GOVERNMENT OF INDIA
DEPARTMENT OF ARCHAEOLOGY
CENTRAL ARCHAEOLOGICAL LIBRARY

ACC. NO. 19786
CLASS
CALL NO. R Sa 4k / Tar

D.G.A. 79.

D2292


OFFICE OF THE DIRECTOR GENERAL OF ARCHAEOLOGY
Library Regr No
INDIA.

वाचस्पत्य

J.B.M.Beglar.
(1) Vol I.

वृहत् संस्कृताभिधान

प्रथमखण्डम्

गवर्णमेण्टसंस्कृतविद्यालयस्थ-दर्शन-व्याकरणाध्यापक-
श्रीतारानाथ-तर्कवाचस्पति-भट्टाचार्य्येण
सङ्कलितम्
तेनैव संस्कृतम्

१८२८ संवत्सरे मुद्रितम्

CENTRAL ARCHAEOLOGICAL LIBRARY New Delhi.
19736

VACHASPATYA

A

COMPREHENSIVE SANSCRIT DICTIONARY

IN TEN PARTS.—PART. I.

R Sa4K Tar
(30)

COMPILED BY

TARANATHA TARKAVACHASPATI

Professor of Grammar and Philosophy in the
Govt. Sanscrit College of Calcutta.

THE DIRECTOR GENERAL OF ARCHAEOLOGY IN INDIA
Regd No

CALCUTTA

PRINTED AT THE KAVYA PRAKASHA PRESS.

1873

To be had from Pandit Jibananda Vidyasagara B. A.
Sanscrit College, Calcutta.


OFFICE OF THE DIRECTOR GENERAL OF ARCHAEOLOGY
Library Regr No
INDIA.

CENTRAL ARCHAEOLOGICAL
LIBRARY NEW DELHI
Acc. 19786
Date 30.5.63
Call No.

वाचस्पत्याभिधाने प्रतिपाद्यानि

ग्रन्थारम्भप्रयोजनादि ।
सङ्ग्रत्युदाहरणं पाणिनीयलिङ्गानुशासनम् ।
पाणिनीयप्रत्ययपरिनिष्ठितरूपम् ।
उणादिप्रत्ययपरिनिष्ठितरूपम् ।
रूढयौगिकादिशब्दभेदनियमविशेषाः ।
शब्दानां पूर्व्वोत्तरपदयोः परिवृत्तिसहत्वासहत्वे ।
डाक्तर उदलसेन-प्रणीताभिधान-शब्दकल्पद्रुमाभिधान-प्रदर्शितशब्दानां व्युत्पत्तयस्तदर्थाश्च ।
यथासम्भवं तेषामर्थभेदेषूदाहरणानि ।
तत्रानुक्तानां जरमणीयसंस्कृताभिधानोक्तानां, वैदिकानां च शब्दानां व्युत्पत्तयस्तदर्थाश्च ।
तत्राप्यनुक्तानां बङ्गनां वैदिकशब्दानाम् निम्ननिर्द्दिष्ट
चार्व्वाकादिपरिभाषितशब्दानाञ्चार्थाः ।
चार्व्वाकपरिभाषितानां शब्दानामर्थास्तन्मतञ्च ।
माध्यमिकपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
योगाचारपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
वैभाषिकपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
सौत्रान्तिकपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
आर्हतपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
रामानुजपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
माध्वपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
पाशुपतपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
शैवदर्शनपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
प्रत्यभिज्ञादर्शनपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
रसेश्वरदर्शनपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
कणादपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
गौतमन्यायपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
जैमिनीयपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
पाणिनीयपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
सांख्यपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
पातञ्जलपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
वेदान्तपरिभाषितशब्दानामर्थास्तन्मतञ्च ।
आश्वलायनादिश्रौतगृह्यसूत्रपरिभाषितानामर्थाः ।
मन्वादिस्मृतिपरिभाषितशब्दानामर्थाः ।
सर्व्वपुराणप्रतिपाद्यविषयाः ।
सर्व्वोपपुराणप्रतिपाद्यविषयाः ।
वाल्मीकिरामायणप्रतिपाद्यविषयाः ।
महाभारतप्रतिपाद्यविषयाः ।
पुराणादिषु प्रसिद्धराजर्षीणां संक्षेपेणेतिवृत्तानि ।
देशविशेषलक्षणतत्स्थानानि ।
वृक्षयोगशास्त्रपरिभाषितशब्दानामर्थाः ।
सुश्रुतादिवैद्यकपरिभाषितशब्दानामर्थाः ।
तदुक्तशरीरादिसंस्थानम् ।
तदुक्तद्रव्यवृक्षादिलक्षणानि ।
ज्योतिषस्य चतुःषष्टिरङ्गानि ।
तेषु परिभाषितशब्दानामर्थाः ।
तत्र सिद्धान्तशिरोमणिपरिभाषितशब्दानामर्थाः
भूमेः स्थिरत्वे तस्य, चलत्वे चार्य्यभट्टस्य मतम् ।
सौरागमपरिभाषितशब्दानामर्थाः ।
भूगोलसंस्थानप्रमाणादि ।
खगोलसंस्थानप्रमाणादि ।
वृहत्संहिताप्रतिपाद्यविषयास्तच्छब्दार्थाश्च ।
वाशिष्ठादिपरिभाषितशब्दानामर्थाः । [च ।
नरपतिजयचर्य्यापरिभाषितानामर्थास्तत्र चक्राणि
शकुनशास्त्रप्रसिद्धशब्दानामर्थाः ।
ताजिकपरिभाषितशब्दानामर्थाः ।
वास्तुशास्त्रादिप्रसिद्धगृहकुण्डादिलक्षणानि ।
सर्व्वदेवमूर्त्तिलक्षणानि ।
तन्त्रशास्त्रपरिभाषितशब्दानामर्थाः ।
तन्त्रोक्तषट्चक्रस्वरूपणि ।
शारदातिलकादिपरिभाषितशब्दानामर्थाः ।
नीतिशास्त्रपरिभाषितशब्दानामर्थाः ।
अश्वशास्त्रपरिभाषितशब्दानामर्थाः ।
धनुर्व्वेदपरिभाषितशब्दानामर्थाः ।
गान्धर्व्ववेदपरिभाषितशब्दानामर्थाः ।
शिल्पपरिभाषितशब्दानामर्थाः
कल्पपरिभाषितशब्दानामर्थाः ।
छन्दःशास्त्रोक्तशब्दानामर्थास्तल्लक्षणभेदाश्च ।
अलङ्कारशास्त्रपरिभाषितानाममर्थाः ।
शब्दार्थालङ्काराणां लक्षणोदाहरणानि । [णानि च ।
दृश्यरूपकादिपरिभाषितानामर्थास्तल्लक्षणोदाहर-
सैन्यव्यूहादिलक्षणानि ।
सैन्यपरिमाणभेदाः ।
पाकशास्त्रपरिभाषितशब्दानामर्थास्तत्प्रकारभेदाश्च ।

OFFICE OF THE DIRECTOR GENERAL OF ARCHAEOLOGY
Library Regd No
INDIA



Professor TARANATHA TARKAVACHASPATI.

श्रीतारानाथ तर्कवाचस्पति ।

CONTENTS.

1. Panini on genders
2. On the suffixes
3. On the primitive and derivative words
4. The derivation and different meanings with illustrations of all the words which are found in the Wilson's Sanskrit dictionary and Radhakanta's Sabdakalpadruma. Also numerous words not to be found in the said or any previous Dictionaries
5. The derivation and different meanings of the words of the Vedas
6. Numerous Vaidik words not to be found in Bohtlingk's Sanskrit and German Dictionary

   Technical words and doctrines of the following systems of Philosophy are fully explained

   Charvaka, Madhyamika Yogachar, Vaibhashika, Soutrantika, Arhata, Ramanuja, Madhya, Pashupata, Saiva, Pratyavijna, Rasheswara, Panini, Nyaya, Vaisheshika, Mimansha, Sankhya Patanjala, and Vedanta
7. The technical terms of the Shrauta and Grihya sutra
8. The technical words of Hindu law
9. The plan and scope of all the Purans and Upapurans
10. Plan and scope of the Mahavarat and Ramayana
11. The History of the ancient kings of India as far as gathered from the Purans and Upapurans.
12. The position and description of the different countries according to Hindu ancient Geography.
13. The technical terms of Hindu medical science are fully explained ; also an account of Hindu anatomy and the preparation of the drugs.
14. The explanations of the technical terms of Hindu astronomy. Also the theory of the celebrated Hindu astronomers regarding the celestial regions.
15. The principles of Hindu astrology.
16. The technical words of the Tantras, Politics, Rhetoric, Prosody, Musical science, Military science, Kookery, Siksha, Kalpa, science on Horses, Hatyoga, Vastushastra,
17. Classification of the Vedas.

OFFICE OF THE DIRECTOR GENERAL OF ARCHAEOLOGY
Library Reg. No
INDIA.

PREFACE.

The profound learning and indefatigable industry of Pandit Taranath Tarkavachaspati, one of the professors of the Calcutta Sanskrit College, has been well known to all in India interested in the classical language of the Hindus and has extended to England and Germany, where his numerous works command a wide circulation among Sanskrit Scholars.

His edition of Panini's grammar with his own commentary was published in 1863 with the patronage of the Government of Bengal on the recommendation of Mr. E. B. Cowell M. A. at that time Principal of the Calcutta Sanskrit College and now Professor of Sanskrit in the University of Cambridge.

Pandit Taranath has been for many years collecting materials for a Sanskrit Dictionary, which shall have a wider and deeper scope than Wilson's Sanskrit Dictionary and the Sabdakalpadruma by the late Raja Radha kanta Deva. It will moreover contain explanations of terms in the Tantras, Philosophy, Rhetoric and Law which are not fully given in the published portions of Bohtlingk's Dictionary. These Dictionaries are written respectively in English, in Sanskrit with Bengali characters and in German. The Pandit's Dictionary will have the explanations in Sanskrit, so as to be available for the use of both Hindu and European Scholars.

When I had the honor to officiate in 1865 as Director of Public Instruction, I brought to the notice of Sir Cecil Beadon the Lieutenant Governor of Bengal, the desire of Pandit Taranath to publish such a Dictionary, and His Honor in consideration of the acknowledged fitness of the learned Pandit for the preparation of the work, was pleased to accord to it the patronage of the Government of Bengal in the following letter, from the Junior Secretary of the Bengal Government to the Director of Public Instruction No. 507 dated Fort William the 26th January 1866.

"I am directed to acknowledge the receipt of your office letter No. 2 dated the 3rd instant and in reply to convey the Lieutenant Governor's sanction to the purchase of 200 copies at Rupees 50 per copy aggregating Rupees 10,000, of the Sanskrit Dictionary in its complete form which Pandit Tarkavachaspati the Grammar Professor of the Sanskrit College engages to compile within a period not exceeding five years."

"No sum whatever, I am to add, will be paid unless the work is completed."

An extension of time for five years longer was granted for the preparation of the work by Sir William Gray, the Lieutenant Governor of Bengal, in the letter from the Bengal Government No. 3480 dated the 12th December 1870.

H. Woodrow. M. A.
Inspector of Schools, Lower provinces of Bengal.
and formerly Fellow of Caius College, Cambrige.

ओं तत्सत्।

ग्रन्थारम्भः।

श्रीगौरीतनुसम्भवं सुरवरैर्वन्द्याङ्घ्रिपद्मद्वयम् दन्तीन्द्राननमेकदन्तसुमुखं सिन्दूरशोभान्वितम्।
विघ्नध्वान्तनिवारणैकतरणितनुं सर्व्वार्थसिद्धिप्रदम् वन्दे भक्तिसमन्वितो विमलधीहेतुं हृदब्जे सदा॥ १॥
व्युत्पार्थाधिगमं सर्व्वप्रकृतिप्रत्ययाभिधम्। अलिङ्गं बहुलिङ्गञ्च शब्दब्रह्माहमाश्रये॥ २॥
वाचामधीश्वरीं देवीं भक्त्या नत्वा वितन्यते। तारानाथद्विजेनेदं वाचस्पत्यसमाक्षयम्॥ ३॥
यो बबन्ध विना सूत्रं शब्दरत्नस्रजं धिया। अशेषशेषुषीदात्रे तस्मै शेषात्मने नमः॥ ४॥
निःशेषं नाशयन्त्वेनः शेषाशेषसुखानि नः। यतः शब्दविशेषाणां रूपार्थाभ्यां प्रकाशनम्॥ ५॥
सूत्रवार्त्तिकभाष्याणां कारकान् मुनिसत्तमान्। पाणिन्यादीन् प्रणम्येह व्युत्पत्तिर्दर्श्यते मया॥ ६॥
निघण्टुकारिणां ग्रन्थास्तद्व्याख्याकारिणां तथा। मच्चित्ते द्योतयन्तोऽर्थान् प्रकाशन्तां सदाऽखिलाः॥ ७॥

मुखबन्धविज्ञापने।

इह खलु पुरुषा यां काञ्चित् भाषामभ्यसितुमीहमानाः प्रयतन्ते तदर्थज्ञानसाधनं तत्तद्भाषाव्याकरणं कोषञ्चाधिगन्तुम्। तत्र व्याकरणात् प्रायोयौगिकशब्दमात्राणामर्थज्ञानं, कोषात् पुनः रूढ़ानां शब्दानां केषाञ्चित् यौगिकानामपि। कोषो नाम शब्दानामर्थबोधकं शास्त्रम्। तच्च संस्कृतकोषे प्रायेण लिङ्गसहितस्यैवार्थबोधनम्। तच्च यद्यपि संस्कृतभाषयेव विजातीयभाषयापि भवितुमर्हति, तथापि भाषान्तरेण भाषान्तरस्यार्थज्ञापने, सम्पूर्णतात्पर्य्यार्थस्यास्फुरणात् एकविधभाषयैवार्थस्य ज्ञापने तु भावार्थस्य स्फुटं स्फुरणात्, समानभाषयापि प्रकृतिप्रत्ययविभागमप्रदर्श्य अखण्डार्थस्य बोधने तदवयवार्थस्यावबोधात् खण्डशस्तथा बोधने तु अवयवशब्दार्थस्यापि सुखेन ग्रहाच्च अवयवार्थप्रदर्शनपूर्व्वकम् एकविधभाषयैवार्थबोधनं युक्तम्। किन्तु प्रसिद्धेषु संस्कृताभिधानेषु अमरकोषादिषु केवलम् अखण्डार्थस्यैव प्रतिपादनात् शब्दानां सर्व्वेषामर्थानामप्रतिपादनाच्च तत्र कीर्त्तितानामपि शब्दानाम् अकारादिक्रममतिक्रम्यैव पाठेनार्थप्रतिपादनात् व्युत्पित्सूनामतीव दुर्गमत्वेन न तेषां समीचीनता। किञ्च तत्रोक्तानामपि शब्दानामवयवार्थज्ञानमसुलभमेव। नानाकोषपठितानां शब्दानामेकत्र सङ्कलनेन पाणिन्यागममनुसृत्य विविधविद्यावता डाक्तरोपाधिना 'उइलिसन्' साहेबेन, वेदादिशास्त्रादिषु विशेषतः शब्दकल्पद्रुमाभिधाने कृतश्रमाभ्यां विद्वद्भ्यां बोधलिङ्गरथाभ्यां च प्रणीतयोः संस्कृताभिधानयोः प्रकृतिप्रत्ययविभागप्रदर्शनपूर्व्वकं सुपरिपाट्या बहुत्वेऽपि तैः स्वस्वभाषयैव संस्कृतशब्दस्यार्थानां बोधनात् संस्कृतभाषयार्थबोधनमन्तरेण संस्कृतशब्दानामर्थजातस्य अवयवार्थग्रहेण विशेषतोऽपरिचिततत्तद्भाषाणां सुतरामेव न सुग्रहः। अतः संस्कृतभाषाशब्दानामभिधानं संस्कृतभाषयैव व्याख्यानयुतं प्रकृतिप्रत्ययादिविभागसहितं सुपरिपाटीक-

मेकमभिधानं व्युत्पित्सुनामवश्यमपेक्षितमिति निश्चित्य तथाविधाभिधानसङ्कलने ममातितरां सङ्कल्पोऽवर्त्तत। किन्त्वसौ सङ्कल्पस्तत्प्रचारोपयोगिव्ययार्थार्थसार्थविरहेण निरर्थकतया मुकुलित इव समजनि।

अथ तथाविधाभिधानप्रचारार्थं मुद्राव्यापारोपयोगिधनवाञ्छया एतद्देशाधिपसंस्थापितविद्यासमाज-विभाग-प्रधानाध्यक्षम् (डिरक्टर) इति पदेऽभिषिक्तम् (एमे) इत्युपाधिकं श्रीयुक्तम् (एइच् उड्रो) इति नामकं साहेबं प्रत्यावेदितम्। मदावेदितेन च विविधविद्यानुरागवता विद्यावृद्धिविषये एकान्तोत्साहिना तेन प्रोत्साहितः वङ्गवर्णमेष्टः अयुतं मुद्राः एतत्पुस्तकमुद्राव्ययसाहाय्यार्थं दातुमङ्गीचकार।

एवमेतद्देशाधिपतिनाऽङ्गीकृते प्रचारोपयोगिव्ययानुकूल्ये चिरमुकुलितोऽपि स संकल्पः पुनः फलोन्मुखीबभूव। अथ तथाविधसंस्कृताभिधाननिर्म्माणाय वेदस्मृतिपुराणमीमांसादिदर्शनज्योतिषतन्त्रवैद्यकव्याकरणालङ्कारादीनि शास्त्राणि समालोड्य बहुलाः शब्दाः सङ्कलिताः उदाहरणानि च नानाशास्त्रेभ्य उद्धृत्य दर्शितानि। आदौ च पाणिनीयलिङ्गानुशासनमुद्धृत्य व्याख्यायोदाहरणजातं प्रादर्शि। ततः पाणिन्यादिविहितप्रत्ययागमानां परिनिष्ठितरूपाणि च दर्शितानि। यौगिकशब्दविशेषे पूर्व्वोत्तरपदयोः परिवृत्तियोग्यतावोधनाय नियमविशेषश्चात्राभिहितः।

अत्र च शब्दानां स्थूलाक्षरेण प्रथमं स्वरूपप्रदर्शनम्, ततः सङ्केतविशेषेण लिङ्गप्रदर्शनम्, ततोऽवयवार्थप्रदर्शनम्, ततः व्याकरणप्रक्रिया; ततोऽर्थविशेषकथनम्, यदर्थविशेषे लिङ्गभेदः प्रकृतिप्रत्ययभेदश्च तेऽत्र परतो दर्शिताः यद्यदर्थविशेषे येये शब्दा ग्रन्थान्तरे प्रयुक्तास्तत्तद्ग्रन्थनाम समुदलेखि। 'नाम च धातुजमाह निरुक्ते' इत्युक्तेः सर्व्वशब्दानां धातुमूलतया पाणिनीयगणसूत्रपठितधातूनपि स्थूलाक्षरेण शब्दक्रममध्ये एव निवेश्य तेषाम् धातूनामर्थविशेषः, उपसर्गभेदेनार्थविशेषः, गणभेदः, पदनियमः, इट्शून्यतादि, सकर्म्मकत्वादि, लटि लुङि प्रसिद्धकृत्सु च रूपञ्च दर्शितम्। यद्यपि अर्थविशेषोल्लेखनं संस्कृतभाषयैव सर्व्वत्र कृतं, तथापि यत्र वङ्गभाषयापि अर्थकथने प्रकृतार्थस्य स्फुटं प्रतीतिर्भवेत् तत्र क्वचित्क्वचित् ग्रन्थबहिर्भूतताम्रचक्रेन वेष्टनाकाररेखाद्वयेन वेष्टितया वङ्गभाषयाप्यर्थप्रकाशनं कृतम्।

अत्र च यावता प्रयत्नेन अतीव सुगमता भवेत् तथा प्रयत्नः कृतः। अतिप्रामाणिकतया पाणिनीयागमानुसार्य्यैव प्रत्ययादिसंज्ञादिकमत्राद्दतम्।

एतस्य ग्राहकाणां सम्पूर्णपुस्तकस्य एकदा प्रचारे तत्क्रयार्थम् एकदैव बहुद्रव्यापेक्षा स्यादिति अल्पवित्तानां कष्टं भवेत् तन्मा भूदित्यनया धिया खण्डश एव प्रचारे यतमानेन मया प्रथममिदं खण्डं प्राचारि।

सम्भावयामि एतत् पुस्तकं प्रायः दशभिः खण्डैः संपूर्णं स्यादिति। प्रयतिष्यते च तथा, यथा षड्भिर्मासैरेकैकं खण्डं प्रचारमियादित्यत्र।

एतस्य सङ्कलने शोधने च भूयान् परिश्रमः स्वीकृतस्तथापि अत्र यत्किञ्चिन्मम स्खलनं सुधीभिः समुद्भाव्येत तच्च तैः निजगुणेन परिशोधनीयम्। शिवमस्तु श्रीं तत्सत्।

प्रतिशब्दं लिङ्गविशेषाणामग्रे वक्ष्यमाणत्वेऽपि शब्दभेदानां प्रत्ययविशेषान्तप्रकृतिविशेषाणाञ्च
सामान्यतो लिङ्गविशेषज्ञाने सौकर्य्यं भवतीति पाणिनीयलिङ्गानुशासनसूत्राणि
प्रदर्श्य व्याख्यायोदाहरणदर्शनेन लिङ्गविशेषास्तत्रादौ निरूप्यन्ते ।

तत्र लिङ्गमित्यधिकृत्य पाणिनिनाऽनुशिष्टम् ।

स्त्री । १ ।

इत उत्तरं वक्ष्यमाणाः शब्दाः स्त्रीलिङ्गाः स्युरित्यधिकारः । तत्तदपवादसूत्रसूत्रे वक्ष्यते तथा च विशेषैरबाधिता एव स्त्रीलिङ्गाः ।

ऋकारान्ता मातृदुहितृयोढृसवृननान्दरः । २ ।

ऋकारान्ता अमी पञ्चैव स्त्रीलिङ्गा नान्ये । अन्येषाम् "ऋतोऽङ्" इति ङीब्विधानेन ईकारान्तत्वात् स्वसादेरेव ङीब्निषेधेन ऋदन्तत्वात्, तिसृचतसृष्वेषु स्त्रियामादेशतया प्रकृतिरूपत्वाभावेन ऋदन्तत्वेऽपि न नियमव्याघातः । माता दुहिता स्वसा योता ननान्दा ।

अन्यूप्रत्ययान्तो धातुः । ३ ।

अनिप्रत्ययान्तः अप्रत्ययान्तश्च धातुः स्त्रियां स्यात् । अवनिः रजनिरित्यादि । तत्र च "ऋदिकारादक्तिनः" इति पक्षे ङीप् अवनी रजनी चेत्यादि । चमूः वधूरित्यादि । प्रत्ययान्तः किम् । दिव्यतेः क्विप् द्यूः अयं विशेष्यलिङ्गः ।

अशनिभरण्यरण्यः पुंसि च । ४ ।

एते स्त्रीलिङ्गाः पुंलिङ्गाश्च स्युः । अनिप्रत्ययान्ततया स्त्रीत्वे प्राप्ते पाक्षिकपुंस्त्वविधानार्थं सूत्रम् । इयमयं वा अशनिः भरणिः अरणिः । स्त्रीत्वपक्षे ङीप् वा अशनीत्यादि

मिन्यन्तः । ५ ।

धातुरित्यनुवर्त्तते । मिन्प्रत्ययान्तः निप्रत्ययान्तश्च धातुः स्त्रियां स्यात् । भूमिः ग्लानिः ग्लानिः धुनिः । अत्रापि वा ङीप् भूमी ग्लानी ग्लानी धुनी इत्यादि ।

वह्निवृष्ण्यग्नयः पुंसि । ६ ।

निप्रत्ययान्तत्वेन स्त्रीत्वे प्राप्ते तदपवादार्थं सूत्रम् । अयं वह्निः हविष्यः अग्निः ।

श्रोणियोन्यूर्म्मयः पुंसि च । ७ ।

एते शब्दाः स्त्रीलिङ्गाः पुंलिङ्गाश्च स्युः । एतेषां मिन्यन्तत्वेन प्राप्तौ विकल्पः । अयमियं वा श्रोणिः योनिः ऊर्म्मिः । स्त्रीत्वपक्षे वा ङीप् श्रोणी योनी ऊर्म्मी ।

क्तिन्नन्तः । ८ ।

क्तिन्प्रत्ययान्तो धातुः स्त्रियां स्यात् । कृतिः बुद्धिः दृष्टिः । "अक्तिनः" इति निर्देशात् अत्र न पक्षे ङीप् ।

ईकारान्तश्च । ९ ।

ईप्रत्ययान्तो धातुः स्त्रियां स्यात् । चकारोऽन्तग्रहणाधिकारनिवृत्त्यर्थः । एतत्सूत्रपर्य्यन्त एव धातुरनुवर्त्तते नाग्रिमसूत्रे । अयीः, तन्त्रीः, तरीः, लक्ष्मीः ।

ऊङ्ङ्यावन्तश्च । १० ।

ङीब्ङीष्ङीनां यद्ग्रहणं तत्र यत्र ङीयद्ग्रहणं टाप्चापोर्यद्ग्रहणायापो यद्ग्रहणम् । ऊङन्तः ङ्यन्तः आवन्तश्च शब्दः स्त्रीलिङ्गः स्यात् । ऊङादीनां स्त्रियां विहितत्वेऽपि एतत्र सर्वेषां यद्ग्रहणे लिङ्गज्ञानस्य सुगमतार्थमिह यद्ग्रहणम् । एवमन्यत्रापि । ऊङ् । कुरुः कर्कन्धूः ङी । कर्त्री गौरी ब्राह्मणी । आप् विद्या भिदा त्वरा जरा इत्यादि ।

यन्तमेकाचरम् । ११ ।

एकाचरः ईकारान्तः ऊकारान्तश्च असति विशेषे स्त्रीलिङ्गः स्यात् । श्रीः भूः । दीव्यतेः क्विपि तु विशेषलिङ्गता । एकाचरं किम् ? बहुव्रीहौ पृथुश्रीः प्राप्तभूः विशेष्यलिङ्ग एव ।

विंशत्यादिरा नवतेः । १२ ।

विंशतिप्रभृतयः नवतिपर्य्यन्ताः संख्यासंख्येयवाचकाः स्त्रियां स्युः । इयं विंशतिः त्रिंशत् चत्वारिंशत् पञ्चाशत् षष्टिः सप्ततिः अशीतिः नवतिः । ऋदिकारान्तत्वाभावात् विंशत्यादिभ्यो न पक्षे ङीप् । एकविंशत्यादेस्तु "परवल्लिङ्गं द्वन्दतत्पुरुषयोः" इति स्त्रीत्वमेव एकनवत्यादेः नवतिलिङ्गानतिदेशेनाविधित्वव्याघातः । आ नवतेः किं ? शतं सहस्रम् । विंशत्यादयः किम् ? एकदशादेर्विशेष्यलिङ्गत्वम् ।

दुन्दुभिरचेषु । १३ ।

अचार्थको दुन्दुभिशब्दः स्त्रीलिङ्गः स्यात् । इयं दुन्दुभिः पक्षे ङीप् दुन्दुभी । अचादन्यत्र न स्त्रीत्वम् किन्तु पुंस्त्वम् ।

नाभिरचक्रिये । १४ ।

चक्रिवार्यकभिन्नो नाभिशब्दः क्लीलिङ्गः स्यात् । इयं नाभिः (अक्षावयवः) वा ङीप् नाभी ।

उभावन्यत्र पुंसि । १५ ।

उभौ द्वन्द्वभिनाभिशब्दौ क्रमेण नाभिभिन्ने चक्रिये च वर्त्तमानौ पुंलिङ्गौ स्याताम् । अयं द्वन्द्वभिः (वाद्यभेदः असुरभेदो वा) अयं नाभिः (चक्रियः) "लिङ्गमशिष्यं लोकाश्रयत्वात्" इत्युक्तेः क्वचित् व्यभिचारः । तेन अवयववाचकस्य पुंस्त्वमपि "मसृणसृपङ्कजपत्रकोमलैरुपाहितशीलुधनीविनाभिभिः" इत्यत्र पुंस्त्वम् । अत एव रभसः

सख्यराट् चक्रिये नाभिः पुंसि प्राग्वङ्क्षके द्वयोः ।
चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदे ॥

इत्याह स्म ।

तलन्तः । १६ ।

भावाद्यर्थे विहितस्तलप्रत्ययान्तः स्त्रीलिङ्गः स्यात् । शुभस्य भावः शुभ्रता एवं जडता मृदुता । ब्राह्मणस्य कर्म्म भावो वा ब्राह्मण्यता । जनानां समूहः जनता ग्रामता । देव एव देवता "स्वार्थिका अपि प्रत्ययाः क्वचित् प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते" इत्युक्तेः प्रकृतिभिन्नलिङ्गत्वम् ।

भूमिविद्युत्सरिल्लतावनिताभिधानानि । १७ ।

भूम्यादिपर्य्यायशब्दाः स्त्रीलिङ्गाः स्युः । अचला अवनी विश्वम्भरा इत्यादयः । विद्युत् तडित् सौदामनी चपला चञ्चला । सरित् निम्नगा आपगा । लता वल्ली वल्लरी ततिः । वनिता योषित् अबला ।

वादो नपुंसकम् । १८ ।

वादशब्दः सरिद्वाचकोऽपि क्लीवलिङ्गः स्यात् । पूर्व्वसूत्रापवादः । इदं वादः (नदी) ।

भास्त्वक्स्वग्दिग्दृग्रुग्विण्मुषान्नहः । १९ ।

एते स्त्रियां स्युः । इयं भाः त्वक् स्वक् दिक् दृक् उग्विक् उषानत् ।

स्थूणोर्णे नपुंसके च । २० ।

स्थूणोर्णाशब्दौ स्त्रियां नपुंसके च स्तः । स्थूणा स्थूणम् (काष्ठमयी द्विकर्षिका) । ऊर्णा ऊर्णं (मेषादिलोम) ।

गृहशब्दाभ्यां क्लीवे । २१ ।

गृहपूर्व्वकः स्थूणाशब्दः शणपूर्व्वकश्च ऊर्णाशब्दः क्लीवलिङ्ग एव स्यात् न तु स्त्रियाम् । परत्वलिङ्गतापवादः । गृहस्थूणम् शणोर्णम् ।

प्रावृड्विप्रुड्रुड्विट्त्विषः । २२ ।

एते शब्दाः स्त्रियां स्युः । इयं प्रावृड् विप्रुड् रुड् विट् त्विट् ।

दर्विविदिवेदिखनिशाण्यभ्रिवेणिक्ष्योषध्यङ्गुलयः । २३ ।

एते शब्दाः स्त्रीलिङ्गाः स्युः । पक्षे ङीप् । इयं दर्विः विदिः वेदिः खनिः शाणिः अभ्रिः वेणिः क्षिः ओषधिः अङ्गुलिः । पक्षे ङीप् सर्वत्र, दर्वीकरः, "अङ्गुलीवोरगलता" इति कालिदासः ।

तिथिनाडिरुचिवीचिनालिधूलिकिकिकेलिच्छवि-
राव्यादयः । २४ ।

एते स्त्रीलिङ्गाः स्युः । इयं तिथिः । अस्य पुंस्त्वमपि "तिथयोर्द्वयोः" इत्यमरोक्तेः । "निखिलाद्यिषि पूर्णिमातिथीन्" इति नैषधम् नाडिः रुचिः इत्यादि । राव्यादय इत्यादिपदात् नक्षंदोषाभिज्ञा रात्रिपर्य्याया गृह्यन्ते । सर्व्वत्र पक्षे ङीप् । नाड्यौ रुच्यौ वीच्यौ इत्यादि ।

शष्कुलिराजिकुक्ष्यवन्तिवर्त्तिभ्रुकुटिवुटिवलि-
पङ्क्तयः । २५ ।

एते शब्दाः स्त्रियां स्युः । इयं शष्कुलिः राजिः इत्यादि । सर्व्वेभ्यः पक्षे ङीप् । "अवलम्बितकर्णशष्कुलीकलसीकम्" इति नैषधम् । "राजीवराजीवशलोलभृङ्गम्" इति माघः । वलिरुदरावयवः ।

प्रतिपदापद्विपत्संपच्छरत्संसद्परिषदुषःसंवित्
क्षुद्युन्मुत्समिधः । २६ ।

एते शब्दाः स्त्रियां स्युः । इयं प्रतिपत् आपत् विपत् इत्यादि । उषाः प्रातरधिष्ठात्री देवता "उषा उषसि" इति वेदमन्त्रः ।

आशीर्धूःपूर्गीर्द्वारः । २७ ।

एते स्त्रियां स्युः । इयमाशीः धूः पूः गीः द्वाः ।

अप्सुमनस्समासिकतावर्षाणां बहुत्वञ्च ।

अप्प्रभृतीनां पञ्चानां स्त्रीत्वं बहुवचनान्तत्वं च स्यात् । इमा आपः । इमाः सुमनसः । पुष्पसामान्यवाचित्व एवास्य बहुत्वं तेन सुमना मालती जातिरित्यादौ एकत्वम् । देववाचकस्य तु पुंस्त्वमेव । बहुत्वं चैषां प्राधिकम् अत एव अर्थवत्सूत्रभाष्ये, "एका च सिकता तैलदानेऽसमर्था" इति प्रयुक्तम् । "समां समां विजायते" इति सूत्रभाष्ये समायां समायामिति प्रयुक्तम् । "विभाषा प्राग्रात्रेः" इति सूत्रवृत्तिव्याख्यायाम् आम्रासातां सुमनसाविति हरदत्तेन च प्रयुक्तम् ।

शुक्त्वग्ज्योग्वाग्यवागूनौस्त्रियः । २८ ।

एते शब्दाः स्त्रियां स्युः । इयं शुक् त्वक् द्यौक् वाक् ।

तटिसीमासंबध्याः । ३० ।

एते शब्दाः स्त्रियां स्युः । तटिः पक्षे ङीप् सीमा संबध्या ।

चूल्लिवेणिखार्य्यश्च । ३१ ।

एते शब्दाः स्त्रियां स्युः । इयं चूल्लिः वेणिः खारिः पक्षे ङीप् ।

ताराधाराज्योत्स्नादयश्च । ३२ ।

एते शब्दाः स्त्रियां स्युः । तारा धारा ज्योत्स्ना ।

शलाका स्त्रियां नित्यम् । ३३ ।

शलाकाशब्दो नित्यस्त्रीलिङ्गः । इयं शलाका ।

स्त्रीत्वाधिकारे पुनः स्त्रीग्रहणमधिकारनिवृत्त्यर्थम् । नित्यग्रहणमन्येषां व्यभिचारसूचनार्थम् । यत्र यत्र च व्यभिचारः तत्तत् पूर्व्वसूत्रम् ।

अत्र सूत्रपाठाद्यनुसारेण किञ्चिदवशिष्टं सूच्यते । स्त्रियां क्तिन् (३,३,९४) इत्यधिकारे ये विहिताः क्यबादयः प्रत्ययास्तदन्ता अपि स्त्रियां स्युः । यथा व्रजयजोर्भावे क्यप् (३,३,९८ सू०) प्रव्रज्या इज्या । संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः (३,३,९९) । समज्या सभा, निषद्या आपणः, निपत्या पिच्छिला भूमिः, मन्या गलपार्श्वशिरा, विद्या, सुत्या अभिषवः, शय्या, भृत्या, इत्या शिविका । ऊर्णोः य च (३,३,१००) क्रियाऽक्रिया । इच्छा (३,३,१०१) इच्छा । परिचर्य्यापरिसर्य्यासृगयाटाट्यानासुपसंख्यानमिति तत्तत्यवार्त्तिकम् । परिचर्य्या पूजा, परिसर्य्या, मृगया, अटाट्या । जागर्त्तेरकारो वा (वा०) जागरा जागर्य्या । अ प्रत्ययात् (३,३,१०२, सू०) जिगमिषा विविदिषा पुत्रकाम्या । गुरोश्च हलः (३,३,१०३, सू०) ईहा ऊहा, मूर्च्छा । षिद्भिदादिभ्योऽङ् (३,३,१०४, सू०) जरा त्रपा लज्जा भिदा छिदा । चिन्तिपूजिकथिकुम्बिचर्चश्च (३,३,१०५, सू०) चिन्ता पूजा कथा कुम्बा चर्चा । आतश्चोपसर्गे (३,३,१०६) उपधा उपमा, उपदा । अदभ्रेरुपसंख्यानम् (वा०) श्रद्धा अनर्द्धा । ख्यासम्प्रत्ययो युच् (३,३,१०७, सू०) कारणा यातना पीडना आसना यन्त्रणा । वदिव्रन्दिविदिभ्यश्च (वा०) वदना वन्दना वेदना । इच्छेरनिच्छार्थस्य (वा०) अन्वेषणा । परेर्वा (वा०) पर्य्येषणा । रोगाख्यायां ण्वुल् बहुलम् (३,३,१०८) प्रच्छर्दिका प्रवाहिका विचर्चिका । धात्वर्थनिर्देशे ण्वुल् वक्तव्यः (वा०) आसिका शायिका । संज्ञायाम् (३,३,१०९) उद्दालपुष्पभञ्जिका । विभाषाख्यानपरिप्रश्नयोरिञ् च (३,३,११०) कां कारिं कारिकां क्रियां कृत्यां कृतिं वा तमकार्षीरिति प्रश्ने सर्व्वां कारिं कारिकां वाऽकार्षमित्युत्तरम् एवं गणिं गणिकां गणनाम् । पाचिं पाचिकां पचां पक्तिम् । पर्य्यायार्हर्णोत्पत्तिषु ण्वुच् (३,३,१११) भवत आसिका पर्य्यायेणासना, अर्हे भवानिक्षुभक्षिकामर्हति । ऋणे इक्षुभक्षिकां मे धारयसि । उत्पत्तौ इक्षुभक्षिका उदपादि । आक्रोशे नञ्यनिः (३,३,११२) अजीवनिस्तव भवादिति । अनित्यत्वयाचनतया एतस्य प्रायावपि स्त्र्यधिकारपतितयोऽत्रोक्तम् । कर्म्मव्यतिहारे णच् स्त्रियाम् (३,३,४३) इति णचि "णचः स्त्रियामञ्" इति (५,४,१४) स्वार्थिकोऽञि व्यावक्रोशी व्यालुक्षी ।

तलन इति (१७) सूत्रे तलग्रहणं समूहार्थवादीनामुपलक्षणम् अत एव "तल्टन्दे वेनिकद्यूला वैरमैथुनकादिषु" इत्यमर आह स्म । तस्य समूहः (४,२,३७) इत्यधिकारे पाशादिभ्यो यः (४,२,४९) इति ये पाश्या वन्या वाल्या धर्म्या हर्म्या । खलगोरथात् (४,२, ५० सू०) खल्या गव्या रथ्या । इनित्रकट्यचश्च (४,२,५१, सू०) खलादिभ्य इनित्रकट्यचः (वा०) खलिनी डाकिनी कुटिम्बिनी । गोला, रथकट्या । द्वन्द्वाद्वृन् वैरमैथुनिकयोः (४,३,१२५) वैरे काकोलूकिका । मैथुने अलिभारद्वाजिका, आदिना "पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्चेति" दशकव्यवसर्गयोश्चेति (५,१,२७,२८) वुनो ग्रहणम् द्विपादिकां ददाति दशकतो द्वौ द्वौ पादौ ददातीत्यर्थः । द्विशतिकां त्यजति । वुग्रहणात् वुञोऽपि ग्रहणम् तेन "गोत्वचरणात् श्लाघात्याकारेत्यादि (५,१,१२४) वुञो ग्रहणम् गार्गिकया काठिकया वा श्लाघते । द्वन्द्वमनोज्ञादिभ्यश्चेति (५,१,११३) वुञश्च ग्रहणम् । शैष्योपाध्यायिका मानोन्निका । तदस्यां प्रहरणमिति क्रीडायां णः (४,२,५७) इति खान्तोऽपि स्त्रियाम् । दण्डः प्रहरणमस्यां क्रीडायाम् दाण्डा मौसला । घञः सास्यां क्रियेति ञः (४,२,५८) इति विहितञान्तश्च स्त्रियां स्यात् । दाण्डपाता तिथिः । मृगैनम्माता मृगया, तैलम्माता खधा ।

एतद्विद्या अन्येऽपि केचन, शब्दाः स्त्रीलिङ्गतयाऽमरेऽभिहिताः यथा तिन्दुकी कणिका, भङ्गिः सुरङ्गा सूचिः सातिः काकिनी (खी) चूर्णिः, शाणी द्रुणिः दरत् । कन्था आसन्दी (व्रतिनासुपवेशनासनम्) झल्लरी घर्घरी, पारी क्षोरा लङ्गा सिध्मला लाजा लिक्षा गण्डुषा, स्रग्घसी चमसी मसी । इत्यादयः

इति स्त्रीलिङ्गानुशासनम् ।

पुमान् । १ ।

वक्ष्यमाणाः शब्दाः अस्मिन् वाधिके पुंलिङ्गाः स्युः ।

घञन्ताः । २ ।

घञन्तः अवन्तश्च धातुः पुंलिङ्गः स्यात् । घञ्—भावः ।

अप्—करः गरः तरः शरः । घञादयो भावार्थका एवेह स्मर्यन्ते । भावे विहिताभ्यां क्त्नयुड्भ्यां नपुंसकत्वस्य, स्त्रीत्वादिभिश्च स्त्रीत्वस्य बाधनात् तद्बाध्यतया भावार्थकतैवोचिता । तेन कर्मादौ घञाद्यन्ता विशेष्यलिङ्गा एव । अत एव भाष्यकारेण सम्बन्धमनुवर्त्तिष्यते इति सम्बन्धशब्दस्य कर्मार्थकत्वेन नपुंसकतया प्रयोगः कृतः ।

घाजन्तश्च । ३ ।

घान्तः अच्प्रत्ययान्तश्च धातुः पुंसि स्यात् । विस्तरः गोचरः चयः जयः नय इत्यादि ।

भयलिङ्गभगपदानि नपुंसके । ४ ।

अजाद्यन्तत्वेन पुंस्त्वे प्राप्ते अपवादार्थं सूत्रम् । एते शब्दा नपुंसकलिङ्गाः स्युः । इदं भयं लिङ्गं भगं पदम् ।

नङन्तः । ५ ।

नङ्प्रत्ययान्तः शब्दः पुंसि स्यात् । यत्नः प्रश्नः इत्यादि ।

याञ्ञा स्त्रियाम् । ६ ।

नङ्प्रत्ययान्तत्वेन पुंस्त्वे प्राप्तेऽपवादोऽयम् । याच्ञाशब्दः स्त्रियां स्यात् । इयं याचञा ।

क्यन्तो धुः । ७ ।

किप्रत्ययान्तो धुः (दा धा) पुंसि स्यात् । आधिः उदधिः (घटः) । व्याधिः निधिः । धुः किं चक्रिः जत्रिः विशेष्यलिङ्ग एव ।

इषुधिः स्त्री च । ८ ।

क्यन्तत्वेन पुंस्त्वे प्राप्ते वा स्त्रीत्वार्थं सूत्रम् । इयमयं वा इषुधिः ।

देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्डखड्गशरपङ्काभिधानानि । ९ ।

देवादिपर्य्यायशब्दाः यथासम्भवं तल्लेदवाचिनश्च असति बाधके पुंलिङ्गाः स्युः । देवाः सुराः । भेदाः ब्रह्मा विष्णुः शिवः शक्रः । असुराः दनुजाः । भेदाः बलिः कालकेयः नेमिः । आत्मा चेतनः । स्वर्गः नाकः । गिरिः नगः पर्व्वतः । भेदाः हिमालयः सुमेरुः । समुद्रः उदन्वान् सिन्धुः । भेदाः क्षीरोदः लवणोदः । नखः नखरः करजः । केशः कचः बालः । दन्तः दशनः । स्तनः कुचः पयोधरः । भुजः प्रकोष्ठः । कण्ठः गलः । खड्गः असिः । शरः सायकः मार्गणः । पङ्कः कर्दमः ।

त्रिपिष्टपं त्रिभुवने नपुंसके । १० ।

तृतीयभुवनवाचकत्रिपिष्टपशब्दः क्लीबे स्यात् । स्वर्गवाचितेन पुंस्त्वे प्राप्ते अयमारम्भः । इदं त्रिपिष्टपम् (स्वर्गः) ।

द्यौः स्त्रियाम् । ११ ।

द्योदिवोस्तत्त्वेन यत्नेन । स्वर्गाभिधायित्वेन पुंस्त्वे प्राप्तेऽयमारम्भः । द्योशब्दः दिव्शब्दश्च स्त्रियां स्यात् । इयं द्यौः इमे भूदिवौ ।

इषुवाङ्ग स्त्रियाञ्च । १२ ।

इषुवाङ्गशब्दौ पुंसि स्त्रियाञ्च स्याताम् । शरवाचित्वेन भुजवाचित्वेन पुंस्त्वे प्राप्ते पक्षे स्त्रीत्वविधानार्थमारम्भः । इयमयं वा इषुः वाङ्गः ।

बाणकाण्डौ नपुंसके च । १३ ।

एतौ पुंसि नपुंसके च स्याताम् । शरवाचित्वेन पुंस्त्वे प्राप्ते पक्षे क्लीबत्वार्थमारम्भः । अयमिदं वा बाणः बाणं काण्डः काण्डम् ।

नन्तः । १४ ।

न इत्येतदन्तः पुंसि स्यात् । श्वा तक्षा दृषा उक्षा । चर्म्मवर्म्मादयस्तु "मनू ह्यच्कोऽकर्त्तरि" इति परसूत्रेणास्य बाधात् क्लीबलिङ्गाः । तत्र "ह्यच्कः" इत्युक्तेः पृथिमा मृदिमा इत्यादयो नन्तत्वेन पुंस्येव ।

क्रतुपुरुषकपोलगुल्फमेघाभिधानानि । १५ ।

क्रत्वादिपर्य्यायशब्दाः यथासम्भवं तद्विशेषशब्दाश्च पुंसि स्युः । क्रतुः अध्वरः । भेदः उक्थः अग्निष्टोमः । पुरुषः नरः । कपोलः गण्डः । गुल्फः प्रपदः । मेघः नीरदः जलधरः । भेदः पुष्करः आवर्त्तकः ।

अभ्रं नपुंसकम् । १६ ।

मेघवाचित्वेन पुंस्त्वे प्राप्ते तदपवादः । अभ्रम् ।

उकारान्तः । १७ ।

उकारान्तः शब्दः पुंसि स्यात् । विभुः विधुः इक्षुः । इदञ्च विशेषैरबाधितविधेयम् । अत एव "कृतुर्हर्तृविलासिन्यां स्त्रियामारम्भे गदे स्त्रियाम्" इति मेदिनिः । "करेणुरिभ्यां स्त्री नेभे" इत्यमरः । तथा च एवंजातीयकविशेषाभाव एव सूत्रं प्रवर्त्तते एतदभिप्रायेण "लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः" इत्युक्तममरसिंहेन । एवमन्यत्रापि ।

धेनुरज्जुकुडुसरयुतनुरेणुप्रियङ्गवः स्त्रियाम् । १८ ।

उदन्तत्वेन पुंस्त्वे प्राप्ते तदपवादार्थं सूत्रम् । एते शब्दाः स्त्रियां स्युः । धेनुः रज्जुः कुडुः । अत्र अप्राणिजातित्वात् पक्षे

जङ्घ्। कुक्षः सरयूः तनूः रेणूः प्रियङ्गूः। धेनोः प्राणित्वात् रज्ज्वोश्च पर्य्युदासाद्ङीष्।

समासे रज्जुः पुंसि च। १९।

समासान्तस्थः रज्जुशब्दः पुंसि, चात् स्त्रियाम्। कर्कशरज्ज्वा कर्कशरज्जुना वा बध्नाति।

श्मश्रुजानुस्वाद्यश्रुजतुत्वपुतालूनि नपुंसके।२०।

उदन्तत्वेन पुंस्त्वे प्राप्ते तदपवादाय सूत्रम्। एतानि क्लीबे स्युः। श्मश्रु जानु स्वादु अश्रु जतु त्वपु तालु।

वसु चार्थवाचि। २१।

अर्थवाचिवसुशब्दः क्लीबे स्यात्। वसु धनम्। अर्थवाचोत्वन्तोः पुंस्यग्नौ सूर्य्ये धनाधिपेषु देवभेदे च पुमान्।

मद्गुमधुशीधुसानुकमण्डलूनि नपुंसके च।२२।

एते शब्दाः पुंसि नपुंसके च स्युः। पुंस्त्वे प्राप्ते पक्षे क्लीबत्वार्थं सूत्रम्। अयं मद्गुः इदं वा मद्गु मधुः मधु। व्यवस्थितविकल्पाश्रयणेन वसन्ते चैत्रे दैत्यभेदे च पुमानेव क्षौद्रवाचि तु नपुंसकमेव।

रुत्वन्तः। २३।

रकारान्तः हकारान्तश्च पुंसि स्यात्। उकारान्तत्वेनैव प्राप्ते प्रपञ्चार्थः। मेरुः सेतुः हेतुः।

दारुकसेरुजतुवस्तुमस्तूनि नपुंसके।२४।

पूर्वसूत्रापवादः। एते शब्दाः क्लीबे स्युः। दारु कसेरु जतु वस्तु मस्तु।

सक्तुर्नपुंसके च। २५।

त्वन्तत्वेन पुंस्त्वे प्राप्ते पक्षे क्लीबत्वार्थं सूत्रम्। चात् पुंसि। सक्तुः सक्तु।

प्राग्रश्मेकारान्तः। २६।

इत ऊर्द्धं रश्मिशब्दघटितसूत्रपर्य्यन्तमकारान्तोऽधिक्रियते।

कोपधः। २७।

ककार उपधाभूतो यस्य तथाभूतोऽकारान्तः पुंसि स्यात्। स्तवकः करकः कोरकः। कारकपाठकादयस्तु विशेषणशब्दत्वेन लिङ्गिनः। अत्र च प्रकरणे प्रायः विशेष्यशब्दानामेव लिङ्गमनुविधीयते न तु विशेषणशब्दानामिति न व्यभिचारः।

चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके। २८।

कोपधतया पुंस्त्वे प्राप्तेऽपवादः। एते शब्दाः क्लीबे स्युः। चिबुकं शालूकं प्रातिपदिकमित्यादि।

कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतटाकनिष्कशुल्कवर्चस्कपिनाकभाण्डककटकदण्डकपिटकतालकफलककल्कपुलाकानि नपुंसके च। २९।

एते शब्दाः पुंसि क्लीबे च स्युः। पुंस्त्वे प्राप्ते पक्षे क्लीबत्वार्थं सूत्रम्। कण्टकः कण्टकम् अनीकः अनीकमित्यादि।

टोपधः। ३०।

टोपधः अकारान्तः पुंसि स्यात्। घटः पटः।

किरीटमुकुटललाटवटवीटशृङ्गाटकरटलोष्टानि नपुंसके। ३१।

पूर्वसूत्रापवादः। एते शब्दाः क्लीबे स्युः। किरीटं मुकुटं ललाटमित्यादि।

कुटकूटकपटकपाटकर्पटनटनिकटकीटकटानि नपुंसके च। ३२।

एते शब्दाः नपुंसके पुंसि च स्युः। कुटं कुटः कूटं कूटः कपटं कपट इत्यादि।

णोपधः। ३३।

णोपधोऽकारान्तः पुंसि स्यात्। गुणः गणः पाषाणः।

व्रणलवणपर्णतोरणरणोष्णानि नपुंसके। ३४।

पूर्वसूत्रापवादः। व्रणं लवणम् पर्णं तोरणमित्यादि।

अमरस्तु "तोरणोऽस्त्री" इत्युक्तवान् तन्मूलं मृग्यम्। उष्णशब्दस्य सर्वंवाचित्वे एव क्लीबता तद्वति तु गुणवचनत्वेन त्रिलिङ्गत्वम्। उष्णः वह्निः उष्णा यवागूरित्यादि।

कार्षापणस्वर्णसुवर्णव्रणचरणतृणविषाणचूर्णतृणानि नपुंसके च। ३५।

एते शब्दाः क्लीबे पुंसि च स्युः। कार्षापणं कार्षापण इत्यादि।

थोपधः। ३६।

थकारोपधः अकारान्तः पुंसि स्यात्। रथः अर्थः।

काष्ठपृष्ठरिक्थोक्थानि नपुंसके। ३७।

पूर्वसूत्रापवादः। एते शब्दाः क्लीबे स्युः। काष्ठम् उक्थं (सामावयवभेदः)।

काष्ठा दिगर्था स्त्रियाम् । ३८ ।

दिग्वाचककाष्ठाशब्दः स्त्रियां स्यात् । काष्ठा दिक् । दिशि रूढ्यनेनेटसिद्धौ सीमार्थेऽपि स्त्रीत्वार्थमर्थग्रहणं तेन "स्वयं विशीर्ण-द्रुमपर्णवृत्तिता परा हि काष्ठा" इति कालिदासप्रयोगः ।

तीर्थप्रोथयूथानि नपुंसके च । ३९ ।

चादधिकारात् पुंस्त्वेवानुषज्यते न तु स्त्रियामिति । तेन "प्रोथमस्त्रियाम्" इत्यमरोक्तिः । तीर्थं तीर्थः प्रोथं प्रोथः

नोपधः । ४० ।

अदन्तो नोपधः पुंसि स्यात् । द्रुनः फेनः ।

जघनाजिनतुहिनाननवनतृजिनविपिनवेतन-ग्रासनसोपानमिथुनश्मशानरत्ननिम्बचिह्नानि नपुंसके । ४१ ।

पूर्वसूत्रापवादः । ग्रासनशब्दः परित्यक्तुं शक्यते ल्युडन्तत्वेन क्लीवत्वस्य वक्ष्यमाणत्वात् । एते शब्दाः क्लीबे स्युः । जघनम् अजिनं तुहिनं काननमित्यादि ।

मानयानाभिधाननलिनपुलिनोद्यानशयनासन-स्थानचन्दनालानसम्मानभवनवसनसंभावनविभावन-विमानानि नपुंसके च । ४२ ।

एते शब्दाः पुंसि क्लीबे च स्युः । मानादिषु केषाञ्चिन्नान्तत्वेन पुंस्त्वे केषाञ्चिच्च ल्युडन्ततया तद्बाधकसूत्रेण क्लीवत्वे प्राप्ते च उभयलिङ्गतार्थं सूत्रम् । मानः मानं यानः यानम् । वस्तुतः "करणाधिकरणयोर्ल्युट्" इति वक्ष्यमाणसूत्रेण लिलिङ्गत्व-प्राप्तौ पूर्वापवादेन नपुंसकत्वमेवेति तदपवादार्थं सूत्रम् ।

पोपधः । ४३ ।

अदन्तः पोपधः पुंसि स्यात् । धूपः दीपः यूपः ।

पापरूपोडुपतापघ्निल्पपुण्यशय्यसमीपान्तरीपाणि नपुंसके । ४४ ।

पूर्वसूत्रापवादः । एते शब्दाः क्लीबे स्युः । पापम् रूपम्

भ्रूर्पकुतपकुणपद्वीपविटपानि नपुंसके च । ४५ ।

एते शब्दाः पुंसि क्लीबे च स्युः । भ्रूर्पः भ्रूर्पमित्यादि ।

भोपधः । ४६ ।

अदन्तः भोपधः पुंसि स्यात् । करभः कुम्भः शलभः ।

तलभं नपुंसकम् । ४७ ।

पूर्वसूत्रापवादः । तलभम् ।

जृम्भं नपुंसके च । ४८ ।

जृम्भं जृम्भः । अङि तु स्त्रीत्वात् जृम्भा ।

मोपधः । ४९ ।

अदन्तः मोपधः पुंसि स्यात् । सोमः स्तोमः भीमः (मध्यम-पाण्डवः) भीतिहेतुवाचित्वे विशेषलिङ्ग एव ।

रुक्मसिध्मयुग्मे ध्मगुल्माध्मात्मकुङ्कुमानि नपुंसके । ५० ।

पूर्वसूत्रापवादः । रुक्मं सिध्मम् । आत्मनीति विग्रहेऽव्ययीभावे अनन्तत्वेनाच्समासान्ते टिलोपेऽदन्तत्वम् तस्य चाव्ययत्वेऽपि नपुंसकत्वकथनम् अदन्तमोपधत्वेन प्राप्त पुंस्त्वापवादार्थम् । वस्तुतः अध्यात्मशब्दः प्रत्याख्यातुं शक्यते ।

संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च । ५१ ।

एते शब्दाः नपुंसके चात् पुंसि च स्युः । संग्रामं संग्रामः । दाडिमं दाडिमः । उद्दामशब्दः प्रचण्डवाची । उद्दामो दामाया इति विग्रहे तु विशेष्यलिङ्ग एव ।

योपधः । ५२ ।

अदन्तः योपधः पुंसि स्यात् । हयः गवयः समयः ।

किसलयेन्द्रियहृदयोत्तरीयाणि नपुंसके । ५३ ।

पूर्वसूत्रापवादः । इदं किसलयम् इन्द्रियम् ।

गोमयकषायमलयान्वयाव्ययानि नपुंसके च । ५४ ।

एते शब्दाः नपुंसके चात् पुंसि च स्युः । गोमयं गोमयः । कषायस्तु रसवाची "तुवरस्तु कषायोऽस्त्री" इत्यमरः । तद्धितस्तु लिलिङ्गः । अव्ययशब्दः क्लीववाची । व्ययाभाववाची तु नास्त्र विषयः व्ययशब्दस्याजन्ततया पुंस्त्वेन ततो नञ् तत्पुरुषेऽपि पुंस्त्वमिति ततोऽर्थाभावेऽव्ययीभावे क्लीवतेति भेदः ।

रोपधः । ५५ ।

अदन्तः रोपधः पुंसि स्यात् । क्षुरः अङ्कुरः ।

द्वारागस्कारतक्रवक्त्रवप्रक्षिप्रक्षुद्रच्छिद्रपारतीर-दूरक्षच्छूरश्वासशुभ्रभीरुगभीरक्रूरचित्रकेयूरकेदारो-दराजस्रशरीरकन्दरमन्दरपञ्जराजरजठराजिर-वैरचामरपुष्करगङ्करकुटीरकुलीरचत्वरकाश्मीरनी-राम्बरग्निग्निरतन्त्रयन्त्रचेत्रचत्रमित्रकलत्रच्छत्रसुत्र-

वक्रनेत्रगोचाङ्गुलित्रतनुवास्त्रग्रस्त्रग्रास्त्रवस्त्रपत्त्रपात्र-नक्षत्राणि नपुंसके । ५६ ।

पूर्ब्बसूत्रापवादः । एते शब्दाः नपुंसके स्युः । इदं द्वारम् । अत्र स्त्रारशब्दो रोगभेदवाची प्रकाशवाची तु विशेष्यलिङ्गएव। वक्रशब्दः नद्याः पुटभेदेवाची कुटिलवाची तु विशेष्यलिङ्गः । क्षिप्रः शीघ्रार्थे तद्वति विशेष्यलिङ्गः । क्षुद्रशब्द उपद्रवभेदे तद्वति विशेष्यलिङ्गः । दूरशब्दो दूरत्वे, अक्षुशब्दः अक्षुत्वे तद्वति तु विशेष्यलिङ्गः । गभीरशब्दो गाम्भीर्य्ये तद्वति विशेष्यलिङ्गः । क्रूरं क्रौर्य्यं क्रौर्य्यवति त्रि० । चित्रं वर्णे तद्वति त्रि० । अजस्रं सातत्ये तद्वति त्रि० । शिशिरं शीतल-स्पर्शे तद्वति त्रि० ।

शुक्रमदेवतायाम् । ५७ ।

देवभिन्नार्थे शुक्रशब्दः क्लीबे स्यात् । शुक्रं रेतः । शुभ्रवर्ण-वाची तु गुणवचनत्वात् विशेष्यलिङ्गः । देवे तु पुमान् ।

चक्रवज्राभ्रकारसारावारपारचीरतोमरशृङ्गार-शृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके च।५८।

एते शब्दाः क्लीबे चात् पुंसि च स्युः । चक्रं चक्रः । शिशिर-शब्दस्तु हिमे स्पर्शे च पुंनपुंसकलिङ्गः स्पर्शवति त्रिलिङ्गः ।

षोपधः । ५९ ।

अदन्तः षोपधः पुंसि स्यात् । इषः इक्षवः यक्षः ।

शिरीषजोषाम्बरीषपीयूषपुरीषकिल्बिषकल्मा-षाणि नपुंसके । ६० ।

पूर्ब्बसूत्रापवादः । शिरीषं जोषम् । अम्बरीषं भर्ज्जन पात्रभेदेः मुनिभेदे तु पुमान् । कल्माषं शस्यभेदे वर्णभेदे च तद्वति तु त्रिलिङ्गः ।

यूषकरीषमिषविषवर्षाणि नपुंसके च । ६१ ।

एते क्लीबे चात् पुंसि च स्युः । यूषं यूषः । वर्षं वर्षः (वृष्टिः) वत्सरे ऋतुभेदे च स्त्री ।

सोपधः । ६२ ।

अदन्तः सोपधः पुंसि स्यात् । वत्सः वायसः मङ्गानसः ।

मानसविसवृसमांसानि नपुंसके । ६३ ।

पूर्ब्बसूत्रापवादः । एते क्लीबे स्युः । मानसं विससित्यादि ।

चमसमरसनिर्य्यासोपवासकार्पासवासमासकास-कांसमांसानि नपुंसके च । ६४ ।

एते पुंनपुंसकयोः स्युः । चमसं चमस इत्यादि ।

कंसञ्चाप्राणिनि । ६५ ।

अप्राणिनि कंसशब्दः क्लीबे पुंसि च स्यात् । कंसं कंसः पान-भोजनम् मथुरान्ध्रे तु कंसः । चकारोऽदन्ताधिकारसमाप्त्यर्थः ।

रश्मिदिवसाभिधानि । ६६ ।

रश्मिदिवसपर्य्यायशब्दाः पुंसि स्युः । रश्मिर्मयूखः किरणः । दिवसो भक्षः ।

दीधितिः स्त्रियाम् । ६७ ।

पूर्ब्बसूत्रापवादः । इयं दीधितिः ।

दिनाह्नी नपुंसके । ६८ ।

दिवसाभिधानत्वे पुंस्त्वे प्राप्ते तदपवादः । दिनम् अह्नः ।

मानाभिधानानि । ६९ ।

मीयतेऽनेनेति मानं तद्विशेषाभिधानानि पुंसि स्युः । कुडवः प्रस्थः ।

द्रोणाढकौ नपुंसके च । ७० ।

मानविशेषवाचित्वेन पुंस्त्वे प्राप्ते पक्षे क्लीबतायै सूत्रम् । द्रोणः द्रोणम् आढकः आढकम् ।

खारीमानिके स्त्रियाम् । ७१ ।

पुंस्त्वापवादार्थं सूत्रम् । इयं खारी इयं मानिका ।

दाराश्चतलाजानां बहुत्वञ्च । ७२ ।

दारशब्दस्य स्त्रीत्वे प्राप्ते रोपधत्वेन पुंस्त्वसिद्धावपि बहुत्वार्थं अन्ययोरप्राप्तौ बहुत्वार्थञ्च सूत्रम् । एते शब्दाः पुंसि नित्य-बहुवचनान्ताश्च स्युः । इमे दाराः । अक्षताः लाजाः ।

नाड्यपजनोपपदानि व्रणाङ्गपदानि । ७३ ।

नाडीपूर्ब्बपदः व्रणान्तशब्दः अपपूर्ब्बकोऽङ्गशब्दः जनपूर्ब्बः पद-शब्दश्च पुंसि स्यात् । परवल्लिङ्गत्वेन क्लीबादिलिङ्गत्वे प्राप्ते नित्यपुंस्त्वार्थमारम्भः । नाडीव्रणः । अपाङ्गः नेत्रान्ते, अङ्गापगते तु त्रिलिङ्गः । जनपदो (देशे) जनानां पदे तु क्लीबलिङ्गः ।

मरुद्गरुदुत्तरदृत्विजः । ७४ ।

एते शब्दाः पुंसि स्युः । अयं मरुत् गरुत् (पक्षः) । उत्तरत् उत्पूर्ब्बात् तरतेरतिप्रत्ययान्तः शतृप्रत्ययान्तस्तु त्रिलिङ्गः । तरन् तरन्ती तरत् । अयम् ऋत्विक् ।

ऋषिराशिष्टतिप्रहिक्रिमिध्वनिवल्मिकौलिमौलि-रविक्रविसुनयः । ७५ ।

एते शब्दाः पुंसि स्युः । अयमृषिः राशिः । बलिः पूजोप-

हारे राजपाह्वे करे दानवभेदे एव पुमान् उदरावयवे तु स्त्रीलिङ्गाधिकारस्थेन (२५) स्त्रवेण स्त्रीलिङ्ग इति भेदः ।

ध्वजगजमुञ्जपुञ्जाः । ७६ ।

एते पुंसि स्युः । ध्वजः पताका "ध्वजमस्त्रियाम्" इत्यमरोक्तिः अयाग्निनीवतयोमेधा । मूलं वा तस्य स्तम्बम् ।

हस्तकुन्तान्तवातव्रातदूतधूर्त्तसूतचूतमुङ्कर्त्ताः । ७७ ।

एते पुंसि स्युः । हस्तः सूतः सारथौ प्रसृते तु त्रिलिङ्गः । "सङ्कर्त्तोऽस्त्रियाम्" इत्यमरोक्तिश्चिन्त्यमूला ।

षण्डमण्डकरण्डभरण्डरण्डवरण्डतुण्डगण्डमुण्ड-पाषण्डशिखण्डाः । ७८ ।

एते पुंसि स्युः । षण्डः मण्डः गण्डः । एतद्विरुद्वाभिधायिनी अमोक्तिश्चिन्त्यमूला ।

वंशांशपुरोडाशाः । ७९ ।

एते पुंसि स्युः । वंशः अंशः पुरोडाशः (हविर्भेदः) ।

ह्रदकन्दकुन्दवुद्बुदशब्दाः । ८० ।

एते शब्दाः पुंसि स्युः । ह्रदः कन्दः कुन्दो द्रव्यः पुष्पे तु कुन्दम् । शब्दः ।

अर्घपथिसख्यभुक्तिस्तम्बनितम्बपूगाः । ८१ ।

एते पुंसि स्युः । एषोऽर्घः । सामगैस्तु अर्घ्यमित्येव यदन्ततया प्रयोज्यं तच्च क्लीवलिङ्गम् ।

पल्लवपल्ललकफरेफकटाहनिर्ह्रमठमणितरङ्गः-गन्धस्कन्धस्पृदङ्गसङ्गसमुद्गपुङ्गाः । ८२ ।

अयं पल्लवः । "पल्लवोऽस्त्री" इत्यमरोक्तिश्चिन्त्यमूला ॥

सारथ्यतिथिकुक्षिवस्त्यञ्जलयः । ८३ ।

एते पुंसि स्युः । अयं सारथिः अतिथिरित्यादि ।

अथातोऽवशिष्टम् । नौ ण चेति (३,३,६० सू०) घञचोः सङ्कुचितः अदेः णप्रत्ययोऽपि पुंसि स्यात् । न्यादः । स्तम्बे क च (३,३,८३ सू०) स्तम्बोपपदात् हन्तेः कप्रत्ययः पुंसि स्यात् स्तम्बघ्नः । क्तिनोऽघुच् (३,३,८६ सू०) एतद्विहितोऽघुजन्तः पुंसि स्यात् । वेपथुः वमथुः । पूर्ववदश्ववडवौ (२,४,२७ सू०) निर्देशात् परवल्लिङ्गतापवादेन पुंस्त्वमेव अश्ववडवौ द्वित्व मविवक्षितम् । अश्ववडवाः

एतद्विन्नाः केचित् शब्दाः "कान्तः सूर्येन्दुपर्य्यायपूर्व्वोऽयः पूर्व्वकोऽपि" चेत्यमरसिंहेन पुंलिङ्गतया विहिताः । सूर्य-कान्तः तरणिकान्तः चन्द्रकान्तः इन्दुकान्तः अयस्कान्तः लौह-कान्तः इत्यादयः । श्रीवेष्टः श्रीवासः हकपूपः गुग्गुलुः कसेरुः सिल्लकः इत्यादयः हस्तनिर्यासभेदाः, पुङ्गः न्युङ्गः पिण्डः गौण्डः पिचण्डः गडुः लगुडः इतिः कामसद्दः अर्बुदः (रोगभेदः) गोलः हिङ्गुलः पुङ्गलः वेतालः मल्लः भल्लः पट्टिशः पतद्ग्रहः ।

इति पुंलिङ्गाधिकारः ।

नपुंसकम् । १ ।

इत ऊर्द्धं वक्ष्यमाणा बाधमन्तरेण क्लीवलिङ्गाः स्युरित्यधिकारः ।

भावे ल्युडन्तः । २ ।

भावार्थकल्युट्प्रत्ययान्तः धातुः क्लीवे स्यात् । गमनं हसनम् । भावे किं ? पच्यतेऽनेनेति करणे ल्युट् पचनो दहनोऽग्निः । इध्मप्रचनः कुठारः, पाषाणदारणः टङ्कः ।

निष्ठा च । ३ ।

भावार्थकनिष्ठान्तो धातुः क्लीवे स्यात् । हसितं गीतं हृत्तम् ।

त्वतलौ तद्धितौ । ४ ।

भावे इत्यनुवर्त्तते । भावे विहितौ ये त्वतलौ तद्धितौ तदन्ताः क्लीवे स्युः । भावे—शुभ्रत्वं शौभ्रम्, जडत्वं जाड्यम् । घञः पित्त्वसामर्थ्यात् पक्षे स्त्रीत्वमपि तेन पित्करादिभ्यश्चेति ङीषि य लोपे, औचितो औचित्यं, माधुरो माधुर्यं, चातुरो चातुर्यम् ।

कर्म्मणि च ब्राह्मणादिगुणवचनेभ्यः । ५ ।

ब्राह्मणादिभ्यो गुणवचनेभ्यश्च कर्म्मणि चात् भावे यौ विहितौ त्वतलौ तदन्ताः क्लीवे स्युः । ब्राह्मणस्य कर्म्म भावो वा ब्राह्मणत्वं ब्राह्मण्यम् । "चातुर्वर्ण्यादीनां स्वार्थे उपसंख्यानमिति" वार्त्तिकोक्तेः स्वार्थे ष्यञ् चातुर्वर्ण्यं त्रैलोक्यं चातुर्वैद्यं षाड्गुण्यम् "क्वचित् स्वार्थिका अपि प्रत्ययाः प्रकृतितो लिङ्ग-वचनान्यतिवर्त्तन्ते इति भाष्योक्तेः प्रकृतिलिङ्गवचनातिक्रमः ।

यय्दढण्यगञ्ण्वुञ्क्ङाश्च भावकर्म्मणि । ६ ।

भावे कर्म्मणि चार्थे विहिता ये यय्दादयस्तदन्ताः क्लीवे स्युः । भावकर्म्मणोरिति गृह्यं स्वार्थनिवृत्त्यर्थम् । सेनस्य भावः कर्म्म वा "सेनाद्यत् नलोपश्चेति" (५,१,१२५) यति सेन्यम् । सख्युर्भावः कर्म्म वा "सख्युर्य इति" (५,१,१२६) ये सख्यम् । कपेर्भावः कर्म्म वा भावादि "कपिज्ञात्योर्ढगिति" (५,१,१२७) ढकि कापेयम्

ज्ञातेयम् । सेनापतेर्भावादि "पत्यन्तपुरोहितादिभ्यो यक्तिति" (५,१,१२८) यक्ति सैनापत्यम् आधिपत्यं पौरहित्यम् । उद्गस्य भावादि "प्राग्भवज्जातिवयोवचनोद्गात्रादिभ्योऽञ्जिति" (५,१,१२९) अञ्जि औद्गम् तस्य प्राग्धारिजातिवचनत्वात्, शैशवं कौमारं वयोवचनात्वात्, औद्गात्रं चातुर्होत्रम् । द्विहायनस्य भावादि "हायनान्तयुवादिभ्योऽण् इति (५,१,१३०) अणि द्वैहायनं यौवनम् । वयोवचनत्वेन प्राग्भावेऽपि णित्करणार्थं वचनम् । इगन्ताच्च लघूपधात्" (५,१,१३१) अण् सौष्ठवम् भार्ष्टं पाटवम् । "योपधाद्गुरूपोत्तमाद्वुञ्" (५,१,१३२) रमणीयस्य भावादि रामणीयकं कामनीयकम् । "होत्रादिभ्यश्छ इति (५,१,१३५) छे अच्छावाकीयम् अच्छावाको होत्रविशेषः अनुक्तसमुच्चय चकारः समुच्चयाय परिशिष्टे दर्शयिष्यते ।

अव्ययीभावः । ७ ।

अव्ययीभावसमासनिष्पन्नः क्लीवलिङ्गः स्यात् । अधिस्त्रि स्त्रियामिति विगृह्ये विभक्त्यर्थेऽव्ययीभावे तदन्तस्य क्लीवतया ह्रस्वः । उपनदि पक्षे अच्समासान्ते उपनदम् ।

द्वन्द्वैकत्वम् । ८ ।

समाहारद्वन्द्वनिष्पन्नः शब्दः क्लीवे स्यात् । पाणिपादम् धवखदिरम् ।

अभाषायां हेमन्तशिशिरावहोरात्रे च ।९।

संस्कृतभाषाभिन्ननियमके वेदे हेमन्तशिशिरशब्दौ द्वन्द्वसमाहारः नैकवत् क्लीवलिङ्गौ वा । किन्तु "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरित्युक्तेः परवल्लिङ्गता द्विवचनान्तता च । तथा अहोरात्रशब्दो द्वन्द्वनिष्पन्नः क्लीव एव "रात्राह्नाहाः पुंसीति" पुंल्लिङ्गापवादः । अभाषायामित्युक्तेः भाषायां हेमन्तशिशिरम् अहोरात्रश्चेति ।

अनञ्कर्मधारयस्तत्पुरुषः । १० ।

इतः परं नञ्कर्मधारयभिन्नस्तत्पुरुषोऽधिक्रियते

अनल्पे छाया । ११ ।

बहुसम्बन्धिनी वा छाया तदन्तस्तत्पुरुषः क्लीवे स्यात् । नपुंसकत्वेन छापो ह्रस्वः । द्रुणां छाया द्रुच्छायम् । "द्रुच्छायानिषादिन्य, इति तु आनिषादिन्य इत्याङ्प्रश्लेषेण समर्थनीयम् । शराणां छाया शरच्छायम् ।

राजाऽमनुष्यपूर्वा सभा । १२ ।

राजपर्यायपूर्वः मनुष्यभिन्नमनुष्यसदृशतुल्यपूर्वश्च छायान्तस्तत्पुरुषः क्लीवे स्यात् । रूपाणां सभा रूपसभम् । द्रुसभम् राजपर्यायपूर्वस्यैवेष्यते न तु राजसदृशविशेषपूर्वस्य । तेन राजसभा चन्द्रगुप्तसभा । भाष्यकृता चन्द्रगुप्तसभेतिप्रत्युदाहरणात् चन्द्रगुप्तस्य भाष्यकारसमकालत्वं ततः प्राक्कालत्वं वा प्रतीयते । अमनुष्येति पर्युदासात् तत्सदृशरक्षःपिशाचादिपूर्वकस्यैव, तेन रक्षःसभं पिशाचसभम् । तत्पूर्वकस्य किम् ? त्वसभा मृगसभेत्यादि ।

सुरासेनाच्छायाशालानिशाः स्त्रियाञ्च । १३ ।

एतदन्तस्तत्पुरुषः स्त्रियां स्यात् क्लीवे च स्यात् । यवसूरं यवसूरा ब्राह्मणसेनं ब्रह्मणसेना । अवङ्सम्बन्धार्थं छायाशब्दग्रहणम् । कुड्यच्छाया कुड्यच्छायम् । गोशालं गोशाला । द्यूनिशं द्यूनिशा । तत्पुरुष इत्यधिकारात् बहुव्रीहौ नलिङ्गः । दृढसेनः दृढसेना दृढसेनमित्यादि । अनञ्कर्मधारय इत्युक्तेः असेना परमसेना इत्यादि स्त्रियामेव । "अशाला च (२,४,२४) पा० सू०) शालाभिन्नार्थकसमानस्तत्पुरुषः क्लीवे स्यात् । स्त्रीसभम् स्त्रीसंघात इत्यर्थः । शालायां धर्मसभा धर्मशालेत्यर्थः । संज्ञायां कन्थोशीनरेषु (२,४,२०) पा० सू०) कन्थान्तस्तत्पुरुषः क्लीवे स्यात् । सा चेत् कन्था उशीनरदेशोत्पन्नायाः कन्थायाः संज्ञा । सुशमस्यापत्यानि सौशमयस्तेषां कन्था । संज्ञायां किं वीरणकन्था । उपज्ञोपक्रमान्तः तदाद्याचिख्यासायाम् (२,४,२७सू० पा०) उपज्ञान्त उपक्रमान्तश्च तत्पुरुषः नपुंसके स्यात् । तयोरुपज्ञायमानोपक्रम्यमाणयोरादिः प्राधान्यं चेदाख्यातुमिष्यते । उपज्ञायते इत्युपज्ञा कर्मणि अङ् । पाणिनेरुपज्ञा पाणिन्युपज्ञम् । उपक्रम्यते इत्युपक्रमः नन्दस्य उपक्रमः नन्दोपक्रमं द्रोणः । भाष्यकारस्य तदोदाहरणात् नन्दादर्वाचीनत्वं भाष्यकृत इति प्रतीयते ।

परवत् । १४ ।

उक्तभिन्नस्तत्पुरुषः परवल्लिङ्गः स्यात् । राजपुरुषः राजमहिषी राजधनम् ।

रात्राह्नाहाः पुंसि । १५ ।

कृतसमासान्तरात्राद्यन्तस्तत्पुरुषः पुंस्येव स्यात् परवल्लिङ्गतापवादः । तदन्तद्वन्द्वोऽपि पुंसि स्यात् स्त्रीत्वपाठे "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरित्युपक्रमेण एतदपवादसूत्रे द्वन्द्वपदस्यानुवर्त्तनात् । पूर्वरात्रः अपररात्रः पूर्वाह्णः अपराह्णः प्रगेतराः । द्वन्द्वे अहश्च रात्रिश्च अहोरात्रः ।

संख्यापूर्वा रात्रिः । १६ ।

संख्यावाचकपूर्वपदः रात्रान्तस्तत्पुरुषः क्लीवे स्यात् । पुंस्यपवादः । त्रिरात्रं पञ्चरात्रं गणरात्रम् ।

अपथपुण्याहे नपुंसके । १७ ।

अपथपुण्याहशब्दौ नपुंसके स्तः । अपथम् । तत्पुरुष इत्येव अन्यत्र अपथोदेयः । पुण्याहस्य तु पुंस्ते प्राप्ते ऽयमारम्भः स च तत्पुरुष एव बहुव्रीहौ समासान्तप्रसङ्गे: वार्त्तिके "पुण्याहसुदिनाभ्यामह्नः क्लीवता" इत्यङ्गे: । सुदिनाहम् । अपथेति निर्देशात् कृतसमासान्त एव सूत्रं प्रवर्त्तते नेह अपन्थाः ।

द्विगुः स्त्रियाञ्च । १८ ।

द्विगुसमासनिष्पन्नः स्त्रियां स्यात् नपुंसके च स्यात् । व्यवस्थितविभाषेयं व्यवस्था च सूत्रपाठेन वार्त्तिकपाठेन दर्शिता यथा स नपुंसकम् २ ४ १७ सू० भा०) स समाहारद्विगुर्नपुंसकलिङ्गः स्यात् । परवल्लिङ्गतापवादः । पञ्चगवम् । अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः (वा०) । पञ्चमूली, त्रिलोकी, "आबन्तो वा (वा०) आबन्तो द्विगुः स्त्रियां क्लीवे च स्यात् । पञ्चखट्वी पञ्चखट्वम् । अनो नलोपश्च वा च द्विगुः स्त्रियाम्, (वा०) अचन्त द्विगोर्वा नलोपः । नलोपपक्षे स्त्रीत्वं पक्षे क्लीवतेत्यर्थः । पञ्चतक्षी पञ्चतक्षम् । पात्राद्यन्तस्य न, (वा०) न स्त्रीत्वमपि तु "स नपुंसकम्" इति क्लीवत्वमेव । अदन्तत्वेन स्त्रीत्वे प्राप्ते तदपवादार्थं वार्त्तिकम् । पञ्चपात्रं त्रिभुवनम् ।

इसुसन्तः । १९ ।

इस्प्रत्ययान्त उस्प्रत्ययान्तश्च शब्दः क्लीवे स्यात् । हविः धनुः ।

अर्चिः स्त्रियाञ्च । २० ।

इसन्तत्वेन क्लीवत्वे प्राप्ते वचनम् । इदमियं वा अर्चिः ।

छदिः स्त्रियामेव । २१ ।

इसन्तत्वेऽपि छदिशब्दः स्त्रियां स्यात् न तु क्लीवे । इयं छदिः एवमनुशासने स्थिते पटलं छदिरित्यमरव्याख्यातारः पटलसाहचर्य्यात् छदिषः क्लीवतां वदन्तः उपेक्ष्याः ।

मुखनयनलोहवनमांसरुधिरकार्ष्मुकविवरजलहलधनान्नाभिधानानि । २२ ।

एतद्वाचकानि क्लीवे स्युः । सुखम् आननम् । नयनं लोचनम् । लोहं कालम् अयः । वनं गहनम् विपिनम् । मांसमामिषं पलम् । रक्तं रुधिरं शोणितम् असृक् । कार्ष्मुकं शरासनम् । विवरं छिद्रं बिलम् । जलं सलिलं वारि । हलं लाङ्गलम् । धनं द्रविणं वसु । अन्नमशनम् इत्यादि ।

सीरार्थोदनाः पुंसि । २३ ।

पूर्वसूत्रापवादः । एते शब्दाः पुंसि स्युः । सीरः । अर्थः "रायोऽहलोति" सूत्रनिर्देशात् रैशब्दस्य धनवाचित्वेऽपि पुंस्त्वमेव । क्लीवत्वे रैशब्दस्य ह्रस्वे रिण इति स्यात् । ओदनः ।

वक्त्रनेत्रारण्यगाण्डीवानि पुंसि च । २४ ।

एते शब्दाः पुंसि चात् क्लीवे च स्युः । वक्त्रो वक्त्रम् । नेत्रो नेत्रम् । अरण्यः अरण्यम् । गाण्डीवः गाण्डीवम् ।

अटवी स्त्रियाम् । २५ ।

वनवाचित्वेऽपि अटवीशब्दः स्त्रियां स्यात् । इयमटवी ।

लोपधः । २६ ।

ह्रस्वादीनाम् अदन्तानामपवादतया परसूत्रे निर्देशेन अदन्तानुवृत्तेरिह प्रकरणे स्पष्टत्वात् । एवं सर्वत्र । अदन्तो लोपधः क्लीवे स्यात् । कुलं कूलम् स्थलम् स्थानमात्रे अवनिमभूमौ तु स्त्रीत्वविधानसामर्थ्यात् स्त्रीत्वमेव । तेन स्थली अवनिमा भूमिः ।

तूलोपलतालकुसुमतरलकम्बलदेवलवृषलाः पुंसि । २७ ।

पूर्वसूत्रापवादः । ह्रस्वः उपलः । तालः गानक्रियामानम् । ह्रस्ववाचकस्य जातित्वात् द्विलिङ्गता अत एव छिन्नालस्यापि परत्वात् द्विलिङ्गता न विरुध्यते । तरलः हारमध्यगमणिः । चञ्चलपर्य्यायस्तु त्रिलिङ्गः क्रियोपाधित्वात् ।

शीलमूलमङ्गलसालकमलतलमुसलकुण्डलपलल-मृणालबालगलपलाशविड्डालखिलपृथुलाः पुंसि च । २८ ।

एते शब्दाः पुंसि चात् क्लीवे स्युः । लोपधत्वेन क्लीवत्वे प्राप्ते पक्षे पुंस्त्वार्थं सूत्रम् । शीलं शीलः मूलः मूलमित्यादि ।

शतादिसंख्या । २९ ।

शतादिशब्दाः संख्यासंख्येययोः क्लीवे स्युः । शतं सहस्रम् । शतादिः किम् ? एको द्वौ बहवः । संख्या किम् ? शतः (शतस्कृपर्वतः) ।

शतायुतप्रयुताः पुंसि च । ३० ।

एते शब्दाः पुंसि चात् क्लीवे । अयं शतः इदं शतम् । अयुतः अयुतम् प्रयुतः प्रयुतम् । संख्यावाचकत्वेन क्लीवत्वे प्राप्ते पक्षे पुंस्त्वार्थं सूत्रम् ।

लक्षाकोटी स्त्रियाम् । ३१ ।

एते स्त्रियां स्तः । लक्षा कोटिः । इकारान्तत्वात् पक्षे ङीप् कोटी । लक्षशब्दस्य क्लीवत्वमपि विप्रतिषेधेऽपरं कार्य्यमिति

परिभाषया तथात्वम् अत एव "वा लक्षा निधुतङ्ग तत्" इत्यमरः ।

सहस्रः पुंसि च । ३२ ।

अयं पुंसि चात् क्लीबे स्यात् । क्लीबत्वे प्राप्ते पक्षे पुंस्त्वार्थं सूत्रम् । सहस्रः सहस्रम् ।

मन् द्व्यचकोऽकर्त्तरि । ३३ ।

कर्तृभिन्नार्थकमनुप्रत्ययान्तः द्व्यचकश्चेत् क्लीबे स्यात् । कर्म चर्म शर्म, नर्म, । द्व्यचकः किम् ? अणोर्भावः अणिमा एवं लघिमा । नन्तत्वेन पुंस्त्वम् । अकर्त्तरि किम् ? ददातीति दामा ।

ब्रह्म पुंसि च । ३४ ।

ब्रह्मनृशब्दः पुंसि चात् क्लीबे च स्यात् । व्यवस्थितविभाषेयम् वेदे सत्ये तपसि परात्मनि च क्लीबम् चतुर्मुखे पुमानिति ब्रह्मा ।

नामरोमणी नपुंसके । ३५ ।

एते क्लीबे स्युः । मनुद्व्यचक इत्यस्य प्रपञ्चः । नाम रोम ।

असन्तो द्व्यचकः । ३६ ।

अकर्त्तरीत्यनुवर्त्तते । अकर्त्तर्यकारान्तप्रत्ययान्तः द्व्यचकश्चेत् क्लीबे स्यात् । यशः तपः मनः । अकर्त्तरीत्यनुवर्त्तनेनेह । वेधाः । द्व्यचकः किम् ? उरोधाः चन्द्रमाः ।

अप्सराः स्त्रियाम् । ३७ ।

प्रायेणायं बहुवचनान्तः । इमाः अप्सरसः । प्रायेणेत्युक्तेः अप्सरा वै रूपिणी मेनेति भाष्यप्रयोगः सङ्गच्छते । इदं स्त्रीलिङ्गे निर्देष्टुमुचितम् असन्तत्वेन प्राप्तावपि द्व्यचकत्वाभावेन प्राप्त्यभावात् तदपवादत्वासंभवात् ।

त्रान्तः । ३८ ।

रोषधत्वेन पुंस्त्वे प्राप्ते तदपवादार्थं सूत्रम् । त्रप्रत्ययान्तः क्लीबे स्यात् । पत्त्रम् छत्त्रम् दात्रं कलत्रम् गोत्रम् । गोत्रशब्दस्य भूमिपर्यायतया स्त्रीत्वमेव गोत्रशब्दस्य तु गिरिपर्यायतया पुंस्त्वमेव । नेत्रशब्दस्य विशेषविधानात् पुंनपुंसकता ।

यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव । ३९ ।

एते शब्दाः स्त्रियां स्युः । त्रान्तत्वेन क्लीबताप्राप्तौ तदपवादार्थं सूत्रम् । दंश्यतेऽनया दन्दशेः इन् तस्य णित्त्वेऽपि न ङीष् सूत्रे दंष्ट्रेति निर्देशात् । यात्रा मात्रा भस्त्रा दंष्ट्रा वरत्रा ।

भूत्रामित्रच्छात्रपुत्रमन्त्रवक्त्रमैत्राः पुंसि । ४० ।

त्रान्तत्वेन क्लीबत्वे प्राप्ते तदपवादार्थं सूत्रम् । अयं सूत्रः । न मित्रम् अमित्रः मित्रशब्दस्य त्रान्तत्वेन क्लीबत्वेन नञ्तत्पुरुषे परवल्लिङ्गतया तल्लिङ्गत्वापत्तौ यङ्लुगसामर्थ्यात् पुंस्त्वम् । "तस्य मित्राख्यमित्रास्ते" इति "स्यातामभितौ मित्रे च" इति च भावः । मित्रशब्दस्य सूर्य्यार्थे रोषधत्वेन पूर्वविप्रतिषेधेन, देवविशेषवाचित्वेन च पुंस्त्वमेव । मित्रात् स्वार्थेऽण् मैत्रः वचनसामर्थ्यात् न प्रकृतिलिङ्गता ।

पत्रपात्रपवित्रस्रुवच्छवाः पुंसि च । ४१ ।

त्रान्तत्वेन क्लीबत्वे प्राप्ते पक्षे पुंस्त्वार्थम् वचनम् । पत्रं पत्रः । पात्रं पात्रः । पवित्रं पवित्रः । अनुक्तसमुच्चयबोधकारेण स्त्रीत्वमप्यस्य । "पवित्रासि वैष्णवी" इतिवेदमन्त्रः ।

बलकुसुमशुल्वपत्तनरणाभिधानानि । ४२ ।

एतेषां पर्य्यायशब्दाः क्लीबे स्युः । बलं सहः वीर्य्यं सामर्थ्यम् । कुसुमं पुष्पम् । सुमनःशब्दस्य विशेषाभिधानात् स्त्रीत्वम् । रणं युद्धम् आयोधनम् । युत्समिधोर्विशेषाभिधानात् स्त्रीत्वम् ।

पद्मकमलोत्पलानि पुंसि च । ४३ ।

पद्मादिशब्दाः क्लीबे पुंसि च स्युः । पद्मं पद्मः । "भाति पद्मः सरोवरे" इत्यादावालङ्कारिकैस्तु अप्रयुक्तादोषोद्धारस्यतयाऽस्य पुंस्त्वमनुशासनसिद्धमित्यभ्युपगतम् । अत एव अर्द्धर्चादिस्त्रे पद्मं नपुंसकमेवेति वृत्तिग्रन्थोऽप्रयुक्तादोषबुद्ध्यैवेत्युच्चेयः । कमलं कमलः इत्यादि ।

आहवसंग्रामौ पुंसि । ४४ ।

रणपर्य्यायतया क्लीबत्वे प्राप्ते तद्बाधनार्थं सूत्रम् । आहवः संग्रामः ।

आजिः स्त्रियामेव । ४५ ।

रणवाचित्वेन प्राप्तक्लीबतावाधनार्थं सूत्रम् । इयम् आजिः पक्षे ङीप् आजी ।

फलजातिः । ४६ ।

फलप्रधानद्रुजातिवाची शब्दः क्लीबे स्यात् । आम्रजम्बाः फलम् अण् "फले लुक्" इति लुकि "लुक् तद्धितलुकि" इति "ङीषो लुकि क्लीबत्वम् । आम्रकम् आम्रम् । तथा च विकारावयवप्रत्ययलुग्विषये एवास्य प्रवृत्तिः नान्यथा, तेन "जम्बू वा" इति जम्बूशब्दात् अपि "लुप् चेति" तस्य लुप्पक्षे स्त्रीत्वमेव लुक्पक्षे क्लीबता तदुभयाभावपक्षे प्रत्ययस्थितिः । तेन जम्बूः जम्बु जाम्बवम् । अत एव "जम्बूः स्त्री जम्बू जाम्बवम्" इत्यमरः । "फले लुक्" इत्यत्र फलतीति व्युत्पत्त्या फलशब्दः प्रसवमात्र-

वचनः । अत एव "द्विहीनं प्रसवे सर्वं हरीतक्यादवः स्त्रियाम्" इत्यमरः ।

वृक्षजातिः स्त्रियामेव । ४७ ।

क्वचिदित्यध्याहार्य्यम् । हरितक्यादिप्रसववाचकशब्दः स्त्रियामेव । हरीतक्याः फलम् "हरीतक्यादिभ्यश्च" इति फलार्थकप्रत्ययस्य लुपि स्त्रीत्वम् "हरीतक्यादिषु व्यक्तिः" इति वार्त्तिके हरीतक्यादीनां प्रकृतिलिङ्गत्वोक्तेः । स च गणः "हरितकी कोशातकी नखरजनी, शष्कखंडी, दाडी दोडी श्वेतपाकी अर्जुनपाकी द्राक्षा, काला ध्याक्षा, गभीका कण्ठकारिका पिप्पली चिब्बा ग्रेफालिका" इति । वृक्षजातिरित्युक्तेः फलप्राधान्याभावेऽपि पुष्पप्रधानजातिवाचिनः पुष्पपरत्वेऽपि स्त्रीत्वम् । मालती मल्लिका । लुप् चेति (४,२,१६६) सूत्रे "फलपाकशुषासंख्यानम्" इति वार्त्तिकोक्तेः व्रीहीणां फलानि-व्रीहयः शुक्लाः माषाः । "पुष्पमूलेषु बहुलम्" इति वार्त्तिकोक्तेः बहुलग्रहणात् क्वचित् लुप् क्वचिच्चेति द्योतितम् तेन मल्लिकायाः पुष्पं मल्लिका एवं मालती। विदार्याः मूलं विदारी । बहुलग्रहणात् क्वचित्र पाटलानि पुष्पाणि, शाखानि मूलानि । बाहुलकात् पुष्पे मूले च वाच्ये क्वचित् लुक् । अशोकम् करवीरम् ।

वियच्जगत्सलत्कषत्पृषच्छत्रयत्रुदश्चितः । ४८ ।

एते शब्दाः क्लीबे स्युः । वियत् जगत् । सलत् ।

नवनीतावतान्नताम्रतन्निमित्तवित्तपित्तव्रतरजत-पलितानि । ४९ । [भिन्ने त्रि० ।

एते शब्दाः क्लीबे स्युः । नवनीतम् अवतम् अन्नतं (सुधा) नत

आम्रकुलिशपीठकुण्डाङ्गदधिसक्थ्यक्ष्यास्यदाकाग्रकणवीजानि । ५० [अपेपुंनपुंसकत्वोक्तेः, कस्वं (पापम्)

एते शब्दाः क्लीबे स्युः । आम्रं कुलिशम् । आकाशः परित्याज्यः

दैवं पुंसि च । ५१ ।

दैवशब्दः पुंसि चात् क्लीबे स्यात् । दैवः दैवम् ।

धान्याज्यशस्यरूप्यपण्यवर्षाग्रधिष्ण्यहव्यकव्यकाव्यसत्यापत्यमूल्यिक्यकुद्यमद्यहर्म्यतूर्य्यसैन्यानि । ५२ ।

वोपधत्वेन पुंस्त्वे प्राप्तेऽपवादार्थं सूत्रम् । एते शब्दाः क्लीबे स्युः । धान्यम् आज्यं शस्यम् ।

द्वन्द्ववर्हदुःखवडिग्रपिच्छविश्वकुटुम्बकवचकवरवृन्दारकाणि । ५३ ।

एते शब्दाः क्लीबे स्युः । द्वन्द्वं (मिथुनम्) वर्हम् इत्यादि ।

अक्षमिन्द्रिये । ५४ ।

इन्द्रियार्थे अक्षशब्दः क्लीबे स्यात् । अक्षम् । इन्द्रिये किम् ? रथाङ्गे अक्षभेदादौ मा भूत् ।

अथ नपुंसकावशिष्यते तत्र भावे ल्युडन्त इत्युपलक्षणं क्त्वादीनाम्, तेन भावार्थकक्त्वाद्यन्ताः नपुंसके स्युः । भवितव्यम् भवनीयम् भव्यं भाव्यं कृत्यं ब्रह्मभूयम् । भावे इत्युक्तेः कर्म्मणि कर्तरि च लिङ्गिन एव । कर्म्मणि—चेतव्यः चयनीयः चेय इत्यादि । कर्त्तरि—शेयः भव्य इत्यादि । क्त्वादयश्च "अभिविधौ भावे इनुण्" (३,३,४४, सू०) इतीनुण्, तदन्तात् अस्तिनुधः इति (५,४,१५) स्वार्थे अणि सांराविणं साङ्कुटिनम् । भावे खल्—दुर्भवं दुःशयम् । आतो युच् (३,३,२८) दुर्ज्ञानम् दुर्ज्ञानम् ।

तस्य समूहः (४,२,३७) इत्यधिकारे ये वाद्याः स्त्रियामुक्ताः तद्धितप्रत्ययान्ता नपुंसके स्युः । अण्—काकं वाकम् । भिक्षादिभ्योऽण् (४,२,३८) भैक्षम् गार्भिणम् । गोत्रादिभ्यो वुञ् (४,२,३९) औपगवकम् औच्चकम् औष्ट्रकम् औरभ्रकम् राजकम् राजन्यकं राजपुत्रकम् मानुष्यकम् आजकम् । केदाराद् यञ् च (४,२,४०) कैदार्यम् कैदारकम् । गणिकाया ण्यिति (वा०) गाणिक्यम्, ठञ् क्वचिनच (४,२,४१) कावचिकम् कैदारिकम् । ब्राह्मणमाणववडवाद्यत् (४,२,४२) ब्राह्मण्यम् माणव्यम् वडव्यम् पर्शवाण् (वा०) पार्शवम् । अनुदात्तादेरञ् (४,२,४४) कापोतम् माधूरम् । खण्डिकादिभ्यश्च (४,२,४५) खाण्डिकम् सैनम् औलुकमित्यादि । चरणेभ्यो धर्म्मवत् (४,२,४६) छान्दोग्यं काठक्यम्, अचित्तहस्तिधेनोष्ठक् (४,२,४७) साङ्कुकम् हास्तिकम् धैनुकम् । केशाश्वाभ्यां यञ्छावित्रि (४,२,४८) कैश्यं कैशिकम् आश्वीयं आश्वम् । "सामादेर्नपुंसकम् (वा०) क्रियाव्ययानां भेदकानि नपुंसकलिङ्गानि स्युः । कदु पचति कमनीयम् प्रातः । एतद्भिन्नाः कतिचिच्छब्दा नपुंसकतयाऽमरे परिगणिताः यथा उत्कं (सामावयवभेदः) तोटकं (छन्दोभेदः) । चोचम् (तालफलम्, तदीयफलस्थयथाकारपदार्थो वा) । पिच्छं (भक्षसंभूतमण्डः) । तिरीटम् (वेटनम्) । राजसूयं राजमेयं यज्ञविशेषत्वेऽपि अनेन बाधाद्व नपुंस्कम् । गद्यं पद्यं (कविकृतौ) । माणिक्यं भाण्यं सिन्दूरं चीरं चीवरं, लोकायतं हरिताश्वम् विदलं (वंशपात्रभेदः स्थाली वा) ।

इति नपुंसकलिङ्गानुशासनम् ।

स्त्रीपुंसयोः । १ ।

इत ऊर्द्धं वक्ष्यमाणाः स्त्रीपुंसलिङ्गाः स्युः । इत्यधिकारः ।

गोमणियष्टिमुष्टिपाटलिवस्तिशाल्मलिचुटिमसिमरीचयः । २ ।

एते पुंसि स्त्रियां च स्युः । तत्र गोशब्दस्य पशुविशेषवाचित्वे स्त्रीपुंसलिङ्गता स्वर्गवाग्किरणनेत्रवाचित्वे पुंसि, भूमिदिग्वाग्वाचित्वे स्त्रियामिति व्यवस्था । इयं गौः अयं गौः, इयमयं वा मणिः स्त्रीत्वपक्षे वा ङीप् मणी एवं सर्वत्र ।

मन्युशीधुकर्कन्धुसिन्धुकण्डुरेणवः । ३ ।

एते स्त्रियां पुंसि च स्युः । इयमयं वा मन्युः शीधुः । कर्कन्धुः अप्राणिजातित्वात् स्त्रीत्वपक्षे ऊङ् कर्कन्धूः ।

गुणवचनमुकारान्तं नपुंसकञ्च । ४ ।

गुणवचना उकारान्ताः शब्दाः नपुंसके चात् स्त्रीपुंसयोः स्युः । तेन त्रिलिङ्गाः । पटुः पट्वी पटु । मृदुः मृद्वी मृदु । उदन्तत्वविशेषणात् तद्भिन्नानां गुणवचनानां गुणपरत्वे पुंस्त्वम् गुणिपरत्वे त्रिलिङ्गता । शुभ्रः शुक्रः शुचिः वस्त्रे, तद्वति शुक्लं वस्त्रं शुक्रः पटः शुक्राः शाटी । एतत् सूत्रं परित्यक्तुं शक्यते गुणवचनहेति त्रिलिङ्गस्यसूत्रेण परेषाञ्च बाधात् । तेन शुक्लं शुचि वा वस्त्रमित्युकारान्तत्वाभावेऽपि तेनैव त्रिलिङ्गता ।

अपत्यार्थतद्धिताः । ५ ।

अपत्यार्थे विहिता ये तद्धितास्तदन्ताः स्त्रीपुंसयोः स्युः । औपगवः औपगवी । दाक्षिः दाक्षी, गार्ग्यः गार्गी, वैदः वैदी । अमरेण ठ

"स्त्रीपुंसयोरपत्यान्ता द्विपदःषट्पदोरगाः ।
जातिभेदाः पुमाख्याश्च स्त्रीयोगे सहमल्लकः ॥"

इत्युक्तम् । तथा च द्विपदाः, चतुष्पदाः, षट्पदाः, उरगवाचिनः जातिविशेषवाचिनः पुरुषाख्याश्चे स्त्रीयोगे एव ते च स्त्रीलिङ्गास्तेन पुंपरत्वे पुंस्त्वं, स्त्रीपरत्वे स्त्रीत्वमिति द्विलिङ्गता । तत्र द्विपदाः—मानुषः मानुषी, विप्रः विप्रा, शूद्रः शूद्रा, बकः बकी, हंसः हंसी इत्यादि । चतुष्पदाः—मृगः मृगी, सिंहः सिंही, शुभ्रः शुभ्री, इत्यादि । षट्पदाः—भ्रमरः भ्रमरी, मधुकरः मधुकरी, उरगः उरगी, सर्पः सर्पा, अबाधिता इत्येव तेन सतामज्ञिकाग्निवाहां नित्यस्त्रीत्वमेव । जातिभेदवाचिनः—मत्स्यः मत्स्यी, मल्लकः मल्लकी । पुमाख्याः—कुम्भकारः स्त्रीयोगे कुम्भकारी (कुम्भकारस्य भार्या) ।

अमरे केचित् शब्दा अपि द्विलिङ्गतया पठिताः । मल्लकः मल्लिका, मुनिः मुनी, वराटकः वराटिका, स्वातिः स्वाती, वर्धकः वर्धिका, झाटजिः झाटजी, मनुः मनावी-मनायी, मूषः मूषा, रूपाटिः रूपाटी, यष्टिः यष्टी, कटिः कटी, कुटिः कुटी ।

इति स्त्रीपुंसलिङ्गानुशासनम् ।

पुंनपुंसकयोः । १ ।

अधिकारोऽयम् । इत ऊर्द्धं वक्ष्यमाणाः पुंनपुंसकलिङ्गाः स्युः ।

घृतभृतमुस्तच्छेलितैरावतपुस्तवुस्तलोहिताः । २ ।

एते शब्दाः पुंनपुंसयोः स्युः । इदं घृतम्, अयं घृत इत्यादि । भूतशब्दस्य अतीते भवनकर्त्तरि च त्रिलिङ्गता । पिशाचे जन्तुभावे च पुंसि । घृतिब्यादिषु पञ्चसु क्लीवता, युक्ते यथार्थे नपुंसकतेति व्यवस्था । अमरेण ठ "युक्ते च्छादादृते भूतं प्राग्व्यतीते समे त्रिषु" इत्युक्तम् । तथा च भूतशब्दस्य त्रिलिङ्गताविषयभिन्ने एवास्य, सूतस्य विषयः । लोहितं लोहितः (रुधिरम्)

शृङ्गार्द्रनिदाघोद्यमशस्तदृढाः । ३ ।

एते पुंनपुंसकयोः स्युः । अयं शृङ्गः इदं शृङ्गम् । "अर्द्रं नपुंसकम्" (२,२,२) सूत्रात् समांशवाचिनो नपुंसकता खण्डवाचिनस्तु पुंस्त्वमिति व्यवस्था । दृढशब्दस्य गुणवचनत्वे त्रिलिङ्गता विश्रब्धवाचित्वे एतत्सूत्रविषयता ।

व्रजकुञ्जकुथकूर्चप्रस्थदर्पकर्षोर्षपुच्छाः । ४ ।

एते पुंनपुंसकलिङ्गाः स्युः । व्रजः व्रजम् । अर्द्धर्चाः पुंसि चेति (२,४,३१) सूत्रे अर्द्धर्चादीनां प्राप्तत्वेऽपि पुनरर्द्धर्चग्रहणं तद्गणपठितानां केषाञ्चित् वैदिकविषयत्वसूचनाय अत एव इह इतादीनां केषाञ्चित् पाठो लौकिकप्रयोगेऽपि पुंनपुंसकतार्थः ।

अर्द्धर्च गोमय कषाय कार्षापण कुतप कुणप कपाट यन्त्र गृध्र यूष ध्वज कबन्ध पद्म मत्स्य सरक कंस दिवस यूष अभ्रंकार दण्ड कमण्डलु मण्ड भूत द्वीप दूत चक्र धर्म कर्मन् मोदक शतमान यान नख नखर चरण पुच्छ दाडिम हिम रजत मन्थु प्रधान सार पात्र घृत सैन्धव औषध आढक चषक द्रोण खर्जीन पात्रीव (पात्रीर) पुष्कर वारवाण प्रोथ कपित्थ शुल्क शाल शील शुल्क शीधु कवच रेणु क्षण करट शीकर सुमन सुवर्ण वर्ष पूर्व चमस चीर कर्ष आकाश अष्टापद मङ्गल निधन निर्यास जन्म घृत पुंस वृन्त च्छेदित मद्य निगड खल मधु मूल मूलक स्थूल शराव नाल वप्र विमान सुख प्रत्यय शूल वज्र कटक कण्टक कपर्द शिखर कल्क नाट मस्तक वलय कुसुम

हत्थ पङ्क कुण्डल किरीट कुसट अर्बुद अङ्कुश तिमिर आश्रम भूषण दूष्यास सकुल वसन तडाग पिटक विटङ्क विडङ्ग पिण्याक माष कोश(ष) फलक दिन दैवत पिनाक समर स्थाणु अनीक उपवास शाक कर्पास विशाल चषाल खण्ड दर विटप रण वल मक स्थाल हस्त आर्द्र फल मूल ताण्डव गाण्डीव मण्डप पटह सौध योध पार्श्व शरीर फल ह्रद पुर राष्ट्र विम्ब अम्बर कृत्रिम कुक्कुट कुडप कवट खण्डल तोमर तोरण मस्तक पल्लक पुच्छ मध्य बाल व्याल वल्मीक वर्ष वस्त्र वस्तु देह उद्यान अट्टोग स्नेह स्तेन स्तन स्वर संगम निम्ब क्षेम शूक चत्व पवित्र यौवन कलह पालक मूषिक मण्डल वल्कल कुञ्ज विहार लोहित विषाण भवन अरण्य पुलिन हद आसन ऐरावत मूर्ष तीर्थ लोमश तमाल लोह दण्डक शपथ प्रतिसर दारु धनुष् मान वर्त्मन् कूर्च तण्डुक मठ सक्थ ओदन प्रवाल शकट अपराह्ण नीड शकल तण्डुल । अर्द्धर्चादिः ।

अत एव "अर्द्धर्चादौ इतादीनां पुंस्त्वार्थं वैदिकं ध्रुवम् तथोक्तमिह लोकेऽपि तच्चेदृक्यस्तु शेषवत्" इत्यमरशेषोक्तमतो यथोक्तविषयत्वमवगम्यते तत्र इतादीनामिहोक्तेरेषां लौकिकप्रयोगविषयत्वमपीति अमरोक्तं चिन्त्यमूलमिति भेदः ।

कबन्धौषधायुधान्ताः । ५ ।

कबन्धः कबन्धम् औषधः औषधम् आयुधः आयुधम् अन्तः अन्तम्

दण्डमण्डखण्डाग्रवसैन्धवपार्श्वकाग्राङ्कुराकाग्रकुशकुलिशाः । ६ ।

एते पुंनपुंसयोः स्युः । दण्डः दण्डम् "कृगो रामश्च्ते दर्भे योक्षे क्षीमे कृयस्त्रे" इत्युक्तार्थेषु पुमान् शलाकावाची तु स्त्रियां जानपदादित्वात् (४,१,४२) अयोविकारे ङीष्विधानात् कुशी । अयोविकारभिन्ने तु टाप् कुशा । अत एव "अतः शकलीत्यादि (२,३,४८)सूत्रे कुशाकर्षीति, शारीरकसूत्रे च "क्षानौ तृणायनग्रन्थेषत्वात् कुशाच्छन्दः" इति स्त्रीत्वप्रयोगः ।

गृहमेहदेहपट्टपटहाटापदार्बुदककुदाश्च । ७ ।

एते उक्तलिङ्गाः स्युः । गृहं गृहः । मेहः मेहम् इत्यादि ।

इति पुंनपुंसकलिङ्गानुशासनम् ।

स्त्रीलक्षता स्त्रीनपुंसकलिङ्गं विशिष्य नोक्तम् अमरसिंहेन तु सूत्रस्वरसात् तदविशिष्टतयाऽभिहितं तदिहाभिधीयते ।

"स्त्रीनपुंसकयोर्भावकर्मिययोः क्यञ् क्वचिच्च वुञ्" । इति भावकर्मणोर्विहितक्यञन्तस्य स्त्रीनपुंसकलिङ्गत्वं तच्च पूर्वसूत्रमपि अवसरप्राप्ततया ज्ञानलौकर्यार्थमिह पुनरुच्यते । गुणवचनब्राह्मणादिभ्यः कर्मणि चेति चकारात् भावे विहितः ष्यञ् वुञ् च क्वचित् स्त्रीनपुंसकयोः स्यात् । उचितस्य भावः कर्म वा औचित्यं औचितो एवं चातुर्यं चातुरी माधुर्यं माधुरी । क्वचिदित्युक्तेः अर्हतो भावः आर्हन्त्यमेव तत्र अर्हतो नुम् चेति नुम् । वुञ्, आहोपुरुषिका चौरिका मैथ्योपाध्यायिका, गार्गिकया ज्ञायते इति । क्वचित्युक्तेः रामणीयकं कामनीयकमित्यादौ "योपधाद्गुरूपोत्तमात्"(५,१,१३२) इति वुञन्तस्य स्त्रीत्वमेव । भावकर्मणोरित्युक्तेः स्वार्थे ष्यञ् स्त्रीत्वे एव चातुर्वर्ण्यं त्रैलोक्यम् ।

"षष्ठ्यन्तप्राक्पदाः सेनाच्छायाशालासुरानिशाः इति"

षष्ठीसमासनिष्पन्नाः सेनाद्यन्ताः स्त्रीनपुंसकलिङ्गाः स्युः । मनुष्यसेना मनुष्यसेनम्, हस्तच्छाया हस्तच्छायम्, यवसुरा यवसुरं, गोशाला गोशालम्, अनिशा अनिशम् ।

"आबन्नन्तोत्तरपदो द्विगुश्चापुंसि नञ् लुक्" इति च । आबन्तं अनन्तञ्च उत्तरपदं यस्य तादृशो द्विगुः स्त्रीनपुंसकयोः तत्र च अनन्तस्य नञ् लुप् च । त्रिखट्वं त्रिखट्वी । त्रितक्षं त्रितक्षी । एतच्च पूर्वं प्रायेणोक्तम् प्रपञ्चार्थमिहोपन्यस्तम् ।

स्त्रीनपुंसकलिङ्गानुशासनम् ।

अविशिष्टलिङ्गम् । १ ।

नास्ति विशिष्टं लिङ्गं तत्कार्यं च यस्य । इत ऊर्ध्वं वक्ष्यमाणाः शब्दा विशिष्टलिङ्गकार्यशून्याः विशिष्टलिङ्गशून्याश्च तेन त्रिलिङ्गाः स्युः ।

अव्ययडतियुष्मदस्मदः । २ ।

चादयोऽव्ययशब्दाः डतिप्रत्ययान्ता, युष्मदस्मच्छब्दौ च विशिष्टलिङ्गकार्यशून्याः स्युः । उच्चैः तरुः लता, मन्दिरं वा । कति पुरुषाः स्त्रियः वस्त्राणि वा । त्वं पुमान् त्वं स्त्री त्वं कुलम् । अहं पुमान् स्त्री, कुलं वा ।

ष्णान्ता संख्या । ३ ।

षान्तनान्तसंख्यावाचकाः शब्दाः अविशिष्टलिङ्गकार्याः स्युः । पञ्च षट् पुरुषाः स्त्रियः कुलानि वा । ष्णान्तेति विशेषणात् त्रिदाः संख्याः त्रिलिङ्गाः विशिष्टलिङ्गकार्यवन्तः । एकः पुमान् एका स्त्री एकं कुलं द्वौ द्वे द्वे । त्रयः तिस्रः तीणि वा ।

गुणवचनञ्च । ४ ।

गुणवाचकाः शब्दाः गुणिपरत्वे लिलिङ्गाः स्युः । शुक्लः पटः शुक्ला शाटी शुक्लं वस्त्रम् । गुणपरत्वे तु यथाप्राप्तं शुक्ल इत्यादयेव अत एव "गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति" इत्यमरः ।

क्तत्याच्च । ५ ।

क्तेति वक्तव्यवचनं क्तसामान्योपलक्षणं तच्चासति बाधके कर्त्राद्यर्थे लिलिङ्गाः स्युः । तथा च भावे विहितस्त्रीत्वादेः स्त्रीत्वस्य, वजादेश्च पुंस्त्वस्य विशिष्योक्तेस्तेनास्य बाधः । तत्र कर्तरि-भव्यः गेयः पाठकः गायक इत्यादयः लिलिङ्गाः । कर्मणि-स्तोतव्यः स्तवनीयः स्तुत्य इत्यादयः । अत एव "क्तः कर्तर्य-संज्ञायां क्त्याः कर्मणि कर्तरि" इत्यमरोक्तिः । तत्र क्त-स्थल उत्तरवाक्यस्थं कर्मणीति पदमाकृष्यते । तथा च कर्तरि कर्मणि च क्तः तत्तदर्थे क्त्याच्च लिलिङ्गाः स्युः ।

करणाधिकरणयोर्ल्युट् । ६ ।

करणे अधिकरणे च विहितल्युडन्तास्त्रिलिङ्गाः स्युः । ल्युडन्त-त्वेनक्लीवत्वे प्राप्ते लिलिङ्गतार्थं सूत्रम् । तत्र करणे—देव-यजनः, प्रमाणी, साधनम् प्रमाणम् । अधिकरणे पशुसंज्ञपनो वत्सः इष्टा स्त्री ङीप् । सत्रे नपुंसकम् ।

सर्वादीनि सर्वनामानि ।

सर्वविश्वेत्यादीनि सर्वनामसंज्ञकानि लिलिङ्गानि स्युः । सर्वः सर्वा सर्वम्, विश्वः विश्वा विश्वम् । युष्मदस्मदोस्तु सर्व-नामत्वेऽपि विशेषाभिधानात् न लिङ्गविशेषकार्यमिति भेदः ।

अमरवार्तिकाद्यनुसारेण अत्रेदमधिकमुच्यते ।
"परं लिङ्गं स्वप्रधाने इन्द्वे तत्पुरुषेऽपि तत् ।
अर्थान्ताः प्राग्वहंप्राप्तापन्नपूर्वाः परोपगाः ।
तद्धितार्थौ द्विगुः संख्यासर्वनामसदन्तकाः ।
बहुव्रीहिरदिङ्नाम्नासञ्चेयं तदुदाहृतम् ।
गुणद्रव्यक्रियायोगोपाधयः परगामिनः ॥

तत्र परवल्लिङ्गं "इन्द्वतत्पुरुषयोः" (२,४,२६ सू०) इति इन्द्वतत्पुरुषयोः उत्तरपदलिङ्गसमानलिङ्गत्वविधानेऽपि "स नपुं-सकम्" (२,४,२७ सू०) इति समाहारद्विगुद्वन्द्वयोर्नपुंसकत्वस्य विधानात् स्वप्रधानं इत्युक्तम्, समाहारे तु तयोः संघातस्यैव प्राधा-न्यात् न स्वघटकपदार्थप्राधान्यमिति न तत्र परवल्लिङ्गता । "अर्थेन सह नित्यसमासो विशेष्यलिङ्गता च" (२,१,२६ वा०) इति द्विजाय यवमियमिदं वेति विग्रहे द्विजार्थः विशेष्यलिङ्गः ।

कुगतिप्रादयः (२,२,१८) प्रादिभिर्नित्यसमासनिष्पन्न-शब्दाः विशिष्टलिङ्गाः । तत्तत्ववार्तिकानि "प्रादयो गताद्यर्थे प्रथमया" (वा०) प्रगत आचार्यं प्राचार्यः प्रकृष्टः पितामहो प्रपितामहो प्रकृष्टं वस्त्रम् प्रवस्त्रम् सुवस्त्रमित्यादि । "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" (वा०) अतिक्रान्तः अतिक्रान्ता अतिक्रान्तं वा राजानम् अतिराजः अतिराजी अतिराजम् । परवल्लिङ्गतापवादः । एवमन्यत्राऽपि "अवादयः क्रुष्टाद्यर्थे तृतीयया" (वा०) अवक्रुष्टः कोकिलया अवकोकिलः अवकोकिला अवकोकिलम् । "परयादयो ग्लानाद्यर्थे चतुर्थ्या" (वा०) परिग्लानोऽध्ययनाय पर्य-ध्ययनस्त्रिलिङ्गः । "निरादयः क्रान्ताद्यर्थे पञ्चम्याः" (वा०) निष्क्रान्तो गृहात् इति विग्रहे निर्गृहः निर्गृहा निर्गृहम् । इति वार्तिकोक्तार्थविशेषे प्रादिसमासनिष्पन्ना अपि परगामिन-स्त्रिलिङ्गाः । अलंपूर्वोऽपि लिलिङ्गः । अलं कर्मणे, अलं-कर्मा लिलिङ्गः । "प्राप्तापन्ने च जीविकया" (२,२,४) इति विहितः प्राप्तापन्नपूर्वकजीविकान्वितस्तत्पुरुषस्त्रिलिङ्गः । प्राप्त-जीविकः प्राप्तजीविका प्राप्तजीविकम् एवम् आपन्नजीविकः । तद्धितार्थे द्विगुः पञ्चभिर्गोभिः क्रीतः पञ्चगुरित्यादिस्त्रिलिङ्गः । संख्यासर्वनाम्नां लिलिङ्गत्वं सूत्रकृतैव पूर्वं दर्शितम् । तदन्ता-नाममरेऽधिकोक्तिः परित्यक्तुं शक्यते तत्पुरुषे इन्द्वे च पर-वल्लिङ्गतयैव लिलिङ्गतापाप्तेः बहुव्रीहेस्त्रिलिङ्गत्वस्य अग्रे वक्ष्यमाणत्वाच्च । "अनेकमन्यपदार्थे" २,२,२४ सू०) बहु-व्रीहेरन्यपदार्थबोधकतया तल्लिङ्गत्वौचित्यात् "दिङ्नामान्य-तराले" (२,३,२६ सू०) इति दिङ्नामवाचित्वात् स्त्रीत्व-मेव न तु लिलिङ्गत्वम् । उत्तरपूर्वा । गुणद्रव्यादियोग उपाधिः शब्दप्रवृत्तौ निमित्तं येषां तादृशाः शब्दास्त्रिलिङ्गाः तत्र गुण-वचनानां, "गुणवचनश्चेति" क्रियावचनानां च "क्त्याच्च" इत्यनेन सूत्रकृतैवोक्तम् द्रव्यसंबन्धोपाधिकास्त्रिलिङ्गाः इत्येवाधिकम् दण्डोऽस्यास्तीति इनिः दण्डी दण्डिनी दाण्डिः, धनाद् धनवती धनवत् इत्यादि ।

अथाद्यन्तास्त्रेण रक्ताद्यर्थे त्रिलिङ्गभेदकाः ।

इत्यमरोक्तिः "तेन रक्तं रागात्" (४,२,१) इति रक्ताद्यर्थे रञ्जनद्रव्यवाचिन उत्तरे विहिताद्यन्ताः लिलिङ्गाः स्युः । कषायेण रक्तानि वस्त्राणि कषायाः पटः कषायी शाटी कषायं वस्त्रम् । आदिपदात् तदधिकारे "लाक्षारोचनाट्ठक्" (४,२,२,) इति ठगादयो गृह्यन्ते । लाक्षिकः रौचनिक-स्त्रिलिङ्गः । रक्तादीत्यादिपदात् क्रियाविशेषकर्मणि तत्कर्तरि वा ये अणादयो विहिता ये च सम्बन्धार्थे विहितास्ते सर्वेऽपि गृह्यन्ते । "नक्षत्रेण युक्तः कालः" (४,२,३) इत्यण् पुष्येण युक्तं पौषं लिलिङ्गम् । "इदं साम" (४,२,७) अण् वसिष्ठेन दृष्टं

साम, वासिष्ठं साम वासिष्ठी ऋक् वासिष्ठो मन्त्रः "कठेढक्" (४,२,८) कठिना दृष्टं काठेयम्। "वामदेवाड्ड्यड्ड्यौ"(४,२,९) वामदेव्यम्। "परिषदो ण्यः"(४,२,१०)वत्सेन परिषदो वात्स्यः। "तदधीते तद्वेद" (४,२,५९) व्याकरणमधीते वेद वा वैयाकरणः, इत्येवमध्ययनवेदनरूपक्रियादिकर्तरि विहितास्त्रिलिङ्गा एव "वास्य देवता" (४,२,२४) इत्यादिना विहिताश्चादयः पाशुपतम् नाथ-व्यम् ऐन्द्रम्। "तदस्य पण्यम् (४,४,५१) अपूपं पण्यमस्य आपूपिक इत्यादयो ज्ञाह्याः।

इति अविग्निष्टलिङ्गत्रिलिङ्गानुशासनम्।

इति पाणिनीयं लिङ्गानुशासनं समाप्तम्।

अकारादिक्रमेण पाणिन्यागमसिद्धप्रत्ययागमानां प्रयोगे परिनिष्ठितरूपाणि दृष्टप्रयोजन-सहितानि सोदाहरणानि प्रदर्श्यन्ते।

अ

अ अ भावार्थे कृत्प्रत्ययः। जिगमिषा चिकीर्षा।
अकङ् अक् आगमः अन्तादेशः। सौधातकिः वैयासकिः।
अकच् अक आगमः अन्तोदात्तता। सर्वकः उच्चकैः।
अकार अ अपत्यवत्तुल्ये तद्धितः। उडुलोमाः। भावे कृत्। जागरा।
अङ् अ भावे कृत्प्रत्ययः गुणाभावादि। भिदा छिदा।
अच् अस्त्यर्थे तद्धितः, अन्तोदात्तः। अर्शसः, कर्तरि कृत् प्रकृतिप्रत्ययसमुदायान्तोदात्तः। पचः देवः।
अञ् अ अपत्याद्यर्थे तद्धितः आदिवृद्धिः आद्युदात्तता। वैदः स्त्रियां ङीप् वैदी। औत्सः।
अट् अ आगमः आद्यवयवः। अभवत् अभूत् अभविष्यत्।
अठच् अठ घटाद्यर्थे तद्धितः अन्तोदात्तः। कम्मठः।
अण् अ अपत्याद्यर्थे तद्धितः आदिवृद्धिः। शैवः स्त्रियां ङीप् शैवी। कर्तरि कृत् वृद्ध्यादि। कुम्भकारः स्त्रियां टाप्।
अत् अ विभक्त्यर्थे तद्धितः स्वरितः अव्ययः। क्र। [उत्तरतः।
अतसुच् अतस् प्रथमाद्यर्थे तद्धितः अन्तोदात्तः। दक्षिणतः।
अति अत् परिमाणार्थे वर्गे तद्धितः। षष्टत् दशत् वर्गः।
अदन् अद् कर्तरि कृत् आद्युदात्तता हुम्। जरन् स्त्रियां ङी।
अथुच् अथु भावे कृत् सप्तदायान्तोदात्तता। वेपथुः वमथुः।
अदुक् अद् आगमः अन्तावयवः। एकाद्रविंशतिः एकाद्रविंशतिः।
अद्ड् अद् आगमः टिलोपः। कतरत् कतमत्।
अध्यै(न्) अध्यै तुमर्थे कृत्। पृषध्यै। निच्चे आद्युदात्तता। [नीत्वा रक्तं नीलम्।
अन् अ भागाद्यर्थे तद्धितः, आद्युदात्तता। द्वितीयो भागः।
अनङ् अन् समासान्तः, अन्तादेशः। पुष्पधन्वा।
अनि अनि भावे कृत् स्त्रियाम्। अजीवनिः।
अनिच् अन् समासान्तः, अन्तोदात्तः। सुधर्मा विधर्मा।
अनीयर् अनीय भावकर्मणोः कृत् उपोत्तमोदात्तः। भवनीयम्।
अप् अ समासान्तः अनुदात्तः। कल्याणपञ्चमाः, अन्तर्लोमः। भावे कृत्। करः गरः भवः प्रसवः।
अम् अस् वेदे एवागमः। नितरं नेके तु नितराम्।
अयङ् अय आगमः, अन्तादेशः। शय्यते शय्या।
अयच् अय अवयवे तद्धितः, अन्तोदात्तः। उभयम् इयम्।
असि अस् प्रथमाद्यर्थे तद्धितः अव्य०। पुरः अधः अवः।
असिच् अस् समासान्तः अन्तोदात्तः। अप्रजाः सुप्रजाः।
असुक् अस् आगमः अन्तावयवः। दध्यस्यति।
असुक् अस् आगमः अन्तादेशः। पुमांसौ पुमांसः।
असे(न्) असे तुमर्थे कृत् निच्चे आद्युदात्तः। शरदो जीवसे।
अस्ताति अस्तात् प्रथमाद्यर्थे तद्धितः अव्ययः। अधस्तात्।

आ

आकिनिच् आकिन् असत्तायार्थे तद्धितः अन्तोदात्तः। एकाकी। [उत्तरा।
आच् आ प्रथमाद्यर्थे तद्धितः अन्तोदात्तः अव्य०। दक्षिणा।
आट् आ आगमः आद्यावयवः। आतीत्।
आटच् आट मत्वर्थे तद्धितः अन्तोदात्तः। वाचाटः।
आति आत् प्रथमाद्यर्थे तद्धितः अव्य०। दक्षिणात् उत्तरात्।
आनङ् आन् आगमः अन्तादेशः। पिता स्वसा उक्षणाः।
आनुक् आनु आगमः अन्तावयवः। इन्द्राणी वरुणानी।
आपुक् आप् आगमः अन्तावयवः। सत्यापयति अर्थापयति।
आम् आम् आगमः। एधाञ्चकार एधामास।
आमिनिच् आमिन् मत्वर्थे तद्धितः अन्तोदात्तः। स्वामी।
आमु आम् आगमः अव्य०। नितरामु सुतरामु पचतितमाम्।
आय आय स्वार्थे धात्ववयवप्रत्ययः। गोपायति धूपायति।
आय्य आय्य शीलार्थे कृत् उणादि इत्येके। सूकृयाय्यः।

आरकन् आरक मत्वर्थे तद्धितः आद्युदात्तः । ऋक्षारकः ।
आरक् आर अपत्यार्थे तद्धितः आदिर्ञ्णिः अन्तोदात्तता । गौधारः । जाडारः ।
आरि आरि वर्षे इत्वर्थे तद्धितः अव्ययः । परारि ।
आरु आरु शीलार्थे कर्तरि क्रत् । गरारुः वन्दारुः ।
आलच् आल मत्वर्थे तद्धितः अन्तोदात्तः । वाचालः ।
आलुच् आलु शीलार्थे कर्तरि क्रत् समुदायान्तोदात्तता । कृपयालुः । मत्वर्थे तद्धितः अन्तोदात्तः । कृपयालुः ।
आहि आहि प्रथमाद्यर्थे तद्धितः अव्य० । दक्षिणाहि ।

इ

इक् इ धातुनिर्देशे क्रत् गुणवृद्ध्यभावः । पचिः भिदिः ।
इकट् इक चौरे तद्धितः । ऐकागारिकः स्त्रियां ङीप् ।
इच् इ समासान्तः अन्तोदात्तः अव्य० । दक्षादक्षिञ् ।
इञ् इ प्रत्याख्यानार्थे क्रत् इङ्गादि आद्युदात्तः । कांकरिमकार्षीः । अपत्याद्यर्थे तद्धितः आदिर्ञ्णिः । कार्ष्णिः ।
इट् इ आगमः आद्यावयवः । भविता रोदिति । [स्रावकितः
इतच् इत अस्य जातेऽर्थे तद्धितः अन्तोदात्तः । तारकितः ।
इत्नु इत्नु शीलार्थे कर्तरि क्रत् । स्तनयित्नुः गदयित्नुः ।
इथुक् इथ् डटि आगमः अन्तावयवः । यावतिथः तावतिथः ।
इन इन नासिकानत्वर्थे समासान्तः । चिक्किनम् ।
इन् इ कर्तरि क्रत् आद्युदात्तः । स्तम्बकरिः नाथकरिः ।
इनङ् इन ढकि आगमः अन्तादेशः । कल्याणिनेयः ।
इनच् इन मत्वर्थे तद्धितः अन्तोदात्तः । फलिनः ।
इनि इन् शीलार्थे कर्तरि क्रत् । प्रजवी । मत्वर्थे तद्धितः । धनी ज्ञानी । [आदिर्ञ्णिः । सांराविणम् ।
इनुण् इन् अभिव्याप्तौ भावे क्रत् इङ्गादिः । ततः स्वार्थे अण्
इम इम तज्जाते तद्धितः । पाकिमः त्यागिमः । [लघिमा ।
इमनिच् इमन् भावे कर्मणि च तद्धितः अन्तोदात्तः । मृदिमा ।
इयङ् इय् अन्तादेशः । स्त्रियः धियः शिश्रियतुः ।
इल इल चतुरर्थां तद्धितः । काशिलः गुग्गिलः यक्षिलः ।
इलच् इल मत्वर्थे तद्धितः अन्तोदात्तः । फेनिलः पिच्छिलः । स्वार्थे तद्धितः पूर्वपदलोपश्च । दन्तिलः ।
इष्ठन् इष्ठ स्वार्थप्रकर्षे तद्धितः आद्युदात्तः । लघिष्ठः करिष्ठः ।
इष्णुच् इष्णु शीलार्थे कर्तरि क्रत् समुदायान्तोदात्तः । निराकरिष्णुः अलङ्करिष्णुः ।

ई

ईकक् ईक प्रहरणार्थे इवार्थे च तद्धितः आदिर्ञ्णिः अन्तोदात्तः । शाक्तीकः । लौहितीकः स्फाटिकीकः ।
ईकञ् ईक स्वार्थे तद्धितः आदिर्ञ्णिः । आद्युदात्तः । द्वैतीयीकः तार्तीयीकः ।
ईकन् ईक परिमाणार्थे तद्धितः आद्युदात्तः । खारीकम् । अर्धखारीकम् ।
ईट् ई आगमः आद्यावयवः । अचेतीत् अवीति स्रवीति ।
ईमसच् ईमस मत्वर्थे तद्धितः अन्तोदात्तः । मलीमसः ।
ईयङ् ईय धात्वंशप्रत्ययः गुणवृद्ध्यभावः । ऋतीयते ।
ईयसुन् ईयस् स्वार्थप्रकर्षे तद्धितः आद्युदात्तः । श्रेयान् स्त्रियां ङीप् ।
ईरच् ईर मत्वर्थे तद्धितः अन्तोदात्तः । आखनीरः ।
ईरन् ईर मत्वर्थे तद्धितः आद्युदात्तः । काण्डीरः ।

उ

उ उ कर्तरि क्रत् । जिगमिषुः आशंसुः भिक्षुः विन्दुः इच्छुः ।
उकञ् उक कर्तरि क्रत् वृद्ध्यादिः । पाठकः स्रावुकः ।
उण् उ संप्रदानापादानभिन्ने कर्त्रादौ क्रत् वृद्ध्यादिः । कारुः ।
उति उत् वर्षे इत्वर्थे तद्धितः अव्ययः । परुत् ।
उम् उ आगमः अन्त्यादचः परः । अवोचत् ।
उरच् उर मत्वर्थे तद्धितः अन्तोदात्तः । दन्तुरः ।
उवङ् उव अन्तादेशः । भुवः । लुलुवतुः ।
उसि उस् करणादौ क्रत् । वक्षुः यजुः ।

ऊ

ऊक ऊक शीलार्थे कर्तरि क्रत् । जागरूकः दंदशूकः ।
ऊङ् ऊ स्त्रीप्रत्ययः ङित् चिह्नार्थः । कुरूः कर्कन्धूः ।
ऊठ् ऊ आदेशः । अव-ऊः ज्वर-जूः दिव-द्यूतम् ।
ऊलच् ऊल समूहाद्यर्थे तद्धितः अन्तोदात्तः । बाह्लः बलूलः ।

ए

एण्य एण्य भवाद्यर्थे तद्धितः । प्राङ्गेण्यः ।
एत्य एत्य भवाद्यर्थे तद्धितः । दूरेत्यः ।
एद्यवि एद्यवि अद्यनीत्यर्थे तद्धितः अव्ययः । परेद्यवि ।
एद्युसुच् एद्युस् अद्यनीत्यर्थे तद्धितः अन्तोदात्तः अव्ययः । परेद्युः अन्येद्युः उभयेद्युः । [द्वेधा त्रेधा ।
एधाच् एधा प्रकारार्थे तद्धितः अन्तोदात्तः अव्ययः ।
एनप् एन प्रथमासप्तम्यर्थे तद्धितः अव्ययः अनुदात्तः । दक्षिणेन उत्तरेण ।
एलु एलु असहनार्थे तद्धितः । क्ष्मेलुः ।

ऐ

ऐ ऐ ङीपि स्त्रियाम् आदेशः । पूतक्रतायी अग्नायी ।
ऐरक् ऐर अपत्यार्थे तद्धितः आदिर्ञ्णिः अन्तोदात्तः । चाटकैरः

औ

औ औ-स्त्रियां ङीपि आदेशः । मनावी ।

क

क अ कर्तरि क्त गुणाभावादि । किरः प्रः प्रस्थः । घञर्थे भावे क्त । उपप्नः निप्नः । चतुरर्थ्यादौ तद्धितः न कित् । अशनकः शरकः । अज्ञाताद्यर्थे—अश्वकः । कुत्सिते—अश्वकः । स्वार्थे—अधिकः । गोत्वे—तूष्णीकः ।

कक् क चतुरर्थ्यां तद्धितः आदिवृद्धिः अन्तोदात्तः । पाराहकः । [स्त्रियां ङीप् ।

कत्र् अ कर्मकर्तरि क्त गुणाभावादि आद्युदात्तः । अन्याङ्गयः

कटच् कट समूहाद्यर्थे तद्धितः न कित् अन्तोदात्तः । समूहे अविकटम् । स्वार्थे सङ्कटम् विकटम् । [रथकट्या ।

कट्टच् कट्ट समूहार्थे तद्धितः न कित् अन्तोदात्तः स्त्रियाम् ।

कथे(न्) अध्व तुमर्थे क्त गुणाभावादि नित्त्वे आद्युदा० अव्ययः । आङ्वध्वै ।

कन् क अज्ञाताद्यर्थे तद्धितः न कित् । मद्रकः देवदत्तकः ।

कप् क समासान्तत्वात् तद्धितत्वेन न कित् अनुदात्तः । व्यूढोरस्कः अनर्थकः । नदीभाटकः ।

कमुल् अम् तुमर्थे क्त प्रत्ययात् पूर्वंसुदात्तः । प्रलुपं नायकत् प्रलोपितुमित्यर्थः ।

कल्पप् कल्प ईषदसमाप्त्यर्थे तद्धितः न कित् अनुदात्तः । पटुकल्पः । तिङन्तु उत्कर्षे । पचतिकल्पम् ।

कसुन् अस् तुमर्थे क्त आद्युदात्तः । ईश्वरो विलिखं विलिखितुमित्यर्थः । [श्रियसे ।

कसेन् असे तुमर्थे क्त आद्युदात्तः अव्ययः । भवानिदं

काण्ड काण्ड समूहार्थे तद्धितः न कित् । दूर्वाकाण्डम् ।

कानच् आन लिङ्वत् न गुणः क्त सप्तदावान्तोदात्तः । चक्राणः ।

काम् का आगमः अन्त्यादचः परं स्वार्थे तद्धितः अव्ययः । तूष्णीकाम् । [दात्तः । पुत्रकाम्यति ।

काम्यच् काम्य इच्छार्थे धात्वंशप्रत्ययः न कित् सप्तदावान्तोदात्तः ।

कार कार स्वरूपार्थे तद्धितः न कित् । अकारः ककारः ।

कि(न्) इ कर्तरि क्त लिड्वत् गुणाभावादि । नित्त्वे आद्युदात्तः । यपिः अग्निः चक्रिः । कर्तरि क्त । दधिः दद्धिः । कर्मण्युपपदेऽधिकरणार्थे क्त । जलधिः ।

कुक् क आगमः अन्त्यावयवः । स्वकीयं परकीयम् । वातकी अतीसारकी । [अवकुटारम् ।

कुटारच् कुटार अवाचीनार्थे तद्धितः न कित् अन्तोदात्तः ।

कुणच् कुण पाकार्थे तद्धित न कित् अन्तोदात्तः । पीलुकुणः ।

कुरच् उर कर्मकर्तरि क्त गुणाभावादि सप्तदावान्तोदात्तः । विदुरः भिदुरः । [पञ्चत्वः पचति

क्तवतुच् क्तवत् क्रियापौनःपुन्ये तद्धितः न कित् अन्तोदात्तः ।

केन्य इ क्त्वार्थे क्त गुणाभावादि आद्युदात्तः अव्ययः । अवगाहे

केन्य एन्य क्त्वार्थे क्त गुणाभावादि अव्य० । दिदृक्षेण्यः ।

केलिमर् एलिम कर्मकर्तरि क्त गुणाभावः । उपोत्तमोदात्तः । भिदेलिमः ।

क्त त कर्मभावादौ क्त गुणाभावादि । भूतं ज्ञातं विदितं । अधिषि संज्ञायाञ्च । देवदत्तः विष्णुरातः ।

क्तवतु तवत् कर्तरि क्त गुणाभावादि स्त्रियां ङीप् । गतवान् ।

क्तिच् ति आशीर्वादे संज्ञायां क्त गुणाभावः सप्तदावान्तोदात्तः । रन्तिः, भूतिः ।

क्तिन ति भावे क्त गुणाभावादि आद्युदात्तः । क्षान्तिः मतिः ।

क्ति ति तल्लातेऽर्थे क्त गुणाभावादि ततः स्वार्थे मप् अनुदात्तः । उद्गिमः पक्किमः ।

क्त्वा त्वा प्रकृत्यर्थे क्त गुणाभावादि । कृत्वा भूत्वा ।

क्नु नु शीलार्थे कर्तरि क्त गुणाभावः । स्नद्नुः स्निग्नुः स्नक्नुः ।

क्मरच् मर शीलार्थे कर्तरि क्त गुणाभावः सप्तदावान्तोदात्तः । स्मरः । क्षमरः ।

क्यच् य, इच्छार्थे धात्वंशप्रत्ययः सप्तदावान्तोदात्तः । पुत्रीयति

क्य(ङ)घ् य आचाराद्यर्थे धात्वंशप्रत्ययः ङित्त्वे आत्मनेपदम् । अश्वायते । णित्त्वे उभयपदम् । लोहितायते-ति

क्यप य, भावकर्मादौ क्त गुणाभावः अनुदात्तः । कृत्यम् स्तुत्यः । भावे स्त्रियाम् । कृत्या ।

क्रु र शीलाद्यर्थे क्त गुणाभावः । भीरुः ।

क्रुकन् रुक शीलाद्यर्थे क्त गुणाभावः आद्युदात्तः । भीरुकः

क्लुकन् लुक शीलाद्यर्थे क्त गुणाभावादि आद्युदात्तः । भीलुकः

क्वनिप् वन् शीलाद्यर्थे क्त गुणाभावादि अनुदात्तः । सुदामा सुधीवा ।

क्वरप् वर शीलाद्यर्थे क्त गुणाभावः अनुदात्तः । स्वत्वरः इत्वरः गत्वरः । स्त्रियां ङीप् । [मेधिवान् ।

क्वसु वस् लिङ्वत् क्त गुणाभावादि स्त्रियां ङीप् । अग्निवान्

क्विन्(प) व् तस्य लोपः कर्तरि क्त गुणाभावादि । नित्त्वे आद्युदात्तः कृत्वस् । डक् स्रुक् । णित्त्वे अनुदात्तः । प्रस्थः भावाधिकरणादौ स्त्रियाम् । संपद् संसद् ।

केस से तुमर्थे क्त गुणाभावः । प्र-इष-प्रेषे ।

ख

ख ख-ईन भवाद्यर्थे तद्धितः न खित् । कुलीनः ।

खच् अ कर्त्तरि कृत् ससुदायान्योदात्तः सुम् । प्रियंवदः । स्तनन्धयः ।

खञ् ख-ईन भवार्थे तद्धितः न खित् आदिर्ञिदिञ्दिः आद्युदात्तः । भाङ्गाकुलीनः गौडीनः स्त्रियां टाप् ।

खण्ड खण्ड समूहार्थे तद्धितः न खित् । इक्षुखण्डः ।

खमुञ् अम् अभूततद्भावे आक्रोशे भावादौ कृत् खित् सुम् आद्युदात्तः ञ्दिः । चौरङ्कारभाक्रोशति । [करम् ।

खल् अ, भावादौ कृत् पूर्व्वसुदात्तः । दुर्भवं सुकरम् ईषत्-

खश् अ कर्त्तरि कृत् खित् सुम् । जनमेजयः नाडिन्धमः ।

खिष्णुच् इष्णु शीलाद्यर्थे कृत् खित् सुम् ससुदायान्योदात्तः । आदर्शम्भाविष्णुः । [प्रियम्भावुकः ।

खुकञ् उक शीलाद्यर्थे कृत् खित् सुम् वृद्धिः आद्युदात्तः ।

ख्युन् यु-अन करणभावयोः कृत् खित् सुम् आद्युदात्तः । भद्रङ्करणम् ।

ग

गोयुगच् गोयुग स्थानार्थे तद्धितः न गित् अन्योदात्तः । गोगोयुगम् । [गोगोड्यम् ।

गोष्ठच् गोष्ठ स्थानार्थे तद्धितः न गित् अन्योदात्तः ।

ग्मिनि ग्मिन् मत्वर्थे तद्धितः न गित् । वाग्मी ।

ग्स्नु स्नु-शीलाद्यर्थे कृत् गित् गुणाभावः । जिष्णुः स्नात्नुः ।

घ

घ अ भावादौ कर्त्तरि च कृत् । गोचरः उरच्खदः । देवताद्यर्थे तद्धितः न घित् घ-ईय । महेन्द्रियम् यज्ञियम् । [यम्

घच् घ-ईय चिकित्स्यार्थे तद्धितः न घित् अन्योदात्तः । वैद्यित्रि-

घञ् अ-भावादौ कृत् चजोः कुः अन्योदात्तः ञ्दिः आद्युदात्तः । पाकः त्यागः ।

घन् घ-ईय देवताद्यर्थे तद्धितः न घित् आद्युदात्तः । शुक्रियम् । [भत्वम् । ऋत्वियम् ।

घस् घ-ईय अस्य प्राप्तेऽर्थे तद्धितः वेदे, न घित् सित्त्वात्

घिनुण् इन् शीलाद्यर्थे कृत् वृद्ध्यादि चजोः कुत्वम् । त्यागी रागी योगी भोगी । [दात्तः । भङ्गुरम् ।

घुरच् उर शीलाद्यर्थे कृत् चजोः कुत्वम् । ससुदायान्यो-

ङ

ङीन् ई शारङ्गादिभ्यः स्त्रीप्रत्ययः । ससुदायान्योदात्तः । शारङ्गरवी नारी । [ङ्गी ।

ङीप् ई स्त्रीप्रत्ययः अनुदात्तः । कर्त्री भेत्री भवती ।

ङीष् ई स्त्रीप्रत्ययः ञित् चिह्नार्थः । कल्याणी सारङ्गी । [यज्वा ।

ङ्वनिप् वन् भूते कर्त्तरि कृत् गुणाभावादि अनुदात्तः । हत्वा

च

चणप् चण वित्तार्थे तद्धितः वकारप्रश्लेषात् न चित् अनुदात्तः । विद्याचणः ।

चरट् चर भूतपूर्व्वार्थे तद्धितः वकारप्रश्लेषात् न चित् स्त्रियां ङीप् । आढ्यचरः । [निघ्नानः ।

चानश् आन शीलाद्यर्थे कृत् ससुदायान्योदात्तः । भुञ्जानः ।

चाप् आ यङन्तात् स्त्रीप्रत्ययः चित् अन्योदात्तः कारीषगन्ध्या । आवश्या । [अभावि ।

चिण् इ-आगमः वृद्ध्यादि ससुदायान्योदात्तता । अदायि

चुञ्चुप् चुञ्चु वित्तार्थे तद्धितः वकारप्रश्लेषात् न चित् । अनुदात्तः । विद्याचुञ्चुः ।

च्फञ् फ-आयन अपत्यार्थे तद्धितः वृद्धिः चित्त्वात् अन्योदात्तः । कौञ्जायनः ।

च्वि वि, तस्य लोपः अभूततद्भावे तद्धितः अव्ययः चित् अन्योदात्तः । श्वेतीभवति । श्वेतीकरोति ।

छ

छ छ-ईय भवार्थे तद्धितः न छित् । त्वदीयः ।

छण् छ-ईय अपत्यार्थे तद्धितः न छित् वृद्धिः । पैलच्छलीयः ।

छस् छ-ईय भवार्थे तद्धितः न छित् सित्त्वात् पूर्व्वस्य पदत्वम् । भवदीयः ।

ज

जातीयर् जातीय प्रकारे तद्धितः ब्प्रश्लेषात् न जित् उपोत्तमोदात्तः । पटुजातीयः ।

जाहच् जाह-मूलार्थे तद्धितः ब्प्रश्लेषात् न जित् अन्योदात्तः । कर्णेजाहम् ।

ञ

ञ अ भवार्थे तद्धितः ञ्दिः आद्युदात्तः । पौर्वशालः ।

ञिठ ठ-इक भवार्थे तद्धितः ञ्दिः आद्युदात्तः । कार्षिकः ।

ञ्य य-भवार्थे तद्धितः वृद्धिः आद्युदात्तः । कौविदार्थं गाम्भीर्यं पाञ्चजन्यः प्रागाद्यः ।

ञ्यङ् य-भवार्थे तद्धितः वृद्धिः आद्युदात्तः । सौवीर्यः कौसल्यः । ङित्करणं यङ्लोपेति चाविधानार्थम् ।

ट

ट अ-कर्त्तरि कृत् स्त्रियां ङीप् । कुरुचरः सेनाचरः पुरःसरः ।

टक् अ-कर्त्तरि कृत् गुणाभावादि स्त्रियां ङीष् । सामगः सुरापः ।

टच् अ समासान्तः स्त्रियां ङीप् । अन्योदात्तः । वङ्गराजः ।

टाप् आ स्त्रीप्रत्ययः अनुदात्तः । अजा जिगमिषा । [निकः ।

ठ्विन् ठ-इक, दानसंप्रदानार्थे तद्धितः आद्युदात्तः । ओद-

टीटच् टीट-नासिकानतार्थे तद्धितः ङ्म्प्रत्ययात् न टित् अन्तोदात्तः । अवटीटम् । [शार्केण्यः ।
टेण्यन् एण्य स्वार्थे तद्धितः वृद्धिः आद्युदात्तः स्त्रियां ङीप् ।
ण्य य-देवतार्थे तद्धितः आदिवृद्धिः स्त्रियां ङीए । सौम्यम् ।
ण्यु(ल्) यु-अन भवार्थे तद्धितः टुडागमः स्त्रियां ङीप् ञित्त्वे पूर्वोदात्तः । सायन्तनः चिरन्तनः ।

ठ

ठ ठ-इक स्वार्थे तद्धितः न ठित् । देवदत्त एव देविकः दत्तिकः ।
ठक् ठ-इक अपत्याद्यर्थे तद्धितः आदिवृद्धिः अन्तोदात्तः स्त्रियां ङीप् । रैवतिकः रौचनिकः ।
ठच् ठ-इक चतुरर्थ्यां तद्धितः अन्तोदात्तः । कुसुदिकः ।
ठञ् ठ-इक इस्, उस्, उ, ऋ, इत्यन्तात् परः क, भवार्थे तद्धितः स्त्रियां ङीप् आद्युदात्तः । दैनिकः नैगिकः धैनुकम् पैत्रकम् ।
ठन् ठ-इक मत्वर्थादौ तद्धितः आद्युदात्तः । धनिकः धतिकः ।

ड

ड अ कर्तरि कृत् अभत्वेऽपि टिलोपः । अन्नगः दूरगः ।
डच् अ समासान्तः तद्धितः अन्तोदात्तः । द्विधाः पञ्चधाः ।
डट् अ पूरणार्थे तद्धितः स्त्रियां ङीप् । एकादशः द्वादशः ।
डतण् अ परिमाणार्थे तद्धितः वृद्धिः । त्रैगं चात्वारिंशम् ।
डतमच् अतम बहूनां मध्ये एकोत्कर्षे तद्धितः आद्युदात्तः । कतमः । [कतरः ।
डतर अतर द्वयोर्मध्ये एकोत्कर्षे तद्धितः अन्तोदात्तः ।
डति अति पूरणार्थे तद्धितः बहुवचनान्तः । कति यति तति ।
डर अर शीलार्थे कर्तरि कृत् । आखरः ।
डवतुप् अवत् कर्तर्थे कृत् अनुदात्तः स्त्रियां ङीए । भवान् ।
डाच् आ अभूततद्भावादौ तद्धितः अन्तोदात्तः अव्ययः । पटपटाकरोति वीजाकरोति ।
डाप् आ स्त्रीप्रत्ययः अनुदात्तः । सीमा सीमे सीमाः ।
डामच् आमह-पितर्थ्यर्थे तद्धितः अन्तोदात्तः । पितामहः मातामहः ।
डिनि इन् स्त्रीभेदार्थे तद्धितः । पञ्चदशी (पञ्चः) त्रिंशी (भावः)
डिमच् इम भवार्थे तद्धितः अन्तोदात्तः । आदिमः ।
डु उ कर्तरि कृत् । विभुः प्रभुः ।
डुपच् उप स्वार्थे तद्धितः अन्तोदात्तः । कृतपः ।
डुमसुन् उमस् कर्तरि कृत् आद्युदात्तः अभत्वेऽपि टिलोपः । पुनातीति पुमान् पुंसः ।
डुलच् उल भवार्थे तद्धितः अन्तोदात्तः । माहुलः ।
ड्मतुप् मत् चतुरर्थ्यां तद्धितः स्त्रियां ङीप् अनुदात्तः । कङ्कुमान्

ढ

ढ(त्) य दृष्टसाम्यार्थे तद्धितः ञित्त्वे स्वरितः । वामदेव्यम् ।
ढ्रण् य साध्वाद्यर्थे वेदे तद्धितः आदिवृद्धिः । पाथ्यः नाद्यः ।
ढुलच् बल मत्वर्थे तद्धितः अन्तोदात्तः । नड्वलः ।
ढ्वन् यु-अक-आकीयसद्धित आद्युदात्तः । लिंशकः लिंशकः ।

ढ

ढ ढ-एय साध्वर्थे तद्धितः न ढित् । सभेयः । शिलेयः ।
ढक् ढ-एय अपत्याद्यर्थे तद्धितः वृद्धिः अन्तोदात्तः स्त्रियां ङीप् । माङ्गेयः गाङ्गेयः कादृवेयः । मादेयः ।
ढकञ् ढ-एयक अपत्याद्यर्थे तद्धितः वृद्धिः आद्युदात्तः स्त्रियां ङीप् । बाह्वृकेयकः । [ङीप् । गार्ग्येयः ।
ढञ् ढ-एय अपत्याद्यर्थे तद्धितः वृद्धिः आद्युदात्तः स्त्रियां ङीप् । नाडेयः ।
ढिनुक् ढिन्-एयिन् प्रोक्ताध्येतरि बह्वत्वे तद्धितः वृद्धिः अन्तोदात्तः । शागलेयिनः । [नाटेरः ।
ढ्रक् ढ्र-एर-अपत्यार्थे तद्धितः वृद्धिः अन्तोदात्तः । गौधेरः

ण

ण अ कर्तरि कृत् वृद्ध्यादि । ज्वालः व्याहः दायः ।
णच् अ भावे कृत् वृद्ध्यादि स्त्रीत्वम् तदन्तात् स्वार्थे अञ् आद्युदात्तः ङीप् । व्यावक्रोशी व्यातिहासी ।
णमुल् अम् भावे कृत् वृद्ध्यादि अव्ययः । कारंकारम् । अभ्यस्तानामाद्युदात्तः । चिकीर्षंचिकीर्षम् । [(पर्युसंधः)
णस् अ समूहार्थे तद्धितः वृद्धिः ञित्त्वात् न भत्वम् । पार्श्वम्
णिङ् इ पुच्छादितः धात्वंगप्रत्ययः आत्मनेपदम् । उत्पुच्छयते संचीवरयते । [कारयति भावयति ।
णिच् इ प्रेरणे धात्वंगप्रत्ययः वृद्ध्यादि समुदायान्तोदात्तः ।
णिनि इन् कर्तरि कृत् वृद्ध्यादि । याही स्वायी पायी ।
ण्य य अपत्याद्यर्थे तद्धितः वृद्धिः । दैत्यः सांकाश्यः ।
ण्यत् य कर्मभावयोः कृत् वृद्ध्यादि स्वरितः । कार्यम् हास्यम् वाच्यम् । कृत्यं भोग्यम् ।
ण्युट् यु-अन कर्तरि कृत् वृद्ध्यादि स्त्रियां ङीप् । गायनः ।
ण्वि वि-तस्य लोपः कर्तरि कृत् वृद्ध्यादि । सुखभाक् ।
ण्विन् वि-तस्य लोपः कर्तरि कृत् आद्युदात्तः वृद्ध्यादि । क्षेत्रवाही उक्थयासौ अवयाजौ ।
ण्वुच् वु अक पर्यायाद्यर्थे भावे कृत् वृद्ध्यादि समुदायान्तोदात्तः स्त्रियाम् । भवत आसिका ।
ण्वुल् वु अक रोगाख्यायां भावे कृत् वृद्ध्यादि अभ्यस्तानामाद्युदात्तः स्त्रियाम् । प्रवाहिका विचर्चिका ।

त

त त मत्वर्थे तद्धितः । श्रन्तः कन्तः ।

तप् त मत्वर्थे तद्धितः अनुदात्तः । पर्व्वतः मरुत्तः ।
तमट् तम-डटि आगमः आद्यवयवः । एकविंशतितमः । षष्टितमः । [विद्वत्तमः । पटुतमः ।
तमप् तम बहूनां मध्ये एकोत्कर्षे तद्धितः अनुदात्तः ।
तरप् तर द्वयोर्मध्ये एकोत्कर्षे तद्धितः अनुदात्तः । पटुतरः मृदुतरः । विद्वत्तरः । [जनता ।
तल् त-भावसमूहाद्यर्थे तद्धितः पूर्व्वस्योदात्तता । युक्तता देवता
तवेङ् तवे तुमर्थे कृत् अव्ययः गुणाभावादि । कृतवे ।
तवेन् तवे तुमर्थे कृत् अव्ययः आद्युदात्तः । कर्त्तवे । [तवै ।
तवै(न्) तवै तुमर्थे कृत् अव्ययः निच्चे आद्युदात्तः । स्रोच्छि-
तव्यत् तव्य-भावकर्म्मणोः कृत् स्वरितः । भवितव्यं चेतव्यः ।
तसि तस् पञ्चम्याद्यर्थे तद्धितः अव्ययः । कृष्णतः प्रति । एक-दिगर्थे च । पौलुमूलतः । [सर्व्वतः ततोभवान् ।
तसिल् तस् पञ्चम्याद्यर्थे तद्धितः अव्ययः पूर्व्वस्योदात्तता । कुतः
तातिल् तति स्वार्थे प्रशंसार्थे च तद्धितः पूर्व्वोदात्तता । सर्व्वतातिः । वृकतातिः । [स्त्रीप्रत्ययश्च । युवतिः ।
ति ति भूतार्थे मत्वर्थे च तद्धितः । पक्तिः । कन्तिः शन्तिः
तिकन् तिक प्रशंसार्थे तद्धितः आद्युदात्तः । स्रक्तिका ।
तिथुक् तिथ् डटि आगमः अन्त्यावयवः । बहुतिथुः ।
तीय तीय पूरणार्थे तद्धितः । द्वितीयः तृतीयः ।
तु त मत्वर्थे तद्धितः । श्रन्तः कन्तुः ।
तुक् त् क्तति पिति आगमः अन्त्यावयवः । संयत् कृत्यम् ।
तुट् त् आगमः (च्युटुञोः) आद्यवयवः । सावन्तनः ।
तुमुन् तुम् भावे क्रियार्थक्रियायां कृत् आद्युदात्तः । भोक्तुं याति ज्ञातुमिच्छति । [भोक्ता स्त्रियां ङीप् ।
तृच् तृ-कर्त्तरि कृत् सप्तदायान्योदात्तः । कटस्य कर्त्ता अन्नस्य
तृन् तृ शीलाद्यर्थे कृत् आद्युदात्तः । कटम् कर्त्ता ।
तैलच् तैल स्नेहार्थे तद्धितः अन्योदात्तः । तिलतैलम् ।
तोसुन् तोस् तुमर्थे कृत् अव्ययः आद्युदात्तः । ईश्वरो विचरितोः विचरितुमीश्वर इत्यर्थः ।
त्र त्र भवार्थे तद्धितः । चिरत्रः परत्रः ।
त्रप् त्र स्वार्थे तद्धितः अनुदात्तः । नूत्रं प्रत्रम् ।
त्यक् त्य-भवाद्यर्थे तद्धितः वृद्धिः अन्योदात्तः । दाक्षिणात्यः पाश्चात्यः । [अधित्यका
त्यकन् त्यक आसन्नाद्यर्थे तद्धितः आद्युदात्तः । उपत्यका
त्यप् त्य-भवाद्यर्थे तद्धितः अनुदात्तः । तत्यः इत्यः ।
त्र त्र समूहार्थे तद्धितः स्त्रियाम् । गोत्रा । [तत्रभवान् ।
त्रप् त्र सप्तम्याद्यर्थे तद्धितः अव्ययः पूर्व्वोदात्तता । यत्र तत्र ।
त्रा त्रा देवाद्यर्थे तद्धितः अव्ययः । देवाय देयं करोति देवत्राकरोति ।
त्व त्व-भावकर्म्मार्थे तद्धितः । देवत्वं ब्राह्मणत्वं शुभ्रत्वम् ।
त्वन् त्व कृत्यार्थे कृत् आद्युदात्तः । कर्त्तव्यम् ।

थ

थकन् थक-कर्त्तरि कृत् आद्युदात्तः । गाथकः ।
थट् थ पूरणार्थे तद्धितः स्त्रियां ङीप् । पञ्चथः दशथः ।
थमु थम् प्रकारेऽर्थे तद्धितः अव्ययः । कथम् इत्थम् ।
था था प्रकारेऽर्थे तद्धितः अव्ययः । यथा तथा सर्व्वथा ।
थाल् था इत्यर्थे वेदे तद्धितः अव्ययः पूर्व्वोदात्तः । प्रत्नथा पूर्व्वथा ।
थुक् थ् आगमः डटः अन्त्यावयवः । षष्ठः चतुर्थः कतिथः ।
थ्यन् थ्य हितार्थे तद्धितः आद्युदात्तः । अजथ्या यूथिः अविथ्या

द

दघ्नच् दघ्न उन्माने तद्धितः अन्योदात्तः स्त्रियां ङीप् । जरद्दघ्नः गजदघ्नः ।
दा दा कालेऽर्थे तद्धितः अव्ययः । सर्व्वदा तदा यदा ।
दानीम् दानीम् कालेऽर्थे तद्धितः अव्ययः । तदानीम् इदानीम् ।
दुक् दु आगमः अन्त्यावयवः । अन्यदाशीः अन्यदीयः ।
दूस दूस दुरर्थे तद्धितः । अविदूसम् (अविदुरम्) ।
देशीयर् देशीय ईषदसमाप्त्यर्थे तद्धितः उपोत्तमोदात्तता । पटुदेशीयः ।
देश्य देश्य ईषदसमाप्त्यर्थे तद्धितः । पटुदेश्यः ।
द्य द्य दिनेऽर्थे तद्धितः अव्ययः । अस्मिन् दिने अद्य ।
द्यस् द्यस् दिनेऽर्थे तद्धितः अव्ययः । समानेऽह्नि सद्यः ।
द्युस् द्युस् दिनेऽर्थे तद्धितः अव्ययः । उभये दिने उभयद्युः ।
द्वयसच् द्वयस उन्माने तद्धितः अन्योदात्तः स्त्रियां ङीप् । जरद्द्वयसम् गजद्वयसम् ।

ध

धमुञ् धम् प्रकारेऽर्थे तद्धितः अव्ययः वृद्धिः आद्युदात्तः । द्वैधम् त्रैधम् । स्वार्थेऽपि द्वैधः ।
धा धा क्रियाप्रकारेऽर्थे तद्धितः अव्ययः । चतुर्द्धा पञ्चधा [पचति ।
धुना धुना कालेऽर्थे तद्धितः अव्ययः । अस्मिन् काले अधुना ।
धेय धेय स्वरूपार्थे तद्धितः । नामधेयं भागधेयम् ।
ध्यमुञ् ध्यम् प्रकारे तद्धितः वृद्धिः आद्युदात्तता अव्ययः । ऐकध्यम् ।

न

न न मत्वर्थे तद्धितः । पामनः अङ्गना ज्योत्स्ना । पुरा-णेऽर्थे च । प्रथम् ।

नङ् न भावे कृत् गुणाभावादि । यज्ञः प्रज्ञः यज्ञः ।

नजिङ् नञ् शीलाद्यर्थे कृत् गुणाभावादि । खप्रक् भ्रष्णक् ।

नन् न भावे कृत् आद्युदात्तः । खप्नः ।

ना ना असहायार्थे पृथग्भावे स्वार्थे तद्धितः अव्ययः । विना ।

नाञ् ना असहायार्थे पृथग्भावे तद्धितः वृद्धिः अव्ययः आद्यु-दात्तः । नाना ।

नाटच् नाट वासिकनतार्थे तद्धितः अन्तोदात्तः । अवनाटम् ।

नि नि भावे कृत् स्त्रियाम् । ग्लानिः ग्लानिः ।

निङ् नि समासान्तः अन्तादेशः । युवजानि; ।

नीग् नी आगमः अन्त्यावयवः । वनीवञ्चीति ।

नुक् नृ आगमः अन्त्यावयवः । धूनयति क्षीणयति ।

प

पटच् पट-विस्तारे तद्धितः अन्तोदात्तः । अविपटः ।

पाशप् पाश कृत्सितार्थेत० अनुदात्तः । भिषक्पाशः ।[तिलपिञ्जः]

पिञ्ज पिञ्ज निष्फलेऽर्थे तद्धितः । तिलपिञ्जः । वेदे तु डित् ।

पिटच् पिट-नासिकानतार्थे तद्धितः अन्तोदात्तः । चिपिटम् ।

पुक् प् आगमः अन्त्यावयवः । स्थापयति यापयति ।

पेज पेज निष्फलेऽर्थे तद्धितः । तिलपेजः ।

फ

फक् फ-आयन अपत्याद्यर्थे तद्धितः वृद्धिः अन्तोदात्तः । नाडायनः । [स्त्रियां ङीप् । वात्स्यायनः आश्वलायनः ।

फञ् फ-आयन गोत्रार्थे युनि तद्धितः वृद्धिः आद्युदात्तः

फिञ् फि-आयनि अपत्याद्यर्थे तद्धितः वृद्धिः आद्युदात्तः । तैकायनिः । [कायनिः ।

फिन् फि-आयनि अपत्यार्थे तद्धितः आद्युदात्तः । ग्लुचु-

ब

ब(व) ब(व) मत्वर्थे तद्धितः । शंबः शम्बः दन्त्य इति कौसुदी-सम्मतम् । [ब(व)हुगुडः ।

ब(व) डच् ब(व)हु देशदेशसमाप्तेऽर्थे तद्धितः अन्तोदात्तः ।

भ

भ भ मत्वर्थे तद्धितः । शम्भः कम्भः ।

भक्तल् भक्त चतुरर्थ्याम् तद्धितः पूर्वपदात्तः । ऐषुकारिभक्तम् ।

भटच् भट-नासिकानतार्थे तद्धितः अन्तोदात्तः । अवभटम् ।

म

म म-भवार्थे मत्वर्थे च तद्धितः । आदिमः मध्यमः । द्रुमः ।

मट् म डट् आगमः आद्यावयवः । पञ्चमः दशमः ।

मण् म भवार्थे तद्धितः वृद्धिः स्त्रियां ङीप् । माध्यमः ।

मतुप् मत् अस्त्यर्थे तद्धितः स्त्रियां ङीप् अनुदात्तः । अग्नि-मान् श्रीमान् । अकारादितस्तु मस्य वः । धनवान् लक्ष्मी-वान् यशस्वान् विद्वान् ।

मनिन् मन्-शीलाद्यर्थे कर्तरि कृत् आद्युदात्तः । सुशर्मा ।

मप् म जातार्थे क्त्रिप्रत्ययान्ताच्चित्वं मप् तद्धितः अनुदात्तः । पक्ष्मिमम् ।

मयट् मय तद्रूपविकारे प्राचुर्यार्थे च तद्धितः स्त्रियां ङीप् । वाङ्मयः यवमयी यवागूः । अन्नमयो यज्ञः । [(अविदुग्धम्)

मरीसच् मरीस-दुग्धेऽर्थे तद्धितः अन्तोदात्तः । अविमरीसम्

मात्रच् मात्र प्रमाणसामान्ये तद्धितः स्त्रियां ङीप् अन्तोदात्तः । प्रस्थमात्रः गजमात्रम् । कात्स्न्र्ये च तावन्मात्रम् ।

मिनि मिन् मत्वर्थे तद्धितः । गोमी ।

मीय मीय भवार्थे तद्धितः । मध्यमीयः ।

मुक् म् आगमः अन्त्यावयवः । पवमानः । [न्यवः ।

मुम् म् आगमः खिति अन्त्यावयवः । रात्रिञ्चरः । स्तन-

य

य य भावाद्यर्थे कृत् वेदे । निष्क्यः देवहूयः । लोके तु यत् । समूहार्थे तद्धितः स्त्रियाम् । पाक्ष्या वात्या धूर्ष्या । साध्वर्थे च डित् । सभ्यः ।

यक् य-धात्वंशप्रत्ययः । कण्डूयते । विकरणः । क्रियते नूयते । भावकर्माद्यर्थे तद्धितः वृद्धिः अन्तोदात्तः । पौर-हित्यम् सैनापत्यम् ।

यङ् य यौन;पुन्नाद्यर्थे धात्वंशप्रत्ययः । ङित् आत्मनेपदं गुणाभावादि । बोभूयते चेक्रीयते । [वात्स्यः ।

यञ् य-अपत्याद्यर्थे तद्धितः वृद्धिः आद्युदात्तः । गार्ग्यः

यत् य भावाद्यर्थे कृत् स्वरितः । भव्यं भव्यः, गेयं गेयः, चेयं चेयः ।

यल् य-मत्वर्थे तद्धितः पूर्वोदात्तः । यशोभाग्यः यशोभाग्यः ।

यस् य मत्वर्थे तद्धितः सित्त्वात् पूर्वस्य पदत्वेन अनुस्वारादि शंयः शय्यः कंयः कय्यः ।

युक् य् आगमः अन्त्यावयवः । आदायि स्थायी दायः । [दुर्यानम्

युच् यु-अन भावाद्यर्थे कृत् सप्तदावान्तोदात्तता । सुखायम्

युस् यु मत्वर्थे तद्धितः सित्त्वात् पूर्वस्य पदत्वेन अनुस्वारादि शंयुः शय्युः कंयुः कय्युः । उर्वायुः ।

र

र र मत्वर्थादौ तद्धितः । कुञ्जरः मधुरः । स्वार्थे कुटीरः न प्रकृतिलिङ्गता ।

शीलाद्यर्थे कृत्प्रत्ययः । हिंसः कस्यः नमुः ।

रण् र शरण्येऽर्थे तद्धितः इद्भिः । अग्नीध्-आग्नीध्रम् ।

रदानुक् रदानु कर्तरि कृत् । कृत्--जीव-जीरदानुः ।

रिक् रि आगमः अन्तावयवः । कृ-चरिकरीति ।

रिङ् रि अन्तादेशः । कृ-क्रियते क्रिया ।

रिल् रि प्रथमाद्यर्थे तद्धितः अव्ययः पूर्वोदात्तः । उपरि ।

रिष्टातिल् रिष्टात् प्रथमाद्यर्थे तद्धितः पूर्वोदात्तः । उपरिष्टात् ।

रीक् री आगमः अन्तावयवः । कृ-चरीकरीति ।

रीङ् री अन्तादेशः । मालीकरोति धालीकरोति । [धारः ।

रु र् आदेशः । हरिः अहः । रु शीलाद्यर्थे कृत्प्रत्ययः । दारुः

रुक् र् आगमः अन्तावयवः । कृ-चर्करीति ।

रुट् र् आगमः आद्यवयवः । श्री-श्रेरते, सम्+विदृ--संविद्रते ।

रूपप् रूप-प्रागख्ये तद्धितः अनुदात्तः । पटुरूपः पचतिरूपम् ।

रूप्य रूप भूतपूर्वसम्बन्धार्थे तद्धितः । क्षणरूप्या गौः ।
भवार्थे-समरूप्यः ।

र्हिल् र्हि सप्तम्यर्थे तद्धितः अव्ययः पूर्वोदात्तः । कर्हि तर्हि ।

ल

ल ल चक्षुःक्षेदार्थे तद्धितः न णित् । चिल्लः चुल्लः पिल्लः ।

लच् ल मत्वर्थे तद्धितः अन्तोदात्तः । चूडालः मांसलः अंसलः ।

ल्यप् य आनन्तर्यार्थे कृत् अव्ययः पूर्वोदात्तः । प्रभूय प्रहृत्य ।

ल्यु यु-अन कर्तरि कृत् पूर्वोदात्तः । नन्दनः विचक्षणः ।

ल्युट् यु-अन भावादौ कृत् पूर्वोदात्तः । भवनम् । स्त्रियां
ङीप् । प्रमाणी ।

व

व व मत्वर्थे तद्धितः । केशवः गार्ग्यिव(र्ग्वो)वः अजगवः । शंवः
शम्भुः कौतुदीमते वलादिरवस् न वशादिः ।

वति वत् क्रियादितुल्यार्थे तद्धितः अव्ययः । देवदत्तवत्
पचति । रामवत् कृष्णस्य चरितम् स्टहवत् वने वसति ।

वतुप् वत् परिमाणार्थे तद्धितः अनुदात्तः उगित्कार्यम् ।
यावान् तावान् । किमः इदमश्च परस्य वस्य यकारस्य इयः ।
कियान् इयान् । [वस्य रश्च । धीवरो ।

वनिप् वन् भूते कर्तरि कृत् अनुदात्तः । यज्वा । स्त्रियां ङीप्

वय वय भानार्थे तद्धितः । दुवयस् ।

वरच् वर शीलाद्यर्थे कृत् सप्तदायान्तोदात्तः । स्थावरः ईश्वरः ।

वलच् वल चतुरर्थ्यां मत्वर्थे च तद्धितः अन्तोदात्तः । शिखावलः ।
रज्जुवला । [उपयट् उत्तपाः विश्वपाः ।

विच् वि तस्य लोपः कर्तरि कृत् सप्तदायान्तोदात्तः ।

विट् वि तस्य लोपः कर्तरि कृत् । अग्नेगाः उदधिक्राः ।

विडच् विड संहतार्थे तद्धितः अन्तोदात्तः । निविडम् ।

विधल् विध-विषयार्थे तद्धितः पूर्वोदात्तः । भौरिकिविधः ।

विनि विन् मत्वर्थे तद्धितः स्त्रियां ङीप् । तेजस्वी यशस्वी ।

विरीसच् विरीस संहतार्थे तद्धितः अन्तोदात्तः । निविरीसः ।

वुक् वु अक भवाद्यर्थे तद्धितः । कन्थिकम् । व् आगमः
अन्तावयवः । भू--अभूवन् बभूव ।

वुच् वु-अक स्वार्थे तद्धितः अन्तोदात्तः । उपकः (उपेन्द्रदत्तकः)

वुञ् वु अक शीलाद्यर्थे कृत् इङ्घादि । निन्दकः ।
हिंसकः । समूहार्थे तद्धितः । औष्ट्रकम् औरभ्रकम्
राजन्यकम् राजकम् ।

वुन् वु-अक साधुकार्यर्थे कृत् आद्युदात्तः । प्रवकः सरकः
लवकः । वेदनादिकर्त्रर्थे तद्धितः । पदकः क्रमकः ।

व्यत् व्य-अपत्यार्थे तद्धितः स्वरितः । भ्रातृव्यः (भ्रातृपुत्रः) ।

व्यन् व्य सपत्नार्थे तद्धितः आद्युदात्तः । भ्रातृव्यः (रिपुः)
भ्रातव्यर्थे तद्धितः । पितृव्यः (पितृभ्राता ।

श

श अ भावे कृत् स्त्रियाम् । कृ-क्रिया । कर्तरि कृत् अ ।
विद--विन्दः । मत्वर्थे तद्धितः न णित् । रोमशः लोमशः ।

शङ्कटच् शङ्कट स्वार्थे तद्धितः अन्तोदात्तः । विशङ्कटः ।

शतृ अत् न गुणादि उगित्कार्यम् । पचन्नम् विदन् विदतो ।

शध्यै(न्) अध्यै तुमर्थे कृत् निच्चे आद्युदात्तः । मदशध्यै पिबध्यै

शस् शस् वीप्साबोधके कारके तद्धितः अव्ययः । वृक्षशो ददाति ।

शाकट शाकट चेलेऽर्थे तद्धितः न णित् । इक्षुशाकटम् ।

शाकिन शाकिन चेलेऽर्थे तद्धितः न णित् । इक्षुशाकिनम् ।

शानच् आन कर्तृकर्मादौ कृत् सप्तदायान्तोदात्तः । पचमानः
क्रीयमानः भूयमानम् । [यजमानः ।

शानन् आन शीलाद्यर्थे कर्तरि कृत् आद्युदात्तः । पवमानः

शालच् शाल वैपुल्ये तद्धितः अन्तोदात्तः । विशालः ।

शितिप् ति धातुस्वरूपार्थे कृत् अनुदात्तः । भवतिः बिभर्त्तिः ।

ष

ष अ समासान्तः स्त्रियां ङीप् । द्विमूर्द्धः त्रिमूर्द्धः । [दीर्घसक्थः ।

षच् अ समासान्तः स्त्रियां ङीष् अन्तोदात्तः । पञ्चास्यः

षड्गवच् षड्गव पशुघटकार्थे तद्धितः अन्तोदात्तः ।
गोषड्गवम् महिषषड्गवम् । [वराकः जल्पाकः ।

षाकन् आक-शीलाद्यर्थे कर्तरि कृत् स्त्रियां ङीष् आद्युदात्तः ।

षिकन् इक अध्येतर्यर्थे तद्धितः आद्युदात्तः स्त्रियां ङीष् ।
शतपथिकः षष्टिपथिकः । [मनु-मानुषम् ।

षुक् ष् आगमः अन्तावयवः । जतु-जाटुषम् लवु-लाटुषम्

धेन्यन् एन्य आधानार्थे तद्धितः ङिद्वत् आद्युदात्तः। सामिधेन्यः। स्त्रियां ङीष् सामिधेनी ऋक्। [पथिकः।

धकन् क गच्छतीत्यर्थे तद्धितः आद्युदात्तः स्त्रियां ङीष्।

इरच् तर अल्पार्थे तद्धितः अन्तोदात्तः। उच्चतरः। स्त्रियां ङीष्, वल्गुतरी।

इन् त्र करणाद्यर्थे ऊत् आद्युदात्तः। योत्रम्। स्त्रियां क्वचित् ङीष्। नप्त्री। क्वचिन्न। दंष्ट्रा। [ङीष्। कुसीदिकः।

ठच् ठ-इक गर्ह्ये प्रयच्छतीत्यर्थे तद्धितः अन्तोदात्तः स्त्रियां

ठन् ठ-इक गर्ह्ये प्रयच्छतीत्यर्थे तद्धितः आद्युदात्तः स्त्रियां ङीष्। कुसीदिकः। चरतीत्यर्थे च। पर्षिकः। [आर्कषिकः।

ठल् ठ-इक चरतीत्याद्यर्थे तद्धितः पूर्वसदात्तम् स्त्रियां ङीष्।

ष्फ फ-आयन यञ्जनात् तद्धितः स्त्रियां ङीष्। काक्षायनी कौरव्यायणी। [दात्तः। कापिशायनः।

ष्याङ् फ-आयन भवाद्यर्थे तद्धितः ङिद्वत् स्त्रियां ङीष् अन्तोदात्तः। विष्वेऽपि यञ्जाप्। क्रोष्टा वावराह्वा।

ष्यञ् य भावकर्मादौ तद्धितः ङिद्वत् आद्युदात्तः। चातुर्यम्। स्त्रियां ङीष्। चातुरी।

ष्रञ् र विकाराद्यर्थे तद्धितः ङिद्वत् स्त्रियां ङीष्। शामीलम्।

ष्वुन् वु-अक कर्तरि ऊत् आद्युदात्तः स्त्रियां ङीष्। नर्त्तकः रजकः।

स

स स चतुरर्थ्यां तद्धितः। दक्षसः पर्शवः। प्रायस्ये तद्धितः। स्वस्ति।

सण् अ समूहार्थे तद्धितः ङिद्वत् सित्त्वात् न भत्वम्। पार्श्वम् (परशुसंघः)। सण इत्यस्य सकारस्य इत्त्वाप्रसक्तेः वार्त्तिककृता तत्परिवर्त्तनेन षस् इति पठितम्।

सन् स इच्छार्थे धात्वंशप्रत्ययः। क्र-चिकीर्षति, गम्-जिगमिषति।

समसण् समस् वत्सरार्थे तद्धितः ङिद्वत् अव्ययः। ऐषमः।

साति सात् सात्त्यर्थेन सम्पद्यादार्थे तद्धितः अव्ययः। अग्निसात्करोति।

सुक् स् आगमः अन्तावयवः। दधिस्यति। [स्रिःपचति।

सुच स् क्रियावृत्तिगणने तद्धितः अव्ययः अन्तोदात्तः। द्विरह्नि से(न्) से तुमर्थे ऊत् नित्त्वे आद्युदात्तः। वक्ष्ये वक्तुमित्यर्थः।

सोढ सोढ दुग्धार्थे तद्धितः। अविसोढम् (अविदुग्धम्)।

स्कन्थच् स्कन्ध समूहार्थे तद्धितः अन्तोदात्तः। गजस्कन्धः।

स्त स्त प्रायस्ये तद्धितः। स्वस्ति।

स्तञ स्त अपत्याद्यर्थे तद्धितः ङिद्वत् आद्युदात्तः। पौरस्तः।

ह

ह ह सप्तम्यर्थे तद्धितः अव्ययः। अस्मिन् हह, कस्मिन् कुह।

विभक्तिरूपादिकं तु प्रसिद्धत्वान्न प्रदर्शितम्। इति पाणिनीयप्रत्ययादिपरिनिष्ठित-रूपादिविवरणम्।

अथाकारादिक्रमेण उणादिप्रत्ययपरिनिष्ठित-रूपादिविवरणम्।

अ

अ अ। रिफ-रेफः (कुत्सितः)।

अकुच् अकु सप्तदावन्तोदात्तः। वच-वचकुः। (विप्रः वाग्मी च)

अङ्कुच् अङ्क सप्तदावान्तोदात्तः। पत-पतङ्कः। तॄ-तरङ्कः। विडादिभ्यः तस्य किच्चं तेन न गुणः। विड्ङ्कः। स्फटङ्कः। कॄ-उत्त्वे कुरङ्कः। भृवृञ्भ्यां णित्त्वम्। भारङ्कः। वारङ्कः।

अच् अ सप्तदायान्तोदात्तः। उद्+हृ-उदरम्।

अच अच। कु-कवचम्। [संप्रसारणं च। पृषत्।

अजि अज्। पारि+अजि-पारक् (सुवर्णम्)। प्रथः किच्चं

अटच् अट सप्तदायान्तोदात्तः। भृ-भरटः।

अटन् अट आद्युदात्तः। शक-शकटः, कक्कि-कङ्कटः।

अटि अट्। भृ-भरट्।

अठ अठ। कम-कमठः। जॄ-जरठः। रम-वृद्धिः। रामठम्।

अण्डच् अण्ड सप्तदायान्तोदात्तः। कॄ-करण्डः। भृ-भरण्डः।

अतच् अत सप्तदायान्तोदात्तः। भृ-भरतः, स्मृ-मरत इत्यादि।

अति अत् शतृवत् उगित्कार्यम्। पृष्-पृषन्ति। मह-महान् महती वृह-बृहन् बृहती।

अति अति। अम-अमतिः रम-रमतिः।

अतन् अत आद्युदात्तः। अम-अमतम्, यज-यजता।

अत्रिन् अत्रि नित् आद्युदात्तः। पत-पत्रिः।

अथ अथ। शो-शयथः शप-शपथः रप-रपथ इत्यादि।

अदि अद्। भृ-भरद् ह-हरद् भस-भसद्। त्यजादेः तस्य डित्त्वम्। त्यज-त्यद् तन-तद् यज-यद् सर्वनाम।

अन् अ नित् आद्युदात्तः। क्रिय-ललोपः केवः। [यज्ञियः

अनि अनि स्त्रियाम्। ऋ-अरणिः स्मृ-सरणिः धृ-धरणिः यज्-

अनुङ् अनु गुणाभावादि। नद-नदनुः क्षिप-क्षिप्नुः। [खनम्।

अन्य अन्य। राज-राजन्यः (वह्निः)। भृ-भरण्यम् रम-रम्

अन्युच् अन्यु सप्तदायान्नोदात्तः । सृ-सरण्युः (मेघः वातश्च) ।
अप अप । सृ-पुक् च सर्पः ।
अमच् अम सप्तदायान्नोदात्तः । कृ-करमः भृ-शरभ इत्यादि ।
अम अम । कल-कलमः कई-कर्दमः अव-अवमः अध-अधमः ।
अमच् अम सप्तदायान्नोदात्तः । प्रथ-प्रथमः चर-चरमः ।
अम्बच् अम्ब सप्तदायान्नोदात्तः । क्रु-करम्बः कद-कदम्बः ।
अयु(यू) अवु(यू) । सृ-सरयुः सरस्वती ।
अर(च) अर । कृ-अररस् कृच्छ्र-कृच्छ्रा जर्ज-जर्जरः । चित्वे सर्व्वान्नोदात्तः । अव-अवरः । [तुट्च अन्तः ।
अरन् अर आद्युदात्तः । प्र+आ+अत-प्रातः । अमः
अरु अरु । कृ-अररुः ।
अल् अ पूर्व्वोदात्तः । उद्+कृ-उदरम् ।
अलच् अल सप्तदायान्नोदात्तः । मगि-मङ्गलम् ।
अलिच् अलि सप्तदायान्नोदात्तः । अञ्ज-अञ्जलिः ।
अवक अवक । स्था-तादेयः कित्त्वं च स्तवकः ।
अस अस । अर्पि-अर्पसः (अयमांसम्) ।
असच् अस सप्तदायान्नोदात्तः । अत-अतसः चम-चमसः ।
असानच् असान सप्तदायान्नोदात्तः । शृ-शरसानः जृ-जरसानः
असि अस् । सु+तप-सुतपाः, जात+विद-जातवेदाः ।
असि असि । सन-सानसिः निः दृद्भिः । वृ-हुक् वर्षसिः ।
असुन् अस् आद्युदात्तः । चित-चेतः सृ-सरः तप-तपः ।

आ

आ आ अव्ययः । वि+सी-विषा (वृद्धिः) । वि+हा-विहा (स्वर्गः) । [पताका ।
आक आक । खज-खजाका वल-वलाका शल-शलाका पत-
आगूच् आगू सप्तदायान्नोदात्तः । यु-यवागूः ।
आघक आघक । लू-लवाघकः धू-धवाघकः ।
आतु आतु । जीव-जीवातुः ।
आढकन् आढक आद्युदात्तः । जीव-निः वृद्धिः जैवाढकः ।
आनक आनक । शी-शयानकः भी-भयानकः ।
आनच् आन सप्तदायान्नोदात्तः । सम्+सु+संस्रवानः । सुध-कित् सुधानः, एवं लुध-लुधानः बुध-बुधानः ।
आनुक् आनु गुणाभावः । ऋग-ऋगानुः ।
आन्य आन्य । वद-वदान्यः ।
आय्य आय्य । सृहि-सृहयाय्यः ।
आरन् आर आद्युदात्तः । अगि-अङ्गारम्, मद-मदारः ।
आल आल । मव्य-वलोपः वस्य लादेशे मरालः ।
आलच् आल सप्तदायान्नोदात्तः । स्था-स्थालं स्थाली ।
आनञ् आन दृद्भिः आद्युदात्तः । पत-वागमः वात्वालः पत-पातालम् चडि-चण्डालः ।
आलीयच् आलीय सप्तदायान्नोदात्तः । मृज-मार्जालीयः ।
आस आस । यु-यवासः (दुरालभा) ।
आसि आसु । दृष-अयाः अव्ययः । (वह्निः) ।

इ

इ इ । रु-रविः कु-कविः पु-पविः भृ-अरिः कृ-किरिः, एवं भृ-गिरिः ।
इकन् इक आद्युदात्तः । क्री क्रयिकः । आ+पण-आपणिकः । आ+पत-आपतिकः ।
इजि इज् । पण-पस्यवादेशः वणिक् । वश-कित् उशिक् ।
इञ् इ दृद्भिः आद्युदात्तः स्त्रियां वा ङीप् । वप वापिः वापी । यज-याजिः याजी । वस-वासिः वासी ।
इण् इ दृद्भिः । जन-जनिः अज-आजिः अत-आतिः ।
इत इत । कुस-कुसितः (जनपदः) । [पलितम् ।
इतच् इत प्रकृतिप्रत्ययसप्तदायान्नोदात्तः । फल-फस्यादेशः
इतन् इत आद्युदात्तः । हृ-हरितः श्यै-श्येतः ।
इति इत् । सृ-सरित् हृ-हरित् रुह-रोहित् युष-योषित् ।
इत्नुच् इत्नु-सप्तदायान्नोदात्तः । स्तनि-स्तनयित्नुः ।
इत्व इत्व । अग-अगित्वम् वह-वहित्वम् भृ-धरित्री ।
इत्वन् इत्व आद्युदात्तः । जन-जनित्वः ।
इथिन् इथि आद्युदात्तः । अत-अतिथिः ।
इन् इ आद्युदात्तः । पच-पचिः वल-वलिः यज-वजिः ।
इनच् इन सप्तदायान्नोदात्तः । श्यै-श्येनः, हृ-हरिणः, श्यै-श्येनः, अव-अविनः ।
इनण् इन वृद्धिः । मद्र-माद्रिनम् ।
इनन् इन आद्युदात्तः । दु-द्रविणम् दक्ष-दक्षिणः-दक्षिणा ।
इनि इन् । गम-गमी । आङि कित् । आगामी । [भृ-धरिमा ।
इमनिच् इमन् सप्तदायान्नोदात्तः । हृ-हरिमा स्थ-स्थिमा
इमनिन् इमन् आद्युदात्तः । जन-जनिमा भृ-भरिमा ।
इलच् इल-सप्तदायान्नोदात्तः । सल-सलिलम् कल-कलिलम्
इ(ष्ट)ठच् इ(ष्ट)ठ सप्तदायान्नोदात्तः । अङ्ग-अङ्गि(ष्ट)ठः ।
इष्णुच् इष्णु-सप्तदायान्नोदात्तः । गै-गेष्णुः दा-देष्णुः ।
इसन् इस आद्युदात्तः । अर्पि-अर्पिसः (अयमांसम्) ।
इसि इस् । अर्च-अर्चिः शुच-शोचिः हु-हविः स्रुप-सर्पिः ।
इसिन् इस आद्युदात्तः । द्युत आदेर्ज्जः ज्योतिः ।

ई

ई ई । अव-अवीः तॄ-तरीः स्रु-सरीः तन्त्रि-तन्त्रीः ।

ईकन् ईक आद्युदात्तः । कष-कषीका, दूषि-दूषीका ।
ईचि ईचि । सृ-सरीचिः कष-कषीचिः ।
ईद ईद । कुस-कुसीदम् । [ष्ट-धरीमा ।
ईमनिच् ईमन् सप्तदायान्तोदात्तः । हृ-हरीमा सृ-सरीमा
ईरच(न्) ईर चित्त्वे सप्तदायान्तोदात्तः नित्त्वे आद्युदात्तः ।
हिंसेरः । [(फलम्) ।
ईरन् ईर-आद्युदात्तः । कृ-करीरः, गृ-गरीरम् पृ-परीरम्
ईषन् ईष आद्युदात्तः । कृ-करीषम् तृ-तरीषः ।

उ

उ उ । भृ-भरुः शी-शयुः सृ-सरुः तृ-तरुः चर-चरुः ।
उकन् उक आद्युदात्तः । सम्+कस-सङ्कुकः ।
उडच् उड सप्तदायान्तोदात्तः । गृ-गरुडः । [खादुः ।
उण् उ वृद्धादि । क्रु-कारुः पा-पायुः वा-वायुः खद-
उति उत् । सृ-सरुत् गृ-गरुत् ।
उत्र उत्र । लू-लोत्रम् वृ-वस्त्रम् ।
उन उन । शक-शकुनः । [दारि-दारुणः ।
उनन् उन आद्युदात्तः । कृ-करुणः करुणा । वृ-वरुणः,
उनसि उनस् । दस-दसुनाः ।
उनि उनि । शक-शकुनिः ।
उन्त उन्त । शक-शकुन्तः ।
उन्ति उन्ति । शक-शकुन्तिः ।
उम उम । कुस-कुसुमम् ।
उम्भ उम्भ । कुस-कुसुम्भम् । [चत-चतुरः ।
उरच् उर सप्तदायान्तोदात्तः । मन्द्-मन्दुरा, मथ-मथुरा,
उरन् उर आद्युदात्तः । अस-असुरः, मस-मसुरा ।
उरिन् उरि आद्युदात्तः । जस-जसुरिः सह-सङ्गुरिः ।
उल उल । तडि-तण्डुलः ।
उलच् उल सप्तदायान्तोदात्तः । कृष-कृषुलः चट-चटुलः ।
उलन् उल आद्युदात्तः । वृ-वरुणः ताडि-तण्डादेशः तण्डुलः ।
उलि उलि । अगि-अङ्गुलिः ।
उशच् उश सप्तदायान्तोदात्तः । अकि-अङ्कुशः । [कलुषः ।
उषच् उष सप्तदायान्तोदात्तः । पृ-परुषः नह-नड्वषः कल-
उ(ऊ)षन् उ(ऊ)ष आद्युदात्तः । ऋ-अर्(रु)षः ।
उसि उस । जन-जतुः । अस्य नि० उदन्तत्वमपि ।
उसिन् उस् आद्युदात्तः । ऋ-अरुः, पृ-परुः, वप-वपुः ।

ऊ

ऊ ऊ । रूप-रूपूः चम-चमूः तन-तनूः ।
ऊक ऊक । सृ-सरूकः, वल-वलूकः मडि-मण्डूकः ।
ऊकण् ऊक दृद्धादि । कण-कणूकः, शल-शालूकम्,
ऊख ऊख । मा-मयादेशः मयूखः ।
ऊथन् ऊथ आद्युदात्तः । जृ-जरूथम्, इ-वरूथः ।
ऊम ऊम । गुध-गोधूमः ।
ऊर ऊर । खर्ज्ज-खर्जूरः, रूप-कर्पूरः, वस्त्र-वस्त्रूरम् ।
ऊरन् ऊर आद्युदात्तः । मी-मयूरः । सून्द्-सिन्धुसारणम्
सिन्दूरम् । मस-मसूरा ।
ऊलच् ऊल सप्तदायान्तोदात्तः । पिञ्जि-पिञ्जूलम्, कुस-
कुसूलः ।

ऋ

ऋ ऋ । दिव-देवा देवरौ ।
ऋतिन् ऋत् आद्युदात्तः । शक-शक्रत् । [ननन्दा ननन्दरौ ।
ऋन् ऋ आद्युदात्तः । स्व+अस-स्वसा स्वसारौ । न+नन्द्-

ए

एणु एणु । कृ-करेणुः, हृ-हरेणुः ।
एन्य एन्य । इ-वरेण्यः । [गुडेरः ।
एरक् एर गुणाभावादि । पत-पतेरः, कुठ-कुठेरः, गुड-
एलिमच् एलिम सप्तदायान्तोदात्तः । पच-पचेलिमः ।
एष्णुक् एष्णु गुणाभावादि । मे-मेष्णुः ।

ओ

ओतच् ओत सप्तदायान्तोदात्तः । कवः पादेशः कपोतः ।
ओलच् ओल सप्तदायान्तोदात्तः । पट-पटोलः । कपि-
नलोपः कपोलम् ।
ओरन् ओर आद्युदात्तः । कठ-कठोरः, चक-चकोरः ।

क

क अ गुणाभावादि । स्तु-स्तवः । वि+आ+धृ-व्याधः ।
क क वकारप्रश्लेषात् न कित् । क्रु-कर्कः रा-राका कल-कल्कः ।
कक् क अन्तकित्त्वेन नादेः कित्त्वम् । इ-वृकः, भू-भूकः ।
कङ्कण कङ्कण वकारप्रश्लेषात् न कित् । स्फुड-स्फुडङ्कणः (शिशुः)
कण कण वप्रश्लेषात् न कित् । चित-कान्तादेशः गुणाभावश्च
नि० चिक्कणः ।
कतु अत गुणाभावादि । क्रु-क्रतुः । [(वज्रसृष्टिकरः) ।
कत्निच् अत्नि गुणाभावादि सप्तदायान्तोदात्तः । ऋ-रत्निः
कत्नन् अत्न गुणाभावादि आद्युदात्तः । स्व+विद-सुविदत्नम् ।
कन् अ गुणाभावादि आद्युदात्तः । क्रिय-नि० कीनाशः ।
कन् क वप्रश्लेषात् न कित् आद्युदात्तः । इण-एकः भी-भेकः
कनसि अनस् गुणाभावादि । वप-उपनाः ।
कनिन् अन् गुणाभावादि आद्युदात्तः । यु-युवा, इण-युवा ।

कन्यन् अन्य कित् आद्युदात्तः । हर्य-हिरादेशः हिरण्यम् ।
कन्युच् अन्यु गुणाभावादि सप्तदायान्तोदात्तः । क्षिप-क्षिपण्युः
कप अप गुणाभावादि । कृष-संप्रसारणं कृषपः (शवः) ।
कपन् अप गुणाभावादि आद्युदात्तः । उष-उषपः कुट-कुटपः ।
कमिन् अम् कित् आद्युदात्तः । इदि-नलोपः, इदम् सर्वनाम
कयन् अय गुणाभावादि आद्युदात्तः । तन-तनयः ।
करन् कर न कित् आद्युदात्तः । ग्रह-गरः ।
कल अल गुणाभावादि । लप-लपला, लफ-लफला ।
कलन् कल न कित् आद्युदात्तः । पुष-पुष्कलः ।
काकु आकु गुणाभावादि । कट-कटाकुः कुष-कुषाकुः (स्फुर्यः) ।
कालन् आल गुणाभावादि आद्युदात्तः । विड-विडालः ।
किकन् इक कित् आद्युदात्तः । ऋच-वृश्चिकः ऋष-ऋषिकः ।
कितच् इत कित् सप्तदायान्तोदात्तः । रुच-रुचितं वच-उचितम् । [पुलिन्दः ।
किन्दच् इन्द कित् सप्तदायान्तोदात्तः । कुल-कुलिन्दः पुल-
किरच् इर कित् सप्तदायान्तोदात्तः । इष-इषिरः ।
किण्यन् इण्य कित् आद्युदात्तः । रुच-रुचिण्यः भुज-भुजिष्या ।
कीकन् ईक कित् आद्युदात्तः । ऋज-ऋजीकः ऋढ-ऋढीकः ।
कीटन् ईट कित् आद्युदात्तः । ऋ-किरीटं ऋ-तिरीटम् ।
कु उ गुणाभावादि । पृ-पुरुः भिद-भिदुः व्यध-विधुः ।
कुक् कु अन्यकित्त्वान्नादिकित्त्वम् । हु-होकुः ।
कुकन् उक गुणाभावादि आद्युदात्तः । प्रथ-संप्रसारणम् पृथुकः
कुषन् उष गुणाभावादि आद्युदात्तः । पृ-पुरुषः ।
कू ऊ गुणाभावादि । ऋत-ऋतूः ऋध-ऋधूः ।
कोय्य एय गुणाभावादि । स्तु स्तुवेय्यः (वेद एवायम्) ।
क्त त गुणाभावादि । अक-अक्तः इ-इतम् स्रु-स्रुतम् ।
क्नु, क्नु गुणाभावादि । क्ष-क्षत्नुः हन-हत्नुः ।
क्ल ल गुणाभावादि । अम-अन्त्रं चि-चित्रं भिद-भित्त्रम् ।
क्थन् थ गुणाभावादि आद्युदात्तः । हन-हथः कुष-कुथः ।
क्थिन् थि गुणाभावादि आद्युदात्तः । अस-अस्थि सक-सक्थि
क्न न गुणाभावादि । हन-हनोपः हत्नम् । [नृ-नूनिः ।
क्निन् नि कित् स्त्रियां आद्युदात्तः न ङीप् । स्तृ-स्तृणिः ।
क्मलन् मल कित् आद्युदात्तः । कुट-कुम्मलम् कष-कश्मलम् ।
क्यु यु-अन गुणाभावादि । कृ-किरयः पृ-पुरयः ।
क्युच् यु-अन गुणाभावादि आद्युदात्तः । ह्व-उत् उरयः ।
क्युन् यु-अन गुणाभावादि सप्तदायान्तोदात्तः । भू-भुवनम् ।
क्रन् र कित् आद्युदात्तः । सु-सुरः स्रु-स्रुरः धा-धीरः ।
क्रच् रर गुणाभावादि सप्तदायान्तोदात्तः । कृ-कुररः ।
क्रि रि गुणाभावादि । स्रु-स्रुरिः ।
क्रिन् रि गुणाभावादि आद्युदात्तः । अद-अद्रिः भू-भूरिः ।
शुभ-शुभ्रिः ।
क्वुकन् रुक गुणाभावादि आद्युदात्तः । भी-भीरुकः । [शत्रुः ।
क्वुन् रु गुणाभावादि आद्युदात्तः । रु-रुः शाति-क्षुरः ।
क्ल ल गुणाभावादि । मू-मूलम् शक-शक्लः अम-अम्लः ।
क्वन व गुणाभावादि आद्युदात्तः । अय-अव्यः प्रुष-प्रुव्यः ।
क्वनिप् वन् गुणाभावः अनुदात्तः । धी-धीवा क्रुश-क्रुश्वा ।
क्विन् वि, इकारास्वानुनासिकत्वाभावाच्च लोपः । ऋ-कीर्विः भृ-गीर्विः जास्ट-जास्टर्विः ।
क्विप् वि तस्य लोपः अनुदात्तः कित् । वच-दीर्घः वाक् ।
क्वुन् वु-अक कित् आद्युदात्तः । चर-चरकः ।
क्सरन् सर कित् आद्युदात्तः । तन-तसरः, ऋष-ऋक्षरः ।
क्सि सि गुणाभावादि । प्रुष-प्रुक्षिः, कृष-कृक्षिः, शुष-शुक्षिः
क्सु सु गुणाभावादि । इष-इक्षुः ।
क्ष्ण क्ष गुणाभावादि । क्षत्-क्षत्क्षम्, अश-अक्षम् ।

ख

ख ख वकारप्रश्लेषात् न खित् । शम-शङ्खः सह-सरादेशे मूर्खः ।

ग

ग ग वकारप्रश्लेषात् न गित् । भृ-गर्गः ।
गक् ग वकारप्रश्लेषात् न गित् गुणाभावादि । सद-सङ्गः ।
गण् ग वकारप्रश्लेषात् न गित् इद्यादि । भृ-सृट् शार्ङ्गः ।
गन् ग वकारप्रश्लेषात् न गित् आद्युदात्तः । गम-गङ्गा ।

घ

घथिन् अधि कुत्वम् आद्युदात्तः । नि+सञ्ज+निषङ्गधिः ।

च

चट् च वप्रश्लेषात्र चित् स्त्रियां ङीप् । कु-दीर्घः कूची ।
चतु अत सप्तदायान्तोदात्तः । एध-एधतः, वह-वहतः ।
चिक् च् वकारप्रश्लेषात् न चित् गुणाभावादि । स्नु-स्नुक् स्नुचौ

ञ

ञ्नुच् ञ्नु-अन सप्तदायान्तोदात्तः । जृ-जरन्तः विश-वेशन्तः ।
ञ्निच् ञि अनि तेन न ञित् सप्तदायान्तोदात्तः । भू-भवन्तिः ।

ञ

ञ्नुन् उ इद्यादिः आद्युदात्तः । दृ-दारु, सन-सानु ।

ट

ट(न्) अ स्त्रियां ङीप् । निच्चे आद्युदात्तः । दनुष-नख आ दायः, दनुस-दासः । [मह-महिषः ।
टिषच् इष सप्तदायान्तोदात्तः स्त्रियां ङीप् । अव-अविषः

ठ

ठ ट वप्रत्ययेषात् न ठित् । कण-कण्ठः ।

ड

ड ड वप्रत्ययेषात् न डित् । कुण-कुण्डम्, गु-गुडः ।
डुउ अउ अमत्वेऽपि टिलोपः । तन-तन्वत् तितउः डउ प्रत्ययसन्निविष्टेनाच्च सन्विः ।
डट अट अमत्वेऽपि टिलोपः । नम-नटः ।
डति अति अमत्वेऽपि टिलोपः । पा-पतिः । [भवती ।
डवतुप् अवत टिलोपः उगित्कार्यम् अनुदात्तः । भा-भवान्
डिमि इम् टिलोपः । कै-किम् । अस्य इदमश्च मान्तत्वेन ङन्त्वेऽजन्तइत्यव्ययत्वप्रसङ्गेऽपि चिरव्यवमिति नियमादुषादौ चिप्रत्ययान्तत्वे एवाव्ययत्वं नान्यथा ।
डुतच् उत टिलोपः सप्तदायान्तोदात्तः । अद्+भू-अद्भुतम् ।
डुन् उ टिलोपः आद्युदात्तः । श्वन्+स्त्री-श्वश्रूः, न+स्त्री अश्रूः । [वार्त्तिकेऽप्ययं प्रत्ययः ।
डुमसुन् उमस् टिलोपः आद्युदात्तः । पा-पुमान्, पुंसः ।
ड् ऊ टिलोपः । भ्रूम-भ्रूः । [डिमिप्रत्यये ।
डै ऐ टिलोपः । रा-रै-राः रायौ । यथा नाव्ययत्वं तथोक्तं
डैसि ऐस् टिलोपः । उद्+चि-उच्चैः नि-दीर्घः नीचैः ।
डो ओ टिलोपः । गम-गो-गौः, गवा । नाव्ययत्वसूत्रम् ।
डोसि ओस् टिलोपः । दम्-दोः दोषौ दोषः ।
डौ औ टिलोपः । ग्लै-ग्लौः नुद-नौः नाव्ययत्वसूत्रम् ।
ङ्ट् र टिलोपः स्त्रियां ङीप् । स्त्री-स्त्री ।
ङि रि टिलोपः । हृ-त्रि-त्रयः ।

ढ

ढ ढ वप्रत्ययेषात् न ढित् । यभ-यब्ढः ।

ण

णित्वन् इत्व इद्भिः आद्युदात्तः । भू-भावित्वं वद-वादित्वम् ।
णु णु वप्रत्ययेषाच्च णित् । स्था-स्थाणुः अज-वेणुः वृ-वर्णुः
ण्वुकन् उक इद्वादि आद्युदात्तः । पच-कादेये पाचुकः ।
ण्व यस्य वप्रत्ययेषात् न णित् । धृष अकारस्य इत्त्वं धिष्वम् ।

त

त त । स्त्री-ष्टुट् स्तः स्त्रिम् (स्त्रिटम्) ।
तकन् तक आद्युदात्तः । दृष-दृटका, अश-अटका ।
तन् त आद्युदात्तः । कृस-कृत्तः, मृ-मर्त्तः, मृट्-मर्त्तः ।
तनन् तन आद्युदात्तः । वी-वेतनम् ।
तश्चन् तश आद्युदात्तः । दृष-एतशः (ब्राह्मणः) ।
तशसुन् तशस् आद्युदात्तः । दृष-एतशाः (विप्रः) ।
ति ति । वि+तस-वितस्तिः स्तु+अस-स्वस्ति स्वरादिः । स्वस्तिपाठे स्वस्तीतिनिर्देशात् न भूभावः । [कृत्तिका ।
तिकन् तिक आद्युदात्तः । वृत-वर्तिका । कृत-कित्त्वम्-
तु त । कम-कन्तुः जन-जन्तुः गै-गातुः हि-हेतुः ।
तुन् त आद्युदात्तः । सि-सेतुः तन-तन्तुः मन-मन्तुः ।
ष्टच् ष्ट सप्तदायान्तोदात्तः । खद-खट्टा मन्-मन्था ।
ष्टन् ष्ट आद्युदात्तः । शंस-शंस्था ।
ष्ठण् ष्ठ वृद्ध्यादि । च्यु-च्यौत्नः । (अश्वजः, स्त्रीषष्ठ्यश्च ।
ष्यक् ष्यु-गुणाभावादि । स्कृ-स्कर्यः ।
ष्ठ ष्ठ । गु-गोष्ठं गोष्ठा । वच-वक्ष्यं यम-यन्त्रम् ।
ष्ठन् ष्ठ आद्युदात्तः । ह्रु-ह्रोत्रम् या-यात्रा श्रु-श्रोत्रम् ।
ष्ठिन् ष्ठि आद्युदात्तः । अद-अत्तिः ।
ष्ठिन् ष्ठिन् आद्युदात्तः निञ्चेत्लुकोः न नित् । अद-अत्त्री अत्तिनौ ।
ष्ठिप् ष्ठि-अनुदात्तः । रा-रात्रिः यद-यत्तिः (हस्ती) ।
ष्ठन् ष्ठ आद्युदात्तः । दात्रः (दाता) ।

थ

थक् थ गुणाभावादि । पृष-पृथं यू-यूथं गू-गूथम् ।
थन् थ आद्युदात्तः । उष-ओथः कुष-कोथम् गा-गाथा ।

द

द द । मा-मादः (जम्बालः यस्यच्च) ।
दन् द आद्युदात्तः । शप-शब्दः अव-अवदः ।

ध

धुक् धु गुणाभावादि । धी-धीधु ।

न

न न । धा-धाना (भृष्टयवः) पृ-पर्णम् वस-वस्नः ।
नक् न गुणाभावादि । दृष-दृनः । सि-सिनः ।
नि नि । वी-नि० यत्वं वेणिः । ज्या-ज्यानिः ।
नु नु । दा-दानुः भा-भानुः ।

प

प प । पा-पापम् । नी-नेपः नि० नीपः । विष-विष्पम् ।
पास पास । कृ-कर्पासः ।

फ

फक् फ गुणाभावादि । कल-अस्योत्त्वं कुल्फः गल-गुल्फः ।

भ

भ भ । इ-दर्भः दल-दल्भः (ऋषिवाचकश्च) ।
भन् भ आद्युदात्तः । मृ-अर्भः मृट्-गर्भः ।

म

मक् म गुणाभावादि । द्रुम-द्रुमः युध-युध्मः भी-भीमः ।
मदिक् मद् गुणाभावः । यु-युष्मद्-त्वम् । अस-अस्मद्-अहम् सर्वनाम ।
मन् म आद्युदात्तः । क्ष-अर्ष्मः सु-सोमः सु-सोमः ।
मनि मन् । सु+मृ-सुषर्मा ।
मनिण् मन् इद्विः । अत-आत्मा ।
मनिन् मन् आद्युदात्तः । सो-सामन् ऊ-कर्मन् इ-वर्मन् ।
मि मि । नी-नेमिः भू-कित् भूमिः ।
मिनि मिन् । ङ-होमी ।
मुक मक । उप-लान्तादेशः गुणाभावः उलमुकः । (ज्वलदङ्गारम्) ।

य

य य । गल-गल्यम् ।
यक् य गुणाभावः । जन-जन्यं (युद्धम्) जन्या वधूः ।
यत् य खरितः । यु-युक् युग्यम् धा-धुक् धान्यम् ।
यतुच् यत् सप्तदायान्तोदात्तः । तन-तन्यतुः ।
युक् यु गुणाभावः । भुज-भुज्युः (भोजनम्) । [जन्युः ।
युच् यु न अनादेशः सप्तदायान्तोदात्तः । मन-मन्युः जन-
युन् यु-अन आद्युदात्तः । हन-आद्यन्तयोर्घतौ घतनः ।

र

र र । रीङ्-लुखः घुट् च रिप्रम् (कृत्सितम्) ।
रक् र गुणाभावः । स्काय-स्कारम् । क्षिप-क्षिप्रम् रूप-रूप्रः ।
रन् र आद्युदात्तः । इदि-इन्द्रः वज-वज्रः । भी-भेरः ।
रु रु । भी-भेरुः पी-पेरुः पा-पारुः । जत-जल्गुः ।

ल

लक् ल कित् । श्री-श्रीलम् ।

व

व व । कृ-कर्वः मृ-मर्वः मृ-मर्वः बगादिरित्येके ।
वन् व आद्युदात्तः । इण-एव, खरादिः । श्री-श्रेवः ।
वन् वन् न निच्चं ज्ञापकात् । अ-अर्वा (कुत्सितः) ।
वनिप् वन् अनुदात्तः । स्ना-स्नावा अ-अर्वा (तरङ्गहयोः) ।
वरट् वर स्त्रियां ङीप् । अव-उपधाया ईत्त्वम् ईश्वरः ।
वलच् वल सप्तदायान्तोदात्तः । इल-इल्वलः पल-पल्वलः ।
वलञ् वल इद्विः । श्री-श्रैवलः । [दरादित्वात् सैवालश्च ।
वालुञ् वाल इद्विः आद्युदात्तः । श्री-श्रैवालः । पृषो-
वालन् वाल आद्युदात्तः । श्री-श्रेवालः नि० वस्य पः, श्रेपालश्च ।
वि वि ज्ञापकस्य न लोपः । इ-वर्विः बगादिरित्येके ।
विन् वि-अनुदात्तत्वप्रतिज्ञाभावात् नास्य इदित्त्वं तेन न विलोपः । इ-वर्विः । बगादिरित्येके ।
वुन् वु अक-आद्युदात्तः । कृ-करकः करका ।

श

शक् श वकारप्रश्लेषात् न णित् गुणाभावः । इ-वृशः ।
शुन् शु आद्युदात्तः । सृज-सृष्टभावः पर्शुः (आयुधम्) ।
श्वण् श्व वृद्धिः । सृज-सृष्टभावः पार्श्वः ।

ष

षवन् अव आद्युदात्तः स्त्रियां ङीप् । प्रथ-संप्रसारणे पृथ्वी ।
षिवन् इव आद्युदात्तः स्त्रियां ङीप् । प्रथ-सम्प्रसारणे पृथिवी
ष्टन् ल-आद्युदात्तः । वस-वस्नं यस-यस्नम् अस-अस्नम् स्त्रियां ङीप् । नड्डी । [मृ-मर्वरी ।
ष्वरच् वर सप्तदायान्तोदात्तः स्त्रियां ङीप् । इ-वर्वरः

स

स स । वृ-वर्षम् । तृ-तर्षः । वस-वत्सः । हन-हंसः ।
सन् स आद्युदात्तः । अम-अंसः ।
सरन् सर आद्युदात्तः । अज-अजरम् । वस-वत्सरः ।
सिकन् सिक आद्युदात्तः । हन-हंसिका (हंसयोषित्) ।
स्नन् स्न आद्युदात्तः । स्रुच-स्रुच्नम् ।
सु सु । मद-मत्सुः ।
स्यन् स्य आद्युदात्तः । मद-मत्स्यः ।

इत्युणादिप्रत्ययस्वरूपादिप्रदर्शनम् ।

शब्दविभागनियमादि ।

शब्दास्तावत् चतुर्विधाः रूढयौगिकयोगरूढपारिभाषिकभेदात् । तत्र अवयवशक्तिमनपेक्ष्य समुदायशक्त्या कस्यचिदिभिधेयस्य बोधः ते रूढाः । यथा आखण्डलमखण्डपरशुप्रभृतयः तत्र अवयवार्थाबोधनेनैव समुदायेन विशिष्टार्थस्य बोधनात् ।

द्रव्यगुणक्रियासम्बन्धस्वरूपावयवार्थयोगेन तत्तद्विशिष्टार्थबोधका यौगिकाः । यथा धनवान् दण्डी रूपवान् रसवान् पाचकः गन्तेत्यादयः । तेषाञ्च धनादिद्रव्यस्य, रूपरसादिगुणस्य, पाकादिक्रियायाश्च संबन्धस्य यथाक्रमं बोधकता । एवञ्च प्रकृतिप्रत्ययाभ्यां तत्तदर्थयोरुपस्थाप्यत्वेन तद्योगरूपसम्बन्धविशिष्टस्य बोधकत्वात् तेषां यौगिकत्वम् । यौगिका अपि कृदन्ततद्धितान्तसमासजभेदात् त्रिविधाः । तत्र पाचकादयः कृदन्ताः, काषायादयः तद्धितान्ताः, राजपुरुषादयः समासजाः । तत्रायं विशेषः कृदन्ताः

क्रियासम्बन्धमात्राभिधायकाः तथा हि पाचक इत्यादौ धातुना पाकस्य, खलादिना कर्त्रादेर्बोधनात् विशिष्टार्थबोधकत्वेन क्रियासम्बन्धबोधकत्वम् ।

तद्धितान्तास्तु द्रव्यगुणक्रियासम्बन्धाभिधायकाः । तत्र धनवान् दण्डीत्यादौ द्रव्यसम्बन्धस्य, रूपवान् रसवान् ज्ञानवान् इत्यादौ रूपादिगुणसम्बन्धस्य, गतिमान् क्रियावान् स्पन्दनवानित्यादौ च गत्यादिक्रियासम्बन्धस्य मतुबादिभिर्बोधनात् तथात्वम् । तत्र सम्बन्धाश्च नानाविधाः स्वस्वामिभावादिरूपाः, तत्तत्प्रकृत्योपात्ततत्तत्क्रियाकारकादिभावादिरूपाश्च तत्र धनवानित्यादौ स्वस्वामिभावादिः । काषायः लाक्षिक इत्यादौ रञ्जनकर्म्म, शाब्दिक इत्यादौ वेदनकर्म्म, पञ्चपुरित्यादौ क्रयकर्म्म, पथिक इत्यादौ गमनकर्त्ता, इत्येवमादयोऽर्थाः अर्थादिप्रत्ययेन बोध्यन्ते ।

समासजा अपि द्रव्यगुणक्रियासम्बन्धबोधकभेदेन प्रथमं त्रिविधाः । तत्रापि द्रव्ययोः, द्रव्यगुणयोः, द्रव्यक्रिययोः, गुणयोः, गुणक्रिययोः, क्रिययोश्च सम्बन्धबोधकत्वेन ते पुनः षड्विधाः । तत्र राजपुरुषः राजधनमित्यादौ द्रव्ययोः, षटरूपं विप्रज्ञानमित्यादौ द्रव्यगुणयोः, रथगतिः, पादक्रियेत्यादौ द्रव्यक्रिययोः, नीलोत्पलः लवणरक्त इत्यादौ गुणयोः, गतिरोधः, भोजनज्ञानमित्यादौ गुणक्रिययोः, स्नातानुलिप्तः पक्वभुक्त इत्यादौ क्रिययोश्च सम्बन्धस्य साक्षात्, परम्परया वा बोधनात् तथात्वम् ।

तत्र कृतः, तद्धिताः समासाश्च नानाविधाः तेषां स्वरूपभेदाः अर्थविशेषाश्च व्याकरणत एवावगन्तव्याः ।

यत्र अवयवशक्त्या प्रकृतिप्रत्ययार्थयोरुपस्थापनेन तद्योगविशिष्टस्य समुदायशक्त्या रूढ्या इत्था कस्यचित् पदार्थस्य बोधनं ते योगरूढाः । यथा पङ्कजमनोज्ञादयः, ते च अवयवशक्त्या उपस्थापितेन पङ्कजनिकर्तृत्वरूपेणार्थेन सहितस्य रूढ्या इत्था पद्मत्वादिविशिष्टस्य बोधनात् योगरूढाः । तेन पङ्कजशब्दादितः न कुसुदादीनां बोधः ।

अन्ये तु पङ्कजनिकर्तृत्वरूपार्थस्य कुसुदादिषु सद्भावेऽपि पङ्कजशब्दप्रयोगे पद्मत्वसुपाधिरिति प्रयोगनियमेन पद्मत्वादिकस्य तत्र उपाधित्वमङ्गीकृत्य न कुसुदादिषु तत्प्रयोगस्तथाच पङ्कजादिशब्दादीनां यौगिकेष्वेवान्तर्भाव इत्यूररीचक्रुः ।

वैयाकरणास्तु समासनिष्पन्नानामपि शब्दानाम्

"समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत् ।"

इति पङ्कजशब्दवत् योगरूढत्वमेव स्वीचक्रुः ।

समासानां सम्बन्धवाचकत्वेयं विशेषः दिग्नामविकल्पार्थक भिन्नबहुव्रीहेर्भेदसम्बन्धवाचकत्वम् । यथा पीताम्बरः बहुधनः इत्यादयः पीताम्बरादिभेदसम्बन्धवाचकाः । दिग्नामसमासे उत्तरपूर्व्वा पूर्व्वदक्षिणेत्यादौ, द्विता पञ्चधा इत्यादौ विकल्पार्थकसमासे च न भेदसम्बन्धबोधकत्वं किन्तु कर्म्मधारयवत् अभेदसम्बन्धबोधकत्वम् बहुव्रीहेरपि भेदसम्बन्धबोधकत्वेऽयं विशेषः, क्वचित् कर्म्मत्वादिकारकसम्बन्धः क्वचिच्च स्वस्वामिभावादिसम्बन्धः बोध्यते तत्र आरूढवानरादौ कर्म्मत्वादिसम्बन्धस्य पीताम्बरादौ तु स्वस्वामिभावसम्बन्धस्य बोधः । यथा आरूढो वानरोऽयम् प्राप्तसदकं यमिति विग्रहे आरूढवानरप्राप्तोदकशब्दौ वानरकर्त्तृकारोहणकर्म्मणः उदककर्त्तृकप्राप्तिकर्म्मणश्च बोधकौ । एवम् जढो रथो येन इति विग्रहे जढरथशब्दादेः रथवहनकरणस्य, दृष्टो रथो येनेति विग्रहे दृष्टरथादेश्च रथदर्शनादिकर्त्तुश्च बोधकत्वम् । उपहृतः पशुर्यस्मै इति विग्रहे उपहृतपशुशब्दादेः पशूपहरणसम्प्रदानस्य, पतितं पत्रं यस्मादिति विग्रहे पतितपत्रादेः पत्रपतनापादानस्य, निहितो घटो यत्रेति विग्रहे निहितघटादिशब्दस्य, घटनिधानाधिकरणस्य च बोधकत्वम् । एवमव्ययीभावहस्वेष्वपि भेदसम्बन्धबोधकत्वमूह्यम् । हस्वस्य एकक्रियान्वयित्वरूपसम्बन्धबोधकत्वात् तथात्वं अव्ययीभावस्य तु तथात्वं प्रसिद्धमेव

तत्पुरुषेऽपि पूर्व्वपदार्थस्य उत्तरपदार्थे, क्वचिच्च उत्तरपदार्थस्य पूर्व्वपदार्थे सम्बन्धबोधकता । यथा राजपुरुष इत्यादौ राजादिपूर्व्वपदार्थस्य उत्तरपदार्थे पुरुषादौ, अङ्गेग्राम इत्यादौ च ग्रामादेरुत्तरपदार्थस्य अङ्गादिपूर्व्वपदार्थे, सम्बन्धो बोध्यते । स च सम्बन्धः स्वस्वामिभावः कारकरूपश्च । तत्र राजपुरुषादौ स्वस्वामिभावस्य, ग्रामश्रितादौ, श्रयणकर्म्मणः रामकृतमित्यादौ कर्त्तुः अध्वगतमित्यादौ गतिकरणस्य व्याघ्रभीत इत्यादौ भयापादानस्य, ग्रामस्थित इत्यादौ स्थित्यधिकरणस्य यथायथं पूर्व्वपदार्थस्य उत्तरपदार्थेऽन्वयः । द्विगौ, कर्म्मधारये, समानाधिकरणबहुव्रीहेरवान्तरपदार्थयोराभेदेनैवान्वयात् कर्म्मधारयस्य द्विगौः समानाधिकरणबहुव्रीहेश्च स्वघटकपदार्थाभेदबोधकत्वमिति विवेकः । उपपदसमासस्य तु तत्पुरुष एवान्तर्भावः अन्यत् यथासम्भवमूह्यनीयम् ।

शास्त्रकारसङ्केतविशेषेण तत्तदर्थबोधकाः शब्दाः पारिभाषिकाः । यथा "कर्त्तुरीप्सिततमं कर्म्म," "साधकतमं करणम्" योगश्चित्तवृत्तिनिरोध इत्यादयः । तत्तच्छास्त्रकारैः, कर्म्मशब्दः कर्त्तुरीप्सिततमं, करणशब्दः साधकतमं, योगशब्दः चित्तवृत्तिनिरोधं बोधयितीच्छाविशेषरूपपरिभाषात्मकसङ्केतेन तत्तदर्थानां बोधनात् तथात्वम् ।

परिभाषायाश्च आधुनिकसङ्केतत्वेन सादित्वात् अनादिसङ्केतवतो रूढ्याद्भेदः ।

तेषां सङ्केतविशेषकरणञ्च तत्तच्छास्त्रेषु तत्तच्छब्देन तत्र तत्र पारिभाषिकार्थानामेव ग्रहणार्थम् । अत एव "क्तिसाक्तिनयोर्मध्ये क्तिमि कार्यसंप्रत्ययः" इति परिभाषया क्तिमन्तसङ्केतवत एव ग्रहणसूत्रम् तेन "कर्मण्यण्" "कर्मणि द्वितीया" इत्यादौ स्वशास्त्रे पारिभाषिकार्थानामेव कर्मादीनां ग्रहणं न तु "कर्म क्रिया" इति कोषोक्तक्रियादीनां ग्रहणम् ।

केचित्तु सङ्केतवत्त्वसाम्यात् पारिभाषिकस्य रूढ्येवान्तर्भावमिच्छन्ति ।

यत्किञ्च अस्माच्छब्दादयमर्थो बोध्य इत्याकाङ्क्षा । सा च सम्प्रदायप्रवर्तकस्य ईश्वरस्य तत्स्थानीयत्वेन कल्पितस्य तथाविधस्य अपरस्य वेत्यन्यदेतत् । तथा च सम्प्रदायप्रवर्तकस्य इदानीमसुलभतया कस्य शब्दस्य कोऽर्थः? इति जिज्ञासायां पूर्वपूर्वसम्प्रदायानुसारेण आप्तप्रायैः अमरादिभिः स्वस्वकोषेषु, बाहुल्येन रूढानां, केषाञ्चिच्च यौगिकानां शब्दानाम्, पाणिन्यादिभिश्च स्वस्वपाठादिषु बाहुल्येन यौगिकानां, केषाञ्चिच्च रूढानामर्थविशेषा दर्शिताः । अत एवोक्तम्

यत्किञ्चिदहं व्याकरणोपमानात् कोषाप्तवाक्यात् व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥ इति

अमरकोषादिषु च एकैकग्रन्थेषु सर्वशब्दानामनुक्तेः यावत् कोषज्ञानस्य इदानीन्तनैरशक्यतया तेषामसुलभतया च, यौगिकशब्दज्ञानोपयोगिनश्च पाणिन्यागमस्य प्रायशः दुर्बोधतया तत्तद्ग्रन्थानां च एकैकपुरुषेण बहुकालसाध्यपाठतया, पठितानामपि सदा स्मरणाभावेन, तत्तद्ग्रन्थानाञ्च सुपरिपाटीकत्वाभावेन कथङ्कारं सर्वशब्दार्थज्ञानम् सुकरं भवेत् इत्यतः वेदपुराणेतिहासतन्त्रशास्त्रदर्शनशास्त्रज्योतिषनीतिशास्त्रवैद्यकव्याकरणादिशास्त्रेषु प्रयुक्तशब्दानां तत्र तत्र पारिभाषिकशब्दानाञ्च अर्थज्ञानाय नानाकोषादिभ्यः शब्दानां सङ्कलनेन सुपरिपाटीकतया एतद्रचनायामस्माभिः प्रवृत्तम् ।

यानि यानि च शास्त्राण्यालोच्य तत्तदर्थविशेषावधारणं कृतम् उदाहरणतया च तत्तद्ग्रामान्यत्र तत्तच्छब्दार्थदर्शनावसरे प्रदर्शयिष्यन्ते प्रदर्शयिष्यन्ते चात्र तेषां ग्रन्थानां समष्टीकृत्य नामानि ।

यौगिकशब्दानामपि अनन्तभेदतया दिङ्मात्रतयाऽत्र प्रदर्शनं कृतम् अन्यथा एकैकधातोः एकैकप्रत्ययान्ततया शब्दभेदकल्पनेऽनन्तशब्दाः स्युस्तत्कथने च वृथा ग्रन्थबाहुल्यमात्रसम्पादनमनतिप्रयोजनञ्च । अत एवोक्तम्

वृहस्पतिर्दिव्यं वर्षशतमिन्द्राय शब्दपारायणं
जगौ नैवान्तं जगामेति ।

तथा च प्रतिपदशब्दार्थकथनापेक्षया प्रकृतिप्रत्ययविभागेन शब्दसाधुतासम्बोधनाय लघूपायतया व्याकरणमारब्धं तन्त्रकारैः । तच्च तत एवागन्तव्यम् । किन्तु पाणिन्यागमानामिदानीम् असुलभतया बहूनाञ्च तदज्ञानेन तेषां बोधनार्थं ततः सारमाकृष्य अपेक्षितयौगिकशब्दानामर्थविशेषोऽत्राभिधास्यते ।

किञ्च यावन्तः शब्दास्तावन्त एव नञ्योगेन शब्दाः स्युरिति नञ्योगेन शब्दबाहुल्यसम्पादनमकिञ्चित्करमेवेति नञ्युक्तशब्दा अस्माभिः आधुनिककोषकृद्भिरिव नाहृताः किन्तु यत्र यत्र अर्थविशेषः यथा असुरः अब्राह्मण इत्यादिषु तत्रैव संगृह्योक्ताः ।

अपरञ्च यौगिकशब्दानां पूर्वोत्तरपदयोः परिवर्त्तनेन नानारूपता स्यात् तेषां प्रत्येकं ग्रहणे च दुष्टानन्तभेदकल्पनेन ग्रन्थबाहुल्यमात्रसम्पादनं अर्वाचीनानामिव दृष्टा स्यात् न च तत्र प्रयोजनाधिक्यमित्यतः प्रथमं कञ्चित् नियमविशेषोऽभिधीयते यद्बलात् पूर्वोत्तरपदपरिवर्त्तनेन तत्तत्समानार्थकशब्दार्थग्रहः सुकरो भवेत् ।

नियमो यथा

स्वत्वविशिष्टपूर्वपदात्, पाल, धर, भृग् धारिन् भृत्, पति, नेतृशब्दास्तत्समानार्थकशब्दाः मत्वर्थीयप्रत्ययश्च यदा प्रयुज्यन्ते तदा तत्स्वामी बोध्यते । यथा भूपालः भूधरः भूभृक् भूधारी भूभृत् भूपतिः भूनेता इत्यादयः, भूमान् इत्यादयश्च भूमिपतिवाचकाः अत्र समानार्थकशब्दैः पूर्वपदपरिवर्त्तने उत्तरपदपरिवर्त्तने च स एवार्थोऽभिधीयते । यथा भूमिपालः भूमिरक्षकः इत्यादिषु ।

जन्यवाचकपूर्वपदात् कृत्-कर्तृ सृ-सृट्-सृष्ट-विधातृ कारक-प्रभृतिशब्दास्तत्पर्यायशब्दाश्च प्रयुक्ताः तज्जनकबोधकाः । यथा विश्वकृत् विश्वकर्त्ता विश्वसृः विश्वसृट् विश्वसृष्टा विश्वविधाता विश्वकारकइत्यादयः सर्वकृत् सर्वकर्त्तेत्यादयश्च चतुर्मुखस्य वाचकाः ।

जनकवाचकपूर्वपदात्, योनि, ज, रुह, जन्मन्, भू, भव इत्यादयस्तत्पर्यायाश्च तज्जन्यबोधकाः । यथा भूमियोनिः भूमिजः भूमिरुहः भूमिजन्मा भूमिभूः भूमिभवः इत्यादयः क्ष्मायोनिः क्ष्माज इत्यादयश्च । तथा अपत्यभवाद्यर्थे अणादयश्च जन्यवाचकाः । यथा भौमः माहेयः इत्यादयः ।

धार्यर्थशस्त्रादिवाचकपूर्वपदात्, पाणिबृहौलि, भूषण, भृच्छालिन् शेखर, धर्तृ, धारकप्रभृतयः तत्पर्यायशब्दाः मत्वर्थीयप्रत्ययाश्च तद्धारकवाचकाः । यथा शूलपाणिः शूलाङ्कः चन्द्रमौलिः चन्द्रभूषणः शूलभृत् शूलशाली चन्द्रशेखरः शूली शूलवान् इत्यादयः । इयांस्तु विशेषः । यत्र यत्रावयवे धार्यत्वं प्रतीयते तत्तद्वाचकशब्दा एव उत्तरपदे निवेशनीयाः । यथा शूलहस्तः चन्द्रमस्तक इत्यादि ।

भोज्यवाचकपूर्वपदात् अन्न, भुज्, व्रत, लिट्, पायिन्, प,

अग, अगनादयः उत्तरपदस्थाः तद्वृक्षवाचकाः। यथा मध्वत्रः मधुभुक् मधुव्रतः मधुलिट् मधुपायी मधुपः मध्वगः मध्वशन इत्यादयः पूर्वोत्तरशब्दपरिवर्त्तनेन तत्पर्य्यायशब्दाश्च भ्रमरवाचकाः।

पतिवाचकात् कान्ता प्रिया, वधू प्रणयिनी इत्यादयः उत्तरपदस्थाः तद्भार्य्यावाचकाः। यथा हरकान्ता हरप्रिया हरवधूः हरप्रणयिनी इत्यादयः पूर्वोत्तरशब्दपरिवर्त्तने तत्तत्पर्य्यायशब्दाश्च दुर्गावाचकाः।

भार्य्यावाचकात् वर, रमण, प्रणयिन्, प्रिय, प्रभु, नाथादयः उत्तरपदस्थाः तत्पतिवाचकाः। यथा रमावरः रमारमणः रमाप्रणयी रमाप्रियः रमाप्रभुः रमानाथ इत्यादयः कमलावरादयश्च विष्णुवाचकाः।

सखिवाचकपूर्व्वपदात् सखिवाचकाः शब्दाः सख्यन्तरवाचकाः यथा शिवसखः शिवसुहृत् शिवमित्रम् इत्यादयः कुबेरवाचकाः।

वाहनवस्तुपूर्व्वपदात् गामिन्—यानासनप्रभृतयः शब्दाः तद्वाह्यबोधकाः। यथा हयगामी हययानः हयासन इत्यादयः।

जन्मनिमित्तकसम्बन्धविशिष्टपूर्व्वपदात् स्वस्रादयः, दुहित्रादयः, आत्मजादयः, अपत्यादयः, अवरजादयश्च तत्तत्सम्बन्धवाचकाः। यथा यमनस्वसा यमनभगिनी यमनसहोदरेत्यादयः एकसूर्य्यतेजन्मत्वेन यमुनाबोधकाः। सूर्य्यदुहिता सूर्य्यनन्दिनी सूर्य्यतनया सूर्य्यपुत्रीत्यादयः तज्जन्मसम्बन्धत्वेन यमुनाबोधकाः। शिवतनयः शिवपुत्रः शिवात्मज इत्यादयः शिवतो जन्मवत्कार्त्तिकेयादिवाचकाः। यमुनाग्रजः यमुनाभ्राता यमुनासहोदर इत्यादयः यमुनासमानजन्मसम्बन्धत्वेन यमबोधकाः। रामानुजः रामावरज इत्यादयः रामपश्चाज्जन्मभाग्वासुदेववाचकाः।

आश्रयवाचकपूर्व्वपदात् शय, वासिन्, सद्मन्, स्थित, सद्, स्थितादिशब्दाः तदाश्रितवाचकाः। यथा भूमिशयः भूमिवासी भूमिसद्मा भूमिश्रितः भूमिसद् भूमिस्थितः इत्यादयः।

बध्यवाचकपूर्व्वपदात् भिद् द्वेषिन् छिद् घ्न् जिद् घातिन् घ्न् रिपु ध्वंसिन् यातनादयः अन्तकदमनदर्पहन् मथनादयश्च तद्घातकवाचकाः। यथा कामभित् कामद्वेषी कामच्छित् कामघक् कामजित् कामघाती कामघ्नक् कामरिपुः कामध्वंसी कामयातनः इत्यादयः। एवं कामान्तकः कामदमनः कामदर्पहा काममथन इत्यादयः शिववाचकाः।

अथ च प्रायशोऽतिदेशेन तत्तच्छब्दानां तत्तदर्थवाचित्वं यथावसरं दर्शयिष्यते दिङ्मात्रमिहोदाहरणसङ्क्रमः।

एवंप्रकारेण पूर्व्वोत्तरपदयोः परिवर्त्तनेन बहवः शब्दास्तत्तदर्थवाचका भवन्ति। तत्राधर्यं विशेषः। वृषादेर्वाहनत्वविवक्षायां वृषवाहनादयः प्रयोज्याः, स्वत्वविवक्षायां वृषपतिः वृषस्वामी वृषवान् इत्यादयः, चिह्नत्वविवक्षायां वृषाङ्कः वृषलाञ्छन इत्यादयः। अंश्वादेर्धार्य्यत्वविवक्षायाम् अंशुमाली अंशुभृत् अंशुधर इत्यादयः, स्वत्वविवक्षायाम् अंशुपतिः अंशुमानित्यादयः। सर्पादेर्बध्यत्वविवक्षायां सर्परिपुः सर्पारिः सर्पघ्नः इत्यादयः। भक्ष्यत्वविवक्षायां सर्पभुक् सर्पभोजनः सर्पाशन इत्यादयः यथायथं प्रयोज्याः।

द्रव्यजातिवाचकशब्दा अपि चिह्नत्वविवक्षायां तत्तच्चिह्नितवस्तुनो वाचका भवन्ति। यथा अगस्तिचिह्ना दक्षिणाशा, मकरचिह्नः कामः इत्यादयः।

अयुग्मायुगविषमादिशब्दाः पूर्व्वपदस्थाः त्रिपञ्चसप्तादिवाचकाः। यथा अयुग्मनेत्रः अयुग्मनेत्रः विषमनेत्र इत्यादयः त्रिनेत्रवाचकाः। अयुग्मबाणः अयुग्बाणः विषमबाणः इत्यादयः पञ्चबाणवाचकाः। अयुग्मच्छदः अयुक्छदः विषमच्छद इत्यादयः सप्तच्छदवाचकाः।

अथ पूर्व्वोत्तरपदयोः परिवृत्तिसहत्वासहत्वनियमः।

तत्र भूभृदादिशब्देषु उभयपदयोः परिवृत्तिसहत्वम्। यथा भूभृत् भूमिभृत् क्ष्माभृत् भूधरः भूमिधरः क्ष्माधरः क्ष्मापाल इत्यादयः।

वारिधिप्रभृतिशब्देषु पूर्व्वपदस्यैव परिवृत्तिसहत्वं नोत्तरपदस्य। यथा वारिधिः जलधिः तोयधिः वार्धिः पयोधिः। किन्तूत्तरपदस्य ऊदन्ततया उपसर्गमात्रेणैव व्यवधानमात्रम्। यथा वारिधिः वारिनिधिः पयोधिः पयोनिधिः जलधिः जलनिधिः इत्यादयः इयांस्तु विशेषः वाडाद्योपसर्गशब्दपूर्व्वपदस्य प्रयोगोऽस्ति तादृशपूर्व्वकस्यैव न तु सर्व्वोपसर्गपूर्व्वकाणाम्।

वाड़वाग्न्यादिषु उत्तरपदस्यैव परिवृत्तिसहत्वम्। यथा वाड़वाग्निः वाड़वानलः वाड़वादहन इत्यादयः। इत्थंभूताः सर्व्वेऽपि शब्दाः यौगिका एव।

गोर्व्वाणादिषु उभयोः पदयोर्न परिवृत्तिसहत्वमिति तेषां योगरूढत्वमेव।

नञ्पूर्व्वपदा इतरोत्तरपदाश्च सुखवाचकशब्दाः विरोध्यर्थवाचकाः। यथा असितः अशुक्लः इत्यादयः, एवं सितेतरः शुक्लेतरः इत्यादयः, शुक्लत्वविरोधिकृष्णत्ववाचकाः एवं अतुष्ण उष्णेतरः इत्यादयः उष्णविरोधिशीतस्पर्शबोधकाः सुखेतरत् असुखमित्यादयः सुखविरोधिदुःखवाचकाः एवम् अपुण्यम् पुण्येतरदित्यादयः पुण्यविरोधिपापबोधकाः।

इत्येवं नियमावली ज्ञानसौकर्यार्थमादौ प्रदर्शिता एतदनुसन्धानेन अलानुक्ता अतिदिष्टतया तत्तदवसरे उक्तप्रायाश्च शब्दा यथायथम् ऊहनीयाः ।

गुणवाचकशब्दमध्ये शुक्लादिरूप-मधुरादिरस-खरादिस्पर्श-शीघ्रादिवेग—वाचकशब्देभ्यः यथाप्राप्तं विहितमत्वर्थीयस्य तद्धितस्य लुकि व्यक्तेः (विशेष्यस्य) लिङ्गानुसारित्वम् तथा च शुक्लादयः रूपवाचकाः शब्दा गुणपरत्वे पुंलिङ्गाः तदुत्तरात् मत्वर्थप्रत्ययस्य लुका गुणवत्परत्वे विशेष्यलिङ्गाः । यथा गुणे शुक्लः नीलः पीतः रक्त इत्यादि गुणिनि शुक्लः पटः शुक्ला शाटी शुक्लं वस्त्रम् एवं नीलः नीला नीलं पीतः पीता पीतमित्यादि । एवं स्पर्शविशेषे खरादयः क्लीवलिङ्गाः तद्वति त्रिलिङ्गाः । यथा खरं तिग्मं तीक्ष्णमित्यादि तद्वति खरः किरणः खरा दीधितिः खरं तेज इत्यादि । एवं स्पर्शे शीतं शीतलं शिशिरमित्यादि तद्वति शीतचन्द्रः शीता क्ष्मानी शीतं जलमित्यादि । तथा वेगे शीघ्रं त्वरितमित्यादि वेगवति शीघ्रोऽश्वः शीघ्रा वडवा शीघ्रं यानमित्यादि । एवं रसे मधुरः कटुः अम्ल इत्यादि तद्वति मधुरो गुडः मधुरा द्राक्षा मधुरं सौहित्यादि एवं कटुः कट्वी कटु इत्यादयः बोध्याः ।

स्त्रीपुंसवाचकशब्दा अपि अल्पत्वविवक्षायां स्त्रीलिङ्गाः स्युः । यथा घटी पटीत्यादयः स्वल्पघटादिवाचकाः ।

बहुभिः कोषकारैः शब्दानां लिङ्गानुशासनम् कृतं तदनुसारेण प्रायेणाभिप्रेतलिङ्गशब्दप्रदर्शनसमये लिङ्गान्युक्तानि किन्तु तानि अमूलकानि समूलकानि वा तत्प्रदर्शनाय प्रथमतः पाणिनीयलिङ्गानुशासनसूत्राणि प्रदर्शितानि तानि च समालोक्य तत्तत्कोषोक्तलिङ्गानां प्रामाणिकत्वाप्रामाणिकत्वे सुधीभिर्विवेचनीये इति दिक् ।

अथ शब्दव्युत्पत्तिदर्शने कारणादि ।

धातुपाठ-गणपाठ-संयुतं
सूत्रपाठमखिलं सवार्त्तिकम् ।
भाष्यमस्य सरहस्यमर्थतो
ये विदन्ति खलु केऽपि ते विदः ॥ १ ॥

उत्तरङ्गो महानक्रवक्रोक्तिचक्रभीषणः ।
शब्दसिन्धुः सदुर्गम्यो दुस्तरोऽकृतबुद्धिभिः ॥ २ ॥

येषां सद्गुरुकर्णधारभजनं प्रज्ञावहिर्वागमो-
ऽभ्यासश्चानुगुणो मरुत् प्रतिदिनं शब्दागमाम्भोनिधौ ।
पारं यत्नवशादवाप्य नितरां रत्नानि लभ्यानि तै-
र्दूरात् तीरगतैस्तु दर्शनभिया धीदङ्गिराप्यानि किम् ?३

भाष्याद्यागमवारिधौ गुरुहरिप्रोत्साहनाशालिभिः
प्रज्ञावासुकिरज्जुकर्षणयुजा यत्नौघमन्थाद्रिणा ।
तत्साहैर्गुरुकैयटादिवचनैरालोड्यते तत्सुधाम्
व्युत्पत्तिं सुमनोभिरेत्य सुतरां चित्ते परं निर्वृतम् ॥४॥

नो चक्षुषापि कलिता किल कौमुदी यै-
र्भाष्यादिदीपनिवहौघगतो न वा यैः ।
येषाञ्च पाणिनिमतार्कसमागमो नो
तेषां तमःप्रचय एव न चास्य शान्तिः ॥ ५ ॥

यैर्वीक्षिता नोज्ज्वलदत्तवृत्ति-
र्नो काशिकावृत्तिरथाध्यगामि ।
नालोकिता यैर्गणरत्नवृत्ति-
स्तेषां तमःशान्तिरुदेति कस्मात् ? ॥ ६ ॥

पाणिन्यागमसूर्य्येण शब्दाकाशो विकाश्यते
न तु खद्योतमात्रेण स्वल्पव्याकरणादिना ॥७॥

कल्पद्रुमात् फलचयो यदि सौरभं वा
लभ्येत वाञ्छितमथार्थकदम्बकं वा ।
शब्दानुशासनमृते न तदंशबोध-
स्तच्चापि पाणिनिमतन्नतु भिन्नशास्त्रम् ॥ ८ ॥

भाष्याद्यागमनामगन्धमपि ये नाघ्रातवन्तो मनाक्
ते व्युत्पत्तिनिदर्शने यदि रताः किन्नाम ? चित्रं ततः ।

आस्तां तत्र कुमारभाववशतः प्रौढ्या प्रवृत्तिर्हठात्
दौर्भाग्यं वत वङ्गभूमिवसतेस्तत्रादरो यन्मनाक् ॥९॥
कथञ्चित् मुग्धबोधस्य पाठमात्रमदोद्धतैः ।
काव्यमात्रसमालोकात् व्युत्पत्तेर्दर्शनं कथम् ? ॥१०॥
उक्तग्राम्यैकशरणाः सुरिसौरभलोभतः ।
कुमाराद्येत् प्रवर्त्तेरन् प्रवर्त्तन्तां हठान्विताः ॥
तदाकोष्वादरकृतः शोचनीया परं जनाः ।
दौर्भाग्यात् वत वङ्गानां बालवाक्ये समादरः ॥११॥

अत एव प्राचीनैरुक्तम्—

"अहञ्च भाष्यकारश्च कुशाग्रीयधियावुभौ
नैव शब्दाम्बुधेः पारं किमन्ये जड़बुद्धयः" ॥ इति ।
पदवाक्यप्रमाणज्ञा ये रायमुकुटादयः ।
प्रमत्तास्तेऽपि यत्रासन् बालास्तत्रालमद्भुतम् ॥१२॥
अहोचित्रमहोचित्रमहोचित्रमहोदयः ।
पाणिन्याद्यनभिज्ञैर्यैत् व्युत्पत्तीनां प्रदर्शनम् ॥१३॥
डुण्ड्भाचस्तुबालानां महाहिखेलनं यथा ।
अज्ञातशास्त्रतत्त्वानां शब्दव्युत्पादनं तथा ॥ १४ ॥
कोषालोकादर्थजातं काव्यालोकादुदाहृतौ ।
दर्शयेयुः कुमाराद्येत् न च तत्र चतिर्मनाक् ॥१५॥
शास्त्रे व्युत्पादिताः शब्दा अन्यथा दर्शिता यदि ।
विश्वासात् खलु तदाकोष्वन्येषां महती क्षतिः ॥१६॥
समीक्ष्यकारिणो ये तु लज्जाभीतिसमन्विताः ।
यथाज्ञानं प्रवर्त्तन्ते नाज्ञातविषये क्वचित् ॥ १७ ॥
कल्पद्रुमादिकर्त्तारः स्वज्ञानाद्यनुसारतः ।
शब्दार्थदर्शने रक्ता न तु व्युत्पत्तिदर्शने ॥ १८ ॥
येषां चित्ते भृशं लज्जा हासभीतिश्च वर्त्तते ।
न ते तथा प्रवर्त्तन्ते प्रवृत्ता बालका यथा ॥ १९ ॥
पाणिन्याद्यनुसारेण शब्दसाधनतत्पराः ।
भवेयुर्यद्येत् तदा लोके शोभन्ते नान्यथा क्वचित् ॥२०॥
यदि बालाग्रहे चित्ते न मनाग्जायते घृणा ।
तदान्यच्चुल्लमार्गेण धावनं परिशीलते ॥ २१ ॥
स्वयमज्ञाततत्त्वानामन्यच्चुल्लपथाश्रिताम् ।
लेशतोऽतिक्रमः क्लान्तो हासाय पतनाय च ॥ २२ ॥
परोत्कीर्णपथक्रान्त्या श्रान्तानां दूरधावनात् ।
मूलचर्चातरुच्छायाराहित्यात् निर्वृतिः कुतः ? ॥२३॥
अन्धानामिव मार्गयानविषये येषां परोक्षं परं
मूलं, ते खलु मार्गदर्शनविधावन्यस्य शक्ताः किमु ? ।
येषां तद्वचने समादरवरस्ते केऽपि लोकाधमा
जाता अन्धतमास्ततोऽद्य वसुधा प्रायोऽन्धतामेष्यति ॥२४
यस्मिन् रुचिर्भवेत् यस्य स तत्रैव प्रवर्त्तताम् ।
निरङ्कुशरुचिर्लोको न वाग्वश्यो हि कस्यचित् ॥२५॥

परिशेषे इदमपि स्मार्य्यते—

"प्रायः शास्त्रमधीते कश्चन तनुते निबन्धमप्यत्र ।
अस्य तु किमपि रहस्यं केचन विज्ञातुमीशते सुधियः"
अनेके चेत् कोषकाराः स्वस्ववुद्धिप्रभावतः ।
चक्रुः कोषानपि तथा गतार्थो न मम श्रमः ॥२६॥

तवेदं प्राचीनपद्यं स्मार्य्यते—

"परिष्कुर्वन्त्वर्थान् सहृदयधुरीणाः कतिपये
तथापि क्लेशो मे कथमपि गतार्थो न भविता ।
तिमीङ्गाः संक्षोभं विदधति पयोधेः पुनरमी
किमेतेनायासो भवति ? विफलो मन्दरगिरेः" ॥
भाष्याद्याशयबोधनैकसरणिं वाक्यप्रदीपं सुदु-
र्दृष्टोद्द्योतसमन्वितं सुविपुलं भाष्यप्रदीपं तथा ।
पाणिन्यष्टकशाकटायनकृते वृत्त्यान्विते वार्त्तिकं
पर्य्यालोच्य समादरादिह मया व्युत्पत्तिरादर्शिता ॥२७
रूढानामपि रूपसाधनकृते कोषादिटीका मया
वङ्गीर्दृष्टवता समाहृतवता ताभ्यश्च सारं परम् ।
लोकानां हितकाम्यया रचितो ग्रन्थः श्रमात् सुक्रमो
विद्वांसोऽस्य विलोकने यदि रताः स्यान्मे श्रमः सार्थकः ॥२८
जिज्ञासूनां बोधनार्थं सम्यग्व्युत्पत्तिसंयुतम् ।
नानाशब्दान् समाहृत्य वाचस्पत्यं मया कृतम् ॥ ३० ॥
सुगमं सुक्रमं वेद—लोकशब्दार्थबोधकृत् ।
वाचस्पत्यमदो वीक्ष्य वाचस्पत्यमवाप्यताम् ॥ ३१ ॥

वाचस्पत्यम्।

अ पु॰ अवति रक्षति अतति सातत्येन तिष्ठतीति वा अव-अत-वा ड। विष्णौ "अकारोविष्णुरुद्दिष्टउकारस्तु महेश्वरः। मकारस्तु स्मृतोब्रह्मा प्रणवस्तु त्रयात्मक" इति। अस्य (विष्णोः) अपत्यम् अत इञ् इः (कामः) अस्य (विष्णोः) पत्नी ङीप् ई (लक्ष्मी)।

अ अव्य॰ अव-प्रीणनादौ ड स्वरादिपाठाद्व्ययत्वम्। अभावे, प्रतिषेधे खल्पेऽर्थे अनुकम्पायां, सम्बोधने, अ अनन्त!। अधिक्षेपे, अ पचसि त्वं जाल्म!। "उपसर्गस्वरविभक्तिप्रतिरूपकार्थेति" स्वरादिगणस्थत्वे अ इति सिद्धान्तकौमुद्यामुदाहृतं मनोरमायाञ्च अ संबोधने अधिक्षेपे निषेधे चेति व्याख्यातम्। "अभावे नञ्नोन" इत्यमरटीकायां नञादेशोऽयमित्युक्तम्। स च आदेशः नखनमुच्चादिभिन्नशब्दघटके उत्तरपदस्थे हलादौ शब्दे परे भवति। स तु नञर्थे एव स्यानितुल्यार्थकत्वादादेशस्य। नञर्थाश्च

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः॥

इत्युक्तेः षड्विधाः। तत्र अब्राह्मणशब्दादौ ब्राह्मणसादृश्यवत्त्वेन क्षत्रियादीनां बोधकता, अघटमित्यादौ घटाभावस्य, अपटइत्यादौ पटभिन्नस्य, अनुदरा कन्येत्यादौ अल्पोदरत्वस्य, अपशवो वै अन्ये गोऽश्वेभ्यइत्यादौ गवाश्वभिन्नपशूनामप्राशस्त्यस्य, असुरः असितइत्यादौ च सुरसित विरोधस्य बोधकता। तत्रायं विशेषः नञः सर्व्वत्र अभावे भेदे च शक्तिः सादृश्यादौ तु निरूढलक्षणा। तत्र अघटमित्यादौ अव्ययीभावे, अधन इत्यादौ बहुव्रीहौ भावप्रधानोत्तरपदके "अभेदः अज्ञानमित्यादौ" नञ्तत्पुरुषे च अभाववोधकता। भावप्रधानभिन्नोत्तरपदनञ्तत्पुरुषे तु अघट इत्यादौ भिन्नत्वबोधकतेति। अत्रेदं बोध्यम्। समासे हलादौ उत्तरपदे नञः स्थाने अइत्यादेशविधानेन समासएवास्य नञर्थकस्य अइत्यस्य प्रयोगः नान्यथा, सम्बोधनादिवाचकस्य तु पृथक्प्रयोगः किन्तु "नञोनवोपसिङि क्षेपे" इति वार्त्तिकेन तिङन्तपदे परेऽपि नञादेशस्य विधानात् तस्यैव पृथक्प्रयोगः। अधिकं नञ्शब्दार्थावसरे वक्ष्यते। अजीवनिरित्यादौ अधिक्षेपार्थकता अजसुमित्यादौ उप॰ स॰। तस्य च क्रियायोगात् प्रतिषेधार्थकता।

अक्षणिन् त्रि॰ न क्षणी नञ् त॰ क्षकारस्यात्व हलत्वाभ्युपगमात् न नुट् नलोपश्चात्वम्। क्षणिभिन्ने, क्षणशून्ये,।

दिवस्याष्टमे भागे शाकं पचति यो नरः।
अक्षणी चाप्रवासी च स वारिचर! मोदते इति भारतम्

हलत्वानाश्रयणे नुटि अक्षणीत्यपि तत्रैवार्षे।

अंश विभाजने अद॰ चु॰ उभ॰। अंशयति ते आंशिशत् त। अङ्गापयतीतिवत् आपुकि अंशापयतीत्येके। अच् अंशः उ-अंशुः णिनि अंशी क्त अंशितः।

अंश पु॰ अंश-भावेऽच्। विभागे "सकृदंशो निपतति सकृत्कन्या प्रदीयते। सकृदाह ददानीति त्रीण्येतानि सकृत् सकृदिति स्मृतिः। कर्म्मणि अच्। विभाज्ये "द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पितेति" "द्वयंहरोऽङ्गहरो वा पुत्रवित्तार्ज्जनात् पितेति" च स्मृतिः। संख्यास्थचक्षादिविभाज्ये तथाङ्के, च "अन्योन्यहाराभिहतौ हरांशावितिं" अंशाहतिश्छेदवधेन भक्तेति" भजेच्छिदोऽरैरथ तैर्विभिन्नैरिति च लीला॰। करणे अच्। अवयवे "अंशुरंशुष्टे देव! सोमाप्यायस्वेति" यजु॰। अंशुरंशुः सर्व्वोप्यवयव इति वेददीपः। "अंशिनः स्वांशगात्यन्ताभावं प्रति स्वयात्मतेति" वेदान्तपरि॰। "अंशो नानाव्यपदेशादिति" शारीरक सूत्रम्, जीवस्य निरवयवब्रह्मावयवत्वाभावमाशङ्क्य भाष्यकृता अंश इवेति व्याख्यातम्। तत्समानार्थकं "ममैवांशो जीवलोके जीवभूतः सनातन" इति गीतावाक्यम्। "चतुर्दश्यष्टमांशे च क्षीणो भवति चन्द्रमाः अमावास्याष्टमांशे च ततः किल भवेदशुरिति, स्मृतिः। विशेषावयवे, राशिचक्रस्य षट्त्रिंशत्तमतमवधा विभाजके भागे, राशेस्त्रिंशद्भा

विभाजके अवयवे, "अक्षस्यांशाः समाख्याताः षष्ट्युत्तरशतत्रयमिति" "क्षेत्रं क्षेत्रा च रेक्काणं नवांशोद्वादशांशकः। त्रिंशांशश्चेति विज्ञेयः षड्वर्ग इति च ज्योतिषम् नवभितोऽंशः (राशेस्त्रिंशभागः) नवांशः एवं द्वादशांशादयः। स च अंशः षष्टिकलात्मकः कला तु षष्टिविकलात्मिका। नवभिर्विभक्ते राशेः त्रिंशात्मके नवांशे च। "द्विभर्तृका मेषनवांशके स्यात्" इत्युपक्रम्य "निःस्वा झषांशे" इति, "विगुणा घटांशे" इति च व्यवहारचमत्कारः। ६, १, २०३ पा० सू० इषादिषु पाठात् अस्य आद्युदात्तत्वम्।

अंशक त्रि० अंश-स्वार्थे कन्। विभाजके। स्त्रियाम् अंशिका। ज्ञातौ दायादे पु० अंश+स्वार्थे कन्। अंशशब्दार्थे "त्रिंशांशकस्था राशे र्भाग" इत्यभिधीयते इति ज्योतिषम् नवभिते राशित्रिंशभागात्मके नवांशे, "द्विभर्तृका मेषनवांशके स्यात् इत्युपक्रम्य" "इषांशके सा पशुगोलयुक्तेति" सिंहांशके सा पितृवाससंस्थितेति, च ज्यो० सौरदिने न०।

अंशल त्रि० अंश+बलोपाधिके मत्वर्थे लच्। बलवति। अंशं लाति ला+क। अंशग्राहके त्रि०।

अंशसवर्णन न० समानोवर्णः योगवियोगयोग्यता सवर्णः ततः करणार्थे णिचि भावे ल्युट् सवर्णनम् अंशयोः अतुल्यच्छेदयोः राश्योः समच्छेदकरणम् ६त०। लीलावत्युक्ते अतुल्यच्छेदराश्योः योगवियोगयोग्यतासम्पादके समच्छेदसाधने क्रियाविशेषे, तत्प्रादर्भावप्रसङ्गमात्र "अन्योन्यहाराभिहतौ हरांशौ राश्योः समच्छेदविधानमेवमिति लीलावत्युक्तम्।

अंशहर त्रि० अंशं हरति हृ-अच्। अंशहारके "हृंग्रहरोर्ङ्हरो वा पुत्रविच्छ्वशुरात् पितेति" स्मृतिः। अतुल्यमने एव हृञोऽच् इति नियमात् अन्यत्र अण्। भारहारः।

अंशावतरण न० ६त०। भारते आ०प०६१अ० उक्ते देवानां स्वस्वभागविशेषेण वासुदेवादिरूपेण पृथिव्यामाविर्भावेन नरदेहग्रहणरूपे अवतरणे।

अंशिन् त्रि० अंश-इनि। अंशकारके "पुनर्विभागकरणे सर्वे वा सुः समांशिन" इति स्मृतिः अंश+मत्वर्थे इनि। अवयविनि। "अंशिनः सांशगात्रत्वाभावं प्रति स्मृत्यादेतति" वेदान्तपरिभाषा।

अंशु पु० अंश-उण० कु। किरणे रश्मौ सूर्यांशौ प्रकाशे प्रभायां तेजे च "अंशवोऽत्र पतिता रवेः किल"? इत्युद्भटः "सूर्यांशुभिर्भिन्नमिवारविन्दमिति" कुमा०। तत्र स्वप्रकाशकस्य तेजःपदार्थस्य समन्तात् प्रसृतः सूर्यादेवोत्पन्नः किञ्चिन्निविडः सूक्ष्मांशविशेषः किरणः, स च प्रायशः सूर्यस्य, तस्य तेजसा प्रदीप्तचन्द्रादेश्च। तदपेक्षया अल्पस्थानप्रसारी किञ्चिद्विरलः सूर्यादेयोग्यः तेजःसूक्ष्मांशः प्रभा, सा च रत्नादिवस्तुनः। चन्द्रादेस्तु अन्यापेक्षयाऽधिकप्रसृतत्वात् किरणसम्भवः अतएव तत्र शीतांशुः सितकिरण इत्यादिप्रयोगः। सूर्यादेयोग्यः तेजःपदार्थस्य किरणादपि निविडः सूक्ष्मांशः आतपः, किरणापेक्षया अतिविरलप्रसारी सूर्यादेयोग्यः परप्रकाशसाधनमतिसूक्ष्मांशविशेषः आलोकः। प्रभायाम् आलोके वा न सूर्योऽनुभूयते। तत्र अंशुशब्दस्य किरणवाचित्वे सहस्रांशुः उष्णांशुः शीतांशुरित्यादयः। प्रभापरत्वे रत्नांशुः नखांशुरित्यादयः। "अजस्रमाश्रावितवल्लकीगुणच्छटोज्ज्वलाङ्गुलनखांशुभिन्नयेति" "हिजावलीबालनिशाकरांशुभिरिति" च माघः। सूक्ष्मांशपरत्वे अंशुकं षट्टांशुकं चीनांशुकमित्यादयः। प्रकाशपरत्वे उपांशु उपसृतप्रकाशत्वाद्धास्य गुप्तत्वं प्रतीयते तच्चार्थिकम्। सूक्ष्मविभागपरत्वे प्रांशुः प्रोद्गतावयवत्वा द्धास्य दीर्घत्वं प्रतीयते तच्चार्थिकम् इति।

अंशुक न० अंशवः सूक्ष्मतन्तवः विषयोऽस्य अंशु+अच्छादि० क। वस्त्रे। "यत्तांशुकाक्षेपविलज्जितानामिति" कुमारः। सूक्ष्मवस्त्रे उत्तरीयवस्त्रे पत्ते (तेज पात) शुक्लवस्त्रे च। अंशु+स्वार्थे कन्। अंशुशब्दार्थे पु०।

अंशुधर पु० धृ-अच् ६त०। सूर्ये अंशुशब्दादयोऽत्र किरणादिधारके वेगधारके च त्रि०।

अंशुपट्ट न० अंशुना सूक्ष्मसूत्रेण युक्तं पट्टम्। सूक्ष्मसूत्र घटितपट्टवस्त्रे। "श्रीफलैरंशुपट्टानामिति" विष्णु०।

अंशुपति पु० ६त०। सूर्ये, तस्य सर्वतेजस्विनां किरणाधायकत्वात् चन्द्रादिप्रहादौ तेजोदायकत्वाद्धास्य तथात्वम् अतएवोक्तं हरिवंशे "सलिलमये यशिनि रवेर्दीधिति" इति "मूर्त्तित्वे परिकल्पितः यशिभृत" इति हरिवंशे च। "अस्तं वावादित्यः सायं प्रविशतीति" "उद्यन्तं वावादित्यमभिरन्तुसमारोहतीति" च श्रुतौ अस्तो सूर्यांशुप्रवेशाभिधानम्। अत एव माघे तस्य स्त्रियां पतित्वेन तस्याश्चमये तासामनुमरणार्थं ज्वलनप्रवेश उक्तः। यथा "हविधाक्षि भर्तरि भृशं विमलाः परलोकमभ्युपगते विविशुः। ज्वलनं स्त्रिय इति"। एवं अंशुहस्तौ स्त्रिट्पतिप्रभृतयोऽत्र।

अंशुमत् पु० अंशु+अस्त्यर्थे मतुप्। सूर्ये, अंशुमाल्लादयो-

यत्न। सूर्य्यवंश्ये असमञ्जःपुत्रे दिलीपजनके राजभेदे तत्कथा रा०आ०४३अ०। अंशुमति पदार्थमाले लि०।

अंशुमती स्त्री० अंशु रूक्षं पत्रमस्याः अंशु+मतुप्+ङीप्। शालपर्णयाम् (शालपान्)।

अंशुमत्फला स्त्री० अंशुमानिव रक्तं फलं मोचकं यस्याः जातिवाचकत्वेऽपि फलान्ततया नङीप् अजा० टाप्, अंशुमानिव समन्तात् प्रस्तं फलतीति फल-अच् वा। कदलीवृक्षे।

अंशुमालिन् पु० अंशुभिर्मलते संबध्नाति मल-णिनि ३त०, अंशवः मालेव ततः अस्त्यर्थे इनि वा। सूर्य्ये, द्वादश संख्यायाञ्च। किरणादिजालवति लि० स्त्रियां ङीप्।

अंशुल पु० अंशुं प्रभां बुद्धिप्रतिभां लाति ला-क। चाणक्ये मुनौ, मुनिमात्रे च। अंशुग्राहके लि०।

अंशुहस्त पु० अंशुः किरणोहस्त इव जलाद्याकर्षणसाधनं यस्य। सूर्य्ये। "गरैरहस्तैरिवोदीच्यान् उद्धरिष्यन् रसानिवेति" रघौ सूर्य्यकिरणानां रसाकर्षकत्वस्य इदानिविधयोक्तत्वादस्य किरणस्य रसाकर्षकत्वाद्धस्तत्वम्। तस्य च सहस्रांशूनां रसाकर्षकत्वमर्थे सहस्रांशुशब्दे वक्ष्यते।

अंश्वादि पु०। ब०। स्वरविशेषार्थं पाणिनिगणपाठोक्ते शब्दसमूहे, "प्रतेरंश्वादयस्तत्पुरुषे" (६,३,१८२ पा०) स च गणः अंशु जन, राजन्, उद्र, खेटक, अजिर, आर्द्रा श्रवण, कृत्तिका चर्चुपुर।

अंस विभाजने अद०चु०उभ०अंसयति ते आंसिसत् त। आधुकि अंसापयतीत्यर्थके। वि+विश्लेषकरणे प्रच्यावने च "व्यंसयामास तत् सैन्यमिति" भारतम्। अच् अंसः।

अंस पुं अंस-कर्म्मभावादौ अच्। अंशशब्दार्थे, स्कन्धे च। "अंसनिषक्तबाहुः" "अंसारोपितचापेनेति" शान्तोऽपि स्कन्धे।

अंसत्र न० अंसं स्कन्धं त्रायते त्रै-क। स्कन्धावरके कवचभेदे।

अंसकूट पुंन० अंसः कूट इव दृढत्वात्। दृढत्स्कन्धे "राजन्योऽसांसकूटक्रथनपटुरटद्घोरधारः कुठार इति प्रबोध०

अंस(से)भार पु० अंसे धृतः भारः या० त० वा अलुक्। स्कन्धधृतभारे। [द्वन्द्व। स्कन्धभारहारके, स्त्रियां ङीप्।

अंस(से)भारिक लि० अंस(से) भारेण हरति भरा०

अंसल लि० अंस+बलोपाधिके अस्त्यर्थे लच्। बलवति।

अंस्य लि० अंसे भवः अंस+यत्। स्कन्धभवे, "ये अंसा ये अङ्गाः स्रुचिका" इति वेदः। अंस-कर्म्मणि यत्। विभाज्ये लि०।

अंह भाषने अद० चु० उभ०। अंहयति ते आंजिहत् त।

अंहति स्त्री० हन्ति दुरितमनया हन-अति, अंहादेशः। दाने।

अंहस् न० अमति गच्छति प्रायश्चित्तेन अम-असुन् हुक् च। पापे "सङ्कल्पजंरुस" इति वेदः स्वधर्म्मत्यागे "लोभोऽनृतं चौर्य्यमनार्य्यमंहो ज्येष्ठा च माया कलहश्च दण्ड" इति भागवते कलिं प्रति परीक्षिद्वाक्यम् अंहः स्वधर्म्मत्यागः इति श्रीधरस्वामिरघुनन्दनादयः।

अंहिति स्त्री० अहि-क्तिन् षत्वादित्वात् ढत्। दाने।

अंहु लि० अहि-अङ० कु। पापकारिणि। "आ वोऽर्वाची सुमतिर्वव्रत्वादंहोश्चिद्या" इति (व० ८, ७) "अंहोः" पापकारिणः हननशीलस्येति वेददीपः।

अंहुर लि० अहि-अङ्गुरादि० उरच्। गतियुक्ते "सप्त मर्य्यादाः कवयस्ततक्षुस्तासामेकामिदभ्यंहुरो गात्" इति वेदः।

अंह्रि पु० अंहति गच्छत्यनेन अहि-बहुलादि० क्रिन्। पादे वृक्षादीनां मूले, तेन अंह्रिपो वृक्षः। चतुःसंख्यायाञ्च।

अंह्रिप पु० अंह्रिणा मूलेन पिबति सिक्ततोयम् पा-क। वृक्षमात्रे। [उपरिभागे च।

अंह्रिस्कन्ध पु० अंह्रेः स्कन्धइव। गुल्फेऽङ्गुष्ठाङ्गुलिमध्यभागस्थ

अक वक्रगतौ भ्वा० प० घटादि। अकति आकीत्। अकयति।

अक न० न कम् सुखम् गुणवचनस्य नञ्योगे विरोध्यर्थाभिधायिता न० त०। दुःखे। नास्ति कं सुखं यस्मात्। पापे। नाकशब्दे अकं दुःखं पापं वा।

अकच पु० अकाय दुःखाय चायते चाय-ड। केतयष्टे तस्य चोदयेन लोकोपद्रवस्य शास्त्रप्रसिद्धिः केतशब्दे विस्तरः। "उपद्रवाय लोकानां धूमकेतुरिवोत्थित इति कुमा०। नास्ति कचोयस्य। केशशून्ये (टाकरोगयुक्ते) लि०।

अकाडम न० अ,क,ड,म, इत्यादिक्रमेण आद्यकोष्ठादौ वर्णेसप्तदायोऽस्यत्र अच्। याह्यगोपालमन्त्रस्य गुणागुणविचारोपयोगिनि चक्रभेदे। तत्स्वरूपं यथा रुद्रयामले—"रेखात्रयं पूर्व्वपरे मध्ये रेखात्रयं लिखेत्। चतुष्कोणे चतूरेखाऽकडमं चक्रमण्डलम्। श्यामायित्वा महाछत्तं निर्म्माय वर्णमालिखेत्। अकारादिक्षकारान्तान् क्लीवहीनान् लिखेत्ततः। एकैकक्रमतो लेख्यान्नेभादिकृष्णान्तकान्। वामावर्त्तेन गण्येत् क्रमशो वीरवल्लभ!। दक्षमार्गेण गण्येच्चामादिवर्णकादिकान्। मेषादितोऽहि नामानं क्रमशः मन्त्रपण्डितः। सिद्धसाध्यसुसिद्धारीन् पुनः सिद्धादिकान् पुनः। नवैकपञ्चमे सिद्धः साध्यः षड्दशयुग्मके। सुसिद्धस्त्रिसप्तनौ रुद्रे वेदाष्टद्वादशे रिपुः" इति। (क्लीववर्णाः अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ वर्णाः)

"गोपालेऽकडमं ऋतमिति" तत्रैवोक्तम्। एतच्च गोपालमन्त्रविषये सिद्धादिचक्रत्वेन व्यवस्थितं।

अकथह न० अ,क,थ,ह, इत्यादिवर्णसंचक्रमेण वर्णसमुदायोऽस्त्यस्मिन् अच्। तन्त्रोक्तमन्त्रयन्त्रार्थं तत्तन्मन्त्राणां शुभाशुभविचारोपयोगिनि चक्रभेदे तत्स्वरूपं यथा रुद्रयामले। "वक्ष्येऽकथहचक्राख्यं सर्व्वचक्रोत्तमोत्तमम्। यस्य विचारमात्रेण कामरूपी भवेन्नरः॥ तत्प्रकारं वीरनाथ। क्रमशः क्रमशः शृणु। चतुरस्रे लिखेत् वर्णान् चतुःकोष्ठसमन्विते॥ चतुःकोष्ठ-चतुष्कोष्ठचतुष्टं हसमन्वितम्। मन्दिरं षोड़शं प्रोक्तं सर्व्वकर्म्मार्थसिद्धिदम्॥ चतुरस्रं लिखेत् कोष्ठं चतुष्कोष्ठसमन्वितम्। पुनश्चतुष्कं तत्रापि लिखेद्वीमान् क्रमेण तु॥ सर्व्वेषु शृहमध्येषु प्रादक्षिण्य क्रमेण तु। अकारादिक्षकारान्तान् लिखित्वा गणयेत्ततः॥ चन्द्रमग्निं रुद्रवर्णं नवमं युगलन्तथा॥ वेदमङ्कं दश रसं वसुं षोड़शमेव च। चतुर्दशं भास्करं च सप्तपञ्चदशेति च॥ वक्ष्यीन्द्र कोष्ठगं वर्णपञ्चाशैकं मयोदितम्। एतदङ्कस्थितान् वर्णान् गणयेत् तदनन्तरम्॥ नामाद्यक्षरमारभ्य यावत् मन्त्रादिमाक्षरम्। चतुर्भिः कोष्ठैरेकैकमिति कोष्ठचतुष्टयम्॥ पुनः कोष्ठगकोष्ठेषु सव्यतो नामकादितः। सिद्धः साध्यः सुसिद्धोऽरिः क्रमशो गणयेत् वशी॥ सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः। सुसिद्धो यद्दृष्टाज्ञानी शत्रुर्हन्ति चिरायुषम्। सिद्धस्तु बान्धवः प्रोक्तः साध्यः सेवक उच्यते। सुसिद्धः मोषकः प्रोक्तः शत्रुर्घातक उच्यते। सिद्धकोष्ठस्थिता वर्णा बान्धवाः सर्व्वकामदाः। जपेन बन्धुः सिद्धः स्यात् सेवकोऽधिकसेवनात्॥ पुष्णाति मोषकोऽभीष्टं घातको नाशयेत् ध्रुवम्। सिद्धो यथोक्तकालेन द्विगुणात् सिद्धसाध्यकः॥ तत्सुसिद्धोऽर्द्धजप्येन सिद्धारिर्हन्ति बान्धवान्। साध्यसिद्धो द्विगुणतः साध्यसाध्यो निरर्थकः॥ तत्सुसिद्धो द्विगुणजपात् साध्यारिर्हन्ति गोत्रजान्। सुसिद्धसिद्धोऽर्द्धजपात् तत्साध्यो द्विगुणाधिकात्। तत्सुसिद्धो यदादेव सुसिद्धारिः सगोत्रहा॥ अरिसिद्धः सुतान् हन्यात् अरिसाध्यस्तु कन्यकाः। तत्सुसिद्धस्तु पत्नीघ्नस्तदरिर्हन्ति साधकमिति"॥ एतच्च सर्व्वमन्त्रेषु सिद्धादिचक्रत्वेन व्यवस्थितं।

अकनिष्ठ पु० अके वेदनिन्द्यरूपे पापे निष्ठाऽस्य। बुद्धे। न० त०। कनिष्ठभिन्ने ज्येष्ठे मध्यमादौ च त्रि०।

अकनिष्ठप पु० अकनिष्ठान् बुद्धान् पातीति पा-क। बुद्धाधिपभेदे। न० त०। कनिष्ठभिन्नपालके त्रि०।

अकम्पित पु० कम्पितं बुद्धिदत्तेशासनं तन्नास्ति यस्य। बुद्धभेदे। कपि-कर्त्तरि क्त न० त०। सङ्कल्पितवस्तुभ्योऽनुपरते दृढ़ाध्यवसाये त्रि०। भावे क्त न० ब०। कम्पनशून्ये त्रि०।

अकरण न० कृ-भावे ल्युट् अर्थाभावे न० त०। करणाभावे निष्ठत्तौ "अकरणे प्रत्यवायानुवन्धित्वं नित्यत्वमिति" मीमांसकादयः। "अकरणात् मन्दकरणं श्रेय" इति स्मार्त्ताः अकरणञ्च न्यायादिमते करणाभावः, मीमांसकवेदान्तिमते निष्ठत्तिः। अत एव अश्रोत्रियां मांसं नाश्नीयादित्यादौ सर्व्वत्र निषेधसमभिव्याहृतक्रियाविषयकनिवृत्तावेव विध्यर्थान्वयः इत्युक्तं मीमांसकैः। शङ्कराचार्य्येण च "नासतो विद्यते भावोनाभावो विद्यते सतः" इति गीताश्लोकभाष्ये महता प्रबन्धेन सत्पदार्थादभावोत्पत्ति निरस्यता निषेधस्य निवृत्तिरूपत्वमररीकृतम्। निवृत्तिश्च प्रवृत्तिविरोधी भावरूपोधर्म्मविशेषः। नास्ति करणं देहेन्द्रियादिकमस्य। सर्व्वकरणशून्ये परात्मनि पु०। "अपाणिपादोजवनोग्रहीतेत्यादि" श्रुतौ तस्य सर्व्वकरणशून्यत्वमुक्तम्।

अकरणि स्त्री० नञ्+कृ-आक्रोशे अनि। करणं मा भूदित्याक्रोशात्मके शापे। "तस्याकरणिरेवास्तु" इति।

अकरा स्त्री० अकं दुःखं सेवनात् लोकानां राति शृह्णाति नाशयतीति रा-क। आमलक्याम्। नास्ति करोऽस्य। करशून्ये त्रि०। न करोति कृ-अच् न० त०। कारकभिन्ने करणशीलभिन्ने निष्ठत्तिपरे च त्रि०।

अकरुण त्रि० नास्ति करुणा यस्य यत्र वा। दयाशून्ये दैन्यशून्ये च।

अकर्कश त्रि० न कर्कशः। कार्कश्यविरोधिमृदुत्ववति कोमले

अकर्ण त्रि० नास्ति कर्णोऽस्य। श्रवणेन्द्रियशून्ये "पश्यत्यकर्ण" इति श्रुतिः। सर्पे पु० तस्य चक्षुषैव श्रवणात्तदिन्द्रियशून्यत्वम्। राधेयः कर्णः तच्छून्ये त्रि०। "अनर्जुनमकर्णं वा जगदद्येति निश्चितमिति" भारतम्।

अकर्त्तन त्रि० उच्चस्यं फलं कर्त्तितं शीलमस्य कृत-युच् न० त०। उच्चविरोधिनिम्नत्ववति स्वर्गे। कृत-भावे ल्युट् न० ब०। छेदनाकर्त्तरि त्रि०।

अकर्त्तव्य त्रि० कृ-कर्म्मादौ तव्य न० त०। करणानर्हे निषिद्धे पदार्थे। भावे क्त न० ब०। क्रियाशून्ये कूटस्थे चैतन्ये न०। "न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किञ्चनेति" गीतायामीश्वरस्य सर्व्वक्रियानिषेधात् तथात्वम्।

अकर्त्तृ त्रि० कर्त्तृ+न० त०। कर्त्तृभिन्ने कर्त्तृसदृशे कारके

"अकर्त्तरि च कारके" पा० । कर्त्तृभिन्ने, क्रियाशून्ये च "पुरुषोऽकर्त्ता भोक्ता" चेति सांख्यमतम् ।

अकर्म्मक त्रि० नास्ति कर्म्म यस्य ब० कप् । व्याकरणोक्ते कर्म्मशून्ये धातौ, "धः कर्म्मणि च भावे चाकर्म्मकेभ्य इति" पा० । "फलव्यापारयोरेकनिष्ठतायामकर्म्मक इति" हरिः । स्त्रियां टापि कापि अतइत्त्वम् अकर्म्मिका । "प्रसिद्धेरविवक्षातः कर्म्मणोऽकर्म्मिका क्रियेति" हरिः ।

अकर्म्मण्य त्रि० न कर्म्मणे प्रभवति कर्म्मन्+यत् न०त० । कर्म्मानर्हे "अकर्म्मण्यं तिथिमलं विद्यादेकादशीं विनेति" ति०त० ।

अकर्म्मन् अनुपलम्भादिवत् अर्थाभावे न० त० । कर्म्माभावे "कर्म्मणोह्यपि बोद्धव्यं बोधव्यञ्च विकर्म्मणः । अकर्म्मणश्च बोद्धव्यं गहना कर्म्मणोगतिरिति" गीता अकर्म्मणः अक्रियाया इति तद्भाष्यम् । दुष्टं कर्म्म अप्राशस्त्ये न० त० । दुष्टकार्य्ये अकर्म्मादावभिरत इति स्मृतिः । न०ब० । कार्य्यशून्ये त्रि० "अकर्म्मा दस्युरभित" इति वेदः ।

अकल पु० नास्ति कलाऽवयवोऽस्य । निरंशे परमात्मनि "चिन्मयस्याद्वितीयस्य निष्कलस्ये"त्युक्तेस्तस्य तथात्वम् । गीतादिकलाशून्ये, अवयवशून्ये च त्रि० ।

अकल्कन त्रि० कल्कनं दम्भः न०ब० । दम्भरहिते "अकल्कनो निरारम्भः" इति गीता । वैद्यकोक्तौषधपाकविशेषः कल्कनं, तच्छून्ये च । नास्ति कल्कोऽस्य ब०कप् । अकल्कोऽप्यत्र । अत एव गीतायामकल्कक इत्यपि क्वचित् पाठः ।

अकल्का स्त्री० न कल्कः मलोऽस्यां न० ब० । निर्म्मलत्वेन शुभ्रायां ज्योत्स्नायाम् । मलादिशून्ये त्रि० ।

अकल्य त्रि० कलासु साधुः कला+यत् कल्यः निरामयः न० त० । अस्वास्थ्यवति । कल्यते इति कल-यत् कल्यं कल्पनीयं मिथ्याभूतं न० त० । सत्ये "अपि त्वनीनयदपनीतार्णवशल्यमकल्यसन्ध इति द्वयश्रु० । अकल्यसन्धः सत्यसन्ध इत्यर्थः ।

अकवा त्रि० न कव्यते वर्ण्यते कव-घञ् न०त० । अवर्ण्यनीये "प्र प्रजायन्ते अकवा मरुद्भिरिति" वेदः ।

अकस्मात् अव्य० न कस्मात् किञ्चित्कारणाधीनत्वं यत्र अलुक् स० । कारणानधीने अतर्कितोपनते । "कथमयमकस्माद्गगनचारिणामाकाशे करुणध्वनिः श्रूयते" इति नाटकम् "सामान्यलक्षणा कस्मादकस्मात् परिलुप्यते" इति पक्षधरः । "अकस्मात् नगरोपान्ते कथं धूमायते चितेति" काव्या० । पा० चार्वादिगणे तथा पाठाच्च न पञ्चम्या लुक् तेन आपतितभवार्थे ठञि टिलोपे आकस्मिक इति ।

अकाण्ड त्रि० न०त० । अनवसरे अनुचितकाले "तातस्यकाण्डे एव प्राणहरप्रतीकारसुपक्रमिति" काद० । अस्य नि० एतदन्तत्वमिति केचित् । ब० । स्तम्बशून्ये वृक्षे पु० ।

अकाम त्रि० न कामयते काम-णिङ्-अच् । इच्छाशून्ये "नाकामो दातुमर्हतीति" स्मृतिः । कामनाविषयफलानभिसन्धायिनि । "अकामो विष्णुकामोवेति" स्मृतिः स्मरविकारशून्ये च । "भयादकामाऽपि हि दृष्टिविभ्रममिति" शक्र० ।

अकामतस् अ० अकाम+पञ्चम्यास्तसिल् । अनिच्छात इत्यर्थे "अकामतः कामचारे चैरवद्दण्डमर्हतीति" स्मृतिः ।

अकाय पु० नास्ति कायोऽस्य । कायशून्ये राहौ तस्य चास्मताहरणकाले विष्णुना च्छिन्नमस्तकत्वेऽपि अमृतप्राशनेन अमरणमित्यनुसन्धेयम् । "अमृताप्लादनविशेषाच्छिन्नमपि शिरः किलासुरस्य दस्" । प्राणैरपरित्यक्तं यद्गतं यातं वदन्त्यके इति" बृहत्स० । देहशून्ये त्रि० । परमात्मनि पु० । निष्कलस्याशरीरिणश्चोक्तेस्तस्य तथात्वम् ।

अकार पु० अ+स्वरूपार्थे कार । अक्षररूपे वर्णे एवमिकारादयोऽपि तत्तदर्थस्वरूपेषु । कारः करणं न० ब० । क्रियारहिते त्रि० ।

अकारण त्रि० नास्ति कारणं हेतुरुद्देश्यं वा यस्य । हेतुरहिते उद्देश्यरहिते च "किमकारणमेव दर्शनं विलपन्त्यै रतये न दीयते" इति कुमा० "ततोऽकारणवैरी नः "कारणादपरे परे इति" नैषधम् । निष्प्रयोजने च । न० त० । कारणभिन्ने "अकारणगुणोत्पन्ना" इति भाषा० ।

अकारिन् त्रि० क-णिनि न०त० । कर्त्तृभिन्ने, करणाद्विहीने च ।

अकार्पण्य त्रि० नास्ति कार्पण्यं यस्य । दैन्यशून्ये, कृपणताशून्ये च ।

अकार्य्य न० अप्रशस्तं कार्य्यम् अप्राशस्त्ये न० त० । कुत्सितकार्य्ये निषिद्धकार्य्ये च । "अकार्य्यमिव पश्यामि स्वमांसमिव भोजने" । "किमकार्य्यं कदर्य्याणामिति" हितो० । कर्त्तव्यभिन्ने त्रि० ।

अकाल पु० अप्राशस्त्ये न०त० । अप्रशस्तकाले विहितकर्म्मसु पर्य्युदस्तायामभिहिते गुरुशुक्राद्यस्तकालादौ, स च मलमास, गुरुशुक्रबाल्यवृद्धत्वास्तमय, सिंहमकरान्यतरगुरुस्थिति, पूर्व्वराश्यनागतातिचारिगुरुकवत्सर, पूर्व्वराशिसंक्रमिष्यमाणातिचारिगुरुकपक्षत्रय, वक्रगुरुकाष्टाविंशतिदिवस, भूमिकम्पाद्भुतसप्ताह, सिंहादित्य, गुर्वादित्य, पौषमासचतुष्टयान्य-

तमैकहित्वितदधिकान्यतमदिनदृष्ट्याकालिकदृष्ट्युत्तरैकत्रिंशप्राह्नान्यतमदिनादि, रूपो मलमासतत्त्वादयुक्तः तत्तद्धितकर्म्मसु पर्य्युदस्तत्वादभिहितः कालः एतत्प्रमाणानि सम्प्रति प्रसवं मलमासतत्त्वमुद्धृत्य चिन्तामण्यादौ दृष्टव्यानि "अकाले वीचितो विष्णुर्हन्ति पुण्यं पुराकृतमिति" पु०। अप्राप्तः अनुचितः कालः या०त०। अप्राप्तकाले "नाकाले म्रियते कश्चित् प्राप्ते काले न जीवतीति" पुराणम्। "अकालजलदोदय" इति रघुः। "अकालदृष्टयुद्धरण"मिति तत्त्वम्। "वर्त्त्याधारस्नेहयोगात् यथा दीपस्य संस्थितिः। विक्रियापि हि दृष्टैवमकाले प्राणसंक्षय" इति याज्ञ०। "अकालजन्तु विरसं न धान्यं गुणवत् स्मृत"मिति, वैद्य०। "नाकालदृष्टौ कुर्व्वीत व्रतवन्धशुभक्रियामिति" स्मृतिः अनुचितकाले दृष्टाविति तदर्थः। "वरमेकाब्दतिः काले नाकाले लक्षकोटयः इति ति०त०। नास्ति कालेऽपाधिजन्यजातमत्र। जन्यशून्ये प्रलये। "अकालकालमेघमेदुरेति काद०। अप्राप्तः कालो यस्य प्रादिभ्यः धातुजस्येति ब० अन्त्यलोपश्च। अप्राप्तकाले अनुचितकाले पदार्थे त्रि०। कालः क्षणः न०त०। क्षणविरुद्धगुणवर्त्ते पु०। क्षणविरोधिगुणवत्वति त्रि०।

अकिञ्चन त्रि० नास्ति किञ्चन यस्य मयूर०त०। निर्धने, "अकिञ्चनः सनू प्रभवः स सम्पदा"मिति कुमा०। दरिद्रे, "अकिञ्चने किञ्चनतामिकाङ्क्षके किमारकूटाभरणेन न स्त्रिय" इति नैषधम्।

अकिञ्चनता स्त्री० अकिञ्चनस्य भावः तल्। संन्यासाङ्गे सर्व्वद्रव्यत्यागरूपे यमविशेषे "व्रतं दानं परिव्रज्या तपस्या नियमस्थितिः। अहिंसाऽस्तेयब्रह्माकिञ्चनता यम" इति स्मृतिः ब्रह्म वेदमन्त्रः ईश्वरभजनं वेत्यर्थः। निर्द्धनत्वे च। भावे त्व। तत्त्वार्थे न०। "स्थाने भवानेकनराधिपः मन्नकिञ्चनत्वं मखजं व्यनक्ति" रघुः।

अकिञ्चिज्ञ त्रि० न किञ्चित् जानाति ज्ञा-क अश्राद्धभोजीतिवत् असमर्थस०। किञ्चिदनभिज्ञे, किञ्चिद्ज्ञानशून्ये, अल्पज्ञाने, ज्ञानशून्ये च।

अकिञ्चित्कर त्रि० न किञ्चित् करोति कृ-अच् असमर्थस०। किञ्चिदकारके क्रियाशून्ये, निष्प्रयोजने च।

अकुण्ठ त्रि० नास्ति कुण्ठा यस्य। प्रतिबन्धशून्ये, कर्म्मदक्षे च।

अकुतोभय त्रि० नास्ति कुतोऽपि भयं यस्य मयूर०स०। कुतश्चिदपि भयशून्ये।

अकुप्य न० कुप्यते निन्द्यताव्यञ्जकतया-लक्ष्यीकरत्वात् कुप-क्यप् नि० कस्य पः कुप्यं रैत्यादि न०त०। स्वर्णे, रूप्ये च।

अकुमार त्रि० न कुमारः। अतीतकौमारावस्थे तरुणे।

अकुल त्रि० अप्रशस्तं कुलमस्य न० ब०। अप्रशस्तकुले "कुलान्यकुलतां यातीति" मनुः।

अकुशल त्रि० न कुशलं मङ्गलमस्य। मङ्गलविरोध्यमङ्गलयुक्ते। न०त०। कुशलविरोधिनि अभद्रे न०। दक्षभिन्ने त्रि०।

अकूपार पु० न कूपस्थ्यति ष्ठ-अण्। दृढत्वकर्त्रे। न कुं पृथ्वीं पिपूर्त्ति पृ-पालनपूरणयोः अण् वा०दीर्घः, न कुत्सितं पारं गन्तव्यदेशो यस्य वा, पृ०दीर्घः। महापारे समुद्रे, दूरगामिनि स्त्रियां च पु०। पृ०। अकूवारोऽप्यत्र।

अकृत त्रि० कृ-कर्म्मणि क्त न०त०। कृतभिन्ने अन्यथाकृते। "कृताकृतावेक्षणादौ ब्रह्मा ऋत्विक् नियुज्यते" इति याज्ञिकप्रसिद्धिः। "अकृतव्यूहाः पाणिनीया" इति परिभाषा। न कृतो व्यूहः विशेषेण जङ्घोरुः विनाशोन्मुखं दृष्ट्वा कृतमपि कार्य्यं नाशयन्तीति तदर्थः सि०कौ०। बलपूर्व्वकृते ऋणलेख्यपत्रादौ च "सर्व्वान् बलकृतानर्थानकृतान् मनुरब्रवीदिति" मनुः। "बलात् कृत्वा पापानि सन्तु तान्यकृतानि वः। सर्व्वान् बलकृतानर्थानकृतान् मनुरब्रवीदिति" नैषधम्। पुत्रिकात्वेन अकल्पितायां दुहितरि स्त्री। "अकृता वा कृता वापि यं विन्देत् सदृशात् सुतमिति" स्मृतिः। भावे क्त अभावार्थे न०त०। करणाभावे निवृत्तौ "नैव तस्य कृतेनार्थो नाकृतेनेह कश्चने"ति गीता।

अकृतज्ञ त्रि० न कृतं जानाति ज्ञा-क असम०स०। कृतोपकाराज्ञारके, कृतघ्ने, "आत्मारामाः पूर्णकामाः अकृतज्ञा गुरुद्रुह" इति भागवतम्।

अकृतिन् त्रि० कृतमनेन कृत+इनि न०त०। कार्य्यक्षमे क्रियासु पाटवरहिते।

अकृत्य न० कृ-क्यप् अप्राशस्त्ये न०त०। दुष्टकार्य्ये चौर्य्यादिकरणे। न कृत्यमस्य न०ब०। कर्म्मरहिते त्रि०।

अकृत्रिम त्रि० न कृत्रिमः न०त०। कृत्रिमभिन्ने स्वभावसिद्धे। "कृत्रिमाकृत्रिमयोर्मध्ये कृत्रिमे कार्य्यसंप्रत्यय" इति परिभाषा अकृत्रिमस्नेहरसानुविद्धमिति"।

अकृत्वा अ० न कृत्वा न+कृ-क्त्वा। करणानन्तर्ये "अकृत्वा कुलसन्ततिमिति" मनुः।

अकृष्टपच्य त्रि० अकृष्टे क्षेत्रे पच्यते पच-क्यप् ७त०। कृष्याद्यकृष्टक्षेत्रे पच्यमाने नीवारादौ धान्ये।

अक्रुष्ण पु० नास्ति कृष्णः मलो यस्य । निष्कलङ्के चन्द्रे "चन्द्रमा वै ब्रह्माऽकृष्ण" इति श्रुतिः । न०त० । कृष्णत्वविरोधिशुभ्रत्वे पु० । तद्वति, शुद्धे च त्रि० । [पुण्यशीले ।

अकृष्णकर्म्मन् त्रि० न कृष्णं शुद्धं कर्म्म यस्य । शुद्धकर्म्मकारिणि

अकेतु पु० नास्ति केतुश्चिह्नं यस्य । चिह्नरहिते अज्ञाने, "केतं कृण्वन्नकेतवे" इति वेदः य० (२९,३७) अकेतवे अज्ञानायेति वेददीपः । चिह्नध्वजाभ्यां रहिते त्रि० ।

अकौशल त्रि० न-कुशलः अकुशलस्ततो भवादौ अण् आद्यचो वा न वृद्धिः । अकुशलभवादौ । आद्यचो वा वृद्धौ आकौशलोऽप्यत्र । कुशलस्य भावः अण्+न०त० । असौष्ठवे न० । [कायति कै क वा । मातरि जनन्याम् ।

अक्का स्त्री अक-क, अच्यते इत्यक् अन्च-क्विप् गतिः तस्यै

अक्त त्रि० अज्यते अनुज-कर्म्मणि क्त । कृताञ्जने, "अक्तं रिक्थारणां व्यन्तु वय इति" "अक्ताः शर्करा उपदधातीति" च श्रुतिः परिमिते, व्याप्ते, सङ्गते च ।

अक्तु पु० अनुज-तु नि० । रात्रौ, तदुपलक्षिते तमसि च "रुद्रं दिवा वर्द्धया रुद्रमक्तौ" इतिवेदः ।

अक्त न० अन्ज-बा० क्त । वर्म्मणि । [इतिवेदः ।

अक्र त्रि० अन्चु गतौ रक् । स्थिरे । "उदु स्वर्नवजा नाक्रः"

अक्रम त्रि० नास्ति क्रमः परिपाटी पादः क्रमणं वाऽस्य । परिपाटीशून्ये व्यक्रमे एकपादे । "तच्चार्थक्रियाचारित्वं क्रमाक्रमाभ्यां व्याप्तं न च क्रमाक्रमाभ्यामन्यः प्रकारः समस्तीति" सर्व्वद० पादशून्ये आक्रमणशून्ये च । क्रमभावे वञ् अभावार्थे न०त० । क्रमणाभावे पु० । अव्ययीभावः । क्रमाभावे अव्य० ।

अक्रान्ता स्त्री न क्रम्यते स्म कष्टकाद्यतत्वात् क्रम-क्त न० त० । वृक्षत्वात् । क्रान्तभिन्ने विष्णुना क्रान्ते च त्रि० ।

अक्रतु त्रि० नास्ति क्रतुर्यज्ञः संकल्पोवा यस्य । यज्ञरहिते संकल्परहिते च परमात्मनि पु० "न्यक्रतून्यर्धिनो मृध्रवाच" इति वेदः ।

अक्रिया स्त्री० अभावार्थे न०त० । क्रियाभावे "प्रधानस्याक्रिया यत्र साङ्गं तत् क्रियते पुनः । तदङ्गस्याक्रियायान्तु नावृत्तिर्न च तत्क्रियेति" "अक्रिया त्रिविधा प्रोक्तेति" च स्मृतिः । न०ब० । कर्म्मशून्ये गुणादौ च त्रि० । सर्व्वकर्म्मशून्ये परमात्मनि पु० । [वंश्ये चत्रियभेदे पु० ।

अक्रूर त्रि० न क्रूरः । क्रूरभिन्ने मृदुले, स्वनामप्रसिद्धे वृष्णि-

अक्रोध पु० न क्रोधः अभावार्थे न०त० । क्रोधाभावे यमभेदे अहिंसा सत्यमक्रोधः सत्यास्तेयापरिग्रहा" इति पुराणम् । "अक्रोधं शिक्षयन्त्यन्ये क्रोधना ये तपोधना इति नैष० न० व० । क्रोधशून्ये त्रि० ।

अक्लम पु० न क्लमः अभावार्थे न०त० । श्रमाभावे । न० ब० । श्रमशून्ये त्रि० ।

अक्लिष्ट क्लिश-भावे क्त न०७ब० । क्लेशरहिते कर्म्मादौ । क्लिश-कर्त्तरि क्त न०त० । श्रान्तभिन्ने त्रि० । [शून्ये त्रि० ।

अक्लेश पु० अभावार्थे न०त० । क्लेशाभावे । न०ब० । क्लेश-

अक्ष व्याप्तौ संहतौ च भ्वा० प० वेट् । अक्षति अक्षोति आक्षीत् आक्षाम् आक्षिष्टाम् आनक्षे । क्त अक्षः क्तिन् अक्षिः गह अक्षणुवन् इ अक्षि-कनिन् अक्ष ।

अक्ष न० अश्नुते व्याप्नोति विषयान् स्ववृत्त्या संयोगेन वा अश-स । इन्द्रिये, "अक्षाणि पण्डितजना विदुरिन्द्रियाणि" उ० नेत्रे, अधोऽज इति । द्यूते (द्यूँते) सौवर्चले च । ज्योतिषोक्ते राशिचक्रावयवभेदे । "शङ्कुनरोना कवितः सएव खार्द्राद्रवेर्वा विषुवद्दिनार्द्धे । नतः पलोऽच्च सएव तज्ज्ञैस्तत्रोन्नतिर्यास्य सएव लम्ब इति" सिद्धान्तशिरोमणिगणिताध्यायोक्ते विषुवद्दिनार्द्धे खार्द्रामिच्छया नतिरूपे पलांशभेदे पु० । एतद्विवरणम् भास्कराचार्य्येण प्रमिताक्षरायां स्वयमेव कृतम् । यथा "निरक्षदेशे (खङ्गविभागे) यदेव विषुवन्मण्डलं तदेव समसण्डलं ततः क्षितिजादन्यदुन्मण्डलं नाम वलयं नास्ति तत्र ध्रुवौ च क्षितिजसंस्थे, अथ निरक्षदेशात् दृष्टा यथा यथा उत्तरतो गच्छति तथा तथा उदग्ध्रुवस्तुङ्गतं पश्यति तथा यैर्भागै र्ध्रुवउन्नतस्तैरेव भागैः अक्षसंज्ञै: खस्वस्तिकात् दक्षिणतोविषुवन्मण्डलं नतं पश्यतीति" । "चन्द्रार्कयो १२ निम्ना पलभार्द्धिता च लङ्कावधिः स्यादिह दक्षिणोऽक्ष" इति भास्करोक्तौ । "उदगदिशं याति यथा यथा नरस्तथा तथा खात्रतमण्डलम् । उदग्ध्रुवं पश्यति चोन्नतं क्षितेस्तदन्तरे योजनजाः पलांशका इति सिद्धान्तशि० गोलाध्यायः यदि भूपरिधि (४९६७) योजनैरेकांशाः (३६०) लभ्यन्ते तदापसारयोजनैः किमिति, यदुच्चपरिधिना (३६०) भूपरिधिः (४९६७) लभ्यते तदा अक्षांशैः किमिति, त्रैराशिकेन फलं निरक्षदेशलङ्कास्वदेशयोरन्तरयोजनानि स्युरिति, स्वयमेव प्रमिताक्षरायां व्याख्यातम्, तथैव गोलाध्यायोक्तं दर्शितम् । "योजनसंख्या भांशै (३६०) र्गुणिता स्वपरिधि (४९६७) हृता भवन्त्यंशाः (अक्षांशाः) । अक्षांशेभ्यो भूमौ कक्षायां (क्रान्त ३६० कक्षायाम्) वा योजनानि च व्यस्तमिति" । व्यस्तमिति भूपरिधिगुणिता भांशहृता

अक्षसंख्या (योजनसंख्या) भवतीति। निरक्षदेशात् क्षितिचतुर्थांशे किल मेरुस्तत्र भवतिः पलांशाः (अक्षांशाः) इति च तत्रैवोक्तम्। पाशके कर्षपरिमाणे च न० विभीतकवृक्षे (बयडा) तुये, आत्मनि रुद्राक्षे सर्षे जातान्धे गरुडे च पु०। तत्र रुद्राक्षे अक्षमाला। कर्षे अनुभवति धाराभिरक्षमात्राभिरिति, विभीतके "यथा वै हे आमलके, हे वा कोले हौ वाक्षौ इति" श्रुतिः। व्यवहारे अक्षदर्शकः। रावणसुतभेदे पु०। तत्कथा रामा० सु० ४३ अ०।

अक्षक पु० अक्षद्रव कायति कै-क। तिनिशवृक्षे। स्वार्थे-कन्। अक्षशब्दार्थे प्रकृतिलिङ्गम्। [कन्। तत्रैव।

अक्षकूट पु० अक्षस्य चक्षुषः कूटत्व। नेत्रतारायां, स्वार्थे

अक्षक्षेत्र न० अक्षनिमित्तं क्षेत्रम् श०त०। ज्योतिषोक्तेषु अक्षसाधनार्थं क्षेत्रतया कल्पितेषु अक्षभवेषु अष्टसु क्षेत्रेषु। तानि च सिद्धान्तशिरोमणौ गणिताध्याये दर्शितानि यथा। "भुजोऽक्षभा कोटिरिनाङ्गुलो ना कर्णोऽक्षकर्णः१ खलु मूलमेतत् क्षेत्राणि वान्यान्यक्षभवानि तेषां विद्मैव मानार्थयशःसुखानाम्॥ लम्बज्यका कोटिरथाक्षजीवा भुजोऽत्र कर्णस्त्रिभुजे २ त्रिभज्या। कृत्वा भुजः कोटिरपक्रमज्या कर्णोऽप्यका च त्रिभुजं तथैतत्३॥ तत्रैव कोटिः समदक्षशङ्कुरया भुजस्तद्धृतिरत्र कर्णः४। भुजोऽपमज्या समना च कर्णः कृज्योनिता तद्धृतिरत्र कोटिः५॥ अग्रादिखण्डं कथिता च कोटिरुद्धृत्तना दोः अवणोऽपमज्यार्द्धे। उद्धृतना कोटिरथाग्रकाग्रखण्डं भुजस्तच्छ्रवणः क्षितिज्या७॥ खण्डं यदूर्द्धं समदक्षशङ्कोर्यस्तद्धृतेस्तावच कोटिकर्णौ। अग्रादिखण्डं भुज ८ एवमष्टौ क्षेत्राण्यमून्यक्षभवानि तावत्॥" क्षेत्राणि दर्शयेत्, "तत्र दक्षिणोत्तरमण्डले विषुवद्वृत्तसम्पातादधो यावाङ्क्षव्यः क्षितिजसमस्वस्तिकपर्यन्तः सा तत्र कोटिः, लम्बनिपातकुमध्ययोरन्तरं साऽज्या तत्र भुजः, भूमध्यालम्बायनामिस्वस्तिं त्रिज्या सा तत्र कर्णः, इदमग्रक्षेत्रम्, इष्टाहोरात्रवृत्तं यत्र क्षितिजे लग्नं तस्य प्राक् स्वस्तिकस्य चान्तरमग्रा (चापांशाः) तेषां ज्याऽग्रा तावती च प्रत्यक्क्षितिजे अयनयोर्निवृत्तं स्वस्तिदवासस्वस्तिकम् अहोरात्रवृत्तोन्मण्डलसम्पातस्य प्राच्यपरसूत्रस्य च यदन्तरं सा क्रान्तिज्या, सा तत्र कोटिः, अग्रा कर्णः, तदग्रयोरन्तरं सा कृज्या स भुजः इदमक्षक्षेत्रं, तथाहोरात्रवृत्तसममण्डलसम्पातादधोवलम्बः, समवृत्तशङ्कुः सा कोटिः, अग्रा भुजः, अहोरात्रवृत्ते ज्याखण्डकं तद्धृतिः कर्णः, इदमक्षक्षेत्रं, तथा कृज्योनिता तद्धृतिरहोरात्रवृत्ते ज्याऽर्द्धं सा कोटिः, उन्मण्डले क्रान्तिज्या स भुजः, समवृत्तशङ्कुः कर्णः, इदमक्षक्षेत्रम्, तथाहोरात्रोन्मण्डलयोः सम्पातादवलम्ब उन्मण्डलशङ्कुः स भुजः, उन्मण्डलवृत्ते क्रान्तिज्या कर्णः, उन्मण्डलशङ्कुमूलस्य प्राच्यपरसूत्रस्य च यदन्तरं तदग्रादिखण्डं सा तत्र कोटिः, इदमक्षक्षेत्रं, तथोन्मण्डलशङ्कुः कोटिः, शङ्कुमूलोदयास्तसूत्रदोरन्तरमग्रायखण्डं स भुजः, कोटिभुजाग्रयोरन्तरसूत्रं सा कृज्या स तत्र कर्णः, इदमक्षक्षेत्रं, तथोन्मण्डलशङ्कुना हीनः समशङ्कुस्तत्समशङ्कोरूर्द्धं खण्डं सा कोटिः, कृज्योना तद्धृतिस्तद्धृतेरूर्द्धखण्डं स कर्णः, अग्रादिखण्डं स भुजः, इदमक्षक्षेत्रम् एतान्यष्टौ तावत्क्षेत्रतानि एवमन्यान्यपि भवन्ति।

अक्षज न० अक्षात् इन्द्रियसन्निकर्षात् जायते जन-ड। इन्द्रियविषयसन्निकर्षोत्पन्ने प्रत्यक्षज्ञाने वज्रे अस्थिरूपावयवजातत्वात्तस्य तन्नामत्वम्। प्रागुक्ताक्षार्थजाते त्रि०। ज्योतिषोक्ते अक्षभवे क्षेत्रादौ च।

अक्षणिक त्रि० न क्षणिकं न०। स्थिरे निश्चले च। "क्षरिवीक्षणाच्चणिकचक्षुषेति" माघः। अक्षणिकचक्षुषा स्थिरदृष्ट्या स्मितनेत्रवेत्यर्थः इति मल्लिनाथः।

अक्षण्वत् त्रि० अक्षअक्षाक्षि मतुप् मस्य वः। नेत्रयुक्ते "पश्यदक्षण्वान्न विवेद" इति "अक्षण्वन्तःकर्मण्वन्तः समर्था" इति च वेदः।

अक्षत पु०व० न क्षताः। "अक्षताश्च यवाः प्रोक्ता इति का० स्मृत्युक्ते यवे। नपुंसकमिति केचित् "दूर्वाक्षतानि" चेति पुराणम्। तच्छब्दे, "अक्षतैर्नार्चयेद्विष्णुं न तुलस्या विनायकमिति" तन्त्रम्। अस्यभावे न०। क्षयमुक्तभिन्ने उत्कर्षान्विते अविदारिते च त्रि०। "अक्षता वा क्षता वा पीति" मनुः। क्षय-भावे क्त न०त०। क्षयाभावे न०। "अक्षतञ्चारिष्टं चा स्तु" इति आशीर्विप्रसभीपे कृतकर्मणोऽक्षयप्रार्थना।

अक्षदर्शक पु० अक्षाणामक्षादानादिव्यवहाराणां दर्शकः दृश-ण्वुल् तत्०। विवादनिर्णेतरि धर्माधिकरणाध्यक्षे। द्यूतदर्शके त्रि०।

अक्षदृश् पु० अक्षान् व्यवहारान् पश्यति दृश-क्विन् कुत्वम्। अक्षदर्शकशब्दार्थे। अक्षार्थद्रष्टरि त्रि०।

अक्षदेविन् त्रि० अक्षैर्दीव्यति दिव-णिनि श्रत०। पाशकादिद्यूतक्रीड़ाकारके। [कारके।

अक्षद्य त्रि० अक्षैर्दीव्यति दिव-क्विप् जश्। पाशकादिद्यूत-

अच्चद्यूत न० अच्चैर्द्यूतम् ३त० । पाशकादिक्रीड़ायाम् ।

अच्चद्यूतादि पु० ब० । "निर्दृत्तेऽच्चद्यूतादिभ्य" इति पाणिन्युक्ते ठक्प्रत्ययनिमित्ते शब्दसमूहे । अच्चद्यूत, जानुप्रहृत-जङ्घाप्रहृत जङ्घाप्रहृत, पादस्खेदन, कण्टकमर्दन, गतानुगत, गतागत-यातोपयात, अनुगत इति । अच्चद्यूतेन निर्दृत्तम् आच्चद्यूतिकं वैरमित्यादि ।

अच्चधर पु० अच्चं चक्रं रथावयवं तत्कीलकमिव कण्टकं वा धरति धृ-अच् ६त० । विष्णौ चक्रे शाखोटवृक्षे च चक्रधारकमात्रे त्रि० । [समा० । चक्राग्रे चक्रभारे च ।

अच्चधुर् स्त्री० अच्चस्य चक्रस्य धूरग्रं भारोवा ६त० न अ

अच्चधूर्त्त त्रि० अच्चे तद्देवने धूर्त्तः । द्यूतकुशले द्यूतकारिणि च (जुयारि) । [शकटवाहनकर्त्तरि द्वये ।

अच्चधूर्त्तिल पु० अच्चस्य शकटस्य धूर्त्तिं भारं लाति ला-क ।

अच्चन् न० अच्च-बाहु० कनिन् । नेत्रे "दक्षिणेऽच्चन् इति वृह० उप० "भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाच्चभिर्यजत्रा" इति वेदः ।

अच्च(क्षि)पटल न० अच्चः नेत्रस्य पटलमिवाच्छादकत्वात् । नेत्रस्यावरके कोशभेदे नेत्ररोगभेदे (क्षानि) च । पटलस्य-रोगभेदादि शुश्रुते उक्तं यथा

"मसूरदलमात्रान्तु पञ्चभूतप्रसादजाम् । खद्योतविस्फुलिङ्गाभां सिद्धां तेजोभिरव्ययैः ॥ आवृतां पटलेनाक्ष्णोर्बाह्येन विवराकृतिम् । गीतसात्म्यां दृशां दृष्टिमाहुर्नयन चिन्तकाः ॥ रोगांस्तदाश्रयान् घोरान् षट् च षट् च प्रचक्षते । पटलानुपविष्टस्य तिमिरस्य च लक्षणम् ॥ शिराभिरभिसम्प्राप्य विगुणोऽभ्यन्तरं भृशम् । प्रथमे पटले दोषो यस्य दुष्टो व्यवस्थितः ॥ अव्यक्तानि स रूपाणि सर्वाण्येव प्रपश्यति । दृष्टिर्भृशं विक्षुभति द्वितीयं पटलं गते । मक्षिकाः मशकान् केशान् जालकानि च पश्यति । मण्डलानि पताकाश्च मरीचीः कुण्डलानि च ॥ परिप्लवांश्च विविधान् वर्षभ्रं तमांसि वा । दूरस्थान्यपि रूपाणि मन्यते च समीपतः ॥ समीपस्थानि दूरे च दृष्टेर्गोचर-विभ्रमात् । यत्नवानपि चात्यर्थं सूचीपाशं न पश्यति ॥ ऊर्द्धं पश्यति नाधस्तात्तृतीयं पटलं गते । महान्त्यपि च रूपाणि च्छादितानीव वाससा ॥ कर्णनासाक्षियुक्तानि विपरीतानि वीक्षते ॥ यथादोषञ्च रज्यते दृष्टिर्द्वीपे वलीयसि ॥ अधःस्थिते समीपस्थं दूरस्थञ्चोपरिस्थिते । पार्श्व-स्थिते तथा दोषे ऽपार्श्वस्थानीव पश्यति ॥ समन्ततः स्थिते दोषे सङ्कुलानीव पश्यति । दृष्टिमध्यगते दोषे स एकं मन्यते द्विधा ॥ द्विधास्थिते त्रिधा पश्येद्बहुधा चानवस्थिते । तिमि-राख्यः स वै दोषश्चतुर्थपटलङ्गतः ॥ रूपाण्डि सर्वतो दृष्टिं लिङ्गनाशः स उच्यते । तस्मिन्नपि तमोभूते नातिरूढे महागदे ॥ चन्द्रादित्यौ सनक्षत्रावन्तरिक्षे च विद्युतः । निर्मलानि च तेजांसि भ्राजिष्णूनि च पश्यति ॥ स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः" इति ।

अच्चाणां व्यवहाराणां पटलमस्यस्य अच् ६त० । अच्च-दर्शके धर्माध्यक्षे पु० ।

अच्चपरि अव्य० अक्षेण पाशकेन विपरीतं दत्तम् । अच्च-शलाकेत्यादिना परिषा अव्य० । पाशकक्रीड़ायां यथा गुटिकापाते जयोभवति तद्विपरीतपातने ।

अच्चपाटक पु० अच्चे व्यवहारे पाटयति दीव्यते पट दीप्तौ-ण्वुल् । व्यवहारनिर्णेतरि धर्माध्यक्षे ।

अच्चपाद पु० अच्चं नेत्रं दर्शनसाधनतया जातः पादोऽस्य । न्यायसूत्रकारके गौतमे मुनौ, स हि स्वमतदूषकस्य व्यासस्य सुखदर्शनं चक्षुषा न कर्त्तव्यमिति मत्वा ज्ञात्वा पश्चात् व्यासेन प्रसादितः पादे नेत्रं प्रकाश्य तं दृष्टवानिति पौराणिकी कथा । "अच्चपादप्रणीते च काणादे सांख्य-योगयोः । त्याज्यः श्रुतिविरुद्धोऽर्थ इति" पद्मपुराणम् ।

अच्चपीड़ा स्त्री० अच्चमिन्द्रियं रसनारूपं पीड़यति आस्वा-दनात् पीड-अच् । यवतिक्तालतायाम् । पीड-भावे अङ्+ ६त० । इन्द्रियपीड़ायाम् ।

अच्चम त्रि० न क्षमते क्षम-अच् न० त० । असमर्थे । क्षम-भावे अङ् अभावार्थे न० त० । क्षमाभावे ईर्ष्या-याम् स्त्री । "अच्चमा भवतः कोयमिति" भारतम् । न० ब० । क्षमारहिते त्रि० ।

अच्चमाला स्त्री अच्चाणां रुद्राच्चाणां माला । रुद्राच्च बीजग्रथितमालायाम् । अकारादिक्षकारान्तः अच्च स्तत्तुल्या तत्प्रतिनिधीभूता वा माला या० त० । एकपञ्चाशद्वर्ण-मालायाम् तत्प्रतिनिधीभूतायां स्फटिकादिग्रथितायाम् वाङ्मालायाञ्च "शोध्यमाणपुष्करबीजं यथ्यमनाच्च माल-मिति" काद० । "विभान्तमच्चस्फटिकाच्चमालयेति" माघः । तद्विवरणम् । "क्रमोत्क्रमगते माला मातृकार्णे क्षमेरुके । ज्ञानसारैः साष्टवर्णैरन्तर्यजनकर्म चीति" सनत्कुमारीये । "पद्मबीजादिभिर्माला बहिर्यागे प्रशस्यते ताः । रुद्राच्चपद्म-पद्माच्चपुत्रजीवकमौक्तिकैः । स्फाटिकैर्मणिरत्नैश्च सुवर्णैर्विद्रुमैस्तथा । रजतैः कुशमूलैश्च मृदस्यस्याच्चमालि-केति" तन्त्रसारे एतद्विस्तारस्तत्रैवागन्तव्यः । अच्चस्य

नक्षत्रचक्रस्य मालेव भूषणत्वात्। अरुन्धत्यां, सा हि उत्तरस्यां दिशि गगने सप्तर्षिमण्डलचक्रे वसिष्ठसमीपे-मालारूपेण वर्त्तते सर्व्वेभ्यश्च उज्वलत्वात्तस्या मालारूपेण स्थितत्वाच्च नक्षत्रचक्रभूषणत्वम्।

अक्षय त्रि० नास्ति क्षयोऽस्य। क्षयरहिते सर्व्वदा वर्त्तमाने "गयायामक्षयवटे पितृणां दत्तमक्षयमिति" वायुपुराणम् "अभिजिद्रोहिणीदेवे यदत्तं दीयते जनैस्तदक्षयसदाहृतमिति" स्मृतिः। परमात्मनि पु०। क्षयोवासः, तच्छून्ये अनिकेतने संन्यासिनि, दरिद्रे च। अक्षयं पुण्य-मस्यास्ति अच्। अक्षयपुण्यसाधने तिथिभेदे च "अमा वै सोमवारेण रविवारेण सप्तमी। चतुर्थी भौमवारेण अक्ष-याद्यपि चाक्षयेति" भविष्यपुराणम्।

अक्षयतृतीया स्त्री कर्म्म०। वैशाखशुक्लपक्षतृतीयायाम्। "वैशाखे मासि राजेन्द्र! शुक्लपक्षे तृतीयिका। अक्षया सा तिथिः प्रोक्ता कृत्तिकारोहिणीयुता। तस्यां दानादिकं सर्व्वमक्षयं समुदाहृतमिति"। "या शुक्ला कुरुशार्दूल! वैशाखे मासि वै तिथिः। तृतीया साक्षया लोके त्रिदशैरभिवन्दि-तेति" च भविष्यपुराणम्। "वैशाखस्य सिते पक्षे तृतीयाऽ-क्षयसंज्ञितेति" स्कन्दपुराणम्।

अक्षय्य त्रि० क्षेतुं शक्यं क्षि-यत् नि० न०त०। क्षयानर्हे। अक्षये च "तेषां पिण्डो मया दत्तोह्यक्षय्यमुपतिष्ठतामिति" वायु०

अक्षय्योदक न० नक्षय्य मक्षय्य मुदकं यत्र श्राद्धे पिण्ड-दानानन्तरं देये मधुतिलमिश्रिते उदके। "अक्षय्योदक दानन्तु अर्घ्यदानवदिष्यते। षण्णैव नित्यं तत् कुर्य्यात् न चतुर्थ्यां कदाचनेति" कल्पोगप०।

अक्षर न० न क्षरतीति क्षर-चलने अच् न०त०। परम-ब्रह्मणि कूटस्थे चैतन्ये "अक्षरं परमं ब्रह्मेति" गीता। क्रियाशून्ये त्रि० जीवे परमात्मनि च पु०। "क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते इति "यस्मात् क्षरमतीतो-ऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम इति" च गीता। क्षरणशून्येऽत्र स्थिरे त्रि०। अश्नुते व्याप्नोति वेदादिशास्त्राणि अश-सरन्। अकारादि-वर्णे न० "अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य चेति" गीता। वर्णस्मारकलिपिसन्निवेशे, "अक्षरं वर्णनिर्म्माणं वर्णमप्यक्षरं विदुः। अक्षरं न क्षरं विद्यादश्नुतेर्वा सरे-ऽक्षरमिति" उज्ज्वल०। उदके मोक्षे च न०।

अक्षरचण त्रि० अक्षरेण वर्णविन्यासलिप्या क्षिप्तः अक्षर+ चणप्। लेखनाजीविके। [चु(च)क्षुप्। लेखनाजीविके।

अक्षर(चु)चञ्चु त्रि० अक्षरेण वर्णविन्यासलिप्या क्षिप्तः अक्षर+

अक्षरच्छन्दस् न० अक्षरेण वर्णसंख्यया कृतं छन्दः। वर्ण-वृत्ते "छन्दस्तु द्विविधं प्रोक्तं वृत्तं जातिरिति द्विधा वृत्त-मक्षरसंख्यातं जातिर्मात्राकृता भवेदिति" छन्दोम० तस्य च तत्कृतत्वात्तथात्वम्। अक्षरं निश्चलं छन्दोऽभि-प्रायोऽस्य व०। परमेश्वरे पु० दृढाध्यवसाये त्रि०।

अक्षरजननी स्त्री अक्षराणां जननीव। लेखन्याम् (कलम्)।

अक्षरजीवक त्रि० अक्षरेण तल्लिपिलेखनेन जीवति जीव-ण्वुल् ३त०। अक्षरलेखनोपजीवके।

अक्षरतूलिका स्त्री अक्षराणां तल्लिपिलेखानां तूलिकेव साधनत्वात्। लेखन्याम् (कलम्)।

अक्षरन्यास पु० अक्षराणि तत्स्मारकाकारविशेषा न्यस्यन्ते अत्र+नि+अस-आधारे घञ् ६त०। लिप्याम्, पत्रिकायाम्। भावे घञ् ६त०। अक्षरस्मारकरेखा-द्याकारविशेषलेखने, हृदयाद्याधारस्पर्शपूर्व्वकं तत्तदक्ष-राणां स्मरणोच्चारणरूपे तन्त्रप्रसिद्धे वर्णन्यासे, "सबिन्दून् वा न्यसेदेतान् निर्बिन्दून् वा यथाक्रममिति" तन्त्रम्। विस्तारः मातृकाशब्दार्थे द्रष्टव्यः। अक्षरविन्यासो-ऽप्युक्तार्थेषु। [पयोऽस्य। लिपिलेखनोपजीविनि।

अक्षरजीविक त्रि० अक्षरं तल्लिपिलेखनं जीविका वर्त्तनो-

अक्षरजीविन् त्रि० अक्षरेण तल्लिपिलेखनेन जीवति जीव-णिनि ३त०। अक्षरलेखनेन वृत्तिनिर्वाहकारके। स्त्रियां ङीप्।

अक्षरमुख त्रि० अक्षराणि तन्मयानि शास्त्राणि वा मुखे यस्य। शास्त्राभिज्ञे अक्षराभिज्ञे च ६त०। अकाररूपे वर्णे न०

अक्षरशस् अव्य० अक्षरमक्षरमिति वीप्सार्थे कारके शस्। प्रत्यक्षरमित्यर्थे, "पृच्छ अक्षरशः इति" गद्यम्।

अक्षरसंस्थान न० अक्षराणां तत्तत्स्मारकरेखाविशेषाणां संस्थानमव० व०। वर्णस्मारक-रेखाविशेषयुक्त-लिप्याम्। "लिखिताक्षरसंस्थानमित्यमरः"।

अक्षराङ्ग न० अक्षराणामङ्गं तत्स्मारकरेखाविशेषाणामवयवः ६त०। लिप्याम्, लेखनसाधनद्रव्ये च।

अक्षराज पु० अक्षेण तत्क्रीडया राजेव। द्यूतासक्ते।

अक्षरी स्त्री अश्नुते गगनाभोगं मेघैः अश-सरन् गौ० ङीप्। वर्षायाम्

अक्षवती स्त्री अक्षा पाशकाः साधनत्वेन विद्यन्तेऽत्र अक्ष+ मतुप् मस्य वः ङीप्। द्यूतक्रीड़ायाम्।

अक्षवाट पु० अक्षाणां पाशकक्रीडानां वाटः वासस्थानम्।

द्यूतस्थाने, पाशकाधारे फलके च। अक्षस्य रथचक्र चुखस्थानस्येव वाटः। मञ्चभूमौ तत्र हि रथचक्रचुख-पांशुसदृशपांशुमत्त्वात् तत्सदृशत्वम्।

अक्षविद् त्रि० अक्षं पाशककीडां व्यवहारं वा वेत्ति विद-क्विप्। अक्षविद्याभिज्ञे व्यवहाराभिज्ञे च अक्षवेत्रादयो ऽस्यत्र। स्त्रियाम् अक्षवेत्री।

अक्षविद्या स्त्री ई० त०। पाशकादिद्यूतविद्यायाम्।

अक्षवृत्त न० अक्षं राशिचक्ररूपं वृत्तं वेष्टनाकारं कोष शून्यं चेलम्। राशिचक्ररूपे वृत्तचेले। अक्षे पाशक क्रीडायां वृत्तः व्याप्तः ७त०। पाशककीडासक्ते "यदक्ष-वृत्तमनु दत्तं न एतदिति" श्रुतिः। [द्यूतक्रीडाकुशले।

अक्षशौण्ड पु० अक्षेषु तत्क्रीडायां शौण्डः प्रवीणः ७त०।

अक्षसूत्र न० अक्षस्य जपमालायाः सूत्रम्। जपमालाश्रय साधने सूत्रे "साक्षसूत्रकमण्डलुरिति" पुराणम्।

अक्षाग्रकीलक न० अक्षस्य रथनाभिचेलस्याग्रनद्धं कीलकम्। ई त०। चक्रनाभिचेलाग्रप्रोते कीलके।

अक्षानह् न० अक्षे चक्रे आनह्यते बध्यते आ+नह-क्विप्। चक्रसंबन्धे काष्ठभेदे। "अक्षानहो नह्यतनोत सौम्या" इति वेदः। [क्रोधेच। न०ब०। क्षमाशून्येत्रि०।

अक्षान्ति स्त्री० क्षम-क्तिन् विरोध्यर्थे न०त०। ईर्ष्यायां,

अक्षारलवण त्रि० क्षारेण उपरक्षत्तिकया निर्वृत्तं अण् क्षारं कृत्रिमं लवणं न०त०। अकृत्रिमलवणे "सन्य-क्षानि पयः सोमोमांसं यज्ञानुपाकृतम्। अक्षारलवणञ्चै-वेति" मनुः। "चतुर्थकालमश्नीयादक्षारलवणं तथेति" मनुः अक्षारलवणमकृत्रिमलवणमितिप्राय० रघु०। क्षार-लवणभिन्ने सैन्धवलवणे न०। "नैतस्यां रात्रावन्नं प्रचेयुस्किरातमक्षारलवणाशिनः खुर्हादशरात्रं महा-गुरुव्रतिति, आश्वलायनस्मृतम्। अक्षारलवणं क्षार-क्षत्तिकादि-कृतलवणभिन्नं सैन्धवं सम्भारि चेति शु० रघु०। "गोक्षीरं गोघृतञ्चैव धान्यमुद्गास्तिलायवाः। साक्षुद्रं सैन्धवञ्चैव अक्षारलवणं स्मृतम्" इति स्मृत्युक्ते गोघृतादि-द्रव्यगणे च।

अक्षावपन न० अक्षान् पाशकान् आवपति क्षिपत्यस्मिन् आ+वप-आधारे ल्युट् ई त०। पाशकपातनाधारे फलके।

अक्षावली स्त्री ई०त०। जपसाधन-रुद्राक्षबीजावली जप-मालायाम् "रुद्राक्षावलीमिवाक्षावलीं कण्ठेनोद्वहन्ती"तिकाद०।

अक्षावाप त्रि० अक्षान् पाशकान् आवपति क्षिपति आ+वप-अण् उप०स०। द्यूतकारके, तद्ध्यक्षे च।

अक्षि न० अश्नुते विषयान् अश-क्सि। नेत्रे, इन्द्रियमध्ये तस्यैव विषयदेशं प्राप्य विषयग्राहकत्वं सर्व्ववादिसम्मतमन्ये-षान्तु सर्व्वमते न तथात्वमतोऽस्य विषयव्यापकता। एतदन्त बहुव्रीहेः खाङ्गपरत्वे यजन्तता पद्माक्षः पद्माक्षी, अखाङ्ग-परत्वे अजन्तता दीर्घाक्षा वेणुयष्टिः, अव्ययीभावे अजन्तता प्रत्यक्षं समक्षमित्यादि तत्पुरुषे ऽखाङ्गपरत्वेऽजन्तता गवाक्षः। इदञ्च शब्दादिषु बाह्येन्द्रियग्राह्यविशेषगुणेषु मध्ये रूपस्यैव ग्राहकतया तैजसं नेत्रगोलकेऽधिष्ठितं किञ्चित् वस्तु। तैजसत्वाच्चास्य सूर्य्यादिकिरणवदाशुदूरपर्य्यन्ता-नुधावनमागमनञ्च। तच्च परमाणुतुल्यमिति नैयायि-कादयः तदपेक्षया स्थूलमिति सांख्यादयः। उभयमते-ऽपि न तस्य प्रत्यक्षयोग्यता। तदाधारगोलके द्वे बाह्ये आभ्यन्तरे च चत्वारि कोशवत् पटलानि, मांसादयः पङ्क्तांशाः, पक्ष्मादीनि पञ्च मण्डलानि षट् सन्धयश्च सन्ति। तद्विवरणं यथा "विद्याद्दृङ्मण्डलं बाह्यं खाङ्गुलोदरसन्निभम्। द्वाङ्गुलं सर्व्वतः सार्द्धं भिन्नमयनवृद्बुदम्॥ सुवृत्तं गोस्तनाकारं सर्व्वभूतगुणोद्भवम्। पलं भुवो, ऽग्नितो, रक्तं, वातात् कृष्णं, सितं जलात्॥ आकाशादश्रुमार्गाश्च जायन्ते नेत्रबुद्बुदे। दृष्टिज्ञाने तथा वक्ष्ये यथावादीद्विशारदः॥ नेत्रायामस्ति-भागस्तु कृष्णमण्डलसञ्ज्ञितः। कृष्णात् सप्तममिच्छन्ति दृष्टिं दृष्टिविशारदाः॥ मण्डलानि च सन्धीश्च पटलानि च लोचने। यथाक्रमं विजानीयात् पञ्च षट् च षडेव च॥ पक्ष्मवर्त्मश्वेतकृष्णदृष्टीनां (५) मण्डलानि तु। अनुपूर्व्वन्तु तन्मध्यात्चत्वारोऽन्ये यथोत्तरम्॥ पक्ष्मवर्त्मगतः सन्धिर्वर्त्म शुक्लगतोऽपरः। शुक्लकृष्णगतस्त्वन्यः कृष्णदृष्टिगतोऽपरः॥ ततः कनीनकगतः षष्ठश्चापाङ्गजः स्मृतः। द्वे वर्त्मपटले विद्याच्चत्वार्य्यन्यानि चाक्षणि। जायते तिमिरं वेणु व्याधिः परमदारुणः। तेजोजलाश्रितं बाह्यं तेष्वन्यत् पिशिताश्रितम्॥ मेदस्तृतीयं पटलमाश्रितन्त्वक्षि चापरम्। पञ्चमांशसमं दृष्टेस्तेषां बाह्यमिष्यते इति शुश्रुते॥

अक्षिक पु० अक्षाय चक्रावयवाय हितम् ठन्। रज्जनद्धुमे (आतदृच)। [तारायाञ्च।

अक्षिकूटक न० अक्ष्णः कूट इव कन्। नेत्रगोलके नेत्र-

अक्षिगत त्रि० अक्षिणि गतः सर्व्वदाभावनावशादत्यासन्न-कृष्टोऽपि उपस्थित इव। द्वेष्ये शत्रौ नेत्रगोचरे च। "त्वयि किलाक्षिगते नयनैस्त्रिभिरिति नै०। [तुल्यत्वम्।

अक्षितर न० अक्षीव तरति तॄ-अच्। जले निर्म्मलत्वान्नेत्र

अक्षिभू स्त्री अक्ष्णः भूर्विषयः। चक्षुर्गोचरे प्रत्यक्षे, सत्ये

नेत्रदृष्टवस्तुन एव सत्यतासंवादितया तस्य सत्यत्वम् । "सत्यस्याक्षिभवो यथा, इति श्रुतिः । [वृद्धे ।

अक्षिभेषज न० ६त० नेत्ररोगविशेषनिवारके पट्टिकालोध्र-

अक्षिभ्रुव न० भ्रुवौ च अक्षिणी च समा०द्व० । राजदन्तादि० अक्षिशब्दस्य वङ्क्यादित्वेऽपि पूर्व्वनि० अच्समा० । भ्रूनेत्रसंघाते "सौमित्रिरक्षिभ्रुवमुज्जिहान" इति भट्टिः ।

अक्षिव पु० अक्षि वाति प्रोणाति अङ्गनेन वा-क । (सजना) शोभाञ्जनवृक्षे साहुडलवणे च ।

अक्षिविकूणित न० अक्ष्णः विकूणितं लज्जादिना सम्यक् प्रसाराभावात् सङ्कोचोय त्र । अपाङ्गदर्शने कटाक्षपाते

अक्षीव न० न क्षीवते माद्यति क्षीव-क, क्ष वा न०त० । शोभाञ्जने (सजना) साहुडलवणे च । मत्तभिन्ने त्रि० । वान्तोयमित्यन्ये । [इति वेदः ।

अक्षु न० अक्ष-उ । शीघ्रे । "जूर्णौ मनुवाहंसोयजत्रा"

अक्षुध्य त्रि० अक्षुधे हितम् अक्षुध्+यत् । क्षुधाभावसाधने द्रव्ये । "अक्षुध्या अक्षय्यासे स्वहामाक्षद्विभीतनेति"वेदः ।

अक्षेत्र न० अप्रशस्तं क्षेत्रं न०त० । अप्रशस्तोत्पादके क्षेत्रे उपदेशानर्हे शिष्ये, अपात्रे च । "अक्षेत्रे बीजमुत्सृष्टमन्नरैव विनश्यतीति" पुरा० ।

अक्षेत्रविद् त्रि० क्षेत्रं देहतत्त्वं तत्त्वतो न जानाति विद्-क्विप् अस० स० । क्षेत्रतत्त्वानभिज्ञे आत्मत्वेन देहाभिमानिनि जीवे । "अक्षेत्रविदु क्षेत्रमिदं ह्यप्राट् प्रैति क्षेत्रविदानुशिष्ट" इति वेदः ।

अक्षेत्रिन् पु० क्षेत्रं शस्योत्पत्तिस्थानं कलत्रं वा अस्त्यर्थे इनि न०त० । क्षेत्रस्वामिभिन्ने । "वेऽक्षेत्रिणो बीजवन्तः परक्षेत्रे प्रवापिन इति" स्मृतिः ।

अक्षोट पु० अक्ष-ओट, अक्षस्य विभीतकस्येव उटानि पर्णान्यस्य वा । पर्व्वतीयपीलुभेदे (आखरोट) स्वार्थे कन् तत्रैव ।

अक्षोड पु० अक्ष-ओड अक्षः विभीतक इव क्रोडति पत्रैः संछन्नते उड-अच् वा । पर्व्वतीयपीलुवृक्षे (आखरोट) स्वार्थे कन् तत्रैव ।

अक्षोभ्य त्रि० क्षोभ्यते विचाल्यते क्षुभ-णिच् कर्म्मणि यत् न० त० । भयादिजनशक्ये "इक्ष्वाकुबलमक्षोभ्यमिति" पुरा० । तन्त्रोक्ते द्वितीयविद्यामन्त्रोपासके तद्देवताया: शिरसि नागरूपेण स्थिते ऋषिभेदे पु० । "अक्षोभ्योऽस्याऋषिः प्रोक्त, इति तन्त्रम् ।

अक्षोभ्यकवच न० अक्षोभाय हितमक्षोभ्यं कर्म्म० । तन्त्रोक्ते कवचभेदे तच्च तन्त्रसारे द्रष्टव्यम् ।

अक्षौहिणी स्त्री अक्षः समूहः संविकल्पकत्वानं वा सोऽस्यास्ति इनि, अक्षाणां रथानां सर्व्वेषामिन्द्रियाणाम् "वा अक्षिनी चात्वं वृद्धिच । रथगजतुरङ्गपदाति-संख्याविशेषान्विते सेनासमूहे । "अक्षौहिण्यामित्यधिकैः सप्तत्या चाष्टभिः शतैः । संयुक्तानि सहस्राणि गजानामेकविंशतिः । एवमेव रथानान्तु संख्यानं कीर्त्तितं बुधैः । पञ्चषष्टिः सहस्राणि षट् शतानि दशैव तु । संख्यातास्तुरगास्राज्ञैर्विना रथ्यतुरङ्गमैः । नृणां शतसहस्रं तु सहस्राणि नवैव तु । शतानि त्रीणि चान्यानि पञ्चाशच्च पदातय इति । रथाः २१८७० । गजाः २१८७० । रथवाहकाश्वभिन्नाः अश्वाः६५६१० । पदातयः १०९३५० ।

अक्ष्ण त्रि० अश्नुते व्याप्नोति अश-क्स्न । व्यापके अखण्डे काले न० अक्ष्णया दक्षिणेऽंसे श्रेष्ण्यां श्रेष्ण्यांसे, इति वेदः ।

अखट्ट पु० खट्ट-अच् न०त० । पियालवृक्षे (पियासाल)

अखट्टि स्त्री खट्ट-इ न०त० वा ङीप् । अशिष्टव्यवहारे ।

अखण्ड त्रि० खडि-घञ् न०त० । संपूर्णे, सकले "अखण्डसाम्राज्यपतितत्वमेतीति" जातकम् खण्डभिन्ने पु०न० ।

अखण्डन पु० न खण्ड्यते निरवयवत्वात् खडि-ल्युट् न०त० खण्डनानर्हे परमात्मनि, पूर्णे त्रि० । [च ।

अखण्डित त्रि० खडि-क्त न०त० । सम्पूर्णे, "खण्डितभिन्ने

अखण्डितर्त्तु पु० अखण्डितः ऋतुः तत्सम्मत पुष्पादिप्रसवरूपा यत्र पुष्पादि-सर्वसम्पद्युक्ते ऋतुकाले ।

अखलीकार पु० न खलः अखलस्य कारः अखल+च्वि-कृ-घञ् । सप्रयोजनताविधाने अखलान्यथासम्पादने ।

अखेटिक पु० न खेटत्वस्यात् खिट-भवे ठिकन् । वृक्षमात्रे ।

अखात पु०न० खन-क्त न०त० । देवखाते, मनुष्यादिखाते च । खातभिन्ने त्रि० । "खातमखातमुत सक्तमिति" वेदः ।

अखाद्य त्रि० खाद-अर्हार्थे ण्यत् न०त० । भोजनानर्हे गोमांसादौ, भक्ष्यभिन्ने च ।

अखिद्र त्रि० खिद-रक् न०त० । खेदरहिते "मरुतोयातेमखिद्रयामभिरिति" वेदः ।

अखिन्न त्रि० खिद-भावे क्त त०ब० । क्लेशरहिते अनायासमाध्ये कर्म्मणि खेदरहिते कर्त्तरि च । कर्त्तरि क्त न०त० । अक्लिष्टे ।

अखिल त्रि० न खिल्यते न कणशादीयते खिल-क न०त० । समग्रे । खिलाभिन्ने क्षेत्रभूम्यादौ स्त्री । नास्ति खिलमवशिष्टं यस्य शेषशून्ये "वेदोऽखिलोधर्म्ममूलं स्मृतिशीले च तद्विदामिति" मनुः । तेन सिंहासं

पैत्राभखिलं चारिमण्डलमिति" रघुः। "न निशाखिल-यापि वापिका प्रससाद स्वहितेव मानिनीति" नै०।

अग इदित् गतौ भ्वादि० पर०। अङ्कति। आङ्कीत्। ल्युट् अङ्कनम् असुन् अङ्कः। [यति।

अग वक्रगतौ भ्वादि०पर०सटादि। अगति आगीत्। अग-

अग पु० न गच्छतीति गम-ड न०त०। वृक्षे, पर्व्वते, च। गमनाकर्त्तरि त्रिका० त्रि०। न गच्छति वक्रगत्वा पश्चिमम्। सूर्य्ये तस्य हि वक्रगत्वभावः ज्योतिषप्रसिद्धः। "वक्रशीघ्रगतिश्चैव भवेत् भौमादिपञ्चके" इत्युक्तेः आर्य्यभट्ट मते तु पृथिव्याएव गतिमत्त्वेन दिनरात्रिसम्भवात् सूर्य्यस्य न गतिमत्त्वम्। सप्तसंख्यायाञ्च कुलाचलानां सप्तत्वेन तेषाञ्च प्राधान्यात् "प्रधानेन व्यपदेशाभवन्तीति" न्यायात् तथात्वम्।

अगच्छ पु० गम-बा० श न०त०। वृक्षे।

अगज न० अगात् पर्व्वतशिलातो जायते जन-ड। शिला-जतुद्रव्ये। पर्व्वतजातमात्रे त्रि०।

अगण्य त्रि० गणयितुमशक्यम् गण-शक्यार्थे यत् न० त०। गणयितुमशक्ये असंख्ये। "गुणैरगण्यैरतिशीलशालिभि-रिति"। अर्हे यत् न०त०। गणनानर्हे, अकिञ्चित्करे त्रि०।

अगति स्त्री गम-क्तिन् न०त०। उपायाभावे। बहु०। गतिशून्ये, उपायशून्ये च त्रि०। स्वार्थे कन्, येषाहा कप् तत्रैवार्थे त्रि० "मामगतिकमिति" शङ्कराचार्य्यः।

अगद पु० नास्ति गदो रोगो यस्मात् ५ब०। औषधे ६ब०। "औषधान्यगदोविद्या दैवी च विविधा स्थितिः। तपसैव प्रसिध्यन्तीति" पुराणम्। रोगशून्ये त्रि०। गद-भावे अच्-न०त०। अकथके त्रि०। [दीत्।

अगद नीरोगत्वे कण्ड्वा० पर०। अगदयति आगदीत्-आग-

अगदङ्कार पु० अगदं करोति अगद+क्त-अण् सुम् च। वैद्ये। [न्रि त्रि०।

अगम पु० न गच्छतीति गम-अच् न०त०। वृक्षे। अग-

अगम्य त्रि० न-गन्तुमर्हति गम-यत् न०त०। गमनानर्हे "अगम्या सा भवत्तव यतोभूत् स महारण्य इति" चण्डी। अन्त्यजातिस्त्रियां स्त्री। "अगम्यां च स्त्रियं गत्वेति" "अगम्यागमनञ्चैव जातिभ्रंशकराणि षडिति" च स्मृतिः दुर्वोध्ये "योगिनामप्यगम्योऽसाविति" पुराणम्।"

अगरी स्त्री नास्ति गरो विषं यस्याः ५ब० गौ०ङीष्। मूषिक-विषहारिणि देवताडवृक्षे। विषहारिणि द्रव्यमात्रे त्रि०।

अगरु न० न गिरति गॄ-उ न०त०। स्वनामप्रसिद्धे अगुरु-

चन्दने। "कौसुमस्रजमेताञ्च चन्दनागरुचर्चितामिति" दुर्गापूजामन्त्रः "चन्दनागरु" इति पाठान्तरम्।

अगर्हित त्रि० न०त०। निन्दितभिन्ने शुद्धे, "यत्किञ्चित्-स्नेहसंयुक्तं भक्ष्यं भोज्यमगर्हितमिति" स्मृतिः।

अगस्ति पु० अगं विन्ध्याचलम् अस्यति अस्-क्तिच् शक-न्ध्वादि०। अगस्त्यनामके मुनौ। अगस्त्यसम्बन्धात्पत्यादौ बहुषु यञोलुक्। तद्गोत्रापत्येषु ब०व०। तत्सम्बन्धित्वात् दक्षिणस्यां दिशि। अगस्त्यजन्मकथा च। "तयोरादित्यवो: सत्रे दृष्ट्वाप्सरसमुर्व्वशीम् रेतश्चस्कन्द तत् कुम्भे न्यपतद्दैवयोगतोवरे तेनैव तु मुहूर्त्तेन वीर्य्यवन्तौ तपस्विनौ, अगस्त्यश्च वशिष्ठश्च तावृषी संबभूवतुः। बहुधा पतितं रेतः कलसे च जले स्थले। स्थले वशिष्ठस्तु मुनिः संभवर्षिसत्तमः। कुम्भे-त्वगस्त्यः सम्भूतः जले मत्स्यो महाद्युतिः। उदियाय ततोऽगस्त्यः क्षणमात्रे महातपाः इति" पुराणम्। तस्य च विन्ध्याचलस्तम्भनकथा काशीखण्डे ऽनुसन्धेया। हरि-संहितायामस्य गगनमण्डले दक्षिणस्यां तारारूपेण स्थिति-रुक्ता तत्र अगस्त्यचारशब्दे द्रष्टव्यम्।

अगस्तिद्रु पु० अगस्तिप्रियः द्रुर्वृक्षः शाक० त०। वकवृक्षे। अगस्तिवृक्षादयोऽपि।

अगस्त्य पु० अगं विन्ध्याचलं स्यायति सम्यति स्त्यै-क। अगस्त्यनामके मुनौ। अगस्त्यचरिताभाषां प्रतस्थे दिग्-जिगीषयेति" रघुः। यस्या०यञ्। आगस्त्यस्यादपत्ये।

अगस्त्यगीता स्त्री अगस्त्येन गीता विद्याभेदः। भारते शान्तिपर्व्वणि प्रसिद्धे विद्याभेदे।

अगस्त्यचार पु० अगस्त्यस्य नक्षत्ररूपेण दक्षिणस्यस्य चारः शुभाशुभसूचकगत्यादि। वराहसंहितोक्ते अगस्त्यनामक-नक्षत्रस्य उदयादौ। यथा "विन्ध्यमस्तम्भयद्यश्च तस्योदयः श्रूयताम्" इत्युपक्रम्य। "उदये च पुनरगस्त्यनाम्नः कु-समा-योगमलप्रदूषितानि। हृदयानि सतामिव स्वभावात् पुन-रम्बूनि भवन्ति निर्म्मलानि॥ पार्श्वद्वयाधिष्ठितचक्रवाकामा-पुष्पतो सस्तनहंसपङ्क्तिम्। ताम्बूलरक्तोत्कषितायदन्ती विभाति योषेव सरित्प्रहासा॥ इन्दीवरासङ्गसितोत्पलान्विता सरिद्भुजत्पट्पदषट्पदाङ्किभूषिता। सम्भूलताक्षेपकटाक्ष-वीक्षणा विदग्धयोषेव विभाति सस्मरा॥ इन्दोः पयोदवि-गमोपहितां विभूतिम् द्रष्टुं तरङ्गवलया कुसुदं निशासु। उन्मीलयत्यलिनिलीनदलं सुपक्ष्म वापी विलोचनमिवा-सिततारकान्तम्॥ नानाविचित्रास्बुजहंसकोककारण्डवा-पूर्णतडागहस्ता। रत्नैः प्रभूतैः कुसुमैः फलैश्च भूर्यच्छती

वार्धमगस्त्यनाम्ने ॥ सलिलमरपात्रवेष्टितं बहुन-परिवेष्टितमूर्त्ति भिर्भुजङ्गैः । फणिजनितविषाग्निसङ्कटं भवति शिवं तदगस्त्यदर्शनेन ॥ स्मरणादपि पापमपाकुरुते किमुत ? स्तुतिभिर्वरणाङ्करुहः । मुनिभिः कथितोऽस्य यथार्थविधिः कथयामि तथैव नरेन्द्रहितम् ॥ संख्याविधानात् प्रतिदेशमस्य विज्ञाय सन्दर्शनमादिशेज्ज्ञः । तच्चोज्जयिन्यामगतस्य कन्यां भागैः खराख्यैः स्फुटभास्करस्य ॥ दैवज्ञभिक्षेऽरुणरश्मिजालैर्नभोऽन्धकारे दिशि दक्षिणस्याम् । सांवत्सरावेदितदिग्विभागे भूपोऽर्घमुर्व्यां प्रयतः प्रयच्छेत्" ॥ इत्युक्तान्ने उपसङ्हृतं यथा "दृश्यते स किल हस्तगतेऽर्के रोहिणीसुपगतेऽस्तमेतीति" ।

अगस्त्यसंहिता स्त्री अगस्त्यनिर्मिता संहिता । रामचन्द्रविष्णुवामनादिपूजेतिकर्त्तव्यताबोधके शास्त्रभेदे ।

अगस्त्योदय पु० अगस्त्यस्य नक्षत्ररूपेण दक्षिणस्यस्य उदयः। अगस्त्यनक्षत्रोदये तस्य च नक्षत्रस्य दक्षिणस्थितत्वेन उत्तरदिग्वासिनां सर्वदा दर्शनयोग्यता नास्ति, तस्योदयश्च भाद्रपदे भवति "यस्तु भाद्रपदे मासि उदिते कलसोद्भवे इति" पुराणम् । तद्विवरणम् अगस्त्यचारशब्दे दर्शितम् ॥ तस्योदये जलादीनां प्रसन्नत्वं "प्रसन्नादोदयादम्भः कुम्भयोनेर्महौजसः इति" रघावुक्तम् ।

अगाध त्रि० गाध-प्रतिष्ठायाम् घञ्-न०त० । अतिगभीरे । छिद्रे न० । गाधः निम्नसीमा स नास्ति यस्येति । नीचसीमारहिते "साध्वगाधे भवे मग्नेति" पुरा० दुर्बोधे च । "अगाधस्त्वनघागुणा" इत्यमरः । [छिद्रे ।

अगाधजल पु० अगाधं जलमत्र । अतिगभीरजले

अगार न० अगम् न गच्छन्तिष्ठति प्राप्नोति अग+घञ्-अण् । गृहे । "तत्रागारं धनपतिगृहानिति मेघ० ।

अगिर पु० न गीर्यते दुःखेन गॄ-वा० क न०त० । स्वर्गे ।

अगिरौकस् पु० अगिरः स्वर्गं ओकोवासस्थानं यस्य । देवे ।

अगु पु० न गौः किरणोऽस्य । राहुग्रहे सूर्य्यालोकाभावे तमसि । गोऽन्यत्रे त्रि० ।

अगुण पु० न०त० । गुणविरोधिनि दोषे । "तद्दः सर्वं प्रवक्ष्यामि प्रसन्ने च गुणागुणमिति" स्मृतिः न०ब० । गुणरहिते त्रि० "भक्तिप्रीतिप्रणयसहितं मानदम्भाद्यपेतं चेतोऽस्माकं गुणवदगुणं गोदुहां देहभेतत्" इत्युद्धवदूतः ।

अगुरु न० न गुरुर्यस्मात् । स्वनामप्रसिद्धे, अगुरुचन्दने "धूपैश्चागुरुगन्धिभिरिति" शिंशपा वृक्षे (शिशु) च । गुरुभिन्ने, उपदेशकशून्ये त्रि० । गुरुवर्णभिन्ने लघुवर्णे पु० "अगुरुचगुरुश्च भवति गुरू द्वौ यनकुचयुग्मे, शशिवदनासावितिं" श्रुतबोधः । गौरवरहिते गौरवविपरीतलाघववति त्रि० ।

अगुरुशिंशपा स्त्री अगुरुःसारो यस्याः ताडगी शिंशपा मध्यपदलोपित० । (शिशु) इति प्रसिद्धे शिंशपावृक्षे ।

अगूढगन्ध न० न गूढो गन्धो यस्य ब्रीव० । छिङ्गुड्ये । तच्च यासस्रोत्कटगन्धत्वात्तथा । अगुप्तसौरभे द्रव्यमात्रे त्रि० ।

अगृभीत त्रि० न गृहीतम् क्तस्य त्वात् इसञ् भः । अगृहीते, "जयजय जह्यजामगृभीतगुणामिति, भाग० स्तु० ।

अगौकस् पु० अगः पर्वत ओकः स्थानं यस्य । शरभे पशौ पर्वतवासिनि त्रि० ।

अग्नामरुत् पु० द्वि० द्व० आनङ् । एकविरहेऽग्नयो सन्नाह्यौर्देवयोः । तौ देवते अस्य अण् । आग्निमारुतं हविः । [देवयोः ।

अग्नाविष्णु पु० द्वि०द्व० आनङ् । एकहविर्भोक्तोस्तन्नामकयो

अग्नायी स्त्री अग्नि+ऐङ्-ङीष् । अग्नेर्योषिति स्वाहा ख्यायाम् । "वरुणानी नचाग्नायी तस्याः सिस्मिनी समेवि" भट्टिः । सा च दक्षकन्या तस्यामग्निप्रियतयाकथा महाभारते "दक्षस्याहं प्रिया कन्या स्वाहा नाम महाभुज ! ॥ वाक्याद् प्रभृति नित्यञ्च जातकामा हुताशने स न मे कामनां पुत्र ! समग्रं जानाति पावकः । इच्छामि शाश्वतं वासं वस्तुं पुत्र ! सहाग्निना । स्कन्द उवाच । हव्यं कव्यञ्च यत् किञ्चिद्दिजा० नामाथ संस्कृतम् । होष्यन्त्यग्नौ सदा देवि ! स्वाहेत्युक्ता समुद्गतम् । अद्य प्रभृति दास्यन्ति सुवृत्ताः सत्पथे स्थिताः । एवमग्निस्त्वया सार्द्धं सदा वत्स्यति शोभने" ! वन० मार्क० प० ।

अग्नि पु० अङ्क्ति ऊर्द्धं गच्छति अगि-नि नलोपः । अग्नौ स्वनामप्रसिद्धे तेजोभेदे, तेजसि आकाशाद्वायुर्वायोरग्निरग्नेरापोद्भ्यः पृथिवी, इति" श्रुतिः । तत्र तेजःपदार्थस्त्रावद्विविधः सूक्ष्मः स्थूलश्च । सूक्ष्मवायुसंभूतः सूक्ष्मवायुसंभूतः सूक्ष्मः पञ्चीकृतस्तु स्थूलः "तासां त्रिवृतं त्रिवृतमेकैकां करोतीति" श्रुतौ त्रिवृत्करणस्य पञ्चीकरणस्याप्युपलक्षणत्वम् । पञ्चीकरणप्रकारश्च पञ्चीकरणशब्दे वक्ष्यते । तथा च भूतान्तराष्टमभागमिश्रितेन स्वस्वार्द्धभागेन उत्पन्नः पञ्चीकृतः । तस्य च पञ्चात्मकत्वेऽपि "वैशेष्यात्तद्वाद इति" शारीरकोक्तेः भूयस्त्वात् तैजसत्वव्यवहारः । सोऽयं स्थूलो वह्निः प्रकारान्तरेण त्रिविधः भौमः

दिव्यः जाठरश्चेति भेदात् । तत्र पार्थिवकाष्ठादि प्रभवः भौमः महानसाद्यग्निः, जलवाड्वादिभवः दिव्यः विद्युदुल्कावज्रादिः । उभावपि ऊर्ध्वज्वलनस्वभावः । उदरे भवस्तृतीयः । त्रयोऽप्यमी स्वसंयुक्तपाकदाहप्रकाशन समर्थाः । सर्वेऽप्यमी लोके शास्त्रे च वह्न्यादिशब्देन व्यवह्रियन्ते तेषां विशेषगुणाः शब्दस्पर्शरूपाणि "योयो-यावतिधश्चैषां स स तावद्गुणः स्मृतः" इति मनुना भूतमध्ये स्तृतीयस्य तेजसः त्रिगुणत्वमुक्तं व्यक्तमुक्तं महाभारते शब्दः स्पर्शश्च रूपञ्च तेजसोऽथ गुणास्त्रयः इति "अत एव "वह्नौ भृगुभुग्भ्यभिरिति" पञ्चदश्यामुक्तम् वह्नेश्च तेजोजलभूम्यात्मकत्वेन लोहितशुक्लरूपत्वम् अत एव छान्दोग्ये त्रिवृत्करणानन्तरम् वह्नेस्त्रिरूपत्वमुक्तं यथा "यदग्नेः रोहितं रूपं तेजसस्तद्रूपं, यच्छुक्लं तदपां, यत् कृष्णं तदन्नस्येति" त्रिवृतञ्चैतद्भाष्यकृता "यस्त्वेवतानां त्रिवृत्करणमुक्तं तस्यैवोदाहरणमुच्यते । उदाहरणं नामैकदेशप्रसिद्धायेनप्रसिद्धयसदाह्रियत इति । तदेतदाह यदग्नेः त्रिवृत्कृतस्य रोहितं रूपं प्रसिद्धं लोके तदत्रिवृत्कृतस्य तेजसो रूपमिति विद्धि । तथा यच्छुक्लं रूपमग्नेः तदपामत्रिवृत्कृतानामेव यत् कृष्णं तस्यैवाग्नेः रूपं तदन्नस्य पृथिव्या अत्रिवृत्कृतायाः इति विद्धीति"। अत एव तत्तच्छास्त्रकाव्यादिषु वह्नेररुणरूपतया वर्णनं दृश्यते । अग्निमूर्त्तिध्याने च अरुणरूपत्वमनुपदं दर्शयिष्यते । लोके चारुणत्वेनैव प्रत्यक्षेणासावुपलभ्यते एवञ्च नैयायिकोक्तं तेजसः शुक्लभास्वररूपत्वं प्रत्यक्षवेदविरुद्धत्वादुपेक्ष्यमेव । तत्र भौमदिव्ययोः प्रायशोलोकसिद्धत्वेन दिव्यस्याग्ने दिव्यशब्दे वक्ष्यमाणत्वाच्च जाठरे वह्नौ विशेषोऽभिधीयते । "नाभेरूर्द्धं हृदयादधस्तादाशयमाचक्षते तद्धतं सौरं तेजः पित्तमित्याचक्षते" इति भाष्यविवरणे आनन्दगिरिः वैद्यकवचनत्वेनोवाच । अत एव तस्य कौचेय इति संज्ञा । छान्दोग्ये च "या हृदयस्य नाड्यस्ताः पिङ्गलाद्याणिमृसिडन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिङ्गलः एष शुक्ल एष नील एष पीत एष लोहित इति"। व्याख्यातञ्चैतत् भाष्यकृता । "अथ वा एता वक्ष्यमाणा हृदयस्य पुण्डरीकाकारस्य ब्रह्मोपासनस्थानस्य सम्बन्धिन्यो नाड्यो हृदयमांसपिण्डात्प्रवृत्तो विनिःसृता आदित्यमण्डलादिरश्मयस्तावैताः पिङ्गलस्य वर्णविशेषविशिष्टस्याणिमृः सूक्ष्मारसस्य रसेन पूर्णास्तदाकारा एव तिडन्ति वर्त्तन्त इत्यर्थः । तथा शुक्लस्य नीलस्य पीतस्य लोहितस्य च रसस्य पूर्णा इति सर्वत्राध्याहार्य्यम् । सौरेण तेजसा पित्ताख्येन पाकाभिनिर्वृत्तेन कफेनाल्पेन सम्पर्कात्पिङ्गलं भवति, सौरं तेजः पित्ताख्यम् । तदेव वातभूयस्त्वान्नीलं भवति । तदेव च कफभूयस्त्वाच्छुक्लं, कफेन समतायां पित्तम्, शोणितबाहुल्येन लोहितम् । वैद्यकाद्वा वर्णविशेषा अन्वेष्टव्याः । कथं भवतीति ? श्रुतिस्त्वाहादित्यसम्बन्धादेव, तत्तेजसो नाड़ीष्वनुगतस्यैते वर्ण विशेषा" इति । कथमसौ वाऽदित्यः पिङ्गलो"? वर्णत एव आदित्यः शुक्लोऽप्येष नील एष पीत एष लोहित आदित्य एव, तस्य चान्नरसस्य धात्वन्तरसम्पर्कवशात् वर्णविशेष" इत्यानन्दगिरिः । अस्यैवजाठरस्य पिपासाहेतुत्वं छान्दोग्ये उक्तं यथा "अथ यत्रैतत् पुरुषः पिपासति नाम तेज एवैतत् पीतं नयते इति" । व्याख्यातञ्च भाष्यकृता द्रवकृतस्याशितस्यान्नस्य नेत्रप्रः आपोऽन्नगुङ्गं देहं क्लेदवन्त्यः शिथिलीकुर्य्युः अव्याहत्यात्, यदि तेजसा न शोष्येत । नितराञ्च तेजसा शोष्यमाणासु देहभावेन परिणममानासु धातुभिच्छा पिपासा पुरुषस्य जायते तदा "पुरुषः पिपासति नाम, तदेतदाह "तेज एव तत्तदा पीतमवादि शोषयत् देहलोहितादिभावेन नयते परिणमयतीति" । तस्य रसपाकप्रकारमाह योगार्णवे । "आयुष्यं भुक्तमाहारं स वायुः कुरुते द्विधा संप्रविश्यान्नमध्यन्तु, पृथक् किट्टं पृथग् जलम् (किट्टम् अन्नमलभेदम्) । अग्नेरूर्द्धं च संस्थाप्य तदन्नं च जलोपरि । जलस्याधः स्वयं प्राणः स्थित्वाग्निं धमते घनैः (धमते संधुक्षयति) वायुना ध्मायमानोऽग्निरत्युष्णं कुरुते जलम् । अन्नं तदुष्णतोयेन समन्तात् पच्यते पुनः । द्विधा भवति तत् पक्वं पृथक् किट्टं पृथग् रसम् । रसेन तेन ता नाडीः प्राणः पूरयते पुनः । प्रत्यहर्यन्ति सम्पूर्णारसानि ताः समन्तत इति"। एवं रसपाकोत्तरं धातुपाकोऽभिहितः पदार्थादर्शे । यथा "त्वगसृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः । तत्र त्वक्तल्लोक्ता त्वक् रक्तजोदरवह्निना । पक्वान्नवेदरसादेवं रक्तादिभिस्तथा । स्वकोष्माग्निना पाकात् प्रजायन्ते त्वगादय इति"। एतन्मूलमेव "तत्र षोढा शरीराणि षट् त्वचो धारयन्ति चेति" याज्ञवल्क्यवचनव्याख्यायां मिताक्षराकृता स्मृतमुक्तम् यथा तत्रात्मनीयानि जरायुजाण्डजादीनि शरीराणि तानि प्रत्येकं षट्प्रकाराणि रक्तादिषड्धातुपरिपाकहेतुभूतषडग्निस्थानयोगित्वेन । तथाहि अन्नरसो जाठरवह्निना पच्यमानो रक्ततां प्रतिपद्यते, रक्तः स्वकोष्म-

स्वाग्निना पच्यमानं मांसत्वम्, मांसञ्च स्वकोष्ठस्थानलपरिपक्वं मेदस्त्वम्, मेदोऽपि स्वकोष्ठवह्निना पक्वमस्थितां, अस्थ्यापि स्वकोष्ठगग्निपरिपक्वं मज्जात्वम्, मज्जापि स्वकोष्ठपावकपरिपच्यमानं चरमधातुतया परिणमते इति" जाठरस्य प्रकारान्तरेण पाचनादिदशविधकर्म्मकारित्वात् दशविधत्वसङ्ख्यं पदार्थादर्शे यथा "भ्राजकोरञ्जकश्चैव क्लेदकः स्नेहकस्तथा धारको बन्धकश्चैव द्रावकाख्यश्च सप्तमः। व्यापकः पाचकश्चैव श्लेष्मको दशधा मत इति"। वैद्यकेचास्य चतुर्विधकार्य्यविशेषकारित्वाच्चातुर्विध्यसङ्ख्यम्। विषमश्च समस्तीक्ष्णो मन्दश्चेति चतुर्विधः। कफपित्तानलाधिक्यात् तत्साम्याच्चाठरोऽनलः। विषमो वातजान् रोगान्, तीक्ष्णः पित्तसङ्भवान्, करोत्यग्निस्तथामन्दो विकारान् कफसम्भवान्। समाः समोऽग्निरशितमात्राः समाक् पचत्यसौ" इति॥ अग्नेरतितीक्ष्णत्वे भक्षकसंज्ञा स हि समग्राहाराभावे शोणितादिधातूनपि पाचयित्वा आशु देहं नाशयतीति रक्षितः आहरः। अधिकं कायशब्दे वक्ष्यते। बाह्यस्य भौमस्याग्नेः कर्म्मविशेषे नामान्युक्तानि विधानपारिजाते। यथा

"लौकिके पावकोऽग्निः प्रथमः परिकीर्त्तितः। अग्निस्तु मारुतो नाम गर्भाधाने प्रकीर्त्तितः॥ पुंसवे चमसो नाम शोभनः शुभकर्म्मसु। (शुङ्कर्म्मणीति रघु०)। तच्च सीमन्तान्तर्गतकर्म्मभेदः। सीमन्ते सुमनसो नाम प्रगल्भो जातकर्म्मणि॥ पार्थिवो नामकरणे प्राशनेऽन्नस्य वै शुचिः। सभ्यनामा तु चूडायां व्रतादेशे सहक्षवः॥ गोदाने सूर्य्यनामा स्यात् केशान्ते याजकः स्मृतः। वैश्वानरो विसर्गे स्याद्विवाहे वरदः स्मृतः॥ चतुर्थीकर्म्मणि शिखी धृतिरग्निस्तथाऽपरे। (अपरे कर्म्मणि) आवसथ्यस्तथाधाने वैश्वदेवे तु पावकः। ब्रह्माग्निर्गार्हपत्ये स्याद्दक्षिणाग्निरधेश्वरः। विष्णुराहवनीये स्यादग्निहोत्रे त्रयोमताः नित्यहोमेऽभीष्टदः स्यात् कोटिहोमे महायनः। एके हुताशिषां प्राहुरग्निध्यानपरायणाः॥ रुद्रादौ तु रुद्रो नाम शान्तिके शुभदस्तथा। आदिशब्दात् लघुरुद्रगतरुद्रातिरुद्रा लभ्यन्ते। (पूर्णाहुत्यां रुद्रो नामेति रघु०)। पौष्टिके वरदश्चैव क्रोधाग्निश्चाभिचारके। वश्यार्थे वशदस्तु प्रोक्तो वनदाहे तु शोषकः। उदरे जठरो नाम क्रव्यादः शवभक्षणे। समुद्रे वाडवो ह्यग्निर्लये संवर्त्तकस्तथा॥ सप्तविंशतिसंख्याता अग्नयः कर्म्मसु स्मृताः। तं तमाहूय होतव्यं यो यत्र विहितोऽनलः॥ अन्यथा विफलं कर्म सर्व्वं तद्राक्षसम्भवेत्। आदित्यादिग्रहाणां च साक्षात् ह्यग्निरुच्यते॥ आदित्ये कपिलो नाम पिङ्गलः सोम उच्यते। धूमकेतुस्तथा भौमे जठरोऽग्निर्बुधे स्मृतः॥ बृहस्पतौ शिखी नाम शुक्रे भवति पाठकः। शनैश्चरे महातेजा राहौ केतौ हुताशनः इति॥" यज्ञादौ तु पञ्च भेदाः "आवसथ्याहवनीयौ दक्षिणाग्निस्तथैव च। अन्वाहार्य्यो गार्हपत्य इत्येते पञ्च वह्नयः" इति शा०राघ०। "पञ्चाग्नयो ये च त्रिणाचिकेता" इति श्रुतिः। अग्नेर्ध्येयरूपं यथा "रुद्रतेजःसमुद्भूतं हिमूर्द्धानं द्विनासिकम्। षण्नेत्रं च चतुःश्रोत्रं त्रिपादं सप्तहस्तकम्। वामभागे चतुर्हस्तं सव्यभागे त्रिहस्तकम्। स्रुवं स्रुचञ्च शक्तिं च अक्षमालां च दक्षिणे। तोमरं व्यजनं चैव हुतपात्रन्तु वामके। बिभ्रतं सप्तभिर्हस्तैर्द्विहस्तं सप्तजिह्वकम्। दक्षिणञ्च चतुर्जिह्वं त्रिजिह्वसुत्तरं सुखम्। द्वादशकोटिमूर्त्त्याख्यं द्विपद्मायतकलायुतम्। स्वाहास्वधावषट्कारैरङ्कितं मेषवाहनम्। रक्तमाल्याम्बरधरं रक्तं पद्मासनस्थितम्॥ रौद्रं तु वह्निनामानं वह्निभावाहयाम्यहम्"। इति रुद्रकल्पः। अग्नेर्भौतिकत्वेऽपि कर्म्माङ्गहोमसाधनतया एवं ध्यातव्यता।

अग्न्यभिमानिनि चेतनाधिष्ठिते शरीरादावपि उपचारात् अग्निशब्दप्रयोगः। अग्न्यधिष्ठातरि देवभेदे "अग्निं दूतं वृणीमहे होतारं विश्ववेदस" मित्यादौ वेदे तस्यैव आह्वानपूर्व्वकोपास्यत्वसङ्कल्पम्। तदधिष्ठितदेहभेदेऽपि, स एव विश्वनराख्यन्नासाद्य अग्निलोकाधिपत्यं चकारेति काशीखण्डे उक्तं तत्कथा वैश्वानरशब्दे वक्ष्यते। अग्निदेवताके कृत्तिकानक्षत्रे "अग्नियमदहने"त्यादिना ज्योतिषे कृत्तिकानक्षत्रस्य तत्स्वामिकत्वोक्तेः तद्देवताके पूर्व्वफल्गुनीनक्षत्रेऽदाधिपत्यं तिथिशब्दे वक्ष्यते। तस्य बहुत्वेऽपि वेदत्रयभेदेन दक्षिणाग्निगार्हपत्याहवनीयनामतया प्राधान्येन त्रित्वात् "प्रधानेन व्यपदेशा भवन्तीति" न्यायात् तत्संख्यासदृशसंख्याके त्रित्वसंख्यान्विते, खोदयात् स्वाग्निलब्धं (३०) "यदुभुङ्क्ते भोग्यं रक्षेत्त्रयेदिति" नीलकण्ठः। चित्रकदण्डे (चिते) स्वर्गे तस्य तत्तेजोजातत्वात्तथा तत्कथा अग्निरेतःशब्दे वक्ष्यते भल्लातकदण्डे (भेला) निम्बुकदण्डे (नेबु) पित्ते धातौ तस्य तदुत्पन्नत्वात्तथा यथा च तस्य तदुत्पन्नत्वं तथोक्तं प्राक्। तत्स्वामिके अग्निकोणे च। एवमग्निवाचकाः सर्व्वेऽपि शब्दाः कृत्तिकानक्षत्रादौ वर्त्तन्ते। चित्तं ब्रह्मणि कार्य्यसिद्धिरतुला शक्रे हुताशे भयमिति तिथित०। "हुताशे अग्निकोणे" अनलविधुशता-

ख्येति" ज्योतिषम् । (अनलः कृत्तिका) एवं यथायथमुदाहार्य्यम् ।

अग्न्यभिमानिनश्च देवाः कुत उत्पन्नाः? कस्मिन् कस्मिन् । कर्म्मणि? वा तेषामधिकारत्वं तदुक्तं भारते ।

अङ्गिराउवाच कुरु पुत्रं प्रजासर्गे भवाग्निस्त्वमिरापहः । मान्य देव! ऊरुष्वाग्ने! प्रथमं पुत्रमञ्जसा ॥ तच्छ्रुत्वाऽङ्गिरसो वाक्यं जातवेदास्तदाऽकरोत् । राजन् !। बृहस्पतिर्नाम तस्याप्यङ्गिरसः सुतः । ज्ञात्वा प्रथमजं तन्तु वह्नेराङ्गिरसं सुतम् । उपेत्य देवा पप्रच्छुः कारणं तत्र भारत । स तु दृष्ट्वा तदा देवैस्ततः कारणमब्रवीत् । प्रत्यग्रहीत्तु देवाच तद्वचोऽङ्गिरसस्तदा । तत्र नानाविधानग्नीन् प्रवक्ष्यामि महाप्रभान् । कर्म्मभिर्व्विविधैः ख्याताञ्जानार्थान् ब्राह्मणेष्विह । व०मार्क० स० २१६ अध्या०

ब्रह्मणो वसतीवस्तु पुत्रः कुरुकुलोद्वह ! । तस्याभवत् शुभा भार्य्या प्रजासत्राङ्ग मे शृणु । बृहत्कीर्त्तिर्बृहज्ज्योतिर्बृहद्ब्रह्मा बृहन्मनाः । बृहन्मन्त्रो बृहद्वासस्तथा राजन् ! बृहत्सतिः । प्रजास्तु तास्तु सर्व्वास्तु रूपेणाप्रतिमाऽभवत् । देव! भानुमती नाम प्रथमाऽङ्गिरसः सुता । भूतानामिव सर्वेषां तस्यां रागस्तदाऽभवत् । रागाद्रागेति यामाहुर्द्वितीयाऽङ्गिरसः सुता । यां कपर्द्दिसुतामाहुर्द्वयाद्वयेति देहिनः । तनुत्वात् सा सिनीवाली तृतीयाऽङ्गिरसः सुता । पश्यत्यर्च्चिष्मतो भासा हविष्मती । महामखेष्वाङ्गिरसी दीप्तिमत्सु महामते ! । महावतीति विख्याता सप्तमी कथ्यते सुता । यान्तु दृष्ट्वा भगवतीं जनः कुड्मलतां व्रजेत् । एकानंगेति तामाहुः कुहूमङ्गिरसः सुताम् । २१७ अ० बृहस्पतेश्चान्द्रमसी भार्य्याऽभूद्या यशस्विनी । अग्नीन् साऽजनयत् पुत्रान् षडेकाञ्चापि पुत्रिकाम् । आहुतिष्वेव यस्याग्नेर्हविषाज्यं विधीयते । सोऽग्निर्बृहस्पतेः पुत्रः संयुर्नाम महाव्रतः । चातुर्म्मास्येषु यस्येष्वामश्वमेधेऽध्वरे पशुः । दीप्तो ज्वालैरनेकाभैरग्निरेषोऽथ वीर्य्यवान् । संयोरप्रतिमा भार्य्या सत्याऽसत्याऽथ धर्म्मज ! ॥ अग्निस्तस्य सुतो दीप्तश्चित्रः कनयाच सुव्रताः । प्रथमेनाज्यभागेन पूज्यते योऽग्निरध्वरे । अग्निस्तस्य भरद्वाजः प्रथमः पुत्र उच्यते । पौर्ण्णमास्येषु सर्वेषु हविषाज्यं स्रुचोद्यतम् । भरतो नामतः सोऽग्निर्हितोयः संयुतः सुतः । तिस्रः कनया भवन्त्यस्या यासां स भरतः पतिः । भरतस्तु सुतस्तस्य भरत्येका च पुत्रिका । भरतो भरतस्याग्नेः पावकस्तु प्रजापतेः । महानलश्च सहितस्तथा भरतसत्तमः । भरद्वाजस्य भार्य्या तु वीरा वीरस्य विश्रुता । प्राहुराज्येन तस्यैज्यां सोमस्यैव द्विजाः शनैः । हविषा यो द्वितीयेन सोमेन सह युज्यते । रथप्रभूरथाध्वानः कुरुरेताः स उच्यते । सरय्यां जनयन् सिद्धिं भानुं भाभिः समावृणोत् । आग्नेयं मानवश्चित्यमाधाने ह्येष स्मृयते । यस्तु न च्यवते नित्यं यशसा वर्च्चसा श्रिया । अग्निर्निरुच्यवनो नाम पृथिवीं स्तौति केवलम् । विपाप्मा कलुषैर्मुक्तो विशुद्धार्च्चिषा ज्वलन् । विपापोऽग्निः सुतस्तस्य सत्यः समयधर्म्मकृत् । अक्रोशतां हि भूतानां यः करोति हि निष्कृतिम् । अग्निः स निष्कृतिर्नाम शोभयत्यभिसेवितः । अनुकूजन्ति येनेह वेदनार्त्ताः स्वयं जनाः । तस्य पुत्रः स्वनो नाम पावकः स रुजस्करः । यस्तु विश्वस्य जगतो बुद्धिमाक्रम्य तिष्ठति । तं प्राहुरध्यात्मविदो विश्वजिन्नामपावकम् । अन्तरग्निः ऋतो यस्तु भुक्तं पचति देहिनाम् । स जज्ञे विश्वभुङ्नाम सर्वलोकेषु भारत ! । ब्रह्मचारी यतात्मा च सततं विपुलव्रतः । ब्राह्मणाः पूजयन्त्येनं पाकयज्ञेषु पावकम् । पवित्रा गोतमी नाम नदी यस्याऽभवत् प्रिया । तस्मिन् कर्म्माणि सर्वाणि क्रियन्ते धर्म्मकर्तृभिः । वडवाग्निः पिबत्यम्भो योऽसौ परमदारुणः । अर्द्धभागूर्द्धभाङ् नाम कविः प्राणाश्रितस्तु यः । उदग्धारं हविर्यस्य गृहे नित्यं प्रदीयते । ततः स्विष्टं भवेदाज्यं स्विष्टकृत् परमः स्मृतः । यः प्रशान्तेषु भूतेषु मन्त्रैर्भवति पावकः । क्रुद्धस्य तरसा जज्ञे मन्त्रज्ञो चाथ पुत्रिका । स्वाहेति दारुणा क्रूरा सर्वभूतेषु तिष्ठति । त्रिदिवे यस्य सदृशो नास्ति रूपेण कश्चन अतुल्यत्वात् कृतो देवैर्नाम्ना कामस्तु पावकः । संहर्षाद्वारयन् क्रोधं धन्वी खड्गी रथे स्थितः समये नाशयेच्छत्रून् नमोघो नाम पावकः । उरुष्यो नाम महाभाग । त्रिभिरुत्थैरभिष्टुतः । महावाचन्यजनयत् समाश्वासं हि यं विदुः । २१८ अ०

काश्यपो ह्यथ वाग्मिश्च प्राणश्च प्राणपुत्रकः । अग्निराङ्गिरसश्चैव च्यवनस्त्रिसुवर्च्चकः । अचरत् स तपस्तीव्रं पुत्रार्थे वह्निवार्षिकम् । पुत्रं लभेयं धर्म्मिष्ठं यशसा ब्रह्मणा समम् । महाव्याहृतिभिर्ध्यातः पञ्चभिस्तैस्तदा त्वथ । जज्ञे तेजो महार्चिष्मान् पञ्चवर्णः प्रभावनः । समिद्धोऽग्निः शिरस्तस्य बाहू सूर्य्यनिभौ तथा । त्वङ्नेत्रे च सुवर्णाभे कर्णे जज्ञे च भारत ! । पञ्चवर्णः स तपसा कृतस्तैः पञ्चभिर्जनैः । पाञ्चजन्यः श्रुतो देवः पञ्चवंश-

19736

करस्तु सः। दश वर्षसहस्राणि तपस्तप्त्वा महातपाः। जनयत् पावकं घोरं पितॄणां स प्रजाः सृजत्। दक्षदक्षस्तरं मूर्ध्नो वह्नाद्या तरसा हरौ। शिवं नाभ्यां बलादिन्द्रं बाह्वोर्नी प्राणतोऽसृजत्। बाहुभ्यामनुदात्तौ च विश्वाभूतानि चैव ह। एतान् दृष्ट्वा ततः पञ्च पितॄणामसृजत् सुतान्। दक्षदक्षस्य प्रणिधिः कश्यपस्य महत्तरः। भानुरङ्गिरसो धीरः पुत्रो वर्चस्य सौभरः। प्राणस्य चानुदात्तस्तु व्याख्याताः पञ्चविंशतिः। देवान् यज्ञमुपस्थान्यान् सृजत् पञ्चदशोत्तरान्। सुभीममतिभीमञ्च भीमं भीमबलावलम्। एतान् यज्ञतपः पञ्च देवानां ह्यसृजत्तपः। सुमित्रं मित्रवन्तञ्च मित्रं मित्रवर्द्धनम् मित्रधर्माणमित्येतान् देवानथ्यसृजत्तपः। सुरप्रवीरं वीरञ्च सुरेशं सुरवर्चसम्। सुराणामपि हन्तारं पञ्चैतान् सृजत्तपः। त्रिविधं संस्थिता ह्येते पञ्च पञ्च पृथक् पृथक्। सप्तान्नाल स्थिता ह्येते स्वर्गतो यज्ञयाजिनः। तेषामिष्टं हरन्त्येते निघ्नन्ति च महद्विषः। स्वर्द्वया हव्यवाहानां निघ्नन्त्येते हरन्ति च। द्यां वहन्ति तदा दानं कुशलैः संप्रवर्त्तितम्। तदेते नोपसर्पन्ति यत्र चाग्निः स्थितो भवेत्। चिताग्नेरुदहद्भाव्यं पशाभ्यां तत् प्रवर्त्तितम्। मन्त्रैः प्रयमिता ह्येते नष्टं सृष्णन्ति यत्नियम्। दहदुकथस्तपसैव पुत्रो भूमिसुपाश्रितः। अग्निहोत्रे हूयमाने पृथिव्यां सद्भिरिज्यते। रथन्तरञ्च तपसः पुत्रोऽग्निः परिपठ्यते। मित्रविन्दाय वै तस्मै हविरध्वर्यवो विदुः। सुखदे परमप्रीतः सह पुत्रैर्महायशाः। २१६ अ०

गुरुभिर्नियमैर्जातो भरतो नाम पावकः। अग्निः पुष्टिमतिर्नाम तुष्टः पुष्टिं प्रयच्छति। भरत्येव प्रजाः सर्वास्ततो भरत उच्यते। अग्निर्यश्च शिवो नाम यक्तिपूजापरश्च सः। दुःखार्त्तानाञ्च सर्वेषां शिवकृत् सततं शिवः। तपस्तप्तं फलं दृष्ट्वा सम्भवन्तं तपो महत्। उद्वर्तुकामो मतिमान् पुत्रो जज्ञे पुरन्दरः। जम्भा चैवोग्रयशो जज्ञे सोऽग्निर्भूतेषु कथ्यते। अग्निश्चापि मनुर्नाम प्राजापत्यकारवत्। यमुमग्निमथ प्राहुर्ब्राह्मणा वेदपारगाः। आवसथ्यं द्विजाः प्राहुर्दीप्तमग्निं महाप्रभम्। जर्ज्वल्करान् हव्यवाहान् सुवर्णसदृशप्रभान्। ततस्तपो ह्यजनयत् पञ्च यज्ञसुतानिह। प्रशान्तोऽग्निर्महाभाग। परिस्रान्तो गवाम्पतिः। असुरान् जनयन् घोरान्वर्चांसैव पृथग्विधान्। तपसश्च मनुं पुत्रं भानुङ्गाधङ्गिराः सृजत्। वृहद्भानुन्तु तं प्राहुर्ब्राह्मणा वेदपारगाः। भानोर्भार्या सुप्रजा तु वृहद्भासा तु सूर्य्यजा। असृजेतान्तु षट् पुत्रान् शृणु तेषां प्रजाविधिम्। दुर्व्वासानान्तु भूतानामसृजन् यः समुद्यच्छति। तमग्निं वसदं प्राहुः प्रथमं भानुतः सुतम्। यः प्रशान्तेषु भूतेषु मन्युर्भवति दारुणः। अग्निः स मन्युमान्नाम द्वितीयो भानुतः सुतः। दर्शे च पौर्णमासे च यस्येह हविरुच्यते। विष्णुर्नामेह योऽग्निस्तु हृतिमान् नाम सोऽङ्गिराः। इन्द्रेण सहितं यस्य हविराप्यायणं स्मृतम्। अग्निराप्ययणो नाम भानोरेवान्त्यजस्तु सः। चातुर्मास्येषु नित्यानां हविषां यो निरूपकः। चतुर्भिः सहितः पुत्रैर्भानोरेवान्त्यजस्तु सः। निशा त्वजनयत् कन्यामग्नीषोमावुभौ तथा। भानोरेवाभवद्भार्या सुषुवे पञ्च पावकान्। पूज्यते हविषाग्नेय चातुर्मास्येषु पावकः। पर्जन्यसहितः श्रीमानग्निर्वैश्वानरस्तु सः। अस्य लोकस्य सर्वस्य यः प्रभुः परिपठ्यते। सोऽग्निर्विश्वपतिर्नाम द्वितीयो वै मनोः सुतः। ततः क्षिप्तं भवेदाज्यं क्षिप्तकृत् परमस्तु सः। कन्या सा रोहिणी नाम हिरण्यकशिपोः सुता। कर्म्मणाऽसौ बभौ भार्या स वह्निः स प्रजापतिः। प्राणानाश्रित्य यो देहं प्रवर्त्तयति देहिनाम्। तस्य सन्निहितो नाम यज्ञरूपस्य साधनः। शुक्लकृष्णगतिर्द्वेधा यो बिभर्त्ति हुताशनम्। अकल्मषः कल्मषाणां कर्त्ता क्रोधाश्रितस्तु सः। कपिलं परमर्षिञ्च यमाहुर्यतयः सदा। अग्निः स कपिलो नाम साङ्ख्ययोगप्रवर्त्तकः। अयं यजन्ति भूतानां येन भूतानि नित्यदा। कर्म्मस्विह विचित्रेषु सोऽग्नेर्वह्निरुच्यते। द्रुमानन्यान् समसृजत् पावकान् प्रथितान् भुवि। अग्निहोत्रस्य दुष्टस्य प्रायश्चित्तार्थसिद्धये। संस्पृशेयुर्यदान्योन्यं कथञ्चिद्वायुनाऽग्नयः। इष्टिरष्टाकपालेन कार्य्या वै शुचयेऽग्नये। दक्षिणाग्निर्यदा ह्याभ्यां संसृजेत तदा किल। इष्टिरष्टाकपालेन कार्य्या वै वीतयेऽग्नये। यद्यग्नयो हि सृष्येयुर्निवेशस्था दवाग्निना। इष्टिरष्टाकपालेन कार्य्या तु शुचयेऽग्नये। अग्निं रजस्वला वै स्त्री संसृशेदग्निहोत्रिकम्। इष्टिरष्टाकपालेन कार्य्या दस्रमतेऽग्नये। मृतः सूयेत यो जीवः परेयुः पशवो यदा। इष्टिरष्टाकपालेन कार्य्या सुरभतेऽग्नये। आर्त्तो न जुहुयादग्निं विरात्रं यस्तु ब्राह्मणः। इष्टिरष्टाकपालेन कार्य्या स्वादुत्तराग्नये। दर्शञ्च पौर्णमासञ्च यस्य तिष्ठेत् प्रतिष्ठितम्। इष्टिरष्टाकपालेन कार्य्या रतिकृतेऽग्नये।

सूतिकाऽग्निर्यदा चाग्निं संस्कृयेदग्निहोत्रिकम्। इष्टिरष्टाकपालेन कार्या चाग्निमतेऽग्नये। २२० अध्या०
आपस्य दुहिता भार्या सहस्य परमा प्रिया। भूपतिर्भुवभर्त्ता चाजनयत् पावकं परम्! भूतानाञ्चापि सर्वेषां यं प्राहुः पावकं पतिम्। आत्मा भुवनभर्त्तेति शास्त्रेषु द्विजातिषु। महतामेव भूतानां सर्वेषामिह यः पतिः। भगवान् स महातेजा नित्यं चरति पावकः। अग्निर्भूपतिर्नाम नित्यं यज्ञेषु पूज्यते। हुतं वहति यो हव्यमस्य लोकस्य पावकः। अपां गर्भो महाभागः सत्त्वभुग्यो महाद्युतः। भूपतिर्भुवभर्त्ता च महतः पतिरुच्यते। दहन्भूतानि भूतानि तस्याग्निर्भरतोऽभवत्। अग्नितोमे च नियतः क्रतुश्रेष्ठो भरस्य ह। स वह्निः प्रथमो नित्यं देवैरन्विष्यते प्रभुः। आयान्तं नियतं दृष्ट्वा प्रविवेशार्णवं भयात्। देवास्तत्राधिगच्छन्ति मार्गमाणा यथादिशम्। दृष्ट्वा त्वग्निरथर्वाणं ततो वचनमब्रवीत्। देवानां वह हव्यं, त्वमहं वीर! सुदुर्बलः। अथ त्वं गच्छ मध्यस्थं प्रियमेतत् कुरुष्व मे। प्रेष्य चाग्निरथर्वाणमन्यं देशं ततोऽगमत्। मत्स्यास्तस्य समाचख्युः क्रुद्धस्तानग्निरब्रवीत्। भक्षा वै विविधैर्भावैर्भविष्यथ शरीरिणाम्। अथर्वाणं तथा चापि हव्यवाहोऽब्रवीद्वचः। अनुनीयमानो हि भृशं देववाक्याद्धि तेन सः। नैच्छद्वोढुं हविः सर्वं शरीरस्थापि सोऽत्यजत्। स तच्छरीरं सन्त्यज्य प्रविवेश धरान्दरा। भूमिं सृष्टाऽसृजद्वातान् पृथक् पृथगतीव हि। पूयात् स गन्धं तेजश्च अस्थिभ्यो देवदारु च। श्लेष्मणः स्फटिकं तस्य पित्तान्मारकतं तथा। यकृत् क्रव्यादसं तस्य त्रिभिरेव प्रभुः प्रजाः। नखास्तस्याभ्रपटलं शिराजालानि विद्रुमम्। शरीरादिविधास्तस्य धातवोऽस्याभवन्नृप!। एवं त्यक्त्वा शरीरञ्च परमे तपसि स्थितः। भृग्वङ्गिरादिभिर्भूयस्तपसोत्थापितस्तदा। भृशं जज्वाल तेजस्वी तपसाप्यायितः शिखी। दृष्ट्वा ऋषिं भयाद्यापि प्रविवेश महार्णवम् तस्मिन्नष्टे जगद्भीतमथर्वाणमथाब्रितम्॥ अर्च्या मासुरवैनमथर्वाणं सुरादयः। अथर्वा त्वसृजल्लोकानात्मनालोक्य पावकम्। मिथतां सर्वभूतानामुन्मथ्य महार्णवम्। एवमग्निर्भगवता नष्टः पूर्वमथर्वणा। आहूतः सर्वभूतानां हव्यं वहति सर्वदा। एवं त्वजनयद्विप्रान् वेदोक्तान् विविधान् बहून्। विचरन् विविधान् देशान् भ्रममाणस्तु तत्र वै। सिन्धुं नदं पञ्चनदं देविकाञ्च सरस्वतीं। गङ्गा च शतकुम्भा च सरयूर्गण्डसाङ्गया चर्म्मण्वती सती चैव वेत्रा मेधातिथिस्तदा। ताम्रावती वेत्रवती नद्यश्चिस्रोऽथ कौशिकी। तमसा नर्मदा चैव नदी गोदावरी तथा। वेणोपवेणा भीमा च वडवा चैव भारत॥ भारती सुप्रयोगा च कावेरी सुप्रा तथा। कृष्णवेणा कपिला शोण एव च। एता नद्यस्तु धिष्ण्यानां मातरो याः प्रकीर्त्तिताः। अद्भुतस्य प्रिया भार्या तस्य पुत्रो विभूरसिः। यावन्तः पावकाः प्रोक्ता सोमास्तावन्त एव तु॥ अत्रेश्चाप्यन्वये जाता ब्रह्मणो मानसाः प्रजाः। अत्रिः पुत्रान् सृष्टुकामांस्तानेवात्मन्यधारयत्। तस्य तद्ब्रह्मणः कायाच्चिरन्ति हुताशनाः एवमेते महात्मानः कीर्त्तितास्तेऽग्नयो मया॥ अप्रमेया यशोत्पन्नाः श्रीमन्तस्त्रिभिरापन्नाः। अद्भुतस्य तु माहात्म्यं यथा वेदेषु कीर्त्तितम्। तादृशं विद्धि सर्वेषामेको ह्येष हुताशनः। एक एवैष भगवान् वित्तेयः प्रथमोऽङ्गिराः। बहुधा निःसृतः कायात् ज्योतिष्टोमकृतस्तथा। इत्येष वंशः सुमहानग्नीनां कीर्त्तितोमया। योऽर्चितो विविधैर्मन्त्रैर्हव्यं वहति देहिनाम्। भा० व० मार्क० २२१ अध्या०।

साम्न देवतेति—ढक् आग्नेयमग्निदेवताके हविरादौ त्रि०। अग्निना दृष्टं साम ढक्। आग्नेयं साम। आग्नेयी ऋक् त्रि०। अग्नये हितं ढक्। आग्नेयमौषधम् त्रि०।

लौकिकप्रयोगानुसारेण "अङ्गेर्नलोपश्चेति" औणादिकनलेण अग्निशब्दस्य व्युत्पत्तिर्दर्शिता वैदिकप्रयोगे तु अग्निशब्दस्य प्रवृत्तिनिमित्तभेदोपयोगिन्यो यास्केन वह्नेर्व्युत्पत्तयोदर्शिताः। यथा "अथातोऽनुक्रमिष्यामोऽग्निः पृथिवीस्थानस्तं प्रथमं व्याख्यास्यामोऽग्निः कस्मादग्रणीर्भवत्यग्रं यज्ञेषु प्रणीयतेऽङ्गं नयति संनममानोऽक्नोपनो भवतीति स्थौलाष्ठीविर्नक्नोपयति न स्नेहयति त्रिभ्य आख्यातेभ्यो जायत इति" शाकपूणिरितादक्षाद्दधाद्वा भीनात्स्नेतेरकारमादत्ते गकारमनक्तेर्वा दहतेर्वा नीः परस्मैपदा भवतीति" अग्निमीळे इति"। अस्यायमर्थः। सामान्येन सर्वदेवतानां लक्षणस्याभिहितत्वादनन्तरं यतः प्रतिपदं विशेषेण वक्तव्यत्वमाकाङ्क्षितमतोऽनुक्रमेण वक्ष्यामः। तत्र पृथिवीलोके स्थितोऽग्निः प्रथमं व्याख्यास्यते। कस्मात्प्रवृत्तिनिमित्तादग्निशब्देन देवताभिधीयत? इति प्रश्नस्याग्रणीरित्यादिकमुत्तरम्। देवसेनामध्ये स्वयं नयतीत्यग्रणीः। एतदेकमग्निशब्दस्य प्रवृत्तिनिमित्तम्। तथा च ब्राह्मणान्तरम्। "अग्निर्वै देवानां सेनानीरिति"। एतदेवाभिप्रेत्य बह्वृचा मन्त्रब्राह्मणे आमनन्ति। "अग्नि-

मुखं प्रथमो देवतानामिति" मन्त्रः। "अग्निर्वै देवानामवम इति" ब्राह्मणम्। तथा तैत्तिरीयाम्नायमनन्ति। "अग्निरग्रे प्रथमो देवतानामिति" मन्त्रः। "अग्निरवमो देवतानामिति" च। वाजसनेयिनस्त्वेवमामनन्ति। "सवा एषोऽग्ने देवतानामजायत तस्मादग्निर्नामेति"। यत्रैवाग्निहोत्रेष्टिपशुसोमरूपेष्वयं पूर्व्वदिग्वर्त्याहवनीयदेशं प्रति गार्हपत्यात्प्रणीयत इति द्वितीयं प्रवर्त्तिनिमित्तम्। सद्य-ममानः समक् स्वयमेव प्रह्वीभवद्भङ्गं स्वकीयं शरीरं नयति काष्ठदाहे हविःपाके च प्रेरयतीति तृतीयं प्रवर्त्ति-निमित्तम्। स्थूलाष्ठीविनामकस्य महर्षेः पुत्रो निरुक्त-कारः कश्चिदक्रोपन इत्यग्निशब्दं निर्वक्ति। तत्र न क्रोपयतीत्युक्ते न स्नेहयति किन्तु काष्ठादिकं रूक्षयतीत्युक्तं भवति। शाकपूणिनामको निरुक्तकारो धातुत्रयादग्नि-शब्दनिष्पत्तिं मन्यते। इतः इण् गतौ इति धातुः। अक्तोऽञ्जु व्यक्तिम्रक्षणगतिषु इति धातुः। दग्धो दह भस्मीकरणे इति धातुः। नीतो णीञ् प्रापणे इति धातुः। अग्निशब्दो इकारगकारनिशब्दानपेक्षमाण एतिधातोरुत्पन्नादयनशब्दादकारमादत्ते। अनक्तिधातु-गतस्य ककारस्य गकारादेशं कृत्वा तमादत्ते। यद्वा दहति धातुजन्याद्दग्धशब्दाद्दकारमादत्ते। नीरिति नयतिधातुः स च हुस्वो भूत्वा परो भवति। ततो धातुत्रयं मिलि-त्वाग्निशब्दो भवति। यत्रभूमिं गत्वा स्वकीयमङ्गं नयति काष्ठदाहे हविःपाके च प्रेरयतीति सप्तदायार्थः। तस्मा ग्निशब्दार्थस्य देवताविशेषस्य प्राधान्येन स्तुतिदर्शनायैषाग्नि-मीळे इत्यृग्भवतीति" ऋग्वेदभाष्ये माधवाचार्यः एतस्य वैश्वनरादिशब्दप्रवृत्तिनिमित्तदर्शनेनानेकास्तुतयो वाल्केन दर्शिताश्च तत्तच्छब्दावसरे दर्शयिष्यन्ते।

अग्निक पु० अग्निवत् कायति प्रकाशते कै-क। इन्द्रगोपकीटे।

अग्निकण पु० अग्नेः कणः ६त०। अग्निच्युतक्षुद्रांशे।

अग्निकर्म्मन् न० अग्नौ कर्म्म ७त०। होमे अग्निहोत्रादौ "अग्निकर्म्म ततः कृत्वेति" स्मृतिः अग्निकार्य्यादयोऽप्यत्र न०।

अग्निकला स्त्री ६त०अग्नेरवयवभेदे। सा च दशविधा तासाञ्च यादिलान्तवर्णदेवतात्वं यथोक्तं शारदातिलके। "धूमा-र्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिङ्गिनी। सुश्रीः सुरूपा कपिला हव्यकव्यवहे अपि। यादीनां दशवर्णानां कला धर्म्म प्रदा अमूः" इति।

अग्निकारिका स्त्री अग्निं करोति आधत्ते करणे कर्तृ-त्वोपचारात् कर्त्तरि ण्वुल्। अग्न्याधानसाधनेऽग्नौ-धायामृचि। सा च अग्निं दूतं पुरोदधे, इत्याद्या यजु-र्वेदे एवमन्यवेदेऽप्यनुसन्धेया।

अग्निकाष्ठ न० अग्नेः उद्दीपनं काष्ठम् शा०त०। अगुरुकाष्ठे।

अग्निकुक्कुट पु० अग्नेः कुक्कुटइव रक्तवर्णस्फुलिङ्गवत्त्वात्। ज्वलदग्निव्याप्तहरणपक्षे (हुडा) इति ख्याते।

अग्निकुण्ड न० अग्नेराधानार्थं कुण्डम्। अग्न्याधानार्थे स्थानभेदे तत्स्थानविवरणं कुण्डशब्देऽनुसन्धेयम्।

अग्निकुमार पु० ६त०। कार्त्तिकेये तस्याग्निरेतोजातत्वञ्च महाभारते वनपर्व्वणि २२२ अध्याये सप्तर्षिपत्नीरूपदर्शनात् जातस्मरविकारस्याग्नेस्तेषां गार्हपत्य-प्रवेशेन अनिशं तद्दर्श-नेन जाताधिकविकार तयानिर्वेदपूर्व्वकं वनगमनमुपक्रम्य, "स्वाहा तं दक्षदुहिता प्रथमं कामयत्तदा॥ सा तस्य विद्धि मन्वैक्षद्भिरात् प्रभृति भाविनी। अप्रमत्तस्य देवस्य न चापश्यदनिन्दिता॥ सा तं ज्ञात्वा यथावत्तु वह्निं वनसुपागतम्। तत्त्वतः कामसन्तप्तं चिन्तयामास भाविनी॥ अहं सप्तर्षिपत्नीनां कृत्वा रूपाणि पावकम्। कामयि-ष्यामि कामार्त्ता तासां रूपेण मोहितम्॥ एवङ्कृते प्रीति रस्य कामावाप्तिश्च मे भवेत्॥ २२३ अध्या०

मार्कण्डेय उवाच। शिवा भार्य्या त्वङ्गिरसः शीलरूप-गुणान्विता। तस्याः सा प्रथमं रूपं कृत्वा देवी जनाधिप। जगाम पावकाभ्यासं तञ्चोवाच वराङ्गना॥ मामग्ने! काम-सन्तप्तां त्वं कामयितुमर्हसि। करिष्यसि न चेदेवं मृतां मामुपधारय॥ अहमङ्गिरसो भार्य्या शिवा नाम हुताशन!। शिष्टाभिः प्रहिता प्राप्ता मन्त्रयित्वा विनिश्चयम्॥ अग्नि-रुवाच। कथं मां त्वं विजानीषे कामार्त्तमितराः कथम्। यास्त्वया कीर्त्तिताः सर्व्वाः सप्तर्षीणां प्रियाः स्त्रियः॥ शिवोवाच। अस्माकं त्वं प्रियो नित्यं बिभीमस्तु वयं तव। त्वच्चित्तमिङ्गितैर्ज्ञात्वा प्रेषितास्मि तवान्तिकम्॥ मैथुनायेह संप्राप्ता कामं प्राप्नुं द्रुतं चर। यातरो मां प्रतीक्षन्ते गमिष्यामि हुताशन!॥ मार्कण्डेय उवाच। ततोऽग्नि-रुपयेमे तां शिवां प्रीतिसदायुतः। प्रीत्वा देवी समायुक्ता शुक्रं जग्राह पाणिना॥ व्यचिन्तयन्मेदं ये रूपं द्रक्ष्यन्ति कानने। ते ब्राह्मणीनामन्तं दोषं वक्ष्यन्ति पावके॥ तस्मादेतद्रक्षमाणा गरुडी संभवाम्यहम्। वनाद्विगमन-श्चैव सुखं मम भविष्यति॥ मार्कण्डेय उवाच। सुपर्णी सा तदा भूत्वा निर्जगाम महावनात्। अपश्यत् पर्व्वतं श्वेतं शरस्तम्बैः सुसंवृतम्॥ दृष्टिविषैः सप्तभिर्युग्मं

भोगिभिरद्भुतैः । रक्षोभिश्च पिशाचैश्च रौद्रैर्भूतगणैस्तथा राक्षसीभिश्च संपूर्णमनेकैश्च मृगद्विजैः ॥ सा तत्र सहसा गत्वा शैलपृष्ठं सुदुर्गमम् । प्राक्षिपत् काञ्चने कुण्डे शुक्रं सा त्वरिता शुभा ॥ शिष्टानामपि सा देवी सप्तर्षीणां महात्मनाम् । पत्नीस्वरूपकं कृत्वा कामयामास पावकम् ॥ दिव्यं रूपमरुन्धत्याः कर्तुं न शक्तितं तया । तस्यास्तपः प्रभावेन भर्तृशुश्रूषणेन च ॥ षट्कृत्वस्तत्र निक्षिप्तमग्नेरेतः कुरूत्तम ! । तस्मिन् कुण्डे प्रतिपदि कामिन्या स्वाहया तदा ॥ तत् स्कन्नं तेजसा तत्र संततं जनयत् सुतम् । ऋषिभिः पूजितं स्कन्नमनयत् स्कन्दतां ततः । षट्शिरा द्विगुणश्रोत्रो द्वादशाक्षिभुजक्रमः । एकग्रीवैकजठरः कुमारः समपद्यत ॥ वन० भा० स० २२३ अध्यायः

अग्निकुमारत्वेऽपि तस्य रुद्रकुमारत्वं तदप्युक्तं तत्रैव "ततो ब्रह्मा सहस्रेनं प्रजापतिरथाब्रवीत् । अभिगच्छ महादेवं पितरं त्रिपुरार्दनम् ॥ रुद्रेणाग्निं समाविश्य स्वाहामाविश्य चोमया । हितार्थं सर्व्वलोकानां जातस्त्वम पराजित ! ॥ उभाभ्यान्याञ्च रुद्रेण शुक्रं सिक्तं महात्मना अग्निन् गिरौ निपतितं मिश्रिकामिश्रिकं ततः ॥ सम्भूतं लोहितोदे तु शुक्रशेषमवापतत् । सूर्य्यरश्मिषु चाप्यन्य दन्यच्चैवापतद्भुवि । आसक्तमन्यद्वृक्षेषु तदेवं पञ्चधापतत् ॥ इति २२४ अध्याये । अग्नितनयाग्निसुतादयोऽत्र ।

अग्निकेतु पु० अग्नेः केतुरिव । धूमे तस्याग्निप्रभवत्वेन तच्चिह्नीभूतत्वम् गगने उड्डूयमानत्वात् तत्पताकात्वञ्च ।

अग्निकोण पु० अग्नेः अग्निदेवताकः कोणः अन्तरालदिक् ६त० । अग्निदैवत्ये पूर्व्वदक्षिणयोर्मध्ये दिग्भागे । "इन्द्रोवह्निः पितृपतिर्नैर्ऋतोवरुणोमरुत् । कुबेरईशः पतयः पूर्व्वादीनां दिशां क्रमात्" इत्युक्तेः तस्य पूर्व्वदक्षिणदिशोर्मध्यदिक्पतित्वम् । उपचारात् तत्स्वामिनोऽग्नेर्वाचका अपि अत्रैव । "प्रतिपत् नवमी पूर्व्वे रामरुद्रौ च पावकौ" इति ज्योतिषे "शक्रे हुताशे भयमिति" च अग्निकोणपरतया पावकादिशब्दः प्रयुक्तः ।

अग्निगर्भ पु० अग्निरिव जारको गर्भोऽस्य । अग्निजारदग्धे । अग्निर्गर्भोऽस्य । सूर्य्यकान्तमणौ (आतसि) तस्य सूर्य्यकिरणसम्पर्कात् अग्न्युत्पादकत्वात्तथात्वम् । अग्निमन्थन काष्ठरूपारणौ च । अग्निः स्थितो गर्भोऽस्याः । शमीलतायाम् स्त्री । "अग्निगर्भां शमीमिवेति" रघुः । शमीगर्भेऽग्निस्थितिकथा भा० आनुशा० प० ८५ अध्याये "रुद्रस्य रेतःप्रस्कन्नमग्नौ निपतितञ्च यत् तत्तेजोऽग्निर्महद्भूतं हितीयमिव पावकम् । बधार्थं देवशत्रूणां गङ्गायां जनयिष्यतीति" ब्रह्मवाक्यानन्तरं कार्त्तिकेयोत्पत्त्यर्थमग्निमाणस्य कुतश्चित् कारणेन गुप्तस्याग्नेः "नष्टमात्मनि संलीनं नाधिजग्मुर्हुताशनमित्यनेन" देवैस्तस्यानासादने उक्ते नानास्थानेऽन्वेषणात् परिशेषे शमीगर्भे प्राप्तिरुक्ता, यथा "अन्वत्यात्रिर्गतोवह्निः शमीगर्भमुपाविशदिति" । शमीगर्भेवासस्य स्थितिं कथयतः शुकस्य जिह्वापरिवृत्तिरूपशापदानसङ्का देवैस्तस्मै वरान् दत्त्वा शमीगर्भे वह्निरलक्ष्यत इत्युक्ता च "इत्युक्ता तं शमीगर्भे वह्निमालक्ष्य देवताः तदे वायतनं चक्रुः मुखं सर्व्वक्रियास्वपि । ततः प्रभृति चाग्निः स शमीगर्भेषु दृश्यते । उत्पादने तथोपायमधिजग्मुश्च मानवा" इति ।

अग्नेः सकाशात् गर्भोऽस्याः पृथिव्यां स्त्री । वह्निना गङ्गायामासिक्तगर्भस्य धारयितुमशक्यस्य पृथिव्यां सुमेरौ गङ्गया निक्षेपणमुक्तं तत्रैव । "सा वह्निना वार्य्यमाणा देवैरपि सरिद्वरा । ससृजे तं गर्भं मेरौ गिरिवरे तदेति, उक्ता "तेजसा तस्य गर्भस्य भास्करस्येव रश्मिभिः यद्दृश्यं परिसंसृष्टं पृथिव्यां पर्व्वतेषु च तत् सर्व्वं काञ्चनीभूतं समन्तात् पुत्यदृश्यत । पृथिवी च तदा देवी ख्याता वसुमतीति च स तु गर्भो महातेजाः गाङ्गेयः पावकोद्भवः दिव्यं शरवणं प्राप्य वर्द्धेऽद्भुतदर्शन इति भा० आनु० ८५ अ० । अतएव श्रुतौ "यथाग्निगर्भा पृथिवी यथा द्यौरिन्द्रेण गर्भिणी" इत्युक्तम् । अग्निरिव गर्भोमध्यभागोऽस्याः । अग्निदीप्तायां महाज्योतिष्मतीलतायाम् स्त्री ।

अग्निगृह न० अग्निकार्य्यार्थं गृहं श० त० । होमार्थे गृहे ६त० । औतस्मार्त्ताग्निकृत्याधारे गृहे न । अग्न्यगारादयोऽत्र । "वसंश्चतुर्थोऽग्निरिवाग्न्यगारे" इति रघुः ।

अग्निग्रन्थ पु० अग्निप्रतिपादकः ग्रन्थः श० त० । अग्निहोमादि-प्रतिपादके शास्त्रे "अग्निग्रन्थपर्य्यन्तमधीते" सि० कौ० अग्निग्रन्थः अग्निप्रतिपादकः ग्रन्थ इति तत्त्वबो० । एवमेव मत्कृतसरलायाञ्चक्रम् ।

अग्निघृत न० अग्न्युद्दीपनं घृतं श० त० । वैद्यकोक्ते घृतभेदे यथा चक्रदत्तः ।

"पिप्पलीपिप्पलीमूलं चित्रको हस्तिपिप्पली । शिग्रुचव्याऽजमोदा च पञ्चैव लवणानि च ॥ द्वौ क्षारौ क्षवुका चैव दद्याद्दशपलोन्मितान् । दधिकाञ्जिकशुक्तानि स्नुहीक्षमालासमानि च । आर्द्रकं सरसं प्रस्थं घृतप्रस्थं विपाचयेदिति । एतदग्निघृतं नाम मन्दाग्नीनां प्रशस्यते इति" ॥

"भल्लातकसहस्रार्द्धं जलद्रोणे विपाचयेत् । अष्टभागावशेषञ्च कषायमवतारयेत् । धृतप्रस्थं समादाय कल्कानीमानि दापयेत् । व्योषं विष्पलीमूलं चित्रको हस्तिपिप्पली ॥ क्षिङ्गुचव्याजमोदा च पञ्चैव लवणानि च । द्वौ द्वौ क्षारौ क्षुधा चैव दद्यादर्द्धपलोन्मितान् ॥ दधिकाञ्जिकशुक्तानि खेहमात्रासमानि च । आर्द्रकं सरसञ्चैव शोभाञ्जनरसं तथा ॥ तत् सर्व्वमेकतः कृत्वा शनैर्मृद्वग्निना पचेत् । एतदग्निघृतं नाम मन्दाग्नीनां प्रशस्यते" इति च ।

अग्निचयन पु० अग्नीयते आधीयते अनेन चि-करणे ल्युट् ६त० । अग्न्याधानसाधने मन्त्रभेदे, भावे ल्युट् ६त० । अग्न्याधाने न० ।

अग्निचित् त्रि० अग्निं चितवान् चि-भूतार्थे क्विप् । मन्त्रपूर्व्वकक्रतवह्निस्थापने अग्निहोत्रिणि । भावे क्विप् । अग्न्याधाने ।

अग्निचित्या स्त्री अग्नेश्चित्या चि-भावे क्यप् नि० स्त्रीत्वम् । अग्निचयने अग्न्याधाने "उपविशेदग्निषुच्छस्य सान्निचित्यायामिति" गृह्यम् । "चित्याग्निचित्ये" चेति पा० ।

अग्निचित्वत् त्रि० अग्निचित् अग्निचयनमस्त्यस्मिन् मतुप् मस्य वः तान्तत्वान् न पदत्वम् । अग्निचयनयुक्तेषु यज्ञेषु "अध्वरेष्वग्निचित्वत्स्विति" भट्टिः स्त्रियां ङीप् ।

अग्निज पु० अग्नये अग्न्युद्दीपनाय जायते सेवनात् प्रभवति जन-ड ३त० । अग्निजारशब्दे द्रष्टव्या । अग्नेर्जायते जन-ड ५त० । स्वर्णे न० । कार्त्तिकेये पु० । तत्कथाऽग्निकुमारशब्दे द्रष्टव्या । अग्निजातमात्रे त्रि० "अग्निजा-औषधिजा मह्यीनामिति श्रुतिः" "अग्नीश्वरस्य भक्तानां न भयं विद्युदग्निजमिति" काशीखण्डः ।

अग्निजन्मन् पु० अग्नेर्जन्मास्य ५त० । कार्त्तिकेये तद्विवरणम् अग्निकुमारशब्देऽनुसन्धेयम् । स्वर्णे न० ।

अग्निजार पु० जारयति जॄ-णिच्-कर्त्तरि अण् अग्निरिव जारः । खनामख्याते वृक्षे, औषधभेदे च । रस्य लत्वे अग्निजालोऽप्यत्र ।

अग्निजिह्व त्रि० अग्निर्जिह्वास्यादसाधनं यस्य । अग्निमुखे देवे "ये अग्निजिह्वा उत वा यजत्रा" श्रुतिः अग्निरेव जिह्वास्य । वराहमूर्त्तिधारणकाले विष्णोर्वराहरूपे "अग्निजिह्वो दर्भरोमेति वराहरूपवर्णने विष्णुः । ६त० । अग्निजिह्वायां स्त्री सा च सप्तविधा तासां नामानि यथा "कराली धूमिनी श्वेता लोहिता नीललोहिता सुवर्णा पद्मरागा च जिह्वाः सप्त विभावसोरिति" कथं तासामग्निमुखे स्थितिस्तच्च अग्निशब्दे तद्ध्याने दर्शितम् अग्नेर्जिह्वेव शिखाऽस्याः ब० । लाङ्गलीवृक्षे स्त्री ।

अग्निज्वाला स्त्री अग्नेर्ज्वालेव शिखाऽस्याः । गजपिप्पलीवृक्षे । (विषलाङ्गला) ६त० । अग्निशिखायाम् ।

अग्नितप् त्रि० अग्निना तप्यते तप-क्विप् । अग्निना तपस्याकारके "परावीरास एतनमर्य्यास भद्रजानयः । अग्नितपो यथा सचेति, श्रुतिः ।

अग्नितपस् त्रि० अग्निभिः सम्मुखस्थसूर्य्यसहितचतुर्दिक्स्थपावकैस्तप्यते तप-असुन् ३त० । "ग्रीष्मे पञ्चाग्निमध्यस्थ" इति स्मृत्युक्ततीव्रतपस्याकारके । तपतीति तपाः अग्निरिव तपाः । अग्निसदृशोष्णस्वर्गवति । "यदा बलमुपीयतोजसुंभेदृंहसतिरग्नितपोभिरर्कैरिति" श्रुतिः ।

अग्नितेजस् त्रि० अग्नेरिव तेजोऽस्य । अग्नितुल्यतेजस्के पदार्थे "अग्निलोकेऽग्नितेजस, इति काशी० । "विष्णोः क्रमोऽसि सपत्नहा पृथिवीसंश्रितो अग्नितेजा इति" श्रुतिः । ६त० । अग्नेस्तेजसि न० ।

अग्नित्रय न० त्रयाणां त्रयं त्रि+अवट् ६त० । यथाविधानेन कृताधाने अग्नित्रितये । पित्रादीन्यपक्रमात् "एतएव त्रयोलोका एतएव त्रयोऽग्नयः । पिता गार्हपत्याग्निर्माता दक्षिणाग्निः, आचार्य्य आवहनीय इति" विष्णूक्ते गार्हपत्यदक्षिणाग्न्यावहनीयवह्नित्रयरूपे पित्रादौ च । अस्य वा स्त्रीत्वे ङीप् अग्नित्रयीत्यप्यत्र ।

अग्निद त्रि० अग्निं गृहादौ दाहार्थं ददाति दा-क । गृहादौ दाहार्थं वह्निदायके आततायिभेदे "अग्निदोगरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहारी च षडेते आततायिन इति" स्मृतिः ।

अग्निदग्ध त्रि० अग्निना अग्न्येष्टिविधानेन दग्धः दह-कर्म्मणि क्त । शास्त्रविधानेन संस्कृताग्निना कृतदाहे "अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले ममेति, वायु पु० । अग्निना कृतदाहे पदार्थमात्रे त्रि० । "अग्निदग्धाविमौ पक्षाविति" रामा० ।

अग्निदमनी स्त्री अग्निर्दम्यते अनया दम-णिच्-करणे ल्युट् ६त० ङीप् । कण्टकारिकातः क्षुद्रे-कण्टकाढ्ते गुच्छस्यक्षुद्रफलवति (गणियारी) इति ख्याते क्षुपभेदे ।

अग्निदाह स्त्री० अग्निं विधानेन ददाति दा-ह्च् । अग्न्येष्टिविधानेन दाहकारके "यश्चाग्निदाता प्रेतस्य पिण्डं दद्यात् सएव हि" इति स्मृतिः । स्त्रियां ङीप् ।

अग्निदीपन त्रि० अग्निं जठरस्थानलं दीपयति दीप-णिच्-ल्यु ह्रत० । जठरानलोद्दीपके पदार्थमात्रे औषधभेदे न० ।

अग्निदीप्ता स्त्री अग्निर्जठरानलोदीप्तः सेवनात् यस्याः । ज्योतिष्मतीलतायाम् ।

अग्निदूत पु० अग्निर्दूत इव यस्मिन् यस्य वा० ऽवाङ्कत्वात् । अग्न्याधानानन्तरमाहूतदेवके यज्ञादौ, "यमं ह "यज्ञो गच्छत्यग्निदूतो अरं कृत" इति वेदः तत्राहूते देवे च अतएव यज्ञे अग्नेर्दूतत्वमग्निस्थापने मन्त्रे "अग्निं दूतं पुरोदधे इति, 'अग्निं दूतं वृणीमहे इति' च श्रुतावुक्तम् ।

अग्निदेवा स्त्री अग्निर्देवोऽस्याः । कृत्तिकातारायाम् "अश्वियमदहनशशिकमलजन्मूलभदितिजीवकक्षिपितर इति" ज्योतिषे अश्विन्यादीनां क्रमशोऽश्व्यादिदेवतात्वकथनात् तत्क्रमात् कृत्तिकाया अग्निदैवत्यम् ।

अग्निध् पु० अग्निं दधाति मन्त्रविधिना स्थापयति धा-क्विप् नि० आत्वोपः ह्रत० । अग्न्याधानकर्त्तरि । "अध्वर्युं वा मधुपार्किं सुहृत्तमग्निधं वा घृतदत्तं दमूनसमिति" वेदः ।

अग्निधान न० अग्निर्विधिना धीयतेऽस्मिन् धा-आधारे ल्युट् ह्रत० । अग्निहोत्रगृहे "पदं कृणुते अग्निधाने" इति वेदः । [तारावच्छितारकादयोऽत्र ।

अग्निनक्षत्र न० ह्रत० । अग्निदैवत्ये कृत्तिकानक्षत्रे अग्नि-

अग्निनयन न० अग्नेर्नयनं मन्त्रविधिना संस्कारः नी-भावे ल्युट् ह्रत० । अग्निसंस्काररूपे विधिना अग्निप्रणयने ह्रत० । अग्निनेत्रे न० । [अग्निजारदग्ध्ये ।

अग्निनिर्यास अग्नेः जठरानलस्येव दीपको निर्यासोऽस्य ।

अग्निनेत्र पु० अग्निर्नेता हुतहविःप्रापयिता यस्य अच् समा० । देवतामात्रे । "हव्यं वहति देवानामिति" श्रुतौ हि तस्य देवेभ्यो हव्यवाहकत्वसङ्गतम् । ह्रत० । वह्निनयने न० ।

अग्निपद न० ह्रत० । अग्न्याधानस्थाने अग्निबोधकशब्दे च । तत्र दीयते इत्यर्थे व्युट्यादित्वात् अग्नि आग्निपदम् ।

अग्निपरिक्रिया स्त्री अग्नेः परिक्रिया परिचर्य्या परि+कृ-भावे श ह्रत० । अग्निचर्य्यायां होमादिकरणे । [पर्व्वतभेदे ।

अग्निपर्व्वत पु० अग्निसाधनं पर्व्वतः । खतः अग्निसम्भवके

अग्निपुच्छ पु० न० अग्नेरग्न्याधानस्थानस्य पुच्छ इव । आहिताग्निस्थानात् पृष्ठभागे । "दक्षिणत आवहनीयस्योपविशेदग्निपुच्छस्य साग्निचित्यायामिति" श्रौतसूत्रम् ।

अग्निपुराण न० अग्निना प्रोक्तं पुराणम् । वेदव्यास प्रणीतेषु अष्टादशसु महापुराणेषु मध्येऽष्टमे वह्निनोक्ते पुराणभेदे तद्विवरणं यथा ।

"आग्नेयमष्टमं कृतमिति" भागवते । "परमग्निपुराणञ्च रुचिरं परिकीर्त्तितम् । चतुर्द्दश सहस्राणि परं पञ्चशताधिकम्" इति ब्रह्मवैवर्त्ते । तत्राभिधेयसंक्षेपः । भगवतोऽवतारः, सृष्टिप्रकारः, विष्णुपूजा, अग्निपूजा, सूर्य्यादिलक्षणम्, दीक्षा, अभिषेकः, मण्डपलक्षणम् कुण्डमार्जनाविधिः, पवित्रारोपः, देवतायतनादिनिर्म्माणप्रकारः, शालग्रामलक्षण-पूजे, देवप्रतिष्ठानियामकदीक्षा, देवप्रतिष्ठाविधिः, ब्रह्माण्डस्वरूपं, गङ्गादितीर्थमाहात्म्यं, द्वीपवर्णनम् अधोर्ध्वलोकवर्णना, ज्योतिश्चक्रस्वरूपम् । युद्धजयोपायषट्कर्म्मविधानम्, यन्त्रमन्त्रौषधप्रकारः कुञ्जिकार्च्चनाविधिः, कोटिहोमविधानम्, ब्रह्मचर्य्यधर्म्मः, आह्निकम्, यज्ञयज्ञः, वैदिकस्मार्त्तकर्म्माणी, प्रायश्चित्तम्, तिथिभेदे व्रतभेदः, वारव्रतनक्षत्रव्रते, सप्तव्रतम्, दीपदानविधिः, नूतनव्यूहारम्भादि, नरकनिरूपणम्, दानव्रतम्, नाडीचक्रम्, सन्ध्याविधिः, गायत्र्यर्थः, शिवस्तोत्रं, राज्याभिषेकः, राजधर्म्मः, राजाध्येयशास्त्रम्, शुभाशुभशकुनादि, मण्डलादि, रथदीक्षाविधिः, श्रीरामनतिः, रत्नलक्षणम्, धनुर्विद्या, व्यवहारविधिः, देवासुरयोर्युद्धम्, आयुर्वेदः, गजादिचिकित्सा, पूजाप्रकारः । शान्तिविधिः, छन्दःशास्त्रम्, साहित्यं, शिष्टानुशासनम्, सृष्ट्यादिप्रलयवर्णने, शारीरकरूपं, नरकवर्णनम्, योगः, ब्रह्मज्ञानम्, पुराणमाहात्म्यञ्च ॥

एते विषयाः संक्षेपेण दर्शिता विस्तरस्तस्यैव द्रष्टव्यः ॥

अग्निप्रणयन न० अग्नेः प्रणयनं मन्त्रपूर्व्वकं संस्कारः प्र+नी-भावे ल्युट् ह्रत० । शास्त्रोक्तविधानेन वह्निसंस्कारभेदे "दक्षिणत आहवनीयेऽवस्थितस्याग्नेः सौमिकायामुत्तरवेद्यां नयनं यदस्ति तदेतदग्निप्रणयनमिति" भट्टभाष्यम् ।

अग्निप्रस्कन्दन न० ह्रत० । यथाविधानमग्निकार्य्यरूपहोमाकरणे "प्रजाय यौवनं प्राप्य विनशिष्यन्त्यनो! तव । अग्निप्रस्कन्दनपरस्तज्ज्ञाप्येयं भविष्यसीति, स्वपुत्रमन्तं प्रति ययातिवाक्यम् भार० आदि प० ।

अग्निप्रस्तर पु० अग्निं प्रस्तृणाति स्तृ-अच् अग्नेर्वा प्रस्तरः । (चकमकीति) ख्याते वह्निप्रत्यापके प्रस्तरखण्डे ।

अग्निबाहु पु० अग्नेर्बाहुरिव दीर्घशिखत्वात् । धूमे ।

अग्निभ न० अग्निरिव भाति भा-क । स्वर्णे अग्नितुल्यवर्णत्वात्तस्य तथात्वम् । वह्नितुल्यवर्णपदार्थे त्रि० । भ० नक्षत्रं ह्रत० । अग्निदैवत्ये कृत्तिकानक्षत्रे न० ।

अग्निभू पु० अग्नेर्भवति भू-क्विप् । कार्त्तिकेये अग्निकुमार

गन्धे तद्दुभवकथा । अग्निसम्भवे त्रि० । स्वर्णे न० कृस्नान्तः । अग्निभवादयोऽस्य ।

अग्निभूति पु० अग्निरिव भूतिः तेजस्वित्वादैश्वर्यमस्य । बौद्धभेदे ईत० । पावकविभूत्यां तद्धीर्य्यं च स्त्री । ईव० । वह्निसम्भवे त्रि० ।

अग्निभ्राजस् त्रि० अग्निरिव भ्राजते भ्राज-असुन् । वह्नितुल्यदीप्तियुक्ते । 'अग्निभ्राजसोविद्युतो गर्भस्य इति' वेदः ।

अग्निमणि पु० अग्नेरुत्तापकोमणिः या० त० । सूर्य्यादितेजसद्रव्यसम्पर्कात् अग्न्युत्तापके सूर्य्यकान्ताभिधे मणौ (आतसी) (चक्मकीति) ख्याते प्रस्तरे च ।

अग्निमत् पु० अग्निराधानादस्यास्ति मतुप् । यथाविधानेनाहिताग्निके साग्निके द्विजे "दारास्त्रग्निं विनिःक्षिप्य प्रवसेदनग्निमान् द्विजः" इति स्मृतिः ।

अग्निमथ् पु० अग्निं मथ्नाति अरणिद्वयघर्षणेन निष्पादयति मन्थ-क्विप् नलोपः । अग्न्याधानार्थमरणिद्वयघर्षणेन वह्निसम्पादके याज्ञिके । करणे क्विप् । अग्निमन्थसाधने मन्त्रे, अरणिकाष्ठे च त्रि० ।

अग्निमन्थ पु० अग्निर्मथ्यतेऽनेन मन्थ-करणे घञ् । गणिकारीवृक्षे (गणियारि) तत्काष्ठयोर्घर्षणे हि आशु वह्निरुद्भाव्यते । तन्मन्थनसाधने मन्त्रे च । करणे ल्युट् ईत० । अग्निमन्थनोऽप्युक्तार्थे त्रि० स्त्रियां ङीप् ।

अग्निमान्द्य न० अग्नेर्जठरानलस्य मान्द्यं पाचनकृच्छ्रता । धातुवैषम्येण जठरानलस्य पाचनशक्तिराहित्ये "अग्नीश्वरस्य भक्तानां न विद्युदग्निजं भयम् अग्निमान्द्यभयं नैवेति" काशीखण्डः । अग्निमान्द्येऽल्पजीर्णेता स्यात् तत्काल्पभोजनं कार्य्यं यथा । 'सुदुर्भुरजीर्णेऽपि भोज्यमस्योपकल्पयेत् इति चक्र० । तत्कारणञ्चक्रम् । श्लेष्मपीतस्य वान्तस्य विरिक्तस्य सुताहृजः । निरूढस्य च कायाग्निर्मन्दो भवति देहिनः ॥ सोऽन्नैरल्पैर्गुरुभिरुपयुक्तैः प्रशाम्यति । अल्पोमृद्वभिर्बहुभिश्चान्नैरुपयुक्तैर्विवर्द्धते । काष्ठैरणुभिरल्पैश्च सन्धुक्षित इवानलः ॥ हृतदोषप्रमाणेन सदाहारविधिःस्मृतः इति सुश्रुते ।

अग्निमारुति अग्निश्च मरुच्च तयोरपत्यं वाह्वादेराकृति गणत्वादिञ् ततो द्वन्द्वः देवताद्वन्द्वे च आनङ् बाधित्वा 'द्वन्द्वाविति' वृत् "देवताद्वन्द्वे च" इति द्विपदद्वन्द्वौ पू० पूर्व्वपदस्य ह्रस्वः । अगस्त्ये मुनौ तस्य च कल्पान्तरे ताभ्यामुत्पत्तिरनुसन्धेया ।

अग्निमुख पु० अग्निर्मुखमिव यस्य । देवे । हुतद्रव्यं हि देवैरग्निरूपमुखद्वारेणैवाश्यते । "हव्यं वहति देवानामिति" श्रुतेस्तत्रैव तात्पर्य्यात् । "अग्निमुखा वै देवा" इति "अग्निर्मुखं प्रथमं देवतानामिति च" श्रुतिः । अग्निर्मुखेऽस्येऽस्य । देवे, "अग्निरग्रे प्रथमं देवानामिति" श्रुतौ वह्नेरेव देवानामग्रोत्पत्तेस्तथात्वम् । यथा चाग्नेर्देवमुखत्वं तदादित्वञ्च तथाऽग्निशब्दे निरुक्तव्याख्याने ऋग्वेदभाष्ये प्राक् दर्शितम् अग्निधिकमग्निहोत्रशब्दे वक्ष्यते । अग्निर्मुखं प्रधानमुपायो यस्य । अग्निहोत्रिणि द्विजे । अग्निः दाहकत्वात् शापाग्निर्मुखे यस्य । विप्रे "वाग्वज्रा वै विप्रा" इति श्रुतौ तेषां वाग्वज्रत्वकथनात् अग्निमुखत्वम् । अग्निरिव स्वर्गात् दुःखदावकं सुखमयमस्य । भल्लातकवृक्षे (भेला) चित्रकवृक्षे च । तद्भिर्य्यासस्वर्गेन हि देहे क्षतोत्पत्तेस्तथात्वम् । अग्नेः जठरानलस्य सुखं हारम् । वैद्यकोक्ते चूर्णभेदे न० यथा "त्रिकुभागो भवेदेको वचा च द्विगुणा भवेत् । पिप्पली त्रिगुणा चैव शुण्ठ्यैरं चतुर्गुणम् ॥ यमानिका पञ्चगुणा षड्गुणा च हरीतकी । चित्रकं सप्तगुणितं कुडुचाष्टगुणं भवेत् ॥ एतद्धातकरं चूर्णं पीतमात्रं प्रसञ्चलत् । पिबेद्घृता मस्तुना वा सुरया कोष्णवारिणा ॥ सोदावर्त्तमजीर्णञ्च प्लीहानमुदरन्तथा अङ्गानि यस्य शीर्य्यन्ते विषं वा येन भक्षितम् ॥ अर्शोहरं दीपनञ्च श्लेष्मघ्नं गुल्मनाशनम् । कांसं श्वासं निहन्त्याशु तथैव वक्षणनाशनम् ॥ चूर्णमग्निमुखं नाम न क्वचित् प्रतिहन्यते" इति चक्रदत्तः ।

अग्निमुखी स्त्री अग्निरिव सुखमयं यस्याः गौरादित्वात् ङीष् । (भेला) भल्लातकवृक्षे, लाङ्गलिकावृक्षे (विषलाङ्गला) अग्निरेव सुखं सुखत्वेन कल्पितं यस्याः गौरा० । गायत्रीमन्त्रे । "कदाचिदपि नो विद्वान् गायत्रीमुदके जपेत् । गायत्र्यग्निमुखी यस्मात्तस्मादुत्थाय तां जपेदिति" गोभिलः । तस्माच्च "सोऽकामयत यज्ञं सृजेयेति स मुखतएव त्रिवृतमसृजत तं गायत्री छन्दोऽन्वसृज्यताग्निर्देवता ब्राह्मणोमनुष्योवसन्तऋतुस्तस्मात् त्रिवृत् स्तोमानां मुखं, गायत्री छन्दसामग्निर्देवानामिति" श्रुतौ । अग्निना समंप्रजापतिमुखजातत्वात् तथात्वम् । अग्निश्च पक्षे । अग्नेरिव मुखं प्रजापतिमुखं मुखमुत्पत्तिद्वारमस्या इति विग्रहः गौरा० । गायत्रीमन्त्रश्च गायत्रीशब्दे वक्ष्यते । विप्रे तु पु० । अग्निरिव उत्तप्तं मुखं यस्याः गौ० ङीष् । पाकशालायाम् स्त्री अग्निर्मुखमाद्यो यस्य अग्निप्रभृतौ देवे त्रि० ।

अग्निरक्षण न० अग्निः रक्ष्यतेऽनेनात्र वा रक्ष-ल्युट्। राक्षसादिभ्योऽग्निरक्षाकारके मन्त्रभेदे, अग्निहोत्रे, अग्निहोत्रगृहे च। भावे ल्युट्। अग्न्याधाने।

अग्निरजस् पु० अग्निरिव रज्यते दीप्यते रन्ज् असुन् नलोपः। रक्तवर्णे इन्द्रगोपनामककीटे। हेत०। अग्निवीर्ये, स्वर्णे च न०।

अग्निरहस्य त्रि० अग्नेः रहस्यं तदुपासनाद्यङ्गजातमत्र। अनलोपसनाबोधके शास्त्रे अग्निकल्पे।

अग्निरुहा स्त्री अग्निरिव रोहति रुह-क। मांसादन्यां तदङ्कुरस्य वह्नितुल्यवर्णतयोत्पन्नत्वात् तथात्वमस्याः।

अग्निरूप त्रि० अग्नेरिव रूपं वर्णोऽस्य, अग्निरिव रूपतेऽसौ रूप-कर्मणि अच् वा। वह्नितुल्यवर्णे अग्निसदृशमान्ये च हेत०। अग्नेर्वर्णे अग्निशब्दोक्ते वह्नेर्ध्येयरूपे च न०।

अग्निरेतस् न० हेत०। अग्निशुक्रे, तच्छातत्वात् सुवर्णे च तत्कथा च प्रस्तुत्यरुद्रशुक्रस्य अग्निसंक्रान्तस्याग्निना देवतार्थनया गङ्गयामाहितस्य तया च वोढुमसमर्थया "सस्तम्भसज्ज तं गर्भं मेरौ गिरिवरे तदेत्यनेन" मेरौ पातने कृते तस्य तेजसैव मेरुस्थं सर्वं वस्तु सुवर्णीकृतं यथोक्तमानुशासनिके प० भा०। "तेजसा तस्य गर्भस्य भास्करस्येव रश्मिभिः यद्द्रव्यं परिसंस्पृष्टं पृथिव्यां पर्व्वतेषु च। तत् सर्वं काञ्चनीभूतं समन्तात् प्रत्यदृश्यत" इति। अन्ते च "तस्मात् सुवर्णं माङ्गल्यं रत्नानामुत्तमोत्तमम्। सहजं कार्त्तिकेयस्य वह्नेस्तेजः परं मतमिति" ८६ अध्याये।

अग्निलोक पु० हेत०। अग्न्यधिष्ठिते मेरुशृङ्गाधःस्थे भुवनभेदे। स च। 'सङ्कल्पकाञ्चनमयं शिखरत्रयं च मेरोर्सुरारिकपुरारिपुराणि तेषु। तेषामधःशतमखज्वलनान्तकानां रक्षोऽम्बुपानिलधनीशपुराणि चाष्टौ" इति सि० शि० गोलाध्याये दर्शितः। अयमेव पक्षः युक्तियुक्तः। पुराणे तु अन्तरीक्षएव तस्य स्थितिरुक्ता। काशीखण्डे, विमानयानेन गच्छता शिवशर्म्मणा पृष्टाभ्यां विष्णुदूताभ्यां सूर्य्यलोकादूर्द्धं शक्रपुरीवर्णनोत्तरं तद्दक्षिणस्थाम् अग्निलोको वर्णितः यथा

"एतस्या दक्षिणे भागे वेयं पूर्ट्ट श्यते शुभा। इमामर्चिष्मतीं पश्य वीतिहोत्रपुरीं शुभाम्। जातवेदसि ये भक्ता ते वसन्त्यत्र सुव्रताः। अग्निप्रवेशं कुर्व्वन्ति दृढसत्वा जितेन्द्रियाः। स्त्रियो वा सत्यसम्पन्नास्ते सर्व्वेऽग्नितेजसः। अग्निहोत्ररताविप्रास्तथाग्निव्रह्मचारिणः। पञ्चाग्निव्रतिनो ये वै तेऽग्निलोकेऽग्नितेजसः। शीते शीतापनुत्त्यै यस्त्विध्मभारान् प्रयच्छति। कुर्य्यादग्नीष्टिकां वापि स वसेदग्निसन्निधौ। अनाथस्याग्निसंस्कारं यः कुर्य्याद्दयान्वितः। अयज्ञः प्रेरवेदन्यान् सोऽग्निलोके महीयते। जठराग्निविदह्येद्वा योदद्यादग्नेयमौषधम्। मन्दाग्नये स पुरुषात्मा वह्निलोके वसेच्चिरम्। यज्ञोपस्करवस्त्रानि यज्ञार्थं द्रविणन्तु वा। यथाशक्ति प्रदद्याद्यो ह्यर्द्धि ह्रत्यां वसेत् स वै। अग्निरेको द्विजातीनां निःश्रेयसकरः परः। गुरुर्देवो व्रतं तीर्थं सर्व्वमग्नेर्विनिश्चितम्। अपावनानि सर्व्वाणि वह्निसंसर्गतः क्वचित्। पावनानि भवन्त्येव तस्मात् स पावकः स्मृतः। अपि वेदं विदित्वा यस्त्यजेद्वा जातवेदसम्। अन्यत्र बध्नाति रतिं ब्राह्मणो न स वेदवित्। अन्तरात्मा ह्ययं साक्षाच्चिन्तितो ह्याशुशुक्षणिः। मांसन्यासान् पचेत् कुक्षौ स्त्रीणां नो मांसभेषिकाम्। तैजसी शास्त्रवी मूर्त्तिः प्रत्यक्षा दहनात्मिका। कर्म्मी ह्यन्यो पालयत्वी विनैनां किं विलोक्यते। चित्रभानुरयं साक्षान्नेत्रं त्रिभुवनेशितुः। अन्धतमोभवे लोके विनैनङ्कः प्रकाशकः। धूपप्रदीपनैवेद्यपयोदधिघृतैश्चयम्। एतद्भुक्तं निषेवन्ते सर्व्वे दिवि दिवौकसः" इति।

अग्निवत् त्रि० अग्निरस्यास्य अग्नि+मतुप् वेदे मस्य वः। साग्निके विप्रे, "यथुर्यथस्तु चरन्निवाँ इव" इति वेदः। तुल्यार्थे वति। अग्नितुल्यक्रियायादौ अव्य०।

अग्निवधू स्त्री हेत०। स्वाहायाम् दक्षकन्यायाम्। अग्नायीशब्दे विवरणं द्रष्टव्यम्।

अग्निवर्चस् त्रि० अग्नेर्वर्च इव वर्चो दीप्तिरस्य। अग्नितुल्यदीप्तिमति, "स्कन्देनाग्निवर्चसा" इति भार०। हेत०। अग्नितेजसि न०।

अग्निवर्द्धक त्रि० अग्नेर्जठरानलस्य वर्द्धकः वृध+णिच्-ण्वुल्। जठराग्न्युद्दीपके औषधभेदे, पथ्याहारे च।

अग्निवर्ण त्रि० अग्नेर्वर्ण इव वर्णो रूपं यस्य। अग्नितुल्यवर्णे, "ब्राह्मणस्तु सुरां पीत्वा अग्निवर्णां सुरां पिबेदिति" स्मृतिः। सूर्य्यवंश्ये नृपतिभेदे पु० तत्कथा रघौ १८स०। हेत०। अग्नेः रूपे पु०। [अग्निप्रिये त्रि०।

अग्निवल्लभ पु० अग्नेर्वल्लभः सुखेन दाह्यत्वात्। सालवृक्षे।

अग्निवासस न० अग्निरिव शुद्धं वासो वस्त्रम्। अग्नितुल्यशुद्धे वस्त्रे। हेव०। तादृग्वस्त्रवति त्रि०।

अग्निवाह पु० अग्निं वाहयति गमयति अनुप्रापयति वा वाहेः अण्। छागे, धूमे च। वह्नियाहकमात्रे त्रि०।

अग्निवाहन न० ६त०। छागे, "रक्तं जटाधरं वह्निं कारवेडूकवाहनम्। ज्वालामालाकुलं सौम्यं त्रिनेत्रं ब्रह्मचुधारिणम्। चतुर्बाहुं चतुर्दन्तं देवेशं वायुसारथिम्। चतुर्भिश्छागकैर्युक्तं वायुचिह्ने रथे स्थितम्" इति पुराणे छागवाहनत्वसूक्तम्।

अग्निविद् पु० अग्निं विन्दते विन्द-क्विप्। अग्निहोत्रिणि साग्निके। अग्निरहस्यं वेत्तीति विद-क्विप्। अग्निरहस्यशास्त्राभिज्ञे पु०।

अग्निविन्दु पु० अग्नेर्विन्दुरिव। विस्फुलिङ्गे अग्निकणे।

अग्निवीज न० ६त०। अग्नेर्बीजे तद्हेतोर्जातत्वात् उपचारात् स्वर्णे। "रुद्रतेजःसमुद्भूतं हेम बीजं विभावसोरिति" स्वर्णदानमन्त्रः। तत्कथा अग्निरेतःशब्दे द्रष्टव्या। तन्नाम्नि रकारवर्णे "अग्निबीजं समुद्धृत्य सखट्ससमन्वितमिति" तन्त्रम्।

अग्निवीर्य्य न० अग्नेर्वीर्यम्। वह्निरेतसि, तत्पराक्रमे च। तद्धीर्य्यजातत्वादुपचारात् स्वर्णे। ब०। अग्नितुल्यपराक्रमवति त्रि०

अग्निशरण न० ६त०। अग्न्याधानगृहे अग्निहोत्रगृहे।

अग्निशर्म्मन् त्रि० अग्निरिव शृणाति तीव्रकोपत्वात् शृ-मनिन्। तीव्रकोपान्विते। ऋषिभेदे पु०। वाह्वादि० इञि आग्निशर्म्मिः तदपत्ये। नडादि० फक्। आग्निशर्म्मायणः तद्गोत्रापत्ये।

अग्निशाला स्त्री अग्नीनां शाला गृहम्। अग्न्याधानस्थाने अस्त्रा वा नपुंसकत्वम्। "हविर्धानमग्निशालं पत्नीनां सदनम्" इति वेदः।

अग्निशिख पु० अग्नेरिव अग्निरिव वा शिखा यस्य। कुङ्कुमवृक्षे, कुसुम्भवृक्षे, अग्नितुल्यशिखे-जाङ्गलीवृक्षे च। अग्नितुल्यजटावति त्रि०। अग्निशिखेव शिखाऽस्यास्य। जाङ्गलिकावृक्षे स्त्री (विषजाङ्गला) अग्नितुल्यास्यभासे त्रि० "वाणैरग्निशिखैरिवेति" पुरा०। स्वर्णे कुसुम्भपुष्पे च न०। ६त०। अग्निज्वालायां स्त्री "शरैरग्निशिखोपमैरिति, भार०। [होमे।

अग्निशुश्रूषा स्त्री ६त०। वह्नेः विधानेन सेवोपयोगिनि

अग्निशेखर पु० अग्निरिव शेखरमस्य यस्य। कुङ्कुमवृक्षे, कुसुम्भवृक्षे, जाङ्गलीवृक्षे च। अग्नितुल्यास्यवति त्रि०।

अग्निष्टुत् पु० अग्निःस्तूयतेऽत्र स्तु-आधारे क्विप् षत्वम्। अग्निष्टोमस्य विकृतिभूते एकाहसाध्ये यागभेदे। सामसंहिताभाष्ये संशयपूर्वकं तच्च कर्म्मान्तरमिति सायणाचार्येण निर्णीतम् यथा। "उक्थाग्निष्टुतमेतस्य वारवन्नीय-साम हि। रेवतीष्वृचु स्तवेति श्रुतं पशुफलाप्तये। रेवत्यादिर्गुणः कर्म्म श्रुत्वा पूर्ववद् गुणः। रेवती-वारवन्नीय-सम्बन्धाख्यः पशु-प्रदः। सामोऽत्र फल-कर्म्मभ्यां सम्बन्धे वाक्य-भिन्नता। तेनोक्तगुण-संयुक्तमन्यत् कर्मोच्यते फले"॥ "त्रिष्टदग्निष्टोमस्तस्य वायव्यासु ऋचु एकविंशाग्निष्टोम-साम कृत्वा ब्रह्मवर्चस-कामो यजेत"-इत्यस्य सन्निधौ श्रूयते—"एतस्यैव रेवतीषु वारवन्नीयमग्निष्टोमसाम कृत्वा पशु-कामोऽग्नेतेन यजेत" इति। "अस्यायमर्थः। प्रकृतौ तृतीयसवने आभिव-पवमानस्तोपरि यत्तायत्तीयं साम गीयते, तेन च साम्ना अग्निष्टोमयागस्य समाप्यमानत्वादग्निष्टोम साम्नेत्युच्यते, तच्च प्रकृतौ "यत्तायत्तीयो वा अग्नये" इत्याद्याग्नेयीष्वृचु गीयते अस्मिंस्त्वग्निष्टुति ब्रह्मवर्चसकामेन वायव्यास्वृचु तत् साम गातव्यम्, तच्च प्रकृताविवैक विंश-स्तोम-युक्तम्। पशुकामस्य तु "रेवतीर्नः सधमादे" इत्यादिषु रेवतीष्वृचु "वारवन्नीयं" साम गायेदिति, तत्र रेवतीनामृचां वारवन्नीयनामकेन साम्ना यः सम्बन्धः सोऽयं पशु-फलायाग्निष्टुति विधीयते, एतस्यैवेति प्रकृतपरामर्शकेनैतच्छब्देनान्य-व्यावर्त्तकेनैवकारेण चाग्निष्टुतः समर्प्यमाणत्वात् यथा पूर्वाधिकरणे इन्द्रियफलाय प्रकृताग्निहोत्रे दधि-गुणोविहितः तद्वत्, इति प्राप्ते, ब्रूमः-विषमो दृष्टान्तः, दध्नोहोम-जनकत्वं न शास्त्रेण बोधनीयं तस्य लोकतोऽवगन्तुं शक्यत्वात्। फल-सम्बन्धः एकएव शास्त्रबोध्यः इति न तत्र वाक्यभेदः, इह तु रेवत्यृगाधारकवारवन्नीय-साध्योऽग्निष्टुत्-कर्म्म-साधनत्वं फल साधनत्वं चेत्युभयस्य शास्त्रैक-बोध्यत्वाद् दुर्वारोवाक्य-भेदः तेन पशुफलकं यथोक्तगुण-विशिष्ट-कर्म्मान्तरमत्र विधीयते। एतच्छब्दः एवकारश्च विधीयमान-कर्म्मान्तर-विषयतया योजनीयौ इति"। "यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा,। अभिजिद्विश्वजिद्भ्यां वा त्रिष्टताग्निष्टुतापि वा" इति स्मृतिः।

अग्निष्टुभ् पु० अग्निस्तुभ्यतेऽत्र क्विप् षत्वम्। यज्ञभेदे।

अग्निष्टोम पु० अग्नेः स्तोमः स्तुतिसाधनं ऋचसमुदायोऽस्यानेऽत्र। यागविशेषे स च यागः ताण्ड्यब्राह्मणे षडध्याये "प्रजापतिरकामयत बहु स्यां प्रजायेयेति सएतमग्निष्टोममसृजत" इत्युपक्रम्य "एष वाव यज्ञोवदग्निष्टोम" इति "एकस्या अन्यो यज्ञः कामायाच्छियते सर्व्वेभ्योऽग्निष्टोम" इति चाग्निष्टोमं स्तुत्वा "द्वादश

स्तोत्राण्यग्निष्टोम" इत्यादिना सप्रपञ्चं दर्शितः। अग्निष्टोम शब्दस्य व्युत्पत्तिर्भाष्यकृता सायणाचार्येण दर्शिता यथा "यत्तायत्तीय इत्यस्यामाग्नेय्यामृत्पन्नेन अग्नेष्टोमसाम्ना समाप्ते रग्निष्टोम इतिनाम सम्पद्यमिति"। तद्विधानपरिपाटी च बौधायनीये केशवस्वामिना दर्शिता तत एव साऽवगन्तव्या। ताण्ड्ये षडध्याये च "अग्निष्टोमे द्वादश स्तोत्राणि द्वादश शस्त्राणी"त्युक्त्वा अष्टमाध्यायपर्य्यन्तं यानि स्तोत्राणि शस्त्राणि वा प्रयोज्यानि तान्यभिहितानि तानि च तत एवावगन्तव्यानि तेषां स्वरूपादि तत्तच्छब्दार्थे वक्ष्यते तत्र अप्रगीतमन्त्रसाध्या स्तुतिः शस्त्रं प्रगीतमन्त्रसाध्या तु स्तोत्रमिति तयोर्भेदः। एकाहसाध्ये अग्निष्टुत्प्रधाने यज्ञे च तत् प्रमाणम् अग्निष्टुच्छब्दे। अग्निष्टोमस्य व्याख्यानः कल्पः ठक्। आग्निष्टोमिकः अग्निष्टोमबोधककल्पे।

अग्निष्टोमसाम न० अग्निष्टोमे अवसाने विहितं साम गानविशेषः। अग्निष्टोमयज्ञसमापके तृतीयसवने विहिते "यत्तायत्तीय" इत्यस्यामाग्नेय्यामृचि गीयमाने सामवेदे "प्रकृतौ (अग्निष्टोमे) तृतीयसवने आर्भवपवमानस्योपरि यत्तायत्तीयं साम गीयते तेन च साम्ना अग्निष्टोमस्य समाप्यमानत्वादग्निष्टोमसामेत्युच्यते इतिसा० भा०। "ब्रह्मणो वा एष रसो यद्यत्तायत्तीयं स्तुवन्ति ब्रह्मणएव रसे यज्ञं प्रतिष्ठापयन्तीति" ताण्ड्यब्राह्मणम् तच्च साम यत्तायत्तीयशब्दे वक्ष्यते।

अग्निष्ठ पु० अग्नौ स्थातुमर्हति स्था-क षत्वम्। वह्नौ स्थिति योग्ये लौहमये कटाहादिपात्रे।

अग्निसंस्कार पु० अग्निना संस्कारः मन्त्रपूर्व्वकदाहः। विधानेन अग्निकृतदाहे। "अनाथस्याग्निसंस्कारं यः कुर्य्याद्वा दयान्वितः" इति काशी०।

अग्निसङ्काश त्रि० अग्निरिव सङ्काशते काश-दीप्तौ अच्। अग्नितुल्यवर्णे तत्तुल्यतेजस्के च।

अग्निसम्भव पु० अग्निरिव सम्भवति सम्+भू-अच्। अरण्यकुसुम्भे। ५त० स्वर्णे न०। अग्निसम्भूतमाले त्रि०।

अग्निसहाय पु० अग्निना सह अयते अय-अच् ३त०। वायौ, धूमे च। अग्निसहायधूमवर्णवत्त्वात् शीघ्रगतित्वाच्च वनकोपते च।

अग्निसाक्षिक त्रि० अग्निःसाक्षी यत्र कप्। वह्निं साक्षीकृत्य कृते कर्म्मणि। "सख्यं कृत्वाग्निसाक्षिकमिति" रामा०।

अग्निसार न० अग्नौ सारो यस्य अत्यन्तानलोत्तापनेऽपि सारांशादहनात्। रसाञ्जने ६त०। वह्निसारे तु अस्त्री।

अग्निस्तम्भ पु० अग्निः दाहशक्तौ निरुध्यते अनेन। अग्निदाहनशक्तिनिरोधके मन्त्रे, ओषधे च। ६त०। अग्नेर्दाहशक्तिप्रतिरोधे पु०।

अग्निष्वा(स्व)त्त पु० ब०व० अग्नितः (आहवनीयविप्रकरूपानलात्) सुष्ठु आत्तं गृहीतं येषां आ-दा-क्त षत्वमिति बहवः। मरीचिपुत्रे पितृगणविशेषे। "अग्निष्वा(स्वा)त्ताः बर्हिषदः अज्यपा आज्यपास्तथेति" मनुः। तैत्तिरीयब्राह्मणे तु अन्यथा निरुक्तं यथा "अग्निष्वात्ता ऋतुमतो हवामहे। नराशंसे सोमपीथं य आशुः। ते नो अर्वन्तः सुहवा भवन्तु। अस्मो भवन्तु द्विपदे चतुष्पदे" इति "अग्निष्वात्ता अग्निष्वात्तनामकाः पितरः पितृविशेषाः। ते च चातुर्मास्यगतपितृयज्ञब्राह्मणे स्पष्टमभिहिताः, "ये वा अयज्वानो गृहमेधिनस्ते पितरोऽग्निष्वात्ता" इति। मनुष्यजन्मन्यग्निष्टोमादियागमकृत्वा आर्त्तकर्म्मनिष्ठाः सन्तो मृत्वा च पितृत्वं गताः। तानग्निष्वात्तान्" इति तद्भाष्ये माधवाचार्यः।

अग्निहुत् पु० अग्निं हुतवान् हु-क्विप् ६त०। हुताग्निहवने अग्निहोत्रिणि।

अग्निहोत्र न० अग्नये हूयतेऽत्र हु-त्र ४त०। मन्त्रकरणवह्निस्थापनपूर्व्वतद्देश्यकहोमे। अग्निहोत्रसम्बन्धित्वात् हविषि, वह्नौ पु०। काङ्क्षिदाख्याविकामुपक्रम्य अग्निहोत्रशब्दनिरुक्तिविधानाद्युक्तं तैत्तिरीयब्राह्मणे "सोऽग्निरबिभेत् आहुतिभिर्वै तमाप्नोतीति स प्रजापतिं पुनः प्राविशत् तं प्रजापतिरब्रवीत् जायस्वेति सोऽब्रवीत् किं भागधेयमभिजनिष्य इति तुभ्यमेवेदं हव्याता इत्यब्रवीत् सएतद्भागधेयमभ्यजायत। यदग्निहोत्रम्" इति सुरा प्रजापतेस्तोषं दृष्ट्वा पलायनादुपरतोऽग्निः प्रजापतेस्वपक्रम्यागत एव, ततः प्रजापतिस्तस्मिन्नग्नौ पूर्व्वोक्तं हुतं स्वाहाकारेण यामाहुतिं प्रथममजुहोत्। तदाहुतिसामर्थ्येन पुरुषमसृजत। तथा द्वितीयाद्याहुतिभिः अन्नादीनसृजत। ततः प्रजानां पुनरुत्पत्तेः स्वस्य प्रजापतित्वं सुस्थितम्। तदानीमग्निर्भीतोऽभूत्। तस्यायमभिप्रायः। प्रजापतिः पुनः पुनराहुतिभिरेव मां प्राप्नोति न तु भागं प्रयच्छति। तास्त्वाहुतीर्देवा एव भक्षयन्ति। तस्माद्भागरहितः सेवितुं न शक्नोमीति विचार्य्य पूर्व्ववत् पलायनमकृत्वा तस्मिन् प्रजापतावेव प्रविष्टः। स च प्रजायस्वेति पुनः पुनरग्निमब्रवीत् सचाग्निस्तदुदर एव स्थित्वा भागरहितोऽहं क्षुधितः सेवितुं न शक्नोमि भागो मेऽभीप्सितः। किं भागमभिलष्याह-

क्तुपत्त्या दत्त्वुक्तम् । अग्निना उक्तः प्रजापतिरिदमग्निहोत्रगतं हविस्तुभ्यमेव हूयाता इति भागं दत्तवान् । ततोऽग्निहोत्रहविःस्वरूपं भागधेयमभिलक्ष्याग्निरुत्पन्नः । तस्मादग्नये होत्रं होमोऽस्मिन् कर्म्मणीति बहुव्रीहिव्युत्पत्त्या अग्निहोत्रमिति कर्म्मनाम । अग्नये होत्रमिति तत्पुरुषव्युत्पत्त्या हविर्नाम" इति तद्भाष्यम् । तत्कालश्च तत्रोक्तः "तद्यूयमानमादित्योऽब्रवीत् । मा हौषीः । उभयोर्वै नावेतदिति सोऽग्निरब्रवीत् । कथं नौ होष्यतीति । सायमेव तुभ्यं जुहवत् प्रातर्मह्यमित्यब्रवीत् । तस्मादग्नये सायं हूयते सूर्य्याय प्रातः" इति । तद्विरम्यर्थं प्रजापतिना हूयमानं दृष्ट्वा मा हौषीरित्येवमादित्यो निवारयामास । हेतुश्चैवमवोचत् । योऽयमग्निर्यश्चाहं तयोरुभयोरावयोरेतद्विदुः, न त्वेकस्याग्नेः इति । तदानीमुभयोर्भागव्यवस्था जाता । अग्निना पृष्टा या कालभेदेन व्यवस्था तामुवाच । तस्मादग्नये सायं जुहुयात्, सूर्य्याय प्रातर्जुहुयात्" इति तद्भाष्यम् ।

तच्च नित्यं काम्यञ्च "यावज्जीवमग्निहोत्रं जुहोतीति" श्रुत्या नित्यस्य "उपसद्विचरित्वा मासमेकमग्निहोत्रं जुहोतीति" श्रुत्या च काम्यस्य विधानसूत्रम् । अस्य यजुर्वेदोक्तत्वेऽपि सर्ववेदिभिः कर्त्तव्यता "यद्वामृतं स्वगाखायां पारक्रमविरोधि च विद्वद्भिरनुष्ठेयमग्निहोत्रादि कर्म्मवदिति" छन्दोग०प० कात्या० । "अग्निहोत्रं त्रयोवेदा क्षितश्चो भस्मधारणम् । बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिरिति" चार्वाकमतम् ।

अग्निहोत्रहवनी स्त्री अग्निहोत्रोऽग्निः हविर्वा हूयतेऽनया हुकरणे ल्युट् ङीप् । अग्निहोत्रहविर्यज्ञसाधनेऽग्नौ ।

अग्निहोत्रिन् पु० अग्निहोत्र+मत्वर्थे इनि । अग्निस्थापनपूर्वकं प्रातरादिकाले अग्निहोत्रहोमकर्त्तरि साग्निके ।

अग्नीध् पु० इध्यते इन्ध-भावे क्विप् ङीप् । अग्न्युद्दीपने "अग्नीधः शरणे रण् भवेति" कात्या० वा० । शरणार्थं रथि आग्नीधः । कर्त्तरि क्विप् । अग्न्याधानकर्त्तरि ।

अग्नीध्र पु० अग्निम् आदधाति धृ-क दीर्घः । यज्ञाधानकारके ब्रह्मापरपर्य्याये ऋत्विग्भेदे । अग्निं धारयत्यत्रै सम्प्रदाने घञर्थे क दीर्घः । अग्निकृत्ये होमादौ पु० ।

अग्नीन्द्र पु० द्वि० इन्द्र० इन्द्रपरत्वान्नात् । एतन्नामकयोरेकहविर्भोक्तोर्देवयोः ।

अग्नीन्धन त्रि० अग्निरिध्यतेऽनेन इन्ध-ल्युट् ईत० । मन्त्रभेदे । स्त्रियां टित्त्वात् ङीप् । भावे ल्युटि । अग्निकृत्ये न० । [यज्ञिकृत्स्थाने ।

अग्नीय त्रि० अग्नेरदूरभवं स्थानादि-उत्करा० छ । यज्ञि-

अग्नीवरुण पु० द्वि० इन्द्र० ईत् । एतयोरेकहविर्भोक्तोर्देवयोः ।

अग्नीषोम पु० द्वि० इन्द्र० ईत् षत्वञ्च । एतन्नामकयोरेकहविर्भोक्तोर्देवयोः । "अग्नीषोमीयं पशुमालभेतेति" श्रुतिः ।

अग्नीषोमप्रणयनी स्त्री अग्नीषोमौ प्रणीयेते संस्क्रियेते अनया अत्र वा प्र+नी-करणे आधारे वा ल्युट् ङीप् । तयोः संस्कारकायाङ्गत्वे पात्रान्तरे च । भावे ल्युट् । तयोः संस्कारे न० ।

अग्नीषोमीय त्रि० अग्नीषोमौ देवते अस्य छ । तद्देवताके पश्वादौ कपालरूपपात्रादिसंस्कृते हविर्भेदे च "अग्नीषोमीयमेकादशकपालं निर्वपतीति" "योऽग्नीषोमीयस्य पशोरुद्धातीति" च श्रुतिः ।

अग्न्यगार न० अग्नेः अग्निहोत्रसम्बन्धिवह्नेरगारं ईत० । अग्निहोत्रयष्टे "वसंवत्सरोऽग्निरिवाग्न्यगारे" इति रघुः । अग्निष्टहादयोऽत्र ।

अग्न्याधान न० अग्नेराधानम् आ-धाञ्-ल्युट् ईत० । वेदमन्त्रद्वारा वह्निस्थापने । ७तत्पु० । अग्निहोत्रयागे ।

अग्न्याधेय पु० अग्निराधेयो येन । अग्निहोत्रिणि साग्निके द्विजे तत्प्रकारत्व "पुरुषमेवादधीताग्निमित्युपक्रम्य कात्यायनसंहितायां दर्शितः कल्पग्रन्थे च विस्तरो द्रष्टव्यः ।

अग्न्यालय पु० अग्नेरालयः आ+ली-आधारे अच् ईत० । वेदमन्त्रद्वारा वह्निस्थापनयोग्ये यष्टे, तदाधारे-कुण्डे, स्थण्डिले च ।

अग्न्याहित पु० अग्निराहितो येन आ+धाञ्-कर्म्मणि क्त, वा परनिपातः । अग्निहोत्रिणि साग्निके द्विजे ।

अग्न्युत्पात पु० अग्निना दिव्यानलेन कृत उत्पातः (अनिष्टसूचकोपद्रवः) उद्+पत-घञ् ३त० । आकाशस्थानल विकारसूचितोपद्रवे, उल्कापातादावशुभसूचके, धूमकेतुकृतविकारे च । स च नाभस उत्पातः उल्कादिरूपः पञ्चविधः दिव्योल्काशनिविद्युत्तारभेदात् । तेषां लक्षणादिकं फलसहितम् बृहत्संहितायामुक्तं ३२ अ० यथा "दिवि भुक्तशुभफलानां पततां रूपाणि यानि तान्युल्काः ।

धिष्ण्योल्कागनिविद्युत्तारा इति षड्धा भिन्नाः ॥ उल्का पतेत् फलं तद्वद्धिष्ण्याग्निस्थिभिः पतैः । विद्युद्दृष्टोभिः षड्भिस्तद्वत्तारा विपाचयति ॥ तारा फलपादकरी फलार्धदात्री प्रकीर्त्तिता धिष्ण्या । तिसृः सम्पूर्णफला विद्युदुल्कागनिर्येति ॥ अग्निः स्वनेन महता नगजान्मृगाश्ववेश्मतरुपशुषु । निपतति विदारयन्ती धरातलं चक्रसंस्थाना ॥ विद्युल्लतावत् जनयन्ती तटतटस्वना सहसा । कुटिलविशाला निपतति जीवेश्वनराशिषु ज्वलिता ॥ धिष्ण्या क्षणात्पुच्छा धनूंषि दश दृश्यतेऽनराभ्यधिकम् । ज्वलिताङ्गारनिकाशा ह्रस्वौ सा प्रमाणेन ॥ तारा ह्रस्वं दीर्घा शुक्ला तान्त्राज्यतन्तुरूपा वा । तिर्यगधश्चोर्ध्वं वा याति वियल्लुप्तमानेव । उल्का शिरसि विशाला निपतन्ती वर्धते प्रतनुपुच्छा । दीर्घा भवति च पुरुषा भेदा बहवो भवन्त्यस्याः । प्रेतप्रहरणखरकरभनक्रकपिदंष्ट्रिलाङ्गलमृगाभाः । गोधाहिधूमरूपाः पापा या चोभयशिरस्काः ॥ ध्वजभवनकरिगिरिकमलेष्टुतुरगसन्नप्ररजतहंसाभाः । श्वेतसुवज्रशङ्खस्वस्तिकरूपाः शिवसुभिक्षाः ॥ अम्बरमध्याद्वह्निर्निपतन्त्यो राजराष्ट्रनाशाय । वम्भ्रमती गगनोपरि विभ्रमाख्याति लोकस्य ॥ संसृप्यती चन्द्रार्कौ तद्विसृता वा सभूप्रकम्पा च । परचक्रागमरूपवध-दुर्भिक्षाद्यष्टिभयजननी पौरेतरक्षुत्क्षापसव्यकरणं दिवाकरहिमांश्वोः । उल्का शुभदा पुरतो दिवाकरविनिःसृता यातुः ॥ शुक्ला रक्ता पीता कृष्णा चोल्का द्विजादिवर्णाभा । क्रमशश्चैतान् हन्युर्भूधीरःपार्श्वपृष्ठस्थाः ॥ उत्तरदिगादिपतिता विप्रादीनामनिष्टदा रूक्षा । स्निग्धा स्निग्धाखण्डा नीचोपगता च तद्वृद्ध्यै ॥ श्यामा वारुणनीलाऽसृग्दहनासितभस्मनिभा रूक्षा । सन्ध्यादिनजा वक्राद्दलिता च परागमभयाय ॥ नक्षत्रग्रहघाते तद्भक्तीनां क्षयाय निर्दिष्टा । उदये ग्रसती रवीन्दू पौरेतरक्षुत्क्षयेऽस्ते वा ॥ भाग्यादित्यधनिद्यामूलेष्वल्काकृतेषु युवतीनाम् । विप्रक्षत्रियपीडा पुष्यानिलविष्णुदेवेषु ॥ ध्रुवसौम्येषु नृपाणामुपेषु सदारुणेषु चौराणाम् । स्निग्धेषु कलाविदुषां पीडा साधारणे च हते ॥ क्रन्दन्त्येताः पतिता देवप्रतिमासु राजराष्ट्रभयम् । शक्रोपरि नृपतीनां मरुतेषु तत्स्वामिनां पीडाम् ॥ आशाग्र्यदहोपघाते तद्देश्यानां खले क्षुधिरतानाम् । चैत्यतरौ सम्पतिता सत्क्षतिपीडां करोत्युल्का ॥ द्वारि पुरस्य पुरक्षयमथेन्द्रकीले जनक्षयोऽभिहितः । ब्रह्मायतने विप्रान् विनिहन्याद्गोमिनो गोष्ठे ॥ ह्रेडास्फोटितवादितगीतोत्क्रुष्टस्वना भवन्ति यदा । उल्का निपातसमये भयाय राष्ट्रस्य सन्दृश्य ॥ यस्याद्धिरं तिष्ठति खेऽनुषङ्गो दण्डाकृतिः सा नृपतेर्भयाय । या चोह्यते तन्तुधृतेव खस्था वा वा महेन्द्रध्वजतुल्यरूपा ॥ श्रेणिनः प्रतीपगा तिर्यगा नृपाङ्गनाः । हन्त्यधोमुखी नृपान् ब्राह्मणानर्थोर्द्ध्वगा ॥ वर्हिपुच्छरूपिणी लोकसङ्क्षया वह्नेः । सर्पवत् प्रसर्पिणी योषितामनिष्टदा ॥ हन्ति मण्डला पुरं ह्रस्ववत् पुरोहितम् । वंशगुल्मवत् स्थिता राष्ट्रदोषकारिणी ॥ व्यालशूकरोपमा विस्फुलिङ्गमालिनी । खण्डगोऽश्व वा गता सस्वना च पापदा ॥ सुरपतिचापप्रतिमा राज्ञं नभसि विलीना जलदान् हन्ति । पवनविलोमा कुटिलं याता न भवति शस्ता विनिष्टस्वा वा ॥ अभिभवति यतः पुरं बलं वा भवति भयं तत एव पार्थिवस्य । निपतति च यया दिशा प्रदीप्ता जयति रिपूनचिरात्तया प्रयातः" ॥ तत्कारणसङ्गं गर्गसंहितायाम् "अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधर्मतः । नरापचाराच्चियतमुपसर्गः प्रवर्त्तते । ततोऽपराधाच्चियतमपवर्जन्ति देवताः । ताः सृजन्त्यद्भुतांस्तांस्तु दिव्यनाभसभौमजान् । त एव त्रिविधा लोके उत्पाता दैवनिर्म्मिताः । विचरन्ति विनाशाय रूपैः संबोधयन्ति च" इति । अनिष्टसूचकरूपभेदाश्च बृहत्संहितावाक्ये प्राक् दर्शिताः । तल्लक्षणं काश्यपेन सामान्यत उक्तम् "उल्काच्छिखा च सूच्छाया रक्तनीलशिखोज्वला । पौरुषेय प्रमाणेन उल्का नानाविधा स्मृतेति" ।

अग्न्युद्धार पु० अग्नेरुद्धरणार्थसुद्धारः अरणिमन्थनेन उत्पादनम् । अरणिद्वयघर्षणेनाग्नेरुत्पादने । तत्प्रकारस्तु "अश्वत्थो यः शमीगर्भः प्रथमो वंशसम्भवः । तस्य या प्राङ्मुखी शाखा योदीची वोर्द्ध्वगापि वा ॥ अरणिस्तन्मयी प्रोक्ता तन्मध्ये वोत्तरारणिः । सारवद्दारवद्वत्वभोर्विस्तो च प्रशस्यते ॥ संसक्तमूलो यः शम्याः स शमीगर्भ उच्यते । अलाभे स्वशमीगर्भाद्वरेदविलम्बितः ॥ चतुर्विंशतिरङ्गुलैर्दैर्घ्यं षड्पि पार्थिवम् । चत्वार उच्छ्रये मानमरण्योः परिकीर्त्तितम् ॥ अष्टाङ्गुलः प्रमन्थः स्याद्बलं स्याद्द्वादशाङ्गुलम् । ओविली द्वादशैव स्यादेतन्मन्थनयन्त्रकम् ॥ अङ्गुष्ठाङ्गुलमानन्तु यत्र यत्रोपदिश्यते । तत्र तत्र बृहत्पर्व्व ग्रन्थिभिर्म्मितुयात् सदा ॥ गोवालैः शणसंमिश्रैस्त्रिवृत्समलात्मकम् । व्यामप्रमाणं नेत्रं स्यात् प्रमथस्तेन पावकः ॥ मूर्द्धाङ्गिकर्णवक्त्राणि कन्धरा चापि पञ्चमी ।

अङ्गुष्ठमात्रायतेतानि ह्यङ्गुष्ठं वक्ष उच्यते ॥ अङ्गुष्ठमात्रं हृदयं ताङ्गुष्ठमुदरं स्मृतम् । एकाङ्गुष्ठा कटिर्ज्ञेया द्वौ बस्तिर्द्वौ च गुह्यकम् ॥ ऊरू जङ्घे च पादौ च चतुस्त्रिंशैर्यथाक्रमम् । अरत्नव्यवहारेऽते यास्त्रिकैः परिकीर्त्तिताः ॥ यत्तद्वृक्षमिति प्रोक्तं देवयोनिस्तु सोच्यते । अस्यां यो जायते वह्निः स कल्याणकृदुच्यते ॥ अन्येषु ये तु मथ्नन्ति ते रोगभयमाप्नुयुः । प्रथमे मन्थने त्वेष नियतो नोत्तरेषु च ॥ उत्तरारणिनिष्पन्नः प्रमन्थः सर्व्वदा भवेत् । योनिसङ्करदोषेण युज्यते ह्यन्यमन्थकृत् ॥ आद्यो सप्तधिरा चैव धूर्त्ताङ्गी पाठिता तथा । न स्त्रिता यजमानानामरणिवोत्तरारणिः ॥ परिधावाऽहतं वासः प्राङ्मुख च यथाविधि । विष्टयात् प्राङ्मुखो यत्नमाहृता वह्निमाशया ॥ चतस्रधूप्रमन्थाभ्यं गाढं कृत्वा विचक्षणः । कृत्वोत्तराया मरणिं तद्धूमुपरि न्यसेत् ॥ चतस्रः कीलकास्यास्मोविलोमुदगग्रकाम् । विष्टम्भाद्वारवेद्वं यत्नं निष्कम्पं प्रयतः शुचिः" इति कात्या० श्र० ॥

अग्न्युपस्थान न० अग्निरूपस्थीयतेऽनेन उप+स्था ल्युट् ईत्व०। वह्निरूपासनमन्त्रे। स्त्रियां ङीप्। भावे ल्युट् ईत्व०। वह्निरूपासने न०।

अग्र न० अङ्ग-रक् नलोपः। उपरिभागे, शेषभागे, आलम्बने पूर्व्वभागे, उत्कर्षे समूहे च। प्रधाने, अधिके, प्रथमे च त्रि०। तत्र पूर्व्वभागे अग्रकायः "अग्रायणस्त्रे सकलीकृताङ्गुलाविति" कुमा०। जङ्घे "यङ्गाग्रि यस्याग्रशरीरोरुहाणि इति" कु०। आलम्बने, "मनुमेकाग्रमासीनमिति" मनुः प्रधाने "अग्र्यामहिषी राज्ञ" इति प्रथमे अग्रहायणेष्टिरिति। पुरोऽर्थे, अग्रसरः। शेषभागे, "हस्ताग्रयस्तेषु हस्ताङ्गुलेषिति" रघुः। "सूच्यग्रेण न दातव्यं विना युद्धेन केशवेति" "बालाग्रशतभागस्य शतधा कल्पितस्य चेति" "आराग्रमात्रोह्यपरोऽपि दृष्टः इति" च श्रुतिः। अधिके "अग्रायणरथगालिनेति"। यङ्गे, "कैलासाग्रसमासीनमिति" तत्त्वम् उत्कर्षे, अगादग्रं रोहतीति ता० ब्रा० अग्रमुत्कर्षमिति माधवाचार्य्यः अधिके "साग्रं वर्षशतमिति" रामा० अग्ररूपपलपरिमाणे (ज्योतिषोक्तस्य अग्ररूपपलस्य परिमाणार्थैऽंशभेदे) च। अग्रचेलसाधनार्थावां सिद्धान्तशिरोमण्युक्तायाम् अग्रचेलकर्णेन गुणितायां स्वकोट्या हृतायां क्रान्तिज्यायां स्त्री। "क्रान्तिज्यावे कर्णगुणे विभक्ते कोट्या भुजेनाग्रमितायका स्यात्" इति सि० शि०। "क्रान्तिज्या अग्रच्युतिकर्णेन गुणिता हिः स्याथा एकत्र स्वकोट्या भक्ता सती अग्रा भवतीति" प्रमिता०। "रेखा प्राच्यपरा साध्या विषुवद्भायगा तथा। इष्टच्छायाविषुवतोर्मध्यमग्राभिधीयते" इति सूर्य्यसिद्धान्तपरिभाषितेऽर्थे च स्त्री। विवृतञ्चैतत् रङ्गनाथेन यथा "अथाग्रानार्थमाह। तस्मिंश्चतुरस्रे पूर्वापररेखात उत्तरभागे विषुवद्भागाग्रभागप्रदेशस्याग्रभाकुलान्तरितेत्यर्थः। प्राच्यपरा रेखा पूर्व्वापररेखानुकारा रेखा तथा सर्वतस्तुल्यान्तरेण यष्टेरिष्टच्छायाग्ररेखाभज्ञान्तरेण कार्य्या। अनन्तरमिष्टच्छायाविषुवतोरिष्टच्छायाग्ररेखाग्रभाग्ररेखयोरित्यर्थः। मध्यं चतुरस्रे ऽङ्गुलात्मकमन्तरालं सर्वतस्तुल्यम्। अग्रा कर्णच्छायोच्यते। अत्रोपपत्तिः। भुजस्त्र कर्णच्छाया पलभासंस्कारेणाग्रा उक्ता तद्दक्षिणगोले पलभाधिकोत्तरभुजसङ्गावेन पलभोनो भुजोऽग्रेति, प्राच्यपरस्त्रात्तुत्तरभागेऽग्रभाग्ररेखा भुजमध्ये भवतीति ह्यो रेखयोरन्तरमग्रा पलभोनभुजरूपा। एवमुत्तरगोल उत्तरभुजस्त्र पलभाल्पत्वाद्भुजोनपलभागेति पलभारेखा प्राच्यपरस्त्रात्तुत्तरभागस्था भुजरेखातोऽग्र्यान्तरेणोत्तरदिशीति ह्यो रेखयोरन्तरं भुजोनपलभारूपं कर्णच्छाया। एवं दक्षिणभुजस्त्र पलभोनात्वात् पलभायुतोऽग्रेति प्राच्यपरस्त्रात्भुजाग्रापलभाग्ररेखयोः क्रमेण याम्योत्तरत्वात् तयोरन्तरालं पलभाभुजैक्यरूपमग्रा पलभायाः शङ्कुतलाग्रकल्पत्वात् सदोत्तरत्वं छायासम्बन्धादुक्तम्" इति। "अग्रगब्दस्यावयवरूपैकदेशपरत्वे हस्ताग्रं तदग्रत्वे अग्रहस्त" इति यद्योक्तम् वामनेन, "हस्ताग्रायग्रहस्तयोर्णत्वनिषेधाभेदादिति"। अग्र+भवार्थे यत्। अग्र्यः। च अग्रियम्। कुशाग्रमिव ह। कुशाग्रीयः। इवार्थे शाखादि० य अग्र्यः॥ अग्रः ऋषिभेदस्त्रीत्वापत्ये नडादि० फक्। आग्रायणः। तत्तदर्थेषु। [वत् कर्म्म०। देहपूर्व्वभागे।

अग्रकाय पु० अग्रः कायः अवयवावयविनोरभेदात् अग्रहस्त-

अग्रग त्रि० अग्रे गच्छतीति गम-ड ७त०। पुरोगामिनि।

अग्रगण्य त्रि० अग्रे गण्यते गण-यत् ७त०। अग्रगणनीये, प्रधाने च।

अग्रगामिन् त्रि० अग्रे गच्छति गम-णिनि ७त०। पुरोगामिनि। "प्रतोऽग्रगामिनीति" पा०। अत्राग्रत्वनिर्देशात् अग्रगामिनेत्यादौ न षत्वम्। स्त्रियां ङीप्।

अग्रज पु० अग्रे पुरस्तात् जायते जन-ड। अग्रजाते ज्येष्ठभ्रातरि "अग्रादाग्रे गजाग्रजम्" इति माघः।

ज्येष्ठभगिन्यां स्त्री। वर्णेषु मध्ये अग्रजातत्वात् विप्रे। [स०। जङ्घाग्रभागे।

अग्रजङ्घा स्त्री अग्रा जङ्घा अवयवावयविनोरभेदात् क०

अग्रजन्मन् पु० अग्रे जन्म यस्य जन-मनिन् व्यधि० बहु०। ज्येष्ठभ्रातरि, विप्रे च। अग्रजातमात्रे त्रि०। अग्रात् प्रधानाङ्गात् मुखात् जन्मास्य ब्य०ब०। ब्रह्मणोमुखोत्पन्ने विप्रे, तस्य तन्मुखोत्पत्तिश्च ताण्ड्यमहाब्राह्मणे उक्ता यथा "सोऽकामयत यज्ञं सृजेयेति स मुखत एव त्रिष्टुभमसृजत तं गायत्रीच्छन्दोऽन्वसृज्यताग्निर्देवता ब्राह्मणोमनुष्यो वसन्त ऋतुस्तस्मात्त्रिष्टुत् स्तोमानां मुखं, गायत्री छन्दसाम्, अग्निर्देवतानां, ब्राह्मणो मनुष्याणां, वसन्त ऋतूनां, तस्माद्ब्राह्मणो मुखेन वीर्य्यङ्करोति मुखतो हि सृष्टः" इति। आख्यातञ्चैतत् भाष्ये "सः प्रजापतिरकामयत् किमिति"? सर्व्वसाधकं यज्ञं सृजेयेति स एतमग्निष्टोममपश्यत् तमाहरदित्युक्तस्त्रैवेदं विवरणं सः प्रजापतिः मुखत आत्मनो मुखादेव त्रिष्टुभमादत्तित्यवसाध्यमेतन्नामकं स्तोममसृजत तं त्रिष्टुभमनु पश्चाद्गायत्री-छन्दः गायत्रं नाम छन्दोऽसृज्यत तदनु अग्निर्देवताऽसृज्यत तमनु मनुष्यो ब्राह्मणोऽसृज्यत तथा तमनु वसन्ताख्यश्च ऋतुरसृज्यत यस्माद्यदेते मुखतएव सृष्टाः तस्मादेते त्रिष्टुदादयः सखजातेयानां मध्ये मुख्या अभवन् त्रिष्टुदादीनां मुख्यानां मध्ये ब्राह्मणस्य मुख्यत्वप्रयुक्तं वीर्य्यं लोकसिद्धं दर्शयति तस्मान्मुखसृष्टत्वेन मुख्यत्वात् ब्राह्मणो मुखेनेदानीमपि वीर्य्यं स्वाध्यायप्रवचनादिजन्यं सामर्थ्यङ्करोति तस्मादित्युक्तं विदधाति हि यस्माद्ब्राह्मणो मुखतः सृष्टस्तस्मादित्यर्थः। एवमुक्तमर्थं यो वेद सोऽपि मुखेन वीर्य्यङ्करोति मुखसाध्येन स्वाध्यायप्रवचनादिनैवाभीष्टं साधयति इत्यर्थः" इति। "ब्राह्मणोऽस्य मुखमासीत्" पुरुषसूक्तम् अत एव विप्रस्य मुखजातत्वेन मुखसाध्यस्वाध्यायाभ्यसने एव वीर्य्यं भवतीत्यर्थः उक्तम् अतएव मनुना "वेदमेव सदाभ्यस्येत्" दित्युक्तम् हारीतसंहितायां तु "षट् कर्म्माणि, निजान्याहुर्ब्राह्मणस्य महात्मनः। तैरेव सतत यस्तु वर्त्तेत मुखमेधते अध्यापनं चाध्ययनं याजनं यजनं तथा। दानं प्रति ग्रहश्चेति षट कर्म्माणीति चोच्यते" इति "वेदञ्चैव सदाभ्यस्येत् शुचौ देशे समाहितः धर्म्मशास्त्रं तथा पाठ्यं ब्राह्मणैः शुद्धमानसैः वेदवत् पठितव्यञ्च श्रोतव्यञ्च दिवानिशि श्रुतिहीनाय विप्राय ऋतिहीने तथैव च दानं भोजन मन्यच्च दत्तं कुलविनाशनम्। तस्मात् सर्वप्रयत्नेन वेद शास्त्रं पठेत्, द्विज इति" च। "सत्त्वप्रधाना वप्राः सुरिति भारतोक्तेः विप्रस्य सत्वप्रधानतया "ब्राह्मणक्षत्रियविशां शूद्राणाञ्च परन्तप!। कर्म्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः। शमोदमस्तपः शौचं क्षान्तिरार्जवमेव च। ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म्म स्वभावजमिति" गीतायां सात्विकधर्म्माएवास्य स्वाभाविका इत्युक्तम्। विवृतञ्चैतत् श्रीधर स्वामिना "तत्र ब्राह्मणस्य स्वाभाविकानि कर्म्माणयाह शम इति, शमश्चित्तोपरमः (बाह्यविषयाच्चित्तस्य निवर्त्तनम्) दमो-बाह्येन्द्रियोपरमः (स्वविषयाच्चित्तस्य निवर्त्तनम्) तपः पूर्व्वोक्तं (सगुणब्रह्मोपासनादि) शौचं बाह्यमाभ्यन्तरञ्च। क्षान्तिः (शीतोष्णादिद्वन्द्वसहिष्णुता) आर्जवम् अवक्रता (बाह्याभ्यन्तरयोः कापट्याभावः) ज्ञानं शास्त्रीयं विज्ञानमनुभवः आस्तिक्यम् अस्ति परलोक इति निश्चयः। एतत् शमादि ब्राह्मणस्य स्वभावात् जातं कर्म्मेति"। "मुखजातादयोयत्र अग्रे प्रथमं जन्म यस्य। चतुर्मुखे ब्रह्मणि, "यो वै ब्रह्माणं विदधाति पूर्व्वं यद्वाऽऽ प्रहिणोति वेदमिति" "हिरण्यगर्भः समवर्त्तताग्रे" इति च श्रुतौ परब्रह्मसकाशात् तस्य प्रथमोत्पत्तिरुक्ता, तदुत्पत्तिप्रकारस्तु मनुना "सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधा प्रजाः। अप एव ससर्जादौ तासु बीजमवासृजत्। तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् तस्मिन् जज्ञे स्वयं ब्रह्मा सर्व्वलोकपितामह" इत्यनेनोक्तः।

अग्रजात पु० अग्रे जातः जन-क्त ७त०। ज्येष्ठभ्रातरि, विप्रे च। ज्येष्ठभगिन्यां स्त्री। पूर्व्वजातमात्रे त्रि०।

अग्रजाति पु० अग्रा श्रेष्ठा जातिर्यस्य, जन-क्तिन् कर्म०। विप्रे।

अग्रजिह्वा स्त्री अग्रा जिह्वा अवयवत्वेन क०। जिह्वाग्रभागे।

अग्रणी त्रि० अग्रे नीयतेऽसौ णी-क्विप् ७त० सत्वम्। प्रभौ श्रेष्ठे च। अग्रं नयति देवेभ्य इति। वह्नौ पु० यास्कव्याख्यायामुक्तम्।

अग्रतस् अव्य० अग्रे अग्राद्वा अग्र+तसिल्। पूर्व्वदिक्कौ, पूर्व्वभागावधिके च। [अग्रगामिनि। स्त्रियां ङीप्।

अग्रतःसर त्रि० अग्रतः सरति गच्छति सृ-ट ७त०।

अग्रदानिन् पु० अग्रे दानं उद्देश्यत्वेकाल्यस्य अग्रदान+इनि प्रेतोद्देशेन ब्राह्मणाय दीयते तत्प्रतिग्राहिणि "अग्रदानीति" ख्याते विप्रे। "लोभो विप्रस्य शूद्राणामग्रे दानं परिग्रहीतवान्। यस्मात्तिलदानानामग्रदानो बभूव स" इति पुरा०।

अग्रदानीय पु० अग्रे दानमर्हति छ। अग्रदानिविप्रे।

अग्रनख पु० अग्रो नखः अग्रहस्तवत् क०। नखाग्रे।

अग्रनासिका स्त्री अग्रा नासिका अग्रहस्तवत् क०। नासिकाग्रभागे।

अग्रन्थिक पु० नास्ति ग्रन्थिर्वस्त्वग्रन्थिः संसारबन्धग्रन्थिर्वाऽस्य। निर्ग्रन्थिके सङ्गकक्षे जैनभेदे आत्मज्ञे च "भिद्यते हृदयग्रन्थि" रित्यनेन तस्य संसारग्रन्थिभून्यत्वोक्तेस्तथात्वम्। ग्रन्थिभून्ये त्रि०।

अग्रपर्णी स्त्री अग्रे पर्णं यस्याः जातित्वात् ङीप्। (आल्कुशीति) ख्याते वृक्षे।

अग्रपूजा स्त्री अग्रे पूजा। प्राथमिकपूजायाम्। "अग्रेपूजामिह स्थित्वा स्नपयिष्येमामिति" पुरा०।

अग्रभाग पु० भज्यते इति भागः एकदेशः भज-घञ् अग्रः पूर्व्वः भागः कर्म्म०। आद्यादौ प्रथमसङ्ख्ये देये द्रव्ये अवयविनः शेषभागे च। यथा शराग्रभागः।

अग्रभुक् त्रि० अग्रे देवपित्रादिभ्योऽदत्त्वा भुङ्क्ते भुज-क्विप् ७त०। औदरिके।

अग्रभू पु०अग्रे भवति उत्पद्यते भू-क्विप् ७त०। पूर्व्वजाते ज्येष्ठभ्रातरि विप्रे च ज्येष्ठभगिन्यां स्त्री। पूर्व्वजाते त्रि०।

अग्रमहिषी स्त्री कर्म्म०। प्रधानस्त्रियाम्। "अथाग्रमहिषी राज्ञ" इति।

अग्रमांस न० अग्रं प्रधानं भक्षत्वेन मन्यते मन्-स, दीर्घः कर्म्म०। हृदयस्थे पद्माकारे (फुलका) इति नामके मांसे। केचित् व्युत्क्रमान्मांसमेकं नामेत्याहुः। (अग्रमास) इति प्रसिद्धे रोगभेदे च।

अग्रमुख न० अग्रं मुखम् अग्रहस्तवत् कर्म्म०। मुखाग्रे।

अग्रयण न० अग्रमयनात् उत्तरायणात् यत्वम् यक० ततोविधानकालोऽस्य अच्। मार्गे मासि साग्निकैरुत्सर्ज्जनीयनवशस्येष्टिरूपे यज्ञभेदे। निरग्निकैरुत्सर्ज्जनीये नवान्नश्राद्धे च। "अकृताग्रयणश्चैव धान्यजातं द्विजोत्तमेति" वज्रांचे स्मृतिः। "अकृताग्रयणमकृतनवशस्येष्टिश्राद्धं यथायोग्यं साग्निकैरनग्निपरमिति" श्राद्धतत्त्वे रघुनन्दनः।

अग्रयान न० अग्रे यानं यस्य वा-ल्युट् संज्ञातेऽर्थत्वम्। पुरोगामिनि सैन्ये। अग्रगामिमात्रे त्रि०।

अग्रयायिन् त्रि० अग्रे यास्यति या-णिनि ७त०। पुरोगामिनि "पुत्रास्ते रणशिरस्यग्रयायीति" श्रेष्ठे च।

अग्रयोधिन् पु० अग्रे स्थित्वा युध्यति युध-णिनि ७त०। सैन्यानामग्रे स्थित्वा योद्धरि। [चिल्लोति प्रसिद्धे शाकभेदे।

अग्रलोहिता स्त्री अग्रमुपरिभागः लोहितं यस्याः ब०। तरुखण्डरूढे (कलम) इतिप्रसिद्धे काष्ठजाते वृक्षकादिवृक्षे।

अग्रवीज पु० अग्रं शाखाग्रं वीजमुत्पादकं यस्य। छिन्नाग्रशाखाग्रोत्पादके वृक्षे।

अग्रसन्धानी स्त्री अग्रे फलोत्पत्तेः प्राक् सन्धीयते ज्ञायतेऽनया कार्य्यं सम्+धा-करणे ल्युट् ङीप्। यमपञ्जिकायाम्। यत्र हि प्राणिवर्गस्य प्राग्भवीयकर्म्मानुसारेण शुभाशुभसूचकं सर्व्वं लिख्यते सा यमपञ्जिका। केचित् यमपट्टिकेति वा कथयते। अग्रसन्धानकारिणि त्रि०।

अग्रसन्ध्या स्त्री अग्रं सन्ध्यायाः, "सर्व्वोऽप्येकदेशः कालवाचिना समस्यते, इत्युक्तेः एक०त०। सन्ध्याप्राग्भवसमये। अग्रा पूर्व्वा सन्ध्या इति कर्म०। प्रातःसन्ध्यायाम् "कर्कन्धूनातपरि तृष्णिनं रज्जयत्यग्रसन्ध्येति" शकुन्तला।

अग्रसर त्रि० अग्रे सरति गच्छति सृ-ट ७त०। अग्रगामिनि। "वृद्धायाश्चसरोऽभवदिति" स्त्रियां ङीप्।

अग्रसारा स्त्री अग्रं शीर्षभागं सारोऽस्याः। फलशून्यशिखायां मञ्जर्य्याम्। अग्रात् अग्रमारभ्य सारोऽस्य। वंशादौ पु०।

अग्रह पु० ग्रहः परिग्रहः न०त०। परिग्रहाभावे। बहु०। परिग्रहशून्ये सन्यासिप्रभृतौ, ज्ञानशून्ये त्रि०।

अग्रहर त्रि०अग्रे ह्रियते दीयतेऽसौ अग्र-हृ-अच्। अग्रदेये वस्तुनि, भागाये पु० अग्र-हृ-कर्त्तरि अच्। अग्रहारिणि त्रि० "ग्राग्रहरः कुमार" इति।

अग्रहस्त पु० अग्रश्चासौ हस्तश्चेति गुणगुणिनोरभेदात् कर्म्म०। हस्तस्याग्रभागे "अथाग्रहस्ते सकुलीकृताङ्गुलाविति" कु०।

अग्रहायण पु० अग्रः श्रेष्ठः हायनोव्रीहिरत्र यत्वम्। मार्गशीर्षे मासि। तस्य च "मासानां मार्गशीर्षोऽहमिति" गीतायां भगवद्विभूतिरूपत्वोक्तेः श्रेष्ठधान्यवत्त्वाच्च तथात्वम्।

अग्रहायणेष्टि स्त्री अग्रा प्राथमिकी हायननिमित्ता इष्टिः। नवशस्येष्टौ यागभेदे।

अग्रहार पु० अग्रं प्रथमं ह्रियते उत्पन्नशस्यादुद्धृत्य स्वाम्यते हृ-कर्म्मणि घञ्। क्षेत्रोत्पन्नशस्यादुद्धृत्य ब्राह्मणो देवेन स्वाम्ये धान्यादौ गुरुकुलादाहृत्य ब्रह्मचारिणे देवे क्षेत्रादौ, ग्रामभेदे च "स कस्मिंश्चिदग्रहारे कालौ नामैकस्मिन्निति" दशकु०। अग्रं हरति-अण्। अग्रहारके त्रि०।

अग्राह्य न० अग्रञ्च तदह्य चेति गुणगुणिनोरभेदात् कर्म्म०। खाङ्गपरत्वात् नाच्समा०। नेत्राग्रे अपाङ्गे "अग्राह्या बीजमाणस्तु तिर्य्यग्भ्रातरमब्रवीदिति रामा०।

अग्राणीक न० अग्रञ्च तदनीकं चेति गुणगुणिनोरभेदात्

कर्म्म० त्वम् । अग्नवायिसैन्ये । "अग्नाणीकं रघुव्याघ्रो राक्षसानां बभञ्जतः इति" रामा० ।

अग्न्याधेय न० अग्नेः आधेयं स्थानं तत्र साधु ञ । बौद्धागमसिद्धे प्रवादभेदे "उत्पादपूर्व्वमग्न्याधेयमथ वीर्य्यता प्रवादः स्यात् इति" हेमचन्द्रः ।

अग्रावलेहित न० अग्रं प्रथमभाग उद्धृत्यावलेहितमास्वादितं यस्य । श्राद्धाद्यर्थप्रस्तुताद्यादग्रभागसङ्कल्पास्वादनेन श्राद्धं दानाद्यनर्हताप्रयोजकदोषदुष्टे अन्नादौ "हिः स्विन्न परिदन्वञ्च तथैवाग्नावलेहितमिति" श्राद्धकल्पे ब्रह्मपुराणम् "अग्नावलेहितं श्राद्धार्थोपकल्पितं सकृदुपभुक्ताग्रभागमिति" रघु० ।

अग्रासन न० अग्रमर्घादिदानात् पूर्व्वं कल्पितमासनम् । श्राद्धान्नभोजनार्थे अर्घदानादितोऽग्रे कल्पिते विप्रक्षोपवेशनार्थे आसने "भामग्रासनतोऽवकृष्टमवगमिति" रुद्रा० ।

अग्राह्य त्रि० अग्रह-ण्यत्-न० त० । अग्रहणीयोग्ये शिवनिर्म्माल्यादौ प्रतिग्रहायोग्ये तिलाश्वादौ च । "अग्राह्यं शिवनिर्म्माल्यं पत्रं पुष्पं फलं जलमिति" पुरा० । "ब्राह्मणः प्रतिगृह्णीयाद्वृत्त्यर्थं साधुतस्तथा । अव्यङ्गमपि मातङ्गतिलधेनूश्च वर्ज्जयेत् । कृष्णाजिनहयग्राही न भूयः पुरुषोभवेत् । गव्यालङ्कारवस्त्रादि प्रतिगृह्य मृतस्य च । नरकान्न निवर्त्तन्ते धेनुं तिलमयीं तथा" । तथा "ब्रह्महत्या सुरापानमपि स्तेयं तरिष्यति । आहराद्दुष्टदुष्टेभ्यस्तु तत् कथं ? वै तरिष्यति" । "एतदादद्दव्यादानं गर्हितदोषजनकम्" इति रघु० । "अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्म्मणः । अन्यत्र कुलटापण्डपतितेभ्यो द्विषस्तथेति" मनुः । तेन कुलटादिद्रव्यम् अग्राह्यम् । शौचादौ कर्म्मणि अनुपादेयमृत्तिकायाम् स्त्री । "अन्तर्जले देवगृहे वल्मीके मूषिकस्थले । क्षतशौचावशिष्टे च अग्राह्याः पञ्च मृत्तिका" इति स्मृतिः । अविचारणीये त्रि० "अग्राह्यस्तनिवेदित" इति स्मृतिः । आवेदनकालेऽनिवेदितः पश्चात् निवेदितोऽपि व्यवहारे न विचारणीयः इति तदर्थः ।

अग्रिम पु० अग्रे भवः अग्र+डिमच् । ज्येष्ठभ्रातरि । श्रेष्ठे, उत्तमे च त्रि० । "वीराणामग्रिमो भूत्वा युयुधे पार्थिवैः सहेति" पुरा० ।

अग्रिय पु० अग्रे भवः अग्र+घ । ज्येष्ठभ्रातरि । श्रेष्ठे, उत्तमे, अग्रजातमात्रे च त्रि० । "सन्ध्या अग्रिया भवन्तीति ता० ब्रा० ।

अग्रीय पु० अग्रे भवः अग्र+छ । ज्येष्ठभ्रातरि । श्रेष्ठे, उत्तमे च त्रि० । "अग्रीयभागं ददतेऽस्य दैत्या" इति वेदः ।

अग्रु (ग्रू) स्त्री अगि-क्रु नलोपः वा ऊङ् । नद्यामङ्गुल्याञ्च । निरुक्ते तन्नामोरेतस्का उक्तेस्तदर्थत्वम् । "जनीयन्तोन्यग्रुव" इति वेदः ।

अग्रेग त्रि० अग्रे गच्छतीति गम-ड अलुक् स० । पुरोगन्तरि ।

अग्रेगा त्रि० अग्रे गच्छति गम-विट् अलुक् स० । पुरोगन्तरि ।

अग्रेगु त्रि० अग्रे गच्छतीति गम-डु अलुक् स० । पुरोगामिनि सेवके ।

अग्रेदिधिषु (षू) पु० दिधिं धैर्य्यं स्यति निरस्यति, सो-कू षत्वम् दिधिषूः द्विरूढा पुनर्भूर्योषित् अग्रे गणनीया दिधिषूर्यस्य अलुक् स० ऊङभावः ष्टु० वा ह्रस्वः । पुनर्भूविवाहकारिणि । प्रागनूढज्येष्ठभगिन्याः प्रागूढकनिष्ठभगिन्यां स्त्री । "ज्येष्ठायां यद्यनूढायां कन्यायामनुजायते । सा चाग्रेदिधिषूर्ज्ञेया पूर्व्वा तु दिधिषूः स्मृतेति, मनुः एतत्पक्षे च अग्रे ज्येष्ठाविवाहात् पूर्व्वं दिधिषूः ज्येष्ठाविवाहकाला सहनरूपधैर्य्यलोपकारिणीति विग्रहः । दीर्घान्त एवायम् ।

अग्रेदिधिषूपति पु० ६त० । अनूढज्येष्ठायां भगिन्यां सत्यां कनिष्ठायाभगिन्या वोढरि "यस्याग्रे दिधिषूपतिरिति" स्मृतिः ।

अग्रेपा त्रि० अग्रे स्थित्वा पाति पा-क्विप् अलुक् स० । पुरतो भूत्वा पालके "अग्रेपा ऋभवो मन्दसाना" इति वेदः ।

अग्रेपू त्रि० अग्रे कृत्वा पूयते पू-क्विप् अलुक् स० । पुरः पवित्रकारके "सोमस्य राज्ञो भक्षयन्ति तेनाग्रेपुव" इति वेदः ।

अग्रेवण वनस्याग्रं-राज० पूर्व्व० अलुक् स० षत्वम्, नि० एदन्तत्वम् । वनाग्रभागे । [गामिनि । स्त्रियां ङीप् ।

अग्रेसर त्रि० अग्रे सरति सृ-ट-अलुक् स० । पुरो-

अग्रेसरिक त्रि० सृ-भावे-अप् अलुक् स० अग्रे सरे अग्र गतौ प्रसृतः ठन् । पुरोगामि-सेवके ।

अग्रोपहरणीय त्रि० अग्रमुपहियते यस्मै उप+हृ-सम्प्रदाने अनीयर् । श्राद्धाद्यर्थमुपकल्पितश्राद्धादेरग्रे दानोद्देश्ये वासुदेवादौ । अग्रे उपहियते कर्म्मणि अनीयर् । प्रथमदानार्हे द्रव्ये । ["दृश्यते त्वग्र्यया बुद्ध्येति" गीता ।

अग्र्य पु० अग्रेजातः यत् । ज्येष्ठे भ्रातरि । श्रेष्ठे त्रि०

अघ इदित् गतौ भ्वादि०आत्म० सक०सेट् । अङ्घते । आङ्घिष्ट । क्रि-अङ्घ्रिः अमुन् अङ्घः ।

अघ पापकरणे अदन्तचुरा० उभय० अक० । अघयति-ते । आजिघत् त । अच्-अघम् अघः ।

अघ न० चुरा०अघ-भावे अच्। पापे "हरत्यघं सम्श्रति हेतुरैश्वत" इति माघः। कर्त्तरि अच्। पापकारके त्रि० "अघायुरिन्द्रियारामो मोघं पार्थ! स जीवतीति" गीता अघं हेतुत्वेनास्त्यस्य अर्शा०अच्। व्यसने दुःखे च न०तयोः पापजन्यत्वात्तत्त्वम्। तत्र व्यसने "कश्चित् सृगीणामनघा प्रसूतिरिति" रघुः। "अनघा अव्यसनेति" मल्लिनाथः। "न वर्द्धयेदघाहानीति" "अघाहेषु निबद्धेषु सुखाताः कृतमङ्गला इति" च स्मृतिः अघस्य व्यसनस्य दुष्टवियोगरूपस्य तज्जन्यदुःखस्य वा अहानि अघाहानीति तदर्थः। दुःखे, "उपप्लुतमघोघेन नात्मानमवबुध्यते इति' दुःखौघेनेत्यर्थः "दयालुमनघस्रष्टं पुराणमजरं विदुरिति" माघः। परदुःखेन दुःखित्वे एव तत्प्रहरणाय दयालोरिच्छा, ईश्वरस्य तु दयालुत्वेऽपि न दुःखसम्भवः आनन्दस्वरूपत्वादिति, तत्तात्पर्यार्थः "स्वयशांसि विक्रमवतामवतां न वधूष्वघानि इति भा०। अघानि व्यसनानीत्यर्थः। पूतनावकासुरयोर्भ्रातरि असुरभेदे पु०। "क्षणचरितमिवाघनाशनमिति" श्लेषः। एतत्कथा चाघनाशनशब्दे द्रष्टव्या।

अघकृत् त्रि० अघं पापं सततं करोति कृ-कर्त्तरि क्विप् ६त०। पापकारिणि, सततपापशीले च।

अघन त्रि० न०त०। निबिडताविरुद्धैर्घनत्वयुक्ते।

अघनाशन त्रि० अघं नाशयति नश-णिच्-ल्यु। पापनाशके जपदानादौ "जपेत् सर्व्वाघनाशनमिति" स्मृतिः। स्त्रियां ङीप्। अघस्यासुरभेदस्य नाशनः। श्रीकृष्णे, स हि अजगररूपेण जिघांसन्तं तं हतवान् तत्कथा भागवते "अघवानामाभ्यपतन्महासुरस्तेषां सुखक्रीड़नवीक्षणाक्षमः। नित्यं यदन्तर्निजजीवितेप्सुभिः पीतामृतैरप्यमरैः प्रतीक्ष्यते॥ दृष्ट्वार्भकान् कृष्णमुखान्घासुरः कंसानुशिष्टः स बकीबकानुजः। अयन्तु मे सोदरनाशकृत्तयोर्द्वयोर्नेमेनं सबलं हनिष्ये। एते यदा मित्रुहृदोऽखिलाशयाः कृतास्तदा नष्टसमा व्रजौकसः। प्राणे गते वर्ष्मसु कानुचिन्ता प्रजासवः प्राणभृतोहि संयते॥ इति व्यवस्याजगरं बृहद्वपुः स योजनायाममहाद्रिपीवरम्। धृत्वाद्भुतं व्याप्तगुहानभं तदा पथि व्यशेत गुप्तनाशया खलः" ॥ इत्थम् अघनामकेऽसुरे स्थिते तदुदरे गोवत्सवत्सपालेषु गतेषु स्वयमपि हरिः प्रविश्य आत्मानं स्वदेहवर्द्धनेन तं हतवान् इत्युक्तम्। "तच्छ्रुत्वा भगवान् कृष्णस्तव्यः सार्भवत्सकम्। चूर्णीचिकीर्षोराक्षानं तरसा ववृधे गले॥ ततोऽतिकायस्य निरुद्धमार्गिणोऽक्ष्णोदीर्णदृशो भ्रमत्स्वितस्ततः। पूर्णोऽन्तरङ्गे पवनो निरुद्धोमूर्द्धन्विनिर्भिद्य विनिर्गतो बहिः" इति॥ "अघचरितमिवाघनाशनमिति" श्लेषः।

अघभोजिन् त्रि० अघं पापफलकं भुङ्क्ते भुज-णिनि ६त०। देवपितृतिथ्युद्देशाभावेन स्वार्थपाचके। "अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात्" इति विष्णुः। "भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्" इति गीता।

अघमर्षण न० अघं पापं कृष्यते उत्पन्नत्वेऽपि नाशनेन कर्षाज्जन्यत्वात् सह्यतेऽनेन सह-ल्युट् ६त०। उत्पन्नपापनाशार्थे जप्ये मन्त्रभेदे तच्च द्रुपदादिवेत्यादि, ऋतञ्च सत्यञ्चेत्यादि आपोहिष्ठेत्यादि स्मृतञ्च। तच्च अन्तर्जले जप्यम् तत्फलञ्चोक्तं ब्राह्मणसर्व्वस्वे। यथा "बौधायनः "ऋतञ्च सत्यञ्चाद्यमर्षणम् त्रिरन्तर्जले जपन् सर्व्वस्मात् पापात् प्रमुच्यते"। योगियाज्ञवल्क्यः "हत्वा लोकानिमांस्त्रीन् हि त्रिः पठेदघमर्षणम्। यथाश्वमेधावभृथमेवं तन्मनुरब्रवीत्" इति। हारीतः "पातकोपपातकमहापातकानामेकतमसञ्चिपातेऽघमर्षणमेव जपेत्" इति। वृद्धविष्णुः "यथाश्वमेधः क्रतुराट् सर्व्वपापापनोदनः। तथाघमर्षणं सूक्तं सर्व्वपापप्रणाशनम्" इति। योगियाज्ञवल्क्यः "स्नानमद्भ्यैवतैर्मन्त्रैर्भोजनं प्राणसंयमः। अघमर्षणसूक्तेन अश्वमेधावभृत्समम्" इति। शङ्खः "जलनिमग्नः प्राणान् संयम्य त्रिरावर्त्तयन् अघमर्षणसूक्तेन स्नानात् नास्त्यघमर्षणात् परमन्तर्ज्जले" इति। गौतमः "अन्तर्जलेऽघमर्षणं त्रिरावर्त्तयन् सर्व्वपापेभ्यो मुच्यते" इति। अत्रिः "अपि चाप्सु निमज्ज्यित्वा त्रिः पठेदघमर्षणम्। यथाश्वमेधावभृथं तथैतन्मनुरब्रवीत्" इति। वशिष्ठः "अपि चाप्सु निमज्जानः त्रिः पठेदघमर्षणम्। यथाश्वमेधावभृथं ताद्दृगं मनुरब्रवीत्" इति। आपस्तम्बः "अपि चाप्सु निमज्ज्यित्वा त्रिः पठेदघमर्षणम्"। यथाश्वमेधवभृथो हि मनुस्तादृगमाह तत्" इति। बौधायनः "त्रिरातं चाशुपवसन् त्रिरभ्युपयन्नपः। प्राणानप्सु नि संयम्य त्रिः पठेदघमर्षणम्। "यथाश्वमेधावभृथमेवं तन्मनुरब्रवीत्" इति। योगियाज्ञवल्क्यः "त्र्यहं चोपवसेद् यस्तु त्रिरभ्येत्युपयन्नपः। मुच्यते पातकैः सर्व्वैः जप्त्वा त्रिरघमर्षणम्" इति। रहस्ये बृहन्नन्दुः "मातरं भगिनीं गत्वा मातृष्वसारं स्नुषां सखीं सनाभ्याञ्च अगम्यागमनं कृत्वा अघमर्षणम् अन्तर्जले त्रिरावर्त्य एतस्मात् पापात् पूतो भवतीति"। तथा "गुरुतल्पगमनं कृत्वा अघमर्षणमन्तर्ज्जले त्रिरावर्त्त्य एतस्मात् पापात् पूतो

भवतीति" । अत्र पापगौरवमाकलय्य संयतेन मासेकं यावत् जलमवगाह्याघमर्षणसूक्तं त्रिरावर्त्य स्नातव्यम् । तथा च लघ्वृषयः "महापातककर्मारंभत्वारंभ विशेषतः । अग्निं प्रविश्य शुद्धन्ति स्नात्वा वाप इति क्रतौ । रहस्यकरणे चैव मासमभ्यस्य पौरुषम् । अघमर्षणसूक्तं वा सूक्तं शुध्येच्चान्तर्जलेस्थितः" इति । दक्षस्मृतिः "अथ ब्रह्महत्यां कृत्वा प्राचीं वा उदीचीं वा दिशमुपनिष्क्रम्य प्रभूतेनेध्मेनाग्निं प्रज्वाल्याघमर्षणं चाष्टसहस्रमावर्त्य जुहुयात् तस्मात् प्रापात् पूतो भवतीति" । हारीतश्च "अन्तर्जले त्रिरावर्त्य सूक्तं जपते ब्रह्महत्ययेति" । दक्षापस्तम्बः "अकार्यकरणे चैव अभक्ष्यस्य च भक्षणे । अघमर्षणसूक्तेन पीतापः शुध्यते नरः" । वशिष्ठः "मनसा पापं कृत्वा अघमर्षणं जपेत्" इति । दक्षापस्तम्बः "क्षत्रियागमने वैश्यागमने चैव तापसीम् । त्रिरावर्त्य विशुद्धः स्यात् शूद्रागास्यधमर्षणम्" इति । तापसीमिति तापसीम् ऋचमित्यर्थः गङ्गालिखितौ "ब्रह्महा "त्रिरात्रोपोषितोऽन्तर्जलेऽघमर्षणं त्रिरावर्त्तयेत्" इति । याज्ञवल्क्यः त्रिरात्रोपोषितोजत्वा ब्रह्महा त्वघमर्षणम् । अन्तर्जले विशुद्ध्यर्थं दत्त्वा गान्तु पयस्विनीम्" इति । प्रकाशविष्णौ यौधावनः "तीर्थं गत्वा ततः शुचिरात्मा उदक्कान्ते स्थण्डिले उद्धृत्य सकृच्छिन्नवाससा सकृत् पूर्णेन पाणिना आदित्याभिमुखः अघमर्षणमध्यायमधीयीत इति" ।

षडङ्गन्यासं कृत्वा वामहस्ते जलं निधाय दक्षिणहस्तेन जलमाच्छाद्य हं यं रं लं वं इति त्रिरभिमन्त्र्य मूलसञ्जपन् गलितोदकबिन्दुभिस्तत्सदृश्या सप्रधा मूर्द्धानमभ्युक्ष्य भेषजलं दक्षिणहस्ते समादाय तोजोरूपं ध्यात्वा दृढ़याकाष्ठ्य देहान्तःपापं प्रवाह्य कृष्णवर्णं तज्जलं ध्यात्वा पिङ्गलया विरेच्य पुरः कल्पितवज्रशिलायां फडिति मन्त्रेण पापपुरुषस्वरूपं तज्जलं निःक्षिपेदित्यघमर्षणम् इति तन्त्रसारे तान्त्रिकाघमर्षणसूक्तम् तत्प्रमाणं तु तत्रैवावगम्यम् ।

अघमार त्रि० अघं मारयति मृ-णिच्-अण् उप० । पापनाशके देवादौ, "यमोऽघमारो निर्ऋतः" इति वेदः ।

अघरुद् त्रि० अघं रोदिति स्वकर्म्माद्यमतया यस्मात् रुद-अपादाने क्विप् दीर्घः । पापापनोदनहेतौ, पापनाशने मन्त्रे । "मा त्वाघरुदोरुदन्" इति वेदः । अघे व्यसने रोदिति न तु तत्प्रतीकाराय घटते रुद+कर्त्तरि क्विप् । रोदनेनैव व्यसनोत्तारके तत्प्रतीकारार्थमनुद्यते त्रि० ।

अघर्म्म पु० न० त० । उष्णविरोधिशीते तद्वति त्रि० । "अघर्म्मे काले" इति काद० ।

अघल त्रि० अघं लाति रक्षाति नाशयतीति ला-क । पापापनोदके । "ऋत्वोर्ये अघलादूता" इति वेदः ।

अघवत् त्रि० अघमस्यास्य मतुप् मस्य वः । पापवति सम्बोधने अघोः—अघवन् । "अघोयजेति" मुग्धबोधम् ।

अघविष पु० अघं व्यसनकारि-विषं यस्य । सर्पे ।

अघशंस पु० अघमनिष्टं शंसति दर्शयति शंस—अण् उपस० । अनिष्टसंपादके चौरे "अघाघशंसंतुदतामराति मिति" वेदः । भावे अच् दीर्घः । व्यसनसूचने पु० ।

अघशंसिन् त्रि० अघं शंसति सूचयति शंस—णिनि दीर्घः । व्यसनसूचके "व्यसनाशंसाकर्त्तरि "वचः क्रूरं मयोक्तमघशंसिनेति । स्त्रियां ङीप् ।

अघाय त्रि० अघं पापं परव्यसनं वा कर्त्तुमिच्छति अघ+क्यच्-उ । पापाचरणेच्छावति, परव्यसनचिकीर्षके च । "त्वा दक्षा अघायवोविदन्" इति यजु० । परस्याघं कर्त्तुमिच्छन्नीति वेददीपः । अघमायाति आ+या उ दीर्घः । हिंसानिरते । "बधोऽघायूनामिति" ता० ब्रा० ।

अघायुस् त्रि० अघं पापसाधनमायुरस्य । सर्व्वावस्थासु पापकारके "अघायुरिन्द्रियारामोमोघं पार्थेति" गीता ।

अघारिन् त्रि० अघं व्यसनमृच्छति ऋ-णिनि । व्यसनयुक्ते स्त्रियां ङीप् । "अघारिणीविकेश्योरुदत्व" इति वेदः ।

अघासुर पु० कर्म्म० । असुरभेदे अघनाशनशब्दे तत्कथा ।

अघाह पु० अघस्य व्यसनस्याहः अहसमा० । व्यसनदिने अशौचदिने "अघाहं नैव वर्द्धयेदिति" "अघाहेषु निवृत्तेषु स्नाताः कृतमङ्गलाः । आशौचाद्विप्रमुच्यन्त इति" च स्मृतिः ।

अघोर त्रि० न घोरः भयानकः । भयानकभिन्ने सौम्यरूपे "या ते रुद्र! "शिवा तनूरघोरा पापकाशिनी" इति वेदः । "अघोरा सौम्या अत एव पापकाशिनी शिवा च इति" वेददीपः । नास्ति घोरो यस्मात् । अतिभयानके त्रि० । रुद्रमूर्त्तिभेदे पु० । "ईशानाघोरनामानौ, वामदेवस्ततः परम् । सद्योजात इति प्रोक्तः क्रमशोऽर्चनकर्म्मणीति पुरा० । अघोरः शिव उपासत्वेनास्यास्याम् अघोर+अच् । भाद्रकृष्णचतुर्द्दश्यां स्त्री । "भाद्रे मासि सिते पक्षे ह्यघोराख्या चतुर्द्दशी । तस्यामाराधितः स्थाणुर्नयेच्छिवपुरं ध्रुवमिति" पुरा० ।

अघोष पु० नास्ति घोषोऽस्मात्र वा । वर्णोत्पादनार्थे वाह्य

प्रयत्नभेदे तत्प्रयत्नयुक्तेषु वर्णेषु च । ते च वर्णाः "खयां यमाः खयः+कँपौ विसर्गः शर एव च । एते श्वासानुप्रदाना अघोषाश्चोक्ताः वेदितव्याः । विवरणं मत्कृतशब्दार्थरत्ने सूचीपत्रे द्रष्टव्यम् । शब्दशून्ये त्रि० ।

अघोषवत् त्रि० अघोषः वर्णोच्चारणवाह्यप्रयत्नः अस्त्यस्य मतुप् मस्य वः । "खयां यमाः-खय+कँपौ विसर्गः शरएचेत्युक्तेषु वर्णेषु ।

अघ्न्या पु० न हन्ति सृष्टिकर्त्तृत्वात् न+हन-यक् निपातनात् साधु । प्रजापतौ । न हन्यते स्त्रीहत्यायाः, "अवध्याश्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतामपीति" निषिद्धत्वात् कर्म्मणि नि० । हननकर्म्मतान्यून्यायां स्त्रियां गवि स्त्री । अघ्न्या "गवां पतिरघ्न्या" इति वेदः । "पतिं वो अघ्न्यानामिति" वेदः "गावः प्राश्नन्त्यघ्न्या इति" च वेदः ।

अघ्रेय त्रि० न घ्रातुं शक्यः अर्हः वा घ्रा-शक्यादौ यत् न० त० । घ्राणानर्हे दुर्गन्धे वस्तुमात्रे, मद्ये न० । "मदिराघ्राणमात्रेण ब्राह्मण्यादेव हीयते" इति स्मृतौ मद्यस्य घ्राणनिषेधात् तस्य तथात्वम् ।

अङ्क (नृक) संख्याकरणे चिह्नयुक्तकरणे अदन्तचुरादि० उभ० सक० सेट् । अङ्कयति ते आङ्किक-त्-त । अङ्कापयति ते इति केचित् । "प्रेयांसमाङ्कयदसौ न विधौ कलङ्क" इत्युद्भटः । "पुक चेत्यङ्कापयत्यपीति" कामधेनुः । अच् अङ्कः । क्त अङ्कितः ल्युट् अङ्कनम् असुन् अङ्कः ।

अङ्क पु०न० अङ्क-करणे, कर्त्तरि वा अच् । चिह्ने "रतिवलयपदाङ्के चापभासञ्च कण्ठे" इति कुमा० । कलङ्के, "एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः" इति कुमा० । दृश्यकाव्याङ्कभेदे तल्लक्षणं यथा "प्रत्यक्षनेष्टचरितो रसभावसमुज्ज्वलः । भवेदगूढगर्भार्थः क्षुद्रचूर्णकसंयुतः ॥ विच्छिन्नावान्तरैकार्थैः किञ्चित्संलग्नबिन्दुकः । युक्तो न बहुभिः कार्य्यैर्बीजसंसूतिमान् न च ॥ नानाविधानसंयुक्तो नातिप्रचुरपद्यवान् । आवश्यकानां कार्य्याणामविरोधाद्विनिर्म्मितः ॥ नानेकादिनिवर्त्त्यं कथया सम्प्रयोजितः । आसन्ननायकः पात्रैर्युक्तश्चित्तरसैस्तथा ॥ दूराह्वानं वधो युद्धं राज्यदेशादिविप्लवः । विवाहो भोजनं शापोत्सर्गौ मृत्यू रतं तथा ॥ दन्तच्छेद्यं नखच्छेद्यमन्यद्वा व्रीडाकरञ्च यत् । मयनाधरपानादि नगराद्युपरोधनम् ॥ स्नानानुलेपने चैभिर्वर्जितो नातिविस्तरः । देवीपरि जनादीनामप्यमात्यवणिजामपि ॥ प्रत्यक्षचित्तचरितैर्युक्तो भावरसोद्भवैः । अन्तर्निष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्तितः" इति सा० ॥ दृश्यकाव्यरूपकभेदे च पु० । यथा "नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः । ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश" इति विभज्य "उत्सृष्टिकाङ्क एकाङ्कोनेतारः व्याप्टता नराः । रसोऽत्र करुणः स्यायो बहुस्त्रीपरिदेवितम् ॥ प्राख्यातमितिवृत्तञ्च कविर्बुद्ध्या प्रपञ्चयेत् । भाणवत् सन्धिवृत्त्याङ्कान्यस्मिन् जयपराजयौ ॥ युद्धञ्च वाचा कर्त्तव्यं निर्वेदवचनं बहु" । इति लक्षितम् "इमञ्च केचित् नाटकाद्यन्तःपात्राङ्कपरिच्छेदार्थम् उत्सृष्टिकाङ्कनामानम्" आहुः । अन्ये तु "उत्क्रान्ता विलोमरूपा सृष्टिर्यत्रेति उत्सृष्टिकाङ्कः" इति सा० । पर्व्वते, समीपे, दुष्टभूषणे, देहे, अपराधे, स्थाने, चिह्नयुद्धे परम्परासम्बन्धे चिह्ने च पु० । क्रोडे पु० न० "अनन्यनारीकनीयसङ्कमिति" कुमा० । "अङ्के निधाय तं बालं पुनः संस्कारमर्हतीति" स्मृतिः । "पुनरङ्काश्रयिणी भवामि ते" इति कुमा० । "प्रेम्णोपकण्ठं सुहृदङ्कभाजो रत्नावलीरम्बुधिरावबन्धेति" माघः । "अङ्कः समीपम् उत्सङ्गश्च" इति मल्लिनाथः । एकत्वादिसंख्याबोधकरेखासन्निवेशे- "अङ्कवृतिः किल सङ्कलिताख्येति" लीला० । नवसंख्यायाञ्च पु० ।

अङ्कतन्त्र न० अङ्कानामेकादिपराङ्कान्तसंख्याबोधकरेखाविशेषाणां प्रतिपादकम् तन्त्रं शास्त्रम् । अङ्कशास्त्रे व्यक्ताव्यक्तरूपे, पाटीगणितबीजगणितादौ ।

अङ्कति पु० अञ्च-गतौ अति कुत्वम् । वाते । पूजनार्थात् कर्म्मणि अति । ब्रह्मणि, अग्नौ, अग्निहोत्रिणि च । गन्तरि त्रि० स्त्रियाम् वा ङीप् अङ्कती च ।

अङ्कधारण न० ६त० । चिह्नधारणे तप्तमुद्रादिवैष्णवचिह्नधारणे च । भृ-णिच् भावे युच् । अङ्कधारणाधत्व स्त्री ।

अङ्कन न० अङ्क-करणे ल्युट् । अङ्कनसाधनद्रव्ये गदा(गनीति) प्रसिद्धे । भावे ल्युट् । चिह्नकरणमात्रे न० । "अन्यत्राङ्कनलक्ष्मभ्यां वाहनिर्मोचने" इति स्मृतिः । अङ्कनं त्रिशूलादिचिह्नकरणमिति प्रा० रघु० । भावे युच् । अङ्कनाधत्व स्त्री ।

अङ्कपादव्रत न० व्रतभेदे ।

अङ्कपालि स्त्री पा-आलि ६त० वा ङीप् । क्रोडप्रान्ते । अङ्केन पालयतीति पालि-इ ३त० । उपमातरि (धाइमा) इति प्रसिद्धायाम् । अङ्कस्य पालिरिव । आलिङ्गने ।

अङ्कपाली स्त्री अङ्कपालि+ङीप् । अङ्कपालिशब्दार्थे वेदिकाख्यगन्धद्रव्ये च ।

अङ्कपाश पु० अङ्कः पाश इव बन्धनेनेव पातनहेतुत्वात् । लीलावत्यां एकाद्यङ्कानां स्थानविनिमयेन संख्याभेदबोधके, तदैक्यसंख्यासङ्कलनोपयोगिनि च प्रक्रियाभेदे "स्थानान्तमेकादिचयावधातः संख्याविभेदो नियतैः सुरङ्कैः । भक्तोऽङ्कमिलाङ्कसमासनिघ्नः स्थानेषु युक्तोमितिसंयुतिः स्यादिति"। यथा १, २, एतयोरङ्कयोः स्थानद्वये, स्थितिः तयोः स्थानविनिमये कति भेदा, भेदभिन्नानाञ्च संख्यैक्यमितिः केति १ च पृष्टे अनेनैव प्रकरणेन १२, २१, एतौ द्वौ भेदौ ऐक्याङ्कमितिः" २१ इत्युत्तरं तज्ज्ञानेनैव भवति । "न गुणो न हरो न क्षतिर्न धनः पृष्टस्तथापि दुष्टानाम् । गर्वितगणकवटूनां स्यात् पातोऽवश्यमङ्कपाशेऽस्मिन्निति" लीलावतौ।

अङ्कपूरण न० अङ्कयोस्तत्संख्ययोः पूरणं गुणनम् । अङ्कयोर्गुणने । [परितोऽङ्कस्य बन्धनम् ।

अङ्कबन्ध पु० अङ्कस्य बन्धः । क्रोड़बन्धे । यथा पर्य्यङ्कबन्धः ।

अङ्कलोड्य पु० अङ्केन लोड्यतेऽसौ लोड-ण्यत् ७त० । चिह्नोड़टचे ।

अङ्कलोप पु० अङ्कस्य वियोज्यसंख्यायाः दृष्टसंख्यातो लोपः वियोजनम् । दृष्टसंख्यातः कस्याचित् संख्यायाः वियोजने यथा नवाङ्कसंख्यातः पञ्चाङ्कसंख्यायाः वियोजने चतुःसंख्याऽवशिष्यते । एवम् अन्यत्रापि ।

अङ्कस् न० अनच-असुन् कुत्वम् । चिह्ने, शरीरे च । "पवामङ्कांस्यन्वापनीफलदिति" वेदः ।

अङ्कस न० अङ्कोऽस्त्यस्य अच् । चिह्नयुक्ते । "श्येनस्येव ध्रजतोऽङ्कसं परीति" यजुः । अङ्कसं वस्त्रमाप्रपदिकमिति ।

अङ्काङ्क न० अङ्के मध्ये अङ्काःगतपत्रादिचिह्नानि यस्य । जले "आपो वै अङ्काङ्काः अन्द" इति, अङ्काङ्कं अन्द इति च श्रुतिः । [कारैरङ्कितं मेघवाहनमिति" वह्निध्यानम् ।

अङ्कित त्रि० अङ्क-क्त । चिह्नयुक्तीकृते, "स्वाक्षरस्वाक्षरैरङ्कितं पत्रमिति" ।

अङ्किन् त्रि० अङ्कः आलिङ्गनस्थानत्वेन अस्त्यस्मिन् अङ्क+इनि । अङ्केनाश्लिष्ट वादनीये मृदङ्गादिवाद्यभेदे, क्रीड़विशिष्टे च । "पाशावामङ्किनो ये चरन्तीति" वेदः ।

अङ्किनी स्त्री अङ्कानां चिह्नानां समूहः खलादि० इनि ङीप् । चिह्नसंघाते । अस्त्यर्थे इनि ङीप् । अङ्कयुक्तस्त्रियाम् ।

अङ्कुर अस्त्री० अङ्क-उरच् । बीजादभिनवोत्पन्ने, क्षितिमासद्विद्य जाते तृणवृक्षादौ "श्रमाम्बुकणकेषु तृणाङ्कुरेष्विति" रघुः । जले, गोत्रोत्पत्तिसाधनात् रुधिरे, लोमनि च सकुले च "चूताङ्कुरास्वादकषायकण्ठ" इति कुमा० ।

अङ्कुरक पु० अङ्क्यते तृणादिना सञ्छाद्यतेऽसौ अङ्क-उरच् ततः क । पश्वादीनां वासस्थाने (वाड़ा इति) ख्याते ।

अङ्कुरित त्रि० अङ्कुरः जातोऽस्य ता० इतच् । जाताङ्कुरे ।

अङ्कुश अस्त्री० अङ्क-उशच् । हस्तिचालनोपयोगिनि वक्राग्रे लौहास्त्रभेदे (डाङश) इति ख्याते । "तिरोगतं साङ्कुशसङ्कटन्निर" इति माघः । "सन्निवेश्य कुशावत्यां रिपुनागाङ्कुशं कुशमिति" रघुः । प्रतिबन्धे च "निरङ्कुशाः कवय इति" मल्लिनाथः पक्षा० फक् । आङ्कुशायनः अङ्कुशचिह्नटस्थाने त्रि० ।

अङ्कुशग्रह पु० गृह्णातीति ग्रह-अच् ६त० । अङ्कुशधारिणि निषादिनि । "अन्येतुकामोऽवमताङ्कुशग्रह" इति माघः ।

अङ्कुशदुर्द्धर पु० दुःखेन धार्य्यते व्यवस्थाप्यते दुर्-धारि-खल् दुरः अङ्कुशेन-दुर्द्धरः ३त० । दुर्दान्तहस्तिनि ।

अङ्कुशधारिन् पु० अङ्कुशं धारयति धारि-णिनि । हस्तिपालके ।

अङ्कुशमुद्रा स्त्री अङ्कुशाकारा मुद्रा । "अङ्गुष्ठौ च मध्यमां कृत्वा तस्याग्रपर्व्व मूलतः । तर्ज्जनीं किञ्चिदाकुञ्चेत् सा मुद्राःङ्कुशसंज्ञितेति" तन्त्रोक्ते तीर्थावाहनाद्यर्थं कल्पिते अङ्गुलिसन्निवेश रूपेमुद्राभेदे ।

अङ्कुशी स्त्री अङ्कुशः चित्तनागरोधनोपायः विवेकः अस्त्यस्याः अच् गौ० । जैनोयदेवीभेदे । [तृणवृक्षादौ ।

अङ्कूर पु० अङ्क-खर्जूरादित्वात् अरच् । अभिनवोत्पन्ने

अङ्कूष अस्त्री० अङ्क-अषच् । हस्तिचालनोपयोगिनि वक्राग्रे लौहमयेऽस्त्रभेदे (डाङश) ।

अङ्कोट(ठ) (ल) पु० अङ्क्यते लक्ष्यते कीलाकारकण्टैः । अङ्क-ओट (ओठ) (ओल) वा । पीतवर्णसारे गन्धयुक्तपुष्पे दीर्घकण्टकयुक्ते रक्तवर्णफले (आकोड) इति ख्याते वृक्षे ।

अङ्कोलक पु० अङ्कोल+स्वार्थे-क । आकोड इति ख्याते वृक्षे ।

अङ्कोलिका स्त्री वल-अच् नि० संप्रसारणे-उलः अङ्काय तदानाय उलः स्वार्थे क । आलिङ्गनक्रियायाम् । [विषभेदे ।

अङ्कोलसार पु० अङ्कोलस्य सारः ६त० । अङ्कोटवृक्षजाते

अङ्कोल्लिका स्त्री । पृ० साधुः । अङ्कोठवृक्षे ।

अङ्क्य पु० अङ्के क्रोड़े स्थापयित्वा वाद्यतेऽसौ यत्, अङ्के साधुः अङ्क+य वा । "सार्द्धतालत्रयायामः चतुर्हस्तः शुभाननः । हरीतक्याकृतिर्यः स्यादङ्क्योऽङ्के स हि वाद्यते इत्यतः" क्रोड़े स्थापनपूर्व्वकं वादनीये मृदङ्गादौ । अङ्कनीये त्रि० ।

अङ्क चिह्नयुक्तकरणे अदन्तचुरादि उभय० सकर्म्मकः सेट् । अङ्कयति ते आङ्कि-ग-त्त । मतान्तरे अङ्कपयति ते ।

अङ्ग न० अम-गत्यादौ वा० गन् । चित्ते (अङ्गजः कामः) "हिरण्यगर्भाङ्गभुवमिति" देहे "हस्तेनस्पर्शं तदङ्गमिन्द्रं" इति कुमा०। अङ्गशब्दस्य चेष्टावदन्यावयविरूपावयविवाचित्वेऽपि तदवयवेऽपि हस्तपादादौ व्यवहारः अवयवत्वसामान्यात् तेषाञ्च प्रत्यङ्गशब्देनापि व्यवहारः। तत्राङ्गशब्दस्य देहार्थत्वे तदीयस्वरूपं तदवयवभेदाश्च श्रुतौ दर्शिताः। यथा "शुक्रशोणितं गर्भाशयस्थमात्मप्रकृतिविकारसंमूर्च्छितं गर्भ इत्युच्यते तञ्च चेतनावस्थितं वायुर्विभजति, तेज एनं पचति, आपः क्लेदयन्ति, पृथिवी संहन्त्याकारं विवर्द्धयति। एवं विवर्द्धितः स यदा हस्तपादजिह्वाघ्राणकर्णनितम्बादिभिरङ्गैरुपेतस्तदा शरीरमिति संज्ञां लभते तञ्च षडङ्गं शाखाश्चतस्रो, मध्यं पञ्चमं, शिर इति।

"अतःपरं प्रत्यङ्गानि वक्ष्यन्ते। मस्तकोदरहृन्नाभिललाटनासाचिबुकवस्तिग्रीवा इत्येता एकैकाः। कर्णनेत्रनासाभ्रूअंसगण्डकक्षस्तनहृषपार्श्वस्फिग्जानु-बाहूरुप्रभृतयो द्वे द्वे, विंशतिरङ्गुलयः। स्रोतांसि च वक्ष्यमाणानि। एष प्रत्यङ्गविभाग उक्तः। तस्य पुनःसङ्ख्यानम्। त्वचः कला धातवो मला दोषा यकृत्प्लीहानौ फुप्फुस उण्डुको हृदयमाशया अन्त्राणि वृक्कौ स्रोतांसि कण्डरा जालानि कूर्चा रज्जवः सेवन्यःसङ्घाताः सिमन्ता अस्थीनि सन्धयः स्नायवः पेश्यो मर्म्माणि शिरा धमन्यो योगवहानि स्रोतांसि च॥

त्वचः सप्त। कलाः सप्त। आशयाः सप्त। धातवः सप्त। सप्त शिराशतानि। पञ्च पेशीशतानि। नव स्नायुशतानि। त्रीण्यस्थिशतानि। द्वे दशोत्तरे सन्धिशते। सप्तोत्तरं मर्म्मशतम्। चतुर्विंशतिर्धमन्यः। त्रयो दोषाः, त्रयो मलाः। नव स्रोतांसीति समासः इति"॥

अवयवे "शेषाङ्गनिर्म्माणविधौ विधातुरिति" कुमा०। अपाङ्ग इति।

उपाये, "सर्व्वकार्य्यशरीरेषु सङ्गाङ्गस्कन्धपञ्चकमिति" "मन्त्रो योधदवाधीरः सर्व्वाङ्गैः संहतैरपीति" च माघः। प्रधानोपयोगिनि उपकरणे, "फलवत्सन्निधावफलं तदङ्गमिति" मीमांसा। "प्रधानस्याक्रिया यत्र स्याङ्गं तत् क्रियते पुनः तदङ्गस्याक्रियायान्विति" स्मृतिः। "हस्यस्वरयपादातं सेनाङ्गं स्याच्चतुष्टयमिति" सम्बोधने अव्य०। "त्वमङ्ग यक्षाः पतिरज्झि तक्षन्" इति नैषधम्। अङ्गमस्यास्ति अच्। अङ्गवति "येनाङ्गविकार इति" पा० अङ्गस्याङ्गिन इत्यर्थः अग्निके च त्रि०। जन्मादिलग्ने न० "अङ्गाधीशः स्वगेहे बुधगुरुकविभिः संयुतो वीक्षितो वेति" जातकम्। देशभेदे पु०। तस्य विवरणम् अङ्गाधिपशब्दे। "अङ्गेषु वङ्गेषु खसेषु योज्या" इति "अङ्गवङ्गखसेभ्येति" च ज्योतिषम् अङ्गानां राजा आङ्गः बहुषु अङ्गाः। अङ्गदेशे भवः अण्। आङ्गः। बहुषु अङ्गाः। अङ्गेन देहेन निर्वृत्तः ठक्। आङ्गिकः। अङ्गदेशस्तद्राजानो वा भक्तिरस्य अण् आङ्गः। अङ्गस्येदम् अङ्गीयः। "यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गमिति" पाणिनिपरिभाषिते प्रत्ययावधिभूते शब्दभेदे, "दृषः घीध्वं लुङ्लिटां धोऽङ्गादिति" पा०। अङ्गादागतम् अण्। आङ्गः अङ्गनिमित्ते कार्य्ये "वर्णादाङ्गं बलीय इति" परिभा०। उपकरणानि च यथा यथस्तद्यानि दिङ्मात्रमत्रोच्यते। तत्र "स्वाम्यमात्यसुहृत् कोषो राष्ट्रं दुर्गं बलानि च राज्याङ्गानीत्युक्तानि" "स्वाम्यमात्यौ पुरं राष्ट्रं कोषदण्डौ सुहृत्तथा। सप्त प्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते" इत्युक्तानि राज्याङ्गानि। दर्वादौ च प्रयाजादीनि, वैदिककर्म्मणाञ्च तत्तत्क्रियाकलापाः तत्तद्द्रव्याणि चाङ्गानि "साङ्गाद्धि वैदिककर्म्मणः फलावश्यम्भाव इति" मीमा०। वेदस्य व्याकरणादीनि अङ्गानि, "शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसाञ्चितिः। ज्योतिषामयनञ्चैव वेदाङ्गानि षडेव तु इति"। एतेषाञ्च लक्षणादिकमग्रे वक्ष्यते। एतेषां वेदार्थज्ञानोपयोगित्वादङ्गत्वम् अतएव श्रुतौ "ब्राह्मणेन निष्कारणः षडङ्गः सरहस्योवेदोध्येतव्य" इत्युक्तम् शिक्षायां तेषां वेदार्थज्ञानोपयोगित्वा दङ्गत्वं दर्शितम् यथा

"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते। ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते। शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतं तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते इति" अतो वेदार्थज्ञानोपयोगितया एतेषां ग्रन्थानां वेदाङ्गत्वम्। "द्वे विद्ये वेदितव्ये" इत्युपक्रम्य "पराचापरा च तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दोज्योतिषमिति सा परा ययाक्षरमधिगम्यते" इति श्रुतौ व्याकरणादीनामपरविद्यात्वेन कीर्त्तनं "तेषाञ्च साधनभूतधर्म्महेतुत्वात् षडङ्गसहितानां धर्म्मसाधनत्वेनापरविद्यात्वमिति" भाष्ये उक्तम्। आयुर्वेदादीनामुपवेदत्वं न्यायादीनामुपाङ्गत्वं यथा च तेषां तथात्वं तथा तत्तच्छब्दे दर्शयिष्यते।

तथा ज्योतिषस्याङ्गानि नानाविधानि तत्र प्राधान्यात् त्रिविधानि यथोक्तं वराहसंहितायाम्। "ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम् तत्कात्स्न्र्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता। स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ होरान्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः" इति।

नरपतिजयचर्य्यायान्तु षड्विधान्याङ्गानि समासेनोक्त्वा तेषां विस्तारो दर्शितो यथा

"स्वरचक्राणि चक्राणि भूबलानि बलानि च। ज्योतिषं शकुनञ्चैव षडङ्गान्यत्र वच्म्यहम्॥ यामलेषु च सर्वेषु यान्युक्तानि स्वरोदये। विंशतिःस्वरचक्राणि तन्नामानि वदाम्यहम्। मात्रावर्णौ ग्रहोजीवौ राशिर्भं पिण्डयोगकौ। द्वादशाब्दोद्भवञ्चक्रं वर्षायनर्तुमासकम्॥ पञ्चाङ्गं नाडिकं चक्रन्त्रिंशद्वारर्क्षयोगकम्। तत्कालेन्दुफलङ्गाक्षस्वन्देहोद्भवन्तथा॥ (इति स्वरचक्रनामानि)। पूर्व्वशास्त्रेषु शास्त्रेषु मया ज्ञातानि यानि च चतुरशीतिचक्राणि तेषां नामानि वच्म्यहम्॥ एकाशीतिपदञ्चक्रं शतपत्रं नवांशकम्। छत्रं सिंहासनं चक्रं कूर्म्मपञ्चविधात्मकम्॥ भद्रैयं नगरं छत्रं गृहकूर्म्मञ्च पञ्चकम्। पद्मचक्रं फणी ज्ञाख्यं राङ्कालानलन्त्रिधा॥ सूर्य्यकालानलं चक्रं चन्द्रकालानलन्तथा। घोरकालानलं प्रोक्तं गूढकालानलं बलम्॥ राशिसूर्य्यसमायोगे चक्रं कालानलं मतम्। संघट्टकं सप्त ज्ञेयं सप्त कालानलानि च॥ तिथिवारञ्च नक्षत्रं त्रिधा चैव कुलाकुलम्। कुम्भचक्रं द्विधा प्रोक्तं राशिनक्षत्रसम्भवम्॥ प्रस्तारञ्चक्रवेधाख्यैः प्रभेदैस्तु चरन्त्रिधा। भूचरं खेचरं, पान्थं नाडीचक्रं त्रिधा मतम्॥ कालचक्रं फणिइन्दं सूर्य्याख्यं चन्द्रजन्तथा। कविचक्रं द्विधा प्रोक्तं स्थानस्याभ्यृक्षपूर्व्वकम्॥ खलकाख्यं द्विधा चैव ऋक्षिकास्थान भादिकम्। कोष्ठचक्राष्टकं प्रोक्तञ्चतुरस्रादिभेदतः॥ गजमत्तं रथं व्यूहं कुन्तं खड्गं छुरीम्बतुः। सौरिं सेवां नरस्त्रिरुग्भागांशदृष्टिकम्॥ सप्तरेखोद्भवञ्चक्रं पञ्चरेखेन्दुभास्करम्। त्रिविध मालिकाचक्रं विजयं श्येनतोरणम्॥ अष्टिलाङ्कलवीजोग्निवर्णाख्यं सप्तनाडिकम्। चक्रं संवत्सरञ्चैव स्थानचक्रं तथैव च॥ एतानि सर्वचक्राणि ज्ञात्वा युद्धं समाचरेत्। जयेदिह न सन्देहो शक्रतुल्योऽपि भूभुजि॥ (इति चक्रनामानि)। स्वरोदयेऽयं चक्रेऽयं शत्रुपक्षं समोऽधिकः। तत्र युद्धे बलं ज्ञेयं भूबलैर्विजयार्थिनाम्॥ तेषां नामान्यहं वच्मि ख्यातानां ब्रह्मयामले चतुरशीतिसंख्यानां बहुलेन जयी रणे॥ उड्डी जालन्धरी पूर्णा कामकीलेकवीरका। गिलिम्बी च महामारी चेलपाली च बंगजा॥ रुद्रकालानला काली कालरेखा निरामया। जयलक्ष्मीर्महालक्ष्मीर्जया विजयभैरवी॥ बाली योगेश्वरी चण्डी जानुबन्धककर्त्तरी। शार्दूली सिंहली तन्वी महामाया महेश्वरी॥ देवकोटी शिवा शक्ती धूम्रवाणा वराटिका। त्रिसण्डा मत्तरी धर्म्माऽमृताष्टाऽजया जया॥ दुर्मती प्रवरा गौरी काली नरहरी बला। खेचरी भूचरी गुह्या द्वादशी विदिक्केवला॥ त्रैलोक्यविजया शौरी करालो वड़वापरा। रौद्री च शिशुमातङ्गी अभेद्या दहनी मता॥ बड़बला वर्गभूमी कपाली चानिलानला। चन्द्रार्कबिम्बभूमी च ग्रहभूराशिलग्नगा॥ राङ्कालानलभूमी स्वरभूमि र्द्विधा मता। रुद्रस्त्रिमासिकश्चैव राहुचाष्टविधस्तथा॥ चन्द्रः सप्तविधः सूर्य्यश्चतुर्द्धा योगिनी त्रिधा। कालबलन्त्रिभेदञ्च तिथिनक्षत्रवारजम्॥ इमानि भूबलान्यत्र ज्ञात्वा यः प्रविशेद्रणे। अरयस्तस्य नश्यन्ति मेघा वातहता यथा॥ (इति भूबलानि)। शत्रोः समाधिके नाग्नि स्वरैश्चक्रैश्च भूबलैः। स्थानसेनाधिके शत्रौ बलविज्ञानसंयुते॥ अभङ्गे चाप्यभेदे च दुःसाध्ये दुर्जये रिपौ। जयोपायमहं वच्मि मन्त्रयन्त्रादिकं बलम्॥ रणाभिषेचनं दीक्षा रणार्चा रणकङ्कणम्। वीरपट्टं रणेपट्टं जयपट्टस्य बन्धनम्॥ मेखलाकवचं न्यासं मुद्रारक्षां च कङ्कणम्। औषधन्तिलकं धरुठागुटिकां च कपर्द्दिकाम्॥ योगेघटितशस्त्राणि शस्त्ररक्षाय मोहनम्। शस्त्रलेपांश्च विविधान् वाणानाम्भिच्छबन्धनम्॥ शस्त्रसङ्कुलखड्गां सुरजम्भस्कधारणम्। मारणं मोहनं स्तम्भविद्वेषोच्चाटनं वशम्॥ पताकापिच्छकं यन्त्रात्परविद्याविनाशम्। शान्तिकं निजसैन्यस्य सर्वोपद्रवनाशनम्॥ बलान्येतानि योज्ञात्वा संग्रामं कुरुते नृपः। असाध्यस्तस्य नैवास्ति शत्रुःको पि महीतले॥ (बलाबलनामानि)। गणितं व्यवहारञ्च होराज्ञानं परिस्फुटम्। त्रिस्कन्धं ज्योतिषं वच्मि जयचर्य्यां स्वरोदये॥ खेचरानयनं स्पष्टं पञ्चाङ्गं तिथिसाधनम्। उदयास्तमनञ्चक्रक्रान्तिं वच्मि यथामति॥ नतोन्नतप्रमाणञ्च भावसन्धिप्रसाधनम्। ग्रहाणां षड्बलं वच्मि राशिभावबलान्वितम्॥ राशिसंज्ञाप्रभेदञ्च खेचराणां तथैव च। नृणां जन्मफलं वच्मि ऋक्षराश्यंशलग्नजम्॥ फलञ्चद्राक्योगानां ग्रहाणां स्वोच्चनीचकम्। आयुर्द्दायं दशाश्चैव तासाङ्कालप्रवेशनम्॥ तत्राङ्गन्तु ग्रहानृक्षद्रान्द्रशान्तर्द्दशयोः

फलम् । यद्दग्गोटकं स्पष्टं तच्छाद्दिनफलं वदेत् ॥ ताजिकाब्जान्कलग्नस्य साधनञ्च परिस्फुटम् । वर्षमासदिवालग्ननक्षत्रानयनतत्फलनतः ॥ आयोत्पत्तिं तिथा वक्ष्ये विषुमध्ये दिनेटकम् । दिनमानं दिनं भुक्तसदयभं घटीषु च सिद्धच्छायातिथिघ्नं दृष्टमासप्रविंशति । लग्नोदयान्स्वदेशीयान् तेभ्योलग्नस्य साधनम् ॥ लग्नमानन्तथा होरा-द्रेष्काणं सप्तमांशकम् । नवांशं द्वादशं त्रिंशम् उदये सप्तसाधनम् ॥ तिथेः प्रकरणं वक्ष्ये वारनक्षत्रयोगजम् । योगाख्यं करणाख्यञ्च मुहूर्त्तान् संक्रमोद्भवम् ॥ चन्द्रतारा-बलञ्चैव पक्षभेदेन संयुतम् । शुभाशुभांश्च योगांश्च तिथि-वारर्क्षयोगजान् ॥ सिद्धं संवर्त्तकञ्चैव तथा वारशुभा-शुभम् । अवमन्त्रिदिनं वक्ष्ये ततो योगन्त्रिपुष्करम् ॥ यमघण्टं यमदंष्ट्रां क्रकचार्गलपातकान् । कुमारन्नरणं द्वन्द्वं मूलातिमूलयोगिनीम् ॥ वारमूलन्तथा कालं काल-वेलां परिस्फुटम् । कालहोरार्द्धयामञ्च कुलिकद्वयटकद्वयम् ॥ फलं यद्दग्ध्रिष्णस्य वत्सभार्गवयोः फलम् । दग्धांशान्ह-र्शां स्थूलां वक्रातिचारयोः फलम् ॥ पीडास्थानानि खेटानां यद्दावस्थां तथैवच । भावफलं सन्धिफलं युता-वेधसुपग्रहान् ॥ गोचरक्रमपिण्डे यद्गोचरं गोचरव्यधम् । विवाहञ्च प्रतिष्ठाञ्च दीक्षायात्राप्रवेशनम् ॥ वास्तुदीपो-द्भविन्यासं कालविंशोपकांस्तथा । जलयोगार्घकाख्यञ्च वर्षमासदिनार्द्धजम् ॥ तिथ्यादिपञ्चकं खेटक्षुन्नक्षत्रकाल सम्भवम् । अवस्थाद्यष्टसप्तघ्नं लोकचिन्तां वदाम्यहम् ॥ अङ्गस्पन्दादि सर्वाणि कालचिह्नानि यानि च । दुष्ट-रिष्टान्यहं वक्ष्ये तथा तेषाञ्च शान्तिकम् ॥ ज्योतिरङ्गमिदं सर्वं ये जानन्ति मनीषिणः । दीपवत्तान्विजानीयान्मोहा-न्धकारनाशने" इति ॥

गर्गसंहितायां तु चतुर्विंशतिसंख्यानि अङ्गानि उपा-ङ्गानि चत्वारिंशदिति ज्योतिरङ्गानि चतुःषष्टिविधान्युक्तानि यथा "यथैव वेदस्याङ्गानि षडङ्गानि मनीषिभिः । चतुःषष्टि-स्तथाङ्गानि ज्योतिषस्य विदुर्बुधा" इत्युपक्रम्य गणितज्ञान-पूर्व्वकं तज्ज्ञानमावश्यकमिलुक्त्वा तद्विभागा दर्शिता यथा "तस्मात् कृत्स्नमधीत्यापे वेदाङ्गं कालसाधनम् । ज्योति-षामयनाङ्गानि चतुःषष्टिगतः पठेत् । वेषामग्रे कर्मशुद्धौ चन्द्रलग्ने त्वनन्तरम् । नक्षत्रकेन्द्रभे चैव द्विवर्गः प्रथमः स्मृतः । राहौ दृङ्मस्तके शुक्रे, धूमकेतौ शनैश्चरे । अङ्गारके बुधेऽर्के च चारानष्टौ ततः पठेत् । चक्रेष्वन-न्तरं चक्रं सूर्यचक्रं तथैव च । ऋक्षचक्रं वातचक्रं च चक्राङ्केषु चतुष्टयम् । वास्तुविद्याङ्गविद्या च वायसानां तथैव च । ज्ञेयास्त्रिस्कन्धा विद्यैता दृङ्मर्गमताः शुभाः । स्वातीयोगं तथाषाढारोहिण्ययोगमेव वा । एतान् कृत्स्नान् विजानीयात् भयोगान् वै विशेषतः । रहस्यं चेतीहाङ्गानि चतुर्विंशतिरीरिताः । अतऊर्द्धं प्रवक्ष्यामि उपाङ्गानीह नामतः । अनुपूर्व्याभिधानेन चत्वारिंशद्वि नामतः । यद्दकोणो यद्दयुद्धं यद्दयुद्धाटकं तथा । कृत्स्नं यद्दे-श्वराणाञ्च यद्दपाकास्तथैव च । विषघात्याग्निवर्षाश्च सेना-व्यूहस्तथैव च । मयूरचित्रोपनिषदुपहारप्रणामयः । तत्वानिके तुलाकोणोद्भवन्तत्वोपधारयेत् । सर्व्वभूतहितां-चैव तथा पुष्पलतां विदुः । उपानद्दोस्तथा छेदोवस्त्र-च्छेदस्तथैव च । कृत्स्नोभुवनकोशश्च गर्भाधानादिकं तथा निर्घातो भूमिकम्पश्च परिवेषास्तथैव च । अद्भुत-भावाः सन्त्येवं तथोल्काश्चोपधारयेत् । सांवत्सरस्तथा युक्ताः शास्त्राणां देशकोभवेत् । बलाबलं तु विज्ञेयं वङ्क यत्र बलं वदेत् । चतुःषट्यङ्गमेतत्तु संवत्सरसदाहृतमिति" । एवञ्च गणितादित्रयं प्रधानाङ्गत्वात् स्कन्धसंज्ञम् अन्यानि तु अप्रधानान्यङ्गानीति क्वचित् संक्षेपत उक्तानि, क्वचिच्च विस्तरत इति विशेषः । गर्गोक्तविभागाभिप्रायेणैव सुद्रा-राक्षसे "कृतपरिश्रमोऽस्मि चतुःषष्ठ्यङ्गे ज्योतिषे" इति सूत्रधारवाक्यम् । बृहत्संहितायां तु गर्गोक्तान्येव प्रायशो-ऽङ्गानि प्रदर्शितानि तेषां स्वरूपादिकं तत्तच्छब्दे वक्ष्यते ।

दृश्यकाव्ये मुखप्रतिमुखगर्भविमर्शोपसंहृतिरूपसन्धिपञ्चकस्य चतुःषष्टिरङ्गानि यथोक्तं साहित्यदर्पणे "उपक्षेपः परिकरः परिन्यासो विलोभनं । युक्तिः प्राप्तिः समाधानं विधानं परि-भावना ॥ उद्भेदः करणं भेदः एतान्यङ्गानि वै मुखे"(इति मुखस्य १२) "विलासः परिसर्पश्च विधूतं तापसं तथा । नर्म्म नर्म्मद्युतिश्चैव तथा प्रशमनं पुनः ॥ विरोधश्च प्रतिमुखे तथा स्यात् पर्य्युपासनम् । पुष्पं वज्रमुपन्यासो वर्षसंहार इत्यपि" (इति प्रतिमुखस्य १३)॥ "अमृताहरणं मार्गो रूपोदाहरणं क्रमः । संग्रहश्चानुमानञ्च प्रार्थनाभिप्रिये च ॥ त्रोटका-धिबलोद्देगा गर्भे द्युद्भेदस्तथा (इति गर्भस्य१२)। "अप-वादोऽथ सम्फेटो व्यवसायो द्रवो द्युतिः । शक्तिः प्रसङ्गः खेदश्च प्रतिषेधो विरोधनम् ॥ प्ररोचना विमर्षे स्यादादानं क्षेपणं तथा (इति विमर्षस्य १३)। "सन्धिर्विबोधो यत्नं निर्णयः परिभाषणम् । कृतिः प्रसाद आनन्दः समयो-ऽप्युपगूहनम् ॥ भाषणं पूर्व्ववाक्यञ्च काव्यसंहार एव च । प्रशस्तिरिति संहारे ज्ञेयान्यङ्गानि नामतः" (उप-

संहारस्य १४) ॥ चतुःषष्टिविधं हेतदङ्गं प्रोक्तं मनीषिभिः । कुर्यादनियते तस्य सम्भावपि निवेशनम् । रसानुगुणतां वीक्ष्य रसस्यैव हि मुख्यता । इत्यरिच्छेदे

अङ्गकर्मन् न० अङ्गस्य कर्म मर्दनादि परिकर्म । मर्दनादिदेहसंस्कारे व्यापारे ।

अङ्गग्रह पु० अङ्गस्य रोगादिना ग्रहः ६त० । देहवेदनायाम् ।

अङ्गज पु० अङ्गात् जायते जन-ड । पुत्रे दुहितरि स्त्री । "अङ्गादङ्गं सम्भवति पुत्रवद्दुहिता स्मृतेति" स्मृतिः । देहजातमात्रे त्रि० । रुधिरे न० । रोगे पु० । लोमनि न० । "तवोत्तरीयं करिचर्म साङ्गजमिति" भार० । अङ्गजन्मादवोऽयुक्तार्थे । अङ्गं मनः तस्मात् जाते कामे पु० ।

अङ्गज्वर पु० अङ्गमङ्गम् अधिष्ठत्य ज्वरः । राजयक्ष्मरोगे । "निरवोचमहं यक्ष्म अङ्गज्वरमिति"-वैद्यकम् ।

अङ्गण(न) न० अगि-गतौ अङ्गते स्पृहाद्यिः स्त्रीत्व गम्यते अत्र ल्युट् पृ० वा णत्वम् । अजिरे, चत्वरे, (उठान) इति ख्याते स्थाने "अजनि पङ्कुरपाङ्गनिजाङ्गणपङ्किरुहेऽपीति" नैषधम् । दन्त्यनान्तत्वमपि । "प्रकटाङ्गनोपभोगाप्यखण्डितचरित्रेति" काद० । अङ्गनं चत्वरमङ्गना स्त्री चेति तदर्थः । करणे ल्युट् । याने ।

अङ्गति पु० अङ्गति यात्यनेन अगि-करणे अति । वाहने स्त्रीत्वमपीत्येके वा ङीप् । अङ्गते गम्यते सेवादिना कर्मणि अति । ब्रह्मणि, अग्नौ च । कर्त्तरि अति । अग्निहोत्रिणि पु० ।

अङ्गद न० अङ्गं दायति शोधयति दै-क । (ताड़, बाजु) इति प्रसिद्धे बाहुभूषणे । वालिपुत्रे-वानरे पु० । सच किष्किन्ध्याधिपस्य वानरराजस्य वालिनस्तारागर्भजः पुत्रस्तच्चरितं रामायणे सुन्दरकाण्डाकाण्डयोर्विस्तीर्णम् । अङ्गदानकर्त्तरि त्रि० । दक्षिणदिग्गजकरिण्यां स्त्रीतेऽके । अङ्गं ददाति समर्पयति दा-क । अङ्गदानकर्त्तरि त्रि० योषिति स्त्री ।

अङ्गना स्त्री प्रशस्तमङ्गमस्ति अस्याः अङ्ग+न । अङ्गसौष्ठववत्यां योषिति, योषिन्मात्रे च, "अङ्गना वामनस्य स्यात्" इति वैजयन्तीः वामनदिग्गजयोषिति च ।

अङ्गनाप्रिय पु० प्री-क ६त० । अशोकवृक्षे तत्पुष्पेण हि स्त्रियः स्वाङ्गं भूषयन्तीति लोकसिद्धम् । योषित्प्रियमात्रे तु त्रि० । दक्षिणदिग्गजे वामने पु० ।

अङ्गदनिर्व्यूह अङ्गदस्य केयूरस्य निर्व्यूह इव । केयूरशीर्षस्थे चूड़ाकारेऽवयवे ।

अङ्गन्यास पु० अङ्गेषु हृदयादिषु मन्त्रभेदस्य न्यासः । मन्त्रविशेषस्य उच्चारणपूर्व्वकं करस्पर्शेन कर्त्तव्ये तन्त्रोक्ते न्यासभेदे "अङ्गन्यासं करन्यासं बीजन्यासमथैव चेति" तन्त्रम् ।

अङ्गपालि स्त्री अङ्गं पाल्यते सम्बध्यतेऽत्र अङ्ग-पाल-इ । आलिङ्गने ।

अङ्गपालिका स्त्री अङ्गं देहं पालयतीति पालि-ण्वुल् ६त० । (धाइ मा) इति ख्यातायाम् उपमातरि । अङ्गपालनकारके त्रि० ।

अङ्गप्रायश्चित्त न० अङ्गस्य देहस्य शुद्ध्यर्थं प्रायश्चित्तम् । अशौचेषु पञ्चसूनाजन्यदुरितक्षयार्थं कार्य्ये "दशाहात्तु परं सम्यक् विप्रोऽधीयीत धर्म्मवत् । "दानञ्च विधिवद्देयं मनुभाषितारकं हि तदिति" स्मृत्युक्ते दानरूपे प्रायश्चित्ते ।

अङ्गभू पु० अङ्गात् देहात् मनसो वा भवति भू-क्विप् । पुत्रे, मनोजे कामे च देहमनोजातमात्रे त्रि० । "हिरण्यगर्भोऽङ्गभुवं मुनिं हरिः" इति भागः । नारदस्य तन्मनोजातत्वात् ब्रह्माङ्गभूत्वम् । अङ्गानामङ्गमन्त्राणां भूः । कृताङ्गन्यासे त्रि० । "ब्रह्माङ्गभूर्ब्रह्मणि योजितात्मेति" कुमा० ।

अङ्गमन्त्र पु० अङ्गेषु हृदयादिषु षट्सु न्यासो मन्त्रः । तन्त्रोक्ते षड्दीर्घभाजि मन्त्रभेदे ।

अङ्गमर्द्द पु० अङ्गं मर्द्दयति संवाहयति मृद-णिच् अच् ६त० । देहसंवाहके-सेवके । अङ्गमर्द्दनकारके त्रि० । भावे घञ् । देहमर्द्दने पु० ।

अङ्गमर्द्दक पु० अङ्गं मर्द्दयति मृद-णिच्-ण्वुल् ६त० । देहसंवाहके-सेवके । देहमर्द्दनकारके त्रि० ।

अङ्गमर्द्दिन् पु० अङ्गं मर्द्दयति मृद-णिच्-णिनि ६त० । अङ्गमर्दके सेवके । अङ्गमर्दनकारके त्रि० स्त्रियां ङीप् ।

अङ्गयज्ञ पु० अङ्गीभूतः प्रधानयज्ञोपकरणीभूतः यज्ञः । "नवयज्ञमखं कृत्वा ततः कर्म समाचरेदि"त्युक्ते कर्म्मालाङ्गे यज्ञयागादौ, दर्शाद्यङ्गे समिदाधानादौ च ते च "समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजति, इत्येवं पञ्चविधाः । एतेषाञ्च सकृदनुष्ठानेनैव तन्त्रन्यायेन प्रधानयागानामाग्नेयादीनामुपकारितेति मीमांसा । अङ्गयागादयोऽत्र । "अङ्गानाञ्चयाद्दीदभितः प्रधानमिति" भट्टिः ।

अङ्गरक्त न० ष० अङ्गेऽवयवे रक्तः रञ्ज-क्त ७त० । कम्पिल्लदेशजाते रक्तवर्णचूर्णवति (गुड़ारोचना) इति वणिजेषु वैद्येषु च प्रसिद्धे द्रव्यभेदे । ईव० रक्ताङ्गमात्रे त्रि० ।

अङ्गरचणी अङ्गं रच्यतेऽनया रच-करणे ल्युट् ६त० ङीप् ।

लौहजालभवे अङ्गरक्षणसाधने वर्म्मभेदे अङ्गरक्षणसाधनमात्रे त्रि० । भावे ल्युट् । देहत्राणे न० ।

अङ्गराग पु० अङ्गं रज्यतेऽनेन रञ्ज-करणे घञ् । अङ्गलेपने कुङ्कुमादौ । भावे घञ् । अङ्गस्य विलेपने पु० ।

अङ्गराज पु० अङ्गानां जनपदानां राजा अच् समा० । अङ्गदेशाधिपे, कर्णे च तत्कथा अङ्गाधिपशब्दे दृश्या । अङ्गरूपादयोऽत्र ।

अङ्गराज् पु० अङ्गेषु तन्नामकदेशेषु राजते राज-क्विप् ७त० । अङ्गदेशाधिपे कर्णे, तद्देशराजमात्रे च ।

अङ्गरुह न० अङ्गे रोहति रुह-क्विप् ७त० । देहजे लोमकेशादौ । "विरुङ्गराजाङ्गरुहैरिवायतैरिति" माघः ।

अङ्गलेप पु० अङ्गं लिम्पतेऽनेन लिप-करणे घञ् कुत० । अङ्गरागद्रव्ये । भावे घञ् ७त० । देहे चन्दनाद्यनुलेपने ।

अङ्गव न० अङ्गे स्रावयते याति अन्तर्भवति अतिशोषणात् सङ्कुचिताङ्गमिव भवति वा-ड ७त० । शुष्कफले ।

अङ्गविकल त्रि० अङ्गेन विकलः । देहव्याकुलतायुक्ते ।

अङ्गविकृति पु० वि-कृ-क्तिन् अङ्गस्य विकृतिर्बालनादिर्यस्मात् ५त० । (खगोनाडा) इति ख्याते अपस्माररोगे । कुत० । अङ्गस्य विकारे स्त्री ।

अङ्गविक्षेप पु० वि-क्षिप-घञ् अङ्गस्य विक्षेपः चालनं यत्र ब० । अङ्गुल्यादिविन्यासभेदेन देहचालनरूपे नृत्ते । तद्भेदादि यथा । "देहरक्ष्या प्रतीतो यस्तालमानसमाश्रयः । सविलासोऽङ्गविक्षेपोनृत्तमित्यभिधीयते । ताण्डवञ्च तथा लास्यं द्विविधं नृत्तमुच्यते । मेवलिबङ्गरूपञ्च ताण्डवं द्विविधं मतम् । अङ्गविक्षेप बाहुल्यं तथाभिनयवर्जनता । यत्र सा मेवलिसंज्ञा देशेति नाम लोकतः । छेदनं भेदनं यत्र बहुरूपा सुखावली । ताण्डवं बहुरूपत्वात् दारुणात् गलमर्दितः । कुरितं यौवतञ्चेति लास्यं द्विविधमुच्यते । यत्राभिनयभावाद्यो रसैराद्यैश्चतुष्टयैः । नायिकानायकौ रङ्गे नृत्तमन्कुरितं हि तत् । मधुरं बहुलीलाभिर्नवीभिर्यत्र नृत्यते वशीकरणविद्याभं तल्लास्यं यौवतं मतम् । गेयादुत्तिष्ठते वाद्यं वाद्यादुत्तिष्ठते लयः । लयतालसमारब्धं ततोनृत्यं प्रवर्त्तते इति सङ्गीतदामोदरः । भावे घञ् । अङ्गचालने ।

अङ्गविद्या स्त्री अङ्गरूपा व्याकरणादिशास्त्ररूपा विद्या ज्ञानसाधनम् । ज्ञानसम्पादके व्याकरणादिशास्त्रे । प्रश्नकाले अङ्गानां देहावयवानां चेष्टादिना शुभाशुभबोधके ज्योतिरङ्गे शास्त्रे च । सा च विद्या बृहत्संहितायां दर्शिता यथा "अथाङ्गान्यूर्वोष्ठसनद्वषणपादं च दशना भुजौ हस्तौ गण्डौ कचगलनखाङ्गुष्ठमपि यत् । समङ्गं कक्षांसश्रवणगुदसन्धीति पुरुषे, स्त्रियां भ्रूनासास्फिग्वलिकटिसुखेक्षाङ्गुलिचयम् ॥ जिह्वा ग्रीवा पिण्डिके पाणियुग्मं जङ्घे नाभिः कर्णपाली ललाटी । वक्षं पृष्ठं जत्रुजान्वस्थिपार्श्वं हृत्तालुस्तौ मेहनोरस्थिकं च ॥ नपुंसकाख्यं च शिरो ललाटम् आद्यादृक्षैरपरैरिरेषु । सिद्धिर्भवेज्ज्ञातु नपुंसकैर्नो रूक्षत्वतैर्भग्नकृतैश्च पूर्वैः ॥ स्पृष्टे वा चालिते वापि पादाङ्गुष्ठेऽधिरुग् भवेत् । अङ्गुल्यां दुःखितः शोकं शिरोधत्ते नृपाद्भयम् ॥ विप्रयोगसुरसि स्खलात्ततः कर्पटा कृतिरनर्घदा भवेत् । स्वातिमयाग्निरभिष्टह्य कर्पटं पृच्छतश्चरणपादयोजितः ॥ पादाङ्गुष्ठेन विलिखेद्भूमिं चेतोत्यचिन्तया । हस्तेन पादौ कण्डूयेत्तस्य दासीभवा च सा ॥ तालभूर्जपटदर्शनेऽशुकं चिन्तवेत्कवतुपास्थिभस्मगम् । व्याधिराश्रयति रज्जुजालकं वल्कलं च समवेक्ष्य बन्धनम् ॥ पिप्पलीमरिचशुण्ठिवारिदैर्लोध्रकुवलसनाम्बुजीरकैः । गन्धसांसिगतपुष्पया वदेत् पृच्छतस्तगरकेण चिन्तनम् । स्त्रीपुरुषदोषपीडितसर्वाध्वसुतार्थधान्यतनयानाम् । द्विचतुःषट्पदक्षितीनां विनाशतः कीर्त्तितर्दृष्टैः ॥ न्यग्रोधसधूकतिन्दुकजम्बूशाखवदरिजातिफलैः । धनकनकपुरुषबलोहांशुकरूप्योदुम्बराग्निरपि करगैः ॥ धान्यपरिपूर्णपात्रं कुम्भः पूर्णः कुटुम्बवृद्धिकरौ । गजगोशुनां पुरोधं धनयुवतिसुहृद्विनाशकरम् ॥ पशुहस्तिमहिषपङ्कजरजतव्याघ्रलेभेत सन्दृष्टैः । अविधननिवसनमलयज कौशेयाभरणसङ्घातम् ॥ पृच्छा वृद्धश्रावकसुपरिव्राड् दर्शने नृभिर्विहिता । मित्रद्यूतार्थभवा गणिकानृपसूतिकार्थकृता ॥ शाक्योपाध्यायार्हतनिर्ग्रन्थिनिमित्तनिगमकैवर्तैः । चौरचमूपतिवणिजां दासयोधापणस्थवध्यानाम् ॥ तापसे गौरिण्डके दृष्टे प्रोषितः पशुपालनम् । कृष्णं पृच्छकस्य स्रादुच्छृष्टौ विपन्नता ॥ इच्छामि प्रष्टुं मम पञ्चत्वार्थः समादिशेत्युक्ते । संयोगकुटुम्बोत्था लाभैश्वर्योन्नता चिन्ता ॥ निर्दिशेति गदिते जयाध्वगा, प्रत्यवेक्ष्य मम चिन्तितं वद । आशु सर्वजनमध्यगं त्वया दृश्यतामिति च बन्धुचौरजा ॥ अन्तःस्थेऽङ्के स्वजन उदितो बाह्यजे बाह्य एवं पादाङ्गुष्ठाङ्गुलिकलनया दासदासीजनः स्यात् । जङ्घे प्रेष्यो भवति भगिनी नाभितो वृत्तभार्या पार्श्वाङ्गुष्ठाङ्गुलिचयगतस्तर्जने

पुत्रकन्ये ॥ मातरं जठरे, मूर्द्धि गुरुं, दक्षिणवामकौ । बाहू भ्रातरौ तत्पत्नी स्पृष्ट्वैवं चौरमादिशेत् ॥ अन्तरङ्गमवलोक्य बाह्यप्रगस्पर्शनं यदि करोति पृच्छकः । क्षेत्रमूलशल्यतस्यजन्मधः पातयेत्करतलस्थवस्तु चेत् ॥ भ्रूगलनासिताक्षपरिमोटनतोऽन्यथवा, जनभृतरिक्तभाण्डमवलोक्य च चौरजनम् । हृतपतितनष्टाक्षतविनष्टविभग्नगतोन्मुखितस्तब्धाद्यनिष्टरवतो लभते न हृतम् ॥ निगदितमिदं यत्तत् सर्वं तुषास्थिविषादिकैः सह हृतिकरं षोडार्तानां समं रुदितद्युतैः । अवयवमपि स्पृष्टानास्थं दृढं मरुदाहरेद् अतिबहु तदा भुक्ताद्यं संस्थितः सुस्थितो वदेत् ॥ ललाटस्पर्शनाच्छूकदर्शनाच्छालिजौदनम् । उरःस्थांत् यष्टिकाद्यं ग्रीवास्पर्शे च यावकम् ॥ कुक्षिकुचजठरजानुस्पर्शे माषाः पयस्तिलयवाग्वः । आस्वादयतश्चौष्ठौ लिहतो मधुरं रसं ज्ञेयम् ॥ विस्फुटे स्फोटवेज्जिह्वामस्थे वक्त्रं विकूणयेत् । कटुतिक्तकषायोष्णैर्हिक्केत्, क्षीवेच्च मैथुने ॥ क्षेत्रत्यागे शुष्कतिक्तं तदलं, श्रुत्वा क्रव्यादं प्रेक्ष्य वा मांसभिक्षम् । भृगखण्डौदस्पर्शने शाकुनं तद् भुक्तं तैनेत्युक्तमेतन्निमित्तम् ॥ मूर्धगलकोरुहनुयङ्कणजङ्घं वस्तिं च स्पृष्ट्वा । गजमहिषमेषशूकरगोऽश्वस्पर्शसमुभुक्तम् ॥ दृष्टे श्रुतेऽप्यशकुने गोधामत्स्यामिषं वदेद्भुक्तम् । गर्भिण्याः गर्भस्य च निपतनमेवं प्रकल्पयेत्प्राज्ञः ॥ पुंस्त्रीनपुंसकाख्ये दृष्टेऽनुमिते पुरःस्थिते स्पृष्टे ! तज्जन्म भवति पानान्नपुष्पफलदर्शने च शुभम् ॥ अङ्गुष्ठेन भ्रूदरं वाङ्गुलिं वा स्पृष्ट्वा पृच्छेद्गर्भचिन्ता तदा स्यात् । मध्याज्ज्ञाद्यैर्हेमरत्नप्रवालैरप्यस्यैवं साहधात्यात्मजैव ॥ गर्भयुता जठरे करगे स्याद् दुष्टनिमित्तवशात्तदुदासः । कर्षति तज्जठरं यदि पीठोत्पीड़नतः करगे च करेऽपि । प्राणाया दक्षिणे द्वारे स्पृष्टे मासोत्तरं वदेत् । वामे द्वौ कर्ण एवं मा द्विचतुर्नेः श्रुतिस्तने ॥ वेणीमूले त्रीन् सुतान् कन्यके द्वे कर्णे पुत्रान् पञ्च हस्ते त्रयं च । अङ्गुष्ठान्ते पञ्चकं चानुपूर्व्या पादाङ्गुष्ठे पार्ष्णियुग्मेऽपि कन्याम् ॥ सव्यासव्योरुसंस्पर्शे सुते कन्याद्वयम् । स्पृष्टे ललाटमध्यान्ते चतुस्तितनयान् वदेत् ॥ शिरोललाटभ्रुकर्णगण्डहनुरदागलम् । सव्यापसव्यस्कन्धौ हस्तौ चिबुकनासिकम् ॥ उरः कुचं दक्षिणसव्यसव्यं हृत् पार्श्वमेवं जठरं कटिश्च । स्फिक् पायुसन्ध्यूरुयुगं च जानू जङ्घे च पदाविति क्रमात्कादौ ॥ इति निगदितमेतज्ज्ञालसंस्पर्शलक्ष्म प्रकटमभिलताद्यै वीक्ष्य शास्त्राणि सम्यक् । विपुलमतिरुदारो वेत्ति यः सर्वमेतन्नरपतिजनताभिः पूज्यतेऽसौ सदैव ॥ इति हरत्संहितायामङ्गविद्या प्रकरणम् । "वास्तुविद्याङ्गविद्या चेति" गर्गः । अङ्गविद्याया व्याख्यानो ग्रन्थः ऋगयना० अण् । आङ्गविद्यस्तद्व्याख्यानग्रन्थे ।

अङ्गविधि पु० अङ्गस्य प्रधानोपकारिणः विधिः विधानम् । गुणविध्यपरपर्य्याये विधिभेदे । तथाहि इष्टसाधनताकार्य्यत्वादिबोधकवाक्यं विधिः । स च प्रमाणान्तरैरप्राप्तस्यैव बोधकतयोत्पत्तिविधिः "विधिरत्यन्तमप्राप्तौ" इत्युक्तेः । तथा च प्रमाणान्तराप्राप्तकर्म्मणि इष्टसाधनताकार्य्यतादिबोधकं वाक्यं प्राथमिकप्रवृत्तिजनकप्रतीतिजनकत्वात् उत्पत्तिविधिः । यत्र तु प्राप्तस्यैव कर्म्मणोऽनुवादेन तस्य द्रव्यदेवतादौ इष्टसाधनतादिकं बोध्यते सोऽयमङ्गविधिः सच स्वविषये प्राथमिकप्रवृत्तिजनकप्रतीतिजनकत्वात् विधिरेव । किन्तु प्रधानविधिविधेयकर्म्मणोऽङ्गबोधकतया अङ्गविधिरित्येव विशेषः यथा, अग्निहोत्रं जुहोतीत्युत्पत्तिविधिवाक्येन प्राप्तस्याग्निहोत्रस्य गुणविधानाय प्रवृत्तं दध्ना जुहोतीति वाक्यं प्राप्ताग्निहोत्रानुवादेन दधिकरणत्वमात्रं बोधयत् दधि इष्टसाधनताबोधनेन तत्र प्रवर्त्तयतीति दध्ना जुहोतीति वाक्यं गुणविधिरङ्गविधिरिति च उच्यते । एवमन्यान्युदाहार्य्याणि । तच्चाङ्गं क्वचित् कालः क्वचित् द्रव्यं क्वचित् देवतादि इति नानाविधम् अतएवोक्तं "कार्म्मासन्निहितं नैव बुद्धौ विपरिवर्त्तते । शब्दात्तु तदुपस्थानमुपादेये गुणोभवेदिति" भट्टैः । विवृतञ्चैतत् रघुनन्दनेन प्रमाणान्तरावगतं कर्म प्रथमं बुद्धौ न विषयीभवति प्राथमिकी शब्दादेव तस्य कर्मणः उपस्थितिरिति उपादेये विधेये कर्म्मणि तिथ्यादिर्गुण इति" ।

अङ्गवैकृत न० विकृतस्य भावः विकृत + अण् अङ्गेन अङ्गचेष्टया वैकृतं हृदयभावो ज्ञाप्यते यत्र बहु० । आकार इति ख्यातायाम्-हृदयगतभावावेदकचेष्टायाम् । ईत० । अङ्गस्य विकारे न० ।

अङ्गवैगुण्य न० अङ्गस्य प्रधानोपकारिणः वैगुण्यमन्यथाकरणम् । प्रधानकर्म्माङ्गीभूतद्रव्यादेरन्यथाकरणे यद्दोषनिवारणार्थं विष्णुस्मरणं कर्त्तव्यतया विहितं "यदभाङ्गं ऋतं कर्म्म जानता वाप्यजानता साङ्गं भवतु तत् सर्वं हरेर्नामानुकीर्त्तनादिति" स्मृतिः । अतएव आद्धादिपद्धतौ कर्म्मान्ते यत् किञ्चिदङ्गवैगुण्यं जातं तद्दोषप्रशमनाय विष्णुस्मरणमङ्गं करिष्ये इत्यभिलापवाक्यम् ।

अङ्गशुद्धि स्त्री शुद्ध्यतेऽनया इति शुध-करणे क्तिन् ६त० । स्नानादौ देहसंस्कारसाधने । भावे क्तिन् । देहशोधने ।

अङ्गस् न० अनङ्ग-असुन् कुत्वञ्च । पक्षिणि इत्युज्ज्वलदत्तः ।

अङ्गसंस्कार पु० अङ्गं संस्क्रियतेऽनेन सम्-कृ+करणे घञ् ६त० । देहसंशोधनादिसंस्कारकारणे स्नाने गोधूमचूर्णादिनाङ्गमर्दने च । भावे घञ् ६त० । अङ्गस्य संस्कारे विलेपनादौ । अङ्गं संस्करोति सम्+कृ-कर्त्तरि अण् ६त० । देहसंस्कारके नरमात्रे त्रि० ।

अङ्गसंस्क्रिया स्त्री ६त० । अङ्गसंस्कारे ।

अङ्गसर्ग पु० अङ्गस्य अशौचिदेहस्य इतरैः सर्गस्तद्योगता । इतरकर्त्तृकसर्गयोग्यतायाम् । अशौचिनाम् देहसर्गनिषेधे "चतुर्थेऽहनि कर्त्तव्यमस्थिसञ्चयनं द्विजैः । ततः सञ्चयनादूर्द्धमङ्गसर्गो विधीयते" इति दक्षस्मृतौ चतुर्थदिवसे अशौचिदेहस्य सर्गयोग्यताभिधानात् चतुर्थदिवसे देहसर्गयोग्यता । एतच्च "यावन्नोत्तमसंश्लोक" मित्याद्युक्तव्यतिरिक्तविषयं महागुरुनिपाते पुत्रादिभिन्नविषयञ्च तच्छ्राद्धशब्दे वक्ष्यते ।

अङ्गहार पु० अङ्गं ह्रियते चाल्यतेऽत्र हृ-आधारे घञ् ६त० । अङ्गुल्यादिविन्यासभेदेन नृत्ये । तच्छ्राद्धविक्षेपशब्दे दर्शितम् । भावे घञ् ६त० । अङ्गस्य हरणमात्रे पु० ।

अङ्गहानि स्त्री अङ्गस्य प्रधानोपकारिणः कर्म्मणः हानिः प्रधानकर्म्मोपयोगिनः गुणादेरन्यथा सम्पादनेऽसम्पादने च । "दैवाद् वापात् प्रमादाच्चेदङ्गहानिः प्रजायते । स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिरिति" पुरा० ।

अङ्गहारि पु० अङ्गानि ह्रियन्ते अत्र हृ-बा० णि । अङ्गहारार्थे स्थले रङ्गभूमौ ।

अङ्गहीन त्रि० अङ्गेन हीनम् । साधनीभूतद्रव्यकालाद्यङ्गकरणगुणे कर्म्मणि "अङ्गहीनं क्रियाहीनं विधिहीनञ्च यद् भवेत् । सत् सर्व्वं पूर्णतामेतु भास्करस्य प्रसादतः" इति स्मृतिः । "अङ्गहीनो दहेद्राष्ट्रं मन्त्रहीनस्तु ऋत्विजम् । यजमानमदक्षिणो नास्ति यज्ञसमो रिपुः" इति पुरा० । विकले, छिन्नदेहे च त्रि० । अङ्गेन देहेन हीनः रहितः । काये पु० । तस्यानङ्गत्वात्तत्त्वम् । अङ्गं हीनं यद्योचितप्रमाणादल्पं यस्य । हस्तपादाद्यवयवस्य यथोचितपरिमाणाभावयुक्ते त्रि० । "धान्यचौरोऽङ्गहीनत्वमातिरेक्यञ्च मिश्रक इति" मनुः । वा परनिपातेऽङ्गीनाङ्गोऽन्यत्रार्थे । अङ्गस्य हीनतायां कारणमुक्तं श्रुतौ । "छिद्रदयाञ्च नारीं दौहृदिनीमाचक्षते । दौहृदविमाननात् कुब्जं कुणिं खञ्जं जडं वामनं विकृताननमनक्षं वा नारी सुतं जनयति । तस्मात् सा यद्यदिच्छेत्तत्तस्यै दापयेत् । अलब्धदौहृदा हि वीर्य्यवन्तं चिरायुषञ्च पुत्रं नजनयति ॥ भवन्ति चात्र ॥ इन्द्रियार्थांस्तु यानृयान् सा भोक्तुमिच्छति गर्भिणी । गर्भाबाधभयात्तांस्तान् भिषगाहृत्य दापयेत् । सा प्राप्तदौहृदा पुत्रं जनयेत गुणान्वितम् । अलब्धदौहृदा गर्भे लभेतात्मनि वा भयम् ॥ येषु येष्विन्द्रियार्थेषु दौहृदे वै विमानना । जायेत तत् सुतस्यार्त्ति-स्तस्मिंस्तस्मिंस्तथेन्द्रिये" इति ॥

अङ्गाङ्गिभावः पु० अङ्गस्य अङ्गिनश्च भावः । गौणमुख्यभावे उपकार्य्योपकारकभावे च यथा दर्शादीन् प्रति प्रयाजादीनामङ्गत्वं, प्रयाजादींश्च प्रति दर्शादीनामङ्गित्वम् । "अङ्गाङ्गिभावमज्ञात्वा कथं सामर्थ्यमन्वय" इति च मीमा० ।

अङ्गाधिप पु० अङ्गस्य देशभेदस्य अधिपः । अङ्गदेशाधिपे प्रसिद्धतया कर्णे तस्य तद्राज्यप्राप्तिः भारते आ० । "यद्यहं फाल्गुनो युद्धे नाराद्या योद्धुमिच्छति । तस्मादेवोऽङ्गविषये मया राज्येऽभिषिच्यते ॥ वैशम्पायन उवाच । ततस्तस्मिन् क्षणे कर्णः सलाजकुसुमैर्घटैः । काञ्चनैः काञ्चने पीठे मन्त्रविद्भिर्महारथः । अभिषिक्तोऽङ्गराज्ये स श्रिया युक्तो महाबल इति सच देशः मगधदेशस्यगिरिव्रजात् सन्निकृष्टः पूर्व्वस्यां दिशि स्थितः । सभापर्व्वणि मगधदेशवर्णने गिरिव्रजसमीपवर्त्ति "अङ्गवङ्गादयश्चैव राजानश्च महाबलाः । गौतमाश्रममभ्येत्य रमन्तेस्म पुरार्जुनेति" अङ्गवङ्गप्रभृतीनां सन्निकृष्टत्वमुक्तम् । भीमप्राच्यदिग्विजये च "विजित्य युधि कौन्तेयो मागधानभ्यवाहयत् ॥ दण्डञ्च दण्डधारञ्च विजित्य पृथिवीपतीन् । तैरेव सहितः सर्व्वैः गिरिव्रजसमाद्रवत् । जारासन्धिं सान्त्वयित्वा करे च विनिवेश्य च । तैरेव सहितः सर्व्वैः कर्णमभ्यद्रवद्बली ॥ स कम्पयन्निव महीं बलेन चतुरङ्गिणा । युयुधे पाण्डवश्रेष्ठः कर्णेनामित्रघातिना ॥ स कर्णं युधि निर्जित्य वशे कृत्वा च भारत । ततो विजिग्ये बलवान् राज्ञः पर्व्वतवासिनः ॥ अथ मोदागिरौ चैव राजानं बलवत्तरम् । पाण्डवो वाहुवीर्य्येण निजघान महाद्युते इति" ॥ एवञ्च गिरिव्रजात् पूर्व्वं मोदागिरेः पश्चात् स देशः । बृहत्संहितायान्तु तस्य भारतवर्षे आग्नेय्यां स्थितिरुक्ता । यथा "अग्नेय्यां दिशि कोशल कलिङ्गवङ्गोपवङ्गजठराङ्गा" इति । अङ्गस्य ज्योतिःशास्त्रोक्तलग्नस्य अधिपः । लग्नाधिपे पु० । "अङ्गाधिपे बलनि सर्व्व विभूतिसम्पदिति" ज्योति० ।

अङ्गाधीश पु० ईत० । अङ्गदेशाधिपे कर्णे लग्नाधिपे च "अङ्गाधीशः खगेहे बुधगुरुकविभिः संयुतः" इति जातकम् । अङ्गाधीश्वरादयोऽप्यत्र ।

अङ्गार अस्त्री० अङ्ग-आरन् । अर्द्धदग्धे-अग्निसंक्रान्ते अग्निगर्भे वा (आङार) इति प्रसिद्धे काष्ठखण्डे । "धृत-कुम्भसमा नारी तप्ताङ्गारसमः पुमानिति" "ज्वलदङ्गार-सन्निभमिति" "अङ्गारे शतधौतेऽपि मालिन्यं नैव मञ्चतीति" । "उष्णो दहति चाङ्गारः शीतः कृष्णायते करमिति" च पुरा० । "असौ वावादित्योऽग्निर्दिवोऽङ्गारा" इति छा०ब्रा० । "व्यङ्गारे भुक्तवज्जने" इति स्मृतिः । "अङ्गिरा अङ्गार" इति यजु० । "येऽस्याङ्गारा आसंस्तेऽङ्गिरसोऽभवन्निति" ऐत० ब्रा० । भौमग्रहे पु० रक्तवर्णे न० तद्वति त्रि० । पाषा० यत् अङ्गार्या स्त्री तत्सङ्घे ।

अङ्गारक अस्त्री अङ्गार+स्वार्थे कन् । अङ्गारे "अङ्गारकस्त्वव-न्त्याञ्चेति" पुरा० । "अटावङ्गारके तथेति" ज्योतिषम् । "अङ्गारके कुमारञ्च बुधे नारायणं तथेति" पुरा० । अस्य चारो यथा

"यद्युदयर्क्षाद्वक्रं करोति नवमाष्टमसप्तमर्क्षेषु । तद्वक्रशुक्ल-सदृशे पीडाकरमग्निवार्त्तानाम् ॥ द्वादशदशमैकादशगत-स्तद्वक्रितः कुजोऽत्युशुक्लम् । दूषयति रसानुदये करोति रोगानरिष्टं च ॥ व्यालं त्रयोदशर्क्षात्तदर्शाद्वा विपच्यते ऽस्तमये । दंष्ट्रिव्यालसदृशः करोति पीडां सुभिक्षं च ॥ रुधिराननमिति वक्रं पञ्चदशात् षोड़शाच्च विनिर्दिष्टे तत्कालं सुखरोगं सभयं च सुभिक्षमावहति ॥ असिसदृशं सप्तदशादष्टादशतोऽपि वा तदतु वक्रे । दस्युगणेभ्यः पीडां करोत्यरिष्टं सशस्त्रभयम् ॥ भाग्यार्थमोदितो यदि निवर्त्तते वैश्वदैवते भौमः । प्राजापत्येऽस्तमितस्त्रीनपि लोकान्निपीड़यति ॥ अवखोदितस्य वक्रं पुष्ये मूर्धाभि-घिक्रपीडाकृत् । यस्मिन्नृक्षेऽभ्युदितस्तद्विगृह्यूहान् जनान् हन्ति ॥ मध्येन यदि मघानां गतागतं लोहितः करोति ततः । पार्थिवो नृपो विनश्यति भस्मोद्योगाद्भयमरिष्टैः ॥ भित्त्वा मघां विशाखां भिन्दन् भौमः करोति दुर्भिक्षम् । मरकं करोति घोरं यदि भित्त्वा रोहिणीं याति ॥ दक्षिणतो रोहिण्याचरन् महीजोऽरिष्टनिग्रहकृत् । धूमायन् सशिखो वा विनिहन्यात् पारियात्रस्थान् ॥ प्राजापत्ये श्रवणे भूते तिसृषूत्तरासु शक्रे च । विचरन् धननिधनानाशुपघातकरः क्रमात्तनयः ॥ चारोदयाः प्रशस्ताः श्रवणमघादित्यमूलहस्तेषु । एकपदाश्विविशाखा-प्राजापत्येषु च कुजस्य ॥ विपुलविमलमूर्त्तिः किंशुकाशोक वर्णः स्फुटरुचिरमयूखस्निग्धताम्रप्रभाभः । विचरति यदि मार्गं चोत्तरं मेदिनीजः शुभजलदनिनादां हार्त्तिदस्य प्रजानाम् ॥" इति बृहत्संहिता ।

तस्य भक्तिदेशादि यद्भक्तध्याये तत्रैवोक्तं यथा

"शोणस्य नर्मदाया भीमरथायाश्च पश्चिमार्धस्थाः । निर्विन्ध्या वेत्रवती क्षिप्रा गोदावरी वेणा ॥ मन्दा-किनी पयोष्णी महानदी सिन्धुमालतीपाराः । उत्तर पारशवमहेन्द्राद्रिविन्ध्यमलयोपगाश्चोलाः ॥ द्रविडविदेहा न्ध्राश्मकाभासापुरकौङ्कणाः समन्त्रिसकाः । कुन्तलकेरल-दशकर्णकान्तिपुरश्लेष्मसङ्गरजाः ॥ नासिक्यभोगवर्धन-विराटविन्ध्याद्रिपार्श्वगा देशाः । ये च पिबन्ति सुतोयां तापीं ये चापि गोमतीसलिलम् ॥ नागरलघिकरपारत-ङ्कताश्वनाजीविशस्त्रवार्त्तानाम् । आटविकदुर्गकर्वटवधक-नृशंसावलिप्तानाम् ॥ नरपतिकुमारकुञ्जरदाम्भिकडिम्भा-भिघातपशुपानाम् । रक्तफलकुसुमविद्रुमचूपशुडमद्य-तीक्ष्णानाम् ॥ कोशभवनाग्निहोत्रिकधात्वाकरशाक्यभिक्षु-चौराणाम् । षष्ठदीर्घवैरवह्नाशिनां च वसुधासुतोऽधिपतिः" इति । अङ्गारमिव इवार्थे कन् । रक्तवर्णत्वात् कुरण्टकवृक्षे, (भीमराज) इति ख्याते-भृङ्गराजवृक्षे च पु० । अल्पार्थे कन् । विस्फुलिङ्गे इति विख्याते-अङ्गारचुल्लांशे न० । "दूर्वा लाजा हरिद्रे द्वे मञ्जिष्ठा सेन्द्रवारुणी । बृहती सैन्धवं कुष्ठं रास्ना मांसी शतावरी । आरनालाढकेनैव तैलप्रस्थं विपाचयेत् । तैलमङ्गारकं नाम सर्वज्वरविनाशनमिति" चक्रदत्तवैद्यकोक्ते तैलभेदे न० । [विक्रयार्थमङ्गारकारके ।

अङ्गारकारिन् त्रि० अङ्गारं करोति कृ-णिनि । काष्ठं दग्ध्वा

अङ्गारकमणि पु० अङ्गारकस्य प्रियः मणिः । प्रवाले तस्य च रक्तवर्णत्वात् तत्प्रियत्वं "माणिक्यं भास्करे देयं चन्द्रे मुक्तां प्रदापयेत् प्रवालञ्च कुजे दद्या"दित्यादिना तत्कृताशुभप्रतीकाराय प्रवालदानोक्तेः तत्प्रियत्वम् ।

अङ्गारकुष्ठक पु० अङ्गारवर्णं कुष्ठमिव कन् । श्वित्रावलीनाम-कौषधिभेदे ।

अङ्गारधानी स्त्री अङ्गाराणि धीयन्तेऽस्याम् धा-आधारे ल्युट् ङीप् । (आङठा) इति ख्याते अङ्गाराधान-पात्रात्राम् स्वार्थे कन् । अङ्गारधानिकाप्यत्रैव ।

अङ्गारपरिपाचित न० अङ्गारेण (ज्वलदग्निव्याप्तकाष्ठखण्डेन) परिपाच्यते परि+पच-स्वार्थे णिच्-क्त ३त० । (कबाब) इति प्रसिद्धे-पक्वमांसादौ ।

अङ्गशुद्धि स्त्री शुद्ध्यतेऽनया इति शुध-करणे क्तिन् ह्रस्व० । स्नानादौ देहसंस्कारसाधने । भावे क्तिन् । देहशोधने ।

अङ्गस् न० अनज-असुन् कुत्वञ्च । पचिषि इत्युज्ज्वलदत्तः ।

अङ्गसंस्कार पु० अङ्गं संस्क्रियतेऽनेन सम्-कृ+करणे घञ् ह्रस्व० । देहसंशोधनादिसंस्कारकरणे स्नाने गोधूमचूर्णादिनाङ्गमर्दने च । भावे घञ् ह्रस्व० । अङ्गस्य संस्कारे विलेपनादौ । अङ्गं संस्करोति सम्+कृ-कर्त्तरि अण् ह्रस्व० । देहसंस्कारके नरमाले त्रि० ।

अङ्गसंक्रिया स्त्री ह्रस्व० । अङ्गसंस्कारे ।

अङ्गस्पर्श पु० अङ्गस्य अशौचिदेहस्य इतरैः स्पर्शस्तद्योगता । इतरकर्त्तृकस्पर्शयोग्यतायाम् । अशौचिनाम् देहस्पर्शनिषेधे "चतुर्थेऽह्नि कर्त्तव्यमस्थिसञ्चयनं द्विजैः । ततः सञ्चयनादूर्द्धमङ्गस्पर्शो विधीयते" इति दक्षस्मृतौ चतुर्थदिवसे अशौचिदेहस्य स्पर्शयोग्यताभिधानात् चतुर्थदिवसे देहस्पर्शयोग्यता । एतच्च "यावन्नोत्तमसंश्लोक" मित्याद्युक्तव्यतिरिक्तविषयं महापुरुषनिपाते पुत्रादिभिन्नविषयञ्च तच्चाङ्गास्पृश्यत्वशब्दे वक्ष्यते ।

अङ्गहार पु० अङ्गं ह्रियते चाल्यतेऽत्र हृ-आधारे घञ् ह्रस्व० । अङ्गुल्यादिविन्यासभेदेन नृत्ते । तच्चाङ्गविक्षेपशब्दे दर्शितम् । भावे घञ् ह्रस्व० । अङ्गस्य हरणमाले पु० ।

अङ्गहानि स्त्री अङ्गस्य प्रधानोपकारिणः कर्म्मणः हानिः प्रधानकर्म्मोपयोगिनः गुणादेरन्यथा सम्पादनेऽसम्पादने च । "दैवाद् वयसः प्रमादाच्चेदङ्गहानिः प्रजायते । स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिरिति" पुरा० ।

अङ्गहारि पु० अङ्गानि ह्रियन्ते अत्र हृ-घा० णि । अङ्गहारार्थे स्थले रङ्गभूमौ ।

अङ्गहीन त्रि० अङ्गेन हीनम् । साधनीभूतद्रव्यकालाद्यङ्गकरणशून्ये कर्म्मणि "अङ्गहीनं क्रियाहीनं विधिहीनञ्च यद् भवेत् । सत् सर्व्वं पूर्णतामेतु भास्करस्य प्रसादतः" इति स्मृतिः । "अङ्गहीनो दक्षेद्राद्धं मन्त्रहीनस्तु ऋत्विजम् । यजमानमदक्षिणो नास्ति यज्ञसमो रिपुः" इति पुरा० । विकले, छिन्नदेहे च त्रि० । अङ्गेन देहेन हीनः रहितः । कामे पु० । तस्यानङ्गत्वात्तत्त्वम् । अङ्गं हीनं यथोचितप्रमाणादल्पं यस्य । ह्रस्वपादाद्यवयवस्य यथोचितपरिमाणाभावयुक्ते त्रि० । "धान्यचौरोऽङ्गहीनत्वमातिरेक्यञ्च मिश्रक इति" मनुः । वा परनिपातेऽङ्गहीनाङ्गोऽत्यर्थे । अङ्गस्य हीनतायां कारणञ्चाङ्गं सुश्रुते । "द्विहृदयाञ्च नारीं दौहृदिनीमाचक्षते । दौहृदविमाननात् कुब्जं कुणिं खञ्जं जडं वामनं विकृताङ्गमनघं वा नारी सुतं जनयति । तस्मात् सा यदादिच्छेत्तत्तस्यै दापयेत् । लब्धदौहृदा हि वीर्य्यवन्तं चिरायुषञ्च पुत्रं जनयति ॥ भवन्ति चात्र ॥ इन्द्रियार्थांस्तु यान्यान् सा भोक्तुमिच्छति गर्भिणी । गर्भाबाधभयात्तांस्तान् भिषगाहृत्य दापयेत् । सा प्राप्तदौहृदा पुत्रं जनयेत गुणान्वितम् । अलब्धदौहृदा गर्भे लभेतात्मनि वा भयम् ॥ येषु येष्विन्द्रियार्थेषु दौहृदे वै विमानना । जायेत तत् सुतस्यार्त्ति-स्तस्मिंस्तस्मिंस्तथेन्द्रिये" इति ॥

अङ्गाङ्गिभावः पु० अङ्गस्य अङ्गिनश्च भावः । गौणमुख्यभावे उपकार्य्योपकारकभावे च यथा दर्शादीन् प्रति प्रयाजादीनामङ्गत्वं, प्रयाजादींश्च प्रति दर्शादीनामङ्गित्वम् । "अङ्गाङ्गिभावमज्ञात्वा कथं सामर्थ्यमन्यथ" इति च मीमा० ।

अङ्गाधिप पु० अङ्गस्य देशभेदस्य अधिपः । अङ्गदेशाधिपे प्रसिद्धतया कर्णे तस्य तद्राज्यप्राप्तिः भारते आ० । "यद्ययं फाल्गुनो युद्धे नाराशां योद्धुमिच्छति । तस्मादेषोऽङ्गविषये मया राज्येऽभिषिच्यते ॥ वैशम्पायन उवाच । ततस्तस्मिन् क्षणे कर्णः सलाजकुसुमैर्घटैः । काञ्चनैः काञ्चने पीठे मन्त्रविद्भिर्महारथः । अभिषिक्तोऽङ्गराज्ये स श्रिया युक्तो महाबल इति च देशः मगधदेशस्थगिरिव्रजात् सन्निकृष्टः पूर्व्वस्यां दिशि स्थितः । सभापर्व्वणि मगधदेशवर्णने गिरिव्रजसमीपवर्णने "अङ्गवङ्गादयश्चैव राजानश्च महाबलाः । गौतमाश्रममभ्येत्य रमन्ते स्म पुरार्जुनेति" अङ्गवङ्गप्रभृतीनां सन्निकृष्टत्वमुक्तम् । भीमप्राच्यदिग्विजये च "विजित्य युधि कौन्तेयो मागधानभ्ययाद्बली ॥ दण्डञ्च दण्डधारञ्च विजित्य पृथिवीपतीन् । तैरेव सहितः सर्व्वैर्गिरिव्रजसमाद्रवत् । जारासन्धिं सान्त्वयित्वा करे च विनिवेश्य च । तैरेव सहितः सर्व्वैः कर्णमभ्यद्रवद्बली ॥ स कम्पयन्निव महीं बलेन चतुरङ्गिणा । युयुधे पाण्डवश्रेष्ठः कर्णेनामित्रघातिना ॥ स कर्णं युधि निर्जित्य वशे कृत्वा च भारत । ततो विजिग्ये बलवान् राज्ञः पर्व्वतवासिनः ॥ अथ मोदागिरौ चैव राजानं बलवत्तरम् । पाण्डवो वाहुवीर्य्येण निजघान महाहवे इति" ॥ एवञ्च गिरिव्रजात् पूर्व्वं मोदागिरेः पश्चात् स देशः । ह्रस्वसंहितायान्तु तस्य भारतवर्षे आग्नेय्यां स्थितिरुक्ता । यथा "आग्नेय्यां दिशि कोशल कलिङ्गवङ्गोपवङ्गजठराङ्गा" इति । अङ्गस्य ज्योतिःशास्त्रोक्तलग्नस्य अधिपः । लग्नाधिपे पु० । "अङ्गाधिपे बलनि सर्व्व विभूतिसम्पदिति" ज्योति० ।

अङ्गाधीश पु० ६त० । अङ्गदेशाधिपे कर्णे लग्नाधिपे च "अङ्गाधीशः स्वगेहे बुधगुरुकविभिः संयुत" इति जातकम् । अङ्गाधीश्वरादयोऽत्र ।

अङ्गार अस्त्री० अङ्ग-आरन् । अङ्गदग्धे-अग्निसंक्राम्ते अग्निगृह्ये वा (आङ्गार) इति प्रसिद्धे काष्ठखण्डे । "धृत-कुम्भसमा नारी तप्ताङ्गारसमः पुमानिति" "ज्वलदङ्गार-सन्निभमिति" "अङ्गारे शतधौतेऽपि मालिन्यं नैव मञ्चतीति" । "उष्णो दहति चाङ्गारः शीतः कृष्णायते करमिति" च पुरा० । "असौ वावादित्योऽग्निर्दिवोऽङ्गारा" इति श्रा०ब्रा० । "व्यङ्गारे भुक्तवज्ज्वने" इति स्मृतिः । "अङ्गिरा अङ्गार" इति यजु० । "येऽस्याङ्गारा आसंस्तेऽङ्गिरसोऽभवन्निति" ऐत० ब्रा० । भौमग्रहे पु० रक्तवर्णे न० तद्वति त्रि० । पाषा० यत् अङ्गार्या स्त्री तत्सङ्घे ।

अङ्गारक अस्त्री अङ्गार+स्वार्थे कन् । अङ्गारे "अङ्गारकस्त्वव-न्त्याख्येति" पुरा० । "अष्टावङ्गारके तथेति" ज्योतिषम् । "अङ्गारके कुमारञ्च बुधे नारायणं तथेति" पुरा० । अस्य चारो यथा

"यद्युदयर्क्षाद्वक्रं करोति नवमाष्टमसप्तमर्क्षेषु । तद्भक्तक्षुध-मृदवे पीडाकरमग्निवार्त्तानाम् ॥ द्वादशदशमैकादशनक्ष-त्राद्वक्रितः कुजोऽभ्युदयम् । दूषयति रसानुदये करोति रोगानष्टर्क्षं च ॥ व्याकं त्रयोदशर्क्षात्तदर्क्षाद्वा विपच्यते ऽस्तमये । दंष्ट्रिव्यालस्थगेभ्यः करोति पीडां सुभिक्षं च ॥ रुधिराननमिति वक्रं पञ्चदशात् षोडशाच्च विनिर्दिष्टे तत्कालं सुखरोगं सभयं च सुभिक्षमावहति ॥ असिमुशलं सप्तदशादष्टादशतोऽपि वा तदनु वक्रे । दस्युगणेभ्यः पीडां करोत्यष्टर्क्षं सशस्त्रभयम् ॥ भाग्यायमोदितो यदि निवर्त्तते वैश्वदैवते भौमः । प्राजापत्येऽस्तमितस्त्रीनपि लोकान्पीडयति ॥ श्रवणोदितस्य वक्रं मुख्ये मूर्धाभि-घिक्रपीडाकृत् । यश्चित्रृक्षेऽभ्युदितस्तद्दिग्व्यूहान् जनान् हन्ति ॥ मध्येन यदि मघानां गतागतं लोहितः करोति ततः । पाखण्डो नृपो विनश्यति यस्तीव्रोद्योगाद्भयमष्टर्क्षः ॥ भित्त्वा मघां विशाखां भिन्दन् भौमः करोति दुर्भिक्षम् । मरकं करोति घोरं यदि भित्त्वा रोहिणीं याति ॥ दक्षिणतो रोहिण्यावरन् महीजोऽर्धवृष्टिनिर्यवकृत् । धूमावन् सधिरो वा विनिहन्यात् पारियात्रस्थान् ॥ प्राजापत्ये श्रवणे मूले तिसृषूत्तरासु याम्ये च । विचरन् धनधान्यहानासुपघातकरः क्षमातनयः ॥ चारोदयाः प्रशस्ताः श्रवणमघादित्यमूलहस्तेषु । एकपदाश्विविशाखा-प्राजापत्येषु च कुजस्य ॥ विपुलविमलमूर्त्तिः किंशुकाशोक वर्णः स्फुटरुचिरमयूखस्तप्ताभ्रप्रभाभः । विचरति यदि मार्गं चोत्तरं मेदिनीजः शुभकृदवनिपानां हार्त्तिदश्च प्रजानाम् ॥" इति बृहत्संहिता ।

तस्य भक्तिदेशादि यहभक्तध्याये तत्रैवोक्तं यथा

"शोणस्य नर्मदाया भीमरथायाश्च पश्चिमार्धस्थाः । निर्विन्ध्या वेत्रवती क्षिप्रा गोदावरी वेणा ॥ मन्दा-किनी पयोष्णी महानदी सिन्धुमालतीपाराः । उत्तर पार्श्वमहेन्द्राद्रिविन्ध्यमलयोपगाचोलाः ॥ द्रविडविदेहा न्ध्राभ्रकभासापुरकौङ्कणाः समन्त्रिशकाः । कुन्तलकेरल-दण्डककान्तिपुरश्चेल्लसङ्करजाः ॥ नासिक्यभोगवर्धन-विराटविन्ध्याद्रिपार्श्वगा देशाः । ये च पिबन्ति सुतोयां तापीं ये चापि गोमतीसलिलम् ॥ नागरकपिकरपारत-ङ्कताग्नजाजीविगल्लवार्त्तानाम् । आटविकदुर्गकर्वटवधक-नृशंसावलिप्तानाम् ॥ नरपतिकुमारकक्षुरदात्रिकहिंस्रा-भिघातपशुपानाम् । रक्तफलकुसुमविद्रुमचमूपशुहन्तृ-तीक्ष्णानाम् ॥ कोशभवनाग्निहोत्रिकधात्वाकरशाक्यभिक्षु-चौराणाम् । शठदीर्घवैरवज्ञाशिनां च वसुधासुतोऽधिपतिः" इति । अङ्गारमिव इवार्थे कन् । रक्तवर्णत्वात् कुरण्टकवृक्षे, (भीमराज) इति ख्याते-भृङ्गराजवृक्षे च पु० । अल्पार्थे कन् । विस्फुलिङ्गे इति विख्याते-अङ्गारक्षुद्रांशे न० । "दूर्वा बाला हरिद्रे द्वे भल्लिका सेन्द्रवारुणी । वृक्षती सैन्धवं कुष्ठं राम्ना मांसी शतावरी । आरनालाढकेनैव तैलप्रस्थं विपाचयेत् । तैलमङ्गारकं नाम सर्वज्वरविनाशनमिति" चक्रदत्तवैद्यकोक्ते तैलभेदे न० । [विक्रयार्थमङ्गारकारके ।

अङ्गारकारिन् त्रि० अङ्गारं करोति कृ-णिनि । काष्ठं दग्ध्वा

अङ्गारकमणि पु० अङ्गारकस्य प्रियः मणिः । प्रवाले तस्य च रक्तवर्णत्वात् तत्प्रियत्वं "माणिक्यं भास्करे देयं चन्द्रे शङ्खं प्रदापयेत् प्रवालञ्च कुजे दद्या"दित्यादिना तत्कृताशुभप्रतीकाराय प्रवालदानोक्तेः तत्प्रियत्वम् ।

अङ्गारकुष्ठक पु० अङ्गारवर्णं कुष्ठमिव कन् । हितालीनाम-कौषधिभेदे ।

अङ्गारधानी स्त्री अङ्गाराणि धीयन्तेऽस्याम् धा-आधारे ल्युट् ङीप् । (आङ्ठा) इति ख्याते अङ्गाराधान-पात्रे स्वार्थे कन् । अङ्गारधानिकाशब्दवत् ।

अङ्गारपरिपाचित न० अङ्गारेण (ज्वलदग्निव्याप्तकाष्ठखण्डेन) परिपाच्यते परि+पच-स्वार्थे णिच्-क्त इत० । (क्वाथ) इति प्रसिद्धे-पक्वमांसादौ ।

अङ्गारपर्ण न० अङ्गारमिव पर्णमस्य। वनभेदे। अस्त्यर्थे अच्। तत्स्वामिनि चित्ररथगन्धर्व्वे पु०। भारते चैत्ररथे प०। चित्ररथगन्धर्वस्य अर्ज्जुनादीन् प्रति उक्तिः। "आरात्तिष्ठत मा मह्यं समीपमुपसर्पत। कक्षान्नां नाभिजानीत प्राप्तं भागीरथीजलम्। अङ्गारपर्णं गन्धर्वं वित्त मां खननात्मवम्। अहं मानी तथैवेष्वं कुबेरस्य प्रियः सखा। अङ्गारपर्णमित्येवं ख्यातं चेदं वनं ममेति"। [ख्यातपात्रे।

अङ्गारपात्री स्त्री ईत० अङ्गारधान्याम् (आङ्टा) इति

अङ्गारपुष्प पु० अङ्गारमिव लोहितवर्णं पुष्पं यस्य ब०। (जिँयापुति) इति ख्याते द्रुदीप्टचे।

अङ्गारमञ्जरी स्त्री अङ्गारा रक्तवर्णा मञ्जरी ब० समासान्तकबभावाहुस्त्वे संज्ञात्वात्। (करमचा) इति ख्याते रक्तकरञ्जवृक्षे।

अङ्गारवल्ली स्त्री अङ्गारा इव रक्तफलत्वात् रक्तावल्ली कर्म्म०। रक्तवर्णफलवत्वात् (कुँच) इति प्रसिद्धायाम् गुञ्जालतायां करञ्जवृक्षे च। स्वार्थे कन्। अङ्गारवल्लिका तत्रैव।

अङ्गारवेणु पु० अङ्गारवर्णोवेणुः। वंशभेदे। तज्जाते ठक् अनुगतादि० द्विपदवृद्धिः। आङ्गारवैणुकं, तज्जाते त्रि०।

अङ्गारशकटी स्त्री शकोति वोढुं शकटम्, अल्पं शकटं, शकटी, षष्ठ्यादिवत् अल्पार्थे ङीप् अङ्गारस्य शकटीव ईत०। (आङ्टा) (धुनाचीति) च प्रसिद्धे अङ्गाराधारे पात्रभेदे।

अङ्गारावचेषण न० अङ्गारमवचिन्वतेऽनेन करणे ल्युट्। अङ्गारचेषणसाधने पात्रे। भावे ल्युट्। अङ्गारचेषणे।

अङ्गारि स्त्री अङ्गार+मत्वर्थे ठन् पृषोदरादित्वात् कलोपः। अङ्गाराधारे (आङ्टा) इति प्रसिद्धे पात्रभेदे।

अङ्गारिका स्त्री अङ्गारं विद्यतेऽस्याः अङ्गार+मत्वर्थे ठन् टाप्। (आङ्टा) इति ख्याते अङ्गारपात्रे।

अङ्गारिणी स्त्री० अङ्गार+मत्वर्थे इनि। अङ्गारधानिकायाम् (आङ्टा इति) ख्याते पात्रे। अङ्गारवति त्रि०।

अङ्गारित पु० अङ्गारमिवाचरतीति अङ्गार+क्विप् ततः कर्त्तरि क्त। पलाशकलिकायाम्। अङ्गारं करोतीत्यर्थे णिचि कर्म्मणि क्त, अङ्गार+तारका० इतच् वा। दग्धप्राये काष्ठादौ त्रि०। [अङ्गारप्रकृतिभूते काष्ठादौ।

अङ्गारीय त्रि० अङ्गारेभ्य एतानि प्रकृतिरूपार्थे अङ्गार+छ।

अङ्गिका स्त्री अङ्गम् आच्छादयति अङ्ग+इनि-स्वार्थे कन् स्त्रियां टाप्। (आङ्राखा) इति प्रसिद्धे कञ्चुकवस्त्रे।

अङ्गिन् त्रि० अङ्ग+इनि। अवयवविशिष्टे, देहवति च। "येनाङ्गविकार इति" स्मृतस्य "येनाङ्गेन विकृतेनाङ्गिनो विकार इति" इष्टिः। अङ्गिनं नाङ्गबाधेन कृन्यादपि कदाचनेति" मीमा०। प्रधाने, "एकएव भवेदङ्गी प्रकृतीरो वीर एव वेति" "ये रसस्याङ्गिनो धर्म्माः शौर्य्यादय इवात्मन इति" च साहि०।

अङ्गिरस् पु० अङ्गति अगि-गतौ असि इरुट्। ब्रह्मणोमानसपुत्रे स्वनामख्याते मुनिभेदे। भारते वन० मार्क०। "ब्रह्मणो मानसाः पुत्रा विदिताः षण्महर्षयः मरीचिरत्र्यङ्गिरौ पुलस्त्यः पुलहः क्रतुः" इति "त्वमग्ने प्रथमोऽङ्गिरा ऋषिर्देवानामिति" श्रुतौ अग्नेरङ्गिरस्त्वञ्च तत्कथा भारते वन० मार्क०।

"यदा क्रुद्धो हुतवहस्तपस्तप्तुं वनं गतः॥ तदा च भगवानग्निः स्वयमेवाङ्गिरोभवत्। सन्तापयंश्च प्रभया नाशयं स्तिमिराणि च॥ पुराङ्गिरा महाबाहो! चचार तप उत्तमम्। आत्मस्थो महाभागो हव्यवाहं विशेषयन्। तथा स भूत्वा तु तदा जगत् सर्व्वं व्यकाशयत्॥ तपश्चरंस्तु हुतभुक् सन्तप्तस्य तेजसा। भृशं ग्लानश्च तेजस्वी न स किञ्चित् प्रजज्ञिवान्॥ अथ सञ्चिन्तयामास भगवान् हव्यवाहनः। अन्योऽग्निरिह लोकानां ब्रह्मणा संप्रकल्पितः॥ अग्नित्वं विप्रनष्टं हि तप्यमानस्य मे तपः। कथमग्निः पुनरहं भवेयमिति चिन्त्य सः। अपश्यदग्निवल्लोकांस्तापयन्तं महासनिम्॥ सोऽपासर्पच्छनैर्भीतस्तमुवाच तदाङ्गिराः। शीघ्रमेव भवस्वाग्निस्त्वं पुनर्लोकभावनः। विज्ञातस्त्वमसि लोकेषु त्रिषु संस्थानचारिषु॥ त्वमग्निः प्रथमं सृष्टो ब्रह्मणा तिमिरापहः। स्वस्थानं प्रतिपद्यस्व शीघ्रमेव तमोनुद!॥ अग्निरुवाच। नष्टकीर्त्तिरहं लोके भवान् जातो हुताशनः। भवन्तमेव चाख्यन्ति पावकं न तु मां जनाः॥ निक्षिपाम्यहमग्नित्वं त्वमग्निः प्रथमो भव। भविष्यामि द्वितीयोऽहं प्राजापत्यक एव च॥ अङ्गिरा उवाच। कुरु पुत्रं प्रजासर्गं भवाग्निस्तिमिरापहः। मामुत्र देव! कुरुष्वाग्ने! प्रथमं पुत्रमङ्गसा॥ मार्कण्डेय उवाच। तच्छ्रुत्वाङ्गिरसो वाक्यं जातवेदास्तथाकरोत्। राजन् बृहस्पतिर्नाम तस्याप्यङ्गिरसः सुतः इति"॥

तस्य च यथा अग्नित्वं येन येन रूपेण च आविर्भावस्तथोक्तमग्निशब्दे। अन्यौ च। "शिवो भव प्राजापत्यो मानुषीभ्यामङ्गिरः इति य० अङ्गिरोभिः ऋषिभिः सम्पादितत्वात् अङ्गसौष्ठवाद्वा अङ्गिरा अग्निरूपः

हे अङ्गिरः ! अग्निरूपेति" वेददीपः । अङ्गिरसः गोत्रापत्यम् शिवा० अण् । आङ्गिरसः बहुषु लुक् । अङ्गिरसस्त्रोत्रापत्ये ब० व० । "सर्व्वे सान्ना अदन्ताः स्युः" इत्युक्तेः पृ० सलोपे अङ्गिरशब्दोऽप्यत्र, "येनानवन्वे अङ्गिरे" इति वेदः । मन्वत्रिविष्णुहारीत याज्ञवल्क्योशनोऽङ्गिरा इति याज्ञ० "एवं त्यक्त्वा शरीरं तु परमे तपसि स्थितः । भृग्वङ्गिरादिभिर्भूयस्तपसाप्यायितस्तदेति" भार० ।

अङ्गिरस्वत् पु० अङ्गिरा अग्निः सहायत्वेन विद्यतेऽस्य मतुप् मस्य वः सान्तत्वात् न पदत्वम् । वायौ "यमाय त्वाङ्गिरस्वते पितृमते स्वाहेति" यजुः । "अङ्गिरोयुक्ताय वातायेति" वेददीपः ।

अङ्गीकार पु० अनङ्गम् अस्वोपकरणं,अस्वकीयम् अङ्गं क्रियते अङ्ग+च्वि+कृ-घञ् । स्वीकारे अभ्युपगमे । "अङ्गीकुरुदृशोर्भङ्गीभङ्गीभवतु मन्मथ" इति "नवाङ्गी कुरङ्गीदृगङ्गीकरोत्विति" जगन्नाथः । "अङ्गीकुर्वन् स्वमाहात्म्यं भर्गं जज्वाल पावक" इति पुरा० ।

अङ्गीकृत त्रि० अङ्गीति चुरन्तं तत्पूर्व्वकात् कृतः क्त । स्वीकृते "अङ्गीकृतं सुकृतिनः परिपालयन्ती"तिचौरपञ्चाशिका । "नाङ्गीकृतसुहृज्जनीति" नीतिसा० ।

अङ्गु पु० अगि-उनु । पाणौ हस्ते "अङ्गुवः" ।

अङ्गुरि(री) स्त्री अङ्ग-उलि-रलयोरैक्यं वारणात् रत्वम् । (आङ्गुल) इति प्रसिद्धायाम् हस्तपादशाखायाम् वा ङीप् । अलंवार्थे "अङ्गुरीवोरगच्छतेति" रघुः ।

अङ्गुरीय न० अङ्गुरौ भवम् अङ्गुरि+छ बालमूलादित्वात् वा लत्वाभावः । अङ्गुलिभूषणे (आङ्गुटीति) प्रसिद्धे ।

अङ्गुरीयक न० अङ्गुरीय+स्वार्थे कन् । अङ्गुलिभूषणे (आङ्गुटीति) ख्याते भूषणभेदे ।

अङ्गुल पु० अङ्ग-उल । हस्तपदशाखायाम् (आंगुल) इति ख्यातायाम् । वात्स्यायनसनौ च । "यवोदरैरङ्गुलमष्टसंख्यैरिति" भास्कराचार्य्योक्ते अष्टयवोदरपरिमाणेतु न० । अङ्गौ पाणौ लीयते वा ड । अङ्गुले न० । "समन्तादङ्गुलोत्सेधं हस्तमात्रं तु स्थण्डिलमिति" पुरा० ।

अङ्गुलि स्त्री अङ्ग-उलि । हस्तपदशाखायाम् (आङ्गुल) इति ख्यातायाम् । अङ्गुलिं यन्धिभेदस्य छेदयेत् प्रथमे यत्ने"इति स्मृतिः (छात शुद्धा) इति ख्याते गजकर्णिकाद्रुमे, गजशुण्डाग्रे च । पुंस्त्वमपि "संदंशाधरोऽमङ्गुलिनेति" शब्द० ।

अङ्गुलितोरण न० अङ्गुलेः तोरणमिव कृतम् । चन्दनादिद्वारा कृते ललाटस्थार्द्धचन्द्राकृतितिलके ।

अङ्गुलित्र न० अङ्गुलिं त्रायते त्रै-क ह्रस्वः । (चामाटीति) प्रसिद्धे ज्याकर्षणकृतखेदवारणार्थम् अङ्गुलिवद्धे चर्म्मणि "बद्धगोधाङ्गुलित्रे" इति भट्टिः ।

अङ्गुलित्राण अङ्गुलिस्त्रायतेऽनेन त्रै-क ह्रस्वः । (चामाटीति) प्रसिद्धे ज्याकर्षणकृतखेदनिवारणार्थम् अङ्गुलिवद्धे चर्म्मणि ।

अङ्गुलिमुद्रा स्त्री अङ्गुलेः मुद्रं राति रा-क ह्रस्वः । धारयितुर्नामाक्षरसङ्गसहिते (आङ्गुटीति) प्रसिद्धे अङ्गुलीभूषणे । "उपहितकृतिरङ्गुलिमुद्रेति" शकु० ।

अङ्गुलिमोटन न० अङ्गुल्योर्मोटनं मर्दनं यत्र ब० । अङ्गुलिहृदयमर्दनजाते (तड़ि) इति प्रसिद्धे शब्दे ।

अङ्गुलिषङ्गा स्त्री अङ्गुलौ सङ्गो यस्याः षत्वम् ७ब० । (याउ) इति प्रसिद्धे अङ्गुलिसंलेपकारके यवागूद्रव्ये ।

अङ्गुलिसंज्ञा स्त्री अङ्गुल्या संज्ञा संकेतस्तत्रापनट् । अङ्गुलिचेष्टाभेदेन अभीष्टकर्म्मणि देये सङ्केतविशेषे "सुखार्पितैकाङ्गुलिसंज्ञयेवेति" कुमा० ।

अङ्गुलिसन्देश पु० अङ्गुल्या अङ्गुलिध्वनिना सन्दिश्यते सम्+दिश-भावे घञ् । अङ्गुलिध्वनिद्वारा संज्ञादाने ।

अङ्गुलिस्फोटन न० अङ्गुल्योः स्फोटनं ताड़नं यत्र ७ब० । (तड़ि) इति प्रसिद्धे अङ्गुलिहृदयमर्दनजाते शब्दे ह्रस्वः । अङ्गुलिस्फोटनमात्रे च ।

अङ्गुली स्त्री अङ्गुलि+वा ङीप् । अङ्गुलिशब्दार्थे "च्युतमपि लक्ष्यपदं यदङ्गुलीभिरिति" शकु० "तर्जयन्नङ्गुलीभिरिति" ।

अङ्गुलीपञ्चक न० अङ्गुलीनां पञ्चकम् पञ्चसंख्या । हस्तस्थानामङ्गुलीनां समुदाये तासु अङ्गुष्ठतर्जनीमध्यमानामिकाकनिष्ठाः ।

अङ्गुलीय न० अङ्गुलीयकवत् वा रत्वाभावः । (आंगुटीति) प्रसिद्धे अङ्गुलिभूषणे । "तव सुचरितमङ्गुलीय ! नूनमिति" शकु० । स्वार्थे कन् । तत्तुल्यपरिणाहत्वात्तत्रैव न० ।

अङ्गुलीसम्भूत पु० अङ्गुल्यां सम्भूतः ७त० । नखे । अङ्गुलीसम्भूतमात्रे त्रि० ।

अङ्गुल्यादि पु० ६ब० । पाणिन्युक्ते स्वार्थे विहितकनुप्रत्ययनिमित्ते शब्दगणसमूहे । सच गणः "अङ्गुलि भरल वभ्रु वल्गु मण्डर मण्डल शम्बुली हरि कपि तुनिरुह खल उदश्वित् गोणी उरस् कुलिश इति । अङ्गुलीव+कन् अङ्गुलीयकमित्यादिः ।

अङ्गुष्ठ पु० अङ्गौ पाणौ प्राधान्येन तिष्ठति स्था-क ७त०

त्वम् । इङ्गाङ्गुलौ । "अम्बाम्बेति" सूत्रेऽङ्गुशब्दप्रयोगात् अङ्गुशब्दः ह्रस्ववाचीतिज्ञापितम् । "अङ्गुलोदरमध्ये तु यवो यस्य विराजते" इति साधु० ।

अङ्गुष्ठमात्र त्रि० अङ्गुष्ठ+परिमाणार्थे मात्रच् । अङ्गुष्ठमध्यपर्वपरिमिते । "अङ्गुष्ठमात्रोह्यवरोऽपि दृष्टः" इति श्रुतिः । "अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष बलाद्यम" इति भारतम् । "अङ्गुष्ठाङ्गुलमानन्तु यत्र यत्रोपदिश्यते । तत्र तत्र दृहत्पर्वमध्यभिर्मितुयात् सदेति" कात्या० ।

अङ्गुष पु० अगि-ऊषन् । नकुले वाणे च ।

अङ्गुस् न० अङ्गुते नरकमनेन अधि-गतौ असुन् । पापे "युष्मच्छासनलङ्घनाङ्गुसिमया मग्नेन नाम स्थितमिति" वेणी० ।

अङ्गारि पु० अङ्ग-इण् ङित०टृ० । दीप्तिगीले । "कविरसि "अङ्गारिरसीति" यजु० । "अङ्गारिर्दीप्तिगीले इति" वेददीपः ।

अङ्घि पु० अधिगतौ-इन् । पादे, वृक्षमूले च ।

अङ्घ्रि पु० अधि-गतौ करणे क्रिन् । चरणे, वृक्षमूले, "अधारि पद्मेषु तदङ्घ्रिणा इत्येति नै० । अङ्घ्रिपः (पादपः) छन्दसां चतुर्थभागे च । "प्रथमाङ्घ्रिसमोयस्येति" वृत्त० ।

अङ्घ्रिप पु० अङ्घ्रिणा मूलेन पिबति सिक्तजलम् पा-क ३त० । वृक्षभाले ।

अङ्घ्रिपर्णिका स्त्री अङ्घ्रौ मूले तदारभ्य वा पर्णमस्याः जातौ ङीप् स्वार्थे कन् । सिंहपुच्छाकारपुष्पवति (चाकुलिया) इति ख्याते वृक्षे । काभावे अङ्घ्रिपर्णीत्यपि तत्रैव ।

अङ्घ्रिवल्लिका स्त्री अङ्घ्रेरारभ्य वल्लीव पर्णवल्लेन, ततः स्वार्थे के हस्वे टाप् । सिंहपुच्छाकारपुष्पवति (चाकुलिया) इति प्रसिद्धे वृक्षे । काभावे ङ अङ्घ्रिवल्लीत्यपि तत्रैव ।

अच अविस्पष्टकथने गतौ च उभय० भ्वादि० सक० सेट् क्त्वा वेट् । अचति ते । आचीत् आचिष्ट । क्त अक्तः क्त्वा अचित्वा-अक्त्वा "स्वाहायज्ञमित्यङ्गुली अचते" इति कात्या० । "अचते सङ्कोचयति" इति वेददीपः ।

अच(अनुच) गतौ पूजायाञ्च प० सक० सेट् । तत्र अच इदित् ओदित्च (अनुच) अव्यक्तशब्दे च । अञ्चति आञ्चीत् अनुच-गतौ अचधातात् पूजायामञ्चधातात् । क्त अक्तः पूजायामुभयोः अञ्चितः अधि-वर्त्तमाने क्त अञ्चितः । अनुच-क्त्वा अञ्चित्वा-अक्त्वा अचि-अञ्चित्वा । "अयमञ्चति पक्षशरानुचर" इति सा० टी० । प्र+प्रकर्षे पूर्व्वदिक्कालवृत्तौ च प्राञ्चति प्राङ् (पूर्व्वकालः) प्राची (पूर्व्वा दिक्) परा+प्रतिगतौ, आभिमुख्याभावे, पश्चाद्भावे, बहिर्भावे च पराञ्चति (परागच्छति) पराङ् (बाह्यः) । अप+अपसरणे अपाञ्चति । सम्+सुन्दरगमने, यथोचितगमने च समञ्चति समङ् । अनु+पश्चाद्गतौ । अन्वञ्चति अन्वङ् । उद्+ऊर्द्ध्वगमने, उत्तरदिग्वृत्तौ च उदञ्चति (उद्गच्छति) "उदक्प्रवोमाङ्गमिति" उदङ् देशः उदीची (उत्तरा दिक्) । परि+समन्ताद्गतौ । पर्य्यञ्चति । प्रति+प्रतीपगतौ, पश्चाद्गतौ, पश्चाद्वर्त्तित्वे च प्रत्यञ्चति (प्रतीपं गच्छति) । प्रत्यङ्, प्रतीची (पश्चिमा दिक्) । आत्मनि व्याप्त्यर्थकप्रतिना योगात् प्रत्यक्शब्दः तस्य सर्व्वविषयव्यापकत्वात् प्रत्यक्त्वम् । नि+न्यूनीभावे न्यञ्चति न्यङ् न्यग्भावः न्यक्कारः । अव+अधोगतौ, दक्षिणदिग्वृत्तौ च । अवाञ्चति अवाङ् (अधोमुखः) अवाची (दक्षिणा दिक्) यथा च उत्तरदक्षिणयोः ऊर्द्ध्वाधोभावस्तथा अवाक्शब्दे वक्ष्यते ।

अच गतौ पूजायाम् इदित् उभ० सक० सेट् क्त्वा वेट् । अञ्चति ते आञ्चीत् आञ्चिष्ट । क्त्वा अङ्क्त्वा-अञ्चित्वा । उपसर्गात् अनुचवत् । "न्यञ्चते प्रत्यहं मोहो यस्माद्ग्रन्थिं चारव" इति कविर० ।

अचक्षुस् त्रि० न०व० । मन्दनेत्रे, नेत्रहीने च । "सचक्षुरचक्षुरिव सकर्णोऽकर्ण इवेति" श्रुतिः । न०त० । चक्षुर्भिन्ने न० ।

अचतुर त्रि० न सन्ति चत्वारि यत्र नि० अच्समा० । चतुःसंख्याशून्ये । चतुरोनिपुणः न०त० । दक्षभिन्ने अपटौ त्रि० ।

अचपल त्रि० न चपलः । चापल्यविरोधिस्थैर्य्ययुक्ते ।

अचर त्रि० न चरति चलति-चर-अच् न० त० । चरत्वविरोधिस्थैर्य्यवति स्थावरे स्थितिशीले पृथिव्यादौ "चराणामन्नमचरमिति" मनुः । चलनशून्ये त्रि० । ज्योतिषोक्ते मेषकर्कटतुलामकररााशिरूपचररााशिभिन्नेषु स्थिररााशिषु वृषसिंहवृश्चिककुम्भरााशिषु न० ।

अचरम त्रि० न०त० । अन्तिमत्वविरोधिमध्यत्वाद्यवस्थावति "वयस्यचरमे" इति पा० । अचरमं वयः कौमारादि ।

अचल पु० न चलः ।। (गो॰ज)इति ख्याते शैले । पर्व्वते, "अचलाः सागराः ग्रामाः प्रासादधवलाट्टाः धारितं च त्वयासर्व्वमिति" पृथिवीप्रार्थनामन्त्रः । "अचलएव भवानिव राजते" इति माघः । पृथिव्यां स्त्री । भूमेरचलत्वादिकमुक्तं सि० शि० गो० "भूमेः पिण्डः शशाङ्कशुक्रविरविकुजेज्यार्किनक्षत्रकक्षाष्टत्तैर्वृत्तो वृतः सन् स्वद-

निलसलिलव्योमतेजोमयोऽयम्। नान्याधारः स्वयमथ वैव वियति नियतं तिष्ठतीहास्य दृष्टे निष्ठं विश्वं च भक्त्वदनुजमनुजादित्यदैत्यं समन्तात्। सर्वतः पर्वतारामरम्याम-चैत्यवर्यैश्चितः। कदम्बकुसुमग्रन्थिः केसरप्रकरैरिव। यथोष्णतार्कानलयोश्च, शीतता विधौ, द्रुतिः के, कठिनत्वमश्मनि। मरुच्चलो भूरचला स्वभावतो यतो विचित्रा वत वस्तुशक्तयः। आरूढशक्तिश्च मही तया यत् स्वस्यं गुरु स्वाभिमुखं स्वशक्त्या। आकृष्यते तत्पततीव भाति समे समन्तात् क्व ? पतत्वियं खे" इति। आर्य्यभट्टमते तु अस्याश्चलत्वेऽपि अचलाः पर्वताः सन्त्यत्र अस्त्यर्थेऽच। अचलवत्त्वात् स्वस्थानतो बहिर्गमनाभावाद्वा अचलत्वम्। तेन च तस्याश्चलत्वं दृष्टान्तविधयोक्तं तच्च विस्तरतो भूगोलशब्दे वक्ष्यते। चलनशून्ये त्रि०"तस्मात्त्वमचलोभवेति"कलसस्थापनमन्त्रः। "तस्मान्मम गृहे नित्यं लक्ष्मि! त्वमचला भवेति" पुरा०। "समाधावचला बुद्धिरिति, गीता, अचला भक्तिरीश्वरे" इति पुरा०। न चलति स्वभावात्। शिवे पु० तस्य स्थाणुत्वात् तथात्वम्। ब्रह्मणि न०। "निष्कलं निष्क्रियं शान्तमिति" श्रुत्या अस्य सर्वक्रियाशून्यत्वेनाक्षरचलत्वम्। आत्मनि पु० "नित्यः सर्वगतः स्थाणुरचलोऽयं सनातन" इति गीता।

अचलकन्या स्त्री अचलस्य हिमाचलस्य कन्या। पार्वत्यां, सा हि हिमाचलेन मेनायामुत्पादिता। तत्कथा च "प्रसूतिरभवत्तस्य मेनायाः कन्यका सुतेति" शिवपुराणे प्रपञ्चेन दर्शिता। तन्मूलं कुमारे चोक्तम् "अथावमानेन पितुः प्रयुक्ता दक्षस्य कन्या भवपूर्व्वपत्नी। सती सती योगविसृष्टदेहा तां जन्मने शैलवधूं प्रपेदे। सा भूधराणामधिपेन तस्यां समाधिमत्यासदपादि भव्येति" इति अचलसुतादयोऽप्यत्र।

अचलकीला स्त्री अचलाः कीला इव यस्याः। पृथिव्याम्। अचलस्य सुमेरोः कील इव, अचलः कीलइवावष्टम्भकत्वाद्वा। किष्कुपर्वतेषु मन्दरादिषु पु०। ते च सुमेरूपवर्णने, "विष्कम्भशैलाः खलु मन्दरोऽस्य सुगन्धशैलो विपुलः सुपार्श्व इति" सि०शि०गो० दर्शितास्तेषां स्वरूपादि तत्तच्छब्दे वक्ष्यते।

अचलजा स्त्री अचलात् हिमालयात् जायते जन-ड+टाप्। पार्व्वत्यां, तत्कथा पूर्व्वशब्दे उक्ता। पर्वतजातमात्रे त्रि० अचलजातादयोऽप्यत्र।

अचलत्विष् पु० अचला वह्निप्रज्वालनेनापि मालिन्यानपगमात् स्थिरा त्विट् कान्तिर्यस्य। कोकिले। स्थिरकान्तिमति त्रि०। कर्म्मधा०। स्थिरायां कान्तौ स्त्री।

अचलद्विष् पु० अचलेभ्यः द्वेष्टि द्विष-क्विप् ७त०। इन्द्रे तस्याचलपक्षच्छेदकत्वात्तथात्वं तत्कथा गोत्रभिच्छब्दे वक्ष्यते। अचलरिपादयोऽप्यत्र पु०। पर्व्वतजाते त्रि०।

अचलपति पु० ६त०। हिमाचले। यथा तस्य तत्पतित्वं तथाचलराजशब्दे वक्ष्यते।

अचलभ्राट पु० बौद्धभेदे।

अचलराज पु० अचलानां राजा अच् समा०। हिमाचले "शैलानां हिमवन्तं च नदीनाञ्चैव सागरम्। गन्धर्व्वाणामधिपतिं चित्ररथं विधिरिति" ब्रह्मपुराणे तस्याचलराजत्वोक्तम् अचलाधिपादयोऽप्यत्र।

अचापल न० चपलस्य भावः अण् न०त०। चाञ्चल्यविरोधिस्थिरतायाम्। ब०। चाञ्चल्यशून्ये स्थिरे त्रि०।

अचापल्य न० चपलस्य भावः ष्यञ् न० त०। चाञ्चल्यविरोधिस्थिरतायाम् ब०। ब०। चाञ्चल्यशून्ये त्रि०।

अचिक्कण त्रि० न चिक्कणः। चिक्कणताविरोधिरूक्षत्ववति।

अचित्त त्रि० नास्ति चित्तं यस्य। चित्तशून्ये चेतनारहिते "अचित्तहस्तिधेनोष्ठगिति" अचित्तादेयकालाट्ठगिति" च पा०। स्थावरादीनान्तु न चित्तशून्यत्वं किन्तु विशिष्टचेतनाराहित्यमेवेति अचेतनशब्दे वक्ष्यते।

अचिन्तनीय त्रि० चिन्तयितुं अनुमापकहेत्वभावेन तर्कयितुमशक्यः चिति-शक्यार्थे कर्म्मणि अनीयर् न०त०। अनुमापकहेत्वभावेन तर्कयितुमशक्ये। "अचिन्तनीय स्तु तव प्रभाव इति" रघु०। तदर्थे यत्। अचिन्त्योऽप्युक्तार्थे त्रि० "अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने समस्तजगदाधारमूर्त्तये ब्रह्मणे नमः" इति स्मृत्यं०।

अचिन्तित त्रि० न चिन्तितः। पूर्व्वरूपादिकारणानुसन्धानादिकमन्तरेण अतर्किते "विधेर्नियोगादेतन्मे अचिन्तितमुपस्थितमिति" पुरा०।

अचिर न० न चिरम्। अल्पकाले, अल्पकालस्थायिनि वस्तुमात्रे त्रि०। "अचिरेणैव कालेन वंशनाशो भवेद्ध्रुवमिति पुरा०। अचिरांशुः अचिरप्रभा अचिरद्युतिः।

अचिरत्विष् स्त्री अचिरा अल्पकालस्थायिनी त्विट् कान्तिरस्याः। विद्युति। अल्पकालकान्तियुक्ते त्रि०।

अचिरद्युतिः स्त्री अचिरा अल्पकालस्थायिनी द्युतिर्यस्याः। विद्युति। अल्पकालस्थायिद्युतिमति त्रि०। कर्म्म०। अल्पकालस्थायिन्यां कान्तौ स्त्री।

अचिरप्रभा स्त्री अचिरा अचिरस्थायिनी प्रभा यस्याः। विद्युति। "च्युता दिवः स्थाम्नुरिवाचिरप्रभेति" भट्टिः। अल्पकालस्थायिप्रभावति त्रि०। कर्म्म०। अचिरायां दीप्तौ स्त्री।

अचिरभास् स्त्री अचिरा अल्पकालस्थायिनी भाः यस्याः। विद्युति। अल्पकालस्थायिदीप्तिमति त्रि०।

अचिररोचिस् स्त्री अचिरं रोचिर्यस्याः। विद्युति। अचिरकान्तिमति त्रि०। कर्म्म०। अचिरकान्तौ न०।

अचिरस्थ अव्य० चिरस्येत्यव्ययेन न० त०। स्वल्पकाले।

अचिरांशु स्त्री अचिरा अंशवोऽस्याः। विद्युति। "अचिरांशुसमप्रभेति" पुरा०। अल्पकालस्थायिकिरणवति त्रि०। कर्म्म०। अचिरकिरणे पु०। [लम्बे च।

अचिरात् अव्य० अचिरम् अततीति किप्। शीघ्रे, अवि-

अचिराभा स्त्री अचिरा आभा यस्याः। विद्युति।

अचिराय अव्य० न चिराय। स्वल्पकाले शीघ्रे च।

अचिरेण अव्य० चिरेणेत्यव्ययस्य न० त०। अल्पकाले शीघ्रे च।

अचिष्णु(ष्टु) त्रि० अच-गतौ वा० इष्णु(ष्टु)च्। गमनशीले। "त्वदा दधच्छुचिमिन्द्राय दृष्णेऽपाकोऽचिष्णु(ष्टु)रिति" यजु० अचि(ष्टु)ष्णुः सर्व्वगत इति वेददीपः।

अचेतन त्रि० चेतना ज्ञानम् न०ब०। चेतनाशून्ये। चित-ल्यु न०त०। ज्ञानविशिष्टभिन्ने। ज्ञानञ्च द्विविधं विषयाकारमनोवृत्तिरूपं तत्फलितचैतन्यरूपञ्च तत्र वृत्तिरूपं ज्ञानं चित्तस्यैव धर्म्मः "कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्व्वं मन एवेति" श्रुतौ तस्य चित्तधर्म्मत्वावगमात्। द्वितीयं तदुज्ज्वलितचैतन्यमात्मधर्म्मः। प्रकाशरूपचैतन्यस्य सर्व्वदा स्थितावपि वृत्तिसहकारेणैव तदृताज्ञाननिवारणे चैतन्यं सम्यग्ज्वलति नान्यथा अतएव "बुद्धिवृत्तिचिदाभासौ द्वावेतौ व्याप्नुतो घटम्। तत्राज्ञानं धिया नश्येदाभासान्तु घटः स्फुरेत्" इत्युक्तमिति वेदान्तिनः। सांख्यास्तु विषयोपरक्ता वृत्तिश्चितौ प्रतिबिम्बति तेनैव विषयावभासः "तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुवृत्तयः। इमास्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमाः" इति मन्यन्ते। नैयायिकास्तु सांख्यवेदान्तिमतसिद्धं यत् वृत्तिरूपं ज्ञानं तत्स्थानीयमात्मनश्चैतन्यसुररीचकुः। तादृग्वृत्तौ तत्स्थानीयज्ञाने च आत्ममनःसंयोगादयः कारणानि। आभ्यन्तरसुखादिविषयग्रहणे मनःकरणम्, इन्द्रियाणि तु स्वस्वग्राह्यविषयग्रहणे करणानि, "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमिति" गौतमसूत्रे "प्रतिविषयाध्यवसाय इति" सांख्यसूत्रे च तथैव स्वस्वविषयेष्विन्द्रियाणां ग्राहकता उक्ता। तच्च तत्तच्छब्दावसरे दर्शयिष्यते। एवञ्च आभ्यन्तरे सुखादौ मन एव, बाह्येषु शब्दादिषु श्रोत्रादीनि असाधारणकारणानि। मनस्तु बाह्येषु सर्व्वत्र साधारणकारणमिति भेदः। एवञ्च ज्ञानकारणेन्द्रियशून्ये एवाचेतनशब्दस्य प्रवृत्तिः। अतएवोक्तं "सेन्द्रियं चेतनं दृश्यं निरिन्द्रियमचेतनमिति"। एवञ्च वृक्षादीनामपि अन्तःकरणादिमत्त्वमस्त्येव। अन्यथा सुखदुःखानुभवो न स्यात्। तेषां हि स्वकर्म्मानुसारिदुःखभोगार्थमेव पापेनैव स्थावरत्वप्राप्तिः। अतएव "महापातकजान् घोरान् नरकान् प्राप्य दारुणान्। कर्म्मक्षयात् प्रजायन्ते महापातकिनस्त्विह" इत्युपक्रम्य "वृक्षगुल्मलतात्वञ्च क्रमशो गुरुतल्पगः" इति याज्ञवल्क्येन चेतनस्यैव पापावशेषभोगार्थं वृक्षादिरूपेण जन्मोक्तम्। "शरीरजैः कर्म्मदोषैर्याति स्थावरतां नर" इति च सामान्यतः शारीरिकपापात् वृक्षादिरूपस्थावरजन्म तेनैवोक्तमतस्तेषां दुःखभोगार्थमेव वृक्षादिरूपत्वप्राप्तौ इन्द्रियाभावे कथङ्कारं ते दुःखमनुभवेयुरित्यवश्यं तेषु इन्द्रियादिमत्त्वमस्त्येव। अतएव पद्मं सरोऽन्तरं गच्छति, शाखा च्छिन्नापि चेतनसंयोगात् पुनः प्ररोहतीत्युपलभ्यते। अतएव च श्रुतौ "अथ जीवो यां जहाति सा शुष्यती"त्युक्तम्। तेन तेषां जीवसंबन्धोऽस्त्येव किन्तु विशिष्टचेतनाशून्यत्वादेव तेषु अचेतनत्वव्यवहार इति भेदः। पदार्थादर्शे "देहश्चतुर्विधो ज्ञेयो जन्तोरुत्पत्तिभेदतः। उद्भिज्ज अण्डजोऽस्वेदजश्चतुर्थस्तु जरायुज", इति स्थावराणां देहसम्बन्ध उक्तः। "चेतनाधिष्ठिते भोगायतननिर्म्माणमन्यथा पूतिभावप्रसङ्ग" इति सांख्ये च चेतनसम्बन्ध एव भोगायतनरूपदेहोत्पत्तिरुक्ता। तेषाञ्च भोगायतनदेहवत्त्वेऽपि सर्व्वेन्द्रियस्थानगोलकादेरभावात् न दर्शनादि किन्तु त्वाचप्रत्यक्षं प्राणजप्रत्यक्षं च भवत्येव अतएव अग्न्यादिखरतरकिरणसंसर्गे तेषां शुष्कता, ओषधिविशेषजधूमादिसम्पर्के च तद्घ्राणात् पुष्पफलोत्पत्तिः। अत एव तेषां द्वीन्द्रियत्वेन व्यवहारः यथोक्तम् "षड्वेन्द्रिया मनुष्याद्याः सर्पाद्याश्चतुरिन्द्रियाः। त्रीन्द्रियाः कुन्थिकीटाद्या द्वीन्द्रिया वृक्षजातय" इति। मनसो विद्यमानत्वेऽपि हृदयरूपविशिष्टस्थानाभावात् न स्पष्टमवबोधः। श्रूयते हि हृदयस्थानसुषवर्त्म "तद्धृदयं विशिष्टचेतनाश्रयमित्युक्तम्" तेन तेषां विशिष्टचेतनाश्रय-

हृदयस्थानशून्यत्वात् विशिष्टचेतनावत्त्वं नास्ति सुख-दुःखानुभवमात्रं तु तेषां जायते एवेति विशेषः तेनैव स्वस्वकर्म्मफलानुरूपदुःखानुभवात् स्वस्वकर्म्मफलभाक्-त्वम् इति सुस्थितम्। चेतनाशून्ये पदार्थमात्रे त्रि०। "अचेतनं चेतनावदिव लिङ्गमिति" सा०का०। तत्तद्विषयज्ञानशून्ये च। "तन्तु दुःखाभिसन्नप्नं विल-पन्तमचेतनमिति पुरा०। अत्र दुःखानुतप्तत्वेन तदनुभवस्योक्तेः तथाभूतेऽपि चेतने अचेतनत्वोक्तिः विवेकज्ञानशून्यत्वपरत्वेनैव, एवमन्यत्रापि। "अहङ्कारलये सुप्तौ भवेद्देहोऽप्यचेतन" इत्युक्तिस्तु देहस्य चैतन्यप्रकाशा-वच्छेदकतया, जागरे स्वप्ने च चैतन्यसुपचर्य्य सुषुप्तौ अवच्छेद्याहङ्काररूपमनसो लयात् कथमवच्छेदकत्वं? स्यादित्यतोऽचेतनत्वमित्येवंपरा। अन्यथा "शरीरस्य न चैतन्यं श्रुतेषु व्यभिचारतः" इत्युक्तेः देहे सदा चैतन्याभावस्य सिद्धत्वात् सुषुप्तौ तथात्वकथननवर्थकं स्यात्। सुषुप्तावपि इन्द्रियाणां मनसश्च विशिष्टव्यापाररहित्येन लयत्वोपचारः किन्तु आत्मनि तदापि चैतन्यमस्त्येव। "आनन्दभुक् चेतोमुखः प्राज्ञ" इति श्रुतेः सुखमहमस्वाप्सं न किञ्चिदवेदिषमिति सुप्तोत्थितस्य परामर्शाच्च आनन्दा-नुभवस्य तत्रापि सत्त्वात् सुतरां देहस्य तदनुभवज्ञानाव-च्छेदकत्वमस्त्येवेति विशेषः। विस्तरस्तु सुषुप्तिशब्दे वक्ष्यते।

अचेतस् त्रि० न चेतति चित-असुन् न० त०। चेतनाशून्ये अचेतने घटादौ, तत्तद्विषयज्ञानरहिते च। "गतसंज्ञम-चेतसमिति" पुरा०। नास्ति चेतोऽस्य। चित्तरहिते त्रि०।

अचेतान त्रि० चित-ज्ञानच् वेदे न लुक् न० त०। चैतन्यरहिते "अचेतानस्य मा पथो वि दुक्षः इति" वेदः।

अचेष्ट त्रि० नास्ति चेष्टा यस्य। चेष्टारहिते। चेष्टा च "आत्म-जन्या भवेदिच्छा-इच्छा जन्या भवेत् कृतिः। कृतिजन्या भवे-च्चेष्टा चेष्टाजन्या भवेत्क्रिया" इत्युक्तेः यत्नसाध्या क्रिया-जनकव्यापाररूपा। चेतनाधिष्ठितदेहेष्वेव कर्म्मविशेषः न तदनधिष्ठिते तथा च यस्मिन् देहे आत्मनो यत्नो भवति तद्देहावच्छेदेनैव चेष्टा जायते नान्यस्मिन् सा च उद्यम-रूपैव। मनोवायुभिन्नद्रव्यस्य न स्वतःक्रिया सम्भवति किन्तु गुरुद्रव्याद्याघातनोदनादिनैव क्रिया भवति नान्यथा। तथा च हस्तादिचालनदर्शनात् तत्कारणी-भूतनोदनादिकमनुमीयते तच्च नोदनम् आत्मकर्त्तृकमेव अन्यस्यानुपलब्धेः। अधिकं चेष्टाशब्दे वक्ष्यते।

अचेष्टता स्त्री अचेष्टस्य भावः। चेष्टाराहित्ये।

अचैतन्य त्रि० नास्ति चैतन्यं चेतना यस्य। चैतन्य-शून्ये। "अचैतन्यमिदं विश्वं दैवं चैतन्यमेव यदिति"। न०त०। चैतन्यभिन्ने न०।

अच्छ अव्य० न च्यति दृष्टिं सम्मुखत्वात् छो-क न०त०। आभिमुख्ये। "अच्छा नदस्य सरत् पविते इति" वेदः। "अच्छ गत्यर्थवदेषिति" सूत्रे "अच्छगत्य अच्छोद्य इत्यु-दाहृत्य अभिमुखं गत्वा अभिमुखसङ्गतेति" व्याख्यातम् सि०कौ०।

अच्छ त्रि० न छ्यति दृष्टिम्, छो-क न०त०। स्वच्छे निर्म्मले। निर्म्मले हि वस्तुनि दृष्टिः प्रसरति न तु समले आभ्यन्तर-पर्य्यन्तं धावतीति निर्म्मलस्यैव तदप्रतिबन्धकत्वात्तथात्वम्। "स्वच्छन्दोच्छलदच्छकच्छकुहरेति काव्यप्र०। स्फटिके पु०। न छ्यति भक्षयति नाशितसत्त्वं छा-भक्षणे क न०त०। भल्लके पु०। अच्छभल्लुकशब्देकं नामेत्यन्ये।

अच्छन्दस् त्रि० नास्ति अध्येयत्वेन छन्दोवेदोऽस्य तुक्। वेदाध्ययनशून्ये अनुपनीते बालके, सर्व्वथा तच्छून्ये शूद्रादौ च। नास्ति छन्दो इच्छानुसारी, परिमितमात्रा-क्षरादिसन्निवेशविशेषो यत्र ७त० तुक्। छन्दःशून्ये गद्यात्मके, चूर्णके वा शब्दसमूहे। नास्ति छन्दोभिप्रायो यस्य ब० तुक्। अभिप्रायशून्ये। वा कपि। अच्छ-न्दस्कोऽप्युक्तार्थेषु।

अच्छावाक पु० अच्छं निर्म्मलम् अच्छ आभिमुख्येन वा वक्ति शंसति वच-कर्त्तरि संज्ञायां घञ्(निपातस्य चेति) दीर्घः। शंसनकर्त्तरि होत्रसहकारिणि सोमयागसम्बन्धिनि ऋत्विग्-भेदे। स च आश्वलायनेन दर्शितः। "प्रागपि सोमेनैके, इत्युपक्रम्य, "तस्यर्त्विजः, चत्वारस्त्रिपुरुषाः, तस्य तस्योत्तरे त्रयः, होता, मैत्रावरुणोऽच्छावाकोऽग्नीध्रः पोता, उद्गाता, प्रस्तोता प्रतिहर्त्ता सुब्रह्मण्य इति, एतेऽहीनैकाहैर्या-जयन्ति, एत एवाहिताग्नय इष्ट्वाधमयज्ञा स्टक्पतिसप्तदशा दीक्षित्वा सभाग्नीत्साङ्गुखाः सत्राण्यासते" इति। "अस्या-यमर्थः, दर्शपूर्णमासाभ्यामिष्ट्वा पशुना तदङ्गभानः पुरस्ताद्वा सोमेन यजेत तस्य सोमयागस्य होताध्वर्युर्ब्रह्मोद्गातेति चत्वारः ऋत्विजो मुख्याः ते च प्रत्येकं त्रिभिः त्रिभिः पुरुषैरुपेता अतस्तस्य तस्य एकैकस्योत्तरे त्रयः पुरुषा भवन्ति, त एते होत्रादिनामकाः षोडशर्त्विजो हिरण्मयादिभिरहीनसंज्ञकै-रग्निष्टोमादिभिरेकाहसंज्ञकैर्याजयन्ति। एतएव होत्रादयः षोडशर्त्विजः स्वयमाहिताग्नयः प्रथमयज्ञेनाग्नीधे-

नेट्टा मट्टपतिसंज्ञकेन सप्तदशसंख्यापूरकेण सहिता हादशाहादिसत्रार्थं दीक्षित्वा खखसम्बन्धिनोऽग्नीनेकत्र स्थापयित्वा तत्प्रधानाः सत्राख्यमुपतिष्ठेयुः इति" भाष्यम्।
"यदच्छावाकमनुसञ्चरते इति" ता० ब्रा०। अच्छावाकशब्दोऽस्यास्त्र। अच्छावाकीयम् तच्छब्दयुक्ते सूक्तभेदे, तच्च सूक्तम् "अच्छावाक! यदक्षेष्यन्नोऽच्छा वो अग्निमवस इति सूक्तमन्वाहेत्यादिना" दर्शितम्। अच्छावाकस्येयम् यत्। अच्छावाक्या। अच्छावाकात्विक्-पाखायाम्हचि। "एषा होत्रा यदच्छावाक्या" इति ता० ब्रा०। "अच्छावाक्या अच्छावाकसम्बन्धिनी होत्रागंसनरूपा क्रियेति" तद्भाष्यम्।

अच्छावाकसामन् न० अच्छावाकेन गेयं साम। "य एक इद्दिदवत इति ऋचे गेये सामभेदे एतस्यैव नामान्तरसहंगीयमिति" "त्रैकुभं वोहंगीयञ्चान्ततः प्रतिदाप्ये इति" ताण्ड्य० ब्रा०। "त्रैकुभं ब्रह्मसाम भवति, उहंगीयमच्छावाकसामेति, "य एक इद्दिदवते इति" ऋचे गेयं साम उहंगीयमेते सामनी इति" तद्भाष्यम्।

अच्छावाकीय न० अच्छावाकस्य ऋत्विग्भेदस्य कर्म्म भावो वा "होत्राभ्य" इति छ। शंसनरूपे अच्छावाककर्म्मणि, तद्भावे च।

अच्छिद्र त्रि० न छिद्रं तत्तत्कार्य्येषु प्रमादादिना स्खलनं, रन्ध्रं वा यत्र। प्रमादादिना स्खलनरहिते। "अच्छिद्रेण विचेतव्या देवाः सगिरिकन्दरा" इति रा०। "यच्छिद्रं तपश्छिद्रं यच्छिद्रं पूजने मम अच्छिद्रमस्तु तत्सर्वमिति" "अच्छिद्रं तु भवत्येतत् सर्वेषाञ्च शिवाय नः" इति च पुरा०। "तत्तथा क्रियतां राजन् यथाऽच्छिद्रः क्रतुर्भवेदिति" भार०। रन्ध्ररहिते च।

अच्छिन्न त्रि० छिद्-भावे क्त न०व०। खण्डनरहिते, छेदनरहिते, सन्ते च "वसुधारां प्रवर्त्तेति अच्छिन्नघृतधारेति" पुरा०। कर्म्मणि क्त न०त०। छिन्नभिन्ने त्रि०।

अच्छिन्नपत्र पु० अच्छिन्नं सन्तं पत्रमस्य। शाखोटकवृक्षे सन्तपत्रयुक्तवृक्षभावे च। अच्छिन्नपर्णादयोऽप्यत्र।

अच्छेदिक त्रि० छेदनं नार्हति ठन्। छेदनानर्हे।

अच्छेद्य त्रि० न छेत्तुमर्हति छिद-अर्हार्थे कर्म्मणि यत्। छेदनानर्हे। आत्मनि पु० "अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव चेति" गीता। आत्मनश्च अवयवाभावात् अवयवद्वैधीकरणरूपच्छेदनानर्हत्वात् तथात्वम्।

अच्छोद न० अच्छं निर्म्मलमुदकं यस्य उदादेशः। हिमालय प्रदेशस्थे कादम्बरीप्रसिद्धे सरोवरभेदे। "आह्लादनं हृदे, अच्छोदं नाम सरो दृष्टवानिति" काद०। नदीभेदे स्त्री। अग्निष्वात्तादीनां प्रक्रमात्, "एतेषां मानसी कन्या अच्छोदा नाम निम्नगा" इति पुरा०।

अच्युत पु० स्वरूपसामर्थ्याच्च च्युतो न च्यवते न च्यवियते वा च्यु-कालसामान्ये कर्त्तरि क्त न० त०। परमेश्वरे "शाश्वतं शिवमच्युतमिति" श्रुतिः। "यस्मान्न च्युतपूर्व्वोऽहमच्युतस्तेन कर्म्मणेति" भगद्वाक्यम्। "तेन च्युत्यभावरूपप्रवृत्तिमित्तेने"त्यानन्दगिरिः। तदवतारभेदे वासुदेवे "इयमच्युतलीलाढ्या सहृत्ता जातिशालिनीति" छन्दोमञ्जरी अच्युतस्य लीला अच्युता अस्खला लीला च। षड्भावविकाररहिते च "अच्युतः प्रथितः प्राण" इति सहस्रनामभाष्ये तथैव व्याख्यातम्। नारायणे च "गरुडमूर्त्तिरिवाच्युतस्थितिरमणीयेति" काद०। अच्युतस्य विष्णोः स्थितिः अच्युता अस्खला च स्थितिरिति तदर्थः। चलनरहिते अस्खले स्थिरे त्रि०। "अच्युतमसि अच्युतमसीति" वेदः। द्वादशसर्गयुक्ते काव्यभेदे पु० हेमचन्द्रः। न च्योतति चरति च्युत-क न०त०। चरणशून्ये त्रि०।

अच्युताग्रज पु० अच्युतस्य वासुदेवस्य उपेन्द्रस्य वा अग्रजः ईत०। बलदेवे। वसुदेवाज्जन्मकाले बलदेवस्य ततोऽग्रजननात् तथात्वम्। इन्द्रे। कश्यपाज्जन्मकाले च अदित्यामग्रोत्पन्नत्वात् तस्य तथात्वमिति भेदः। तयोश्च तदग्रजत्वं सङ्कर्षणशब्दे इन्द्रावरजशब्दे च वक्ष्यते।

अच्युताङ्गज पु० अच्युतस्य वासुदेवस्य अङ्गजः। कृष्णपुत्रे प्राधान्यात् कामदेवे। [जात इति भा० १० स्कन्धे।

अच्युतात्मज पु० ईत० कामदेवे। स हि रुक्मिण्यां कृष्णात्

अच्युतावास पु० अच्युतेन ओघ्यतेऽत्र आ-वस-आधारे घञ् ईत०। अश्वत्थवृक्षे। "अश्वत्थः सर्ववृक्षाणामि"त्युक्तेरस्य तत्रोपस्थत्वात्तदावासत्वम्। [च्युतिशून्ये त्रि०।

अच्युति स्त्री च्यु-क्तिन् न०त०। चरणाभावे। वङ्ग०।

अज गतौ क्षेपणे च भ्वादि० पर० सक० सेट्। अजति। अवैषीत्-आजीत्। ल्युट् अजिता-वेता। घञ्। आजः। "अजन्ति वह्निं सदनान्यच्छ" इति वेदः।

अज दीप्तौ इदित् चुरादि० उभय० सेट् अक०। अञ्जयति ते। आञ्जिजत् त।

अज पु० न जायते जन ड न०त०। ईश्वरे, "न जातो न जनिष्यते" इति श्रुतेः "न हि जातो न जायेऽहं न जनिष्ये कदाचन। क्षेत्रज्ञः सर्व्वभूतानां तस्मादहमजः स्मृतः"

इति भार० । जीवे च "अजोनित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे" इति गीता । "जक्षात्वेनां भुञ्जतोऽन्य इति" श्रुतिः । स हि स्वोपाधिभूत बुद्धिनिष्कर्म्मभिरारब्धदेहमधिष्ठाय बुद्धिनिष्कर्त्तृत्वादिक-मात्मन्यभिमन्यमानः जीव इति व्यवह्रियते "न जायते म्रियते वा कथञ्चित् नायं भूत्वा भविता वा न भूय" इति गीतायां तस्य जन्मादिशून्यत्वमुक्तं तच्च "जायते अस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यतीति" यास्कोक्तषड्भाव-विकाराणामुपलक्षणमाद्यन्तयोः जन्मनाशरूपविकारयो रभा-वकथनेन तदन्तःपातिनामपि सन्दंशपतितन्यायेन यद्दणा-वश्यम्भावात् । स च ब्रह्माभिन्न एवेति वेदान्तिमतम् बुद्धिरूपो-पाधीनां नानात्वात् न सर्व्यव्यवहारसाङ्कर्य्यम् । बह्वज इति साङ्ख्यादयः "जन्मादिव्यवस्थातः पुरुषबहुत्वमिति" पुरुष-स्वोपाधिभूतबुद्धिभेदेऽपि "उपाधिर्भिद्यते न तु तद्वानिति" न्यायेन उपाधिभेदेऽपि उपहितस्यैकत्वेन न भेदः, विशिष्ट-स्यानतिरिक्ततया न जन्मादिव्यवस्थेति पुरुषबहुत्वमङ्गी-चक्रुः कर्त्तृत्वादिकं बुद्धिगतमपि स्वोपाहितचैतन्ये एव प्रतिबिम्बति तेन तद्विविक्तचैतन्ये तदवभासात् पुरुषस्य भोगः, "चिदवसानोभोग इति" सूत्रे तथैव प्रतिपादनात् एवञ्च यावत्यः बुद्धिव्यक्तयस्तावन्त एव पुरुषाः स्वस्वोपाधिकृतं कर्म्मादिकं स्वकर्त्तृकतया अभिमन्यमानास्तत्प्रयुक्तं सुख-दुःखादिकमात्मीयत्वेन अभिमन्यमानाः भोक्तारइति व्य-वह्रियन्ते अतएवोक्तम् "बुद्धेर्भोग इवात्मनीति" । "कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एवेति" श्रुतेः ज्ञानादिवृत्तीनां मनोजन्यत्वात् मनोधर्म्मत्वम् सांख्यवेदान्तिनोस्तुल्यम् जीवस्य विभुत्वाङ्गी-कारेऽपि स्वोपाधिबुद्ध्यधिष्ठानदेह एव विशेषसंयोगात् तत्रैव आत्मत्वाभिमानः नान्यदेहेषु, तेषां स्वभोगार्थं स्वोपाधिबुद्धिकृतकर्म्मारब्धत्वाभावात् । एवं सुखदुःखानुस-न्धानमपि स्वोपाधिकृतकर्म्मविशेषादेवेति तत्तद्भेदव्यवस्थेति । ज्ञानकारणमनसाञ्च पुरुषभेदेन भिन्नत्वात् न परानुसन्धा-नेनापरस्यानुसन्धानप्रसङ्ग इति सांख्यभेदान्नयोस्तुल्यम् । विशिष्टस्यातिरिक्तत्वानतिरिक्त एव तयोर्विसंवादः । नैया-यिकवैशेषिकादयस्तु ज्ञानादयो जीवधर्म्माः जीवाश्च बहवः नित्या विभवश्च कर्त्तृत्वं भोक्तृत्वञ्च जीवानाम-मेव धर्म्माः, तेषां विभुत्वेऽपि स्वाङ्गारब्धदेहेष्वेव संयोग-विशेषः सएव जन्म, तद्वियोगश्च मरणमित्येव विशेषः न तु स्वतो जन्मनाशाविति स्वीचक्रुः । तेन तन्मतेऽपि न अज-त्वव्याघातः । एवं सर्व्वदर्शनाङ्गीकृतमरणाभावजत्वम् । माध्वास्तु जीवस्याणुत्वमीश्वरादुत्थितत्वञ्च "एतस्मैव विस्फुलिङ्गाव्युच्चरन्तीति" श्रुतेस्तस्यैव तात्पर्य्यात् "बाला ग्रशतधारस्य शतधा कल्पितस्य च । भागो जीवः स विज्ञेय" इत्युक्तेश्च जीवस्याणुत्वम् अणुत्वेऽपि तेषां सर्व्व-देहगतसुखाद्यनुसन्धानं गुणद्वारैव, यथा गृहैकदेशस्थितं कस्तूरीप्रभृतिसुगन्धिद्रव्यं सौरभेण सर्वं गृहमामोदयति एवं हृदयस्थं विस्फुलिङ्गरूपं चैतन्यं सर्वदेहगतं प्रकाशं कुर्वत् शब्दादीन् विषयांश्चावभासयत् सर्वव्यापीत्युच्यते न तु स्वरूपतः "अणोरणीयान् महतो महीयानिति" श्रुतेः स्वरूपगुणाभ्यां अणुत्वमहत्त्वयोः सम्भवपरतायामेव तात्-पर्य्यात् । अजत्वव्यपदेशस्तु भूतारब्धत्वाभावकृतं गौणमतो-ऽत्र अजशब्दो भाक्त एव इत्युररीचक्रुः । चार्वाकमते तु आत्मनो नाजत्वं देहाकारपरिणतभूतचतुष्टयस्यैव तेषां मते जीवत्वात् तद्विवरणं चेतनशब्दे वक्ष्यते । सौगतादिमते तु जीवानां संविदनतिरिक्ततया सर्व-संविदनुसूतत्वात् जन्मान्तरभाविनः अपवर्गरूपफलादेः स्वीकाराच्च नित्यत्वं, नित्यत्वाच्च अजत्वमिति भेदः । "सत्वं रजस्तम इति प्रकृते र्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते । स्थित्यादये हरिविरिञ्चिहरेति संज्ञा"मित्यु-क्तेश्च ईश्वरस्यैव स्वोपाधिमायागतसत्वरजआद्युपाधिभिः जन्मस्थितिनाशनरूपकार्य्यकरणार्थमायाविभावात् अजस्वरू-पाननतिरेकात् तेषामजत्वं तेन ब्रह्मणि, विष्णौ, हरे च पु० । न जायते इत्यजा । सांख्यमतसिद्धप्रधानापरपर्य्याये साम्यावस्थापन्नसत्वरजस्तमोरूपगुणत्रयात्मकेस्त्री । "अजा-मेकां लोहितशुक्लकृष्णवर्णाः सरूपाः बह्वीः प्रजाः सृज-मानामिति" श्रुतिः । सत्वादिगुणानुसारेण श्वेतादिरूप-युक्तबहुकार्य्यसृष्टत्वाच्च तस्याः नानावर्णत्वमिति सांख्याः । वेदान्तिनस्तु एतां श्रुतिं तेजोऽबन्नरूपपरतया व्याचक्रुः । तथा हि "हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति" तेजोऽबन्नाभि-मानिनीस्तिस्रो देवता अनुप्रविश्येत्युक्तेः प्रक्रान्ततेजोऽ-बन्नानामेव भौतिकस्थूलोपादानत्वावगमात् तासामेव प्रकृतित्वेन अजत्वम्, तासाञ्च लोहितादिरूपाणि तत्प्रक-रणस्थे उक्तानि "यद्लोहितं रूपं तत्तेजसो रूपं, यच्छुक्लं तदपां, तत् कृष्णं तदन्नस्येति" । एवञ्चोक्तशुक्लकृष्णलोहिता-दिरूपाणामेवेह श्रुतौ प्रकृतित्वाभिधानात् अजाशब्देन तेजोऽ-बन्नरूपप्रकृतेर्ग्रहणमिति" तेन अजामित्यादिश्रुतौ अजा-

शब्देन तादृशप्रकृतिरेव बोध्यते। तथा च तादृशां तेजोवह्न्याभिमानिदेवतायां स्त्री। अजाशब्दोक्ता नानायुक्ताः सन्त्यस्य अच्। छागे तस्य नानावर्णत्वात्तथात्वम्। छाग्यां स्त्री जातित्वेऽपि अजादित्वात् टाप्। "अजागलस्तनकल्पेति" ज्योतिषम्। द्वादशधा विभक्तस्य राशिचक्रस्य मेषरूपे प्रथमे राशौ "जीवार्किभानुजेज्यानां क्षेत्राणि क्षुरजादयइति" ज्योतिषम् तस्य मेषरूपत्वेऽपि मेषस्य अजतुल्याजाधिष्ठितरूपाभ्यां तत्त्वम्। मेषे च अजेन ब्रह्मणा दत्तयज्ञभङ्गसमये मेषरूपधारणेन पलायमानत्वात् अजाधिष्ठितरूपवत्त्वात् मेषस्य उपचारात् अजत्वम्। मात्रिकधातौ पु०। जननशून्ये गगनादौ त्रि०। आत् विष्णोर्जायते इति। चन्द्रे कामे, च पु०। "चन्द्रमा मनसो जात इति" श्रुतौ विष्णोर्मनोजन्यत्वाच्चन्द्रस्य अजत्वम्॥ कामस्य वासुदेवात् रुक्मिण्यां जातत्वं भागवते प्रसिद्धम् दशरथपितरि रघुराजपुत्रे रामचन्द्रस्य पितामहे सूर्य्यवंश्ये नृपभेदे च। तस्याजत्वञ्च अजरूपब्रह्मणो मूहूर्त्तजातत्वात् यथोक्तं रघौ "ब्राह्मे मूहूर्त्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमारम्। अतः पिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजंचकारेति" तच्चरितञ्च तत्रैव ब्रह्मशापादप्सर्गान्ते द्रष्टव्यम्। छागतुल्याकारवत्त्वात् औषधिविशेषे स्त्री। तल्लक्षणं "अजालनाभकन्दा तु सक्षीरा क्षुपरूपिणी। अजा महौषधी त्रेया गङ्गकुन्देन्दुपाण्डुरेति" वैद्यकम्। ऋषिभेदे पु०। गर्गा० यञ्। आज्यः तदपत्ये। बह्वादिषु लुक्। अजाः। नड्वा० फक्। आजायनः तद्गोत्रापत्ये। उपमानतया पूर्व्वनिर्द्देशे तदन्तपादस्य नान्तलोपः। अजपादः स्त्रियान्तु कुम्भपा० ङीप् अन्त्यलोपः पदादेशश्च। अजपदीति भेदः। एकादशरुद्रमध्ये प्रथमे रुद्रे पु०। तद्विवरणम् अजैकपादशब्दे दृश्यम्।

अजकर्ण पु० अजस्य कर्ण इव पर्णं यस्य। छागतुल्यलम्बायमानपत्रयुक्ते (साल) इति ख्याते वृक्षे मरिचवृक्षे च। ईत० छागकर्णे। [कै-क। (साल) इति ख्याते वृक्षे।

अजकर्णक पु० अजकर्ण इव कायति पत्रद्वारा प्रकाशते

अजकव अस्त्री० अजो विष्णुः को ब्रह्मा तौ वाति त्रिपुरासुरवधद्वारानेन वा+करणे क ईत०। शिवधनुषि। शिवो हि अनेनैव धनुषा त्रिपुरासुरस्य वधेन विष्णुं ब्रह्माणं च प्रीणितवान् इति तस्य धनुषोऽजकवत्वम् अजकौ अवतीति। अजकावमथत्र। "धनुष्यजगवं युग्यमजकावमजीकवमिति" शब्दार्णवः। अजकं छागं वाति प्रीणाति वा-क। (वावुड इति) ख्याते वर्बरीवृक्षे पु०। तल्लक्षणे तस्य प्रीत्याधिक्यात्तथात्वम्।

अजका स्त्री अजस्य विकारः अवयवः गलस्तनः पुरीषं वा कन्। अजागलस्थे स्तनाकारे मांसखण्डे, तत्पुरीषे च।

अजकाजात पु०५त०। अजकेव जातः। "अजापुरीषप्रतिमो रजावान् सलोहितो लोहितपिच्छिलास्रः। विदार्य्य कृष्णं प्रचयोऽभ्युपैति तं चाजकाजातमिति व्यवस्येदिति" वैद्यकोक्ते रोगभेदे।

अजकाव न० अजका अजागलस्तनइव वाति प्रकाशते वा-क। अजागलस्तनाकारकाण्डावयवयुक्ते मैत्रावरुणे यज्ञीयपात्रभेदे, "अजकावं दुर्ग्रहीकं तिरोदधे" इति भेदः। अजैव अजका तत्पुरीषं वा तद्वत् वाति प्रकाशते वा-क। अजकाजातारव्ये रोगभेदे पु०। शिवधनुषि न०।

अजक्षीर न० अजायाः क्षीरं ईत० पुंवद्भावः। छागीस्तन्यदुग्धे "अजक्षीरेण पाचयेदिति" वैद्यकम्।

अजग न० अजं विष्णुं गच्छति शरत्वेन गम-ड। शिवधनुषि। अजेन ब्रह्मणा गम्यते गीयते वा कर्म्मणि गम-ड-गै-क वा। विष्णौ पु०। अजेन गच्छति, अजं छागंयज्ञाङ्गत्वेन वा गच्छति गम-ड। वह्नौ पु०। प्रज्ञा० स्वार्थे अण् आजगमपि शिवधनुषि "स्थाणोर्धनुष्याजगमित्यमरमाला।

अजगन्धा स्त्री अजस्य गन्ध इव गन्धोऽस्याः। (वनजोयान) इति ख्यातायां वनयामान्यायाम् अजमोदायाम्।

अजगन्धिका स्त्री अजस्य गन्ध इव गन्धो यस्याः ब० कप्, कापि अत इत्त्वम्, अजस्य गन्ध इव गन्धः अस्त्यस्य ठन् वा। (वावुड इति) प्रसिद्धे वर्बरीशाके।

अजगन्धिनी स्त्री अजस्य मेषस्य गन्धो ज्ञेयः एकदेशः शृङ्गमिति यावत् सोऽस्याः फलाकारेणास्तीति अजगन्ध+इनि ङीप्। (गाडरशिङ्गा) इति प्रसिद्धे अजशृङ्गीवृक्षे।

अजगर पु० अजं छागं गिरति गिलति गॄ-अच्। बृहत्सर्पे। अजगरं अगस्त्यशापात् बृहत्सर्पभावापन्नं नहुषमधिकृत्य कृतो ग्रन्थः अण्। आजगरम् अजगरकथायाम् न०। तच्च वनपर्व्वणि आजगरोपाख्यानरूपम्।

अजगव पु० अजगो विष्णुः शरत्वेन त्रिपुरासुरवधकालेऽस्यास्ति अजग+अस्त्यर्थे व। शिवधनुषि "शिवोऽप्यजगवं चापं विधुन्वन् तरसा रथे" इति पुरा०। [शिवधनुषि।

अजगाव पु० अजगं विष्णुमवति अव-अण् उप० स०।

अजघन्य त्रि० न जघन्यः अधमः न०त०। अधमभिन्ने

त्रेते च। "तदा च द्वादशोविष्णुरजघन्योजघन्यज" इति भार०।

अजजीविक त्रि० अजएव क्रयविक्रयादिभ्यां पालनादिना वा जीविका जीवनोपायोऽस्य। छागक्रयविक्रयादिना जीविकावति।

अजटा स्त्री नास्ति जटा शिफा यस्याः। (भुंइआमला) इति प्रसिद्धे शिफारहिते वृक्षभेदे। पृ०। अजडाप्यत्र

अजडा स्त्री अजडयति स्वर्गमात्मादङ्गमर्हणार्थं चालयति अजड+णिच्-ततः अच्। (आलुकगीति) प्रसिद्धे वृक्षे-जडभिन्ने जाड्यविरोधिचाङ्गल्यवति त्रि०।

अजया स्त्री अजानां समूहः अज+व्यन् स्त्रीत्वात् टाप्। अजसमूहे। तद्वद्वानावर्णत्वात् स्वर्णयूथिकायाञ्च।

अजदण्डी स्त्री अजस्य ब्रह्मणोदण्डोऽस्याः पृ० ब० गौरा० ङीष्। ब्रह्मदण्डीवृक्षे ब्रह्मणो यत्तार्थदण्डस्य तदीयकाष्ठेन करणात्तथात्वम्।

अजदेवता पु० ई०त०। छागाधिदेवे वह्नौ "रौद्रो धेनुर्विनिर्दिष्टा छाग आग्नेय उच्यते" इति शु० विष्णुध०।

अजनन स्त्री न+जन-आधारे अनि। आकुरुयमाने जन्माभावे। "तस्माजननिरेवास्तु जननीक्लेशकारिणीति" माघः। वा ङीप् अजननीत्यपत्र। अर्थाभावे अव्ययी०। जनन्याअभावे अव्य०।

अजन्मन् पु० नास्ति जन्म यत्र। जन्मनिवृत्तौ मोक्षे "तस्मात् सयोगादधिगस्य योगमजन्मनेऽकल्पत जन्मतीर" रिति रघुः। ई०त०। जन्मरहिते त्रि०।

अजन्य स्त्री लौकिकहेतुभिर्न जन्यते जन-णिच्-यत् न०त०। शुभाशुभस्वर्गादिके दैवकृते भूकम्पादावुत्पाते। जन्यभिन्ने त्रि०।

अजप पु० अस्पष्टं जपति निन्दार्थे नञ्, जप-अच्। कुपाठके अजं पाति रक्षति पा-क ई०त०। छागपालके त्रि०।

अजपति पु० ई०त०। छागश्रेष्ठे, मेषराशिपतौ मङ्गले च।

अजपथ पु० अजस्य तच्चरणयोग्यः पन्थाः अजेन ब्रह्मणा निर्मितः पन्था वा अप्समा०। छागचरणयोग्यपथे गगनस्थे पथाकारे सेतौ च (यमनाला) छायापथे।

अजपथ्य त्रि० अजपथ इव देवपथा० इवार्थे यत्। सङ्कीर्णपथे नगनसेतुतुल्ये च। [वृक्षभेदे।

अजपद पु०अजस्येव पदं चरणोऽस्य। अजैकपाद्नामके

अजपा स्त्री प्रयत्नेन न जप्या अप्रयत्नोच्चारितत्वात् जप-कर्मणि अच्। श्वासप्रश्वासयोः बहिर्गमनागमनाभ्याम् अक्षरनिष्पादनरूपे जपे, स च हंसः, सोऽहमित्याकारश्चैव, तदाकारमन्त्रे च। "उच्छ्वासैरेव निश्वासैर्हंस इत्यक्षरद्वयम् तस्मात् प्राणश्च हंसाख्य आत्माकारेण संस्थितः। नाभेरुच्छ्वास निश्वासात् हृदयाग्ने व्यवस्थितः। षष्टिश्वासै र्भवेत् प्राणः षट् प्राणा नाडिका मता। षष्टिनाड्यस्तथोरात्रम् जपसंख्याक्रमोमतः। एकविंशतिसाहस्रं षट्शताधिकमीश्वरि!। जपति प्रत्यहं प्राणी सान्द्रानन्दमयीं पराम्। विना जपेन देवेशि! जपो भवति मन्त्रिणः। अजपेयं ततः प्रोक्ता भवपाशनिकृन्तनीति" तन्त्रम्।

अजपाद पु० अजस्य पाद इव पादोऽस्य ह्रस्वा० न अन्त्याकारलोपः। रुद्रभेदे तद्देवताकत्वात् पूर्वभाद्रपदनक्षत्रे च। पाक्षद्धेन तु समासे अजपादपि उक्तार्थे पु०।

अजपाल त्रि० अजान् छागान् पालयति पा+णिच्-अण् ई०त०। छागपालके।

अजबन्धु पु०अजस्य बन्धुरिव मूर्खत्वात्। अजतुल्यमन्दबुद्धौ। "सिलाची नाम कानीना अजबन्धुः पिता तवेति"।

अजभक्ष पु० अजैर्भक्ष्यतेऽसौ भक्ष-कर्मणि घञ् ई०त०। (वाइड इति) प्रसिद्धे वर्बरीवृक्षे तत्पत्रं हि अजैरतिप्रीतितो भक्ष्यते।

अजमार पु०अजं मारयति विक्रयार्थं मृ-णिच्-अण् उप०। (कषाइ) इति अजमांसविक्रयोपजीवे, तत्प्रधानदेशे च। भवादौ कुर्वा० स्य। आजमार्थ्यस्तदुभवादौ त्रि०।

अजमोढ पु० अजोमीढः यज्ञे सिक्तः यत्र ब०। (आजमीर) प्रसिद्धे देशे। राजनि अण्। आजमीढः तद्देशाधिपे प्रसिद्धतया युधिष्ठिरे।

अजमुख पु० अजस्य मेषस्य मुखमेव मुखत्वेन कल्पितमस्य। दक्षे प्रजापतौ, तस्य हि शिवद्वेषे मुखेन शिवनिन्दाकरणात् दक्षयज्ञे शिवाज्ञया वीरभद्रेण तस्योत्पाटने कृते पश्चात् शिवप्रसादने पुनरुत्पादनाय वीरभद्रे नियोजिते अजमुखेनैव तन्मुखं कल्पितं तच्च काशीखण्डे विदितं यथा। "वीरभद्रोऽपि तत् सर्वं सर्वाज्ञां प्रतिपद्य च। विना दक्षस्य वदनं यथापूर्वमकल्पयत्। ईश्वरं ये हि निन्दन्ति ते मूकाः पशवो ध्रुवम् ततो मेषमुखं दक्षं वीरभद्रोऽप्यकल्पयदिति"।

अजमोदा स्त्री अजस्य मोद इव मोदो गन्धो यस्याः अजं मोदयति आनन्दयति मोदि-अण् वा। अजगन्धवत्यां, वनयमान्याम् यमानीभाले च।

अजम्भ पु० नास्ति जम्भो दन्तोऽस्य ब०। भेके सूर्ये च। दन्तशून्ये त्रि०। अजातदन्ते अवस्थाभेदे च।

अजय पु० वीरभूमिनगरसन्निधाने (अजय) इति नामके नद-विशेषे इति कल्पद्रुमः। तन्मूलं सुश्रुतसंहितायां तद्रोगे प्रशस्तत्वात्। अजेन छागेन याति या-क ३त०। छागवाहने अग्नौ पु०। जि-अच् न०त०। जयाभावे "लाभालाभौ जया जयाविति" गीता। ब०। जयशून्ये त्रि०। अव्ययी०। जयाभावे अव्य०। नास्ति जयो मादकत्वेनास्याम्। (सिद्धि, भाङ्ग) इति च प्रसिद्धनामिकायाम् विजयायाम् स्त्री।

अजय्य त्रि० जि-यक्षार्थे यत् न०त०। जेतुमशक्ये दुर्जये शत्रौ पक्षे च। "दैवैरजय्यान् दितिजान् विजिग्ये" इति भार०। "तत्राजय्यं जिगाय तान्" इति सुश्रु०।

अजरा त्रि० नास्ति जराऽस्याः। (धृतकुमारी) इति प्रसिद्धे वृक्षे तस्य जराभावात्तत्त्वम्। अव्ययीभावे अच् समा०अजरसम् जराभावे अव्य०। नास्ति जरा यस्य, देवे। तेषां षड्भावविकारमध्ये जायतेऽस्ति वर्द्धते इति तिसृणामेव दशानां सद्भावात् तदुत्तरवर्त्तिनीनां "विपरिणमते अपचीयते नश्यतीति" तिसृणामभावादजरत्वम्। जराशून्ये त्रि०। "अजरामरवत् प्राज्ञो विद्यामर्थांश्च चिन्तयेदिति" नीति०। ब्राह्मणजातौ स्त्री। "सा सत्या साऽजरामरेति पुरा०। न जीर्य्यति क्षीयते जॄ-अच् न० त०। परब्रह्मणि न०। वृद्धदारकनामवृक्षभेदे पु०। मूर्छागोधिकायाम् स्त्री।

अजर्य्य न० न जीर्य्यति न+जॄ-कर्त्तरि यत्। सौहार्द्दे "तेन सङ्गतमर्य्येण रामाजर्य्यं कुरु द्रुतमिति" भट्टिः।

अजलम्बन न०अज इव लम्बते मूर्छते क्षणवर्णत्वात् कर्म्मणि ल्युट्। खोतोऽञ्जने।

अजलोमन् पु० अजस्य लोमेव लोम (मञ्जरी) यस्य ब०। (चूकशिम्बो) इति ख्याते अजलोमवन्मञ्जरीविशिष्टे वृक्षभेदे। वा ङाप् वा ङीप् च। अजलोमा-अजलोमी तेनाक्षत स्त्री। [जविनीभिर्विवृक्षन्" इति वेदः।

अजवस् पु० जु-असुन् न०त०। वेगशून्ये। "अजवसो

अजवस्रि स्त्री अजस्य वस्तिरिव वस्तिरस्य। ऋषिभेदे। गर्गा० अपत्यार्थे ठञ्। आजवस्रेयः तदपत्ये पु० स्त्री। स्त्रियाम् आजवस्रेयी। यस्कादिपाठात् वृद्धयु लुकि। अजवस्रयः तदपत्येषु।

अजवाह पु० अजं वाहयति यत्र आधारे घञ् ईत०। देशभेदे। कच्छादि० भवार्थे अण्। आजवाहः तद्देश जातादौ त्रि०।

अजवीथी स्त्री अजेन ब्रह्मणा निर्म्मिता वीथी पदं मा०त०। गगनसेतुरूपे (वसनाला) इति ख्याते ज्यायपथे। याम्यारम्भ अगस्त्यस्थानपर्य्यन्तं पितृयानपथः। "पितृयानोऽजवीथ्याच यदगस्त्यस्य चान्तरमिति" पुरा०।

अजशृङ्गी स्त्री अजस्य मेषस्य शृङ्गमिव फलमस्याः ब०। (गाड़लशिङ्गा) इति प्रसिद्धे मेषशृङ्गतुल्यफलवत्यां मेषशृङ्ग्याम्।

अजसुन्द न० अजस्य तुन्दमिव तुन्दमस्मिन् तन्नगरवासिनामित्यर्थात् सुट्। नगरभेदे। "अजसुन्दं नाम नगरमिति" सि०कौ०।

अजस्र न० न+जस र। सन्तते विच्छेदरहिते। तथाभूतकालस्थायिनि वस्तुमात्रे त्रि०। "अजस्रमाघ्रावितवल्लकीगुणेति" माघः "अजस्रदीक्षाप्रयतस्य मन्त्रोरिति" रघुः।

अजहत्स्वार्था स्त्री न जहत् स्वार्थौ यस्याम् हा-शतृ न०ब०। स्वार्थापरित्यागेन परार्थावबोधिकायां लक्षणायाम्। यथा श्वेतो धावतीत्यादौ श्वेतगुणापरित्यागेन तद्वति लक्षणा। "जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा" इति हरिः।

अजहल्लिङ्ग पु० न जहत् लिङ्गं यस्य हा-शतृ न०ब०। नियतलिङ्गके विशेष्यस्यान्यलिङ्गकत्वेऽपि स्वलिङ्गात्यागेन स्वलिङ्गपरे विशेषणशब्दे। तथा चान्यत्र विशेषणस्य विशेष्यानुसारिलिङ्गत्वनियमेऽपि अस्य न तथा नियमः। यथा वेदः श्रुतिर्वा प्रमाणम्। [कुशीति) ख्याते वृक्षे।

अजहा स्त्री न जहाति शूकान्। हा-ड न०त०। (आल्-

अजागर पु० जागरयति जागरः न जागरो यस्मात् ५ब०। सेवनेन निद्राराहित्यकारके "यदपेक्षयाऽन्यस्मिन् जागरणकर्त्तृत्वं नास्ति" तादृशे (भीमराज) इति ख्याते भृङ्गराजे। "भृङ्गराजः सुजागर" इति रभसवाक्यात् तस्यात्यन्तनिद्राराहित्यकारित्वम्।

अजाजि(जी) स्त्री अजेन छागेन जीयते गन्धोत्कटत्वात् त्यज्यते अज-इन् वीभावाभावः ईत०। सर्वभक्ष्येणापि छागेन गन्धोत्कटतया त्यज्यमाने, (जीरा) इति प्रसिद्धे जीरके वृक्षे। काकोदुम्बरिकावृक्षे च (गियारा)॥

अजाजीव पु० अजेन तद्रक्षणपोषणादिना तत्क्रयविक्रयादिना वा आजीवति आ+जीव-अच् ३त०। छाग पालके तत्क्रयविक्रयाभ्यामाजीविनि च।

अजातकक्षुद् पु० न जातं कक्षुदभंसकूटं यस्य न-ब० कक्षुदशब्दस्यान्याकारलोपः। अपूर्णकक्षुदि अल्पवयस्के गवादिवत्से।

अजातदन्त त्रि० न जातो दन्तोऽस्य, यस्मिन् वयसि वा। दन्तजननशून्ये, अवस्थाभेदे च। "अजातदन्ता ये केचिद् वे च गर्भे प्रपीड़िता" इति वायुपुरा०। "अजातदन्तमरणे पितोरेकाहमिष्यते" इति शु० कूर्म्मपुरा०। तत्कालश्च स्त्रियां षण्मासाभ्यन्तरमिति शुद्धितत्त्वे सपक्षं निरूपितम्। पश्चादीनान्तु प्रधानदन्तोत्पत्त्यभावे एवाजातदन्तत्वव्यवहारः (आदाँता) इत्यादि लोके प्रसिद्धिः। स च प्रायेण द्विवर्षोत्तरकालपर्य्यन्तः।

अजातपक्ष त्रि० न जातौ उद्भवनसामर्थ्ययुक्तौ पक्षावस्य। अनुद्भिन्नपक्षके पक्षिणि। "अजातपक्षाः शकुना इवाबभुरिदि भार०।

अजातशत्रु पु० जातस्य जन्तुमात्रस्य न शत्रुः अश्राद्धभोजीत्वादित्वत् नञो व्यवहितेन शत्रुशब्देनान्वयात् असमर्थसमासः, न जातः शत्रुरस्य वा। युधिष्ठिरे राजनि। "न हेहि यज्ञनमतस्त्वमजातशत्रुः, इति" वेणी०। एवमजातारिरपि तत्रैव। "हन्त जातमजातारेः प्रथमेन त्वयारिणेति" माघः। [शून्ये, न्यायोक्ते-जात्यादौ, नित्ये च त्रि०।

अजाति स्त्री जन-क्तिन् न०त०। अनुत्पत्तौ। ब०। जातिभिन्नायां जातौ।

अजादनी स्त्री अजैरद्यतेऽसौ अन्येन दुःखस्पर्शत्वेऽपि अजै-राद्यते इति अद-कर्म्मणि ल्युट् ङीप् त०। दुरालभा इति (विचिति) इति च प्रसिद्धे स्वर्गेण दुःखदायके वृक्षभेदे।

अजादि पु० ङीब्बाधकटाबनिमित्ते पाणिन्युक्ते शब्दसमूहे स च गणः। एडका, कोकिला, चटका, अश्वा मूषिका, बाला, घोड़ा, वत्सा, पाका, मन्दा विलाता, पूर्व्वापहाणा, अपरापहाणा (सम्भवस्त्वाजिनगर्षापिण्डेभ्यः फलात्)। (सदच्छाखप्रान्तयतैकेभ्यः पुष्पात्)। (मूलाच्चजः) (शूद्रा वामहत्-पूर्व्वा जातिः) व्येष्ठा कनिष्ठा मध्यमा (युवोगेऽपि) क्रुञ्चा उष्णिहा देवविशा दंष्ट्रा। [जायारहिते।

अजानि पु० नास्ति जाया यस्य ब० जायाया निङादेशः।

अजानिक त्रि० अजेन तद्विक्रयपालनादिना आनो जीवनम् अस्त्यस्य ठन्। अजाजीविनि। तस्य कर्म्म भावो वा पुरोहिता० यक्। आजानिक्यम् तत्कर्म्मणि तद्भावे च न०।

अजानेय पु० अजेऽपि विशेषेऽपि आनेयो यथास्थानं प्रापणीय आरोही येन अज-विशेषे अण् वीभावाभावः आ+नी-कर्म्मणि यत् ततः स्वा०। वक्ष्यमाणप्रकारप्रतिरोधेऽपि निर्भयेन यथास्थानमारोहिणः प्रापके अश्वे, उत्तमाश्वे च निर्भये त्रि०।

अजान्त्री स्त्री अजस्यान्त्रमिव अन्त्रं तदाकारवती मञ्जरी अस्याः गौ० ङीष्। नीलवृक्षायाम् (नीलबोना)।

अजापक्व न० "छागयकृद्रसमूलचीरैर्दध्ना च साधितं सर्पिः। सक्षारं यच्छकरं कासश्वासोपशान्तये परमिति" चक्रदत्तोक्ते घृतभेदे न०। [उप०। अजपालके, तेनाजीवके च।

अजापालक त्रि० अजान् आपालयति आ+पा-णिच् ण्वुल्

अजि त्रि० अजति अज-इन् व्यभावः। गतिशीले। पदाजिः। भावे इन्। गतौ, क्षेपे च स्त्रियां वा ङीप्।

अजित त्रि० न०त०। जितभिन्ने पराजितभिन्ने। जिधातोर्द्विकर्म्मकत्वात् अनिर्जितगवी, अपराजितदेशादौ चास्य प्रवृत्तिः एकस्य कर्म्मणोऽविवक्षायामन्यस्य विवक्षायां तत्रैव कर्म्मणि क्तः। भूरिप्रयोगस्तु अनिर्जितगवावेव तथा च "गौणे कर्म्मणि दुहादेरिति" गौणकर्म्मण्येवाभिधाननियमात् तस्यैव जयकर्म्मतायां क्तेनाभिधातुं योग्यत्वम्। "न च तेऽस्त्यजितं किञ्चिदिति पुरा०, नास्त्येवाजितो देव" इत्यादौ गौणकर्म्मणोऽविवक्षयैव जयप्राप्त देशादौ जितशब्दप्रयोगात् ततोऽत्रसभास इति भेदः। रागादिभिर्जितत्वाभावात् शिवे, विष्णौ, बुद्धे, च पु०।

अजिन न० अजति क्षिपति रजआदि, आवरणेन अज-इनच् न व्यादेशः। चर्म्मणि, चर्म्मावृतत्वादेव रजआदीनां न देहप्रवेश इत्यतश्चर्म्मणोरजोविक्षेपसाधनत्वात्तथात्वम्। "चेलाजिनकुशोत्तरमिति" स्मृतिः। "ऐणेयाजिनेन ब्राह्मणमिति" श्रुतिः। "गजाजिनं गोक्षितविन्दुवर्षि चेति" "अथाजिनाषाढधर इति" च कुमा०। अदूरभवादावर्थे कथा० ञ्ण्। आजिनीयः तदूरभवादौ त्रि०।

अजिनपत्रा(त्री) (त्रिका) स्त्री अजिनं चर्मेव क्षुद्रिष्टं पत्रं पक्षो यस्याः ब०। (चामुण्डिका) इति प्रसिद्धे पक्षिभेदे गौ० ङीष् (त्री) तत्रार्थे। ततः स्वार्थे के ह्रस्वे टापि-पक्षिकापि तत्रार्थे।

अजिनफला स्त्री अजिनं चर्मविकारत्वात् भस्त्रा इव फलं यस्याः अजिनपूर्व्वकत्वेन जातिलक्षणं ङीषं बाधित्वा अजा० टाप्। (डेपारी) इति प्रसिद्धे, भस्त्राकारफले वृक्षभेदे।

अजिर न० अज-किरच् वीभावाभावः। (उठान) इति ख्याते चत्वरे। शीघ्रगन्तरि त्रि०। "श्येना अजिरा इति" ता० ब्रा० "अजिराः क्षिप्रगमनशीला इति" भाष्यम् अत एव क्षिप्रनामसु निरुक्ते अजिरमिति पठितम् शीघ्रवेगव-

त्वात् नद्यां स्त्री । निरुक्ते च अजिरेति नदीनामसु पठितम् ऋषिभेदे पु० तदपत्यम् गुवा० ढक् । आजिरेयः तदपत्ये पु० स्त्री । उत्करा० छ । अजिरीयः तत्सम्बन्धिनि त्रि० ।

अजिरादि व० पाणिनिना संज्ञायां मतुपि दीर्घविधौ पर्य्युदस्ते शब्दसमूहे सच गणः अजिर, खदिर, पुलिन, हंस, कारण्डव, चक्रवाक इति । अजिरवती । तद्विधे त अमरावतीति ।

अजिह्म त्रि० हा-मनृ हित्वालोपौ ततः न० त० । सरले "अजिह्मामशठां शुद्धां जीवेद्ब्राह्मणजीविकामिति" पुरा० ।

अजिह्मग पु० अजिह्मं सरलं गच्छति गम-ड । बाणे । "वेगवद्भिरजिह्मगैरिति" । सरलगामिनि त्रि० । "व्रजेद्दिशमजिह्मग" इति ।

अजिह्व पु० जि-वनृ ङक् च जिह्वा रसना सा नास्ति यस्य ब० । भेके । तेषां जिह्वाशून्यत्वकथा भारते आदु० । "उवाच देवान् मण्डूको रसातलतलोत्थितः । रसातलतले देवा! वसत्यग्निरिति प्रभो!। सन्तापादिह सम्प्राप्तः पावक प्रभवादहम् । स संतप्तो जले देवा! भगवान् हव्यवाहनः । अपः सं सृज्य तेजोभिस्तेन सन्तापिता वयम् । तस्य दर्शनमिष्टं वो यदि देवा! विभावसोः । तत्तेनमधिगच्छध्वं कार्य्यं वो यदि वह्निना । गम्यतां साधयिष्यामो वयं ह्यग्निभयात् सुराः!। एतावदुक्त्वा मण्डूकस्त्वरितो जलमाविशत् । ऊतावनस्तु बुबुधे मण्डूकस्य च पैशुनम् । शशाप स तमासाद्य न रसान् वेत्स्यसीति वै । तं वै संदुह्य शापेन मण्डूकं त्वरितो ययौ । अन्यत्र वासाय विभुर्न चाक्रामदर्शयत् । देवास्ततस्तमङ्कुर्मण्डूकानां भगूत्तम!। यत्तच्छृणु महाबाहो! गदतो मम सर्वशः । अग्निशापादजिह्वापि रसज्ञानवहिष्कृताः । सरस्वतीं बहुविधां युवद्वोच्चारयिष्यथ । विलवासगतांश्चैव निराहारानचेतसः । गतासूनपि संशुष्कान् भूमिः सम्भारयिष्यति । तमोघनायामपि वै निशायां विचरिष्यथ इति" । जिह्वाशून्ये त्रि० ।

अजीकव अज्ञा शरक्षेपणेन कं ब्रह्माणं वाति प्रीणाति वा-क । शिवधनुषि । [आजीगर्त्तसदपत्ये पुंस्त्री ।

अजीगर्त्त अज्ञै गमनाय गर्त्तमस्य । सर्पे । बाह्वा० इञ् ।

अजीर्ण न० जॄ-भावे क्त न० त० । जठराग्निमान्द्येन भुक्तान्नादेरपाके, न० ७त० । रोगभेदे । "भवेदजीर्णं प्रति यस्य शङ्का स्निग्धस्य जन्तोर्विलनोऽन्नकाले । पूर्वं सशुद्धोमनयाममात्रः संप्राश्य भुञ्जीत हितं हि पथ्यमिति" चक्र० । "अजीर्णे भेषजं वारि जीर्णे वारि बलप्रदमिति" वैद्यकम् । कर्त्तरि क्त जीर्णोऽन्नः । तद्विधे त्रि० ।

अजीव त्रि० नास्ति जीवो जीवनं वा यस्य । जीवरहिते घटादौ, मृते, जन्तुभावे च ।

अजीवनि स्त्री न+जीव-अनि । आकुश्यमाने जीवनाभावे निन्दितजीवने च "अजीवनिस्तव भूयात्" इति सुश्रु० । "तस्य भूयादजीवनिरिति" ।

अजुर त्रि० अज-कुरच् अभावः । वेगशीले बलवति "अवक्रक्षिणं वृषभं यवाजुरमिति" वेदः ।

अजेय त्रि० जेतुमशक्ये जि-यत् न०त० । जयायोग्ये । अजेयाख्ये हृते न० । "पिवेद्वृतमजेयाख्यमिति" वैद्यकम् ।

अजैकपाद (द्) पु० अजस्य छागस्य एकः पाद इव पादो यस्य उपमा० ब० न पादस्यान्त्याकारलोपः । रुद्रविशेषे, तद्देवताके पूर्व्वभाद्रपदनक्षत्रे च । पाच्छब्देन समासे अजैकपादपि तत्रार्थे । "वीरभद्रश्च १ यशश्च २ गिरीशश्च ३ महायशाः । "अजैकपाद (द्) हिर्बुध्नः ५ पिनाकी ७ चापराजितः ७ । भुवनाधीश्वरश्चैव ८ कपाली च ९ विशाम्पते! स्थाणु १० र्भगश्च ११ भगवान् रुद्राख्येकादश स्मृता" इत्युक्तेषु एकादशसु रुद्रेषु मध्ये चतुर्थे रुद्रे । अन्यत्र तु अजैकपादहिर्बुध्ना ३ विरूपाक्षश्च ४ रेवतः ५ । हरश्च ६ बहुरूपश्च ७ । त्र्यम्बकश्च ८ सुरेश्वरः ९ । रुद्रा एकादश प्रोक्ता जयन्त १० श्चापराजितः ११ इत्येवं तद्भेदाः । एतेषामेव ध्यानानि वक्ष्यन्ते । तेन अज इति नामान्तरं एकपादिति च नामान्तरमिति द्रष्टव्यम् । "तेन अजनामा महारुद्रम्" इत्यादि अजस्य ध्यानम् । "एकपादाभिधो विप्रेत्यादि" एकपादस्य ध्यानमिति वक्ष्यते

अज्जुका स्त्री अर्जयति या सा अर्ज्ज-जुक, पृ० रकारस्य जत्वम् । वेश्यायाम् । नाञ्च एवास्य प्रयोगः नान्यत्र ।

अज्झटा स्त्री अजति दोषं क्षिपति अज्-क्विप् झटति संहन्यते झट-अच् ततः कर्म्म० पृ० कुत्वजीभावाभावः । (भूंइ आमला) इति प्रसिद्धे वृक्षे ।

अज्झल न० अञ्जति क्विप् अक् झलति विलिखति झल-अच् कर्म्म० पृ० न कुत्वम् । चर्म्मादिमये प्रतियोधायुधप्रतिरोधके (ढाल) इति ख्याते फलके ।

अज्ञ त्रि० न जानाति ज्ञा-क न० त० । ज्ञानशून्ये चैतन्यशून्ये, विशेषज्ञानशून्ये, मूर्खे, वेदान्तिमतसिद्धाज्ञानरूपपदार्थवति च । तर्हि अहमज्ञ इत्यनुभवस्य अज्ञानविषयत्वं स्वीक्रियते अज्ञानञ्च न ज्ञानाभावः किन्तु पदार्थान्तरं

तज्ज्ञानशब्दे विस्तरेण वक्ष्यते । प्राज्ञः प्रकर्षेणाज्ञाः सुषु प्रावस्थापन्ने जीवे तदानीं विशेषज्ञानाभावात् प्राज्ञत्वम् । अचेतने, जडे, "वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरचेतनेति" सांख्यकाः । अल्पज्ञे, किञ्चिज्ज्ञे च ।

अज्ञात त्रि॰ न ज्ञातः । ज्ञानाविषयीभूते पदार्थे । "अज्ञातकुलशीलस्य वासोदेयो न कस्यचित्" इति क्षिप्तोप॰ ।

अज्ञान न॰ न ज्ञानम् । ज्ञानाभावे, ज्ञानविरोधिनि तदभावे "तत्त्वाज्ञानं धिया नश्येदिति" वेदान्तिमतसिद्धे पदार्थान्तरे च "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव" इति गीता । "अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकयेति, गुरुनतिः । अज्ञानञ्च ज्ञानाभाव इति नैयायिकाः । पदार्थान्तरमिति वेदान्तिनः । तथाहि अहं न जानामि अहमज्ञ इत्यादिविशिष्टानुभवः सार्व्वलौकिकः स च ज्ञानाभवविषय इति नैयायिकैर्यदुक्तं तन्न युक्तं विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुतायाः सर्व्ववादिसिद्धतया आत्मधर्म्मिकज्ञानाभावप्रकारकज्ञाने जनयितव्ये तद्विशिष्टज्ञानाभावघटकज्ञानरूपस्य विशेषणस्य ज्ञानं पूर्व्वमपेक्षितम् आत्मनि तादृशे ज्ञाने च तदानीं सति कथङ्कारं ज्ञानाभावविशिष्टबुद्धिः स्यात् यस्मिन् धर्म्मिणि ज्ञानमस्ति तत्र ज्ञानाभावज्ञानस्य बाधितत्वमेव अभावबुद्धेः प्रतियोगिज्ञानरोधितायाः सर्व्वसम्मतत्वात् । किञ्च ज्ञानाभावः किं ज्ञानसामान्याभाव उत तत्प्रागभावः अथ तद्ध्वंसो वा तत्र विषयो भवति, नाद्यः पूर्व्वोक्तयुक्त्या ज्ञानाभावानुभवासम्भवेन प्रत्याख्यातत्वात् । न द्वितीयः प्रागभावस्य सामान्यधर्म्मानवच्छिन्नप्रतियोगिताकतया तत्तज्ज्ञानप्रागभावस्यैव विषयता वाच्या सा च न सम्भवति सामान्याकारेण ज्ञानाभावस्यैव प्रतीयमानत्वात् अन्यथा ज्ञानवत्यपि पुरुषे तादृशप्रतीतिः स्यात् अपे जनिष्यमाणानन्तज्ञानप्रागभावानामात्मनि सत्त्वेऽपि तेषाञ्च तत्तज्ज्ञानप्रतियोगिकत्वेन ज्ञानसामान्यविशिष्टबुद्धौ विरोधितायाभावात् । नान्त्यः प्रागभावरीत्या तस्यापि प्रत्याख्यातत्वात् । अतस्तादृशानुभवस्य विषयरक्षार्थं ज्ञानाभावातिरिक्तमज्ञानं कल्पनीयम् । तच्चानुमानेनैव । अनुमानञ्चेत्थम्तं प्रमेयविवरणोपन्यासे । विवादाध्यासितं ज्ञानं स्वप्रागभावातिरिक्तस्वविषयावरकसविषयकवस्तुपूर्व्वकं भवितुमर्हति प्रकाशत्वात् अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति । यथा अन्धकारे प्रथमोत्पन्ना प्रदीपप्रभा स्वविषयस्य घटादेरावरकतमोरूपपदार्थपूर्व्विका एवं ज्ञानमपि प्रकाशत्वसाम्यात् स्वविषयस्य घटादेरावरकं कञ्चित् पदार्थं समानविषयकं नियतम् पूर्व्वमपेक्षते । उत्पन्ने च ज्ञाने प्रदीपप्रभया तम इव तद्विवर्त्तते ज्ञानप्रागभावेन सिद्धसाधनतावारणाय स्वप्रागभावातिरिक्तेति विशेषणम् । तच्च अज्ञानं ज्ञानविरोधि सत्त्वासत्त्वाभ्यामनिर्व्वचनीयम् । तच्च शुक्तिकाद्यज्ञानं शुक्तौ रजतादिकमिव ब्रह्मणि प्रपञ्चमुत्पादयति । अतएव तद्भावरूपं भावस्यैव भावपदार्थोपादानत्वसम्भवात् । अभावस्य तु अधिकरणस्वरूपत्वाङ्गीकारात् न भावस्याभावोपादानत्वव्याघातः । तस्य भावरूपत्वेऽपि न त्रैकालिकाबाध्यत्वरूपम् सत्त्वं तत्त्वज्ञानेन बाध्यत्वात् नापि प्रातीतिकरजतादिवदसत्त्वम् व्यवहारयोग्यत्वात् । अतः सदसद्भ्यामनिर्व्वचनीयं व्यवहारिकसत्त्ववत् यत् किञ्चित् भावरूपं पदार्थान्तरमेवाज्ञानमिति सुस्थितम् । अस्य चाज्ञानस्य द्वे शक्ती आवरणं विक्षेपश्च तत्र या कदाचित् स्वविषयमाद्रणोति (विषयत्वसंप्राप्त्यनर्हं करोति) सा आवरणशक्तिः या तु स्वकार्य्यबुद्धिजन्यत्वा इन्द्रियादिद्वारा विषयदेशं प्राप्य विषयगतं स्वकारणनिष्ठावरणशक्तिं नाशयति सा विक्षेपशक्तिः यथोक्तं "बुद्धिवृत्तिचिदाभासौ द्वावेतौ व्याप्नुतो घटम् । तत्राज्ञानं धिया नश्येत् आभासात्तु घटः स्फुरेदिति" । यथा च शुक्तिविषयाज्ञानं स्वविषयशुक्तिमाद्रत्य स्वशक्त्यैव तत्र उत्पादितं रजतं विषयीकृत्य तद्गतमावरणशक्तिं नाशयति एवं ब्रह्मविषयकाज्ञानं स्वशक्त्यैव ब्रह्मणि उत्पादितं प्रपञ्चं विषयीकृत्य तत्तदाकारबुद्धिवृत्तिरूपा विक्षेपशक्तिः तद्गतावरणशक्तिं निवारयतीति दृष्टानुसारिणीयं कल्पना । अधिकमाकरे द्रष्टव्यम् । नास्तिविशिष्टज्ञानमस्य । विशिष्टज्ञानाभाववति अत्रे त्रि॰ ।

अञ्जस् स्त्री अजति गच्छति स्वर्गं दानेनानया अजकरणे असिन् न वीभावः । गवि, इति निरुक्तकारः ।

अञ्जति पु॰ न॰ अनृच-गतौ कर्त्तरि अति । वायौ, गन्तरि त्रि॰ ।

अञ्चल पु॰ अञ्जति प्राप्नोति अनृच-अलच् । वस्त्रप्रान्ते "क्षौमाञ्चलमिव पीनस्तनजघनायाः कुलीनायाः" इति "भूमौ दत्त्वा पदमिह समाधेहि चेलाञ्चलेऽस्मिन्निति च उद्भटः । प्रान्तभागे "दृगञ्चलैः पश्यति केवलं मनागिति" उद्भटः ।

अञ्चित त्रि॰ अनृच-क्त । पूजिते, आकुञ्चिते च । "अपिखञ्जनभञ्जनाञ्चितमिति" नैष॰ । "अञ्चितसव्यपाद इति" भट्टिः । "अञ्चितः शूलपाणिरिति" पुरा॰ । यचिते च "अञ्चांञ्चिता सत्वरसञ्चितायां" इति रघुः ।

अञ्जन न० अज्यतेऽनेन अनज-करणे ल्युट्। कज्जले। "अपि खञ्जनमञ्जनमञ्जनाञ्चितमिति" नैष०। "मैलं प्रसाधनं स्नानं दन्तधावनमञ्जनम्। पूर्व्वाह्णएव कुर्व्वीतेति" स्मृतिः। "विलोचनं दक्षिणमञ्जनेन संभाव्येति" रघुः। अञ्जनविशेषाश्च सुश्रुते दर्शिता यथा

"चत्वार एते योगाः स्युरुभयोरञ्जने हिताः। कुञ्जकागोकशालार्ष्यप्रवञ्जुनलिनोत्पलैः॥ पुष्पैर्हरेणुकृष्णाङ्गापथ्यामलकसंयुतैः। सर्पिर्मधुयुतैश्चूर्णैर्वेणुनाद्यामवस्थितैः॥ अञ्जयेद् द्वावपि भिषक् पित्तश्लेष्मविभावितौ। आम्रजम्बूद्वयं पुष्पं तद्वृक्षेण हरेणुकाम्॥ पिष्ट्वा चौद्राज्यसंयुक्तां प्रयोज्यमथ वाञ्जनम्। नलिनोत्पलकिञ्जल्कगैरिकैर्गोशकृद्रसैः॥ गुडिकाञ्जनमेतद्वा दिनरात्र्यन्धयोर्हितम्। रसाञ्जनरसक्षौद्रतालीशस्वर्णगैरिकम्॥ गोशकृद्रससंयुक्तं पित्तोपहतदृष्टये। शीतं सौवीरकं वापि पिष्ट्वाथ रसभावितम्॥ कूर्म्मपित्तेन मतिमान् भावयेद्वौहितेन वा। चूर्णाञ्जनमिदं नित्यं प्रयोज्यं पित्तशान्तये॥ काश्मरीपुष्पमधुकदार्व्वीलोध्ररसाञ्जनैः। सक्षौद्रमञ्जनन्तद्वद्धितं नेत्रामये सदा॥ स्रोतोजं सैन्धवं कृष्णां रेणुकाञ्जापि मेषयेत्। अजमूत्रेण ता वर्त्तीः कृष्णदान्ध्याञ्जने हिताः॥ कालानुसारिवां कृष्णां नागरं मधुकं तथा। तालीशपत्रं कृष्णे गार्ङ्गेयञ्च रसक्रिये॥ कृतास्ता वर्त्तयः पिष्ट्वा कायाशुष्काः सुखावहाः। मनःशिलाभयाव्योषबलाकालानुसारिवाः॥ सफेना वर्त्तयः पिष्टास्त्रागक्षीरसमन्विताः। गोमूत्रपित्तमदिराग्रक्षद्वालीरसे पचेत्॥ क्षुद्राञ्जनं रसे चान्यद्यक्तरक्तेऽपि वा। गोमूत्राज्याक्षमलपिप्पलीक्षौद्रकट्फलम्॥ सैन्धवोपहितं युञ्ज्याच्चिक्षिप्तं वेणुगह्वरे। मेदोयकृद्वृक्षतक्षारं पिप्पल्यः सैन्धवं मधु॥ रसमामलकक्षापि पक्वं समधृङ्निधापयेत्। कोशे खदिरनिर्म्माणे तद्वत्क्षुद्राञ्जनं हितम्॥ हरेणुमगधाजास्थिमज्जैलायकदन्वितम्। यकृद्रसेनाञ्जनं वा श्लेष्मप्रहतदृष्टये॥ विपाच्य गोधायकृदर्द्धपाटितं सुपूरितं मागधिकाभिरग्निना। निषेवितं तत्सकृदञ्जनेन निहन्ति नक्तान्ध्यमसंशयं खलु॥ तथा यकृच्छागभवं हुताशने विपाच्य सम्यग्मगधासमन्वितम्। प्रयोजितं पूर्व्ववदाशसंशयं जयेत् क्षपान्ध्यं यकृदञ्जनकृष्णाम्॥ क्षीरा यकृद्वाप्यभिषिते उभे प्रकल्प्य मूल्ये घृततैलसंयुतम्। ते सार्षपस्नेहसमायुतेऽञ्जनं नक्तान्ध्यशान्त्यै कृतः प्रयोजिते। नदीजमिश्रीकटुकान्वयाञ्जनम्मनःशिला इे च निशे यकृद्रसे। स चन्दनेयं गुटिकाथ वाञ्जनं प्रशस्यते वै दिवसेष्वपक्षताम्" इति॥ सौवीरे, रसाञ्जने च। अञ्जनवर्णोऽस्यास्य। अर्श० अच्। ज्येष्ठदिग्गजे पु० उत्तरदिग्गजयोषिति केशरियोषिति वानर्य्यां च स्त्री०। "अञ्जनागर्भसम्भूतो वायुपुत्रो महाबल इति" तत्त्वम्। भावे ल्युट्। मिश्रीकरणे, लेपने अलिप्तीकरणे मालिन्ये च न० "निरञ्जनं दिव्यसुपैति साम्यमिति" निरवद्यं निरञ्जनमिति" च श्रुतिः। अञ्जिच्-युच्। यक्षलक्ष्म्यार्थातिरिक्तार्थबोधके आलङ्कारिकोक्ते व्यञ्जनाद्यक्तिरूपे शब्दशक्तिभेदे स्त्री० "अन्यार्थधीकृत् व्याकृतिरञ्जनेति" काव्यप्रकाशः। तत एव भावे ल्युट् तत्त्वार्थे न०।

अञ्जनकेशी स्त्री अञ्जनमिव केशो यस्याः ५त०। केशसंस्कारके कृष्णविलासिनीनामके गन्धद्रव्ये। यत्संयोगात् केशस्यातीव कृष्णता स्यात्।

अञ्जनशलाका स्त्री अञ्जनसाधनं शलाका। अञ्जन दानार्थं शलाकायाम् "स्नानाङ्गेनशलाकेयेति" स्मृतिः।

अञ्जनागिरि पु० अञ्जनवर्णो गिरिः किंशुका०दीर्घः। नीलपर्व्वते तद्विवरणं नीलगिरिशब्दे।

अञ्जनाद्रि पु० अञ्जनमिव कृष्णः अद्रिः। नीलपर्व्वते "अञ्जनाद्रिनिभां श्यामामिति" कालीध्यानम्।

अञ्जनाधिका स्त्री अञ्जनादधिका कृष्णत्वात् ५त०। (आजनाड) इति ख्याते कीटभेदे।

अञ्जनावती स्त्री अञ्जनं विद्यतेऽस्याः अधिकृष्णवर्णत्वात् अञ्जन+मतुप् वत्वं दीर्घः। ऐशानकोणस्थ हस्तिन्याम्। कालाञ्जनवृक्षे पु०।

अञ्जनिका स्त्री अञ्जनवर्णोऽस्यास्याः ठन् कापि पूर्व्वाकारस्य इत्त्वम्। (आजनाड) इति प्रसिद्धे अञ्जनाख्ये कीटभेदे। अञ्जना स्वार्थे कन्। प्रतीकदिग्गजस्त्रियाम्। पुरोडि०यक्। आञ्जनिक्यम् तद्भावे न०।

अञ्जनी स्त्री अज्यते चन्दनकुङ्कुमादिभिरसौ अनज-कर्म्मणि ल्युट् ङीप्। कुङ्कुमाद्यनुलिप्तायाम् स्त्रियाम्। करणे ल्युट्। कटुकाद्यक्षे, कालाञ्जनवृक्षे च। "अञ्जनीदारुकाष्ठमयलक्षः मैलावरुणः" इति याज्ञिकाः न्यायायां स्त्रियाञ्च।

अञ्जलि पु० अनज-अलि। संयुतकरपुटे, "अवधाञ्जलिपुटमेयमिति वेणी०। "न्यायप्रसूनाञ्जलिरिति" उदयनः कुड़वपरिमाणे च अञ्जलिपरिमितद्रव्ये च "प्रकीर्णैः पुष्पाणां हरिचरणयोरञ्जलिरयमिति" वेणी०। [आलभिकायाम्।

अञ्जलिका स्त्री अञ्जलिरिव कायति प्रकाशते कै-क टाप्।

अङ्गस् न० अनक्ति गच्छति मिश्रयति वाऽनेन अनुज-गतौ मिश्रणे च असुन्। वेगे, बले, औचित्ये च। "अङ्गेस उपसंख्यानमिति" वार्त्तिकात् तृतीयायाः अलुक्। अङ्गसाक्षतम्। "अङ्गैः सगद्गमपजग्मुराप" इति भेदः।

अङ्गस त्रि० अनुज-असच्। सरले अवक्रे।

अङ्गसा अव्य०अनुज-भावे अच् अङ्गं गतिं विलम्बं वा सृजति सो-वा०का। विलम्बाजमे, यौक्तये, याथार्थ्ये च। "रसोऽङ्गसा शासता रज" इति भेदः।

अङ्गि पु० अञ्चतेऽनेन अनुज-करणे इन्। तिलकादौ चिह्ने "अग्नयेऽनीकवते रोहिताङ्गिरनङ्गानिति" य० रोहितो रक्तोऽङ्गिस्तिलकोऽस्येति भेददीपः। "तक्वं दन्ताङ्गिये इति" भवदेवे भेदमन्त्रः। [(ष्णु)च्। सूर्य्ये।

अङ्गिष्ठ(ष्णु) पु० अनक्ति स्वभाभिर्विश्वम्। अनुज-इष्ठ-

अङ्गी स्त्री० अङ्गि+वा ङीप्। पेषणयन्त्रे, भङ्गले च।

अङ्गीर पु० अनुज-वा० ईरन् (पेयारा) इति ख्याते वृक्षे।

अट गतौ भ्वादि० सक० पर० सेट्। अटति आटीत्। "भो वटो भिक्षामटेति" सि०कौ। परि+परितो भ्रमणे पर्य्यटन्।

अट गतौ इदित् भ्वा०आत्म०सक०सेट्। आटते आटिष्ट।

अटनि(नी) स्त्री अटति भौर्व्वीम् अट-अनि वा ङीप्। धनुरग्रे गुणारोपणस्थाने।

अटरू(रू)ष पु० अटति भ्रमति अट-अच् तं रोषति हिनस्ति रुष-क, अटैः अटङ्गिर्वा रूष्यते न युज्यते रूष-क वा। (वासक) इति ख्याते वृक्षे।

अटर्व (वी) स्त्री अटन्ति चरन्ति वयसि यत्र अट-अवि वा ङीप्। वने। विन्ध्याटवीति का० विन्ध्यगिरिसन्निकृष्टं प्रसिद्धवनम्। "कान्तारप्रदेशेष्वटवीषु चेति" रामा०।

अटा स्त्री अट-वा० अङ्। पर्य्यटने।

अटाट्या स्त्री अट-यङ्-भावे अ स्त्रीत्वात् टाप्। परिभ्रमणे, इधागमने च। यङ्लुकि। अटाटाभ्यत्र।

अट्ट अतिक्रमे बधे च भ्वादि० आत्म० सक० सेट्। अट्टते। आट्टिष्ट। दोषधोऽयं तेन आट्टिटिषते आट्टिटत्। किपि अत्। टोपधस्य तु आटिट्टिषते अटिट्टत् किप् अट्।

अट्ट अनादरे चुरादि० उभय० सक० सेट्। अट्टयति ते। आटिट्टत्।

अट्ट पु० अट्टयति अनाद्रियतेऽन्यद्यत्र अट्ट-आधारे घञ्। प्रासादस्योपरिस्थे, प्राचीरोपरिस्थसैन्यस्थे, च यत्र स्थिता हि नरा अन्यान् हीनतया नाद्रियन्ते, यस्मिन् वसतश्च अन्योत्कर्षेऽनादरः। उच्चे भवने च त्रि०अच्चे "अट्टशूला जनपदाः शिवशूलाश्चतुष्पथा" इति भार० "अट्टमन्नं शूलं विक्रेयं येषामिति" नीलकण्ठः शुल्के च न०। क्षौमवस्त्रे प्रासादे च पु० "सुधाधवलाट्टहासेति" काद०। "ददृशे नगरी लङ्का साट्टप्राकारतोरणेति" रामा०। स्टक्शब्दे प्रासादलक्षणादि वक्ष्यते।

अट्टट्ट अव्य० अट्टोऽनादरः अट्टप्रकारः अट्टस्य गुणवाचितया प्रकारे द्वित्वम् शकन्ध्वादि० पररूपम्। अत्युच्चे, "अट्टट्ट हासमभिवं शिवदूती चकार हेति" चण्डी

अट्टन न० अट्ट्यतेऽनाद्रियते रिपुरनेन अट्ट-करणे ल्युट्। चक्राकारफलकास्त्रे। भावे ल्युट्। अनादरे न०।

अट्टशूली स्त्री अट्टप्रधाना शूली श०त०। प्रासादप्रधाने देशभेदे धूमा० वुञ्। आट्टशूलकः तद्देशभवे त्रि०।

अट्टहास पु० अट्टेनातिशयेन हासः हस-घञ् ३त०। उच्चहासे।

अट्टहासक पु० अट्टहास इव कायति कै-क। कुन्दवृक्षे तस्य शुभ्रपुष्पत्वात् उच्चहासवत्त्वात्। [उच्चहासिनि त्रि०।

अट्टहासिन् पु० अट्टमुच्चैर्हसति हस-णिनि। शिवे।

अट्टाट्ट पु० अट्टट्टवत् न पररूपम्। अत्युच्चे सर्व्वोत्कर्षे अनादराधिक्ये।

अट्टालक पु० अट्ट इव प्रासादवृक्षभिव अलति पर्य्याप्तो भवति अल-अच्। प्रासादोपरिस्थे गृहे। स्वार्थे कन्। तत्रार्थे "गोपुराट्टालकवतीं धर्म्मप्राकारशोभनामिति" रा०।

अट्टालिका स्त्री अट्टाल+स्वार्थे कन्। इष्टकादिनिर्म्मिते राजगृहे।

अट्टालिकाकार पु० अट्टालिकां करोति रचयति कृ-अण् उप०। (राज) प्रासादकारके "कुलटायां च शूद्रायां चित्रकारस्य वीर्य्यतः। भवेदट्टालिकाकारः पतितो जारदोषत" इत्युक्ते सङ्कीर्णजातिभेदे।

अठ गतौ भ्वादि० पर० सक० सेट्। अठति। आठीत्।

अठ गतौ इदित् आ० भ्वादि० सक० सेट्। अण्ठते। आण्ठिष्ट।

अड अद्यमे भ्वादि० पर० सक० सेट्। अडति आडीत्।

अड व्याप्तौ स्वादि० पर० अक०सेट्। वेद एवास्य प्रयोगः। अड्नोति। आडीत्।

अड्ड अभियोगे, समाधाने च भ्वादि०पर०सक०सेट्। अड्डति। आड्डीत्। दोषधोऽयम् अड्डिडिषति आड्डिडत्। किप् अत्। डोपधस्य तु आडिड्डिषति आडिड्डत् अट्

अण शब्दे भ्वादि० पर० अक० सेट्। अणति। आणीत्।
अण जीवने दिवा० आत्म० अक० सेट्। अण्यते आणिष्ट।
अण (न) क वि० अणति यथेच्छम् नदति अण-अच् ततः कुत्सितैरिति पा०" । अणक कुलालः सि० कौ०। दन्त्यमध्यायमित्यन्ये।
अणव्य वि० अणोः सूच्यग्रस्य चीनादिकस्य भवनं क्षेत्रम् अणु+यत्। चीनकादिसस्योत्पत्तियोग्ये (सुनाभूमि) क्षेत्रे।
अणि पु० स्त्री अणति शब्दायते अण-इन्। (आरा) इति ख्याते रथचक्राग्रस्थिते कीलके, सूच्याद्यग्रभागे च। स्त्रीत्वे वा ङीप्। अत आदेर्दीर्घतापीष्यते। तेन आणिः आणी।
अणिमन् पु० अणोर्भावः अणु+इमनिच्। सूक्ष्मत्वे सूक्ष्मपरिमाणे, ऐश्वर्यभेदे च यद्द्वारा सूक्ष्मीभूय सर्व्वत्र गन्तुं शक्नोति। ऐश्वर्याणि च। "अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा। ईशित्वं च वशित्वञ्च तथा कामावसायिता" इत्युक्तानि। एतेषां स्वरूपाणि ऐश्वर्यपदार्थनिरूपणे वक्ष्यन्ते। "यथा केशः सहस्रधा भिन्नस्तावत्यणीयसी" इति वेदः।
अणिष्ठ वि० अतिशयेन अणु-इष्ठन्। अणुतरे अतिसूक्ष्मे। "अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं, यन्मध्यमन्मांसं, योऽणिष्ठस्तन्मन" इति छा० उ०।
अणीमाण्डव्य पु० अणी शूलाग्रं तद्विद्धितः माण्डव्यः। तन्नामके मुनिभेदे। तस्य तत्प्रोतत्वकथा भार० आ० प०। "बभूव ब्राह्मणः कश्चिन्माण्डव्य इति विश्रुतः। धृतिमान् सर्व्वधर्म्मज्ञः सत्ये तपसि च स्थितः॥ स आश्रमपदद्वारि वृक्षमूले महातपाः। ऊर्द्ध्वबाहुर्म्महायोगी तस्थौ मौनव्रतान्वितः॥ तस्य कालेन महता तस्मिंस्तपसि वर्त्ततः। तमाश्रमपदं प्राप्ता दस्यवो लोभ्मुद्धारिणः॥ अनुसार्य्यमाणा बहुभी रक्षिभिर्भरतर्षभ!। ते तस्यावसथे लोभ्मुं दस्यवः कुरुसत्तम!। निधाय च भयाद्धीनास्तत्रैवागते बले॥ तेषु लीनेष्वधो शीघ्रं ततस्तद्रक्षिणां बलम्। आजगाम ततोऽपश्यं स्तस्करानुगाः॥ तमपृच्छं स्ततो राजंस्तथादत्तं तपोधनम्। कृतमेन पथा याता दस्यवो द्विजसत्तम!। तेन गच्छामहे ब्रह्मन्! पथा शीघ्रतरं वयम्॥ तथा तु रक्षिणां तेषां ब्रुवतां स तपोधनः। न किञ्चिदुचनं राजन्नुवाच साध्वसाधु वा॥ ततस्ते राजपुरुषा विचिन्वानास्तमाश्रमम्। ददृशुस्तत्र लीनांस्तांश्चौरान् शूलेऽनेव च॥ ततः शूलाग्रसमभद्रक्षिणां तं मुनिं प्रति। संयमं नं ततो राज्ञे दस्यूंश्चैव न्यवेदयन्॥ तं राजा सह तैश्चौरैरन्वशाद्वध्यतामिति। स रक्षिभिस्तदा तीक्ष्णैः शूले प्रोतो महायशाः॥ ततस्ते शूल आरोप्य तं मुनिं रक्षिणस्तदा। प्रतिजग्मुर्महीपालं धनान्यादाय तान्यथ॥ शूलस्थः स तु धर्म्मात्मा कालेन महता ततः। निराहारोऽपि विप्रर्षिर्म्मरणं नाभ्यपद्यत। धारयामास च प्राणान्योगेन समुपानयत्॥ शूलाग्रे तप्यमानेन तपस्तेन महात्मना। सन्तापं परमं जग्मुर्मुनयस्तपसान्विताः॥ ते रात्रौ शकुना भूत्वा सन्निपत्य तु भारत!। दर्शयन्तो यथाशक्ति तमृषिं द्विजोत्तमम्॥ ओहमिच्छामहे ब्रह्मन्! किं पापं कृतवानसि। येनेदृ समनुप्राप्तं शूले दुःखमयं महत्॥ वैशम्पायन उवाच। ततः स मुनिशार्दूलस्तानुवाच तपोधनान्। दोषतः कं गमिष्यामि न हि मेऽन्योऽपराध्यति॥ तं दृष्ट्वा रक्षिणस्तत्र तथा बहुतिथेऽहनि। न्यवेदयंस्तथा राज्ञे यथावृत्तं नराधिप!॥ श्रुत्वा च वचनं तेषां निश्चित्य सह बन्धुभिः। प्रसादयामास तदा शूलस्थमृषिसत्तमम्॥ राजोवाच। यन्मयापकृतं मोहादज्ञानादृषिसत्तम!। प्रसादये त्वां तत्राहं न मे त्वं क्रोद्धुमर्हसि॥ एवमुक्तस्ततो राज्ञा प्रसादमकरोन्मुनिः। कृतप्रसादं राजा तं ततः समवतारयत्॥ अवतार्य्य च शूलाग्रात्तच्छूलं निष्कर्ष ह। अशक्नुवंश्च निष्कृष्टुं शूलं मूले स चिच्छिदे॥ स तथान्तर्गतेनैव शूलेन व्यचरन्मुनिः। तेनातितपसा लोकान् विजिग्ये दुर्लभान् परैः। अणीमाण्डव्य इति च ततो लोकेषु गीयते" इति॥
अणीयस् वि० अतिशयेन अणुः अणु+ईयसुन्। अणुतरे अतिसूक्ष्मे "अणोरणीयान् महतो महीयान् इति" श्रुतिः। स्त्रियां ङीप्।
अणु वि० अण-उन्। क्षुद्रे, सूक्ष्मपरिमाणवति, द्रव्ये, क्लेशे च। (चिना, काङ्नी, श्यामा) प्रभृति सूक्ष्मधान्ये पु०। "अनणुषु दशमांशोऽणुष्वेकादशांश" इति लीला०। अणुशब्दोहि परिमाणविशेषवाची। तत्र परिमाणस्य चतुर्विधा स्थूलसूक्ष्मदीर्घह्रस्वरूपाः "अथादेशेनेतिनेति" इत्युपक्रम्य "अस्थूलमनण्वह्रस्वमदीर्घमित्यादि" श्रुत्या चतुर्विधपरिमाणस्यैव ब्रह्मणि निषेधेन परिमाणचातुर्विध्यलाभः एतन्मूलकमेव शारीरकभाष्ये, वैशेषिकसूत्रे, न्यायकन्दल्यां च उक्तभेदमादायैव परिमाणचातुर्विध्यसङ्गम्। तत्रारम्भकद्रव्यभूयस्त्वाभूयस्त्याभ्यां स्थूलसूक्ष्मत्वे ह्रस्वदीर्घत्वे तु तत्तच्छब्दे वक्ष्येते। एवञ्च सूक्ष्मपदार्थे आरम्भकाल्प-

त्वात् अणुत्वं यत्र चारम्भकद्रव्यान्तरं नास्ति स तादृशपरिमाणवत्त्वात् परमाणुरित्युच्यते। एवञ्च अणुशब्दस्य शुक्लादिशब्दवत् अणुत्वपरिमाणविशिष्टद्रव्यवाचकत्वम्। अणुत्वञ्च सूक्ष्मत्वम् अतिसूक्ष्मत्वञ्च। तत्र सूक्ष्मपरत्वेन सप्तपर्वीनकादिद्रव्याणामारम्भकद्रव्यात्वात् तत्र प्रवृत्तिः। तदभिप्रायेणैव "अनणुषु दशमांशोऽणुष्वेकादशांश" इति लीला०। श्रुतौ च "अणोरणीयानिति" निर्देशः। अतिसूक्ष्मपरत्वे च "नित्या स्याद्दणुलक्षणेति" भाषा० तस्य नित्यत्वञ्च आरम्भकावयवाभावात् "अनित्या च भवेदन्या सैवावयवयोगिनीति" भाषापरिच्छेदेऽवयवयोगेनैवानित्यत्वकथनात् परमाणोस्तदभावेनैव नित्यत्वं भङ्गोक्तमिति नैयायिकाः। वेदान्तिनस्तु सूक्ष्मभूतानामपि ब्रह्मण उत्पत्तिमररीचक्रुः। यथा च एतन्मतयोः युक्तायुक्तत्वे तथा आरम्भवादशब्दे वक्ष्यते। सूक्ष्मार्थग्राहित्वेन अणुबुद्धिरित्यादौ, अणुर्जीव इत्यादौ च दुर्ज्ञेयत्वेन तत्रैतस्य भाक्तत्वम्। एवञ्च अणुत्वपरिमाणरूपगुणमादाय तद्वत्येवास्य प्रवृत्तिः तेन तत्र त्रि० स्त्रियान्तु गुणवचनतया वा ङीप्। अणी। "अणुश्लोमाजाविनाग्न्यो दशार्हाणाञ्च याः स्मृता इति मनुः।" अस्थूलमनणु इत्यादि" श्रुतिः अत्र नञ्तत्पुरुषसमासनिष्पन्नस्य अनणुशब्दस्य "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति" पाणिन्युक्तेः परवल्लिङ्गत्वेन अणुशब्दस्यापि नपुंसकत्वमित्यवसीयते। अधिकं परमाणुशब्दे वक्ष्यते।

अणुक त्रि० अणुप्रकारः अणु-स्वार्थे का० कन्। अणुप्रकारे स्वार्थे कन्। अणुशब्दार्थे चीनकादिधान्ये पु०।

अणुत्व न० अणोर्भावः। अणुपरिमाणे।

अणुधर्म्म पु० अणुः सूक्ष्मो दुर्विज्ञेयो धर्म्मः। "दुर्बोधे धर्म्मे "नहि सुबोधोऽणुरेष धर्म्म इति" पुरा०।

अणुभा स्त्री अणी सूक्ष्मा भा दीप्तिर्यस्याः ब०। विद्युति।

अणुमात्र त्रि० अणुः परिमाणमस्य अणु+मात्रच्। अल्पपरिमाणे "स अणुमात्रेण न संबध्यते" इति शारीरकभा०।

अणुरेवती स्त्री अणुः सूक्ष्मा रेवती तारेव। दन्तिदन्ते।

अणुवीक्षण न० अणुः सूक्ष्मो वीक्ष्यतेऽनेन करणे ल्युट्। सूक्ष्मपदार्थदर्शनसाधने यन्त्रभेदे, भावे ल्युट्। सूक्ष्मपदार्थालोचने न०।

अणुव्रीहि पु० कर्म०। सूक्ष्मधान्ये श्यामादौ चीनकादौ च।

अण्ड न० अमन्ति संप्रयोगं यान्ति अनेन अम-ड टवर्गादित्वेऽपि डस्य नेत्त्वम्। पुंसोऽवयवभेदे सुक्ले, पक्षिडिम्बे, "तदण्डमभवद्धैमं सहस्रांशुसमप्रभमिति" मनुः। "ब्रह्माण्डभाण्डोदरभ्रामदिति" वीर०। वीर्य्ये च। स्वार्थे कन्। तत्रैव। अस्मिन् कुक्कुटादीनां पुंवत्। कुक्कुटाण्डम्।

अण्डकटाह न० अण्डं ब्रह्माण्डं कटाहमिव प्राणिजातकृतकर्म्मपाकसाधनत्वात्। शुभाशुभकर्म्मपाकसाधने ब्रह्माण्डगोलके। "तद्ब्रह्माण्डकटाहसंपुटतटे" इतिसि०शि०गो०।

अण्डकोटरपुष्पी स्त्री० अण्डमिव कोटरे मध्ये पुष्पं यस्याः जातित्वात् ङीप्। नीलवृक्षाख्ये।

अण्डकोष(ग) पु० अण्डस्य सुक्लस्य कोष(षः) इवावरकत्वात्। अण्डाकारे चर्म्मादिते पुंचिह्नभेदे।

अण्डज पु० अण्डात् डिम्बात् जायते जन-ड। अण्डजाते पक्षिणि, सर्पे, मत्स्ये, (कांकलास) इति ख्याते सरटभेदे च। अण्डजातमात्रे त्रि०। भगनाभिकसूर्य्यान्त स्त्री "अण्डजास्तु पक्षिणः सर्पा नक्रा मत्स्याः कच्छपा" इत्यादयः सर्व्व एवाण्डजातत्वात् "अण्डजाः। तेषामुत्पत्तिप्रकारः पदार्थादर्शे दर्शितो यथा "अण्डतो वर्त्तुलीभूताच्छुक्रशोणितसंयुतात् कालेन भिन्नात् पूर्णात्मा निर्गच्छन् प्रक्रमिष्यतीति"। अण्डजातादयोऽत्र।

अण्डालु पु० अण्डः अस्त्यस्य अण्ड+आलुच्। डिम्बविशिष्टे मत्स्ये।

अण्डीर पु० अण्डः पुमवयवभेदः अस्त्यस्मिन्निति अण्ड-ईरन्। विशिष्टसामार्थ्यवति पुरुषे, समर्थे च।

अत वन्धने इदित् भ्वा० पर०सक०सेट्। अन्तति। आन्तीत् "समन्तति कपोत इव गतधिमिति" वेदः।

अत वन्धने भ्वादि० पर०सक० सेट्। अतति। आतीत्।

अत प्रापणे, सातत्ये, गतौ च भ्वादि० पर० सक०सेट्। अतति। आतीत्। क्त अतितः। इन् (पदातिः) "अतिथिरभ्यतति स्वहान् प्रति" इति वेदः।

अत् अव्य० अत-क्विप्। आश्चर्य्ये। ऋ्यादि०। अद्भुतम्।

अतक पु० अतति सततं गच्छति अत-कन्। पथिके।

अतट पु० तट्यते आहन्यतेऽम्भसा इति तटं जलाघातस्थानं तन्नास्ति यस्य ब०। (आड़रीरि) प्रसिद्धे आलम्बनस्थानशून्ये, "मनोरथानामतटप्रपाताः" इति। पर्व्वतादुच्चस्थाने, भूमेरधोभागे च।

अतथोचित त्रि० न तथारूपमुचितं यस्य। यस्य यद्रूपमुचितं तद्विरोधिरूपापन्ने।

अतद्गुण पु० "तद्भूपाननुहारस्तु हेतौ सत्यप्यतद्गुण इति"

दर्पणोक्ते अर्थालङ्कारभेदे, "इन्त सान्द्रेण रागेण भ्रतेऽपि हृदये मम। गुणगौर! निषण्णोऽपि कथं ? नाम न रज्यसीति। अत्यतिरक्तहृदयसंबन्धात् उचितमपि रक्तत्वं न निष्पन्नमिति हेतुसद्भावेऽपि तद्रूपानुहरणात्तथात्वम्।

अतद्गुणसंविज्ञान पु० न तस्य गुणीभूतस्य सम्यक् ज्ञानं यत्र। शाब्दिकोक्ते बहुव्रीहिभेदे। यथा लब्धकर्षमादावेत्यादौ गुणीभूतकर्षादेरपि धर्म्मिद्वारा आनयनेऽन्वयस्तथा दृष्टसदृशमानयेत्यादौ गुणीभूतस्य सदृशस्य नानयनेऽन्वयः इत्यतः लब्धकर्षइत्यादिस्तद्गुणसंविज्ञानः दृष्टसदृश इत्यादिश्च अतद्गुणसंविज्ञानः बहुव्रीहिरिति भेदः। एवमुदाहरणान्तराणि ज्ञेयानि।

अतन्त्र त्रि० न तन्त्रं कारणं तदधीना विवक्षा वा यस्य। कारणानधीने विवक्षाशून्ये च। "सुखप्रहणमतन्त्रमिति" सिद्धान्तकौ०। [निद्रारहिते, आलस्ये च।

अतन्द्र त्रि० नास्ति तन्द्रा निद्रा, तत्सदृशम् आलस्यं वा यस्य।

अतन्द्रित त्रि० तन्द्रा जाताऽस्य तारं० इतच् न०त०। अजातनिद्रे अनलसे च "अतन्द्रिता सा स्वयमेव दृष्टकान्" इति कुमा०।

अतप्ततनु(नू) त्रि० न तप्ता पयोव्रतादिना तनुरस्य। पयोव्रतादिना देहकार्श्यकारके। दीर्घान्तपाठोऽयमेव "विश्वतोऽतप्ततनूर्न तदाम" इति ता०ब्रा०। न तप्ता तप्तसदृशा तनुरस्य। तप्तसदृशा अक्षतचित्ते त्रि० "नातप्ततनुरिति" श्रुतिस्तत्परतयैव वैष्णवैर्व्याख्याता। [निर्हेतुके, तर्कहीने च।

अतर्क त्रि० तर्कयतेऽनेन तर्कस्तर्कहेतुः स नास्ति यस्य।

अतर्कित त्रि० न तर्कितम्। तर्कहेतुव्यापारानुसन्धानेन हठादागते, अनुमितभिन्ने च। "अतर्कितमुपस्थितमिति" पुरा०।

अतल न० अस्य भूखण्डस्य तलं पृथो० इदमोऽत्त्वम्। सप्तपातालमध्ये प्रथमखण्डे भूमेरधोभागे। तद्वोकाच सप्त, अतल, वितल, सुतल, तलातल, महातल, रसातल, पाताल-संज्ञका अधोधस्तिष्ठन्ति तेषां निवेशस्थानञ्च "खादूदकान्तर्बडवानलोऽसौ पातालसंज्ञोकाः पृथिवीपुटानीति" सि०शि० गो०उक्तम्। विशेषस्तत्तच्छब्दे वक्ष्यते। तलशून्ये त्रि० नास्ति तलः प्रतिष्ठा यस्य। अप्रतिष्ठे त्रि०। [गभीरे।

अतलस्पर्श त्रि० न तलस्याधोभागस्य स्पर्शो यत्र ब०। अतिगभीरे।

अतलस्पृश् त्रि० न तले स्पृशते कर्म्मणि किन्। अगाधे।

अतस् अव्य० इदम्+तसिल्। एतद्धेतुकार्थे "अथातो ब्रह्म जिज्ञासेति" सूत्रे अतःशब्दो हेत्वर्थ इति भाष्यम्। "अथातो धर्म्मजिज्ञासेति" जै०। "अतश्चराचरं विश्वमिति" कुमा०।

अतस पु० अत-गतौ असच्। वाते। सातत्यार्थकात् अतः असच्, आत्मनि। गौरादित्वात् ङीषि अतसी। (तिसि, मसिना) इति ख्याते क्षुपे स्त्री। "तस्मात्तसीक्षुनसमानभास" इति माघः। "अतसीपुष्पवर्णाभेति" दुर्गाध्याने अतसी यथा इति स्मार्त्तोक्तेः यथाऽर्थे च। तत्सदृशजाते त्रौमवस्त्रे न०।

अति अव्य० अत-इ। पूजायाम्, उत्कर्षे, अतिक्रमणे, च। स्वभावोल्लङ्घनतिरिच्यते "तेषु हार्दी तथाप्यतीति" चण्डी०। तत्पुरुषपूर्व्वपदस्थः अतिक्रान्तार्थे "अत्यादयः क्रान्ताद्यर्थे द्वितीययेति" वा०। अतिराजो अतिन्वी। उत्कर्षार्थे कुगतिप्रादयश्चेति समासे अतिधनमतिबलमिति। "विक्रमातिक्रमावुद्विक्षुत्यार्थातिशयेष्वतीति" गणरत्नोक्तेश्च विक्रमादिषु तत्र, विक्रमे अतिरथः, (रथाधिकविक्रमवान्) अतिक्रमे, अतिमति (बुद्धातिक्रमः) अबुद्धौ अतिगहनम् (दुर्ज्ञेरविषयः) भये अतितप्तम् (भयतप्तम्) अतिशये अतिवेगः (अतिशयितो वेगः) एवमन्यान्यप्युदाहार्य्याणि। अस्य क्रियायोगे उपसर्गता अतिक्रमे पूजायाञ्च कर्म्मप्रवचनीयसंज्ञा तेन तद्योगे द्वितीयादि तत्रातिक्रमे राजानमति, पूजायाम् अतिस्तुतमित्यादौ उपसर्गत्वबाधाच्च पत्वम्।

अतिकथ त्रि० अतिक्रान्तः कथाम्। कथनायोग्ये, अश्रद्धेये, नष्टे च। [भाषणे च।

अतिकथा स्त्री अत्युत्कटा कथा। अत्युत्कटवर्णने, व्यर्थ-

अतिकन्दक पु० अतिरिक्तः कन्दः यस्य कप्। हस्तिकन्दनामके वृक्षे। [अत्यन्ताकर्षके च।

अतिकर्षण त्रि० अत्यन्तं कर्षति रूप-ल्यु। अत्यन्तातिपादयके,

अतिकश त्रि० अतिक्रान्तः कशाम् तत्प्रहारमनादृत्य स्वेच्छानुसारेण प्रवृत्तत्वात् अत्या० त०। कशाप्रहारसहङ्कृत्य यथेच्छव्याकृते दुर्दान्ते अश्वे।

अतिकाय त्रि० अत्युत्कटः कायोऽस्य। विकटदेहे, रावणपुत्रे राक्षसभेदे पु० तत्कथा लङ्काकाण्डे "चुकोप स महातेजा ब्रह्मदत्तवरो विभुः अतिकायो महावीर्य्य" इत्युपक्रम्य "आच चक्षे महातेजा रामाय रावणानुजः। दशग्रीवो महातेजाः राजा वैश्रवणात्मजः। तस्य पुत्रो ह्यसौ वीरो रावणप्रतिमोरणे इति" तस्य सामर्थ्यं विभीषणेन निवेदिते लक्ष्मणेन सह तस्य युद्धमासीत् तेन च तस्य शिरश्छिन्ने इति "तदातिकायस्य शिरो जहारेति" रामा०लङ्का०।

अतिकुल्व त्रि० अति+कुल-व-किच्च। अतिलोभने।

अतिकृच्छ्र न० अतिक्रान्तं कृच्छ्रं प्रजापत्यं तदधिकदुःख-

साध्यत्वात् "अत्यादयः क्रान्ताद्यर्थे द्वितीयेति" स०। द्वादशरात्रसाध्ये प्रायश्चित्तरूपे व्रतभेदे "एकैकं यासमश्नीयात् त्र्यहाणि त्रीणि पूर्ब्ववत्। त्र्यहञ्चोपवसेदन्त्य मतिकृच्छ्रं चरन् द्विजः इति" मनुः। "त्र्यहाणि त्रीणि नक्ताहानि पूर्ब्ववत् प्रातःसायमयाचितैः प्राजापत्यवदिति" रघुनन्दनः। प्रजापतेः हि "त्र्यहं प्रातस्त्र्यहं सायं, त्र्यहमद्यादयाचितमिति" मनुनैव प्रातःकालादौ भक्षणमुक्तं पूर्ब्ववदित्यनेन तद्धर्म्मातिदेशः। अस्य पुंलिङ्गत्वमपि "अतिकृच्छ्रः पराकृच्छ्रः सौम्यः कृच्छ्रातिकृच्छ्रक" इति विश्वामित्रवचने पुंस्त्वनिर्देशात्। "अवगुर्य्य चरेत् कृच्छ्रमतिकृच्छ्रं निपातने इति" मनुः। अतिशयितं कृच्छ्रं प्रा० स०। अतिकटे। तद्वति त्रि०।

अतिकृत त्रि० मर्य्यादातिक्रमेण कृतम्। मर्य्यादातिक्रमेण कृते पदार्थे "सर्ब्वत्रातिकृतं लोके व्यसनायोपकल्पते" इति पुरा०।

अतिकृति स्त्री अति+कृ-क्तिन्। मर्य्यातिक्रमेण करणे। अत्या०स०। उत्तरत्राकरोक्ते "तथातिकृतिरुत्कृतिरिति" पञ्चविंशत्यक्षरपादके वर्णवृत्तभेदे।

अतिकेशर पु० अतिरिक्तानि केशराण्यस्य ब०। कुब्जकवृक्षे।

अतिक्रम पु० अति-क्रम-घञ् हुस्वः। उल्लङ्घने। अतिक्रान्तः क्रममिति अत्या०स०। लङ्घितक्रमे त्रि०। दुर्+अति+क्रम-कर्म्मणि खल्। दुःखेनातिक्रमणीये त्रि०। "कालो हि दुरतिक्रम" इति "स्वभावो दुरतिक्रम" इति च पुरा०। भावे ल्युट्। अतिक्रमणम् अत्रैव न०। भावे क्तिन्। अतिक्रान्तित्वार्थे स्त्री।

अतिक्रुद्ध पु० प्रा०स०। "अष्टाविंशत्यक्षरोत्थ एकविंशदथापि वा। अतिक्रुद्धः स विज्ञेयो निन्दितः सर्ब्वकर्म्मसु इति" तन्त्रोक्तमन्त्रभेदे। अतिकोपान्विते त्रि०।

अतिक्रूर पु० प्रा०स०। "क्रूरा वक्रा अतिक्रूरा" इति ज्योतिषपरिभाषिते" वक्रगत्यापन्ने भौमशनिरूपक्रूरग्रहे। अत्यन्तक्रूरे त्रि०। "त्रिंशदक्षरको मन्त्रस्त्रयस्त्रिंशदथापि वा। अतिक्रूरः स विज्ञेयो निन्दितः सर्ब्वकर्म्मसु" इति तन्त्रोक्ते मन्त्रभेदे पु०।

अतिगण्ड पु० अत्या०स०। "अतिगण्डः सुकर्म्मा चेति" ज्योतिषपरिभाषिते विष्कुम्भावधि षष्ठे योगे। "गण्डातिगण्डयोर्नाड़ीषट्कं परिवर्ज्य येदिति" ज्यो०। अतिदृढो गण्डो गलः। दृढगण्डे पु०। प्रा० ब०। अतिदृढगण्डवति त्रि०।

अतिगन्ध पु० अतिशयितो गन्धो यस्य ब०। चम्पकवृक्षे। अतिशयितगन्धवति त्रि०। [याम् राजनिघ०।

अतिगन्धालु पु० अतिगन्ध+मत्वर्थे आलुच्। पुत्रदाक्षलता

अतिगर्वित त्रि० अत्यन्तं गर्वितः। अत्यन्तगर्व्वयुक्ते अत्यभिमानिनि गर्व्वश्च आत्मनि असतो गुणादेरुत्कर्षाभिमानः तस्यात्यन्तत्वमन्यस्मिन् अपकर्षज्ञानपूर्ब्वकत्वम्।

अतिगव त्रि० अतिक्रान्तो गां वृद्धा षच्समा०। अत्यन्तमूर्खे, अतिक्रान्तः गां वाचम्। वाक्पथातीते अवर्णनीये च त्रि०।

अतिगह्वर त्रि० अतिक्रान्तो गह्वरं दुर्बोधत्वेन प्रवेशायोग्यत्वात् अत्या० स०। दुर्बोधे अतिगहने।

अतिगुण पु० अतिशयितो गुणः। अतिशयविनयदाक्षिण्यादौ। अतिक्रान्तो गुणम्। गुणहीने त्रि०। अतिशयितो गुणोऽस्य प्रा०ब०। उत्कृष्टगुणवति त्रि०।

अतिगुरु पु० अतिशयितो गुरुः पूज्यतमत्वात् प्रा० स०। "त्रयः पुरुषस्यातिगुरवो भवन्ति पिता माताचार्य्यश्चेति" विष्णुके पित्रादौ। अत्यन्तगुरुत्ववति पारदादौ द्रव्ये त्रि०। स्त्रियां वा ङीप्। अतिगुर्वी। [पर्य्यास्।

अतिगुहा स्त्री अतिक्रान्तो गुहां मध्यावकाशेन। पृषो-

अतिग्रह त्रि० अतिशयितः ग्रहो ज्ञानं, स्वस्वकार्य्यस्य ग्रहणं वा येषाम्। स्वस्वविषयग्राहकेषु नेत्रादिषु ज्ञानेन्द्रियेषु, आदानादिस्वस्वकार्य्यकारकेषु वागादिषु कर्म्मेन्द्रियेषु च। अतिक्रान्तो ग्रहम्। अत्यन्तदुर्बोधे त्रि०। अतिशयितो ग्रहो ज्ञानम्। सर्ब्वथा समग्रज्ञाने पु०। अतिग्रहणादयोऽप्युक्तार्थेषु। [सन्धिके सुखावस्थाभेदे।

अतिघ्नी स्त्री अतिशयेन हन्ति दुःखं हन-टक्। दुःखा-

अतिचरा स्त्री अतिक्रम्य स्वस्थानं सरोऽन्तरं चरति गच्छति चर-अच्। पद्मिन्याम्, तत्तुल्याकारवत्त्वात् स्थलपद्मिन्यां, पद्मचारिण्यां लतायाञ्च। अतिक्रमणकारिणि त्रि०।

अतिचारः पु० अतिक्रम्य स्वस्वभोगकालसञ्जातं चारः राश्यन्तरगमनम्। ज्योतिषोक्ते भौमादिपञ्चकस्य स्वस्वाक्रान्तराशिषु भोगकालसञ्जातं राश्यन्तरगमने। अतिचारश्च ग्रहगतिशब्दे वक्ष्यमाणेन "रविर्मासं निशानाथः सपादंदिवसद्वय" मित्यादिनोक्तभोगकालभेदोल्लङ्घनेन ग्रहाणां अतिशीघ्रगतया अल्पकालेनैव आक्रान्तराशिमुपभुज्य राश्यन्तरगमनम्। तच्च विस्तरेण ग्रहगतिशब्दे वक्ष्यते। "यदातिचारं सुरराजमन्त्रीति" "अतिचारं गते जीवे" इति "गोऽजाश्विकुम्भेतरगोऽतिचारम" इति च ज्योतिषम्। गुरोरतिचारे कालशुद्धिश्च अकालशब्दे दर्शिता। अतिक्रम्य गमने च।

अतिचारिन् त्रि० अति+चर-णिनि । पूर्व्वोक्तातिचारवति यज्ञे । "अतिचारी यदा जीव" इति ज्योतिषम् । अतिक्रम्य अतिशयेन वा गन्तृमात्रे त्रि० ।

अतिच्छत्र पु० अतिक्रान्तश्छत्रम् तुल्याकारेण अत्या०स० । (छातिया) इति प्रसिद्धे स्थलहरणविशेषे, (तालमाखना) इति प्रसिद्धे जलहरणभेदे च । स्वार्थे कन् । अतिच्छत्रकोऽप्यत्रार्थे, छत्राकारपत्रपुष्पवति (खूलफा) इति प्रसिद्धे शाकभेदे ङ स्त्री । चोरस्वामिमते छत्रा इत्येव नाम । छत्रातिक्रमकारिणि त्रि० । अतिक्रमेऽव्ययी० । छत्रातिक्रमे अव्य० ।

अतिच्छन्दस् न० अतिक्रान्तः छन्दः छन्दानुसारिवर्णविन्यासभेदम् अत्या०स० । उक्त्यादिछन्दोऽतिक्रमेण विन्यस्तेऽक्षरविन्यासभेदे "प्राजापत्या अच्छन्दस" इति "अच्छन्दसः शंसतीति" च वेदः । छन्दो वेदोऽभिप्रायो वा । तदतिक्रान्तरि वेदोक्तकर्म्मकर्त्तरि, अतिक्रान्ताभिप्राये च त्रि० ।

अतिजगती स्त्री अतिक्रान्ता जगतीं द्वादशाक्षरपादमेकाक्षराधिक्यात् अत्या०स० । त्रयोदशाक्षरपादके छन्दोभेदे । जगतीं भुवनमतिक्रान्तवति त्रि० । पुंसि स्त्रीत्वे च ङीष्यात्वाभावः ।

अतिजव त्रि० अतिशयितो जवोयस्य ब० । अतिवेगवति वृत्तगन्धिनि च । प्रा०स० । अतिशयितवेगे पु० । "सगरसन्ततिसन्तरणेच्छया प्रचलितातिजवेन" इत्युद्भटः ।

अतिजागर पु० अतिशयितो जागरो निद्राराहित्यं यस्य ब० । नीलवके पक्षिणि तस्य सर्व्वदा जागरूकत्वात्तत्त्वम् । निद्राराहित्यवति त्रि० । [अतिदोषगमने ।

अतिडीन न० अतिक्रान्तं डीनं गतिभेदं अत्या०स० । पक्षिणाम्

अतित(मा)राम् अव्य० अति+तर(म)प् आम् । अत्यन्ते "वेगवानतितरामायाति चेन्मारुत" इत्युद्भटः ।

अतितार त्रि० अतिशयितस्तारः । सप्तादेरतिशययुक्तौ "अतितारस्तारेति" कादम्ब० । अत्युच्चशब्दे पु० तद्वति त्रि० ।

अतितीक्ष्ण त्रि० अतिशयेन तीक्ष्णः कटुरसो यस्य ब० । मरीचादौ (सजना) इति प्रसिद्धे शोभाञ्जने पु० । अतितिक्ते पु० । तद्वति त्रि० ।

अतिथि पु० अतति गच्छति न तिष्ठति अत-इथिन् । अध्वयोगेन आगन्तुके गृहागते, "एकरात्रं हि निवसन् वृत्तिथिर्ब्राह्मणः स्मृतः । अनित्यास्य स्थितिर्यस्मात्तस्मादतिथिरुच्यते" । नैकपाकीयमतिथिं विप्रं साङ्गतिकं तथेति विष्णुस० । तस्य च वैश्वदेववेलेः प्रागेव पूजनता परत्र आहारदानमात्रं यथोक्तं मनुना "वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत् तस्या अन्नं यथाशक्ति प्रदद्यादिति" किन्तु तस्याप्यतिथित्वमेव यथोक्तं "प्रियो वा यदि वा द्वेष्यो मूर्खः पण्डित एव वा । संप्राप्तो वैश्वदेवान्ते विप्रः सोऽतिथिरिष्यते" इति स्मृत्वा । अतिथिप्रतीक्षणञ्च मुहूर्त्तार्द्धमभागपर्य्यन्तम् । "आचम्य च ततः कुर्य्यात् प्राज्ञो द्वारावलोकनम् मुहूर्त्तस्यार्द्धं भागमुदीक्ष्योऽतिथिर्भवेत्" इति मार्क० । विषये च तस्य इन्द्रियेषु संसर्गमात्रकाले एव चेतसि स्थितिर्नोत्तरकालमिति गतिरनुभीयते । "प्रथमं पथि लोचनातिथिमिति" नैष० ।

अतिथिपूजा स्त्री ६त० । गृहस्थकर्त्तव्यपञ्चयज्ञान्तर्गते नृयज्ञरूपेऽतिथिपूजने अतिथिसत्कारादयोऽत्र ।

अतिदान न० अतिशयितं दानम् प्रा० स० । अत्युत्कटदाने "अतिदाने बलिर्बद्ध" इति नीति० ।

अतिदिष्ट त्रि० अति+दिश-क्त । अतिदेशविषये यथा "प्रकृतिवत् विकृतिः कर्त्तव्येति" वाक्येन प्रकृतीभूतदर्शयागादेरङ्गकार्य्याणि प्रयाजादीनि विकृतौ पश्वादियागेऽतिदिश्यन्ते । अतिदेशोनाम इतरधर्म्मस्य इतरस्मिन् प्रयोगाय आदेशः इति मीमांसायां स्थितम् ।

अतिदीर्घ पु० अतिशयेन दीर्घ्यते अति+दीर्घ-कर्त्तरि यत् । रक्तचित्रके (लालचिता) इति ख्याते वृक्षे ।

अतिदेव पु० अतिक्रान्तोदेवान् अत्या०स० । सर्व्वदेवश्रेष्ठे रुद्रे "द्राक्षणाच्चातिदेव इति" वेदः ।

अतिदेशः पु० अतिक्रम्य स्वविषयसङ्कल्पं अन्यत्र विषये देश उपदेशः अतिदिश्यते वा करणे कर्म्मणि वा घञ् । "अन्यत्रैव प्रणीतायाः क्रतुक्रावा धर्म्मसंहतेः । अन्यत्र कार्य्यतः-प्राप्तिरतिदेशः स उच्यते । प्राकृतात् कर्म्मणो यत्कात्तत्-सम्बन्धेषु कर्म्मसु । धर्म्मप्रवेशो येन स्यादतिदेशः स उच्यते" इत्यधिकरणमालाष्टताभियुक्तवाक्योक्ते अन्यत्रप्राप्तेऽन्यधर्म्मे तत्प्रापके शास्त्रभेदे च । यथा "प्रकृतिवत् विकृतिः कर्त्तव्येत्यादिः" स चातिदेशः पञ्चविधः शास्त्रातिदेशः, कार्य्यातिदेशः, निमित्तातिदेशः, व्यपदेशातिदेशः, रूपातिदेशश्च । एतस्य उदाहरणादिकमाकरे ज्ञेयम् । अतिदेशश्च प्रायेण इववदादिसादृश्यवाचकशब्देन यथा प्रकृतिवत् विकृतिरित्यादि अयञ्च वैदिककर्म्मणीव व्याकरणादिशास्त्रे, लौकिके व्यवहारे च विद्यते यथा "इक्षदिक्, इत्यत्र व्याकरणे रूपातिदेशः" "कर्म्मणा कर्मवत्तुल्यक्रिय" इत्यादौ, धुंवदित्यादौ च कार्य्यातिदेशः, णिद्वदित्यादौ निमित्तातिदेशः, व्यपदेशिवद्भावइत्यादौ संज्ञाति-

देश इत्येवं प्रकारा अतिदेशाः सन्ति ॥ लोके च गोसदृशो-गवयइत्यादौ रूपातिदेशइत्यादि । अतएवोपमानरूपप्रमाणे अस्यातिदेशवाक्यस्य करणत्वं सङ्गकारिभावोवेत्यादि तत्-च्छास्त्रकारैरङ्गीकृतम् अतिदेशेन निर्वृत्तम् ठक् । आति-देशिकं त्रि० । "आतिदेशिकविधिरनित्य" इति परिभाषा ।

अतिधन्वन् पु० अत्युत्कटं धनुर्यस्य प्रा०ब० धनुषोऽनङ् । उत्कटधनुर्युक्ते बोधे । धन्वा मरुः अत्या०स० । मरुस्थ-लातिक्रमकारिणि त्रि० ।

अतिधृति स्त्री अतिक्रान्ता धृतिम् अष्टादशाक्षरपादिकां वृत्ति-मेकाक्षराधिक्यात् अत्या० स० । जनविंशत्यक्षरपादके छन्दोभेदे । धृतिर्धैर्य्यं सन्तोषो वा । तदतिक्रमकारिणि त्रि० ।

अतिनु(नौ) त्रि० अतिक्रान्तोनावम् अत्या०स०क्तीवे ह्रस्वः । नौकातिक्रमकारिणि । पुंसि स्त्रियां च अतिनौः ।

अतिनिद्र अव्य० निद्रा सम्पृति न युज्यते अव्ययी० । निद्राया अयोग्यकाले । अतिक्रान्तो निद्राम् अत्या०स० । अतिक्रान्तनिद्रे निद्रारहिते त्रि० । अतिशयिता निद्रा-अस्य । दीर्घनिद्रे त्रि० । प्रा०स० । दीर्घनिद्रायां स्त्री ।

अतिपत्ति स्त्री अति+पत-क्तिन् । अतिपतने, अति-क्रमे । "कालातिपत्तौ द्विगुणामिति" स्मृतिः । पद-क्तिन् पत्तिर्निष्पत्तिः अत्या०स० । अनिष्पत्तौ स्त्री । "लिङ्निमित्ते लृङ् क्रियातिपत्ताविति" पा० । क्रियातिपत्तिः क्रियाया अनिष्पत्तिरिति वृत्तिः । पत्तिं सेनामतिक्रान्ते त्रि० ।

अतिपत्र पु० अतिरिक्तं छदत्पलमस्य । हस्तिकन्दवृक्षे ।

अतिप(थ)थिन् पु० अतिशयितः सुन्दरः पन्थाः प्रा०स०अतेः पूजार्थत्वात् न समा० । सत्पथे । अतीतपथे तु समा० ।

अतिपद त्रि० अतिक्रान्तः पदं चरणम् । वर्णवृत्तानुसारिपादा-तिक्रान्ते "अतिपदा गायत्री अतिपदा जगतीति" ।

अतिपन्न त्रि० अति+पद-क्त । अतिक्रान्ते । "सद्यातिपन्न-शिशुसंस्कारावेति" सुश्रुतः चि० ।

अतिपरोक्ष त्रि० अतिक्रान्तम् परोक्षम् । प्रत्यक्षे, तद्विषये च ।

अतिपात पु० अतिक्रम्य पातः गतिः अति+पत-घञ् । "अतिक्रमे "न चेत् कार्य्यातिपातः" इति मनुः ।

अतिपातक न० अतिक्रान्तोऽत्यन्तदुष्टत्वेनान्यत् पातकं अत्या० स० । पुंसां मातृस्नुषादुहितृगमनजन्ये, स्त्रीणाञ्च पुत्र-पितृश्वशुरगमनजन्ये पातकविशेषे । "मातृगमनं, दुहितृ-गमनं, स्नुषागमनञ्चेत्यतिपातकानीति" "अतिपातकि-नस्ते प्रविशेयुर्ब्राह्मणमिति" "एतेष्वकृतप्राय-श्चित्ता अतिपातकिनः पर्य्यायेण कल्पं पच्यन्ते" इति च विष्णुसं० । "सद्योऽग्निप्रवेशनतिपातकिन" इति हारीतः । "अथ नरकानुभूतदुःखानां तिर्य्यक्त्वसम्प्राप्तीर्णानां मानुष्ये लक्षणानि कुष्ठातिपातकीति" विष्णुसं० । पातक-मतिक्रान्तवति पुण्यशीले त्रि० ।

अतिप्रगे अव्य० अतिप्रगीयतेऽस्मिन् काले अति+प्र+गै-के । अत्यन्तप्रातःकाले । "नातिप्रगे नातिसायं न निशीथे न चोषसीति" स्मृतिः ।

अतिप्रमाण त्रि० अतिक्रान्तः प्रमाणम् अत्या० स० । प्रमा-णातिक्रान्ते यस्य यत्प्रमाणमुचितं ततोऽधिकप्रमाणवति । प्रा० स० । अत्यन्तप्रमाणे वृहत्प्रमाणे न० ।

अतिप्रवृद्ध त्रि० अत्यन्तं प्रमाणातिरेकेण प्रवृद्धम् । प्रमाणाति-रेकेण वर्द्धिमति । अतिप्रवृद्धत्वं नद्यादेर्जलस्य तीराद्यति-क्रमेण, क्षत्रियादेः स्वकर्त्तव्यतामूढतया मर्य्यादाद्यतिक्रमेण वीर्य्याधिक्येन वा वृद्धिः "तस्यातिप्रवृद्धस्य ब्राह्मणान् प्रति अनादर" इति । "अतिप्रवृद्धं प्रहितास्त्वदृष्टिभिरिति" रघुः ।

अतिप्रश्न पु० अतिक्रम्य मर्य्यादां प्रश्नः । मर्य्यादातिक्रमेण प्रश्ने सदुत्तरे जातेऽपि पुनर्जिज्ञासायाम् । यथा वृह-दारण्यके याज्ञवल्क्यं प्रति वालाक्यतिप्रश्नः तत्र ब्रह्ममी-मांसायाम् तेन कृतायामपि दृढातिप्रश्नकरणात् तस्य सद्यःपतनं स्मर्य्यते तस्मात् बृहदारण्यकेऽनुसन्धेयम् ।

अतिप्रसक्ति स्त्री अति+प्र+सृज-क्तिन् । अत्यन्तासक्तौ, प्रसङ्गमतिक्रम्यान्यत्र सम्बन्धे अतिप्रसङ्गे च । लक्ष्ये लक्षण-सम्बन्धः प्रसङ्गः, अलक्ष्ये तत्सम्बन्धोऽतिप्रसङ्गः । "अति-प्रसक्तिनापादकेति" जगदीशः ।

अतिप्रसङ्ग पु० अति+प्र+सृज घञ् । अतिप्रसक्तिपदार्थे । प्रसङ्गमतिक्रान्तवति त्रि० । [शुभूषिते च ।

अतिप्रसिद्ध त्रि० अति+प्र+सिध-क्त । अतिविख्याते

अतिप्रौढा स्त्री प्रकर्षेण वृद्धतेऽत्र प्रौढः विवाहकालः प्रा०ब० अतिशयिता वा प्रौढा वृद्धियुक्ता । विवाहयोग्यकालायाम् अतिशयवृद्धियुक्तायाञ्च स्त्रियाम् स्त्रीणान्तु दशवर्षा-तीतकाल एव अतिप्रौढकालः । "अतिप्रौढा च या नारीति" स्मृतिः अतिप्रवृद्धे त्रि० ।

अतिबल त्रि० अतिशयितं बलं यस्याः ५ब० । अत्यन्तबलाधायि कायां पीतवर्णायां (वेडियाला) इति ख्यातायां लतायां, विश्वामित्रेण रामाय दत्ते अस्त्रविद्याभेदे च स्त्री । यथा "गृहाण त्वं इमे विद्ये बलामतिबलां तथा । न ते श्रमो जरा वाऽस्त्रां भविता राघवैतयम् ॥ न च सुप्तं प्रमत्तं

वा धर्षयिष्यन्ति नैर्ऋताः । न च ते सदृशो राम ! वीर्येणान्यो भविष्यति । सदेवनरनागेषु लोकेष्विह पुमांस्त्विषु । न सौभाग्ये, न दाक्षिण्ये, न बुद्धिश्रुतिपौरुषे ॥ नोत्तरे प्रतिपत्तव्ये त्वत्तुल्यो वा भविष्यति । एतद्विद्याद्वयं प्राप्य यशश्चाव्ययमाप्स्यसि ॥ बलामतिबलां चैव ग्राहविज्ञानमातरौ । क्षुत्पिपासे च ते राम ! नात्यर्थं पीडयिष्यतः ॥ जयञ्च दुर्गकान्तारप्रदेशेष्वटवीषु च । शरतां त्रिषु लोकेषु गमिष्यसि च राघव ! ॥ पितामहसुते ह्येते विद्ये चायुर्बलावहे । मातृं त्वमसि काकुत्स्थ ! विद्ययोर्पुरुषेऽनयोः ॥ स्वभावजैर्गुणैर्दिव्यैः कर्म्मजैर्बहुभिर्वृतः । भूयस्तव गुणोत्कर्षमेते विद्ये करिष्यतः ॥ ततो रामो जलं स्पृष्ट्वा प्राञ्जलिः प्रणतः स्थितः । प्रतिजग्राह ते विद्ये विश्वामित्रात् तपोधनादिति" । अतिशयितं बलम् प्रा० स० । अत्यन्ते बले, सामर्थ्ये, सैन्ये च न० । अतिरिक्तं बलमस्य । अत्यन्तबलयुक्ते त्रि० "जयत्यतिबलो रामो लक्ष्मणश्च महाबल" इति रामा० । अतिरथे च भारते अतिरथविषयएव,"एष ह्यतिबलोमत" इति भीष्मेण भूरिशः प्रयुक्तत्वात् बलकार्य्यत्वाच्च तस्य तथात्वम् ।

अतिबाला स्त्री अतिक्रान्तो बालं बाल्यावस्थाम् । द्विवर्षवयस्कायाम् "वर्षमाला तु बाला स्यादतिबाला द्विवार्षिकीति" स्मृत्युक्तायाम् गवि "अतिवृद्धामतिक्रुशामतिबालां च रोगिणाम् हत्वा चरेदिति" स्मृतिः । अत्यन्तबाले त्रि० ।

अतिब्रह्मचर्य्य पु० अतिक्रान्तो ब्रह्मचर्य्यम् अत्या०स० । स्त्रीसङ्गमकारिणि ब्रह्मचर्य्यत्यागिनि ।

अतिभारः पु० अत्यन्तोभारः गुरुत्वम् स्वकार्य्यकरणे क्षमताविशेषो वा । अत्यन्तगौरवे अत्यन्तभारे, "न चातिभारः समर्थानामिति" । अतिशये "सा सङ्कटकण्ठं व्यसनातिभारात् चक्रन्द विग्ना कुररीव भूय" इति रघुः । वेगे च ।

अतिभारग पु० अतिभारेण वेगेन गच्छति गम–ड श० । खरे अश्वतरे गर्द्दभादुद्वडवाजाते अश्वभेदे ।

अतिभी स्त्री अतिबिभेत्यस्याः दर्शनात् अति+भी–क्विप् । वज्वज्वालायाम् । तद्दर्शने हि लोकानामतिभीतिर्लोकसिद्धा ।

अतिभूमि स्त्री अतिशयिता भूमिर्मर्य्यादा प्रा०स० । अतिमर्य्यादायाम्, आधिक्ये च । "प्राप्य मन्मथमदादतिभूमिं दुःसहस्तनभराः सुरतस्रेति" माघः । अतिक्रमेऽव्ययी० । मर्य्यादातिक्रमेऽव्य० । भूमिं मर्य्यादां वाऽतिक्रान्ते त्रि० ।

अतिभोजन न० अत्यन्तं मर्य्यादामतिक्रम्य भोजनम् । यस्य यावत् भोजनमुचितं तदतिक्रमेण भोजने ।

अतिमङ्गल्य पु० अतिमङ्गलाय हितम् अतिमङ्गल+यत् । विल्ववृक्षे । प्रा०ब० । अतिमङ्गलहिते त्रि० ।

अतिमर्य्याद अव्य० । अतिक्रमे अव्ययी० । मर्य्यादातिक्रमे । अतिक्रान्तो मर्य्यादाम् अत्या० स० । मर्य्यादामतिक्रान्तवति । यस्य वस्तुनः यावती सीमा तदतिक्रान्ते निर्मर्य्यादे त्रि० ।

अतिमात्र त्रि० अतिक्रान्तो मात्रामस्यं अत्या०स० । अतिशयिते, मात्रातिक्रमकर्त्तरि च । अतिशयिता मात्रा प्रमाणमस्य । भृशार्थे त्रि० । "सुनिव्रतैस्तामतिमात्रकर्षितामिति" कुमा० । अतिक्रान्तोमात्रां प्रमाणम् अत्या० स० । दृढत्प्रमाणे त्रि० । [इत्तिवोष्णार्थे ।

अतिमात्रशस् अव्य० अतिमात्र+शस् । अतिप्रमाणकारक-

अतिमान पु० अत्यन्तः मानः अभिमानः । अनुचिताभिमाने "अतिमाने च कौरव" इति चाणक्यः । अतिक्रान्तोमानं प्रमाणम् अत्या०स० । प्रमाणाधिके त्रि० ।

अतिमानुष त्रि० अतिक्रान्तो मानुषचरित्रम् अत्या०स० । मनुष्यायोग्ये दिव्ये कर्म्मादौ । "कर्म्म तस्यातिमानुषमिति" पुरा० । तथाभूते रूपादौ च ।

अतिमित्र न० अत्यन्तं परमं मित्रम् । अत्यन्तबान्धवे "जन्मसम्पद्विपत् क्षेमं प्रत्यरिः साधकोबधः मित्रं परममित्रञ्चेति" ज्योतिषोक्ते ऋणां जन्मतारावधि नवमाष्टादशसप्तविंशात्मके परममित्रतारके च ।

अतिमुक्त त्रि० अतिशयेन मुक्तः विदेहकैवल्यं गतः अति+मुच–कर्त्तरि क्त । निर्व्वाणमुक्तिमति । अतिक्रान्तो मुक्तां गौर्य्यादात् अत्या० स० । माधवीलतायां, तिनिशवृक्षे च पु० ।

अतिमुक्तक त्रि० अतिमुक्त+स्वार्थे कन् । निर्व्वाणमुक्तिमति अतिशयितमुक्ते च । मुचा भावे क्त अतिशयेन मुक्तं बन्धहीनता यस्य कप् । तिन्दुकवृक्षे, तालवृक्षे च पु० ।

अतिमुक्ति स्त्री अत्यन्ता मुक्तिः । विदेहकैवल्ये तत्त्वज्ञानानन्तरम् "तस्य तावदेव चिरं यावत् विमोक्ष्ये इति" श्रुतिदर्शिते शरीरत्यागे, अतिमोक्षादर्थ्यत्वार्थे पु० ।

अतिमृत्यु पु० अतिक्रान्तो मृत्युम् अत्या०स० । मोक्षे "तमेव विदित्वाऽतिमृत्युमेति नान्यःपन्था विद्यते" इति श्रुतिः । स्वाद्यादिभिः शरीरसंबन्धोहि जन्म, तद्वियोगश्च मरणम् तदभिमानिनोजीवस्य । सति च ज्ञाने तन्मूलाज्ञाने निवृत्ते तद्धेतुकशरीरसंबन्धादिकं तन्तुदाहे पटदाहवत् स्वयं निवर्त्तते अत एव ज्ञानवतो देहादिसंबन्धं श्रुतिर्निरास "अशरीरं

वाव सन्तं प्रियाप्रिये न स्पृशत इति"। तथा च देहसंबन्धाभावे कथं मरणसम्भवः। "न जायते म्रियते वा कदाचिदिति" गीतावाक्येन तस्य मरणनिषेधात्। "न तस्य प्राणाहुत्क्रामन्ति इहैव समवलीयन्ते" इति श्रुत्या तत्त्वज्ञानिनः प्राणोत्क्रमणरूपमरणनिषेधेन ज्ञानिनो न मृत्युरिति वेदान्तिसिद्धान्तः। अन्यमते तु एतद्देहात् प्राणोत्क्रान्तावपि न पुनर्देहसम्बन्धोत्तरं पुनर्मरणमिति तद्राहित्यमेव मोक्ष इति भेदः। अतएवोक्तं श्रुत्या "मृत्युमुखात् प्रमुच्यते" इति तेन पुनर्मृत्युकारणीभूतादृष्टक्षय एव ज्ञानेन जन्यते "ज्ञानाग्निः सर्वकर्माणीति" शास्त्रेण प्रारब्धकर्मातिरिक्तकर्मक्षयस्यैव ज्ञानेन साध्यतायाः सर्वसम्मतत्वात् विदुषश्च एतद्देहारम्भकादृष्टवत् एतद्देहविगमादृष्टस्यापि प्रारब्धफलकतया न तस्य नाश इति। अधिकमाकरे द्रष्टव्यम्।

अतिमैथुन न० अत्यन्तं स्वर्गक्रमतिक्रम्य मैथुनं स्त्रीसङ्गमः। स्वर्गातिक्रमेण स्त्रीसङ्गमे। "अतिमैथुनादमैथुनाद्देति"

अतिमोदा स्त्री अतिशयितो मोदोगन्धः यस्याः ब०। नवमल्लिकायाम्। अत्यन्तामोदवति त्रि०।

अतिरक्त त्रि० अत्यन्तः रक्तः रक्तवर्णः अनुरागयुक्तो वा। अतिलोहितवर्णे, अत्यन्तानुरक्ते च। अत्यन्तरक्तवर्णे पु०।

अतिरथ पु० अतिक्रान्तो रथं रथिनम् अत्या०स०। "अमितान् योधयेद्यस्तु संप्रोक्तोऽतिरथस्तु सः" इत्युक्तलक्षणे योधविशेषे। "ये रथाः पृथिवीपाल! तथैवातिरथाश्च ये" इत्युपक्रम्य "क्षतवर्म्मा कृतिरथ" इति "महाराजो महेष्वासः शस्त्रो मेऽतिरथो मत" इत्यादिना बहवोऽतिरथा भा० उद्यो० रथातिरथसंख्याने दर्शिताः। रथातिक्रमकारके त्रि०। [ख्यातायां मूर्च्छालतायाम्।

अतिरसा स्त्री अतिशयितो रसो यस्याः ब०। (राखा) इति

अतिराज त्रि० अतिक्रान्तो राजानम् टच् समा०। अतिक्रान्तराजे। स्त्रियां ङीप्। [निषेधात् न टच्। पूज्यन्टपतौ।

अतिराजन् पु० अतिशयितः पूजितो राजा "न पूजनादिति

अतिरात्र पु० अतिशयिता रात्रिः ततः अस्त्यर्थे अच्। एकरात्रसाध्ये यागभेदे। स च गवामयने प्रथमसंस्थः यथोक्तं ताण्ड्यब्राह्मणे। "प्रजापतिर्वा इदमग्र आसीत् सोऽकामयत बहु स्यां प्रजायेयेति सएतमतिरात्रमपश्यत्तमाहरत्तेनाहोरात्रे प्राजनयदिति" गवामयनसत्रमुपक्रम्य, "अथास्य सत्रस्य पूर्व्वोक्तान्यहानि क्रमेण विधास्यन् अतिरात्रसंस्थम् प्रथमं विधातुमाहेति" भाष्ये अवतरणिकां दत्त्वा व्याख्यातं यथा "स एवं कामयमानः प्रजापतिः सत्रायत्तेन एतं गवामयनस्याद्यमतिरात्रमपश्यदिति"। तच्च स्तुतिपूर्व्वकं विधित्सन्नाह। "यदेषोऽतिरात्रो स एवाहोरात्रे एव प्रजनयन्तीति" "एष प्रजापतिना दृष्टोऽतिरात्रः गवामयनस्य प्रथममहर्भवतीति यत् तेन सत्रानुतिष्ठतो यजमाना अहोरात्रे एव प्रजनयन्ति उत्पादयन्ति स्वावीने कुर्व्वन्तीति" भाष्यम्। इत्यनुपक्रम्य चतुर्थाध्यायप्रथमखण्डपर्य्यन्ते तत्र विहितानि स्तोत्रशस्त्रादीन्युक्तानि। "अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णातीति" श्रुत्यन्तरम्। षोडशी पात्रभेदः।

अतिरि न० अतिक्रान्तं रायं क्षीवत्वात् ह्रस्वः। धनातिक्रान्ते कुत्सादौ। तृतीयाद्यचि तु अतिरिण्या अतिरिणे इत्येवमेकैकमेव रूपं, न पुंवद्भावः तस्य इगन्ताङ्गत्वाभावात्। पुंसि, स्त्रियाञ्च अतिराः अतिरायावित्यादि।

अतिरिक्त त्रि० अति+रिच्-क्त। अतिशयिते, श्रेष्ठे, भिन्ने, शून्ये च। भावे क्त। अतिशये, आधिक्ये च न०। तत्र भेदे "अतिरिक्तमथापि यद्भवेदिति" भाषा० "न हृच्छतीति व्यतिरिक्तेति" कुमा०। यस्य यावत्प्रमाणं युक्तं ततोऽधिकत्वे "होनाक्षीमतिरिक्ताक्षीमिति" स्मृतिः।

अतिरुच् पु० रोचते इति रुक् स्त्रीणामूरुदेशः अतिक्रान्तो रुचम् अत्या०स०। जानुदेशे। अतिक्रान्तकान्तिके त्रि०। प्रा०स०। अतिशयितकान्तौ स्त्री।

अतिरूक्ष त्रि० अतिशयितः रूक्षः प्रा०स०। अत्यन्तरूक्षे स्नेहशून्ये च। तथाभूते कङ्कुकोद्रवादिधान्ये पु०। अतिक्रान्तोरूक्षम्। अतिशयस्निग्धे त्रि०।

अतिरूप पु० अतिक्रान्तो रूपम्। रूपवर्জ্জिते परमेश्वरे। "अशब्दमस्पर्शमरूपमव्ययमिति" श्रुत्वा तस्य रूपहीनताप्रतिपादनात्तथात्वम्। शुक्लादिरूपहीने वाय्वादौ त्रि०। अतिशयितं रूपम् प्रा०स०। सुन्दररूपे न०। "अतिरूपवती कन्या"।

अतिरेक पु० अति+रिच्-घञ्। अतिशये, भेदे, प्राधान्ये, आधिक्ये च। "संपूर्णमेतयोर्यैयमतिरेके परेऽह्नीति" तिथित०। [प्रा०ब०। अत्यन्तरोगयुक्ते त्रि०।

अतिरोग पु० अतिशयितो रोगः प्रा०स०। क्षयरोगे

अतिरोधान न० न तिरोधानम्। प्रकाशे, व्यवधानाभावे च।

अतिरोमश पु० अतिशयितं रोम अतिरोमन्+अस्त्यर्थे श। वनजाते छागे, दृढहनरे च। अत्यन्तरोमाढ्ये त्रि०।

अतिरोहित त्रि० न तिरोहितः। प्रकाशिते स्फुटेऽर्थे "अतिरोहितार्थमब्रवीदिति" प्रभिता०। अव्यवहिते च।

अतिलोमज पु० अतिलोमवत्। वर्णजाते जाते दुष्टजातरे च। अतिलोमयुक्ते त्रि०। नीलवृक्षायां स्त्री।

अतिवक्त्र त्रि०अति+वच-ष्ट्रन्। शावदूके, वाचोयुक्तिदक्षे च।

अतिवक्त्र पु० मा०स०"अतिवक्त्रा नगाष्टके" इति ज्योतिषोक्ते सूर्य्यस्य सप्तमाष्टमस्थितिवशात् पूर्व्वगतिविपरीतपश्चाद्गतिशालिनि भौमादिग्रहपञ्चके। अत्यन्तकुटिले त्रि०।

अतिवयस् त्रि० अतिक्रान्तो वयः कालजातावस्थां, वयसं पक्षिणं वा। प्राप्तवार्द्धके, अतिक्रान्तपक्षिणि च।

अतिवर्णाश्रमिन् पु० अतिक्रान्तो वर्णानामाश्रमिणश्च अत्या०स०। ब्राह्मणादिवर्णभिन्ने ब्रह्मचर्य्यादाश्रमिभिन्ने च "यो वेदान्तमहावाक्यश्रवणेनैव केवलम् आत्मानमीश्वरं वेदसोऽतिवर्णाश्रमी भवे"दित्यादिभुक्तलक्षणे एकात्मज्ञानिनि

अतिवर्त्तन न०अति+वृत-ल्युट्। अतिरेके। अतिक्रमे दण्डं वर्त्तन्ते कर्त्तरि ल्यु। यानसारथ्यादेः, दण्डाभावप्रयोजके छिन्नस्यादिदण्डके मनुना "यानस्य चैव यातुश्च यानस्वामिन एव च दण्डातिवर्त्तनान्याहुरित्युपक्रमे, छिन्नस्ये भग्नयुगे तिर्य्यक्प्रतिपन्नागते अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च। छेदने चैव यन्त्राणां यन्त्ररश्म्योस्तथैव च। आक्रोशे चाप्यपेक्षेति न दण्डं मनुरब्रवीदिति" दण्डाभावकारणानि दश दर्शितानि ज्ञेयानि। अत्या०स०। अतीतजीवनोपाये त्रि०।

अतिवर्त्तिन् त्रि० अतीत्य वर्त्तते अति+वृत-णिनि। अतिशयिनि, अपगे च।

अतिवर्त्तुल पु० अतिशयितः वर्त्तुलः। (वाटुलाकलाई) इति ख्याते वर्त्तुलाकारके कलाये। अत्यन्तवर्त्तुले त्रि०।

अतिवाद पु० अति+वाद-घञ्। अत्युक्तौ, "अतिवादरता ये च" इति पुराणम्। "अतिवादं शंसत्यतिवादेन" इति वेदः। कठोरवाक्ये, अप्रियवाक्ये च।

अतिवादिन् त्रि० सर्व्वानतीत्य वदतीति अति+वद-णिनि। सर्व्वानतिक्रम्य वदनशीले, सर्व्वमतखण्डनेन स्वमतव्यवस्थापके च। "विज्ञानन् विद्वान् भवते नातिवादीति"श्रुतिः।

अतिवाह पु० अतीत्य देहमन्यदेहे वाहः प्रापणम् ७त०। ऐहिकभोगसाधनाद्यत्वे सूक्ष्मभूतमात्रासहितसूक्ष्मशरीरावच्छिन्नजीवस्य देहान्तरादिसंयोगाय नयने, अतियापने च। अतिवाहे नियुक्तः ठक्। आतिवाहिकः तन्नियुक्ते त्रि०।

अतिवाहक पु०अतीत्यैतं देहं वाहयति देहान्तरं प्रापयति अति+वह-ण्वुल्। ईश्वरनियोजिते अर्च्चिरादयभिमानिदेवभेदे। तथाहि "अर्चिषोऽहः, अह्न आपूर्य्यमाणपक्षम्, आपूर्य्यमाणपक्षात् यान् षण्मासान् उदङ्डेति तान् मासान्, मासेभ्यः संवत्सरं, संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं, तत्पुरुषोऽमानवः सएनं ब्रह्म गमयतीति" श्रुतौ वाक्यशेषे अमानवपुरुषस्य ब्रह्मलोकप्रापकत्वश्रुतेः तत्पूर्व्वांशानामपि अर्चिरादीनां चेतनत्वमिति "आतिवाहिकास्तल्लिङ्गादिति" सूत्रे निर्णीतम्। "अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणमिति" गीताव्याख्यायाञ्च अर्च्चिरादयस्तदभिमानिन्यो देवता"इति श्रीधरस्वामिभिरभ्युक्तम् युक्तञ्च अदृष्टेन्द्रियादिकसूक्ष्मशरीरस्य स्थानान्तरनयनं चेतनकर्त्तृकं विनाऽनुपपन्नमित्यतस्तदानीं तस्य स्थानान्तरगमनसिद्धये कल्पितचेतनानामेव प्रेरकत्वमिति। अन्यच्च, "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधन" मित्युक्तस्य भोगसाधनस्य निर्वेदस्य सूक्ष्मशरीरस्य तदवच्छिन्नजीवस्य च स्थानान्तरनयनमाश्रयभूतेन विना न सम्भवतीति तदाश्रयभूतं भूतपञ्चकं च कल्प्यते यथोक्तं मनुना "अक्षयीमात्राविनाशिन्यो दशार्द्धानान्तु याः स्मृताः। ताभिः सार्द्धम्" इत्युक्तम् शारीरकसूत्रे च "तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्त" इति" भूतमात्रोपष्टब्धस्यैव संसरणमुक्तं सांख्ये च "चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया। तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गमिति, संसरति निरुपभोगं भावैरतिवासितं लिङ्गमिति" चोक्तम्। अतिवाहप्रकारस्तु उत्क्रमणशब्दे विशेषेण वक्ष्यते। अति+वह-णिच् ण्वुल् अतिवाहकारके, अतियापके च त्रि०।

आतिवाहिक त्रि० अतिवाहः अस्यास्ति ठन्। अतिवाहयोग्ये अतिवाहशब्दोक्ते सूक्ष्मशरीरे। [क्रमिते च।

अतिवाहित त्रि० अति+वह-णिच्-क्त। यापिते, अति-

अतिवाह्य त्रि० अति+वह-णिच् कर्म्मणि-यत्। अतिवाहयोग्ये कालादौ। [अतिकराले त्रि०।

अतिविकट पु० अतिशयेन विकटः। दुष्टहस्तिनि।

अतिविषा स्त्री अतिक्रान्ता विषम् अत्या०स०। (आतइच्) इति ख्यातायाम् लतायाम्।

"त्रिविधाऽतिविषा ज्ञेया शुक्ला कृष्णा तथाऽरुणा। रसवीर्य्यविपाकेषु निर्विशेषा गुणाधिकेति" वैद्यकम्। विषातिक्रमकारके त्रि०। [क्रान्ते "तद्युद्धमतिदृत्तमिति" भट्टः।

अतिवृत्त त्रि० अतिक्रम्य वर्त्तते वृत-क्त। अतिशयिते, अति-

अतिवृत्ति स्त्री अति+वृत-क्तिन्। अतिक्रमे। वृत्ति-जीविका तामतिक्रान्ते त्रि०।

अतिवृद्ध त्रि० अत्यन्तं वृद्धः। अत्यन्तवृद्धियुक्ते, अतिजरति च। वृक्षादिच्छेदनासमर्थायां गवि स्त्री। "अतिवृद्धामतिक्षणामिति" स्मृतिः "अतिवृद्धाम् वृक्षच्छेदनासमर्थामिति" रघु०। "चतुःशतं समारभ्य यावद्वर्षसहस्रकम्। अतिवृद्धः स मन्वन्तु सर्वशास्त्रेषु वर्जितः इति तन्त्रोक्ते मन्त्रभेदे पु०।

अतिवृष्टि स्त्री अति+वृष-क्तिन्। अत्यन्तवृष्टौ शस्योपघातकोपद्रवरूपे "अतिवृष्टिरनावृष्टिः शलभाः मूषिकाः खगाश्चेत्याद्युक्ते" ईतिभेदे "निरोतिभावं गमितेऽतिवृष्टय" इति नैष०।

अतिवेध पु० अत्यन्तोवेधः सम्पर्कः। "अरुणोदयवेधः स्यात् सार्द्धन्तु घटिकाद्वयम्। अतिवेधोद्विघटिका प्रभासन्ध्यनादृवेः" इतिस्मृत्युक्ते एकादश्याः दशमीसम्पर्कभेदे, "यातुधानं व्रतं योगे, मन्त्रवेधे तु राक्षसम्। जन्माक्षरस्थातिवेधः" इति ब्रह्मवै० जन्माक्षरस्थ फलदायकं न तु कर्त्तुः फलदम् तेन निन्दाश्रवणात् सा एकादशी नैवोपास्येति।

अतिवेगित त्रि० अतिवेगो जातोऽस्य तारा० इतच्। जाताधिकवेगे "भौमाद्योऽल्पमूर्त्तित्वाच्छीघ्रमन्दोच्चसंज्ञकैः देवतैरपलभ्यन्ते सुदूरमतिवेगिताः" इति सूर्य्य०।

अतिवेल त्रि० अतिक्रान्तो वेलां मर्य्यादां कूलं वा अत्या०स०। अतिशयिते, निर्मर्य्यादे, समुद्रादिकूलातिक्रमकारके च। अतिक्रमे अव्ययी०। वेलातिक्रमे अव्य०।

अतिवोढृ त्रि० अति+वह-तृच्। अतिवहनकर्त्तरि प्रापके "अग्निर्वै पशोऽतिवोढा स एतानतिवहतीति" श्रुतिः। स्त्रियां ङीप्।

अतिव्यथन न० अति+व्यध-णिच्-ल्युट् वृद्धा० ह्रस्वः। अत्यन्तपीड़ने, "सपत्नानिष्पत्नादतिव्यथने" इति पा०।

अतिव्यथा स्त्री अत्यन्ता व्यथा। अत्यन्तपीड़ायाम्।

अतिव्यय त्रि० अतिशयितोव्ययः। अपरिमितव्यये यस्य यावान् व्ययउचितस्ततोऽधिकव्यये व्ययनियमश्च, "पादेन तस्य पारक्यं कुर्यात् सञ्चयमात्मवान्। अर्द्धेन चात्मभरणं नित्यनैमित्तिकं तथा पादार्द्धेन सदैव मूलभूतं विवर्द्धयेत् एवमारभतः पुंसामर्थः साफल्यमश्नुतीति" मार्क०पुरा०। "अतिव्ययात् स्वल्पकालात् क्लिश्येदर्थपरिक्षयादिति" नीति०।

अतिव्याप्ति स्त्री अतिशयेन लक्ष्यमलक्ष्यञ्चाविशिष्य व्याप्तिः व्यापनम्। अतिशयव्यापने (लक्ष्यस्येवालक्ष्यस्यापि व्यापने)। तथा च यत्र यस्य स्थितिरुचिता ततोऽन्यत्रापि तस्य सम्बन्धे प्रसक्ते अतिव्याप्तिः। यथा पृथिव्याः गन्धो लक्षणं तत्रैव तस्य स्थितिरुचिता तस्य वाय्वादौ सत्त्वप्रसङ्गे अतिव्याप्तिः। यथा वा धूमे वह्न्यव्यापकता न तु जले, तत्र प्रसक्तौ अतिव्याप्तिः। एवञ्च पृथिव्या रूपवत्त्वं लक्षणम् जलादावतिव्याप्तम्। "परिगणनं कर्त्तव्यमव्याप्त्यतिव्याप्तिदोषवारणायेति" सिद्धा०कौ०।

अतिशक्करी पु० अतिक्रान्ता शक्करीमेकाक्षराधिक्यात्। पञ्चदशाक्षरपादके छन्दोभेदे "शक्करी सातिपूर्वा स्यादिति छन्द०।

अतिशक्ति स्त्री अतिशयिता शक्तिः कर्म्मसाधनं सामर्थ्यम् देहजं बलम् वा प्रा०स०। अतिशयिते सामर्थ्ये, अधिकवीर्य्ये च "स वीर्य्यमतिशक्तिभागि"त्यमरः। अतिक्रान्तः शक्तिम् अत्या०स०। सामर्थ्यातिक्रमकारके त्रि०। अतिशयिता शक्तिर्यस्य व०। अतिशयबलवति त्रि०। अतिक्रमेऽव्ययी०। शक्त्यतिक्रमे अव्य०।

अतिशय पु० अति+शीङ्-अच्। आधिक्ये, अतिरेके च। अतिक्रान्तः शयं हसम् अत्या०स०। हसातिक्रमकारके त्रि०। अतिशय+अस्त्यर्थे अच्। अतिशयवति। "अतिशयरयवर्षिणेति" कादं०। द्वारे व्यापारे च "चिरध्वंसं फलायाधं न कर्म्मातिशयं विदे"त्युदयनः।

अतिशयन न० अति+शी-भावे ल्युट्। अतिरेके अतिशयार्थे। अतिक्रान्तं शयनम् अत्या०स०।

अतिशयित त्रि० अति+शीङ्-क्त। अधिके, अतिक्रान्ते च।

अतिशयिन् त्रि० अति+शी-इनि। अतिशयान्विते स्त्रियां ङीप्। "इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्यादिति" काव्यप्र०।

अतिशयोक्ति स्त्री अतिशयेन उक्तिर्निर्देशः यत्र। अलङ्कारशास्त्रप्रसिद्धे (सा०१०परि०) "सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते भेदेऽभेदः सम्बन्धेऽसम्बन्धस्ताहिपर्य्ययौ। पौर्वापर्य्यायवः कार्य्यहेत्वोः सा पञ्चधा मते"त्युक्तलक्षणे अर्थालङ्कारभेदे यथा "विच्छेदः खादिव बहुमौन"मित्यत्र चेतनगतं मौनित्वमन्वयत्, अचेतनगतञ्चान्वयदिति द्वयोर्भेदेऽपि अभेदः। "अन्यदेवाङ्गलावण्यमन्याः सौरभसम्पद" इत्यत्र लावण्यादेरभेदेऽपि अन्यशब्देन भेदः इति" "अस्याः सर्गविधौ प्रजापतिरभूच्छन्दो नु? कान्तिप्रद" इत्यादौ श्लोके "वेदाभ्यासजड़ं कथं नु? विषयव्यावृत्तकौतूहलो निर्मातुं प्रभवे"दित्यादिना विधातृत्वसम्बन्धेऽपि तदसम्बन्धः। "यदि स्यान्मुखमेके सकलमिन्दोरिन्दीवरद्वयम् तदोपमीयते तस्या वदनं चारुलोचनमिति" यदि शब्दबला-

दाहृतसम्भावनायैव सम्बन्धात् तद्विपर्य्ययः । "समभेव समाक्रान्तं हयं द्विरदगामिना तेन सिंहासनं पित्रमखिलञ्चारिमण्डल" मित्यत्र कार्य्यकारणयोः पौर्व्वापर्य्याभावः ।

अतिशायन न० अति-शीङ् ल्युट् "अतिशायने इष्ठ" नित्यादिसूत्रनिर्द्देशात् त्रि० दीर्घः । आधिक्ये, प्रकर्षे च । "भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने इति" कारिका ।

अतिशीत न० अतिशयितं शीतम् प्रा० स० । अत्यन्तशीतलस्पर्शे । तद्विशिष्टे त्रि० ।

अतिशेष पु० अतिशिष्यते कर्म्मणि घञ् । स्वत्यवशिष्टे, "स हि खादित्वातिशेषान् जायाया आजहारेति" । [श्रेष्ठे च ।

अतिशोभन त्रि० अति+शुभ-ल्यु । अत्यन्तशोभान्विते,

अतिश्वन् त्रि० अतिक्रान्तः श्वानं वहेन यच् समा० । वराहादौ । सेवायां स्त्री, सेवायाः कुक्कुरवत् पराधीनवृत्तित्वात् तथात्वम् । अतएव मनुना "न श्वहत्या कदाचनेति" सेवायाः कुक्कुरवृत्तित्वेन निषेधः कृतः ।

अतिश्वन् पु० अतिशयितः श्वन्दरः श्वा अतेः पूजार्थत्वात् न समा० । उत्तमकक्कुरे तद्दूरदेशादौ पक्षा० फक् । आतिश्वायनः तद्दूरदेशादौ त्रि० ।

अतिष्ठा त्रि० अतीत्य सर्व्वान् तिष्ठति स्था-क्विप्-षत्वम् । सर्व्वातीते । "अतिष्ठा वा एषा छन्दसां यदतिच्छन्दा अतिष्ठा अश्वमेधो यज्ञानामिति" ६०उ० ।

अतिसञ्चय पु० अतीत्य आवश्यकत्वं सञ्चयः । मधुमक्षिकादीनामिव स्वपरवञ्चनेनातिमात्रसञ्चये ।

अतिसन्ध त्रि० अतिक्रान्तः सन्धां सन्धानं मर्य्यादां वा अत्या० स० । सन्धानवर्জ্জिते, अतिक्रान्तमर्य्यादे च ।

अतिसन्धेय त्रि० अतिकष्टेन सन्धेयः अतुसन्धेयः संयोज्योवा । कष्टानुसन्धेये, कष्टेन संयोजनीये च ।

अतिसन्धा स्त्री अत्यासन्ना सन्ध्या यस्याः ब० स० । पूर्व्वदिवसीयरात्रिशेषदण्डादिपरदिनसूर्य्योदयपर्य्यन्तः, सूर्य्यास्तात् पूर्व्वोत्तरदण्डात्मकश्च कालः सन्ध्या । तस्याः आसन्ने काले । "नातिसन्ध्यसमीपत" इति स्मृतिः ।

अतिसर त्रि० अतीत्य सगतिसत्त्वङ्गत्र सरति अति+सृ-अच् । अतिचारिणि, अपसरे च यां "असावतिसरांचकारेति

अतिसर्ग पु० अति+सृज-घञ् । दाने । "सदुर्वरातिसर्गात्तु मया तस्य दुरात्मनः" इति रघुः । सर्गं सृष्टिमति क्रान्तरि, निस्ने, सक्ते च त्रि० । अतिसृज्यते यत्नेष्टं कर्म्म क्रियतेऽनेन । कामचारानुज्ञायाम् यथेच्छं क्रियताभित्याद्यभिलाषरूपायाम् "विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रातिसर्गेति" पा० । अतिसर्गः कामचारानुज्ञेति वृत्तिः ।

अतिसर्জ্জन न० अति+सृज-ल्युट् । दाने, वधे, विप्रलम्भे, अतिशयदाने च । "ज्वलनातिसर्জ্जनादिति" कुमा० ।

अतिसर्व्व त्रि० अतिक्रान्तः सर्व्वान् अत्या० स० गौणत्वान्न सर्व्वनामता । सर्व्वातिगे सर्व्वातीते । "अतिसर्व्वाय सर्व्वायेति" सुश्रु० ।

अतिसान्तपन न० अतिक्रान्तं सान्तपनमधिकदिनसाध्यत्वात् अत्या० स० । "गोमूत्रगोमयक्षीरदधिसर्पिःकुशोदकान्येकाहं द्वितीयमुपवसेत्तत् सान्तपनम्, तत्प्रहाभ्यस्तैवातिसान्तपनमिति" विष्णुक्ते व्रतभेदे ।

अतिसाम्या स्त्री अत्यन्तं साम्यं मधुनाऽस्याः । मधुयष्टिलतायाम् । प्रा० स० । अत्यन्तसादृश्ये न० ।

अतिसायम् अव्य० अत्यासन्नं सायम् यस्य ब० स० । सायंकालसमीपे काले "नातिप्रगे नातिसायमिति" स्मृतिः ।

अति(ती)सार पु० अतिसारयति मलम् द्रवीकृत्य अति+सृ-णिच्-अच् वा अतेः दीर्घः । रोगभेदे उदरामये । तस्य निदानादि सुश्रुते उक्तं यथा "गुर्वतिस्निग्धरूक्षोष्णद्रवस्थूलातिशीतलैः । विरुद्धाध्यशनाजीर्णैर्विषमैश्चापि भोजनैः । क्लेदाद्यैरतियुक्तैश्च मिथ्यायुक्तैर्विधैर्भयैः । शोकाद्दुष्टाम्बुमद्यातिपानैः सात्म्यस्तुपर्य्ययैः । जलाभिरमणैर्वेगविघातैः क्रमिदोषतः । ऋणां भवत्यतीसारो लक्षणं तस्य वक्ष्यते । (तस्य संप्राप्तिः) "संगाग्न्यापां धातुरग्निं प्रदुष्टः श्लक्ष्मिश्रो वायुनाधः प्रपद्यतः । सरत्यतीवातिसारं तमाहुर्व्याधिं घोरं षड्विधं तं वदन्ति । एकैकशः, स सर्व्वशश्चापि 8 दोषैः शोकेनान्यः ५ षष्ठ आमेन ६ चोक्तः ॥ (तस्य पूर्व्वरूपम्) हृन्नाभिपायूदरकुक्षितोद-गात्रावसादाविलसन्निरोधाः । विट्सङ्ग आध्मानमथाऽविपाको भविष्यतस्तस्य पुरःसराणि । (वायुजः) शूलाविष्टः सक्थिमूलोऽन्त्रकूजी वस्त्यापानः सङ्गकर्षूरुजङ्घः । वर्चोसङ्गस्त्वल्पमल्पं सफेनं रूक्षं श्यावं सानिलं सारुजेन । (पित्तजः) दुर्गन्ध्युष्णं वेगवन्मांसतोयप्रख्यं भिन्नं स्निग्धदेहोऽतितीक्ष्णम् । पित्तात्पीतं नीलमालोहितं वा तृष्णा मूर्च्छा दाहपाकज्वरार्त्तोः (कफजः) तन्द्रानिद्रागौरवोत्क्लेशसादी वेगाग्निर्वृद्धविट्कोऽपि भूयः । शुक्लं सान्द्रं श्लेष्मणा श्लेष्मयुक्तं भक्तद्वेषी स्निग्धमं वृद्धरोमा ॥ (त्रिदोषजः) तन्द्रायुक्तो मोहमादास्यशोषी वर्चः कुर्य्याच्चैकवर्णं तृषार्त्तः । सर्व्वैर्भूतैः सर्व्वलिङ्गोपपत्तिः कृच्छ्रायं वालवृद्धैरसाध्यः ॥ (शोकजः) तैस्तैर्भावैः शोचतोऽत्यागनस्य वाष्पो वेगः पक्ष्मसाविश्य-

ञ्जनोः। कोडं गत्वा चोभयन् यस्य रक्तं तच्चाधस्तात्काकनलोमप्रकाशम् ॥ वर्च्चोमिश्रं निः पुरीषं सगन्धं निर्गन्धं वा सार्य्यते तेन कोठात्। शोकोत्पन्नो दुश्चिकित्स्योऽतिमात्रं रोगो वैद्यैः कट एष प्रदिष्टः ॥ (आमजः) आमाजीर्णैः प्रदूताः क्षोभयन्तः कोठं दोषाः सम्प्रदुष्टाः सभक्तम्। नानावर्णं नैकशः सारयन्ति तच्छ्राव्यञ्जनोः षडमेनं वदन्ति ॥

अति(ती)सारकिन् त्रि० अतिसारो रोगोऽस्यास्ति अतिसार+इनि-कुक्-च्। अतिसाररोगवति। [अतिसाररोगे।

अतिसारिन् पु० अत्यन्तं सारयति मलम् अति+सृ-णिनि।

अतिसृज्य त्रि० अति+सृज-क्यप्। त्याज्ये, सर्जनीये च।

अतिसृष्ट त्रि० अति+सृज-क्त। दत्ते, प्रेरिते च।

अतिसौरभ पु० अतिशयितं सौरभमस्य ब०। अत्यन्तामोदवति आम्रे। सौरभान्विते वस्तुमात्रे त्रि०। प्रा०स०। अत्यन्तसुरभिगन्धे न०। [माचररेदिति" स्मृतिः।

अतिसौहित्य न० प्रा०स०। अत्यन्ततृप्तौ "नातिसौहित्य-

अतिस्तुति स्त्री अति+स्तु-क्तिन् अतेः पूजार्थत्वादुपसर्गत्व बाधाच्च षत्वम्। अविद्यमानगुणानुकीर्त्तने।

अतिस्वर्ग त्रि० अतिक्रान्तः स्वर्गं वर्ग्योच्चारणप्रयत्नभेदं दानं वा। जिह्वाग्रादेः सम्पूर्णस्वर्गाभावेन ईषत्स्वर्गमात्रेण उच्चार्य्ये वरत्नात्मके वर्णे स्वरवर्णे च "अघोऽस्पृष्टा य-स्त्वोष्मभिरस्पृष्टाः यलस्तवेति" शिक्षायां तेषामुच्चारणेऽस्पर्शं षत्स्वर्गयोरुत्कीलयात्वम्। दानहाने त्यागे अधर्मे च। "अतिस्वर्गो वर्वरता च रेफे" इति। प्रा०स०। अत्यन्तस्वर्गे।

अतिस्फिर त्रि० प्रा०स०। अत्यन्तस्फूर्तिगामिनि, अतिवृद्धे च।

अतिहसित न० अति+हस-क्त। उद्धासे। घञ्। अतिहासोऽप्यत्र पु०। [अति+हस्त+णि-अतिहस्तयति।

अतिहस्ति नामधातुः हस्तो निरस्यति हस्तिनाऽतिक्रामति वा

अतीक्ष्ण त्रि० न०त०। तीक्ष्णत्वविरोधिस्निग्धत्ववति। विषयुङ्नौहरूपतीक्ष्णगन्धार्थभिन्ने न०।

अतीत त्रि० अति+इण-क्त। अतिक्रान्ते, भूतकाले च। तद्वृत्तौ आरब्धपरिसमाप्ते पदार्थमात्रे त्रि०। अतीतस्य वर्त्तमानध्वंसप्रतियोगो। भवति च अपचदित्यादौ पाकादेर्वर्त्तमानध्वंसप्रतियोगित्वम्। स च कालो द्विविधः अद्यतनः अनद्यतनश्च अद्यतनस्तु अतीतायाः रात्रेः पश्चार्द्धेन, आगामिन्याः पूर्व्वार्द्धेन च सहितः कालः। तत्र वृत्तिध्वं स प्रतियोगी अद्यतनातीतः तदरिक्तः अनद्यतनः। तत्रानद्यतने भूते लङ् (अपचत्) "अनद्यतने लङिति" सूत्रात् तस्यैव वक्तुरपारोक्ष्यविवक्षायां लिट् (पपाच) "परोक्षानद्यतने लिडिति" सूत्रात्। भूतसामान्ये लुङ्। अपाक्षीत्। सगद्यादियोगे लटोऽपि भूतत्वमर्थः। कालस्तु क्रियान्वयी सर्व्वत्र, "क्रियाभेदाय कालस्थिति" रित्युक्तेः। अतीतत्वादिकन्तु सर्व्वत्र प्रयोगकालमादायैव व्यवस्थियते इत्यादिकमाकरे द्रष्टव्यम्। अतीतकाले, "गीतेऽतीते वसनमशनमिति" "कालातीता हृषा सन्धेति" "संवत्सरे व्यतीते तु पुनरागमनाय चेति" तत्कालवृत्तौ "अलमतीतवार्त्तयेत्यादि"।

अतीन्द्र पु० अतिक्रान्त इन्द्रम् गुणैः अत्या०। इन्द्रगुणातिगे विष्णौ इन्द्रातिगमात्रे त्रि० "अतीन्द्रमतिरूढं च भवतचरितं परमिति" पुरा०।

अतीन्द्रिय त्रि० अतिक्रान्तमिन्द्रियं तदविषयत्वात् अत्या० स०। इन्द्रियायोग्ये अप्रत्यक्षे, "नेत्रश्रोत्रनासिकारसनात्वक्चेतांसीन्द्रियाणि तैर्ग्राह्यमग्राह्यं विषये। "ज्ञानं यच्चविकल्पाख्यं तदतीन्द्रियमिष्यते" भाषा०। "यत्तत् सूक्ष्ममतीन्द्रियमिति" गीता। ईश्वरे च तस्य तथात्वम् बाह्येन्द्रियायोग्यत्वेनैव अन्यथा "मनसैवानुद्रष्टव्यं" इति श्रुतौ ज्ञानविषयत्वमुक्तं विरुध्येत। "यन्मनसा न मनुते" इत्यादिकं तु अशुद्धमनसोऽविषयत्वपरम्। अत एव "विशुद्धचेतसा गम्यमिति" वाक्यान्तरम्। किञ्च वेदान्तिमते ज्ञानं द्विविधं वृत्तिरूपं तदवच्छिन्नमनोवृत्तिप्रतिबिम्बितचैतन्यरूपञ्च तत्र बाह्येन्द्रियाणां रूपादिग्राहकत्वमीश्वरस्य रूपादेरभावेन बाह्येन्द्रियायोग्यत्वाभावेऽपि मनोवृत्तिविषयत्वमस्त्येव अतिसूक्ष्मत्वाच्च नाशुद्धमनोविषयत्वमित्येव भेदः। किन्तु मनोवृत्तिविषयत्वेऽपि तदवच्छिन्नचैतन्याविषयत्वात्तस्य मानसाविषयत्वम् अतएवोक्तमभियुक्तैः "फलव्याप्यत्वमेवास्य शास्त्रलब्धिर्निराकृतम्। ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षितेति"। अन्यथा विषयगताज्ञाननिवृत्तिं प्रति स्वविषयकमनोवृत्तेः कारणतया तदभावे कथंकारं? तद्वताज्ञाननिवृत्तिः स्यात् एतत्पक्षेऽप्यतीन्द्रियत्वं तज्जन्यवृत्त्यवच्छिन्नचैतन्याविषयत्वेन द्रष्टव्यम्।

अतीव अव्य० अत्येव-इवः अवधारणे प्रा०स०। अवधृतातिशयेऽत्यन्तातिशये च। अतीव विव्यधे" इति भार०। "अतीव सुकुमाराङ्गीति"। "उच्चैःशिरसामतीवेति" कु०।

अतुल पु० नास्ति तुला शुभ्रपुष्पतायामस्याः। तिलकवृक्षे तुलारहिते त्रि०। "रामस्त्वतुलविक्रम" इति रामा०।

अतुल्य त्रि० न तुल्यः । असदृशे असमाने "अतुल्यमङ्गसार्द्धं रामेण मम विग्रह" इति भट्टिः ।

अतुष त्रि० नास्ति तुषोऽस्य । अवघातादिना निस्तुषीकृते धान्यादौ "अतुषानिव यवान् क्षत्वेति" ।

अतुहिनरश्मि पु० न तुहिनः अहिम उष्णो रश्मिरस्य । उष्णरश्मौ सूर्य्ये । न०त० । उष्णरश्मौ पु० ।

अतूतुजि पु० न+तुज-कि द्वित्वदीर्घे । अदातरि । "अतूतुजिं चित् तूतुजिरश्विअदिति" ऋ०तूतुजिर्दातेति भा० ।

अतूर्त्त त्रि० न तूर्यते तुरी हिंसायाम् क्त इदित्त्वादिट् न । अहिंसिते । "अतूर्त्तोः राजा अव इच्छसान इति ऋ० । अतूर्त्तः अहिंसित इति भा० ।

अतृणाद् त्रि० न तृणमत्ति अद-क्विप् उप० न०त० । तृणाभक्षके दुग्धमात्रपोषे गवादिवत्से । "अथ वत्सं जातमाङ्तृणादमिति" वेदः । [मनर्हे पर्वते ।

अतृदिल पु० न तृद्यते बध्यते तृद-किलच् न०त० । कन्तु-

अतृप्ति स्त्री० तृप्तिः सन्तोषः अभावार्थे-न०त० । तृप्त्यभावे व० । तृप्तिरहिते, असन्तोषिणि, लोलुपे च त्रि० ।

अतेजस् न० न तेजः विरोधे न०त० । तेजोविरोधिनि तमसि छायायाम् । नास्ति तेजोऽस्य वा न कप् । तेजोरहिते त्रि० कपि । अतितेजस्कोऽप्यत्र त्रि० ।

अत्क पु० अतति सततं विततिम् अत-कन किच्चम् । शरीरावयवे "स्तरीर्नात्कं व्युतं वसानेति" श्रुतेः । अततति सततं गच्छति । पान्थे त्रि० ।

अत्तवे अव्य० अद-तुमर्थे तवेङ् । अत्तुमित्यर्थे "हविषेऽत्तवे इति" यजु० । "अत्तवे हविर्भक्षितुमिति" वेददीपः ।

अत्ता स्त्री अतति सततं सम्बध्नाति अत-तक् टडभावः । मातरि, स्त्रियाः-स्वस्त्राञ्च । स्वार्थे के कापि अत इत्त्वे । अत्तिकाप्यत्र ।

अत्ति त्रि० अत्यते सर्वदा सम्बध्यते कर्म्मणि क्तिन् । मातरि, ज्येष्ठभगिन्यां, स्त्रियाः—स्वस्त्राञ्च । स्वार्थे कन् । तत्रैवार्थे ।

अत्तृ पु० अद्-तृच् । परमेश्वरे, "अत्ता चराचरग्रहणादिति" शारीरकसूत्रम् तस्य अत्तृत्वञ्च "यस्य ब्रह्म च क्षत्रञ्चोभे भवत ओदनो मृत्युर्यस्योपसेचनमिति" श्रुतौ सर्वभक्षकत्वेनोक्तेः । अधिकमदितिशब्दे वक्ष्यते भक्षणकर्त्तृभावे त्रि० स्त्रियां ङीप् । "अरक्षितारमत्तारं रूपं विद्यादधोगतिमिति" भार० ।

अत्न न० अतति जयपराजयावत्र अत-न । युद्धे । निरु०

अत्नु पु०अत-नु । वायौ । सततगन्तरि । पथिके त्रि० । उषा०

अत्य त्रि० अतति शीघ्रं गच्छति कर्त्तरि यत् । शीघ्रगेऽश्वे, "अश्वोऽस्यत्योऽसि मयोभूरिति" ता०ब्रा० । "अशुमत्यं न वाजिनमिति" वेदः ।

अत्यग्निष्टोम पु० अतिक्रान्तोऽग्निष्टोममधिकफलदत्वात् अत्या०स० । "अग्निष्टोमोऽत्यग्निष्टोम उक्थः षोडशी राजसेयोऽतिरात्रोऽप्तोर्याम इति" गवामयनसंस्थयज्ञभेदे ।

अत्यङ्कुश पु० अतिक्रान्तोऽङ्कुशं तत्पीडनमनादृत्य यथेष्टं प्रवृत्तत्वात् अत्या०स० । अङ्कुशाघातानादरेण यथेच्छं प्रवृत्ते उत्कटे दुर्दान्ते गजे । [अङ्गुलिपरिमाणाधिके ।

अत्यङ्गुल त्रि० अतिक्रान्तोऽङ्गुलिं तत्परिमाणम् अच् समा० ।

अत्यध्व त्रि० अतिक्रान्तोऽध्वानम् अत्या०स० अच् समा० । अतिक्रान्तपथे प्रा०स० । अतः पूजनार्थत्वाच्च समा० । अत्यध्वन् । सुपथि पु० ।

अत्यन्त न० अतिक्रान्तोऽन्तं सीमाम् अत्या०स० । अतिशये । तद्युक्ते सर्वपरिच्छेदातिक्रान्ते त्रि० । अतिक्रमेऽव्ययी० । परिच्छेदातिक्रमे नाशातिक्रमे च अव्य० । "किं वा तवात्यन्तवियोगदुःखे" इति रघुः "अत्यन्तहिमोत्तरानिला इति" कुमा० । "सुखमत्यन्तमश्नुते" इति गीता । "शरीरस्य गुणानाञ्च दूरमत्यन्तमन्तरमिति" च पुरा० । "अत्यन्ते भवः ठक् आत्यन्तिकः । अत्यन्तभवे वस्तुनि त्रि० । नाशातिक्रान्ते त्रि० "अत्यन्तं निर्जगद्योमेति" पञ्चदशी ।

अत्यन्तकोपन त्रि० अत्यन्तं भृशं कुप्यति अति+कुप-ल्यु । भृशकोपान्विते अतिकोपयुक्ते ।

अत्यन्तगामिन् त्रि० अत्यन्तम् अनात्ययं अति+अन्-अत्यये अव्ययीभावः तद्गच्छति गम-कर्त्तरि णिनि । आत्यन्तिके अतिशयगमनशीले च । स्त्रियामत्यन्तगामिनी ।

अत्यन्तनिवृत्ति स्त्री अत्यन्ता निवृत्तिः । स्वप्रतियोगिजातीयप्रागभावासमानाधिकरणे ध्वंसे । यस्यां सत्यां स्वप्रतियोगिजातीयस्यान्यस्य पुनरुत्पत्तिर्न भवेत् तादृशी निवृत्तिरत्यन्तनिवृत्तिः "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थ इति" सांख्यसूत्रम् । सा च मोक्षावस्थायामेव, मोक्षे हि विवेकेनाविद्यानिवृत्तौ तत्कार्य्यस्य दुःखादेः सुतरां समूलमुच्छेद इति तत्र न पुनर्दुःखोत्पादः अतस्तत्र दुःखात्यन्तनिवृत्तिः ।

अत्यन्तसंयोग पु० अत्यन्तेन साकल्येन संयोगः संबन्धः व्याप्तिरिति यावत् अन्तमवसानमतिक्रान्तः संयोगो वा । सन्ततसम्बन्धे, व्याप्तौ च । "कालाध्वनोरत्यन्तसंयोग" इति पा० । [इत्ते राजनि० ।

अत्यन्तसुकुमार पु०अत्यन्तं सुकुमार इति । (काङ्गी) कङ्गनी

अत्यन्ताभाव पु० अत्यन्तः अन्तमतिक्रान्तः नित्यः अभावः कर्म०। नास्तीति वाक्याभिलप्यमाने नाशप्रागभावभिन्ने संसर्गाभावे। यथा न्यायमते भूतले घटाभावः प्रतीयते स च भूतले घटोनास्ति इति वाक्येन अभिलप्यते सोऽयमभावः, न नाशः, नापि प्रागभावः तयोः समवायि देशवृत्तित्वनियमात् भूतलादेश्च तदभावात्। नाशप्रागभावयोस्तु न अत्यन्तता प्रतियोगिकाले तयोरसत्त्वात्। नापि तयोर्नित्यता प्रागभावस्य प्रयोगिनाश्यत्वात् ध्वंसस्य च प्रतियोगिजन्यत्वात्। भेदस्य नित्यत्वेऽपि संसर्गाभावत्वाभावात् न तथात्वम्। अत्यन्ताभावस्य नित्यत्वेऽपि प्रतियोगिसत्त्वकाले न तत्प्रतीतिः अभावप्रत्यक्षे योग्यानुपलब्धेर्हेतुतया योग्यस्य घटादिरूपप्रतियोगिन उपलब्धौ तदनुपलब्धेरभावात्। नापि एकस्मिन् भावाभावयोः सत्त्वं विरुद्धम् एकस्मिन्नपि हृदे कपिसंयोगतद्भावयोरवच्छेदभेदेन सत्त्वदर्शनात् तथा च एकस्मिन्नपि भूतलेऽवच्छेदभेदेन तयोः सत्त्वं न विरुध्यते। द्रव्यादौ गुणतदभावयोः कालरूपावच्छेदभेदेन स्थितिरपि न विरुद्धा। तथा च प्रतियोगिसत्त्वकाले द्रव्ये गुणात्यन्ताभावबुद्धिः प्रतिबन्धकसद्भावेन परं नोदेति इत्येव विरोधमात्रम्। अधिकमभावशब्दे वक्ष्यते। "प्रागभावस्तथाध्वंसोऽप्यत्यन्ताभाव एव चेति" भाषा०।

अत्यन्तिक त्रि० अत्यन्तं गच्छति अत्यन्त+ठन्। अतिशयितगमनकारिणि। अतिशयितमन्तिकं निकटं प्रा० स०। अतिनिकटे न०। तद्वृत्तौ त्रि०। नाहैवात्यन्तिके नोदूरे तत् स्थापयेदिति। अत्या०स०। अतिक्रान्तसामीप्ये दूरे न०। तद्वृत्तौ त्रि०।

अत्यन्तीन त्रि० अन्तरहितव्ययः अत्यन्तम् अत्यये व्ययी० अत्यन्तं गामी अत्यन्त+ख। अतिशयितगतिशीले। "लक्ष्मीं परम्परीणां त्वमत्यन्तीनत्वसङ्गयेति" भट्टिः।

अत्यम्ल पु० अतिशयितोऽम्लोरसः फलपत्रादौ यस्य ब०। (तेतुल) इति प्रसिद्धे तिन्तिड़ीवृक्षे। अत्यन्ताम्लरसवति वस्तुमात्रे त्रि०। वनबीजपूरे (टाबालेबु) इति प्रसिद्धे वृक्षे स्त्री। अम्लरसस्य लक्षणादुक्तं सुश्रुते यथा "यो दन्तहर्षमुत्पादयति मुखस्रावं जनयति श्रद्धाञ्जोत्पादयति सोऽम्ल इति" अम्लो जरणः पाचनः पवननिग्रहणोऽनुलोमनः कोष्ठविदाही वह्निगीतः क्लेदनःप्रायशो हृद्यश्चेति स एवं गुणोऽप्येक एवाम्लरसोपसेव्यमानो दन्तहर्षनयनसंमीलनरोमसंवेजनकफविलयनशरीरवैविल्यान्यापादयति तथा च तत्राभिहतदग्धदष्टभग्नशूलरुग्णप्रच्युताऽवमूर्छितविसर्पितच्छिन्नभिन्नविद्धोत्पिष्टादीनि पाचयत्याग्नेयस्वभावात् परिदहति कण्ठहरो हृदयञ्चेति"। अम्लद्रव्याणि च तत्र कानिचित् प्राधान्येन दर्शितानि यथा। दाड़िमामलकमातुलुङ्गाम्बातक-कपित्थकरमर्दवरकोलप्राचीनामलकतिन्तिड़ीककोशाम्बभव्यपारावतवेत्रफलकुचाम्लवेतसदन्तशठदधितक्रसुराशुक्तसौवीरकतुषोदकधान्याम्लप्रभृतीनि समासेनाम्लवर्ग इति।

अत्यम्लपर्णी स्त्री अत्यम्लं पर्णं यस्याः जातित्वात् ङीप्। अत्यम्लपत्रयुक्ते वनबीजपूरे (टाबालेबु) इति ख्याते वृक्षे।

अत्यय पु० अति+इण-अच्। अतिक्रमे, अभावे, विनाशे, दोषे, कृच्छ्रे, अतिक्रम्य गमने, कार्य्यस्यावश्यम्भावाभावे च। "प्राणात्यये च संप्राप्ते योऽन्नमत्ति यतस्ततः। न स पापेन लिप्येत पद्मपत्रमिवाम्भसेति" स्मृतिः। "क्षुरस्य धारा निशिता दुरत्ययेति" पुरा० अत्ययं कालातिक्रमं न सहते ठक् आत्ययिकः। विलम्बाक्षमे कार्य्ये त्रि०। "आत्ययिकेषु कार्य्येषु सद्य एवाधिवासयेदिति" पुराणम्।

अत्यर्थ न० अतिक्रान्तमर्थमनुरूपस्वरूपं अत्या०स०। अतिशये। तद्वति त्रि०। अत्यये अव्ययी०। अर्थाभावे अव्य०।

अत्यल्प त्रि० अतिशयितोऽल्पः प्रा०स०। अत्यन्तालपे अणुतरे च। [कृत्यादिति"।

अत्यशन न० अतिशयितमशनम्। अतिभोजने "नचैवात्यशनं

अत्यष्टि स्त्री अतिक्रान्ता अष्टिं योऽक्षराक्षरपादिकां इत्तिमेकाक्षराधिक्यात् अत्या०स०। सप्तदशाक्षरपादके छन्दोभेदे।

अत्याकार पु० अतिशयेन आकारः तिरस्कारः अति+आ+कृ-घञ्। तिरस्कारे। "स्वाधात्याकारतदवेतेष्विति" पा० अतिशयित आकारो मूर्त्तिः प्रा०स०। वृक्षदेहे पु०। अतिशयित आकारो यस्य ब०। तद्विशिष्टे त्रि०।

अत्याग पु० न त्यागः अभावार्थे न०त०। त्यागाभावे "उपेत्यातिक्रमे दोषञ्चुतेरत्यागदर्शनादिति" स्मृतिः।

अत्यागिन् त्रि० त्यज-घिणुन् मन्दार्थे नञ् त०। कर्म्मफलाननुसन्धानेन कर्म्मानुष्ठायिनि, त्यागिभिन्ने च।

अत्याचार पु० अत्युत्कट आचारः प्रा०स०। अनुचिताचरणे। अतिक्रमे अव्ययी०। अचारातिक्रमे अव्य०।

अत्याज्य न० न त्यक्तुं शक्यम् शक्यार्थे यत् न कुत्वम्। त्यागशक्ये त्यागार्हे च।

अत्यादान त्रि० अतिक्रान्तम् आदानम्। आदानातिक्रान्ते अतिशयितमादानम् प्रा०स०। अत्यादाने।

अत्याधान न०अति+आ+धा-ल्युट्। अतिक्रमणे, सम्बन्धमात्रे, उपरिस्थापने च। अत्यवे अव्ययी०। आग्नाधानातिक्रमे अव्य०। अतिक्रम्य ज्येऽग्नाधानम्। ज्येष्ठातिक्रमेण अग्नाधाने न०।

अत्याय पु० अति+अय-घञ्। अतिक्रमे, "प्रजाह तिस्रो "अत्यायमीयुरिति" श्रुतिः। अतिक्रान्तलाभे त्रि०। प्रा०स०। अतिशयिते लाभे पु०।

अत्यायु न० अति+आ+या-कु। वयिसपालभेदे। "भूङ्खत्यायु पालमसीति"ता० "अत्यायुनामाभिधेयमिति" भाष्यम्। [विख्यात्यतिशये अतिप्रसिद्धौ च।

अत्यारूढि स्त्री अति+आ+रुह-क्तिन्। आरोहणातिशये।

अत्याल पु० अतिशयेन समन्तात् अलति पर्य्याप्नोति अति+आ+अल-अच्। (लालचिता) इति ख्याते रक्तचित्रकवृक्षे, तस्य अत्यल्पकालेन समन्तात् व्यापनात् तत्त्वम्।

अत्याशा स्त्री प्रा०स०। अपूरणीयधनादिलक्षणायाम्। अत्या० स०। आशातिक्रान्ते त्रि०।

अत्याश्रम त्रि०अतिक्रान्त आश्रमान् तद्विहितधर्म्मान् अत्या० स०। सर्व्वाश्रमत्यागिनि परमहंसाभिधे संन्यासिनि। अतीत्याश्रमिन् इत्यर्थे। अतिशयित आश्रमः प्रा०स०। उत्तमाश्रमे संन्यासे पु०।

अत्याहित न० अत्यन्तमाधीयते तद्विचारणार्थं मनो दीयतेऽस्मिन् आ+धा-आधारे क्त। अत्यन्तभीतौ, प्राणहानिगङ्काकरे अनर्थे च। "किमत्याहितमिति" नाटकम्।

अत्युक्ति स्त्री अतिशयेन अनौचित्येन वा उक्तिः अति+वच-क्तिन्। अतिशयोक्तौ, अन्याय्योक्तौ, निर्गुणस्य जड़स्य वा आरोपितगुणेन स्तवने। "अत्युक्तौ न यदि प्रकृष्यसि रूपवादस्य नो मन्यसे" इत्युद्भटः।

अत्युक्ता(क्था) स्त्री उक्ता(क्था) एकाक्षरपादिका वृत्तिः ताम् अतिक्रान्ता अत्या०स०। द्व्यक्षरपादके छन्दोभेदे। अत्युक्थस्तु उक्थनामकसामभेदातिक्रान्तरि त्रि०।

अत्युच्छ्रित त्रि० अत्यन्तमुच्छ्रितः। अत्यन्तोन्नते उन्नतेः परमसीमापन्ने।

अत्युत्कट त्रि० अत्यन्त उत्कटः। अत्यन्तोग्रे। "अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते" इति पुरा०।

अत्युत्कृष्ट त्रि० अत्यन्तमुत्कृष्टः। परमसीमापन्नोत्कर्षयुते।

अत्यूमशा अव्य० ऊर्णादिगणोक्ते अनुकरणशब्दे हिंसायाद्योतकोऽवमित्यन्ये अत्यूमशाशब्दः। गणरत्ने तु अयं न दृश्यते गणपाठे तु दृश्यते इति विवेच्यम्।

अत्यूह पु० अतिशयेन ऊहते शब्दायते अति+ऊह-अच्। कालकण्ठे (ड़ेको) इति प्रसिद्धे दात्यूहे पक्षिणि। अतिशयेन ऊहस्तर्कः प्रा०स०। अतिशयितवितर्के। (नील) इति ख्यातौषधौ नीलिकायां स्त्री। अत्यवेऽव्ययी०। वितर्काभावे अव्य०।

अत्र अव्य० अस्मिन् एतस्मिन् वा इदम्+एतद्-वा सप्तम्यास्त्रल् प्रकृतेरशभावश्च। अस्मिन् एतस्मिन् वेत्यर्थे। "कोऽत्र भूमिवलये जनानू सुखेति" माघः। न त्रायते केनापि त्रै-वा० कर्म्मणि क। अन्यत्राणायोग्ये त्रातिये "प्रायः क्षयितोः प्रत्नतमत्वमाप्नोतीति" यज्ञ न त्रायते केनचिदत्र त्रातं प्राप्नोत्यर्थः।

अत्रप त्रि० नास्ति त्रपा यस्य। निर्लज्जे।

अत्रभवत् त्रि० अयमित्यर्थे अत्र "अन्येभ्योऽपीति" प्रथमार्थे त्रल् ततः कर्म्म०। पूज्ये, "जयमत्रभवान्नूनमरातिष्वभिलाषुक" इति भार०।

अत्रस्त त्रि० न त्रस्तः। त्रासरहिते त्रासोपाधिरहिते च "जुगोगात्रानमत्रस्त" इति रघुः। त्रासोपाधिमन्तरेणेत्यर्थः मल्लिनाथः। [त्रासशून्ये त्रि०।

अत्रास पु० न त्रासः अभावार्थे न०त०। त्रासाभावे न०ब०।

अत्रि(त्रि) पु० अद-त्रिन् "मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः। ब्रह्मणोमानसाः पुत्रा वशिष्ठश्चेति सप्त ते इत्युक्ते सप्तर्षिमध्ये मुनिभेदे। "अग्निरत्रिं धर्म उरुष्टदन इति श्रुतिः"। अत्र पक्षे वा तलोपे अत्रिरित्यपि। त्रिभिन्ने त्रि० बहुवचनान्तः। अस्य उत्तरदिशि तारारूपेणापि स्थितिः वृहत्संहितायामुक्ता यथा "एकावलीव राजति सप्तितोत्पलमालिनी सहासेव। नाथवतीव च दिव्यैः कौबेरी सप्तभिर्मुनिभिः॥ ध्रुवनायकोपदेशाच्चरीनक्षत्रीवोत्तरा समञ्चिच। यैश्चारमहं तेषां कथयिष्ये वृद्धगर्गमतात्॥ आसन्मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ। षड्द्विकपञ्चद्वियुतः शककालस्य राजश्च॥ एकैकस्मिन्नृक्षे शतं शतं ते चरन्ति वर्षाणाम्। प्रायुत्तरतश्चैते सदोदयन्ते समाध्वीकाः॥ पूर्वे भागे भगवान् मरीचिरपरे स्थितो वशिष्ठोऽत्रात्। तस्माङ्गिरास्ततोऽत्रिस्तस्मात्पुलस्त्यश्च॥ पुलहः क्रतुरिति भगवानासन्नानुक्रमेण पूर्व्वाद्याः। तत्र वशिष्ठं मुनिवरमुपाश्रितारुन्धती साध्वी॥ उल्कानिधूमाद्यैर्हता विवर्णा विरश्मयो हृस्वाः। हन्युः स्वं स्वं वर्गं विपुलाः स्निग्धाश्च तद्वदेव" इति॥ अत्रेर्वर्गाश्च तत्रैवोक्ता यथा

"अत्रेः कान्तारभवा" इति । अधिकं सप्तर्षि शब्देदृश्यम् । अद–त्रिनि । अत्रीत्यप्यत्र उणादि० ।

अत्रिजात पु० अत्रेर्नेत्रात् जातः जन–क्त ५त० । चन्द्रे, चन्द्रोहि प्रजासर्गार्थं तपस्तप्तोऽत्रेर्नेत्रात् जातोयथा । "पिता सोमस्य वै राजन् जज्ञेऽत्रिर्भगवान्ऋषिः । ब्रह्मणो मानसात् पूर्व्वं प्रजासर्गे विधित्सतः । तत्रात्रिः सर्व्वभूतानां तस्थौ स्वतनयैर्वृतः । कर्म्मणा मनसा वाचा शुभान्येव चचार सः । अहिंसः सर्वभूतेषु धर्म्मात्मा संशितव्रतः । काष्ठकुड्यशिलाभूत ऊर्द्ध्वबाहुर्महाद्युतिः । अनुत्तरं नाम तपो येन तप्तं महत् पुरा । त्रीणि वर्षसहस्राणि दिव्यानीति ह नः श्रुतम् । ततोर्द्धरेतसस्तस्य स्थितस्यानिमिषस्य ह । सोमत्वं तनुरापेदे महासत्त्वस्य भारत । ऊर्द्धमाचक्रमे तस्य सोमत्वं भावितात्मनः । नेत्राभ्यां वारि सुस्राव दशधा द्योतयन् दिशः । तं गर्भविधिना कृत्वा दश देव्यो दधुस्तदा । समेत्य धारयामासुर्न च ताः समशक्नुवन् । स ताभ्यः सहसैवाथ दिग्भ्यो गर्भः प्रभान्वितः । पपात भासयन् लोकान् शीतांशुः सर्वभावनः । यदा न धारणे शक्तास्तस्य गर्भस्य ता दिशः । ततस्ताभिः सहैवाशु निपतात वसुन्धराम् । पतितं सोममालोक्य ब्रह्मा लोकपितामहः । रथमारोपयामास लोकानां हितकाम्यया । स हि वेदमयस्तात ! धर्म्मात्मा सत्यसङ्गरः । युक्तो वाजिसहस्रेण सितेनेति हि नः श्रुतम् । तस्मिन्निपतिते देवाः पुत्रत्वेऽत्रेः परमात्मनि । तुष्टुवुर्ब्रह्मणः पुत्रा मानसाः सप्त ये श्रुताः इति हरिवंशे ।

अत्रिदृग्ज पु० अत्रेर्दृगिनेत्राज्जायते जन–ड ५त० । चन्द्रे अत्रिनेत्रजादयोऽप्यत्र । तद्विधितिरत्रिजशब्दे दृश्यम् ।

अत्रिभारद्वाजिका स्त्री अत्रिभारद्वाजवंशयोः मैथुनम् "इन्द्राद्वनू वैरमैथुनयोरिति" वुन् "वैरमैथुनकादिषु" त्रिभरोक्तेः स्त्रीत्वम् । तद्वंशजातयोः स्त्रीपुंसयोर्मैथुने ।

अत्रिसंहिता स्त्री अत्रेः संहिता स्मृतिः । वर्णाश्रमाचारादिबोधके अत्रिप्रणीते धर्मशास्त्रभेदे ।

अत्वरा स्त्री न त्वरा शीघ्रम् अभावार्थे न०त० । त्वराभावे "त्रीणि त्वाहे प्रशंसन्ति शौचमक्रोधमत्वरामिति" स्मृतिः ।

अत्सरुक पु० नास्ति त्सरुरिव सृष्टिबन्धनस्थानं यस्य । सृष्टिबन्धनस्थानशून्ये खड्गाकारे यज्ञियपात्रभेदे चमसे ।

अथ अव्य० चु०–अर्थ–ड पृषो० रलोपः । संशये, आरम्भे आनन्तर्य्ये, प्रश्ने, विकल्पे, प्रकरणे, समुच्चये पश्चान्तरे च । मङ्गलं तु नास्यार्थः किन्तु अर्थान्तरप्रयुक्तोऽप्ययं श्रुत्या मङ्गलसाधनं भवति । "ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभा" विष्णुके स्तस्य श्रवणेन मङ्गलसाधनत्वम् अतएव शारीरकभाष्ये "अर्थान्तरप्रयुक्तोऽथशब्दः श्रुत्या मङ्गलमारचयती"त्युक्तम् । तत्र "अथातो ब्रह्मजिज्ञासेत्यादौ" साधनचतुष्टयानन्तर्य्ये "अथ प्रजानामधिप" इत्यादौ चानन्तर्य्ये, "अथ योगानुशासन"मित्यत्र अधिकाररूपारम्भे "शब्दोनित्यः अथा नित्य" इत्यादौ संशये, संशयश्च एकधर्म्मिकं कोटिद्वयज्ञानं तत्र कोट्युपस्थापनस्य संशयहेतुत्वात् प्रकृते तस्यैव संशयशब्दार्थता विकल्पश्च संशयविशेष एव । "अथ शक्नोषि भोक्तुमित्यादौ" प्रश्ने, "अथ शब्दानुशासनमित्यत्र मङ्गलार्थतयोपादानमर्थस्तु अधिकार एव "अथ मरणमवश्यमेव जन्तोरिति" वेण्यास्, "अथ चेत्त्वमिमं धर्म्म्यं संग्रामं न करिष्यसीत्यादौ गीतायां च पश्चान्तरे, अथातोधर्मं व्याख्यास्याम इत्यादौ कात्स्न्र्ये, "भीमोऽथार्জ্জुन" इत्यादौ समुच्चये, स्वरादिपाठादव्ययत्वम् ।

अथकिम् अव्य०अथ+कायतेः कवतेर्वा वा०डिमि । स्वीकारे । स्वीकारश्चेह नादानं, किन्तु अन्योक्तपदार्थस्य वक्तुः तथात्वेनाभ्युपगमात्मकज्ञानम्, तत्र द्योतकत्वमस्य शब्दस्य, यथा कस्यचित् "इत्थं दत्तमिति" प्रश्ने अथकिमित्यादिना दृष्टवस्तुनः यथादत्तत्वाभ्युपगमः स च वक्तुरेव ।

अथर्वण पु० अथर्वा तदुक्तविद्याऽस्यास्ति प्राशस्त्यात् अच् वृ० न टिलोपः । शिवे, त्रिकाण्ड० ।

अथर्वणि पु० अथर्वणि तदुक्तगान्धर्वादौ कुशलः वा० इञ् सित्त्वेन भत्वाभावात् न टिलोपः । अथर्ववेदोक्तकर्म्माभिज्ञे ब्राह्मणे पुरोहिते च मेदिनिः ।

अथर्वन् पु० अथ+ऋ–वनिप् शक० । अथर्वनामकमुनिविशेषे, स च कल्पभेदे ब्रह्मणो ज्येष्ठः पुत्रः यथोक्तं सप्तके । "ब्रह्मा देवानां प्रथमं संबभूवे"त्युपक्रम्य ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राहेत्युक्तम्" "अनेकेषु ब्रह्मणः सृष्टिप्रकारेषु अन्यतमस्य सृष्टिप्रकारस्य मुखे अयमथर्वा सृष्ट" इति भाष्यम् । "अथर्वणे यां प्रवदेत ब्रह्माथर्वा पुरोवाचाङ्गिरे इति" अथर्वायेत्युक्तेः अथर्वशब्दोऽदन्तोऽपि "सर्वे नाना अदन्ताः स्युरित्युक्तेः" पृषो० नलोपः । अथर्वणाऽधीतत्वात् वेदवेदे पु० । ततः तद्वेदाधीते वा ठक् आथर्वणिकः, अथर्वणा दृष्टं साम अण् आथर्वणम् । तेन प्रोक्तम् अधीयते तत्ठको लुक् । अथर्वाणः । तत्प्रोक्ताध्यायिप्रभृतिष्वर्थेषु ।

अथर्ववित् पु० अथर्ववेदं तदुक्तं कर्म वा वेत्ति विद-क्विप्। अथर्ववेदस्य "शन्नो देवीरभीष्टय" इत्यादिकस्य, तद्विहिताभिचारादिकर्म्मणश्च वेत्तरि वशिष्ठादौ। "गुरुणाऽथर्ववित्कृतक्रिय" इति रघुः।

अथर्ववेद पु० कर्म०। वेदभेदे तद्विहितिः "अथर्वणस्य नव शाखाः, पैप्पलादा शौनकी दामोदा औप्पा ब्रह्मदा प्रश्नशौनकी देवदर्शी चारणविद्या चेति तेषामध्ययनं द्वादशैव सङ्ग्रन्थाश्च तस्य पञ्च कल्पा भवन्ति कल्पे कल्पे पञ्च शतानि भवन्ति नक्षत्रकल्पो, विधानकल्पः संहिताविधिकल्पः, अभिचारकल्पः, शान्तिकल्पश्चेति" चरणव्यूहोक्ता। तस्याध्ययनप्रचारभेदादि विष्णुपुराणेऽभिहितं यथा

"अथर्वाणमथो वक्त्रे संहितानां ससञ्चयम्। अथर्ववेदं स मुनिः सुमन्तुरमितद्युतिः॥ शिष्यमध्यापयामास कवन्धं सोऽपि तद् द्विधा। कृत्वा तु देवदर्शाय तथा पथ्याय दत्तवान्॥ देवदर्शस्य शिष्यास्तु मौद्गो ब्रह्मबलिस्तथा। शौक्लायनिः पिप्पलादस्तथान्यो मुनिसत्तम!॥ पथ्यस्यापि त्रयः शिष्याः कृता वेदद्विजः संहिताः। जाजलिः कुमुदादिश्च तृतीयः शौनको द्विजः॥ शौनकस्तु द्विधा कृत्वा ददावेकान्ह बभ्रवे। द्वितीयां संहितां प्रादात् सैन्धवायनसंज्ञिने॥ सैन्धवश्चञ्चकोणाभ्यां भिन्ना वेदा द्विधा पुनः। नक्षत्रकल्पो वेदानां संहितानां तथैव च॥ चतुर्थः स्यादाङ्गिरसः शान्तिकल्पश्च पञ्चमः। त्रयस्त्वथर्वणामेते संहितानां हि कल्पकाः इति"॥ एतस्य उपनिषदः एकत्रिंशत् तासां नामानि यथा प्रश्नः १ मुण्डकं २ माण्डूक्यम् ३ अथर्वशिरः ४ अथर्वशिखा ५ बृहज्जाबालिः६ त्रिशिखब्राह्मणोपनिषत् ७ नारदपरिव्राजकः ८ सीता ९ शरभः १० नारायणः ११ रामरहस्यम् १२ रामतापनी १३ पाशुपतब्रह्मः १४ परमहंसपरिव्राजकः १५ अन्नपूर्णा १६ सूर्य्या १७ पाशुपतम् १८ परब्रह्म १९ त्रिपुरातापनी २० देवी २१ भावना २२ भस्म २३ जाबालिः २४ गणपतिः २५ महावाक्यम् २६ गोपालतापनी २७ कृष्णतापनी २८ हयग्रीवः २९ दत्तात्रेयः ३० गरुडः ३१ एतानि प्रायशः ब्रह्मविद्यातदङ्गोपासनाप्रतिपादिकाः सन्त्युपनिषदः।

अथर्वशिखा स्त्री अथर्वणः वेदस्य शिखेव ब्रह्मविद्याप्रतिपादकत्वेन श्रेष्ठत्वात्। तद्वेदीये ब्रह्मप्रतिपादके तन्नामके उपनिषद्भेदे। [श्रेष्ठत्वात् स्वनामख्याते अथर्वोपनिषद्भेदे।

अथर्वशिरस् न० अथर्वणः शिरइव ब्रह्मविद्याप्रतिपादकतया

अथर्वाङ्गिरस पु० अथर्वा चाङ्गिराश्च नि०अच्। एतयोर्मुन्योः। उपचारात् तद्दृष्टमन्त्रादिभेदे च "अथर्वाङ्गिरसं नीलरुद्रं देव्यपराजितेति" तत्र। "अथर्वाणं पितरं देवबन्धुं मातुर्गर्भं पितुरसुं युवानम्॥ यदङ्गं यत्तं मनसा चिकेत प्रणो वोचस्तमिहेह ब्रुवः इति"। ""अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः। तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम॥ अङ्गिरोभिर्यज्ञियैरागहीह यम वैरूपैरिह मादयस्व। विवस्वन्तं हुवे यः पिता तेऽस्मिन् बर्हिष्या निषद्य॥ इमं यम प्रस्तरमा हि सीदाङ्गिरोभिः पितृभिः संविदानः। आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषो मादयस्व॥ इतएत उदारुहन् दिवस्पृष्ठान्यारुहन्। प्रभुर्ज्ञयो यथा यथा द्यामङ्गिरसो ययुरिति" सूक्तद्वयं॥ अव० १८,१,५८,६१, [वेदराशित्वयुक्ते" बुधे।

अथर्वाधिप पु० ६त०। "सामवेदाधिपो भौमः शशिजोऽथर्व-

अथर्वी स्त्री न+थुर्व अच् ङीष्। उलोपः गौ० ङीष्। अहिंसिकायाम् "याभिर्विश्वलां धनसामथर्व्यमिति" वेदः।

अथवा अव्य० अथेति वायते अथ+वा-का। पक्षान्तरे "अथवा कृतवाग्द्वारे इति" "अथवा मूढ वस्तु हिंसितमिति" च रघुः। "अथवा हेतुमच्चित्तविरहाप्रतिबोगिनेति" भाषा०।

अथो अव्य० अथ-डो पृषो० रलोपः। अथशब्दार्थे आरम्भादौ। "अथाधो संशये स्वातामधिकारे च मङ्गले विकल्पानन्तर प्रश्नकात्स्न्यारम्भसमुच्चये इत्युक्ते" अथशब्दार्थे।

अद बन्धने भ्वा०पर० इदित् सक०सेट्। अन्दति आन्दीत्।

अद भक्षणे च अदा०पर०सक० अनिट्। अत्ति अधसत् जघास अत्ता अत्स्यति। सनि जिघत्सति। क्त-ओदनार्थे अन्नम् अन्यत्र जग्धम् घञ् घसः-आदः क्विन् जग्धिः। "योऽन्नमत्ति यतस्तत" इति श्रुतिः। "अत्ता चराचरग्रहणादिति" शा०सू०। "किमदन्ति भक्षा" इति।

अदंष्ट्र पु० नास्ति दंष्ट्रा दशनसाधनदन्तविशेषः यस्य। भग्नाशीदन्ते सर्पे। प्रधानदन्तरहिते त्रि०।

अदत्त त्रि० विरोधार्थे न०त०। दत्तत्वविरोधिस्वत्ववति।

अदक्षिण त्रि० दक्षिणोऽनुकूलः कुशलश्च विरोधार्थे न०त०। दक्षिणत्वविरुद्धनैसुख्यप्रतिकूलत्ववति, वामाङ्गे च। नास्ति दक्षिणा कर्म्मसमाप्तौ देया यत्र। दक्षिणाशून्ये यज्ञादौ। दक्षिणादानस्य नित्यत्वं दक्षिणाशब्दे वक्ष्यते "हतयज्ञमदक्षिणमिति"।

अदग्ध त्रि० शास्त्रविधिनाग्निना न दग्धः। शास्त्रविधिना-

ऽक्षताग्निसंस्कारे। "अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले ममेति" आङ्गमन्त्रः। दग्धभिन्ने त्रि०।

अदण्ड्य त्रि० न दण्डमर्हति यत्। दण्डानर्हे "अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन्निति" याज्ञ०। "अपि भ्राता सुतोऽध्यो वा श्वशुरोमातुलोऽपि वा नादण्ड्यो नाम राज्ञोऽस्ति धर्म्मात् प्रचलितः स्वकादिति" मनुः। ऋणादौ कर्मविशेषे दण्डः तदभावश्च उक्तोऽनुसन्धेयः तत्र केचिददण्ड्याः संदृष्टान्ते। "अनिर्द्दशाहां गां सूतां हृतान् देवपशूंस्तथा। सपालान् वा विपालान् न दण्ड्यान् मनुरब्रवीत्"। यानवाहकदण्डाभावे प्रयोजकसङ्गम् अति वर्त्तनशब्दे, चौले देवप्रावरणविशेषसङ्गा तदकरणे दण्डाभावो मनूक्तः यथा "तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणामिति" "महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः पालोवेषाञ्च ते मोच्या दैवराजपरिप्लुता" इति "अदण्ड्या हस्तिनोऽश्वाश्च प्रजापाला हि ते स्मृताः। अदण्ड्याः काणकुण्ठाश्च दमः क्षतलक्षण इति" स्मृतिः।

अदत्ता स्त्री दा-क्त न०त०। परिणयार्थमदत्तायां स्त्रियाम्। "अदत्तायां मृतायान्तु त्रयोदशदिनेषु वान्धवा" इति स्मृतिः अदत्तमाले त्रि०। अप्राशस्त्ये न०त०। अदत्तन्तु भयक्रोधेत्याद्यभिहितलक्षणे दानाभासेनार्पिते दत्त्वापि प्रत्याहर्त्तुं योग्ये त्रि०। तल्लक्षणं नारदेन यथा "अदत्तन्तु भयक्रोधशोकवेगरुजान्वितैः। तथोत्कोचपरीहासव्यत्यासच्छलयोगतः॥ बालमूढासतन्त्रार्तमत्तोन्मत्तापवर्जितम्। कर्त्ता ममेदङ्करोतीति प्रतिलाभेच्छया च यत्। अपात्रे पात्रमित्युक्तो कार्ये वा धर्म्मसंहिते। यद्दत्तं स्यादविज्ञानाददत्तमिति तत् स्मृतमिति"। अस्यार्थः भयेन बन्दिग्राहादिभ्यो दत्तम्। क्रोधेन शत्रादिवैरनिर्य्यातनायान्यस्मै दत्तम्। पुत्रविहीनतादिनिमित्तशोकाविष्टेन दत्तम्। उत्कोचेन कार्य्यप्रतिबन्धनिरासार्थमधिकृतेभ्यो दत्तम्। परिहासेनोपहासेन दत्तम्। एकः स्वद्रव्यमन्यस्मै ददात्यन्योऽपि तस्मै ददातीति दानव्याघातः। छलयोगतः शतदानमभिसन्धाय सहस्रमिति परिभाष्य ददाति। बालेनाप्राप्तषोड़शवयस्केन मूढेन, लोकवेदानभिज्ञेन असतन्त्रेण पुत्रदासादिना, आर्त्तेन रोगाभिभूतेन, मत्तेन मदनीयप्रमत्तेन, उन्मत्तेन, वातिकाद्युन्मादयस्तेन वा अपवर्जितं दत्तम्। तथाऽयं मदीयमिदं कर्म्म करिष्यतीति प्रतिलाभेच्छया दत्तम्। अचतुर्वेदाय चतुर्वेदोऽहमित्युक्त्वते दत्तम्। यत्तं करिष्यामीति धनं लब्ध्वा द्यूतादौ विनियुञ्जानाय दत्तमित्येवं षोड़शप्रकारमपि दत्तमदत्तमित्युच्यते प्रत्याहरणीयत्वात्। आर्त्तदत्तस्यादत्तत्वं धर्म्मकार्य्यव्यतिरिक्तविषयम्। "स्वस्थेनार्त्तेन वा दत्तं रक्षितं धर्म्मकारणात्। अदत्त्वा तु मृते दाथस्तत्सुतो नात्र संशय" इति कात्यायनस्मरणात्। तथेदमपरं संक्षिप्तार्थवचनं सर्वविवादसाधारणम्। "योगाधमनविक्रीतं योगदानप्रतिग्रहम्। यस्य वाप्युपधिं पश्येत् तत् सर्वं विनिवर्त्तयेत्" इति। योग उपधिः। योगेनोपाधिविशेषेणाधिविक्रयदानप्रतिग्रहाः कृतास्तदुपाधिविगमे तान् विक्रयादीन् विनिवर्त्तयेदिति। यः पुनः षोड़शप्रकारमप्यदत्तं स्पृहयति, यश्चादेयं प्रयच्छति, तयोर्दण्डो नारदेनोक्तः। "स्पृहयत्यदत्तं यो लोभात् यश्चादेयं प्रयच्छति। अदेयदायको दण्ड्यस्तथाऽदत्तप्रतीच्छुक" इति। मिताक्षरा०।

अदत्तादायिन् त्रि० अदत्तमादत्ते आ+दा-णिनि ह्रस्व०। अदत्तस्य ग्राहके "अदत्तादायिनो हस्तात् लिप्सेत ब्राह्मणो धनम् याजनाध्यापनेनापि यथा स्तेनस्तथैव सः" इति स्मृतिः।

अदत्र त्रि० अद-बा० अत्रन्। अदनीये "अदत्रया दयते वार्य्याणीति" ऋ०५, ४६.३, अदत्रया, अदनीयानीति भा०।

अदद्रुच् त्रि० असमञ्जति अदस्+अनुच-क्विप् अद्रुआगमः। अदोगते, स्त्रियाम् अदद्रोची असर्वनामस्थानाद्यचि तु अदद्रीचः इत्यादि। अस्य दस्वा मत्वोत्वे असद्रुङ् असद्रयङ् इत्यादयोऽप्यत्र।

अदन्त पु० नास्ति दन्तोऽस्य। पूषरूपे आदित्यभेदे वा कप् तत्रैव। "यद्यप्यदन्तकः पूषा पैष्टमत्ति सदा चरुमिति" छन्दोगप०। तस्यादन्तता च दक्षयज्ञभङ्गसमये वीरभद्रेण कृता यथा भागवते ४ स्कन्धे। "पूष्णो ह्यपातयद्दन्तान् कालिङ्गस्य यथा बलः। शप्यमाने गरिमणि योऽहसद्दर्शयन् दत" इति। अतएव तस्यादन्ततया पिष्टचरुभक्तं तदपि तत्रैवोक्तम् ब्रह्मप्रसादितेन शिवेन पश्चात् दत्तादि वरदानसमये "पूषा तु यजमानस्य दद्भिर्जक्षितु पिष्टभुगिति" श्रुतावपि "प्रपिष्टभागोऽदन्तको हि तं देवा अध्यगामिति" अदन्तकत्वेन पिष्टकभागित्वमुक्तम्। दन्तहीने, अजातदन्ते च त्रि०। "येऽप्यदन्ताः कुले ममेति" वायु०। दन्तानां दन्तजननकालस्तु प्रसङ्गात एव शुद्धितत्त्वे निर्णीतः पशूनान्तु "वर्षमात्रा तु बाला स्याद-

तिवाला द्विवार्षिकी। अतः परन्तु सा गौः स्वात्तरुणी दन्तजन्मनीति" अङ्गिरोवचने द्विवर्षोत्तरकाले गवां दन्तजन्मकथनं पशुमात्रोपलक्षणम् अतैव काले (आँदाता) इति लोके प्रसिद्धिः सा च गवामिव महिषाश्वादीनामपि तथैव। अत् अन्ते यस्य व०। अकारान्तशब्दे पु०।

अदभ्र दृभ-क्र न०त०। अहिंसिते "अदब्भेभिः पायुभिः पाह्यक्षानिति" ऋ०१,९५९, अदब्भैरहिंसितैरिति भा०। "अदब्धासुर्व्राजमानोह्येव" इति वेदः।

अदब्धायु पु० अदब्धेन अहिंसनेन आयौति आ-या-कु-उ०। अहिंसायुक्ते "अग्नेऽदब्धायो अशीततमेति यजु० अदब्धायो। अहिंसित! यजमान इति वेददीपः।

अदभ त्रि० न दभ्यते कर्म्मणि वा०क। अहिंसे "ताहधन्नावतु द्यून्कर्त्ताय देवावदभा" इति ऋ०५,८६,५ अदभौ अहिंस्रौ इति भा०।

अदभ्र त्रि० दृभ-रक् दभ्रमल्पं न०त०। अनल्पे "अदभ्रदर्भमधिशय्य स स्वलीमिति" भारविः।

अदभ्र पु० अभावार्थे न०त०। दम्भाभावे। नास्ति दम्भो यस्य। दम्भरहिते त्रि०। "अदभ्रं शठतां हीनं कर्म्म कुर्य्यादलोलुप" इतिपुरा०।

अदम्य त्रि० न दम्यतेऽसौ। अदमनीये। गवामेकवर्षपर्य्यन्तकालेऽदम्यता "पादद्याप्राप्नके देय इति" स्मृतिः अप्राप्नकः अप्राप्तदम्यावस्य इति" रघु० तेन "एकवर्षे गवि हृते छन्दःपादो विधीयते" इत्येकवाक्यतया एकवर्षकालपर्य्यन्तकाल एव वत्सानामदम्यत्वं प्रतीयते।

अदर्शन न० न दर्शनम् अभावार्थे न०त०। दर्शनाभावे लोपे, विनाशे च "लोपोऽदर्शनमिति" पा०। नास्ति दर्शनं यस्याः व०। दर्शनाविषये दृष्टिशून्ये च त्रि०।

अदल पु० दल्यते भिद्यते इति दल पत्रं दल-कर्म्मणि घञ् न०व०। दलशून्ये (छिजल) इति ख्याते वृक्षे। पत्रशून्ये वृक्षमात्रे त्रि०। धृतकुमार्य्यां स्त्री। दलः खण्डः। तच्छून्ये त्रि०।

अदस् त्रि० न दश्यते उत्क्षिप्यतेऽङ्गुलिर्यत्र इदन्तया निर्द्धारणाय पुरोवर्त्तिन्येवाङ्गुलिनिर्देशः सम्भवति नापुरोवर्त्तिनि। न+दस्-क्विप्। अपुरोवर्त्तिनि परोक्षे ज्ञाते वस्तुनि। सर्व्वनामता। "अदसश्च विद्या रसनाग्रनर्त्तकीति" नैषधम्। परलोके "नचासुत्र फलप्रद इति" पुरा०। "इदमस्तु सन्निकृष्टं समीपतरवर्त्ति चैतदोरूपम्। अदस्तु विप्रकृष्टं तदिति परोक्षे विजानीयादित्युक्ते" विप्रकृष्टे एवास्य प्रयोगः। यच्छब्दाकाङ्क्षितत्वच्छब्दप्रयोगेऽस्य तदर्थबोधकता। यथा "आनन्दयति ते नेत्रे योऽधुनासौ समागत इत्यादौ"। अतएवोक्तं काव्यप्रकाशे इदंशब्दवददःशब्दस्तच्छब्दार्थमभिधत्ते इत्युक्तम्" यच्छब्दस्य तु निकटस्थितत्वे तच्छब्दस्यापि प्रसिद्धपरामर्शितेति वदता च तेन तच्छब्देव इदमदःशब्दयोरपि प्रसिद्धार्थकता तत्रैवोक्ता। यथा "करवालकरालदोःसहायो युधि योऽसौ विजयार्ज्जुनैकमल्लः। यदि भूपतिना स तत्र कार्य्यं" इत्यादौ प्रसिद्धार्थकता। अन्यथा स इत्यनेन पुनरुक्तत्वापत्तेः अतएव दर्पणकृता "आनन्दयति ते नेत्रे योऽसौ शम्भु! समागत' इति पदौ यच्छब्दस्य सन्निकृष्टतया तच्छब्दार्थावाचकत्वमाशङ्क्य आनन्दयति ते नेत्रे योऽधुनासौ समागत इत्येवं पाठःपरिवर्त्तितः। यच्छब्देनाकाङ्क्षितत्वे तु न तच्छब्दार्थाभिधायित्वं किन्तु प्रसिद्धाद्यभिधायकता यथा "असौ मरुच्चुम्बितचारुकेसर इत्यादौ" नात्र तच्छब्दार्थप्रतीतिरिति काव्यप्रकाशे उक्तम्। तथा च यच्छब्देनाकाङ्क्षास्थले एव यच्छब्दस्यासन्निकृष्टतयोपात्तत्वादःशब्दस्य तच्छब्दार्थकता नान्यथेति सुस्थितम्। "अदोऽनुपदेशे इति" सूत्रनिर्देशात् अनुपदेशे अदसः गतिसंज्ञा तेन अदः कृत्वादः कृतमित्यादौ गतित्वेन समासे ल्यप्। परं प्रति उपदेशे तु अदः कृत्वा अदः कुरु इत्यादौ न गतित्वम्। अस्य गतिसंज्ञात्वे नाव्ययत्वमपि। तेनाव्ययपूर्व्वकतया ल्यप् अर्थस्तु अदःशब्देव।

अदाढ त्रि० न०त०। दाढभिन्ने "अदाता वंशदोषेणेति" पुरा०। "अदाता पुरुषत्यागी धनं संत्यज्य गच्छतीति" नीति०। स्त्रियां ङीप्।

अदान न० न दानमभावार्थे न०त०। दानाभावे। नास्ति दानं त्यागोमदजलं वा यस्य। दानशून्ये त्रि०। मदजलशून्ये गजे पु०। "सदा दानपरक्षीणः शक्तएव करीश्वरः। अदानः पीनकायस्तु निन्द्यतएव गर्द्दभ" इति।

अदान्त त्रि० न०त०। इन्द्रियदमनाकारके अविनीते च "अदान्तोविषयासक्त" इति पुरा०।

अदाभ्य त्रि० दभ्र स्वत् नलोपोपधाटड्डौ न०त०। अहिंस्ये। "यत्ते सोमादाभ्यं नाम जाग्वीति य० ७,२, हे सोम! ते त्वदीयमहिंसितं जाग्वि जागरणशीलमिति वेददीपः।

अदाय त्रि० नास्ति दायो येषाम्। दायानर्हेपतितज्ञात्यादौ। "अदायाश्च स्त्रियोमता" इति स्मृतिः।

अदायाद त्रि० दायं पित्रादिधनं सम्बन्धितया अदति भुङ्क्ते अद-अण् ६त० न०त० । सम्बन्धिधनग्राहके पतितादि सपिण्डभेदे "अदायादाश्च परिगणितमात्रादिभिन्नाः स्त्रियः, "अदायाश्च स्त्रियोमताः" इति स्मृतेः । ह्रादशविधान् पुत्रानुक्त्वा "क्रानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा । स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवा इति मनूक्ताः क्रानीनादयश्च वेदितव्याः तथा विभागानार्हा अपि क्लीवादयोऽदायादा इत्यवसरे वाच्यम् । सपिण्डभिन्ने च ।

अदायिक त्रि० दायमर्हन्ति दाय+ठक्-न०व० । दायादशून्ये "अदायिकं राजगामीति" स्मृतिः दायग्राहकपुत्रादिशून्यं तदर्थः ।

अदाह्य त्रि० न दग्धुमर्हति दह-अर्हार्थे ण्यत् न०त० । शास्त्रोक्तविधिना अग्निसंस्कारानर्हे पतितादौ ते च स्मृतौ दर्शिता यथा । "ग्रहिदंष्ट्रिनखिव्यालविषवह्निस्त्रियाजलैः । आदरात् परिहर्त्तव्यः कुर्वन् क्रीड़ां स्मृतस्तु यः । नागानां विप्रियं कुर्वन् दग्धव्याश्च विद्युता । निग्रहीतः स्वयं राज्ञा चौर्य्यदोषेण कुत्रचित् । परदारान् रमन्तश्च द्वेषात्तत्पतिभिर्हताः । असमानैश्च संकीर्णैश्चाण्डालाद्यैश्च विग्रहम् । कृत्वा तैर्निहता ये तु चाण्डालादीन् समाश्रिताः । गराग्निविषदाश्चैव पापण्डाः क्रूरबुद्धयः । क्रोधात् पापं विषं वह्निं यस्मसद्दग्धनं जलम् । गिरिदुर्गप्रपातञ्च ये कुर्वन्ति नराधमाः । कुशिल्पजीविनश्चैव स्तनालङ्कारकारिणः । सुखेभगाश्च ये केचित् क्लीवप्राया नपुंसकाः । ब्रह्मदण्डहता ये च ये च वै ब्राह्मणैर्हताः । महापातकिनोये च पतितास्ते प्रकीर्त्तिताः । पतितानां न दाहः स्याद्राज्ञान्येर्दिनोस्थिसञ्चयः । नचाश्रुपातः पिण्डं वा कार्य्यं श्राद्धादिकं क्वचित् । एतानि पतितानाञ्च यः करोति विमोहितः । तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्नचान्यथा" इति । दग्धुमयोग्ये निरयवत्वात् परमात्मनि । "नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः" इत्युपक्रम्य "अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्यएव चेति" गीतायां तस्यादाह्यत्वोक्तेश्चतथात्वम् ।

अदिति स्त्री न दीयते खण्ड्यते इति दो-क्तिच् न०त० । दातुं छेत्तुं नयोग्यायां पृथिव्याम् "चतुरदितावसनमिति" ता०ब्रा० "अदितो पृथिव्यामिति" भाष्यम् । वाचि निरुक्त० । दितिर्दनुजमाता विरोधार्थे न०त० । तद्विरोधिन्यां देवमातरि "प्रजज्ञिरे महाभागा दक्षकन्याश्चयोदश । अदितिर्दितिर्दनुःकाला दनायुः सिंहिका तथा । क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः । कद्रुश्च सुरभिश्चैव दक्षकन्यैव भारतेति" भारतम् आदिप० । एता एव कश्यपाय दक्षेण दत्ता यथोक्तं तत्रैव "दक्षस्य जायताङ्गुष्ठाद्वह्निष्वात्तगवान्वयिः ब्रह्मणः पृथिवीपाल ! शान्तात्मा सुमहातपाः । वामाद्जायताङ्गुष्ठाद्भार्य्या तस्य महात्मनः । तस्यां पञ्चशतं कन्याः स एवाजनयत् प्रभुः । ददौ स दश धर्म्माय सप्तविंशतिमिन्दवे । दिव्येन विधिना देव ! कश्यपाय त्वयोदशेति" अदितिरदीनादेवमातेति निरु० । तद्देवताके पुनर्वसुनक्षत्रे । अत्ति प्राणिजातम् अद-इतिच् । सर्वनाशके स्त्र्यौ, परमेश्वरे च पु० । "स यद्यदेवासृजत तत्तदत्तुमध्रियत सर्वं वा अत्तीति तददितेरदितित्वम्, सर्वस्यैतस्यात्ता भवति सर्वमस्यान्नं भवति य एवमेतददितेरदितित्वं वेदे"ति बृ०उ० दितिः खण्डनम् । तच्छून्ये अखण्डे । "अदितिर्द्यौरदितिरन्तरिक्षमदितिर्मातासपितासपुत्रः" यजु० "अदितिरखण्डितेति" वेददीपः ।

अदितिज पु० अदितेर्जायते जन-ड । देवे । "ह्रादशैवादितेः पुत्राः यज्ञसंख्याः नराधिप ! । तेषामवरजो विष्णुर्यत्र लोकाः प्रतिष्ठिता इति"भारतम् ह्रादश आदित्याः यज्ञादयः यज्ञसंख्याश्च देवाश्चेत्यर्थः ।

अदितिनन्दन पु० ६त० । देवे अदितिसुतादयोऽप्यत्र ।

अदीन त्रि० दी-क्त न०त० । अकातरे कातर्यरहिते ।

अदुष्ट त्रि०न०त० । कृत्युक्तदुरदृष्टसाधनतारूपदोषरहिते । "अदुष्टा सन्तता धारा" इति स्मृतिः "दुष्टानि च दुष्टशब्दे वक्ष्यन्ते ।

अदूर न० न०त० । दूरत्वविरोधिसामीप्ये "अदूरे जगदभ्यायाः शारदीयो महोत्सव" इति पुरा० । तद्वति त्रि० । "परस्पराश्लिष्टाङ्गमदूरोन्मिषितेक्षणं क्षितिं" रघुः ।

अदूषित त्रि० न०त० । दूषितभिन्ने स्मृत्युक्ते दोषानर्हे द्रव्यभेदे च । दूषितञ्च अस्पृश्यस्पर्शवत्त्वेन, पर्य्युषितत्वेन, विरसत्वेन, दोषजनकादृष्टविशेषहेतुत्वेन च स्मृत्यादौ दुष्टत्वेन कीर्त्तितम् तत्रैव क्वचिद्विषये प्रतिप्रसवः स्मृतावुक्तात्पदार्थादूषितम् । दूषितविवरणं दुष्टशब्दे वक्ष्यते ।

अदृग् त्रि० नास्ति दृक् दृष्टिरस्य । अन्धे चक्षुरिन्द्रियशून्ये । न पश्यति दृश-कर्त्तरि क्विप् न०त० । अदर्शके त्रि० ।

अदृश्य त्रि० न०त० । दृश्यभिन्ने । न द्रष्टुमर्हति । दर्शनानर्हे, परमेश्वरे च । "यत्तददृश्यमग्राह्यमित्यादिश्रुतिः ।

अदृष्ट न० दृश-क्त न०त० । पुण्यापुण्यरूपे भाग्ये,

इन्द्रियावोग्यत्वात् तस्माद्दृष्टत्वम्। अदृष्टसत्त्वे प्रमाणञ्च। "सापेक्षत्वादनादित्वात् वैचित्र्यात् विश्वसृष्टितः। प्रत्यात्मनियमात् भुक्तेरस्ति हेतुरलौकिक" इति "चिरध्वस्तं फलायालं न कर्म्मातिशयं विनेति" चेति कुसु०। अस्याभिप्रायः। इह हि जगति उच्चावच विचित्राः सुखदुःखानुभवरूपा भोगाः प्रत्यात्मवेदनीयाः, ते च न नित्या उत्पत्तिविनाशशालित्वात् अतएव न सदातनाः किन्तु कादाचित्का एव, सति च तेषां कादाचित्कत्वे हेतुसापेक्षत्वमेव तथा हि विमता भोगव्यक्तयः हेतुसापेक्षाः कादाचित्कत्वात् घटवत्। यदयत् कादाचित्कं तत्तत् हेतुसापेक्षं यथा घटः भवन्ति च भोगव्यक्तयः कादाचित्काः तस्मात् हेतुसापेक्षा इति पञ्चावयवन्यायेन भोगानां हेतुसापेक्षत्वसिद्धिः स च हेतुः न लौकिकप्रत्यक्षादिविषयः कचित् सम्भवति तदन्वयव्यतिरेकाभावात् न च कालस्यैव तद्धेतुत्वेनार्थान्तरापातः। कालस्य साधारणकारणतया विचित्रभोगं प्रत्यनियामकत्वात् अन्यथा कालस्यैकरूपतया सर्वदा सर्वभोगप्रसङ्गः। एतेन तत्तत्कालत्वेन कारणताकल्पनेऽपि न निस्तारः तत्तत्कालव्यक्तीनां पुरुषमात्रसाधारण्येन प्रत्यात्मविचित्रभोगोपपादकत्वानुपपत्तेः। अतो विचित्रभोगान्यथानुपपत्त्या तदाधायकमलौकिकं कारणं यत् कल्पनीयं, तदेवादृष्टम्। एवमनुमानेन आगमप्रामाण्यान्यथानुपपत्तेः प्रति अलौकिकादृष्टसाधनम्। आगमेन तु तत्सिद्धिरेवमभियुक्तैरभ्युपेता "स्वर्गकामो यजेतेति" वाक्ये समभिव्याहृतस्वर्गसाधनत्वं यागे विधिप्रत्ययेन बोध्यते तच्च न सम्भवति, स्वर्गादेः कालान्तरभावितया आशुविनाशिनो यागादेस्तदानीमसत्त्वेन कारणत्वासम्भवात् अतो विधिबोधितं यागादेरिष्टसाधनत्वं फलकालपर्य्यन्तस्थायिस्वजन्यव्यापारं विनानुपपन्नमित्यनुपपत्तिज्ञानेन द्वारीभूतमपूर्व्वं कल्प्यते। तदभिप्रायेणैव चिरध्वस्तमित्याद्युक्तम्। अतएव "पौरुषं दैवसम्पत्त्या काले फलति पार्थिव!। तत्रैतन्मनुष्यस्य पिण्डितं स्यात् फलावहमिति" शास्त्रान्तरे कार्य्यजननसामग्र्यां दैवपदाभिधेयापूर्व्वस्य कीर्त्तनम्। तदादृष्टं द्विविधं सुखं पापञ्च विहितानुष्ठानजन्यं सुखं, निषिद्धानुष्ठानजन्यं पापम्, तदुभयमपि विविधं, प्रारब्धं फलदानोन्मुखं सञ्चित ञ्चेति। देहाद्यारम्भकमदृष्टं प्रारब्धं, बह्वनामदृष्टानां चिरसञ्चितानां मध्ये फलविपाकाय उन्मुखं फलदानोन्मुखं, तद्भिन्नं सञ्चितम्। तत्र "ये समर्था जगत्स्थिति सृष्टिसंहारकारकाः। तेऽपि कालेन लीयन्ते इति" शास्त्रात् "कलनात् सर्वभूतानां काल इत्यभिधीयते" इत्युक्तेश्च कालस्य सर्वनाशकत्वेऽपि नाऽदृष्टनाशकत्वम् "नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपीति" शास्त्रान्तरात् किन्तु भोगादेव क्षयः। तथा पुण्यस्य कर्म्मणो गाङ्गजलस्नानादितोऽपि नाशः, पापस्य प्रायश्चित्तादिना नाशः। प्रारब्धातिरिक्तपुण्यापुण्यकर्म्मणां तत्त्वज्ञानात् नाशः। "ज्ञानाग्निः सर्वकर्म्माणि भस्मसात् कुरुतेऽर्জुनेति" गीतादिशास्त्रात्। इदमदृष्टं वेदान्तिभिर्न्नानुमन्यते तैर्हि कर्म्मणः सूक्ष्मावस्थापन्नसंस्कारविशेष एवादृष्टस्थानीयतयाङ्गीक्रियते इति भेदः। तच्चानुभयशब्दे विस्तरतो वाच्यम्। तच्चादृष्टमात्मधर्म्म इति नैयायिका वैशेषिकादयश्चाभ्युपगच्छन्ति। वेदान्तिसाङ्ख्यपातञ्जलास्तु बुद्धिधर्म्म इति भेदः। तेषां मते हि कर्त्तृत्वस्य बुद्धिधर्म्मतया "शास्त्रदेशितं फलमनुष्ठातरीति" न्यायात् तत्रैवादृष्टोत्पत्तेरुचितत्वम् अन्यकृतकर्म्मणा अन्यस्यादृष्टोत्पत्तौ अतिप्रसङ्गात् "कृतहानाकृताभ्यागमप्रसङ्गश्चेति" सूत्रेण च तथैव प्रतिपादितत्वादधिकभाकरे द्रष्टव्यम्। अस्य च अदृष्टशब्दवाच्यत्वे "प्रत्यक्षनिमित्तं विद्यमानोपलम्भनत्वादिति" जैमिनिसूत्रं मानम्। तस्यायमभिप्रायः "नोदनालक्षणोऽर्थोधर्म्म" इति धर्म्मे वेदैकसमधिगम्यत्वमुपपादितं तस्य दृढीकरणार्थमिदं सूत्रं प्रवृत्तम्। "अनुष्ठानाद्ध्वंसत्यदृश्यमानस्य धर्म्मस्य पूर्व्वमविद्यमानत्वात् न प्रत्यक्षयेण्यतास्ति उत्तरकालेऽपि रूपादिराहित्याच्चेन्द्रियैरनगम्यता। अतएवादृष्टमिति सर्वैरभिधीयते" इति शा० भाष्यम्। सूत्रार्थस्तु प्रत्यक्षं चक्षुरादि न तदुपलब्धे निमित्तं तेषां विद्यमानोपलम्भहेतुत्वात् धर्म्मस्य च प्राक् अविद्यमानत्वात्। लिङ्गराहित्याच्च नानुमानविषयत्वमस्ति। सुखदुःखयोस्तद्भोगकत्वेन लिङ्गत्वसम्भवेऽपि तयोर्लिङ्गत्वज्ञानमपि वेदैकगम्यं, "कस्य कर्म्मणः? किं फलं? मित्यध्यवसायस्य वेदैकसमधिगम्यत्वात् सुखदुःखाभ्यां सामान्येन धर्म्माधर्म्मानुमानेऽपि तद्विशेषप्रतिपत्तौ वेदस्यैव साधनत्वादिति प्रतिज्ञातं धर्म्मस्य नोदनामात्रप्रमाणकत्वं सुस्थितमिति। दृष्टभिन्ने त्रि० "सर्वमदृष्टं शुचीति" स्मृत्यन्तरम्। "अदृष्टकर्य्यमदृष्टवैभवात् करोति सुप्रियजनदर्शनातिथिमिति" नैष०। अज्ञातमात्रे त्रि०। "अदृष्टविरहव्यथमिति"। हितो०। "अदृष्टसङ्गिनिर्घृणमिति" स्मृतिः "अदृष्टसदृषातशङ्कामिरशातमिति" रघु०। अदृष्टहेतुके भयादौ च। दैविकाग्निभयादेरदृष्टसाध्यत्वाददृष्टत्वम्।

अदृष्टपूर्व्व त्रि० न पूर्व्वं दृष्टः सह सुपेति स० परनि० । पूर्व्वमदृष्टे । "अदृष्टपूर्व्वं हृषितोऽस्मि दृष्ट्वेति" गीता ।

अदृष्टि स्त्री विरुद्धा दृष्टिः विरोधार्थे अभावार्थे वा न० त० । क्रूरदृष्टौ, सरोषवक्रदृष्टौ, दर्शनाभावे च । ब० । दृष्टिशून्ये त्रि० ।

अदेय त्रि० न० त० । देयभिन्ने दानायोग्ये च । दानायोग्यत्वञ्च पुत्रादि—"स्वं कुटुम्बाविरोधेन देयं दारसुतादृते नान्वये सति सर्व्वस्वं यज्ञान्यस्मै प्रतिश्रुतमिति" याज्ञ० "अन्याहितं याचितकमाधिः साधारणञ्च यत् । निक्षेपः पुत्रदाराश्च सर्व्वस्वान्वये सति । आपत्स्वपि च कष्टासु वर्त्तमानेन देहिना । अदेयान्याङ्गिराचार्य्यो यज्ञान्यस्मै प्रतिश्रुतम्" इत्येवं स्मृतिनिषिद्धदाने वस्तुनि "योऽदत्तं प्रतिगृह्णाति यश्चादेयं प्रयच्छतीति" तदादानमपि स्मृतौ निषिद्धम् । "मद्यमदेयमपेयमयाज्यप्रतिग्रहमिति" स्मृतिः ।

अदेवत्र त्रि० न देवान् त्रायते प्रीणाति अनेन त्रै—करणे क । देवप्रीणनासाधने अन्नादौ "अदेवत्रादराधस" इति श्रुतिः ।

अदेवमातृक पु० न० त० । देवमातृकदेशभिन्ने नदीहृष्टाम्बु सम्पन्नव्रीहिपालितदेशे । "वितन्वति क्षेममदेवमातृका" इति भार० । ["अवज्वानमदेवयुमिति" ऋ० ५, ६, ११ ।

अदेवयु त्रि० न देवं याति प्राप्नोति या—कु । देवाप्रापके ।

अदेश पु० न० त० । गर्हितदेशे अयोग्यदेशे च । "नादेशे तर्पणं कुर्य्यात् न सन्ध्यां नापि पूजनमिति" स्मृतिः । "स्त्रियं स्मृशेददेशे च" इति स्मृतिः । गर्हितदेशाश्च स्मृतौ दर्शिताः केचित् संगृह्यन्ते । "चातुर्व्वर्ण्यव्यवस्था तु यस्मिन् देशे न वर्त्तते । तं म्लेच्छदेशं जानीयादार्य्यावर्त्तं ततःपरम्" इति विष्णु० । "आनर्त्तकाङ्गमगधाः सुराष्ट्राः दक्षिणापथः । तथा च सिन्धुसौवीरा एते सङ्कीर्णयोनय इति" "पद्भ्यां स कुरुते पापं यः कलिङ्गान् प्रपद्यते । ऋषयो निष्कृतिस्तस्य प्राहुर्वैश्वानरं हविरिति" बौधा० । "अङ्गवङ्गकलिङ्गांश्च तीर्थयात्रां विना व्रजन् । प्रायश्चित्तं प्रकुर्वीतेति" स्मृतिः । इष्टदेशेऽपि केचित् श्राद्धतर्पणादौ विशेषतोवर्ज्याः यथा "रूक्षं क्रमियुतं क्लिन्नं सङ्कीर्णानिष्टगन्धिकम् । देयं त्वनिष्टशब्दञ्च वर्ज्जयेत् श्राद्धकर्म्मणीति" । "न म्लेच्छविषये श्राद्धं कुर्य्यान्नम्लेच्छेत्तं तथा नेष्टाचरिते पितॄन् तर्पयेदिति" शङ्खलिखितौ । "परकीयमृते यस्तु पितॄन् संतर्पयेद्यदि । तद्भूमिस्वामिनस्तस्य हरन्ति पितरो बलादिति" एवमन्येऽपि गर्हितत्वयोजकाः स्मृत्याद्युक्ता वेदितव्याः । "अदेशकाले यद्दानं—तद्दानं तामसं विदुरिति गीता ।

अदैव न० दैवं वैश्वदेविकश्राद्धं तन्नास्ति यत्र । वैश्वदेविकश्राद्धशून्ये नित्यश्राद्धे । तस्य पार्व्वणेतिकर्त्तव्यतया वैश्वदेव श्राद्धप्राप्तौ "अदैविकन्तु तत् कार्य्यमिति" स्मृतौ पर्य्युदासाश्रयात् वैश्वदैविकम् धिक्कं नित्यश्राद्धशब्दे वक्ष्यते । अदैविकमत्र । दैवं भाग्यम् । तच्छून्ये, दुर्भाग्यवति च त्रि० ।

अदोष पु० दोषः स्मृत्युक्तदुरदृष्टसाधनत्वम् अभावार्थे न० त० । स्मृत्युक्तदुरदृष्टसाधनत्वदोषाभावे । न० ब० । दोषशून्ये त्रि० । अलङ्कारोक्तदोषशून्ययोः शब्दार्थयोः "तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापीति" काव्यप्र० । "अदोषं गुणवत् काव्यमिति" सरस्वतीक० ।

अद्भ न० अद्यते देवैः अद—कर्म्मणि गन् । पुरोडाशे उज्ज्वलद० ।

अद्धा अव्य० अश्नुते अत् तं सन्तं गमनं ज्ञानं वा दधाति क्विप् । याथार्थ्ये, साक्षात्कारे, स्फुटे, अवधारणे, अतिशये च । "अद्धा स्त्रियं पालितसङ्गरायेति" रघुः । "यस्य स्यादद्धा न विचिकित्सास्तीति" श्रुतिः । अयं स्वरादिः, चादिश्च तेनोभयस्वरता । साक्षादादिषु पाठात् अद्धाकालेत्यादौ समासे ल्यप् ।

अद्भुत न० अतितीव्रत् अव्यवमाकस्मिकार्थे तथा भाति भा—डुतच् । आकस्मिके उल्कापातादौ, आलङ्कारिकप्रसिद्धे नवरसान्तर्गतविस्मयस्थायिभावके रसभेदे यथोक्तम् "अद्भुतो विस्मयस्थायिभावो गन्धर्व्वदैवतः ॥ पीतवर्णो वस्तु लोकातिगमालम्बनं मतम् । गुणानां तस्य महिमा भवेदुद्दीपनं पुनः ॥ स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसम्भ्रमाः । तथा नेत्रविकासाद्या अनुभावाः प्रकीर्त्तिताः ॥ वितर्कावेगसम्भ्रान्तिहर्षाद्या व्यभिचारिणः इति" । यथा "दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यतङ्कारध्वनिरार्य्यबालचरितप्रस्तावनाडिण्डिमः । द्राक्पर्य्यस्तकपालसंपुटमिलद्ब्रह्माण्डभाण्डोदरभ्राम्यत्पिण्डितचण्डिमा कथमहो ? नाद्यापि विश्राम्यति" इति ॥ तद्वति त्रि० । "कस्माद्भुतमस्माक्षे इति" ज्योति० । अद्भुतस्वरूपविभागादि "प्रकृतिविरुद्धमद्भुतवचनम् प्रकृतिविरुद्धमद्भुतमापदः प्राक् प्रबोधाय देवाः सृजन्तीति" ज्योतिषतत्त्वे आर्थ्यवाक्ये । "आपज्ज्ञानाय भूम्यादीनां पूर्व्वं स्वभावप्रच्यावः देवकर्त्तृकोऽद्भुत इति रघुः । तेषां त्रैविध्यादि अन्यत्र शब्दे उक्तम् । "उदयति यः तदद्भुतमालिभिरिति" नैष० । "तमसद्भुतं बालकमम्बुजेक्षणमिति" भाग० ।

अद्भुतस्वन पु० अद्भुतः स्वनो यस्य ब० । महादेवे । कर्म्म० । आश्चर्य्यशब्दे । ब० । तथाभूतशब्दवति त्रि० ।

अद्मनि पु० अत्ति सर्वान् अद–मनिन् । अग्नौ ।
अद्मर त्रि० अद–कर्त्तरि क्मरच् । भक्षणशीले ।
अद्य अव्य० अस्मिन्नहनि इदम्शब्दस्य निपातः सप्तम्यर्थे । अस्मिन् दिवसे । "कृष्ण ! त्वदीयपदपङ्कजपिञ्जरान्ते अद्यैव मे विगत मानसराजहंस इत्युद्भटः । अद्यत्वे इत्यादिभाष्यप्रयोगात् तद्वृत्तावपि अस्य बोधकता । तेनाधारार्थत्वेऽपि अस्य समासान्तरघटकता "अद्यदिन मारभ्य इति" "अद्यप्रभृत्यवनताङ्गोति" कुमारः । एवञ्च वर्त्तमाने काले वर्त्तमानकालवृत्तौ च वृत्तिः "अद्यावधि भवद्भ्यो भिक्षोऽहमिति" वेणी० ।
अद्यतन त्रि० अद्य भवः अद्य+ट्युट्तुडागमश्च । अद्यभवे वस्तुमात्रे । स्त्रियामद्यतनी । अद्यतनश्च अतीतो भविष्यच्चेति द्विधा । तत्र अद्यतनभूते लुङ् अपाचीत् । अद्यतनभविष्यति लृट् । पक्ष्यति । अनद्यतनभूते तु लङ्–अपचत् अनद्यतने भविष्यति लुट् पक्ता । [इत्तित्वे वर्त्तमानत्वे ।
अद्यत्व न० अद्य तदृत्तेर्भावः अद्य+त्व । एतर्हि वस-
अद्यश्वीना स्त्री अद्य श्वः परदिने वा प्रसोष्यते अद्य–श्वस्+ख टिलोपः । आसन्नप्रसवायां प्रौढगर्भिण्याम् । "अद्यश्वीनावटब्धे" इति पा० ।
अद्रव पु० अभावार्थे न०त० । द्रवाभावे । न०ब० । द्रवशून्ये त्रि० "अद्रवं मूर्त्तिमत् स्वाङ्गं प्राणिस्थमविकारजमिति" महाभाष्य० ।
अद्रव्य न० अप्रशस्ते द्रव्ये न०त० । अप्रशस्तद्रव्ये अयोग्यपदार्थे "नाद्रव्ये निहिता काचित् क्रिया फलवती भवेदिति"
अद्रि पु० अद–क्रिन् । पर्व्वते, तदवयवे प्रस्तरे यावणि । इक्षे, सूर्य्ये, मेघे, परिमाणभेदे च तद्भेदश्च परिमाणशब्दे वक्ष्यते तत्र यावणि, अद्रिप्रुतः, मेघे "अद्रिभाता, पर्व्वते, दुहितरमनुकस्याग्रमद्रिरादाय दोर्भ्यामिति" कुमा० ।
अद्रिकर्णी स्त्री अद्रिः अद्रिनामिका गिरिर्वालुकभूमिका तस्याः कर्णः कर्णतुल्यं पुष्पान्तःस्थं पत्रं यस्याः गौरादित्वात् ङीष् । वालुकभूमिकाकर्णतुल्यपुष्पाभ्यन्तरपत्रायां अपराजितायाम् ।
अद्रिकीला स्त्री अद्रयः कुलाचलाः पर्व्वताः कीलाः शङ्कव इव यस्याः ब० । पृथिव्याम् । अद्रेः सुमेरोः कील इव वा । विष्कुम्भपर्व्वते पु० । तद्विवरणं अचलकीलाशब्दे दृश्यम् ।
अद्रिज न० अद्रौ जायते जन–ड ७त० । (शिलाजतु) इति स्वनामप्रसिद्धे गन्धद्रव्ये । (गेरि) इति प्रसिद्धे उपधातौ इति केचित् । पार्व्वत्यां स्त्री । पर्व्वतभवमात्रे त्रि० । सैंहलीयद्वे स्त्री राजनि० । अद्रिजातादयोऽप्युक्तार्थेषु पर्व्वतजाते दवानले, सूर्य्यजे हंसे, रूपे आत्मनि च पु० ।
अद्रितनया स्त्री ६त० । पार्व्वत्यां तद्विवृतिः अचलकन्या शब्दे द्रष्टव्या अद्रिसुतादयोऽप्यत्र । "अद्रिसुतासमागमोत्क" इति कुमा० ।
अद्रिद्विष् पु० अद्रिभ्यः द्वेष्टि द्विष–क्विप् । इन्द्रे । तस्य तद्द्वेष्टृत्वं गोत्रभिच्छब्दे दृश्यम् ।
अद्रिदुग्ध पु० अद्रिभिर्यावभिर्दुग्धः अभिषुतः ३त० । यावाभिषुते सोमे, "तिरो रोम पवते अद्रिदुग्ध" इति ऋ० । ९, ९७, ११, "अद्रिदुग्धः यावाभिषुत" इति भा० ।
अद्रिद्रोणि स्त्री अद्रेर्द्रोणिरिव । पर्व्वतभवनद्याम् "अद्रिद्रोणीरनपसारमार्गा" इति दश० ।
अद्रिपति पु० ६त० । हिमाचले तद्विवरणम् अचलराजशब्दे ।
अद्रिवर्हस् त्रि० अद्रेर्बर्हः इव बर्होऽस्य । अद्रिसारे अतिकठिने "पीदुषं द्यौरदितिरद्रिबर्हा" इति ऋ० १०, ६३, ३ ।
अद्रिवुध्न पु० उपमा० ब० । अतिकठिने । "अयं निधिः सरमे अद्रिबुध्न इति" ऋ० १०, १०८, ७, ।
अद्रिभिद् पु० अद्रिं भिनत्ति भिद–क्विप् ६त० । इन्द्रे । गोत्रभिच्छब्दे तद्भेदेन विवरणम् ।
अद्रिभू स्त्री अद्रावपि भवति भू–क्विप् ७त० । अपराजितालतायाम् तस्याः पर्व्वतेऽप्यतिकठोरभूमिके जायमानत्वात्तथात्वम् । पार्व्वत्यां स्त्री । पर्व्वतजातमात्रे त्रि० ।
अद्रिमातृ पु० अद्रिर्मेघस्तज्जलं मिमीते मा–क्तृच् । मेघजलनिर्म्मातरि 'खर्वत् कोशं दिवो अद्रिमातरमिति' ऋ० ९, ८९, ३ ।
अद्रिराज पु० अद्रीणां राजा ट्चसमा० । हिमाचले । अद्रिषु राजतेः क्विप् अद्रिराड्पि अत्रैव पु० । विवरणमचलराजशब्दे ।
अद्रिप्रुत पु० अद्रिभिः यावभिः स्रुतः अभिषुतः ३त० यत्वम् । यावाभिषुते सोमे । "बधूतो अद्रिप्रुतोर्वङ्गोति" ऋ० ९, ७२, ४ अद्रिप्रुतः यावभिरभिषुत इति भाष्यम् ।
अद्रिसंहत पु० अद्रिभिः संहतम् अभिषुतम् । यावाभिषुते सोमे "स्वसारो अद्रिसंहताविति" ऋ० ९, ९८, ६, अद्रिरिव संहतः कठिनः । अतिकठिने त्रि० ।
अद्रिसार पु० अद्रेः सार इव । लौहे । अद्रेरिव सारोऽस्य अतिकठिने त्रि० ।
अद्रिसारमय त्रि० अद्रिसारात्मकः । अत्यन्तकठिने ।

अद्रीश पु० अद्रीणाम् अद्रेर्वा ईशः ६त०। हिमाचले, शिवे च।

अद्रुक्वन् त्रि० द्रुह–क्वनिप् न०त०। द्रोहाकर्त्तरि–"तावां समाअद्रुक्वाणेवमिति" ऋ० ५,७०,२, "हे अद्रुक्वाणा अद्रोग्धारौ" इति भाष्यम्।

अद्रोघ त्रि० द्रुह–घञ् वेदे घत्वम् न०ब०। द्रोहरहिते "त्वं देहि सहस्रिणं रयिं नोऽद्रोघमेषेति" ऋ०३,३२,६, "अद्रोघमेष द्रोहरहितेनेति" भा०। न०त०। द्रोहाभावे पु०।

अद्रोघावित त्रि० अद्रोघः अवितो येन। अद्रोहरक्षके। "क्रणुत धूमं वृषणं सखायोऽद्रोघाविता" इति वेदः।

अद्रोह पु० अभावार्थे न०त०। द्रोहाभावे "अद्रोहोनाभिमानितेति" "अद्रोहः सर्वभूतानामिति" च पुरा०।

अद्वय न० न द्वयम्। द्वित्वाभावे। नास्ति द्वयं द्वित्वं तज्ज्ञानं वा यत्र। सर्वात्मतया आत्मनि ब्रह्मात्मैक्यज्ञे, अभेदे च। "अर्थतोऽप्यद्वयानन्दमतीतद्वैतभानत" इति वे०सा०। ब्रह्मा द्वयं पश्यत इति अद्वयं विज्ञानाभेदः पदार्थानामस्वप्नवादकत्वेन अस्त्यर्थे अच्। बौद्धभेदे ते हि "सङ्घोपाधिन्निवमादभेदो नीलतद्धियोरित्यनेन" पदार्थानां संविदभिन्नत्वं वदन्ति विवरणं बौद्धशब्दे द्रष्टव्यम्।

अद्वयवादिन् पु० अद्वयं वदति सर्वमेव वस्तु चिन्मात्ररूपं नान्यदतो द्वितीयमस्तीति वदतीति वद–णिनि। अद्वैतवादिनि वैदान्तिके, बाह्यार्थाभावेन ज्ञानात्मकं सर्वं वस्तु स्वीकुर्वति बौद्धे च।

अद्वयस् त्रि० नास्ति द्वयं द्वित्वमस्य ब० योगविभागात् असिच् समा०। द्वित्वरहिते। "सखा सख्येवो अद्वया इति" ऋ० १,१८७,३, "अद्वया द्वयरहित" इति भाष्यम्।

अद्वयानन्द पु० नास्ति द्वयं द्वित्वं भेदः तज्ज्ञानं वा यस्य यत्र वा तादृश आनन्दः। ब्रह्मरूपानन्दे अद्वैतानन्दे। "अर्थतोऽप्यद्वयानन्दमतीतद्वैतभानत इति" वे०सा०।

अद्वयाविन् त्रि० अद्वयमस्त्यर्थे विनि छन्दसि दीर्घः देवपितृयानरूपमार्गद्वयरहिते। "पुलस्य पाथः पदमद्वयाविन" इति ऋ० १,४ १५९, २, अद्वयाविनः मार्गद्वयरहितस्येति भाष्यम्।

अद्वयु त्रि० द्वयं द्विप्रकारोऽस्यास्य वा उ न०त०। द्विप्रकाररूपकार्यशून्ये अन्तर्बाह्यैक्यरूपे "उप द्रवन्नाद्वयुश्च वसव इति" ऋ०८, १८, १५।

अद्वार न० निन्दितं द्वारम्। प्रवेशानर्हे गुप्तद्वारे "अद्वारेण प्रवेशनमिति" "अद्वारेण न चातीयाद्ग्रामं वा वेश्म वा पुरमिति" च पुरा०। नास्ति द्वारमस्य ब०। प्रवेशायोग्ये दुष्प्रवेशे, अगम्ये अनुपाये च त्रि०।

अद्वितीय त्रि० द्विधा इतं भेदं गतम् द्वीतम् तस्य भावः द्वैतं तन्नास्ति यस्य ब०। सजातीयादिभेदशून्ये केवले परमात्मनि। वस्त्वद्वितीयमिति भा० "एकमेवाद्वितीयं ब्रह्मेति" श्रुतिः। "अत्र एकम्, एव, अद्वितीयमिति" पदत्रयेण ब्रह्मणि भेदत्रयराहित्यमुक्तम्। तथाहि भेदस्तावत् त्रिधा स्वगतभेदः सजातीयभेदः विजातीयभेदश्चेति। वृक्षादीनां स्वावयवशाखादिभ्यो भेदः स्वगतभेदः, घटात् घटान्तरस्य भेदः सजातीयभेदः, घटस्य पटादितो भेदः विजातीयभेदः। ब्रह्मणश्च "तदनन्यत्वमारम्भणशब्दादिभ्य" इति सूत्रेण स्वकार्य्यात् घटादितोऽनन्यत्वात् न स्वगतभेदः। घटादेर्व्यवहारिकसत्त्ववत्त्वेन पारमार्थिकसत्त्ववतो ब्रह्मणः विजातीयत्वेऽपि ततोऽभेदएव तद्विरुद्धस्वाभावात् "सर्वं खल्विदं ब्रह्मेति" श्रुत्यन्तरात् तत्सजातीयवस्त्वन्तराभावादेव तद्भेदः सिद्धएवेत्यादिकमाकरे दृश्यम्। द्वितीयशून्ये, असहचरे त्रि०।

अद्विषेण्य त्रि० द्वेष्टुं शीलमस्य, द्विष–एण्यनृ–किच्च न०त०। प्रियरूपे, "मयोभुरद्विषेण्यः सखेति" ऋ० १,१८७,३, अद्वेषिण्यः अद्वेष्यरसः प्रियरस इति भाष्यम्।

अद्वेष पु० न द्वेषः अभावार्थे न०त०। द्वेषाभावे। ब०। द्वेषरहिते त्रि०। "अद्वेषो हस्तयोर्दधे" इति ऋ० १, २४,४, "अद्वेषः द्वेषरहितः नास्ति द्वेषोऽस्येति" भाष्यम्। एतेन अद्वेषःशब्दे इतन्नन्तस्योदाहरणत्वेनोपन्यासः केषाञ्चित् भाष्यादर्शनमूलकः।

अद्वेषस् त्रि० द्विष–असुन् न०त०। द्वेषानास्पदे द्वेषाकर्त्तरि "अद्वेषो मरुतो गातुमेतनेति" ऋ० ५,८७,८, "अद्वेषः अद्वेषस" इति भाष्यम्।

अद्वैत न० द्विधा इतम् द्वीतं तस्य भावः द्वैतं भेदः अभावार्थे न०त०। अभेदे, "अद्वैतं सुखदुःखयोरनुयुग्यं सर्वास्वस्थासु यदिति" उत्तरचरितम्। नास्ति द्वैतं भेदो यत्र। भेदरहिते त्रि० ब्रह्मणि न०। "अद्वैततत्त्व इव सत्यतरेऽपि लोके" इति नैषधम्।

अद्वैतसिद्धि पु० अद्वैतस्य जगतो ब्रह्माभेदस्य सिद्धिरत्र। स्वनामख्याते वेदान्तप्रकरणभेदे ६त०। तत्सिद्धौ स्त्री।

अध अव्य० अथ वेदे "सुपांसुलुगित्यादिना" वर्णव्यत्ययः। अथशब्दार्थे "अधा निवह उत्तर" इति ऋ०४,१८,६, अधा "अथानन्तरमिति" भा०। अधापोधस्य पोषेणेति य० १२,८, अधेति अव्ययम् अथार्थे "निपातस्य चेति" पा० दीर्घ इति वेददीपः।

अधःकाय पु० अधः अधरं कायस्य एकदेशिस०। नाभेरधः-प्रदेशे नेत्वनुदृत्तौ "केशाद्दीविमधःकायं संस्पृशन् धरणीमपीति" स्मृतिः। "अधःकायं नीवेरधःप्रदेशमिति" रघु०।

अधःकार पु० अधरमित्यर्थेऽधः तस्य कारः। न्यूनीकरणे, तिरस्कारे, अधरीकरणे च।

अधःक्षिप्त त्रि० अधोमुखेन क्षिप्तम् क्षिप–क्त शाक०त०। अधोमुखतया स्थापिते न्यञ्चिते न्युब्जीकृते, अधस्ताच्चिक्षिते च।

अधःपुष्पी स्त्री अधोमुखं पुष्पं यस्याः (अनन्तमूल) गोजिह्वायाम् अधाक्पुष्प्याम् (भाटुइ) इति ख्याते वृक्षे इत्यन्ये।

अधः(धश्च)शय्या स्त्री अधोवर्त्तिनी शय्या वा सत्यम्। खट्वावर्जनेन भूमिशय्यायाम् "अग्नीन्धनं ब्रह्मचर्य्यमधःशय्यां गुरोर्हितम्। आ समावर्त्तनात् कुर्य्यादिति" मनुः।

अधन त्रि० नास्ति धनमस्य। धनहीने दरिद्रे स्वातन्त्र्यरहिते च। "अधनो हि धनं लब्ध्वा दृप्यवत् मन्यते जगदिति" नीतिः। "भार्य्या पुत्राश्च दासश्च त्रय एवाधनाः स्मृताः। यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनमिति" मनुः। "स्वातन्त्र्यराहित्यपरमिति" दायभागः।

अधम त्रि० अव–अम–धादेशः। कुत्सिते, हीने च। "सर्वत्र त्रिविधा भेदा उत्तमाधममध्यमा" इति। "अधमसमवरिष्ठा न्यर्कोन्द्रादिसंस्थे यशिनि विनयवित्तज्ञानधीनैपुणानामिति" ज्योतिषोक्ते नृणां वित्तज्ञानादिषु अधमत्वसूचके रविचन्द्रयोः स्थितिविशेषरूपे योगभेदे।

अधमभृतक पु० कर्म्म०। "उत्तमस्त्वायुधीयोऽत्र मध्यमस्तु कृषीवलः। अधमो भारवाही स्यादित्येवं त्रिविधो भृत इति" स्मृत्युक्ते, पञ्चविधशूद्रकर्मध्ये भृतकभेदे।

अधमर्ण त्रि० ऋणं अवश्यदेयम् तत् अधमं गोप्यं यस्य ब०। अवश्यदेयर्णगोपके (खातक) इति प्रसिद्धे ऋणग्रहीतरि।

अधमर्णिक त्रि० अधमस्यर्णमवश्यदेयं दाढ्यत्वेनास्यास्य ठन्। अधमर्णशब्दार्थे। "यद्गृहीता च क्रमाद्याप्यो धनिनामधमर्णिक" इति याज्ञ०। "यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः। तैस्तैरुपायैः संगृह्य दापयेदधमर्णिकमिति" मनुः। अस्त्यर्थे इनि। अधमर्णीत्यप्यत्रैव त्रि० स्त्रियां ङीप्।

अधमाङ्ग न० अधमम् अङ्गम् कर्म्म०। चरणे। तस्य सर्व्वाङ्गापेक्षया अधरत्वात् अधमत्वम्।

अधमार्द्ध न० अधममर्द्धम्। नाभेरधोभागे। ततः भवादौ यत्। अधमार्द्धम् तद्भवादौ, तत्सम्बन्धिनि च त्रि०।

अधर पु० न म्रियते ध्रुङ–अच् न०त०। (ठोट) इति ख्याते जङ्घे, नीचे वा ओष्ठे। "पिबसि रतिसर्वस्वमधरमिति" शकु०। "निर्व्यूढरागोऽधर" इति सा०दर्प०। "उमामुखे बिम्बफलाधरोष्ठे" इति कुमा०। "अधरं खलु बिम्बनामकं फलमाश्रयामिति भव्यमन्वयम्। लभतेऽधरबिम्बदृत्वदः पदमस्या रदनच्छदे वदति" नैष०। धरस्य धरः ब०। ततः सम्बन्धरहिते हीने, पु० ब०। तले, नीचे च स्त्रियां ङीष्। अधरमन्दिरे स्त्रीचिह्नभेदे पु० न०। हीनवादिनि त्रि०। अयं सर्वनामकार्य्यभाक्। तत्रायं विशेषः पूर्व्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायामिति (पा०ग०)। इत्युक्तेः व्यवस्थायामेवास्य सर्वनामता-व्यवस्था च स्वाभिधेयापेक्षोऽवधिनियमः। अवधित्वञ्च दैशिकं कालिकञ्च तत्र "पूर्व्वापरादिशब्दानां केषाञ्चित् प्रविभागतः। सामान्येनाभिधानेऽपि प्रवृत्तिर्देशकालयोरिव" भियुक्तोक्तेः केषाञ्चिदेव उभयावधित्वनियमः न सर्वेषाम्, तथाहि पूर्व्वापरावरपरोत्तरशब्दा सख्यवच्चा दिक्कालयोर्वर्त्तन्ते तदवच्छिन्नदेशग्रामादौ च। तत्र पूर्व्वस्यां दिशि वसति, पूर्व्वस्यादिग आगतः पूर्वदिक्सम्बन्धात् पूर्व्वो वायौ। एवं पूर्व्वस्मिन् मासे वसति पूर्व्वस्मात् मासाच्चिरवृत्तः। तत्कालसम्बन्धात् पूर्व्वो गुरुः पूर्व्वस्मिन् गुरोरागतः पूर्व्वस्मात् प्रासादादागत इत्यादि। एवम् अपरावरपरशब्दत्रयस्यापि "ते च विनापि दिक्कालसम्बन्धं देशवृत्तिमन्तः इति भेदः। अपरदेशसम्बन्धादपरो ग्रामः अवरो वा। अपरस्मिन् अवरस्मिन् वा पर्व्वते वसति। सन्निकर्षे विप्रकर्षे च सर्व्वासु दिक्षु तुल्योऽयं व्यपदेशः। न तु ते दिग्मात्रसम्बन्धेन तत्तद्दर्शं बोधकाः एकस्यामेव दिशि स्थितयोर्निकटानिकटयोः परावरादिव्यपदेशप्रवृत्तेः। एतच्छब्दापेक्षया सख्यवृत्त्या वक्ष्यमाणकारिकायां देशग्रहणम् सार्व्वकं अन्यस्य तु सतो देशवृत्तित्वम्। सन्निकर्षासन्निकर्षयोर्देशवत् कालोऽप्याश्रयः। तेन परः अपरः अवरो वा कालः। अतएव परकालसम्बन्धात् परःपाणिनिः अपरकालसंबन्धादपरः कैयटादिरिति। दक्षिणाधरशब्दौ तु दिशि दिग्वच्छिन्ने पर्व्वतादौ च वर्त्तेते न तु काले, नापि कालावच्छिन्ने इति भेदः। दक्षिणस्यां वसति, दक्षिणे पर्व्वते वा वसति, अधरस्यां दिशि वसति अधरदिक्सम्बन्धात् अधरप्रासादे वा वसति इति। तेन "सख्यवृत्तिभेदेऽप्यभि कालदिग्देशवृत्तयः। पूर्व्वापरावरधराधरास्तु दक्षिणोत्तरौ" इति गणरत्ने सर्वेषां कालादिवृत्तित्वोक्तावपि दक्षिणाधरयोस्तु न कालवृत्तित्वमिति तेनैव खण्डितव्याख्यानरूपे गणरत्नमहोदधौ स्थिरीकृतम्। दक्षिणस्यां दिशि

स्त्री० दक्षिणदिशश्च भूगोले यथाधरत्वं तथा उदक्शब्दे वक्ष्यते । सर्वनाम्नां ङसौ पुंवद्भावात् अधरस्यां भवः अधरतन इत्यादि अधरस्यां वर्त्तते अधरङसिः अधरा अधरस्याः अधरस्यामित्यर्थे अधरत इत्यादि । [अधोभागे इत्यर्थे ।

अधरतस् अव्य० अधर–तसिल् । प्रथमाषष्ठीसप्तम्यर्थेऽस्त्री

अधरत्तात् अव्य० अधर+अत्ताति प्रु० । अधरत इत्यर्थे । "पुरस्तात् सवितोत्तरत्तादधरत्तादिति" ऋ० १०,२६,१४,

अधरमधु न० अधरस्य मध्विव आस्वादातिशयात् । अधररसे । [रतद्रव्यर्थे

अधरस्तात् अव्य० अधर+सप्तम्यादयर्थे अस्ताति । अध-

अधराच् त्रि० अधरां दक्षिणां दिशमञ्चति क्विप् । दक्षिणदिग्गन्तरि । "प्राङ् वा उदङ् वाऽधराङ् वा प्रध्मायीताभिनद्धाय इति श्रा० उ० । स्त्रियामधराचीति । सा च दक्षिणस्यां दिशि च ।

अधराचीन त्रि० अधराचि भवः अधराच्+ख । अधःप्रदेशभवे । "अधराचीनमक्षणोदपामप" इति ऋ० २,१७,५,

अधराच्य त्रि० अधरस्यां भवः यत् । दक्षिणदिग्भवे अधोदिग्भवे च । "अरसं प्राचंग्र विषमरसं यदुदीच्यम् अर्धैकमधराच्यमिति" वेदः ।

अधरात् अव्य० अधर+अस्त्यर्थे अति । अधरतस्त्यर्थे । "पश्चादोत्तरादधरादापुरस्तादिति" ऋ० ६,६,६, अधरात् दक्षिणत इत्यर्थः ।

अधरीण त्रि०-अधरे भवः अधर+ख । अधरभवे ।

अधरेण अव्य० अधरस्मिन् देशे, दिशि वा अधर+एनप् । प्रथमासप्तमीद्वयौ आसन्ने नीचे देशादौ, सन्निकृष्टदक्षिणदिशि च । [त्वसपचारात् । अधरदिवसे ।

अधरेद्युस् अव्य० अधरे दिने अधर+एद्युस् । कालसप्त-

अधरोत्तर न० अधरश्च उत्तरश्च समा०द्व० । न्यूनाधिक्यवति निम्नोन्नते । "अद्यात् काकः पुरोडाशं श्वावलिह्याद्विलक्षया स्वास्थं च न स्यात् कथंचित् प्रवर्त्तेताधरोत्तरमिति" मनुः ।

अधर्म्म पु० ध्रियतेऽनेन धृ–मनिन् विरोधे न०त० । धर्म्मविरोधिनि वेदादिनिषिद्धकर्म्मजन्ये पापे, तद्धेतुभूतप्राणिहिंसादौ च । "नोदनालक्षणोऽर्थोधर्मः" इति सूत्रकारेण निषेधलक्षणोऽनर्थोऽधर्म इति तल्लक्षणं सूचितम् तत्र वेदप्रतिपाद्योऽर्थोधर्म्मः, तन्निषेधप्रतिपाद्योऽनर्थः अधर्मः । स च निषिद्धकर्म्माधीनः पापनामा अदृष्टभेदः । अनर्थश्च अनिष्टसाधनम् । तत्सत्त्वयुक्तिस्तु "विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् अनिग्रहाच्चेन्द्रियाणाम् नरः पतनमृच्छतीति" । "शरीरजैः कर्म्मदोषैर्याति स्थावरतां नर" इत्यादिना शास्त्रेण कर्म्मणामशुभानामिनां कालान्तरभाविनरकादिजन्मविशेषान् प्रति हेतुत्वोक्तावपि तथात्वं मध्यस्थद्वारीभूतमदृष्टं विना न सम्भवतीति तत् कल्प्यते अतः 'चिरध्वस्तं फलायालमित्यादिना" अदृष्टशब्दे दर्शितयुक्तेश्च पापसत्त्वसाधनम् । "अधर्म्मेणैधते तावत् ततो भद्राणि पश्यति । ततः सपत्नान् जयति समूलस्तु विनश्यतीति" मनुः । "अभ्युत्थानमधर्म्मस्य तदात्मानं सृजाम्यहमिति" गीता । अधर्म्मभेदात्गतिविशेषोक्तेश्चाधर्मसत्त्वम् यथा

"कर्म्मभिर्निर्यतैर्बद्धो जन्तुर्दुःखान्युपाश्नुते । येन येन तु भावेन कर्म्मणा पुरुषो गतिम् । व्रजति परुषां घोरां तत्ते वक्ष्यामृतः परम् । अधीत्य चतुरो वेदान् द्विजो मोहसमन्वितः । पतितात् प्रतिगृह्याथ खरयोनौ प्रजायते । खरो जीवति वर्षाणि दश पञ्च च भारत ! । खरो मृतो बलीवर्दैः सप्त वर्षाणि जीवति । बलीवर्दो मृतश्चापि जायते ब्रह्मराक्षसः । ब्रह्मरक्षश्च मासांस्त्रींस्ततो जायेत ब्राह्मणः । पतितं याजयित्वा तु ऋभियोनौ प्रजायते । तत्र जीवति वर्षाणि दश पञ्च च भारत ! । ऋभिभावाद्विमुक्तस्तु ततो जायेत गर्दभः । गर्दभः पञ्च वर्षाणि पञ्च वर्षाणि शूकरः । कुक्कुटः पञ्च वर्षाणि पञ्च वर्षाणि जम्बुकः । श्वा वर्षमेकं भवति ततो जायेत मानवः । उपाध्यायस्य यः पापं शिष्यः कुर्य्यादबुद्धिमान् । स जीव इह संसारांस्त्रीनाप्नोति न संशयः । प्राक् श्वा भवति राजेन्द्र ! ततः क्रव्यात्ततः खरः । ततः प्रेतः परिक्लिष्टः पश्चाज्जायेत ब्राह्मणः । मनसाऽपि गुरोर्भार्य्यां यः शिष्यो याति पापकृत् । स उग्रान् प्रेति संसारानधर्म्मेणेह चेतसा । श्वयोनौ तु स सम्भूतस्त्रीणि वर्षाणि जीवति । तत्रापि निधनं प्राप्तः ऋभियोनौ प्रजायते । ऋभिभावमनुप्राप्तो वर्षमेकन्तु जीवति । ततस्तु निधनं प्राप्तो ब्रह्मयोनौ प्रजायते । यदि पुत्रसमं शिष्यं गुरुर्हन्यादकारणे । आत्मनः कामकारेण सोऽपि हिंस्रः प्रजायते । पितरं मातरञ्चैव यस्तु पुत्रोऽवमन्यते । सोऽपि राजन् ! मृतो जन्तुः पूर्वं जायेत गर्दभः । गर्दभत्वन्तु सम्प्राप्य दश वर्षाणि जीवति । संवत्सरन्तु कुम्भीरस्ततो जायेत मानवः । पुत्रस्य मातापितरौ यस्य रुष्टावुभावपि । गुर्व्वध्यानतः सोऽपि मृतो जायेत गर्दभः । खरो जीवति मासांस्तु दश त्रा

च चतुर्दश। विडालः सप्त मासांस्तु ततो जायेत मानवः। मातापितरावाक्रुश्य सारिकः सम्प्रजायते। ताड़यित्वा तु तावेव जायते कच्छपो नृप!। कच्छपो दश वर्षाणि त्रीणि वर्षाणि शल्लकः। व्यालो भूत्वा च षण्मासांस्ततो जायेत मानुषः। भर्तृपिण्डसुपाश्नन् यो राजद्विष्टानि सेवते। सोऽपि मोहसमापन्नो मृतो जायेत वानरः। वानरो दश वर्षाणि पञ्च वर्षाणि मूषिकः। श्वाऽथ भूत्वाऽथ षण्मासांस्ततो जायेत मानुषः। न्यासापहर्त्ता तु नरो यमस्य विषयं गतः। संसाराणां शतं गत्वा कृमियोनौ प्रजायते। तत्र जीवति वर्षाणि दश पञ्च च भारत!। दुष्कृतस्य क्षयं कृत्वा ततो जायेत मानुषः। असूयको नरश्चापि मृतो जायेत शार्ङ्गकः। विश्वासकर्त्ता च नरो मीनो जायेत दुर्मतिः। भूत्वा मीनोऽष्ट वर्षाणि मृगो जायेत भारत। मृगस्तु चतुरो मासांस्ततस्त्यागः प्रजायते। त्यागस्तु निधनं प्राप्य पूर्वे संवत्सरे ततः। कीटः प्रजायते जन्तुस्ततो जायेत मानुषः। धान्यान् यवांस्तिलान् माषान् कुलत्थान् सर्षपांश्चणान्। कलायानथ मुद्गांश्च गोधू मानतसीस्तथा। यस्यान्यस्य हर्त्ता च मोहाज्जन्तुरचेतनः। स जायते महाराज! मूषिको निरपत्रपः। तत्र प्रेत्य महाराज! मृगो जायेत शूकरः। शूकरो जातमात्रस्तु रोगेण म्रियते नृप!। श्वा ततो जायते मूढः कर्म्मणा तेन पार्थिव!। भूत्वा श्वा पञ्च वर्षाणि ततो जायेत मानवः। परदाराभिमर्षन्तु कृत्वा जायेत वै बकः। श्वा मृगालस्ततो गृध्रो व्यालः कङ्को वकस्तथा। भ्रातृभार्यान्तु पापात्मा यो धर्षयति मोहितः। पुंश्चलीत्वमाप्नोति सोऽपि संवत्सरं नृप!। सखिभार्यां गुरोर्भार्यां राजभार्यान्तथैव च। धर्षयित्वा तु कामाद्य मृतो जायेत शूकरः। शूकरः पञ्च वर्षाणि दश वर्षाणि वै बकः। विड़ालः पञ्च वर्षाणि दश वर्षाणि कुक्कुटः। पिपीलकस्तु मासांस्त्रीन् कीटः सप्तान्यमेव तु। एतानासाद्य संसारान् कृमियोनौ प्रजायते। तत्र जीवति मासांस्तु कृमियोनौ चतुर्दश। ततोऽधर्म्मक्षयं कृत्वा पुनर्ज्जायेत मानवः। उपस्थिते विवाहे तु यज्ञे दानेऽथवा विभो!। मोहात्करोति यो विघ्नं स मृतो जायते कृमिः। कृमिर्जीवति वर्षाणि दश पञ्च च भारत!। अधर्मस्य क्षयं कृत्वा ततो जायेत मानवः। पूर्व्वं दत्त्वा तु यः कन्यां द्वितीये दातुमिच्छति। सोऽपि राजन्! मृतो जन्तुः कृमियोनौ प्रजायते। तत्र जीवति वर्षाणि त्रयोदश युधिष्ठिर!। अधर्म्मसङ्क्षये सद्यस्ततो जायेत मानुषः। देवकार्य्यमकृत्वा तु पितृकार्य्यमथापि वा। अनिर्व्वाप्य समन्नन्तु वै मृतो जायेत वायसः। वायसः शतवर्षाणि ततो जायेत कुक्कुटः। जायते व्यालकश्चापि मासं तस्मात्तु मानुषः। ज्येष्ठं पितृसमञ्चापि भ्रातरं योऽवमन्यते। सोऽपि मृत्युसुपागम्य क्रौञ्चयोनौ प्रजायते। क्रौञ्चो जीवति मासांस्तु दश द्वौ सप्त पञ्च च। ततो निधनमापन्नो मानुषत्वमुपाश्नुते। दम्भको ब्रह्मणीं गत्वा कृमियोनौ प्रजायते। ततः सम्प्राप्य निधनं जायते शूकरः पुनः। शूकरो जातमात्रस्तु रोगेण म्रियते नृप!। श्वा ततो जायते मूढः कर्म्मणा तेन पार्थिव!। श्वा भूत्वा कृतकर्म्माऽसौ जायते मानुषस्ततः। तत्रापत्यं समुत्पाद्य मृतो जायेत मूषिकः। कृतघ्नस्तु मृतो राजन्! यमस्य विषयं गतः। यमस्य पुरुषैः क्रुद्धैर्व्वधं प्राप्नोति दारुणम्। दग्धं सन्दंशकं शूलमग्निकुम्भञ्च दारुणम्। असिपत्रवनं घोरं वालुकां कूटशाल्मलीम्। एतान्यान्यानि वह्नीः स यमस्य विषयं गतः। यातनाः प्राप्य तत्रोग्रास्ततो वध्यति भारत!। ततो हतः कृतघ्नः स तत्रोग्रैर्भैरवैर्नृप!। संसारचक्रमासाद्य कृमियोनौ प्रजायते। कृमिर्भवति वर्षाणि दश पञ्च च भारत!। ततो गर्भं समासाद्य क्षत्रैव म्रियते शिशुः। ततो गर्भशतं जन्तुर्व्वङ्गभिः सम्प्रपद्यते। संसारांश्च बहून् गत्वा ततश्चिर्य्यक् प्रजायते। ततो दुःखमनुप्राप्य बहुवर्षगणानिह। अपुनर्भवसंयुक्तस्ततः कूर्म्मः प्रजायते। दधि हृत्वा बकश्चापि घृतो मत्स्यानसंस्कृतान्। चोरयित्वा तु दुर्ब्बुद्धिर्भधुदंशः प्रजायते। फलं वा मूलकं हृत्वा अपूपं वा पिपीलिकाः। चोरयित्वा तु निष्पावं जायते कृकलासकः। पायसं चोरयित्वा तु तित्तिरित्वमवाप्यते। हृत्वा पिष्टमयं पूपं कुम्भोलूकः प्रजायते। अयो हृत्वा तु दुर्ब्बुद्धिर्वायसो जायते नरः। कांस्यं हृत्वा तु दुर्ब्बुद्धिर्हारीतो जायते नरः। राजतं भाजनं हृत्वा कपोतः संप्रजायते। हृत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते। पत्रोर्णं चोरयित्वा तु ऊकरत्वं स गच्छति। कौशिकन्तु ततो हृत्वा नरो जायेत वर्त्तकः। कंशुकं चोरयित्वा तु शुको जायेत मानवः। चोरयित्वा दुकूलन्तु मृतो हंसः प्रजायते। क्रौञ्चः कार्पासिकं हृत्वा मृतो जायेत मानवः। चोरयित्वा नरः षट्टं त्वाविकञ्चैव भारत!। चौमञ्च वस्त्रमादाय शमो जन्तुः प्रजायते

वर्षाणि हत्वा तु पुरुषो मृतो जायेत वर्हिणः। हत्वा रक्तानि वस्त्राणि जायते जीवजीवकः। वर्णकादींस्तथा गन्धांश्चोरयित्वेह मानवः। छुच्छुन्दरित्वमाप्नोति राजन्! लोभपरायणः। तत्र जीवति वर्षाणि ततो दश च पञ्च च। अधर्मस्य क्षयं कृत्वा ततो जायेत मानवः। चोरयित्वा पयश्चापि बलाका सम्प्रजायते। यस्तु चोरयते तैलं नरो मोहसमन्वितः। सोऽपि राजन्! मृतो जन्तुस्तैलपायी प्रजायते। अश्वस्थं पुरुषं हत्वा सगस्तः पुरुषाधमः। अर्थार्थी यदि वा वैरी स मृतो जायते खरः। खरो जीवति वर्षे द्वे ततः शस्त्रेण वध्यते। स मृतो मृगयोनौ तु नित्योद्विग्नोऽभिजायत। मृगो वध्यति शस्त्रेण गते संवत्सरे तु सः। हतो मृगस्ततो मीनः सोऽपि जालेन वध्यते। मासे चतुर्थे सम्प्राप्ते श्वापदः सम्प्रजायते। श्वापदो दश वर्षाणि द्वीपी वर्षाणि पञ्च च। ततस्तु निधनं प्राप्य कालपर्यायनोदितः। अधर्मस्य क्षयं कृत्वा ततो जायेत मानुषः। स्त्रियं हत्वा तु दुर्बुद्धिर्यमस्य विषयं गतः। बद्धक्लेशान् समासाद्य संसारांश्चैव विंशतिम्। ततः पश्चान्महाराज! कृमियोनौ प्रजायते। कृमिर्विंशतिवर्षाणि भूत्वा जायेत मानुषः। भोजनं चोरयित्वा तु मक्षिका जायते नरः। मक्षिकासङ्घवशगो वह्नून् मासान् भवत्युत। ततः पापक्षयं कृत्वा मानुषत्वमवाप्नुते। धान्यं हृत्वा तु पुरुषो लोमशः सम्प्रजायते। तथा पिण्याकसंमिश्रमशनं चोरयन्नरः। स जायते वस्तुसमो दारुणो मूषिको महान्। दग्ध्वा वै मानुषं नित्यं पापात्मा स प्रजायते। घृतं हृत्वा तु दुर्बुद्धिः काकमद्गुः प्रजायते। मत्स्यमांसमधो हृत्वा काको जायेत दुर्मतिः। क्षत्रं चोरयित्वा तु चौरिकाकः प्रजायते। विश्वासेन तु निक्षिप्तं यो वै निह्नौति मानवः। स मृतायुर्नरस्ताक्ष्यं मत्स्ययोनौ प्रजायते। मत्स्ययोनिमनुप्राप्य मृतो जायेत मानवः। मानुषत्वमनुप्राप्य क्षीणायुरुपपद्यते। पापानि तु नरः कृत्वा तिर्यग् जायेत भारत!। न चात्मनः प्रमाणन्ते धर्मं जानन्ति किञ्चन। ये पापानि नराः कृत्वा निरस्यन्ति व्रतैः सदा। सुखदुःखसमायुक्ता व्याधिताश्चे भवन्त्युत। असंवासाः प्रजायन्ते खेच्छा अपि न संशयः। नराः पापसमाचारा लोभमोहसमन्विताः। वर्जयन्ति च पापानि जन्मप्रभृति ये नराः। अरोगा रूपवन्तश्च धनिनश्च भवन्त्युत। स्त्रियोऽप्येतेन कल्पेन कृत्वा पापमवाप्नुयुः। एतेषामेव जन्तूनां भार्यात्वमुपयान्ति ताः। परस्वहरणे दोषाः सर्व्व एव प्रकीर्त्तिताः। एतद् ते देशमात्रेण कथितं ते मयाऽनघ!। अपरान् मत्कथायोगे भूयः श्रोष्यसि भारत!। एतत्कथा महाराज! ब्रह्मणो वदतः पुरा। सुरर्षीणां शृतं मध्येष्टश्चापि यथातथम्। मयाऽपि तच्च कात्स्न्र्येन यथावदनुवर्णितम्। एतच्छ्रुत्वा महाराज! धर्मे कुरु मनः सदा हरिवं०। "महापातकजान् घोरान्नरकान् प्राप्य दारुणान्। कर्म्मशेषात् प्रजायन्ते महापातकिनस्त्विह। मृगश्वसूकरोष्ट्राणां ब्रह्महा योनिमृच्छति। खरपुल्कसवेणानां सुरापो नात्र संशयः। कृमिकीटपतङ्गत्वं स्वर्णहारी समाप्नुयात्। तृणगुल्मलतात्वञ्च क्रमशोगुरुतल्पगः" इति। "शूकरखरोष्ट्राणां गोऽजाविमृगपक्षिणाम्। चण्डालपुल्कसानाञ्च ब्रह्महा योनिमृच्छति। कृमिकीटपतङ्गानां विड्भुजाञ्चैव पक्षिणाम्। हिंसाशाञ्चैव सत्वानां सुरापो ब्राह्मणो व्रजेत्। तृताहिसरटानाञ्च तिरश्चां चाम्बुचारिणाम्। हिंसाशाञ्च पिशाचानां स्तेनोविप्रःसहस्रशः। तृणगुल्मलतानां च क्रव्यादां दंष्ट्रिणामपि। क्रूरकर्म्मकृताञ्चैव शतशोगुरुतल्पग" इति। "ब्रह्महा क्षयरोगी स्यात् सुरापः श्यावदन्तकः। हेमहारी च कुनखी दुश्चर्मा गुरुतल्पगः। यो येन संवसत्येषां स तद्भिक्षोऽभिजायते। अन्नहर्त्तामयावी स्यान्मूकोवागपहारकः। धान्यमिश्रोऽतिरिक्ताङ्गः पिशुनः पूतिनासिकः। तैलहृत्तैलपायी स्यात् पूतिवक्त्रस्तु सूचकः। यद्वा तद्वा परद्रव्यमपहृत्य बलाद्धरः। अवश्यं याति तिर्य्यक्त्वमश्नुते चैवाऽऽतं हरिरिति"। "परस्य योषितं हृत्वा ब्रह्मस्वमपहृत्य च। अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः। हीनजातौ प्रजायेत पररत्नापहारकः। पतत्रिणं शिखी हृत्वा, गन्धान् छुच्छुन्दरिः शुभान्। मणिमुक्ताप्रवालानि हृत्वा लोभेन मानवः। विविधानि च रत्नानि जायते हेमकर्त्तृकिति"। "मूषिको धान्यहारी, स्याद्वानसुद्गः, कपिः फलम्। जलं प्लवः, पयः काको, मद्गुकारी हविष्करम्। मधु दंशः, पलं श्वभ्रो, गां क्रोधा, ऽग्निंबकस्तथा। स्त्रियं वस्त्रं, स्त्रियं रसन्तु, चोरी लवणहारकः। प्रदर्शनार्थमेतत्तु मयोक्तं स्तेयकर्म्मणि। द्रव्यप्रकाराहि यथा तथैव प्राणिजातयः" इति। "द्रव्यस्यापह्रियमाणस्य यादृशाः प्रकारास्तादृशा एव प्राणिजातयः स्तेयकर्म्मण्यपहर्त्तारो भवन्ति यथा कांस्यहारी हंस इति। अथवा यत्फलसाधनद्रव्यमपहरति तत्साधनविकलो यथा पङ्गुतामश्नुहारक इति" मिता०। "ब्रह्महा

कुष्ठी, तैजसापहारी मण्डली, देवब्राह्मणाक्रोशकः खलति, गरदाग्निदावुन्मत्तौ, गुरुप्रतिघ्नापस्मारी, गोघ्नश्वान्वेा, धर्म्मपत्नीं शुद्धान्यत्र प्रहृतः शब्दवेधी प्राणिविशेषः, कुरुडाशी भगभक्षी, देव-ब्राह्मण-स्वापहारी पाण्डुरोगी, न्यासापारो च काणः, स्त्रीपण्योपजीवी षण्डः, कौमारदारत्यागी दुर्भगो, भिक्षैकाशी वातगुल्मी, अभक्ष्यभक्षकोगण्डमाली, ब्राह्मणीगामी निर्वीजी, क्रूरकर्म्मा वामनो, वस्त्रापहारी पतङ्गः, शय्यापहारी क्षपणकः, शङ्खशुक्त्यपहारी, कपाली दीपापहारी कौशिको, मित्रभुक् क्षयी, मातापित्रोराक्रोशकः खञ्जन" इति अष्टतवागुल्लखो, सुरुमुण्डःसंलग्नवाक् जलोदरी, दारत्यागी कूटसाक्षीस्त्रीपदी, उच्छूनजङ्घाचरणो, विवाहविघ्नकर्त्ता छिन्नोष्ठः, अवगुरणः छिन्नहस्तो, मातृघ्नोऽन्धः, स्नुषागामी, वातव्रणः, चतुष्पथे विण्मूत्रविसर्जने मूलकृच्छ्री, कन्यादूषकः षण्ढः, ईर्ष्यालुर्मशकः, पित्रोर्विवदमानोऽपस्मारी,न्यासापहार्यनपत्यो, रत्नापहार्यल्पनदरिद्रोविद्याविक्रयी पुरुषस्नगः, वेदविक्रयी द्वीपी, वृद्धयाजकोजलज्वरः, अवाच्ययाजकोवराहः, अनिमन्त्रितभोजी वायसः, भिक्षैकभोजी वानरः, यतस्ततोऽन्नाजीरः, कलत्रनदहनात्खद्योतः, दारकार्थोसुखविघ्नितः, पर्युषितभोजी ऋक्षः, अदत्तादायी बलीवर्दो, मत्सरी भ्रमरः, अन्युप्तसादी मण्डलकुष्ठी, शूद्रार्थाःश्वपाकः, गोहर्ता सर्पः, क्षेत्रापहारी क्षयी, अन्नापहार्यजीर्णी, ज्ञानापहारी मूर्खः, चण्डालीपुक्कसीगमनेऽजगरः, प्रव्रजितागमने मरुपिशाचः, शूद्रागमने दीर्घकीटः, सवर्णाभिगामी दरिद्रः, जलहारी मत्स्यः, क्षीरहारी बलाका, वार्द्धुषिकोऽक्षपीनः, अविक्रेयविक्रयी यक्षः, राजसर्षपीगामी नपुंसकः, राजाक्रोशकोगर्दभः, गोगामी मण्डूकः, अनध्यायाध्ययने शृगालः, परद्रव्यापहारी परप्रेष्यः, मत्स्यवधे गर्भवासी" इत्येवं नानाकृति वचनैः गतिविशेषो मिताक्षरायां दर्शितस्तेन तत्कालपर्य्यन्तस्थायिताऽधर्म्मस्येति गम्यते। ब० अनिच्समा० अधर्म्मा। पुण्यरूपधर्म्मशून्ये त्रि०। नास्ति निहतः धर्म्मो यस्य अनिच्समा० अधर्म्मा। क्षीणपुण्ये त्रि०। "तारकावर्षमिवाधर्मविनाशपिशुनमिति" काद०। गुणाद्यपरपर्य्यायः अधर्मस्तद्वृत्तिते ब्रह्मणि न०।

अधर्म्मचारिन् त्रि० न धर्मं चरति अनुतिष्ठति चर+णिनि ईत० न०त०। धर्मकृत्याननुष्ठायिनि, पापानुष्ठायिनि च स्त्रियां ङीप्।

अधर्म्मतस् अव्य० अधर्म+तसि। अधर्मेण, "अधर्मतो यत्र भवेत्प्रवृत्तिः" भा० व० ३३ अ०।

अधर्म्मतस् अव्य० अधर्म+तसि। अधर्मेण, "अधर्मतो यत्र भवेत्प्रवृत्तिः" भा० व० ३३ अ०।

अधर्म्मपथ पु० अधर्म्मस्य पथः ६त०। अधर्म्मस्य पथि मार्गे, "अधर्म्मपथमास्थाय" भा० व० ३३ अ०।

अधर्म्मपथ पु० अधर्म्मस्य पथः ६त०। अधर्म्मस्य पथि मार्गे, "अधर्म्मपथमास्थाय" भा० व० ३३ अ०।

अधर्म्मप्रचुर त्रि० अधर्म्मेण प्रचुरः ३त०। अधर्म्मबहुले, "अधर्म्मप्रचुरे लोके" भा० व० ३३ अ०।

अधर्म्मप्रचुर त्रि० अधर्म्मेण प्रचुरः ३त०। अधर्म्मबहुले, "अधर्म्मप्रचुरे लोके" भा० व० ३३ अ०।

अधर्म्मभय त्रि० अधर्म्मेण प्रचुरः प्राचुर्य्यार्थे मयट्। पापप्रचुरे। स्त्रियां ङीप्। [पापाचारिणि।

अधर्म्मभय त्रि० अधर्म्मेण प्रचुरः प्राचुर्य्यार्थे मयट्। पापप्रचुरे। स्त्रियां ङीप्। [पापाचारिणि।

अधर्म्मात्मन् त्रि० अधर्म्मप्रधानः आत्मा यस्य। प्राधान्येन

अधर्म्मात्मन् त्रि० अधर्म्मप्रधानः आत्मा यस्य। प्राधान्येन

अधर्म्मास्तिकाय पु० आर्हतमतसिद्धेषु जीवादिपञ्चकास्तिकायेषु मध्ये स्थितिस्वभावके पदार्थभेदे विवरणमर्हच्छब्दे द्रष्टव्यम्। [ङीप्।

अधर्म्मास्तिकाय पु० आर्हतमतसिद्धेषु जीवादिपञ्चकास्तिकायेषु मध्ये स्थितिस्वभावके पदार्थभेदे विवरणमर्हच्छब्दे द्रष्टव्यम्। [ङीप्।

अधर्म्मिन् त्रि० अधर्मः पापमस्त्यस्य इनि। पापयति स्त्रियां

अधर्म्मिन् त्रि० अधर्मः पापमस्त्यस्य इनि। पापयति स्त्रियां

अधर्म्मिष्ठ त्रि० अतिशयेन अधर्म्मी इष्ठन् भत्वाट्टिलोपः। भृशपापयुक्ते।

अधर्म्मिष्ठ त्रि० अतिशयेन अधर्म्मी इष्ठन् भत्वाट्टिलोपः। भृशपापयुक्ते।

अधर्म्म्य त्रि० न धर्म्माय हितं यत्। पापापादके, "पञ्चानां तु त्रयो धर्म्म्या द्वावधर्म्म्यौ स्मृताविहेति" मनुः।

अधर्म्म्य त्रि० न धर्म्माय हितं यत्। पापापादके, "पञ्चानां तु त्रयो धर्म्म्या द्वावधर्म्म्यौ स्मृताविहेति" मनुः।

अधवा स्त्री न विद्यमानो धवो भर्त्ता यस्याः। मृतभर्त्तृकायां विधवायाम् स्त्रियाम्। [भागगर्नरि त्रि०।

अधवा स्त्री न विद्यमानो धवो भर्त्ता यस्याः। मृतभर्त्तृकायां विधवायाम् स्त्रियाम्। [भागगर्नरि त्रि०।

अधश्चर पु० अधःखनित्वा चरति अच्। चौरे, अधो-

अधश्चर पु० अधःखनित्वा चरति अच्। चौरे, अधो-

अधश्चौर पु० अधोभागे खनित्वा चोरयति चुर-अच् स्वार्थे अण्। सन्धिं कृत्वा चौर्य्यकारके। (सिन्धियाल)।

अधश्चौर पु० अधोभागे खनित्वा चोरयति चुर-अच् स्वार्थे अण्। सन्धिं कृत्वा चौर्य्यकारके। (सिन्धियाल)।

अधश्शिरस् न० अधोवर्त्ति शिरः यस्य शत्वम् वा। अवाङ्मस्तके।

अधश्शिरस् न० अधोवर्त्ति शिरः यस्य शत्वम् वा। अवाङ्मस्तके।

अधस् अव्य० अधर+असि अधरशब्दस्थाने अधादेशश्च। पाताले, अधस्थानमात्रे च। तत्रापि अर्थवशात् प्रथमापञ्चमीसप्तम्यर्थो उद्देयाः। तत्र प्रथमार्थे अधोरत्नं, पञ्चम्यर्थे अधोऽवात् पतति, सप्तम्यर्थे अधोऽस्ते शेते इत्यादि। "अधः कथञ्चिद्भुतभूमिभागमिति" कुमा०। "पतत्यधोधाम विसारि सर्व्वतः, इति माघः।

अधस् अव्य० अधर+असि अधरशब्दस्थाने अधादेशश्च। पाताले, अधस्थानमात्रे च। तत्रापि अर्थवशात् प्रथमापञ्चमीसप्तम्यर्थो उद्देयाः। तत्र प्रथमार्थे अधोरत्नं, पञ्चम्यर्थे अधोऽवात् पतति, सप्तम्यर्थे अधोऽस्ते शेते इत्यादि। "अधः कथञ्चिद्भुतभूमिभागमिति" कुमा०। "पतत्यधोधाम विसारि सर्व्वतः, इति माघः।

अधस्तन त्रि० अधोभवः अधस्+ष्ण ट्युट् च। अधोभवे स्त्रियां ङीप्। "एवमागामियागीयसख्यकालादधस्तनः स्वकालादुत्तरो गौणः कालः पूर्वस्य कर्मण इति" स्मृतिः। "अधस्तनः पूर्वतनः इत्यवच्छास्त्रेषु व्यवहार" इतिन्यायादिति" रघुनन्दनोक्तेः पूर्वतनेऽपि।

अधस्तन त्रि० अधोभवः अधस्+ष्ण ट्युट् च। अधोभवे स्त्रियां ङीप्। "एवमागामियागीयसख्यकालादधस्तनः स्वकालादुत्तरो गौणः कालः पूर्वस्य कर्मण इति" स्मृतिः। "अधस्तनः पूर्वतनः इत्यवच्छास्त्रेषु व्यवहार" इतिन्यायादिति" रघुनन्दनोक्तेः पूर्वतनेऽपि।

अधस्तरा(मा)म् अव्य० अतिशयेन अधः, तर(म)प् आम्। अत्यन्ताधरे। द्रव्ये तु नाम। अधस्तरोदेशइत्यादि।

अधस्तरा(मा)म् अव्य० अतिशयेन अधः, तर(म)प् आम्। अत्यन्ताधरे। द्रव्ये तु नाम। अधस्तरोदेशइत्यादि।

अधस्तात् अव्य० अधर+अस्तात्यधादेशः। अधःशब्दार्थे। अयञ्च प्रथमापञ्चमीसप्तम्यर्थे एव "धर्म्मेण गमनमूर्द्धं गमनमधस्ताद् भवत्यधर्म्मेण" ३४ साङ्ख्यका०।

अधस्तात् अव्य० अधर+अस्तात्यधादेशः। अधःशब्दार्थे। अयञ्च प्रथमापञ्चमीसप्तम्यर्थे एव "धर्म्मेण गमनमूर्द्धं गमनमधस्ताद् भवत्यधर्म्मेण" ३४ साङ्ख्यका०।

अधस्पदम् न० अधोऽस्ति पदं वा सत्वम्। निम्नपदे।

अधस्पदम् न० अधोऽस्ति पदं वा सत्वम्। निम्नपदे।

अधामार्गव पु० न धावते अधाः तादृशं मार्गं वाति वा-क। अपामार्गे इति क्षीरस्वामी।

अधामार्गव पु० न धावते अधाः तादृशं मार्गं वाति वा-क। अपामार्गे इति क्षीरस्वामी।

अधार्म्मिक त्रि० धर्मं चरति आसेवते ठक् विरोधार्थे न०त०।

अधार्म्मिक त्रि० धर्मं चरति आसेवते ठक् विरोधार्थे न०त०।

अधर्म्यं—स्वारसिकप्रवृत्तिमति "अधर्म्याच्छेति वक्तव्यमिति" उक्तिं तु आधर्मिक इत्यप्यत्र त्रि०।

अधि अव्य० न+धा—कि। अधिकारे, ऐश्वर्ये, स्वत्वे, अधिकत्वेत्यर्थे, उपरि, आधिक्ये, अतिशये च। अस्य ऐश्वर्ये, स्वत्वे च कर्म्मप्रवचनीयत्वेन तद्योगे सप्तमी, अधि रामे भूः, अधि भुवि राम इति। "अधिः अध्ययनैश्वर्यवचित्वस्मरणाधिक्येषु" इति गणरत्ने उक्तम् तत्रोपाध्यायादधीते इत्यादावध्ययने, इङोऽध्ययनार्थकत्वस्य अधिद्योतकः। ऐश्वर्ये अधिपतिः, वशित्वे अधीनः, अधिगतमिनमु अत्या०स०। स्मरणे मातरध्येति इकः स्मरणार्थत्वमधिद्योतयति। अधिके, अधिकमिति अधि+कन्। "अधिपरी अनर्थकाविति" पा० उक्तेः आनर्थक्ये गतित्वाभावात् नोपसर्गत्वं तेन अध्यागच्छति इत्यादौ गतिसंज्ञाबाधात् "गतिर्गताविति" पा० निघातो न। अतएव अस्य धात्वर्थत्वमात्रद्योतकत्वेऽपि विशिष्टक्रियाद्योतकत्वाभावात् अनर्थकत्वव्यवहारः विशिष्टक्रियायोगाभावाच्च नोपसर्गत्वम् तेन "तस्मिन्नाक्रमवतुर्भागे प्राङ्नाकमधितस्थुषीति" रघौ न धत्वम् सति च क्रियाविशेषद्योतकत्वे अधितष्ठावित्यादाविव उपसर्गत्वेन धत्वमिति भेदः। मुग्धबोधे तु "नात्रार्थायां स्वतो नातिक्रमेऽतिः पर्य्यधी गताविति" गत्यर्थद्योतकत्वे नोपसर्गत्वमित्युक्तम् तेन नाकमधितस्थुषीत्यस्य गतवतीत्यर्थकतयोपसर्गत्वाभावाच्च धत्वमिति विवेकः। तथा अधिके, "इतो वा सातिमीमहे दिवो वा पार्थिवादधि" इति ऋ० १,६,१० "अधोमहे आधिक्येन याचामहे" इति भाष्यम्। उपरि "ये नाकस्याधि रोचने दिवीति" ऋ० १,१६,६, "नाकस्य दुःखरहितस्य स्वर्गस्य उपरीति" भाष्यम्, अधिकारे "यदत्र सामधिकरिष्यतीति" सि० कौ०। विभाषा ऋजौति पा०। वा गतित्वमत्र विनियोक्तुरीश्वरत्वं गम्यते अधिकारो विनियोगः। आधिक्ये "अधिगत्य जगत्यधीश्वरादिति" नैष० अधिगत्येत्यादौ गमेर्विशिष्टज्ञानार्थत्वद्योतकत्वात् उपसर्गत्वम् "धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते, तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधे"त्युक्तेः विशिष्टज्ञानार्थता, तेन गतिसमासे ल्यप्। "अधिगतं विधिवद्दु यदुपायनयदित्यादौ" दायत्वेन लब्धमित्यर्थः। एवमन्यत्रापि विशेषार्थद्योतकता विज्ञेया। आधीयते दुःखमनेनेति आ+धा—कि वा षृ०ह्रस्वः। मनःपीड़ायाम् पु०।

अधिक त्रि० अध्यारूढ एव स्वार्थे कन् उत्तरपदलोपश्च। प्रधाने अतिरिक्ते, "जनं न सत्वेऽधिको बबाधे" इति रघुः। आधिक्यं च योग्यपरिमाणातिक्रमः अतिशयश्च। तत्तानुरूपातिक्रमे "अकालप्रसवा नार्य्य इत्युपक्रम्य "हीनाङ्गीमधिकाङ्गीञ्च जायन्ते यदि वा तयं" इत्यरिष्टसूक्तसदार्थम्। "हीनाङ्गमधिकाङ्गञ्च श्राद्धभोज्ये विवर्ज्जयेदिति" स्मृतिः। "इयमधिकमनोज्ञा वल्कलेनापि तन्वीति" शकु०। "अधिकं फलमश्नुते" इति पुरा०। असाधारणे च। "ब्राह्मणस्याधिकं लब्धं, क्षत्रियस्य विजितं, निर्विष्टं वैश्यशूद्रयोरिति" गौतमः "ब्राह्मणस्याधिकं लब्धमिति ब्राह्मणस्य प्रतिग्रहादिना यल्लब्धं तदधिकमसाधारणम्। क्षत्रियस्य विजितमित्यत्राधिकमित्यनुवर्त्तते क्षत्रियस्य विजयदण्डादिलब्धमसाधारणम्। "निर्विष्टं वैश्यशूद्रयोरिति"। अत्राप्यधिकमित्यनुवर्त्तते वैश्यस्य कृषिगोरक्षादिलब्धमिर्विष्टन्तदसाधारणं, शूद्रस्य द्विजशुश्रूषादिना भृतिरूपेण यल्लब्धन्तदसाधारणम्। एवमनुलोमजानामतिलोमजानाञ्च लोकप्रसिद्धेषु स्वत्वहेतुषु यद्यदसाधारणसूक्तं स्मृतानामश्वसारथ्यमित्यादि तत्तत् सर्वं निर्विष्टशब्देनोच्यते सर्वस्यापि भृतिरूपत्वात् "निर्वेशो भृतिभोगयोरिति" विकाण्डशेषात्। तत्तदसाधारणं वेदितव्यम्" इति मिताक्षरा। दर्पणोक्ते अर्थालङ्कारभेदे यथा दर्पणे "आश्रयाश्रयिणोरेकस्याधिक्येऽधिकसच्यते"। "किमधिकमस्य ब्रूमो महिमानं वारिधेर्हरिर्यत्र। अज्ञात एव शेते कृत्वा निश्चिन्त भुवनानि" इत्यत्राश्रयस्य। "युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकाशमासत। तनौ वसुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः" इति माघे तु आश्रितस्याधिक्यम्। भावार्थे ष्यञ्—आधिक्यम्। उचित प्रमाणातिरेके न०। [अत्यन्तोत्कृष्टे च।

अधिकतर त्रि० अधिक+तरप्। द्वयोर्मध्ये उत्कृष्टे एकस्मिन्,

अधिकतम त्रि० अधिक+तमप्। बहूनां मध्ये एकस्मिन् उत्कृष्टे, अत्यन्तोत्कृष्टे च।

अधिकमास पु० कर्म्म०। मलमासे तद्धिरण्यमधिमासशब्दे।

अधिकरण न० अधि+कृ—ल्युट्। आधारे, व्याकरणशास्त्रे "कर्त्तृकर्म्मव्यवहितामसाक्षाद्धारयत् क्रियाम्। उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतमिति" हरिपरिभाषिते अधिकरणसंज्ञके कर्त्तृकर्म्मद्वारा क्रियाश्रये कारके, यथा गेहे स्थाल्यामन्नं पचतीत्यादौ गेहस्य कर्त्तृद्वारा, स्थाल्याश्च कर्म्मद्वारा, परम्परया पाकक्रियाश्रयत्वात्, गेहादेः। "आधारोऽधिकरणमिति" "सप्तम्यधिकरणे इति" पा०।

अधिकरणं चयस्य गुणादेर्यो धर्मी स एव। यथा गुणकर्मजातीनां द्रव्यम्, द्रव्यस्य च संयोगादिसम्बन्धेन द्रव्यान्तरं, तत्राधिकरणत्वाधिकरणत्वं यथा कुण्डादेर्बदरादीनामधिकरणत्वम् स्टङ्गादेर्घटादीनां, न तु वैपरीत्ये। द्रव्यादिषु गुणादेरेव, समवायेन तादात्म्येन वा मतभेदेन अधिकरणत्वं नतु गुणादीनां द्रव्याधिकरणत्वमित्येव मन्तव्यम्। क्रियते निर्णयार्थं विचारोऽस्मिन्। पूर्व्वोत्तरमीमांसाशास्त्रप्रसिद्धे एकार्थप्रतिपादके विषयसंशयपूर्व्वपक्षसिद्धान्तनिर्णयात्मकपञ्चाङ्गबोधकवाक्यसमुदाये न्याये। तथा हि "विषयोविशयश्चैव पूर्व्वपक्षस्तथोत्तरं निर्णयश्चेति"सिद्धान्तः शास्त्रेऽधिकरणं स्मृतमिति" मीमांसा। तत्र विचारार्हं वाक्यं विषयः, तस्यार्थविषये विशयः इदमित्थं न वेति विकल्पः। तत्र सन्दिह्यमानयोः पक्षयोः असत्पक्षे युक्तिप्रदर्शनवाक्यं पूर्व्वपक्षवाक्यं, पूर्वपक्षोक्तां युक्तिं खण्डयित्वा सत्पक्षे युक्तिप्रदर्शनवाक्यम् सिद्धान्तः। ततश्चेत्यादयभिलापेन सिद्धान्तसिद्धार्थोपसंहारकं वाक्यं निर्णायकवाक्यमिति यथा "स्वाध्यायोऽध्येतव्य" इत्यादिवाक्यं विचारार्थत्वेन विषयः। अत्राध्ययनमक्षरग्रहणमात्रम्? अर्थग्रहणपर्य्यन्ताध्ययनं ? वेति संशयः। तत्र अक्षरग्रहणमात्रमध्ययनमिति पूर्व्वपक्षः। अर्थज्ञानसहिताक्षरग्रहणमिति सिद्धान्तः। तेन विधिवाक्यस्य सार्थवेदाध्ययनमेव फलितोऽर्थ इति निर्णय इत्थं तत् प्रतिपादकावयवपञ्चात्मकोन्यायोऽत्रावसीयते। एवमन्यदप्युदाहार्य्यम्। उत्तरमीमांसायामपि एतानि यथायथं योज्यानि विशेषस्त्वयं वेदान्ते पञ्चावयवा अन्यविधा यथोक्तं माधवाचार्य्येण। "तत्रैकैकमधिकरणं पञ्चावयवं विषयः सन्देहः सङ्गतिः पूर्व्वपक्षः सिद्धान्तश्चेति पञ्चावयवा इति" सङ्गतिश्च "शास्त्रेऽध्याये तथा पादे न्यायसङ्गतयस्त्रिधा। शास्त्रादिविषये ज्ञाते तत्तत्सङ्गतिरुह्यता"मित्यनेन सङ्गतित्रैविध्यं तेनैव दर्शितं तद्विवरणं सङ्गतिशब्दे वक्ष्यते। तत्र वेदान्ताधिकरणं यथा "अथातो ब्रह्मजिज्ञासेति प्रथमाधिकरणम् "अचिन्त्यं चिन्त्यं वा ब्रह्माध्यासानिरूपणात्। असन्देहाफलत्वाभ्यां न विचारं तदर्हति। अध्यासोऽहंबुद्धिसिद्धोऽसङ्गं ब्रह्म श्रुतीरितम् सन्देहान्मुक्तभावाच्च विचार्य्यं ब्रह्म वेदत" इति माधवः। व्याख्यातञ्चैतत् स्वेनैव यथा "आत्मा वा अरे द्रष्टव्यः श्रोतव्य" इत्यत्र आत्मदर्शनं फलमुद्दिश्य तत्साधनत्वेन श्रवणं विधीयते। श्रवणं नाम वेदान्तवाक्यानां ब्रह्मणि तात्पर्य्यं निर्णेतुमनुकूलोन्यायविचारः तदेतद्विचारविधायकं वाक्यं विषयः। न चायं विषयः श्लोकयोर्न संगृहीतः, सन्देहसंग्रहेणैवार्थात् तत् संग्रहप्रतीतेः ब्रह्मविचारात्मकन्यायनिर्णयात्मकशास्त्रमनारभ्यणीयमारभ्यणीयं वेति सन्देहः। पूर्वोत्तरपक्षयुक्तिश्चयं सर्वत्र सन्देहबीजमुच्चेयम्। तत्रानारभ्यमिति तावत्प्राप्तं विषयप्रयोजनयोरभावात्। संदिग्धं हि विचारविषयोभवति ब्रह्म त्वसन्दिग्धं तथा हि तत् किं ब्रह्माकारेण सन्दिह्यते? आत्माकारेण? वा, नाद्यः "सत्यं ज्ञानमनन्तं ब्रह्मेति"वाक्येन ब्रह्माकारस्य निश्चयात्। न द्वितीयः अहंप्रत्ययेनात्माकारस्य निश्चयात्। अध्यासात्मविषयत्वेन भ्रान्तोऽयं प्रत्यय इति चेत् न अध्यासानिरूपणात् तमःप्रकाशवद्विरुद्धस्वभावयोर्जडाजडयोर्देहात्मनोः शुक्तिरजतवदन्योन्यतादात्म्याध्यासेन निरूपयितुं शक्यते। तस्मादभ्रान्ताभ्यां त्वत्यहंप्रत्ययाभ्यां निश्चितस्यासंदिग्धत्वाच्च विचारस्य विषयोऽस्ति। नापि प्रयोजनं पश्यामः। उक्तप्रकारेण ब्रह्मात्मनिश्चयेऽपि शास्त्रदर्शनात् तस्माद्ब्रह्म न विचारमर्हति अतः शास्त्रमनारभ्यणीयमिति पूर्वपक्षः। अत्रोच्यते। शास्त्रमारभ्यणीयं विषयप्रयोजनसद्भावात् त्वत्यहंप्रत्ययोः सन्दिग्धं ब्रह्मात्मवस्तु। "अयमात्मा ब्रह्मेति" श्रुतिरसङ्गं ब्रह्मात्मत्वेनोपदिशति। अहंमनुष्यदेवादाद्यहं बुद्धिर्देहादितादात्म्याध्यासेनात्मानं स्टङ्गाति, अध्यासस्य दुर्निरूपत्वमसङ्गाराय, तस्मात् संदिग्धं वस्तु विषयः तच्चिन्तयेन सच्चिदानन्दं प्रयोजनं श्रुत्या, विद्वदनुभवेन च सिद्धम्। तस्माद्वेदान्तवाक्यविचारसुखेन ब्रह्मणो विचारार्हत्वाच्छास्त्रमारभ्यणीयमिति सिद्धम् इति"। अभेदान्वयिपदार्थबोधकतुल्यविभक्तिकपदे च। "समानाधिकरणस्तत्पुरुषः कर्मधारय"इति पा०। समानाधिकरणः अभेदान्वयिपदार्थबोधकतुल्यविभक्तिकपदघटितस्तत्पुरुषः कर्मधारय इत्यर्थः "तादृशपदघटितत्वेनान्यपदार्थत्वे समानाधिकरणबहुव्रीहिः पीतमम्बरं यस्येति वाक्ये पीताम्बर इत्यादि। अभेदान्वयिपदार्थबोधकभिन्नपदघटितत्वे व्यधिकरणबहुव्रीहिरिति यथा पद्मं नाभौ यस्येति वाक्ये पद्मनाभः। शुश्रुतोक्तेषु द्वात्रिंशत्तन्त्रयुक्तिषु तन्त्रयुक्तिभेदे च तन्त्रयुक्तिशब्दे तद्विवरणम्।

अधिकरणविचाल पु० अधिकरणस्य विचालः अन्यथाकरणं वि–चल घञ् ६त०। द्रव्यस्य अवस्थान्तरकरणेन संख्यान्तरकरणे, विचालो नाम यदेकमनेकं क्रियते अनेकं वैकं क्रियते इति। एकस्य राशेः पञ्चधा विभागे, पञ्चात्मकस्य वा एकधा विभागे च अधिकरणस्य संख्याया विचालः। "अधिकरणविचाले चेति" पा०।

अधिकरणिक पु० अधिकरणम् धर्माधिकरणम् आश्रयतयाऽस्यास्ति ठन्। विचारकरणाय धर्माधिकरणमण्डपे नियुक्ते प्राड्विवाकादौ। तत्र नियुक्तः ठक्। आधिकरणिकोऽप्यत्र पु०।

अधिकर्म्म(न्) अव्य०कर्म्मणि विभक्त्यर्थेऽव्ययी०वा अच्समा०। कर्म्माधिकृत्येत्यर्थे। अधिकं कर्म प्रा०स०। अधिककर्म्मणि। न०व०। अधिककर्म्मयुक्ते त्रि०।

अधिकर्म्मकर त्रि० अधिकं कर्म्म तत्करोति क्त–आतोमनादौ ट। शूद्रभेदे दासभेदे। क्विप् अधिकर्म्मकदप्यत्र त्रि०।

अधिकर्म्मकृत त्रि० अधिकं कर्म अधिकर्म तत् कृतं येन निडा० नस्य परनि०। "सर्वेष्वधिकृतो यः स्यात् कुटुम्बस्य तथोपरि। सोऽधिकर्मकृतो ज्ञेय" इति स्मृत्युक्ते शूद्रभेदे।

अधिकर्म्मिक पु० अधिकृत्य कृष्टं कर्म्मणेऽलम् अधिकर्म–ठन्। कृष्टाध्यक्षे, कृष्टस्यवणिग्भ्यः शुल्कादानकर्म्मणि नियुक्ते।

अधिकाङ्ग न० अधिकोऽङ्गात्। वर्म्मधरयोर्वक्षःस्थलयमध्ये वर्मदार्ढ्यार्थं बद्धपट्टिकादौ। ब०। अधिकाङ्गवति त्रि०। "अजाविघातने चैव अधिकाङ्गः प्रजायते" इति ज्ञाता०।

अधिकार पु० अधि+कृ–घञ्। आरम्भे, यत्रेदं क्रयविक्रयादिकर्त्तृत्वसम्पादके स्वामित्वे, "अधिकारः फले स्वाम्यमधिकारी प्रभुर्भवेदिति" मीमांसोक्ते विहितकर्म्मफलस्वामित्वे, विनियोज्यपुरुषस्य सम्बन्धे, यथा याजनादिकर्मणि ब्राह्मणादेः, राज्ञां प्रजापालनादौ, वैश्यस्य कृष्यादौ, शूद्रस्य द्विजसेवायाम्, "नैमित्तिकोऽयं प्रायश्चित्ताधिकार" इति मिताक्षरा। स्वामित्वे–"सर्व्वे स्वरधिकारिण" इति स्मृतिः। तत्र च वैदिकादिकर्म्मसु कर्त्तव्यताज्ञानाधीनप्रवृत्तिहेतुरधिकारः। यथा याजनादौ ब्राह्मणस्येत्यादि। शूद्रस्य नाध्ययनादिष्वधिकारः यथोक्तं "निषेकादिश्मशानान्तो यस्य वेदोदितो विधिः। तस्य शास्त्रेऽधिकारोऽस्मिन्ज्ञेयस्तस्य कदाचनेति" मनुना। न केवलम् अध्ययने शूद्राणामधिकारः यागादावप्यनधिकारः यथोक्तं जैमिनीयसूत्रभाष्यादौ। "चातुर्वर्ण्यमविशेषात्" इत्याशङ्क्य "निर्देशाद्वा त्रयाणां स्यादग्न्याधेये ह्यसम्बन्धः क्रतुषु ब्राह्मणश्रुतिरित्यालेख्य" इति। "वाशब्दः पक्षं व्यावर्त्तयति, "त्रयाणाम्" अधिकारः स्यात् कुतः ? अग्न्याधेये निर्देशात् अग्न्याधेये त्रयाणां निर्देशो भवति, "वसन्ते ब्राह्मणोऽग्निमादधीत, ग्रीष्मे राजन्यः, शरदि वैश्यः" इति शूद्रस्य आधाने श्रुतिर्नास्ति इत्यनग्निः शूद्रः असमर्थोऽग्निहोत्रादि निर्वर्त्तयितुम्। तस्मात् "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्येवमादिषु शूद्रस्य प्राप्तिका श्रुतिर्नास्ति। ब्राह्मणादीन् एवाधिकृत्य सा प्रवर्त्तते, ते हि समर्था अग्निमत्त्वात्, आहवनीयादयो न शूद्रस्य, अविधानात्, संस्कारशब्दत्वाच्च आहवनीयादीनाम्। तस्मात् अनधिकृतोऽग्निहोत्रादिषु शूद्रः इत्यालेख्यः मन्यते स्म" इति भा०। तथा कर्मप्रतिपादक सर्वशास्त्र विहितकर्मसु मनुष्याणामेवाधिकारः न तिरश्चां न वा देवादीनां यथोक्तं तत्रैव "फलार्थित्वात् कर्मणः शास्त्रं सर्वाधिकारं स्यात्" इत्याशङ्क्य "कर्त्तुर्वा श्रुतिसंयोगाद्विधिः कात्स्न्र्येन गम्यते" इति सू०"वाशब्दः पक्षं व्यावर्त्तयति। न चैतदस्ति तिर्यगादीनामपि अधिकारः इति। कस्य तर्हि ?। यः समर्थः कृत्स्नं कर्म अभिनिर्वर्त्तयितुम्। न चैते, शक्नुवन्ति तिर्यगादयः कृत्स्नं कर्माभिनिर्वर्त्तयितुम्, तस्मात् एषां न सुखस्याभ्युपायः कर्म, कथं यो न शक्नुते कर्त्तुम्, सोऽभ्युपायः स्यात् ? इति। न देवानां, देवतान्तराभावात्- न हि आत्मानम् उद्दिश्य त्यागः सम्भवति, त्याग एवासौ न स्यात्, न अधीक्षाम्, आर्षेयाभावात् न ऋग्वादयो ऋग्वादिभिः सगोत्रा भवन्ति, न चैषां सामर्थ्यं प्रत्यक्षम्। "अपि च तिर्य्यङ्नो न कालान्तरफलेन अर्थिनः, आसन्नं हि कामयन्ते। "ननु च उक्तं, कालान्तरफलार्थिनः तिरश्चः पश्यामः, गुनः श्येनांश्चतईश्याम् अष्टमग्रां च उपवसतः" इति उच्यते न जन्मान्तरफलार्थिन उपवसन्ति। 'कथं अवगम्यते ? वेदाध्ययनाभावात्, ये वेदमधीयते ते एतद्विदुः, "इदं कर्म कृत्वा, इदं फलमस्मै प्राप्नोति इति" न चैते वेदमधीयते, नापि स्मृतिशास्त्राणि, नाप्यन्येभ्यः अवगच्छन्ति, तस्मात् न विदन्ति धर्मम्। अविदांसः कथम् अनुतिष्ठेयुः, तस्मात् न धर्म्माय उपवसन्ति इति। किमर्थं तर्ह्यर्थाय उपवासः ?। उच्यते, रोगात् अरुचेरेषाम् । कथं पुनर्भियते काले रोगो भवति ?। उच्यते नियतकाला अपि रोगा भवन्ति यथा तृतीयकाश्चातुर्थकाश्चेति। तस्मात् मनुष्याणाम् अधिकारः इति। न च तिरश्चां द्रव्यपरिग्रहः, न हि एते द्रव्यं स्वेच्छया उपयुञ्जना दृश्यन्ते, तस्मात् अनीशाना धनस्य। यत्तु, देवयामो हविष्यामः इति, उपचारमात्रं तत्। तस्मात् अपि न तिरश्चाम् अधिकारः इति। यानि पुनर्लिङ्गानि, "देवा वै सत्रमासत" इत्येवमादीनि, अर्थवादाः ते विधिप्ररोचनार्थाः। विद्यते हि विधिरन्यः तेषु सर्वेषु,

न च विधेर्विधिनैक्यवाक्यभावो भवति, वचनव्यक्तिभेदात्। स्तुतिस्तु सा, इत्थं नाम सत्राणि आसितव्यानि, यत् कृतक्रत्या अपि आसते देवाः, आसन्नचेतना अपि तिर्यञ्चः, अचेतना अपि वनस्पतयः, किमङ्ग पुनर्विद्वांसो मनुष्या" इति भा०। ब्रह्मविद्यायान्तु सर्वेषां देवादीनामधिकार इति "तदुपर्यपि बादरायणः सम्भवात्" इति शा०सूत्रेण व्यवस्थापितं, व्याख्यातञ्चैतत् शाङ्करभाष्ये यथा "वाढं मनुष्यानधिकारोऽत्र शास्त्रं न तु मनुष्यानेवेतीह ब्रह्मविज्ञाने नियमोऽस्ति तेषां मनुष्यात्वासुपरिष्टात् ये देवादयस्तान व्यधिकरोति शास्त्रमिति बादरायण आचार्यो मन्यते कस्मात् ? सम्भवात्। सम्भवति हि तेषामर्थित्वाद्यधिकारकारणम्। तत्रार्थित्वं तावत् मोक्षविषयं देवादीनामपि, सम्भवति विकारविषयविभूत्यनित्यतालोचनादिनिमित्तम्। तथा सामर्थ्यमपि तेषां सम्भवति मन्त्रार्थवादेतिहासपुराणलोकेभ्यो विग्रहवत्त्वाद्यवगमात्। नच तेषां कश्चित् प्रतिषेधोऽस्ति। नचोपनयनादिशास्त्रेणैषामधिकारो निवर्त्तितः उपनयनस्य वेदाध्ययनार्थत्वात् तेषाञ्च स्वयंप्रतिभातवेदत्वात्। अपि चैषां विद्याग्रहणार्थं ब्रह्मचर्य्यादि दर्शयति "एकशतं ह वै वर्षाणि मघवान् प्रजापतौ ब्रह्मचर्य्यमुवास" "भृगुर्वै वारुणिर्वरुणं पितरमुपससाद अधीहि भगवो! ब्रह्मेत्यादि"। यदपि कर्मस्वनधिकारकारणमुक्तम्, न देवानां, देवतान्तराभावात्। न कर्मणोऽन्यैवान्तराभावादिति। न तद्विद्यास्ति न क्षीन्द्रादीनां विद्यास्वधिक्रियमाणानामिन्द्राद्युद्देशेन किञ्चित् कर्म्मास्ति न च भृग्वादीनां भृग्वादिसगोत्रतया। तस्माद्देवादीनामपि विद्यास्वधिकारः केन वार्य्येत ? इति"। ततश्च विहितत्वकर्मफलार्थित्व-तत्तत्कर्मकरणसमर्थत्वापर्य्युदस्तत्वानि अधिकारप्रयोजकानीति सिद्धम् तत्रापि विधानेन सर्वकर्मत्यागरूपे सन्न्यासे विप्रस्यैवाधिकार इति सर्वेषादिसम्मतम् द्विजमात्राणामधिकार इति केषाञ्चिन्मतम्। अधिकमाकरे दृश्यम्। क्वचिच्चाधिकृतस्यैवाधिकारः। यथा दर्शाद्यधिकृतस्य प्रयाजादिष्वधिकारः "प्रधानाधिकारो ह्यङ्गाधिकारी भवतीति" न्यायात्। "तास्वेतावाधिकारौ दत्त इति" हितो०। "हृताधिकारां मलिनामिति" स्मृतिः। कर्मणि घञ्। "कर्त्तव्ये "स्वाधिकारे प्रमत्त" इति भेद०। प्रकरणे, व्याकरणशास्त्रे पूर्वसूत्रोपात्तपदादेरुत्तरत्र सूत्रेषु अनुवर्त्तने। "अधिकारोऽयम् आ पञ्चमाध्यायसमाप्तेरिति" सि०कौ०। तत्राधिकारश्च प्रत्ययादिकर्म्माद्यर्थसूत्तरोत्तरसूत्रेषु पूर्वसूत्रोपात्तशब्दस्यानुवर्त्तनम्। यथा "प्रत्ययः, परश्च" इति सूत्रोपात्तप्रत्ययपरशब्दयोः आ पञ्चमाध्यायसमाप्तेः सर्व्वत्र सूत्रेषु अनुवर्त्तनम्। स चाधिकारः त्रिविधः "सिंहावलोकितं चैव मण्डूकप्लुतमेव च। गङ्गाप्रवाहवच्चापि अधिकारस्त्रिधा मतः" इत्युक्तभेदत्रयात्। तदुदाहरणन्तु व्याकरणेऽवगम्यम्। नियोज्यतया विधयीकरणे, "सर्व्वाधिकारं शास्त्रमिति" जै०सू०। तदभिप्रायेण "वाढं मनुष्यानधिकारोऽत्र शास्त्र"मिति मनुष्याधिकारत्वाच्छास्त्रस्येति" च शा०भा०। सर्वमधिकरोति कर्म्मण्युपपदे अण् एवमेव मनुष्याधिकारत्वादित्यत्रापि

अधिकारविधि पु० अधिकारे फलस्वाम्ये विधिर्विधानम्। मीमांसकोक्ते विधिभेदे कर्मजन्यफलभोक्तृतात्पर्य्यके विधौ यथा स्वर्गकामो यजेत इत्यनेन यागजन्यफलभोक्ता स्वर्गकामीति ज्ञायते। तत्र नियोज्यप्रवर्त्तनाविधिः अधिकारः यथा "राजा राजसूयेन यजेतेति" तत्र राजसूये राज्ञ एव नियोज्यतया तत्र प्रवर्त्तनात्तस्य तथात्वम् स्वस्वकर्मणि नियोगे च।

अधिकारिता स्त्री अधिकारिणो भावः तल्। विहितफलार्थित्वकर्म्मकरणशक्तिमत्त्वापर्य्युदस्तत्वप्रयोज्ये अधिकारे "भार्य्यापुत्रविहीनस्य—नास्ति यज्ञेऽधिकारितेति" स्मृतिः। भावार्थे त्व। अधिकारित्वम् अत्रैवार्थे न०।

अधिकारिन् त्रि० अधिकरोति अधि+कृ-णिनि। स्वामिनि विहितकर्मफलभोक्तरि, शास्त्रेण कर्त्तव्यतोपदेशेन नियोजिते, कामनाविषयफल-तदुपायोपदेशेन प्रवर्त्तिते च स्त्रियां ङीप्। वेदान्तमतसिद्धे अनुबन्धचतुष्टयमध्ये अनुबन्धभेदे वेदान्तसारे वेदान्तशास्त्रालोचनहेतुभूतानुबन्धचतुष्टयनिरूपणाय "अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थः इह जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्ज्जनपुरस्सरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्म्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाते"त्युक्तम्। स चाधिकारी उत्तममध्यमभेदेन त्रिविधः "अधिकारित्रैविध्याच्च नियम" इति "अधिकारिभेदाच्च नियम"इति च सांख्यसूत्राभ्यां तथोक्तेः। तत्र उत्तमाधिकारिणः विधानेन विहितसर्वकर्मत्यागपूर्व्वकं निराकारब्रह्मज्ञानेऽधिकारः, मध्यमाधिकारिणः विहितवर्णाश्रमादि कर्म्मकरणपूर्व्वकं सोपाधिब्रह्मोपासने, अधमस्य तु वर्णाश्रमविहितकर्म्मविधानपूर्व्वकं साकारब्रह्मोपा-

सने "वे सन्यास्ते तु सञ्जन्ते ब्रह्मणोरूपकल्पने" इत्युक्तेः। अतएवोक्तम् "प्रशान्तचित्ताय जितेन्द्रियाय प्रहीणदोषाय यथोक्तकारिणे-प्रदेयमेतत् सततं सुसूक्ष्मे" इति। अत्र यथोक्तकारिणे इत्यनेन प्राक् ज्ञानोत्पत्तेः वर्णाश्रमविहितं कर्मानुष्ठेयमेवेत्युक्तं शा० स्थलेऽपि "विहितत्वादाश्रम कर्मापि" इत्युक्तम् गीतायामपि "आरुरुक्षोर्मुनेर्योगः कर्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते" इत्यनेन आरुरुक्षोः यथोक्तकर्माधिकारः उक्तः "कषाये कर्मभिः पक्वे ततो ज्ञानं प्रजायते" इत्यनेन कषायशब्दवाच्यचित्तदोषक्षयार्थं कर्मावश्यकतेत्युक्तम्। "द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव चेति" श्रुतावप्यधिकारिभेदात् निराकरणोपाधिकयोः द्वयोर्ब्रह्मणोर्वेदितोक्ता। गीतायामपि "लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ! ज्ञानयोगेन सांख्यानां, कर्मयोगेन योगिनामिति" अधिकारिभेदात् ज्ञानकर्मणोरधिकार इत्युक्तम्। "समक्ष् संसाधनं कर्म कर्त्तव्यमधिकारिणा। निष्कामेण सदा पार्थ! कामंत्र कामान्तिन चेति" भवि०पु०। "अधिकारिणाऽर्घिना विदुषा समर्थनेति" रघु० तेन विहस्तं तत्तत्कर्मजन्यफलार्थित्वम् तत्तत्कर्म्मकरणयोग्यत्वम् अपर्युदस्तत्वञ्च अधिकारिताप्रयोजकम्। तत्र फलार्थित्वञ्च सति कामे एव, सुसूक्ष्मे तु न फलार्थित्वावश्यकतेति भेदः। मार्कण्डेयपुराणे रुचिवाक्येन "पितृभक्ते दिवि ये च मूर्त्ताः स्वधाभुजः कामफलाभिसन्धौ। प्रदानशक्ताः सकलेप्सितानां विमुक्तिदा येऽनभिसंहितेषु" इति अनेन फलार्थिनं प्रति तत्तत्फलदातृत्वं, तदनर्थिनं सुसूक्ष्मं प्रति मुक्तिदातृत्वमिति स्पष्टमुक्तम् एवं देवतानामप्यधिकारिभेदेन फलदातृत्वम्। अनभिसंहितेषु अनुद्दिष्टेषु फलेष्वित्यर्थः। अधिकारोऽस्यास्ति इनि। स्वामित्ववति "सर्वे स्वरधिकारिण" इति स्मृतिः स्त्रियां ङीप्। "कृतात्र देवी वचनाधिकारिणीति नैष०।

अधिकार्थवचन न० अधिकार्थस्य स्तुतिनिन्दाभ्यामारोपितस्य वस्तुधर्म्मादतिरिक्तस्य गुणस्य वचनम्। स्तुत्यर्थवादे, निन्दार्थवादे च। यथा वातच्छेद्यं तृणमित्यत्र दुर्बलत्वेन निन्दा, काकपेया नदीत्यत्र च पूर्णजलत्वेन स्तुतिः गम्यते "स्तुतैरधिकार्थवचने" इति पा०।

अधिकाम पु० अधिकः कामः। अत्यन्ताभिलाषे। ब०। तद्वति त्रि०। कामे विभक्त्यर्थे अव्य०। काममधिकृत्येत्यर्थे अव्य०।

अधिकृच्छ्र पु० अधिकं कृच्छ्रं कष्टं साधनतयाऽस्यास्य अच्। "बिल्वैरामलकैर्वापि कपित्थैरथवा शुभैः। मासेन लोके ऽधिकृच्छ्रः कथ्यते द्विजसत्तमैः" इति (यङ्ग्रस०) उक्ते माससाध्ये व्रतभेदे। प्रा०स०। अधिककष्टे न०। तद्वति त्रि०।

अधिकृत पु० अधि+कृ-क्त। आयव्ययादावेक्षके, अध्यक्षे कर्म्मजन्यफलसम्बन्धिनि नियुक्ते, स्वामित्ववति च त्रि०। "महीपतीनां पृथगर्हणार्थं समादिदेशाधिकृतानधिश्रीरिति" रघुः।

अधिकृति स्त्री अधि+कृ-क्तिन्। अधिकारे। [आरोहणे।

अधिक्रम पु० अधि+क्रम-भावे घञ्। अमन्त्रत्वान्न इडिः।

अधिचित् त्रि० अधि+भावे कर्त्तरि वा क्विप्-तुक् च। परिचये, तत्कारिणि च। "विशामासामभयानामधिचित्तम् ऋ० १०,९२,२४।

अधिक्षिप्त त्रि० अधि+क्षिप-क्त। स्थापिते, निन्दिते, कृताधिक्षेपे, प्रेरिते, तिरस्कृते च।

अधिक्षेप पु० अधि+क्षिप-भावे घञ्। तिरस्कारे, स्थापने, प्रेरणे च।

अधिगत त्रि०अधि+गम कर्म्मणि-क्त। प्राप्ते, ज्ञाते च। "अधिगतं विधिवत् यदपालयदिति" रघुः "अधिगतसकलकलाकलापकमिति" काद०। अधिगताखिलवेदार्थ" इति वे०सा०।

अधिगम पु० अधि+गम-घञ्। ज्ञाने, प्राप्तौ, स्वीकारे च। "अध्यात्मयोगाधिगमेनेति" गीता। निध्यादेः प्राप्तौ च। "स्वामी सकृत्कृयसंविभागपरिग्रहाधिगमेष्विति" गौत०। "अधिगमो निध्यादेः प्राप्तिरिति" मिता०।

अधिगव अव्य० गवि विभक्त्यर्थे अव्ययी० वेदे अच् समा०। गवीत्यर्थे "खादीयो यदधिगवं चीरमिति" वेदः।

अधिगुण पु० अधिको गुणः प्रा०स०। अतिशयितविनयादिगुणे। ब०। तद्वति त्रि०। "याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा" इति नीति०। गुणे-विभक्त्यर्थे अव्ययी०। गुणमधिकृत्येत्यर्थे अव्य०। अधिगतो गुणो येन। ज्याधिरूढे धनुषि न०।

अधिजिह्व पु० अधिका जिह्वा यस्य। द्विजिह्वे सर्पे तस्य द्विजिह्वत्वञ्च अस्तास्वादायया कुशविलेहनात्। यथोक्तं भा०आ०प०। "यत्तैतदहृतञ्चापि स्थापितं कुशसंस्तरे। तद्विज्ञाय हृतं सर्पैः प्रतिमायाञ्चतच्च तत्। सोमस्थानमिदञ्चेति दर्भांस्ते लिलिहुस्तदा। ततो द्विधाकृता जिह्वा सर्पाणां तेन कर्म्मणा। अभवंश्चाहृतस्यार्द्भाग्भाग्योऽथ पवित्रिणः। एवं तदहृतं तेन हृतमाहृतमेव च। द्विजिह्वाश्च कृताः सर्पा गरुडेन महात्मना" इति।

अधिजिह्विका स्त्री जिह्वेव इवार्थे कन् अधिरूढा जिह्विका वा । (आलजिभ) उपजिह्वायाम् ।

अधिज्य न० अध्यारूढा ज्या यत्र प्रा०ब०, अधिगतं ज्यां वा अत्या०स० । आरोपितगुणके धनुषि "त्वयि चाधिज्यकार्मुके" इति शकु० ।

अधिज्योतिष अव्य० ज्योतिषि विभक्त्यर्थे अव्ययी० अच् समा० । सूर्यतारकादिज्योतींष्यधिकृत्येत्यर्थे ।

अधित्यका स्त्री अधि+त्यकन् । पर्वतस्योपरिभूमौ । "आरूढं स्वत्यधित्यकेति" सि०कौ० । "स्थाणुं तपस्त्यनमधित्यकायामिति" कुमा० । "अधित्यकायामिव धातुमय्यामिति" रघुः ।

अधिदन्त पु० अध्यारूढो दन्तम् अत्या०स० । दन्तोपरि जातदन्ते (गजदाँत) । प्रा०ब० । तद्वति त्रि० । दन्ते विभक्त्यर्थे अव्ययी० । दन्तमधिकृत्येत्यर्थे अव्य० ।

अधिदेव पु० अधिकृतोदेवः येन गुणातिशयात् प्रा०ब० । सर्वदेवाधिपे परमेश्वरे । देवे विभक्त्यर्थे अव्ययी० । देवमधिकृत्येत्यर्थे अव्य० । अधिदेवं भवः ठञ् । आनुगतिका० द्विपदवृद्धिः । आधिदैविक देवेभ्यो जाते दुःखादौ त्रि० ।

अधिदेवता स्त्री अधिष्ठात्री देवता प्रा०त० । अधिष्ठात्र्यां देवतायाम् । देवतानाम् अधिष्ठातृत्वञ्च सन्निधानमात्रेण तत्तत्पदार्थानां तत्तत्कर्मसु नियन्तृत्वरूपम् । तच्च साक्षात् परमेश्वरस्यैव यथोक्तम् बृ०उ० अन्तर्यामि ब्राह्मणे । "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो, यं पृथिवी न वेद, यस्य पृथिवी शरीरं, यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ योऽप्सु तिष्ठन्नद्भ्योऽन्तरो, यमापो न विदुर्यस्यापः शरीरं, योऽपोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । योऽग्नौ तिष्ठन्नग्नेरन्तरो यमग्निर्न वेद, यस्याग्निः शरीरं, योऽग्निमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । योऽन्तरिक्षे तिष्ठन्नन्तरिक्षादन्तरो, यमन्तरिक्षं न वेद यस्यान्तरिक्षं शरीरं योऽन्तरिक्षमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो वायौ तिष्ठन्वायोरन्तरो, यं वायुर्न वेद, यस्य वायुः शरीरं, यो वायुमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो दिवि तिष्ठन्दिवोऽन्तरो, यं द्यौर्न वेद, यस्य द्यौः शरीरं, यो दिवमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । य आदित्ये तिष्ठन्नादित्यादन्तरो, यमादित्यो न वेद, यस्यादित्यः शरीरं, य आदित्यमन्तरो, यमयत्येष त आत्मान्तर्याम्यमृतः । यो दिक्षु तिष्ठन्दिग्भ्योऽन्तरो, यं दिशो न विदुर्यस्य दिशः शरीरं, यो दिशोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यश्चन्द्रतारके तिष्ठंश्चन्द्रतारकादन्तरो, यञ्चन्द्रतारकं न वेद, यस्य चन्द्रतारकं शरीरं, यश्चन्द्रतारकमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । य आकाशे तिष्ठन्नाकाशादन्तरो, यमाकाशो न वेद, यस्याकाशः शरीरं, य आकाशमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यस्तमसि तिष्ठंस्तमसोऽन्तरो, यं तमो न वेद, यस्य तमः शरीरं, यस्तमोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यस्तेजसि तिष्ठंस्तेजसोऽन्तरो, यं तेजो न वेद, यस्य तेजः शरीरं, यस्तेजोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इत्यधिदैवतम् । अथाधिभूतम् यः सर्वेषु भूतेषु तिष्ठन्सर्वेभ्यो भूतेभ्योऽन्तरो, यं सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीरं, यः सर्वाणि भूतान्यन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इत्यधिभूतम् । अथाध्यात्मम् यः प्राणे तिष्ठन्प्राणादन्तरो, यं प्राणो न वेद, यस्य प्राणः शरीरं, यः प्राणमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो वाचि तिष्ठन्वाचोऽन्तरो, यं वाङ्न वेद, यस्य वाक् शरीरं, यो वाचमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यश्चक्षुषि तिष्ठंश्चक्षुषोऽन्तरो, यं चक्षुर्न वेद, यस्य चक्षुः शरीरं, यश्चक्षुरन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यः श्रोत्रे तिष्ठञ्छ्रोत्रादन्तरो, यं श्रोत्रं न वेद, यस्य श्रोत्रं शरीरं, यः श्रोत्रमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो मनसि तिष्ठन्मनसोऽन्तरो, यं मनो न वेद, यस्य मनः शरीरं यो मनोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यस्त्वचि तिष्ठंस्त्वचोऽन्तरो, यं त्वङ्न वेद, यस्य त्वक् शरीरं, यस्त्वचमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो विज्ञाने तिष्ठन्विज्ञानादन्तरो, यं विज्ञानं न वेद, यस्य विज्ञानं शरीरं, यो विज्ञानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो रेतसि तिष्ठन्रेतसोऽन्तरो, यं रेतो न वेद, यस्य रेतः शरीरं, यो रेतोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतोऽदृष्टो द्रष्टा,ऽश्रुतः श्रोता,ऽमतो मन्ता,ऽविज्ञातो विज्ञाता, नान्योऽतोऽस्ति द्रष्टा, नान्यतोऽस्ति श्रोता, नान्यतोऽस्ति मन्ता, नान्यतोऽस्ति विज्ञातैष त आत्मान्तर्याम्यमृतोऽतोऽन्यदार्त्तम्" इति । तस्यैवांशविशेषेणाविर्भूतानां दिगाद्यभिमानिदेवानामिन्द्रियाधिष्ठातृत्वं यथा "वैकारिकादहङ्काराद्देवा वैकारिका दश । दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रका" इति शार० । "शक्तिसामर्थ्याद्विकृतपरमेश्वरादुत्पन्नत्वेनाऽहङ्कारस्य तदु-

तृपन्नदेवानाञ्च वैकारिकत्वमिति" राघवभट्टेन व्याख्यातम् । "वैकारिका दिगाद्याश्च चन्द्रेणैकादश स्मृताः । इन्द्रियाणामधिष्ठातृदेवास्ते परिकीर्त्तिता" इति तद्धृताभियुक्तोक्तिः । तथा च श्रोत्रस्य दिक्, त्वचो वातः, नेत्रस्य अर्कः, रसनायाः वरुणः, घ्राणस्य अश्विनौ, वागिन्द्रियस्य वह्निः, हस्तस्य इन्द्रः, पादस्य उपेन्द्रः, पायोः मित्रः, उपस्थस्य (कः) प्रजापतिः, मनसः चन्द्रः, इत्येते एकादशेन्द्रियाणामधिष्ठातृदेवाः । "ईश्वरं भास्करे विद्याद्गुहां विद्याच्चिशाकरे । स्कन्दमङ्गारके विद्याद्बुधे नारायणं विदुः । गुरौ वेदनिधिं विद्यात् शुक्रे शक्रो विधीयते । शनैश्चरे यमं विद्याद्राहोः कालं तथैव च । चित्रगुप्तोऽधिपः केतोरित्येते ग्रहदेवताः" इति (मत्स्यपुरा०) उक्ता ग्रहाणामधिदेवाः । एतेषां पुनरधिष्ठातृदेवाश्च प्रत्यधिदेवतात्वेन व्यवह्रियन्ते ते च प्रत्यधिदेवताशब्दे दर्शयिष्यन्ते । अधिदेवताप्यत्रैव । "आदित्याभिसुखाः सर्वे साधिप्रत्यधिदेवता" इति मत्स्यपु० । "शशाङ्कमूर्त्तेरधिदेवताकृतिरिति" भट्टिः । चन्द्राधिदेवता उमा ।

अधिदैवत न० अधिष्ठातृ दैवतम् प्रा०स० । अधिदेवताशब्दार्थे "शिवाधिदैवतं ध्यायेत् वह्निप्रत्यधिदैवतमिति" "विचिन्त्यो माधिदैवत"मिति च विष्णुध०पु० । दैवते विभक्त्यर्थे अव्ययीभावः । दैवतमधिकृत्येत्यर्थे अव्य० । "अथाधिदैवतम् आदित्यो वा" इति ऋग्वो० उ० "इत्यधिदैवतमिति इ०उ०" । अधिदैवमथत्र अव्य० । "अधिदैवं किमुच्यते इति" गीता ।

अधिनाथ पु० अधिको नाथः प्रा०स० । अधीश्वरे । "तत्राधिनाथमधिकृत्य दिवस्तथासाविति" नैष० ।

अधिनाय पु० अधिनीयते वायुना गन्धाधारस्थच्छ्रांगनयनद्वारा तत्तत्स्थानं क्षिप्यतेऽसौ अधि+नी-घञ् । गन्धे ।

अधिप पु० अधिपाति अधि+पा-क । प्रभौ ईश्वरे । "अथ प्रजानामधिपः प्रभाते" इति रघुः । "श्रियः कृष्णामधिपस्येति" भार० ।

अधिपति पु० अधिकः पतिः, अधि+पा-डति वा । ईश्वरे स्वामिनि "स वा एष सर्वेषां भूतानामधिपतिरिति" श्रुतिः । "सर्व्वस्याधिपतिर्हि स" इति मनुः । "ततो भुजङ्गाधिपतेः फणायैरिति" कुमा० । पत्यन्तत्वात् भावादौ यक् आधिपत्यम् । अत्यन्तैश्वर्य्ये न० । "शैलाधिपत्यं स्वयमन्वतिष्ठदिति" कुमा० । सपूर्व्वपदकत्वात् स्त्रियां ङीष् नद्यन्तादेशः । "विटङ्किनीं दिशामधिपत्नीमिति यजु० १४,५, अधिपत्नीं स्वामिनीमिति" दीपः ।

अधिपा त्रि० अधिपाति अधि+पा क्विप् अधिपतौ, अधिपालके च "सर्यदञ्चन्नधिपा उ अन्योऽभि" ऋ०७,८८,२ ।

अधिपुरुष पु० अधिकः उत्तमः पु(पू)रुषः प्रा०स० । परमेश्वरे । पु(पू)रुषे विभ० अव्ययी० । पु(पू)रुषमधिकृत्येत्यर्थे अव्य० । [वद्धप्रजायां स्त्री ।

अधिप्रज त्रि० अधिका प्रजा यस्य । बद्धप्रजायुक्ते । प्रा०स० ।

अधिभू पु० अभिभवति स्वामीभवति स्वाम्यर्थेऽत्राधिः अधि+भू-क्विप् । प्रभौ ।

अधिभूत अव्य० भूतेषु विभ० अव्ययी० । भूतान्यधिकृत्येत्यर्थे "अधिभूतं किमुच्यत" इत्यर्जुनप्रश्ने "अधिभूतं क्षरोभाव" इति भगवदुत्तरम् इति गीता । "भूतं प्राणिमात्रमधिकृत्य भवतीत्यधिभूतमुच्यते" इति श्रीधरः । अधिभूतं भवः अनुगतिका० द्विपदत्वात् आधिभौतिकम् । भूतान्यधिकृत्य जाते दुःखादौ त्रि० ।

अधिभोजन न० अधिकमत्यन्तं भोजनम् प्रा०स० । अत्यन्तभोजने । भोजनं निरुक्ते धननामसु पठितम् अधिकं धनं मूल्यं यस्य । अतिमूल्यलभ्ये वस्तुनि त्रि० । "दश वस्त्राधिभोजना इति ऋ०६,४७,२२ अधिभोजना अधिकं धनं मूल्यं येषां तादृशानि दश वस्त्राणीति भाष्यम् ।

अधिमन्थ पु० अधिकं मथ्यतेऽनेन अधि+मन्थ-करणे घञ् । "उत्पाद्यत इवार्त्थं नेत्रं निर्मथ्यते तथा । शिरसोऽर्द्धं हृतं विद्यादधिमन्थं स्वलक्षणैः" इत्युक्ते अरक्षिकाक्षिमन्थनावयवभेदे ।

अधिमांस न० अधिकं मांसमत्र । "विस्तीर्णं स्तब्धं बद्धमूलं यकृत्प्रकारं श्यावं वा तदधिमांसजाभं विद्यादिति" वैद्यकोक्ते रोगभेदे ।

अधिमांसक पु० अधिको मांसो यत्र ब० कप् । "हनूस्थे पक्ष्मिले दन्ते महागोथो महारुजः । कालाम्लायी कफकृतो विज्ञेयः सोऽधिमांसक" इति वैद्यकोक्ते दन्तरोगविशेषे ।

अधिमात्र त्रि० अधिका मात्रा यस्य, अधिकं प्रमाणमस्य मात्रच् वा । अधिकप्रमाणे ।

अधिमास पु० अधिको रविमासादतिरिक्तः शुक्लप्रतिपदादिदर्शान्तश्चान्द्रो मासः प्रा०स० । मलमासे "असंक्रान्तमासोऽधिमासो निरुक्त"इतिरूत्युक्तो रविसंक्रान्तिवर्जितो मासोऽधिमासः । तथा हि "मीनादिस्थो रवियेंमासारम्भः प्रथमे क्षणे । ते चैत्राद्या" इत्युक्तदिशा मीनस्थे रवौ यस्य चान्द्रमासस्यारम्भः स चैत्रः एवं मेषस्थरवारम्भो वैशाख

इत्येवं स्थिते यस्मिन् चान्द्रमासे रवेः राश्यन्तरसंक्रमो न जातः, तस्य तदुत्तरस्य च चान्द्रमासस्य उभयोर्मध्यस्थे रवौ सारस्नात् उभयोरपि वैशाखता, तत्राद्योऽधिमासः संक्रान्तिहीनत्वात् द्वितीयः शुद्धः इति स्मृतौ प्रसिद्धम्। यथा मलमासतत्त्वे लघुहारीतः॥ "इन्द्राग्नी यत्र ह्यर्यते" इत्युक्त्वा "तमतिक्रम्य तु रविर्यदा गच्छेत् कथञ्चन। आद्योमलिम्लुचोऽन्योद्वितीयः प्रकृतः स्मृतः। तस्मिंस्तु प्रकृते मासि कुर्य्यात् श्राद्धं यथाविधि। तथैवाभ्युदयं कार्यं नित्यमेकं तु सर्वदा"। "यदा तं दर्शान्तमासमतिक्रम्य तत्पूर्वमासान्त्यक्षणदक्षिणराशिस्थः सन् सूर्य्योऽतिवाह्य गच्छेत् मासान्तरे राश्यन्तरसंयोगं गच्छेत्तदाद्योऽतिक्रान्तोमासोमलिम्लुचोज्ञेयः"।ज्योतिषे।"अमावास्याद्वयं यत्र रविसंक्रान्तिवर्जितम् मलमासः स विज्ञेयोविष्णुः स्वपिति कर्कटे"।"अमावास्याद्वयं अमावास्यान्त्यक्षणद्वयं रविसंक्रान्तिभ्यां क्रियोत्पत्तिरूपोत्तरसंयोगरूपाभ्यां यथाक्रमं वर्जितं तेन दर्शान्त्यक्षणद्वययोरेव क्रियोत्पत्त्युत्तरसंयोगाभ्यां यथाक्रमं संयोगेनाधिमासः। संक्रान्तेरेकक्षणे क्रियोत्पत्तिरपरक्षणे पूर्वसंयोगनाशः उत्तरसंयोगोत्पत्तिश्चेति क्षणद्वयवृत्तित्वमिति मीमांसकसिद्धान्तात्"। स्मृत्यर्थसारे ज्योतिः-पराशरौ। "रविणा लङ्घितोमासश्चान्द्रः स्यात्तोमलिम्लुचः। तत्र यद्विहितं कर्म्म उत्तरे मासि कारयेत्" पराशरः। "पक्षद्वयेऽपि संक्रान्तिर्यदि न स्यात् सितासिते। तदा तन्मासविहितमुत्तरे मासि कारयेत्"। अत्र लङ्घनमसंक्रमणञ्च रवेस्तदा भवति यदा तन्मास तत्पूर्वमासान्त्यक्षणयोरेकराश्यवस्थितस्य तन्मासानन्तर-संयोगः, न त्वेकराशिस्थितस्य मासव्यापनमात्रं तथात्वे चतुर्ष्वमासेष्वेकराशौ संक्रान्तस्य प्रतिपत्प्रथमक्षणेऽपररात्रौ, तत्पररात्रौ च द्वितीयायां प्रतिपदि वा रवेः संयोगेऽपरस्यापि मलमासता स्यात्"। अतएव ज्योतिषे "अमावास्यापरिच्छिन्नं रविसंक्रान्तिवर्ज्जितम्। मलमासं विजानीयाद्गर्हितं सर्वकर्म्मसु। तस्यार्कोदयकक्षैकराशौ दर्शद्वयातिगः"। "अत्रैकराशिस्थार्कस्य दर्शद्वयातिगत्वमुक्तम्। एतच्च पूर्वोपदर्शितयोर्मासयोः पूर्व्मस्यैव सम्भवति न परस्य"। मलमासकारणन्तु ज्योतिषे। "दिवसस्य खरत्र्यंकषष्टिभागमितौ सदा। करोत्येकमहश्छेदं तथैवैकञ्च चन्द्रमाः। एवमर्कतृतीयानामह्नामधिमासकम्। शीघ्रे जनयतः पूर्व्वं पञ्चाब्दान्ते तु पश्चिमम्"। "तेन दिवसस्य तिथेः षष्टिभागं दग्धुमेकं रविर्हरति भेदयति उत्तरे भेदमित्यभिधानात्। ततश्च ऋतौ मासद्वये षष्टिनाड़ीच्छेदादङ्गीकृतेष्वेदमाकर्षणं करोति। एवं चन्द्रोऽपि। एवमित्युक्तक्रमेण वर्षे द्वादश तिथ्यात्मककालाकर्षादर्कतृतीयानामन्ते अर्कं तृतीयं येषां ते तथा। शीघ्रे माधवादिषु षट्केषु पूर्वं माधवादिकपतितं, पञ्चाब्दान्ते तु पश्चिमं श्रावणादिकपतितं मलमासञ्चन्द्रार्कौ जनयतः"। मिश्रिरः। "माधवादिषु षट्केषु मासि दर्शद्वयं यदा। द्विराषाढः स विज्ञेयः शेते तु श्रावणेऽच्युतः। "मिथुनोपगतो भानुरमावास्याद्वयं स्पृशेत्। द्विराषाढः स विज्ञेयोविष्णुः स्वपिति कर्कटे"। "अमावास्याद्वयं तदन्त्यक्षणद्वयं स्पृशेत् संयुज्यात् न तन्मध्ये राश्यन्तरसंयोग इत्यर्थः"। "कन्यासिंहकुलीरेषु यदा दर्शद्वयं भवेत्। आगामिनि तदा वर्षे कुलीरे माधवः स्वपेत्"। यद्यपि "यां तिथिं समनुप्राप्य तूलां गच्छति भास्करः। तयैव सर्वसंक्रान्तिर्यावन्नैव न गच्छति" इति "राजमार्त्तण्डवचनात्तुलादिषण्मासे तिथिषट्कभावाद्यैं द्वादशषट्कि-रनुपपन्ना तथापि "मध्ये विषुवतोर्भानुर्यान्यर्क्षाणि तु वर्द्धयेत्। तैः सम्भूयाधिकोमासः पतत्येव त्रयोदशः" इति "षट्त्रिंशत्परिशिष्टवाक्ये विषुवतोर्मेषतुलासंक्रान्त्योर्मध्ये मेषादिषण्मास एव तिथिषट्कवृद्धया अहर्गणने मेषादिषण्मासे मन्दभुक्त्या सप्तदिनषट्कितुलादौ शीघ्रभुक्त्या दिनद्वयह्रासः" इति तथा च ज्योतिःशास्त्रम् "मेषादीनामहर्वृन्दं यस्यां सप्ताष्टचन्द्रकम् (१८७)। तुलादीनामष्टसप्तचन्द्रकन्तु(१७८) लिखेत् पृथक्"। "चन्द्र एकः "अङ्कस्य वामा गतिः" इत्यङ्कविदां समयात् व्युत्क्रमेणाङ्का बोध्याः। तेन दिनषट्कि ५ क्रमसङ्ख्याभ्यां ६ मेषादिषट्के एव एकादशतिथिषट्कि:"। एवञ्च "गतेऽब्दहितये सार्द्धे पञ्चपक्षे दिनद्वये। दिवसस्याष्टमे भागे पतत्येकोऽधिमासकः"। इति "राजमार्त्तण्डोक्तः सप्तदशदिनाधिकाष्टमासाधिकवर्षद्वयेऽधिमासः। स च सौरे मासि सप्तदशदिनोत्तरं चान्द्रमासलङ्घनासम्भवात् सावनमानेन ज्ञेयः इति"। सिद्धान्तशिरोमणौ तु ४३२०००००० कल्पप्रमाणवर्षेषु १५८३३०००० एतन्मिता अधिमासाभवन्तीत्युक्तम् यथा "लक्षाकृता देवनवेषुचन्द्राः कल्पेऽधिमासाः कथिताः सुधीभिरिति"। "अतोपपत्तिः प्रकृतास्तावद्विमासास्तेभ्यश्चान्द्रमासा यावद्भिरधिकास्तावन्तोऽधिमासा" इति। तदेवाह। "रवेः कोटिनिघ्नाः खताऽरेन्द्वाशाः" ५१८४००००००० "खरामखाब्धिरामेभवो लक्षनिघ्नाः५२४३३३२०००० ।

शाशाङ्कसूत्र मासाः पृथक् सूर्य्यमासैर्विहीनास्तु कल्पेऽधवा तेऽधिमासाः इति"॥ इदानीं अधिमासानयनं तत्रैवोक्तं यथा "कथितकल्पगतार्कसमागमो रविगुणो गतमाससमन्वितः। खदहनैं (३०) र्गुणितस्त्रिहिसंयुतः पृथगतोऽधिकमाससमाहृतात् (१५८३३०००००) ॥ रविदिना (१५५५२००-०००००००)प्रगताधिकमासकैः कृतदिनैः सहितो द्युगणो विधोः" इति। अत्र वासना कल्पगताब्दा द्वादशगुणिता रविमासा जातास्ते चैत्रादिगतचान्द्रतुल्यैः सौरैरेव युतास्त्रिंशद्गुणा इष्टमासप्रतिपदादिगततिथितुल्यैः सौरैरेव दिनैर्युताः एवन्ते सौरा जातास्तेभ्यः पृथक् स्थितेर्योऽधिमासानयनं त्रैराशिकेन, यदि कल्पसौरदिनैः कल्पाधिमासा लभ्यन्ते तदैभिः किमिति फलम् गताधिमासाः। तै र्दिनीकृतैः पृथक् स्थितः सौराहर्गणसहितचान्द्रो भवति यतः सौरचान्द्रान्तरमधिमासदिनान्येव" इति। सूर्य्यसिद्धान्तोऽप्युक्तम्। "भवन्ति यत्रिणो मासाः सूर्य्येन्दुभगणान्तरम्। रविमासोनितास्ते तु शेषाः स्युरधिमासकाः" इति॥ सूर्य्यचन्द्रभगणयोरन्तरं चन्द्रस्य मासा भवन्ति ते चान्द्रमासा रविमासोनिताः सन्तः शेषा अवशिष्टा ये चान्द्रमासास्तेऽधिकमासा एव भवन्ति नान्ये। अनेन चान्द्रत्वमधिमासानां स्पष्टीकृतम्। अत्रोपपत्तिः। त्रिंशत्तिथ्यात्मकस्य रवीन्दुयुतिकालरूपदर्शान्तावधेश्चान्द्रस्य, द्वादशराश्यन्तरं त्वेकं भगणान्तरमतो भगणान्तरेण चान्द्रो मासः सिद्धः। सौरमासापेक्षया यदन्तरेण चान्द्रमासानामधिकत्वं त एवाधिमासा इति।

अधियज्ञः पु० अधिकृतोयज्ञो यस्मात् प्रा०ब०। परमेश्वरे। "अधियज्ञः कथं? कोऽत्रे"त्यर्जुन प्रश्ने। "अधियज्ञोऽहमेवात्र देहे देहभृतां वर!" इति भगवदुत्तरम् गीतायाम्। "अत्राक्षिन् देहेऽन्तर्यामित्वेन स्थितोऽहमधियज्ञः यज्ञादिकर्म्मप्रवर्त्तकस्तत्फलदाता चेति" श्रीधरः। यथा च तस्य सर्व्वान्तर्यामित्वं तथा अधिदेवताशब्देऽन्तर्यामिब्राह्मणे पुरस्ताद्दर्शितम्। यज्ञे विभ० अव्ययी०। यज्ञमधिकृत्येत्यर्थे अव्य०। अधिवक्तुं ब्रह्म जगेदिति मनुः, आगे विभ०अव्ययी०। अधियागमभ्युक्तार्थे अव्य०। अधिकः अधिकाङ्कत्यागः प्रा०स०। अधिकाङ्के त्यागे पु०।

अधियोग पु० अधिकोयोगः प्रा०स०। ज्योतिषप्रसिद्ध यात्रिकशुभयोगे। स च गमनसमयलग्ने-तत्राद्या चतुर्थे, पञ्चमे, सप्तमे, नवमे, दशमे, वा अत्यतमस्थाने बुधजीवभार्गवाणां मध्ये द्वयोः स्थितौ सत्यां भवति। "योगे क्षेममथाधियोगगमने क्षेमं विपूणां वध इति" सङ्गः।

अधियोध पु० आधिक्येन युध्यति अधि+युध-अच्। अतियोद्धरि। विभ०अव्ययी०। योधे इत्यर्थे अव्य०।

अधिरथ अध्यारूढः रथं रथिनम् अत्रा०स०। अतिरथे। कर्णपितरि पु०। "विशेषाधिरथोरङ्गं यष्टिग्राहो ह्यधिरथेति" भा० आदि०। तस्यापत्यम् इञ्। आधिरथिः कर्णे पु०। कर्णपर्वणि भूरिप्रयोगोऽस्य।

अधिराज् पु० अधिराजते अधि+राज-क्विप्। साम्राज्यवति, स्वप्ने, सम्यक्स्वप्ने च "प्रायोपविष्टो गङ्गायामनाहत्याधिराट् श्रियमिति" भाग०। अधिकशोभान्विते त्रि०।

अधिराज पु० अधिको राजा टच् समा०। अधीश्वरे साम्राज्यवति, स्वप्ने च। "शैलाधिराजतनया न ययौ न तस्थावि"ति "हिमालयोनाम नगाधिराज" इति च कुमा०।

अधिराज्य न० अधिकं राज्यं प्रा०स०। साम्राज्ये। "अन्यान् पृथिवीपालान् पृथिव्यामधिराज्यभागिति"।

अधिराष्ट्र न० अधिकृतं राष्ट्रमत्र प्रा०ब०। राज्ये। विभ० अव्ययी०। राष्ट्रमधिकृत्येत्यर्थे अव्य०।

अधिरुक्म त्रि० अधिगतं रुक्ममाभरणं येन प्रा०ब०। अधिगतसुवर्णाभरणे मानवे। अधिरुक्मा विनीयते" इति ऋ० ८,४६,२२, अधिरुक्मा अधिकरुक्माभरणेति" भाष्यम्।

अधिरूढ त्रि० अधि+रुह-कर्त्तरि-क्त। उपरिभागे आरोहणकर्त्तरि, अतिदुष्टमति च। [शयेनारोपिते।

अधिरोपित त्रि० अधि+रुह-णिच्-युक् कर्मणि क्त। अति-

अधिरोहण न० अधि+रुह भावे-ल्युट्। उपर्य्यारोहणे। घञ्। अधिरोहोऽप्यत्र पु०।

अधिरोहणी स्त्री अधिरुह्यतेऽनया अधि+रुह-करणे ल्युट्। (मइ) इति, (सिढ़ि) इति च प्रसिद्धे काष्ठबंशादिनिर्म्मिते उच्चस्थानारोहणसाधने सोपानवृन्दे। अधिरोहः साधनत्वेनास्त्यस्याः इनि। अधिरोहिणीत्यप्यत्र इति शब्दकल्पद्रुमः तन्मूलं चिन्त्यम्। रायमुकुटादिभिः ल्युटैवतत्पदसाधनान्नास्य इन्नन्तता।

अधिलोक अव्य० लोके विभ० अव्ययी०। लोके इत्यर्थे।

अधिवक्तृ त्रि० अधि+वच-तृच्। पक्षपातेन वक्तरि। "विश्वाहेन्द्रो अधिवक्ता" इति ऋ० १,१००,१०, अधिवक्ता पक्षपातेन वचनयुक्त इति भा०। स्त्रियां ङीप्।

अधिवचन न० अधि+वच-ल्युट्। पक्षपातेन कथने। "अधिकवचनं पक्षपातेन वचन"मिति माधवाचार्य्यः।

अधिवस्त्र त्रि० अध्याहृतं वस्त्रं येन प्रा०ब०। उपरिनिहित वस्त्रे। "यत्तेभिराहृतोऽधिवस्त्रा वधूरिवेति" ऋ० ८,२ ६,१२, अधिवस्त्रा उपरिनिहितवस्त्रेति भा०।

अधिवाक पु० अधि-वच-घञ्। पक्षपातेन वचने। "तस्मिन्नेषु क्षितेष्वधिवाकाय हरन्ति" इति ऋ०८,१५,५, "अधिवाकाय पक्षपातवचनायेति" भा०।

अधिवास पु० अधि+वस निवासे-घञ्। निवासे "श्रीः कैटभारिहृदयैककृताधिवासेति" देवीमा०। अधि+वास सुरभीकरणे भावे घञ्। सौरभे "कक्षुश्चिकन्यावक्त्रान्तर्वासलब्धाधिवासयेति" माघः "अधिवासस्पृहयेव मारुत" इति रघुः। अधिवासयति देवता अनेन अधि+वस-णिच् करणे घञ्। यज्ञारम्भपूर्व्वदिवसे देवतास्थापनादिकर्म्मणि। "अधिवासः परेऽह्नीति" स्मृतिः "मध्यरात्रेऽधिवासयेदिति" सूत्रोक्तस्य पूर्व्वेद्युर्मध्यरात्रे कर्त्तव्यता। "आत्ययिकेषु कार्य्येषु सद्यएवाधिवासये"दित्युक्ते यागदिनेऽपि क्वचित् कर्त्तव्यता। गन्धमाल्याद्यैः संस्कारे च।

अधिवासन न० अधिवासयति स्थापयति देवता अनेन अधि+वस-णिच् ल्युट्। यागपूर्व्वदिने देवताद्यावाहनपूर्व्वकपूजनादिकर्म्मभेदे। अधिवास्यते सुरभीक्रियते अधि+वास सुरभीकरणे भावे ल्युट्। गन्धमाल्यादिभिः सुरभीकरणरूपसंस्कारभेदे तद्द्रव्यादि च "मही गन्धः खिला धान्यं दूर्व्वा पुष्पं फलं दधि। घृतं खस्तिकसिन्दूरं शङ्खकज्जलरोचनाः। सिद्धार्थं काञ्चनं रौप्यं ताम्रवामरदर्पणम्। दीपः प्रग्वस्त्रपात्रञ्च विज्ञेयमधिवासने" इति स्मृत्युक्तानि वेद्यादीनि। "सायं यज्ञान्तु कर्त्तव्यं पार्व्वत्या अधिवासनमिति" पुरा०।

अधिवासित त्रि० अधि+वास-सुरभीकरणे कर्म्मणि क्त। सुरभीकृते गन्धमाल्यादिभिः कृतसंस्कारे। अधि+वास-निवासे णिच् कर्म्मणि क्त। कृताधिवासने देवादौ।

अधिवाहन न० अधि+वह-णिच्-ल्युट्। उपरि प्रापणे वाहने, च। विभ०अव्ययी०। वाहनं यानमधिकृत्येत्यर्थेऽव्य०।

अधिविकर्त्तन न० अधि+वि+कृत-छेदने ल्युट्। अत्यन्तच्छेदने "आशासनं विशासनमथो अधिविकर्त्तनमिति" ऋ० १०,८५,३५।

अधिविद्य अव्य० विद्यायां विभक्त्य० अव्ययी०। विद्यामधिकृत्येत्यर्थे। "अधिविद्यं प्रकाशते इति" वाक्यपदीयम्।

अधिविन्ना स्त्री अधि+विद-लाभे कर्म्मणि क्त। कृताधिवेदनायां वस्त्रा उपरि विवाहान्तरं कृतं तस्यां स्त्रियाम् "अधिविन्नासु या नारी निर्गच्छेदुषिता गृहादिति" मनुः। अधिविन्नस्त्रियै देयमाधिवेदनिकं सममिति" याज्ञ०।

अधिवेत्तृ पु० अधि+विद-लाभे कर्त्तरि तृच्। विवाहोत्तरं विवाहान्तरकर्त्तरि।

अधिवेद अव्य० वेदे-विभक्त्य०अव्ययी०। वेदमधिकृत्येत्यर्थे। अधि+विद-भावे घञ्। विवाहोत्तरं विवाहान्तरकरणे पु०

अधिवेदन न० अधि+विद-लाभे भावे ल्युट्। विवाहोपरिविवाहान्तरकरणे। तत्र नियुक्तादि ठक्। आधिवेदनिकम् अधिवेदनविषयनियुक्ते तत्रलब्धे च धनादौ त्रि०। "अधिविन्नस्त्रियै देयमाधिवेदनिकं सममिति" याज्ञ०। "आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्त्तितमिति" स्मृतिः। अधिवेदनकालनिमित्ते तु मत्कृतवङ्गविवाहवादे विस्तरत उक्ते ततएवावसेये।

अधिवेदनीय स्त्री अधि+विद-लाभे कर्म्मणि-अनीयर्। यद्विवाहोपरि विवाहान्तरकरणयोग्यं ताडय्यां स्त्रियाम्। कर्म्मणि यत्। अधिवेद्याथत्र स्त्री। "बन्ध्याष्टमेऽधिवेद्याब्दे" इति मनुः। [ल्युट्। पाचने।

अधिश्रपण न० अधि+श्रा-पाके णिच्-युक् ह्रस्वश्च भावे

अधिश्रय पु०अधि+श्री-पाके भावे अच्। चूल्ल्यासुपरिस्थापनरूपे विक्लित्तिहेतुभूते व्यापारे, पाके।

अधिश्रयण न० अधि उपरि श्रयणं पाकार्थं स्थापनं श्रीञ्-भावे ल्युट्। चूल्ल्या उपरि स्थापने, तत्पूर्व्वकपाके च। अधिश्रीयते पच्यतेऽत्र, आधारे ल्युट् ङीप्। चूल्ल्याम् (आका) इति, (चूला), इति च ख्यातायाम् स्त्री।

अधिश्रयणीय त्रि०अधिश्रयणाय पाकाय हितम् छ। पाकसाधनपात्रे। अधिश्रयितुमर्हति अधि+श्री-पाके अर्हार्थे कर्म्मणि अनीयर्। पाकार्हे वस्तुनि त्रि०।

अधिश्रयितवै अव्य० अधि+श्री-पाके वेदे तुमर्थे तवै। पचनीये "गौरेव दुग्धमधिश्रयितवै ब्रूयादिति" वेदः।

अधिश्री त्रि० अधिका श्रीर्यस्य। अधिकशोभान्विते अधिकसम्पत्तिमति च "इयं महेन्द्रप्रभृतीनधिश्रिय" इति कुमा० "समादिदेशाधिकृतानधिश्रीरिति" रघुः।

अधिषवण न० अधिषूयते सोमः यत्र अधि+षू अभिषवे आधारे ल्युट्। सोमाभिषवसाधनचर्म्मादिपात्रे। "अंशूनिव यावाभिषवणे" इति वेदः। भावे ल्युट्। अभिषवे।

अधिषवण्य त्रि०अधिषवणाय हितम् यत्। अभिषवसाधने फलके। "यत्र द्वाविव जघनाधिषवण्या कृता" इति ऋ० १,२८,२ अधिषवण्या उभे अधिषवणफलके इति भा०।

अधिष्ठातृ त्रि० अधि+स्था–तृच् षत्वम् । अध्यक्षे, नियमितकार्य्यविशेषाकरणेन ज्ञताज्ञतावेक्षके, नियन्तरि च । "आत्मेन्द्रियाद्यधिष्ठातेति" भाषा० । अधिदेवे च । "इन्द्रियाणामधिष्ठातृदेवास्ते परिकीर्त्तिता" इति पुरा० । ते च अधिदेवताशब्दे दर्शिताः सर्वाधिष्ठाता तु परमेश्वर एव तदपि तत्तैरानर्थ्यमिभिप्रायेण दर्शितम् । "तत्सान्निध्यादधिष्ठातृत्वं मणिवदिति" सांख्यसू० । यथायस्कान्तमणेः सान्निध्यमात्रेण अयस्कान्तिकर्षकत्वं न सङ्कल्पादिना तथैवादिपुरुषस्य संयोगमात्रेण प्रकृतेर्महत्तत्त्वरूपेण परिणमनम् । इदमेव च सोपाधिकस्तृत्वमित्यर्थः । तथाचोक्तम् । "निरिच्छे संस्थिते रङ्गे यथा लोकः प्रवर्त्तते । सत्तामात्रेण देवस्य तथा चेयं जगज्जनिः । अत आत्मनि कर्त्तृत्वमकर्त्तृत्वं च संस्थितम् । "निरिच्छत्वादकर्त्तासौ कर्त्ता सन्निधिमात्रतः" इति सां०भा० । स्त्रियां ङीप् ।

अधिष्ठान न० अधि+स्था–ल्युट् । नियमितकार्य्यविशेषाकरणेन सान्निध्यमात्रेण नियमनाय, स्थितौ, वेदान्तशास्त्रप्रसिद्धे आरोपाधिकरणे च । वेदान्तिनाञ्च अध्यासस्याङ्गमधिष्ठानं यथा तथाऽध्यासशब्दे वक्ष्यते । अधिकरणे ल्युटि । पुरे आधारमात्रे, आश्रये च । "तदधिष्ठानाश्रयदेहे तद्वाद इति" सां०सू० । "तस्य लिङ्गस्य यदधिष्ठानमाश्रयो वक्ष्यमाणभूतपञ्चकं तस्याश्रये षाट्कौशिके देहे इति भाष्यम्" । करणे ल्युटि । चक्षे, प्रभावे च चक्षेण, प्रभावेन च हि प्रवृत्तयुद्धत्वादिसम्भवः । अधिष्ठानञ्च नियन्तृत्वं यथोक्तं सांख्ये । "संहतपरार्थत्वात् त्रिगुणादिविपर्य्ययादधिष्ठानादिति" "इतश्च पुरुषोऽस्ति अधिष्ठानात् त्रिगुणात्मकानामधिष्ठीयमानत्वात् यद्यत् सुखदुःखमोहात्मकं तत् सर्व्वं परेणाधिष्ठीयमानं दृष्टं यथा रथादि वस्त्रादिभिः, सुखदुःखमोहात्मकञ्चेदं बुद्ध्यादि, तस्मादेतदपि परेणाधिष्ठातव्यम् । स च परस्त्वेगुण्यादन्य आत्मेति" सा०कौ० । भावे ल्युट् । सन्निधिमात्रे । "अत्राधिष्ठानं कुर्विति" आवाहनमन्त्रः । "भोक्तुरधिष्ठानाभावेऽगायतननिर्म्माणमन्यथा पूतिभावप्रसङ्गात्" इति सांख्यसू० "भोक्तुः प्राणस्याधिष्ठानात् व्यापारादेव भोगायतनस्य शरीरस्य निर्म्माणं भवति । अन्यथा प्राणव्यापाराभावे शुक्रशोणितयोः पूतिभावप्रसङ्गात् मृतदेहवदित्यर्थः । तथाच रसरक्तादिव्यापारविशेषैः प्राणो देहस्य निमित्तकारणं धारकत्वादिति भाव इति भा० । ननु प्राणिनः निर्व्यापारस्याधिष्ठाने प्रयोजनाभाव इति तत्राह । "मृत्यद्वारा स्वामग्राधिष्ठितिर्नैकान्त्यात्" इति सां० सू० । "देहनिर्म्माणे व्यापाररूपमधिष्ठानं स्वामिनश्चेतनस्यैकान्त्यात् अपेक्षा नास्ति किन्तु प्राणरूपभृत्यद्वारा यथा राज्ञः पुरनिर्म्माण इत्यर्थः । तथा च प्राणस्याधिष्ठातृत्वं साक्षात्, पुरुषस्याधिष्ठातृत्वं प्राणसंयोगमात्रेणेति सिद्धम् । कुलालादीनां घटादिनिर्म्माणेष्वप्येवम् । विशेषस्त्वयं तत्र चेतनस्य बुद्ध्यादेश्चाप्युपयोगोऽस्ति बुद्धिपूर्ब्बकं सृष्ट्वादिति । यद्यपि प्राणाधिष्ठानादेव देहनिर्म्माणं तथापि प्राणद्वारा प्राणिसंयोगोऽप्यपेक्ष्यते पुरुषार्थमेव प्राणेन देहनिर्म्माणादित्याशयेन भोक्तुरधिष्ठानादित्युक्तम् इति भा० । अधिक्रीयते कर्म्मणि ल्युट् । अधिष्ठिते रुद्रिधिमात्रेण नियन्त्रिते । "इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते" इति गीता ।

अधिष्ठित त्रि० अधि–स्था–कर्म्मणि क्त । अध्युषिते "विलोक्य दृढोऽमधिष्ठितं त्वयेति" कुमा० । सन्निधिमात्रेण नियोजिते "ईश्वराधिष्ठिताः सर्वे स्वं स्वं कार्य्यं हि कुर्वते इति पुरा० ।

अधिहरि अव्य० हरौ, विभ० अव्ययी० । हरिमधिकृत्येत्यर्थे

अधीकार पु० अधि+कृ–घञ् उपसर्गस्य दीर्घत्वम् । अधिकारशब्दार्थे "सर्वाकरेष्वधीकारो महायन्त्रप्रवर्त्तनम्" इत्युपपातकगणनायां मनुः । "स्वागतं स्वानधीकारानिति" कुमा० ।

अधीत न० अधि+इङ–भावे क्त । अध्ययने, कर्म्मणि क्त । ज्ञताध्ययने अभ्यस्ते च त्रि० "ईषदीषदनधीतविद्येवेति" कुमा० । "अधीतवेदवेदाङ्गत्वेनेति" वे०सा० ।

अधीति स्त्री अधि+इङ् अध्ययने क्तिन् । अध्ययने "अधीतिबोधाचरणप्रचारणैरिति" नैष० । अधि+इक–स्मरणे क्तिन् । स्मरणे "न ते पूर्व्वस्य वसो अधीतौ दतीये" इति ऋ०२,४,८, "अधीतौ स्मरणे" इति भाष्यम् ।

अधीतिन् त्रि० अधीतमनेन अधीत+इनि । ज्ञताध्ययने । "त्वयुत्तरासङ्गवतीमधीतिनीमिति" कुमा० । एतदिन्यन्तयोगे च कर्म्मणि सप्तमी वेदेऽधीतोत्यादि किन्तु कर्म्माविवक्षया प्रथमं भावे एव क्तः पश्चात् कर्म्मणा योगः ज्ञतपूर्व्वी कटमित्यत्रेव । यथोक्तं हरिणा । "अकर्म्मकत्वे सत्येव क्तान्ते भावाभिधायिनि । पश्चात् क्रियावता कर्त्रा योगो भवति कर्म्मणेति" । विस्तरः मत्कृतसरलायां द्रष्टव्यः ।

अधीन त्रि० अधिगतमिनं प्रभुम् आत्मा०स० । आयत्ते । विज्ञाधीन इत्यादौ तु विज्ञे अधि–इति वाक्ये समासे अध्युत्तरपदात् ख । "क्व नु मां त्वदधीनजीविताभिति" कुमा० ।

"दाराधीनस्तथा स्वर्गः पितृणामात्मनश्च ह" इति मनुः। "इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः" इति रघुः।

अधीर त्रि० धीरः धैर्य्यान्वितः न०त०। चञ्चले, "कान्तस्या धरमणिम् अधीरमाचुम्बतेति" दशकु०। कातरे, रोगादिनाकुलचित्ते च। विद्युति, नायिकाभेदे च स्त्री। तल्लक्षणं नायिकाशब्दे वक्ष्यते

अधीवास अधि+वस आच्छादने करणे घञ्। सर्व्वतआवरके महाकञ्चुके वस्त्रभेदे। "अधीवासं परिसुच्योष्णीषं संवेष्य निवीते" इति कात्या० १५,५,१२, उपरि सर्वतः संछाद्यतेऽनेनेत्यधीवासः महाकञ्चुक इति तद्व्याख्या। "अधीवासेन प्रच्छादयतीति" कात्या० २०,६,१५, "उपरिष्टादावरकं वासोऽधीवास" इति वेददीपः।

अधीश त्रि० अधिक ईशः प्रा०स०। सार्वभौमे अधिपतौ च। "अङ्गाधीशः खगेन्द्रे बुधगुरुकविभिः संयुत" इति जात०।

अधीश्वर त्रि० अधिक ईश्वरः प्रा०स०। स्त्रियां ङीप्। राजनि "अधिगत्य जगत्यधीश्वरादिति" नैष०। प्रभौ च।

अधीष्ट न० अधि+इषा+क्त-भावे क्त। सत्कारपूर्व्वकनियोगे, "विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङिति" पा० "अधीष्टं सत्कारपूर्व्वकव्यापार" इति सि०कौ०। कर्म्मणि क्त। सत्कारपूर्व्वकं नियोजिते त्रि०।

अधुना अव्य० अस्मिन् काले इदम्शब्दस्य न०। संप्रतीत्यर्थे "प्रमदानामधुना" विडम्बनेति कुमा०। अधुना भवार्थे ठञ्। आधुनिकः इदानीन्तने त्रि०। [स्त्रियां ङीप्।

अधुनातन त्रि० अधुना+भवार्थे ट्युल् तुट् च। इदानीम्भवे

अधुर नास्ति धूः चिन्ता भारो वा यस्य अच्समा०। भारशून्ये चिन्ताशून्ये च, न०त०। अधूः—अभारे अचिन्ते च। अन्ये तु नाच्समा०। अधूरच्चः इति।

अधूमक पु० नास्ति धूमो यत्र कप्। धूमशून्ये ज्वलदग्नौ।

अधृत पु० न धृतः। सर्वेषां धारकत्वेन केनापि न धृते परमेश्वरे, श्रुतौ "स भगवः! कस्मिन्नु प्रतिष्ठितः?" इति प्रश्ने "स्वे महिम्नी"त्युत्तरम् तेनान्याधृतत्वात् स्वप्रतिष्ठत्वाच्च तस्य तथात्वम्। "अधृतः स्वधृतः स्वास्थ इति विष्णुसहस्र०।

अधृति स्त्री धृतिर्धारणं धैर्य्यं वा अभावार्थे न०त०। धारणाभावे, धैर्य्याभावे, च।

अधृष्ट त्रि० धृष-निर्लज्जत्वे क्त न०त०। लज्जाशीले। धृष-अभिभवे क्त न०त०। अनभिभूते "वन्दे नोमित्यवस्थावधृष्टमिति" ऋ०६,६७,२, अधृष्टमनभिभूतमिति भा०। अक्षिंसिते च। "दूतासोवसवोऽधृष्टा" इति ऋ० ६,५०,४, "अधृष्टा अक्षिंसिता" इति भा०।

अधृष्य त्रि० न धृष्यः न०त०। अनभिभवनीये "अधृष्यवाभिगम्यश्च यादोरत्नैरिवार्णव" इति रघुः। धृष-निर्लज्जत्वे भावे क्यप् तन्नास्ति यस्य। अप्रगल्भे, लज्जाशीले च त्रि०।

अधेनु स्त्री न०त०। दोहनशून्यायां गवि। "अधेनुं दस्रा सप्तर्यमिति" ऋ० १,११७,२०, "अधेनुम् अदोग्धीमिति" भा०। [शून्ये त्रि०।

अधैर्य्य न० अभावार्थे न०त०। धैर्य्याभावे। व०। धैर्य्य-

अधोअच त्रि० अधः अचस्य, अधस्तात् अञ्चति अञ्चते वा अच-अच्, अग-स वा वेदे अतोलोपाभावः। अधरस्ताद् व्यापके। "अधोअचाः सिन्धवः सोत्वाभिरिति" ऋ० २ ६३,६, "यदापः अचस्याधस्ताद्वहन्ति तदा रथादीनि नेतुं शक्नुवन्ति" इति भा०। [अधादेशश्च। परिधानवस्त्रे।

अधोऽंशुक न० अधरमंशुकम् अधर+प्रथमार्थे असि अधरस्य

अधोऽध्व न० अधरमध्वं यत्र मार्गे अधर+प्रथमार्थे असि व०। कविधिनाध्वाधोमार्गे। "दक्षिणस्याद्वं प्राङ्मो निष्क्रामतीति" का० १२, ४, १४, दक्षिणकविधिनाध्वाधोमार्गेण प्राङ्मुखा निःसरन्तीति" वेददीपः।

अधोऽन्नज पु० अन्नात् इन्द्रियात् जायते जन-ड ५त०। अन्नजं प्रत्यक्षत्वान्नम् अधरं प्राकृतत्वाभावाद्धीनं यस्य अधर-प्रथमार्थे असि अधादेशश्च। इन्द्रियायोग्ये, "अधो न क्षीयते जातु यस्मात्तस्मादधोऽन्नज" इत्युक्तलक्षणे, वा विष्णौ। "व्याप्तो वायुरधोऽन्नज" इति विष्णुसह०। "द्यौरन्नं पृथिवी चाधस्तयोर्यस्मादजायत। मध्ये वैराजरूपेण ततोऽधोऽन्नजदृश्यते" इति भाष्ये तथा च अण्डकपालद्वयमध्ये विराड्रूपेण जातत्वादस्य तथात्वम्। अधोभूते स्वस्वविषयेभ्यो निवर्त्तनेन प्रत्यक्षप्रवांछिते अन्नगणे जायते प्रकाशते इति अधोऽन्नज इति वा। तलर्थे।

अधोगति स्त्री अधरस्मिन् अधस्तात् नरकादौ गतिः नरकादिगमने "साधकानां त्वधोगतिरिति" तन्त्र०। नरकस्य च पापफलत्वेन पुण्यादधरत्वात् अधरत्वम् "और्वे च सर्वे नरकाः सदैत्या" इति (सि०शिरो०) और्वस्थाने एव नरकस्थितिरुक्ता और्वस्थिति च। "स्वादूदकान्तर्वडवानलोऽसौ पातालसंघाः पृथिवीपुटानी"त्यनेन पातालसन्निकृष्टे तत्रैवोक्ता। अतो नरकानामधःस्थत्वम्, भूगोलशब्दे विवरणं द्रष्टव्यम्। "जघन्यगुणवृत्तास्तु अधोगच्छन्ति तामसा इत्युक्तेः तामसानामधोगतित्वम्। अधोगतित्वञ्च पापादेव। अधःप्रदेशमात्रे गमने च "मूला-

नामधोगतिरिति" कात्०। अधोऽधस्तात् गतिर्यस्य ब०। नरकगामिनि त्रि०। "अनभ्यर्चितमर्य्यादं नास्तिकं विप्लुतक्रमम्। अरक्षितारमत्तारं रूपं विद्यादधोगतिमिति" मनुः ८,३९, ४१, अधोगतिं नरकगामिनमिति कुल्लूकभट्टः।

अधोगामिन् त्रि० अधरस्मिन् अधः गच्छति गम्-णिनि। नरकगामिनि, अधोभागे-गन्तरि च। स्त्रियां ङीप्।

अधोघण्टा स्त्री अधरात् अधस्तादारभ्य घण्टेव तदाकारफलवत्त्वात्। अपामार्गे रत्नमाला।

अधोजानु न० अधरं जानुनः प्रथमार्थे असि। जानुनोऽधरे ब्राह्मणादीनां प्रमाणविशेषमभिधाय "सर्वेषां वाधोजानु इति का० २१,४,१८, "वा विल्पार्थे सर्वेषां जानुनोरधस्तात् अधोजान्विति" तद्व्याख्या।

अधोजिह्विका स्त्री अल्पा जिह्वा जिह्विका अल्पार्थे कन् अधोऽधरा जिह्विका कर्म्म०। (आलजिभ) इति ख्यातायाम् तालुस्थजिह्विकायाम्।

अधोदारु न० अधरं दारु अधर+प्रथमार्थे असि। काष्ठमयद्वारस्याधरकाष्ठे (गोवराट्)।

अधोदिश् स्त्री अधरा दिश् अधर+प्रथमार्थे असि कर्म्म०। दक्षिणस्यां दिशि। अस्या अधरत्वञ्चोदक्शब्दे वक्ष्यते।

अधोदृष्टि त्रि० अधरस्मिन् अधः दृष्टिरस्य। योगाभ्याससमये नासिकाग्रमात्रदर्शनयुक्ते, तत्प्रकारस्तु "किञ्चित् प्रकाशसंमितोन्नतारैर्भ्रूविक्रियायां विरतप्रसङ्गैः। नेत्रैरविस्पन्दितपक्ष्ममालैर्लक्ष्मीकृतग्राग्रमधोमयूखैरिति' कुमारे "करणान्यवहिष्कृत्य स्थाणुवच्चिन्तयात्मकः। आत्मानं हृदये ध्यायेन्नासाग्रन्यस्तलोचन" इति योगसारे "गीतायामपि "सम्प्रेक्ष्य नासिकाग्रं स्वमित्यादिना" दर्शितः। अधोदर्शनयुक्तमात्रे त्रि०। "अधोदृष्टिनैकृतिक" इति मनुः ४,१९६। कर्म्म०। अधस्थदृष्टौ स्त्री।

अधोऽधस् अधस्+अधस्तात् सामीप्ये द्वित्वम्। समीपाधोदेशे "नवानधोधोऽवृतः पयोधरानिति" माघः।

अधोपहास पु० अधः अधोभागस्थ स्मरमन्दिरस्य उपहासः सन्धिच्छान्दसः। स्त्रीणामधोभागस्योपहसने। "यदयं विद्वानधोपहासं चरत्यासां, स्त्रीणां सुकृतं दुष्कृत" इति द्व०उप०। दुष्कृते आवर्ज्जयतीति भाष्यम्।

अधोभक्त न० अधरं भक्तं यस्मात् अधर+प्रथमार्थे असि ब०। भक्तभोजनानन्तरे पीयमानजले।

अधोभाग अधरोभागः अधर+प्रथमार्थे असि कर्म्म०। अधरभागे "पूर्व्वभागो गुरुः पुंसामधोभागस्तु योषितामिति"।

अधोभुवन न० अधरमधः भुवनम् लोकः। सप्तसु पातालेषु। तत्स्थानञ्च 'भूमेरधं चारसिन्धोरुदक्स्थं जम्बुद्वीपं प्राहुराचार्य्यवर्य्याः अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य यामे चारक्षीराद्यम्बुधीनां निवेशः॥ लवणजलधिरादौ दुग्धसिन्धुश्च तस्मादस्मादमुष्मादमुतरदधिसः श्रीश्च यस्माद्बभूव। महितचरणपद्मः पद्मजन्मादिदेवैर्वसति सकलवासो वासुदेवश्च यत्र॥ दध्नो घृतस्येक्षुरसस्य तस्मान्मद्यस्य च स्वादुजलस्य चान्यः। स्वादूदकान्तर्वडवानलोऽसौ पातालसंज्ञाः पृथिवीपुटानीति सि०शि०॥ अधिकं भूगोलशब्दे वक्ष्यते।

अधोमुख त्रि० अधो मुखं यस्य ब०। ज्योतिषशास्त्रे प्रसिद्धेषु नक्षत्रभेदेषु। यथा "मूलाश्लेषा कृत्तिका च विशाखा भरणी तथा। मघा पूर्व्वात्रयं चैव अधोमुखगणः स्मृत" इति। गोजिह्वास्यवृक्षे (अनन्तमूल) अवाङ्मुखे स्त्रियां वा ङीष्। "स्त्यब्दृटिरधोमुख" इति "अधोमुखैरूर्द्धमुखैश्च पक्षिभिः" इति रघुः। रुद्राभेदे च तत्स्वरूपं रुद्रशब्दे वक्ष्यते।

अधोराम पु० अधोभागे अधस्ताद्भागे रामः शुक्लः दृष्टितर्पकत्वात् तस्य रामत्वम्। अधोभागे शुक्लवर्णे "आश्विनावधोरामाविति" य०२४,१,"अधोरामौ अधोभागे शुक्लवर्णावजाविति" वेददीपः। [अधोभुवनशब्दे विवरणम्।

अधोलोक पु० अधोऽधरो लोकः कर्म्म०। भूमेरधःस्थपातालेषु।

अधोवर्चस् त्रि० अधोगामि वर्चः ज्योतिर्यस्य। अवाचीनज्योतिष्के "तत्ते विद्वान् वरुण! प्रब्रवीम्यधोवर्चस" इति वेदः।

अधोवायु पु० अधोगामी वायुः रा०त०। अपानवायौ पर्द्दशब्दकारके वाते "अधोवायुसमुत्सर्गे प्रहासेऽन्यतमास्थे" इत्युपक्रम्य "कर्म्म कुर्व्वन्नुपस्पृशेदित्युक्तं स्मृतौ।

अध्यक्ष त्रि०अधिगतोऽक्षं व्यवहारम् अक्षा०स०। न्यायस्य व्यवहारादिव्यवहारेऽधिक्रियते। अध्यश्नोति व्याप्नोति अधि+अक्ष-अच्। व्यापके। अधिगतं मूलतया अक्षमिन्द्रियम् अक्षा०स०। प्रत्यक्षज्ञाने। अर्श आदित्वात् अच्। तद्विषये त्रि०। "द्रव्याध्यक्षे त्वयोयोगो मनसा ज्ञानकारणमिति" भाषा०। "सेनापतिबलाध्यक्षाविति" मनुः। अधिष्ठातरि सन्निधिमात्रेण नियन्तरि च "मयाध्यक्षेण प्रकृतिः सूयते सचराचरमिति" गीता "यदध्यक्षेण जगता वयमारोपितास्त्वयेति" कुमा० क्षीरिकाख्ये पु० शब्दार्णवः।

अध्यक्षर अव्य० अक्षरे-विभ० अव्ययी०। अक्षरमधिकृत्येत्यर्थे।

अध्यग्नि अव्य० अग्नौ अग्निसमीपे वा विभक्त्यर्थे सामीप्ये

र्थे वा अव्ययी०। अग्नौ अग्निसमीपे वेत्यर्थे। तत्र स्याने विवाहादौ स्त्रीभ्यो दत्ते धनादौ न०। स्मृतिशास्त्रे चास्मिन्नर्थे पारिभाषास्त्र कृता यथा "विवाहकाले यत् स्त्रीभ्यो दीयते स्वग्निसन्निधौ। तदध्यग्नि कृतं सद्भिः स्त्रीधनं परिकीर्त्तितमिति" कात्या०। "अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतिकर्म्मणि भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतमिति" मनुः। "पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम्। आधिवेदनिकाद्यञ्च स्त्रीधनं परिकीर्त्तितमिति याज्ञ०। "विवाहकालेऽग्नावधिकृत्य मातृलादिदत्तमिति"मिताक्षरा। अध्यग्निकृतमित्येकं पदं दत्तमध्यग्न्युपागतमित्येकवाक्यत्वात् कृतं दत्तमित्यर्थः इत्येके।

अध्यञ्च् त्रि० अधि+अञ्चु-क्विप्। अधिगन्तरि।

अध्यण्डा स्त्री अधिकमण्डमिव बीजं यस्याः दैत०। अधिक बीजवत्यां (भुंइ आमला) इति ख्यातायाम् भूम्यामलक्याम्।

अध्यधिक्षेप पु० अधिकोऽधिक्षेपः प्रा०स०। अत्यन्तनिन्दायामतिशयतिरस्कारे च "गुरूणामध्यधिक्षेप" इति।

अध्यधीन त्रि० आधिक्येन अधीनः। अत्यन्ताधीने गर्भदासे तस्य जन्मावधि दासत्वात् क्रयविक्रयार्हत्वाच्च तथात्वम्।

अध्यय पु० अधि-इङ्-इक् वा भावे अच्। अध्ययने स्मरणे च।

अध्ययन न० अधि+इङ-ल्युट्। पठने, गुरुमुखोच्चारणानुसारिणि उच्चारणे च। अध्ययनञ्चाक्षरमात्रपाठ इति वैदिकाः सार्थाक्षरपरिज्ञानमिति मीमांसकाः। "इज्याध्ययनदानानि तपः सत्यं क्षमा दमः। अलोभ इति मार्गोऽयं धर्म्मस्याष्टविधः स्मृत" इति "अब्राह्मणादध्ययनमापत्काले विधीयते" इति "श्रुताध्ययनसम्पन्न" इति च स्मृतिः अध्ययनं च वेदाध्ययनं तत्र च त्रैवर्णिकानामधिकारः यथोक्तं मनुना। "अध्यापनमध्ययनं यजनं याजनं तथा, दानं प्रतिग्रहञ्चैव ब्राह्मणानामकल्पयत्॥ प्रजानां रक्षणं दानमिज्याध्ययनमेव च। विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः। पशूनां रक्षणं दानमिज्याध्ययनमेव च। वणिक्पथं कुसीदञ्च वैश्यस्य कृषिमेव च" इति मनुः। वेदाध्ययनञ्च ब्रह्मयज्ञत्वेनाभिधीयते तच्च ब्रह्मयज्ञशब्दे वक्ष्यते तच्च सार्थाध्ययनमेव प्रशस्तं यथोक्तं ब्राह्मणसर्वस्वे "कूर्म्मपुराणे। न वेदपाठमात्रेण सन्तोषं कारयेद्गुरुः। पाठमात्रावसन्नस्तु पङ्के गौरिव सीदति। योऽधीत्य विधिवद्विप्रो वेदार्थं न विचारयेत् स शास्त्रयः शूद्रसमः प्रोक्तो न प्रपद्यते"। व्यासः "वेदस्याध्ययनं कार्य्यं धर्म्मशास्त्रस्यापि यत्। अजानतार्थं तत् सर्वं तुषाणां कण्डनं यथा" तथा "यथा पशुर्भारवाही न तस्य भजते फलम्। द्विजस्यार्थानभिज्ञो न वेदफलमश्नुते"। तथा "पाठमात्ररतान्नित्यं द्विजातींश्चार्थवर्ज्जितान्। पशूनिव च तान् प्राज्ञो वाङ्मात्रेणापि नार्चयेत्। श्रुतहीनमधीतं यच्चेह नासत्र तद्भवेत्। श्रुतन्तु केवलमपि सत्तद्धाराय कल्पते"। स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्। अर्थवित् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा। व्यासः। "योऽधीते नार्थतत्त्वज्ञस्तस्य तद्भारकं श्रुतम्। भारवाहीव मृतकः केवलं क्लेशभाग्भवेत्। तस्मादर्थपरिज्ञाने यत्नः कार्य्यो विजानता"। व्यासः। "ज्ञानं कर्म्म च संयुक्तं सम्यगर्थं प्रकाशयेत्। अधीतं श्रुतसंयुक्तं तथा चेहं न केवलम्" व्यासः। "अधीत्य यत्किञ्चिदपि वेदार्थाधिगमे रतः। स्वर्गलोकमवाप्नोति धर्म्मानुष्ठानविद्द्विजः"। मनुः "वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन्। इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते"। व्यासः। "सप्तत्रिंशतं श्लोकमपि श्रुताधीतं विशिष्यते। चतुर्णामपि वेदानां केवलाध्ययनात् द्विजात्"। कृष्णद्वैपायनः "अनूचानाप्यन्धिनः श्रेया अन्धिभ्यो धारिणोवराः। धारिभ्यश्चार्थतत्त्वज्ञास्तेभ्योऽप्यध्यात्मचिन्तकाः" इति॥ एतच्च साध्येयोऽध्येतव्य" इति श्रुतौ मीमांसकैः विस्तरतो व्यवस्थापितम्।

अध्यर्द्ध त्रि० अधिकमर्द्धं यस्य ब०। सार्द्धेन सहिते वस्तुमात्रे। "एकाधिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्द्धं ततोऽनुजः" इति मनुः। एकाधिकमंशं हरेदित्यर्थः ज्येष्ठपुत्रो ह्यंशद्वयात् अधिकमर्द्धं यत्रांशे सार्द्धमंशं इति कुल्लू०। अर्द्धशब्दः रूपकार्द्धे रूढः तेन सार्द्धरूपके च। अध्यर्द्धपूर्व्वात् क्रीताद्यर्थे "अध्यर्द्धपूर्व्वद्विगोर्लुगसंज्ञायामिति" पा० अध्यर्द्धपूर्व्वात् द्विगोश्चार्द्धीयस्य टञो लुक्। अध्यर्द्धकंसम्। "विंशतिकात्खः" इति पा०। खविधाश्च लुक्। अध्यर्द्धविंशतिकीनं "सार्द्धारैकम्" पा०। अध्यर्द्धखारीकम् "पञ्चपादमाषशताद्यत्" पा०। अध्यर्द्धपञ्चं अध्यर्द्धपाद्यम् अध्यर्द्धमाष्यम् अध्यर्द्धशत्यम् "गाणाड्वेति" पा० यत् ठञ् तस्य लुक्च वेति अध्यर्द्धगाण्यम् अध्यर्द्धगाणम्। इत्यादयः शब्दाः तत्क्रीतार्थे त्रि०। अध्यूढोभेति यत्र अधि+ऊढ-आधारे घञ्। वायौ। "कत्वेव देवा याज्ञवल्क्य! इति" याज्ञवल्क्यं प्रति शाकल्यप्रश्ने तत्र याज्ञवल्क्येन "अध्यर्द्ध" इत्युत्तरं (ड०उ०) दत्तम् तस्य विशेषज्ञानाय

"कतमोऽध्वर्यु" ? इति पुनः शाकल्यप्रश्ने, "योऽयं पवत" इत्युक्तं तत्र पवत इत्यनेन वायुरुक्तः । "तदाहुर्यदयमेकएव पवते अथ कथमध्वर्यु"? इति । वायोरेकत्वेन अध्वर्यु-शब्दार्थस्य सार्द्धत्वासम्भवे पुनराक्षिप्ते "यदस्मिन् इदं सर्व-मध्यार्धोत् तेनाध्वर्यु" इत्युत्तरम् तेन अधिकाद्धिहेतुत्वात् वायोरध्वर्युत्वात् तद्वात्वम् अधि+ऋध-लङ् अध्यार्धोत् ।

अध्यवसाय पु० अधि+अव-सो-घञ् । इदमेवमेवेति विषय-परिच्छेदे निश्चये । स चात्मधर्म इति नैयायिकाः बुद्धिधर्म इति सांख्यादयः । "उपात्तविषयाणामिन्द्रियाणां हृत्तौ सत्यां बुद्धेः रजस्तोऽभिभवे सति यः सत्त्वसमुद्रेकः सोऽयमध्यव-साय इति वृत्तिरिति चाख्यायते" इति सांख्यतत्त्वकौमुदी-परिभाषितलक्षणः, "कर्तव्यमिति योऽयं निश्चयः चित्-सान्निध्यात् प्राप्तचैतन्याया बुद्धेः परिणामः सोऽयमध्य-वसाय" इत्युक्तलक्षणो वा निश्चयः । "प्रतिविषयाध्यवसायो दृष्टमिति सां०का० । उत्पाद्ये च । उत्पाद्यत्व कर्म्मणु सुकरत्वेन ज्ञानात् उद्यमभेदः ।

अध्यवसायित त्रि० अध्यवसायो जातोऽस्य तारा० इतच् । जाताध्यवसाये । [निश्चयवति च ।

अध्यवसायिन् त्रि० अधि+अव-सो-णिनि । उत्पाद्यान्विते

अध्यवहनन न० अधि-उपरि अवहननम् । पूर्व्वावघातेन विदुषीकरणेऽपि पुनरवघाते । तेन च "व्रीहीनवह-न्तीति" नियमपालनम् ।

अध्यशन न० अधिकमशनम् । "साजीर्णे भुज्यते यत्तु तद-ध्यशनमुच्यते" इति सुश्रुतोक्ते अजीर्णेऽपि अधिकाशने । "यथोक्तैः प्रकोपणैर्विरुद्धाध्यशनस्त्रीप्रसङ्गेत्यादि" सुश्रुतम् ।

अध्यस्त त्रि० अधि+अस-कर्म्मणि क्त । कृताध्यासे आरो-पिते, अध्यासशब्दे वक्ष्यते तद्विषये मिथ्याभूते पदार्थे । शुक्तौ रजतमध्यस्तम् ब्रह्मणि जगदध्यस्तमित्यादि ।

अध्यात्म अव्य० आत्मानं देहमिन्द्रियादिकं क्षेत्रज्ञं ब्रह्म वाऽधिकृत्य टच् समा० । देहमिन्द्रियादिकम् आत्मानं ब्रह्म वाधिकृत्येत्यर्थे । तत्र देहाधिकारे "अध्यात्ममिति" द्व०उ० अधिदेवताशब्दे दृश्यम्, तत्र प्राणाद्यधिकारेण अन्यथा-ऽपि त्वमुक्तम् । क्षेत्रज्ञाधिकारे "अध्यात्मयोगाधिगमेनेति" । "अध्यात्मरतिरासीनो निराकाङ्क्षो निरामिष" इति मनुः । "आत्मानं ब्रह्माधिकृत्येति" कुल्लू० । "जरामरणमोक्षाय मामाश्रित्य यतन्ति ये । ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म्म चाखिलमिति" गीता । "ते जनाः परं ब्रह्म कृत्स्नमध्यात्मञ्च विदुः ये तत् प्राप्तव्यं देहादिव्यति-रिक्तं शुद्धमात्मानञ्च जानन्तीति" श्रीध० । "अक्षरं परमं ब्रह्म स्वभावोऽध्यात्मसुच्यते" इति गीता । "स्वस्यैव ब्रह्मण एवांशतया जीवस्वरूपेण भावोभवनं स एवात्मानं देहम-धिकृत्य भोक्तृत्वेन वर्त्तमानोऽध्यात्मशब्देनोच्यते" इति श्रीधरः । तेन देहाधिकारेण भोक्तृतया ब्रह्मणोऽंशस्य जीवभवनेऽस्य पारिभाषिकत्वं सूचितम् "अध्यात्मविद्या विद्यानां वादः प्रवदतामहमिति" गीता सा च विद्या न्याय वैशेषिकमते देहभिन्नत्वेन, सांख्यादिमते प्रकृतिभिन्न-त्वेन आत्मनः स्वरूपादिप्रतिपादिका । वेदान्तिमते तु ब्रह्माभिन्नत्वेनेति भेदः । सर्व्वेषां मतेऽध्यात्मतत्त्व-ज्ञानरूपत्वात्तस्या अध्यात्मविद्यात्वम् । तत्र नैयायिकवैशे-षिकमते आत्मा द्विविधः जीवात्मा परमात्मा च । तत्र जीवात्मानमधिकृत्य उदयनाचार्य्येण आत्मतत्त्वविवेकरूपप्रक-रणं, परमात्मानमधिकृत्य च कुसुमाञ्जलिनामकमपरं प्रकरणं निरमायि । सांख्ये ईश्वरानभ्युपगमेन पुरुषस्य प्रकृत्यादिभ्यो विवेकज्ञानाय षड्ध्यायीरूपं कपिलमुनिना, तन्मूलकमीश्वर-कृष्णेन च सांख्यकारिकाः सम्प्रतिः निरमायिषत, वाच-स्पतिना च ता व्याख्याताः ततएव विस्तरोऽवसेयः । पातञ्जले तु जीवानामीश्वरस्य च भेदस्वीकारेऽपि ईश्वरप्रणिधानेन पुरुषस्य प्रकृत्यादिभ्यो भेदसाक्षात्कार इति भेदः । अधिकं तत्तच्छब्दे वक्ष्यते । "मयि कर्म्माणि स-र्व्वाणि संन्यस्याध्यात्मचेतसेति" गीता । "अध्यात्मचेतसा विवेकबुद्धया" । अध्यात्मं जातः ठञ् । अनुगतिका० द्विपद-बुद्धिः । आध्यात्मिकं दैहिके मानसिके च दुःखादौ त्रि० ।

अध्यात्मदृश् त्रि० अध्यात्मं पश्यति दृश-क्विन् । आत्मनि विषयत्यागेनात्ममात्रदर्शके ।

अध्यात्मयोग पु० आत्मानं क्षेत्रज्ञमधिकृत्य योगः । विषयेभ्यः प्रतिसंहृत्य चेतसआत्मनि समवधाने । "अध्यात्म योगाधिगमेनेति" ।

अध्यात्मरामायण न० आत्मानमधिकृत्य कृतं रामस्यायनं यत्र । वाल्मीकिप्रणीते अध्यात्मज्ञानप्रतिपादके प्रस-ङ्गतो रामचरितज्ञापके स्वनामख्याते ग्रन्थभेदे ।

अध्यात्मशास्त्र न० अध्यात्म प्रतिपादकं शास्त्रम् । आत्म-स्वरूपादि प्रतिपादकग्रन्थे ।

अध्यापक पु० अध्यापयति अधि+इङ् णिच्-ण्वुल् । अध्ययनकारयितरि, उपाध्याये च । "भृतकाध्यापकोयस्तु भृतकाध्यापितस्त्वेति" मनुः । अस्य अकान्तत्वेऽपि याज-कादिगणे पाठात् षष्ठीसमासः तेन वेदाध्यापकः न्याया-

ध्यापक इति। अध्यापकश्च द्विविधः आचार्य्य उपाध्यायश्च यथोक्तं विष्णुना "यस्तूपनीय व्रतादेशं कृत्वा वेदमध्यापयेत्तमाचार्यं विद्यात्। यस्त्वेनं मूल्येनाध्यापयेदेकदेशं वा तमुपाध्यायमिति"।

अध्यापन न० अधि+इङ्-णिच्-भावे ल्युट्। पाठनायाम्। "याजनाध्यापनं तथेति" मनुः। "अध्यापनञ्च त्रिविधं धर्म्मार्थशुल्कधारणम् शुश्रूषाकारणञ्चेति त्रिविधं परिकीर्त्तितमिति" हारीतसंहितोक्तेस्त्रिविधमध्यापनम् अध्यापनप्रकारादि यथा "नापरीक्षितं याजयेत् नाध्यापयेत् नोपनयेत॥ योऽधर्म्मेणाह यश्चाधर्म्मेण पृच्छति तयोरन्यतरः प्रैति, विद्वेषं वाधिगच्छति॥ धर्म्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा। तत्र विद्वा न वक्तव्या शुभं बीजमिवोषरे। विद्याह्व वै ब्राह्मणमाजगाम गोपाय मां शेवधिस्तेऽहमस्मि। असूयकायानृजवेऽयताय न मां ब्रूया वीर्य्यवती तथा स्याम्॥ यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्य्योपपन्नम्। यस्ते न द्रुह्येत् कतमश्च नाह तस्मै मां ब्रूया विधिपाय ब्रह्मन् इति"॥ युचि त स्त्रीत्वात् टापि, अध्यापना तत्रिष्पन्नेवार्थे स्त्री।

अध्यापित त्रि० अधि-इङ्-णिच् कर्म्मणि क्त। पाठिते "अध्यापितस्तोत्रनासापि नीतिमिति" कुमा०।

अध्याप्य त्रि० अधि इङ्-णिच्-कर्म्मणि यत्। पाठनीये अध्यापयितुमर्हे च। "ब्रह्माञ्जलिकृतोऽध्याप्यो लघुवासा जितेन्द्रिय" इति मनुनाध्यपनीयार्हता दर्शिता।

अध्याय पु० अधि+इङ्-घञ्। अध्ययने, कर्म्मणि घञ्। वेदादिशास्त्रस्य एकार्थकविषयसमाप्तिद्योतके विश्रामस्थाने ग्रंथविशेषे, "सर्गोवर्गः परिच्छेदोद्घाताध्यायाङ्कसंग्रहाः। उच्छ्वासः परिवर्त्तश्च पटलः काण्डमेव च। स्थानं प्रकरणञ्चैव पर्य्यायाह्निकानि च। पुराणादौ परिच्छेदा अनेके परिकीर्त्तिता" इत्युक्तान्यतमप्रकारे च "संकल्पिते स्तोत्रपाठे संख्यां कृत्वा पठेत् सुधीः अध्याय प्राप्य विरमेन्न तु मध्ये कदाचन। कृते विरामे मध्ये तु अध्यायादिं पुनः पठेदिति" म० सू० "स्वाध्यायोऽध्येतव्य" इति श्रुतिः।

अध्यारूढ त्रि० अधि+आ+रुह कर्म्मणि कर्त्तरि वा क्त। आक्रान्ते, अध्यारोहणकर्त्तरि उपरिष्टात् अरोहणकर्त्तरि, समारूढे, अधिके च।

अध्यारोप पु० अधि+आ-रुह-णिच्-घान्तादेशः घञ् अतस्मिन् तद्बुद्धिरारोपः मिथ्याज्ञानम् किञ्चिदधिष्ठानमधिकृत्य तादृशारोपः अध्यारोपः यथा असर्पभूतां रज्जुमधिकृत्य सर्पारोपः तथैव अजगद्रूपे ब्रह्मणि जगद्रूपारोपः। तादृशे मिथ्याज्ञाने। "स एष बीजाङ्कुरादिवदविद्याकृतः संसार आत्मनि क्रियाकारकफलाध्यारोपलक्षणोऽनादिरनन्त" इति ह० उप० भाष्यम्।

अध्यारोपण न० अधि+रुह-णिच् घान्तादेशः ल्युट्। अतिशयेनारोपणे धान्यादेर्वपने।

अध्यावाप पु० अधि+आ+वप-घञ्। अधिवपने सस्यानामावापे। आधारे घञ्। तदाधारक्षेत्रे।

अध्यावाहनिक न० अध्यावाहनं पितृगृहात् भर्त्तृगृहागमनं तत्काले लभ्यम् अधि+आ+वह-ल्युट् ततः लभ्यार्थे ठन्। "यत् पुनर्लभते नारी नीयमाना हि पैतृकात्। अध्यावाहनिकं नाम स्त्रीधनं परिकीर्त्तितमिति" स्मृत्युक्तलक्षणे पितृकुलात् भर्तृकुलगमनकाले तेभ्यः प्राप्ते स्त्रीधने। "अध्यग्न्यध्यावाहनिक स्त्रीधनं पड्विधं स्मृतमिति" स्मृतिः।

अध्यास पु० अधि+अस-भावे घञ्। मिथ्याज्ञाने "आह कोऽयमध्यासो? नामेति प्रश्ने "स्मृतिरूपः परत्र पूर्व्वदृष्टावभास" इति शा० भाष्यम्। स्मृतेः रूपमिव रूपमस्य संस्कारप्रभवत्वात्। परत्र अन्यस्मिन् स्वभिन्ने स्वाभाववति च पूर्व्वदृष्टस्य पूर्व्वानुभूतस्यावभासो ज्ञानम्। यथा शुक्तौ रजतमित्यायां पूर्व्वदृष्टस्य रजतस्यानेदज्ञानम्, स्वाभाववति च स्फटिके पूर्व्वानुभूतस्य लोहितरूपस्य वा ज्ञानम्। तथाभूते मिथ्याभूतज्ञाने। तत्र बाध्यांशे अधिष्ठानशुक्त्यादौ इन्द्रियसंप्रयोगे सत्यपि तस्य विशेषरूपेणाज्ञानात् सामान्याकारेण इदन्वादरूपेण ज्ञानं, सादृश्यज्ञानम्, आरोप्यमाणस्य संस्कारश्चेति कारणत्रयं सति च तस्मिन् चाकचक्यादिदोषविशेषात् अधिष्ठानविशेषज्ञानं प्रतिरुध्य, रजतादिसंस्कारे चोद्बोधिते तत्रानिर्व्वचनीयं रजतादिकं शुक्त्यादिज्ञानेनोत्पाद्यते तदाकारवृत्तिश्च जन्यते तत्र आविद्धिकरजताद्यनुत्पत्तौ इदं रजतं पश्यामीत्याद्यनुभवानुपपत्तिः नच स्मरणेन तदुपपत्तिः स्मरणस्य विषयाप्रवर्त्तकत्वात् तदुत्तरं प्रवर्त्तते च तत्तदृश्यहणाय सर्वः। नापि अलौकिकप्रत्यक्षरूपता साक्षात्करोमीत्यनुभवस्य साक्षात्कारविषयत्वात् अन्यथानुमानादीनामपि अलौकिकप्रत्यक्षत्वापत्तेः तत्पूर्व्वं नियतं तत्तज्ज्ञानस्यावश्यम्भावेन विशिष्टालौकिकप्रत्यक्षापत्तेर्दुर्निवारत्वात् अतः तत्तदृश्यहणाय प्रवर्त्तकस्य तत्तज्ज्ञानस्य प्रत्यक्षत्वसमर्थनाय अनिर्व्वचनीयं रजतादिकम् अधिष्ठानाज्ञानेन तत्राधिष्ठाने उत्पद्यते इति कल्प्यं प्रत्यक्षे हि विषयसन्निकर्षः कारणमेतेन क्रमः

देशान्तरस्थरजतादिकं तु न इन्द्रियसन्निकृष्टमित्यनुमया तथा कल्प्यते । अतएव श्रुतौ "यत्र हैतमिव भवति तदितर इतरत् पश्यतीति" "अथ रथान् रथयोगान् पथः सृजते" इति च जागरे हैतस्य इवशब्देन मिथ्यात्वं सूचितम् । स्वप्ने च रथादेः स्रष्टं सृष्टिरुक्ता । तथाच ब्रह्मणि जगदादेरनिर्वचनीयस्य तदज्ञानेनोत्पत्तिः । इयांस्तु विशेषः रजतादेः स्वप्नरथादेश्च प्रतीतिसमकालत्वं, वियदादेस्तु व्यवहारिकत्वम् । "देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयादित्युक्तेः व्यवहारकाले वियदादिप्रमेयाणां सत्यत्वं, "परमार्थदृष्ट्या तु मिथ्यात्वमिति" "अन्यदार्त्तमित्यादि" श्रुत्या च ब्रह्मभिन्नानां मिथ्यात्वावगमात् । अधिकमाकरे दृश्यम् ।

अध्यासन न० अधि+आस–उपवेशे ल्युट् । निवासे । विभ०अव्ययी० । आसने इत्यर्थे अव्य० ।

अध्यासित त्रि० अधि+आस आधारस्य कर्मसंज्ञायां कर्मणि क्त । अधिष्ठिते । "धेन्वा तदध्यासितकातराक्ष्येति" रघुः ।

अध्याहार पु० अध्याहरति ज्ञानायानुसन्धीयते अधि+आ+हृ–घञ् । आकाङ्क्षाविषयपदानुसन्धाने, जल्पे, तर्के, अपूर्व्वोत्प्रेक्षणे च । जल्पस्वरूपमूहशब्दे तर्कस्वरूपं च तर्कशब्दे वक्ष्यते । [क्ति । अधिष्ठिते स्थानादौ ।

अध्युषित त्रि० अधि+वस–आधारस्य कर्मसंज्ञया कर्मणि

अध्युढ् त्रि० अधिगतमूढं वाहनत्वेन अत्या०स० । उद्वाहनयुक्ते शकटादौ । (उठगाड़ि) ।

अध्यूढ त्रि० अधि उपरि ऊढः । अवलम्बनत्वेन उपरिभावेन अवलम्बिते । "तस्मादृच्यध्यूढं साम गीयते" इति का० उप० । ऋचमवलम्ब्यैव सामो गीयमानतया ऋच्यध्यूढत्वम् । अधिकवृद्धियुक्ते, सम्बद्धे च । कृतसापत्निकायां प्रथमायां "यस्या उपरि विवाहान्तरं कृतं" तादृश्यां स्त्रियाम् स्त्री ।

अध्यूढी स्त्री अधिकमूधोयस्याः अनङ् ङीप् च । सम्बद्धापीनायां धेन्वाम् "अध्यूढीं क्षीरे प्रयच्छतीति श्रुतिः अवधाध्यूढीवनिष्णुषु सप्तदश इति का० १,८,८१ ।

अध्येतव्य त्रि० अधि–इङ कर्मणि क्त । पाठे "स्वाध्यायोऽध्येतव्य इति" श्रुतिः । अर्थार्थे तव्य । अध्येतुमर्हे "श्रोतव्यमिह सूद्रेण नाध्येतव्यं कदाचनेति" स्मृतिः ।

अध्येषण न० अधि–इष–प्रेरणे ल्युट् । सत्कारपूर्व्वकमाचार्य्यादेः प्रेरणे, प्रवर्त्तनमात्रे च । युचि टाप् तत्रैवार्थे स्त्री । अधिका एषणा प्रार्थना । अधिकप्रार्थने स्त्री ।

अधृ त्रि० न–धृष–क्विप् । अधृष्टे । न+धृष–ड्रि, अधृष्ये ।

अधृगु त्रि० अधृ+गम–कु–डिच्च जङादेशो वा । अधृतगमने । "यदधृगावोऽधृगु रदाचिदश्वो अश्विना" इति ऋ० ८,२२, ११, "अधृगावोऽधृतगमना अधृगु–अधृतगमनाविति" भा० ।

अधृज त्रि० अधृमधृतमधृष्यं वा जनयति जन–अन्तर्भूतण्यर्थे, ड । अधृतजनके अधृष्यजनके च । "इति चिन्मन्युमधृज इति ऋ०५,७,१० "अधृजः अधृतमन्यैः अग्निव्यतिरिक्तैः अधृष्यं वा जनयिता" इति भा० ।

अध्रुव त्रि० न०त० । अनिश्चिते, चञ्चले, अस्थिरे च । "योऽध्रुवाणि परित्यज्य ध्रुवाणि निषेवते । ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि" इति हितो० ।

अध्रुष पु० "गोथः स्थूलस्तोददाहप्रकाशो रक्ताज्ज्ञेयः सोऽध्रुषो रुग्ज्वराढ्य इति" सुश्रुतोक्ते विक्षतरक्तादिजे ज्वरकारके शोथरोगभेदे ।

अध्वग पु० अध्वन्+गम–ड । पथिके, अध्वगमनप्रकारश्च विष्णुसंहितायामुक्तः । यथा "नैकोऽध्वानं प्रपद्येत नाधार्मिकैः साद्धम्, न क्षपणैः, न द्विषद्भिः, नातिप्रत्यूषम्, नातिसायम्, न सन्ध्ययोः, न मध्याह्ने, न सन्निहितपानीयम्, नातितृणम्, न रात्रौ, न सन्नद्धव्याधितास्तैर्वाहनैः, न हीनाङ्गैः, न रोगिभिः, न दीनैः, न गोभिः, नादान्तैः, यवसोदकैर्वाहनानामदत्त्वात्मनः क्षुत्तृष्णापनोदने न कुर्य्यात् । न चतुष्पथमधितिष्ठेत्, न रात्रौ वृक्षमूलम्, न शून्यालयं, न श्मशानम्, न पण्यानां बन्धनागारम्, न कैवर्तपक्षपालास्थिभस्माङ्गारान्, न कापालास्थि । चतुष्पथं प्रदक्षिणीकुर्य्यात् देवताश्च । प्रज्ञातांश्च वनस्पतीन्, अग्निब्राह्मणगणिकापूर्णकुम्भादर्शच्छत्रध्वजपताकाश्वी वृद्धवर्द्धमाननन्द्यावर्त्तांश्च, तालदम्यचामरान्निगजाजगोदधिक्षीरमधुसिद्धार्थकांश्च, वीणाचन्दनायुधार्द्रगोमयपुष्पशाकगोरोचनादूर्वाप्ररोहांश्च, उष्णीषालङ्कारमणिकनकरजतवस्त्रासनयानासिपांश्च, भृङ्गारोद्धृतोदकरज्जुवद्धपशुकुमारीमीनांश्च दृष्ट्वा प्रायादिति । मत्तोन्मत्तव्यङ्गान् दृष्ट्वा निवर्त्तेत वान्तविविक्तसस्नातमलिनवसनजटिलवामनांश्च, कषायिप्रव्रजितमलिनांश्च, तैलगुडशुष्कगोमयेध्मनलक्षणकृशपलायभस्माङ्गारांश्च, लवणक्षीवासवनपुंसककार्पासरज्जुनिगडसक्तकेशांश्च, वीणाचन्दनार्द्रकागोष्णीषालङ्कारकुमारीः प्रस्थानकालेऽभिवन्देदिति । देवब्राह्मणगुरूदीक्षितानां छायां नाक्रामेत्,

निष्ठूतवाल्लरुधिरविष्मुत्रस्नानोदकानि वा। न वस्त्रतन्त्रीं लङ्घयेत्। प्रवर्षति न धावन्, न तृत्वा नदीं तरेत्। न देवताभ्यः पितृभ्यश्च कामं प्रदाय, न बाहुभ्याम्, न भिन्नया नावा। न कच्छमधितिष्ठेत्। न कूपमवलोकयेत्, न लङ्घयेत्। इन्द्रभारिन्दपक्षातस्त्रीरोगिवरचक्रिणाम् पन्थादेयो वृषस्तेषां मान्यः स्नातश्च भूपतेरिति"। "सन्नानकतरुच्छायसुप्तविद्याधराध्वगमिति" कुमा०। स्त्रर्थे, उद्गे, च। पथिगास्तुकमात्रे त्रि०। गङ्गायां स्त्री अन्तरे पु०।

अध्वगत् त्रि० अध्वानं गच्छति क्विप्। पथिके।

अध्वगभोग्य पु० अध्वगेन अतिसौलभ्यात् अयत्नलभ्यफलत्वाच्च भोग्यः ३त०। (आमड़ा) इति प्रसिद्धे आम्रातवृक्षे। अनायासेन तत्फलस्य भोग्यत्वात्तस्य तथात्वम्।

अध्वजा स्त्री अध्वनि जायते जन-ड ७त०। (सोना) इति ख्याते स्वर्णपुष्पीवृक्षे।

अध्वन् पु० अत्ति वलम् अद-क्वनिप् धादेशः। पथि, "अपि लङ्घितमध्वानं बुबुधे न बुधोपमः" इति रघुः। अध्वानमध्वाल्विकारश्च" इति कु०। "नैकोऽध्वानं गच्छेदिति विष्णु स०। आकाशे पु० निरुक्तकारः। अधिकदुरारोहृक्षे च। सर्वभक्षकत्वात् काले, क्षिप्रे च। अश्नुते खण्डशो भक्षयतेऽनेनेति करणे क्वनिप्। अश्वये। मा०स०। उपसर्गपूर्वादचसमा०। अधुःदुरधुः (कुपथः) प्रा०ब०। कदादेशः कदध्वा। अवयवश्च वेदस्य शाखाऽपि यथा "एवंविशत्यध्वयुक्तश्चवेदस्त्रयो विदुः। सङ्ख्याधा सामवेदो यजुरेकशताध्वकमिति।

अध्वनीन त्रि० अध्वानमलं गच्छति अध्वन्+ख। पथिके। पथिगमनक्षमे।

अध्वन्य त्रि० अध्वानमलं गच्छति अध्वन्+यत्। पथिके। पथि क्षिप्रगमनक्षमे शीघ्रगामिनि। "क्षिप्रं ततोऽध्वन्यतरङ्गयावीति" भट्टिः।

अध्वपति त्रि० ७त०। मार्गपालके। स्त्रर्थे पु० दिवैव पथिकानां गमनात् रात्रौ च "न रात्राविति" विष्णुना गमननिषेधात् स्त्रर्थस्य तत्पालकत्वम् "अध्वनामध्वपते! प्रसातिं स्वस्ति मेऽस्मिन् देवयाने पथीति यजु०। "अध्वपते! मार्गपालकदेवे" इति वेददीपः।

अध्वर पु० अध्वानं सत्पथं राति रा+क। यज्ञे। "अध्वरेक्षिणिनां पातेति" भट्टिः। "तमध्वरे विरुजिति क्षितीशमिति" रघुः। आकाशे निरुक्तकारः। अष्टवसुमध्ये द्वितीयवसौ च। न ध्वरति कुटिला न भवति ध्वृ-अच् न०त०। अकुटिले च। दैव्या होतारा ऊर्ध्वमध्वरं न इति २७,१८ "इमं यज्ञमवतामध्वरं न" इति यजु०। २७,१७ अध्वरं "अकुटिलं गाल्लोक्तमिति" वेददीपः। सावधाने त्रि० नडा० फक्। आध्वरायणः।

अध्वरकर्मन् न० अध्वरएव कर्म। यज्ञरूपकर्मणि।

अध्वरमीमांसा स्त्री अध्वरस्य यज्ञस्य कर्त्तव्यताज्ञानाय मीमांसा विचारः। जैमिनीयप्रोक्ते "अथातो धर्मजिज्ञासेत्यादि धर्ममीमांसाख्ये शास्त्रे।

अध्वरथ पु० अध्वैव रथो यस्य ब०। पथिप्रस्थे दूते। अध्वने हितः पर्य्याप्तो रथो यस्य ब०। पथिगमनोपयुक्ते रथे। चक्रविशिष्टोरथस्तावत् क्रीडार्थः, देवयानार्थः विनयार्थः पथिगमनार्थः गन्त्रीरथश्चेति भेदात् पञ्चविधः। इति हेमचन्द्रः।

अध्वर्यु पु० अध्वरमिच्छति अध्वर+क्यच्-युच् ततोऽन्त्याकारलोपः। यजुर्वेदज्ञे होमकारिणि ऋत्विजि। "निर्मिमीते क्रियासङ्कैरध्वर्युर्यज्ञियं वपु"रिति सा०भा०। सोमयागे षोड़शसु ऋत्विक्षु चतुर्षु प्रधानेषु मध्ये ऋत्विङ्भेदे तद्विवरणम् अच्छावाकशब्दे दृश्यम्। "होता प्रथमं शंसति तमध्वर्युः प्रोत्साहयतीति" सि०कौ०। "त्वमध्वर्युरुत होतासि पूर्व्यः प्रशास्तापोता जनुषा पुरोहित" इति ऋ० १,९४,६। योपधत्वात् स्त्रियां न ङीप्। अध्वर्वोर्भावः कर्म उक्षा० अण् आध्वर्यवम् तद्भावादौ न०।

अध्वशल्य पु० अध्वनि शल्यमिवाचरतीति क्विप्+अच्। पथिकानां पादवस्त्रादौ शल्यवद्वेधकारके (आपाङ्) इति ख्याते अपामार्गवृक्षे।

अध्वस्मन् त्रि० ध्वंस-मनिन् किच्च न०त०। ध्वंसरहिते "अध्वस्मभिः पथिभिः स्वाजदृष्टय" इति ऋ० २,२४,५, अध्वस्मभिः ध्वंसरहितैरिति भा० अध्वस्मानोदिविध्विति ऋ०१२०४०।

अध्वाति पु० अध्वानमतति अत इ ६त०। पथिके। अद्धा निश्चयमतति अद्धेति दोषदो धान्तः। मेधाविनि निरुक्त०।

अध्वान्तशातव पु० अध्वान्तस्य मार्गसीमायाः शातव इव। सोनाकवृक्षे। ६त०। मार्गसीमारिपौ पु०।

अध्वायन न० अध्वनि अयनं गतिः। यात्रायाम् "अध्वायनञ्च यच्चारकर्म सौरेण मानेन सदाध्यक्षे"दिति विष्णुध० पुरा०। "अध्वायनमध्वगमनं यात्रेति यावदिति" रघु०।

अन जीवने अदा०पर० अक०सेट्। अनिति आनीत्। घञ् आनः, अच् अनः, ल्युट् अननम्। आनयति अनिनिषति। क्विप् अत् "सर्वं खल्विदं ब्रह्म तज्जलानिति विश्वे चनेदना ऋ० ४ ३०,३, अना प्राणनेति भा० आ०उप० "यद्येष आकाश आनन्दो न स्यात् कोऽन्यात्यात्? कः प्राण्यात्? इति श्रुतिः "प्राणिषत्यव मानार्थमिति" भट्टिः। प्राद्युपसर्गतोविशेषगत्यर्थता। प्र+प्राग्गतौ, प्राणः अप+अधोगतौ अपानः, उद्+उर्द्धगतौ उदानः, वि+आ+विश्वग्गतौ व्यानः, सम्+समन्नाड्गतौ समानः। "यद्वै प्राणिति स प्राणः यदपानिति सोऽपानः" इति श्रुतिः। जीवनं च प्राणधारणं तेन धात्वर्थस्टहीतकर्मकत्वात्कर्मकः यस्य संयोगात् देहनिर्म्माणभित्युक्तमधिष्ठानशब्दे। उपसर्गनिमित्तात् ल्युलन्तत्वेऽप्यस्य णत्वं प्राण्।

अन जीवने दिवा० आत्म०अक० सेट्। अन्यते आनिष्ट।

अन पु० आ+नी–वा०ड पृ० आङो नुसः अन–वा० अच् वा। आनयने प्राणने च "प्राणोऽपानो व्यान उदानः समानोऽन इत्येतत्सर्वं प्राण इति" छ०उप०। "अथ प्राण उच्यते। प्राणो मुखनासिकसञ्चार्य्यान्हृदयवृत्तिः। प्रथनात् प्राणः। अपनयनान्मलपुरीषादेरपानोऽधोवृत्तिः आनाभिस्थानः। व्यानो व्यानयनकर्मा, व्यानः प्राणापानयोः सन्धिर्वियत्कर्म्महेतुश्च। उदान उत्कर्षोर्द्धगमनादिहेतुरापादतलमस्तकस्थान ऊर्द्धवृत्तिः। समानः समं नयनाद्भुक्तस्य पीतस्य च कोष्ठस्थानोऽन्नपक्ता। अन इत्येषां वृत्तिविशेषाणां सामान्यभूता सामान्यदेहचेष्टासम्बन्धिनी वृत्तिरेवं यथोक्तं प्रणादिवृत्तिजातमेतत् सर्वं प्राण एवेति" भा०। प्राणे च "स होवाच किं मेऽन्नं भविष्यतीति" यत्किञ्चिदिदमा श्वभ्य आ शकुनिभ्य इति होचुस्तद्वा एतदन्नाद्यमनो ह वै नाम प्रत्यक्षमिति छा०उ० "स होवाच मुख्यः प्राणः, किं मेऽन्नं भविष्यतीति" मुख्यप्राणं प्रहारमिव कल्पयित्वा वागादीन् प्रतिवक्तृनिव कल्पयन्ती श्रुतिराह। यदिदं लोकेऽन्नजातं सर्वप्रसिद्धमा श्वभ्य आ श्वभिः सह, आ शकुनिभ्यः सह शकुनिभिः सर्वं प्राणिनां यदन्नं तत्तवान्नमिति होचुर्वागादय इति। प्राणस्य सर्वमन्नं प्राणोऽत्ता सर्वस्यान्नस्येत्येवं प्रतिपत्तये कल्पितास्याधिकारूपाद्याद्यत्व स्तेन श्रुतिरूपेणाह। तदेवं एतद्यत्किञ्चिल्लोके प्राणिभिरन्नमद्यते अनस्य प्राणस्य तदन्नम् भा०

अनंश त्रि० नास्ति अंशोदायग्रहणाधिकारोऽस्य। अंशानधिकारिणि क्लीबे क्लीबपतितादौ। तेच "सर्वे हि धर्म्मयुक्ता भागिनो द्रव्यमर्हन्ति यस्तधर्म्मेण द्रव्याणि प्रतिपादयति ज्येष्ठोऽपि तमभागं कुर्वीतेति" आप०। "सवर्णाजोप्यसुखवाचार्हः स्यात् पैतृके धने। तत्पिण्डदाः श्रोत्रिया ये तेषां तदभिधीयते। उत्तमर्णाधमर्णेभ्यः पितरं त्रायते सुतः। अतस्तद्विपरीतेन नास्ति तेन प्रयोजनम्। तया गवा किं क्रियते या न धेनुर्न गर्भिणी। कोऽर्थः पुत्रेण जातेन यो न विद्वान् न धार्म्मिकः। शास्त्रशौर्य्यार्थरहितस्तपोविज्ञानवर्जितः। आचारहीनः पुत्रस्तु मूलोच्चारसमस्तु स इति हृ० "श्राद्धादेः पुत्रकर्त्तृकतया महाफलश्रुतेस्तत्कर्म्मवेतनं धनसम्बन्धित्वं अतस्तदकुर्व्वतः कुतो वेतन? मिति दा०भा०। अतएवाह मनुः। "सर्वएव विकर्म्मस्था नार्हन्ति भ्रातरो धनम्"। तथा "अनंशौ क्लीवपतितौ जात्यन्धबधिरौ तथा। उन्मत्तजड़मूकाश्च ये च केचिच्चिररिन्द्रियाः इति। "पतितस्तत्सुतः क्लीवः पङ्गुरन्धश्चिकित्सकः जड़ः। अन्धोऽचिकित्स्यरोगार्त्तो भर्त्तव्यास्ते निरंशका" इति काल्या०। देवलः "मृते पितरि न क्लीवकुष्ठ्यन्धजड़ान्धकाः। पतितः पतितापत्यं लिङ्गी दायांशभागिनः। तेषां पतितवर्ज्जेभ्यो भक्तवस्त्रं प्रदीयते। तत्सुताः पिण्डदायांशं लभेरन् दोषवर्ज्जिता" इति। बौधायनः। "अतीतव्यवहारान् व्यासाच्छादनैर्बिभ्रयुः, अन्धजड़क्लीवव्यसनिव्याधितादीनाकर्म्मिणः पतिततज्जातवर्जम् इति"। "पिण्डहिट् पतितः षण्ढो यश्च स्यादौपपातिकः। औरसा अपि नैतेऽंशं लभेरन् क्षेत्रजाः कुतः? इति" नार०। "अक्रमोढासुतश्चैव सगोत्राद्यस्तु जायते। प्रव्रज्यावसितश्चैव न रिक्थं तेषु चार्हति। अक्रमोढासुतस्त्वृक्थी सवर्णश्च यदा पितुः। असवर्णप्रसूतश्च क्रमोढ़ायाश्च यो भवेत्। प्रतिलोमप्रसूतोयस्तस्याः पुत्रो न रिक्थभाक्। व्यासाच्छादनमात्रं तु देयं तद्बन्धुभिर्मतम् बन्धूनामप्यभावे तु पित्र्यं द्रव्यं तदाप्नुयात्। स्वपित्र्यं तद्धनं प्राप्य दापनीया न बान्धवा इति काल्या०। एवं दर्शिताः। अंशः अवयवः। तच्छून्ये निरयवे आकाशादौ, परमेश्वरे च। [यस्माः। कदल्याम् जटाधरः।

अनंशुमत्फला स्त्री न अंशुमत् मोचकाभ्यन्तरस्थत्वात् फलं

अनक पु० अणकवत्। अधमे, कुत्सिते च।

अनक्ष् त्रि० न अक्ष्णोति व्याप्नोति विषयमिन्द्रियेण अक्ष–क्विप् न०त०। अन्धे चक्षुरिन्द्रियशून्ये। "प्रतिश्रोणः स्या व्यनगवष्टेति" ऋ०२, १५, ७, "पूर्व्वमन्धः अधुना चक्षुर्लाभात् व्यचष्टेति भा०।

अनक्ष त्रि०नास्ति अक्षं चक्षं नेत्रादिकमिन्द्रियं वा यस्य ब०।

वक्त्रशून्ये, चक्षुरादीन्द्रियशून्ये च । "अयज्ञासो बधिरा अहासत" इति ऋ० ६,७३,६, अनज्ञासश्चक्षुर्वर्ज्जिताः इति भा० वेदे सौत्रात्स इति वत् अनज्ञास इति । रूपसिद्धिः ।

अनक्षर न० अप्रशस्तान्यक्षराणि यत्र ब० । सङ्गणसङ्केपके दोषोद्घोषकवाक्ये, अवाच्ये निन्दावचने, (गालि) इति प्रसिद्धे दुष्टवचने च । न सन्ति अक्षराणि क्षेत्रत्वेनास्य । अक्षरज्ञानशून्ये मूर्खे त्रि० ।

अनक्षि पु० अप्रशस्तं मन्दमक्षि न०त० । मन्दनेत्रे । ब० । षच्समासान्तः । तत्र अनक्ष इत्येव । तद्वति । स्त्रियां ङीष् ।

अनगार त्रि० नास्ति अगारमस्य । गृहशून्ये । अनिकेतने । प्रव्रजिते, सन्यासादौ च पु० ।

अनग्न त्रि० न नग्नः । अदिगम्बरे आच्छादनवति च "यज्ञोनवसना अनग्ना" इति ऋ० १,१,६, । "स होवाच किं मे वासो भविष्यतीत्याप इति होचुस्तस्माद्वा एतदशिष्यन्तः पुरस्ताज्जोपरिष्टाच्चाद्भिः परिदधति तस्मादको यथा वासो भवत्यनग्नो ह भवतीति छा०उ० । "तस्मात्प्राणस्य वास आपस्तस्माद्वा एतदशिष्यन्तो भोक्ष्यमाणा भुक्तवन्तश्च आच्छादा विद्वांस एतत्कुर्वन्ति । किं अद्भिर्वासस्त्वनीयाभिः पुरस्ताज्जोजनात्पूर्व्वंसपरिष्टाच्च भोजनादूर्द्ध्वं च परिदधति परिधानं कुर्व्वन्ति तस्यैव प्राणस्य तस्मादको लग्नशीलो वासो भवति । वाससो लग्नैव भवतीत्यर्थः । अनग्नो भवति । वाससो लग्नुकत्वेनार्थसिद्धैवानग्नता इत्यनग्नो ह भवतीत्युत्तरीयवान् भवतीत्येतत्" इति भाष्यम् ।

अनग्नि पु० नास्ति अग्निः श्रौतः स्मार्त्तो वाऽस्य । श्रौतेन स्मार्त्तेन वा विधिना अनाहिताग्नौ गृहस्थभेदे, सर्व्वथा अग्निशून्ये, प्रव्रजिते च । "अनग्निरनिकेतश्च मुनिर्मूलफलाशन" इति मनुः । न०त० । अग्निभिन्ने पु० । "अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचिदिति" स्मृतिः । ७व० । अग्निचयनरहिते यज्ञे च । "अनग्नावुत्तरवेदिम्, कात्या० २६,७,११, "अनग्नौ अग्निरहिते अनग्निचिते यज्ञे, उत्तरवेदिं प्रतिगच्छतीति" तद्व्याख्या ।

अनग्नित्रा न अग्निं त्रायते रक्षति असम०स० । अग्निरक्षाकरे पापिष्ठे "अनग्नित्रा अभ्यमन्त कृष्टीः ऋ० १,१८६, २, "अनग्नित्राः पापिष्ठाः कृष्टयः प्रजा" इति भा० ।

अनग्निदग्ध त्रि० न अग्निना दग्धः अस०स० । श्मशानकर्म्मणि अग्निसंस्कारहीने "ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः" इति ऋ० १०,१५२४, "अनग्निदग्धाः श्मशानकर्म्म न प्राप्ता" इति भा० । विप्राणां पितृभेदे "अग्निदग्धानग्निदग्धान् काव्यान् बर्हिषदस्तथा अग्निष्वत्तांश्च सौम्यांश्च विप्राणामेव निर्देशेदिति" मनुः । वह्निना अदग्धे च ।

अनघ त्रि० नास्ति अघं पापं दुःख व्यसनं कालुष्यं वा यस्य । पापशून्ये, दुःखहीने, व्यसनशून्ये, मलशून्ये, स्वच्छे च । विष्णौ पु० "अनघो विजयो जेतेति" वि० सह० । "स आत्माऽपहतपाप्मेत्यादि" श्रुतौ तस्य पापराहित्योक्तेस्तथात्वम् । तत्र दुःखशून्ये, "दयालुमनघस्रष्टमिति" माघः । दोषरहिते "अगाधस्यानघा गुणा" इत्यमरः । व्यसनरहिते "कश्चित् मृगीनामनघा प्रसूतिः ? इति" रघुः ।

अनङ्ग न० नास्ति अङ्गमाकारो यस्य । आकाशे, चित्ते च । कन्दर्पे पु० । अङ्गशून्यमात्रे त्रि० । तत्राकाशस्य निरवयवत्वात्, न्यायवैशेषिकनये चित्तस्याणुत्वेन च निरवयवत्वात्तथात्वम् । कामस्य हरनेत्रेण दग्धाङ्गत्वात् अनङ्गत्वम् । तत्कथा च शिवपुराणे "कामोधनुषि संयोज्य पुष्पबाणं तदा सुने ! पार्वतीसम्मुखे स्थाणौ मोक्तुकामो व्यवस्थितः । हरस्तु धैर्य्यमालम्बा किमेतदिति चिन्तयन् । ददर्श पृष्ठतः कामं पुष्पबाणधनुर्धरम् । विद्वन्मन्योक्षस्याथ तृतीयनयनात् सुने ! । स्फुरन्नुदर्चिरग्निस्तु पपात मदनोपरि । क्रोधं संहर हे देव ! इति यावत् वदन्ति खे । इन्द्रादिसकला देवास्तावद्भस्मीचकार तम्" इति ॥ "त्वमनङ्गः कथमसता रतिरिति" "तनुतां दुःखमनङ्ग ! मोक्ष्यतीति" च कुमा० । अङ्गसुपकरणं न०त० । अङ्गभिन्ने । न०ब० । तच्छून्ये त्रि० ।

अनङ्गक्रीड़ा स्त्री अनङ्गेन क्रीड़ा । कामहेतुकक्रीड़ायाम् । "अष्टावर्द्धे गा ह्यभ्यस्ता यस्याः सानङ्गक्रीड़ेत्युक्तेति" (वृत्त०) उक्ते मात्रावृत्तभेदे च ।

अनङ्गलेख पु० अनङ्गस्य तद्व्यङ्गको लेखः । कामव्यञ्जकलेखे । "अनङ्गलेखक्रिययोपयोगमिति" कुमा० ।

अनङ्गशेखर पु० क्रमेण लघुगुरुनिवेशवति दण्डकभेदे, छन्दोविशेषे । यथा "लघुर्गुरुः क्रमेण यत्र बध्यते सुधीभिरिच्छया स दण्डकस्त्वनङ्गशेखरः कृतः" इति छन्दो० ।

अनङ्गारिस्तुति पु० ६त० । शिवे तस्य तद्देहभस्मीकरणात्तत्त्वम् ।

अनच्छ त्रि० न अच्छः निर्म्मलः न०त० । कलुषे, अप्रसन्ने च ।

अनञ्जन न० न अञ्जते लिप्यते अनेन अञ्ज–कर्म्मणि ल्युट् न०त० । निःसङ्गे, आकाशे, परब्रह्मणि च । "निरञ्जनं सामरसमुपैतीति दिव्यमिति" श्रुत्वा तस्य सम्बन्धराहित्योक्तेस्तथात्वम् । अञ्जनं दोषस्तद्रहिते नारायणे पु० । तथाभूतवस्तुमात्रे

त्रि० । कज्जलशून्ये त्रि० । "नेत्रे दूरमनञ्जने पुलकिनेति" सा०द० ।

अनडुज्जिह्वा स्त्री अनडुहोजिह्वेव । गोजिह्वायाम् (अनन्तमूल) । तस्या गोजिह्वाकृतिपत्रत्वात्तथात्वम् ।

अनडुह् पु०अनः शकटं वहतीति नि० । (एड़े) इति प्रसिद्धे गवि । स्त्रियां गवि ङीपि अनडुही, अनड्वाहीति च । कृत्यादि० क । अनडुत्कः अनडुदासन्नदेशादौ त्रि० । ऋषिभेदे । तद्गोत्रापत्ये गर्गा० यञ् । आनडुह्यः तदपत्ये पु०स्त्री ।

अनणु पु० न अणुः । स्थूलधान्ये "अनणुषु दशमांशोऽणुष्वर्धकादशांशः" लीला० । अणुभिन्ने स्थूले त्रि० स्त्रियां ङीप् ।

अनतिक्रम न० न०त० । अतिक्रमाभावे । [क्रमणीये ।

अनतिक्रमणीय त्रि० न०त० । अतिक्रमणीयभिन्ने अनुल्ल-

अनतिद्भुत त्रि० सर्वाणि अतिक्रमम् न भवति अति–भू–क्विप् न०त०षट् । सर्वातिक्रमेणाभूते यथार्थभूते । "ब्रह्मा ते इन्द्र ! गिर्वणः क्रियन्ते अनतिद्भुता" इति ऋ० ८,९१,२, अनतिद्भुता सर्वानतिक्रमम् न भवन्ति इन्द्रगुणव्यापकानि यथार्थभूतानीति" भा० ।

अनतिप्रश्न त्रि० अतिप्रश्नमर्हति यत् न०त० । अतिप्रश्नार्हे वस्तुनि । "सङ्होवाच गार्गि ! मातिप्राक्षीः मा ते मूर्धा व्यपप्तदनतिप्रश्न्यां वै देवतामतिपृच्छसीति" ह०उ०

अनतिरिक्त त्रि० न० । अधिके । "न्यायोक्तो स्वानधिकरणवृत्तिभिन्ने च "अनतिरिक्तवृत्तित्वमवच्छेदकत्वमिति" गदा० ।

अनतिविलम्बिता स्त्री न अतिविलम्बिता अभावार्थे न०त० । अतिविलम्बाभावे वाग्गुणभेदे च । वाग्गुणाश्च हेमचन्द्रे दर्शिताः यथा "संस्कारवत्त्वमौदार्यमुपचारपरीतता । मेघगाम्भीर्यनिर्घोषप्रतिनादविधायिता दक्षिणत्वमुपनीतरागत्वं च महार्थता । अव्याहतत्वं श्लिष्टत्वं संशयानामसम्भवः । निराकृतान्योत्तरत्वं हृदयङ्गमिताऽपि च । मिथः साकाङ्क्षता प्रस्तावौचित्यं तत्त्वनिष्ठता । अप्रकीर्णप्रसृतत्वमसंक्षाप्त्यनिन्दिता । आभिजात्यमतिस्निग्धमधुरत्वं प्रशस्यता । अमर्मवेधितौदार्यं धर्म्यार्थप्रतिबिद्धता । कारकाद्यविपर्यासोविभ्रमादिवियुक्तता चित्रकृत्त्वमद्भुतत्वं तथानतिविलम्बिता अनेकजातिवैचित्र्यमारोपितविशेषता । सत्वप्रधानता वर्णपदवाक्यविविक्तता । अव्युत्थितिरखेदित्वमस्खलितगुणश्च वाग्गुणाः" इति ।

अनद्वा अव्य० न अद्वा । अनिश्चये "अनद्वा वैतद्यदिमाङ्लोकानतीति" वेदः । नञ्–क्वा न०त० । अपरिच्छेदे त्रि० ।

अनद्वापुरुष न अद्वा स्वकार्ये नियतो यस्य तादृशः पुरुषः । देवपिण्डकार्य्यविसर्गे । "अनद्वापुरुषमीक्षते" इति का० १६,२,१३, "अनद्वापुरुषं देवपिण्डकार्य्ये विसर्गमध्वर्युमिति" वेददीपः ।

अनद्य पु० न अद्यं भक्ष्यम् अप्राशस्त्ये न०त० । गौरवर्णभेदे राजनिघ० । भक्ष्यभिन्ने त्रि० ।

अनद्यतन पु० न अद्यतनः । अद्यतनभिन्ने भूते भविष्यति च काले "अनद्यतने लङिति" "अनद्यतने लुडिति" च पा० । अनद्यतने भूते लङ् अपचत्, अनद्यतने भविष्यति लुट् पक्तेति "परोक्षानद्यतने लिडिति" पा० यपाच । तत्कालवृत्तौ त्रि० । अद्यतनञ्च "अतीतायारात्रेः पश्चार्द्धेन, आगामिन्याः रात्रेः पूर्व्वार्द्धेन सहितोदिवसोऽद्यतन" इति सि०कौ० तद्भिन्नः कालः ।

अनधिकार पु० न अधिकारः अभावार्थे न०त० । अधिकाराभावे । व० । अधिकारशून्ये ।

अनधिकारचर्चा स्त्री अनधिकारस्य चर्चा चिन्ता । यत्र यस्याधिकारो नास्ति तस्य तद्विषये चिन्तायाम् ।

अनधिकारिन् त्रि० न अधिकारी । अधिकारिभिन्ने ।

अनधिकृत त्रि० न अधिकृतः । अधिकृतभिन्ने ।

अनधिगत त्रि० न०त० । गतभिन्ने, प्राप्तभिन्ने, ज्ञातभिन्ने च अनधिगताबाधितार्थज्ञानत्वेन प्रमाणत्वमिति वे०प० ।

अनधिष्ठित त्रि० न अधिष्ठितः । अधिष्ठितभिन्ने ।

अनधीन त्रि० न अधीनः परस्य । स्वाधीने । संज्ञायाम् कन् । कौटतन्त्रे । स हि कस्यां वसन् न कस्यचित् अधीनः

अनध्यक्ष न० अध्यक्षम् अभावे न०त० । प्रत्यक्षाभावे "मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत्" इति भाषा० द्रव्यप्रत्यक्षं प्रति आश्रयमहत्त्वस्याकारणत्वेन मनसश्च "अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते इत्युक्तेः अणुत्वेन ज्ञानादिप्रकारकं अहंजानामीत्याद्याकारं ज्ञानं प्रत्यक्षं न स्यात् ज्ञानाश्रयत्वेन अभिमतस्य मनसो महत्त्वाभावादिति तदाशयः । व० । अध्यक्षरहिते त्रि० ।

अनध्याय पु० अध्यायोऽध्ययनमभावार्थे न०त० । अध्ययनाभावे । न अधीयतेऽस्मिन् काले इति अधिकरणे घञ् । अध्ययनाय निषिद्धे "चातुर्मास्यद्वितीयादौ स्मृतिपूजानध्यायकाले "अष्टकासु च संक्रान्तौ श्रवणे बोधने हरेः । अनध्यायं प्रकुर्व्वीत तेत्याद्युक्ते काले, "निर्घाते भूमिचलने" इत्याद्याकालिकानध्यायकाले च । अनध्यायकालाश्च स्मृतौ

दर्शिताः यथा "प्रेकोचैचा द्वितीयास्ताः प्रेतपक्षे गते तु या । या तु कोजागरे याते चैत्रावल्याः परेऽपि या । चातुर्मास्ये समाप्ते च द्वितीया या भवेत्तिथिः । पराख्येताऽनध्यायः पुराणैः परिकीर्त्तितः" इति राजमार्त्तण्डः । "चैत्राश्वयुग्द्वितीयायां तिस्रष्वेवाष्टकासु च मार्गे च फाल्गुने चैव आषाढ़े कार्त्तिके तथा । पञ्चयोर्मासयोरन्त्यस्य द्वितीयां परिवर्जयेदिति" भुजबलः । "मन्वादौ च युगादौ च शिष्याञ्चाध्यापयेद्बुधः" । निर्णयामृते "रात्रौ यामद्वयादर्वाक् सप्तमी च त्रयोदशी । प्रदोषः स तु विज्ञेयो वेदाध्ययनगर्हितः ॥ रात्रौ नवसु नाड़ीषु चतुर्दशी यदि दृश्यते । प्रदोषः स तु विज्ञेयो वेदाध्ययनगर्हितः" इति ॥ निर्णयसिन्धौ प्रजापतिः । "षष्ठी च द्वादशी चैव अर्द्धरात्रोनताड़िका । प्रदोषे त्वनधीयीत तृतीया नवनाड़िका" ॥ उद्वर्गः । "ऋतिथूक्ताननध्यायान् सप्तमीञ्च त्रयोदशीम् । पञ्चयोर्मासयोरन्त्यस्य द्वितीयां परिवर्जयेत्" इति । अनध्यायास्तु द्विविधा नित्या नैमित्तिकाश्चेति तत्र नित्याः । "आषाढ़े फाल्गुने ज्येष्ठे या द्वितीया विधुक्षये । चातुर्मास्यद्वितीयास्ताः प्रवदन्ति मनीषयः" ॥ गर्गोऽपि ॥ "कृष्णपक्षे द्वितीयायां फाल्गुनाषाढ़कार्त्तिके । शुक्लाश्वयुग्द्वितीयायां नैवाध्ययनमाचरेत्" इति । "एतायुगादयः प्रोक्ताः स्वाध्यायं वर्जयेद्बुधः" इति उशः । गौतमः । "चातुर्मास्यद्वितीयासु, मन्वादिषु युगादिषु । अष्टकासु च संक्रान्तौ शयने बोधने हरेः । अनध्यायं प्रकुर्वीत तथा सोपप्लवासु चेति" । सोपप्लवास्तु । "सिता ज्येष्ठे द्वितीया च आश्विने दशमी तथा । चतुर्दशी द्वादशी माघे एताः सोपप्लवाः स्मृता इति" गर्गोक्ताः । उद्वह्निः "पञ्चदश्यां चतुर्दश्योरष्टमीद्वितीये तथा । पक्षादावपि पक्षान्ते ब्रह्म नाधीयते नरैः ॥ अष्टमी हन्त्युपाध्यायं शिष्यं हन्ति चतुर्दशी । अमावस्योभयं हन्ति प्रतिपत् पाठमात्रतः" इति । मनुः नैमित्तिकानध्यायानाह स्म । "सन्ध्यागर्जितनिर्घातभूकम्पोल्कानिपातने । व्रतबन्धं न कुर्वीत" इति ॥ तथापस्तम्बः ॥ "उल्कायामभ्युत्पाते च सर्वासां विद्यानामाकालिकमिति" ॥ ऋष्यशृङ्गः ॥ "विद्युद्गर्जितवृष्टीनां सन्निपातोयदा भवेत् । अनध्यायं प्रकुर्वीतेत्यादि" । "व्रतेऽग्नि पूर्वसन्ध्यायां वारिदो यदि गर्जति । तद्दिनं स्यादनध्यायं व्रतं तत्र विवर्जयेत्" ॥ "सायं सन्ध्यास्तमिते, प्रातःसन्ध्यास्तमिते अहोरात्रौ, विद्युत्त्वपररात्रावधि विद्युति, नक्तञ्चापररात्रादिति गौतः । ऋतिरत्नावल्याम् "कालवृद्धौ च तत्कालमकाले च तिरात्रकम् । अतिमात्रावधौ वृष्टिर्नाधीयीत दिनत्रयम् । अनुराधर्क्षमारभ्य षोड़शर्क्षेषु भास्करः । यावद्धरति चैतावत्कालं मुनयो विदुः ॥ तथा च वराहः । मार्गान्नासात् प्रभृति मुनयोऽम्बासवाख्यौकिगर्गाश्चैत्रं यावत् प्रवर्षणविधौ नेतिकालं वदन्ति । नाड़ीजङ्घः सुरगुरुस्तनिः प्राह वृष्टेरकालौ मासावेतावशुभफलदौ पौषमाघौ न शेषाः" । तत्राकालवृष्टौ पशुमर्त्यचरणाङ्कितायामेव दोषो नान्यथा उक्तञ्च तत्रैव चिन्तामणौ "यदि मासेषु चतुर्षु पौषमासादिषु भवेदकालवृष्टिः । पशुमर्त्यचरणाङ्कितायां यावद्वसुधा नहि तावद्दोष" इति । तत्र दिनसंख्योक्ता तत्रैव । एकैनैकमहः प्रोक्तं द्वितीयेन त्रिरात्रकम् । तृतीयेन तु सप्ताहं दशरात्रमतः परमिति, पौषे दिनत्रयं वर्ज्यं माघे चैव दिनद्वयम् । फाल्गुने दिनमेकन्तु चैत्रे तु घटिकाद्वय" मित्यावश्यककार्य्यविषयम् । "अनध्यायस्य पूर्व्वेद्युरस्य चैवापरेऽहनि । व्रतबन्धं विसर्गञ्च विद्यारम्भं न कारयेत्, इति नैमित्तिकानध्यायः । मनुरपि नित्यादनध्यायमाह स्म । "इमान्नित्यानध्यायानधीयानो विवर्जयेत् । अध्यापनञ्च कुर्वाणः शिष्याणां विधिपूर्व्वकम् ॥ कर्णश्रवेऽनिले रात्रौ दिवा पांशुसमूहने । एतौ वर्षास्वनध्यायावध्ययनात्तः प्रचक्षते । विद्युत्स्तनितवर्षेषु महोल्कानाञ्च संप्लवे । आकालिकमनध्यायमेतेषु मनुरब्रवीत् । एतांस्त्वभ्युदितान् विद्यात् यदा प्रादुष्कृताग्निषु । तदा विद्यादनध्यायमन्तौ चाभ्रदर्शने । निर्घाते भूमिचलने ज्योतिषाञ्चोपसर्जने । एतानाकालिकान् विद्यादनध्यायान्तदापि । प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिस्वने । सन्ध्योतिः स्यादनध्यायः शेषे रात्रौ यथा दिवा । नित्यानध्याययुक्तो ग्रामेषु नगरेषु च । धर्म्मनैपुण्यकामानां पूतिगन्धे च सर्व्वदा । अन्तर्गतशवे ग्रामे वृषलस्य च सन्निधौ । अनध्यायो रुद्यमाने समवाये जनस्य च । उदके मध्यरात्रे च विण्मूत्रस्य विसर्जने । उच्छिष्टः श्राद्धभुक् चैव मनसापि न चिन्तयेत् । प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम् । त्र्यहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके । यावदेकानुद्दिष्टस्य गन्धो लेपश्च तिष्ठति । विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्त्तयेत् । श्मशानः प्रौढ़पादश्च कृत्वा चैवाशुकृच्छिकाम् । नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च । नीहारे वाशब्दे च सन्ध्ययोरेव चोभयोः । अमावास्याचतुर्द्दश्योः पौर्णमास्यष्टकासु च । अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्द्दशी । ब्रह्माष्टका-

मौर्णमास्यौ तथाऽऽत्ताः परिवर्जयेत् । पांशुवर्षे दिशां दाहे गोमायुविरुते तथा । श्वखरोष्ट्रे च रुदति षण्ढौ च न पठेद् द्विजः । नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजेऽपि वा । वमित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च । प्राणि ङा यदि वा प्राणि यत्किञ्चिच्छ्राद्धिकं भवेत् । तदा-लभ्याध्ययनध्वाव: पाण्यासन्नो हि द्विजः स्मृतः । चौरै-रुपद्रुते ग्रामे संक्रमे चाग्निकारिते । आकालिकमनध्यायं विद्यात् सर्वाद्भुतेषु च । उपाकर्मणि चोत्सर्गे त्रिरात्रं ऋषयं स्मृतम् । अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु । नाधीयीतान्वमाद्धो न दत्तं, न च हुतम् । न नावं, न खरं, नोष्ट्रं, नेरिणस्थो, न यानगः । न विवादे, न कलहे, न सेनायां, न सङ्गरे । न भुक्तमात्रे, नाजीर्णे, न वमित्वा, न रक्तके । अतिथिश्चानधीयान आरण्ये वाति वा भृशम् । रुधिरे च स्रुते गात्राच्छस्त्रेण च परि-क्षते । सामध्वनावृग्यजुषी नाधीयीत कदाचन । वेद-स्याधीत्य वाप्यन्तमारण्यकमधीत्य च" इति । याज्ञवल्क्यस्तु । "त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबन्धुषु । उपाकर्मणि, चोत्सर्गे, स्वगोत्रेष्वोत्रिये हुते । सन्ध्यागर्जितनिर्घात भूकम्पोल्कानिपातने । समाप्य वेदं द्युनिशमारण्यकमधीत्य च । पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके । ऋतुसन्धिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च । पशु-मनुष्यकुक्कुरबिडालोष्ट्रसूषिकैः । क्षतेऽन्तरे त्वहो-रात्रं, शवपाते, तथोच्छ्रये । अशौद्युगर्दभोलूकसाम-वाय्वर्त्तिनिखने । अमेध्यगवयस्थूलान्त्यश्मशानपतितान्तिके । देशेऽशुचावात्मनि च विद्युत्स्तनितसंप्लवे । भुक्त्वार्द्र-पाणिरभ्योऽन्तरर्द्धरात्रेऽतिमारुते । पांशुवर्षे दिशां दाहे सन्ध्यानीहारभीतिषु । धावतः पूतिगन्धे च शिष्टे च गृहमागते । खरोष्ट्रयानहस्त्यश्वनौदुरुहेरिणरोहणे । सम्प्रति-ग्रहनध्यायानेतांस्तात्कालिकान् विदुः" इति । वसिष्ठः । "तस्मानध्यायाः सन्ध्यास्तमिते स्तनित्नु शब्दे दिवाकीर्त्तौ नगरेषु ग्रामे गोमयपर्य्युक्षिते परिलिखिते वा श्मशानान्ते शयानस्य श्राद्धिकस्य । मानवस्त्वात्र श्लोकमुदाहरन्ति । फलान्यापस्तिलान् भक्ष्यमन्यान्यच्छ्राद्धिकं भवेत् । प्रति-गृह्याध्ययनध्यायः पाण्यासन्ना, ब्राह्मणाः स्मृता इति ॥ धावतः पूतिगन्धिप्रस्रुतेरिणदुरुहमारूढस्य, नावि, सेनायाञ्च, भुक्त्वा चार्द्रहस्ते, वाणशब्दे, चतुर्दश्यामभावास्यायामष्टम्या-मष्टकासु प्रसारितपादोपस्थस्योपाश्रितस्य गुरुसमीपे मिथु-नव्यवेतायां वासस्या मिथुनव्यवेतेनानिर्दशे न ग्रामान्ते-ऽर्दितस्य, मूत्रितस्योच्चरितस्य, वज्रपाते सायंसन्ध्ये, वाजीर्णे निर्घातभूमौ च न चन्द्रसूर्य्योपरागेषु, दिङ्-नादपर्वतनादकम्पप्रपातेषूल्कारुधिरपांशुवर्षेष्वाकालिकम् । उल्काविद्युत्सज्योतिषमपर्त्वाकालिकं वा । आचार्य्ये च प्रेते त्रिरात्रमाचार्यसुतशिष्यभार्य्यासहोदरात्रम् । ऋत्विग्-योनिसम्बन्धेषु च" इति । शङ्खोऽप्याह । अनध्यायेष्वध्य-यनं वर्जयेच्च प्रयत्नतः । चतुर्दशीं पञ्चदशीमष्टमीं राहु-सूतकम् । उल्कापातं महीकम्पमग्नौचं ग्रामविप्लवम् । इन्द्र-प्रयागं सुरतं घनसंघातनिखनम् । वाद्यकोलाहलं युद्ध-मनध्यायं विवर्जयेत् । नाधीयीताभियुक्तोऽपि प्रयत्नाच्च न वेगत" इति । "यद्दिनमहः क्रियते तद्दिनमनध्याय" इत्युक्तेः देवोत्सवादिदिनेऽपि अनध्याय इति केचित् तेन सारस्वतोत्सवे श्रीपञ्चमीदिवसे रथयात्रोत्सवादौ चानध्यायः । "महानवम्यां द्वादश्यां भरण्यामपि पर्वसु । तथाऽन्य-त्तृतीयायां शिष्याद्याध्यापयेद्बुधः । माघमासे तु सप्तम्यां रथाख्यायाञ्च वर्जयेदिति" हारीतः । एवं नानाऽऽकृत्युक्तो-ध्येषु च येन सर्वसंग्रहस्तथाचरणीयम् ।

अनन न० अन–भावे ल्युट् । जीवने, गतौ च "प्राणननवान् प्राण" इत्यादि वे०सा० ।

अननुगत त्रि० न अनुगतः । अनुगतभिन्ने अनुगतत्व तुल्या-कारप्रतीतिप्रयोजको धर्मभेदः यथा घट इति बुद्धौ घटत्वम् एवं पटत्वम् तस्य सर्वत्र एकरूपेण प्रतीयमानत्वात् । अननुगतञ्च तत्तद्व्यक्तित्वादिकं तस्य सर्वत्र प्रतीत्यभावात् । अपदार्थान्तरे, अनधीने च ।

अननुगम पु० न अनुगमः अभावार्थे न०त० । अनुगमाभावे अनुगमत्व तुल्यप्रतीतिप्रयोजकधर्मानुसरणम् एतस्य न्यायादिदर्शनेषु भूरिप्रयोगः ।

अनन्त पु० नास्ति अन्तः गुणानां यस्य ब० । "गन्धर्वाप्सरसः सिद्धाः किन्नरोरगचारणाः । नान्तं गुणानां जानन्ति तेना-नन्तोऽयमुदाहृतः" इत्युक्तलक्षणे विष्णौ, अनन्त ! "संसार-महासमुद्रे मग्नान् समभ्युद्धर वासुदेव !" इति भविष्य-पुरा० । "विष्णुर्वीरोऽनन्त" इति विष्णुस० । मेघे । बहुगीर्ण कत्वादपरिच्छिन्ने शेषनागे, तदवतारे बलभद्रे च । अन्तः परिच्छेदः देशतः कालतः वस्तुतश्च नास्ति यस्य । तस्मिन् परब्रह्मणि न० "सत्यं ज्ञानमनन्तं ब्रह्मेति" श्रुतिः । "न व्यापित्वाद्देशतोऽन्तो नित्यत्वाच्चापि कालतः । न वस्तु-तोऽपि सर्वात्मत्वादानन्त्यं ब्रह्मणि त्रिधा । देशकालान्य-वस्तूनां कल्पितत्वाच्च मायया । न देशादिकृतोऽन्तोऽस्ति

ब्रह्मानन्तं ततः स्फुटमिति" पञ्चदशी। आकाशे च। बहुविस्तारवति सिन्धुवारवृक्षे पु०। अवधिशून्ये, इयत्ता-शून्ये वस्तुमात्रे, सकले च त्रि०। "अनन्तरत्नप्रभवस्य यस्येति" कुमा०। जिनभेदे पु०।

अनन्तचतुर्दशी स्त्री अनन्तस्य विष्णोराधनार्था चतुर्दशी। भाद्रपदशुक्लचतुर्दश्याम्।

अनन्तजित् अनन्तानि भूतानि जितवान् जि-क्विप्। सर्वभूत-जयिनि वासुदेवे। "सहस्रजिदनन्तजिदिति" विष्णुसह०। अनन्तान् चित्तदोषान् जयति। जिनदेवभेदे पु०।

अनन्ततीर्थकृत् पु० अनन्तानि अनेकानि तीर्थानि शास्त्राणि करोति कृ-क्विप्। जैनभेदे। बहुतीर्थकर्तरि त्रि०।

अनन्तत्रयोदशी स्त्री "नभस्ये वाथ वैशाखे मार्गशीर्षेऽथवा पुनः। शुक्लपक्षत्रयोदश्यां मिलुपक्रम्य पद्मपुराणे तत्त-दन्यतमतिथिषु व्रतविशेषमभिधाय "उक्तानन्तत्रयोदश्यैषा कृता-नन्दफलप्रदा" इत्यनेन परिभाषितायां भाद्रमार्गवैशाखा-न्यतममासीयशुक्लत्रयोदश्याम् हेमा०व्रत०। [परमेश्वरे च।

अनन्तदृष्टि पु० अनन्ता दृष्टयो नेत्राणि यस्य। इन्द्रे

अनन्तदेव पु० अनन्तो देव इव। शेषनागे, अनन्ते शेषनागे दीव्यति दिव-अच्। शेषशायिनि नारायणे।

अनन्तमूल पु० अनन्तानि मूलान्यस्य। खनामख्याते मूलप्रधाने वृक्षभेदे।

अनन्तर त्रि० नास्ति अन्तरं व्यवधानं यत्र। अव्यवहिते, व्यवधानञ्च द्विविधं दैशिकं कालिकञ्च। तत्र दैशिके "विष-यानन्तरो राजा भवे"दित्यमरः। "एष ब्रह्मर्षिदेशो वै आर्यावर्त्तादनन्तर" इति मनुः। कालिके। "तदिदं क्रियतामनन्तरं भवता बन्धुजनप्रयोजनमिति" कुमा०। "पितरनन्तरसुत्तरकोशलामिति" रघुः। कालिकमपि द्विविधं पूर्व्वापरकालव्रतव्यवधानभेदात् उत्तरकालव्रतसङ्कोदारणे "अनन्तरोदीरितलक्ष्मभाजाविमौ" पूर्व्वकालावधिकृतम्। मध्यशून्ये, अवकाशशून्ये, अवधिशून्ये च। "तदेतद्ब्रह्मा-पूर्व्वमनपरमनन्तरमबाह्यमिति" स यथा "सैन्यवचनोऽन-न्तरोऽबाह्य" इति च भ०उ०। अव्यवहितकाले। "पुराण-पत्रापगमादनन्तरं—लतेव सद्वृत्तमनोज्ञपल्लवा" इति रघुः। तत्र व्याप्तौ द्वितीया। तत्कालवृत्तिसंनहनक्रिया-विशेषणतया स्त्रीत्वादि। एवमन्यत्र एवञ्च एतस्य स्त्रीवो-क्तिरर्वाचीनानां प्रामादिकी। एतेन अनन्तरस्याभावः अभा वार्थेऽव्ययीभाव इत्यागमेन साम्प्रतकल्पनमपि तत्तदुदा-हरणेषु अनन्वयादुपेक्ष्यमेव। उक्तोदाहरणेषु "अथास्य गोदानविधेरनन्तरमिति" "अनन्तरं भर्त्तुरुपस्थितो-दयेति" च रघौ "योगाच्चान्तिरनन्तरमित्यादौ" च व्य-धानाभावार्थकत्वे समभिव्याहृतपदार्थानां हि नान्वयः तस्य देशकालादिबोधकत्वाभावेन व्याप्त्यर्थे द्वितीयाया अयस्य स्वः। अतः बहुव्रीहित्वात् कालबोधकतया उक्तोदा-हरणादिषु व्याप्त्यर्थे द्वितीयेति बोध्यम्। न०त०। अन्तर-भिन्ने त्रि० तस्य अपुरि सर्व्वनामता। अनन्तरे भवः गहा०ढञ्। आनन्तरीयः अविलम्बभवे त्रि०।

अनन्तरज पु०स्त्री अनन्तरस्याः अनन्तरवर्णायाः जायते जन-ड पुंवद्भावः। क्रमोढाजे पुत्रादौ। अनन्तरं जातः। ज्येष्ठे कनिष्ठे च भ्रातरि। तथाभूतभगिन्यां स्त्री।

अनन्तरय पु० अन्तरयति दूरीकरोति अन्तर+ऊर्ध्वे णि भावे अच् अन्तरयः दूरीकरणम् अभावार्थे न०त०। अपरित्यागे। "यदुक्थो यज्ञक्रतोरनन्तरयावेति" ऋ०४,१, ६, "अनन्तरयाय अपरित्यागावेति" भा०।

अनन्तराय त्रि० नास्ति अन्तरायः प्रतिबन्धको यस्य। निष्-प्रतिबन्धके निर्विघ्ने "ताएतानवानन्तरायमन्त्रहेति" इ०उ०।

अनन्तराशि पु० अनन्तस्य आकाशरूपशून्यस्य राशिः। बीजगणितोक्ते शून्यभागहारादूर्ध्वं परिकल्पिते राशौ।

अनन्तरूप पु० अनन्तानि रूपाण्यस्य। परमेश्वरे विष्णौ "अनन्तरूपोऽनन्तश्रीरिति" वि०स०। "इन्द्रोमायाभिः पुरुरूपईयत" इति श्रुत्या तस्य बहुरूपत्वप्रतिपादनात्तत्त्वम्।

अनन्तर्गर्भिन् अन्तर्गर्भोऽस्य अस्त्यर्थे इनि न०त०। अन्त-र्गर्भशून्ये पवित्रार्थे कुशे। "अनन्तर्गर्भिणं साग्रं कौशं द्विद-लमेव चेति" आ०तत्त्वे छन्दो०प०। अनन्तर्गर्भिणमन्त-र्गर्भशून्य"मिति रघुनन्दनः।

अनन्तविजय पु० अनन्तान् विजयतेऽनेन धनिद्वारा। युधि-ष्ठिरशङ्खे "अनन्तविजयं नाम कुन्तीपुत्रोयुधिष्ठिरः" इति गीता।

अनन्तवीर्य्य पु०। ब०। जैनभेदे।

अनन्तव्रत न० अनन्तस्य व्रतमुपासनार्थम् ईत०। भाद्र-शुक्लचतुर्दश्यां कर्त्तव्ये खनामख्याते व्रते। "अनन्तव्रतमेतद्वि सर्वपापहरं शुभम्" इत्युपक्रम्य "तथा शुक्लचतुर्दश्यां मासि भाद्रपदे भवेदिति" भवि० पुरा०।

अनन्तशक्ति पु० अनन्ता अपरिच्छेदा शक्तिरस्य। परमेश्वरे "पराऽस्य शक्तिर्विविधैव श्रूयते" इति श्रुतौ तस्य बहुशक्ति-श्रवणात् तथात्वम्।

अनन्तशीर्षा स्त्री अनन्तानि बहूनि शीर्षाणि यस्याः।

वासुकिपत्न्याम् । वासुकौ परमेश्वरे च पु० "सहस्रशीर्षा पुरुष" इति श्रुत्या तस्य बहुशीर्षत्वोक्तेस्तथात्वम् ।

अनन्तश्री पु० अनन्ता अपरिमिता श्रीः परा शक्तिरस्य । परमेश्वरे "परास्य शक्तिर्विविधैव श्रूयते इति" श्रुत्या तस्य बहुशक्तिप्रतिपादनात्तथात्वम् ।

अनन्ता स्त्री नास्ति अन्तोऽस्याः ब० । विशल्यायामोषधौ (अनन्तमूल) इति ख्याते मूलभेदे, पाठायाम्, पृथिव्याम्, दुरालभायां, दूर्वायां, हरितक्यां, आमलक्याम्, गुडूच्याम्, अग्निमन्थवृक्षे, अग्निशिखावृक्षे, श्यामलतायाम्, पिप्पल्यां, नीलदूर्वायाम्, श्वेतदूर्वायां, शारिवोषधौ च ।

अनन्त्य न० अनन्तस्येदम् यत् । हिरण्यगर्भपदे ।

अनन्द त्रि० न नन्द्यति नन्द्–णिच्–अच् न०त० । आनन्दयितृभिन्ने" अनन्दा, नाम ते लोका इति कठ०व० ।

अनन्न न० न०त० । अदनीयभिन्ने । "न किञ्चिदनन्नं भवति आ त्वभ्यः आ शकृनिभ्य" इति छा० उ० ।

अनन्य त्रि० न अन्यः सर्वना० । अन्यभिन्ने स्वस्मिन् "अनन्यरतिरासीन" इति मनुः अनन्यस्मिन् स्वस्मिन् रतिरनुरागोऽस्येति तदर्थः । नास्ति अन्यो यस्य उपास्यत्वेन विषयत्वेन वा । अन्यासेवके "अनन्याश्चिन्तयन्तोमामिति" अनन्यविषये च । "पुरुषः स परः पार्थ! भक्त्या लभ्यस्त्वनन्ययेति" च गीता । अस्य नञ उत्तरत्व पदान्तरसत्त्वे असमर्थसमासाश्रयणात् तदर्थेनैवान्वयः । यथा "अनन्यदृष्टिः सवितारमैक्षतेत्यादौ" अन्यत्र दृष्ट्यभावस्य, अनन्यचेता इत्यादौ अन्यत्र चेतोऽभावस्य, अनन्यकाम इत्यादौ अन्यत्र कामाभावस्य च बोधनमेवमन्यत्र ।

अनन्यगतिक त्रि० नास्ति अन्या गतिरस्य कप् । अन्योपायरहिते तन्मात्रान्वये च । "अनन्यगतिके जने विगतपातके चातके" इत्युद्भटः ।

अनन्यज पु० नास्ति अन्यद्यस्मात् सर्व्ववस्तुभेदानां तदात्मकत्वात् अनन्यो विष्णुः तस्मात् जायते जन–ड ५त० । कामदेवे । तस्य कृष्णात् रुक्मिण्यां जन्मेति भाग० १०स्कं० "तस्यात्र ताडशीमस्यां गतायां जनस्यानन्यजेनेति" दशकु० ।

अनन्यदेव पु० न अन्यद्यस्मात् सर्व्वात्मकत्वात् ताडशोदेवः । परमेश्वरे विष्णौ "सर्व्वदेवमयोहरिरित्युक्तेस्तथात्वम् ।

अनन्यपूर्व्वा स्त्री न अन्यः पूर्व्वो यस्याः सा अन्यपूर्व्वा न भवति । अन्याभुक्तायां स्त्रियाम् "मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः । तथाप्यनन्यपूर्व्वैव तस्मिन्नासीद्वसुन्धरेति" रघुः ।

अनन्यभाज् त्रि० न अन्यम् अन्यां वा भजते भज–क्विप् अस० स० पुंवद्भावः । अन्यस्यान्यस्या वा सेवनाकारिणि । "भजते मामनन्यभागिति" गीताः "अनन्यभाजं पतिमाप्नुहीति" कुमा० ।

अनन्यवृत्ति त्रि० न अन्या विभिन्ना एकरूपा वृत्तिर्मनोवृत्तिरस्य । एकतानचित्ते । न अन्या वृत्तिर्जीवनोपायोऽस्य । एकमात्रजीवने त्रि० ।

अनन्यसाधारण त्रि० न अन्यस्यान्यधर्म्मस्य साधारणः सदृशः । अन्यधर्म्मासदृशे "अनन्यसाधारणमेव कर्म्मेति" कुमा० ।

अनन्वय त्रि नास्ति अन्वयो यत्र ब० । अन्वयशून्ये । शाब्दबोधे परस्परं संसर्गशून्ये अन्वयशब्दे वक्ष्यते अर्थालङ्कारभेदे पु० । तल्लक्षणं यथा "उपमानोपमेयत्वे एकस्यैव त्वनन्वय" इति सा० द० । "राजीवमिव राजीवं जलं जलमिवाजनी"त्यादौ च अनन्वयात् तदलङ्कारत्वं तथा हि उपमानोपमेयभावे सादृश्यज्ञानावश्यकत्वेन तस्य बोधने नियते तद्भिन्नत्वे सति तद्गतभूयोधर्म्मवत्त्व रूपसादृश्यस्य भेदगर्भिततया स्वप्रतियोगिकभेदस्य स्वस्मिन्नसम्बन्धेनापाततोऽनन्वय एव तात्पर्य्येण तु इतरसादृश्याभावपरत्वलक्षणयान्वयसाधा च राजीवं राजीवेतरासदृशमिति बोधात्तस्योत्कर्षो व्यज्यते । एवं "रामरावणयोर्युद्धं रामरावणयोरिवे"त्यत्रापि ।

अनप त्रि० न सन्ति आधिक्येनापो यत्र नञ्पूर्व्वकत्वेऽपि बहुव्रीहौ अच्समा० । खलजले पल्वलादौ ।

अनपकर्म्मन् न० अपकर्म्म अपाकरणं अभावार्थे न०त० । त्यागाभावोपलक्षिते दत्तस्य आदाने "दत्तस्यानपकर्म्म चेति" मनुः अपकर्म अपाते पात्रबुद्ध्या क्रोधादिना वा दत्तस्यानपकर्म, पुनर्ग्रहणम् । "कृपणस्यापकर्म चेति" स्मृतिः । अनपकर्म अपाकरणाभावः अशोधनमित्यर्थः । अनपक्रियायाञ्च स्त्री । अपाकरणाभावे । "कृपणानामनपक्रियेति" स्मृतिः ।

अनपच्युत त्रि० अप+च्यु–भावे क्त न०ब० । विनाशरहिते "स्वर्यं सुवज्रमनपच्युतमिति" ऋ० ४,१७,४, अनपच्युतं विनाशरहितमिति" भा० ।

अनपत्य त्रि० नास्ति अपत्यं यस्य । अपत्यशून्ये । न हितमपत्यानामिति, पतनाय हितं पत+यत् वा न०त० ततः न०त० । अपत्याहिते, पतनकारणे च "द्युतेत नो अनपत्यानीति ऋ० ३, ५४,१८, अनपत्यानि अपत्यानां पुत्राणामहितानि, पतनकारणं न भवत्यपत्यं तदन्यानि पतनकारणानीति" भाष्यम् ।

अनपत्रप त्रि० नास्ति अपत्रपा अन्यहेतुका लज्जा यस्य । अन्यहेतुकलज्जाहीने ।

अनपभ्रंश पु० न अपभ्रंशः न०त० । अपभ्रंशभिन्ने व्याकरणप्रतिपाद्यसंस्कारवति साधुशब्दे "अनभ्रंशतानादिर्यङाभ्युदवोन्यता । व्याक्रियाव्यङ्गनीया वा जातिः कापीह साधुतेति" हरिः ।

अनपाकर्म्मन् न० अपाकर्म अपाकरणम् अभावार्थे न०त० । अपाकरणाभावे ऋणादेरगोधने ।

अनपायिन् त्रि० न अपैति अप-इण-णिनि न०त० । निश्चले स्थिरे "अनपायिनि संश्रयद्रुमे गजभग्ने इति"कुमा० ।

अनपावृत् त्रि० अपावर्त्तनमपावृत् अप+आ+वृत-भावे क्विप् न०ब० । पुनरावृत्तिशून्ये । "इत्वा सुजानाह अनपावृद्-र्धमिति ऋ० ६,३,५, "अनपावृत् अपावृत् अपावर्त्तनम् पुनरागमनं न भवतीति" भा० ।

अनपिहित त्रि० न अपिहितमावरणं भावे क्त तद्रास्ति यस्य । आवरणशून्ये । "एष वानपिहितस्सर्व्व तदपिधानं यच्छिखेति श्रा० "अनपिहित आवरणशून्य" इति रघु० ।

अनपेक्ष त्रि० न अपेक्षते अनुरुध्यते अच् न०त० । अपेक्षाशून्ये अननुरोधिनि । "उत्सृज्य प्रमदामेतामनपेक्षो यथासुखमिति" रामा० ।

अनपेत त्रि० न अपेतः बहिर्गतः अपगतो वा । अबहिर्गते अपेतभिन्ने अनुगते । "धर्म्मपथ्यर्थन्यायादनपेते" इति पा० "धर्म्मादनपेतम् धर्म्यमित्यादि" सि०कौ० ।

अनप्त त्रि० न आप्तः वेदे तृ० तुस्तः । आप्तभिन्ने । "अनप्तमप्सु दुष्टरमिति" ऋ० ८, १६,३, "अनप्तं शत्रुभिरनाप्तमिति" भा० ।

अनप्तृ त्रि० नास्ति अप्तृ रूपं यस्य । रूपहीने "जज्ञाया अनप्तस इति" ऋ० २,३,६, "अनप्तृः कर्म्महीना" इति भाष्योक्तेः कर्म्महीने च ।

अनफा पु० (चन्द्रात्) "रविवर्ज्जं द्वादशगैरनफेति" दीपिकोक्तेः योगभेदे "सच्छीलं सुखान्वितं प्रभुं ख्यातियुक्तमनफायामिति" दीपिका ।

अनभिज्ञ त्रि० न अभिजानाति । अत्रे ज्ञानशून्ये ।

अनभिधेय न० न अभिधेयः । अवाच्ये ।

अनभिभव पु० न अभिभवः अभावार्थे न०त० । अभिभवाभावे पराजयाभावे ।

अनभिभवनीय त्रि० न अभिभवनीयः । अपराजेये ।

अनभिभूत त्रि० न अभिभूतः । अपराभूते ।

अनभिमत त्रि० न अभिमतः । असम्मते, विमते च ।

अनभिम्लातवर्ण त्रि० अभि+म्लै-क्त न अभिम्लातः म्लोववर्णो यस्य । दीप्यमाने । "सो अपां नपादनभिम्लातवर्ण" इति ऋ०२,३५,१३ अनभिम्लातवर्णः दीप्यमान इति भा० । शिवा० अण् । आनभिम्लातः तदपत्ये पु० स्त्री ।

अनभिलाष पु० न अभिलाषः अभावे न०त० । अभिलाषाभावे । न०ब० । अभिलाषशून्ये त्रि० ।

अनभिव्यक्त त्रि० न अभिव्यक्तः न०त० । अपरिस्फुटे ।

अनभिशस्त त्रि० अभि+शंस-क्त न०त० । अनिन्दिते । "परास्वानभिशस्ता दिव्या" इति ऋ० ६,८८,७, "अनभिशस्ता अनिन्दिता" इति भा० । परिवादायस्ते च ।

अनभिशस्त्र त्रि० अभिशस्तिं निन्दामर्हति अभिशस्यः न०त० । अनिन्दनीये प्रशस्ये निरुक्तकारः ।

अनभिसंहित त्रि० न अभिसंहितः न०त० । अभिसन्धिना फलोद्देशेन कृते "विस्तृतिदा येऽनभिसंहिते-ष्विति" रुचि० ।

अनभिहित त्रि० न अभिहितः । अनुक्ते प्रत्ययादिना उक्तार्थभिन्ने "अनभिहिते इति पा० अस्य उपकादिगणे पाठात् तत्कार्य्यम् । [वातस्तगगमनामिति" का०द० ।

अनभीष्ट त्रि० न अभीष्टः । अभीष्टभिन्ने "अनभीष्टदक्षिण-

अनभ्यावृत्ति स्त्री न अभ्यावृत्तिः अभ्यासः अभावार्थे न० त० । अभ्यासाभावे । "मनागनभ्यावृत्त्या वा कामं व्याप्यत यः शमीति" माघः ।

अनभ्यासमित्य त्रि० न अभ्यासे निकटे इत्यः इण-कर्म्मणि क्यप् तुम् । दूरतः परिहर्त्तव्ये त्रि० कौ० ।

अनमित्र त्रि० नास्ति अमित्रोऽस्य । शत्रुशून्ये "इन्द्रोयां चक्रे आत्मने अनमित्रां शचीपतिरिति" अथ० १२,१, नृपभेदे पु० ।

अनमीव त्रि० अमीवः रोगः न०ब० । रोगहीने "अनमीवा इषस्करदिति" ऋ० ३,१६२,१४, अनमीवा "रोगवर्जितानि इषोऽन्नानीति" भा० "प्रदानमीवस्य शुश्रिणस्य" इति ता० ब्रा० । "अरोगोऽमीवस्तद्रहितस्येति" भा० ।

अनस्वर पु० नास्ति अस्वरं कण्ठसहितं यस्य । बौद्धभेदेऽस्य सत्ता कण्ठतया तथात्वम् दिगम्बरशब्देऽस्य विवरणम् । नग्ने त्रि० ।

अनय पु० अयः शुभावहो विधिस्तदन्यः न०त० । अशुभदैवे । नयोद्यूते दक्षिणावर्त्तेन शारायामिष्टस्थाननयनं विरोधे न०त० । (दुगडोति) ख्याते द्यूतभेदे शाराया वामावर्त्तेनाभीष्टस्थाननयने पु० । नयोनीतिः

नो–अच् न०त०। नयाभावे अनीतौ दुर्नये, दुष्टे, कर्म्मणि च। "विजानतोऽपि ह्यनयस्य रौद्रता" भार०। न० ७व०। आपदि "जीवेदेतेन राजन्यः सर्वेषामनयं गत इति" मनुः। "सर्वतः प्रतिसङ्क्षीयात् ब्राह्मणस्वनयं गतः" इति मनुः "अनयमापदमिति" कुल्लू०। ईव०। नवहीने त्रि०। [स हि रावणेन परिभूतो हृतः।

अनरण्य पु० सूर्य्यवंश्ये नृपभेदे तत्कथा रामा० उत्तराकाण्डे

अनर्काभ्युदित पु० न ईक्षत्, अर्कोऽभ्युदितो यस्मिन्। ईक्षदर्कोदयकाले। "अनर्काभ्युदिते काले माघे कृष्णचतुर्दशी" इति यमः "माघे मासि रटन्त्यापः किञ्चिदभ्युदिते रवौ" इत्यनेनैकवाक्यत्वात् नञ ईक्षदर्थता।

अनर्गल त्रि० नास्ति अर्गलं प्रतिबन्धकं यस्य। अप्रतिबन्धके प्रतिबन्धकशून्ये "तुरङ्गस्तत्सृष्टमनर्गलं पुनरिति" रघुः।

अनर्घ त्रि० अर्घो मूल्यं न०ब०। अमूल्ये। [नाटकभेदे।

अनर्घराघव न० राघवचरितख्यापके मुरारिमिश्ररचिते

अनर्घ्य त्रि० न अर्घ्यः पूज्यो यस्य, यस्माद्वा। अन्यपूज्यशून्ये अत्यन्तपूजनीये च "अनर्घ्यमर्घेण तमद्रिनाथ" इति कुमा०।

अनर्थ पु० अर्थः प्रयोजनं विरोधे न०त०। अनिष्टे। "एकैकमप्यनर्थाय किमु तत्र चतुष्टयमिति" हितो०। "नोदनालक्षणोऽर्थो धर्म्म" इति सूत्रे निषेधलक्षणोऽनर्थोऽधर्म इति भङ्ग्या सूचिते नरकादिसाधनत्वादनिष्टहेतावधर्म्मे च। "दातुर्भवत्यनर्थाय परत्रादातुरेव चेति" मनुः। ब०। अभीष्टरहिते विष्णौ पु० आप्तकामत्वात्तस्य। अर्थोऽभिधेयः प्रयोजनं वा नास्ति यस्य ब० कप्। अर्थरहितमात्रे त्रि०।

अनर्थक न० अर्थोऽभिधेयोऽप्राशस्त्ये न०ब० कप्समा०। असदाद्यार्थशून्ये प्रलापे, असम्बद्धे वाक्ये च। व्यर्थे त्रि०। "धिगिदं जीवितं लोके किमु? सार्थमनर्थकमिति"।

अनर्थलुप्त त्रि० इष्टेनार्थेन अलुप्तः असम०स०। दृष्टार्थेनालुप्ते "अनर्थलुप्ता इति" काल्या० ६,१०,२०,।

अनर्थान्तर त० अन्योऽर्थः अर्थान्तरं मयूर०त० ततः न० त०। अभेदे, एकार्थे।

अनर्व त्रि० ऋ–व अर्वः गतिः शैथिल्यं स नास्ति यस्य। अशिथिले "त्रिनाभि चक्रमजरमनर्वमिति" ऋ०१,१६४,२, 'अनर्वमशिथिलमिति" भा०।

अनर्वन् त्रि० अर्व–हिंसायां कनिन् "अर्वा श्वाश्वे" इति श्रुतेः अर्वा सपत्नः न० त०। शत्रुभिन्ने। "जनोऽनर्वाणं तं परित" इति ऋ० १,१२६,५, "अनर्वाणमशिथिलमिति" भा०। अर्वा अश्वः। तच्छून्ये त्रि०। न त्रादेशः।

अनर्विश् त्रि० अनसा शकटेन विशति प्राप्नोति विश–क्विप् ३त० अहरा० रुः, ऋ–कर्म्मणि विच् अरं गन्तव्यं प्रति विशति विश–क्विप् वा न०त०। शकटेन काष्ठाद्याहरणाय वनप्रवेशिनि, गन्तव्यं स्थलं गन्तुमशक्ते च। "अनू द्यूनमनर्विशे पथिभ्यो तुराववेति" ऋ० १,१२१,७,

अनर्शराति त्रि० अनर्शाय अपापिष्ठाय रातिर्दानं यस्य। अपापिष्ठे दातरि "अनर्शरातिं वसुदामुपस्तुहीति" ऋ० ८, ६६,४, अनर्शरातिमनश्लीलदानशीलं पापमिति निरुक्त०

अनर्ह न अर्हः। अयोग्ये। "तान् ह्यकाव्यवोर्विप्राननर्हान् मनुरब्रवीदिति" मनुः।

अनल पु० नास्ति अलः पर्य्याप्तिर्यस्य बह्वादाद्यदहनेऽपि दहनेरभावात् न०ब०। वह्नौ, "व्यभिचार न तापकरोऽनल" इति नैषधम् अनलः नलाभावोवह्निश्च अनुपलब्धवदभावार्थे न०त०। अव्ययीभावसिद्धत्वे क्लीवता स्यात्। "अये नलोऽयमिति तं प्रति चित्तमेकं ब्रूतेऽस्य चान्यदनलोऽयमितीदमीयमिति" "आवर्ज्जनं तमनु ते ननु साधु नामयाहं मयानलमुदीरितमेतदत्र" इति "सैमानलं सहजरागभरादिति" च नैषधम् "वयोभिः खादयन्त्यन्ये प्रक्षिपन्त्यनलेऽप्सु चेति" स्मृतिः। जठराग्नेरस्य पित्तजातत्वात् देहस्थे पित्तधातौ च। अष्टवसुमध्ये पञ्चमे वसौ, मेदिनिः तच्च "धरोध्रुवः सोमनासा तथाऽपोऽव्यनिलोनल" इति वसुभेदबोधकवचने नलइत्यत्रानलइत्याकारश्लेषात्रान्यथा वेत्तं किन्तु वसूनां स्वरूपख्यापके विष्णुधर्म्मोत्तरवचने "सुवाचमालिके दक्षे वामे शक्तिकपालभृत् सव्योद्दादिक्रमाद्योऽसौ नलाख्यस्तु वसुः स्मृत" इति नलनामत्वस्यैव प्रतीतेर्नलएव वसुभेद इत्यवधेयम्। अनलदैवतत्वात् कृत्तिकानक्षत्रे "अनलविधिगताख्येति ज्योति०। (चिता) इति ख्याते चितके दग्धे, पु०। तस्य सर्व्वतः पर्य्याप्तेऽपि पर्य्याप्तेः सीमाभावात्तत्त्वम्, (भेला) इति ख्याते भल्लातके वृक्षे च। अन–कलच्। षष्टिवर्षमध्ये पञ्चाशत्संख्याते वर्षे षष्टिवर्षगणननामभेदादि वर्षशब्दे वक्ष्यते। पितृदेवभेदे "कव्यवाडोऽनलः सोमः यमश्चैवार्य्यमा तथा अग्निष्वात्ताः बर्हिषदः सोमपाः पितृदेवता" इति वायु पुरा०। अनात् प्राणात् लाति आत्मत्वेन गृह्णाति इति अनलः शिवः। तद्रूपेण सर्व्वान्तर्यामितया स्थिते विष्णौ पुंस–गन्धे बन्धे वा न नलति न बध्यते वा अच्। गन्धशून्ये परमेश्वरे विष्णौ "अगन्धनस्य गन्धं रक्ष" इति "तथा रक्षं निरञ्जनगन्धवश्चेति"

च श्रुतेस्तस्य गन्धशून्यत्वात् तथात्वम्। अल पर्य्याप्तौ अच् न०त०। अपर्य्याप्ते अपरिमिते परमेश्वरे "पवनः-पावनोऽनल" इति वि०सह०। भाष्यकृता च उक्तव्युत्पत्तिः विष्णुविषयत्वे दर्शिता।

अनलदीपन त्रि० अनलं जठरानलं पित्तधातुवर्द्धनेन दीपयति वर्द्धयति दीप-णिच्-ल्यु। जठरानलोद्दीपके "मधुरो मधुरः पाके दीपनोऽनलदीपन इति" "सौगन्ध्यात् पूतिकोऽग्निः सौक्ष्म्याच्चानलदीपन" इति च सुश्रुतोक्ते द्रव्यभेदे। [नामिकायां लतायाम्।

अनलप्रभा स्त्री अनलस्य प्रभेव प्रभा यस्य ब०। ज्योतिष्मती-

अनलप्रिया स्त्री ६त०। स्वाहाख्यायां दक्षकन्यायाम् वह्निपत्न्याम्।

अनलि पु० अनिति अन-अच् अनः अलिर्वत्व ब० शक०। वकवृक्षे तत्पुष्पस्य बकमधुसत्त्वेन तन्मधुभिर्भ्रमराणां जीवनधारणात्तथात्वम्।

अनल्प त्रि० न अल्पः। प्रचुरे भूयिष्ठे। [शून्ये त्रि०।

अनवकाश पु० न०त०। अवकाशाभावे। ब०। अवकाश

अनवगीत त्रि० अव+गै-क्त न०त०। अनिन्दिते।

अनवग्रह त्रि० नास्ति अवग्रहो यस्य। प्रतिबन्धशून्ये "अवग्रहभव्येष्वनवग्रहपक्षेति" नैष०। न०त०। दृष्टिप्रतिबन्धाभावे।

अनवद्य त्रि० न अवद्यं निन्द्यम्। निन्द्याभिन्ने दोषशून्ये च "अनवद्यास्त्रयार्हिणो सृगानिति" नैष०। "अनवद्यविद्योद्द्योतेनेति" दायभा०। "अनवद्योरिणादा" इति ऋ०६,६६,१०, "अनवद्योगर्हारहित" इति भा०। "अग्निः गर्हमनवद्यं सुवानमिति" ऋ० १,७१,८।

अनवधान न० न अवधीयते मनः संयुज्यते कर्त्तव्यकर्म्मणि यथावस्थितं प्रवर्त्तते ऽनेन अव+धा-करणे ल्युट् अवधानम् चित्तवृत्तिभेदः अभावे न०त०। अवधानाभावे मनःसंयोगविशेषाभावे प्रमादे, न०ब०। तद्वति त्रि०।

अनवधानता स्त्री अवधानं नास्ति यस्य तस्य भावः। प्रमादे। कर्त्तव्येऽकर्त्तव्यताबोधेन ततोनिवृत्तिः, अकर्त्तव्ये कर्त्तव्यताबोधेन तत्र प्रवृत्तिश्च प्रमादः। "कर्त्तव्याकरणं यत्राकर्त्तव्यस्याथवा क्रिया। उच्यते ह्युभयं तत्र प्रमादोऽनवधानतेति"।

अनवपृग्ण त्रि० अव+पृच् संपर्के क्त दृढभावादि छान्दसम् न०त०। असम्पृक्ते। "अनवपृग्णा विसृता वसानमिति" ऋ० १,१५२,४।

अनवभ्रव पु० अव+भ्रू-अच् न वचादेशः न०त०। अपवादवर्जिते "विजेषं कृदिन्द्र इवानवभ्रवोऽस्माकमिति" ऋ० १०,८४,५।

अनवभ्र त्रि० न भ्रंशते वा०ड। अवभ्रंशशून्ये "प्रस्कण्वदेष्णा अनवभ्ररायस" इति ऋ० १,१६६,७। "अनवभ्ररायसः अनवभ्रष्टवित्तादिधना" इति भा०।

अनवम त्रि० न अवमः। न्यूनताहीने श्रेष्ठे "सुधर्म्मानवमां सभामिति" रघुः।

अनवर त्रि० न अवरः। अवरभिन्ने श्रेष्ठे अजघन्ये "सोऽयमिन्द्रादनवरो वासुदेवश्च भारतेति भार०।

अनवरत त्रि० अव+रम+भावे क्त अवरतम् विरामः तद्रहित यस्य ब०। निरन्तरे विश्रामशून्ये।

अनवरार्द्ध्य त्रि० अवरस्मिन् अर्द्धे भवः यत् न०त०। उत्कृष्टे श्रेष्ठे च गौर्षभागे स्थापनीयतयास्य तत्त्वम्।

अनवलम्ब त्रि० नास्ति अवलम्बो यत्र। आलम्बनहीने। "न परं पवि पक्षपातिताऽनलम्बे किमु? माडम्बेऽपि सेति" नैष०।

अनवलोभन न अवलुभ्यते पुमान् येन अव+लुभ-ल्युट् ष्ठ० यस्य भः। गर्भसंस्कारभेदे। "उपनिषदि गर्भलम्भनं पुंसवनमनवलोभनञ्चेति" आ० ष्ट०।

अनवस त्रि० अव-प्रीणनादौ असच् अवसः भोजनं प्रीतिकरत्वात् न०ब०। प्रत्याशनहीने "अनवसो अनभीशु" इति ऋ०६,६६,७, "अनवसः अप्याशनरहित" इति भा०।

अनवसर त्रि० अवसरः उचितः कालः नास्ति यस्य ब०। उचितकालविहीने। "अतर्कैश्चर्य्ये त्वयनवसरदुःस्थाकृतधिय इति मल्लि० स्तो०। न०त०। अवसराभावे।

अनवसित त्रि० अवसितः समाप्तो निश्चितो वा न०त०। अनिश्चिते असमाप्ते च। "अनवसितान्यौ भ्गौ गुरुरन्ते इति (वृत्त०) उक्ते छन्दोभेदे स्त्री।

अनवस्कर त्रि० अवस्क्रियते शोध्यते अव-कृ-अप् सुडागमः अवस्करो मलः स नास्ति यस्य ब०। मलहीने।

अनवस्था स्त्री अव+स्था-अङ् अवस्थितिः न०त०। अवस्थाभावे, तर्कदोषविशेषे उपपाद्यस्य समर्थनाय उपपादकस्यानुसरणं तर्कः यत्र तर्के उपपाद्योपपादकयोर्विश्रान्तिर्नास्ति तादृशतर्कस्यानवस्थादोषः तत्र स तर्को न याह्यः। अधिकं तर्कशब्दे वक्ष्यते "प्रामाणिकी अनवस्था न दोषायेति" जग०। नास्ति अवस्था यस्य। अवस्थितिशून्ये त्रि०। "अशरीरं शरीरेषु अनवस्थेष्ववस्थितमिति"।

अनवस्थान न० अव+स्था–ल्युट् न०त० । अवस्थानाभावे । व० । वायौ पु० । चञ्चलभावे त्रि० ।

अनवस्थित त्रि० न अवस्थितः । चञ्चले, अस्थिरे "दयिताश्वनवस्थितं स्त्रणामिति" कुमा० । व्यभिचारवति च । "चतुर्णामपि वर्णानां नारीर्हत्यानवस्थिता" इति मनुः अनवस्थिताव्यभिचारिणीरिति कुल्लू० । व्यभिचारित्वाच्च पत्नौ नितान्तावस्थानाभावात् तथात्वम् । अवस्थातु मल्लभे च "प्रस्थितं तमनवस्थितं प्रिया" इति रघुः अनवस्थितम् अवस्थातुमशक्यमिति" मल्लि० । [नाभावे ।

अनवस्थिति न० न अवस्थितिः । अभावार्थे न०त० । अवस्था-

अनवङ्कर त्रि० अव+ङ्कृ–कौटिल्ये अच् न०त० । अकुटिले सरले "सचेते अनवङ्करमिति" ऋ० २,४१,६ । "अनवङ्करमकुटिलमिति" भा० ।

अनवाप्त त्रि० न अवाप्तः । अप्राप्ते "नानवाप्तमवाप्तव्यं त्रिषु लोकेषु किञ्चनेति" गीता ।

अनवाय त्रि० अव+इण् घञ् अवायः अवयवः न०ब० । निरवयवे "अनवायं किमीदिने" इति ऋ० ७,१०४,२ ।

अनवेक्षक त्रि० न अवेक्षकः न०त० । पर्य्यालोचनाहीने सदसद्विवेकहीने । [अपेक्षाभावे ।

अनवेक्षा स्त्री न अवेक्षा अपेक्षा अभावार्थे न०त० ।

अनशन अश–ल्युट् न०त० । भक्षणाभावे, उपवासे, स च भोजनविषयनिवृत्तिरूपः व्रतभेदः अहोरात्रभोजनाभाव एव तस्य प्रयोगोपाधिता । तेन यत्किञ्चित्क्षणे अभोजनेऽपि न उपवासपदप्रयोगः । त्रिरात्रादिपदसमभिव्याहारे तु भोजनाभावमात्रपरतेति भेदः । न०ब० । भोजनशून्ये त्रि० ।

अनश्वर त्रि० न नश्वरः । नश्वरभिन्ने, स्थायिनि, नित्ये च ।

अनस् न० अनिति शब्दायते अन–असुन् । शकटे "दूरादनसा रथेन" ऋ० २,३३,१० । अनिति जीवत्यनेन करणे ल्युट् । ओदने, ओदनस्थाने, पितरि च मातरि स्त्री । उत्तरपदस्थः अव्ययी० शरदा० टच्समा० । अध्यनसम् तत्पुरुषेऽपि संज्ञायां जातौ च टच्समा० । उपानसं भक्षानसम् अनोऽत्र भक्षस्थानम् । "अपोषा अनस" इति ऋ० ४,३०,१० ।

अनसूय त्रि० नास्ति असूया यस्य । परगुणेषु दोषारोपशून्ये "श्रद्दावाननसूयश्चेति" गीता "श्रद्दधानोऽनसूयश्चेति" मनुः ।

अनसूयक न असूयकः । असूयाशून्ये "यदा तदा हि सदृत्तमतिश्लाघनसूयक" इति मनुः ।

अनसूया स्त्री असू–कण्ड्वादित्वात् यक्–भावे अङ् असूया गुणेषु दोषारोपः अभावार्थे न०त० । "न गुणान् गुणिनोऽल्पि स्तौति चान्यगुणानपि । न हसेच्चान्यदोषांश्च साऽनसूया प्रकीर्त्तिते" शुक्लयजुषे असूयाभावे । "एकमेव तु शूद्रस्य प्रभुः कर्म्म समादिशत् । एतेषामेव वर्णानां शुश्रूषामनसूयया" "यत्किञ्चिदपि दातव्यं याचितेनानसूयया" च मनुः । अतिसूनिपत्यां च शकुन्तलासहचरीभेदे शकु० ।

अनसूयु त्रि० असू–उपतापे कण्ड्वा० यक् उ न०त० । असूयाशून्ये "इदन्ते गुह्यतमं प्रवक्ष्याम्यनसूयवे" इतिगीता ।

अनस्तमित त्रि० न अस्तमितः गतः असम०स० । असमप्राप्ते ।

अनस्थ पु० नास्ति अस्थि यस्य वा० अच्समा० । अस्थिवर्जिते अवयवे "पुरस्तादनस्थ जरूरवरंवमाण" इति ऋ० ८,१,२४, अस्थि अवयवः । तच्छून्ये निरवयवे सांख्यप्रसिद्धे प्रधाने, ईश्वरमायायाञ्च "यदनस्था बिभर्त्ति" ऋ० १,१६४,४, "अनस्था निरवयवा प्रकृतिरीश्वरायत्तमायेति" भा० । समासान्ताभावे अनस्थि । अस्थिशून्ये त्रि० ।

अनस्वत् त्रि० अनः शकटमस्यास्य मतुप् मस्य वः सान्तत्वान्न पदत्वम् । शकटयुक्ते "अनस्वन्तः श्रव एधन्त पज्राः ऋ० १,१२६,५ ।

अनहङ्कार पु० न अहङ्कारः अभावार्थे न०त० । अहङ्काराभावे । व० । तच्छून्ये त्रि० अहङ्कारशब्दशब्दे वक्ष्यते ।

अनहङ्कारिन् त्रि० । अहमिति गर्वं करोति अहम्+कृ णिनि । न०त० । गर्वशून्ये ।

अनहंकृत त्रि० अहमिति कृतमहङ्कारः, भावे क्त न०ब० । अहङ्कारशून्ये "सदु वाग्यनहंकृत" इति मनुः ।

अनहंकृति स्त्री अहमिति क्रियते भावे क्तिन् न०त० । अहङ्काराभावे न०ब० । अहङ्कारशून्ये त्रि० ।

अनहंवादिन् त्रि० अहमिति गर्वेण न वदति वद–णिनि, गर्वरहिते "मुक्तसङ्गोऽनहंवादीति" गीता ।

अनाकार त्रि० नास्ति आकारोऽस्य । अवयवहीने आकाशादौ, ईश्वरे च ।

अनाकाल पु० आ सम्यक् अद्यादिसस्यनिष्पत्तिकालः आकालः न०त० । शस्यादिसस्यकालभिन्ने दुर्भिक्षे काले ।

अनाकुल त्रि० न आकुलः न०त० । अव्यग्रे, एकाग्रे, स्थिरे, असङ्कीर्णवाक्ये च ।

अनाकृत न० नेत्यनेन कृतः नाकृतः निराकृतः न०त० ।

— अनिवारिते "न वक्ता जरणा अनाजत" इति ऋ० १,१४१,७, "अनाजतः अनिवारितः" इति भा० ।

अनाक्रान्ता स्त्री आक्रमितुमयोग्या सर्वतःकण्टकावृततत्वात् आ+क्रम-क्त न०त०। कण्टकावृतक्षेत्रे। आक्रान्तभिन्ने त्रि०।

अनाचारित न० न आचारितः अपक्वतः। अनपक्वते। "अनाचारितपूर्व्वोऽयं" इति कात्या० ।"अनाचारितोऽनपक्वतः" इति प्रा०विवेकः ।

अनाग त्रि० न आ सम्यग्गच्छति स्वर्गमनेन नागः अधर्म्मः न०ब०। पापरहिते "मित्रोनो अत्रादितिरनागान्" ऋ० १०,१२,६, "अनागान् अपापान्" इति भा० ।

अनागत त्रि० न आगतः। भविष्यत्कालवर्त्तौ, "श्वेयं दुःखमनागतमिति पा०सू० आगतभिन्ने च "अनागतार्त्तवे" स्मरः 'तावद्भयस्य भेतव्यं यावद्भयमनागतमिति" हितो० "अनागतादिलिङ्गेन न स्यादनुमितिस्तदेति" भाषा० ।

अनागतविधातृ त्रि० अनागतस्य भविष्यतः अनिष्टस्य विधाता प्रतिविधानकर्त्ता। आगामिदुःखस्य लिङ्गद्वारानुमानेन तन्निवारणोपायानुष्ठातरि "अनागतविधाता च प्रत्युत्पन्नमतिस्तथा। द्वावेतौ सुखमेधेते यद्भविष्योविनश्यतीति" हितो० ।

अनागतावाध अनागतः आबाधः दुःखम्। भाविदैहिकादिदुःखे। यदाचरणेन भाविदुःखानुत्पादस्तदाद्या उपायाः सुश्रुते दर्शिता यथा "अथातोऽनागतावाधप्रतिषेधनीयं व्याख्यास्याम" इत्युपक्रम्य। "उत्थायोत्थाय सततं स्वस्थेनारोग्यमिच्छता। धीमता यदनुष्ठेयं तत् सर्व्वं सम्प्रवक्ष्यते ॥ तत्रादौ दन्तपवनं ह्रादयाङ्गुलमायतम्। कनिष्ठिकापरिणाहश्लक्ष्ण्वग्रथितसन्नहम्। अयुग्मपर्व्वि यच्चापि प्रत्यग्रं शस्तभूमिजम्। अवेक्ष्यर्त्तुञ्च दोषञ्च रसं वीर्य्यञ्च योजयेत् ॥ कषायं मधुरं तिक्तं कटुकं प्रातरुत्थितः। निम्बस्य तिक्तके श्रेष्ठः, कषाये खदिरस्तथा ॥ मधूको मधुरे श्रेष्ठः, करञ्जः कटुके तथा। क्षौद्रव्योषविवर्गाक्तं सतैलं सैन्धवेन च ॥ चूर्णेन तेजोवत्याश्च दन्तान्निम्बं विशोधयेत्, । एकैकं घर्षयेद्दन्तं मृदुना कूर्चकेन च ॥ दन्तशोधनचूर्णेन दन्तमांसान्यबाधयन् ॥ तद्दौर्गन्ध्योपदेहौ तु क्षेत्राणां चापकर्षति। वैशद्यमग्न्याभिरुचिं सौमनस्यं करोति च ॥ न खादेद्वलतालोऽजिह्वारोगसङ्कवे। अपाखपाके श्वासे च कासहिक्कावमीषु च ॥ दुर्व्वलो जीर्णभक्तश्च मूर्च्छार्त्तो मदपीड़ितः। शिरोरुग्गार्त्तकृमितः आन्तः पानक्लमान्वितः ॥ अर्हितो कर्णशूली च दन्तरोगी च मानवः, । जिह्वानिर्लेखनं रौक्ष्यं सौवर्च्चलं वार्च्चलेव च ॥ तन्मलापहरं श्रेष्ठं मृदु स्निग्धं दगाङ्गुलम्। सुखवैरस्यदौर्गन्ध्यशोफजाड्यहरं सुखम् ॥ दन्तदार्ढ्यकरं रुच्यं श्लेष्मगण्डूषधारणम्। क्षीरवृक्षकषायैर्व्वा क्षीरेण च विमिश्रितैः ॥ शिक्षोदकक्षायेण तथैवामलकस्य वा। प्रक्षालयेन्मुखं नेत्रे स्वस्थः शीतोदकेन वा ॥ निखीकां सुखशोषञ्च पिड़कां व्यङ्गमेव च। रक्तपित्तकृतान् रोगान् सद्य एव विनाशयेत्, ॥ सुखं लघु निरीक्षेत दृढं पश्यति चक्षुषा, । मतं स्रोतोऽञ्जनं श्रेष्ठं विशुद्धं सिन्धुसम्भवम् ॥ दाहकण्डूमलघ्नञ्च दृष्टिक्लेदरुजापहम्, । अक्ष्णोरुपावहञ्चैव सहते मारुतातपौ ॥ न नेत्ररोगा जायन्ते तस्मादञ्जनमाचरेत्। भुक्तवान् शिरसा स्नातः आत्मस्थैर्दनवाहनैः ॥ रात्रौ जागरितवापि नाङ्गाभ्यक्तरित एव च, । कर्पूरजातिकक्कोललवङ्गकटुकाह्वयैः ॥ सचूर्णपूगैः सहितं पत्रं ताम्बूलजं शुभम्। सुखवैशद्यसौगन्ध्यकान्तिसौष्ठवकारकम् ॥ हनुदन्तस्वरमलजिह्वेन्द्रियविशोधनम्। प्रसेकशमनं हृद्यं गलामयविनाशनम्। पथ्यं सुप्तोत्थिते भुक्ते स्नाते वान्ते च मानवे। रक्तपित्तकृतक्षीणक्षताभ्यूर्द्ध्वंपरीतिनाम् ॥ रूक्षदुर्ब्बलमर्त्यानां न हितं चास्यशोषिणाम्, । शिरोगतांस्तथा रोगान् शिरोऽभ्यङ्गोऽपकर्षति ॥ केशानां मार्द्दवं दैर्घ्यं बलत्वं स्निग्धकृष्णताम्। करोति शिरसस्तृप्तिं सुखत्वमपि चाननम् ॥ सन्तर्पणं चेन्द्रियाणां शिरसः प्रतिपूरणम्। मधूकं क्षीरशुक्लौ च सरलं देवदारु च। चतुष्कं पञ्चनामानं समभागानि संहरेत्। तेषां कल्ककषायाभ्यां चक्रतैलं विपाचयेत् ॥ सदैव शीतलं जन्तोर्मूर्द्धि तैलं प्रदापयेत्, । केशप्रसाधनी केश्या रजोजन्तुमलापहा, ॥ हनुमन्याशिरःकर्णशूलघ्नं कर्णपूरणम्, । अभ्यङ्गो मार्द्दवकरः कफवातनिरोधनः ॥ धातूनां पुष्टिजननो वृद्धावर्ष्यबलप्रदः, । सेकः श्रमघ्नोऽनिलरक्तघ्नस्निग्धप्रसाधकः ॥ शताग्निदग्धाभिहतविष्टानां रुजापहः। जलसिक्तश्च वर्द्धन्ते यथा मूलेऽङ्कुरास्तरोः ॥ तथा धातुविदर्हिर्हि स्नेहसिक्तस्य जायते। शिरास्नायुरोमकूपैर्धमनीभिश्च तर्पयन् ॥ शरीरबलमाधत्ते युक्त स्नेहोऽवगाहने। तत्र प्रकृतिसात्म्यर्त्तुदेशदोषविकारवित् ॥ तैलं हृतं वा मतिमान् भुञ्जादभ्यङ्गसेकयोः। केवलं सामदोषेषु न कदाचन योजयेत् ॥ तरुणञ्चर्य्यजीर्णं च नाभ्यङ्ग्यौ कदाचन। तथातिस्निग्धो वान्तश्च निरूढो यश्च मानवः ॥

पूर्व्वयोः क्रुच्छ्रता व्याध्योरसाध्यत्वमथापिवा । श्वेषाणां तदृः प्रोक्ता अग्निमान्द्यादयोगदाः ॥ सन्तर्पणसमुत्थानां रोगाणां नैव कारयेत्, । शरीरायासजननं कर्म व्यायामसंज्ञितम् ॥ तत् कृत्वा तु सुखं देहं विमृद्नीयात् समन्ततः । शरीरोपचयः कान्तिर्गात्राणां सुविभक्तता ॥ दीप्ताग्नित्व-मनालस्यं स्थिरत्वं लाघवं मृजा । श्रमक्लमपिपासोष्ण-शीतादीनां सहिष्णुता ॥ आरोग्यं चापि परमं व्यायामा-दुपजायते । न चास्ति सदृशं तेन किञ्चित् स्थौल्यापक-र्षणम् ॥ न च व्यायामिनं मर्त्यमर्दयन्त्यरयो भयात् । नचैनं सहसाक्रम्य जरा समधिरोहति ॥ स्थिरीभवति मांसञ्च व्यायामाभिरतस्य च । व्यायामजुषगात्रस्य प्रकृत्यासुवर्त्तितस्य च ॥ व्याधयो नोपसर्पन्ति सिंहं क्षुद्र-मृगा इव । वयोरूपगुणैर्हीनमपि कुर्य्यात् सुदर्शनम् ॥ व्यायामं कुर्वतो नित्यं विरुद्धमपि भोजनम् । विदग्ध-मविदग्धं वा निर्दोषं परिपच्यते ॥ व्यायामो हि सदा-पथ्योबलिनां स्निग्धभोजिनाम् । स च शीते वसन्ते च तेषां पथ्यतमः स्मृतः ॥ सर्व्वेष्वृतुष्वहरहः पुंभिरात्महितै-षिभिः । बलस्यार्द्धेन कर्त्तव्यो व्यायामो ह्यन्यतोऽन्यथा ॥ हृदि स्थानस्थितो वायुर्यदा वक्त्रं प्रपद्यते । व्यायामं कुर्वतो जन्तोस्तद्बलार्द्धस्य लक्षणम् ॥ वयोबलशरीराणि देशकालाशनानि च । समीक्ष्य कुर्य्यात् व्यायाममन्यथा रोगमाप्नुयात् ॥ क्षयस्तृष्णारुचिच्छर्दिरक्तपित्तभ्रमक्लमाः । कासश्वोपक्षयश्वासा अतिव्यायामसम्भवाः ॥ रक्तपित्ती क्षयी शोषी श्वासकासक्षतातुरः । भुक्तवान् स्त्रीषु च क्षीणो श्रमार्त्तश्च विवर्जयेत्" ॥ उद्वर्त्तनं वातहरं कफ-मेदोविलापनम् । स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परम् ॥ शिरासुखविविक्तत्वं त्वक्स्थस्याग्नेश्च तेजनम् । उद्वर्षणोत्सादनाभ्यां जायेवातामसंशयम्, ॥ उत्सादना-द्भवेत् स्त्रीणां विशेषात् कान्तिमद्दपुः । प्रहर्षसौभाग्यमृजा-लाघवादिगुणान्वितम्, ॥ उद्वर्षणन्तु विज्ञेयं कण्डूकीटा-निलापहम् । जङ्घोः सञ्जनयत्याशु फेनकः स्वैर्यलाघवे कण्डूकीटानिलस्तस्मलरोगापहश्च सः । तेजनं त्वग्गत-स्याग्नेः शिरासुखविरेचनम् ॥ उद्वर्षणन्विष्टिकया कण्डू-कीटविनाशनम् । निद्रादाहश्रमहरं स्वेदकण्डूहृषा-पहम् ॥ हृद्यं मलहरं श्रेष्ठं सर्वेन्द्रियविशोधनम् । तन्द्रापापोपशमनं तुष्टिदं पुंस्त्ववर्द्धनम्, ॥ रक्तप्रसादनं चापि स्नानमग्नेश्च दीपनम् । उष्णेन शिरसः स्नान-महितञ्चक्षुषः सदा ॥ शीतेन शिरसः स्नानं चक्षुष्यमिति निर्दिशेत् । श्लेष्मारुतकोपे तु ज्ञात्वा व्याधिबलाबलम् ॥ कामतुष्णं शिरःस्नानं भैषज्यार्थं समाचरेत् । अतिशीता-म्बुशीते च श्लेष्मारुतकोपनम् ॥ अत्युष्णसुष्णकाले च पित्तशोणितवर्द्धनम् । तज्ज्ञातिसारज्वरितकर्णशूलानि-नार्त्तिषु ॥ आध्मानारोचकाजीर्णभुक्तवत्सु च गर्हितम्, । सौभाग्यदं वर्णकरं प्रीत्योजोबलवर्द्धनम् ॥ स्वेददौर्गन्ध्य-वैवर्ण्यश्रमश्रमनुलेपनम् । स्नानं येषां निषिद्धन्तु तेषा-मप्यनुलेपनम् । रजोघ्नमग्र्य चौजस्यं सौभाग्यकरमुत्तमम्, । सुमनोऽम्बररत्नानां धारणं प्रीतिवर्द्धनम् ॥ सुखालेपाद्दृढं चक्षुःपीनगण्डं तथाननम् । अव्यङ्गपिडकं कान्तं भव-त्यम्बुजसन्निभम्, ॥ पद्मलं विशदं कान्तममलोज्ज्वल-मखण्डलम् । नेत्रमञ्जनसंयोगाद्भवेच्चामलतारकम्, । यशस्यं स्वर्ग्यमायुष्यं धनधान्यविवर्द्धनम् । देवतातिथिविप्राणां पूजनं गोत्रवर्द्धनम्, ॥ आहारः प्रीणनः सद्योबलजद्देहधारकः । आयुस्तेजःसमुत्साहस्मृत्योजोऽग्निविवर्द्धनः, ॥ पादप्रक्षालनं पादमलरोगश्रमापहम् । चक्षुःप्रसादनं हृद्यं रजोघ्नं प्रीतिवर्द्धनम् ॥ निद्राकरो देहसुखस्वक्षुष्यः श्रम-सन्निहृत्, । पादत्वङ्मृदुकारी च पादाभ्यङ्गः सदा हितः ॥ पादरोगहरं हृद्यं रजोघ्नं प्रीतिवर्द्धनम्, । सुखप्रचार-मौजस्यं सदा पादत्रधारणम् ॥ अनारोग्यमनायुष्यं चक्षुषोरुपघातकृत् । पादाभ्यामुपानद्भ्यां सदा चंक्रमणं हृणाम्, ॥ पापोपशमनं केशनखरोमापमार्जनम् । रूप-लाघवसौभाग्यकरमुत्साहवर्द्धनम् ॥ वाणवारं मृजावर्णते-जोबलविवर्द्धनम्, । पवित्रं केश्यमायुष्यं वातातपरज-ोऽपहम् ॥ वर्षानिलरजोघर्मतृष्मादीनां निवारणम् ॥ वर्ण्यं चक्षुष्यमौजस्यं शुक्लं छत्रधारणम् ॥ शुनः सरी-सृपव्यालविषाणिभ्यो भयापहम्, । श्रमस्खलनदोषघ्नं स्थिरे च प्रशस्यते ॥ सत्वोत्साहबलस्थैर्यधैर्य्य वीर्य्य विवर्द्धनम् । अवष्टम्भकरञ्चापि भवत्रं दण्डधारणम्, ॥ आस्या वर्णकफस्थौल्यसौकुमार्य्यकरी सुखा, । अध्मा वर्णकफस्थौल्यसौकुमार्य्य विनाशनः, । अत्यध्मा विपरीतो-ऽस्माज्जरादौर्ब्बल्यकृच्च सः ॥ यत्तु चंक्रमणं नातिदेह-पीड़ाकरं भवेत्, । तदायुर्बलमेधाग्निप्रदमिन्द्रियबोध-नम् ॥ श्रमानिलहरं हृद्यं सुप्तिनिद्राक्षतिप्रदम् । सुखं शय्यासनं दुःखं विपरीतगुणं मतम्, ॥ व्यालव्यजन-मौजस्यं मक्षिकादीनपोहति । शोषदाहश्रमस्वेदमूर्च्छा-घ्नो व्यजनानिलः, ॥ प्रीतिनिद्राकरं हृद्यं कफवात-श्रमापहम् । संवाहनं मांसरक्तत्वक्प्रसादकरं श्रम्, ।

देशभेदे परम्परागताः तत्तत्स्मृतिभूक्ता वेद्याः । ब० । आचारहीने त्रि० ।

अनाघ्रात त्रि० न आघ्रातः । सम्यग्ज्ञानाविषयीभूते "आघ्रातं यदनाघ्रातं यत्तस्त्र क्रियते मिथ" इति यजु० ।

अनातप पु० आ+तप–अच् न०त० । आतपस्य रौद्ररश्मेरभावे, छायायां च । अनातपविशेषितमिति" वैद्यकम् छायाशुष्कमिति तदर्थः । ब० । आतपशून्ये त्रि० ।

अनातुर त्रि० न आतुरः । आतुरभिन्ने स्वस्थे अरोगे च "यद्देवाः धर्म्मं धरणं यज्ञङ्गं यदनातुरमिति" ऋ० ८,४७,१०, 'भेजे धर्म्ममनातुर" इति रघुः ।

अनात्मक त्रि० नास्ति आत्मा स्थिरः यत्र कप् । क्षणिकविज्ञानमते, स्थिरात्मशून्ये जगति च । नैरात्म्यवादे हि चेतयिता स्थिर आत्मा न स्वीक्रियते किन्तु क्षणिकविज्ञानेनैव सर्वव्यवहारसिद्धिरित्यतः पराभिमतात्मशून्यत्वम् जगतः । विस्तरः क्षणिकविज्ञानशब्दे द्रष्टव्यः ।

अनात्मज्ञ त्रि० आत्मानं यथास्वरूपं न जानाति ज्ञा–क अस०स० । आत्मस्वरूपानभिज्ञे आत्मचेष्टितानभिज्ञे स्वपरविवेचनाशून्ये च ।

अनात्मन् पु० न आत्मा अप्राप्यरूपे भेदार्हे च न०त० । "अप्राप्यः प्राप्यते योऽयमत्यन्तं त्यज्यतेऽथवा । जानीयात्तमनात्मानं बुद्धान्तं वपुरादिकम्" इत्येवं प्रतिपादिते आत्मभिन्ने अपकृष्टात्मनि देहादौ "अनात्मनि देहादौ आत्मेति या बुद्धिः साऽविद्येति वे०प्र० । "देवाश्च असुराश्च उभयएवानात्मान" इति श्रुतिः "अनात्मन्यात्मबुद्धिर्या साऽविद्या परिकीर्त्तितेति" पुरा० ।

अनात्मवत् त्रि० आत्माऽन्तःकरणं यस्यत्वेनास्त्यस्य मतुप् मस्य वः न०त० । अजितेन्द्रिये । "अनात्मवन्तःपशुवद्भुञ्जते वेऽप्रमाणत" इति सुश्रुतम् ।

अनात्म्य न० आत्मन इदं आत्मन्+यत् आत्मनम् शरीरं न०व० । अशरीरे "एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्ते इति तै०ब्रा० "अनात्म्ये अशरीरे" इति भा० ।

अनाथ त्रि० नास्ति नाथः प्रभुरस्य । प्रभुहीने "किं स्वाता सद्यदनाथमिति" ऋ० १०,१०,११, । विलपन्त्यनाथवदिति भार० ।

अनादर पु० आदरः गौरवहेतुका सम्माननां विरोधे न० त० । परिभवे, तिरस्कारे, अवज्ञायाम् च तेषामादरविरोधित्वात्तथात्वम् । "गुणेषु रागो व्यसनेष्वनादरः" नीति० । ब० । आदरशून्ये त्रि० ।

अनादि पु० आदिः कारणम् पूर्व्वकालो वा स नास्ति यस्य परमेश्वरे । नास्ति आदिः प्राथमिकोयस्मात् ५ब० । हिरण्यगर्भे पु० तस्य च "हिरण्यगर्भः समवर्त्तताग्रे" इति श्रुतौ रूढेः प्रयुत्पत्त्युपलक्षेत्वात्वम् । आदिशून्ये त्रि० । "जगदादिरनादिरुमिति" कुमा० । "अनादिनिधनं ब्रह्म शब्दतत्त्वं प्रचक्षते" इति स्मृतिः । "अनादिनिधना देवी वागुत्सृष्टा स्वयम्भुवेति" पुरा० । "अनादिर्भूर्भुव इति" विष्णु स० । "अनादित्वात् निर्गुणत्वादिति" गीता ।

अनादिमत् आदिमत् कार्य्यं तद्भिन्नः । कार्य्यभिन्ने ।

अनादिष्ट त्रि० न आदिष्टः विशेषरूपेण उपदिष्टः । विशेषरूपेणाकथिते "अस्य पापस्य, इदं प्रायश्चित्त" मित्यादिरूपेण विशेषतोऽनिर्दिष्टे प्रायश्चित्ते "उपपातकयुक्तानामनादिष्टेषु चैव हि । प्रकाशे च रहस्ये च" इति विश्वामित्रः ।

अनादृत न० आदृतम् आदरः भावे क्त अभावार्थे न०त० । आदराभावे अवज्ञायाम् । कर्म्मणि क्त न०त० । आदृताभिन्ने अवज्ञाते तिरस्कृते च त्रि० ।

अनादेय न० न आदेयः । क्रीत्यादिषु निषिद्धतया आदानानर्हे वस्तुनि "अनादेयस्य चादानादादेयस्य च वर्जनादिति" मनुः । अप्रतिग्राह्ये च अप्रतिग्राह्यद्रव्याणि च अप्रतिग्राह्यशब्दे वक्ष्यन्ते । ["मन्त्रानादेये गायत्रीति" स्मृतिः ।

अनादेश पु० न आदेशः अभावे न०त० । उपदेशाभावे ।

अनाद्य त्रि० न आद्यं भक्ष्यम् । अभक्ष्ये स्मृतिनिषिद्धतया भक्षणानर्हे । "एषोऽनाद्यादनस्योक्तो व्रतानां विविधोविधिरिति" "ज्ञानाज्ञानकृतं कृत्स्नं श्रुतानाद्यभक्षणे" इति च मनुः । अनाद्यानि च अभक्ष्यशब्दे दर्शयिष्यन्ते । आद्यशून्ये अनादौ त्रि० ।

अनाधार त्रि० नास्ति आधारो यस्य । आश्रयशून्ये "अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिष्यते" (भाषा०) उक्तेः न्यायमते नित्यद्रव्यभावे, आश्रयशून्यत्वाच्च युक्तमनाधारत्वम् "अस्य रात्रेरष्टते" त्यादि या० स्मृतेश्च अस्वरपर्य्यन्तानां सर्व्वेषामाधारत्वमीश्वरस्येति नाम्नरादौ अनाधारत्वं किन्तु ब्रह्मण एवेति वेदान्तिनः ।

अनाधृष् त्रि० आ+धृष–क्त न०त० । अनभिभूते आधर्षणरहिते "रेवतीरनाधृषः सिषासव" इति ऋ० ६,२,२ ।

अनाधृष्ट त्रि० न आधृष्टः पराभूतः । अपरिभूते "महो न आयुनाधृष्ट" इति ऋ० ७,१५, १४, । वार्य्यमनाधृष्टं रक्षस्विना, ऋ० ८,२२,१८ ।

अनाधृष्य त्रि० आ+धृष-कर्म्मणि क्यप् न आधृष्यः न०त० । अनभिभवनीये "अनाधृष्यं वृषभं तुग्र्यमिन्द्रमिति" ऋ०४, १८,१०,"तव देवैरनाधृष्यमिति" रामा० ।

अनानुद त्रि० अनुददाति अनु+दा-क न०त० पृ० दीर्घः । समानदातृशून्ये अतुल्यदातरि । "अनानुदो वृषभोदोधत" इति ऋ० २,२१,४, "प्रभूतधनदानेन अन्यः समानो दाता नास्तीति" भा० ।

अनापि त्रि० आप्यते आप-कर्म्मणि इन् आपिराप्तो बन्धुश्च न०ब० । आप्तशून्ये । "अनापिरात्रा असजात्मातिरिति" ऋ०१०,३९,६, "अनापिरबन्धुरिति" भा० "अस्पार्हव्यो अना त्वमनापिरिन्द्र" इति ऋ० ८,२१,१२।

अनाप्त त्रि० आप्तो बन्धुः यथार्थज्ञानवान्, प्राप्तश्च, न०त० । बन्धुभिन्ने, अप्राप्ते, "यस्यानाप्तः सूर्य्यस्येव ऋ०१,१००,२, "अनाप्तः परैरप्राप्तः" इति भा० । यथार्थनिश्चयवज्जिन्ने "युष्मस्याः प्राजकोऽनाप्ते सर्वे दण्ड्याः शतं शतमिति" मनुः ।

अनाभयिन् त्रि० आबिभेति आ+भी-णिच्-इनि न०त० । सम्यग्भीतभिन्ने । "अनाभयिन्नरिमा ते" ऋ०८,२,१, ।

अनाभू त्रि० आभिमुख्येन भवति आभूः स्तोता न०त० । स्तोतृभिन्ने आभिमुख्याप्राप्ते च । "इन्द्रःअथयज्ञनाभुव" इति ऋ० १,५१,६, ।

अनामन् न० अननमनः अनं जीवनम् अभयति रुजति अभ-कनिन् । अरोगेरोगे । नास्ति नामास्य नामन्शब्दे मलमासे पु० तस्य वैदिककर्म्मानर्हतयाऽनामत्वात्तत्त्वम् । नामशून्ये त्रि० अनाभिकायामपि पु० शब्दरत्ना० । स्वार्थे कन् । तत्रार्थे ।

अनामय पु० अम-घञ् आमं तापं यात्यनेन या-क आमयो रोगः न०त० । रोगाभावे आरोग्ये । "ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयमिति" मनुः । न०ब० । बाह्याभ्यन्तरपीड़ानिवारके विष्णौ पु० "पुण्यकीर्त्तिरनामय" इति विष्णुस० । रोगशून्ये त्रि० । "जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयमिति" गीता ।

अनामयित्नु अम-णिच्-त्रा० इत्नुच् न०त० । व्यथकभिन्ने "इन्द्राभ्यामनामयित्नुभ्यामिति" ऋ० १०,१२७,७, ।

अनामा स्त्री ब्रह्मणः शिरश्छेदनसाधनतया ग्रहणायोग्यत्वात् नास्ति नाम ग्रहणयोग्यं यस्याः, नास्ति अङ्गुष्ठतर्जन्यादिवत् विशेषनामास्य वा मनन्तत्वात् डाप् । स्वनामप्रसिद्धायां मध्यमाकनिष्ठयोः मध्यगायामङ्गुल्याम् । स्वार्थे कन् । अनामिकाप्यत्र । तथा हि शिवेन ब्रह्मशिरश्छिन्नमिति पुराणे प्रसिद्धम् तेन तस्या अपवित्रजातीयता अतएव तस्याः पवित्रीकरणार्थं यज्ञादौ पवित्रनामकदर्भधारणं तत्र क्रियते । "अनामिकाष्टता दर्भा हैमकानामिकापि वा, द्वाभ्यामनामिकाभ्यां तु धार्य्यौ दर्भपवित्रकौ" इति छन्दो०प० ।

अनाम्रण त्रि० आम्रणाति हिनस्ति आ+म्रण-क न०ब० । हिंसकरहिते । "अनाम्रणः कविदादस्य ऋ० १,३३१, ।

अनायत्त त्रि० न आयत्तः । अवशे अनधीने । "एतावज्जन्मसाकल्यं यदनायत्तवृत्तितेति" हितो० ।

अनायन न० न आयनं चालनम् यत्र । एकान्ते हेम० एकान्तानायनमित्येकं नामेति केचित् ।

अनायास पु० आ-यस घञ् अल्पार्थे न०त० । प्रयत्नाभावे, अल्पप्रयासे, अक्लेशे च । "शरीरं पीड्यते येन शुभेनाशुभेन वा । अत्यन्तं तन्न कुर्वीत अनायासः स उच्यते" अत्रि० । ब० । प्रयत्नशून्ये त्रि० । "समाधेऽकस्मिन्नायासे कर्म्मणि सहायेन भवता भवितव्यमिति" शक० ।

अनायासकृत न० अनायासेन अल्पप्रयत्नेन कृतं न०त० । अल्पायासेन साध्ये फाल्गुने क्राथे ।

अनायुष्य न० आयुषे हितम् आयुस्+यत् न०त० । आयुरहितकरे अतिभोजनादौ । "अनारोग्यमनायुष्यमस्वर्य्यञ्चातिभोजनम्" इति "नह्येतद्यमनायुष्यं लोके किञ्चन विद्यते यादृगं पुरुषस्यैव परदारोपसेवनमिति" च मनुः । "तत्र प्रथमदिवसे क्षतुमत्यां मैथुनगमनमनायुष्यं पुंसामिति" सुश्रुतम् एवमन्यान्यपि बह्वनि अनायुष्याणि तत्तत्स्थाने स्थाने दर्शितानि । तत एव तानि बोध्यानि ।

अनारत न० आ+रम-क्त आरतं विरतिः अरतिरभावे न०त० । सन्ततौ, अविरामे अविच्छेदे च । "अनारतं तेन पदेषु लम्भिता" इति भार० । ब० । तद्वति त्रि० ।

अनारभ्य अव्य० आ+रभ-ल्यप् न आरभ्य । किञ्चिदनधिकृत्येत्यर्थे । "अनारभ्याधीतत्वादिति" मीमांसा । न आरभ्यः न०त० । आरभ्यभिन्ने त्रि० । अनारभ्यत्वादिति का० १,८,३, "नैवायमारभ्यणोऽर्थ" इति व्याख्या ।"अनारभ्यत्वाच्चेति" इति कात्या० २०,८,२८, ।"तस्मादनारभ्योऽयमर्थ" इति व्याख्या ।

अनारभ्याधीत त्रि० न आरभ्य किञ्चित् अधीतः । किञ्चिदनधिकृत्य अधीते, वेदां मन्त्राणां कर्म्मविशेषे विनियोगो नोक्तस्तेषां मन्त्राणामनाराभ्याधीतत्वात् ब्रह्मयज्ञे एव विनियोग इति मीमांसायां स्थिरीकृतम् । "सामान्येन तु विनियोगो यद्यपि ब्रह्मयज्ञविशेषे" इति ऋ०भा० माधवः ।

अनारम्भः पु० न आरम्भः अभावार्थे न०त०। आरम्भाभावे अनुद्यमाभावे। "न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते इति" गीता।

अनारोग्य न० न आरोग्यम्। "आरोग्याभावे। नास्ति आरोग्यं यस्मात् ५ब०। आरोग्यासाधने "अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनमिति" मनुः।

अनार्जव पु० अजोर्भाव आर्जवं सरलता स्वाच्छन्द्यं वा न० ७ब०। रोगे। अभावार्थे अव्ययी०। ऋजुत्वाभावे अव्य०। ६ब०। कुटिले त्रि०।

अनार्त्तव त्रि० ऋतुरस्य प्राप्तः ऋतु+अण् न०त०। स्वकाल रूपे-ऋतौ-अनुत्पन्ने कुसुमादौ। ऋतोः स्त्रीकुसुमस्यैदम् विकारावनम् आर्त्तवं तन्नास्ति यस्याः। अदृष्टरजस्कायां स्त्रियां स्त्री।

अनार्य्य पु० न आर्य्यः न०त०। आर्य्यभिन्ने असच्चरिते। "अनार्य इति मामार्या इति" रामा०। न० ७ब०। आर्य्यानाश्रये देशे।

अनार्य्यक न०। न आर्य्यो यत्र देशे तत्र आर्य्यावर्त्तादिभिन्ने द्वीपान्तरादौ भवः अनार्य्य+कन्। अगरुकाष्ठे।

अनार्य्यज न०। अनार्य्ये देशे जायते जन-ड। अनार्य्यदेशजाते अगरुकाष्ठे। तद्देशजातमात्रे त्रि०।

अनार्य्यतिक्त पु० अनार्य्यं प्रियस्तिक्तः शाक० त०। (चिरता) इति ख्याते भूनिम्बे वृक्षे।

अनार्ष त्रि० ऋषिजुष्टत्वाद्यर्षिवेदस्तत्रोक्तः आर्षः न०त०। अवैदिके वेदाप्रयुक्ते। "संवृद्धौ शाकल्यस्येतावनार्षे" इति पा०। "अनार्षे अवैदिके" इति सि०कौ०। ऋषिणा दृष्टम् अण् आर्षम् न०त०। ऋषिणाऽदृष्टे। "अर्षिजोरनार्षयोर्गुरूपोत्तमयोरिति" पा०। "अनार्षयो किं? वाशिष्ठीति" सि०कौ०।

अनालोचि(डि)त त्रि० न आलोचि (डि) तः। अविवेचिते। "अनालोचितकार्यस्य वाग्जालं वाग्मिनो वृथेति" माघः अनिर्वेचितेति वा पाठः।

अनाविल त्रि० न आविलः। प्रसन्ने स्वच्छे कालुष्यरहिते।

अनाविद्ध त्रि० न आविद्धः। अबाधिते। "अनाविद्धया तन्वा त्वाजय" ऋ० ६,७५,१।

अनावृत्त त्रि० न आवृत्तः अभ्यस्तः। अपुनर्गते प्रथमगते च। "मलमासेऽप्यनावृत्तां तीर्थयात्रां विवर्जयेदिति" स्मृतिः।

अनावृत्ति स्त्री न आवृत्तिः पुनर्गमनम्। अभ्यासाभावे, आगमनाभावे च "अनावृत्तिः शब्दादिति" वा० सू०। "तत्र प्राप्तविवेकस्यानावृत्तीति" सां०सू०। ब०। तद्वति त्रि०।

अनावृष्टि स्त्री आ+वृष-क्तिन् "अभावार्थे न० त०। "अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः। प्रत्यासन्नाश्च राजानः षडेते ईतयः स्मृता" इत्युक्ते ईतिभेदे "द्वादशवार्षिक्यामनावृष्ट्यामिति" हितो०।

अनाशक पु० आ सम्यक् यथेच्छम् आशः अशनम् आ+अश घञ् न०ब०कप् नञ्स्ति नञ-स्वुल् न०त०वा। यथेच्छभोगशून्ये, अनश्वरे च "तमेतं ब्राह्मणा विविदिषन्ति वेदानुवचनेन यज्ञेन तपसाऽनाशकेनेति" श्रुतिः। फलकामनाशून्यत्वेन, भोगाय फलाजनकत्वात् तादृशकर्मणश्च भोगेन क्षयाभावाच्च तथात्वम्।

अनाशकायन न नश्यति अनाशक आत्मा तस्यायनं प्राप्त्युपायः। आत्मज्ञानसाधने ब्रह्मचर्य्यभेदे, "अथ यदनाशकायनमित्याचक्षते ब्रह्मचर्य्यमेव तदेष ह्यात्मा न नश्यति यं ब्रह्मचर्य्येणानुविन्दते" इति छा०उ०।

अनाशस्त त्रि० आ+शन्स स्तुतौ-क्त न०त०। अस्तुते। "अनाशस्ता इवाऋषि" ऋ० १,२६,१,।

अनाशिन् त्रि० न नश्यति नश-णिनि, कर्म्मफलमश्नुते अश-णिनि वा न०त०। अनश्वरे आत्मनि, ईश्वरे च, "अनाशिनोऽप्रमेयस्येति" गीता "अन्योऽनश्नन्नभिचाकशीति" श्रुतेरीश्वरस्य फलभोक्तृत्वाभावात्तथात्वम्। नाशरहिते त्रि० "नश्यतो विनिपातेनाविनिपाते त्वनाशिनौ" मनुः।

अनाशु त्रि० नश-उण्-अश-व्याप्तौ कर्मणि उण् वा न०त०। विनाशरहिते, अव्याप्ते च। "धन्वन् त्रिषु अनाशवः" इति ऋ० १,१३५,६, "अनाशवः विनाशरहिताः अव्याप्ता वा इति भा०। न आशुः शीघ्रः न०त०। क्षिप्रभिन्ने। "अविप्रे चिद्यदोदृदनाशुनेति ऋ० ६,४५,२, "अनाशुना अक्षिप्रगमनेनेति" भा०।

अनाश्रमिन् पु० न आश्रमी न०त०। गृहस्थाद्याश्रमशून्ये "अनाश्रमी न तिष्ठेत्तु क्षणमेकमपि द्विज" इति स्मृतिः।

अनाश्रय त्रि० नास्ति आश्रयो यस्य। आलम्बनरहिते।

अनाश्वस् त्रि० अश-भोजने क्वसु नि०। भोगशून्ये "उपेयिवाननाश्वाननूचानश्चेति" पा० "भृतृजयष्टतेरनाशुष" इति भारविः।

अनाश्वास पु० अभावार्थे न०त०। आस्थाभावे विश्वासाभावे "प्रत्यक्षपूर्व्वकत्वादनुमानस्य सर्व्वत्रानाश्वासप्रसङ्गादिति" द०उ० भा०।

अनास् त्रि० आस्यते निरास्यते जीवनमनेन आ+अस-क्षेपे करणे क्विप् आः सुखं नास्ति तत् साधनत्वेनास्य । आस्य-व्यापारशब्दरहिते । "अनासोदसँरुषे" इति ऋ०५,२६, १०, "अनासः आस्यरहितानि तद्व्यापारशून्यानीति" भा०।

अनासिक त्रि० नास्ति नासिकाऽस्य । भग्ननासिके विकृत नासिके च ।

अनास्था स्त्री आ+स्था-अङ् आस्था आदरः अभावार्थे न०त० । अनादरे । "स्त्री पुमानित्यनास्थैषा दृष्टं हि महितं सतामिति" कुमा० "अनास्थया स्वजनकरप्रसारिणीमिति" नैष० । न०ब० । आदररहिते त्रि० ।

अनास्थान त्रि० आस्थीयतेऽस्मिन् आ+स्था-आधारे ल्युट् आस्थानोभूप्रदेशः न०त० । आस्थानायोग्ये जलादौ । "अनारम्भणे तदवीरयेथामनास्थाने" इति ऋ०१,११६,५। आस्थानं सभा । तच्छून्ये च ।

अनास्राव आ+स्रु-घञ् न०ब० । क्लेशरहिते । लोके तु अप् अनास्रव इति । "तेषामसि त्वसुक्तममनास्रावमरोगमिति अथ० २,२,२ ।

अनाह पु० नह-घञ् न०त० । मलादिबन्धाभावोपलक्षिते-ऽतीसारोगे ।

अनाहत न० आ-हन-भावे क्त आहतं छेदो भोगो वा न० ब० । छेदभोगादिरहिते नवीने वस्त्रे । तन्त्रशास्त्रे प्रसिद्धे हृदयस्थिते सुषुम्णामध्यस्थे द्वादशदलपद्मे "यद्यो ब्रह्ममयः, यच्छोऽनाहतो यत्र ङ्यते अनाहताख्यं तत् पद्मं मुनिभिः परिकीर्त्तितमित्युल्लेखः । नाभिस्थं मणिपूरं चक्रं वर्णयित्वा "तदूर्द्धेऽनाहतं पद्मसद्यदादित्यसन्निभम् । कादिठान्ताक्षरैर्वर्कपत्रैश्च समधिष्ठितम् । तन्मध्ये वाणलिङ्गन्तु सूर्य्यायुतसमप्रभम् । आनन्दसदनं तत्तु पुरुषाधिष्ठितं परमिति" तन्त्रसारे उक्तम् । अस्मिन् पद्मे च आहतमाघातः कण्ठतालाद्यभिघातः तद्वास्मिन् साधनत्वेनास्य तादृशः शब्दः अस्यास्मिन् अर्थ आदित्वात् अच् । अनाहतशब्देन च परा, पश्यन्ती, मध्यमा, वैखरीतिप्रसिद्धानां वाग्वृत्तीनां मध्ये मध्यमा वाक् कथ्यते तस्याश्च हृदयपद्मे कण्ठादिस्थानमनाहतत्वंवोत्पन्नत्वादनाहतत्वम् अधिकं मध्यमाशब्दे वक्ष्यते । ब० । आघातरहिते वस्तुमात्रे त्रि० ।

अनाहार पु० न आहारः अभावार्थे न०त० । भोजनाभावे "अनाहारेखात्मानं तव हारि व्यापादयिष्यामीति" हितो० । "अनाहारेण देहिन" इति पुरा० ।

अनाहार्य्य त्रि० आहार्य्यः कृत्रिमः आहरणीयश्च न०त० । अकृत्रिमे स्वाभाविके, आहरणीयभिन्ने च ।

अनाहिताग्नि पु० न आहितः अग्निर्येन । विधिना अकृताग्न्याधाने निरग्नौ द्विजभेदे । "योऽनाहिताग्निः यतगुरवज्वा तु सहस्रयु"रिति मनुः । 'अनाहिताग्निशुतेषेति' कात्या० ४,१,२६, "अनाहिताग्नेरपि पिण्डपितृयज्ञः श्रूयते" इति तद्व्याख्या सा च श्रुतिस्तत्रैव दर्शिता "अथानाहिताग्निना कार्य्य इति" "यदि स दर्शाङ्गं स्यात् अनाहिताग्ने र्दर्शपौर्णमासाभावाच्च श्रूयेतेति" तद्व्याख्या ।

अनिकेत पु० नास्ति निकेतः नियमेन निवासो यस्य ब० । नियतनिवासशून्ये परिव्राजके । "अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशन" इति "अनग्निरनिकेतः स्याद्ग्रामभद्रार्थ मात्रयेदिति" च मनुः "अनिकेतः स्थिरमतिरितिः" गीता अनिकेतनोऽप्युक्तार्थे ।

अनिन्दु न० न इन्दुः साहश्ये, अप्राशस्त्ये वा न०त० । इन्दुसदृशे गुडहेतौ (नटा) इति ख्याते कायभेदे ।

अनिगीर्ण त्रि० न निगीर्णः । अनपह्नुतभेदे, "विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत् सारोपा स्यादिति" सा०द० । (अनिगीर्णस्य) अनपह्नुतभेदस्य (विषयस्य) आरोपविषयस्य आरोप्यमाणस्य, (अन्यस्य) आरोपाश्रयस्य तादात्म्यभेदस्तुप्रतीतिकृत् तद्बोधसाधनं वृत्तिः सारोपा लक्षणेति तदर्थः यथा अश्वः श्वेतो धावतीत्यादौ श्वेतगुणवानश्वोऽनपह्नुतभेदः सन् स्वसमवेतश्वेतगुणतादात्म्येन प्रतीयते इत्यतस्तत्र सारोपा लक्षणा ।

अनिच्छा स्त्री न इच्छा अभावार्थे न०त० । इच्छाभावे "स्फुटामनिच्छां विवरीतुमुत्सुकामिति" नैष० । "चरेत् सान्तपनं कृच्छ्रं प्राजापत्यमनिच्छयेति" मनुः ।

अनित्य त्रि० न नित्यः । नश्वरे, जन्ये च । "नित्याऽनित्या च च सा हेधा नित्या स्यादणुलक्षणा । अनित्या तु तदन्या स्यादिति" भाषा० । "यदि नित्यमनित्येन निर्मलं मलवाहिना । यशः कायेन लभ्येतेति" हितो० "रजस्वलमनित्यञ्च भूतावासमिमं त्यजेदिति" मनुः । अस्थिरे "अनित्योविजयो यस्मात् दृश्यते युध्यमानयोः । पराजयश्च संग्रामे तस्मादुद्युद्धं विवर्जयेदिति" मनुः । कृताकृतप्रसङ्गि नित्यं विरोधे न०त० । कृताकृतप्रसङ्गशून्ये वैकल्पिके, "समासान्तविधेरनित्यत्वमिति" पा०भा० । यावदाश्रयमवस्थानायोग्ये, "वर्षे चानित्ये" इति पा० । अव्यवस्थिते, (यावदाश्रयमदनवस्थिते) "इह खलु द्रव्यं व्यवस्थितं न रसादयः, यथा आम्रे फले, ते रसादयस्ते

पक्षे न सन्ति, नित्यत्वाच्च नित्यं द्रव्यम् अनित्या गुणा यथा कल्कादिप्रविभागः, सएव सञ्जरसगन्धो व्यापन्नरसगन्धो वा भवतीति" सुश्रुतम् अतएव "सत्वे निविशतेऽपैति पृथग्जातिषु दृश्यते । आधेयवाक्रियाजत्वसोऽसत्वप्रकृतिर्गुणे" इति गुणलक्षणे गुणानामुत्पादविनाशोक्तिः । सदातनभिन्ने काले च । "अनित्यं हि स्थितिं यस्मात्तस्मादतिथिरुच्यते" इति मनुः । अनित्यमित्यत्र आप्नौ, कालाधिकरणे वा द्वितीया न मान्नाव्ययत्वमस्य तथात्वे प्रमाणाभावात् । सदाकालवृत्तिपरत्वेऽपि धातूपस्थाप्यसाध्यक्रियाविशेषणत्वेन सञ्चारोरतिमन्दिरावधीत्यादिवत् द्वितीयेति बोध्यम् । नित्यम् मान्नमव्ययम् न०त० । केचित् ।

अनिद्रा स्त्री न निद्रा अभावार्थे न०त० । निद्राभावे "क्षुद्व्यङ्गलौल्यमनिद्रा स्तब्धं" इति सुश्रुतम् । निद्राराहित्ये च रोगविशेष एव कारणम् । नास्ति निद्रा यस्य । निद्रारहिते आलस्यरहिते त्रि० "अनिद्रो षड्ङ्होरात्रं तपोवनमरक्षताम्" इति "प्रजा नित्यमनिद्रेण यथाशक्त्यभिरक्षिता" इति च रामा० । "अनिद्रेण अनलसेनेति" तदर्थः ।

अनिन्दित त्रि० न निन्दितः । निन्दारहिते प्रशस्ते "अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजेति" मनुः ।

अनिन्द्र त्रि० न इन्द्रोपास्याऽन्योयस्य । इन्द्रोपासनागून्ये "मानिन्द्राः कण्वब्रह्मनुक्थाः ऋ० ५,२,३, "अनिन्द्रा इन्द्रमयजन्त" इति भाष्यम् ।

अनिबद्ध त्रि० न निबद्धः । अनायत्ते, "अनायतो अनिबद्ध" इति ऋ० ४,१२,५ । ग्रथितभिन्ने च ।

अनिबाध त्रि० नास्ति निबाधः संबाधा यस्य । संबाधरहिते "उरौ महाँ अनिबाधे ववर्द्ध" इति ऋ० ३,१,११, अनिबाधे असंबाधे इति भा० ।

अनिभृत त्रि० न निभृतः न०त० । चञ्चले "भुवमनिभृतवेलेति" भा० । "वेलाचञ्चला" इति मल्लि० ।

अनिभृष्ट त्रि० नि+भृज् क्त नि० न०त० । अबाधिते । अनिभृष्टतविषिर्हन्योजसा "ऋ०२,२५,४, अनिभृष्टतविषिः अबाधितबल" इति भा० ।

अनिमक पु० अन-जीवने ग्रन्थे च भावे वा० इमन् "अनिमः जीवनं तेन कायति प्रकाशते कै-क । भेके । तस्य मरणेऽपि पुनरुज्जीवनात्तथात्वम् । कोकिले, भ्रमरे च तयोः मधुरशब्देन प्रकाशमानत्वात्तथात्वम् । अनिमाय कं जलं यस्य । पद्मकेसरे । अनिमाय कं सुखं यस्मात् । मधूके (महुल) वृक्षे मेदिनिः ।

अनिमान त्रि० नि+मा-भावे ल्युट् न०व० । परिच्छेदरहिते "स नो महाँ अनिमानो धूमकेतुः ऋ०१,२७,११ "अनिमानः अपरिच्छिन्न" इति भा० ।

अनिमित्त न० न निमित्तम् । निमित्ताभावे कारणाभावे "अनाहरः स्वानि स्वानि न सृजेदनिमित्तत" इति मनुः न०व० । कारणशून्ये त्रि० ।

अनिमिष् त्रि० नि+मिष-भावे क्विप् स नास्ति यत्र । स्पन्दशून्ये दर्शने "इमे दिवो अनिमिषा" इति ऋ०७, ६०,७, "मित्रः क्षत्रीरनिमिषा" इति ऋ०३,५६,१, अनिमिषा निमिषरहितेनेति भा० ।

अनिमि(मे)ष पु०नास्ति निमि(मे)षः चक्षुःस्पन्दं यस्य मिष घञ् कुटादि० न गुणः, मिष-भ्वादि घञ्-वा, । चक्षुःस्पन्दशून्ये देवे "सुरेषु नापश्यदवैक्षताक्ष्णोर्द्वये निमेषं निजसम्मुखे सेति" नैषधे सुराणां निमेषशून्यत्वमुक्तम् "अक्षन्नजो अनिमिषा" इति २,२७,६ संस्पन्दनो अनिमिष एकवीर इति च ऋ० १०१०३,१ । मत्स्ये च । निमिषो दृष्टिप्रतिबन्धस्तच्छून्ये विष्णौ च । "नैमिषेऽनिमिषक्षेत्रे" इति भाग० "अनिमिषः विष्णुः अनुग्रहदृष्टित्वात् तस्य क्षेत्रे इति श्रीधरः । न निमिषति चलतीति नि+मिष -क न०त० । महाकाले । क्रियाशून्ये वस्तुमात्रे त्रि० । स्पन्दनशून्ये त्रि० । "यतैस्समक्षमनिमेषदृष्टिभिरिति" रघुः ।

अनियत त्रि० न नियतः । नियमेनैकरूपशून्ये, अनित्ये अस्थायिनि "रत्नादयोऽप्यनियते रसे स्युर्व्यभिचारिणः" इति सा०द० । नियतकारणाद्यनपेक्षे च "रिष्टं त्रिविधं सूनवोनियतमनियतं योगजञ्चेति" ज्योति० । अनियन्त्रिते च । [उच्छृङ्खले च ।

अनियन्त्रित त्रि० नि+यन्त्र चु० क्त न०त० । अनियमिते

अनियम पु० न नियमः अभावार्थे न०त० । नियमाभावे । "पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः । षष्ठे पादे गुरु ज्ञेयं श्लोकेष्वनियमोमत" इति छन्दो० ।

अनिरा स्त्री नास्ति इरा अन्नं यस्याः ५व० । अतिदृष्ट्यादौ ईतौ । "व्यसन् विश्वा अनिरा" इति यजु० ११,४७, अनिराः अतिदृष्ट्याद्या इति वेददीपः । न ईरयितुं शक्यते ईर-क षृ० तुक्० न०त० । प्रेरयितुमशक्ये । "अपत्या अस्युरनिरा" इति ऋ० ८,४८,११, "अनिरा प्रेरयितुमशक्या" इति भा० । ७व० । अन्नरहिते दारिद्र्ये च "युवतमस्यदनिरामनीवामिति" ऋ०७,७१,२, "अनिरामन्नदारिद्र्यमिति" भा० ।

अनिराकरण न निराकरणमभावार्थे न०त०। निवारणाभावे "अनिराकरणात् कर्तुस्त्यागाङ्कर्मणोऽस्तमिति" हरिः।

अनिरुक्त त्रि० निष्क्रान्तं उक्तमवयवार्थं निर्वक्तसक्तमवयवार्थो येन वा निरुक्तं निर्वचनम् न०त०। विशेषरूपेण निर्वचनसूत्रे "एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्ते" इति श्रुतेः। निर्वचनञ्च निरुक्ते यास्केन दर्शितं यथा "अथ निर्वचनम् तदेषु पदेषु स्वरसंस्कारौ समर्थौ, प्रादेशिकेन गुणेनान्वितौ स्यातां, तथा तानि निर्ब्रूयादधानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्ष्येत केनचिद्वृत्तिसामान्येनाविद्यमाने सामान्येऽप्यक्षरवर्णसामान्याच्चिर्ब्रूयात् नत्वेव न निर्ब्रूयाच्च संस्कारमादिशेत विषयवत्यो हि दृष्टयो भवन्ति। यथार्थं विभक्तेः संनमवेत्प्रसमवस्तमिति धात्वादो एव शिष्येते। अथाप्यस्तेर्निष्टत्तिस्थानेष्वादिलोपो भवति स्तः सन्ति, अथाप्यन्तलोपो भवति गत्वा गतमिति, अथाप्युपधालोपो भवति जग्मतुर्जग्मुरिति, अथाप्युपधाविकारो भवति राजा दण्डीति, अथापि वर्णलोपो भवति तत्त्वा यामीति अथापि द्विवर्णलोपः ल्यप इति, अथ व्यादिविपर्ययो भवति ज्योतिर्धनो विन्दुर्वाद्य इति अथाद्यन्तविपर्ययो भवति स्रोको रज्जुः सिकतास्कर्कु इति अथाप्यन्तव्यापत्तिर्भवति" इति॥ तथा प्रकृतिप्रत्ययवानपेक्ष्यैव समुदायेन विशिष्टार्थबोधकमपि निरुक्तं यथोक्तम् ऋ० भा० माधवेन यथा "प्रकृतिप्रत्ययार्थमनपेक्ष्य विशिष्टकार्थबोधकं पदं निरुक्तमिति"। अनिर्दिष्टे "अनिरुक्तप्रातःसवनः प्रथम" इति काल्या० २२,५,७, "अनिरुक्तं प्रातःसवनं यस्यासौ प्रथम" इति तद्व्याख्या।

अनिरुद्ध पु० न केनापि युद्धेन निरुद्धः नि+रुध-क्त न०त०। कामदेवपुत्रे, उषापतौ, वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाख्यचतुर्व्यूहस्य परमेश्वरस्य कथमप्यनिषेध्यस्य अत्यन्तचलस्य चेतसोऽधिष्ठातरि अनिरुद्धाख्ये अंशे च अनिरुद्धः सुरानन्द" इति विष्णु सं०। "न केनापि प्रादुर्भावेषु निरुध्यते" इति भा० "अनिरुद्धोऽप्रतिरथ" इति विष्णु सह०। "चतुर्षु व्यूहेष्वनिरुद्ध" इति भा० "संकर्षणोवासुदेवः प्रद्युम्नश्चानिरुद्धकः। व्यूहश्चतुर्विधो ज्ञेयः सच्चं सम्पूर्णषड्गुणमिति" रामा० दर्श०। विवरणं रामानुजशब्दे वक्ष्यते। अप्रतिरुद्ध त्रि०।

अनिरुद्धपथ न० न निरुद्धः पन्था यत्र ब०। आकाशे तत्र हि कस्यापि गतिरोधनाभावः। रुद्धवर्त्मभिन्ने त्रि०।

अनिरुद्धभाविनी स्त्री ईत०। उषायां वाणकन्यायां तस्यास्तत्पत्नीभवनकथा च उषापतिशब्दे दृश्या।

अनिर्ज्ञात त्रि० न निर्ज्ञातः निश्चितो प्राप्तो वा। अप्राप्ते, अनिश्चिते च "क्रिया हि अनिर्ज्ञातकालादिक्रियायाः परिच्छेदकत्वात् लक्षणं भवतीति" प्रौ० मनो०। अनिर्ज्ञातप्रार्थ्यं प्रतीक्षणं प्रतीक्षेति कठ०उ०भा०। प्राप्तं हि यथा स्वरूपं ज्ञातुं शक्यते नाप्राप्तमित्यतोऽप्राप्तस्यानिर्ज्ञातत्वम्। [धारणाभावे।

अनिर्णय न निर्णयः अभावे न०त०। निश्चयाभावे अव-

अनिर्दश त्रि० न निर्गतानि दश दिनानि यस्य ब०स०। अनपगतदशाहे। "उपाङ्गं स्मृतिकाञ्चैव पर्य्याचान्तमनिर्दशमिति" अनिर्दशञ्च प्रेताङ्गमिति, "तावत् स्यादशुचिर्विप्रो यावत्तत् स्यादनिर्दशमिति" "विगतं तु विदेशस्थं श्रुत्वाद्यो ह्यनिर्दशमिति" "अनिर्दशायाः गोःक्षीरमौष्ट्रमेकशफं तथेति च" मनुः। अनिर्दशाङ्गमध्यत्र त्रि०। "अनिर्दशाङ्गां गां स्मृताभिति" मनुः।

अनिर्देश्य त्रि० न निर्देश्यं जातिगुणक्रियासंज्ञाभिर्निर्देष्टुमशक्यम् निर्+दिश्-शक्यार्थे ण्यत् न०त०। निर्विशेषे निर्धर्मके परमात्मनि तस्य जातिगुणाद्यभावेन "इदं तदिति" निर्देशायोग्यत्वात्तत्त्वम्। "यत्तत् सूक्ष्ममनिर्देश्यमिति" श्रुतिः। "ब्रह्मन्! ब्रह्मण्यनिर्देश्ये निर्गुणे गुणकृतय" इति भाग० १०म श्लो०। अनिर्देश्यवपुः श्रीमानिति विष्णु स०। "इदं तदिति निर्देष्टुं यन्न शक्यते परैः, स्वयं वेद्यत्वादिति" भाष्यम्। [स्थिते।

अनिर्द्धारित त्रि० न निर्द्धारितः। अवधारितभिन्ने अनि-

अनिर्म्माख्या स्त्री निर्-मल-ख्यत् न०त०। शुक्लानामकौ षधौ शब्दरत्ना०।

अनिर्व्वचनीय पु० निर्वचनं निरुक्तिः लक्षणादिना ज्ञापनम्। एवंरूपतया निर्वक्तुमशक्ये परमात्मनि। सत्त्वासत्त्वाभ्यामेकतररूपेण निर्वक्तुमशक्ये वेदान्तिमते जगति, अज्ञाने च न०। "अज्ञानञ्च सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति" वे०सा०।

अनिर्व्वचनीयसर्व्वस्व न० अनिर्वचनीयं सर्व्वस्वं यस्य। श्रीहर्षप्रणीते खण्डनखण्डखाद्यापरपर्य्याये ग्रन्थभेदे तत्र हि सर्व्वेषां पदार्थानामभिदन्नया निर्वक्तुमशक्यता व्यवस्थिता।

अनिर्व्वृति स्त्री न निर्व्वृतिः स्वाच्छन्द्यमभावार्थे न०त०। स्वाच्छन्द्याभावे तद्रूपोपलक्षिते दारिद्र्ये च "अनिर्व्वृति-

निशाचरोऽमर्षसहान्तरात्मा गते"लुङ्लटः। ब०। तहति ति०।

अनिर्वेद पु० न निर्वेदः अभावार्थे न०त०। निर्वेदाभावे वैराग्याभावे अवैराग्ये, असन्तोषे च "अनिर्वेदः श्रियोमूलमनिर्वेदमयं सुखम् "अनिर्वेदो हि सततं सर्वार्थेष्वनुवर्त्तते" इति रामा०।

अनिल पु० अनित्यत्वेन अन-इलच्। वायौ, तेनैव सर्वेषां प्राणधारणात्तत्त्वम्। "तप्तकृच्छ्रं चरन् विप्रो जलक्षीरहतानिलान्" इति सोमाग्न्यर्कानिलेन्द्राणां वित्ताप्त्योर्यमस्य चेति" मनुः। "स सखा दीप इवानिलाहत" इति कुमा०। अनिलश्च मायासहकृतेन ब्रह्मणा विवर्त्तरूपाद्य तद्रूपाविष्टेन ततोदग्रांशत उत्पादितः द्रव्यभेदः "तस्माद्वैतस्माद्वा आत्मन आकाशः संभूतः आकाशात् वायुः वायोरग्निरित्यादिश्रुतिः, स च स्वाभाविकशब्दस्पर्शगतिवेगाख्यगुणवान् विवर्त उत्पन्नत्वात् शब्दगुणवांश्च। यथोक्तं पञ्चदश्यां "माया सत्त्वैकदेशस्था यदा तत्त्वैकदेशगम्। वियत्, तत्रायेकदेशगतो वायुः प्रकल्पितः। शब्दस्पर्शौगतिर्वेगो वायुधर्मा इमे मताः। त्वयः स्वभावात् सन्मायाव्योम्नां ये तेऽपि वायुगाः। वायुरस्तीति सद्भावः, सतोवायौ पृथक्कृते। निस्तत्वरूपो मायायाः स्वभावो वियतोऽपि निरिति "पुराणोक्तं तारतम्यं दशांशे भूतपञ्चके" इति च। तदाविष्टेनैव ब्रह्मणा वह्निरुत्पादित इति वेदान्तिमतम् सांख्यमते सतु स्पर्शतन्मात्रादुत्पन्नः। वैशेषिकनये तु स्पर्श, संख्या, परिमाण, पृथक्त्वसंयोगविभागपरत्वापरत्ववेगगुणकोऽनिलः ईश्वरादेव अदृष्टवशादुत्पद्यते इति भेदः स च स्थूलः सूक्ष्मश्च। तत्र स्थूलः सप्तविधः सप्तस्कन्धाश्रितः यथोक्तं सिद्धान्तशिरमणौ "भूवायुरावह इह प्रवहस्तदूर्ध्वः स्यादुद्वहस्तदनु संवहसंज्ञकश्च। अन्यस्ततोऽपि सुवहः परिपूर्वकोऽस्मादाक्षेपः परावह इमे पवनाः प्रसिद्धाः। भूमेर्वहिर्दशगयोजनानि भूवायुरत्राम्बुदविद्युदाद्यम्। तदूर्ध्वगो यः प्रवहः स नित्यं प्रत्यग्गतिस्तस्य तु मध्यसंस्था। नक्षत्रकक्षा खचरैः समेतो यत्रादतस्तेन समाहतोऽयम्। भपञ्जरः खेचरचक्रयुक्तो भ्रमत्यजस्रं प्रवहानिलेन इति"। भूवायौ विद्युदादय उत्पद्यन्ते इत्युक्तम् तेषां स्वरूपादि तट्टीकायामुक्तं श्रीपतिवाक्येन। "निर्घातोल्कापवनसुरधनुर्विद्युदुल्लः कुवायोः संहश्यन्ते खनगरपुरीवेषपूर्वं तथान्यत्" इति। तत्र विद्युतः। "सुजलजलधिमध्ये वाडवोऽग्निः स्थितोऽस्मात् सलिलभरनिमग्नादुत्थिता धूममालाः। वियति पवननोताः सर्वतस्ता इवन्ति द्युमणिकिरणतप्ता विद्युतस्तत्स्फुलिङ्गाः"। करकाः। "उद्भूतैः पांसुभिर्भूमेः प्रचण्डपवनोद्धतात्। मेघमण्डलमानीतैर्मालिन्यपरिवर्जितैः। मिश्रणाज्जलबिन्दूनां पिण्डभावो भवेदिह। दग्धत्वात्पतन्त्येते द्रवन्ते च पुनः क्षितौ"। विद्युत्पातसंभवस्तु। "अकस्माद्दैवयुतं तेजः पार्थिवांशकमिश्रितम्। वाय्वावृद्धमदाघाते प्रतिकूलानुकूलयोः। वाय्वोस्तात् पतति प्रायो ह्यकालं प्राप्य वर्षणे। यतः प्रावृषि नैवेते पांसवः प्रसरन्ति हि। तत् तेषां पार्थिवं चाग्न्यं तैजसं, तत्तदुत्थितः। गतो निर्झरदाहेन भूमिस्थैरनुभूयते"। इन्द्रधनुः। "सूर्यस्य विविधवर्णाः पवनेन विघट्टिताः कराः साभ्रे। वियति धनुःसंस्थाना ये दृश्यन्ते तदिन्द्रधनुः"। परिवेषः। "संमूर्च्छिता रवीन्दोः किरणाः पवनेन मण्डलीभूताः। नानावर्णाकृतयस्तन्वभ्रे व्योम्नि परिवेषः"। उल्का। "यासां गतिर्दिवि भवेद्वक्षितेन गन्त्र्यास्तास्तारकाः सकलखेचरतोऽतिदूरे। तिर्यग्गति या अनियतोर्द्धगतयश्च नाराचवद्वादधो हि विवसन्ति तदाश्रितास्ताः। शीतांशुवज्ज्वलमयास्तपनात् स्फुरन्ति ताश्चावहप्रवहमारुतसंधिसंस्थाः। पूर्वानिलैस्तिमितभावमुपागतेऽस्मिंस्तारा: पतन्ति कुहचिद्गुरुतावशेन"। अथ रजःसंहतिः। "वर्षान्ते निर्जला मेघा वायुना विरलीकृताः। ईषद्वाष्पावशेषास्तु पतन्ति वसुधातले। धूमावयवरूपैस्तै स्कन्धाद्यन्ते गिरयो द्रुमाः। रामारामादयस्ते तु पुनर्कांशुशोभिताः। भूवायुना विशीर्णास्तु विलीयन्ते नभस्तले। तद्रजःसंहतिर्धेनुमच्छियोज्झीरनाशवत्"। संध्यारागः। "भूम्युत्थितैः रजोधूमैर्दिगन्तव्योम्नि संस्थितैः। सूर्यांशुकिरणैर्भिन्नैरारक्तमवभासते। विरलावयवं वस्तु यद्दृष्टेर्व्यवधायकम्। तेनाभ्रमरुणीभूतं दृश्यते शक्रचापवत्। संध्यारागः स विज्ञेयो दिनादौ च दिनात्यये। राकायां तु निशावक्त्रे तच्चैवेन्दुकरोद्गमे" इति। तदधिष्ठातृदेवोत्पत्तिर्मन्वन्तरभेदेन वामनपुराणादौ दर्शिता यथा "पुलस्त्य उवाच। प्रविश्य जठरं शुक्रोदैत्यमातुः पुरन्दरः। ददर्शोर्द्धमुखं बालं कठिन्यसक्करं महत्॥ तेनैव गर्भं दितिजं वज्रेण शतपर्वणा। चिच्छेद सप्तधा ब्रह्मन्! स रुरोद सुविस्वरम्। शक्रोऽपि प्राह मा मूढ! रुदस्वेति सुदारुणम्। इत्येवमुक्त्वा चैकैकं भूयश्चिच्छेद सप्तधा॥ ते जाता मरुतो नाम देवादित्याः शतक्रतोः। मातरेवापचारेण बलवीर्यपुरस्कृताः इति॥ "यदसौ भवता प्रोक्ता मरुतोदिति सम्भवाः। तत् केन पूर्वमासन् वै मरुन्नामेति कथ्यतामिति" नारद-

प्रश्ने पुलस्त्योक्तिः। "शृणुताम् पूर्वमरुतामुत्पत्तिं कथयामि ते। स्वायम्भुवं समारभ्य यावन्मन्वन्तरं त्विदम्॥ स्वायम्भुवस्य पुत्रोऽभून्मनोर्नाम प्रियव्रतः। तस्यासीत् सवनो नाम पुत्रस्त्रैलोक्यपूजितः॥ सस्तत्पपाताथ स कामचारी सभं महिष्मा वसुमानपुत्रया। रराम तन्व्या सह कामचारी ततोऽम्बरात् प्राच्यवताश्च शुक्रम्॥ पतिभिः समनुज्ञाताः पपुः पुष्करसंस्थितम्। तं शुक्रं पार्थिवेन्द्रस्य मन्यमानास्तदाहृतम्॥ पीतमात्रेण शुक्रेण पार्थिवेन्द्रोऽभवेन च। ब्रह्मतेजोविहीनास्ता जाताः पत्यस्तपस्विनाम्॥ सुषुवुः सप्त तनयांस्ते रुदन्तोऽथ भैरवम्। तेषां रुदितशब्देन सर्वमापूरितं जगत्॥ अथाजगाम भगवान् ब्रह्मलोकात् पितामहः। समभ्येत्याब्रवीद्बालान् मा रुदध्वं महाबलाः!॥ मरुतो नाम यूयं वै भविष्यध्वं त्रिविष्टपाः। इत्येवमुक्त्वा देवेशो ब्रह्मा लोकपितामहः॥ तानादाय त्रिविष्टारी मारुतानादिदेश ह। ते चासन् मरुतश्चाद्या मनोः स्वायम्भुवान्तरे"॥ खारोचिषे तु मरुतो वक्ष्यामि शृणु नारद!। खारोचिषस्य पुत्रश्च श्रीमानासीत् क्रतुध्वजः॥ तस्य पुत्राभवन् सप्त सप्तार्चिःप्रतिमा सुने!। तपोऽर्थं ते गताः शैलं महामेरुं नभश्चराः॥ आराधयन्तो ब्राह्मणं पदमैन्द्रमथेश्वरः। ततो विपश्चिन्नामा स सप्तस्वाद्यो भयातुरः॥ पृतनामक्षरोत्तस्यां प्राह नारद! वाक्यवित्। यथा हि तपसो विघ्नं तेषां भवति सुन्दरि!॥ तथा कुरुष्व मा तेषु, सिद्धिर्भवतु वै यथा। इत्येवमुक्ता शक्रेण पृतना रूपशालिनी॥ तत्राजगाम त्वरिता यत्र तप्यन्ति ते तपः। आश्रमस्याविदूरे तु नदीमन्दोदवाहिनी॥ तस्यां स्नातुं समायाताः सर्वएव सहोदराः। सा तु स्नातुं सुचार्वङ्गी त्ववतीर्णा महानदीम्॥ ददर्शुस्ते ऋषयः स्नातुं ततस्तुम्बिरे सुने!। तेषाञ्च प्राच्यवत् शुक्रं, तत् पपौ जलचारिणी॥ शङ्खिनो मुखसक्तस्य महाशङ्खस्य वल्लभा। ते वै विनिष्टतपसो जग्मू राज्यन्तु पैतृकम्॥ अथो वर्त्तिषे काले सा प्राची शङ्खरूपिणी। ससुता महाजालैर्मृत्स्यबन्धेन मानिनी॥ स तां दृष्ट्वा महाशङ्खीं स्वसुतां मत्स्यजीवनः। निवेदयामास तदा क्रतुध्वजसुतेषु वै॥ तयाश्चेल महात्मानो योगिनो योगधारिणः। नीत्वा स्वमन्दिरं सर्वे पुरव्याप्तां ससुतां सुजन्॥ ततः क्रमाच्छङ्खिनी सा सुषुवे सप्त वै शिशून्। जातमात्रेषु पुत्रेषु मोचमागच्छ सा॥ अमार्हपिटका बाला जलमध्य विचारिणः। स्नान्यार्थिनो वै रुरुदुरथाभ्यागात् पितामहः॥ मा रुदध्वमिति प्राह मरुतो नाम पुत्रकाः!। यूयं देवा भविष्यध्वं वायवोऽम्बरचारिणः॥ इत्येवमुक्त्वा-दाय सर्वांस्तान् दैवतान् प्रति। निवोह्य च मरुन्मार्गे वैराजभवनं गतः॥ एवमासंश्च मरुतो मनोः खारोचिषान्तरे। औत्तमे मरुतो ये च तान् शृणुष्व तपोधन!॥ औत्तमस्यान्वयावे च राजासीच्छिबिधार्धिपः। वसुमानिति विख्यातो वसुधा भास्करोपमः॥ तस्य पुत्रो गणश्रेष्ठो ज्योतिष्मान् धार्मिकोऽभवत्। स पुत्रार्थी तपस्तेपे नदीं मन्दाकिनीमतु॥ तस्य भार्या च सुश्रोणी देवाचार्य्यसुता शुभा। तपश्चरणयुक्तस्य बभूव परिचारिका॥ तेजोयुक्ता सुचार्वङ्गी दृष्टा सप्तर्षिभिर्वने। तां तथा चारु सर्वाङ्गीं दृष्ट्वाथ तपसा कृशाम्। पप्रच्छुस्तपसो हेतुन्तस्यास्तद्भर्तुरेव च। साऽब्रवीत्तनयार्थाय आवाभ्यां वै तपः क्रिया॥ ते चास्यै वरदा ब्रह्मन्! जाताः सप्त महर्षयः। व्रजध्वं तनयाः सप्त भविष्यन्ति न संशयः॥ युवयो र्गुणसंयुक्ता महर्षीणां प्रसादतः। इत्येवमुक्ता जग्मुस्ते सर्व एव महर्षयः॥ सोऽपि राजर्षिरगमत् सभार्यो नगरं निजम्। ततो वर्त्तिषे काले सा राज्ञो महिषी प्रिया॥ अवाप गर्भं तन्वङ्गी तस्मात् नृपतिसत्तमात्। गुर्विण्यामथ भार्यायां समारासौ नराधिपः॥ सा चाप्यारोढुमिच्छन्ती भर्तारं वै पतिव्रता। निवारिता तदामात्यैर्न तथापि व्यतिष्ठत॥ तं समालिङ्ग्य भर्तारं चितायामारुरोह सा। ततोऽग्निमध्यात् सलिले मांसपेश्यपतन्मुने!॥ साम्भसा सुखशीतेन संसिक्ता सप्तधाऽभवत्। तेऽजायन्नाथ मरुत औत्तमस्यान्तरे मनोः॥ तामसस्यान्तरे ये च मरुतोऽभवन् पुरा। तानहं कीर्त्तयिष्यामि गीतन्दत्तकलिप्रिय!॥ तामसस्य मनोः पुत्र क्रतुध्वज इति श्रुतः। स पुत्रार्थी जुहावाग्नौ स्वमांसं रुधिरं तथा॥ अस्थीनि रोम केशांश्च स्नायुमज्जायकृच्छ्वसम्। शुक्रं च वितसो राजा सुतार्थी चेति नः श्रुतम्॥ सप्तार्चिर्मध्याच्च ततः शुक्रपातादनन्तरम्। मा मा क्षिपस्वेत्यसरत् शब्दः सोऽपि ऋषौ मृतः॥ ततस्तस्याद्भुतवहात् सप्त तत्तेजसोपमाः। शिशवः समजायन्त ते रुदन्तश्च तन्मुने!॥ तेषान्तु ध्वनिमाकर्ण्य भगवान् पद्मसम्भवः। समागम्य निवार्यांश्च स चक्रे मरुतः सुतान्॥ ते त्वान्मरुतो ब्रह्मँ स्तामसे देवतागणाः। येऽभवन्नृषते तांश्च शृणुष्व तं तपोधन!॥ रैवतस्यान्वयावे तु राजासीद्विश्व-

जिह्वो। रिपुजिच्चाम स ख्यातो न तस्यासीत् सुतः किल ॥ स समाराध्य तपसा भास्करं तेजसां निधिम्। अवाप कन्यां सुरतिं तां प्रस्तुह्य स्वयं ययौ ॥ तस्यां पिटस्वहे ब्रह्मन्! वसत्यान्तु पिता सुतः। सापि दुःखपरीताङ्गी स्वां तनुं त्यक्तुमुद्यता ॥ ततस्तां वारयामासुर्ऋषयः सप्त मानसाः। तस्यामासक्तचित्तास्तु सर्व्व एव तपोधनाः॥ अपारयन्ती तद्दुःखं प्रज्वाल्याग्निं विवेश ह। ते चापश्यन्त ऋषयस्तच्चित्ता भावितास्तया ॥ तां सुतां ऋषयो दृष्ट्वा कष्टं कष्टेति वादिनः। प्रजग्मुर्ज्वलनाज्ञापि सप्ताजायन्त दारकाः ॥ ते च मात्रा विना भूता रुरुदुस्तान् पितामहः। निवारयित्वा ऊतवान् लोकनाथो मरुद्गणान् ॥ रेवतस्यान्तरे जाता मरुतोऽमी तपोधन!। शृणुष्व कीर्त्तयिष्यामि चाक्षुषस्यान्तरे मनोः ॥ आसीन्महौजेति विख्यातो तपसो सत्यवाक् शुचिः। सप्तसारस्वते तीर्थे सोऽतप्यत महत्तपः ॥ विघ्नार्थं तस्य तपसो देवाः सर्व्वे ययुर्वधम्। सा चाप्येत्य नदीतीरं क्षोभयामास भाविनी ॥ ततोऽस्य प्राच्यवच्छुक्रं सप्तसारस्वते जले। तां चैवाप्सरसं रूढां सुनिर्म्माङ्गनिकां वधूम् ॥ गच्छालज्जेऽतिमूढे! त्वं पापस्यास्य फलं महत्। विघ्नं सयिष्यति ह्यो भवतीं यज्ञसंसदि ॥ एवं श्रुत्वा ऋषिः क्रोधान् जगामाथ स्वमाश्रमम्। खरस्वतीभ्यः सप्तभ्यः सप्त वै मरुतोऽभवन्। एते तवोक्ता मरुतः पुरा यथा जाता विद्याग्निकरा महर्षे!। येषां श्रुते जन्मनि पापहानिर्भवेच्च धर्म्माभ्युदयो महान्वै" ॥ अतःपरं प्रवक्ष्यामि मरुतोऽग्नीन् पितॄन् महान्। आवहो निवहश्चैव उद्वहः संवहस्तथा ॥ विवहः प्रवहश्चैव परिवहस्तथैव च। अन्तरीक्षे च वाहेऽमी ते पृथङ्मार्गविचारिणः ॥ महेन्द्रप्रविभक्ताङ्गा मरुतः सप्त कीर्त्तिताः। सूर्य्याग्निश्च शुचिर्नाम वैद्युतः पावकः स्मृतः ॥ निर्मथ्य पचमानोऽग्निस्त्रयः प्रोक्ता इमेऽग्नयः। अग्नीनां पुत्रपौत्राश्च चत्वारिंशच्चैव तु। मरुतामपि सर्वेषां विज्ञेयाः सप्त सप्तका इति" ॥ तेषां नामान्युक्तानि वह्निपुराणे यथा

"एकज्योतिश्च द्विज्योतिस्त्रिज्योतिर्ज्योतिरेव च। एकशुक्रो द्विशुक्रश्च त्रिशुक्रश्च महाबलः ॥ इन्द्रश्च गत्यङ्गश्च ततः प्रतिसुतस्परः। मितश्च सम्मितश्चैव सुमितश्च महाबलः ॥ ऋतजित् सत्यजिच्चैव सुषेणः सेनजित्तथा। अन्मित्रोऽनमित्रश्च पुरुमित्रोऽपराजितः ॥ ऋतश्च ऋतधाश्चैव धर्त्ता च धरणो ध्रुवः। विधारणो नाम तथा देवदेवो महाबलः ॥ द्वादशाप्यष्टसंख्याश्च एते दश मिताशिनः। व्रतिनः प्रसदश्चैव सभरश्च महायशाः ॥ धाता दुर्गोधितिर्भीमस्त्वभियुक्तस्वपात् सहः। धुतिर्धरुणश्चाथोऽथ वासः कामो जयो विराट्। इत्येकोनाश्च पञ्चाशन्मरुतः पूर्व्वमन्वयाः इति" ॥ एवञ्च अनिलस्य जनपञ्चाशद्भेदत्वेन सप्तभेदत्वेन च गणदेवतात्वम् अयञ्चानिलाधिष्ठाता दिक्पालभेदः तस्य च गन्धवतीनामिका पुरी मेरोः पूर्व्वेण कुबेरपुरयोर्मध्येऽस्ति। तस्य पूर्व्वादिदिग्भेदेन वर्णभेदेन च शुभाशुभसूचकत्वमुक्तं "पूर्व्वः पूर्वसमुद्भवीचिशिखरप्रस्फालनाघूर्णितचन्द्रार्कांशुसटाभिघातकलितो वायुर्यदाकाशतः। नैकान्तस्थितनीलमेघपटलां शारद्यसंवर्धितां वासन्नोत्कटसस्यमण्डिततलां विद्यात्तदा मेदिनीम् ॥ यदाग्नेयो वायुर्मेरुशिखरास्फालनपटुः प्लवत्यम्भोयोगे भगवति पतङ्गे प्रवसति। तदा निर्व्योहीप्रा ज्वलनशिखरालिङ्गिततला खगालोप्योच्चासैर्वमति वसुधा भस्मनिकरम् ॥ तालीपत्रलतावितानतरुभिः शाखास्थगाग्नर्तयन् योगेऽस्मिन् प्लवति ध्वनन् सुपरुषो वायुर्यदा दाक्षिणः। सर्व्वोद्योगसमुद्यताश्च गजवत्तालाङ्कुशैर्घट्टिताः कीनाशा इव सन्दवारिकणिकान्मुञ्चन्ति मेघास्तदा ॥ सूक्ष्मैलालवलीलवङ्गनिचयान् व्याघूर्णयन् सागरे भानोरस्तमये प्लवत्यविरतो वायुर्यदा नैर्ऋतः। क्षुत्क्षुब्धाश्चलमानुषास्थिरकलप्रस्तारभारोद्धता मत्ता प्रेतवधूरिवोद्यचपला भूमिस्तदा लक्ष्यते ॥ यदा रेणूत्पातैः प्रविकटसटाटोपचपलः प्रवातः पश्चार्द्धे दिनकरकरापातसमये। तदा सस्योपेता प्रवरवटवाङ्गसमरा धरा स्याने स्याने ष्वविरतवसामांसरुधिरा ॥ आषाढीपर्वकाले यदि किरणपतेरस्तकालोपपन्नो वायव्यो दृढवेगः प्लवति घनरिपुः पन्नगादानुकारी। जानीयाद्वारिधारा-प्रसृतिसदितां सक्तमस्तूकरूपां सस्योद्वासैकचिह्नां सुखबडलतया भाग्यसेनामिवोर्वीम्। मेरुपल्लसरीचिमण्डलतले योग्यावसाने रवौ वाय्वाशोदिकदस्यगन्धसुरभिर्वायुर्यदा चोत्तरः। विद्युद्भ्रान्तिसमस्तकान्तिकलनाभस्तास्तदा तोयदा उन्मत्ता इव नष्टचन्द्रकिरणां गां पूरयन्त्यम्बुभिः ॥ ऐशानो यदि शीतलोऽमरगणैः संसेव्यमानो भवेत् पुन्नागारुणपारिजातसुरभिर्वायुः प्रचण्डध्वनिः। आपूर्णोदकयौवना वसुमती सम्भ्रमसस्याकुला धर्म्मिष्ठाः प्रथमारवो नृपतयो रक्षन्ति वर्षांस्तदा" इति बृहत्संहितायाम् ॥

अथ वैद्यकोक्ता दिग्भववायुगुणाः। "प्राग्वातो मधुरः क्षारो वह्निमान्द्यकरो गुरुः। वैरस्य गौरवौष्ण्यानि करोत्यप्स्वोषधीषु च ॥ अग्नेर्नृपिटज्वरताद्येषु रागज्वरपुटाहकृत्। सन्नि-

पातज्वरश्वासतन्द्रोपार्गोविषक्रमीन्॥ कोपवेदामवातञ्च धनसंघातकारणम्, ॥ दाक्षिणो मारुतोबल्यबलुष्यः शस्त्रघातकः । मधुरस्निग्धदाही च कषायानुरसो लघुः॥ रक्तपित्तप्रशमनो न च मारुतकोपनः । गण्डूपदादिकीटानां जनकः प्राणकारकः, ॥ पाश्चिमोऽग्निवपुर्वर्णबलारोग्यविवर्द्धनः । कषायः शोषणः स्वर्यो रोचनो विशदो लघुः॥ अपां लघुत्ववैशद्यशैत्यवैमल्यकारकः । सर्वद्रव्येष्वभिव्यक्तप्रभावरसवीर्य्यकृत् ॥ व्रणसंरोपणस्तच्छो दाहशोथहरापहः, ॥ औत्तरो मारुतः स्निग्धो मृदुर्मधुर एव च। कषायानुरसः शीतः सर्वदोषप्रकोप(षः)नः ॥ क्षीणक्षत विषार्त्तानां क्षितोदाहहरापहः । शीताधिकः सनीहारः स विद्युत्स्तनयित्नुमान्, ॥ विध्वंसायुरनायुष्यः प्राणिनां नैकदोषकृत् । सर्वर्त्तुनिन्दको हन्ता क्लोत्पातपुरःसरः" इति ॥ तालादिव्यजनवायुगुणाः । मूर्च्छादाहहरश्रमस्वेदश्रमघ्नो व्यजनानिलः । तालोद्भवो वातश्लिदोषश्रमनो लघुः । वंशव्यजनजो वातो रूक्षोष्णो वातपित्तदः । बालव्यजनजोजस्यं मक्षिकादीन् व्यपोहति ॥ मायूरा वस्त्रजा वैत्रा वाता दोषत्रयापहा" इति ।

सूक्ष्मास्तु वायुः शरीरस्थः प्राणादिभेदेन दशविधः दशविधकार्य्य करणात्। यथोक्तम् वैद्यके "प्राणोऽपानः समानश्चोदानव्यानौ च वायवः । नागः कूर्म्मश्च कृकरो देवदत्तो धनञ्जयः ॥ प्राणस्तु प्रथमो वायुर्नराणामधिपः प्रभुः । नित्यमास्यापयेत् सर्व्यान् प्राणिनासुरसि स्थितः ॥ निःश्वासोच्छ्वासकश्चैव प्राणो जीवं समाश्रितः । प्रसाराकुञ्चनो वायुः प्रकाशो धारणस्तथा ॥ प्राणस्त्वेवंविधं कुर्य्यात् प्राणिनां प्राणधारकः । प्राणनं कुरुते यस्मात् तस्मात् प्राणः प्रकीर्त्तितः । प्राणो हि भगवान् ईशः प्राणो विष्णुः पितामहः । प्राणेन धार्य्यते लोकः सर्वं प्राणमयं जगत् ॥ इन्द्रियाणि प्रवर्त्तन्ते यावत् प्राणानिलो हृदि । नष्टे न दृश्यते सर्वं तस्मात् प्राणन्तु रक्षयेत्, ॥ रज्जुबद्धो यथा श्येनो गतोऽप्याकृष्यते पुनः । गुणवद्बलया जीवः प्राणापानेन लभ्यते, ॥ अपानयंस्तथाहारं मनुजानां यतोऽधमः । शुक्रमूत्रव्रजे वायुरपानस्तेन कीर्त्तितः, ॥ पीतं भक्षितमाघ्रातं रक्तं पित्तकफानिलान् । समं नयति गात्रेषु समानो नाम मारुतः ॥ समानोऽग्निसमीपस्थः कोष्ठे च वाति सर्वतः । अन्नं गृह्णाति पचति विरेचयति मुञ्चति ॥ स्पन्दयत्यधरं पक्ष्मं नेत्रगात्रप्रकोप(नः)णः, । उद्वेजयति मर्म्माणि उदानो नाम मारुतः ॥ व्यानोविनामयत्यङ्गं व्यानो व्याधिप्रकोप(नः)णः । प्रीतेर्विनाशकश्चायं बाह्यकोत्पादकक्षिधा इति ॥

प्राणादीनां स्थानानि । "शिरसो नासिकान्तमुदानस्थानमुच्यते । नाभेः पादतलं यावदपानस्य प्रकीर्त्तितम् ॥ शरीरव्यापको व्यानः प्राणः सकलनायकः । उद्गारे नाग इत्युक्तः कूर्म्मोन्मीलने स्थितः ॥ कृकरः क्षुधिते चैव देवदत्तो विजृम्भिते । धनञ्जयस्थितो मेद्रे मृतस्यापि न मुञ्चति ॥ भूतावाप्तिस्ततस्तस्माज्जायतेन्द्रियगोचरात् ॥ उत्साहोच्छ्वासनिःश्वासचेष्टा धातुगतिः समा । समो मोक्षे गतिमतां वायोः कर्म्मविकारजम्" इति सुखबोधः ॥ प्राणादयश्च पञ्चसूक्ष्मभूतरजोगुणेभ्यः समस्तेभ्य उत्पद्यन्ते इति वेदान्तिमतम् सकलेन्द्रियाणां व्यापार एव प्राणो न पदार्थान्तरमिति सांख्यमतं विवरणं प्राणशब्दे द्रष्टव्यम् ।

उदानादीनां कर्म्मविशेषा उक्ता यथा "उदानो नाम यस्तूर्द्ध्वमुपैति पवनोत्तमः । तेन भाषितगीतादिप्रवृत्तिर्कुपितस्तु सः ॥ ऊर्द्ध्वजत्रुगतान् रोगान् विदधाति विशेषतः ॥ यो वायुः प्राणनामासौ मुखं गच्छति देहधृक् ॥ सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते । प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान् गदान् ॥ आमपक्वाशयचरः समानो वह्निसंगतः । सोऽन्नं पचति तत्रान्त्र विशेषान् विविनक्ति हि ॥ स दुष्टो वह्निमान्द्यातिसारगुल्मान् करोति हि । पक्वाशयस्थयोऽपानः काले कर्षति चाप्ययम् ॥ समीरणः शकृन्मूत्रशुक्रगर्भार्त्तवान्त्रधृक् । कुद्धस्तु कुरुते रोगान् घोरान् बस्तिगुदाश्रयान् ॥ शुक्रदोषप्रमेहांश्च व्यानापानप्रकोपजान् । सर्वदेहचरो व्यानो रससंव्यूहनो यतः ॥ स्वेदासृक्स्रावणश्चापि पञ्चधा चेष्टयत्यपि । गत्यपक्षेपणोत्क्षेपनिमेषोन्मेषणादिकाः ॥ प्रायः सर्व्वाः क्रियास्तस्मिन् प्रतिबद्धाः शरीरिणाम् । प्रस्यन्दनं चोद्वहनं पूरणञ्च विरेचनम् ॥ धारणञ्चेति पञ्चैताश्चेष्टाः प्रोक्ता मनस्वतः । कुद्धः स कुरुते रोगान् प्रायशः सर्वदेहगान् ॥ युगपत् कुपिता एते देहं भिन्युरसंशयम् इति च वैद्यके उक्तम् ।

तत्र देहस्थस्य वायोर्विकारहेतुलक्षणादिकमुक्तं वैद्यके "व्यायामादपतर्पणात् प्रपतनाद्भङ्गात् क्षयाज्जागरात् वेगानाञ्च विधारणादतिशुचः शैत्यादतित्रासतः । रूक्षान्नारुक्षायतिक्तकैरतिभिः प्रकोपं व्रजेत् वायुर्वारिधरागमे परिणते चान्नेऽपराह्णेऽपि च" ॥ विकृतवायुलक्षणम् ।

"आध्मानस्तम्भरौक्ष्यस्फुटनविमथनजोभकम्पप्रतोदाः कण्ठध्वंसावसादौ श्रमकविलपनं श्वंसशूलप्रभेदाः । पारुष्यं कर्णनादो विषमपरिणतिश्चंसदृष्टिप्रमोहा विस्पन्दोद्वट्टनादिग्लपनमनशनं ताड़नं पीड़नञ्च ॥ नामोन्नामौ विषादो भ्रमपरिषदनं जृम्भणं रोमहर्षो विक्षेपाक्षेपशोथयक्ष्मगुरिता खेदनं वेटनञ्च । वर्णः श्यावोऽरुणो वा लड़पि च महतो स्रावविश्लेषसङ्गा विद्यात् कर्म्माण्यस्मिन् प्रकुपितपवने स्यात् कषायो रसश्च" ॥ किञ्च "वदनविरसता स्याद्दर्चसः कर्कशत्वं भवति वपुषि कार्श्यं रात्रिनिद्रानिवृत्तिः । त्वचि च परुषता स्यात् स्याच्च वैषम्यमग्नेरिति पवनविकारे लक्षणं प्रोक्तमेतत्" ॥ तत्प्रशमनकारणम् यथा । "रूक्षः शीतो लघुः सूक्ष्मश्चलोऽथ विशदः खरः । विपरीतगुणैर्द्रव्यैर्मारुतः संप्रशाम्यति" ॥ "स्निग्धोष्णस्थिरद्रव्यबस्तिलवणस्वाद्वम्लतैलातपस्नानाभ्यञ्जनवस्तिमांसमदिरासंवाहनोन्मर्दनैः । स्निग्धस्वेदनिरूहणोपशमनः स्नेहोपनाहादिकं पानाहारविहारभेषजमिदं वातं प्रशान्तं नयेत्" ॥ ऋतुभेदेन विहारादिना च तस्य प्रकोपप्रचयप्रशमाद्युक्तं यथा "ग्रीष्मे सञ्चीयते वायुः प्रावृट्काले प्रकुप्यति । प्रावेषोपशमं याति स्वयमेव सभीरणः ॥ शरत्काले वसन्ते च पित्तं प्रावृड्हृतौ कफः । चयकोपशमान्दोषान् विहाराहार सेवनैः ॥ समानैर्यान्त्यकालेऽपि विपरीतैर्विपर्ययः" इति ॥ नरपतिजयचर्य्योक्तमनिलचक्रन्तु चक्रशब्दे वक्ष्यते । अनाहतचक्रस्थवायुमण्डलविवरणं तन्त्रोक्तं षट्चक्रशब्दे द्रष्टव्यम् । तद्देवताके स्वातिनक्षत्रे, अष्टवसुमध्ये पञ्चमे वसौ च । "धरोध्रुवः सोमनामा तथापोऽप्यनिलो नलः । प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिता" इति विष्णुधर्म्मो० पुरा० । विष्णौ, तस्य प्राणात्मना सर्वदेहधारणात् तथात्वम् "अहः संवर्त्तको वह्निरनिलो धरणीधर" इति विष्णु० स० । शरीरस्थे धातुभेदे च । तस्य विवरणसङ्गप्रायम् । "पित्तं पङ्गुः कफः पङ्गुः पङ्गवो मलधातवः । वायुना यत्र नीयन्ते तत्र वर्षन्ति मेघवत् ॥ वायुरायुर्बलं वायुर्वायुर्धाता शरीरिणाम् । वायुर्विश्वमिदं सर्वं प्रभुर्व्यायुः प्रकीर्त्तितः ॥ वाह्यमण्डलचक्रेषु यथा राजा प्रशस्यते । तथा शरीरमध्येऽपि वायुरेकः परो विभुरिति" वैद्यकम् ॥ दोषधातुमलादीनां नेता शीघ्रः सभीरणः । रजोगुणमयः सूक्ष्मो रूक्षशीतो लघुचलः ॥ उत्साहोच्छ्वासनिःश्वासचेष्टाहेतुप्रवर्त्तनैः । सम्यग्गत्या च धातूनामिन्द्रियाणाञ्च पाटवैः ॥ अनुग्रहात्मविक्रतो हृदयेन्द्रियचित्तधृक् । खरो मृदुर्योगवाही संयोगादुभयार्थकृत् । दाहरूक्षतेजसा युक्तः शीतकृत् सोमसंश्रयात् ॥ विभागकरणाद्वायुः प्रधानं दोषसंग्रहैः । पक्वाशयकटीसक्थिश्रोत्रास्थिस्पर्शनेन्द्रियम् ॥ स्थानं वातस्य तत्रापि पक्वाधानं विशेषतः" इति ।

अनिलघ्नक पु० अनिलं वातरोगं हन्ति हन्+क ततः संज्ञायां कन् । (वयड़ा) इति ख्याते वृक्षे तत्फलस्य हि वातनाशकत्वम् ।

अनिलसख पु० अनिलस्य वायोः सखा टच् । वह्नौ । अनिल बन्ध्वादयोऽप्यत्र "मघा विशाखानिलवह्निदैवत" ज्योति० ।

अनिलान्तक पु० अनिलो वातरोगस्तस्यान्तकः अन्तं करोतीति अन्त+णिच्-ण्वुल् । (जोयाइति) इति ख्याते वृक्षे ।

अनिलामय पु० अनिलजन्य आमयः शाक० त० । वातरोगे ।

अनिवर्त्तिन् त्रि० न निवर्त्तते नि-वृत-णिनि न० त० । कार्य्यान्नगत्वा अनिवृत्ते। संग्रामेष्वनिवर्त्तिनामिति" रामा० न निवर्त्तते कृतचेत् अलुप्रशक्तिकत्वात् ईश्वरे, विष्णौ च पु० संग्रामादनिवर्त्तित्वात्तथात्वम् "अनिवर्त्ती निवृत्तात्मेति" विष्णुसहस्रनाम ।

अनिविशमान त्रि० न निविशमानः । निवेशनरूपस्थितिशून्ये सर्वदा गन्तरि, "पुनाना यत् मन्वानिविशमाना" इति ऋ० ७,४६,१, अनिविशमानाः सर्वदा गच्छन्त्य इति भाष्यम् ।

अनिश त्रि० निशा तद्धेतुकत्वेनोपचारात् चेष्टाविनाशः सा नास्ति यस्य ब० । अविरते, निरन्तरे, सदाभवे वस्तुनि, रात्रिवर्জ্জिते च । "तदुभयोरनिशं हि विरोधिता कथमहो समता मम तापने" इत्युद्भटः ।

अनिशम् न निशेतेऽत्र नि+शी-वा० डस नि० त० । सप्तम्यै स्वरादेराकृतिगणत्वेन तस्य तत्र पाठ इति मौ० म० ।

अनिशृस्त त्रि० निर्+शनृसु-क्त न० त० । अनिन्दिते "न वोऽतीतेषामानिःशस्ता" इति ऋ० ४,३४,११, "अनिशस्ता अनिन्दिता" इति भा० ।

अनिष्ट त्रि० इष-क्त विरोधे न० त० । इष्टस्य सुखादेर्विरोधिनि प्रतिकूलवेदनीये दुःखे, तज्जनके पापे, विषादौ, अपकारे च । "इष्टनाशादनिष्टाप्तेः करुणाख्यो रसोभवेदिति सा० द० । "ध्यायत्यनिष्टं तत्सङ्गी पाणिग्राहस्य चेतसेति" "एवं यद्यप्यनिष्टेषु वर्त्तन्ते" इति अनिष्टं वा स्यानिष्टेषु तं धर्म्मं न विचालयेदिति" मनु-

सानिष्टचिन्तनमिति" च मनुः। नागबलायां स्त्री। यज-क्त न०त०। अकृतयागे देवादौ।

अनिष्टिन् त्रि० न इष्टमनेन यज-भावे क्त ततः इनि न०त०। कृतयागभिन्ने। "अनिष्टिनोवाजपेयेन" इति काल्या० १५१,२।

अनिष्पव न० निःसृतं पलं पक्वोऽत्र ताडयं न भवति। अनिसृतपक्वकगरेण वेधनादौ। "विशाख्यां वा स्रोर्ण-सुच्छ्रितं वा विध्यन्त्यनिष्पवमिति" काल्या० १३,२,१२, "अनिष्पवमित्यनिःसृतपक्वं विध्यन्ति चत्रिया" इति तद्व्याख्या।

अनीक पु०न० अनित्यनेन अन-ईकन् अङ्चार्दि। सैन्ये, तस्य हि जीवनरक्षकत्वम्। न नीयते अपसार्यतेऽस्मात्। नी-क्विप् ब० कप् हस्वाभावः। युद्धे, ततोहि प्रायोमरणा-च्चपुनराहत्तिः। "रथेषु वोऽनीकेष्वधिश्रिय" इति ऋ०८,२०, १२ अनीकेषु सेनासङ्घेष्विति भा०। "दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदेति" गीता मुखे, तस्य प्राणवायुनिःसा-रणद्वारत्वात् तथात्वम् "अग्नेरनीकमप्याविवेशापामिति" यजु० ८,२४, "अनीकं मुखमिति" वेददीपः।

अनीकस्थ त्रि० अनीके युद्धे तिष्ठति स्था-क। युद्धगते सैन्ये।

अनीकिनी स्त्री अनीकानां संघः अनीकं युद्धं प्रयोजनतया अस्त्यस्याः वा अनीक+इनि। सेनासंघे हस्त्यादिसंख्या-विशेषवत्यां सेनायाञ्च तत्संख्या चोक्ता भारते "एको रथो गजश्चैको नराः पञ्च पदातयः। ज्ञेयश्च तुर-गास्तज्ज्ञैः पत्तिरित्यभिधीयते॥ पत्तिन्तु त्रिगुणाभेता-माहुः सेनामुखं बुधाः। तीणि सेनामुखान्येको गुल्म इत्यभिधीयते॥ त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः। कृतास्त्रिभस्तु वाहिन्यः पृतनेति विच-क्षणैः॥ चमूस्तु पृतनास्तिस्रस्तिभिस्त्वनीकिनीति"। तत्र हस्तिनः २१८७। रथाः २१८७। अश्वाः ६५६१। पदातयः १०९३५ समुदिताः २१८७०।

अनीश पु० नास्ति ईशो नियन्ता यस्य ब०। सर्वनियन्तरि विष्णौ, स्वामिशून्ये त्रि०। न०त०। ईश्वरभिन्ने "भजेरन् मामकं रिक्थमनीशास्ते हि जीवतोरिति" मनुः। अस्वतन्त्रे, "एकोऽप्यनीशः सर्वत्रेति" व्यास स्मृतिः। ईश-भावे अञ् न०त०। दीनभावे स्त्री "निमग्नोऽनी-शया शोचतीति" सु०उ०। दीनभावोऽनीशेति भा०।

अनीश्वर न० न ईश्वरः नियन्ता यत्र। नियन्तृशून्ये संस्था-दिमति जगति "जगदाहुरनीश्वरमिति" गीता ईश्वरस्य न भवति असम०स०। ईश्वरसम्बन्धिभिन्ने "ध्यानेनानी-श्वरान् गुणानिति" मनुः। नियन्तृशून्ये, स्वामिशून्ये च।

अनीह त्रि० ईह-भावे अङ् न०ब०। स्पृहाशून्ये, निश्चेष्ट च।

अनु अव्य० अन-उ। "अनु वेदाध्ययनानुष्ठानसामीप्यपश्चा-द्भावानुबन्धसाम्याभिमुख्यविसर्गलक्षणेष्विति" गणरत्नोक्तेषु अर्थेषु तत्र वेदे अनुवाक इति। अध्ययने अन्वधीते, अनुष्ठाने, अनुतिष्ठति, सामीप्ये अनुमेघं वर्षति, पश्चाद्भावे तदनु, अनुबन्धने, अनुशेते अनुशयः, साम्ये, अनुकरोति, आभिमुख्ये अनुमातरं वत्सोधावति, हीने अनु हरिं सुराः विसर्गे (प्रकृष्टप्रतिबन्धे) अनुजानीते, लक्षणे अनु वन-मग्निर्गतः"। "अनुर्लक्षणे" इति "द्वितीयार्थे" इति (सङ्ख्यार्थे) "हीने" इति, लक्षणेत्थम्भूताख्यानभाग वीप्सासु प्रतिपर्य्यनु इति, च (पा०) उक्तेषु अर्थेषु, तत्र लक्षणे, जपमनुप्रावर्षत्। "हेतुभूतजपोपलक्षितम् वर्षणम्" सि०कौ० सङ्ख्यार्थे, नदीमनु अवसिता सेना, "नद्या सह संवृता सेना" सि०कौ० हीने, हरिमनु सुराः हरेर्हीना इत्यर्थः, लक्षणे वृक्षमनु विद्योतते विद्युत्, तत्र च वृक्षप्रका-शेन विद्युद्विद्योतदेशज्ञापनात् वृक्षो लक्षणमिति प्रौ०मनो०। (इत्थम्भूतः) कञ्चित् प्रकारं प्राप्तः आख्यायते अनेन, इत्थ-म्भूताख्यानं प्रकारविशेषनिरूपकं तस्मिन्नर्थे, यथा भक्तोहरि-मनु, हरेरित्थम्भूतः, भक्तिविशेषयुक्त इत्यर्थः। भागे भागो-ऽस्यास्ति अर्शआदच् भागस्वामिनि, हरिमनु लक्ष्मीः, हरिस्वामिकभागवतीत्यर्थः। वीप्सायां, विषयभूतायां, वृक्षं वृक्षमनु सिञ्चति, यावद्वृक्षव्यापकः सेकः। इयांस्तु भेदः अन्यत्रानुशब्दः तत्तदर्थस्य द्योतकः अत्र तु द्विवचनेनैव व्याप्तिबोधनात् अनोक्तद्वितीयत्वमात्रम्। पाणिन्युक्तेष्वेषे-वार्थेष्वस्य कर्म्मप्रवचनीयसंज्ञा तेन तद्योगे द्वितीया एवं कर्म्मप्रवचनीयसंज्ञया गत्युपसर्गसंज्ञयोर्बाधनात् न क्त्वादि न वा अनुव्यचलदित्यादौ गतिर्गतावित्यादिना निघातः। "अनुर्यत् समया इति" "यस्य चायाम इति च" (पा०) उक्ते सामीप्ये, अनुवनमग्निर्गत इति वनसमीपं गत इत्यर्थः आयामे, अनुगङ्गं वाराणसी, गङ्गादैर्घ्यसदृशदैर्घ्योपलक्षिता वाराणसीत्यर्थः नित्यसमासः योग्यत्वे च। अनुरूपम्। "रूपादियोग्यमिति" सि०कौ०, अनुक्रमम्। क्रमानतिक्रमे अत्रापि नित्यसमासः एतेषामुदाहरणानि शास्त्रान्तरेषु दृश्यानि दिग्मात्रमुदाह्रियते। तत्र पश्चादर्थे "तदनु ननु कयासौ ब्रूहि यातोऽध्वदक्षेति" लीला०। "तदनु ज्वलनं मदर्पितमिति" कुमा० अस्मौ "कुमारसम्भवोऽनु-

जात" इति रघुः। "रत्ना च सागङ्गमनुप्रयात" इति कुमा० अनुज्ञाने, "शैलाधिपत्यं स्वयमन्वतिष्ठदिति" कुमा० सादृश्ये, "अनुगर्जितसन्दिग्धा" इति कुमा०। अनुगर्जितं गर्जनसदृशं प्रतिरूपगर्जितमित्यर्थः। अनुगताद्यर्थे नित्यसमासः। तथैव सोऽभूदन्वर्थो "राजा प्रकृतिरञ्जनादिति" रघुः। तत्र अन्वर्थः अनुगतोऽर्थो यस्येति प्रा०ब०वा अनित्यसमास उत्तरपदलोपो वा इति तत्र अनुगतार्थोपीति भेदः। एवमेव अनूप इत्यादावपि। उपासने च "अन्वासितमरुन्धत्येति" रघुः "पश्चादुपवेशनपूर्वकसेवायां धातोर्लक्षणायासनुद्योतकः। एवम् एतद्योगे वसतेः आधारस्य कर्मता अनुवसति ग्रामं देवदत्तः "मथुरामनूष्येति" स०बो० क्रियासमभिव्याहृतस्यानुशब्दस्य तत्तत्क्रियासदृशतत्तत्क्रियायां लक्षणाद्योतकत्वं तत्र आद्यक्रियाश्रयस्य कर्मत्वम् यथा मातरमनुरोदितीत्यादौ मातृरोदनसदृशरोदनस्य बोधनेन प्रथमरोदनाश्रयस्य मातुः कर्मत्वमेवमन्यत्र। कर्मणि तिङाद्युक्ते तु प्रथमा।

अनुक त्रि० अनुकामयते अनु+कामतर्थ्यर्थे कन्। कामुके "अनुकाभिकाभीकाः कमयितेति" पा० "वाचमनुकामालनोऽकुरुतेति" कौ० ब्रा०।

अनुकम् अव्य० अनुकामयते अनु-कम-क्विप्। वितर्के। चादेरादिऋतिगणत्वात् अस्य चादिगणे पाठः इति प्रौ०मनो०।

अनुकम्पक त्रि० अनुकम्पते दयते अनु-कम्प-ण्वुल्। दयाकारके। "सर्व्वभूतानुकम्पक" इति मनुः।

अनुकम्पन त्रि० अनु+कम्प-युच्। दयाशीले। "सर्वभूतानुकम्पन" इति रामा०। भावे ल्युट्। दयायां न०।

अनुकम्पा स्त्री अनु+कम्प-अङ्। दयायाम्, दयया हि दुःखहेतुकान्यकर्म्म दृष्ट्वा तत्सदृशकर्म्मकरणात् दयायास्तथात्वम् अतएवानुकम्पधातोरनुरोदनवत् सकर्म्मकत्वम्। दया च परदुःखप्रहरणेच्छा अनुपूर्व्वककम्पतेस्तदर्थपरत्वमित्येके धात्वर्थस्फीतकर्म्मकत्वेन तत्राकर्म्मकत्वमिति भेदः। "तेषामेवानुकम्पार्थं प्रदेयं प्रीतिपूर्व्वकमिति" स्मृतिः। "भूतानुकम्पा तव चेदियं गौरिति" रघुः। किञ्चिच्चलने च।

अनुकम्प्य त्रि० अनुकम्पमर्हति अनुकम्प+यत्। तरक्षिणि वेगवति। अनुकम्प्यते अर्हार्थे यत्। दयार्हे त्रि०। "दुहितरमनुकम्प्यामश्रिरादाय दोर्भ्यामिति" कुमा०।

अनुकरण न० सादृश्ये अनु+कृ-ल्युट्। सदृशक्रियादिकरणे। तच्च गुणक्रियावयवादिभिः सदृशीकरणम्। अनुक्रियतेऽनेनेति करणे ल्युट्। सदृशीकरणसाधने। यथा पटव्यां प्रभृतिशब्दाः अव्यक्तशब्दानुकरणानि। "अव्यक्तस्यानुकरणस्यात इतौ" इति पा०।

अनुकर्ष(ण) पु० अनुकृष्यते स्वसंबन्धेन चक्रेण अनु+कृष-घञ्। रथाधःस्थिते चक्रोपरि बद्धे काष्ठे। कर्त्तरि ल्यु। नानोऽप्यूक्तार्थे। भावे ल्युट्। पूर्ववाक्योपात्तपदादेरुत्तरवाक्यार्थमाकर्षणे, आकर्षणमात्रे च न०।

अनुकल्प पु० कल्प्यते विधीयते इति कृप-णिच्-अच् कल्पो विहितः हीनः कल्पो मुख्यकल्पादधमः पा०स०। गौणकल्पे, प्रतिनिधौ। "एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः। अनुकल्पस्त्वयं ज्ञेय" इति। "प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते" इति च मनुः "समर्थः प्रथमे कल्पे योऽनुकल्पे प्रवर्त्तते" इति स्मृतिः। "भार्य्याः कार्य्याः सजातीयाः सर्वेषां श्रेयसःस्मृतिसुखः कल्पस्ततोऽनुकल्पस्तु चतसोऽन्याश्चगणेत्यादि" पैठीनसिः स्मृतिः। अनुकल्पश्च मुख्यद्रव्याभावे मुख्यसदृशद्रव्यान्तरादि प्रतिनिधिरूपम्। यथा "यवाद्यभावे गोधूमाः मध्वाद्यभावे गुड़ादयः। एवं उपवासासामर्थ्ये नक्तं "हविष्यान्नादि स्मृतिपुराणे वेदितव्यम्। अनुगतं कल्पं वेदाङ्गभेदम् अत्रा०स०। कल्पानुगते ग्रन्थे अनुकल्पप्रतिपादकग्रन्थे च तद्वेत्तरि उगवादि०ठक्॥ आनुकल्पिकः अनुकल्पग्रन्थवेत्तरि त्रि०।

अनुकाम पु० अनुरूपः कामः प्रा०स०। योग्याभिलाषे। सदृशं कामस्य सादृश्यार्थे काममनतिक्रम्य यथार्थे वा अव्ययी०। कामसादृश्ये यथाकामे च अव्य०। अनुकामं तर्पयेथामिति ऋ० १,१७,३, "अनुकामं परा दा इति" ऋ०८,४८,८, "अनुकामं यथाकाममिति" भा०। अनुकामयते अनु+काम-अच्। अतिकामुके त्रि०।

अनुकामीन त्रि० कामस्य अभिलाषस्य सदृशमनुकामं सादृश्येऽव्ययी० ततः गच्छतीत्यर्थे ख। यथेष्टगमनशीले। "अनुकामीनतां त्यजेति" भट्टिः। [विवरणमनुकरणशब्दे द्रष्टव्यम्

अनुकार पु० अनु-कृ-घञ्। गुणक्रियादिभिः सदृशीकरणे।

अनुकारिन् त्रि० अनुकरोति अनु+कृ-णिनि स्त्रियां ङीप्। गुणक्रियादिभिः सदृशीकारके। "अनुकारिणि पूर्व्वेषां युक्तरूपमिदं तव" इति रामा०।

अनुकार्य्य अनुक्रियतेऽसौ अनु+कृ-कर्मणि अर्हार्थे वा ण्यत्। अनुकरणीये सदृशीकरणार्हे पश्चात्करणीये च। "यः पश्चात् पूर्व्वकार्य्याणि कुर्य्यादैश्वर्य्यमोहितः पूर्व्वं चैवानुकार्य्याणीति" रामा०।

अनुकाल अव्य० कालस्य योग्यम् यथार्थे अव्ययी०। काल-

योग्यत्वे।"भोजनाच्छादनं दद्यादनुकालं विशेषतः" इति।

अनुकीर्त्तन न० अनु+कृत–णिच्–ल्युट् कीर्त्तादेशः। कथने "सार्द्धं भवति तत् सर्वं हरेर्नामानुकीर्त्तनादिति" स्मृतिः।

अनुकूल त्रि० कूलमावरणं क्षेत्रेणानुबन्ध इति यावत् अनुगतस्तम् अत्या०स०। सहचरे, सहाये, स्वपक्षपातिनि, "नारीणामनुकूलमाचरसि चेज्जानासीति" का० प्र०। "अनुकूलयतीन्द्रोऽपि स्वर्गद्रुमविभूषणैरिति" कुमा० अनुकूलयति अनुकूलं करोतीति नामधातुः। दक्षीढ्ये स्त्री राजनि०। अलङ्कारशास्त्रप्रसिद्धे "अनुकूल एकरति"रित्युक्ते नायकभेदे "एकस्यामेव नायिकायामासक्तोऽनुकूलनायक" इति तदर्थः यथा "अस्माकं सखि! वाससी न रुचिरे, नैवेदकं नोज्ज्वलं, नो वक्त्रा गतिरुद्धतं, न हसितं, नैवास्ति कश्चिन्मदः। किन्त्वन्येऽपि जना वदन्ति सुभगोऽयस्याः प्रियो न्यायतो दृष्टिं निक्षिपतीति विस्मयिता मन्यामहे दुःस्थितम्" इति॥ "अनुकूलं प्रातिकूल्यमानुकूल्यानुबन्धि चेत्" इति (सा० द०) ल्युट्यर्थालङ्कारभेदे न०। यथा "कुपितासि यदा तन्वि! निधाय करजक्षतम्। बधान भुजपाशाभ्यां कण्ठमस्य दृढं तदा॥" "सर्वेषामात्मत्वेनानुकूले परमेश्वरे पु०"अनुकूलः शतावर्त्तइति"विष्णुस०। सर्वेषामात्मत्वादनुकूलः न हि स्वस्मिन् प्रतिकूलं स्वयमाचरतीति" भा०।

अनुकृति स्त्री अनु+कृ–क्तिन्। "अनुकरणे। ओमित्येतदनुकृतिर्हिंसा वा" इति श्रुतिः।

अनुकृष्ट अनु+कृष–कर्म्मणि क्त। कृताकर्षणे, अनुवर्त्तिते च।

अनुक्त त्रि० न उक्तः। अनभिहिते अकथिते उक्तिश्च प्रायेण तिङ्कृत्तद्धितसमासैः "तत्र तिङा हरिः सेव्यते, कृता चैतेन मतः, तद्धितेन, शतेन क्रीतः शत्। शत्रा, समासेन, आरूढो वानरोयमिति वाक्ये आरूढवानरो दृश्यः सर्वत्र कर्म्मण उक्तत्वात् प्रातिपादिकार्थे प्रथमा। तैरुक्तभिन्ने तु ग्रामं गच्छति, ग्रामं गत, वेदेऽधीते, इत्यादौ "अनभिहिते" इति द्वितीयाद्येव एवमन्यकारकेऽप्युदाहार्य्यम् "अनुक्तसञ्चयवकार" इति रघु० अनियोजिते च "असावनुक्तोऽपि सहाय एव इति" कुमा०।

अनुक्थ त्रि० नास्ति उक्थं स्तोत्रं यस्य। स्तोत्रशून्ये "किं यामनिन्द्राः क्षणवन्नुक्था" इति ऋ०५,२,३, "अनुक्थाः अस्तुतव" इति भा०।

अनुक्रम त्रि० अनुगतः क्रमम् अत्या०स०। अनुगतक्रमे क्रमानुसन्धिते, अनुक्रमश्च यथोत्तरं यस्य पाठः करणं वा उचितं तदनतिक्रमेण तस्यानुष्ठानरूपा परपाटी। "प्रचक्रमे वक्तुमनुक्रमज्ञा" इति रघुः। क्रमश्च स्थानं तत्स्वरूपादि क्रमशब्दे वक्ष्यते। क्रममनतिक्रम्य यथार्थे अव्ययी०। क्रमानतिक्रमे अव्य०।

अनुक्रमणिका स्त्री अनुक्रम्यते यथोत्तरं परिपाट्या आरभ्यतेऽनया अनु+क्रम–करणे ल्युट् स्त्रीत्वात् ङीप् स्वार्थे कनि ह्रस्वः। अनुक्रमज्ञापके, ग्रन्थाद्यंशभेदे उक्तस्य वक्तव्यस्य वार्थसङ्गस्य ग्रन्थभेदे, क्वचिदादौ वा संपाठके पुराणादेरंशविशेषे। स्वार्थे काभावेऽनुक्रमणीत्यपि, तत्रैव। तत्र आदौ यथा "भारतस्येतिहासस्य श्रूयतां पर्वसंग्रहःपर्व्वानुक्रमणी पूर्वं द्वितीयः पर्वसंग्रह" भार० आदि०। अन्ते यथा "अनुक्रमणिकाध्यायं तथा भारतात्मनस्तमभिति" काशीख०। एवमन्यत्र द्रष्टव्यम्।

अनुक्री पु० अनुक्रियते अनु–क्र–उखा० वा०ई किच्च। साद्यस्क्रतुभेदे, "षट् साद्यस्का इत्युपक्रम्य "हीनस्यानुक्रीः" इति कात्या०२२,२,१६, उक्तम् "अनुक्रीर्नाम साद्यस्क्रः क्रतुः स हीनस्य भवतीति" तद्व्याख्या।

अनुक्रोश पु० अनुक्रोशत्यनेन अनु+क्रुश–आह्वाने रोदने च घञ्। दयायाम्। परदुःख प्रहरणेच्छारूपदयया हि परक्रोशं दृष्ट्वा तदनु रोदनं क्रियते इति तस्यास्तथात्वम्। अनुगतः क्रोशं गतिस०। प्राप्तक्रोशाध्वके त्रि०।

अनुक्षण न० वीप्सायाम् अव्ययी०। प्रतिक्षणे अनवरते, अनुगतं क्षणम् अत्या०स०। अजस्रदत्तौ त्रि०।

अनुग त्रि०अनुगच्छति अनु+गम–ड। पश्चाद्गामिनि, "गोत्रिक्थानुगः पिण्डः व्यपैति ददतः स्वधेति" छिन्नं निवारयेत् सर्वं श्वसूकरसुखानुगमिति" "प्रमदाद्भुतपथं नेतुं कामक्रोधवशानुगमिति" च मनुः। सहचरे, आनुलोम्यं गते, सेवके च। "तदभूतनाथानुग! नार्हसि त्वमिति" रघुः।

अनुगङ्ग अव्य० गङ्गायाम् विभक्त्यर्थे अव्ययी०। गङ्गायामित्यर्थे। परिसखा० अत्र। आनुगङ्गम् अनुगङ्गभवे त्रि०।

अनुगत त्रि० अनु+गम–क्त। पश्चाद्गते, सहगते, आनुलोम्यं गते, सामान्यधर्म्मयत्नेन संश्लेषितेऽखिले विशेषे, अधीने च। "आगच्छद्यत्र काकुत्स्थः स्वर्गाय सशरस्थितः विमानवरकोटीभिर्देवैरनुगतस्तदेति" रामा०।

अनुगति स्त्री अनु+गम–क्तिन्। अनुगमने, पश्चाद्गतौ, "बलस्य चतुरङ्गस्य नायकानुगतिर्नय"इति "गतानुगतिकन्यायः"।

अनुगम पु० अनु+गम–घञ् डुगभावः। पश्चाद्गमने, "डुकृञ्धातोरर्थानुगमादिति" भा०भा०। सहायीभवने, सामा-

स्वधर्मेण सर्वेषां विशेषरूपाणां संग्रहे च। "सम्बन्धस्यानुगमो न दोषावेति" दाय० श्रीकृष्णः। आनुलोम्यकरणे, "अलौ त्वनुगमान्विते" इति स्मृतिः।

अनुगमन न० अनु+गम–भावे ल्युट्। पश्चाद्गमने। "श्वानुगमनाशौचं स्नानमात्रेण शुध्यतीति" स्मृतिः भर्तृशरीरानुगमनमहं करिष्यामीति शु०त० रघु०।

अनुगव न० गोःसदृश आयामः "यस्य चायाम" इति समासे नि०अच्। गवायामसदृशायामयुक्ते शकटादौ।

अनुगवीन त्रि० गोः पश्चात् पर्य्याप्तं वा गच्छति अनुगु–ख। गोः पश्चाद्गामिनि गोपाले। "अनुगवमंगामीति" (पा०) उक्तेः पर्य्याप्तगन्तरि च।

अनुगादिन् त्रि० अनुगदति अनु+गद–णिनि। अनुवादके स्त्रियां ङीप्। अनुगाद्येव स्वार्थे, "अनुगादिनष्ठक् च" पा० ठक् आनुगादिकः तदर्थे।

अनुगामिन् त्रि० अनुगच्छति अनु+गम–णिनि। पश्चाद्गन्तरि, सहचरे च। स्त्रियां ङीप्। "दृष्ट्वा स्त्रियमिवायान्तीं ब्राह्मणीमनुगामिनीमिति" रामा०।

अनुगुण त्रि० अनुकूलो गुणो यस्य। अनुकूले, अनुगते, अनुरूपे च। "अर्हतं सुखदुःखयोरनुगुणं सर्व्वास्ववस्थासु यदिति" उत्तरच०। अनुरूपः गुण उपकरणम्। योग्योपकरणे "रसानुगुणतामेतीति" सा०द०। सदृशगुणयुक्ते त्रि०। "कान्तारतापसाविच्छु वंशकानुगुणौ मताविति" सुश्रुतम्। अनुगतः गुणं तन्त्रोक्तं वा गुणानुरक्ते त्रि० तन्त्रोक्तवीणायां स्त्री "उत्कण्ठितस्य हृदयानुगुणा वयस्येति" अनुगुणा वीणेति तदर्थः। गुणे विभक्त्यर्थे, गुणमनतिक्रम्य वा अव्ययी०। गुणे इत्यर्थे, गुणानतिक्रमे च। तद्वोधकग्रन्थमधीते वसन्तादि० ठक्। आनुगुणिकस्तदध्येतरि, तद्वेत्तरि च त्रि०।

अनुगुप्त त्रि० अनु+गुप्–क्त। आच्छादिते। "अनुगुप्ता अप आच्छत्तेति" गोभिलः "अनुगुप्ता आच्छादिता" इति रघु०।

अनुगृहीत त्रि० अनुग्रह–क्त। कृतानुग्रहे।

अनुग्र त्रि० न उग्रः। शान्तस्वभावे असमर्थे, अनुद्धते च। "भगमनुग्रो अध याति रत्नमिति" ऋ०७,३८,६, "अनुग्रः असमर्थः" इति भा० "अनुग्रासश्च इत्वहन् ऋ० ८,१,१४, अनुग्रा अनुद्धृगूर्णा इति (भा०) उक्तेः अनुद्धृगूर्णे च।

अनुग्रह पु० अनु+ग्रह–अप्। अभीष्टसम्पादनेच्छारूपे प्रसादे, आनुकूल्ये, अनिष्टनिवारणपूर्व्वकेष्टसाधनेच्छारूपायामभ्युन्नतौ, "विरूपोच्चनिःस्वासानामनुत्थापपूर्व्वकं हि यत्। पूरणं दानमानाभ्यामनुग्रह उदाहृत" इत्युक्तलक्षणे दरिद्रादिपोषणे च। "नियहानुग्रहे शक्तः प्रभुरित्यभिधीयते" इति तन्त्रम्। "अनुग्रहं संस्मरणप्रवृत्तमिति" कुमा०। "पादार्पणानुग्रहपूतपृष्ठमिति" रघुः। यज्ञे यज्ञार्थं सूर्य्यादिग्रहे वा अनुगतस्तम् गतिं स०। यज्ञानुगते सूर्य्यादिग्रहानुगे च त्रि०।

अनुग्राह्य त्रि० अनु+ग्रह–ण्यत्। अनुग्रहार्हे "यदि तेऽहमनुग्राह्यो यदि वास्मि मे गुणानिति" "सर्वथानुग्राह्यो देवतानामसंशय" इति च रामा०।

अनुचर त्रि० अनुचरति अनु+चर–ट स्त्रियां ङीप् अच् वा स्त्रियां टाप्। सहचरे, पश्चाद्गामिनि, दासादौ, "व्रताय तेनानुचरेण धेनोरिति" "अन्येद्युरात्मानुचरस्य भावमिति च" रघुः। अनुगतश्चरं दूतं गतिस०। दूतानुगे त्रि०। सेवके च, "गन्धर्वा गुह्यकायक्षा विबुधानुचराश्च ये" इति मनुः "चत्वारि च शतान्यनुचरणामिति" कौ०ब्रा० "अप्सरसो महेन्द्रानुचरा दर्शेति "सौमित्रिसीतानुचरस्थेति" भट्टिः। "शालागलो सानुचर्य्यः यतेन यतेन" इति काल्या० २०,१,१२, एतद्व्याख्यायां वङ्गीयः अनुचरीशब्दप्रयोगस्तत्र द्रष्टव्यः शालागलो दासगुली।

अनुचारक त्रि० अनुचरति अनु+चर–ण्वुल्। अनुगन्तरि, सेवके च। तस्य धर्म्यम् अण्। आनुचारिकम् सेवकधर्म्ये कार्य्ये त्रि०।

अनुचित त्रि० न–उचितः। अपरिचिते, अयुक्ते च।

अनुचिन्तन न० अनु+चिन्ति–ल्युट्। अनुस्मरणे सततचिन्तायाम् "हादशे ह्रस्वभावे च वैपरीत्यानुचिन्तनमिति ज्योति०।

अनुचिन्ता स्त्री अनु+चिन्ति–अ। सततचिन्तायाम्।

अनुच्च त्रि० न उच्चः विरोधे ब०त०। उच्चताविरोधिनिम्नत्ववति। ज्योतिषोक्ते यज्ञानां नीचस्थाने च। तानि स्थानानि उच्चशब्दे वक्ष्यते।

अनुच्छिष्ट त्रि० उद्+शिष–क्त न०त०। उच्छिष्टभिन्ने आचार्य्यद्रव्यस्य भुक्तावशिष्टसुच्छिष्टं तद्भिन्ने।

अनुज त्रि० अनु पश्चात् जायते अनु+जन–ड। पश्चाज्जाते सहोदरे भ्रातरि। तादृश्यां भगिन्यां स्त्री। एकाधिकं हरेज्ज्येष्ठः सुतोऽध्यर्द्धं ततोऽनुज" इति मनुः। "चचार सानुजः शान्त" इति रघुः "परिवेत्तानुजेऽनूढे" इति मनुः।

अनुजन्मन् पु० अनु जन्म यस्य। सहोदरे कनिष्ठभ्रातरि। "अननाथ! तवानुजन्मनामिति" भारविः।

अनुजात त्रि० अनु+जन–क्त । पश्चाज्जातमात्रे, "दत्तजाते-नुजाते च कृतचूडे च संस्थिते" इति मनुः । अनुजाते दत्तजन्मानन्तरं संस्थित इति" कुल्लू० "भ्रातस्त्वानुजाताऽहं भुङ्क्ष्व भक्तमिदं शुभम्" इति स्मृतिः । "असौ कुमार-स्तमजोनुजात" इति रघुः । अनन्तरजातत्वात् उत्तस्य तथात्वम् ।

अनुजावर त्रि० अनुजादप्यवरः । अत्यन्तनिकृष्टे । "एता-मेवानुजावराय कुर्यादिति" ता० ब्रा० । अनु पश्चाज्जायते इत्यनुजः कनीयान् सहि निकृष्टः तस्मादप्यवरो निकृष्ट इति भा० वेदे न रूढिभावः लोके तु अनुजावरत्वं ।

अनुजीविन् त्रि० अनुजीवितुमाश्रयितुं शीलमस्य अनु+जीव-णिनि । सेवके, आश्रिते च । [जीवे सेव्ये ।

अनुजीव्य त्रि० अनुजीव्यतेऽसौ अनु+जीव–ण्यत् । आश्र-

अनुज्ञा स्त्री अनु+ज्ञा–अङ् । स्वयंप्रवृत्तस्यान्यस्य प्रवृत्त्य-विघातकरणेन प्रवर्त्तनारूपायामनुमतौ । "गुरोरनुज्ञामधि-गम्य मातः" ! इति रघुः । "तद्वा एतदनुज्ञाक्षरं यद्धि-किञ्चनानुजानात्योमित्येव तदाहेति" श्रुतिः ।

अनुज्ञात त्रि० अनु+ज्ञा–क्त । कृतानुज्ञे यज्ञे करणायानुज्ञा कृता तस्मिन् जने ।

अनुज्येष्ठ त्रि० अनुगतो ज्येष्ठम् प्रा०स० । ज्येष्ठानुगते । ज्येष्ठमनतिक्रम्य यथार्थे अव्ययी० । ज्येष्ठानुरूपे ज्येष्ठानति-क्रमे च अव्य० । [रार्थं देवे शुक्रादौ, आतरे ।

अनुतर न० अनुतीर्यतेऽनेन अनु–तॄ–करणे अप् । नदीपा-

अनुतर्ष न० अनुतृष्यतेऽनेनेदं वा करणे कर्म्मणि वा घञ् । सुरापानपात्रे, मद्ये च । भावे घञ् । मद्यपाने, अभिलाषे, पानेच्छायाञ्च । "सोपचारमुपशान्तविचारं स्वानुतर्षमनुन-र्घपदेनेति" माघः ।

अनुताप पु० अनु+तप–घञ् । दृष्टमनुचितं कृतमिति स्वकृत-वस्तुनो दुःखजनकतया ज्ञानेन पश्चात्तापे । "ख्यापनेना-नुतापेन" इति मनुः । "तस्याः करिष्यामि दृढानुताप-मिति" कुमा० ।

अनुतिल त्रि० अनुगतस्तिलम् अत्या० स० । तिलानुगते क्षेत्रादौ, तिले विभक्त्यर्थे अव्ययी० तत्र भवः परिखादि० अञ् । आनुतिल्यः तिलभवे त्रि० ।

अनुतूलन न० तूलेनानुकृष्यति हृष्यत्यस्य अनु+तूल+अनुकोषणे णिच्–भावे ल्युट् । तूलेन हृष्या-द्यादेरनुघट्टने ।

अनुत्क त्रि० न०त० । उत्कण्ठितभिन्ने स्वस्थे ।

अनुत्कर्ष पु० न उत्कर्षः अभावे न०त० । उत्कर्षाभावे ब० । उत्कर्षशून्ये त्रि० ।

अनुत्त त्रि० न+उन्द्–क्त नसत्तनिषक्तानुत्तेत्यादिना नि० । अक्लिन्ने "इन्द्र ! तुभ्यमिदद्रिवोऽनुत्तमिति" ऋ० १,८०,७, तुद–क्त न०त० । अनुद्रे अप्रेरिते । "अनुत्तमाते मघव-न्निति" ऋ० १,१६५,८, "अनुत्तमप्रेरितमिति" भा० ।

अनुत्तम न० न उत्तमोयस्मात् । अत्युत्कृष्टे । "काङ्क्षन् गति-मनुत्तमामिति," "इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमं सुख-मिति" "यशोऽस्मिन् लोके प्राप्नोति प्रेत्य चानुत्तमं सुखमिति" च मनुः ।

अनुत्तर त्रि० उत्तरउत्तमः न० ५ब० । अत्यन्तश्रेष्ठे । ६ब० । उत्तरयाक्षरहिते "भवत्यवश्या च भवत्यनुत्तरादिति" नैष० । न०त० । उत्तरदिग्भिन्नायां तद्विरोधिन्यां दक्षिणस्यां दिशि, स्त्री । उत्तमभिन्ने अपकृष्टे त्रि० । न उत्तरति चलति उद्+तॄ–अच् न०त० । स्थिरे त्रि० ।

अनुत्तान त्रि० न उत्तानः विरोधे न०त० । उत्तानभिन्ने अवताने अवाङ्मुखे ।

अनुत्तरङ्ग त्रि० उद्गतस्तरङ्गो वीचिर्यस्याङ्गस्य वा यस्मात् प्रा० ब० न०त० । अनुद्गततरङ्गे अचञ्चले च "अपामिवाधार-मनुत्तरङ्गमिति" कुमा० शिवपक्षे अचञ्चलमित्यर्थः ।

अनुत्पत्ति स्त्री न उत्पत्तिः अभावे न०त० । उत्पत्त्यभावे "इयं केचिदुपाख्यस्य दुरितस्य प्रचक्षते । अनुत्पत्तिं तथा चान्ये प्रत्यवायस्य मन्वते" स्मृतिः ।

अनुत्पत्तिक त्रि० नास्ति उत्पत्तिर्यस्य कप् । उत्पादशून्ये ।

अनुत्पन्न त्रि० न उत्पन्न न०त० । उत्पन्नभिन्ने अजन्ये ।

अनुत्पाद पु० न उत्पाद उत्पत्तिः अभावार्थे न०त० । उत्पत्त्यभावे । ब० । उत्पत्तिशून्ये त्रि० ।

अनुत्साद पु० न उत्सादः अवसादनम् भावे न०त० । अव सादाभावे उच्छेदाभावे । न०ब० । उच्छेदशून्ये त्रि० ।

अनुत्साह पु० न उत्साहः अभावे न०त० । उत्साहाभावे ब० । उत्साहशून्ये त्रि० ।

अनुत्सिक्त त्रि० न उत्सिक्तः गर्व्वितः । अगर्व्विते गर्व्वशून्ये ।

अनुत्सुक त्रि० न०त० । उत्सुक–भिन्ने उत्कण्ठाशून्ये ।

अनुत्सूत्र त्रि० उत्क्रान्तः सूत्रम् अत्या० स० न०त० । सूत्रानुगते "अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धनेति" माघः । सूत्रं पाणिनीयसूत्रं नीतिशास्त्रञ्चेति विवेकः ।

अनुद त्रि० न नुदति नुद–क न०त० । प्रेरकभिन्ने अनु-ददाति हव्यं ददाति अनु+दा क । हव्यरूपदातरि,

एतस्य उदाहरणम् प्रागुक्ते अनानुदगब्दे द्रष्टव्यम् ।

अनुदक त्रि० नास्ति उदकं यत्र । "उदकशून्ये मरुदेशादौ अल्पार्थे न०त० । अल्पजले पल्वलादौ "उद्वन्तीरनुदकाश्च या" इति ऋ०७,५१,४, उदकदानविशेषशून्ये श्राद्धभेदे "पुरोडाशमात्रा अनुदका" इति काल्या० १०, ५,११, । "अनुदकाः प्रत्यवनेजनपरिषेचनादि वर्जिता" इति तद्व्याख्या ।

अनुदग्र न उद्गतमग्रमस्य । स्तब्धे अतीक्ष्णे उन्नताग्रभिन्ने च नास्ति उद्ग्रोयस्मात् ५ब० । अल्पुन्नते त्रि० ।

अनुदर त्रि० न उदरं यस्यास्यार्थे न०ब० । अल्पोदरयुक्तिनि कृशोदरे, "अनुदरा कन्येति सि०कौ० स्त्रियां टाप् ।

अनुदर्शन अनु+दृश–ल्युट् । अनुचिन्तने, "जन्ममृत्युजराव्याधि दुःखदोषानुदर्शन"मिति गीता ।

अनुदात्त न० न उदात्तः विरोधे न०त० । उदात्तस्वरभिन्ने नीचैरुच्चारिते स्वरभेदे । स्वराहि त्रिविधाः उदात्तः अनुदात्तः स्वरित इति भेदात् तत्र "उच्चैरुदात्तः" "नीचैरनुदात्तः" "समाहारः स्वरित" इति च पा० । तास्वादिषु, समागेषु स्थानेषूर्द्धभागे निष्पन्नोऽनुदात्तः, तत्रैव नीचभागे निष्पन्नोऽच् अनुदात्तः । "तस्यादित उदात्तमर्द्धहस्वमिति" पा० । यस्यादितोऽर्द्धमुदात्तमन्त्यमनुदात्तं तादृशः स्वरः स्वरितः इति" "अनुदात्तं पदमेकवर्ज्जमिति"अस्यैव निघात नीचादि संज्ञा उदात्तानुदात्तत्वादिकं स्वरवर्णस्यैव न तु व्यञ्जनानां, यथोक्तम् शिक्षायाम् "उदात्तश्चानुदात्तश्च स्वरितश्च स्वराख्यः ह्रस्वोदीर्घः प्लुतश्चेति कालतोनियमस्त्वयोति" । "प्रयत्नप्रेरितोवायुर्यदोर्द्धभागे प्रतिहतोऽचं निष्पादयति स उदात्तः । एवमधोनिष्पन्नोऽनुदात्त इति" यज्ञेन्दु० । "उदात्तानुदात्तस्वरितानां सन्निकर्ष ऐक्यमुत्वम्" इति आन्ध्र० सङ्ग्रहम् ।

अनुदार न० न उदारः । अतिदाहभिन्ने, अमहति च । नास्ति उदारो यस्मात् ५ब० । अतिमात्रदातरि, अतिमहति च । अनुगतो दारान् अत्या०स० । दारानुगते । "यस्मिन् प्रसीदसि पुनः स भवत्युदारोऽनुदारश्चेति का० प्र० । उदारत्वानुदारत्वयोरापाततो विरोधः । उदारत्वानुगतदारत्वाभ्यां तत्परिहारः ।

अनुदित पु० उद्+इण्+क्त रैषदर्थे न० ७ब० । किरणमालेन रैषदुदितसूर्ये प्रविरलतारके काले । "उदितेऽनुदिते चैवेति मनुः न०त० । उदितभिन्ने त्रि० । वद–क्त न०त० । अकथिते त्रि० ।

अनुदिन अव्य० वीप्सार्थे अव्ययी० । प्रतिदिने "धारावतः खलु शिलाकणमात्रभोगी कामी भवेदनुदिनं यद कोऽत्र हेतु"रित्युद्भटः । अनुदिवसादर्थेयत्र ।

अनुदृष्टि स्त्री अनुगता अनुकूला वा दृष्टिः प्रा०स० । अनुगतदृष्टौ, अनुकूलदृष्टौ च । ब० । तथादृष्टिमति त्रि० । तथाभूतस्त्रियाः अपत्यं कल्याण्या०ढक् ह्रनङ्च । आनुदृष्टिनेयः तदपत्ये पुंस्त्री० । अनुदृष्टेः पुंसोऽपत्यम् शुभ्रा० ढक् । आनुदृष्टेयः तदपत्ये पुंस्त्री० ।

अनुदेश पु० अनु+दिश–घञ् । यथाक्रमोच्चारणे, उपदेशे च "यथासंख्यमनुदेशः समानामिति" पा० । अनुदिश्यते कर्मणि घञ् । उपदेश्ये "अनुदेशाद्याः पुरोडाशेत्यादि" काल्या० १८,६,१५ ।

अनुद्देग पु० न उद्वेगः अभावार्थे न०त० । उद्वेगाभावे ।

अनुद्धत त्रि० न उद्धतः विरोधे न०त० । विनयवुक्ते ।

अनुद्धरण न० न उद्धरणम् अभावार्थे न०त० । उद्धाराभावे

अनुद्धार पु० न उद्धारः अभावार्थे न०त० । उद्धाराभावे । न उद्धारः विभाज्यविशेषस्योत्थापनं यत्र । विशेषोद्धारशून्ये विभागे त्रि० । "अनुद्धारोविभागः स्यादिति स्मृतिः ।

अनुद्धृत त्रि० न उद्धृतस्तुत्थापितम् । अनुत्थापिते "पयोऽनुद्धृतसारश्चेति" हविष्यविषये स्मृतिः ।

अनुद्भट त्रि० न उद्भटः विरोधे न०त० । अप्रल्भे स्तब्धे ।

अनुद्यम पु० न उद्यमः अभावे न०त० । उद्यमाभावे । न० ब० । उद्यमशून्ये त्रि० ।

अनुद्यूत न० अनु+दिव–क्त । द्यूतस्य पश्चात् पुनर्द्यूते । तदधिकृत्य कृतग्रन्थतयोक्तमनुद्यूतपर्व सभापर्वणि द्रष्टव्यम् ।

अनुद्योग पु० न उद्योगः अभावे, न०त० । उद्योगाभावे ब० । उद्यमशून्ये त्रि० ।

अनुद्रुत त्रि० अनु+द्रु–क्त । अनुगते "धनुर्द्धरै राजभुतैरनुद्रुतमिति रघुः "अनुद्रुतः संयति येन केवलं बलस्य शत्रोः प्रथमं शीघ्रतामिति" माघः । "अर्द्धमात्रं द्रुतं ज्ञेयं द्रुतार्द्धाध्यनुद्रुतमित्युक्ते" मात्राचतुर्थभागकाले तालभेदे न० । [न०त० । तच्छून्ये त्रि० ।

अनुद्वाह पु० न उद्वाहः अभावार्थे न०त० । विवाहाभावे

अनुद्विग्न त्रि० न उद्विग्नः विरोधे न०त० । उद्विग्नभिन्ने अव्याकुलचित्ते ।

अनुद्वेग पु० न उद्वेगः अभावार्थे न०त० । उद्वेगाभावे न०ब० । तच्छून्ये त्रि० "अनुद्वेगकरं वाक्यं सतां स्वाभाविकं मतमिति" नीति० ।

अनुधावन न० अनु+धाव–ल्युट्। पश्चाद्गमने, तत्त्वनिश्चयायानुसरणे, अनुसन्धाने च। [आसक्तौ च।

अनुध्या स्त्री अनु+ध्यै–अङ्। शुभानुचिन्तने, अनुपदे,

अनुध्यान न० अनु+ध्यै–ल्युट्। अनुक्षणचिन्तने "या नः प्रीतिर्विरूपाक्ष! त्वदनुध्यानसम्भवेति" कुमा०।

अनुध्याय पु० अनु+ध्यै–कर्त्तरि घञ्। अनुचिन्तके शुभानुचिन्तके। "बालस्याग्रक्षस्य वा तदनुध्यायमनसेति" प्रा०त० स्मृतिः।

अनुध्येय त्रि० अनु+ध्यै–कर्म्मणि यत्। अनुध्यातुं योग्ये शुभानुचिन्तनं क्रियते तस्मिन्। "अनुदध्युरनुध्येयं साध्वि-ध्यैः प्रतिसागतैरिति" रघुः।

अनुनय पु० अनु+नी+अच्। विनये, प्रणिपाते, प्रार्थने, सान्त्वने च। "कथं नु? यक्षोऽनुनयोमर्षैर्विश्राणना-दन्यथवस्थिनीनामिति" रघुः। [अनुरूपशब्दे।

अनुनाद पु० अनुरूपोनादः प्रा०स०। प्रतिध्वनौ प्रतिशब्दे

अनुनादिन् त्रि० अनु+नदति अनु+नद–णिनि। प्रतिरूप शब्दकारके "गम्भीरेणानुनादिनेति" रामा०।

अनुनायिका स्त्री अनुगता नायिकाम्। नायिकानुगतायाम् "सखी प्रव्रजिता दासी प्रेष्या धात्रेयिका तथा। अन्याश्च शिल्पकारिण्यो विज्ञेया ह्यनुनायिका" इत्युक्तदास्यादौ।

अनुनाश पु० अनु+नश–घञ्। अनुसरणे। अदूरदेशादावर्थे सङ्घादित्वात् यस्य आनुनाश्यः तददूरदेशादौ त्रि०।

अनुनासिक त्रि० अनुगतो नासिकाम् अत्या०स०। नासिकया सह स्वस्वस्थानेनोच्चार्य्यमाणेषु वर्णभेदेषु। ते च "अमोऽनुनासिका न ह्रौ" इति शिक्षायां दर्शिताः हकार-रकारभिन्नाः अम्प्रत्यहरान्तर्गताः वर्णाः। "सखनासिका-वचनोऽनुनासिक" इति पाणिन्युक्तेषां तत्तत्स्थान-सहितनासिकयोच्चार्य्यमाणत्वात्तत्त्वम् "उपदेशेऽजनुनासिक" इति पा०। अम्प्रत्याहारमध्ये रभिन्ना यवलाः निर-नुनासिकाः सानुनासिकाश्च तत्तानुनासिकस्थाने उत्पन्नय-वलाभ्येव सानुनासिकत्वम् "यवलोद्विधाऽरो निरनुनासिकः सानुनासिकः। अमोऽनुनासिकस्तेन तत्स्थाने सानुनासिक" इत्यभियुक्तोक्तेः यथा यथँयते विद्वाल्लिखति, सर्व्वत्सरः अन्ये निरनुनासिकाः। वेत्यनुवृत्तौ "अणोऽप्रगृह्यस्यानु-नासिक" इति पाणिन्युक्तेरप्रगृह्या एवाणोऽनुनासिकाः।

अनुनीत त्रि० अनु+नी–क्त। कृतानुनये यस्य सान्त्वनार्थं विनयादिकं क्रियते तस्मिन्। "स चानुनीतोऽपि भृशं चुकोपेति" भारतम्।

अनुनेय त्रि० अनु+नी–कर्म्मणि यत्। अनुनयकरणार्हे, अनु-नेतुं योग्ये च।

अनुपकार पु० न उपकारः अभावार्थे न०त०। उपकारा-भावे विरोधे न०त०। अपकारे। [स्त्रियां ङीप्।

अनुपकारिन् त्रि० न उपकारी विरोधे न०त०। अपकारिणि

अनुपचित त्रि० उप+चि–क्त वेदे निष्ठातस्य न नत्वम् न०त०। अनुपक्षीणे। "सुवीर्य्यं वर्षिष्ठमनुपचितम्" ऋ० ३,१३,७ अनुपचितम् "अनुपक्षीणमिति" भा०। लोके तु अनुपक्षीणः त्रि०।

अनुपठित न० अनु+पठ–भावे क्त। गुरुमुखपाठानुसारिपाठे अनुपठितमनेन इष्टादि० इनि। अनुपठितो कृता-नुपाठे त्रि० स्त्रियां ङीप्। [पतने च।

अनुपतन न० अनु+पत–ल्युट्। अनुकूलपतने, अनुरूप-

अनुपति अव्य० पत्युः सामीप्यम् अव्ययी०। पतिसमीपे। "अनुपति पत्नीरुत्तर उत्तर" इति काल्या० १२,२,१६, दीक्षाकर्त्ता पतिसमीपे तत्पत्नीः दीक्षयतीति तद्व्याख्या।

अनुपथ पु० अनुकूलः पन्थाः अच् समा०। अनुकूलमार्गे "अन्तस्था अनुपथा" इति ऋ० ५,५२,१०, अनुपथाः अनुकूलमार्गाः" इति भा०। पथःसमीपे पथि वा अव्ययी०। पथिसमीपे पथीत्यर्थे वा अव्य०। परिसुखा० अ। आनुपथ्यम् पथिभवादौ त्रि०।

अनुपद न० अनुरूपं पदम् प्रा०समा०। अनुकूलपदे अनुरूप-स्थाने "आशिषामनुपदमिति" "अर्घानुपदमाशिष" इति च रघुः। पदस्य पश्चात् अव्ययी०। पदस्य पश्चादित्यर्थे पश्चा-द्गमने च। भवादौ परिसुखा० अ आनुपद्यः तत्र भवादौ त्रि०। सुप्तिङन्तं पदं तत्सदृशं यन्थमधीते वेत्ति वा उक्था० ठक्। आनुपदिकः तदध्येतरि तद्वेत्तरि च त्रि०।

अनुपद् न० अनुपद्यते प्रतिदिनं लभ्यते अनु+पद–क्विप्। प्रतिदिनलभ्येऽन्ने। "अनुपदस्थानुपदे त्वा" य० १५,८, "प्रतिदिनमनुपद्यतेऽनुपदन्नमिति" वेददीपः।

अनुपदिक त्रि० अनुपदमस्यस्य गन्तृत्वेन ठन्। पश्चाद्गते

अनुपदिन् अनुपदमन्वेष्टा अनुपद+इनि। अनुपदम् अन्वेष्टरि (अन्वेषणकर्त्तरि) "अनुपद्यन्वेष्टेति" पा० "ऋगस्यानुपदी रामो जगाम गजविक्रम" इति भट्टिः।

अनुपदिष्ट त्रि० उप+दिश–क्त न०त०। उपदेशाकर्म्मणि।

अनुपदीना स्त्री अनु, पदस्य आयामतुल्यायामः आयामे-ऽव्ययी० अनुपदं वर्त्तेत्यर्थे ख। पादतुल्यायामवत्यां पाद-वद्भावां पादुकायाम् (मोजा) इत्यादि ख्यातायाम्।

अनुपधि त्रि० नास्ति उपधिर्यस्मिन् यत्र । निष्कपटे सरलव्यवहारे । [ज्ञानलक्षणाधीनज्ञानाविषयीभूते त्रि० ।

अनुपनीत पु० न उपनीतः न०त० । अकृतोपनयनसंस्कारे

अनुपन्यास त्रि० न उपन्यासः अभावे न०त० । उपन्यासाभावे कथनाभावे । न०ब० । कथनशून्येवागारभृशून्ये त्रि० ।

अनुपपत्ति स्त्री० उप+पद-क्तिन् उपपत्तिर्युक्तिः न०त० । युक्त्यभावे, असङ्गतौ च । "तात्पर्य्यानुपपत्तित" इति भाषा० । उपपत्तिश्च न्यायादिमते व्यतिरेकव्याप्तिज्ञानाधीनानुमितिः" आपादकज्ञानाधीना आपाद्यनिश्चयरूपा ऽनुभूतिर्वा । यथा पीनोदेवदत्तो दिवा न भुङ्क्ते इत्युक्ते दिवाऽभोजिनः पीनत्वं रात्रिभोजनं विनानुपपन्नमिति" अभोक्तुः पीनत्वासम्भवेन रात्रिभोजनं निश्चीयते तथा हि पीनत्वस्य भोजनव्याप्यतया पीनत्वाभावस्य च रात्रिभोजित्वाभावव्याप्यतानिश्चयेन पीनत्वेन रात्रिभोजनमनुमीयते सा चानुमितिः अर्थापत्तित्वेन व्यवह्रियते इति नैयायिकाः । मीमांसकवेदान्तिभिस्तु कल्पयामि अर्थापद्यामीति विलक्षणानुभवात् अनुमितिभिन्नैव सेति स्वीक्रियते । अधिकमर्थापपत्तिशब्दे वक्ष्यते ।

अनुपपन्न त्रि० उप+पद-क्त न०त० । उपपत्तिशून्ये ।

अनुपबाध त्रि० नास्ति उपबाधा प्रतिबन्धोऽस्य । प्रतिबन्धशून्ये ।

अनुपम त्रि० नास्ति उपमा यस्य । अतुल्ये अन्यसादृश्यरहिते अत्युत्कृष्टे । "बलं प्रमाणं शक्तिश्च परैरनुपमं समेति रा० । कुसुददिग्गजयोषिति स्त्रीत्यमरः । सुप्रतीकदिग्गजस्त्रियां स्त्रीति मेदिनिः ।

अनुपमेय त्रि० केनापि न उपमीयतेऽसौ उप+मि-कर्म्मणि यत् न०त० । अन्यैरतुल्ये, अन्यसादृश्यरहिते ।

अनुपयुक्त न उपयुक्तम् उचितं भुक्तं वा न०त० । असुचितभिन्ने अननुरूपे भुक्तभिन्ने च ।

अनुपयोग पु० न उपयोगः आनुकूल्यं भोजनं वा न०त० । आनुकूल्याभावे, भोजनाभावे च । न०ब० । आनुकूल्यशून्ये, भोजनशून्ये च त्रि० । [रागनिवृत्तिशून्ये ।

अनुपरत त्रि० उपरतः निवृत्तः न०त० । अनिवृत्ते विषय-

अनुपरति स्त्री० न उपरतिः विषयरागः अभावे न०त० । विषयरागाभावे । [षेवाग्राहते अतर्किते ।

अनुपलक्षित त्रि० न उपलक्षितः विशेषेण ज्ञातः । विशे-

अनुपलब्धि स्त्री० न उपलब्धिः अभावे न०त० । ज्ञानाभावे प्रत्यक्षाद्यभावे च । तत्र अनुपलब्धिश्च न केवलं इन्द्रियादिसन्निकर्षाभावमात्रेण, किन्तु तत्सन्निकर्षेऽपि कारणान्तरादपि भवति यथोक्तं सांख्यसूत्रे । "सौक्ष्म्यात्तदनुपलब्धिरिति" । तदेव कारिकायां विवृतम् "अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् । सौक्ष्म्यात् व्यवधानादभिभवात् समानाभिहारादिति "नास्ति घटोऽनुपलब्धेरिति" । योग्यपदार्थस्यानुपलब्धिश्च अभावज्ञानसामग्री । तद्विवरणं योग्यानुपलब्धिशब्दे द्रष्टव्यम् ।

अनुपवीत पु० न उपवीतं यज्ञसूत्रं विधिना जातमस्य । अनुपनीते मानवके । उपवीतरूपयज्ञसूत्रशून्ये च ।

अनुपशम पु० न उपशमः शान्तिः निवृत्तिर्वा अभावे त०त० । शान्त्यभावे, निवृत्त्यभावे च ।

अनुपसंहारिन् पु० न्यायमते परिभाषिते दुष्टहेतुविशेषे । स च अन्वये व्यतिरेके च दृष्टान्तरहितत्वेन दुष्टो हेतुः । यथा सर्वमनित्यं प्रमेयत्वादित्यनुमाने सर्वस्यापि पक्षत्वेन अन्वये दृष्टान्तो नास्ति नापि व्यतिरेके दृष्टान्तः, सर्वस्यापि प्रमेयतया तदभावस्य कुत्राप्यसिद्धेः । "तथैवानुपसंहारी केवलान्वयिपक्षक" इति । "आद्यः साधारणस्तु स्यादन्योऽसाधारणो मतः । तथैवानुपसंहारी त्रिधा नैकान्तिको मत" इति च भाषा० सूत्रकारस्यान्तु सर्वमभिधेयं प्रमेयत्वादित्यादिकं तदुदाहरणत्वेनोपन्यस्तं "केवलान्वयिपक्षक इत्यस्य च केवलान्वयिसाध्यक इत्येतत् परतया व्याख्यातञ्च । यथा "केवलान्वयिधर्म्मावच्छिन्नपक्षक इत्यर्थः । सर्वमभिधेयं प्रमेयत्वादित्यादौ सर्वं खल्वेव पक्षत्वात् सामान्याधिकरण्यग्रहस्यखलान्तराभावाद्धानुमितिः इदन्तु न सम्यक् । पक्षैकदेशे घटसहचाराग्रहेऽपि क्षतेरभावात् अस्तु वा सहचाराग्रहत्वावतापि पक्षे अज्ञानरूपासिद्धिरेव न दुष्टहेत्वाभासत्वं तस्य, तथापि केवलान्वयिसाध्यकत्वं तत्त्वमित्युक्तम् । उपसंहाराकारके त्रि० ।

अनुपसेचन त्रि० नास्ति उपसेचनं व्यञ्जनं यत्र । दध्यादिव्यञ्जनशून्ये अन्ने "स यत्तदन्नस्य महिमानं विद्यादि" त्युपक्रम्य "नान्न इति ब्रूयान्नानुपसेचन" इति उक्तम्, अथ० १९, ३, ४ ।

अनुपस्कृत त्रि० उप+कृ-प्रतियत्ने क्त सुट् न०त० । अकृतपाकादिसंस्कारे अविकृते च "सन्त्यन्यानि पयः सोमो मांसं यज्ञानुपस्कृतमिति" मनुः अनुपस्कृतं पाकोपस्कारररहितमिति रघु० । "अविकृतमिति" वृद्धः । अपरिष्कृते "अजमश्वमथैव राजतञ्चानुपस्कृतमिति" मनुः । दृष्टप्रयोजनानपेक्षे, "ब्राह्मणार्थे गवार्थे वा देहत्यागोऽनुपस्कृत"

इति मनुः "इष्टप्रयोजनानमेच्छ" इति कुल्लू०। अनिन्दिते च "एषोऽनुपस्कृतः प्रोक्त" इति मनुः अनुपस्कृतः अविहित इति कुल्लू०। [भावे न०व०। तच्छून्ये त्रि०।

अनुपस्थान न० न उपस्थानम् अभावे न०त०। उपस्थाना-

अनुपस्थाप्य त्रि० न उपस्थाप्यः। अक्षरणीये। प्रथमान्तपदानुपस्थाप्यत्वादिति जग०।[भावे, क्त्यभावे च।

अनुपस्थिति स्त्री न उपस्थितिः अभावे न०त०। उपस्थित्य-

अनुपहत न० न उपहतः भोगच्छेदादिना। सदये नवे अभुक्ते वस्त्रे "अनुपहतमतिधवलमिति" काद०। उपघात शून्ये त्रि०। [रचनादिसंस्कार उपाकरणं तद्रहिते।

अनुपाकृत त्रि० उप–आ–कृ–क्त न०त०। मन्त्रैर्यज्ञे पशो-

अनुपात पु० अनुरूपः त्रैराशिकेन पातः। पाटीगणितोक्तेन त्रैराशिकेन युक्तसंख्यायाते। "पुरान्तरं चेदिदमुत्तरं स्यात् तदाविशेषेण तदैक्यदा किम् ?। चक्रांशकैरित्यनुपातयुक्त्या युक्तं निरक्षं परिधेः प्रमाणम्" सि०शि०॥"निरक्षदेशः स्वदेशाद्यथा यथा दक्षिणतो भवति तथा तथा स्वस्वस्तिकाद्विषुवद्वृत्तं नतम् तयोरन्तरेऽक्षांशाः। ते च निरक्षदेशजाक्षसारयोजनैरनुपातेनोत्पद्यन्ते। अतः कस्मिंश्चित् पुरेऽक्षांशान् ज्ञात्वा तस्मात् पुराद्दक्षिणतोऽन्यस्मिन् पुरे ज्ञेयाः। ततस्तेषामन्तरांशैः पुरान्तरयोजनैश्चानुपातः। यद्यन्तरांशैः पुरान्तरयोजनानि लभ्यन्ते तदा चक्रांशैः ३६० किमिति फलं भूपरिधियोजनानि" इति प्रमि०। तदानयनञ्च "प्रमाणमिच्छा च समानजाती आद्यन्तयोः स्तः, फलमन्यजाति मध्ये, तदिच्छाहतमाद्यहृत् स्या"दित्युक्त त्रैराशिकरीत्या अन्तरयोजनसंख्याहृत्न राशिचक्रसंख्या-३६० घ्ने गुणिते पुरान्तरयोजनाहृत्न विभक्ते लब्धं परिधिमानसंख्या। पद्यात्पतने च। अनुगतः पातं राजरूपपक्षभेदम्। पातपक्षानुगते। अनु+पत–घञ् समु०। पश्चादुपपतिवित्येत्यर्थे अव्य०। किन्तु कर्म्मोपपदेन सह "अमैवाव्ययेनेति" पा० नित्यसमासः "लतानुपातं कुसुमान्यग्रहादिति" भट्टिः।

अनुपातक न० अनुपातयति नरकं गमयति पत–णिच्–ण्वुल् पातकं ब्रह्महत्यादि तत्सदृशम् मा०स०। ब्रह्महत्यादिमहापातकसदृशे वेदनिन्दादिजन्ये पापविशेषे तानि च पञ्चत्रिंशत्प्रकारहेतुत्ववेन तावत्संख्यातानि अनुरत्न सादृश्ये तेन पतनहेतुमहापातकतुल्यत्वादस्य अनुपातकत्वमिति प्रा० वि०। तानि च विष्णुना दर्शितानि यथा "यागस्थस्य क्षत्रियस्य वैश्यस्य च, रजस्वलायाश्चार्त्तव्यत्याशात्रिगोत्रायाश्चाविज्ञातस्य गर्भस्य शरणागतस्य च घातनं ब्रह्महत्यासमानीति, कौटसाक्ष्यं सुहृद्वध एतौ सुरापानसमौ। ब्राह्मणस्य भूम्यपहरणं निक्षेपापहरणं सुवर्णस्तेयसमम्। पितृव्यमातामहमातुलश्वशुरदीक्षापत्न्यभिगमनं गुरुदारगमनसमम्। पितृष्वसृमातृष्वसृसखिगमनञ्च श्रोत्रियवर्त्तिगुणाध्यायसाध्वीपत्न्यभिगमनञ्च स्वसुः सख्याः सगोत्रायाः उत्तमवर्णायाः कुमार्याः अन्त्यजायाः रजस्वलायाः शरणागतायाः प्रव्रजितायाः निष्क्रियायाश्च॥ अनुपातकिनस्त्वेते महापातकिनो यथा अश्वमेधेन शुद्ध्यन्ति तीर्थानुसरणेन वा इति"॥ नरकाख्यभिधाय "एतेष्वकृतप्रायश्चित्ता अतिपातकिनः पर्य्यायेण कल्पं पच्यन्ते, मन्वन्तरं तु महापातकिनः, अनुपातकिनश्च, उपपातकिनश्चतुर्युगमिति विष्णुः स०। तथा च महापातक सदृशान्येतानि पातकानि। अन्यान्यपि मनुना संक्षिप्य दर्शितानि यथा "अन्तश्च सप्तरात्रं राजगामि च पैशुनम्। गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया॥ ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः। गर्हितानाद्ययोर्जग्धिः सुरापानसमानि षट्॥ निक्षेपस्यापहरणं नराश्वरजतस्य च। भूमिवज्रमणीनाञ्च रुक्मस्तेयसमं स्मृतम्॥ रेतःसेकः स्वयोनीषु कुमारीष्वन्त्यजासु च। सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुरिति"॥

अनुपातकिन् त्रि० अनुपातकमस्यास्ति इनि स्त्रियां ङीप्। अनुपातकयुक्ते "अनुपातकिनस्त्वेते महापातकिनस्त्रया" स्मृ०।

अनुपातिन् त्रि० अनुपतति अनुगच्छति अनु+गम–णिनि अनुगामिनि।

अनुपान न० अनु भेषजेन सह पश्चाद्दा पीयते कर्म्मणि ल्युट्। औषधेन सह, तत्पश्चाद्दा भेदे मधुगुड़ादौ। पानस्य जलस्य समीपे अव्ययी०। जलसामीप्ये अव्य०।

अनुपाद्दत्त त्रि० न उपाद्दत्तः। अपराद्धे।

अनुपुष्प पु० अनुगतं पुष्पं तद्विकाशम् अत्या०स०। शरद्धे तस्य पुष्पेणैव प्रकाशात्तथात्वम्।

अनुपूर्व्व त्रि० अनुगतं पूर्व्वं परिपाटीं गतिस०। यथाक्रमप्राप्ते यथाद्यान्यनुपूर्व्वं भवति स्मृ०१०,१८,५"यथावदनुपूर्व्वञ्च" इति वर्णानामनुपूर्व्वञ्च" इति च मनुः। अनुपूर्व्व+ष्यञ्। आनुपूर्व्वयः। "दृष्टानुपूर्व्वी च न दोषदृष्टे" इति कुमा० "ततोऽनुपूर्व्वीयतदृत्तबाहुरिति" भारविः पूर्व्वमनुगतौ गोपुच्छाकारावितौ मल्लि०, अनुगतः पूर्व्वम्। पश्चादुगामिनि त्रि०। आग्नेयः प्रथमो गच्छत्यन्यारब्धो-

नुपूर्व्या इतरे, कात्या० ८,८,२६ "इतरे दश पशवः अनन्वारब्धा एव अनुपूर्व्याः अनुगामिनो भवेयुरिति" व्या० निरुक्तप्रमाणे च "अनुपूर्व्याइतरे" कात्या० ८,८,२०, "अनुपूर्व्याः निरुक्ता इत्यनुगच्छन्ति अत्र च प्रमाणेन निरुक्तत्वम्। अतश्च दक्षिणस्य वर्षिष्ठत्वसत्त्वं तत उत्तरस्य तदपेक्षया हीनप्रमाणत्वं तदपेक्षया तत उत्तरस्य, तदपेक्षया तदुत्तरस्येत्येवमेकादशो यूपः सर्वतो निकृष्टो यथा भवति तथा कर्त्तव्यमिति" व्याख्या। अनुपूर्व्य+भावादौ ष्यञ्। आनुपूर्व्ये तद्भावे त्वित्वात् चातुरीवत् वा स्त्री "साजात्यञ्च समानानुपूर्व्यीकत्वेनेति" जग०। वेदे पृ० पूर्व्वपदह्रस्वः। अनुपूर्व्वी आनुपूर्व्वी स्त्री। "वर्षिष्ठरशनः पुरुषोऽनुपूर्व्या इतरेषामिति" कात्या० १६,१,६, "अनुपूर्व्या द्विव्यामया रशनया" इति व्याख्या।

अनुपृष्ठा त्रि० अनुपृष्ठं बध्यते अनुपृष्ठ+यत्। पृष्ठमध्ये बध्यमानादौ "अनुपृष्ठामावस्य पायवेरिति" कात्या० १६,८,५।

अनुपेत त्रि० न उपेतः। उपगतभिन्ने। उपगमनञ्च उपनयनार्थं गुरुसमीपगमनम्, तच्छून्ये च। न स्त्री जुडभावान्नानुपेत" इति स्मृतिः "अनुपेतः अनुपनीतः" इति रघु०। "यं प्रव्रजन्तमनुपेतमपेतसंस्कारमिति" भाग० अत्रापि शूद्रस्य विद्यत्वेन संस्कारसामान्याभावेन अनुपनीततयैव प्रव्रज्योक्तिः।

अनुप्रदान न० अनुप्रदीयते वर्णविशेषरूपता आधीयते अनेन अन+प्र+दा-करणे ल्युट्। वर्णोत्पादनवाह्यप्रयत्नभेदे "एते श्वासानुप्रदाना अघोषाश्च विवृण्वते" इति सि० कौ०। श्वासः अनुप्रदानं बाह्यप्रयत्नो येषामिति तत्त्वबो०। "अनुप्रदानात् संसर्गात् स्थानात् करणविन्यासात्। जायते वर्णवैशेष्यं परिभाषाश्च पञ्चमादिति" शिक्षा।

अनुप्रवचन न० अनुरूपं गुरुसमोच्चारितानुरूपं प्रवचनम्। गुरूच्चारितानुवचने। तत्प्रयोजनमस्य छ। अनुप्रवचनीयः तथाभूत ध्यानप्रयोजनयुक्ते त्रि०।

अनुप्रवचनादि पु० ऐत०। पाणिन्युक्ते "तदस्य प्रयोजनमित्यर्थे विहितप्रत्ययनिमित्ते प्रकृतिभूते शब्दसमूहे। अनुप्रवचन, उत्थापन, उपस्थापन, संवेशन, अनुप्रवेशन, अनुवादन, अनुवचन, अनुवाचन, अन्वारोहण, प्रारम्भण, आरम्भण, आरोहण।

अनुप्रवेश पु० अनु+प्र+विश+भावे घञ्। अनुरूपप्रवेशे "उपोढ इद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमा" इति रघुः। अमावास्यायाञ्चन्द्रार्कयोः एकराश्यवस्थितत्वेन सूर्य्यमण्डलादधःस्थितत्वाच्चार्कांशुचन्द्रस्यान्तरगतौ सूर्य्यरश्मेरिन्दौ प्रवेशः तदुत्तरञ्च क्रमशःप्रवेशाधिक्यम् "सलिलमये शशिनि रवेर्दीधितयोमूर्च्छितास्तमोनेशम्। जपयन्ति दर्पणोदरनिहिता इव मन्दिरस्थान्रिति" हृत्तत्त्व०। यथा च तस्याधस्त्वं तथा इन्दुशब्दे वक्ष्यते। तथाहि यावद्यावच्च सूर्य्यात् चन्द्रमाः पूर्वं गच्छति तावत्तावदेव व्यवधानानुरूपेण सूर्य्यरश्मेस्तत्र क्रमशःप्रवेशः।

अनुप्रासः पु० अनुगतः रसाद्यनुगुणं प्रकृष्टन्यासं वर्णन्यासं समवर्णरचनां समवर्णोच्चारणं वा गतिश्च०। अलङ्कारप्रसिद्धे स्वरवैषम्येऽपि समवर्णानां तुल्यरचनारूपे "अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् (सा०द०) उक्ते शब्दालङ्कारभेदे। स च पञ्चधा ते च सोदाहरणसङ्ख्या दर्पणे यथा "छेको व्यञ्जनसङ्घस्य सकृत् साम्यमनेकधा"। छेकश्छेकानुप्रासः। अनेकधेति स्वरूपतः क्रमतश्च। रसः सर इत्यादिक्रमभेदेन सादृश्यं नाम्नालङ्कारस्य विषयः। यथा "आदाय वकुलगन्धानन्धीकुर्व्वन् पदे पदे भ्रमरान्। अयमेति मन्दमन्दं कावेरीवारिपावनः पवनः"॥ अत्र गन्धानन्धीति संयुक्तयोः, कावेरीवारीत्यसंयुक्तयोः। पावनः पवन इति बह्वनां व्यञ्जनानां सकृदावृत्तिः। छेको विदग्धः तत्प्रयोज्यत्वादेष छेकानुप्रासः। "अनेकस्यैकधा साम्यमसकृद्वाप्यनेकधा। एकस्य सकृदप्येष वृत्त्यनुप्रास उच्यते"॥ एकधा स्वरूपत एव न तु क्रमतोऽपि। अनेकधा स्वरूपतः क्रमतश्च। सकृदपीत्यपिशब्दादसकृदपि। यथा "उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः। नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः"। अत्र रसोल्लासैरमी इति रसयोरेकधैव साम्यम्। न तु तेनैव क्रमेणापि। द्वितीये पादे तु कलयोरसकृत् तेनैव क्रमेण च। प्रथमे एकस्य तकारस्य सकृत्। रसविषयव्यापारवती वर्णरचना वृत्तिस्तदनुगतत्वेन प्रकर्षेण न्यसनाद्वृत्त्यनुप्रासः। "उच्चार्यत्वाद्यदैकत्र स्थाने तालुरदादिके। सादृश्यं व्यञ्जनस्यैव तुल्यानुप्रास उच्यते"॥ यथा "इमा दृशं मनसिजं जीवयन्ति दृशैव याः। विरूपाक्षस्य जयिनीस्ताः स्मरो वामलोचनाः"॥ अत्र "जीवयन्तीति" "या इति" "जयिनीरिति" अत्र जकारयकारयोरेकत्र स्थाने तालौ उच्चार्यत्वात् सादृश्यम्। एवं दन्त्यकण्ठ्यादिस्थानानामुदाहार्य्यम्। एष च सकृदुच्चारणमेव श्रुतिसुखावहत्वाच्छ्रुत्यनुप्रासः। "व्यञ्जनं चेद्यावत्यं सहाद्येन स्वरेण तु। आवर्त्तते ऽन्त्य-

योज्यत्वादन्यानुप्रास एव तत्"॥ "यथावस्थमिति" यथा सम्भवमनुस्वारविसर्गस्वरसंयुक्ताक्षरविशिष्टम्। एष च प्रावेण पादस्य पदस्य चान्ते प्रयोज्यः। पादान्तगो यथा "केशः काशसवकविकासः कायः प्रकटितकरभविलासः। चक्षुर्दग्धवराटककल्पं त्यजति न चेतः कामममल्पम्" ॥ पदान्तगो यथा। "मन्दं हसन्तः पुलकं वहन्त इत्यादि। "शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्यमात्रतः। लाटानुप्रास इत्युक्तोऽनुप्रासः पञ्चधा ततः" इति। यथा "क्षीरराजीवनयने! नयने किं निमीलिते?। पश्य निर्जितकन्दर्पं कन्दर्पवयगं प्रियम्॥ अत्र विभक्त्यर्थस्यापौनरुक्त्येऽपि सूक्ष्मतरस्य प्रातिपदिकांशद्योत्यधर्म्मिरूपस्याभिन्नार्थत्वाल्लाटानुप्रासत्वमेव। "नयने तस्यैव नयने" अत्र द्वितीय नयनशब्दो भाग्यवत्तादिगुणविशिष्टत्वरूपतात्पर्य्यमात्रेण भिन्नार्थः। यथा वा। "यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य। यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य" ॥ अत्रानेकपदानां पौनरुक्त्यम्। एष च प्रावेण लाटजनप्रियत्वाल्लाटानुप्रास" इति।

अनुप्लव पु० अनु–प्लु–अच्। सहाये, अनुचरे, दासे च। "सानुप्लवः प्रभुरपि क्षणदाचराणामिति" रघुः।

अनुबन्ध पु० अनु+बन्ध–घञ्। बन्धने, इच्छापूर्वकदोषविशेषाभ्यासे, "अनुबन्धादिकं हित्वा सर्वं कार्यं यथाक्रममिति" स्मृतिः। "अनुबन्धः पौनःपुन्येनाभिनिवेश" इति रघुः। शास्त्रस्यादौ वक्तव्येषु अधिकारिविषयप्रयोजनसम्बन्धेषु, "अनुबन्धानामविषयप्रयोजनाधिकारिसम्बन्ध" इति "अस्य वेदाप्तप्रकरणत्वात्तदीयैरेवानुबन्धैस्तद्वत्तासिद्धेरिति च" वेदा०सा० "ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते। यन्थादौ तेन वक्तव्यः सम्बन्धः स प्रयोजन" इत्युक्तेः विषयप्रयोजनादीनामारम्भप्रयोजकत्वात् तद्वेतुत्वम्। अस्मिन् पक्षे च अनुबध्यते अनेनेति करणे घञ्। सूक्ष्मानुयायिनि अप्रधाने, बालकादौ प्रकृतस्यानुवर्त्तने, संबन्धे, वातपित्तादिदोषाणामप्राधान्ये, प्रकृतिप्रत्ययागमादेशानां विकरणागमगुणवृद्ध्यादिकार्य्यविशेषार्थमनुबन्धनीये परिनिष्पन्नपदकालेषु अश्रूयमाणतया नश्वरे इत्संज्ञतया लुप्तलोपे वर्णादौ, "पदानिङ्विड्विकरणाद्यनुबन्धगणोदितम् कर्म्मोच्चारणमात्रेण स्वष्टमत्यनुबन्धत इति" कविकल्पद्रुमः। फलसाधने पुनःपुनरनुष्ठानाभ्यासे, "अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः। सत्त्वापराधौ चालोक्य दण्डं दण्ड्येषु पातयेदिति" मनुः। बन्धेऽपि मेदिनिः। आरम्भे, शब्दरत्ना०। अनुसरणे "शान्तज्वरोऽपि शोध्यः स्यादनुबन्धभयाद्धर इति" सुश्रुतम्। सन्ततसम्बन्धे (अविच्छेदे) "सानुबन्धाः कथं न स्युः सम्पदो मे निरापद" इति रघुः। अनुबध्यते अनुरुध्यते कर्म्मणि घञ्। पश्चाद्भाविनि शुभाशुभे। "अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्" इति गीता पश्चात्सम्बन्धे च। "यदग्रे चानुबन्धे च सुखं मोहनमात्मन" इति गीता।

अनुबन्धिन् त्रि० अनुबध्नाति अनु+बन्ध–णिनि। सङ्गचरे, अनुगते, अनुरोधिनि, व्यापके च। स्त्रियां ङीप्। "गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव" इति रघुः। "अधश्च मूलान्यनुसन्ततानि कर्म्मानुबन्धीनि मनुष्यलोके" इति गीता। "सूक्ष्मानुबन्धो रूक्षश्च सुगन्धो रोचनो लघुरिति" "भेदःकषायैः खलु रोग एष सुदुस्तरो वर्षगणानुबन्धी" इति च सुश्रुतम्।

अनुबन्धी स्त्री अनुबध्यतेऽतिश्वासेन व्याप्रियतेऽनया अनु+बन्ध–घञ् गौरा० ङीष्। हिक्कारोगे, लक्षणायाञ्च।

अनुबन्ध्य त्रि०वधार्थं बन्धोऽनुबन्धः अनु+बन्ध–कर्म्मणि यत्। वधार्थं बध्ये गवादौ। "नानुबन्ध्यावधोऽपि वा। तयोद्वारविभागश्च नैव संप्रति वर्त्तते" इति स्मृतिः।

अनुबोध पु० अनु+बुध–णिच्–घञ्। पूर्व्वलिप्तचन्दनादेर्गन्धोद्दीपनार्थं पुनर्मर्दनादौ, पश्चाद्बोधे च।

अनुब्राह्मण न०ब्राह्मणं मन्त्रेतरवेदभागस्तत्सदृशम्। ब्राह्मण सदृशे ग्रन्थे। तदधीते वेद वा इनि। अनुब्राह्मणी ब्राह्मणसदृशग्रन्थाध्यायिनि, तद्वेत्तरि च त्रि० स्त्रियां ङीप्।

अनुभव पु० अनु+भू–अप्। स्मृतिभिन्ने ज्ञाने। विषयानुरूपभवनाच्च बुद्धिवृत्तेरनुभवत्वम्। "वृत्तिसारूप्यमितरत्र" पात० सूत्रे, विषयानुरूपत्वं चित्तवृत्तेरभिहितम्। तथाहि यथा पयः प्रणाल्या चेलादिकं प्राप्य चतुरस्राद्याकारेण परिणमते एवमेव इन्द्रियादिप्रणाल्याऽन्तःकरणं बहिर्निसृत्य विषयाकारेण परिणमते तादृशपरिणामरूपवृत्त्या च विषयगतमज्ञानं निवारयतीति अन्तःकरणस्य विषयरूपानुरूपभवनात् अनुभवत्वम्। स्मृतौ तु विषयसन्निकर्षाभावात् न विषयाकारतापाप्तिरिति तद्भिन्ने ज्ञाने एवास्य प्रयोगोपाधिता इति सांख्यवेदान्तिमतम्। अनुभवस्य प्रत्यक्षानुमानोपमाशाब्देन चतस्रो विधाः इति नैयायिकादयः। वेदान्तिनो मीमांसकाश्च अर्थापत्त्यनुपलब्धिरूपमधिकं तद्भेदद्वयमसुरेरीचक्रुः। वैशेषिकाः सौगताश्च

प्रत्यक्षानुमारूपमेव अनुभवद्वयं स्वीचक्रुः अन्येषां सर्व्वेषामनयोरन्तर्भावात्। सांख्यादयः प्रत्यक्षानुमाशाब्दा एवेति भेटवयीमङ्गीचक्रुः। चार्वाकाः प्रत्यक्षमात्रमिति भेदः। "अनुभवं वचसा सखि लुम्पसीति" नैष०।

अनुभाव पु० अनुभावयति उद्बोधयत्यनेन अनु+भू–णिच्–करणे–घञ्। कोषदण्डादिजाते राज्ञां तेजोविशेषे। सामर्थ्ये च। कर्त्तरि अच्। अलङ्कारशास्त्रप्रसिद्धे रसव्यञ्जके "भावं मनोगतं साक्षात् सगतं व्यञ्जयन्ति ये। तेऽनुभावा" इत्युक्तलक्षणे भूभङ्गादौ। "विभावेनानुभावेन व्यक्तः सञ्चारिणा तथेति" सा०द०। अनुभावस्य लक्षणभेदादिकसङ्ख्या दर्पणे। "उद्बुद्धं कारणैः स्वैःस्वैर्बहिर्भावं प्रकाशयन्। लोके यः कार्य्यरूपः सोऽनुभावः काव्यनाट्ययोः॥ यः खलु लोके सीतादिवन्द्रादिभिः स्वैःस्वैरालम्बनोद्दीपनकारणैरुत्पादेरनरुद्धं रत्यादिकं बहिः प्रकाशयन् कार्य्यमित्युच्यते स काव्यनाट्ययोः पुनरनुभावः। कः पुनरसावित्याह। "उक्ताः स्त्रीणामलङ्कारा अङ्गजाश्च स्वभावजाः। तद्रूपाः सात्त्विका भावास्तथा चेष्टाः परा अपि"॥ तद्रूपा अनुभावस्वरूपाः। तत्र च यो यस्य रसस्यानुभावः स तत्तद्रूपवर्णने तत्र तत्र दर्शितः। तत्र सात्त्विकाः। "विकाराः सत्त्वसम्भूताः सात्त्विकाः परिकीर्त्तिताः"। सत्त्वं नाम स्वात्मविश्रामप्रकाशकारी कश्चनाऽऽन्तरो धर्म्मः। "सत्त्वमात्मोद्भवत्वात्ते भिन्ना अप्यनुभावतः"॥ गोवलीवर्द्दन्यायेन इति शेषः। के ते इत्याह। स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः। वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः॥ तत्र। स्तम्भश्चेष्टाप्रतीघातो भयहर्षामयादिभिः। वपुर्ज्जलोद्गमः स्वेदो रतिघर्म्मश्रमादिभिः॥ हर्षाद्भूतभयादिभ्यो रोमाञ्चो रोमविक्रिया। मदसंमदयोर्द्याद्यैर्ग्रहणं गद्गदं विदुः॥ रागद्वेषभयादिभ्यः कम्पो गात्रस्य वेपथुः। विषादमदरोषाद्यैर्वैवर्ण्यान्यत्वं विवर्णता॥ अश्रु नेत्रोद्भवं वारि क्रोधदुःखप्रहर्षजम्। प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिरोधतः इति"॥ "अनुभावविशेषास्तु सैनापरिगतैरिव" रघुः। तेजसि च। गुरुभिरभिनिविष्टं लोकपालानुभावैरिति" रघुः। साक्षात्रे, "जाने वो रक्षसाक्रान्तानुभावपराक्रमौ इति" रघुः।

अनुभावक त्रि० अनुभावयति बोधयति अनु–भू–णिच्–ण्वुल्। बोधके "यत्पदेन विना यस्यानुभावकता भवेत् लाक्षणिकेति" भाषा०। "येन पदेन विना यत्पदस्यान्वयानुभावकत्वं तेन सह तस्यालाक्षणिकेति" सिद्धान्तमुक्तावली।

अनुभाविन् त्रि० अनुभवति अनु+भू–णिनि। साक्षात्कारादिकारके। "अनुभावी तु यः कश्चित् कुर्य्यात् साक्ष्यं विवादिनामिति" मनुः। मनुपश्चात् भवति। पश्चाज्जाते कनिवादौ। "अनुभाविनां परिवापनमिति" आप०स्मृतिः। अनुपश्चाद्भवन्तीति अनुभाविनः कनिष्ठा इति रत्नाकरः "स्वाशौचमनुभवन्तीति अनुभवकारका" इति शु०त०रघु०।

अनुभाषण न० अनु सहितं भाषणम्। सहभाषणे।

अनुभू स्त्री अनु+भू–क्विप्। अनुभवरूपे ज्ञानभेदे "अयमात्मा सर्व्वानुभूरिति" बृ०उप०। "सत्यं ज्ञानमनन्तं ब्रह्मेति" श्रुत्या ब्रह्मणोज्ञानरूपत्वात् सर्व्वज्ञानरूपत्वम्।

अनुभूत त्रि० अनु+भू–कर्म्मणि क्त। अनुभवविषयीभूते पदार्थे अनु+भू–कर्त्तरि क्त। पश्चाज्जाते त्रि०।

अनुभूति स्त्री अनु+भू–क्तिन्। अनुभवे तद्विवरणमननुभवगम्ये ह्यस्म्। "अनुभूतिश्चतुर्विधा प्रत्यक्षमथ्यनुमितिस्तथोपमितिशाब्दे" इति भाषा०।

अनुभूतिप्रकाश पु० अनुभूतेरनुभवस्य वेदान्तश्रवणजन्यस्य प्रकाशार्थं माधवाचार्य्यप्रणीते उपनिषत्तात्पर्य्यप्रकाशके प्रकरणभेदे

अनुमत त्रि० अनु+मन–क्त। स्वयंप्रवृत्ते इदं क्रियतामिति प्रोत्साहनार्थमनुज्ञाते। अनुमोदिते च "कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकमिति" वेणी०। "गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि" इति मनुः। "सम्यग्विनीयानुमतो बटूनायेति" च रघुः। "उभयानुमतः साक्षीति" स्मृतिः।

अनुमति स्त्री अनु+मन–क्तिन्। अनुज्ञायाम्। "अनुमत्या व्यमेवादिति" स्मृतिः। अनुमन्यते कलाहीनत्वेऽपि पूर्णिमाविहितयागादिकरणायानुज्ञायते ऽस्याम् अधिकरणे क्तिन्। कलाहीनचन्द्रवत्यां शुक्लचतुर्दशीयुतपूर्णिमातिथौ। अनुमतो राकेति देवपत्न्याविति नैरुक्ताः पौर्णमास्याविति याज्ञिका या पूर्व्या पौर्णमासी सानुमतिर्योत्तरा सा राकेति विज्ञायते॥ अनुमतिरनुमननात्। "अनुमतिराकासिनीवाल्यौ दृष्टमस्यदेव" इति का०१८,६,२१, कुहूं "चैवानुमतिं च प्रजापतय एव चेति" मनुः।

अनुमन्तृ त्रि० अनु+मन–तृच्। स्वयमुदासीने कार्य्यादौ प्रवृत्तस्यान्यस्योत्साहवर्द्धनार्थमनुज्ञाकर्त्तरि। "अनुमन्ता विशसिता निहन्ता क्रयविक्रयीति" मनुः "उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वर" इति गीता। "अनुमन्ता अनुमोदयितैव सन्निधिमात्रेणानुग्राहक" इति श्रीधरः।

अनुमन्त्रण पु० अनु मन्त्रोच्चारणात् पश्चात् मन्त्रणम् मन्त्रेण

संस्कारादिकरणम् । मन्त्रोच्चारपूर्व्वके यागादिषु संस्कारभेदे "प्रयाजानुमन्त्रणमिति" कात्या० ३,३.२ ।

अनुमरण न० अनु+मृ-ल्युट् । भर्त्तरि मृते तद्देहाप्राप्तौ तत्पादुकादिग्रहणेन पृथक्चितारोहणेन स्त्रीणां देहत्यागे । "भर्त्रानुमरणं काले याः कुर्व्वन्ति तथाविधाः । कामात् क्रोधात् भयाद्वापि सर्व्वाः पूताः भवन्ति ताः" इति स्मृतिः अनुपूर्व्वकमरणस्य मरणसदृशमरणार्थकत्वेन सकर्म्मकत्वम् अतएव "भवता नानुमृतापि लभ्यते" इति रघौ कर्म्मणि क्तप्रयोगः । अनुमरणं च भर्त्तुः देशान्तरादिमरणे देहाद्यलाभे एव "देशान्तरे मृते पत्यौ साध्वी तत्पादुकाद्वयम् । निधायोरसि संशुद्धा प्रविशेज्ज्वलतवेदसमिति" स्मृतिः । तत्र क्षत्रियादीनामेवाधिकारो न विप्राद्याः, यथोक्तम् । "पृथक् चितां समारुह्य न विप्रा गन्तुमर्हतीति" शु०त०स्मृतौ ।

अनुमा स्त्री अनु+मा-अङ् । परामर्शज्ञानाधीने (व्याप्तधूमादिलिङ्गविशिष्टज्ञानाधीने) ज्ञानभेदे यथा "पर्व्वतो वह्निमानित्यादि" तथाहि धूमादिहेतौ सङ्ज्ञानात् प्राक् भूयः-सहचारदर्शनात् धूमत्ववह्नित्वसामान्यधर्म्मेण सकलवह्निधूमादिव्याप्तिनिश्चयः अनन्तरं देशान्तरं गतवतो वह्न्यर्थिनः पर्व्वतादौ धूमदर्शने सति तत्र वह्निव्याप्तिस्मृतिर्जायते एकसम्बन्धिज्ञानस्यापरसम्बन्धिस्मारकतायाः नियमेन, धूमदर्शनात् धूमगतायाः वह्नेर्व्याप्तेः स्मरणसम्भवात् । ततः लाङ्गलधूमवान् अयं पर्व्वत इति निश्चयरूपपरामर्शेन तत्र वह्निमानयमिति निश्चिनोति सोऽयं निश्चयः अनुमितिरूपः अनुभवभेद इति । तत्र च धूमादिलिङ्गज्ञानमेव करणं नतु ज्ञायमानलिङ्गं करणमिति नव्यनैयायिकसिद्धान्तः प्राचीनमते ज्ञायमानलिङ्गमेवेति भेदः "अनुमायां ज्ञायमानं लिङ्गं तु करणं न हीति" भाषा० । "सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमेति" शु०य०प० ।

अनुमातृ त्रि०अनु+मा-तृच् । अनुमानकर्त्तरि "नहि करिणि दृष्टे चीत्कारेण तमनुमिमतेऽनुमातार" इति वाचस्पतिः ।

अनुमान न० अनु-मि-मा-वा भावादौ ल्युट् । व्याप्यस्य ज्ञानेन व्यापकस्य निश्चये, यथा वह्निर्धूमस्य व्यापक इति धूमस्य व्याप्य इत्येवं तयोः भूयः सहचारं पाकस्थानादौ दृष्ट्वा पश्चात् पर्व्वतादौ उद्भूयमानशिखस्य धूमस्य दर्शने तत्र वह्निरस्तीति निश्चीयते । करणे ल्युटि । तद्धेतुभूते धूमादौ । "तज्ज्ञानजं त्रिविधमिति" चिन्तामणिः । श्रुतेरेव स्वतः प्रामाण्यं, यत्र श्रुतिः साक्षात् न श्रूयते तत्र स्मृतिवाक्यात् श्रुतिवाक्यमनुमीयते इति श्रुत्यनुमापकं स्मृतिवाक्यमप्यनुमानपदेनाभिधीयते इति मीमांसकाः । "विरोधे त्वनपेक्षत्वात् स्मृत्यनुमानमिति जै०सू० । इयं स्मृतिः वेदमूलिका आप्तवाक्यत्वादित्येवमनुमानाकारः इति । "दृष्टमनुमानमाप्तवचनञ्च सर्व्वप्रमाणसिद्धत्वादिति सा०का० । "अतीन्द्रियस्य सिद्धिरनुमानादिति" सांख्य०सू० "प्रत्यक्षपरिकलितमर्थमनुमानेन बुभुत्सन्ते" इति वाच० "प्रत्यक्षमनुमानं च शास्त्रञ्च विविधागममिति मनुः । "एवमनुमाने निरूपिते तस्मात् पुरुषधौरेयसिद्धिरिति" चिन्ता० "नानुमानं रसादीनामिति सा०द० "सपरिकरमनुमानं निरूप्येति" चिन्तामणिदीधितिः ।

अनुमानचिन्तामणि पु० गङ्गेशोपाध्यायकृते न्यायशास्त्रस्यानुमानतत्त्वज्ञापके प्रकरणभेदे । तत्र च आदौ अनुमितिस्वरूपादिनिरूपणं ततस्तत्कारणव्याप्तिज्ञानार्थं व्याप्तिनिरूपणम् ततोव्याप्तिग्रहोपायनिरूपणम् ततो व्याप्तिग्रहानुकूलतर्कनिरूपणम्, उक्तासु वह्नीषु व्याप्तिषु कयद्वारं तासामनुगमस्तन्निरूपणम्" ततः व्याप्तिज्ञानोपायतया सामान्यलक्षणानिरूपणम् ततो हेतोः परिशुद्धिज्ञानार्थं-सुपाधिनिरूपणम् । ततोऽनुमित्यङ्गपक्षतानिरूपणम् परार्थानुमानस्य पञ्चावयवन्यायसाध्यतया तन्निरूपणम् । अनुमितौ परामर्शस्य (साध्यव्याप्तिमद्धेतुविशिष्टज्ञानात्मकस्य) स्वरूपादिनिरूपणम् ॥ ततोहेत्वलंविध्यस्य (केवलान्वयि केवलव्यतिरेक्यन्वयव्यतिरेकित्वरूपस्य) निरूपणम् ततो वर्জ্জनीयतया हेतोर्दोषाणां (हेत्वाभासानाम्) निरूपणम् तत्रादौ सासान्यतो हेत्वाभासलक्षणम् ततः सव्यभिचारस्य, साधारणस्य, असाधारणस्य, अनुपसंहारिणः, असिद्धेश्च क्रमशः, ततो बाधस्य निरूपणम् इत्येतत्पर्य्यन्तं सपरिकरमनुमानं हेयतया तद्दोषांश्च निरूप्य तादृशानुमानेन ईश्वरस्य सिद्धिर्दर्शिता तस्याराधनसहकृतेन षोडशपदार्थतत्त्वज्ञानेनात्यन्तिकदुःखनिवृत्तिरूपापवर्गसिद्धिरित्येते पदार्थाः तत्त्वतो अवधेयाः ।

अनुमानदीधिति स्त्री अनुमानरूपचिन्तामणेर्दीधितिरिव । रघुनाथशिरोमणिकृतायामनुमानचिन्तामणिव्याख्यायाम् ।

अनुमार्ग अव्य० मार्गे विभक्त्यर्थे वीप्सार्थे, पश्चादर्थे वा अव्ययी० । मार्गे इत्यर्थे, मार्गानुरूपे, मार्गस्य पश्चादर्थे च । "अनुमार्गगतायाञ्चेति" काद० ।

अनुमाघ अव्य० माघे विभक्त्यर्थे अव्ययी० । माघे इत्यर्थे । परिसंख्या० अत्र । आनुमाघ्यः तद्भवादौ त्रि० ।

अनुमास अव्य० वीप्सार्थे अव्ययी० । प्रतिमासे, अनुमासे

भवः ठञ्। आनुमासिकः प्रतिमासभवे "पिण्डान्वाहार्य्यकं श्राद्धं कुर्य्यान्मासानुमासिकम्" इति मनुः।

अनुमित त्रि० अनु+मि–कर्म्मणि क्त। ज्ञातानुमाने अनुमानविषयीभूते। "अनुमितोऽपि हि वाग्मिनिरीक्षणाद् व्यभिचार न तापकरोऽनल" इति नैष०।

अनुमिति स्त्री अनु–मा–क्तिन्। अनुमाने व्याप्तिविशिष्टस्य पक्षधर्म्मताज्ञानाधीने अनुभवभेदे "स पक्षस्तत्र हृत्तित्वज्ञानादनुमितिर्भवेदिति" भाषा०। अनुमितिश्च द्विविधा स्वार्था परार्था च तत्र हेतौ व्याप्तिनिश्चये सति तस्य च पक्षे हृत्तित्वज्ञानात् उपादेयपदार्थप्रहणाय प्रवर्त्तिका यानुमितिः सा स्वार्था। विवदमानं प्रति कञ्चित्पदार्थं साधयितुं मध्यस्थाद्यवलम्बनेन प्रतिज्ञाहेतूदाहरणोपनयननिगमनरूपपञ्चावयवन्यायसाध्या परार्था।

अनुमित्सा स्त्री अनु+मि–सन्–भावे अ। अनुमातुमिच्छायाम् सिषाधयिषायाम्। अनुमित्सायां हि सिद्धिसत्त्वेऽनुमितिरुदेति तदभावे साध्यवत्तानिश्चयरूपसिद्धिसत्त्वे नानुमितिः। तत्रायं विशेषः सामानाधिकरण्येन सिद्धिसत्त्वेऽपि अवच्छेदावच्छेदेनानुमितिर्भवत्येव न तत्रानुमित्सापेक्षा तथा च अवच्छेदावच्छेदेन सिद्धिरेव अवच्छेदावच्छेदेन सामानाधिकरण्येन चानुमितिं प्रतिबध्नाति एवञ्च तत्रैव इच्छामेवेति। अतएव वाचस्पतिना "प्रत्यक्षपरिकल्पितमर्थमनुमानेन बुभुत्सन्ते तर्करसिका" इत्युक्तम्।

अनुमृत त्रि० अनु पश्चात् शोकादिना मृतः। शोकादिना मृतस्य पश्चात् मृते। अनु+मृ–कर्म्मणि क्त। यस्य पश्चात् म्रियते तस्मिन् "भवता नानुमृताऽपि लभ्यते" इति रघुः।

अनुमेय त्रि० अनुमीयतेऽसौ अनु+मि–कर्म्मणि यत्। अनुमित्यर्हे, अनुमातुं योग्ये "एतावता नन्वनुमेयशोभीति" कुमा०। "फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव" इति रघुः।

अनुमोद पु० अनु+मुद–णिच्–घञ्। प्रकृतकर्म्मणि प्रवृत्तिविघातानुकरणेनान्यप्रोत्साहानुकूलव्यापारे,। त्वया यत् कृतं तन्मेऽनुमतमित्याद्यभिलापव्यङ्ग्ये। भावे ल्युट्। तत्रैवार्थे न०।

अनुमोदित त्रि० अनु+मुद–णिच्–कर्म्मणि क्त। ज्ञातानुमोदने स्वानुमतत्वज्ञापनेन प्रोत्साहिते "भवता यदुच्यमानं तन्मे साध्वनुमोदितम्। प्रार्थ्यमानोऽर्थिना यत्र हृष्यति नैव विघातितः। दानकालेऽथवा तूष्णीं स्थितः, सोऽर्थेऽनुमोदित इति (प्रा०वि०) उक्तेऽर्थे च।

अनुयव अव्य० यवे विभक्त्यर्थे अव्ययी०। यवे इत्यर्थे। परिसंख्या० भवादौ अत्र। आनुयव्यम् तत्रभवे पदार्थे त्रि०।

अनुयाज पु० अनु+यज–घञ् यजादित्वात् कुत्वाभावः। दर्शपौर्णमासाङ्गेषु प्रयाजादिषु पञ्चसु यागेषु। "यजतिषु ये यजामहे नानुयाजेषु" इति श्रुतिः। "प्रयाजान्ते अनुयाजांश्च केवलानिति" कल्प० १०,५१,६, अनुयाजानुमन्त्रणम् का० २,५,१४।

अनुयात त्रि० अनु या–कर्त्तरि क्तः। पश्चाद्गन्तरि, सकर्म्मणि कर्म्मणि क्तस्य पश्चाद्गम्यते तादृशे जने।

अनुयात्र अव्य० यात्रायां विभक्त्यर्थे पश्चादर्थे वा अव्ययी०। यात्रायामित्यर्थे, यात्रायाः पश्चाद्भावे च। अनुगता अनुरूपीकृता यात्रा येन प्रा०ब०। अनुयायिवर्गे। "त्यक्तभोगस्य मे राजन्! वने वन्येन जीवतः। किं कार्य्यमनुयात्रेणेति" रामा० अनुगता यात्रा प्रा०स०। पश्चाद्यात्रायां स्त्री। तत्प्रयोजनमस्येत्यर्थे ठक्। आनुयात्रिकः अनुचरे सेवके त्रि०।

अनुयात्रिक त्रि० अनुयात्रा पश्चाद् यात्रा अनुगमनमस्यस्य ठन्। पश्चाद्गन्तरि अनुचरे "सर्व्वानेवानुयात्रिकवर्गान् त्वया सहेति" शक०।

अनुयायिन् त्रि० अनुयाति पश्चात् गच्छति अनु+या–णिनि स्त्रियां ङीप्। पश्चाद्गन्तरि, सेवके, अनुचरे "न्यषेधि शेषोऽप्यनुयायिवर्गः" इति रघुः सहगे, सख्यस्यानुगन्तरि शिवौ च।

अनुयुक्त त्रि० अनु+युज–क्त। जिज्ञासिते पदार्थे। कृतप्रश्ने, यं प्रति कस्यचित् पदार्थस्य जिज्ञासार्थं प्रश्नः क्रियते तस्मिंश्च। "स चानुयुक्तो व्याचष्टामिति खण्डनखाद्यम्।

अनुयुग अव्य० युगे विभ० अव्ययी०। युग इत्यर्थे। तत्र भवः परिसंख्या० अत्र। आनुयुग्यः अनुयुगभवे त्रि०।

अनुयूप अव्य० यूपे विभ० अव्ययी०। "यूप इत्यर्थे। तत्र भवः परिसंख्या० अत्र। आनुयूप्यः यूपभवे त्रि०।

अनुयोक्तृ त्रि० अनु+युज–तृच् स्त्रियां ङीप्। प्रश्नकारके। शास्त्रकाध्यापके च।

अनुयोग पु० अनुयुज्यते कथनाय नियुज्यते अनु+युज–घञ्। प्रश्ने। सति हि प्रश्ने, शिष्टः कथनाय प्रवर्त्तते। "निष्टक्यानुयोगे चेति" पा०। अनुपूर्व्वात् युजेः प्रश्नार्थकता। तेन "त्वया क्रियतेति तमन्वयुङ्क्त" इति रघौ प्रश्नार्थकतया निर्द्देशः।

अनुयोगकृत् पु० अनुयोगं प्रश्नविषयसंशयं कृन्तति कृत छेदने क्विप्। आचार्य्ये। कृ–क्विप्। शुश्रूषके त्रि०।

अनुयोगिन् त्रि० अनुयुङ्क्ते अनु+युज-घिनुण्। प्रश्नकारके।
अनुयोज्य त्रि० अनुयुज्यते नियुज्यते "अनु+युज-गत्यर्थे आवश्यकार्थे वा ण्यत्। प्रश्नार्हे अवश्यनियोज्ये, त्वया कथमित्थं कृतमित्याद्येवंरूपे प्रश्ने, आज्ञाकारके, दासादौ च "वासवानुयोज्यो दुष्टस्तः प्रणमति" शक०।
अनुरक्त त्रि० अनु+रञ्ज क्त। अनुरागयुक्ते, अनुगतः रक्तं रागम् अत्या०स०। प्राप्तरक्तवर्णे।
अनुरक्ति स्त्री अनु+रञ्ज-क्तिन्। अनुरागे।
अनुरञ्जक त्रि० अनुरञ्जयति अनुरक्तं करोति अनु+रञ्ज-णिच्-ण्वुल्। अनुरागयुक्तकारके।
अनुरञ्जन न० अनु+रञ्ज-णिच्-भावे ल्युट्। अनुरागयुक्तकरणे "विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दुरिति" माघ०। कर्त्तरि ल्यु। अनुरञ्जके त्रि०।
अनुरञ्जित त्रि० अनु+रञ्ज-णिच्-कर्म्मणि क्त। यस्य अनुरागः कृतः तस्मिन्, अनुरक्तीकृते जने।
अनुरणन अनु+रण-ल्युट्। घण्टादिशब्दज प्रतिध्वन्यात्मके शब्दसन्ताने व्यञ्जनरूपशब्दशक्तिभेदे, ध्वनिभेदे च।
अनुरत त्रि० अनु+रम-कर्त्तरि क्त। अनुरक्ते, अभिरते च।
अनुरति स्त्री अनु+रम-भावे क्तिन्। अनुरागे।
अनुरस त्रि० अनुगतो रसम्। माधुर्य्यादिरसानुगते "भूमिजं गुरु नातिवातलं भूमितोयसानुरसं" इति "मधुरानुरसं रूक्षं लवणानुरसं लघु। नार्य्यास्तु मधुरं स्निग्धं कषायानुरसं हिममिति" च सुश्रुतम्।
अनुरहस त्रि० अनुगतं रहः अत्या०स० अच्समा०। निर्ज्जनदेशानुगते।
अनुराग पु० अनु+रञ्ज+घञ्। आत्मप्रीतौ, स्नेहे च। अनुरूपो रागः मा०स०। अनुरूपरागे। "अनुरागवन्तमपि लोचनयोरिति" माघः "प्रसादस्तु शब्दः स्यादनुरागज" इत्यमरः। "प्रियानुरागस्य मनःसमुन्नतेरिति" रघुः। अनुगतो रागं गतिस०। प्राप्तलौहित्यवर्णे त्रि०।
अनुरागिन् त्रि० अनु+रञ्ज-घिनुण् कुत्वम्। अनुरागयुक्ते स्त्रियां ङीप्। "वेश्याङ्गानानुरागिणीमिति" सा०द०
अनुरात्र अव्य० रात्रौ विभ० अव्ययी० अच्समा०। रात्रावित्यर्थे, प्रतिरात्रे च। "तस्मात् स्त्र्यनुरात्रं पत्नाविच्छते" इति श्रुतिः। अनुगतो रात्रिम्। रात्र्यनुगते त्रि०।
अनुराधा स्त्री० अनुगता राधां विशाखाम् अत्या०स०। सप्तविंशतिधाविभक्तस्य राशिचक्रस्य सप्तदशभागात्मके नक्षत्रभेदे "रेवत्युत्तररोहिणीमृगशिरोमूलानुराधासु" ज्योति०। "राधे विशाखे सुहृदनुराधाज्येष्ठासु नक्षत्रेष्विति" स्मृतिः। "शिखिगुणरसेन्द्रियानलशशिविषयगुणर्तुपञ्चवसुपक्षाः। विधयैकचन्द्रभूतार्णवाग्निरुद्राश्विवसुदहनाः। भूतशतपञ्चवसवो द्वात्रिंशच्चेति तारकामानम्। क्रमशोऽश्विन्यादीनां कालसाराप्रमाणेन। नक्षत्रजसुहृद्दे फलमद्दैनारकामितैः सदृशम्। दिवर्क्षरस्य नाशो व्याधेरन्यस्य वा वाच्यः" इति बृ० उक्तोक्तसंज्ञाः चतुस्सारात्मकत्वम्। अस्थिमदृहनकमलजशशिभूलभदृदितिजीवर्क्षपितरः। योन्यर्यमदिनकृत्त्वष्टृपवनशक्राग्निमित्राख्य। शक्रो निर्ऋतिस्तोयं विश्वे देवाश्चरिर्बुध्नश्च रूपाः। अजपादोऽहिर्बुध्न्यः पूषा चेतीश्वरा भानाम्" इति बृहत्संहितोक्तोक्तसंज्ञा मित्रदेवताकत्वम्। तस्य च योगतारा "ज्येष्ठाश्रवणधनिष्ठाणां वाहिस्थस्य मध्यमा" इति सूर्य्यसि० उक्तेर्मध्यमा तारा। तत्र भवः अण् लुक् "लुगतद्धितलुकीति" पा० स्त्रीप्रत्ययस्य लुक्। अनुराधास्वजाते त्रि०। नक्षत्रेण युक्तः काल इत्यणस्तु लुप् "लुपि युक्तवद्व्यक्तिवचनमिति" पा० अनुराधा अनुराधानक्षत्रयुक्तकाले ततः सम्पन्नार्थे ढतीयेति भेदः। पृ० दीर्घः। अनूराधाश्वत्र।
अनुरुद्ध-त्रि अनु+रुध-कर्म्मणि क्त। अपेक्षिते।
अनुरुध् त्रि०अनु+रुध-क्विप्। अनुरोद्धरि अपेक्षके। कर्म्मणि क्विपि वेदे उपसर्गदीर्घः। अनूरुद्धे। "आशितूपूर्वांस्वपरा अनूरुधः ऋ० ३,५५,५, "अनूरुद्ध अनुरुद्धमिति" भा०।
अनुरूप अव्य० रूपस्य सादृश्ये योग्यत्वे वा अव्ययी०। रूपस्य सादृश्ये, योग्यतायाञ्च। अर्श आद्यच्। तद्वति त्रि०। "अथानुरूपाभिनिवेशतोषिणेति" कुमा०। "सत्वानुरूपा सर्व्वस्य श्रद्धा भवति भारत" गीता। द्वादशाहसाध्ये यागे वक्ष्यमाणगतानां त्रयाणां ऋचानां मध्ये मध्यमे ऋचे। "श्रोत्रियानुरूपौ ऋचौ भवतः इषस्वन्नस्तूचा भवन्ति तत्र उत्तमः पर्य्यास" इति ता०ब्रा०। प्राक्तनानां वक्ष्यमाणगतानां त्रयाणां ऋचानां श्रोत्रियः, अनुरूपः, पर्य्यासश्चेति त्रीणि नामानीति भा०।
अनुरोध पु० अनु+रुध-घञ्। अनुसरणे, आराध्यादेरिष्टसम्पादनेच्छायाञ्च। "मित्रस्यानुरोधेन द्विविधं कृतमासनमिति" "नानुरोधोऽस्त्यनध्याये" इति च मनुः।
अनुरोधिन् त्रि०अनु+रुध-णिनि। अपेक्षके। स्त्रियां ङीप्। "पतिव्रतानां समयानुरोधिनीति" रामा०। [भाषणे।
अनुलाप पु० अनुर्वीप्सायां वारंवारं लप्यते लप-घञ्। सङ्ग-
अनुलिप्त त्रि० अनु+लिप-क्त। गन्धादिना कृतानुलेपे

"चन्दनागुरुकर्पूरकुङ्कुमोशीरपत्रकैः अनुलिप्तो नरैर्भक्त्या हरिरिष्टं प्रयच्छतीति" पुरा०।

अनुलेप पु० अनु+लिप-भावे घञ्। चन्दनादिमर्दने। करणे घञ्। अनुलेपसाधने चन्दनादौ।

अनुलेपक त्रि० अनुलिम्पति अनु+लिप-ण्वुल्। चन्दनादिभिः स्वदेहदेवाङ्गादेरनुलेपकारके। स्त्रियां टाप्। तस्याः धर्म्ये मन्त्रिभ्या० अण्। आनुलेपिकम् तद्धर्म्ये त्रि०।

अनुलेपन न० अनु+लिप-भावे ल्युट्। चन्दनादिमर्दने "धात्रीफलं तथा दद्यादनुलेपनकारणादिति" पुरा०। करणे ल्युट्। अनुलेपसाधने चन्दनादौ द्रव्ये।

अनुलेपित त्रि० अनु+लिप-णिच्-कर्मणि क्त। "अनुलिप्तोक्ते

अनुलेपिन् त्रि० अनुलिम्पति अनु+लिप-णिनि। अनुलेपके

अनुलोम पु० यथाक्रमे अव्ययी० अच्समा०। यथाक्रमे। "अनुलोमविलोमाभ्यां मातृकार्ष्णान् जपेद्बुध इति तन्त्र० "तत्र प्रतिलोममालिख्येदानुलोम्यमिति" सुश्रुतम् अनुगतः लोम आनुरूप्यम् रोम वा प्रा०स०। आनुरूप्यप्राप्ते, यथाक्रमप्राप्ते च त्रि० "सवर्णासु पुत्राः सवर्णा भवन्ति अनुलोमजा मातृवर्णा" इति विष्णुस० अनुलोमं लातं वेत्ति प्रतिलोमं कर्षति सि०कौ०। अनुगतरोमे च। "अनुलोमाः सुलोमाश्च रुचिरा रोमराजय" इति।

अनुलोमज पु०स्त्री० अनुलोमेन यथाक्रमेण जातः जन-ड। परिणीतक्षत्रियादिस्त्रीषु विप्रादिभ्य उत्कृष्टेभ्यो वर्णेभ्यो जाते मूर्द्धावसिक्तादौ सङ्कीर्णवर्णे। अनुलोमजाश्च "विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां, विशःस्त्रियाम्। अम्बष्ठः, शूद्रायां निषादजातिः पारशवोऽपि वा" "वैश्यात्तूद्रोसु राजन्यात्, माहिष्योग्रौ सुतौ स्मृतौ, वैश्यात्तु करणः शूद्रायां, विप्रास्वेष विधिः स्मृत" इति च याज्ञ०स०।

अनुलोमजन्मन् पु०स्त्री० अनुलोमं पितृवर्णानुक्रमेण जन्म यस्य। अनुलोमजाते मूर्द्धावसिक्तादौ। स्त्रियां ङीप्। "अन्येऽनुलोमजन्मानः प्रतिलोमभवा अपीति" काशी०।

अनुवंश अव्य० वंशे विभक्त्यर्थे अव्ययी०। वंशे इत्यर्थे तत्र भवः परिमुखा० अञ्। आनुवंश्यस्तत्र भवे त्रि०।

अनुवक्तृ त्रि० अनुवक्ति गुरुमुखात् श्रुत्वा तदनुरूपं वदति अनु+वच-तृच्। गुरुमुखोच्चारितानुरूपपाठके। स्त्रियां ङीप्।

अनुवक्र त्रि० अनुक्रमेण वक्रः। अतिवक्रे "यस्य वक्रानुवक्राभ्यङ्गा" इति सुश्रुतम् अतिवक्रत्वञ्च यङ्घाताम् "अतिवक्रा नगाटग" इति सूर्य्याक्रान्तराश्यपेक्षया सप्ताष्टस्थानस्थितौ भवति।

अनुवचन न० अनुरूपं वचनम् प्रा०स०। अनुरूपकथने "तमेतं ब्राह्मणाविविदिषन्ति वेदानुवचनेन" इति "त्रिरुक्तोर्वेदानुवचनमिति" च श्रुतिः।

अनुवत्सर पु० अनुकूलो वत्सरो दानादिविशेषाय। "शकाब्दात् षड्भिः शेषात् समाद्यादिषु वत्सराः। सम्वरोदानुपूर्व्याच्च तथोदापूर्व्वका मता" इत्युक्ते वत्सरभेदे। "संवत्सरे तथा दानं तिलस्य तु महाफलम्। परिपूर्व्वे तथा दानं यवानाञ्च द्विजोत्तम!। इदापूर्व्वे च वस्त्राणां धान्यानाञ्चानुपूर्व्वके उदासंवत्सरे दानं रजतस्य महाफलमिति" विष्णु०ध०पुरा०। अनुवर्षादयोऽत्र।

अनुवर्त्तन न० अनु+वृत-ल्युट्। अनुगमने, अनुसरणे, व्याकरणादौ पूर्व्वसूत्रस्थतद्शब्दस्योत्तरसूत्रेऽन्वयार्थमनुसरणे च।

अनुवर्त्तिन् त्रि० अनु+वृत-णिनि। पश्चद्गामिनि अनुयायिनि च स्त्रियां ङीप्। "सशरीरा मता स्वर्गं भर्त्तारमनुवर्त्तिनी" इति रामा०।

अनुवाक पु० अनूच्यते अनु+वच-घञ् कृत्यम्। मानसूक्ते ऋग्विशेषे, ऋग्यजुःसमूहे, यज्ञनाम्नि ख्याते वेदांशे। "अग्निरेकाक्षरेणेत्यनुवाकं द्वादशवत् कृत्वेति" काश्या० १४,५,२६, "चतुःकण्डिकात्मकमनुवाकं द्वादशवदिति" वेददीपः। "अध्यायानुवाकयोर्लुक्" पा० विसृष्टशब्दोऽस्यस्य अण् तस्य वा लुक्। वैसृष्टो विसृष्टो वा अध्यायः अनुवाको वा।

अनुवाक्या स्त्री अनु+वच-ण्यत् कृत्यम्। ऋत्विग्भेदः प्रयाजा तत्साध्यायां देवताज्ञानसाधने ऋचि। "पुरोऽनुवाक्या याज्या वेति" यजु०। "हे ऋचौ सुराग्रहणार्थे याज्यानुवाक्ये प्रथमानुवाक्या, श्रुतमिवेति याज्येति" वेददीपः। "पुरोऽनुवाक्या याज्या च यस्यैवेति" इ०उप०। पुरोऽनुवाक्या प्राक्प्रयोगकालाद् याः प्रयुज्यन्ते ऋचः सा ऋग्जातिः पुरोऽनुवाक्येत्युच्यते इति भा०।

अनुवाच् पु० अनुवाचयति अनु+वच-णिच्-क्विप्। अनुवाचके अध्यापके।

अनुवाचन न० अनु+वच-णिच्-ल्युट्। अध्यापने। तत्प्रयोजनमस्य अनुप्र० ञ। अनुवाचनीयः अध्यापके त्रि०।

अनुवात पु० अनुगतो वातः। शिष्यादिदेशात् गुर्वादिदेशगन्तरि वायौ "प्रतिवातेऽनुवाते च नासीत गुरुणा सहेति" मनुः।

अनुवाद पु० अनु+वद-घञ्। विधिप्राप्तस्य वाक्यान्तरेण कथने यथा अग्निहोत्रं जुहोतीति वाक्येन प्राप्तस्य होमस्य

दध्ना जुहोतीति वाक्येन पुनरनुवादेन दधिकरणकत्व-मात्रं तत्र विधेयम्। तत्र होमस्यानुवादः एवमन्यत्रापीहम् अनुवादः पूर्व्वस्येति का०४,३,१८, "य इच्छेत्तनेन वाक्येन पौर्णमास्यामवस्थायां वा विकृतीनामनुष्ठानमुच्यते तद्व प्रकृतितः प्राप्तमेव अतः कारणात् य इच्छेत्यनुवाद इति तद्वा०। अनुवादश्च त्रिविध भूतार्थानुवादः स्तुत्यर्थानुवादः गुणानुवादश्चेति। तत्र सदेव सौम्येदमग्र आसीदित्यादौ भूतार्थानुवादः। "वायुर्वै क्षेपिष्ठा देवतेत्यादौ, स्तुत्यर्थानुवादः। वायव्यं श्वेतं आलभतेत्यादौ प्राप्तायां वायुदेवतायाः स्तुत्यर्थत्वात् तस्य स्तुत्यर्थानुवादत्वम्। अग्निहोत्रं जुहोतीति प्राप्तस्याग्निहोत्रहोमस्य गुणविधानार्थं प्रवृत्तं दध्ना जुहोतीत्यादि गुणानुवादः। एवमन्यान्यप्युदाहार्य्याणि। अनुलक्षकथने। "क उत्तमः श्लोकगुणानुवादात् पुमान् विरज्येत विना पशुघ्नादिति" भाग०। "सिद्धोपदेशे च "अनुवादे चरणानामिति" पा०। "सिद्धोपदेशे" इति सि०कौ०।

अनुवादक त्रि० अनुवदति अनु+वद–ण्वुल्। अनुवादकारके अनुवदनशीले च।

अनुवादिन् त्रि० अनुवदति अनु+वद–णिनि। अनुवादकारके, अनुवदनशीले, युक्तगोतानुवादिनि च स्त्रियां ङीप्।

अनुवाद्य त्रि० अनु+वद–ण्यत्। उद्देश्ये प्राप्तावपि विधिविधानार्थमनुकीर्त्तनीये। "अनुवाद्यमनुक्तौ च न विधेयमुदीरयेदिति ह्यार्हाः तथा च। पर्वतो वह्निमानित्येव प्रयोक्तव्यं न वैपरीत्येन, तथा प्रयोगे तु आलङ्कारिकैः वाक्यगतविधेया विमर्शदोषो भवतीति प्रतिपादितम् यथा "न्यक्कारो ह्ययमेव मे वदरयः" इति वाक्ये अयमेव न्यक्कार इति प्रयोक्तव्ये तद्वैपरीत्येन प्रयोगात्तथात्वम्। अतएव "ह्यादिरादैच्" इति पा० सूत्रे आदैच् ह्यादिसंज्ञः स्यादित्यर्थके ह्यादेर्विधेयत्वेन पूर्व्वनिर्देशावश्यम्भावेऽपि ह्यादिशब्दस्य मङ्गलार्थत्वेन प्राक्प्रयोगो भाष्यादौ समर्थितः यथा "पूर्व्वोच्चारितः" संज्ञी परोच्चारितः संज्ञेत्याचिख्य "एतदेकमाचार्य्यस्य मङ्गलार्थं श्रूयताम्। माङ्गलिक आचार्य्यो महतः शास्त्रौघस्य मङ्गलार्थं ह्यादिशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्त्यायुष्मत्पुरुषाणि च अध्येतारश्च ह्यादियुक्ता यथा स्युरित्येवमेवं"। "माङ्गलिको मङ्गलप्रयोजनः। महतोऽर्थतः एकैकं सूत्रं शास्त्रमिति शास्त्रौघस्येत्युक्तम्। मङ्गलादीनीत्यादिना स्वप्रयोजनं श्रोतृप्रयोजनञ्चोक्तम्। प्रथन्ते विस्तृतानि भवन्ति तेन समाप्तिरर्थाच्छिष्यते" इति भा०उद्यो०।

अनुवासन न० अनु+वास–णौरभ्ये ल्युट्। धूपादिभिः सुरभीकरणे, वैद्यौकोक्ते स्नेहाद्यैः वस्तिकर्म्मणि च। "द्विधा वस्तिः परिज्ञेयो निरूहश्चानुवासनम्। कषायाद्यैर्निरूहः स्यात् स्नेहाद्यैरनुवासनम्" इति वैद्यकम्। अनुवसति, अनुवासरं दीयते वा ष्ठ०। सुश्रुतोक्ते अनुवासनद्रव्ये पु०। तत्र यथाप्रमाणगुणविहितः स्नेहवस्तिविकल्पोऽनुवासनः पादावशेषः। अनुवसन्नपि न दुष्यत्यनुदिवसं वा दीयत इत्यनुवासनः। तस्यापि विकल्पोऽर्द्धमात्रावशेषोऽपरिहार्य्यो मात्रावस्तिरिति"। "निरूहः शोधनो लेखो स्नेहनो बृंहणो मतः। निरूहशोधितान् मार्गान् सम्यक् स्नेहोऽनुगच्छति। अपेतसर्व्वदोषांस्तु नाड़ीष्विव वहञ्जलम्। सर्व्वदोषहरत्वात्तौ शरीरस्य च जीवनः। तस्माद्धि शुद्धदेहस्य स्नेहवस्तिर्विधीयते" इति। "तत्रोन्मादभयशोकपिपासारोचकाजीर्णाग्लपाण्डुरोगश्रमभ्रमदमूर्च्छार्दि-कुष्ठ-मेहोदर-श्लीपदास-कासकण्ठशोथशोफोपसृष्टजन्तुकोष्ठवस्तिमासगर्भिणी दुर्बलाग्न्युत्सन्ना बालवृद्धौ च वातरोगार्त्ते क्षीणा नानुवास्या नास्थापयितव्या उदरी च प्रमेही च कुष्ठी स्थूलश्च मानवः। असाध्यता विकाराणां स्यादेषामनुवासनात्" इति च सुश्रुतम्। अजादिवस्तिचर्म्मधनवस्त्रादिनिर्म्मितेन (पिचुकारीति) प्रसिद्धयन्त्रेण धातुवैषम्यदोषनाशाय लिङ्गद्वारेण योनिद्वारेण वा दीयमानं स्नेहाद्रव्यमनुवासन इति वैद्यकप्रसिद्धिः। अधिकं वस्तिकर्म्मशब्दे वक्ष्यते। अनुवासनं प्रयोजनमस्य अनुप्रवच० ढक्। अनुवासनीयः अनुवासनहेतौ त्रि०।

अनुवासित त्रि० अनु–वास–क्त। सुरभीकृते, वस्तिकर्म्मणा चिकित्सिते च।

अनुवास्य त्रि० अनु+वस–कर्म्मणि यत्। सुरभीकार्य्ये वस्तिकर्म्मणा चिकित्स्ये च। "अवश्यं स्थापनीयाश्च नानुवास्या कथञ्चनेति" सुश्रुतम्।

अनुविधायिन् त्रि० अनु+विधत्ते अनु+वि+धा–णिनि। पश्चाद्विधायिनि, अनुगते च। "गुणानां तदन्वयव्यतिरेकानुविधायित्वमिति" सा०द०।

अनुविद्ध त्रि० अनु+व्यध–क्त। संसृष्टे। "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्ध इवार्थो हि सर्वः शब्देन भासते" इति वाक्यप०। "क्रीटानुविद्धरत्नादिसाधारण्येन काव्यता। दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुट" इति सा०द०। [वावन्त्याविति" भा०भी०प०।

अनुविन्ध्य पु० अवन्तिदेशीये नृपतिभेदे "विन्ध्यानुविन्ध्या-

अनुवृत् त्रि० अनु पश्चात् वर्त्तते अनु+वृत–क्विप्। पश्चाद्वर्त्तिनि पश्चाद्भाविनि अनुगते च "अनुवृदस्रनुवृते" इति ता० ब्रा०।

अनुवृत्त त्रि० अनु+वृत–क्त। अनुगते, पूर्वसूत्रादपरसूत्रे आकाङ्क्षापूरणार्थम् अन्विते पदादौ, अनुक्रमेण वृत्ततामाप्ते क्रमशः वर्त्तुलाकारे। अनुगतो वृत्तं शीलम् अत्या० स०। शीलानुगते त्रि०।

अनुवृत्ति स्त्री अनु+वृत–क्तिन्। अनुसरणे, सेवने, पूर्वसूत्रादुत्तरसूत्रे आकाङ्क्षापूरणार्थमनुसरणे च। "कृषी दलधिवाणिज्यगुल्कशालानुवृत्तिभिः कृतोपकारादाप्नञ्च राजसं सप्तदाहृतमिति" नारदः। "अनुवृत्तिः सेवेति" रघु०। "अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीश्वताभिति" देवी० तत्सत्त्वे तत्सत्त्वरूपे अन्वये, समन्वये च। एवं व्याहत्यनुवृत्तिभ्यामन्नमयत्वं मनसः सिद्धमिति ऋ० उप० भा०। "जन्माद्यस्य यतोऽन्वयादिति" भागव०। "अन्वयशब्देनानुवृत्तिरिति" श्रीधरः नह्यन्ववबुद्धस्वभावा भिषजः स्वस्यानुवृत्तिं रोगनिग्रहणञ्च कर्त्तुं समर्था इति सुश्रुतम् "यासां सर्व्वपि सद्गुणानुसरणे दोषानुवृत्तिः परेति" सा० द०। दोषः दोषा च तदनुवृत्तिः सेवा अनुसरणञ्चेति तदर्थः।

अनुवेध पु० अनु+विध–घञ्। संसर्गे। "नहि कीटानुवेधादयो रत्नस्य रत्नत्वं व्याहन्तुमीशा" इति सा० द०।

अनुवेल न० वीप्सार्थे अव्ययी०। प्रतिसमये अनुक्षणे "इति स्म पृच्छत्यनुवेलमादृत" इति रघुः। अर्थआदि० अस्त्यर्थे अच्। तद्वृत्तौ त्रि०।

अनुवेल्लित न० अनु+वेल्ल–क्त। सुश्रुतोक्ते व्रणलेपनबन्धभेदे। बन्धश्च "कोशदामस्वस्तिकानुवेल्लितप्रतोलीमण्डलस्थगिकायमकखट्वाचीनविबन्धविताननोपणाः पञ्चाङ्गी चेति चतुर्दश बन्धविशेषाः तेषां नामभिरेवाकृतयः प्रायेण व्याख्याता" इति सुश्रुतोक्ताः वेदितव्याः। तत्र अनुवेल्लितं तु शाखासु इति वैद्यकप्रसिद्धिः।

अनुवेश पु० अनु+विश–घञ्। ज्येष्ठातिक्रमेण कनिष्ठस्य विवाहे "यवीयसोऽनुवेशो हि ज्येष्ठस्य विधिलोपक" इति भार०।

अनुवेश्य त्रि० अनुक्रमेण वेशमर्हति यत्। प्रतिवेश्यानन्तरवासिनि। "प्रातिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजे" इति मनुः। "अनुवेश्यः प्रातिवेश्यानन्तरस्टहवासीति कुल्लू०।

अनुव्रज त्रि० अनुव्रजति अनुगच्छति अनु+व्रज–क। अनुगते ततो देवा अनुव्रमिवासुः का० १,२,५, अनुव्रम् अनुगमनं न्यगभूतिं "प्राप्ता इव बभूवुरिति" तद्भा०।

अनुव्याख्यान न० अनुरूपं व्याख्यानम् प्रा० स०। मन्त्रादीनामनुरूपार्थप्रकाशके व्याख्याने। [कथने च।

अनुव्याहार पु० अन्+वि+आ+हृ–घञ्। अनुवादे, स्मृ-

अनुव्रजन न० अनु+व्रज+भावे ल्युट्। अनुगमने अनुव्रजनं च गच्छतोऽतिस्निग्धादेः जलसमीपपर्य्यन्तानुधावनम् तथैवोपमाविधया वर्त्मिलं नैषधे "वनान्तपर्य्यन्तमुपेत्य सस्नुहं क्रमेण तस्मिन्नथ तीर्थदक्षये। न्यवर्त्तिदृष्टिप्रकरैः पुरौकसामनुव्रजद्भ्यमुमाजवन्धुभिरिति"।

अनुव्रज्या स्त्री अनु+व्रज–क्यप्। अनुसरणादिरूपे सेवने। "अव्राह्मणादध्ययनमापत्काले विधीयते। अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोरिति" मनुः।

अनुव्रत त्रि० अनुकूलं व्रतं कर्म्म यस्य। अनुकूलकर्म्मयुक्ते। "अनुव्रताय रन्धयन्नपव्रतायेति ऋ० १,५,६, अनुव्रताय अनुकूलकर्म्मणे इति भा०। वैश्याः क्षत्रमनुव्रताः रामा०

अनुव्रतिकादि न० ङीव० पाणिनीयगणपाठोक्ते ञिति णिति किति च तद्धिते परे द्विपदयोरादिपदयोरुत्तरपदवृद्धिनिमित्तीभूते शब्दसमूहे, सच गणः। अनुव्रतिक, अनुक्रोड़, अनुसंवरण, अनुसंवत्सर, अङ्गारवेणु, असिहस्त, अस्थहस्त, अस्थहेति, वध्योग, पुष्करसद्, अनुहरत्, कुरुकत, कुरुपञ्चाल, उदकशुद्ध, इहलोक, परलोक, सर्वलोक, सर्वपुरुष, सर्वभूमि, प्रयोग, परस्त्री, (राजपुरुषात् ष्यञि) क्षत्रनड़, आकृतिगणोयम्। तेनाभिगम, अधिभूत, अधिदेव, चतुर्विद्या, इत्यादयोऽन्येऽपि।

अनुशय पु० अनु+शीङ्–अच्। अत्यन्तद्वेषे, पश्चात्तापे, पूर्ववैरे च। अनुगतः शयं दुःखं गतिस० दुःखानुगते त्रि०। तत्र क्रीतादिपदार्थविशेषेणानुशयस्वरूपादि नारदेनोक्तम्। "क्रीत्वा मूल्येन यः पण्यं क्रेता न बहु मन्यते। क्रीतानुशय इत्येतद्विवादपदमुच्यते"। तत्र च यस्मिन्दिने पण्यं क्रीतन्तस्मिन्नेवाह्नि तद्विक्रेतं प्रत्यर्पणीयमिति तेनैवोक्तम्। "क्रीत्वा मूल्येन यत् पण्यं दुःक्रीतं मन्यते क्रयी। विक्रेतुः प्रतिदेयन्तत्तस्मिन्नेवाह्नयविचारितमिति"। द्वितीयादिदिने तु प्रत्यर्पणे विशेषस्तेनैवोक्तः। "द्वितीयेऽह्नि ददत् क्रेता मूल्यात्तिंशांशमाहरेत्। द्विगुणन्तु तृतीयेऽह्नि परतः क्रेतुरेव तदिति"। परतोऽनुशयो न कर्त्तव्य इत्यर्थः। एतच्च बीजादिव्यतिरिक्तोपभोगादिविनश्वरवस्तुविषयम्। बीजादिक्रये पुनरन्य एव प्रत्यर्पणेऽवधिरित्याह। "दशैक-

पञ्चसप्ताहमासत्रयार्द्धमासिकम् । बीजायोवाह्यरत्नस्त्री दोह्यपुंसां परीक्षणम्" । बीजं व्रीह्यादिबीजम् । अयो लौहम् । वाह्यो बलीवर्दादिः । रत्नं सुक्ताप्रवालादि । स्त्री दासी । दोह्यं महिष्यादि । पुमान् दासः । एषां बीजादीनां यथाक्रमेण दशाहादिकः परीक्षाकालो विज्ञेयः । परीक्ष्यमाणे च बीजादौ यद्यसम्यग्बुद्धाऽनुशयो भवति तदा दशाहाभ्यन्तर एव क्रयनिवृत्तिः । न पुनरर्द्धमित्युपदेशप्रयोजनम् । यत्तु मनुवचनम् । "क्रीत्वा विक्रीय वा किञ्चित् यस्येहानुशयो भवेत् । सोऽन्तर्दशाहात् तद्द्रव्यं दद्याच्चैवाददीत वेति" । तदुक्तलोहादिव्यतिरिक्तोपभोगादिविनश्वरवस्त्वल्पतरयानशयनासनादिविषयम् । सर्वं चैतदपरीक्षितक्रीतविषयम् । यत् पुनः परीक्षितञ्च पुनः प्रत्यर्पणीयमिति समयं कृत्वा क्रीतं तद्विक्रेतरि न प्रत्यर्पणीयम् तदुक्तम् । "क्रेता पण्यं परीक्षेत प्राक् स्वयं गुणदोषतः । परीक्षाभिमतं क्रीतं विक्रेतुर्न भवेत् पुनरिति" मिता० । ततश्च क्रीतस्य, विक्रीतस्य, अन्यथा वा कृतस्य वस्तुनः, असमीचीनत्वबुद्धा यः पश्चात्तापः सोऽनुशय इति बोध्यम् । "भुक्तकर्म्मणोऽवशेषे च "कृतान्वयेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवमिति" शा० सू० स्वर्गार्थकर्म्मणो भुक्तफलस्यावशेषः कश्चिदनुशयो नाम भाण्डानुसारिस्नेहवत् यथा हि स्नेहभाण्डं विरिच्यमानं न सर्वात्मना विरिच्यते भाण्डानुसार्य्येव कश्चित् स्नेहशेषोऽवतिष्ठते तथानुशयोऽपीति" भा० । "तत्र दृष्टं प्रत्यक्षं स्मृतिः सा हि सानुशयानामेवावरोहं दर्शयति यथा "तद्य इह रमणीयचरणा अभ्यासोह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रियोनिं वा वैश्ययोनिं वा अथ य इह कपूयचरणा अभ्यासोह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा शूकरयोनिं चाण्डालयोनिं वेति" । चरणशब्दे नानुशयः (शेषः) रूच्यते । दृष्टश्चायं जन्मनैव प्राणभृद्भावरूपउपभोगः प्रविभज्यमान आकस्मिकत्वासम्भवात् अनुशयसद्भावं सूचयति अभ्युदयप्रत्यवायवोः सुकृतदुष्कृतहेतुकत्वस्य सामान्यतः शास्त्रेष्वागमितत्वादिति च शा०भा० ।

अनुशयाना स्त्री अनु+शीङ्–शानच् । परकीयनायिकाभेदे । तद्विवरणं नायिकाशब्दे दृश्यम् । अनुतापकर्त्तरि त्रि० ।

अनुशयिन् पु० अनु+शीङ्–इनि । यावत्कर्म्मक्षयं चन्द्रलोके स्थित्वा सावशेषे एव कर्म्मणि पश्चात्तापान्विततया भूमिलोके जन्मग्रहणायागन्तुं प्रवर्त्तते जीवे । "यो यो ह्यत्रमत्ति अनुशयिभिः तदंशेन भावितत्वात् संस्कृतत्वाच्च संश्लिष्टरेतःसिगिति" छा०भा० । तस्य रेतःसिगाख्याः पूर्व्वसम्भूतत्वात् तद्भूमेव गर्भाशयमनुप्रविष्टोऽनुशयी रेतःसिगाख्यतिर्भवतीति आनन्द० । पश्चात्तापवति त्रि० । पुरुषस्य अनुशयत एव भुक्तभोगायाः प्रकृतेस्त्यागः श्रुतावयुक्तः । "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः । अजोह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य इति "यं संपद्य जहात्यजामनुशयी मृदुः कुलायं यथेति" भाग० ।

अनुशयी स्त्री अनुशय्यते पश्चात्तप्यतेऽस्याम् । अनु+शीङ्–अधिकरणे अच् गौरा० ङीष् । पादरोगभेदे, "हरेदनुशयीं वैद्यः क्रियया श्लेष्मविद्रधेरिति" भावप्रकाशः ।

अनुशर पु० अनुशृणाति अनु+शॄ–कर्त्तरि–अच् । राक्षसे ।

अनुशासन न० अनुशिष्यते याथार्थ्येन निरूप्यते अनु+शास–भावे ल्युट् । याथार्थ्यज्ञापने, निरूपणे, कर्त्तव्योपदेशे च । "ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति । अपह्नुते तद्द्विगुणं तन्मनोरनुशासनमिति" मनुः अनुशासनविरोधादिति हृद्वाः । करणे ल्युट् । तत्प्रतिपादके शास्त्रे यथा "अथ शब्दानुशासनम्" । "अनुशिष्यन्तेऽसाधुशब्देभ्यो विविच्य बोध्यन्तेऽनेनेति करणल्युड्न्ततया शास्त्रपदेन सामानाधिकरण्यमिति भाष्यप्रदीपोद्द्योतः । "अथशब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यमिति भाष्यम्" । "अथ योगानुशासनमिति" पातञ्जलसूत्रम् योगोऽनुशिष्यतेऽनेन तादृशं शास्त्रमधिकृतमिति तदर्थः उभयत्र अथशब्दस्याधिकारार्थत्वात्तथात्वम् "नामलिङ्गानुशासनमित्यमरः" अनुशासनं धर्म्मनिरूपणं प्रयोजनमस्य ठक् आनुशासनिकम् । महाभारतान्तर्गतानुशासनपर्व्वणि ।

अनुशासितृ त्रि० अनुशास्ति याथार्थ्येन कर्त्तव्यमुपदिशति अनु+शास–तृच् । कर्त्तव्योपदेशके । स्त्रियां ङीप् । औणा०तृन् । अनुशास्तापि तत्रार्थे त्रि० स्त्रियां ङीप् ।

अनुशासिन् त्रि० अनु+शास–णिनि । कर्त्तव्योपदेशके दण्डयितरि च "एवस्त्वनानुशासी राजेति" विक्र० ।

अनुशिष्ट त्रि० अनु+शास–कर्म्मणि क्त । कृतानुशासने, यस्य हितोपदेशः क्रियते तस्मिन्, दण्ड्यते च ।

अनुशीत अव्य० शीते विभ० अव्ययी० । शीते इत्यर्थे, परिसमा० भवादौ आ । आनुशीत्यः तद्भवादौ त्रि० ।

अनुशीलन न० अनुक्षणं शीलनं प्रा०स० । सतताभ्यासे अनुक्षणाचरणे "आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमेति" भक्तिरसा० कृष्णस्य तद्गुणकीर्त्तनस्यानुशीलनं तदर्थः ।

अनुशोक पु० अनु+शुच-घञ्। पश्चाच्छोके अनुशोचने।

अनुशोचन न० अनु+शुच-ल्युट्। अनुशोके। "इष्टं दत्तमधीतं वा विनश्यत्यनुकीर्त्तनात्। ज्ञायानुशोचनाभ्यां च भस्मतेजो विभिद्यते" इति शु०त० देवलः। अनुशोचनं धनव्ययेन पश्चात्ताप इति रघुनन्दनः। स्वार्थे णिचि युच्। अनुशोचना तत्रैवार्थे स्त्री।

अनुशोचनीय त्रि० अनुशुच्यते अनु+शुच-कर्म्मणि अनीयर्। अनुशोचनार्हे यमुद्दिश्य शोक क्रियते तस्मिन्।

अनुशो(शु)चित न० अनु+शुच-भावे क्त उदुपधत्वात् वा न कित्त्वम्। अनुशोचने। अनुशोचितुमारब्धः आरम्भार्थे क्त वा शुचः। कृतशोचनारम्भे त्रि०।

अनुश्लोक न० अनुश्लोक्यते गीयते अनु+श्लोक-कर्म्मणि अच्। महाव्रते गेये सामभेदे, "श्लोकेन स्तुवते पुरस्तात् सदसः, अनुश्लोकेन पश्चादिति" ता०ब्रा०। तच्च वेगानप्रन्थे ११२ प्रपा० आद्यम् साम। [नुपक्ता" इति सि०कौ०।

अनुषक्त त्रि० अनु+सञ्ज-क्त। संलग्ने। "येऽत्र नकारा-

अनुषङ्ग पु० अनु+सञ्ज-घञ्। दयायां दयया हि अन्यदुःखेनान्यदुःखसम्बन्धात्तथात्वम्। प्रसङ्गे, प्रसङ्गश्च अन्योद्देशेन प्रवृत्तस्य तद्व्यावर्त्तकविधयान्यसिद्धिः यथा "विप्रबधप्रायश्चित्तेन तद्व्यावर्त्तकविधया अवगोरदन्तनिपातनप्रायश्चित्तसिद्धिः। "अयं कैश्चिदपाक्तस्य दुरितस्य प्रवक्षते। अनुत्पत्तिं तथाचान्ये प्रत्यवायस्य मन्यते। नित्यक्रियां तथाचान्ये ह्यनुषङ्गफलां स्तुतिमिति" प्रा०त० आप०सू०। अनुषङ्गेण फलं यस्या इति तदर्थः। एकस्य वाक्ये श्रुतस्य शब्दस्यान्यत्र वाक्येऽन्वयार्थमाकर्षणे। यथा "नित्यक्रियां तथा चान्ये" इति वाक्ये पूर्ववाक्योपात्तस्य मन्यते इति क्रियापदस्यान्वयार्थमाकर्षणम्। तथा पञ्चावयवन्यायवाक्येषु उपनयवाक्यस्थस्य अयमिति पदस्य निगमनवाक्येऽन्वयार्थमाकर्षणम्। यथा वह्निव्याप्यो धूमो धूमवांश्चायमिति उपनयवाक्यस्थस्य अयमिति शब्दस्य तस्माद्वह्निमानिति वाक्येऽन्वेन अयं वह्निमानिति बोधः। अतएव शास्त्रकारैः पूर्वत्र श्रुतशब्दस्योत्तरत्रानुकर्षणबोधनाय एतत्पदमनुषङ्गनीयमित्युक्तम्।

अनुषङ्गिन् त्रि० अनुषङ्गं सजते अनु+सञ्ज घिनुण्। अनुषङ्गं प्रसक्ते। "सप्तकस्यास्य वर्गस्य सर्वत्रैवानुषङ्गिणः। पूर्वं पूर्वं गुरुतरं विद्याद्व्यसनमात्मनः" इति मनुः। अनुषङ्गिणः प्रादेशावस्थितस्येति" कुल्लू०। व्यापके च। "विभुतानुषङ्गि भवमेति जन इति "किरा० विभुतायाः प्रभुत्वस्यानुषङ्गि व्यापकमिति" तट्टीकायां मल्लिनाथः।

अनुषट् अव्य० अनु+सनज-क्विप्। आनुपूर्व्ये। "स्वरादेराकृतिगणत्वादयं तद्गणीयः" इति मनो०। षट्० दीर्घः। आनुपूर्व्यार्थे अव्य०।

अनुसिक्त त्रि० अनु+सिच-क्त। सततसिक्ते पश्चात्सिक्ते च।

अनुसेचन न० अनु+सिच-भावे ल्युट्। अनुक्षणसेचने, पश्चात्सेचने च।

अनुस्तुति स्त्री अनु+स्तु-क्तिन्। अनुक्रमेण स्तुतौ "यः पूर्व्वमनुस्तुतिमीशे इति ऋ० ८,६८, अनुस्तुतिम् अनुक्रमेण क्रियमाणां स्तुतिमिति भाष्यम्।

अनुष्टुब्गर्भा स्त्री ङीप्। "आद्यः पञ्चाक्षरः" पादः उत्तरेऽष्टाक्षरात्मकः अनुष्टुब्गर्भैव सोष्णिक्त्रैलुक्कलक्षणे छन्दोभेदे। "आद्यः पञ्चकलयोऽष्टका अनुष्टुब्गर्भा" इति का०सर्वा०

अनुषण्ड अव्य० षण्ड पञ्चत्वमूहस्तत्र विभ० अव्ययी०। षण्डे इत्यर्थे। तत्र जातादि कच्छादि० अण्। आनुषण्डस्तज्जाते त्रि०।

अनुष्टुभ् स्त्री अनु+स्तुभ-क्विप् षत्वम्। सरस्वत्याम्, अष्टाक्षरपादके, छन्दोभेदे वाचि च। अनुष्टुप्छन्द इति य० १५,५, "अनु निरन्तरं स्तुभ्यतेऽनया अनुष्टुप् वाक्" वागेव संस्तुप् छन्दः "वागनुष्टुप् छन्द" इति श्रुतेरिति" वेददी०। "अनुष्टोभनादनुष्टुबिति" ब्राह्मणे निरुक्तिः। "गायत्युष्णिगनुष्टुप् चेति इक्ष०। अनुष्टुप् च द्विविधा यथा कथञ्चिदष्टाक्षरपादिका जातिः, विशेषसन्निवेशयुक्ताक्षरकं छन्दश्च। तस्य जातेः २५६ भेदाः। "पञ्चमं लघु सर्व्वत्र सप्तमं द्विचतुर्थयोः। गुरु षष्ठञ्च पादानां शेषेष्वनियमो मत" इति छन्दोमञ्जर्य्युक्तलक्षणं द्वितीयम्। तस्य च पञ्चमलघुत्वं व्यभिचरति च "यियज्ञमाणेनाहृत" इति माघः। तस्य च मात्राद्यक्तरूपत्वं यथा 'प्रयोगे प्रायिकं प्राहुः कोऽप्येतद्वक्तलक्षणम्। लोकेऽनुष्टुबिति ख्यातम् तस्याष्टाक्षरता श्रुतेति छन्दोम०। अतएव वृत्तरत्नाकरे "वक्त्रं नाद्याक्षरौ स्वामन्द्यौऽनुष्टुभि ख्यातमिति" वक्त्रनामतोक्ता। वर्णवृत्तस्य तु वितानमिति नाम यथोक्तं वृत्तरत्नाकरे "वितानमाभ्यां यदन्यदिति।" आभ्यां समानिकाप्रमाणिकाभ्यामन्यत् सर्वमित्यर्थः। "अथ छन्दांसि गायत्युष्णिगनुष्टुबृहतीपङ्क्तित्रिष्टुब्जगत्यक्षरादीनि चतुरुत्तराणि, जनाधिकेनैकेन निचृद्भूरिजौ, ह्राभ्यां विराट्स्वराजौ, पादपूरणार्थं तु छिन्नसंयोगैकाक्षरीभावात् व्यूहेदिति "अनादेशेऽष्टाक्षराः पादाश्चतुष्पदार्च इति

तृतीयमनुष्टुभिति" च काला० सर्वानुक्र० "शुचिमनुष्णिहा प्राथमनुष्टुभेति" यजु० ।

अनुष्ठ त्रि० अनुक्रमेण तिष्ठति अनु+स्था-क षत्वम् । अनुक्रमेण स्थातरि "क्षिता विश्वा अनुष्ठा प्रवणेषु जिघ्नते इति ऋ० १,५४,१०, अनुष्ठाः अनुक्रमेण तिष्ठन्तीति भाष्यम् । भावे अङ् टाप् । अनुष्ठाने स्त्री ।

अनुष्ठातृ त्रि० अनु+स्था-तृच् स्त्रियां ङीप् । विधानकर्त्तरि "शास्त्रदेशितं फलमनुष्ठातरीति" न्यायवाक्यम् ।

अनुष्ठान न० अनु+स्था-भावे ल्युट् षत्वम् । विहितकर्म्मादिकरणे। अलब्धलाभादिकमभिधाय "एतच्चतुर्विधं विद्यात् पुरुषार्थप्रयोजनम् । अस्य नित्यमनुष्ठानं सम्यक् कुर्य्यादतन्द्रित" इति मनुराह स "उपरुध्यते तपोऽनुष्ठानम्" शकु० ।

अनुष्ठित त्रि० अनु+स्था-कर्म्मणि क्त । विधानेन कृते धर्म्मशास्त्रादौ "अस्माभिर्यदनुष्ठेयं गन्धर्वैस्तदनुष्ठितमिति" भा० व० प० ।

अनुष्ठु अव्य० अनु+स्था-कु । सम्यगित्यर्थे "पार्थिवानास्कृतं प्रासासहिदधावनुष्टु इति ऋ० १,६५,२, अनुष्टु इत्येतदव्ययं सम्यक्समानार्थं सुष्ठु यथेति भा० ।

अनुष्ठेय त्रि० अनु+स्था-कर्म्मणि यत् । विधेये । "अस्माभिर्यदनुष्ठेयं गन्धर्वैस्तदनुष्ठितमिति" भा० व० प० ।

अनुष्ण त्रि० न उष्णः न० त० । उष्णभिन्ने शीतपदार्थे "अनुष्णाभिरफेनाभिरद्भिस्तोयेन धर्मवित्" इति मनुः । न उष्णः विरोधे न० त० । अजले । अजलो हि शीतबाधाभावेऽपि शीतबाधामभिनयन् कर्त्तव्यकर्म्मणि जड़ इव भवति दक्षस्तु शीतेऽपि तदगणयित्वा कर्त्तव्यकरणाय अजड़ इव सन् व्याप्रियते इति तयोरुष्णानुष्णता । अत्र कारिषार्थे कनि अनुष्णकोऽपि । उत्तमे न० । उष्णभिन्ने शीतले स्पर्शे पु० "अनुष्णाशीतपाकज" इति भाषा० । अनुष्णः स्पर्शश्च पृथिवीसमीरणयोः, तयोरौष्ण्योपलब्धिषु तेजःसंयोगविशेषादिति बोध्यम् ।

अनुष्णगु पु० अनुष्णाः शीतला गावः किरणाः यस्य । चन्द्रे अनुष्णकिरणादयोऽप्यत्र पु० ।

अनुष्णवल्लिका स्त्री अनुष्णा शीतला वल्लीव इवार्थे कनि टापि अत इत्त्वम् । नोलदूर्व्वायाम् ।

अनुसंवत्सर अव्य० संवत्सरे विभक्ति० वीप्सायां वा अव्ययी० । वत्सरे इत्यर्थे, प्रतिवर्षे च । तत्र भवादौ ठञ् अनुसर्यतिका० उभवपदवृद्धिः । आनुसांवत्सरिकः प्रतिवर्षभवे त्रि० ।

अनुसंवरण न० अनु+सम्+वृ-ल्युट् । अनुक्रमेण गोपने । अनुसंवरणाय हितम् ठण् अनुसर्यतिका० द्विपदवृद्धिः । आनुसांवरणिकः तद्ववादौ त्रि० ।

अनुसंहित त्रि० अनु+सम्+धा-कर्म्मणि क्त । कृतानुसन्धाने यज्ञ ज्ञानार्थमन्वेषणादिकम् क्रियते तस्मिन् । संहितायां विभ० अव्ययी० । संहितायामित्यर्थे । "अर्थैक्ये प्राङ्नरनुसंहितमिति ऋग्वेदप्रातिशाख्यम् ।

अनुसन्तति स्त्री अनुक्रमेण सन्ततिः । अविच्छेदधारायाम् "अनुसन्ततिपातिनः पटुत्वमिति" माघः ।

अनुसन्धान न० अनु+सम्+धाञ्-ल्युट् । अन्वेषणे, चिन्तने च

अनुसन्धेय त्रि० अनु+सम्+धा कर्म्मणि अर्हार्थे वा यत् । अनुसन्धातुं योग्ये, अनुसन्धातव्ये च ।

अनुसर त्रि० अनुसरति पश्चाद् गच्छति । अनु+सृ-ट स्त्रियां ङीप् । अनुचरे, सहगन्तरि च ।

अनुसरण न० अनु+सृ-ल्युट् । अनुगमने, सदृशीकरणे च ।

अनुसवन अव्य० सवनस्य पश्चात् अव्ययी० । सवनस्य (स्नानस्य) पश्चात् सवने, "अनुसवनमेनमालभेरन्निति का० २५,१२, २६, एनं ज्वराद्यभिभूतं दीक्षितं सर्व्वे ऋत्विजः सवनान्तेषु स्नुग्भेषुरिति तद्व्याख्या ।

अनुसाय अव्य० साये विभ० अव्ययी० । सायाह्ने इत्यर्थे तत्रभवः पारिषद्या० अ । आनुसायः तत्रभवे त्रि० ।

अनुसार पु० अनु+सृ-घञ् । अनुसरणे, "धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः" इति या० स्मृतिः । "स्मृत्यनुसारादधिका व्यतिरिक्ता न सिध्यतीति" मनुः ।

अनुसारणा स्त्री अनु+सृ+णिच्-युच् सारणा अनुगत्य सारणा चालना । अनुधावने, अपसारणायाम्, भीतिहेतोरनुधावने हि भीतस्य चालना भवतीति तस्य सारणाहेतुत्वम् "तस्मात् पलायमानानां कुर्य्यात्तत्यनुसारणाम्" भा० शा० प० ।

अनुसारिन् त्रि० अनुसरति पश्चाद् गच्छति अनु+सृ-णिनि । अनुगन्तरि । "कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके । मृगानुसारिणं साक्षात् पश्यामीव पिनाकिन" मिति शकु० । "यदा यदा मतां हानिर्वेदमार्गानुसारिणामिति" पुरा० ।

अनुसूया स्त्री अनुसूयते अनु+सूय-क्यप् । शकुन्तलासहचरीभेदे शकु० । अनुसूयेत्येके ।

अनुसृति स्त्री अनु+सृ-क्तिन् । अनुसरणे । अनुसरति कुलान्तरं कर्त्तरि संज्ञायां क्तिच् । कुलटायां स्त्रियां, स्त्री । तस्याः अपत्यं मतान्तरे कल्याणादि० ढक् इनङ् च । आनुसृतिनेयः तदपत्ये पु० स्त्री० ।

अनुसृष्टि स्त्री अनु+सृज-क्तिन् । अनुसर्जने । कर्त्तरि संज्ञायां

क्लिच् । प्रत्यत्पन्नमतौ स्त्रियां स्त्री । तस्याः अपत्यम् कल्याण्यादि० ढक् इनङ् च । आनुरुद्धिनेयः तदपत्ये पु०स्त्री० ।

अनुसेविन् त्रि० अनुक्षणं सेवते अनु+सेव–णिनि स्त्रियां ङीप् । सततसेविनि "क्रूरकर्म्मानुसेविनीमिति" रामा० ।

अनुस्तरण त्रि० अनुस्तीर्य्यते अनु+स्तृ–करणे ल्युट् । आच्छादने चर्म्मादौ स्त्रियां ङीप् । "अनुस्तरणा वपासत्खिद्य गिरोसुखं प्रच्छादयेदिति" ता० ब्रा० । तत्साधने स्त्रीगव्यां स्त्री । "अनुस्तरणीं गामजां वैकवर्णां कृष्णामेके सव्ये वाहौ बध्नीते" श्रुतिः । "सेयं गौः स्तृतं दीक्षितमनुस्तृतत्वाद्वांछितत्वाच्चानुस्तरणीत्युच्यते" इति तद्विवरणब्राह्मणम् । अनुतीर्य्यते वैतरणी नदी अनया अनु+तॄ–करणे ल्युट् षृ० रुट् । वैतरणीनद्युत्तारिकायां गवि स्त्री । "तस्मात् पुरुषाय पुरुषानुत्तरणी क्रियते इति" श्रुतिः ।

अनुस्मृति स्त्री अनु+स्मृ–क्तिन् । अनुरूपचिन्तने आलम्बनसदृशतया चिन्तने "अनुस्मृतेर्बादरिरिति" शा०सू० । प्रादेशमात्रत्वेन अयम् (परमेश्वरः) अप्रादेशमात्रोऽप्यनुस्मरणीयः प्रादेशमात्रप्रत्ययवत्त्वाय । एवमनुस्मृतिनिमित्ता परमेश्वरे प्रादेशमात्रश्रुतिरिति बादरिराचार्य्योमन्यते इति भा० । "प्रादेशमात्रोऽह्यपरोऽपि दृष्ट इत्यादौ श्रुत्यौ प्रादेशमात्रत्वमनुस्मृत्यर्थमित्यत्र तत्तात्पर्य्यम् ।

अनुस्यूत त्रि० अनु+सिव–क्त ऊट् । ग्रथिते, सततसंबन्धे च । "सूत्रसूत्रवत् सर्व्वानुस्यूतेति" ति०त०रघुनन्दनः ।

अनुसमाहार पु० अनु+सम्+आ+हृ–घञ् । अनुसन्धाने "अनुसमाहरतीत्यस्यानुसन्धत्ते" इति भाष्ये व्याख्यानात्तथात्वम् ।

अनुस्वार पु०सृ–क्वप् उदात्तादिस्वरवत्त्वात् स्वराः स्वरवर्णा एव स्वाराः अनुगतः स्वारान् अत्वा० स० । स्वराश्रयेण उच्चार्य्यमाणे बिन्दुरेखया व्यज्यमानेऽनुनासिके वर्णभेदे । "अनुस्वारो विसर्गश्च"त्यपकृष्य "आश्रयस्थानभागिन" इत्युक्तेस्तस्य तथात्वम् । सानुस्वारो विसर्गी च दीर्घश्चैव गुरुर्भवेत् छन्दोम० । "अनुस्वारो विसर्गश्च +कंपौ चापि पराश्रितौ । अयोगवाहा विज्ञेया आश्रयस्थानभागिन" इति शिक्षा ।

अनुहरण न० अनु+हृ–ल्युट् । देशभाषाचेष्टादिना सदृशीकरणे, सादृश्यधर्म्मादिष्करणे च ।

अनुहार पु० अनु+हृ–घञ् । अनुकरणे पश्चाद्धरणे च ।

अनुहार्य्य त्रि० अनु+हृ–ण्यत् । सदृशीकार्य्ये ।

अनुहृत त्रि० अनु+हृ–क्त । अनुकृते सदृशीकृते ।

अनुहोड त्रि० होडे विभक्ति० अव्ययी० । होडे इत्यर्थे । तत्र भवादौ ठक् अनुशतिका० द्विपदर्द्धिः । आनुहोडिकः । होडभवे त्रि० ।

अनूक पु० अनु+उच–समवाये क नि० कुत्वम् । गतजन्मनि । सुशीले न० । वहुप्राधारे पृष्ठास्थिभेदे पु० । यत्र ग्रीर्ष्णोऽवद्यति नांसयोर्नानूकस्य नापरस्कृष्ययोरिति" शत० ३,८,३,२७, भाष्यकृता तथैव व्याख्यातम् । चयनसाधने यज्ञिये इष्टकोपधायकपात्रभेदे न० । "अयुग्मागण्यमध्यमानूके" इति कात्या० १६,७,२२। अयुग्मो य इष्टका गण्यः तासां मध्यमाऽनूके उपधेया इति । "एका च" कात्या० १६,७,२३। यावत्येकेष्टका साध्यनूक एव । "अभितो युग्माः २४, अनूकमभितो युग्मा अर्द्धाङ्किका इति तद्भा०। "साध्यमनूकं वक्ष्यादिति" इष्टकाचितोक्ते पुरुषलक्षणभेदे न०।

अनूकाश पु० अनु+काश–घञ् उप० दीर्घः । अधस्तनदेहादिप्रकाशे "प्रकाशेनान्तरमनूकाशेन वाहृमिति" य० २५,२ "अनूकाशेनाधस्तनदेहकान्त्येति" वेददीपः ।

अनूचान पु० अनु+वच–कान नि० । शिक्षादिषड्वङ्गसहितवेदाध्ययनकारिणि, वेदार्थानुवचनसमर्थे च । "इदमूचुरनूचानाः प्रीतिकण्टकितत्वच" इति कुमा० "सङ्ग ह्यादशवर्षं उपेत्य चतुर्विंशतिवर्षः सर्व्वान् वेदानधीत्य सङ्कामना अनूचानमानी स्तब्ध एयाय" छा० उप० । "बालाकिर्ह्यनूचानमना आसेति" छा० उ० ।

अनूच्य त्रि० अनूच्यते अनु+वच–क्यप् । अनुवाच्ये पाठे "पश्चादरण्येऽनूच्यमिति" "विमुखेनारण्येऽनूच्यमिति" च का० १८,४२०,२४ ।

अनूढ त्रि० अनु+वह–क्त । अविवाहिते । "परिवेत्तानुजोऽनूढे ज्येष्ठे दारपरिग्रहा"दित्यमरः । स्त्रियां ङीप् ।

अनूति स्त्री वे–क्तिन् अभावे न०त० । गमनाभावे । "अस्तूती अनूती क्षिरिणिप्रःसत्या" इति ऋ० ६,२६,६ । "अनत्वा अनागमनेनेति" भा० ।

अनूदित त्रि० अनु+वद–क्त । यस्य तुल्यार्थकभाषान्तरेणानुवादः कृतः, तस्मिन् पदार्थे अनुवादविषये च ।

अनूद्य अव्य० अनु+वद–ल्यप् । अनुवादं कृत्वेत्यर्थे । अनु+वद–क्यप् । अनूद्ये अनुवादार्हे ।

अनून त्रि०न ऊनः न०त० । परिपूर्णे, समग्रे, अक्षीणे च । "अनूपराजस्य गुणैरनूनामिति" रघुः । नूनं निश्चितं न० त० । अनिश्चिते । स्वार्थे कन् तत्रैवार्थे ।

अनूप त्रि० अनुगता आपो यत्र ७त० अच्समा० अतउत्त्वम्। जलप्राये स्थाने। "शकटः शाकिनी गावो जालमस्यन्दनं वनम्। अनूपं पशवो राजा दुर्भिक्षे नव दत्तय" इति आह्नि० त० ज्ञागलेयः। तत्स्थले सर्व्वदावासिनि मह्षिये पु०। "बङ्गस्यूर्वंडहजस्य वातस्तेनामयान्वितः। देशोऽनूप इति ख्यात" इत्युक्ते "अनूपसर" इति प्रसिद्धे देशभेदे पु०। "अनूपराजस्य गुणैरनूनामिति" रघुः।

अनूपज न० अनूपे जलप्राये देशे जायते जन-ड ७त०। (आदा) इति ख्याते आर्द्रके, तस्य जलप्रायोद्भवत्वात्तथात्वम्। तत्स्थानजातमात्रे त्रि०।

अनूप्य त्रि० अनूपदेशे भवः यत्। अनुगतजलदेशभवे "शत्र आपो धन्वन्याः शमनः सन्वनूया" इति स्तानमन्त्रः।

अनूबन्ध्य त्रि० अनु+बन्ध-ण्यत् उपस० दीर्घः। बधार्थं बन्धनीये वत्सिये पशौ, "यशमनूबन्ध्यामालभेत" इति यत० २,४,४,१४, "अनुबन्ध्ययेदेति" आश्व०। [याजार्थे।

अनूयाज पु० अनु+यज घञ् उपसर्गस्य वा दीर्घः। अनु-

अनूरु पु० न स्त ऊरू यस्य ब०। सूर्य्यसारथौ विनताज्येष्ठपुत्रे अरुणे। तस्य अपूर्णे एव गर्भे माता अण्डस्य स्फोटनादूरुप्रभृत्यङ्गविकलत्वम् तत्कथा भा०आदिप०। यथा "ततः पुत्रार्थिनी देवी व्रीड़िता च तपस्विनी। अण्डं विभेद विनता तत्र पुत्रमपश्यत। पूर्व्वार्द्धकायसम्पन्नमितरेणाप्रकायता। स पुत्रः क्रोधसंरब्धः शशापैनामिति श्रुतिः। योऽहमेवं कृतो मातस्त्वया लोभपरीतया। शरीरेणासमग्रेण तस्माद्दासी भविष्यसि। पञ्चवर्षशतान्यस्या यदा विप्रकृते सह। एष च त्वां सुतो मातर्दासीत्वान्मोचयिष्यति। यद्येनमपि मातस्त्वं मामिवाण्डविभेदनात्। न करिष्यसनङ्गं वा व्यङ्गं वापि यशस्विनम्। प्रतिपालयितव्यस्ते जन्मकालोऽस्य धीरया। विशिष्टं बलमीक्षन्त्या पञ्चवर्षशतात्परः। एवं शप्त्वा ततः पुत्रो विनतामनरोचगः। अरुणो दृश्यते ब्रह्मन् प्रभातसमये सदा। आदित्यरथमध्यास्ते सारथ्यं ममकल्पयदिति"। 'गतं तिरश्चीनमनूरुसारथेरिति" माघः। [तत्कथाऽनुपदमुक्ता।

अनूरुसारथि पु० अनूरुः सारथिः रथनियन्ता यस्य। सूर्य्ये

अनूराध त्रि० अनु+राध-घञ् उपस०दी०। अनुराधनीये "इन्द्रं वयमनूराधं हवामहे" इति अथ० १९,१५,२।

अनृच पु० नास्ति अध्यक्षतया ऋक् यस्य अच् समासान्तः। ऋक्शूचे अनुपनीते बालके। "अनृचवह्नृचावध्येतव्यौ वेति" सि०कौ०। "यथा चान्धेऽफलं दानं तथा विप्रोऽनृचो ऽफलः" मनुः। "अनृचः अनधीयान इति" कुल्लू०। "अनृचो माणवक इति" कुमारबोधम्। समासान्तविधेरनित्यत्वात् क्वचित् न अच्। "तेन सहस्रं हि सहस्राणामनृचां यत्र भुञ्जते इति" "तथानृचे हविर्दत्त्वा न दाता लभते फलमिति" च मनुः। समासान्तपक्षे अनृचे इति विवक्षया सप्तमी, तदभावपक्षे चतुर्थीति भेदः। अध्येतरीत्युक्तेः "अनृक् सामेति" सि०कौ०। अजभावपक्षे विभाषया कप्। अनृकः ऋक्शून्ये त्रि०।

अनृजु त्रि० न ऋजुः। शठे वक्रे कुटिले च। "न वाणिपाद चपलो न नेत्रचपलोऽनृजुः" इति मनुः। "या भ्रातृव्ये अनृजोर्ऋणमिति" ऋ०४,२,१२। "सन्नात् पापादृज्वनृजू व्यर्थार्थस्यौ यदा तदा। कर्त्तरी नाम सा शक्तिर्या मृत्युदारिद्र्यशोकदेति" सङ्क्षिप्तचि०। ऋजुमार्गगामी पूर्व्वगतिः, अनृजुः वक्री पश्चादुगतिरिति तदर्थः।

अनृण त्रि० न ऋणं यस्य। ऋणशून्ये। ऋणञ्च अवश्यदेयम् तच्च उत्तमर्णाय दातव्यत्वेन स्वीकृतं धनम्। तच्चावश्यं शोध्यं तदशोधने "ऋणानामनपक्रियेत्युक्तेरुपपातकं भवति। अवश्यशोध्यत्वेन तत्सदृशम् वेदाध्ययनादिकमपि ऋणशब्देन व्यवह्रियते "जायमानो वै पुरुषस्त्रिभिर्ऋणैर्ऋणी भवति ब्राह्मणेन ऋषिभ्यः, यज्ञेन देवेभ्यः प्रजया पितृभ्य" इति श्रुतिः एवञ्च वेदाध्ययनादिना ऋष्यादीनामृणशोधने अनृणो भवतीति स्मृत्यादौ प्रसिद्धम्। एवञ्च "ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेदिति" ऋणशून्यस्यैव मोक्षाधिकारः। अतएव मनुना "दशलक्षणकं धर्ममनुतिष्ठन् समाहितः। वेदान्तं विधिवच्छ्रुत्वा संन्यसेदनृणो द्विज" इति अनृणस्यैव संन्यासोऽभिहितः। "ऋणेन जातमात्रेण पुत्री भवति मानवः। पितृणामनृणश्चैव स तस्मात् सर्व्वमर्हतीति" मनुः। "एष वा अनृणः यः पुत्रीति" श्रुतिः। कृतोपकारस्य प्रत्युपकारोऽपि ऋणत्वेन स्वीक्रियते। तदभिप्रायेणैव "प्राणैर्दारधनैर्मित्रैरनृणं कण्ठवर्त्तिभिरिति" रघौ वर्णितम्।

अनृणिन् त्रि० न ऋणी स्त्रियां ङीप्। ऋणिभिन्ने "दिवस्याष्टमे भागे शाकं पचति यो नरः। अनृणी चाप्रवासी च स वारिचर! मोदते, इति भा०व०प०। "एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत्। पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा सोऽनृणी भवेदिति" पु०।

अनृत न० न ऋतम्। सत्यभिन्ने मिथ्याभूते। "यद्दाक्षमभिद्रोह यद्वा शेष उतानृतमिति" ऋ० १,२३,२२। "प्रियञ्च

नान्तं ब्रूयादेष धर्मः सनातन" इति मनुना मिथ्याभूतं प्रियवाक्यमपि निषिद्धं तत्र साक्ष्यनृतभाषणस्यातीवनिन्द्यता यथा "यावतो बान्धवान् यस्मिन् हन्ति साक्ष्येऽनृतं वदन्" इति" "एषामन्यतमे स्थाने यः साक्ष्यमनृतं वदेदिति" च मनुः। "ये च पापकृतां लोका महापातकिनां तथा। अग्निदानाच्च ये लोकाः ये च स्त्रीबालघातिनाम्। स तान् सर्व्वानवाप्नोति यः साक्ष्यमनृतं वदेदिति" या०। "ब्रूहि साक्षिन्! यथातत्त्वं लम्बन्ते पितरस्तव। तव वाक्यसदोचैव वसून्पतन्ति पतन्ति च॥ नग्नो मुण्डः कपाली च भिक्षार्थी क्षुत्पिपासितः। अन्धश्चलुकले गच्छेद् यस्तु साक्ष्यनृतं वदेत्॥ पञ्च कन्यानृते हन्ति दश हन्ति गवानृते। शतमश्वानृते हन्ति, सहस्रं पुरुषानृते॥ वशि०स०। क्वचिद्विषये तदपवादः। "वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेदिति" या०। "प्राणात्यये सर्व्वधनापहारे विप्रस्य चार्थे ह्यनृतं वदेच्च। विवाहकाले रतिसंप्रयोगे पञ्चानृतान्याहुरपातकानि भा०क०प०। क्षत्रियकर्मणि न०मे०।

अनृतक त्रि० अनृते प्रसृतः कन्। असत्यकथनरते "लुब्धा अनृतकाश्चैव तिष्ठे जायन्ति भारत"! भा० भी०प०।

अनृतवादिन् त्रि० अनृतं वदति वद-णिनि। मिथ्यावादिनि

अनृतु पु० न ऋतुः वर्षादिकालः। स्वस्वयोग्यवर्षर्त्तुभिन्ने काले "तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने" इति मनुः। नास्ति ऋतुः स्त्रीपुष्पविकारो यस्मिन् काले। स्त्रीपुष्पविकारशून्ये काले पु०। "अनृतावृतुकाले च मन्त्रसंस्कारकृत् पतिरिति" मनुः।

अनृशंस त्रि० न नृशंसः विरोधे न०त०। अहिंसे दयालौ। तस्य भावः युवादि० अण् आनृशंस्यम्, ब्राह्मणा०ष्यञ् आनृशंस्यञ्च दयायाम्।

अनेक त्रि० न एकः एकभिन्नतया उत्सर्गतः बहुवचनान्तता। बहुसंख्यकेषु। "अनेकानि सहस्राणि कौमारब्रह्मचारिणा" मिति मनुः। "पतन्त्यनेके जलधेरिवोर्म्मयः" इति माघः "अनेके सेवन्ते भवदधिकगोर्वाणनिवहानिति" श्यामाख्योक्तम्। एकशब्दस्य सर्व्वनामत्वेन नञ्तत्पुरुषे तद्भिन्नवाचकतया गौणत्वेऽपि अतच्छब्दवत् सर्व्वनामकार्य्यं तेन अनेके इति, अनेकेषामिति, अनेकस्मिन्नित्यादि। एवञ्च एकशब्दस्य समाहारद्विगुत्वनिषेधादनेकशब्दस्य बहुसंख्यावाचकत्वेऽपि न समाहारः। तेन अनेकराजन्यशब्दस्य बहुव्रीहिमिति किरा० समाहारे अनेकराजन्यशब्दोऽपीति स्यात्। "यत्रानेकविधमान्नर्य्यं तत्र स्यानत आनर्य्यं बलीय इति" परिभा० सि०कौ०। "अनेकपिटकानान्तु पिटतो भागकल्पनेति" याज्ञ०। "अनेकबाह्वुदरवक्त्रनेत्रमिति" "अनेकजन्मसंसिद्धस्ततो याति परां गतिमिति" च गीता नास्ति एकः "द्व्येकयोर्द्विवचनैकवचने" इतिवत् एकत्वं यत्रेति बहुव्रीहौ अनेकशब्दस्य एकवचनान्तताधीष्यते। "अनेकमन्यपदार्थे" इति पा०सू०। "आकाशमेकं हि यथा घटादिषु पृथग्भवेत् "तथात्मैकोऽप्यनेकस्थेति" याज्ञ०। "अनेकमाश्रितं लिङ्गमिति" सा०का०। "एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा। साधारणे सङ्ख्येऽल्पे संख्यायाञ्च प्रयुज्यते" इत्युक्तेष्वर्थेषु एकशब्दस्य इत्तेः तदुक्तार्थभिन्ने त्रि०। तत्र च संख्यान्यर्थे एव बहुवचनान्तत्वन्यत्र यथेष्टमिति मनो०। उत्करादि० भवार्थे ढक्। अनेकीयः तद्भवे त्रि०। भावे ब्राह्मण० ष्यञ्। अनैक्यं बहुत्वे न०।

अनेकज पु० अनेकवारं जायते जन-ड इत्तौ संख्यावाचकस्य सुजर्थता। द्विवारं जाते पक्षिणि, तस्य गर्भाण्डाभ्यां जातत्वेन द्विवारजाततया द्विजत्वादनेकजत्वम्। ५त०। बहुभ्यो जाते त्रि०।

अनेकधा अव्य० अनेक+प्रकारे धाच्। बहुप्रकारे "अनेकधा कृताः पुत्रा ऋषिभिर्ये पुरातनैरिति" स्मृतिः। "तत्रैकस्थं जगत् कृत्स्नं प्रविभक्तमनेकधेति" गीता।

अनेकप पु० अनेकाभ्यां सङ्खशुण्डाभ्यां पिबति पा-क। द्विपे हस्तिनि। "मालवनाथोऽप्यनेकानेकपयूथसनाथः" द०कु०।

अनेकमूर्त्ति पु० अनेका लोकानामनुग्रहाय अवतारेषु नानाविधा मूर्त्तयोऽस्य। परमेश्वरे "अनेकमूर्त्तिरव्यक्त" इति विष्णुसह०।

अनेकरूप पु० अनेकानि रूपाण्यस्य। बहुरूपे परमेश्वरे "रूपं रूपं प्रतिरूपो बभूवेति" श्रुतौ तस्य बहुरूपत्वोक्तेस्तथात्वम्। नानाविधरूपयुक्तभावे पटादौ त्रि०।

अनेकलोचन पु० अनेकानि लोचनानि यस्य। इन्द्रे, परमेश्वरे च "सहस्राक्षः सहस्रपादिति" श्रुतौ अनेकबाह्वुदरवक्त्रनेत्रमिति" गीतायाञ्च तस्य अनेकनेत्रत्वोक्तेस्तथात्वम्

अनेकवर्णसमीकरण न० अनेकवर्णाः अज्ञातविशेषसंख्यकानेकराशयः समीक्रियन्ते ज्ञातसंख्यकसमतया क्रियन्ते यत्र। बीजभेदे यथोक्तं भास्करबीजगणिते "अथानेकवर्णसमीकरणं बीजम्। तत्र रूपं सार्द्धत्रितयम्।" "आद्यं वर्णं शोधयेदन्यपक्षादन्यान् रूपाण्यन्यतश्चाद्यभक्तौ। पक्षेऽन्यस्मिन्नाद्यवर्णोन्मितिः स्याद्वर्णस्यैकस्योन्मितीनां बहुत्वे॥ समीकृत-

च्छेदगमे तु ताभ्यस्तदन्यवर्णोन्नितयः प्रसाध्याः । अन्योन्नितौ कृदुविधेर्गुणाप्तौ ते भाज्यतद्भाजकवर्णमाने ॥ अन्येऽपि भाज्ये यदि सन्ति वर्णास्तन्मानमिदं परिकल्प्य साध्यम् । विलोमकोत्थापनतोऽन्यवर्णमानानि भिन्नं यदि मानमेवम् ॥ भूयः कार्य्यः कृदुको ऽत्रान्यवर्णं तेनोत्थाप्योत्थापवेद्यस्तमानात्" । "इदमनेकवर्णसमीकरणं बीजं यत्रोदाहरणे द्वित्र्यादयोऽव्यक्तराशयो भवन्ति तेषां यावत्तावदादयो वर्णाः मानेषु कल्पनात्तत्र पूर्व्वाचार्य्यैः कल्पिताः यावत्तावत्, कालक, नीलक, पीतक, लोहितक, श्वेतक, चित्रक, कर्बुरक, पिङ्गलक, धूम्रक, पाटलक, श्यामलक, मेचक, इत्यादि । अथ वा कादीन्यक्षराणि अव्यक्तानां संज्ञाः असङ्करार्थं कल्पनाः । अतः प्राग्वदुद्देश्यकालापवद्विधिं कुर्वता गणकेन पञ्च सप्त कार्य्याः पञ्च वा सप्त कार्य्याः । ततः स्वल्पावतारोऽयं तयोः समयोरनेकस्मात् पञ्चादितरपक्षस्थाद्यं वर्णं शोधयेत्तदन्यवर्णान् रूपाणि च इतरपक्षाच्छोधयेत्ततः आद्यवर्णशेषेऽन्येतरपक्षे भक्ते भाजकवर्णोन्नितिः । बहुषु पक्षेषु ययोर्ययोः साम्यमस्ति तयोरेवं कृते सति अन्या उन्नितयः स्युः । ततस्तासून्नितिषु एकवर्णोन्नितयो यद्यनेकधा भवन्ति ततस्तासां मध्ये द्वयोर्द्वयोः समीकृतच्छेदगमेनाद्यं वर्णं शोधयेदित्यादिनान्यवर्णोन्नितयः स्युः । एवं यावत्सम्भवस्ततोऽन्योन्नितौ भाज्यवर्णे योऽङ्कः स भाज्यराशिः, यो भाजके स भाजकः, रूपाणि क्षेपः, अतः कृदुकविधिना यो गुण उत्पद्यते तद्भाज्यवर्णमानं, वा लब्धिस्तद्भाजकवर्णमानं, तयोर्मानयोर्द्दभाजकभाज्याविष्टेन वर्णेन गुणितौ क्षेपकौ कल्प्यौ । ततः स्वस्वमानेन सक्षेपेण पूर्व्ववर्णोन्नितौ वर्णावुत्थाप्य स्वच्छेदेन हरणे यद्भाज्यते तत् पूर्व्ववर्णस्य मानम् । एवं विलोमकोत्थापनतोऽन्यवर्णमानानि भवन्ति । यदि तु अन्योन्नितौ द्व्यादयो वर्णा भवन्ति तदा तेषामिष्टानि मानानि कृत्वा स्वस्वमानैस्तानुत्थाप्य रूपेषु प्रक्षिप्य कृदुकः कार्य्यः । अथ यदि विलोमकोत्थापने क्रियमाणे पूर्व्ववर्णोन्नितौ तन्नितिर्भिन्ना लभ्यते तदा कृदुकविधिना यो गुण उत्पद्यते स क्षेपः स भाज्यवर्णमानं तेनान्यवर्णमानेषु तं वर्णं संस्थाप्य पूर्व्वोन्नितिषु विलोमकोत्थापनप्रकारेणान्यवर्णमानानि साध्यानि । इह यस्य वर्णस्य यन्मानमागतं व्यक्तमव्यक्तं, अव्यक्ताव्यक्तं वा तस्य मानस्य व्यक्ताङ्केन गुणने कृते तद्वर्णाक्षरस्य निरसनमुत्थापनमुच्यते" तद्ग्राह्यम् । उदाहरणं तत्रैव द्रष्टव्यम् ।

अनेकविध त्रि० अनेका विधा प्रकारा यत्र । बहुप्रकारे "यत्रानेकविधमानार्थं तत्र स्यानत आनर्थ्यं बलीय" इति परि० ।

अनेकशस् अव्य० अनेक+वीप्सार्थे कारके शस् । अनेकवारार्थे "अनेकशो निर्व्जितराजकस्त्वमिति" भट्टिः ।

अनेकाग्र त्रि० न एकाग्रः । शून्यहृदये एकाग्रताशून्ये

अनेकान्त त्रि० न एकान्तो नियमो व्यभिचारो यत्र । अनियमे, अनिश्चितफलके च । व्यभिचारवति दुष्टहेतौ पु० । "अनेकान्तो विरुद्धव्याप्यसिद्धः प्रतिपत्तितः । कालात्ययापदिष्टश्च हेत्वाभासाश्च पञ्चधेति" भाषा० । स च त्रिविधः "आद्यः साधारणस्तु स्यादन्योऽसाधारणो मतः । तथैवानुपसंहारी त्रिधाऽनैकान्तिको मत" इति भाषा० । एकान्तोऽस्यास्ति प्रज्ञा० अण् । ऐकान्तः न० त० अनैकान्तोऽपि क्वचित् "भाषायाम् अनैकान्तो विरुद्ध वेत्येव" पाठः । तथा च साधारणादित्रितयान्यान्यत्वमनेकान्तत्वम् ।

अनेकान्तवादिन् पु० अस्ति नास्ति वेत्येकान्तं न वदति वद-णिनि ६त० । बौद्धभेदे । तस्य अस्तिनास्तिकायवादित्वेन तथात्वं विवरणमर्हच्छब्दे द्रष्टव्यम् ।

अनेकार्थ त्रि० अनेके अर्था अभिधेया यस्य । नानार्थे शब्दे । यथा गवादय अजादयश्च । 'अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते । एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधा श्रयेति' सा० द० । अयमाशयः "संयोगश्च विभागश्च साहचर्यं विरोधिता । अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः । सामर्थ्यमौचिती देशः कालाद्युक्तिः स्ववाचकः । शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव" इति हर्य्युक्तैरनेकार्थशब्दानां सर्वत्र शक्तौ समानायां सत्यां, संयोगाद्यैरितरार्थबोधप्रतिरोधनेन विशेषार्थ एव स्मार्य्यते । तद्भिन्नार्थस्य तु व्यञ्जनया बोधः इत्यलङ्कारिकाणां मतम् । तथाच संयोगादयः शक्त्या अन्यार्थोपस्थितौ प्रतिबन्धकाः । व्यञ्जना तूक्त्या तदुपस्थापने तु न । "अनेकार्थशब्देभ्यःसर्वेषामर्थानामविशेषेणोपस्थितौ सत्यामपि संयोगादयः अन्यशक्तिविषयशाब्दबोधमात्रं प्रतिबध्नन्ति नतु व्यङ्ग्यविषयमिति" रसगङ्गाधरः । नैयायिकादयस्तु अनेकार्थशब्दानां शक्यतावच्छेदकलाघवलाभे तत्रैव शक्तिरन्यत्र लक्षणा तत्र संयोगादयः अन्यार्थबोधनं नैव प्रतिबध्नन्ति । तथा च संयोगादयः सति तात्पर्य्ये, तद्विषयीभूतार्थविषयकस्मृतिं तज्जन्यान्वयबुद्धिं वा न प्रतिबध्नन्ति किन्तु तात्पर्य्यमात्रोच्चायका इत्यलं व्यञ्जनाऽऽकाङ्क्षेति स्वीचक्रुरिति भेदः । अनेके अर्थाः प्रयोजनानि

यत्न यस्य वा। अनेकप्रयोजनवति त्रि० "अनेकार्थाभियोगे च यावत्संसाधवेद्धनौ" इति स्मृतिः। कर्म्म०। बहुप्रयोजने पु० ब०व०।

अनेकाश्रित पु० अनेकेषु आश्रितः ६त०। वैशेषिकनये संयोगादिषु, सामान्येषु च। "संयोगश्च विभागश्च संख्या द्वित्वादिकास्तथा। द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणा" इति भाषा०। "नित्यत्वे सति अनेकसमवेतत्वं जातित्वमिति" सङ्गा०। एकस्या एव व्यक्तेर्नानाव्यक्तिनित्यत्वेऽस्य प्रयोगोपाधिता। भवन्ति च संयोगादयः सामान्यं च तथा। रूपादेर्नानाव्यक्तिषु सत्त्वेऽपि नैकव्यक्तेरिति न तस्य तथात्वमिति भेदः।

अनेजत् न० न एजत्। सर्व्वदैकरूपे ब्रह्मणि। "अनेजदेकं मनसो जवीय" इति ईशोप०। "एजनं कम्पनं स्वभावप्रच्युतिस्तद्विवर्ज्जितं सर्व्वदा एकरूपमिति" भा०। कम्पनशून्ये त्रि० स्त्रियां ङीप्।

अनेडमूक त्रि० एड़ो बधिरो मूको वाक्शक्तिरहितश्च नास्ति यस्मात् ५ ब०। (काला, बोवा) इति ख्याते श्रवणवचनशक्तिरहिते, शठे च। [प्रगल्भे प्रधाने निरुक्तकारः।

अनेद्य त्रि० निदि कुत्सने क्यप् नि० नलोपश्च न०त०।

अनेनस् त्रि० नास्ति व्यसनमधर्म्मो वा यस्य। व्यसनपापादिरहिते "राजा भवत्यनेनास्तु सुच्यन्ते च सभासदः" इति व्यव०त० मन्वादिधृ०। "अनेनो वोमरुतो यामे" इति ऋ०६,६६,७। "अनेनः पापरहितं यथा भवतीति" भाष्यम् "त्वानेना नमसा तुर" इति ७,८६,४। "अनेना अपापे" इति भाष्यम्।

अनेमा पु० नी-मनिन् न०त०। प्रगल्भे निरुक्तकारः।

अनेहस् पु० न हन्यते हन-असि प्रकृतेरेहादेशः। काले। सौ अनड्। अनेहा "कालोऽद्दिष्टोऽप्यनेहापी"त्यमरः। न हन्यते कर्म्मणि असि। अहिंसनीये त्रि०। "शम्भुवं मन्त्रं देवा अनेहसमिति" ऋ०१,४०,६। "अनेहसं कोनाप्यहिंस्यामिति" भा०। "यापिनोवयम् यजामहे सुप्रतूर्तिमनेहसम्" ऋ० १,४०,४। "यथा नोऽग्ने जघाय विषये अनेहः" ऋ०६,५०३।

अनैकाग्र्य न० एकाग्रस्य भावः ष्यञ् अभावे न०त०। ऐकाग्र्याभावे। न०ब०। ऐकाग्र्यशून्ये त्रि०। "आचाराणामनैकाग्र्यं सर्वेषामुपलक्षणादिति" भाग०।

अनैकान्त पु० अनेकान्तशब्दार्थे। तत्रैव व्युत्पत्तिर्दर्शिता 'अनैकान्तो विरुद्धवेति" भाषा० पाठान्तरम्।

अनैकान्तिक पु० एकान्तं नियतं व्याप्नोति एकान्त+ठक् एकान्तो नियमो व्याप्तिरस्यास्य ठन् स्वार्थे अण् वा न०त०। अनेकान्तशब्दार्थे अनेकान्तशब्देऽधिकं द्रष्टव्यम् "त्रिधाऽनैकान्तिको मत" भाषा०। ऐकान्तिको निश्चितरूपस्तद्भिन्ने त्रि०

अनैक्य न० न ऐक्यम् अभावे न०त०। ऐक्याभावे।

अनैतिह्य त्रि० न ऐतिह्यं यत्र। परम्पराश्रवणरूपैतिह्य प्रमाणशून्ये। "अनागतमनैतिह्यं कथं ब्रह्माधिगच्छति"? भा०शा०प०।

अ(आ)नैपुण न० अनिपुणस्य भावः अण् आद्यचो वा दृद्धिः। अनिपुणत्वे। ष्यञ् अ(आ)नैपुण्यमप्यत्र न०।

अ(आ)नैश्वर्य्य न० अनीश्वरस्य भावः आद्यचो वा दृद्धिः। अनीश्वरत्वे अधीनत्वे। नास्ति ऐश्वर्य्यं यस्य। अनैश्वर्यः ऐश्वर्य्यशून्ये त्रि०।

अनो अव्य० न+नी-डो। अभावार्थे। "अभावे, नञ्नो नापी"त्यमरे अनो दृश्यते नामेति नीलकण्ठः। अन्ये तु अ इति, नो इति, च छित्त्वा नामद्वयमित्याहुः।

अनोकह पु० अनसः शकटस्याकं गतिं हन्ति प्रतिरोधं करोति हन-ड दैत०। वृक्षे। "द्रुमाच्छ्रुतं हरति पुष्पमनोकहानामिति" अनोकहाकम्पितपुष्पगन्धीति च" रघुः। "उद्यानसुदृद्भुतमनोकहजालमध्ये इति" माघः।

अनोदन त्रि० नास्त ओदनरूपं भक्ष्यं यत्र। "अन्नवर्जनयुक्ते व्रते। "नक्तं हविष्यान्नमनोदनं वा" इति स्मृतिः।

अनोङ्कृत त्रि० न ओङ्कारस्योच्चार्य्य कृतः ओम्+कृ-क्त न०त०। ओङ्कारोच्चारणाभावेन कृते। "ब्राह्मणः प्रणवं कुर्य्यादादावन्ते च सर्वदा। स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्य्यति" मनुः। ओमिति स्वीकारे तथा कृतम्। अङ्गीकृते त्रि०।

अन्च व्यक्तौ चु०उभ०सक० सेट्। अञ्चयति-ते आञ्चिचत् त कर्म्मणि अञ्च्यते। णिजभावे अच्यते इति भेदः "पूर्णात् पूर्णमुदच्यते" इति श्रुतिः।

अन्चु गतौ अचिवत् ८२ पृ० द्रष्टव्यम्।

अन्ज गतौ कान्तौ अक्षणे व्यक्तौ च रुधा० वर्त्तमाने क्त अदित् वेट् पर०। अनक्ति। सिचि परस्मैपदे नित्यमिट्। आञ्जीत्-आनङ्क्ष। अञ्जिता-अङ्क्ता। अञ्जिष्यति-अङ्क्ष्यति। क्त अक्तः। क्तिन् अक्तिः। क्त्वा-अक्त्वा अञ्जित्वा। वि+प्रकाशने। व्यनक्ति व्यञ्जते "व्यनक्ति कालत्रितयेऽपि योग्यतामिति" माघः। घञ् व्यङ्क्तः। खल् व्यङ्क्त्यः। "सव्यङ्क्त्यमुत्तमं काव्यमिति"। णिच्। व्यञ्जयति ल्युट्। व्यञ्ज-

नम् । "अन्यार्थधीजत् व्यावृत्तिरञ्जनम्" का०प्र० । कर्त्तरि ल्यु । व्यञ्जना एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रयेति" सा०द० ।

अन्त न० अम-तन् । स्वरूपे, स्वभावे च । शेषे पु०न० । नाशे, सीमायां, निश्चये, शेषावयवे च पु० । निकटे, मनोहरे च त्रि० । तत्र स्वरूपे "ह्रदुलतान्तलतान्तमलोकवदिति" माघः । नाशे "पतत्यविरतं वारि नृत्यन्ति शिखिनो मुदा । "अद्य कान्तः कृतान्तो वा दुःखस्यान्तं करिष्यतीति" उद्भटः । "वैरस्यान्तं करिष्यति" रामा० । सीमायां "वनान्तपर्य्यन्तमुपेत्य सस्मृहमिति" नैष० । "छोदकान्तात् स्निग्धोऽनुगन्तव्य" इति श्रुतिः । सीमाऽवधिः स च दैशिकः कालिकश्च । तत्र दैशिक उक्तोदाहरणे कालिकस्तु । "पञ्चान्ते निष्फला यात्रा मासान्ते मरणं ध्रुवमिति" ज्योति० । "दशाहान्ते पुनः क्रियेति" स्मृतिः शेषसीमायाम् "अस्तं वनान्ताद्दनितवद्दारिष्यमिति" माघः । "दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिन" इति भामिनी० । "गङ्गाप्रपातान्तविरूढशष्पमिति" रघुः । शेषावयवे "नेत्रान्तसञ्चारिभिरिति" वेदान्त इत्यादि । निश्चये । "उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिरिति" गीता । उभयोः सदसतोरित्यर्थः । निकटे अन्तपालः । स्वभावे गुणान्तः । शेषे निगान्तः ।

अन्तःकरण न० क-करणे ल्युट् अन्तरभ्यन्तरस्थं करणं, कर्म्म०, तद्वृत्तिपदार्थानां सुखादीनां करणं ज्ञानसाधनं इत० वा । ज्ञानसुखादिसाधने आभ्यन्तरे मनोबुद्धिचित्तादिपदाभिलप्यमाने इन्द्रिये । तच्चान्तःकरणम् वेदान्तिमते चतुर्विधम् । "मनो बुद्धिरहङ्कारश्चित्तं करणमान्तरम् । संशयो निश्चयो गर्वः स्मरणं विषया इमे" इत्युक्तकार्य्यभेदात् । अन्यत्र व्यक्तमुक्तम् "यदा तु संकल्पविकल्पकर्त्तृ तदा भवेत्तन्मन इत्यभिख्यम् । स्याद्बुद्धि संज्ञं च यदा तु वेत्ति सुनिश्चितं संशयरूपहीनम् । अनुसन्धानरूपं तच्चित्तञ्च परिकीर्त्तितम् । अहंकृत्याभिमत्त्या तु तदहङ्कारतां गतमिति" । एतदनुसारेणैव शारदायामुक्तम् "अन्तःकरणमात्मनः । मनोबुद्धिरहङ्कारश्चित्तञ्चेति प्रकीर्त्तितमिति" । तस्य च ज्ञानादिप्रत्यक्षकरणत्वादन्तःकरणत्वम् । तत्साधकमनुमानञ्चेत्थम् ज्ञानसुखादिप्रत्यक्षं स्वप्राह्येन्द्रियसापेक्षं प्रत्यक्षत्वात् रूपादिप्रत्यक्षवत् । नच चक्षुरादीनां तत्करणत्वं सम्भवति रूपादित्वाभावादित्यन्तःकरणसिद्धिरिति नैयायिकादयः । सांख्यादयस्तु महत्तत्त्वापरपर्य्यायमेवान्तःकरणमङ्गीचक्रुः । पञ्चतन्मात्रेभ्यो भूतेभ्यश्चाहङ्काररूपद्रव्यसिद्धिसङ्गा "तेनान्तःकरणस्येति" सां०सू० तत्सिद्धिरुक्ता तदनुमाने च भाष्ये एवं प्रयोगादिकं दर्शितम् । "अहङ्काराद्रव्यं निश्चयेच्छत्तिमद्द्रव्योपादानकं निश्चयकार्यद्रव्यत्वात् यच्चैवं तच्चैवं यथा पुरुषादिरिति । अत्राप्ययं तर्कः, सर्वोऽपि लोकः पदार्थमादौ स्वरूपतो निश्चित्य पश्चादभिमन्यते अयमहं, मयेदं कर्त्तव्यमित्यादिरूपेणेति, तावत् सिद्धमेव । तत्राहङ्काराद्रव्यकारणाकाङ्क्षायां इच्छोः कार्यकारणभावेन तदाश्रययोरेव कार्यकारणभावो लाघवात् कल्प्यते कारणस्य इच्छिलाभेन कार्येच्छिलाभस्यौत्सर्गिकत्वादिति । यद्यपि अन्तःकरणमेकं तथापि वंशपर्वस्विवावान्तरभेदमाश्रित्यान्तःकरणत्वे क्रमः, कार्यकारणभावश्चोक्तः योगोपयोगिस्मृतिस्मृतिपरिभाषानुसारादिति मन्तव्यम् । तदुक्तं वाशिष्ठे । "अहमर्थोदयो योऽयं चित्तात्मा वेदनात्मकः । एतच्चित्तद्रुमस्यास्य बीजं विद्धि महामते ! ॥ एतस्मात् प्रथमोद्भिन्नादङ्कुरोऽभिनवाह्वयः । निश्चयात्मा निराकारो बुद्धिरित्यभिधीयते ॥ अस्य बुद्ध्यभिधानस्य याङ्कुरस्य प्रपौत्रता । सङ्कल्परूपिणी तस्याश्चित्तचेतोमनोभिधा" इति । अहमर्थोऽन्तःकरणसामान्यम् । अत्र वाक्ये बीजाङ्कुरन्यायेनैकस्यैवान्तःकरणद्रव्यस्य इच्छिमात्ररूपेण चित्ताद्यवस्थाभेदाः क्रमिकास्त्रिविधाः परिणामा उक्ता इति । साङ्ख्यशास्त्रे च चिन्तनाद्यवृत्तिकस्य चित्तस्य बुद्धावेवान्तर्भावः । अहङ्कारस्य चात्र वाक्ये बुद्धावन्तर्भावः" इति ॥ कारिकायामपि "अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यमिति" त्रैविध्यसङ्गा "सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्, तस्मात्त्रिविधं करणं द्वारि, द्वाराणि शेषाणीति" तत्त्रयस्यैव प्राधान्यमुक्तम् । एवञ्च पुरुषस्य सन्निधिमात्रादधिष्ठातृत्वं गौणं मुख्यमधिष्ठातृत्वन्तु अन्तःकरणस्यैव यथोक्तम् "अन्तःकरणस्य तदुज्ज्वलितत्वाल्लौहवदधिष्ठातृत्वम्" सां०सू० ॥ "अन्तःकरणस्यानुपचरितमधिष्ठातृत्वं सङ्कल्पादिद्वारकं प्रत्येतव्यम् । नन्वधिष्ठातृत्वं घटादिवदचेतनस्य न युक्तं तत्राह । लौहवत् तदुज्ज्वलितत्वादिति । अन्तःकरणं हि तप्तलौहवच्चेतनोज्ज्वलितं भवति । अतस्तस्य चेतनायमानतयाधिष्ठातृत्वं घटादिव्यावृत्तमुपपद्यत इत्यर्थः । नन्वेवं चैतन्येनान्तःकरणस्योज्ज्वलने चितेः सङ्क्रान्तिमन्विच्छेदेव स्यादिति चेन्न नित्योज्ज्वलचैतन्यसंयोगविशेषमात्रस्य संयोगविशेष

जन्यचैतन्यप्रतिबिम्बस्य वान्तःकरणोज्ज्वलनरूपत्वात्। न तु चैतन्यमन्तःकरणे संक्रामति येन सङ्गिता स्यात्॥ अग्नेरपि हि प्रकाशादिकं न लौहे संक्रामति, किन्त्वग्निसंयोगविशेष एव लौहस्योज्ज्वलनमिति। नन्वेवमपि संयोगेन परिणामित्वमिति चेन्न सामान्यगुणातिरिक्तधर्म्मोत्पत्तावेव परिणामव्यवहारादिति। अयं च संयोगविशेषोऽन्तःकरणस्यैव सत्त्वोद्रेकरूपात् परिणामाद्भवतीति फलबलात् कल्प्यते पुरुषस्यापरिणामित्वेन संयोगे तन्निमित्तकविशेषासम्भवादिति। अयमेव च संयोगविशेषो बुद्धाकनोरन्योऽन्यप्रतिबिम्बने हेतुरिति" सा०प्र०भा०। अन्तःकरणस्य च इत्तयस्त्रिधा "शान्ताघोराश्चतामूढा मनसो इत्तयस्त्रिधा। वैराग्यं शान्तिरौदार्य्यमित्याद्याः शान्तइत्तयः। तृष्णा स्नेहोरागलोभावित्याद्या घोरइत्तयः। सम्मोहोभयमित्याद्या कथिता मूढइत्तयः" इति तास्वेव इत्तिषु ज्ञानत्वोपचारात् तत्साधनत्वमिन्द्रियाणाम् "अन्तःकरणइत्तौ ज्ञानत्वोपचारादिति" पञ्चपादिकाविवरणम्। शान्तादीनामेव सात्विकादिरूपेण व्यवहारः। ताश्च इत्तयः "क्रमशोऽक्रमशश्च इत्तय इति सां०सू० उक्तेः युगपदपि भवन्तीति सांख्यादयः। नैयायिकादयस्तु "अयौपद्याज्ज्ञानानां"मिलुक्तेः क्रमिकत्वमेवाङ्गीचक्रुः। तच्चान्तःकरणमणुपरिमाणमिति नैयायिकादयः। यावद्देहकार्य्यकारित्वात् जलावगाहे एकदैव सर्वदेहगतशैत्याद्युपलब्धेर्मध्यपरिमाणमिति सांख्यादयः। तेषां च चतुर्णां चन्द्रचतुर्मुखशङ्कराच्युता अधिष्ठातारोदेवा इति।

अन्तःकुटिल पु० अन्तर्मध्ये कुटिलः। वक्राकारमध्यावयववति शङ्खे। वक्रान्तःकरणे त्रि०।

अन्तःकृमि पु० अन्तरभ्यन्तरे कृमिर्यस्य। (शुटि) इति ख्याते कृमिकोषफले। मध्यस्थकृमियुक्ते फलादौ त्रि०।

अन्तःकोटरपुष्पी स्त्री अन्तःकोटरे अभ्यन्तरे पुष्पं यस्याः जातित्वात् ङीप्। अन्तःकोटरपुष्पवत्यां नीलवृक्षायाम्।

अन्तःपदवी स्त्री ७त०। सुषुम्णामध्यगते पथि।

अन्तःपशु पु० अन्तःग्राममध्ये पशवो यत्र। ग्राममध्ये पशुस्थितिकाले ग्राह्ये, सायाह्ने च "अन्तःपशौ पशुकामस्य सायं प्रातः" कात्या० ४,१५,१४। "अन्तःपशौ काले ग्राममध्ये पशवो यस्मिन् काले, सायं पशुषु ग्राममध्येषु आगतेषु, प्रातश्च ग्रामादनिःसृतेषिति"तद्भा०।

अन्तःपात पु० अन्तर्मध्ये पततीति पत-कर्त्तरि घ। सन्धिस्थाने। भावे घञ्। मध्यपतने।

अन्तःपातिन् त्रि० अन्तःपतति पत-णिनि ६त०। मध्यप्रविष्टे। स्त्रियां ङीप्।

अन्तःपात्य पु० अन्तर्मध्ये पात्यते पत-णिच्-आधारे यत्। मध्ये पातनाधारे देशे "अन्तःपूर्व्वेण यूपं परीत्यान्तःपात्यदेशे स्थापयतीति" कात्या० १५,६,२२, "स्थापितगवानां पतये स्वस्वाले द्रव्यं शतमधिकं वा दत्त्वा यूपात् पूर्व्वदिशि परीत्यान्तःपात्यदेशे स्थापयेदिति" वेददीपः।

अन्तःपुर न० अन्तरभ्यन्तरं पुरं गृहं कर्म्म०। (अन्दर) इति प्रसिद्धे राज्ञां स्त्रीणां स्थानयोग्ये गृहे। "त्रितयमिदमपूर्वं दृष्टमन्तःपुरे ते" इत्युद्भटः "व्यायम्याप्लुत्य मध्याह्ने भोक्तुमन्तःपुरं विशेत् इति" भुक्तवान् विश्रमेच्चैव स्त्रीभिरन्तःपुरे सहेति। "अन्तःपुरप्रचारञ्च प्रणिधीनाञ्च चेष्टितमिति" च मनुः। तत्र स्थितत्वात् राजमहिलायामपि। "दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदेति" भक्तः। पुरशब्दसमासे अचि स्त्रीत्वात् ङीप्। अन्तःपुरीत्यपि स्त्री।

अन्तःपुरचर पु० अन्तःपुरे चरति चर-ट ७त०। राजान्तःपुरचारिणि कञ्चुक्यादौ। अन्तःपुरस्त्रियाम् स्त्री ङीप्।

अन्तःपुरसहाय पु० अन्तःपुरे सहायः। राज्ञामन्तःपुरसञ्चरे विदूषकादौ।

अन्तःपुराध्यक्ष पु० ६त०। "वृद्धः कुलीनतः शक्तः पितृपैतामहः शुचिः। राज्ञामन्तःपुराध्यक्षो विनीतश्च तथेष्यते" इति नरपत्युक्तलक्षणेऽन्तःपुराधिकृते। अन्येऽपि पञ्च तथा, "पञ्चापरे वामनको जघन्यः कुब्जोऽपरो मण्डलकोऽथ सामी। पूर्व्वोक्तभूपानुचरा भवन्ति सङ्कीर्णसंज्ञाः प्रथुलक्षणैस्तान्॥ सम्पूर्णाङ्गो वामनो (१) भग्नदृष्टः किञ्चिन्नोरध्यकक्षान्तरेषु। ख्यातो राज्ञो ह्येष भद्रानुजीवी स्त्रीतो दाता वासुदेवस्य भक्तः॥ मालव्यसेवी तु जघन्यनामा खण्डेन्दुतुल्यश्रवणः सुसन्धिः। शुक्रेण सारः पिशुनः कविश्च रूक्षच्छविः स्थूलकराङ्गुलीकः॥ क्रूरो धनी स्थूलमतिः प्रतीतस्ताम्रच्छविः स्यात् परिहासशीलः। उरोऽन्तिकेऽसिशक्तिपाशपरश्वधाङ्कश्च जघन्यनामा (२)॥ कुब्जो (३) नामायः स शुद्धो ह्यधस्तात् क्षीणः किञ्चित्पूर्वकाये नतश्च। हंसासेवी नास्तिकोऽर्थैरुपेतो विद्वान् शूरः सूचकः स्यात् कृतघ्नः॥ कलास्वभिज्ञः कलहप्रियश्च प्रभूतभक्ष्यः प्रमदाजितश्च। सम्भूय लोकं प्रजहात्यकस्मात् कुब्जोऽयसङ्गः सततोद्यतश्च॥ मण्डलकनामधेयो 8 रूचकानुचरोऽभिचारवित् कुशलः। छलाबलालादिषु कर्मसु विद्यासु चानुरतः॥

ष्ट्टाकारः खरूक्षमूर्धजः शत्रुनाशने कुशलः । द्विजदेवयज्ञयोगप्रसक्तधीः क्षोजितो मतिमान् ॥ सामीति (५) यः सोऽतिविरूपदेहः यशानुगामी खलु दुर्भगश्च । दाता महारम्भसमाप्रकार्यो गुणैः यशस्चैव भवेत् समानः" बृहत्संहितोक्तलक्षणादिभेदपङ्कात् ।

अन्तःपुरिक त्रि० अन्तःपुरे नियुक्तः ठक् संज्ञापूर्व्वकविधेरनित्यत्वान्न वृद्धिः । अन्तःपुराध्यक्षे कञ्चुक्यादौ "अस्मत्प्रार्थनामन्तःपुरिकाभ्यो निवेदयेति" चक्षुकौ० ।

अन्तःपुष्प न० अन्तर्गतं पुष्पं क्षौरजः । द्वादशवर्षादूर्द्धमध्यन्तरजाते क्षौणां रजसि । "वर्षद्वादशकादूर्द्धं यदि पुष्पं वहिर्नहि । अन्तःपुष्पं भवत्येव पणसोडुम्बरादिवत्" । इति काश्यपसंहिता ।

अन्तःप्रकृति स्त्री अन्तर्वर्त्तिनी प्रकृतिः राज्याङ्गम् । राज्ञां सन्निकृष्टप्रकृतौ अमात्यादौ । "अन्तःप्रकृतिकोपनं हि राज्ञां महद्व्यसनमिति" नीति० । [आत्मानुसन्धानपरे ।

अन्तःप्रज्ञ त्रि० अन्तःस्था प्रत्यक्तत्त्वविषयिणी प्रज्ञा यस्य ।

अन्तःप्रविष्ट त्रि० अन्तःकरणे, मध्ये वा प्रविष्टः । हृदयगते, अभ्यन्तरगते च । "अन्तःप्रविष्टकर्णपल्लवप्रतिबिम्बेनेति" काद० ॥

अन्तःशरीर न० अन्तः स्थूलदेहमध्यस्थं शरीरम् । स्थूलदेहमध्यवर्त्तिनि वेदान्तमतसिद्धे सूक्ष्मशरीरे । तच्च "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधन"मित्युक्तं सप्तदशावयवं भोगसाधनं सूक्ष्मशरीरम् । शरीरस्य मध्ये अव्ययी० । देहमध्ये इत्यर्थे अव्य० । अन्तर्देहादयोऽप्युक्तार्थयोः । अन्तरेव देहः । मनोरूपदेहे न० । [दुःखदायके ।

अन्तःशल्य न० अन्तःकरणस्य शल्यमिव पीड़कत्वात् । मनसो

अन्तःसंज्ञ त्रि० अन्तः अभ्यन्तरवर्त्तिनी कर्म्मनायोग्यत्वात् अप्रकाश्या संज्ञा चेतना यस्य । वृक्षादौ । ते च मनुना दर्शिता यथा "उद्भिज्जा स्थावराः सर्व्वे बीजकाण्डप्ररोहिणः । ओषध्यः फलपाकान्ताः बहुपुष्पफलोपगाः । अपुष्पाः फलवन्तोये ते वनस्पतयः स्मृताः । पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः । गुच्छगुल्मं तु विविधं तथैव तृणजातयः । बीजकाण्डरुहाण्येव प्रताना वल्ल्य एव च । तमसा बहुरूपेण वेष्टिताः कर्म्महेतुना । अन्तःसंज्ञाभवन्त्येते सुखदुःखसमन्विता" इति ।

अन्तःसत्त्वा स्त्री अन्तरभ्यन्तरे गर्भे सत्त्वं प्राणी सारो वा यस्याः यस्य वा ब० । गर्भिण्यां स्त्रियाम् । अन्तःसारे त्रि० ।

अन्तःसुख त्रि० अन्तरात्मनि तदनुसन्धाने एव सुखं यस्य । आत्मानुसन्धानमात्रसुखे बाह्यसुखशून्ये । "योऽन्तःसुखोऽन्तरारामः इति" गीता । [मदस्रावियि हस्तिनि ।

अन्तःस्वेद पु० अन्तःस्वेदो मदस्यन्दनं मदजलं यस्य ब० ।

अन्तक पु० अन्तयति अन्तं करोति अन्त+णिच्-ण्वुल् । मृत्यौ "व्याजेनापि कृता राजन् नो दर्शयति शान्तकमिति" भार० पु० । देहिनां स्वस्वकर्म्मानुसारेण विनाशनाय ईश्वरनियुक्ते यमाख्ये देवभेदे "कृपिप्रभावान्वयि नान्तकोऽपि प्रभुः प्रहर्त्तुं किमुतान्यहिंसा" इति रघुः । विनाशकमात्रे त्रि० "क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहमिति" वेणी० । परमेश्वरे पु० तस्य सर्व्वभूतानां प्रलये संहर्त्तृत्वात्तथात्वम्, "महोदधिशयोऽन्तक" इति विष्णुसह० ।

अन्तकर त्रि० अन्तं नाशं करोति कृ-ट उप०स० । नाशकारके । "अहमन्तकरो नूनं ध्वान्तस्येव दिवाकर" इति भट्टिः । स्त्रियां ङीप् ।

अन्तकरण त्रि० अन्तं करोति नन्द्या० ल्यु । नाशकारके । "द्यूतं समाह्वयश्चैव राजा राष्ट्राद्विवासयेत् । राज्यान्तकरणावेतौ हौ दोषौ पृथिवीक्षितामिति" मनुः । भावे ल्युट् । नाशने न० ।

अन्तकर्म्मन् न० अन्तस्य नाशस्य परिच्छेदस्य वा कर्म्म उत्पादनम् । नाशने । "यो अन्तकर्म्मणि इति" पा० धातु० । स्नेनांशनार्थत्वात् सकर्म्मकत्वम् तेन "राघव ! स्व शरैर्घोरैर्वीरं रावणमाहवे" इत्यादौ वीरस्य कर्म्मता स्नेति स्नतेर्लोटो मध्यमैकवचनान्तरूपम् । परिच्छेदकरणे "अवासासीच्च वैयासकीमित्यादि ।

अन्तकारिन् त्रि० अन्तं करोति कृ-णिनि ब० । अन्तकारके विनाशके । स्त्रियां ङीप् । ण्वुल् । अन्तकारकोऽप्युक्तार्थे त्रि० । [ब्रह्म निर्वाणमृच्छतीति" गीता ।

अन्तकाल पु० ब० । मृत्युकाले, "स्थित्वाऽस्यामन्तकालेऽपि

अन्तकृत् त्रि० अन्तं करोति कृ-क्विप् ब० । विनाशके ।

अन्तग त्रि० अन्तं गच्छति गम-ड उप०स० । कार्य्यान्तगामिनि, निरवशेषकार्य्यकारके, पारगामिनि, च "यत्नेन भोजयेच्छ्राद्धे वह्वृचं वेदपारगम् । शाखान्तगमथाध्वर्य्युं छन्दोगं च समाप्तिकमिति" मनुः । [गामिनि ।

अन्तचर त्रि० अन्ते शेषावधौ चरति चर-ट । कार्य्यादिशेष-

अन्ततस् अव्य० अन्त+सार्व्वविभक्तिकस्तसि । अन्तेन अन्ते अन्तादिलाद्यर्थे । तत्र तृतीयार्थे । "वैश्योऽद्भिः प्राप्तिता-

भिक्षु शूद्रः क्षुद्राभिरन्तत" इति मनुः। "शुध्येत स्त्री च शूद्रवत्क्षुद्राभिरन्तत" इति या०। सप्तम्यर्थे "सह द्यावापृथिव्योश्च तथा खिद्यतेऽन्तत" इति मनुः। "अन्ततः उपसृत्य शुचिरिति गोभि०। अन्ततः अवच्छेदे इत्यर्थः 'तामन्ततोऽपक्रम्येत्यादौ तु पञ्चम्यर्थे। अमेक्षायां, सम्भावनायाञ्च। अवयवे, शासने च विश्व०।

अन्तम त्रि० अन्तिक+तमप् "तादेर्वेति" वेदे तिकशब्दलोपः। अन्तिकतमे अत्यन्तनिकटस्थिते। शिक्षा अन्तमस्येति ऋ० १,२७,५, "तनूपा अन्तमो भवेति" ऋ० ६,४६,१०,। भाष्यकृतोक्तार्थतयैव व्याख्यातम्।

अन्तपाल त्रि०पु० अन्तं समीपदेशं द्वारं पालयति। द्वारप्रान्ते। "शुद्धमुक्त्वन्तपालेभ्यः श्रुत्वा लिखितमागतमिति" भा०शा०प०।

अन्तर् अव्य० अम-अरन् तुड़ागमश्च। मध्ये, "अन्तःशाक्ता बहिःशैवाः सभायां वैष्णवा मता" इति तन्त्रम्। "अन्तर्विश्वानि भेषजा" ऋ० १,२३,२० "अप्स्वन्तरमृतमप्सु" इति ऋ० १,२३,१९, "न प्रसज्जेषि गतान्यासाद्य दन्तान्तरधिष्ठितमिति" मनुः "प्रतिबलजलधेरन्तरौर्वायमाणं" इति "अन्तर्ज्वालावलीढेति" च वेणी०। सर्वमध्यस्थे परमेश्वरे देहमध्यस्थे जीवे च अन्तःप्रज्ञः अन्तर्ज्योतिरित्यादि। चित्ते "अन्तर्गता मदनवह्निशिखावली वेल्लुद्भटः "अन्तर्गतं प्राणभृतां हि वेदेति" रघुः। प्राप्ते, स्वीकारे च। अस्य च मध्यार्थेऽव्ययीभावः। अन्तर्जलधि अन्तर्गृहमित्यादि अव्य०।

अन्तर न० अन्तं राति ददाति रा-क। अवकाशे, अवधौ, परिधानांशुके अन्तर्द्धाने, भेदे, परस्परवैलक्षण्यरूपे विशेषे, तादर्थ्ये, छिद्रे, आत्मीये, विनार्थे, बहिरर्थे, व्यवधाने, मध्ये, सदृशे च। आसन्ने त्रि०। "क्षप्रायुजश्चिदन्तरम् ऋ०१,१०,६, अन्तरं क्षप्र आसद्यं कुरु" भा० "पायुरन्तरो निषङ्गाय" ऋ०१,३१,१२, "अन्तरः समीपवर्त्तीति" भा० "न यत्परो नान्तर इति" ऋ०२,४१,८, "अन्तरः समीपवर्त्तीति" भा० निकटस्थे "यद्रोहीतो वो अन्तर इति" ८,१८,१९, अन्तरः अन्तिके वर्त्तमान इति भा०। अन्तरयति दूरीकरोति अन्तर-णिच्+अच्। अपसारणे। अन्तर्गते त्रि०। "हृदो अस्यन्तरम्" ऋ०७,१०१,५ "अन्तरमन्तर्गतमिति" भा०। ह०उप० अन्तर्यामिब्राह्मणे अन्तर्गते वस्तुनः प्रयुक्तः तच्च (१३०) पृष्ठे द्रष्टव्यम्। "यो अन्तरोमित्यमहो वसुष्यात् ऋ० ६,५,४, अन्तरः अभ्यन्तरवर्त्तीति भा०। "पुरोहितोऽन्तरोयासिदूत्यम् ऋ० १,४४,१२, "अन्तरः देवयजनमध्ये वर्त्तमान" इति भा०। अवकाशे, "क्षणालब्धान्तरमभ्यम्" कुमा०। "तत्रान्तरे जह्नुरसुं कटाक्षैः" माघः। मध्ये, "दिलीपस्यनोः स इवाङ्गजान्तरमिति" रघुः। "आवयोरन्तरे जाताः पर्वताः सरितो द्रुमा" इति रामा०। व्यवधाने गिरिर्वा व्यवधायकः। "महानद्यन्तरं यत्र तद्देशान्तरमुच्यते इ०मनुः। "निरन्तराभ्यन्तरवातदृष्टिषु" कुमा० निरन्तरमव्यवधानम् इत्यर्थः। "एकान्तरे आनुलोम्यादिति" मनुः। भेदे "सैव विगिनष्टि पुनःप्रधानपुरुषान्तरं सूक्ष्ममिति" सा०का०। "शरीरस्य गुणानाञ्च दूरमत्यन्तमन्तरमिति" स्मृतौ०। "यदन्तरं सर्षपशैलराजयोर्यदन्तरं वायसवैनतेययोरिति" रामा०। व्यसने। "प्रहरेदन्तरे रिपुम्"। बहिर्योगे "अन्तरे च पुरात् चाण्डालावासा" इति। उपसंव्याने (उत्तरीयवस्त्रे) अन्तरं परिदधाति। सदृशे, "स्थानेऽन्तरतम" इति पा० अन्तरशब्दस्य पुरीभिन्ने एव विशेषे सर्वनामकार्य्यम् "सुमेधसामन्तरङ्गैः" इति सि०कौ०, सु०बो०। पुर्य्यान्तु न, अन्तरायै नगर्य्यै। तत्रापि बहिर्योगे उपसंव्याने एव सर्वनामता। मयूरव्यंसादित्वात् नञादेशान्तरशब्दस्य स्वजातीयभिन्ने वृत्तिः शब्दस्वाभावात् "राजान्तरं राजसुतां निनायेति" रघुः। अन्यो राजा भवः "राजान्तरमिति" मल्लिना०। "देशान्तरस्थे पत्यौ साध्वी तत्पादुकाद्वयमिति" स्मृतिः "स्वमेव मूर्त्त्यन्तरमष्टमूर्त्तिरिति "अर्थोऽयमर्थान्तरभाव्य एव" इति च कुमा०। अन्तरस्य भावः ब्राह्मा०ष्यञ्। आन्तर्य्यं सादृश्ये न० "यत्रानेकविधमान्तर्य्यं तत्र स्यानत आन्तर्य्यं बलीव" इति परि०सि० कौ०। अन्तरे भवः अण् आन्तरः तद्भवे त्रि०। "कथन आन्तरो भाव इति" सा०द०। "अन्तःकरणमान्तरमिति" वेदा० व्यवकलने (वियोजने) "कुर्य्याद् यथा स्याननकमन्तरं वेति" लीला०।

अन्तरग्नि पु०अन्तर्वर्त्ती अग्निः। जठरानले "दीप्तान्तरग्निः परिशुद्धकोष्ठ" इति "वाय्वग्नि चायं चिरमन्तरग्नेरिति" "इच्छाभिघातभयशोकहृतेऽन्तरग्नौ" इति च सुश्रुतम्। अग्नेर्मध्ये अव्य०। अग्निमध्ये अव्य०।

अन्तरङ्ग पु० अन्तरं सदृशमङ्गं यस्य। अत्यन्तप्रिये, "समीपगोऽन्तरङ्गःप्रियो भवतीति" ब्रा०उप०भा०। "चरमगिरिकुरङ्गीमङ्गकण्डूयनेन स्पृशति सुखमिदानीमन्तरङ्गः

कुरङ्गः" इति। बहिरङ्गशास्त्रीयनिमित्तसमुदायमध्ये अन्तर्भूतानि अङ्गानि निमित्तानि यस्य। व्याकरणोक्ते परनित्यबहिरङ्गबाधके नैमित्तिककार्यभेदे, तद्बोधकशास्त्रे च। यथा यामघिनी कुले इत्यादौ "इकोऽचीति" पा०)नित्यप्राप्तं तुमं बाधित्वा "हस्वो नपुंसके" इति पा० ह्रस्वः। पूर्वं कृते तु तुमि अजन्तत्वाभावात् ह्रस्वो न स्यात्। ततश्च तुमरूपकार्यं प्रत्ययस्याङ्गरूपं निमित्तमपेक्षतेइति तद्बहिरङ्गं ह्रस्वस्तु प्रकृतिमात्रसापेक्षत्वात् अन्तरङ्ग इति तस्य बहिरङ्ग-निमित्तककार्यबाधकत्वे बीजम्। "परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीय इति" "असिद्धं बहिरङ्गमन्तरङ्गे" इति च परि०शि०को०। एतन्मूलिकैव "बहिरङ्गविधिभ्यस्तु अन्तरङ्गविधिर्बलीति" कारिका। अन्तः आसन्नमङ्गं कर्म्म०। आराद्युपकारके न० यथा ब्रह्मसाक्षात्कारे श्रवणमनन निदिध्यासनानि, संप्रज्ञातसमाधौ च धारणादीनि त्रीणि अन्तरङ्गाणि। यमादयस्तु पञ्च बहिरङ्गाणि। तथा हि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयश्चत्वारो संप्रज्ञातसमाधेरङ्गानि तत्र यमादयः बहिरङ्गाणि, प्रतिबन्धकस्य चित्तकायप्राणेन्द्रियमलस्य निवर्त्तनेन परम्परया उपकारकत्वात्, धारणाद्यस्तु संप्रज्ञातसमाधेः समानविषयतया साक्षात्स्वरूपोपकारकत्वादन्तरङ्गाणीति अत एव धारणादित्रयमभिधाय "त्रयमन्तरङ्गं पूर्व्वेभ्य" इति पात०सूत्रे धारणादित्रयस्यान्तरङ्गत्वमुक्तम्। धारणादिस्वरूपादि तत्तच्छब्दे वक्ष्यते। असंप्रज्ञातसमाधौ तु सर्व्वान्येव बहिरङ्गाणि असमानविषयत्वादिति बोध्यम्।

अन्तरचक्र न० अन्तरं मध्यवर्त्ति चक्रम्। तन्त्रोक्तेषु देहस्थसुषुम्णामध्यस्थेषु मूलाधारादिषु षट्सु पद्माकारचक्रेषु। विवरणं षट्चक्रशब्दे दृश्यम्। ६त०। आत्मीयसमूहे न०।

अन्तरज्ञ त्रि० अन्तरं भेदं विशेषं जानाति ज्ञा-क ६त०। विशेषज्ञे "नान्तरज्ञाः स्त्रियो जातु प्रियैरासां न भूयते" इति किरा०।

अन्तरण न० अन्तरं व्यवहितं करोति अन्तर+णिच्-भावे ल्युट्। अन्तरितकरणे व्यवधापने, "हरिरन्तरणे प्राक् प्रधानेज्यायाः" इति काल्पा० २५,५,१५, "यदि नाम हरिरन्तरितं न स्टहीतमेव, प्राक् प्रधानेज्यायाः स्मृत्वा अन्वाहरेत् हरिर्योऽन्तरणं बहूनां मध्ये एकस्याप्यहरिति" तद्व्या०।

अन्तरतम त्रि० अतिशयेन अन्तरः सदृशः, अत्यन्तसदृशे "स्यादेऽन्तरतम" इति पा०। सादृश्यञ्च "तुल्यास्यप्रयत्नमिति" पा० सूत्रोपात्तं स्थानादिसाम्यम्, यथा ककारादीनां ङकारादिषु तुल्यस्थानप्रयत्नवत्त्वेन साम्यम् एवं सकारस्य चकारे। आत्मीयतमे च।

अन्तरतस् अव्य० सप्तम्यर्थे तसि। मध्ये इत्याद्यर्थे। "दृष्ट्वन्तरतः कृत्वा रावणं वाक्यमब्रवीत्" इति रामा०।

अन्तरदृश् पु० अन्तरे दृश् यस्य। अन्तरस्थे परमात्मानुसन्धायिनि। अन्तरं भेदं पश्यति दृश-क्विप् ६त०। विभेददर्शे त्रि०।

अन्तरदेश पु० कर्म्म०। मध्यदेशे तद्विवरणं मध्यदेशशब्दे दृश्यम्

अन्तरपु(पू)रुष पु० अन्तरः मध्यवर्त्ती पुरुषः वा दीर्घः। अन्तर्यामिनि परमेश्वरे। "मन्यन्ते च पापकृतो "न कश्चित् पश्यतीति नः"। तांस्तु देवाः प्रपश्यन्ति स्वश्चैवान्तरपूरुष" इति मनुः।

अन्तरपूजा स्त्री ७त० तन्त्रोक्ते मनःकल्पितोपचारेण पूजायाम् तत्प्रकारस्तु अन्तर्यागशब्दे वक्ष्यते।

अन्तरप्रभव पु० अन्तरेभ्यो भिन्नवर्णमातृपितृभ्यः प्रभवति प्र+भू-अच् ५त०। सङ्कीर्णवर्णे मूर्द्धावसिक्तादौ। अन्तरप्रभवाश्च द्विविधाः अनुलोमजाः, प्रतिलोमजाश्च तत्रोत्कृष्टवर्णात् अपकृष्टवर्णायां स्त्रियां जाताः मूर्द्धावसिक्तादयः अनुलोमजाः, अपकृष्टवर्णात् उत्कृष्टवर्णायां स्त्रियां जाताः प्रतिलोमजाः सूतादयः। "भगवन्! सर्व्ववर्णानां यथावदनुपूर्व्वशः। अन्तरप्रभवानाञ्च धर्म्मान्नो वक्तुमर्हसीति" मनुः। एतेषां भिन्नवर्णजातत्वात् अन्तरनामत्वमपि मनुना हि अनुलोमजान् प्रतिलोमजांश्च उक्त्वा "तान्नामभिस्तु मातृदोषात् प्रचक्षते" इत्युक्तम्। अधिकं वर्णसङ्करशब्दे वक्ष्यते।

अन्तरय पु० अन्तर्मध्ये अयः गमनम् इण्-अच्। मध्यगतौ व्यवधाने। ल्युडन्तमथत्व न०। अन्तरं याति या-क। देहमध्यस्थचित्तगते त्रि०।

अन्तरयायिन् पु० अन्तरे शेते शी+णिनि। चित्तस्थे जीवे। तस्य तत्र प्रतिबिम्बरूपेण स्थितत्वात्तथात्वम्।

अन्तरस्थ पु० अन्तरे देहमध्ये तिष्ठति स्था-क ७त०। देहमध्यस्थचित्तस्थे जीवे।

अन्तरा अव्य० अन्तरेति इण्-डा। निकटे, मध्ये, विनार्थे च। तत्र मध्ये "अन्तरा पतिते पिण्डे सन्देहे वा पुनर्हरेदिति" या०। "अन्तरा स्मृतस्मृतके" इति स्मृतिः। "पशुमृगोष्ट्रकलाङ्गूरक्षसर्पनकुलादिभिः अन्तरा गमने, विद्यादनध्यायमहर्निशमिति" मनुः। "सौमित्रेर्निशितैर्बाणैरन्तरा प्रकलीकृता" इति रघुः। "अन्तेले बीज-

सत्सङ्गमन्तरेण विनश्यति" इति मनुः। हृदयेर्मध्ये "अन्तरान्तरेण युक्ते" पा० उक्तेः एतत्सम्बन्धिपदात् द्वितीया। अन्तरा त्वां मां हरिरिति" सि०कौ०। वर्ज्जने निकटे च मेदिनिः। [विस्मरत्यन्तराकेति" सा०द०।

अन्तरात्मन् पु० कर्म्म०। जीवात्मनि। "तदपि न हरिणाक्षी' अन्तरापत्या स्त्री अन्तरे गर्भमध्येऽपत्यं यस्याः। गर्भवत्यां स्त्रियाम्।

अन्तराय त्रि० अन्तरं व्यवधानमयते अय-अच्। व्यवधानकारके। "अस्य ते वाणपातपथवर्त्तिनः कृष्णसारस्यान्तरायौ तपस्विनौ संवृत्तौ" शक०। विघ्ने च "त्वमन्तरायो भवसि च्युतो विधिरिति" रघुः। "वैरी न चेद्वेपथुरन्तराय" इति सा०द०। 'समाध्यन्तरायाश्च लयादयः वेदान्तसारे दर्शिताः यथा। "अस्माद्विनोनिर्विकल्पकस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारोविघ्नाः सम्भवन्ति। लयस्तावदखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा। अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यावलम्बनं विक्षेपः। लयविक्षेपयोरभावेऽपि चित्तवृत्तेः रागादिवासनया स्वरूपावादखण्डवस्त्वनवलम्बनं कषायः। अखण्डवस्त्वनवलम्बनेनापि चित्तवृत्तेः सविकल्पानन्दास्वादनं रसास्वादः, समाध्यारम्भसमये सविकल्पानन्दास्वादनं वा। अनेन विघ्नचतुष्टयेन रहितं चित्तं निर्वातदीपवदचलं सदखण्डचैतन्यमात्मस्वरूपतिष्ठते यदा, तदा निर्विकल्पकसमाधिरित्युच्यते। तदुक्तम्। "लये संबोधयेत् चित्तं विक्षिप्तं शमयेत्पुनः। सकषायं विजानीयात् शमप्राप्तं न चालयेत्। नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत्" इति। योगशास्त्रोक्ताः प्रधानपुरुषसाक्षात्कारात् प्राग्भवाः प्रातिभादयः सिद्धयः विवेकसाक्षात्कारस्योपसर्गापरपर्य्यायाऽन्तरायाः यथोक्तं पातञ्जलसूत्रे "ततः प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जायन्ते" इत्यनेन प्रातिभादिसिद्धीरुक्त्वा "ते समाधावुपसर्गा व्युत्थाने सिद्धय इति" व्यवर्णयत्। योगजधर्म्मानुग्रहीतेन मनोमात्रेण सर्वगोचरत्वात् प्रातिभसिद्धिः। दिव्यानां शब्दस्पर्शरूपरसगन्धानां ग्रहणे योगजधर्म्मानुग्रहीतानि श्रवणादीनि यदाक्रमं समर्थानि यदा भवन्ति तदा श्रावणवेदनादर्शास्वादवार्त्तास्याः सिद्धयः। तथा च दिव्यशब्दग्रहणे यदा योगिनः श्रवणं समर्थं भवति तदा श्रावणमिति संज्ञा एवं दिव्यस्पर्शग्रहणसमर्थात्वक् वेदनासंज्ञा, दिव्यरूपग्रहणे समर्थं नेत्रं दर्शसंज्ञम्। दिव्यरसास्वादे समर्था रसना आस्वादसंज्ञा, दिव्यगन्धग्रहणे समर्थं घ्राणं वार्त्तासंज्ञा। ते प्रातिभादयः निःश्रेयसफले समाधौ तस्य योगिनः व्युत्थानसमये योगविरामकाले जायमानाः उपसर्गा भवन्ति। अतो मोक्षार्थी तानुपेक्षेतेति उपदेशप्रयोजनम् नह्यात्मसाक्षात्कारं विना सिद्धिकोऽपि कृतकृत्यता भवतीति।

अन्तरारात्म पु० अन्तरे सर्व्वाभ्यन्तरेऽतिसूक्ष्मत्वात् आत्मनि आरमते क्रीड़ति आ+रम कर्त्तरि घञ्। आत्माभिरते। "योऽन्तःसुखोऽन्तराराम" इति गीता।

अन्तराल न० अन्तरं व्यवधानसीमामाराति गृह्णाति आ+रा क रस्य लत्वम्। मध्ये अभ्यन्तरे। "द्युतोष पश्यन् विहगान्तराला" इति भट्टिः। "वधूप्रवेशोऽष्टदिनान्तराले" इति सङ्ग० दिङ्नामान्यन्तराले" पा०। सङ्कीर्णवर्णे च। "वर्णानां सान्तरालानां स सदाचार उच्यते" मनुः। तद्वर्त्तिनि त्रि० स्वार्थे अण् चान्तरालमत्र न०।

अन्तरालदिक् स्त्री अन्तराला दिक्। दिशो मध्यायां विदिशि ऐशान्यादौ कोणे।

अन्तरावेदि(दी) स्त्री अन्तरा मध्यस्था वेदिः वा ङीप्। गजयोर्युध्यमानयोर्मध्यस्थायां भूमौ अवटवेद्याम्। "जयश्रीरन्तरावेदी मत्तवारणयोरिव" रघुः। अन्तरेति पृथक्पदमिति मल्लि०। "समूहे चान्तरावेद्यामिति" त्रिका०।

अन्तरिक्ष न० अन्तः स्वर्गपृथिव्योर्मध्ये ईक्षते ईक्ष-कर्म्मणि घञ्, अन्तः अक्षाणि अस्य वा पृषो० पक्षे ह्रस्वः अकारस्य इत्वं वा। पक्षिमेघसञ्चारयोग्ये भूलोकस्वर्गमध्यवर्त्तिनि आकाशप्रदेशे। "पृथिवी हिङ्कारोऽन्तरिक्षं प्रस्ताव" इति छा० उप०। "अन्तरिक्षगतांश्चैव मुनीन् देवांश्च इति" मनुः। "तिर्य्यक् चान्तरिक्षं व्यपोहितमिति" अथ०। "अदितिर्द्यौरदितिरन्तरिक्षमिति" ऋ० १,८९,१०। "अदितिरदीना अखण्डनीया वा पृथिवी देवमाता वा सैव द्यौर्द्योतनशीलो नाकः ततश्च सैवान्तरिक्षम् अन्तरा द्यावापृथिव्योर्मध्ये ईक्ष्यमाणं व्योमेति" भा०। "विश्वमाप्रा अन्तरिक्षमिति" ऋ० १,५२,१३। अन्तरिक्षमन्तरिक्षान्तं द्यावापृथिव्योर्मध्ये वर्त्तमानमाकाशं विश्वं सर्वमिति" भा०। "दिवञ्च पृथिवीं चान्तरिक्षमथो स्वरिति" सन्ध्यामन्त्रः। ततश्च द्यावापृथिवीमध्यस्थाकाशस्यैव भुवर्लोकरूपस्यान्तरिक्षत्वम्। "सादयाम्यन्तरिक्षस्य धर्त्रीमिति" य० १४,५। अन्तरिक्षस्य भुवर्लोकस्य धर्त्रीमिति" वेददीपः। अत्र अन्तरीक्षमपि। अस्यान्तरीक्ष-

निरुक्तिः श्रुतौ । "योऽन्तरे नाकाश आसीदन्तरीक्षमभवदोचं हि तन्नाम ततः पुरान्तरा वा इदानीमीक्षमभूदिति" तस्मादन्तरीक्षमिति" ।

अन्तरिक्षप्रा त्रि० अन्तरिक्षं प्राति पूरयति प्रा-पूरणे विच् । अन्तरिक्षपूरके "अन्तरिक्षप्रां तविषीभिरावृतमिति" ऋ० १,१५,२ । "अन्तरिक्षं द्युलोकं स्वतेजसा प्राति पूरयतीति" विच्, भा० ।

अन्तरिक्षप्रुत् त्रि० अन्तरिक्षं प्रवते प्रुङ् गतौ क्विप् । अन्तरिक्षचरे "अन्तरिक्षप्रुद्भिरपोदकाभिरिति" ऋ०१,११६,३।

अन्तरिक्षसद् त्रि० अन्तरिक्षे सीदति सञ्चरति सद-गतौ क्विप् । आकाशचारिणि । "हंसः शुचिषद्वसुसदन्तरिक्षसदिति ऋ० ४,४०,५ । "अन्तरिक्षसद अन्तरिक्षसञ्चारीति" भा० ।

अन्तरिक्षसद्य त्रि० अन्तरिक्षे सद्यम् सदनं सद-भावे यत् । अन्तरिक्षसदने । "उपरि सद्यं वा एष जयति यो जयत्यन्तरिक्षसद्यमिति" कौ० ब्राह्म० ।

अन्तरिक्ष्य त्रि० अन्तरिक्षे भवः यत् । अन्तरिक्षभवे । "पवतामन्तरिक्ष्या इति ऋ० ९,२६,५ ।

अन्तरित त्रि० अन्तर्-इण-कर्त्तरि क्त २त० । अन्तर्गते अन्तरं व्यवधानं करोतीति णिचि कर्म्मणि क्त । व्यवधानी गते, व्यवधापिते, तिरस्कृते आच्छादिते, "द्विरेफदन्तान्तरितैः सरोरुहैरिति" किरा० । अपसारिते, "कुर्य्यात् यथास्थानक्रमन्तरं वेति" लीलावत्यामन्तरशब्दस्य वियोजने प्रयोगात् तत्प्रकृतिकतया वियोजिते च ।

अन्तरिन्द्रिय न० कर्म्म० । अन्तःकरणे ।

अन्तरीक्ष न० अन्तरिक्षवत्सर्व्वम् । [दके आकाशात्पतितजले

अन्तरीक्षजल न० अन्तरीक्षात् पतितं जलम् शा० त० । दिव्यो-

अन्तरीप पु० अन्तर्मध्ये गता आपोऽस्य ब० अच् समा० आतश्चत्वम् । द्वीपभेदे । द्वीपस्य हि जलमध्यस्थत्वात् अन्तर्गतजलत्वात्तद्वत्वम् इयांस्तु भेदः चतुर्दिक्षु जलसत्त्वे तस्य अन्तरीपत्वम् द्वयोर्दिग्जोर्जलसत्त्वे द्वीपत्वमित्यनयोर्भेदः । काकाक्षिगोलकन्यायात् "द्वीपोऽस्त्रियामन्तरीपमित्यत्रापि अस्त्रियामित्यस्य अन्वय इति तेनायं पुंस्त्री० इति केचित् ।

अन्तरीय न० अन्तरे भवं गहादित्वात् छ । "नाभौ धृतञ्च यद्वस्त्रमाच्छादयति जानुनी । अन्तरीयं प्रशस्तं तदित्यत्रसभवान्वयो" रित्येवंलक्षणे परिधाने वस्त्रे । भवार्थे धूमा० वुञ् । आन्तरीयकः तद्भवे त्रि० ।

अन्तरे अव्य० अन्तरेति इण्-विच् । मध्ये । "आनन्देऽवान्तरेऽन्तरा, अन्तरेण च मध्ये स्युरित्यमरः" ।

अन्तरेण अव्य० अन्तरेति इण्-ण टवर्गादित्वेऽपि षस्य नेत्त्वम् । विनार्थे, मध्यार्थे च । तत्र विनार्थे "अन्तरेणाञ्जलिं बद्धा लक्ष्मणस्य प्रसादनमिति" रामायणम् । मध्ये "अन्तरेण वै योनिं गर्भः सञ्चरति" कौ० ब्रा० । "अन्तरेणापां गुणम् इति" स्मृतिः । तत्र विनार्थे, द्वितीयातृतीये पर्य्यायेण, "श्रीनैगेन विना शम्भुनान्तरेणाच्युतं सुखमिति" सु० बो० । उभयोर्मध्येऽर्थे द्वितीया "अन्तरेणाहवनीयं गार्हपत्यञ्चेति" कौ० ब्रा० ।

अन्तर्गंडु त्रि० अन्तर्मध्ये गडुरिव निरर्थकः । ग्रीवाप्रदेशे जातस्य गलमांसपिण्डस्य गडोर्यथा निरर्थकत्वम् तद्वन्निरर्थके । "किमनेनान्तर्गंडुनेति सर्व्वदर्शन सं० । "अन्तर्गंडु निरर्थकमिति" मेदिनिः ।

अन्तर्गत त्रि० अन्तःअन्तःकरणे गतः । अन्तःकरणस्थे देहस्थे च "अन्तर्गतं प्राणभृतां हि वेद" इति रघुः । "येषामन्तर्गतं पापं जनानां पुण्यकर्म्मणामिति" पुरा० "अन्तर्गता मदनवह्निशिखावली या सा बाध्यते किमिह चन्दनचर्च्चितेनेति" उद्भटः । अभ्यन्तरस्थे च "अन्तर्गतयवे ग्रामे हृषलस्य च सन्निधाविति" । "नेत्रवक्त्रविकारेण स्पष्टमन्तर्गतं मनः" इति च मनुः । अन्तर्गतफलारम्भाः शस्यानामिव सम्पदः" इति रघुः ।

अन्तर्गर्भ त्रि० अन्तरभ्यन्तरस्थो गर्भोऽस्य । अभ्यन्तरस्थगर्भयुक्ते । "कुशौ समावग्रयौर्णाग्रावनन्तर्गर्भाविति" कात्या० २,३, ३१ । गर्भस्य मध्यम् अव्ययी० । गर्भमध्ये अव्य० ।

अन्तर्गर्भिन् त्रि० अन्तर्मध्ये गर्भोऽस्यास्य इनि । मध्यस्थगर्भयुक्ते । "अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव चेति" पवित्रलक्षणे कात्यायन स्मृतिः ।

अन्तर्गृह न० अन्तःस्थं गृहम् । वाराणसीस्थे सम्भावरणवति स्थानविशेषे "अन्यस्थाने कृतं पापं वाराणस्यां विनश्यति । वाराणस्यां कृतं पापं पञ्चक्रोश्यां विनश्यति । पञ्चक्रोश्यां कृतं पापमन्तर्गृहे विनश्यति" ॥ काशीखा० अन्तर्गेहमध्यत्व "अन्यत्र यत्कृतं पापं तत्काश्यां परिनश्यति वाराणस्यां कृतं पाप मन्तर्गेहे विनश्यति अन्तर्गेहे कृतं पापं पैशाच्यनरकावहमिति" "देवो विरजसः पीठादन्तर्गेहं विवेश ह" इति च काशी० । मध्यस्थगृहे च । गृहस्य मध्यम् अव्ययी० गृहस्य मध्ये अव्य० ।

अन्तर्घण पु० अन्तर्हन्यते क्रोडीभवत्यस्मिन् अन्तर्+हन-अप्

नि० षादेशः षत्वम् । द्वारमतिक्रम्य स्थिते सावकाशे देशे "तस्मिन्नन्तर्घणे पश्यन् प्रघणे सौधसद्मनः" इति भट्टिः ।

अन्तर्जठर अव्य० जठरस्य मध्यम् अव्ययी० । जठरस्य मध्ये, उपचारात् तत्स्थकोडे न० ।

अन्तर्जात त्रि० अन्तर्देहमध्ये जातः । देहाभ्यन्तरजाते ।

अन्तर्जानु अव्य० जानुनोर्मध्यम् अव्ययी० । जानुनोर्मध्ये "अन्तर्जानु शुचौ देशे उपविष्ट उदङ्मुखः । प्राङ् वा प्राक्षेण तीर्थेन द्विजो नित्यमुपस्पृशेदिति" या० "जानुनोर्मध्ये हस्तौ क्षत्वेति" रघु० ।

अन्तर्ज्योतिस् न० अन्तर्गतं ज्योतिःप्रकाशकत्वात् चैतन्यम् । सर्वान्तर्यामिनि परब्रह्मरूपचैतन्ये तस्य सर्वान्तर्यामित्वात्तथात्वम् ।

अन्तर्ज्वलन न० अन्तः देहान्तरस्य ज्वलनम् । रोगकृते देहान्तर्दाहे । अन्तःस्थो ज्वलनः । जठरानले पु० ।

अन्तर्दधन न० अन्तर्दध्यते आधीयते मादकताऽनेन दधकरणे ल्युट् । किण्वप्रभृतौ मद्यबीजे ।

अन्तर्दशा स्त्री अन्तर्गता दशा आधिपत्यकालः । ज्योतिषोक्ते महादशान्तर्गते यहाणां स्वाधिपत्ययुक्तकालभेदे । दशा च नानाविधा तासु दशाशब्दे वक्ष्यते । तत्राष्टोत्तरीयदशायामन्तर्दशाऽभिधीयते वक्ष्ये च तस्या एव प्रचलितत्वम् । "षट्सूर्यस्य दशा ज्ञेयाः शशिनोदश पञ्च च । अष्टावङ्गारके ज्ञेया बुधे सप्तदश स्मृताः । शनैश्चरे दश प्रोक्ता गुरोरेकोनविंशतिः । राहोर्द्वादश वर्षाणि भृगोरेकविंशति"रित्युपक्रम्य सत्याचार्यः "कृत्तिकादितये सूर्यः सोमो रौद्रचतुष्टये । मघादितितये भौमो बुधो हस्तचतुष्टये ॥ अनुराधादितये सौरिर्गुरुःपूर्वाचतुष्टये । धनिष्ठादितये राहुः शेषे शुक्रःप्रकीर्त्तितः ॥ सूर्योपभौमार्किदशातिकष्टदा नृणाम् । गुरुशचन्द्रशुक्राणां यथेप्सितफलप्रदा" ॥ अन्तर्दशाज्ञानं यथा । "स्वदशाभिर्दशां हृत्वा नवभिर्भागमाहरेत् । लब्धा मासास्तु तच्छेषं पूरयित्वा तु विंशता ॥ अङ्गैर्हृत्वा दिनं लब्धं तच्छेषे षष्टिपूरिते । नवभिश्च हृते लब्धा ज्ञेया दशान्तरदशान्तरे ॥ रवेः षड्वर्षमध्ये तु वेदा ४ मासा रवेर्निजाः । चन्द्रस्य दश मासाश्च दिग्दिनं पञ्चमासकाः । कुजस्य, भस्य रुद्रास्तु मासा दिग्दिवसाः, शनेः । ऋतुमासाश्च विंशच्च गुरोर्वर्षाण्युविंशतिः । राहोर्मासाष्टकं ज्ञेयं भृगोर्वर्षस्तु मासकौ एवं यहाणामन्येषामूह्याश्चैवान्तरादयः । यद्ग्रहस्यान्तरे यस्तु यत्संख्यकालमाप्नुयात् । तत्संख्यं स्वान्तरे तस्मै स्वदद्यादिति निश्चयः । स्वान्तरे यद्गृहे स्वांशं स्वांशेन पूरयेत् सदा इति" ज्यो० त० । विंशोत्तरीये तु । आर्द्रं कुराजोशनकेशुपूर्व्या वह्न्यादितो भात् क्रमशस्त्रिवारम् । भानं रसाशानगदन्तिचन्द्रकलाङ्कचन्द्राद्रिरसाद्रिविंशा" इत्युक्तेः ऋक्षिकादिक्रमेण रव्यादीनां त्रिवारं रसादिमिता वर्षा महादशा । यथा ऋक्षिकायां जातौ रवेः षट्वर्षाः, रोहिण्यां जातौ चन्द्रस्य १० वर्षाः, मृगे, कुजस्य ७ वर्षाः, आर्द्रायां राहोः १८ वर्षाः, पुनर्वसौ जीवस्य १६ वर्षाः, पुष्ये जातौ शनेः १९ वर्षाः, अश्लेषायां बुधस्य १७ वर्षाः, मघायां केतोः ७ वर्षाः, पूर्वफाल्गुन्यां जातस्य शुक्रस्य २० वर्षाः, एवमुत्तरफाल्गुन्यादिषु नवसु उत्तराषाढादिषु नवसु च रव्यादीनां यथाक्रमं षड्वादिवर्षाः । तदन्तर्दशा तु "स्वदशाभिर्दशां हृत्वा नवभिर्भागमाहरेदिति" विशेषः । ततश्च उभयोर्दशयोरनुपातेनान्तर्दशामानसिद्धेयम् यथा यदि १०८ वर्षैः ६ वर्षाः तदा ६ वर्षैः किमिति इत्यादिक्रमेण त्रैराशिकेन तत्तन्मानम् एवं १२० वर्षैः यदि ६ वर्षाः तदा ६ वर्षैः किमित्यादिक्रमेण त्रैराशिकेन तत्तन्मानसिद्धिः । एवं योगिन्यादिदशायामपि अन्तर्दशामानसिद्धेयम् ।

अन्तर्दशाह अव्य० दशाहस्य मध्यम् अव्ययी० । दशाहाभ्यन्तरे "अन्तर्दशाहे स्नाताहेत् पुनर्मरणजन्मनी" इति मनुः दशाहपदं स्वसजात्युक्ताशौचदिनपरम् ।

अन्तर्दहन न० अन्तरभ्यन्तरे दहनम् । रोगकृते देहाभ्यन्तरदाहे । अन्तःस्थः दहनः । जठरानले पु० ।

अन्तर्दाह पु० अन्तर्मध्ये दाहः । देहाभ्यन्तरसन्तापे ।

अन्तर्दुष्ट त्रि० अन्तः अन्तःकरणे दुष्टः । दुष्टान्तःकरणे ।

अन्तर्द्वार न० अन्तर्गतं द्वारम् । गृहमध्यस्थे गुप्तद्वारे । जालद्वारे क्षीरस्वामी (खिड़की) द्वारे शवरः ।

अन्तर्द्धा स्त्री अन्तर्+धा स्त्रियां भावेऽङ् । अन्तर्द्धाने तिरोधाने "अन्तर्द्धासुपवयुरुत्पलावलीषु" इति माघः ।

अन्तर्द्धान न० अन्तर्+धा-ल्युट् । तिरोधाने दृश्यपदार्थस्य दर्शनायोग्यस्थाने स्थितौ, सन्ध्यादीनां शरीरत्यागे च । "अन्तर्द्धानं गते रामेऽरति" रामायणम् ।

अन्तर्द्धि पु० अन्तर्+धा-कि । आच्छादने, व्यवधाने, अन्तर्धाने च "अन्तर्द्धौ येनादर्शनमिच्छति" या० ।

अन्तर्नगर न० नगरस्य मध्यम् अव्ययी० । नगरमध्ये अन्तःस्थं नगरम् कर्म० । अन्तःपुरे । "दशाननान्नर्नगरं ददर्शेति" रामा० ।

अन्तर्भाव पु० अन्तर्मध्ये भावः प्रवेशः । मध्यप्रवेशे समुदाय-मध्यपाते । "आत्मानमात्मना विश्वदस्तीति व्यपदिश्यते अन्तर्भावाच्च तेनासौ कर्म्मणा न सकर्म्मक" इति हरिका० स्वविषयकज्ञानविषयत्वे च भवति च वह्निमद्भोधविषयत्वा-द्वह्नेर्वह्निमदन्तर्भावः । अन्तःस्थोभावः । चित्तवृत्तिभेदे ।

अन्तर्भावना स्त्री अन्तःस्था व्यञ्जकचेष्टाकारादिरहिता भावना । व्यञ्जकचेष्टादिशून्ये चिन्तने ।

अन्तर्भावित त्रि० अन्तर्+भू–णिच्–क्त । मध्यप्रवेशिते समु-दायान्तर्भूतीकृते । "अन्तर्भावितसत्त्वं चेत् कारणं तदसत्त्वतः । नान्तर्भावितसत्त्वं चेत् कारणं तदसत्त्वत" इति खण्डनखण्डखाद्यम् । अव्यवहितपूर्ववर्त्तितया कार-णस्य यत् सत्त्वसुररीक्रियते तस्य सत्त्वमस्ति न वा तस्य सत्त्वस्वीकारे पुनस्तत्सत्त्वस्य सत्त्वस्वीकारेऽनवस्थापातः ततश्च उत्तरत्र एकस्य सत्त्वमनङ्गीकृत्यैव अनवस्था वारणीया तथाच कारणसत्त्वेऽपि कुतः तथा नाङ्गीक्रियते । एवं च विनापि सत्त्वं, तदङ्गीकृत्य कारणतास्वीकारे न कोऽपि दोषोऽस्ति इति तदाशयः ।

अन्तर्भूत त्रि० अन्तर्मध्ये भूतः भू+क्त । मध्यस्थिते, अन्त-र्गते च । "कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः । सर्वै-रकर्मकैर्योगे कर्मत्वमुपजायते" इति हरिका० "एष वै भगवान् विष्णुरन्तर्भूतः सनातन" इति पुरा० ।

अन्तर्मनस् त्रि० अन्तर्गतं बाह्यव्यापारशून्यतया अन्तरेव स्थितं मनो यस्य । व्याकुलचित्ते, समाहितमनस्के च । दुःखितस्य हि बाह्येतरव्यापारशून्यतया तत्प्रती कारचिन्तनायान्तरेव मनसः स्थितत्वात् तथात्वम् समाधि-स्थस्य तु बाह्यविषयपरिहारेण ध्येयात्मात्रगोचरमन-स्कतया तथात्वमिति भेदः ।

अन्तर्मुख त्रि० अन्तःपरमात्मा मुखं प्रवेशद्वारं यस्य । बाह्य-वस्तुपरिहारेण परमात्मविषयकतया प्रवेशयुक्ते चित्तादौ । अन्तरभ्यन्तरे सुखं यस्य । सुप्तौतोक्ते ब्रह्मसाक्षात्कारसाधने यज्ञ भेदे न० । "सूचीकुशपलाशीसुखशरारीसुखान्मुखत्रिकू-र्चकानि विस्रावणे" इति सुश्रुतम् । अन्तःकरणं अविद्या-वृत्तिरूपं द्वारं सुखानुभवे यस्य । स्वरूपसुखानुभवहेतुना अविद्यावृत्तिरूपान्तःकरणेन सुषुप्तौ आनन्दानुभवकारके प्राज्ञाख्ये जीवभेदे "आनन्दभुक् चेतोमुखः प्राज्ञः" इति श्रुतौ प्राज्ञस्य आनन्दभोगे चेतोमुखत्वोक्त्या तथात्वम् । मुखस्य मध्यम् अव्ययी० । मुखस्य मध्ये इत्यर्थे अव्य० ।

अन्तर्मातृका स्त्री अन्तःस्था षट्चक्रस्था मातृका अकारादि-वर्णाः । तन्त्रोक्तेषु षट्पद्मस्थेषु अकारादिषु वर्णेषु । ते च वर्णा अन्तर्मातृकान्यासशब्देऽनुपदं वक्ष्यन्ते ।

अन्तर्मातृकान्यास पु० अन्तःस्थाया मातृकाया न्यासः उच्चा-रणपूर्व्वकं तत्तत्स्थानेषु न्यासः । अन्तस्थमातृकावर्णानां स्मरणपूर्व्वकं तत्तत्स्थानेषु न्यासे । यथा "न्यासोऽय-मान्तर" इत्युपक्रम्य "द्वादशपत्राम्बुजे कण्ठे स्वरान् षोड़श विन्यसेत् । द्वादशच्छदहृत्पद्मे कादीन् द्वादश विन्यसेत् । दशपत्राम्बुजे नाभौ डकारादीन्न्यसेद्दश । षट्पत्रमध्ये लिङ्गस्थे बकारादीन्न्यसेच्च षट् । आधारे चतुरोवर्णान् न्यसेद्वादीन् चतुर्दले । हृत्पौ भ्रूमध्यगे पद्मे द्विदले विन्यसेत् प्रिये ! । तन्मध्ये परविन्दुञ्च सृष्टिस्थितिलयात्मकम् । एवं समाहितमना ध्यात्वेन्द्रासोयमान्तरः" इति तन्त्रसारः ।

अन्तर्मृत पु० स्त्री अन्तर्गर्भाशये मृतः । गर्भाशये मृते बालकादौ "भवत्युच्छ्वासपूतिश्च शूलं चान्तर्मृते शिशौ" इति सुश्रुतम् ।

अन्तर्य त्रि० अन्तरे भवः दिगा० य । मध्यभवे ।

अन्तर्याग पु० अन्तरन्तःकरणेन मनसा कल्पितोपचारैर्याग: पूजा होमश्च । तन्त्रोक्ते मानसोपचारैः पूजने, होमभेदे च । "अर्च्चयन् विषयैः पुष्पैस्तत्तत्त्वात् तन्मयो भवेत् । न्यासै-स्तन्मयतामुद्वहः सोऽहंभावेन पूजयेत्" । तन्मयेति तदेकत्व-ज्ञानं सोऽहमिति, "मन्त्राक्षराणि तच्छक्तौ प्रोतानि परिभाव-येत् । तामेव परमव्योम्नि परमानन्दरूपिते । दर्शयत्यात्मसद्भावं पूजा होमादिभिर्विनेति" । विषयपुष्पाणि यथा । अमा-यामनहङ्कारमरागमगदं तथा । अमोहकमदम्भञ्च अ-निन्दाऽद्वेषकौ तथा । अमात्सर्य्यमलोभञ्च दशपुष्पं विदुर्बुधाः । अहिंसा परमं पुष्पं पुष्पमिन्द्रियनिग्रहः । दया पुष्पं क्षमा पुष्पं ज्ञानं पुष्पञ्च पञ्चमम् । इत्यष्टसप्तभिः १५ पुष्पैः पूजयेत् परदेवताम्" । अथ होमः । "आत्मा-नमपरिच्छिन्नं विभाव्यात्मानमन्तरा परमात्मज्ञानमेकस्व-रूपं संविभाव्य च । चतुरस्रं तु चित्कुण्डमानन्दमेखला-युतम् । अर्द्धमात्राकृतियोनिस्तया चैव विभूषितम् । नाभौ ध्यात्वा तन्मयस्वज्ञानाग्नौ जुहुयात् यथा । मूलान्ते नाभि-चैतन्यरूपाग्नौ हविषा स्रुचा । ज्ञानप्रदीपिते नित्यमष्टष्टीर्जुहोम्यहम्" । (स्वाहा इति प्रथमाऽऽहुतिः, मूलान्ते) धर्म्मा-धर्म्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा । सुषुम्णावर्त्मना नित्यमष्टष्टीर्जुहोम्यहम्" । (स्वाहेति द्वितीयाऽऽहुतिः, मूलान्ते) "प्रकाशाकाशहस्ताभ्यां अवलम्बनः स्रुचा । धर्म्माधर्म्मकलाक्षेपूर्णमग्नौ जुहोम्यहम्" । (स्वाहेति तृती-

याङ्गुतिं जुहुयात्। ततो मूलाग्रे)। "अन्तर्निरन्तर-निरिन्धनएधमाने मायान्धकारपरिपन्थिनि संविदग्नौ। कक्षिंचिदद्भुतमरीविविकाशमूलौ विश्वं जुहोमि वसुधादि-शिवासनान्तम्। इत्थन्तर्यजनं कृत्वा साक्षाद्ब्रह्ममयो भवेत्। न तस्य पापपुण्यानि जीवन्मुक्तोभवेद्ध्रुवम्"। "अयमन्त-र्यागोऽग्निनामेव। अयान्तःपञ्चमकारयजनप्रकारः॥ तदुक्तं कुलार्णवे अन्तर्यजने"। "सुरा यक्तिः शिवोमांसं तद्भोक्ता भैरवःस्वयम्। तयोरैक्यसमुत्पन्ने आनन्दोभोग उच्यते। आनन्दं ब्रह्मणोरूपं तच्च हृत्पे व्यवस्थितम्। तस्माभिव्यञ्जकं द्रव्यं योगिभिस्तेन पीयते। त्रिकूटत्रय-विशेषतः षट्चक्रपद्मभेदतः। पीठस्थानानि चागम्य महा पद्मवनं व्रजेत्। आमूलाधारमाब्रह्मरन्ध्रं गत्वा पुनः पुनः। चिच्चन्द्रकुण्डलीशक्तिसामरस्यमहोदयः। व्योमपङ्कजनि-ष्यन्दसुधापानरतो नरः। मधुपानमिदं देवि! चेतरन्मद्य-पानकम्। पुण्यापुण्यं पशुं हत्वा ज्ञानखड्गेन योगवित्। परे ब्रह्मणि मनश्चित्तं पलाशीति निगद्यते। मानसादिन्द्रिय-ग्रामं संयम्यात्मनि योजयेत्। मांसाशी स भवेद्देवि! इतरे प्राणिघातकाः। शिवशक्त्यात्मिथुनसंयोगानन्दनिर्भराः। सुक्ताम्बे मैथुनं तत्स्यादितरे स्त्रीनिषेवकाः" इति त०सा०। "अन्तःपूजां विधायैव बाह्यपूजां समाचरेदिति" तन्त्रम्।

अन्तर्याम पु० अन्तर्यामो यस्मात्। यजुर्भेदे सामपरायणे पात्रभेदे। "त्रिष्टुभः खारं खारादन्तर्यामः 'अन्तर्या-मात् पञ्चदश' इति यजु० १३,५५ खारात् साम्नोऽन्त-र्यामं यच्चं निरभिमीतेति" श्रुतेरिति वेददीपः। तच्च यज्ञियं पात्रभेदः। "सुत्वा सुत्यायामन्तर्याममनु-मन्त्रयेदिति" श्रुतिः "उन्नेतुः पात्रयोजनमित्युपक्रम्य" खरोत्तरपूर्वार्द्धे उपांशुयाजान्तर्यामयोः" कात्या० ६,१,२, खरस्य उत्तरपूर्वार्द्धे ईशानकोणे, उपांशुयाजान्तर्यामयोः पात्रयो र्योजयति सादयतीति वा" तद्भा०।

अन्तर्यामिन् पु० अन्तर्मध्येऽनुप्रविश्य यमयति स्वस्वकर्म्मणि इन्द्रियादीनि जीवं वा व्यापारयति यम+णिच्-णिनि। "अन्तराविश्य भूतानि यो बिभर्त्त्यात्मकेतुभिः। अन्तर्यामी-श्वरः साक्षात् भवे"दित्युक्ते ईश्वरे "अन्तरेष यमयती-त्यादि" बृहदारण्यकान्तर्यामिब्राह्मणोक्तेऽस्य तथात्वम्। आत्मकेतुभिः निजव्यापारैः प्राणादिवृत्तिभिरित्यर्थः। वायौ च तस्य सर्व्वप्राणिषु अध्यात्मवायुरूपेण स्थितत्वा-त्तथात्वम्। अन्तर्गतवस्तुज्ञातरि त्रि०।

अन्तर्यामिब्राह्मण न० अन्तर्यामिन ईश्वरस्य ज्ञापकम् ब्राह्मणं मन्त्रेतरवेदभागः। बृहदारण्यकान्तर्गते अन्तर्या-मिनः ईश्वरस्य ज्ञापके ब्राह्मणे। तच्च १२०पृष्ठे दर्शितम्।

अन्तर्लोम न० अन्तर्गतमाच्छाद्यं लोम अच् समा०। आच्छाद्ये लोम्नि।

अन्तर्वंशिक त्रि० अन्तर्वंशे राज्ञामाभ्यन्तरस्थे नियुक्तः नियुक्तार्थे ठक् संज्ञापूर्व्वकविधेरनित्यत्वाच्च ढञ्। अन्त-र्वंशः नियोज्यतयाऽस्त्यस्य ठन् वा। राज्ञामन्तःपुरे रक्ष-णार्थं नियुक्ते कुब्जवामनादौ।

अन्तर्वण अव्य० वनस्य मध्यम् सप्तम्। वनमध्ये इत्यर्थे।

अन्तर्वत्नी अन्तरस्त्यस्य गर्भ इति वाक्ये "अन्तर्वत्पतिवतो-र्नुगिति" पा० अन्तःशब्दस्याधिकरणशक्तिप्रधानतयाऽस्ति-सामानाधिकरण्याभावात् अप्राप्तौ मतुप् अनुपपत्ये मस्य वः नुक् च। गर्भवत्याम् स्त्रियाम्। "तस्यामेवास्य यामिन्यामन्तर्वत्नी प्रजावती सुतावसृत सम्भावितिं" रघुः। अन्तःशब्दस्य तत्स्थलक्षणया अस्त्यर्थे मतुप् मस्य वः। अन्तःस्थपदार्थवति त्रि०। "पुमानन्तर्वां स्थविरः पयसानिति" अथ० ६,४,३,।

अन्तर्वमि पु० अन्तःस्थित एव वाक्यति उद्गारशब्दं कारयति वम-शब्दे इन् मस्य सत्वम्। (ढेकुर) इतिख्यात-स्योद्गारशब्दस्य कारके अजीर्णनामके रोगभेदे।

अन्तर्वर्त्तिन् त्रि० अन्तः मध्ये वर्त्तते वृत-णिनि। मध्य-वर्त्तिनि। "अन्तर्वर्त्तिनीं विभक्तिमाश्रित्येति" सि०कौ०।

अन्तर्वा त्रि० अन्तः अन्तरङ्गभावम् अन्तःकरणं वा याति गच्छति स्निग्धत्वेन वा-गतिगन्धनयोः विच्। पुलपक्षादिषु।

अन्तर्वाणि त्रि० अन्तर्गता अन्तःकरणे स्थिता शास्त्रवाक्या-त्मिका वाणी यस्य ब० समासान्तविधेरनित्यत्वाच्च कप् ह्रस्वश्च। बहुशास्त्रवाक्याभिज्ञे पण्डिते।

अन्तर्वावत् त्रि० अन्तर्वाः पुत्रादिरस्त्यस्मिन् मतुप् मस्य वः। पुत्रादिमति "अन्तर्वावत् जयं दधे" इति ऋ० १,४०,७, "अन्तर्वावत् अन्तःस्थितपुत्रादिमत्त्वात् बहुगुणोपेतं जयं मदहमिति" भा०।

अन्तर्वाष्प त्रि० अन्तर्गतं वाष्पम्। वाष्पाप्रकाशिते कण्ठ-प्रभृतिप्राप्ते रोदनजन्यजलकणे। ब०। तद्युक्तपदार्थे त्रि०। "अन्तर्वाष्पविलोचने" इति।

अन्तर्विगाह पु० अन्तर्भूत्वा विगाहः। मध्यप्रवेशे। ल्युट्। अन्तर्विगाहनमप्यत्र न० हेम०।

अन्तर्वेदि पु० अन्तर्गता वेदिर्यत्र देशे। ब्रह्मावर्त्तदेशे, स च देशः आ प्रयागात् हरिद्वारपर्य्यन्तो गङ्गायमुनयोर्मध्यदेशः।

वेद्या मध्यम् अव्ययी०। वेदिमध्ये अव्य०। "अपणस्य पचादुपविशत्यन्तर्वेदि वा कात्या० २,५,११, "अन्तर्वेदि वेद्याः करिष्यमाणायाः प्रदेशो लक्ष्यते तस्य देशस्याभ्यन्तरे उपविशतीति" तद्वा०"अन्यदन्तर्वेदि" कात्या०१३,३,२। अन्तर्वेदि विहितं कर्म ठन्। अन्तर्वेदिकम् अन्तर्वेदिविहिते इष्ट्यादौ कर्मणि "नित्यमैष्टिकपौर्त्तिकमिति" मनुवचने ऐष्टिकमन्तर्वेदिकमिति" कुल्लू०।

अन्तर्वेदी स्त्री पृथिव्या मध्यस्थितत्वादन्तर्वेदीव। हरिद्वारावधिप्रयागपर्य्यन्ते गङ्गायमुनेति ब्रह्मावर्त्तइति च ख्याते देशे

अन्तर्वैशिक त्रि० अन्तर्वेशे अन्तःपुरे नियुक्तः ठक् संज्ञापूर्व्वकविधेरनित्यत्वात् न वृद्धिः। अन्तःपुररक्षणाय नियुक्ते कञ्चुक्यादौ। अन्तर्वैशिकादयोऽप्यत्र।

अन्तर्हेत्य अव्य० अन्तर्+हन–ल्यप्। मध्ये हत्वेत्यर्थे "अन्तरपरियहे" पा० अपरिग्रह एवास्य गतित्वेन समासः परियहे ढ न, "अन्तर्हत्या गतः हतं परिग्रहेति" सि०कौ०। [तद्वति त्रि०।

अन्तर्हास पु० अन्तरप्रकाशो हासः। गूढ़हास्ये, हृत०।

अन्तर्हित त्रि० अन्तर्+धा–क्त। गुप्ते, तिरोहिते च। "अन्तर्हितस्त्वर्थे" इति सि०कौ०।

अन्तवत् त्रि०अन्तो नाशः परिच्छेदो वाऽस्य मतुप् मस्य वः। अवश्यनश्वरे "अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिण" इति गीता। परिच्छेदयुक्ते सीमावति च। "स ह्येतानन्तवत उपास्तेऽन्तवतः स लोकान् जयतीति" छ० उ०। "अन्तवतः परिच्छिन्नानिति" भा०। स्त्रियां ङीप्।

अन्त(न्ते)वासिन् पु० अन्ते समीपे वस्तुं शीलमस्य वस–णिनि सप्रत्ययो वा अलुक्। शिष्ये। स्त्रियां ङीप्। समीपस्थिते त्रि०। [सीमावासि, नाशसमये च।

अन्तवेला स्त्री अन्तस्या वेलाऽवधिः कालो वा ६त०। शेषान्तशय्या स्त्री शयनं शय्या शीङ्–भावे क्यप् अन्तस्य नाशार्थं शय्या चतुर्थ्यर्थे ६त०। मरणार्थं भूमिशय्यायाम्, तद्धेतुत्वात् श्मशाने च। अन्त एव शय्या निर्व्यापारत्वसाङ्घात् कर्म्म०। मरणे।

अन्तसद् पु० अन्ते निकटे सीदति सद–क्विप्। अन्तेवासिनि शिष्ये। "तमुपासते गुरुमिवान्तसद्" इति किरा०। समीपगे त्रि०।

अन्तस्सलिल न० अन्तरप्रकाशं सलिलम्। भूमिमध्यस्थे जले "गङ्गाया अन्तस्सलिलवाहित्वाच्च दोष" इति रघु०। सत्त्वाभावपक्षे अन्तःसलिलमस्यत्। अन्तर्गतं सलिलं यस्याः। अप्रकाशितजलायां सरस्वतीनद्यां स्त्री। सलिलस्य मध्यम् अव्ययी०। जलमध्ये अव्य०। अन्तःसलिलमवगाहेतेति" स्मृतिः। [तापे च।

अन्तस्ताप पु० अन्तःस्थितः तापः। चित्ततापे, देहमध्य-

अन्त(न्ते)स्था पु०अन्तः स्वरोष्मणोर्वर्णयोर्मध्ये तिष्ठतीति स्था–क्विप्। यरलवाख्येषु वर्णेषु ते हि कादिभावमानस्वरौणां शषसहरूपोष्मषसमध्यस्थाः। वा विसर्गजिह्वामूलीयस्था अपि। "हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम्। औरस्यं तं विजानीयात् कण्ठ्यमाङ्करसंयुतमिति" पा०शि०। स्था–क। अन्तःस्थोऽत्र मध्यस्थितमात्रे त्रि०। भवादौ गणा० क। अन्तःस्थीवः मध्यस्थभवे त्रि०।

अन्तादि त्रि० आदिश्च अन्तश्च ह०राज० वा परनिपातः। आद्यन्तयोः। "अन्तादिवच्चेति" पा०।

अन्तानल पु० अन्तस्य प्रलयस्यानलोवह्निः। प्रलयानले, अन्त्येष्टिकर्म्माङ्गवह्नौ च।

अन्तार पु० अन्तं वनपर्य्यन्तदेशमृच्छति ऋ–अण् उप०। "अधिष्ठातारमन्तारं पशूनां पुरुषं विदुरिति" भारतोक्ते पशुपालके। [चाण्डालादौ तस्य ग्रामान्तस्थत्वात्तथात्वम्।

अन्तावशायिन् पु० अन्ते पर्य्यन्तदेशेऽवशेते अव+शी–णिनि।

अन्तावसायिन् पु० नखकेशानामन्तमवसादं क्षेत्तुं शीलमस्य अव+सो–णिनि युक् च। नापिते। अन्ते वृद्धे वयसि अवस्यति निश्चिनोति तत्त्वम्। मुनिभेदे। "अन्ताय स्वतोऽर्थं जन्तुनाशाय अवस्यति। प्राणिहिंसके चाण्डालादौ।

अन्ति (का) स्त्री अन्त्यते संबध्यते अन्त–इ। नटाभिनयनकाले तदुक्तौ ज्येष्ठभगिन्याम्। स्वार्थे के टापि अन्तिकेत्यपि। सामीप्यार्थे अव्य० "सुखप्रमीतवदुपेयतुरन्ति मातोरिति" भाग०"यो नो अग्नेऽभिदासत्यन्ति दूरे पदीष्ट स" इति ऋ० १,७६,११, "अन्ति अन्तिके" भा०। "नहीं तु वो मरुतो अन्त्यग्ने" ऋ० १,१६७,६। अस्य सामीप्यार्थत्वात् पदान्तरेण अव्ययीभावे। तत्तदर्थसामीप्ये "इषश्चावन्तिदेवमिति ऋ० १,१८०,७।

अन्तिक त्रि० अन्त्यते संबध्यते सामीप्येन, अन्त–घञ् सोऽस्यास्तीति मत्वर्थीयः ठन्। सामीप्यवति। "विप्रान्तिके पितृन् ध्यायन्निति" "शनैः पिण्डान्तिके पुनरिति" "वसेयुश्च सदान्तिके" इति च मनुः। "तामन्तिकन्यस्तबलिप्रदीपामिति" रघुः। स्वार्थे ठनि सामीप्ये न०। चूल्लाम् न०। ओषधिभेदे स्त्री। अन्तं शेषसीमां व्याप्नोति अन्त+कनु। पर्य्यन्तव्यापके त्रि०। "जेयान्तिको ब्राह्म-

यस्य दण्डः कार्य्यः प्रमाणतः। ललाटसम्मितो राज्ञः स्यात्तु नासान्तिको विश" इति "षट्त्रिंशदाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम्। तदर्द्धिकं पादिकं वा ग्रहणान्तिकमेव वेति" च मनुः। "जनान्ते स्याज्जनान्तिकमिति" भा०ट०।

अन्तिकतम त्रि० अतिशयेनान्तिकः अतिशयने तमप्। अत्यासन्ने वेदे तु "तादेर्वेति" तिकलोपे अन्तभोऽप्युक्तार्थे।

अन्तिकाश्रय पु० अन्तिकं समीपम् आश्रयते आ+श्रि-अच्। निकटस्थे, अवलम्बनस्थाने च।

अन्तितस् अव्य० अन्तिक+तसिल् कलोपः अन्तिशब्दाद्वा तसिल्। अन्तिके इत्यर्थे "नकिष्टं न्त्यन्तितोनदूरादिति" ऋ० २,२७,१३, "अन्तितः अन्तिकादिति" भा०।

अन्तिम त्रि० अन्ते भवः अन्त+डिमच्। अन्तभवे, चरमे च। "अजातमृतमूर्खानां वरमाद्यौ नचान्तिमः। सकृद्दोषकरावाद्यावन्तिमस्य पदे पदे" हितो०।

अन्तिवाम त्रि० अन्ति अन्तिके वामं वननीयं धनमस्य। निकटस्थधने "अन्तिवामा दूरे" इति ऋ० ७,७७,४। "अन्ति अक्षदन्तिके वामं धनं यस्याः सान्तिवामेति" भा०।

अन्तेवसत् पु० अन्ते निकटे विद्याग्रहणाय वसति वस-शतृ ७त० अलुक्समा०। शिष्ये अन्तेशब्दस्य पृथक्स्थितावपि तत्सभभिव्याहारमात्रेण तदर्थता। "वसन्निवान्ते विनयेन जिष्णुः" किरा०।

अन्तेवासिन् पु० अन्ते निकटे विद्याग्रहणाय वसति वस-णिनि ७त० अलुक्समा०। शिष्ये "वाच्यान्तेवासिनोवापि न त्वन्यत इति स्थितिरिति" मनुः "कलापिवैशम्पायनान्तेवासिभ्यश्चेति" "आचार्य्योपसर्जनान्तश्चान्तेवासीति" च पा०। "वामदेवान्तेवासी तदाश्रमवासीति" दशकु०। यामादेरन्तेवासिनि चाण्डालादौ त्रि०।

अन्तोदात्त न० अन्ते उदात्तः स्वरो यस्य। अन्तोदात्तस्वरयुक्ते पदे "पथिमथोः सर्व्वनामस्थाने" पा०सूत्रे "सर्व्वनामस्थाने किम्? ज्योतिष्मतः पथो रक्षेति उदात्तनिवृत्तिस्वरेणान्तोदात्तं पदमिति" सि०कौ०। अन्ते अन्ता वयवे उदात्तः। षाड्गसमुदायस्य अन्त उदात्तः षाड्गे समुदाये "कर्त्तरीतो घञोऽन्त उदात्त" इत्यधिकारे विहिते अन्तोदात्तस्वरे, कार्यःपाक इत्यादि। "धातोः" पा० अन्तोदात्तः। "गोपायतश्च" इति सि०कौ०। "फिषोऽन्त उदात्त" इत्यधिकारे शाकलवाचार्य्यप्रणीतसूत्रैः प्रातिपदिकस्यान्त उदात्तः। तानि च सूत्राणि सि०कौ० उत्तरार्द्धे ५५१, पृष्ठादौ उपात्तानि। षाड्गसूत्रोत्पन्नानां प्रातिपादिकानामन्तोदात्तता बोध्या।

अन्त्य त्रि० अन्ते पर्य्यन्ते वसतीति अन्त+यत्। चाण्डाले। "अन्त्यादपि परं धर्म्मं स्त्रीरत्नं दुष्कुलादपीति" मनुः "अन्त्यचण्डाल" इति कुल्लू०। म्लेच्छे, चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च पतत्यज्ञानतो विप्रो ज्ञानात् साम्यं तु गच्छति" नर्च्चद्यवनदीनाम्नो नान्त्यपर्वतनामिकामिति" "नान्त्यो न विकलेन्द्रिय" इति च मनुः। "अन्त्यचण्डालादिरिति" "नर्च्चद्यवनदीम्लेच्छपर्वतनामिकामिति" च कुल्लू०। म्लेच्छानां सर्व्वापकर्षान्नभवत्वात्तथात्वम्। अवसानभवे, "जायायै पूर्व्वमारिण्यै दत्त्वाग्नीनन्त्यकर्म्मणीति" मनुः "नानावीजेष्वन्त्य एव सामर्थ्यात्" काल्या० २,४,१०, "असङ्ख्यमीड्य भगवन्! अघमन्त्यमवेहि मे" इति "विससर्ज्ज तदन्त्यमखण्डनमिति" च रघुः "क्रियतां कथमन्त्यमखण्डनमिति" कुमा०। अवसानञ्च दैशिकं कालिकञ्च उक्तोदाहरणे यथायथं बोध्यम् अन्ताय परिच्छेदाय हितः यत्। परिच्छेदकारके वैशिषिकोक्ते विशेषपदार्थे "अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्त्तित" इति भाषा० प्रलये परमाणूनां गगनादीनाञ्च अन्यस्य विशेषकारकस्याभावात् विशेषस्यैव परिच्छेदकरत्वमिति तस्यान्त्यत्वम्। सप्तायाम् स्त्री। अन्तिमे वस्तुनि त्रि०। यथा नक्षत्राणां मध्ये रेवती, राशीनां मध्ये मीनः, वर्णानां मध्ये हकार इत्यादि। संख्याभेदे न०"जलधिश्चान्त्यं मध्यं परार्द्धमिति दशगुणोत्तरा संख्ये"ति भास्कराचार्य्योक्ते परार्द्धगतभागे। गणितशास्त्रोक्ते सर्व्वस्य वामस्थिताङ्के "स्थाप्योऽन्त्यवर्गो द्विगुणान्त्यनिघ्न" इति लीला०। लग्नावधिहादशराशौ पु० षष्ठेऽष्टमेऽन्त्रे भुविचेन्त्विज्येश इति नील०ता०। "त्रिकोणाष्टकयूकान्त्यग्रहा यद्वत् फलं तथा इति"ज्योति०। अन्तेभवः दिगा० यत्। सिद्धान्तशिरोमणयुक्तायां चरजीवया युतोनायां त्रिज्यायाम् स्त्री। यथा "त्रिज्यैवं द्विगुणश्च सा भूतिश्चरज्यैवं त्रिगुणोऽपि सान्त्यका"। "द्युज्यैव त्रिज्यैवं द्विगुणोत्तरगोले युता, वामे रहिता भूतिर्भवति। एवं त्रिज्या चरजीवया युतोनान्त्या स्यात्। अत्रोपपत्तिः। अत्र गोलेऽहोरात्रवृत्तत्रिज्यासंपातयोर्बद्धं यत् तदुदयास्तसूत्रम्। एवमुन्मण्डलसंपातयोर्बद्धं तदहोरात्रवृत्तत्रासूत्रम्। तदुदयास्तसूत्रयोरन्तरं सर्व्वत्र कुज्या। अत्र याम्योत्तरवृत्तसंपातयोर्बद्धं तत् तन्मितं तस्य त्रासूत्रम्।

तयोर्व्यासस्तलयोर्यः संपातस्तस्मादुपरितनं खण्डं त्यजेत् । सोऽत्तरगोलेऽधःस्थया कुज्यया युता यावत् क्रियते तावद्दिनार्धं कोदयास्तलयोरन्तरं स्यात् । दक्षिणे तु कुज्यया हीना । यतस्तत्रोदयास्तसूत्रादधः कुज्या । यदर्कोदयास्तसूत्रयोरन्तरं सा च क्षितिरुच्यते । एवमन्यापि । अत्राहोरात्रवृत्तव्यासार्धं त्रिज्यातुल्यैरङ्गैरङ्क्यते तावत् त्रिज्यातुल्यं भवति । तैरङ्गैर्यावत् कुज्या गण्यते तावच्चरज्यातुल्या भवति । अथ चरज्यया त्रिज्या युतोनाऽन्त्यासंज्ञा भवति । नक्षत्रान्त्याङ्घ्र्योः चेलसंस्थानभेदः । किन्त्वङ्गानां गुरुलघुत्वात् केवलं संख्याक्रमतो भेद इत्युपपन्नम्" प्रमिता० ।

अन्त्यकर्मन् न० अन्ते नाशे भवं कर्म्म । अन्त्येष्टिक्रियायाम् । "जायायै पूर्वं मारिष्यै दत्त्वाग्नीनन्त्यकर्मणि" "आत्मानं याजनं कृत्वा परेषामन्त्यकर्म च अभिचारमहीनञ्च त्रिभिः कृच्छ्रैर्व्यपोहति" इति "जातकर्मान्त्यकर्माणि सर्वश्राद्धं तथैव चेति" च मनुः । "तमेनं मृतमितोऽस्मादयामात् अग्नये" इति का०उप० अग्नयेऽन्त्यर्थस्त्विजोऽरनि पुत्रा वान्त्यकर्म्मणि" इति का०उप० भा० ।

अन्त्यज पु०स्त्री० अन्त्यः सन् जायते जन–ड । शूद्रे तस्य वर्णमध्ये शेषभवत्वात्तथात्वम् । "येन केनचिदङ्गेन हिंसाच्छेदमन्त्यज" इति मनुः । "अन्त्यजः शूद्रः" इति कुल्लू० । शेषजातमात्रे त्रि० । अन्त्यशब्दात् इव जायते जन–ड । रजकादिषु सप्तसु जातिषु पु०स्त्री० "रजकश्चर्मकारश्च नटो वरुड एव च । कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः" अत्रिसंहिता । "न शूद्रराज्ये निवसेदित्यधिक्रत्य नोपस्पृष्टेऽन्त्यजैर्जग्धिरिति" "सङ्करं त्वन्त्यजस्त्रियामिति" च मनुः ।

अन्त्यजन्मन् पु०स्त्री० अन्त्यं जन्म यस्य । शूद्रे, "प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मन" इति मनुः । शेषजातमात्रे त्रि० ।

अन्त्यजाति पु०स्त्री० अन्त्या जातिर्यस्य । शूद्रे । "शरीरजैः कर्मदोषैर्याति स्थावरतां नरः । वाचिकैः पक्षिमृगतां मानसैरन्त्यजातितामिति" मनुः । चण्डालादौ च । "अन्त्यजातिरविज्ञातो निवेशयितुमर्हति" याज्ञ० ।

अन्त्यभ न० कर्म० । मीनराशौ, रेवतीनक्षत्रे च तयोः राशिचक्रस्थाने स्थितत्वात्तथात्वम् ।

अन्त्ययोनि पु०स्त्री० अन्त्या योनिरुत्पत्तिर्यस्य । शूद्रे, चण्डालादौ च "शूद्राश्च सन्तः शूद्रासामन्त्यानामन्त्ययोनय" इति मनुः ।

अन्त्यवर्ण पु०स्त्री० कर्म्म० । शूद्रे । यदवाक्षादेरवसानस्थिताचरे पु० । [ष्ठ्यस्य विवरणम् ।

अन्त्यानुप्रास पु० कर्म० । शब्दालङ्काररूपे अनुप्रासभेदे (१७८)

अन्त्यावसायिन् पु० स्त्री० "निषादस्त्री तु चण्डालात् उग्रमन्त्यावसायिनम् । श्मशानगोचरं सूते" इति मनूक्ते निषादस्त्रियां चण्डालजाते (सरदाफरास) इति ख्याते सङ्कीर्णवर्णे स्त्रियां ङीप् । "चण्डालः श्वपचश्चैव सूतो वैदेहकस्तथा । मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः" इत्यङ्गिरसोक्तचण्डादिषु च । "अन्त्यावसायिनामग्रमग्रीयाद्यस्तु कामत" इति अङ्गिरःस्मृतिः ।

अन्त्याश्रम पुंन० कर्म्म० । चतुर्थाश्रमे भिक्षुरूपशेषाश्रमे ।

अन्त्याश्रमिन् पु० अन्त्याश्रमोऽस्यास्ति इनि । चतुर्थाश्रमयुक्ते ।

अन्त्याहुति स्त्री कर्म्म० । अन्त्येष्टौ साग्निकस्य मृतस्य देहसंस्कारके यज्ञभेदे "अन्त्याहुतिं जुहावयिषुं सविप्रा" इति भट्टिः ।

अन्त्यूति स्त्री अन्ति अन्तिकस्य वा ऊतिः रक्षणम् अव–क्तिन् कलोपः । आसन्नरक्षणे "अहमन्त्यूतिमयोभुवमिति" ऋ० १,१३८,१ ।

अन्त्येष्टि स्त्री अन्तेभवा इष्टिः । साग्निकस्य मृतस्य देहसंस्कारार्थमिष्टिभेदे तत्समत्वात् निरग्नेर्दाहशास्त्रसंस्कारे च । "पतितानां न दाहः स्यान् नान्त्येष्टिर्नोदकक्रिया" इति शु०त० स्मृतिः ।

अन्त्र न० अन्त्यते देहो बध्यतेऽनेन अति–बन्धने करणे ष्ट्रन् । देहबन्धने–"उक्ताः सार्द्धास्त्रयो व्यामाः पुंसामन्त्राणि सूरिभिः अर्द्धव्यामेन हीनानि स्त्रीणामन्त्राणि निर्द्दिशेत्" । इति वैद्यकोक्तपरिमाणवति नाड़ीभेदे । "सार्द्धत्रि व्यामान्यन्त्राणि पुंसः स्त्रीणामर्द्धव्यामहीनानि" सुश्रुतम् । "नित्यदन्त्रविभूषितमिति दुर्गाध्यानम्" "यस्मान्मन्त्रं रूपलेपिभिरिति" सुश्रुतम् ।

अन्त्रकूज पु० अन्त्रस्य कूजः शब्दभेदः । अन्त्रविकूजने "पक्वाशयस्योऽन्त्रकूजं शूलं नाभौ करोति वेति" सुश्रुतम् ।

अन्त्रपाचक अन्त्रस्थं दोषं पाचयति । त्वचिसारे निर्य्यासविषे औषधिभेदे "स्थावरङ्गमञ्चैव द्विविधं विषमुच्यते" इत्युपक्रम्य । "दशाधिष्ठानमाद्यन्तु द्वितीयं षोड़शात्मकमित्यभिधाय "मूलं पत्रं फलं पुष्पं त्वक् क्षीरं सार एव च निर्य्यासः धातवश्चैव कन्दश्च दशमः स्मृत" इति विशेषतः स्थावरस्य स्थानसङ्ख्या "अन्त्रपाचककर्कटीयमौरीयककरघाटक रम्भनन्दनवराटकानि सप्त त्वक्सारनिर्य्यासविभागा-

ङेति" २५२ पृ० सुश्रुते उक्तम्। विवरणं विषयशब्दे द्रष्टव्यम्।

अन्नमांस न० "आन्त्रिकं छिद्रमार्गेण धौतं निर्मलधारिणा। तस्य खण्डान् संविधाय वेसवार (वेसन) युतान् पचेत्। निःसारं विरसोद्गारमन्नमांसमुदाहृतमिति वैद्यकोक्ते पक्वमांसभेदे आन्त्रिके।

अन्नवृद्धि पु० अन्ननिमित्ता वृद्धिः। सुश्रुतोक्ते रोगभेदे स च रोगः सु० २८६ पृ० सुश्रुते दर्शितो यथा "वातपित्तश्लेष्मशोणितमेदोमूत्रान्ननिमित्ताः सप्त वृद्धयः। तासां मूत्रान्ननिमित्ते वृद्धी वातसमुत्थे केवलसमुत्पत्तिहेतुरन्यतमः॥ अधःप्रकुपितोऽन्यतमो हि दोषः फलकोशवाहिनोरभिप्रपद्य धमनीः फलकोशयोर्वृद्धिं जनयति तां वृद्धिमित्याचक्षते॥ तासां भविष्यतीनां पूर्वरूपाणि वस्तिकटीसक्थिमेढ्रेषु वेदना मारुतनिग्रहः फलकोशशोफश्चेति तत्रानिलपरिपूर्णां वस्तिमिवातततां परुषामनिमित्तानिस्तोदां वातवृद्धिमाचक्षते, पक्वोडुम्बरसङ्काशां ज्वरदाहोपवतीं चाशु संस्रावपाकां पित्तवृद्धिं, कठिनामल्पवेदनां शीतां कण्डूमतीं श्लेष्मवृद्धिं, श्वयथुशोटाढ्यां पित्तवृद्धिलिङ्गां, रक्तवृद्धिं मृदुस्निग्धां कण्डूमतीमल्पवेदनां तालफलप्रकाशां मेदोवृद्धिम्॥ मूत्रसम्भारणशीलस्य मूत्रवृद्धिर्भवति सा गच्छतोऽम्बुपूर्णा द्रतिरिव क्षुभ्यति मूत्रकृच्छ्रवेदनां श्वयथोश्च स्वयं कोपयोच्चापादयति तां मूत्रवृद्धिं विद्यात्। भारहरणबलवद्विषमदृढप्रपतनादिभिरायासविशेषैर्वायुरतिप्रवृद्धः प्रकुपितश्च स्थूलान्त्रस्येतरस्य चैकदेशं द्विगुणमादायाधोगत्वा वङ्क्षणसन्धिसमेत्य यन्त्रिरूपेण स्थित्वाऽप्रतिक्रियमाणे च कालान्तरेण फलकोशं प्रविश्य शुष्कशोफमापादयत्याध्मातो वस्तिरिवाततः प्रदीर्घः शोफो भवति सशब्दश्वयथोर्ह्रतवोद्धसुपैति। विस्तृत्य पुनरावर्तते तामन्त्रवृद्धिमसाध्यामित्याचक्षते" इति। "यस्मात्पुरुषस्तैतमन्त्रवृद्धिं व्यपोहति" सुश्रुतम्।

अन्दिका स्त्री अदि+बन्धने खुल्। नाखोटौ ज्येष्ठभगिन्यामित्यमरटीकायां नीलकण्ठः।

अन्दू स्त्री अन्द्यते बध्यतेऽनेन अदि+ऊ। निगडे स्त्रीपादभूषणभेदे च। स्वार्थे कन् "केऽण इति" ह्रस्वः। अन्दुकोऽत्र "स्वार्थिकप्रत्ययस्य प्रकृतितो लिङ्गवचनातिक्रमस्य देवतागन्धादौ दर्शनात् पुंस्त्वम्।

अ (आ) न्दोल दोलने अद० चु० उभ० सक० सेट्। अ(आ)न्दोलयति-ते आन्दुदोलत्-त। क्षुट्। अ(आ)न्दोलनम् "किन्त्वासामरविन्दसुन्दरदृशां द्राक्चामरान्दोलनादि" क्षुब्धटः। अ(आ)न्दोलितः। चुरादेराकृतिगणत्वान्नायसत्प्रेक्षितः स च दीर्घादिः। "आन्दोलत् क दोलने" इति कविकल्पद्रुमोक्तेः ह्रस्वान्त इत्यन्ये तन्मूलं मृग्यम्।

अन्ध दृष्टिविघाते अद०चु०उभ० धात्वर्थगृहीतकर्मकत्वादकर्मकः सेट्। अन्धयति-ते आन्धिधत्-त। अन्धवत् अन्धितः। "कनकस्थगलक्ष्माम्बितधियेति" मा०द०। दृष्टिरत्र नेत्रेन्द्रियजं प्रत्यक्षं विवेकज्ञानञ्च तद्विघातान्वयश्च कर्तृत्वम्।

अन्ध त्रि० अन्ध-अच्। नेत्रद्वयशून्ये एकचक्षुर्हीने तु नास्य प्रयोगः अनुपहतनेत्रान्तरेण तस्य दर्शनसम्भवात्। अन्धश्च द्विविधः जन्मान्धः, उत्पत्तौ नेत्रद्वयवानपि रोगादिना उपहतनेत्रद्वयश्च उभयत्रैव तत्प्रयोगात्। "जड़मूकान्धबधिरानिति" "उन्मत्तोऽन्धश्च वध्याः स्युरिति" च मनुः। "दृष्ट्वैवास्ते तु सा लोके गौरन्धेवैकेक्षणीति" "अनंशौ क्लीवपतितौ जात्यन्धबधिरौ" तथेति स्वजात्यन्तरम् "अन्धोगगनं न पश्यतीति" व्यु०मदा० "दृष्टोऽन्धः पतिरेव भक्तकृत" इति मा०द०। चक्षुःसत्त्वेऽपि आलोकादि सहकारिकारणान्तराभावेन दृष्टिराहित्येऽपि अस्य प्रयोगः। यथा "दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथा परे। केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टय" इति देवी०। तत्र पेचकानां दर्शने आलोकाभावस्यैव सहकारितया तेषां दिवान्धत्वम्। कपोतादीनां तु सूर्यालोकाभावेऽपि दीपाद्यालोकान्तरसद्भावे रात्रावन्धता। मनुष्याणान्तु दिवा सूर्यालोकात्, रात्रौ दीपाद्यालोकात् उभयत्र दृष्टिमत्त्वान्नान्धत्वम्। विवेकज्ञानशून्ये "क्रोधान्धस्तस्य तस्य स्वयमिह भवितेति" वेणी०। "नैवान्धत्वं मदान्धसिन्दूरघटेति" गङ्गास्तोत्रम्। "अरान्धा गाढ़तारुण्या समस्तरतकोविदेति" मा०द० "अज्ञानतिमिरान्धस्येति" गुरुनतिः। परिव्राजकभेदे, तस्य "सचक्षुरचक्षुरिव सकर्णः अकर्ण इवेत्यादि श्रुत्या वाह्यवस्तुदर्शनशून्यचक्षुःशून्यत्वोक्तेरन्धत्वम् अतएव "तिष्ठतोव्रजतोवापि यस्य चक्षुर्न दूरगम्। चतुष्पदां भुवं सङ्ख्य, परिव्राडन्ध उच्यते" श्लोकेन तस्यान्धत्वं परिभाषितम्। नष्टद्रव्यलाभालाभोपयोगितया ज्योतिषपरिभाषिते राशिभेदे च। "मेषो वृषो मृगेन्द्रश्च दिवान्धाः परिकीर्त्तिताः। वृश्चिकर्कटकन्याश्च रात्रावन्धाः प्रकीर्त्तिता" इति तत्रैव च मेषादिषु दिवा नष्टद्रव्यस्य लाभः तत्र गृहीतचौरस्य दिवान्धत्वात्। मिथुनादिषु तु रात्रौ नष्टद्रव्यस्य लाभः तत्र गृहीतचौरस्य रात्रावन्धत्वात्

अन्धत्व नष्टस्य न लाभ इत्येतत्परतया तत्राऽन्धत्वम् भाक्तम् । अन्धयतीत्यन्धम् अन्ध-चु०प्रेरणे णिच्-अच्, अन्ध-करणे अच् वा । तमसि अन्धकारे "अन्धं तमस्ते प्रविशन्ति ये के चात्महनोजना इति" श्रुतिः । यथार्थ ज्ञानावरके वेदान्तिमतसिद्धे अज्ञाने च "आसीदिदं तमोभूतमिति" मनौ "तमसाऽततत्त्वेनेति" "तमसैवाऽऽवृतं तत्त्वं नाऽवपश्यति मूढधीरिति" च पुराणे तमःशब्दे नाऽज्ञानस्यैवाभिधानात्तथात्वम् । जले न०मेदि० । तस्य मनुष्याणामन्धकारित्वात्तथात्वम् तेषां हि जलमध्ये उन्मीलितनेत्राणामपि न दर्शनमित्यनुभवसिद्धम् ।

अन्धक पु० अन्ध-खुल् । दैत्यभेदे स च दैत्यः दितौ कश्यपादुत्पन्नः तस्य वरेण महादेवैरवध्यतामाभेदे यथोक्तं हरिवंशे १४५ अ० "दितिरुवाच कृतपुत्राऽस्मि भगवन्! देवैर्धर्षयितास्वर!। अवध्यं पुत्रमिच्छामि देवैरमितविक्रमम् । कश्यप उवाच । अवध्यस्ते सुतो देवि! दाक्षायणि! भवेदिति । देवानां संशयो नात्र कश्चित् कमललोचने!। देवदेवसुते रुद्रं तस्य न प्रभवाम्यहम् । आत्मा ततस्ते पुत्रेण रक्षितव्यो हि सर्व्वथा । अन्वालभत तां देवीं कश्यपः सत्यवागथ । अङ्गुल्योदरदेशे तु सा पुत्रं सुषुवे ततः । सहस्रबाहुं कौरव्य! सहस्रशिरसं तथा । द्विसहस्रेक्षणञ्चैव तावद्बलपराक्रमम् । स व्रजन्नन्धवद्याऽऽदन्धोऽपि हि भारत!। तमन्धकोऽयं नाम्नेति प्रोचुस्तत्र निवासिनः । अवध्योऽस्मीति लोकान् स सर्व्वान् बाधति भारत!। हरन्यपि च रत्नानि सर्व्वाण्यात्मबलाश्रयात् । वासयन्नात्मवीर्य्येण निगृह्याऽसुरसं गणान् । स्वेष्वन्धकवृष्णिभ्यो ऽन्धं सर्व्वलोकभयङ्करः । परदारापहरणं परस्वविलोपनम् । चकार सततं मोहादन्धकः पापनिश्चयः" इति "निशितविशूलदारितान्धकमहासुर इति" काद० । अन्ध एव अन्धकः स्वार्थे कन् । मुनिभेदे स च हरिस्तिन्ध्येऽभ्यातुः उतथ्यात् ममतायामुत्पन्नः हरिस्तिग्रापादन्धत्वमापेदे । तस्य जात्यन्धत्वात् दीर्घतमा इति नामान्तरं तत्कथा भा० आ०प० १०४अ० "उतथ्यस्य यवीयांस्तु पुरोधास्त्रिदिवौकसाम् । हरिस्तिर्हरितेजा ममतामन्वपद्यत ॥ उवाच ममता तन्तु देवरं वदताम्बरम् ॥ अन्तर्वत्नी त्वहं भ्रातर्व्यवेनारभ्यतामिति । अयञ्च मे महाभाग! कुक्षावेव हरिस्यते!। श्रौतव्यो वेदसत्रापि मङ्गलं प्रत्यधीयत ॥ अमोघरेतास्त्वञ्चापि द्वयोर्नास्त्यत्र सम्भवः । तस्मादेवं गतेऽद्य त्वमुपारमितुमर्हसि ॥ एवमुक्तस्तया सम्यक् हरिस्तिरुदारधीः । कामात्मानं तदात्मानं न शशाक नियन्त्रितुम् ॥ स बभूव ततः कामी तया सार्द्धमकामया । उत्सृजन्तं तु तं रेतः स गर्भस्थोऽभ्यभाषत ॥ भोस्तात! मा गमः कामं द्वयोर्नास्त्यिह सम्भवः । अल्पावकाशो भगवन्! पूर्व्वञ्चाहमिहागतः । अमोघरेताश्च भवान् पीडां कर्त्तुमर्हसि ॥ अस्त्वेवं तु तदाकूतं गर्भस्थस्य हरिस्तिः । जगाम मैथुनायैव ममतां चारुलोचनाम् ॥ शुक्रोत्सर्गं ततो बुद्ध्वा तस्या गर्भगतो मुनिः । पद्भ्यामरोधयद्भागं शुक्रस्य च हरिस्तेः ॥ स्थानमप्राप्तमथ तद्रेतः प्रतिहतन्तदा । पपात सहसा भूमौ ततः क्रुद्धो हरिस्तिः ॥ तद्दृष्ट्वा पतितं शुक्रं शशाप स रुषान्वितः । उतथ्यपुत्रं गर्भस्थं निर्भर्त्स्य भगवान्मुनिः ॥ यस्मात् त्वमीदृशे काले सर्व्वभूतेष्विते सति । एवमात्म वचस्तस्मात्तमो दीर्घं प्रवेक्ष्यसि ॥ स वै दीर्घतमा नाम शापाद्बभिरजायत । हरिस्तेर्हरितक्रीर्त्तेर्हरिस्तिरिवौजसा ॥ जात्यन्धोवेदवित् प्राज्ञः पत्नीं लेभे स विद्यया । तरुणीं रूपसम्पन्नां प्रद्वेषीं नाम ब्राह्मणीम् ॥ स पुत्रान् जनयामास गौतमादीन् महायशाः" इति । यादवभेदे च "सात्त्वतान् सत्त्वसम्पन्नात् कौशल्या सुषुवे सुतान् । भजिनं भजमानञ्च दिव्यं देवावृधं नृपम् । अन्धकञ्च महाबाहुं दृष्णिञ्च यदुनन्दनम् । तेषां विसर्गाश्चत्वारो विस्तरेणेह तान् शृणु । अन्धकात् काश्यदुहिता चतुरोऽलभतात्मजान् । कुकुरं भजमानञ्च शमं कम्बलबर्हिषम्" । इति हरिवंशे ३८ अ० । "दूतं संप्रेषयामास उग्रसेनोऽन्धकनिवेशनम्, ततो उग्रसेनोऽन्धकाः उग्रसेनिति" हरिवंशः ।

अन्धकरिपु पु० ६त० । महादेवे तस्य तन्नाशकत्वात्तथात्वम् यथा हरिवंशे १४६ अ० "सुमोच भगवाञ्शूलं प्रदीप्ताग्निसमप्रभम् । तत् पपात हरोत्सृष्टमन्धकोरसि दुर्द्धरम् । भक्षसाङ्गकरोद्रौद्रमन्धकं साधुकण्ठकमिति"। अन्धकहन्त्रादयोऽत्र । अन्धकस्यान्धकारस्य रिपुरपसारकत्वात् । सूर्य्ये, चन्द्रे, वह्नौ, च पु० ।

अन्धकवर्त्त पु० अन्धक इव वर्त्तते वृत-अच् । पर्व्वतभेदे महा० क । अन्धकवर्त्तीयसङ्घे त्रि० ।

अन्धकार पुं० न० अन्धं करोति कृ-अण् उप०स० । तमसि तच्च तेजोद्रव्यसामान्याभावरूपमिति नैयायिकाः । नीलं तमोधावतीति प्रयोगात् नीलरूपवत् भावनाख्यक्रियावच्च द्रव्यान्तरम्, आलोकस्य अन्यत्र चाक्षुषप्रत्यक्षे सहकारित्वेऽपि तत्प्रत्यक्षे मेचकप्रत्यक्षवत् न सहकारिता

वस्तुस्वाभाव्यादिति भेद इति मीमांसकादयः। "दिवाकराद्यति यो गुहासु लीनं दिवाभीतमिवान्धकारमिति" कुमा० "सुखं हि दुःखान्यनुभूय शेते घनान्धकारेष्विव दीपदर्शनमिति" मृच्छ० "अथान्धकारं गिरिगह्वराणामिति" रघुः। अन्धकारस्य दृष्टिविघातकत्वं मनुष्याणामेव तेषामेवालोकसहकारेण दर्शनोदयात् उन्दुरादीनान्तु तदभावेऽपि दृष्टेरुदयात्। ततश्च आलोकरूपसहकारिविघटनेनास्य दृष्टिरोधकत्वमवसेयम्। यथार्थज्ञानविरोधिनि वेदान्तिमतसिद्धे अज्ञाने च। [रान्धकारे।

अन्धकारमय त्रि० अन्धकार+प्राचुर्य्ये मयट्। प्रचुरान्धकारे।

अन्धकारि पु० अन्धकः तदाख्यस्यासुरस्यारिः ६त०। शिवे अन्धकरिपुशब्देऽस्य विवृतिः।

अन्धकासुहृत् पु० अन्धकस्य असून् हरति हृ-क्विप् तुक् च, अन्धकाख्यासुरस्य असुहृत् रिपुर्वा ६त०। महादेवे।

अन्धकूप पु० अन्धयतीत्यन्धः स चासौ कूपः। सान्धकारे कूपे। अन्धः कूपो यत्र ७व०। नरकभेदे यथा "यस्त्विह वै भूतानामीश्वरकल्पितदृत्तीनामविरिक्तपरव्यथानां स्वयं पुरुषोपकल्पितदृत्तिर्विरिक्तपरव्यथोव्यथामाचरति स परत्रान्धकूपे तदभिद्रोहेण निपतति॥ तत्रह्यसौ तैस्तैर्जन्तुभिः पशुसृगपक्षिसरीसृपैर्मशकयूकमत्कुणमक्षिकादिभिः, ये के चाभिद्रुग्धास्तैश्च सर्व्वतोऽभिदुह्यमानस्तमसि विहतनिद्रानिर्हृतिरलब्धावस्थानः परिक्रामति यथा कुम्भीरीरे जीवः रैति भाग० ५स्क०। अन्धस्य दृष्ट्यभावस्य कूप इव। मोहे। सहि सर्व्वदृष्ट्यभावस्याकरः इति तस्य तथात्वम्। [अन्धकरणसाधने।

अन्धङ्करण न० अन्धः क्रियतेऽनेन च्व्यर्थे कृ-करणे ल्युट्।

अन्धतमस न० अन्धयति अन्ध+अच् तायति अनेनेति तम-करणे-असि कर्म्म० अच् समासान्तः। निविड़ान्धकारे, तद्युक्ते नरकभेदे च।

अन्धतामस न० तम एव तामसं प्रज्ञा० स्वार्थेअण् अन्धयतीति अन्धं कर्म्म०। निविड़ान्धकारे।

अन्धतामिस्र न० तमिस्रा तमस्तति; तमिस्रमेव तामिस्रम् अन्धयतीत्यन्धम् कर्म्म०। निविड़ान्धकारे। अन्धम् अन्धकारकं तामिस्रं यत्र ७व०। नरकविशेषे पु० न०। "तामिस्रमन्धतामिस्रं महारौरवरौरवौ नरकं कालसूत्रञ्च नड्वानरकमेवचेत्यादिना" मनुना गणितेषु एकविंशतिनरकभेदेषु द्वितीये नरके तत्स्वरूपम्। "यस्तु परवित्तापत्यकलत्रान्यक्षरति स हि कालपाशबद्धो यमपुरुषैरतिभयानके स्वामिके नरके बलाच्चिपात्यते॥ अनशनानिपानदण्डताड़नसन्तर्जनादिभिर्यातनाभिर्यात्यमानो जन्तुर्यत्र कश्मलमासादितएकदैव मूर्च्छामुपयाति तामिस्रप्राये॥ एवमेव अन्धतामिस्रे। यस्तु "वञ्चित्वा पुरुषं दारादीनुपयुङ्क्ते यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति यथा वनस्पतिर्छ्यमानमूलस्कादन्धतामिस्रं तमुपदिशन्ति इति भाग० ५स्क०॥ सांख्यशास्त्रप्रसिद्धे भयविशेषविषयकेऽभिनिवेशे पु०। तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः इति सा०का०। "अभिनिवेशस्त्रासः दिव्यादिव्यशब्दविषयत्वेन दृश्यविषयकत्वात् अणिमाद्यष्टविधैश्वर्य्यविषयत्वाच्चाष्टादशधा। तथा हि देवाः खलु अणिमादिकमष्टविधमैश्वर्य्यमासाद्य दश शब्दादीन् भुञ्जानाः "शब्दादयो भोग्यास्तदुपायाश्चाणिमादयोऽस्माकं असुरादिभि र्मोक्ष उपधानिपतेति विभ्यति तदिदं भयमभिनिवेशोऽन्धतामिस्रोऽष्टादशविषयत्वादष्टादशधेति" सा० को०। वेदान्तिमतसिद्धे "देहे नेदे अहमेव नष्टोऽस्मीत्येवं" रूपे अज्ञाने च।

अन्धत्व न० अन्धस्य भावः। नेत्रघाते चक्षुषः स्वपाठ्यासामर्थ्ये "एकादशेन्द्रियवधा" इत्यादि सा०का० (४६) व्याख्याने गौड़ाद्याम् "बाधिर्य्यं कुण्ठितान्धत्वजड़ताऽजिह्मता तथा। मूकता कौब्जपङ्गुत्वक्लैब्योदावर्त्तमन्दता इत्यादिना श्रोत्रादीनां क्रमेण इन्द्रियाणां घातोदर्शितः।

अन्धपूतना स्त्री २८ष० सुश्रुतोक्ते बालग्रहभेदे "स्कन्दस्यैव प्रथमः स्कन्दापस्मार एव च शकुना रेवती चैव पूतना चान्धपूतने" त्युद्दिश्य। "योद्वेष्टि स्तनमतिसारकासच्छर्द्यरोचकैर्दीप्तिभिर्ज्वरसहिताभिरर्द्यमानः दुर्वर्णः सततमधःशयोऽभ्युदन्यिकं ब्रूयुर्वैरभिषजोऽन्धपूतनार्त्तमिति" तल्लक्षणमुक्तम्।

अन्धमूषिका स्त्री अन्धं दृष्ट्यभावं सूते अन्ध-सू-खुञ् दीर्घः। देवताद्वेषे तत्सेवने हि चक्षुर्म्लुक्ता भवतीति वैद्यकप्रसिद्धम्।

अन्धम्भविष्णु त्रि० अनन्धोऽन्धोभवति भू-च्व्यर्थे इष्णुच्। अन्धीभवितरि।

अन्धम्भावुक त्रि० अन्ध च्व्यर्थे भू-ण्वुल्। अन्धीभवितरि

अन्धस् न० अद्यते अद-असुन् नुम् धश्च। ओदने। अन्नतान्धसोदेवाः। "द्विजातिशेषेण यदेतदन्धसा" किरा० "विधानं शुक्रमन्धस इति" यजु० १९,७५।

अन्धाहि पु० अन्धोऽहिरिव। (कुचिया) इति प्रसिद्धे मत्स्ये।

अन्धवर्त्मन् पु० अन्धं सूर्य्यप्रकाशरहितत्वात्प्रकाशं वर्त्म यत्र। वायौ। सप्तमे स्कन्धे। "भरदिन्द्रः सरभसः साम-

ज्ञोमानुषीतिपाः देवीविशोऽन्यवर्त्मा च स्वन्यः सप्तम आ ध्रुवादिति" पुरा० ।

अन्यातमस न० कर्म० अन्येद्योऽपीति दीर्घः । निविड़ान्धकारे । रजन्यान्तु स्त्री ।

अन्विका स्त्री अन्वयति अन्व-प्रेरणे णिच् ण्वुल् । द्यूतक्रीड़ायाम् तया हि जनः अन्धइव विवेकशून्यः क्रियते । सर्वथाच्च तस्यात्यन्तसेवनात् इष्टिसयः वैद्यकप्रसिद्धः ।

अन्धु पु० अन्ध-कु । कूपे । कूपतुल्यच्छिद्रवत्त्वात् पुंचिह्ने च । "वाक्पाणिपादपायूपस्थान्यार्द्धर्मनीषिण" इति भा० ति० । अन्धुलिङ्गमिति शब्दा० चि० ।

अन्धुल पु० अन्ध-उलच् । शिरीषवृक्षे । तत्पुष्पदर्शनात् वियोगिनामन्धत्वात्तथात्वम् ।

अन्ध्र पु० अन्ध-रन् । देशभेदे स च देशः । "जगन्नाथाद्भुर्द्भागादर्वाक् श्रीशैलराजकात् तावदन्ध्राभिधोदेश इत्युक्तः" ॥ वैदेहेन कारावरस्य स्त्रियासत्पादिते अन्त्यजभेदे च । व्याधभेदे इति काश्यपः ।

अन्न न० अनिलनेन अन-नन्, अद्यते इति अद-क्त वा "अन्नाण इति" पा० निर्देशात् अन्नार्थतया न जग्धिः । ओदने, खिन्नान्ने, "शस्यं क्षेत्रगतं प्रोक्तं सतुषं धान्यमुच्यते । आमंतु वितुषं क्षेयं खिन्नमन्नमुदाहृतम्" इति वसि० स्मृ० । अन्नमूलं हि जीवनमित्युक्तेः तेषां प्राणहेतुत्वात्तथात्वम् । तत्रामान्नेऽपि अन्नशब्दप्रयोगः "आमान्न हरये दत्त्वा पक्वं कृत्वाथ खादयेत् । षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिरिति" पुराणे "चाण्डालान्नं भुक्त्वा त्रिरात्रं सुपवसेत् सिद्धं भुक्त्वा पराकं" इति विष्णुस्मृतौ, आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा" इति मानवे च तत्र प्रयोगात् "खिन्नमन्नमुदाहृतमिति वसिष्ठोक्तिस्तु परिभाषार्था न तु तन्नात्रलक्षणावाचतावोधनार्था । अतएव "अन्नमाश्रित्य पापानि तिष्ठन्ति हरिवासरे" इत्यादिनिषेधे आमान्नभक्षणस्यापि ग्रहणम् अन्नानि च विविधानि "अन्नानि विविधानीह भवन्ति गिरिसन्निधे" । इत्युपक्रम्य अष्टादशविधानि धान्यान्यभिधाय "अन्नवर्ज्यव्रते देवि ! एतान्येव विवर्ज्येत्" दित्यनेन पद्मपुराणे अन्नवर्ज्यव्रते तेषां वर्ज्यनीयत्वाभिधानात् अष्टादश धान्यानि च धान्यशब्दे वक्ष्यन्ते "अन्नमर्थितं त्रेधा विधीयते तस्य यःस्थविष्ठोधातुस्तत्पुरीषं यन्मध्यमस्तन्मांसं योऽणिष्ठस्तन्मन" इति श्रुत्या "अन्नमयं हि सोम्य मन इति" श्रुत्यन्तरोक्तं मनसोऽन्नमयत्वं यत् यदर्थितं तत् सर्वप्रकारान्नविकारत्वेनैव । ततश्च "राजान्नं तेज आदत्ते" इत्यादौ निषिद्धतापि सर्वेषामेव । "शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणः । भोज्यान्नाः नापितश्चैव यश्चात्मानं निवेदये" दित्यादावपि दासादेर्भोज्यान्नताप्रतिप्रसवः अष्टादशान्नविषयएव दासादयश्च संकीर्णजातिभेदाः पराशरोक्ता वेदितव्यास्ते च तत्तच्छब्दे दर्शयिष्यन्ते । "गोरसं तिलसक्तूंश्च तिलपिण्याकमेव च । अपूपान् भक्षयेत् शूद्रान्नान्यत् पयसाक्षतमिति" संवर्त्तवचनन्तु आपदि शूद्रान्ननिष्कृत्तानामपि भक्ष्यतार्थम् । "कन्दुपक्वं तैलपक्वं पायसं दधि सक्तवः । एतान्यशूद्रान्नभुजां भोज्यानि मनुरब्रवीदिति" हारीतवचने अशूद्रान्नभुजामिति विशेषणात्तथावगतेः एवमेव प्रा० वि० । "अन्नं हि भूतानां श्रेष्ठं तस्मात् सर्व्वौषधमुच्यते" इति श्रुतौ अन्नस्य सर्व्वौषधिरूपत्वोक्तेः सर्वेषां व्रीह्याद्योषधीनामन्नत्वं व्यक्तमुक्तं "पृथिव्या ओषधय ओषधिभ्योऽन्नमिति" श्रुतौ च ओषधिजमात्रस्य अन्नत्वमुक्तम् "अद्यतेऽत्ति च भूतानि तस्मादन्नमितुच्यते" इति तन्निरुक्तिरपि श्रुतौ दर्शिता । पृथिव्यां, तस्माच्च अन्नहेतुत्वादन्नशब्दवाच्यता । "अन्नमोऽन्नमिति श्रुतेः" "यत् कृष्णं रूपं तदन्नस्येति" छा० उप० श्रुतेश्च । अत एव भाष्यकृता "इन्नाहमिमाश्चिस्रो देवता" इति श्रुतौ इदमा तेजोवन्नात्मिकायाः देवतायाः परामर्शः इत्युक्तम् । उदके च निरुक्तं० तस्य च "इष्टेरन्नं ततः प्रजा इति" मनुना अन्नहेतुत्वोक्तेस्तथात्वम् । तथाऽत्तीति प्राणिभिरनेनेति व्युत्पत्तेः उदकस्य प्राणहेतुत्वादन्नत्वम् "आपोमयः प्राण" इत्युक्ता तत्समर्थनाय "आपः पीताश्चेधा विधीयन्ते तासां यःस्थविष्ठोधातुस्तन्मूत्रं योमध्यमः तल्लोहितं योऽणिष्ठः स प्राण इति छान्दोग्येऽपां प्राणहेतुत्वमुक्तम् । तथा "षोड़शकलो वा असौ पुरुषः" इत्युपक्रम्य "पञ्चदशाहानि मायीः कामम्पः पिबापोमयः प्राणो न पिबतो विच्छेत्स्यते" इति तत्रैव जलपानाभावे प्राणविच्छेद उक्तः । प्राणानन्नहेतुत्वाद्वा अन्नस्य तथात्वम् यथा "आपो वा अन्नाद्रूपस्यसृष्ट्याद्या सृष्टिर्न भवति व्याधीयन्ते प्राणाः अन्नं कनीयो भविष्यतीति अथ यदा सुसृष्टिर्भवति आनन्दिनः प्राणाः भवन्ति अन्नं बहु भविष्यतीति छा० उप० । सूर्य्ये पु० सि० कौ० तस्य अन्नहेतुदृष्टिहेत्वात्तथात्वम् "आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा" इति मनुना तद्धेतुत्वोक्तेस्तथात्वम् भोगसाधने उपकरणे, न० "स्त्रियोऽन्नं पशवोऽन्यच्च विशोऽन्यच्च मलोचितमिति" मनुः । भक्ष्यद्रव्ये च "प्राणस्यान्नमिदं सर्वं प्रजापतिरकल्पयत् । स्थावरं

जङ्गमञ्चैव सर्वं प्राणस्य भोजनमिति" मनुना जङ्गमस्याप्यन्नत्वोक्तेः ।

अन्नकिट्ट न० ६त० । अन्नपाकशब्दे वक्ष्यमाणे अन्नमलभेदे ।

अन्नकोष्ठ पु० अन्नस्य व्रीह्यादेः स्वल्पं कोष्ठमिव अल्पार्थे कन् । (कुटी) इति ख्याते धान्यादेः स्थापनस्थाने ।

अन्नद त्रि० अन्नं ददाति दा–क । अन्नदातरि "वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नद" इति मनुः । अन्नपूर्णाख्यदेवीभेदे स्त्री ततः पूजादि अन्नदाकल्पग्रन्थे दृश्यम् ।

अन्नदास पु० अन्नेन पालितो दासः । अन्नमात्रलाभेन प्राप्तदासत्वे भक्तदासे (पेटभाता) अन्नस्य दासमात्रे च, "अन्नस्य पुरुषो दास" इति भारते पुरुषस्य अन्नहेतुनैव दासत्वोक्तेः ।

अन्नदोष पु० अन्नस्य भोजनप्रतिग्रहादिकृतः दोषः पापविशेषः धातुवैषम्यं वा । अभक्ष्यान्नभक्षणजनिते अप्राह्यान्नप्रतिग्रहजनिते च पापहेतौ अपथ्यभोजनजधातुवैषम्यकृते च दोषभेदे "आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति" मनुः । अभक्ष्यान्नानि द्विविधानि स्मृत्यादौ निषिद्धतया उक्तानि, तानि च अभक्ष्यशब्दे वक्ष्यन्ते । वैद्यके रोगनिदानतया उक्तानि च, तानि धातुवैषम्यसम्पादनद्वारा रोगनिदानतया वैद्यके प्रसिद्धानि यथा सन्दाग्नेः गुर्वाद्दीनि ।

अन्नपाक पु० ६त० । अन्नस्य व्रीह्यादेर्लौकिकदहनेन विक्लित्त्यनुकूलव्यापाररूपे पचने, भुक्तान्नस्य जठरानलेन रसरक्तादिरूपान्तरापादने च तत्र लौकिकपाकः चूल्यादुपरिस्थापनपूर्व्वाधःसन्तापनादिर्लौकिकसिद्धः । जाठरपाको यथा पदार्थादर्शे योगार्णवे । "आयुष्यं भुक्तमाहारं स वायुः कुरुते द्विधा संप्रविश्यान्नमध्यन्तु पृथक् किट्टं पृथग्जलम् । अग्नेरूर्द्धं जलं स्थाप्य तदन्नं च जलोपरि । जलस्याधः स्वयं प्राणः स्थित्वाग्निं धमते शनैः । वायुना ध्मायमानोऽग्निरत्युष्णं कुरुते जलम् । अन्नं तदुष्णतोयेन समन्तात् पच्यते पुनः । द्विधा भवति तत् पक्वं पृथक् किट्टं पृथग्जलम् । रसेन तेन ता नाड्यः प्राणः पूरयते पुनः । अतर्पयन्ति सम्पूर्णास्ताश्च देहं समन्ततः । रसः स नाड्यीमध्यस्थः शरीरे चोष्मणा सह । पच्यते पच्यमानस्तु भवेत् पाकद्वयं पुनः । चर्म्मावेष्ट्य समन्ताच्च रुधिरञ्च प्रजायते" इति त्वगादिधातुपाकस्तु ४६ पृष्ठे उक्तः ।

अन्नपान न० अन्नस्य अभ्यवहार्य्यमात्रस्य पानसहभोगः । भावदत्तीयादिभक्षणे, "अथातोऽन्नपानविधिमध्यायं व्याख्यास्यामः" इति प्रतिज्ञाय "तस्याशितपीतलीढखादितस्य नानाद्रव्यात्मकस्येति" सुश्रुते उक्तत्वात् सर्व्वेषामन्नपानत्वम् ।

अन्नपूर्णा अन्नं पूर्णं यया । देवीभेदे "अन्नपूर्णे ! सदापूर्णे ! शङ्कर प्राणवल्लभे ! । ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां मे देहि पार्व्वतीति, शङ्कराचार्य्यः । एषा च काशीश्वरमहिषी काशीखण्डे एतस्याभूरिशो वर्णनम् ।

अन्नपूर्णेश्वरी स्त्री भैरवीभेदे, तन्त्रसारेऽस्या विवरणम् । अन्नपूर्णायामपि "भिक्षां देहि कृपावलोकनकरी मातान्नपूर्णेश्वरीति" शङ्कराचार्य्यः ।

अन्नप्राशन "न० प्रकृष्टं विधानेन प्रथममाशनं प्राशनं ६त० । षष्ठाष्टममासादौ बालकादेर्विधानेन प्रथममन्नभोजने । "षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले" इति मनुः । "ततोऽन्नप्राशनं षष्ठे मासि कार्य्यं यथाविधि । "अष्टमे वास्य कर्त्तव्यं यद्वेष्टं मङ्गलं कुले" इति स्मृत्यन्तरम् । षष्ठ इति सुश्रुतकल्प इति रघु० । तत्रायं विशेषः ज्योतिश्चिन्तामणौ । "अन्नस्य प्राशनं कार्य्यं मासि षष्ठेऽष्टमे बुधैः स्त्रीणान्तु पञ्चमे मासि सप्तमे प्रजगौ" मुनिः । तत्र विहिततिथ्यादि यथा

"षष्ठे मासि निशाकरे शुभकरे रिक्तेतरे वा तिथौ सौम्यादित्यसितेन्दुजीवदिवसे पक्षे च शुक्लेतरे । प्राजेशादिति पौष्णवैष्णवयुगैर्हस्तादिषट्कोत्तरैरान्नेयाप्यपितृत्रभैश्च नितरामन्नादिभक्षः शुभ इति, भुज० भो० । प्राजेशादयश्च रोहिण्यादयः ४,५,७,८,२७,१,२२,२३,१३,१४,१५,१६,१७,१८,१२, २१,२६,३,२०,१०, । तथाचैतन्नितानि नक्षत्राणि तत्र । विहितानि । तत्र वर्ज्यानि । "द्वादशीसप्तमीनन्दारिक्तासु पञ्चपर्वसु । बलमायुर्यशोहन्यात् शिम्बूनामन्नभक्षणम् । क्वचि० । "वेधं सर्वत्र वर्ज्ययेत्" दिलुक्तेनैतद्वेधस्यापि तत्र वर्ज्यता ।

अन्नभक्त त्रि० अन्नार्थं भक्तः दासः । अन्नमात्रदानेन प्रतिपादिते दासभेदे भक्तदासे विहितरस्य दासशब्दे दृश्या ।

अन्नमय पु० अन्नस्य विकारः अन्न+विकारार्थे मयट् । स्थूलशरीरे । स्थूलशरीरस्य अन्नविकारत्वादन्नमयत्वम् अतएवोक्तम्, 'पिण्डभुक्तान्नजाद्वीर्य्याज्जातोऽन्नेनैव वर्द्धते, देहः सोऽन्नमयोनाम्ना प्राक् चोक्तं तदभावत इति" हरीतोक्तिः "सवा एष पुरुषोऽन्नरस" इति श्रुतौ अन्नरसत्वोक्तेश्च अन्नमयत्वम् । "अन्नाद्रेतः रेतसः पुरुषः" इति श्रुतौ च देहस्यान्नजन्यत्वे प्रकारोदर्शितः ॥ अन्नविकृतिमात्रे त्रि० । "अन्नमयं

हि सौम्य ! मन" इति श्रुतिः विवरणं कोशशब्दे। अन्न-प्रकृतसुच्यतेऽस्मिन् "तत् ऋतवचने" पा० मयट्। अन्न-प्रचुरे यज्ञादौ "अन्नमयोयज्ञ" इति सि०कौ०।

अन्नमल न०पु० अन्नस्य मलः किट्टः। निस्सारितरसभागभेदे (सिटि) इति ख्यातेऽन्नकिट्टे "वर्चस्कः मल" इति सि० कौ०। सुरायाञ्च "सुरा वै मलमन्नानां पुरीषं मलमुच्यते। तस्मात् ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदिति" मा०वि० श्रुतिः।

अन्नरस पु० अन्नस्य रसः सारांशः स्वादो वा। भुक्तस्य अन्नस्य सारांशे "सवा अयं पुरुषोऽन्नरस" इति श्रुतिः अपथ्यैः सह संभुङ्क्ते व्याधिरन्नरसे यदेति" वै०। रसस्तु जठरानलेनान्नस्य परिपाकात् कश्चित् सारांशः। अन्नपाकशब्दे तद्विवरणम्। अन्नस्यास्वादे च।

अन्नविकार पु० अन्नस्य विकारः। शोणितादिषु सप्तसु धातुषु "प्रधानेन व्यपदेशाभवन्तीति" न्यायात् चरमधातोरेवास्य प्रयोगोपाधित्वात् चरमे धातौ शुक्रे रा०नि०। शुक्रोत्पत्त्यर्थमेव हि क्रमशःशोणितादिपाकात्तस्य प्राधान्यम्। अत एव "अन्नाद्रेत" इति श्रुतौ अन्नतो रेतस उत्पत्तिर्दर्शिता सा च परम्परयैव।

अन्नाद त्रि० अन्नमत्तुं शक्नोति अद-अण् उप०। अन्न-भोजनसामर्थ्यवति दीप्ताग्नौ। "अन्नवानन्नादोभवति य एवं विद्वानिति छा०उप०। "अन्नादः दीप्ताग्निरिति" गा०भा०। "त्विषिमानपचितिमान् यशस्वी ब्रह्मवर्चस्वान्नाद" इति कात्या० ३,३,५। अन्नभक्षके त्रि० "टिड्-ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपश्च" पा० सूत्रे आद्यन्तयोस्तद्धितसाहचर्य्यात् तद्धिताणन्तादेव ङीप् अन्यतोन, तेनातः स्त्रियां टाप्।

अन्नादिन् त्रि०अन्नमत्ति अद-णिनि ह्रस्व०। अन्नभक्षके। "भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेदृतीति" मनुः स्त्रियां ङीप्।

अन्नाद्य न० अन्नरूपमाद्यं भक्ष्यम्। अन्नरूपभक्ष्ये। "अग्नि-मन्नादमन्नाद्यायादधे" य०३,५,। अन्नमाद्यं यस्य। अन्न-प्रभृतौ त्रि०"अन्नाद्याय व्यूहध्वं सोमोराजा यमाममदिति" दत्तधावनमन्त्रः। "अन्नादोनोदकेन वा" इति मनुः।

अन्नायुस् त्रि० अन्नमायुर्जीवनसाधनमस्य। अन्नजीवने "स एषोऽन्नस्य यन्नोयद्वायुरन्नायुर्वा एष यद्वायुरिति" ऐ० उप०। अन्नायुरन्ननिबन्धनायुरन्नजीवन इत्यर्थः।

अन्नावृध त्रि० अन्नं वर्द्धतेऽनेन इध-करणे क्विप् दैत० पूर्व्व-पददीर्घः। अन्नवर्द्धके। "अत उत्वा पितृभृतोजनित्री-रन्नावृधं प्रतिचरन्त्यन्नैरिति ऋ० १०,१,४,।

अन्नाशन न० अन्नस्य विधानेन आशनम्। अन्नप्राशनार्थे।

अन्य त्रि० अन-अन्नादि० य। भिन्ने, सदृशे च। "उचितं दृढगेऽन्यच्च कवन्नेभ्यो न किञ्चनेति" रघुः। "शरीरेण समं नाशं सर्वमन्यद्धि गच्छति" हितो०। "अन्यदुच्छ्वसितं सत्यमन्यच्चारूनिवन्नितमिति" माघः धन्यास्तागुणरत्नरोहणभुवोधन्याश्चदन्यैव सेति" सा०द० सदृशे अन्योक्तिः सख्यत्वेऽस्य सर्वनामता। "नान्वये सति सर्व्वस्वं यज्ञान्यस्मै प्रतिश्रुतमिति" या०। "व्याप्तिः साध्यवदन्यस्मिन्निति" भाषा०। "हलन्तन्नन्येषां या गत-क्रतोरिति ऋ० ८,३३,१४, अन्यस्मिन् यूपे, निदधाति रेत इति ऋ० ३,५५,१७। इन्नेऽन्यस्य न तत्कार्य्यम्, "साध्वन्यानां सखिह्रिषे" इति स०वो० जसि तु वा साध्वन्ये-साध्वन्याः। तस्येदमित्यर्थे ञ दुक्। अन्यदीयः।

अन्यकारक प्र० अन्यत् करोति कृ-उण् स्वार्थे कन् कारकः। पुरीषकिट्टे हारा०। अन्यस्य कारके त्रि०।

अन्यचित्त न० अन्यदिव स्वव्यापराक्षमं चित्तं कर्म्म०। विषयालोचनासमर्थे चित्ते। ईत०। अन्यमनस्के त्रि०।

अन्यत् अव्य०। अन-वा० यति। अन्यार्थे। "देव-दत्तोगच्छति अन्यश्च यज्ञदत्त" इति गण० महो० स्वरादिपाठादव्ययत्वम्।

अन्यतम त्रि० अन्य+डतमच्, सुग्धबोधम्। बहूनां मध्ये निर्द्धारिते एकस्मिन्। न्यायमते अनेकभेदावच्छिन्नप्रतियो-गिताकभेदवति तच्च तद्भिन्नत्वे सति तद्भिन्नत्वे सति तद्भिन्न-भिन्नत्वम्। यथा घटपटभ्यामन्यतम इत्यादौ घटादिभेद-त्रयभेदो घटपटगृहेष्वेव, तद्भिन्नेषु सर्वत्र तत्त्रयभेदस-त्त्वात्। अनेकत्वञ्च अपेक्षाबोधविषयत्वं तथा च यावन्तः पदार्थाः अन्यतमघटकप्रथमभेदप्रतियोगितया विवक्षिता-स्तावन्तएव भेदा याहृग्रास्तथा च तावत्पदार्थभिन्नभेद-वत्त्वमेवान्यतमशब्दार्थः। "अन्यतरान्यतमशब्दौ अव्युत्पन्नौ प्रातिपदिके इति" कैयटः। तेनान्यतमस्य न सर्वनामका-र्य्यम् "किंयत्तदोनिर्द्धारणे इति" पा० किंयत्तद्भ्योऽन्यत्र डतरादिविधानाभावान्न डतमान्तत्वम् अतोऽव्युत्पन्नत्वम्। इति भा०प्र०उ०। अतएव सर्वनामसंज्ञासूत्रे डतरडत-मान्नयोरुक्तत्वेऽपि अन्यतरशब्दस्य पृथगुपादानम्। "कर्म्मादिष्टकान्यतमत्व' कारकत्वमिति" सारमञ्जरी "अधःप्रकृपितोऽन्यतमो हि दोष" इति सुश्रुतम्।

अन्यतर त्रि० अन्य+डतर सु०वो०। द्वयोर्मध्ये निर्द्धारिते एकस्मिन्। न्यायमते भेदद्वयादिच्छिन्नप्रतियोगिताकभेदवति

तच्च तद्भिन्नत्वे सति तद्भिन्नभिन्नत्वमधिकमन्यतमशब्दे द्रष्टव्यम् अव्युत्पन्नत्वेऽपि अस्य स्वशब्देनोपात्तत्वात् सर्वनामकार्यम् । किंयत्तदभ्योऽन्यत्र इतराद्यभावात् अव्युत्पन्नत्वमिति भाष्य० प्र० उद्योत० । शुभादि०अपत्ये ठक् । आन्यतरेयस्तदपत्ये पुंस्त्री० । [दिवसे ।

अन्यतरेद्युस् अव्य० अन्यतरस्मिन्नहनि एद्युस् । अन्यतर-

अन्यतस् अव्य० अन्य+सप्तम्यादार्थे तसिल् । अन्यत्र अन्यस्मादित्यादार्थे । तत्र सप्तम्यर्थे "नैव न प्रियतमोभयवासौ यद्यसुनं हणुते हणुते वा । एकतस्तु धिगमूमगुणज्ञामन्यतः कथमदःप्रतिलम्भः इति" नै० "एकतस्तु सकलानि निमित्तान्यन्यतो मनसः प्रतिपत्तिरिति नीति० "गुरो र्यत्र परीवादोनिन्दा वापि प्रवर्त्तते । कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यत" इति मनुः । पञ्चम्यर्थे तु "या निशुक्लान्यतः पुत्रं देवराद्वाप्यवाप्नुयादिति" मनुः ।

अन्यतस्थ त्रि० अन्यतोऽन्यस्मिन् स्वेतरपक्षे भवः अन्यतस्+त्यप् । सपक्षे । "स य एतमुपास्ते जिष्णुर्जापराजिष्णुर्भवत्यन्यतरूपजावीति" श्रुतिः । [कारके ।

अन्यत्कारक त्रि०अन्यस्य कारकः ई० तत् कृ च । अन्यस्य-

अन्यत्र अव्य० अन्यस्मिन्+अन्य+त्रल् । अन्यस्मिन्नित्यर्थे । "अन्यत्र निद्रव्येभ्य आश्रितत्वमिष्यते इति" भाषा० न चानुमानगम्यं शास्त्रप्रामाण्यं येनान्यत्र दृष्टं निदर्शनमपेक्षते इति" अन्यत्र प्रजापतिव्रतादिभ्यः इति च शारी० भा० । प्रकरणबलाच्च कालो देशो वा विशेष्यः तत्र कालः । "अन्यत्र निधनात् पत्युः पत्नी कोशाच्च वापयेदित्यादौ" निधनकालभिन्ने काले इत्यर्थः । उक्तोदाहरणे तु देश इति । "इतराभ्योऽपि दृश्यन्ते इति पा०उक्तेः तत्रभवानित्यादिवत् प्रथमार्थे त्रल् । प्रथमार्थे "देवा अन्यत्वाश्विभ्यां सत्यं निषेदुरिति" कौ०ब्रा० । अन्यत्र अन्ये इत्यर्थः "अन्यत्र धर्मादन्यत्राधर्मादन्यत्र कृताकृतात् अन्यत्र भूताद्भव्याच्चेति" कठ०उप० । धर्मादन्यइत्यर्थः ।

अन्यथा अव्य० अन्य+प्रकारार्थेथाच् । अन्यप्रकारे "यदभावि न तद्भावि भावि चेन्न तदन्यथेति" हितो० । "अवाप्यते वा कथमन्यथा द्वयमिति" कुमा० । निष्कारणे भेदि० अभावार्थे च "अन्यथानुपपत्तिरिति" ।

अन्यथाकारम् अव्य० अन्यथा+कृ+णमुल् । अन्यप्रकारेण कृत्वेत्यर्थे यस्य यथाकरणमुचितं ततोन्यरूपेण कृत्वेत्यर्थे ।

अन्यथाख्याति स्त्री अन्यथा अन्यरूपेण ख्यातिर्ज्ञानम् । यस्य यद्धर्मत्वेन ज्ञानमुचितं तस्य तद्भिन्नधर्मेण ज्ञाने । यथा ह्रदो वह्निमानित्यादिज्ञानम् तच्च भ्रमात्मकं तदभावरूपतया ज्ञानं तत्प्रकारकत्वात् । तच्च विशिष्टमेकं ज्ञानं तस्यैव प्रवर्त्तकत्वात् तथा च शुक्तौ रजतत्वभ्रमात् रजतार्थिनस्तदुपादाने प्रवृत्तिरुपजायते इति नैयायिकादयः । मीमांसकादयस्तु तत्र ज्ञानद्वयम् वह्निज्ञानं ह्रदज्ञानञ्च असंसर्गाग्रहवशाच्च तयोः विशिष्टज्ञानकार्यकारिता सति च ह्रदे वह्नेरसंसर्गज्ञाने तत्र न प्रवृत्तिरित्यतोऽसंसर्गाग्रह एव तत्र प्रवर्त्तकः अप्रवृत्तिस्तु तदभावे इत्याहुः । वेदान्तिनस्तु धर्म्मिणोऽसन्निकृष्टस्थले नान्यथाख्यातिः किन्तु अलौकिकपदार्थान्तरोत्पत्त्या तस्य लौकिकं प्रत्यक्षं जायते यथा इदं रजतमिति ज्ञानं तद्विवरणमध्यासशब्दे १३० पृष्ठे उक्तम् । अतोऽसत एव तत्र ख्यातिरित्यसत्ख्यातिः धर्म्मिसन्निकर्षस्थले तु जपासन्निकृष्टस्फटिकादौ अन्यथा ख्यातिरिति भेद इत्यन्ये चक्रुः ।

अन्यथानुपपत्ति स्त्री अन्यथा अभावे न उपपत्तिःअसम्भवः स्वाभावप्रयोज्यासम्भवे, अर्थापपत्तिप्रमाणे च तथा हि पीनो देवदत्तो दिवा न भुङ्क्ते इत्यादौ दिवाभोक्तृदैवदत्तस्य पीनत्वं रात्रिभोजनं विनाऽनुपपन्नम् (असम्भवि) इति ज्ञानात् रात्रिभोजनाकर्त्तृकपीनत्वेन रात्रिभोजनं कल्प्यते तथा च भोजनस्य पीनत्वव्यापकतया व्यापकाभावस्य च व्याप्या भावव्याप्यतया साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिज्ञानात् अनुमितिरूपार्थापत्तिरुदेति । सेयमर्थापत्तिः मीमांसकमते प्रमाणान्तरं नैयायिकानां मते व्यतिरेकव्याप्तिज्ञानहेतुकानुमितिरिति भेदः ।

अन्यथाभाव पु० अन्यथा अन्यरूपेण भावः । यस्य यथारूपमुचितं तस्य ततोऽन्यथारूपेण भवने । अन्यरूपापत्तये च । "अतो मय्यन्यथाभावो न कर्त्तव्य इति" ज्ञा०उप० भा० "ज्ञातेऽपि विषये तवानुक्तिरित्येवं रूपो भाव इत्यर्थः ।

अन्यथाभूत त्रि० अन्यथा अन्यप्रकारेण भूतः । प्रकारान्तरतां प्राप्ते । "अन्यथाभूतमिति" सु०बो० ।

अन्यथावृत्ति स्त्री अन्यथाऽन्यरूपेण वृत्तिः । चित्तादेः अन्यप्रकारेण वृत्तौ, (परिणामे) अन्यथास्थितौ च ।

अन्यथासिद्ध त्रि० अन्यथा अन्यप्रकारेण सिद्धः । अन्यप्रकारेण सिद्धे पदार्थे, न्यायादिमते अन्यथासिद्धिरूपायां कारणतायां प्रतिबन्धकानां दोषाणामाश्रये वस्तुनि च । अन्यथासिद्धानि च पञ्च तत्र घटादौ दण्डत्वादिकमाद्यम् दण्डादिरूपं द्वितीयं, कुलालजनकः तृतीयः, गगनादि चतुर्थम् रासभादि पञ्चमम्, यथोक्तं भाषायाम् 'येन सह पूर्व-

भावः कारणमादाय वा यस्य । अन्यं प्रति पूर्व्वभावे ज्ञाते यत्पूर्व्वभावविज्ञानम् ॥ जनकं प्रति पूर्व्ववर्त्तितामपरित्यज्य न यस्य स्पृहयते । अतिरिक्तमन्यापि यद्वेद्यिवतावश्यक-पूर्व्वभाविनः ॥ एते पञ्चान्यथासिद्धा दण्डत्वादिकमादि-मम् । घटादौ, दण्डरूपादि द्वितीयमपि दर्शितम् ॥ तृतीयन्तु भवेद् व्योम कुलालजनकोऽपरः । पञ्चमो रास-भादिः स्यादेतेष्वावश्यकस्त्वसौ" इति ॥

अन्यथासिद्धि स्त्री अन्यथा अन्यप्रकारेण सिद्धिः । अन्य-प्रकारेण सिद्धौ न्यायाद्युक्तकारणताप्रतिबन्धकरूपे पञ्च-विधे दोषे च ।

अन्यदर्थ पु० अन्योऽर्थः कर्म्म० दुक् । भिन्नार्थे । ईत०३त० वा अन्यार्थः अन्यस्यान्येन वाच्यं पु० । अन्यः अर्थोयस्य अन्यार्थः भिन्नार्थके त्रि० । "अन्यार्थं उपन्यास इति"

अन्यदा अव्य० अन्यस्मिन् काले दा । अन्यस्मिन् काले इत्यर्थे "अन्यदा भूषणं पुंसां क्षमा लज्जेव योषितामिति" माघः

अन्यदाशा स्त्री अन्या आशा दुक् । भिन्नप्रार्थने । अन्य-स्याशा ईत० । अन्यस्य वाञ्छायाम् अन्यलाभाशये ।

अन्यदाशिस् स्त्री अन्या आशीः दुक् । अन्याशीर्वादे अन्यस्य अन्येन वाशीरिति ईत०३त० वा । अन्या-शीरित्येव । अन्यस्य अन्येन वाञ्छास्यप्रार्थने ।

अन्यदास्था स्त्री अन्यस्मिन् आस्था दुक् । अन्यस्मिन्नास्थावाम् अन्यस्यास्था ईत० । अन्यास्थेत्येव अन्यस्यास्थायाम् ।

अन्यदास्थित त्रि० अन्यमास्थितः दुक् । अन्यरूपास्थिते ३त० । अन्यास्थित इत्येव अन्येनास्थिते ।

अन्यदीय त्रि० अन्यस्यायम् गङ्गा०छ दुक् च । अन्यसम्बन्धिनि

अन्यदुत्सुक त्रि० अन्यस्मिन् उत्सुकः दुक् । अन्य-विषयोत्कण्ठिते । अन्येन उत्सुकः ३त० । अन्योत्-सुक इत्येव तत्रैवार्थे त्रि० ।

अन्यदूति स्त्री अन्या ऊतिः दुक् । अन्यरक्षणे । अन्यस्य ऊतिः ईत० । अन्योतिरित्येव अन्यस्य रक्षणे ।

अन्यद्राग पु० अन्यस्मिन् रागः दुक् । अन्यविषयरागे । अन्येन अन्यस्य वा रागः ३त०ईत० वा । अन्यराग इत्येव अन्यत्करणके अन्यसम्बन्धिनि च रागे ।

अन्यपुष्ट पुंस्त्री० अन्यया नाद्भिन्नया पुष्टः सर्वनाम्नो वृत्तौ पुंवद्भावः । कोकिले "अथान्यपुष्टाः प्रतिकूलशब्दाः श्रोतुर्बिभेतीरिव तादृशानेति" कुमा० । "बलिपुष्ट-कुलादिवान्यपुष्टैरिति" माघः ।

अन्यपूर्व्वा स्त्री अन्यः पूर्व्वो यस्याः । पूर्व्वपतिमरणादौ पश्चात् कृततद्भिन्नपतिकायां पुनर्भूस्त्रियाम् । अन्यपूर्व्वा च सप्तविधाः यथोक्तं नारदेन "परपूर्व्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमम् । पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्व्विधा । कन्यैवाक्षतयोनिर्य्या पाणिग्रहण-दूषिता । पुनर्भूः प्रथमा प्रोक्ता पुनःसंस्कारकर्म्मणा । देशधर्म्मानवेक्ष्य स्त्री गुरुभिर्य्या प्रदीयते । उत्पन्नसाक्षसान्यस्मै सा द्वितीया प्रकीर्त्तिता"।(उत्पन्नसाक्षसा उत्पन्नव्यभिचारा) । "असत्सु देवरेषु स्त्री बान्धवैर्य्या प्रदीयते । सवर्णाय सपि-ण्डाय सा तृतीया प्रकीर्त्तिता" । स्त्री प्रव्रजिताऽप्रव्रजिता वा पत्यावेव तु जीवति । कामार्थमात्रवेदन्यमथवा स्वैरिणी तु सा । कौमारभर्त्तृकेत्युक्ता या त्वन्यं पुरुषं श्रिता । पुनः पत्युर्गृहं यायाद्या द्वितीया प्रकीर्त्तिता । मृते भर्त्तरि तु प्राप्तान् देवरादीनपास्य या । उपगच्छेत्परं कामात्सा तृतीया प्रकीर्त्तिता । प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा तु या । तवाहमित्युपगता सा चतुर्थी प्रकीर्त्तिता इति" । अन्या अपि सप्तविधाः कात्यायनेन दर्शिता यथा "सप्त पौनर्भवाः कन्या वर्জनीयाः कुलाधमाः । वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला । उद-कस्पर्शिता या च या च पाणिग्रहीतिका । अग्निं परिगता या च पुनर्भूप्रभवा च या । इत्येताः काश्यपेनोक्ता दहन्ति कुलमग्निवत्" इति । अन्यपूर्व्वाभेदश्च युगान्तरविषय-मिति माधवाचार्य्यादयः "नष्टे मृते प्रव्रजिते क्लीबे वा पतिते पतौ । पञ्चस्वापत्सु नारीणां पतिरन्योविधीयते पराशरवाक्यस्य तेन युगान्तरविषयकत्वस्य व्यवस्थापनात् । कलियुगेऽपि तत्कर्त्तव्यतेति आधुनिकाभ्यन्ये तत्र बला-बले तत्तद्ग्रन्थे एवावगन्तव्ये । अन्यस्वामिकमात्रेऽपि "मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः । तथाप्यनन्य-पूर्व्वेव तस्मिन्नासीत् वसुन्धरेति रघुः । ततः अर्शआदित्वात्, अन्या पूर्व्वा यस्य वा । तत्परित्यक्तरि पुनर्भूपतौ पु० ।

अन्यभाव पु० अन्यरूपो भावः । अन्यरूपभवने अन्यरूप-चित्तभावे च । ब्रा० ष्यञ् । आन्यभाव्यं तद्भावे न० ।

अन्यभृत् पुंस्त्री० अन्यया भिन्नया भृतः पुष्टः । कोकिले । अन्यभृत पुंस्त्री० अन्यया भृतः पुष्टः । कोकिले । "कलमन्य-भृतासु भाषितमिति" रघुः । अन्यपुष्टभावे त्रि० ।

अन्यमनस् त्रि० अन्यस्मिन् मनोयस्य । स्वयाङ्गविषयपरि-हारेण उत्कण्ठया व्याकुलीभावेन अन्यत्रासक्तचित्ते । वा कप् । अन्यमनस्कोऽप्यत्र त्रि० ।

अन्यमातृज पु० अन्यस्या मातृजायते जन ड ५त० पुंवद् ।

कारणकत्वाद्भिन्न इति यदुक्तं प्रकाशिकायाम् । "शब्दो यदि स्वार्थस्यानुभवे भवेद्धेतुस्तर्हि प्रात्यक्षिकएवौपनायिके, तत्र नाकाङ्क्षादयुपयोगः, तद्भिन्ने चेदानुमानिक एव न च तत्र सद्यः, साकाङ्क्षत्वादिधीमात्रेण, व्याप्तिबोधस्याधिकस्यापेक्षणादित्याशङ्कामपनेतुमन्वयबोधनामकमनुभवान्तरं दर्शयति । "साकाङ्क्षशब्दैर्योबोधस्तदर्थान्वय गोचरः । सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमा" । शाब्दधियः प्रत्यक्षत्वाभ्युपगमे प्रत्यक्षादिसामान्यं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वासम्भवात्, शाब्दान्यप्रत्यक्षत्वाद्यवच्छिन्नं प्रति तस्यास्तथात्वमपेक्ष्य शाब्दधियः प्रत्यक्षादभिन्नत्वकल्पनायामेव लाघवाच्च । लिङ्गजन्यत्वेनान्वयबुद्धेरनुमितित्वसिद्धावनायत्त्या शाब्दान्यानुमित्यां तत्सामग्र्याः प्रतिबन्धकत्वं वाच्यमतो लिङ्गजत्वमेव शाब्दधियः खण्डयति ।"योग्यतार्थगताऽऽकाङ्क्षा शब्दनिष्ठाऽनुभाविका। प्रत्येकं वा मिलित्वा वा नैते लिङ्गमसिद्धितः" । गवादावस्तित्वादेरनुभवार्थं न तावदस्तित्ववाधविरहरूपं लिङ्गं बाधनिश्चयाभावेनान्यथासिद्धस्य योग्यतानिश्चयस्यानावश्यकत्वात् योग्यतामात्रलिङ्गकसंसर्गानुमानस्यान्वयबुद्धित्वे घटः कर्म्मत्वमित्यादिस्थलीयस्यापि तस्य तथात्वापाताच्च । योग्यतायाः संशयस्थलेऽप्यन्वयबुद्धेरानुभविकत्वात् । गवादावस्तित्वादेरन्वयबोधानुकूलानुपूर्व्वीपर्य्यवसितात्वाकाङ्क्षा स्वयमसिद्धा कथमस्तित्वाद्यन्वयबोधं साधयेत् तत्र गवास्तित्वादेर्योग्यताविशिष्टमाकाङ्क्षावत्त्वं न तदन्वयस्यानुमापकप्रसिद्धेरित्यादि" ।

अन्वयिन् त्रि० अन्वेति अनु–इण–णिनि । शाब्दबोधोपयोगि संबन्धति अनुगते च अन्वयः वंशादिः अस्त्यस्य इनि । प्रागुक्तान्वयवति स्त्रियां ङीप् । न्यायनये अन्वयव्याप्तियुक्ते हेतौ पु० "केवलान्वयी" ।

अन्वर्थ त्रि० अनुगतोऽर्थम् अत्वा०स०। अर्थानुगते व्युत्पत्तियुक्ते शब्दे "तथैव सोऽभूदन्वर्थः राजा प्रकृतिरञ्जनादिति" रघुः ।

अन्ववसर्ग पु० अनु+अव+सृज–घञ् अनुगतोऽवसर्गमिच्छानुरूपप्रचारम्, अत्वा०स०, अनुरूपं स्वेच्छानुरूपतया अवसृज्यते न प्रतिरुध्यते अनेन इति वा अनु+अव+सृज–घञ् । यथेष्टं क्रियतामित्येवं रूपायामनुज्ञायाम् कामाचारानुज्ञाने, "अपिः पदार्थसंभावनान्वयसमुच्चयाऽऽशङ्कासमुच्चयेषु" पा० अपि सिञ्च अपि सुहि इत्यादौ यथेष्टं कृत्या इत्यादयोऽपिना द्योत्यते न तु कृत्वापि अनुज्ञया प्रतिरोधः क्रियते इति तस्य तथात्वम् ।

अन्ववाय पु० अन्ववायते उत्पत्त्यानुसंबध्यते अनु+अव+अय–घञ्, इण्–अच् वा अनुन्ववेति अनुगच्छति देहावयवम् अनु+अव+इण्–कर्त्तरि अच् वा । वंशे, सन्ताने च ।

अन्वयव्यतिरेकिन् त्रि० अन्वयव्यतिरेकौ स्तोऽस्य इनि । साध्यसाधके हेतुविशेषे, यथा वह्निसाधने धूमः । स हि वह्निमति महानसादौ, वह्न्यभाववति जलादौ च भावाभावाभ्यां वह्नेरन्वयव्याप्तेः व्यतिरेकव्याप्तेश्च तथेति न्यायमते प्रसिद्धम् । अन्वयोऽन्वयव्याप्तिर्व्यतिरेको व्यतिरेकव्याप्तिस्तौ विद्येते अस्य इनि । अन्वयव्याप्तिमति व्यतिरेकव्याप्तिमति च हेतौ । यथा वह्नौ साध्ये धूमस्य अन्वयव्यतिरेकव्याप्तिकत्वम् । तत्र च धूमसत्त्वे वह्नि सत्त्वरूपान्वयव्याप्तिः वह्निव्यतिरेके च धूमाभावः व्यतिरेकव्याप्तिरित्युभयव्याप्तिसत्त्वात्तथात्वम् ।

अन्वयव्याप्ति स्त्री अन्वयेन व्याप्तिर्व्यापनं नियततया स्थितिः ३त०। यत्र धूमसत्त्व वह्निरित्येवं रूपायां व्याप्तौ। अन्वयेन तस्य सत्त्वेन व्याप्तिः इनरान्वयस्य साध्यस्यान्वयः व्यापकता । यथा धूमसत्त्वेन वह्निसत्ता इत्यतोधूमसत्त्वेन वह्नेर्व्यापकता । सा च साध्यसामानाधिकरण्यरूपा ।

अन्वयागत त्रि० अन्वयात् वंशपरम्परायाः आगतः । दायप्राप्ते धनादौ "श्रुतं शौर्य्यं तपःकर्मागम्यवाच्यान्वयागतम् धनं सप्तविधं शुद्धमिति" नारस० ।

अन्वेक्षा स्त्री अनु+अव+ईक्ष–अङ् । अपेक्षायामनुरोधे ।

अन्वष्टका स्त्री अनुगतोऽष्टकाम् । श्राद्धकालभेदे स च अग्रहायण्या ऊर्द्धं तिसृः कृष्णाष्टम्यः अष्टकाः, तदुत्तरवर्त्तिन्यस्तिस्रः कृष्णनवम्यः तद्रूपः। तासु सान्निकस्य मात्रादिश्राद्धकालः । तथाहि "अष्टका यो ऊर्द्धमाग्रहायण्यास्तिस्राष्टमीति" गोभि० । "पिण्डदानाय मूले स्युरष्टकास्तिस्र एव च कृष्णपक्षे वरिष्ठावेति" ब्रह्मपु० । आश्वलायनगृह्ये तु तासां तस्य इत्युक्तम् यथा । "हेमन्तशिशिरयोश्चतसृणामपरपक्षाणामष्टमीष्वष्टका" इति । "एकस्यां चतसृषु वेति" विकल्पश्रवणात् सामर्थ्यभेदेन एकस्यां तिसृषु चतसृषु वा अष्टकाश्राद्धम् अन्वष्टकाश्राद्धं च कार्य्यमिति गम्यते । तत्र पशुकल्पस्थालीपाकाद्यङ्गजातसङ्ख्या "अपरेद्युरान्वष्टक्यमिति" सूत्रेण तदुत्तरवर्त्तिकृष्णनवमीषु तद्विहितम् तत्र मात्रादिभ्योऽपि देयम् "पितृभ्यश्च हुत्वा मन्यवर्ज्यम् स्त्रीभ्यश्च सुरावामिति" तत्रैवोक्तेः मनुनाऽपि "पितृंश्चैवाष्टकास्वर्चेच्चित्रान्वष्टकासु" चेत्युक्तम् अत्र पितृपदमष्टकापक्षे स्वपरम्, अन्वष्टका-

पक्षे "स्त्रिया पुंवत्" इत्येकशेषेण मातृपितामहीप्रपितामहीसहितपित्रादिपरम्। एवञ्च आश्वलायनगृह्ये मनुवचने च पित्रादेरपि देवतात्वश्रवणात् मात्रादिमात्रदैवत्वं रघुनन्दनोक्तं चिन्त्यं वस्तुतः शाखिभेदेन सपत्नीकपित्रादिश्राद्धं मात्रादिदेवताकं वा तच्छ्राद्धमिति व्यवस्था। "पित्रादित्रिकपक्षेषु भोज्या मातृः प्रति द्विजाः। स्त्रीणामेव तु तद्यस्मान्मात्रश्राद्धमिहोच्यते" शङ्खवचनन्तु तासां पृथक्श्राद्धविधानार्थम्। एतच्च अन्वष्टकाश्राद्धं साग्निकमात्रेण कर्त्तव्यम्। तथा च विष्णुः। "अन्वष्टकाश्राद्धवदग्नौ कृत्वा मात्रे पितामह्यै प्रपितामह्यै पूर्ववद्ब्राह्मणान् भोजयित्वा" इति। अत्र होमस्य देवाग्निप्राप्तेरग्निग्रहणं तन्नियमार्थम्। न चाग्नौकरणहोमे विप्रपाणाद्यविधानादत्रापि तथेति वाच्यम् प्रकृतिभूतश्राद्धविध्युक्ताधारान्तरस्य विकृतीभूतश्राद्धे विशेषविहिताधारेण बाधात्। न वा लौकिकाग्नौ होमः "न पैत्र्ययज्ञियो होमो लौकिकाग्नौ विधीयते" इति मनुवचनेन निषेधात्। श्राद्धचिन्तामणावप्येवम्। आ०त० रघुनन्दनः।

अन्वष्टमदिश अव्य० अष्टमीं दिगमनुलक्ष्यीकृत्य अव्ययी० अच्समा०। पश्चिमोत्तरयोर्दिगोरष्टमाभिमुखीकृतदिग्भागे। स च वरुणकोणः तस्य च पश्चिमोत्तरयोर्मारुतदक्षिणावर्त्ताभ्यामष्टमभागत्वात्तथात्वम् "अरण्ये संयतपाणिः सन्ध्यासुपास्ते नित्यं वाग्यत उत्तराभिमुखोऽन्वष्टमदिगभिमानलक्षणदर्शनादिति" आ०त० सांख्या०भ०। अन्वष्टमदिगभिति उभयदिगष्टमभागमिति रघु०। [प्रत्यहमित्यर्थे।

अन्वह अव्य० अह्नि अह्नि वीप्सार्थेऽव्ययी० अच् समा०।

अन्वाख्यान न० अनु+आ+ख्या—ल्युट्। तात्पर्य्यावधारणार्थं व्याख्याने तत्प्रतिपादने च "वस्त्वन्याख्यानं क्रियान्याख्यानं चेति" "आत्मस्वरूपान्याख्यानपरेष्विति च भ०उ०भा०

अन्वाचय पु० प्रधानस्य पश्चादन्यः आचीयते बोध्यते यत्र अनु+आ+चि+अच्। उद्देश्यसिद्धानुद्देश्यसिद्ध्यर्थोपदेशे। यथा भिक्षां गच्छ यदि गां पश्येस्तामानय, अत्र भिक्षायामेव उद्देशः न गवानयने, तत्सिद्धुत्तरं गवानयनमनुद्दिष्टमपि साध्यतया निर्दिष्टम्। "चान्वाचये समाहारे" इत्यमरः। "चार्थे द्वन्द्व इति" पा० सूत्रे "सकृच्छ्रयान्वाचयेतरेतरयोगसमाहारार्थाय" इति सि०कौ०।

अन्वाजे अव्य० अनु-आजयत्यनेन अनु+आ+जि-डे। दुर्व्वलस्य बलाधाने। बलस्य हि जयहेतुत्वं प्रसिद्धम्। सप्रत्यनप्रतिरूपकोऽयम्। 'उपाजे अन्वाजे इति" पा० वा उपपदसमासे अन्वाजेशब्दात्तो ल्यप्। पक्षे अन्वाजेकृत्वा।

अन्वादेश पु० अनु+आ+दिश—घञ्। पूर्व्वोपात्तस्य किञ्चित्कार्य्यान्तरं विधातुं पुनरुपदेशे। यथा अनेन व्याकरणमधीतं नश्चायमेनं प्रपाठयेति नश्चायपाठनार्थं पुनरुपदेशः। कथितकथने, अनुवादार्थे च। "इदमोऽन्वादेशेऽशनुदात्त" इति पा०।

अन्वाधान न० वह्निस्थापनस्य पश्चात् आधानम्। आहित वह्नौ—द्वयोः तिसृणां वा समिधाधाने। स्थण्डिलादिकरणानन्तरम् 'तदभ्युक्ष्याग्निं प्रतिष्ठाप्यान्वाधाय परिसमूहेदिति" आ०श्रौ० सूत्रे हि अग्न्याधानोत्तरं तदाधानमुक्तम्। "अग्न्याधानमध्वर्युर्यजमानो" वेति कात्या० २,१,२'।

अन्वाधि पु० पश्चात् आधीयते अनु+आ+धा—कि। स्वसमीपे आहितस्य वस्तुनः स्वामिने दानाय परत्राधाने तद्विषये धने च "अर्थमार्गणकार्य्येषु अनृणिनु वचनाक्षम। दद्यास्त्वमिति योदत्तः स इहान्वाधिरुच्यते इति" कात्या० स०। सन्तत आविः। सन्ततमानसव्याधायाम्।

अन्वाधेय न० विवाहस्य पश्चात् आधेयम् दत्तम्। अनु+आ+धा—यत्। विवाहात् परम् पित्रादिभिः स्त्रीभ्यो दत्तधने स्त्रीधनभेदे "विवाहात् परतोयत्तु लब्धं भर्त्तुकुलात् स्त्रिया अन्वाधेयं तदुक्तं तु लब्धं बन्धुकुलात्तथेति ना०स०। "बन्धुदत्तं तथा शुल्कमन्वाधेयकमेव च। अप्रजायामतीतायां बान्धवास्तदवाप्नुयुरिति" या०।

अन्वायतन अव्य० आयतनस्य मध्यम् अव्य०। गृहमध्ये इत्यर्थे अनुगतमायतनम् अत्या०स०। गृहानुगते त्रि०।

अन्वायत्त त्रि० अनु+यत—क्त। अनुगते "प्रस्तोतः! या देवता प्रस्तावमन्वायत्ता ताद्देविद्वानिति" "वसवोऽन्वायत्ता" इति च श्रा०उप०।

अन्वारब्ध त्रि० अनु+आ+लभ—कर्त्तरि क्त लस्य रः। कृतस्पर्शे "विष्णोः कर्म्माणीति वाचयति यूपमन्वारब्धमिति" का० ६,३,१२, "अन्वारब्धं स्रुत्वन्नमिति" वेददीपः। कर्म्मणि क्त। पश्चाद्भागे—स्रुचि, पश्चाद्भागे च। "अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु इति" आ०त० या०। "अन्वारब्धेन पश्चाद्भागेनेति" रघु०। "द्वाभ्यां पत्नीभ्यामन्वारब्ध" इति वौ० सू०।

अन्वारभ्य त्रि० सह आलभ्यः लस्य रः। सहस्पृश्य।

अन्वारम्भ न० पश्चात् आलम्भः लस्य रः। स्पर्शे अनुपूर्व्वकलभेर्हि स्पर्शार्थत्वम्। "अनड्वाहमन्वारभामहे"

इति यजु० ३५,१२ स्वार्थे प्रयोगात्। "अनड्वाहमन्वारभामहे आलभामहे शमाम" इति वेददीपः। [रूढे च।

अन्वारूढ त्रि० अनु+आ+रुह-क्त। अधिरूढे। पश्चादा-

अन्वारोहण न० पश्चात् आरोहणम्। पश्चादभर्त्तरि मृते पश्चात् सह वा स्त्रियाश्चितारोहणे तच्च "ब्रह्मचर्य्यं तदन्वारोहणं वेति" वि०सूत्रे विहितम् विहितमनुमरणशब्दे।

अन्वासन न० अनु+आस-ल्युट्। अनुपवेशनेन सेवने।

अन्वासित त्रि० अनु+आस-कर्मणि क्त। पश्चादुपवेशनादिना सेविते "अन्वासितमरुन्धत्येति" रघुः।

अन्वाहार्य्य न० मासि मासि आहियते अनु+आ+हृ-कर्मणि ण्यत्। "यच्छ्राद्धं कर्म्मणामादौ या चान्ते दक्षिणा भवेत्। अमावास्यं द्वितीयं स्यादन्वाहार्य्यं विदुर्बुधा इति" कात्यायनपरिभाषिते नान्दीमुखश्राद्धे, अमावास्यायां मासि मासि कर्त्तव्ये श्राद्धे, दक्षिणायाञ्च "पित्र्यां मासिकं श्राद्धमन्वाहार्य्यं विदुर्बुधा इति मनुः। "सर्वांस्तेवान्वाहार्य्यवन्ति" गोभि०। अन्वाहार्य्यं नान्दीमुखश्राद्धम् दक्षिणा च तदुभयवन्ति। स्वार्थे कन् तत्रैव। "पिण्डान्वाहार्य्यकं श्राद्धं कुर्य्यान्मासानुमासिकमिति" मनुः मासि-मासिकर्त्तव्यश्राद्धस्यानुमासमाहियमाणत्वात् नान्दीमुखस्य संस्कारादौ आहियमाणत्वात्, दक्षिणायाः कर्म्मणां पश्चात् आहियमाणत्वाच्च तथात्वम्।

अन्वाहार्य्यपचन पु० अन्वाहार्य्यं तदर्थं पच्यतेऽनेन पच+ल्युट्। दक्षिणाग्नौ ऋग्वेदविधिना स्थापितेऽग्नौ। "अथ चैनमन्वाहार्य्यपचनोऽनुगयासापो दिशो नक्षत्राणि चन्द्रमा इति आ०उप०। अन्वाहार्य्यपचनो दक्षिणाग्निरापो दिशो नक्षत्राणि चन्द्रमा इत्येतेसोमम चतस्रस्तनवस्तनुर्वा अहमन्वाहार्य्यपचनः विभज्य आत्मानं स्थितः इति" भा०। "प्रसिद्धं हि दर्शपौर्णमासयोरन्वाहार्य्यपचने हविः श्रपयन्तीति" आन०गि०। "यस्मिन्नग्नाहुचा वा सान्नाय्या वा यजुषा वा समिधं वाभ्यादध्यादाहुतिं वा जुहुयादन्ते दक्षिणां वा हरेयुरनु वा गमयेयुर्दक्षिणा वाहेन हरन्त्यान्वाहार्य्यपचनोभविष्यतीति अनु वा गमयन्ति" इति शत० ब्रा० तस्य निरुक्तिर्दर्शिता।

अन्वाहित त्रि० अनु+आ+धा-क्त। कृतान्वाधाने, वह्नौ-अग्निप्रसमिद्विशेषे "अन्वारोपिते" आधेःस्वामिनोदानार्थमपरस्य हस्ते निक्षिप्ते च। "अन्वाहितं याचितकमित्यादि या०।

अन्विच्छा स्त्री अनु+इष-अ नि०। अन्वेषणे।

अन्वित त्रि० अनु+इण+क्त। अनुगते, युक्ते, सङ्गते, गाढ्बोधे विशेष्यतानिरूपिते च "प्रकृत्यर्थान्वितस्यार्थबोधकत्वं प्रत्ययानामिति" न्यायः।

अन्विष्ट त्रि० अनु+इष्-क्त। अन्वेषिते कृतान्वेषणे। "यदायुरन्विष्टमृगैः किरातैरिति कुमा०। कृतानुसन्धाने च "अन्विष्टः स्यात् प्रमातैव पाशदोषादिवर्जितः" इति या०भा०।

अन्विति त्रि० इण-क्तिन् नमस्कारेण अनुकूला इतिः यस्य। नत्वा अनुकूलताप्राप्ते "अन्वितिरसि दिवे त्वेति" ता० ब्रा०। "अन्वितिः अनुकूलनतिमुक्तोऽस्मीति" भा०।

अन्वीक्षा स्त्री पश्चात् ईक्षा पर्य्यालोचना प्रा०स०। वेदवाक्यश्रवणस्य पश्चात् तदर्थनिश्चयार्थं तदर्थपर्य्यालोचने, अन्वीक्षायै हिता ठक्। आन्वीक्षिकी तर्कविद्या। "आन्वीक्षिकी कौशलानामिति" गीता। ल्युट्। अन्वीक्षणमप्यत्र न०।

अन्वीत त्रि० अनु+इ-गतौ कर्त्तरि क्त। अनुगते अन्वितशब्दार्थे

अन्वीप त्रि० अनुगता आपो यत्र स्थानादौ अच्समा० अचि आत ईत्। अनुगतजले स्थाने, देशे वाच्ये ठ "जदनोर्देशे" इति पा० ऊत्, अनूपोदेशः।

अन्वृच अव्य० ऋचि विभ० अव्ययी० अच् समा०। ऋचीत्यर्थे। "विदुभवान्वाच तासामृको बह्वृचं वेदमन्वृचमिति" शत०ब्रा०।

अन्वेष पु० अनु+इष-भावे घञ्। अन्वेषणे अनुसन्धाने गवेषणे "वयं तत्त्वान्वेषान्मधुकर! कृतास्त्वं खलु कृतीति" शक०।

अन्वेषण न० अनु+इष-भावे ल्युट्। अनुसन्धाने गवेषणे नष्टद्रव्यस्य दर्शनाय लाभाय वा व्यापारभेदे। "रक्षान्वेषणदक्षाणां द्विषामाभिमतां वधौ" रघुः।

अन्वेषणा स्त्री अनुगता एषणा "इषेरनिच्छार्थकस्येति" पा० युच् टाप्। तत्त्वानुसन्धाने तर्कादिना ज्ञातपदार्थस्य शुद्ध्यर्थं युक्त्यादिना समर्थने गवेषणे च।

अन्वेषित त्रि० अनु+एष-गतौ-इष-स्वार्थे णिच्-कर्मणि वा क्त। गवेषिते, कृतानुसन्धाने च।

अन्वेषिन् अनु+इष-णिनि। गवेषणकर्त्तरि "तौ सीतान्वेषिणौ रथ्यं नूनपक्षमपश्यतामिति" रघुः। स्त्रियां ङीप्।

अन्वेष्टव्य त्रि० अनु+इष-कर्मणि तव्य। अनुसन्धेये "सोऽन्वेष्टव्यः स विजिज्ञासितव्य इति श्रुतिः "अन्वेष्टव्यात्मविज्ञानात् प्राक्प्रमाहत्वमात्मन" इति या०भा०।

अन्वेष्टृ त्रि० अनु+इष-शीलार्थे तृच् वा इडभावः। गवेषक

शीले तत्कर्त्तरि च "अनुपदसर्वेत्ता" पा०। इट्पक्षे अन्वेषितायत्र। उभयतः स्त्रियां ङीप्।

अप् स्त्री ब०व०। आप-क्विप् ह्रस्वश्च। जले। "प्रत्तं जलं द्राङ्गलमन्निकेऽपाम्" भट्टिः। "अद्भिरेव पारयित्वा नैत्यिकान्ने भुञ्जिक्रियेति" स्मृतिः अग्नेरापः, अद्भ्योऽग्निरिति श्रुतिः "अपएव ससर्ज्जादौ तासु बीजमवासृजदिति" मनुः। समासान्ते अच् समासान्तः। "वस्त्रपानि तड़ागानि सारसाः समुपासते" इत्युद्भटः। कृतसमासान्तस्य उपसर्गं द्राग्नः परस्य आतश्चत्वम्। समीपं प्रेपम् द्वीपः अन्तरीपम्। अनुपूर्व्यात्तु देशे वाच्ये जत्। अन्वपोदेशः अन्यत्र अन्वीपोऽपाम इत्यादि। पूजार्थकसुपूर्व्यात् न अच्। स्वाम्नि नगराणि। अपां विकारः मयट्। अस्मयः, वा घञ्। आप्यम्। स्वार्थे चातु० ष्यञ्। आप्यं जले न०।

अप अव्य० न पाति पा-ड। वियोगे, विकृतौ, विपरीते, निदर्शने, आनन्दे, वर्ज्जने, चौर्य्ये च। "अप-वियोग विकृति-विपरीत-निदर्शनानन्द-वर्ज्जन-चौर्य्य-वारणेषु" इति ग०म०। वियोगे "अपवादि'सत्वे निविशतेऽपैतीति" पा० भा०। "भीत्वा रामादपासरत् ?। विकृतौ, अपक्षतः अपचयः' विपरीते, अपशब्दः "तएव शक्तिवैकल्यप्रमादालसतादिभिः। अन्यथोच्चारिताः शब्दा अपशब्दा इतीरिता" इति चर्य्युक्तेः साधुशब्दानां वैपरीत्येनोच्चारणएवापशब्दत्वस्य परिभाषितत्वादस्य विपरीतशब्दत्वम्। निदर्शने निदेशे अपदिशति। आनन्दे अपहसति, वर्जने "अपपरी वर्जने" इति पा० उक्तेः कर्म्मप्रवचनीयसंज्ञा तद्योगे पञ्चमी। अप लिङ्गत्वात् हृष्टोदेवः। चौर्य्ये अपहरति। वारणे अपवर्त्तयति "समेन केनापवर्त्तेति" लीला०। अपकर्षे अपकर्म्म। अधः प्रदेशे च अपाङ् अपानः। अधोगतिमानित्यर्थः।

अपकर्म्मन् न० अपकृष्टं कर्म्म प्रा०स०। दुष्टाचरणे। अपाकरणे च "अपस्थानपकर्म्म चेति" दत्तस्थानपकर्म्म चेति स्मृतिः प्रा०व०। दुष्टाचरणवति त्रि०। स्त्रियां वा ङाप्।

अपकर्त्तृ त्रि० अप+कृ-तृच् स्त्रियां ङीप्। अपकारकारके।

अपकर्ष पु० अप+कृष-भावे घञ्। उचितधर्म्मापेक्षातो हीनतायां, "तत्र पृथिव्यादीनामन्योन्यानुप्रवेशकृतः सलिलभवरसोत्कृत्कर्षापकर्षेण चेति" यथा हि वर्षाणां पञ्चानामुत्कर्षापकर्षकृतेन संयोगविशेषेणेति" च सुश्रुतः "उत्कर्षञ्चापकर्षञ्च मनुष्येष्विह जन्मतः इति" मनुः। "उत्कर्षापकर्षविहीनोमध्यः, सि० कौ०। स्वकर्त्तव्यकालात् पूर्व्वकालकरणे, परस्वल्पदानामन्यथार्थं पूर्व्वकृते आकर्षणे आकर्षणमात्रे च। अपकृष्यते कर्म्मणि घञ्। स्वकालतः पूर्व्वं कर्त्तव्ये यथा अपकर्षसंसिद्धनम्। तथा च "सस्यं यद्यं मासिमासि अपर्य्याप्तादृतं प्रति। द्वादशाहेन वा कुर्य्यादेकाहे द्वादशावरेति" स्मृतौ परशोत्तरं सृताहे मासि मासि कर्त्तव्यानां सृताहनिमित्तकमासिकादीनां द्वादशाहेषु एकाहेषु च कर्त्तव्यत्वोक्तेः सर्व्वापकर्षः। तथाऽपकर्षे च हेतव एकपुत्रत्वादयः। "आनन्त्यात् कुलधर्म्माणां पुत्रस्य चायुषः क्षयात्। अस्थितेश्च शरीरस्य द्वादशाहे प्रशस्यते इति" स्मृत्युक्ताः। तत्र पाश्चात्यानां कुलधर्म्मात् द्वादशाह एव कर्त्तव्यतायाः कुलपरम्पराचारः। वङ्गीयानान्तु एकपुत्रस्यैव आयुषःक्षयसम्भावनायामिति भेदः। अयमेव सर्वापकर्षः, आवश्यकदाहारम्भकाले तु न सर्वापकर्षः। किन्तु पश्चाद्दाहविनाभिवापकर्ष इति भेदः। एवं नवमासादिष्वप्यपकर्षणे न सर्वापकर्ष इति बोध्यम्।

अपकर्षक त्रि० अपकर्षति अप+कृष-कर्त्तरि ण्वुल्। अपकर्षकारके "रसस्यानपकर्षकत्वे तेषां दोषत्वमपि नाङ्गीक्रियते" इति 'दोषाक्षस्यापकर्षका" इति च सा०द०।

अपकर्षण त्रि० अपकर्षति अपहरति कर्त्तरि ल्यु। अपहारके "नचास्ति सदृशं तेन किञ्चित्स्यौख्यापकर्षणमिति" "वर्षावां वह्निविन्यूलारुक्षाः क्षेपापकर्षणा" इति सुश्रु० भावे ल्युट्। आकर्षणे न०। "सशल्यः क्रियते प्राणैर्विशल्योविनशिष्यति। इति मामाविशच्चिन्ता तस्य शल्यापकर्षणे" रामा०।

अपकाम त्रि० अपगतः कामो यस्य यत्र यस्माद्वा प्रा०ब०। अपगतकामे वा उत्तरपदलोपाभावे अपगतकामोऽपकामार्थे "अपकामं स्यन्दमाना अवीवरत वोहितमिति" अथ० २१३,३, । कामस्यात्ययः अत्यये अव्ययी०। कामात्यये अव्य० "शत्रोरकामं कृणोति धन्वनेति" ऋ० ६,७५,२, "अपकामं कामस्यापायमिति" भा०।

अपकार पु० अप+कृ-भावे घञ्। अनिष्टसम्पादने तद्धेतौ द्रोहे च "द्रोहेऽपकार इति" सि०कौ०। "उपकर्त्तारिणा सन्धिर्न मित्रेणापकारिणा। उपकारापकारौ हि लक्ष्यं लक्षणमेतयोरिति" माघः। "अपकारोऽनिष्टचिन्ने" त्युक्तेरनिष्टं भयादि. चिन्ने च "ततो जातास्त्रिभा घोरा नानारूपा महाविधाः अपकाराय वर्त्तन्ते इति सुश्रुतः।

अपकारगिर् स्त्री अपकारेण हेयेन गीर्य्यते गृ-क्विप्। भर्त्सनवाक्ये। "भर्त्सनं त्वपकारगीः" इत्यमरः।

अपकारिन् त्रि० अप+कृ-कर्त्तरि णिनि। अपकारकारके,

अनिष्टचिन्तके द्रोग्धरि च। "उपकर्त्तारिणा सन्धिर्न मित्रेणापकारिणेति" माघः स्वयोर्येणैव तान् शिष्यान्नानवानपकारिण" इति मनुः।

अपकृत त्रि० अप+कृ-कर्म्मणि क्त। यस्यानिष्टं कृतं तस्मिन् कृतद्रोहे "किं मयापकृतं तस्येति"। भावे क्त। अपकारे न०। "मित्रस्य चैवापकृते द्विविधोविग्रहः स्मृत" इति मनुः। [द्रोहे च।

अपकृति स्त्री अप+कृ-भावे क्तिन्। अपकारे, अनिष्टचिन्तने,

अपकृत्य न० अपकृष्टं कृत्यम् प्रा०स०। अपकृष्टकर्म्मणि। अप+कृ-भावे क्यप्। अपकारे न०। भावे स्त्रियां क्यप्। अपकृत्या अपकारे स्त्री।

अपकृष्ट त्रि० अप+कृष-क्त। अधमे, हीने, स्वकालात् पूर्व्वकाले कृते, परस्त्वादन्यार्थे पूर्वस्त्वे आकृष्टे, आकृष्टमात्रे च "स्वोच्चापकृष्टा भगणैः प्राङ्मुखंयानि मङ्गुहा" इति सूर्य्यसिद्धान्तः।

अपक्ति स्त्री न पक्तिः अभावार्थे न०त०। पाकाभावे।

अपक्रम पु० अप+क्रम-भावे घञ्। अपयाने। अपक्रमादुर्हवैषामेतद्भियाङ्कार" शत०ब्रा० ४,२,२,११। अपक्रम्यते यस्मात् अपादाने घञ्। अपयानावधिस्थाने "विभाषपत्येष विक्षेपं चन्द्रादीनामपक्रमादिति" सू०सि०। "अपक्रमात् क्रान्तिवृत्तस्यस्वटपक्षभोगस्थानादिति" रङ्गनाथः। अपगतः क्रमःपरिपाटी यस्मात् प्रा०स०। क्रमविहीने अक्रमे त्रि० वा उत्तरपदलोपाभावे अपगतक्रमोऽयुक्तार्थे त्रि०। क्रमस्यात्ययः अव्ययी०। क्रमात्यये अव्य०। क्ति वेट्कत्वात् वा इडभिः। अपक्रामोऽयुक्तार्थे। "यस्यस्याभिक्रान्त्याऽपक्रामाय" इति ऐ० ब्रा०।

अपक्रमण त्रि० अप+क्रम-भावे ल्युट्। अपयाने पलायने च। "अपक्रमणमेवास्य सर्वकामैरहं वृणे" इति रामा०। "पुरस्ताद्यापक्रमणमस्यवैवान्विच्छतेति" शत०ब्रा०।

अपक्रमिन् त्रि० अप+क्रम-कर्त्तरि णिनि वेट्कामन्तत्वात् वा इडभिः। अपयानकर्त्तरि "तानेवैतदनपक्रमिणोऽकुरुत" शत० ब्रा० इडभौ अपक्रामीत्यपि स्त्रियां ङीप्।

अपक्रिया स्त्री अप+कृ-भावे स्त्रियां श। द्रोहे, अपकारे च। चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रियेति" माघः। "जन्मवैषतपसां विरोधिनो' मा कथाः पुनरमूमपक्रियामिति" किरा०।

अपक्रोश पु० अप+क्रुश-घञ्। निन्दने। उपक्रोशोऽप्यत्र। भावे ल्युट्। अपक्रोशनमप्यत्र न०।

अपक्व त्रि० न पक्वः। अपरिणते अपक्वयोगी अपरिणतयोगी यथा योगाभ्यास उचितः तथाभ्यासशून्यः इत्यर्थः। आमे तण्डुलफलादौ च। "अपक्वेन वर्त्तितव्यं फलमूलादिनापि वेति" स्मृतिः।

अपक्ष त्रि० नास्ति पक्षो गरुत् यस्य। पक्षशून्ये उड्डयनशक्तिशून्ये च। पक्षः सहायः। तच्छून्ये।

अपक्षपात पु० पक्षे सहायतायां पातः आनुकूल्यम् अभावार्थे न०त०। पक्षपाताभावे सहायताऽकरणे। "अपक्षपातात् वक्तव्यं सभायामिति निश्चय इति" नीतिः।

अपक्षपातिन् त्रि० पक्षे सहायतायां पतति पत-णिनि ७०त०ततः न०त०। पक्षपातिभिन्ने यथार्थवादिनि।

अपक्षेपण न० अप-क्षिप-ल्युट्। अधःस्थानसंयोगहेतौ क्रियाविशेषे, अधःपातने च। अवक्षेपणमप्यत्रार्थे। उत्क्षेपणं तथापक्षेपणमाकुञ्चनं तथा प्रसारणञ्च गमनं कर्म्मैतानि षड्ज चेति" भाषा०। अवक्षेपणमिति वा पाठः।

अपगण्ड पु० गण्डोऽद्रो वैपरीत्यार्थकेनापशब्देन प्रा०स०। अतिबाले अपोगण्ड इति हैम०। अपोगण्डशब्दे विवरणं द्रष्टव्यम्। [भावे घञ्। तत्रार्थे पु०।

अपगत त्रि० अप+गम-कर्त्तरि क्त। अपयाते पलायिते च।

अपगम पु० अप+गम-भावे घञ् न इडभिः। अपयाने अपसरणे। "निद्रापगमहेतुभ्यो विबोधयेतनागम" इति सा०द०। "पुराणपत्रापगमादनन्तरं ऋतेव सन्नह्यमनोज्ञपल्लवेति" रघुः।

अपगर पु० अप+निन्दार्थे गॄ-भावे अप्। निन्दने। "अन्यदन्तर्वेदीत्यु पक्रम्य "अभिगरापगरौ" कात्या० १२,२,२, "अपगरोनिन्देति" तद्व्या०।

अपगा स्त्री अपगच्छति निघन्दते अप+गम-ड। आपगायाम् नद्याम्। अपयानकर्त्तरि त्रि०।

अपगा(गो)रम् अव्य० अप+गुरी-उद्यमने असुन् एच आत्त्व वा। उद्यम्येत्यर्थे "अस्रपगारम् अस्रवगोरं वेति" सि०कौ०।

अपगोह पु० अप+गुह-घञ्। तिरोधाने गोपने च। "स विहानपगोहं कर्णीनामाविर्भवन्निति" ऋ० २,१५,७, "अपगोहं तिरोभावमिति" भाष्यम्।

अपघन पु० अपहन्यते संहृत्य कर्म्म कृत्वा वियुज्यते अप+हन-अप् घनादेशः। शरीरे, हस्ताद्यवयवे च। शरीरादि हि पुरुषोपभोगाय प्रथमं संहृत्य तत्तत्कर्म्म निष्पाद्य भोगावसाने पुनर्विमुञ्चते इति तस्य तथात्वम्। देहादेः संहृत्य

कारित्वं च पातञ्जलादौ दर्शितं यथा। "परार्थं संहत्य कारित्वादिति" पात०। इतरसाहित्येनार्थक्रियाकारित्वं संहत्यकारिता, संहननञ्च आरम्भकसंयोगभेदः। तथा च देहादिकं परार्थं (स्वेतरस्य भोगापवर्गफलकम्,) संहतत्वात् शय्यासनादिवदित्यनुमानप्रयोगः। अतएव सांख्यसूत्रे "संहतपरार्थत्वादिति" संहन्तृसिद्धिरुक्ता। संहतानां देहादीनां स्वेतरस्य भोगादिफलकत्वात् संघातातिरिक्तः पुरुषोऽनुमीयते नहि अचेतनानां देहादीनां स्वतः संघातः सम्भवति अतः संघातसिद्धये पुरुषसिद्धिरिति वसुदितार्थः। "संयोगाच्च विभागान्ता" इत्युक्तेः संयोगभेदरूपसंहननस्यावश्यं वियोगान्तत्वात् देहादीनां तदवयवानाञ्च क्रमेणारम्भकसंयोगनाशेन परस्परवियोग इत्यतोऽङ्गादेरवश्यवियोगवत्त्वात् तथात्वम् अतएव "अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिण" इति गीतायामारम्भकसंयोगनाशपूर्व्वकपरस्परवियोगेन नाश उक्तः। "लोहोद्धतघनस्वान्ता लक्षितापघनां स्त्रियमिति" भट्टिः। अपगतोघनोमेघो यस्मात् प्रा०ब० वा गतलोपः। मेघावरणशून्ये त्रि० वा गतलोपाभावे अपगतघनोऽभ्युक्तार्थे। [मरुणे च।

अपघात पु० अप-हन-भावे घञ्। अपकृष्टहनने दुष्टहेतुक-

अपघातक पु० अपहन्ति अप+हन-ण्वुल्। विनाशके। "जिज्ञासा तदपघातके हेतौ" सा०का० पाठान्तरम्।

अपघातिन् त्रि० अप+हन-कर्त्तरि णिनि। अपहननकर्त्तरि स्त्रियां ङीप्।

अपच पु० न पक्तुं शक्तः पच-"अचः कावशक्तौ" पा०। अच्। पक्तुमशक्ते। "अपचः पक्तुमशक्त" इति सि०कौ०।

अपचय पु० अप+चि भावे अच्। हानौ, अपहरणे, व्यये च।

अपचरित न० अपकृष्टं चरितं प्रा०स०। अपकृष्टचरिते सदोषाचरणे, "आहोस्वित् प्रसवो ममापचरितैर्विष्टम्भितो वीरुधामिति" शक०।

अपचार पु० अप+चर-भावे घञ्। अहिताचरणे अपथ्यसेवने "कृतापचारोऽपि परैरनाविष्कृतविक्रियः। असाध्यं कुरुते कोपं प्राप्ते काले गदो यथेति" माघः। "अपचारः अपकारः अपथ्यञ्चेति" मल्लि०। "योनिप्रदोषाच्च भवन्ति शिम्रे पञ्चोपदंशा विविधापचारैरिति" वैद्य०। वैपरीत्यादिहेतुकदोषे "नापचारमगमन् कचित् क्रिया" इति माघः। "अपचारं लोपविपर्ययविपर्य्यासादिदोषमिति" मल्लि०। विनाशे च "महाध्वरे विध्यपचारदोष" इति किरा०। "अपचारः कर्म्मलोपदोष" इति मल्लि०। "सह्यापचारे मात्रप्रतिनिधाविति" मीमांसा। अपकर्म्मणि च "गृह्यमानाऽपचारं सा बन्धुपक्षभयात्तदा" भा०आ० प० १११ अ०।

अपचारिन् त्रि० अप+चर-तच्छीलार्थे कर्त्तरि णिनि। अपकर्म्मकरणशीले स्त्रियां ङीप्। "पत्यौ भार्य्यापचारिणीति" मनुः। "भार्य्या अपचारिणी व्यभिचारिणी जारपतिं क्षममाणे भर्त्तरि पापं संश्लेषयतीति" कुल्लूकभट्टः।

अपचिकीर्षा स्त्री अपकर्त्तुमिच्छा अप+कृ-सन्-भावे स्त्रियाम् अ। अपकर्त्तुमिच्छायाम्। [कारकरणेच्छावति।

अपचिकीर्षु त्रि० अपकर्त्तुमिच्छुः अप+कृ-सन्-उ। अप-

अपचित् त्रि० अप+चि-क्विप्। अपचयकारके। "इतस्ताः सर्वानश्यन्तु बाधका अपचितामिव" अथ०६,२५,१।

अपचित त्रि० अपचाय्यते आनन्देन पूज्यते चाय-पूजनादौ क्त चायतेश्चिः अपगतश्चानन्दपूर्व्वकत्वम्। आनन्देन पूजिते। पूजितो हि आनन्दपूर्व्वकं पूज्यते। अप+चि-क्त। जातापचये अवयवाद्यपचययुक्ते, क्षीणे, व्ययिते च। "तत्रापचितवन्ताः प्राणिनोभवन्ति" सुश्रुतः।

अपचिति स्त्री० अप+चाय-क्तिन् चायतेश्चिः। पूजायाम् "विहितापचितिर्महीभृता" इति माघः। अप+चि-क्तिन्। अपचये क्षीणतायाम्, अपचयरूपभावविकारभेदे च।

अपची स्त्री अपकृष्टं पच्यतेऽसौ पच-कर्म्मकर्त्तरि अच् अप्राणन्ये न०त० गौ० ङीष्। गण्डमालोपरिजाते रोगभेदे "अथातोऽग्न्यङ्गपच्यर्बुदगण्डमालानां निदानं व्याख्यास्याम" इत्युपक्रम्य "अनन्यवर्णरूपचीयमानं चयप्रकर्षादपचीवदन्ति कण्डूयनाल्पोत्सेधरुजाः प्रभिन्नाः स्रवन्ति नश्यन्ति भवन्ति चान्ये" इति सुश्रुते तल्लक्षणमुक्तम्। "ते चान्ये केचिदनाग्नेयाकाः स्रवन्ति नश्यन्ति भवन्ति चान्ये। कालानुबन्धं चिरमादधाति सैवापचीति प्रवदन्ति केचिदिति" वै० "नाड़ीं कफानिलकृतामपचीं व्रणांश्चेति" अपचीं गण्डमालां च व्रणीं शोथमेव चेति" च सुश्रुतः। [यमाणे।

अपचीयमान त्रि० अप+चि-कर्म्मकर्त्तरि शानच्। अपची-

अपच्छाय पु० अपगता देहच्छाया कान्तिर्यस्य प्रा०ब० वा गतलोपच। देवे देहच्छायाशून्यत्वात्तेषामपच्छायत्वम्। अतएव "भजन्त रूपं किमदस्य देवाश्छाया नलस्यास्ति तथापि नैषाम्। इतीरयन्नीव तथा निरैक्षि सा (छाया) नैषधे नलमरेषु तेषु" इति नैषधे देवानां छायाराहित्यं लक्षणत्वेन वर्णितम्। अपगतकान्तौ त्रि०।

अपच्यव पु० अप+च्युङ्-गतौ भावे अप्। अपसरणे निर्गमने

"यत्र नार्थपच्यवसुपच्यवञ्च शिष्यते" इति ऋ०१,२८,२ "अपच्यं शालायानिर्गमिति" भा०। अप-च्यु-अरणे, अप्। अपसरणे। [चरिते च।

अपच्युत त्रि० अप+च्यु-कर्त्तरि क्त। अपक्षयप्राप्ते नष्टप्राये-

अपजगुराण त्रि० अप+गृ-यङ् लक्-ताच्छील्ये चानश्। आच्छादनादिमोचनशीले "जिगर्त्तिमिन्द्रो अपजगुराण" इति ऋ० ५,२९,४।

अपञ्चीकृत त्रि० अपञ्चात्मकः पञ्चात्मकः कृतः न०त०। पञ्चात्मकतामनापादिते सूक्ष्मभूते, पञ्चीकारप्रकारस्तु पञ्चीकरणशब्दे वक्ष्यते "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनमिति" वेदा०प०।

अपजय पु० अप+जि-भावे अच्। पराजये।

अपटान्तर त्रि० पटेन तिरस्करिण्या अन्तरमत्र न०त०। अव्यवहिते, आसन्ने, संसक्ते च। अपटान्तरमित्यव्ययवैवार्थे।

अपटी स्त्री अल्पः पटः पटी न०त०। (कानात्) इति ख्याते काण्डपटे वस्त्रप्रावरणे स च "दूष्याधोलम्बिवासुसञ्चारार्थः पटभेदः" इति मल्लिनाथः।

अपटीक त्रि० नास्ति पटी यस्य कप्। प्रावरणपटशून्ये, अपगता टीकाव्याख्यापन्योवस्य। टीकाज्ञानशून्ये, "अपटीकोजड़ोमाषे भक्षं जाक्षेन ताड्यते" इत्युद्भटः।

अपटीक्षेप पु० अपक्षाः काण्डपटस्य क्षेपः। प्रावरणपटक्षेपे। नाट्ये हि प्रावरणपटे अनैपराक्षिप्ते एव पात्रप्रवेशोऽभिनयसम्प्रदायसिद्धस्तद्बुद्ध्या पात्रेण यत्र काण्डपटं स्वयं क्षिप्त्वा प्रविश्यते तेन चाक्षुषित्वं तत्प्रवेशस्य गम्यते। एतत्प्रयोगश्च भूरिशो नाटकेषु।

अपटु त्रि० पटुर्दक्षः न०त०। रोगिणि, दक्षतारहिते, कार्य्याक्षमे, दक्षताविरोधिमन्दत्वे च। भावे त्व अपटुत्वम्। अपाटवे। तल्। अपटुताप्यत्रैव त्वान्तं न०तलन्तं स्त्री। गुणवचनत्वात् इमनिच्। अपटिमा तत्रैव पु०।

अपण त्रि० न पण्यः विक्रेयः अपण्यशब्दे न०त०। सूत्रादिनिषिद्धविक्रये पदार्थे। प्रायश्चित्तसहितानि अपण्यानि च प्रायश्चित्तविवेके दर्शितानि यथा विष्णुः। लवणक्षारक्षत्रलगुड़गन्धमधुरसोर्णाविक्रयी त्रिरात्रमुपवसेत्। रक्तः सिन्दूरः सुम्भादि। एतत् सकृद्विक्रये पैठीनसिः। "तथाऽविक्रेयाणि ब्राह्मणस्य लवणं पक्वान्नं मधुरक्षीरं दधि एतत्सप्तकं सर्व्वगन्धोलाक्षारक्षत्रासो गुड़क्षौद्रं याम्यपशूनामेकशफाः केशिनः। सर्व्वे चारण्याः पशवोविद्यापूर्त्तमिष्टं सावः शङ्खश्चोर्णा चेति विक्रयेण तेषामेकैकस्मिन् प्राजापत्यद्वयं चरेत्"। तथाच्यवनः "दधिमधुक्षिप्तसर्पिःपक्वान्नतिलतक्रक्षीररसविषतिलाङ्गनीलीकौषेयवासोलाक्षारसलवणविक्रये प्राजापत्यद्वयं चरेत्। एतच्चाभ्यासविषयं तत्र धेनुरेका दातव्या। हारीतः। "लाक्षालवणमांसतैलक्षीरदधिघृततक्रगन्धचर्म्मरक्तवाससामेकतमविक्रये चान्द्रायणम्" तथा शातातपः। "आममांससुरासोमलाक्षालवणसर्पिषाम्। विक्रये सर्व्वपण्यानां द्विजश्चान्द्रायणं चरेत्"। एतच्चाल्पाभ्यासे चान्द्रायणे चाष्टधेनवः। भविष्यपुराणे। "गुड़ं तिलांस्तथा नीलीं क्षौमगोधूमकन्यकाः। विक्रये ब्राह्मणोऽप्याशु कृच्छ्रं सान्तपनं चरेत्"। एतद्बाहुल्याभ्यासे सान्तपने धेनुद्वयम्। हारीतः "अथोर्णिकेशिकेशरिणाञ्च धेन्वनड्वुद्रक्षगरुत्विक्रये तप्तकृच्छ्रविधिः। हिङ्गुगुग्गुलुरससर्जरसहरितालमनःशिलाञ्जनगैरिकक्षारलवणमणिमौक्तिकप्रवालदन्तनखशुक्तिशङ्खवेणुवैणवस्नायुविक्रये च। आरामतड़ागोदपानपुष्करिणीपूर्त्तसेतुदेवविक्रयेषु त्रिपवणस्नाय्यधःशायी चतुर्थकालभुक् संवत्सरेण पूतोभवतीति"। आरामादिनिखिलविक्रये हेतुरिति धर्म्मप्रदीपः। तथा "हीनोन्मानमापनसङ्कर सङ्कीर्णविक्रये च"। अत्र च कामाकामसकृदभ्यासामेलवावैषम्यदोषः समर्थनीयः। हीनमानोन्मानमापनं तुलादेर्नाङ्कुरसङ्कीर्णत्वं द्रव्यस्याद्रव्येण। विष्णुः "प्राणिभूपुरुषसोमविक्रयी तप्तकृच्छ्रं कुर्य्यात्। अन्नौषधिपुष्पमूलचर्म्मबिदलतृणकार्पासकोशभक्षास्थिगोरसपिण्याकतिलतैलविक्रयी प्राजापत्यम्"। विदलः पाचितवंशादिनिर्म्मितः। तथा "क्षौम जतुमधुक्षिप्तशुक्तिपुरीषगरलक्षणलोहोदुम्बरखड्गमांसविक्रयी महासान्तपनम्"। क्षौमा चर्म्मविकारः वरुडेति यस्य पर्य्यायः। महासान्तपने धेनुद्वयम्, सुमन्तुः "देवर्षिसोमचैत्यान्नापत्यकूपोदपानदारात्मनां विक्रये कृच्छ्रद्वयम्। एतत्तिलतैलरक्तवस्त्रपक्वान्नानां प्राजापत्यंचरेत्। गोविक्रयनिन्दामाह यमः। "गवां विक्रयकारी च गवि रोमाणि यानि तु। तावद्वर्षसहस्राणि गवां गोष्ठे क्रिमिर्भवेत्"॥ यच्च मनुनोक्तं सद्यः पतति मांसेन लाक्षया लवणेन च। त्र्यहेण शूद्रीभवति ब्राह्मणः क्षीरविक्रयीति, तन्निन्दातिशयार्थम्। गौतमः। "पशवः हिंसायोगे" अस्यार्थः यत्र विक्रीताः सन्तः पशवोहिंस्यन्ते तत्र तेषामप्यपण्यत्वम्। यानि चान्यानि गुरुतरप्रायश्चित्तबोधकवचनानि तानि बहुतरकालाभ्यासे समूहानि गुरुत्व त्वल्पान्तापादि दोषाभावमाह पराशरः। "लवणं मधु मद्यं वा दधि तक्रं घृतं

पवः। न दुष्येत् शूद्रजातीनां कुर्य्यात् सर्वेषु विक्रयम्" ॥ कालिकापुराणे। "विक्रयं सर्ववस्तूनां कुर्वन् शूद्रो न दोषभाक् ॥ मधुवर्मसुरां लाक्षां लवणञ्च पशुम्" । एतदध्यापदि दोषापवादमाह गौतमः। "विनिमयस्तु रसानां रसैः पशूनाञ्च लवणऋतान्नयोस्तिलानाञ्च समेनामेन पक्वस्य संयत्वर्दे"। पशूनां समानजातीयैरसमानजातीयैर्वा पशुभिरेव परिवर्त्तो न तु द्रव्यान्तरेण। पक्वान्नस्य चामेन तण्डुलादिना तावत्परिमितेनेत्यर्थः। अत्र समग्रशब्दात् व्यद्रव्यपरिवर्त्ते न नियमः। मनुः "रसारसैर्विभातव्या नत्वेव लवणं रसैः। एतान्नान्नाद्यतान्नेन तिलधान्येन तत्समाः" ॥ वशिष्ठः "रसारसैः समतोहीनतो वा विभातव्या नत्वेव लवणं रसैः तिलतण्डुलपक्वान्नविद्यामनुष्यञ्च विहिताः परिवर्त्तकेन"। नारदः। "अगदौ भेषजस्यार्थे यज्ञहेतोस्तथैव च। यद्यद्वस्तन्तु विक्रेयास्तिला धान्येन तत्समाः" ॥ एतेन "कामसत्पाद्य क्रयासु स्वयमेव क्रये बलः। विक्रीणीत तिलान् शुद्धान् धर्म्मार्थमचिरस्थितानिति" मनुवचनम् तिलविनिमयपरम् ॥

अपतन्त्रक पु० अपगतं तन्त्रं भिषजामधीनता यत्र कप्। वातरोगभेदे "वायुरूर्द्धं व्रजेत् स्थानात् कुपितो हृदयं शिरः। सन्धौ च पीड़यत्यङ्गान्याक्षिपेन्मर्म्मवेद्ध सः। निमीलिताक्षो निश्चेष्टस्तब्धो वापि कूजति। निरुच्छ्वासोऽथ वा छिन्नोच्छ्वासस्य नष्टचेतनः। स्वस्थः स्याद्दृढे सक्थे आयते च प्रसुप्यति। कफान्वितेन वातेन ज्ञेय एषोऽपतन्त्रक इति" सुश्रुते २५५ पृ० तल्लक्षणमुक्तम्। "अपतन्त्रकातुरं नापतर्पयेदिति" सुश्रुतः।

अपतर्पण न० अप+तृप-भावे ल्युट्। रोगादौ-उपवासे, तृप्त्यभावे च। "अपगतं तर्पणं यस्य वा गतलोपः तर्पणशून्ये त्रि० "क्रियाभिचिकित्सेत् स्थूलमपतर्पणं युक्तामिरिति" सुश्रुतः।

अपतानक पु० अपक्रम्य अन्तरान्तरा तनुते तन कर्त्तरि-ण्वुल्। वातरोगभेदे "यदा तु चमनीः सर्व्वाः कुपितोऽभ्येति मारुतः। तदाक्षिपत्याशुशुङ्गं दंशं सङ्कुचयेत्। सङ्कुचेत् सङ्कुचादाक्षेपादाक्षेपक इति स्मृतः। सोऽपतानकसंज्ञोयः पातयत्यन्तान्तरेति सुश्रुते आक्षेपकातरोगस्यैवान्तरान्तरापतने अपतानकसंज्ञा" सु० २५४ पृ० उक्ता "अभिघातनिमित्तश्च योषितामभिसङ्गाच्च यः। गर्भपातनिमित्तश्च न सिध्यत्यपतानक" इति तत्रैव तस्यासाध्यतोक्ता "अभुक्तवता पीतमच्छदधिमरिचवचायुक्तमनपतानकं हन्ति तैलसर्पिर्वसाक्षीद्राणि चेति" सुश्रु०।

अपत्नी स्त्री नास्ति पतिर्यस्याः "विभाषा सपूर्व्वस्येति" पा०वा न ङीप् च। पतिरहितायां स्त्रियाम्। पक्षे अपतिरित्यपि कापि तु अपतिकेत्येव तत्रैवार्थे।

अपत्नीक पु० नास्ति सन्निहितें कर्म्मयोग्या, मृता वा पत्नी यस्य कप्। असन्निहितपत्नीके, कर्म्मायोग्यपत्नीके, मृतपत्नीके च। "अपत्नीकस्याहवनीये तच्छापिण्डः" कात्या० २,५, १८। "अपत्नीकस्य रजोदोषप्रसवप्रवासादिना असन्निहितपत्नीकस्य तच्छापिण्ड आहवनीयश्चापिण्डः आहवनीये हविःश्रपणं कुर्व्वतो यजमानस्य "आहवनीये आज्यमधिश्रयती" त्यृक्तेः। आहवनीयश्चापिण्डोऽपि सन्निहितायां पत्न्यां गार्हपत्य एवाज्यमधिश्रयति, शाखान्तरे चैवं श्रूयते "यस्य ब्रह्मेऽहनि पत्न्यनालंभुकी (रजस्वला) स्यात्तामनपरुध्य यजेतेति"। केचित् अपत्नीको मृतपत्नीक इत्याहुः तस्यैकाकिन एवाधानं श्रूयते आश्वलायनब्राह्मणे, "पत्न्यां मृतायामग्निभिर्दग्धायां पुनर्विवाहासम्भवे आत्मार्थमग्नयाधानमाहापस्तम्बः दर्शपौर्णमासाद्ययणार्थं, शेषाणि कर्म्माणि न भवन्तीति" तथा त्रिकाण्डे मण्डनः "तस्मान्मन्त्रैकदेशेन दग्धव्या पूर्व्वमारिणी पत्नी ज्येष्ठेतरा वापि यज्ञपार्श्वे निरूपितम्" ॥ कात्यायनः (कर्म्मप्रदीपे) "मृतायामपि भार्य्यायां वैदिकाग्नीन्नहि त्यजेत्। उपाधिनापि तत्कर्म यावज्जीवं समापयेदिति"। तद्व्या०(उपाधिना स्वर्गादितत्प्रतिमूत्त्या)। नास्ति पत्नी सहिता यस्य कप्। पत्नीसहितरहिते। "पितृयज्ञमपक्रम्य"। "अपत्नीकः" कात्या०५,७,५। "पितृयज्ञो भवति केवलस्यैकाकिनो यजमानस्यैवाधिकारो न तु पत्नीसहितस्य। अतोऽत्र पत्न्याः प्रतिषेधात् "पत्नीं सञ्चक्ष्रेति प्रैषस्याभावः। आज्यावेक्षणं त्वाज्यसंस्कारत्वादध्वर्युः करोतीति" तद्व्या०।

अपत्य न० न पतन्ति पितरोऽनेन पत-वा करणे यत् न०त०। पुत्रदुहितृरूपे संताने। "नापुत्रस्य लोकोऽस्तीति श्रुतेः पुत्राभावे स्वर्गादिलोकानुपपत्तेः "पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपमिति" या० स्मृतेश्च तदुत्पादने स्वर्गलोकलाभोक्तेः "पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः। तस्मात् पुत्र" इति स्मृत्या नरकनिस्तारकत्वस्य श्रुतेश्च सुतादीनां पतनाहेतुत्वात् तथात्वम् पौत्रादीनामपि पतनाहेतुत्वात् अपत्यत्वम्। अतएव "अपत्यं पौत्रप्रभृति गोत्रमिति" पा० सूत्रे पौत्रादीनामप्यपत्यशब्दाच्यतोक्ता। पौत्रादीनां तु गोत्रसंज्ञापीति विशेषः। "अपत्यं पितृरेव स्यात् ततः

प्राचामपीति चेति" सि० कौ० का० । "अपत्यैरिव नीवार-भागधेयोचितैर्मृगैरिति" रघुः । "सोऽपत्यं साहरत्पाद्येति" "अपत्यलाभात् वा तु स्त्रीति, "अपत्यं धर्मशुश्रूषेति" च मनुः ।

अपत्यदा स्त्री० अपत्यं तद्धेतुं गर्भं ददाति । सेवनेन गर्भ-दायके ओषधिविशेषे गर्भदायिविद्यादौ च । अपत्यदायि-मात्रे मन्त्रादौ त्रि० ।

अपत्यपथ पु० अपत्यस्य गर्भात् तन्निसारणस्य तदुत्पत्तेश्च पन्थाः अच् समा० । प्रसवनिःसारणद्वारे स्त्रीणां गुह्य-स्थानभेदे "स यदा विगुणानिलपीडोऽपत्यपथमनेकधा-प्रतिपद्यते इति" स्त्रीणान्तु विंशतिरधिका, दश तासां स्तनयोरेककस्मिन् पञ्च पञ्च, यौवने तासां परिदृष्टिः । अपत्यपथे चतस्र इति" । "तिर्य्यगागतस्य परिघस्येव तिर-श्चीनस्य पार्श्वादूर्द्धमूर्द्धमुत्क्षिप्य गर्भमपत्यपथं प्रत्यार्ज्जवमानी-यापहरेत् पार्श्वपृष्ठशिरसमसंप्रपीड्य जङ्घमुत्क्षिप्य शिरो-ऽपत्यपथमानीयापहरेदिति" च सुश्रुतः ।

अपत्यशत्रु स्त्री अपत्यं शत्रुर्गर्भभेदनेन नाशकं यस्याः । कर्क-श्याम् सा हि गर्भेऽपत्यजनने तन्निःसारणसमये गर्भस्फोट-नान्निवते इति" लोकप्रसिद्धेः "खनाशाय कर्कटी गर्भं धत्त इत्युक्तेश्च तथात्वम् । दैत० । अपत्यनाशके, कर्कटे सर्पे च ।

अपत्यसाच् पुंस्त्री० अपत्यैः सचते संबध्यते सच-क्विप्-खि । अपत्यसमवेते । "अपत्यसाचं रुत्यं रराथाम्" ऋ० १, ११०।२३।

अपत्र पु० नास्ति पत्रं दलं पक्षोवास्य । वंशकरीरे (कोड़) अङ्कुरे च तदवस्थायां तयोः पत्रशून्यतयोत्पत्तेस्तथात्वम् । गलितपत्रे वृक्षे, गलितपत्रे विहगे च ।

अपत्रप त्रि० अपगता त्रपा लज्जा यस्मात् प्रा० व० वा गतलोपः । लज्जाहीने लोपाभावे अपगतत्रपोऽप्युक्तार्थे ।

अपत्रपा स्त्री अपरम् अपेक्ष्य त्रपा, अप+त्रप-भावे स्त्रियाम् अ वा । अन्यहेतुकलज्जायाम् लज्जामात्रे च । "अपत्रपा चेतसि च न्यषेधदिति" नैषधम् । [लज्जाशीले ।

अपत्रपिष्णु त्रि० अप+त्रप-गोलार्थे इष्णुच् । स्वभावतो

अपथ न० न पन्थाः अप्राशस्त्ये न०त० । "अपथं" पु० न० पा० । "विभाषेति" पा० वा अच् समा० । अपकृष्टपथे निन्दितपथे कुपथे । "घनागमे राजपथे हि पिच्छिले क्वचिद्दुरैरप्यपथेन गम्यते" इति नै० । "को वा न पद-मपथेऽकार्ष्यत मया" इति प्रबोध० । "कथैतदपथमिवेति यदेतादृगिति" शत० ब्रा० । नास्ति पन्थाः सुन्दरमार्गो यत्र ब० अच् समा० । सुन्दरपथशून्ये यानादौ त्रि० । पथोऽभावः अव्ययी० अच् समा० । मार्गाभावे अव्य० ।

अपथिन् पु० न पन्थाः अप्राशस्त्ये न०त० वा अजभावः । अपकृष्टपथे ।

अपथ्य न० पथ्ये वैद्यकोक्तभोजनादिनियमाव नीत्यनाचाराय वा हितम् यत् न०त० । वैद्यकोक्तिसङ्कुत्र, अनिष्टे भोजनादौ अहिताचारे च "अकार्यं कार्यसङ्काशमपथ्यं पथ्यसम्मतम्" रामा० । "संतापयन्ति किमपथ्यभुजं न रोगा" इति वै० । पथ्यापथ्ये च सुश्रुते दर्शिते यथा "अथातो हिताहितीयमध्यायं व्याख्यास्यामः । यद्दावोः पथ्यं तत्पित्तस्यापथ्यमित्यनेन हेतुना न किञ्चिद्द्रव्य-मेकान्तेन हितमहितं वास्तीति" केचिदाचार्या ब्रुवते तत्तु न सम्यक् । इह खलु यस्माद् द्रव्याणि स्वभावतः संयोगतश्चैकान्तहितान्येकान्ताहितानि हिताहितानि च भवन्ति । तत्रैकान्तहितानि जातिसात्म्यात् सलिल-घृतदुग्धौदनप्रभृतीनि । एकान्ताहितानि दृष्टनष्टवन-सारणादिषु प्रदत्तान्यग्निचारविषादीनि । संयोगादप-राणि विषतुल्यानि भवन्ति । हिताऽहितानि तु यद्दावोः पथ्यं तत्पित्तस्यापथ्यमित्यतः सर्वप्राणिनामवसाहारार्थं वर्ग उपदिश्यते । तद्यथा रक्तशालिषष्टिककङ्गुकसुक-न्दकपाण्डुकपीतकप्रमोदककालकायनकपुष्पककर्दमकशुना-हृतसुगन्धककलमनीवारकोद्दालकश्यामाकगोधूमवेणुयवा-दयः । एणहरिणकुरङ्गऋष्यप्राढकाश्वदंष्ट्राकरालऋक्ष-कपोतलावतित्तिरिकपिञ्जलवर्त्तीरवर्त्तिकादीनां मांसानि । सुद्वनसुद्गमकुष्ठकलायमसूरमङ्गल्यचणकतरेखाढकीसतीनाः। चिल्लोवास्तूकसुनिषण्णकजीवन्तीतण्डुलीयकमण्डूकपर्ण्यः । गव्यं घृतं सैन्धवदाडिमामलकमित्येष वर्गः सर्वप्राणिनां सामान्यतः पथ्यतमः । तथा ब्रह्मचर्य्या-निवातशयनो-ष्णोदकनिशास्वप्न्यायामार्कैकान्ततः पथ्यतमाः । एकान्त-हितान्येकान्ताहितानि प्रागुपदिष्टानि ॥ हिताहितानि तु यद्दावोः पथ्यं तत्पित्तस्यापथ्यमिति ॥ संयोगतस्त्वप-राणि विषतुल्यानि भवन्ति । तद्यथा । वल्लीफलकवक-करीराम्लफलनवणकुलत्थपिण्याकदधितैलविरोहिपिष्टशुष्क-शाकाजाविकमांसमद्यजाम्बवचिल्लिचिमत्स्यगोधावराहांश्च नैकध्यमश्नीयात् यथा ।

रोगं सात्म्यञ्च देशञ्च कालं देहञ्च बुद्धिमान् । अवेक्ष्या-न्यादिकान् भावान् रोगहृत्तेः प्रयोजयेत् । अवस्थान्तर-

वाङ्खाद्दोगादीनां व्यवस्थितम् । द्रव्यं नेच्छन्ति भिषज इच्छन्ति खल्वरजसे । द्वयोरन्यतरादाने वदन्ति विषदुग्धयोः । दुग्धस्यैकान्तहितता विषमेकान्ततोऽहितम् ॥ एवं युक्तरसाद्येषु द्रव्येषु सलिलादिषु । एकान्तहितता विद्धि वत्स ! सुश्रुत ! नान्यथा ॥

अतोऽन्यान्यपि संयोगादहितानि वक्ष्यामः ॥ न च विरुद्धधान्यैर्व्यंसामधुपयोगुड़माषैर्ज्ञा यान्यानूपोदकपिशितादीनि चाभ्यवहरेत् । न पयोमधुभ्यां रोहिणीशाकं जातु शाकं वाश्नीयात् । बलाकां वारुणीकुल्माषाभ्याम् । काकमाचीं पिप्पलीमरिचाभ्यां, नाड़ीभङ्गशाकङ्कटदधीनि च नैकध्यम् । मधु चोष्णोदकानुपानं पित्तेन वा सांसानि । सुराक्षीरपायसांश्च नैकध्यम् । सौवीरकेण सह तिलशष्कुलीम् । मत्स्यैः सह गुडविकारान् । गुड़ेन काकमाचीं, मधुना मूलकं, गुड़ेन वाराहं, मधुना च सह विरुद्धम् । क्षीरेण मूलकम् । आम्रजाम्बवाम्राविच्छूकरसगोधाश्च सर्व्वांश्च मत्स्यान्विशेषेण चिलिचिमं पयसा । कदलीफलं तालफलेन, पयसा, दध्ना, तक्रेण वा । लकुचफलं पयसा, दध्ना, माषसूपेन वा मधुना, घृतेन च प्राक् पयसः पयसोऽन्ते वा ।

अतः कर्म्मविरुद्धान् वक्ष्यामः ॥ कपोतान् सर्षपतैलभृष्टान्नाद्यात् । कपिञ्जलमयूरलावतित्तिरिगोधार्थं रण्डदार्वग्निसिद्धा एरण्डतैलसिद्धा वा नाद्यात् । कांस्यभाजने दधरात्रपर्य्युषितं सर्पिर्म्मधु चोष्णैरूषे वा । मत्स्यपरिप्लवे ह्रस्ववेरपरिप्लवे वा सिद्धां काकमाचीम् । तिलकल्कसिद्धसपोदिकाशाकम् । नारिकेलेन वराहवसापरिभृष्टां बलाकाम् । भासमद्गारगृध्रं नाश्नीयादिति ॥

अतो मानविरुद्धान् वक्ष्यामः ॥ मध्वम्बुनी मधुसर्पिषी मानतस्तुल्ये नाश्नीयात् । स्नेहौ मधुस्नेहौ जलस्नेहौ वा विशेषादान्तरीक्षोदकानूपौ ।

अत ऊर्द्धं रसवद्भानि रसतो वीर्य्यतो विपाकतश्च विरुद्धानि वक्ष्यामः । तत्र मधुराम्लौ रसवीर्य्यविरुद्धौ मधुरलवणौ च मधुरकटुकौ च सर्व्वतः । मधुरतिक्तौ रसविपाकाभ्यां मधुरकषायौ चाम्ललवणौ रसतः । अम्लकटुकौ रसविपाकाभ्यामम्लतिक्तावम्लकषायौ च सर्व्वतः । लवणकटुकौ रसविपाकाभ्यां लवणतिक्तौ लवणकषायौ च सर्व्वतः । कटुतिक्तौ रसवीर्य्याभ्यां कटुकषायौ तिक्तकषायौ च रसतः । तरतमयोगयुक्तांश्च भावानतिरूक्षानतिस्निग्धानत्युष्णानतिशीतानित्येवमादीन् विवर्जयेत् । भवन्ति चात्र ॥

विरुद्धान्येवमादीनि रसवीर्य्यविपाकतः । तान्येकान्ताहितान्येव शेषं विद्याद्धिताहितम् ॥ व्याधिमिन्द्रियदौर्ब्बल्यं मरणञ्चाधिगच्छति । विरुद्धरसवीर्य्यादीन् भुञ्जानोऽनात्मवान्नरः ॥ यत्किञ्चिद्दोषसंसृष्टमेषु भुक्तं कायान्न निर्हरेत् । रसादिव्यवयार्थं वा तद्विकाराय कल्पते ॥ विरुद्धाशनजान् रोगान् प्रतिहन्ति विरेचनम् । वमनं शमनं वापि पूर्व्वं वा हितसेवनम् ॥ सात्म्यतोऽल्पतया वापि दोषाग्नेस्तरुणस्य च । स्निग्धव्यायामबलिनां विरुद्धं वितथं भवेत् ॥ व्यायामशीलो बलवान् स्निग्धोऽग्निमांश्चापि भक्षाशनश्च । आप्नोति रोगान्न विरुद्धजातानभ्यासतो वाऽल्पतया च जन्तुः । अथ वातगुणान् वक्ष्यामः ॥

पूर्व्वः समधुरः स्निग्धो लवणश्चैव मारुतः । गुरुर्विदाहजननो रक्तपित्ताभिवर्द्धनः ॥ क्षतानां विप्लुष्टानां बलिनः क्षीणलाश्च ये । तेषामेव विशेषेण सदा रोगविवर्द्धनः ॥ वातलानां प्रशस्तश्च आढ्यानां कफशोषिणाम् । तेषामेव विशेषेण श्लेष्मदोषविवर्द्धनः ॥ मधुरस्वादिदाही च कषायानुरसोलघुः । दक्षिणो मारुतः श्लेष्मशुष्मो बलवर्द्धनः । रक्तपित्तप्रशमनो न च वातप्रकोपणः ॥ विशदो रूक्षपरुषः खरः स्नेहबलापहः । पश्चिमो मारुतस्तीक्ष्णः कफमेदोविशोषणः । सद्यः प्राणक्षयकरः शोषणस्तु शरीरिणाम् ॥ उत्तरो मारुतः स्निग्धो मृदुर्म्मधुर एव च । कषायानुरसः शीतो दोषाणामप्रकोपणः ॥ तस्माच्च प्रकृतिस्थानां क्लेदनो बलवर्द्धनः । क्षीणक्षयविषार्त्तानां विशेषेण तु पूजितः" इति चरकः १,२० ।

अपद् त्रि० न पद्यते ज्ञायते पद-कर्म्मणि क्विप् न०त० । अज्ञेये । "गायत्र्यक्षरैकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि न पद्यसे" इति शत०ब्रा० १४,८,१५,१० । नास्ति पादोऽस्याः पादोऽन्यलोपः कर्म्म० ङीप् पादः पच्च । पादशून्यायां स्त्रियाम् । पुंसि तु अन्यलोपो "न ङीप् । अपाद् । "आपादशीर्षा गूहमान" इति ऋ० ४, १,११ । "अपादहस्तोऽपृतनादविन्द्रमिति" ऋ०१,३२,७ । "अथ यदपात् समभवत्तस्मादपरिति" शत०ब्रा० । "अपादपाणिर्जवनोग्रहीतेति" श्रुतिः ।

अपद न० न पदम् अप्राशस्त्ये न०त० । अप्रशस्तस्थाने सुप्रसिद्धेऽभिन्ने च नापदं शास्त्रे प्रयुञ्जीतेति उद्भटः ।

अपदान न० अपदायति परिशुध्यति येन कर्म्मणा अप+दैप्-शोधने करणे ल्युट् । परिशुद्धाचरणे येन कर्म्मणा सर्व्वः परिशुद्धत्वेन ज्ञायते तस्मिन् कर्म्मणि । [सद्विशिष्टे, संस्कृते च ।

अपदान्तर त्रि० न पदान्तरं व्यवधानं यत्र । अव्यवहिते,

अपदिश अव्य० दिशयोर्मध्ये अप+दिशा+अव्ययी०। दिशोर्मध्ये विदिक् इति कोश इति च ख्याते। दिक्शब्देन समासे तु शरदा० टच् इति भेदः।

अपदिष्ट त्रि० अप+दिश-कर्म्मणि क्त। कथिते प्रयुक्ते। "कालात्ययापदिष्ट हेत्वाभासाश्च पञ्चधेति" भाषा०।

अपदेश पु० अप+दिश-घञ्। लक्ष्ये, स्वरूपाच्छादनरूपे, छले, निमित्ते स्थाने च। "रक्षापदेशान्मुनिहोमधेनो रिति" रघुः। "न धर्म्मख्यापदेशेन पापं कृत्वा व्रतं चरेदिति"। "भक्ष्यभोज्यापदेशैश्च ब्राह्मणानां च दर्शनैः"। "शौर्य्यकर्म्मापदेशेनेति" "साध्यभावे प्रसिद्धिर्भवोरूपसमन्वितैः। अपदेशैश्च संन्यस्य स्थिरत्वं तस्य तत्त्वत इति"च मनुः। उपदेशे च। "दीक्षाया अपदेशात्" कात्या० २२, १२२। अपदेश उपदेश इत्यर्थः। अपकृष्टोदेशः प्रा० ब० वा कृष्टपदलोपः। अपकृष्टदेशे, अनुचितस्थाने च।

अपदेश्य त्रि० अप+दिश-कर्म्मणि यत्। छलेन कथनीये। अपदेशे अनुचितस्थाने भवः दिगा० यत्। अनुचितस्थानभवे त्रि०। "अपदिश्यापदेश्यञ्च पुनर्यस्तपधावतीति" मनुः। यत्र यस्य दानमुचितं ततोऽन्यत्र स्थाने दानस्यानुचितत्वात् तथात्वम्।

अपद्रव्य न० अपकृष्टं द्रव्यम् प्रा०ब० वा कृष्टभागलोपः। अपकृष्टद्रव्ये "अदूषितानां द्रव्याणां दूषणे भेदने तथेति" मानव व्याख्यायाम् "अपद्रव्यप्रदानेन दूषणे"इति कुल्लूकः।

अपद्वार न० अपकृष्टं द्वारं प्रा०ब० वा कृष्टलोपः। अपकृष्टद्वारे "निर्यासास्रपद्वारैरिति" सुश्रुतः।

अपधा स्त्री अप+वारणे धा-भावे स्त्रियाम् अङ्। वारणार्थं निरोधे, "गा उदाजदपधा वलस्य" इति ऋ० २,१२,३। "अपधाअपधायाः निरोधादिति" भा०।

अपध्यान न० अपकृष्टं ध्यानम् प्रा०स०। अनिष्टचिन्तने। वैपरीत्यचिन्तने च।

अपध्वंस पु० अप+ध्वनस-भावे घञ्। नाशे, यस्य यथारूपसूचितं ततः प्रच्यवे च। "पद्मामपध्वंसेनैत्विन्द्र" इति अथ० १,३,५।

अपध्वंसज पुंस्त्री अपध्वस्यतेऽनेन अपध्वंसः वर्णानां भिन्नरूपतासंपादकः सङ्करस्तस्माज्जायते जन-ड ५त०। भिन्नवर्णसङ्गमजाते करणादौ सङ्कीर्णवर्णे। "शूद्राणां तु सधर्म्माणः सर्व्वेऽपध्वंसजाः स्मृता"इति मनुः "ये द्विजानामपसदा ये चापध्वंसजाः स्मृता" इति च मनुः। तेषां पितोः समवर्णत्वाग्रहेः स्वरूपप्रच्यवेन जातत्वात् तथात्वम्।

अपध्वंसिन् त्रि० अपध्वंसयति अप+ध्वनस-णिच्-णिनि। नाशके। "सर्व्वेनसामपध्वंसि जप्यं स्यादघमर्षणमिति" मनुः

अपध्वस्त त्रि० अप+ध्वनस-क्त। निन्दिते, परित्यक्ते अवधूर्णिते च।

अपध्वान्त न० अपकृष्टं ध्वान्तं ध्वनितम् ध्वन-क्त वेदे नि० खनार्थेऽपि डभावः। भिन्नकांस्यस्वरसमे शब्दे "दुष्टस्तेरपध्वान्तमिति" छा०उप०। वार्हस्त्यं तदपध्वान्तं भिन्नकांस्यस्वरसममिति" भा०।

अपनय पु० अप+नी-अच्। दूरीकरणे स्थानान्तरनयने च। "अपनयो वाऽदृष्टत्वादिति" कात्या० २५,८,२। "तस्य तस्डुलापनयो वचनादिति" कात्या० २५,४४,३। "अपनयतेर्दूरीकरणार्थत्वात्तथात्वम् अतएव "अविनयमपनय विष्णो!" इति शङ्कराचार्य्येण दूरीकरणार्थतया प्रयुक्तम्। अपकृष्टो नयो वैपरीत्ये प्रा०स० वा। निन्दितनीतौ दुष्टनीतौ च। अपकारे "ततः सपत्नापनयस्मरणानुशयस्फुरेति" माघः।

अपनयन न० अप+नी-ल्युट्। दूरीकरणे, खण्डने च। अपनीयतेऽनेन अप+नी-करणे ल्युट्। अपकारसाधने। अपगतं नयनं यस्य। नेत्रहीने त्रि०।

अपनस त्रि० अपगता नासिका यस्य प्रा०ब० नसादेशश्च। अपगतनासिके। "असिं कौशेयसद्यस्य चकारापनसं मुखमिति" भट्टिः। [सारिते च।

अपनीत त्रि० अप+नी-क्त। खण्डिते, दूरीकृते, अप-

अपनुत्ति स्त्री अप+नुद-क्तिन्। खण्डने दूरीकरणे। "परिजनश्रमापनुत्त्यै" इति छा०उप०। "पापानामपनुत्तये इति" "गुरुतल्यापनुत्तये" इति च मनुः।

अपनुद त्रि० अप+नुद-क। दूरीकारके, खण्डके, शोधके च।

अपनोद पु० अप+नुद-भावे घञ्। खण्डने, दूरीकरणे, अपसारणे च। "तस्यापनोदाय फलप्रदत्तावितिं" रघुः। "ब्रह्महत्यापनोदाय मितभुङ्नियतेन्द्रियः" इति मनुः।

अपनोदन न० अप+नुद-ल्युट्। अपसारणे खण्डने च "एनसां स्थूलसूक्ष्माणां चिकीर्षन्नपनोदनमिति" मनुः। कर्त्तरि ल्यु। दूरीकारके त्रि०। "यथाश्वमेधः क्रतुराट् सर्व्वपापापनोदनः। तथाऽघमर्षणं जप्यं सर्व्वपापापनोदनम्" इति। "पराकोनाम कृच्छ्रोऽयं सर्व्वपापापनोदन" इति च मनुः।

अपपत्र त्रि० पत-क्त नि०न०त०। अपतिते। "आशवोऽपपत्रदृक्षसेति" यजु० ६,२४। न पत्रं पतितं दृष्टं यस्येति" वेददीपः। पत्रस्य दृश्यत्वं हि पत्रशब्दस्य पतितार्थकत्वं दृष्टम्।

अपपाठ पु० अपकृष्टः पाठः । यथा यस्य पाठः सङ्कुचितः ततोऽन्यथा पाठे अपकृष्टपाठे "द्वादशापपाठा अस्य जाता इति" सि०कौ० ।

अपपात्र त्रि० अपकृष्टं पात्रं भोजनपात्रं यस्य । चण्डालौ तेषां हि भोजने पात्राणामपकृष्टत्वं तत्रास्यौभोजनानर्हत्वात्तेषां तथात्वम् "चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः अपपात्राश्च कर्त्तव्या इति" मनुः ।

अपबर्हिस् त्रि० अपगतं बर्हिर्यस्य प्रा०ब० वा गतलोपः । बर्हिर्होमरहिते "सोऽपबर्हिषौ द्वावनुयाजौ" इति श्रुतिः । "अपबर्हिषमत्तुरः प्रयाजान् यजति" । शत० ब्रा० । अपबर्हिष इति पृथक्पदमित्येके ।

अपभय त्रि० अपगतं भयं यस्य प्रा०ब० वा गतलोपः । गतभये भीतिशून्ये । लोपाभावे अपगतभयोऽयुक्तार्थे त्रि० ।

अपभर्त्तृ पु० अपकृष्टो भर्त्ता प्रा०स० । अपकृष्टभर्त्तरि

अपभी त्रि० अपगता भीरस्य प्रा०ब० वा गतलोपः । भीतिशून्ये अपभीतिरप्यत्र स्त्री ।

अपभूति स्त्री अपकृष्टा भूतिः प्रा०स० । "अपकृष्टविभूतौ "यमभी पुरोदधिरे ब्रह्माणमपभूतये" इति श्रुतिः ।

अपभ्रंश पु० अप+भ्रंशु-घञ् । अपचरणे अधःपतने "अल्पाक्षरदिर्भवति महतामप्यपभ्रंशनिष्ठा" भर्तृ० । "अपभ्रंशति स्वभावात् प्रच्यवते" अप+भ्रंशु-कर्त्तरि अच् । साधुशब्दस्य शक्तिवैफल्यप्रयुक्तान्यथोच्चारणयुक्ते अपशब्दे । "त एव शक्तिवैकल्यप्रमादालसतादिभिः । अन्यथोच्चारिताः शब्दा अपशब्दा इतीरिता" इति हरिणा साधुशब्दानामेवान्यथोच्चारणेऽपशब्दतोक्तेः तस्य स्वभावतो भ्रंशात् तथात्वम् । "अनपभ्रंशतानादिर्यदाभ्युदययोग्यतेति" हरिः । "आभीरादिगिरः काव्येष्वपभ्रंशगिरः स्मृताः । शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितमिति" दण्डी ।

अपम त्रि० अपकृष्टं मीयते अप+ मा-बा० क । अपकृष्टतया ज्ञाते "भगोऽनाधोचिदर्विताऽपमस्य चित्" । ऋ० १०, ३९,३ । "अपमस्य ज्ञात्यातिनिकृष्टस्य" भा० । अपकृष्यभूगोलादुपरि मीयते । भूगोलानाच्छादितान्तरिक्षभागे ज्योतिषपरिभाषितायां खस्वस्तिकादिगत्यवधिर्यन्मेखायाम् क्रान्तौ यथा । "नाड़िकामण्डलात् तिर्य्यगयमपमः, क्रान्तिवृत्तावधिः क्रान्तिवृत्ताक्षरः । विक्षेपवृत्तावधिस्तिर्य्यगेवं स्फुटो नाड़िकाद्यन्तखेटान्तरालेऽपम" इति सि०शि० । "क्रान्तिवृत्ते यत् स्फुटयहस्थानं तस्य नाड़ीवृत्तात् तिर्य्यगन्तरम् अपमः क्रान्तिः । अथ विमण्डले यत् ग्रहस्थानं तस्य क्रान्तिवृत्तात् यत् तिर्य्यगन्तरं स विक्षेपः अथ विमण्डलस्य प्राक् च नाड़ीवृत्तात् यत् तिर्य्यगन्तरम् स: अपमः स्फुटा क्रान्तिः यहस्य उत्तरतो याम्यदिशं याम्यान्नात् तदनु सौम्यदिग्भागम् । ग्रभि० "परिसरतां गगनसदां चलनं किञ्चिद्भवेदपमः" इति । सि०शि० ।

अपमज्या स्त्री अपमस्य धनुराकृतिक्षेत्रस्य ज्येव । क्रान्तिवृत्ताख्यजीवायाम् । विवरणम् क्रान्तिज्याशब्दे द्रष्टव्यम् ।

अपमण्डल न० अपक्रान्तं मण्डलात् भूमण्डलात् निरा०त० । सिद्धान्तशिरोमण्युक्ते क्रान्तिवृत्ते । यथा "ग्रहस्य गोले कथिताऽपमण्डलं प्रकल्प्य कक्षावलयं यथोदितमिति" "क्रान्तिवृत्तं कक्षामण्डलं प्रकल्प्येति" ग्रभिता० । "एव भगोलः कथितः खेचरगोलोऽयमेव विज्ञेयः । अत्रापमण्डले वा स्वलाधारैव यस्य तस्यैवेति" सि०शि० ।

अपमर्द पु० अप+मृद-घञ् । विमर्द्दने "हयहस्तिकरीणाम्यामपमर्द्दः कृतोमहानिति" रामा० ।

अपमान पु० अपकृष्टं मीयतेऽनेन अप+मा-करणे ल्युट् । अनादरे "अपमानं पुरस्कृत्य स्वकार्य्यं साधयेद्बुधः" इति नीतिः । "मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयो" रिति" गीता । वेदस्य ब्राह्मणानाञ्च अपमानादधोगतिः पुरा० अपकृष्टो मानो यस्मात् अप+मन-करणे घञ् वा । अनादरे पु० । नापमानः प्रयोक्तव्यः कामक्रोधवशतः क्वचिदिति" रामा० । "अथापमानेन पितुःप्रयुक्तेति" कुमा० ।

अपमानित त्रि० अपमानं जातमस्य तारं० इतच् । यस्यापमानं कृतं तस्मिन् कृतापमाने अनादृते । [सितवर्त्मनि ।

अपमार्ग पु० अपकृष्टो मार्गः प्रा०स० वा कृष्टलोपः । कुत्-

अपमार्जन न० अप+मृज-भावे ल्युट् इडभिः । संशोधने । "कांस्यापमार्जनमसीमधुरं सैन्धवं नवमिति" सुश्रुतः अधस्तान्मार्जने च । अपमार्जनप्रोक्षिताभ्यामपस्फुट इति कात्या० ६,१०,४ । "अपमार्जनं ग्रहपात्रसुखादारभ्याधस्तादपमार्जनमिति" तद्भा० ।

अपमित त्रि० अप-मा-क्त । अवज्ञाते अनादृते ।

अपमित्यक न० अपमित्य अपमानमङ्गीकृत्य स्वार्थे कन् । ऋणे

अपमुख न० अपगतं पराभूतं मुखम् प्रा०त० । पराङ्मुखे वदने प्रा०ब० गतलोपः । पराङ्मुखवदनवति पदार्थे त्रि० ।

अपमूर्द्ध त्रि० अपगतो मूर्द्धा यस्य । शिरःशून्ये कबन्धे ।

अपमृत्यु पु० अपकृष्टः दुष्टहेतुजन्यत्वेन स्फुर्त्तुमरणम् । विषोद्बन्धनादिहेतुके मृत्यौ । "अपमृत्युहेतवश्च शुद्धिप्रत्त्वे कौर्म्मे दर्शिता यथा

"ऋक्षैर्दंष्ट्रिनखिव्यालविषवह्निस्त्रियाजलैः। आदरात् परिहर्त्तव्यः कुर्वन् क्रीड़ां ऋतस्तु यः। नागानां विप्रियं कुर्वन् दग्धश्चायच विद्युता। निगृहीतः स्वयं राज्ञा चौर्य्यदोषेण कुत्रचित्। परदारान् रमन्नत्र हेयात्तत्पतिभिर्हृताः। असमानैश्च सङ्कीर्णैश्चाण्डालाद्यैश्च विग्रहम्। कृत्वा तैर्निहतास्तांस्तु चाण्डालादीन् समाश्रिताः। गवाग्निविप्रदावैव पाषण्डाः क्रूरबुद्धयः। क्रोधात् प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम्। गिरिदृक्षप्रपातञ्च ये कुर्वन्ति नराधमा" इति।

अपस्मृत त्रि॰ न॰ अप+स्मृ–क्त वाक्ये वाच्ये नि॰। त्यक्ते वाक्ये। अन्यत्र अपस्मृतमित्येव सोढ़े त्यक्ते, पराहृते च।

अपयशस् न॰ अपगतं यशः। "यशोविपरीतायामकीर्त्तौ "अपयशो यस्यास्ति किं मृत्युना" इतिनीतिः। अपगतं यशो यस्य। कीर्त्तिशून्ये त्रि॰। [अकीर्त्तिहेतौ।

अपयशस्कर त्रि॰ न यशस्करः क–हेतौ ट विरोधे न॰।

अपयान न॰ अप+या–भावे ल्युट्। अपक्रम्य पलायने "अपयानेऽपि न भवान् समर्थो लघुविक्रये" इति रामा॰।

अपर न॰ न पूर्य्यते यतः पृ–अपादाने, अप्। गजस्य पश्चाद्भागे। "वह्नापराणि परितो निगडान्यत्रावोदिति" माघः। परितो बद्धः अपरः पश्चिमपादोयैरिति मल्लि॰। न पृणाति सन्तोषयति पृ-अच्। शत्रौ, भिन्ने त्रि॰। "अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे" इति मनुः "तमा सस्रुद्वापरे परे रूपाः" नैष॰ पश्चिमायां दिशि स्त्री "अपरदिग्गणिकेति" माघः परकालवृत्तौ त्रि॰। "पूर्व्वां सन्ध्यां जपन् तिष्ठेत् सकाले चापरां चिरमिति" मनुः। पश्चाद्वृत्तौ त्रि॰ "पूर्व्वापरौ तोयनिधी वगाह्य" कुमा॰। ऋग्वेदादिविद्यायां स्त्री। 'द्वे विद्ये वेदितव्ये इति ह स्म ब्रह्मविदो वदन्ति परा चैवापरा च तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति" छा॰ भा॰ धृता श्रुतिः। अस्य च कालदेशादिनियमे सर्व्वनामकार्य्यम्। तत्र "पूर्व्वादिभ्यो नवभ्यो वा इति" पा॰वा तत्कर्म। अपरत्वञ्च दैशिकं कालिकं च द्विविधं, तत्र स्वापेक्षया उदयाचलविप्रकृष्टत्वम् दैशिकमपरत्वम् स्वापेक्षयाधिकसूर्य्यस्यन्दनवत्त्वं कालिकम्। उक्तोदाहृतौ दैशिकम् कालिकन्तु। "अपरं भवतो जन्म परं जन्म विवस्वत" इति गीता। अल्पदेशवृत्तिरूपे व्याप्ये त्रि॰ "सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च। व्यापकत्वात् परापि स्यात्, व्याप्यत्वादपरापि च" भाषा॰। द्रव्यत्वादेः घटत्वाद्यपेक्षया अधिकदेशवृत्तित्वात् परत्वं सत्तापेक्षयाऽल्पदेशवृत्तित्वात् अपरत्वमिति सङ्गा॰। "द्रव्यत्वादिका जातिस्तु परापरतयोच्यते" इति भाषा॰। "स्वायम्भुवस्य च मनो षड्वंश्या मनवोऽपरे" इति अपरकालिका भिन्ना वा इत्यर्थः। निकृष्टे। "भूमिरापोऽनलो वायुः खं मनोबुद्धिरेव च अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्इति" गीता। तत्र भूम्यादीनामितरपदार्थप्रकृतित्वेऽपि जड़त्वात् संहत्य कारित्वात् स्वयमसमर्थत्वेन जीवस्य भोगाद्यर्थमेव प्रवृत्तिमत्त्वाच्च निकृष्टत्वम्। जीवस्य तु तदपेक्षया परत्वम्॥

उत्तरकालिकत्वात् तद्विकारलक्षणे कार्य्ये "तदेतद्ब्रह्माऽपूर्व्वमनपरमनन्तमिति" बृह॰उप॰। नास्ति अपरं कार्य्यं यस्येति भा॰। वस्तुतः स्वरूपप्रच्यवाभावेन कूटस्थस्य न कार्य्यकारित्वमत एव "न कर्त्तृत्वं न कर्म्माणि लोकस्य सृजति प्रभुः अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव इति" गीतायाम् तस्याकर्त्तृत्वमुक्तं कर्त्तृत्वन्तु अज्ञानोपहितेश्वरस्येति न विरोधः। समुदायिनः शेषभागे "अपरात्रः अपराह्णः एकदेशि स॰। अस्य पूर्व्वपदस्यस्य पश्चादेशः पश्चार्द्धम् न॰ शेषार्द्धे। अपरस्मिन् भवः ञिमच् पश्चिमः शेषभवे। प्रथमापञ्चम्यादिदेशकालवृत्ते परशब्दात् प्रथमाद्यर्थे अति। पश्चात्। अधिकमधःशब्दे दृश्यम्। अस्य दिग्वाचकत्वात् तेन समासे देशवाचिनः णिदादि तद्धिते उत्तरपदस्यैव वृद्धिः अपरपाञ्चालक इत्यादि।

अपरक्त त्रि॰ अपगतो रक्तः शोणितो यस्मात्। अपगतरक्तवर्णे अप+रञ्ज–क्त। विरक्ते अनुरागशून्ये च त्रि॰।

अपरज पु॰ अपरस्मिन् काले जायते जन–ड ७त॰। रुद्रभेदे "नमः पूर्व्वजाय चापरजाय" चेति यजु॰ १६, ३२।

अपरति स्त्री अप+रम–भावे क्तिन्। अविरतौ। [काले वा।

अपरत्र अव्य॰ अपरस्मिन् कालादौ। अपरस्मिन् देशे

अपरत्व न॰ अपरस्य भावः त्व। अपरभावे तच्च वैशेषिकोक्तो गुणभेदः। तदपि द्विविधं दैशिकं कालिकञ्च तत्स्वरूपमपरशब्दे उक्तम्। तत्र च कारणमपेक्षाबुद्धिविशेषः तस्य नाशाच्च परत्वापरत्वयोर्नाशः। "संयोगश्च विभागश्च परत्वञ्चापरत्वकमिति" "परापरत्वधीहेतुरेका नित्या द्विधुच्यते" इति च भाषा॰। तत्र दैशिकापरत्वं अल्पसूर्य्यसंयोगज्ञानजन्यं, कालिकं तु अल्पसूर्य्यपरिस्पन्दज्ञानजन्यमिति भेदः। कालिके कालोहेतुः दैशिके तु

दिगिति भेदः । "परत्वञ्चापरत्वञ्च द्विविधं परिकीर्त्तितम् । दैशिकं कालिकञ्चापि मूर्त्त एव तु दैशिकम् ॥ परत्वं सूर्य्यसंयोगभूयस्त्वज्ञानतो भवेत् । अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम् ॥ तयोरसमवायी तु दिक्संयोगस्तदाश्रये । दिवाकरपरिस्पन्दपूर्व्वोत्पन्नत्वबुद्धितः ॥ परत्वमपरत्वन्तु तदनन्तरबुद्धितः । अत्र त्वसमवायी स्यात् संयोगः कालपिण्डयोः ॥ अपेक्षाबुद्धिनाश्येन नाशस्त्वेषामुदाहृत" इति भाषा० ।

अपरदक्षिण अव्य० अपरा च दक्षिणा च "दिङ्नामान्यन्तराले इति" पा० सूत्रं बाधित्वा तिङदङ्गुप्रभृतिपाठात् अव्ययी० । पश्चिमदक्षिणयोरन्तराले नैर्ऋते कोणे । तद्गणपाठाच्च नैतस्य समासान्तरघटकतेति विशेषः ।

अपरपक्ष पु० अपरः शेषः पक्षः । कृष्णपक्षे स हि चन्द्रस्य हृद्विच्छासपक्षयोर्मध्ये शेषः, चैत्रशुक्लप्रतिपदेव वर्षारम्भात् शुक्लस्य पूर्व्वत्वम् सुतरां कृष्णस्यापरत्वम् । "पूर्व्वपक्षो देवानामपरपक्षः पितॄणामिति" श्रुतिः । "यथा चैवाऽपरपक्षः पूर्व्वपक्षादिशिष्यते" इति मनुः "अथ श्राद्धममावास्यायां पितॄणां दद्यात् पञ्चमीप्रभृति वाऽपरपक्षेति" स्मृतिः "अश्वयुक्कृष्णपक्षस्य प्रेतपक्षत्वेन अपरपक्षत्वव्यवहारः । "अमावास्यामृतोद्धारपरपक्षमृतस्तथा । तस्य पार्व्वणमुद्दिष्टं मुनिभिः पञ्चपात्रकमिति" स्मृतिः क्वचित् प्रेतपक्षेत्येव पाठः । "तुलादिषडशीत्यङ्कां षडशीतिसुखं क्रमात् । तच्चतुष्टयमेव स्याद्दिक्षभावेषु राशिषु ॥ षड्विंशे धनुषो भागे द्वाविंशेऽनिमिषस्य च । मिथुनाष्टादशे भागे कन्यायास्तु चतुर्दशे ॥ ततः शेषाणि कन्याया वान्यक्षाणि तु षोड़श । क्रतुभिस्तानि तुल्यानि पितॄणां दत्तमक्षयम्" इति सूर्य्यसिद्धान्तोक्तेः षड़शीतिसुखावशिष्टानां षोड़शानां दिनानां श्राद्धप्रशस्तकालत्वादपरपक्षत्वम् अथ वा नास्ति परो यस्मात् तादृशः पक्षः । तावाचाक्षयपुण्यदत्वेन अत्युत्कृष्टत्वात्तथात्वम् । पञ्चादशाहस्यैव पक्षत्वेऽपि षोडशानां दिनानां किञ्चिदधिकपक्षत्वात् पक्षत्वम् तेषां सौरत्वेऽपि चान्द्रे पक्षे व्यवहारस्य गौणतेति भेदः । विकल्प्यमानयोः पक्षयोर्मध्ये शेषपक्षे च ।

अपरराव पु० अपरं रात्रेः एकदे०त० अच् समा० । रात्रिशेषे "अपरराव सायंदोहमिति" कात्या० ७,४,३०, "अपररात्रकृतम्" सि०कौ० ।

अपरव पु० अपकृष्टोरवः प्रा०त० । अकोर्त्तौ अपयशसि ।

अपरवक्त्र न० "अयुजि नयरला गुरुः समे नृजभपरवक्त्रमिदं ततोजरौ" इति वृत्तरत्नाकरोक्ते अर्द्धसमे मात्राछत्तभेदे "वदन्त्यपरवक्त्राख्यं वैतालीयं विपश्चितः । पुष्पिताग्राभिधं केचिदौपच्छन्दसिकं तवेति ह०र० । अपरवक्त्रा स्त्रियामिति केचिदाहुः ।

अपरवैराग्य न० कर्म्म० । पातञ्जलोक्ते वैराग्यभेदे । यथा "दृष्टानुश्राविकविषयवितृष्णस्य वशीकारसंज्ञं वैराग्यमिति" यतमानव्यतिरेकैकेन्द्रियवशीकारसंज्ञाश्चतस्रः तत्र रागादीनां चित्तस्थानां कषायाणां विषयेष्विन्द्रियप्रवर्त्तकानां पाकाय प्रयत्नो यतमानसंज्ञं वैराग्यं ततः पक्वानां केषाञ्चित्कषायाणां वक्ष्यमाणेभ्यो विरागावधारणं व्यतिरेकसंज्ञं वैराग्यं, ततः पक्वानां सर्व्वेषामिन्द्रियप्रवर्त्तनाऽशक्तानां मनस्यौत्सुक्यरूपेणावस्थानमेकेन्द्रियसंज्ञं वैराग्यम्, स्त्रियोन्नपानभित्यादिषु दृष्टेषु, गुरूच्चारणमनु श्रवः श्रवणं यस्य सोऽनुश्रवो वेदः तदुक्तेष्वानुश्राविकेषु स्वर्गादिदिव्यविषयेषु मन्त्रेषु च विनाशपरितापसातिशयत्वासूयादिदोषाणामभ्यासेन साक्षात्काराद्दृष्टानुश्रवोपेक्षाबुद्धिः वशीकारसंज्ञं वैराग्यमित्यर्थः । एतानि च संप्रज्ञातसमाधेरन्तरङ्गाणि असंप्रज्ञातसमाधेस्तु बहिरङ्गाणि" इति पा० द० ।

अपरस्पर न० अपरश्च परश्च क्रियासातत्ये द्वित्वं सुट् च । क्रियासातत्ये । क्रियावतां सातत्ये तु त्रि० । अपरास्पराः पुंमांसः, योषितो वा गच्छन्ति अपरस्पराणि कुलानि यान्ति । सततमविच्छेदेन गच्छन्तीत्यर्थः । "अपरस्पराः सार्था गच्छन्ति" सि०कौ० ।

अपरहैमन त्रि० अपरहैमन्ते भवः अपरहैमन्त+भवार्थे अण् तलोपः उत्तरपदवृद्धिः । हैमन्तशेषभवे । एवं पूर्व्वहैमनः हैमन्तपूर्व्वभवे त्रि० ।

अपरा स्त्री अपसृत्य राति ददाति जन्म यस्याः रा—अपादाने वा०ड । जरायौ ततोऽपयानादेव गर्भाद्विस्मरणाज्जन्मेति तस्यास्तथात्वम् । अधिकमपरशब्दे दृश्यम् ।

अपराग पु० अप+रञ्ज—घञ् नलोपकृत्वे । अननुरागे विरागे "अनुरागापरागौ च प्रचारं मण्डलस्य चेति" मनुः ।

अपराग्नि पु० द्वि० कर्म्म० । गार्हपत्यदक्षिणाग्न्योः, "अन्तरेणापराग्नी गत्वा दक्षिणेनेति" कात्या० ४,१२,१२, "अपराग्नो गार्हपत्यदक्षिणाग्नी" इति तद्व्या० । अग्निमाग्नौ अग्न्येष्टिकर्म्माङ्गवह्नौ पु० एकव० ।

अपराङ्ग न० अपरस्य रसादेरङ्गम् । गुणीभूतव्यङ्ग्ये काव्यभेदे । "अगूढमपरस्याङ्गमिति" काव्य०प्र० । अपरस्य रसादेः वाक्यार्थीभूतस्य वा वाच्यस्याङ्गम् यथा "अयं स

रणनोत्कर्षी पीनस्तनविमर्दनः । नाभ्यूरुजघनस्पर्शी नीवी-विस्रंसनः कर इति"। अत्र श्रृङ्गारस्य करुणाङ्गत्वात्तथात्वम् वाच्याङ्गव्यङ्ग्यं तत्र द्रष्टव्यम् ।

अपराङ्मुख त्रि० न पराङ्मुखः न०त० । अनिष्टत्ते कर्त्तव्यकर्म्मणोऽनादृतया ततोनिवृत्तिरहिते" स्त्रियां ङीप् ।

अपराच् त्रि० न पराञ्चति परावर्त्तते परा+अञ्च–क्विन् न०त० । अनिवृत्ते पराङ्मुखभिन्ने स्त्रियां ङीप् ।

अपराजित पु० परा+जि–क्त न०त० । शिवे, विष्णौ, तयोः केनाप्यपराजितत्वात्तथात्वम् अभिभेदे च । पराजितभिन्ने त्रि० । दूर्वायां, शेफालिकायां, जयन्तीवृक्षे, असनवृक्षे, शङ्खिनीवृक्षे, कृष्णवृक्षे असनपर्य्यायम्, ऐशान्यां दिशि "अपराजितां वास्थाय व्रजेद्दिशमजिह्मग" इति मनुः "अपराजितामैशानीं दिशमिति" कुल्लू० । चतुर्हैशाक्षरपादके "ननरसलगैः स्वरैरपराजितेति" वृ०र० उक्ते छन्दोभेदे, दुर्गायां देव्यां "अपर्णा चापराजितेति" दुर्गास्तोत्रम् "नास्ति पराजितं शत्रोः पराजयो यस्याः ५त० । विजयदशम्याम् पूजनेन अपराजयदात्रीदुर्गामूर्त्तिभेदे । सा च आश्विनशुक्लदशम्यां श्रवणयुतायामपराह्णे सन्ध्यायां वा पूजा यथा हेमाद्रौ व्रतखण्डे "आश्विनशुक्लपक्षस्य" "दशम्यां च नरैः सम्यक् पूजनीयाऽपराजिता । हेमार्थं विजयार्थञ्च पूर्व्वोक्तविधिना नरैः । नवमीशेषयुक्तायां दशम्यामपराजिता । ददाति विजयं देवी पूजिता जयवर्द्धिनी" स्कान्दम् । "आश्विने शुक्लपक्षे तु दशम्यां पूजयेच्चरः । एकादश्यां न कुर्व्वीत पूजनञ्चापराजितमिति" निर्णयसिन्धौ स्कान्दम् । "उदये दशमी किञ्चित् संपूर्णैकादशी यदि, श्रवणर्क्षं यदा काले सा तिथिर्विजयाभिधेति" हेमाद्रौ काश्यपः । "काले ऽपराह्णे" इति निर्णयसिन्धुः । तस्याञ्च अपराह्णपूजयता हेमाद्रौ दर्शिता ततएव तदवगन्तव्यम् । "नाधयोव्याधयस्तस्य भवन्ति न पराजयः श्रियं पुष्कलमवाप्नोति विजयञ्च सदा भवीति" तत्पूजायाः फलत्वेन अपराजयस्योक्तेस्तस्यास्तथात्वम् । तत्पूजाङ्गदशम्या अपि अपराजयहेतुत्वात् विजयहेतुत्वाच्च अपराजितेति विजयेति च नाम अतएव "पूजनञ्चापराजित" मित्युक्तम् अपराजितामधिकृत्योक्ततत्वात् पूजनञ्चापराजितत्वम् तत्र पूजनप्रकारस्तु हेमाद्रौ व्रतखण्डे अपराजितदशमीप्रकरणे द्रष्टव्यः । योगिनीभेदे तत्स्वरूपं ध्यानञ्चोक्तं यथा । ॐविष्णुः पराजितः तल्लक्षणतया यथा । विष्णुक्रान्तायां स्वनामख्यातायां लतायां च स्त्री । अधिकं विजयदशम्यां वक्ष्यते ।

अपराद्ध त्रि० अप+राध–कर्त्तरि क्त । अपराधिनि, स्वोचितकार्य्याकारके, स्खलिते च "निमित्तादपराद्धेषु धातुष्वक्षेषु वत्सितमिति" माघः भावे क्त । अपराधे ।

अपराद्धप्लुषत्क पु० अपराद्धो लक्ष्यात् च्युतः प्लुषत्को बाणो यस्य । लक्ष्याच्याहिसाधके धानुष्के ।

अपराधृ त्रि० अप+राध–क्विप् । अपराधकर्त्तरि स्वोचितकार्य्याकारके स्त्रियां ङीप् ।

अपराध पु० अप+राध–घञ् । स्वोचितकर्म्माकरणे आगसि "कमपराधलवं मम पश्यसीति" मा०द० । दण्डयोग्यकर्म्मकरणे । "यथाऽपराधदण्डनामिति" रघुः । देवविषये अपराधश्च शास्त्रविध्युल्लङ्घनेन, निषिद्धसेवनेन च जातदुरितविशेषः । तत्र निगमे द्वात्रिंशद् अपराधा दर्शिता यथा" यानैर्वा पादुकैर्वापि गमनं भगवद्गृहे । देवोत्सवाद्यसेवा च अप्रणामस्तदग्रतः ॥ उच्छिष्टे वाथवाऽशौचे भगवद्दर्शनादिकम् । एकहस्तप्रणामश्च पुरस्ताद्प्रदक्षिणम् ॥ पादप्रसारणं चाग्रे तथा पर्य्यङ्कबन्धनम् । शयनं भक्षणं वापि मिथ्याभाषणमेव च ॥ उच्चैर्भाषा मिथोजल्पो रोदनानि च विग्रहः । निग्रहानुग्रहौ चैव नृषु च क्रूरभाषणम् ॥ कम्बलावरणं चैव परनिन्दा परस्तुतिः । अश्लीलभाषणं चैव अधोवायुविमोक्षणम् ॥ शक्तौ गौणोपचारश्च अनिवेदितभक्षणम् । तत्तत्कालोद्भवानाञ्च फलादीनामनर्पणम् ॥ विनियुक्तावशिष्टस्य प्रदानं व्यञ्जनादिके । पृष्ठीकृत्यासनं चैव परेषामभिवादनम् ॥ गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा । अपराधास्तथा विष्णोर्द्वात्रिंशत् परिकीर्त्तिताः इति" ॥ आह्निकतत्त्वे तु वाराहमूलका अन्यविधा द्वात्रिंशत् दर्शिता यथा । "भगवद्भक्तानां चतुर्दश्यसिद्धान्नभोजनम् १ अनिषिद्धदिने दन्तधावनमकृत्वा विष्णोरुपसर्पणम् २ मैथुनं कृत्वा स्नात्वा विष्णोरुपसर्पणम् ३ मृतं नरं स्पृष्ट्वा स्नात्वा विष्णुकर्म्मकरणम् ४ रजस्वलां स्पृष्ट्वा विष्णुमन्दिरप्रवेशनम् ५ मानवं शवं स्पृष्ट्वा स्नात्वा विष्णुसन्निधावस्थानम् ६ विष्णुं स्पृशतः पायुवायुप्रयोगः ७ विष्णोः-कर्म्म कुर्वतः पुरोधत्यागः ८ विष्णुशास्त्रमनादृत्य शास्त्रान्तरप्रशंसा ९ अतिमलिनं वासः परिधाय विष्णुकर्म्माचरणम् १० अविधानेनाचम्य विष्णोरुपसर्पणम् । ११ विष्णोरपराधं कृत्वा विष्णोरुपसर्पणम् १२ कुक्कुरस्य विष्णु-

स्पर्शनम् १३ निषिद्धपुष्पेण विष्णुर्चनम् १४ रक्तं वासः परिधाय विष्णोरुपसर्पणम् १५ अन्धकारे दीपेन विना विष्णोः स्पर्शनम् १६ क्षौमवस्त्रं परिधाय विष्णोः कर्म्माचरणम् १७ वायसोद्भूतवासः परिधाय विष्णोः कर्म्माचरणम् १८ विष्णवे कुक्कुरोच्छिष्टदानम् १९ वराहमांसं भुक्त्वा विष्णोरुपसर्पणम् २० हंसजालपादसरारिमांसं भुक्त्वा विष्णोरुपसर्पणम् २१ दीपं स्पृष्ट्वा हस्तमप्रक्षाल्य विष्णोःस्पर्शनं कर्म्मकरणं वा २२ श्मशानं गत्वाऽस्नात्वा विष्णूपसर्पणम् २३ पिन्याकं भुक्त्वा विष्णोरुपसर्पणम् २४ विष्णवे वराहमांसनिवेदनम् २५ मद्यमाघ्राय पीत्वा स्पृष्ट्वा वा विष्णुस्पृष्टप्रवेशनम् २६ परकीयेणाशुचिना वस्त्रेण परिच्छिन्नेन विष्णुकर्म्माचरणम् २७ विष्णवे नवान्नमप्रदाय तद्भोजनम् २८ गन्धपुष्पे अप्रदाय धूपदीपदानम् २९ उपानद्भ्यामारूढ्य विष्णुस्थानप्रवेशनम् ३० भेरिशब्देन विना विष्णुप्रबोधनम् ३१ अजीर्णे सति विष्णुस्पर्शनम् ३२ इति" एतदुपलक्षणम् "अपराधसहस्राणि, अपराधशतानि चेति" मन्वादिवाक्यात् "अहश्चरन्ति योमन्त्रैर्नीताध्यायन्तु संपठेत्। द्वात्रिंशदपराधेषु अहन्यहनि सुच्यते" इति नरसिंहपुरा०।

अपराधय त्रि० अपराधं याति या–ड। अपराधप्राप्ते। आङ्० भावे कर्म्मणि च घञ् आपराधयं तस्य भावे तत्कर्म्मणि च न०। [कारके, स्त्रियां ङीप्।

अपराधिन् त्रि० अप+राध–णिनि। कृतागसि अपराधे

अपरान्त पु० "अपरस्याः पश्चिमायाः अन्तः सीमाभूतोदेशः। देशभेदेऽस्य पश्चिमदिशः सीमाभूतत्वात्तथात्वम् स च देशः कुतस इति तावच्चिर्णीयते "तस्यानीकैर्विसर्पद्भिरपरान्तजयोद्यतैः रामास्त्रोत्सारितोऽभ्यासीत् सह्यलग्न इवार्णव इति" रघुः। तेनास्य सह्यपर्वत सन्निकृष्टत्वम्। "अपकार्षं किलोदन्वान् रामायाभ्यर्थितो ददौ। अपरान्तमहीपालव्याजेन रघवे करमिति" रघुः तेनार्णवसन्निकृष्टत्वं च प्रतीयते। तत्रैव देशे रघौ "त्रिकूटमेव तत्रोच्चं जयस्तम्भं चकार सः" इति त्रिकूट पर्वतस्पर्शनात् त्रिकूटयुक्तत्वञ्च तस्य प्रतीयते। "पारसीकांस्ततोजेतुमित्यनन्तरोक्तेश्च पारसीकदेशात् पूर्व्वत्वं प्रतीयते पारसीकदेशश्च पाश्चात्यः "संग्रामस्तुमुलस्तस्य पाश्चात्यैरश्वसाधनैरिति" तेषां पाश्चात्यत्वस्य तत्रैव वर्णनात्। बृहत्संहितायाञ्च "नव भारतवर्षे मध्यात् प्रागादिविभाजितादेशा" इत्युपक्रम्य "अपरस्यां मरुमान् मेघवान् वनौघः शुरार्पणोऽस्तगिरिः। अपरान्तयामिकहैहयप्रभृत्यादिकोद्भवा" इत्यादिना मध्यस्थानात्तस्य पश्चिमदिक्स्थत्वमुक्तम् तत्र च सुरसा नाम नदी। "सुरसामारुतोद्भूतमिति" रघौ तत्र तस्या वर्णनात् तदवान्तरदेशः केरलः। "भयोत्सृष्टविभूषाणां तत्र केरलयोषितामिति" रघौ तथा वर्णनात्। जनपदवाचित्वात् तद्धिताश्वोलुकि तद्देशभवे तद्राजनि च व०व०। "उन्मूलनः सन्निपत्यापरान्तैरिति" माघः।

अपरार्क पु० स्मृतिसंग्रहभेदे।

अपरार्द्ध पु० न परार्द्धम्। परार्द्धभिन्ने। अपरमर्द्धमिति वाक्ये तु अपरस्य पश्चादेशे पश्चार्द्धमित्येव।

अपरावर्त्तिन् त्रि० न परावर्त्तते परा+वृत–णिनि न०त०। अपराङ्मुखे कार्य्ये समाप्तिमत्त्वाऽनिवर्त्तिनि स्त्रियां ङीप्।

अपराह्ण पु० अपरमह्न एक०त०टच् अह्नादेशः। दिनशेषभागे स च द्विधा विभक्तस्य, त्रिधा विभक्तस्य च दिनस्य शेषभागः। "पूर्व्वं दिनं मनुष्याणामपराह्णः पितॄणामिति" श्रुतौ द्विधा विभजनात् "पूर्व्वाह्णोवै देवानां मध्यन्दिनं मनुष्याणामपराह्णः पितॄणामिति श्रुतौ त्रिधा विभजनाच्च तयोस्तेषु वा शेषस्य तथात्वम्। तथा च द्विधा विभक्तस्य दिनस्य शेषार्द्धम्, त्रिधा विभक्तस्य तृतीयार्द्धं च अपराह्णः। "यवाक्षं सविता याति पितरस्तानुपासते। तिथिं तेभ्योऽपराह्णो हि स्वयं दत्तः स्वयंभुवेति" स्मृतिः। "तथा श्राद्धस्य पूर्व्वाह्णादपराह्णो विशिष्यते" मनुः। पञ्चधा विभक्तस्य तु चतुर्थभागे च तस्य च कर्म्मयोग्येतरापेक्षयाऽपरत्वात् तथात्वम्। अग्निमत्यिमुहूर्त्तस्य तु राक्षसवेलात्वेन कर्म्मानर्हत्वात् कर्म्मयोग्यशेषभागत्वाभावान्नापराह्णत्वम्। तथा च "प्रातःकालोमुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु। मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततस्तथा। सायाह्नस्त्रिमुहूर्त्तः स्यात् श्राद्धं तत्र न कारयेत्। राक्षसी नाम सा वेला गर्हिता सर्वकर्म्मसु" त्रिमुहूर्त्तात्मकतया पञ्चधा विभक्तदिनस्य चतुर्थे भागे कर्म्मार्हापराह्णत्वेन परिभाषणात्तथात्वम्। लौकिके तु मध्याह्नात्परतः, सूर्य्यास्तात् प्राक्कालोऽपराह्णत्वेन व्यवह्रियते इति" भेदः। ततः भवार्थे वा वुञ् अपराह्णकः तद्भवे त्रि०। पक्षे तदर्थे ठञ् आपराह्णिकः। तद्भवे त्रि०। "आद्ये चैवापराह्णिक" इति स्मृतिः। स्त्रियां ङीप्। "पार्व्वणे पिण्डकृत्ये च तिथिर्याह्नापराह्णिकेति" स्मृतिः।

अपराह्णतन त्रि० अपराह्णे भवः खुञ् तुट् च। अपराह्ण-

भवे त्रि० स्त्रियां ङीप् । "षकालेत्यादिना" पा० सप्तम्या वा अलुकि अपराह्णेतनोऽप्युक्तार्थे त्रि० । [अनुते च ।

अपरिकलित त्रि० न परिकलितः न०त० । अज्ञाते, अदृष्टे,

अपरिक्रम त्रि० नास्ति परिक्रमः उद्योगोयस्य । अनुद्युक्ते । "जानन्नपि च किं कुर्यादशक्तश्चापरिक्रम इति" स्मृतिः । परितः क्रमः क्रमणम् अभावार्थे न०त० । परितः क्रमणाभावे पु० । परिगतः क्रमम् न० त० । क्रमापरिगते अपरपाटीके त्रि० ।

अपरिक्लिष्ट त्रि० क्लिश भावे क्त न परिक्लिष्टं क्लेशोयत्र । अनायाससाध्ये । कर्त्तरि क्त न०त० । क्लेशयुक्ताभिन्ने त्रि० ।

अपरिगत त्रि० न०त० । ज्ञातभिन्ने, अप्राप्ते च ।

अपरिगृहीत त्रि० न०त० । अस्वीकृते, अनुहोते, अज्ञाते च

अपरिग्रह पु० अभावे न०त० । परिग्रहाभावे, पातञ्जलोक्ते यमभेदे च यथा "अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः" "सू० तत्रापरिग्रहो नाम देहयात्रानिर्वाहकातिरिक्तभोगसाधनधनाद्यनङ्गीकारः । तस्य फलमपि तत्रैव दर्शितम् यथा "अपरिग्रहस्थैर्य्ये जन्मकथन्तासंबोधः" अपरिग्रहशीलस्य तत्स्थैर्य्ये सति किंरूपं जन्म किंप्रकारकं, किंहेतुकं, किंफलकम्, किमवसानमिति शरीरस्यापि परिग्रहविरोधिनी जिज्ञासा भवति शरीरस्यापि परिग्राह्यत्वाविशेषात् कथं तत्परिग्रहो न स्यादिति जिज्ञासावश्यम्भावात् । ततः कार्य्यकरणसंबन्धात् पुरुषस्याग्रस्य जन्म देवनरतिर्य्यक्त्वप्रकारम् । क्लेशकर्म्महेतुकं, दुःखैकफलकम्,पुरुषतत्त्वावसानमित्याचार्य्यादागमतश्च निश्चित्य अदेहः सन्नपरिग्रहयमस्य परमां काष्ठामनुभवतीत्यर्थः" इति तट्टी० । "लोभस्य पुरतः केऽमी ? सत्यास्तेयापरिग्रहा" इति प्र०च० । नास्ति देहयात्रानिर्वाहकव्यतिरिक्तस्य परिग्रहः संग्रहो यस्य । परिव्राजके "निराशीरपरिग्रह" इति गीता । तस्य च कौपीनादिपरिग्रहेऽपि तस्य शरीरयात्रानिर्वाहकत्वान्न क्षतिः "कौपीनाच्छादनार्थं हि वासोवै बिभृयादयतिः । योगसम्भारभेदांश्च गृह्णीयात् पादुके तथेति" स्मृतौ तत्परिग्रहविधानात् । [पूर्व्वमज्ञाते च ।

अपरिचित त्रि० परि+चि–क्त न०त० । अनुशीलितभिन्ने,

अपरिच्छद त्रि० न परिच्छदोयस्य अप्राशस्त्ये न०ब० । अपगतवस्त्राद्युपकरणयुक्ते दरिद्रे ।

अपरिच्छन्न त्रि० परिच्छन्नः परिष्कृतः न०त० । अपरिष्कृते, मार्জ্জनशुद्धादिरहिते ।

अपरिच्छिन्न न० न परिच्छिन्नः । द्रव्यसारहिते निःसीमनि कूटस्थे चैतन्यात्मके ब्रह्मणि "तदेतद्ब्रह्मापूर्व्वमनपरमनन्तमिति ह०उ०श्रुत्या तस्यानाराद्यित्योक्तेश्चात्मद्रव्यसारहितभावे त्रि० "जगत्यपर्य्याप्तेत्यादि" भाष्यव्याख्यायामपर्य्याप्तः अपरिच्छिन्न" इति मल्लि० ।

अपरिच्छेद पु० अभावार्थे न० । परिच्छेदाभावे द्रव्यसाभावे । न०ब० । द्रव्यसाशून्ये त्रि० । [तच्छून्ये त्रि० ।

अपरिज्ञान न० अभावे न०त० । तत्त्वविवेकाभावे । न०ब० ।

अपरिणत त्रि० परि+नम–क्त न०त० । अपरिपक्वे । यस्य यथा परिणाम उचितस्तावत्यप्राप्ते अन्यरूपतामप्राप्ते च ।

अपरिणय पु० परिणयो विवाहः अभावे न०त० । विवाहाभावे । [होने कौमारावस्थायुक्ते ।

अपरिणीत त्रि० परि+नी–क्त न०त० । विवाहसंस्कार-

अपरितोष पु० अभावे न०त० । सन्तोषाभावे ।

अपरिपक्व त्रि० न०त० । परिपक्वभिन्ने यस्य यथा परिणतिरुचिता तथारूपतामप्राप्ते, "यथा अपरिपक्वयोगीति" । विक्लित्तिप्राप्तिशून्ये आमे तण्डुलफलादौ च ।

अपरिमाण न० अभावे न०त० । परिमाणाभावे द्रव्यसारहित्ये न०ब० । तच्छून्ये त्रि० ।

अपरिमित त्रि० न०त० । द्रव्यसाशून्ये परिमाणशून्ये ।

अपरिमेय त्रि० परिमातुं योग्यः न०त० । परिमाणयोग्ये द्रव्यसारहिते ।

अपरिम्लान पु० न परिम्लायति कर्त्तरि क्त । रक्तवर्णे (आवला) ख्याते महासप्तपर्णे रा०नि० । तस्य बहुमर्द्दनेऽपि म्लानिराहित्यात् तथात्वम् । म्लानिवर्জিते त्रि० ।

अपरिविष्ट त्रि० परि+विष–कर्म्मणि क्त न०त० । वेष्टनशून्ये अव्याप्ते । "जर्জ্জयन्त्या अपरिविष्टमास्यमिति" ऋ० २, १२,८ । अपरिविष्टं मलादिभिरव्याप्तमिति" भा० । विष्टभाद्यारार्थमुपकृतं न०त० । परिवेषनशून्ये भोजपरिमार्थमनुपढौकिते त्रि० ।

अपरिवृत त्रि० न परिवृतः । अनाच्छादिते । परितोवेष्टनरहिते अनावृते क्षेत्रादौ "तत्रापरिवृतं शस्यं विहिंस्युः पशवोयदीति" मनुः क्षेत्राद्यावरणप्रकारोऽपि तेन दर्शितः "वृतिं तत्र प्रकुर्व्वीत यासङ्गोनावलोकयेत् छिद्रञ्च वारयेत् सर्व्वं शूकरमुखादनुगमिति" तेन तादृशच्छिद्रहीनवरणशून्येऽपि अपरिवृतत्वम् असंस्कृते च "मघोभिरपरीवृतो वसति प्रचेताः" ऋ० २,१०,३, अपरीवृतोऽसंस्कृतः इति भा० वेदे दीर्घः । [राहित्ये । न०ब० । द्रव्यसाशून्ये त्रि० ।

अपरिशेष पु० अभावे न०त० । परिशेषाभावे द्रव्यसा-

अपरिष्कार पु० अभावे न०त०। मार्ज्जनादिशोधनसंस्काराभावे। न०ब०। तच्छून्ये त्रि०।

अपरिष्टि स्त्री अप+वैपरीत्ये रिष-हिंसायाम् क्तिन्। पूजायाम् हेम०। पूजायाञ्च हिंसाहेतुकद्वेषशून्यत्वात् तथात्वम्।

अपरिसमाप्ति स्त्री अभावे न०त०। इयत्ताभावे समाप्त्यभावे च। न०ब०। तच्छून्ये त्रि०। [न०ब०। तच्छून्ये त्रि०।

अपरिसर पु० अभावे न०त०। विस्ताराभावे प्रचाराभावे च

अपरिहरणीय त्रि० न परिहर्त्तुं शक्यते हृ-शक्यार्थे कर्म्मणि अनीयर्। परिहर्त्तुमशक्ये, परिहर्त्तुमयोग्ये च।

अपरिहार्य्य त्रि० न परिहर्त्तुमर्हति शक्यते वा हृ-ण्यत्। परिहर्त्तुमयोग्ये, परिहर्त्तुमशक्ये च।

अपरीक्षित त्रि० न०त०। रूपवर्णपरिमाणादिना यथार्थ तत्त्वानुसन्धानशून्ये "एतच्चापरीक्षितक्रयविषयमिति" मिताक्षरा परीक्षिते तु "परीक्षितं तु यत् क्रीतं तत् सर्वं न निवर्त्तयेदिति" तद्वृता स्मृतिः।

अपरीत त्रि० न०त०। परितोऽव्याप्ते अनभिगते च "शवसाऽपरीता" इति ऋ० १,१००,३, "अपरीताः अपरैरनभिगता" इति भा०। अपरिगते, अपर्य्याप्ते च "अपरीतं वृतो शव" इति ऋ० ८,२४,८, "अपरीतम् शत्रुभिरपरिगतमव्याप्तमिति वा" भा०।

अपरुष् त्रि० अपगता रूट् यस्य। विगतक्रोधे "अपरूषा परुषाक्षरभीरितेति" रघुः।

अपरूप न० अप आनन्दे आश्चर्य्ये वा प्रा०स०। आश्चर्य्यरूपे आनन्दहेतुप्रशंसितरूपे च। "ततोऽपरूपं जायते तस्मादश्वेष्वदेनस इति" अथ० १२,४,६, अपकृष्टरूपे च। प्रा०ब०। तद्वति त्रि०।

अपरेद्युस् अव्य० अपरस्मिन् अह्नि एद्युस्। अपरदिने इत्यर्थे "पूर्व्वेद्युरपरेद्युर्वा श्राद्धकर्म्मण्युपस्थिते निमन्त्रयेत विप्रान् वै" इति स्मृतिः।

अपरोक्ष अव्य० न परोक्षम् इन्द्रियासन्निकृष्टम्। प्रत्यक्षे विषयेन्द्रियसन्निकर्षोत्पन्ने ज्ञाने "सम्भावनादिनिरासे तु विचारविपाकात्तेनैव प्रमाणेन जनितं ज्ञानं प्रतिबन्धाभावात् फलं जनयदपरोक्षमित्युच्यते" इति टङ्काः। फलं ज्ञाततामिति भाट्टाः चितिबुद्धेः प्रतिबिम्बमिति सांख्याः बुद्धौ चितः प्रतिबिम्बमिति वेदान्तिनः। संस्कारम् विषयताविशेषं वेति तार्किकादयः। तथा हि प्रथममिन्द्रियेण विषयः संबध्यते ततो विषयालोचनारूपं विनिर्विकल्पकस्थानीयं सामान्याकारं ज्ञानं जायते ततः विषयावरणरूपप्रतिबन्धनाशात् चित्प्रतिबिम्बरूपं फलं जनयज्ज्ञानमपरोक्षमित्युच्यते इति वेदान्तिनः। नैयायिकास्तु विषयेन्द्रियसन्निकर्षात् प्रथमं निर्विकल्पकरूपं विशेष्यविशेषणयोः संसर्गानवगाहि ज्ञानं जायते तदुत्तरं विषयप्रत्यक्षमित्यङ्गीचक्रुः। सांख्यादयस्तु विषयेन्द्रियसन्निकर्षात् बुद्धेस्तद्विषयकारेण परिणामे जाते ततश्चैतन्याभासो बुद्धेः प्रतिबिम्बरूपं फलमुत्पद्यते तत्रैव ज्ञातृत्वव्यवहारोमुख्यः बुद्धिवृत्तौ तु गौण इति मन्यन्ते। "युक्तितोऽपि न बाध्यते दिङ्मोहरदपरोक्षादृते" सां०रू०। ब्रह्मणस्तु अज्ञानरूपावरणाभावात् सर्वदा प्रकाशमानत्वात् नेन्द्रियादिसन्निकर्षापेक्षेति तस्य सर्वदा प्रत्यक्षरूपत्वम् "यत् साक्षादपरोक्षाद्ब्रह्मेति" श्रुतिः अपरोक्षादपरोक्षमित्यर्थः। अर्श०अच्प्रत्ययेन अच्। तद्विषये त्रि०।

अपरोक्षानुभूति पु० अपरोक्षा प्रत्यक्षा अनुभूतिर्यस्मात्। वेदान्तप्रकरणभेदे। कर्म०। प्रत्यक्षरूपे ज्ञाने स्त्री।

अपरोध पु० अप+रुध-भावे घञ्। "बाधने अभिप्रायमभिप्रुखन्ति देशानपरोधेन" काल्या० २४,२,२१।

अपर्णा स्त्री नास्ति पर्णान्यपि हृत्तिसाधनानि यस्याः। शैलराजदुहितरि उमायां सा हि शिवप्राप्त्यर्थं व्रतकाले पर्णान्यपि त्यक्तवती यथोक्तं कुमारे "स्वयं विशीर्णद्रुमपर्णवृत्तिता परा हि काष्ठा तपसस्तया पुनः। तदप्यपाकीर्णमतः प्रियंवदाम् वदन्त्यपर्णामिति तां पुराविदः" इति "चतुर्थे त्यक्तपर्णा च अपर्णाख्यामवाप सेति" शि०पु०।

अपर्त्तु त्रि० अपगत ऋतुर्यस्य। वसन्ताद्यृतुविगमयुक्ते। "यत्र विजायते यमिन्यपर्तुरिति" अथ०३,२८,१, अपगतऋतुः स्त्रीपुम्नं यस्याः। निरुत्तरजस्कायां स्त्रियां स्त्री।

अपर्य्याप्त त्रि० नास्ति पर्य्याप्तोमर्य्यादा यस्य। निःसीमनि इयत्तारहिते "तदस्यमपर्य्याप्तं दुर्ज्जयं वानरं बलम्" रा०।

अपर्य्याप्त त्रि० परि+आप-क्त न०त०। असमर्थे, असम्पूर्णे, स्वकार्य्याक्षमे च "परिभुक्तमवज्ञातमपर्य्याप्तमसंस्कृतम् यः प्रयच्छति विप्रेभ्यस्तद्ब्रह्मन्यवतिष्ठतीति" "अपर्य्याप्तं स्वकार्य्याक्षममिति शु०त० रघु०। अपरिच्छिन्ने इयत्तारहिते "जगत्यपर्य्याप्तसहस्रभानुनेति" माघः "अपर्य्याप्तः अपरिच्छन्न" इति मल्लि०।

अपर्य्याप्ति स्त्री न पर्य्याप्तिः अभावार्थे न०त०। अपरिच्छेदे असामर्थ्ये च। "सख्यं आद्यं मासिमासि अपर्य्याप्तादृतं प्रतीति" स्मृतिः। न०ब०। परिच्छेदशून्ये त्रि०।

अपर्य्याय पु० न पर्य्यायः परिपाटी अभावे न०त०। पक्रमाभावे। न०ब०। क्रमशून्ये त्रि०।

अपर्य्युषित त्रि० न पर्य्युषितः । अभिनवे सद्योभवे पुष्पादौ । "अपर्य्युषितनिच्छिद्रैः प्रोक्षितैर्जन्तुवर्जितैरिति" नर० पु० ।

अपर्वदण्ड पु० अपर्वा दण्ड इव । रामठाख्यगरभेदे तस्येतरगरस्येव ग्रन्थियुक्तत्वाभावात्तथात्वम् ।

अपर्वन् त्रि० नास्ति पर्व ग्रन्थिः यस्य प्रकरणपरिच्छेदो वा वस्तु । ग्रन्थिशून्ये दण्डादौ विच्छेदशून्ये ग्रन्थादौ च । वा कप् । अपर्वकोऽप्यत्र त्रि० । "यदपर्वकं स्यात् प्रलम्बमिति" श्रुत० ब्रा० । "विच्छेदशून्यमिति" भा० ।

अपल न० अपक्रमनिष्टत्तौ लाति गृह्णात्यत्र ला–बा० आधारे क । कोशके शब्द० मा० । तद्ग्रन्थने हि अपक्रमनिष्टत्तेस्तथात्वम् । नास्ति पलं मांसं यस्य । मांसशून्ये त्रि० ।

अपलाप पु० अप+लप–घञ् । सतोऽप्यसत्त्वेन कथनरूपे अपह्नवे, "न च प्रत्यक्षसिद्धस्यापलापः कर्तुं शक्यते इति" अप+आनन्दे लप्यत्वेन लप–करणे घञ् । स्नेहे मेदिनिः । स्नेहेनैवानन्दभाषणात्तथात्वम् ।

अपलाषिका स्त्री लष इच्छायां पर्य्याये खुच् स्वार्थिका पर्य्यायेण इच्छा अप वैपरीत्ये प्रा० स० । अपर्य्यायेच्छारूपायां तृष्णावामतिशयलालसायाम् हेम० । अत्रार्थे अपलाषिकेति पाठकल्पनं प्रामादिकं लषतेरिच्छार्थत्वाभावात् ।

अपलाषिन् त्रि० अप+अपकर्षे लष–ताच्छील्यादौ घिनुण् । अनुचितधनादिदृष्टार्थशीले । स्त्रियां ङीप् ।

अपलाषुक त्रि० अप+अनुचितत्वात् अपकर्षे लष–ताच्छील्यादौ वा० उकञ् । अनुचितधनादिदृष्टार्थशीले ।

अपक्ष्णुलन न० न पक्ष्णुलनं शोधनम् अभावे न० त० । स्नानमार्ज्जनक्षारसंयोगादिना शोधनाभावे । "यदिदं स्नातव्रतं निहितमपक्ष्णुलनक्तं भवतीति श्रुत० ब्रा० । "अपक्ष्णुलनक्तं क्षारद्रव्यसंयोगादिनाऽधौतमिति" भा० । अत्रासमर्थसमासात् करणे नञर्थान्वय इति भेदः । तथा च रजकाधौतमिति तदर्थः । कर्मकाले रजकधौतवस्त्र परिधानस्य स्मृतौ निषेधात् तथोक्तम् ।

अपवत् त्रि० अपः कर्म तदस्यास्य मतुप् वेदे सस्य लोपः । कर्मयुक्ते । "अपूपवानपवांश्चरेद्ह सीदत" अथ० १८,४,२४।

अपवन न० अपक्रष्टं कृत्रिमत्वात् स्वल्पत्वाच्च वनम् प्रा० त० । उपवने कृत्रिमवने हेम० । [अन्तर्गृहे वासगृहे ।

अपवरक न० अप+वियते अप+वृ–कृञा० संज्ञायां वुन् ।

अपवरण न० अप+वृ–भावे ल्युट् । अनावरणे आवरणाभावकरणे च ।

अपवर्ग पु० अपवृज्यते संसारोऽत्र अप+वृज–घञ्कृत्वम् । मोक्षे । "स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिण" इति कुसुमा० । "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापायादनन्तरापायादपवर्गः" इति "कृत्स्नकर्मक्षयान्मोक्षस्त्वपवर्गः" इति च न्यायसू० । अपवर्गप्रकारस्तु मोक्षशब्दे वक्ष्यते । भावे घञ् । दाने, त्यागे च "सुष्टेरसम्भेद इवापवर्गे" किरा० । अपवृज्यते विरज्यते यस्मात् अपादाने घञ् । फलप्राप्तौ तद्धेतौ कर्म्मसमापने च "अपवर्गे तृतीयेति" पा० । "अपवर्गे तृतीयेति भणतः पाणिनेरयमिति" नैषधम् "उदगपवर्गं सुखेषु सम्पद्यादिति" ता० ब्रा० । "कृत्वा गते भाग्य इवापवर्गमिति" किरा० "अपवर्गं समाप्तिमिति" मल्लि० ।

अपवर्जन न० अप+वृज–ल्युट् । दानादावपवर्गार्थे । "घटापवर्जनमिति" मिताक्षरा ।

अपवर्जित त्रि० अप+वर्ज्–क्त । परिक्षिप्ते, त्यक्ते, दत्ते च ।

अपवर्त्तन न० अप+वृत–णिच्–ल्युट् । परिवर्त्तने, वक्रीकरणे अङ्कशास्त्रे प्रसिद्धे भाज्यभाजकयोरुभयोरपि तुल्यरूपेण केनचिदङ्केन विभाजने । "समेन केनापवर्त्त्येते" लीला० । अपहरणे च "न त्यागोऽस्ति द्विवर्त्याद्य न च दायापवर्त्तनमिति" मनुः । भावे अच् अपवर्त्तोऽप्यत्र पु० ।

अपवाद पु० अप+वद–भावे घञ् । निन्दायाम् अपकीर्तौ "किं करिष्यामि राज्येन सापवादेन राघव!" "प्रकाशं च कृते तस्मिन्नपवादो भवेन्मम" इति च रामा० । मिथ्यावादे "अपवादमात्रमवुद्धानामिति" सां० सू० "अपवादः मिथ्यावादः" भा० । कुत्सितवादे तत्रैव "अपवादः कुत्सितवाद" इति व्याख्यानात् । अपोद्यते सामान्यशास्त्रं स्वविषयात् सङ्कोच्यतेऽनेन करणे घञ् । विशेषशास्त्रे । तद्धि स्वविषयं परिरुध्य सामान्यशास्त्रं विषयान्तरे व्यवस्थापयतीति तस्य सङ्कोचकं भवति यथा "मा हिंस्यात् सर्व्वाभूतानीति" श्रुतौ हिंसानिषेधस्य सर्वभूतविषयकत्वेऽपि "वायव्यं श्वेतमालभेतेति" शास्त्रं वायव्यक्षागहिंसाविषयकत्वेन विरोधात् स्वविषयात् सङ्कोचयत् तस्येतरविषयकतां व्यवस्थापयति "अपवादैरिवोत्सर्गाः कर्त्तव्याहृत्तयः परैरिति" कुमारः "परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीय" इति "अपवादोयदन्यत्र चरितार्थस्तदर्थान्तरङ्गेण बाध्यते" इति च व्या० परि० । "क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते" इति पा० भा० । अपोद्यते अपवाद्यते मिथ्याभूतमनेन अप+वद–करणे घञ् । वेदान्तमतसिद्धे मिथ्याभूतपदार्थनिवारणार्थमुपदेशभेदे । स च रज्जुविवर्त्तस्य मिथ्याभूतसर्पस्य रज्जुमात्रत्ववत् वस्तुभूतब्रह्मणो विवर्त्तस्य प्रपञ्चादेः वस्तु-

भूतरूपतोपदेशः। "अध्यारोपापवादाभ्यां वस्तुतत्त्वविनिश्चय, इति वेदा०प्र०। भावे घञ्। विश्वासे, प्रणये च। करणे घञ्। बाधनसाधने वस्तुमात्रे। कर्म्मणि घञ्। कुत्सितवाद्ये "मधुकरैरपवादकरैरिव" माघः "अपवादः मृगवञ्चनाय धनुष्टादि कुत्सितवाद्यमिति" मल्लि०। भावे घञ्। आदेशे "ततोऽपवादेन पताकिनीपतेरिति" किरा०। "अपवादेन आदेशेनेति" मल्लि०। निरासने च।

अपवादक त्रि० अपसार्य्य स्वविषयात्, वदति शास्त्रान्तरम् व्यवस्थापयति वद-ण्वुल्। स्वविषयं परिच्छिद्य सामान्यशास्त्रेतरत्र व्यवस्थापके विशेषशास्त्रे। अप+वद-ण्वुल्। अकीर्त्तिकरे" निन्दके निरासके च त्रि०। [ङीप्।

अपवादिन् त्रि० अप+वद-णिनि। अपवादकर्त्तरि स्त्रियां

अपवारण त्रि० अपवारयति आच्छादयति अप+वृ-णिच् नन्द्या० ल्यु। व्यवधायके। भावे ल्युट्। व्यवधाने न० आधारे ल्युट्। अन्तर्द्धौ सति तु व्यवधाने अन्तर्धानं भवत्येवेति तस्य तथात्वम्।

अपवारित त्रि० अप+वृ-णिच्-कर्म्मणि क्त। आच्छादिते व्यवधापिते च। भावे क्त। अपवारणे, अप्रकाशे न०। "तद्ग्रहेदपवारितम्। रहस्यन्तु यदन्यस्य पराङ्तत्र प्रकाश्यते" इति सा०द० उक्ते पराङ्तग्राम्यस्य रहस्यकथने न० पराङ्तग्राम्यस्य रहस्यकथनमपवारितमिति तदर्थः।

अपवारितक न० अपवारितं अपवारणम् अप्रकाशमेव स्वार्थे कन्। अप्रकाशे "अपवारितकेन प्राङ्क्षोतीति" नाटकम्। अप्रकाशाच्छोदयतीत्यर्थः।

अपवारक पु० अप+वृ-ण्वु०। उकञ्। प्रस्तरे।

अपवार्य्य अव्य० अप+वृ-णिच्-ल्यप्। आच्छाद्येत्यर्थे "विपत्ताकरेणान्यमपवार्यान्तरा कथेति" सा०द०।

अपवास पु० अपहृत्य वासः स्थितिः। अपसरणे "अपवासे नक्षत्राणामपवास उपसंख्यानम्" अष्ट० ३,७,७।

अपवाह पु० अपसार्य्य वाहः स्थानान्तरनयनम्। इतरस्थानादपसार्य्य स्थानान्तरप्रापणे। "भूतपूर्व्वमभूतपूर्व्वं वा जनपदं परदेशापवाहेन स्वदेशाभिष्यन्दवमनेन वा निवेशयेदिति" कौटिल्यः "भोनाः वट् गिति नवरसगरयतियुतमपवाहाख्यमिति" वृ०र० उक्ते वर्ण्यवृत्तभेदे।

अपवाहन न० अप+वह-णिच्-ल्युट्। परदेशस्थजनानां स्वदेशप्रापणे "स्वराष्ट्रं वर्द्धयेद्राजा परदेशापवाहनादिति" हितो०। [वह-णिच्-ल्यप्। अपसार्य्येत्यर्थे अव्य०।

अपवाह्य त्रि० अप+वह-कर्म्मणि ण्यत्। दूरीकार्य्ये। अप+

अपविग्न त्रि० अपगतो विग्नो यस्मात्। विग्नशून्ये "यतं क्रतूनामपविग्नमाप स" इति रघुः।

अपवित्र पु० न पवित्रः कृतशौचादिः। अकृतशौचादौ, "अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपि वा यःस्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरे शुचिरिति" स्मृतिः।

अपविद्ध त्रि० अप+व्यध-क्त। त्यक्ते "अपविद्धगदोबाहुर्भग्नशाख इव द्रुम" इति कु०। "सोऽपविद्धस्तया रहस्यनिर्भेदभयादिति" दशकु०। प्रत्याख्याते, निरस्ते च "रजोविप्रकृतावास्तामपविद्धशुचाविव" रघुः "मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा। यं पुत्रं प्रतिगृह्णीयादपविद्धः स उच्यते" इति मनूक्ते द्वादशपुत्रान्तर्गते पुत्रभेदे पु०।

अपविद्या स्त्री अप विरोधे या०त०। विद्याविरोधिन्यां वेदान्तादिप्रतिपाद्यायामविद्यायाम् "तत्त्वस्य संविच्छिरिवापविद्यामिति" किरा०। अपकृष्टा विद्या। बौद्धाद्यागमविद्यायाम्। [राज०नि०। अपगतविषे त्रि०।

अपविषा स्त्री अपगतं विषं यस्याः। निर्विषलशुनभेदे

अपवृत्त त्रि० अपवर्त्तते अप+वृत-कर्त्तरि क्त। समाप्ते, "अपवृत्ते कर्मणि यामदेव्यगानं शान्त्यर्थमिति" गोभिलः। "अपवृत्ते समाप्ते" संस्कारतत्त्वे रघुनन्दनः।

अपवेध पु० अपकृष्टः अस्थानकृतत्वात् वेधः या०त०। मणीनामस्थानकृते वेधने "मणीनामपवेधे च दण्ड उत्तमसाहसम् इति" मनुः।

अपव्यय पु० अपकृष्टः शास्त्रादिमर्य्यादासङ्कुचितस्थाने कृतत्वात् व्ययः या०त०। द्यूतवेश्यादावस्थाने कृते व्यये। अपगतः व्ययःव्ययोऽस्य। अविनश्वरे त्रि०।

अपव्ययमान त्रि० अप+वि+अय-शानच्। अपलापकर्त्तरि। "अर्थेऽपव्ययमानन्तु कारणेन विभावितम्। दापयेद्वनिकस्यार्थं दण्डलेशञ्च शक्तित इति" मनुः। अपव्ययमानमपलपन्तमिति दि०त०रघु०। अपव्ययकर्त्तरि त्रि०।

अपव्रत त्रि० अपगतं व्रतं यौतादि कर्म्म यस्य। अपगतविहितकर्म्मणि "अनुव्रताय रन्धयन्नपव्रतानिति" ऋ०१,५१,६, अपव्रतान् "अपगतकर्म्मण" इति भा०। "गूढं सूर्य्यं तमसाऽपव्रतेन" ऋ०५०,४,६,१, अपगतव्रतमस्य। नष्टव्रते स्वीकृतव्रतत्यागिनि त्रि०। या०त०। अपकृष्टे व्रते न०

अपशङ्क त्रि० अपगता शङ्का यस्य या०ब०। निःशङ्के शङ्कारहिते।

अपशद त्रि० अप+शद-कर्त्तरि अच्। नीचे इति केचित्। तच्च सदधातुघटिततया दन्त्यमध्यमिति बहवः।

अपशब्द पु० अपशब्दैरपरीते या०त०। शक्तिवैकल्यप्रमा-

दादिना साधुशब्दस्यान्यथोच्चारणसाध्ये अपभ्रंशशब्दे "त एव शक्तिवैकल्यप्रमादालसतादिभिः । अन्यथोच्चारिताः शब्दा अपशब्दा इतीरिता" इति हरिः "म्लेच्छो हवा नाम यदपशब्दः" इति श्रुतिः ।

अपशब्य त्रि० पशवे हितः यत्, विरोधे न०त० । पशुहृद्विघातके "अपशब्येव हु वा ईश्वरा" इति ता०ब्रा० "अपशब्येव पशूनां हृद्विघातिनी" भा० ।

अपशु पु० न पशुः अप्राशस्त्ये न०त० । गोऽन्यभिन्ने पशौ । "अपशवो वा अन्ये गोऽश्वेभ्यः इति" "अपशुर्वा एष यदारण्योनैतस्य होतव्यमिति" च शत०ब्रा० । नास्ति पशुर्यस्य । पशुशून्ये "अप्रजा अपशुर्भविष्यति" । शत०ब्रा० ।

अपशुच् त्रि० अपगता शुक् शोकोयस्य प्रा०ब० । अपगतशोके । सर्वदाऽपेतशोके आत्मनि पु० । "क उत्तमःश्लोकगुणानुवादात् पुमान् विरज्येत विनाऽपशुघ्नादिति,' भागवते पाठं प्रकल्प्य श्रीधरेण अपशुघातकेतिव्याख्यातम् तस्य हननञ्च यत्नार्थेनाज्ञानं "योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते किं तेन न कृतं पापं ? चौरेणात्मापहारिणेति" मनुना आत्मनोऽन्यथारूपज्ञानेनैव स्वात्महन्तृत्वोक्तेः । "अन्धं तमस्ते प्रविशन्ति ये केचात्महनोजना" इति श्रुतिभाष्येऽपि तथैवात्मात्तज्ञाने आत्महननमुक्तम् । अपशोकादयोऽप्यत्र त्रि० ।

अपश्चिम त्रि० न पश्चिमः विरोधे न०त० । अग्रिमे "कश्यपश्च महाभागस्तेषामासीदपश्चिम" इति रामा० नास्ति पश्चिमः शेषभेदोयस्य । शेषशून्ये, इयत्तान्यूने च "अपश्चिमामिमां कष्टामापदं प्राप्नुवन्त्यहमिति" रामा० ।

अपश्य त्रि० दृश-वेदे वा०श न०त० । अद्रष्टरि अदर्शके "अन्धा अपश्या न दभन्नभिख्या" इति ऋ० १,१४८,५, "अपश्या अद्रष्टारः" इति भा० लोके तु अदर्शीत्येव ।

अपश्रय पु० अप+श्रि-अच् । उपाश्रये "सामासाद उद्गीथोऽपश्रयः" अथ० १५,१,८, ।

अपश्री त्रि० अपगता श्रीर्यस्मात् श्रीःशोभादिः । शोभादिहीने ।

अपश्लिष्ट त्रि० अप+श्लिष-क्त । श्लेषशून्ये, संसर्गहीने, वियुक्ते च । [अपक्रम्य स्थातरि त्रि० ।

अपष्ठ न० अप+स्था-क अम्वा० षत्वम् । अङ्गुष्ठार्थे हेम० ।

अपष्ठु अव्य० अप+स्था-सुषामादि० षत्वम् । निर्द्दोषे, शोभने, विपरीते, च । "अपष्ठु पठतः पाठ्यमधिगोष्ठि शठस्य ते" इति नैष० । प्रतिकूले, विरुद्धार्थे च त्रि० । काले पु० ।

अपष्ठर(ल) त्रि० अप+स्था-कुरच् वा लत्वम् । प्रतिकूले हेम० । विपरीते त्रिका० ।

अपस् न० आप-असुन् हृस्वश्च । कर्म्मणि निरु० । तहति च । "अपसा सन्तु नेमे" ऋ० १,५३,८, अपः कर्म्म तहन्तीति भा० "ग्लास्त्वाऽकृन्नपसोऽतन्वत" ता०ब्रा० । "अहन्यन्नीरपसोयन्त्यच्छा" ऋ० ७,७१,२ "अपसा कर्म्मयुक्ता" इति भा० । प्राग्ने त्रि० । "अध्याम कर्म्मापसा नवेन ऋ० १,३१,८, "अपसा प्राग्नेनेति" भा० ।

अपसद त्रि० अपकृष्ट इव सीदति सद-अच् । अधमे, नीचे च । "रेरे क्षत्रियापसदाः!" इति वेणी० । "विप्रस्य त्रिषु वर्णेषु क्षत्रियस्य द्वयोर्द्वयोः । वैश्यस्य वर्णे चैकस्मिन् अपेतेऽपसदाः स्मृता इति" मनूक्ते अनुलोमवर्णस्त्रीजाते वर्णसङ्करभेदे मूर्द्धावसिक्तादौ पुंस्त्री० । "ये द्विजानामपसदा ये चापध्वंसजाः स्मृता" इति मनुः ।

अपसम अव्य० समाया अव्ययः अव्ययी० । वत्सरात्मके तिङन्तद्रुगणपाठान्नैतस्य समासान्तरघटकता ।

अपसर पु० अप+सृ-भावे अच् । अपयाने, अपसरत्वात् स्वत्वम् अपादाने अच् । प्रतिपक्षक्रियादौ । "निरन्वयोऽनपसरः प्राप्तःस्याद्दौरकिल्बिषमिति" मनुः । "अपसरः प्रतिपक्षक्रियादिः" कुल्लूकभट्टः ।

अपसरण न० अप+सृ-भावे ल्युट् । अपयाने "इतोऽवसरणमेव श्रेय इति" नाटकम् "अपसरणतोह वा अग्ने देवा जयन्तोऽजयन्" इति "दिवमेवाग्ने अग्नेदमन्तरिक्षमग्नेतोऽनपसरणात् सपत्नानुदन इति च शत०ब्रा० १,६,१११ ।

अपसर्জ্জন न० अप+सृज-भावे ल्युट् । त्यागे, वर्জ্জने च । घञ् । अपसर्गोऽप्युक्तार्थे पु० ।

अपसर्प पु० अप+सृप-कर्त्तरि अच् । गुप्तचरे । "सर्पाधिराजोरुभुजोऽपसर्पं पप्रच्छ भद्रं विजितारिभद्रः" रघुः । "तयैवासर्पभूतया तव स्कन्धाग्रशेषमचोरयावः" इति दशकु० । भावे घञ् । अपसरणे । [गमने ।

अपसर्पण न० अप+सृप-भावे ल्युट् । अपयाने पृष्ठतो

अपसल त्रि० अप+सल-कर्त्तरि अच् । अपसव्यतामाप्ते । "यथाबालं पुरस्कृत्य यज्ञोपवीतानि अपसलानि कृत्वा तीर्थमवतीर्य्येति" शु०त० बौधा० । "अपसलानि अपसव्यानीति शुद्धितत्त्वे रघुनन्दनः ।

अपसलवि अव्य० अप+सल-वा० अवि । तर्জ्जन्यङ्गुष्ठमध्यस्थानरूपे पितृतीर्थे, "तर्जन्यङ्गुष्ठयोरन्तरा अपसलवि अपसव्यं वा तेन पितृभ्योनिदधाति" शु०त० स्मृत्यम् । "सव्येनैव पाणिना स्रुवतन्तुं गृहीत्वा अपसलवि पूर्व्वस्यां कर्व्यां पितृभ्यो निदध्यादिति" गोभिलः ।

(2) Vol I

अपसव्य न० अपक्रान्तं सव्यात् निरा०त०। १ देहदक्षिणभागे "तर्ज्जन्यङ्गुष्ठयोरन्तरा अपसव्यवि अपसव्यं वेति" २ स्मृत्युपरिभाषिते पितृतीर्थे च। अपगतं भग्नतया भूमौपातिततत्वात् सव्यं यत्र। भूमौ पातनेन भग्नप्रायवामाङ्गे अप वैपरीत्ये स्व-भावे यत् सव्यं गतिः। विपरीते त्रि०। "अपसव्यं ततः कृत्वा पितृणामाप्रदक्षिणमिति" याज्ञ०। "देवकर्म्मानन्तरं पितृकर्म्मकरणे प्राप्तवामोपचारनिरासायाप्रदक्षिणव्यापार" इति श्रा०त० रघु०। आभ्युदयिके हि "निपातो न हि सव्यस्य जानुनोविद्यते क्वचिदिति" श्रा० त० वह्निवोक्तेः भूमौ पातितवामजानूकरणाभावः। अतएव "नात्रापसव्यकरणं न पैत्रं तीर्थमिष्यते" इत्यादिना अपसव्यकरणनिषेधः स्मृपपन्नः। पितृतीर्थञ्च "यत्रानुक्तोविशेषस्तु दक्षिणस्तत्र शस्यते इति" स्मृतेः। दक्षिणहस्त एव। "प्राचीनावीतिना भाव्यमपसव्यमतन्द्रिणा। पितृमानिधनात् कार्य्यं विधिवद्दर्भपाणिना" इति मनुः।

अपसार पु० अप+सृ-णिच्-अच्। १ दूरीकरणे २ बहिष्करणे, ३ अपनयने ३ च। ल्युट्। अपसारणमप्यत्र न०।

अपसारित त्रि० अप+सृ-णिच्-क्त। १ उत्सारिते २ दूरीकृते च

अपसिद्धान्त पु० अपक्रान्तः सिद्धान्तात् निरा०त०। १ स्वीकृतसिद्धान्तात् स्खलनरूपे दोषभेदे, "सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्त इति" गो०सू०। सिद्धान्तं किञ्चिच्छास्त्रकाराभ्युपगतमर्थमभ्युपेत्य स्वीकृत्यानियमात् तद्विषयभङ्गकरणात् कथायां प्रसङ्गः स्वीकृतसिद्धान्तप्रच्यवोऽपसिद्धान्त इति तदर्थः। यथा सांख्यमतेनाहं वदिष्यामीत्यभ्युपेत्य कथायामारभ्यायां आविर्भावस्यातिर्भावाङ्गीकारेऽनवस्थेति दूषणे वादिनोद्भाविते प्रतिवादी यदा तद्दोषोद्धाराय आविर्भावस्यासतोऽपि सत्पत्तिमभ्युपैति तदा सत्कार्य्यवादिसांख्यमतविरुद्धाभिधायित्वेन स्वाभ्युपगतनियमातिक्रमात् स्वीकृतसिद्धान्तप्रच्यवरूपो दोषो भवति सएवापसिद्धान्तः एवमन्योऽप्युदाहार्य्यः। वितण्डावादिनः बौद्धभेदाश्च नापसिद्धान्तं दोषमङ्गीचक्रुः तेषां कस्यचित् सिद्धान्तस्यानङ्गीकारात्।

अपसोपान पु० अपक्रान्तः अतिक्रान्तः सोपानमाकारेण अत्वा०स०। १ हस्तिनखे।

अपस्कर पु० अप+कृ-अप् रथाङ्गे नि०सुट्। १ चक्रभिन्ने रथारम्भके अवयवभेदे। "अपस्करोरथाङ्गमिति" भा०। "कूबरञ्च रथस्यासीद्दासुकिर्भुजगोत्तमः। अपस्करमधिष्ठाने हिमवान् विन्ध्यपर्वत" इति भा०क०प० उक्तेः क्लीवमपि।

अपस्नात त्रि० अपगतं अमङ्गलार्थत्वात् स्नातः। १ मृतसङ्घिस्नाते जने। २ स्नानसंस्काराय स्थापिते मृते पुंस्त्री०क्लीव०

अपस्नान त्रि० अपक्रान्तः स्नानात् निरा०स०। १ स्नानावशिष्टे जले "उद्वर्त्तनमपस्नानं विष्णुक्षेरक्षमेव च। स्नेहनिष्ठ्यूतवान्तानि नाधितिष्ठेत्तु कामत" इति मनुः।

अपस्पश त्रि० अपगतः स्पशोगूढचरोयतः। १ गूढचरभृत्ये। "शब्दविद्येव नोभाति राजनीतिरपस्पशेति" माघः। शब्दविद्यापक्षे पस्पशा पातञ्जलभाष्यस्य नवाह्निकं २ तत्कर्त्तरीत्यर्थः।

अपस्मार पु० अपस्मारयति स्मरणं विलोपयति अप+स्मृ-णिच्-कर्त्तरि अच्, अपगतः स्मारः स्मरणं यतो वा। १ रोगभेदे। स च सुश्रुते दर्शितो यथा "स्मृतिर्भूतार्थविज्ञानमपचपरिवर्जने अपस्मार इति प्रोक्तस्ततोऽयं व्याधिरन्तकृत॥ मिथ्यादियोगेन्द्रियार्थकर्म्मणामतिसेवनात्। विरुद्धमलिनाहारविहारकृपितैर्मलैः। वेगनिग्रहशीलानामहिताशुचिभोजिनाम्। रजस्तमोऽभिभूतानां गच्छताञ्च रजस्वलाम्॥ तथा कामभयोद्वेगक्रोधशोकादिभिर्मनः। चेतस्यभिहते पुंसामपस्मारोऽभिजायते॥ संज्ञावहेषु स्रोतःसु दोषव्याप्तेषु मानवः। रजस्तमःपरीतेषु मूढो भ्रान्तेन चेतसा॥ विक्षिपन् हस्तपादौ च विजिह्मभ्रू र्विलोचनः। दन्तान् खादन् वमन् फेनं विक्रोशन् पतेत् क्षितौ॥ अल्पकालान्तरञ्चापि पुनः संज्ञां लभेत सः। सोऽपस्मार इति प्रोक्तः स च दृष्टश्चतुर्विधः॥ वातपित्तकफैर्दृष्टैराद्यैस्तैर्यः सन्निपाततः। हृत्कम्पः शून्यता स्वेदो ध्यानं मूर्च्छा प्रमूढता॥ निद्रानाशश्च तस्मिंस्तु भविष्यति भवन्त्यथ। वेपमानो दशेद्दन्तान् खादन् फेनं वमन्नपि॥ यो ब्रूयाद्विकृतं सत्वं छाया मामनुधावति। ततो मे चित्तनाशः स्यात्सोऽपस्मारोऽनिलात्मकः॥ त्रस्तापस्वेदमूर्च्छार्त्तोध्मानचञ्चलानि विह्वलः। यो ब्रूयाद्विकृतं सत्वं पीतं मामनुधावति॥ ततो मे चित्तनाशः स्यात्स पित्तभव उच्यते। शीतेच्छासनिद्रार्त्तः पतन् भूमौ वमन् कफम्॥ यो ब्रूयाद्विकृतं सत्वं शुक्लं मामनुधावति। ततो मे चित्तनाशः स्यात्सोऽपस्मारः कफात्मकः॥ हृदि तोदस्तृडुत्क्लेदश्लिष्यमेतेषु संस्थया। प्रलापः कूजनं क्लेशः प्रत्येकन्तु भवेदिह॥ सर्व्वलिङ्गसमावायः सर्व्वदोषप्रकोपजे। अनिमित्तागमाद्व्याधेर्गमनादृतेऽपि च॥ आगमाच्चाप्यपस्मारं वदन्त्यन्ये न दोषजम्। क्रमोपयोगाद्दोषाणां चिरकत्वात्तथैव च॥ आगमाद्दैवरूपाच्च स तु निर्वर्त्यते बुधैः। वर्त्तन्त्यपि यथा देवे भूमौ बीजानि कानिचित्॥ यदि प्रतिरोहन्ति तथा व्याधिसमुद्भवः। स्यायिनः केचिदल्पेन

कालेनाभिप्रवर्द्धिताः ॥ दर्शयन्ति विकारांस्तु विश्वरूपाद्विसर्गतः । अपस्मारो महाव्याधिस्तस्माद्दोषज एव तु" इति॥ "धूर्त्तोऽपस्माररोगी स्यादिति" याज्ञा० कर्म्म० । "अपस्मारादिरोगाणां ज्वरादीनां विशेषत इति" वटुकस्तोत्रम् ।

अपस्मारिन् त्रि० अपस्मार+अस्त्यर्थे इनि । १ अपस्माररोगयुक्ते । स्त्रियां ङीप् ।

अपस्य त्रि० अपसि कर्म्मणि साधुः अपस्+यत् । १ साधुकर्म्मकारिणि "अनाहुता अपस्योषसाना" इति "यजु० १०,७, अपस्याः अपसि कर्म्मणि साध्व्यः" वे० दी० । "अपरेण खयमाहरणमेत्यापस्याः पञ्च पञ्चानूकान्लेप्वपामिति" का० १७, ६,२, अपस्यास्तत्संज्ञका इष्टकाभेदा इति वेददी० ।

अपस्यु त्रि० अपः कर्म्मेच्छति अपस्+अच्-उ । १ कर्म्मेच्छौ "गिरयो सबन्धवः पञ्चाङ्गाता अपस्यव" इति ऋ० ६,१४,२

अपह त्रि० अप+हन-"अमे क्लेशतपसोः" पा० ड । १ अपघातकर्त्तरि । क्लेशापहः पुत्रः तपोऽपहः सूर्य्यः । योगविभागादत्रापि "सुपरीक्षितमन्त्राद्यमद्याद्यान्नर्त्विषापहैरिति" मनुः

अपहत त्रि० अप+हन-क्त । १ विनाशिते "योऽयमात्माऽपहतपाप्मेति" श्रुतिः ।

अपहति स्त्री अप+हन-क्तिन् । १ नाशने । "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति" छा० उ० ।

अपहर त्रि० अप+हृ-कर्त्तरि अच् । १ अपहरणकर्त्तरि "भद्रं भवेद्भवभयापहरं नृलोके" इति हेमा० भवि० पु० ।

अपहरण न० अप+हृ-ल्युट् । १ स्तेये साधारणस्य परकीयस्य वा धनादिचौर्य्ये । "सीताद्रव्यापहरणे राक्षसानामयोधस्य चेति" "निक्षेपस्यापहरणं नराश्वरजतस्य चेति" "भक्ष्यभोज्यापहरणे यानशय्यासनस्य च" इति च मनुः स्तेयस्वरूपञ्च स्मृतौ दर्शितं यथा "उपायैर्विविधैरेषां छलयित्वापकर्षणम् सुप्रमत्त प्रमत्तेभ्यः स्तेयमाददमनोषिणः" इति नार० । "स्यात् साहसं त्वन्वयवत् प्रसभं कर्म्म यत् कृतम् । निरन्वयं भवेत् स्तेयं कृत्वापह्नुयते च यदिति" मनुः । "अन्वयवद् द्रव्यरक्षिराजाध्यक्षादिसमक्षं प्रसभं बलावष्टम्भेन यत् परधनहरणादिकं क्रियते तत् साहसं, स्तेयन्तु तद्विलक्षणं निरन्वयं द्रव्यस्वाम्याद्यसमक्षं वञ्चयित्वा यत् परधनहरणं तदुच्यते यच्चान्वयमपि कृत्वा न मयेदं कृतमिति भयात् निह्नुते तदपि स्तेयमिति" मिताक्षरा । तच्च साधारणस्य परकीयस्य वा हरणम् "सामान्यद्रव्यप्रसभहरणात् साहसं स्मृतमिति" याज्ञ० उक्तेः । तच्च परकीये साधारणे वा द्रव्ये स्वत्वहेतुभूतलौकिकव्यवहारातिक्रमेच्छादिकमूलरेव स्वत्वापादनं हरणम् तदेव बलपूर्व्वकं साहसमिति भेद इति मिताक्षरादिमतम् दायभागमते तु साधारणद्रव्यस्य नापहरणं परमात्मस्वत्ववद्द्रव्यस्यैवापहरणमिति तत्रोक्तेरिति विशेषः । २ बलादपकर्षणे च । "निर्विशोऽतिममत्वेन राज्यापहरणेन चेति" देवी भा० ।

अपहरणीय त्रि० अपहर्त्तुमर्हति अप+हृ-अनीयर् । १ अपहरणयोग्ये तानि वस्तूनि च स्मृतौ दर्शितानि । "द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविमौ हे च मूलके । आददानः परक्षेत्रात् दण्डं दातुमर्हति" मनुः । "चणकव्रीहिगोधूमयवानां क्षुद्रभावयोः । अनिश्चितैर्यदीतव्या सृष्टिरेका पथि स्थितैरिति" "तत्रैव सप्तमे भक्ते भक्तानि षडनश्नता । अश्वस्तनविधानेन हर्त्तव्यं हीनकर्म्मणः इति" च मनुः । "द्विजस्तूभैः पुष्पाणि सर्व्वतः स्वयमाहरेदिति" याज्ञ० । "गोऽन्यर्थं तृणमेधांसि यज्ञार्थं वीरुदनस्पतीनां पुष्पाणि स्वयमाददीत फलानि चेति" गौ० । २ अपनेतव्ये च ।

अपहर्त्तृ त्रि० अप+हृ-तृच् स्त्रियां ङीप् । १ अपहारके । "निक्षेपस्यापहर्त्तारं तत्समं दापयेद्दममिति" मनुः । अत्र तु नलोकेत्यादिना पा० षष्ठीनिषेधात् कर्म्मणि द्वितीया ।

अपहस्त पु० अपसारणार्थः हस्तः । १ गलहस्ते अपसारणायोद्यतः हस्तोयस्य । २ गलहस्तेन अपसारिते त्रि० ।

अपहस्तित त्रि० हस्तेन अपसार्यते अप+हस्त+णिच्-कर्म्मणि क्त । १ गलहस्तादिना निरस्ते अपसारिते ।

अपहार पु० अप+हृ-घञ् । १ चौर्य्ये २ अपहरणे, ३ अपनयने । "कर्णनासापहारेण भगिनी मे विरूपितेति" रामा० स्वाम्यनुपकारिधनव्यये "नापहारं स्त्रियः कुर्य्युः पतिरिक्थात् कथञ्चनेति" स्मृतिः । "अपहारश्च धनस्वाम्यनुपयोगे भवतीति" दायभागः । ४ अपचये, ५ हानौ, ६ सङ्कोचने च ।

अपहारक त्रि० अप+हृ-ण्वुल् । १ चौर्य्यकर्त्तरि २ अपसारणकर्त्तरि ३ सङ्कोचके ४ स्थानान्तरापकर्षके च । "जालापहारकान् पक्षिण" इति हितो० । अपहारकभेदाश्च मनुना दर्शिताः "द्विविधांस्तस्करान् विद्यात् परद्रव्यापहारकान् । प्रकाशाश्चाप्रकाशाश्च चारचक्षुर्महीपतिः । प्रकाशवञ्चकास्तेषां नानापण्योपजीविनः । प्रच्छन्नवञ्चकास्तेते ये स्तेनाटविकादयः । उत्कोचकाश्चोपधिकावञ्चकाः कितवास्तथा । मङ्गलादेशवृत्तास्तु भद्रार्थैश्चरणैः सह । असम्यक्कारिणश्चैव महामात्राश्चिकित्सकाः । शिल्पोपचारयुक्ताश्च निपुणाः पण्ययोषितः । एवमादीन् विजानीयात् प्रकाशांश्चौरकरकटकान् । "निगूढचारिणश्चान्यानर्थानर्थलिङ्गिन" इति ।

अपहारिन् त्रि० अप+हृ-णिनि स्त्रियां ङीप् । १ अपहर्त्तरि २ अपनायके च "इन्द्रियाणां विचरतां विषयेष्वपहारिषु" इति मनुः "क्षेत्रदारापहारी च षण्ढेते हृततल्पिन" इति मनुः

अपहास पु० अप+हस-घञ् । १ अकारणहास्ये हेमचन्द्रः ।

अपह्नव पु० अप+हृ-अप् । १ सतोऽपि वस्तुनोऽसत्त्वेन कथनरूपेऽपलापे, । अपह्नाय द्विविधः यद्वतः अर्थतोवा "मिथ्यैतदिति यद्वतः, नाभिजानाम्यहं, तत्र तदा न मम स्थितिरित्येवमर्थतोऽपह्नव इति । २ प्रेमणि च ।

अपह्नुत त्रि० अप+ह्नु-क्त । १ ज्ञातापहारे वस्तुनि वस्त्र चौर्य्ये कृतं तस्मिन्, २ स्थानान्तरं नीते, ३ अपसारिते च ।

अपह्नुति स्त्री अप+ह्नु-क्तिन् । १ अपह्नवे "प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिरिति" सा०द० उक्ते २ अर्थालङ्कारभेदे च । सा च द्विधा अपह्नवपूर्व्वकः अन्यारोपः, अन्यारोपपूर्व्वकः अपह्नवश्च यथा "नेदं नभोमण्डलमम्बुराशिर्नैताश्च तारा नवफेनभङ्गाः । नायं शशी कुण्डलितः फणीन्द्रो नासौ कलङ्कः शयितो मुरारिः" ॥ "एतद्विभाति चरमाचलचूडचुम्बि हिण्डीरपिण्डरुचिगीतमरीचिबिम्बम् । उज्ज्वालितस्य रजनीं मदनानलस्य धूमं दधत्प्रकटलाञ्छनकैतवेन" ॥ "विराजते व्योमसरः पयोधिस्तारामयाश्चात्र च फेनभङ्गाः" । इत्याद्याकारेण प्रकृतनिषेधो बोद्धव्यः । "गोपनीयं कमप्यर्थं द्योतयित्वा कथञ्चन । यदि ह्रीषेणान्यथा वाऽन्यत्रवेत् साप्यपह्नुतिः" सा०द० तत्र ह्रीषेण यथा ॥ "काले वारिधराणामपतितया नैव भक्ष्यते स्रातुम् । उत्कण्ठितासि तरले ! न हि न हि सखि ! पिच्छिलः पन्थाः" ॥ अत्रापतितवेत्यत्र पतिं विनेत्युक्ता पतनाभावेनेत्यन्यथाकृतम् । अन्यत्रवेण यथा । "इह पुरोऽनिलकम्पितविग्रहा मिलति का न वनस्पतिना लता । स्मरसि किं सखि ! कान्तरतोत्सवं ! न हि घनाममरीतिरुदाहृता" इति ॥

अपह्नुवान त्रि० अप+ह्नु-शानच् । १ चोरयति २ अपनयति ३ संगोपयति च "अपह्नुवानस्य जनाय यच्चिजामिति" नैष०

अपह्नूयमान त्रि० अप+ह्नु-कर्म्मणि शानच् । १ अपनीयमाने २ स्थानान्तरमपसार्य्यमाणे ३ चौर्य्यमाणे च ।

अपह्रियमाण त्रि० अप+हृ-कर्म्मणि शानच् । १ चौर्य्यमाणे । २ अपाक्रियमाणे च ।

अपांक्त्य पु० ईत० अलुक् स० । १ नेत्रे । अक्ष्णोजलधरत्वात्तथात्वम् "अपांक्त्ये चक्षुषि, त्वां सादयामि "चक्षुर्वा अपांक्त्य इति" श्रुतिः यजुर्वेददीपः । पदद्वयमित्येके ।

अपांज्योतिस् न० ईत० अलुक्स० । १ विद्युत्सुता हि अप्सु क्षियन्ति "अपांज्योतिषि विद्युति त्वां सादयामि" "विद्युद्वा अपांज्योतिरिति" श्रुतिः वे०दी० पदद्वयमित्येके

अपांनपात् पु० न पातयति पत-णिच्-क्विप् न०त० "न भाक्ष्नपादिलो०" पा० प्रकृतिभावः अलुक्स० । १ यज्ञ देवताभेदे । "अपोनपात् अपांनपाच्च देवतेति" सि०कौ० । "अपोनपाते अपांनपातेऽनुब्रूहीति" प्रैष्यः ।

अपांनप्त्र(प्त्री)य त्रि० अपांनपात् देवताऽस्य घ, ढ वा । १ अपांनपाद्देवताके हविरादौ ।

अपांनाथ पु० ईत० अलुक् स० । १ समुद्रे ।

अपांनिधि पु० निधीयतेऽस्मिन् नि+धा-आधारे कि ईत० अलुक्स० । १ समुद्रे, २ विष्णौ च "अपांनिधिरविज्ञानमप्रमत्तः प्रतिष्ठित इति" विष्णुसह० । "सरितामस्मि सागर" इति गीतोक्तेरस्य तथात्वम् । [२ वरुणे च ।

अपांपति पु० पा-डति ईत० अलुक् स० । १ समुद्रे,

अपांपाथस् न० पाथः सारः ईत० अलुक्स० । १ अन्ने तस्य हृद्यप्रभवत्वात्तथात्वम् "हृदेरन्नं ततः प्रजेति" गीतायां तथोक्तेः । "अपांपाथसि अन्ने त्वां सादयामि" "अन्नं वा अपांपाथ" इति श्रुतिः वे०दी० । पदद्वयमित्येके ।

अपांपित्त न० ईत० वा अलुक् स० । १ अग्नौ, तस्य जलहेतुत्वात् तत्पित्तत्वम् "आकाशाद्वायुर्वायोरग्निरग्नेरापः" इति श्रुतौ तस्य तथात्वावगतेः । वा लुकि अप्पित्तमप्यत्र ।

अपांपुरीष न० पुरीषं मलः ईत० अलुक्स० । १ सिकतासु, तासां जलमलरूपत्वात्तथात्वम् "अपांपुरीषे सितकासु त्वां सादयामि "सिकता वा अपां पुरीषमिति श्रुतिः" वेददी०

अपांयोनि स्त्री ईत० अलुक्समा० । १ समुद्रे "अपांयोनौ समुद्रे" इति वेददी० "समुद्रोवै अपांयोनिरिति" शत० ब्रा० पदद्वयमित्येके ।

अपांशु(सु)ला स्त्री पांशु(सु)वोऽभिचारदोषाः सन्ति यस्याः विषo छच् पांशु(सु)ला स्त्रैरिणी न०त० । १ पतिव्रतायां स्त्रियाम् "अपां(सु)गुलानां धुरि कीर्त्तनीयेति" रघुः ।

अपांसदन न० अलुक्स० । १ दिवि "दिवि ह्यापः सन्ना इति" शत०ब्रा० । भिन्नं पदमित्येके ।

अपांसधस्थ पु० ईत० अलुक्स० । १ अन्तरिक्षे "अपांसधस्थे अन्तरिक्षे" वेददी० "अन्तरिक्षं वा अपांसधस्थमिति" शत०ब्रा० । भिन्नं पदमित्येके ।

अपांसधिम् न० ईत० अलुक्स० । १ श्रोत्रे "अपांसधिषि श्रोत्रे" वेददी० । "श्रोत्रं वा अपांसधिरिति" शत०ब्रा० ।

अपांसमुद्र पु० समुद्रः सदनम् ई॰ अलुक्स०। १ मनसि "मनो वा अपां समुद्र" इति शत०ब्रा०।

अपाक पु० पच-घञ न०त०। १ पाकाभावे, भुक्ताद्यादेरग्निमान्द्यादिना २ पाकाभावे च। ७व०। तत्साधनेऽजीर्णतारोगे। ईव०। पाकरहिते आमे त्रि०। ४ मूर्खः पाकः ५तद्विज्ञे, प्राज्ञे "ऐतनापाकाः प्राज्ञोन केचिदापय" इति ऋ० १,११०२, अपाकाः। पक्वव्यप्रज्ञाःअपरिपक्वज्ञाना इति भा०। "अदिद्युतत् स्वपाको विभावाग्ने ऋ० ६,११,। पाकः पक्वव्यप्रज्ञोमूर्खस्तद्विलक्षण इति" भा० "आ यस्मिन् त्वे स्वपाके यजत्रा" ऋ० ६,१२,२, "अपाके प्राज्ञे" इति भा० "पाकः पक्वव्य" इति निरु०। पाकश्च द्विविधः लौकिकः अलौकिकश्च तत्र लौकिकः दहनादिसाध्यः अलौकिकस्तु द्विविधः कालजतपरिणतिभेदः जठराग्निसाध्यश्च तत्र तण्डुलादेः पाकः लौकिकः, आम्रफलादेः कालजतः, भुक्ताद्यादेः जठराग्निजतः वैद्यकप्रसिद्धः। स च सुश्रुते दर्शितः "विपाकः प्रधानमिति" कस्मात्? सम्यङ्मिथ्याविपाकत्वादिह सर्व्वद्रव्याण्यभ्यवहृतानि सम्यग्मिथ्याविपक्वानि गुणं दोषं वा जनयन्ति। तस्माद्धरन्ये प्रतिदर्शं पाक इति। केचित्त्रिविधमिच्छन्ति मधुरमम्लं कटुकं चेति तत्तु न सम्यगनूत्तगुणादागमाच्चाम्लो विपाको नास्ति पित्तं हि विदग्धमम्लतासुपैत्यग्नेर्मन्दत्वात्। यद्येवं लवणोऽप्यन्यः पाको भविष्यति श्लेष्मा हि विदग्धो लवणतासुपैति मधुरो मधुरस्याम्लोऽम्लस्यं सर्व्वेषामिति केचिदाकुर्द्दृष्टान्तं परिदिशन्ति यथा तावत् क्षीरं स्थालीगतमभिपच्यमानं मधुरमेव स्यात्तथा शालियवसङ्गादयः प्रकीर्णाः स्वभावसुत्तरकालेऽपि न परित्यजन्ति तद्वदिति। केचिद्वदन्त्यबलवन्तो बलवतां वशमायान्तीत्येवमनवस्थितिस्तस्मादसिद्धान्त एषः। आग्नेये हि द्विविध एव पाकोमधुरः कटुकश्च तयोर्मधुराम्लोगुरुः कटुकाम्लो लघुरिति तत्र पृथिव्यग्नेयोर्वायुकाशानां द्वैविध्यं भवति गुणसाधर्म्यादृगुरुता लघुता च पृथिव्यापश्च गुर्व्यः, शेषाणि लघूनि, तस्माद्द्विविध एव पाक इति। भवन्ति चात्र।

द्रव्येषु पञ्चभूतेषु येऽम्ल पृथिवीगुणाः। निर्व्वर्त्तनेऽधिकास्तत्र पाको मधुर उच्यते॥ तेजोऽनिलाकाशगुणाः पञ्चभूतेषु ये तु ते। निर्व्वर्त्तनेऽधिकास्तत्र पाकः कटुक उच्यते॥ पृथक्त्वदर्शिनामेव वादिनां वादसंग्रहः। चतुर्णामपि सामर्थ्यमिच्छन्त्यत्र विपश्चितः॥ तदुद्रव्यमात्मना किञ्चित् किञ्चिद्वीर्य्येण सेवितम्। किञ्चिद्रसविपाकाभ्यां दोषं घ्नन्ति करोति वा॥ पाको नास्ति विना वीर्य्याद्वीर्य्यं नास्ति विना रसात्। रसो नास्ति विना द्रव्याद्द्रव्यं श्रेष्ठमतः स्मृतम्॥ जन्म तु द्रव्यरसयोरन्योऽन्यापेक्षकं स्मृतम्। अन्योऽन्यापेक्षकं जन्म यथा स्याद्देहदेहिनोः॥ वीर्य्यसंज्ञा गुणा येऽष्टौ तेऽपि द्रव्याश्रयाः स्मृताः। रसेषु न यतस्ते तु निर्गुणास्तु गुणाः स्मृताः॥ द्रव्ये द्रव्याणि यस्माद्धि विपच्यन्ते न षड्रसाः। श्रेष्ठं द्रव्यमतो ज्ञेयं शेषा भावास्तदाश्रयाः॥ अमीमांस्यान्यचिन्त्यानि प्रसिद्धानि स्वभावतः। आगमेनोपयोज्यानि भेषजानि विचक्षणैः" इति॥ तदुभयाभावः अपाकः। वैद्यकोक्तापाकलक्षणसङ्गं निदाने "अङ्गमर्द्दोऽरुचिस्तृष्णा आलस्यं गौरवं ज्वरः॥ अपाकः शून्यताङ्गानामामवातस्य लक्षणमिति"। गात्रप्रदेशे क्वचिदेव दोषाः संमूर्च्छिता मांसमसृक् प्रदुष्य, दृढं स्थिरं मन्दरुजं महान्तमनल्पमूलं चिरद्वयपाकमिति" माधवः। पाकः अल्पः ई तद्विज्ञे त्रि०। "सेनयाग्नेरपाकचक्षस" इति ऋ० ८।७५।७। "अपाकचक्षसः अनल्पचक्षस" इति भा०। अधिकं पाकशब्दे वक्ष्यते।

अपाकज त्रि० न पाकाज्जायते जन-ड न०त०। १ पाकजभिन्ने "अपाकजानुष्णाशीतः स्वर्गस्तु पवने मत" इति भाषा०।

अपाकरण न० अप+आ+कृ-ल्युट्। १ निराकरणे। "तदपाकरणायाहेति" प्रश्न०उ०भा०। "कण्डूयायापाकरणाद्वास्यपवर्ग इति" गौ०सू० अपसारणे, दूरीकरणे च। "निधाय वत्सापाकरणं पूर्व्ववदिति" का० ४१२।३५।

अपाकरिष्णु त्रि० अप+आ+कृ-वा० ष्णुच्। १ दूरीकरणशीले २ अपसारणशीले।

अपाकर्त्तोस् अव्य० अप+आ+कृ-तुमर्थे तोसुन्। १ अपाकर्त्तव्ये तस्य च भावलक्षणत्वमौपाधिकम्।

अपाकर्म्मन् न० अप+आ+कृ मनिन् निरासे।

अपाकशाक पु० न पच्यते शाको यस्य। १ आर्द्रके। तस्य मूलमेव भोजनार्थं पच्यते न शाकः।

अपाकिन् त्रि० न पाकोऽस्यस्य इनि। १ पाकशून्ये अपाके।

अपाकृत त्रि० अप+आ+कृ-क्त। १ निवारिते २ दूरीकृते "अपाकृतस्वेदलवामरुद्भिरिति" रघुः। [२ अपसारणे च।

अपाकृति स्त्री अप+आ+कृ-भावे क्तिन्। १ दूरीकरणे।

अपाकृत्य अव्य० अप+आ+कृ-ल्यप्। १ निराकृत्येत्यर्थे "कण्डूयमपाकृत्य मनोमोहे निवेशयेदिति" मनुः।

अपाक्रिया स्त्री अप+आ+कृ-भावे श। १ अपाकरणे २ अपसारणे "कण्डूयानामपाक्रियेति" उपपातकगणनयां स्मृतिः

अपाक्तात् अव्य० अपाची अवाची प्रतीची वा बा० तातिल् । अवाच्याः २ प्रतीच्या वा इत्यर्थे "प्राक्तादपाक्तादधरादुदक्तादभि ऋ० ७,१०४।१६ । अपाक्तात् प्रतीच्या इति भा० ।

अपाच न० अपगतमनुगतमञ्चमिन्द्रियम् अत्या० स० । १ इन्द्रियसन्निकर्षजे प्रत्यक्षे २ तद्विषये त्रि० त्रिका० ।

अपाङ्क्तेय त्रि० सह्निः सह भोजने पङ्क्तिमर्हति अर्हार्थे ढक् न०त० । १ सह्निः सह एकपङ्क्तौ भोजनानर्हे स्तेनपतितादौ । अत्र व्यञ्जि अपाङ्क्त्य इत्यपि । ते च मनौ दर्शिताः यथा "ये स्तेनपतितक्लीबा ये च नास्तिकवृत्तयः । तान् हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत् ॥ जटिलं चानधीयानं दुर्बलं कितवं तथा । याजयन्ति च ये पूगांस्तांश्च श्राद्धे न भोजयेत् ॥ चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा । विपणेन च जीवन्तोवर्ज्याः स्युर्हव्यकव्ययोः । प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः । प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्द्धुषिस्तथा ॥ यक्ष्मी च पशुपालश्च परिवेत्ता निराकृतिः । ब्रह्मद्विट् परिवित्तिश्च गणाभ्यन्तर एव च ॥ कुशीलवोऽवकीर्णी च इषलीपतिरेव च । पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे ॥ भृतकाध्यापको यश्च भृतकाध्यापितस्तथा । शूद्रशिष्यो गुरुश्चैव वागुदुष्टः कुण्डगोलकौ ॥ अकारणपरित्यक्ता मातापित्रोर्गुरोस्तथा । ब्राह्मैर्योनैश्च सम्बन्धैः संयोगं पतितैर्गतः ॥ अगारदाही गरदः कुण्डाशी सोमविक्रयी । समुद्रयायी वन्दी च तैलिकः कूटकारकः ॥ पित्रा विवदमानश्च कितवो मद्यपस्तथा । पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयी ॥ धनुःशराणां कर्त्ता च यश्चाग्नेदिधिषूपतिः । मित्रध्रुग्द्यूतवृत्तिश्च पुत्राचार्यस्तथैव च ॥ भ्रामरी गण्डमाली च श्वित्र्यथो पिशुनस्तथा । उन्मत्तोऽन्धश्च वर्ज्याः स्युर्वेदनिन्दक एव च ॥ क्षत्रियोऽवोढ्दमको नक्षत्रैर्यश्च जीवति । पक्षिणां पोषको यश्च युद्धाचार्यस्तथैव च ॥ स्रोतसां भेदको यश्च तेषां च पोषणे रतः । स्तेनसंवेशको दूतो दुष्टारोपक एव च ॥ अक्रीड़ी श्येनजीवी च कन्यादूषक एव च । हिंस्रो इषलवृत्तिश्च गणानां चैव याजकः ॥ आचारहीनः क्लीबश्च नित्यं याचनकस्तथा । ऋणजीवी स्त्रैपदी च सद्भिर्निन्दित एव च ॥ औरभ्रिको माक्षिकः परपूर्वापतिस्तथा । प्रेतनिर्हारकश्चैव वर्जनीयाः प्रयत्नतः ॥ एतान् विगर्हिताचारानपाङ्क्तेयान् द्विजाधमान् । द्विजातिप्रवरोविद्वानुभयत्र विवर्जयेत् । ब्राह्मणस्त्वनधीयानस्तृणाग्निरिव शाम्यति । तस्मै हव्यं न दातव्यं न हि भस्मनि हूयते ॥ अपाङ्क्तदाने यो दातुर्भवत्यूर्द्धं फलोदयः । दैवे हविषि पित्र्ये वा तत्प्रवक्ष्याम्यशेषतः ॥ अत्रैतैर्द्विजैर्भुक्तं परिवेक्त्रादिभिस्तथा । अपाङ्क्तैर्यदन्यैश्च तद्वै रक्षांसि भुञ्जते" इति ॥

अपाङ्क्त्र त्रि० न पङ्क्तिमर्हति अ न०त० । १ अपाङ्क्तेये । "अपाङ्क्तदाने योदाहरिति" मनुः ।

अपाङ्ग पु० अपाङ्गति तिर्य्यक् चलति नेत्रं यत्र अप+अङ्ग घञ् । १ नेत्रप्रान्ते, "अञ्जनि पङ्गुरपाङ्गनिलाङ्गणभ्रमिकणेऽपि तदीक्षणखञ्जन" इति नैष० २ तिलके च । अपगतमङ्गं यस्य प्रा० व० । ३ अङ्गहीने त्रि० स्त्रियां ङीप् ।

अपाङ्गक पु० अपगतमङ्गं यस्य वा कप् । (आपाङ्) इति ख्याते अपामार्गे । स्वार्थे कन् १ नेत्रान्ते पु० । २ अपगताङ्गे त्रि० ।

अपाङ्गदर्शन न० अपाङ्गेन नेत्रान्तेन दर्शनं ३त० । १ कटाक्षे

अपाङ्गनेत्र न० अपाङ्गं देशं व्याप्य नेत्रम् । १ दीर्घनेत्रे ।

अपाच् त्रि० अपाञ्चति अप+अञ्चु–क्विप् । १ अपगमनकर्त्तरि २ अप्रकाशार्थे च । स्त्रियां ङीप् । सा च ३ दक्षिणस्यां दिशि, ४ प्रतीच्यामिति वेदभाष्ये माधवः । "प्राक्तादपाक्तादधरादिति ऋ० ७,१०४,१६ "अपाक्तात् प्रतीच्या" इति तेन व्याख्यानात् । तत्र पदान्तरेण दक्षिणप्रतीतेरपाक्शब्दस्य प्रतीच्यां लक्षणैव न तत्रशक्तिरिति तु युक्तम् ।

अपाचीन त्रि० अपाच्यां दक्षिणस्यां भवः ख । १ दक्षिणदिग्भवे २ अप्रकाशमाने च । "योऽपाचीने तमसि मदन्तीरिति" ऋ० ७,६,४, "अपाचीने अप्रकाशमाने" भा० ।

अपाच्य त्रि० अपाच्यां भवः "दिशोऽमद्राणामित्या०" पा० यत् । १ दक्षिणदिग्भवे पदार्थे "ये के च नीच्यानां राजानो ये अपाच्यानामिति" ऐत० ब्रा० ।

अपाटव न० पाटवं पटुता पटु+भावेऽण् नास्ति तद्यत्र । १ रोगे । न०त० । २ पटुताभावे "अपाटवाद्यशौचाद्यैर्यदि विघ्नं प्रजायते" इति स्मृतिः । ३ त० । ३ पटुतान्यूने त्रि० ।

अपात्त त्रि० अप+आ+दा–क्त । १ प्राप्ते । "सहोवाच विज्ञायते नास्ति हिरण्यस्यापात्तमिति" छ० उ० । "अपात्तं प्राप्तमिति" भा० ।

अपात्र न० पात्रं श्राद्धभोजनदानादियोग्यं न०त० । १ विद्यादिहीनेऽनाचारे, २ दानादियोग्यताहीने कुपात्रे, नटादौ च । दानादिपात्रञ्च पात्रशब्दे दर्शयिष्यते । "अदेशकाले यद्दानमपात्रेभ्यश्च दीयते । असत्कृतमवज्ञातं तत्तामसमुदाहृतमिति" गीता "अपात्रेषु च यद्दत्तं तत् सर्वं विफलं भवेदिति" स्मृतिः "अपात्रे पात्रमित्युक्ते कार्य्ये वा धर्म्मसंहिते" इति मिताक्षरायां नारदः ।

अपाचीकरण न० अपात्रं श्राद्धभोजनाद्ययोग्यं क्रियतेऽनेन। १ निन्दितप्रतिग्रहादिजनिते "निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम्। अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणं" मिति मनूक्ते पापभेदे २ तद्धेतुभूते निन्दितधनादानादौ च।

अपाद् त्रि० नास्ति पादोऽस्य अन्यलोपः समा०। १ पादशून्ये "अपादपाणिर्जवनोग्रहीतेति" श्रुतिः।

अपादान न० अपगमाय आदीयतेऽवधित्वेन अप+आ+दा-ल्युट्। "ध्रुवमपायेऽपादानमिति" १ व्याकरणपरिभाषिते कारकभेदे। यथोक्तं हरिणा "अपाये यदुदासीनं चलं वा यदि वाऽचलम्। ध्रुवमेवातदावेशात्तदपादानमुच्यते" यत एतोध्रुव एवार्थो यस्मादस्मात् पततत्यसौ। तस्माध्रुवस्य पतने कृद्यादि ध्रुवमुच्यते। भेदान्तरक्रियापेक्षमवधित्वंपृथक् पृथक्। भेदयोः स्वक्रियापेक्षं कर्तृत्वञ्च पृथक् पृथक्" इति तच्चापादानं त्रिविधम्। "निर्दिष्टविषयं किञ्चिदुदासीनविषयं तथा। अपेक्षितक्रियञ्चेति त्रिधापादानमिष्यते" इति हर्युक्तेः। निर्दिष्टः श्रूयमाणो विषयो यस्य तत्, स्वापेक्षितश्रूयमाणक्रियमित्यर्थः यथा वृक्षात् पत्रं पततीत्यादौ, अपादानविषयीभूतं पतनं हि तत्र श्रूयमाणम्। द्वितीयम् उपात्तः गृहीतः धात्वन्तरार्थघटकीभूत इति यावत् विषयो यस्येति व्युत्पत्त्या स्वविषयक्रियाघटितश्रूयमाणक्रियान्तरमित्यर्थः यथा मेघात् विद्योतते विद्युदित्यादौ निःसरणपूर्वकविद्योतनार्थविद्योतितियोगे मेघादेस्तदेकदेशे निःसरणेऽपादानत्वम्। अपेक्षितक्रियं त्रयीयं यथा कुतो भवानिति प्रश्नवाक्ये, पाटलिपुत्रादिल्युत्तरवाक्ये च कुत इति पाटलिपुत्रादित्वनयोरपेक्षितगत्यादिक्रियापेक्षत्वात् अपेक्षितक्रियापादानत्वम्। "अपादाने पञ्चमीति पा०।

अपान पु० अपानयति अपसारयति मूत्रादि अप+आ+नी-ड अपसारयति अधोऽनिति गच्छति वा अप+अन-अच् वा १ मूत्रादेरधो नयनशीले, शुक्रादेरुत्सर्गे "अधोनयनत्यागस्तु आहारश्च यथा पुनः" तिलुक्षणयुते "मूत्रशुक्रवहोवायुरपान इति कीर्त्यते" इत्यक्षणयुते च वायौ। "प्राणोऽपानव्यानसमान इत्येतेत सर्वं प्राण" इति श्रु० "अपनयनात् मूत्रपुरीषादेरपानोऽधोऽनित्तिर्वायुः नाभिस्थान" इति भा० "अथ योऽयं मध्यङ् शुचिः सोऽपान" इति छा० उ०। "अथ योऽयं मध्यङ् शुचिः पश्चिमदिक्थो वायुविशेषः स मूत्रपुरीषाद्यधोऽनित्तिर्वायुः" इति भा० "यद्वै प्राणिति स प्राणः यदपानिति सोऽपान इति" छा० उ०। "यद्वै पुरुषः प्राणिति मुखनासिकाभ्यां वायुं वह्निर्निस्सारयति स प्राणाख्यो वायुर्वायुवृत्तिविशेषः यदपानित्यपश्यमिति ताभ्यामेव मुखनासिकाभ्याम् अन्तराकर्षति वायुः सोऽपानोऽपानाख्या वृत्तिरिति" भा०। पदार्थादर्शे तु पूर्व्वोक्तैव निरुक्तिर्दर्शिता यथा अपानयत्यपानोऽयमाहारं च मलार्पितम्। "शुक्रं मूत्रं तथोत्सर्गमपानस्तेन मारुतः। इन्द्रगोपप्रभाकारः सन्ध्याजलदसन्निभः॥ स च मेढ्रे च पायौ च ऊरुवङ्क्षणजानुषु। जङ्घोदरे कक्षाद्याश्च नाभिमूले च तिष्ठती" ति योगार्णवः। "प्राणापानान्तरे देवी वाग्वै नित्यं प्रतिष्ठतीति" महा० भा० "प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणा" विति गीता। अप+अन-भावे घञ्। २ अपानक्रियायाम् वह्निर्गतायाः ३ प्राणवृत्तेरन्तः प्रवेशने पु० "प्रजाभ्योऽपानायेति" ता०ब्रा०। "अपानः वह्निर्गतायाः प्राणवृत्तेरन्तःप्रवेशनमपाननं तेन हि वायुः शरीरे नीयते अपानेन, यतः "प्राणो न पराभवतीति" श्रुत्यन्तरमिति" ता०भा०। आधारे घञ् ४ गुह्यस्थाने पु०।

अपानन न० अप+अन-भावे ल्युट्। १ अपश्वसने, मुखनासिकाभ्यां वह्निर्निस्सारिप्राणवायोस्ताभ्यामेव मार्गाभ्यामन्तराकर्षणे २ मूत्रपुरीषादेरधोनयने च अपानशब्दे ता०ब्रा०उदा०

अपान्तरतमस् पु० अपगतमान्तरं तमो यस्य। १ वेदार्थप्रकाशके देवसुतभेदे। "अपान्तरतमा नाम जातो देवस्य वै सुतः। कृताञ्च तेन वेदार्थास्तेन सत्येन मोक्षयेति" हरिव० २६२अ०

अपाप त्रि० नास्ति पापं पापकारणं वा यस्य। १ पापजनकाचारशून्ये २ निष्पापे च "इयं दाशरथे! सीता सुव्रता ब्रह्मचारिणी। अपापा हि त्वया त्यक्तेति" रामा०।

अपामार्ग पु० अपमृज्यते व्याधिरनेन मृज्-करणे घञ् कुत्वदीर्घौ। (आपाङ्) इति १ ख्याते क्षुपे! "अपामार्ग! त्वया वयं सर्व्वं तदपमृजमहे" अथ० ४,१८,७। "अपामार्ग ओषधीनां सर्व्वासामेक इद्वशी" अथ० ४,१७,६,७।

अपामार्गक्षारतैल न० "कर्णनादे कर्णक्लेदे कटुतैलेन पूरणम् नादबाधिर्ययोः कुर्यात् कर्णशूलोक्तमौषधम् अपामार्गक्षारजलैः कृतकल्केन साधितम् तिलजमपहरति कर्णनादं बाधिर्य्यञ्चापि पूरणत" इति चक्रदत्तोक्ते १ तैलभेदे।

अपामार्गतैल न० "अथजे जयमासाद्य कर्त्तव्यो हंसपदी विधिः। पाने नस्ये च सर्पिः स्याद्दातव्यं मधुरैः शुभम्। क्रमिजे व्योषनक्ताह्वशिग्रुवीजैश्च नावनम्। अजामूत्रयुतं नस्यं क्रमिजे क्रमिजित् परम्। अपामार्गफलव्योषनिशाक्षारकरामठैः। सविड्कं हृतं मूत्रे तैलं नस्यं

क्रमिं जवेदिति" चक्रदत्तोक्ते १ क्रमिघ्नतैलभेदे ।

अपाय पु० अप+इण्-अच् । १ विश्लेषजनकक्रियायाम् "ध्रुवमपाये ऽपादानमिति" पा० । "अपाये विश्लेषजनकक्रियायामिति" सि० कौ० । "अपाये यदुदासीनमिति" हरि० । २ नाशे ३ अपगमने च ।

अपायिन् त्रि० अप+इण-णिनि । १ अपायवुक्ते २ वियोगिनि २ नश्वरे च "मात्रास्पर्शास्तु कौन्तेय ! शीतोष्णसुखदुःखदाः आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारतेति" गीता । "अनपायिनि संश्रयदुमे गजभग्ना पतनाय वल्लरीति" कु० ।

अपार त्रि० नास्ति पारं यस्य । १ पारशून्ये २ दुःखेनोत्तार्थे ३ दीर्घमर्य्यादे । "मही ऽपारा सदने सदस्येति" ऋ० २,३०,६ ४ अगाधे "अनरपार ऊर्वे अन्धतं दक्षनोः ऋ० २,१,१४ । "अपारे अगाध" इति भा० । ५ दूरपारे "रजसी अपारे ऋ० १,४२,४६ । "इमे चिदिन्द्र ! रोदसी अपारे इति ऋ० ३,३०५ । "अपारे दूरपारे" इति भा० । ६ सीमारहिते "मही अपारे रजसी" ऋ० ६,६८,२ । "अपारे सीमारहिते" इति भा० । ७ अधिके "अपारो वो महिमा हड्डरण" इति ऋ० ५,८७,६ । "अपारः अधिक" इति भा० । "अपारे पारमिच्छन्तः संसाराणवरोधसीति" भट्टभा० । "तदपारमसंख्येयं वानराणां महद्बलम्" रामा० । ८ अनुत्तार्थे "रावणश्च महाशत्रुरपारः प्रतिभाति मे इति" रामा० । तस्याः पारमपारञ्च व्रजन्ति विजयैषिण इति" भा० क० प० १६ अ० । ९ नद्यादेरवाक्पारे न० । १० पृथिव्यां स्त्री निरु० ।

अपार्श्व न० अप+अर्ह-क्त नि० न । १ अध्यर्धे समीपे निरु० । २ समीपवर्त्तिनि त्रि० ।

अपार्थ त्रि० अपगतोऽर्थो यस्य । १ निरर्थके २ व्यर्थे ३ निष्प्रयोजने "सर्वमेतदपार्थं ते चिप्रं तौ संप्रसादयेति" वनप० २१४ अ० । ४ अभिधेयशून्ये, "अपार्थं बत सङ्कीर्णं भाषते" इति सुश्रुतम् । वा कप् । अपार्थकोऽप्यत्र । अतो यदन्यद्विशेषधर्म्मार्थं तदपार्थकमिति" मनुः । तत्र योग्यतासत्त्वाकाङ्क्षाशून्यं वाक्यं यथोक्तं गौतमेन "पौर्वापर्य्यायोगादप्रतिबन्धार्थमपार्थकमिति" "पौर्वापर्य्यं कार्य्यकारणभावस्तस्याऽयोगादसम्भवात् शाब्दबोधजनकाकाङ्क्षाज्ञानाद्यसम्भवात् अप्रतिबन्धः असम्बन्धोऽर्थः प्रयोजनं शाब्दबोधरूपं यत्र । तत्राभिमतवाक्यार्थबोधानुकूलाकाङ्क्षादिशून्यबोधजनकत्वं तत्त्वमिति तदर्थः ।

अपाल त्रि० नास्ति पालः पालको यस्य । १ पालकशून्ये पशादौ । २ अक्लवादिन्यामतिसुतायां स्त्री । "अपालामिन्द्र ! शिश्वः पूष्णाकृणोरिति" ऋ० ८,९१,७ । अपालामेतन्नामिकामतिसुतां अक्लवादिनीमिति" भा० ।

अपालम्ब पु० अपक्रम्यालम्बते अप+आ-लम्ब घञ् । १ शकटपश्चाद्भागे "ततःपश्चात् परिक्रम्य अपालम्बमभिपद्याहेति" शत० ब्रा० ३,३,४,१२, "अपालम्बं शकटस्य पश्चाद्भागमिति" भा० । [पतित्वा लुण्ठने, २ अपाकरणे च ।

अपावर्त्तन न० अप+आ+वृत-ल्युट् । १ उद्धुण्ठने भूम्यादौ

अपावृत त्रि० अप+आ+वृ-क्त । १ अनावृते २ उद्घाटिते ३ अपसारितावरणे च "यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् । सुखिनः क्षत्रियाः पार्थ ! लभन्ते युद्धमीदृशमिति" गीता । "अहो अपावृतं द्वारमापदामयमेव मे" रामा० ४ आवृते, ५ पिहिते स्वतन्त्रे च इति मेदिनिः ।

अपावृति स्त्री अप+आ+वृ-क्तिन् । १ आवरणनिवारणे उद्घाटने २ आवरणापसारणे च । "स ऊ स्व रेजयत्व-पावृतिमिति" ऋ० ।

अपावृत्त त्रि० अप+आ+वृत-क्त । १ अनरिते २ पराङ्मुखे, ३ निवृत्ते च "प्रतिपद्यादपावृत्तः सन्तुष्टो येन केनचिदिति" भट्टा० भा० "कथं दृष्ट्वाप्यपावृत्तां परैरिव हृतां चमूमिति" रामा० । [वृत्तौ च ।

अपावृत्ति स्त्री अप+आ+वृत-क्तिन् । १ उद्वर्त्तने २ नि-

अपाश्रय पु० अप+आ+श्रि-अच् । १ मध्ये "पर्य्यङ्कशापाश्रये" इति काद० । २ अङ्गावरणे चन्द्रातपादौ हेम० अपगत आश्रयो यस्य । ३ आश्रयविहीने त्रि० ।

अपाष्ठ त्रि० अप+आ+स्था-क अस्था० षत्वम् । १ अपास्थिते "शल्याहिषं निरवर्चं प्राङ्नाद्युत पर्ह्वधेः । अपाष्ठाच्छङ्खादिति" अथ० ४,६,५ ।

अपासङ्ग पु० अप+आ+सञ्ज-घञ् कुत्वम् । १ तूणे इषुधौ ।

अपासन न० अप+अस-ल्युट् । १ मारणे वधे २ अपक्षेपणे, ३ दूरीकरणे च ।

अपासित त्रि० । अप+अस+णिच्-क्त । १ अपसारिते ।

अपास्त त्रि० अप+आ+स्था-क्त । १ दूरीभूते २ पलायिते ।

अपास्त त्रि० अप+अस+क्त । १ क्षिप्ते २ निरस्ते ३ दूरीकृते ४ अपसारिते च "ससुच्छ्वसितविभ्रमा गतिरपास्तसंस्था मतिरिति" माल० "निरस्तगाम्भीर्य्यमपास्तपुष्पकमिति" माघः । [पास्ताभरणानि यौवने" इति कुमा० ।

अपास्य अव्य० अप+अस-ल्यप् । १ निरस्येत्यर्थे । "किमित्य-

अपि अव्य० न पियति गच्छति । पि-गतौ किप् न तुक् ।

अगर्हाकरणायोद्यमरूपायां, १ शक्त्युत्कर्षभाविष्कर्तुमत्युक्तिरूपायाञ्च सम्भावनायां, २ सन्देहे, ३ निन्दायां, ४ प्रश्ने, ५ समुच्चये, ६ अल्पपदार्थे, ७ कामचारानुज्ञायाम्, ८ अवधारणे, ९ पुनरर्थे च। क्रियायोगेऽस्य उपसर्गसंज्ञा "अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु इति" पा० उक्तार्थेषु कर्म्मप्रवचनीयसंज्ञा तदर्थेषु न तु उपसर्गत्वम् तेन न पत्वादि तत्र "पदार्थे सर्पिषोऽपि स्यात्। अनुपसर्गत्वाच्च षः। सम्भावनायां लिङ् तस्या एव विषयभूते भवने कर्त्तृदौर्लभ्यप्रयुक्तदौर्लभ्यं द्योतयन्नपिशब्दः स्यादित्यनेन सम्बध्यते सर्पिष इति षष्ठी तु अपिशब्दबलेन गम्यमानस्य विन्दोरवयवावयविभावसम्बन्धे। इयमेवापिशब्दस्य पदार्थद्योतकता नाम। द्वितीया तु नेह प्रवर्त्तते सर्पिषो विन्दुना योगो न त्वपिनेत्युक्तत्वात्" सि० कौ० सम्भावने अपि स्तुयादिष्णुम् सम्भावनं शक्त्युत्कर्षभाविष्कर्तुमत्युक्तिः। अन्ववसर्गः कामचारानुज्ञा अपि स्तुहि। गर्हायाम् धिग्देवदत्तमपि स्तुयाद्बलम्। समुच्चये अपि सिञ्च अपि स्तुहि। गणरत्ने तु "सम्भवगर्हागीर्त्तिभूषासमुच्चयेष्वित्युक्तं तेन तेऽपि अपिशब्दार्थाः तत्र। सम्भवे योजनमस्ति, गर्हायाम् अपि पापिन्! ११ आशीर्वादे भद्रमपि, १२ स्तुतौ मरणमपि, १३ भूषायाम् अपि नक्षत्रतिलकम्, समुच्चये तदपीत्युदाहृतञ्च। समुच्चये "अथप्रसिद्धं यशसे हि पुंसामिति" कुमा०। प्रश्ने "अपि प्रसन्नेन मघर्षिणा त्वमिति" रघुः अस्य क्रियायोगभेदे अकारलोपो वा "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयो" रित्युक्तेः। अपिधानं पिधानं अपिनद्धः पिनद्ध इति "वितत्य शार्ङ्गं कवचं पिनद्धेति" भट्टिः।

अपिकक्ष अव्य० कक्षे विभक्त्यर्थे अव्ययी०। १ कक्षप्रदेशे इत्यर्थे "ग्रीवायां बद्धो अपिकक्ष आसनि" ऋ० ४,४०,४।

अपिकक्ष्य त्रि० अपिकक्षं सम्भानम् यत्। १ कक्षप्रदेशेन संधानभूते प्रवर्ग्यविद्यारूपे रहस्ये। "त्वाङ्गं यद्स्यावरेऽपिकक्ष्ये वाम्" ऋ० १,१६७,२२। "अपिकक्ष्यं छिन्नस्य यज्ञशिरसः कक्षप्रदेशेन संधानभूतं प्रवर्ग्यविद्याख्यं रहस्यमिति" भा०।

अपिकर्ण न० अपिगतः कर्णम् अत्या० स०। १ समीपे। २ तद्वर्त्तिनि त्रि०। "तुते अपिकर्ण आहणे ऋ० ६,४८,१६, "अपिकर्णे कर्णसमीपगते समीपे स्थितः इति भा०।

अपिगीर्ण त्रि० अपि+गृ-क्त। १ कथिते २ वर्णिते ३ स्तुते च। [१ प्रतिभाहेत्र।

अपिगृ(ग्रा)ह्य त्रि० अपि+ग्रह-वेदे-क्यप् लोके यत्।

अपिच अव्य० ह०। १ किञ्चेत्यर्थे पदद्वयमिति बहवः।

अपिच्छिल त्रि० न०त०। १ पिच्छिलविरोधिनि गाढे २ अपङ्किले च। "प्रमेहिणो यदा मूत्रमनाविलमपिच्छिलमिति" निदा०।

अपिज त्रि० अपि अम्बु जायते जन-ड अलुक्समा० वेदे अप्शब्दस्यैकत्वम्। १ जले तस्य जलक्रीड़ारतिसाधनत्वात्तथात्वम्। "प्रसवाय स्वाहापिजाय स्वाहे ति" यजु० १८,२८। "अम्बु जायते इत्यपिजः जलक्रीड़ारतत्वाज्जले इति" वेददीपः।

अपित् स्त्री आप इतोगता यस्याः वेदे न जश्। १ जलरहितायां नद्याम् "अपितः पिन्वतं धिय" ऋ० ७,८२,३ "अपितोऽजलरहिता नदीरिति" भा०। "अस्य मदे जरितस्मिन्द्रोजिन्वदजुवोऽपिन्वदपित" इति तद्भृता श्रुतिः।

अपितु अव्य० अपि+तु+ड०। १ यद्यर्थे क्रिया०। २ किन्त्वर्थे भूरिप्रयोगः।

अपित्व न० अपित्वरतेऽर्थे अपि+त्वर-बा० ड। १ भागे भागिनो हि विभक्तधनाद्यादानाय त्वरन्ते इति तस्य तथात्वम्। "तस्यामपित्वमीषा ते" इति शत० ब्रा०।

अपित्विन् त्रि० अपित्वं भागोऽस्यास्ति इनि स्त्रियां ङीप्। १ भागवति सभागे। "तस्मिन् देवता अपित्विन्योमन्यन्ते" इति शत० ब्रा०।

अपिधान न० अपि+धा-ल्युट्। १ आच्छादने। करणे ल्युट्। २ तत्साधने त्रि०। "अस्तापिधानमसि स्वाहेति" भोजनान्त जलपानमन्त्रः "राध्यमानस्यौदनस्य द्यौरपिधानमिति" अथ० ११,३,१। साधने आच्छादनत्वोपचारात् सामानाधिकरण्यम्। अपेरतो वा लोपे पिधानमप्यत्र "पृथिवी ते पात्रं द्यौः पिधानमिति" आङ्मन्त्रः "तस्य तद्द्वारं यदमावास्या चन्द्रमा एवद्वारपिधानः" शत० ब्रा०।

अपिधि पु० अपिधीयते ह्रस्वप्रयत्नं दीयते अपि+धा-कि। १ ह्रस्वप्रयत्नदत्ते। "प्रियाँ अपिधी वनिषीष्ट" ऋ० १,१२७,७, "अपधीन् ह्रस्वप्रयत्नं दत्तानिति" भा०।

अपिनद्ध त्रि० अपि+नह-क्त। १ परिच्छिते, अतोवालोपे पिनद्धश्च तत्रार्थे।

अपिप्राण त्रि० अपि+प्र+अन-अच् स्त्रियां गौ० ङीष्। १ सर्व्वदा चेष्टमाने "यजत्रा अपिप्राणो च सदनो च भूया" इति ऋ०। १,१८६,११। "अपिप्राणो सर्व्वदा चेष्टयितेति" भा०।

अपिव्रत त्रि० अपिः संसर्गे संसृष्टं व्रतं, कर्म्म, भोजनं वा यस्य।

१ दायाद्येनाविभक्ते २ संसृष्टधने ३गोव्रजे ४संसृष्टभोजने च। "अपिव्रतान्वारभन्ते यजमानमिति" का० ८,६, २६। "अपिव्रतास्तु उच्यन्ते येषां यजमानव्रते अपित्वमस्ति दायाद्येनाविभक्ता इति" पित्रभूतिः "अपिव्रता गोव्रजा इति कर्कभा०"अपिः संसर्गे संसृष्टं व्रतं कर्म्म येषामिति अपिव्रता अविभक्ता दायादाः तेषां एकेनापि कृष्यादि कर्म्म कृतं सर्व उपजीवन्तीति हरिस्वामी, "व्रतं भोजनं यजमानेन सह प्राग्भोजनाः बन्धुवर्गाः" इति माधवः।

अपिगर्व्वर त्रि० अपिः प्रादुर्भावे अव्ययी०वा०अच् समा०। १ गर्व्वरीसुखसमये प्रदोषकाले, "समिद्धमपिगर्व्वरे" इति ऋ० ३,६,७, । "अपिगर्व्वरे गर्व्वरीसुखे" इति भा० ।

अपिङ्गल पु० अपिङ्गलते अपि+गल–अच् ।१ सन्निभेदे तस्यापत्यम् इञ्। आपिङ्गलिः । शाब्दिकभेदे । "इन्द्रवन्द्रः काशकृत्स्नापिशली शाकटायनः । पाणिन्यमरजैनेन्द्राजयन्त्यष्टादिगाद्विका" क०क० "तुल्यापिङ्गलेः"इति पा० ।

अपिहित त्रि० अपि+धा–क्त । १ आवृते "तुल्येनाभुरपिहित" इति श्रुतिः । अतोलोपे पिहितोऽप्यत्र "भुजङ्गपिहितद्वारमिति" रघुः ।

अपीच्य त्रि० अपिच्यवते सौन्दर्य्यादीयते अपि+च्यु–ड अतोलोप उपसर्गदीर्घः न०त० । १ अतिसुन्दरे "अपीच्यदर्शनं सौम्यं सर्व्वलोकनमस्कृतमिति" हरिः० "अपीच्यवेषं द्विभुजं सौम्याकारं सुदर्शनमिति" यममूर्त्तिलक्षणम्, अपि+अञ्च–क्विप् अयङ् तत्र साधु यत् अञ्चतेरतोलोपे पूर्व्वदीर्घः । २ अन्तर्हिते । "यदाविर्यदपीच्यं देवासो अस्ति दुष्कृतमिति" ऋ० ८,४७,१२, अपीच्यमन्तर्हितम् भा० ३ गुह्ये "मर्त्तानां मनुष्याणामपीच्यम्" ऋ० ८,२६,६, "अपीच्यं गुह्यमिति" भा० ।

अपिजू त्रि० अपि+जव–क्विप्–ऊठ् । १ प्रेरके । "उषसानक्ता जगतामपीजुवा" ऋ० २,३१,५ । "अपिजुवा प्रेरयितव्य" इति वेदे उवङ् भा० ।

अपीत त्रि० अपि+इण–क्त । १ विलयप्राप्ते विलीने, "सौम्य ! तदा सम्पद्यते स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतोभवतीति"छा०भा०धृता श्रुतिः । भावे क्त । १ विलये २ अपगमने न० । पीतवर्णभिन्ने पु० तद्वति त्रि० । पीतं पानकर्म्म २ तद्भिन्ने त्रि० ।

अपीति स्त्री अपि+इण–क्तिन् । १ विलये २ अपगमे ३प्रलये च । "अपीतौ तदतप्रसङ्गादसमञ्जसम्" भा०ब्र०। आधारे क्तिन् । ४ संयामे । "पुरा यत् क्षरसनसो अपीतेस्तमद्रिवः" इति ऋ० १,१२१,१० । "अपीतेः संग्रामादिति" भा० ।

अपीनस पु० अपीनाय अपीनत्वाय सीयते कल्पते सो कर्म्मकर्त्तरि क । १ पीनसरोगे तद्विवरणं पीनसशब्दे ।

अपुंस् पु० न पुमान् न०त० । १ नपुंसके क्लीवे । "पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः । समेऽपुमान् पुंस्त्रियौ वा क्लीवेऽल्पे च विपर्य्यय इति" मेदिनिः ।

अपुंस्का स्त्री नास्ति पुमान् यस्याः उरःप्रभृतित्वात् कप् । १पतिशून्यस्त्रियाम् । 'नापुंस्कासीति मे मतिरिति'भट्टिः ।

अपुच्छा स्त्री नास्ति पुच्छमस्यं यस्याः । १ शिखरहीने शिंशपावृक्षे । २पुच्छहीने त्रि० । [२ पुच्छशून्ये त्रि० ।

अपुण्य न० न पुण्यं विरोधे न०त० । १ पापे । न०व० ।

अपुण्यकृत् त्रि० पुण्यं न करोति अपुण्यं पापं वा करोति । ताच्छील्ये क्विप् १ पुण्याकर्त्तरि २ पापकारिणि च । "क्षत्रियस्यैव दत्तस्यौशनसः शूद्रस्यैव च । यः पिबेत् कपिलाक्षीरं न ततोन्योऽस्त्यपुण्यकृत्" आप० स्मृतिः ।

अपुत्र पुंस्त्री नास्ति पुत्रोयस्य । १ अजातपुत्रे २मृतपुत्रे च । "अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदेति" स्मृतिः"नापुत्रस्य लोकोऽस्ति" श्रुतिः । "अपुत्रा यवनं भर्त्तुः पालयन्ती व्रते स्थितेति"हरिवंशः।"अपुत्रस्यैव या कन्या सैव पिण्डप्रदा भवेदिति" स्मृतिः पुत्रपदञ्च पुत्रपौत्रप्रपौत्रपरमिति दायभागादयः वा कप् । अपुत्रकोऽप्युक्तार्थे ।

अपुनर् अव्य० न पुनः न०त० । पुनर्वारभिन्ने सकृदर्थे "अनासुतत्वमपुनश्चकार" ऋ० १०,६८,१० ।

अपुनरावृत्ति स्त्री न पुनः आवृत्तिः संसारगतिर्यत्र ५ब०। निर्व्वाणमुक्तौ "न स पुनरावर्त्तते" इति श्रुतेस्तथात्वम् । ईदृश० । पुनर्गमनशून्ये त्रि० । अर्थाभावे अव्ययी० । पुनरावृत्त्यभावे अव्य० ।

अपुनर्भव पु० न पुनर्भवति संसारं भजतेऽस्मिन् भू–आधारे अप् । १ मोक्षे । करणे अप् न०त० । २ पुनर्भवाभावहेतौ तत्त्वज्ञाने अभावार्थे न०त० । पुनरुत्पत्त्यभावे पु० ३ प्रशमने निवारणे, 'रोगाणामपुनर्भवे । ज्ञानं चतुर्विधं वक्ष्येति" वैद्यकम् । नास्ति पुनर्भवः पुनरुत्पत्तिरस्य ४ पुनर्जन्मशून्ये तत्त्वज्ञानवति कृते ।

अपुराण त्रि० विरोधे न०त० । १ पुराणभिन्ने नवीने ।

अपुष्ट त्रि० पुष–कर्म्मणि क्त न०त० । १ अकृतपोषणे यस्य पुष्टिर्न कृता तस्मिन् ।

अपुष्टता स्त्री अपुष्टस्य भावः तल् । अपुष्टदुष्कर्म्मयाम्यव्याहता-

श्लीलकटता" इत्यादिना सा०द०उक्ते काव्ये प्रकृतार्थापोषकारित्वरूपे अर्थदोषभेदे। यथा "विलोक्य वितते व्योम्नि विधुं सज्ञ रवं प्रिये!" इत्यत्र विततशब्दो मानत्यागं प्रति न किञ्चिदुपकुरुते इति तस्य ततोषानुपकारित्वात्तथात्वम् अपुष्टस्य भावः त्व। अपुष्टत्वमप्यत्र न०। "अपुष्टत्वं सख्यानुपकारित्वमिति" सा०द०।

अपुंस अव्य० पुंसोभावः अव्ययी०। पुंस्त्वाभावे। "तैरपुंस्त्वात् वनस्पति"रित्यमरः अपुंस्त्वादित्वात् पञ्चम्या नामभावः।

अपुष्पफलद पु० अपुष्पं पुंस्त्वाभावेऽपि फलं ददाति दा—क। १ पुष्पं विना फलदे पनसे तथाभूते उदुम्बरादौ च। उपचारात् २ अहेतुकफलदातरि कर्त्तरि त्रि०।

अपूजा स्त्री अभावादौ न०त०। १ पूजाभावे २ आदराभावे ३ सम्मानाभावे ४ कुत्सितपूजायाम् ५ अविधानेनार्चने च।

अपूजित त्रि०न०त०। १ पूजितभिन्ने २ अनादृते ३ अवज्ञाते च

अपूत त्रि० न०त०। १ पवित्रभिन्ने २ अशुचौ "अपूतो वा एषोऽमेध्यो यदृत्वः" इति शत०ब्रा० "यथापूत इव मन्येत" काल्या० २२,४,२६। ३ संस्कारहीने ब्राह्मे च "एतैरपूतैर्विधिवदापद्यपि च कर्हिचिदिति" मनुः।

अपूप पु०न पूयते विशीर्य्यति पू—पन०त०। १ गोधूमादिचूर्णपिष्टकैः पुरोडाशे हविर्भेदे "अपूपं देव इतवन्नमस्ये" ऋ० १०,४५,६। "अपूपं पुरोडाशमिति" भा०। "इयं जगरसंवादं पायसापूपमेव चे"ति मनुः। प्राचुर्य्ये मयट्। अपूपमयं पर्व अपूपमयो यज्ञः। अपूपाय हितम् "विभाषा हविरपूपादिभ्यः" पा०यत्। अपूप्यम् "ऋच" पा० अपूपोयंच पिष्टकहिते यवगोधूमचूर्णादौ। तत् पक्वमस्य ठक्। आपूपिकः। अपूपविक्रेतरि त्रि०।

अपूपादि पु० ६व०। पाणिन्युक्ते हितार्थे त्रयतोः प्रकृतिभूते यज्ञसमूहे। स च यथा: "अपूप तण्डुल, अप्यूष, अप्योष, अवोष, अधेय, शष्कुक, ओदन, सूप, पूप, किख, प्रदीप, सुसल, कटक, कर्णवेष्टक।

अपूपाष्टका स्त्री अपूपसाधनाष्टका। पौष्या ऊर्द्धं १ कृष्णाष्टम्यां २ तत्र विहिते श्राद्धे च।

अपूरणी स्त्री न पूर्य्यते सर्वतः कण्टकाद्यततया दुरारोहत्वात् पूर—कर्मणि ल्युट् ङीप् न०त०। शाल्मलिवृक्षे। करणे ल्युट्। संख्यापूरणसाधनार्थकप्रत्ययभिन्ने च।

अपूर्ण त्रि० न पूर्णम्। ऊने। "अपूर्णमेकेन शतक्रतूपमः शतं क्रतूनामिति" रघुः। भावे क्त। पूरणाभावे "सारतण्डुलमपूर्णं अपयित्वेति" का० ४,१,५,७, अपूर्णं यथा ग्रहेण चरुणा स्थाल्याः पूरणं न भवतीति तथा अपयित्वेति" तद्भा०। [पूरणं युक्तं तत्कालाप्राप्ते।

अपूर्णकाल त्रि० न पूर्णः कालोयस्य। यस्य यत्काले

अपूर्व्व त्रि० न पूर्वं दृष्टम्। १ अविदिते २ आश्चर्य्ये "अधुनापि यरजालं मर्मभेदानुकारि त्रितयमिदमपूर्व्वं दृष्टमन्तःपुरे ते" इति "अपूर्व्वो दृश्यते वह्निः कामिन्याः स्तनमण्डले। दूरतोदहतीवाङ्गं हृदि लग्नस्तु शीतल" इति च उद्भटः। पूर्व्वः पूर्व्ववर्त्ती न०ब०। ३ हेतुभूते त्रि०। न०त०। ४ पूर्व्वकालादिभिन्ने त्रि०। पूर्व्वशब्दस्य दिग्देशकालवाचित्वे सर्वनामतया ततो नञ्तत्पुरुषेऽपि अस्य सर्वनामता तेन तत्कार्य्यम् अपूर्व्वे अपूर्व्वस्मै ङिङसोस्तु वा दृष्टौ पुंवद्भावश्च "कोमारापूर्व्ववचने" इति पा०५ परब्रह्मणि पु०। "तदेतद् ब्रह्मापूर्व्वमनपरमनन्तरमबाह्यमिति" शत०ब्रा०। दृष्टप्रमाणान्तराप्राप्ते "उपक्रमोपसंहारावभ्यासोऽपूर्व्वता फलमिति" वेदा० सा० ७वैधनिषिद्धक्रियाजन्ययोः कालान्तरभाविनोः सुखदुःखयोर्हेतुभूतयोः पुण्यपापयोः न०। आदृष्टसिद्धिवत् अपूर्व्वसिद्धिरूपे वा। सा च ११७ पृष्ठे दृश्या। स्वर्गकामोयजेतत्यादौ लिङा हि यागादौ इष्टसाधनत्वं बोध्यते इति नैयायिकाः कार्य्यत्वेनापूर्व्वं बोध्यते इति प्राभाकरमन्यन्ते। तत्रोभयमतेऽपि, आशुविनाशिनः कालान्तरभाविफलजनकत्वे फलसमयपर्य्यन्तस्थायिव्यापारजनकत्वं प्रयोजकमिति तथा हि अव्यवहितपूर्व्वस्थायिन एव कारणत्वेन यागस्य कालान्तरभाविस्वर्गस्य च मध्ये व्यापाररूपमपूर्व्वं प्रकल्प्यते साक्षादसाधनस्य यागस्य स्वर्गसाधनता व्यापारमन्तरेणानुपपद्यमाना स्वर्गनिर्वाहकं व्यापारमपूर्व्वं कल्पयतीति। तच्चापूर्व्वं किंनिष्ठं कथं वा तस्यैव व्यापारत्वमित्यादृष्टं यद्दृष्टचिन्तामणौ निरूपितं यथा "तथापि ध्वंस एव व्यापारोऽस्तु तव सहभावनिरूपकस्यापि कारणत्वात् तस्यानन्तत्वेऽपि स्वभावात् सावधेः फलजनकत्वम्। यत्र ध्वंसोहेतुस्तत्र तत्प्रागभावोऽपीति चेत् न दुग्धध्वंसजन्यदध्नि, मिथ्याधीध्वंससाध्यरज्जौ च व्यभिचारात्। प्रतिबन्धकाभावत्वेन हेतुत्वे, तथाभावाच्च ध्वंसेनानुपपत्तिः कथं तेनैव समाधातव्येति चेन्न ध्वंसे सति तद्व्यापारत्वज्ञानं विनानुपपत्तेस्तद्व्यापारत्वकल्पनया शान्तेरिति नैवं प्रतियोगिध्वंसयोरेकत्वाजनकत्वात् न हि नियमतोध्वंसे सति यद्भवति तत्तत्र कारणम् न च संसर्गाभावत्वेन हेतुत्वे तथेति वाच्यं व्यभिचाराभावेन तस्यापि प्रयोजकत्वात्।

अथ यद्यदृष्टद्वारकत्वात्, व्यापारं विना तदनुपपत्तेः न च तज्जन्यध्वंसस्य कारणत्वकल्पनमित्युभयमपि जनकम् अन्यत्र तु मानाभावाच्च तथेति वाच्यं यागध्वंसस्य यागजन्यस्वर्गं प्रति जनकत्वस्य प्रमाणान्तरविरोधेनार्थापत्तिकल्पनात् । अस्तु देवताप्रीतिरेव व्यापार इति चेन्न यागस्य देवताप्रीतिहेतुत्वे मानाभावात् गङ्गास्नानादौ देवताविरहेण तदभावात् । न च तत्रापि तत्प्रीतिः, तस्य तत्प्रीतिहेतुत्वे मानाभावात् लाघवेन कर्तृगतव्यापारकल्पनाच्च ननु नायं नियमः, पुत्रगतश्राद्धादिना पितरि, पितृगतजातेष्टया पुत्रे चाऽदृष्टोत्पत्तेश्च अथ तत्रापि कर्तृस्थमेवाऽदृष्टं, विहितक्रियाया यागस्येव कर्तृगताऽदृष्टजनकत्वात् । न च सुते पुत्रे तददृष्टनाशात् पितरि-स्वर्गः स्यादिति वाच्यम् अदृष्टस्य फलनाश्यतया पितरि स्वर्गाभावेनाऽदृष्टानाशात् स्वदृष्टियागजन्याऽदृष्टस्य शक्तिविरोधित्वात् न तु पितृगतमदृष्टं जन्यते सुते पितरि दोषाभावेन योगिनामिव विहितक्रियायाः, पितृदृष्टजनकत्वात् तथात्वे च साङ्गमपि श्राद्धादिकं निःफलं स्यादिति तद्विधेरप्रामाण्यापत्तिः पुत्रगताऽदृष्टेन च सुप्तपितरि सुखोत्पत्तौ न विरोधः योगिनामिव सुखोत्पत्तौ दोषस्याहेतुत्वात् अथ पितृसुखं पितृपुण्यजन्यमिति पितरि न पुण्यं तेन विना तदभावात्, न, पुत्रे तत्फलप्रसङ्गात् । पितृस्वर्गकामनाजन्यक्रिया पितृपुण्यहेतुरिति पुत्रक्रियापि तज्जनिकेति चेत् एवं पितृक्रियापितृपुण्यजनिकेति नत्वं विना पितरि पुण्यं, पुत्रक्रिया च पुत्रपुण्यजनिकेति पुत्रे पुण्यं, पितृस्वर्गकामनाजन्यपुण्यत्वेन पितृस्वर्गहेतुरस्तु तत्पुण्यं पितृदृत्ति तत्तुल्यहेतुत्वात् न च पुत्रदृत्ति, तत्तुल्याहेतुत्वादिति न, तत्पुण्यं न पितृदृत्ति तत्क्रियजन्यपुण्यत्वात् पुत्रदृत्ति वा तत्कृतिजन्यपुण्यत्वात् तत्कृतपुण्यवत् तस्मात् पितृस्वर्गकामनाजन्यपुण्यत्वेन पितृस्वर्गहेतुतेति पुत्रएव तत्पुण्यमिति, मैवं स्वर्गोपपादकं ह्यपूर्वं स्वर्गाश्रये कल्प्यते प्रथमोपस्थितित्वेन लाघवात् कल्पनायाः साक्षादुपपादकविषयत्वाच्च । न च स्वर्गहेतुकामनाश्रये, स्वर्गकामनाजन्यक्रियाकर्तरि वा, विलम्बोपस्थितिकत्वात् गौरवात् परम्परया स्वर्गोपपादकत्वाच्च यदि च पुत्रकृतपुण्येन सुप्तस्य शरीराद्युत्पत्तिः कुतो वा स्यात्, तदा साक्षिविषयाऽसत्त्वाभिधानादि पुत्रक्रियाजन्यपापेन "स विज्ञायां ऊर्मिभूत्वा पितृभिः सह पच्येत" इत्यादिबोधितं नरकभागित्वादि सुप्तस्य पितुः स्यात् तथा च पुत्रकृततथाविधगङ्ख्या न कश्चिन्मोक्षार्थी ब्रह्मचर्यादिदुःखेनात्मानमवसादयेत् "दुःखेनात्यन्तविमुक्तश्चरतीति" "न स पुनरावर्तते" इति श्रुतिविरोधश्च तथा च सुप्तस्य सुखदुःखशरीरादिकञ्च भवतीत्यपदर्शनम्। सुप्ते च पितरि श्राद्धादिना दोषाभावादेव नाऽदृष्टसृत्पद्यते न चैवं साङ्गश्राद्धस्यापि नित्यफलत्वम् अदृष्टोत्पत्तौ स्वरूपसतो दोषस्याङ्गस्य वैगुण्यात्, यथा विघ्नहेतुदुरितसत्त्वेन कृतं सङ्गतं न पापध्वंसं जनयति स्वरूपसतः पापस्याङ्गस्याभावादिति एवञ्च यागस्यापि व्यधिकरणव्यापारोभविष्यतीति ॥ उच्यते विहितक्रियया कर्तृगतव्यापारद्वारा कालान्तरे फलं जन्यत इत्युत्सर्गः स च बलवता बाधकेनापोद्यते प्रकृते च बाधकं नास्ति यथा शास्त्रदेशितं फलमनुष्ठातरीत्युत्सर्गः सुतकृतमयाश्वादिकं पितृस्वर्गं प्रति, पितृकृतजातेष्टेः पुत्रपूतत्वादिकं प्रति हेतुत्वस्य शास्त्रेण बोधनात् नत्वयं नियमएव पितृयज्ञजातेष्ट्यादौ परम्परासम्बन्धेन कर्तृगतमेव फलं, न हि यस्य कस्यापि पितरिपुत्रे वा फलं किन्तु स्वपितृपुत्रयोः तथा च स्वपितृगतत्वं स्वर्गभागिपितृकत्वं परम्परासम्बन्धः फलेन पुत्रस्य, एवं पूतत्वादिकं पितृगतमेव । न च फलस्य कर्तृगतत्वं साक्षात्सम्बन्धेनैवेति वाच्यं श्यामपशुभूमिहिरण्यादीनां परम्परया कर्तृगतत्वमिति व्यभिचारात् न हि श्यामादयः कर्तरि साक्षात्संबद्धाः। एवं फलस्य साक्षात्कर्तृगामित्वबोधने शास्त्रस्योत्सर्गो न तु फलस्य कर्तृगामितावोधने यत्तु स्वर्गभागिपितृकत्वं न फलं तत्कामनाया अधिकारिविशेषणत्वाभावात् 'पितृस्वर्गकामः' इत्यादि श्रुतेः स्वतश्च तथा कामनया प्रवृत्तौ फलकामनाविरहेण प्रयोगेऽङ्गवैगुण्यात् फलाभावप्रसङ्गः। किञ्च स्वर्गभागिपितृकत्वं विधिर्न तत्र विधेयं तत्पितृकत्वं न काम्यम् न वा फलं, सिद्धत्वात् तदसाध्यत्वाच्च, किन्तु विधेयं पितृगतः स्वर्ग इतिसएव फलमिति" तत्र न हि स्वर्गभागिपितृकत्वं फलम् अपि तु स्वर्गेण समं पुत्रस्य परम्परासम्बन्धरूपं तदुक्तमिति । उच्यते परम्परासम्बन्धेन यदि पुत्रगतत्वं पितृस्वर्गस्य, तदा संसृष्टसमवायेन तत्पुत्रधनस्यापि फलत्वं स्यात् । सम्बन्धः शास्त्रेण बोध्यत इति चेत् तदा स्वर्गभागिपितृकत्वमपि न तथा, शास्त्रेण बोधितत्वाभावात् श्यामादिपशुहिरण्यादीनाञ्च सिद्धत्वेन न काम्यत्वं किन्तु तद्विषयकं ज्ञानं काम्यं फलमपि काम्यं तदेव, तच्च साक्षात्कर्तृगतमिति कर्तृगतत्वेन फलस्य साक्षात्सम्बन्धोऽपि नियत एव तत्स्वत्वेन फले कामनात् । तस्मात् यथागममेव शास्त्रदेशितं फलम्

अतएव कामनाविषयः स्वगत एव स्वर्गः फलं यागादेः, स्वर्गपुत्रत्वादेश्च पितृपुत्रगतत्वेन काम्यत्वमिति श्राद्धजातेश्चादेः पितृपुत्रगतमेव फलम् एवञ्च मातापित्रादिगतस्वर्गकामनया पुत्रादिना कृतं पुष्करिणीसङ्घादानादिकं पित्रादिस्वर्गजनकमेव कामनाविषयस्वर्गसाधनत्वेन तेषां श्रुतत्वात् न हि स्वगतस्वर्गकामस्य कर्त्तव्यतां पुष्करिण्यादेर्विधिर्बोधयति किन्तु स्वर्गकामस्य स्वर्गः स्वगतः परगतो वेति स्वर्गकामत्वमविशिष्टम् । यजेतेत्यात्मनेपदमपि कर्त्रभिप्रेतक्रियाफलमात्रजनकत्वे । न च स्वर्गकामोयजेतेत्यादौ स्वगतस्वर्गकामनाया अन्तरङ्गत्वादौत्सर्गिकत्वाच्च स्वर्गकामत्वेन स्वगतस्वर्गकाम एवीच्यते । सामान्ये बाधकं विना विशेषपरत्वे मानाभावात् । केचित्तु सम्यगनुष्ठस्याश्रमपरिपालनस्य ब्रह्मलोकावाप्तिः फलं श्रूयते इति जातेष्टिपिशुयज्ञयोरपि स्वरूपकर्म्मत्वेन तदेव फलमिति फलस्य कर्त्तृगामित्वेनियमएव प्रातिस्विकफलाभिप्रायेणोत्सर्गः इत्याहुः नन्वेवं यावज्जीवपरिपालनस्य तत् फलं न तु काम्यश्राद्धादेः काम्यानर्भावे मानाभावात् यावत्काम्यानुष्ठानाशक्तेश्च, यावच्छक्यानुष्ठानस्यापि नानर्भावः कामनाविरहादिनाध्यकरणात् यावज्जीवानुष्ठाने तत्फलाभावप्रसङ्गाच्चित्यस्यैवावश्यकत्वेनोपस्थित्यान्वयाच्च । अपि च तैः कर्म्मभिः प्रत्येकमुत्पत्त्यपूर्व्वं तेषु परमापूर्व्वं जन्यत इति" न गौरवान्मानाभावाच्च किन्वनिमक्रियया परिपालनरूपक्रियान्तरेण वेति न सर्वं कर्म्म ब्रह्मलोकावाप्तिफलकमिति" मैवं भगवदुद्देशेन कृतस्य नित्यस्य यस्य कस्यापि पालनात् ब्रह्मलोकप्राप्तिः फलं श्रूयत इति जातेष्टिपिशुयज्ञयोरपि तथा कृतयोस्तदेव फलं तथा च श्रीभगवद्गीता "यज्ञायाचरतः कर्म्म कर्म्मयन्निलीयते यज्ञार्थात् कर्म्मणोऽन्यत्र लोकोऽयं कर्म्मबन्धन" इति तच्च कर्म्म यज्ञार्थतया प्रत्येकमेव तत्फलसमर्थं फलसम्बन्धे, संवलनन्तु मङ्गलवदुपयुज्यते अन्यथैकप्रयोगस्य व्यवधानादसम्भवः । परिपालनन्तु कर्त्तव्यमित्येव करणं तदुक्तं "ददामि देयमित्येव यजे यष्टव्यमित्यहमिति" यत्तु निषिद्धासम्बन्धएव सम्यक्त्वम् न तु विहितमात्रानुष्ठानमिति, तन्न यत्किञ्चिन्निषिद्धासम्बन्धस्याभावात्, सर्वनिषिद्धासम्बन्धस्य सर्वत्र सुलभत्वादिति सम्प्रदायः । अत्र ब्रूमः भगवदुद्देशेन कृतं किञ्चिदेव कर्म्म, सर्वं वा, काम्यं वा सर्वं, नित्यं वा सर्वमिति नाद्यः एकेनैव काम्येन नित्येन वा स्नानेन तथा कृतेन तत्फलसिद्धौ बहुवित्तादिसाध्ये श्राद्धादावप्रवृत्त्यापत्तेः नापरौ अगत्यात् न तृतीयः जातेश्चादेर्नित्यत्वाभावात् तस्मात् सम्यगनुष्ठस्याश्रमपालनस्य न तत्फलं सम्यक्त्वञ्च सामस्त्यमेव अतो न श्राद्धादेः ब्रह्मलोकावाप्तिरिति साधूक्तं शास्त्रदेशितं फलमनुष्ठातरीत्युत्सर्ग इति तच्च फलं क्वचिद्विधिवाक्यश्रुतं क्वचिच्चार्थवादिकमिति" । इदन्त्ववधेयं कर्मभ्यः सेनापूर्वप्रत्याख्याने "ज्ञानाग्निः सर्वकर्माणीत्यादि शास्त्रबोधितस्य तत्त्वज्ञाननाश्यत्वस्य बाधः ध्वंसस्य नाश्यत्वाभावात् न्यायमते तु कर्मपदेन तज्जन्यापूर्वलक्षणया तेषां क्षयसम्भव इति । अस्य च कार्य्यमात्रं प्रति कारणेति नैयायिकादयः । कर्मण एव फलमिति मीमांसकाः । ईश्वराधिष्ठितादेव सूक्ष्मावस्थापन्नात् कर्मणः फलमिति वेदान्तिनः तथा हि "फलमत उपपत्तेरिति" शा०सू० भाष्ये "अथोच्येत कर्म्मकार्य्यादपूर्व्वात् फलमुत्पत्स्यते" इत्याशङ्क्य । तदपि नोपपद्यते अपूर्व्वस्याचेतनस्य काष्ठलोष्टसमस्य चेतनाप्रवर्त्तितस्य प्रदातृत्वानुपपत्तेः तदस्तित्वे च प्रमाणाभावात् अर्थापत्तिः प्रमाणमिति चेन्न ईश्वरसिद्धेरर्थापत्तिपरिहारादिति" अपूर्व्वं निराकृत्य । "धर्म्मं जैमिनिरत एवेति" शा०सू०। जैमिनिमतं धर्म्मस्यैव फलहेतुत्वं पूर्व्वपक्षीकृत्य । "पूर्व्वन्तु बादरायणो हेतुव्यपदेशादिति" शा०सू० निराकृतम् । व्याख्यातञ्चैतत् भाष्यकृता शङ्कराचार्य्येण । नन्वनुष्ठानविनाशिनः कर्म्मणः फलं नोपपद्यते इति परित्यक्तोऽयं पक्षः नैष दोषः श्रुतिप्रामाण्यात् श्रुतिश्चेत् प्रमाणं यथायं कर्म्मफलसम्बन्धः श्रुत एव उपपद्यते तथा कल्पयितव्यः न चानुत्पाद्य क्रियपूर्व्वं कर्म्म विनश्यत् कालान्तरितं फलं दातुं शक्नोतीति अतः कर्मणो वा काचिदुत्तरावस्था फलस्य वा पूर्व्वावस्थाऽपूर्व्वं नामास्तीति च तर्क्यते । उपपद्यते चायमर्थ उक्तेन प्रकारेण ईश्वरस्तु फलं ददातीत्यनुपपन्नम् । अविचित्रस्य कारणस्य विचित्रकार्य्यानुपपत्तेः वैषम्यनिर्घृण्यप्रसङ्गादनुष्ठानवैयर्थ्यापत्तेश्च तथा च धर्मत एव फलमिति "पूर्व्वपक्षः" बादरायणस्तु आचार्य्यः पूर्व्वोक्तमेवेश्वरं फलहेतुं मन्यते केवलात् कर्म्मणोऽपूर्व्वाद्वा केवलात् फलमित्ययं पक्षः तुशब्देन व्यावर्त्त्यते कर्मापेक्षाद्वाऽपूर्व्वापेक्षाद्वा यथा तथा वा ईश्वरात् फलमिति सिद्धान्तः "हेतुव्यपदेशात्" धर्म्माधर्मयोरपि कारयितृत्वेनेश्वरोहेतुर्व्यपदिश्यते फलदातृतया च । "एष ह्येव साधु कर्म कारयति तं यमेभ्य उन्निनीषते एष उ एवासाधु कर्म कारयति तं यमधोनिनीषते" इति श्रूयते चायमर्थो गीतासु । "यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् । स तया श्रद्धया युक्तस्या

राधनमीक्षते। लभते च ततः कामान् मयैव विहितान् हि तान् इति"। विचित्रकार्य्यानुपपत्त्यादयोऽपि दोषाः कृतप्रयत्नापेक्षत्वादीश्वरस्य न प्रसज्यन्ते" इति। एतेन "नमस्तत् कर्मभ्योविधिरपि न वेद्यः प्रभवतोल्लुक्तिस्तु प्रामादिकीत्यवसेयम् एवञ्च ईश्वराधिष्ठितकर्मभ्य एव तत्तत्फलोत्पत्तिरिति सुस्थम्। कर्मणामाशुविनाशिनामपि सूक्ष्मरूपेणैव स्वकारणेऽन्तःकरणे सत्त्वात् "क्षीयन्ते चास्य कर्माणि" इत्यादयुक्तिः सङ्गच्छते तज्जन्यापूर्व्यस्वीकारे तु तत्र तज्जन्ये लक्षणेति भेदः। अतएव "ज्ञानाग्निः सर्वकर्माणीत्यादौ सूक्ष्मावस्थानां ज्ञानादेव क्षयः, स्थूलावस्थापन्नानान्तु आशुनाशात्" इति वेदान्तिमते युक्तिरूहनीया। "आत्मान्तरगुणानामात्मान्तरेऽकारणत्वादिति" वै०सू०। "आत्मान्तरस्य गुणानां पुण्यपापानामात्मान्तरेऽकारणत्वात् स्वर्गफलस्येति शेषः। "गाङ्गदेयितं फलमनुभावतीति" जै०सू०। "आत्मान्तरे यौ दुःखदुःखगुणौ तयोरकारणत्वात् प्रत्यात्मनिष्ठाभ्यामेव धर्माधर्माभ्यां सुखदुःखे, न व्यधिकरणाभ्याम्। अन्यथा येन यागहिंसादिकं न कृतं तस्य तत्फलं स्यादिति कृताकृताभ्यागमस्य प्रसज्येतेति" एतच्च सामान्यशास्त्रं विशेषशास्त्रेणापोद्यते तेन पितृयज्ञादेः पुत्रपुत्रत्वादिहेतुत्वमिति" वै०सू० उपस्करः। तच्चापूर्व्वं त्रिविधं प्रधानापूर्व्वमङ्गापूर्वं कलिकापूर्वञ्चेति मीमांसकाः। तत्र दर्शपौर्णमासाद्यपूर्वं प्रधानापूर्वं तदेव परमापूर्वं, प्रयाजाद्यङ्गजन्यापूर्वमङ्गापूर्वं, तदवान्तरक्रियाकूटजन्यमपूर्वं कलिकापूर्वं तच्च व्रीहिप्रोक्षणाभ्युक्षणादिजन्यं द्रव्यनिष्ठमिति मीमांसकाः तज्जन्यसंस्कारविशेष एव कलिकापूर्व्वतया व्यवह्रियते स चात्मनिष्ठ इति नैयायिकाः विस्तरस्तु कुसुमाञ्जलौ १ स्तबके द्रष्टव्यः। कलिकापूर्वञ्च परमापूर्वं जनयित्वा नश्यति। अङ्गापूर्वन्तु परमापूर्वे विशेषमाधीयते इति भेदः तथा च अङ्गापूर्वसहितं परमापूर्वं विशिष्टफलं जनयति तद्विहीनन्तु स्वल्पं फलम्। अत एव प्रधानकरणे दैवात् यत्राङ्गाकरणे न प्रधानस्य वैफल्यं किन्तु अल्पफलत्वमेवेति सिद्धान्तः। केवलाङ्गापूर्वाणां तु न फलजनकत्वम् प्रधानासिद्धेः फलाभावात्। अतएव "प्रधानस्या क्रिया यत्र साङ्गं तत् क्रियते पुनः। अप्रधानक्रियायान्तु नाङ्गसिद्धं च तत्क्रियेति" जैमिनीयन्यायोपरिशिष्टे तथा व्यवस्थापितम्। इदञ्च परमापूर्वं फलनाश्यं तत्त्वज्ञाननाश्यं कर्मनाशाजलस्पर्शादिनाश्यञ्च। "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभमिति" "कर्मणाञ्चैव सर्वेषां भोगादेव क्षयोभवेदिति" च शास्त्रात् "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्জ্জুनेति" गीतावाक्याच्च। सर्वकर्मपदेन च प्रारब्धकर्म्मातिरिक्तकर्म्माण्येवोच्यन्ते तेन प्रारब्धकर्मणां भोगादेव क्षय इत्यनुपदं वक्ष्यते। परमापूर्वञ्च नित्यकर्मणि परुडापूर्वत्वेन मीमांसकैः व्यवह्रियते सन्ध्यावन्दनस्य किञ्चित्फलाजनकत्वात्। अर्थवादोपस्थापितब्रह्मलोकादिप्राप्तिरूपफलजननात् न तत्रापूर्वस्य फलाजनकत्वेन परुडत्वमिति नैयायिकाः। अत एव चिन्तामणौ यत्रार्थवादिकं फलं न श्रूयते तत्र तत्त्वज्ञानसाधनत्वं गीतादिवाक्येन व्यवस्थापितं तच्च पूर्वं दर्शितम्। "नकलङ्कं भक्षयेदित्यादि निषेधस्यापि परुडापूर्वजनकत्वमिति मीमांसकाः। तत्रापि प्रत्यवायाभावरूपफलाङ्गीकाराच्च परुडत्वमिति तत्त्वज्ञानप्रतिबन्धकाभावत्वेन तस्यापीष्टत्वादिति नैयायिकाः। अपूर्वस्यापूर्वशब्दवाच्यत्वे हेतुर्जैमिनिना दर्शितः। "प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात्" सूत्रेण व्याख्यातञ्चैतत् अदृष्टशब्दे ११६ पृष्ठे ततश्च पूर्वमविद्यमानत्वात् अपूर्वशब्दवाच्यतेति। वेदान्तिनस्तु कर्म्मणः रूक्ष्मावस्था, फलस्य पूर्व्वावस्था वाऽपूर्वमिति स्वीचक्रुः तच्चानुपदं दर्शितम्। तत्त्वज्ञानेन कर्मक्षये कश्चिद्विशेषोऽभिधीयते। "तदधिगमे उत्तरपूर्व्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्" शा०सू० भाष्ये "अथेदानीं ब्रह्मविद्याफलं प्रति चिन्ता प्रजायते ब्रह्माधिगमे सति तद्विपरीतफलं दुरितं क्षीयते न वा क्षीयत इति संशयः किन्तावत् प्राप्तं फलहेतुत्वात् कर्म्मणः फलमदत्त्वा न सम्भाव्यते क्षयः। फलदायिनी ह्यस्य शक्तिः श्रुत्या समधिगता यदि तदन्तरेणैव फलोपभोगमुपलक्षयेत, श्रुतिः कदर्थिता स्यात्। स्मरन्ति च "नहि कर्म क्षीयते" इति। नन्वेवं सति प्रायश्चित्तोपदेशोनिरर्थकः प्राप्नोति। नैष दोषः प्रायश्चित्तानां नैमित्तिकत्वोपपत्तेर्ज्ज्योतिष्टोमादिवत्। अपि च प्रायश्चित्तानां दोषसंयोगेन विधानात् भवेदपि दोषक्षपणार्थता नत्वेवं ब्रह्मविद्यायाविधानमस्ति। नन्वनभ्युपगम्यमाने ब्रह्मविदः कर्म्मक्षये, तत्फलस्यावश्यभोक्तव्यत्वादनिर्म्मोक्षः स्यात्। नेत्युच्यते। देशकालनिमित्तापेक्षोभोगः कर्म्मफलवद्भविष्यति। तस्माच्च ब्रह्मविद्याधिगमे दुरितनिवृत्तिरित्येवं प्राप्ते ब्रूमः। तदधिगमे ब्रह्माधिगमे सत्युत्तरपूर्व्वाघयोरश्लेषविनाशौ भवतः उत्तरस्माच्छ्लेषः पूर्वस्य विनाशः। कस्मात्? तद्व्यपदेशात्। तथा हि ब्रह्मविद्याप्रक्रियायां

सम्भाव्यमानसम्बन्धस्यागामिनो दुरितस्यानभिसम्बन्धं विदुषो व्यपदिशति श्रुतौ "यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यत" इति । तथा विनाशमपि पूर्वोपचितस्य दुरितस्य व्यपदिशति "तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्त" इति । अयमपरः कर्मक्षयव्यपदेशो भवति । "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इति । यदुक्तमनुपभुक्तफलस्य कर्मणः क्षयकल्पनायां शास्त्रकदर्थनं स्यादिति । नैष दोषः न हि वयं कर्मणः फलदायिनीं शक्तिमवजानीमहे विद्यत एव सा, सा तु विद्यादिना कारणान्तरेण प्रतिबध्यत इति वदामः । शक्तिसद्भावमात्रे च शास्त्रं व्याप्रियेत न प्रतिबन्धाभावेऽपि । "न हि कर्म क्षीयत" इत्येतदपि स्मरणमौत्सर्गिकं न भोगादते कर्म क्षीयते तदर्थत्वादिति दृश्यत एव प्रायश्चित्तादिना तस्य क्षयः । "सर्वं पाप्मानमरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेदेत्यादिस्तुतिशतेभ्यः । यत्तूक्तं नैमित्तिकानि प्रायश्चित्तानि क्षपयिष्यन्तीति तदसत् दोषसंयोगेन नीयमानानामेषां दोषनिर्हृतिफलान्तरकल्पनानुपपत्तेः । यत् पुनरुक्तं न प्रायश्चित्तवद्दोषक्षयोद्देशेन विद्याविधानमस्तीत्यत्र ब्रूमः । सगुणास्तु तावद्विद्यास्तु विद्यत एव विधानं तासु च वाक्यशेषे ऐश्वर्यप्राप्तिः पापनिवृत्तिश्च विद्यावत उच्यते । तत्राविवक्षाकारणं नास्तीत्यतः पाप्मप्रहाणपूर्वकैश्वर्यप्राप्तिफलाः फलमिति निश्चीयते । निर्गुणायास्तु विद्यायां यद्यपि विधानं नास्ति तथाप्यकर्तृत्वबोधात् कर्मप्रदाहसिद्धिः । अक्षेष इति चागामिदुष्कर्मसु कर्तृत्वमेव न प्रतिपद्यते ब्रह्मविदिति दर्शयति । अतिक्रान्तेषु तु यद्यपि मिथ्याज्ञानात् कर्तृत्वं प्रतिभेद इव तथापि विद्यासामर्थ्यान्मिथ्याज्ञाननिवृत्तेस्तान्यपि प्रक्षीयन्त इत्याह विनाश इति । पूर्वप्रसिद्धकर्तृत्वभोक्तृत्वविपरीतं हि त्रिष्वपि कालेष्वकर्तृत्वाभोक्तृत्वरूपं ब्रह्माहमस्मि नेतः पूर्वमपि कर्ता भोक्ता वाहमासं नेदानीं नापि भविष्यामि काल इति ब्रह्मविदवगच्छति । एवमेव च मोक्ष उपपद्यते अन्यथा ह्यनादिकालप्रवृत्तानां कर्मणां क्षयाभावे मोक्षाभावः स्यात् । न च देशकालनिमित्तापेक्षोमेक्षः कर्मफलवद्विनष्टुमर्हति अनित्यत्वप्रसङ्गात् परोक्षत्वानुपपत्तेश्च ज्ञानफलस्य । तस्माद्ब्रह्माधिगमे दुरितक्षय इति स्थितम् ॥ "इतरस्याप्येवमसंश्लेषः पाते तु" शा०सू० ॥ "पूर्वकृतधिकरणे बन्धहेतोरविद्यात्वे सविनाशौ ज्ञाननिमित्तौ शास्त्रव्यपदेशाच्चिरवृत्तिवौ धर्मस्य पुनः शास्त्रीयत्वाच्छास्त्रीयेण ज्ञानेन विरोध इत्याशङ्क्य तन्निराकरणाय पूर्वाधिकरणन्यायातिदेशः क्रियते । इतरस्यापि पुण्यस्य कर्मण एवमवद्यं संश्लेषोविनाशश्च ज्ञानवतो भवतः । कुतः ? तस्यापि स्वफलहेतुत्वे ज्ञानफलप्रतिबन्धित्वप्रसङ्गात् "उभे उ ह्येवैष एतेन तरतीत्यादि" श्रुतिषु च दुष्कृतवत् सुकृतस्यापि प्रधानशब्दव्यपदेशात् अकर्तात्मबोधनिमित्तस्य कर्मक्षयस्य सुकृतदुष्कृतयोस्तुल्यत्वात् । "क्षीयन्ते चास्य कर्माणि इति चाऽविशेषश्रुतेः । यद्यपि केवलएव पाप्मशब्दः पठ्यते तथापि तेनैव पुण्यमप्याकलितमिति द्रष्टव्यं ज्ञानमेवद्यानिष्टफलत्वात् । अस्ति च श्रुतौ पुण्येऽपि पाप्मशब्दः "नैनं सेतुमहोरात्रे प्रतत तरत" इत्यत्र सह दुष्कृतेन सुकृतमभ्युक्त्य "सर्वे पाप्मानोऽतोनिवर्तन्त" इत्यविशेषेणैव प्रतीतेषु पाप्मशब्दप्रयोगात् । पाते त्विति । तुशब्दोऽवधारणार्थः । एवं धर्माधर्मयोर्बन्धहेतोर्विद्यासामर्थ्यादत्यन्तविनाशसिद्धेरवश्यं भाविनी विदुषः शरीरपाते सद्भिरित्यवधारयति "अनारब्धकार्ये एव तु पूर्वे तदवधेः शा०सू० ॥ "पूर्वयोरधिकरणयोर्ज्ञाननिमित्तः सुकृतदुष्कृतयोर्विनाशोऽवधारितः स किमविशेषेणारब्धकार्ययोश्च भवत्युत विशेषेणानारब्धकार्ययोरेवेति विचार्यते तत्र "उभे उहैवैष एतेन तरतीत्येवमादि" श्रुतिष्वविशेषश्रवणादविशेषेणैव क्षय इत्येवं प्राप्ते प्रत्याह अनारब्धकार्ये एव त्विति । अप्रवृत्तिफले एव पूर्वजन्मान्तरसञ्चिते अस्मिन्नपि च जन्मनि प्राक् च ज्ञानोत्पत्तेः सञ्चिते सुकृतदुष्कृते ज्ञानाधिगमात् क्षीयेते न त्वारब्धकार्ये सोभिभुक्तफले वाभ्यामेतदुभयं ज्ञानायतनं जन्म निर्मितम् । कुत एतत् ? "तस्य तावदेव चिरं यावन्न विमोक्ष्यइति शरीरपातावधिकरणात् क्षेममाप्नोति । इतरथा हि ज्ञानादशेषकर्मक्षये सति स्थितिहेत्वभावात् ज्ञानमाप्नुवन्नन्तरमेव क्षेममश्नुवीत तत्र शरीरपातप्रतीक्षां नाचक्षीत । ननु वस्तुबलेनैवायमकर्तात्मबोधः कर्माणि क्षपयन् कथं कानिचित् क्षपयेत् कानिचिन्नोपेक्षेत न हि समाने ह्यग्निबीजसम्बन्धे केषाञ्चिद्बीजशक्तिः क्षीयते केषाञ्चिन्न क्षीयते इति शक्यमङ्गीकर्तुमिति । उच्यते । न तावदनाश्रित्यारब्धकार्यं कर्माशयं ज्ञानोत्पत्तिरुपपद्यते आश्रिते च तस्मिन् कुलालचक्रवत् प्रवृत्तवेगस्यान्तराले प्रतिबन्धासम्भवाद्भवति वेगक्षयप्रतिपालनम् । अकर्तात्मबोधोऽपि हि मिथ्याज्ञानबाधनेन कर्माशयमुच्छिनत्ति । बाधितमपि मिथ्याज्ञानं द्विचन्द्रज्ञानवत् संस्कारवशात्

कञ्चित् कालमनुवर्त्तत एव । अपि च नैवात्र विवदितव्यं ब्रह्मविदः कञ्चित् कालं शरीरं म्रियते न म्रियते वा इति । कथं हेतुकस्य स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधारणञ्चापरेण प्रतिक्षेप्तुं शक्येत ? श्रुतिस्मृतिषु च स्थितप्रज्ञलक्षणनिर्देशेनैतदेव निरूप्यते । तस्मादनारब्धकार्य्ययोरेव सुकृतदुष्कृतयोर्विद्यासामर्थ्यात् क्षय" इति भा० ।

अपूर्व्वता स्त्री अपूर्व्वस्य अन्यतोऽप्राप्तस्य भावः तल् । १ प्रमाणान्तरागम्यत्वे "उपक्रमोपसंहारावभ्यासोऽपूर्व्वता फलम् अर्थवादोपपत्तिश्च हेतुस्तात्पर्य्यनिर्णये २ इष्टसाधने तात्पर्य्यावधारणहेतुभेदे च यथा छान्दोग्ये "तत्त्वौपनिषदं वेदेति ब्रह्मणो मानान्तरागम्यत्वमुक्तम् ।

अपूर्व्वपति स्त्री न पूर्व्वः पतिर्य्यस्याः । कुमार्य्याम् । "अपूर्व्वपतिं कुमारीमिति" सि० कौ० ।

अपूर्व्ववाद पु० अपूर्व्वमधिकृत्य वादः तत्त्ववुभुत्सोः कथा । गङ्गेशोपाध्यायकृते शब्दचिन्तामणेरन्तर्गते ग्रन्थभेदे ।

अपूर्व्वविधि पु० अपूर्व्वे प्रमाणान्तरेणाप्राप्ते विधिर्विधानम् वि+धा–कि । अप्राप्तप्रापके लिङादिपदवेदनीये शब्दविशेषे । यथा स्वर्गकामो यजेतेति लिङादियुक्तं वाक्यं प्रमाणान्तरेणाप्राप्तस्य स्वर्गसाधनत्वस्य यागे बोधयत् तथा । अपूर्व्वविधिरपि चतुर्विधः कर्म्मविधिः गुणविधिः विनियोगविधिः प्रयोगविधिश्चेति । तत्र अग्निहोत्रं जुहोति इत्यादौ यागरूपे कर्म्मणि इष्टसाधनतायाः, क्रतिसाध्यतायाः भावनायाः वा मतभेदेन बोधनात् कर्म्मविधित्वम् । द्रव्यदेवतादिविधायकविधिषु गुणविधिः । यथा दध्ना जुहोत्यादिवाक्यं प्राप्तस्याग्निहोत्रस्यानुवादेनाप्राप्तगुणरूपद्रव्यादेर्विधानात् । "ऐन्द्र्या गार्हपत्यमुपतिष्ठत इत्यादि ऐन्द्र्या ऋचः गार्हपत्योपस्थाने विनियोजनात् विनियोगविधिः । एवं कृत्वा एवं कुर्य्यादित्यादि प्रयोगशास्त्रकोविधिः प्रयोगविधिः । यथा अधीत्य स्नायादित्यादि 'उपसद्विचरित्वा मासमेकमग्निहोत्रं जुहोत्यादि च अत्रत्य विधिरिति भेदः ।

अपूर्व्य त्रि० न पूर्व्यमर्हति यत् न० त० । पूर्व्यानर्हे "त्वं नो वायवेषामपूर्व्यः सोमानामिति" ऋ० १,१३४,६ ।

अपृक्त त्रि० पृच–क्त न० त० । १ असंबद्धे "अपृक्त एकाल् इति पाणिसूत्रे वर्णान्तरायुक्ते २ एकवर्णे "वेरपृक्तस्य पा० ।

अपृथक् अव्य० न पृथक् । सहयोगे फूबौपरयोरेकादेशरूपे समूहभवने पृथक्त्वाश्रित्यमपृथक्त्वाश्रित्यञ्चेति साश्रित्यं द्विविधमिति दृष्टाः ।

अपेक्षणीय त्रि० अप+ईक्ष–कर्म्मणि अनीयर् । १ अनुरोद्धव्ये अपेक्षाकर्म्मणि २ प्रतिपाद्ये च "आत्मा यत्नेन रक्षोरक्षशिरसि पुनः सोऽपि नापेक्षणीय" इति नीतिः ।

अपेक्षा स्त्री अप+ईक्ष–भावे अ । १ आकाङ्क्षायां, सा च शाब्दबोधजनिका "यत्पदेन विना यस्यानुभावकता भवेदित्युक्ता तत्पदे पदवत्त्वरूपा । अपेक्षायाञ्च प्रायशोऽनुपपत्तिर्नेष्यते "सापेक्षे प्रत्ययो न स्यात् समासो वा कथञ्चन । सापेक्षं तद्विजानीयादसमस्तविशेषणम्" यथा प्रवीरं पुत्रकाम्यति कृष्णस्य राजभक्त इत्यादौ प्रत्ययसमासौ न स्तः । "सापेक्षत्वेऽपि गमकत्वात् समास" इति भाष्योक्तेः देवदत्तस्य गुरुकुलमित्यादौ समासः इति भेदः । १ प्रयोजकत्वे तच्च ज्ञाने स्थितौ उत्पत्तौ वा इतरस्यानुरोधित्वम् ज्ञानादिकार्य्ये च यस्य यत्पदार्थान्तरज्ञानाद्यनुरोधः तस्य तदपेक्षा । अतएव तर्कग्रन्थे जगदीशेन "ज्ञापेक्षापादकः प्रसङ्ग आत्माश्रयः अपेक्षा च ज्ञप्तावुत्पत्तौ स्थितौ च प्राहेत्यभिधाय एतद्घटज्ञानं यद्येतद्घटज्ञानजन्यं स्यादेतद्घटज्ञानभिन्नं स्यादिति ज्ञप्तौ । घटोऽयं यद्येतद्घटजनकः स्यात् एतद्घटभिन्नः स्यादिति उत्पत्तौ, अयं घटः यद्येतद्घटदृष्टिः स्यात् तदात्वेनोपलभ्येतेति स्थितौ च" ज्ञापेक्षापेक्षितत्वे उदाहृतम् । अनतिदूरे च "अपेक्षा चात्र साक्षात्परम्परासाधारणी प्राहे"त्युक्तम् । तेन साक्षात् परम्परया वा स्वज्ञानादिप्रयोजकतैवापेक्षेति निष्कर्षः । स्वपक्षसापेक्षत्वपक्षकत्वमन्योन्याश्रयलक्षणम् । २ अनुरोधे "सत्यामपि तपःसिद्धौ नियमापेक्षया मुनिः" रघुः । ३ स्पृहायाञ्च "सङ्गोदेषु कामेषु निरपेक्षः परिव्रजेदिति" "अध्यात्मरतिरासीत निरपेक्षोनिरामिष इति" च मनुः । "निरपेक्षः विगतस्पृह इति" कुल्लूकभट्टः ।

अपेक्षाबुद्धि स्त्री अयमेकः अयमेक इत्याकारिकायाम् अनेकैकत्वविषयिण्यां "अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरिष्यते भाषा० परिभाषितायाम् बुद्धौ ।

अपेक्षाबुद्धिज त्रि० अपेक्षाबुद्धितो जायते जन–ड ५त० । न्यायोक्ते द्वित्वादिपरार्द्धान्ते संख्याभेदे । "द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजा मताः अनेकाश्रयपर्य्याप्ता एते तु परिकीर्त्तिताः अपेक्षाबुद्धिनाशाच्च नाशस्तेषां प्रकीर्त्तित" इति भाषा० । अत्रायमभिसन्धिः । यद्यपि द्वित्वादि समवायः प्रत्येकं घटादावस्ति तथापि एकोद्वाविति ज्ञानाभावात् एको न द्वावितिज्ञानाच्च द्वित्वादीनां पर्य्याप्तिस्वरूपः कश्चित् संबन्धोऽनेकाश्रयोऽङ्गीक्रियते पर्य्याप्तिसंबन्धेन च

प्रत्येकं घटादौ न द्वित्वादि । तादृशसम्बन्धेन अपेक्षाबुद्धि-सापेक्षत्वेन तत्सत्त्वे तथा ज्ञानं, तदसत्त्वे न तथाज्ञानम् । तत्र प्रथमम् अयमेकः अयमेक इत्याकारिका अपेक्षाबुद्धि-स्ततोद्वित्वोत्पत्तिः ततो द्वित्वद्वित्वत्वनिर्विकल्पकं ततोद्वित्व-प्रत्यक्षम् । अपेक्षाबुद्धिनाशाच्च ततोद्वित्वनाशः इति । यद्यपि बोम्यविभुविशेषगुणानां स्वोत्तरवर्त्तिगुणनाश्यत्वेन ज्ञानमा-त्रस्य द्वित्वस्थायित्वं तथापि अगत्या अपेक्षाबुद्धेरिच्छ्य-स्थायित्वं स्वीक्रियते अन्यथा निर्विकल्पककाले अपेक्षा-बुद्धिनाशे द्वित्वस्य नाशः प्रसज्येत न तु द्वित्वप्रत्यक्षं तदानीं विषयाभावात् विषयस्य प्रत्यक्षं प्रति कार्य्यकालवृत्तित्वेव कारणत्वोपगमात् तथा च द्वित्वप्रत्यक्षमेवापेक्षाबुद्धिनाशकं नान्यदिति कल्प्यते । कालान्तरे द्वित्वप्रत्यक्षाभावाच्च अ-पेक्षाबुद्धिनाशात् द्वित्वादिनाशइति कल्प्यतइति सि०मु०।

अपेक्षित त्रि० अप+ईक्ष-कर्म्मणि क्त । १ अपेक्षाविषय भूते २ आकाङ्क्षिते च । "अपेक्षितक्रियश्चेति त्रिधा-ऽपादानमिष्यते" इति हरिः ।

अपेक्षिन् त्रि० अप+ईक्ष-णिनि स्त्रियां ङीप् । अपेक्षावति स्वकार्य्यजननादौ इतरप्रयोजकतानुरोधिनि च ।

अपेक्ष्य त्रि० अप+ईक्ष-कर्म्मणि ण्यत् । १ अपेक्षणीये । भावे ल्यप् । अनुरुध्येत्यर्थे अव्य० "किमपेक्ष्य फलं पयोधरान् ध्वनतः प्रार्थयते मृगाधिप" इति किरा० ।

अपेत त्रि० अ+इण-कर्त्तरि क्त । १ अपगते अपसृते । "यं प्रव्रजन्तमनुपेतमपेतकृत्यमिति" भाग० २पलायिते च।

अपेतराक्षसी स्त्री अपेतः राक्षस इव पातकं यस्याः गौ०ङीप्। तुलस्याम् राजनि० । तस्याः राक्षसतुल्यपापादिहरणा-त्तथात्वम् । "दूब्यां दहति पापानि धात्री हरति पातकम् । हरितकी हरेद्रोगं तुलसी हरते त्वयम्" आ०त० स्कान्दोक्तेस्तस्याः पापादिहारित्वम् ।

अपेय त्रि० पा अर्हार्थे यत् न०त०। १ सुतौ निषिद्धपाने मद्यादौ "मद्यमेयमपेयमनिश्राद्धमिति" ति०त०उद्व० एवमन्यानि अपेयानि सुतौ प्रसिद्धानि यथा "वर्ज्यं स-लवणं क्षीरं यच्च विस्रुतं पयः। अनिर्दशायागोः क्षीरं पीत्वा चान्द्रायणं चरेदिति" आ० त० सुतिः । "अप: सुराभाजनस्था मद्यभाण्डे स्थितास्तथा पञ्चरात्रं पिबेत् पीत्वा शङ्खपुष्पीहतं पय" इति मनुः । "शुनोच्छिष्टाः स्थिता वापो यदि कथित् द्विजः पिबेत् शङ्खपुष्पीविपक्वेन लाक्षं क्षीरेण वर्त्तयेदिति" यमः । "स्त्रियोच्छिष्टाः स्थिता आपो यदि कथित् पिबेद्द्विजः । शङ्खपुष्पीत्यादि० शङ्खः "शूद्रोच्छिष्टा स्थिताश्चापो यदि कथित् पिबेत् द्विजः । कृमिमूत्रविपक्वेन लाक्षं क्षीरेण वर्त्तयेदिति हारीतः "शुना संस्पृष्ट भाण्डे तु रेतोमूत्रविदूषिते। जलक्षीरादिकं पीत्वा तप्तकृच्छ्रं समाचरेत्" लघुवौ० । "चण्डालकूपभाण्डेषु यस्त्वज्ञानाज्जलं पिबेत् प्रायश्चित्तं कथं तत्र वर्षे वर्षे विधीयते । चरेत् सान्तपनं विप्रः प्राजापत्यन्तु भूमिपः । तदर्द्धं तु चरेद्वैश्यः पादं शूद्रस्य निर्दिशेत्" आप० । "चण्डालपरिस्रुतं योऽज्ञानाज्जलं पिबेत् । तस्य शुद्धिं विजानीयात् प्राजापत्येन नित्यश" इति आप० । "यस्तु चण्डालसंस्पृष्टं पिबेत् किञ्चिदकामतः स तु सान्त-पनं कृच्छ्रं चरेच्छुद्ध्यर्थमात्मनः" अङ्गिराः । "किञ्चिदिति जलक्षीरादिकमिति" प्रा०वि० । आममांसादौ न दोषः । "आमं मांसं हृतं क्षौद्रं स्नेहाश्च फलसम्भवाः । स्नेच्-भाण्डस्थिता दुष्टानिष्क्रान्ताः शुचयः स्मृताः" यमः "अन्त्यजैः खानिताः कूपास्तडागानि तथैव च । एषु स्नात्वा च पीत्वा च पञ्चगव्येन शुध्यति" आप० । जलान्तराभावे तु तदभावादि पाठं शक्यते "अन्त्यजैः खानिते कूपे सेतौ वाप्यादिके तथा तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्यते इति वृद्धयाज्ञ० । "इदमल्पनापद्विषयमिति" प्रा० वि० । "भाण्डस्थिता अनोज्ञानामपः पीत्वा पयोदधि । ब्राह्मणो क्षत्रियो वैश्यः शूद्रस्यैवोपसर्पति ब्रह्मकूर्चो-पवासश्च याज्ञवल्क्यस्य निष्कृतिः" परा० । उपसर्पति उपसर्पेत् प्रायश्चित्तमिति शेषः तदेवाह ब्रह्मकूर्चोमेति । "यदि विप्रः प्रमादेन शूद्रतोयं पिबेत् स्वयम् । उपोष्य विल्व-पद्मानां पलाशस्य कुशस्य च । एतेषामुदकं पीत्वा तेन शुद्धिमवाप्नुयात्" याज्ञ० । अत्रापवादः । "नवभाण्डेषु पानीयं विट्शूद्रक्षत्रजन्मनाम् । पेयं तदाह्मणैर्प्राणां पयो-दधि तथैव च" जाबा० । "हृतं तैलं पयःक्षीरं तथैवेक्षुरसो गुडः । शूद्रभाण्डस्थितं तक्रं तथा मधु न दुष्यति" याज्ञ० । हृतादीनामाकरभाण्डस्थितानां न दोषः" शङ्खः । "पीता-वशेषितं पीत्वा पानीयं ब्राह्मणः क्वचित् । त्रिरात्रं तु व्रतं कुर्य्याद्दामहस्तेन वा पुनः" शङ्खः । "वामेन केवलेनेति" प्रा०वि० । "प्रपामरुखे घटके च कूपे द्रोण्यां जलं कोष-गतास्तथापः । क्रतेऽपि शूद्रात्तदपेयमाहुरापद्गतो भूमि-गताः पिबेत्ता" इति यमः । प्रपाजलं, कूपजलाहरण घटस्थजलं द्रोणी सेकपात्रविशेषः तज्जलं, खड्गादि कोषगतं जलञ्च शूद्रासम्बन्धेऽप्यपेयम् "आपदि तु तदेव जलं भूमिगतं कृत्वा ततः पात्रान्तरेणोद्धृत्य पेयमिति"

प्रा॰वि॰। एतद्विषये एव। द्रोणशाभायसयुक्तायां ऊने प्रावर्त्तके तथा। यामप्रपाजलञ्चैव पीत्वापत्सु न दुष्यतीति लघुहारीतः। तदपि भूमिगतं ऊर्त्यैव पेयं पूर्ववनैकराक्यात्। "प्रावर्त्तके सेचके ऊने अश्नाते" प्रा॰वि॰। "कूपे विन्मूत्रसंसृष्टे पीत्वा तोयं द्विजोत्तमः। त्रिरात्रेण विशुध्येत" अङ्गिराः। "जलाशये तथान्येषु स्थावरेषु महीतले। कूपवत् कथिता शुद्धिः महत्सु च न दूषणमिति" विष्णुः। "महत्स्वप्यशुचिगन्धया तीर्थसमीपतोयमपहरणवर्ज्जनमिति" प्रा॰वि॰। यथोक्तं देवलेन। "तत्राचोष्यतडागानि नदीर्वापीः सरांसि च कक्षलाशुचियुक्तानि तीर्थतः परिवर्जयेदिति"। "खतपञ्चनखात् कूपादल्पोपहताद्धोदकं पीत्वा ब्राह्मणस्त्रिरात्रमुपवसेदित्यादि" विष्णुः "अल्पोपहतात् अमेध्यादिनेति" प्रा॰वि॰। "यस्तु कूपात् पिबेत् तोयं ब्राह्मणः शवदूषितात् उपवासत्रयं कृत्वेत्यादि" लघुहा॰। "छिद्रो भिन्नः शवश्चैव कूपस्थो यदि दृश्यते। पयः पीत्वा त्रिरात्रेण इत्यादि" देवलः। "पीतशेषं पिबेत् विप्रैर्विप्रः स्यादत्यथा पशुरिति भवि॰पु॰। "क्षेप्योपानहविन्मूत्रं क्षीरजो मद्यमेव च। एभिः संदूषिते कूपे तोयं पीत्वा कृच्छं विधिः। एकं द्वयहं त्रयहञ्चैव द्विजातीनां विशोधनमिति" अत्रिः। अत्यापवादमाह स एव "गोदोहने चर्म्मघटे च तोयं वन्याकरे कारुकशिल्पिहस्ते। स्त्रीबालवृद्धाचरितानि यान्यप्रत्यवरुद्धानि शुचीनि तानि। प्राकाररोधे विषमप्रदेशे सेवानिवेशे भवनस्य दाहे। आरब्धयज्ञेषु महोत्सवेषु तथैव दोषा न विकल्पनीयाः। शुचि गोदग्निकृत्तोयं प्रकृतिस्थं महीगतम्। चर्म्मभाण्डैस्तु धाराभिस्तथा यन्त्रोद्धृतं जलमिति"। प्रागुक्तवचनजातैः चर्म्मभाण्डस्थितयन्त्रोद्धृतयोरपेयत्वेन निषेधे प्राप्ते चर्मभाण्डैरुद्धृतं यन्त्रोद्धृतञ्च सन्ततधारयोद्धृतञ्च एतत्त्रयं यदि महीगतं गोदग्निकरं प्रकृतिस्थमविकृतं च तदा शुचीत्यनेन प्रतिप्रस्तुतम् महत्तु च न दुष्यतीत्यनेन महत्त्वस्यामेध्याक्रान्तत्वेन अव्यावर्त्तकतया गोदग्निकरत्वेन विशेषणात् तथाभूतं महत्त्वमेव प्रकृते विवक्षितम्। तदपि जलान्तराभावे शुद्धमित्यवधेयं प्रागुक्तवचने आपद्गतस्यैव भूमिगतं कृत्वा ततः उद्धृत्य पानविधानेन तदेकवाक्यत्वात् तथैवेह ज्ञेयम्। एतच्च स्वभावतः पेयजलस्यैव—चर्म्मभाण्डादिस्थितिरूपदोषप्रतिप्रसवार्थम् न तु अपेयस्य क्षारादिखानिततोयस्यापि पेयतापादनार्थं तथात्वे वाक्यभेदापत्तेः न च हिरण्योदकस्यैव अत्रस्येव सामान्यशास्त्रनिषिद्धापेयजलस्य शुद्ध्यर्थतापरं स्वभावतः पेयस्यैव चर्म्मभाण्डादिगतत्वेन दोषपरिहारपरतयैव सर्व्वसामञ्जस्ये विधिद्वयकल्पनायाः अन्याय्यत्वात् एतेन इदानीन्तनस्य क्षाराजखानितस्रजलस्य यन्त्रोद्धृतत्वेन शुद्धताकीर्त्तनं साहसमेव तस्य स्वेच्छखानितजलत्वेन स्वभावतोऽपेयत्वात् जलान्तरस्य गङ्गाजलस्य च सन्निकृष्टत्वादापद्विषयत्वाभावात् प्रकृतिस्थविशेषणाच्च तस्य संस्कारविशेषेण विकारविशेषवत्त्वादेतद्वचनस्यापि तत्राप्रवृत्तेश्च। किञ्च "विचित्रसारतरुदवे यत्किञ्चन प्रजायते सर्व्वन्तु विदेयं पुरोपनत् स्वभावतः" इति ब्रह्मपुराणेन अमेध्यसंसर्गवत्त्वेन शङ्खितान्नादेर्भोजननिषेधात् स्वेच्छखानेऽमेध्यादिसंसर्गवत्त्वेन शङ्कितस्यास्य जलादेरप्यपेयतेति गम्यते। अग्निसूर्य्यकिरणास्पृष्टतया च तस्य व्यापन्नजलतया वैद्यकोक्तदोषाधायकत्वेनापि ऽपेयता। "अपि चण्डालभाण्डस्थं तज्जलं पावनं महत्" इत्युक्तेश्चण्डालखाते गङ्गाजलानामेवाङ्गतत्वात्तस्य स्वभावतः शुद्धतेति तु न युक्तम्। "सर्व्वत्र पावनी गङ्गा त्रिषु स्थानेषु दुष्यति स्वेच्छसर्गे सुराभाण्डे मेघादिजलमिश्रणे" इति वचनात् तस्य मेघादिजलसम्पर्कगङ्गायामेच्छादिसंसर्गस्य प्रत्यक्षदर्शनाच्च स्वभावतः शुद्धत्वाभावात्। धारायां प्रतिप्रसवमाह वैधायनः "अदुष्टा सन्तता धारा वातोद्धूताश्च रेणवः। आकराः शुचयः सर्वे वर्ज्जयित्वा सुराकरमिति" "काले नवोदकं शुद्धं न पातव्यन्तु तत्क्वचित्। अकाले तु दगार्द्रं स्यात् पीत्वा नाद्यादहर्निशमिति" आ॰त॰स्मृतिः। "स्नानमाचमनं दानं देवतापितृतर्पणम्। ऋतोदकेन कुर्वीत तथा मेघादिनिःसृतैः"। आचमननिषेधात् पानादेः स्मृतरां निषेधः। "यद्यद्दयं श्रावणादि सर्व्वा नद्यो रजस्वलाः। तासु स्नानादिकं वर्ज्यं वर्ज्जयित्वा सुरापगाम् इति" छन्दो॰प॰। "यैः कृतः सर्वभक्षोऽग्निस्तेषां चैव महोदधिरिति" मनुः यैः विप्रैः "अन्यथा हि कृतश्रेष्ठैः देवयोनिरपांपतिः। कुशाग्रेणापि कौन्तेय न स्प्रष्टव्यो महोदधिरिति भा॰व॰प॰ स्वर्गनिषेधात् पाननिषेधः। "अनिर्द्दशाया गोः क्षीरमौष्ट्रमैकशफञ्च तथा। आविकं सन्धिनीक्षीरं विवत्साया याश्च गोः पयः। आरण्यानाञ्च सर्व्वेषां मृगाणां महिषं विना। स्त्रीक्षीरञ्चैव वर्ज्यानि सर्व्वशुक्तानि चैव हि" मनुः। "गोः क्षीरमनिर्द्दशायाः स्मृतके अजामहीष्योश्च नित्यमपेयमौष्ट्रमैकशफञ्च स्यन्दिनीनाञ्च याश्च वत्सव्यपेताः" अङ्गि॰। "वर्ज्जयेद्गोरवत्सायाः पयश्चैवान्यवत्सया। आरण्यानाञ्च सर्व्वेषां वर्ज्जयित्वा तु माहिषमिति" यमः। "सर्वासां हि स्त्रीणां क्षीरं वर्ज्यमजावर्ज्जमिति" यतुः "गोजामहिषीवर्ज्यं

सर्वपर्वाणि यान्यनिर्दशाङ्गं तान्यपि मन्थिनीस्यन्दिनीविदाह्यायमक्षुद्वीरं चामेध्यभुजञ्च" विष्णुः । पीत्वोपवसेदित्यनुवृत्तिः । मन्थिनो दधिभाक्तान्ना स्यन्दिनी नित्यं प्रस्रवत्पयःसना । अमेध्यभुजः मद्यादिभक्षणशीलायाः । यमसूर्वल्लयुग्मं प्रस्तुता "हस्तवल्या निन्दितं रासभञ्च पयो वर्ज्जयेदिति" हारीतः । तत्राजाक्षीरं दद्याच्छादर्वाक् निषिद्धम् ऊर्द्धं तत् मेयं सर्ववचनसामञ्जस्यात् "गोघ्रातं शकृनोच्छिष्टं पदास्पृष्टञ्च कामतः । सन्धिन्यनिर्दशावत्सगोपयः परिवर्ज्जयेत् याज्ञ० ।" "क्षीराणि यान्यभक्ष्याणि तद्विकाराशने पुनः सप्तरात्रं व्रतं कुर्यादित्यादि" या० । "उष्ट्रक्षीरमानुषीक्षीरपाने पुनरुपनयनं तप्तकृच्छ्रञ्चेत्यादि" याज्ञ० । "उष्ट्रतक्रेऽविलवनपिण्याकमथितप्रभृतीनि चात्तवीर्य्याणि नाश्नीयात्" गौत० । उष्ट्रतक्रेहं क्षीरादि विलवनं हतमलं पिण्याकः खलिः मथितं तक्रादि आत्तवीर्य्याणि गृहीतसाराणि ॥ आत्तवीर्य्यपदञ्चात्रोष्ट्रतक्रेऽपरं मथितपदं च उदकप्रायतक्रपरञ्च । "क्षत्रियश्चैव वृत्तस्थो वैश्यः शूद्रोऽथ वा पुनः । यः पिबेत् कपिलाक्षीरं न ततोऽन्योऽस्यपुण्यकृत्" आप० । "कापिलं यः पिबेच्छूद्रो नरकेण वियुज्यते" स्मृतिः । सुश्रुते तु धातुदोषविशेषजनकतयाकानिचिदपेयान्युक्तानि तानि प्रायशः सामान्यतोऽपेयशब्दे २२६,२७, पृष्ठे उक्तानि । तत्र विशेषः कश्चित् प्रदर्श्यते "वर्षाजले गाङ्गेयजलसदृक्षपरीक्षणसङ्गा "वर्षान्त्यत्वे सिक्यभेदे च सासदृमिति विद्यात्तन्नोपादेयमित्युक्तम् कीटमूत्रपुरीषाण्डशवकोथप्रदूषितम् । क्षणपर्य्योत्करवृतं कलुषं विषसंयुतम् योऽवगाहेत वर्षासु पिबेद्वापि नवं जलम् । स वाताभ्यन्तरान् रोगान् प्राप्नुयात् क्षिप्रमेव तु तत्र यत् सैवालपद्मकह्लारप्रभृतिभिरवच्छन्नं शशिसूर्य्यकिरणैर्नाभिजुष्टं गन्धवर्णरसोपपन्नञ्च तद्ग्राह्यमिति विद्यात् । तस्य स्पर्शरूपरसगन्धवीर्य्यविपाकाः दोषाः षट् सम्भवन्ति । व्यापन्नं वर्ज्जयेन्नित्यं तोयं यदथनार्त्तवम् । दोषसङ्जननं हेतुत्रादर्दीवाहितन्तु तत् । "व्यापन्नं सलिलं यस्तु पिबतीहाप्रसाधितम् । श्वयथुं पाण्डुरोगञ्च त्वग्दोषमविपाकताम् । श्वासकासप्रतिश्यायशूलगुल्मोदराणि च । अन्यान् वा विषमान् रोगान् प्राप्नुयात् क्षिप्रमेव चेति" नदीविशेषजलस्य दोषकीर्त्तनेनापेयता च तत्रोक्ता "पूर्व्वाभिस्वास्तु न प्रशस्ता गुरूदकत्वादिति । सह्यप्रभवाः कुष्ठं जनयन्ति, विन्ध्यप्रभवाः कुष्ठं पाण्डुरोगञ्च, मलयप्रभवाः क्रमीन्, महेन्द्रप्रभवाः श्लीपदोदराणि, हिमवत्प्रभवाः कुष्ठश्वयथुगरोरोगश्लीपदगलगण्डान्, प्राच्यावन्त्याः अपरावन्त्याचार्य्यांश्चोपजनयन्ति, इति "सासदृसदृक्षं विस्रं लवणं सर्व्वदोषकृदिति । अनेकदोषमानूपं वार्य्यभिष्यन्दिगर्हितमिति"च । रोगभेदे शीतलजलस्यापेयतोक्ता, "पार्श्वशूले प्रतिश्याये, वातरोगे गलग्रहे, आध्माते स्तिमिते कोष्ठे सद्यः शुद्धे नवज्वरे । हिक्कायां स्रोतसि पीते च शीताम्बु परिवर्ज्जयेदिति" । तक्रस्यापेयता रोगभेदे तत्रोक्ता "तक्रं नैव पिबेत् क्षते दद्यादुष्णकाले न दुर्बले । न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपैत्तिके । शीतकालेऽग्निमान्द्ये च कफोत्क्लेशामयेषु चेति" । द्रव्यान्तरसंयोगादपेयता अपथ्यशब्दे २२६,२७, पृष्ठे दर्शिता । विशेषस्त्वेषः । "उष्णोदकानुपानन्तु स्नेहानामथ शस्यते, क्षते भल्लातकस्नेहात् स्नेहात्तौवरकात्तथेति" रोगभेदेऽनुपाननिषेधेन तत्र जलादीनामपेयता भङ्ग्या तत्रैव दर्शिता । अनुपानगुणमभिधाय "न प्रिवेच्छासकासार्त्तो रोगे चाप्यूर्द्धजत्रुगे । स्वरोरस्थः प्रसेकी च यस्य चोपहतः स्वरः । पीत्वाऽध्वभाष्याध्ययनगेयस्यग्र्यं पीलयेत् । प्रदुष्यामाशयं तद्धि तस्य कण्ठोरसि स्थितः । मन्दाग्निसादहृद्रोगादीनामवान् जनयेत् बहूनिति"सुश्रुते ॥ [अदत्ते

अपेशल त्रि० विरोधे न०त० । पेशलत्वविरोधिमान्द्ययुक्ते

अपेहिकटा स्त्री अपेहि अपगच्छ कट ! इत्युच्यते यस्यां क्रियायाम् मयू०स० । कटसम्बोधनकापगतिनिदेशक्रियाविशेषे । एवं मयू० समासे । अपेहिद्वितीया, अपेहिप्रथमा, अपेहिवाणिजा अपेहिस्वागता एतेऽपि शब्दाः तत्तत्सम्बोधनकागमनक्रियानिदेशे ।

अपैशुन न० अभावे न०त० । १ पैशुन्याभावे न०ब० । २ पैशुन्यशून्ये त्रि० अपैशुन्यमभ्युक्तार्थे न० तद्वति त्रि०

अपोगण्ड त्रि० अपसि कर्म्मणि गण्डः त्याज्यः । विकलाङ्गे "विकलाङ्गं हि सर्वत्र धर्म्मकार्य्येषु वर्ज्जयेदिति" स्मृतेः स हि वैधकर्म्मसु त्याज्यः । २ अतिभीरौ सोऽपि हि कर्म्मभावे त्याज्यः । अपसि अगण्डः अवीर इति वा तस्य कर्म्मणि अवीरत्वात्तथात्वम् । अपोजलमिव भक्षितुमशक्यात् गण्ड एकदेशोऽस्य । ३ त्रिवलिवृते मध्यभागे वलीनामेव तस्य तरङ्गाकारत्वात् तथात्वम् । अपसि कर्म्मणि त्याज्यः गण्डः अपटुत्वात् पेगण्डः शिशुः न०त० । पोगण्डः पञ्चमादब्दादर्वाक् च दशमाब्दतदुत्तरे पञ्चाब्दे बाले । पोगण्डभिन्नशिशोरेव तथात्वात् । "बाल आषोड़शात् वर्षात् पोगण्डश्चेति शब्दव्रत" इति नारदोक्तपोगण्डभिन्ने ५ षोड़शवर्षातीतवयस्के च "अजड़वेदपोगण्डो

विषये चास्य भुञ्जते भस्मं तद्व्यवहारेण भोक्ता तदुद्रव्यमर्हति" काल्या०। [भ्रान्तं प्रत्यक्षं निर्विकल्पकम्" स०द०।

अपोढ त्रि० अप-वह-क्त। १ निरस्ते त्यक्ते २"कल्पनापोढम-

अपोदक त्रि० अपगतमुदकं सुस्निष्टत्वात् यस्य। १ अप्रविष्टोदके "तमूहथुर्नौभिरात्मन्वतीभिरन्तरिक्षप्रुद्भिरपोदकाभिः ऋ०१,११६,२। अपनष्टं फलेषूदकं यस्याः उक्तपुंस्कत्वात् स्त्रियामत ङीषं वा। ङीषन्तेऽपोदिकापि (पुइ) पूतिकायाम् तत्फलेषु उदकस्यत्वात्तथात्वम्। अपगतदुष्टमुदकं यस्मात् ५ब०। जलापकर्षहेतौ विषादौ "यत्र अपोदकं विषं तत्र एतास्वप्यभवम् अथ० ५,१३,१।

अपोनप्त्रि(प्त्री)य त्रि० अपोनपात् देवताऽस्य च-छ वा नि०। अपोनपाद्देवताके हविरादौ। [मयट्। जलमये।

अपोमय त्रि० अपः जलं तदात्मकं तद्विकारत्वात् अपस्+

अपोह पु० अप+उह गत्यादौ बा० भावे क। १ त्यागे २ अतद्व्यावृत्तौ तद्विषस्य व्यावृत्तेरपि त्यागविशेषरूपत्वात्तथात्वम्। "तद्ज्ञानपोहो वा शब्दार्थः" इति काव्यप्र० "अपोहः अतद्व्यावृत्तिरिति" महेश्वरः। अहस्तर्कः अपः विपरीते प्रा०स०। अपरतर्कनिरासाय कृते विपरीततर्के स च "सुबुधा अवधं चैव यदधं धारणा तथा। अहोऽपोहोऽविज्ञानं तत्त्वज्ञानञ्च धीगुणा इति हेमचन्द्रोक्तः बुद्धिगुणभेदः। "स्वयमूहापोहासमर्थः" इति पा०भा०। भावे ल्युट्। अपोहनमत्र न०। "मत्तः स्मृतिर्ज्ञानमपोहनञ्चेति" गीता।

अपोहनीय त्रि० अप-ऊह-अनीयर्। अपरकृततर्कनिरसनेन तर्कणीये, "अतिगपोहनीयास्त्वयः" काल्या० २२,६ २१।

अपोह्य त्रि० अप-उह गत्यादौ कर्मणि यत्। अपगमनीये "त्याज्ये एतैस्त्रिभिरपोह्यं स्यादेनोहिंसासङ्गवम्" मनुः अप+वह-ल्यप्। दूरीकरणेऽर्थे अव्य०।

अपौरुष त्रि० नास्ति पौरुषमस्य। विक्रमशून्ये। अभावे न०त०। पौरुषाभावे न०।

अप्चर त्रि० अप्सु चरति चर-ट। १ जलचरे जन्तौ स्त्रियां ङीप् "त्रीण्याद्यान्यास्थितास्तेषां मृगगर्भाश्चयाप्चराः" इति मनुः त्रीणि दुर्गाणि।

अप्तु न० आप्यते भोगाय जीवेन आप-तन् तुगागम। १शरीरे २सूक्ष्मरूपसोमे च। "अधाप्नये हितीये यामाज्यं जुहोति शत०ब्रा०२,६,२८, अप्तुः सूक्ष्मरूपः सोमः भा०।

अप्तुर् पु० अद्भ्यः जलदानाय तृतोर्त्ति तुर-वेगे क्विप्। जलदायके इन्द्रे तस्य मेघनायकत्वेन तत्प्रेरकतया जलदातृत्वात्तथात्वम् "यत्तेन गातुमप्तुरो विवित्रिरे ऋ०२,२१,५, "अप्तुरः अपां प्रेरकादिन्द्रात्" भा०। २तद्वायकेऽनलादौ च तत्वान्नादेः "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिरिति" मनूक्तेः जलप्रेरकत्वम्।

अप्तुर्य्य न० अप्तुरो भावः बा० वेदे यत्। "जलप्रेरकत्वे लोके तु यञ् आप्तुर्य्यमित्येव। "इन्द्राग्नी! तविषाणि वां सधस्थानि पर्वांसि च युवोरप्तुर्य्यं हितम् १२,८, अप्तुर्य्यं वृष्टिप्रेरकत्वम् भा०युवोर्युवयोरिन्द्राग्न्योः

अप्तोर्याम पु० अप्तोर्दैक्षस्य यागकर्तृत्वाद्याम इव अत्तु०स०। अग्निष्टोमाङ्गयागभेदे "यावज्जीवमग्निहोत्रं जुहोतीति" श्रुत्या अग्निष्टोमस्य देहव्यापककालकर्तृत्वात्तथात्वम्। "सोऽप्तोर्यामेण यजेत" काल्या० ६,११,१०, "बहुत्तरे अत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्यामः काल्या० १०,६,२६,।

अप्त्य त्रि० अप्सु देहे भवः यत् वेदे टिलोपः। १अपत्ये निरु० २देहकर्म्मणि स्थिते च "पूर्व्ये अर्द्धे रजसो अप्त्यस्य" ऋ०१,१२४,५ "अप्त्यस्य कर्मणि स्थितस्येति" भा०

अप्त्र:स्थ त्रि० अप्त्रसि कर्मणि तिष्ठति अधिकृतत्वात् स्था-क ७त०। १ कर्मण्यधिकृते "संवावप्त्रःस्थौ अपसेव" ऋ० ६, ६७,३। "अप्त्रःस्थः कर्मण्यधिकृतः" भा०।

अप्त्रराज पु० अप्त्रसां कर्म्मणां राजा प्रेरकत्वात् टच् समा० वेदे पृ० सलोपः। कर्म्मप्रेरके। "युवं ह्यप्त्रराजावसीदतम् ऋ० १०१३२७।

अप्त्रवान पु०अप्त्रसा कर्म्मणा वानं गतिः सङ्गतिरस्य। भृगुवंश्ये, ऋषिभेदे, "यमप्त्रवानो भृगवो विरुरुचुः ऋ०४,७,१, अप्त्रवानः भृगुसम्बन्धी कश्चिदृषिः, भा०। "और्व्वभृगुवदप्त्रवानवदाङ्गिरवे अग्निं ससृजसम्" ऋ०८,१०२,४, अस्यैव वत्सादिगोत्रप्रवरत्वम् "वत्सानां भार्गवच्यवनाप्त्रवानौर्व्वजामदग्न्याः" इति "भार्गवौर्वजामदग्न्याः" इति वा "भार्गवच्यवनाप्त्रवानाः" इति वा"वेदानां पक्षे, भार्गवच्यवनाप्त्रवानौर्ववेदाः" इति गोत्रप्रवरा०। वत्सानामाप्नुवतः प्रवरत्वकल्पनं प्रवराध्यायविरुद्धत्वाद्धेयम्। अप्त्रसे आदानकर्मणे वानमस्य पृ० सलोपः। बाहौ निरु०।

अप्त्रस् त्रि० आप-अत्रन् तुट् हस्वश्च। १ कर्म्मणि निरु०। "क्रियातो विभागः विभागात् पूर्व्वदेशसंयोगनाशस्तत उत्तरदेशसंयोग" इत्युक्तेः संयोगहेतुत्वात्तथात्वम् "तद्देवेषु चक्रुषे भद्रमप्त्रः ऋ० १,११३,६। "अप्त्रः कर्म" भा०।

वा० अकर्म्माख्यायामपि असुन् तुट् हुश्च । २ प्राप्तव्ये, "वह्निमप्न उशसो वहन्त" ऋ० १,११३,२० । "अप्नः प्राप्तव्यम्" भा० ।

अप्नस्वत् त्रि० अप्नस्+अस्त्यर्थे मतुप् मस्य वः स्त्रियां ङीप् । कर्म्मयुक्ते । "अप्नस्वतीष्वरराशिति" ऋ० १,१२७,६ । "अप्नस्वतीषु खननादिकर्म्मोपेतासु" भा० ।

अप्पति पु० अपां पतिः ६त० । १वरुणे २समुद्रे च । "इन्द्राग्नकाप्पतीन्दुभ्यः सानुगेभ्यो बलिं हरेत्" इति "विन्ताप्पत्योर्यमस्य च" इति च मनुः ।

अप्पित्त न० अपां पित्तमिव हेतुत्वात् । १ अग्नौ "अग्नेराप" इति श्रुतौ अग्नेर्जलहेतुत्वोक्तेस्तथात्वम् ।

अप्य त्रि० अपामिदम् तत्र साधु संस्कृतं वा यत् । १जलसंस्कृते "अप्येगो राजाप्यस्तमिष्यते" ऋ० ६,८६,४५ । "अप्यः अप्सु संस्कृतः" भा० जलसम्बन्धिनि "त्वयाहितमप्यमप्सु भागम्" ऋ० २,३८,७ । "अप्यमपां सम्बन्धिनम्" भा० । २कर्म्मणि साधौ" स ईं रुगो अप्योवनर्गुरुप" ऋ० १, १४५,५ । "अप्यः कर्म्मणि साधुः" भा० अप्सु योग्यं वेदे वत् हुश्च । ४प्राप्तुं योग्ये "योनिमप्यमनिश्चितम्" ऋ० २,३८,८ । "अप्यम् आप्तुं योग्यम्" भा० ।

अप्यय पु० अप+इण-भावे अच् । १ "अपगमने २ नाशे ३ विलये च "स्वाप्ययादिति शा०सू० भवाप्ययौ हि भूतानां श्रुतौ विस्तरशोमया" गीता । अपैत्यस्मात् अपादाने अच् । पक्वपुच्छसन्धिषु "पक्वपुच्छानि परास्थिरप्यवेषु" कात्या० १७,६,७, "अप्यवेषु पक्वपुच्छास्थिसन्धिषु" वेददी० ।

अप्रकट त्रि० न प्रकाशः विरोधे न०त० । प्रकाशितभिन्ने गुप्ते । "प्रकटाऽप्रकटा चेति लीला सेयं हरेर्द्विधा प०पु०

अप्रकम्प पु० न प्रकम्पः अभावे न०त० । १ चलनाभावे न० ब० । २चलनशीने त्रि० "अप्रकम्पो दुराधर्षः" इति पुरा० ।

अप्रकर्ष पु० न प्रकर्षः विरोधे न०त० । १ अपकर्षे न०ब० । २ प्रकर्षशून्ये त्रि० ।

अप्रकाण्ड पु० न प्रकटः काण्डः स्कन्धोऽस्य । १ स्कन्धशून्ये भिष्टीप्रभृतिवृक्षे । न०त० । २प्रकाण्डभिन्ने स्कन्धे त्रि०

अप्रकाश पु० न प्रकाशः अभावे न०त० । प्रकाशाभावे गोपने "अप्रकाशकृषे क्रेतुः स्वामिन्याधरणादिति" मा०त०ना० । न०ब० । "प्रकाशशून्ये त्रि० "प्रकाशांश्चाप्रकाशांश्च तस्करान् विविधान् विदुः" मनुः । अप्रकाशचौराश्च अपहर्त्तृशब्दे मनूक्ताः १५४ पृष्ठे दृश्याः । "प्रकाशश्चाप्रकाशश्च लोकालोक इवाचल" इति रघुः ।

अप्रकाश्य त्रि० प्र+काश-णिच् अर्हार्थे कर्म्मणि यत् । १ प्रकाशयितुमनर्हे गोप्ये "अप्रकाश्यमिदं गुह्यं न देयं यस्य कस्यचित्" तन्त्रम् । २विशेषतो गोप्ये जन्मर्क्षादिनवके च तच्च । "जन्मर्क्षं मैथुनं मन्त्रो रन्ध्रच्छिद्रञ्च वञ्चनम् । आदुर्धनापमानं स्त्री न प्रकाश्यानि सर्व्वदा" का०ख० ।

अप्रकृत त्रि० न प्रकृतः प्रक्रान्तः यथार्थो वा । १अप्रक्रान्ते २अयथार्थे च । प्रकृतिः स्वभावोऽस्यास्ति अर्श० आ० अच् न०त० । भयादिना ३स्वभावच्युते । "तामसं यज्ञमप्रकृतो ददातीति गु०त० ह्रारी० "अप्रकृतो भयादिभान्" रघुनन्दनः ।

अप्रकृति स्त्री न प्रकृतिः । प्रकृतिभिन्ने कार्य्यकारणभिन्ने सांख्यप्रसिद्धे पुरुषे "न प्रकृतिर्न विकृतिः पुरुष" इति सां०का० उक्तेरस्य प्रकृतिभिन्नत्वात्तथात्वम् २ व्याकरणोक्ते प्रत्ययनिमित्तरूपप्रकृतिभिन्ने प्रत्ययादिशब्दे, मीमांसकोक्तायां ३ प्रकृतिभिन्नायां विकृतौ च । प्रकृतिः स्वभावः न० ब० । ४तच्छून्ये त्रि० वा कप् । अप्रकृतिकोऽप्यत्र ।

अप्रकृतिस्थ त्रि० प्रकृतौ स्वभावे न तिष्ठति रोगभयादिना ततश्चलति स्था-क ७त० न०त० । रोगभयादिना स्वभावाच्चलिते ।

अप्रकृष्ट त्रि० न प्रकृष्टः विरोधे न०त० । निकृष्टे अपकर्षयुक्ते

अप्रकॢप्त त्रि० प्र+कृप्-क्त न०त० । कॢप्तभिन्ने यदुचितं तद्भिन्ने "ऋत्विजां वैकोऽप्रकॢप्त्याच्छाभिते कात्या० ६,७,२

अप्रक्षित त्रि० प्र+क्षि-भावे क्त "अक्षयदर्थे" पा० उक्तेः भावकर्म्मणोश्च क्षयदर्थतया तद्भिन्ने दीर्घविधानात् भावस्य च क्षयदर्थतया न दीर्घः तेन न नत्वम् नास्ति प्रक्षिः प्रक्षयो यस्य । प्रक्षयरहिते "अप्रक्षितं वसु बिभर्षि" ऋ० १,५५,८ । [मृदुत्वयति ।

अप्रखर त्रि० न प्रखरः विरोधे न०त० । १ तीक्ष्णत्वविरोधि

अप्रगुण त्रि० न प्रकृष्टो गुण उपकरणं कार्य्यसामर्थ्यं वा यस्य । १ व्याकुले न०त० । २ अनुगुणभिन्ने च ।

अप्रचेतस् न० न प्रचेतति प्र+चित-असुन् न०त० । अज्ञाने "कथाविधात्यप्रचेताः" ऋ० १,१२०,१ ।

अप्रज पु० न प्रजायते आत्मजरूपेण प्र+जन-ड न०त० । पुत्रादिजननाभावेन अज ते १ वन्ध्ये "आत्मा वै जायते पुत्र" इति श्रुतेः पुत्रजनने आत्मजननात् तच्छून्यस्य तथात्वम् । "ब्राह्मणामप्रजः कश्चित् क्षिवेत प्रव्रजेत वेति" स्मृतिः "अप्रजस्त्रीधनं भर्त्तुर्ब्राह्मादिषु चतुर्ष्वपीति" या० । २पुत्ररहितायां स्त्रियां स्त्री "अप्रजायामतायां भ्रातृवा-

स्तदवाप्नुयुः" इति स्मृतिः "संवत्सरद्वयं तन्तु गान्धारीगर्भ-माहितम् । अप्रजा धारयामास ततस्तां दुःखमाविशत्" भा०आ०प० ।

अप्रजस् पुंस्त्री न प्रजा सन्ततिः यस्य असिच् समा० । प्रजाशून्ये । "अतीतायामप्रजसि तद्वनं भर्तृगामि च" स्मृतिः । "अस्यं त्वाप्रजसं क्रणोमि" अथ० ७,३५,२ ।

अप्रजाता स्त्री न प्रजाता कदापि न प्रसूता । १ अदृष्त-गर्भायां वन्ध्यायां स्त्रियाम् "दासीनामप्रजातानां शुभानां स्वर्गवर्चसाम् । शतमश्वं प्रदास्यामि" भा०उ०प० १५अ०।

अप्रणीत त्रि० न प्रणीतः वेदविधिना संस्कृतः । १ वैध-संस्कारशून्ये अनलादौ २ अक्रते च ।

अप्रतर्क्य त्रि० न प्रतर्क्यः तर्कयितुमशक्यः । लिङ्गाद्यभावेन अनुमानेन ज्ञातुमशक्ये । "अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः" मनुः ।

अप्रता त्रि० प्र+ताय-क्विप् नास्ति प्रताः यस्मात् ५त० । १ अतिविस्तीर्णे "न सोमो अप्रता पपे" ऋ० ८,२२,१६, "अप्रता विस्तीर्णधनेनेति" भा० धातोरातोलोपात् रूपम्

अप्रति त्रि० नास्ति प्रति प्रतिरूपः प्रतिद्वन्द्वी वा यस्य । १ अत्युत्कृष्टे "सो अप्रतीनि मनवे पुरूणीन्द्रः" ऋ० २,१६ ४, "अप्रतीनि उत्कृष्टानि" भा० २ प्रतिद्वन्द्विरहिते "यः एकः इदप्रतिमन्यमानः ऋ० ५,३२,२ । "अप्रतिः प्रतिद्वन्द्विरहितः" भा० । ३ अप्रतिरूपे अनुपमे च

अप्रतिकार त्रि० प्रति वैपरीत्ये कृ-कर्त्तरि अच् न प्रतिकरः । १ विपरीतकारिणि विस्मृते, जटा० प्रति+कृ-भावे अप् प्रतिकरः प्रतिक्षेपः अभावे न०त० । २ प्रतिक्षेपाभावे पु० न०ब० ३ प्रतिक्षेपशून्ये त्रि० ।

अप्रति(ती)कार पु० प्रति+कृ-घञ् वा दीर्घः अभावे न०त० १ प्रतीकाराभावे । न०ब० । २ प्रतीकारहीने ३प्रतिकर्त्तुमशक्ये च त्रि० । अभावे अव्ययी० । ४ प्रतीकाराभावे अव्य० ।

अप्रतिकर्म्मन् त्रि० नास्ति प्रतिकर्म प्रतीकारो यस्य । १ प्रतिकर्त्तुमशक्ये । नास्ति प्रति प्रतिरूपं तुल्यं यस्य तादृशं कर्म यस्य । २ अतुल्यकर्मके त्रि० स्त्रियां ङीप् वा ।

अप्रतिक्रिया स्त्री प्रतिक्रिया प्रतीकारः अभावे न०त० । १ प्रतीकाराभावे । न०ब० । २ प्रतीकारशून्ये ३ प्रति-कर्त्तुमशक्ये च त्रि० ।

अप्रतिग्राह्य त्रि० न प्रतिग्रहीतुं योग्यं स्मृतौ निषेधात् । प्रतिग्रहीतुमयोग्ये स्मृतौ निषिद्धप्रतिग्रहतया उल्लिखिते हिरण्यादौ द्रव्ये, शूद्रादिधनादौ च प्रतिग्रहत्याहृदर्थ-त्यक्तद्रव्याङ्गीकारः । तत्र द्रव्यविशेषे, अपादानविशेषे, काला-दिविशेषे च प्रायश्चित्तोत्कीर्त्तनेन पापजनकत्वात् क्वचित् वस्तुकृता क्वचित् कालादिनिमित्तकृता चाप्रतिग्राह्यता "प्रतिग्रहाप्रतिग्राह्यं भुक्त्वा चान्नं विगर्हितम्" मनुः तानि च प्रायश्चित्तविवेके दर्शितानि तत्रादौ प्रतिग्रहे अपादाननियमः "यथा "राजतो धनमन्विच्छेत् संसीदन् स्नातकः क्षुधा । याज्यान्तेवासिनो वापि नत्वन्यत इति स्थितिः" मनुः । राजशब्दोऽत्र न्यायवर्त्तिक्षत्रिय रूपतिपरः "न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः" इति "यो राज्ञः प्रतिगृह्णीयाद्बुध्नोच्छ्राखवर्त्तिनः स पर्य्यायेण यातीमान्नरकानेकविंशतिमिति" मनुनान्य-राजतस्तन्निषेधात् देवलेन विगिटादेव राज्ञः प्रति-ग्रहविधानाच्च "धर्मघ्नस्य कृतघ्नस्य रक्षार्थं यासतोऽशु-चीन् मेध्यमेव धनं प्राह्लस्तीक्ष्णस्यापि महीपतेः" इति "द्विजातिभ्यो धनं लिप्सेत् प्रशस्तेभ्यो द्विजोत्तमः । अपि वा क्षत्रियात् वैश्यात् न तु शूद्रात् कदाचनेति" व्यासः निन्दितप्रतिग्रहस्य अपात्रीकरणम् "निन्दितेभ्यो-धनादानं वाणिज्यं शूद्रसेवनम् । अपात्रीकरणं ज्ञेयमिति" मनूक्तेः चाण्डालादिप्रतिग्रहस्तु पातित्यहेतुः "चण्डालान्त्यस्त्रियोगत्वा भुक्त्वा च प्रतिगृह्य च । पतत्यज्ञानतोविप्रोज्ञानात् साम्यं तु गच्छति" मनूक्तेः तेन प्रायश्चित्ताधिक्यम् रजकादीनुक्त्वा "भुक्त्वा चैषां स्त्रियोगत्वा पीत्वापः प्रतिगृह्य च । कृच्छ्रमब्दं चरेज् ज्ञानादिति" मनूक्तेः "पतितानां गृहं गत्वा भुक्त्वा च प्रतिगृह्य च । मासोपवासं कुर्वीत चान्द्रायणमथापि वा" हरिः "शौकरिकव्याधनिषादरजकवरूढचर्मकारा न भोज्यान्नाः अप्रतिग्राह्यास्तदन्नाशनप्रतिग्रहयोश्चान्द्रायणं चरेत्" शुद्धिः "रजकचर्मकारश्च नटोवरूढ एव च कैवर्त्तमेदभिल्लाश्च सप्तैते ह्यन्त्यजाः स्मृताः एतेषाञ्च स्त्रियोगत्वा भुक्त्वा च प्रतिगृह्य च । पतत्यज्ञानतोविप्रो-ज्ञानात् साम्यं तु गच्छति" यमः अत्रापवादः "ग्रस्यां गृहं कृशान् गन्धान् पत्रं पुष्पं फलं दधि । धाना-मत्स्यान् पयोमांसं शाकञ्चैव न निर्णुदेदिति" मनुः न निर्णुदेत् न त्यजेत् "अभोज्यान्नानामपि पुष्पफलशाक लवणकाष्ठधान्यानि चेलस्थान्यम्बु तड़ागस्थं, गोस्थं च पय आदाय न दोष"इति शुद्धितत्त्वे तेषाञ्च उपढौकितानाम-मेवादाने न दोष इति प्रा०वि० । "अयाचिताहृतं याह्य-मपि दुष्कृतकर्मणः । अन्यत्र कुशटाश्वक्षपतितेभ्यो द्विष-

क्षयेति" या० स्मृत्येकवाक्यत्वात्। व्यक्तमुक्तम् "गन्धपुष्पकृशान् शय्यां शाकं मांसं पयोदधि। मणिमत्स्त्रीं स्त्रियं धान्यं याचमानेतदुपस्थितम्। मधूदकं फलं मूलमेधांस्य भवदर्पिता अभ्युद्यतानि याचमानानि" का०ख०। तेनैषामेवायाचितानामेव याचमानता नान्येषाम्। एवञ्च चण्डालादितोऽपि शय्यादिभिन्नानामुपढौकितानामपि अप्रतिग्राह्यता। शूद्रादिप्रतिग्रहनिषेधस्तु अनापद्येव, आपदि तु तस्य कर्त्तव्यता "याजनाध्यापने नित्यं क्रियेते संस्कृतात्मनाम्। प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मनः" इति "अदत्तिकर्षितः सीदन्निमं धर्म्मं समाचरेत् सर्वतः प्रतिगृह्णीयात् ब्राह्मणस्त्वनयं गतः" इति मनुना तस्याभ्यनुज्ञानात्। तत्र स्तेनात् द्रव्यं कथञ्चिदपि न प्रतिग्राह्यम् "योऽदत्तादायिनोहरेत् विप्रस्य ब्राह्मणोधनम् याजनाध्यापनेनापि यथा स्तेनस्तथैव सः" या०उक्तेः आपदि शूद्रधनस्य ग्राह्यत्वेऽपि यज्ञार्थतया नग्राह्यता "न यज्ञार्थं धनं शूद्राद्विप्रोलिप्सेत कर्हिचित्" मनुना कर्हिचिदत्यनेन आपद्यपि तस्य निषेधात् "ये शूद्रादग्निमन्वाधेयमग्निहोत्रमुपासते ऋत्विजस्ते हि शूद्राणां ब्रह्मवादिषु गर्हिताः" इति मनूक्तेश्च। तत्र द्रव्यविशेषे प्रतिग्रहनिषेधः। "स्तेनश्याहृतयाची न पुनर्मानवोभवेदिति" पुरा०। "शस्त्रं विक्रयं सुरा चाप्रतिग्राह्या ब्राह्मणानामन्येषाञ्च" वशि०। विक्रयं सुरसम्" "मद्यमदेयमपेयमनिग्राह्यमिति" ति०त० उद्य०। "मणिवाससोगवादीनां प्रतिग्रहे सावित्र्याष्टोत्तरं जपेत् पञ्चरात्रं, मध्यमे द्वादशरात्रं पयोव्रतः शतसहस्रमसत्प्रतिग्रहे" हारी०। "हिरण्यं भूमिसन्नं गामन्नं वासक्तिलान् घृतम्। अविद्वान् प्रतिगृह्णानो भस्मीभवति दारुवत्" मनुः। अविद्वानित्युक्तेः विदुषो न दोषाय। "किं करिष्यत्यसौ मूढोगृह्णन्नुभयतोसुखीम्। सहस्रं वारुणाः पाशाः क्षुरधारासमन्विताः पूर्यन्ते वर्षसहस्रे तु पाश एकः प्रमुच्यते। एतामवस्थां प्राप्नोति गृह्णन्नुभयतोसुखीमिति म०पु०। एतस्य विद्वद्विद्वद्विषये निषिद्धता कृष्णाजिनादीनां तु अप्राह्यशब्देनैवोक्ता। देशकालाविशेषेण च प्रतिग्राह्याणामपि प्रतिग्राह्यता "न तीर्थे प्रतिगृह्णीयात् पुरुषेष्वायतनेषु च। निमित्तेषु च सर्व्वेषु अप्रमत्तोद्भवेद्विजः" "तीरे प्रतिग्रहस्त्याज्यस्त्याज्यो धर्म्मस्य विक्रयः" इतिप्रा०त०पु०। "पायसं भक्षं छत्रं लवणमेव च। कृसरञ्च न गृह्णीयात् तप्तं गोमांसभक्षणैः" इति का०ख०। "तत्रैकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि सन्तानाय पूर्व्वेषां" मित्यनेन ज्येष्ठपुत्रदानप्रतिग्रहयोर्निषेधेन तस्याप्यप्रतिग्राह्यता। तथा "न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वाऽन्यत्रानुज्ञानात् भर्त्तुरिति" स्मृतेः भर्त्रनुज्ञामन्तरेण स्त्रियाः पुत्रस्याप्रतिग्राह्यता। परितोषार्थं विसृष्टस्यग्रहणे तु न दोषः। न प्रतिग्राह्यं यस्मात् ५त०। प्रतिग्राह्यद्रव्यादानात् कर्षौ शौकरिकादौ चण्डालादौ च पु०। "न भोज्यान्ना अप्रतिग्राह्या" इति प्रागुक्तमनुवाक्यम्। "प्रायश्चित्तद्रव्यग्रहणे दोष" इतिप्रा०वि०।

अप्रतिघ त्रि० नास्ति प्रतिघः प्रतिघातकोऽस्य। १ प्रतिघातकशून्ये अप्रतिबद्धे "यस्तु दुःखसमायुक्तमप्रीतिकरमात्मनः। तद्भोऽप्रतिघं विद्यात् सततं हारि देहिनामिति" मनुः।

अप्रतिद्वन्द्व त्रि० प्रतिगतः द्वन्द्वं विरोधं सङ्घो वा अत्रा०स० न० त०। १ प्रतिस्पर्द्धाशून्ये "त्वामप्रतिमकर्म्माणमप्रतिद्वन्द्वमाहवे" रामा०। प्रतिद्वन्द्वः सहचरः। २तच्छून्ये च "सोऽहं वनमिदं प्राप्तोनिर्जनं लक्षणान्वितः। सीतया चाप्रतिद्वन्द्व" इति रामा०।

अप्रतिपक्ष त्रि० नास्ति प्रतिपक्षः विपक्षः सदृशो वा यस्य। १ विपक्षहीने २असदृशे च।

अप्रतिपत्ति स्त्री प्रतिपत्तिः कर्त्तव्यतानिश्चयः अभावे न० त०। १ कर्त्तव्यतानिश्चयाभावे "अप्रतिपत्तिविक्षुब्धानि चेन्द्रियाणि" काद०। २ निश्चयाभावे ३ अस्वीकारे ४अग्रहणे ५स्मृत्यभावे "उत्तरस्याप्रतिपत्तिरप्रतिभेति" गौ०सू०। न०ब०। ६तच्छून्ये त्रि०।

अप्रतिपद् त्रि० प्रतिपद्यते जानाति प्रति+पद-क्विप् न०त०। विकले "सर्व्वदेवेभ्यो प्रतिपदम्" य० ३०,८। "अप्रतिपदं विकलमिति" वेददी०।

अप्रतिपन्न त्रि० न०त०। १अज्ञाते २अनङ्गीकृते च।

अप्रतिबद्ध त्रि० न प्रतिबद्धः निरुद्धः न०त०। अनिरुद्धे उद्दामे। [प्रबले २ विपक्षहीने च।

अप्रतिबल त्रि० नास्ति प्रतिबलः प्रतिपक्षो यस्य। १ अति-

अप्रतिभ त्रि० नास्ति प्रतिभा यस्य। १ प्रतिभाशून्ये २अप्रगल्भे ३ स्फूर्त्तिशून्ये ४ प्रत्युत्पन्नमतिशून्ये ५अदृष्टे ६लज्जिते च।

अप्रतिभा स्त्री अभावे न०त०। वादिप्रतिवादिनोर्वादे प्रवृत्ते वादिनोद्भावितदोषोद्धारणोपायज्ञानेऽपि तत्काले प्रतिवादिनः १ स्फूर्त्त्यभावरूपे निग्रहस्थानभेदे "उत्तरस्याप्रतिपत्तिरप्रतिभेति" गौ०सू०। २ प्रगल्भताभावे च।

अप्रतिम त्रि० नास्ति प्रतिमा उपमा यस्य । अतुल्ये "अनुपमे-त्वामप्रतिमकर्माणमप्रतिद्वन्द्वमाहवे" इति रामायणम् ।

अप्रतियोगिन् त्रि० नास्ति प्रतियोगी तुल्यरूपः यस्य । स्त्रियां ङीप् । १ अनुपमे । प्रतियोगी अभावसम्बन्धी न०त० । २ अभावसम्बन्धिभिन्ने । "अथ वा हेतुमद्विरुद्धाप्रतियोगिना साध्येन हेतोरेकाधिकरण्यं व्याप्तिरुच्यते" भाषा० । यस्याभावः स एव प्रतियोगीति दृष्टाः ।

अप्रतिरथ पु० नास्ति प्रतिरथः प्रतियोद्धा यस्य । १ प्रतियोधशून्ये । नास्ति प्रतिरथः तुल्यः मङ्गलार्थत्वेनास्य । २यात्रा मङ्गलार्थे साममेदे । "एष सोऽप्रतिरथोऽथ यः स इन्द्रस्तिरिति" "ब्रह्मा दक्षिणतोऽप्रतिरथं जपति" इति च शत० ब्रा० ।

अप्रतिरव त्रि० न प्रतिकूलो रवः प्रतिरवः स नास्ति यत्र । समेदं द्रव्यं त्वया न भोक्तव्यमित्यादि प्रतिषेधकवचनशून्ये भोगे । "अप्रतिरवं विंशतिवर्षोपभोगनिमित्ता क्वानिर्भवति" मिता० ।

अप्रतिरूप त्रि० नास्ति प्रतिरूपस्तुल्यरूपो यस्य । असदृशे ।

अप्रतिरूपकथा स्त्री नास्ति प्रतिरूपा प्रत्युत्तरीभूता कथा यस्याः । उत्तरवाक्यरहितायां वाचि । [पराक्रमे ।

अप्रतिवीर्य्य त्रि० न प्रतिरुद्धं वीर्य्यं यस्य । अन्यैरनिरोध्य

अप्रतिषिद्ध त्रि० न प्रतिषिद्धम् । अनिषिद्धे "अप्रतिषिद्धमनुमतं भवतीति" न्यायः सौवर्णराजतौम्बरखड्गमणिमयपात्राणामन्यतमेषु अप्रतिषिद्धेषु वेति" आ०त० गोभिलः "अप्रतिषिद्धानि कदलीदत्तत्वगादीनि" रघु० ।

अप्रतिष्कुत त्रि० प्रति+स्कु-क्त न०त० वेदे षत्वम् । १अप्रतिगन्धिते "स वीरो अप्रतिष्कुतः" ऋ० ७,३२,६, "अप्रतिगतोऽप्रतिगन्धितो वा" भा० २अप्रतिगते च ।

अप्रतिष्ठ न० नास्ति प्रतिष्ठा यस्य । १अन्याधारशून्ये स्वधामप्रतिष्ठिते ब्रह्मणि । "स भगवः ! कस्मिन् प्रतिष्ठितः स्वे महिम्नीति" श्रुतेस्वस्मान्याधारशून्यत्वात्तथात्वम् । २अनाश्रये ३निष्फले । "सोमविक्रयिणे विद्वान् भिषजे पूयशोणितम् । नष्टं देवलके दत्तमप्रतिष्ठं तु वार्द्धुषौ" मनुः ४प्रशंसाशून्ये च त्रि० । अभावे न०त० । ५प्रशंसाभावे स्त्री । अप्रतिष्ठितमप्यत्र । स च विष्णौ पु० । "अपांनिधिरधिष्ठानमप्रमत्तोऽप्रतिष्ठितः" इति विष्णुसह० ।

अप्रतिसंख्य त्रि० न प्रतीता संख्या यस्य उत्तरपदलोपः । अयमेकः अयमेक इत्याकारापेक्षाबुद्ध्यभावेन १प्रत्येकसंख्याग्रहणाभावादनुपलब्धसंख्यके वस्तुनि । प्रतिसंख्या बुद्धिविशेषः । अभावे न०त० । २विशेषबुद्ध्यभावे स्त्री ।

अप्रतिसंख्यानिरोध पु० न प्रतिसंख्यया बुद्ध्या निरोधः । १ बौद्धविशेषकल्पिते अबुद्धिपूर्व्वके भावविनाशे । तद्विशेषः बौद्धशब्दे वक्ष्यते । सोऽयम् प्रतिसंख्यानिरोधः "प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्" शा०सू० प्रत्याख्यातः । "अपि च वैनाशिकाः कल्पयन्ति बुद्धिबोध्यं त्वयादन्यत् संस्कृतं क्षणिकञ्चेति" तदपि त्वयं प्रतिसंख्याऽप्रतिसंख्यानिरोधावाकाशञ्चेत्याचक्षते । त्वयमपि चैतदवस्तु अभावमात्रं निरुपाख्यमिति मन्यन्ते बुद्धिपूर्व्वकः किल विनाशोभावानां प्रतिसंख्यानिरोधोनाम भाष्यते तद्विपरीतोऽप्रतिसंख्यानिरोधः आवरणाभावमात्रमाकाशमिति प्रतिसंख्याऽप्रतिसंख्यानिरोधयोरप्राप्तिरसम्भ इत्यर्थः । कस्मात् ? अविच्छेदात् तौ हि प्रतिसंख्याऽप्रतिसंख्यानिरोधौ सन्तानगोचरौ वा स्याताम् भावगोचरौ वा । न तावत् सन्तानगोचरौ सम्भवतः, सर्व्वेष्वपि सन्तानेषु (ज्ञानप्रवाहेषु) सन्तानिनामविच्छिन्नफलहेतुभावेन सन्तान विच्छेदस्यासम्भवात् नापि भावगोचरौ, नहि निराश्रयो निरुपाख्योविनाशः सम्भवति सर्व्वास्ववस्थासु प्रत्यभिज्ञाबलेनान्वयाविच्छेददर्शनात् अदृष्टप्रत्यभिज्ञास्ववस्थासु क्वचिद्दृष्टे नान्वयाविच्छेदेन अन्यत्रापि तदनुमानात् । तस्मात् परकल्पितस्य निरोधद्वयस्यानुपपत्तिरिति" मल्लरभाष्यम् ।

अप्रतिश्रुत त्रि० न०त० । अनङ्गीकृते दातव्यत्वेनास्वीकृते ।

अप्रतिहत त्रि० न प्रतिहतोऽभिभूतः प्रतिरुद्धो वा न०त० । अन्यैरनभिभूते २अप्रतिरुद्धे च । [२निरवयवे ब्रह्मणि न० ।

अप्रतीक त्रि० नास्ति प्रतीकमेकदेशो यस्य । १ सम्पूर्णे

अप्रतीक्षा स्त्री न प्रतीक्षा अपेक्षया कालयापनम् अभावे न०त० । १ प्रतीक्षाभावे कार्य्यजननाय इतरापेक्षया कालयापनाभावे २इतरानपेक्षया त्वरितकरणे । न०ब० । ३प्रतीक्षाशून्ये "अथाप्रतीक्षं पुनरायन्ति" शत० ब्रा० ।

अप्रतीत त्रि० प्रति+इण-क्त प्रतीतः परिज्ञातः प्रतिगतश्च न० त० । १ प्रतिगतभिन्ने "सहस्रसां वाजिनमप्रतीतम्" ऋ० १,११७,८, । "अप्रतीतं शत्रुभिरप्रतिगतम्" भा० "मरुत्वतो अप्रतीतस्य" ऋ० । ५,४२,६, "अप्रतीतस्या" प्रतिगतस्य भा० २अपरिज्ञाते "देवेभिर्विन्वतो अप्रतीतः" ऋ० २,३६,३, "अप्रतीतः एतावदस्य सामर्थ्यमित्यपरिच्छिद्यमानः" भा० ३अपलापिते च ।

अप्रतीति न० अभावे न०त० । ज्ञानाभावे "न स्खोटः प्रतीत्यप्रतीतिभ्याम्" सां० सू० ।

अप्रतीत्त त्रि० प्रति+दा-क्त प्रतीत्तं प्रतिदत्तं न०त० ।

प्रतिदत्तभिन्ने "अपमित्यमप्रतीत्तं यदस्मि यमस्य येन बलिना चरामि" इति अथर्ववेदः ६,११७,१,

अप्रतीप त्रि० विरोधे न०त० । प्रतीपभिन्ने अनुकूले ।

अप्रत्यय पु० न प्रत्ययः विश्वासोज्ञानं वा अभावे न०त० । १विश्वासाभावे "दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्ययानामिति" सिद्धान्तः न०ब० । २ विश्वासशून्ये । "बलवदपि शिक्षितात्मन्यप्रत्ययं चेतः" शक० । ३ज्ञानाभावे पु० । न०ब० । ४ज्ञानशून्ये त्रि० । प्रत्ययः-प्रकृतिनिमित्तकः अर्थबोधकः सुबादिशब्दभेदः न०त० । ५ सुबादिशब्दभिन्ने सार्थके प्रकृतिरूपे शब्दे "अर्थवद्धातुरप्रत्ययः प्रातिपदिकमिति" पा० ।

अप्रत्याख्येय त्रि० न०त० । अपरिहार्य्ये त्यक्तुमशक्ये ।

अप्रधान न० न प्रधानम् । १प्रधानभिन्ने सख्यभिन्ने गौणे । "प्रधानकर्म्मण्याख्याते क्रादीनाङ्क्रियाकर्म्मणाम् अप्रधाने दुहादीनां यज्ञे कर्त्तुश्च कर्म्मणः" हरिः कर्म्मणोऽप्रधानत्वञ्च अप्रधानक्रियाफलाश्रयत्वम् । "प्राधान्यं हि विधेर्यत्र प्रतिषेधेऽप्रधानतेति" भाट्टाः २अनुत्कृष्टे अङ्ग लिङ्गिङ्गत्वमपीष्यते । "अप्रधानः प्रधानः स्यात् सेवते यदि पार्थिवम् । प्रधानोऽप्यप्रधानः स्याद्यदि सेवाविवर्जितः" नीतिः । ३ प्रधानकर्म्माङ्गे न० "अप्रधानकालं सकृदसन्निपातात्" कात्या० १,७,१५, अयमर्थः । "वसन्ते ब्राह्मणोऽग्नीनादधीतेत्यनारभ्याधीतमग्न्याधानमग्निहोत्रादीनामङ्गमिति कृत्वा चिन्त्यते किमङ्गं सत् आधानं प्रतिकर्म प्रतिप्रयोगं च भेदेन कर्त्तव्यम् उत सर्व्वप्रयोगाणां साधारणं सकृदिति । तत्र कर्म्माङ्गत्वे प्रयाजाद्यङ्गवत् प्रतिकर्मभेदेन कर्त्तव्यम् न च बहिःकालत्वेनाग्नेयप्रमाणविशेषता, यदृयस्यानन्तरं क्रियते तत्तदर्थमित्यानन्तर्य्येण विशेषग्रहणात् । तस्मात् प्रतिकर्मभेदेनाधानप्राप्ताविदमुच्यते अप्रधानकालं यदङ्गमाधानसङ्गम् तत्सकृदेव कर्त्तव्यम् न भेदेन कर्मण आदौ । कुतः ? असंनिपातात् न चैतत् कस्यचित् कर्मणः प्रक्रमे कर्ममध्ये वा संनिपतितम् येन विशेषग्रहणं स्यात् किन्तु यदेव किञ्चिदग्निकार्य्यं निमित्तवशात् कामवशाद्वा यथाकामं प्राप्तम् तदर्थमाधास्येऽग्नीनिति, न तु कञ्चिदेव कर्मविशेषमभिसंधायाधानम् एवमनभिसंहितकर्मविशेषेण सर्व्वोद्देशेनाधाने कृते यद्यपि कारणवशात् किञ्चित् कर्म प्रथममापतति तथापि न तादर्थ्यमेव भवति प्रथमावस्थायामेव सर्व्वार्थत्वावधारणात् तस्मात् अप्रधानकालीनत्वात् सकृदेव कार्य्यमिति" कात्या० व्या० ।

अप्रधृष्य त्रि० न प्रधर्षितुं शक्यः । १अतिक्रान्तुमशक्ये २धर्षितुमशक्ये च । "यदाऽयं भीष्ममत्यन्तशूरं हतं पार्थेनाहवेष्वप्रधृष्यम्" भा० आ० प० ।

अप्रपन्न त्रि० न०त० । १प्राप्तभिन्ने, २अनागते, ३अज्ञाते च

अप्रबल त्रि० न प्रबलः । प्रबलभिन्ने हीनबले ।

अप्रभाव पु० न प्रभावः अभावे न०त० । १ प्रभावाभावे न०ब० । २ प्रभावशून्ये त्रि० ।

अप्रभूत त्रि० न प्रभूतः न०त० । प्रचुरभिन्ने स्वल्पे ।

अप्रमत्त त्रि० प्र+मद्–क्त प्रमादवान् विरोधे न०त० । सावधाने "निमित्तेषु च सर्व्वेषु अप्रमत्तोभवेन्नरः" इति स्मृतिः । "यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम्" "युक्तश्चैवाप्रमत्तश्च परिरक्षेदिमाः प्रजाः" इति च मनुः २ विष्णौ पु० "अपां निधिरधिष्ठानमप्रमत्तोऽप्रतिष्ठितः" विष्णुसह० "अप्रमत्तोऽधिकारिभ्यः कर्म्मानुरूपं फलं यच्छन्नप्रमत्तः" इति भा० । २ मद्यादिना प्रमत्तभिन्ने त्रि० ।

अप्रमय पु० न प्रमीयते प्र+मि–अच् वेदे नाम्त्वम् । अप्रमेये "मनसैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम्" शत० ब्रा० "अप्रमयमप्रमेयम्" भा० ।

अप्रमाण न० न प्रमाणं विरोधे न० । प्रमाज्ञानभिन्नभ्रमादिजनके वाक्यादौ । तानि च "वेदाः प्रमाणं स्मृतयः प्रमाणं धर्म्मार्थयुक्तं वचनं प्रमाणम् । यस्य प्रमाणं न भवेत् प्रमाणं कस्तस्य कुर्य्याद्वचनं प्रमाणमिति" स्मृत्युक्तवेदादिप्रमाणभिन्नानि चार्वाकादिवचनानि "नद्यां शिलाः तरन्त्योद्यादीनि प्रमाणान्तरविरुद्धार्थकानि वचनानि" च । एवं पित्तादिदुष्टानि इन्द्रियाणि आभासकलितानि लिङ्गानि च । "प्रमाणत्वाप्रमाणत्वे" इत्यादि मीमांसा ।

अप्रमाद पु० न प्रमादः अभावार्थे न०त० । १ प्रमादाभावे "अप्रमादेन गन्तव्यं कान्तारेषु नदीषु च" इति "अप्रमादश्च कर्त्तव्यः सर्व्वभूतेषु नित्यशः" इति च रामा० । न०ब० २प्रमादशून्ये त्रि० "माता च मम कौशल्या । कुशलं चाभिवादयन् । अप्रमादं च वक्तव्यमिति" रामा० "प्रमादश्च कर्त्तव्येषु अकर्त्तव्यत्वभ्रमेण ततोनिवृत्तिः । अकर्त्तव्येषु च कर्त्तव्यत्वभ्रमेण तत्र प्रवृत्तिरिति" मञ्जूषादयः । [प्रमादहीने स्त्रियां ङीप् ।

अप्रमादिन् त्रि० न प्रमाद्यति प्र+मद–णिनि न०त० ।

अप्रमायुक त्रि० प्र+मि+उण् आयुच् युच् स्वार्थे कन् न०त० । अपरिच्छेदके । "ऋणोत्प्रमायुकं रथयुतिमनागसम्" अथ० १६,४४,१ ।

अप्रमित त्रि० न प्रमितः न०त०। १अपरिमिते २अनुपलब्धे च।

अप्रमीय त्रि० प्र+मा-बा० कर्मणि य०न०त०। अप्रमेये। "गजाश्वसंख्याः वाऽप्रमीयाः प्रमीयन्ते" श्रुतिः।

अप्रमूर त्रि० प्र+मूर्छा-क्विप् प्रमूः मूर्छा अस्त्यर्थे कुड्वादि०र न त०। १मूर्छाद्युक्तभिन्ने अमूर्च्छिते। "ते हि वस्वो वसवानासो अप्रमूरा महोभिः ऋ० १,६०,२, "अप्रमूराः अमूर्छिताः" भा०।

अप्रसृष्ट त्रि० प्र+सृष-क्त न०त०। १ असोढे अज्ञाते। प्र+सृज-क्त न०त०। २ अदृष्टे ३अप्रोक्षिते प्र+सृष-क्त न०त०। ४अज्ञाते च।

अप्रस्कण्य त्रि० न प्रस्कण्यः प्र+स्कद-कण्य न०त०। १ बाधितुमशक्ये। "सदामं तद्रेकणो अप्रस्कण्यम्" ऋ० ६,२०,७। "अप्रस्कण्यं केनाप्यबाध्यम्" भा०।

अप्रमेय त्रि० प्रमातुं ज्ञातुं परिच्छेत्तुं वा योग्यं न०त० १अपरिच्छेद्ये २बहुसंख्यकोर्व्यवति ३इदमित्थमिति निश्चेतुमशक्ये "त्वमेकोऽप्रस्य सर्वस्य विधानस्य स्वयम्भुवः। अचिन्त्यस्याप्रमेयस्य कार्य्यतत्त्वार्थवित्प्रभुः" मनुः "स्वयंभुवोऽपौरुषस्य विधानस्य वेदस्य" कुल्लू०। "अग्रकल्पाप्रमेयञ्च वेदशास्त्रमिति स्थितिः" मनुः। ४ ब्रह्मणि न० केनापि प्रमाणेन तस्य प्रमातुमशक्यत्वात्। वेदान्तिमते हि प्रमाणानि षट् प्रत्यक्षानुमानशब्दोपमानार्थापत्तियोग्यानुपलब्धिभेदात् तत्र परब्रह्मणः न प्रत्यक्षप्रमाणचक्षुरादिगम्यता रूपाद्यभावात् "अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यदिति" श्रुतौ तस्य रूपाद्यभावस्योक्तेः। नापि अनुमानगम्यता व्याप्तिलिङ्गाद्यभावात् "असङ्गोऽयं पुरुष" इति श्रुत्वा तस्य सर्वसङ्गशून्यतोक्तेः नाप्युपमानगम्यता निर्द्धर्मकत्वेन, तद्भिन्नत्वे सति तद्गतभूयोधर्म्मवत्त्वलक्षणस्य सादृश्यस्य तत्राभावात्। न वार्थापत्तिगम्यत्वम् किञ्चिदस्तु विना अनुपपद्यमानस्यैवार्थस्यार्थापत्तिप्रमाणवेद्यतया तद्भिन्नवस्त्वभावेन तत्र तदसम्भवात्। न्यायमते च अर्थापत्तेर्व्यतिरेकव्याप्तिहेतुकानुमानेऽन्तर्भावेण तद्भिन्नस्य तत्राभावात्। योग्यानुपलब्धेस्त्वभावमात्रप्रमाणत्वात् परब्रह्मणश्च सदात्मकत्वेनाभावरूपत्वाभावात्। नापि शब्दप्रमाणवेद्यत्वम् तत्र शाब्दबोधोपायशक्त्यादेरभावात् अतएव "यद्वाचा न मनुते येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" इति श्रुत्याऽस्य वाग्विषयत्वं निराकृतम्। न च लक्षणया तद्बोधः, शक्यसम्बन्धरूपलक्षणायाः निरूढसम्बन्धे तत्रिरूढेः। अतएव "ब्रह्मन्! ब्रह्मस्वनिर्देश्ये निर्गुणे गुणदृत्तयः। कथं चरन्ति? श्रुतयः साक्षात् सदसतः परे" इति भागवते गुणवृत्तिश्रुतिगोचरतान्यूनत्वमस्योक्तम्। न च प्रमाणागोचरत्वे तस्य कथं सिद्धिः? कथं वा "तत्त्वौपनिषदं पुरुषं वेदेति" श्रुतौ "शास्त्रयोनित्वादिति" भा० स्त्रे च तस्य उपनिषद्वेद्यत्वसङ्गं संगच्छताम्? शास्त्रजनितबुद्धौ व तस्य विषयीकरणात् तथात्वसङ्गतेः। तथा च शास्त्रजन्यान्तःकरणविषयत्वमेव तस्य न तु तदवच्छिन्नचैतन्यविषयतापि यथोक्तं "फलव्याप्यत्वमेवास्य शास्त्रजन्यनिराकृतम् ब्रह्मस्वज्ञानायाय श्रोतव्याप्रिरमेत्यितेति" फलति प्रतिबिम्बति बुद्धिवृत्तौ फलं चिदाभासस्तद्व्याप्यत्वं तद्विषयत्वं तेन यथा घटपटादीनां तदाकारबुद्धिवृत्ति प्रतिफलितेन चिदाभासेनैव प्रकाश्यता, न तथा ब्रह्मणः स्वप्रकाशतया तस्य इतराप्रकाश्यत्वात् किन्तु स्वयं प्रकाश्यता न तु तत्रान्यापेक्षास्ति। परन्तु स्वाज्ञाननाशायैव बुद्धिवृत्तेरपेक्षामात्रं सा च शब्दजनितेति उपनिषद्वेद्यता इत्यनुभयश्रुतिसामञ्जस्यम्। वाचस्पतिमते तु शब्दादपि अखण्डाकारा काचित् दशमस्त्वमसीत्यादिवत् मनोवृत्तिरुदेति तद्विषयत्वादस्य शास्त्रवेद्यता। "मनसैवानुद्रष्टव्यमिति" श्रुतेस्तस्य मनोमात्रवेद्यत्वेऽपि "तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनमिति" शास्त्रात् मनःसंस्कारे च शास्त्रापेक्षणात् शास्त्रवृत्तिवेद्यता। न च मनोवृत्तिवेद्यत्वेऽप्रमेयत्वहानिः। असंस्कृतमनोविषयत्वाभावेनैव तथात्वात् "अवाङ्मनसगोचरमिति" वाक्यस्यापि तत्रैव तात्पर्य्यात्। मनोविषयत्वोक्तिरपि अज्ञाननाशार्थमनोवृत्तिमात्रवेद्यताभिप्रायेण, तदवच्छिन्नचिदाभासविषयत्वाभावाच्चाप्रमेयता "यन्मनसा न मनुते येन मनोऽनुमन्यते" इति श्रुतेस्तात्पर्य्यात्। जगत्कर्त्तृत्वेन ईश्वरस्यानुमानेऽपि कूटस्थस्य तदनुमानगम्यत्वाभावात् ईश्वरस्यैव श्रुतिप्रमाणकत्वेन उपनिषद्वेद्यतोक्तिः। तदुत्तरं मननादिना श्रुतिवाक्यतात्पर्य्यावधारणेनाखण्डब्रह्माकारा चित्तवृत्तिरुदेति इति न काचिदनुपपत्तिः। नैयायिकादिमते तु तद्गुणगणस्य परिमाणमशक्यत्वात् दुष्टागमावेद्यत्वाच्च अप्रमेयत्वमिति। प्र+मि+क्येपे यत् न०त०। अपरिच्छेद्ये "यदाश्चर्यं वासुदेवार्जुनौ तो तथा धनुर्गाण्डिवमप्रमेयम्" भा०आ०प०।

अप्रयत्न पु० प्रकृष्टो यत्नः प्रयत्नः प्रयासः अभावे न०त०। १प्रयत्नाभावे प्रयासाभावे। न०ब०। २प्रयासशून्ये त्रि०। "अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः" मनुः।

अप्रयुत त्रि० प्र+यु–मिश्रणे अमिश्रणे च क्त न०त०। १अपृथग्भूततया युते २पृथग्भूततया युते च।

अप्रयुवन् त्रि० प्र+यु–पृथग्भावे क्वनिप् न०त०। अपृथग्भूते "पर्त्तृभिरप्रयुवभिः" ऋ० ६,४८,१०, "अप्रयुवभिरपृथग्भूतैः" भा०।

अप्रलम्ब न० प्र+लम्ब–घञ् अभावे न०त०। १ विलम्बाभावे शीघ्रे २तद्वति त्रि० फलायुधः।

अप्रवर्त्तिन् त्रि० न प्रवर्त्तितुं शीलमस्य ताच्छील्ये इनि। १प्रवृत्तिशीलशून्ये २सन्तते ३विच्छेदरहिते स्त्रियां ङीप् ४अनुच्छित्तौ "मैतदक्षिन् संवदिष्ठाः अप्रवर्त्तीति" छ०उ०। "अथं वाव स योऽयमन्तर्हृदयाकाशस्तदेतत् पूर्णमप्रवर्त्ति अप्रवर्त्तिनी श्रियं लभते य एवं वेद" इति छा० उ०। "अप्रवर्त्ति अनुच्छित्तिधर्म्मकमिति" भा०।

अप्रवीत त्रि० प्र+वी–प्रजननादिषु क्त न०त० १अजाते। गर्भधारणेन गतसारभिन्नायां २ अकामितायां च स्त्रियां स्त्री। "दक्षिणेन द्वारं सोमक्रयणी तिष्ठल्लक्षिता व्यङ्गाऽप्रवीतेति" कात्या०७,६, १४, "अप्रवीता वै गतिजननकान्त्यादिषु अत्र प्रजननार्थः प्रगृह्यात् वाक्यशेषाच्च प्रजाता हि गतसारा भवति नोपभोगमात्रेण। तस्मादप्रवीताऽप्रजातेति हरिस्वामी। अकामितेति कर्कभा० ३अयातयामायां स्त्रियाम् "सा स्यादप्रवीता वाम्बा एषा निदानेन यत् सहस्रो अजातयाम्नी वा इयं वागयातयाम्नी अप्रवीता, तस्मादप्रवीता स्यादिति" शत०ब्रा० ५अनुपगते त्रि० "यदप्रवीता दधते ह गर्भम्" ऋ० ४,७,६, "अप्रवीता अनुपगता" भा०। [निरुक्ते।

अप्रवृत्त त्रि० न प्रवृत्तः विरोधे न०त०। प्रवृत्तिभिन्ने

अप्रवेद त्रि० नास्ति प्रवेदः लाभोयस्य। १ दुर्लभे। "अवस्तू अप्रवेदे इति माह कस्माच्च नावस्तू प्रवासीमीत इदं पुष्टं कवन प्रविदतेऽवैतदाह" शत०ब्रा० "नास्ति प्रवेदः प्रलाभः ययोः दुर्लभे" इति भा०।

अप्रशस्त त्रि० न प्रशस्तम् विरोधे न०त०। १प्रशस्तभिन्ने अपकृष्टे २दुष्टे "अप्रशस्तञ्च लब्ध्वा तु मासमासीत भैक्षभुक्" मनुः। ३निन्दिते च "अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनादिति" परा०। ४क्षीणे "यानि मित्रावरुणावद्याश्चयत दैर्यमोऽप्रशस्तान्" ऋ० १,१६७,८, "अप्रशस्तान् क्षीणान्" भा०। यावत्पदार्थस्य यत्र उचितत्वम् ततोन्यूनत्वे अस्य प्रवृत्तिः।

अप्रसक्त त्रि० न प्रसक्तः अभिनिवेशयुक्तः संबद्धो वा। १अभिनिवेशशून्ये, आयहरहिते २प्रसङ्गरहिते च अप्रसक्तनिषेधानुपपत्तेरिति मीमांसा। ३असंबद्धे।

अप्रसक्ति स्त्री अभावे न०त०। प्रसक्त्यभावे न०ब०। प्रसङ्गशून्ये त्रि० प्रसक्तिरायहः प्राप्तिश्च।

अप्रसङ्ग पु० अभावे न०त०। १सम्बन्धाभावे। न०ब०। २सम्बन्धशून्ये त्रि०। प्रसङ्गः उत्तराभिधाने सङ्गतिभेदः अभावे न०त०। २सङ्गत्यभावे। न०ब०। ३तच्छून्ये त्रि० "अप्रसङ्गाभिधाने च श्रोतुः श्रद्धा न जायते" दृष्टाः।

अप्रसन्न त्रि० न०त०। १प्रसादशून्ये २अस्वच्छे ३चित्तप्रसादशून्ये ४स्फूर्त्तिहीने ५असन्तुष्टे च।

अप्रसाद्य त्रि० न प्रसादयितुं योग्यम्। १ प्रसादयितुमयोग्ये तीव्रकोपयुते।

अप्रसाह्य पु० न प्रसह्यतेऽभिभूयते प्र+सह–कर्म्मणि घञ्। १अनिष्टादिना अनभिभूयमाने "पश्चादग्नेः संविशति चर्म्मणि स्वपिहिते वा वाचंयमोऽप्रसाह्यः" छा०उ०। "न प्रसह्यते नाभिभूयते स्व्याद्यनिष्टसप्रदर्शनेन" भा०।

अप्रसिद्ध त्रि० न०त०। १अनिष्पन्ने २अविख्याते च "अथ प्रसिद्धं वपसे हि पुंसामिति" कुमा०।

अप्रसृत त्रि० न प्रसृतः। १ विस्तारशून्ये प्रसरशून्ये।

अप्रसृत त्रि० न प्रसृतः। १ अनिष्पन्ने २कार्य्यसाधनायानुद्युक्ते ३ अप्रक्रान्ते ४ असंसृते च।

अप्रस्तुतप्रशंसा स्त्री सा०द०उक्ते अर्थालङ्कारभेदे तल्लक्षणादि "क्वचिद्विशेषः सामान्यात्१, सामान्यं वा विशेषतः२। कार्य्यात्किमित्तं३ कार्य्यञ्च ४हेतोरथ समात् समम्५॥ अप्रस्तुतात् प्रस्तुतस्येङ्ग्यते पञ्चधा ततः। अप्रस्तुतप्रशंसात्र स्यात्"। "पादाहतं यदुत्थाय मूर्द्धानमधिरोहति। स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः"॥ अत्राक्षदप्रेक्षया रजोऽपि वरमिति विशेषे प्रस्तुते सामान्यमभिहितम्। "खगिव यदि जीवितापहा हृदये किं निहिता न हन्ति माम्?। विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया"॥ अत्रेश्वरेच्छया क्वचिदहितकारिणोऽपि हितकारित्वं, हितकारिणोऽप्यहितकारित्वमिति सामान्ये प्रस्तुते विशेषोऽभिहितः। एवञ्चात्राप्रस्तुतप्रशंसामूलोऽर्थान्तरन्यासः। दृष्टान्ते प्रसिद्धमेव वस्तु प्रतिबिम्बत्वेनोपादीयते। इह तु विषामृतयोरमृतविषीभावस्याप्रसिद्धेर्न तस्य सङ्गावः॥ "इन्दुर्लिप्त इवाञ्जनेन, जडिता दृष्टिर्मृगीणामिव, प्रस्थानारुणिमेव विद्रुमदलं श्यामेव हेममप्रभा। कार्श्यं कलया च कोकिलबधूकण्ठेष्विव प्रस्तुतं सीतायाः पुरतस्य हन्त मणिनां वह्नौ समर्पैव

मनु ॥" अत्र संभाव्यमानेभ्य इत्यादिगताञ्जनत्वादिभ्यः कार्येभ्यो वदनादिगतसौन्दर्यविशेषरूपं प्रस्तुतं कारणं प्रतीयते । "गच्छामीति मयोक्तया सृगदृशा निःश्वासरुद्धे-क्षिणं त्यक्त्वा तिर्यगवेक्ष्य वाष्पकलुषेणैकेन मां चक्षुषा । अद्य प्रेम मदर्पितं प्रियसखीहस्ते त्वया बध्यतामित्यं स्नेहविवर्द्धितो मृगशिशुः सोत्रासमाभाषितः ॥" अत्र कस्यचिदगमनरूपे कार्ये कारणमभिहितम् । तल्लेऽप्रस्तुते तुल्याभिधाने च द्विधा श्लेषमूला साऽश्वमात्रमूला च । श्लेषमूलापि समासोक्तिर्द्विविधेषणमात्रश्लेषे, श्लेषद्विधे-रप्यपि श्लेषे भवतीति द्विधा । क्रमेण यथा ॥ "सहकारः सदामोदो वसन्तश्रीसमन्वितः । समुज्ज्वलरुचिः श्रीमान् प्रभूतोत्कलिकाकुलः" ॥ अत्र विशेषणमात्रश्लेषवशादप्रस्तु-तात् सहकारात् कस्यचित् प्रस्तुतस्य नायकस्य प्रतीतिः "पुंस्त्वादपि प्रविचलेद्यदि यद्यधोऽपि यायाद्यदि प्रणयनेन महानपि स्यात् । अभ्युद्धरेत्तदपि विश्वसितीडगीत्थं केनापि दिक् प्रकटिता पुरुषोत्तमेन" ॥ अत्र पुरुषोत्तम-पदेन विशेषेणापि श्लिष्टेन प्रचुरप्रसिद्धया प्रकृतं विष्णुरेव बोध्यते । तेन वर्णनीयः कश्चित्पुरुषः प्रतीयते । साऽश्व-मात्रमूला यथा । "एकः कपोतपोतः प्रतप्तः श्लेषनाः क्षुधाभिधावन्ति । अम्बरमाडतिशून्यं हरि हरि शरणं विधेः करुणा" ॥ अत्र कपोताद्प्रस्तुतात् कश्चित् प्रस्तुतः प्रतीयते । इयं कचित् वैधर्म्येणापि भवति । यथा "धन्याः खलु वने वाताः कह्लारस्मेरशीतलाः । रामभि-न्दीवरश्यामम् ये स्पृशन्त्यनिवारिताः" ॥ अत्र वाता "धन्या अहमधन्या इति वैधर्म्येण प्रस्तुता प्रतीयते । वाच्यस्य सम्भवासम्भवोभयरूपतया त्रिप्रकारेयम् । तत्र सम्भवे उक्तोदाहरणान्येव । असम्भवे यथा । "कोकिलोऽहं भवान् काकः समानः कालिमाश्रयोः । अन्तरं कथयि-ष्यन्ति काकलीकोविदाः पुनः" ॥ अत्र काककोकिलयो-र्वाक्योवाक्यम् प्रस्तुताध्यारोपणं विनाऽसम्भवि । उभय-रूपत्वे यथा । "अन्तस्त्विद्राणि भूयांसि कण्टका बहवो बहिः । कथं कमलनालस्य मा भूवन् भङ्गुरा गुणाः" ॥ अत्र प्रस्तुतस्य कस्यचिदध्यारोपणम् विना कमलनालान्त-र्स्थितानां गुणभङ्गुरीकरणे हेतुत्वमसम्भवि अन्येषान्तु सम्भवीत्युभयरूपत्वम् ।

अप्रहत त्रि० न प्रहन्यते स्म प्र+हन्–क्त न०त० । अक्षुण्णे (खिल) इति ख्याते अकृष्टभूम्यादौ । "ईषद्धौतं नवं श्वेतं सदशं वस्त्रधारितम् निर्म्लेजकाद्यानीतं ज्ञाप्रहतं वासउच्यते" इति विधा०पा०उक्ते वासोभेदे अहतमिति पाठान्तरम् ।

अप्रहन् त्रि०न प्रहन्ति प्र+हन्–क्विप् न०त० स्त्रियां ङीप् । "कार्यानायके तदनुपाहके "त्वमेको अप्रहणं स्थणीये यव-सास्मतिम्" ऋ०६,३४,४। "अप्रहणमनुपाहकमिति" भा० ।

अप्राकृत त्रि० प्रकृतेरागतम् अण् प्राकृतम् न०त० । १प्रकृतिकार्य्यभिन्ने ईश्वरलीलादौ । प्रकृतेः स्वभावस्य अयम् अण् न०त० । २स्वभावसम्बन्धिभिन्ने असामान्ये मनुष्यादौ च । [अधमे ।

अप्राग्र्य त्रि०न प्राग्र्यः प्रधानः विरोधे न०त० । श्रेष्ठभिन्ने

अप्राण त्रि० नास्ति देहादुक्रान्तत्वात् प्राणो यस्य । १मृते शवे । सर्व्वथा प्राणशून्ये २ईश्वरे पु० अप्राणोऽमनो बुद्धिरिति" श्रुतिः ।

अप्राप्त त्रि०न प्राप्तः प्रमाणान्तरावगतः । १प्रमाणान्तरानवगते "अप्राप्तप्रापको विधिरिति" "अप्राप्ते तु विधीयमाने ब्रह-णोऽप्येकयत्नतः" इति च मीमांसा । २अनागते च ।

अप्राप्तकाल त्रि० न प्राप्तः कालोऽस्य । अप्राप्तसमये । "अवयवविपर्य्यासवचनमप्राप्तकालमिति" गौ०सू० उक्ते २समाजोभव्यामोहादिना व्यत्यस्ताभिधानरूपे वादिदोषभेदे च । प्रतिज्ञाहेत्वुदाहरणादीनां यथाक्रमं विन्यासे हि वादसमयः । तेषां व्युत्क्रमकथने वादिनो निग्रहः ।

अप्राप्तप्रापक पु० अप्राप्तं प्रापयति बोधयति प्र+आप-णिच्–ण्वुल् तत० । प्रमाणान्तरेणानवगतस्य यागादीना-मिष्टसाधनत्वस्य ज्ञातिसाध्यत्वस्य वा बोधके लिङादौ शब्दे । तथा च प्राथमिकप्रवृत्तिजनकप्रतीतिजनकत्वं तत्त्वम् भवति च स्वर्गकामोयजेतेत्यादौ लिङ्युक्तं वाक्यं, यागे इष्टसाधनतां ज्ञातिसाध्यतां वा बोधयत् प्रेरकत्वात्तथा । अप्राप्ता दस्यावस्था यस्य ततः स्वार्थे कन् देवकवत् उत्तरपदलोपः । २अप्राप्तदस्यावस्थे वतुसि "पादशाप्राप्तके देयः" स्मृतिः "अप्राप्तके अप्राप्तदस्यावस्थे" इति रघु० ।

अप्राप्तव्यवहार त्रि० न प्राप्तः व्यवहारयोग्यः कालोऽस्य । "अप्राप्तव्यवहारोऽसौ यावत् षोडशवर्षक" इति दक्षोक्ते अपूर्णषोडशवर्षवयस्के बाले "गर्भस्थैः सप्तमोऽब्देन अष्ट-मात् वत्सराच्छिशुः । बाल आ षोडशादर्वाक् पौगण्डश्च निगद्यते । परतोव्यवहारज्ञः स्वतन्त्रः पितराद्दते इति" नारदः । "अप्राप्तव्यवहाराणां धनं व्ययविवर्जितम् । न्यसेयुर्बन्धुमित्रेषु प्रोषितानां तथैव च" कात्या० स्मृतिः ।

अप्राप्ता स्त्री न प्राप्तः विवाहप्रशस्तकालोऽस्याः ष्टच् उत्तरपद लोपः । अप्राप्तविवाहप्रशस्तकालायां कुमार्य्याम् ।

"उत्कृष्टायाभिरूपाय वराय सदृशाय च । अप्राप्तामपि तां कन्यां तस्मै दद्याद्यथाविधि" मनुः "अप्राप्ताम् अप्राप्त विवाहप्रयुक्तकालाम्" उ०त० रघुनन्दनः ।

अप्राप्ति स्त्री अभावे न०त० । १ लाभाभावे "तदप्राप्ति-महादुःखविलोनाशेषपातका" का०प्र० २प्रमाणान्तरतो-ज्ञानाभावे "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सतीति" मीमां० ३असम्भवे "प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्ति-रिति" शा०सू० । "अप्राप्तिरसम्भव" इति भा० । ४अनुपपत्तौ च "समुदायहेतुकेऽपि तदप्राप्तिः" शा०सू० । समुदायाप्राप्तिः समुदयभावानुपपत्तिः भा० । न०ब० । ५लाभशून्ये त्रि० ।

अप्रामाणिक त्रि० प्रमाणेन सिद्धः, प्रमाणं वेद वा ठञ् न०त० । १प्रमाणासिद्धे २प्रमाणानभिज्ञे च स्त्रियां ङीप् । "अप्रमाणिकीयमनवस्थेति" सां०भा० ।

अप्रामाण्य न० अभावे न०त० । १यथार्थबोधकत्वाभावे "अप्रामाण्यं कथयति सदा नन्दसूनोर्विवेकः" पदा० अप्रामाण्यहेतुकानुज्ञानाभावे च "अननुज्ञानलक्षणमप्रा-माण्यम्" सां०सू० ।

अप्रामि त्रि० प्रकर्षेण अथते हिंसतेऽसौ प्र+अम–णिच्-कर्म्मणि इन् न०त० । अहिंसिते, "अप्रामिसत्योमघवन्" । ऋ० ८,६०,४, "अप्रामिसत्यः अहिंसितसत्यः" भा० ।

अप्रायु त्रि० प्र+इण–उण् न०त० । अगन्तरि, "असच्च प्रा-युरोरचितारो दिवेदिवे" ऋ० १,८६,१, "अप्रायुवः अप्रायवः अगच्छन्तः वेदे तन्वादित्वादुवङ्" भा० ।

अप्रायुस् त्रि० न प्रकृष्टं प्रगतं वाऽऽयुर्यस्य । १प्रकृष्टायुर्भिन्ने २गतायुर्भिन्ने च । "नक्तयः सुदर्शतरोदिवातरादप्रायुषः ऋ० १,१२७,५ ।

अप्रिय न० विरोधे न०त० । प्रियभिन्ने इष्टभिन्ने स्वभा-तोहिष्टे दुःखे "न ह वै सशरीरस्य सतः प्रियाप्रिययोरप-हतिरस्ति" श्रुतिः "तस्माद्यम इव स्वामी स्वयं हित्वा प्रियाप्रिये" इति मनुः । २ तत्साधने वचनादौ त्रि० "सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्" "पाक्षिकस्य साध्वी स्त्री नाचरेत् किञ्चिदप्रियम्" इति च मनुः । (सिडि) इङ्गीतत्वे स्त्री शब्द र० । प्रिय-हेतुत्वाभावात्तस्यास्तथात्वम् । [जकवाक्यप्रयोक्तरि

अप्रियंवद त्रि० विरोधे न०त० । कटुवाक्यवादिनि उद्वे-

अप्रियवादिन् त्रि० अप्रियं वदति वद–णिनि ६त० स्त्रियां ङीप् । । कटुवाक्यवादिनि उद्वेजकवाक्यकथके "माता यस्य गृहे नास्ति भार्य्या चाप्रियवादिनीति" चाणक्यः ।

अप्रीति स्त्री अभावे न०त० । १सन्तोषाभावे, २दुःखे, "प्रीत्यप्रीतिविषादाः प्रकाशप्रवृत्तिनियमार्थाः" इति सां०का० । "प्रीतिः सुखं प्रीत्यात्मकः सत्त्वगुणः, अप्रीति-र्दुःखमप्रीत्यात्मकोरजोगुणः" इति सां०त०कौ० ।

अप्रेतराक्षसी स्त्री न प्रेता प्राप्ता राक्षसीम् अत्या०स० न०त० । तुलसाम्, अपेतराक्षसीशब्दे २५४पृष्ठे विस्तरः ।

अप्रेमन् पु० न प्रेम विरोधे न०त० । स्नेहविरोधिनि द्वेषे ।

अप्रौढ़ त्रि० न प्रौढः न०त० । १अप्रगल्भे २अपटौ च ।

अप्सु त्रि० आप–बा०व पृ० सुक् । प्राप्ये "अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि" ऋ० १०, १०२, १२, "हरिमाणं तेऽङ्गेभ्योऽप्सुमन्तरोदरात्" अथ०६,८,६

अप्सु त्रि० अपः सनोति सन–ड । १अपां विशेषगुणीभूते रसे "पृथिव्याः पुरीषमप्सोनाम" य०१४,४ । "अप्सोनामापां सारभूतो रस" इति वेददी० । आप इव निर्मलतया सन्यते संबध्यते सन–बा०ड । २रूपे निरु० ।

अप्सरःपति पु० ६त० । १ इन्द्रे अप्सरापतिशब्दे ।

अप्सरस् स्त्री ब०व० अद्भ्यः सरन्ति उद्गच्छन्ति सृ–असुन् । समुद्रात्निष्कृतायां स्वर्वेश्यायाम् "अप्सु निर्मथनादेव रसात्तस्मा-दजायत स्त्रियः । उत्पेतुर्मनुजश्रेष्ठ । तस्मादप्सरसो ऽभवन्" इत्युक्तेस्तासां तथात्वम् । "एकाप्सरःप्रार्थितयोर्विवादः" रघुः "आराधितोऽद्भा मनुरप्सरोभिश्चक्रे प्रजाः स्वाः स-निमेषचिह्नाः" इति माघः । तासां च नाट्यकर्म्म वृत्तिः । ताश्च प्रधानतया हादश वह्निपुराणे दर्शिताः "उर्व्वशी मेनका रम्भा मिश्रकेशी हृलम्बुषा विश्वाची च घृताची च पञ्चचूडा तिलोत्तमा भानुवल्लवला रम्भा हादशाप्सरसः शुभाः" इति गणभेदनामाध्याये । अत्र शुभा इति विशेषणात् अन्या अपि । तास्व "उर्व्वशी मेनका रम्भा घृताची पुञ्जिकास्थला सुकेशी मञ्जुघोषा च सहाजन्यवतीति च" इति भा० पु० "अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा । क्रोधा प्रधा च विश्वा च विनता कपिला मुनिः । कद्रुश्च मनुजव्याघ्र । दक्षकन्याश्चयोदश" इति कश्यपपत्नीरभिधाय । "इत्येते देवगन्धर्व्वाः प्राधेयाः परिकीर्त्तिताः" इति गन्धर्ववंशमभिधाय च "इमं त्वप्सरसां वंशं विदितं पुण्यलक्षणम् प्रधानस्मृत महाभागादेव देवर्षितः पुरा । अलम्बुषा मिश्रकेशी विद्युत्पर्णा तिलो-त्तमा । अरुणा रक्षिता चैव रम्भा तद्वन्मनोरमा । केशिनी च सुबाहुश्च सुरता सुरसा तथा । सुप्रिया चातिबाहुश्च"

लुक्तम् भा०आ०प०। एतासाञ्च चतुर्दशोत्पत्ति स्थानानि क्रमदर्शयितुं वर्णितानि "यथा विबुधसङ्घन्यप्सरसो नाम कन्यकाः सन्तीति तासां चतुर्दश कुलानि एकं भगवतः कमलयोनेर्मनसः सकाशात्प्रसूतम्, अन्यद्देवेभ्यः सम्भूतम्, अन्यदग्नेरुद्भूतम् अन्यत् पवनात् प्रसूतम्, अन्यदस्तान्मथ्यमानादुत्थितम्, अन्यज्जलाज्जातम्, अन्यदर्ककिरणेभ्यो निर्गतम्, अन्यत् सोमरश्मिभ्यो निष्पतितम्, अन्यद्भूमेरुद्भूतम्, अन्यत् सौदामनीभ्यः प्रादुर्भूतम्, अन्यत्कृतुना निर्मितम्, अपरं मकरकेतुना सकाशात्पादितम्, अन्यत्तु दक्षस्य प्रजापतेरतिप्रभूतानां सुतानां मध्ये द्वौ सुतौ मुनिरिष्टा च बभूवतुः, ताभ्यां गन्धर्वैः सह कुलद्वयं जातम् एवमेतान्येकत्र चतुर्दश कुलानि" एतन्मूलं तु विस्तरभयान्नोक्तम्।२दिशि २ उपदिशि च तयोर्जलहेतुत्वात्तथात्वम् "पुष्किकास्थला च क्रतुस्थाश्वरसाविति" य० १५,१५, "पुष्किकास्थला क्रतुस्थला चाश्वरसौ दिगुपदिग्रूपे परिचारिके" इति वेददी०। "अश्वरसाविति दिक् च उपदिक् चाह" श्रुतेस्तथात्वम्। "मेनका वै अश्वरारूपिणीति" भाष्यप्रयोगात् अश्वरसाविति श्रुतिनिर्देशाच्च नित्यबहुवचनान्तत्वेऽप्युत्सर्गः क्वचिदेकवचनान्तताऽपि

अप्सरस्तीर्थ त्रि० ६त०। १ तीर्थभेदे।

अप्सरा स्त्री अप्सु रूपमस्त्यस्याः प्राशस्त्ये कृञा०र। दिव्यरूपवत्यां स्वर्वेश्यायाम् "उद्भिन्दतो संजयन्तीमप्सराम्" अ० ४,३८,१।

अप्सरायमाणा स्त्री अप्सरस इवाचरति देहसौन्दर्य्यादिना अप्सरस+क्यङ्-सलोपः कर्त्तरि शानच्। अप्सरस्तुल्य सौन्दर्य्यवत्यां स्त्रियाम्।

अप्सव त्रि० अप्सु जलरसं वाति छिनत्ति वा-कइ६त०। जलरसशून्ये समुद्रे तस्य लवणजलत्वात्तथात्वम्। "ये अप्सवमर्णवं चित्ररधसस्तोनो रासन्ताम्" ऋ० १०,६५,३।

अप्सव्य पु० अप्सु भवः "अपोयोनियन्मतुषः" वार्त्ति० सप्तम्या अलुक्, यञ्। जलभवे।

अप्सस् त्रि० अप्सु अपसाधने तेजसि सक्ति सर्पति सस्किप् ७त०। १ रूपे तस्य तेजोहेतुत्वात् तथात्वम् २ रूपवति च। "शीर्णा शिरोऽप्सासो अर्दयन्न् शुन् बभस्ति हरितेभिरश्वभिः" अ० ६,४६,२, "जायेव पत्य उशती सुवासा उषा हसेव निरिणीते अप्सः" ऋ० १,१२४,७।

अप्सा त्रि० अपोजलानि सनति ददाति सन-विट्। जलदातरि "आषाड़ं युत्सु पृतनासु पप्रिं स्वर्षामप्साम्" ऋ० १,८१,२१, "अप्सां जलानां दातारम्" भा०। "पवस्व देवमादनो विचर्षणिरप्साः" ऋ० ९,८४।

अप्सु त्रि० नास्ति प्सु रूपम् (निरुक्तोक्तम्) यस्य। रूपरहिते "मा त्वा वयं सहसावन्नवीरा माप्सवः परि" ऋ०७,४,६, अप्सवः रूपरहिताः" भा०। अप्राशस्त्ये न०ब०। अप्रशस्तरूपे असुरे, "अप्सुजितः" अप्सुजिच्छब्दे दृश्यम्।

अप्सुक्षित् त्रि० अप्सु जलाधारे अन्तरिक्षे क्षियति निवसति-क्षि-क्विप् अलुक्स०। अन्तरिक्षवासिनि देवादौ "ये देवासो दिव्येकादश स्थ पृथिव्यामेकादश स्थ अप्सुक्षितो महिनैकादश स्थ" ऋ० १,१३९,११, य० १८,६, च "तद्वेतत्वात् तात्स्थ्यम् अप्सु अन्तरिक्षे क्षियन्ति निवसन्तीति" भा०। [ङीप्। जलचरे।

अप्सुचर त्रि० अप्सु चरतीति चर-ट अलुक्समा० स्त्रियां

अप्सुज त्रि० अप्सु जले तद्वेतौ अन्तरिक्षे वा जायते जन-ड अलुक्स०। १जलजाते २अन्तरिक्षजाते "यदग्ने! दिविजा अप्सुजाः" इति ऋ० ८,४३,२८, "अप्सुजा अन्तरिक्षजाता" इति भा०।

अप्सुजा पु० अप्सु-जायते जन+विट् अलुक्स०। अश्वे "अस्तावाश्मतो वज्रेवैदेथोऽखाड्ढ गर्भतः। साम्नोहयानामुत्पत्तिः सप्रधा परिकीर्त्तिता" इत्युक्तेस्तस्य वाप्यजातत्वात्तथात्वम् "संगतो अप्सुजुजा ब्रह्मा सोम पुरोगवः" य० २३,१४, "अप्सुजा अश्व" इति वेददी०। २ वेतसे तस्य जलसमीपजातत्वात् तथात्वम् "अप्सुयोनिर्वा अश्वोऽप्सुजा वेतस" इति शत०ब्रा०। ३ जलजातमात्रे त्रि०।

अप्सुजित् त्रि० अप्सून् असुरान् जयति जि-क्विप् अलुक्समा०। अन्तरिक्षस्थासुरजेतरि "सुपारः सुश्रवस्तमः समप्सुजितः" ऋ० ८,१३,२, "अप्सुजितः अन्तरिक्षवर्त्तमानानामसुराणां जेतारः" भा०।

अप्सुमत् त्रि० अप्सु आपः जलानि सन्त्यस्य "अपोयोनियन्मतुषः" वार्त्ति० सप्तम्या मतुप् अलुक्स० च। १जलसंयुक्ते आधारज्यभागे। "अप्सुमन्तावाधाराज्यभागाविति" सि०कौ०। २यवेष्टं जलञ्चरि च "न ह्याप्सुमान् भवति, का०उप०। मरुस्थलीष्वपि यवेष्टोदकवान् भवतीति" आनन्दगिरिः।

अप्सुयोग पु० ७त० अलुक्समा०। जलेषु योगे। "जिष्णवे योगायाप्सुयोगैर्वोयुनज्मि" अथ० १०,७,५।

अप्सुयोनि त्रि० अप्सु योनिरुत्पत्तिरस्य अलुक्समा०।

१जलभवे २अब्दे पु० "अम्बुयोनिर्वाऽब्दः" इति शत० ब्रा० । जलजत्वमस्य अम्बुजाशब्दे उक्तम् ।

अप्सुषद् त्रि० अप्सु जले कारणत्वेन सीदति षद-क्विप् वेदे षत्वम् । जलस्थे अग्नौ "चन्द्रमग्निं चन्द्ररथं हरिव्रतं वैश्वानरमप्सुषदम्" ऋ० ६,३,५ ।

अप्सुसोम पु० अम्बु अद्भिः सोम इव पवित्रत्वात् "सुधां तु" पा० व्यत्ययेन सप्तमी अलुक्समा० वेदे षत्वम् । जलपूर्णे चमसभेदे "अम्बुसोमानाम चमसानामालब्धे अद्भिः पूर्णा" इति ता० ब्रा० द्राह्यायणश्रुतम् । "पूर्णपात्रान् समवद्यन्ति यानेवेऽम्बुसोमा इत्याचक्षते" शत० ब्रा० ।

अप्सुसंशित पु० अद्भिः संशितः वि०ब्य० अलुक्समा० जलनिमित्तभूते विष्णुक्रमेऽन्तरीक्षे "विष्णोः क्रमोऽसि सपत्नमप्सुसंशितो वरुणतेजाः" अथ० १०,५,२२, ।

अफल त्रि० नास्ति फलं पुष्पप्रभवं धर्म्मप्रभवं सुखादिकं वा यस्य । १बन्ध्ये फलकाले फलशून्ये (राँड़ाइचे) २धर्मकार्यसुखादिशून्ये ३निष्फले च । "यथा धौरुष्ट्रोऽफलः स्त्रीषु यथा गौर्गवि चाफला । यथा चात्रेऽफलं दानं तथा विप्रोऽन्त्यचोऽफल इति" मनुः । अफलं दानमाह मनुः "धूर्त्ते वन्दिनि मल्ले च कुवैद्ये कितवे शठे चाटचारणदासेषु दत्तं भवति निष्फलमिति" हारीतः । "अथासद्द्रव्यदानमस्वर्ग्यं दत्त्वा परितप्यते तद्धि दानमफलं यज्ञोपकारिणे ददाति यच्च तन्नात्तं परिक्लिष्टं यच्च सोपधं ददाति अन्यत्रावितमलं यच्चापात्राय ददाति अनिष्टदानं स्मरति यच्च दत्त्वा प्रकीर्त्तयते स्वदानं यच्चान्यया ददाति क्रोधाद्राजसं यच्चाक्रुश्य ददाति दत्त्वा वा क्रोशति असत्कृतं पैशाचं यच्चावज्ञातं ददाति वावजानीते मुमूर्षोस्तामसं यच्चाप्रकृतो ददाति" । "एतैर्दानोपसर्गैरुपहृतं दानमप्रशस्तमस्वर्ग्यं प्रायशस्तमध्रुवफलं भवत्यल्पफलं वा रघु० (भाउ)। ४भावुकदुष्टे पु० तस्य फलशून्यत्वात्तथात्वम् । नास्ति फलमिव दृषणावस्य । ५इन्द्रे । स हि गौतमशापात् दृषणशून्योमेषदृषणश्चासीत् यथोक्तं रामायणे "नित्यं शुक्रफलोपेतैः पादपैरुपशोभिते ॥ स चेह तप आतिष्ठदहल्यासहितो मुनिः । संवत्सरसहस्राणि बहूनि रघुनन्दन ! ॥ तस्यान्तरं विदित्वाथ कामार्तस्त्रिदिवेश्वरः । मुनिवेशधरो भूत्वा सोऽहल्यामिदमब्रवीत् ॥ ऋतुकालः प्रतीक्षोऽपि न प्रतीक्षे सुमध्यमे । संगमं शीघ्रमिच्छामि पृथुश्रोणि ! सङ्गम त्वया ॥ मुनिवेशधरं शक्रं स ज्ञात्वापि परंतप ! । मतिं चकार दुर्मेधा देवराजकुतूहलात्" इत्युपक्रम्य ॥ "सोऽपि दृष्ट्वैव देवेन्द्रं मुनिवेशधरं मुनिः ॥ दुर्वृत्तं वृत्तसंपन्नो रोषाद्वचनमब्रवीत् । मम रूपं समास्थाय कृतवानसि दुर्मते ! ॥ अकर्त्तव्यमिदं यस्मात्तस्मात् त्वं विफलो भव । गौतमेनैवमुक्तस्य सरोषेण महात्मना ॥ पेतुर्दृषणौ भूमौ सहस्राक्षस्य राघव ! । व्यथितः स तदा चासीद्वृतौजा विफलीकृतः ॥ धर्षितस्तपसोग्रेण कश्मलं चापि सोऽविशत्" इत्युक्त्वा । "गौतम क्रोधमुत्पाद्य सुरकार्यं चिकीर्षुणा ॥ अफलोऽहं कृतस्तेन क्रोधात् सा च निराकृता । शापदोषेण तेनास्य तपोविघ्नः कृतो मया ॥ तन्मां सुरगणाः सर्वे सर्षिसंघाः सचारणाः । सुरकार्यार्थमफलं सफलं कर्तुमर्हथ ॥ शतक्रतोर्वचः श्रुत्वा देवा अग्निपुरोगमाः । ऊचुः पितृगणान् वाक्यमिदं तत्र समागतान् ॥ एष मेषः सदृषणःशक्रश्चादृषणीकृतः । अस्येमौ दृषणौ छित्त्वा मदेन्द्राय प्रयच्छत ॥ अफलस्तु कृतो मेषः परां तुष्टिमुपैष्यति । भवतामुपयोगेन तच्चास्य सुमहत् फलम् ॥ तस्मान्मेषस्य दृषणौ छित्त्वेमौ दातुमर्हत । इन्द्राय सुरकार्यार्थं विफलाय पितामहाः ! ॥ श्रुत्वाग्निपुरोगाणां देवानां पितरो वचः । उत्कृत्य मेषदृषणाविन्द्रायोपददुस्तदा ॥ ततःप्रभृति कौरुत्स्य ! पितरः कव्यभोजिनः । अफलं भुञ्जते मेषं सफलं तु न भुञ्जते ॥ इन्द्रश्च मेषदृषणस्ततःप्रभृति राघव ! गौतमस्य प्रभावेन बभूवामिततेजसः" रामा० ॥ ६मेषे च तस्य दृषणेन शक्रदृषणकरणात्तस्य तथात्वम् नास्ति फलं यस्याः जातित्वेऽपि "फलाच्छ" इति पा० म० अजादित्वात् टाप् । ७दृतकुमार्याम् टभूम्यालक्ष्म्याञ्च स्त्री तयोः फलशून्यत्वात्तथात्वम् । फलं प्रयोजनम् तच्छून्ये त्रि० । "अन्यथा ते वर्त्तमानस्याधर्म्मोभवत्यफला च विद्या" सुश्रु० । "यथा षण्ढ इत्यादि" मनुः ।

अफलाकाङ्क्षिन् त्रि० न फलं कर्मफलमाकाङ्क्षते आ+काङ्क्षिणि ६त० न०त० स्त्रियां ङीप् । कर्मफलाकाङ्क्षाशून्ये "अफलाकाङ्क्षिभिर्यज्ञः क्रियते ब्रह्मवादिभिः" गीता ।

अफलित त्रि० फलं जातमस्य तारका० इतच् न०त० । फलितभिन्ने वन्ध्ये अफले वृक्षे ।

अफल्य त्रि० विरोधे न०त० । फलगुभिन्ने सारे ।

अफुल्ल त्रि० न०त० । फुल्लभिन्ने सङ्कुचिते ।

अफेन त्रि० नास्ति फेनं यस्य । १फेनशून्ये दुग्धादौ । निन्दितं फेनं निर्य्यासोऽस्य (आफिङ्) ख्याते अहिफेने तस्य निर्य्यासस्य बडबेवने प्राणनाशनात् निन्दितफेनत्वम् ।

अब शब्दे इदित् भ्वादि० आत्म० सक० सेट् । अम्बते

आश्लिष्ट अम्बा अम्बाला अम्बिका अम्बरम् अम्बुदः ।

अबद्ध त्रि० बन्ध-क्त न०त०। १असंबद्धे २अन्वयबोधयोग्यताशून्ये परस्परविरुद्धे वाक्ये च यथा "यावज्जीवमहं मौनी ब्रह्मचारी च मे पिता माता तु मम वन्ध्यासीदपुत्रश्च पितामहः" इत्यादि वाक्यम् । ३ बद्धभिन्ने शक्ते च ।

अबद्धमुख त्रि० न बद्धं यथेच्छवादितया अप्रतिरुद्धं मुखमास्यक्रिया यस्य स्त्रियां वा ङीप् । अप्रियवादिनि "सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियमिति" मनुनाऽप्रियवचनकथनस्य निषेधेऽपि तदुक्तबन्धनेन अप्रियवाक्यप्रयोक्तृत्वेन तस्य तथात्वम् ।

अबध पु० न बधस्ताडनं देहे आघातः प्राणवियोजनं वा अभावे न०त०। ताड़नाभावे । "शिष्यशिष्टिरबधेनाशक्तौ वेणुदलेनेति" मिता० स्मृतिः । १प्राणवियोजनाभावे च ।

अबधा स्त्री न बध्यतेऽसौ लम्बेन । लोलावलम्बके त्रिकोणादि देहे लम्बोभयपार्श्वस्थे भूमिखण्डे। न, बाध्यते आबाध्यते वा, अबाधा आबाधाऽत्र । तदानयनञ्च "त्रिभुजे भुजयोर्योगस्तदन्तरगुणो भुवा हृतो लम्बः। द्विःस्था भूरूनयुता दलिताऽबाधे तयोः स्यातामिति" लीला०।"दशसप्तदशप्रमौ भुजौ त्रिभुजे यत्र नवप्रमा मही। अबधे वद लम्बकं तथा गणितं गाणितिकाशु तत्र मे" इति लीला० अबधोद्देशकः ।

अबध्य त्रि० बधमर्हति यत् न०त० । १बधानर्हे प्राणवियोगफलकव्यापारो हिंसात्र बधः । "अबध्याञ्च स्त्रियं प्राज्ञस्तिर्य्यग्योनिगतामपि" स्मृतिः । २बधदण्डानर्हे ब्राह्मणे च "बधः सर्वस्वहरणं पुराच्चिर्वासनाङ्कने । तदङ्गच्छेद इत्येषो दण्ड उत्तमसाहसः । अविशेषेण सर्वेषामेषदण्डविधिः स्मृतः । बधार्हते ब्राह्मणस्य न वधं ब्राह्मणोर्हति" मिता० स्मृतिः । "उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमौ। चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च दण्डस्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत् त्रिषु वर्णेषु यानि स्युरक्षतो ब्राह्मणोव्रजेदिति" मनुः बन्ध-बा० क्यप् । ३अयोग्यवाक्ये हे०मे० च ।

अबन्धक न० बध्यते स्वधनमितरत्र आधीयते बन्ध आधीयमानद्रव्यं स नास्ति यत्र कप् । १आधिशून्ये ऋणादाने । "अशीतिभागोवृद्धिः स्यान्मासिमासि सबन्धके । वर्षक्रमाच्चतं द्विगुणःपञ्चकमन्यथा"या० "अन्यथा बन्धकरहिते" मिता० "दद्युर्वा सक्षतां वृद्धिं सर्वे सर्वासु जातिषु" या० व्याख्यायाम् "ब्राह्मणादयोवर्णा अबन्धके सबन्धके वा सक्षतां वृद्धिं सर्वासु जातिषु दद्युः" विज्ञा०। अस्य पा०उपकादिगणपाठात् "उपकादिभ्योऽन्यतरस्यामद्वन्द्वे च" पा०सूत्रेण गोत्रप्रत्ययस्य बहुत्वे लुगविधानात् कस्मिंश्चित् २ गोत्रप्रवर्त्तके ऋषावपि अस्य रूढिः ।

अबन्धुर त्रि० न०त० । १ उन्नतानतभिन्ने २ शोभनभिन्ने ३ विधुरबन्धुरबन्धुरमैक्षतेति" माघः ।

अबन्ध्य त्रि० बन्ध्यः अफलः । १सफले,"अबन्ध्यं दिवसं कुर्य्यात् दानाध्ययनकर्म्मभिः" स्मृतिः २अफलभिन्ने फलकाले फलयुक्ते वृक्षे पु० ।

अबल न० न बलं सामर्थ्यसत्कर्षोवाऽभावे न०त०। १ बलाभावे "प्रायश्चित्तं प्रदातव्यं दृष्ट्वा तस्य बलाबलम्" स्मृतिः । "गव्यानाञ्च रसानाञ्च ज्ञात्वा चार्घबलाबलम्" मनुः । बलसत्कर्षमबलमसत्कर्षम्" इति कुल्लू० । नास्ति बलं यस्य। २बलहीने दुर्बले त्रि० "पञ्चवर्गबिलेनोनो न हर्षस्थानमाश्रितः अबलोऽयं लम्बदर्शीति नी०ता०। अबलस्खलागिनो झसाच्चिजनीडद्रुमपोड़िनः खगान्" नैष० । २नार्य्यां स्त्री "भुजलतां जड़तामबलाजनः" रघुः।"हृदये वहसि गिरीन्द्रौ त्रिभुवनजयिनी कटाक्षेण । अबला त्वं यदि मन्ये के बलवन्तोन जानीमः" इत्युद्भटः । ५ब० । ४वरुणवृक्षे पु० । [रोगादिनिमित्ते देहस्य क्षीणभावे ।

अबलिमन् पु० बलस्य भावः इमनिच् विरोधे न०त० ।

अबाध पु० अभावे न०त० । १बाधाभावे २ प्रतिबन्धाभावे । नास्ति बाधो यस्य । ३ बाधशून्ये त्रि० । बाधस्य असत्त्वं स चानुमापकहेतौ दोषभेदः बह्न्यभाववद्वृत्तित्वं हि बाध दोषः यत्सत्त्वेऽनुमितेः प्रतिबन्धः तस्य हेतुदूषकत्वमिति नैया०। नास्ति बाधा पीड़ायस्य । ४पीड़ाशून्ये त्रि० ।

अबाधक त्रि० न०त०। १बाधकभिन्ने अनुगुणे। नास्ति । बाधो यस्य वा कप् । २बाधशून्ये त्रि० ।

अबाधित त्रि० न बाधितः । बाधितभिन्ने यथार्थे "अबाधितार्थकीर्तिनिश्चयत्वं प्रमात्वमिति" वृद्धाः । तद्यथा तत्प्रकारकं ज्ञानं हि प्रमा तच्च तदभाववति तत्प्रकारकज्ञानेन प्रतिबध्यते तथा च तदभाववति तत्प्रकारकताशून्यत्वेन ज्ञानस्य याथार्थ्यं, तादृशज्ञानविषयत्वात् विषयस्याबाधितत्वम् । [अप्रतिरोध्ये ।

अबाध्य त्रि० न बाध्यते अपोद्यते बाध-ण्यत् न०त० ।

अबाल त्रि० न०त० । १ बालभिन्ने पूर्णे चन्द्रादौ २तरुणे च ।

अबिन्धन पु० आप एव इन्धनस्येन्धनसाधनस्य । बाड़वाग्नौ "अबिन्धनं वह्निमसौ विभर्त्ति" रघुः ।

अबुद्ध त्रि० बुध-कर्त्तरि कर्म्मणि वा क्त न०त०। १बोधानाश्रये २बोधाविषये च। [सचित्ते२तथाज्ञानाभावे।

अबुद्धि स्त्री अभावे न०त०। १ज्ञानाभावे यस्य यद्भूयेष ज्ञान-

अबुद्धिपूर्व्वक त्रि० अबुद्धिः पूर्व्वो यस्य। यथार्थबुद्धिपूर्व्वकभिन्ने। "अबुद्धिपूर्व्वं हनने व्रतार्हसुपकल्पयेत्" स्मृतिः यदि गां गवयबुद्ध्या हन्ति, गवयं वा गोबान्त्या हन्ति, सर्व्वाऽबुद्धिपूर्व्वकत्वम् एवमन्यार्थचिप्रनाराचादिना हननेऽपि तथात्वम्। इयं गौरिमां हन्मीत्युद्देशेनैव हनने बुद्धिपूर्व्वकत्वम्। [२अल्पज्ञाने च।

अबुध पु० विरोधे अप्राशस्त्ये वा न०त०। १बुधभिन्ने मूर्खे

अबु(बो)ध्य त्रि० बुध बा० वेदे क्यप् लोके तु गुणत्। ज्ञातुमशक्येऽर्थे "अबुध्यमबुध्यमानं सुपर्णमिन्द्रम्" ऋ० ४, १८,३, "अबुध्यं दुर्विज्ञेयमिति" भा०।

अबुध्न न० नास्ति बुध्नं मूलमस्य। १मूलशून्ये अन्तरिक्षे "अबुध्ने राजा वरुणो वनस्योर्द्ध्वम्" ऋ० १,२४,७, "अबुध्ने मूलशून्ये अन्तरिक्षे" भा०। २मूलशून्यमात्रे करकादौ त्रि०।

अबोध पु० अभावे न०त०। १बोधाभावे अज्ञाने "निसर्गदुर्बोधमबोधविक्लवाः" किरा०। न०ब०। २बोधरहिते त्रि०।

अबोधगम्य त्रि० बोधेन गम्यः विषयीकार्य्यः न०त०। ज्ञानेनाविषयीकार्य्ये ज्ञातुमशक्ये।

अब्ज न० अप्सु जायते जन-ड ७त०। १पद्मे, २ शङ्खे पुंन०। ३ निचुलवृक्षे तस्य जलप्रायभवत्वात् तथात्वम् १ चन्द्रे ५ धन्वन्तरौ च पु०। तयोः समुद्रजातत्वात् तथात्वम् "प्रसन्नात्मा ससृत्पद्मः सोमः शीतांशुरुज्ज्वलः" इति "धन्वन्तरिस्ततोदेव! वपुष्मानुदतिष्ठत" इति च भा०आ०प०। चन्द्रनामकत्वात् ६कर्पूरे पु०। "अर्बुदमब्जं खर्वनिखर्वमहापद्मशङ्कवस्तस्मादिति" लीलावत्युक्तदशार्बुदसंख्यायां ७शतकोटिसंख्यायां दशतसंख्येये च न०। ९जलजातमात्रे त्रि० "स्थलजाः पक्षिणोऽब्जाश्च" इति "अब्जेषु चैव रत्नेषु सर्व्वेष्वप्सम्भवेषु च" इति रामा०।

अब्जकर्णिका स्त्री अब्जस्य कर्णिका कर्णाभरणभेदइव तत्प्राकारत्वात्। पद्ममध्यस्थसवर्त्तिकाख्ये पद्मावयवभेदे पद्मकर्णिकादयोऽप्यत्र।

अब्जज पु० अब्जात् विष्णोर्नाभिकमलात् जायते जन-ड। चतुर्मुखे ब्रह्मणि तस्य विष्णुनाभिकमलजातत्वात्तथात्वम् "दृष्ट्वा भूतानि भगवान् लोकसृष्ट्यर्थमव्ययः। ब्रह्मणो जन्मसहितं वपुरूपं विचिन्वति"। इत्युपक्रम्य "ततस्तस्मिन्महातोये स्वविभो हरिरद्भुतः। स्वपन् क्रीडंश्च विविधं मोदते वैस पावकिः पद्मं नाभ्युद्भवं चैकं ससृत्यादितवांस्ततः। सहस्रपर्णं विरजो भास्वराभं हिरण्मयम्। अथ योगविदां श्रेष्ठं सर्वभूतमनोमयम्। स्रष्टारं सर्वभूतानां ब्रह्माणं सर्वतोमुखम्। तस्मिन् हिरण्मये पद्मे वपुर्योजनविस्तृते। इति ससृत्यादितवानित्यार्षम्। अनतिदूरे च "कस्त्वं पुष्करमध्यस्थः सितोष्णीषचतुर्मुखः। आवां न गणयेर्गोप्तादाख्ये त्वं विगतज्वरः। एष्ट्रावयोर्बाहुयुद्धं प्रयच्छ कमलोद्भव!। इति तेन तस्य विष्णुनाभिकमलज त्वं तदुत्पत्तेश्च हरि०पौ०प०। "स्वराशौ स्वांशगे सौम्ये (बुधे) लग्नस्थे वा भृगोः सुते। जीवे वाऽब्जजयोगोऽयं यातुः शत्रुविनाशकृदिति" ज्योतिषोक्ते २ यात्रायोगभेदे च।

अब्जबान्धव पु० अब्जानां बान्धवइव प्रकाशकत्वात्। कमलप्रकाशके सूर्य्ये तस्योदये हि कमलं विकाशते इति कविसम्प्रदायप्रसिद्धिः। एवं कमलबान्धवादयोऽप्यत्र।

अब्जभोग पु० अब्जस्य शङ्खस्य भोगः अवयवइव भोगोयस्य। शङ्खावयवतुल्यावयवे वराटके। भुज्यते भुज-कर्म्मणि घञ् भोगः भोज्यम्। अब्जस्य भोज्यांशे पद्मकन्दे शालूके तस्य लोकैर्भुज्यमानत्वात् तथात्वम् कमलभोगादयोऽप्यत्र।

अब्जयोनि पु० अब्जं विष्णुनाभिकमलं योनिरुत्पत्तिस्थानं यस्य। चतुर्मुखे ब्रह्मणि। विस्तरोऽब्जजशब्दे दृश्यः।

अब्जवाहन पु० अब्जस्य चन्द्रस्य वाहनं धारणं येन "अब्जं शङ्ख इव शुभ्रं वाहनं वपुरूपं यस्य वा। १चन्द्रमौलौ शिवे। अब्जं कमलं वाहनमिवाधारो यस्याः। २पद्मासनस्थायां लक्ष्म्याम् "पद्मासनस्थां ध्यायेच्च श्रियं त्रैलोक्य मातरमिति" तद्ध्याने उक्तेः तस्या अब्जवाहनत्वम् कमलादि वाहनाश्रयत्वात्। [उ०द०। तस्य जन्मावधिप्राप्तत्वेन तथात्वम्।

अब्जस् न० आप्यते जन्मतः आप-असुन् जुट्-ह्रस्वश्च। रूपे

अब्जस्थित पु०। अब्जे विष्णुनाभिकमले स्थितः स्था-क। चतुर्मुखे ब्रह्मणि "स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः देवी अधिकमब्जजशब्दे दृश्यम्।

अब्जहस्त पु० अब्जं पद्मं हस्ते यस्य। सूर्य्ये "पद्मासनं पद्महस्तम्" इति तद्ध्यानोक्ते स्तवात्वम्।

अब्जा त्रि० अप्सु जायते जन-विट् ७त०। जलजातमात्रे "अब्जामुक्थैरहिं गृणीषे" ऋ०७,३४,१६, "अब्जामब्जजातमहिम्" भा०।

अब्जिनी स्त्री अब्जानां समूहः अब्ज+इनि-ङीप्। पद्मसमूहे। अब्जानां देवःपुष्करा० इनि। २पद्मलतायाम् च।

अब्जिनीपति पु० अब्जिन्याः पद्मसमूहस्य पतिःप्रकाशकत्वात्।

कमलप्रकाशके स्फुटं। पद्मिनीनाथतत्पत्न्यादयोऽत्र।

अ(ब्द)ब्द पु० अवति रक्षति सोमानं दन्। १ पर्वतभेदे स च वर्षपर्वत एव तद्भेदः वर्षपर्वतशब्दे वक्ष्यते। अपोददाति दा-क ईत०। २मेघे ३सस्यायां च तस्याशाश्वत्सगीतवीर्य्यत्वेन वैद्यकोक्तेः जलमयमूलत्वाच्च तथात्वम्। व्याप्यते व्याप्यते ऋतुमासपक्षतिथिनक्षत्रयोगकरणवारादयो येन व्याप-दन् ह्रस्वश्च "अ(ह्या)ऽहादयश्च" उ०नि०। ४वत्सरे। स च नवविधः। "ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं गुरोस्तथा सौरञ्च सावनं चान्द्रमार्क्षं मानानि वै नवेति" स्फु०सि० उक्तेः तत्र ब्राह्माब्दमानम् "सूर्याब्दसंख्यया द्वितिसागरैरयुताहतैः सध्यासध्यंशसहितं विज्ञेयं तच्चतुर्युगम् इदं युगसहस्रेण भूतसंहारकारकः कल्पो ब्राह्ममहः प्रोक्तं तावती रात्रिस्तस्य तावतीति" "परमायुः शतं तस्य तथाहोरात्रसंख्यया" इति च स्फु०सि०। तथाच सौरैः (४३२०००००००) एतावद्वर्षैस्तस्याहस्तावद्भिश्च रात्रिः तेन द्विगुणितैस्तैः २६० गुणितैर्ब्राह्माब्दमानम्। अथ दिव्यम् "मासैर्द्वादशभिर्वर्षं दिव्यं तदहरुच्यते तत्षष्टिः षड्गुणा दिव्यं वर्षमासुरमुच्यते" इति तत्रोक्तेः ३६० सौरवर्षैर्दिव्याब्दमानम् "मन्वन्तरव्यवस्था च प्राजापत्यमुदाहृतम् न तत्र द्युनिशोर्भेद इति तत्रोक्तम् मन्वन्तरमानमेव प्राजापत्याब्दमानम् तच्च "युगानां ४३२०००० सप्ततिः सैका मन्वन्तरमुदाहृतम्" इदमुक्तम् तेन७१ गुणितैः २११०४०००सौरवर्षैः प्राजापत्यम्। पित्र्यं तु "त्रिंशता तिथिभिर्मासश्चान्द्रः पित्र्यमहः स्मृतम् निशा च मासपक्षाभ्यां तयोर्मध्ये विभागतः" इत्युक्तेः चान्द्रमास एव पित्र्यमहोरात्रं तच्च ३६० गुणितं तद्वर्षमानम् तथाच १०८०० चान्द्रदिनैः पित्र्यवर्षमानमितिफलितम्। वार्हस्पत्यन्तु "वैशाखादिषु कृष्णे च योगः पञ्चदशे तिथौ। कार्त्तिकादीनि वर्षाणि गुरोरस्तोदयात् तथा" स्फु०सि० "यया पौर्णमास्यां नक्षत्रसम्बन्धेन तत्संज्ञो मासो भवति तथेति सप्तम्यर्थकम्। ह्रस्वस्यतेः सूर्यसान्निध्यदूरत्वाभ्यामस्तादुदयाद्वा वैशाखादिषु द्वादशसु मासेषु कृष्णपक्षे पञ्चदशे तिथौ अमावास्यायामित्यर्थः। चकारः पौर्णमासीसम्बन्धात् सप्तम्यर्थकः। योगो दिननक्षत्रसम्बन्धः कार्त्तिकादीनि द्वादश वर्षाणि भवन्ति। वैशाखकृष्णपक्षपञ्चदश्यामारूपायां ह्रस्वस्यतेरस्ते उदये वा जाते सति तदादि ह्रस्वस्यतिवर्षं कृत्तिकादिनक्षत्रसम्बन्धात् कार्त्तिकसंज्ञम्। एवं ज्ञेयाषाढश्रावणभाद्रपदाश्विनकार्त्तिकमार्गशीर्षपौषमाघफाल्गुनचैत्रमासेषु क्रमशो ह्रस्वपुष्यमघापूर्वफाल्गुनीचित्राविशाखाज्येष्ठापूर्वाषाढाश्रवणपूर्वभाद्रपदाश्विनीनक्षत्रसम्बन्धान्मार्गशीर्षादीनि भवन्ति। अत्रापि नक्षत्रद्वयसम्बन्धः चान्द्रमासवत् बोध्यः। तच्च मासशब्दे द्रष्टव्यम् तेन यद्दिने ह्रस्वस्तेरुदयोऽस्तो वा तद्दिने यच्चन्द्राधिष्ठितनक्षत्रं तत्संज्ञं वार्हस्पत्यं वर्षं भवतीति तात्पर्य्यम्। मेषादिसंक्रान्तीरुक्त्वा "मेषादयो द्वादशैव सौरमाने तु वत्सराः" इति "सौरन्तु तद्भवेन्मानं भानोर्भगणपूरणादिति" चोक्तेः ३६० सौरदिवसैः सौरवर्षमानम्। सावनन्तु "उदयादुदयं भानोः सावनं तत्प्रकीर्त्तितं" मित्युक्तम्। "पञ्चाङ्करामाब्धिहयाः खरामाः सार्द्धद्विदस्राः कुदिनाद्यमब्दे" इति सि०शि० उक्तेः ३६५, दिनानि १५,३०,२२,३०, दण्डादिसहितानि सावनदिनानि "अष्टार्कमासोऽर्कहराः प्रदिष्टस्त्रिंशद्दिनः सावनमास" इति सि०शि० उक्तादिना तन्मासादवोद्धेयाः। "त्रिंशता तिथिभिर्मासश्चान्द्र इति" प्राग्उक्तं चान्द्रमानम् तच्च "कालेन येनैति पुनः शशीनं क्रमन् भचक्रं विवरेण गत्वोः मासः स चान्द्रोऽब्दयमाः कुरामाः खाग्नेधवस्तत् कुदिनप्रमाणम्" इति सि०शि० उक्तेः ३११।५० दण्डादियुतैरेकोनत्रिंशत्कुदिनैश्चान्द्रमासः द्वादशगुणिते च तस्मिन् ३५४।१८ कुदिनैश्चान्द्रवर्षमानम् चान्द्रमासविशेषाः मासशब्दे वक्ष्यन्ते। नाक्षत्रं यथा "भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते" स्फु०सि० नित्यं प्रत्यहं भचक्रभ्रमणं नक्षत्रसमूहस्य प्रवहवायुकृतः परिभ्रमः नाक्षत्रं नक्षत्रसंबन्धि दिनम्। एवं नवसु ब्राह्मादिषु वर्षेषु दर्शितेषु चतुर्ष्वेव व्यवहारोपयोगिता यथोक्तं "चतुर्भिर्व्यवहारोऽत्र सौरचान्द्रार्क्षसावनैः वार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यग" इति स्फु०सि०। तत्र कस्य कुत्रोपयोगस्तदुक्तं तत्रैव। "सौरेण द्युनिशोर्मानं षड्गीतिसुखानि च अयनं विषुवच्चैव संक्रान्तेः पुण्यकालता" इति "तिथिः करणसंज्ञाः सौरं सर्व्वक्रियासु तथा व्रतोद्वाहयात्रासु क्रिया चान्द्रेण गृह्यते" इति "सावनानि क्षुरेतेन यज्ञकालविधिस्तु तैः मृतकानां परिच्छेदोदिनमासाब्दपास्तवा मध्यमग्रहभुक्तिश्च सावनेनैव गृह्यते" स्फु०सि०। चान्द्रेण तु मासवर्षादिगणनापि "चैत्रे मासि जगत्सृष्टा ससर्ज प्रथमेऽहनि शुक्लपक्षे समग्रन्तु सदा सूर्योदये सति प्रवर्त्तयामास तदा कालस्य गणनामपि यस्मात् राशीन्ऋतून् मासान् वत्सरान् वत्सराधिपान्" इति म०त० ब्र०पु०। "यत्राब्दे पुरुषसंज्ञं शुभं सोऽब्दः शुभप्रदः" इति नी०ता०।

अब्दप पु० अब्दं पाति पा–क । १वर्षाधिपे तदानयनप्रकारश्च सि०शि०दर्शितः यथा"अधोऽधस्त्रिधा कल्पयाताब्दहन्दात् कराभ्यां, ऋतैः, पावकैः, संगुणाच्च । भुजङ्गैरवाप्तं फलं स्याद्दिनाद्यं तदब्दान्वितं भास्कराद्दप्पः स्यात्" अत्रोपपत्तिः । एकस्मिन् रविवर्षे सावनाहाः प्राक् प्रतिपादिताः ३६५ । १५ । ३० । २२ । ३० एतदष्टभिः सवर्णितं कार्यम् । ततोऽनुपातः । यद्यष्टभिर्वर्षैरेतावद्दिनाद्यं तदा कल्पगतैः किमिति । फलं दिनाद्यम् । तदनष्टं संस्थाप्यम् । ततो गताब्दैर्युतं सदब्दपतिः स्यादिति यदुक्तं तदुक्तम् । यतः पञ्चषष्ट्यधिकशतत्रये सप्तभिर्भक्ते एकोऽवशिष्यते । अत एकगुणाब्दसंख्या तस्मिन् दिनाद्ये निविष्टा । तस्मिन् सप्ततष्टेऽकोद्योऽब्दपतिः । यतो यस्मिन् वारेऽब्दादिः सोऽब्दपतिः स्यादित्युपपन्नम् । ताजिकोक्ते २ वर्षाधिपतौ च तदानयनप्रकारश्च जन्मलग्नपतिवर्षलग्नाधिपतिमुन्थहाधिपतित्रिराशिपतीनां दिवासूर्याक्रान्तराशिपतेः रात्रौ चन्द्राक्रान्तराशिपतेश्चैषां पञ्चाधिकारिणां मध्ये द्वादशवर्गीबलेन पञ्चवर्गीबलेन वोपेतः लग्नदर्शी वर्षाधिपतिः । बलसाम्ये दृष्टतिरेकात्, तत्रापि साम्ये दृष्ट्यभावे च सत्यहेश्वरः वर्षाधिपः । "अब्दपबलस्य विचारणेत्यम्" नी०ता० । अब्दपत्वादयोऽप्यत्र ।

अब्दसार पु० अब्दस्य सस्यावायाः सारः मूलनिर्यासः । कर्पूरे तस्य सस्यामूलसारजत्वात्तथात्वम् घनसारमेघसारादयोऽप्यत्र ।

अब्दवाहन पु० अब्दोमेघोवाहनमस्य । इन्द्रे ।

अब्दिमान् त्रि० अपां दानमब्दिः दा०वा० भावे कि दैत० ततः अस्त्यर्थे मतुप् । जलदानवति "अब्दिमानुदधिमान्" ऋ० ५,४२,१४, "अपांदानवान् मेघ" इति भा० ।

अब्दुर्ग अब्भिर्वेष्टितं दुर्गं या०त० । सर्वतोवेष्टितेनोदकेनोपलक्षिते दुर्गे (गड़) "धन्वदुर्गं मही दुर्गमब्दुर्गं वार्क्षमेव च । नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् पुरम्" मनुः ।

अब्देवत त्रि० आपोदेवतान्यस्य । १जलदेवताके मन्त्रभेदे "उदित्तृचा वारुणेन हचेनाब्देवतेन च" मनुः"स्नानमब्देवतैर्मन्त्रैर्मार्जनं प्राणसंयम" इति या० । स च मन्त्रः "आपोहि ष्ठा मयोभुव" इत्यादिसूक्तात्मकः । य० ११,५०,५१,५२ । २जलदेवताके पूर्व्वाषाढानक्षत्रे च ।

अब्धि पु० आपो धीयन्तेऽस्मिन् धा–आधारे कि उप०स० । १सरोवरे २समुद्रे च स च जम्बूद्वीपपूर्व्वापरादिवर्त्तिता भेदेन चतुर्विधः यथोक्तं भागवते"तत्र चतुर्द्वा विभज्यमानाचतुर्भिर्नामभिश्चतुर्दिगभिप्यन्दन्ती तदनदीपतिमेवाभिनिविशति, सीतालकनन्दाचक्षुर्भद्रेति । सीता तु ब्रह्मसदनात् केसराचलादिशिखरेभ्योऽधोऽधः प्रस्रवन्ती गन्धमादनमूर्द्धसु पतित्वान्तरेण भद्राश्वं वर्षं प्राच्यां दिशि खार समुद्रमभिप्रविशति । एवं माल्यवच्छिखराच्च्यवनी तत उपरतवेगा केतुमालमभिचक्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति । भद्रा चोत्तरतोमेरुशिखरतो निपतिता गिरिशिखराद्गिरिशिखरमतिहाय ब्रह्मणः ब्रह्मसदनादवस्यन्माना उत्तरांस्तु कुरूनभित उदीच्यां दिशि लवणार्णवं प्रविशति । तथैवालकनन्दा दक्षिणेन ब्रह्मसदनाद्धहनि गिरिकूटानि अतिक्रम्य हेमकूटहिमकूटान्यतिरभसरंहसालुठन्ती भारतमभिवर्षं दक्षिणस्यां दिशि लवणजलधिमभिप्रविशति" अत एव तत्संख्यातुल्यसंख्याकचतुःसंख्यावचकताऽस्य । "पञ्च पञ्चयुगषट्कलोचनद्व्यधिषड्गुणमिता ई४२६५५ गुरोर्मता" । "खाष्टाब्धयो (४८०)ऽष्टागजेषुदिग्द्विपद्विपाब्धयः ४८८१०५८५८, इति च सि०शि० । सप्तद्वीपान्तरालस्य लवणादिभेदात् सप्तविधोऽपि यथोक्तं सि०शि० "भूमेर्यः चारसिन्धोरुदक्स्थं जम्बूद्वीपं प्राहुराचार्यवर्याः । अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य वाप्ये क्षारक्षीराद्यम्बुधीनां निवेशः । लवणजलधिरादौ दुग्धसिन्धुश्च तस्मादमृतमृतरश्मिः श्रीश्च यस्माद्बभूव । मणितचरणपद्मः पद्मलक्षादिदेवैर्वसति सकलवासो वासुदेवश्च यत्र । दध्नो घृतस्येक्षुरसस्य तस्मान्मद्यस्य च स्वादुजलस्य चान्यः । स्वादूदकान्तर्वडवानलोऽसौ पाताललोकाः पृथिवीपुटानि" । तेषाञ्च द्वीपद्वयान्तरालस्थितिमूलम् अब्धिद्वीपाभ्यन्दे दृश्यम् तेन तत्संख्यातुल्यसप्तसंख्यकोऽप्यस्य क्वचित् प्रवृत्तिः अतएव सप्तद्वीपेत्यर्थे अब्दिद्वीपेति प्रयुक्तम् । "चतुरः सप्त वाम्बुधीन्" वाग्भटालङ्कारः ।

अब्धिकफ पु० अब्धेः समुद्रस्य कफ इव । समुद्रफेने ।

अब्धिज ०० अब्धौ जायते जन–ड ७त० । १चन्द्रे २मद्ये ३समुद्रजातमात्रे त्रि० ४लक्ष्म्यां स्त्री । ५अश्विनीकुमारयोः द्वि०व० । एतेषाञ्च समुद्रजातत्वात्तथात्वम् ।

अब्धिद्वीपा स्त्री अब्धिसंख्याता लवणादिसप्तसंख्याता द्वीपा अस्याः । जम्बूप्रभृतिसप्तद्वीपवत्याम् पृथिव्याम् । "आर्कं ततः शाल्मलमत्र कौशं क्रौञ्चं च गोमेदकपुष्करे च । द्वयोर्द्वयोरन्तरमेकमेकं समुद्रयोर्द्वीपमुदाहरन्ति" सि०शि० ।

अब्धिनगरी स्त्री अब्धौ तत्समीपे नगरी । द्वारकायां तस्याः समुद्रसन्निकृष्टत्वात् समुद्रोत्खातभूमौ रचितत्वाच्च तथात्वम् यथा "इयं द्वारवती नाम पृथिव्यां निर्मिता मया भविष्यति

पुरी रम्या यक्षरक्षोगणावृतां"त्युपक्रम्य "वदीक्षेत् सागरः किञ्चिदुत्सृष्टुमिह तोयराट्। ततः स्रोतसलक्षया पुरी स्यात् पुरुषोत्तम। एवमुक्तस्ततः कृष्णः द्रागेव कृतनिश्चयः। सागरं सरितां नाथमुवाच वदतांवरः। मद्रङ्ग! दश च द्वे च योजनानि जलाशये। प्रतिसंक्षिप्यतामद्भा यदस्ति मयि मान्यता। अवकाशे त्वया दत्ते पुरीयं मामकं बलम्। पर्य्याप्तविषयारामा समग्रं विषक्ष्यिति ततः कृष्णस्य वचनं श्रुत्वा नदनदीपतिः। स मारुतेन योगेन उत्सस्र्ज जलाशयम्"। इति हरिवंशः।

अभ्रिनवनीतक पु० अभ्रेर्नवनीतमिव कायति प्रकाशते कै-क। चन्द्रे-ग०र० तस्य क्षीरसारतुल्यत्वात् तथात्वम्।

अभ्रिफेन पु० ६त०। मस्तङ्गफेने।

अभ्रिमण्डूकी स्त्री अभ्रिं मण्डयति मण्ड-ऊक गौरा० ङीष् ६त०। सक्तासाधने गुल्मौ।

अभ्रिशय पु० अभ्रौ शेते शी-अच् ७त०। मस्तङ्गस्यवटपत्रशय्यायाम् अभ्रौ वा शय्यायां शायिनि विष्णौ। खण्डप्रलयमुपक्रम्य "ततस्तं मारुतं घोरं खयम्भूर्मनुजाधिप!। आदिःपद्मालयोदेवः पीत्वा स्वपिति भारत!। तस्मिन्वै वार्ष्णवे घोरे" इत्युपक्रम्य॥ "ततः कदाचित् पश्यामि तस्मिन् सलिलसञ्चये। न्यग्रोधं सुमहान्तं वै विशालं पृथिवीपते!। शाखायां तस्य वृक्षस्य विस्तीर्णायां नराधिप!। पर्य्यङ्के पृथिवीपाल! विश्वयः समहानभूत्। कथं त्वयं शिशुःशेते लोके नाशमुपागते भा०व० मार्क०प० १८८२ देवीमाहात्म्ये तु "एकार्णवेऽहिशयने योगनिद्रामुपागत" इत्यहिशयनत्वमुक्तम्।

अभ्राग्नि पु० अभ्रौ स्थितोऽग्निः। वडवानले तत्कथा और्वशब्दे दृश्या। अग्निदहनादयोऽप्यत्र।

अभ्रक्ष पु० अपो भक्षयति भक्ष-अण् उप०स०। १सर्पभेदे २जलमात्राहारे त्रि०। "अब्भक्षो वायुभक्षश्च उपवास परस्तत" इति पुरा०।

अभ्र(भ्र) न० अपोविमर्त्तिक अभ्र-गतौ-अच् वा वा द्वित्वम्। १मेघे "अ(भ्रा)भ्राणि विभ्राणसुमाद्रसङ्गेति" माघः। २मेघनामायां सुन्नायाम्, (आभ) २ धातुभेदे च। मेघतुल्याकारत्वात्तस्य तथात्वम्। ४ मेघाधारे आकाशे न०।

अभ्रंलिह(भ्रं) पु० अभ्रं(भ्रं) लेढि स्पृशति लिह-खश् मुम् च। उद्गिखरे "अभ्रंलिहायं रविमार्गभङ्गमिति" भट्टिः। "अभ्रंलिहानि लिलिहे नवपल्लवानीति" माघः।

अभ्र(भ्र)क पु० अभ्र(भ्र)मिव कायति राजते कै-क। (आभ) धातुभेदे। मेघतुल्याकारत्वात्तस्य तथात्वम्।

अभ्र(भ्र)कष त्रि० अ(भ्रं)भ्रं मेघं कषति शोषयति कष-खच् मुम् च। १वायौ। २अलुब्धे त्रि०।

अभ्र(भ्र)पुष्प न० अभ्र(भ्र)स्य पुष्पमिव शुभ्रत्वात् कार्य्यत्वाच्च। १जले। अभ्र(भ्र)मिव पुष्पमस्य ब०। २वेतसवृक्षे पु०। [ऐरावते गजे तस्य मेघनायकत्वात्तथात्वम्।

अभ्र(भ्र)मातङ्ग पु० अभ्रा(भ्रा)धिपः मातङ्ग इव ष०त०।

अभ्र(भ्र)मु स्त्री अभ्रे(भ्रे) अभ्रा(भ्रा)धिपे ऐरावते माति मा-डु। ऐरावतस्य योषिति पूर्व्वदिग्वस्तिन्यामुः।

अभ्र(भ्र)सुवल्लभ पु० अभ्र(भ्र)मोः वल्लभः ६त०। ऐरावते गजे। अभ्र(भ्र)-सुपत्वादयोऽप्यत्र।

अभ्र(भ्र)रोहस पु० अभ्रा(भ्रा)त् तच्छब्दात् रोहति रुह-असुन्। वैदूर्य्यमणौ तस्य हि मेघशब्दादुद्भव इति प्रसिद्धम् "विदूरभूमिर्नवमेघशब्दादुद्भिद्यया रत्न शलाकयेव" कु०वर्णितम्

अभ्रा(भ्रा)त्य न० अ(वभ्र)भ्रात् तद्विषर्य्यादुत्पद्यते उद्भ+स्या-क। १ वज्रे २ विद्युदग्नौ पु० अ(भ्र)दभ्रजादयोऽप्यत्र। [नौकामलापकर्षके काष्ठमये कुद्दाले।

अभ्रि(भ्रि) स्त्री अभ्र गतौ इन् वा द्वित्वम्। काष्ठकुद्दाले

अभ्रि(भ्रि)य त्रि० अभ्रे(भ्रे)भवः य। मेघभवे।

अब्रह्मचर्य्य न० विरोधे न०त०। १ ब्रह्मचर्य्यविरोधिनि स्त्रीसंभोगादौ ब्रह्मचर्य्यं च स्त्रीस्मरणादि तच्च ब्रह्मचर्य्यशब्दे वक्ष्यते। न०व०। २ ब्रह्मचर्य्यरहिते त्रि०।

अब्रह्मण्य न० ब्रह्मणि ब्राह्मणोचितकर्म्मणि अहिंसादौ साधु यत् विरोधे न०त०। १ब्रह्मकर्म्मण्यसाधौ २हिंसादौ तथात्वेन भोदनविधये २वचने च तथा हि "अयं न वध्य" इति कथने हि न हिंस्यते। हिंसा च ब्रह्मकर्म्मणि न साधुः इत्यतस्तस्य तथात्वम् एतच्च प्रायेण नास्तीत्यादेव प्रयुज्यते "भो अब्रह्मण्यमब्रह्मण्यं वर्त्तते" नाटकम्। क्वचिदन्यत्रापि "अथैत्य योगनन्दस्य व्याहृतं क्रन्दितं पुरः। अब्रह्मण्यमतत्कालजीवो योगस्थितोहिजः" बृहत्कथासारः।

अब्राह्मण पु० अप्रशस्तब्राह्मणे न०त०। १ अप्रशस्तब्राह्मणे "समब्राह्मणे दानं द्विगुणं ब्राह्मणव्रुवे" इति पुरा० अब्राह्मणाश्च षट् ऋतौ दर्शिताः। "अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्वदर्शिना। आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी तृतीयो वृद्धयाज्यःस्याच्चतुर्थो ग्रामयाजकः। पञ्चमस्तु कृतस्तेषां ग्रामस्य नगरस्य च। अनागतान्तु यः पूर्व्वां सादित्यां चैव पश्चिमाम्। नोपासीत द्विजः सन्ध्यां स शूद्रोऽब्राह्मणः स्मृतः" आ०त०धृता०। एवमन्योऽपि स्मृत्यु-

ज्ञावेदितव्याः । २ ब्राह्मणसङ्गे क्षत्रियादौ भट्टदैवज्ञादौ च "अब्राह्मणाद्ध्ययनमापत्काले विधीयते । अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः" मनुः । भेदे न०त०। ३ ब्राह्मणभिन्ने शूद्रादौ च "नेतद्ब्राह्मणोवक्तुमर्हति समिधमाहर उप त्वा नेष्ये" इति छा०उ० ।

अब्रूक्षत न० न ब्रुवे क्षतम् । १ कथनाय प्रतिरोधके सनिजोवे अब्रूक्षते "अब्रूक्षतमाह नङ् दुष्टम् इति श्रुतिः ।

अभिज्ञ त्रि० अर्थं विज्ञं बोधनसामर्थ्यं यत्र । जलरूपार्थ प्रकाशसामर्थ्ययुक्ते य० पठिते १।१,५०'५१,५२अपोहिष्ठा इत्यादिके हचे अर्द्धचे मन्त्रे "कस्य नूनमित्यादि" पञ्चदशर्चात्मके च तच्च ऋ० १ मण्डले चतुर्विंशम् सूक्तम् ।

अभक्त त्रि० भज–सेवायां विभागे च कर्त्तरि कर्म्मणि वा क्त न०त० । १असेवके । "भक्तमभक्तमवोऽन्धः" इति ऋ०१, १२७,५ । २अदृष्टकल्पते च । [हीने त्रि० ।

अभक्ति स्त्री अभावे न०त० । १भक्त्यभावे । न०व० । २भक्ति-

अभक्षण न० अभावे न०त० । १ भक्षणाभावे २ भक्षणनिषेधो च । "पौर्णमास्यन्नमाधे च मूलकानामभक्षणमिति" म०त० ।

अभक्ष्य त्रि० भक्षितुमयोग्यं स्मृतिनिषिद्धित्वात् । १ स्मृतिनिषिद्धभक्षणे लशुनादौ अभक्ष्यत्वञ्च वस्तुस्वभावकृतं, कालकृतं, देशादिनिमित्तकृतं, द्रव्यान्तरयोगकृतं, स्वामिविशेषकृतं, चण्डालादिस्पर्शदर्शनादिदोषकृतम्, पात्रविशेषपाकादिकृतम्, अधिकारिविशेषकृतञ्चेति तत्तदुपाधिकृतम्, तत्र केषाञ्चित् नखादिना केषाञ्चिच्च तत्तद्भक्षणे प्रायश्चित्तोपदेशेना भक्ष्यत्वं स्मृत्यादावुक्तम् । अभक्ष्याणि च श्रुत्यादौ दर्शितानि "न कवकं भक्षयेच्च लशुनं न पलाण्डुमिति श्रुतिः "लशुनं गृञ्जनं चैव पलाण्डुं कवकानि च अभक्ष्याणि द्विजातीनाममेध्यप्रभवानि च" मनुः । । कवकानि छत्राकाः अमेध्यप्रभवानि विड्जादिजातानि । पलाण्डुशब्दार्थं यत्तु गन्धवर्णरसादिभिः । अभोज्यं तदुभवेत् सर्वमिति "लशुनादिषु यो दृष्ट्वा गन्धवर्णरसादिभिः । अभक्ष्याणि द्विजातीनाम्" इति च देव० । "लशुनपलाण्डुगृञ्जनकरञ्जकिंपाकज्ञम्बीभक्षणे द्वादशरात्रं पयः पिबेत्" शङ्खः "लोहितान् वृक्षनिर्यासान् ब्रह्मणप्रभवांस्तथा । श्लेष्मातकञ्च पेयूषं प्रयत्नेन विवर्जयेत्" मनुः श्लेष्मातकं बहुवारफलं गोसम्बन्धि पेयूषं नवप्रसूतायाः गोः अग्निसंयोगात् कठिनीभूतं क्षीरम् । "इत्याज्यपरमंयावं पायसापूपमेव च अनुपाकृतमांसानि देवान्नादि हवींषि च" मनुः । इत्या देवतोद्देशेन त्यागार्थं यत् पच्यते तत् । "तिलतण्डुलसंपक्वः क्षपरः सोऽभिधीयते" इति छा०प० उक्तः क्षपरः, संयावः घृतक्षीरगुडगोधूमचूर्णमयः पिष्टकभेदः । अनुपाकृतानि मन्त्रैरसंस्कृतपशुमांसानि । देवान्नानि देवार्थं कल्पितानि प्राक् होमात् नाद्यानि । "इत्यामांसञ्च नाश्नीयात् पिण्डदेवादिवर्जितम्" स्मृतिः "न तदश्नीयाद्यद्देवपितृमनुष्यार्थञ्च कुर्य्यात्" शङ्खलि० । "इत्या मांसं न भोक्तव्यं भोक्तव्यं श्राद्धकर्म्मणि अन्यथा भक्षयन् विप्रः प्राजापत्यं समाचरेत्" छाग० । अस्यापवादः "भक्षयन्नपि मांसानि शेषभोजी न दुष्यति औषधार्थमशक्तौ वा नियोगात् यज्ञकारणात्" देवलः, "रोगी नियुक्तो विधिना हुतं विप्रमतं तथा । मांसमश्नन्नदोषी स्यात् परिसंख्या प्रकीर्त्तिता" इड० । मनुरपि "क्रीत्वा स्वयं वाप्युत्पाद्य परोपकृतमेव वा अर्चयित्वा पितॄन् देवान् खादन्मांसं न दुष्यति" अन्यत्र दोषमाह स एव "अतोऽन्यथा तु योऽश्नीयात् विधिं हित्वा पिशाचवत् । यावन्ति पशुरोमाणि तावत् प्राप्नोति सान्वयम् । प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानाञ्च काम्यया यथाविधि नियुक्तस्तु प्राणानामेव चात्यये इति च मनुः । ब्रह्मणकाम्यया तु सकृदेव भक्ष्यम् "भक्षयेत् प्रोक्षितं मांसं सकृद् ब्राह्मणकाम्यया दैवे नियुक्तं श्राद्धे वा नियमे तु विवर्गयेदिति" यमोक्तेः नियमः मांसभोजननिवृत्तिसंकल्पः स च व्रतभेदः । "मांसं नाश्नीयात् तद्व्रतम् संवत्सरं वेति" छा० उप० इत्यादिकः । अतएव विहित मांसविवर्जने एव मनुना फलाधिक्यं दर्शितम् "यो बन्धन वधक्लेशान् प्राणिनां न चिकीर्षति स सर्वस्य हितप्रेप्सुः सुखमत्यन्तमश्नुते । यद्ध्यायति यत्कुरुते धृतिं वा याति यत्र च । तदवाप्नोत्ययत्नेन यो हिनस्ति न किञ्चन" इति वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः । मांसानि च न खादेदृयस्तयोः पुण्यफलं समम् ॥ फलमूलाशनैर्मेध्यैर्मुन्यन्नानाञ्च भोजनैः न तत् फलमवाप्नोति यन्मांस परिवर्जनात्" । अतएव मनुना न मांसभक्षणे दोषो न मद्ये न च मैथुने प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला" इत्यनिषिद्धमांसवर्जनस्य महाफलतोक्ता । मांसभक्षणे न दोषइत्यादिकं तु दैवादिकर्म्मादौ अनुक्तमांसादिदोषाभावपरम् न तु निन्दितमांसभोजनेऽपि दोषाभावपरं तस्य स्वयमेव दुष्टत्वाभिधानात् तथा च स्वोक्तविहितमांसभक्षणे "सौत्रामण्यां सुरां पिबेदिति" श्रुत्युक्ते मद्यपाने, "न कामतो परिक्षरेत्तद्व्रतमित्यादि" श्रुत्युक्ते मैथुने च न दोषः । तेषामेव त्यागे महाफलत्वम् । अत

एव "कुर्यात् हतपशुं सङ्गे कुर्यात् पिष्टपशुं तथे"त्यनेन सति सङ्गे (वशादिफलकामनायाम्) पिष्टपशुनैव तं सम्पादयेदिति तेनैवोक्तम् अधिकं पिष्टपशुशब्दे वक्ष्यते। रोगिणा भक्षणेऽपि विशेषः "ब्राह्मणानुज्ञया भक्ष्यसङ्गं मांसञ्च रोगिभिः। मातापित्रभ्यां संभुक्तं शेषं वा ब्रह्मचारिणः पुनः प्रधानरोगेण कर्त्तव्यमधिकं व्रतम्" ब्रह्मपु०। "अगम्यागमने चैव मद्यगोमांसभक्षणे शुद्ध्यै चान्द्रायणं कुर्यात् पराय० "ग्रामञ्च कुक्कुटौ च सर्वान् पञ्चनखांस्तथा। क्रव्यादं कुक्कुटं याम्यम् भुक्त्वा संवत्सरं व्रतम्" यङ्गः। पञ्चनखाश्च यथादिभिन्नाः। "शशकः शल्की गोधा खड्गी कूर्मश्च पञ्चमः। भक्ष्यान् पञ्चनखेष्वाहुरिति मनूक्तेः। "विड्वराहग्रामकुक्कुटनरगोमांसभक्षणेषु सर्वेष्वेव द्विजानां प्रायश्चित्तान्ते भूयः संस्कारं कुर्यात्" विष्णुः "हंसं मद्गुं च काकोलं काकं वा खञ्जरीटकम्। मत्स्यादांश्च तथा मत्स्यान् बलाकां शुकसारिके। चक्रवाकं प्लवं कौलं भक्त्वा कृच्छ्रं भुजंगं तथा। मासमेकं व्रतं कुर्यात् भूयश्च तन्न भक्षयेदिति यङ्गः। मत्स्यादः पाठीनव्यतिरिक्तः "पाठीनरोहितावाद्यौ नियुक्तौ दैवपैतृयोः" मनुना तस्य विधानात्। "कलविङ्कहंसमद्गुचक्रवाकरज्जुबालसारसदात्यूहशुकसारिका भासचाषकाकबलाकाकोकिलखञ्जरीटाशने त्रिरात्रमुपवसेत्" विष्णुः। "चाषांश्च रक्तपादांश्च सौनं वल्गूरमेव च मत्स्यांस्तु कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत्" मनुः। सूना वध्यस्थानं तत्र भवत् सौनम् वल्गूरं शुष्कमांसम्। "क्रव्यादान् ग्रामनीन् सर्वान् टिट्टिभञ्च विवर्जयेत् कलविङ्कं प्लवं हंसं चक्राङ्गं ग्रामकुक्कुटम् सारसं रज्जुबालञ्च दात्यूहं शुकसारिके। मत्स्यादान् जलपादांश्च क्रौञ्चांश्च नख विष्किरान्। निमज्जतश्च मत्स्यादान् सौनं वल्गूरमेव च बकञ्चैव बलाकाञ्च काकोलं खञ्जरीटकम् मत्स्याद्यान् विड्वराहांश्च मत्स्यानेव च सर्वशः" इति मनुः। मत्स्यभेदे दैवादावाद्यभाक्ष मनुः "पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः। राजीवसिंहतुण्डांश्च सशल्कांश्चैव सर्वशः" "अभक्ष्यं भक्षयेज्जग्ध्वा पयोक्षीरं विवर्जयेत् पञ्चनखमत्स्यवराहमांसानि" चेति विष्णुः। "मत्स्यकर्कटशम्बूकशङ्खशुक्तिकपर्दकान् पीत्वा नवोदकञ्चैव पञ्चगव्येन शुध्यति" हारी० "कृमिकीटपिपीलिकाजलौकापतङ्गास्थिप्राशने गोमूत्रगोमयाहारस्त्रिरात्रेण प्रजतो भवेत्" हारी० केशमक्षिकारुधिरप्राशने ग्राम्यमांसक्रमिभक्षणे इत्युपक्रम्य "त्रिरात्रोपवासं हतप्राशनञ्च कुर्यात्" यङ्गलि०। "भक्ष्याणामभक्ष्यमांसरुधिरप्राशने तु पञ्चगव्यम्" हारी०। "नखकेशरुधिरप्राशने सद्यः स्नानं हतकुक्कुटरक्तोदकप्राशनञ्च" बुधः "अजाविकमक्षिपङ्गपाणाम् मांसभक्षणे केशरुधिरप्राशने च वृद्धिपूर्ब्बं त्रिरात्रम्" बौधा० भक्ष्यमांसकस्यापि क्वचिदंशे निषिद्धता "शुष्कमांसं गर्भशय्यां शुष्कमांसमथापि वा। भूमेरन्तर्गतं कृत्वा वह्निवागालितं च यत्। पक्वं मांसन्तु जीवन्तु प्रयत्नाच्च न भक्षयेत्। प्रमादभक्षितैरेभिर्नवे वासे वसेद्दिनं० ब्र०पु०। क्रव्यादं पिष्टपचनभाण्डं तत्र पक्वम्। व्यक्तिविशेषे सर्वमांसानामभक्ष्यता "न भक्ष्यं यतिना मांसं कदाचित्तु सुमूर्षुणा" ब्र०पु०। स्त्रीणान्तु सर्व्वथा मांसनिषेधमाह भागवतम् "ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते याश्च स्त्रियो रूपमुत् खादन्ति तांश्च ताश्च ते पशवः इह ये निहता यमसदने यातयन्तो रक्षोगणाः सौनिका इव स्वधितिनावदायास्रक् पिबन्ति"इति। कार्त्तिकादौ तु सर्व्वथा मांसादिनिषेधः। "न मत्स्यं भक्षयेन्मांसं न कौमं नान्यदेव हि। चण्डालो जायते राजन्! कार्त्तिके मांसभक्षणात्" आ०त०ना०पु०। "कौमुदन्तु विशेषेण शुक्लपक्षं नराधिप!। वर्ज्जयेत् सर्वमांसानि धर्म्मस्तत्र विधीयते। एकादश्यादिषु तथा तासु पञ्चसु रात्रिषु" इत्युपक्रम्य वर्ज्जितव्या तथा हिंसा मांसभक्षणमेव च ब्रह्मपु०। "निष्पावान् राजमाषांश्च सुप्ते देवे जनार्दने यो भक्षयति राजेन्द्र! चण्डालादधिकोहि सः। कार्त्तिके तु विशेषेण राजमाषांश्च वर्ज्जयेत्। निष्पावान् सुनिशार्दूल। यावदाङ्गतनारकी। कदम्बानि पटोलानि इन्ताकसहितानि च। न त्वजन् कार्त्तिके मासे यावदाङ्गतनारकी। एतानि भक्षयेद्यस्तु सुप्ते देवे जनार्दने। शतजन्मार्जितं पुण्यं दग्धमेति नात्र संशयः"म०त०ब्रह्मपु०। निष्पावः श्वेत शिम्बी। कदम्बानि कदम्बफलानीति कलम्बीति वा म०त० रघु०। तिथिविशेषेषु मांसादीनामभक्ष्यता "क्षौद्रतैलमांससंभोगी पर्व्वसेतेषु मानवः विण्मूत्रभोजनं नाम नरकं प्रतिपद्यते" इति वि०पु०। "षष्ठ्यष्टमी पञ्चदशी उभे पक्षे चतुर्दशी। अत्र सन्निहितं पापं तैले मांसे भगे क्षुरे" स्मृतिः "मत्तक्रुद्धातुराणाञ्च न भुञ्जीत कदाचन। केशकीटावपन्नञ्च पदा स्पृष्टञ्च कामतः। भ्रूणघ्नावेक्षितं चैव संस्पृष्टञ्चामृदुक्तया। पतत्रिणावलीढञ्च शुना संस्पृष्टमेव च। गवा चाघ्रातमुपघ्रातं धुताघ्रञ्च विशेषतः। गर्हितान्नं गणिकान्नञ्च विदुषा च जुगुप्सितम्। सेनगाय-

नयोश्चैव तच्छोवार्द्धुषिकस्य च। दीक्षितस्य कदर्यस्य वृद्धस्य निगडस्य च। अभिशस्तस्य षण्ढस्य पुंश्चल्या दाम्भिकस्य च। चिकित्सकस्य क्रूरयोः क्रूरस्योच्छिष्टभोजिनः। उपान्नं सूतिकान्नञ्च पर्य्याचान्नमनिर्दशम्। शुक्तं पर्य्युषितं चैव सूद्रोच्छिष्टं तथैव च। अनर्चितं हयामांसमधोरायाश्च योषितः। द्विषदन्नं नगर्य्यन्नम् पतितान्नमवल्गुतम्। पिशुनान्दतिनोश्चान्नं क्रीतविक्रयिणस्तथा। शैलूषतन्तुवायान्नं कृतघ्नस्यान्नमेव च। कर्म्मारस्य निषादस्य रङ्गावतारकस्य च। सुवर्णकर्त्तुर्वेणस्य शस्त्रविक्रयिणस्तथा श्रवतां शौण्डिकिनाञ्च चेलनिर्णेजकस्य च। रजकस्य नृशंसस्य यस्य चोपपतिर्गृहे। सूत्यन्ति ये चोपपतिं स्त्रीजितानाञ्च सर्वशः। अनिर्दशञ्च प्रेतान्नमतुष्टिकरमेव च। राजान्नं तेज आदत्ते सूद्रान्नं ब्रह्म वर्चसम्। आयुः सुवर्णकारान्नं यशश्चर्म्मावकर्त्तिनः। कारुकान्नं प्रजा हन्ति बलं निर्णेजकस्य च। गणान्नं गणिकान्नं च लोकेभ्यः परिकृन्तति। पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्वभिन्द्रियम्। विड्वा वार्द्धुषिकस्यान्नं शस्त्रविक्रयिणोमलम्। भुक्त्वा चान्यतमस्यान्नमभुक्त्वा चपणं त्रयहम्। भुक्त्वा भुक्त्वा चरेत् कृच्छ्रं रेतोविण्मूत्रमेव च। नाद्यात् सूद्रस्य पक्वान्नं विद्वानश्राद्धिनोद्विजः। आददीतामभेवान्नाद् दत्तावेकरात्रिकम्" मनुः। 'केशकीटावपन्नं केशकीटैः सह पक्वम्। घृष्टान्नं "केशोल्लारः" इत्युक्ता सत्रादौ यदन्नं दीयते तत्। गणान्नं बहुभिर्मिलित्वा यद्भोज्यं क्रियते तत्। दीक्षितस्य दीक्षणीययागानन्तरमा यज्ञसमाप्तेः अन्नमभक्ष्यम्। वृद्धस्य रज्जादिना। निगडस्य अर्श० आ० अच् निगडवतः निगडबद्धस्येत्यर्थः। सूतिकान्नं सूतिकाभक्षणसङ्ख्यं यत् पक्वं तत्कुलजैरपि न भक्ष्यम्। पर्य्याचान्नम् एकपङ्क्तिस्थेषु बहुषु भुञ्जानेषु यदि कश्चिदाचमनं करोति तदा तत्पङ्क्त्युपविष्टानां तदन्नमभक्ष्यम्। अनिर्दशं जननाशौचिनोऽन्नं तेनानिर्दशाहं प्रेतान्नमित्यनेन न पौनरुक्त्यम्। "सूतके तु यदा विप्रो ब्रह्मचारी विशेषतः। पिबेत् पानीयमन्नान्नं समश्नीयात् सृजेत वा। पानीयपाने कुर्वीत पञ्चगव्यस्य भक्षणम् त्रिरात्रं भोजने प्रोक्तम्" शङ्खः। एतच्चोभयाशौचपरम् उक्तं यन्मधुरं कालवशादम्लतां गतमम्लं क्षाव्यन्नान्नतां गतम्। शुक्तेषु दधि तज्जातञ्च भक्ष्यम् "दधि शुक्तेषु भोक्तव्यं सर्वत्र दधिसम्भवमिति" मनूक्तेः। तदपि गुडादिद्रव्यमिश्रणेऽभक्ष्यमेव "गुडादिद्रव्यसंयुक्तं वर्ज्यं पर्य्युषितं दधि। तथैव यावकादीनि मन्वादिचरितान्यपि" यमोक्तेः। "सगुडं मरिचाक्तं च तथा पर्य्युषितं दधि जीर्णतक्रमपेयञ्च नष्टस्वादञ्च केनचित्। प्रमादभणितैरेभिर्विने पञ्चव्रतं चरेत्" स्मृतेश्च "यवगोधूमवर्ज्यं गव्यविकारं स्नेहाक्तं चक्षुषाभवं वर्जयित्वा पर्य्युषितं प्राश्नीयवसेत् तथा दधिवर्जं सर्वशुक्तानि" विष्णुः। "केवलानि च शुक्तानि तथा पर्य्युषितानि च। अजीर्णपक्वं भुक्त्वा तु त्रिरात्रं तु व्रती भवेत् शङ्खः। चक्षुषा व्यञ्जनभेदः। "अपूपान्न करम्भान्न धाना वटकशष्कवः। शाकं मांसमपूपञ्च सूपं क्षरमेव च। यवागूं पायसञ्चैव यच्चान्यत् स्नेहसंयुतम् सर्वं पर्युषितं भक्षेत् शुक्तं तु परिवर्जयेदिति यमः। "अविकारि भवेन्मेध्यमभक्ष्यं तद्विकारकृत्" पर्य्युषितं रात्र्यन्तरितम् स्नेहाक्तं चेद्भक्ष्यं यदाह मनुः। यत्किञ्चित् स्नेहसंयुक्तं भक्ष्यं भोज्यमगर्हितम् तत्पर्य्युषितमप्याद्यं हविः शेषञ्च यद्भवेदिति" "चिरसंस्थितमप्याद्यं स्नेहाक्तमपि द्विजैः। यवगोधूमजं सर्वं पयसाञ्चैव विक्रियेति" च अनर्चितं निन्द्याधरीकृतम्। अवीराया निःस्वन्धायाः पतिपुत्रहीनायाः सम्बन्धिन्यास्तु पितामह्यादेर्न दोषः। नगर्य्यं नगरिणो नगराधिपस्यान्नम् "नगराधिपतेः शत्रोः पिशुनान्दतिनोस्तथेति" व्र० पु० ऐकवाक्यात्। अवल्गुतं अवशुसहितम्। "इत्यन्येषी नटानान्तु स तु शैलूषकः स्मृत" इति आ० पु० उक्तः शैलूषः। तन्तुवायकः सूचीकर्म्मकृत्, निषादः प्रतिलोमजवर्णसङ्करभेदः। रङ्गावतारकः नृत्यस्थाने गीतवाद्यादिना तदनुगुणतायां प्रसक्तौ। वेषः वंशविकारपात्रादिकर्त्ता। श्वान् सूगयाद्यर्थं कुक्कुरपोषणकृत्। शौण्डिकादयश्च तत्तद्वृत्तिभाजो द्विजाः अन्यजानां गुरुप्रायश्चित्तश्रवणात् प्रा० वि०। सूद्रान्नं सूद्रस्पृष्टे न भक्ष्यम्। "सूद्रेणाक्तानि विप्रेण क्षीरं वा यदि वा दधि। निष्टप्तेन न भोक्तव्यं सूद्रान्नं तदपि स्मृतम्"। "निष्टप्तेन सूद्रान्नान्निष्टप्तेनेति" आ० त० रघु० "यथा यतस्ततो वापः शुद्धिं यान्ति नदीं गताः। सूद्रादिभ्रष्टहेयञ्च प्रविष्टं तु सदा शुचि" अत्रिः। तेन स्वभ्रष्टगतस्यैव शुद्धत्वं तद्भ्रष्टगतस्य सूद्रान्नत्वमिति भेदः। "यः सूद्रेण समाक्रान्तो भोजनं कुरुते द्विजः। सुरापीति स विज्ञेयः सर्वधर्मबहिष्कृतः। यः सूद्रेणाभ्यनुज्ञातः कुर्याद्वा भोजनं द्विजः। सुरापीति स विज्ञेयः सर्वधर्मबहिष्कृतः" दक्ष० ना०। "सूद्रान्नेन तु भुक्तेन उदरस्थेन यो मृतः। स वै चरत्वसृक्त्वं सूकरत्वं वाऽधिगच्छति। "सूद्रान्नं ब्राह्मणोभुक्त्वा तथा रङ्गावतारिणः। चिकित्सकस्य क्रूरस्य तथा स्त्रीजग-

जीविनः । चण्डालान्नं भूमिपान्नमजजीव्यश्वजीविनाम् । शौण्डिकान्नं सूतिकान्नं भुक्त्वा मासव्रती भवेदिति' शङ्खः । सूद्रस्यापि भोज्यविशेषस्य भक्ष्यतामाह सुमन्तुः गोरसश्चैव शक्तूंश्च तैलं पिण्याकमेव च । अपूपान् भक्षयेच्छूद्रात् यच्चान्यत् पयसा कृतम् । कन्दुपक्वं तैलपक्वं पायसं दधि शक्तवः एतान्यसूद्रान्नभुजां भोज्यानि मनुरब्रवीदिति" हारीतः । "रजके चैव शैलूषे वेणुचर्म्मोपजीविनि । एतेषां यस्तु भुञ्जीत द्विजश्चान्द्रायणं चरेत् आप० । अन्त्यजान्नं यदा भुङ्क्ते सूद्रो मोहात् कदाचन एकरात्रोषितोभूत्वा दानं दत्त्वा विशुध्यति" संवर्त्तः "अभिशस्तपतितपौनर्भवस्त्रैणकपुंश्चल्यगुचिशूद्रकारतैलिकचाक्रिकध्वजिसुवर्णकारलेखकगण्डतुन्नवायकवन्धकगणिकान्नानि च न भोज्यानि शौकरिकव्याधनिषादरजक वरूडकैवर्त्तचर्मकारा अभोज्यान्ना अप्रतिग्राह्याश्च" सुम० । "पतितानां स्टष्टं गत्वा भुक्त्वा च प्रतिस्पृश्य च मासोपवासं कुर्य्यात" इत्त० "चाण्डालपतिताद्यभोजनेषु ततः पुनरूपनयनम्" वसि० । "पतितद्रव्यमादाय भुङ्क्ते च ब्राह्मणः क्वचित् । कृत्वा तस्य समुत्सर्गं यतिकृच्छ्रं चरेद्द्विजः" उश० । "चण्डालचाक्रिकलोहकारधाण्टिकान्नभोजने त्रिरात्रमुपवसेत्" हारीतः चाक्रिको दण्डादिचक्रेण तैलनिष्पादनवृत्तिः । धाण्टिकः देवघण्टावादकः । "ध्वजिबणिक्किरीटिवार्द्धुषिकान्नभोजने पञ्चरात्रम्" हारीतः । ध्वजी शौण्डिकवृत्तिः बणिक् शिल्पोपजीवी । किरीटी बणिग्भेदः । "भगवृत्तिपुंश्चलीवेश्यान्नभोजने सप्तरात्रम् दुष्कृतिगरदतस्करान्नभोजने दशरात्रम् प्रव्रजितगणोद्दिष्टान्नभोजने दशरात्रं ताम्रकांस्यसीसकारव्याधिततच्चकान्नभोजने तप्तकृच्छ्रं ब्राह्मणवृत्तिघ्नवधबन्धोपघातदत्त्वन्नभोजने च सङ्घीर्णान्नभोजने च असंस्कृतावज्ञासरोषविक्रयान्नभोजने च" हारी० । भगवृत्तिर्भुनशुल्केन यस्य वृत्तिः गरदो विषदाता व्याधिजनकौषधदाता च "इतरे ये त्वभोज्यान्नास्तेषामन्नं विगर्हितम् अजाविके माहिषिके कूटे च दृषलीपतौ एतेषां भोजनं कृत्वा द्वादशाहं पयःपिबेत्" मनुः । अजाविकोऽजाविभ्यां वृत्तिमान् । माहिषिकः महिषेण वृत्तिमान् । कूटः अन्यनृमनसि अन्यद्दृषलीत्यादिरूपकपटव्यवहारी "वन्ध्या तु दृषली ज्ञेया दृषली च सुतप्रजा । अपरा दृषली ज्ञेया कुमारी या रजस्वला" । उश० उक्ता तस्याः सूद्रायाश्च पतिः विष्णुः "गणगणिकासेनगायकान्नानि भुक्त्वा सप्तरात्रं पयसा वर्त्तेत तच्छ्राद्धं चर्म्मकर्त्तुश्च वार्द्धुषिकस्य दीक्षितस्य वृद्धनिगड़ाभिशस्तान्नानाञ्च पुंश्चल्युदान्धिकचिकित्सकलुब्धकक्रूरोच्छिष्टभोजिनाञ्च अवीरास्त्रीसुवर्णकारसंसर्गपतितानाञ्च पिशुनानृतवादिनाञ्च धर्म्मसोमविक्रयिणाञ्च शैलूषतक्षवायकृतघ्नरजकानाञ्च कर्म्मकारनिषादरङ्गावतारिवेणशस्त्रविक्रयिणाञ्च अजीविशौण्डिकतैलिकचेलनिर्णेजकानाञ्च भुक्त्वान्नावेक्षितसुदक्या संस्पृष्टं पतत्रिणावलीढं शुना संस्पृष्टं गवा घ्रातञ्च कामतः पदास्पृष्टमवज्ञातञ्च मत्तक्रुद्धातुराणाञ्च अनर्चितं हुत्वा मांसञ्च । यत्र नाश्नन्ति देवाश्च पितरश्च यथाविधि । हुताशकः परिक्लेदः तस्य नाद्यात् कथञ्चन । हुताशकस्य भुञ्जानः प्रायश्चित्तं चरेत्" । "नवं क्षरपूपादि पायसं मधुसर्पिषी चण्डालेन शुना वापि दृष्टं क्षविरयज्ञियम् । विड़ालादिभिरुच्छिष्टं दुष्टमन्नं विवर्जयेत् अन्यत्र क्षिरखोदकस्वर्गादिति" याज्ञ० । क्षिरखोदकस्वर्गसेवान्नस्य, तापनादेः एतादीनां शुद्धिकरत्वमाह सएव "तापनं हृततैलानां प्लावनं गोरसस्य च अन्यानां भक्षणेवस्तु भक्षितोयैर्द्विजातिभिः । चान्द्रं कृच्छ्रं तदर्द्धं वा" उशनाः "कापालिकान्नभोक्तॄणां तद्व्रतीनामभिनां तथा । ज्ञानात् कृच्छ्राब्दमुद्दिष्टम्" आप० । "अन्यावसायिनामन्नमज्ञानाद्यदि कामतः । शिशुचान्द्रायणं कुर्य्यादिति" अङ्गि० । "चण्डालपतितादीनामुच्छिष्टस्य च भक्षणे । द्विजः शुध्येत् पराकेण" अङ्गि० । "अमेध्यपतित चाण्डालपुक्कसगरजस्वलाऽवधूतकृमिकृमिकुनखिस्पृष्टानि भुक्त्वा कृच्छ्रमाचरेत्" शङ्खः । अमेध्यं मद्यभाण्डविस्मूत्रेतस्यादि । पुक्कसः क्षत्रियायां सूद्राज्जातः प्रतिलोमजः वर्णसङ्करः । कृमिः स्वभावतः पाणिविकलः । "चण्डालपतितामेध्यकृमिभिः कृमिना तथा उदक्यासूतिभिः स्पृष्टं भुक्त्वा मासं वने वसेदिति" ब्र०पु० । "अस्थ्यादिदूषिताद्यञ्च भुञ्जानस्तु यदा भवेत् स्नात्वार्कमर्चयित्वा तु हुतं प्राश्य विशुध्यति" ब्र०पु० पतितादिस्पर्शे अकृतस्नानानामन्नमात्रस्नानभक्षणता "मद्यापातकिसंसर्गे स्नानमेव विधीयते संस्पृष्टस्तु यदा भुङ्क्ते तप्तकृच्छ्रं समाचरेत् स्नानार्हको यदा स्नानमकृत्वाश्नाति वै द्विजः । अहोरात्रोषितः स्नातः पञ्चगव्येन शुध्यति" पैठ० । "केशकीटावपन्नञ्च स्त्रीभिः स्पृष्टं तथैव च । सोदक्यास्पृष्टसंस्पृष्टं पञ्चगव्येन शुध्यति" जाबा० । स्त्री भिन्नजातिस्त्री । केशकीटादुपहतस्य प्रोक्षणादिकं कृत्वा भक्ष्यमेव । "अवक्षुतं केशपतङ्गकीटैरुदक्यया वा पतितैश्च दृष्टम् । स्नातस्मृद्भस्मक्षिरखतीयैः संस्पृष्टमन्नं मनुराह भोज्यम्"

यमः चण्डालपतितामेध्यैः कृमिभिः कृमिना तथा। ब्रह्मघ्नसूतिकोदक्याकौलेयकशुनाशुभिः। दृष्टं वा केशकीटाद्यं भक्षयेत् कनकाम्बुभिः शुद्धमश्नात् सङ्कल्पेन प्रभूतं व्युष्टमेव च ब्रह्मपु०। कौलेयकः कुक्कुरः कुटुम्बी कुक्कुटादि प्राणिभेदः तस्यावकुटुम्बवत्त्वात्। व्युष्टं पर्य्युषितम्। एतच्च चुरतरमभ्युक्ष्य भक्ष्यम् अन्यत्रोपहतस्य तु त्यज्यतैव" प्रा०वि०। "विशुद्धमपि चाहारं मक्षिकाभिर्जन्तुभिः। केशलोमनखैर्वापि दूषितं परिवर्जयेत्" देव०। तन्मात्रसंवृतं शुद्धेत् कठिनन्तु पयोदधि। "अविलीनं तथा चैव विलीनं अपयेन तु" याज्ञ०। "नाश्नीयतते यज्ञे यामयाजिकृते तथा। स्त्रिया क्लीवेन च कृते भुञ्जीत ब्राह्मणः क्वचित्। अश्लीलमेतत् साधूनां यत्र जुह्वत्यमी हविः प्रतीपमेतद्देवानां तस्मात्तत् परिवर्जयेदिति" मनुः। "अश्रोत्रोऽनधीतवेदः तेन हुतयज्ञे अन्नमभक्ष्यम्। यामयाजी यामजनानां श्राद्धपूजाकारविता ऋत्विग्भावेन होमसंस्थायनकर्त्ता च स च होता यत्र यज्ञे तदन्नमभक्ष्यम्। श्राद्धविशेषान्नभक्षणता "चान्द्रायणं नवश्राद्धे पराकोमासिके मतः। पक्षश्राद्धेऽतिकृच्छ्रः स्यात् षण्मासे कृच्छ्र एव च। आब्दिके कृच्छ्रपादः स्यादेकाहः पुनराब्दिके अङ्गिरः०। पक्षश्राद्धं पौष्टिकश्राद्धम्। नवश्राद्धमेकादशाहादिश्राद्धम्। हस्तादिदत्त द्रव्यविशेषभक्षणता। "हस्तदत्तांश्च ये स्नेहा लवणं व्यञ्जनानि च दातारं नोपतिष्ठन्ति भोक्ता भुङ्क्ते च किल्बिषम्। तस्माच्छ्रान्तरितं देयं पर्णेनाथ तृणेन वा। प्रदद्याच्च तु हस्तेन नायसेन कदाचन। आयसेन तु पात्रेण यदन्नं प्रदीयते। भोक्ता विड्समं भुङ्क्ते दाता च नरकं व्रजेत्" भवि०पु०। "माक्षिकं क्षौद्रितं शाकं गोरसं लवणं घृतम्। हस्तदत्तानि भुक्त्वा च भोक्ता सान्तपनञ्चरेत्" यमः। "एकेन पाणिना दत्तं शूद्रादत्तं न भक्षयेत्। घृतं तैलञ्च लवणं पानीयं पायसं तथा" स्मृतिः। "वाग्दुष्टं भावदुष्टञ्च भाजने भावदूषिते भुक्त्वान्नं ब्राह्मणः पश्चात् त्रिरात्रं तु व्रती भवेत्" शङ्खः। शूद्राद्यां भाजने भुक्त्वा भुक्त्वा वा भिन्नभाजने। अहोरात्रोषितोभूत्वा पञ्चगव्येन शुध्यति" संव०। भिन्नभाजनं कांस्यपरं "भिन्नकांस्ये तु योऽश्नीयादन्नं स्नात्वा जपन् द्विजः। गायत्र्यष्टसहस्रं तु एकभक्तव्रतः शुचिः" बौधा० कांस्यत्वेन विशेषणात्। आपोशनाकरणे भोजनस्य निषेधात् तदकृतवता द्रव्यमात्रस्याभक्ष्यता। "आपोशानमकृत्वा तु भुङ्क्ते योऽनापदि द्विजः। भुञ्जानश्च यदा ब्रूयात् गायत्र्यष्टशतं जपेत्"। अनाचान्तस्य द्रव्यमात्रस्याभक्ष्यता। "अनाचान्तः पिबेद्यस्तु भक्षयेद्वापि किञ्चन। गायत्र्यष्टसहस्रं तु जप्त्वा विशुध्यति। आचामेदङ्गुष्ठमूले नित्यं शुद्धो ताम्बूलचर्वणम् दन्तलग्ने फलमूले भुक्तशेषे तथैव च। ताम्बूले चेक्षुदण्डे च नोच्छिष्टो भवति द्विजः" जाबा०। "कषायकटुताम्बूले भुक्तशेषानुलेपने। मधुपर्के च सोमे च नोच्छिष्टं मनुरब्रवीत्" लघुवौ० अनाचान्तः कषायकटुताम्बूलेक्षुव्यतिरिक्तद्रव्यं सकृदुभक्षयित्वा दुग्धमधुनारिकेलजलादिकञ्च सकृत् पीत्वा अष्टोत्तरसहस्राद्यां गायत्रीं जपेत् प्रा०वि०। यज्ञोपवीतरहितानामन्नमात्रस्याभक्ष्यता। "विना यज्ञोपवीतेन भुङ्क्ते तु ब्राह्मणो यदि। स्नानं कृत्वा जपं कृत्वा उपवासेन शुध्यति" लघुहा०। अमेध्यदूषितफलानामभक्ष्यता। "कङ्कारिकृमिभादीष्ट फलकन्देक्षुमूलकान्। विण्मूलदूषितान् प्राश्य कृच्छ्रं तु पादमाचरेत् सञ्चिक्कटे ह्यहमेव स्यात्" संव०। स्फोटादेरभक्ष्यता। "अङ्कुरं दन्तकाष्ठञ्च प्रत्यक्षलवणं तथा। स्फोटिकाभक्षणञ्चैव तत्सं गोमांसभक्षणैः भवि०पु०। अन्नापवादः। सैन्धवं लवणञ्चैव यच्च सामुद्रिकं भवेत् पर्वणि परमे चैते प्रत्यक्षे अपि नित्यशः" वायुपु०। "भुक्त्वा तु चारलवणं त्रिरात्रं तु वने वसेत्" यमः। "स्फोटोद्गादने अहोरात्रमभोजनाच्छुद्धिः आ०त०रघु०। "नैकोद्दिष्टान्नमश्नीयात् वर्जयित्वा स्वधीं सुतान्। दारान् भ्रात्रातिथींश्चैव तथासम्बन्धिबान्धवान् इत्युपक्रम्य "चाण्डाले नरके घोरे दुर्गन्धे प्राप्यते नरः" यमः। "पयोऽनुद्धृतसारञ्च भक्षयेद्दधि नो निशि दिवसे नवनीतञ्चेति" "सर्वं तिलमयं नाद्यात् सायं धर्म्माभिलाषिभिः" इति। "नाश्नीयात् सन्ध्ययोर्द्वयोः" इति च का०ख०। "नातिसौहित्यमाचरेत् नातिप्रगे नातिसायम् न निशीथे नचोषसि" मनुः न दध्युद्धृतसारञ्च भक्षयेद्दधि नो निशि। नाद्यादाद्यप्रि रात्रिषु" काशी०ख०। "श्राद्धं कृत्वा परश्राद्धे योऽश्नीयात् ज्ञानवर्ज्जितः। दातुः श्राद्धफलं नास्ति भोक्ता किल्बिषभुग् भवेत्" यत् वेष्टितशिराभुङ्क्ते यत् भुङ्क्ते दक्षिणामुखः सोपानात्कश्च यद्भुङ्क्ते तद्वै रक्षांसि भुञ्जते, इति का०ख०। "यो मत्वीत्वा विपश्चाग्निं मत्वस्य इव मन्यते। अन्नं तस्य न भोक्तव्यं दत्तापाको हि स स्मृतः" का०ख०। "पक्षे वा यदि मासे वा यस्य गेहेऽत्ति न द्विजः। भुक्त्वा दुरात्मनस्तस्य चरेच्चान्द्रायणं व्रतम्" का०ख०। "अपाङ्क्त्यं शिवनिर्माल्यं पलं पुष्पं फलं जलम्" ति०त०पु०। "यातुधानाः

पिशाचाश्च राक्षसाः क्रूररूपिणः । क्षरन्ति रसमद्यस्य मण्डलेन विवर्जितम् का०ख० । नोत्सङ्गे भाजनं कृत्वा नो पाणौ नैव कर्पटे । नासने न च शय्यायां भुञ्जीत न मलार्दितः" का०ख०" । "नारिकेलोदकं कांस्येताम्रपात्रे गुडप्लुता । सुरातुल्यं भवेदेतत् ताम्रे गव्यं हतं विनेति आ०त०पुरा० । "वर्जनीयं सदा माघे मूलकं मदिरासमिति" ब्र०पु० । सदा विप्रैरिति विधानपा० पाठः । "वट्टक्षोद्रुम्बरनीपदधित्थमातुलङ्गानि न भक्षयेत्" हारी० दधित्थः कपित्थः । कालान्तरेऽपि द्रव्यान्तर निषेधः "आमिषं चुक्रशाकञ्च योभुङ्क्ते च रवेर्दिने सप्तजन्म भवेत् काणी दरिद्रयोपजायते । स्त्रीतैलमांससंभोगी पर्वस्वेतेषु वै पुमान् । विण्मूत्रभोजनं नाम नरकं प्रतिपद्यते" वि०पु० । अथ तिथिविशेषे द्रव्यविशेषाभक्ष्यतामाह कृष्णे "कृष्णाण्डे वार्धक्षानिः स्यात् हत्वा न चरेद्धरिम् । वड्डशत्रुः पटोले स्यात् धनहानिस्तु मूलके । कलङ्की जायते बिल्वे तिर्यक्कगयोनिञ्च निम्बके । ताम्बे शरीरनाशःस्याद्वारिकेले च मूर्खता । तुम्बी गोमांसतुल्या स्यात् कलम्बी गोवधात्मिका । शिग्वी पापकरी प्रोक्ता पूतिका ब्रह्महातिका । वार्ताकी सुतहानिः स्याज्जिरारोगी च मार्षके । महापापकरं मांसं प्रतिपदादिषु वर्जयेत्" षट्त्रिं० । तत्र सप्रत्यामेव तालनिषेधादन्यत्र भक्षणं प्राप्तम् । अतः 'तालं श्वेताञ्च वार्ताकीं न खादेद्वैष्णवो नरः' । इत्यनेन तालमपि श्वेतं निषिद्धं साहचर्य्येण श्वेतानुषङ्गात् । "अलाबूं वर्त्तुलाकारां वार्ताकीं कन्दसन्निभाम्"" ति०त० पु० यदपि 'कुसुम्भं नालिकाशाकं हुलाकं पूतिकान्तथा । भक्षयन् पतितस्तु स्यादपि वेदान्तगोद्विजः' इत्यनेन सामान्यतोऽभिहितम् । तदपि श्वेतहुलाकपरम् । तत्र नालिकाश्वेतकलम्बी । पूतिका द्वादशाम्राधिकदोषाय मृदुविषविकारा इति ति०त०रघु० ।

कृष्णाण्डं २ हरितीफलन्तु २ लवणं वर्ज्यं ४ तिलान्नं तथा ५ तैलं ६ चामलकं ७ दिवं प्रवसता दर्शीर्षं ९ कपालान्नकम् १० । ११ निम्बाचार्य १२ मूलकाफलमद्यो १३ हुलाक संज्ञं १४ मधु द्यूतं १५ स्त्रीगमनं क्रमात् प्रतिपदादिष्वेवमाद्योड्डग । नि०सि०सु०दीपि० । शीर्षं नारिकेलम् कपालं अलाबूः अन्नकं पटोलम् । "१ कृष्णाण्डं २ हरितो ३ क्षारं ४ मूलकं ५ पनसं ६ फलम् । ७ धात्री ८ शिरः ९ कपालान्नं १० ११ नख १२ चर्म १३ तिलानि च १४ क्षुरकर्माञ्जनासेवां १५ प्रतिपदादिषु वर्जयेत् नि० सि०भूपालः । नखं शिग्वी चर्म मूलकिका । "उच्छिष्टस्याद्यमात्रस्याभक्ष्यता "उच्छिष्टमगुरोरभोज्यं स्वोच्छिष्टमुच्छिष्टाहृतञ्च" याता० । गुरुः पित्रादिः । "पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोज्यम्, आप० मातापितृभ्यां संभुक्तं शेषं वा ब्रह्मचारिणः" ब्र०पु० । स्वमुच्छिष्टन्तु यो भुङ्क्ते यो भुङ्क्तेऽन्नभाजने एवं वैवस्वतः प्राह भुक्त्वा चान्द्रायणं चरेत्" चतुर्विंशतिमतम् । "नाश्नीयात् भार्य्यया सार्द्धं नाश्नीयादुत्कटासने" मनुना स्त्रिया सह भोजननिषेधेऽपि अध्वनि ब्राह्मण्या स्त्रिया सह भोक्तुं शक्यते । "ब्राह्मण्या स्त्रितया सार्द्धं क्वचिद्भुञ्जीत चाध्वनि । अधोवर्णस्त्रिया सार्द्धं भुक्त्वा चान्द्रायणं चरेत्" ब्र०पु० । एतद्विषय एव "ब्राह्मण्या वा सहाश्नीयादुच्छिष्टं न कथञ्चन । न तत्र दोषं मन्यन्ते" अङ्गिराः । विड्वराहाद्युच्छिष्टस्याभक्ष्यता । "विड्वराहकाकाद्युच्छिष्टं जग्ध्वा स्पृष्ट्वा तथा च । केशकीटपतञ्च पिबेत् ब्रह्मकुर्च्चकाम्" मनुः । "दूषितं केशकीटैश्च मार्ज्जारैर्मूषिकैस्तथा । मक्षिकामशकैश्चैव विरालेश्च विशुध्यति । श्वकाकगोभिरुच्छिष्टभक्षणे तु दिनत्रयम्" मनुः अत्रापवादः । "देवद्रोण्यां विवाहेषु यज्ञेषु प्रकृतेषु च काकैः स्पृष्टञ्च संस्पृष्टमन्नं तत्र विवर्जयेत् । तन्मात्रमन्नमुद्धृत्य शेषं संस्कारमर्हति" यमः । संस्कारश्च "घनानां प्रोक्षणाच्छुद्धिः द्रवाणामपि तापनात् । संसर्गात्तु भवेच्छुद्धिरपां प्राऽर्घ्यं तस्य च लाभस्य सुखसंस्पृष्टं शुचि चैव हि तद्भवेत्" यमः । "पक्त्वापदजग्धस्य रसस्नावस्य भूयसः । संस्काररहितस्यापि भोजने पादकृच्छ्रकम्" विष्णुः । कुत्सितशूद्रादिपङ्क्तिभोजननिषेधात्तत्राभक्ष्यता "यस्तु पङ्क्तिषु भुञ्जीत कुत्सितानां विशेषतः अक्षोरालोषितः स्नात्वा पञ्चगव्येन शुध्यति" अङ्गि० । "अपाङ्क्तेयब्राह्मणोपवेशनेन कुत्सितास्तु । जलादिना पङ्क्तिभेदनमन्तरेणेत्याचारः प्रा०वि० । "ब्राह्मणः क्षत्रियपङ्क्त्यासन्नविप्रासंस्पृशन् यदा भुञ्जेतदा नक्तमाचरेत् । वैश्यपङ्क्त्यामेकरात्रं शूद्रपङ्क्त्यां त्रयाह माचरेत्" विष्णुः । अनिन्दितपङ्क्तिष्वपि सहभोजने एकस्योत्थाने तदन्नाभक्ष्यता "एकपङ्क्तिपविष्टानां विप्राणां सहभोजने । यद्येकोऽपि त्यजेत् पात्रं शेषमन्नं न भोजयेत् । मोहात् भुङ्क्ते तु यः पङ्क्त्यासच्छिष्टं सहभोजने । प्रायश्चित्तं चरेद्विप्रः कृच्छ्रं सान्तपनं तदा" शङ्खः । कालविशेषे द्रव्यमात्रस्य अभक्ष्यता । "सूर्य्यग्रहे तु नाश्नीयात् पूर्वं यामचतुष्टयम् । चन्द्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विना" हेम०गौ० । "ग्रहणं तु भवेदिन्दोः प्रथमादधि यामतः भुञ्जी-

तावर्त्तनात् पूर्वं प्रथमे प्रथमादधः" मा०पु०। अधिकर्त्तृम्। "यस्तोदके सति विधोर्नाहर्भोजनमाचरेत्" वशि०। "अस्तङ्गयोरस्तगयोरह्नात् तद्वा परेऽहनि" व्यासः। "अहोरात्रं न भोक्तव्यं चन्द्रसूर्य्यग्रहो यदा सूतिं तदा तु भोक्तव्यं स्नानं कृत्वा ततःपरम् विष्णुध०पु०। 'सन्ध्याकाले यदा राहुर्ग्रसते शशिभास्करौ। तदहर्नैव भुञ्जीत रात्रावपि कदाचन" गर्गः। सायं सन्ध्यायां सूर्य्ये यस्तास्ते, पूर्व्वेद्युश्च रात्रौ च न भोक्तव्यं, प्रातः सन्ध्यायां चन्द्रे यस्तास्ते पूर्व्वरात्रापरेद्युश्च च न भोक्तव्यमित्यर्थः नि०सि०। बालवृद्धातुरैर्विनेत्युक्तेस्तेषां विशेषः। "सायाह्ने ग्रहणं चेत् स्यादपराह्णे न भोजनम्। अपराह्णे, न मध्याह्ने, मध्याह्ने न तु सङ्गवे। भुञ्जीत संगवे चेत् स्नात्वापूर्व्वं भोजनक्रियेति" मा०पु० उक्तः'। एतच्च बालादिविषयमिति नि०सि०। "सर्वेषामेव वर्णानां सूतकं राहुदर्शने स्नात्वा कर्माणि कुर्वीत सूतमन्नं विवर्जयेत्" हेमा०धृतवि०। "नवश्राद्धेषु यच्छिष्टं यच्चपर्य्युषितञ्च यत्। सर्व्वं तदुदृष्टतामेति" स्मृतेः प्रासकाले पक्वान्नादेरभक्ष्यता। अत्रापवादः। "आरनालं पयस्तक्रं दधि क्षेत्राज्यपाचितम्। मणिकस्थोदकं चैव न दुष्येद्राजसूतके" मेधा०। "अन्नं पक्वमिह त्याज्यं स्नानं सवसनं यदि। वारितक्तारनालादि तिलदर्भैर्न दुष्यति" स्मृतेः १ घृतभक्षणाद्यन्नस्याभक्ष्यता। "याजकान्नं नवश्राद्धं संग्रहे चैव भोजनम्। स्त्रीणां प्रथमगर्भे च भुक्त्वा चान्द्रायणं चरेत्। ब्रह्मौदने च सोमे च सीमन्तोन्नयने तथा। जातश्राद्धे नवश्राद्धे भुक्त्वा चान्द्रायणं चरेत्" आप०। संग्रहे स्त्रीणामेव व्यभिचारादिदोषार्थंप्रायश्चित्तेन संग्रहे ब्रह्मौदने व्रतोपवासयज्ञकर्म्मविशेषे प्रा०वि०। "जन्मप्रभृति संस्कारे बालस्यान्नस्य भोजने। असंपिण्डैर्न भोक्तव्यं श्मशानान्ते विशेषतः" अङ्गि०। "निर्दशे चूडकर्मणि च प्राङ्नामकरणात् तथा। चरेत् सान्नपनं भुक्त्वा जातकर्म्मणि चैव हि" व्यासः। भोजनकाले मूत्रादिमुत्सर्गेऽन्नमात्रस्याभक्ष्यता। "मूत्रोच्चारसमुत्सर्गे मोहात् भुङ्क्ते ऽथ वा पिबेत्। त्रिरात्रं कुर्वीत" याज्ञ०। भोजनकाले सूतकाद्यशौचे भक्ष्यमाणान्नस्याभक्ष्यता "यदा भोजनकाले तु अशुचिर्भवति द्विजः। भूमौ निःक्षिप्य तं ग्रासं स्नात्वा विप्रोविशुध्यति। भक्षयित्वा तु तं ग्रासमहोरात्रेण शुध्यति अशित्वा सर्व्वमेवान्नं त्रिरात्रेण विशुध्यति" याज्ञ०। "अशुचिः सूतकादिनेति" प्रा०वि०। तैलाभ्यङ्गादिना स्नानार्हस्नातस्नानस्यान्नस्यालक्ष्याभक्ष्यता। "समुत्पन्ने द्विजः स्नाने भुञ्जीताथ पिबेत्तथा। गात्रोद्वर्त्तनसङ्घर्षं तु जयेत् स्नात्वा समाहितः" स्मृ०। स्नाने तैलाभ्यङ्गक्षौरादिनिमित्ते स्नाने प्राप्ते प्रा०वि०। नीलीवस्त्रपरिधाने द्रव्यमात्रस्याभक्ष्यता। "नीलीवस्त्रं परिधाय भुक्त्वा स्नानार्हकस्तथा। त्रिरात्रं तु व्रतं कुर्य्यात्" शङ्खः। "लोहितान् व्रणनांस्तथा। अनुपाकृतमांसानि विड्जानि कवकानि च छत्राकपरसंज्ञावयवसाधूपशमनुलीरिति" या०। विड्जानि अमेध्योद्भवानि। अमेध्यदेशोद्भवानान्तु न दुष्टता "अमेध्येषु तु ये वृक्षा उग्राः पुष्पफलोपगाः तेषान्नैव प्रदुष्यन्ति पलपुष्पफलानि चेति" बौधा० उक्तेः। अतिथ्यादिश्राद्धभुक्तवत्तु गृहस्थस्यान्नमात्रस्याभक्ष्यता 'देवतातिभृतेषु श्लेष्मश्यागतेषु च। अभुक्तवत्तु तेऽश्नन्ति तथा पित्रग्निपक्षिषु। दुष्टान्नपयनिर्यासभुजः शुचीनशास्तु ते। जायन्ते गिरिवृक्षाद्याः" इति मार्क०पु०। "असंतर्प्य पितॄन् देवान्नाद्यादन्नं नवं क्वचित्। पक्वान्नं चापि नो मांसमिति का०ख०। भक्ष्येष्वपि देवायानिवेदितमभक्ष्यमेव "अनिवेद्य न भुञ्जीत मत्स्यमांसादिकं च यत्। अन्नं विडा पयोमूत्रं यद्विष्णोरनिवेदितम्" आ०त०पु०। "तैर्दत्तानप्रदायेभ्यो यो भुङ्क्ते स्तेन एव सः" गीता ब्रह्मचारिणोऽभक्ष्याणि। 'मासिकान्नन्तु योऽश्नीयादसमावर्त्तकोद्विजः। स स्त्रीयज्ञान्नुपवसेद् मनुः। "सूतान्नं मधुमांसञ्च नैवाश्नीत व्रती क्वचित्। त्रिरात्रोषोषितः सम्यगाविमेकां जले वसेत्" देवलः। "सूतिकान्नं नवश्राद्धं मासिकान्नं तथैव च। ब्रह्मचारी च योऽश्नीयात् मधुमांसं कथञ्चन प्राजापत्यं तु कृत्वादौ मौञ्जीहोमेन शुध्यति" संव०। मांसं च गिष्टभक्ष्यमांसपरम् "ब्रह्मचारी चेन्मधुमांसमश्नीयात् गिष्टभोजनीयं, कृच्छ्रं द्वादशरात्रञ्चरित्वा व्रतशेषं समापयेत्" वशि०उक्तेः। अस्यापवादः "स चेत् व्यधीयत कामं गुरोरुच्छिष्टं भैषज्यार्थं सर्वं प्राश्नीयात् येनेच्छत्तेन चिकित्सेत् स यदा अगदः स्यादादित्यमुपतिष्ठेत्" बौधा०। अस्य पात्रविशेषे द्रव्यमात्रस्याभक्ष्यता। "आमिषस्य तु यो भाण्डे पक्वमश्नीत सव्रतः (ब्रह्मचारी)। कुणपत्वविपक्वेन त्यक्तं क्षीरेण वर्त्तयेत्" लघुहारीतः।

सर्वापवादः। "जातमात्रः शिशुस्तावद्यावदष्टौ समाः" स्मृतेः। भक्ष्याभक्ष्ये पुनो दुष्येद्यावद्वै दशनीयते" का०ख०। एवमन्यान्यपि स्मृतौ निषिद्धानि दृष्टान्यि वैद्यकोक्तदोषादपि कानिचिदभक्ष्याणि तानि चापथ्यशब्दे २२६२ पृष्ठे प्रायशोदर्शितानि विशेषतः कानिचित् प्रदर्श्यन्ते "वर्जयेत् पयसा सिद्धं मत्स्यमांसमनूपकम्। बल्लीफलम-

कृष्णाखण्डमद्यैर्व्वाब्यूफलादते। मांसं मूलकसंसिद्धं हतेन मधुमांसके। मत्स्यानि क्षुरिकारेण चौद्रसर्षपेण वारिणा पुनरुष्णीकृतज्ञात्रं हतं कांस्ये दशाङ्गिकम्। दध्ना तक्रेण पयसा तालस्यापि फलेन च। विरोधाद्वैव भुञ्जीत मतिमान् कदलीफलम्। विरुद्धाशनजान् रोगान् प्रतिहन्ति विरेचनम् वमनं शयनं वारि पूर्व्वं वा हितभोजनम् शाम्येतालस्यतो वापि दीप्ताग्नेस्तरुणस्य च स्निग्धव्यायामवलिनां विरुद्धं वितथं भवेत्। अतिहारदोषास्तु जायन्ते पापिनामिह" आह्निकतत्त्वे वैद्यकम्।

अभङ्ग पु० न०त०। १ भङ्गाभावे २ पलायनाभावे च न०ब०। "भङ्गरहिते त्रि०। २ अभङ्गास्त्रे "पुनस्त्रिधा समङ्गोऽथाभङ्गस्तदभयात्मक" इति सा०द० उक्ते श्लेषे शब्दालङ्कारभेदे पु०। यथा "पायात् स स्वयमन्धकक्षयकरस्त्वां सर्व्वदोमाधवः"। अन्धकेऽलाभङ्गः श्लेषः।

अभङ्गुर त्रि० न भङ्गुरः। भङ्गुरभिन्ने स्थिरे "अभङ्गुरतनुत्विषां वलयिता यतैर्विद्युताम्" रसगङ्गाधरः।

अभद्र न० विरोधे न०त०। सुखभिन्ने दुःखे १ न०ब०। २ मङ्गलभिन्ने अमङ्गले च ३ तत्साधने ४ तदाश्रये च त्रि०।

अभय न० अभावे न०त०। १भयाभावे। "प्रदद्यात् परिहारांश्च ख्यापयेदभयानि च" मनुः। "अभयं वै जनक! प्राप्तोऽसीति" श्रुतिः। "प्रवृत्तिं च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये" गीता हेत०। २ भयशून्ये त्रि०। न भयमस्मात् ५ब०। ३परमात्मनि, ४तज्ज्ञाने च। ५हरितक्यां ६दुर्गामूर्त्तिभेदे च स्त्री ७ वीरणमूले उशीरे न० ८ सर्वपरित्यक्तशून्ये, शास्त्रोपदिष्टेर्योऽसन्देहेनानुज्ञातरि ९ आत्मनिवे पु०। "उच्चमूलत्रिकोणेषुवर्त्तते गुरुभार्गवौ। अभयाभिधयोगोऽयं भयङ्करविनाशन" इति "यत्रैकादशगश्चन्द्रोभानुर्वा प्रबलः शुभः। अभयोनाम योगोऽयमरिभूत विनाशकृदिति" च ज्योतिषोक्ते १० यात्रिकयोगभेदे पु०। न भयं यस्मात् ५त०। मामैषीरित्युक्ता ११ उत्तोलित दक्षिणहस्तप्रसारभेदे "अभयं वरदं चैव दक्षिणे दर्शतीक्रमात्" ध्यानाध्यानम्। १२ त्राणे च न०।

अभयकृत् क्ति० अभयं त्राणं करोति कृ-क्विप् हेत०। १ त्राणकर्त्तरि। न भयकृत् विरोधे न०त०। भयङ्करभिन्ने २ सौम्ये। अभयकारकादयोऽप्युक्तार्थे। [सौम्ये।

अभयङ्कर त्रि० न भयङ्करः विरोधे न०त०। भयङ्करभिन्ने

अभयङ्कृत् स्त्री द्वि० अभयं कुरुतः क्विप् वेदे पृ० सुम्। द्यावापृथिव्योः द्यावापृथिव्यावित्युपक्रम्य "उरू गव्यूती ते अभये स्यामित्यतदाह" शत०ब्रा०।

अभयजात पु० अभयाय जातः। गर्गादिगणभेदे मुनिभेदे तस्यापत्यं यञ्। आभयजात्यः तदपत्ये पुंस्त्री०स्त्रियां ङीप् यलोपश्च आभयजाती। पुंसि बहुषु लुक्। अभयजाताः। यूनि आभयजातायनः।

अभयडिण्डिम पु० अभयाय स्वयोधभयाभावाय डिण्डिमः स्वसैन्यप्रोत्साहनार्थं वादनीये रणढक्कादौ वाद्यभेदे।

अभयद त्रि० अभयं भयाभावं ददाति तदर्थं वचनं प्रयुङ्क्तवति दा-क हेत०। मा भैषीरित्यादिवचनसङ्घे भीत-२ त्राणकर्त्तरि "त्रातमलभयदार्हेति" किरा०। अभयप्रदयोऽप्यत्र। "यानमथाप्रदोभार्य्यामैश्वर्यमभयप्रदः २ विष्णुः।

अभयदक्षिणा स्त्री अभये त्राणे त्रातेन देया दक्षिणा। त्रातेन रक्षितरि देयदक्षिणायाम्। "मधूदकं फलं मूलमेषांस्यभयदक्षिणा अभ्युद्यतानि याच्यानि" का०ख० "सर्वतः प्रतिगृह्णीयान्नध्वथाभयदक्षिणाम्" मनुः। अभयं दक्षिणेव देयत्वात्। अभयरूपदेये "रात्रौ दानं न शंसन्ति विना चाभयदक्षिणाम्" मत्स्य पु०। अभयदक्षिणाम-भयदानम् रघु०। [शब्दे विवरणम्।

अभयमुद्रा स्त्री अभयार्था मुद्रा। १ तन्त्रोक्ते मुद्राभेदे मुद्रा-

अभयवाच् स्त्री अभयार्था वाक्। १ अभयदानार्थे मा भैषीरित्यादिवाक्ये।

अभयाद्य पु० अभया हरितकी आद्या यस्य। १ वैद्यकोक्ते मोदकभेदे। स च "अभया पिप्पलीमूलं मरिचं नागरं तथा॥ त्वक्पत्रपिप्पलीस्तस्विडङ्गामलकानि च। कर्षः प्रत्येकमेषान्तु दन्त्याः कर्षत्रयन्तथा॥ षट्कर्षाश्च सिताया-स्तु द्विपलं लिहतो भवेत्। सर्वं चूर्णितं कृत्वा मधुना मोदकं कृतम्॥ खादेत् प्रतिदिनञ्चैकं शीतद्वानुपिबेज्जलम्। तावद्विरिच्यते जन्तुर्यावदुष्णं न सेवते॥ अभयाद्यो मोदकोऽयम्" चक्रदत्तोक्तः।

अभव पु० भव उत्पत्तिः अभावे न०त०। १ भवाभावे जन्माभावे "मत्त एव भवाभवौ" गीता। २ विनाशे "भवाय सर्वभूतानामभवाय च रक्षसाम्" रामा०। ३ब०। ३मोक्षे "प्राप्नुमभवमभिवाञ्छसि वा" किरा०शिवभिन्ने पु०

अभव्य न० न भव्यम् अप्राशस्त्ये न०त०। १ अमङ्गले, २दुष्टभाग्ये च न०ब०। २ दुर्भाग्यवति त्रि०। "उपनतमवधीरयन्त्यभव्याः" किरा०।

अभाग पु० न भागः अभावे न०त०। १ भागाभावे।

भागश्च एकदेशः दायादग्राह्यधनाद्यञ्च ७ब० । तच्छूचे पूर्वे निंदायां च त्रि० । "यो ज्येष्ठो विनिकुर्वीत लोभाद्भ्रातॄन् यवीयसः । सोऽज्येष्ठः स्यादभागश्च नियन्तव्यश्च राजभिः" मनुः "यं भागिनं निर्भजन्त्यथ यमभागं निर्भजन्ति" श्रुत० ब्रा० ।

अभागिन् त्रि० न भागी स्त्रियां ङीप् । १ अधिकारानर्हे क्लीवपतितादौ । २ भागोभाग्यम् । तच्छून्ये च । "यमात्मानं नविदुरभागिन" इति कट उ० ।

अभाग्य न० अप्रशस्ये न०त० । १ दुष्टभाग्ये । न०ब० । २ दुष्टभाग्यवति त्रि० । [गुणदुष्टोरभाजनम्" का०प्र० ।

अभाजन न० न०त० । अनाधारे "दीधीवेवीसमः कश्चिद्

अभार्य्य पु०नास्ति भार्य्या तत्सम्बन्धो वा यस्य । १भार्य्याहीने २ शास्त्रनिषिद्धभार्य्यासम्बन्धे नैष्ठिकब्रह्मचारिप्रभृतौ च । "अतिदुष्टभार्य्यांश्च ऋषिसत्तमान्" स्मृतेश्च उ०त० छा०प० । "अभार्य्यान् शास्त्रनिषिद्धभार्य्यासम्बन्धान्" रघु० ।

अभाव पु० न भावः । भावभिन्ने सत्त्वेन प्रतीत्यनर्हे वैशेषिकोक्ते सप्तमपदार्थे भावभिन्नत्वमभावत्वमिति बहवः । भावभेदाश्रयरूपत्वस्य तल्लक्षणस्य अभावविशेषघटितत्वेन अन्योन्याश्रयदोषग्रस्ततया अभावत्वमखण्डोपाधिरिति नव्याः । अभावश्च भावाभावसाधारणाश्रयः घटाभावस्य पटे पटाभावादौ च सत्त्वात् स च भावातिरिक्तः कश्चित् पदार्थ इत्याधुनिका वैशेषिका नैयायिकाश्च उररीचक्रुः । सूत्रकृता तु "द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निश्रेयसम्" इति षडेव पदार्थाः कणभुजा उक्ताः । अत एव "नवयं षट्पदार्थवादिनः" इति सांख्यसूत्रे षट्पदार्थीस्वीकारस्तेषां सूचितः । आधुनिकास्तु घटोनास्तीत्यादिप्रतीत्यन्यथानुपपत्त्या पदार्थान्तरमभावं कल्पयन्ति । प्राभाकरास्तु अभावस्याधिकरणस्वरूपत्वमङ्गीचक्रुः । तेषामयमाशयः "मानाधीना मेयसिद्धिरित्युक्तेः अभावस्यातिरिक्तस्य सिद्धौ प्रमाणं वक्तव्यम् न तावत् प्रत्यक्षम्, अभावस्य रूपाद्यभावेन इन्द्रियसन्निकर्षाभावात् तदयोग्यत्वात् न च इन्द्रियसंयुक्तविशेषणता तत्सन्निकर्षः भूतलादौ चक्षुरादिसन्निकर्षसत्त्वेऽपि तत् स्वरूपविशेषणतायां अव्यावर्त्तकत्वात् अन्यथा घटाभाव प्रत्यक्षकाले पटाद्यभावप्रत्यक्षस्य दुर्वारत्वात् भूतलादिस्वरूपस्यानुगमात् तस्मे सन्निकर्षरूपे विशेषणता सम्बन्धे विनिगमनाभावेन नियामकत्वाभावात् । अथ ज्ञानलक्षणया यस्य ज्ञानं, तस्यैवाभावस्य प्रत्यक्षमिति कल्पनादस्ति नियम इति चेत् ज्ञानलक्षणया घटादेरुपनये तद्विशिष्टबुद्धेरेवोदयप्रसङ्गात् विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वेन तज्ज्ञानसामग्र्याः समवधानात् अथ अभावज्ञानसामग्र्याः प्रतिबन्धकत्वेन न तद्दोष इति चेत् अभावबोधसामग्र्याः अनियतत्वेन तस्या अप्रतिबन्धकत्वात् इन्द्रियसन्निकृष्टविशेषणतासम्बन्धस्य भूतलादिस्वरूपत्वानतिरिक्तेः भूतलादिस्वरूपस्य कदाचिदप्यनपायेन प्रतिबन्धकत्वायोगात् अन्यथा भूतलादौ कदापि घटादेर्ज्ञानलक्षणया विशिष्टज्ञानस्यानुत्पत्त्यापत्तेः "अभावबुद्धिश्च विशिष्टवैशिष्ट्यावगाहिबोधमर्य्यादां नातिशेते" इति दीधितिजागदीशादौ प्रतियोगिज्ञानस्यापेक्षितत्वेन अभावांशे प्रतियोगिज्ञानवत् धर्म्यंशे तद्ज्ञानस्य दुष्परिहारत्वात् । एतेन योग्यानुपलब्धेस्तत्र हेतुत्वकल्पनेऽपि न निस्तारः । घटादीनामिव घटादेरपि योग्यतया तदुपलब्धेरभावस्य सत्त्वेन सर्वेषां योग्यानामभावप्रत्यक्षप्रसङ्गात् । नाप्यनुमानं तत्र प्रमाणं, तत्र व्याप्तिलिङ्गादेरभावात् । तस्यैवाज्ञाने तद्ग्राह्यताप्रहासप्रसङ्गाच्च किञ्चातिरिक्ताभाववादिभिः भूतले "घटोनास्तीति प्रतीतिः सविषया प्रतीतित्वात् यत्तज्ज्ञानं तत्तत् सविषयकं यथा घटादिज्ञानमित्यनुमानप्रयोगः स्वीकार्य्यः । तत्र तदनुमानेन सविषयकत्वसिद्धावपि अधिकरणस्वरूपेणैव तद्विषयकत्वसम्बन्धेन उद्देश्यसिद्धेः नापि लक्षणात्तत्सिद्धिः अभावस्य निर्वक्तुमशक्यतया तल्लक्षणस्यैवाभावात् । तथा हि अभावशब्दस्य व्युत्पाद्यमानस्य भावभिन्नत्ववाचितया भावभिन्नत्वमभावस्य लक्षणं वाच्यं तच्च भेदरूपाभावज्ञानसापेक्षत्वेनान्योन्याश्रयदोषकवलितत्वेन दुर्वचं यत् । किञ्च भावभिन्नत्वस्य अभावलक्षणत्वे भावरूपविशेषणज्ञानशून्यकाले घटोनास्तीति प्रत्ययानुपपत्तिः विशिष्टबुद्धेर्विशेषणज्ञानाधीनत्वात्, अभावो न भाव इति वाक्यात् शाब्दबोधानुपपत्तिश्च उद्देश्यतावच्छेदकविधेययोरैक्ये घटोघटः इत्यादाविव शाब्दबोधाभावस्य सर्वसम्मतत्वात् । एतेन अभावत्वम् समवाय सामनाधिकरण्यान्यतरसम्बन्धावच्छिन्नप्रतियोगिताकसत्त्वाभाववत्त्वमित्युक्तावपि न निस्तारः तथात्वे अभावो न भाव इति शाब्दबोधोपपत्तावपि तदज्ञानकाले घटोनास्तीति प्रत्ययस्यानुपपत्तेरन्योन्याश्रयदोषस्य दुष्परिहरत्वाच्च । घटाभावाभावादेर्घटरूपतयाऽङ्गीकारेण तत्र समवायेन सत्तावत्त्वेन निरुक्ताभाववत्त्वाभावात् घटाभावाभावोऽभाव इति बुद्धेरनुत्पत्त्यापत्तेश्च । अथ अभाववत् अभावत्वमप्यतिरिक्तः पदार्थः तथाचाभावत्वेन भावभिन्नत्वादि किन्तु स्वरूप-

सम्बन्धविशेषः अखण्डोपाधिर्वेति मतम् तदेतदुच्यते कोऽयंस्वरूपसम्बन्धः ? किंस्वरूपमेव संबन्धः ? स्वरूपस्य वा सम्बन्धः ? तत्राद्ये यदि अधिकरणस्वरूपस्यैव सम्बन्धत्वम् आयातं तर्हि अभावस्याधिकरणस्वरूपत्वेन, स्वरूपस्यैवाभावाधिकरणसम्बन्धत्वेन भवताऽपि स्वीकारात् । अन्त्ये कस्य स्वरूपस्य सम्बन्धः ? यदि अधिकरणस्य तदा जितं प्राभाकरैः अन्यस्य तथाविधत्वेऽपसिद्धान्तापत्तेः भूतले तदाधारतानुपपत्तेश्च । अखण्डोपाधेरपि अभाववत् प्रमाणसापेक्षतया तद्दोषतादवस्थ्यम् प्रमाणाधीनतयैव पदार्थस्य सिद्धे सर्वसम्मतत्वात् असति प्रमाणे कथं तत्सिद्धिः ? । किञ्च अखण्डोपाधित्वस्य भवन्मते कारणतावादेऽपि सत्त्वेनाभावेतरभेदासाधकतया तल्लक्षणत्वायोगः भिन्नभिन्नाखण्डोपाधिस्वीकारे च तस्यापि लक्षणसापेक्षतया तस्य च निर्वक्तुमशक्यतया न तस्याभावलक्षणत्वम् । न च नञ्पदशक्यतावच्छेदकतया तत्सिद्धिः तथाहि अभावस्य अधिकरणस्वरूपत्वे स्वरूपसंबन्धविशेषस्यैव नञ्पदशक्यतावच्छेदकत्वं वाच्यं तदपेक्षया अभावत्वरूपाखण्डोपाधेरेव तथात्वकल्पने लाघवम् इति वाच्यम् कम्बुग्रीवादिमानित्वादौ गुरुधर्मोऽपि शक्यतावच्छेदकत्वस्वीकारात् अन्यथा घटः कम्बुग्रीवादिमानित्वादि वाक्यात् शाब्दबोधानुपपत्तिः । उपेयते च सर्वैः गुरुधर्मोऽपि शक्यतावच्छेदकत्वम् । अथ शब्दएव अभावे प्रामाणमिति चेत् शब्दवेद्यस्य वध्यघातादेरपि, अतिरिक्ततया कल्पनापत्तेः अथाप्तशब्दएव प्रमाणमिति चेन्न अभावस्य पदार्थान्तरत्वे आप्तवाक्याभावात् भवतां क्षतक्षताऽपि अभावस्य घटपदार्थातिरिक्ततया कार्यत्वोक्तेः अभावशब्दमात्रप्रयोगेऽपि तस्याधिकरणस्वरूपत्वेनोपलीयमानत्वात् । एवमतिरिक्ताभावकल्पनपक्षे निरस्तेऽपि स्वपक्षदोषोद्धारमित्थं चक्रुः । अभावस्याधारस्वरूपत्वे भूतले घटोनास्तीत्यादावधिकरणताप्रतीतिः कथं संगच्छतामिति चेत् परेषामिव अत्यन्ताभावस्य नित्यत्वेऽपि घटसत्त्वे घटाभावबुद्धेरनुत्पादे तत्तत्कालीनभूतलादिसम्बन्धस्य नियामकतावत् तत्तत्कालीनभूतलस्वरूपस्यैव अभावपदार्थतया तथाप्रतीतिसम्भवात् तत्तत्कालीनभूतलस्वरूपस्य घटाद्यनवच्छेदकालसम्बन्धरूपतया तस्य च भूतले स्वरूपमित्यादिवदाधारताऽक्षतेः । एतेनानन्तसम्बन्धस्वरूपकल्पनापेक्षया एकाभावकल्पने लाघवमित्यपास्तं क्लृप्ततया कालस्य तत्सम्बन्धस्य च सर्वत्रादिसम्मततया अधिकस्याकल्पनात् । भवतामभाव इव तवैव सम्बन्धे घटादेः प्रतियोगितयान्वयः कल्प्यते अतो नाधिककल्पना । घटो न पट इत्यादौ घटनिष्ठमेव तत्तत्कालीनतादात्म्यं भेदशब्दार्थस्तवैव पटतादात्म्यानुपस्थितस्य तादात्म्यस्याधिकरणे घटादिस्वरूपे भेदे तादृशसम्बन्धे वा घटादेः प्रतियोगितयान्वये सर्वसामञ्जस्यम् । अतएव "न सोऽस्ति प्रत्ययोलोके यत्र कालो न भासते" इत्युक्तेः सर्वत्र बुद्धौ कालावभास इत्यभियुक्तोक्तिः । भक्तामभावभेदबुद्धीर्यथा नियमः मन्मतेऽपि तथा । वायुादौ रूपाद्यभावचाक्षुषत्वाद्यनुपपत्तिरिष्टैव न च तत्र दृढतरं किञ्चित् प्रमाणमस्तीति तत्स्वीकारावश्यकतेति" । अभावभेदबुद्धीर्नियमाय नञ्शब्दे प्रदर्शयिष्यन्ते । सोऽयमभावः बौद्धैः शून्यतया आकाशतया निरावरणतया निराख्यतया च व्यवस्थियते तच्च तत्रतावसरे वक्ष्यते । "अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशय" इति हरिः । "नाभावउपलब्धेः शां०सू० । "नासतोविद्यते भावो नाभावोविद्यते सतः" इति गीता । यथा च अभावान्न भावोत्पत्तिस्तथा उत्पत्तिशब्दे वक्ष्यते । न्यायादिमते स चाभावः द्विविधः संसर्गाभावः अन्योन्याभावश्चेति भेदात् संसर्गश्च ध्वंसप्रागभावात्यन्ताभावभेदात् त्रिविधः । "अभावश्च द्विधा संसर्गान्योन्याभावभेदतः । प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभावएव च । एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते" इति भाषा० । प्रागभावश्च उत्पत्तेः प्राक् कारणस्य सूक्ष्मावस्था, उत्पत्तिराविर्भावः, ध्वंसस्तिरोभाव इति सांख्यादयः । २मरणे, मरणञ्च खाडदारब्धशरीरेण सह जीवस्य विभागः, पूर्वसंयोगनाशो वा, प्राणवायोरुत्क्रमणं वा बोध्यम् । भावः आलङ्कारिकोक्तरत्यादिस्थायिभावः ३ तच्छून्ये त्रि० । आन्तरः भावः स्नेहापरपर्य्यायः अनुरागः । ४तद्धीने त्रि० । सचानुरागः देवविषयो भक्तिः पुत्रादिविषयः स्नेहः, पत्न्यादिविषयः प्रेमेति भेदः । मीमांसकाद्युक्ते अभावप्रमाणके ६ योग्यानुपलब्धिरूपे प्रमाणे ७ असत्त्वे, अविद्यमानत्वे च । नास्ति भावः सत्त्वं यस्य । ८मिथ्याभूते त्रि० । [तुमयके च ।

अभावनीय त्रि० न०त० । १ चिन्तयितुमशक्ये २उत्पादयितुमशक्ये च ।

अभावसम्पत्ति स्त्री अभावस्य मिथ्याभूतस्य सम्पत्तिः । १ मिथ्याभूतपदार्थज्ञाने अध्यासे यथा शुक्तिकायां रजतज्ञानं तत्र च यथा मिथ्याभूतस्यैव ज्ञानं तथोक्तमध्यासशब्दे ।

अभाषण न० अभावे न०त० । भाषणाभावे मौनभावे ।

अभि अव्य० न भाति भा—वा०कि । १ कञ्चित् प्रकारं प्राप्तस्य

द्योतने, २ आभिमुख्ये, ३ अभिलाषे, ४ वीप्सायाम्, ५ लक्षणे, ६ समन्तादर्थे। ७ धर्षणे दुर्गा०। "अभि पूजाभ्यर्थेच्छासौम्याभिमुख्यसौरूप्यवचनाहारस्वाध्यावेषु" गणरत्नोक्तेऽपूजादौ च तत्र पूजायाम् अभिवन्दते अभिवादयते। अभ्यर्थे अभियुक्तः अभिनिवेशः। इच्छायाम् अभिलाषः अभिकः। सौम्यं माधुर्यम् तत्र अभिजातः "प्रज्ञलितायामभिजातवाचि" कुमा०। आभिमुख्ये अभिमुखम् अभ्यग्नि यन्ति यतन्ति "अभिचैद्यं प्रतिशासुः" माघः सौरूप्ये अभिरूपम्। वचने, अभिधानम् "साक्षात् सङ्केतितं योऽर्थमभिधत्ते स वाचक" इति काव्य०प्र०। आहारे अभ्यवहारः। स्वाध्याये अभ्यस्यति "वेदाभ्यासे सदारतः" स्मृतिः। स्वाध्याय इत्युपलक्षणम् अन्यस्यापि पौनःपुन्यमात्रेऽस्य प्रवृत्तिः "अभ्यस्यन्ति तटाघातं निर्जितैरावतागजा" कु०। एतस्य च तत्तदर्थद्योतकतामात्रं समभिव्याहृतशब्दस्यैव तत्तदर्थे लक्षणेति सिद्धान्तः अस्य क्रियायोगे उपसर्गता "वीप्सेत्यभ्यावचिह्नेषु तुकर्मप्रवचनीयता। इक्षंदण्डमभिसिञ्चति। हरिमभि वर्त्तते। भक्तीहरिमभि, अग्निमभि यन्ति यतन्तिवत्यादुदाहार्य्यम् यद्धपरत्वेऽपि "अभिरभागे" पा०।

अभिक त्रि० अभिकामयते अभि+कन्। १ अनुकाभिकाभीकाः कमितेति" पा०नि०। कामुके "सोऽधिकारमभिकः कुलोचितं कार्यन स्वयमवर्त्तयत् समाः" रघुः।

अभिकाङ्क्षा स्त्री अभि+काङ्क्ष–भावे अ। अभिलाषे "गीताभिकाङ्क्षा सुखतिक्तता च" सुश्रु०।

अभिकाङ्क्षित त्रि० अभि+काङ्क्ष–कर्मणि क्त। अभिलषिते। [स्त्रियां ङीप्।

अभिकाङ्क्षिन् त्रि० अभि+काङ्क्ष–णिनि। अभिलाषवति

अभिकाम त्रि० अभिकामयते अभि+कम–णिङ्–अच्। १ कामयमाने "वाचे त्वामभिकामाहं तस्मात् कुरु मम प्रियम्" भा०आ०प०। भावे घञ्। अभिलाषे पु० "मनसाप्यभिकामस्य कुरुक्षेत्रं युधिष्ठिर!" भा०व०प०। अभिकामादागतः ठञ् आभिकामिकः अभिलाषात् प्राप्ते त्रि०स्त्रियां ङीप्। "गुणैर्वानुपमैर्युक्तः समस्तैराभिकामिकैः" भा०शा०प०।

अभिक्रम पु० अभि+क्रम–भावे घञ् अदुपधः। १ आरम्भे, २ आरोहणे, ३ युद्धाय, गतुसंमुखयाने च। कर्मणि घञ्। ४ आरम्भे "नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते" गीता। आधारे घञ्। ५ युद्धे।

अभिक्रमवत् त्रि० अभि+क्रम–क्वनिप् स्त्रियां ङीप् वनो र च। आभिमुख्येन कारिणि। "अमेयं रात्रयुक्थयोऽन्वभिक्रमत्वरोः अथ० २,८,२।

अभिक्रुप्त त्रि० अभि+क्रुप–क्त रोत्वः। १ सम्पन्ने २ नियते ३ अभिप्रकाशिते च "हृदा मनीषा मनसाभिक्लृप्त एतद्विदुः" कठ उप०।

अभिक्रतु पु० आभिमुख्येन क्रतुर्युद्धकर्म यस्य। बलवति। "अधाभवद्भमिताभिक्रतूनाम्" ऋ० ३,३४,१०। "अभिक्रतूनाम् बलीयसाम्" भा०।

अभिक्रान्ति स्त्री अभि+क्रम–क्तिन्। १ अभिक्रमे २ उपक्रमे "यत्रास्याभिक्रान्तिरनपक्रमाय" श्रुतिः।

अभिक्रान्तिन् त्रि० अभिक्रान्तमनेन इष्टादि० इनि। उपक्रमकर्त्तरि "य एषामध्ययने अभिक्रान्तिमः" श्रुतिः।

अभिक्रामम् अव्य० अभि+क्रम–वीप्साभीक्ष्ण्ययोः यमुल्। आक्रम्य, आरभ्य, आभिमुख्येन गत्वेत्यर्थे। पूर्व्वं पूर्व्वमेवाभिक्रामम्" काशा० ३,२,२१। [२निन्दायाम्।

अभिक्रोश पु० अभि+क्रुश–भावे घञ्। १ आक्रोशे

अभिक्रोशक त्रि०अभि+क्रुश–ण्वुल्। १ निन्दके २ अपवादके च

अभिक्षत्तृ त्रि० अभि+क्षद–तृच् स्त्रियां ङीप्। हिंसके "अभिक्षत्तुस्त्वावतो वरूताः" ऋ०७।२१।८। "अभिक्षत्तुरभिहिंसकस्य" भा०।

अभिक्षद त्रि० अभि+क्षद–हिंसायाम् अच्। हिंसके। "अभिक्षदामर्थमाणम्" ऋ० ६,५०,१। अभिक्षदां हिंसकं छान्दसत्वात् आत्त्वम्।

अभिख्या स्त्री अभि+ख्या–अङ्। १ अभिधाने, २ शोभायां "काव्यभिख्या तयोरासीत् व्रजतोः शुद्धवेशयोः रघुः। ३ कीर्त्तौ ४ अभितः ख्यातौ, ५ साक्षात्कृते "अभ्या अपख्यानदभ्रभिख्याम्" ऋ० १,१४८,५ "अभिख्यामभितः ख्यातिं साक्षात्कृतं वा" भा०। कर्मणि क्विप्। ६ अभितो गन्तरि" ७ प्रसिद्धे च "अभिख्या भासा बृहता शुशुक्वनिः" ऋ०८,२२,५ "अभिख्या अभिमुखं गच्छन्त्याऽभितः प्रभिद्वया वा भासा" भा० धातोरातोलोपात् रूपम्। ८ प्रज्ञायां निरु०।

अभिख्याढ त्रि० अभि+ख्या–ढच् स्त्रियां ङीप्। १ कामुके अभिगन्तरि २ अभिद्रष्टरि च। "आपिरभिख्यातामर्हता सोभ्यानाम्" ऋ० ४,१७,१७ "अभिख्याताभिद्रष्टा" भा०।

अभिगत त्रि० अभि+गम–क्त। १ आनुकूल्येन प्राप्ते २ सेविते ३ आभिमुख्येन गते च।

अभिगन्तव्य त्रि० अभि+गम–तव्य। अभिगम्ये सेव्ये च

"सन: सदाभिगन्तव्या यदि वोपदिशन्ति ते" मनि० ।

अभिगन्तृ त्रि० अभि+गम-तृच् स्त्रियां ङीप् । युद्धार्थम् आभिमुख्येन १ गन्तरि २ आनुकूल्येन गन्तरि च । "चत्वं वरुणोऽभिगन्तेव ब्रह्म" शत० ब्रा० ।

अभिगम पु० अभि+आभिमुख्ये आनुकूल्येवा गम-घञ् । आभिमुख्येन गमने "तवार्हतो नाभिगमेन हन्नम्" रघुः आनुकूल्येन २गमने "स्वरूपा क्रियमाणे तु तत्रावश्यक्रिया क्वचित् । नोद्यते नियमः सोऽत्र ऋतावभिगमो यथेति" मीमांसा । भावे ल्युट् । अभिगमनं तत्रैव न० । "ज्ञेयाभिगमनात् पूर्वं तेनाप्यनभिनन्दिता" रघुः । "पापलक्षणमुच्यते पापात्तीर्वाभिगमनेन च" स्मृतिः ।

अभिगम्य त्रि० अभिगन्तुं शक्यते सौम्यादित्वात् । आभिमुख्येन गन्तुं शक्ये "अद्यप्रभृति भूतानामभिगम्योऽस्मि शुद्धये" कुमा० । "सोऽभिगम्यश्च पूज्यश्च कर्त्तव्यश्च प्रदक्षिणम्" रामा० । "अदृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः" रघुः । अभि+गम-ल्यप् । आभिमुख्येन गत्वेत्यर्थे अव्य० "मनुमेकाग्रमासीनमभिगम्य महर्षयः" इति मनुः ।

अभिगर पु० अभि+गृ-स्तुतौ अप् । १ अभितः स्तवे । "अनुष्टुप् तेऽभिगरम्" इति यजु० ८,४७ ।

अभिगामिन् त्रि० अभिगच्छति अभि+गम-णिनि अभिगन्तरि । "ऋतुकालाभिगामी स्यात् स्वदारनिरतः सदा" मनुः । "राजपत्न्यभिगामी च दग्धव्यस्तल्पकटाग्निना" या०

अभिगीत त्रि० आनुकूल्येन गीतः । १ आनुकूल्यार्थं स्तुते २ अभितोगीते च ।

अभिगुप्ति स्त्री अभि+गुप्-क्तिन् । १ अभिरक्षणे "तद्व्रजमेवेताभिगुप्ता आसादयति" श० ब्रा० ।

अभिगूर्त्त(र्ण) त्रि० अभि+गुर-क्त वेदे नत्वाभावः । १उद्यते "इदं वीतमभिगूर्त्तम्" यजु० २५,३७, "अभिगूर्त्तं ये यजामहे इत्यभिगूर्त्तोक्तम्" वे० दी० लोके तु अभिगूर्णइत्येव अभ्युद्यते त्रि० ।

अभिगूर्त्ति स्त्री अभि+सातत्ये गुर-क्तिन् । सततसङ्कल्पे "तेषामभिगूर्त्तिर्न इन्वतु" ऋ० १,१६२,६ । "अभिगूर्त्तिः सङ्कल्पः सर्व्वथा करणीयमिति बुद्धिः" भा० २ अभित उद्यमे च "उतो तेषामभिगूर्त्तिर्न इन्वतु" ऋ० १,१६२,१२, "अभिगूर्त्तिः" उद्यमः भा० । [आनुकूल्यार्थं ऋताङ्कतौ ।

अभिगृहीतपाणि त्रि० आनुकूल्यार्थं गृहीतः पाणिर्येन ।

अभिगेष्ण त्रि० अभि+गै-ल्युट् । अभितो गायके "यदेतवा अभिगेष्णावदन्ति" श्रुतिः ।

अभिगोप्तृ त्रि० अभितो गोपायति अभि+गुप-तृच् स्त्रियां ङीप् । अभिरक्षके ।

अभिग्रस्त त्रि० अभि+ग्रस-क्त । १ आक्रान्ते २ कवलीकृते च

अभिग्रह पु० अभि+ग्रह-अप् । (लुट) इति ख्याते प्रकाशकरणे, २ अभियोगे, ३ आभिमुख्येनोद्यमे, ४ गौरवे ५ युद्धे च । ल्युटि अभिग्रहणमप्यत्र न० । [१धर्षणे, २ग्रहणे च ।

अभिघर्षण न० अभि+घृष-भावे ल्युट् । परस्परसंयोगेन

अभिघात पु० अभि+हन-भावे घञ् । १ निःशेषहनने समूलनाशने "दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ" सां० का० । २ ताडने । "तडाभिघातादिव लब्धपङ्के" कुमा० । अभिहन्यतेऽस्मै फलाय उद्दिश्यार्थे वा० घञ् । द्रव्यान्तरक्रियया उत्पादितद्रव्यान्तरसंयोगे, वैशेषिकोक्ते शब्दहेतौ, संयोगिनोर्भिन्नोविभागजनकक्रियाहेतौ च ३ संयोगभेदे । यथोक्तं "नोदनाभिघातात् संयुक्तसंयोगाच्च पृथिव्यां कर्म्मेति वै० सू० । "यः संयोगः शब्दनिमित्तकारणं, यज्जनितं कर्म्म संयोगिनोः परस्परविभागहेतुश्च भवति स संयोगविशेषोऽभिघातः नोदनं तु तद्विलक्षणः संयोगः । ताभ्यामपि प्रत्येकं कर्म्म जन्यते पङ्गाख्यायां पृथिव्यां चरणेन नोदनात् चरणाभिघाताच्च कर्म्म जायते तत्र पङ्गुः समवायिकारणम् नोदनाभिघातौ यथा यथमसवायिकारणम् गुरुत्ववेगप्रयत्ना निमित्तकारणानि संयुक्तसंयोगात् नोदनाभिघाताद्वा पङ्गे कर्म पङ्गुस्थिते घटादावपि, तत्समकालमेव कर्मदर्शनादिति" प० उपस्करः । "आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म, तथा हस्तसंयोगाच्च मुषले, अभिघातजे मुषले कर्म्मणि व्यतिरेकादकारणं हस्तसंयोगः" वै० सू० तथात्मसंयोगात् हस्तकर्मणि, अभिघातान्मुषलसंयोगाच्च हस्ते कर्म "आत्मजन्या भवेदिच्छा इच्छाजन्या भवेत् कृतिः कृतिजन्या भवेच्चेष्टा चेष्टाजन्या भवेत् क्रिये"त्युक्तिमनुसृत्याह आत्मसंयोगप्रयत्नाभ्यां हस्ते समवायिकारणे कर्म, तस्य च कर्मणः प्रयत्नवदात्मसंयोगोऽसमवायिकारणं प्रयत्नस्तु निमित्तकारणम् प्रयत्नवदात्मसंयोगासमवायिकारणिका च क्रियैव चेष्टा । तथा उत्क्षेपबद्धस्तसंयोगात् मुषले उत्क्षेपणं कर्म जायते । तथाच प्रयत्नवदात्मसंयुक्तेन हस्तेन यो मुषलस्य संयोगः स तत्रासमवायिकारणम् मुषलं समवायिकारणमिति । उदूखलाभिहतस्य मुषलस्य कर्मोदुत्पतनं जायते तत्र कारणमाह । मुषलादौ उत्पतन कर्म्मणि अभिघात एव हेतुः, न तु हस्तसंयोगः तस्य तं प्रति कारणत्वेनान्वयासिद्धत्वात् तद्व्यतिरेकेऽपि अभिघात-

मालेष अभिहतप्रधानगुरुद्रव्यसंयोगेनैव उत्पतनदर्शनात् यथा भूम्यादौ हस्तेन वेगचिप्तलोष्टादेर्हस्तयोगं विनाऽपि उत्पत्तिर्दृश्यतेऽत उत्पतने अभिघात एव असमवायिकारणम् "अभिघातात् सुषले संयोगाद्धस्ते कर्म" वै०सू० अभिघातात् अभिघातजनितसंस्कारजनितात् हस्तसुषलसंयोगात् हस्ते उत्पतनं कर्म तत्र सुषलसंयोगोऽसमवायिकारणम्। तीव्रवेगप्रयुक्तक्रियाजनितः संयोगः शब्दहेतुः। "हतोयः स्यात् कर्म्मजोऽपि द्विधैव परिकीर्त्तितः अभिघातोनोदनञ्च शब्दहेतुरिहादिमः। शब्दाहेतुर्द्वितीयः स्यादिति" "शब्दोध्वनिश्च वर्णश्च ह्रदक्कादिभवोध्वनिः। "कण्ठसंयोगादिजन्यावर्णास्ते कादयोमता" इति च भाषा० अतएवोक्तम् "कण्ठताल्वाद्यभिघातजन्यः शब्दः" इति वैद्यैः। गिद्यायामप्युक्तम् "आत्मा बुद्ध्या समेत्यार्थान् मनोयुङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। सोदीर्णो मूर्द्धमभिहतो वक्त्रमापद्य मारुतः वर्णान् जनयते" इति। स उदीर्णः सन्धिः पादपूरणार्थः। ह्रदक्कादौ तीव्रवेगेन काष्ठादिताड़नसंयोगे शब्दोजन्यते इति लोके प्रसिद्धिः। हक्कादौ प्रबलतरवायुसंयोगाच्छब्दो ध्वन्यात्मक एव। ह्रदुवेगेन क्रियया संयोगे नोदनरूपे न शब्दः इति तस्य शब्दाहेतुत्वमुक्तम् अधिकं नोदनशब्दे वक्ष्यते। "अभिघातोऽस्यास्य अर्थ०अच्। अभिघातयुक्ते त्रि० "अभिघातं स्मात् पूर्व्वं वेदहित्वादिवर्ण्यते। नववर्गाणां नवतो धरणीचन्द्रहिरामाद्या" इति केरलोक्ते वर्णभेदे, न० शब्दकल्पद्रुमः।

अभिघातक त्रि० अभि+हन-ण्वुल्। १ शत्रौ रिपौ २ अभिघातसंयोगकारके ३ समूलनाशके च। "तदभिघातके हेतौ" सां०का०। [ह्रन्। रिपौ।

अभिघाति पु० अभिघातयति अभि-हन-स्वार्थे णिच-

अभिघातिन् त्रि० अभि+हन-णिनि स्त्रियां ङीप्। १ शत्रौ २ नाशके ३ अभिघातसंयोगकारके च।

अभिघार पु० अभिघार्य्यते समन्तादग्नौ सिच्यते अभि+हृ-करणे णिच-भावे घञ्। अग्नौ समन्तात् घृतादेः १ सेचने २ घृतादिसंस्कारभेदे च। "ह्रदभिहितोभावो द्रव्यवत् प्रकाशते" द्रव्यवृत्तेः अभिघार्य्य भावे ३ घृतादौ च निरु०।

अभिघारण न० अभितोधारणम् जलादिभिः विधिना सेचनम्। अभि+हृ-णिच्-भावे ल्युट्। घृतादेः संस्कारभेदे "एत्य ऊङ्घाभिधारणम् प्रुषायां हविष उपश्रुतस्य" कात्या० २,२,६, "पशुप्रयाजहोमानन्तरं वजतिस्थानादेत्य वेदेः पश्चादागत्य उपविश्य जुहूस्थेनैव प्रयाजशेषेण प्रुषायां प्रौक्षाज्यस्य हविषः आज्यस्थाज्यपुरोडाशयोश्च उपश्रुतः उपश्रुतसंस्थस्याज्यस्य अध्वर्युरभिधारणं करोति उपयोगक्रमेण अयञ्च हविः संस्कारः प्रयाजशेषप्रतिपत्तिः हवींषीति द्वितीयाश्रुतेः हविषः संस्कार्य्यत्वावगमात् ऋतः सद्विहितानि सर्व्वाणि हवींषि शेषेणाभिधारणीयानि" कर्क०

अभिचक्षण अभि-चक्ष-ल्यु। १ सर्व्वतोविचक्षणे कर्मकुशले "वेदाहं तस्य भेषजं शोषुदुरभिचक्षणम्" ऋग्० ६,१२७,२, विषूचीर्यावतोराया अभिचक्षणादिवः ऋग्० ६,२,२१।

अभिचर त्रि० अभितः आभिमुख्येनाऽकुल्यार्थं चरति चर-ट। १ भटे २ अभितो गते च स्त्रियां ङीप्।

अभिचरण न० अभि+चर-ल्युट्। १ शत्रुघाताय विहितश्येनयागादौ।

अभिचरणीय त्रि० अभिचरणमर्हति छ। १ अभिचारार्हे वैरिणि "तं त्वष्टा हतपुत्रोऽभ्यचरत् सोऽभिचरणीयमेन्द्रम् सोममाहरत्" शत० ब्रा०।

अभिचार पु० अभि-आभिमुख्येन क्षत्याजननार्थं चारः अभि+चर-भावे घञ्। १ शत्रुवधोत्पादकक्षत्याजनके मूलकर्म्मणि "श्येनेनाभिचरन् यजेतेति" विहिते श्येनयागादौ। "अभिचारेषु सर्व्वेषु कर्त्तव्यो द्विगतोदमः" "अभिचारमहीनञ्च त्रिभिः कुर्च्छैर्व्यपोहति" इति च मनुः "अभिचारक्रियाक्रूरैकप्रकृतयः पुरोधसः" काद०। अभिचाराय हितं स प्रयोजनमस्य वा ठञ्। आभिचारिकः। १ तदहितकर्म्मादौ २ तत्प्रयोजनकादौ च त्रि० स्त्रियां ङीप्।

अभिचारकल्प पु० अभिचारसाधनं कल्पोरहस्यप्रकाशकग्रन्थः। १ अथर्ववेदान्तर्गते ग्रन्थभेदे अथर्ववेदशब्दे विवरणम्।

अभिचारिन् त्रि० अभिचरति अभि+चर-णिनि स्त्रियां ङीप्। १ अभिचारकर्त्तरि "ये त्वा जाता ओभिरे विदूढा अभिचारिणः" ऋग्० १०,१,६।

अभिच्छाय त्रि० अभिगतश्छायाम् छाया०स०, अभिमुखीभूता छाया यस्य वा। १ छायाप्राप्ते २ छायाभिमुखप्राप्ते च। छायां अभिमुखम् अव्ययी०। ३ छायाभिमुखे अव्य०। "यो माभिच्छायमत्येषि मां चाक्रिं चान्तरा" ऋग्० १३,१,५७।

अभिजन पु० अभिजायतेऽस्मिन् जन+आधारे-घञ् अलुक्। १ कुले, "न परिचयं रजति नाभिजनमीक्षते" काद०। "वयसः कर्म्मणोऽर्थस्य श्रुतस्याभिजनस्य च वेषवाग्बुद्धिसारूप्यमाचरन् विचरेदिह" मनुः। २ जन्मभूमौ,

अभिमतः पित्रादीनां जनोऽत्रस्थानम् । २ पित्रादिभिरध्युषिते स्थाने "अभिजनश्च" पा० "अभिजनो नाम यत्र पूर्व्वैरुषितम्" भाष्यम् । अभिमतोजनः श्रेष्ठत्वात् प्रा०स० । ४कुलश्रेष्ठे अभि+जन–भावे घञ् । उत्कृष्टस्थानजतया ५अभिमतोत्पत्तौ "श्रैष्ठ्यं नाभिजनेनेदं सर्वं वै ब्राह्मणोऽर्हति" मनुः ब्रह्मसुखोद्भवत्वेनाभिजनेन श्रेष्ठतया" कुल्लू० । अभिजायते सत्पुरुषोभवति येन करणे घञ् । ६कीर्त्तौ "यावत् कीर्त्तिर्हि लोकेषु तावत् पुरुष उच्यते" इत्युक्तेः कीर्त्त्यैव सफलजन्मत्वात्तस्यास्तथात्वम् । अभिजनादागतः अण् । आभिजनः वंशसंबन्धादागते, त्रि० "तां पार्व्वतीत्याभिजनेन नाम्ना" कु० ।

अभिजात त्रि० अभिमतं प्रशस्तं जातं जन्म यस्य । १कुलीने, "जात्यस्तेनाभिजातेन शूरः शौर्य्यवता कृशः" "भिन्नानस्त्रैर्मोहभाजोऽभिजातान्" च रघुः । २परिपक्वे, ३श्रेष्ठे "न स्रेच्छितव्यं यत्नादौ स्त्रीषु नाप्राकृतं वदेत् । सद्वीरुधं नाभिजातेषु नाप्रबुद्धेषु संस्कृतम्" हेमाद्रिः । ४मनोहरे । "प्रजल्पितायामभिजातवाचि" कु० । अभिजातस्य भावः ष्यञ् । आभिजात्यं कौलीन्येन० । [जनने ।

अभिजाति स्त्री प्रशस्ता जातिः जननं प्रा०स० । प्रशस्तवंश-

अभिजित् त्रि० अभिसुखीभूय जयति यत्नून् अभि+जि–क्विप् । १अभिसुखीभूय यत्नुजयिनि । अभितो जयत्यनेन करणे क्विप् । २सर्वतोजयसाधने "अभिजिता तेजसा तेजोजिन्व" य० १५,७, "सर्व्वजयहेतुना तेजसा अन्नेन" वेददी० । "अभिजिदसि युक्ष्मावेन्द्राय" ता० ब्रा० "अभिजित् सर्वजयहेतुरसि" भा० । अभिजयति ऊर्द्धाधःस्थित्वा अपराणि नक्षत्राणि कर्त्तरि क्विप् । "अभिजिन्नाम नक्षत्रमुपरिष्टे दाषाढानामधस्ताच्छ्रोणायाः" श्रुत्युक्ते २नक्षत्रभेदे इतरनक्षत्राणां स्वकक्षामात्रस्थितेस्तस्य च ऊर्द्धाधःस्थित्या इतरनक्षत्रजयित्वात् तथात्वम् । अतएव भागवते "नक्षत्राणि मेरुं दक्षिणेनैव कालायने रैश्वरयोजितानि सहाभिजिताऽष्टाविंशति"रित्युक्तम् । नक्षत्रचक्रस्य अश्विन्यादिसप्तविंशतिनक्षत्रात्मकतया ज्योतिषे प्रसिद्धत्वेऽपि श्रुत्युक्तोषाढोपरिश्रवणाधःस्थाने अभिजिन्नामकं नक्षत्रचक्रानन्तर्गतमपि कर्म्मविशेषे फलविशेषार्थं ज्योतिषादौ स्वीकृतम् यथा" सप्त सप्त विलिखेत्तु रेखिकास्तिर्य्यगूर्द्धमथ लक्षिकादिकम् । लेखवेदभिजिता समन्वितं चैकरेखकमखेन विध्यते । वैद्यस्य चतुर्थांशे श्रवणादौ लिप्रिकाचतुष्के च । अभिजित् तत्स्थे खेटे वित्तेशा रोहिणी विद्धा । यद्यवेदेकरेखास्थो वेधः सप्तशलाकक" इति दीपिका ततश्च आषाढोपरिश्रवणाधोभागे तस्य स्थितावपि जनविंशकलात्मकत्वं कर्म्मविशेषार्थं कल्पितम् तत्र यद्यस्थित्या सप्तशलाकादिवेधवशात् विवाहादौ वर्জ্জिता अनिष्टफलदायकत्वात् । श्रुतौ स्थानविशेषोक्तिस्तु तस्य स्थितिस्थानज्ञापनार्था अतएव सूर्य्यसिद्धान्ते "आषाढस्यैवाभिजित् प्रान्ते वैश्वान्ते श्रवणस्थितिरित्युक्तं व्याख्यातञ्चैतत् रङ्गनाथेन आषाढस्य पूर्व्वाषाढाया अवसाने, धनूराशौ विंशतिकलोनसप्तविंशतिभागे २६,४० अभिजिद्योगतारा" इति एवञ्च दीपिकोक्ता जनविंशतिकलात्मकता कर्म्मविशेषार्था अतएव अष्टाविंशतिनक्षत्राभिप्रायेणैव बृहत्संहितायामष्टाविंशतिर्नक्षत्राधीश्वरा उक्ताः "अश्वियमदहनकमलजयिन्दुसूदितिजीवफणिपितरः । योन्यर्यमदिनकृत्त्वष्टृपवनशक्राग्निमित्राश्च ॥ शक्रो निर्ऋतिस्तोयं विश्वे ब्रह्मा हरिर्वसुर्वरुणः । अजपादोऽहिर्बुध्नः पूषा चेतीश्वरा भानाम्" ॥ तथा चाभिजितोब्रह्माधीश्वरः । अभिजयति इतरत्राङ्कालान् प्राग्रूपेण, आभिमुख्येन पश्चिमावस्थितां छायां जयति प्राग्वर्त्तिनीं करोति वा क्विप् । पश्चिमवर्त्तिच्छायायाः पूर्व्ववर्त्तित्वसम्पादके पञ्चदशघटिकात्मकदिनखण्डे कुतपाख्ये मध्याह्नप्रसरे २ मुहूर्त्ते । "अपराह्णे तु संप्राप्ते अभिजिद्रोहिणोदये । यदत्र दीयते जन्तोस्तदक्षयमुदाहृतमिति" मत्स्य० पु० उक्तेस्तस्येतरापेक्षयाऽक्षयफलदात्वात्तथात्वम् । "कुतपप्रथमभागे एकोद्दिष्टमुपक्रमेत् आवर्त्तनसमीपे वा" स्मृतेः "आरभ्य कुतपे श्राद्धं कुर्य्यादारोहिणं बुधः" इत्युक्तेश्च तन्मुहूर्त्तसंस्पर्शकालतया प्रशस्तत्वाच्च तथात्वम् । अभिजयति यत्नून् गमनेनेति आधारे" क्विप् । "मध्यं व्योमप्रयाते स्फुरदनलनिभे कोटरे चार्कबिम्बे छाया साध्वीव कान्ता प्रचलति पुरुषे यत्र तत्पादलग्ना । तावत् सौरेर्न दृष्टिः कुजकृतमशुभं नैव कस्यापि योगः लक्ष्मीमारोग्यसम्पत्तिमथ युवतीं तत्र गत्वा लभेत" इति ज्योतिषोक्ते ४ वालालग्नभेदे च । यद्यपि "सर्व्वेषिनु विधुपापयुक्ततुलवार्द्धे निशाङ्घोर्घटीत्रयं वै" इत्यादिना दिनार्द्धपूर्व्वापरस्थघटीत्रयं सार्द्धक–२० पलस्य सर्व्वत्र वर्জ্জिता तथापि यात्रायां विशिष्याभिधानात्तदपवादः । "ततः प्रभाते विमले मुहूर्त्तेऽभिजिति प्रभुः" रामा० । अग्निष्टोमयागाङ्गे गवामयनिके ५ यागभेदे अभिजिदग्निष्टोम" इति कात्या० । अग्निष्टोमप्रकृतादभि-

जिदन्तरं तत्संज्ञकं गवामयनिकमेतत् कर्क० । संवत्सरसाध्ये गवामयने २षडमासीयपञ्चविंशतितमदिने यथोक्तम् ता०भाष्ये "तत्र षष्ठे मासादौ त्रयोऽभिप्लवाः षड्हाः कार्याः तत एकः पृष्ठ्यः षड्हः ततोऽभिजिदेकमहः" इति । अभिजिन्मुहूर्त्तस्य च किञ्चिदूनदिनार्द्धप्रवक्तेः तत्सान्यात् पञ्चविंशतिदिनाधिकपञ्चममासस्य किञ्चिदूनदैर्घ्यदिवसार्द्धतुल्यतयास्याभिजिच्छब्दवाच्यता ६ तद्दिनकर्त्तव्ये ७ अतिरात्रयागादौ च उपचारात् अतएव ताण्ड्यभाष्ये "षष्ठे मासि त्रीनभिप्लवान् एकं पृष्ठ्यं कृत्वाऽभिजिदनुहेयः" इत्युक्तम् विवरणं गवामयनशब्दे द्रष्टव्यम् । "अभिजिदतिरात्रे" इति श्रुत०ब्रा० । "अतिरात्रसंस्थः अभिजिन्नामके दिने कार्य्यं" इति भा० ।

अभिजित पु० अभिजोयादन्यान् संज्ञायामाशोर्व्यादे देवरातादिवत् क्विप् । अर्द्धरात्रसम्बन्धिनि मुहूर्त्ते "अहं त्वभिजिते योगे निशाया यौवने स्थिते । अर्द्धरात्रे करिष्यामि गर्भमोक्षं यथासुखम्" । मुहूर्त्तेऽभिजिते प्राप्ते सार्द्धरात्रे विभूषिते देवकीजनवद्विष्णुं यशोदा तान्तु कन्यकाम् विष्णु पु० ।

अभिजिति स्त्री अभि+जि-भावे क्तिन् । अभिजये "एषां लोकानामभिजित्यै" श्रुत०ब्रा० ।

अभिज्ञ त्रि० अभिजानाति अभि+ज्ञा-क । १ निपुणे, २पण्डिते ३ ज्ञातरि चेतने "अन्ययादितरतश्चार्थैर्वभिज्ञः स्वराट्" भाग० । अभिज्ञाम्लेदपातानां क्रियन्ते नन्दनद्रुमाः कुमा० "शङ्कुस्खनाभिज्ञतया निहत्ताः" रघुः ।

अभिज्ञा स्त्री अभि-ज्ञा-अङ् । १ प्रथमसुत्पन्ने ज्ञाने । २ संस्कारसहकृते इन्द्रियसन्निकर्षजन्ये प्रत्यभिज्ञारूपे ज्ञाने च ।

अभिज्ञात त्रि० अभिज्ञायतेस्म अभि+ज्ञा-कर्म्मणि क्त । कालान्तरे पुनर्दृष्ट्वा जातेन सोयमित्याकारकज्ञानेन विषयीकृते पूर्व्वदृष्टे पदार्थे ।

अभिज्ञान न० अभिज्ञायतेऽनेन अभि+ज्ञा-करणे ल्युट् । सोयमिति ज्ञानसाधने १चिह्ने । "चिह्नभूतं त्वभिज्ञानं त्वमङ्गे कर्त्तुमर्हसि" "उपपन्नैरभिज्ञानैर्दूतं तमवगच्छत" इति च रामा० । भावे ल्युट् । तदिदमित्याकारके २ज्ञाने च । तच्च संस्कारसहकृतं पुरोवर्त्तिनि इन्द्रियसन्निकर्षजन्यं प्रत्यक्षविलक्षणं स्मृतिविलक्षणञ्च ज्ञानम् । "तदभिज्ञान हेतोर्हि दत्तं तेन महात्मना" रामा० ।

अभिज्ञानशकुन्तला स्त्री अभिज्ञायते कर्म्मणि ल्युट् तथा भूतां शकुन्तलामधिकृत्य कृताख्यायिका "तदधिकृत्य कृते ग्रन्थे" पा० अण् आख्यायिकायां तस्य वा लुपि व्यक्तिवचनतेति स्त्रीत्वम् । कालिदासकृतौ दुष्मन्तेन गान्धर्वविधिना कृतोपयमां कण्वकन्यां शकुन्तलामधिकृत्य कृते नाटकभेदे तस्याश्च दुर्वासःशापात् प्रथमं दुष्मन्तेनानभिज्ञानात् पश्चाच्च स्वदत्ताङ्गुरीयकरूपाभिज्ञानदर्शनेन प्रत्यभिज्ञातत्वात् तामधिकृत्याख्यायिकारूपत्वाच्चाटकस्य तथात्वम् । "कालिदासस्य सर्व्वस्वमभिज्ञानशकुन्तला" लुबभावे आभिज्ञानशकुन्तलम् न० । "नवेनाभिज्ञानशकुन्तलेनेति" शकु० ।

अभिङ्क्ष त्रि अभिगते आभिमुख्येन स्थापिते जानुनी येन वेदे बा०क्षु १ आभिमुख्येनावस्थापितजानुयुक्ते । "संजानाना उपसीदन्नभिक्षु" ऋ० १,७२,५ ।

अभितराम् अव्य० अभि+प्रकर्षे-तरप् आम् । १ आभिमुख्यातिशये २ शनैःशनैराभिमुख्ये च "अभितराङ्वै जयन् क्रामति तस्मादभितरामभितरामेव क्रामेत्" श्रुत०ब्रा० । "अभितराम् उ वै शत्रोरत्यन्तमभिमुखं खलु, अस्मावपि दैवदीषत् पुरस्तादाक्रामेदिति" भा० ।

अभितस् अव्य० अभि+तसिल् । सामीप्ये, आभिमुख्ये, उभयतोऽर्थे, शीघ्रतायाञ्च । एतद्योगे द्वितीया "अभितस्परितसोःकार्य्या धिक्शब्दपर्य्यादिषु त्रिषु । द्वितीयाम्रेडितान्तेषु तथान्यत्रापि दृश्यते" इत्युक्तेः । "अङ्गान्यवाचीदभितः प्रधानमिति" भट्टिः "अभितस्तं पृथासूनुः स्नेहेन परितस्तरे" किरा० "कामक्रोधवियुक्तानां यतीनां यतचेतसाम् । अभितोब्रह्मनिर्वाणमिति" गीता ३साकल्ये च । "पर्य्यभिभ्याङ्" पा० "सर्वोभयार्थाभ्यामेव वा० उक्तेः सर्व्वोभयार्थयोरेवास्य साधुता ।

अभिताप पु० अभि+तप-घञ् । भृशं सन्तापे ।

अभिताम्र पु० भृशं ताम्रं प्रा०स० । १ अत्यन्ताम्रवर्णे २ तद्वति त्रि० "रामस्यमभिताम्राक्षं दृष्ट्वाशाखावलम्बिनम्" रघुः ।

अभितोमुख त्रि० अभितः मुखमस्य । १ सर्व्वदिग्मुखे ।

अभिदर्शन न० आभिमुख्येन दर्शनम् अभि+दृश-भावे ल्युट् । आभिमुख्येन दर्शने, "यामघाते हिताभङ्गे परेषामभिदर्शने" मनुः । [स्मृतौ च ।

अभिद्रा स्त्री अभि+द्रा-अङ् । १ पलायने, २अभिध्यायाम्

अभिदि(धि)ष्णु त्रि० अभि+दम्भ-स्नु उ वेदे नदस्य धः । १अभिभवनेच्छावति "विश्वा इदर्यो अभिदिष्णुः" इति ऋ० ३,२३,१२ । "अभिदिष्णुः अभिभवनेच्छावती छान्दसम्" भा०

अभिद्रवण न० अभि+द्रु-ल्युट्। १ वेगेन गमने। अप्। अभिद्रवोऽप्युक्तार्थे पु०।

अभिद्रुह् त्रि० अभिद्रुह्यति अभि+द्रुह् क्विप्। १ अपकारके

अभिद्रोह पु० अभि+द्रुह-घञ्। १आक्रोशे, २अनिष्टचिन्तने, ३अपकारे च। "नामजातिग्रहं तेषामभिद्रोहेण कुर्वतः"। मनुः "भूतेन्द्रियान्तरात्मनां धर्मोऽहि परमोमतः" का०ख०

अभिधर्षण न०आभिमुख्येन धर्षणम्। १निष्पीडने २आस्फालने ३भूतादेरावेशे च। कर्त्तरि ल्यु। ४राक्षसे पु०।

अभिधा स्त्री अभि+धाञ्-भावे अङ्। १ कथने, २शब्दनिष्ठे अर्थबोधजनकतारूपशक्तिभेदे च। अभिधीयतेऽनेनेति करणे अङ्। २ वाचकशब्दे भट्टमते फलजनकव्यापाररूपायां शब्दनिष्ठायां ३ भावनायाञ्च। अभिधा च सङ्केतितार्थस्य बोधिका शब्दनिष्ठा शक्तिरिति आलङ्कारिका "वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः। व्यङ्ग्योव्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः" ता अभिधाद्याः। "तत्र सङ्केतितार्थस्य बोधनादभिधाऽभिधा" सा०द०। भाट्टास्तु प्रवृत्तिजनने विधिव्यापारीभूता विधिसमवेता भावनापरनामाऽतिरिक्तपदार्थविशेषोऽभिधा तस्या एव ज्ञानं प्रवर्त्तकं तत्रैव च भावनात्वरूपेण विधिशक्तिः सा च जन्यत्वसम्बन्धेन एकपदोपात्तत्वप्रत्यासत्त्या वा आख्यातसामान्यशक्तिबललभ्या कृतिरूपव्यापारविधेरर्थान्तरे विशेषणतयाऽन्वेति प्रकृत्यर्थोऽपि विधयितया व्यापारे विशेषणं तथा च यागविषयकभावनाजन्यव्यापारवान् पुरुष इत्यन्वयबोधः नचैताद्दशशब्दाभावेऽपि प्रयोजनाज्ञाने कृतः प्रवृत्तिः प्रयोजनस्याहेतुत्वे विश्वजिदादौ फलकल्पनानुपपत्तेरिति वाच्यम् यागविषयकव्यापारेऽभिधाजन्यत्वसान्वये व्यापारनिष्ठेष्टसाधनत्वस्यान्वयप्रयोजकरूपतया योग्यतात्वेन योग्यताबलादेव व्यापारे तद्भानात्। यद्वा विधित एव स्वर्गादिसाधनत्वग्रहस्तत्र प्रवृत्तिरूपव्यापारे आख्यातार्थेऽन्वेति प्रवृत्तावि ष्टसाधनताज्ञानमेव प्रवर्त्तकम्। न चैवं न्यायमतविशेषः इष्टसाधनत्वेन विध्यर्थत्वस्वीकारादिति वाच्यं क्रियागतं साधनत्वं न विध्यर्थः अपि तु प्रवृत्तिगतमिति विशेषात् अभिधाभ्युपगमाभ्युपगमाभ्यामपि विशेषसम्भवाच्च न चैवं तादृशाभिधायां मानाभाव इति वाच्यं विधिः प्रवृत्तिजनकधर्म्मसमवायिकारणं तज्जनकद्रव्यत्वादात्मवदित्यनुमानादेव तत्सिद्धेः भट्टमते शब्दस्य द्रव्यत्वाच्चाप्सिद्धिः। न च प्रवृत्तिजनकशरीरे व्यभिचारः, तस्य शरीर प्राणसंयोगोत्पादानत्वात् न च विधिर्न प्रवृत्तौ कारणं प्रवृत्तिसामान्ये व्यभिचारात् इति वाच्यं वैधजन्यप्रवृत्तौ तद्धेतुत्वात् ज्ञानवत् प्रवृत्तावपि वैलक्षण्यसम्भवाच्च तच्च जातिरूपमखण्डोपाधिरूपं स्वरूपं वेत्यन्यदेतत्। नन्वस्त्वभिधा तथापि तद्धीर्न प्रवृत्तिहेतुः प्रवृत्तिसामान्ये तस्य व्यभिचारात् प्रत्यक्षादिना इष्टसाधनत्वग्रहेऽपि प्रवृत्तेः, नापि यागादिविषयिकायां, यागकृतिः स्वर्गसाधनमित्याप्तवाक्यादितोपि प्रवृत्तेः। नापि विधिजन्यायां, तज्जन्यतावच्छेदकस्यैव दुष्परिचयात्। नापि जातिविशेषविशिष्टायां, गुणगतजात्यनभ्युपगमात् इति चेन्न विधिजन्यतावच्छेदकाखण्डोपाध्यवच्छेदेनैव तद्धेतुत्वात् न च भावनादिपदादपि तादृशप्रवृत्त्यापत्तिरिति वाच्यं विधिजन्यभावनाज्ञानस्यैव विलक्षणशक्तिमत्त्वेन तादृशप्रवृत्तिविशेषे हेतुत्वादित्याहुः। तामेतामभिधारूपभावनां प्रभाकरान मन्यन्ते। एवं हि तस्यानिरासस्तैः कृतः" अभिधासंकल्पाऽपूर्व्वभावनाज्ञानं न प्रवर्त्तकं तच्चिन् सत्यप्रवृत्तेः असत्यपि प्रवृत्तेश्च किन्तु कार्य्यत्वज्ञानमेव प्रवर्त्तकमिति तथा हि ज्ञानस्य क्रतौ जनयितव्यायां चिकीर्षातिरिक्तं न कर्त्तव्यमस्ति यत्सत्त्वे कृतिविलम्बोहेत्वन्तराभावात्। चिकीर्षा च कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयकेच्छा पाकं कृत्वा साधयामीति तदनुभवात् सा च स्वकृतिसाध्यत्वज्ञानसाध्या इच्छायाः स्वप्रकारकधीसाध्यत्वनियमात्" इति। यथा चास्यैव प्रवर्त्तकत्वं तथा विधिशब्देवक्ष्यते। सा चाभिधाशक्तिः कुत्रार्थे कस्येति व्याकरणादितोज्ञायते तदुक्तमभियुक्तैः "शक्तिग्रहं व्याकरणोपमानात् कोषाप्तवाक्यात् व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धा" इति व्याख्यायेदमुदाहृतमस्माभिः शब्दार्थरत्ने। यथा "तत्र सर्वेषां शब्दानां प्रथमतो व्यवहारादेव प्रायशः शक्तिग्रहः। तथा हि केनचित् वृद्धेन व्युत्पन्नं पुरुषं प्रति गामानयेत्युपदिष्टे तत् श्रुत्वन् व्युत्पन्नो गवानयने प्रवर्त्तते। तच्चेष्टादर्शनेन तत्प्रवृत्तिमनुमाय व्युत्पित्सुर्बालो व्युत्पन्नपुरुषीयप्रवृत्त्यन्यथानुपपत्त्या तद्धेतुभूतकर्त्तव्यतादिज्ञानादिकं तत्रानुमिनुतेऽनुमिनुते चापरकारणानुपस्थितेः श्रुतस्यैव सप्रदितवाक्यस्य तद्बोधजनकत्वम्। ततश्च वाक्यस्य तद्बोधजनकत्वेन तत्सम्बन्धित्वमवसीयते इत्यतो व्यवहारस्यैव शक्तिग्राहकत्वमित्येवमवसीयते शास्त्रकारैः। पश्चाच्च पदानामन्वयव्यतिरेकाभ्यां प्रत्येकपदशक्तिग्रहः तथा हि पुनर्यागं वधान घटमानयेत्यादिवाक्यश्रवणे नियोज्यस्य पूर्व्वापेक्षया विशेषकार्य्यप्रवृत्तिदर्शनेन गवादिपदश्रवणसत्त्वे तत्कार्य्यकरणं तदभावे च तत्कार्य्या-

करणमित्यन्वयव्यतिरेकाभ्यां तत्तत्पदानां विशेषार्थवाचकत्वावधारणमिति द्रष्टव्यम्। व्याकरणमपि तथा, तद्धि कर्मणि द्वितीयेत्यादिना द्वितीयादीनामर्थविशेषे प्रयोगनियमाय प्रवृत्तं द्वितीयादीनामर्थमध्यवगमयति तथा हि कर्मण्येव द्वितीया शक्ता न करणादौ, कर्मणि द्वितीयैव शक्ता न तृतीयेत्येवं द्विविधनियमपरतया प्रवृत्तं शास्त्रं नियमतदतिक्रमयोः पुण्यापुण्यफले दर्शयत् तत्तच्छब्दानां तत्तदर्थेष्वेव साधुतोक्त्या शक्तिमवगमयति। तदुक्तं भाष्यकारैः "सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्। प्रसिद्धानियमस्तत्र नियमः प्रकृतेषु चेति"। उपमानमपि शक्तिग्राहकम्। यथा गोसदृशो गवय इत्युपदेशवाक्यं श्रुतवतोऽारण्यपुरुषस्य वनगमनादनन्तरं गोसदृशपिण्डदर्शनेनोपदिष्टं वाक्यं स्मरतश्च दृष्ट्वा पिण्डो गवयपदवाच्य इति भवति मतिरित्युपमानरूपोपदेशवाक्यस्य गवयपदशक्तिग्राहकत्वम्। तत्र च व्याकरणादीनामप्रवृत्तेः प्रकृतिप्रत्ययाद्यधीनोपस्थितविषये एव व्याकरणस्य, रूढिविषये च कोषस्योपयोगात्तदभावाच्च तस्यैव तत्र तथात्वम्। कोषोऽपि अनपेक्ष्यैव प्रकृतिप्रत्ययादिविभागं केषाञ्चित् पदजातानां रूढिज्ञानाय प्रवर्त्तमानो मण्डपघटादिशब्दानां शक्तिमवगमयति। आप्तवाक्यमपि तथा, व्याकरणादिशक्तिधीहेत्वज्ञानेऽपि यथार्थज्ञानवतोपदेशेन तत्तच्छब्दानां तत्तदर्थेषु शक्तिग्रहः। व्यवहारतस्तु दर्शितः। वाक्यशेषोऽपि तद्ग्रहे हेतुः यथा स्वर्गकामोयजतेत्यादौ श्रुतस्वर्गपदस्य अर्थविशेषमजानतामधिकारिणां तच्छक्तिबोधनाय प्रवृत्तेन "यत्र दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदमिति" वाक्यशेषवाक्येन दुःखासंभिन्नत्वादिमति सुखविशेषे एव स्वर्गपदस्य शक्तिग्रहः। व्याख्यानरूपा टीकादिपदाभिधेया निबन्धतिरपि तत्तच्छब्दानां तत्तदर्थेषु शक्तिं ग्राहयति यथा पचतिपदस्य पाकं करोतीति व्याख्या पाककर्त्तृत्वेऽन्वयेऽपि। प्रसिद्धपदसामानाधिकरण्यमपि तद्ग्रहे हेतुः। पिकादिशब्दार्थमविदुषाप्तपदेशाय प्रवृत्तेन सहकारतरौ मधुरं रौति पिक इति वाक्येन प्रत्यक्षयक्ष्या ज्ञातशक्तिकपदोपस्थापितार्थे मधुरशब्दकारके पिकशब्दस्य शक्तिग्रहः। एवं कोषादावपि "सत्कृत्यालङ्कृतां कन्यां यो ददाति स कूलद" इत्यादौ प्रसिद्धपदोपस्थापितार्थे सत्कारपूर्वकालङ्कृतकन्यादातरि कूलदपदस्य शक्तिग्रहः। अत्र च प्रसिद्धपदसान्निध्यं नाम अर्थविशेषे निश्चितशक्तिकपदसामानाधिकरण्यम् सामानाधिकरण्यञ्च स्वबोध्यार्थभेदेनान्वयबोधजनकत्वम्। वैयाकरणमते चाख्यातप्रथमान्तार्थयोरभेदेनान्वयस्वीकारः। अतो मधुरं रौति कन्यां ददातीत्यादावाख्यातान्तस्य प्रथमान्तसामानाधिकरण्यं सुलभमेव। अतएव च भाष्ये "लटः शतृशानचावप्रथमासमानाधिकरणे" इति सूत्रे अप्रथमासमानाधिकरणे इति निर्देशादन्यत्र लटः प्रथमान्तसामानाधिकरण्यमुपपादितमुपपादितञ्च "आदेशे सामानाधिकरण्यं दृष्टानुमानाद्भवत्यं स्थानिनः सामानाधिकरण्यमित्यादिना" लटः स्थानिलकारसामान्यस्य प्रथमान्तसमाधिकरण्यम्। एतेन ददानः कुरुते इत्यादि पाठकल्पनमपि परेषामनादेयमेवेति"।

अभिधान न० अभि+धा—भावेल्युट्। १ कथने। करणे ल्युट् २ नामनि, २ शब्दार्थप्रतिपादके निघण्टुकोषादिनामके ग्रन्थे च। तथा च शब्दादानामर्थविशेषे शक्तिग्राहकं कोषादिकमेव अभिधानशब्दवाच्यम् तच्चामरादिनांना कोषादिकम्। तत्र च प्रायेण एकार्थवाचकानां पर्य्याय शब्दानां क्वचिच्च नानार्थानामपि शब्दानां संघ उपदिष्टः तेषां शक्तिग्राहकत्वञ्च अभिधाशब्दे दर्शितम्।

अभिधानी स्त्री आभिधीयते आभिमुख्येन धीयते बन्धेनानया अभि+धा—करणे ल्युट्। १ रज्जौ तया हि बन्धेन बध्यमाभिमुख्येन स्थाप्यते। "इषामग्भन्नरणान्नृतस्य इत्यश्वाभिधानीमादत्ते" इति तै० ब्रा०। "अभिधानीं रणनामिति" भा० "तस्या इन्द्रोवत्स आसीद्गायत्र्यभिधान्यभवद्भूधः" अथ० ८,१०,१२। "भूमौङ्गीभिरभिधानीभिर्हिता भवन्ति" काल्या० ३,४।

अभिधामूला स्त्री अभिधा मूलं यस्याः। आलङ्कारिकोक्तौ व्यञ्जनाभेदे। अभिधाश्रयाव्यत्र अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रया" आद्यशब्दाद्विप्रयोगादयः"। उक्तं हि "संयोगो विप्रयोगश्च साहचर्यं विरोधिता। अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः। सामर्थ्यमौचिती देशः कालोव्यक्तिः स्वरादयः। शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः" इति यथा सशङ्खचक्रो हरिः". इत्यत्र शङ्खचक्रसंयोगेन हरिशब्दोविष्णुमेवाभिधत्ते। अशङ्खचक्रो हरिः इति वियोगेन तमेव। भीमार्জ্জুनौ इति अर्জ্জुनः पार्थः। कर्णार्জ্জुनौ इति कर्णः कृतपुत्रः। स्थाणुं वन्दे इति स्थाणुः शिवः

सर्वं जानाति देवः इति देवोभवान् । कुपितोमकरध्वजः इति मकरध्वजः कामः । देवः पुरारिः इति पुरारिः शिवः । मधुना मत्तः पिकः इति मधुरसन्नः । पातु वोदवितासुखमिति सामुख्यम् । विभाति गगने चन्द्रः इति चन्द्रः शशी । शिखि चिलभानुः इति चिलभानुर्वह्निः । भाति रथाङ्गम् इति नपुंसकव्यक्त्या रथाङ्गं चक्रम् । स्वरस्तु वेदे एव विशेषप्रतीतिकृत् न काव्यादौ तस्य विषयोऽतोनोदाहृत इति, यथा । दुर्गालङ्कितविग्रहो मनसिजं सम्मोलयंस्तेजसा प्रोद्यद्राजकलो ललाटतरिमा विश्वम्बृतो भोगिभिः । नक्तञ्चेश्वरतेजसो गिरिगुरौ गाढां दृढं धारयन् गामाक्रम्य विभूतिविभूषिततनू राजत्युमाङ्गजः । अत्र प्रकरणेनाभिधया उमावल्लभशब्दस्योमानाम्नी महादेवी तद्वल्लभभानुदेवन्द्रपतिरूपेऽर्थे नियन्त्रिते व्यञ्जनयैव गोरीवल्लभरूपोऽर्थो बोध्यते" सा० द० ।

अभिधायक त्रि० अभि+धा–ण्वुल् । वाचकशब्दे "लिङ्गान्तरा नभिधायकत्वं नित्यस्त्रीत्वमिति का० वृत्तिः २ तत्तच्छब्दोच्चारके च ।

अभिधायिन् त्रि० अभिधत्तेकथयति अभि+धा–णिनि स्त्रियां ङीप् । १ कथके २ शब्दप्रयोक्तरि । "त्वं सुधाचि ! विनैव कञ्चुलिकया धत्से मनोहरिणीं लक्ष्मीमित्यभिधायिनि प्रियतमे तद्दीटिकां संसृजीति "अमरुशतकम् वाचकशब्दे च "प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाभिधायिनः वेदान्ता यदि शास्त्राणि बोद्धैः किमपराध्यते इति ।

अभिधावक त्रि० आभिमुख्येन धावति अभि+धाव–ण्वुल् । आभिमुख्येन वेगेन गन्तरि । [धितुमिच्छायां विवक्षायाम् ।

अभिधित्सा स्त्री अभिधातुमिच्छा अभि+धा–सन्–अ । कथ-

अभिधृष्णु त्रि० अभि+धृष–क्नु । अत्यन्तधर्षके । "तस्माद्ब्रह्मणः पन्थानमभिधृष्णुतम" शत० ब्रा० ।

अभिधेय त्रि० अभिधीयते अभिधाशक्त्या बोध्यते अभि+धा–कर्मणि यत् । वाच्यार्थे सङ्केतयति शब्दार्थे । आविष्करातिशयोभिधेयवत् प्रतीयते" सा० द० "अभिधेया विनाभूतप्रतीतिर्लक्षणोच्यते का० प्र० अन्वयप्रतिपाद्ये च" "इतिप्रयोजनाभिधेयसम्बन्धा" इति सुग्धबोधम् "एतेनाभिधेयञ्च दर्शितम् सा० द० ।

अभिध्या स्त्री अभि+ध्यै–अङ् । १ परधनस्वाजिहीर्षायां, २ जिघृक्षायां, ३ विषयप्रार्थनायां ४ चिन्तने, च । अभिध्यायतेश्चिन्तनार्थत्वात् तथात्वम् "सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजा इति" मनुना आलोचने अभिध्यायतेः प्रयोगात् तस्यास्तथार्थत्वम् । "अभिध्योपदेशाच्च" शा० सू० ।

अभिध्यातव्य त्रि० अभि+ध्या–तव्य । सततचिन्तनीये । "यः पुनरेतं त्रिमात्रेणौमित्येतेन परं पुरुषमभिध्यायीतेति" श्रुत्वा "परमेव ब्रह्माभिध्यातव्यमित्युपदिश्यते" शा० भा० ।

अभिध्यान न० अभि+ध्यै–भावे ल्युट् । १ अभिध्यायशब्दार्थे २ अभितोध्याने च तच्च भिन्नजातीयप्रत्ययानन्तरितोऽविच्छिन्न एकमात्रविषयप्रत्ययसन्तानः । "तदभिध्यानादेवतल्लिङ्गात्" शा० सू० ।

अभिनद्ध त्रि० अभितो नद्धः बद्धः अभि+नह–क्त । सर्वतो बद्धे "यथा सौम्य । पुरुषमभिनद्धात्तमिति" छा० उ० "अभिनद्धाक्षं बद्धाक्षम्" भा० "परिरम्भरुचिं ततिर्जानामभिनद्धा रसमानसारसेन" माघः ।

अभिनन्द पु० अभि+नन्द–घञ् । १सन्तोषे, २प्रतिपाद्यगुणकथनादिनाऽऽनन्दे ३ प्रशंसायाम् ४अल्पसुखे च "योभिरर्चिर्यदन्नः करोति तेऽङ्गारा अभिनन्दाः विस्फुलिङ्गाः छा० उ० "अभिनन्दाः सुखलवाः" भा० । अभिनन्द्यति । अभि+नन्द–णिच्–अच् । ५ सन्तोषके ६ प्रोत्साहनेन प्रवर्त्तके च त्रि० । अभितो नन्दत्यत्र आधारे घञ् । अत्रस्य स्वकलत्रादि गुणप्रशंसनप्रवर्त्तकभ्रान्तिभेदे । तत्र हि स सुखायते । अभितोनन्दः । आत्मनन्दमये परमात्मनि इति वेदान्तिमते । नैयायिकादिमते तु अभितोनन्दः दुःखाभावो यत्र सः । परमात्मनि, सर्वदुःखनुन्नत्वात्तस्य तथात्वम् । भारादिदुःखापनयेऽपि भारादिवाहकानाम् अहं सुखी संवृत्तः इति प्रतीतेर्दुःखाभावेऽपि सुखत्वोपचारदर्शनात् ईश्वरस्य सदा दुःखाभावाच्च तथात्वम् ।

अभिनन्दन न० अभि+नन्द–भावे ल्युट् । १ सन्तोषे । णिच्–ल्युट् । सन्तोषार्थं २ प्रशंसने । कर्त्तरि ल्यु । ३ सन्तोषके प्रोत्साहनार्थं ४ प्रवर्त्तके ५ प्रशंसके च त्रि० । ६ वृक्षभेदे पु० ।

अभिनन्दनीय त्रि० अभिनन्द्यते प्रशस्यते अभि+नन्द–णिच् कर्मणि अनीयर् । १प्रशंसनीये २प्रोत्साहनेन प्रवर्त्तनीये च ।

अभिनन्दित त्रि०अभि+नन्द–णिच्–क्त । १प्रशंसिते २अनुमोदनेन प्रोत्साहिते च ।

अभिनन्दिन् त्रि० अभिनन्दति णिनि । १ सन्तोषिणि । अभिनन्द्यति णिनि । २ अनुमोदनेन प्रोत्साहके । स्त्रियान्तत्वात् ङीप् ।

अभिनन्द्य त्रि० अभिनन्द्यते प्रशस्यते अभि+नन्द्-णिच्-यत् । १ प्रशंसनीये "जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ" रघुः अभि+नन्द्-णिच् ल्यप् । प्रशस्येत्यर्थे अनुमोदनेन प्रोत्साहयेत्यर्थे अव्य० ।

अभिनम्र त्रि० अभिमुखं नम्रः प्रा० स० । आभिमुख्येन नम्रे नते "इमां तटाघातलताञ्च तन्वीं स्तनाभिरामस्तवकाभिनम्राम्" रघुः ।

अभिनय पु० अभि-नी-करणे अच् । १ कृदृतभावव्यङ्ग्ये शरीरचेष्टादौ । भावे अच् । २ अभिनेयपदार्थस्य शरीरचेष्टाभाषणादिभिरनुकरणे "भवेदभिनयोऽवस्थानुकारः स चतुर्विधः । आङ्गिकोवाचिकश्चैवमाहार्यः सात्त्विकस्तथेति" नटै रङ्गादिभिः रामयुधिष्ठिरादीनामवस्थानुकरोऽभिनयः सा० द० । नर्त्तकीरभिनयातिलङ्घिनीति" रघुः । नानाभिनयसम्बन्धान् भावयन्ति रसान् यतः" सा० द० तदभिनयभिवाक्लिष्टैर्नानाभावतन्तुत नूतनपल्लवाङ्कुलीभिः माघः । "अङ्गैराङ्गिकवेद्यैर्तं हृद्येनार्थं प्रकाशयेदित्युक्तदिशा व्यङ्ग्यचेष्टामतनुतेत्यर्थः । "शौरिरित्यभिनयादिवोद्भवैः" माघः । अभिनयति बोधयत्यर्थमत्र आधारे अच् । शरीरचेष्टादिभिर्दृश्यपदार्थज्ञापके २ रूपकादौ दृश्यकाव्ये ।

अभिनव पु० अभि+नु-भावे अप् । आनुकूल्यार्थस्तवे । अभिमतः प्रशस्तः नवः प्रा० स० । प्रत्यग्रोद्भूते नवीने त्रि० । "रथाङ्गभर्त्रेऽभिनवं वराय" माघः । "अभिनवा इव पत्रविशेषकाः" रघुः ।

अभिनवतामरस न० "अभिनवतामरसं ननजाद्रुयं" इति उक्ते द्वादशाक्षरपादके १ वृत्तभेदे । २ नूतनपद्मे च ।

अभिनवोद्भिद् (द्) पु० अभिनवमुद्भिद्य जायते उद्+भिद्-क्विप् क वा । अङ्कुरे । [दृढबन्धने च ।

अभिनहन न० अभि+नह-भावे ल्युट् । १ अभितो बन्धने

अभिनिधन त्रि० अभिगतं निधनम् अत्या० स० । १ नाशाभिमुखतां प्राप्ते नाशोन्मुखे । निधनस्य समीपे वाभिमुखम् अव्ययी० । २ नाशावसानयोराभिमुख्ये अव्य० तत्र पाठे ३ सामभेदे च । "आभीकमभिनिधनमाभीषवानि" कात्या० २५,१४,१५, "आभीकाद्यानि सामानीति" कर्क० ।

अभिनिधान अभि+धा-भावे ल्युट् । १ आभिमुख्येन स्थापने । "संस्कृत्य पुरुरवा दत्तमभिनिधानतया" कात्या० ५,१,२१ ।

अभिनिर्मुक्त पु० अभितः सर्वतः सायन्तनकर्म्मणा निर्मुक्तः । १ सूर्य्यास्तकाले निद्रावशात् त्यक्ततत्कालकर्त्तव्यकर्म्मणि । "सूर्य्येण ह्यभिनिर्मुक्तः शयानोऽभ्युदितश्च यः प्रायश्चित्तमकुर्वाणोयुक्तः स्यात्कृतेनसा" मनुः एतद्वचनस्य ब्रह्मचारिप्रकरणत्वात् ब्रह्मचारिण्येवभूतेऽस्य रूढिः ।

अभिनिर्य्याण न० अभिलक्ष्य रिपून् निर्य्याणम् युद्धार्थं निष्क्रमः । रिपुजिगीषया सैन्यैः सह निष्क्रमणे ।

अभिनिर्वृत्त त्रि० अभि+निर्+वृत-क्त । १ निष्पन्ने ।

अभिनिर्वृत्ति स्त्री० अभि+निर्+वृत-क्तिन् । १ निष्पत्तौ ।

अभिनिवर्त्त पु० अभि+नि+वृत-भावे घञ् । १ अभितोनिवृत्तौ । यत्नः । अभिनिवर्त्तम् । पुनः पुनर्निवृत्त्यर्थे अव्य० । "पुनरभिनिवर्त्तन्ते जीवलोकस्तथाहतवत् मासद्यान्योन्यमभिनिवर्त्तन्ते" यत० ब्रा० ।

अभिनिविष्ट त्रि० अभि+नि+विश-कर्त्तरि क्त । १ अभिनिवेशयुक्ते २ चिन्तयाव्यग्ये ३ चिन्तनाय प्रवृत्ते च "निन्दाक्षेपापमानादेरभर्त्सोऽभिनिविष्टता" सा० द० ।

अभिनिवेश पु० अभितोनिवेशः घञ् । अवश्यमिदं कर्त्तव्यमित्याग्रहसमन्विते मनःसंयोगभेदे योगशास्त्रप्रसिद्धे मरणभीतिजनके अज्ञानविशेषे, अनित्यैरपि देहादिभिर्वियोगो मा भूदिति मरणनिवारणार्थे व्यापारे च । योगशास्त्रे हि अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः दर्शिताः क्लिश्यन्ति कर्मतत्फलप्रवर्त्तकाः सन्तः पुरुषं दुःखाकर्षन्ति क्लेशाः पञ्च । उत्तरेषामविद्याप्रसवत्वमपि तत्रोक्तम् । "अविद्याक्षेत्रमुत्तरेषामप्रसुप्ता तनुविच्छिन्नोदाराणाम्" पा० सू० उत्तरेषामस्मितादीनामविद्या क्षेत्रं प्रसवभूमिः तेषाञ्च अप्रसुप्ता विवेकख्यात्यभावेनादग्धतया शक्तिरूपेणावस्थानात् अतएव ते पुनरुद्भवन्ति ते च क्रियायोगिनां तनवः, विषयसङ्गिनां विच्छिन्ना उदाराश्च भवन्ति । यथा यत्र रागस्तत्र क्रोधो विच्छिन्नः स्फुरतां राग उदारः । एवं यत्र क्रोध उदारस्तत्र रागोविच्छिन्न एवं रागादयः विच्छिन्नोदाराभूत्वा पुरुषपशुं क्लेशयन्ति एवं च क्लेशा अविद्यामूलाः अविद्यायाः पुरुषविवेकख्यात्यानिवृत्तौ निवर्त्तन्ते । एवं सामान्यतः क्लेशानुक्त्वाऽभिनिवेश उक्तः "स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः" इति । विदुषोमूर्खस्य वा जन्तुमात्रस्य यो मरणत्रासः सोऽभिनिवेशः यथा मूर्खस्य यद्दं सदा भूयासं न भूयेयमिति रूढः त्रासस्तथा विदुषोऽपि दृश्यते यतः स्वरसवाही सः, पूर्वजन्मनु अनुभवजन्यवासनासंघः स्वरसः तेन वहति प्रवर्त्तत इति स्वरसवाही । ते चाविद्यादयः पञ्च क्रमेण तमोमोहमहामोहतामिस्रान्धतामिस्रसंज्ञाः । सांख्यकारिकायाम् पञ्च विपर्य्ययभेदानुपन्यस्य । "भेदस्तमसोऽष्टविधो-

मोहश्च दशविधोमहामोहः । तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः" ॥ अन्धतामिस्रः अभिनिवेशस्तासः तच्चेत्यनेनाष्टादशधेत्यनुषज्यते । देवाः खल्वणिमादिकमष्टविधमैश्वर्यमासाद्य दश शब्दादीन् भुञ्जानाः शब्दादयोभोग्यास्तदुपायाश्चाणिमादयोऽप्राकाम्यसुरादिभिर्मा स उपधानिषतेपि विभ्यति । तदिदं भयमभिनिवेशोऽन्धतामिस्रोऽष्टादशविधयित्वात् अष्टादशधेति" सा०कौ०। २ आसक्तौ च "अथानुरूपाभिनिवेशतोपिणा" कुमा० ।

अभिनिवेशिन् त्रि० अभि+नि+विश–णिनि स्त्रियां ङीप् । १ आग्रहवति २ अनुरागवति च ।

अभिनिष्कारिन् त्रि० अभि+निस्+कृ–णिनि स्त्रियां ङीप्। अभितोनिःशेषेण कारिणि "कृताकृतो बलिनोऽभिनिष्कारिणः प्रजाम्" अथ० १०,१,२१ ।

अभिनिष्क्रम पु० अभि+निस्+क्रम–घञ् । आभिमुख्येन निर्गतौ ख्युट् । अभिनिष्क्रमणमण्डल न० । [निर्गते ।

अभिनिष्क्रान्त त्रि० अभि+निस्+क्रम–कर्त्तरि क्त । अभि-

अभिनिष्ठान पु० अभि+स्था–घञ् शब्दसंज्ञायां षत्वम् । १विसर्जनीये । "नाम चार्के ददुर्घोषवदाद्यन्तस्थमभिनिष्ठानान्तम्" मुग्धबोधव्याकरणम् । २ अवरमात्रे च शब्दमात्रे ष्ठ न षत्वम् । अभिनिस्थान इत्येव । [निर्गमे ।

अभिनिष्पतन न० अभि+निस्+पत–ल्युट् । आभिमुख्येन

अभिनिष्पत्ति स्त्री अभि+निस्+पद–क्तिन् । १ सम्यक्तौ सिद्धौ यस्य यथारूपमुचितं तथारूपेण तस्य भवने २उत्पत्तौ च ।

अभिनिष्पन्न त्रि०अभि+निस्–पद–क्त । १सम्पन्ने २सिद्धे च ।

अभिनीत त्रि० अभिनीयते स्म अभि–नी क्त। न्याये, १युक्ते "अभिनीततरं वाक्यमित्युवाच युधिष्ठिरः" भा०शा०प० । २भूषिते ३अतिसंस्कृते ४पूजिते ५क्रोधने, यस्याभिनवः रूपाद्यनुकरणं वेषादिभिः कृतस्तच्छिन् ६ आभिमुख्येन ७प्रापिते च "मितार्थमभिनीतस्थम्" रामा० ।

अभिनीति स्त्री आनुकूल्यार्था युक्तिः । १ प्रियवाक्यादियुक्तायुक्तौ । "सान्त्वपूर्व्वमभिनीतिहेतुकम्" किरा०। २अभितः प्रापणे च रूपादेर्वेषादिना ३ अनुकरणे च । नीतेरभिमुख्यम् अव्ययी० । ४ नीत्याभिमुख्ये अव्य० ।

अभिनेतव्य त्रि० अभि+नी–कर्म्मणि तव्य । देहचेष्टादिना १अनुकार्य्ये आभिमुख्येन २ प्रापणीये च । भावे तव्य । आवश्यकाभिनये न० । [रङ्गकरणकर्त्तरि नटादौ ।

अभिनेत्र त्रि० अभि+नी–ष्ट्रच् स्त्रियां ङीप् । नाटके देहादे-

अभिनेय त्रि० अभि+नी–कर्म्मणि यत् । १ देहादिचेष्टादिना १अनुकार्य्ये आभिमुख्ये २प्रापणीये च ।

अभिन्न त्रि०न भिन्नः । १एकरूपतापाप्ते २अविदलिते ३अविदारिते च "भूयोभूयोरविभिदस्य वईयन्नभिन्ने खिल्ये" ऋ० ६,२८,२ "अभिन्ने शत्रुभिरभेद्ये" भा० । "न भिन्नां कृष्णामुपदध्यात् आर्च्छति वा एषा या भिद्यते" इत्युपक्रम्य "नाभिन्नां परास्येदिति" शत०ब्रा० । ४अभग्ने दृढे, "अभिन्नेन चरेत्" कात्या० २६,७,४८ "अभग्नेनदृढेन" कर्क० ।

अभिन्नपुट पु० अभिन्नं न विदलितं पुटं यस्य । नवपल्लवे "दूर्व्वायवाङ्कुरश्चत्यमभिन्नपुटोत्तरान्" रघुः ।

अभिन्यास पु० अभिन्यस्यते अन्तःस्थ आत्मा बहिष्परत्वेन अभि+नि–अस–करणे घञ् । ज्वरभेदस्य, "ग्रसन् निपतितः शेते प्रलापोपद्रवायुतः । तमभिन्यासमित्याहुर्हतौजसमवापरे" सुश्रुतोक्ते ज्वरभेदे "निद्राक्षं तमभिन्यासं क्षीणमेनं हतौजसमिति" सुश्रुतः ।

अभिपत्ति स्त्री अभि+पद–क्तिन् । निष्पत्तौ ।

अभिपन्न त्रि० अभि+पद–क्त । १ अपराधवति, २ आपन्नते, ३स्वीकृते, ४आभिमुख्येन गते च ।

अभिपित्व न० अभि+पा–भावे कित्वन् । १अभिपतने २आगमनकाले "विश्वं जगदभिपित्वे मनीषा" य० २२,२४, "अभिपित्वे अभिपतने आगमनकाले" वेददी० । ३अभिमतप्राप्तौ "शुद्धमिहाभिपित्वम् करते स्थानः" ऋ० ४,१६,१, "अभिपित्वमभिमतप्राप्तिम्" भा० । ४ अभितः प्राप्तौ "तस्येदिन्द्रो अभिपित्वेषु रण्यति" ऋ० १,८३,६, "अभिपित्वेषु अभिप्राप्तिषु" भा० कृष्णाभिपित्वं करतः कृष्णोयतः ऋ०१०,४०,२, "इमामेव ऋचमभिप्रेत्य "क्व स्विदाढ्यो भवथः क्व दिवा क्वाभिप्रापि कृरुथ" इति याज्ञेन अभिप्राप्तिपरत्वमस्य सूचितम् । कर्म्मणि कित्वन् । ५अभिपतनीये, "नोविश्वं जगदभिपित्वे मनीषा" १,१८६,१, "अभिपित्वे अभिपतनीये" भा० ६अभिगन्तव्ये, "कृरिभिरभिपित्वे सजोषाः" ऋ० १,१८६,६, "अभिपित्वे अभिगन्तव्ये" भा० ७अभिप्राप्ते "परक्षीभाशुचनेदभिपित्वं जगाम" ऋ० ७,१८,६, "इच्चाविन्मे अभिपित्व आरात्" ऋ० ८,५,२१, अभिपित्वे अभिप्राप्ते भा० । ८आसन्नकाले "कच्चीवा अभिपित्वे अङ्गाम्" ऋ० १०,१२६,२ "अभिपित्वशब्दस्तासन्नकालवाचीति" भा० ९अभिप्राप्तकाले "अभिपित्वे मनवे शास्यः" ऋ० १,१८६,७, "अभिपित्वे अभिप्राप्तकाले" भा० ।

अभिपुष्प पु० अभितः पुष्पमस्य । १ सर्वतः पुष्पवति वृक्षे ।

अभिपूरण न० अभ्यासेन अभितो वा पूरणम् प्रा० स० । अभ्यासेन सर्वतः पूरणे "अभिप्रायाभ्यासेनाभिपूरणम्" काल्या० २४,१,२२, ।

अभिप्रज्ञा स्त्री० अभितः सर्वतः प्रज्ञा चिन्तनम् । सततचिन्तने "तमसनायापिपासे अजूतामावाभ्याभिप्रजानीहि" ऐ० भा० अभिप्रजानीहि चिन्तयेति व्याख्यानात्तस्याप्तार्थत्वम् ।

अभिप्रणयन न० अभितः सर्वतः प्रणयनं संस्कारः । वेदविधिना अग्न्यादेः संस्कारे ।

अभिप्रणीत पु० अभितः प्रणीतः । सर्वतः वेदविधिना संस्कृते वह्न्यादौ "जज्वाल लोकस्तिसृषे स राजा यथाध्वरे वह्निरभिप्रणीतः" भट्टिः ।

अभिप्रमुर् स्त्री० अभिप्रमूर्च्छति आकृतिदानेन वह्निरनया । १ अभि+प्र+मूर्च्छ करणे क्विप् । जुह्वाम् ।

अभिप्रवर्त्तन न० अभितः प्रवर्त्तनम् । १सर्वतः प्रवृत्तौ २सर्वतः प्रवृत्तिसम्पादने च "त्वक्खादोरोमहर्षश्च खेदस्त्राभिप्रवर्त्तनम्" सुश्रुतः ।

अभिप्रातर् अव्य० अत्यन्तं प्रातः । १ अतिप्रत्यूषे "अथाभिप्रातरेव स्यालोपाकाटताञ्चमिति" शत० ब्रा० ।

अभिप्राप्ति स्त्री० आभिमुख्येन प्राप्तिः प्रा० स० । १ आभिमुख्येन प्राप्तौ अभिपित्वयशब्दे उदाहृतं निरुक्तवाक्यम् ।

अभिप्राय पु० अभि+प्र+इण-भावे अच् । १ आशये । "तेषां स्वमभिप्रायमुपलभ्य पृथक् पृथक्" मनुः । "सर्वानभिप्राय-कृतान् भाव्यांश्चभत कौरव" भा० उ० प० अभिप्रैति कर्त्तरि पचा० अच् । २ अभिगामिनि "स्वरितञित आत्मनेपदं कर्त्रभिप्राये क्रियाफले" पा० कर्त्रभिगामिनीति व्याख्याकारः मणिकृता तु एतत्सूत्रं कर्तुरीप्सिततमपरतया व्याख्यातम् तत्रापूर्वशब्दे २५० पृष्ठे दर्शितम् । अभिप्रेयते पुरुषार्थक ङिभिः आभिमुख्येन प्रत्ययैरभिप्रैति जगदस्मिन् वा कर्त्रभि आधारे वा अच् । ३विष्णौ "अभिप्रायः प्रियार्होऽर्हः" इति वि० सह० ।

अभिप्री वि० अभिप्रीणाति अभि+प्री-क्विप् । १ सर्वतस्तर्पके "तथं वाता अभिप्रियस्तुयं मर्धन्ति सिन्धवः" ऋ० ८,२१,२

अभिप्रेत त्रि० अभि+प्र+इण-क्त । १ अभिलषिते "अभिप्रेतार्थसिद्धिर्मङ्गलम् "कामाय तु भवेत् काम्यमभिप्रेतार्थसिद्धये" भवि० पु० ।

अभिप्रेत्य अव्य० अभि+प्र+इण-ल्यप् । १ उद्दिश्येत्यर्थे । "यदभिप्रेत्य धात्वर्थस्तत्सम्प्रदानमिति" व्याकरणान्तरम्

अभिप्रेप्सु त्रि० अभि+प्र+आप-सन-उ । प्राप्तुमिच्छौ "सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः" "ऐन्द्रं स्थानमभिप्रेप्सुः" इति च मनुः ।

अभिप्रोक्षण न० अभितः प्रोक्षणं संस्कारभेदः । १ जलादिना सर्वतः सेचनरूपे वैधे संस्कारे ।

अभिप्लव पु० अभिप्लवन्ते स्वर्गमभिगच्छन्ति अभि+प्लु-गतौ अच् । १ प्राजापत्ये आदित्ये । "अथादित्याच आङ्गिरसश्च उभये प्राजापत्या अस्पर्द्धन्त वयं पूर्वे स्वर्गं लोकमेष्यामो वयं पूर्वे इति । आदित्यास्तुर्भिः स्तोमैश्चतुर्भिः पृष्ठैश्चतुर्भिः सामभिः स्वर्गं लोकमभ्यप्लवन्त तस्मादभिप्लवाः आदित्याः" शत० ब्रा० । वर्षसाध्ये गवामयने प्रत्येकमासीयचतुर्विंशतिदिवसेषु चतुःषट्कात्मकेषु चतुर्षु षडहेषु विशेषः गवामयनशब्दे वक्ष्यते । "अभिप्लवः षडहः षड्यहानि भवन्त्यभिप्लवः" इति शत० ब्रा० । "अभिप्लवं पूर्वं पुरस्ताद्विषुवत् उपयन्ति चतुर्विंशेन महाव्रतमभिप्लवेन परमभिप्लवमिति" च शत० ब्रा० । २षडहसाध्ये स्तोमादिपाठसाधनके गवामयनाङ्गयागभेदे च । ४उपप्लवे-उपप्लवे ५सर्व्वतः प्लवने च । अभिप्लवे विहितः ठक् । आभिप्लविकः उक्तषडहेषु विहिते सामादौ । [भिक्षे च ।

अभिप्लुत त्रि० अभि+प्लुत-क्त । १ सर्वतोव्याप्ते २अभितः

अभिभङ्ग त्रि० अभितोभङ्गोयस्मात् । १ भङ्गहेतौ "अभिभवेऽभिभङ्गाय वन्वते" ऋ० २,२१,२, अभितोभङ्गः । २सर्वतोभङ्गे पु० । अभितोभङ्गो यस्य । ३भङ्गयुक्ते त्रि० ।

अभिभव पु० अभि+भू-अप् । पराजये, तिरस्कारे, अनादरे, च । "रघोरभिभवाशङ्कि चुक्षुभे द्विषतां मनः" रघुः "अलभ्यशोकाभिभवेयमाकृतिर्विमानना शुभ्रु! कृतः पितुर्गृहे" कु० "अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः" गीता । रोगादिना गात्रादिजड़ीभावे "दृषसिक्त इवाङ्कुरो दृढिकघटैर्विहि स्थानं गमागमौन स्तः । न हृतं न चापि नष्टं न रोगग्लानिर्नचाभिभवः" षट् पञ्चाशिका ।

अभिभवन न० अभि+भू-ल्युट् । १ अभिभवे रोगादिनाज्ञानरोधे "जरया चाभिभवनं व्याधिभिश्चोपपीड़नम्" मनुः

अभिभा स्त्री० अभि+भा-अङ् । १ अभिभवे "मा त्वा काचिदभिभा विश्वावित्" ऋ० २,४२,१ । "अभिभा अभिभवः" भा० ।

अभिभार त्रि० अभिर्भर्त्सार्थे अतिशयितो भारो यस्य । अतिभारान्विते "चतुरुपस्थति तद्वज्वमभिभारं करोति तेन वज्वेषाभिभारेणेमा लोकान् प्रभिनत्ति" शत० ब्रा० ।

अभिभावक त्रि० अभि+भू-ण्वुल्। १ अभिभवकर्त्तरि २तिरस्कारके ३पराजेतरि ४जड़ीभावकारके च।

अभिभाविन् त्रि० अभिभवति अभि+भू-णिनि स्त्रियां ङीप्। १तिरस्कारके २ पराजेतरि "सर्वातिरिक्तसारेण सर्वतेजोऽभिभाविना" रघुः। ह्रच्। अभिभवितायत्व।

अभिभावुक त्रि० अभि+भू-उकञ्। १ तिरस्कारके २पराजेतरि ३जड़ीभावकारके च। [हस्वेन कथने।

अभिभाषणा न० आभिमुख्येन भाषणम् प्रा०स०। १ आभि-

अभिभाषिन् त्रि० आभिमुख्येन भाषते अभि+भाष-णिनि स्त्रियां ङीप्। आभिमुख्येन भाषिणि। "प्रसन्नमुखरागं तं स्मितपूर्व्वाभिभाषिणम्" रघुः।

अभिभू त्रि० अभिभवति अभि+भू-क्विप्। १ अभिभावके २ तिरस्कारके "अभिभूवे अभिभवित्रे" भा०। "अभिभूते अभिभवित्रे" भा०।

अभिभूत त्रि० अभि+भू-क्त। १ किं कर्त्तव्यमिति ज्ञानशून्ये, २पराभूते, ३व्याकुले च। "सञ्चरेणाभिभूत" इति ज्यो०।

अभिभूति स्त्री अभि+भू-क्तिन्। १ पराभवे २अवज्ञायाञ्च अभिभवति कर्त्तरि क्विच्। ३अभिभावके त्रि०। "गायत्र्यै छन्दसे अभिभूत्यै स्वाहा" कात्या०२५२। "यस्य पूर्वी दीर्घनिचलमभिभूति मुष्णात्" ऋ० ४,२१,१। अभिभूति अभिभावुकं बलम्" भा०। अतः संपदाद्यभिभूत आदर" ऋ० १,५२,२। "अभिभूते, शत्रूणामभिभवितः" भा०।

अभिभूय न० अभि+भू-भावे 'भुवो भावे' पा० क्यप्। अभितोभावे "अभिभूयाय त्वा राष्ट्रम्" अथ० १९,३७,२। अभि+भू-ल्यप्। तिरस्कृत्येत्यर्थे अव्य०।

अभिभूवन् त्रि० अभि+भू-क्वनिप् स्त्रियां ङीप् च। अभिभावके "समर्जैषमिमा अहं सपत्नीरभिभूवरीः" ऋ० १०,१५९,९।

अभिमत त्रि० अभि+मन-कर्म्मणि क्त। १अभिमानविषयीभूते ममेदमित्याकारमिथ्याज्ञानविषये २सम्मते ३आदृते ४अभीष्टे च "अभिमतफलसंधी चारु पुल्कोर बाहुः" भट्टिः। भावे क्त। ५ अभिमाने मिथ्याज्ञाने न०।

अभिमति स्त्री अभि+मन-क्तिन्। १अभिमाने, मिथ्याज्ञाने २आदरे, ३सम्माने, ४अभिलाषे च।

अभिमनस् त्रि० अभिमुखं मनो यस्य। कर्त्तव्यप्रवणमनस्के। भ्वगा० क्यङ् सलोपश्च अभिमनायते। "कान्तिं नाभिमनायेव कोवा स्थाणुसमोऽपि ते" भट्टिः।

अभिमन्तव्य त्रि० अभि+मन-कर्म्मणि तव्य। ज्ञातव्ये "नसा स्त्रीत्वभिमन्तव्या यस्यां भर्त्ता न रज्यति" पुरा०। २अभिमानेन विषयीकर्त्तव्ये च।

अभिमन्तृ त्रि० अभि+मन-तृच् स्त्रियां ङीप्। १अभिमानिनि "मनसश्चाप्यहङ्कारमभिमन्तारमीश्वरम्" मनुः। २सम्मानकर्त्तरि च।

अभिमन्तोस् अव्य० अभि+मन-तोसुन्। अभिमन्तुमभिमानेन विषयीकर्त्तुमित्यर्थे "एष वै रुद्रियोऽग्निः सङ्कल्पमीश्वरः सपुत्रं सपशुमभिमन्तोः" शत० ब्रा०।

अभिमन्त्र न० अभि+मन्त्र-भावे अच्। १ "मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन संस्मरेत्। शेषिणं तन्मना भूत्वा स्वादेतदनुमन्त्रणम् एतदेवाभिमन्त्रस्य लक्षणं वीप्सयाधिकम्" मीमांसोक्ते मन्त्रपाठपूर्व्वकेज्यादिसंस्कारभेदे। ल्युट्। अभिमन्त्रणमस्यत्न०। "अभिमन्त्रणशेषो वा विशेषोपदेशात्" कात्या० ६,१,१६, "अभिमन्त्रणमुत्तरैः" कात्या०६,८,२१।

अभिमन्त्र्य अव्य० अभि+मन्त्र+ल्यप्। १ अभिमन्त्रणं कृत्वेत्यर्थे

अभि(धि)मन्थ पु० अभि(धि)मथ्नाति नेत्रम्। "इक्षुरेतैरभिष्यन्दैर्नराणामक्रियावताम्। तावन्नस्यभि(धि)मन्थाः स्युर्नयने तीव्रवेदने" इति माधवोक्ते १ नेत्ररोगभेदे भावे घञ्। २भ्रमन्थने। अव्यये०। मन्थदण्डस्याभिमुख्येऽव्य०।

अभिमन्यु पु० लक्षणसुभद्रागर्भजाते अर्জ্জুনपुत्रे। स च युद्धे षड्भिः महारथैः परिहृत्य हतः। तत्कथा। "एतत्कुरु महेष्वास! राधेय! यदि शक्यसे। अथैनं विमुखीकृत्य पश्चात् प्रहरणं कुरु। सधनुष्को न शक्योऽयमपि जेतुं सुरासुरैः। विरथं विधनुष्कञ्च कुरुष्वैनं यदीच्छसि तदाचार्य्यवचः श्रुत्वा कर्णो वैकर्त्तनस्तदा। अक्षतो लघुहस्तस्य पृषत्कैर्द्वैतुराच्छिनत्। तस्याश्वानवधीद्भोजो गौतमः पार्ष्णिसारथी। शेषास्तु छिन्नधन्वानं शरवर्षैरवाकिरन्। त्वरमाणास्तराकाङ्क्षे विरथं षण्महारथाः। शरवर्षैरकरुणा बालमेकमवाकिरन्। स छिन्नधन्वा विरथः खं धर्ममनुपालयन्। खड्गचर्मधरः श्रीमानुत्पपात विहायसा। मार्गैः स कौशिकादीँश्च लाघवेन बलेन च। आर्জুनिर्व्यचरद्व्योम्नि श्येनं वै पक्षिराडिव। मध्येव निपतत्येष सासिरित्यूर्द्धदृष्टयः। विव्यधुस्तं महेष्वासाः समरे छिन्नदर्शिनः। तस्य द्रोणोऽच्छिनन्मुष्टौ खड्गं मणिमयत्सरुम्। क्षुरप्रेण महातेजास्तरमाणः सपत्नजित्। राधेयो निशितैर्बाणैर्ध्वजमस्य चोत्तमम्। वृत्तिचर्मेषुपूर्णाङ्गः सोऽन्तरीक्षात् पुनः क्षितिम्। आस्थितश्चक्रुरस्यश्च द्रोणं क्रुद्धोऽभ्यधावत" इति "विचेता न्यपतद्भूमौ सौभद्रः परवीरहा। एवं

विनिहतो राजन् एको बहुभिराहवे" भा०द्रो०प० ॥

अभिमर पु०आभिमुख्येन क्षिपतेऽत्र अभि+मृ-आधारे अप्। १युद्धे। करणे अप्। २भये, अभिक्षिपते यस्मात् अपादाने अप्। ३ मारणव्यापारे वधे ४ बन्धने च अभिमुखीभूय क्षिपते कर्त्तरि अच्। ५ खड्गे ६ धनाशया प्राणनिरपेक्षतया हस्तिनं व्याघ्रं वाऽभियोद्धुमुद्यते च।

अभिमर्द्द पु० अभि+मृद्-भावे घञ्। १चूर्णीकरणे २निष्पीड़ने च। आधारे घञ्। ३ युद्धे, ४ मद्ये च। कर्त्तरि अच्। ५ मर्द्दनकर्त्तरि त्रि०।

अभिमर्द्दन न० अभि+मृद्-भावे ल्युट्। १ आरम्भकर्मयोगनाशनेन चूर्णीकरणे २निष्पीड़ने च।

अभिमर्श(र्ष) पु० अभि+मृश(र्ष) भावे घञ्। १ स्पर्शे धर्षणे च "पराभिमर्शेन तवास्ति कः करमिति" कुमा०। "कृताभिमर्शा(र्षा)मनुमन्यमानः सुतां त्वया नाम सुनिर्विमान्य" भट्ट०। "परदाराभिमर्शे(र्षे)षु प्रहृत्तान् नृन् महीपतिः" मनुः।

अभिमर्श(र्षि)क त्रि० अभि+मृश(र्ष) ण्वुल्। १स्पर्शकर्त्तरि २धर्षणकर्त्तरि च "न दुष्टः कश्चिदथासीत् परदाराभिमर्शकः" रामा०।

अभिमर्शन(र्षण) न० अभि+मृश(र्ष)-भावे ल्युट्। १ स्पर्शे "नीवीस्तनप्रावरणस्त्रीकेशाभिमर्शनम् (र्षणम्)" या०। "यः पुनः परनारीपरिधानसन्धिप्रदेशकुचप्रावरणजघनमूर्द्धकचादिस्पर्शनं साभिलाषं इवाचरति" मिता०। "सदोऽभिमर्शनम्(र्षणम्) काल्या० ६,८,१६, "तूष्णीं पिण्डनादीनां करणाभिमर्शन(र्षण)क्षत्तक्षधूपनप्रदहनोद्धरणावलेचनानि" काल्या० २६,१,२७ धर्षणे च "परदाराभिम(र्ग)र्षणम्" स्मृतिः।

अभिमाति त्रि० अभि-मेङ् कर्त्तरि क्तिन् न ह्रस्वम्। घातके। "विष्णोः क्रमोऽस्यभिमातिहा"यजु०१२,५, "अभिमातिः घातकः" वेददी०। २शत्रौ पु० हेम०। "अग्ने! सहस्व पृतना अभिमातीरपास्य" य० ६,३७, अभिमातिः शत्रुरुच्यते स्त्रीत्वमार्षम् अभिमातीन् शत्रून्" वेददी०।

अभिमातिन् पु० अभिमातमनेन अभि+मेङ्-भावे क्त वेदे षत्वं न ह्रस्वम् दृष्टा० इन्। शत्रौ। "बाधते विश्वमभिमातिनम्" ऋ० १,८५,३ "अभिमातिनम् शत्रुम्" भा०।

अभिमातिषाह् त्रि० अभिमातिं रिपुं सहते सह-खिन् वेदे षत्वम्। रिपुजयिनि "तद्वीरासो अभिमातिषाहः ऋ०६,७,२, "अभिमातिषाहः शत्रूणामभिभवितारः" भा०

अभिमातिषाह त्रि० अभिमातिं रिपुं सहते सह-अच् उप०स० वेदे षत्वम्। रिपुजयिनि। "अभिमातिषाहोगवेषणः सहमान उद्भित्" अथ०५,२०,११।

अभिमान पु० अभि+मन-घञ्। १ आत्मन्युत्कर्षारोपे, २ मिथ्यागर्व्वे-बलादिदर्पे, ३ प्रणये, ४ हिंसायाम्। ५गर्वमात्रे "संकल्पयोनेरभिमानभूतम्" कुमा० ६ईश्वरज्ञाने। "अनात्तस्य चाभिमानसामर्थ्यात्" कात्या०६,५,१२ "अनात्तस्य अनात्तरसस्य सरसस्यैव सोमस्य सोमाभिमानसामर्थ्यात् सोमबुद्धिसामर्थ्यादिति सोमोयमिति बुद्धिरनात्तरसे अनभिषुते एव सोमे नाभिषुते" कर्क०। ७मिथ्याज्ञाने "अभिमानेन मानोमे जातिदोषेण वै महान्" भा० शा०प०। उत्साहादिसमुद्बोधः साधारण्याभिमानतः" सा०द०। मिथ्याज्ञानञ्च तदभाववति तत्प्रकारकं ज्ञानं यथा देहे आत्मत्वबुद्धिः आत्मनि च असतोऽत्युत्कर्षस्य ज्ञानम्। शुक्तिकायां रजतज्ञानम् मूर्खस्य पाण्डित्याभिमान इत्यादि। अभिमानश्चात्मधर्म इति वैशेषिकादयः। अन्तःकरणधर्म्म इति पातञ्जलादयो वेदान्तिनश्च। तत्र विपर्य्यासज्ञानमविद्या सा च बुद्धिधर्मः गर्व्वात्मकज्ञानम् अहङ्कारस्य वृत्तिभेदः। अहङ्कारश्चाभिमानवृत्तिकमन्तःकरणद्रव्यम्" सां०प्र०भा०। अभिमानोऽहङ्कारः सा०सू० "अभिमानोऽहङ्कारसर्गात् द्विविधः प्रवर्त्तते सर्गः" सा०का० अभिमानोऽहङ्कारः यत् खल्वालोचितं, मतञ्च तत्राहमधिकृतः शक्तः खल्वहमत्र, मदर्थाः एवामी विषयाः, मत्तोनान्योऽत्राधिकृतः कश्चिदस्यतोऽहमस्मीति योऽभिमानः सोऽस्याधारणव्यापारत्वादहङ्कारः तमुपजीव्य हि बुद्धिरध्यवस्यति कर्त्तव्यमेतन्नयेति" त०कौ०। अन्तःकरणञ्च वृत्तिभेदात् त्रिविधमिति साङ्ख्यादयः" "मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम्। संशयो निश्चयोगर्वः स्मरणम् विषया इमे" इति चतुर्विधवृत्तित्वेन चतुर्विधं वेदान्तिनः स्वीचक्रुः। "न हि धनिनो दरिद्रस्य धनाभिमानिनो धनापहारनिमित्तं दुःखं दृष्टमिति तस्यैव प्रव्रजितस्य धनाभिमानरहितस्य तदेव धनापहारनिमित्तं दुःखं भवति। न हि कुण्डलिनः कुण्डलित्वाभिमाननिमित्तं सुखं दृष्टमिति तस्यैव कुण्डलविवृक्तस्य कुण्डलित्वाभिमानहीनस्य तदेव कुण्डलित्वनिमित्तं सुखं भवति" भा०भा०। अभितोमानः। दम्भहङ्कारसाम्यास्याभेदे। "विप्रलम्भोऽथ सम्भोग इत्येष द्विविधोमतः स

च पूर्व्वरागमानप्रवासात्मकचतुर्द्धा स्यात्। मानः कोपः स तु द्वेधा प्रणयेर्ष्यासमुद्भवः द्वयोः प्रणयमानः स्यात् प्रमोदे समहत्यपि" सा०द० अधिकं मानशब्दे। ६वैर-निर्यातने, "अभिमानधनस्यगतवैरः" किरा०। अभिमानेन निर्वृत्तः ठक्। आभिमानिक अभिमानसाध्ये त्रि०।

अभिमानित त्रि० अभिमानोगर्वोजातोऽस्य इतच्। जात-गर्व्वे १जाताभिमाने अभि+मन+णिच्-आधारे क्त। २अभिमानसाधने मैथुने सुरते न०।

अभिमानिन् त्रि० अभि+मन-णिनि स्त्रियां ङीप्। १गर्व-युक्ते २प्रणयकोपादियुक्ते च सौम्यस्य मनोः १पुत्रभेदे पु०। "तरङ्गभीरुर्वप्रश्च तरस्वानुग्र एव च अभिमानी प्रवीरश्च जिष्णुः संक्रन्दनस्तथा। तेजस्वी सबलश्चैव सौम्यस्यैते मनोः सुताः, हरिवं०। ३मिथ्याज्ञानयुक्ते त्रि०। "अभिमानिव्यप-देशस्तु विशेषानुगतिभ्याम्" शा०सू०। "यतोभिमानि-व्यपदेश एषः। स्तदाद्यभिमानिन्योवागाद्यभिमानिन्यश्चेतना देवता वदनसंवदनादिषु चेतनोचितेषु व्यवहारेषु व्यप-दिश्यन्ते" शा०भा०।

अभिमानुक त्रि० अभि+मन-वा० उकञ्। अभिमानशीले अभिमानश्च प्रागुक्तः बाधितुं शक्ते च। "अनक्षा एवस्यु-रभिमानुकोरुद्रः पशून्तृस्यात् यदक्षात्" शत०ब्रा०। "अभिमन्तुंबाधितुं शक्तः स्यात्" भा०।

अभिमाय त्रि० अभिगतोमायामविद्याम् अत्या०स०। इति कर्त्तव्यविमूढे अज्ञानेनैव लोकानां कर्त्तव्याकर्त्त-व्येषु मोहः इति तद्वतत्वान्मूढत्वम्।

अभिमि(मे)ह्य त्रि० अभि+मिह-वा० वेदे क्यप् लोके ण्यत्। यस्याभिमुखं मेहनं मलमूत्रत्यागः क्रियते तस्मिन् "यत्र मेध्यन् भवति तत् क्षणविधायाया लोष्टं वा किञ्चि-दोपहन्लोयं ते यज्ञिया तनूरिति इयं वै पृथिवी देवय जनो सा दीक्षितेन नाभिमिह्या" शत०ब्रा०।

अभिमुख त्रि० अभिगतोमुखम् अत्या०स०। १सम्मुखतां गते "प्रसादाभिमुखो ब्रह्मा प्रत्युवाच दिवौकसः" कुमा०। "वानराभिमुखोऽगच्छद्रक्षे रक्षविशारदः" रामा०। "निद्रा चिरेण नयनाभिमुखीबभूव"। मुखशब्दस्य स्वाङ्गपरत्वे स्त्रियां वा ङीप्। अभिमुखीप्रतिमा अस्वाङ्गपरत्वे टाबेव अभिमुखा शाला। अभिगतं मुखं यस्य। तत्त-त्कर्म्मकरणाय २प्रेरितमुखे उद्यते। "प्रातः प्रयाणाभिमुखा व तस्मै" "पुरः प्रवेशाभिमुखो बभूव" इति च रघुः। "युयोज माकाभिमुखैः भर्त्तुर्विज्ञापनाफलैः" कु०। मुख-मभिलक्षीकृत्य अव्य०। २आभिमुख्ये अव्य०। "कर्षं ददा-त्यभिमुखं मयि भावमार्थे" अमरदत्तकम्।

अभिमुखीकरण न० न अभिमुखः अभिमुखः क्रियते अनेन अभिमुख+च्वि-कृ-करणे ल्युट्। व्याकरणोक्ते सम्बो-धने। कृते हि सम्बोधनपदाद्युच्चारणे श्रोता अभिमुखो भवति इति तस्य तथात्वम्। "सिद्धाभिमुखीभावमात्रं सम्बोधनं विदुः। प्राप्ताभिमुखः पुरुषः क्रियासु विनि-युज्यते" इति हर्य्युक्तादिगा अभिमतक्रियाप्रवर्त्तनाविषय-बोधनञ्चैव सम्बोधनपदार्थत्वात् प्रवर्त्तयितव्यस्य तदाभि-मुखीभावस्यावश्यकत्वाच्च तथात्वम्।

अभिमुखीभाव पु० अनभिमुखस्य अभिमुखतया भावः। १आ-भिमुख्ये २कार्य्यानुकूलतायाम् ३तत्तत्क्रियोद्यमे च।

अभिमृष्ट त्रि० अभि+मृज-क्त। १स्पृष्टे २धर्षिते ३मिलिते ४संस्कृते च। मृज-क्त। कृतमार्जने त्रि०।

अभिमेथक त्रि० अभि+मिथ-ण्वुल्। सर्वप्राप्तिसाधने वाक्य-भेदे। स्त्रियां टाप् अत इत्त्वम्। "सर्वाग्निर्वा एषा वाचः यदभिमेथिका सर्व्वे कामाः अश्वमेधे सर्वया वाचा सर्वान् कामानाप्नवाम" शत०ब्रा०।

अभिम्लात त्रि० अभि+म्ला-क्त। सर्व्वतोम्लाने। न०त०। अनभिम्लातः तस्यापत्यम्। शिवा०अण्। आनभिम्लातः अनभिम्लात इत्यपि नमध्यपाठः।

अभियाचन न० अभि+याच+ल्युट्। अभिमुखप्रार्थने।

अभियाति पु० अभिमुखं युद्धार्थं याति या-क्तिच्। १रिपौ भावे क्तिन्। २युद्धार्थमभिगमने स्त्री। [इनि। शत्रौ।

अभियातिन् पु० अभियातमनेन अभि+या-भावे क्त इता०

अभियाद पु० अभिमुखं याति युद्धार्थम् अभि+या-दच्। १शत्रौ, २अभिमुखगन्तृमात्रे त्रि०। स्त्रियां ङीप्।

अभियायिन् त्रि० अभिमुखं याति या-णिनि। अभिमुख-गन्तरि। "रामाभियायिनां तेषां तदेवाभूदमङ्गलम्" रघुः।

अभियुक्त त्रि० अभि+युज-क्त। १परैः रुद्धे, २आसक्ते व्यव-हारविषये ३प्रतिवादिनि च। "अभियुक्तोऽभियोगस्य यदि कुर्य्यादपह्नवम्" नार०। "अभियुक्तन्तु नाम्नेन मोक्षं विप्रकृतं नवेदिति" या०। ४पराक्रान्ते "नागाभियुक्त इव युक्तमहो महेभः" माघः। ५आप्ते वृद्धतमे।

अभियुव(ज्व)न् त्रि० अभि+युज-ङनिप् वेदे पृ० कुत्वम्। अभियोक्तरि, "स रथेन रथीतमोऽक्षाकेनाभियुज्वना" ऋ० ६,४५,१५ लोके तु अभियुज्या। स्त्रियां ङीप् वनोरच्च।

अभियुज् त्रि० अभिमुखं युनक्ति अभि+युज-क्विप्। अभि-

योक्तरि "आभिर्विश्वा अभियुजो विषूचीः" ऋ०६।२५।२।

अभियोक्तव्य त्रि० अभि+युज-तव्य। निषेध्ये "न स राज्ञाभियोक्तव्यः स्वकं संसाधयन् धनम्" मनुः। व्यवहारे यं प्रति अभियोगः कर्त्तुं शक्यते २ तस्मिन् प्रतिवादिनि अभिसुखं ३योजनीये च।

अभियोक्तृ त्रि० अभि+युज-तृच्। १व्यवहारे-अपराधयोजनकर्त्तरि वादिनि, स्त्रियां ङीप् "अभियोक्ता दिशेद्देश्यं करणं वान्यदुद्दिशेत्"। "अभियोक्ता न चेत् ब्रूयाद्बध्यो दण्ड्यश्च धर्म्मतः" इति च मनुः २युद्धार्थमाक्रामिणि च।

अभियोग पु० अभि+युज-घञ्। अन्यकृतस्य निजधर्षणस्य न्यपाय १विज्ञापने, (नालिश) अभियोगो द्विविधः "अभियोगस्तु विज्ञेयः शङ्कातत्त्वाभियोगतः। शङ्काऽसतान्तु संसर्गात् तत्त्वं हेढ़ाभिदर्शनात्" नारदोक्तेः। "अभियोगमनिस्तीर्य्य नैनं प्रत्यभियोजयेत्" या० २युद्धार्थमाक्रमे, ३शपथे, ४उद्योगे, ५आयत्ते "सन्तः स्वयं परहितेषु कृताभियोगाः नीति० ७अपचिकीर्षयाक्रमणे, "सम्प्रापदप्राप्तपराभियोगम्" कुमा० ८अभिनिवेशे "नयाभियोगं मनसः प्रसादं समापयस्यात्मगुणेन कामम्" रामा० ९अपचिकीर्षयानिरोधे। "क्षुभितं वनगोचराभियोगादिति" किरा०।

अभियोगिन् त्रि० अभि+युज-घिनुण्। १अभियोगकर्त्तरि वादिनि "मिथ्याभियोगी दण्ड्यः स्यात् विवादात् द्विगुणं दमम्" या०। २आक्रमकर्त्तरि, ३आयत्तयुक्ते, ४अभिनिविष्टे, ५योजनकर्त्तरि च।

अभियोजन न० भृशं योजनम्। योजितस्य दार्ढ्यार्थं पुनर्योजने "अभियोजनं नाम युक्तस्य पुनर्योजनमिति" माध०।

अभिरक्षण न० अभितो रक्षणम्। मन्त्रादिना सर्व्वतः स्वेत सर्षपादिविक्षेपैः यातुधानादिभ्यो १ रक्षणे २ सर्व्वतो रक्षणे चाभावे अ। अभिरक्षाध्यक्ष स्त्री। "प्रशास्तृत्वार्थं दिगतोऽभिरक्षया" किरा०।

अभिरक्षित त्रि० अभितोरक्षितः। सर्व्वतोरक्षिते।

अभिरक्षित्र त्रि० अभितोरक्षति रक्ष् क्विप् स्त्रियां ङीप्। सर्व्वतो रक्षके "वर्णानामाश्रमाणाञ्च राजा सृष्टोऽभिरक्षिता" मनुः

अभिरत त्रि० अभिमुखतया भृशं वा रतः। १आत्मानन्दके २अभिमुखतया रते च।

अभिरति स्त्री अभितो रतिः प्रा०स०। आसक्तौ "न मृगयाभिरतिर्नदुरोदरम्" रघुः। [मनोरमे।

अभिरम्य त्रि० अभिरमते भृशं रमतेऽत्र आधारे यत्।

अभिराज् त्रि० अभितो राजते अभि+राज+क्विप्। १अधिकदीप्तिशीले २अधीश्वरे च।

अभिराद्ध त्रि० अभि+राध-क्त। सेविते।

अभिराम पु० अभिरम्यतेऽस्मिन् रम+आधारे घञ्। १सुन्दरे २प्रिये, ३मनोहरे च। "श्रोत्राभिरामाः शब्दास्तौ रथेभिस्तनोत्नुभिः" "श्रोत्राभिरामध्वनिना रथेन" "यस्यालयेषु नयनाभिरामः" इति च रघुः श्रीवासङ्गाभिरामं सुदूरनुपतति स्वन्दने दत्तदृष्टिः शक०। "राम इत्यभिरामेण वपुषा तस्य नोदितः" रघुः।

अभिरुचि पु० भृशा आत्मना रुचिः प्रा०स०। १ आत्मनरुचौ

अभिरूप त्रि० अभिरूपयति सर्वं स्वात्मकं करोति रूप-अच्। १ स्निग्धे, २ विष्णौ च। अभिरूपयति निरूपयति। २परिस्फुटे। उत्कृष्टं रूपं यस्य। ४ कन्दर्पे, ५ चन्द्रे च। ६ मनोहरे त्रि०। "उत्कृष्टायाभिरूपाय वराय सदृशाय च" मनुः। "अभिरूपभूयिष्ठा परिषत्" शक०। ७ अनुरूपे त्रि० "कामसमनभिरूपप्रमत्ता वयसो वल्कलम्" शक०। अभिरूपस्य भावः मनोज्ञा० वुञ् आभिरूपकम् ष्यञ् आभिरूप्यञ्च सौन्दर्य्यादौ न०। "अर्चकस्य तपोयोगादर्चनस्यातिशायनात्। आभिरूप्याच्च बिम्बानां देवः सान्निध्यमृच्छति" ति०त०पु०।

अभिलक्ष्य त्रि० अभिलक्ष्यते उद्दिश्यते अभि+लक्ष यत्। १उद्देश्ये। लक्षस्य शरव्यस्याभिमुख्यम् अव्ययी०। २शरव्याभिमुख्ये अव्य०। "शब्दं प्रतिगजप्रेषुरभिलक्ष्यमपातयत्" रघुः। ल्यप्। ३लक्ष्यीकृत्येत्यर्थे अव्य०।

अभिलङ्घन न० अभि+लघि-भावे ल्युट्। उल्लङ्घने। "लवानामेव भूतानां सागरस्याभिलङ्घने" रामा०।

अभिलषणीय त्रि० अभि+लष-कर्म्मणि अनीयर्। काम्ये। एष्टव्ये। तव्य। अभिलषितव्योऽभ्यत्र त्रि०।

अभिलषित त्रि० अभि+लष-कर्म्मणि क्त। १ इष्टे अभिलाषविषये। भावे क्त। २अभिलाषे इच्छायाम् न०।

अभिलाप पु० अभिलप्यते मनःसंकल्पोऽनेन। १ मनःसंकल्पावेदके अहमिदं करिष्ये इत्यादिरूपे वाक्ये "काम्ये हि कामाभिलाषसंज्ञितसङ्कल्पजलतिलत्यागरूपः सङ्कल्पः कार्य्य इति प्रा०त० प्रकरणाधिकरणम्। २ आत्मीयज्ञानाकारोल्लेखिवाक्ये च यथा भूतलं घटाभाववदिति ज्ञानावेदकं घटोनास्तीति वाक्यं यथा च अयं घट इति ज्ञानोत्तरमनुव्यवसायात्मकज्ञानस्यावेदकं घटमहं जानामीति वाक्यम् "न निर्विकल्पकं ज्ञानं तस्य वाचकमिष्यते तथाऽभिलाप-

संसर्गयोग्यत्वविरहाच्च सविकल्पकज्ञानवेद्यानां हि वचनप्रयोगयोग्यता न तु रसस्येति" सा०द० । कथने च "तदभावाभिलापाच्च" गा०सू० ।

अभिलाव पु० अभि+लू-घञ् । छेदने ।

अभिलाष(स) पु० अभि+लष(स)-घञ् । १इच्छायां, २लोभे च । अभेरिच्छाद्योतकत्वात् तदुपसृष्टलसेरिच्छार्थत्वम् । "अतोऽभिलाषे प्रथमं तयाविधे" इति रघुः मानुषामनुजव्याघ्र ! साभिलाषाः सुतान् प्रति" देवीभा० । "न खलु सत्यमेव भक्तलतायां ममाभिलाषः" भक्त० ।

अभिलाषक त्रि० अभि+लष-खुल् । १ अभिलाषयुक्ते ।

अभिलाषिन् त्रि० अभि+लष-णिनि स्त्रियां ङीप् । अभिलाषशीले "जलाभिलाषी जलमाददानाम्" "अगच्छदंशेन गुणाभिलाषिणी" इति च रघुः "असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः" भक्त० ।

अभिलाषुक त्रि० अभि+लष-उकञ् । अभिलाषशीले, "जयमल्ल भवान्नमरातिष्वभिलाषुकः" किरा० ।

अभिवदन न० अभिरानुकूल्ये अनुकूलं वदनं कथनम् । १आनुकूल्यार्थकथने अभिवादने । वदनस्य मुखस्याभिमुख्यम् अव्ययी० । २मुखस्याभिमुख्ये अव्य० ।

अभिवन्दन न० अभितः सर्वतोऽभिमुखे वा वन्दनम् । १सर्वतोनतिकरणे २ अभिमुखप्रणामे च । "उभयोरेवशिरसा चक्रे पादाभिवन्दनम्" रामा० ।

अभिवयस् त्रि० अभिमतं श्रेष्ठं वयोऽस्य प्रा०ब० । प्रशस्तवयस्के "तीव्रस्याभिवयसो अस्य पाहि" ऋ०१०,१६०,१ ।

अभिवर्त्तिन् त्रि० आभिमुख्येन वर्त्तते अभि+वृत-णिनि स्त्रियां ङीप् । १ अभिमुखे वर्त्तमाने "कल्पनां च रणार्थाय मृत्युकालाभिवर्त्तिनः" रामा० ।

अभिवर्षक त्रि० अभितोवर्षकः । १ सर्वतोवर्षकर्त्तरि ।

अभिवर्षण न० अभितोवर्षणम् । सर्वतोवर्षणे ।[सर्वतोवर्षके ।

अभिवर्षिन् अभितोवर्षति अभि+वृष-णिनि स्त्रियां ङीप् ।

अभिवात् त्रि० आभिमुख्येन वाति गच्छति वा-क्विप् स्त्रियां ङीप् । १अनुचरे, २"अभिवानभिभूयै रूपम्" शत० ब्रा० ।

अभिवाद पु० अभि+चु०वद-भावे घञ् । १अभिमतः प्रणामे- "प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते" इति "नामधेयस्य ये केचिदभिवादं न जानते" इति च मनुः

अभिवादक त्रि० अभि+चु०वद-ण्वुल् । १ आभिमुख्येन नतिकारके । "आयुष्मान् भव सौम्येति वाच्योविप्रोऽभिवादकः (के) मनुः ।

अभिवादन न० अभिमुखीकरणाय वादनं वदनम् चु०-वद-ल्युट्, अभिमुखं वाद्यते आशीरनेन वद-णिच्-ल्युट् वा । १नामग्रहणपूर्व्वकनतौ २पादग्रहणेन वाचा वा नतौ । तत् प्रकारो यथा "अहं प्राणाञ्जुत्क्रामन्ति यूनः स्थविर आयति । प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥ अभिवादनशीलस्य नित्यं वृद्धोपसेविनः । चत्वारि संप्रवर्द्धन्ते आयुर्विद्या यशो बलम् ॥ अभिवादात् परं विप्रो ज्यायांसमभिवादयन् । असौ नामाहमस्मीति स्वं नाम परिकीर्त्तयेत् ॥ नामधेयस्य ये केचिदभिवादं न जानते । तान् प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्वास्तथैव च ॥ भोःशब्दं कीर्त्तयेदन्ते स्वस्य नाम्नोऽभिवादने । नाम्नां स्वरूपभावोहि भोभाव ऋषिभिः स्मृतः ॥ आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादकः (के) । अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्व्वाक्षरप्लुतः ॥ यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम् । नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥ ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम् । वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च ॥ अवाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत् । भोभवत्पूर्व्वकं तेनमभिभाषेत धर्मवित् ॥ परपत्नी तु या स्त्री स्यादसम्बन्धा च योनितः । तां ब्रूयाद्भवतीत्येवं सुभगे ! भगिनीति च ॥ मातुलांश्च पितृव्यांश्च श्वशुरान्ऋत्विजो गुरून् । असावहमिति ब्रूयात् प्रत्युत्थाय यवीयसः ॥ मातृष्वसा मातुलानी श्वश्रूरथ पितृष्वसा । संपूज्या गुरुपत्नीवत् समास्ता गुरुभार्य्यया ॥ भ्रातुर्भार्य्योपसंग्राह्या सवर्णाऽन्यस्त्वसंस्कृता । विप्रोष्य तूपसंग्राह्या ज्ञातिसम्बन्धियोषितः ॥ पितृभगिन्यां मातृश्च ज्यायस्याश्च स्वसर्य्यपि मातृवद्वृत्तिमातिष्ठेत् माता ताभ्यां गरीयसी ॥ दशाब्दाख्यं पौरसख्यं पञ्चाब्दाख्यं कलाश्रुताम् । त्र्यब्दपूर्व्वं श्रोत्रियाणां स्वल्पेनापि स्वयोनिषु ॥ ब्राह्मणं दशवर्षन्तु शतवर्षन्तु भूमिपम् । पितापुत्रौ विजानीयाद्ब्राह्मणस्तु तयोः पिता ॥ वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी । एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥ पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च । यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं गतः ॥ चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः । स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च ॥ तेषान्तु समवेतानां मान्यौ स्नातकपार्थिवौ । राजस्नातकयोश्चैव स्नातको नृपमानभाक्" इति मनुः "राजत्विक्श्रोत्रियाधर्मप्रतिषेध्युपाध्यायपितृव्य मातामहमातुलश्वशुरज्येष्ठभ्रातृसम्बन्धिनश्चाचार्यवत् । पत्न्य

एतेषां सवर्णाः । मातृष्वसा पितृष्वसा ज्येष्ठा स्वसा च । श्वशुरपितृव्यमातुलर्त्विजां कनीयसां प्रत्युत्थानमेवाभिवादनम् । हीनवर्णानां गुरुपत्नीनां दूरादभिवादनं न पादोपसंग्रहणेन । गुरुपत्नीनां गात्रोत्सादनाञ्जनकेशसंयमनपादप्रक्षालनं न कुर्यात्" विष्णुः। "पादोपसंग्रहणं गुरुसमवायेऽन्वहम् । अभिगम्य तु विप्रोष्य मातापितृतद्बन्धूनां पूर्वजानां विद्यागुरूणां तत्तद्गुरूणाञ्च सन्निपाते परस्य । नाम प्रोच्याहमयमित्यभिवादोऽन्तेवासिवादतोऽनियममेके न विप्रोष्य स्त्रीणाममातृपितृव्यभार्याभगिनीनां, नोपसंग्रहणं भ्रातृभार्यायां स्वस्रायाश्च । ऋत्विक्श्वशुरपितृव्यमातुलानान्तु वयीयसां प्रत्युत्थानमनभिवाद्यास्तद्वन्द्यः पूर्वः पौरोऽमीतिकावरः स्यूद्योऽथपत्यसमेनावरोऽप्यार्यः स्यूद्येन नाम चास्य वर्जयेद्राज्ञस्त्राजपः प्रेष्योभोभवदिति वयस्यः समानेऽहनि जातोदग्वर्षद्वयः पौरः पञ्चभिः कलाभरः श्रोत्रियश्चारण्यस्त्रिभिः राजन्योवेश्यः कर्मविद्याहीनोदीक्षितस्य प्राक्क्रयात् । वित्तबन्धुकर्मजातिविद्यावयांसि मान्यानि परवल्लीयांसि श्रुतन्तु सर्वेभ्योगरीयस्तन्मूलत्वाद्धर्मस्य श्रुतेः"गौत०। अनभिवाद्याश्च "समिद्दार्युदकुम्भपुष्पाद्यहस्तोनाभिवादयेद्याच्ञेवंयुक्तमिति" बौधायनः। "अपवृत्तजलस्थञ्च समित्पुष्पकुशानलान् दन्तकाष्ठञ्च भक्षञ्च वह्निं नाभिवादयेदिति" लघुहारीतः । अन्यत्रापि । "समित्पुष्पकुशान्यम्बु–स्तदन्नाजपार्थिकः । जपं होमञ्च कुर्वाणोनाभिवाद्यो द्विजो भवेदिति" च ।

अभिवाद्य त्रि० अभिवादयितुमर्हः यत् । १ अभिवादनार्हे अभिवाद्यानामभिवादनगन्धे उक्ताः ।"गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः"मनुः । ल्यप् ।२अभिप्रणम्येत्यर्थे अव्य०।

अभिवान्य त्रि० अभि+वन–संभक्तौ कर्म्मणि ण्यत् । संभजनीये । "अभिवान्यवत्सायाः प्रजुड्वात्" श्रुतिः ।

अभिवासस् अव्य० वासस उपरि अव्ययी० । परिच्छितवस्त्रस्योपरिभागे" स वा अभिवासः संनह्यति" शत०ब्रा०। "परिच्छितस्य वस्त्रस्य उपरि" भा०।

अभिवाह्य अभि++वह–ण्यत् । १अभितो वहनीये । भावे ण्यत् । २वहने न० "हव्यकव्याभिवाह्याय सर्वस्यास्य च गुप्तये" इति मनुः ।

अभिविधि पु० अभितो विधिर्व्याप्तिः । १व्याप्तौ, मर्य्यादायां हि अवधिभूतं विहाय तत्तत्कार्य्यान्वयः अभिविधौ तु अवधिसहिते कार्य्यान्वय इति तस्य व्यापकता अतएवोक्तम् "मर्य्यादाभिविधिसन्देहे कार्य्यान्वितत्वादभिविधेर्व्याप्तिमत्त्वमिति युक्तैः। "आङ् मर्य्यादाभिविध्योः" पा० । "अभिविधौ भाव इनुण्" पा०"मर्य्यादायामभिविधौ क्रियायोगेपदर्थयोः । य आकारः स ङित् प्रोक्त" मु०बो० ।

अभिविमान पु० परमात्मनि, "यस्येनं प्रादेशमात्रमभिविमानं वैश्वानरमुपास्ते" इति छा०उ० । एतस्य निरुक्तिः शा० भाष्ये दर्शिता । प्रत्यगात्मतया सर्वैः प्राणिभिरभिविभीयत इति अभिविमानः । अभिगतो वाऽयं प्रत्यगात्मत्वात्, विमानश्च मानवियोगादित्यभिविमानः । अभिविभीते वा सर्वं जगत्कारणत्वादित्यभिविमानः" इति।

अभिवृत्ति स्त्री अभि+वृत्–क्तिन् । अभिगमने "स्वर्गस्य नो तस्याभिवृत्त्यै" ता०ब्रा० "अभिवृत्त्यै अभिगमनाय" भा०

अभिव्यक्त त्रि०अभि+वि+अञ्ज–कर्मणि क्त । १अभिव्यक्तियुक्ते २सांख्यादिमे–सिद्धार्विर्भावयुक्ते"तत्र दैवमभिव्यक्तं पौरुषम् पौर्व्वदेहिकम् पु०अभिव्यक्तमाविर्भूतं फलदानोन्मुखम्"रघु०

अभिव्यक्ति स्त्री अभि+वि–अञ्ज–क्तिन् । १ प्रकाशे सूक्ष्मरूपेण स्थितस्य ("कारणात्मना स्थितस्य) कारणस्य २कार्य्यरूपेणाविर्भावे । साङ्ख्यपातञ्जलादिमते हि उत्पत्तेः प्राक् कार्य्यं सत् कारणव्यापारेण व्यज्यते यथोक्तम् । सांख्यसूत्रे । "त्रिविधविरोधापत्तेश्च" । "अथ सर्वं कार्य्यं त्रिविधं सर्ववादिसिद्धमतीतमनागतं वर्त्तमानमिति । तत्र यदि कार्य्यं सदा सद्भवेत् तदा त्रिविधत्वानुपपत्तिः । अतीतादिकाले घटाद्यभावेन घटादेरतीतादिधर्म्मकत्वानुपपत्तेः सदसतोः सम्बन्धानुपपत्तेः । किञ्च प्रतियोगित्वस्य प्रतियोगिरूपत्वे तद्दोषतादवस्थ्यात् । अभावमात्रस्वरूपत्वे घटाद्यभावो घटाद्यभावः स्यादभावत्वाविशेषात् । अभावेऽपि स्वरूपतो विशेषाङ्गीकारे चाभावत्वस्य परिभाषामात्रत्वप्रसङ्गात् । अथ प्रतियोग्येवाभावविशेषक इति चेन्न असतः प्रतियोगिनः प्रागभावादिषु विशेषकत्वा सम्भवादिति । तस्मात्त्रित्वस्यैव कार्य्यस्यातीतानागतवर्त्तमानावस्थाभेदा एव वक्तव्याः । घटोऽतीतो घटो वर्त्तमानो घटो भविष्यन्निति प्रत्ययानां तुल्यरूपतौचित्यात् । न त्वेकस्य भावविषयत्वमन्ययोराभावविषयत्वमिति । ते एवातीतानागतत्वे अवस्थे ध्वंसप्रागभावव्यवहारं जनयतस्तदतिरिक्ताभावहये प्रमाणाभावादिति एवमन्योन्याभावान्योन्याभावावधिकरणस्वरूपावेव । न चैवं प्रतियोगिसत्ताकालेऽधिकरणस्वरूपानपायादत्यन्ताभावप्रत्ययप्रसङ्ग इति वाच्यम् परैरपि प्रतियोगिमति देशे तदत्यन्ताभावाङ्गीकारात् । प्रतियोगिसम्बन्धस्यातीतानागतावस्थयोरेव

सामयिकात्यन्ताभावत्वसम्भवाच्च। तस्माद्वाक्यसिद्धान्तेऽभावोऽतिरिक्तः किञ्च घटो ध्वस्तो घटो भावी घटोऽत्र नास्तीत्यादिप्रत्ययनियामकतया किञ्चिद्वस्त्वाकाङ्क्षायां तद्भावरूपमेव कल्प्यते लाघवात्। अभावस्याऽदृष्टस्य कल्पने गौरवादिति"प्र०भा०॥"नासदुत्पादोऽदृष्टकल्पवत्"सू०॥ नरश्रृङ्गतुल्यस्यासत उत्पादोऽपि न सम्भवतीत्यर्थः॥"उपादाननियमात्" सू०॥ सदेव घट उत्पद्यते तन्तवेव पट इत्येवं कार्याणामुपादानकारणं प्रति नियमोऽस्ति। सन्न सम्भवति उत्पत्तेः प्राक् कार्यासत्तायां हि न कोऽपि कारणे विशेषोऽस्ति येन कञ्चिदेवासन्तं जनयेन्नेतरमिति। विशेषाङ्गीकारे च भावत्वापत्तेर्गतमसत्तया। स एव च विशेषोऽस्माभिः कार्यस्यानागतावस्थेत्युच्यत इति। एतेन यद्वैशेषिकाः प्रागभावमेव कार्योत्पत्तिनियामकं कल्पयन्ति तदप्यपास्तम्। अभावकल्पनापेक्षया भावकल्पने लाघवात्। भावानां दृष्टत्वादन्यानपेक्षत्वाच्च। किञ्चाभावेषु स्वतो विशेषे भावत्वापत्तिः। प्रतियोगिविशेषस्य प्रतियोग्यसत्ताकाले नास्ति। अतोऽभावानामविशिष्टतया न कार्योत्पत्तौ नियामकत्वं युक्तमिति॥"शक्तस्य शक्यकरणात्"सू०॥कार्यशक्तिमत्त्वमेवोपादानकारणत्वम् अन्यस्य दुर्वचत्वात् लाघवाच्च। सा शक्तिः कार्यस्यानागतावस्थैवेत्यतः शक्तस्य शक्यकार्यकरणाच्चासत उत्पाद इत्यर्थः॥"कारणभावाच्च" सू० उत्पत्तेः प्रागपि कार्यस्य कारणाभेदः श्रूयते तस्माच्च सत्कार्यसिद्धा नासदुत्पाद इत्यर्थः। कार्यस्यासत्त्वे हि सदसतोरभेदानुपपत्तिरिति। उत्पत्तेः प्राक् कार्याणां कारणाभेदे च श्रुतयः। "तद्वेदं तर्ह्यव्याकृतमासीत्। सदेव सौम्येदमग्र आसीत्। आत्मैवेदमग्र आसीत्। आप एवेदमग्र आसुरित्याद्याः॥ "न भावे भावयोगवेत्" सू०॥ नन्वेवं कार्यस्य नित्यत्वे सति भावरूपे कार्ये भावयोग उत्पत्तियोगो न सम्भवति असतः सत्त्व एवोत्पत्तिव्यवहारादिति चेदित्यर्थः॥ "नाभिव्यक्तिनिबन्धनौ व्यवहाराव्यवहारौ"सू०॥ कार्योत्पत्तेर्व्यवहाराव्यवहारौ कार्याभिव्यक्तिनिमित्तकौ। अभिव्यक्तिः उत्पत्तिव्यवहारोऽभिव्यक्त्यभावाद्योत्पत्तिव्यवहाराभावः न त्वसतः सत्त्वेत्यर्थः। अभिव्यक्तिश्च न ज्ञानं किन्तु वर्त्तमानावस्था। कारणव्यापारोऽपि कार्यस्य वर्त्तमानलक्षणपरिणाममेव जनयति। सतश्च कार्यस्य कारणव्यापारादभिव्यक्तिमात्रं लोकोऽपि दृश्यते। यथा तिलाभ्यस्यप्रतिभावा लैङ्गिकव्यापारेणाभिव्यक्तिमात्रं तिलस्यतैलस्य च निष्पीडनेन, धान्यस्यतण्डुलस्य चावघातेनेति। तदुक्तं वाशिष्ठे। "सूक्ष्मावस्थया चक्रपङ्क्तिरेखाः शिलोदरे। यथा स्थिताश्चिरन्तनत्वेयं जगदावली"॥ एतेषामिवाक्षाकमप्यनागतावस्थायाः प्रागभावाख्याया अभिव्यक्तिहेतुत्वाच्चेति। नन्वतीतमप्यस्तीत्यत्र किं प्रमाणं? न ह्यनागतसत्तायामिव स्मृत्यादयोऽतीतसत्तायामपि स्फुटमुपलभ्यन्त इति। मैवम्। योगिप्रत्यक्षत्वान्यथानुपपत्त्यानागतातीतयोरुभयोरेव सत्त्वसिद्धेः प्रत्यक्षसामान्ये विषयस्य हेतुत्वात्। अन्यथा वर्त्तमानस्यापि प्रत्यक्षेणासिद्ध्यापत्तेः। तस्माद्विद्यामौत्सर्गिकप्रामाण्येनासति बाधके योगिप्रत्यक्षेणातीतमप्यस्तीति सिद्ध्यति योगिनामतीतानागतप्रत्यक्षे च स्मृतिरितीतिहासादिकं प्रमाणं योगवार्त्तिके प्रपञ्चितमिति। नन्वभिव्यक्तिरपि पूर्वं सती वाऽसती वा। आद्ये कारणव्यापारात् प्रागपि कार्यस्याभिव्यक्त्या स्वकार्यजनकत्वापत्तिः कारणव्यापारश्च विफलः। अन्त्ये चाभिव्यक्तावेव सत्कार्यसिद्धान्तक्षतिः असत्या एवाभिव्यक्तेरभिव्यक्त्यङ्गीकारादिति चेदुच्यते। कारणव्यापारात् प्राक् सर्वकार्याणां सदासत्त्वाभ्युपगमेनोक्तविकल्पानवकाशाद्घटवत् तदभिव्यक्तेरपि वर्त्तमानावस्थया प्रागसत्त्वेन तदसत्तानिष्टत्त्यर्थं कारणव्यापारापेक्षणात्। अनागतावस्थया च सत्कार्यसिद्धान्तरक्षणतेः। नन्वेकदा सदसत्त्वयोर्विरोध इति चेत्। प्रकारभेदस्योक्तत्वात्। नन्वेवमपि प्रागभावानङ्गीकारेण प्रागसत्त्वमेव कार्याणां दुर्वचमिति। मैवम्। अवस्थानामेव परस्पराभावरूपत्वादिति॥ ननु सत्कार्यसिद्धान्तरक्षार्थमभिव्यक्तेरप्यभिव्यक्तिरेष्टव्येत्यत आह।"पारम्पर्यतोऽन्येषां बीजाङ्कुरवत्"सू०॥ पारम्पर्यतः परम्परारूपेणैवाभिव्यक्तेरनुधावनं कर्त्तव्यम् बीजाङ्कुरवत् प्रामाणिकत्वेन चाक्षाऽदोषत्वादित्यर्थः। बीजाङ्कुराभ्यां चात्रायमेव विशेषो यद्बीजाङ्कुरस्थले क्रमिकपरम्परानवस्था, आभिव्यक्तौ चैककालीनपरम्परेति। प्रामाणिकत्वन्तु तुल्यमेवेति। सर्वकार्याणां स्वरूपतो नित्यत्वमवस्थाभिर्विनाशित्वं चेति पातञ्जलभाष्ये यद्द्विव्रांसदेवैरपीयमनवस्था प्रामाणिकत्वेन स्वीकृतेति। "उत्पत्तिवदाहदोषः" सू०॥ यथा घटोत्पत्तेरुत्पत्तिः स्वरूपमेव वैशेषिकादिभिरसदुत्पादत्वादिभिरिष्यते लाघवात् तथैवाक्षाभिर्घटाभिव्यक्तेरप्यभिव्यक्तिः स्वरूपमेवैष्टव्या लाघवात्। अत उत्पत्तावभिव्यक्तावपि नानवस्थादोष इत्यर्थः। अथैवमभिव्यक्तेरभिव्यक्त्यनङ्गीकारे कारणव्यापारात् प्राक् तस्याः सत्त्वानुपपत्त्या सत्कार्यवादक्षतिरिति चेन्न। अस्मिन् पक्षे सत

एवाभिव्यक्तिरित्येव सत्कार्यसिद्धान्त इत्याशयात्। अभिव्यक्तेश्चाभिव्यक्त्यभावेन तस्याः प्रागसत्त्वेऽपि नासत्कार्यवादत्वापत्तिः। नन्वेवं मृद्दादीनामेव प्रागसत्त्वमिष्यतां किमभिव्यक्त्याख्यावस्थाकल्पनयेति चेन्न। तद्वेदं तर्ह्यव्याकृतमासीदित्यादि श्रुतिभिरव्यक्तावस्थायाः सतामेव कार्याणां सिद्धेः तथाप्यभिव्यक्तेः प्रागभावादिस्वीकारापत्तिरिति चेन्न। तिस्रणामनागताद्यवस्थानामन्योऽन्याभावरूपतयोक्तत्वात् तादृग्भावनिबन्धनत्व एव च कारणव्यापारसाफल्यादिसम्भवात्। अयमेव हि सत्कार्यवादिनामसत्कार्यवादिभ्यो विशेषो यत् तैरुच्यमानौ प्रागभावध्वंसौ सत्कार्यवादिभिः कार्यस्यानागतातीतावस्थे भावरूपे प्रोच्येते। वर्त्तमानताख्या चाभिव्यक्तावस्था घटाद्यतिरिक्तेति घटादेरवस्थात्रयवत्त्वानुभवादिति। अन्यत्तु सर्वं समानम्। अतो नास्त्यस्मात्सधिकगङ्गावकाय इति सां० प्र०भा०। "अतः सिद्धं प्राक् कार्योत्पत्तेः कारणसद्भावः। कार्यस्य चाभिव्यक्तिलिङ्गत्वात् अभिव्यक्तेः कार्यस्य च सद्भावः प्रागुत्पत्तेः सिद्धः। कथम्? अभिव्यक्तिलिङ्गत्वात्। अभिव्यक्तिर्लिङ्गमस्येत्यभिव्यक्तिश्च साधाद्दिज्ञानात्मत्वप्राप्तिः। यद्धि लोके प्राहृतं तमश्चादिना घटादि वस्तु तदालोकादिना प्रावरणतिरस्कारेण विज्ञानविषयत्वं प्राप्नुवत् प्राक् सद्भावं न व्यभिचरति। तद्वेदमपि जगत् प्रागुत्पत्तेरित्यवगच्छामः न हि अविद्यमानो घट उदितेऽभ्यादित्य उपलभ्यते" इ०भा०। २ अन्यथा स्थितस्य अन्यरूपेण प्राकाशे "अभिव्यक्तेरित्याश्मरथ्यः" शा०सू०। अतिमात्रस्यापि परमेश्वरस्य प्रादेशमात्रत्वमभिव्यक्तिनिमित्तं स्यात् अभिव्यज्यते किल प्रादेशपरिमाणः परमेश्वर उपासकानामुते, प्रदेशेषु वा हृदयादिषु प्रायविद्यास्थानेषु विशेषेणाभिव्यज्यते ततः परमेश्वरेऽपि प्रादेशमात्रश्रुतिरभिव्यक्तेरुपपद्यत इत्याश्मरथ्य आचार्यो मन्यते" इति भा०।

अभिव्यञ्जक त्रि० अभिव्यञ्जयति प्रकाशयति अभि+वि+अञ्ज-णिच्-ण्वुल्। प्रकाशके आलङ्कारिकप्रसिद्धव्यञ्जनया इच्छा प्रकाशके च गुणाभिव्यञ्जको शब्दार्थौ "गुणाभिव्यञ्जकशब्दार्थत्वस्यापि रसाभिव्यञ्जकत्वेन उपचारत" इति च सा०द०।

अभिव्यापक त्रि० अभि+वि+आप-ण्वुल्। अभितोव्यापके सर्वावयवावच्छेदेन व्यापके यथा इच्छादेराकाशसंयोगः, कपिसंयोगादिस्तु नैवं तस्य स्वाधिकरणे इच्छ एव मूलावच्छेदेनासंस्पर्शात्। वैयाकरणोक्ते सर्व्वथा व्यापकतावति आधारभेदे "औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा" सि०कौ०। यथा सर्व्वस्मिन् ब्रह्मास्ति"।

अभिव्याप्ति स्त्री अभि+वि+आप-भावे क्तिन्। १ अभितोव्याप्तौ सर्वावयवावच्छेदेन व्याप्तौ। व्याप्तिशब्दे विस्तरः।

अभिव्याप्य त्रि० अभि+वि+आप-कर्मणि ण्यत्। १सर्वावयवावच्छेदेन १ व्याप्ये। ल्यप् २सर्वतो व्याप्येऽर्थे अव्य०। "अभिव्याप्याकर्षणमपवर्ग" इति सुश्रु०।

अभिव्याहार पु० अभि+वि+आ+हृ-घञ्। १ प्रयोक्तौ २अभितः कथने व्याङ्पूर्वहरतेः कथनार्थत्वादभियोगात्तस्यैव सम्यक्त्वार्थता। अतएव "ऋचं वा यजुर्वा साम वाऽभिव्याहरतीति" शत०ब्रा० "नाभिव्याहरेयुः ब्रह्म स्वधानिनयनादृते" मनौ च तथार्थे एव अभिव्याहरतेः प्रयोगः। ससुपसर्गयोगे तु साकल्येऽस्य रूढिः।

अभिव्रज् पु०अभि+व्रज-गतौ घञ्। अभिगमने यासां तिस्रः पञ्चाशतोभिव्रज्यैरपायव" ऋ० १,११२,४। अभिव्रज्यैरभिगमनैः व्रजतिर्गतिकर्मेति" भा०।

अभिशंसन न० आभिमुख्येन शंसनमाक्रोशवचनं वारोप्यापवादश्च। समन्तमाक्रोशरूपे पारुष्यकथने १ अयं चौर" इत्यादिना २मिथ्यापवादे च "शतं ब्राह्मणमाक्रुश्य"त्युपक्रम्य"पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने इति याज्ञवल्क्यारूढे "अभिशंसनप्रयोगात्तयोस्तुल्यार्थत्वम् "स्वभार्यान्तु यदा क्रोधादगम्येति नरो वदेत्" या० व्याख्यायां स्वभार्यायामिशंसनमिति विज्ञानेश्वरेणोक्तम्। २ आभिमुख्येन कथनमात्रे च "शतं स्त्रीदूषणे दद्यात् हे तु मिथ्याभिशंसने" इति याज्ञ०।

अभिशंसिन् त्रि० अभि+शंस-णिनि। १ समन्तमाक्रोशके २अपवादवाक्यप्रयोक्तरि च "मिथ्याभिशंसिनो दोषो हि गुणोऽन्यतवादिन" इति या०।

अभिशङ्का स्त्री अभि+शङ्क-भावे अ। १सर्वथा शङ्कने २संशये ३भ्रमे च। "उमेयुषो कल्पलताभिशङ्कया" किरा०"कल्पलताभिशङ्कया कल्पलताभ्रमेण" मल्लि०। संशयस्य स्थाणुर्वानरोवेति उभयकोटिज्ञानरूपत्वेऽपि तदीयायथार्थकोटिविषयत्वेन भ्रमस्य तदीयैकतरकोटिविषयकत्वात् तथात्वम्। अयन्तु मिथ्याभूतकोटिमेवावगाहते इति विशेषः। कर्त्तरि अच्। २सर्वतः शङ्किते त्रि०।

अभिशङ्कित त्रि० अभि+शङ्क-क्त। १सन्दिग्धे २भ्रान्ते च।

अभिशप्त त्रि०अभि+शप-क्त। इदं तेऽनिष्टं भूयादित्येवं रूपस्य

गुरुविप्राद्यभिशापस्य उद्देश्ये। "न नाम परुषं कुर्यात् जनकस्य गुरोस्तथा। भार्यायाः अभिशप्तस्य क्षयाणस्य विशेषतः" इति पुरा०। [२समन्तकथिते च।

अभिशब्दित त्रि० आभिमुख्येन शब्दितः। १ समन्तमाहूते

अभिशस् त्रि० अभि+शंस्-क्विप्। अभिशंसनकर्त्तरि "यदाभिशंसा निःशसाभिशसा" ऋ० १०,१६४,३।

अभिशस्त त्रि० अभि+शंस्-क्त। अयं परस्त्रियं गच्छतीत्यादिना मिथ्यावाक्येन मैथुनविषयकदोषारोपो यस्मिन् जने कृतः तस्मिन्। "अभिशस्तो व्रतया हन्त्वं चरेदाग्नेय मेव वा" या०। "नियम्य प्रयतो वाचमभिशस्तांस्तु वर्जयेत्" स्मृतिः। अभि+शस-बधे क्त। २हिंसिते २आक्रान्ते च त्रि०। "आतुरानभिशस्तांश्च चौरव्याघ्रादिभिर्भयैः" मनुः। "अभिशस्तामाक्रान्तामिति" प्रा०त० रघु०। उभयतः भावे-क्त ४ आक्रोशे, ५ अपवादकथने ६हिंसने ७ अभिशापे च न०। "एवञ्चैव नरश्रेष्ठः रक्षन्ना एव हिजातयः। शापराधानपि हि तान् विषयान्ते समुत्सृजेत् अभिशस्तमपि ह्येषां क्षपायीत विशाम्पते"। भा०शा०प०।

अभिशस्तक त्रि० अभिशस्ते अभिशापे भवः कन्। वैद्यकोक्ते अभिशापजज्वरादौ "इत्ता ये देवद्रोहाभिशस्तका अथर्वकृता उपसर्गकृताश्च" सुश्रुतः।

अभिशस्ति स्त्री अभि+शंस्-क्तिन्। १ अभिशापे "उरुष्या णो अभिशस्तेः सोमः" ऋ० १,६१,१५। अभिशस्तेरभिशापरूपान्निन्दनात्" भा०। २ अपवादे "इमां मिथ्याभिशस्तिञ्च क्षणस्य समुदाहृताम्" हरिवं०। अभि+शस बधे भावे क्तिन्। ३ हिंसायां "तितिक्षन्ते अभिशस्तिं जनानाम्" ऋ०२,२०,१। "अभिशस्तिं हिंसाम्" भा०। शस्यते हिंसतेऽनेन करणे क्तिन्। ४हिंसाहेतौ, "पुरा तस्या अभिशस्तेरधीहि" ऋ० १,७१,१० "अभिशस्तेः हिंसाहेतोः" भा०। आभिमुख्येन शस्तिर्व्याचनम्। ५प्रार्थनायाम्। [शार्हे च

अभिशस्य त्रि० अभिशस्तिमर्हति यत्। १हिंसार्हे २आक्रोशार्हे

अभि(भी)शाप पु० अभि+शप-घञ् वा दीर्घः। १ मिथ्यापवादकथने २ आरोपितदोषकथने ३ अनिष्टं ते भूयादित्याक्रोशे च "वेद मिथ्याभिशापास्तं न स्पृशन्ति कदाचन" हरिवं०।

अभिशिरोग्र त्रि० शिरसोऽभिमुखमग्रं यस्य। १ जई मूलाधोभे "ओषधे। त्रायस्वैनमिति सप्त दर्भपिञ्जूलीर्दक्षिणस्यां कपुष्णिकायामभिशिरोग्रा उपदधाति" शौ०।

अभिशिरोग्राः जईमूलाधोग्राः सं०त०रघुनन्दनः।

अभिशोक पु० अभिलक्ष्य शोकः। कञ्चिदभिलक्ष्यीकृत्य कृते शोके। शुच-घञ्। अभिशोचनमप्यत्र न०।

अभिश्रा(श्र)व पु० अभि+श्रु-अप् वेदे घञ्। अभितः श्रवणे "ऋतं दिवे तदवोचं पृथिव्यामभिश्रावाय" श्रुतिः।

अभिश्रैत्य त्रि० अभितः श्रैत्यं शुद्धचारित्र्यादस्य। शुद्धचरिते "अदक्षिणमवज्ञानमभिश्रैत्येति व्याहरन्" भा०द्रो०प०

अभिषङ्ग पु० अभि+षञ्ज-घञ्। १ पराभवे, २ आक्रोशे, ३ शपथे, ४ व्यसने च "अभिषङ्गजडं विजज्ञिवानिति" रघुः "तीव्राभिषङ्गप्रभवेण दृप्तिम्" कुमा० "जातोभिषङ्गो नृपतिर्निषङ्गात्" "ततोऽभिषङ्गानिलविप्रविद्धा" "विनोदयिष्यन्नि नवाभिषङ्गान्" इति च रघुः "नवाभिषङ्गां नूतनदुःखामिति" मल्लि०। ५आसक्तौ "सङ्करिति वनविभ्रमाभिषङ्गात्" माघः ६भूताद्यावेशे अभिघाताभिषङ्गाभ्यामभिचाराभिशापतः" माधवनिदानम्।

अभिषव पु० अभि+सु-अप्। १ यज्ञाङ्गस्नाने, २निष्पीडने, ३ सुरोत्पादनादिव्यापारे, ४ सोमलतापाने, ५ तत्कण्डने च "अद्भ्यादानप्रभृति त्रिपर्य्यायानभिषवान् करोति" कात्या० १०,१,४। "निर्यात्य राजानमभिषुण्वन्ति व्याख्यातोऽभिषव" इति कर्क०। "आप्यायनाभिषवाश्चदाभ्येषु च" कात्या० ७,६,२८। सर्वजित् सहस्रतः संवत्सरदीक्षः सप्ताहाभिषवस्तिस्र उपसदः कात्या० "संवत्सरादूर्द्धं सप्ताहेऽतीतेऽभिषवः स्तुत्या" कर्क०। ६स्नाने। "जपोपवासाभिषवैर्मुनीनाम्" किरा०। करणे अप्। ७ अङ्गुल्यामिति निरु० सोमकण्डनसाधनत्वात् तद्वत्त्वम्। आधारे अप्। ८यज्ञे।

अभिषवण न० अभि+सु-ल्युट। अभिषवशब्दार्थे स्नानमात्रे "शिरसा स्फरिन्मणिनिभः स वहन् कृतजन्मनोऽभिषवणेन जटाः" किरा० करणे ल्युट् स्त्रियां ङीप्। अभिषवसाधने "सूर्पं पवित्रं तथा अजीषाभिषवनीरापः" अथ०।

अभिषह्य त्रि० अभितः सहः। १ सोढुं शक्ये। ल्यप्। २प्रसह्येत्यर्थे अव्य० "अभिषह्य तु वः कन्यां कुर्याद्धर्मेण मानवः"। मनुः।

अभिषाच् त्रि० अभि+सच-खि-सार्वे क्विच्-क्विप् वा। १ आभिमुख्येन सम्बन्धुं समर्थे २ अभिभावुके च "वसो अभिषाचकध्यान्" ऋ० ६,६३,६।

अभि(भी)षाह् त्रि० अभि+सह-णिच्-क्विप् वा षत्वम् वा दीर्घः। १शत्रुजयिनि २सहनशीले च।

अभिषिक्त त्रि० अभि+सिच-क्त। १ कृताभिषेके राजादौ

"कन्दर्पं परिवीक्ष्य नूतनमनोराज्याभिषिक्तम्" सा०द० । "दीक्षितेष्वभिषिक्तेषु ऋतवीर्थपरेषु च" परा० । "सेनापत्येन देवानामभिषिक्तो गुहस्तदा" भा०व०प० २ स्नाते च । अभिषिक्तेन निर्वृत्तम् सङ्घा० अण् । आभिषिक्तः अभिषिक्तनिर्वृत्ते कूपे पुं० । [सोमादौ च ३काङ्क्षिके न०।

अभिषुत त्रि० अभि+षु–क्त । १ निष्पीड़िते २ कृताभिषवे

अभिषेक पु० अभि+सिच–घञ् । १ विधिना शान्त्यर्थं सेचने, २अधिकारप्राप्त्यर्थं स्नाने, यथा "अथाभिषेकं रघुवंशकेतोः" रघुः । मन्त्रादिना शिरसि जलप्रक्षेपमालेप ३ मार्जने । ४स्नानमात्रे च । "कृताभिषेकां हुतजातवेदसम्" कुमा० । "निष्यन्दिनीरनिकरेण कृताभिषेकाः" माघः "तत्राभिषेकं कुर्वाणो गोसहस्रफलं लभेत्" । "तत्राभिषेकं कुर्वीत पितृदेवार्चने" रतः "तत्राभिषेकं कुर्वीत नागतीर्थे नराधिप । भा०व०प० । ५ कर्म्मान्ते शान्त्यर्थं स्नाने च । "सुरास्त्वामभिषिञ्चन्तु इत्यादिमन्त्रैः स्नाने तच्च मत्स्यपुराणादानादिपदे २०६पृष्ठे दृश्यम् । ६प्रतिष्ठादौ देवादेः स्नपने च । करणे घञ् । ७ जले ।

अभिषेक्तृ त्रि० अभि+सिच–तृच् । अभिषेककारिस्त्रियां ङीप् ।

अभिषेक्य त्रि० अभिषेक्तुमर्हति अभि+सिच–यत् कुत्वम् । अभिषेकयोग्ये "अभिषेक्याभविष्यत समाहुवन्त इत्याह राजसूयान्" काट्या० २०,२,१७ "यूयमस्मद्यां समाहुवन्तः पट्टाभिषेकयोग्या भविष्यथ" कर्क० ।

अभिषेचन न० अभि+सिच–भावे ल्युट् । अभिषेकशब्दार्थे अभिषेचने हितम् ठञ् । आभिषेचनिकम् । अभिषेकद्रव्यमन्त्रादौ त्रि० । करणे ल्युट् । अभिषेकद्रव्ये न० ।

अभिषेचनीय त्रि० अभि+सिच–कर्म्मणि अनीयर् । अभिषेकार्हे "ये वा एतस्योदकं गमिष्यन्ति राष्ट्रं ते भविष्यति राजानो अभिषेचनीयाः" शत०ब्रा० । स्वार्थे क । २ अभिषेकद्रव्ये त्रि० "पुरोडाशस्त्रिरुन्नतोऽभिषेचनीयवत्" काट्या० १८,६,१५, "राजसूयस्यान्तर्गताभिषेचनीय सोमस्येव" कर्क० "अभिषेचनीयेच्छा" शत०ब्रा० ।

अभिषेणन न० सह इनेन सेना तयाभिसृत्यं याति गत्योः अभि+सेना+णिच्–ल्युट् णत्वम् । युद्धार्थं गत्योरभिसृत्यं सेनया सह जिगीषोर्गमने ।

अभिष्टन पु० अभि+स्तन–अप् णत्वम् । सिंहनादे "अभिष्टने ते अद्रिवो यत् स्था" ऋ० १,८०१४, "अभिष्टने सिंहनादे" भा० ।

अभि(भी)ष्टि त्रि० अभि+यज–इष वा क्तिन् वेदे षत्वं एका० । १"अभिवट्ये 'मह्ना अभिष्टिरोजसा य०२३,२५, अभीज्यते इत्यभिवट्यः वे०दी० । २ अभिलाषे, । आसादभिष्टिद्रवसे वासदृयः" य० २०,४८ अभिष्टिमभिलाषं करोतीत्यभिष्टिकृत् मनोरथप्रदः" इति वेददी० ।

अभिष्टुत त्रि० अभि+स्तु–क्त । १वर्णिते, २स्तुते, च ।

अभि(स्य)ष्यन्द पु० अभि+स्यन्द–भावे घञ् अप्राणि कर्त्तरि वा णत्वम् । १अतिदत्तौ २ स्रवणे ३ जलादिक्षरणे च । कर्त्तरि घञ् । ४ अधिके । "स्वर्गाभिष्यन्दवमनमिति" कुमा० । "भूतपूर्व्वमभूतपूर्व्वं वा जनपदं परदेशापवाहनेन स्वदेशाभिष्यन्दवमनेन वा निवेशयेदिति" कौटि० । आधारे घञ् । ५नेत्ररोगहेतौ । "प्रायेण सर्व्वे नयनामयास्ते भवन्त्यभिष्यन्दनिमित्तमूलाः" । तस्मादभिष्यन्दसदीर्यामाशसूपाचदेदाशु क्षिताय धीमान् सुश्रु० । उष्णाभितप्तस्य जलप्रवेशाद्दूरेक्षणात् स्वप्नविपर्य्ययाच्च । स्वेदाद्रजोधूमनिषेवणाच्च अर्हैर्विघाताद्दमनातियोगात् द्रवाक्षवाद्राक्षिणि सेविताच्च विस्रूलवातक्रमनिग्रहाच्च प्रसक्तसंरोदनशोककोपाच्छिरोभिघातादतिमद्यपानात् । तथा ऋतूनाञ्च विपर्य्ययेण क्रोधाभिघातादतिमैथुनाच्च । बाष्पग्रहात् सूक्ष्मनिरीक्षणाच्च नेत्रे विकारान् जनयन्ति दोषाः । स च चतुर्विधः यथा । वातात् पित्तात् कफाद्रक्तादभिष्यन्दश्चतुर्विधः । प्रायेण जायते घोरः सर्व नेत्रामयाकरः । सुश्रु० ।

अभिष्यन्दनगर न० अभिष्यन्देन प्रधाननगरातिदृष्ट्या तदतिवाहेन कृतं नगरम् । शाखानगरे अभिष्यन्दरमणमित्यपि पाठः । रत्नं रतिस्नानं ऐत० । तत्रार्थे ।

अभिष्य(स्य)न्दिन् त्रि० अभिष्यन्दते अभि+स्यन्द–णिनि अप्राणिकर्त्तरि वा णत्वम् । सर्व्वतः स्रुते । "पयोऽभिष्यन्दि गुर्व्वाभं प्रायशः परिकीर्त्तितम्" सुश्रु० ।

अभिष्वङ्ग पु० अभि+स्वञ्ज–घञ् । १ उत्कटरागे २अनात्मन्यहंबुद्धौ च "असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु" गीता

अभिसंरब्ध त्रि० अभि+सम्+रभ–क्त । १ क्रुद्धे । [निष्पन्ने च

अभिसंवृत्ति स्त्री अभि+सम्+वृत–क्तिन् । १ व्यवहारे २अभि-

अभिसंश्रय च० अभितः संश्रयः । १ सर्वतः आश्रये "यदि कुर्य्यात् भवानेवं विलेऽस्मिन्नभिसंश्रयम्" रामा० ।

अभिसंसार अव्य० संसारस्याभिमुख्यम् अव्ययी० । संसाराभिमुख्ये । अभि+सम्+सृ–घञ्यां सलुक् । अभिनाघोद्योतनात् न द्वित्वम् । अभिसंसारम् अभिगम्याभिगम्येत्यर्थे । "महानागमिवाभिसंसारं दिदृक्षितारः" ग०ब्रा०

अभिसंहित त्रि० अभि+सम्+धा–कर्मणि कर्त्तरि वा क्त। १ फलोद्देशेन कृते २ अभिसन्धिविषयभूते ३ अभिसन्धिकर्त्तरि च "विसृक्तिदायेऽनभिसंहितेषु" रुचिस्तवः।

अभिसन्ताप पु० अभिसन्तापयतेऽनेन अभि+सम्+तप–णिच्–करणे अच्। १ अभिशापे। तप–भावे घञ्। २ अभितः सन्तापे। तप–आधारे। घञ्। ३ युद्धे।

अभिसन्धक त्रि० अभि+सम्+धा–क–स्वार्थे कन्। १ परगुणासहनेन आक्षेपके, "वैडालव्रतिकोक्षेयोद्विजः सर्वाभिसन्धकः मनुः"। "अभिसन्धकः परगुणासहनेन सर्वाक्षेपक इति" कुल्लू०। [२ फलोद्देशे ३ बन्धने च।

अभिसन्धा स्त्री अभि+सम्+धा–भावे अङ्। १ अभिसन्धौ

अभिसन्धान न० अभि+सम्+धा–ल्युट्। १ परवञ्चने। "पराभिसन्धानपरं यद्यप्यस्य विचेष्टितम्" रघुः। "पराभिसन्धानपरामन्त्रिणः" कादं० २ फलोद्देशे ३ अभिसन्धौ च। "फलाभिसन्धानपरा न योगिनः" पुरा०।

अभिसन्धाय पु० अभि+सम्+धा–भावे घञ्। १ अभिसन्धौ फलाद्युद्देशे। ल्यप्। २फलाद्युद्दिश्येत्यर्थे अव्य०। "अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्" गीता।

अभिसन्धि पु० अभि+सम्+धा–भावे कि। १ फलाद्युद्देशे। "स्वर्गाभिसन्धि सुकृतं वञ्चनाभिव मेनिरे" कुमा०। "स्वधाभुजः काम्यफलाभिसन्धौ" रुचिस्तवः।

अभिसन्धित त्रि० अभिसन्धा जाताऽस्य तारं० इतच्। १ जाताभिसन्धौ अभिसन्धिविषये।

अभिसम्पत्ति त्रि० अभि+सम्+पद–क्तिन्। १ अभितः सम्पत्तौ अन्यरूपस्यान्यथाभवने, "चित्यस्याहवनीयाभिसम्पत्तेः" कात्या० १८,६,२५। "आहवनीय एव चित्याभिसम्पत्ति रवगात् "यो वाव चितेऽग्निर्निधीयते तामेवैष्टकामेव सर्वोऽग्निरभिसम्पद्यत" इतिश्रुतिः एकवारं चित्यस्योपरि निधानेनाहवनीयाग्नेरेव सर्व्वदा चित्यात्मकतासम्पन्ना" कर्क०।

अभिसम्पद् स्त्री अधिका सम्पद् प्रा०स०। १ अधिकसम्पत्तौ। अभिलक्ष्य संख्यां सम्पद्। तत्तत्संख्यादिसाध्येन सम्पद्व्रतायाम् "तान्युभयान्येकविंशतिः सम्पद्यन्ते द्वादश मासाःपञ्चर्त्तवस्त्रय इमे लोकाः असावादित्य एकविंशः एतामभिसम्पदम्" शत०ब्रा०। "यैषा संख्यासम्पत्तिस्तामभिलक्ष्य भवति" भा०। सम्पदमभिलक्ष्य अव्ययी० टच् समा०। अभिसम्पदम् सम्पदमभिलक्ष्येत्यर्थे अव्य०।

अभिसम्पात पु० अभि+सम्+पत–आधारे घञ्। १ युद्धे। भावे घञ्। २ पतने। करणे घञ्। ३ अभिशापे लोकप्रसिद्धिः।

अभिसम्बन्ध पु० अभि+सम्+बन्ध–घञ्। १ अभितः सम्बन्धे "द्रव्याणां कर्म्मसंयोगे गुणात्वनाभिसम्बन्धः" "फलार्थित्वात्तु स्वामित्वे नाभि" जै०सू० "वैजिकादभिसम्बन्धादनुरुध्यादधं त्याहृम्" मनुः २ वाक्यादौ आकाङ्क्षितपदान्वये च पदानामन्वयेच पदार्थान्वयोस्त्यत्रैव।

अभिसर त्रि० अभितःसरति सृ+ट स्त्रियां ङीप्। १ सङ्केते, २ अनुचरे। "तथैवाभिसरास्तेषां त्यक्तात्मानो जये धृताः" भा०उ०प०। "अथ साभिसरं शरैस्तरस्वी" माघः।

अभिसरण न० अभि+सृ–ल्युट्। १ अभिगमने २ नायकयोरेकतरेण रागेण सङ्केतस्थानगमने च। [३ उत्सृष्टे च

अभिसर्ज्जन न० अभि+सृज–भावे घञ्। १ दाने, २ बधे

अभिसाय अव्य० आभिमुख्ये अव्ययी०। सायाङ्गाभिमुख्ये। "श्रितोदयाद्रेरभिसायसङ्गैरचूचुरच्चन्द्रमसोऽभिरामताम्" माघः।

अभिसार पु० अभि+सृ–आधारादौ घञ्। १ युद्धे, २ साङ्गाख्ये, ३ साधने, ४ स्त्रियाः पुंसो वा संभोगार्थं निर्ज्जनसङ्केतस्थानगमने च। "आरब्धे रभसान्नया प्रियसखि! क्रीड़ाभिसारोत्सवे"। अभिसारप्रकारश्च। "क्षेपु गात्रेषु संलीना मूकीकृतविभूषणा"। अवगुण्ठनसंवीता कुलजाऽभिसरेद्यदि। विचित्रोज्ज्वलवेषा तु वल्गूपुरनिस्वना प्रमोदस्वैरवदना स्याद्वेश्याऽभिसरेद्यदि। मदस्खलितसंलापा विभ्रमोत्पुल्ललोचना। आविद्धगतिसञ्चारा स्यात् प्रेष्याऽभिसरेद्यदि॥ क्षेत्रं वाटी भग्नदेवालयो दूतीसृष्टं वनम्। मालयञ्च श्मशानञ्च नद्यादीनां तटी तथा एवं कृताभिसाराणां युवतीनां विनोदने, स्नानान्यष्टौ तथा ध्यानञ्चैषु क्वचिदाचरेत्" इति सा०द०। कर्त्तरि घञ्। अनुचरे पु० "अभिसारैश्च सर्व्वैश्च ततोयुद्धमवर्त्तत" भा०ब०प०।

अभिसारिका स्त्री अभिसरति अभिसारयति वा कान्तं सङ्केतस्थानं अभि+सृ–णिच्–वा ण्वुल्। १ "अभिसारयते कान्तं वा मन्मथवशंवदा। स्वयं वाभिसरत्येषा धीरैरुक्ताभिसारिका" सा०द० उक्ते नायिकाभेदे "अनभिज्ञास्वभिज्ञासु दुर्दिनेष्वभिसारिकाः" कुमा०"यः सञ्चरोऽभूदभिसारिकाणाम्" रघुः।

अभिसारिन् त्रि० अभिसरति णिनि। १ आभिमुख्येन गन्तरि २अनुचरे च स्त्रियां ङीप्। "यत्र त्रिष्टुपे त्रैष्टुभपदा

हौ तु जागतौ यस्याः सा जागते जगती, त्रैष्टुभे त्रिष्टुप्। वैराजौ जागतौ चाभिसारिणी" ऋतु०क्र० उक्ते वैदिकच्छन्दोभेदे स्त्री यस्याः वैराजौ द्वौ पादौ द्वौ च पादौ जागतौ साऽभिसारिणीति तदर्थः।

अभिसृष्ट पु० अभि+सृज-क्त। १दत्ते, २उत्सृष्टे, ३त्यक्ते च

अभिस्वर् न० स्वृ-भावे-क्विप् स्वः अभितः स्वः स्वरणं यद्वो वा यस्य। अभितः स्वरयुक्ते स्तोत्रभेदे "अभिस्वरा निषदा गा अवस्यवः" ऋ०२,२१,५ अभितः स्वः स्वरः शब्दनं वा यस्य तेन स्तोत्रेण" भा०। "स्तोमं नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरा" ऋ०८,६७,१२ "अभिस्वरा अभिस्वरणेन स्तोत्रेण" भा०। [रथस्य हर्योरभिरभिस्वरे"श्रुतिः।

अभिस्वर पु० अभि+स्वृ-अप्। आभिमुख्येन प्रेरणे "स्यात

अभिहत त्रि० अभि+हन-क्त। १ अभिघातसंयोगवति। "सोदीर्णोर्मूर्ध्नाभिहतो वक्त्रमापद्य मारुतः" शिशु। २ ताडिते "परस्परेणाभिहता विनेदुः" पु०। ३ गुणिते च। "अन्योन्यहाराभिहतौ हरांशौ" लीला०।

अभिहरण न० अभि+हृ-ल्युट्। १आभिमुख्याहरणे "कार्मुकाभिहरणाय मैथिलः" रघुः। २विवाहादौ यौतकदाने च।

अभिहव पु० अभिह्वयते अभि+ह्वे-अप् संप्रसारणञ्च। आभिमुख्येनाह्वाने ह्व-अप्। २ सर्व्वतोहोमे।

अभिहस्य त्रि० अभि+हस-यत्। उपहसनीये "यस्ते मदोऽवकेशोविकेशो येनाभिहस्यं पुरुषं बभूथ" अथ०६,३०,२, ल्यप्। २ उपहसेत्यर्थे अव्य०।

अभिहार पु० अभि+हृ-घञ्। १ अपचिकीर्षया अभिगम्याक्रमणे, २ साक्षाच्चौर्य्ये, ३ अभियोगे, ४ करचादिधारणे ५ संश्लेषणे ६ मेलने च। "अतिदूरात् सामीप्यादिन्द्रियघातान्मनोनवस्थानात्। सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्च" सां०का०। "समानाभिहारात् तोयदविसक्तानुदबिन्दून् जलाशये न पश्यति" सा० कौ०।

अभिहित त्रि० अभि+धा-क्त। १ अभिधया उक्त्या बोधिते २उक्ते। "अभिहिते प्रथमा" पा०। अभिधानञ्च प्रायेण तिङन्तसुबन्तसमासैः क्वचिदव्ययेन। तत्तद्विभक्त्यर्थायां अभिहितत्वे कर्त्तृकर्मणोरभिहितत्वमिति नैयायिकाः भवति च ग्रामं गच्छति चैत्रः, ग्रामो गम्यते चैत्रेणेत्यादौ कर्त्रादिकर्मगतसंख्यायां आख्यातेनाभिधानमतस्तत्र प्रथमोपपत्तिः। तथाचाख्यातार्थसंख्यावत्त्वेन कर्त्तृकर्मणोः अभिहितत्वम्। वैयाकरणमते कर्त्तृकर्मणोरेव आख्यातेनाभिधानमिति भेदः। "अनभिहिते" पा० अनभिहिते इत्यधिकारे कर्मादौ द्वितीयादि "इति प्रविश्याभिहिता द्विजन्मना" कु०अस्य वचनस्यैकतया गौणे कर्मणि क्त। वचनोद्देश्यत्वेन तस्याः कर्म्मत्वादुक्तता। गौणकर्म्मणोऽप्रयोगे तु मुख्यकर्म्मणोवचनादेरुक्तता। "वासुदेवेनाभिहिते वाक्ये तेन महात्मना" भा०उ०प०।

अभिहितान्वय अभिहितानामन्वयः। अभिधाद्वृत्त्या (शक्त्या) उपस्थापितानामर्थानां परस्परसंबन्धे। तथा हि अभिधाद्वृत्त्या पदार्थबोधने द्विधा प्रकारः। अन्विताभिधानम् अभिहितान्वयश्च तत्र मीमांसका एवमाहुः "सर्वेषां शब्दानां व्यवहारादेव प्रथमं व्युत्पत्तिर्दृश्यते इतरोपायानां शब्दव्युत्पत्त्यधीनत्वात्। तथा हि प्रयोजकस्य वाक्योच्चारणानन्तरं प्रयोज्यप्रवृत्तिमुपलभमानो बालः प्रेक्षावद्वाक्योच्चारणस्य प्रयोजनजिज्ञासायां तदन्वयव्यतिरेकानुविधायित्वादुपस्थितत्वाच्च प्रयोज्यवृद्धप्रवृत्तिरेव प्रयोजनमवधारयति न चाकिञ्चित्कृर्व्वतस्तादर्थ्यं सम्भवतीति तद्वाक्यजन्यं प्रवृत्त्यनुकूलं कार्य्यतात्पर्य्यज्ञानमेव कल्पयति स्वप्रवृत्तौ बालेन कार्यतात्पर्य्यज्ञानस्य हेतुत्वावधारणात् तथा च प्रेक्षावत् प्रवृत्तिः कार्यतात्पर्य्यज्ञानाधीना प्रवृत्तित्वात् मदीयप्रवृत्तिवदित्यनुमीयते तत्र कारणान्तरानुपस्थितेः शब्दस्यैवोपस्थितेस्तस्यैव कार्यतात्पर्य्यज्ञानहेतुत्वमवधार्य्य तत्रैव शक्तिं कल्पयति प्रथमान्वयव्यतिरेकाभ्यां क्रियाकारकपदानां कार्य्यान्वितस्वार्थेषु शक्तिं गृह्णाति प्रथमं गृहीतसामान्यशक्त्यनुरोधात्। ततश्च पदं कार्य्यान्वितस्वार्थबोधजनकं पदत्वादिति सामान्यतोऽवगतः स्वार्थः, विशेषः पुनराभिहितः स च उत्तरकाले तात्पर्य्यदृष्टपदेशादिभिरवगम्यते। अतः प्रवृत्तिपराणामेव शब्दानां प्रवर्त्तकज्ञानजनकत्वम् तच्च क्वचित् साक्षात् क्वचित्परम्परया कार्य्यान्वितस्वार्थबोधजनकत्वम् तत्र साक्षात् यजेत यष्टव्यमित्यादौ वाक्ये। विधिरूपीभूतार्थवादादौ तु परम्परया। कार्य्यान्वय इति सर्व्वत्र वेदे कार्य्यान्वितस्वार्थबोधकता स्वरूपाख्यानपराणान्तु काव्यनाटकादीनां पदार्थासंसर्गाग्रहेण संसर्गस्य व्यवहारः न तु संसर्गग्रहेण, तथा च व्यवहारेणैवानुमिते इतरान्वितज्ञाने करणत्वग्रहात् तत्रैव शक्तिर्दृश्यते उपस्थितत्वात् नचाद्ये तत्त्यागः हेत्वभावात्। न तु पदार्थमात्रे शक्तिग्रहः व्यवहारात्तस्यानुपस्थितेः उपायान्तरात्तदुपस्थित्यन्तरकल्पने मानाभावात्। एवञ्च इतरान्वितस्वार्थज्ञानजनकत्वेन ज्ञातं पदं स्वार्थान्वयानुभावकमिति वाक्यार्थ एव शक्त्याऽभिधीयते इत्यन्विताभिधानवादिनः"। अभिहितान्वयवादिनस्तु नैयायिकादयस्तेषामयमाशयः। इतरा-

न्वितपदार्थज्ञानोपस्थितौ पदार्थज्ञानं विशेष्यमिति तदुपस्थितौ पदार्थस्य विषयत्वात् विशिष्टज्ञानस्य विशेष्यविषयत्वनियमादिति तत्रैव शक्तिः कल्प्यते लाघवात् नत्वन्वयांशेऽपि गौरवात् अस्तु वा प्रथममितरान्विते शक्तिरुपस्थिते तस्य त्यागः आकाङ्क्षायोग्यतादिबलात्पदप्रतिसन्धानात् अनन्यलभ्यस्यैव शब्दार्थत्वात् प्रथमस्मृतितत्वमात्रस्याकिञ्चित्करत्वात् तथा च घटशब्देन ज्ञातं पदं स्वार्थस्मारणद्वाराकाङ्क्षादिसहकारिवशात् समभिव्याहृतपदार्थेन सह स्वार्थस्यान्वयमनुभावयति स्वभावादित्यन्वयैवान्वयज्ञानोदयात् किं तत्र शक्त्या, अन्वयमात्रशक्तावपि अन्वयविशेषज्ञानार्थमाकाङ्क्षादेरवश्यमपेक्षणात् तैरेव सहकारिभिरन्वयविशेषावगमसम्भवात् । क्रियाकारकपदयोः प्रत्येकमितरान्वितस्वार्थबोधकत्वेऽवान्तरवाक्यार्थद्वयबोधप्रसङ्गात् । न चैकमेव पदमन्विताभिधायकमितरत्तु अन्वयप्रतियोगिस्मारकमिति वाच्यम् अविशेषात् कस्याभिधायकत्वमित्यनिर्णयात् । किञ्च किमशक्त्योरेवान्वये शक्तिः ? उत शक्त्योः ? आद्ये यस्य कस्यापि अन्वयबोधकत्वापत्तेरतिप्रसङ्गः स्यात् तथा च शक्यान्वयाभिधायकत्वं वाच्यं एवं च शक्ये शक्यान्वये च द्विधा शक्तिः कल्पनीयेति गौरवम् । अथ अन्वयतात्पर्यकतया तत्प्रतिपादकं पदमित्युभयसङ्गतम् तात्पर्यं निर्वाहिका च वृत्तिः सा च न गौणी न वा लक्षणेति अगत्या शक्तिः स्वीकार्येति चेत् वृत्तिं विनापि तात्पर्यनिर्वाहात् किं वृत्त्या, पदानामुक्तक्रमेणान्वयबोधकत्वसम्भवात् अन्यथा शक्त्यैव तात्पर्यं निर्वाहावश्यम्भावे लक्षणोच्छेदः स्यात् । अथ घटमानयेत्यादौ प्रत्येकमन्वये सत्येव विशेषान्वयसामान्ये जिज्ञासा भवति न च सामान्यानवगमे विशेषे सा स्यादित्यतस्तत्र शक्तिरिति चेन्न कारकेण क्रियायाः क्रियया च कारकस्य सामान्यत आक्षेपात् दृष्टे फले तदीयरसजिज्ञासावत् तदुपपत्तेः ततश्च पदार्थे एव शक्तिः न पदार्थान्वयांशे तस्मात् पदज्ञानं करणं पदार्थस्मरणं व्यापारः आकाङ्क्षादिसहकारिणि स्मारितपदार्थान्वयानुभवः फलमिति" ।

अभिङ्गति स्त्री अभि+ङ्गे-क्तिन् । आभिमुख्येनाङ्गाने ।

अभिङ्गत् त्रि० अभि+ङ्गृ-कर्मणि अति वेदे प्र० न गुणः । आभिमुख्येन ह्रियमाणे । "दुरितादभिङ्गतः शंसादघादभिङ्गतः" ऋ० १,१२८,५ "अभिङ्गत आभिमुख्येन ह्रियमाणान्" भा० ।

अभिङ्कर् त्रि० अभि+ङ्कृ-विच् । १ कुटिलगन्तरि "नाभिङ्करे पदं निदधाति शत्रवे" अथ० ६,७६,३ अभि+ङ्कृ-कर्मणि अप् । अभिङ्करः उपङ्करे गन्तव्यदेशादौ ।

अभिङ्कृत् त्रि० ङ्कृ कौटिल्ये कर्त्तरि अति प्र० । आभिमुख्येन कुटिलं कुर्वति "निनित्सोरभिङ्कृतामसि" ऋ० १,१८६,६, "अभिङ्कृतामाभिमुख्येन कुटिलं कुर्वताम्" भा० ।

अभिङ्कृति स्त्री अभि+ङ्कृ-क्तिच् वेदे प्र० । कुटिलस्वभावे । "यतभुजिभिस्तमभिङ्कृतेरवाते" ऋ० १,१६६,८ "अभिङ्कृतेः कुटिलस्वभावात्" भा० ।

अभी त्रि० नास्ति भीर्यस्य । भवत्युन्ये । कप् । अभीकोऽप्यत्र

अभीक त्रि० अभि+कन् "अनुकाभिकाभीकाः कमयिता" पा० नि० । १ कामयमाने "मेदस्विनः सरभसोपगतानभीकान्" माघः । २क्रूरे ३उत्सुके च । आभिमुख्येन कायति प्रकाशते दीर्घः । ४समीपे "प्रतङ्गावयो वङ्कन्वरूथमभीके" ऋ० १,११८,५, "अभीके स्वसमीपे" भा० । ४ अभि+इण+कन् । ५ अभिगते त्रि० "यामन्रुद्यतामभीके" ऋ० ७,८६,१, "अभीके अभिगते" भा० । ६कवौ ७स्वामिनि च त्रि० ।

अभीक्ष्ण त्रि० अभि+क्ष्णु-तेजने वा०ड प्र० दीर्घः अभिगतः क्षणं वा प्र० । १ सन्तते २ भृशे च । २ क्रियापौनःपुन्ये" न० । "सङ्कारणमनभीक्ष्णोपसेवितम्" राजा० । अभीक्ष्णस्य भावः ष्यञ् । आभीक्ष्ण्यम् सन्ततभावे "नित्यवीप्साभीक्ष्ण्ये" पा० "आभीक्ष्ण्ये" इति सि० कौ० ।

अभीक्ष्णम् अव्य० अभि+क्ष्णु-वा०डमु प्र० दीर्घः । पौनःपुन्ये स्वरादि । "अभीक्ष्णमङ्कुशतयाऽतिदुर्गमम्", माघः ।

अभीत त्रि० अभि+इण-क्त न०त० । १ अभिगते । न भीतः विरोधे न०त० । २ भीतभिन्ने उत्साहान्विते त्रि० ।

अभीति स्त्री अभावे न०त० । १ भयाभावे २ तद्दानार्थायाम् अभयस्तद्द्वारात्वाच्च । "परशुस्मरराभीतिरुच्चैः प्रसन्नम्" शिवध्यानम् । ३ईप्सिते । २ भीतिशून्ये त्रि० । अभि+इण-क्तिन् । अभिगमने ३ "अभीतिमर्थे" इति ऋ० ७,२१,६ । "अभीतिमभिगमनम्" भा० । कर्मणि क्तिन् । ५समीपे ।

अभीपत् त्रि० अभि+पत-क्विप् दीर्घः । अभिगमनकर्त्तरि । "अभीपतोऽद्रिभिस्पर्यन्नम्" ऋ० १,१६४,५२, "अभीपतोऽभिगमनवतः" भा० । [लषिते ।

अभीप्सित त्रि० अभि+आप+सन-क्त । १ अभीष्टे अभि-

अभीप्सु त्रि० अभि+आप+सन्-उ । अभिलाषुके ।

अभीम त्रि० विरोधे न०त० । १ भयानकभिन्ने सौम्ये ।

अभीमान पु० अभि+मन-क्विप् वा दीर्घः । अभिमानशब्दार्थे

अभीर पु० अभिमुखीकृत्य ईरयति गाः अभि+ईरः अच् ।

गोपे जातिवाचकादन्यशब्दत्वेन ततः स्त्रियां ङीप्।

अभीरु(लु) त्रि० न०त०। १ भीरु(लु)भिन्ने युद्धादावुत्साहान्विते। "स्थाने युद्धे च कुशलानभीरूनविकारिणः" मनुः "ते वाशीमत इष्मिणो अभीरवः" ऋ० १,८७,६। २वटुकभैरवे पु० "अभीरुर्भैरवो भीरुर्भूतपोयोगिनीपतिः" वटुकस्तवः ७त०। युद्धस्थाने न०। शतमूल्यां स्त्री असङ्कुचितपत्रत्वात्तथात्वम्। वा ङीष्। अभीरूः शतमूल्याम्। "अभीरूभिसिसिम्बूश्वत्सकोशीरपद्मकैः" सुश्रुतः।

अभीरुण अभि+रु-बा०उनन् दीर्घः। १ अभिमुखे "यज्ञाभिद्रोहाच्चतं यज्ञ गोपे अभीरुणम्" श्रुतिः।

अभीरुपत्री स्त्री न भीरूणि असंकुचितत्वात् पत्राण्यस्याः जातौ ङीप्। शतमूल्याम्। [३ तद्धति। त्रि०

अभील न० अभि+ईर-अच् रस्य लः। १ कष्टे २ भयानके

अभीलाप पु० अभि+लप-भावे घञ् दीर्घः। अभिमुखकथनरूपे शब्दे। "आलापाश्च प्रलापाश्चाभीलापलपश्च वै" अथ० ११,८,२५ लप् लपनं भावे क्विप् ततोद्वन्द्वः। तेन लपनालापप्रलापाभीलापाश्चत्वार इह उक्ताः। अभीलापलप् इति शब्दकल्पनं भ्रमविजृम्भितम्।

अभीवर्ग पु० अभि+इज-आधारे घञ्। अभिमुखसंघे "अहं राष्ट्रस्याभीवर्गे निजोभूयाससत्तमः" अथ०३,५,२०।

अभीवर्त्त पु० अभिवर्त्तन्ते गच्छन्ति स्वर्गमनेन अभि+वृत-करणे घञ्। १ब्रह्मसामनि तच्च "उदङ्ङुत्तीयाहरित्यस्यां योनावुत्पन्नं ब्राह्मणाच्छंसिनऋत्विग्भेदस्य पृष्ठस्तोत्रम्। "अभीवर्त्तोब्रह्मसाम भवति अभीवर्त्तेन वै देवाः स्वर्गं लोकमभ्यवर्त्तन्त यदभ्यवर्त्तन्त तदभीवर्त्तो ब्रह्मसाम भवति स्वर्गस्य लोकस्याभिवृत्त्यै" ता०ब्रा०। "अभिवृत्तिसाधनत्वादस्य साम्नोऽभीवर्त्तसंज्ञा निष्पन्ना"भा०। "तदभीवर्त्तस्याभीवर्त्तत्वमिति सांख्यायनस्तु०। एतदभीवर्त्ताख्यं साम पूर्व्वस्मिन् पक्षे विद्यमानानामाभिप्लविकानामङ्गां स्वरसाम्नां च माध्यन्दिने सवने यजमानान्यारब्धेन ब्रह्मणा पृष्ठस्तोत्रतया कर्त्तव्यं, तथा उत्तरस्मिन् पक्षे "इन्द्रक्रतुश्च आभरे" श्लोक एव प्रगाथः ब्रह्मसामाश्रयः कर्त्तव्यः। प्रत्यृचं च तस्मिन् प्रगाथे अन्यदन्यत्साम ब्रह्मणा पृष्ठस्तोत्रार्थं कर्त्तव्यम् इति" ता०ब्रा० भा०। २ संवत्सरे। "अभीवर्त्तः सविंशः" यजु० १४,२३। अभिवर्त्यते आवर्त्यत इत्यभीवर्त्तः सामाद्यात्मकः स विंशः स्तोमः यद्वा अभिवर्त्तयत्यावर्त्तयति सर्वाणि भूतानीत्यभीवर्त्तः संवत्सरः "उपसर्गस्य घञ्यमनुष्ये बहुलमिति" पा० दीर्घः। द्वादशमासात्मकसंवत्सररूपविंशतिसङ्ख्यया सहितः सविंशः। य एष सविंशस्तोमः तस्यपदधातीत्यर्थः "संवत्सरो वा अभीवर्त्तः इति संवत्सरो हि सर्वाणि भूतान्यभिवर्त्तते" श्रुतिः वे०दी०। ३अभीवर्त्तेनेत्यादिके सूक्ते "अयैनं सारथमाशसुपारुह्याभीवर्तं वाचयति" आश्व० श्रौ०। ४ अभिवृत्तिसाधने हविर्भेदे च। "अभीवर्त्तेन हविषा येनेन्द्रो अभिवाहते" ऋ० १०,१७४,१।

अभीशु पु० अभि+अश-उन् पृ० अत इत्त्वम्। १ बाहौ "अभीशवोऽभ्यश्नुवते कर्म्मणि" निरु०। २ अश्वरज्जौ। "स्थिरा वसन्तु नेयोरधो अश्वा स एषां सुसंस्कृता अभीशवः" ऋ० १,३२८,१२,। ३ किरणे "प्रफुल्लतापिच्छनिभैरभीशुभिः" माघः "सुयन्तुभिः सर्वशासैरभीशुभिः" ऋ० ५,४४,४, अभीशुभिः रश्मिभिः" भा०। ४ "अङ्गुली च अभीशवोऽङ्गुलयः" ऋ० भा० उक्तेः।

अभीशुमत् पु० अभीशवः किरणा बाहुल्येन सन्त्यस्य मतुप्। सूर्य्ये "क्षितिपःक्षिपुरभीशुमानिव" माघः।

अभीषङ्ग पु० अभि+सनज-घञ् दीर्घः। अभिषङ्गशब्दार्थे।

अभीषु पु० अभि+इष+कु। १ किरणे (लागाम) इति ख्याते २प्रग्रहे, ३ कामे, ४ अनुरागे च। सर्वे कोषकारा मूर्द्धन्यान्ततया पेठुः लोकवेदयोस्तु तालव्यान्तप्रयोगः" मल्लि०।

अभीष्ट त्रि० अभि+इष-क्त। १ वाञ्छिते, २ दयिते, ३ हृद्ये च "स्नातकं गुरुमभीष्टमित्विजम्" माघः। "आत्मानमखिलाधारमात्मन्येऽभीष्टसिद्धये" वे०सा०।

अभुक्त त्रि० भुज-कर्म्मणि क्त न०त०। १ "अभक्षिते अन्नादौ २अकृतभोगे पुण्यादौ च। "नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि" पुरा०। भोगश्च भोजनीयद्रव्याहारः कर्म्मजसुखदुःखानुभवश्च। भुक्तं भोजनं भावे क्त अर्थाः अच् न०त०। ३ भुक्तवद्भिन्ने "भुक्ताभ्राह्मणाः पीता गाव इति अर्थ आद्यच्" पा०भाष्यम्। सुप्तबोधे तु कर्त्तरि क्त इत्युक्तम्। "अभुक्तौ ह्यतिथिर्भुङ्क्ते" स्मृतिः "अभुक्तस्य दिवा निद्रा पाषाणमपि जीर्य्यति" वैद्य०।

अभुक्तमूल न० "भुजङ्गपौरन्दरपौष्णभानां तदप्यभानाञ्च यदन्तरालम्। अभुक्तमूलं प्रथमप्रमाथं त्यजेत् सुतं तत्प्रभवां सुताञ्च" इति नार०। "ज्येष्ठान्ते घटिके द्वे च मूलाद्ये घटिकाद्वयम्। अभुक्तमूलमित्याहुर्ज्ञातं तत्र विवर्ज्जयेत्" वशि० ज्येष्ठान्यघटिकार्द्धञ्च मूलादौ घटिकार्द्धकम्। तयोरन्तर्गता नाड़ी ह्यभुक्तमूलसञ्ज्ञते" इति ज्यो० उक्ते ज्येष्ठामूलानक्षत्रयोराद्यन्तघटिकाविशेषे।

अभुज् त्रि० न भुङ्क्ते भुज–क्विप् न०त०। अभक्षके। "नभ आहहोः किमभुग्वदामि" ऋ० १०, ६५, ११।

अभूत त्रि० न भूतः। भूतशब्दार्थभिन्ने। "अभूतमासज्य विरूढमोहितम्" माघः। २ मिथ्याभूते ३ अविद्यमाने च

अभूततद्भाव पु० अभूतस्य प्रकृतिरूपेणानाविर्भूतस्य तेन रूपेण भावः। यः कश्चित् पदार्थः येन रूपेण प्रागभूतस्तेन रूपेण तस्याविर्भावे। यथा मृत्तिका घटीभवति। "च्वि-प्रत्ययोगे सम्पद्ये कर्त्तरि च" पा० "अभूततद्भावे इति वक्तव्यम्" वा०। [त्वाभिमाने।

अभूताभिनिवेश पु० अभूतेऽसत्येऽभिनिवेशः। असत्ये सत्य-

अभूति स्त्री अभावे न०त०। १ भवनाभावे "तस्य हृन देवाश्च नाभूत्या ईशते" शत० ब्रा०। "अभूत्यै अभवनाय" भा० ३ सम्पत्त्यभावे" "ध्वजाद्यापि व्यर्थोऽन्न भरतानाम-भूतये" भा० ४० प०। न०ब०। भूतिशून्ये त्रि०।

अभूमन् पु० विरोधे न०त०। १ भूरिभिन्ने खल्वे।

अभूमि स्त्री न०त०। १ अनाश्रमे अविषये "अभूदभूमिः प्रतिपक्षजन्मनां भियामिति" माघः "अभूमिरियमपन-यस्य" शकु० "नाभूदभूमिः करगायकानाम्" नैष०। "सखलु मनोरवानामप्यभूमिर्विसर्जनावसरसत्कारः" इति शकु०। अप्राशस्त्ये न०त०। अप्रशस्तभूमौ। न०ब०। भूमिशून्येत्रि०।

अभूमिज त्रि० न०त०। १ भूमिजभिन्ने आकाशजे जलादौ २ अप्रशस्तभूमौ उत्पन्ने धान्यादौ च। "अभूमिजं नव-द्वापि न धान्यं गुणवत् स्मृतमिति" स्मृतेः।

अभूयिष्ठ त्रि० विरोधे न०त०। भूरिभिन्ने अल्पे।

अभूषित त्रि० विरोधे न०त०। भूषितभिन्ने अपरिष्कृते

अभृत त्रि० न भृतः। १ अप्राप्तवेतने। गोस्वाम्यनुमते भृत्यः सा स्यात् पाकेऽभृते भृतिः" मनुः २ अपुष्टे च।

अभृग्न त्रि० न०त०। १ भृगभिन्ने मन्दे अल्पे।

अभेद पु० अभावे न०त०। भेदाभावे ऐक्ये "गतयोरभेद-मिति सैन्ययोस्तयोः" माघः "अभेदः शिवरामयोः" पुरा० "रलयोर्डलयोश्चैव जवयोर्बवयोरपि। शसयोर्षनयोश्चान्ते सविसर्गाविसर्गयोः। सबिन्दुकाविन्दुकयोः स्वादभेदेन कल्प-नम्" आलङ्कारिकाः "गुणगुणिनोः क्रि[illegible] इति सांख्यादयः। अभेदश्च भेदाभाव इति बहवः। तादा-त्म्यमिति तु साङ्ख्यादयः। तादात्म्यञ्च तत्सत्त्वनियतस-त्ताकत्वं तेन गुणगुणिनोः क्रियाक्रियावतोरपि तादात्म्यं गुणक्रिययोर्द्रव्यनियतसत्ताकत्वात् अतएव वेदान्तपरि-भाषायाम् सत्यैक्ये भिन्नभेदस्तादात्म्यमिलक्षं द्रव्यगुण-योर्भिन्नभेदसत्त्वेऽपि तत्सत्त्वनियतसत्ताकत्वात् तथात्वम्।

अभेद्य त्रि० भेत्तुं शक्यते भिद–शक्यार्थे यत् न०त०। १ भेत्तुमशक्ये "अभेद्यकवचं दधे" भा० द्रो० प०। २ क्षीरके न० तस्य केनापि धातुना भेत्तुमशक्यत्वात् तथात्वम्।

अभोक्तव्य त्रि० न भोक्तुमर्हम् कृत्यादिनिषिद्धत्वात्। अभक्ष्ये। तद्भक्षशब्दे २७४ पृष्ठे दर्शितम्।

अभोक्तृ त्रि० न भोक्ता स्त्रियां ङीप्। भोक्तृभिन्ने। [त्रि०

अभोग पु० अभावे न०त०। १ भोगाभावे न०ब०। २ भोगशून्ये

अभोजन न० अभावे न०त०। भोजनाभावे उपवासे "स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम्" "यतात्मनोऽप्र-मत्तस्य द्वादशाहमभोजनम्" इति च मनुः। भोजनाभावश्च भोजनविषयकनिवृत्तिरिति मीमांसकाः भोजनात्मनाभाव इति नैयायिकाः आत्मनाभावस्य नैमित्तिकजन्यत्वाङ्गी-कारात्तु कृतिसाध्यत्वमिति विवेकः। भोजनाभावश्च भोजने कश्चिद्रागाभावेन रोगेण वा, कश्चित्तु शास्त्रादितो भोजने बलवदनिष्टसाधनत्वज्ञानेन विरोधात् इष्टसाधनताज्ञानानुद-येन, यथा न कलञ्जं भक्षयेदित्यादौ। कश्चित्तु व्रतरूपे भोजनाभावे इष्टसाधनताज्ञानेन। स च भोजननिवृत्ति-स्तदन्याभावो वेत्युक्तम्। विस्तरस्तु निषेधनिषेधविधि-शब्दयोर्दृश्यः। "अजीर्णे भोजनं येषां जीर्णे येषामभो-जनम् रात्रावभोजनं येषां तेषां नश्यन्ति धातवः" इति वैद्यः। न०ब०। २ भोजनशून्ये त्रि०।

अभोज्य त्रि० न भोक्तुं शक्यं निषिद्धत्वात्। अभक्ष्ये तत्-स्वामिनि उपचारात् "अभोज्यानान्तु भुक्त्वान्नमिति" मनुः अभक्ष्यशब्दे २७४ पृष्ठे विवरणम्।

अभोज्यान्न त्रि० न भोज्यमन्नं यस्य कृतिनिषिद्धत्वात्। अभक्ष्यान्नस्वामिनि ते च अभक्ष्यशब्दे २७४ पृष्ठे उक्ताः। "य एतेऽन्ये त्वभोज्यान्नाः क्रमशः परिकीर्त्तिताः" मनुः।

अभौम न० भूमौ भवम् न०त०। भौमभिन्ने नभसजलादौ विर-रणं जलशब्दे "अभौमम्भोविसृजन्ति मेघाः" इति पुरा०

अभ्यक्त त्रि० अभि+अनज–क्त। १ कृततैलाद्यभ्यङ्गे २ अभि-तोलिप्ते च।

अभ्यक्ष त्रि० अभिमुखमक्ष्णं यस्य। आसन्ने निकटे।

अभ्यङ्ग पु० अभि+अनज–घञ् कुत्वम्। तैलादिमर्द्दने। "मूर्द्धि दत्तं यदा तैलं भवेत् सर्वाङ्गसङ्गतम्। स्रोतोभिस्तर्पयेत् बाह्यं अभ्यङ्गः स उदाहृतः" "तैलमल्पं यदाङ्गेषु न च स्याद्वाङ्गतर्पणम्। संघार्षि बद्धगोऽभ्यङ्गोमस्तकादौ प्रकीर्त्तितः" इति च वैद्यकोक्ते २ विशेषाभ्यङ्गे च। "तैलाभ्य-

ङ्गनिषेधे तु तिलतैलं निषिध्यते"। "अतैलं सार्षपं तैलं यत् तैलं पुष्पवासितम्। अदुष्टं पक्वतैलञ्च स्नानाभ्यङ्गेषु नित्यशः" इति च ति०त० स्मृतिः। "अभ्यङ्गनेपथ्य मलङ्कार" कुमा०। "अभ्यङ्गमङ्गनञ्चाज्ञोरुवान-ञ्छत्रधारणमिति" मनुः। "अभ्यङ्गमाचरेन्नित्यं सजरा-श्रमवातहम्"। "शिरःश्रवणादिषु तं विशेषेण शीलयेत्" वैद्य०।

अभ्यञ्जन न० अभि+अनृज-भावे ल्युट्। अभ्यङ्गशब्दार्थे "भोजनाभ्यञ्जनाद्दानात् यदन्यत् कुरुते तिलैः" मनुः। "ताम्बूलाभ्यञ्जनं चैव कांस्यपात्रे च भोजनम्। यतिव ब्रह्मचारी च विधवा च विवर्जयेत्" शु०त० प्रचेताः। करणे ल्युट्। २नेत्रादौ कज्जलादिदाने। ३ तत्साधने द्रव्ये। अभि+अनृज-णिच् ल्युट्। अभ्यङ्गनसाधन-व्यापारे "अभ्यङ्गं स्नापनञ्च गात्रोत्साद्दनमेव च। गुरु-पत्न्या न कार्य्याणि" मनुः।

अभ्यञ्जनीय त्रि० अभि+अनृज-कर्मणि अनीयर्। १अनु-लेपे चन्दनादौ २ अर्हनीये तैलक्षतादौ च "एतदभ्यञ्ज-नीयं हतमिति" दुर्गोत्सवपूजापद्धतिः"।

अभ्यधिक त्रि०अगमधिकः प्रा०स०। उत्कृष्टतमे। "अयं वैनः श्रेष्ठ" इति छ०उ० भाष्ये श्रेष्ठः प्रशस्यतमः अध्यधिकइति व्याख्यानात् तथात्वम्। "न त्वत्समोऽस्त्यभ्यधिकः कुतोन्यः" गीता। २ अधिकपरिमाणे "धान्यं दशभ्यः कुम्भेभ्योहर-तोऽभ्यधिकं वधः" "तथा धरिम (पल) मेयानां शताद-भ्यधिके वधः" इति। "पञ्चपलतस्त्वभ्यधिके क्षुर-च्छेदनमिष्यते" इति च मनुः।

अभ्यध्व अव्य० अध्वनोऽभिमुखम् अव्ययी० अच्समा०। मार्गाभिमुखे "संस्थितेऽध्वर्युराहवनीयसमीपे स्थित्वाऽ-भ्यध्वं गम्यां प्राक्षति" कात्या० २४,५,३५, "अभ्यध्वं मार्गाभिमुखम्" कर्कः। "यवोरभ्यध्वे उत वद्रे चित्" "अध०४,२८,२" तृतीयासप्तम्योर्ब्बहुलम्" पा०वा नाम्

अभ्यक्ष पु० अभि-अक्ष-अच् पृ०। तिलकल्के। (खलि)

अभ्यनुज्ञा स्त्री० अभि+अनु+ज्ञा-अङ्। अनुज्ञायाम् इदं कुरु इत्यादिना प्रवर्त्तने "कृताभ्यनुज्ञा गुरुणा गरीयसा" कुमा०"पपौ वसिष्ठेन कृताभ्यनुज्ञः" रघुः।

अभ्यनुज्ञात त्रि० अभि+अनु+ज्ञा-क्त। इदं कुरु इत्या-दुक्ता नियोजिते आभिमुख्येनानुज्ञाते।

अभ्यनुज्ञान न० अभि+अनु+ज्ञा-भावे ल्युट्। १ अनुज्ञा-याम् इदं कुरु इत्यादुक्ता नियोजनभेदे। "भरद्वाजाभ्य-नुज्ञानाद्विलकूटस्य दर्शनम्" रामा०। [२ प्रकाशिते च

अभ्यनूक्त त्रि० अभि+अनु+वच-क्त। १ आभिमुख्येन अनूक्ते

अभ्यन्तर न० अभिगतमन्तरम्। १ अन्तराले, मध्य-स्थाने। "नवोटजाभ्यन्तरसम्भृतानलम्" कुमा०। "प्रदीपः स्नेहमादत्ते दशयाभ्यन्तरस्थया" "शमीमिवाभ्यन्तरलीन-पावकाम्" इति च रघुः। "ब्रह्महिट्परिविक्तिश्च गर्हा-भ्यन्तर एव च" मनुः। २ उभयोर्मध्ये ३ अन्तःकरणे च। अभ्यन्तरे भवः अण् आभ्यन्तरम्। अन्तःकरणस्थे त्रि० "शौचन्तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा। मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्त्वान्तरम्। अशौचाद्धि वरं बाह्यं तस्मादाभ्यन्तरं वरम्" दक्षः।

अभ्यन्तराराम त्रि०अभ्यन्तरे सर्व्वाभ्यन्तरे परमात्मनि आर-मति कर्त्तरि घञ्। आत्मारामे आत्मस्थे योगिनि "आत्मनश्च "इन्द्रियेभ्यः परा ह्यर्था ह्यर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः। महतः परमव्यक्तमव्य-क्तात् पुरुषः परः" इति गीतावाक्येन अन्तर्यामिब्राह्मणेन १२० पृष्ठे दर्शितेन च सर्व्वाभ्यन्तरवर्त्तित्वम्।

अभ्यमन न० अभितः अमनम् अम-गत्यादौ भावे ल्युट्। १ अभिगमने। चु० अम-ल्युट् अमनत्वात् ह्रस्वः। २। रोगे, करणे ल्युट्। ३तत्साधने अहितसेवने च।

अभ्यमित त्रि० उभि+चु०+अम-कर्मणि क्त। १ रुग्णे २ पीड़िते च। वा नि०। अभ्यानोऽभ्यलं च "बहुभिस्तेन चाभ्यान्तं विव्याध ततोऽधिकैः" भा० द्रो०प०।

अभ्यमित्र अव्य० अमित्रस्याभिमुख्यम् अव्ययी०। अमित्रस्य शत्रोराभिमुख्ये। अमित्रमलंगामीत्यर्थे "अलं गामीत्यधि-कारे "अभ्यमित्राच्छ च" पा०ङ अभ्यमित्रीयः चात् खञतौ अभ्यमित्रीणः अभ्यमित्रः। सामर्थ्येन शत्रोरभिमुखगामिनि वीरे पु०। "मारीचोऽनुवंस्तासादभ्यमित्रोभवामि ते" "उद्योगमभ्यमित्रीणोवधेष्टं त्वञ्च मन्तु" इति च भट्टिः।

अभ्यमिन् त्रि० अभि+चु०+रोगे-अम-कर्त्तरि अम-नत्वात् ह्रस्वः णिनि। १रोगयुक्ते २आभिमुख्येन पीड़के।

अभ्यय पु० अभितः सर्व्वतः अयः निष्क्रमः इण-अच्। १ अस्तमये "आदित्याभ्यवेऽङ्गतायामपि" कात्या० ८, ९,१३"वषाहोमात् पूर्व्वमादित्यास्तमये" कर्कः। २अपगमे च "तमोऽभ्यये सायं जुहुयात्" कात्या० ४,१५,१२ तमसोऽन्धकारस्याभ्यवेऽपगमे" कर्कः।

अभ्यर्चन न० अभि+अर्च-ल्युट्। १ समन्तात्पूजने २ आभिमुख्यार्थं पूजने च। "नित्यं स्नात्वा शुचिः

कर्य्यादिलुपक्रमे "देवताभ्यर्चनञ्चैव" मनुः। भावे अ। अभ्यर्चाप्यत्र स्त्री।

अभ्यर्च्य त्रि० अभि+अर्च्-कर्म्मणि ण्यत्। १ अभितः पूजनीये "देवान्नयः सदाभ्यर्च्यास्तद्दक्षस्वेषु विशेषतः" पु०। ल्यप्। २आभिमुख्येन पूजयित्वेत्यर्थे अव्य० "देवान् पितॄन् समभ्यर्च्य खादन् मांसं न दोषभाक्" मनुः।

अभ्यर्ण त्रि० अभि+अर्द्-कर्मणि क्त आविदूर्ये इडभावे नि० नत्वम्। समीपे। "कालोऽभ्यर्णजलागमः कुवलिनो-वल्लस्य वार्त्तापि न" मा०द०। "अभ्यर्णमागच्छतमस्तृ-ग्भिः" रघुः। "कृष्णार्णवाभ्यर्णचरैकहंसः" प्रतप्तमभ्यर्ण-तया विवस्वता" इति च माघः।

अभ्यर्थना स्त्री अभि+अर्थ-भावे युच्। आभिमुख्येन प्रार्थने "अभ्यर्थनामङ्गभवेन साधुर्माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे" कुमा०। भावे ल्युट्। तत्रैव न०। [अभिमुखं याचनीये।

अभ्यर्थनीय त्रि० अभि+अर्थ-गौणे कर्म्मणि अनीयर्।

अभ्यर्थित त्रि० अभि+अर्थ-गौणे कर्म्मणि क्त। १प्रार्थिते "अवकाशं किलोदन्वान् रामायाभ्यर्थितो ददौ" रघुः। गौणकर्म्मोपिवक्षायां सुखे क्त। २प्रार्थनाकर्म्मणि।

अभ्यर्ह्य त्रि० अभि+अर्ह-यत्। प्रार्घनीये। "कार्य्येषु चैककार्य्यत्वादभ्यर्ह्योऽसि न वज्रिणा" रघुः। ल्यप्। आभिमुख्यं याचयित्वेत्यर्थे अव्य०।

अभ्यर्दित त्रि० अभि+अर्द् क्त। भग्नपीड़िते।

अभ्यर्हणा स्त्री अभि+अर्ह-भावे युच्। १ पूजावाम् २आभिमुख्यमर्चायाञ्च। भावे ल्युट्। तत्रैव न०।

अभ्यर्हणीय त्रि० अभि+अर्ह-अनीयर्। पूजनीये। "गा-रङ्गो मन्दपालेन जगामाभ्यर्हणीयताम्" मनुः।

अभ्यर्हित त्रि० अभि+अर्ह-कर्मणि क्त। १पूज्ये २उचिते च।

अभ्यवकर्षण न० अभि+अव+कृष-भावे ल्युट्। शस्त्राद्युद्धारे।

अभ्यवस्कन्द पु० अभि+अव+स्कन्द्-घञ्। १ शत्रोराक्रमे, २ निर्बलीकरणाय शत्रुभिः क्रियमाणे प्रहारे ३अभ्य-वसादने ४ प्रहारमात्रे, ५ आसादने, ६ प्रपाते च। ल्युटि अभ्यवस्कन्दनमप्यत्रार्थे न०।

अभ्यवहरण न० अभि+अव-हृ-ल्युट्। भोजने।

अभ्यवहार पु० अभि+अव+हृ-घञ्। भोजने। "अल्पान्ना-भ्यवहारेण" मनुः।

अभ्यवहार्य्य त्रि० अभि+अव+हृ-ण्यत्। भोक्तुंयोग्ये। "सर्व्व लोदरिकस्याभ्यवहार्य्यमेव" विक्र०। "खरं विशदमभ्यवहार्य्यम्" पा०भ०

अभ्यवहृत त्रि० अभि+अव+हृ-क्त। भक्षिते।

अभ्यवायन न० अभि+अव+इण-ल्युट्। आभिमुख्येनापयाने "यत्र शुष्कस्य चार्द्रस्य च सन्धिःस्यात्तदुपगूहेत यद्यु अभ्यवायनाय" शत०ब्रा०।

अभ्यसन न० अभि+अस-ल्युट्। १अभ्यासे २पौनःपुन्येनैक-क्रियाकरणे ३ पुनःपुनरावर्त्तने "विद्याभ्यसनेनेव प्रसा-दयितुमर्हसि" रघुः। "स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते" गीता "अनभ्यसनशीलस्य विद्येव तनुतां गता" रामा० "वेदस्वीकरणं पूर्व्वं विचारोऽभ्यसनं जपः" दक्षः।

अभ्यसनीय त्रि० अभि+अस-आवश्यकार्थे अनीयर्। अव-श्याभ्यासयोग्ये वेदादौ।

अभ्यसूयक त्रि० अभि+असूय-उपतापे कण्ड्वा० यक् ण्वुल्। अत्यन्तासूयाकर्त्तरि सन्मार्गवर्त्तिनां गुणेषु दोषारोपके। "मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः" गीता।

अभ्यसूया स्त्री अभि+असूय-उपतापे कण्ड्वादि० यक् प्रत्य-यान्तत्वात् अ, स्त्रीत्वात् टाप्। गुणेषु दोषारोपणे। "केनाभ्यसूया पदकाङ्क्षिणा ते" कुमा० "रूपेषु वेशेषु च साभ्यसूयाः" "शक्राभ्यसूयाविनिवृत्तये यः" "नूनं तेषा-मभ्यसूयापरीऽभूत्" इति च रघुः।

अभ्यस्त त्रि० अभि+अस-क्त। पौनःपुन्येनैकजातीयाक्रिया कर्म्मणि पुनःपुनरावर्त्तिते। "शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणामिति" रघुः। २ "उभे अभ्यस्ताम्" पा० उक्तयोः कृतद्वित्वयोरुभयोः धातुभागयोः। "नाभ्य-स्ताच्चतुः" "अभ्यस्तस्य च" पा०।

अभ्यस्य अव्य० अभि+अस-ल्यप्। पुनःपुनरावर्त्त्यैत्यर्थे।

अभ्याकाङ्क्षित न० अभि+आ+काङ्क्ष-भावे क्त। १मिथ्या-भियोगे। (मिथ्यानालिग) कर्म्मणि क्त। २ईप्सिते त्रि०।

अभ्याख्यान न० अभि+आ+ख्या-ल्युट्। १ मिथ्याभियोगे, "यतं मे धारयसीत्यादि" मिथ्याभियोगे २ मिथ्योद्भावने च।

अभ्यागत पु० अभि+आ+गम+क्त। भिन्नग्रामीये स्वकं गते-ऽतिथौ "सर्व्वत्राभ्यागतो गुरुः" पुरा०। २ सम्मुखागत-मात्रे त्रि०। "अभ्यजातोऽभ्यागतस्तूर्णतर्णकान्" माघः।

अभ्यागम आभिमुख्येनागम्यतेऽत्र अभि+आ+गम-अप्। १ युद्धे। कर्म्मणि अप्। २ अन्तिके। करणे अप्। ३ विरोधे। भावे अप्। ४ अभ्युत्थाने ५ अभिघाते ६ अभिमुखगमने "किं वा मदभ्यागमकारणं ते" रघुः।

अभ्यागमन न० अभि+आ-गम-ल्युट्। १ आभिमुख्ये नोद्गमने २ अभ्युत्थाने च।

अभ्यागारिक पु० अभ्यागारे तद्गतकर्म्मणि व्याप्तः ठन्।

१ स्पृहदृत्तिप्रवादिगोचरेषु व्याप्ते २तेनैव व्याकुले ।

अभ्याघात पु० अभि+आ+हन-घञ् । १ आघाते २ ताड़ने च । करणे घञ् । ३ आघातोपदेशे । "अभ्याघातेषु मध्यस्थान् शिष्याद्वीरानिव द्रुतम्" मनुः "अभ्याघातेषु चौर्य्याऽपदेशेषु" कुल्लू० ।

अभ्याघातिन् त्रि० अभि+आ+हन-ताच्छील्ये घिनुण् । हिंसाशीले । "अभ्याघातिभिरामिश्रघातकैः परिराटिभिः" भट्टिः ।

अभ्याचार पु० अभि+आ+चर-घञ् । आभिमुख्येनाचरणे । "अवारयन्त वरुणेन देवाअभ्याचारमसुराणाम्" अथ० १०,३,२

अभ्याज्ञाय पु० अभि+आ+ज्ञा-घञ् । अभिज्ञाने पूर्व्वज्ञातस्य तथात्वरूपेण ज्ञाने "तस्मिन् दक्षिणां दधाति तूपरौ मिथुनौ दद्यादित्यभ्याज्ञावेनैवमन्य" इति शत० ब्रा० ।

अभ्यातान पु० अभि+आ+तन-घञ् । अत्यन्तसन्ततौ ।

अभ्यात्त पु० अभि+आ+अद+क्तले कर्त्तरि क्त वेदे नि० । १ सर्व्वव्यापके परमेश्वरे । "सर्व्वमिदमभ्यात्तोऽवाक्यनादरः" छा० उप० । "सर्व्वमिदं जगदभ्यात्तः अभिव्याप्तः अततेः व्याप्यस्य कर्त्तरि निष्ठा" भा० । अभि+आ-दा-क्त । २आभिमुख्येन गृहीते त्रि० । [२ आरम्भे च ।

अभ्यादान न० अभि+आ+दा-ल्युट् । १ आभिमुख्येनादाने,

अभ्याधान न० अभित आधानम् । अभितोमन्त्रादिना वज्रादेराधाने "यानिध्मस्य परिदधात्यभ्याधानाय" शत० ब्रा० । [अभ्यमितशब्दे २७५ पृष्ठे विवरणम् ।

अभ्यान्त पु० अभि+अम-क्त नि० । रोगयुक्ते निष्पीड़िते

अभ्यापत्ति स्त्री अभि+आ-पद-क्तिन् । अभिमुखागमने ।

अभ्यामर्द अभि+आ+मृद-आधारे घञ् । १ रणे । भावे घञ् । २निष्पीड़ने ।

अभ्यायंसेन्य त्रि० अभि+आ+यम-कर्म्मणि वा० सेन्य । अभितो नियन्तव्ये । "वाससोऽभ्यायंसेन्या भवतं मनीषिभिः" ऋ० १,२४,१, "अभ्यायंसेन्यौ अभितोनियन्तव्यौ" भा० ।

अभ्यारम्भ पु० अभि+आ+रभ-घञ् सुम् । प्रथमारम्भे

अभ्यारूढ त्रि० अभि+आ+रुह-क्त । भृशमारूढे दृढे "तेनैव चलमनभ्यारूढम्" शत० ब्रा० ।

अभ्यारोह पु० अभि+आ+रुह-घञ् । १ आभिमुख्यारोहणे । आभिमुख्येनारोहति देवभावमनेन करणे घञ् । २मन्त्रजपभेदे "नन्विदमभ्यारोपजपविधिशेषोऽर्थवादः" इति द० भा० । "श्रेयान् वा एषोऽभ्यारोहाद्भवति" शत० ब्रा० ।

अभ्यारोहणीय त्रि० अभि+आ+रुह-अनीयर् । आभिमुख्येनारोहणीये । शत० । अभ्यारोहयोऽत्र ।

अभ्यावर्त्त त्रि० अभि+आ+वृत-अच् । १ पुनः पुनरावर्त्तमाने "प्रजा वै बर्हीरेतः आज्यं तत्प्रजास्वेवैतत् रेतः सिञ्चते तेन रेतसा सिक्तेनेमाः प्रजाः पुनरभ्यावर्त्तं प्रजायन्ते" शत० ब्रा० । भावे घञ् । २ भृशमावर्त्तौ पु० । अभि+आ+वृत-णिच् कर्म्मणि अच् । २ पुनः पुनरावर्त्तनीये स्तोत्रादौ त्रि० । "चतुर्विंशाः पवमानाः त्रिवृदभ्यावर्त्तं चतुश्चत्वारिंशाः पवमानाः एकविंशमभ्यावर्त्तम् अष्टाचत्वारिंशाः पवमानास्त्रयस्त्रिंशमभ्यावर्त्तम्" शत० ब्रा० ।

अभ्यावर्त्तिन् त्रि० भृशमावर्त्तते अभि+आ+वृत-णिनि । १ सन्तत वर्त्तमाने । २वेदप्रसिद्धे यजमानराजपुत्रे पु० । "शेषोऽभ्यावर्त्तिने यजमानाय ब्रूयात्" ऋ० ६, २७,५ । "अभ्यावर्त्ती यजमानो ददाति" ऋ० ६,२७,८ ।

अभ्याहृत पु० अभि+आ+हृत- उपसृष्टत्वात् कर्म्मणि क्त । आभिमुख्येन आनीते होमयोग्यद्रव्ये । "वातोऽभ्याहृतः" य० १,५८ । "अभ्याहृतः होमयोग्यीभूतः" वे० दी० २ पुनःपुनरभ्यस्ते त्रि० ।

अभ्यावृत्ति स्त्री अभि+आ+वृत-क्तिन् । पौनःपुन्येनाभ्यासे "संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्" भा० । "मनागनभ्याहृत्या वा कामं शाम्यतु यः शमी" माघः ।

अभ्याश पु० आभिमुख्येनाश्नुते व्याप्नोत्येनेन अश्नु-व्याप्तौ करणे घञ् । निकटे । निकटस्यस्याभिमुख्यव्यापनात्तथात्वम् । २चिप्रे तस्याव्यवहितकालेन व्यापनात्तथात्वम् । "यएतदेवं विद्वान् साधु सामेत्युपास्ते अभ्याशोह यदेनं साधवोधर्म्मा अभ्यागच्छेयुः" छा० उ० । "अभ्याशः क्षिप्रम्" भा० "तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्" । य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन्" छा० उ० ।

अभ्यास पु० आभिमुख्येनाश्नुते क्षिपते अस-क्षेपे कर्म्मणि घञ् । १ निकटे । "चूतयष्टिरिवाभ्यासे मधौ परभृतोन्मुखी" कुमा० । अभेर्नित्यार्थत्वे । २ पुनःपुनरनुशीलने पौनःपुन्येन करणे । "अभङ्गाभ्यासरतिं विचिन्त्य तमिति" कुमा० । "अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ! "अभ्यासेन च कौन्तेय ! वैराग्येण च गृह्यते" । "अभ्यासेऽप्यसमर्थोऽसि मत्कर्म्मपरमोभव" ३ "अभ्यासयोगयुक्तेन ततो यासि परां गतिम्" इति च गीता ४वेदादेराकृत्तौ च अभ्यासश्च षड्विधः । "वेदस्वीकरणं पूर्व्वं विचारोऽभ्यसनं जपः । तद्दानञ्चैव शिष्येभ्योवेदाभ्यासो हि षड्विधः"

दत्तः । ४ यत्नतात्पर्यज्ञापके पौनःपुन्येन कथनरूपे लिङ्गभेदे "उपक्रमोपसंहारावभ्यासोऽपूर्व्वता फलम् । अर्थवादोपपत्ती च हेतुस्तात्पर्यनिर्णये इति" उक्तेः यथा छान्दोग्ये षष्ठप्रपाठके "तत्त्वमसि श्वेतकेतो ! इत्यस्य नवकृत्वः अभ्यासः । ५ एकस्मिन्नालम्बने देवादौ इतरतः समाकृष्य मनसः स्थापने च । कर्म्मणि घञ् । ६ व्याकरणोक्तयोः द्विरुक्तभावापन्नयोः धातुभागयोः । "स्यादिश्च अभ्यासेन चाभ्यासस्य" पा० ।

अभ्यासयोग पु० अभ्यासेन सततानुशीलनेन योगः । सततैकविषयचिन्तनेन जाते समाधौ । "अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय" ! "अभ्यासयोगयुक्तात्मा ततो याति परां गतिमिति" च गीता ।

अभ्यासादन न० अभि+आ+सद्-णिच् ल्युट् । १ शस्त्रादेः शत्रोर्निर्बलताकरणे, २ शत्रोः सम्मुखगमने ३ समीपस्थापने च ।

अभ्याहार पु० अभि+आ+हृ-घञ् । १ अभिहारार्थे २ समाहरणे ३ आभिमुख्येन आनयने च । "अक्षिभ्रुवैकेऽवान्तरदेशे कर्णं खात्वा ततोऽभ्याहारं कुर्व्वन्ति" शत० ब्रा० ।

अभ्याहित त्रि० अभि+आ+धा-कर्म्मणि क्त । १ आभिमुख्येन मन्त्रादिना स्थापिते विधिना कृतसंस्कारे वह्नौ ।

अभ्युक्त त्रि० आभिमुख्येनोक्तः । १ समन्त्रके २ प्रकाशिते च

अभ्युक्षण न० अभि+उक्ष-सेचने ल्युट् । "उत्तानेनैव हस्तेन प्रोक्षणं परिकीर्त्तितम् । न्यञ्चताभ्युक्षणं प्रोक्तं तिरश्चावोक्षणं स्मृतम्" स्मृत्युक्ते अवतानपाणिना सेच्याभिमुख्येन, सेचने २ सेचनभावे "परस्पराभ्युक्षणतत्पराणाम्" रघुः अभ्युक्षणं च स्नानकार्य्ये कात्या० २२, ६, १४ । कर्त्तव्यमिति शेषः । अभ्युक्षणादि च द्रव्यादिसंस्कारविशेषः अभ्युक्षितद्रव्याणामेव यागाङ्गत्वात् । स च संस्कारः अदृष्टविशेषरूपः द्रव्यनिष्ठ इति मीमांसकाः तेषामयमाशयः । यो यद्गतफलार्थितया क्रियते स तन्निष्ठफलजनकव्यापारजनक इति नियमेन व्रीह्यादिगतावघातानुकूलशक्तिरूपफलार्थितया क्रियमाणानां प्रोक्षणाभ्युक्षणादीनां स्वगतावघातादिरूपफलजनकव्यापारत्वम् तथा च प्रोक्षिता एव व्रीह्यादयोऽवघातादौ कल्पन्ते प्रोक्षणादिजन्यः कालान्तरभाव्यवघातजनकोव्यापारो व्रीह्यादिनिष्ठ एव कल्प्यते" इति । नैयायिकास्तु "संस्कारः पुंसएवेष्टः प्रोक्षणाभ्युक्षणादिभिः" कुसुमा० उक्तेः प्रोक्षणादिभिः संस्कारोऽदृष्टं पुंसएव पुंनिष्ठः एव स्त्रीक्रियते प्रतिव्रीहीत्यादि नानाशक्तिकल्पनापेक्षया एकस्यैवादृष्टस्यात्मनिष्ठस्य प्रोक्षणादिजन्यस्य लाघवेन कल्पनात् शास्त्रेणितं फलमनुग्रहतरीतिन्यायेन क्रियाकर्त्तृस्थमेव प्रधानफलवत्तत्तदवान्तरादृष्टस्यापि तत्रैव कल्पनौचित्यात् अन्यथा अन्यगतादृष्टेन अन्यगतप्रधानापूर्व्वजनने वैयधिकरण्यात् अतिप्रसङ्गः स्यात् व्रीह्यादेश्च सर्व्वपुरुषसाधारण्येनानिष्पन्नत्वात् अन्यथा अकृतप्रोक्षणादिसंस्कारस्यापि पुंसः परकृतसंस्कारेण प्रधानापूर्व्ववत्त्वापत्तेः । यो यद्गतफलार्थितयेत्यादिनियमस्य यत्निष्ठबधाद्युद्देशेन क्रियमाणे श्येनयागादौ व्यभिचाराच्चार्थसाधकत्वं तत्र हि यत्नगतबधफलाद्युद्देशेऽपि अभिचारिपुरुषगतस्यादृष्टविशेषस्य कल्पनावश्यम्भावात् अन्यथा तत्कर्त्तुः प्रायश्चित्तोपदेशस्यानर्थक्यापत्तेः अभिचारकर्म्मत्वञ्च उपपातकमध्ये मन्वादिभिर्गणनात् तस्य पापजनकत्वसिद्धिरिति ।

अभ्युचित त्रि० अभि+उक्ष-क्त । कृताभ्युक्षणे यज्ञपात्रादौ

अभ्युच्य त्रि० अभि+उक्ष-ण्यत् । अभ्युक्षणार्हे । ल्यप् । अवतानपाणिना सिक्त्वेत्यर्थे अव्य० "असन्दैनमवष्टभ्य हृत्वाभ्युक्ष्य सोमोपनहनेन" कात्या० २२, ६, १३ । तेनोदकेनात्मानं पूजनोपकरणञ्चाभ्युक्षेति" त० सा० ।

अभ्युच्चय पु० अभि+उद्+चि-अच् । १ वृद्धौ । "अभ्युच्चयस्तु लक्ष्मीः" किरा० २, १९ मल्लिनाथोक्तेः २ लक्ष्म्यामपि ।

अभ्युत्थान न० अभि+उत्-स्था-ल्युट् । १ आदरेणासनादित उत्थाने २ गौरवेणोत्थानादिना ३ प्रत्युद्गमने, ४ उत्थानमात्रे, ५ उद्यमे, ६ उद्भवे च । "नवाभ्युत्थानदर्शिन्योवनन्धंयप्रजाः प्रजाः" रघुः "अभ्युत्थानमधर्म्मस्य तदात्मानं सृजाम्यहम्" गीता । [कर्त्तरि स्त्रियां ङीप् ।

अभ्युत्थायिन् त्रि० अभि+उद्+स्था-णिनि । अभ्युत्थान

अभ्युत्थित त्रि० अभि+उद्-स्था-क्त । १ कृताभ्युत्थाने अभिवादे सम्मानार्थमासनादित उत्थिते । २ आभिमुख्येनोद्यते च "अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमेऽनु यान्" रघुः ।

अभ्युत्थेय त्रि० अभि+उद्+स्था-उपसृष्टत्वात् कर्म्मणि यत् । अभिवाद्ये यस्याभिवादनार्थमासनादित उत्थानं क्रियते तस्मिन् । "अभ्युत्थेयस्यापि" कात्या० २२, ५, २७ गुर्व्वादेरभ्युत्थेयस्यापि अभ्युत्थानमिति" कर्क० ।

अभ्युत्पतन न० अभि+उत्+पत-ल्युट् । आभिमुख्येनोत्पतने "अवक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः" रघुः ।

अभ्युदय पु० अभि+उत्+इण्-अच् । १ अभीष्टकार्य्याणां प्रादुर्भावे, २ वृद्धौ, "भवो हि लोकाभ्युदयाय तादृशाम्" रघुः ।

अभ्युदीयतेऽनेन करणे अच् । २आशास्यमानचूड़ादिसंस्कारे च । अत एव तदर्थकश्राद्धम् आभ्युदयिकमित्युच्यते । ४अभ्युदयसाधने इष्टलाभे ५इष्टनिमित्तके श्राद्धे च "सम्यङ्मित्यभ्युदये दैवे रुचितमित्यपि" मनुः । "अभ्युदये इष्टि श्राद्धे" कुल्लू० । "प्रतिषेद्धाऽपि चेद्या तु मद्यमभ्युदयेष्वपि" मनुः । भावे अच् । ६उत्तरोत्तरवृद्धौ "अभ्युदयफलं धर्म्मज्ञानमिति" गा० भा० "धर्मः श्रेयः सदृष्टं श्रेयोऽभ्युदयसाधनमिति" भवि० पु० । अभ्युदयः इष्टलाभादि प्रयोजनमस्य ठञ् । अभ्युदयनिमित्ते श्राद्धे । "अथाभ्युदयिके श्राद्धे युग्मानाशयेत्" गोभि० "अभ्युदयः इष्टलाभः विवाहादि तदर्थं श्राद्धम् आभ्युयिकम् तच्च भूतभविष्यद्भेदेन द्विविधम् भूतं पुत्रजन्मादि भविष्यत् विवाहादि श्रा० त० रघुनन्दनः ।

अभ्युदयार्थक न० अभ्युदयः इष्टलाभादि अर्थो निमित्तं यस्य । अभ्युदयनिमित्ते श्राद्धे "नैमित्तिकमथो वक्ष्ये श्राद्धमभ्युदयार्थकम्" मार्क० पु० ।

अभ्युदानयन न० अभि+उद्+आ+नी-ल्युट् । अग्नेरभिमुखानयने "अभ्युदानयन्" गो० सू० अभ्युदानयन् अग्नेरभिमुखमानयन् जपेदिति स० त० रघुनन्दनव्याख्यानात् तदुपसृष्टस्य नयतेः तथार्थत्वम् ।

अभ्युदाहरण न० अभि+उद्+आ+हृ-ल्युट् । १ अभिमुखकथने २आभिमुख्येनोद्धरणे च ।

अभ्युदित त्रि० अभितः सर्व्वतः उदितमुत्क्रान्तं प्रातर्विहितं कर्म यस्मात् । सूर्य्योदयकाले निद्रयाऽक्षततत्कालकर्त्तव्ये ब्रह्मचारिणि । "सूर्य्येण ह्यभिनिर्मुक्तः शयानोऽभ्युदितश्च यः" मनुः । २अभितउदिते, ३ प्रकाशिते च त्रि० "माघे मासि रटन्त्यापः किञ्चिदभ्युदिते रवौ" म० त० पुरा० । [भावे क्त कथने न० ।

अभ्युदीरित त्रि० अभि-उद्+ईर-क्त । अभिमुखमुक्ते ।

अभ्युद्गम पु० अभि+उद्+गम-भावे अप् । १ अभ्युत्थाने २ उद्भवे च । ल्युट् । अभ्युद्गमनमप्यत्र न० ।

अभ्युद्यत त्रि० अभि+उद्+यम-क्त । उद्युक्ते "कुलमभ्युद्यतं नूनमेश्वरम्" रघुः । १अयाचितोपनीते फलादौ, "एधोदकं मूलफलमन्नमभ्युद्यतञ्च यत्" मनुः ।

अभ्युद्धृत त्रि० अभि+उद्+हृ-क्त । १अयाचितोपनीते २अभ्यर्थ्य दत्ते च "एधोदकं मूलफलमन्नमभ्युद्धृतञ्च यत्" शु० त० मनुवचनपाठः "अभ्यर्थ्य दत्तमिति व्याख्यातं च रघुनन्दनेन । अभि+उद्+धृ-क्त । ३आभिमुख्येनोत्तोलनेन धृते ।

अभ्युन्नत त्रि० आभिमुख्येन उन्नतः । आभिमुख्येन उन्नते अत्यन्तोन्नते । "अभ्युन्नताङ्गुलनखप्रभाभिः" कुमा० ।

अभ्युपगत त्रि० अभि+उप+गम-क्त । १स्वीकृते अङ्गीकृते । २ समीपगते ३अभिमुखमुपगते च ।

अभ्युपगम पु० अभि+उप+गम-अप् । १स्वीकारे "क्रियाभ्युपगमात्त्वेतद्बीजार्थं यत् प्रदीयते" मनुः । २समीपगतौ च । "नियमदवादीत्राभ्युपगमेत्यादि" सुश्रुतः ।

अभ्युपपत्ति स्त्री अभि+उप+पद-क्तिन् । अनिष्टनिवारणपूर्व्वकाभीष्टसम्पादनरूपे अनुनये, "ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकमिति" "स्त्रीविप्राभ्युपपत्तौ च धर्मेण न्नव दुष्यति" "स्त्रीबालाभ्युपपत्तौ च बाह्यानां सिद्धिकारणम्" इति च मनुः अभ्युपपूर्व्वपदतेः सान्त्वनानुनयहर्षार्थत्वेनैव "रतिमभ्युपपत्तुमातुरामिति" कु० प्रयोगः । २ सान्त्वने च

अभ्युपपत्तुम् अव्य० अभि+उप+पद-तुमुन् । सान्त्वयितुम् अनुपग्रहीतुं वेत्यर्थे "रतिमभ्युपपत्तुमातुराम्" कुमा० ।

अभ्युपपन्न त्रि० अभि+उप+पद-क्त । अनुगृहीते ।

अभ्युपाय पु० अभि+उप+इण्-अच् । १ स्वीकारे २ अधिकोपाये च । "तस्मिन् सुराणां विजयाभ्युपाये" कुमा० "तान् वोऽभ्युपायान् वक्ष्यामि" मनुः ।

अभ्युपेत त्रि० अभि+उप+इण-क्त । १अभिमुखसमीपगते २अङ्गीकृते ३ अङ्गीकर्त्तरि च ।

अभ्युपेत्य त्रि० अभि+उप+इण-कर्म्मणि क्यप् । अभिमुखं समीपगम्य । ल्यप् । स्वीकृत्यर्थे अव्य० । "अभ्युपेत्य च शुश्रूषामिति" नार० ।

अभ्युपेत्याशुश्रूषा स्त्री अभ्युपेत्य अङ्गीकृत्य अशुश्रूषाऽसेवनम् । अङ्गीकृत्य पश्चात् दास्याकरणरूपे विवादभेदे "अभ्युपेत्य च शुश्रूषां यस्तां न प्रतिपद्यते । अशुश्रूषाभ्युपेत्यैतद्विवादपदमुच्यते" नार० । "आत्माकरणं शुश्रूषा तामङ्गीकृत्य पश्चाद्यो न सम्पादयति तद्विवादपदमभ्युपेत्याशुश्रूषास्यमिति" मिताक्षरा ।

अभ्युपेत्या स्त्री अभि+उप+इण-भावे क्यप् । सेवायाम् ।

अभ्युषित त्रि० अभि+वस-क्त । १अभिमुखमुषिते अभिमुखस्थिते सेवकादौ पु० ।

अभ्यूष पु० अभित उ(ऊ)प्यते अग्निना दह्यते अभि+ऊ(ऊ)ष-बा० कर्म्मणि क । १ यवगोधूमादिचूर्णकृते (रोटि) प्रसिद्धे दग्धान्नभेदे । ऊष भावे कर्म्मणि वा घञ् । वह्निना दह्यतेऽत्रे हेम० भावे घञ् । कलायादेरीषद्दहने अभि+उप-भावादौ घञ् । अभ्योषोऽयत अभ्यू(भ्यूभ्यो)भावर्हितं क्यतौ अभ्यू(भ्यू)(भ्यो)धीयम् अभ्यू(भ्यू)(भ्यो)-

घञ् । तत्रहिते गोधूमकलायादौ । अपूपादिगणपाठात् नि० अभ्येषगब्दोऽप्युक्तार्थे ततोऽपि अवतौ उक्तार्थे ।

अभ्यूह अभि+ऊह-घञ् । स्वबुद्धिमात्रकल्पिते तर्के "नैषा तर्केण मतिरापनेयेति" कठ उ० भाष्ये "स्वबुद्ध्यभ्यूहेन केवलेन तर्क्यमाण इति" उक्तम् ।

अभ्यूहनीय त्रि० अभितः ऊहनीयः । स्वबुद्ध्या तर्कणीये ।

अभ्यूह्य त्रि० अभितः ऊह्यः । १स्वबुद्धिमात्रेण तर्कणीये । ल्यप् । २अभितस्तर्कयित्वेत्यर्थे अव्य० ।

अभ्र अतौ भ्वादि०पर०सक० सेट् । अभ्रति आभ्रीत् आनभ्र अभ्रम् "तेष्वसौ दन्त्यकारिवेनेष्वानभ्र निर्भवः" भट्टिः ।

अभ्र न० अभ्र-अच् । १मेघे २सुस्तके ३आकाशे च अवभ्रशब्देऽधिकं दृश्यम् । "तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने" मनुः "अभ्रं लिहाग्रं रविमार्गभङ्गम्" भट्टिः । "वर्षाल्यर्तेन रूक्षमभ्रघनादिवोन्दोः" रघुः कुर्वादिगणपाठात् तन्नामके ऋषिभेदे पु० । तस्य अपत्यम् कुर्वादि०ण्य । आभ्र्यः तदपत्ये पुंस्त्री । अभ्रमिवाचरति क्विप् अभ्रायते ।

अभ्रक न० पु० अभ्र-कुन् । क्वचित् पुंस्त्वमप्यस्य । (आव)धातुभेदे एतच्च गौरीरजोजातं यथोक्तम् रसेश्वरदर्शने शिववाक्यम् । "अभ्रकस्य बीजन्तु भस्म बीजन्तु पारदः अनयोर्मेलनं देवि! मृत्युदारिद्र्यनाशनम्" । जारिताभ्रस्य पारदमेलनद्वारा मृत्युनाशकत्वमतस्तज्जारणविधिर्दर्शितः यथादत्ते । "कृष्णाभ्रकमनेकवपुर्ज्ञात्वा त्यक्त्वा कपालकं कृत्वा । काष्ठमयोदूखलके चूर्णं सुबलेन कुर्वीत ॥ भूयो दृषदि च पिष्टं वासःसूक्ष्मावकाशतलगलितम् । मण्डूकपर्णिकायाः प्रचुररसे स्थापयेच्चिदिनम् ॥ उद्धृत्य तद्रसादव पिण्याट्टमल्लिकधान्यभक्तस्थम् । अचोदात्यन्तस्वच्छजलेन प्रयत्नेन । मण्डूकपर्णिकायाः पूर्वं सुरसेनालोडनं कुर्यात् । स्थालीपाकं पुटनं चाद्यैरपि भृङ्गराजाद्यैः ॥ ताडादिपत्रमध्ये कृत्वा पिण्डं निधाय भस्माग्नौ । तावद्देयं यावल्लीनोऽग्निर्दृश्यते सुचिरम् ॥ निर्वापयेच्च दुग्धेन दुग्धं प्रक्षाल्य वारिणा तदनु । पिष्ट्वा श्लक्ष्णं वस्त्रे चूर्णं निरन्द्रकं कुर्यात्" इति ।

अभ्रंलिह त्रि० अभ्रं गगनं लेढि स्पृशति अभ्र+लिह-खश् मुम् । गगनस्पर्शिनि अत्युच्चे "प्रासादमभ्रंलिहमारुरोह" रघुः "अभ्रंलिहाग्रं रविमार्गभङ्गमिति" भट्टिः ।

अभ्रकष त्रि० अभ्रं गगनं कषति पीड़यति उच्चत्वात् अभ्र+कष-ड मुम् । अत्युच्चे । "आदायाभ्रकषं प्रायात्कलशं फलशालिनम्" भट्टिः ।

अभ्रज त्रि० अभ्रात् मेघात् जायते जन-विट् ५त० । मेघजाते "यो अभ्रजा वातजा यश्च शुम्भनस्तनीनूत्सचतां पर्व्वतांश्च, अथ० १,१२,३जन-ड । अभ्रजोऽप्युक्तार्थे त्रि०

अभ्रनाग पु० ६त० । ऐरावते गजे ।

अभ्रपथ पु० ६त० अच् समा० । विमाने गगनमार्गे ।

अभ्रपिशाच पु० अभ्रे गगने पिशाच इव । राहुग्रहे तस्य छायात्मकत्वेन नीलवर्णतया पिशाचतुल्यत्वम् ।

अभ्रम पु० भ्रमोभ्रमणं मिथ्याज्ञानञ्च अभावे न०त० । १भ्रमाभावे । न०व० । २भ्रान्तिशून्ये त्रि० । [जटामांसाम् ।

अभ्रमांसी स्त्री अभ्रमिव जटाया मांसमस्य गौ०ङीष् ।

अभ्रमाला स्त्री ६त० । मेघसमूहे ।[केन लिप्तायां स्त्रियाञ्च ।

अभ्रलिप्ती स्त्री ३त० ङीष् । १अल्पाभ्रैर्लिप्तायां दिवि २अल्पसस्त-

अभ्रवर्ष पु० अभ्रैर्मेघैर्हृष्यते कर्मणि घञ् । १मेघैः सिच्यमाने "दिव्यानकोशासो अभ्रवर्षाः" ऋ० ६,८८,६, अभ्रवर्षाः अभ्रैर्हृष्यमाणाः भा० । भावे घञ् । २मेघवर्षणे ।

अभ्रवाटिका स्त्री अभ्रेण शून्येन वाटो वेष्टनं यस्याः गौ० ङीष् । अभ्रातकवृक्षे । तस्याः पत्रशून्यकाले शून्यावृततयेन प्रतीतेस्तथात्वम् ।

अभ्राज त्रि० न भ्राजते भ्राज-अच् न०त० । १ दीप्तिशीलभिन्ने २सामगानविशेषद्रष्टरि ऋषिभेदे पु० । तेन दृष्टं साम अण् । आभ्राजं तदृष्टे सामभेदे न० तच्च "परिखानो गरिदा इत्यस्यर्चि गीयमानं साम" ता० ब्रा० भा० । तदपि ऊहगाने ६प्र० दर्शितम् । तस्य च पाठविनियोगः ता० ब्रा० उक्तः यथा "भ्राजाभ्राजे पवमानसुखे भवत" इति गवामयने विषुवद्दिनाग्रहे तत् पाठ्यम् ।

अभ्रातृ(क) पुं स्त्री नास्ति भ्राता यस्य वेदे न कप् लोके तु कप् । भ्रातृशून्ये । "अभ्रातेव पुंस एति प्रतीची" ऋ० १,२२,३, कवभावे स्त्रियां ङीष् । "नाभ्रातीसपयच्चेत्" भट्टि० । कपि तु अभ्रातृका तत्रार्थे "अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम्" मनुः ।

अभ्रातृव्य त्रि० नास्ति भ्रातृव्यः शत्रुर्यस्य । शत्रुरहिते "अभ्रातृव्योभ्रातृव्यवान् भवति य एवं विद्वान्" शत० ब्रा० ।

अभ्रान्त त्रि० विरोधे न०त० । १ भ्रान्तिभिन्ने यथार्थज्ञानयुक्ते २ भ्रमशून्ये स्थिरे च ।

अभ्रान्ति स्त्री अभावे न०त० । १मिथ्याज्ञानाभावे २ भ्रमणाभावे च । न०व० । ३मिथ्याज्ञानशून्ये ४ भ्रमणशून्ये च त्रि० ।

अभ्रावकाश पु० अभ्रमेवावकाशः । इतरावरणशून्ये आकाशमात्रावकाशे ।

अभ्रावकाशिन् त्रि० अभ्रावकाशोऽस्त्यस्य इनि। गगनमात्रावकाशवति निरावरणे। स्वार्थे कन्। तत्रैव "ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वभ्रावकाशिकः" मनुः।

अभ्रि स्त्री अभ्रति भवं यस्मात् अभ्र गतौ अपादाने इन्। १नौकामलधर्षणार्थे काष्ठमये कुद्दाले २ कुद्दालभाले च। "खनति भेषजमित्युपक्रम्य। "हिरण्मयीभिरभ्रिभिर्गिरीणामुपसानुषु" अथ० १०,४,१४। वा ङीप्। अभ्रीत्यप्यत्र

अभ्रित त्रि० अभ्रं मेघोजातमस्य तारः इतच्। जातमेघे अश्वरादौ "ददर्श काले दिवसभ्रितामिव" रघुः।

अभ्रिय त्रि० अभ्रे मेघे भवः घ। १मेघोद्भवे, २ सुखकभवे, ३गगनभवे च। "अभ्रिया न द्युतयन्तो दृष्टयः ऋ०२, २४,२,। "यदभ्रियां वाचमुदीरयन्ति ऋ०१,१६८,८,।

अभ्रेष पु० भ्रेष-चलने घञ् न०त०। १ न्याये, उचिते। २ चलनशून्ये त्रि०।

अभ्रु त्रि० भू-प्राप्तौ क्रुन् डिच्च न०त०। सहति निरु०। "यद्व ते विश्वागिरश्चिदभ्वाः" इति ऋ०१,६३,१।

अम रोगे चुरा० उभय० सेट् अक० पीड़ने सक०। अमयति-ते आमिमत् त। "यक्षा उदरमामयत्" ऋ० १०८६,८ मा च नः किञ्चनाममत्" अथ० ६,२७,२। अमितः-आन्तः घञादौ ऊति अमः-आमः अमी-आमी।

अम गतौ भोजने भ्वादि०सक०शब्दे च अक०सेट् प०। अमति आमीत्। "किंशुरपत्रिनस्त्वमभ्यमीषि" १०,८६,८ वेदे शपोलुकि ईट्। अमतः अमतिः अमनिसः।

अम पु० अम-रोगे घञ्। १ रोगे "अम-गतौ अच्। प्राणे सर्व्वदागतिमत्त्वात्तस्य तथात्वम्। "वाग्वै सामैषा सा चामयेति छ० उ० "अमो नामासि अमा हि सर्व्वमिदम् छा०उ०। अमः प्राणः भा०। अमति सह-गच्छति। सेवके "याहि राजेवामवाँ" इभेन य० १२, ६। "अमवान् सेवकान्" वेदी० ४ अपकुकलादौ न० शब्दर०। प्राणहेतुत्वात् ५ बले "सेनेव सृष्टामं दधाति" ऋ० १,६६,४,अमं बलम् भा०।

अम् अव्य० चु० अम-क्विप् खरादि०। १अर्से २गीघ्रतायाञ्च

अमङ्गल पु०नास्ति मङ्गलं प्रयोजनं यतः। ईषद्बहुव्रीहे। ईषन्। कुशलशून्ये त्रि०। न०त०। मङ्गलभिन्ने। अमङ्गलञ्च मङ्गलविरोधि वस्तु। मङ्गलञ्च अभिप्रेतार्थसिद्धिर्मङ्गलमित्युक्तलक्षणं तद्विरोधि अनभिप्रेतार्थसिद्धिः। तथा च अनिष्टदुःखावाप्तिरमङ्गलं मङ्गलस्य हेतोर्विनायकस्तवपाठादेर्मङ्गलत्ववत् अनिष्टप्राप्तिसाधनस्याप्यमङ्गलत्वम्। अमङ्गलसाधनं च द्विविधं लौकिकमलौकिकञ्च। लौकिकमिष्टवियोगादि। अलौकिकन्तु अनिष्टसूचकत्वात् अनिष्टसाधनम् न तु कारकम् "गोचरे वा विलग्ने वा ये मङ्गारिष्टसूचकाः इत्युक्तेः "उत्पातेन ज्ञापिते चेति वार्त्तिकोक्तेश्च। अलौकिकमपि त्रिविधं भौमं दिव्यमान्तरिक्षञ्च। तानि च उत्पातशब्दे वक्ष्यन्ते। अमङ्गलसूचकानि लिङ्गानि च कानिचित् साधारणानि कानिचिच्चासाधारणानि नेलस्खन्दादीनि तत्र साधारणानि कतिचित् संक्षिप्य दर्शयन्ते यथा भा०भी०प०। "तथेमानि निमित्तानि भयायादोपलक्षये॥ ग्रहेना स्टधाय काकाय कङ्काय सहिता वकैः। संपतन्ति नगाग्रेषु समवायांश्च कुर्व्वते॥ अभ्यघञ्च प्रपश्यन्ति युद्धमानन्दिनो द्विजाः। क्रव्यादा भक्षयिष्यन्ति मांसानि गजवाजिनाम्॥ निर्द्दयञ्चाभिधावन्तो भैरवा भयवेदिनः। कङ्काः प्रयान्ति मध्येन दक्षिणामभितो दिशम्॥ उभे पूर्वापरे सन्ध्ये नित्यं पश्यामि भारत!। उदयास्तमने सूर्य्यं कबन्धैः परिवारितम्॥ श्वेतलोहितपर्य्यन्ताः कृष्णपीताः सविद्युतः। त्रिवर्णाः परिधाः सन्धौ भानुमन्तमवारयन्॥ ज्वलितार्केन्दुनक्षत्रं निर्ज्झिग्रेषदिनत्रयम्। अहोरात्रं भया दृष्टं तद्भयाय भविष्यति॥ अलक्ष्यः प्रभया हीनः पौर्णमासीञ्च कार्त्तिकीम्। चन्द्रोऽभूदग्निवर्णश्च पक्षस्यैं नभस्तले॥ खड्गिनि निहता वीरा भूमिमाहत्य पार्थिवाः। राजानो राजपुत्राश्च शूराः परिघबाहवः॥ अनरीचे वराहस्य हयदंशस्य चोभयोः। प्रणादं युध्यतो रात्रौ रौद्रं नित्यं प्रलक्षये॥ देवताप्रतिमाश्चैव प्रकम्पन्ते हसन्ति च। वमन्ति रुधिरञ्चास्यैः स्विद्यन्ति प्रपतन्ति च॥ अनाहता दुन्दुभयः प्रणदन्ति विशाम्पते। अयुक्ताश्च प्रवर्त्तन्ते अक्षिबाधां महारथाः॥ कोकिलाः शतपुत्राश्च चाषा भाषाः शुकास्तथा। सारसाश्च मयूराश्च वाचो सृजन्ति दारुणाः॥ सहीतशस्त्राः क्रोशन्ति वर्म्मिणो वाजिपृष्ठगाः। अरुणोदये प्रहृष्यन्ते शतशः शतभद्रजाः॥ उभे सन्ध्ये प्रकाशेते दिशां दाहसमन्विते। पर्ज्जन्यः पांशुवर्षी च मांसवर्षी च भारत!॥ या चैषा विद्युता राजंस्त्रैलोक्ये साधुसम्मता अरुन्धती तयाश्चैष वशिष्ठः पृष्ठतः कृतः॥ रोहिणीं पीडयन्नेष स्थितो राजन्! शनैश्चरः। व्याहृत्य लक्ष्म सोमस्य भविष्यति महद्भयम्॥ अनभ्रे च महाघोरः स्तनितः श्रूयते खनः। वाहनानाञ्च रुदतां निपतन्त्यश्रुबिन्दवः॥ खरा गोषु प्रजायन्ते रमन्ते मानुषैः सुताः। अना-

त्तैवं पुष्पफलं दर्शयन्ति वनद्रुमाः ॥ गर्भिण्यो राजपुत्रांश्च जनयन्ति विभीषणान् । क्रव्यादाः पक्षिणश्चापि सङ्घान्ति परस्परम् ॥ त्रिविषाणाश्चतुर्नेत्राः पञ्चपादा द्विमेहनाः । द्विशीर्षाश्च द्विपुच्छाश्च दंष्ट्रिणः पशवोऽशिवाः ॥ जायन्ते विकृताक्षाश्च व्याहरन्त्योऽशिवा गिरः । त्रिपदाः शिखिनस्ताक्ष्यांश्चतुर्दंष्ट्रा विषाणिनः ॥ तथैवान्याश्च दृश्यन्ते स्त्रियो वै ब्रह्मवादिनाम् । वैनतेयान् मयूरांश्च जनयन्त्यः पुरे तव ॥ गोवत्सं बड़वा सूते श्वा शृगालं महीपते ! । कुक्कुटान् करभांश्चैव शुकांश्चाशुभवादिनः ॥ स्त्रियः काश्चित् प्रजायन्ते चतस्रः पञ्च कन्यकाः । जातमात्राश्च नृत्यन्ति गायन्ति प्रसृजन्ति च ॥ पृथग्जनस्य सर्वस्य क्षुद्राः प्रहसन्ति च । नृत्यन्ति परिगायन्ति वेदयन्तो महद्भयम् । प्रतिमाश्चालिखन्त्येते सशस्त्राः कालचोदिताः अन्योन्यमभिधावन्ति गिरयो दण्डपाणयः । अन्योन्यमवस्रन्ति नगराणि युयुत्सवः ॥ पद्मोत्पलानि दृश्यन्ते जायन्ते कुसुदानि च । विध्वस्ताश्च वान्त्युल्का रजो नाशुपशाम्यति । अभीक्ष्णं कम्पते भूमिरर्कं राहुरुपैति च । श्वेतो ग्रहस्त्वया चित्रां समतिक्रम्य तिष्ठति । अभावं हि विशेषेण कृष्णां तत्र पश्यति ॥ धूमकेतुर्महाघोरः पुष्यञ्चाक्रम्य तिष्ठति । सेनयोरुभयं घोरं करिष्यति महाग्रहः ॥ मघास्वङ्गारको वक्रः श्रवणे च बृहस्पतिः । भाग्यं(मघास्)नक्षत्रमाक्रम्य स्थूर्यपुत्रेण पीड्यते ॥ शुक्रः प्रौष्ठपदे पूर्वे समारुह्य विरोचते । उत्तरे तु परिक्रम्य सहितः सप्तदीप्यते ॥ श्वेतो ग्रहः प्रज्वलितः सधूम इव पावकः । ऐन्द्रं तेजस्वि नक्षत्रं ज्येष्ठामाक्रम्य तिष्ठति ॥ ध्रुवं प्रज्वलितं घोरमपसव्यं प्रवर्तते । रोहिणीं च पीड्यत उभौ च शशिभास्करौ ॥ चित्रास्वात्यन्तरे चैव धिष्ठितः परुषो ग्रहः । वक्रानुवक्रं कृत्वा च श्रवणं पावकप्रभः । ब्रह्मराशिं समादाय लोहिताङ्गो व्यवस्थितः ॥ सर्वसस्यपरिक्षया पृथिवी सस्यशालिनी । पञ्चगोर्षा यवाश्चापि शतशीर्षाश्च शालयः ॥ प्रधानाः सर्वलोकस्य यास्यावत्तमिदं जगत् । ता गावः प्रस्रुता वत्सैः शोणितं प्रक्षरन्त्युत ॥ निर्घातैरर्चिषश्चापात् खड्गाश्च ज्वलिनो भृशम् । व्यक्तं पश्यन्ति शस्त्राणि संग्रामं समुपस्थितम् ॥ अग्निवर्णा यथा भासः शस्त्राणां सदकस्य च । कवचानां ध्वजानाञ्च भविष्यति महान् क्षयः ॥ पृथिवी शोणितावर्ता ध्वजोडुपसमाकुला । कृष्णां वैशसे राजन् ! पाञ्चवैः सह भारत ! ॥ दिशु प्रज्वलिताश्चाग्न्य आहरन्ति मृगद्विजाः । अत्याहितं दर्शयन्तो वेदयन्ति महद्भयम् ॥ एकपाच्चिचरणः शकुनिः खचरो निशि । रौद्रं नदति संरब्धः शोणितं छर्दयन्निव ॥ शस्त्राणि चैव राजेन्द्र ! प्रज्वलन्तीव संप्रति । सप्तर्षीणामुदाराणां समवच्छादते प्रभा ॥ संवत्सरस्थायिनौ च यमौ प्रज्वलितावुभौ । विशाखायाः समीपस्थौ दृश्यतेऽनेश्वरौ ॥ चन्द्रादित्यावुभौ ग्रस्तावेकपक्षे त्रयोदशीम् । अपर्वणि ग्रहं यातौ प्रजासंक्षयमिच्छतः ॥ अशोभिता दिशः सर्वाः पांशुवर्षैः समन्ततः । उत्पातमेघा रौद्राश्च रात्रौ वर्षन्ति शोणितम् ॥ कृत्तिका पीड्यते तीक्ष्णैर्नक्षत्रं पृथिवीपते ! ॥ अभीक्ष्णं वाता वायन्ते धूमकेतुसमवस्थिताः । विषमं जनयन्त्येते आक्रन्दजननं महत् ॥ त्रिषु क्षत्रेषु सर्वेषु नक्षत्रेषु विशाम्यते । रश्मिः संपतते दीप्तः जनयन् भयमुत्तमम् ॥ चतुर्दशीं पञ्चदशीं भूतपूर्वां च षोडशीम् । इमान्तु नाभिजानामि भूतपूर्वां त्रयोदशीम् ॥ चन्द्रसूर्यावुभौ ग्रस्तावेकमासे त्रयोदशीम् । अपर्वणि ग्रहावेतौ प्रजाः संक्षयविष्यतः । शोणितैर्वक्त्रसम्पूर्णा अल्पास्तत्र राक्षसाः । प्रतिस्रोतोवहा नद्यः सरितः शोणितोदकाः । फेनायमानाः कूपाश्च कूर्दन्ति इव भीमा इव ॥ पतन्त्युल्काः सनिर्घाताः शक्राशनिसमप्रभाः । अद्य चैव निशां व्युष्टासुदये भानुराहरत् ॥ ज्वलन्तीभिश्च वह्नीभिरुल्काभिः सर्वतो दिशम् । अन्योन्यमवस्थाञ्छित्वा चोक्तं महर्षिभिः । भूमिपालसहस्राणां भूमिः पास्यति शोणितम् ॥ कैलासमन्दराभ्यान्तु तथा हिमवतो गिरेः । सहस्रशो महाशब्दाः शिखराणि पतन्ति च ॥ महाभूता भूमिकम्पे चत्वारः सागराः पृथक् । वेलामुदीर्य वलीव क्षोभयन्तो वसुन्धराम् । उच्छ्रायमुच्छ्रय्य वान्त्युल्का वाताः शर्करकर्षिणः ॥ अभस्माः समहावातैरयनीभिः समाहताः । उच्चाः पतन्ति चैत्यानां यामेषु नगरेषु च । नीललोहितपीतश्च भवत्यग्निर्हुतो द्विजैः । वामार्चिर्दृश्यते सद्यः सङ्घान् वै दारुणं क्षयम् ॥ स्वर्गा गन्धा रसाश्चैव विपरीता महीपते ! । ध्वजं ध्वजाः प्रसङ्गन्ति कम्पमाना मुहुर्मुहुः ॥ सङ्गन्त्यङ्गारवर्षञ्च भेर्यश्च पटहास्तथा । शिखराणां सङ्घातानुपरिष्टात् समन्ततः । वायसाश्च रुवन्त्युग्रं वामं मण्डलमाश्रिताः । पक्षापक्षेति सुभृशं वाशन्ते वयांसि च ॥ निलीयन्ते ध्वजाग्रेषु क्षयाय पृथिवीक्षिताम् ॥ ध्मायन्तः प्रकिरन्तश्च व्याला वेपथुसंयुताः । दीनास्तुरङ्गमाः सर्वे वारणाः सलिलाश्रयाः" इति असाधारणानि अमङ्गलानि च दर्शितानि यथा "सङ्कर्षणीं छिन्नभासां रुदतीञ्च दिगम्बराम् । कृष्णवस्त्रपरीधाना-

मपरां विधवामपि । सुखदुष्टां योनिदुष्टां व्याधिताञ्चैव कुट्टिनीम् । पतिपुत्रविहीनाञ्च डाकिनीं पुंश्चलीमहो । कुम्भकारं तैलकारं व्याधं सर्पोपजीविनम् । कुचेलमतिरुक्षाङ्गं नग्नं काषायवासिनम् । अङ्गविक्रयिणञ्चैव कन्याविक्रयिणं तथा । चितां दग्धशवं भस्म निर्व्याणाङ्गारमेव च । सर्पच्छतनरं सर्पं गोधाञ्च शशकं विषम् । श्राद्धपात्रञ्च पिण्डञ्च मोटकं वानरं तथा । देवलं शववाहञ्च शूद्रश्राद्धान्नभोजिनम् । शूद्रान्नपाचकं शूद्रयाजकं ग्रामयाजकम् । कुशपुत्तलिकाञ्चैव शवदाहनकारिणम् । शून्यकुम्भं भग्नकुम्भं तैलं लवणमस्थि च । कार्पासं कच्छपं चूर्णं कुक्कुरं शब्दकारिणम् । दक्षिणेन शृगालञ्च कुर्वन्तं भैरवं रवम् । कपर्दकञ्च चौरञ्च छिन्नकेशं नखं मलम् । कलहञ्च विलापञ्च विलापकारिणं जनम् । अमङ्गलं वदन्तञ्च रुदन्तं शोककारिणम् । मिथ्यासाक्षिप्रदातारं चौरञ्च नरघातिनम् । पुंश्चलीपतिपुत्रञ्च पुंश्चल्युच्छिष्टभोजिनम् । देवतागुरुविप्राणां वस्तुविक्षेपकारिणम् । दत्तापहारिणं दस्युं हिंसकं सूचकं खलम् । पितृमातृविरक्तञ्च द्विजात्यविघातिनम् । सत्यघ्नञ्च कृतघ्नञ्च स्वाम्यपहारिणं जनम् । विप्रद्रोहं मित्रद्रोहं सतां विश्वासघातकम् । गुरुदेवद्विजानाञ्च निन्दकं स्वाङ्गघातकम् । जीवानां घातकञ्चैव स्वाङ्गहीनञ्च निर्दयम् । व्रतोपवासहीनञ्च दीक्षाहीनं नपुंसकम् । गर्हितव्याधिगात्रञ्च काणं बधिरमेव च । पुङ्खं छिन्नलिङ्गञ्च सुरामत्तं सुरां तथा । क्षिप्रं वमन्तं रुधिरं महिषं गर्दभं तथा । मूत्रं पुरीषं श्लेष्माणं कन्विनं स्फक्पालिनम् । झञ्झावातं रक्तदृष्टिं वाताञ्च क्षतपातनम् । शूकञ्च शूकरं स्पष्टं श्वेतं कङ्कञ्च भल्लुकम् । पाशञ्च शुष्ककाष्ठञ्च वायसं गन्धकं तथा । अपदानिनाञ्च सर्पञ्च तन्त्रमन्त्रोपजीविनम् । वैद्यञ्च रक्तपुष्पञ्चौषधं तृणमेव च । कुवार्त्तां श्रुतवार्त्ताञ्च विप्रशापञ्च दारुणम् । दुर्गन्धवातं दुःशब्दं राजा संप्राप वर्त्मनि । मनश्च कुत्सितं प्राणः क्षुभितश्च निरन्तरम् । वामाङ्गस्पन्दनं देहज्वरो राज्ञो बभूव ह । तथापि राजा निःशङ्कं दर्शंदर्शमङ्गलम्" इति ब्रह्म० पु० नि० निएवमन्यान्यपि साधारणासाधारणानि निमित्तान्यूह्यानि "अमङ्गलाभ्यासरतिं विचिन्त्य तम्" कुमा०

अमङ्गल्य त्रि० अमङ्गलाय हितं यत् । अमङ्गलसाधने "अमङ्गल्यं शीलं तव भवतु नामैवमखिलम्" पुष्पदन्तः ।

अमण्ड त्रि० नास्ति मण्डो भक्ष्यविशेषः भूषा वा यस्य । १ मण्डहीने भक्ष्यादौ २ भूषणहीने च ।

अमत पु० अम-रागादौ अतच् । १ खल्यौ २काले ३रोगे च । ४रेणौ उज्ज्वल० । मन-क्त न०त० । ५सम्मतभिन्ने त्रि० । "यस्यामतं तस्य मतमिति श्रुतिः । ६अज्ञाते च ।

अमति पु० अम-अति । १ काले उणा० । २ चन्द्रे मेदि० ३रूमे स्त्री निरु० वेदे तु रूपे एव अस्य प्रयोगः "क्षिरण्ययोममतिं यामशिश्रेत्" "ध्रुवां पृथ्वीममतिं सृजान" ऋ०७,३८,१,२ अमतिं रूपमिति भा० आवस्थुरेममतिं दर्शता" १,६४,६ । दुष्टे त्रि० शब्दार्थ० । मननं मतिः अभावे न०त० । ४ज्ञानाभावे यथास्वरूपाज्ञाने । "अमन्तैतानि षड्जग्ध्वा त्रिरात्रमिति" मनुः "कृच्छ्रांस्तु चतुरः कुर्याद्बोधे बुद्धिपूर्व्वके अमत्या तु हयं कुर्यादिति श्रुतिः ५ अप्रशस्तबुद्धौ च स्त्री न०ब० । ६ज्ञानहीने त्रि० ।

अमतीवन् त्रि० अमतिरप्रशस्ता बुद्धिः तदा वनुते वन-क्विप् दीर्घः । अप्रशस्तबुद्धियुक्ते । "न मे स्तोताऽमतीवान दुरितः स्यात्" ऋ०८,१६,२६ । "अमतीवा अप्रशस्तबुद्धिमान्" भा० ।

अमत्र न० अमत्यत्रमत्र अम-भोजने आधारे अत्रन् । १भोजनपात्रे । "अयं सोमश्चमूसुतोऽमत्रे परिषिच्यते" ऋ०५, "आसनं वसनं चैव शय्याऽमत्रं कमण्डलुः । आत्मनस्तु शुचीनि स्युर्न परेषां कदाचन" स्मृतिः । अम-रोगे अत्रन् । २ शत्रूणामभिभावके । "मर्हा अमत्रो वृजने" ऋ० २,३६,४ । "अमत्रः शत्रूणामभिभविता" भा० अम-गतौ कर्त्तरि अत्रन् । ३गमनशीले त्रि० । "खरिरमत्रो ववक्षे रथाय १,६१,६ । "अमत्रः युद्धादिषु गमनकुशलः" भा० ४ बले च "गम्भीरेण न उरुणामम त्रिन्" १,२४,६ "अमत्रं बलं तद्वत्" भा० ।

अमत्त त्रि० न०त० । १ मत्तभिन्ने मादकद्रव्यादिभिरविकृतचित्ते २सावधाने अप्रमत्ते च । [२अन्यद्देवशब्दे त्रि० ।

अमत्सर पु० अभावे न०त० । १अन्यशुभद्वेषाभावे २न०ब० ।

अमनस् त्रि० नास्ति कार्य्यक्षमं मनो यस्य । १ कार्य्यक्षममनोहीने बालादौ "यथा बाला अमनसः प्राणन्तः" छा० उ० । २मनोवृत्तिहीने योगिनि च । सर्व्वथा मनःशून्ये ३परात्मनि पु० "अप्राणोह्यमनाः शुभ्रः" श्रुतिः । वा कप् । ४अन्यमनस्के ५स्नेहशून्ये ६अनिष्टहीतमनस्के च ६तत्संयोगान्यभेदे पु० ।

अमनि स्त्री अमति गच्छत्यत्र अम-अनि । पथि ।

अमनुष्य पु० अप्राशस्त्ये न०त० । १ मनुष्योचितकर्त्तव्यशून्ये जातिमात्रमनुष्ये २मनुष्यभिन्ने गन्धर्व्वादौ च "सहस्रसंवत्सरममनुष्याणामसम्भवात्" काल्या० १,६,१७ । सहस्रसंवत्सर-

सत्वम् अमनुष्याणां मनुष्याभिधानां गन्धर्वादीनां सम्भवात् सहस्रायुष्यं भवति मनुष्याणां तु तदसम्भवात्" कर्क० ।

अमनोगत त्रि० न मनोगतः । १ अनभिप्रेते २ मनसाऽचिन्तिते । [अस्फुटे २अनभिप्रेते च

अमनोनीत त्रि० न मनसा नीतः स्फुटीतः । १ मनोऽप्रीत्या

अमनोयोग पु० मनसो योगः विषयेषु सावधानतया संयोजनम् अभावे न०त० । अवधानाभावे तत्त्वनिर्णायकमनोऽप्रत्यभावे । न०ब० । तत्शून्ये त्रि० ।

अमनोहर त्रि० विरोधे न०त० । रम्याभिन्ने कुत्सिते ।

अमन्तु त्रि० मन्तुर्मन्ता मन-तुन् न०त० । अज्ञातरि "अकर्मा दस्युरभितो अमन्तुरन्यव्रतः" ऋ०१०,२२,८ १ मन्तुरपराधः न०ब० । २ तच्छून्ये त्रि० ।

अमन्त्र त्रि० नास्ति मन्त्रः पाठो यत्र कर्मणि । १ मन्त्रशून्ये कर्म्मादौ "सायं त्वन्नस्य सिद्धस्य पत्यमन्त्रं बलिं हरेत्" मनुः नास्ति मन्त्रः मन्त्राध्ययनमस्य । २ वेदपाठशून्ये "अव्रतानाममन्त्राणां जातिमात्रोपजीविनां नैषाम् प्रतिग्रहो देयः" "निरिन्द्रियाह्यमन्त्राश्च स्त्रियोऽनृतमितीरिताः" इति च मनुः । वा कप् । अमन्त्रकोऽप्युभयत्र "अमन्त्रकं तु शूद्रस्य सर्व्वकर्म्माणि कारयेत्" अमन्त्रकस्य शूद्रस्य विप्रोमन्त्रेण स्फुटते" इति च स्मृतिः । [क्षुटे च ।

अमन्द त्रि० विरोधे न०त० । १मन्दभिन्ने पटौ २उत्-

अमम त्रि० नास्ति ममेत्यभिमानः गेहादिषु यस्य । स्फुटत्वादिषु ममेत्यभिमानशून्ये "शरीरेष्वममश्चैव इदममूलनिकेतनः" मनुः । २ जिनविशेषे पु० । अममकारादयोऽत्र

अमर पु० मृ-अच्याद्यच् न०त० । बहुकालस्थायितया मृत्युहीने देवे, "तत्रामरालयमरालमरालकेशी" नै० "सुधाम रत्नानि हरामराङ्गनाः" माघः । स्त्रीयुक्तराणि क्रमशः प्लवङ्गमनरामराः" मनुः अष्टशाब्दिकमध्ये २ अमरसिंहनामके शाब्दिके, "पाणिन्यमरजैनेन्द्राः जयन्यष्टादिशाब्दिकाः" इति कविक० । स च काश्मीरवयुक्तलिङ्गानुशासनकोषकर्त्ता विक्रमादित्यसभासदनवरत्नमध्येऽन्यतमः "धन्वन्तरिः क्षपणकोऽमरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः । ख्यातोवराहमिहिरोनृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य" शङ्कुः सुवाग् वररुचिर्मणिरंगुदत्तो जिष्णुस्त्रिलोचनहरो घटकर्पराख्यः । अन्येऽपि सन्ति कवयोऽमरसिंहपूर्व्वा यस्येह विक्रमनृपस्य सभासदोऽमी" इति च ज्योतिर्विदा० । २स्फुटीभवे, स हि छिन्नोऽपि पुनःपुनः प्ररोहति, सहसा न क्षिवते । ४ पारदे तस्य वह्न्यादौ बहुतापनेऽपि न ध्वंसः । अपादाने वा अप् । तत्रैव तस्य सेवने हि मृत्युराहित्यम् रसेश्वरदर्शनशब्दे वक्ष्यते । ५ अस्थिसञ्चये च स हि बहुकालं भूमौ स्थितोपि न जीर्य्यति । स०व० ६ मरणशून्येत्रि० । "अजरामरवत् प्राज्ञो विद्यामर्थांश्च चिन्तयेत्" हितो० "उत्पादयति सावित्री सा नित्या साऽजराऽमरा" मनुः ज्योतिषोक्ते ७ विवाहयोटकार्थे नक्षत्रगणभेदे "हस्ताश्वातिद्युतिमृगशिरःपुष्यमैत्राश्विभानि पौष्णादित्ये जगुरिह बुधा देवसंज्ञानि भानि" ज्योत्स्ना० अधिकं गणशब्दे दृश्यम् । मरुत्वतीगर्भजाते ८मरुद्गणभेदे पु० । "मारुत्वती च मरुतो देवानजनयत् सुतान् अग्निवर्चुहविर्ज्योतिः सावित्रं मितमेव च । अमरं शरडद्विश्च संचयश्च महाभुजम्" इत्यादि हरिवं० ९ गुडूच्याम् १० दूर्व्वायां ११ वारुणीवृक्षे १२ महानिलीवृक्षे १३ धृतकुमार्य्याम् १४ क्षुद्रौषधे च स्त्री । एतासां छेदनेऽपि पुनः प्ररूढत्वात् यथायथं दूर्व्वरत्वाच्च तथात्वम् । न क्षियतेऽनया करणे अप् । १५ जरायौ स्त्री । तद्धर्म्मणा वेष्टनेनैव जठरानलदाहनिवारणात् मरणनिवारकत्वात् तथात्वम् । १६नाभिनालावाम् राजनि० १७स्थूणायां स्फुटं मरणनिवारकत्वात्तथा । अमराः सन्त्यस्मात् अर्श आ०अच् । १८ इन्द्रपुर्य्याममरावत्यां स्त्री

अमरकोष पु० अमरेण कृतः कोषः । अमरसिंहकृते लिङ्गानुशासनाख्ये त्रिकाण्डात्मके अभिधानभेदे ।

अमरज पु० अमरः दुर्मर इव जायते जन-ड । दुष्खदिरे कालस्कन्दाख्ये खदिरभेदे दुर्मरत्वेन जातत्वात्तथात्वम् ।

अमरदारु पु०न० । अमराणां प्रियं दारु । देवदारुवृक्षे ।

अमरद्विज पु० अमरपूजकः द्विजः शाक० त० । देवले (पूजारीति) ख्याते विप्रे ।

अमरपति पु० ६त० । देवराजे इन्द्रे अमरभर्त्रादयोऽप्यत्रार्थे

अमरपुष्पक पु० अमरमविशीर्णं पुष्पं यस्य । १कंसवृक्षे २इक्षुगन्धायां स्त्री । २ काशवृक्षे पु० रत्नमा० ।

अमरपुष्पी स्त्री अमरमविशीर्णं पुष्पमस्याः जातित्वात् ङीप् । अवाक्पुष्प्याम् । कप् अत इत्त्वम् । अमरपुष्पिकाप्यत्र ।

अमरप्रभु पु० ६त० । १विष्णौ तस्य सर्व्वेश्वरत्वात्तथा । २ शक्रे च

अमररत्न न० अमर इव शुद्धं रत्नम् । स्फटिके मणौ ।

अमरराज पु० ६त० टच् समा० । देवराजे इन्द्रे ।

अमरलोक पु० ६त० । १ स्वर्गे । अमराणामिव लोको भुवनं यस्य । २प्राप्तदेवलोके धार्म्मिके त्रि० । "तेषां सत्यगवर्त्त-

मानो गच्छत्यमरलोकताम्" मनुः ।

अमरवल्ली स्त्री अमरा उच्छेदेऽपि न म्रियमाणा वल्ली । आकाशवल्ल्याम् (आलकलता) अमरलतादयोऽस्यत्र ।

अमरसरित् स्त्री ६त० । मन्दाकिन्यां गङ्गायाम् ।

अमराङ्गना स्त्री ६त० । "अक्षरन्तु 'सुधाश्च रत्नानि हरामराङ्गनाः" माघः ।

अमराद्रि पु० ६त० । सुमेरौ । तत्स्थानञ्च । "लङ्का कुमध्ये यमकोटिरस्याः प्राक्पश्चिमे रोमकपत्तनञ्च । अधस्ततः सिद्धपुरं सुमेरुः मौर्व्येऽथ वाम्ये बड़वानलश्च । इह हि मेरुगिरिः किल मध्यगः कनकरत्नमयश्चिदशालयः द्रुहिणजङ्घकपद्मकर्णिकेति च पुराविद इत्यमवर्णयन्" सि० शि० । अधिकं मेरुशब्दे भूगोलशब्दे च द्रष्टव्यम् ।

अमराधिप पु० ६त० । देवराजे इन्द्रे अमराधीशादयोऽस्यत्र [नैष० ।

अमरापगा स्त्री ६त० । गङ्गायाम् ।

अमरालय पु० ६त० । स्वर्गे "तत्रामरालयमरालमरालकेशी"

अमरावती स्त्री अमराविद्यतेऽस्यां मतुप् मस्य व दीर्घः । इन्द्रनगर्याम् । सा च मेरुपर्व्वतोपरिस्था "सद्रत्नकाञ्चनमयं शिखरत्रयञ्च मेरौ मुरारिकपुरारिपुराणि तेषु । तेषामधः शतमखज्वलनान्तकानां रक्षोऽम्बुपानिलशशीशपुराणि चाष्टौ" सि० शि० । एतद्वर्णनं भा० स० प० ७ अध्याये काशी० ख० १० अध्याये च द्रष्टव्यम् । "यस्यां मेन्द्रद्रुतपातितार्गला निर्भोगाताङ्गीव भियाऽमरावती" का० प्र० ।

अमरिष्णु त्रि० मृ-बा० ष्णुच् न० त० । मरणशीलभिन्ने "अनातुरा अजरास्यामरिष्णवः" ऋ० १०,९४,११ ।

अमरु पु० अमरुशतकप्रणेतरि कविभेदे "कविरमरः कविरमरः कविरेरोमयूरक" इत्युद्भटः ।

अमरेश पु० ६त० । देवराजे इन्द्रे अमरेश्वरादयोऽप्युक्तार्थे "अयममरेशदिगीहसं सुधांशुः" सा० द० ।

अमर्त्त त्रि० मृ-तच् न० त० । मरणधर्म्मशून्ये "दृंहणानि च मर्त्तमानो अमर्त्तः" ऋ० ५,३३,६, "अमर्त्तः अमरणधर्म्मा" भा० ।

अमर्त्य त्रि० मृतिमर्हति यत् न० त० । मरणशून्ये "अग्ने : विवस्वदुषसश्चित्रं राधो अमर्त्य !" ऋ० १,४४,१, "अमर्त्य ! मरणरहित !" भा० "उत्क्रान्तवायोः समकालमेव अमर्त्यभावेऽपि कयोश्चिदासीत्" रघुः ।

अमर्त्यभुवन न० अमर्त्यानां देवानां भुवनम् । स्वर्गे ।

अमर्य्याद त्रि० नास्ति मर्य्यादा सीमा सम्मानो वा यत्र । १ सीमारहिते २ सम्मानरहिते च ।

अमर्ष पु० मृष-क्तौ घञ् विरोधे न० त० । असहिष्णुत्वे कोपे । "अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः" किरा० तानेव सामर्थतया निजघ्नुः" रघुः हर्षामर्षभयोद्वेगैर्वियुक्तः स च मे प्रियः" गीता ।

अमर्षण त्रि० मृष-ल्युट् न० त० । १ असहने २ क्रोधने च । "हृदि यतो गोत्रमिदाप्यमर्षणः" रघुः । अमर्षणोऽन्यस्यायो विशालं कायलक्षणम्" । अमर्षणः स्वयं जेतुमशक्तः शत्रियोरणे भा० आ० प० । भावे ल्युट् । क्रोधे न० ।

अमर्षित त्रि० मृष-क्त इट् गुणश्च न० त० । क्रुद्धे "अस्मं प्रादुश्चकारोयं नारायणमसर्षितः" भा० आदिप० ।

अमर्षिन् त्रि० मृष-णिनि न० त० । क्रुद्धे स्त्रियां ङीप् ।

अमल न० अम+कलच् । १ सातलाख्ये २ अभ्रके च नास्ति मलं यस्य । २निर्म्मले, दोषरहिते त्रि० "रसकलामलपल्लवलीलया" माघः "संलिप्ताक्षरकेसलामलपटैर्लालित्यलीलावतीम्" "अमलकमलरागेस्वाङ्गपङ्गांगषद्भैः" लीला० ।

अमलात्मन् पु० अमलः रागादिदोषरहितत्वात् शुद्ध आत्मान्तःकरणं यस्य । निष्टरागादौ योगिनि । [२निर्म्मोधे च

अमम पु० अम-गतिरोगादौ असच् । १ काले २ रोगे

अमलिन त्रि० विरोधे न० त० । १मालिन्यशून्ये २निर्दोषे च कुलममलिनं नत्वेवाहं न च जीवितम्" माल० ।

अमसृण त्रि० विरोधे न० त० । चिक्कणभिन्ने रूक्षे ।

अमा अव्य० न+मा-का । १सहार्थे, अमेवानः सुहवाः" ऋ० २,३६,२ । "अमा सह भा०" । अमावस्या । २निकटे च । न माति परिच्छिनत्ति क्षयोदयविशेषम् मा-क न० त० । सर्व्वकलाव्यापकतया स्थितायां चन्द्रस्य षोड़श्यां २कलायाम् स्त्री "अमा षोड़शभागेन देवि ! प्रोक्ता महाकला संस्थिता परमा माया देहिनां देहधारिणी अमादिपौर्णमास्यन्तायाएव यस्यिनः कलाः । तिथयस्ताः समाख्याताः षोड़शैव वरानने !" इति रु० प्रभा० ख० । व्याख्यातं चैतत् कालमाधवीये "महामाया आधारशक्तिरूपा देहिनां देहधारिणी सा चन्द्रमण्डलस्य षोड़शभागेन परिमिता चन्द्रदेहधारिणी अमानाम्नी महाकलेति प्रोक्ता क्षयोदयरहिता नित्या तिथिसंज्ञिकैव इतरा अपि पञ्चदश कला दिवसव्यवहारोपयोगिन्यः क्षयोदयवत्यः पञ्चदश तिथयो भवन्तीति तिथयः षोड़शैव एवञ्चात्र सामान्यविशेषरूपेण तिथिर्द्विविधसंज्ञं भवति । तत्र येयम् अमेत्युक्ता क्षयोदयवर्জ्जिता ध्रुवा षोड़शी कला तदुक्तः कालस्तिथिसामान्यम् । यास्त्वगिष्टा इन्दिक्षयोपेताः पञ्चदश कलास्ताभिः विशिष्टकालविभागस्तिथिविशेषः" इति । अधिकं तिथिशब्दे वक्ष्यते

सूर्य्यकिरणासंपर्काददीप्तायां, ४ पञ्चदश्यां कलायाम् न मीयते ह्रस्यते विपरीत । ५ अमावस्यायां तिथौ च स्त्री । "अमार्कपाते श्रवणं यदि स्यात्" "यद्यमा रविवारेण" इति च प्रा० त० पुरा० । "अमायां तु सदा सोम-ओषधीः प्रतिपद्यते" इति सोमो० । न मीयतेऽसौ मा-कर्मणि क्विप् । ६ आत्मनि पु० । ७ मानशून्ये त्रि० । ८ गृहे अव्य० निरु० । "कामधरतामसा भूते" ऋ० २,३८,६ । "अमा गृहमिति" भा० । अम्यते गम्यते चन्द्रलोकात् यत्र अम-आधारे-घञ् वा दीर्घः । ९ दृष्टलोके । "अमातोमरुतोवि व्यान्तरिक्षादमायुत" ऋ०५,५०,५८ । "अमातः अमाद्गृहात्" भा० । तत्र यावत्सम्पातसुस्थित्वा "क्षीणे पुण्ये मर्त्यलोकं विशन्तीति" श्रुतौ चन्द्रलोकादेव इह लोकागमनात्तथात्वम् । [दुर्बलः ।

अमांस त्रि० नास्ति मांसं यस्य । १दुर्बले । मांसहीनो हि

अमात्य पु० अमा सह वसति यत् । मन्त्रिणि । तस्य दण्डनीतौ राजसहचरत्वात्तथात्वम् । "पुरोहितामात्यसुखाय बोधाः" भट्टिः । "अमात्यपुत्रैः सवयोभिरन्वितः" रघुः । "अमात्ये दण्ड आयत्त" इति मनुः "अमात्यव्यङ्गना रात्रौ ध्यायेत् यत्नसंहिताः" माघः । अमात्यलक्षणसङ्ख्या शैवा० विष्णुध० पु० । "सर्व्वलक्षणलक्षण्यो मन्त्री राज्ञस्तथा भवेत् । ब्राह्मणो वेदतत्त्वज्ञोविनीतः प्रियदर्शनः । कुलजश्चे महात्मा च स्वामिभक्तः प्रियंवदः । दक्षस्त्यागुणःप्रोक्तां नीतिं जानाति सर्व्वतः । रागद्वेषैश्च यः कार्यं न च हन्ति महीक्षितः । लोकापवादाद्राजार्थे भयं यस्य न विद्यते । क्लेशक्षमस्तु धर्म्मात्मा विजितात्मा जितेन्द्रियः । गूढमन्त्रश्चाश्चदक्षः प्राज्ञो भक्तजनप्रियः । इङ्गिताकारतत्त्वज्ञ ऊहापोहविचारदः । शूरश्च ज्ञातविद्यश्च न मानी न च मत्सरी । चारप्रचारकुशलः प्रणिधिप्राण आत्मवान् । षाड्गुण्यविधितत्त्वज्ञ उपायकुशलस्तथा । वेत्ता विधाता कार्य्याणां नैव कार्य्यातिपातनः । समयज्ञश्च कालज्ञो भक्तानाञ्च गुणप्रियः । कृतानामकृतानां च कर्म्मणामन्ववेक्षिता । यथा पुरुषमर्हाणां पुरुषाणां नियोजकः । कर्त्ता परोक्षे कार्य्याणि सांपरावे भवेदुत्तम : तत्त्वातत्त्ववेदिता च कर्मणो गुरुलाघवम् । यत्नमित्रविभागज्ञो विग्रहे चैव तत्त्ववित् स राज्ञः सर्व्वकार्य्याणि कुर्यादृष्टगुणोदयः । विदितानि तथा कुर्याच्च ज्ञातानि महीक्षिता अज्ञातानि नरेन्द्रस्य कृत्वा कार्य्याणि भार्गव ! अचिरेणापि विदेयं स मन्त्री त्वधिगच्छति । कुरुते यस्तु कार्य्याणि विदितानि महीपतेः भेदो न तस्य भवति कदाचिदपि भूभुजा एवंगुणो यस्य भवेत्तु मन्त्री वाक्ये च तस्याभिरतस्य राज्ञः । राज्यं स्थिरं स्याद्विपुलाश्च लक्ष्मीर्यशश्च दीप्तं भुवनत्रयेऽपि" इति ।

अमात्र पु० नास्ति मात्रा परिच्छित्तिर्यस्य । १ दृश्यशून्ये परमात्मनि तुरीये ब्रह्मणि । हृत्परिमाणकल्पनेन २ परिच्छेदशून्ये गगनादौ च त्रि० । अमात्रं त्वा धिषणं तविषे ऋ० १,१०२,७, "अमात्रं मात्रया दृश्यतया रहितम्" भा० ।

अमानना स्त्री अमाने न० त० । आदराभावे न० ब० । आदरशून्ये त्रि० । [मनःकष्टदायके दुःखे ।

अमानस्य न० मानसे साधु न भवति मानस+यत् न० त० ।

अमा(म)मासी स्त्री अमा सह सूर्य्येण मा: मासो वा चन्द्रमा यस्यां गौरा० ङीष् । अमावस्यायाम् ।

अमाय त्रि० नास्ति माया यस्य । १कपटशून्ये २ अविद्याशून्ये ब्रह्मणि न० । मायाभावमात्रम् । ३ दृश्यशून्ये त्रि० ।

अमानिन् त्रि० न मन्यतेऽभिमन्यते मन-णिनि न० त० । अभिमानशून्ये "अमानित्वमदम्भित्वम्" गीता ।

अमार्जित त्रि० मृज-क्त विरोधे न० त० । अपरिष्कृते ।

अमा(वा)वसी स्त्री अमा सह वसतश्चन्द्रार्कौ यस्याम् यप् घञ् वा नि० गौरा० ङीष् । अमावास्यायाम् ।

अमाव(वा)स्या अमा सह वसतश्चन्द्रार्कौ यस्याम् नि० । कृष्णपक्षीयपञ्चदशीतिथौ । तथा हि अधः प्रदेशवर्त्ती शीघ्रगामी चन्द्रः, ऊर्द्ध प्रदेशवर्त्ती मन्दगामी सूर्य्यः । तयोर्गतिविशेषात् यत्काले चन्द्रमण्डलमन्यूनमनतिरिक्तं सत् सूर्य्यमण्डलस्याधोभागे व्यवस्थितम् भवति तदा सूर्य्यरश्मिभिः साकल्येनाभिभूतत्वात् चन्द्रमण्डलमीषदपि न दृश्यते इति कृष्णपक्षे पञ्चदशकलाक्रियाकूटोपलक्षित कालः अमावस्येति निष्कर्षः । "सूर्य्याचन्द्रमसोः यः परो विप्रकर्षः सा पौर्णमासी यैः परःसन्निकर्षः साऽमावस्येति" गोभि० "अमावस्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी" मनुः । अमावास्यायां भवः वा कुन् अमावास्यकः यञ् आमावस्यः । तत्रभवे त्रि० । "य आमारे मृगयन्ते प्रतिच्छेयेऽमावास्ये" अथ० २६,३ ।

अमावसु पु० आयुपुत्रे ऋषिभेदे "अमावसुमिति ख्यातायोः पुत्रं वर्षसिगम्" हरिवं० ।

अमित त्रि० न मितः । १ अपरिच्छिन्ने दृश्यशून्ये "अमितस्य हि दातारं भर्त्तारं का न पूजयेत्" ? रामा० । २ अज्ञाते च ।

अमितविक्रम पु० अमिता अपरिच्छिन्ना विक्रमाख्यः पाद-

विक्रमो यस्य, अमितः विक्रमः शौर्य्यमस्येति वा ।विष्णौ । "सङ्क्रन्दोऽमितविक्रमः" वि०स० । बहुशौर्य्ये त्रि० ।

अमिताशन पु० अमितमत्ति संहारसमये अद-ल्यु, । सर्वभक्षके परमेश्वरे ।"यस्य ब्रह्म च क्षत्रञ्च उभे भवत ओदने मृत्युर्यस्योपसेचनम्" इति श्रुतेः "अत्ता चराचरग्रहणात्"इति शा० स्मृत्याञ्च तस्य सर्वभक्षकत्वम् । २ विष्णौ च "वेगवानमिताशनः" विष्णुस० ।

अमितौजस् त्रि० अमितमोजो यस्य । अपरिच्छिन्न सामर्थ्ये प्रचुरबले । "कविरमितौजा अजायत" ऋ०१,११,४ । "स तैः पृष्टस्तथा सम्यगमितौजा महात्मभिः" मनुः ।

अमित्र अम० रोगे इत्र । रिपौ । "ज्ञातामित्रौ मित्रे च सहजप्राकृतावपि" तस्य मित्रार्थममित्रामित्रास्त्रे" इति च माघः "अमित्रजिन्मित्रजिदोजसा स यदिति" नैष० "अमित्रादपि सद्वृत्तमनेध्यादपि काञ्चनम्" मनुः ।

अमित्रस(सा)ह त्रि०अमित्रं सहते बलाधिक्यात् अच् अण् वा । रिपुजयशीले बलिनि "शासदृत्वा मघवा अस्यमित्र साहः" । ऋ० १,२०,४ । [तस्ते प्रियमभ्यमित्या"रघुः ।

अमिथ्या अव्य० विरोधे न०त० । मिथ्याभिन्ने सत्ये "तामूच-

अमिन् त्रि० चु० अम-रोगे इनुः इनि । रोगिणि ।

अमिन त्रि० मि-क्षेपे बा० कर्मणि नङ् न०त० । अक्षेपणीये अहिंस्ये "उत द्विवर्हा अमिनः सहोभिः" ऋ० ६, १६,१ । "अमिनः अहिंसनीयः" भा० ।

अमिश्र त्रि० न०त० । संकीर्णभिन्ने पृथग्भूते । "तद्वा अमिश्रमेव वस्नां प्रातः सवनम्" शत०ब्रा० ।

अमिश्रित त्रि० न०त० । मिश्रितभिन्ने पृथग्भूते ।

अमिष न० अम-भोगे कर्मणि इषन् । १लौकिकसुखे नास्ति मिषन्मूलं यत्र । २व्याजशून्ये त्रि० ।

अमीत त्रि० मी-वधे कर्मणि क्त न०त० । अहिंसिते । "अमीतवर्णा उषसश्चरन्ति" ऋ० ४,५१,६, "अमीतवर्णा अहिंसितवर्णाः" भा० ।

अमीव त्रि० अम-वनु नि० ईड़ागमः । १रोगे "मनेमयक्ष्मा, यक्ष्मामीवाः व०"६,१६ । अमीवाः व्याधीन् सपांसुः वे०दी० । "अपामीवं बाधते वेति" ऋ० १, ३५, ६ "अमीवां रोगादिबाधाम्" भा०"प्रजावन्तोऽनमीवा अनागसः" ऋ० १०,३७,७ "अनमीवा रोगरहिताः" भा० । "अमीवहा वास्तोष्पते" ऋ० ७,५५,१ "अमीवं रोगं हन्ति अमीवानां रोगाणां नाशयिता" भा० । २पापे, ३ दुःखे, च न० । उज्ज्वलदत्तस्तु मीङ् हिंसायां वन् मीवः उदरकृमिरित्येवनिपातः न तु अमीवः इत्याह ।

अमीवचातन त्रि० अमीवं रोगं चातयति चत-याचने णिच्-ल्यु । रोगहिंसके "देवममीवचातनम्" ऋ० १,१२,७ अमीवानां हिंसकानां शत्रूणां रोगाणां वा चातनं घातकम्"भा० स्त्रियां गौ० ङीष् । आप इद्व उ भेषजीरापो अमीवचातनीः" ऋ० १०,१३७,६ ।

अमुक त्रि० अदस्+टेरकच् उत्त्वमत्वे । अदःशब्दार्थे "अत्राहममुकः साक्षी" "समाप्ते ऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत् मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितम्" च या० ।

अमुक्त त्रि० न सक्तः विरोधे न०त० । सक्तभिन्ने १ बद्धे "सदा प्रहृष्टया भाव्यं व्यये चासक्तहस्तया" मनुः । २संसारबन्धयुक्ते च न सज्यते सर्व्वदा योधः ।(हारीतः)। ३क्षुरिकाभेदे न०

अमुक्ति स्त्री अभावे न०त० । १सक्त्यभावे मुक्तिर्मोचनं रज्वादिबन्धननिवृत्तिः संसारबन्धनिवृत्तिरूपोमोक्षश्च । न०ब० २मुक्तिशून्ये त्रि० । [गौणे ।

अमुख्य त्रि० मुख्यम् विरोधे न०त० । मुख्यभिन्ने प्रधानभिन्ने

अमुग्ध त्रि० न मुग्धः १ मुग्धभिन्ने । मुग्धः मोहान्वितः मनोहरश्च । २मुग्धावस्थातीतप्रौढायां स्त्रियां स्त्री ।

अमुतस् अव्य० अमुष्मात् अदस+तसिल् उत्त्वमत्वे । १ अमुष्मादित्यर्थे २ परलोकादित्यर्थे च "इतआजातोऽमुतः कुतश्चित् ऋ० १, १७६ ४ ।

अमुत्र अव्य० अमुष्मिन् अदस् त्रल् उत्त्वमत्वे । १ अमुष्मिन्नित्यर्थे २ परलोके इत्यर्थे च "यत्तु वाणिजके दत्तं नेह नामुत्र तद्भवेत्"मनुः । ["अमुत्रभूयादध यद्यमस्य"श्रुतिः ।

अमुत्रभूय न०अमुत्र भवनम् भू-भावे क्यप् । परलोकभवने

अमुधा अव्य० अमुना प्रकारेण धाल् । अमुनाप्रकारेणेत्यर्थे "इत्थं नः सद्योऽमुधासद्योः न एतदतिक्रामादिति" शत०ब्रा० ।

अमुद्रयञ्च्(च्) त्रि० अमुमञ्चति अदस+अनृच क्विप् अद्रयागमः उत्त्वमत्वे । १अदःशब्दार्थप्राप्ते २ततूपूजके च । शसादौ अमुद्र्यीचः । पूजार्थे अमुद्रयञ्चः । स्त्रियां ङीप् ।

अमुमुयञ्च्(च्) त्रि० अमुमञ्चति अदस् अनृच-क्विप् गतौ न लोपः अद्र्यादेशः अद्रेरपि उत्त्वमत्वे । १अदः शब्दार्थे गते ततूपूजके च शसादौ अमुमुद्र्यीचः अमुमुद्र्यञ्चः स्त्रियां ङीप् ।

अमु(दो)वत् अव्य० अमुष्येव वति वेदे उत्त्वमत्वे । अमुष्येवेत्यर्थे "मनुष्वद्भरतवदमुवदिति यजमानार्थे याज्याह" काल्या० २,२,७ ।

अमुष्यकुल न० ६त० नि० अलुक् । प्रसिद्धकुले । मनोज्ञा० वुञ् आमुष्यकुलकम् तद्भावे कौलीन्ये न० ।

अमुष्यपुत्र पु० ईत०नि०अलुक्। प्रख्यातवंशे कुलीने तस्य भावः मनोज्ञा० वुञ् आमुष्यकम्। कौलीन्ये न०।

अ(आ)मुष्यायण पु० अमुष्य अपत्यम् फक् (फञ्) अलुक्। विख्यातकुलोत्पन्ने अपत्ये अमुष्यापत्ये च।

अमूढ्त्त त्रि० अमुष्येव दर्शनमस्य अदस्+डत्व—क्त आति अत्त्वमत्वे। अदःशब्दार्थसदृशे। कञ्। अमूदृशः किन् अमूदृक् कृतम्। उक्तार्थे। कञ् प्रत्यये स्त्रियां ङीप् "अमूदृशी तत्कविदृन्दवन्दिता" नै०।

अमूर स्त्री अमूः मूढ्भावः कृञा० अस्त्यर्थे र। मूढनिष्ठे मोहशून्ये "संजानत स्वैर्दक्षैरमूराः" ऋ० १ ६८'४, "यास्कस्तु मूढा वयं स्मोऽमूढस्त्वमसि इति" मूढशब्दस्य रूपमाह तत्र पृ० साधुत्वम्।

अमूर्त्त त्रि० न०त०। मूर्त्तभिन्ने अवयवशून्ये अपरिच्छिन्नपरिमाणे "क्षितिर्जलं तथा तेजः पवनोमन एव च। परापरत्वमूर्त्तत्वक्रियावेगाश्रया अमी" भाषा० "मूर्त्तत्वमवच्छिन्नपरिमाणवत्त्वमिति" सि०मुक्ता० तद्वीने गगनादौ। "द्वे वाव ब्रह्मणो रूपे मूर्त्तञ्चामूर्त्तमेव च" श्रुत०ब्रा०।

अमूर्त्तगुण पु० ईत०। वैशेषिकोक्ते अमूर्त्ताकाशादेर्गुणविशेषे "धर्माधर्मौ भावना च शब्दोवुद्ध्यादयोऽपि च एतेऽमूर्त्तगुणाः सर्व्वे" भाषा०।

अमूर्त्ति त्रि० नास्ति मूर्त्तिरस्य। १अवयवशून्ये गगनादौ २विष्णौ पु० "अमूर्त्तिरनघोऽचिन्त्यः" विष्णुस० "मूर्त्तिर्घनरूपं धारणसमर्थं चराचरलक्षणं तद्वास्ति यस्य" भा०।

अमूर्त्तिमत् त्रि० न०त०। १मूर्त्तिमद्भिन्ने गगनादौ २विष्णौ पु० "दीप्तमूर्त्तिरमूर्त्तिमान्" वि०स०।

अमूल त्रि० नास्ति मूलं यस्य। १ आदिकारणशून्ये "मूलं मूलाभावादमूलम्" सा०सू०। "त्रयोविंशतितत्त्वानां मूलस्वादानं प्रधानं अमूलं मूलशून्यं अनवस्थापत्त्या तत्र मूलान्तरासम्भवात्" प्र०भ०। "इयं वा इदं जीवनं "मूलि चैवामूलञ्च तदुभयं देवानां यन्मनुष्याः उपजीवन्ति पयोऽमूलाः ओषधयोमूलिन्यः" श्रुत० ब्रा०। मूलि च अमूलञ्चाद्यं प्रतिश्रितम्" श्रुत०ब्रा०। २ मूलशब्दादिशिफा तच्छून्ये त्रि० मूलाच्च" । पा० अजादि टाप्। सा च ३ अग्निशिखायाञ्च। कप्। अमूलकोऽल्पार्थे मूलशून्येषु—अष्टे च "एतद्वचनममूलकम्" भूरिलोकप्रसिद्धिः।

अमृक्त त्रि० मृज—गोधालङ्कारयोः वेदे न पत्वम् न०त०। १अमोचिते अनिर्णिक्ते "अमृक्तेन रुशता वाससा" भ० ऋ० ६,६६,५ लोके तु अमृष्टः। तत्रार्थे धातूनामनेकार्थत्वात् २अहिंसिते। "रथोवाजा अमृक्तसो अस्कृधः" ऋ०७,३७,१। "अमृक्तः अहिंसितः" भा०।

अमृणाल न० साङ्गे न०त०। मृणालसङ्गे वीरणमूले।

अमृत त्रि० न मृतः। १मरणशून्ये जीविते "अमृते जारजः कृष्णः" अमरः "अपाम सोमममृता अभूम" इति श्रुतिः मरणाभाव "आभूतसंप्लवस्थानमस्मृतत्वं हि भाष्यते इति" विष्णु पु० उक्तम् महाकल्पावस्थायित्वं, देवानामपि तथैवामृतत्वम् "कार्य्यात्यये तदध्यक्षेण सहातः परमात्मनात्" शा०सू० कार्य्यब्रह्मणा सह सर्व्वेषां लयाभिधानात्। न मृतं मरणं यस्मात्। २पीयूषे तत्सेवने हि अमृतत्वं भारतादौ प्रसिद्धम्। तच्च प्रथमं पृथूपदिष्टै र्देवैरिन्द्रं वत्सं कृत्वा गोरूपधरायाः पृथ्वा दुग्धम् पश्चाच्च दुर्वासःशापात् समुद्रमध्यं गतम् ततो देवासुरैः समुद्रे मथिते पुनरुत्पन्नमिति पौराणिकी कथानुसन्धेया "देवाहरैरमृतमस्मृनिधिर्मथ्यमाने" किरा० न वै देवा अश्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति" छा०उ०। "अमृतदीधितिरेष विदर्भजे। भजसि तापमनुष्यकिमंशुभिः। यदि भवन्ति मृताः सखि! चन्द्रिकाः इति" नैषधम्। ३ जले तस्य प्राणहेतुत्वात् अमृतत्वम्। "अन्नमयं हि सौम्य! मन आपोमयः प्राणः" इत्युपक्रम्य षोढ़शकलः सौम्य! पुरुषः पञ्चदशाहानि माषोः काममपः पिबापोमयः प्राणो न पिबतो विच्छेत्स्यते" छा०उ०। जलपानाभावे प्राणविच्छेदोक्तेः तत्पाने च प्राणदृद्धेः जलस्य मरणाहेतुत्वम्। "अमृतोपस्तरणमसि स्वाहा" "अमृतापिधानमसि स्वाहेति" आपोशनमन्त्रः। ४ घृते तस्य, "आयुर्वै घृत" मित्युक्तेरायुर्जनकत्वात् मरणाहेतुत्वात्तथात्वम्। "अमृतं नाम यत् सन्तोमन्थजिह्वेषु जुह्वति। शोभैव मन्दरक्षुब्धक्षुभितास्मोधिवर्णना" माघः। ५पारदे तस्य च रसायनादिना पाने "अभ्रकस्तव बीजन्तु मम बीजन्तु पारदः अनयोर्मेलनं देवि! मृत्युदारिद्र्यनाशनम्" इत्युक्तेः बहुकालजीवनहेतुत्वात् तथात्वम् रसेश्वरदर्शने विवरणम्। ६वस्तुभिदे द्रव्ये "यज्ञशेषोऽमृतं स्मृत" मित्युक्तेस्तथात्वम्। ७ अयाचिते वस्तुनि "मृतं स्याद्ययाचितं भैक्ष्यममृतं स्याद्दयाचितम्" मनूक्तेश्च मरणरूपापमानहेतुयाचनशून्यत्वात् तथात्वम्। "ऋताऽमृताभ्यां जीवेत" मनुः। ८दुग्धे तस्य देहधारकत्वेन मरणाहेतुत्वात् तथात्वम्। ९अन्ने "अन्नमूलं हि जीवन" मित्युक्तेस्तथात्वम्। न म्रियते क्षीयते। १०स्वर्गे।

"अग्नौ सुवर्णमक्षीणमिति" या० उक्तेरस्य वह्नौ बहुतापनेऽपि अक्षीणत्वात्तथात्वम् अतएव तस्य तैजसत्वं "स्वर्णं तैजसमत्यन्तानलसन्तापेऽपि अनाश्यत्वादित्यनुमानेन" सि०सु०साधितम् । एतदभिप्रायेणैव "अमृतं वै हिरण्यमित्युक्तम्" शत०ब्रा० । ११भक्षणीयद्रव्यमाले, तस्याश्चक्षुष्यत्वात् १२स्वादुद्रव्ये अमृततुल्यस्वादवत्त्वात् । १३ तत्साधने द्रव्ये त्रि० "आदित्यो वै देवमधु" इत्यादि मधुविद्यायाम् 'ता एवास्यैतामधुनाड्यः" छा०उ०पञ्चत्वेन पाठः । १४हृद्ये अमृतवदाह्लादकत्वात् तथात्वम् १५ विषे १६ वत्सनाभे विषे तयोः वैद्यकोक्तदिशा शोधने अमरणहेतुत्वात्तथा । अतएव "विषमप्यमृतं क्वचिद्भवेदिति" रघुः १७मोक्षे "विद्ययामृतमश्नुते" इति श्रुतिः क्षयशून्यत्वात्तथा "अमृतत्वस्य नेशेऽरिति" श्रुतिः "स श्रिये चामृताय च" अमरः । १८ अमृततुल्ये आनन्दकरत्वात्तथा । "अमृतं बालभाषितमिति" हितो० । "आप्यायितोऽसौ वचनामृतेन उद्भटः" । अमृतमस्यास्य स्वामित्वेन मत्वर्थे वा अर्श०अच् । १९ धन्वन्तरौ सहि समुद्रमथनसमये अमृतं बिभ्रदुत्थितः इति पुराणे प्रसिद्धम् । २० देवे तद्भक्षत्वेन तथात्वम् । देवानाञ्चामृतदर्शनेनैव तृप्तत्वम् "न वै देवा अश्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्तीति" छा०उ०उक्तेः "रथेनामृतं मर्त्यश्च" य०२३,४० अमृतं देवादिकमिति" वे०दी० । न म्रियते यत् कर्त्तरि क्त । २१वाराहीकन्देऽ तस्य वल्लूक्षेदनेऽपि पुनःप्ररूढत्वात्तथा २२ वनसङ्गे च तस्य ओषधितया फलपाकान्तेऽपि छिन्नप्ररूढत्वात्तथात्वम् । २३ गुडूच्याम् । २४ इन्द्रवारुण्यां २५ ज्योतिष्मत्याम् २६ गोरक्षदुग्धायाम् २७ अतिविषायां २८ रक्तविल्वे २९ दूर्व्वायाम् ३०आमलक्यां ३१ हरीतक्यां ३२ तुलस्यां ३३ पिप्पल्यां ३४ स्थूलमांसहरीतक्याञ्च स्त्री । एतासां यथावद्यं रोगनिवारकत्वेन तथात्वम् । अमृतेन सहोत्पन्नत्वात् अमृततुल्यास्वादवत्त्वाच्च ३५ सुरायां स्त्री । ३६सूर्य्यरश्मिभेदे स्त्री "तासां शतानि चत्वारि रश्मीनां दृष्टिसर्ज्जने । शतत्रयं हिमोत्सर्गे तावद्भर्क्षस्य सर्ज्जने । आनन्दाय हि मेधाय भूतनाः पूतना इति । चतुःशतं दृष्टिवाहाः सर्व्वासां अमृता स्त्रियः" मल्लि० यादवः । तासाञ्चामृतस्य जलस्य दायित्वात्तथा । "सौरीभिरिव नाडीभिरमृताख्याभिरन्वयः" रघुः । ३७मरणधर्म्मरहिते विष्णौ पु० "अमृतः शाश्वतः स्थाणुः" वि० स० । नास्ति मृतं मरणं यस्मात् । ३८ अजरमरत्वप्रदे त्रि० । "इन्द्रियस्येन्द्रियमिदं पयोऽमृतं मधु" यजु० १९,७२,७३,७४,७५ । "अमृतमजरामृत्युप्रदत्वात् आनन्दकरम् अमृततुल्यम् वे०दी० "नन्दा भौमार्कयोर्भद्रा शुक्रेन्दोश्च जया बुधे । शुभयोगा गुरौ रिक्ता पूर्णा मन्देऽमृताह्वया । "आदित्यभौमयोर्नन्दा भद्रा शुक्रशशाङ्कयोः जया तु स्याद् गुरौ रिक्ता पूर्णाकें चामृता शुभेति" इति ज्योतिषोक्ते ३९ तिथिवारयोगरूपे योगभेदे "ध्रुवगुरुकरमूला पौष्णभान्यर्कगारे हरियुगविधिवह्नि फल्गुनीभाद्रयुग्मे । दिवसकरतुरङ्गौ गर्वरीनाथवारे । गुरुयुगनलवातोपान्त्यपौष्णानि कौजे । दहनविधिशताख्यामैत्रभं सौम्यवारे । मरुददितिभपुष्या मैत्रभं जीववारे । भगयुगजयुगश्वोविष्णुमैत्रे सिताहे । वसनकमलयोनी सौरिवारेऽमृतानि" राज मा० उक्ते आदित्यहस्ता गुरुपुष्ययुक्ता बुधानुराधा शनिरोहिणी च । सोमे च विष्णुः कुजरेवती च शुक्राश्विनी चामृतयोगवर्गाः । उक्ते च ४० वारनक्षत्रयोगजे योगभेदे "यदि विदित्यतीपातौ दिनंवाप्यशुभं भवेत् । हन्यतेऽमृतयोगेन भास्करेण तमो यथा" ज्योति० । ४१ब्रह्मणि न० ।

अमृतगति स्त्री यदि दग्धं गुरु विद्धितं विश्लिष्टमितं शुक्र विद्धितम् । अमृतगतिः फणिकथिता दलयतिका रूप ! कथिता" इत्युक्तलक्षण छन्दोभेदे ।

अमृतगर्भ पु० अमृतं ब्रह्म गर्भेऽभ्यन्तरे यस्य । १ जीवे तस्य ब्रह्मात्मकत्वात् ब्रह्मणा चान्तर्यामितया तदन्तःस्थितत्वात् तथात्वम् । "यो न जीवोऽसि न मृतो देवानाममृतगर्भोऽसि स्वप्न" अथ० ६,४६,१ "स्वप्नेन स्वेन तदा सम्पन्नो भवतीति" श्रुतेः सुषुप्त्यवस्थायां सकलानर्थानवभासनेन तच्छून्यतया जीवस्य ब्रह्मरूपापत्त्या तथात्वम् अधिकं सुषुप्तिशब्दे द्रष्टव्यम् अमृतस्य मोक्षस्य गर्भ आधारः ।२ब्रह्मणि

अमृतजटा स्त्री अमृतमिव स्वादु जटा यस्याः । जटामांसाम्

अमृततत्व न० अमृतस्यामरणस्य भावः त्व । १मोक्षे । "त्यागेनैके अमृतत्वमानशुः" श्रुतिः "कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" क०उ० । "अमृतत्वममरणधर्म्मत्वम् भा० "अहिंसया च भूतानाममृतत्वाय कल्पते" इति मनुः "आभूतसंप्लवस्थानममृतत्वं हि भाष्यते" इति विष्णु०पु० उक्ते २महाकल्पावस्थायित्वे च ।

अमृततरङ्गिणी स्त्री अमृतस्य सुधाया तृषारस्य तरङ्गिणी नदीव । ज्योत्स्नायाम् राज०नि० ।

अमृततिलका स्त्री नगणपयोधरस्थिरा कुसुमविराजितसु-

करा । वसुलघुदीर्घयुगलका भवति सखेऽमृततिलका इत्युक्तलक्षणे दशाक्षरपादके वर्णवृत्तभेदे "त्वरितगतिश्च नजनैरित्युक्तत्वरितगतिलक्षणाक्रान्तत्वात् तस्या एव नामान्तरम्।

अमृतदीधिति पु० अमृतमिवाप्यायिका दीधितिरस्य । चन्द्रे "अमृतदीधितिरेष विदर्भजे भजसि तापमसह्यं" नै० ।

अमृतद्युति पु० अमृतमिवाप्यायिका द्युतिरस्य । चन्द्रे ।

अमृतधारा स्त्री अमृतस्य धारा सन्ततिः । अमृतसन्ततौ । "चरमचरणलयमवसितिरुद्युग्मम् । अखिलमपरसुपरिगतमिति ललितपदयुक्ता तदियममृतधारा" छ०र० उक्तेः १पदचतुष्टयपदके २छन्दोभेदे । उपरिगतम् "सुखपादोऽष्टभिर्वर्णैः परेऽस्यान्नकरालयैः क्रमाद्धा" इत्याद्युक्तलक्षणम् हेत० । २सुधासन्ततौ च । [उपनिषच्छब्दे विवरणम् ।

अमृतनाद पु० उपनिषद्भेदे सा च कृष्णयजुर्वेदान्तर्गता

अमृतनालिका स्त्री अमृतस्य स्वादुरसस्य नालीव । कर्पूरनालिकाभेदे पक्वान्नभेदे शब्दर० ।

अमृतप पु० अमृतं पाति रक्षति अमृतेभ्यः पा-रक्षणे क । १विष्णौ हि अमृतमन्थनसमये असुरैर्हियमाणममृतं मोहिनीरूपं विधाय तान् वञ्चयित्वा देवेभ्योदानात् तत्पालकः इति भागवती कथा । "सोमपोऽमृतपः सोम" इति वि०स० । अमृतं पिबति पा-पाने क । २देवे तद्दर्शनेन हृष्टत्वात्तत्पायित्वम् अमृतशब्दे दृश्यम् । ३ अमृततुल्यमध्वादिपातरि त्रि० । "ध्रुवममृतपनामवाञ्छयासावधरमसुं मधुपस्त्वाजिहीते" माघः ।

अमृतपक्व पु० अमृतस्य हिरण्यस्य पक्वः चयाकारित्वात् । १वह्नौ "अग्नौ सुवर्णमक्षीणम्,' या० उक्तेः सर्व्वदाहकस्यापि वह्नेर्न सुवर्णनाशकत्वमित्यतस्तस्य स्वर्णपक्वत्वम् । "तस्येतावदमृतपक्वौ यावेतावभितोऽग्नी" इति शत०ब्रा० अमृतं स्वर्णमिव पीतौ पक्वावस्य । २स्वर्णवर्णपक्वे ग्रहभेदे "हिरण्यपक्वः शकुनोभुरण्युरमृतं वै हिरण्यमृतपक्वः शकुनः" शत०ब्रा० ।

अमृतफल न० अमृतमिव स्वादु फलम् । (नासपातीति) १ यवनप्रसिद्धे रुचिफले "अमृतफलं लघु हृद्यं सुस्वादु वीर्यकरेद्दोषान् । देशेषु सुहृदानां बहुलं तद्भक्ष्यते लोकैः भा०म० । ई०ब० । २ आमलक्याम् ३ द्राक्षायाञ्च स्त्री ४घटोले ५पारावतवृक्षे च पु० ।

अमृतबन्धु पु० अमृतस्य बन्धुः एकस्थानोत्पत्तिकत्वात् सहोदरः । १ चन्द्रे तस्य अमृतमन्थनसमये समुद्रात् उत्पन्नत्वात् तथात्वम् । "ततः शतसहस्रांशुर्मथ्यमानात्तु सागरात् अमृतात्मा सहोत्पन्नः सोमः शीतांशुरुच्यते" इति भा०आ० प०। अमृतस्य बन्धुरिव यादृकत्वात् । २ देवमात्रे "तं देवा अन्वजानन्न भ्रा अमृतबन्धवः" ऋ० १०,७२,५, ।

अमृतभल्लातकी स्त्री "सुपक्वभल्लातफलानि सम्यक् हित्वा त्विदा खांडकसम्मितानि । विपाच्य तोयेन चतुर्गुणेन चतुर्थशेषेण्यनीय तेन ॥ पुनः पचेत् क्षीरचतुर्गुणेन धृतांशयुक्तेन घनं यथा स्यात् । सितोपलाः षोडशभिः पलैस्तु विमिश्र्य संस्थाप्य दिनानि सप्त ॥ ततः प्रयोज्याग्निबलेन मात्रां जयेद् गुदोत्थानखिलान् विकारान् । कचान् सुनीलान् घनकुञ्चिताग्रान् सुवर्णदृष्टिं सुकुमारतान्च ॥ जवं हयानान्च मतङ्गजं बलं, स्वरं मयूरस्य शुतादृदीप्तिम् । स्त्रीषङ्गशक्तिं लभते प्रजाश्च नीरोगभद्रद्विशतानि चायुः ॥ न चान्नपाने परिहार्यमस्ति न चातपे चाध्वनि मैथुने च । प्रयोगकाले सकलामयानां राजा ह्ययं सर्व्वरसायनानाम् ॥ भल्लताकी शुद्धिरिह प्रागिष्टा चूर्णगुडनात् । धृताच्चतुर्गुणं क्षीरं हृतस्य प्रस्थं दृश्यते" चक्रदत्तोक्ते धृतभेदे ।

अमृतभुज् पु० अमृतं भुङ्क्ते हृदा भोगतृप्त्यं हृद्भिमन्यते भुज-क्विप् हेत० । देवे "न वै देवा अश्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्तीति" शा०उ० उक्तेः दर्शनमात्रेण भोजनतृप्तिमत्त्वात्तथात्वम् । अमृतमुत्पादितं यज्ञशिष्टान्नं वा भुङ्क्ते । २ यज्ञशिष्टान्नभोक्तरि ३ उत्पादितान्नभोक्तरि च त्रि० ।

अमृतयोग पु० अमृताख्योयोगः । ज्योतिषोक्ते । तिथिवारादियोगभेदे स चामृतशब्दे उक्तः ।

अमृतरस पु० अमृतं रस इव आस्वाद्यम् । १ अमृतरूपे आस्वाद्ये "विज्ञानेन विमर्दनेऽमृतरसप्रस्यन्दमाध्वीकभूः" कुमा० । अमृतस्य रसः सारः । २सुधारसे "सिक्ता इवामृतरसेन सुहृज्जनानाम्" माघः । अमृतं मोक्षः रस इव यस्य । ३ परमात्मनि "स एष वैश्ववनोऽमृतरस इति" श्रुतिः अमृतस्येव रस आस्वादोऽस्याः । ४ कपिलाद्राक्षायां (अन्दरसा) प्रसिद्धे ५ पक्वान्नभेदे च स्त्री । सा च "तृतीयभागखण्डेन मिश्रितं घनपिष्टकम् । शुभ्रमीषद्घृतयुतं मर्दयेद्दृढपाणिना । एवं संसाधितं कृत्वा स्थापयेद्भाजनोदितम् । ततोऽन्यस्मिन्दिने तु चिरितं निस्त्वचैर्न्निर्द्दैः विधाय पूपकं तेन तस्मिंकायां हृते पचेत् । ततोऽमृतरसा जाता वातशुद्धबलवर्द्धिनी" इति भा०म० उक्ता ।

अमृतलता स्त्री अमृतेव लता । १ गुडूच्याम् (अमरलता) इति २ ख्यातायां लतायाञ्च ।

अमृतवपुस् अमृतेनाप्यायितं वपुरस्य । १ चन्द्रे स हि कृष्ण-

पत्ने वह्न्यादिभिः कलानामेकैकशः भक्षणेऽपि पुनः यज्ञशिष्टरूपामृतेनाप्यायते। यथोक्तं कालमाधवीये सोमोत्पत्तिवाक्येन "प्रथमां पिबते वह्निर्द्वितीयां पिबते रविः। विश्वे देवास्तृतीयान्तु चतुर्थीं सलिलाधिपः। पञ्चमीं तु वषट्कारः षष्ठीं पिबति वासवः। सप्तमीमृषयोदिव्या अष्टमीमजएकपात्। नवमीं कृष्णपक्षस्य यमः प्राप्नोति वै कलाम्। दशमीं पिबते वायुः पिबत्येकादशीसुमा। द्वादशीं पितरः सर्वे समं प्राप्नन्ति भागशः। त्रयोदशीं धनाध्यक्षः कुबेरः पिबते कलाम्। चतुर्दशीं पशुपतिः पञ्चदशीं प्रजापतिः। निश्योतञ्च कलाशेषश्चन्द्रमा न प्रकाशते। कला षोड़शिकाया तु सा त्वपो विशते तदा। अमावां तु सदा सोम ओषधीः प्रतिपद्यते। तमोषधिगतं गावः पिबन्त्यृगतञ्च यत्। तत्क्षीरममृतं भूत्वा मन्त्रभूतं द्विजातिभिः। हुतमग्निषु यज्ञेषु पुनराप्यायते शशी। दिने दिने कलाद्वृद्धिः पौर्णमासीं तु पूर्णता" इति। यद्यपि ज्योतिषे कृष्णपक्षे सूर्यमण्डले प्रवेश एव उक्तस्तथापि तत्तद्दिवसे चन्द्रकलाभक्षणवत् वह्न्यादीनां तत्प्रीतिरूपेतत्परत्वं सोमोत्पत्तिवाक्यस्य देवानाम् अन्नादीनामिव भोजनस्यासिद्धेः तत्प्रीमात्राधायकत्वेन तद्बोध्यत्वम् "न वै देवा अन्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति" श्रा० उ० उक्तोऽर्थोऽवगम्यते इत्यविरोधः। अनश्वरस्वरूपे विष्णोः "अमृतांशोऽमृतवपुः" विष्णुस०।

अमृतवल्ली स्त्री० अमृता वल्ली। गुडूच्याम् (गुलञ्च)।

अमृतवाक् त्रि० अमृतमिव वाक्यो वचनं यस्य। १अमृततुल्य वचने "अमृतवाक्या वयसां सा त्रिप्रश्नेन जनयति" शत० ब्रा०

अमृतसंभवा स्त्री० अमृतेन सम्भवति सम् भू+अच्। गुडूच्याम् (गुलञ्च)।

अमृतसंस्राव न० अमृतमिव स्वादु संस्रावम्। पक्वान्नभेदे। "पचेत् ततोत्तमे तप्ते न्यसेत् पक्वं नवे घटे। ततो मरिचचूर्णेन खण्डचूर्णावचूर्णितम्। कुर्यात् कर्पूरसंयुक्तं संस्राव ममृतोपमम्। संस्रावममृतस्वादु पित्तघ्नं मधुरं स्मृतमिति भा० प्र०।

अमृतसार पु० अमृतस्य दुग्धस्य सारः। इते। चक्रदत्तोक्ते अयःपाकभेदे यथा "लोहस्य पाकमधुना नागार्जुनमिष्टमधिदध्नः॥ लोहारकूटताम्रजकटाहे दृढमृण्मये प्रणम्य शिवम्। तदयः पचेदचपलः काष्ठेन्धनेन वह्निना मृदुना॥ निक्षिप्य त्रिफलाजलदृढितं यत्तत् धृतञ्च दुग्धञ्च। संचाल्य लोहमय्या दर्व्या लग्नं समुत्पाद्य। मृदुमध्यखरभावैः पाकस्त्रिविधोऽत्र वक्ष्यते पुंसाम्। पित्तसमीरणरक्तैर्मृदुप्रकृतीनां मध्यमस्य समः॥ अथ कृदर्विलोहं सुखदुःखस्खलनयोगि मृदु मध्यम्। उज्झितदर्वि खरं परिभाषन्ते कोचिदाचार्याः॥ अन्ये विहीनदर्वीप्रलेपमाखुकराकृतिं ब्रुवते। मृदुमध्यमर्द्धचूर्णं सिक्ताप्रक्षोपमन्तु खरम्॥ त्रिविधोऽपि पाक ईडक् सर्वेषां गुणकृदेव न तु विफलः। प्रकृतिविशेषे त्वल्पो गुणदोषौ जनयतीत्यल्पम्॥ वित्ताय पाकमेवं रागवतार्थे चितौ क्षणान् कियतः। विश्राम्य तत्र लोहे त्रिफलादेः प्रक्षिपेच्चूर्णम्॥ यदि कर्पूरप्राप्तिर्भवति ततो विगलिते यदुच्यते। चुर्णीकृतमनुरूपं क्षिपेच्च वा न यदि तज्ज्ञः॥ पक्वं तदग्रसारं सुचिरधृतस्थित्यविरुद्धत्वे। गोदोहनादिभाण्डे लौहभाण्डाभावे सति स्याच्यम्। यदि तु परिप्लुतिहेतोर्घृतमौक्तेताधिकं ततोऽन्यस्मिन्। भाण्डे निधाय रक्षेद्वाप्युपयोगो ह्यनेन महान्॥ अवशि विरूक्षीभूते स्नेहस्निग्धतेन सम्पाद्यः। एतत्ततो गुणोत्तरमित्यसुना स्नेहनीयं तत्॥ अत्यन्तकफप्रकृतेर्भक्षमयसोऽसुनैव शंसन्ति। केवलमपीदमथितं जनयत्ययसो गुणान् कियतः॥ अमृतसारः" चक्र० द०।

अमृतसारज पु० अमृतादिव स्वादोः सारात् जायते जन+ड ५त०। १गुड़े रा०नि०।

अमृतसू अमृतं दीधितिरूपमाप्ययनं सूते सू+क्विप्। चन्द्रे। अमृतान् देवान् सूते। देवमातरि स्त्री।

अमृतसोदर अमृतस्य सोदर एकत उत्पन्नत्वात्। उच्चैःश्रवसि अश्व। तस्यामृतमथने समुद्रादुत्पन्नत्वात् तथात्वम्। सुरा देवी समुत्पन्ना तुरगः पाण्डरस्तथा" भा० आ० प०। तज्जातीयत्वात् घोटकमात्रे राजनि०।

अमृतस्रवा स्त्री० अमृतमिव स्रवति स्रु+पचाद्यच्। १ रुदन्तीलतायाम्। भावे अप् ईत०। २ अमृतनिष्यन्दे पु०।

अमृतांशु पु० अमृतमिवाप्यायकः अंशुरस्य। चन्द्रे।

अमृतांशूद्भव पु० अमृतांशोश्चन्द्रस्योद्भवो यस्मात्। विष्णौ "अमृतांशूद्भवो भानुः" वि०स०। ५त० चन्द्रोद्भवे त्रि०।

अमृतान्वस् पु० अमृतमन्धोऽन्नमिव दर्शनात् तृप्तिकरमस्य। अमृताशने देवे तेषाममृताशनस्य दर्शनमात्रेण "न वै देवा अन्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति" श्रुतेः। तेषां तत्पानकथा "ततस्तदमृतं देवो विष्णुरादाय वीर्यवान्। जहार दानवेन्द्रेभ्यो नरेण सहितः प्रभुः। ततो देवगणाः सर्वे पपुस्तदमृतं समम्" भा० आ० प०।

अमृताफल न० अमृतायाः फलम्। पटोले द्रव्याभि०।

अमृतायमान त्रि० अमृतमिवाचरति अमृत+क्यङ् शानच्।

अमृतत्वे "उच्छिष्ट वह्नेत्वमृतायमानम् वचोनिशम्येति" रघुः ।

अमृताश पु० अमृतममरणं क्षयाभावमश्नुते अश-व्याप्तौ अण् । विष्णौ "१अमृताशोऽमृतवपुः" विष्णु० स० अमृतं सुधामश्नाति अश-भोजने अण् । २देवे । [स्त्रियां ङीप् विवरणम्

अमृताशन पु० अमृतमश्नाति अश-भोजने ल्यु । देवे अमृता

अमृताश्म त्रि० न म्रियते मृ-तन् न० त० जौत नित्यः कर्म्म० टच् समा० । प्रस्तरभेदे जीविप्रस्तरखण्डभेदे ।

अमृताष्टक पु० अमृताप्रभृतीनामष्टकं यत्र । गूडूचीन्द्रयवारिष्टपटोलं कटुका तथा नागरं चन्दनं मुस्तं पिप्पलीचूर्णसंयुतम् "अमृताष्टक इत्येष पित्तश्लेष्मज्वरापहः" चक्रदत्तोक्ते कषायभेदे ।

अमृतासङ्ग न० अमृतस्य विषस्येवासङ्गो यत्र । नीलवर्णे तुल्यभेदे हेम० तस्य विषतुल्यनीलवर्णत्वात् तथात्वम् ।

अमृतासु त्रि० अमृता अनश्वरा असवो यस्य । अनश्वरप्राणे बहुकालजीविनि । "आबभूवामृतासुर्वर्धमानः सुजन्मा" "उतामृतासुर्व्रतएमि" इति च ऋग० ५,१,१,७ ।

अमृताहरण पु० अमृतमाहरति मातृदासनिवारणार्थं स्वर्गात् भूलोकं नयति आ+हृ-ल्युट् । गरुड़े तत्कथा भा० आदि प० ३३ अ० । "तान् हत्वा पतगश्रेष्ठः सर्व्वानुत्क्रान्तजीवितान् । अतिक्रान्तोऽमृतस्यार्थे सर्व्वतोऽग्निमपश्यत ॥ आदत्तवानं महाज्वालसर्चिभिः सर्वतोऽम्बरे । दहन्तमिव तीक्ष्णांशुं चण्डवायुसमीरितम् ॥ ततो नवत्वा नवतीर्मुखानां हत्वा महात्मा गरुड़स्तरस्वी । नदीः समापीय सुखैस्ततस्तैः सुवीर्यवागम्य पुनर्ज्जवेन ॥ ज्वलन्तमग्निं तमभित्रतापनः समास्तरत् पत्ररवो नदीभिः । ततः प्रचक्रे वपुरन्यदल्पं प्रवेष्टुकामोऽग्निमभिप्रगाह्य ॥ जाम्बूनदमयो भूत्वा मरीचिनिकरोज्ज्वलः । प्रविवेश बलात् पक्षी वारिवेग इवार्णवम् ॥ स चक्रं क्षुरपर्य्यन्तमपश्यदमृतान्तिके । परिभ्रमन्तमनिशं तीक्ष्णधारमयस्मयम् ॥ ज्वलनार्कप्रभं घोरं छेदनं सोमहारिणाम् । घोररूपं तमत्यर्थं यन्त्रं देवैः सुनिर्मितम् ॥ तस्यान्तरं स ददर्श पर्य्यवर्त्तत खेचरः । आरान्तरेणाभ्यपतत् संक्षिप्याङ्गं जवेन ह ॥ अधश्चक्रस्य चैवात्र दीप्तानलसमद्युती । विद्युज्जिह्वौ महावीर्य्यौ दीप्तास्यौ दीप्तलोचनौ ॥ चतुर्विषौ महाघोरौ नित्यं क्षुधौ तरस्विनौ । रक्षार्थमेवामृतस्य ददर्श भुजगोत्तमौ ॥ सदा संरक्तनयनौ सदा चानिमिषेक्षणौ । तयोरेकोऽपि यं पश्येत् स तूर्णं भस्मसाद्भवेत् ॥ तयोश्चक्षुर्भि रजसा सुपर्णः सहसाऽऽक्षिपत् । ताभ्यामदृष्टरूपोऽसौ सर्वतः समताडयत् ॥ तयोरङ्गे समाक्रम्य वैनतेयोऽन्तरीक्षगः । अच्छिनत्तरसा मध्ये सोमसम्भवत्रवत्ततः ॥ ससृत्पाद्यामृतं तत्र वैनतेयस्ततो बली । उत्पपात जवेनैव यन्त्रसम्भव वीर्य्यवान् ॥ अपीत्वैवामृतं पक्षी परिक्षुब्धाशु निःसृतः । अगच्छदपरिश्रान्त आवार्य्यार्कप्रभां ततः" ॥ हत्व । अमृताहर्त्ता तत्रैव । "काश्यपेयोऽमृताहर्त्ता" ध्वजपूजामन्त्रः ।

अमृताङ्क न० अमृतमाङ्क्यते स्वाद्यते तुल्यस्वादफलेन आ+ङ्के-क (आराकानदेश) जाते बहुविस्वाकृतौ (नासपाति) नामके रुचिफले वृक्षे । अमृतफलशब्दे विवरणम् ।

अमृतेशय पु० अमृते जले शेते शी-अच् अलुक् स० । विष्णौ तस्य प्रलये जलशायित्वात् तथात्वम् ।

अमृतोत्पन्न न० अमृतं विषमिव उत्पन्नम् नीलवर्णत्वात् । खर्परीतुल्ये राजनि० । [५त० । मक्षिकायां राजनि० ।

अमृतोत्पन्ना स्त्री अमृतमिव स्वादु मधु उत्पन्नं यस्याः

अमृतोद्भव न० अमृतं विषमिव नीलवर्णतया उद्भवति उद्+भू-अच् । खर्परीतुल्ये (वृक्षे) तुल्यभेदे । अमृतं मृत्युञ्जयं शिवस्तद्भवते प्राप्नोति स्वसाध्यार्चनावत्त्वात् । बिल्ववृक्षे । 'अमृतोद्भवः श्रीवृक्षः शङ्करस्य सदा प्रियः" तद्दानमन्त्रः ।

अमृत्यु पु० अभावे न० । १ मृत्युविगमे । नास्ति मृत्युर्यस्मात् । २मृत्युहेतुभिन्ने त्रि० । "स्वभानवे स्वर्भानवे अवोऽमृत्यु धुक्षत" ऋ० ६, ४८,१२ "अमृत्यु अमरणहेतुं अवोऽन्नम्" भा० । मृत्युर्विनाशो नास्यस्य । ३ विनाशशून्ये विष्णौ "अमृत्युः सर्व्वदृक् सिंहः" विष्णुसहस्रनाम ।

अमृध्र त्रि० मृधु उन्दने वा० रक् न० त० । क्लेदाद्यक्लिन्ने । 'दृषुं मिहोनपातममृध्रम्" ऋ० १,३७,११, "अमृध्रं क्लेदाक्लिन्नम्" भा० । [अतिस्रक्षैव पुरुषोऽमृधा" यत० ब्रा० ।

अमृषा अव्य० न० त० । मिथ्याभिन्ने सत्ये । "यथा दृष्टो वन

अमेधस् त्रि० नास्ति मेधा धारणावती बुद्धिर्यस्य अस्तिच् समा० । श्रवणमात्रेण विस्मारिणि धारणाशून्यबुद्धिमति मूर्खे ।

अमेध्य त्रि० न मेध्यम् पवित्रम् विरोधे न० त० । अपवित्रे । "अमेध्यादपि काञ्चनम्" "नामेध्यं प्रक्षिपेदग्नौ" इति "अमेध्यप्रभवानि च" इति च मनुः । २ पुरीषे न० ।

अमेनि त्रि० मि-नि-न० त० । परिच्छेदाभावे । "मेन्या मेनिरसमेनयस्ते सन्तु मेऽक्षानभ्यधारयन्" अथ० ५,६,६ ।

अमेय त्रि० न मेयः । १ परिच्छेत्तुमशक्ये २ ज्ञातुमशक्ये च "अमेयो मितलोकस्त्वमनर्थः प्रार्थनावहः" रघुः ३ "इयाकपिरमेयात्मा" विष्णुस० ।

अमोघ त्रि० मोघो निष्फलः न० त० । १ सफले, २ अव्यर्थे च ।

"अमोघास्तु पतन्त्येषु धर्म्मपोतेन सन्तर" भा० शा० ५०। "यदमोघमपामन्तरग्नं बीजमज ! त्वया कुमा० धनुष्यमोघं समधत्त सायकम्" "अमोघाः प्रतिसङ्क्रान्तावर्घानुपदमार्पिषम्" इति च रघुः। २नदभेदे पु०। ४ पटोलतायां, हरितक्यां ५ विड्भेदे च स्त्री। ६विष्णौ पु० "अमोघः पुण्डरीकाक्षः" विष्णुस० "सत्यकामः सत्यसङ्कल्प" इति श्रुतेः अवितथसङ्कल्पत्वात्तस्य तथात्वम्।

अमोत न० अमा सह जतस् ब्ये-क्त। अच्छिन्नदशवस्त्रयुग्मे "अमोतं वासो दद्याद्धिरण्यमपि दक्षिणाम्" अथ० ९,५,१४

अम्ब गतौ भ्वादि० पर०सक० सेट्। अम्बति आम्बीत् आनम्ब अम्बा अम्बालिका अम्बिका अयमिदित् शब्दे इत्येके।

अम्बक न० अम्बति शीघ्रं नक्षत्रस्थानपर्य्यन्तं गच्छति अम्ब-ण्वुल्। १नेत्रे। अम्ब्यते स्नेहेनोपगम्यते घञ् स्वार्थे क। २ पितरि।

अम्बर न० अबि-शब्दे घञ् अम्बः शब्दस्तं राति धत्ते रा-क दैत०। १शब्दाश्रये आकाशे २मर्म्मरशब्दयुक्ते वस्त्रे, स्वनाम ख्याते ३गन्धद्रव्ये ४अभ्रकधातौ च। "अङ्गुणाकरायाङ्गुल्या तावतर्जयताम्बरे" इति रघुः "धौतदुकूलवल्कलधवलाम्बर इति काद० "आकाशसाम्यं दधुरम्बराणि" माघः संविव्युरम्बरविकाशि चमूसमूहम्" माघः। २अन्तिके निरु०।

अम्ब(रि)रीष पु०न० अम्ब्यते पच्यतेऽत्र अम्ब-अरिष नि० वा दीर्घः। (भाजनाखोला) इति ख्याते भर्जनपात्रे। अम्बरीषमपि। "वैश्यकुलाम्बरीषमहानसाद्वा" कात्या० ४,७,१९,। "अग्निमाहृत्य गार्हपत्यागारे निर्मथ्याभ्यादधीतेति शेषः वैश्यकुलाद्व लौकिकोऽग्निर्हुतोच्छिष्टो वा याह्यः न तु परिस्तीर्त आवसथ्यादिः। अथवा अम्बरीषात् भ्राष्ट्रात् कन्दुकटाहात् महानसाद्वेति कर्क०। दीर्घोक्तस्तु २ विष्णौ, ३ शिवे, ४ भास्करे ५ बालके आम्रातकवृक्षे, ७ नरकभेदे, ८ अनुतापे। ९ सूर्य्यवंशनृपभेदे पु० स च। "भगीरथसुतो राजा श्रुत इत्यभिविश्रुतः। नाभागस्तु श्रुतस्यासीत् पुत्रः परमधार्मिकः। अम्बरीषस्तु नाभागिः सिन्धुद्वीपपिताऽभवत्" इति हरिवंशोक्तः सूर्य्यवंशभगीरथपौत्रः "अम्बरीष ! शुकप्रोक्तं नित्यं भागवतं शृणु। परा० उ०। "भगवान् अम्बरीषश्च ब्राह्मण्यानमितौजसौ भा० आनु०प०। "पुण्यश्लोकोऽम्बरीषश्च पुण्यश्लोको युधिष्ठिरः" इति प्रातःस्मरणीयवेषु पुरा०।

अम्बरीषम् पु० अम्बरमीषो यस्य। देवेषु तेषां मेरुस्थितत्वेऽपि मेरोः सर्व्वतः उच्चत्वादग्रादाद्यमेवयाम्बरवासित्वम्। तेन आकाशस्य धारणात्तथात्वेऽपि न क्षतिः। "विलिप्यते मौलिभिरम्बरौकसाम्" कुमा०।

अम्बर आभरणे कण्ड्वा०। अम्बर्य्यति।

अम्बष्ठ पु० अम्बाय चिकित्सकब्राह्मणाय तत्ख्यापनार्थं तिष्ठतेऽभिप्रैति स्था-क षत्वम्। चिकित्सके "विप्रात् वैश्यकन्यायां जाते १सङ्कीर्णवर्णे, "ब्राह्मणाद्वैश्यकन्यायामम्बष्ठोनाम जायते मनुः "सजातिजानन्तरजाः षट्सुता द्विजधर्मिणः" इति मनूक्तेः "द्विजातीनां समानजातीयासु जाताः तथाऽनुलोम्येनोत्पन्नाः ब्राह्मणेन क्षत्रियावैश्ययोः, क्षत्रियेण वैश्यायामेवं षट् पुत्रा द्विज धर्म्मिणः उपनेयाः तानन्तरजनाम्ना इति यदुक्तं तत् तज्जातिव्यपदेशार्थं न संस्कारार्थमिति कस्यचिद्भ्रमः स्यात् अत एषां द्विजातिसंस्कारार्थवचनमिति" कुल्लू० उक्तेश्च अम्बष्ठादीनामुपनयनसंस्कारसत्त्वेऽपि इदानीन्तनानां संस्कारलोपेन शूद्रत्वम् अतएव इदानीं क्षत्रियादीनां शूद्रत्वमेवमम्बष्ठादीनामपि" इति रघु० ये तु ब्राह्मदोषप्रायश्चित्तमाचरन्ति तेषामुपनयनयोग्यता भवत्येव "येषां पित्रादयोऽप्युपनीतास्तेषामापत्सम्भवेऽपि "यस्य पिता पितामहावप्युपनीतौ स्यातान्तस्य संवत्सरं त्रैविद्यकम्, ब्रह्मचर्य्यं यस्य प्रपितामहादीनां नानुष्ठीयते उपनयनन्तस्य द्वादशवार्षिकं त्रैविद्यकम्, ब्रह्मचर्य्यमिति" मिता० उक्तेः। "सूतानामम्बष्ठानां चिकित्सितम्" मनूक्ता तेषां वृत्तिः। २देशभेदे, ३स्त्रिपके च। ४यूथिकायां स्त्री। स्वार्थे कनि ह्रस्वे अत इत्त्वे। अम्बष्ठिकापत्यत्वेव (वामनघाटीति) प्रसिद्धायां ५ब्राह्मीलतायाञ्च।

अम्बष्ठकी स्त्री अम्बष्ठं कायति आदानार्थमाह्वयति कै-क गौरा० ङीष्। १ (पटाखड़ु) इति ख्यातायां लतायां पाठायाम्।

अम्बष्ठा स्त्री अम्ब्यते शब्द्यते अम्बा ताडयी सती तिष्ठति स्था-क अम्बा० षत्वम्। (अम्बाड़ा) इति ख्यातायाम् षष्ठाम्बायाम् (पटांड़ु) इति हिमगिरिप्रसिद्धायां १पाठायाम्। २चाङ्गेर्य्याम्। ३यूथिकायाञ्च। संज्ञायां कन् अत इत्त्वे। अम्बष्ठिका। (वामनघाटी) ४ब्राह्मीलतायाम्।

अम्बा स्त्री अम्ब्यते स्नेहेनोपगम्यते अम्ब-कर्म्मणि घञ्। १मातरि, लोके सम्बोधने तदर्घे ह्रस्वः। "क्षताङ्किलास्त्र यदम्ब ! सत्यात्" रघुः। वेदे तु "अम्बेऽम्बालेऽम्बिके पूर्व्वेति" पा० निर्देशात् न ह्रस्वः। "अम्बे ! अम्बिके

अम्बालिके ! न मानयति कञ्चन य० २३, १८ । नाप्योक्तावपि तत्रैव, २ अम्बालतायां, ३ काशीराजकन्यायाञ्च । "अथाश्रौषं महाबाहो तिस्रः कन्याः स्वयम्वराः । रूपेणाप्रतिमा लोके काशीराजसुतास्तदा । अम्बां चैवाम्बिकां चैव तथैवाम्बालिकामिति । राजानश्च समाहूताः पृथिव्यां भरतर्षभ ! । "अम्बा ज्येष्ठाभवत्तासामम्बिका त्वथ मध्यमा । अम्बालिका च राजेन्द्र ! राजकन्या कनीयसी इत्युपक्रम्य । अम्बाया उपाख्यानं विस्तरेण वर्णितम् भा० उ० प० अम्बोपाख्याने । "मया सौभपतिः पूर्व्वं मनसा हि वृतः पतिः इत्यम्बिकोक्ते "अनुजज्ञे तदा ज्येष्ठामम्बां काशीपतेः सुताम् । अम्बिकाम्बालिके भार्य्ये प्रादात् प्रीत्या यवीयसे । भीष्मो विचित्रवीर्य्याय विधिदृष्टेन कर्मणा" भा० आ० प० ।

अम्बाला स्त्री अम्बेति शब्दं लाति धत्ते ला—क । मातरि ।

अम्बालिका स्त्री अम्बालैव स्वार्थे के ह्रस्वे अत इत्त्वम् । मातरि, १पाण्डुराजमातरि काशीराजकन्यायां विचित्रवीर्य्यस्य भार्य्यायाम् ।

अम्बिका स्त्री अम्बैव कन् । १मातरि २दुर्गायाम् "आशीर्भिरेधयामासुः पुरः । पाकाभिरम्बिकाम्" कुमा० । काशीराजस्य मध्यमकन्यायां विचित्रवीर्य्यस्य भार्य्यायां धृतराष्ट्रस्य २मातरि ।

अम्बिकापति पु० ष० त० । शिवे । [१गणेशे २धृतराष्ट्रे च ।

अम्बि(आ)कीय पु० अम्बिकाया अपत्यम् ढ (ठक्) वा ।

अम्बु न० अबि शब्दे—उण् । १सम्भावधिके चतुर्थस्थाने २(वाला) इति ख्यातायामोषधौ ३ जले "गाङ्गमम्बु सितमम्बु यासुनं कज्जलाभमुभयत्र मज्जतः का० प्र० । "क्षीतेतरामम्बुक्षटा" का० प्र० "विश्वासाय विहङ्गानामालवालाम्बुपायिनाम् । "तौ सरांसि रसवद्भिरम्बुभिः" इति च रघुः । "फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादनम्" मनुः । तच्च जलम् रसतन्मात्रादुत्पन्नो भूतविशेष इति सांख्याः पञ्चीकृतेभ्य एव पञ्चभ्यो भूतेभ्यः स्थूलतया उत्पन्नमिति वेदान्तिनः जलभूतांशबाहुल्यात् जलत्वव्यवहारः "वैशेष्यात्तद्वादः" भा० शब्दात् । तस्य च रूपरसस्पर्शशब्दा विशेषगुणाः "योयोयावतिथश्चैषां स स तावद्गुणः स्मृतः" इति मनुना भूतमध्ये चतुर्थस्य जलस्य चतुर्गुणत्वाभिधानात् "शब्दस्पर्शौ रूपरसौ सलिलस्य गुणा अमी" भा० शा० प० उक्तेश्च "जले कुलकुलध्वनिः । शीतस्पर्शः शुक्लरूपं रसो माधुर्य्यमीरितम्" पञ्चद० । "अग्नेरापः" इति श्रुतेस्तस्याग्निप्रभवत्वम् यथोक्तं "तत्तेज ऐक्षत बहु स्यां प्रजायेयेति तदपोऽसृजत तस्माद्यत्र क्व च शोचति स्वेदते पुरुषस्तेजस एव तदध्यापो जायन्ते" छा० उ० । "तेज इति प्रसिद्धं लोके दग्धृपक्तृप्रकाशकं रोहितरूपेति तत्सृष्टं तेज ऐक्षत । तेजोरूपत्वेन स्थितं सदैक्षतेत्यर्थः । बहु स्यां प्रजायेयेति पूर्ब्ववत्तदपोऽसृजत । आपो द्रवाः स्निग्धाः स्यन्दिन्यः शुक्लाश्चेति प्रसिद्धं लोके । यस्मात्तेजसः कार्य्यभूता आपस्तस्माद्यत्र क्व च देशे काले वा शोचति म्लायते स्वेदते प्रस्विद्यते वा पुरुषस्तेजस एव तदापोऽधिजायन्ते । ता आप ऐक्षन्तेति पूर्ब्ववदेव आकारसंस्थितं सदैक्षतेत्यर्थः भा० । "तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति "सेयं देवतैमास्तिस्रो देवता अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत्" छा० उ० ॥ "सेयं तिस्रो देवता अनुप्रविश्य स्वात्मावस्थे बीजभूते अव्याकृते नामरूपे व्याकरवाणीति तासाञ्च तिसृणां देवतानामेकैकां त्रिवृतं करवाणि एकैकस्याः त्रिवृत्करणे एकैकस्याः प्राधान्यं ह्ययोर्द्वयोर्गुणभावोऽन्यथा हि रज्ज्वा इवैकमेव त्रिवृत्करणं स्यात् न तु तिसृणां पृथक् त्रिवृत्करणमिति । एवं हि तेजोऽबन्नानां पृथङ्नामप्रत्ययलाभः स्यात्तेज ऐक्षत"इमा आपः, अऽद्भिरिति च पृथङ्नामप्रत्ययलाभे देवतानां सम्यग्व्यवहारस्य प्रसिद्धिः प्रयोजनं स्यात् । एवमीक्षित्वा सेयं देवतैमास्तिस्रो देवता अनेनैव यथोक्तेनैव जीवेन सूर्यबिम्बवदन्तः प्रविश्य वैराजं पिण्डं प्रथमं देवतादीनां च पिण्डमनुप्रविश्य यथासङ्कल्पमेव नामरूपे व्याकरोदसौनामायमिदंरूप इति तासाञ्च देवतानां गुणप्रधानभावेन त्रिवृतं त्रिवृतमेकैकामकरोत्कृतवती देवता"भा० । "अद्भिः सोम्य ! शुङ्गेन तेजो मूलमन्विच्छ" छा० उ० "अद्भिः शुङ्गेन तेजो मूलं कार्य्येण कारणम् अन्विच्छ "तेजो वा अद्भ्यो भूयस्त्वा एतद्वायुसप्तदृग्राकाशमभितपति तदाऽर्द्रमिवोचति नितपति वर्षिष्यति वा इति तेज एव तत्पूर्व्वं दर्शयित्वाऽपः सृजते तदेतदूर्द्धाभिश्च तिरश्चीभिश्च विद्युद्भिर्मेघाद्वाचरन्ति तस्मादाऽविद्योतते स्तनयति वर्षिष्यति वा इति तेज एव तत्पूर्व्वं दर्शयित्वाऽपः सृजते तेज उपाख्येति" छा० उ० ॥ "तेजो वाऽद्भ्यो भूयः, तेजसोऽप्कारणत्वात् । कथमप्कारणत्वमित्याह । यस्मादद्योनिस्तेजस्तस्मात्तद्वा एतत्तेजोवायुमाप्त्वाग्रादभ्य स्वात्मना निर्वर्त्तीकृत्य वायुमाकाशमभिव्याप्योक्तपति यदा, तदाऽर्द्रौकिकाः अभिशोचति म्लायति सामान्येन जगन्ति तपति देहानतो वर्षि-

ष्यति वै इति । प्रसिद्धं हि लोके कारणमभ्युद्यतं दृष्टवतः कार्यं भविष्यतीति विज्ञानम् ॥ तेज एव तत्पूर्व्वमात्मानमद्भूतं दर्शयित्वाऽथानन्तरमपः सृजतेऽतोऽप्सृष्ट्वाद्भूयोऽद्भ्यस्तेजः । किञ्चान्यत्तदेतत्तेज एव स्तनयित्नुरूपेण वर्षहेतुर्भवति । कथं जङ्घाभिरोर्द्ध्वगाभिर्विद्युद्भिस्तिरश्चीभिश्च तिर्यग्गताभिश्च महाह्लादाः स्तनयनशब्दाश्चरन्ति । तस्मात्तद्दर्शनादाङ्लौकिका विद्योतते स्तनयति वर्षिष्यति वा इत्याद्युल्काद्यमतस्तेज उपास्येति भा० ।

नैयायिकादयस्तु परमाणुविशेषेभ्य एव तस्योत्पत्तिः । तच्च द्विविधं नित्यमनित्यञ्च नित्यं परमाणुरूपमनित्यं द्व्यणुकादि । प्रकारान्तरेण अनित्यमपि त्रिविधं देहेन्द्रियविषयभेदात् । देहः अयोनिजः वरुणचन्द्रलोकयोः स्वात्मादिप्रसिद्धः इन्द्रियं रसनं शब्दादिषु मध्ये रसमात्रव्यञ्जकत्वात् तस्य जलीयत्वम् । द्व्यणुकादिकमारभ्य द्विपरार्द्धसिन्ध्वपर्य्यन्तं विषयः उपभोग्यत्वात् । सङ्ख्यापरिमितिसंयोगविभागपरत्वापरत्वानोत्पत्तौ वेगः गुरुत्वं रूपं रसःस्नेहश्च जलस्यैते चतुर्द्दशसमान्यविशेषगुणाः यथोक्तं "सङ्ख्यादयोऽष्टौ वेगश्च गुरुत्वञ्च द्रवत्वकम् । रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश । वर्षः शुक्लोरसस्वादुः । जले मधुरशीतलौ । स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम्" । नित्यत्वादि प्रथमवत् किन्तु देहमयोनिजम् इन्द्रियं रसनं सिन्ध्वादिविषयो मतः" भाषा० । एवं स्थूलभूतजलस्य उपाधिभेदेन सुश्रुते गुणदोषादिविवेकाय भेदा दर्शिता यथा "पानीयमान्तरीक्षमनिर्देश्यरसमस्मृतं जीवनं तर्पणं धारणमाश्वासजननं श्रमभ्रमं क्लमपिपासामदमूर्च्छातन्द्रानिद्रादाहप्रशमनमेकान्ततः पथ्यतमञ्च तदेवावनौ पतितमन्यतमं रसगुणभजते स्थानविशेषाच्चदीनदसरस्तडागवापीकूपचुण्टी प्रस्रवणोद्विहिङ्किरकेदारपल्वलादिषु स्थानेष्ववस्थितमिति । तत्र लोहितकपिलपाण्डुपीतनीलशुक्लेष्ववनिप्रदेशेषु मधुराम्ललवणकटुतिक्तकषायाणि यथासङ्ख्यमुदकानि सम्भवन्तीत्येके भाषन्ते तत्तु न सम्यक् तत्र पृथिव्यादीनामन्योन्यानुप्रवेशतः सलिलरसो भवत्युत्कर्षापकर्षभेद तत्र स्वगुणभूयिष्ठायां भूमावम्लं लवणञ्च । अम्बुगुणभूयिष्ठायां मधुरम् । तेजोगुणभूयिष्ठायां कटुकं तिक्तञ्च । वायुगुणभूयिष्ठायां कषायञ्च । आकाशगुणभूयिष्ठायामव्यक्तरसमव्यक्तं ह्याकाशमित्यतस्तत्प्रधानमव्यक्तरसत्वात् तत्पेयमान्तरीक्षाभे । तत्रान्तरीक्षं चतुर्व्विधम् । तद्यथा । धारं कारं तौषारं हैमनिति । तेषां धारं प्रधानं लघुत्वात्तत्पुनर्द्विविधं गाङ्गं सामुद्रं चेति । तत्र गाङ्गमाश्वयुजे मासि प्रायशो वर्षति तयोर्द्वयोरपि परीक्षणं कुर्व्वीत शाल्योदनपिण्डमकुथितमविदग्धं रजतभाजनोपहितं वर्षति देवे वहिष्कुर्व्वीत स यदि मुहूर्त्तं स्थितस्तादृश एव भवति तदा गाङ्गं पततोऽवगन्तव्यं वर्षान्यत्वे सिक्थक्लेदे च सामुद्रमिति विद्यात्तत्तु तदुपादेयम् । सामुद्रमप्याश्वयुजे मासि ग्रहीतं गाङ्गं पुनः प्रधानं तदुपाददीताश्वयुजे मासि, शुचिशुक्लिततपटैकदेशच्युतमथ वा हर्म्यतलपरिभ्रष्टं मन्त्रैर्व्वा शुचिभिर्भाजनैर्गृहीतं सौवर्णे राजते मृण्मये वा पात्रे निदध्यात्तत्सर्व्वकालमुपयुञ्जीत तस्यालाभे भौमम् । तच्चाकाशगुणबहुलं तत्पुनः सप्तविधम् । तद्यथा । कौपं नादेयं सारसं ताड़ागं प्रास्रवणमौद्भिदं चौष्टमिति तत्र वर्षास्वान्तरीक्षमौद्भिदं वा सेवेत महागुणत्वात् शरदि सर्व्वं प्रसन्नत्वात् हेमन्ते सारसं ताड़ागं वा, वसन्ते कौपं प्रास्रवणं वा ग्रीष्मेष्वेवं प्रावृषि चौष्टमनवमनभिष्टं सर्व्वेष्वेति ॥ कीटमूत्रपुरीषास्थवकोधप्रदूषितम् । तृणपर्णोत्करयुतं कलुषं विषसंयुतम् ॥ योऽवगाहेत वर्षासु पिबेद्वापि नवं जलम् । स वाक्प्राभ्यन्तरान् रोगान् प्राप्नुयात्सद्यिमेव तु ॥ तत्र यत् शैवालपङ्कहृष्टतृणपद्मपत्रप्रभृतिभिरवच्छन्नं शशिसूर्य्यकिरणानिलैर्नाभिजुष्टं गन्धवर्णरसोपसृष्टञ्च तद्व्यापन्नमिति विद्यात् ॥ तस्य स्पर्शरूपरसगन्धवीर्य्यविपाकदोषाः षट् सम्भवन्ति । तत्र खरता पैच्छिल्यमौष्ण्यं दन्तपाहिता च स्पर्शदोषाः । पङ्कसिकताशैवालबहुवर्षता रूपदोषाः । व्यक्तरसता रसदोषः । अनिष्टगन्धता गन्धदोषः । यदुपयुक्तं तृष्णागौरवशूलकफप्रसेकानापादयति स वीर्य्यदोषः । यदुपयुक्तं चिराद्विपच्यते विष्टब्नाति वा स विपाकदोष इति । त एते आन्तरीक्षे न सन्ति ॥ व्यापन्नानामग्निक्वथनं सूर्य्यातपप्रतापनं तप्तायःपिण्डसिकताशोषाणां वा निर्व्वापणं प्रसादनञ्च कर्त्तव्यं नागचम्पकोत्पलपाटलापुण्ड्रप्रभृतिभिश्चाधिवासनमिति ॥ सौवर्णे राजते ताम्रे कांस्ये मणिमये तथा । पुण्यावतंसं भौमे वा सुगन्धि सलिलं पिबेत् ॥ व्यापन्नं वर्जयेन्नित्यं तोयं यद्व्याधनार्त्तवम् । दोषसञ्जननं हेतुत्वादुदीरितन्तु तत् ॥ व्यापन्नं सलिलं यस्तु पिबतीहाप्रसादितम् । श्वयथुं पाण्डुरोगञ्च लभते दोषमविपाकताम् ॥ श्वासकासप्रतिश्यायशूलगुल्मोदराणि च । अन्यान्वा विषमान् रोगान् प्राप्नुयात् क्षिप्रमेव च ॥ तत्र सप्त कलुषस्य प्रसादनानि भवन्ति । तद्यथा । कतकगोमेदकविषमन्थिप्रैवालमूलवस्त्राणि शुक्तामणिश्चेति ।

पञ्च निक्षेपणानि भवन्ति । तद्यथा । फलकं त्राटकं सङ्कलय उदकमङ्किका शिक्यञ्चेति ॥ सप्त गीतीकरणानि भवन्ति प्रवातस्थापनसूदकप्रक्षेपणं यष्टिकाभ्रामणं व्यजनं वस्त्रोद्धरणं वालुकाप्रक्षेपणं शिक्यावलम्बनञ्चेति

अम्बुकण पु० ६त० । शीकरे जलविन्दौ स्त्रीत्वेके । [च ।

अम्बुकण्टक पु० अम्बुनः कण्टकमिव । १कुम्भीरे, २मत्स्यघाटके

अम्बुकिरात पु० अम्बुनि किरात इव हिंस्रः । कुम्भीरे ।

अम्बुकीश पु० अम्बुनि कीशः वानर इव । (शुशक) इति ख्याते शिशुमारे जलजन्तुभेदे ।

अम्बुकूर्म्म पु० अम्बुनि कूर्म्म इव । शिशुमारे (शुशक) हेम० ।

अम्बुकेशर पु० अम्बुजातः केशरोऽस्य । कोलङ्कदत्ते रत्नमा० ।

अम्बुचर त्रि० अम्बुनि चरति चर-ट ७त० । जलचरे हंसादौ स्त्रियां ङीप् । [ख्याते गँवाले ।

अम्बुचामर न० अम्बुनि चामरमिव । (सेओवाला) इति

अम्बुचारिन् त्रि० अम्बुनि चरति चर-णिनि ७त० । जलचरे हंसादौ स्त्रियां ङीप् । "लूताहिसरटानाञ्च तिरश्चां चाम्बुचारिणाम्" मनुः ।

अम्बुज न० अम्बुनि जायते जन+ड । १पद्मे २सारसपक्षिणि । ३चन्द्रे ४कर्पूरे ५हिजल इति ख्याते वृक्षे च पु० । ६शङ्खे पु०न० । ७वज्रे च । वज्रस्य जलदप्रभवत्वात्तथात्वम् । "चापं पाशाम्बुजसरसिजान्यङ्कुशं पुष्पबाणमिति"-ऽभुवनेश्वरीध्याने अम्बुजं पद्मं नतु शङ्खमिति तन्त्रसारोक्तेः अस्य शङ्खवाचकतापीति ज्ञायते ।

अम्बुजन्मन् न० अम्बुनो जन्मास्य जन्मोत्तरपदत्वाद्बहुव्रीहिः । १पद्मे २सारसविहङ्गे ३शङ्खे पु० च ।

अम्बुजासना स्त्री अम्बुजमासनम् यस्याः । १लक्ष्म्याम् । २जलोद्भवे त्रि० । [यास् अच् । गँवाले (सेओवाला) ।

अम्बुताल पु० अम्बुनि तालयति प्रतितिष्ठति चु० तल-प्रतिष्ठा-

अम्बुद पु० अम्बु ददाति दा-क । १मेघे, "नवाम्बुदश्यामपुरन्ध्यविच्छत" माघः "नवाम्बुदानीकमुदूर्त्तनाध्वने" "स्तनद्धृतं वह्निमिवाद्रिरम्बुदः" इति च रघुः । २मुस्तके च ।

अम्बुधर पु० अम्बूनि धरति धृ-अच् । १मेघे "शरत्प्रसृष्टाम्बुधरोपरोधः" रघुः "अगनेरस्तस्य चोभयोर्विनश्याम्बुधराद्य योनयः" कुमा० । २मुस्तके च ।

अम्बुधि पु० अम्बूनि धीयन्तेऽत्र धा-आधारे कि । १समुद्रे । "रत्नावलीरम्बुधिरावबन्ध" माघः २उदकाधारे घटादौ अम्बुधिघटः सि०कौ० । ३चतुःसंख्यान्विते च ।

अम्बुधिप्रसवा स्त्री अम्बुधिमिव प्रचुररसं प्रसूते प्र+सू-अच् । १घृतकुमार्य्याम् ।

अम्बुनिधि अम्बूनि निधीयन्तेऽस्मिन् अम्बु+नि+धा-आधारे कि । समुद्रे । "देवासुरैरमृतमम्बुनिधिर्ममन्थे" किरा० । "ये पक्षिणः प्रथममम्बुनिधिं गतास्ते" माघः ।

अम्बुप पु अम्बूनि पाति पिबति वा पा-रक्षणे-पाने वा क । १जलेश्वरे वरुणे "रक्षोऽम्बुपानिलशचीशपुराणि चाष्टौ" सि०शि० । २समुद्रे च ३जलपायिनि त्रि० ।

अम्बुपत्रा स्त्री अम्बूनि पत्रे यस्याः । उड्डटाख्ये । अम्बुयुक्तं पत्रमस्याः गौरा० ङीप् । अम्बुपत्रीत्यपि ।

अम्बुप्रसाद पु० अम्बूनि प्रसादयति प्र+सद-णिच्-अण् उप०स० । कतकवृक्षे (निर्म्मल्ये) ।

अम्बुप्रसादन न० अम्बूनि प्रसादयति प्र+सद+णिच्-ल्यु ६त० । कतकफले "फलं कतकवृक्षस्य यद्यम्बुप्रसादनम्" मनुः । जलप्रसादकारके त्रि० तानि २१०पृष्ठे दृश्यानि ।

अम्बुभृत् पु० अम्बु बिभर्त्ति-भृ-क्विप् ६त० । १मेघे २मुस्तके ३समुद्रे च । ४जलाधारमात्रे त्रि० ।

अम्बुमत् त्रि० अम्बूनि बाहुल्येन सन्त्यस्मिन् । १वल्कटके देशादौ स्त्रियां ङीप् । सा च २नदीभेदे । "ततोऽम्बुमत्या धर्मज्ञ ! सुतीर्थद्वाय्युत्तमम् भा०व०प० ।

अम्बुमातृज पु० अम्बुमातरि अब्जजे जायते जन-ड ७त० । शम्बूके, (शामुक) हेम० । [२मुस्तके च ।

अम्बुमुच् पु० अम्बूनि मुञ्चति मुच-क्विप् ६त० । १मेघे

अम्बुर पु० अम्ब-वा०उरन् । द्वाराधःकाष्ठे (गोबराट) हेम०

अम्बुराशि पु० अम्बूनां राशयो यत्र । समुद्रे । "नैतद्भोमखलमम्बुराशिः" सा०द० "अभूतपूर्व्वां रुचमम्बुराशेः" माघः "शापं दधज्ज्वलनभौर्वमिवाम्बुराशिः" रघुः ।

अम्बुरुह न० अम्बुनि रोहति रुह-क्विप् ७त० १पद्मे "विस्फुरद्भिरम्बुरुहां रजोभिः" माघः । २सारसविहङ्गे च

अम्बुरुह पु० अम्बुनि-रोहति रुह-क ७त० । १पद्मे । "द्रक्ष्यस्यम्बुरुहं दिव्यं गोशृङ्गं नाम पर्वतम्" । "नदीं गोदावरीं चैव प्रसन्नाम्बुरुहां तत" इति च रामा० । अम्बुरुहं पद्ममिव पुष्पमस्याः अर्श०अच् । स्वल्पपद्मिन्यां स्त्री

अम्बुरुहिणी स्त्री अम्बुरुहाणां समूहः सन्निकृष्टदेशोत्पन्नता इनि । १पद्मसमूहे २पद्मलतायाञ्च । [रक्षे च ।

अम्बुरोहिन् न० अम्बुनि रोहति रुह-णिनि । १पद्मे २सा-

अम्बुवाची स्त्री अम्बु तद्वर्षणं वाचयति सूचयति वच-णिच्-अण् उप०स० ङीप् । आर्द्रादिपादस्यरविकालिकभूमौ "आर्द्रादि

विशाखान्तं रविचारेण वर्षति" इत्युक्तेस्तथा वृष्टिसूचकत्वम्। तत्काले हि भूमेरन्तर्गतरजोयोगस्यतत्तत्स्थानस्थत्वम्। यदोक्तम् "रजोयुक्ताम्बुवाची च रौद्राद्यपादगे रवौ" ज्योति०। मिथुनराशिस्थि मृगशिरःशेषार्द्राद्यपादचतुष्क पुनर्वसुपादत्रयात्मकः। तत्र मृगशिरसि भुक्ते यदा आर्द्रायाः प्रथमपादोपभोगार्थं रविर्गच्छति तदा पृथ्वी ऋतुमती भवति तच्च मिथुने ६।१० चत्वारिंशत्कलाधिकषड्भागानतोत्र आर्द्रादिपादावधि यावत्तिष्ठति तावत्। यदोक्तं राजमा०। "रवौ रौद्राद्यपादस्थे भूमेः संजायते रजः" इत्युपक्रम्य। "चत्वारिंशच्छिप्रिक षड्भागयुतोरविर्यदा भवति। तत्राम्बुवाची त्रेया शिवर्क्षपादे स्थितो यावत्। दिग्भागशून्य त्रिप्रोगणितेन भवति रविर्यदा साग्र" इति। तत्र च वर्ज्यानि "न स्वाध्यायं वषट्कारं न देवपितृतर्पणम्॥ फलानां वाहनञ्चैव बीजानां वपनं तथा" राजमा०। "तस्यां पाठोबीजवापोनाम्भोर्दुग्धपानतः" ज्यो०। यदा ऋक्षं समादाय भानोर्मन्त्रवगामिता। पुनस्तत्स्थे समादाय यजनं त्रिदिनं त्यजेत्। काम्यं नैमित्तिकं चैव यात्रां मन्त्रक्रियां तथा। ऋतुमत्यां न कुर्वीत पूर्व्यसङ्ख्यितादृते। न कुर्य्यात् खननं भूमेः सूच्यग्रेणापि शङ्करि!। मत्स्य सू०। "यतिनोव्रतिनश्चैव विधवा च द्विजस्त्रिया। अम्बुवाचीदिने चैव पाकं कृत्वा न भक्षयेत्। स्वपाकं परपाकं वा अम्बुवाचीदिने तथा। भक्ष्यं नैव कर्त्तव्यं चण्डालान्नमयं स्मृतम्" विष्णुरहस्यम्।

अम्बुवासिन् त्रि० अम्बुप्रधाने देशे वसति वस-णिनि ङीप्। १ पाटलावृक्षे। २ जलवासिमात्रे त्रि०। [पाटलावृक्षे।

अम्बुवासी स्त्री अम्बुप्रधाने देशे वासो यस्याः गौरा० ङीष्।

अम्बुवाह पु० अम्बूनि वहति वह-अण् उप० स०। १ जलधरे मेघे। "व्याजेन यस्यावहिरम्बुवाहः यतोज्झितास्तिर्मुकुरम्बुवाहैः" "फलधरपरिधानश्यामलैरम्बुवाहैः" इति च माघः। २ रुस्तके। स्त्रि अम्बुवाहुभयत्र।

अम्बुवाहिन् त्रि० अम्बूनि वहति धारयति वह-णिनि ईत०। १ जलधारके त्रि० २ मेघे ३ रुस्ते च पु०।

अम्बुवाहिनी स्त्री अम्बूनि वहति स्थानान्तरं नयति वह-णिनि ईत० ङीप्। १ नौकाजलसेचनार्थं काष्ठनिर्मिते पात्रभेदे २ जलवाहिन्यां स्त्रियाञ्च।

अम्बुविहार पु०७त०। जलक्रीड़ायाम् सम्भरणादौ "यदम्बुविहारश्रमं शुचिना" माघः। [वेंडूदकायां क्षुतकुमाण्डयाम्।

अम्बुविल्वा स्त्री अम्बूनि विस्रवति वि+स्रु-अच्। पलान्त-

अम्बुवेतस पु० अम्बुजातोवेतसः शाक०त०। जलवेतसे।

अम्बुशिरोषिका स्त्री अल्पः शिरीषः अल्पार्थे कन् स्त्रीत्वम् जलशिरीषे। [जोंक) इति ख्यातायां जलौकायाम्।

अम्बुसर्पिणी स्त्री अम्बुनि सर्पति सृप-णिनि ङीप्त०।

अम्बुसेचनी स्त्री अम्बूनि सिच्यन्ते नौकातः अनया सिच-करणे ल्युट् ईत० ङीप्। नौकादेर्जलसेचनीपात्रे।

अम्बूकृत न० अम्बु अम्बु कृतं अम्बु स्थे इत्यात्मकाम्बु उपचाराच्चयुक्तं ततः चि+क-क्त। निर्जीवनयुक्ते वचसि।

अम्बू पु० अबि-शब्दे क्त नि० न ह्रस्वः। १ अक्षरसे २ तद्वति त्रि०।

अम्भ ध्वनौ भा० आ० अक० सेट्। अम्भते आम्भिष्ट आनम्भे आनभे अयम् इदित्केके तेन आनम्भे इत्येव। अम्भः

अम्भस् न० आप्यते आप-असुन् "उदके तन्भौ चेति" उणा० अम्भ-शब्दे असुन् वा। १ जले "सैव्यमामज्वरं प्राप्तः कोऽम्भसा परिषिञ्चति"?। "लिखोतसः सन्ततधारमम्भः" इति च माघः। "परिश्रमाम्भःपुलकेन सर्पता" किरा०। "कवमथम्भसामन्तरा निष्पत्तेः प्रतीक्षते" कुमा० "अभ्यर्द्धेऽम्भःपतनसमये" इति मेघ०। २ देवे, जलहेतुत्वात् तथात्वम् ३ पितृलोके, तेषां जलमयचन्द्रलोके स्थितत्वात् अम्भयदेहत्वाच्च तत्त्वम्। ४ मन्त्रे "वेत्थ सौम्य! यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" छा०उ०। ५ पुरुषाणां जलमयत्वात् तथात्वं पञ्चाग्निविद्यापदे प्रपञ्चः। ६ वसुरे, युद्धे देवसङ्घया यज्ञायमानत्वात्तथा। "तानि वा एतानि चत्वार्यम्भांसि देवा मनुष्याः पितरोऽसुरा" इति श्रुतिः। ७ बालनामोषधौ। ज्योतिषोक्ते ७ लग्नाद्यतुर्थस्थाने। योगशास्त्रोक्तासु नवविधतुष्टिषु मध्ये प्रकृत्याख्यायां दशाध्यात्मिकतुष्टौ च। यथा "आध्यात्मिकश्चतसः प्रकृत्युपादानकालभाग्याख्याः। बाह्या विषयोपरमात् पञ्च, नव तुष्टयोऽभिमताः सा०का०। "प्रकृतिव्यतिरिक्तमात्मानमीति प्रतिपद्य ततोऽस्य श्रवणमननादिना विवेकसाक्षात्काराय स्वसदुपदेशतुष्टो यो न प्रवर्त्तते तस्य चतस्त्र आध्यात्मिकास्तुष्टयोभवन्ति प्रकृतिव्यतिरिक्तात्मानमधिकृत्य यस्मात्तासुष्टयस्तस्मादाध्यात्मिक्यः, काल्याः, इदन्त यात्र प्रकृत्युपादानकालभाग्याख्याः प्रकृत्यादिराख्या यासां तास्तथोक्ताः। तत्र प्रकृत्याख्या तुष्टिर्यथा कस्यचिदुपदेशः "विवेकसाक्षात्कारोहि प्रकृतिपरिणामभेदः तच्च प्रकृतिरेव करोतीति ज्ञातं ते ध्यानाभ्यासेन, तस्मादेवमेवास्य वर्त्तते"। सेयमुपदेष्टव्यस्य शिष्यस्य प्रकृतौ तुष्टिः प्रकृत्याख्या तुष्टिः अम्भ इत्युच्यते" त०कौ०। अस्य अम्भः-

शब्दवाच्यत्वे हेतुस्तद्व्याख्याने दर्शितोऽम्भिः यथा "अम्भाय हृष्टेरम्भस इव प्रसन्नत्वात् उपदेशरूपशब्दहेतुकत्वाच्च अम्भस्तम् अभि-गद्दे इति धातोरसुन्नन्तस्य शब्दहेतुकरूपार्थानुगमात्"। द्यावापृथिव्योः हि०ब० निरु०। [रा०नि०।

अम्भः(म्भस्)सार न० अम्भसां सारं वा सत्वम्। सुक्तायां

अम्भः(म्भस्)सु पु० अम्भांसि सुते सु-क्विप् वा सत्वम्। घर्मे हे०।

अम्भसांनिधि पु० ई स० अलुक् स०। समुद्रे "शिखाभिराश्लिष्ट इवाम्भसां निधिः" माघः।

अम्भृण पु० भृण-शब्दे यङ् लुक् अच् वेदे नि०। १महति निरु०। २भयङ्करशब्दकारके "पिशङ्गभृष्टिमम्भृणं पिशाचिम्" ऋ० १,१३३,५, "भयङ्करशब्दायमानमतिप्रहृष्टं वेति" भा०। "कुम्भीभ्यामम्भृणौ सुते" य० १६,२७।

अम्भोज न० अम्भसि जायते जन-ड ७त०। १पद्मे "गिरा सखाम्भोजमियं युयोज" नैष०। "यद्वाम्भोजं सरस्यधिवसति सदा शोणएवाधरस्ते" का०प्र०। २सारसे ३चन्द्रे "पिबन्ति तन्मुखाम्भोजच्युतं हरिकथामृतमिति" भाग०। चन्द्रादेवामृतच्युति सम्भवः ४कर्पूरे च पु०। ५शङ्खे पु०न०। ६जलजातमात्रे त्रि०।

अम्भोज(ख)षण्ड न० अम्भोजानां समूहः(ख)षण्डच्। पद्मसमूहे "कुसुदवनसुपश्चि श्रीमदम्भोजख(ष)ण्डम्" माघः।

अम्भोजजन्मन् पु० अम्भोजाज्जन्म यस्य जन्माद्युत्तरपदोव्यधिकरणोऽपि साधु वामनः। चतुर्मुखे हरिनाभिपद्मजे ब्रह्मणि अजजशब्दे विवरणम्। "अम्भोजजन्मजनिरुद्दन्तरगतो वक्त्रानितो वक्त्रपात्" भाग० अम्भोजजन्मनः हिरण्यगर्भस्य जनिरुत्पत्तिर्यस्मात् तथाविधो विष्णुरित्यर्थः।

अम्भोजयोनि पु० अम्भोजं हरिनाभिपद्मं योनिः उत्पत्तिस्थानं यस्य। विधातरि। अजजशब्दे विवरणम्। "सदनसुपगतोऽहं पूर्वमम्भोजयोनेरिति" प्रबो०।

अम्भोजिनी स्त्री अम्भोज+समूहार्थे तद्धिते देये वा पुष्करा० इनि। १पद्मसमूहे, २ लतारूपे पद्मोत्पत्तिदेशे च।

अम्भोद पु० अम्भो ददाति दा-क। १मेघे, २मुस्तके च। ३जलदानकर्त्तरि त्रि०। [१मुस्तके २समूहे, च।

अम्भोधर पु० अम्भोधरति धृञ्-धारणे अच्। १मेघे।

अम्भोधि पु० अम्भांसि धीयन्ते यत्र धा-आधारे कि। समुद्रे। "समुद्यान्भोधिमभ्येति महानद्या नगापगा"। "अम्भोधिरोधसि पृथुप्रतिमानभागेति" "अम्भोधिर्विकसित वारिजाननोऽसौ" इति च माघः।

अम्भोधिवल्लभ पु० ६त०। प्रवाले राजनि०।

अम्भोनिधि पु० अम्भांसि निधीयन्तेऽत्र अम्भस्-नि+धा-कि। १समुद्रे। "मैनाकमम्भोनिधिबद्धसख्यम्" कु० "अम्भोनिधिर्वहति दुर्वहबाड़वाग्निम्" चौ० प०। [समुद्रे।

अम्भोराशि च० अम्भसां राशिरिव एकत्वोपचितत्वात्।

अम्भोरुह न० अम्भसि रोहति रुह-क। १पद्मे २सारसे च ३जलजातमात्रे त्रि० "हेमाम्भोरुहगन्धानां तद्व्याप्तो धाम शाश्वतम्" कुमा०।

अम्भस त्रि० अपां विकारादि अप्+मयट्। १जलविकारे २जलप्रचुरे च "सौरीभिरिव नाड़ीभिरम्भस्ताभिरम्भसः" रघुः। "नद्यम्भांसि तीर्थानि नदेवा ब्रह्मविद्भवा" भाग०।

अम्ल पु० अमति सौरभेण दूरं गच्छति अम-रन्। आम्रवृक्षे। फलपत्रादौ न०। एवं प्रायः सर्व्वत्र वृक्षवाचकेषु।

अम्ल(ल्ला)न पु० अम्लं रसं सर्व्वत्र पत्रपुष्पादौ ऋतति व्याप्नोति ऋत-अण् वा रस्य लत्वम्। (आमड़ा) आम्रातकवृक्षे। स्वार्थे कन् अम्ल(ल्ला)तकोऽपि।

अम्ल न० अम-क्त। (घोल) १तक्रे। (टक)रसभेदे पु०। २ तद्वति त्रि० "कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः" गीता। अम्लरसद्रव्याणि च सुश्रुते दर्शितानि यथा। दाड़िमामलकमाहलुङ्गाम्लातककपित्थकरमर्द बदरकोलव्राचीनामलकतिन्तिड़ीकको शाम्रभव्यपारावतवेतसफलकुचाम्लवेतसदन्तशठदधितक्रसुराशुक्तसौवीरकतुषोदकधान्याम्लप्रभृतीनि समासेनाम्लोवर्गः"।

अम्लक पु० अल्पोऽम्लः अल्पार्थे कन्। (मान्दार) लकुचवृक्षे।

अम्लकाण्ड न० अम्लं काण्डं यस्य। लवणवृक्षे राजनि०।

अम्लकेशर पु० अम्लः केशरोऽस्य। बीजपूरे (गोड़ानेबु)।

अम्लचूड पु० अम्ला चूड़ा शिखाऽस्य। अम्लवाके।

अम्लजम्बीर पु० अम्लो जम्बीरः। (गोड़ानेबु)जम्बीरवृक्षे।

अम्लनायक पु० अम्लं रसं नयति नी-ण्वुल्। अम्लवेतसे।

अम्लनिशा स्त्री अम्लरसे निःशेषेण शेते शो-ड। शठीवृक्षे

अम्लपञ्चफल त्रि० "कौलं च दाड़िमञ्चैव द्राक्षाम्लं चूर्णिका तथा। अम्लवेतसमित्येतदम्लपञ्चफलं स्मृतम्" जम्बीरं नागरङ्गञ्च तथाम्लवेतसं पृथुः। तिन्तिड़ीकं बीजपूरमम्लपञ्चफलं स्मृतमिति चोक्ते फलपञ्चके।

अम्लपत्र पु० अम्लं पत्रं यस्य। अम्लम्लकवृक्षे।

अम्लपत्री स्त्री अम्लं पत्रं यस्याः ङीप्। पत्राशीलतायाम्।

अम्लपनस पु० अम्लः पनसः कर्म०। (मान्दार) लकुचवृक्षे।

अम्लपित्त त्रि० अम्लाय पित्तम्। रोगभेदे यत्र भुक्तं सर्व्वं

वस्तुमात्रं पित्तदोषेणाम्लरसतां नीयते तस्मिन् रोगभेदे ।
अम्लपूर न० अम्लेन अम्लरसेन पूर्यते पूर-कर्म्मणि घञ् ६त० । इक्षाम्ले (तेतुल) राजनि० ।
अम्लफल पु० अम्लं फलं यस्य । (तेतुल) इतिख्याते इक्षाम्ले ।
अम्लवन्या स्त्री वन्य-कर्म्मणि यत् । अम्लसम्बन्धे कन्दभेदे ।
अम्लभेदन पु० अम्लार्थं भिद्यतेऽसौ कर्म्मणि ल्युट् । अम्लवेतसे
अम्लरस पु० अम्लो रसः । अम्ले रसे । २तद्वति त्रि० ।
अम्लरुहा स्त्री अम्लाय रोहति रुह-क । मालवजनागवल्ल्याम्
अम्ललोनि(णि)का स्त्री अम्लं रसं लाति स्वीकरोति अम्लः तमूनयति अल्पयाम्लत्वात् क्षीनयति ऊन-खुल् पृ० षत्वम् । (आमरुल) इति ख्याते लताभेदे । अम्लोनीपत्र ।
अम्लवती स्त्री अम्लो रसो विद्यतेऽस्याः अम्ल+रसा० मतुप् मस्यवत्वम् । (आमरुल) ख्याते लताभेदे ।
अम्लवर्ग पु० अम्लरसप्रधानानां वर्गः । सुश्रुतोक्ते अम्लरस-प्रधानद्रव्ये । तच्च अम्लशब्दे ३३३ पृष्ठे द्रश्यम् ।
अम्लवल्ली स्त्री अम्लरसवती वल्ली । त्रिपर्णिकानामकन्दभेदे
अम्लवाटिका स्त्री अम्लस्य वाटिका स्थानमिव । नागवल्ली भेदे । पित्तरक्तप्रकोपकरत्वेन तत्स्थानत्वात् तथात्वम् ।
अम्लवास्तूक पु० अम्लरसान्वितो वास्तूकः शाकभेदः । (चुक-पालङ्ग) इति ख्याते चुक्रे ।
अम्लवीज न० अम्लस्य वीजं कारणम् । (तेतुल) इक्षाम्ले ।
अम्लवृक्ष न० अम्लरसोवृक्षे यस्य । (तेतुल) इक्षाम्ले
अम्लवेतस पु० अम्लावेतस इव नलच । (चुका) ख्याते चुक्रे
अम्लशाक पु० अम्लः शाको यस्य । (चुका) इति १ ख्याते चुक्रे । २ अम्लप्रधाने शाकाम्ले पु० ।
अम्लसार पु० अम्लोरसएव सारः प्रधानं यस्य । १ चुक्रे २निम्बुके, ३हिन्ताले च । ४ काञ्जिके न० । [ख्याते इक्षे
अम्लहरिद्रा स्त्री अम्लरसान्विता हरिद्रा । (आमहरिद्रा)
अम्ला स्त्री अम्लो विद्यतेऽस्या अर्श आद्यच् । तिन्तिड्याम् ।
अम्लाङ्ग पु० अम्लम् अङ्गमाकारमयं यस्य । चुक्रे ।
अम्लातक पु० न म्लायति म्लै-तन् न०त० । अम्लवेतसे ।
अम्लादन पु० अद्यते अद-कर्म्मणि ल्युट् कर्म्म० । कुरण्टकवृक्षे ।
अम्लान पु० म्लै-क्त न०त० । आम्ला इति ख्याते महा-गन्धाढ्ये । २ म्लानभिन्ने त्रि० । "अम्लानपङ्कजां मालां शिरस्युरसि चापराम्" देवी० । ३ पद्मे न० । [न्याम् ।
अम्लानिनी स्त्री अम्लानानां पद्मानां समूहः इनि । पद्मि-
अम्लिका स्त्री अम्लैव स्वार्थे कन् । १तिन्तिड्याम् । अत्राम्लीके-ऽपि सा च २ पलाशीलतायां ३ श्वेताम्लिकायां ४ क्षुद्रा-म्लिकायाञ्च राजनि० । अम्लोऽस्यत्र उद्गारे वा ठन् । १ अम्लोद्गारे मेदि० ।
अम्लिकावटक पु० अम्लिकाया वटकः । भावप्रकाशोक्ते (अम्ल वड़ी) इति ख्याते वटकभेदे यथा "अम्लिकां स्वेदयित्वा तु जलेन सह मर्दयेत् । तत्क्षीरे कृतसंस्कारे वटकान् मज्जयेत् पुनः । अम्लिकावटकास्ते तु रुच्यवह्निप्रदीपनाः" भा० म० ।
अम्ली स्त्री अम्ल+गौ०ङीष् । चाङ्गेर्याम् (आमरुल) ।
अम्लोटक पु० अम्लम् उटं पत्रं यस्य । (अम्लकुचा) इति अम्लफलवृक्षे ।
अम्लोद्गार पु० अम्लस्य उद्गारः । अम्लरसूचके उद्गारे ।
अय गतौ भ्वा० आ०सक० सेट् । अयते आयिष्ट अयाम्बभूव अयामास अयाञ्चक्रे । अस्य परस्मैपदित्वमपि "अय सदयति सद्भावभञ्जनः पद्मिनीनामिल्युद्भटः "शुचोदयन् दीधितिसुक्थशासः यजु० १६ ६६ । "उदयति विततो-र्द्धरश्मिः" माघः ।
अय पु० एति सुखमनेन इण्-करणे अच् । १ प्राक्तने शुभ-कर्म्मणि, २शुभदायके-दैवे "स शुभ्रमूलप्रत्यन्तः शुद्धपार्ष्णि-रयान्वितः" रघुः "तव धर्म्मः सदयीदयोज्वलः" नै० ३विधाने च । अयते जयमनेन । ४कपर्दके रूपे एकाद्यङ्कयुक्ते द्यूतसाधने ५पाशके च "अथाक्षै पञ्चात्मान् पाशावावपति अभिभूरस्येतानसे पञ्च दिशः कल्पन्तामित्येष वा अयानभि-भूर्यत्कलिरेष हि सर्वानयानभिभवति" इति शत० ब्रा० । "अक्षा नाम कपर्दकाः सुवर्णनिर्म्मिता, विभीतफलानि सौवर्णानि वा । ते चाक्षा द्यूतकाले निवपनीयाः । तेषां चतुर्णामङ्कानां कृतसंज्ञा पञ्चानां कलिसंज्ञा तथा च शाखान्तरे सोमसंस्थायां कृतादिव्यवहारः श्रुतः "वै वै चत्वारः सोमाः कृतं तत्" अथ ये पञ्च कलिः इति" यदा पञ्चाप्यक्षा उत्ताना भवन्ति तदा देवि-तुर्जयोभवति पञ्चसु त्वेकरूपासु जय एव भविष्यतीत्यन्य-लोक्तम् । अयशब्दः अक्षवाची" इति भा० । चतुरङ्गा-न्विते ६ पाशकभागे च । "यथा कृताय विजितायाधरेयाः संयन्ति" छा०उ० "कृतो नाम अयोद्यूत समये प्रसिद्धचतुरङ्गः स यदा जयति द्यूते प्रवृत्तानां, तस्मै विजिताय तदर्थमितरे त्रिद्व्येकाङ्का अधरेयाः तेताद्वापरकलिनामानः संयन्ति सङ्कल्पन्ते अन्तर्भवन्ति चतुरङ्के कृताङ्के त्रिद्व्येकाङ्कानां विद्यमानत्वादन्तर्भवन्तीति" भा० । "द्यूतस्य समयः सङ्केतस्तदनुज्ञानसमयो वा येन द्यूतविद्यायां जीयते सोऽस्य कश्चिद्भागोऽयशब्दवाच्यः स

च चतुरङ्गोभागः चत्वारोऽङ्गाविद्यन्त्यस्मिन्निति व्युत्पत्तेः तस्मै, कृतनामभ्यते, यदा द्यूते प्रदत्तानां मध्ये स कोऽपि जयति तदा तस्मै कृतनामभ्यते विजिताय अधरेवाः संवल्गीति सम्बन्धः तदर्थं आचष्टे तदर्थमिति अधरेवान् व्याकरोति ते तेति । अक्षस्य यस्मिन् भागे त्रयोऽङ्काः स त्रेतानामायः यत्र तु द्वावङ्कौ स द्वापरनामायः । यत्र एकोऽङ्कः स कलिनामाय इति । तादर्थ्ये नेतराङ्कानामन्तर्भावसूक्तं व्यक्तीकरोति चतुरङ्क इति तदन्तर्भवति तस्मिन् कृताये ते तादवस्थ्येऽन्तर्भवन्ति महासंख्यायामवान्तरसंख्यानामन्तर्भावः प्रसिद्ध इति" आनन्दगिरिः । यन्ति गाराः अस्मिन् इण-आधारे अच् । द्यूते सर्वगारगन्तव्ये ऽक्षखण्डभेदे अयानयशब्दे विवरणम् । अयते अच् । ऽगन्तरि त्रि० । चिदया आ नाम ऋ०६,६६,५ ।

अयःपान न० अयः द्रवीभूतं तप्तलौहं पीयतेऽत्र ल्युट् । नरकभेदे यथा भाग० ५स्कन्धे तामिस्रादिनरकगणनायाम् "लौहितयःपानमित्युक्त्वा तद्विवरणं सहेतुकं तत्रैवोक्तं 'यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथस्तत्कलत्रं वा सुराः प्रतस्यो वा पिबति प्रमादतः तेषां निरयं नितानारुरुक्षुपदाक्रम्य वह्निना द्रवमाणं कार्ष्णायसं निषिञ्चन्ति" इति।

अयःशूल न० अय एव शूलम् उपतापकम् । १तोत्रे उपतापे, २लौहशूलाख्यभेदे च । वा सत्वम्, अयश्शूलमध्यत्व ।

अयक्ष्म त्रि० नास्ति यक्ष्मा रोगोयस्य वेदे नि०अच् समा० । १नीरोगे रोगशून्ये "यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत्" यजु०१६,४ अयक्ष्मं नीरोगम् वेददी० । ५व० । २उपद्रवासाधने "तयाक्ष्मान्त्सचतस्त्वमयक्ष्मयापरिभुज" यजु० १६,११, "अयक्ष्मया निरुपद्रवया" वेददी० ।

अयज्ञ त्रि० नास्ति यज्ञो यस्य । अकृतयज्ञे । "पनीं अयज्ञ अदधा अयज्ञान्" ऋ० ७,६,३ ।

अयज्ञिय त्रि० न यज्ञायहितः यज्ञ-घ न०त० । १यज्ञकर्मणि दातुमनर्हे २माषादौ "अयज्ञिया वै माषा" श्रुतिः यज्ञकालेऽनुद्धार्येऽपशब्दे च अयज्ञियशब्दवचने भ०भ० ३यज्ञं कर्तुमनर्हे असंस्कृतेऽनुपनीतादौ "अयज्ञिया वै गर्भास्तमेतं ब्रह्मणैव यजुषा यज्ञियं करोति" श्रुतः ब्रा० ।

अयज्यु त्रि० यज-वा० उ नि० युट् न०त० । १यष्टृभिन्ने २यज्ञविघातके च "शासस्त्वमिन्द्र मर्त्यमयज्युं शवसस्पते !" ऋ० १,१३१,४ "यज्वेदयज्योर्विभजातिभोजनम्" ऋ०२,२६,१ ।

अयज्वन् पु० विधिनेष्टवान् यज्वा न०त० । अकृतयज्ञे । "अयज्वानमदक्षिणमभिशस्तेति ब्राह्मणम्" भा०द्रो०प० षोड़शधा पाठः । "योऽनाहिताग्निः शतसुरयज्वा च सहस्रसुः" "अयज्वनान्तु यद्वित्तमासुरं वै तदुच्यते" मनुः ।

अयत त्रि० न यस्यते यम-क्त न०त० । १अकृतयमे अकृतेन्द्रियनिग्रहे । यतते यत-अच् न०त० । २यत्नशून्ये ।

अयत्न पु० अभावे न०त० । १यत्नाभावे आयासाभावे "तदवाप्तोल्वयत्नेन यो हिनस्ति न कञ्चन" मनुः । न०व० । २प्रयासशून्ये त्रि० "तद्योधवारवाणानामयत्नपटवासताम्" रघुः ।

अयत्नवत् त्रि० न यत्नवान् । १यत्नशून्ये "तेन तुल्यम् क्रिया चेद्वति" "तत्र तस्येवति" पा० वा वति । २यत्नशून्यतुल्यक्रियादौ ३यत्नशून्यस्य समाने च अव्य० ।

अयथा अव्य० यथा योग्यत्वे न०त० । यस्य यथा विधानसूचितं १यथा करणाभावे २अनुचितकरणे ३मिथ्याभूते च नास्ति तथा योग्यत्वं यत्र । ४अयोग्ये ५ अयत्ने च त्रि० । "तस्मा अयथं कर्षदेतत्" ऋ० १०,१८,१५ अयथमयत्नेन लीलया" भा० ।

अयथातथ त्रि० यथा योग्यं तथा न भवति "यथातथयथापुरयोरिति" पा० निर्द्धारात् नि०स० । १अयथार्थे यत् यदर्थं क्रियते तस्मिन् तदर्थमभूते च । "दैवे कर्म्मणि पित्र्ये च तद्ऋक्त्वयथातथम्" मनुः । यत् कर्म्म यदर्थं क्रियते तत्र साधवति" कुल्लू० तस्य भावः ष्यञ् वा पूर्वपदवृद्धिः आयातथ्यम् अयाथातथ्यञ्च तद्भावे न० ।

अयथार्थ त्रि० विरोधे न० त० । यथार्थभिन्ने मिथ्याभूते यथा अयथार्थानुभवः । स च तदभाववति तत्प्रकारकं ज्ञानं तच्च त्रिविधम् संशयभ्रमारोपरूपतर्कज्ञानभेदात् । तेषां सर्वेषाम् तदभाववति तत्प्रकारकज्ञानरूपत्वात्तथात्वम् ।

अयथावत् अव्य० अयोग्यरूपमर्हति अर्हार्थे वति । अननुरूपे यथोचितभिन्ने । [२स्वल्पे त्रि० ।

अयथेष्ट अव्य० न०त० । १इच्छानुरूपाभावे । अर्थ आद्यच्

अयन न० अय-भावे ल्युट् । १गतौ, दक्षिणत उत्तरस्याम्, उत्तरतश्च दक्षिणस्यां सूर्यस्य चन्द्रस्य च २गतौ, तथा हि द्वादशराश्यात्मकस्य राशिचक्रस्यार्द्धं मकरादिधनुषिमिथुनपर्य्यन्तम् राशिषट्कं क्रमेण उत्तरावनतं तत्र स्थितोऽर्कश्चन्द्रो वा स्वगत्या प्राचीं गच्छन्नपि किञ्चित् किञ्चित्तिर्य्यग्गत्वा उत्तरामभिक्रामति, एवं कर्कटादिधनुःपर्य्यन्तं राशिषट्कं क्रमेण दक्षिणावनतं तत्र स्थितोऽर्कश्चन्द्रो वा प्राग्वत् दक्षिणामेवाभिक्रामति सेयं गतिरयनशब्देन ज्योतिषे व्यव-

च्छिद्यते तत्र सूर्य्यस्यायनं सौरैः षड्भिर्मासैरेकं भवतीति च तत्रैव प्रसिद्धम् । "अयनविष्णुपदीषडशीतय" इत्युक्तेः ३अयनाख्यसंक्रान्तौ सा हि परिभाषिकायनशब्दवाच्या । नभोमण्डले प्रवहानिलेन पश्चाद्गत्या बंभ्रम्यमाणस्य राशिचक्रस्य निराधारतया दोलायमानत्वेन सप्तविंशांशपर्य्यन्तं प्राक् पश्चाच्च गतिर्भवति । क्रान्तिस्थानञ्च अष्टमासाधिक ६।८ षट्षष्टिवर्षैरेकैकमंशमतीत्य प्राक्, पश्चाद्वा चलतीति १८०० अष्टदशगतवर्षैः सप्तविंशांशपर्य्यन्तं प्राक् गत्वा पुनः पश्चात्, पश्चाद्गत्वा च पुनः प्रागवलम्बते । यदा चैवं राशिचक्रस्यायनस्थानं प्राक् गच्छति तदा राशिचक्रनिर्दिष्टमेषादिस्थानात् उक्तकालभेदेनैकैकांशातिक्रमेण क्रमशः प्राचि, प्राक्तरे, प्राक्तने, वा स्थाने रव्यादियहाणां प्रभापुञ्जसञ्चारः । यदा तु पश्चादवलम्बते तदा निर्दिष्टमेषादिस्थानात् तत्रैव परे, परतरे, परतमे, च स्थाने यहाणां प्रभापुञ्जसञ्चार इति भेदः । इदानीञ्च पश्चिमायनं तेन राशिस्थानात् पश्चादेव यहप्रभापुञ्जसञ्चारः । तथा च ज्योतिषोक्तगणितरीत्या मीनान्तात् पश्चादेकविंशांशे एवेदानीं विषुवादिसंक्रान्तिर्भवति एवं विष्णुपद्यादीनामपि तत्तदंश एव यहप्रभापुञ्जसञ्चारः। अयञ्चायनानुसारेण यहप्रभापुञ्जसञ्चारस्वीकारः दिनमानविशेषस्य लग्नपरिमाणस्य छायापदविशेषस्य, च बोधार्थमिति सिद्धान्ते प्रसिद्धम् । करणे ल्युट् । ४उक्तायनज्ञानसाधने शास्त्रे, ज्योतिषामयनञ्चैवेति" ५सैन्यनिवेशविशेषरूपव्यूहप्रवेशमार्गे च "अयनेषु च सर्व्वेषु यथाभागमवस्थिताः" इति गीता । आधारे ल्युट् । ६पथि, ७मार्गे, ८आश्रये, ९स्थाने, "तावदयनं पूर्व्वमिति" मनुः । प्रागुक्तराशिचक्रस्य क्रान्तिवृत्तारम्भस्थानविशेषे १०अंशादौ च "तत्काले सायनार्कस्थैति" नीलकण्ठः । तथा हि मीनान्तो हि युगादौ अयनांशप्रथमस्थानं ततःप्राग्गत्वा कियदंशपर्य्यन्तचलनेन परावृत्य पश्चाद्गत्वा पूर्व्वराशेः कियदंशपर्य्यन्तं गत्वा पुनः प्राग्गत्वा प्राथमिकचलनस्थानप्राप्तौ अयनस्यैकोविलक्षणो भगणो भवति इत्येवं स्थिते तद्भगणपरिमाणकालादिज्ञापनाय किञ्चिदभिधीयते । सूर्य्यसिद्धान्ते । "त्रिंशत्कृत्वो युगे भानां चक्रं प्राक् परिलम्बते । तद्गणाद्दिनैर्भक्ताद्युगणाद्दवाप्यते ॥ तद्दोक्षिप्ता दशाप्तांशा विज्ञेया अयनाभिधाः । तत्संस्कृताद्यहात् क्रान्तिच्छायाचरदलादिकम्" इति ॥ "भानां चक्रं राशीनां दृत्तं क्रान्तिदृत्तं खचिह्नेपलितशलाकाग्रप्रोतनलनलगर्थैर्युक्तमित्यर्थः । युगे महायुगे प्राक् पूर्व्वविभागे त्रिंशत्कृत्वस्त्रिंशत्सङ्ख्या लभ्यः त्रिंशतयः षट्यतमित्यर्थः । परिलम्बते ध्रुवाधारभगोलस्थानात् तद्दूरमवलम्बते । अत्र परिलम्बत इत्यनेन भचक्रपूर्णभ्रमणाभाव उक्तोऽन्यथा यहभगणप्रसङ्गेन मध्याधिकार एवैतदुक्तं स्यात् । तथा च तद्दूरमवलम्बनोक्त्या पराद्धं यथास्थितं भवतीत्यागतं तथापि स्वस्थानात् तत्रैव पश्चिमतोऽप्यवलम्बत इति सूचितम् । एवञ्च भचक्रं पश्चिमत ईश्वरेच्छया प्रथमतः कतिचिद्भागैश्चलति ततः पराद्धत्य यथास्थितं भवति ततोऽपि तद्भागैः क्रमेण पूर्व्वतश्चलति ततोऽपि पराद्धत्य यथावस्थानंस्थितमित्येको विलक्षणो भगणः । तेन प्रागित्युपलक्षणम् । पश्चिमावलम्बनानुक्तिस्तु संवादकाले तदभावात् । अत्र त्रिंशत्कृत्व इति पाठः प्रामादिकः । "युगे षट्शतकृत्वो हि भचक्रं प्राग्विलम्बते" इति सोमसिद्धान्तविरोधात् । "तत् पश्चाच्चलितं चक्रमिति" ब्रह्मसिद्धान्तोक्तेश्च । अहर्गणात् तद्गुणात् षट्शतगुणिताद् भूदिनैर्युगीयसूर्य्यसावनदिनैर्भक्ताद्यत् फलं भगणादिकं प्राप्यते तस्य भगणत्वागमेन राश्यादिकस्य भुजः कार्य्यस्तस्माद्राश्यंशा दशभिर्भजनेनाप्तभागास्त्रिगुणिता अयनसंज्ञका ज्ञेयाः । भुजांशास्त्रिगुणिता दशभक्ताः फलमयनांशा इति तात्पर्य्यार्थः । तत्संस्कृतात् तैरयनांशैर्भचक्रपूर्व्वापरचलनवशाद्गुणहीनाद्वृत्तात् पूर्व्वापरभचक्रचलनावगमस्वयनयहस्य षड्भान्तर्गतानन्तर्गतत्वक्रमेण क्रान्तिच्छायाचरदलादिकं साध्यम् । न केवलात्, विशेषोक्तेः । छाया वक्ष्यमाणा चरदलं चरं पूर्व्वाधिकारोक्तम् । आदिशब्दादयनवलनभायनदृक्कर्म सङ्गृह्यते । यद्यपि तत्संस्कृताद् यहात् क्रान्तिरित्येव वक्तव्यमत्रैवामत्र तदुपजीव्यत्वाद् यहणं व्यर्थं तथापि क्रान्तिरित्युक्त्या केवलक्रान्तिज्ञानार्थं तत्संस्कृतयहात् क्रान्तिः साध्या । पदार्थान्तरोपजीव्याबाधः क्रान्तेः साधनं तु केवलादित्यस्य वारणार्थं क्रान्तिमात्रं तत्संस्कृतात् साध्यमिति सूचकं छायाचरदलादिकथनम् । ईश्वरेच्छया क्रान्तिदृत्तं स्वमार्गे पश्चिमतः सप्तविंशत्यंशैः क्रमोपचितैश्चलितं ततः पराद्धत्य स्वस्थानं छागत्य तत्स्थानात् पूर्व्वतः सप्तविंशत्यंशैश्चलितम् । तथा च सूच्यादिभूतक्रान्तिविषुवद्दृत्तसम्पातान्वितक्रान्तिदृत्तप्रदेशो रेवत्यामत्रः प्रागानीतयहभोगावधिरूपः स्वस्थानात् पूर्व्वमपरत्र वा क्रान्तिदृत्तमार्गे गतः । विषुवद्दृत्ते तु तद्भागस्य वा पश्चिमभागः पूर्व्वभागो वा गतः । सम्पाते तद्दृत्तयोर्याम्योत्तरान्तराभावात् क्रान्त्यभावः । पूर्व्वसम्पातप्रदेशे तु तयोर्याम्योत्तरान्तरत्वात् क्रान्तिरुत्पन्नातो यथास्थितयहभो-

गात् क्रान्तिरसङ्गतेति सम्मातावधिकयहभोगात् क्रान्तियुक्ता तत्र सम्मातावधिकयहभोगज्ञानार्थं पूर्वसम्मातावधिकः पूर्वाधिकारोक्तो यहभोगो वर्त्तमानसम्मातपूर्वसम्मातान्वितक्रान्तिहृत्तप्रदेशयोरन्तरभागैरयनांशाख्यैः पूर्वसम्मातप्रदेशस्य पूर्वपश्चिमावस्थानक्रमेण युतहीनो भवति । क्रान्त्युपजीव्याः पदार्था अपि वर्त्तमानसम्मातादुत्पन्ना इति तत्साधनमपि तत्संस्कृतयहात् । अयनांशज्ञानं तु षट्गतभगणेभ्यः पूर्वानुपातरीत्याकर्षणाद्दृग्यहभोगो भगणादिकस्तत्र गतभगणमितं परपूर्वभचक्रावलम्बनं गतम् । वर्त्तमानं त्वारभ्भे पश्चिमावलम्बनाद्राशिषट्क्रान्तगते राश्यादिके पश्चिमावलम्बनमनन्तर्गते पूर्वावलम्बनम् । तत्रापि त्रिभान्तर्गतानन्तर्गतत्वक्रमेण चलनं परावर्त्तनमिति भुजः साधितस्ततो नवत्यंशैर्यदि सप्तविंशतिभागास्तदा भुजांशैः किमित्यनुपातेन गुणहरौ नवभिरपवर्त्य भुजांशास्त्रिगुणिता दृग्भक्ता इति सर्व्वमुपपन्नम् रङ्ग०" ॥ 'स्फुटं हक्तुल्यतां गच्छेदयने विषुवद्वये । प्राक् चक्रं चलितं हीदं छायार्कात् करणागते ॥ अन्तरांशैरपाहृत्य पश्चाच्चैवं तथाधिके" सू० सि० । "अयने दक्षिणोत्तरायणसन्धौ विषुवद्वये गोलसन्धौ चलितं चक्रं हक्तुल्यतां दृष्टिगोचरतां स्फुटमनायसं गच्छेत् । तत्र प्रत्यक्षतस्तस्मिन् गत्यन्तरं दृश्यत इत्यर्थः । तथा च सूर्य्यादिकाले रेवतीयोगतारासञ्चावधिमेषतुलाद्योः कर्कमकरादोर्विषुवायनप्रवृत्तेरिदानीमन्यत्र तत्स्वरूपे प्रत्यक्षे इति क्रान्तिहृत्तं चलितमन्यथा तदनुपपत्तेरिति भावः । ननु पूर्वतोऽपरत्र वा चलितमिति कथं ज्ञेयमित्यत आह । प्रागिति । छायार्काद्यह्निने सूर्य्यस्यायनदिक्परावर्त्तनसदये प्राच्यपरस्थलस्थत्वं वा तस्मिन् दिनेऽन्यस्मिन् दिने वा मध्याह्नच्छायातो वक्ष्यमाणप्रकारेण सूर्यः साध्यस्तस्मादित्यर्थः । करणागते प्रागुक्तप्रकारेणातीतः स्पष्टः सूर्यस्तस्मिन्नित्यर्थः । न्यूने सति अन्तरांशैः सूर्ययोरन्तरांशैश्चक्रं क्रान्तिहृत्तं प्राक् पूर्वस्मिन् चलितमिति ज्ञेयम् । अथ यद्यधिके सति ग्रेहैः सूर्ययोरन्तरांशैश्चक्रमाहृत्य परिहृत्य पश्चात् पश्चिमाभिमुखं तथा चलितमिति ज्ञेयम् । अत्रोपपत्तिः । छायातो वक्ष्यमाणप्रकारेण सूर्यो वर्त्तमानसम्मातादङ्गिताग्रतस्तु रेवतीतारासञ्चाद्यवधितोऽतस्तयोरन्तरमयनांशात्तत्र क्रान्तिहृत्तस्य पूर्वचलने गणितागतच्छायार्कोऽधिको भवति पश्चिमचलने तु न्यूनो भवतीति सर्व्वमुपपन्नम्" । रङ्गनाथः ॥ एवमयनस्य प्रकृतस्थानात् चलने स्थिते सौरागमे "त्रिंशत्कलोद्गुणे भाना" मित्युक्तेः सोमसिद्धान्ते "युगे षट्गतकल्पो हि भचक्रं प्राक् विलम्बते" इत्युक्तेश्च ४३२०००० वर्षमिते युगे षट्गतैर्विभाजिते लब्धं ७२०० वर्षैरेकोऽयनस्य भगणो भवतीति गम्यते । एवञ्चोक्तदिशा युगादितः प्रथमं मीनान्तात् मेषसप्तविंशतिपर्य्यन्तं प्राक् गत्वा ततः परिहृत्य मीनशेषपर्य्यन्तं सप्तविंशत्यंशैरागत्य ततोऽपि पश्चादुगत्वा सप्तविंशत्यंशैः मीनचतुर्थांशपर्य्यन्तमागत्य परिहृत्य प्रागागत्य पुनः सप्तविंशत्यंशैः मीनशेषपर्य्यन्तं धावति इत्येवं चतुर्भिः सप्तविंशत्यंशैः अष्टोत्तरशतांशैः प्राग्पश्चाद्गतिभेदेन एकोऽयनभगणोभवति प्रागुक्तैः ७२०० वर्षैः यदि १०८ अंशाः तदा एकांशे किमित्यनुपातेन ६६ । ८यष्टमासाधिकषट्षष्टिवर्षैरेकैकांशायनचलनम् इति प्रतिभाति ततश्च यदि ६६। ८ वर्षादिभिः ६०कलात्मकोऽंशस्तदा एकवर्षेण किमित्यनुपाते ५४ विकलाः प्रतिवर्षमयनस्थानचलनमायाति अत्र प्रागित्युक्तेः सृष्ट्यादौ युगादौ च प्रथमं प्रागेव गतिर्न तु पश्चिमत तथात्वे इदानीन्तनांशवैषम्यापत्तेः । तथा हि ४३२०००० युगे यदि षट्शतानि अयनभगणास्तदा १७२८००० कृतयुगे किमित्यनुपातेन २४० भगणाः १२९६००० त्रेतायुगे १८० भगणाः ८६४००० द्वापरे १२० भगणाः इत्येवं त्रियुगे ५४० भगणा गता इदानीं कलियुगस्य वर्षागता ४९७३ यदि ७२०० वर्षैषु १०८ अंशात्मकोभगणस्तदा ४९७३ वर्षेषु किमिति त्रैराशिके ७४ अंशाः २५ कलाः ४४ विकलाः लब्धा तथा च १०८ अंशात्मकायनभगणमध्ये एतावदंशादयो गता इति लभ्यते । तत्र यदि प्रथमं पश्चादुगत्वा भगणारम्भस्तदा मीनान्तात् चतुर्थांशं यावत् पश्चादुगत्वा परावृत्य मीनपर्य्यन्तगमने ५४ अंशाः गता ततः प्रागत्वा मेषसप्तविंशत्यंशैर्गतिस्वीकारे इदानीं मेषस्य २०।२५।४४ अयनांशादिः स्यात् । न च तत् ज्ञायादिसंवादि प्रथमं प्रागतिस्वीकारे तु प्रागुगत्वा प्रथमं मीनान्तात् मेषस्य सप्तविंशत्यंशपर्य्यन्तं गत्वा पश्चादुगत्वा सप्तविंशत्यंशैः मीनान्तगमने ५४ अंशाः गताः ततः पश्चादुत्वा मीनस्य एते २०।२५।४४ अंशादयोगतास्तथा च पश्चादुगत्वा मीनस्य नवमांशे इदानीमयनांशादिरिति सर्व्वज्योतिर्वित्सम्प्रदायः । अतएव एतदयनांशमादायैव यहस्पष्टादिकं यहयं साध्यते दिनमानादिकञ्चानीयते । इदानीन्तनाः ज्योतिर्विदां शिरोमणयः सर्वगणकावतंसाः पण्डितोत्तमाः श्रीमन्तोबापुदेवशास्त्रिणः अयनचलनस्य राद्धान्तेन सर्व्वथा

विलोमगतितवायनभगणम् यदुरीचक्रुः तत्र विरोधादिकं प्रदर्शयिष्यते तद्दृष्ट्वा विद्वद्भिस्तस्य प्रमादोऽप्रमादो वावगन्तव्यः। तथा हि आयादिना अयनभोगस्य प्रतिवर्षं ५४विकलाः इदानीं पश्चादयनस्थानचलनं च सर्वज्योतिर्वित्प्रसिद्धम्। तत्र केवलं पश्चाद्गत्याऽयनस्थानचलनेन भचक्रस्यभ्रमणाङ्गीकारे। यदि ५४विकलाभिः एको वर्षस्तदा १२९६०० विकलात्मकभचक्रभ्रमणे कति वर्षा इत्यनुपातेन २४००० वर्षैरेको भगणो भवति यदि २४००० वर्षैः एकोभगणः तदा ४३२००० वर्षात्मके महायुगे कति भगणा भवन्ति इत्यनुपातेन १८० भगणा भवन्ति। ततश्च सौरसोमसिद्धान्तोक्तषट्गतसंख्याविरोधः इदानीं मीननवांशे अयनस्थानविरोधश्च। तथा हि तन्मते राशिचक्रस्य केवलं विलोमगत्यायनभगणस्वीकारेण प्रागुक्तादिना २४००० वर्षैरेको भगणः तदा १७२८००० वर्षात्मके कृतयुगे कतीत्यनुपातेन ७२ भगणाः। १२९६००० वर्षात्मकत्रेतायाम् ५४,८६४००० द्वापरे २६ इत्येवं त्रियुगे १६२ भगणाः गताः इदानीं कलेः ४९७३ गताब्देषु किमिति जिज्ञासायाम् यदि ५४ विकलाभिरेको वर्षस्तदा ४९७३ वर्षेषु किमित्यनुपाते ७४।२५।४४ अंशादयोगताः इत्यायाति तन्मते च मीनान्तात् सर्वथा पश्चाद्गत्या भगणपूरणस्वीकारेण मीनान्तात् ७४।२५।४४ अंशादितः पूर्वमयनस्थानापत्तिः तथा च मीनान्तात् तावद्भिरंशैः पूर्वं मकरस्य पञ्चदशांशे अयनांशादि स्यात्। न च तथाप्रत्यक्षादिभिरवगम्यते नापि ज्योतिर्विदां केषाञ्चित् सम्मतम् अतोऽयनस्थानेन केवलविलोमगत्या भचक्रस्य भ्रमणोक्तिः साहसमेव। किञ्च अतिचिरन्तनकालैः संवादनीये प्रागतित्वे पश्चाद्गतित्वे वा आर्षज्ञानं विना निर्णयासम्भवः अतः सौराद्यागमोक्तं प्रागतित्वमनादृत्य प्रथमं पश्चाद्गतिस्वीकारः केवलपश्चाद्गतिस्वीकारः अयनचलनस्य तद्भगणसंख्यातो विषमकल्पनञ्चार्वागृग्यां आगमविरोधात् वचनमात्रेण न श्रद्धाय प्रभवति। किञ्च सौरागमाद्युक्तं प्रागगतित्वमनादृत्य केवलं पश्चाद्गतित्वं यत् स्वीकृतं तत् सर्वव्यवहारलोपकम् तिथ्यादिसाधनाङ्गायनांशादिविलोपकञ्च। एतेन इंग्लण्डिया अपि ज्योतिर्वेत्तारः सृष्टिकालस्य षट्सहस्रकालमात्रपरिमितत्वादिनोऽपि परास्ताः। तैरपि प्रतिवर्षं ५४ विकलाः अयनांशभोगाः स्वीकृताः स्वीकृतश्च षट्षष्टिवर्षैरेकांशभोगः तथा च ६६।८ वर्षादिभिर्यदि एकोंशः पश्चाद्गच्छति तदा तद्गतसृष्टिकाले ६००० अतीत्यनुपाते ९० अंशाः समायान्ति तेन मीनान्तात् ९० अंशान्तरे पश्चाद्गत्या धनुःशेषांशेऽयनारम्भः स्यात् तदेतद्दृष्टविरुद्धत्वादपेक्षमेव मीनान्तं विहाय अन्यत्र क्वान्तिवृत्तारम्भस्थानतश्चलनकल्पने न विनिगमकमस्ति इति विजातीयज्योतिर्विदाम्मतमसङ्गतमेव तैरपि तद्वधिक्रान्तिवृत्तारम्भांशचलनस्वीकारात्। इदानीं च संवाद्ययनानुसारेण मीनान्तात् २०।२५।४४तत्रानुपाते प्रायेण १३७०वर्षा आयान्तितस्मिन् सृष्टिकल्पनन्तु नैव सम्भवति खीष्टाब्द १८७२कालस्य ततोऽधिकत्वेन ततपूर्वं सृष्टेरुचितत्वात्। पुनर्भगणान्तरस्वीकारे तु २४०००वर्षास्ततोऽधिकाः स्फुटेन २५३५ वर्षाः सृष्टिकालाः अन्ततः स्युः तावतिधेव काले सर्वभचक्राणां मेषादौ स्थित्यसम्भव एव इति सर्वथा तन्मतमनादरणीयमेव। प्राग्दर्शितसरणौ प्राचीनसम्मतिरपि यथा। "मृगसंक्रान्तितः पूर्वं पश्चात्तारादिमान्तरे। प्रतिवर्षं चतुःपञ्चपलमानक्रमेण तु। षट्षष्टिवत्सरानेकदिनं स्यादयनं रवेः। एवं चतुःपञ्चदिनादयनारम्भणं क्रमात्। व्युत्क्रमेण च तद्वत् स्यादुदग्यानं रवेर्ध्रुवम्। कर्किसंक्रमणे तद्वदभितोदक्षिणायनम्। अयनांशक्रमेणैव विषुवारम्भणं तथा। रविसंक्रान्तितोमेषतुलयोरभितः पुनः" तिथि०त०। अधिकमयनसंक्रान्तिशब्दे वक्ष्यते। एति सूर्य्योदक्षिणात्तरां वाऽत्र आधारे क्त्युट्। पूर्व्वीकरीत्या सूर्य्यस्योत्तरदक्षिणागत्याधारे ११काले तथा च। "तपस्तपस्यौ शिशिराद्वसुश्च माधवश्च वासन्तिकाद्वसुः शुक्रश्च शुचिश्च ग्रैष्माद्वसुः अथैतदुत्तरायणं देवानां दिनं नभश्च नभस्यश्च वार्षिकाद्वसुं इषश्च ऊर्जश्च शारदाद्वसुः सहश्च सहस्यश्च हैमन्तिकाद्वसुः अथैतद्दक्षिणायनं देवानां रात्रिः" इति श्रुतौ "अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदोजनाः। धूमोरात्रिस्तथा कृष्णः षण्मासादक्षिणायनमिति" गीतायाञ्च षण्मासानामेव अयनत्वेनाभिधानात्। १२ अयनाभिमानिदेवेषु "आतिवाहिकास्तल्लिङ्गात्" ब्र०सू०। अर्च्चिरादीनां तदभिमानदेवतापरत्वव्यवस्थापनात् "तेऽर्चिषमभिसम्भवन्ति अर्च्चिषोऽहः अह्न आपूर्य्यमाणपक्षम् आपूर्य्यमाणपक्षात् यान्षडुदङ्एति तान्मासान् मासेभ्यः संवत्सरमित्युपक्रम्य स एतान् ब्रह्म गमयतीति" छा०उ० श्रुतौ ब्रह्मगमयितृत्वोक्तेः तेषां चेतनपरत्वौचित्यम्। "अयते याति अनेन ऋतुत्वेन सूर्य्योदक्षिणात्तरां वेति

ऋतुत्रयमयनं तथा च वाजसनेयिनः पञ्चाग्निविद्यायां दक्षिणोत्तरमार्गयोः समामनन्ति। "यान् षण्मासान् दक्षिणादित्य एति, यान् षण्मासानुदङ्ङादित्य एतीति" तथा छन्दोगा अधीयते। "यान् षड्दक्षिणैति- मासान् तान्, यान् षडुत्तरैति मासांस्तानिति" तैत्तिरीयाः क्रतु यष्टब्राह्मणे पठन्ति "तस्मादादित्यः षण्मासान् दक्षिणेनैति षडुत्तरेणैति" एवंचादित्यगतिसुपजीव्यायननिष्पत्तेः सौरमेवैतत् अत एव विष्णुधर्मोत्तरे सौरमानमधिकृत्योक्तम् "ऋतुत्रयं चायनं स्यादिति" केचित्तु चान्द्रमानेनायनद्वयमभ्युपगच्छन्ति "मार्गमासादिकैस्त्रिभिः ऋतुभिः कल्पितः कालः षण्मासात्मकस्तुत्तरायणं ज्यैष्ठमासादिकैः दक्षिणायनमिति तत्र प्रमाणं ज्योतिःशास्त्रादौ मृग्यं श्रौतस्मार्तकर्मानुष्ठाने तु मकरकर्कटसंक्रान्त्यादिक एवायनद्वयकाल इति यथोक्तस्मृतिस्मृतिभ्यामवगन्तव्यम् उत्तरायणस्य यागकर्माङ्गत्वं कृत्वा अधीयते 'उदगयन आपूर्य्यमाणे पक्षे पुण्याहे द्वादशाङ्गुलपसद्दती भूत्वेत्यादि"। चौलादीनामुत्तरायणकर्त्तव्यता स्मृत्यृतिषु प्रसिद्धा। सत्यव्रतय देवताप्रतिष्ठादीनामुत्तरायणदक्षिणायनयोर्विधिनिषेधाश्च "देवतारामवास्यादिप्रतिष्ठोदङ्मुखे रवौ। दक्षिणाभिमुखे कुर्व्वन् न तत्फलमवाप्नुयादिति" उमदेवतानां प्रतिष्ठा दक्षिणायने कर्त्तव्या तथा च वैखानससंहितायामभिहितम् 'भालभैरववाराहनारसिंहत्रिविक्रमाः। महिषासुरहन्त्री च स्थाप्या वै दक्षिणायन इति" कालमाधवीये माधवः। "सौरेण द्युनिशोर्मानं षड्गीतिघ्नानिच। अयनं विषुवच्चैव संक्रान्तेः पुण्यकालता"। सू०सि० उक्तेः अयनं सौरमानेनैवेत्यवगम्यते। क्रान्तिवृत्तारम्भस्थानचलनं च सर्वेषां राशीनां स्वस्थानात् प्राक् पश्चाद्वा अयनांशानुसारेणान्यत्र स्थाने भवति। तस्य स्फुटायनमयनसंक्रान्तिशब्दे वक्ष्यते। "संक्रान्तिषु यथा कालस्तदीड्योऽयने तथा" का०मा० स्मृतिः। एति सर्व्वत्रिमनेनकरणे ल्युट्। १२सत्रविशेषे यथा गवामयनम् तद्विवरणं गवामयनशब्दे। अयनेन निर्वृत्तम् अयनस्येदं वा अण्। आयनम् अयनसाध्ये अयनसम्बन्धिनि च त्रि०। 'युतायनांशोद्भवकोटिघिङ्गिनी जिनांशभौर्व्या गुणिता विभाजिता। द्युजीवया लब्धफलस्य कार्म्मुकम् भवेच्छराङ्गायनदिक्कमायनमिति" आयनं वलनमस्फुटेषुणा सङ्गुणं द्युगणभाजितं हृतम्। पूर्व्वपूर्व्वस्मृतिभिर्दृङ्निश्चितव्यक्तोदयच्छदायनाः कलाः "अस्फुटेषुवलनाच्चतिस्तु वा षष्टिहृत् फलकलाः स्फुरायनाः" इति च सि०शि०। अयने भवः ठञ्। आयनिकः अयनभवे त्रि० स्त्रियां ङीप्।

अयनकाल पु० अयधारः कालः। अयनांशाधारे काले

अयन(च)वलन न० ६त०। अयनांशस्य प्राक् पश्चाद्वा स्थानान्तरचलने।

अयनज पु० अयनात् राशीनां स्वस्थानचलनात् जायते जन-ड। अयनांशजाते मासादौ।

अयनभाग पु० अयनज्ञापको भागः। अयनांशे।

अयनमास पु० अयनकृतः मासः। अयनांशानुसारेण दिनमानादिज्ञानार्थे कल्पिते मासे।

अयनसंक्रम पु० अयनांशानुसारेण संक्रमः। मेषादिषु राशिषु अयनांशानुसारेण ग्रहाणां प्रभाषुञ्जसञ्चारे अयनसंक्रान्तिशब्दे विवरणम्।

अयनसंक्रान्ति स्त्री अयनेन राशिचक्रस्य पश्चात्, प्राग्वा गत्वा कृता संक्रान्तिर्यहाणां प्रभाषुञ्जस्य सञ्चारः सम्+क्रम-क्तिन्। चलसंक्रान्तौ, संक्रान्तिस्त्रिविधा मध्याचला अचला चेति भेदात् मध्यानुपदं वक्ष्यते मेषादिभिर्द्वादशभिः स्थानैर्विभक्तस्य निरावारतया स्थितस्य राशिचक्रस्य दोलायमानतया प्राक् पश्चाद्वा निर्दिष्टमेषादिस्थानात् पश्चात् पूर्व्वं वा राश्यन्तरे मण्डलगतिं विनापि ग्रहाणां प्रभाषुञ्जमात्रसंचारः चलसंक्रान्तिः अनियतस्थानतया चलत्वात्। निर्दिष्टराशिस्थानेषु ग्रहाणां मण्डलसञ्चारः अचलसंक्रान्तिः राशिसंक्रान्तिरिति चोच्यते तस्या नियतमेकस्थानएव जायमानत्वादचलत्वम्। अनयैव संक्रान्त्या यथा मासादिव्यवहारे न दोषः चलसंक्रान्त्या तु बहवो दोषास्तथा निरूप्यते तथा हि ग्रहाणामाक्रान्तराशितो राश्यन्तरक्रमणं संक्रान्तिरित्युच्यते सा च द्विधा मध्यमा स्फुटा च। षट्कर्म्मसंस्कृतो मध्यग्रहो यदा राश्यन्तरं संक्रामति तदा मध्यसंक्रान्तिरित्युच्यते यदा तु स्फुटीकृतसंस्कारो ग्रहो राश्यन्तरं गच्छति सा स्फुटसंक्रान्तिरित्युच्यते तत्र मध्यसंक्रमस्य स्फुटीकरणार्थत्वादेव तज्जनितसंक्रान्तेः स्फुटीकार एवोपयोगात् लोकशास्त्रयोर्व्यवहारे न तस्य उपयोगः किन्तु "गुरोर्भध्यमसंक्रान्तिहीनोवत्सान्द्रवत्सरः। अधिसंवत्सरस्तस्मिन् कारदेव सवत्सरम्। वर्जनीया प्रयत्नेन प्रतिष्ठा सर्व्वकर्म्मिणाम् स्फुटसंक्रान्तिहीनेऽस्मिन् जेऽप्याङ्गरधिमासकम्" इति कालमाधवीयधृतस्मृतेः मध्यसंक्रान्तेरपि अधिमासरोपयोगिता तदन्यत्र तु तस्या-

नोपयोगः इति षट्संक्रान्तेरेव लोकशास्त्रोपयोगः। षट्संक्रान्तिरपि द्विविधा सायनांशा निरयनांशा चेति भेदात् यदा सिद्धान्तगणनयायनांशसंस्कृतो यद्भोराश्यन्तरं गच्छति सा सायनांशा संक्रान्तिः। यदा तु अयनांशसंस्काररहितः राश्यन्तरं गच्छति सा निरयनांशा संक्रान्तिरुच्यते। संक्रान्तिश्च "त्रुटेः सहस्रभागोयः स कालोरविसंक्रम" इत्युक्तसूक्ष्मकालरूपा एतच्च क्रियैव काल इति मते अन्यमते तु संक्रान्त्यनुपलक्षितस्ताडशसूक्ष्मकाल इति भेदः। ताडश सूक्ष्मकालस्य संक्रान्तिशब्दार्थत्वे संक्रान्तिशब्दे वक्ष्यमाणदानाद्यङ्गत्वासम्भवेन "मुख्याभावे प्रतिनिधिः शास्त्रार्थं" इति न्यायेन गौणकालस्याश्रयदर्त्तव्यता स्नानाद्यङ्गत्वान्यथानुपपत्त्या च तथा कल्पत्वे मुख्याद्यूक्तकालविशेष एव तदङ्गत्वेन कल्पते यथोक्तं कालमाधवीये स्नानदानाद्यङ्गभूते संक्रान्तिकाले मुख्यकालस्यासम्भवादनुकल्पएवादर्त्तव्यः यथाहं देवलः "संक्रान्तिसमयः सूक्ष्मोदुर्ज्ञेयः पिशितेक्षणैः। तद्योगादयधर्योर्द्वं त्रिशंद्घाद्याः पवित्रिताः" इति देशव्यवधानराहित्येनात्यन्तसंश्लिष्टयोः पूर्वोत्तरराश्योर्मध्ये सूर्यः पूर्वराशिं परित्यज्य यावता कालेनोत्तरराशिं प्रविशति स कालः योगदृष्टिं विना मांसदृष्ट्या दुर्ज्ञेयः अतोऽनुदाने मुख्यसंक्रान्तिकालग्रहणासंभवात् संक्रान्तिसम्बन्धिनौ पूर्वोत्तरकालौ ग्रहीतव्यौ संक्रान्तेः पूर्वोत्तरयोरेकैकस्मिंस्त्रिंशद्घटिकाः पुण्या इति सामान्यत उक्तमिति"। तत्र यच्चलसंक्रान्तेरिव चलसंक्रान्तेरपि पुण्यकालनाक्ति यथोक्तं तत्रैव मेषादिसंक्रान्तयो यस्मिन्दिने भवन्ति तस्माद्दिनात् पूर्वेभ्य एकादशदिनेभ्यः प्राचीने दिने मेषायनमेवं दृषभायनमित्येवं तत्तन्नामाङ्कितम्भवति तत्काले तस्मिन्नयने स्नानादिषु पुण्यकालमाह जाबालिः "संक्रान्तिषु यथा कालस्तदीयेऽप्ययने तथा। अयने विंशतिः पूर्वा मकरे विंशतिः परेति" मकरव्यतिरिक्तैकादशसंक्रान्तिसम्बन्ध्ययनेषु तत्तत्संक्रान्तिवत् पुण्यकालोऽवगन्तव्यः मकरसंक्रान्तिसंम्बन्धिनि त्वयने संक्रान्तिवैलक्षण्यं, तदुक्तं मकरभिन्ने प्राचीना विंशतिघटिकाः पुण्याः मकरसंक्रान्तौ तु पाश्चात्या विंशतिघटिकाः पुण्या इति"। न केवलमादित्यस्यैव संक्रान्त्ययने पुण्यकालः किन्तु सर्वेषामपि ग्रहाणां नक्षत्रराशिसंक्रमे पुण्यकालो भवति रव्यांस्तु विशेषोरवेरेव राशिसंक्रमे पुण्यकालः अयनसंक्रमे तु चन्द्रादीनामपि कालविशेषे पुण्यता यथाह तत्रैव ज्योतिःशास्त्रे "नक्षत्रराश्योरविसंक्रमे सुरर्वाक् परस्ताद्दशचन्द्रनाद्याः पुण्याससूर्येन्दोस्त्रिधरालवैर्युता एकैक नाड़ी सुनिभिः शुभोक्ता। नाद्यचतस्रः सपलाः कुजस्य। बुधस्य तिस्रः पलविंशयुक्ताः। अध्यर्द्धनाद्याः पलसप्तयुक्ता गुरोश्चतस्रः सपलाश्च शुक्रे। द्विनागनाद्याः पलसप्तयुक्ताः शनैश्चरस्यामिहिताः शुभाख्याः। आद्यन्तमध्ये जपहोमदानं कुर्वन्नवाप्नोति सुरेन्द्रधामेति"। अयमर्थः आदित्यस्य राशिनक्षत्रगमने अर्वाक् परतश्च नाड्य घटिकाः पुण्यकालः तथा चन्द्रस्यापि घटिकैका पलानि च त्रयोदशार्वाक्परतश्च पुण्यकालः। एवं मङ्गलस्य चतस्रो घटिकाः पलमेकं च पुण्यकालः तथा बुधस्य तिस्रो घटिकाश्चतुर्दश पलानि च पुण्यकालः बृहस्पतेरपि सार्द्धचतस्रो घटिकाः सप्त पलानि च पुण्यकालः। शुक्रस्य चतस्रो घटिकाः पलमेकञ्च पुण्यकालः शनैश्चरस्य द्व्यशीतिघटिकाः पलानि च सप्त पुण्यकालः। पीयूषधारायां तु जैमिनिवचनत्वेन एतद्वचनमुपन्यस्तम्। मेषायनादिषु संक्रान्तिस्फुटीकरणञ्च दृङ्गणितचिन्तामणौ "तथायनांशाः खरसाहताश्च षष्टार्कगत्या विहृता दिनादि। मेषादितः प्राक् चलसंक्रमाः स्युर्दाने जपादौ बहुपुण्यदास्ते"। यथा राशिसंक्रमाः बहुपुण्यदास्तथा चलसंक्रमा अपीति द्योतनाय तथाशब्दः। अयनांशाः षष्ट्या गुण्या षष्ट्या सूर्यगत्या विहृताः लब्धैर्दिनाद्यैः दिनघटीपलैः कलां कृत्वा मेषादिद्वादशराशिसंक्रमणकालात् प्राक्चलसंक्रमाश्चल संक्रान्तयः चलसंक्रमदाने ब्राह्मणेभ्यो दक्षिणादाने जपादौ जपश्राद्धहोमादौ बहुपुण्यदा भवन्ति तदुक्तं वशिष्ठसिद्धान्ते चलसंक्रमशुद्धमासे संक्रमोयः स संक्रमः अजागलस्तन इव राशिसंक्रान्तिरुच्यते" पुलस्त्यः "अयनांशसंस्कृतोभानुर्गोलेचरति सर्वदा असंस्कृता राशिसंक्रान्तिस्तुल्यः कालविधिस्तयोः। स्नानदानजपश्राद्धव्रतहोमादिकर्म्मणि यत् कृतं चलसंक्रान्तावयं पुरुषोऽश्नुते" इति रत्नमालायाम् "यावद्भिरंशैरयनच्युतिः स्यात्तद्भोग्यकालेन दिवाकरस्य। च्युतिर्भवेद्विष्णुपदादिकानां रहस्यमेतन्मुनिभिः प्रदिष्टमिति" अयनांशानयनञ्च अयनशब्दे दर्शितम्। तत्रद्राक्ष्यादिमार्गेषु सूर्यादितेजःपुञ्जसञ्चारचलसंक्रमोभगोलमध्यसंपर्कश्च राशिसंक्रम इतिविषयविवेकः तद्यथा रथ्यायां प्राक् पश्चाद्वा नीयमानस्य दीपस्याग्रे दीपप्रभा यस्मिन्प्रदेशे गच्छति तस्मिन्नेव प्रदेशे स्थानान्तरेण दीपोऽपि गच्छति एवं सर्वेषामपि ग्रहाणां चलसंक्रमा द्रष्टव्याः नन्वेवं चलसंक्रमस्य सूक्ष्मत्वे तेनैव मानेन पञ्चाङ्गगणना स्यात् इतिचेत् न अश्विन्यादिभानां विसंवादात् तथाहि सूर्यांक्रान्तराशितश्चन्द्रनक्षत्रस्यैव सन्ध्याकाले प्रथमसदयोज्योतिषे प्रसिद्धः सर्वसम्मतश्च। तत्

यदि अयनांशशोधनमन्तरेणैव सूर्यस्य तत्तद्राशिषटकनक्षत्रस्थितिस्वीकारस्तदा इदानीमयनांशानुसारेण २०,३५, ४४, एतदंशादितः पूर्वं रवेर्मेषादौ गत्वावश्यकत्वात् तस्य च तदुपटकनक्षत्रस्थितेस्तत्तद्वर्षगतनक्षत्रस्य सन्ध्यायां प्रथमोदयापत्तिर्न च तथा दृश्यते तथा यस्मिन् दिने इदानीममापूर्णिमादयो दृश्यन्ते ततः पूर्वं २०,३५,४४ सूर्यचन्द्रयोरेकराशिस्थत्वेन अमावस्यापत्तिस्ततः पञ्चदशेऽहनि पूर्णिमापत्तिश्च नचैतत् प्रत्यक्षसंवादीति। अयनांशशोधनेन निरयनांशसंक्रमादितस्तु सर्वं प्रत्यक्षसंवादि। किं च सायनसंक्रमरहितस्य चान्द्रमासस्याधिमासत्वव्यवहारप्रसङ्गः संक्रान्तिद्वययुतस्य तस्य क्षयमासत्वव्यवहारप्रसङ्गश्च। एवं च बहुविप्लवात् चलसंक्रान्तेः सुस्थत्वेऽपि तेनैव मासवर्षगणनादिशङ्का न कार्या प्राग्प्रदर्शितपुलस्य वचनेन, अयनशब्दे दर्शितेन सौरागमवाक्येन, "दिनरात्रि प्रमाणानां निर्णयो न भसंक्रमात्" अतः सकलकर्म्माणि" इति, सिद्धान्तशिरोमणिवाक्येन च स्मार्त्तकर्म्मविशेषे, लग्नस्नानादिकर्म्मस्वेव तस्य सुस्थत्वाभिधानात् न तेन सर्वव्यवहारः अन्यथा तत्तद्विशेषोपादानं व्यर्थं स्यात्। एकान्तेन राशिसंक्रमानङ्गीकारे प्रागुक्तवचनजाते राशिसंक्रान्तिवत् पुरुषकालताभिधानानुपपत्तिः तथा च यथा मासवत्सराणामनेकविधत्वेऽपि क्रियाविशेषे तेषां याच्ञता एवं चलस्थिरसंक्रान्त्योरपि विषयविशेषेऽपि याच्ञता। किञ्च सायनसंक्रमाश्रयेण सर्वव्यवहारे अनेके विसंवादा पीयूषधारायां दर्शिताः। तेऽप्यत्रोपदर्श्यन्ते। सायनगणनयात्वयोर्म्येऽपि काले यद्यदाचिदेकनक्षत्रान्तरे नक्षत्रयोरन्तरे वोपलभ्येत सूर्यचन्द्रयोस्तु तेजोवद्धत्वान्नक्षत्रतेजःपरिभवान्न नक्षत्रसंनिधावुपलम्भो यद्यपि। तथापि कदाचित् क्षीणचन्द्रस्योपलम्भोऽस्त्येव गोचरादिविषयकदृष्टफलानि एकराशिस्थितयद्दयोगफलानि च विरुध्येरन् यद्दयादिविसंवादश्च। तस्मान्निरयनगणनयैव सर्वोऽपि व्यवहारो युक्तः यत्तु अजागलस्तनद्वयेत्यादि प्रागुक्तवचनम् "पुरुषत्वं राशिसंक्रान्तेः केचिदाहुर्मनीषिणः नैतन्मम मतमित्यादिवशिष्ठवाक्यञ्च तत् चलसंक्रान्तेः स्तुतिपरम् "न निन्दानिन्दनीयं निन्दति किन्तु विधेयं स्तौतीति" न्यायात् अन्यथा संक्रान्तिशब्दे दर्शयिष्यमाणानां राशिसंक्रान्तिपुरुषकालताबोधकवचनानां बहूनां विप्लवापत्तेः "दिनपतिसंक्रमात् प्राक् षोडश नाड्यस्तु पुरुषकालः सः। परतः षोडश नाड्यः स्नानदानकार्य्येष्विति" वशिष्ठस्यैव वचनान्तरेण विरोधः स्यात् अयनसंक्रान्तिषु तु अन्यविधस्यैव तेन पुरुषकालतोक्तेस्ततो विलक्षणविषयत्वौचित्यं तादृशवचनानाम्।

अयनांशज पु० अयनस्य अंशः तज्जः। प्राथमिकक्रान्तिद्वारस्थानातिक्रमेण जाते मासे "अयनांशजमासान्ते व्युत्क्रमेणादितो बुधैः" ज्यो०तत्त्व०।

अयव पु० अल्पोयवस्तुरुस्योवा। इडरीषजे क्षमिभेदे क्षमिशब्दे विवरणम् नास्ति यवः यत्नसाधनं यस्य। अङ्कतया यवहीने तिलसाधने २पिलत्वादौ। इु मिश्रणे कर्त्तरि अच् न०त०। ३असम्बद्धे गतौ ४रविचन्द्रयोर्वियोजके क्षणपक्षे च "अयवानामाधिपत्यमिति पूर्वपक्षा वा यवाश्चयरपक्षा वा अयवास्ते ह्येदं सर्वं युवते चायुवते" इति शतप्रा०।

अयवस् पु० न युतः पृथग्भूतौ चन्द्रसूर्य्यौ यत्र यु-असुन् न०त०। अर्द्धमासे पक्षे। "सञ्जरद्भो अयवोभिः" यजु० १२७४ "यवाश्चायवाश्चार्द्धमासावोच्यन्ते वे०दी०।

अयशस् विरोधे न०त०। यशोविरोधिनि अपवादे। अयशो-"महदाप्नोति नरकञ्चैव गच्छति" मनुः। "स्वभावलोलेत्व यशः प्रस्टष्टम्" रघुः। न०ब०। कीर्त्तिशून्ये त्रि० वा कप् अयशस्कः तत्रैव।

अयशस्कर त्रि० अयशः करोति कृ-ताच्छील्यादौ ट स्त्रियां ङीप्। अपवादकरे।

अयशस्य न० यशसे हितम् यत् यशस्म् विरोधे न०त०। अपवादकरे "पैशुन्यानृतालस्यायशस्यानि त्यजेत्" मनुः।

अयश्चूर्ण न०६त०। "गलदम्लं तरङ्गस्य सुयुक्तं भाववेदति। निःक्वाथेन विडङ्गानां चूर्णं प्रथमनन्तु तत्। अयश्चूर्णान्यनेनैव विधिना योजयेद्भिषक्" सुश्रुतोक्ते लौहचूर्णघटितौषधभेदे।

अयस् न० एति चलति अयस्कान्तसान्निध्यात् इण-असुन्। लौहे धातुभेदे तस्य स्थिरत्वेऽपि अयस्कान्तसान्निध्याच्चलनात्तथात्वम्। "सुहृदयोर्हृदयः प्रतिगर्ज्जताम्" "अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषाम्" इति च रघुः "ताम्रायःकांस्यरैत्यानां त्रिपुणः सीसकस्य च" अयः कांस्यपलानाञ्च द्वादशाष्टमपाक्रता" इति च मनुः। अयसः पाकादि अमृतसारशब्दे ३२६ पृष्ठे दृश्यम्। अधिकं लौहशब्दे द्रष्टव्यम्। उपचारात् २अयोनिर्म्मिते शस्त्रादावपि। "तेजोऽयसो न धाराम् ऋ०६,३,५, अयसः अयोमयस्य परश्वादेर्धाराम्" भा०। हिरण्यशब्दोऽयो अस्यपादाः ऋ० १,१६२,६भावे असुन्। ३गमने न०। 'ज्योतिरकारि हरितो

नाऽयसे ऋ० १,५७,२ "अयसे गमनाय" भा० अयसा-निर्म्मितम् अण् । आयसम् लौहमये कठाहादौ अयसो-विकारः अण् आयसः । लौहविकारे 'अयस्कान्तदायसम्' रघुः "आयसेन तु पात्रेणेत्यादि २७८ पृष्ठे दर्शितम् । मयट् अयोमयः । वेदे तु अयस्मयादि० नि० अयस्मयः । लौहविकारे त्रि० स्त्रियां ङीप् । चतुरर्थ्यां अण् । आयसीयः अयस्चिह्नितदेशादौ त्रि० स्त्रियां ङीप् । एति यज्ञस्थानम् इण असुन् । २वज्रौ पु० । "अयाश्चाग्नेऽस्यनभिशस्त्यायाश्च सत्यमित्त्वमया असि । अयानो यज्ञं वहास्या नोधेहि भेषजम्" यजु० । ४हिरण्ये निरु० "रजोहा विचर्षणिरभियोनिमयोहतम् अभ्यनूषतायोहतम् ऋ० ६,१,२,८०, "अय इति हिरण्यनामेति भा० "हिरण्यपाणिः प्रतिदोषमास्यात् अयोहनुर्यजते इति ऋ० ६,७१,१, अयोहनुर्हिरण्यमयहनुः" भा० ।

अयस्कंसा पु०न० । अयोविकारः कंसं पात्रं सत्वम् । लौहनिर्म्मिते पानपात्रे ।

अयस्कर्णी स्त्री अय इव कर्णोऽस्य गौ० ङीष् । लौहतुल्यकठिनकर्णयुक्तायां स्त्रियाम् ।

अयस्कान्त पु० अयसु कान्तः रमणीयः कस्कादित्वात् सत्वम् । (कान्तिलोह) इति ख्याते १लौहभेदे । अयसां कान्तः इष्टः सन्निधिमात्रेणाकर्षकत्वात् । सन्निधिमात्रेण लौहाकर्षके (चुम्बक) इति ख्याते २प्रस्तरभेदे । "यमोर्यतध्वमाकृष्टमयस्कान्तेन लौहवत्" कुमा० "स चकर्ष परस्कान्तदयस्कान्तमिवायसम्" रघुः । अयस्कान्तेनाकर्षणीयशल्यापनयनार्थे व्रणचिकित्साभेदे यथोक्तं सुश्रुते "अनुलोममनवबृहकर्णमनल्पव्रणमखमयस्कान्तेन" ।

अयस्काम त्रि० अयः कामयते कम-अण् उप०स० सत्वम् । लौहाभिलाषिणि । [सत्वम् । लौहकारे (कामार) ।

अयस्कार त्रि० अयोविकारं करोति कृ-अण् उप०स०

अयस्कुम्भ पु० अयोविकारः कुम्भः सत्वम् । लौहमये घटे ।

अयस्कृशा स्त्री अयःसहिता कृशा शाक०त० सत्वम् । लौहसहितकृशायाम् ।

अयस्कृति स्त्री अयसा कृतिः चिकित्साप्रक्रिया सत्वम् । सुश्रुतोक्ते महाकुष्ठचिकित्साभेदे "अथ अर्द्धमयस्कृतीर्व्याख्यास्यामः । तीक्ष्णलोहपत्राणि तनूनि लवणवर्गप्रदिग्धानि गोमयाग्निप्रतप्तानि त्रिफलाशालसारादिकषायेण निर्वापयेत् पोडशवारांस्ततः खदिराङ्गारतप्तान्युपशान्ततापानि कृष्णचूर्णानि कारवेल्लाढतान्नवपरिस्रावितानि ततो यथावलं मात्रां सर्पिर्भुञ्जां संसृज्योपयुञ्जीत । जीर्णे यथाव्याध्यनन्नमलवणमाहारं कुर्व्वीत । तुलासपयुज्य कुष्ठमेहभेदः व्रणपाण्डुरोगोन्मादापस्मारानपहृत्य वर्षशतं जीवति तुलायां तुलायां वर्षशतगुणोत्कर्षः । एतेन सर्व्वलौहेष्वयस्कृतयो व्याख्याताः ।

अयस्कृत पु० अयोनिर्म्मितः स्कृतः वा विसर्गलोपः । लौहमये १स्फटस्फोटे ६त० । तथाविधस्फटस्फोटयुक्ते २स्फटे । "अयस्कृतस्फटपतीनां वै" शतब्रा० अयस्कृता स्फटपतयोऽमिति तेषाम् हीनद्रव्यकत्वादाक्षेपः भा० । ७त० ३अयोमयाक्षे रथादौ त्रि० । "व्युटावयस्कृतसदिता सर्व्वसः" ऋ० ५,६२,८, अयस्कृतमयोमयशङ्कुं गर्त्तं रथं वेति भा० । ४ऋषिभेदे पु० तस्य गोत्रम् अण् आयस्कृतः तस्य बहुषु लुक् । अयस्कृताः । गौ० पाटात् ङीष् अयस्कृती ।

अयस्पात्र न० अयोमयं पात्रं सत्वस् । लौहमये पात्रे ।

अयस्मय त्रि० अयोविकारः अयस्+मयट् वेदे नि० मत्वम् स्त्रियां ङीप् । अयोमये लौहमये "असुरा एषु लोकेषु पुरश्चक्रिरेऽयस्मयमेवास्मिँलोके रजतामन्तरीक्षे हरिणीं दिवि" शतब्रा० । "भूम्या अवस्थयस्पातु" अथ० ५,२८,६, शतब्राह्मणयोः अथ० ४,३७,८, छन्दसीति प्रायिकं तेन लोकेऽपि "परिभ्रमन्तमनिशं तीक्ष्णधारमयस्मयम्" भा० आ० प० "ततः शक्तिं स्फोट्य तु रुक्मदण्डमयस्मयीम् भा० द्रो० प० ।

अयस्मयादि पु० ६त० "अयस्मयादीनि छन्दसि" पा० उक्ते मत्वादिकार्य्यार्थे निपातनीये अञ्जतिगणभेदे ।

अयाचित न० याच+क्त न०त० । १अमृताख्यद्रव्यौ "अमृतं स्यादयाचित"मिति मेदि० । २अप्रार्थिते त्रि० । "अयाचितोपस्थितमम्बु केवलम्" "अयाचिताहृतं प्राहुरमपि दुष्कृतकर्म्मणः" स्मृतिः "याचेर्हृदादिपाठात् गौणे कर्म्मणि" क्त । यस्य सकाशे न याच्यते ३तस्मिन् जने च ।

अयाज्य त्रि० न याजयितुमर्हः यज-णिच्-कर्म्मणि यत् न०त० । पतितादौ स्मृतिनिषिद्धयाजने । ते च स्मृतौ दर्शिताः यथा देवलः "पतितेन सहोषित्वा जानन् संवत्सरं नरः मिश्रितस्तेन सोऽज्ञाने स्वयञ्च पतितो भवेत् । याजनं योनिसम्बन्धं साध्यायं सहभोजनम् । कृत्वा सद्यः पतत्येव पतितेन न संशयः । बौधा० "संवत्सरेण पतति पतितेन न संशयः याजनाध्यापनादूढौनात् सद्यो नयनासनात् ' ।

मनुविष्णू। "संवत्सरेण पतति पतितेन सहाचरन् याजनाध्यापनाद्यौनात् न तु यानासनाशनात्" पैठीनसिः "संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद्यौनान्न त्वेकशयनासनात्"। पतितानभिधायाह शमन्तुः। "यश्च तैर्यग्योनमौक्षशौवाणां सम्बन्धानामन्यतमेन सह संवत्सरं सम्भूयकर्मकियात् तस्याप्येतदेव प्रायश्चित्तं विद्यात्" इत्यात् कुर्यात् द्वादशवार्षिकमित्यर्थः मौक्षं सुखसाध्यमध्यापनं स्तोवं सुखसाध्यं याजनमित्यर्थः अत्र याजनादीनामन्यतमेन संवत्सरेण पततीत्यवगम्यते प्रा०वि०। हारीतः। "संवत्सरेण पतति पतितेन सहाचरन् याजनाध्यापनाद्यौनादेकशय्यैकभोजनात्" इत्यत्रिः। "षण्मासिके तु संयोगे याजनाध्यापनादिना। एकवासनशय्याभिः प्रायश्चित्तार्द्धमाचरेत्"। "याजनादिकं लघुगुरुभेदेन द्विविधं भवति तत्र गुरुज्ञानकृतेन याजनादिना एकैकेन सद्यःपातः तेनैवाज्ञानकृतेन वारद्वयाभ्यासात्। लघुनि याजनादावज्ञानकृते संवत्सरेण पतति तस्मिन्नेव ज्ञानकृते वत्सरार्द्धेनेति व्यवस्था। तथाहि याजनं योनिसम्बन्धमित्यत्र देवलवचने पतितेन सहोषित्वा जानन्निति पूर्ब्ववचनस्थस्य जानन्निति पदस्य सम्बन्धात् ज्ञानकृतत्वे गुरुत्वं दर्शितं गुरुयाजनाध्यापनादिकमाह देवलः। "आचार्य्यादध्ययनियमशुश्रूषादिभिस्तयोर्विद्योपादानमध्ययनम्। तस्य चाचारान्वयप्रक्रमसामर्थ्यभक्तिशीलशुश्रूषोपनताय शिष्याय प्रदानमध्यापनं, पशुक्षीराज्यपुरोडाशसोमौषधिचरुप्रभृतिभिः खदिरपलाशाश्वत्थन्यग्रोधोदुम्बरप्रभृतिभिः समिद्भिः स्रुक्स्रुवोदूखलमुसलकुठारखनित्रयूपदारुचर्म्मदर्भस्रावपवित्रभाजनादिभिर्द्रव्योपकरणैः प्रोत्साहिहोतृध्वर्यु ब्रह्मादिभिः ऋत्विग्भिः काम्यनैमित्तिकानां पशादिपूर्ब्बकाणां यथोक्तदक्षिणानां यज्ञानां समापनं यजनम् एतेन याजनं व्याख्यातम्"। तथा च ज्योतिष्टोमादियज्ञानां याजनं गुरु, पूर्त्तादिकर्म्मणा याजनं लघु। कौर्म्मम् "याजनं योनिसम्बन्धं तथैवाध्यापनं द्विजः। कृत्वा सद्यः पतेज्जानन् सहभोजनमेव च"। यमः। "असत्प्रतिग्रहीतारस्तथैवायाज्ययाजकाः। नक्षत्रैर्जीव्यते यश्च सोऽन्धकारं प्रपद्यते"। वसिष्ठः। अश्रद्धानस्याभोक्तव्यश्चौरस्य च विशेषतः। न त्वेव बहुयाज्यस्य यशो धनयते बहु"। बौधायनः। "बहुप्रतिग्राह्यं वाऽप्रतिगृह्ययाज्यं वा याजयित्वाऽप्रतिग्राह्यस्य वा प्रतिगृह्य अनाशनस्य वाऽश्वमश्वित्वा तरत्समन्दीयं जपेत्"। वसिष्ठः। "एतेनैव गर्हिताध्यापकयाजकाव्याख्याता" दक्षिणात्यागाच्च पूताभवन्तीति विज्ञायते" "एतच्च स्तेतरस्योपपातकादिगर्हितस्य पञ्चमहायज्ञयाजनादिविषयमिति धर्म्मप्रदीपः" प्रा०वि०। तत्रैव बृहद्गुरोहितयाजकाध्यापकादनुद्धृत्तौ यमः। "एतेषामेव सर्व्वेषां प्रत्यापत्तिस्तु मार्गताम्। भैक्षान्नसपयुङ्नोहिजचान्द्रायणञ्चरेत्। फलं नागह्रदे तोये ह्रदवेदभिभावितम् अर्घोत्सर्गेण यन्नाम्ने तस्मात् पापात् प्रमुच्यते। अलाबुलवणं रक्तां पिबेद्बृसवर्च्चलाम्। तस्योपनयनं कृत्वा व्यवहार्य्यसदा भवेत्" इति। फलं लब्धं धनं नागह्रदे गजमज्जनयोग्यह्रदे अविभावितम् अभुक्तम्। यन्नाम्ने व्रतान्ने।

अयाज्ययाजन न० अयाज्यस्य याजनम्। अयाज्यस्य पतितादेर्याजने। याजनं च लघुगुरुभेदेन द्विधेत्युक्तमयाज्यशब्दे। "अयाज्ययाजनैर्यैव नास्तिकत्वेन च कर्म्मणाम् फलान्याशु विनश्यन्ति यानि हीनानि मन्वतः" मनुः।

अयाज्यसंयाज्य न० सम्+यज–णिच्–भावे यत् ह्रैत०। अयाज्यस्य पतितादेर्याजने "सेवायायाज्यसंयाज्यपारदार्य्यात्विक्क्रयः" इति मनुः।

अयातयाम पु० न यातोयामः समयोऽस्य। १अपर्य्युषिते २अनतिक्रान्तकाले ३विगतदोषे च। "छन्दांस्येवैतत् पुनराधाययत्ययातयामानि करोति–न वा अत्र स्रुवते न शंसन्ति तच्छन्दांस्येवैतत् पुनराधाययत्ययातयामानि करोति तैरयातयामैर्यज्ञं तन्वते" इति शत० ब्रा०। "छन्दांस्ययातयामानि" भाग०। "अयातयामानि विगतदोषाणि" श्रीधरः।

अयातु पु० भीमो भीमसेनवत् यातुर्यातुधानः न०त०। १राक्षसभिन्ने २अहिंसके च योसायातुं यातुधानेत्याह ऋ० ७,१०४,१६, अयातुमराक्षसम् भा०। "त्र्यायुषं देवा अयातुरग्ने! ऋ०७,३४,८ अयातुः अहिंसकः भा०।

अयाथातथ्य न०त०। मिथ्यात्वे। अयथातथशब्दे विवृतिः।

अयान न० न यानं चलनं यस्य। १स्वभावे निसर्गे यथा जले शैत्यं अग्नेरुष्णता न हि तत् कदापि चलतीति तस्य तथात्वम् अभावे न०त०। २गमनाभावे। यानं गमनं बाहनञ्च न०ब०। ३यानशून्ये त्रि०।

अयानय पु० द्यूते सर्व्वशारगन्तव्यशेषसोमाभूते शीर्षस्थाने व्युत्पत्तिविवरणम् मत्स्यतन्त्रस्तरलायाम् यदा आनीयन्ते शारा अस्मिन् इत्यानयः अक्षेन दक्षिणावर्त्तेनापसव्य-

गमनेनानयः अयानयः शीर्षस्थानम् । तत् नेयः ख । द्यूतविशेषे हि चतस्रोवीथयः प्रत्येकं द्वादशकोष्ठोपेताः शारास्तु त्रिंशत् ते च एकैककितवेन पञ्चदशगो याह्याः स्वामपार्श्वस्थप्रथमकोष्ठपर्य्यन्तमारभ्यान्तिमकोष्ठरूपंशीर्षस्थानरूपमयानयं दक्षिणावर्त्तेनापसव्यगत्या सर्व्वेऽपि शारा नेया अतस्ते अयानयोना इत्युच्यन्ते तत्रायं प्रकारः "ससहायस्य शारस्य परैर्नाक्रम्यते पदम् । असहायस्तु शारेण परकीयेन हन्यते इत्युक्तादिगावसेयः । परैः परकीयैः नाक्रम्यते द्वादिशाराश्रितकोष्ठं नाक्रम्यते परकीयशारेण तत्स्थानाक्रमणेन प्रतिरोधात् । असहायस्तु हन्यते इत्यतः प्रतिरोधाजनकः "अनुपदसञ्चायानयं वह्वा भक्षयति नेयेषु" पा० "अयानयः स्थानविशेषः तं नेयः अयानयोनः शारः" सि० कौ ।

अयाशु त्रि० अयमश्नाति नाशयति अय–उ–ईत० । शुभावहविधिलोपके यातुधानभेदे "खलजाःशकधूमजा उरुखा वे च भट्टभटाः कुम्भसुप्का अयाशवः । तानस्या ब्रह्मणस्पतेः प्रतीबोधेन नाशय" अथ० ८,६,१५ ।

अयास्य त्रि० यस–णिच्–शक्यार्थे यत् न०त० । १उपक्रमपवितुमशक्ये "अयुजो असमोन्मभिरेकः क्रतीरयास्यः" ऋ० ८,६२,२, "अयास्यः उपक्रमपवितुमशक्यः" भा० । यासः प्रयत्नस्तत्साध्यः यत् न०त० । २ युद्धरूपसाधनैः साधयितुमशक्ये शत्रौ। आस्यादयते निर्गच्छति अच् ष्ट०पदव्यत्ययः । ३ सुखेन निर्गमनहेतुके प्राणवायौ उपचारात् ४ तदुपासके अङ्गिरसि ऋषिभेदे । "अयास्यः स्तवमानेभिरर्कैः" ऋ० १,६२,७, "अयास्यः यासः प्रयत्नः तत्साध्यो यास्यः न यास्योऽयास्यः । युद्धरूपैः प्रयत्नैः साधयितुमशक्य इत्यर्थः यद्वा अयास्यः पञ्चवृत्तिर्मुख्यः प्राणः । स ह्यास्यान्मुखादयते गच्छति निष्क्रामति । तदुपासकोऽप्यङ्गिरा उपचारादयास्य उच्यते । तथा च छन्दोगैराम्नातम् "तं ह्यायास्य उद्गीथमुपासाञ्चक्रे एवमु एवायास्यं मन्यन्ते आस्यादयते तेनेति" । अथवा अयमास्ये मुखे वर्त्तत इत्ययास्यः तथा च वाजसनेयकम् "ते होचुः क नु सोऽभूद्यो न इत्थमसक्ष्यत्ययमास्यान्नरितीति" । पूर्ववदुपासकोऽप्ययास्यः" भा० ।

अयि अव्य० इण–इन् । १प्रश्ने, २अनुनये, ३संबोधने, ४अनुरागे च "अयि सन्ति देहि दर्शनम्" "अयि जीवितनाथ । जीवसि" इति च क्रमा० । "अयि जानीषे रेभिलस्य सार्थवाहस्य सूनुम्" सूच० ।

अयुकुकुद पु० अयुग्माः सप्त सप्त छदा अस्य । सप्तपर्णे वृक्षे तस्य हि प्रत्येकपल्लवे सप्त सप्त पर्णानि विद्यन्ते । "वसुरयुक्छदयुच्छुगन्धयः" माघः । अयुक्पत्रादयोऽप्यत्र ।

अयुक्त त्रि० युज–क्त न०त० । १विषयान्तरासक्ततया कर्त्तव्येऽनवहिते, २अनुचिते, ३आपद्गते ४असंयुक्ते च "अयुक्तः प्राकृतस्तब्धः शठो नैकृतिकोऽलसः मीता" अयुक्ताः अनवहित इति आ०त० रघु० । "नचायुक्तस्य भावना" गीता ५अयोग्ये "अयुक्तरूपं किमतः परं वद" कुमा० । अयुक्तं शपथं कुर्व्वन्नयोग्योयोग्यकर्म्मकृत् । दैवहिर्मुखे "अयुक्तः कामकारेण फले सक्तोनिबध्यते इति गीता" "अयुक्तः बहिर्मुखः" म०त० रघु० । युक्तियुक्तं युक्तम् न०त०७युक्तिशून्ये त्रि० । "अयुक्तं यदिह प्रोक्तम्" इति दुर्गादासः व्यभिचारीजिते च । "अयुक्तचारप्राणधिः नीति० ।

अयुक्ति स्त्री अभावे न०त० । १युक्त्यभावे । न०व० । २युक्तिशून्ये ३योजनशून्ये च त्रि० ।

अयुग न०त० । युग्मभिन्ने (विजोड़) विषमे । "युगपदयुगसदृस्तुल्यसंख्यैर्भयूखैः" माघः अयुगनेत्रः त्रिनेत्रः अयुगेषुः पञ्चशरः १अयुगत्वादयोऽप्यत्र । न०व० । २युगशून्ये त्रि० । ३भग्नयुगे रथादौ

अयुगपद् अव्य० न०त० । युगपद्भिन्ने क्रमिकभवने ।

अयुगू स्त्री इति वन्ध्यत्वम् इण–उन् अयुगौ यते गै–क्विप् । काकवन्ध्यायां स्त्रियाम् । "अयुगूः काकवन्ध्या या जाता तां न विवाहयेत्" काल्पा० स्मृतिः ।

अयुग्म न० न०त० । युग्मभिन्ने (विजोड़) १विषमे । यथा संख्यायामेकत्रिपञ्चसप्तादयः । न०व० । २तत् संख्यान्विते त्रि० । "अथेन्द्रियक्षोभमयुग्मनेत्रं" इति कुमा० । अयुग्मशरः पञ्चबाणः । अयुग्मच्छदः सप्तच्छदः अयुग्मबाहुः सप्तबाहुः "अयुग्मे विधवा नारी" उ०त०पु० "युग्मासु पुत्राजायन्ते स्त्रियोऽयुग्मासु रात्रिषु" मनुः । "द्वादशराशिषु विषमसंख्यान्वितेषु सेषमिथुनसिंहतुलाधनुःकुम्भेषु" ज्योति० प्रथमतृतीयचरणयोः ।

अयुग्मनेत्र पु० अयुग्मानि नेत्राण्यस्य । त्रिनेत्रे महादेवे "अथेन्द्रियक्षोभमयुग्मनेत्रः" कु० । अयुग्मलोचनादयोऽप्यत्र ।

अयुग्मच्छद पु० अयुग्माः सप्त सप्त छदा अस्य । सप्तच्छदे (छातिम) वृक्षे अयुग्मपत्रादयोऽप्यत्र ।

अयुग्मबाहु पु० अयुग्माः सप्त बाहवो अस्य । सप्तबाहौ सूर्य्ये । अयुग्माश्वादयोऽप्यत्र ।

अयुग्मशर पु० अयुग्माः पञ्च शरा अस्य । पञ्चबाणे कामदेवे अयुग्मबाणादयोऽत्र । बाणपञ्चकं च पञ्चबाणशब्दे वक्ष्यते।

अयुज् त्रि० न युज्यते सजातीयेन, युज-क्विन् न०त० । अयुग्मे (विजोड़) विषमे "अयुजि नयुगरेफतो यकारो युजि नजरगाच्च पुष्पितायाम्" "अयुग् दानं स्त्रीणाम्" गोभि० । "अयुक् अयुग्मान्तरम्" सं०त० रघु० "अयुजश्च पितॄन् सर्वान्" मनुः । "वयुरदुक्छदयुच्छदुगन्वय": माघः ।

अयुत त्रि० न युतः संयुक्तः सम्बद्धो वा । १असंयुक्ते २असम्बद्धे च २दशसहस्रसंख्यायाम् न०"सूर्य्याब्धिसंख्यया हिलिसागरैरयुताहतैः" सू०सि० । स वित्तेयः परः धर्म्मोनाज्ञानादितोऽयुतैः" मनुः । ४तत्संख्यान्विते च ।

अयुतनायिन् पु० अयुतं पुरुषमेधानामयुतं नीतवान् जिभूते णिनि । पुरुवंश्ये महाभौमपुत्रे राजभेदे । "पूरोस्तु भार्य्या कौशल्यानाम तस्यामथ जज्ञे जनमेजय" इत्युपक्रम्य "महाभौमः खलु प्राचेनजितीसुषवेमे तस्य पुत्रो जज्ञे अयुतनायी यः पुरुषमेधानामयुतमनयत् तेनायुतनायित्वम्" भा० आ०प० ।

अयुतशस् अव्य० अयुतमयुतम् वीप्सार्थे कारकात् शस् । अयुतमयुतमित्यर्थे ।

अयुतसिद्ध त्रि० युतः पृथग्भूतः सन् सिद्धो न भवति न०त० । कारणकपालादेरपृथग्भूततया सिद्धे १कार्य्यद्रव्ये घटादौ तथाभूते वैशेषिकोक्ते द्रव्याश्रिते २गुणे ३कर्म्मणि च तदेतदयुतसिद्धत्वं कार्य्यद्रव्यगुणकर्म्मणां वेदान्तिभिर्नाङ्गीक्रियते यथा गा०भा० । गुणकर्म्मादीनां कारणद्रव्यात्मकतां व्यवस्थाप्य द्रव्यगुणादेरयुतसिद्धत्वनिरासावोक्तम् "गुणानां द्रव्याधीनत्वं द्रव्यगुणयोरयुतसिद्धत्वादिति यदुच्येत तत्पुनरयुतसिद्धत्वमपृथग्देशत्वं वा स्यात् अपृथक्कालत्वं वा अपृथक्स्वभावत्वं वा । सर्व्वथापि नोपपद्यते । अपृथग्देशत्वे तावत् स्वाभ्युपगमोविरुध्येत कथं तन्तवारब्धो हि पटस्तन्तुदेशोऽभ्युपगम्यते नतु पटदेशः पटस्य तु गुणाः शुक्लत्वादयः पटदेशा अभ्युपगम्यन्ते न तन्तुदेशाः तथाचाहुः । "द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरमिति"।तन्तवो हि कारणद्रव्याणि कार्यद्रव्यं पटमारभन्ते तन्तुगताश्च गुणाः शुक्लत्वादयः कार्यद्रव्ये पटे शुक्लत्वादि गुणान्तरमारभन्ते इति हि तेऽभ्युपगच्छन्ति । सोऽभ्युपगमोद्रव्यगुणयोरपृथग्देशत्वेऽभ्युपगम्यमाने बाध्येत। तथापृथक्कालत्वमयुतसिद्धत्वसञ्चेत सव्यदक्षिणयोरपि गोविषाणयोरयुतसिद्धत्वं प्रसज्येत । अथापृथक्स्वभावत्वे त्वयुतसिद्धत्वे न द्रव्यगुणयोरात्मभेदः सम्भवति तस्य तादात्म्येनैव प्रतीयमानत्वात् । युतसिद्धयोः सम्बन्धः संयोगः अयुतसिद्धयोस्तु समवाय इत्यवमभ्युपगमोऽप्येव। तेषां प्राक्सिद्धस्य कार्य्यात् कारणस्यायुतसिद्धत्वानुपपत्तेः अथान्यतरापेक्ष एवायमभ्युपगमः स्यात् अयुतसिद्धस्य कार्य्यस्य कारणेन सम्बन्धः समवाय इति" एवमपि प्रागसिद्धस्यात्मलाभात्मकस्य कार्य्यस्य कारणेन सम्बन्धोनोपपद्यते इत्ययुक्तत्वात् सम्बन्धस्य । सिद्धं भूत्वा सम्बध्येत इति चेत् प्राक्कारणसम्बन्धात् कार्य्यस्य सिद्धावभ्युपगम्यमानायां युतसिद्धभावात् कार्यकारणयोः संयोगविभागौ न विद्यते इतीदमुक्तं दुरुक्तं स्यात् । यथा चोत्पन्नमात्रस्याक्रियस्य कार्य्यद्रव्यस्य विभुभिराकाशादिद्रव्यान्तरैः सम्बन्धः संयोग एवाभ्युपस्यते न समवायः एवं कारणद्रव्येणापि सम्बन्धः संयोग एवास्तान्न समवायः । नापि संयोगस्य समवायस्य वा सम्बन्धस्य सम्बन्धिव्यतिरेकेणास्तित्वे किञ्चित्प्रमाणमस्ति । सम्बन्धिशब्दप्रत्ययव्यतिरेकेण संयोगसमवायशब्दप्रत्ययदर्शनात्तयोरस्तित्वमिति चेन्न एकत्वेऽपि स्वरूपवाक्प्ररूपामेक्षयाऽनेकशब्दप्रत्ययदर्शनात् । यथैकोऽपि सन् देवदत्तोलोके स्वरूपं सम्बन्धिरूपञ्चापेक्षानेकशब्दप्रत्ययभाग्भवति मनुष्योब्राह्मणः श्रोत्रियोवदान्योबालो युवा स्थविरः पितापुत्रः पौत्रोभ्राताजामातेति । तथा चैकापि सती रेखास्थानान्यत्वेन निवेश्यमानैकदशशतसहस्रादिशब्दप्रत्ययभेदमनुभवति तथा सम्बन्धिनोरेव सम्बन्धिशब्दप्रत्ययव्यतिरेकेण संयोगसमवायशब्दप्रत्ययार्हत्वं न व्यतिरिक्तवस्त्वस्तित्वेनोपलब्धिलक्षणप्राप्तस्यानुपलब्धेरभावोवस्त्वन्तरस्य । नापि सम्बन्धिविषयत्वे सम्बन्धशब्दप्रत्ययोः सततभावपसङ्गः स्वरूपवाक्प्ररूपापेक्षयेत्युक्तोत्तरत्वात् । तथैवाऽस्वात्ममनसामप्रदेशत्वान्न संयोगः सम्भवति प्रदेशवतो द्रव्यस्य प्रदेशवता द्रव्यान्तरेण संयोगदर्शनात् । कल्पिताः प्रदेशाश्चस्वात्ममनसाम्भविष्यन्तीतिचेन्न अविद्यमानार्थस्य कल्पनायां सर्व्वार्थसिद्धि प्रसङ्गात् इत्यनेवाविद्यमानोविरुद्धोऽविरुद्धोवार्थः कल्पनीयोनातोऽधिकइति नियमहेत्वभावात् कल्पनायाश्च स्वायत्तत्वात् प्रभूतत्वसम्भवाच्च । नच वैशेषिकैः कल्पितेभ्यः षड्भ्योऽर्थेभ्योऽभ्यधिकाः शतं सहस्रं वार्थान कल्पयितव्या इति निवारकोहेतुरस्ति । तस्माद्यच्च यत्र यदुच्यते तत्तत् सिध्येत् । कश्चिद्व्यालुः प्राणिनां दुःखबहुलः संसार एवमा भूदिति कल्पयेत् अन्योवाव्यसनी सुक्लानामपि पुनरुत्पत्तिं कल्पयेत्

कस्तयोर्निवारकः स्यात् । किञ्चान्यत् द्वाभ्यामणुभ्यां निरवयवाभ्यां सावयवस्य द्व्यणुकस्याकाशेनेव संश्लेषानुपपत्तिः नह्याकाशस्य पृथिव्यादीनाञ्च जतुकाष्ठवत् संश्लेषोऽस्ति । कार्यकारणद्रव्ययोराश्रिताश्रयभावोऽन्यथा नोपपद्यते इत्यवश्यकल्याः समवायइति चेन्न इतरेतराश्रयत्वात् । कार्यकारणयोर्हि भेदसिद्धावाश्रिताश्रयभावसिद्धिराश्रिताश्रयभावसिद्धौच तयोर्भेदसिद्धिः कुण्डबदरवदितरेतराश्रयता स्यात् । नंहि कार्यकारणयोर्भेदः आश्रिताश्रयभावो वा वेदान्तवादिभिरभ्युपगम्यते कारणस्यैव संस्थानमात्रं कार्यमित्यभ्युपगमात् । किञ्चान्यत् परमाणूनां परिच्छिन्नत्वात् यावत्योदिशः षडष्टौ दश वा तावद्भिरवयवैः सावयवास्ते स्युः सावयवत्वादनित्याश्चेति नित्यत्वनिरवयवत्वाभ्युपगमो बाध्येत । यांस्तं दिग्भेदभेदिनोऽवयवान् कल्पयसि तएव मम परमाणव इति चेन्न स्थूलरूक्षतारतम्यक्रमेणा परप्रकारत्वेन नाशोपपत्तेः। यथा पृथिवी द्व्यणुकाद्यपेक्षया स्थूलतमा वस्तुभूतापि विनश्यति ततःसूक्ष्मं सूक्ष्मतरञ्च पृथिव्येकजातीयकं विनश्यति ततोद्व्यणुकं तथा परमाणवोऽपि पृथिव्येकजातीयकत्वाद्विनश्येयुः । विनश्यन्तोऽवयवविभागेनैव विनश्यन्तीतिचेन्नायं दोषः यतोऽतकाठिन्यविलयनवदपि विनाशोपपत्तिमवोचाम । यथाहि इतस्तुषणीनामविभज्यमानावयवानामप्यग्निसंयोगात् द्रवभावापत्त्या काठिन्यविनाशोभवति एवं परमाणूनामपि परमकारणभावापत्त्या विनाशोभविष्यति । तथा कार्यारम्भोऽपि सावयवयवसंयोगेनैव केवलेन भवति क्षीरजलादीनामन्तरेणाप्यवयवसंयोगान्तरं दधिछिमादिकार्यारम्भदर्शनात्" । ह० उ० भा० सत्कार्यव्यवस्थापनेहेत्वे 'द्विनिष्ठत्वात् सम्बन्धस्यायुतसिद्धानामदोष इति चेत् न । भावाभावयोरयुतसिद्धत्वानुपपत्तेः । भावभूतयोर्हि युतसिद्धताऽयुतसिद्धता वा स्यान्न तु भावाभावयोर्या तस्मात् सदेव कार्यं प्रागुत्पत्तेरिति सिद्धम्" । "युतसिद्धयोरज्जुघटयोर्भिथःसंयोगे पृथक्सिद्धिरपेक्ष्यते अयुतसिद्धानां परस्परपरिहारेण प्रतीत्यनर्हाणां कार्यकारणादीनां मिथोयोगेऽपृथक्सिद्धभावो न दोषमावहतीति मन्यते अयुतेति" आनन्दगिरिः । "द्रव्याश्रयेष्वपि गुणेषु" मा०५, २८, वाक्यायां मल्लिनाथः द्रव्याश्रयेष्वपि अयुतसिद्धत्वात् द्रव्यसमवेतत्वाच्च द्रव्याधीनसत्ताकेषु सत्स्वपीति ।

अयुतसिद्धि स्त्री यु-क्तिन्नर्थे क्त युतः पृथग्रूपेण स्थितः तथाभूतयोः सिद्धिः अभावे न०त० । पृथग्भावेनासिद्धौ । यथा अवयवावयविनोः, द्रव्यगुणयोः, द्रव्यक्रिययोस्तथासिद्धिः ते हि स्वस्वकारणे अपृथग्भूततया सिद्धाः । अतएवोक्तं "युतसिद्धभावात् कार्यकारणयोः संयोगविभागौ न विद्येते" वै०सू० । "समवायस्तयोर्विद्यमानत्वम् पृथगाश्रयाश्रयित्वं वा युतसिद्धिस्तद्भावस्त्ववयवावयविनोः" इति उप०वृत्तिः । अयमाशयः 'घटपटादयो हि पृथग्भूततया सिद्धाः आश्रयाश्रयिभावं लभन्ते । कार्यकारणयोस्तु न पृथक्स्थितिर्येन तथा स्यात्' इति ।

अयुताजित् पु० अयुतं जितवान् जि-भूते क्विप् दीर्घः उ०प०स० । यदुवंश्ये नृपभेदे । "अयुताजित् शतजित् सहस्राजित् धनाजिदथ दासकः उपवाह्यकसहस्रदुर्ग्यां भजमानाद्विजज्ञिरे" हरि०प० । [त्रि० ।

अयुद्ध न० अभावे न०त० । १युद्धाभावे न०ब० । २युद्धशून्ये

अयुव त्रि० न यौति यु-वा०क० । असंहृते "अयुवमार्यस्य राष्ट्रं भवति" ऐत०ब्रा० ।

अयुवन् पु०स्त्री०न युवा विरोधे न०त० । द्वन्द्वे-स्त्रियां ङीप् ।

अयूप्य त्रि० यूपे साधु यत् न०त० । यूपसाधने निम्बजम्बोरादौ वृक्षे "वृक्षा द्विविधा यूप्या अयूप्याश्च पलाशखदिरविल्वादयो यूप्या निम्बजम्बोरादयस्त्वयूप्याः" यजु०वेद०दी० ।

अये अव्य० इण्-एच् । १कोपे, २विषादे, ३संभ्रमे, ४सहतौ, ५अवहौ च । "अये दक्षिणेन पुष्पवाटिकामालाप इव श्रूयते" शकु० "अये गौरीनाथ ! त्रिपुरहर ! शम्भो ! त्रिनयन" ! सां०द० ।

अयोग पु० युज्-घञ् अभावे न०त० । १योगाभावे, अप्राशस्त्ये न०त० । ज्योतिषोक्ते तिथिवारादीनां दुष्टे २योगे "अयोगः सिद्धियोगश्च द्वावेतौ भवतोवदि । अयोगोहन्यते तत्र सिद्धियोगः प्रवर्त्तते इति राजमा० । "अयोगे सुयोगोऽपि चेत् स्यात्तदानीमयोगं निहत्यैव सिद्धिं तनोति । परे लग्नशुद्ध्या कुयोगादिनाशं दिनार्द्धोत्तरं विष्टि-पूर्वेह्नशस्तम्" "यत् लग्नं विना किञ्चित् क्रियते शुभसंज्ञकम् तत् तेषामयोगानां प्रभावाज्जायते फलम्" इति च मुहू० चि० । न०ब० । ३विधुरे, ४कूटे, ५कठिनोदये सुश्रुतोक्ते वमनापशमनीये रोगभेदे च । "यत्राध्मानं हृदयग्रहस्तृष्णा मूर्च्छा दाहश्च भवति तमयोगमित्याचक्षते तमाशु वमयेदिति" । "अयोगाङ्गास्तु वक्ष्यामि व्याधेः संचिकित्सिताः। अतुष्णोऽल्पौषधो हीनो वस्तिर्नेति प्रयोजितः विट्मारुताध्मानशूलैश्च तमयोगं प्रचक्षते' इति च सुश्रुतः ।

अयोगवः पु० अय इव कठिना गौर्वाणी यस्य नि० अच्। अयोगं दुष्टयोगं वाति वा—क वा। "शूद्रादयोगवःक्षत्ता चाण्डालश्चाधमोनृणाम्। वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः इति मनूक्ते शूद्रात् वैश्यायां जाते प्रतिलोमजे सङ्कीर्णवर्णे। "प्रसाधनोपचारज्ञमदासं दासजीवनम् सैरिन्ध्रं वागुराहस्तं स्मृते दस्युरयोगवे, मनुः। अयोगवस्यायम् अण्। आयोगवः तज्जातिसम्बन्धिनि त्रि० स्त्रियां ङीप्। "भवन्त्यायोगवीष्वेते जातिहीनाः पृथक् त्रयः" मनुः।

अयोगवाह पु० अक्षरसमाम्नायसूत्रेषु "अइउण्" इत्यादिषु चतुर्दशसु नास्ति योगः पाठादिरूपः संबन्धो येषां ते तथापि वाहयन्ति यत्नसाध्यादिकार्य्यादिकं निष्पादयन्ति वाहैः अच् कर्म्मधा०। "अनुस्वारो विसर्गश्च+कुँपौ चैव पराश्रितौ। अयोगवाहावित्तेया" इति शिक्षादृष्टेषु अनुस्वारविसर्गादिषु

अयोगुल (ड) पु० गुलः गोलाकारः अयसा निर्म्मितोगुलः। (गोलीति) ख्याते लौहगुटिकायाम्। वा लस्य डः।

अयोगू पु० अयोलोहविकारं गच्छति कर्त्तृत्वेन गम—डा० डू। अयोगन्तरि अयस्कारे "पाप्मने क्लीवमाक्रियावा अयोगमिति"। पुरुषमेधे यजु० ३०५ "अयोगूमयोगन्तारम्। वेद दी०।

अयोग्य त्रि० न०त०। १योग्यभिन्ने अनर्हे २अनुचिते च।

अयोग्र न० अयोऽग्रे मुखे यस्य। मुखले तस्य मुखे लौहावस्थित्या तथात्वम्।

अयोघन पु० अयांसि हन्यन्तेऽनेन हन-अप् घादेशश्च नि०। (हातुड़ीति) ख्याते लौहमुद्गरे। "अयोघनेनाय इवाभिताप्तम्" ॥ रघुः।

अयोजाल न० अयोविकारः जालम्। १लौहमये जाले अय इव दुर्भेद्यं जालं मायाऽस्य। २दुर्भेद्यकपटे असुरादौ त्रि० "अयोजाला असुरा मायिनोऽयस्मयैः" अथ० १,१९,९६।

अयोदंष्ट्रा त्रि० अयोमयी दंष्ट्रा चक्राग्रधारा अस्य। लौहमयधारे रथादौ। "पस्पन् क्षिरणच्चक्रानयोदंष्ट्रान् विधावतो वराहून्" ऋ० १,८८,६, "दंष्ट्रा चक्रधारा" भा०।

अयोदत् त्रि० अयइव कठिनो दन्तोवस्य संज्ञायां दत्रादेशः। लोहवत्कठिनदन्तयुक्ते राक्षसादौ स्त्रियां ङीप्।

अयोध्य त्रि० योद्धुमशक्यः युध—ण्यत् न०त०। योद्धुमशक्ये "अष्टाचक्रा नवद्वारा देवानां पूरयोध्या" अथ० १०, २,३१, इक्ष्वाकुवंश्यनृपाणां राजधान्यां स्त्री सा च सरयू तीरसन्निकृष्टा सेवनादौ मोक्षदा च। "अयोध्या मथुरा माया काशी काञ्ची अवन्तिका। पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः" पुरा० "बलमुपहितयोभां तूर्ण्यमायादयोध्याम्" भट्टिः।

अयोध्याकाण्ड न० अयोध्यायास्तत्तत्क्षत्रान्तवर्णनस्य काण्डम्। रामायणान्तर्गते अयोध्यावर्णनात्मके ग्रन्थे।

अयोनि स्त्री न०त०। १योनिभिन्नस्थाने। "अमानवीषु पुरुषे उदक्यायामयोनिषु। रेतः सिक्त्वा जले चैव कृच्छ्रं सान्तपनं चरेत्" मनुः। नास्ति योनिरुत्पत्तिस्थानं यस्य। २अजन्ये नित्ये। "जगद्योनिरयोनिस्थम्" कु०।

अयोनिक त्रि० न आम्नाता योनिरस्य कप्। अनाम्नात योनिकेषु यज्ञरूपयज्ञपात्रादौ "नायोनिकेषु" कात्या० ६,५,२३, अयोनिकेषु यत्र "एष ते योनिः" इत्यस्याम्नानं न भवति तत्र "एष ते योनिः" इत्यनेनासादनं भवति "सर्वेषिति वात्सोऽविशेषात्" कात्या० ६,५,२७ "सर्वेष्वाम्नात योनिकेषु अनाम्नातयोनिकेषु च यज्ञेषु परिमार्जनानन्तरम् एष ते योनिरिति मन्त्रेणासादनं भवत्येव" कर्क०।

अयोनिज न० योनेर्न जायते जन—ड। योनितोऽनुत्पन्ने शुक्रशोणितसन्निपातानुत्पन्ने जरायुजभिन्ने ऋषिदंशादौ तथाहि "शरीरं द्विविधं योनिजमयोनिजञ्च" वै० सू०। तत्र पार्थिवादिशरीरेषु मध्ये पार्थिवं शरीरं द्विविधं योनिजमयोनिजञ्चेति आप्यतैजसवायवीयशरीराणां वरुणादित्यवायुलोकेषु प्रसिद्धानामयोनिजत्वमेव शुक्रशोणितसन्निपातानपेक्षत्वात्। अयोनिजञ्च देवानामृषीणाञ्च श्रूयते हि "ब्रह्मणो मानसासन्नादय" इति। कारणमन्तरेण कथं कार्य्यमिति चेत् योनेः शरीरत्वावच्छेदेनाकारणत्वात् जम्बूजक्षभिमशकादिशरीरे व्यभिचारात् संस्थानविशेषवत्त्वस्य चासिद्धेः देवर्षिशरीरापेक्षयाऽस्मदादिशरीराणामन्यादृशत्वात्, योनिजमपि द्विविधं जरायुजमण्डजञ्च, जरायुजं मानुषपशुमृगाणां, गर्भाशयस्य जरायुत्वात्, पक्षिसरीसृपाणामण्डजं परितः सर्पणशीलत्वात् सर्पकीटमत्स्यादयोऽपि सरीसृपा एव यद्यपि दंशादयोऽपि शरीरभेदा एव भोगाधिष्ठानत्वात् न खलु भोगाधिष्ठानत्वमन्तरेण जीवन-मरण-स्वप्न-जागरणभेषज-प्रयोग-बीजसजातीयानुबन्धानुकूलोपगम-प्रतिकूलापगमादयः सम्भवन्ति दृष्टिक्षतभग्नसंरोहणे च भोगोपपादके स्फुटे एव, आगमोऽप्यस्ति। "नर्म्मदातीरसम्भूताः सरलार्जुनपादपाः। नर्म्मदातोयसंस्पर्शात् ते यान्ति परमां गतिम्"।

"ब्रह्मणाने जायते दृश्यः कङ्कटप्रादिसेवितः", इत्यादिश्च तथापि चेष्टावत्त्वमिन्द्रियवत्त्वञ्च नोद्भिदां स्फुटतरमतो न शरीरव्यवहारः उ०ह०॥ दृक्षादीनामयोनिजशरीरसत्त्वे प्रमाणान्तरमस्ति "शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः" मनुना कर्मविशेषैर्नराणां तद्भावप्राप्तिरुक्ता। "गुरुं तङ्कृत्य कृत्य विप्रं निर्जित्य वादतः। ब्रह्मणाने जायते दृश्यः कङ्कटप्रादिसेवित" इत्यादि वचनेन। अयोनिजशरीरोत्पत्तिकारणमाह। "अनियतदिग्देशपूर्व्वकत्वात्" वै० सू०। "धर्म्मविशेषाच्च" "समाख्याभावाच्च" "अनियतदिग्देशाः परमाणवोधर्म्मविशेषजनितकर्म्माणस्तत्पूर्व्वकत्वात् अयोनिजशरीराणाम् ननु परमाणूनां कर्म्म विना कथं द्रव्यासमवायिकारणं संयोगमन्तरेण द्रव्योत्पत्तिरत आह। अदृष्टवशात्संयोगादेव सर्गादौ परमाणूनां कर्म्म तेन च कर्म्मणा सम्भूय परमाणवो द्व्यणुकादिक्रमेण अयोनिजं देवर्षीणां शरीरमारभन्ते इत्यर्थः, उपलक्षणञ्चैतत् अधर्म्मविशेषाच्च क्षुद्रजन्तूनामूष्मजानां यातनामयानि शरीराण्युत्पद्यन्ते इत्यपि द्रष्टव्यम् देवर्षीणामयोनिजे शरीरे प्रमाणान्तरमाह। समाख्या अन्वर्था संज्ञा श्रुतिरुक्तीतिहासपुराणादिषु संज्ञायाआदित्वात् प्रसिद्धा तथाहि दुर्व्वासःप्रभृतयो मानसाः "अहङ्कारेभ्यः समभवद्विरा" इत्यादिका, तथाऽपि श्रूयते सन्त्ययोनिजानि शरीराणि देवर्षीणामिति प्रमाणान्तरमाह। सर्गादौ या ब्रह्मादिसंज्ञा आदिभूता प्राथमिकी तया श्रूयते अस्त्ययोनिजं शरीरमिति नहि तदा ब्रह्मणो मातापितरौ स्तः याभ्यां ब्रह्मादिसंज्ञा स्यादिति भावः उपसंहरति। "सन्त्ययोनिजाः" "वेदलिङ्गाच्च वै०सू०" शरीरविशेषा इति शेषः उपसंहृतेऽतिदार्ढ्यं प्रमाणान्तरमाह। वेदो मन्त्रः स च लिङ्गयते श्राव्यतेऽनेनेति वेदलिङ्गं ब्राह्मणम्, ततोऽप्ययोनिजं शरीरं प्रतिपद्यते इत्यर्थः। तथाहि ब्राह्मणम् "प्रजापतिः प्रजा अनेका असृजत् स तपोऽतप्यत प्रजाः सृजेयमिति स मुखतो ब्राह्मणमसृजत् बाहुभ्यां राजन्यमूरुभ्यां वैश्यम् पद्भ्यां शूद्रम्" इति, वेदोऽपि "ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत" इत्यादिः, एवं योनिजमयोनिजञ्च पार्थिवशरीरमुक्तम्, आप्यं तैजसं वायवीयञ्चायोनिजमेव "ब्रह्मणो मानसा मन्वादय" इति उप० उक्तिः। "किन्तु देहमयोनिजमिति" भाषा० आ०उ०तद्भाष्ये च त्रैविध्यमुक्तं यथा "तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जमिति" छा०उ० "तेषां जीवाविष्टानां खल्वेषु पक्षादीनां भूतानामेषामिति प्रत्यक्षनिर्द्देशात्तु तेजःप्रभृतीनां तेषां त्रिवृत्करणस्य वक्ष्यमाणत्वादसति त्रिवृत्करणे प्रत्यक्षनिर्द्देशानुपपत्तिः। देवताशब्दप्रयोगाच्च तेजःप्रभृतिषु द्रव्यास्त्रिवृद्देवता इति। तस्मात्तेषां खल्वेषां भूतानां पशुपक्षिस्थावरादीनां त्रीण्येव नातिरिक्तानि बीजानि कारणानि भवन्ति। कानि तानीत्युच्यते। आण्डजमण्डाज्जातं अण्डजमेवाण्डजं पक्षादि। पक्षिसर्पादिभ्यो हि पक्षिसर्पादयो जायमाना दृश्यन्ते। ते च पक्षिणां बीजम्। सर्पः सर्पाणां बीजम्। तथाऽन्यदप्यण्डाज्जातं तज्जातीयानां बीजमित्यर्थः भा०। २अयोनिजदेहवति नरादौ च त्रि० "राघवाय तनयामयोनिजाम्" रघुः ३विष्णौ पु०। "वाचस्पतिरयोनिज" इति वि० सह०।

अयोमय त्रि० विकारे मयट् स्त्रियां ङीप्। लौहविकारे अस्त्रशस्त्रादौ। "निःचेष्टोऽयोमयः शङ्कुर्व्वल्मीके दशाङ्गुलः" गुरुतल्पाभिधाय्यैनस्तप्ते स्यादयोमये" इति च मनुः।

अयोमल न० अयसो मलमिव। (लौहगू) इतिख्याते लौहमले तत्किट्टे "शताद्भुक्तमं किट्टं मध्यञ्चागीतिवार्षिकम्" अधमं षष्टिवर्षीयं ततो हीनं विशोधनम् यल्लौहं यद्गुणं प्रोक्तं तत्किट्टं चापि तद्गुणमिति" राजनि०।

अयोमुख न०अयोविकाररूपं मुखं यस्य। १लाङ्गलादौ "भूमिं भूमिशयांश्चैव हन्ति काष्ठमयोमुखम्" २अयोलौहयुक्ते त्रि० भेत्तृखल्वजः "कुम्भमयोमुखेन" रघुः। अय इव कठिनं मुखं यस्य। ३लौहतुल्यकठिनमुखे विहगादौ "अयोमुखाः सूचीमुखाः अयोविकृतिमुखाः पिशाची क्रव्यादो वातरंहसः अथ० ११,१०,२। "श्वानो भीषणकाया अयोमुखानि वयांसि जले मत्स्यपक्षिणाञ्च सङ्घाः भा० शा० प०। ४असुरभेदे पु०। "शङ्कुकर्णो विराधश्च गवेडी दुन्दुभिस्तथा अयोमुखः शम्बरश्च कपिलोवामनस्तथा हरिवं०। अयःसुवर्णं मुखमाद्यं यस्य। सुवर्णादिधातौ "अयोमुखैश्च विपुलः पर्व्वतो धातुभिर्युतः इति हरिवं० तत्र भवः मुखादि० अ। अयोमुखीयः तद्भवे त्रि०।

अयोरस पु० द्वैत०। लौहमले। ताप्यमानाल्लोहात् यत् पृथग् भवति तस्मिन् "सर्व्वायोरसाश्रुचूर्णैः स्रवाः संस्रुज्ये काल्पा० १५,५,६, "अयोरसः लोहसिङ्घाणः

किट् इति यः प्रसिद्धः कर्कः "अयैतच्चयं पिष्टं भवति गर्करारूक्षावोरसक्तेन संहृजति" य० ब्रा० ।

अयोहृदय त्रि० अय इव कठिनं हृदयमस्य । कठिनचित्ते दयाशून्यचित्ते । "सुहृदयोहृदयः प्रतिगतर्जताम् रघुः ।

अरमन् त्रि० अर–मनिन् । १गन्तरि २गमनसाधने च "समानमयमन् पर्य्येति जाग्विः" ता०ब्रा० "अरमन् अरमनि गमनसाधने रथे उपविष्टः" भा० ।

अर पु० इयर्त्ति गच्छत्यनेन ऋ–अच् । १चक्रस्य २नाभिनेम्योर्मध्यस्थे काष्ठे ३शीघ्रे च ४शीघ्रतादिगुणवति त्रि० । "गच्छोच्चलासञ्चालनाभिचक्रवा विराजमानां नवयोदरश्रियां" माघः उदरा उन्नता अराश्चक्रशलाका इति मल्लि० "विभुरराट्न नेमिः परिभूरजायथाः ऋ०१ १४,६ "अरा इव रथनाभाविति" श्रुतिः "सव्यञ्जोऽग्निं स पर्यतारा नाभिमिवाभितः" अथ० ३,२०,६, "अरा इवाग्ने नेमिरिति" शत०ब्रा० । एवमस्य पुंस्त्वेन प्रयोगात् "रोपधः" ६।७ पृष्ठे दर्शितात् पा० स्त्रियाञ्च पुंस्त्वे स्थिते मेदिनीकरोक्तं क्लीवत्वं शीघ्रतायामेवान्वितं न तु चक्राङ्गेऽपि । "यदपि च तच्चक्रं द्वादशारं यद्वै कुमाराः परिवर्त्तयन्ति तेऽपि ऋतवः संवत्सरश्चक्रम्" भा०आ०प० । द्वादश मासा अराइव यस्य तदर्थः । "पञ्चारे चक्रे परिवर्त्तमाने तस्मिन्नातस्थुर्भुवनानि च विश्वा" ऋ०१,१६४,१३ पञ्चारे पञ्चर्त्तुरूपैररैर्युक्ते हेमन्तशिशिरयोरेकत्वाभिप्रायेण पञ्चर्त्तुता" भा० ४ कोषे "त्रिपञ्चारे पीठे शवशिवछदीति" श्यामाश्लवः । संज्ञायां कन् । ५शैवाले "प्राघडीति" ख्याते ६पर्पटे च पु० ।

अरज्जस् त्रि० नास्ति रज्जो रज्जस्तुल्यं बाधकं यस्य । "बाधकरहिते । "जिघर्म्यरज्जसा मनसा च तज्जुषेत" ऋ०२,१०,५ । "अरज्जसा बाधकरहितेन मनसा" भा० ।

अरञ्जित त्रि० न रञ्जितः । रञ्जितभिन्ने । "पादं स्वामिन्यरञ्जिते" स्मृतिः ।

अरग्वध पु०पृ० लुप्तः । आरग्वधशब्दे (शुँधालो) ।

अरघट्ट पु० अरं शीघ्रं घट्ट्यते चाल्यतेऽसौ । १महाकूपे, २कूपोपरिनिबद्धजलोत्तोलनकाष्ठे च । "अथ कूपमासाद्यारघट्टघाटिकामार्गेण सर्षसेनानीतः" । "तदाकर्ण्य तु अरघट्टघाटिकामार्गमहमाश्रित्येति" च पञ्चत० स्वार्थे कन् । तत्रैव ।

अरङ्कृत् त्रि० अलं करोति अलम्+कृ–क्विप् लुप्तरः । १अलङ्कारिणि "त्वमग्ने ! द्रविणोदा अरङ्कृते" ऋ० २,१,६,० "अरङ्कृते अलङ्कुर्वते" भा० हविष्मन्तो अरङ्कृतः ऋ०१,१४,५, भा० अलङ्कृतःअलङ्कुर्वतः "कपिलकादीनां संज्ञाछन्दसोः" लुप्तरः भा० । २पर्य्याप्तकारिणि च "उरुधारामरङ्कृतम् ऋ० ८,१,१०, "अरङ्कृतं पर्य्याप्तकारिणमिन्द्रम्" भा० ।

अरङ्कृत त्रि० अलं क्रियते स्म अलम्+कृ+क्त लोपः । अलङ्कृते भूषिते "यमोह यज्ञो गच्छत्यग्निदूतो अरङ्कृतः" ऋ०१०,१४,१२, अरङ्कृतः बहुभिर्व्यैरलङ्काररूपैर्युक्तः" भा० ।

अरङ्कृति स्त्री अलम्+कृ+क्तिन लुप्तरः । अलङ्कारे भूषायाम् "का ते अस्यरङ्कृतिः स्तुहि" ऋ०७,२६,२ । "अरङ्कृतिरलङ्कृतिः" भा० ।

अरङ्गम पु० अलं पर्य्याप्तं गमोगतिः लुप्तरः । पर्य्याप्तगमने "अरङ्गमाय जग्मयेऽपवाह्याय नरे" ऋ०६,४२,१, "अरङ्गमाय पर्य्याप्तगमनाय" भा० ।

अरजस् त्रि० रजोऽस्त्यस्मिन् मत्वर्थीयो नञ्लोपः न०ब० । १रजोगुणकार्य्यकामक्रोधादिशून्ये । "अजरममरमभयमक्षतमरजं" इति शत०ब्रा० वा कप् । अरजस्कोऽप्यत्र । २अनार्त्तवायां नग्निकायां स्त्री । भवा० अभूततद्भावे क्यङ्" सलोपश्च, अरजायते ।

अरज्जु न० नास्ति रज्जुर्बन्धनसाधनं यत्र । १बन्धनागारे रज्जुहीनत्वेऽपि बन्धनहेतुत्वात् तथात्वम् । "अरज्जौ दस्यूनृत्ससुनद्धमीतये" ऋ०२,१३,६, "अरज्जौ बन्धनागारे" भा० २रज्जुरहिते रोगादौ च "सेतुभिः रज्जुभिः सिनीथः, ७,८१,२, रज्जुरहितैः रोगादिभिः भा० ।

अरट्टु(लु) पु० अरं शीघ्रमटति अट–अल वा उन् शक० । (गोना) इक्षे इति ख्याते क्षुद्रादि० क । डलयोरैक्यात् अरडुकः तद्वति त्रि० ।

अरट्ट पु० न रटति रट–वन् न०त० । पृषुअवोल्लपतिभिन्नभेदे "अरट्टे अक्षे नह्ये सकृत्वनि" सुकृत्तराय सुकृतः" ऋ० ६,४५,१७ अरट्टे अक्षे नह्ये सकृत्वनि च एते तस्य रात्रोऽध्यचाः" भा० ।

अरण त्रि० नास्ति रणं युद्धं यस्य । १युद्धशून्ये "अरणं मरणं समयात् समयात्" भट्टिः नास्ति रणः शब्दो येन । २वाक्सङ्गरहिते ३रिपौ "ब्रह्मराजन्याभ्यां शूद्राय चार्य्याय स्वाय चारणाय" यजु० १६,२, "अरणाय पराय वाक्सङ्गरहिताय शत्रवे" वेददी० । ४अरमाणे पृ०साधुः । "योनः स्वो अरणो यश्च निष्ट्यो जिघांसति" ऋ०६,

७५,१६ "अरणोऽरममाणः" इति भा० । ४दुःखिते "मा भूम निष्ठा इवेन्द्र ! अरणा इव" ऋ०८,१,१२, "अरणा अरममाणाः दुःखिनः" भा० ।

अरणि पु० ऋ-अनि । १स्तूर्ये 'गणिवारीति' ख्याते २दण्डे । ऋच्छति प्रापयत्यग्निम् । ३अग्निमन्थनकाष्ठे हि० । स्त्रियां ङीप् । "जाते पुत्रेऽरणिं मथित्वेति" श्रुतिः "आत्मानमरणिं कृत्वा" पुरा० "अग्न्युद्धारशब्दे ६१२६ विवरणम् "अरणीसहितं मन्थं ब्राह्मणस्य तपस्विनः । मृगस्य घर्ममाणस्य विषाणे समजज्यत" भा०व०प० । "ततः पुनर्मथ्यमानः पाणिं वेनस्य दक्षिणम् । अरणीमिव संरब्धा ममन्थुर्जातमन्यव" इति हरिवं० "पराशरकुलोद्भूतः शुकोनाम महातपाः । भविष्यति युगे तस्मिन् महायोगी द्विजर्षभः । व्यासादरण्यां संभूतो विधूमोऽग्निरिव ज्वलन्" हरिवं० । अरणीमधिकृत्य कृतोग्रन्थः ढक् । आरणेयम् भारतवनपर्व्वान्तर्गते अरणीहरणाधिकारेण व्यासकृतेऽवान्तरपर्व्वभेदे ।

अरणिक पु० अरणये अग्निमन्थनकाष्ठाय साधु ठन् । अग्निमन्थनकाष्ठसाधने अग्निमन्थनदण्डे ।

अरणीकेतु पु० अरणी केतुरस्य । अग्निमन्थनदण्डे राजनि० ।

अरणीसुत पु० ३त० । शुकदेवे "स लब्ध्वा परमं देवाद्वरं सत्यवतीसुतः" । अरणीसहिते मन्थे ममन्थाग्निचिकीर्षया । अथ रूपं परं राजन् बिभ्रतीं स्वेन तेजसा । घृताचीन्नामाप्सरसमपश्यद्भगवान्ऋषिः । ऋषिरप्सरसं दृष्ट्वा सहसा काममोहितः । अभवद्भगवान् व्यासो वने तस्मिन् युधिष्ठिर ! । सा च दृष्ट्वा तदा व्यासं कामसंविग्नमानसम् । शुकीभूत्वा महाराज ! घृताची समुपागमत् । स तामप्सरसं दृष्ट्वा रूपेणाप्रतिमेन संहताम् । शरीरजेनानुगतः सर्व्वगात्रातिगेन ह । स तु धैर्य्येण महता निगृह्यात्मानमात्मना । न शशाक नियन्तुमत् व्यासः प्रविद्धं मनः । भावित्वाच्चैव भावस्य घृताच्या वपुषा हृतः । यत्तद्विषक्तमक्षस्य शुनेरग्निचिकीर्षया । अरण्यामेव सहसा तस्य शुक्रमवापतत् । सोऽविषण्णेन मनसा तथैव द्विज सत्तमः । अरणीं ममन्थ ब्रह्मर्षिस्तस्यां जज्ञे शुको नृपः । शुके निर्म्मथ्यमाने स शुको जज्ञे महातपाः । परमर्षिर्महायोगी अरणीगर्भसम्भवः । यथाऽध्वरे समिद्धोऽग्निर्भाति हव्यसदावहन् । तथारूपः शुको जज्ञे प्रज्वलन्निव तेजसा" भा०शा०प० ।

अरण्य पु०न० अर्य्यते गम्यते वयस्तत्र ऋ-अन्य । १वने, अर्द्धर्चादि । "माता यस्य गृहे नास्ति भार्य्या चाप्रियवादिनी । अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्" चाणक्यः । "सावित्रीमप्यधीयीत गत्वारण्यं समाहितः । गृहे गुरौ वारण्ये वा निवसन्नात्मवान् द्विजः" मनुः । "गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः । अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत्" मनुना अन्त्ये वयस्येव अरण्यवासविधानात्तस्य तथात्वम् । स्वार्थे कन् तत्रैव । "य एनमेव विन्दन्ति ये चारण्यकमाश्रिताः" या० स्मृ० । २कट्फलवृक्षे पु० । उत्करादि०चतुरर्थ्यां क । अरण्यीयः अरण्यसन्निकृष्टदेशादौ त्रि० । अरण्येऽध्येयः वुञ् । आरण्यकं वनपाठे अनुवाकभेदे "आरण्यकमधीत्य च" मनुः । अरण्यमधिकृत्य कृतः ग्रन्थः आरण्यम् रामायणान्तर्गतारण्यकाण्डे ।

अरण्यकदली स्त्री अरण्यस्थैव कदली । गिरिकदल्यां तस्या यामादावनुत्पत्तेस्तथात्वम् । [ग्रन्थभेदे ।

अरण्यकाण्ड न० रामायणान्तर्गते रामस्य वनगमनवर्णनात्मके

अरण्यकार्पासी स्त्री अरण्ये कार्पासी । (वनकापास) इति ख्यातायां वनकार्पास्याम् ।

अरण्यकुलत्थिका स्त्री अरण्यस्य कुलत्थिका । (वनकुलथी) ख्यातायाम् वनकुलत्थिकायाम् ।

अरण्यकुसुम्भ पु० कर्म्म० । वनकुसुम्भे ।

अरण्यगज पु० अरण्यस्थो गजः । दुर्द्दान्तगजे ।

अरण्यगान न० अरण्ये गीयते कर्म्मणि ल्युट् । सामवेदान्तर्गते अरण्ये गेये गानभेदे । [भेदे राजनि० ।

अरण्यघोली स्त्री अरण्यजा घोली । वनघोल्यां पत्रशाक-

अरण्यचटक पु० कर्म्म० । वनचटके ।

अरण्यचन्द्रिका अरण्ये चन्द्रिकेव निष्फला दृष्टुरभावात् । निष्फलभूषणे । लोके हि चन्द्रिका उन्मीलितनेत्रपङ्क्तिभिरालोक्यते अरण्ये तु लोकाभावेन दर्शकाभावात् दर्शनेन प्रीतिजनिका न भवतीति तस्याः यथा निष्फला शोभा एवमन्यस्यापि तथा, अतएव "स्त्रीणां प्रियालोकफलो हि वेषः" इति कुमा० व्याख्यायां मल्लिनाथेन "अन्यथा अरण्यचन्द्रिका स्यादित्युक्तम्" ।

अरण्य(ण्ये)चर त्रि० अरण्ये चरति चर-ट ७त० वा अलुक्स० । वनचरे व्याधादौ ।

अरण्यज त्रि० अरण्ये जायते जन-ड उप०स० । वनजाते ।

अरण्यजादिक न० अरण्ये जायते जन-ड कर्म्म० । (वन आदा) इति ख्याते वनार्द्रके ।

अरण्यजीर पु० । ६त० । वनजीरके ।

अरण्यजीव त्रि० अरण्येन तद्भवफलादिना जीवति जीव-क । वनस्थफलादिना जीविकावति वानप्रस्थादौ ।

अरण्यधर्म्म पु० अरण्ये आचरणीयो धर्मः । वानप्रस्थधर्म्मे । स च धर्मः "गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः । अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत् । सन्त्यज्य ग्राम्यमाहारं सर्व्वञ्चैव परिच्छदम् । पुत्रेषु भार्य्यां निक्षिप्य वनं गच्छेत् सहैव वा । अग्निहोत्रं समादाय गृह्याग्निपरिच्छदम् । ग्रामादरण्यं निःसृत्य निवसेन्नियतेन्द्रियः । सन्यैश्चैर्व्विविधैर्म्मेध्यैः शाकमूलफलेन वा । एतानेव महायज्ञान्निर्व्वपेद्विधिपूर्व्वकम् । वसीत चर्म्म चीरं वा सायं स्नायात् प्रगे तथा । जटाश्च बिभृयान्नित्यं श्मश्रुलोमनखानि च । यज्ञोपवीतं स्वाततो दण्डं भिक्षाञ्च शक्तितः । अग्निपक्वफलभिक्षाभिरर्च्चेदाश्रमागतान् । स्वाध्याये नित्ययुक्तः स्याद्दान्तोमैत्रः समाहितः । दाता नित्यमनादाता सर्व्वभूतानुकम्पकः । वैतानिकञ्च जुहुयादग्निहोत्रं यथाविधि । दर्शमस्कन्दयन् पर्व्व पौर्णमासञ्च योगतः । ऋक्षेष्ट्राग्रयणञ्चैव चातुर्म्मास्यानि चाहरेत् । उत्तरायणञ्च क्रमशो दक्षिणायनमेव च । वासन्तशारदैर्म्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः । पुरोडाशांश्चरूंश्चैव विधिवन्निर्व्वपेत् पृथक् । देवताभ्यस्तु तद्धुत्वा वन्यं मेध्यतरं हविः । तेषामात्मनि युञ्जीत लवणञ्च स्वयंकृतम् । स्थलजोदकशाकानि पुष्पमूलफलानि च । मेध्यवृक्षोद्भवान्यद्यात् स्नेहांश्च फलसम्भवान् । वर्জ्जयेन्मधुमांसञ्च भौमानि कवकानि च । भूस्तृणं शिग्रुकञ्चैव लेाम्नान्तकफलानि च । त्यजेदाश्वयुजे मासि सन्यन्नं पूर्व्वसञ्चितम् । जीर्णानि चैव वासांसि शाकमूलफलानि च । न फालकृष्टमश्नीयादुत्सृष्टमपि केनचित् । न ग्रामजान्यात्तोऽपि मूलानि च फलानि च । अग्निपक्वाशनोवा स्यात् कालपक्वभुगेव वा । अश्मकुट्टोभवेद्वापि दन्तोलूखलिकोपि वा । सद्यःप्रक्षालको वा स्यान्मासषष्ठयिकोऽपि वा । षण्मासनिचयोवा स्यात् समानिचय एव वा । नक्तञ्चाह्न समश्नीयाद्दिवा वाकृत्य शक्तितः । चतुर्थकालिकोवा स्यात् स्याद्वाष्टमकालिकः । चान्द्रायणविधानैर्वा शुक्ले कृष्णे च वर्त्तयेत् । पक्षान्तयोर्वाप्यश्नीयाद्यवागूं कथितां सकृत् । पुष्पमूलफलैर्वापि केवलैर्वर्त्तयेत् सदा । कालपक्वैः स्वयंशीर्णैरेकान्तसमये स्थितः । भूमौ विपरिवर्त्तेत तिष्ठेद्वा प्रपदैर्दिनम् । स्थानासनाभ्यां विहरेत् सवने सवनेऽपयन्नपः । ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वभ्रावकाशिकः । आर्द्रवासास्तु हेमन्ते क्रमशो वर्द्धयंस्तपः । उपस्पृशंस्त्रिषवणं पितॄन् देवांश्च तर्पयेत् । तपश्चरंश्चोग्रतरं शोषयेद्देहमात्मनः । अग्नीनात्मनि वैतानान् समारोप्य यथाविधि । अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः । अप्रयतः सुखार्थेषु ब्रह्मचारी धराशयः । शरण्येष्वमत्सरश्चैव वृक्षमूलनिकेतनः । तापसेष्वेव विप्रेषु याचिकं भैक्ष्यमाचरेत् । गृहमेधिषु चान्येषु द्विजेषु वनवासिषु । ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान् वने वसन् । प्रतिगृह्य पुटेनैव पाणिना शकलेन वा । एतावान्यात्र सेवेत दीक्षा विप्रो वने वसन् । विविधा चौपनिषदीरात्मसंसिद्धये श्रुतीः । ऋषिभिर्ब्राह्मणैश्चैव गृहस्थैरेव सेविताः । विद्यातपोविवृद्ध्यर्थं शरीरस्य च शुद्धये । अपराजितां वास्थाय व्रजेद्दिशमजिह्मगः । आ निपाताच्छरीरस्य युक्तो वाय्वनिलाशनः । आसां महर्षिचर्य्याणां त्यक्त्वान्यतमया तनूम् । वीतशोकभयो विप्रो ब्रह्मलोके महीयते" मनुः ६अ० ।

अरण्यधान्य न० ६त० । नीवारादौ वनधान्ये ।

अरण्य(ण्यानाम्)पति पु० अरण्यानां तत्स्थानां चौराणां पतिः वा अलुक् समा० । चौराधिष्ठातरि रुद्रे "नमोनमोनिचेरवे परिचरायारण्यानां पतये नमः" यजु० १६,२०, "रुद्रो हि लीलया चौरादिरूपं धत्ते यद्वा रुद्रस्य जगदात्मकत्वाच्चौरादयो रुद्रा एव ध्येयाः यद्वा स्तेनादिशरीरे जीवेश्वररूपेण रुद्रोद्विधा तिष्ठति तत्र जीवरूपं स्तेनादिशब्दवाच्यम् तदीश्वररुद्ररूपं लक्षयति यद्वा शाखायं चन्द्रम्" वे० दी० । तस्य सर्वनियन्तृत्वेन चौराणामपि पतित्वं युक्तमेव "एष एव साधु कर्म्म कारयति तं यमेभ्यो निनीषते एष एवासाधु कर्म्म कारयति तं यमधोनिनीषते" इति श्रुत्या तस्य साध्वसाधुकर्म्मनियन्तृत्वस्योक्तेः पूर्व्वकृतकर्म्मसापेक्षत्वेन च न वैषम्यनैर्घृण्ये इत्याकरे व्यक्तम् । २ अरण्यचरव्याधपतौ च ।

अरण्यभव त्रि० अरण्ये भवति भू-अच् । वनभवे ।

अरण्यमक्षिका स्त्री ६त० । (डाग) इदि ख्याते दंशे ।

अरण्यमार्ज्जार पु० अरण्ये मार्ज्जारः । वनविड़ाले ।

अरण्यमुद्ग पु० ६त० । वनमुद्गे ।

अरण्ययान न० अरण्ये यानम् । अयोग्यकाले वनगमने "अरण्ययाने तुकरे पिता मातृ" इति भट्टिः ।

अरण्यरक्षक पु० अरण्ये रक्षकः । वनरक्षके वनेषु लोकरक्षार्थं राज्ञा नियुक्तसैन्यभेदे ।

अरण्यराशि अरण्यसंज्ञको राशिः। "मकरादिमार्द्रसिंहौ वन्यौ दिवसेऽजद्यभौ चेति" ज्योतिषोक्ते सिंहादिराशौ।

अरण्य(ण्ये)रुदित न० अरण्ये रुदितं रोदनम् सप्तम्या वा अलुक्। ग्राम्योपायकारकश्रोतृशून्ये निष्फले १ रोदने २ तत्तुल्ये निष्फले वस्तुमात्रे च। लोके हि रोदने तद्रोदनग्राम्योपायोदयार्थिभिः क्रियते अरण्ये रोदने तु न कश्चित् तस्य शमयितेति तस्य निष्फलत्वम्।

अरण्यवायस पु० ईत०। (दाँड़काक) इतिख्याते द्रोणकाके।

अरण्यवास पु० अरण्ये वासः। वनवासे।

अरण्यवासिन् त्रि० अरण्ये वसति वस-णिनि। वनवासिनि १ सन्यादौ "एते हिमगिरेरुपत्यकारण्यवासिन" इति भरतः। स्त्रियां ङीप्। सा च २ अत्यन्तपर्णीलतायां राजनि०। [वालुके।

अरण्यवालुक पु० ईत०। (वनवेतो) इति ख्याते वन-

अरण्यशालि पु० अरण्यभवः शालिः। वनभवे नीवारादौ।

अरण्यशूकर पु० अरण्यस्थ शूकरः। वनवराहे। [शूरणे।

अरण्यशूरण पु० मा०त०। वनभवे (ओल) इति ख्याते

अरण्यश्वन् पु० अरण्ये श्वेव हिंस्रः। हके।

अरण्यषष्ठी स्त्री अरण्याय गन्तुं षष्ठी। ज्यैष्ठशुक्लषष्ठ्याम्। "ज्यैष्ठे मासि सिते पक्षे षष्ठी यारण्यसंज्ञिता। व्यजनैकरास्तस्मात्ति विपिने स्त्रियः" इतिः राजमा०।

अरण्याध्यक्ष पु० अरण्यरक्षणादौ अध्यक्षः। वनेषु चोरकरणार्थं राजनियुक्ते सैन्यपतिभेदे।

अरण्यानी स्त्री महदरण्यं नि०ङीप् आनुक् च। महारण्ये। "यथारण्यान्यासुत्साचरत" श्रुत०ब्रा०।

अरण्यायन न० अरण्येऽयनं वानप्रस्थधर्मस्तदिवाचरणमस्य अच्। "यद् अरण्यायनमित्याचक्षते ब्रह्मचर्य्यमेव तदिति" श्रुत्युक्ते ब्रह्मचर्य्ये। "तदस्य रक्षसार्ष्यावित्यादिना तत्रैव व्युत्पत्तिर्दर्शिता।

अरण्येतिलक पु० सप्तम्या अलुक्। वनतिलभेदे।

अरण्येऽनूच त्रि० अरण्ये अनूचः नियतपाठोमन्त्रो यस्य अलुक् समा० १ अरण्यमात्रपाठ्यमन्त्रेण संस्कृते पुराडाशादौ "पशादरण्येऽनूचम्" १८,४,२०। "अरण्येऽनूचा वक्तव्याः पठनीया मन्त्रा यस्यासौ अरण्येऽनूच" इति कर्क०। ७त०अलुक्स०। २अरण्येऽनूचे (पाठे) मन्त्रभेदे पु०। स च "उषस भीमस्येत्यादिमन्त्रः सहि नियतमरण्ये पठ्यते" इति कर्क०। "वानेवारण्येऽनूच्यासोऽरण्येनूचो भवति" ता०ब्रा०। "अरण्येऽनूचः कश्चिदनुवाकः तेन हूयमानोऽपि पुरोडाशोऽरण्येऽनूचो भवति" भा०। अयमेव पक्षः श्रेयान् कर्कमते बहुव्रीह्या अरण्ये सप्तम्या लुक् न स्यात् अलुक्समासस्य तत्पुरुषैकविषयत्वात् अत उपचारात् तत्सम्बन्धवाचकत्वं युक्तम् "सोऽस्यैषोऽवाङ् प्राण एतस्य प्रजापतेः सोऽरण्येनूचो भवति" शत०ब्रा०।

अरण्यौकस् पु० अरण्ये विधानेनौकोयस्य। १सन्यादौ २वानप्रस्थे "वैकल्यं मम तावदीदृशमपि स्नेहादरण्यौकसः" शक०

अरत त्रि० न रतः। १ अननुरक्ते २विरते च। [त्रि०।

अरतचप पु० अरता विरता तपा यस्य। १ कुकुरे २लज्जाहीने

अरति पु० ऋ-अति। १क्रोधे। रम-क्तिन् न०त०। २अनवस्थितचित्ततायाम्, ३रागाभावे, "सुखं कषायमरतिर्गौरवं कण्डवत्तसोः" सुश्रुतः। ४ रतिविरहे, ५उद्वेगे, "स्वाभीष्टवस्तुलाभेन चेतसो याऽनवस्थितिः अरतिःसा" इत्येवंरूपे ६ इष्टवियोगाद्मनसोव्याकुलीभावे ७ अमन्तोयें "भृशमरतिं हि सहियोगः" इति। किरा० अरक्षते ८ नायकदशाभेदे च स्त्री। "हर्म्यतलः सकुसुमोत्तराजागरः कृशताऽरतिः। ह्रीत्यासोन्मादमूर्च्छाः स्याः इत्यनङ्गदशा दश" साहि०। सा च विषयविद्वेषं करोति। न०ब०। ९रागहीने त्रि०।

अरत्नि पु० ऋ-कत्नि रत्निः बहुव्रीहिकरः स नास्ति यत्र। १विस्तृतकनिष्ठे बहुव्रीहिहस्ते, २कफोणिमारभ्य कनिष्ठाङ्गुलिपर्य्यन्तपरिमाणे। अतस्ततः प्रमाणे मात्रच्। तत्परिमिते त्रि०। "अरत्निमात्रान्तरिते देशे" भवदेवः। "तासुत्तरतोऽग्नेर्निदधात्यरत्निमात्रे" कात्यश्रु०। "अरत्निमात्रा लुपकाः पत्रैर्द्वादशभिर्मितैः" सुश्रु०। २ कफोणौ (कनो) बाहोरवयवे। "भीमो धनुष्मानुपजान्वरत्निः" भट्टिः। "जवनेनाहवनीयमरत्नी संधत्त" शत०ब्रा०। ४ बाहौ बाहुर्वा अरत्निः बाहुना वीर्यं क्रियते" शत०ब्रा०। वा कप्। अरत्निकोऽप्युक्तार्थे।

अरथि पु० ऋच्छति रथिना सह युद्धभूमिम् ऋ-रथिन् सारथिः न०त०। सारथिभिन्ने। "अस्तनश्चविद्यमजत्यरथोः" ऋ० ६,६६,७, रथिः सारथिः न रथिरथिः" सा०दीर्घः भा०। [२ भग्नदन्ते द्वेषे च

अरद पु० न जातोरदोयस्य। अजातदन्तावस्थे बाले

अरध्र त्रि० राध-क्विप्, कर्म्मणि रन् हुस्वश्च न०त०। शत्रु- "भिरद्रिंसे उपसूयस्व तवसस्वीयोऽरध्रस्य रध्रतरोबभूव" ऋ० ६,१८,४, राध-सिद्धौ रन् हुस्वः भा०।

२सम्बन्धे च "ता ह त्यद्वर्त्तियेदरध्रसुये त्या" ऋ०६,६२, ३, अरध्रम् सम्बन्धम् भा०।

अरन्तुक न० कुरुक्षेत्रान्तर्गतसमन्तपञ्चकसीमाभूते स्थानभेदे। "तरन्तुकारन्तुकयोर्यदन्तरं रामह्रदानाञ्च सचक्रकस्य च। एतत् कुरुक्षेत्रसमन्तपञ्चकम्" इति भा०व०प०।

अरन्धन न० अभावे न०त०। पाकाभावे स च सिंहसंक्रान्तौ कन्यासंक्रान्तौ च विधेयः "कर्कान्नमद्यात् सिंहार्के सिंहान्नं सिंहकन्ययोः"। इत्याचारमार्त्तण्डोक्तेः तस्मिन् पर्य्युषिताद्य भोजनविधानेन पाकाभावो गम्यते।

अरन्ध्र त्रि० नास्ति रन्ध्रं छिद्रं यस्य। निविड़े छिद्ररहिते

अरपस् त्रि० नास्ति रपोदुरितं यस्य। पापशून्ये "शंयोररपोदधातन" ऋ०१०,१५,४, "तदग्ने शंयोररपोदधातन" ऋ० १०,३७,११।

अरम् अव्य० अल-अम् वा लस्य रत्वम्। १ वक्ष्यमाणेऽलमर्थे २ शीघ्रतायाञ्च। अरङ्कृतशब्दे अरङ्कृतिशब्दे च उदा०। ३ अत्यर्थे च। "तस्या अरं गमावः" य०११,५२ अरमिषे सवामहे मीलुष्टवे अरंगमाय जग्मये" ऋ०८,४६,१७।

अरम त्रि० न रम्यतेऽत्र आधारे घञ्। अधमे।

अरमति स्त्री अरात्यर्था पर्य्याप्ता वा मतिः। १पर्य्याप्तबुद्धौ २दोग्ध्रौ च। "स्वादग्ने अरमतिर्वसुयुः ऋ०७,३४,२१। "उप स्वेनमरमतिर्वसुयुः" ला०उ०।

अरर त्रि० ऋ-अरन्। १ कवाटे। "सरभसमरराणि द्वारपाटल्य" वीर० च०। २आपिधाने ३ बंशकोषे विश्वः ४ अग्निभेदे पु०। गर्गा० यञ्। आरर्य्यस्तदपत्ये युवस्त्री०

अररि पु०न० ऋच्छति ऋ+विट्अरमियर्त्ति ऋ-इन्। कपाटे

अरिरिन्द न० रा-कि द्विव ररिर्दाता नास्त्यन्योररिरस्य पिपासोपगमस्य अररिं पिपासोपगमं ददाति दा-ख सुम्। जले निरु०। "अधारयदररिन्दानि सुक्रतुः" ऋ०१।२६।१०। भाष्ये प्रायुक्ता अन्या च व्युत्पत्तिर्दर्शिता। 'यद्वा-अररिरितवे तस्य गमनं औणादिकोऽरिप्रत्ययः। आतोऽनुपसर्गे कः पृषोदरादित्वादभिमतरूपसरसिद्धिः। तद्दतीत्यररिन्दान्युदकानि चेष्टाप्रदानीत्यर्थः। 'आपोमयाः प्राणा' इति श्रुतेः। यद्वा ररिर्दानं न विद्यते तादृशं दानमितरस्मादस्मात् तदररि अन्यैरदेयं लोकोपकारि भोगं ददतीत्यर्थः" इति।

अरिरिवस् त्रि० रा-क्वसुः ररिवान् न०त०। अदातरि। "योनो अग्ने अरिरिवा अघायुररातीः" ऋ०१,१४७,४।

अरु पु० ऋ-अरु। १शत्रौ त्रि०कौ०। २आयुधे उज्ज्वलद०

३ गमनस्वभावे त्रि० अरुरं, अरुरं मर्म्म परिदधाति मर्म ऋ० १,१२६,३, 'अरुरं गमनस्वभावम्' भा०।

अरुरुस् पु० ऋ-अरुस्। अर्त्तेरुरः इति" स्वतं सान्तमिति माधवः। उपद्रवकर्त्तुमागते शत्रौ "मा नः शंसो अरुरुषो धूर्त्तिः' ऋ०१,१८,३,। "अरुरुषः उपद्रवं कर्त्तुमशक्तसमीपे प्राप्तस्य शत्रुरूपस्य मनुष्यस्य" भा०।

अरुरे अव्य० अरं शीघ्रं राति रा-के। शीघ्रं प्रत्युत्तर लाभेच्छया क्षते अतिव्यग्रतया संबोधने। तच्च नीचं प्रत्येव

अरुलु पु० अरं लाति ला-कु-ऋअरु कपिलका० रस्य लः वा। (शोना) श्योनाकवृक्षे। "अरुलुत्वक्प्रियङ्गू च मधूकं दाड़िमाङ्कुरान्। अवाप्य पिष्ट्वा दधनि यवागूं साधयेद्द्रवम्" सुश्रु०। स्वार्थे कन् "तत्रैव। कपोतवङ्कारुलुको वरुणः पारिभद्रक" इति सुश्रु०।

अरव पु० अभावे न०त०। १रवाभावे प्रतिषेधार्थक शब्दाभावे न०ब०। २तच्छून्ये त्रि०।

अरविन्द न० अरान् चक्राङ्गानीव पत्राण्यस्मिन् विन्दते विद-अ। पद्मे "सरसीषुरविन्दानां वीचिविक्षोभशीतलम् रघुः" "रविन्दधानेऽरविन्दधाने" माघः "रागेण स्त्रियमरविन्दतः करायैः" माघः २सारसपक्षिणि ३ नीलोत्पले, ४ रक्तकमले ५ ताम्रे च। [नाभे विष्णौ।

अरविन्दनाभ पु० अरविन्दं नाभौ यस्य अच् समा०। पद्म-

अरविन्दाक्ष त्रि० अरविन्दमिव मनोहरमक्षि यस्य अच् समा० स्त्रियां ङीष्। १ पद्मसदृशनेत्रे २ पुण्डरीकाक्षे विष्णौ पु०। "पद्मनाभोऽरविन्दाक्षः" विष्णु सह०।

अरविन्दिनी स्त्री अरविन्दस्य सन्निवेशदेशादि इनि ङीप्। १पद्मयुक्ते देशे २पद्मलतायाञ्च। तेषां संघः इनि। ३ पद्मसमूहे।

अरश्मन् त्रि० नास्ति रश्मिररस्य वेदे वा० अनिच्समा०। प्रग्रहरज्जुरहिते रथादौ "अरश्मानो येऽरथा अयुक्ताः" ऋ० ६,६,७,२,०। "अरश्मानो रज्जुरहिताः" भा०।

अरस पु० अभावे न०त०। १ आस्वादाभावे। रस्यते आस्वाद्यते कर्म्मणि अच्। आस्वाद्यं मधुरादि न०त०। २ मधुरादिरसभिन्ने ३ अप्रशस्तरसे। न०ब०। ४ रसशून्ये त्रि० "अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्" श्रुतिः ५ असारे त्रि०। "इक्षिक्षारसं विषमरसं इक्षिक! ते विषम्" ऋ० १,१६१,१६, "अरसमसारमिति भा०"। रसं वेत्ति अच् न०त०। रसज्ञभिन्ने। "किमस्यानाम स्वादरसपुरुषानादरभरैः" नैष०।

अरसिक त्रि० रसं वेत्ति रस+ठन् न०त०। रसानभिज्ञे "अरसिकेषु रहस्य निवेदनं शिरसि मा लिख" इत्युद्भटः।

अराग पु० अभावे न०। १ अनुरागाभावे रङ्गनाभावे च न०व०। २रागशून्ये त्रि०। "तमहमरागमदृश्यम्" वेणी०

अरागिन् त्रि० न रागी न०त०। विरक्ते स्त्रियां ङीप्।

अराजक त्रि० नास्ति राजा यत्र कप्। राजशून्ये देशादौ 'अराजको हि लोकोऽयम् सर्व्वतो विद्रुते भयात्" मनुः। [दराजन्यप्रसूतितः" मनुः।

अराजन्य पु० न०त०। क्षत्रियभिन्ने "राज्ञो न धनमिच्छे-

अराजिन् त्रि० राजा अधिष्ठातृत्वेनास्त्यस्य व्रीह्या० इनि न०त०। १ राजानधिष्ठिते "वि पर्व्वताः अराजिनः" ऋ० १,७,२३। अराजिनः राज्ञा केनचित्स्वामिना ऽनधिष्ठिताः" भा०। न राजते राज-इनि। २दीप्तिशून्ये त्रि० स्त्रियामुभयतो ङीप्।

अराजीव पु० अरम् चक्राङ्गं तत्साधनम् आजीवति आ+ जीव अन् उप०स०। १रथकारे। राजीवं पद्मम् न०ब०। २पद्मशून्ये जलादौ त्रि०।

अराति पु०न राति ददाति सुखं रा+क्तिच् न०त०। १शत्रौ। "देवः, सोऽयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः" वेणी० अरिशब्दे विद्वतिः। ज्योतिषोक्ते २षडस्थाने। "आरतिव्रणयोः षष्ठे अष्टमे मृत्युरन्ध्रयोः" इत्युक्तेः षडस्थाने अरिक्षत्रशुभाशुभचिन्तनीयत्वात्तस्यात्वम् कामादिष्वान्तररिपुषु ४षट्संख्यायां कामादीनामान्तररिपूणां संख्यासाम्यात्। ५अभिगमनशीले च "मा घोन्यर्योवनुषामरातयः" ऋ०७,८३,५,। "विश्वा अग्नौ अरातीः ऋ० ८,७६,२, अरातीः अभिगमनशीलाः शत्रवोवा भा० भावे क्तिन् अभावे न०त०। ६ दानाभावे स्त्री "मा नो अरातिरीशत" ऋ० २,७,२। "अरातिरदानम् शत्रुर्वा वेदे शत्रौ अरातिशब्दः स्त्री" भा०। अरातिरिवाचरति। आत्मनः अरमिच्छति क्यच् अरातीयति। शत्रुतुल्यमाचरति तदिच्छति वेत्यर्थे। "य उक्त यजमने यारातीयति" शत० ब्रा०। योऽस्मभ्यमरातीयात्" यजु० ११, ८०। [अथ० १०,६,१।

अरातीयु त्रि० अरातिरिव आचरति अराति+क्यच्-उ। शत्रुतुल्याचारशीले "अरातीयोर्भ्रातृव्यस्य दुर्हृदः"

अरातीवन् त्रि० अरातिमिच्छति वेदे मत्वर्थीयोवनिप् पूर्व्वपददीर्घश्च। शत्रुतुल्याचारयति। "अधायुररातीवा मर्चयति हृषेन" ऋ०१,१४७,४।

अराधस् त्रि० राधः धननाम निरु०। तद्रहिते यस्य। धनरहिते 'कदामर्त्तमराधसम्' ऋ०१,८४,८, "अराधसम् राधसा धनेन रहितम्" भा० 'यदा पणौ रराधसो निराधसं' ऋ०८,६१,२ "अराधसं धनहीनम् यज्ञञ्च" भा०।

अराय त्रि० नास्ति राधनं यस्य वेदे यच्समा०। १धनशून्ये स्त्रियां ङीप्॥ "अपस्कृधि वा यातुधानानप सर्व्वा अरायः" अथ० ४,१८,८ रा+भावे घञ् रायोवत्तादौदानम् न०व०। २तच्छून्ये त्रि०। "नारायासो न ज्वहवः" ऋ० ८।६१।११, "अरायाः अधनाः अहविष्का वा" भा० "अरायेभ्योजिघत्नुभ्य इमं मे परिरक्षत" अथ० ८,२,२०।

अराल पु० ऋ-विच् अरमालाति आ+ला-क। १ सर्ज्जरसे २ मत्स्यहस्तिनि। ३ कुटिले त्रि०। "तत्तामरालयमरालमरालकेशी" नैष० "भित्त्वा निराक्रामदरालकेश्याः" रघुः "नोवक्त्रमालीयमरालपक्ष्मणः" कुमा०। ४ वेश्यायां स्त्री

अरावन् त्रि० रा-वनिप् न०त०। अदातरि। "अरावा चन मर्त्यः' ऋ०८,८,४, 'याहि धूर्षेररावणः, ऋ०१,३६, १५ स्त्रियां ङीप् वनोरच्। अरावरी।

अरि पु० ऋ-इन्। १ शत्रौ २ रथाङ्गे, चक्रे, ३विट्खदिरे, ४कामक्रोधलोभमोहमदमात्सर्येषु षट्सु, तत्संख्यासाम्यात् ५षट्संख्यायां, ६ ज्योतिषप्रसिद्धे लग्नादधिके षडस्थाने ७ ईश्वरे च। तत्र शत्रौ "दूरात्प्रशमितारिभिः' 'विजितारिपुरः पुरः" रघुः। "नारीणामनुकूलमाचरसि चेज्जानासि" का०प्र० "अरिकरिहरणार्थम्" लीला०। "नारिं न मित्रं यं विद्यात्तं आद्धेभोजयेत् द्विजम्" मनुः। चक्रे "गदारिखड्ग पद्मधृक्" विष्णुध्यानम्। कामादौ "कृतारिषड्वर्गजयेन" किरा०। ईश्वरे अरिधामश् शब्दे उ०विट्खरि अरिभेदः। "सितासितौ चन्द्रमसो न कचित् बुधः शशी सौम्यसितौ रवीन्दू। रवीन्दुभौमा रवितस्त्रिमित्रा' इति ज्योतिषोक्तेषु रव्यादीनां ८शुक्रमन्दादिषु। यथा रवेः शुक्रशनी, कुजस्य बुधः, बुधस्य शशी, गुरोः बुधशुक्रौ शुक्रस्य रविचन्द्रौ" शनेः रविचन्द्रभौमाः। "नीचस्थितेऽरिगेहगेऽथ पराजिते वा जीवे भृगौ व्रतविधौ कृतिकर्महीनः" ज्योति०एते च नैसर्गिका अरयः तात्कालिकास्तु "चतुर्थदशवित्तान्यविनाशस्थाः परस्परम्। तत्कालमित्राण्युच्चस्थः कैश्चिदुक्तोऽन्यथा रिपुः" ज्योतिषोक्तेः तत्काले तत्तद्राशिस्थग्रहापेक्षया २,३,४,१०,११,१२ स्थानभिन्नेषु १,५,६, ७,८,९ स्थानेषु स्थिताः ग्रहाः तथाहि कर्मकाले ये ग्रहा यत्र राशौ तिष्ठन्ति तेषां यदपेक्षया १,५,६,७,८,९,स्थान

स्था यद्दाः स्युः तेषां तत्कालिकारयो भवन्ति तएव यद्दा यदि नैसर्गिकरिपवस्तदा अधियत्रवः नैसर्गिकसमाचेत् रिपवः, इति भेदः। यथोक्तं हितसमरिपुसंज्ञा ये निसर्गे निरूक्ताः अधिहितहितमध्यास्तेऽपि तत्कालमित्रैः। रिपुसमसुहृदाख्या ये निसर्गोपदिष्टा अधिरिपुरिपुमध्याः शत्रुभिश्चिन्तनीया' इतिराजमा०। निसर्गसमाच "बुधःकुजेज्यासुजिदर्कपुत्राः शुक्रार्किजौ, भौमसुरेज्यमन्दाः। शनिः, कुजेज्यौ, सुरराजमन्त्री रव्यादितोऽमी समसंज्ञिताः स्युः" इत्युक्ताः यथा रवेः बुधः, चन्द्रस्य कुजगुरुशुक्रशनयः। कुजस्य शुक्रशनी, बुधस्य कुजगुरुशनयः। गुरोः शनिः, शुक्रस्य कुजगुरू शनेः गुरुः, एतेषां कूमेणैते समास्त एव समा अपि तात्कालिकरिपवश्चेत् रिपव इति अवगन्तव्यम्। एतेषां बलज्ञानार्थं तत्तत् संज्ञा तथाहि अधिमित्रस्टहे २२।३०कला बलम् मित्रस्टहे१५ कलाः, समस्टहे ११।३५कलाः शत्रुगेहे ७।३० कलाः अधिशत्रुस्टहे ३।३५ कलाबलम्। मूलं जातकादौ द्रष्टव्यम्। नैसर्गिकरिपुता तु सर्वकार्यमात्रे इति भेदः। एतच्च जातोक्तपद्दादिबलज्ञानोपयोगि। ताजके तु "दृष्टिः स्याच्चमपञ्चमे बलवती प्रत्यक्षतः क्षेत्रदा पादोना (४५कलाः) ऽखिलकार्यसाधनकरी मैत्रापकाख्योच्यते। गुप्तक्षेत्रकरी तृतीयभवने कार्यस्य संसिद्धिदा त्र्यंशोना कथिता (४०कलाः) तृतीयभवने षड्भागदृष्टिर्भवे (१०-कलाः)। दृष्टिः पादमिता (१५कलाः) चतुर्थदशमे गुप्तारिभावा सुहृदाऽन्योन्यं सप्तमे तवैकभवने प्रत्यक्षवैराखिला" (६०कलाः) इति दृष्टिविशेषमभिधाय "पञ्चखित्रदृशा (३,५,९,११,) सुहृत्, रिपुदृशा (१,४,७,१०,) शत्रुः। समस्त्रन्यथा २,६,८,१२,इति नील०उक्तदिशा तात्कालिकमित्रादि। तेन स्वामैत्र्या १,४,७,१०, स्थानस्था यद्दाः रिपवः। तत्र "स्वस्वाधिकारोक्तबलं सुहृद्भे पादोनमर्द्धं समभेऽरिभेऽङ्घ्रिः" नील०। राहोर्निसर्गरिपवस्तु "सूर्यः शशाङ्को धरणीसुतश्च राहोः रिपुः"इत्युक्ता ज्ञेयाः। तत्कालिकास्तु प्रागुक्तदिशा ज्ञेयाः केतोस्तु 'शुक्रशनी विपश्चौ' इत्युक्तौ ज्ञेयौ। जातके षष्ठस्थाने "षष्ठे च ज्ञतविद्विषौ" इत्युक्तौ चिन्तनीयौ। ताजके तु "रिपौ मातुलमान्द्यारिचतुष्पाद्बन्धनीक्षणा" इति नील० ताजकोक्ताः चिन्तनीयाः। ८ तन्त्रोक्ते मन्त्रभेदे।

तथाहि षोडशकोष्ठात्मके सिद्धादिचक्रे चतुश्चतुःकोष्ठादिक्रमेण सिद्धः, साध्यः सुसिद्धः अरिरिति संज्ञा। तत्रापि तेषु चतुःकोष्ठात्मकेषु प्रत्येकं चतुर्थं कोष्ठमपि अरिसंज्ञं तथा च पञ्चमकोष्ठं सप्तमकोष्ठं त्रयोदशकोष्ठं एकादशंकोष्ठम् द्वादशं पञ्चदशं कोष्ठं षोड़शं चेति सप्तकमरिसंज्ञं तस्यारिसंज्ञकत्वात् तत्स्थवर्णा अप्यरिसंज्ञाः। षोड़शकोष्ठस्थवर्णेषु मध्ये साधकनामाक्षरं यत्र तिष्ठति तस्यैवादित्यं प्रकल्प्य दक्षिणावर्त्तेन सर्व्वत्र चतुर्षु चतुःकोष्ठात्मकेषु गणना तथा च प्रथमादिकोष्ठस्थाक्षरादिको मन्त्रः सिद्धादिनामभाक्। यथा आद्यकोष्ठचतुष्टये प्रथमे १सिद्धसिद्धः २ द्वितीये सिद्धसाध्यः। तृतीये ३सिद्धसुसिद्धः ४ चतुर्थे सिद्धारिः। द्वितीयकोष्ठचतुष्के आद्ये साध्यसिद्धः द्वितीये साध्यसाध्यः। तृतीये साध्यसुसिद्धः चतुर्थे साध्यारिः। तृतीयकोष्ठचतुष्टये आद्ये सुसिद्धसिद्धः द्वितीये सुसिद्धसाध्यः। तृतीये सुसिद्धसुसिद्धः चतुर्थे सुसिद्धारिः। चतुर्थकोष्ठचतुष्के आद्ये अरिसिद्धः। द्वितीये अरिसाध्यः तृतीये अरिसुसिद्धः चतुर्थे अर्थ्यरिरिति गणना। एतच्च प्रदर्शनमात्रमुक्तम् किन्तु सर्व्वत्र यत्र कोष्ठे साधकनामाक्षरं तदारभ्यैव गणना तथाच साधकनामाक्षरं यत्र तिष्ठति तत्कोष्ठस्थैवादित्यं प्रकल्प्य दक्षिणावर्त्तेन गणने मन्त्राक्षरं यत्र तिष्ठति तत्पर्य्यन्तगणनायां सिद्धादिषोड़शसंज्ञा तथा च २८ पृष्ठे दर्शिताऽकथहचक्रानुसारेण प्रथमादिसंज्ञा साधकनामाक्षरादिकल्पनयैव। ततश्च सिद्धादिचक्रस्थकोष्ठानां प्रथमादिसंख्या या उक्ता सा न भवता अकथहचक्रगन्धे तन्मूलं द्रष्टव्यम्।"अरिमन्त्रं न स्पृशीयादिति"तत्त्वम्। राशो विषयानन्तरस्थेऽन्यपतौ। स च द्वादशराजचक्रमध्ये आदिसूतः यथोक्तं माघ २,८१ श्लोकव्याख्यायां मल्लि०। "अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परम्। अरिमित्रस्य मित्रञ्च विजिगीषोः पुरस्सराः" पञ्चेति शेषः "पार्ष्णिग्राहस्ततः पश्चादाक्रन्दस्तदनन्तरम्। आसारावनयोश्चैव विजिगीषोस्तु पृष्ठतः" पार्ष्णिग्राहासारः आक्रन्दासारश्चेति चत्वार इति शेषः एवं नव भवन्ति विजिगीषुर्द्वयमः ':अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः। अतुयद्धे संहतयोः समर्थोव्यस्तयोर्वधे। मण्डलाद्बहिरेतेषासदासीनो बलाधिकः" इति मध्यमोदासीनाख्यां सह द्वादश इति। अरये साधु तत्कर्म हितं वा यत्। अराय्यं तत्र साध्वादौ त्रि० "असौ यो अधरादुदक्तस्तत सन्वराय्यः" ऋग्० २,१४,२,। १० प्रेरके त्रि० अरिष्टतशब्दे उदा०।

अरिक्थभाज् त्रि० रिक्थं पित्रादिदायं न भजते भज-क्विप् अस०स०। दायाप्राप्तिशि अनंशे स्त्रीपुंसितादौ अनंशशब्दे १४२ पृष्ठेऽस्य विवरणम्।

अरिगूर्त्त(र्ण) पु० अरये तद्धननाय गूर्त्तः उद्युक्तः गुरी उद्यमे क्त तस्य न वेदे नत्वम्। शकुबधायोद्युक्ते "पर्षदरि गूर्त्तः स्तरिः ऋ०१,१८६,२ लोके तु अरिगूर्ण इत्येव।

अरिता स्त्री अरेर्भावः तल्। शत्रुतायामनिष्टसम्पादने।

अरित्र पु० ऋ-अन्मनूतत्रार्थे इत्र वेदे इट्। नाविके कर्णधारे "इयर्त्ति वाचमरितेव नावम्" ऋ०६,६५,२, २,४२,१, लोके तु नेट् अर्त्ता गन्तरि स्त्रियां ङीप्।

अरित्र न० ऋच्छत्यनेन ऋ-इत्र। (हाजि(इति ख्याते नौकाचालनकाष्ठे। "लोलैररित्रैस्तरणैरिवाभितः" माघः "नौर्ह वा एषा स्वर्ग्या यद्ऋत्विग्यवमानं तस्या ऋत्विज एव सृष्ट्याधारित्राय" शत०ब्रा०। २गमनसाधने वाहनादौ च "अरित्रं वां दिवस्पृथु" ऋ०१,४६,८, "अरित्रं गमनसाधनं नौरूपम्" भा०। "शतारित्रां नावमातस्थिवांसम्" ऋ०१,११६।५, "शतारित्रां वज्रिरित्रां यैः काष्ठैः पार्श्वतोवद्भैर्जलालोडने सति नौः शीघ्रं गच्छति तान्यरित्राणि" भा०। ऋरितः पापादितस्त्रायते त्रै-क। पापादितो २रक्षके त्रि०। "दशारित्रो मनुष्यः स्वर्गः" ऋ०२,१८,१, "दशारित्रः अरिभ्य पापेभ्यस्त्रायन्ते इत्ररित्रा यस्मात् दशसंख्याकायस्मात्" भा०। काश्या० ब्रज्जिठौ। तत्सम्बन्धिनि आरित्रिकः तद्वादौ च त्रि० अञ स्त्रियां ङीप्।

अरिदान्त पु० अरिर्दान्तोयेन निष्ठान्तत्वात् विशेष्यस्यापि परनिपातः। यदुवंश्ये क्षत्रियभेदे। 'रामे भारं समासज्य, युयुधाने च वीर्यवान्। अक्रूरे विष्टपौ चापि गदे च कृतवर्म्मणि। चक्रदेवे सुदेवे च सारणे च महाबले। निहत्तशत्रौ विक्रान्ते भङ्कारे विदूरथे। उग्रसेनात्मजे कङ्के शतद्युम्ने च केशवः। राजाधिदेवे शूरे च प्रसेने चित्रके तथा। अरिदान्ते वृहद्गौ च सफल्के साल्वकौ पृथौ। वृष्ण्यन्धकेषु चोन्येषु सख्येषु। मधुसूदनः। गुरुमासज्य तं भारं ययौ द्वारवतीं प्रति"। इति हरिवं०।

अरिधायस् त्रि० अरिभिरीश्वरैः धार्य्यते धा-असुन् षुट् युट् च। ईश्वरधार्य्ये। "अदावरिधायसोगाः" ऋ० १,१२६, ५, अरिधायसः "अरिभिरीश्वरैः धार्य्यमाणा" भा०।

अरिनन्दन त्रि० अरीन् शत्रून् नन्दयति तोषयति नन्द-णिच्-ल्यु उप०स०। शत्रुसन्तोषके अकृतेन्द्रियजये व्यसनासक्ते।

अरिन्दम त्रि० अरीन् शत्रून् कामादीन् वा दाम्यति दमयति दम-अन्मनूतत्रार्थे खच् मुम् उप०स०। पराभिभावके १शत्रुतापके २जितकामादौ च। काश्या० ब्रज्जिठौ आरिन्दमिकः। तत्सम्बन्धिनि त्रि० अञि स्त्रियां ङीप्।

अरिप्र त्रि० रिप्रमिति निरुक्ते पापनाम तन्नास्ति यस्य। पापरहिते "अरिप्रा इत्वहन्मनाः" ऋ०८,८,६, "रिप्रमिति पापनाम" भा०। "तं वो वयं शुचिमरिप्रमद्य"। ऋ०७,४७,१, "अरिप्रं पापरहितम्" भा०।

अरिमर्द पु० अरिं रोगरूपं शत्रुं मृद्नाति मृद-अच् उ०स०। १कासमर्दवृक्षे। २शत्रुतापके त्रि०।

अरिमर्दन त्रि० अरिं मृद्नाति मृद-ल्यु-उप०स०। १शत्रुतापके गान्दिनीसुते अक्रूरसोदरे श्वफल्कस्य सुते यदुवंश्ये क्षत्रियभेदे "श्वफल्कः काशिराजस्य सुतां भार्य्यामविन्दत। गान्दिनीं नाम तस्यार्थे गाः सदा प्रददौ पिता। तस्यां जज्ञे महाबाहुः सुतवानिति विश्रुतः। अक्रूरोऽथ महाभागो यज्वा विपुलदक्षिणः। उपमद्गुस्तथा मृदुगुर्मृदरश्चारिमर्दनः। अरिक्षिपस्तथोपेक्षः शत्रुघ्नोऽरिमर्दनः। धर्म्मदृग्व्रतिधर्म्मा च स्वधर्मोजानकस्तथा आवाहप्रतिवाहौ च सुन्दरी च वराङ्गना" हरिवं०।

अरिमेजय पु० अरिमेजयति कम्पयति एज-णिच्-खश् मुम् उ०स०। शत्रुतापके अक्रूरसोदरे यदुवंश्ये क्षत्रियभेदे अरिमर्दनशब्दे विवृतिः।

अरिमेद पु० अरेर्विट्खदिरस्येव मेदः सारः स्नेहोऽस्य। (गुदबावला) १वृक्षभेदे। अरिरिव मेद्यति स्नेहयत्यात् अर्त्तिं क्षिपतीति भिद-अच्। २विट्खदिरे। संज्ञायां कन्। ३क्रिमिभेदे तद्गणनायाम् "वाह्यका पिच्छिटः कृष्णो वर्च्चकीटोऽरिमेदकः" सुश्रु०।

अरिला स्त्री 'षोड़शकले विलासिनि! छन्दसि प्रतिपदमन्ते यमकविलासिनि। अरिला नाम पयोधरधारिणि! शेषे नियतलघुहयधारिणि" "श्लक्ष्णलक्षणे मात्राछन्तभेदे।

अरिष पु० न ऋर्त्ति मलं यस्मात् ऋ-किषन् न० त०। १अपानमांसजे रोगभेदे। न रिष्यति विच्छिद्यते रिष-क न०त०। २अविच्छिन्नधारावर्षणे न०।

अरिषड्वर्ग न०षट् च अष्टौ च द्व० ततः परिमाणार्थे कन् षड्वर्गकम् अरिस्वामिकं षड्वर्गकं शाक० त०। विवाहे वर्जनीये योगविशेषे, तथाहि दम्पत्योः परस्परराश्यपेक्षया परस्परस्य राशेः षष्ठत्वेऽष्टमत्वे वा अशुभं तयोः राश्योर्मित्रस्वामिकत्वे पुनर्न दोषः शत्रुस्वामिकत्वेऽतीव दोषः। यथोक्तं "मकरः करिसुरिपुणा कन्या मेषेण सह भवस्तुलया। कर्कटपटौ वृषधनुषी

ष्टचिकमिथुने चारिविधौ। यदि कन्याष्टमे मर्त्तुर्भर्तुः षष्ठे च कन्यका। षड्दंष्टकं विजानीयात् वर्ज्जितं त्रिदशैरपि" ज्यो०त०। तत्र प्रतिप्रसवः। "सौहृद्ये द्वयोर्हयोरपि तयोरैक्येऽपि वा तारापट्सु सुमित्रमित्रसुखदत्वेमार्थसम्पदादि। षट्काष्टे नवपञ्चमे व्ययधने योगे च पुंयोषितोः प्रोत्थायुःसुखदद्विपुत्रजननं कार्य्यो विवाहः शुभः" भुज०भी०। अत्यन्तापद्विषये व्यासः। "मैत्रादियोगेऽपि षडष्टकादौ तारावियत्पल्यरिनैधनाख्याः। वर्ज्या विवाहे पुरुषोऽतो हि प्रीतिः परा जन्मसु तारकासु"। तत्प्रदानशुक्रम् तत्रैव। "षड्दष्टके गोमिथुनं प्रदेयमिति"।

अरिषड्वर्ग पु० षण्णां वर्गः समुदायः षड्वर्गः अरीणां कामक्रोधलोभमोहमदमात्सर्य्यरूपाणामन्तःशत्रूणां षड्वर्गः देवीभागवतवत् विष्णुभागवतवच्च सामेत्यत्वेऽपि गमकतया स०। कामादिषु षट्स्वान्तरेषु रिपुषु "कृतारिषड्वर्गजयेन" किरा०।

अरिषण्य त्रि० न रिषति हिनस्ति रिष हिंसायाम् अन्यक् न०त०। अहिंसके "त्वानेव नो अरिषण्या तनूनाम्" ऋ०२,३६,४, "अरिषण्यावहिंसकौ त्वानौ" भा०।

अरिष्ट पु० रिष–हिंसायां कर्त्तरि–क्त न०त०। १लशुने २निम्बे। "सर्षपारिष्टपत्राभ्यां सर्षिषा लवणेन च "व्रणे रक्षायां सुश्रुतः। "सुमनायाश्च पत्राणि पटोलारिष्टयोस्त्वचेति" विद्रधिचिकित्सायां सुश्रुतः। ३ लङ्कानिकटवर्त्तिपर्वतभेदे ४काके ५कङ्के (रोठा) इति ख्याते पक्षिणि फलकङ्के। "अरिष्टकस्त्रिदोषघ्नोऽपहृजिद्गर्भपातनः" वैद्य०। ७कृष्णकृतेऽसुरभेदे। "यत्र शार्ङ्गञ्च मैन्दञ्च कंसं द्विविदमेव च अरिष्टं वृषभं धेनुं पूतनां दैत्यदारिकाम्। नागं कुवलयापीडं चानूरं मुष्टिकं तथा। दैत्यान् मानुषदेहस्थान् जघानाशु वीर्य्यवान्" हरिव०। ८अशुभे। ९तक्रे। १०सूतिकागृहे। "अरिष्टशब्दो परितोविसर्पिणा" रघुः तत्करणप्रकारस्तु "नवमे मासि सूतिकागारमेनां प्रवेशयेत् प्रशस्तितिथ्यादौ तत्रारिष्टं ब्राह्मणक्षत्रियवैश्यशूद्राणां श्वेतरक्तपीतकृष्णेषु भूमिप्रदेशेषु विन्यस्तन्यग्रोधतिन्दुकभल्लातकसर्षपदूर्वानिर्म्मितं गृहागारं यथासंख्यं तन्नवपञ्चसप्तनवभित्तिं सुविभक्तपरिच्छदं प्राग्द्वारं दक्षिणद्वारं वाऽष्टहस्तायतं चतुर्हस्तविस्तृतं रत्नाम्बुसमन्वितं विधेयम्" सुश्रु०। तत्र प्रवेशे "रोहिण्यैन्द्रवपौष्णे तु स्वातीवस्वर्यमोरपि। पुनर्वसौ पुष्यहस्तधनिष्ठोत्तरासु च। मैत्रे त्वाष्ट्रे तथाश्विन्यां सूतिकागारमाविशेत्" नि० सि० तारा उक्ता। एतच्च सम्भवे "प्रसूति समये प्राप्ते सद्यएव प्रवेशयेत्" वशिष्ठोक्तेः। तच्च नैर्ऋत्यां वास्तुभूमौ कार्यम् "वारुण्यां भोजनस्थं नैर्ऋत्यां सूतिकागृहम्" वशिष्ठोक्तेः "दशाहं सूतिकागारमायुष्यञ्च विशेषतः। वह्निना तिन्दुकालातैः पूर्णकुम्भैः प्रदीपकैः। सुखेन तथा हारिवर्षकैश्चित्रितेन च" विष्णु०पु०। ११अनिष्टसूचके उत्पाते भूमिकम्पादौ "अरिष्टे त्रिविधोत्पाते" इतिज्यो०। १२अनिष्टस्थानस्थेषु रव्यादिग्रहेषु। १३पानेनारिष्टकारके मद्ये। "रक्तारिष्टं शोणिताजीर्णशेषम्" माधवः। "अरिष्टं लघु पाकेन सर्व्वतस्तु गुणाधिकम्। अरिष्टस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः" वैद्य०। मद्ये पुंस्त्वमपि भावप्र०। नास्ति रिष्टं यतोऽधिकम् ५ब०। १४मरणचिह्ने। "रोगिणो मरणं यस्मादवश्यं भावि लक्ष्यते। तल्लक्षणमरिष्टं स्यात् रिष्टमप्यभिधीयत" इति पुरा०। न०त०। १५शुभे न० ५ब०। १६शुभदायके विधाने १७अविनाशिनि च त्रि०। १८बलिपुत्रे दैत्यभेदे पु० "अरिष्टो बलिपुत्रश्च वरिष्ठोऽथ शिलायुधः" हरिवं० (कट्की) ख्यातायां १९कटुकायां २०कश्यपपत्नीभेदे च स्त्री "अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा खसा" इत्युपक्रम्य "कद्रुर्मुनिश्च राजेन्द्र! ताम्रपत्न्यानि मे शृणु अरिष्टा तु महासत्त्वान् गन्धर्वानसितौजसः" हरिव० रिष हिंसा विरोधे न०त०। २१सुखेनावस्थाने न० "मर्त्तवेऽथो अरिष्टतातये" ता०ब्रा०। "अरिष्टं सुखेनावस्थानं तस्य तातये विस्तारायै" भा०। स्वार्थे कन्। निम्बादौ।

अरिष्टगातु अरिष्टं हिंसितं गच्छति गम–क्तन् नि० आदन्तादेशः। अहिंसितगमने। "अरिष्टगातुःसहोतासहोभरिः" ऋ० ५,४३,२, "अरिष्टगातुरहिंसितगमनः" भा०।

अरिष्टताति अरिष्टस्य करः वेदे अरिष्ट+तातिल्। सुखकरणे 'जीवातवे न स्तवेऽथोऽरिष्टतातवे' ऋ०१०,६०, ८, "ओषधीरस्मा अरिष्टतातये" यजु०। लोके तु ताय–क्तिन्। अरिष्टविस्तारे "तद्वत्भवतां निष्प्रत्यूहमरिष्टतातिमाशासे" वीरच०। क्वचिद्देऽपि तथा अरिष्टशब्दे दृश्यम्।

अरिष्टदुष्टधी त्रि० अरिष्टेन मरणसूचकनिमित्तेन दुष्टा धीरस्य। आसन्नमरणसूचक-निमित्तेन दुष्टमतौ

अरिष्टनेमि पु०ईत० कश्यपपुत्रे विनतायाः पुत्रभेदे "तार्क्ष्य-

वारिष्टनेमिश्च गरुड़श्च महाबलः। अरण्यचारुषिर्वैव विनतायाः सुताः स्मृताः" अरिव०२तीर्थंकरे जिनभेदे च।

अरिष्टि स्त्री न रिष्टिः हिंसा अभावे न०त०। हिंसाभावे। "प्रोषं रयीणामरिष्टिं तनूनाम् ऋ० २, २१, ६,। 'अरिष्टिमहिंसाम्' भा०।

अरिष्टुत त्रि० अरिभिः प्रेरयितृभिः स्तुतं वेदे यत्वम्। प्रेरयितृभिः स्तुते प्रगस्ते "रासते विश्वगूर्त्तो अरिष्टुतः ऋ० ८,१,२२। लोके तु न यत्वम्। [स्यातरि।

अरिष्ट त्रि० अरये तिष्ठते स्था-क वेदे यत्वम्। शत्रुनाशाय

अरिह त्रि०अरान् हन्ति हन-ड। १शत्रुनाशके "हरिहयोऽरिहयोगविचक्षणः" रघुः "पौरवे रूपभेदे" अवाचीनोऽपि वैदर्भीमपरामुपयेमे मर्यादां नाम तस्यासश्च जज्ञे अरिहः, अरिहः खलु क्षत्रियोपयेमे" भा० आ० प०।

अरीढ़ त्रि० न रीढः लीढः न आस्वादितः लस्य रः। १अनास्वादिते। ऋग्वेदे तु ढस्य हः अरीह्णः इतेव। "अरीह्णं वत्सम्" ऋ०४,१८,१०। अरीह्णं शत्रुभिरनभिभूतमानम् भाष्योक्ते २अर्थे च।

अरीहण पु० अरिं हन्ति हन-अच् पूर्व्वदीर्घः। रूपभेदे अरीहणेन निर्वृत्तम् वुञ्। आरीहणकम्। चतुरर्थ्याम् उत्करा० ञ्। अरीहणीयः तत्सन्निकृष्टदेशादौ त्रि०।

अरीहणादि पु० अरीहण आदिर्यस्य। निर्वृत्तार्थे विहितवुञ्प्रत्ययनिमित्ते पाणिन्युक्ते शब्दसमूहे। स च गणः अरीहण, द्रुघण, द्रुहण, भगल, उलन्द, किरण, सांपरायण क्रौष्ट्रायण, औष्ट्रायण, त्रैगर्तायन, मैत्रायण भाल्लायण, वैमतायन। गौमतायन, सौमतायन। सौमायन, घौमतायन, सौमायन, ऐन्द्रायण,। कौन्द्रायण खाडायन, गाण्डिल्यायन, रायस्पोष, विपथ, विपाश। उदुदण्ड, उदञ्चन, खाण्डवीरण, वीरण, कपञ्जलस्, जाम्बवत गिंगपा, रैवत, विल्व, सुयज्ञ, शिरीष, बधिर जम्बु खदिर सुगर्भन्, दलद, भलन्दन, खण्डु, कनल यज्ञदत्त, अरीहणादिः।

अरुंषिका अरुंषि मर्मस्थानान्यधिकृत्य जाता ठन् ट०, सुम्। क्षुद्ररोगभेदे। "समासेन चतुश्चत्वारिंशत्क्षुद्ररोगा भवन्ति॥ तद्यथा अजगल्लिका यवप्रख्याऽम्बालजी विद्रधिका। कक्षपिका वल्मीकमिन्द्रवृद्धा पनसिका पाषाणगर्द्दभो जालगर्द्दभः कच्छा विस्फोटकोऽग्निरोहिणी विपर्पटः कृमिकोऽलजी विदारिका शर्कराऽर्बुदं पामा विचर्चिका एकसा पाददारिका कदरमलसेन्द्रलुप्तौ दारुणकोऽरुंषिका पलितं मस्तकविका यौवनपिडका पद्मिनीकण्टको जतुमणिर्म्मशकवर्म्म कीलशिलकालको व्यङ्गः परिवर्त्तिकाऽवपाटिका निरुद्रपकायः निरुद्गुदोऽक्षिपूतनं दृष्यकच्छ्रुदुन्दुभयश्चेति"॥ अरुंषि व्रणवस्त्राणि वस्त्रक्लेदानि मूर्द्धनि। कफासृक् क्लमिकोपेन नृणां विद्यादरुंषिकाम्" "अरुंषिकाकृते रक्ते सेचयेच्छिम्बवारिणा" इति च सुश्रुतः।

अरुग्ण त्रि० रुग्णः विरोधे न०त०। स्वस्थे रोगशून्ये "रजदरुग्णं विवलस्य सानुम्" ऋ०६,३६,२।

अरुच् त्रि० नास्ति रुक् कान्तिर्यस्य। प्रकाशहीने मलीमसे "अयं रोचयदरुचोरुचानोऽयम्" ऋ०६,३६,४॥

अरुचि पु० न रुचिर्यत्र। सत्यर्थभिलाषे १भोजनायोग्यता सम्पादके १रोगभेदे। न रुचिः सन्तोषः न०त०। २सन्तोषाभावे 'इत्यरुचेराह' जगदीशः। पूर्व्वोद्भावितदोषस्य शिथिलत्वशङ्कया सन्तोषाभावादिरर्थः। भोजनादौ २अभिलाषाभावे च "सन्निपातक्षयव्यासकार्यश्चिक्काऽरुचिप्रदः" "स्वादुर्विरिक्ते कफपित्तकोपो दाहोऽरुचिर्गौरवमग्निसादः" इति च सुश्रुतः।

अरुज त्रि० नास्ति रुक् रोगो यस्य। १रोगशून्ये २अनुत्पन्नरोगे च "कोऽरुक् कोऽरुक् कोऽरुक् "इति मन्त्रे" हतभुगमितभुगशाकभुक् सोऽरुगित्युद्भटः "अरुक् सदाप्यचलो महांश्च मन्मोत्तितश्चापि विवर्ज्जनीयः' सुश्रुतः।

अरुज पु० न रुजति रुज-क। (सोंदाल)इति ख्याते १वृक्षे। नास्ति रुजा यस्मात् ५व०। २रोगाभावसाधने त्रि० "विषेभ्यः खलु सर्व्वेभ्यः कर्णिकारुजां स्थिराम्" सुश्रुतः। ३ दानवभेदे पु० दानवगणनायां हरिवं०"अनुह्लादो हरिह्रयोवराहः संह्लादोऽरुजः"। ६त०। ४रोगशून्ये नीरोगे च त्रि०। "अपाककठिनः स्थूलोऽन्थिवर्त्मभवोऽरुजः" सुश्रुतः। "अरुजं वा व्रणं नृनमन्नः क्षिप्रं खलत्यपि" सुश्रु०।

अरुण पु०ऋ-उनन्। १सूर्य्ये, २सूर्य्यसारथौ, ३गुडे, ४सन्ध्यारागे ५भिःशब्दे, ६दानवभेदे ७कुष्ठभेदे, ८उद्रागरोगे। ९ अव्यक्तरागे १० कृष्णमिश्रितरक्तवर्णे च ११ तद्वति त्रि०। १२वृक्षभेदे, १३ सिन्दूरे च न०। १४ मञ्जिष्ठायाम् १५ श्यामाकायाम्, १६ अतिविषायाम् १७ नदीभेदे १८ कदम्बपुष्पायाञ्च स्त्री। १९ तिन्दुतायां मेदि०। २०इन्द्रवारुण्याम् २१गुञ्जायां राजनि० २२मुखनिक्षायाम् च स्त्री। तत्र अनूरौ 'विभावरी यदरुणाय कल्पते' कुमा०"यावत् प्रतापनिधिराक्रमते न भानुरुच्चाय तावदरुणेन तमोनिरस्तम्" रघुः। "तार्क्ष्यश्चारिष्टनेमिश्च गरुड़श्च

महाबलः अरुणश्चारुणिश्चैव विनतायाः सुताःस्मृताः" हरि० "अरुणोगरुड़भ्राता जवापुष्पसमप्रभः। योगानाञ्चैव सर्वेषां साध्यानामधिपः स्मृतः" हरिव०। "तदुत्पत्त्यादिकथा अनूरुशब्दे" १६१ उक्ता। रूप्यं "संहृज्यते सरिजैररुणांशुभिश्चैः" रघुः "रागेण बालारुणकोमलेन" कुमा०। वर्णे तद्वति च "नवनान्यरुणानि घूर्णयन्" कुमा० "अरुणपुष्पाणि फाल्गुनानि" शत० ब्रा०। "दधत् सन्ध्यारुणव्योमस्फुरत्तारानुकारिणोः" माघः। द्वादशादित्यमध्ये माघमासाधिपे २२आदित्यभेदे "अरुणो माघमासे वै" आदित्यहृदयम् विवरणमादित्यशब्दे। २४देवभेदे पु०। धूमादि० वुञ्। आरुणकः तद्भवे त्रि० गुणवचनात् भावे इमनिच् अरुणिमा पु० ष्यञ् आरुण्यम् न०। तल् अरुणता स्त्री त्व अरुणत्वम् न०। रक्तादिवर्णे। अपत्ये इञ्। आरुणिः जटायौ सूर्यपुत्रेमन्दे यमे कर्णे वैवस्वतमनौ सुग्रीवे ऋषिभेदे च। अश्विनीकुमारयोः द्वि०व० यमुनायां तपत्यां च स्त्री गुणवचनात् ङीषा० अभूततद्भावे क्यङ् अरुणायते अरुणायमानः। गौरा० ङीष्। २५अरुणवर्णायां गवि स्त्री। "अरुण्योगाव उषसामिति" निरुक्तोक्तायाम् २६ ऊषायामपि स्त्री। २७ मन्दरगिरिस्थे सरोवरे तस्य चारुणजलत्वात्तथात्वम् "सरांस्यथैतेष्वरुणञ्च मानसं महाह्रदः श्वेतजलं यथाक्रमात्" सि० शि०। "एतेषु मन्दरादिविष्कम्भशैलेषु" गुड़कुङ्कुमसिन्दूरादीनाञ्चारुणवर्णत्वात्तथात्वम्।

अरुणकमल न० ऊधसर्पवत् नित्यकर्म्म धा०। रक्तोत्पले

अरुणदूर्वा स्त्री ऊधसर्पवत् नित्यसमासः। रक्तदूर्व्वाभेदे, "यद्यदाराद्य विन्देयुः अरुणदूर्व्वां अभिषुणुयात् एष वै सोमस्य न्यङ्को यदरुणदूर्व्वा तस्मादरुणदूर्व्वां अभिषुणुयात् यद्यरुणदूर्व्वां न विन्देयुः" शत० ब्रा०।

अरुणप्रिया स्त्री अरुणस्य प्रिया। सूर्य्यभार्य्यायाम् १ संज्ञायाम्, २ छायायाञ्च अरुणभार्य्यादेवोऽत्र "तस्य भार्य्याऽभवत् देवी संज्ञा त्वाष्ट्री विवस्वतः" इति। "असहन्ती तु तां छायां सवर्णां निर्ममे ततः। छायामयी तु सा संज्ञा, तस्मान्छायासमुद्भिता। प्राञ्जलिः प्रणता भूत्वा छाया संज्ञां नरेश्वर!। उवाच किं मया कार्य्यं कथयस्व शुचिस्मिते!। स्थितास्मि तव निर्देशे याधि मां वरवर्णिनि!। संज्ञोवाच। अहं यास्यामि भद्रं ते स्वमेव भवनं पितुः। त्वयेह भवने भद्रे वस्तव्यं निर्विचारया। इमौ च बालकौ भद्रे कन्या चेयं सुमध्यमा। संभाव्यास्ते न चाख्येयमिदं भगवते क्वचित्। छायोवाच। आकर्णय्य हृता देवि! या शापाद्धैव कर्हिचित्। आख्यास्यामि सतं तुभ्यं गच्छ देवि! यथेच्छया"। इति हरिवं०। २प्रधाकन्याभेदे च। "सुषुवेऽष्टौ महाभागा प्रधा देवर्षिपूजिताः"। अनुवन्धा मनूकाञ्च अनूनामरुणप्रियाम् अतुगां सुभगाञ्चैव" हरिवं० अरुणवर्णं पुष्पादि प्रियमस्य। ४रक्तवर्णपुष्पप्रिये सूर्य्ये पु० ५तद्वर्णपुष्पप्रियमात्रे त्रि०।

अरुणपृषु त्रि० अरुणः पृषुः रूपं (निरु०) यस्य। रक्तवर्णरूपे "ऋतावरीमरुणपृषुं विभातीम्" ऋ०५,८०,१, "अरुणपृषुमरुणरूपाम्" भा०। [२ रक्तनेत्रयुक्ते त्रि०।

अरुणलोचन पु० अरुणे रक्ते लोचने यस्य। १पारावतपक्षिणि

अरुणसारथि पु० अरुणः गरुड़ात्मजः सारथिरस्य। सूर्य्ये विवरणमनूरुशब्दे।

अरुणात्मज पु० ६त०। १जटायौ पक्षिणि। २सूर्यपुत्रे मन्दे ३ सावर्णे मनौ ४ कर्णे ५ सुग्रीवे ६ यमे च ७ अश्विनीकुमारयोः द्वि०व० ८ यमुनायां तपत्यां च स्त्री। "त्रीण्यपत्यानि कौरव्य! संज्ञायां तपतांवरः। आदित्यो जनयामास कन्यां द्वौ च प्रजापती। स च वैवस्वतः पूर्व्वं आदित्यो देवः प्रजापतिः। यमश्च यमुना चैव यमजौ संभूवतुः"। संज्ञायां द्वौ सुतौ सुता चेति त्रीण्यपत्यानि। "द्वितीयायां तु संज्ञायां संज्ञेयमिति चिन्तयन्। आदित्यो जनयामास पुत्रमात्मसमं तदा। पूर्व्वजस्य मनोस्तात! सदृशोऽयमिति प्रभुः। मनुरेवाभवद्भ्राता सावर्णः इति चोच्यते। द्वितीयायां सुतस्तस्याः स विज्ञेयः शनैश्चरः"। इति सावर्णिः शनिश्च एतौ द्वौ सुतौ, संज्ञायाः छायाख्यायां द्वितीयायां सवर्णायां जातौ हरिवं०। वड़वारूपधरिण्यां संज्ञायाञ्च अश्विनीकुमारौ जातौ यथा तत्रैव। "वड़वारूपमास्थाय वने चरति शाद्वले। स तथारूपमास्थाय स्वां भार्य्यां शुभलोचनाम्। ददर्श योगमास्थाय स्वां भार्य्यां वड़वां ततः। अदृष्टां सर्व्वभूतानां तपसा नियमेन च। वड़वावपुषा राजंस्तस्यामेकतोभयाम्। सोऽश्वरूपेण भगवांस्तां सुखं समभावयत्। मैथुनाय विचेष्टन्तीं, परपुरुषशङ्कया। सा तच्छिरवमच्छुक्रं नासिकायां विवस्वतः। देवौ तस्यामजायेतामश्विनौ भिषजां वरौ। नासत्यश्चैव दस्रश्च स्मृतौ हावश्विनाविति"। तपतीशब्दे तदुत्पत्तिः कर्णोत्पत्तिः यथा "एवमुक्ता बहुविधं सान्त्वपूर्व्वं विवस्वता। सा तु नैच्छद्वरारोहा कन्याऽस्मिति भारत!। बन्धुपक्षभयाद्भीता लज्जया च यशस्विनी। तामर्कः पुनरेवेदमब्रवीद्भरतर्षभ!। मत्प्रसादान्न ते रात्रि! भवि-

ता दोष इत्युत । एवमुक्ता स भगवान् कुन्तिराजसुतां तदा । प्रकाशकर्त्ता तपनः सम्भूव तया सह । तत्र वीरः समभवत् कर्णः शस्त्रभृतां वरः । आसुक्तकवचः श्रीमान्देवगर्भः श्रियान्वितः । सहजं कवचं बिभ्रत् कुण्डली द्योतिताननः । अजायत सुतः कर्णः सर्व्वलोकेषु विश्रुतः" । भा० आ० प० । सुषीवोत्पत्तिः सुषीवशब्दे दृश्या ।

अरुणानुज पु० अरुणस्यानुजः । गरुडे तस्य ततोऽनुजातकथानूरुशब्दे दृश्या । [रोहं रथेहरिः" हरिवं० ।

अरुणावरज पु० ऐत० । गरुडे "अरुणावरजं श्रीमानारु-

अरुणित त्रि० अरुणं क्रियते स्म अरुण+क्तयर्थे णिच्-कर्म्मणि क्त, तारकादि० इतच् वा । १रक्तवर्णीकृते २जातलोहितवर्णे च । "स्तनाङ्गरागारुणिताङ्ग कन्दुकात्" कुमा० ।

अरुणोदक न० अरुणमुदकं यस्य । १सरोवरभेदे । उदकस्य वा उदादेशे अरुणोदमप्यत्र । तच्च सरः मन्दरगिरिरूपविष्कम्भपर्वतस्थम् त्रि०पु० । २नदीभेदे स्त्री सा च "मन्दरोत्सङ्गएकादशशतयोजनोत्तुङ्गदेवचूतशिरसोगिरिशीखरस्थूलानि फलान्यरुतकल्पानि पतन्ति । तेषां विशीर्य्यमाणानामति मधुरसुरभिसुगन्धिबहलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखराच्चिपतन्ती पूर्व्वेणेलावृतमुपप्लावयति" इति भागवतोक्तस्थलस्था ।

अरुणोदय पु० अरुणस्यार्कस्य तत्किरणस्योदयो यत्र । "चतस्रो घटिकाः प्रातररुणोदय उच्यते" इत्युक्ते सूर्य्योदयात् प्राचि चतुर्दण्डात्मके काले ।

अरुणोदयविद्धा स्त्री अरुणोदयकाले विद्धा । अरुणोदयकाले दशम्या विद्धायामेकादश्याम् । "दशमीशेषसंयुक्ता यदि स्यादरुणोदये । वैष्णवेन न कर्त्तव्यं तद्धिनैकादशीव्रतम्" हेमा० भवि० पु० 'अरुणोदयविद्धा तु द्वादश्यां पारणा लाभेऽपि वैष्णवैर्नोपास्या" ए०त० रघुनन्दनः ।

अरुणोदयसप्तमी स्त्री अरुणोदयकाले पुण्यविशेषसाधनं सप्तमी । माघशुक्लसप्तम्याम् । "सूर्य्यपक्षेण तुल्या हि शुक्ला माघस्य सप्तमी । अरुणोदयवेलायां तस्यां स्नानं महाफलम् । माघे मासि सिते पक्षे सप्तमी कोटिभास्करा । दद्यात् स्नानार्घदानाभ्यामायुरारोग्यसम्पदः । अरुणोदयवेलायां शुक्ला माघस्य सप्तमी । गङ्गायां यदि लभ्येत सूर्य्यपङ्गतैः समेति" ति०त० भविष्य पु० ।

अरुणोपल पु० अरुण उपलः । (चुनीति) ख्याते पद्मरागे ।

अरुन्तुद त्रि० अरूंषि मर्म्माणि तुदति तुद-खश् मुम् च । मर्म्मपीडके दुःखदायके "अरुन्तुदमिवानार्यं नवबद्धस्य दन्तिनः" इति रघुः "नारुन्तुदः स्यादार्त्तोऽपि न परद्रोहकर्म्मधीः" मनुः ।

अरुन्धती स्त्री न रुन्धतो । १ रोधनाकारिकायां स्त्रियाम् २ वसिष्ठपत्न्याम् संज्ञात्वादव्युत्पन्नः "अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम्" रघुः "आर्य्याप्यरुन्धती तत्र व्यापारं कर्त्तुमर्हति" "साक्षादिव तपःसिद्धिर्विभासे बह्वरुन्धती" इति च कुमा० । सा च कर्दमप्रजापतेरानूत्पन्ना भाग० तपसा सिद्धा नक्षत्ररूपेण सप्तर्षिस्थाने स्थिता । २ तन्नामके नक्षत्रभेदे तत्स्थितिस्थानञ्च "प्रागुत्तरतश्चैते सदोदयन्ते ससाध्वीकाः । पूर्व्वे भागे भगवान् मरीचिरपरे स्थितो वसिष्ठोऽत्रात् । तस्माङ्गिरास्ततोऽतिरस्यासन्नः पुलस्त्यश्च । पुलहः क्रतुरिति भगवानासन्नानुक्रमेण पूर्व्वाद्याः । तत्र वसिष्ठं मुनिवरमुपाश्रितारुन्धती साध्वी" इ०सं० । विवाहकाले सैव पत्यै पत्या दर्शनं "अरुन्धतीञ्च रुन्धाहमक्षीति" मोभि० । "एवञ्च सप्तर्षिनिकटवर्त्तिनीं सूक्ष्मां तारामरुन्धतीं रुन्धाहमक्षीति मात्रमन्त्रेण पश्येत्" सं०त०रघु० । अरुन्धती यथा पत्यौ अनुरक्ता एवमेवं त्वं मयि इत्यभिप्रायेण तद्दर्शनम् । आसन्नमृत्यवश्च तां न पश्यन्ति यथोक्तम् श्रुतौ । "न पश्यति मनक्षत्रां यस्तु देवीमरुन्धतीम्" ध्रुवमाकाशगङ्गां च तं वदन्ति गतायुषे" ४दक्षकन्यारूपे धर्म्मस्य पत्नीभेदे । "ददौ सदश धर्म्माय" इत्युपक्रम्य "तासां नामानि मे शृणु" इति चोक्त्वा । "अरुन्धतो वसुर्यामी लम्बा भानुर्मरुत्वती । सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च भारत ! । धर्म्मपत्न्यो दश त्वेता इति" "पृथिवीविषयं सर्वमरुन्धत्वाभजायत च" हरिव० । ५जिह्वायाञ्च "अरुन्धतीं ध्रुवञ्चैव विष्णोस्त्रीणि पदानि च । आसन्नमृत्युर्नो पश्येच्चतुर्थं माहमखण्डम्" इत्युक्त्वा तत्रारुन्धत्यादिशब्दानां पारिभाषिकत्वं दर्शितं यथा "अरुन्धती भवेज्जिह्वा ध्रुवोनासापसुच्यते विष्णोः पदानि भ्रूमध्यं नेत्रेऽग्नौ माहमखण्डम्" काशीखण्ड० । [वसिष्ठे मुनौ

अरुन्धतीजानि पु० अरुन्धती जाया यस्य निङ् समा० । वसिष्ठे मुनौ तत्पत्न्यादयोऽत्र ।

अरुन्धतीदर्शनन्याय पु० अरुन्धत्यादर्शनमिव दर्शनं यस्य तत् सूचको न्यायः । प्रथमस्थूलदर्शनेन सूक्ष्मदर्शनरूपे न्याये "यथाऽरुन्धतीं दिदर्शयिषुः तत्समीपस्थां स्थूलां तारामसूक्ष्मां प्रथममरुन्धतीति व्याहृत्य तां प्रत्याख्याय पश्चादरुन्धतीमेव व्याहरति" भा० भा० ।

अरुन्धतीनाथ पु० ऐत० । वसिष्ठे मुनौ तत्पत्न्यादयोऽत्र ।

अरुष त्रि० न रोषति क्रुध्यति रुष–क न०त०। १अक्रोधने। "युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः" यजु० २३,५ "असौ वा आदित्योऽब्रध्नोऽरुषः" इति श्रुतिः। विरोधे न०त०। २ रोचमाने। "श्वेतं सज्ञानमरुषं सहिता" ऋ० ३,१,४, 'अरुषं रोचमानम्' भा०। ऋ–गतौ–उषन्। ३ गमनशीले अश्वादौ वेदे स्त्रियां ङीप्। "युञ्जाह्यरुषी रथे" ऋ०१,१४,१२, अरुषीर्गमनशीला वडवाः" भा०। रुषा हिंसा न०ब०। ४हिंसारहिते "जानन्ति वृष्णो अरुषस्य शेवम्" ऋ० ३,७,५,। "अरुषस्य हिंसारहितस्य" भा०। [स्त्री निरु०।

अरुष् त्रि०नास्ति रुट् यस्य। १अक्रोधे। गौ०ङीष्। २उषसि

अरुष्क पु० अरुर्मर्म स्यानं कायति पीडयति कै–क। स्वर्गमात्रेण व्रणकारकफलरसे (भेला) भल्लातकवृक्षे।

अरुष्कर पु० अरुः करोति ट उप०स० मत्वम्। स्वर्गमात्रेण व्रणकारकफलरसे १भल्लातके (भेला) २व्रणकारके त्रि०"शुष्कोऽग्रपार्श्वकोऽरुष्करश्च" सुश्रु०। स्त्रियां ङीप्।

अरुस् पु० ऋ–उसि। १अर्के २रक्तखदिरे च। ३मर्म्मणि न०। ४व्रणे, ५क्षते च पु०न०। "अरुर्द्विषदजन्तस्य मुम्" पा०। "अरुर्वै' पुरुषोऽवच्छित्तः अनरुरेवैतद्भवति" शत०ब्रा०। "यद्रुक्षेण यदिध्मा यद्वारुषा हरसा" अथ०५,५,४। "अरुर्वै पुरुषस्याचीति" शत०ब्रा० उक्ते ६ नेत्रे च। अरुस्+अभूततद्भावे च्वि अन्तलोपः दीर्घः अरूकरोति।

अरुहा स्त्री न विद्यतेऽरुर्मर्मास्थिव्रणादिकं यस्याम् ब० व्री०। १गुडूच्याम् २वल्लीमात्रे च राजनि०। ऋगा० ऋण्। आरुहीयम् तत्सन्निकृष्टदेशादौ त्रि०।

अरूक्ष त्रि० विरोधे न०त०। स्निग्धे मसृणे, "दर्भैः प्रच्छादयत्यरूक्षतायै", शत०ब्रा०।

अरूक्षित त्रि०न रूक्षितः विरोधे न०त०। स्निग्धे मसृणे, "अरूक्षितं दृश आ रूपे अव्रम्" ऋ०४,११,१, अरूक्षितं स्निग्धम्" भा०।

अरूक्षण त्रि०रूक्ष+ल्युट् विरोधे न०त०। स्निग्धे। "यत्ते वासः परिधानम्–संस्पर्शेऽरूक्षमस्तु ते" अथ०८,२,१६।

अरूप त्रि० नास्ति रूपमस्य। १रूपशून्ये २सांख्योक्ते प्रधाने वेदान्तोक्ते ३ब्रह्मणि न० "अशब्दमस्पर्शमरूपमव्ययमिति" कठ०उ०। कुत्सितार्थे न०त०। ४कुत्सितरूपे न०।

अरूपहार्य्य त्रि० रूपेण न हार्य्यः वशीकार्य्यः अस०स०। सौन्दर्य्यादिना अवशीकार्य्ये "अरूपहार्य्यं मदनस्य निग्रहात्" कुमा०।

अरूष पु० ऋ–ऊषन्। १सर्पविशेषे २सूर्य्ये च सि० कौ०।

अरे अव्य० ऋ–ए। १रोषाह्वाने, २नीचसंबोधने "आत्मा वा अरे द्रष्टव्यः श्रोतव्य इति" न वा अरे पत्युः कामायायाः पतिः प्रियो भवति" शत० ब्रा० वङ्क्रत्वः पाठः। तत्र याज्ञवल्क्येन मैत्रेयीनामकपत्नीं प्रति सम्बोधनायोक्तं तस्याश्च स्वापेक्षया न्यूनत्वात् नीचसम्बोधनम्। ३अपकृतौ, ४असूयायाञ्च।

अरेपस् त्रि० नास्ति रेपः पापं निरुक्तोक्तं यस्य १निष्पापे "प्राप्ते रूपे पुराऽरेपाः" इति माघः २निर्मले च "अरेपसा तन्वा शासदाना" ऋ०१,१२४,५, अरेपसाऽपापया निर्म्मलया वा" भा०।

अरेरे अव्य० अरे+वीप्सायां द्विरुक्तिः। नीचसंबोधनादौ। २सक्रोधसम्बोधने च "अरेरे राधागर्भभारभूत! सुतापसद! किमेवमाक्षिपसि" अरेरे वाचाट! दृष्टाश्चर्य्यदुर्विदग्ध! वटो" इति च वेणीसंहारः।

अरोक त्रि० रुच–दीप्तौ घञ् रोकस्त्विड् दीप्तिश्च न०ब०। १क्लिन्नत्वे २दीप्तिशून्ये च। "विभाषा ग्लाद्यारोकाभ्याम्" पा०बहुव्रीहौ एतत्पूर्व्वकदन्तस्य दत्। अरोकदन् अरोकदन्तः। निविड़दन्ते दन्तादेये स्त्रियां ङीप्।

अरोग त्रि० नास्ति रोगोऽस्य। रोगशून्ये "अरोगाः सर्व्वसिद्धार्थाश्चतुर्वर्षशतायुषः" सुश्रु०। "एतद्विधानमातिष्ठेदरोगः पृथिवीपतिः" मनुः तस्य भावः ष्यञ्। आरोग्यम्। रोगाभावे न०। "आयुरारोग्यविजयं देहि देवि! नमोऽस्तु ते" दुर्गास्तवः "आरोग्यं वित्तसम्पत्तिर्गङ्गाकरणजं फलमिति" पुरा० तल् अरोगता स्त्री त्व अरोग्यत्वम्" तत्रैव न०।

अरोगण त्रि० रोगोऽस्यास्य वा०मत्वर्थे न न०त०। रोगशून्ये "तेषामसि त्वमुत्तममनाशवमरोगणम्" अथ०२,३,२।

अरोगिन् त्रि० न रोगी विरोधे न०त०। रोगशून्ये "यावज्जीवमरोगो स्यात्" पुरा० स्त्रियां ङीप्। "अरोगिणां गृहमताम्" स्मृतिः।

अरोचक पु०न रोचयति प्रीणयति रुच+णिच्–ण्वुल् न०त०। रोगभेदे यत्र क्वचिदपि द्रव्ये भोजनादौ न प्रीतिस्तादृशे रोगे स च सुश्रुतोक्तः। 'दोषैः पृथक् सहजचित्तविपर्य्ययाच्च भक्तावनेषु हृदि चावतते प्रगाढम्। नाद्ये रुचिर्भवति तं भिषजो विकारं भक्तोपघातमिह पञ्चविधं वदन्ति। हृच्छूलपीड़नयुतं विरसाननत्वं वातात्मके भवति सिक्तमरोचके तु। हृद्दाहशोषबहुता मुखतिक्तता च

मूर्च्छा सङ्घट्टः भवति पित्तक्षते तथैव । कण्डूः गुरुत्वकफसंस्रवसादतन्द्राः श्लेष्मात्मके मधुरमाखुमरोचके तु । सर्व्वात्मके पवनपित्तकफा वहूनि रूपाण्युदासा हृदये सशब्दोरुवन्ति । संरागशोकभयविप्लुतचेतसस्तु चिन्ताक्षते भवति सोऽशुचिदर्शनाच्च" इति । "गुल्मान् प्लीहोदरं कालंक्लीसकमरोचकम्" इति सुश्रुतः । [शून्ये त्रि० ।

अरोदन न०अभावे न०त० । १रोदनाभावे । ब० । २क्रन्दन-

अरोधन न० अभावे न०त० । १रोधाभावे २आवरणाभावे ३गतिरोधके व्यापारे । न०ब० । ४तच्छून्ये त्रि० ।

अरोध्य त्रि० न रोध्यः । रोद्धुमशक्ये । [शून्ये त्रि० ।

अरोपण न०अभावे न०त० । १रोपणाभावे न०ब० । २रोप-

अरोष पु०अभावे न०त० । १क्रोधाभावे । न०ब० । २क्रोधशून्ये त्रि० ।

अरौद्र त्रि०न रौद्रः विरोधे न०त० । १भीषणभिन्ने सौम्याकृतौ २रागद्वेषादिशून्ये विष्णौ पु० । "अरौद्रः कुण्डली चक्री" विष्णुस० "कर्म रौद्रं, रागश्च रौद्रः, कोपश्च रौद्रः, त्रयं यस्य नास्ति अवाप्तसर्वकामत्वेन ह्येषरागादेरभावादित्यरौद्रः" भा० ।

अर्क तापे, स्तुतौ च चुरा०उभ०सक० सेट् । अर्कयति ते आर्चिकत् त । अर्कयामास अर्कितः अर्कयितुम् ।

अर्क पु० अर्च-कर्मणि घञ् कुत्वम् । १सूर्य्ये, २इन्द्रे, ३ताप्ये, ४स्फटिके, ५विष्णौ, ६पक्षिखण्डे, (आकन्दे,) इति ख्याते ७वृक्षे, (आरख) इति ख्याते ८क्काथविशेषे च । ९अर्चनीये त्रि० । "आ सूर्य्यो न भानुभिरर्कैः" ऋ० ६,५,६ "अर्कैः अर्चनीयैः" भा० "ब्रह्मादिभिः पूज्यमानैरर्चनीयत्वादर्कः" भा० १०वृक्षे" पु० । लक्षणया ११अर्काधिपे वारे १२सप्तमीतिथौ १३उत्तरफल्गुनीनक्षत्रे १४द्वादशसंख्यायाञ्च तत्र विष्णौ । "अर्को वाजसनः षड्ढी" वि०सह० अर्कवृक्षे "अर्कः पलाशःखदिरः इति विष्णुध० । सूर्य्ये "अर्कोद्विनिःसृतः प्राचीं यद्यात्यहरहः शुची" सूर्य्यसि० "संपर्कादर्करोचिषाम्" माघः "स्पृष्टं जगत्पूज्यमयुज्य तार्क्षः" माघः इन्द्रे अर्कसोदरशब्दे उदा० । अर्कस्यापत्यम् इञ् । आर्किः सूर्यपुत्रे यमादौ, यमुनायां, तपत्याञ्च स्त्री अरुणात्मजशब्दे विवृतिः ।

अर्ककला स्त्री ६त० । शारदातिलके सूर्य्यस्य उपासकत्वेनोक्ते द्वादशसंख्याके पीतवर्णे कादिठान्तवर्णभणिते कलाभेदे । तास्तु १"तपिनी २तापिनी ३धूम्रा ४मरीचि ५ज्वालिनी ६रुचिः । ७सुषुम्णा ८भोगदा ९विश्वा १०बोधिनी ११धारिणी १२क्षमा । कादयस्तु वसुदाः सौर्य्यो डान्ता स्ता द्वादशेरिताः" "वरानयकरा ध्येयाः श्वेतपीतारुणाः क्रमात्" शार० ति० ।

अर्ककान्ता स्त्री अर्कोऽर्ककिरणः कान्तोऽनुकूलो यस्याः कम-क्त । (ढङढड़िया) इति ख्याते १वृक्षे ६त० । २सूर्य्यप्रियायाम् ३संज्ञायां आयायाञ्च अरुणप्रियाशब्दे विवृतिः ।

अर्कक्षेत्र न० ६त० "कुजशुक्रबुधेन्द्रर्कसौम्यशुक्रावनीभुवाम् । जीवार्किभानुजेज्यानां क्षेत्राणि स्वरजादयः" ज्योतिषोक्ते सूर्य्यस्वामिके सिंहराशौ ।

अर्कचन्दन पु० अर्कस्य प्रियःचन्दनः शाक०त० । रक्तचन्दने

अर्कज पु० अर्काज्जायते जन-ड ५त० । १यमादौ २तपत्यां ३यमुनायां च स्त्री ४अश्विनीकुमारयोः द्वि०व० । ५सुग्रीवे ६कर्णे च । अरुणात्मजशब्दे विवृतिः ।

अर्कतनय पु० ६त० । राधासुते १कर्णे २यमादौ च । अरुणात्मजशब्दे विवृतिः ।

अर्कदुग्ध न० अर्कस्य वृक्षस्य दुग्धमिव निर्य्यासः । अर्कवृक्षनिर्य्यासे श्वेतत्वेन दुग्धाकारे पदार्थे ।

अर्कनयन पु० अर्कोनयनं यस्य । विराट्पुरुषे । "सूर्य्याचन्द्रमसावग्निर्यस्य नेत्राणि जज्ञिरे" पुरा० अनलबाड़वयोश्चसूर्य्यनेत्रम्" गीता अर्कइव दुर्दर्शं नयनमस्य । २दुर्दृश्यलोचने त्रि० ।

अर्कनामन् पु० अर्कं नामयति अनुकूलयति नम-णिच् कनि । रक्तार्कवृक्षे ।

अर्कपत्र पु० अर्कः सूर्य्यइव तीक्ष्णं पत्रं यस्य । १अर्कवृक्षे । अर्कपर्णोऽप्यत्र । २चन्दनायाम् ३अर्कमूलायां स्त्री । ४त० । ५अर्कवृक्षस्य पत्रे न० "स कदाचिदर्कपत्राण्यभक्षयत् क्षुधार्त्तः तैर्भक्षितैरर्कपत्रैः" भा०आ०प० "देवराजो मया दृष्टो वारिवारणमस्तके । खादयत्यर्कपत्राणि" विद०सु० । "सप्त वदरपत्राणि सप्तार्कपत्राणि च शिरसि निधायेति, माघसप्तम्यां स्नाने कृ०त० रघु० ।

अर्कपर्ण त्रि० अर्कइव रक्तं पर्णमस्य । १मन्दारे । ६त० २अर्कवृक्षपत्रे न० । [कर्म्मधा० । (आकन्द) २वृक्षभेदे ।

अर्कपादप पु० अर्कः अर्कवृक्षइव तीक्ष्णः पादपः । १निम्बे ।

अर्कपुष्पी स्त्री अर्कस्यार्कवृक्षस्य पुष्पमिव पुष्पमस्याः जातित्वात् ङीष् । २कटुम्बिनीवृक्षे । वा कप् । अत इत्त्वे अर्कपुष्पिकाप्यत्र ।

अर्कप्रिया स्त्री अर्कं प्रीणाति प्री-क । जवायाम् । ६त० । १सूर्य्यप्रियायां, २संज्ञादौ अरुणप्रियाशब्दे विवृतिः ।

अर्कबन्धु पु० अर्कस्य बन्धुरिव । १गोतमे सूर्यवंश्ये बौद्धभेदे । तस्य तत्कुलोत्पन्नत्वात्तद्बन्धुत्वम् । अर्कस्य बन्धुरिव प्रकाशकत्वात् । २पद्मे । अर्कबान्धवोऽप्युभयत्र ।

अर्कभ न० अर्काक्रान्तं भं नक्षत्रं षा०त० । १सूर्याक्रान्ते नक्षत्रे ऐत० । तत्स्वामिके २सिंहराशौ ३उत्तरफल्गुनीनक्षत्रे च ।

अर्कभक्ता स्त्री अर्कस्य भक्ता (छड़छड़िया) इति ख्यातायां लतायाम् । तत्किरणसंपर्के एव हि तस्याः सौन्दर्यम् ।

अर्कमूल पु० अर्कइव सर्पाणां दुष्प्रसहं मूलं यस्याः । (इअरमूल) इति ख्यातायां लतायाम् ।

अर्कलूष पु० अर्कइव रूक्ष उपः रस्य लः । ऋषिभेदे विदा० अञ् । आर्कलूषः तदपत्ये पुंस्त्री० । स्त्रियां ङीप् ।

अर्कवल्लभ पु० अर्कस्य वल्लभः समानवर्णपुष्पत्वात् । रक्तपुष्पत्वेन अर्कतुल्यपुष्पे बन्धूकवृक्षे । ब० । २पद्मे ।

अर्कविवाह पु० अर्कवृक्षस्य कन्यात्वेन प्रकल्पनेन विवाहः । तृतीयविवाहसिद्ध्यर्थमर्कवृक्षस्य कन्यात्वकल्पनेन विहिते विवाहभेदे । "चतुर्थादिविवाहार्थं तृतीयेऽर्कं समुद्वहेत् । "आदित्यदिवसे वापि हस्तर्क्षे वा शनैश्चरे । शुभे दिने वा पूर्वाह्णे कुर्यादर्कविवाहकम्" कश्य० । "तृतीये स्त्रीविवाहे तु संप्राप्ते पुरुषस्य तु । आर्कं विवाहं वक्ष्यामि शौनकोऽहं विधानतः" शौनकः । तत्प्रकारस्तु विधानपारिजाते तृतीयविवाहप्रकरणे द्रष्टव्यः ।

अर्कवेध पु० अर्कस्य वृक्षस्येव वेधोऽत्र । ताडोपपदे वृक्षे ।

अर्कव्रत पु० अर्कस्याराधनार्थं व्रतम् । माघशुक्लसप्तम्यादौ कर्त्तव्ये अर्काराधनार्थे १व्रते । अर्कस्येव व्रतम् नियमः । "सहस्रगुणमुत्स्रष्टुमादत्ते हि रसान् रविः" इत्युक्तेर्यथा रविणा लोकहितार्थं रसस्य ग्रहणमेवं प्रजापालनार्थमेव राज्ञा प्रजाभ्यो यत् करस्य ग्रहणं क्रियते तादृशे "अष्टौ मासान् यथादित्यस्तोयं हरति रश्मिभिः । तथा हरेत् करं राष्ट्रान्नित्यमर्कव्रतं हि तदिति" मनूक्ते राज्ञः २करादानभेदे ।

अर्कसूनु पु०ऐत० । १यमे २शनैश्चरे ३सुग्रीवे ४कर्णे ५श्राद्धदेवे ६अश्विनीकुमारयोः द्वि०व० । ७यमुनायां ८तपत्यां च स्त्री

अर्कसोदर पु० अर्कस्य इन्द्रस्य सोदर इवोपकारकत्वात् । १ऐरावते हस्तिनि २अर्कतुल्ये दुर्द्धर्षे च ।

अर्कहिता स्त्री ऐत० । १अर्कभक्तायां (छड़छड़िया) लतायाम् २सूर्यहितकरे त्रि० ।

अर्काश्मन् पु० अर्कस्य अनुगतः, अश्मा । सूर्यकान्तमणौ, स हि सूर्यरश्मिसंपर्कादुज्ज्वलति ततस्तस्यार्कसम्बन्धित्वम् । अर्कइव रक्तः अश्मा । (चुनी) २अरुणोपले ।

अर्किन् त्रि० अर्चत्यनेन मन्त्रेण अर्को अर्चनहेतुमन्त्रः सोऽस्यास्ति इनि । अर्चनसाधनमन्त्रयुक्ते । "इहेन्द्रमर्केभिरर्किणः" ऋ० १,७,१, 'अर्किणः अर्चनहेतुमन्त्रोपेताः' भा० "गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः । ऋ० १,१०, १, । अर्कोऽर्चनमस्यास्ति इनि । २अर्चनयुक्ते त्रि० । "वन्दस्व मारुतं गणं त्वेषम् अपनस्युमर्किणम्" ऋ० १,३८,१५ । अर्किणम् अर्चनोपेतम् भा० ।

अर्केन्दुसङ्गम पु० अर्कः इन्दुश्च सङ्गच्छते यत्र । अमावास्यायां तिथौ तन्नाम्नि हि सूर्याचन्द्रमसोरेकराश्येकावच्छेदेन उपर्यधोभावेन स्थितिः ज्योतिषप्रसिद्धा 'सूर्याचन्द्रमसोर्यः परः सन्निकर्षः सोऽमावास्येति" गोभिलेन तस्यास्तथाविधत्वकीर्त्तनात् तथात्वम् । [पद्मरागे च ।

अर्कोपल पु० अर्कस्यानुगतउपलः । १सूर्यकान्तमणौ (चुनी)

अर्क्य त्रि० अर्च-कर्म्मणि ण्यत् कुत्वम् । १अर्चनीये । अर्कस्यायम् यञ् । अर्क्यः अर्कसम्बन्धिनि । "स एष वाकोंय एष तपति तस्यैतदन्नमेष चन्द्रमार्क्यम्" शत०ब्रा० ।

अर्गल क्लीन० अर्ज्-कलच् नुट्च० कुत्वम् । १कपाटमध्यस्थेरोधके १काण्डादिदण्डे, "ससम्भ्रमेन्द्रद्रुतपातितार्गलानिमीलिताक्षीव भियाऽमरावती" का०म० । "पुरार्गलादीर्घभुजा बुभोज" रघुः, "अथानपोढार्गलमप्यगारमिति" रघुः । सप्रणतीस्तोत्रादौ पाठे २स्तोत्रविशेषे "अर्गलां कीलकं चादौ पठित्वा कवचं पठेत् । जपेत् सप्रणतीं पश्चात्" मत्स्यसूक्तम् । ३कङ्कोले, ४कपाटे च न० ५क्षुद्रार्गले स्त्री । गौरा० ङीष् स्वार्थे कन् । अर्गलिकाप्यत्रार्थे । ६विघ्नकृन्मात्रे रोधकमात्रे क्लीन० ॥ वार्य्यर्गलाभङ्ग इव प्रहृत्तः" रघुः । अनुगतनयमार्गामर्गलां दुर्नयस्य" माघः । [दृढे

अर्ग्वेध पु० आरग्वधः पृ० । आरग्वधे (सिंधालि)

अर्घ मूल्ये भ्वादि० पर० सक० सेट् । अर्घति आर्घीत् । आनर्घ । अर्घः । अर्घ्यः ।

अर्घ पु० अर्घ-घञ् । क्रेयवस्तुयथार्घार्थं देये तुल्यरूपे रजतादिद्रव्यरूपे १मूल्ये । "कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृपः" "कुर्युरर्घं यथापण्यमिति" च मनुः अर्घ-करणे घञ् न्याङ्क्रादित्वात् कुत्वम् । २पूजोपचारे दूर्वाक्षतादौ । सामगैरयं सयकारः क्लीवलिङ्गश्च प्रयोक्तव्यः अन्यैः पुंलिङ्गोनियंकारश्च । अर्घाय देयम् यत् । अर्घ्यम् पूजार्हे देये जलादौ अर्घद्रव्यादि च "आपः क्षीरं

कृशायञ्च दधि सर्पिः सतण्डुलम्। यवः सिद्धार्थकश्चैव अष्टाङ्गोऽर्घः प्रकीर्त्तितः" कालीखण्डम्। "तमर्घ्यमर्घ्यादिकयादिपूरुषः" माघः "अर्घ्यमर्घ्यमिति वादिनं नृपं सोऽनवेक्ष्य भरतार्यजो यतः" "अर्घानुपदमाशिषमिति" च रघुः। [पूजातमे महादेवे।

अर्घीश पु० अर्घोऽस्यास्य इनि देयत्वेन तेषु ईशः। सर्व्वदेवेषु

अर्घ्य त्रि० अर्हति पूजयते अर्ह-यत्-न्यङ्वा० कुत्वम्-अर्घमर्हति अर्घ+यत् वा। १पूजनीये "तमर्घ्यमर्घ्यादिकयादिपूरुषः माघः"। अर्घाय देयं यत्। २पूजार्हे देये जलादौ। "तानर्घ्यानर्घ्यमादाय दूरात् प्रत्युद्ययौ गिरिः" कुमा०। "अनर्घ्यमर्घेण तमद्रिनाथः" कुमा०। अर्घं मूल्यमधिकमर्हति यत्। ३जरत्कारतपोवनवल्लीढुवे मधुनि न० तस्य बहुमूल्यत्वात्तथात्वम्।

अर्च पूजायाम् उभ० भ्वादि०सक० सेट्। अर्चति ते आर्चीत् आर्च्चिष्ट। आनर्च-र्चे "पिष्टैर्वै वाटकास्त्वर्च्चैः" मनुः। "एवं हि सर्वभूतानि ब्राह्मणोनित्यमर्चति" मनुः। "रत्नपुष्पोपहारेण त्रयाणामर्च्च पादयोः" रघुः "इन्द्रिमाग्नीद्दिसुधाधिपानाम्" "समीहे मर्त्तुमानर्च्चे तेन वाचाऽखिलं बलम्"। "आर्च्चीत् द्विजातीन् परमार्थविन्दान्" "प्रानर्च्चुरर्च्यं जगदर्च्चनीयम्" "विप्रानर्च्चं-स्त्रया स्तुवन्" इति च भट्टिः अर्चिः अर्चकः अर्चितः अर्चितवान् अर्चितुम् अर्चिता।

अर्चे पूजायां चुरा० उभ० सक० सेट्। अर्चयति ते आर्चिचत् त। अर्चयामास "दूरस्थमार्चयेदेनम्" मनुः। "स्वर्गौकसामर्चितमर्चयित्वा" कुमा०।

अर्चक त्रि० अर्चति अर्च-ण्वुल्। पूजके "ब्रह्मचारी व्रती च स्यादृत्विग्गुरुदेवद्विजार्चकः" मनुः स्त्रियां टाप् अत इत्त्वम्।

अर्चनि त्रि० अर्च-वेदे बा०अनि। अर्चनीये। "अर्चत्नयो धुनयो न वीराः" ऋ० ६,६६,१०। "अर्चत्नयः अर्चनीयाः" भा०।

अर्चत्न्य त्रि०अर्च-भावे-अनि अर्चनिमर्चनमर्हति यत्। पूजनीये। "अर्चत्नोमघवा स्वभ्वः" ऋ०६,२४,१। "अर्चत्नयः अर्चनीयः" भा०।

अर्चन न० अर्च-भावे ल्युट्। पूजने। "अरिष्टं नामयेत् सर्व्वं यद्विप्रसुरार्चनम् पुरा०। ["निरतः पुरा०।

अर्चना स्त्री चु० अर्च-युच्। पूजायाम्। "देवार्चनायां

अर्चनीय त्रि० अर्च+अनीयर्। पूजनीये। "प्रानर्च्चुरर्च्यं जगदर्च्चनीयम्" भट्टिः।

अर्चा स्त्री अर्च्-आधारे अङ्। १प्रतिमायाम् "आभिरूप्येण चार्चायां देवः सान्निध्यमृच्छति" ति०त० पुरा०। "देवाङ्गमयतः कृत्वा ब्राह्मणानां विशेषतः" आ०त०। भावेऽङ्। २पूजायाम् "लोकः पञ्चभानवतुर्भिर्धर्मैः ब्राह्मणं भुनक्त्यर्चया च दानेन चोज्झया दयया च"। शत०ब्रा०।

अर्चि स्त्री अर्च-इन्। वह्न्यादिशिखायाम्। "यस्या रुशन्तो अर्चयः प्रतिभद्रा अदक्षत" ऋ०१,४८,१२, "तव ज्योतींष्यर्चयः" ऋ०८,४४,१७।

अर्चित त्रि०अर्च-क्त। १पूजिते "स्वर्गौकसामर्चितमर्चयित्वा" कुमा० २विष्णौ पु० "अर्चिष्मानर्चितः कुम्भः" वि०स०। "सर्व्वलोकार्चितैर्ब्रह्मादिभिरर्चितः" भा०।

अर्चिरादिमार्ग पु०अर्चिरादिभिस्तदभिमानिदेवैः उपलक्षितो मार्गः। देवयाने पथि उत्तरमार्गे। "तेऽर्चिषमभिसम्भवन्ति अर्चिषोऽहः, अह्न आपूर्य्यमाणपक्षम्, आपूर्य्यमाणपक्षात् यान् षडुदङ्डेति मासांस्तान्, मासेभ्यः संवत्सरं, संवत्सराद् आदित्यम्, आदित्याच्चन्द्रमसं, चन्द्रमसो विद्युतं, तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयत्येष देवयानः पन्थाः" छा०उ०। "आतिवाहिकास्तल्लिङ्गात्" शा०सूत्रे तेषां तदभिमानिदेवतापरत्वेनुक्तम् "अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् तत्र प्रयाताः गच्छन्ति ब्रह्म ब्रह्मविदोजनाः" गीता।

अर्चिव(म)त् त्रि० अर्चिरस्यास्य मतुप् वेदे मस्य वः। दीप्तियुक्ते। "उद्यन्नत्तमर्च्चिवत्" ऋ०७,८,६१,२, "यत्ते पवित्रमर्चिषदग्ने" ऋ०९,६७,२४। लोके तु अर्चिमान्। स्त्रियां ङीप्।

अर्चिष्मत् पु० अर्च्चिर्विद्यतेऽस्य मतुप्। १सूर्य्ये, २वह्नौ ३उपदेवभेदे च "अर्चिष्मांस्तुम्बुरुश्चैव भोरिश्च वदतांवरः। नेतारो देवदेवानामेते हि तपसान्विताः" हरिवं० ४दीप्ते त्रि०। स्त्रियां ङीप्। सा च ५अग्निपुर्य्याम्। इन्द्रलोकसपवर्त्ते "एतस्यादक्षिणे भागे येयं दृश्येत पूः शुभा। इमामर्च्चिष्मतीं पश्य वीतहोत्रपुरीं शुभाम्" काशीख० विस्तरमग्निलोकशब्दे। ६विष्णौ पु०अर्चितशब्दे उदा०।

अर्चिस् न० अर्च्-इसि। १वह्न्यादेः शिखायां "प्रदक्षिणार्च्चिर्आज्येन" "प्रदक्षिणार्च्चिर्हविरग्निराददे" "आसीदासन्निवाणप्रदीपार्च्चिरिवोषसि" इति च रघुः २मयूखे ३वह्नौ च पु०"तेऽर्च्चिषमभिसम्भवन्ति अर्च्चिषोऽहः" आ० उ० "अग्निर्ज्योतिरहः शुक्ल" इति गीतावाक्यैकवाक्य-

त्वात् अर्हिरत्र वह्निः ४दीप्तिमात्रे न० "प्रथमादर्चिषा-मेतदनुदृगोर्ष्णसुराबुधम्" कुमा० ।

अर्च्य त्रि० अर्च-स्तुतौ यत् न कुत्वम् चु० अर्च-यत् वा । पूजनीये प्रानर्ह्यर्च्यं जगदर्ह्यनीयम्" भट्टिः ।

अर्ज प्रतियत्ने भ्वादि०पर०सक०सेट् । अर्ज्जति, आर्ज्जीत् आनर्ज अर्जकः अर्जितः अर्जितवान् अर्जित्वा उपार्ज्य अर्जनु । "अर्जकोद्ग्रथमाहारेत् । दाय०रघु० "न तत्पुत्रै-र्भजेत्सार्द्धमकामः स्वयमर्जितम्" मनुः । "आनर्जु-र्भुजोऽस्राणि" भट्टिः ।

अर्ज्ज संस्कारे चुरा० उभ०सक०सेट् । अर्ज्जयति ते आर्जि-जत् त । "अनुपन्नं पितृद्रव्यं श्रमेण यदुपार्ज्जयेत्" स्मृतिः "परस्वान्यर्जयन्नारीरन्यदोयाः पराङ्गन्" भट्टिः । अर्ज्जयितुम् अर्ज्जयित्वा ।

अर्ज्जक पु० अर्ज्जयति रज्जुम् अर्ज्ज-ण्वुल् । (दावड्) इति ख्याते वृक्षे, तत्त्वक्तन्तुना हि रज्जुर्निर्म्मीयते । अर्ज्जन-कर्त्तरि त्रि० । "अर्ज्जकोद्ग्रथमाहरेत्" स्मृतिः ।

अर्जन न० अर्ज-ल्युट् । १सम्पादने स्वामित्वसम्पादके २व्यापारभेदे च । स्वामित्वहेतुत्वं "सप्त विभागमाधर्म्म्याः दायोलाभः क्रयोजयः । विभागः संप्रयोगश्च सत्प्रतिग्रह एव च" स्मृत्युक्ताः "स्वामी रिक्थक्रयसंविभागाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्य-शूद्रयोः" गो० उक्ताश्च रिक्थादयः साधारणाः सर्व्व-वर्णेषु। तत्राप्रतिबन्धोदायोरिक्थं यथा पित्रादिधने पुत्रादेः। अप्रतिबन्धोदायोविभागो यथा पत्नीप्रभृतेः । लब्धं प्रति-ग्रहः ब्राह्मणस्य तदसाधारणं "याजनाध्यापनप्रतिग्रहै-र्ब्राह्मणोधनमर्ज्जयेदिति" श्रुत्वा ब्राह्मणकर्त्तृकार्ज्जनस्य याजनादिकरणकत्वनियमनात् । क्षत्रियस्य विजितं विज यत्वव्यसाधारणम् । निर्विष्टं स्मृतिः तच्च वैश्यस्य ऋषि-गोरक्षादिलभ्यम् शूद्रस्य शुश्रूषा वेतनं चेति तयो-रसाधारणम् । एवञ्च मनुना "सूतानामश्वसारथ्यम्" इत्यादि यदुक्तं तत् सर्व्वं तेषामसाधारणं तदपि निर्विष्ट-शब्दाभिधेयम्" मिता०शूद्रवत् वर्णसङ्करा इति स्मृतेः 'शूद्रा-णान्तु सधर्म्माणः सर्व्वेऽपध्वंसजा स्मृताः" मनूक्तेश्च तेषां शूद्रधर्म्मातिदेशात्तथा । तच्चार्ज्जनं पुरुषार्थं न यत्नार्थं तेन यद्यस्य वर्णस्योचितं तदतिरेकेणार्ज्जितेनापि धनेन क्रतु-सिद्धिः पुरुषस्य परं नियमातिक्रमे दोषः इति जैमि-नीये निघ्नाधिकरणे स्थितम् । मिताक्षरादृता तस्य चायमर्थ एवं विवृतः । "यदा द्रव्यार्ज्जननियमानां क्रत्वर्थत्वं तदा-नियमार्जितेनैव द्रव्येण क्रतुसिद्धिरिति न पुरुषस्य नियमा-तिक्रमदोषः इति पूर्व्वपक्षे सिद्धान्ते तु अर्ज्जननियमस्य पुरुषार्थत्वात् तदतिक्रमेणार्जितेनापि द्रव्येण क्रतुसिद्धि-र्भवति पुरुषस्यैव नियमातिक्रमाद्दोष इति नियमातिक्र-मार्जितस्यापि स्वत्वमङ्गीकृतम् अन्यथा क्रतुभिद्भावात् । नचैतावता चौर्य्यादिप्राप्तस्यापि स्वत्वं स्यादिति मन्तव्यम् । लोके तत्तत्र स्वत्वप्रसिद्धाभावात् व्यवहारविस-वादाच्च" इति। एवञ्च प्रतिग्रहादुपायकं स्वत्वं लौकिकमेव अतएव "सप्त विभागमाधर्म्म्याः" इत्यनेन तेषां धर्म्महेतुत्व-मात्रोक्तं न तु श्रुतिप्रभृतीनां तत्रानुक्तानां स्वत्वाहेतुत्वम-पि "अर्जयितव्यापारोऽर्ज्जनमिति" दायभा० । "अर्ज्ज-स्वत्वं नापादयतीति" मिता०। "कथिञादर्ज्जनं विलम्" मनुः । "अर्थानामर्जने दुःखमिति" नीति० अर्जधातोः प्रतियत्नार्थकतया विद्यमानपदार्थस्यैव स्वत्वसम्पाद-नार्थकत्वेन तस्य तथात्वम् ।

अर्जुन पु० अर्ज्ज-उनन् । स्वनामख्याते १वृक्षे, "सोऽङ्गणा-द्विःस्रुतः क्षणः कर्षभाण्ड उदूखलम् । यमलाभ्यां प्रतीताभ्यामर्ज्जुनाभ्यां निवारितः । मध्यादिचक्राम तयोः शिशुः कर्षन्नुदूखलम् । तत्तस्य कर्षतो बद्धं तिर्य-ग्गतमुदूखलम् । लग्नं ताभ्यां समूलाभ्यामर्ज्जुनाभ्याङ्गकर्ष ह । तावर्ज्जुनौ क्षयमाणौ तेन बालेन वत्सल । समूलविटपौ भग्नौ स च मध्ये जहास वै" इति हरिवं० । "कदम्बसर्जार्ज्जुननीपकेतकी" रघु० । २मध्यमपाण्डवे शुद्धचरितत्वान्मध्यमपाण्डवस्यार्ज्जुनत्वम् । "पृथिव्यां चतुरन्तायां वर्त्तेमे दुर्लभः समः । करोमि कर्म्म शुद्धञ्च तेन मामर्ज्जुनं विदुः" भा०वि०प० उत्तरं प्रति तस्य स्वनामव्युत्पत्तिकथनम् । स च पाण्डोः चेत्रे कुन्त्यां शक्रेण जनितः "एवमुक्ता ततः शक्र-माजुहाव यशस्विनी अथाजगाम देवेन्द्रो जनयामास चार्जु-नम् । जातमात्रे कुमारे तु वागुवाचाशरीरिणी । महा-गम्भीरनिर्घोषा नभोनादयतीव ह । श्रूयतां सर्व्वभूतानां तेषां चाश्रमवासिनाम् । कुन्तीभाग्य विवृद्धयर्थमिदं शुचिस्मिताम् । कार्त्तवीर्य्य समः कुन्ति ! शिवतुल्यपराक्रमः । एष शक्र इवाजय्यो यशस्ते प्रथयिष्यति । अदित्या विष्णुना प्रीतिर्यथाऽभूदभिवर्द्धिता । तथाविष्णुसमः प्रीतिं वर्ध-यिष्यति तेऽर्जुनः" । भा०आ०प०। "पार्थः कर्णवधाय मार्गणगणान् यानर्जुनः संदधे" लीला० २रुद्रयादिभेदे कार्त्तवीर्य्ये, "एतस्मिन्नेव काले तु कृतवीर्य्यसुतोबली ।

अर्ज्जुनो नाम तेजस्वी क्षत्रियो हैहयाधिपः। दत्तात्रेय-प्रसादेन राजा बाहुसहस्रवान्। चक्रवर्त्ती महातेजा विप्राणामाश्रमेधिके। ददौ स पृथिवीं सप्तद्वीपां सवन-पर्व्वताम्"। हरिवं० ४करवीरे, ५मथूरे, "हृणाख्यायामिलुक्तेः" ६हृष्णे ७धवले। दृशुभतायुणवति त्रि०। "अहश्च कृष्णमहरर्ज्जुनं च" ऋ० ६,६,१, "अर्ज्जुनं सौरेण तेजसा शुक्लवर्णम् भा०। "कृष्णा रूपाण्यर्ज्जुना वि वो मदे विश्वा" ऋ०१०,२१,३ "हे अग्ने! त्वं कृष्णा कृष्णान्यर्ज्जुना अर्ज्जुनानि श्वेतवर्णानि" भा० "पिशङ्गभौज्ञीयुजमर्ज्जुनच्छविम्" माघः। (आजनि) इति ख्याते ६नेत्ररोगभेदे" "एकोयः शबरुधिरोपमस्तु विन्दुः शुक्लो भवति तदर्ज्जुनं वदन्ति" माधवः। एकस्या-मातुरेकस्मिन् १०पुत्रे भेदि० ११इन्द्रे "अर्ज्जुनौ वै इन्द्रोवदस्य गुह्यं नाम" शत०ब्रा०। अर्जुनस्यापत्यम् दृञ्। आर्जुनिः आभिमन्यौ।

अर्जुनध्वज पुं न० ६त०। हनूमति। विवरणं कपिध्वजशब्दे।

अर्जुनपाकी स्त्री अर्जुनः श्वेतः पाकः फलादिः यस्याः ङीप्। श्वेतपाक्यां लताभेदे हरितक्यादित्वात् फले जातस्याणोलुप् लुपि प्रकृतिव्यक्तिवचने। अर्जुनपाकी तत्फले स्त्री। [२स्त्रियां गवि, ४कुट्टिन्याञ्च।

अर्ज्जुनी स्त्री गौरा० ङीष्। १जपायां, २बाहुदायां, नद्याम्

अर्ज्जुनोपम पुं अर्ज्जुनः खनामख्यातः दृश उपमा यस्य। (सेगुन) इति ख्याते १शाकद्रुमे, २महापत्राख्यवृक्षे च।

अर्ण पुं ऋ-न। अकारादौ १वर्णे "पञ्चार्णोमनुरीरितः" तन्त्रम्। २गमनस्वभावे त्रि०। "ऋणोरपो अनव-द्यार्णाः" ऋ० १,१७४,२ "अर्णाः अरणस्वभावा" भा० "त्वं चिदर्ण मघुषः" ऋ०५,३२,८ "अर्णं गन्तारम्" भा०। ३जले न० "अग्ने! दिवो अर्णमच्छा" ऋ०३,२२,३। "अर्णसभः" भा०। अर्णं जलमस्त्यस्यर्श० अच्। ४नद्याम् स्त्री। "वर्षान्तामभिधाता अर्णाः" ऋ०५,४१,१४। "अर्णाःनद्यः, भा०। अभि+अर्ई-क्त इडभावादि। अभ्यर्णम्। नि+अर्णम् वि+अर्णम् सम्+समर्णम् अभ्यासादौ न०तद्वर्त्तिनि त्रि०। 'कालोऽभ्यर्णे जलागमः' इति सा०द०। "कृष्णार्णवाभ्यर्णचरैकहंसः" माघः।

अर्णव पुं अर्णांसि सन्त्यस्मिन् अर्णस्+व सलोपः। १समुद्रे। "यादोरत्नैरिवार्णवः" रघुः "कृष्णार्णवाभ्यर्णचरैकहंसः" माघः २उदकयुक्ते त्रि० "ततः समुद्रादर्णवात्" सन्ध्यामन्त्रः "तिरः समुद्रमर्णवम्" ऋ०१,१६,७। "अर्णवसदक-युक्तम्" भा०। अर्णांसि दाहत्वेनास्त्यस्य मतुप् सलोपः। जलदातरि ३स्तुत्यें ४इन्द्रे च "आदित्याज्जायते वृष्टिः" गीतोक्तेः सूर्य्यस्य पर्जन्याधिपत्वाच्च शक्रस्य जलदातृत्वात्तथात्वम्। "समानुरर्णवो नृचक्षाः" ऋ० २,५१,२ "शतक्रतुमर्णवं शाकिनं नरम्" ३,३,५१,२, अर्णवं पर्ज्जन्यात्मनोदकवन्तम्" भा०। ५सजले च। "अजएकपादनमितुरर्णवम्" ऋ० १०,६६,११। "अन्त-लोके, एतद्देवताः सृष्टा अग्निमहत्यर्णवे" ऐ०ब्रा०। अस्य समुद्रावाधित्वेन क्षीरार्णवः जलार्णवः लवणार्णवः इत्यादौ आधारतामात्रबोधः।

अर्णवज पुं अर्णवात् जायते जन-ड ६त०। १समुद्रफेने रत्नभा०। २समुद्रजातमात्रे त्रि०। अर्णवजातादयोऽत्र।

अर्णवमन्दिर पुं अर्णवः मन्दिरमिव यस्य। वरुणे।

अर्णवोद्भव पुं उद्भवत्यस्मात् उद्+भू-अपादाने अप् अर्णव उद्भवोऽस्य। १अग्निजारद्रुमे २चन्द्रे च ३अम्बुनि न०। ४स्त्रियां स्त्री।

अर्णस् न० अर्च्छति ऋ-असुन् उदके नुट् चेति, नुट्। जले। "सवर्णमर्णः कथमन्यथास्य" माघः। "सिन्धु-नैपिप्येऽर्णसा" ऋ०६,१०७,१२। [त्रि०।

अर्णस पुं अर्णोऽस्यास्य अर्श० अच्। १समुद्रे २जलवति

अर्णस्वत् पुं अर्णांसि सन्त्यस्मिन् मतुप् मस्य वः १समुद्रे २जलवति त्रि०।

अर्णोद पुं अर्णांसि ददाति दा-क। १मेघे २समुद्रे च जलदातरि त्रि०। [२जलोद्भवमात्रे त्रि०।

अर्णोभव पुं अर्णसि जले भवति भू-अच् ७त०। १शङ्खे

अर्त्त(आ)गल पुं आर्त्तद्रव गलति गल-अच् पृषो० वा ह्रस्वः। नीलझिण्टिकायाम्। ह्रस्वाभावे आर्त्तगलव।

अर्त्तन न० ऋत-ल्युट् पक्षे दृयङभावः। निन्दायाम्।

अर्त्ति स्त्री अर्ई-क्तिन्। १पीडायाम्। करणेक्तिन्। २धनुष्को-ट्याम्। "नार्त्तं वाञ्छति नो निद्रासुपैत्यर्त्तिनिपीडितः" सुश्रुतः।

अर्त्तिका स्त्री। ऋत-ण्वुल्। नाड्योक्तौ ज्येष्ठभगिन्याम्।

अर्त्तुक त्रि० ऋत-वा० उकञ्। सर्द्दके। "समहैनान्निन्द-त्यर्त्तुकाद्द भवत्यपि इतमर्धं समहिन्दति" शत०ब्रा०।

अर्थ याचने अद०चु०आत्म०द्विक०सेट्। अर्थयते आर्त्थित। अर्थयामास। अर्थकः अर्थी अर्थितः अर्थ्यः अर्थनीयः अर्थ-यितम् अर्थनम् अर्थना। अर्थयित्वा अर्थयिता "सुराः समभ्यर्थयितार एते" कुमा०। "अवकाशं किलो-

दत्वात् रामायाभ्यर्थितो ददौ" रघुः "अग्लोपित्वं स्यानिवृत्तं चादनस्य प्रयोजनम् यत्र त्वेते न विद्येते तत्राग्लोपविकल्पनम्। तङ्चादनस्यदीर्घश्च पुक् चेत्यङ्गापवत्वमपि "कामधेनूक्तेः पुक्-दीर्घश्च अर्थापवते। सम्+समर्थने समर्थयते समर्थनञ्च प्रमाणेन व्यवस्थापनम्। कृ पीड़ने कदादेशः कदर्थयते। अभि+आभिमुख्येन प्रार्थने अभ्यर्थनीयः। "अभ्यर्थनाभङ्गभवेन साधुः" कुमा०। प्रति+प्रतिकूलाचरणे प्रत्यर्थी। "प्रत्यर्थीभूतामपि तां समाधेः" कुमा०।

अर्थ पु० अर्थ भावकर्म्मादौ यथायथम् अच्। १अभिधेये २शब्दगम्या बोध्ये पदार्थे च "तदेषौ शब्दार्थावनलङ्कृती पुनः क्वापि" का०प्र० आलङ्कारिकमते स च अर्थस्त्रिविधः वाच्यो लक्ष्योव्यङ्ग्यश्चेति भेदात्। "अर्थोवाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः। वाच्योऽर्थोऽभिधया बोध्यो लक्ष्योलक्षणया मतः। व्यङ्ग्योव्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः" सा०द०। तान्य तत्तच्छब्दे वक्ष्यन्ते। अन्यमते "तात्पर्य्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने। तात्पर्य्यार्थं तदर्थञ्च वाक्यं तद्बोधकं परे"। इति तात्पर्य्य प्रतिपाद्योऽन्यपरः अर्थभेदः। स च अभिहितान्वयशब्दे विवृतः। २धने। तस्य सर्व्वैरर्थनीयत्वात्तथात्वम् "अजरामरवत् प्राज्ञोविद्यामर्थञ्च चिन्तयेत्" "अर्थस्योपार्ज्जने क्लेशस्ततोऽपि परिरक्षणे" नीति०। सचार्थस्त्रिविधः शुक्लः शबलः कृष्णश्चेति भेदात् यथा "अथ यद्दानमिश्रस्त्रिविधोऽर्थो भवति। शुक्लः शबलोऽसितश्चेति। शुक्लेनार्थेन यदैहिकं करोति तद्देवमासादयति। यच्छबलेन तन्मानुष्यम्, यत्कृष्णेन तत्तिर्य्यक्त्वम्॥ स्वदत्त्युपार्जितं सर्व्वं सर्व्वेषां शुक्लम्। अनन्तरदत्त्युपात्तं शबलम्। अन्तरितदत्त्युपात्तञ्च कृष्णम्। क्रमागतं पैतृदायम् प्राप्रञ्च सह भार्य्यया। अविशेषेण सर्व्वेषां धनं शुक्लं प्रकीर्त्तितम्॥ उत्कोचशुल्कसंप्राप्तमविक्रेयस्य विक्रये। कृतोपकाराद्दाप्रञ्च यच्चं सप्तदाहृतम्॥ पार्श्विकद्यूतचौर्य्याप्तं प्रतिरूपकसाहसैः। व्याजेनोपार्जितं यच्च तत् कृष्णं सप्तदाहृतम्॥ यथाविधेन द्रव्येण यत्किञ्चित् कुरुते नरः। तथाविधमवाप्नोति स फलं प्रेत्य चेह च" विष्णु०सू०॥ ४प्रयोजने इष्टे। प्रयोजनञ्च इच्छाविषयः। तच्च गौणसुखभेदेन द्विविधम् यत्र अन्येच्छानधीनेच्छा जायते तत् सुखं यथा सुखं दुःखाभावश्च तयोरिच्छा अन्येच्छानधीनत्वात्। साक्षात् परम्परया वा तत्साधनं तु गौणं तत्र सुखदुःखाभावेच्छयैव इच्छोदयात् गौणत्वम्। प्रयोजनञ्च यद्यपि नानाविधम् तथापि शास्त्रकारैः प्राधान्येन धर्म्मार्थकाममोक्षरूपाणि चत्वार्येवाङ्गीकृतानि तत्रैव सर्व्वप्रयोजनानामन्तर्भावात्। तएव चत्वारः पुरुषार्थाः पुरुषेणेप्स्यमानत्वात्। सांख्यास्तु सर्गापवर्गात्मकं द्विविधं पुरुषार्थमाहुः पुरुषस्य प्रयोजनमुद्दिश्य प्रकृतेः प्रवर्त्तनात्। एवं चतुर्विधे द्विविधे वा पुरुषार्थे मतभेदेन स्थिते तेषु मध्ये मोक्षएव परमपुरुषार्थः "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" सा०सू०। "इह खलु धर्म्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्षएव परमपुरुषार्थः" वे०प०। दुःखात्यन्तनिवृत्तिरूपसुखप्रयोजनस्य अन्येच्छानधीनेच्छाविषयत्वात् प्राधान्यम्। धर्म्मार्थकामास्तु तत्साधनानि तत्रापि धर्म्मोऽदृष्टसाधनम् अर्थः कामस्य साधनमित्यवान्तरभेदः "ईक्ष्वाकूणां दुरापेऽर्थे तदधीनाहि सिद्धयः" रघुः। "ज्ञातार्थोज्ञातसम्बन्धः श्रोतुं श्रोता प्रवर्त्तते" इत्यत्रार्थपदेनाभिधेयप्रयोजनयोर्ग्रहणम् "कस्यार्थकामौ वदपीड़यामि" "अनर्थकामौ तस्यास्तां धर्म्म एव मनीषिणः" रघुः। ५निमित्ते "अतोऽर्थाच्च प्रमाद्यन्ति प्रमदासु विपश्चितः" मनुः अर्थात्हेतोः कृत्वृ० "अर्थोऽयमर्थान्तरलभ्य एव" कुमा० "अर्थान्तरं कारणान्तरमिति" मल्लि०। निमित्तञ्च कारणनुद्देश्यञ्च तत्र निमित्तार्थेन "अर्थेन तु नित्यसमासो विशेष्यनिघ्नता चेति" वार्त्तिकोक्तेः नित्यचतुर्थीसमासः। द्विजार्थं पयः। द्विजार्था यवागूः। यूपार्थं दारु। भाष्यकृता तु यूपार्थं दारु इत्यादौ बहुव्रीहिरपि साधुः स्वरे विशेष इत्युक्तम् "अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः" गीता "मदर्थमपि कर्म्माणि कुर्व्वन्नाप्नोति किल्बिषम्" गीता "मदर्थमन्दे शमृषाशमन्धरः" नैष०। "परलोकसहायार्थं सर्व्वभूतान्यपीड़यन्" "तस्माद्धर्म्मं सहायार्थं" इति च मनुः। कर्म्मणि-अच्। ६विषये शब्दादौ। "इन्द्रियाणीन्द्रियार्थेभ्यः गीता" "इन्द्रियेभ्यः पराह्यर्था ह्यर्थेभ्यश्च परं मनः" क०उ०। ७ज्ञेयवस्तुनि "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षम्" गो० सू०। अलार्थः घटादिवस्तुमात्रम्। राज्ञ उपाये ८तन्त्रावापादौ अर्थचिन्ताशब्दे उदा० ९वस्तुस्वभावे यथार्थम्। १०निवर्त्तनीये मशकार्थो धूमः। ज्योतिषोक्ते ११लग्नावधिद्वितीयभवने १२प्रकारे। भावे अच् १३अभिलाषे १४प्रार्थने च कर्म्मणि यत् १५अर्थनीये विष्णौ पु० "अर्थोऽनर्थो महाकोपः" वि० स० "सुखरूपतया सर्व्वैरर्थ्यत इत्यर्थः। भा० १६फले। अर्थाय साधुः अर्था-

दनमेतो वा वत् अर्थ्यः। अर्थादनपेते अर्थसाधने च त्रि०। "अर्थ्यामर्थपतिर्वाचम्" रघुः। "वागीशं वाग्भिरर्थ्याभिः" कुमा०।

अर्थकर त्रि० अर्थं करोति कृ-हेत्वादौ ट। अर्थहेतुकर्मकारके स्त्रियां ङीप्। अर्थकरी दण्डनीत्यादिविद्या।

अर्थकृच्छ्र न० अर्थविषये कृच्छ्रम्। अर्थस्य प्रयोजनस्य कृच्छ्रतायाम् कष्टसाध्यत्व एव तस्य तथात्वम्।

अर्थकृत् त्रि० अर्थं करोति-कृ-क्विप्। अर्थकारके।

अर्थक्रम पु० ६त० क्रमनिर्णयाय श्रुतशब्दक्रमातिक्रमेणाश्रयणीये प्रयोजनानुसारिक्रमे यथा पाठक्रममनादृत्याग्निहोत्रसाधनतया यवागूपाकः प्राक्क्रियते अग्निहोत्ररूपप्रयोजनादेः यवागूसाध्यत्वात्तथात्वम् यथोक्तं भीमां० यत्र प्रयोजनवशेन क्रमनिर्णयः स अर्थक्रमः। यथा अग्निहोत्रं जुहोति यवागूं पचतीत्यग्निहोत्रहोमयवागूपाकयोः। यवागूं हुत्वा वहोमसाधनत्वेन तत्पाकः प्रयोजनवशेन पूर्वमनुष्ठीयते। स चायं पाठक्रमादुबलवान्। यथापाठं ह्यनुष्ठाने क्रमस्य प्रयोजनबाधेऽनर्थक्यं स्यात्। नहि होमानन्तरं क्रियमाणस्य पाकस्य किञ्चिदुपयोगं प्रयोजनमस्ति येनार्थक्रमबाधेन पाठक्रमस्तालादिद्रिवेत"।

अर्थगत त्रि० अर्थं गतः। १अर्थनिष्ठे अर्थाश्रये अलङ्कारोक्ते २दोषभेदे पु० अर्थदोषशब्दे विवरणम्। गतोऽर्थोऽस्य आश्रिता० वा परनि०। ३गतार्थे त्रि०।

अर्थगौरव न० ६त० स्वल्पशब्दस्यापि अर्थस्य गौरवम्। "भारवेरर्थगौरवम्" उद्भटः।

अर्थघ्न त्रि० अर्थं हन्ति ताच्छील्यादौ ट स्त्रियां ङीप्। अर्थनाशके "व्याधिता वाऽधिवेत्तव्या हिंसार्थघ्नी च सर्वदा" मनुः।

अर्थचिन्ता स्त्री अर्थानां तन्त्रावापादीनां चिन्ता। राज्याङ्गतन्त्रावापादीनां चिन्तने। "मन्त्री स्यादर्थचिन्तायामर्थास्तन्त्रावापादयः" सा०द०। अर्थचिन्तनमस्यत्र न० "मन्त्री खड्गोऽपि सखा तस्यार्थचिन्तने" इति। सा०द०अन्यमतम्। [अर्थोजातोऽस्य। २जातधने त्रि०।

अर्थजात न० अर्थानां जातम् ६त०। १अर्थसमूहे।

अर्थज्ञ त्रि० अर्थं जानाति ज्ञा-क। प्रयोजनाभिज्ञे।

अर्थतस् अव्य० अर्थ+तसिल्। १अर्थादित्यर्थे २अर्थानुसारेणेत्यर्थे ३वस्तुस्वभावादित्यर्थे च। "अर्थतोऽप्यहवानन्दानतीतद्वैतभानतः" वे० सा०।

अर्थद त्रि० अर्थान् धनानि ददाति दा-क। १धनदाने धनदानेन तोषके ऽध्याये २शिष्यभेदे पु०। "आचार्यपुत्रः शुश्रूषुर्ज्ञानदोधार्मिकः शुचिः। आप्तः शक्तोऽर्थदः साधुरध्याप्या दश धर्मतः" इति मनुः। ३कुबेरे पु०।

अर्थदूषण न० अर्थानां दूषणं नाशनम्। क्रोधजव्यसनमध्ये अतिशयेनासत्कर्मणि विनियोगेन कष्टदायके धननाशनरूपे व्यसनभेदे। "पैशुन्यं साहसं द्रोहरीर्ष्यासूयार्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः इति "दण्डस्य पातनञ्चैव वाक्पारुष्यार्थदूषणे। क्रोधजेऽपि गणे विद्यात् कष्टमेतत्त्रिकं सदेति च" मनुः। "अर्थदूषणञ्च धनानामपहारः देयानामदानञ्चेति" म०त०रघुनन्दनः। [साधुः"कृ०

अर्थना स्त्री अर्थ-युच्। याचने। "अभ्यर्थना भङ्गभयेन

अर्थपति पु० अर्थानां पतिः ६त०। १नृपे,। "अर्थ्यामर्थपतिर्वाचम्" सनैषधस्यार्थपतेः सुतायाम्" "किञ्चिद्विहस्यार्थपतिर्बभाषे"। "बलनिसूदनमर्थपतिञ्च तम्" इति च रघुः। २कुबेरे च।

अर्थप्रकृति स्त्री अर्थानां प्रयोजनानां प्रकृतिः कारणम्। १प्रयोजनहेतौ। "बीजं बिन्दुः पताका च प्रकरी कार्यमेव च। अर्थप्रकृतयः पञ्च ज्ञात्वा योज्या यथाविधि" सा०द० उक्ते नाटकाङ्गे २कार्यबीजरूपपञ्चके च।

अर्थप्रयोग पु० अर्थानां धनानां प्रयोगः नियोगः। ऋणदानादिवृत्तौ १ऋणदानवाणिज्यादिरूपे धनसङ्ग्रहार्थके व्यवहारे। अर्थास्तन्त्रावापादयः ६त०। २यथायथं तन्त्रावापादेर्विनियोगे च। "अर्थप्रयोगकुशल" इति अमरोक्तलक्षणम्।

अर्थप्राप्त पु० अर्थतः वाचकशब्दाप्रयोगेऽपि तात्पर्य्यवशतः प्राप्तः। वाचकशब्दानुच्चारणेऽपि तात्पर्य्यवशात्ज्ञाते "अर्थप्राप्त एवात्रज्ञानविधेरेव यज्ञोपवीतादिपरित्यागो न विधातव्यः" द०उ०मा०।

अर्थबन्ध पु० अर्थैः विषयैः शब्दादिभिर्बन्धः। १जीवस्य शब्दादिभिः श्रोत्रसम्बन्धरूपे बन्धे २धनकृतबन्धे च।

अर्थभावना स्त्री अर्थनिष्ठा भावना भावयितुर्व्यापार उत्पादना। भट्टमतोक्तायामर्थनिष्ठायां यागसाधनिकायां स्वर्गादुत्पादनायां स्वर्गादीष्टं यागेन साधयेदित्येवंरूपायाम्। भावना च द्विधा शाब्दी आर्थी च विवरणं भावनाशब्दे।

अर्थमर्य्यादा स्त्री अर्थस्य कारणस्य मर्य्यादा इतरसङ्कारेण सामग्रीसमवधानम्। सामग्रीसमवधाने, सामग्रीसमवधाने हि

कार्योत्पत्तिरर्थप्राप्तेति तदुत्पादस्यार्थमर्यादाधीनत्वम् ।

अर्थमात्र न० अर्थ एव मयूर० अवधारणाद्यर्थमात्रशब्देन नित्यस० । १अवधारितेऽर्थे । "भोजनाच्छादनाभ्यधिकं स्वल्पमप्यर्थमात्रं न सम्पद्यते" इति ह० भा० । अल्पार्थमात्राशब्देन ऐत० । २अल्पधनांशे स्त्री टङ्कत्वार्थे च मात्राशब्देन । ऐत० ।३धनवाचके । कथं मयास्येयमर्थमात्राङ्कर्त्तव्या" भट्टी धनमात्रेत्यर्थः ।

अर्थवत् त्रि० अर्थोऽस्यास्य अस्त्रिहतः मतुप् मस्यवः । १अर्थयुक्ते २सार्थके "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" पा० । ३प्रयोजनयुक्ते ४फलयुक्ते च "अपसव्य उपेतश्चेदाहिताग्न्याद्यर्थवत् । या० स्मृ० "विष्णूत्सर्गगुह्यार्थं स्मृदाद्यादेयमर्थवत्" मनुः ५असञ्चितधनवति त्रि० । सञ्चिहिते तु इनि अर्थीत्येव । स च व्यवहारे वादिनि रूढः "ततोऽर्थी लेखयेत् सद्यः प्रतिज्ञातार्थसाधनम्" या० स्मृ० । स्त्रियामुभयत्र ङीप् । ६पुरुषे पु० राजनि० । अर्थमर्हति अर्थेन तुल्यं क्रिया, अर्थ इव वा वति । ७अर्थार्हे ८अर्थतुल्यक्रियायाम् ९अर्थसदृशे आश्वये च अव्य० ।

अर्थवाद पु० अर्थस्य लक्षणया स्तुत्यर्थस्य, निन्दार्थस्य वा वादः वद-करणे घञ् । १प्रशंसानीयगुणवाचके, २निन्द्यनीयदोषवाचके च शब्दविशेषे । भावे घञ् । ३तत्कथने । अभिधया गौण्या वा उक्त्या भूतमर्थं वदन् स्वाध्यायविध्यापादित प्रयोजनवस्तुलाभाय विधिमाकाङ्क्षन्नर्थवादः" अर्थवादेन हि क्वचिद्विधिरुत्क्रियतेऽवसीदन्ती विध्यर्थे शीघ्रं प्रवर्त्तयितुमुत्सह्यते । स च चतुर्विधः "स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः" गो० स्मृतोक्तेः । तत्र स्तुतिः साक्षाद्विध्यर्थस्य प्रशंसार्थकं वाक्यं यथा "सर्वस्य जिता वै देवाः सर्वमजयन् सर्वस्य व्याप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाप्नोति सर्वं जयतीत्यादि" । अनिष्टसाधनताद्वारा विध्यर्थस्यवर्त्तकं वाक्यम् निन्दा । यथा "एष वाव प्रथमोयज्ञानां यज्ज्योतिष्टोमः य एतेनानिष्ट्वान्येन यजते स गर्त्तं पततीत्यादि" । पुरुषविशेषनिन्दतया कथनं परकृतिः परक्रिया, यथा "वपामेवाग्नेऽभिघारयन्ति अथ पृषदाज्यं तदुह चरकाध्वर्यवः पृषदाज्यमेवाग्नेऽभिघारयन्त्यन्यस्मैः प्राणाः पृषदाज्यमित्यभिदधतीत्यादि" ऐहिकमात्रचरिततया कीर्त्तनं पुराकल्पः । एवमन्येऽपि अर्थवादा ब्राह्मणरूपाः सामसंहिताभाष्ये माधवाचार्येण दर्शिताः यथा "हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः । परकृतिः पुराकल्पोवावधारणकल्पना" इति "तेन ह्यत्रं क्रियत" इति हेतुः "एतद्भोदधित्वमिति" निर्वचनम् । "अमेध्या वै भाषा" इति निन्दा "वायुर्वै क्षेपिष्ठेति" प्रशंसा "तद्यत्किञ्चित्किञ्चन जुहवानीमाहोष्यामिति संशयः "यजमानेन सम्मिता औदुम्बरी भवतीति" विधिः "माषानेव सन्तं पचते" इति परकृतिः "पुरा ब्राह्मणा अभैषुः" इति पुराकल्पः । "यावतोऽंशान् प्रतिसञ्जीवात् तावतो वारुणांश्चतुष्कपालान्निर्वपेदिति" विशेषावधारणकल्पनेत्युदाहृतं च तत्रैव । लौगाक्षिणा तु त्रैविध्यमुक्तम् "अर्थवादश्च त्रिविधः गुणवादोऽनुवादोभूतार्थवादश्चेति तदुक्तम् ॥ "गुणवादोविरोधे स्यादनुवादोऽवधारिते । भूतार्थवादस्तद्ज्ञानादर्थवादस्त्रिधा मतः" ॥ गुणवादश्च "यथा सिंहो माणवक" इत्यादौ माणवके सिंहाभेदस्य विरोधेन तद्गतदंशाभेदोबोध्यते तेन समर्थत्वादिरूपं तद्गतगुणमनुवदति प्रतिपादयतीति गुणवादः अन्ये तु "यजमानः प्रस्तर" इत्यादौ प्रत्यक्षादिभिरवधारितेऽर्थे तमेवार्थमनुवदतीत्यनुवादः यथा "वह्निर्हिमस्य भेषजं, "भूमिरावपनं महत् सूर्य्यस्यापकर" इत्याहुः । तद्ज्ञानादेतदुभयार्थकत्वाभावात् तथा चैतदुभयभिन्नं भूतं सिद्धार्थं वदतीति भूतार्थवादः इति । अवच्छानेकविधः क्वचिदुक्तः, स्तुत्यर्थवादः फलार्थवादः सिद्धार्थवादः निन्दार्थवादः परकृतिः पुराकल्पः सन्त्वयेति" । तत्र स्तुत्यर्थवादो यथा "वायुर्वै क्षेपिष्ठा देवता" इत्यादि । फलार्थवादो यथा "तरति मृत्युं तरति ब्रह्महत्यां योऽश्वमेधेन यजेतेत्यादि" । "प्रतितिष्ठन्ति ह वै यएता रात्रीरुपयन्तीत्यादि" च यद्यप्येतस्य परकृतावेव पर्य्यवसानं तथापि फलस्य विशेष्यतयाऽनभिधानात्तादृशेन पृथगुपन्यासः ॥ सिद्धार्थवादो यथा । "यच्च दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतं यत् तत् सुखं स्वःपदास्पदमित्यादि" ॥ निन्दार्थवादो यथा "अन्धन्तमस्ते प्रविशन्ति येके चात्महनोजना" इत्यादि॥ परकृतिः परकृत्यभिधानं परक्रियोक्तिः । एवञ्च लौगाक्षिभास्करोक्तस्य "विरोधेनानुवादः स्यादित्यादि कारिकोक्तस्य त्रैविध्यस्य मध्ये स्तुत्यर्थवादस्यैवान्तरभेदेन तस्य सप्तविधत्वमिति भेदः । ३अन्यतात्पर्य्यावधारणार्थे लिङ्षट्कान्तर्गते लिङ्भेदे च । "उपक्रमोपसंहारावभ्यासोऽपूर्व्यता फलम् । अर्थवादोपपत्ती च हेतुस्तात्पर्य्यनिर्णये इति वे० सा० यथा "उत तमादेशमप्राक्षो येनाश्रुतं श्रुतम् ।इत्यादिनाऽद्वितीयवस्तुनः प्रशंसनम्" ब्रा० ड० भा० उक्तम् ।

अर्थविज्ञान न० ऐत० शुक्लप्राद्यष्टविधायुक्तबुद्धिगुणान्तर्गते गुणभेदे हे० ।

अर्थविद् त्रि० अर्थं कार्य्यं वेत्ति विद-क्विप् । कार्य्याभिज्ञे

"विवक्षितामर्थविदस्तत्त्वज्ञं प्रतिसंहृताम्" माघः ।

अर्थविप्रकर्ष पु० अर्थस्य अर्थबोधस्य विप्रकर्षः बोधनस्य विलम्बेनोत्पादनम् । पूर्वपूर्वमपेक्ष्य उत्तरोत्तरस्य विलम्बेनार्थबोधने "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् "जै०सू० । तथाहि श्रवणापेक्षरूपायाः द्वितीयादिश्रुतेः अर्थप्रकाशनसामर्थ्यरूपलिङ्गापेक्षया शीघ्रार्थबोधकत्वम् इति तस्याः सर्वतः प्राबल्यम् एवं लिङ्गस्य वाक्याद्यपेक्षया शीघ्रार्थोपस्थापकतया बलवत्त्वम् । विवृतिः बलाबलाधिकरणशब्दे ।

अर्थव्ययज्ञ त्रि० अर्थस्य धनस्य व्ययं तत्प्रकारं जानाति ज्ञा—क । किं धनं, कथं,कुत्र, कियत्, कस्मै वा व्ययितव्यमिति विशेषाभिज्ञे ।

अर्थव्यापाश्रय पु०अर्थस्य प्रयोजनस्य व्यापाश्रयः । १प्रयोजनसम्बन्धे २अभिधेयाश्रये । ब० । ३सप्रयोजने त्रि० ।

अर्थशास्त्र न० अर्थस्य भूमिधनादेः प्रापकं शास्त्रं शाक०त० । १नीतिशास्त्रे, अभिचारादिकर्म्मप्रतिपादके २शास्त्रे च । "अर्थशास्त्रात्तु बलवत् धर्म्मशास्त्रमिति स्थितिः" या०स्मृ० विवृतमेतन्मिताक्षरायाम् " यद्यपि समानकर्तृकतया अर्थशास्त्रधर्म्मशास्त्रयोः स्वरूपगतो विशेषोनास्ति तथापि प्रमेयस्य धर्म्मस्य प्राधान्यादर्थस्य चाप्राधान्याद्धर्मशास्त्रं बलवदित्यभिप्रायः धर्मस्य च प्राधान्यं शास्त्रादौ दर्शितत्वाद्धर्मशास्त्रार्थशास्त्रयोर्विरोधे अर्थशास्त्रस्य बाध एव । "गुरुर्वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम् । आततायिनमायान्तं हन्यादेवाविचारयन्। नाततायिवधे दोषोहन्तुर्भवति कश्चन। प्रकाशं वा प्रकाशं वा मन्युस्तं मन्युमृच्छति" तथा "आततायिन मायान्तमपि वेदान्तगं रणे। जिघांसन्तञ्जिघांसीयान्न तेन ब्रह्महा भवेत्" इत्याद्यर्थशास्त्रम् । "इयं विशुद्धिरुदिता प्रमाप्याकामतोद्विजम् सकामतो ब्रह्मवधे निष्कृतिर्न विधीयते" इत्यादि धर्म्मशास्त्रन्तयोर्विरोधे धर्म्मशास्त्रं बलवदिति युक्तं"मित्यन्यमतसङ्गा । "हिरण्यभूमिलाभेभ्योमिलत्यल्पिरा यतः । अतो यतेततत् प्राप्तौ" इत्यर्थशास्त्रम् । "धर्म्मशास्त्रानुसारेण क्रोधलोभविवर्जितः" इति धर्म्मशास्त्रम् । तयोः क्वचिद्विषये विरोधो भवति यथा चतुष्पाद्व्यवहारे प्रवर्तमाने एकस्य जयेऽवधार्यमाणे धर्म्मानुसरणम् न मिलनाभः । अन्यस्य तु जये मिलनञ्चिन्धर्म्म-शास्त्रमनुसृतम्भवति तत्रार्थशास्त्राद्धर्मशास्त्रं बलवत् अतएव "धर्मार्थसन्निपाते अर्थस्याहिण एतदेवेति" प्रायश्चित्तस्य गुरुत्वन्दर्शितमापस्तंबेन" इति ।

अर्थशौच अर्थानां तदुपायानां शौचम् तदर्जने शुद्धिः । अन्यायेन धनोपार्ज्जनपरिहारेण अर्थार्ज्जनशुद्धौ "सर्व्वेषामेव शौचानामर्थशौचं परं स्मृतमिति" मनुः ।

अर्थसंग्रह पु० ६त० । धनसञ्चये ।

अर्थसंस्थान न० अर्थानां धनानां संस्थानं स्थितिर्यस्मात् सम्+स्था—अधिकरणे ल्युट् वा । १धनोपार्जनसाधनप्रतिग्रहादौ । २भावे ल्युट् ६त० । ३अर्थस्थितौ ।

अर्थसञ्चय पु० अर्थानां धनानां सञ्चयः संग्रहः समुदायश्च । १धनसंग्रहे । "कुटुंबभासाद्य कृतोऽर्थसञ्चयः" इति नीतिः । २धनसमूहे च ।

अर्थसमाज पु० अर्थानां कारणानां वा समाजः समूहः । १बहुविधार्थसमूहे २कारणसमूहे च । "अर्थसमाजन्यस्तत्वात् नीलघटत्वादिकम् न कस्यचित् कार्य्यतावच्छेदकमिति" गदा० । तथाहि घटत्वं दण्डादेः कार्य्यतावच्छेदकम् । नीलत्वन्तु नीलकपालस्येति भिन्नभिन्नकारणस्यैव तत्तत्कार्य्यतावच्छेदकम् तथाच नीलघटत्वं न कस्याप्येकस्य कारणस्य कार्य्यतावच्छेदकम् नीलघटत्वस्य नाना कारणस्यैव कार्य्यतावच्छेदकत्वात् एवञ्च तस्य कारणसमाजन्यस्तत्वात् न कस्यापि कार्य्यतावच्छेदकत्वम् । एवमन्यदप्युदाहार्य्यम् । ३धनसमूहे च ।

अर्थसमाहार पु० ६त० । १धनसंग्रहे सम्यगुपायेनार्ज्जने ते च उपायाः "सप्त वित्तागमा धर्म्म्या दायोलाभः क्रयोजयः । विभागः संप्रयोगश्च सत्प्रतिग्रहएव चेति" स्मृत्युक्ताः साधारणाः "ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्दिष्टं वैश्यशूद्रयोः गौ०उक्ताः "याजनाध्यापनप्रतिग्रहैर्ब्राह्मणोधनमर्ज्जयेदितिस्मृत्युक्ताश्च ब्राह्मणादेः यथायथम् असाधारणाः ज्ञेयाः । २धनसमूहे च ।

अर्थसम्बन्ध पु० अर्थस्य धनस्य वाच्यार्थस्य वा सम्बन्धः । १धनसम्बन्धे वाच्यार्थसम्बन्धे । २ धनसम्बन्धप्रयोजकाश्च अपतितपुत्रत्वादयः शास्त्रीयाः क्रयादयश्च लौकिकाः ।

अर्थसिद्ध अर्थात् अर्थान्वयविशेषात् सिद्धः । शब्दादिनाऽबोधनेऽपि अन्वयबललभ्ये पदार्थे" यथा घटमानयेति वाक्ये घटस्य क्रियेतरत्वमन्वयबललभ्यं न च तत्र शब्दशक्त्याद्यपेक्षा । तथा च शाब्दबोधे योग्यताज्ञानस्य हेतुतया क्रियेतरघटएव जलाहरणप्रयोजकत्वावधारणेन तत्रैव प्रवृत्तिर्नेतरघटादौ एवमन्यत्रापि । अर्थः प्रयोजनं धनं वा सिद्धोऽस्य मतेः । २सिद्धार्थे सिद्धप्रयोजने ३स्वतः सिद्धधने च त्रि० ।

अर्थसिद्धि स्त्री अर्थतः योग्यान्यवसायात् सिद्धिः। १अपदार्थस्य तात्पर्य्यविषया सिद्धौ। ६त०। २धनसिद्धौ।

अर्थहर त्रि० अर्थान् धनानि हरति ताच्छील्यादौ ट स्त्रियां ङीप्। परकीयधनहरणशीले चौरादौ।

अर्थहीन त्रि० अर्थेन धनेन हीनः। १धनहीने दरिद्रे। २वाच्यार्थहीने च।

अर्थागम पु० अर्थस्य आगमः। १आये। अर्थागमोनित्यरोगिता च"नीति०। अर्थ आगमस्यतेऽनेन करणे घञ्। २धनार्जनोपाये क्रयादौ। ३वाच्यादर्थापतने च "दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते" सा०द०।

अर्थान्तर न० अन्योऽर्थः अर्थान्तरं मयूर०त०। १अन्यार्थे, "बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरमिति" सांख्यम्। न्यायमते उद्देश्यसिद्ध्यर्थं प्रयुक्ते शब्दसामर्थ्यादनुद्देश्यसिद्धानुकूले २वाक्ये। तस्य प्रतिवादिनोद्भावने वादिनिग्रहः। "प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासोहेत्वन्तरमर्थान्तरं फल्गुत्वादि" गौ० सूत्रेण निग्रहस्थानान्युक्त्वा "प्रकृतादर्थादसम्बन्धार्थोऽर्थान्तरमिति" लक्षितम्। प्रकृतात् प्रकृतोपयुक्तात् ल्यब्लोपे पञ्चमी तेन प्रकृतोपयुक्तमर्थमपेक्ष्यासम्बन्धार्थाभिधानमर्थान्तरं प्रकृतानाकाङ्क्षिताभिधानमिति फलितार्थः यथा शब्दोऽनित्यः कृतकत्वात् इत्युक्ते शब्दोगुणः स चाकाशस्येत्याद्युक्तिः" न्या०वृत्तिः। शब्दस्यानित्यत्वसाधने प्रवृत्तेस्तस्य गुणत्वसाकाशवृत्तित्वसाधने प्रकृतोपयोगित्वं नास्तीति तस्य तथात्वम्। विवरणं निग्रहस्थानशब्दे। अर्थशब्दस्य कारणपरत्वे २कारणान्तरे "अर्थोऽयमर्थान्तरलभ्य एव" कुमा०"अर्थान्तरेण कारणान्तरेण लभ्य" इति मल्लि०।

अर्थान्तरन्यास पु० अर्थान्तरं न्यास्यतेऽत्र। अर्थालङ्कारभेदे "सामान्यं वा विशेषेण विशेषस्तेन वा यदि। कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते॥ साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः"। क्रमेणोदाहरणानि। "दृढक्रमाः कार्यान्तं चोदीयानपि गच्छति। सम्भूयाम्भोधिमभ्येति महानद्या नगापगा"॥ अत्र द्वितीयार्द्धगतः सामान्योऽर्थः स्वोपपत्तिकः क्रियते। "यावदर्थपदां वाचमेवमाधाय साधवः। विरराम महीयांसः प्रकृत्या मितभाषिणः" अत्र सामान्येन विशेषसमर्थनम्। "भूमि! स्थिरा भव भुजङ्गम! धारयैनां त्वं कूर्मराज! तदिदं द्वितीयं दधीथाः। दिङ्नागराः! कुरुत तत्प्रतिपे दिशोर्थाः कार्यैः करोति हरकार्मुकसाततज्यम्" अत्रातत्ज्याकरणं भूभृत्स्थैर्यादेः कार्यस्य समर्थकम्। "सहसा विदधीत न क्रियामविवेकः परमापदां पदम्। वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः" इत्यादौ सम्पद्हरणं कार्यं सहसा विधानाभावस्य विमृश्यकारित्वरूपस्य कारणस्य समर्थकम्। एतानि साधर्म्येण उदाहरणानि वैधर्म्येण यथा "इत्यमाराध्यमानोऽपि क्षिप्राति भुवनत्रयम्। शाम्येत् प्रत्यपकारेण नोपकारेण दुर्ज्जनः"॥ अत्र समान्यं विशेषस्य समर्थकम्। "सहसा विदधीतेति" अत्र सहसा विधानाभावस्यापत्पदत्वं विरुद्धं कार्यं समर्थकम्" सा०द०।

अर्थापत्ति स्त्री अर्थस्य अनुक्तार्थस्य आपत्तिः सिद्धिः। शब्देनानुपस्थापितार्थस्यसिद्धिरूपे मीमांसकोक्ते १प्रमितिभेदे। यथा पीनोदेवदत्तोदिवा न भुङ्क्ते इत्यादौ पीनत्वविशिष्टस्य देवदत्तस्य रात्रिभोजित्वरूपार्थस्य शब्दानुक्तस्यापि सिद्धिः। अर्थस्यापत्तिर्यतः। २तत्साधने च यथोक्तं वे० प०। "तत्तोपपाद्यज्ञानेनोपपादककल्पनमर्थापत्तिः। तत्तोपपाद्यज्ञानं करणम् उपपादकज्ञानं फलम्। येन विना यदनुपपन्नं तत्तत्तोपपाद्यम् यस्याभावे यस्यानुपपत्तिः तत्तत्तोपपादकं यथा रात्रिभोजनेन विना दिवाऽभुञ्जानस्य पीनत्वमनुपपन्नमिति तादृशं पीनत्वमुपपाद्यं यथा वा रात्रिभोजनस्याभावे तादृशपीनत्वस्यानुपपत्तिरिति रात्रिभोजनमुपपादकं रात्रिभोजनकल्पनारूपायां प्रमितौ, अर्थस्यापत्तिः कल्पनेति षष्ठीसमासेनार्थापत्तिशब्दोक्तेते। कल्पनाकरणे पीनत्वादिज्ञाने तु अर्थस्यापत्तिः कल्पना यस्मादिति बहुव्रीहिसमासेन वर्त्तते इति फलकरणयोरुभयोक्तत्वयोगः। नचेयमर्थापत्तिरनुमानेऽन्तर्भवितुमर्हति अन्यथाव्याप्त्युज्ञानेनान्यविधनन्तर्भावात्। व्यतिरेकिणश्चानुमापकत्वं प्रागेव निरस्तम् अतएवार्थापत्तिस्थलेऽनुमीनोमीति नानुव्यवसायः किन्त्वनेनेदं कल्पयामीति"। "अहैतागमनासीरे साधुसा धुन्वती परान्। सेवामेवार्ज्जवल्लर्थापत्तिपत्तिपरम्परा" स०सा०। सांख्यादिभिश्चेयं प्रमाणान्तरमपि तु अनुमानेऽन्तर्भवतीत्युक्तम् यथा "एवमर्थापत्तिरपि न प्रमाणान्तरं तथाहि जीवतश्चैत्रस्य गृहाभावदर्शनेन बहिर्भावस्यादृष्टस्य कल्पनमर्थापत्तिरभिमता द्वयानां साध्यानुमानमेव। यदा खलु व्यापकः सर्व्वत्र नास्ति तदान्यत्रास्ति, यदा व्यापकएकत्रास्ति तदान्यत्र नास्तीति क्रमः स्वशरीरे एव व्याप्तिग्रहः। तथाच सति गृहाभावदर्शनेन लिङ्गेन बहिर्भावदर्शनमनुमानमेव। न च चैत्रस्य क्वचि-

र्द्धर्चिरिति तस्य तत्वात्वम् । समखण्डवाचित्वे तु न० । "अर्द्धं नपुंसकम्" पा० स्वतेस्तत्वोक्तेः । ५समीपे अर्धदेवशब्दे उदा० समांसवाचिनस्तु एकदेशिसमासः । अर्धैः अर्धकायम् अर्धपिप्पली क्वचित् षष्ठीसमासः "एतच्छतार्द्धभावत्थ त्रैलोक्यविजयी भवेत्" तन्त्रम् । एतत् पूर्वकनौशब्दान्ततत्पुरुषात् अच् अर्धनावम् खार्यांस्तु वा अर्धखारम् अर्धखारी । खण्डमात्रवाचित्वे षष्ठीसमासः । "क्रोडार्धं प्रकृतिपुरस्सरेण गत्वा" रघुः । अवयवावयविनोर्भेदात् क्वचित् धर्म्मिपरता । अर्ध्यते वर्ध्यते ऋध्-णिच्-कर्म्मणि अच् । ६खण्डिते त्रि० जसि अर्धाः अर्धे । [क्रियासमाप्तिस्ततोऽर्द्धं कृते ।

अर्द्धकृत त्रि० अर्धं कृतम् । असम्पूर्णकृते यस्य यथा करणे

अ(आ)र्धकौडविक त्रि० अर्धकुडवपरिमाणमर्हति ठञ् उत्तर पदस्य वृद्धिःपूर्वस्य वा। अर्धकुडवपरिमाणार्हे स्त्रियां ङीप्।

अर्द्धखारी स्त्री अर्धं खार्याः एक०त० वा अच् । खारीपरिमाणार्धांशे। अत्र वा अच् । अर्धखारम् तत्रैव न० ।

अर्द्धगङ्गा स्त्री अर्धं गङ्गायाः एकदेशित०। स्नानादौ गङ्गास्नानादेरर्द्धफलदायिन्यां कावेरीनद्याम्।

अर्द्धगर्भ त्रि० अर्द्धे वत्सरस्यार्द्धे मार्गादौ पौषादौ वात्रह्मखण्डस्यार्धे गगने वा गर्भं गर्भस्थानीयमुदकं यस्य । सूर्य्यरश्मिभेदे ते हि मार्गादौ पौषादौ च भूमिस्थम् उदकमाकृष्य गर्भरूपेण गगने धारयन्ति इति ज्योतिषप्रसिद्धम् "तासां शतानि चत्वारि रश्मीनां वृष्टिसर्जने इत्यादिना ३२४ पृष्ठ दर्शितेन यादववाक्येन तेषां मध्ये शतत्रयेण गर्भधारणस्योक्तेस्तत्वात्वम् गर्भधारणकालश्च ह० स० उक्तम् यथा । "मार्गशिरःशुक्लपक्षप्रतिपत्प्रभृति जपाकरेऽषाढाम् । पूर्वां वा समुपगते गर्भाणां लक्षणं ज्ञेयम् । यद्यत्समुपगते गर्भे चन्द्रे भवेत् स चन्द्रगात्। पञ्चनवते दिनशते तत्रैव प्रसवमावाति । सितपक्षभवाः कृष्णे, शुक्ले कृष्णा द्युसम्भवाः रात्रौ । नक्तं प्रभवाश्चाह्नि, सन्ध्याजाताश्च सन्ध्यासु । मार्गशीर्षाद्यागर्भामन्दफलाः पौषशुक्लजाताश्च । पौषस्यकृष्णपक्षेण निर्दिशेच्छ्रावणस्य सितम् । माघसितोद्भवा गर्भाः श्रावणकृष्णे प्रकृतिमायान्ति । माघस्य कृष्णपक्षेण निर्दिशेद्भाद्रपदशुक्लम् । फाल्गुनशुक्लसमुत्था भाद्रपदस्यासिते विनिर्देश्याः।तस्यैव कृष्णपक्षोद्भवास्तु ये तेऽश्वयुक्शुक्ले। चैत्रसितपक्षजाताः कृष्णेऽश्वयुजस्य वारिदा गर्भाः । चैत्रासितसम्भूताः कार्त्तिकशुक्लेऽभिवर्षन्ति" इति । "षष्ठार्द्धे गर्भा भुवनस्य रेतः" ऋ० १,१६४,२६ । "वत्सरस्यार्द्धे गर्भस्थानीयमुदकं धारयन्ति" भा० । [क्षारभेदे

अर्द्धगुच्छ पु०। अर्द्धः चन्द्रसमः गुच्छः । १चतुर्विंशतिलतिके

अर्द्धगुञ्जा स्त्री अर्द्धं गुञ्जायाः । गुञ्जायास्तुल्यार्धपरिमाणे "तुल्या यवाभ्यां कथिता तु गुञ्जा" लीला० उक्तेः यवद्वयार्द्धे एकयवरूपे तत्परिमाणे । तदर्हति ठञ् । उत्तरपदस्य वृद्धिः पूर्वस्य वा ॥ अ(आ)र्द्ध गौड्डिकः तत्परिमाणार्हे त्रि० । स्त्रियां ङीप् ।

अर्द्धचन्द्र पु० अर्द्धं चन्द्रस्य एक०त० । १चन्द्रस्यार्द्धे, तदाकारे-२नखक्षते, ३गलहस्ते, ४बाणभेदे, "रावणेन हृता सीता-अर्द्धचन्द्रार्द्धभास्करा" भट्टाना० "अर्द्धचन्द्रं बिभर्त्ति यः" कुमा० "अर्द्धचन्द्रसखैर्बाणैश्चिच्छेद कदलीस्तम्भम्" रघुः "दृगाताः सर्व्वे गलेऽर्द्ध चन्द्रं दत्त्वा निस्सारिताः"। "तद्दीयतां द्रागेतस्यार्द्धचन्द्रः" इति च पञ्च०त० । गलहस्तस्तु तर्ज्जन्यङ्गुष्ठविस्तारूपा हस्तसन्निवेशविशेषसद्दा । (तेओडोति) ख्यातायां ५तिन्तिडि स्त्रीयां ६तिलकभेदे च । स्त्री । स्वार्थे कन् । हस्ते अतद्रूपे । अर्द्धचन्द्रिका १कर्णस्फोटतायां २क्षितपर्ण्यां च ।

अर्द्धचन्द्रक पु० अर्द्धचन्द्र इव कायति कै-क । १मयूरपिच्छस्यार्द्धचन्द्राकारे पदार्थे ।

अर्द्धचन्द्राकृति पु० अर्द्धं चन्द्रस्याकृतिरिवाकृतिर्यस्य । गलहस्ते तर्ज्जन्यङ्गुष्ठविस्तारूपे गले हस्तसन्निवेशविशेषे ।

अर्द्धचोलक न० अर्द्धं चोलस्य एकदेश त० संज्ञायां कन् । (काञ्चुलीति) ख्याते कुर्पासकवस्त्रे ।

अर्धजरतीय पु० अर्द्धा जरतीव इवार्थे कन् । अर्द्धवृद्धातुल्ये न्यायभेदे स च अर्द्धं कुक्कुट्याः पाकाय अर्द्धं प्रसवाय यथा न प्रभवति एवमेकभागस्यान्यपरत्वमन्यभागस्यान्यपरत्वं न युक्तमित्येवं परः न्यायः । "न च जानीमो विषयसन्धावा विज्ञानरालेऽवस्थानमर्द्धजरतीयकौशलम्" ह० उ० भा० । यथा न जागर्त्ति न स्वपितीति विषयसन्धिरिति अन्तरालेऽवस्थानं दुर्घटं यथा चार्द्धं कुक्कुट्याः पाकार्थमर्धञ्च प्रसवायेति कौशलं नोपलभ्यते" आ० गि० । जरद्वा एव पाकः युवत्यास्तु प्रसवार्थत्वं नत्वेकस्या एव द्विविधकार्य्यकरत्वमित्यर्थः "तुल्ययोर्ज्ञानार्थयोः प्रश्नप्रतिवचनयोः प्रकरणस्य विज्ञानार्थत्वादर्द्धजरतीयोन्यायो न युक्तः कल्पयितुम्" आ० भा० ।

अर्द्धजाह्नवी स्त्री अर्द्धं गङ्गावत् । कावेर्यां नद्याम् ।

अर्द्धतिक्त अर्द्धः असम्पूर्णस्तिक्तः । नेपालनिम्बे । [त्रिके काले ।

अर्द्धदिन अर्द्धं दिनस्य । दिनस्य तुल्याऽंशे सार्द्धसप्तमुहूर्त्ता

अर्द्धदेव पु० अर्द्धे समीपे तद्वर्त्ती देवानाम्। देवसमीपे वर्त्तमाने। "इन्द्रं न इत्तरमर्द्धदेवम्" "इलक्षणं ददथुरर्द्धदेवम्" ऋ० १,४२,८,९। "अर्द्धदेवं देवानामर्द्धे समीपे वर्त्तमानम्" भा०

अ(आ)र्द्धद्रौणिक त्रि० अर्द्धद्रोणमर्हति ठञ्। उत्तरपदस्य वृद्धिः पूर्वपदस्य वा। अर्द्धद्रोणपरिमाणार्हे वस्तुनि स्त्रियां ङीप्।

अर्द्धधार न० अर्द्धे धाराऽस्य। सुश्रुतोक्ते विंशतिशस्त्रमध्ये शस्त्रभेदे "विंशतिः शस्त्राणि। तद्यथा। मण्डलाग्रकरपत्रार्द्धपत्रनखशस्त्रमुद्रिकोत्पलपत्रकार्द्धधारसूचीमुखकुशपत्राटीमुखवराहकर्णखार्जन्तर्मुखत्रिकूर्चकण्ठारिकाद्वीहिमुखसारवेतसपत्रवृद्धिपत्रदन्तयन्त्रोक्षेषणम्" इति। "मुद्रिकोत्पलपत्रार्द्धधाराणि छेदने भेदने च" सुश्रु०।

अर्द्धनारायण न० अर्द्धमर्द्धमितं स्थानं यस्य ताद्योनारायणो यत्र "प्रवाहमवधिं कृत्वा यावद्वृक्षचतुष्टयम्। अत्र नारायणः स्वामी नान्यः स्वामी कथञ्चन" इत्युक्ते गङ्गायाः प्रवाहावधिकवृक्षचतुष्टयात्मके नारायणस्वामिके स्थाने।

अर्द्धनारीश्वर पु० अर्द्धाङ्गे या नारी तस्या ईश्वरः। हरगौरीरूपे शिवमूर्त्तिभेदे तद्रूपादि ध्यानमन्त्रे वक्ष्यते।

अर्द्धनाव न० अर्द्धं नावः अच् समा०। नौकायास्तुल्यांशे।

अर्द्धनिशा स्त्री अर्द्धं निशायाः एकदेशित०। अर्द्धरात्रे।

अर्द्धपण पु० अर्द्धं पणस्य। "वराटकानां दशकद्वयं यत् सा काकिणी ताव पणश्चतस्र" इत्युक्तपणस्यार्द्धे काकिणीद्वये।

अर्द्धपथ न० अर्द्धं पथः अच् समा०। मार्गस्य तुल्यांशे प्रदेशे।

अर्द्धपाञ्चालिक पु० अर्द्धपञ्चाले भवः ठण् उत्तरपदवृद्धिः। अर्द्धपञ्चालदेशभवे।

अ(आ)र्द्धपादिक त्रि० अर्द्धपादं तच्छेदमर्हति ठञ्। पूर्वपदस्य वा वृद्धिः। अर्द्धपादच्छेदार्हे। "गोषु ब्राह्मणसंस्थासु क्षुरिकायाश्च भेदने। पशूनां हरणे चैव दण्डः कार्योऽर्द्धपादिकः" मनुः अर्धपद मर्हति ठञ् उत्तरपदस्य वृद्धिः पूर्वपदस्य वा। अर्द्धपदप्रमाणार्हे उभयत्र स्त्रियां ङीप्। [पोते (तिसिरोति) ख्याते पक्षिणि।

अर्द्धपारावत पु० अर्द्धेन अर्द्धेन पारावत इव। चित्रकण्ठके।

अर्द्धपुलायित न० "मतार्द्धक्रमादूर्नमंसखलायितवल्गितैः। उन्मुखाश्वसुखस्य गतिरर्द्धपुलायितमिति" परिभाषिते अश्वगतिभेदे।

अ(आ)र्द्धप्रस्थिक त्रि० अर्द्धप्रस्थमर्हति ठञ् "नातः" पा० नोत्तरपदस्य वृद्धिः पूर्वस्य तु वा। अर्द्धप्रस्थप्रमाणार्हे स्त्रियां ङीप्।

अर्द्धभाग पु० अर्द्धं भागस्य। भागस्यार्द्धे "तदर्द्धभागेन लभस्व काङ्क्षितम्" कुमा०। अर्द्धभागमर्हति ठञ् वा पूर्वपदवृद्धिः। च(आ)र्द्धभागिक। अर्द्धभागार्हे त्रि० "ज्ञातोऽपि दास्यां शूद्रेण कामतोऽर्धहरो भवेत्। मृते पितरि कुर्य्युस्तं भ्रातरस्त्वर्द्धभागिकम्" या० स्मृतिः।

अर्द्धभाज् त्रि० भज्-क्विप् उप० स०। अर्द्धांशहरे "निधीनां तु पुराणां च धातूनामेव च क्षितौ। "अर्द्धभाग्यक्षणाद्राजा भूमेरधिपतिर्हि सः" मनुः।

अर्द्धभ्रम न० अर्द्धात् भ्रमोभ्रमणं यत्र। "आङरर्द्धभ्रमं नाम श्लोकार्द्धभ्रमणं यदीति सर० कण्ठा० उक्ते शब्दालङ्कारभेदे यथा "स स त्व र ति दे नि त्यं
स द रा म र्थ ना धि नि।
त्व रा धि क क सं ना दे
र म क त्व म क र्थ ति" किरा०
अग्निपुराणे तु "गोमूत्रिकार्द्धभ्रमके" इति कान्ततया पठित्वा "पादार्द्धाद्यैश्चतुर्भिश्च कुर्याद्विन्यासमेतयोः। न्यस्तामिह वर्णनामधोधः भ्रमभागिणाम्। अधोधःस्थितवर्णानामाचतुर्थपदं नयेत्। तुर्यपादं नयेदूर्द्धं पादार्द्धप्रतिलोम्यत" इति तल्लक्षणमुक्तम्। अयमर्थः तिर्य्यगताः पञ्चरेखाः ऊर्द्धगताश्च नव रेखालेख्या एवं द्वात्रिंशत् कोष्ठानि भवन्ति तत्र प्रथमादिपङ्क्तिक्रमेण एकैककोष्ठगैकैकाक्षरकाश्चत्वारः पादाः क्रमेण पङ्क्तिचतुष्के लेख्याः एवं लेखने द्वात्रिंशदर्णा एकैककोष्ठगा भवन्ति। तत्र प्रथमपादार्द्धगता आद्याश्चत्वारोवर्णाः क्रमशोऽधोवर्त्तिनीषु प्रथमादिपङ्क्तिषु यथा भवन्ति यथा च तस्यापरार्द्धगताश्चत्वारो वर्णा अन्तिमादिपङ्क्तिषु ऊर्द्धोर्द्धक्रमेण अन्त्यकोष्ठगा भवन्ति तथा वर्णाः श्लोके निवेश्याः। एवं द्वितीयपादार्धगा आद्याश्चत्वारो वर्णा अधोऽधःक्रमेण प्रथमादिपङ्क्तिद्वितीयकोष्ठगाः अपरार्धघटकाश्चत्वारश्च वर्णा ऊर्द्धोर्द्धक्रमेण अन्तिमादिपङ्क्तिषु सप्तमकोष्ठगाः। तृतीयपादार्धगाः आद्याश्चत्वारो वर्णाः प्रथमादिपङ्क्तिषु अधोऽधःक्रमेण तृतीयकोष्ठगा उत्तरार्धगाश्चत्वारो वर्णाश्च ऊर्द्धोर्द्धक्रमेण अन्तिमादिषु षष्ठकोष्ठगाः चतुर्थपादार्धगा आद्याश्चत्वारोवर्णाः अधोधःक्रमेण प्रथमादिषु पङ्क्तिषु चतुर्थकोष्ठगाः उत्तरार्धगता श्चत्वारो वर्णाश्च ऊर्द्धोर्द्धक्रमेण अन्तिमादिषु पञ्चमकोष्ठगाः यथा भवेयुस्तथा वर्णविन्यासो विधेयः। एवं सति यथा प्रथमादिपङ्क्तिक्रमेण चत्वारः पादाः पठितुं शक्यन्ते एवमुक्तप्रकारेण अधोधःक्रमेण च प्रथमादिकोष्ठगवर्णग्रहणेन एवं अन्तिमादिषु, ऊर्द्धोर्द्धक्रमेण अन्तिमकोष्ठस्थवर्णग्रहणेन, उत्क्रीत्वा प्रथमादिपङ्क्तिषु द्वितीयादिकोष्ठस्थवर्णग्रहणेन

अन्तिमादिषु उपान्तिमकोऽगवर्ग्यषड्भेन च उक्तदिशा पाठे द्वितीयादिपादा भवन्ति। सर्व्वतोभद्रस्येवास्य सर्व्वतो ऽनुलोमविलोमपाठासम्भवेन अर्धभ्रमत्वम् अयञ्च वस्तुः अनुष्टुप्छन्दस्येव नान्यत्र छन्दसीति ज्ञेयम्। एवम् "अभीकमतिकेनेद्वे भीतानन्दस्य नाशने। कनत्सकामसेनाके मन्दकाममकम्पति" माघश्लोकोऽपि ज्ञेयः।

अर्द्धमाणवक पु० अर्धं माणवकस्य। द्वादशलतिके द्वारभेदे माणवकरारब्धचतुर्विंशतिलतिकत्वात्तस्यार्धमानतायास्तथात्वम्।

अर्द्धमात्रा स्त्री अर्धं मात्रायाः। विन्दर्धचन्द्राकारव्यञ्जनायां २अक्षररूपायाम् वाचि २तद्व्याख्यायां देव्याञ्च। "अर्धमात्रास्थिता नित्यं यानुच्चार्या विशेषतः" देवीभा०"अकारो भगवान् ब्रह्मा उकारो विष्णुरुच्यते मकारो भगवान् रुद्रोऽर्धमात्रा महेश्वरी। उत्तरोत्तरभावेनाप्युत्तमत्वं स्मृतं बुधैः। अतः सर्व्वेषु शास्त्रेषु देवीसर्व्वोत्तमा स्मृता" देवीपुरा०। अर्धमात्रा उच्चारणकालोऽस्य। २स्वार्थे वि० "व्यञ्जनं चार्धमात्रञ्च"मित्युक्तेस्तथात्वम्।

अर्द्धमास पु०अर्धं मासस्य एकदे०त०। पञ्चदशाहात्मके मास स्यार्धरूपे पक्षात्मके काले "दर्शेन चार्धमासान्ते पौर्णमासेन चैव हि"मनुः "पञ्चदश वा अर्धमासस्य रात्रयः" इति शत०ब्रा०। "तत्रिंशता भवेन्मास" इत्युक्तेर्मासस्य त्रिंशत्त्वात्मकतया तदर्धस्य पञ्चदशत्वम् "ऐरम्मदैलं वा मासमर्धमासं वा पाययेत्" सुश्रुतः।

अर्द्धयाम पु० अर्द्धं यामस्य प्रहरस्य। दिनरात्रयोः अष्टधा विभक्ते काले यावद्दिनमानं रात्रिमानं वा तस्याष्टधाविभागे यः कालस्तस्मिन्। तस्यैव वारवेलाकालवेलासंज्ञा तस्य च वारविशेषेषु वर्ज्जता ज्योतिषोक्ता। "ऋतसूनि यमगरमङ्गलर्क्षभास्करादिवाभार्द्धे। प्रभवति वारवेला न शुभा शुभकार्य्यकरणाय"। ज्यो०त० तथाच रवौ चतुर्थोऽर्द्धयामः वारवेला एवं चन्द्रे सप्तमः। कुजे द्वितीयः, बुधे पञ्चमः, गुरौ अष्टमः, भृगौ तृतीयः, शनौ षष्ठः वारवेला। "कालस्य वेला रवितः शराद्रिकालानलागाम्बुधयो गजेन्द्राः दिने, निशायामृतवेदनेत्रनगेषुरामा विधुदन्तिनौ च" ज्यो० त०। यथा दिने रवौ पञ्चमः कालवेला एवं चन्द्रे द्वितीयः, कुजे षष्ठः, बुधे तृतीयः,। गुरौ सप्तमः, भृगौ चतुर्थः, शनौ अष्टमः आद्यश्च॥ रात्रौ रवौ षष्ठः कालवेला। एवं चन्द्रे चतुर्थः। कुजे द्वितीयः। बुधे सप्तमः, गुरौ पञ्चमः भृगौ तृतीयः, शनौ आद्यः अष्टमश्च कालवेला॥ एवं दिने वारवेलाकालवेलाद्वयसमावेशेन हवीर्वर्ज्यता यथोक्ता "रवौ वर्ज्यं चतुःपञ्च सोमे सप्त हयं तथा। कुजे षष्ठं द्वितीयञ्च बुधे वाद्यतृतीयकम्। गुरौ सप्ताष्टकञ्चैव त्रिचत्वारि च भार्गवे। शनावाद्यं च षष्ठञ्च अष्टमं परिवर्जयेत्"॥ एवञ्च रात्रौ न वारवेला किन्तु कालवेलैव। तद्दोषोऽप्युक्तः "बालायां मरणं काले (कालवेलायाम्) वैधव्यं पाणिपीड़ने। व्रते ब्रह्मवधः प्रोक्तः सर्व्वं कर्म्म ततस्त्यजेत्" ज्यो०त०। दिनविशेषे तदीयविशेषोऽपि ज्यो०त० उक्तः। "वारेशादर्द्धयामेषु रात्र्यब्दोः षष्ठ षट् क्रमात्। अधिपाःसुर्यपुत्रान्ता यथार्कादे भवन्ति हि। रवीज्येन्दुभृगुच्छाजगनित्तरवयो निशि। रविशुक्रशनीज्यकुजभास्कराः। दिने तूद्रा : परेऽह्येवम्" अवयर्थः यस्मिन् दिवसे यो वारेशः सएव प्रथमयामार्द्धाधिपः। ततो द्वितीयेऽस्तु रात्रौ वारेशात्पञ्चमेन षष्ठः, पुनस्तदग्रेतृतीयेन सप्तमस्तृतीयेऽष्टमः क्रमेण ज्ञेयः। दिने तु वारेश एव आद्याधिपः द्वितीयेऽस्तु वारेशात्पञ्चमेन षष्ठस्तदग्रेतृतीयेन पुनः सप्तमस्तृतीयेऽष्टमः क्रमेण ज्ञेयः॥ एतच्च पताकीवेधे पापस्वामिकस्य रिष्टसूचकताविवेचनार्थम् अन्यत्र शुभकर्म्मसु वर्जनार्थञ्च।

अर्द्धरथ पु० रथोऽस्यास्ति अच् रथः रथी अर्द्धः असंपूर्णोरथः। असम्पूर्णे रथिनि। "सखा ते दयितो नित्यं य एष रथकर्कशः। उत्साहयति राजंस्त्वां विषादे पाण्डवैः सह। एष विकत्थनो नीचः कर्णोवैकर्त्तनस्तव। मन्त्री नेता च बन्धुश्च मानी चात्यन्तसुच्छ्रितः। एष नैव रथः कर्णो न चाप्यतिरथो रथे। वियुक्तः कवचेनैष सहजेन विचेतनः। कुण्डलाभ्याञ्च दिव्याभ्यां वियुक्तः सततं वृषी। अभिशापाच्च रामस्य ब्राह्मणस्य च भाषणात्। करणानां वियोगाच्च तेन नेऽर्द्धरथोमतः। नैष फाल्गुनमासाद्य पुनर्ज्जीवन् विमोक्ष्यते। ततोऽब्रवीत् पुनर्द्रौणिः सर्व्वशस्त्रभृतां वरः। एवमेतत् यथात्थ त्वं न मिथ्याऽस्ति कदाचन। रथेरथेऽभिमानी च विकुत्थापि दृश्यते। वृषी कर्णः प्रमादी च तेन नेऽर्द्धरथो मतः" इति भा० उ०प०।

अर्द्धरात्र अर्द्धं रात्रेः अच्समा०। रात्रेरुत्थार्द्धभागे यामद्वयपूर्त्तिकाले "अर्द्धरात्रे त्वसम्पूर्णे दिवा पुरुषमनाशकम्" "अर्द्धरात्रे व्यतीते तु विज्ञेयं चापरेऽहनि" "सम्पूर्णे चार्द्धरात्रे चेति" च देवी पु०। "कलाभ्यूनार्द्धरात्रे तु यदि संक्रमणं भवेत्" गर्गः। "अर्द्धरात्रे कलाधिक्ये यदा संक्रमते रविः"। "अर्द्धरात्रे तु संपूर्णे यदा संक्रमते रविः भु०भी०। "पूर्णेचेदर्द्धरात्रे तु रविसंक्रमणं भवेत्"

थाता०जावा०। "प्रभाते चार्द्धरात्रे वा स्नानं कुर्य्यात् परेऽहनि" भविष्य पुरा०। "अथार्द्धरात्रे त्रिमितप्रदीपे" रघुः "मध्यन्दिनेऽर्द्धरात्रेच आर्द्रभुक्ताच सामिषम्" मनुः।

अर्द्धर्च पु०न० अर्द्धमृचः एकदेशित० अच्समा०। ऋचोऽर्द्धभागे "अर्द्धर्चैर्द्धर्च प्रतिमन्त्रयीवात्" शत०ब्रा०। "ऋचः पादं मात्रया कल्पयन्नोऽर्द्धर्चेन" अथ०९,१०,१९, अस्य परिमाणवाचकत्वात् वीप्सायांयस्। अर्द्धर्चः। अर्द्धर्चमर्द्धर्चमिति वीप्साद्योतौ कारकभूते अर्द्धर्चे "तस्य वाससा पाणिभ्यां पाणी संमृह्य सावित्रीमन्वाह पक्षोर्द्धर्चः सर्वान्" कात्या० १७,१,१८, "तस्मादर्द्धर्चः संसेत्" शत०ब्रा० "अथार्द्धर्चशोद्वौवा इमौ प्राणौ" शत०ब्रा०।

अर्द्धर्चादि पु० ६त०। "अर्द्धर्चाः पुंसि चेति" पाणिन्युक्तौ पुंनपुंसकलिङ्गानुशासननिमित्ते शब्दसमूहे स च गणः १२, १४ पृष्ठे दर्शितः।

अर्द्धलक्ष्मीहरि अर्द्धलक्ष्म्या आकारोऽस्य ताद्यो हरिः। लक्ष्मीनारायणात्मके विष्णोर्मूर्त्तिभेदे तद्रूपं यथा "उद्यत्प्रद्योतनगतरुचिं तप्तहेमावदातं पार्श्वद्वन्द्वे जलधिसुतया विश्वधात्र्या च जुष्टम्। वामारब्धोत्कलितविविधाकल्पमापीतवस्त्रं विष्णुं वन्दे दरकमल कौमोदकीचक्रपाणिमिति"

अर्द्धविसर्ग पु० अर्द्धं विसर्गस्य तद्वद्भ्रूकत्वादुपचारः। विसर्गसदृशाकारार्द्धरेखया व्यञ्जनीये कण्ठ्योःपरतः जिह्वामूलीयाख्ये पवर्गोःपरतः उपाध्मानीयाख्ये च वर्णभेदे अर्द्धविसर्जनीयादयोऽत्र।

अर्द्धवीक्षण न०अर्द्धमसंपूर्णं वीक्षणम्। कटाक्षदर्शने।

अर्द्धवैनाशिक पु० अर्द्धोऽसम्पूर्णः वैनाशिकः बौद्धभेदः। वैशेषिकशास्त्रकारे तस्य च सर्वस्य क्षणिकतावादितया वैनाशिकसमवत् परिणामभेदेन देहादेरनुविनाशस्वीकारेण आत्मनस्तु स्थायित्वाङ्गीकारेण च ततो वैलक्षण्यात् अर्द्धवैनाशिकत्वम् इति वेदान्तिनो वदन्ति। वैशेषिकादयस्तु वेदान्तिनोऽर्द्धवैनाशिकत्वं कल्पयन्ति "तर्हि वैनाशिकवत् सर्वेषां पदार्थानां चिद्रूपज्ञानमात्रात्मकतया क्षणिकत्वेन चिदंश स्थायित्वाङ्गीकारमात्रेण च ततो वैलक्षण्यमित्यर्द्धवैनाशिकत्वमिति। यथा च नैषां तथात्वं तथा विवरणप्रमेयोपन्यासे प्रपञ्चितम् विद्यारण्येन।

अर्द्धवैशस न० अर्द्धस्य वैशसं वधः। अर्द्धवधे "विधिना हतमर्द्धवैशसम् "अर्द्धो वा आत्मनो यत् पत्नी" इति श्रुतेस्तस्य नाशे पत्न्या अर्द्धनाशोयुक्त इति तथोक्तम्।

अर्द्धशत न० अर्द्धं शतस्य एकदे०त०। १पञ्चाशत्संख्यायां २तत्संख्यान्विते च। "तैस्तोऽर्द्धशतं हे च" मनुः। क्वचित् ६त०। तत्रैवार्थे न० एतच्छताईमावत्यं तैस्तोक्तविजयी भवेत्" तन्त्रम्। [शतमत्यल।]

अर्द्धशन एकदेशित० शक०। अर्द्धभोजने रत्नावली०। अर्द्धा-

अर्द्धशफर पु०अर्द्धः शफरः। (दाढ़का) इति ख्याते मत्स्यभेदे

अर्द्धश्लोक पु० अर्द्धं श्लोकस्य एकदेशित०। श्लोकस्यार्द्धे प्रथम पादद्वये

अर्द्धसम त्रि०अर्द्धेन समः। १अर्द्धेन तुल्ये पदार्थे "प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणोभवेत् द्वितीयस्तुर्य्यवद्वृत्तं तदर्द्धसमसञ्ज्ञकं" इत्तरत्नाकरोक्ते २वृत्तभेदे न० यथा "अयुजि न युगरेफतोयकारो युजि च नजौ जरगाश्च युग्मिताग्र्या" एवमुपचितादीनि।

अर्द्धसौरिन् पु० अर्द्धं सौरस्य हलकृष्यस्यादिफलस्य सोऽस्यास्ति इनि १फलसाध्यकृष्यस्यार्द्धभाजि। "शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणः। भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत्" या०स्मृतिः अत्र निरूढार्थपरत्वम् मिताक्षराकृतोक्तं पराशरेण तु तस्य पारिभाषिकत्वम् दर्शितं यथा" दासनापितगोपालकुलमित्रार्द्धसीरिणः एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत्" इत्युक्त्वा "वैश्यकन्यासुतश्चौरो ब्राह्मणेन तु संस्कृतः। अर्द्धिकः स तु विज्ञेयो भोज्यं विप्रैर्न संशयः" इत्युक्तम् तेन वैश्यात्मजो ब्राह्मणेनोत्पादितः संस्कारवान् वर्णसङ्करभेदः अर्द्धिकः अर्द्धसीरीति। तेन २तदर्थेऽपि।

अर्द्धहार पु०अर्ध-हच् अर्द्धः समग्रः हारः। चतुःषष्टिलतिके हारभेदे।

अर्द्धांश पु० एकदेशित०। अंशस्य सजातीयोचितभागस्य १तुल्यार्द्धभागे २सर्वद्रव्यस्यार्द्धभागे च।

अर्द्धार्द्ध पु० अर्द्धम् अर्द्धस्य तुल्यांशस्य एक०त०। तुल्यभागरूपस्यांशस्य तुल्ये अर्द्धभागे चतुर्थांशे। "चरोरर्द्धार्द्धभागाभ्यां तामयोजनाभ्यामे" रघुः। "पञ्चाधिकस्य वा नाशे ततोऽर्द्धार्द्धे तु तच्छ्राद्धः ततोऽर्द्धार्द्धविनाशे तु स्मृतेत् पुत्रादिमत्तकम्"। काश्या० स्मृ०।

अर्द्धासन न०अर्द्धमासनस्य। आसनस्यार्द्धभागे "बो विसर्जनावसरे मम हि दिवौकसां समक्षमर्द्धासनोपवेशितस्य" भक्त०। "अर्द्धासनं गोत्रभिदाधितस्थौ" रघुः। "अर्द्धासनं गोत्रभिदोऽध्यगात्सीत्" भट्टिः। अर्द्धं सन्नद्धमसनं त्यागः विक्षेपश्च। २क्षेपेण दाने २अकृत्सने च धरणिः।

अर्द्धिक त्रि०अर्द्धमर्हति ठिठन् स्त्रियां ङीप्। १अर्द्धभागार्हे

"तदर्हितं पादिकं स्यात्" मनुः २अर्द्धसौरिगर्द्धार्धे च उदा० तत्रैव ।

अर्हिन् त्रि० अर्हं यहीत्वेनास्त्यस्य इनि । अर्हयहणार्हे "सर्वेषामर्हिनोसस्यात्तदर्हेनार्हिनोऽपरे। हतोविनस्तीयांशास्तुरीयांशास्तु पादिनः"। गोयतभागे स्मृतिः ।

अर्हुक त्रि० अर्घ-वा०उकञ्। सम्यक्ते दक्षिणीले "एकमतिरिक्तं जुहोति तस्मादेकः प्रजास्वर्हुकः" शत० ब्रा० ।

अर्हेन्द पु० अर्हुमिन्दोः एकदे०त० । १चन्द्रहत्खण्डे "जटाजूटसमायुक्तामर्हेन्दुकृतशेखराम्" दुर्गाध्यानम्। तदाकारत्वात् २नखक्षते ३तर्जन्यङ्गुष्ठविस्तारकृपे गलहस्तहृद्भेदे ४अर्द्धचन्द्राकारे बाणे च ।

अर्द्धोक्त न०अर्द्धसक्तम् यच-भावे क्त । अर्द्धकथने । "रामभद्रेत्यर्द्धोक्ते महाराज"! इति वीरचरिते कञ्चुकिवाक्यम्।

अर्द्धोदक न अर्द्धदेहव्यापकसदकम् शाक०त० । देहार्द्धव्यापके उदके । "अर्द्धोदके तु जाङ्घाभ्यां म्रियतेऽनशनेन यः । स याति न पुनर्जन्म ब्रह्मसायुज्यमेति च" अग्निपु० । "अर्द्धोदकं चरणाद्याभिषर्यन्तसदकम्" प्रा०त०रघुनन्दनः ।

अर्द्धोदय पु० अर्द्धस्य सम्बन्धस्य पुण्यस्य उदयो यत्र । तिथिनक्षत्रादियोगविशेषे "माघे मासि आमावस्या यदि अर्कयुता भवेत् । नक्षत्रे श्रवणे देवि ! व्यतीपातो भवेद्यदा । अर्द्धोदयः स विज्ञेयः सूर्यपर्वशतैःसमः । दिवैव योगः प्रस्तोऽयं न च रात्रौ कदाचन । अर्द्धोदये तु सम्प्राप्ते सर्वं गङ्गासमं जलम् । शुद्धात्मानो द्विजाः सर्वे भवेयुर्ब्रह्मसम्मिताः । यत् किञ्चित् क्रियते दानम् तद्दानं मेरुसन्निभमिति" निर्णयः। "अमार्कपातश्रवणैर्युता चेत् पौषमाघयोः । अर्द्धोदयः स विज्ञेयः कोटिसूर्यग्रहैः समः" स्म०पु० । "अर्द्धोदये च पुण्यार्के हस्तार्के रोहिणीबुधे" हस्तारदीपम् ।

अर्द्धोदयासन न० अर्द्धस्य देहस्य उदयेन अर्द्धक्षेपेणासनम् "अर्द्धोदयासनं नाथ ! सर्व्वाङ्गं खे नियोजयेत् । केवलं हस्तयुगलं भुव्यवष्टभ्य तिष्ठति" रुद्रया० उक्ते आसनभेदे ।

अर्द्धेन्दुमौलि पु० अर्द्धेन्दुर्मौलावस्य। चन्द्रशेखरे शिवे ।

अर्द्धोरुक न० ०अर्द्धमूरोः अर्द्धोरु तत्र कायते काय-ड । १जर्द्धोरुधरपर्य्यन्ताच्छादने वस्त्रे, उत्तमस्त्रीणामर्द्धोरुपर्य्यन्ते चोलकाकारे २परिधेयवस्त्रे च ।

अर्घ्य त्रि० अर्घस्येदम् तत्र भवो वा वा यत् १अर्घसम्बन्धिनि २अर्घभवे च। अर्घ-णिच्-यत् ।प्रवर्ग्यनामनि "विदुषा चिदर्घ्यः स्तोमः । ऋ०१,१५६,१, "अर्घ्यं वर्द्धनाईम्, भा० "अविदं वाजं विदुषा चिदर्घ्यम्" ऋ०५,४४,१० ।

अर्पण न० ऋ-णिच्-युक् ल्युट् । १निक्षेपे,२ सत्कारागातकूल व्यापारे ३निवेशने च । "पादार्पणान्मधुपतपृष्ठम्" "सेयं स्वदेहार्पणनिष्क्रयेण" "सस्यार्पणेषु प्रकृतिप्रगल्भाः" इति च रघुः "ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्" "तत् कुरुष्व मदर्पणमिति" च गीता करणे ल्युट्। ४मन्त्रादौ ५जूहूप्रभृतौ स्त्री। संप्रदाने ल्युटि । ६देवादिषु । अधिकरणे ल्युट् । त्यागाधिकरणे ७वज्रादौ । कर्म्मणि ल्युटि । ८हविरादौ त्याज्यद्रव्ये

अर्पित त्रि० ऋ-णिच्-युक् च क्त । १दत्ते २निक्षिप्ते ३निवेशिते "तदनुज्झनं मदर्पितम्" कुमा० ।"मय्यर्पित मनोबुद्धिः" गीता अनर्पितचरीं चिरात् करुणयावतीर्णः कलाविति" हरिभ० "हरिचक्रेण तेनास्य कण्ठे निष्कमिवार्पितम्" इति कुमा० ।

अर्पिस पु० ऋ-णिच् युक् च असुन् । १क्षुद्रे, अल्पमांसे च ।

अर्घ्य त्र० ऋ-णिच्-युक यत् ।१निवेशनीये २देवे ३त्याज्ये च।

अर्व(र्व) हिंसने भ्वादि०पर०सक० सेट् । अर्व(र्व)ति आर्वीं(र्वीं)त् आन(र्व)र्व ।

अर्बु(र्बु)द न० अर्व (र्व) विच् तस्मै उदेति उद्+इण्-ड । (आद् इति) ख्याते १मांसपिण्डाकारे रोगभेदे, स च सुश्रुतोक्तवर्त्मार्श्रयेषु एकविंशतिरोगेषु मध्ये रोगभेदः "पृथग्दोषा समस्ताश्च यदा वर्त्म व्यपाश्रयाः। सिरा व्याप्यावतिष्ठन्ते वर्त्मस्वधिकमूर्च्छिताः । विवर्द्धं मांसं रक्तञ्च तदा वर्त्म व्यपाश्रयान्। विकारान् जनयत्याशु नामतस्तान् निबोधत" इत्युपक्रम्य उत्सर्द्दिनोप्रभृतीन् एकविंशति भेदान् उक्त्वा तेषां प्रत्येकलक्षणान्युक्तानि तत्र "वर्त्मान्तरस्थं विषमं यन्नधिभूतमवेदनम्। विज्ञेयमर्बुदं पुंसां सरक्तमवलम्बितम्" इत्यर्बुदलक्षणोक्तम् अर्बुदञ्च नानाविधं मांसार्बुदशोणितार्बुदादिभेदात् । "क्षणस्फोटीसरक्तैश्च पिड़काभिश्च पीड़ितम्। यस्य वस्तिरजोपा ज्ञेयं तच्छोणितार्बुदम् । मांसदोषेण जानीयादर्बुदं मांससम्भवम्" एवं मेदोऽर्बुदादयोऽपि तत्रोक्ता रोगभेदा ज्ञेयाः। २दशकोटिसंख्यायां शतसंख्यातेषु च एकादिकोटिसंख्या दशगुणोत्तरा उक्ता अर्बुदमवजं खर्वनिखर्वमहापद्मशङ्कवस्तस्मात्" लीला० "इमा मेऽग्न ! इष्टका धेनवःसन्त्वेका च दश च दश च शतं

च शतं चेत्युपक्रम्य "अर्बुदं चन्यर्बुदञ्च इति यजु० १७,२। ४पर्वतभेदे ५असुरभेदे च पु०। "महान्तं चिदर्बुदं निक्रमी पदा" ऋ० १,५१,४, ६काद्रवेये सर्पभेदे पु०पञ्चमेऽहनीत्युपक्रम्य "अर्बुदः काद्रवेयो राजेत्याह तक्ष सर्पाधिपः" इति शत०ब्रा०। अब्बूनि ददाति दा-क वेदे मस्य रः। ७मेघे "न्यर्बुदं वाहधानो अगुः ऋ०२,११,२०, "अब्बूनि ददातीत्यर्बुदो मेघः" भा० अर्बुदाकारत्वात् गर्भस्थ ८मांसपिण्डभेदे "यदि पिण्डः पुमान्, स्त्री चेत्पेशी, नपुंसकेऽर्बुदमिति" सुश्रु०द्वितीयमासिकगर्भमाह न०"प्रथमे मासि संक्लेदभूतो वातविमूर्च्छितः। मासेऽर्बुदं द्वितीये तु तृतीयेऽङ्गेन्द्रियैर्युतः" या०स्मृ० "द्वितीये तु मासि अर्बुदमीषत्कठिनं मांसपिण्डमयं भवति" मिता०।

अर्बुदि पु० अर्बुदमिवाचरति अर्बुद+क्विप् इन्। सर्व्वव्यापके ईशाने। "अर्बुदिर्नाम योदेवईशानश्च न्यर्बुदिः। याभ्यामन्तरिक्षमाततमियं च पृथिवी मही" अथ० ११,८,४।

अर्भ पु० ऋ-भ १बालके। २अल्पे च। "नाभादीघते न महो विभाती। ऋ०१,१२४,६, "अर्भात् अल्पात्" भा०। "इन्द्रमर्भे हवामहे" ऋ०१,७।५। अर्भे स्वल्पेऽपि धने निमित्तभूते" भा०। "यूयं मह्ना एनसोयूयमर्भात्" ऋ०८,४७,८, "अर्भात् अल्पात् एनसः" भा०।

अर्भक पु० अर्भएव स्वार्थे कन्। १बालके, "मरुद्भ्यो नमो अर्भकेभ्यो नमोयुवभ्यः" ऋ० १,२७,१३। "इदमप्युचितनिद्र मर्भकम्" माघः "अर्भकोन कुमारकोऽधितिष्ठन्नवं रथम्" ऋ०८,६८,१५। २मूर्खे च ३अल्पे, ४अल्पे, "नमो "नमोमरुद्भ्योऽर्भकेभ्यो नमोवः" यजु० १६,२६। त्रि० "अर्भकौकस्त्वात्तद्व्यपदेशाच्च" या०सू०। अर्भकमल्पम् भा० "यथा सर्व्वगतमपि सदृश्योम सूचीपाशाद्यभेदेनावाप्तार्भकौकः एवं ब्रह्मणोऽपि अर्भकौकस्त्वम्" भा० ५सूत्रे च त्रि०

अर्भग त्रि० अर्भमल्पं गायति गै शब्दे च। बालके। "यावर्भगाय विभदाय" ऋ० १,११६,१।

अर्म्म न०ऋ-मनिन्। चिरन्तनग्रामनगरादौ "अर्म्मे चावर्णं द्व्यच् त्र्यच्" पा० गुप्तार्म्मं कुक्कुटार्म्मं अवर्णं किम् उदुदर्म्मं द्व्यच् त्र्यच् किम् कज्जलार्म्मम् अमरुन्नवमिलेव। मरुन्नवार्म्मम्। नेत्ररोगभेदे पु०न०। स च पञ्चविधः प्रस्तार्यर्म्म-शुक्लार्म्म रक्तार्म्ममांसार्म्मस्नायुर्म्मभेदात्। तल्लक्षणं नानार्म्मशब्दे वक्ष्यते सुश्रुते तु नानतया पठितम्। अर्य्यते गम्यते कर्म्माणि मनि। २गन्तव्यदेशे। कुत्सिते कन्। अर्म्मकः अरण्ये कुत्सितस्थाने ३मूलधानादौ "वैलस्थानके अर्म्मके महारण्यस्थे अर्मके" ऋ० १,१३२,१। "अर्म्मके मूलधानादौ" भा०।

अर्म्मण पु० ऋ-बा०मनिन्। वैद्यकोक्ते द्रोणपरिमाणे।

अर्म्मन् न० ऋ+मनिन्। नेत्ररोगभेदे "प्रस्तारिशुक्लशतजाधिमांसस्नायुर्मसंज्ञाः खलु पञ्च रोगाः। सूत्रःशुक्तिका चार्ज्जुन पिटकौ च जालं सिराणां पिड़काश्च याः सूत्रः। रोगा बला सप्रथितेन सार्द्धमेकादशाच्छोः खलु शुक्लभागे। प्रस्तारि प्रथितमिहार्म्म शुक्लभागे विस्तीर्णं तनुरुधिरप्रभं सनीलम्। शुक्लाख्यं बहु कथयन्ति शुक्लभागे सञ्छेतं सममिह वर्द्धते चिरेण। यन्मांसं प्रचयमुपैति शुक्लभागे मज्ञार्म तदुपदिशन्ति लोहितार्म्म। विस्तीर्णं बहु बहलं बकृत्प्रकाशं श्यावं वा तदधिकमांसजार्म्म विद्यात्। शुक्ले यत् पिशितमुपैति दृद्धिमेति, इति सुश्रु०। अर्म यच्छालवद्व्याप्ति तदप्युन्नार्ज्जलम्बितम्। अर्म चाल्पन्दधिनिभश्लीलं रक्तमथापि वा। श्लेष्मैव तदर्म्मस्यात् कृष्णमण्डलगञ्च यत्"। अर्म्मबन्धखलायेव वड़िशेनावलम्बिना। अर्म्माणि पिड़कां हन्यान्निराजालानि तेन वै" इति च सुश्रु०।

अर्य्य त्रि०ऋ-यत्। १स्वामिनि २वैश्ये पुंस्त्री। स्त्रियां टाप्। अर्य्या वैश्यजातिस्त्रियां स्वामिन्याञ्च। पत्यन्तु ङीप्। अर्य्यी। वैश्यपत्न्याम् तत्र आनुक् ङीप् चार्य्याणीत्यपि "अर्य्यः स्वामिवैश्ययोः"पा०"अर्य्यक्षत्रियाभ्यां वा"वार्त्ति०। अर्य्यांणी अर्य्या स्वामिनी वैश्या वा पुंवीगे तु ङीप् स्त्रि० कौ०। ३श्रेष्ठे त्रि०। "प्र तत्ते अद्य शिपिविष्ट नामार्यः ऋ० ७,१००,५, "सुभद्रमर्य्यभोजनं बिभर्षि" ८,१,२४, अर्य्यते पूज्यते वा०यत्। ४पूजनीये। "क्षत्राद्वृदस्यादर्या" ऋ० १,१२१,१। "अर्य्या अरणीया पूजनीया" भा०।

अर्य्यमन् पु० अर्य्यं श्रेष्ठं मिमीते मा-कनिन्। १सूर्य्ये, तद्देवताके २उत्तरफल्गुनीनक्षत्रे, ३अर्कवृक्षे, ४पितृणां राजनि "पितृणामर्य्यमा चास्मि" गीता। द्वादशादित्यमध्ये ५आदित्यभेदे च। "धातार्यमा च मित्रश्च वरुणोऽंशुर्भगस्तथा। इन्द्रोविवस्वान् पूषा च पर्जन्यो दशमः स्मृतः। ततस्त्वष्टा ततो विष्णुरजधन्योज धन्यजः इति विष्णुध० पु० एत एव कश्यपाददित्यां जाताः। भारते तु "अदित्यां द्वादशादित्याः सम्भूता भुवनेश्वराः। ये राजन्नामतस्तांस्ते कीर्त्तयिष्यामि भारत। धाता मित्रोऽर्यमा शक्रः वरुणस्त्वंशुरेव च।

भगोविवस्वान् पूषा च सविता दशमः स्मृतः एकादश स्मृतो त्वष्टा द्वादशोविष्णुरुच्यते" । कल्पभेदाद्नामभेद इत्यविरोधः । तद्रूपम् ध्यानशब्दे वक्ष्यते । "यथा नरोऽर्य्यमणोमरुतः कवन्धिनः" ऋ० ५,५४,८ । "अर्य्यमृणे स्वाहेति तदेनमस्य सर्वस्यार्य्यमणं करोति शत०ब्रा० ।

अर्य्यमिक पु० अनुकम्पितः दत्तः अर्थमदत्तः अनुकम्पायाम् ठन् "शेवलसुपरिविशालवरुणार्य्यमादीनां ह्रस्वोवात्" पा० अन्त्यलोपः । अनुकम्पिते अर्य्यमदत्ते ।

अर्य्यम्य पु० अर्य्यमैव स्वार्थे वेदे यत् । स्वार्थे "अर्य्यम्यं वरुणमित्रं वा सखायं वा सदमिद्भ्रातरं वा" ऋ०५,८५,७ ।

अर्वन् पु० ऋ-वनिप् । १घोटके, २इन्द्रे, ३गोकर्णपरिमाणे च । स्त्रियामर्वती सा च ४बड़वायां ५कृष्ट्न्यामपि । अस्य सुभिन्ने त्रादेशः अर्वन्तौ अर्वतः । "स्वीकृतप्रग्रहमर्वतां व्रजाः" माघः सौ तु अर्वा इत्येव लोकएव त्रादेश इति भाष्यम् वेदे तु अर्वाणौ इत्येव । ४गमनशीले त्रि० स्त्रियां ङीप् वनोरच् । अर्वरी ।

अर्वाक त्रि० अवरमकति गच्छति अक-वक्रगतौ अण् पृ०अवरस्यार्वादेशः । समीपे "यच्चासत्या पराके अर्वाके अस्ति भेषजम्" ऋ०८,९,१५ "अर्वाके समीपे" भा० ।

अर्वाक्काल पु० अर्वाक् अवरः कालः । अवरकाले तत्रभवः ठञ् न द्वित्वं अर्वाक्कालिकः अवरकालभवे त्रि० "तान्य र्वाक्कालितया निष्फलान्यन्नतानि च" मनुः ।

अर्वाक्स्रोतस् पु० अर्वाक् अधोगामि स्रोतोरेतोयस्य । ऊर्द्धरोतोभिन्ने इन्द्रियप्रसक्ते ।

अर्वाग्विल पु०अर्वाक् विलमस्य । चमसे । "अर्वाग्विलश्च मस ऊर्द्ध्वबुध्नस्तस्मिन् यशोनिहितम्" । शत०ब्रा० ।

अर्वाच् अव्य० अवरे काले देशे वा अञ्चति अनच्-क्विन् पृषो० अर्वादेशः । १पश्चात्काले २मध्यकाले "अर्वाग्दशभ्यो वर्षेभ्यः" भुज० ३तत्कालवर्त्तिनि त्रि० "ये केचिदस्मादर्वाञ्चो लोकाः" ऋ०उ० । "कथं वा दीयतामर्वाङ् सुनिता धर्म्मरोधिनी" किरा०स्त्रियां ङीप् अर्वाची "उर्म्मीदर्वा "अर्वाचीव पराचीयोपदधाति" शत ब्रा० । २विपर्य्यस्ते अञ्चेः+अचि तस्य लुक् । ४अवरकालादौ ५मध्येच अव्य० । ततोभवार्थे खुञ् तुट् च अर्वाक्तनः । तद्भवे त्रि० स्त्रियां ङीप् । [गर्भे यज्ञ । पर्जन्ये मेघे ।

अर्वाग्वसु अर्वाक् अभ्यन्तरे अर्वाचीनं वसु दृष्टिहेतुदर्क

अर्वाचीन त्रि० अर्वागुभवः खञ् । अवरकालभवे । "अर्वाचीनं सुते मनो यावा कृणोतु" ऋ०१,८४,२, "यद्दूरं पृथिव्या अर्वाचीनमन्तरीक्षात्" शतब्रा० ।

अर्वावत् त्रि०,अवरकालोऽस्यास्य मतुप् पृ० अर्वाभावः दीर्घः मस्य वः । अर्वाचीने । "अर्वावतो न आगहि परावतश्च" ऋ०३,४०८, । "अर्वावतः अर्वाचीनान्" भा० ।

अर्वावसु पु० देवानां होतृविशेषे "इदमहमर्वावसोः सदने सीदामीति" अर्वावसुर्नाम देवानां होता तस्यैव सदने सीदति" शत०ब्रा० "अर्वाक् वसु धनमस्य प्रयो" भा० ।

अर्व्वुक पु० अर्व-हिंसने वा० उकञ् । आटविके दक्षिणदेश स्थेनृपभेदे ते च सहदेवेन जिताः "सचीना अर्व्वुकाश्चैव राजानश्च महाध्वजाः । तांस्तानाटविकान् सर्व्वान् अजयत् पाण्डुनन्दनः" भा०स०प० सहदेवदिग्विजये ।

अर्श त्रि० अश+अच् । अश्लीले पापिष्ठे "अनर्शरातिगन्धे १५१ पृष्ठे उदा० । २अर्शोरोगे न० ।

अर्शआदि पु० अर्शआदिर्येषाम् । अस्यर्थे अच्प्रत्ययनिमित्त भूते "अर्श आदिभ्योऽच्" पाणिन्युक्ते शब्दसमूहे । सच गणः अर्शस् उपस् तुन्द-चतुर पलित, जटा घाटा अच, कईम अस्थ, नवन्थ, (स्वाङ्गादीनात्) (वर्णात्) आकृतिगणोऽयम् ।

अर्श(र्स)स न० ऋ-असुन् गुट् (सुट् दन्तादिरित्यन्ये) । वलिकाकारे गुह्यस्थरोगभेदे यथाह सुश्रुतः "षडर्शांसि भवन्ति वातपित्तकफशोणितसन्निपातैः सहजानि चेति ॥ तत्रानात्मवतां यथोक्तैः प्रकोपणैर्विरुद्धाध्यशनस्त्रीप्रसङ्गोत्कटुकासनशुष्कयानवेगविधारणादिभिर्विगुणैः प्रकुपिता दोषा एकशो द्विशः समस्ताः शोणितसंहिता वा यथोक्तं प्रस्रुताः प्रधानधमनीरनुप्रपद्याऽधोगत्वा गुदमागम्य प्रदुष्य वलीमांसप्ररोहान् जनयन्ति विशेषतोमन्दाग्नेस्तथा तृणकाष्ठोपललोष्ठवस्त्रादिभिः शीतोदकसंस्पर्शनाद्वा कन्दाः परिदृश्यासादयन्ति तान्यर्शांसीत्याचक्षते ॥ तत्र स्वलान्द्रप्रतिबद्धमर्द्धपद्माकृतिं गुदमाश्रुस्रस्मिन् वलयस्त्रिस्रोऽध्यर्द्धाङ्गुलान्तरभूताः प्रवाहणी विसर्ज्जनी संवरणी चेति । चतुरङ्गुलायताः सर्वास्तिर्य्यगेकाङ्गुलोच्छ्रिताः॥ गङ्गावर्त्तनिभाश्चापि उपर्य्युपरि संस्थिताः । गजतालुनिभाश्चापि वर्णतः समुदीरिताः ॥ रोमान्तेभ्यो यवाध्यर्द्धं गुदौष्ठः परिकीर्त्तितः ॥ प्रथमा तु गुदौष्ठादङ्गुलमात्रे । तेषान्तु भविष्यतां पूर्व्वरूपाणि, अन्ने न श्रद्धा क्लेदात्क्रिरङ्गीका सदनिसदनमाटोपः कार्श्यं सन्नारवाङ्गमर्दश्च यथुरुन्द्रकूजनं गुदपरिकर्त्तनमाशङ्का पाण्डुरोगयक्ष्मणी दोषगोपणं वासश्वासौ भ्रमस्तन्द्रा निद्रेन्द्रियदौर्ब्बल्यञ्च । जाते-

श्वेतानि रूपाणि प्रव्यक्ततराणि भवन्ति ॥ तत्र मारुतात्परिशुष्कारुणवर्णानि विषमसंस्थानानि कदम्बपुष्पसदृशकेसरोनाडीसुषिरसूचीमुखाकृतीनि च भवन्ति । तैरुपद्रुतः शूलं संकुचनमुपजायते कटीपृष्ठपार्श्वमेढ्रगुदनाभिप्रदेशेषु चास्य वेदना गुल्माष्ठीलाग्रोहोदराणि चास्य तन्निमित्तान्येव भवन्ति, कृष्णत्वङ्नखनयनदशनवदनमूत्रपुरीषश्च पुरुषो भवति। पित्तान्नीलाप्याणि तनूनि विसर्पीणि पीतावभासानि यकृत्प्लीहाशयानि शुक्तिजिह्वासंस्थानानि यवमध्यानि जलौकोवक्त्रसदृशानि प्रक्लिन्नानि च भवन्ति तैरुपद्रुतः सरुधिरमतिसार्यते ज्वरदाहपिपासामूर्च्छाश्चोपद्रवा भवन्ति, पीतत्वङ्नखनयनदशनवदनमूत्रपुरीषश्च पुरुषो भवति । श्लेष्मजानि श्वेतानि महामूलानि स्थिराणि दृत्तानि स्निग्धानि पाण्डूनि करीषपनसास्थिगोस्तनाकाराणि न भिद्यन्ते न स्रवन्ति कण्डूबहुलानि च भवन्ति तैरुपद्रुतः सक्ष्वेथाग्लसनखं मांसधावनप्रकाशमतिसार्यते शीफशीत ज्वरारोचकाविपाकशिरोगौरवाणि चास्य तन्निमित्तान्येव भवन्ति, शुक्लत्वङ्नखनयनदशनवदनमूत्रपुरीषश्च पुरुषो भवति ॥ रक्तजानि न्यग्रोधप्ररोहविद्रुमकाकणन्तिकाफलसदृशानि पित्तलक्षणानि च यदावगाढपुरीषप्रपीडितानि भवन्ति तदात्यर्थं दुष्टमनल्पमसृक् सहसा विस्रजन्ति तस्यैवातिप्रवृत्तौ शोणितातियोगोपद्रवा भवन्ति ॥ सन्निपातजानि सर्वदोषलक्षणयुक्तानि ॥ सहजानि दुष्टशोणितशुक्रनिमित्तानि तेषां दोषत एव प्रसाधनं कर्त्तव्यं विशेषतश्चात्र दुर्दर्शनानि परुषाणि पाण्डूनि दारुणान्यनखानि तैरुपद्रुतः क्षयोऽल्पभुक् सिरासन्ततगात्रोऽल्पप्रजःक्षीणरेताः क्षामस्वरः क्रोधनोऽल्पाग्निर्व्रणशिरोऽक्षिश्रवणरोगवान् सततमन्द्रकूजाटोपहृदयोपलेपारोचकप्रभृतिभिः पीड्यते ॥" "अर्श आद्या महारोगा अतिपापाद्भवन्ति हि" । भा० ष० । पृषो० सलोपः । अर्शमस्त्यत्र न० ।

अर्शस त्रि० अर्श-अस्त्यर्थेऽच् । बलिकाकारगुह्यव्याधियुक्ते । "क्लीबमक्रियं निष्पुरुषं निरिन्द्रोरोमशार्शसम्" मनुः ।

अर्शसान त्रि० अर्श-असानच् सुट् च । बाधके हिंसके "अव प्रियमर्शसानस्य" ऋ० २,२०६ "अर्शसानस्य बाधमानस्य" भा० न्यर्शसानमोषति ऋ० १०१३०,८ २मन्दे हालुके "इन्द्रः सूर्यस्य रश्मिभिर्न्यर्शसानमोषति ८,१२६, "अर्शसानं बाधमानं मन्दे हालुकमसुरम्" भा० । [ङीप् ।

अर्शिन् त्रि० अर्शमस्त्यस्य इनि । अर्शोरोगयुक्ते स्त्रियां

अर्शोघ्न पु० अर्शो हन्ति हन-ट । (ओल) १सूरणे, २भल्लातके च ३ अमनुष्यकर्त्तृकार्शोहननकारकमात्रे त्रि० "अर्शोघ्नं कारभं मूत्रं मानुषन्तु विषापहम् "यच्चान्यदपि स्निग्धमर्शोघ्नमसृष्टमूत्रपुरीषञ्च तदुपसेवेत" इति च सुश्रुतः । स्त्रियां ङीप् । सा च तालमूल्याम् मेदि०

अर्शोहित पु० अर्शसि हितः सेवनेन तद्व्याधकत्वात् ७त० । १भल्लातके । २अर्शोरोगहितकारकमात्रे त्रि० अहित इति ऋग्वेदे ।३तत्प्रहितकरे त्रि० ।

अर्षण न० ऋष-गतौ भावे ल्युट् । १गमने करणे ल्युट् । २गमनसाधने स्त्रियां ङीप् । "याः सीमानं विरुजन्ति मूर्द्धानं प्रत्यर्षणीः अथ० ६,१८,१३ ।

अर्ह योग्यत्वे भ्वा० पर० अक० सेट् । अर्हति आर्हीत् आनर्ह लोके, वेदे तु आनर्हे । प्राप्तियोग्यतार्थे गतौ च सक० । अर्हीं अर्हितः अर्हितुम् अर्हित्वा अर्हणम् अर्हन् "हित्वाग्रहान्यर्हसि सोढुमर्हन्!" रघुः। "गुरोर्गुरौ सन्निहिते गुरुवन्मानमर्हति" मनुः । "दण्डमर्हति मानवम् मनुः । स तस्माद्वधमर्हति" स्मृतिः "तथापि त्वं महाबाहो नैनं शोचितुमर्हसि" गीता । क्वचिदस्मान्नेपदित्वम् व्यत्ययेन। "मलिनं नार्हसे प्राज्ञ! दातुमेषां हि लौकिकम्" "रावणो नार्हते पूजाम्" इति च रामायणम् ।

अर्ह पूजने चुरा० उभ० सक० सेट् । अर्हयति ते आर्जिहत् त । "राजार्जिहत्तं मधुपर्कपाणिः" भट्टिः । अर्हयामास । अर्हणा अर्हयन् अर्हयितुम् अर्हयित्वा । "सगविणं तल्समासीनमर्हयेत् प्रथमं गवा" मनुः । पूजनं च स्तुतिनतिप्रभृतिभिः सम्माननम् । अभि+आभिमुख्येन सम्माननेऽपि । "अभ्यर्हितञ्च" का० वार्त्ति० ।

अर्ह पु० अर्हयते चु० अर्ह-कर्मणि यत् । पूजास्तुत्यादिभिराराध्ये १ईश्वरे २शक्रे च । ३पूजनीये त्रि० "अर्हानभोजयन् विप्रो दण्डमर्हति मानवम्" मनुः ४ विष्णौ पु० । "अभिप्रायः प्रियार्होऽर्हैः" विष्णुस० । "पूजास्तुतिनमस्कारादिभिः पूजनीय इत्यर्हैः" भा० । भावे घञ् । ५पूजने । अर्हति स्वा० अर्ह-कर्त्तरि अच् । दैर्योग्ये त्रि० । "तस्माद्वार्हा वयं हन्तुं धार्त्तराष्ट्रान् सबान्धवान्" गीता । 'अर्होऽसि कपिराज्यस्य श्रियं भोक्तुमनुत्तमाम्" रामा० । "नियुक्तायामपि पुमान् नार्य्यां जातोऽविधानतः । नैवार्हः पैतृकं रिक्थं पतितोत्पादितो हि सः" मनुः आर्थत्वात् कर्म्मणि न घञी "पूजार्हावरिसूदन" गीतायान्तु "कर्म्मण्यण्" अण् उप० स० । भावे घञ् । ७गतौ दैर्योग्यत्वे धातूनामनेकार्थत्वात् द्रव्यक्रययोग्यत्वात्त अर्ह-कर्मणि घञ्

टमूल्ये "महार्हगव्यापरिवर्त्तनच्युतैः" कुमा० "महानर्हो मूल्यमस्यास्तादृशी यया" इति मल्लि० ।

अर्हण न० अर्ह-भावे ल्युट् । १पूजने । "विश्वकर्मपरिकल्पितार्हणम्" रघुः अर्हतेऽनेनकरणे ल्युट् । सम्मानसाधने द्रव्ये । "अर्हणं तत् कुमारीणामानृशंस्याय केवलम्" मनुः भावे युच् । "अर्हणा पूजायां स्त्री । "अर्हणामर्हते चक्रुर्नयोनयचक्षुषे" रघुः पूर्व्वदेवरिपुरर्हणां हरिः" माघः ।

अर्हणीय त्रि० चु० अर्ह-कर्म्मणि अनीयर् । १पूजनीये । अर्हतेऽनेन करणे अनीयर् अर्हणे साधु अ वा । पूजासाधनद्रव्ये "अर्हणीयगवानुमन्त्रणे विनियोगः" भवदेवः ।

अर्हत् त्रि० "अर्हः प्रशंसायां कर्म्मणि शतृ । ४पूज्ये "अर्हणामर्हते चक्रुः" हितोपदेशान्यर्हसि सोढुमर्हन्" इनि च रघुः "सर्व्वज्ञो जितरागादिदोषस्त्रैलोक्यपूजितः । यथास्थितार्थवादी च देवोऽर्हन् परमेश्वरः" इत्युक्तलक्षणे जैनदेवे पु० । तन्मतं सर्व्वदर्शनसंग्रहात् संगृह्यते ।

"ननु न कश्चित् पुरुषविशेषः सर्व्वज्ञपदवेदनीयः प्रमाणपञ्चकमिहास्ते सद्भावव्यापकस्य प्रमाणपञ्चकस्य तत्रानुपलम्भात् तथाचोक्तं तोतातितैः "सर्व्वज्ञोऽस्मते तावदेदानीमस्मदादिभिः । दृष्टो न चैकदेशोऽस्ति सिद्धं वा योऽनुमापयेत् ॥ न चागमविधिः कश्चित्सर्व्वज्ञबोधकः । न च तत्रार्थवादानां तात्पर्य्यमपि कल्प्यते ॥ न चानुवदितुं शक्यः पूर्व्वमन्यैरबोधितः ॥ अनादेरागमस्यार्थो न च सर्व्वज्ञ आदिमान् । कृत्रिमेण त्वसत्त्वेन स कथं प्रतिपाद्यते ॥ अथ तद्वचनेनैव सर्व्वज्ञोऽन्यैः प्रतीयते । प्रकल्प्येतं कथं सिद्धिरन्योन्याश्रयतयोः ॥ सर्व्वज्ञोक्ततया वाक्यं सत्यं तेन तदस्तिता । कथं तदुभयं सिध्येत् सिद्धमूलान्तराहते ॥ असर्व्वज्ञप्रणीतात्तु वचसान्मूलवर्जितात् । सर्व्वज्ञमवगच्छन्तस्तद्वाक्योक्तं न जानते ॥ सर्व्वज्ञसद्भावं किञ्चिद्यदि पश्येम सम्प्रति । उपमानेन सर्व्वज्ञं जानीयाम ततो वयम् ॥ उपदेशोऽपि बुद्धस्य धर्म्माधर्म्मादिगोचरः । अन्यथा नोपपद्येत सार्व्वज्ञ्यं यदि नाभवदित्यादि" ॥ अत्र प्रतिविधीयते यदभ्यधायि सद्भावव्यापकस्य प्रमाणपञ्चकस्य तत्रानुपलम्भादिति तदयुक्तं तत्सद्भावावेदकस्यानुमानादेः सद्भावात् । तथा हि कश्चिदात्मा सकलपदार्थसाक्षात्कारी तद्बुभुत्सास्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रत्ययत्वात् यत् यद्बुभुत्सास्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रत्ययं तत् तत्साक्षात्कारि यथा अपसततिमिरादिप्रतिबन्धं लोचनविज्ञानं रूपसाक्षात्कारि । तद्बुभुत्सास्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रत्ययश्च कश्चिदात्मा तस्मात् सकलपदार्थसाक्षात्कारीति । तावदेषोऽर्थः यद्बुभुत्सास्वभावत्वमात्मनः सिद्धं चोदनाबलादखिलार्थज्ञानात् नाभ्यन्यथानुपपत्त्या सर्व्वमनैकान्तात्मकं सत्त्वादिति व्याप्तिज्ञानोत्पत्तेश्च । चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थमवगमयतीत्येवं जातीयकैरश्वरौमांसागुरुभिर्विधिप्रतिषेधविचारणानिबन्धनं सकलार्थविषयकज्ञानं प्रतिपद्यमानैः सकलार्थग्रहणस्वभावकत्वसात्मनोऽभ्युपगतम् । न चाखिलार्थप्रतिबन्धकावरणप्रक्षयानुपपत्तिः सम्यग्दर्शनादित्रयलक्षणस्वावरणप्रक्षयहेतुभूतस्य सामग्रीविशेषस्य प्रतीतत्वात् अनया पुनरन्येऽपि शुद्धोपदेशा विद्राव्याः । नन्वावरणप्रक्षयवशादशेषविषयं विज्ञानं विशदं सूक्ष्मव्यवहितविप्रकृष्टप्रत्यक्षं प्रभवतीत्युक्तं तदयुक्तं तस्य सर्व्वज्ञस्यानादिसिद्धत्वेनावरणस्यैवासम्भवादिति चेन्न अनादिसिद्धत्वस्यैवासिद्धेः सर्व्वज्ञोऽनादिसिद्धः सिद्धत्वादितरसिद्धवत् बह्वाभेचया च सिद्धव्यपदेशः तद्रहिते चास्याभावः स्यादाकाशवत् । नन्वनादेः चित्तादिक्रियार्थपरम्परायाः कर्त्तृत्वेन तत्सिद्धिः तथाहि चित्तादिकं सकर्त्तृकं कार्य्यत्वाद्घटवदिति तदप्यसमीचीनं कार्य्यत्वस्यैवासिद्धेः । न च सावयवत्वेन तत्साधनमित्यभिधातव्यं यस्मादिदं विकल्पजालमवतरति । सावयवत्वं, समवेतद्रव्यत्वं, किमवयवसंयोगित्वं अवयवसमवायित्वम् अवयवजन्यत्वम् २समवेतद्रव्यत्वम् समवेतबुद्धिविषयत्वं वा । न प्रथमः, आकाशादावनैकान्त्यात् । न द्वितीयः सामान्यादौ व्यभिचारात् । न तृतीयः साध्याविशिष्टत्वात् । न चतुर्थः विकल्पयुगलार्गलस्यदुर्गमत्वात् समवायसम्बन्धत्वे सति द्रव्यं समवेतद्रव्यत्वम्, अन्यत्र समवेतद्रव्यत्वं वा विवक्षितं हेतुक्रियते । आद्ये गगनादौ व्यभिचारः तस्यापि गुणादिसमवायवत्त्वद्रव्यत्वयोः सम्भवात् । द्वितीये साध्याविशिष्टता अन्यशब्दार्थेषु समवायकारणभूतेष्ववयवेषु समवायस्य साधनीयत्वात् । अभ्युपगम्यैतदभाणि वस्तुतस्तु समवाय एव न समस्ति प्रमाणाभावात् । नापि प्रष्टुमः आत्मादिनानैकान्त्यात्तस्य सावयवबुद्धिविषयत्वेऽपि कार्य्यत्वाभावात् । न च निरवयवत्वेऽप्यस्य सावयवार्थसम्बन्धेन सावयवबुद्धिविषयत्वमौपचारिकमित्येवं निरवयवत्वे व्यापित्वविरोधात् परमाणुवत् । किञ्च किमेकः कर्त्ता साध्यते किं वा सतन्त्रः प्रथमे प्रासादादौ व्यभिचारः स्वपत्यादीनां बहूनां पुरुषाणां तत्र कर्त्तृत्वो-

पलम्भादेनैव सकलजगज्जननोत्पत्तावितरवैयर्थ्यञ्च। तदुक्तं वीतरागस्तुतौ "कर्त्तास्ति नित्यो जगतः स चैकः स सर्व्वगः सन् स्ववशः स सत्यः। इमाः कुहेवाः कुविडम्बनाः स्युस्तेषां न येषामनुशासकस्त्वमिति"॥ अन्यत्रापि। "कर्त्ता न तावदिह कोऽपि यथेच्छया वा दृष्टोऽन्यथा कटकृतावपि तत्प्रसङ्गः। कार्य्यं किमत्र भवतापि च तत्कृतार्थैराहत्य च त्रिभुवनं पुरुषं करोतीति" तस्मात् प्रागुक्तकारणत्रितयवत्त्वादावरणप्रक्षये सार्व्वज्ञं युक्तम्। न चास्योपदेष्टृनराभावात् सम्यग्दर्शनादित्रितयानुपपत्तिरिति भणनीयं पूर्व्वसर्व्वज्ञप्रणीतागमप्रभवत्वादस्मदागमेषार्षज्ञानस्य। न चान्योन्याश्रयतादिदोषः आगमसर्व्वज्ञपरम्परायां बीजाङ्कुरवदनादित्वाङ्गीकारादित्यलम्। रत्नत्रयपदवेदनीयतया प्रसिद्धं सम्यग्दर्शनादित्रितयमर्हत्प्रवचनसङ्ग्रहपरे परमागमसारे प्ररूपितं "सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः" इति। विहितञ्च योगदेवेन "येन रूपेण जीवाद्यर्थो व्यवस्थितस्तेन रूपेणार्हता प्रतिपादिते तत्त्वार्थे विपरीताभिनिवेशरहितत्वाद्यत्परपर्य्यायं श्रद्धानं सम्यग्दर्शनं तथा च तत्त्वार्थश्रद्धानम्, "तत्त्वार्थं श्रद्धानं सम्यग्दर्शनमिति"। अन्यदपि "रुचिर्जिनोक्ततत्त्वेषु सम्यक् श्रद्धानमुच्यते। जायते तन्निसर्गेण गुरोरधिगमेन वेति"॥ "परोपदेशनिरपेक्षमात्मस्वरूपं निसर्गः" व्याख्यानादिरूपपरोपदेशजनितं ज्ञानमधिगमः। येन स्वभावेन जीवादयः पदार्थाः व्यवस्थिताः तेन स्वभावेन मोहसंशयरहितत्वेनागमः सम्यग्ज्ञानम्। यथोक्तम् "यथावस्थिततत्त्वानां संक्षेपाद्विस्तरेण वा। योऽवबोधस्तमत्राहुः सम्यग्ज्ञानं मनीषिणः" इति॥ तज्ज्ञानं पञ्चविधं मतिश्रुतावधिमनःपर्य्यायकेवलभेदेन। तदुक्तम् "मतिश्रुतावधिमनःपर्य्यायकेवलानि ज्ञानमिति"। अस्यार्थः ज्ञानावरणक्षयोपशमे सति इन्द्रियमनसी पुरस्कृत्य व्याप्तः सन् यथार्थं मनुते सा मतिः। ज्ञानावरणक्षयोपशमे सति मतिजनितं स्पष्टं ज्ञानं श्रुतम्। असम्यग्दर्शनादिगुणजनितक्षयोपशमनिमित्तम् अवच्छिन्नविषयं ज्ञानमवधिः। वीर्य्यान्तरायज्ञानावरणक्षयोपशमे सति परमनोगतस्यार्थस्य स्फुटं परिच्छेदकं ज्ञानं मनःपर्य्यायः। तपःक्रियाविशेषान् यदर्थं सेवन्ते तपस्विनस्तज्ज्ञानमन्यज्ञानासंस्पृष्टं केवलम्। तत्राद्यं परोक्षं प्रत्यक्षमन्यत्। तदुक्तम् "विज्ञानं स्वपराभासि प्रमाणं बाधवर्जितम् प्रत्यक्षञ्च परोक्षञ्च द्विधा मेयविनिश्चयादिति"॥ अन्तर्गतिभेदस्तु सविस्तरस्तत्रैवागमेऽवगन्तव्यः। संसरणकर्म्मोच्छित्तावुद्यतस्य श्रद्दधानस्य ज्ञानवतः पापगमनकारणक्रियानिवृत्तिः सम्यक् चारित्रम्। तदेतत् सप्रपञ्चसङ्गमर्हता "सर्व्वथाऽद्ययोगानां त्यागश्चारित्रमुच्यते। कीर्त्तितं तदहिंसादिव्रतभेदेन पञ्चधा। अहिंसासूनृतास्तेयब्रह्मचर्य्यापरिग्रहाः॥ न यत्प्रमादयोगेन जीवितव्यपरोपणम्। चराणां स्थावराणाञ्च तदहिंसाव्रतं मतम्॥ प्रियं पथ्यवचस्तथ्यं सूनृतव्रतमुच्यते। तत्तथ्यमपि नो तथ्यमप्रियञ्चाहितञ्च यत्॥ अनादानमदत्तस्यास्तेयव्रतमुदीरितम्। बाह्याः प्राणा नृणामर्थो हरता तं हता हि ते॥ दिव्यौदारिककामानां कृतानुमतकारितैः। मनोवाक्कायतस्त्यागो ब्रह्माष्टादशधा मतम्॥ सर्व्वाभावेषु मूर्च्छायास्त्यागः स्यादपरिग्रहः॥ यदसत्स्वपि जायेत मूर्च्छया चित्तविप्लवः॥ भावनाभिर्भावितानि पञ्चभिः पञ्चधा क्रमात्। महाव्रतानि लोकस्य साधयन्त्यव्ययं पदमिति"॥ भावनापञ्चकञ्चपञ्चधा प्ररूपितम् "क्रोधलोभभयहास्यप्रत्याख्यानैर्निरन्तरम्। आलोच्य भाषणेनापि भाषेत सूनृतं व्रत" मित्यादिना॥ एतानि सम्यग्दर्शनज्ञानचारित्राणि मिलितानि मोक्षकारणं न प्रत्येकं यथा रसायनज्ञानं श्रद्धानाचरणानि सम्भूय रसायनफलं साधयन्ति न प्रत्येकम्। अत्र संक्षेपतस्तावज्जीवाजीवाख्ये द्वे तत्त्वेस्तः तत्र बोधात्मको जीवः अबोधात्मकस्त्वजीवः। तदुक्तं पद्मनन्दिना "चिदचिद्द्वे परे तत्त्वे विवेकस्तद्विवेचनम्। उपादेयमुपादेयं हेयं हेयञ्च कुर्व्वतः॥ हेयं हि कर्म्मरागादि तत् कार्य्यमविवेकिनः। उपादेयं परं ज्योतिरूपयोगैकलक्षणमिति"॥ सङ्ग्रहविद्रूपपरिणतिं स्वीकुर्व्वाणस्य ज्ञानदर्शने उपयोगः स परस्परप्रदेशात्तु प्रदेशबन्धात् कर्म्मणैकीभूतस्यात्मनोऽन्यत्वप्रतिपत्तिकारणं भवति। सकलजीवसाधारणं चैतन्यमुपशमक्षयक्षयोपशमभवनादौपशमिकक्षयात्मकक्षयौपशमिकभावेन कर्म्मोदयवशात् कलुषान्याकारेण च परिणतजीवपर्य्यायजीवविवक्षायां स्वरूपं भवति यदवोचद्वाचकाचार्य्यः "औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वत्वमौदयिकपारिणामिकौ चेति"। अनुदयप्राप्तिरूपे कर्म्मण उपशमे सति जीवस्योत्पद्यमानो भावः औपशमिकः यथा पङ्के कलुषतां कुर्व्वति कतकादि द्रव्यसम्बन्धादधः पतिते जलस्य स्वच्छता। कर्म्मणः क्षयोपशमे सति जायमानो भावः क्षायिकः यथा मोक्षः। उभयात्म-

भावो मिश्रः यथा जलस्याईस्वरूपता । कर्मोदये सति भवनं भावः औदयिकः । कर्मोपशमाद्यनपेक्षः । सहजो भावः चेतनत्वादिः पारिणामिकः । तदेतत् सत्त्वं यथासम्भवं भव्यस्याभव्यस्य वा जीवस्य तत्त्वं स्वरूपमिति सूत्रार्थः । तदुक्तम् स्वरूपसम्बोधने "ज्ञानाद् भिन्नो नचाभिन्नो भिन्नाभिन्नः कथञ्चन । ज्ञानं पूर्वापरीभूतं सोऽयमात्मेति कीर्त्यते" इति ॥ ननु भेदाभेदयोः परस्परपरिहारेणावस्थानादन्यतरस्यैवावास्तवत्वादुभयात्मकत्वमयुक्तमिति चेत्तदयुक्तं बाधे प्रमाणाभावात् अनुपलम्भो हि बाधकं प्रमाणं न सोऽस्ति समस्तेषु वस्तुष्वनेकरसात्मकत्वस्य स्याद्वादिनो मते सुप्रसिद्धत्वादिति ॥ अपरे पुनर्जीवाजीवयोरपरं प्रपञ्चमाचक्षते जीवकायधर्माधर्मपुद्गलास्तिकायभेदान् । एतेषु पञ्चसु तत्त्वेषु कालत्रयसम्बन्धितया स्थितिव्यपदेशः अनेकप्रदेशत्वेन शरीरवत् कायव्यपदेशः । तत्र जीवा द्विविधाः संसारिणोऽसंसारिणश्च । भवाद् भवान्तरप्राप्तिमन्तः संसारिणः । ते च द्विविधाः समनस्का अमनस्काश्च तत्र संज्ञिनः समनस्काः । शिक्षाक्रियाकलापग्रहणरूपा संज्ञा तद्विपुरास्तमनस्काः । ते चामनस्का द्विविधाः त्रसस्थावरभेदात् तत्र द्वीन्द्रियादयः पङ्गुगण्डोलकप्रभृतयश्चतुर्विधास्त्रसाः पृथिव्यप्तेजोवायुवनस्पतयः स्थावराः । तत्र मार्गगतधूलिः पृथिवी इष्टकादिः पृथिवीकायः पृथिवीकायत्वेन येन गृहीता स पृथिवीकायकः पृथिवीं कायत्वेन यो ग्रहीष्यति न पृथिवीजीवः । एवमवादिष्वपि भेदचतुष्टयं योज्यम् । तत्र पृथिव्यादिकायत्वेन गृहीतवन्तो ग्रहीष्यन्तश्च स्थावरा गृह्यन्ते न पृथिव्यादिपृथिवीकायादयः तेषां जीवत्वात् । ते च स्थावराः सर्वेऽप्येकेन्द्रियाश्च । भवान्तरप्राप्तिविधुरा मुक्ताः धर्माधर्माकाशास्तिकायास्ते एकत्वभाविनो निष्क्रियाश्च द्रव्यस्य देशान्तरप्राप्तिहेतवः । तत्र धर्माधर्मौ प्रसिद्धौ आलोकेनाविच्छिन्ने नभसि लोकाकाशपदवेदनीये सर्वत्रावस्थितिगतिस्थित्युपग्रहौ धर्माधर्मयोरुपकारः अतएव धर्मास्तिकायः प्रदेशत्वतुमेयः अधर्मास्तिकायः स्थित्वनुमेयः अन्यवस्तुप्रदेशमध्येऽन्यस्य वस्तुनः प्रवेशोऽवगाहः तदाकाशत्वम् । सर्वैरसवर्णवन्तः पुद्गलाः ते च द्विविधाः अणवः स्कन्धाश्च भोक्तुमशक्या अणवः द्व्यणुकादयः स्कन्धाः । तत्र द्व्यणुकादिस्कन्धभेदादखादिरुत्पद्यते अखादिसंघातात् द्व्यणुकादिरुत्पद्यते क्वचिद्भेदसंघाताभ्यां स्कन्धोत्पत्तिः । अत एव पूरयन्ति गलन्तीति पुद्गलाः । कालस्यानेकप्रदेशत्वाभावेनास्तिकायत्वाभावेऽपि द्रव्यत्वमस्ति तल्लक्षणयोगात् तदुक्तं गुणपर्यायवद्द्रव्यमिति । द्रव्याश्रया निर्गुणाः गुणा यथा जीवस्य ज्ञानत्वादिसामान्यरूपाः पुद्गलस्य रूपत्वादिसामान्यस्वभावाः धर्माधर्माकाशकायानां यथासम्भवं गतिस्थित्यवगाहहेतुत्वादि सामान्यानि गुणाः । तस्य द्रव्यस्योक्तरूपेण भवनसत्तादः तद्भावः परिणामः पर्यायः इति पर्यायाः यथा "जीवस्य घटादिज्ञानसुखक्लेशादयः पुद्गलस्य मृत्पिण्डघटादयः धर्मादीनां गत्यादिविशेषाः अतएव षट् द्रव्याणीति प्रसिद्धिः । केचन सप्त तत्त्वानीति वर्णयन्ति तदाह जीवाजीवास्रवबन्धसंवरनिर्जरमोक्षास्तत्त्वानीति" । तत्र जीवाजीवौ निरूपितौ आस्रवो निरूप्यते औदारिकादिकायादि चलनद्वारेणात्मनश्चलनं योगपदवेदनीयमास्रवः यथा सलिलावगाहिद्वारं नद्यास्रवस्तं कारणत्वादास्रव इति निगद्यते तथा योगप्रणालिकया कर्मास्रवतीति स योग आस्रवः । यथा आर्द्रं वस्त्रं समन्ताद्गा नीतं रेणुजातमुपादत्ते तथा कषायजलार्द्र आत्मा योगानीतं कर्म सर्वप्रदेशैर्गृह्णाति यथा वा निष्प्रायःपिण्डे जले क्षिप्ते अम्भः समन्ताद्गृह्णाति तथा कषायोष्णो जीवो योगानीतं कर्म समन्तादादत्ते । कषति हिनस्त्यात्मानं कुगतिप्रापणादिति कषायः क्रोधो मानो माया लोभश्च । स द्विविधः शुभाशुभभेदात् तत्राहिंसादिः शुभः काययोगः सत्यमितहितभाषणादिः शुभो वाग्योगः । तदेतदास्रवभेदप्रभेदजातं कायवाङ्मनःकर्मयोगः स आस्रवः शुभः पुण्यस्य, अशुभः पापस्येत्यादिना सूत्रसन्दर्भेण सप्रपञ्चमभाणि । अपरेत्वेवं मेनिरे आस्रवयति पुरुषं विषयेष्विन्द्रियप्रवृत्तिरास्रवः, इन्द्रियद्वारा हि पौरुषं ज्योतिर्विषयान् रूपादिज्ञानरूपेण परिणमत इति । मिथ्यादर्शनाविरतिप्रमादकषायवासाद्योगवशाज्जात्मा सूक्ष्मैकक्षेत्रावगाहिनामनन्तप्रदेशानां पुद्गलानां कर्मबन्धयोग्यानामादानमुपक्षेपणं यत् करोति स बन्धः । तदुक्तं "सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलानादत्ते स बन्धः" इति । तत्र कषायग्रहणं सर्वबन्धहेतूपलक्षणार्थम् । बन्धहेतून् प्रपाठकार्थं: "मिथ्यादर्शनाविरतिप्रमादकषाया बन्धहेतवः" इति । मिथ्यादर्शनं द्विविधं मिथ्याकर्मोदयात् परोपदेशानपेक्षं तत्त्वाश्रद्धानं नैसर्गिकमेकम् अपरं परोपदेशजम् । पृथिव्यादिषट्कायदानकं षडिन्द्रियसंयमनञ्च अविरतिः ।

पञ्चसमितिगुप्तित्रयात्मकाद्दः प्रमादः । कषायः क्रोधादिः । तत्र कषायाणाः स्थित्यनुभववन्धहेतवः प्रकृतिप्रदेशबन्धहेतुर्योग इति विभागः । बन्धश्चतुर्विध इत्युक्तं प्रकृतिस्थित्यनुभवप्रदेशास्तु तद्विधय इति यथा निम्बगुडादेस्तिक्तत्वमधुरत्वादिस्वभावः एवमावरणीयस्य ज्ञानदर्शनावरणत्वमादित्यप्रभोच्छेदकाम्भोधरवत् प्रदीपप्रभातिरोधायककुड्यवच्च सदसद्वेदनीयस्य सुखदुःखोत्पादकत्वमसिधारामधुलेहनवद्दर्शनमोहनीयस्य तत्त्वार्थाश्रद्धानकारित्वं दुर्जनसङ्गवच्चारित्रे मोहनीयस्यासंयमहेतुत्वं मद्यमदवदायुषो देहबन्धकर्तृत्वं जलवत् नाम्नो विचित्रनामकारित्वं चित्रिकवद्गोत्रस्योच्चनीचकारित्वं कुम्भकारवद्दानादीनां विघ्ननिदानत्वमन्तरायस्य स्वभावः कोषाध्यक्षवत् । सोऽयं प्रकृतिबन्धोऽष्टविधः द्रव्यकर्मवान्तरभेदमूलप्रकृतिवेदनीयः । तथावोचदुमास्वातिवाचकाचार्यः "आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तरायाः" इति तद्भेदसमत्वेऽपि पञ्चनवाष्टाविंशतिचतुर्द्विचत्वारिंशद्द्विपञ्चदशभेदा यथाक्रममिति । एतच्च सर्वं विद्यानन्दादिभिर्विवृतमिति विस्तरभयान्न प्रस्तूयते । यथा अजागोमहिष्यादिक्षीराणामेतावत्कालमनेकसंमाधुर्यस्वभावादप्रच्युतिस्थितिः तथा ज्ञानावरणादीनां मूलप्रकृतिनामादितस्त्रिंशत्सागरोपमकोटिकोट्यः परा स्थितिरित्याद्युक्तं कालद्रव्यवत् स्नेहस्वभावादप्रच्युतिस्थितिः । यथा अजागोमहिष्यादिक्षीराणां तीव्रमन्दादिभावेन स्वकार्यकारणे सामर्थ्यविशेषोऽनुभावः । तथा कर्मपुद्गलानां कार्यकरणे सामर्थ्यविशेषोऽनुभावः कर्मभावपरिणतपुद्गलस्कन्धानामनन्तानन्तप्रदेशानाम् आत्मप्रदेशानुप्रवेशः प्रदेशबन्धः । आस्रवनिरोधः संवरः येनात्मनि प्रविशत् कर्म प्रतिषिध्यते स गुप्तिसमित्यादिः संवरः । संसारकारणादयोगादात्मनोगोपनं गुप्तिः । सा त्रिविधा कायवाङ्मनोनिमित्तभेदात् । प्राणिपीडापरिहारेण सम्यगयनं समितिः सा ईर्याभाषादिभेदात् पञ्चधा । प्रपञ्चितश्च हेमचन्द्राचार्यैः "लोकातिवाहिते मार्गे चुम्बिते भास्वदंशुभिः । जन्तुरक्षार्थमालोक्य गतिरीर्या मता सताम् ॥ आपद्य रागतः सर्वजनीनं मितभाषणम् । प्रिया वाचंयमानां सा भाषासमितिरुच्यते ॥ द्विचत्वारिंशता भिक्षादोषैर्नित्यमदूषितम् । मुनिर्यदन्नमादत्ते सैषणासमितिर्मता ॥ आसनादीनि संवीक्ष्य प्रतिलेख्य च यत्नतः । गृह्णीयान्निक्षिपेद्वायेत् सा दानसमितिः" स्मृता ॥ कफमूत्रमलप्रायैर्निर्जन्तु जगतीतले । "यत्नादुत्सृजेत् साधुः सोत्सर्गसमितिर्भवेत्" ॥ अत एव, "आस्रवः स्रोतसो द्वारं संवृणोतीति संवरः" इति निराह्रः । तदुक्तमभियुक्तैः "आस्रवो भवहेतुः स्यात् संवरो मोक्षकारणम् । इतीयमार्हती सृष्टिरन्यदस्याः प्रपञ्चनम्" । अर्जितस्य कर्मणस्तपःप्रभृतिभिर्निर्जरणं निर्जरास्यं तत्त्वं चिरकालप्रवृत्तकषायकलापं पुण्यं सुखदुःखे च देहेन जरयति नाशयति केशोल्लुञ्चनादिकं तप उच्यते । सा निर्जरा द्विविधा यथाकालौपक्रमिकभेदात् तत्र प्रथमा यस्मिन् काले यत् कर्म फलप्रदत्वेनाभिमतं तस्मिन्नेव काले फलदानाद्भवन्ती निर्जरा कामादिपाकजेति च सा गीयते । यत् कर्म तपोबलात् स्वकालमनुदयावलिं प्रवेश्य प्रपद्यते तत् कर्म निर्जरा । यदाह "संसारबीजभूतानां कर्मणां जरणादिह । निर्जरा सम्मता द्वेधा सकामा कामनिर्जरा ॥ स्मृता सकामा यमिनामकामा त्वन्यदेहिनामिति" । मिथ्यादर्शनादीनां बन्धहेतूनां निरोधः अभिनवकर्माभावात् निर्जराहेतुसन्निधानेनार्जितस्य कर्मणो निरसनादात्यन्तिककर्ममोक्षणं मोक्षः बन्धहेतुभवहेतुनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षणं मोक्ष इति तदनन्तरमूर्ध्वं गच्छत्यालोकान्तात् यथा दृक्तदण्डादिभ्रमिप्रेरितं कुलालचक्रमुपरतेऽपि तस्मिन् तद्भावादेवासंस्कारक्षयं भ्रमति तथा भवस्थेनात्मना अपवर्गप्राप्तये यद्यदो यत् कृतं प्रणिधानं सुकृतं च तदभावेऽपि पूर्वसंस्कारादालोकान्तं गमनमुपपद्यते यथा वा मृत्तिकालेपकृतमलाबूद्रव्यं जलेऽधःपतति पुनरपैतन्मृत्तिकावन्धमुक्तं गच्छति तथा कर्मरहित आत्मा असङ्गत्वादूर्ध्वं गच्छति बन्धच्छेदादेरण्डबीजवदूर्ध्वगतिस्वभावाद्वाग्निशिखावत् । अन्योन्यं प्रदेशानुप्रवेशे सत्यविभागेनावस्थानं बन्धः परस्परप्राप्तिमात्रं सङ्गः । तदुक्तं "पूर्वप्रयोगादसङ्गत्वाद्बन्धच्छेदात्तथा गतिपरिणामाच्चाविद्धं कुलालचक्रवद्व्यपगतलेपालाबूदेरण्डबीजवदग्निशिखावच्चेति" । अतएव पठन्ति "गत्वागत्वा निवर्तन्ते चन्द्रसूर्यादयो ग्रहाः । अद्यापि न निवर्तन्ते त्वालोकाकाशमागता" इति । अन्ये तु गतसमस्तक्लेशतद्वासनस्थानावरणज्ञानस्य सुखैकतानस्यात्मन ऊर्ध्वदेशावस्थानं मुक्तिरित्यास्थिषत । एवमुक्तानि सुखदुःखसाधनाभ्यां पुण्यपापाभ्यां सहितानि नव पदार्थान् केचनाक्षीचक्रुः । तदुक्तं सिद्धान्ते "जीवाजीवौ पुण्यपापयुतावास्रवः संवरो निर्जरणं बन्धो

मोक्षश्च नवतत्त्वानीति"। सङ्क्षेपे प्रवृत्ता वयमुपरताः स्म। अत्र सर्वत्र सप्तभङ्गिनयाख्यं न्यायमवतारयन्ति जैनाः "स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च। स्यादवक्तव्यः स्यादस्ति चावक्तव्यः स्यान्नास्ति चावक्तव्यः स्यादस्ति च नास्ति चावक्तव्य इति"। तत्सर्वमनल्पबीर्यः प्रत्यपीपदत् "तद्विधानविवक्षायां स्यादस्तीति गतिर्भवेत्। स्यान्नास्तीति प्रयोगः स्यात्तन्निषेधे विवक्षिते॥ क्रमेणोभयवाच्यायां प्रयोगः सप्तदायभाक्। युगपत्तद्विवक्षायां स्यादवाच्यमगर्भितः॥ आद्योवाच्यविवक्षायां पञ्चमो भङ्ग इष्यते। अन्त्योवाच्याविवक्षायां षष्ठोभङ्गसमुद्भवः॥ सप्तत्वेन युक्तश्च सप्तमो भङ्ग उच्यत इति"। स्यान्छब्दः खल्वयं निपातः तिङन्तप्रतिरूपकोऽनेकान्तद्योतकः। यथोक्तम् "वाक्येष्वनेकान्तद्योति गम्यं प्रति विशेषणम्। स्यान्निपातोऽर्थयोगित्वात्तिङन्तप्रतिरूपक" इति॥ यदि पुनरेकान्तद्योतकः स्यात्छब्दोऽयं स्यात्तदा स्यादस्तीति वाक्ये स्यात्पदमनर्थकं स्यात् अनेकान्तद्योतकत्वे तु स्यादस्ति कथञ्चिदस्तीति स्यात् स्यात्पदात् कथञ्चिदिति अयमर्थो लभ्यते इति नानर्थक्यम्। तदाह "स्याद्वादः सर्वथैकान्तत्यागात् किं वृत्तवृत्तिधेः। सप्तभङ्गिनयापेक्षो हेयादेयविशेषकृदिति:"॥ यदि वस्तुन्येकान्ततः सर्वथा सर्वत्र सर्वात्मनास्तीति न उपादित्साजिहासाभ्यां क्वचित् कदा केनचित् प्रवर्त्तेत निवर्त्तेत वा प्राप्तप्रापणीयत्यहेयहानानुपपत्तेश्च। अनेकान्तपक्षे तु कथञ्चित् केनचित् सत्त्वेन ज्ञानोपादाने प्रेक्षावतासुपपद्यते। किञ्च वस्तुनः सत्त्वं स्वभावः असत्त्वं वेत्यादि प्रष्टव्यं नावदस्तित्वं वस्तुनः स्वभाव इति सर्वास्ति घटोऽस्तीत्यनयोः पर्यायतया युगपत्प्रयोगायोगात् नास्तीति प्रयोगविरोधाच्च एवमन्यत्रापि योज्यम्। यथोक्तम्"घटोऽस्तीति न वक्तव्यं सन्नेव हि यतो घटः। नास्तीत्यपि न वक्तव्यं विरोधात् सदसत्त्वयोरित्यादि" तस्मादित्थं वक्तव्यं सदसत्सदसदनिर्वचनीयवादभेदेन प्रतिवादिनश्चतुर्विधाः पुनरप्यनिर्वचनीयमतेनाभिश्रितानि सदसदादिमतानीति त्रिविधाः तान् प्रति किं वस्त्वस्तीत्यादिपर्यनुयोगे कथञ्चिदस्तीत्यादिप्रतिवचनसम्भवेन ते वादिनः सर्वे निर्विद्याः सन्तः तूष्णीमासत इति सम्पूर्णार्थविनिश्चायिनः स्याद्वादमुद्भावयन्तस्तत्र तत्र विजय इति सर्वमुपपन्नम्। यदवोचदाचार्यः स्याद्वादमञ्जर्याम्। "अनेकान्तात्मकं वस्तु गोचरः सर्वसंविदाम्। एकदेशविशिष्टोऽर्थो न यस्य विषयो मतः॥ न्यायानामेकनिष्ठानां प्रवृत्तौ श्रुतवर्त्मनि। सम्पूर्णार्थविनिश्चायि स्याद्वस्तु श्रुतमुच्यते" "अन्योन्यपक्षप्रतिपक्षभावाद्यावरे मत्सरिणः प्रवादाः। नयानशेषानविशेषमिच्छत्पक्षपाती समयस्तवार्हतः" इति॥ जिनदत्तसूरिणा जैनं मतमित्यसङ्गम्। "बलभोगोपभोगानासभयोर्दानलाभयोः। अन्तरायस्तथा निद्रा भीरज्ञानं जुगुप्सितम्। हिंसा रत्यरती रागद्वेषौ रतिरतिस्करः। शोको मिथ्यात्वमेतेऽष्टादश दोषा न यस्य सः। जीवो देवोगुरुः सम्यक् तत्त्वज्ञानोपदेशकः। ज्ञानदर्शनचारित्राख्यपवर्गस्य वर्त्मनि। स्याद्वादस्य प्रमाणे द्वे प्रत्यक्षमनुमापि च। नित्यानित्यात्मकं सर्वं नव तत्त्वानि सप्त वा। जीवाजीवौ पुण्यपापे चास्रवः संवरोऽपि च। बन्धो निर्जरणं सक्रियेषां व्याख्याधुनोच्यते। चेतनालक्षणो जीवः स्यादजीवस्तदन्यकः। सत्कर्मपुद्गलाः पुण्यं पापं तस्य विपर्ययः। आस्रवः कर्मणां बन्धो निर्जरस्तद्वियोजनम्॥ अष्टकर्मक्षयान्मोक्षोऽवाप्तभावः कैश्चन। पुण्यस्य संक्षये पापस्यास्रवे क्रियते पुनः॥ लब्धानन्तचतुष्कस्य लोकाग्रस्थस्य चात्मनः। लोष्टकर्मणोसक्रिर्ष्यार्थाष्टसिद्धिर्जिनोदिता सरजोहरणा भैक्षभुजो लुञ्चितमूर्द्धजाः। श्वेताम्बराः क्षमाशीलाः निःसङ्गा जैनसाधवः॥ लुञ्चिताः पिच्छिकाहस्ताः पाणिपात्रा दिगम्बराः। अर्हद्भिनोऽग्रे दातुर्द्वितीयाः स्युर्जिनधर्मयः॥ भुङ्क्ते न केवलं न स्त्री मोक्षमेति दिगम्बरः। प्राहुरेषामयं भेदोमहान् श्वेताम्बरैः सहेति"॥

अर्हन्त पु० अर्ह+वा० झ। जैनदेवे अर्हति।

अर्हन्ती स्त्री अर्हतः पूज्यस्य भावः ष्यञ् नुम् ङीष् यलोपः। पूज्यतायाम्—"औत्पात्तिकार्हन्त्यगुणैः" सि० कौ०।

अर्हा स्त्री चु० अर्ह—अङ्। पूजायाम्। युच् क्लिनएव बाधकः

अर्हित त्रि० अर्ह—क्त। पूजिते। "अभ्यर्हितश्च" का० वा०

अर्ह्य त्रि० चु० अर्ह—कर्मणि यत्। १प्राप्तुं योग्ये २स्तोतुं योग्ये च। चु० अर्ह—यत्। ३पूज्ये।

अल भूषणे, वारणे, भ्वा० उभ० सक० पर्याप्तौ अक० सेट्। अलति ते आलीत् आलिष्ट।

अल न० अल—अच्। १दन्तिकपुच्छस्थे कण्टकाकारे पदार्थे। हेम०। २हरितालेरत्नमा०।

अलक पु० अलति भूषयति मुखम् अल—कुन्। १ललाटस्थे चिह्नाग्रे कुटिलकेशे, "कलकलोऽलकलोऽहगाऽन्यया" भाघः "ललाटिकाचन्दनधूसरालका" कुमा० "अस्तृटालकले-

टनौ" "अलकेषु चमरेणुवर्ष्मप्रतिनिधीकृतः" इति च रघुः। "अङ्गलिप्रकुड्मेऽ" च। लिपकादित्वात् कापि नेत्त्वम्। अलका। अष्टवर्षाधिद्वादशवर्षपर्य्यन्तवयस्कायां २कन्यायां ४कुबेरपर्य्यायञ्च स्त्री। साच पुरी मेरुशिखरोपरिस्थेति अग्निलोकशब्दे दर्शितम्। तस्याः स्वरूपमुक्तम् "सभा वैश्रवणी राजन्! शतयोजनमायता। विस्तीर्णा सप्रतिख्यैव योजनानि सितप्रभा। तपसा निर्म्मिता राजन्! स्वयं वैश्रवणेन सा। शशिप्रभा प्रावरणा कैलासशिखरोपमा। युक्ता ब्रह्मकैरुह्यमाना सा खे विपक्षेव शोभते। दिव्या हेममयैरङ्गैः प्रासादैरुपशोभिता। महारत्नवती चित्रा दिव्यगन्धा मनोरमा। सिताभ्रशिखराकारा ज्वलमानेव दृश्यते। दिव्या हेममयैरङ्गैर्विद्युद्भिरिव चित्रिता। तस्यां वैश्रवणो राजा विचित्राभरणाम्बरः। स्त्रीसहस्रैर्वृतः श्रीमान्से ज्वलितकुण्डलः। दिवाकरनिभे पुण्ये दिव्यास्तरणसंवृते। दिव्यपादोपधाने च निषण्णः परमासने। मन्दाराणां मुदाराणां वनानि परिलोड़यन्। सौगन्धिकवनानाञ्च गन्धं गन्धवहो वहन्। नलिन्या बालकाख्यायाः नन्दनस्य वनस्य च। शीतोहृदयसंह्लादी वायुस्तमुपसेवते" भा०स०प०। गन्धवतीं नाम वायुपुरीं वर्णयित्वा काशी० ख० "ततःपरं कुबेरस्य श्रीमत्त्वेषालका पुरीत्युक्तम्। "अलकामतिवाहैव" कुमा०।

अलकनन्दा स्त्री अलति पर्य्याप्नोति कुनु अलका नन्दयतीति अच् नन्दा कर्म्म०। १गङ्गायाम्। "विष्णुपदो विष्णुपदात् पतिता मेरौ चतुर्द्धात्। विष्कम्भाचलस्तसरःसङ्गता गता विषता। सीताख्या भद्राश्वं सालकनन्दा च भारतं वर्षम्" सि०शि०। "तथैवालकनन्दा दक्षिणेन ब्रह्मसदनाद्बहूनि गिरिकूटानि अतिक्रम्य हेमकूटहिमकूटान्यतिरभसरंहसा लुठन्ती भारतमभि वर्षं दक्षिणस्यां दिशि लवणजलधिमभिप्रविशति" भा०५स्क०। अलकैर्नन्दति अच्। २कन्यायाम्। सा हि अलकैस्सुख्यति।

अलकप्रभा स्त्री अलका पर्य्याप्ना प्रभा यस्याः। कुबेरपुर्य्यामलकाख्ययाम्। [(पियासाल) पीतसालवृक्षे।

अलकप्रिय पु० अलकान् प्रीणाति चिक्कणीकरोति प्री–क।

अलकाधिप पु० अलकाया अधिपः ६त०। कुबेरे। अलकेश्वरादयोऽप्यत्र। "अलकेशोदमरालकेश्वरौ" रघुः।

अलक्त पु० न रक्तोऽस्मात् पृ० रस्य लत्वम्। १लाक्षारसे, स्वार्थे कन्। अलक्तकोऽप्यत्र २तद्वृक्षे लाक्षायाञ्च। "अलक्ताकाङ्कां पदवीं ततान" कुमा०रघुश्च। "चिरोज्झितालक्तकपाटलेन" कुमा०गोरचनालक्तककुङ्कुमेनेति" तन्त्रम्।

अलक्षण न० लक्षणमनुमापकं सुचिह्नं न०त०। १अननुमापके, सुचिह्नभिन्ने २दुर्लक्षणे च। लक्षणञ्च इतरभेदानुमापकं चिह्नम् यथा पृथिव्यागन्धवत्त्वम् जलस्य स्नेहवत्त्वम्। शुभसूचकं चिह्नविशेषञ्च लक्षणं तच्च लक्षणशब्दे वक्ष्यते। तदुभयभिन्नमलक्षणम् "आचाराद्धनमक्षय्यमाचारोऽहन्यलक्षणम्" मनुः। नास्ति लक्षणं अनुमापकोऽव्यभिचारिहेतुः अशुभसूचकहेतुश्च यस्य। २तद्वति त्रि० "आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्" मनुः। "क्लेशावहा भर्त्तुरलक्षणाहम्" रघुः। "अलक्षणा भवन्ति यद्वै नास्ति तदलक्षणमसन्नम्" शत० ब्रा०। "निर्ऋतेः कृष्णास्तुपकाश्चिस्रोऽलक्ष्माः" कात्या० १७,२४,२२।

अलक्षित त्रि०लक्ष–क्त न०त०। १अज्ञाते २लक्षणेनाननुमिते "अलक्षिताभ्युत्पतनो न्यषेधत्" रघुः "वपुर्विरूपाक्षमलक्षिता जनैः" काव्य०प्र०। ३अलक्षचिह्ने च। "दक्षिणेन हारं सोमक्रयणी तिष्ठत्यलक्षिता व्यङ्गा" कात्या०। ७,६,१४, "अलक्षिता अनङ्किता" कर्क०।

अलक्ष्मी स्त्री विरोधार्थे नञ्त०। लक्ष्मीविरुद्धायां निर्ऋतौ "आलक्ष्मीति" ख्यातायाम्। "अलक्ष्मीः कालकर्णी च" पुरा०। "अलक्ष्मीरपक्रामति" श्रुतेः।

अलक्ष्य त्रि० न लक्ष्यते लक्ष–कर्म्मणि यत् न०त०। १अज्ञेये २दुर्ज्ञेये। "वपुर्विरूपाक्षमलक्ष्यजन्मता" कुमा०। न लक्ष्या लक्षणया बोध्या। ३लक्षणाबोध्यभिन्ने "न वाच्यत्वादिकं तस्य" इत्यस्य व्याख्याने 'आदिशब्दादलक्ष्यत्वादिं' सा०द०। नास्ति लक्ष्यं व्याजोक्त्यस्य। ४व्याजस्तुत्ये त्रि०।

अलगर्द्द पु० लगति स्पृशति किप् लग् अर्द्दति अर्द–अच् अल् स्वार्थे गन् सन् अर्दो न भवति। १विषभूते जलव्याले पृषो० धत्वम् अलः पर्य्याप्नो भवति वा भू–अच् वा। अलगर्द्दोऽप्यत्र। दर्वीकरगणनायां सुश्रुतः "महाशिरा अलगर्द्द आशीविष" इति। २जलायुकाभेदे स्त्री। "अथ जलायुका वक्ष्यन्ते। जलमासामायुरिति जलायुका जलमासाभोक इति जलौकसः। ता द्वादश तासां सविषाः षट् निर्विषाः षट् तत्र एव निर्विषाः। तत्र सविषाः कृष्णा कर्ब्बुरा अलगर्दा इन्द्रायुधा सामुद्रिका गोचन्दना चेति। "रोमशा महापार्श्वा कृष्णमुखाऽलगर्द्दा" इति च सुश्रुतः।

अलग्न त्रि०न लग्नः संसृष्टः। लग्नभिन्ने असंसृष्टे "अलग्नमिव हि वै वाग्वदेदन्नमनो न स्यात्" शत०ब्रा०"अलग्नमिव वक्त्राव्यपदार्थेन सहासंसृष्टम्" भा०। अलग्लमित्यपाठः।

भाष्यानुक्तेः। ज्योतिषोक्ते पापाक्रान्तादिदुष्टलग्ने न०।

अलघु त्रि० न लघुः विरोधे न०त०। लघुवर्णभिन्ने १गुरुवर्णे आकारादौ २गौरवयुक्ते लाघवशून्ये। "जघनमलघुपीवरोरुरुच्चा" माघः २दोषे च "अलघुप्रसारितविलोचनाञ्जलिः" माघः। स्त्रियां वा ङीप्।

अलङ्करण न०अलम्+कृ-भावे ल्युट्। १भूषायाम्। करणे ल्युट्। २वलयादौ भूषणे। "आवसथोन्मर्दनालङ्करणदन्तप्रक्षालनान्यध्वर्योरदोहितस्य" काल्या० ८,६,२८, । न चालङ्करणं धार्य्यं क्वचिद्धेतवा पुनः" विधवाधर्म्मे पुरा०।

अलङ्करिष्णु त्रि० अलम् कृ-इष्णुच्। भूषके मण्डनकरणशीले। "अलङ्करिष्णवस्ते च शब्दमर्थं सुधौतवि०" अग्निपु०।

अलङ्कर्त्तृ त्रि०अलम्+कृ-तृच्। भूषणकर्त्तरि स्त्रियां ङीप्।

अलङ्कर्म्मीण त्रि० अलं समर्थः कर्म्मणे ख। कर्म्मक्षमे।

अलङ्कार पु०अलम्+कृ-भावे घञ्। १भूषायाम्। करणे घञ्। २हारादौ भूषणे, साहित्यविषयदोषगुणप्रतिपादके ३ग्रन्थे, ४शब्दभूषणे-अनुप्रासादौ, ५शब्दार्थभूषणे-उपमादौ च। "शब्दार्थयोरस्थिरा ये धर्म्माः शोभातिशायिनः। रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्" सा०द० उक्तम् शब्दार्थयोः शोभाकारित्वम् तल्लक्षणम्। ते च बहवः शब्दनिष्ठा अर्थनिष्ठाः उभयनिष्ठाश्च। तत्र जात्यादयः शब्दनिष्ठाः उपमादयोऽर्थनिष्ठाः पुनरुक्तवदाभासादय उभयनिष्ठाः तत्तदन्वयव्यतिरेकाभ्यां तथात्वम् शब्दनिष्ठास्तु बहवस्तेषु केचित् तत्तच्छब्दे उक्ताः केचित् वक्ष्यन्ते तद्भेदास्तावत् समासेनात्राभिधीयन्ते तत्र जात्यादयश्चतुर्विंशतिः शब्दालङ्काराः सरस्वतीकण्ठाभरणे दर्शिताः यथा "ये व्युत्पत्त्यादिना शब्दानलङ्कुर्वन्ति भूमभिः। शब्दालङ्कारसंज्ञास्ते वाजात्यादयोबुधैः"। "जातिर्गतीरीतिवृत्तिच्छायाहेतूक्तियुक्तयः। भणितिर्गुम्फना लक्ष्मा पठितिर्यमकानि च। स्रोतोप्रासचित्राणि वाक्कोवाक्यं प्रहेलिका। गूढप्रश्नोत्तराध्येयश्रव्यप्रेक्ष्याभिनेतयः। चतुर्विंशतिरित्युक्ताः शब्दालङ्कारजातयः"। तेषां लक्षणादीनि क्रमेण यथा तत्र १जातिः "तत्र संस्कृतमित्यादिभारती जातिरिष्यते। सा स्यौचित्यादिभिर्व्वाचामलङ्काराय जायते संस्कृतेनैव केऽप्याहुः प्राकृतेनैव केचन। साधारण्यादिभिः केचित् केचन स्वेच्छभाषया। न स्वेच्छितव्यं यत्रादौ स्त्रीषु नाप्राकृतं वदेत्। संकीर्णे नाभिजातेषु नाप्रचुरेषु संस्कृतम्। देवाद्याः संस्कृतं प्राहुः प्राकृतं किन्नरादयः। पैशाचाद्यं पिशाचाद्या मगधं क्षोनजातयः। संस्कृतेनैव कोऽप्यर्थः प्राकृतेनैव चापरः। शक्योरचयितुं कश्चिदपभ्रंशेन जायते"। तत्र जातिरपि षोढा यथोक्तं तत्रैव। "शुद्धा साधारणी मिश्रा सङ्कीर्णा रम्यगामिनी। अपभ्रष्टेति साचार्य्यैर्जातिः षोढा निगद्यते"। इति जातिः १

२ गतिः। "गद्यं पद्यं च मिश्रं च वाक्यं यत् सा गतिः स्मृता। अर्थैश्चित्रादिभिः साऽपि वागलङ्कार इष्यते। कश्चिद्गद्येन पद्येन कश्चिन्मिश्रेण शक्यते। कश्चिदेकेन च ह्याभ्यां काव्यार्थः कथन त्रिभिः। द्रुता विलम्बिता मध्या साथ द्रुतविलम्बिता। द्रुतमध्या च विज्ञेया तथा मध्यविलम्बिता। सा लघूनां गुरूणाञ्च वाङ्मात्रात्मत्वमिश्रणैः। गद्ये पद्ये च मिश्रे च षट् प्रकारोऽपि जायते। तत्र वृत्तं च जातिश्च पद्यमाङ्रयो पृथक्। समञ्चार्द्धसमं चेति विषमञ्च प्रचक्षते"। "वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेदिति" व०र०। 'गद्यमुत्कलिकाप्रायं पद्यगन्धीति च द्विधा। द्विधैव गद्यपद्यादिभेदान्मिश्रमपीष्यते। ललितं विशदं चूर्णमावृत्तं चेति योऽपरः। विशेषः स तु गद्यस्य रीतिवृत्तेर्विशिष्यते"। गतिः २।

३ रीतिः यथा "वैदर्भ्यादिगतः पन्थाः काव्ये मार्ग इति स्मृतः। रीङ् गताविति धातोश्च व्युत्पत्त्या रीतिरुच्यते। वैदर्भी साथ पाञ्चाली गौड़ियावन्तिका तथा। लाटीया मागधी चेति षोढा रीतिर्निगद्यते। तत्राद्यमासा निःश्लेषसुकुमारादिगुणगुम्फिता। विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते"। दर्पणे तु "माधुर्य्यव्यञ्जकैर्वर्णै रचना ललितात्मिका अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते" लक्षिता। "समस्तपञ्चषपदामोजःकान्तिविवर्जिताम्। मधुरां सुकुमाराञ्च पाञ्चालीं कवयो विदुः। समस्तालुप्तदीर्घपदामोजःकान्तिगुणान्विताम् गौड़ीयेति विजानन्ति रीतिं रीतिविचक्षणाः। अन्तराले तु पाञ्चालीवैदर्भ्योर्यावतिष्ठते। सावन्तिका समस्तैः स्याद् द्वित्रैः क्वचिच्चतुरैस्तथा। समस्तरीतिव्यामिश्रा लाटीया वृत्तिरिष्यते। पूर्व्वरीतेरनिर्वाहे खण्डरीतिस्तु मागधी"। रीतिः ३।

४ वृत्तिः यथा। "या विकाशेऽथ विन्यासे संकोचे विस्तरे तथा। चेतसो वर्त्तयित्री स्यात् सा वृत्तिः सापि षड्विधा। कौशिकारभटी चैव भारती सात्वती परा। मध्यमारभटी चैव तथा मध्यमकौशिकी। मुक्तकार्थसंदर्भा कौशिकी तासु कथ्यते। याच प्रौढ़ार्थसंदर्भा वृत्तिरारभटी तु सा। कोमलप्रौढ़सन्दर्भा कोमलार्था च भारती। प्रौढ़ार्थकोमलप्रौढ़संदर्भां सात्वतीं विदुः। कोमलप्रौढसन्दर्भा या सा

मध्यमकौशिकी । प्रौढार्थकोमलैर्वन्धैर्मध्यमारभटीष्यते । ४

५ छाया । अन्योक्तीनामनुक्तिश्छाया सापीह षड्विधा । लोकस्वकार्थकोन्मत्तप्रौढामत्तोक्तिभेदतः" । ५

६ मुद्रा । "स्वाभिप्रायस्य वाक्ये यद्दृश्यमपि निवेदनम् । मुद्रां तां मुद्रदात्वित्वात् काव्यमुद्राविदो विदुः । साक्षिनृ पदस्य वाक्यस्य विभक्तेर्वचनस्य च । सङ्घातस्य संहत्या मोढा न्यासेन जायते" । मुद्रा ६

७ उक्तिः । "विधिद्वारेण वा यत्र निषेधेनाथवा पुनः । प्रतीयते विशिष्टोऽर्थः सोक्तिरित्याभिधीयते । विधेरत्र निषेधात् स्यादधिकारात् विकल्पनात् । नियमात् परिसंख्याया उपाङ्गैः सेह षड्विधा" । उक्तिः ७

८युक्तिः । "अयुज्यमानस्य मिथः शब्दस्यार्थस्य वा पुनः । योजना क्रियते यासौ युक्तिरित्युच्यते बुधैः । पदं चैव पदार्थश्च वाक्यं वाक्यार्थ एव च । विषयोऽस्याः प्रकरणं प्रबन्धश्चाभिधीयते । योगकारणपर्यायाङ्गाङ्गिभावपरम्पराः । पदयुक्तेर्निमित्तं स्युर्निरूढाः पदसिद्धये । विरुद्धानां पदार्थानां गत्वादीनां परस्परम् । योजनायेह तां युक्तिं पदार्थविषयां विदुः । गर्भः सह निगर्भेण संहतिः समसङ्गसा । हेतवो वाक्ययुक्तीनां क्रियन्तामेवमादयः । यत्तदादेरुपादानं क्रियाभ्याससमन्वयौ । क्रियासमभिहारश्च वाक्यार्थान् युञ्जते मिथः । यदशब्देयर्गलादिवर्णनाभ्युपपत्तये । वाक्यं सेह प्रकरणविषया युक्तिरिष्यते । प्रबन्धविषयार्थेयं युक्तिरुक्ता मनीषिभिः" । युक्तिः ८

९ भणितिः । "उक्तिप्रकारो भणितिः सम्भवेऽसम्भवे च सा । विशेषसंहत्यार्थ्यं कल्पनासु च कल्पते" । भणितिः९

१० गुम्फना । "वाक्ये शब्दार्थयोः सम्यक्रचना गुम्फना स्मृता । शब्दार्थसमपर्यायपदवाक्यकृता च सा" । गुम्फना१०

११ लया । "लघ्वेत्याद्युः पदार्थानां घटना या परस्परम् । सा प्रक्रान्तेन कस्मिंचिदप्रक्रान्तेन कुत्रचित् । अतिक्रान्तेन कुत्रापि यथार्थवर्णयोः क्वचित् । क्वचित् वाच्यार्थयोः क्वापि प्रकीर्णानां च दृश्यते" । लया११

१२ पठितिः "काकुस्वरपदच्छेदभेदाभिनयकादिभिः पाठोयोऽर्थविशेषाय पठितिः सेह षड्विधा" । पठितिः१२

१३ यमकम् । "विभिन्नार्थकरूपाया याऽवृत्तिर्वर्णसंहतेः । अव्यपेतव्यमेतात्मा यमकं तन्निगद्यते । तदव्यपेतयमकं व्यपेतयमकं तथा । स्थानास्थानविभागाभ्यां पादभेदाच्च भिद्यते । तत्र पादादिमध्यान्तस्थानान्येषु प्रकल्प्यते । यदव्यपेतमन्यद्वा तत्स्थानयमकं विदुः । चतुस्त्रिद्व्येकपादेषु यमकानां विकल्पना । आदिमध्यान्तमध्यान्तमध्याद्याद्यन्तसर्वतः । अत्यन्तं बहवस्तेषां भेदाः संभेदयोनयः सुकरा दुष्करास्तैव," अग्निपुराणे तु । अनेकवर्णावृत्तिर्वा भिन्नार्थप्रतिपादिका । यमकं सा व्यपेत चाव्यापेतेति द्विधा मता । आनन्तर्यादपेता स्यात् व्यपेता व्यवधानतः । द्वैविध्येनानयोः स्थानपादभेदाच्चतुर्विधम् । आदिपादादिमध्यान्तेष्वेकद्वित्रिनियोगतः । सर्व्वथा पूर्व्वपूर्व्वेण चेत्यादिनोत्तरोत्तरम् । एकद्वित्रिपदारभ्यात्तत्पादात्तद्पदात् परम् । इतीयं त्रिविधं पादस्यादिमध्यान्तगोचरम् । पादान्तयमकं चैव कोडीयमकमेव च । संसर्गयमकं चैव विक्रान्तयमकं तथा । यमकं चक्रवालं च संदष्टयमकं तथा । पादादियमकं चैव तत्तु सैतीयमेव च । दशधा यमकं श्रेष्ठं तद्भेदावहवोऽपरे" इत्युक्तम् । तत्रास्थानयमकमुक्तं "नादौ न मध्ये नान्ते यत् सन्धौ वा यत् प्रकाशते । अव्यपेतव्यपेतं तत्स्थानयमकं विदुः । पादे श्लोके च तत्प्रायः पादसन्धौ च बध्यते । स्वभेदे च चान्यभेदे च स्थूलं सूक्ष्मं च सूरिभिः" । अन्यदग्निपुराणादौ द्रष्टव्यम् यमकम्१३

१४ श्लेषः "एकरूपेण वाक्येन द्वयोः कारणयोर्द्वयोः । तत्त्वेन यत् स शब्दज्ञैः श्लेष इत्यभिधीयते । प्रकृतिप्रत्ययोत्थौ द्वौ विभक्तिवचनाश्रयौ । पदभाषोद्भवौ चेति शब्दश्लेषा भवन्ति षट्" । १४ श्लेषः

१५ अनुप्रासः । "आवृत्तिर्या तु वर्णानां नातिदूरान्तरस्थिता । अलङ्कारेषु विद्वद्भिरनुप्रासः स दर्श्यते" "श्रुतिभिर्वृत्तिभिर्वर्णैः पदैर्वाक्यैभिरुक्तिभिः । लाटानामुक्तिभिश्चायं षट्प्रकारः प्रकाश्यते" तत्र श्रुत्यनुप्रासः १७८पृष्ठे दर्शितः । स च त्रिविधः याम्योनागर उपनागरश्चेतिभेदात् । याम्योऽपि चतुर्विधः मसृणोऽमसृणो वर्णोत्कटो वर्णान्तुत्कटश्चेति भेदात् । इत्यादीनां लक्षणानि तत्रैव । "सदृशावर्त्यमानेषु यः स्वर्गेषु वर्त्तते । काव्यव्यापी स संदर्भो वृत्तिरित्यभिधीयते । कार्णाटी कौन्तली कौड्री कौड्रणी वानवासिका । द्राविड्री माथुरी मात्सी मागधी ताम्रलिप्तिका । औड्री पौण्ड्रीति विद्वद्भिः सा द्वादशविधोच्यते" । तत्र कवर्गेणानुप्रासवती कार्णाटी एवं चवर्गेण कौन्तली, टवर्गेण कौड्री, तवर्गेण कौड्रणी, पवर्गेण वानवासिका, यवर्गेण, द्राविडी । शवर्गेण माथुरी, द्वित्रिवर्गानुप्रासवती मात्सी । द्वाभ्यां गर्भितैकवर्गानुप्रासवती मागधी । स्वान्त्यसंयोगिकवर्गानुप्रासवती ताम्रलिप्तिका ।

स्वरूपसंयोगिपदिता गौड़ी । असरूपसंयोगिपदिता पौण्ड्री । अन्ये तु "सर्गादीनामसम्बन्धः सम्बन्धोवापि योगिभिः स्फुटादिबन्धसंसिद्ध्यै सेह वृत्तिर्निरुच्यते । सौकुमार्यमथ प्रौढ़िर्मधुरत्वञ्च तद्गुणौ । गम्भीरौजस्विनी प्रौढ़ा मधुरा निष्ठुरा क्षया । कठोरा कोमला मिश्रा परुषा ललिता मिता। इति द्वादशधा भिन्ना कविभिः परिपठ्यते" इत्याहुः । "यथा चम्पकपुष्पादिसगदेर्वर्ण उच्यते वर्णावृत्तिस्तथा वाचां वर्णानुप्रास उच्यते । स तु स्तवकवान् स्थानी गर्भोविद्धतसंहतः । स्फीतसुकुः क्रमवान् विपर्य्यस्तोऽथ संपुटम् । मिथुनं वेणिका चित्रोविचित्रश्चापि वर्ण्यते"। स्थानेस्थाने वर्णस्तवकस्य विन्यासात् स्तवकवान्। नियतविवक्षितस्थानविशेषे विन्यासगाढौ स्थानी । आवृत्तौ वर्णान्तरावेष गर्भः । स्थानेस्थाने विकाशसङ्कोचाभ्यां विद्धतसंहतः । चक्रवालवद्दानोपादानाभ्यां स्फीतसुकुः । क्रमेण द्वित्ववर्णानां संयोगस्वराणामावृत्तिः क्रमवान् । स्वरसंयोगवर्णानां क्रमेणावृत्तित्व क्रमवान् । विपर्य्ययोपन्यासात् विपर्य्ययः । आद्यवर्णवर्त्तिना स्वरेण सह पादमध्यान्तयोरनुप्रासः संपुटम् । अन्तःपादानुपसंहारोपक्रमयोर्विवक्षितस्वरानुप्रासे मिथुनम् । आ वाक्यसमाप्तेः वर्णानुप्रासनिर्व्वाहो वेणिका । उक्तलक्षणेभ्योऽन्यश्चित्रः । एकवर्णावृत्तेर्द्व्यनुप्रासस्यवर्णान्तरवैचित्र्येण विचित्रः । "समयमसमयं वा यस्मिन्नावर्त्तते पदम् । पदान्तरेण स प्रायः पदानुप्रास उच्यते । विसर्गबिन्दुसंयोगस्वर स्थानाविवक्षया । अनिर्व्वाहाय स प्रायो यमकेभ्यो विभिद्यते" "मसृणोदन्तुरः क्षुण्णः संपुटं सम्पुटावली । खिन्नः स्तवकवान् स्थानी मिथुनं मिथुनावली । स्फीतसुकुनामान्यस्ततोऽन्यः पुनरुक्तिमान् । इति द्वादशभेदोऽयं मनीषिभिरिहोच्यते"। असंयुक्त वर्णावृत्तेः पदानुप्रासो मसृणः । संयोगाधिक्ये दन्तुरः । स्वरेण सहावृत्तेः क्षुण्णः । पदाव्यवधाने संपुटम् । तेषामावली संपुटावली । रीतेरनिर्व्वाहात् खिन्नः ॥ वर्णानुप्रासवत् पदानुप्रासोऽपि स्थाने स्थाने निवेशे स्तवकवान् । स्थाननियमात् पदानुप्रासः स्थानी । प्रतिपादं द्वयोर्द्वयोः पदानुप्रासयोः निरन्तरमावृत्ति मिथुनं तदावली मिथुनावली । चक्रवालवत् पदानुप्रासो स्फीतसुकुः पदानां पुनः पुनरावर्त्तने पुनरुक्तिमान् । "स्वभावतश्च गौण्या च वीप्साभीक्ष्ण्यादिभिश्च सा । नाम्नां द्विरुक्तिर्वाक्ये तु नामानुप्रास उच्यते" । आदिना भिन्नसंभ्रमादि स्फुरते । "अर्थभेदे पदावृत्तिः प्रकृत्या भिन्नयाथ वा । स स्थरिभिरनुप्रासोलाटीय इति गीयते । सचाव्यवहितो व्यस्तः समस्त उभयःपुनः । उभयं चक्रवालञ्च गर्भश्चेहाभिधीयते" ॥ अनुप्रासः १५ ।

१६ चित्रम् "वर्णस्थानस्वराकारगतिबन्धान् प्रतीहयः । नियमस्तद्विदुर्धैः षोढ़ा चित्रमित्यभिधीयते" ॥ स्वरव्यञ्जकनिर्देशात् वर्णा अत्र व्यञ्जनानि एकव्यञ्जनद्विव्यञ्जनत्रिव्यञ्जनादिभेदात् नानाविधः एवमेकद्वित्रादिस्वरचित्रम् । स्थानचित्रम् । निष्कण्ठ्यनिस्तालव्यादिभेदात् सप्तविधम् आकारचित्रम् पद्माद्याकारेण चित्रम्। तत्राष्टदलपद्मचित्रम् "कर्णिकायां न्यसेदेकं द्वे द्वे दिक्षु विदिक्षु च । प्रवेशनिर्गमौ दिक्षु कुर्यादष्टदलाम्बुजे" प्रकारान्तरं यथा । "अष्टधा कार्णिकावर्णाः पत्रेष्वष्टौ तथाऽपरे। तेषां सन्धिषु चाष्टावष्टपत्रसरोरुहे" । प्रकारान्तरं यथा । "आकर्णिकं पुनः पर्ण पर्णान्तात् पर्णकर्णिके । प्रतिपत्रं व्रजेद्वीमानिच्छन्नष्टदलाम्बुजे" इति चतुर्दलं यथा "कर्णिकातो नवेदूर्द्धं पत्राकाराक्षरावलीम् । प्रवेशवेत् कर्णिकायां पद्ममेतच्चतुर्दलम्"। षोड़शदलं यथा "गोमूत्रिकाक्रमेणास्य वर्णाः सर्व्वे समासतः । मध्ये त्वेकाक्षरन्यासात् पद्मोऽयं षोड़शच्छदः" अष्टपत्रं कविनामाङ्कं यथा "निविष्टाष्टदलन्यास मिदं पादार्द्धभक्तिभिः । अस्तृष्टकर्णिकं कोष्ठैः कविनामाङ्कमम्बुजम् । एतानि चित्राणि अनुष्टुप्छन्दस्येव । चक्रबन्धो यथा "पुरः पुरोलिखेत् पादानत्र लीनुत्तरोत्तरान् ।तुर्य्यन्तु भ्रमवेन्नेमौ नामाङ्कयुक्तसंविधः" । अस्योद्धारोदर्शितो माघव्याख्यायां मल्लिनाथेन । दशमण्डलरेखात्मके नवमण्डलान्तरालवति चक्रे नाभिस्थानेन सहैकविंशति कोष्ठं प्रत्येकं द्व्यक्षरवत् पङ्क्तित्रयं समरेखया लिखित्वा तत्रैकस्यां पङ्क्तौ वामपार्श्वक्रमेण आद्यपादमालिख्य तथा प्रादक्षिण्येन द्वितीयायां तृतीयायां च पङ्क्त्यां द्वितीय तृतीयौ पादौ लिखित्वा नेमिस्थाने बाह्यवलये साक्षरकोष्ठषट्केन सहाष्टादशकोष्ठवति तृतीयकोष्ठान्तवर्त्तिवर्णमारभ्य प्रादक्षिण्येन तुर्य्यपादं लिखित्वा तत्रैव समापयेत् । तत्रैव माद्यन्तवर्णैः तुर्य्यपादोद्धारः तत्रनेमिस्थाने आद्यपादतृतीयगमाक्षरसंवादः । तृतीयान्तकोष्ठे तुर्य्यांद्यन्तवर्णयोः संवादः" यथा "सत्त्वं मानविगिष्टमाजिरमसादालम्ब्य भव्यः पुरो लक्ष्मीवल्लयगुद्विरुद्धतरश्रीवत्स भूमिर्मुदा । सङ्ग्रा कामममास्तभीः परस्टगव्याधः सनादं हरेरेकोद्यैः समकालमभ्यसदयी रोपैस्तदा ततस्तरे"। अत्र तृतीयवलये "माघकाव्यमिदम्"। "षड्वलये, गिरु-

पालबधः इति काव्यनामाङ्कयोगः । एवमन्यत्रापि यथायथमूह्यम् गतिचित्रं गत्वाविलोमगत्वा तुरङ्गादिगत्वा वा चित्रं तच्च यमकभेद एव यथोक्तं दण्डिना । "आवृत्तिः प्रातिलोम्येन पादार्द्धश्लोकगोचरा । यमकं प्रतिलोमत्वात् प्रतिलोममिति स्मृतम्" तत्र पादगता विलोमावृत्तिर्यथा 'यामताशक्रतायासा सायाता क्रमता मया" । रसखारकता तेऽस्तु स्तुते ताकरणामर" अर्द्धगता यथा । "सा रमानवरारोहा नगेभागमना हि या । याहि नामग! भागेन हारोरा वनमार सा" श्लोकगा यथा । "यान मानव मारावि कयोनानजनासना । यासदारयतायोना मायामायमनादि सा । सादिनामयमाया मानाधीता शरदाऽस्तया । नासना जनना शोकविरामाय न मानवा" ॥ तथाच पादविलोमावृत्तौ अयुक्पादयोर्गतिः युक्पादयोः प्रत्यागतिः । अर्द्धावृत्तौ प्रथमपादाभ्यां गतिः शेषाभ्यां प्रत्यागतिरिति गतिप्रत्यागतिरूपचित्रमित्यवधेयम् । श्लोकावृत्तौ तु पादचतुष्टयेन गतिः प्रतिगत्वा श्लोकान्तरमिति भेदः । इत्येवं गतिचित्रम् । तुरङ्गगतिचित्रं यथा "क्रमात् पादचतुष्कस्य पङ्क्तिशः परिलेखने । तुरङ्गपादायातेन श्लोकोऽन्यश्चोपजायते" स०क० । यथा ।

वा१ ला२० सु८ का२० ल२ वा२४ ला११ सा२६
का१६ नि१८ ला२ ल२८ क१० ला२७ लि४ ता२२
म२१ खा८ सु१७ त१४ व२१ तो६ सा२५ रा१२
द१८ पि१५ का३२ व्र७ त२८ ग१२ द्वि२२ तु५

अत्र तुरङ्गगत्वा "बालालालिततीव्रखा सुकला रागतर्पिका। सुदन्तिका वर्द्धिता ता वा सा साला तलासका इति दत्ताङ्कानुसारेण क्रमशोवर्णन्यासे श्लोकोऽयं जायते । अर्द्धभ्रमगतिचित्रं सर्वतोभ्रमतिगचित्रञ्च यथा । "आडरर्द्धभ्रमं नाम श्लोकार्द्धभ्रमणं यदि । तदिदं सर्व्वतोभद्रं सर्व्वतोभ्रमणं यदि" स०क० । तत्रार्द्धभ्रमसङ्कं २६५ पृ ३ के । सर्वतोभद्रं तु—

रे	वा	का	नि	नि	का	वा	रे
वा	हि	का	स्व	स्व	का	हि	वा
का	का	रे	भ	भ	रे	का	का
नि	स्व	भ	व्य	व्य	भ	स्व	नि

तत्रार्द्धभ्रमवत् सर्व्वं किन्तु पादानामपि अनुलोमविलोमाभ्यां तथैव सर्वतोभ्रमणेन सर्व्वतोभद्रम् एवमन्ये दर्शयित्वा मायगोमूत्रिकाबन्धोऽपि गोमूत्रगतिमत्त्वात् गतिचित्रमपि । बन्धेन बन्धविशेषेण चित्रम् बन्धचित्रं तच्च नानाविधं तत्र द्विचतुष्कचक्रबन्धौ यथा "दृढ शिखरिसन्धिमाला विष्टवादर्द्धं समाश्रितैर्वर्णैः । द्विचतुष्कचक्रबन्धे नेमिविधौ चापरं भ्रमयेत्" । द्विश्चक्राटकबन्ध । "श्चक्रप्रन्थः श्चक्रं व्रजेदिति द्विश्चक्राटकबन्धोऽस्त्रिनेमिः" । त्रिविड़ितचक्रबन्धः । "शिखरादन्यतरस्मात् प्रतिपर्व्वं भ्रमति रेखा चार्द्धम् । नेमौ तदितरमर्द्धं त्रिविड़ितचक्राभिधे बन्धे" । स०क०एतेषामुद्धारोदाहरणे तत्रैव द्रष्टव्ये । शरपत्रबन्धः "चतुर्ष्वपि च पादेषु पङ्क्तिशोलिखितेष्विह । आदेरादेस्तुरङ्गस्य पादैः पादः समाप्यते" । यथा

न१ म१८ स्रो२ ज२० म५ ता२२ गा५ ल२४
सद दा२६ न११ व२८ क्र१३ ल३० च१५ य३२
स१७ म२ स्रो१६ ज४ स२१ ता६ ना२२ ल८
स२५ दा१० म२७ वा२ न२६ ल१४ च२१ या६
अत्र तुरङ्गगत्वा स एव श्लोकः । व्योमबन्धः । "अष्टादशशिखरैरीं गोमूत्रिकया चतुष्पदीं न्यस्येत् । पत्राद्यन्तैर्दद्यः स श्रेयो व्योमबन्धोऽत्र"

सरजबन्धः । "अत्र पादचतुष्केऽपि क्रमशः परिलेखिते । श्लोकपादक्रमेण स्याद्रेखासु सरजलयी" ।

सा१ से१० ना११ ग२८ म२६ ना१६ र१८ स्रो८
र६ से२ ना२७ सो१२ द२० ना३० र७ ता१७
ता१६ र२६ ना३ द१२ ज२१ ना६ म२१ त्त२४
धी२५ र२५ ना१४ ग४ म५ ना२२ म२३ या२२

तदुद्धारस्तु मल्लिनाथेन दर्शितः "तिर्य्यगेखालिखेत् पञ्च नवोर्द्धास्तत्र पङ्क्तयः । अष्टकोष्ठावतस्तः स्युस्तासु श्लोकं लिखेत् क्रमात् । तत्राद्यद्वितितुर्यासु तुर्य्यतिद्व्याद्यपङ्क्तिषु । आद्यद्वितिचतुःपञ्चषट्सप्ताष्टमकोष्ठगः । दृश्यते प्रथमः पादश्चतुर्थश्चैवमेव हि । चतुर्थपङ्क्तिप्राधस्यात्प्रथमावधिवीक्षणात् । द्वितीयादावाद्यद्वितीयोर्द्धं तुर्य्यतितुरीयके । तुर्य्यतिद्व्योस्तृतीयाद्ये द्रष्टव्योऽङ्घ्रिर्द्वितीयकः । तृतीयोऽङ्घ्रिर्द्वितीयान्ते आद्यसप्तमषष्ठयोः । द्वितिपञ्चमयोस्तुर्य्यषष्ठसप्तमयोः क्रमात् । तृतीयान्त्ये च लक्ष्योयमथान्यः क्रम उच्यते ॥ आद्यन्तयुग्मयोः षड्भ्योविन्यासोगोमूत्रिकाक्रमः । ह्रस्वैकं च द्वितीयं द्वे ह्रस्वमेकमिति क्रमात् । यद्वा द्वितयमेकं च ह्रस्वमेकं ह्रयं पुनः । स्वपङ्क्तिप्रक्रमादेव विन्यासहितयं भवेत् ॥ यद्वा प्रथमतुर्य्यांघ्री स्वपङ्क्तेरुक्तदत्तक्रमात् । द्वितीयोऽङ्घ्रिर्द्वितीयस्यां क्रमादाद्यचतुष्टये । व्युत्क्रमाच्च तृतीयस्यामाद्यमेव चतुष्टये । व्युत्क्रमेण द्वितीयस्यां तृतीयस्यां क्रमेण च ।

द्रष्टव्यो हि हतीयोऽङ्क्रिरन्यकोऽचतुष्टये॥ विन्यासभेदात्त्वन्येपि सन्त्येव बहवोऽत्र हि। विस्तरात्तु न लिख्यन्ते स्वयमूह्या विचक्षणैः"॥ एकाक्षरसरजो यथा। "श्लोकस्यैकस्य पादेषु लिखितेषु चतुर्ष्वपि। लिम्पदङ्कुरीह स्याद्वतरेकाक्षरावली"। सरजप्रस्तारो यथा। "क्रमेणैकस्य पादेषु प्रस्तरेषु चतुर्ष्वपि। तथान्यं सरजमार्गेण श्लोकोयमुपजायते"। गोमूत्रिकाबन्धः। "गतिरुज्ञावचा यत्र मार्गे मूलस्य गोरिव। गोमूत्रिकेति तत् प्राहुः दुष्करं चित्रवेदिनाम्। स०क० तच्च नानाविधं दर्शितम्। "दुष्करत्वात् कठोरत्वात् दुर्बोधत्वादिना विधेः। दिङ्मात्रं दर्शितं चित्रं स्वयमूह्यं महात्मभिः" स०क०। "अनेकधा वृत्तवर्णविन्यासैः शिल्पकल्पना। तत्तत्प्रसिद्धवस्तूनां चित्रमित्यभिधीयते इति सामन्यतः सर्ववस्त्वाकारकल्पनया चित्रं भवतीत्युक्तम् अग्निपु०।१६

१७ वाकोवाक्यम् "उक्तिप्रत्युक्तिमद्वाक्यं वाकोवाक्यं विदुर्बुधाः। इयोर्वक्त्रोस्तदिच्छन्ति बहूनामपि सङ्गमे। ऋजूक्तिरथ वक्रोक्तिर्वैयात्योक्तिस्तथैव च। गूढप्रश्नोत्तरोक्तिश्च तद्भिदा त्रिविधैव तु" वाकोवाक्यम् १८।

१८ प्रहेलिका। "प्रहेलिका सक्तप्रश्नः सापि षोढा च्युताक्षरा। दत्ताक्षरोभयं मुष्टिर्विन्दुमत्यर्थवत्यपि। क्रीड़ागोष्ठीविनोदेषु तज्ज्ञैराकीर्णमण्डले। परव्यामोहने चापि सोपयोगा प्रहेलिका"। तत्र "च्युताक्षरा "पयोधरभराक्रान्ता सञ्चलन्ती पदे पदे। पदमेकं न का याति, यदि हारेण वर्जिता"। अत्राहारेणेत्राकारच्युतिः दत्ताक्षरा यथा। "कान्तयानुगतः कोऽयं पीनस्तन्यो मदोद्धतः। सृगाक्षां पृष्ठतो याति, शम्बरो रूढयौवनः"। शवर इति वक्तव्ये मकारो दत्तः। च्युतदत्ताक्षरा च्युतमन्यत् दत्तञ्चान्यदक्षरं यत्र सा यथा "विदग्धः सरसो रागी नितम्बोपरि संस्थितः। तरण्याक्रिक्रितः कण्ठे कलं कूजति को, विटः। अत्र घट इति वक्तव्ये वकारस्य च्युतिः विकारस्य दानमिति तथात्वम्। विन्दुमत्यादीनामुदाहरणानि स०क०ऽवसेयानि। प्रहेलिका १८।

१९ गूढम्। "क्रियाकारकसम्बन्धपदाभिप्रायवस्तुभिः। गोपितैः षड्विधं प्राहुर्गूढं गूढार्थवेदिभिः। "पाण्डवानां सभामध्ये दुर्योधन उपागतः। तत्रैव गाङ्गुहिरण्यञ्च सर्व्वाभरणानि च"। अत्र क्रियापदम् गूढम्। योऽधन उपागतस्तत्रैव गवादिकमदुरित्यर्थः। गूढम् १९

२० प्रश्नोत्तरम्। "वस्तु पर्य्यनुयोगस्य निर्भेदः क्रियते पदैः। विदग्धगोष्ठ्यां वाक्यैर्यं हि प्रश्नोत्तरं विदुः अन्तःप्रश्नबहिप्रश्नबहिःरत्नःसमाङ्कयैः। जातिगोत्रोत्तराभिख्यैः प्रश्नैस्तदपि षड्विधम्। प्रश्नोत्तरम् १२०

२१ अध्येयम् "यद्विधौ च निषेधे च व्युत्पत्तेरेव कारणम्। तदध्येयं विदुस्तेन लोकयात्रा प्रवर्त्तते"। अध्येयम् २१

२२ श्रव्यम् "श्रव्यं शास्त्रेतिहासौ च काव्यं शास्त्रं तथैव च। काव्येतिहासः शास्त्रेतिहासस्तदपि षड्विधम्"। यथा रघुवंशादि। श्रव्यम् १२२

२३ प्रेक्ष्यम् "यदाङ्गिकैकनिवर्त्त्यं सज्ज्ञितं वाचिकादिभिः। नर्त्तकैरभिनीयेत प्रेक्ष्यं तत् च्छेडितादिवत्। तल्लास्यं ताण्डवं चैव ह्लल्लिकं गम्भया सह। ह्लल्लीसकञ्च रासं च षट्प्रकारं प्रचक्षते"। शृङ्गाररसप्रधानत्वे लास्यं वीररसप्रधानत्वे ताण्डवं, शृङ्गारवीररसप्रधानत्वे ह्लल्लिकमिति किन्नरविषयं ह्लल्लिकमेव गम्भा। "मण्डलेन च यत्स्त्रीणां नृत्यं ह्लल्लीसकं तु तत्। तत्रायको भवेदेको गोपस्त्रीणां स्त्रियस्तथा। तदिदं ह्लल्लीसकमेव तालबन्धविशेषयुक्तो रासः। प्रेक्ष्यम् २३।

२४ अभिनयः "अङ्गवाक्सत्वसंहार्य्याः सामान्याचित्र इत्यमी। षड्धा अभिनयास्तद्वदभिनेयं वचो विदुः"।२४

"चत्वारो विंशतिश्चैताः शब्दालङ्कारजातयः। शब्दसंदर्भमात्रेण हृदयं हर्तुमीशते" सर० कण्ठा०। एतेषामुदाहरणानि विस्तरभयात् न लिखितानि तत एवावगन्तव्यानि। अर्थालङ्कारास्तु मतभेदेन बहवः तथापि तेषां समष्टिः दक्षिणा दर्शिता यथा। "स्वरूपाख्यानसमा रूपकं दीपकावली। आक्षेपोऽर्थान्तरन्यासो व्यतिरेको विभावना। समासोऽतिशयोक्तेश्च हेतुः सूक्ष्मो लवः क्रमः। प्रेयोरसवदूर्जस्वि पर्य्यायोक्तं समाहितम्। उदात्तापह्नुतिस्तुल्ययोगिता। विरोधाप्रस्तुतशंसे व्याजस्तुतिनिदर्शने। सहोक्तिः परिवृत्त्याशीःसङ्कीर्णमथ भाविकम्। इति वाचामलङ्कारा दर्शिताः पूर्वसूरिभिः"। सरस्वतीकण्ठाभरणे तु द्वैराश्येन तेषां समष्टिरभिहिता यथा "अलमर्थमलङ्कर्त्तुं यत् व्युत्पत्त्यादिवर्त्मना। ज्ञेया जात्यादयः प्राज्ञैस्तेऽर्थालङ्कारसंज्ञया। जातिर्विभावना हेतुरहेतुः सूक्ष्ममुत्तरम्। विरोधमस्मवान्योन्यं परिवृत्तिर्निदर्शना। भेदः समाहितं भ्रान्तिर्वितर्कः सहितं स्मृतिः। भावः प्रत्यक्षपूर्वाणि प्रमाणानि च जैमिनेः"। प्रत्यक्षानुमानोपमानार्थापत्त्यभावरूपाणि षट् इति चतुर्विंशतिः। एते

तु अर्थमात्रनिष्ठाः । "शब्देभ्योऽपदार्थेभ्य उपमादिप्रतीयते विशिष्टोऽर्थः कवीनां सा उभयालङ्क्रिया मता । उपमा रूपकं साम्यं संशयोक्तिरपह्नुतिः । समाध्युक्तिः समासोक्तिरुत्प्रेक्षाऽप्रस्तुतस्तुतिः । सतुल्ययोगितोल्लेखः ससन्देहोक्तिः ससङ्शयः । आक्षेपोऽर्थान्तरन्यासो विशेषोक्तिः परिवृत्तिः । दीपकक्रमपर्य्यायो विषमश्लेषभाविकः संसृष्टिरिति निर्दिष्टालङ्कारवर्त्मवित्तिर्बुधैः" इत्युक्त्वा तेषां लक्षणानि सभेदं तत्रैव दर्शितानि चन्द्रालोकदर्पणकुवलयानन्दादिभिश्च सामान्यतोऽनुसृत्य नानाविधा दर्शिताः न संक्षेपतो गणिताः । अथार्थालङ्कारा एकत्र संसृष्टा सोदाहरणलक्षणा अकारादिक्रमेण तेषु केचित् दर्शिता अपि क्रमानुरोधात् सर्वेष्वत्र प्रदर्शनं ।

१ अक्रमातिशयोक्तिः "अक्रमातिशयोक्तिः स्यात् सहत्वे हेतुकार्य्ययोः" च० । "आलिङ्गन्ति सखे देव ! त्वां परांश्च शरास्तव" ।

२ अतद्गुणः "सङ्क्रान्तानुगत्वनङ्गीकारमात्रादतद्गुणम्" च० । "चिरं रागिणि मच्चित्ते निक्षिप्तापि न रज्यसि" ।

३ अतिशयोक्तिः १०५ पृष्ठे उक्तलक्षणोदाहरणा ।

४ अत्यन्तातिशयोक्तिः "अत्यन्तातिशयोक्तिस्तु कार्य्यहेतुप्रसक्तिजा" च० । "वाल्मीकेर्मुदिते तन्त्रा बलयोऽभवदूर्म्मिका" । ऊर्म्मिका बलयोऽभवदित्यनयः क्रियत्वात्तथात्वम् ।

५ अत्युक्तिः "अत्युक्तिरद्भुताऽतथ्यशौर्य्यौदार्य्यादिवर्णनम्" च० "त्वयि दातरि राजेन्द्र ! याचकाः कल्पशाखिनः" । याचकानां राजतोधनलाभेन कल्पतरुतुल्यताकथनमौदार्य्यस्यात्युक्तिः ।

६ अधिकम् १२५ पृष्ठे लक्षणोदाहरणभेदाः उक्ताः ।

७ अनन्वयः १४६ पृष्ठे उक्तलक्षणोदाहरणः ।

८ अनुकूलम् "अनुकूलं प्रतिकूलमानुकूल्यानुवर्त्तिचेत्" च० । "कुपिताऽसि यदि तन्वि ! निधाय करजक्षतम् । बधान भुजपाशाभ्यां कण्ठमस्य दृढं तदा" ।

९ अनुगुणः "प्राक्सिद्धः स्वगुणोत्कर्षोऽनुगुणः परसन्निधेः" च० । "नीलोत्पलानि दधते कटाक्षैरतिनीलताम्" ।

१० अनुज्ञा "दीप्साभ्यर्थनानुज्ञा तत्रैव गुणदर्शनात्" च० । "मय्येव जीर्य्यतां वातु यच्चयेह कृतं हरे ! । नरः प्रत्युपकारार्थं विपत्तिमभिकाङ्क्षति" ।

११ अनुमानम् "अनुमानन्तु विच्छित्त्या ज्ञानं साध्यस्य साधनात्" च० । "यत्र पतत्त्रबलानां दृष्टिनिशिताः पतन्ति तत्र शराः । तद्वापरोपितशरो धावत्त्रासां पुरःशरो मन्ये" । ह०क० विशेष उक्तः । यथा "लिङ्गाद्यद्विङ्निरोज्ञानमनुमानं तदुच्यते । पूर्ववच्छेषवच्चैव दृष्टं सामान्यतश्च तत् । फलसामर्थ्यभेदेन द्विधैतत् भिद्यते पृथक्" । तेषु यत्र कारणं दृष्ट्वा कार्य्यमनुमीयते तत् पूर्ववत् । "अविरलविलोलगलज्जलकुटजार्জ্জुननीपसुरभिवनवातः । अयमायातः कालो हन्त हताः पथिकगेहिन्यः" अत्र वर्षर्त्तोः कारणभूतात् कार्य्यं विरहिणीमरणमनुमीयते । यत्र कार्य्यं दृष्ट्वा कारणमनुमीयते तच्छेषवत् । "सामागमिष्यद्भूनं पतितोऽसि पादयोस्तस्याः । कथमन्यथा ललाटे यावकार्द्रतिलकपङ्क्तिरियम्" । अत्र कार्यभूतया यावकतिलकपङ्क्त्या कारणं पादपतनमनुमीयते । यदुभयविधभिन्नं तत् सामान्यतो दृष्टम् "भस्मा मदान्धस्य शिखण्डियूनो-र्दृष्टेः पुरस्तादविरप्रभेव" । सेयं विद्युदिव दृष्टेः प्रथमसुपलभ्यमाना कामन्दकी अविनाभावेन मालत्यागमनं गमयतीति सामान्यतो दृष्टम् । फलसामर्थ्ययोरुदाहरणानि तत्र द्रष्टव्यानि ।

१२ अन्योन्यम् "अन्योन्यं नाम यत्र स्यादुपकारः परस्परम्" च० । "त्रियामा यामिना भाति यामी भाति त्रियामया" । ह०क० भेद उक्तः । "अन्योन्यस्योपकारोयस्तदन्योन्यं त्रिधा च तत् । वाच्यं प्रतीयमानं च तृतीयमुभयात्मकम् ! अन्योन्यचूलिकान्योन्यभ्रान्तिरन्योन्यरूपता । अन्योन्यालङ्कृतावन्तस्त्रयमेतादृशेष्यते" । तत्र वाच्यम् । "कण्ठस्य तस्यासनवस्तुरस्य सङ्काकलापस्य च निस्तलस्य । अन्योन्यशोभाजनाद्बभूव साधारणो भूषणभूष्यभावः । प्रतीयमानन्तु अत्रैवान्योन्यपदानुपादाने । अन्योन्यचूलिका अन्योन्यरूपपरिवृत्तिः सा च व्यत्ययेन विनिमयेन च भवति । यथा "लोचनाधरकृताङ्कुतरागा वासितानन विशेषितवासा । वारुणी परगुणात्मगुणानां व्यत्ययं विनिमयञ्च वितेने" । अत्र वारुण्या यदधररागोऽपहृत्य चक्षुषि निक्षिप्तस्तेन व्यत्ययः । यच्च तस्या मोदवासितया तया स्वामोदो विशेषितस्तेन विनिमयः तेन परिवृत्तिविनिमयाख्यालङ्कारवत्त्वान्मूर्तावितिं द्रष्टव्यम् ।

१३ अपह्नवातिशयोक्तिः "रूपकातिशयोक्तिः स्यात् निगीर्य्याध्यवसानतः । यदाऽपह्नुतिगर्भत्वम् सैव सापह्नवा मता ।" च० "तत्सृष्टिषु सुधा राजन् ! भ्रान्ताः पश्यन्ति तां विधौ" ।

१४ अपह्नुतिः २४१ पृष्ठे उक्तलक्षणोदाहरणा । स०कण्ठा० अन्यथोक्तम् । "अपह्नुतिरपह्नुत्य किञ्चिदन्यार्थदर्शनम्, औपम्यवत्त्वनौपम्या चेति सा द्विविधोच्यते" तत्र औपम्यवती यथा "न केतकीनां विलसन्ति सूचयः प्रवा-

सिनी इन्त इसत्ययं विधिः। तड़ित्वतेयं न चकास्ति वञ्चला पुरःस्फरज्ज्योतिरिदं विजृम्भते"तत्र केतकीस्तबकानां विधिहासतः प्रतीयमानसादृश्येन तड़ित्वतायाः स्फरज्ज्योतिषश्च्युतिः। अनौपम्या यथा "राजकन्यानुरक्तं मां रोमोद्भेदेन रक्षकाः। अवगच्छेयुरात्मानमहो गीतानिलं वनम्" नचात्र सादृश्यमस्ति।

१५ अप्रस्तुतप्रशंसा २६४ पृष्ठे उक्तलक्षणोदाहरणा।

१६ अभावः। "असत्ता या पदार्थानामभावः सोऽभिधीयते। प्रागभावादिभेदेन स षड्विध इष्यते। स०क० प्रागभावः ध्वंसः अत्यन्ताभाव मिथ्यापदार्थाभाव इतरेतराभावः अभावाभावश्च तत्र ध्वंसो यथा "धृतिरस्तमिता रतिश्च्युता विरतं गेयमृतुर्निरुत्सवः। गतमाभरणप्रयोजनं परिशून्यं शयनीयमद्य मे"। इतरेतराभावो यथा। "कर्णोत्पलं न चक्षुस्ते न चक्षुः श्रवणोत्पलम्। इति जानन्नपि जनो मन्यते नेत्रदीर्घताम्" अत्यन्ताभावः यथा "प्रसीद सद्यो सङ्गेमं चण्डि! मानं मनोगतम्। दृष्टमात्रेऽपि ते तत्र रोषः खड्गसमायते"। सामग्र्याभावो यथा। "मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः। न प्रभातरलज्योतिरुदेति वसुधातलात्" अन्योदाहरणानि तत्रैव द्रष्टव्यानि।

१७ अभिदाहेतुः "अभेदेनाभिदाहेतुर्हेतोर्हेतुमता सह"। च० "लक्ष्मीविलासो भवतः कटाक्षवेक्षणं प्रभो"!

१८ अर्थान्तरन्यासः, २७१ पृष्ठे उक्तोदाहरणलक्षणः।

१९ अर्थापत्तिः, २७२ पृष्ठे उक्तलक्षणोदाहरणा। स०कण्ठा० "प्रत्यक्षादिप्रतीतोऽर्थोऽन्यथा नोपपद्यते। अर्थान्तरस्य गम्यत्वमर्थापत्तिं वदन्ति ताम्। सर्व्वप्रमाणपूर्व्वत्वा देकशोऽनेकशश्च सा। प्रत्यक्षपूर्व्विका लैङ्गादिभेदैः षोढा निगद्यते। प्रत्यक्षपूर्व्विका यथा "निर्स्नेतुं शक्यमस्तीति मध्यं तव नितम्बिनि। अन्यथानुपपत्त्यैव पयोधरभरस्थितेः"। अनुमानपूर्व्विका यथा "कपोलपुलकेनास्याः सूचितो मदनज्वरः। मनो निरन्तरासक्तः सद्यःकथयति प्रिये" बोध्यं कपोलपुलकेनानुमितो मदनज्वरः स प्रिये मनसः निरन्तरासक्तिं विनानुपपद्यमानः अनुरागं कल्पयतीत्यनुमानपूर्व्विकार्थापत्तिः एवमन्या उदाहार्य्याः।

२० अलम् "अलन्तु सूचयादाधेयाद्यदाधारस्य सूचमता"। "मणिमालोर्म्मिका तेऽद्य करे जघटायते"।

२१ अवज्ञा "इङ्गितज्ञानो न चेत् स्वातामवज्ञालङ्कृतिश्च"सा न। "स्वल्पमेवाम्बु लभते पान्थः प्राप्यापि सागरम्" "भीलन्ति यदि पद्मानि का हानिरस्ततद्युतेः"।

२२ असङ्गतिः "विरुद्धमिश्रदेशत्वं कार्य्यहेत्वोरसङ्गतिः१। अन्यत्र कारणार्थस्य ततोऽन्यत्र क्रतिश्च या२। अन्यत् कर्त्तुं प्रवृत्तौ च तद्विरुद्धक्रतिश्च या३" च०। क्रमेणोदाहरणानि। "विषं जलधरैः पीतं मूर्च्छिता पथिकाङ्गना"। "अपारिजातां वसुधां चिकीर्षन् द्यां तथाऽलघाः"२। अपगतपरिजातं यस्याः नास्ति पारिजातो यत्र इति च। "गोलोद्धारप्रवृत्तोऽहि गोलोद्धारं पुराऽकरोः३। गोला पृथ्वी गोलः पर्वतश्च।

२३ असम्भवः "असम्भवोऽर्थनिष्पत्तेरसम्भाव्यत्ववर्णनम्।" च० "कोवेद गोपशिशुकः शैलमुत्पाटयिष्यति"।

२४ आक्षेपः "आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात्१। निषेधाभासमाक्षेपं बुधाः केचन मन्वते२। आक्षेपोऽन्योविधौ व्यक्ते निषेधे च तिरोहिते३"। च० "चन्द्र! संदर्शयात्मानमथवास्ति प्रियासुखम्"१। "नायं दूति! तनोस्तापस्तस्याः कालानलोपमः२"। "गच्छ गच्छसि चेत् कान्त! पन्थानः सन्तु ते शिवाः। ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान्"। ३

२५ आगमः "यदाप्तवचनं तद्धि श्रेयसागमसंज्ञया। उत्तमं मध्यमं चाथ जघन्यं चेति तत् त्रिधा"। स०क० तत्रोत्तमं विधिरूपं निषेधरूपञ्च। विधिरूपं यथा "दमं दानं दयां शिक्षेरित्यादौ दाम्यत दत्त दयध्वं इति विधिः। निषेधरूपं यथा "निवार्यतामालि! किमयं वटुः पुनर्विवक्षुः स्फुरितोत्तराधरः। न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभाक्"। तथाच महान्तो नापभाषितव्या इति वाक्यार्थमर्य्यादया निषेधरूप उपदेशः। तदेतदुभयमध्यवस्थानुरोधात्तादुत्तमम्। मध्यमम्पि द्विधा निर्दिष्टवक्तृकमनिर्दिष्टवक्तृकञ्च तत्राद्यं यथा "कल्याणी बत गाथेयं लौकिकीं प्रतिभाति मे। एति जीवन्तमानन्दो नरं वर्षशतादपि" अत्र जीवन्नरः पश्यति भद्रमित्यर्थो निर्दिष्टवक्तृकतया निर्दिष्टः तत्र जीवनाय यतितव्यमिति रूपमाप्तवचनम्। "अत्रे वसति पिशाचो पिचुमर्दे दिनपतिर्वटे यक्षः। विभ्राम्यति पद्मे श्रीस्त्रिशति गौरी मधूकतरौ" तदिदमनिर्दिष्टवक्तृकमनादिलोकप्रसिद्धपारम्पर्य्यमैतिह्यम्। अत्र सर्व्ववाक्यानां निषेधपर्य्यवसानात् अत्रं न सेवेत, पिचुमर्दं न निन्देत, वटं न छिन्द्यात्, पद्मं मूर्द्धि न बिभूयात्, मधूकं न पदा स्पृशेत्" इति निषेधचतुष्टयरूपआगमः। जघन्यं द्वेधा काम्यं निषिद्धञ्च। तत्र निषिद्धविषयविधिर्यथा "वयं बाल्ये बालांसदृशि-

मनि यूनः, परिखतानपोक्षामो दृढा, परिणयविधानस्थितिरियम् । त्वदारब्धं जन्म चपयितुमकाण्डेन विधिना न नो गोत्रे पुत्रि ! कुचिदपि सतीलाञ्छनमभूत्" तदेतच्चिरेधरूपम् निषिद्धविषयमाप्तवचनमसतीवचनरूपम् ।

२६ आशीः "आशीर्नमाभिलषिते वस्तुन्याशंसनं यथा"। दण्डी "पातु वः परमं ज्योतिरपाङ्मनसगोचरम्" ।

२७ उत्तरम् "किञ्चिदाकूतसहितं वदुगूढोत्तरमुत्तरम्" च०। "यत्रासौ वेतसो पान्थ ! तत्रासौ स्नुतरा सरित्" ।

२८ उत्प्रेक्षा "सम्भावनाः स्युरुत्प्रेक्षावस्तुहेतूद्भवाः पुनः। उक्ताद्युक्तात्सदाद्यात्तसिद्धासिद्धास्पदे परे'। च० "धूमस्तोमं तमः पङ्के कोकीविरुतलक्षणम्" "लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः" "रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद् ध्रुवम्"। "त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते मृगी" "मध्यः किं कुचयोर्ज्ञेयो बहुः कनकदामभिः" "प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति" । दर्पणे तु अन्यथा विभज्य उदाहृतम् यथा "भवेत्प्रभावनोत्प्रेक्षा प्रकृतस्य परात्मना । वाच्या प्रतीयमाना सा प्रथमं विविधा मता वाच्येवादिप्रयोगे स्यादप्रयोगेऽपरा पुनः । जातिर्गुणः क्रिया द्रव्यं यदुत्प्रेक्ष्यं द्वयोरपि । तदप्येषापि प्रत्येकं भावाभावाभिमानतः । गुणक्रियास्वरूपत्वान्निमित्तस्य पुनस्त्रयः । द्वात्रिंशद्विधतां यान्ति" । तत्र वाच्योत्प्रेक्षायास्तदाहरणं दिङ्मात्रं यथा ॥ "ऊरुः कुरङ्गकडयत्वञ्चलचेलाञ्चलोभाति । सपताकः कनकमयोविजयस्तम्भः स्मरस्येव" ॥ अत्र विजयस्तम्भस्य जातिवाचकत्वाज्जात्युत्प्रेक्षा ॥ "म्लाने मौनं क्षमा मक्षौ त्यागे श्लाघाविपर्ययः । सुधा गुणानुबन्धित्वात्तस्य सप्रसवा इव" ॥ अत्र सप्रसवत्वं गुणः ॥ "गङ्गाम्भसि सुरत्राण ! तवाप्यस्त्र निःस्वनः । क्षतोदारिबधूवर्गगर्भपातनपातकी" ॥ अत्र क्षतोदारिति क्रिया ॥ "सुखमेणोऽयोभाति पूर्णचन्द्र इवापरः"॥ अत्र चन्द्रत्वेकव्यक्तिवाचित्वाद्द्रव्यम् । एते भावाभिमाने च । अभावाभिमाने यथा ॥ "कपोलफलकावस्य कण्ठं भित्त्वा तथाविधौ । अपश्यन्ताविवान्योन्यमीक्षां चामतां मतौ" ॥ अत्रापश्यन्ताविति क्रियाया अभावः । एवमन्यत् । निमित्तस्य गुणक्रियारूपत्वे यथा गङ्गाम्भसीत्यादौ क्षतोदेत्युत्प्रेक्षानिमित्तं पातकित्वं गुणः । अपश्यन्ताविवेत्यादौ चामतागमनरूपं निमित्तं क्रिया एवमन्यत् । प्रतीयमानोत्प्रेक्षा यथा ॥ "तन्वङ्ग्याः स्तनयुग्मेन सुखं न प्रकटीकृतम् । हाराय गुणिने स्थानं न दत्तमिति खल्वया" ॥ अत्र खल्वेवेति द्रव्याद्यभावात् प्रतीयमानोत्प्रेक्षा एवमन्यत् । अत्र वाच्योत्प्रेक्षायां षोडशस्य भेदेषु मध्ये विशेषमाह "तत्र वाच्याभिदाः पुनः । विना द्रव्यं त्रिधा सर्वाः स्वरूपफलहेतुगाः" तत्रोक्तेषु वाच्यप्रतीयमानोत्प्रेक्षयोर्भेदेषु मध्ये ये वाच्योत्प्रेक्षयोः षोडशभेदास्तेषु आत्मादीनां त्रयाणां ये द्वादशभेदास्तेषां प्रत्येकं स्वरूपफलहेतुगतत्वेन द्वादशभेदतया षट्त्रिंशद्भेदाः द्रव्यस्य स्वरूपोत्प्रेक्षणमेव संभवतीति चत्वार इति मिलित्वा चत्वारिंशद्भेदाः । अत्र स्वरूपोत्प्रेक्षा यथा पूर्वोदाहरणेषु "स्मरस्य विजयस्तम्भ" इति सप्रसवा इवेत्यादयः जातिगुणरूपाः। फलोत्प्रेक्षा यथा॥ "रावणस्यापि रामास्त्रोभित्त्वा हृदयमाशुगः । विवेश भुव माख्यातुसुरशेभ्यइव प्रियम्"॥ अत्राख्यातुमिति भूप्रवेशस्य फलं क्रियारूपमुत्प्रेक्षितम्॥ हेतूत्प्रेक्षा यथा॥ "सैषा स्खली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमूर्व्याम् । अद्यस्त त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम्"॥ अत्र दुःखरूपोगुणोहेतुत्वेनोत्प्रेक्षितः। एवमन्यत् । "उक्तानुक्तोनिमित्तस्य द्विधा तत्र स्वरूपगाः" । तेषु चत्वारिंशत्संख्याकेषु भेदेषु मध्ये ये स्वरूपगायाः षोडश भेदास्ते उक्तेत्यनिमित्तस्योपादानानुपादानाभ्यां द्वात्रिंशद्भेदा इति मिलित्वा षट्पञ्चाशद्भेदा वाच्योत्प्रेक्षायाः । तत्र निमित्तस्योपादाने यथा पूर्वोदाहृते स्नातीवेत्युत्प्रेक्षायां निमित्तं पातकित्वमुपात्तम्। अनुपादाने यथा "चन्द्रद्वापरः" इत्यत्र तथाविधसौन्दर्याद्यतिशयोनोपात्तः। हेतुफलयोस्तु नियमेन निमित्तस्योपादानमेव तथाहि विक्षेपदुःखादिवेत्यत्र यन्निमित्तं बहुमौनत्वम्, आख्यातुमिवेत्यत्र च भूप्रवेशस्ययोरनुपादाने असङ्गतमेव वाच्यं स्यात् । प्रतीयमानायाः षोडशस्य भेदेषु विशेषमाह "प्रतीयमानाभेदाश्च प्रत्येकं फलहेतुगाः" । यथोदाहृते तन्वङ्ग्यास्तनयुग्मेनेत्यत्र खल्वेवेति हेतूत्प्रेक्षितः अस्यामपि निमित्तस्यानुपादानं न सम्भवति द्रव्याद्यनुपादाने निमित्तस्य च कीर्त्तने उत्प्रेक्षणस्य प्रमातृनिष्ठेतुमयत्वात्। स्वरूपोत्प्रेक्षाप्यत्र न भवति धर्म्मान्तरतादात्म्यनिबन्धनायामस्यामिवाद्यप्रयोगे विशेषणयोगे सम्भावनोत्प्रेक्षयोरभ्युपगमात् यथा ॥ "अयं राजाऽपरः पाकशासन" इति। विशेषणाभावे च रूपकस्य,यथा "राजा पाकशासन" इति तदेवं द्वात्रिंशत्प्रकारा प्रतीयमानोत्प्रेक्षा 'उक्तानुक्तयोः प्रस्तुतस्य प्रत्येकं ता अपि द्विधा" । ता उत्प्रेक्षाः। उक्ता यथा ॥ "ऊरुः कुरङ्गकडय" इति ॥ अनुक्ता यथा

प्रभावत्वात् ॥ "इह हि संप्रति दिगन्तमाच्छादयता तिमिरपटलेन । घटितमिवाञ्जनचूर्णैः पूरितमिव मृगमदचोदैः । ततमिव तमालतरुभिर्वृतमिव नीलांशुकैर्भुवनम्,,॥ अत्राञ्जनेन घटितत्वादेरुत्प्रेक्षणीयस्य विषयो व्याप्तत्वं नोपात्तं यथा वा ॥ "स्निग्धतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः" ॥ अत्र तमसोलेपस्य व्यापनरूपोविषयोनोपात्तः अञ्जनवर्षणस्य तमःसंपातः, अनयोरुत्प्रेक्षानिमित्तत्वं तमसोऽतिबहुलत्वं धारावर्षणाधःसंयोगश्च यथासंख्यम् । केचित्तु अलेपनकर्तृभूतमपि तमोलेपनकर्तृत्वेनोत्प्रेक्षितं व्यापनञ्च निमित्तम् एवं नभोपि वर्षणक्रियाकर्तृत्वेने त्याहुः । "अलङ्कारान्तरोक्त्या सा वैचित्र्यमधिकं वहेत्" तत्र सापह्नवोत्प्रेक्षा यथा । "अस्युच्छ्वेन शुद्धयोर्द्ध-तप्तायकधूमकलुषाच्छ्याः । अप्राप्य मानमङ्गे विगलति लावण्यवारिपूर इव" । क्वेयहेतुगा यथा । सुकोत्-करः सङ्कटशुक्तिमध्यादिनिर्गतः सारसलोचनायाः । जानौ महेऽस्याः कमनीयकम्बुग्रीवाधिवासादनुगत्वमाप" । अत्र गुणवत्त्वे क्वेयः कम्बुग्रीवाधिवासादिति हेतूत्प्रेक्षाया हेतुः । अत्र जानौमहे इत्युत्प्रेक्षावाचकम् एवम् "मन्ये शङ्के ध्रुवं प्रायोनूनमित्येवमादयः" । क्वचिदुपमोपक्रमोत्प्रेक्षा यथा । "पारेजलं नीरनिधेरपश्यन्नुरारिरानीलपलाशराजीः । वनावलीरुत्कलिकासहस्रप्रतिच्छटोत्कूलितशैवलाभाः"।इत्यत्राभागशब्दस्योपमावाचकत्वादुपक्रमे उपमा पर्य-वसाने तु जलधितीरे शैवालस्थितेः संभवानुपपत्तेः संभाव-नोत्थानमित्युत्प्रेक्षा एवं विरहवर्णने । "क्षेपूरायित-मङ्गदैरित्यत्र" "विकासिनीलोत्पलभिन्नकर्णैः मृगायताक्ष्याः कुटिलः कटाक्षः" इत्यादौ च ज्ञेयम् । भ्रान्तिमदलङ्कारे "सुधा दुग्धधिवेत्यादौ भ्रान्तानां वस्त्वादीनां विषयस्य चन्द्रि कादेर्ज्ञानं नास्ति तदुपनिबन्धनस्य कविनैव कृतत्वात् । इह तु संभावनाकर्तुर्विषयस्यापि ज्ञानमिति ह्योर्भेदः । सन्देहे तु समकक्षतया कोटिद्वयस्य प्रतीतिः इह तूत्कटा संभाव्यभूतैका कोटिः । अतिशयोक्तौ विषयिणः प्रतीतस्य पर्यवसानादसत्यता प्रतीयते इह तु प्रतीतिकालएवेति भेदः । "रञ्जिता तु विविधास्त्रगैला नामितं तु गगनं स्वगितं तु । पूरिता तु विषमेव धरित्री संहता तु ककु-भस्त्विरेव" इत्यत्र तत्पदो तिमिराक्रान्ततारञ्जनादि रूपेण सन्दिह्यतइति सन्देहालङ्कारइति केचिदाहुः । तत्र एकविषये समानबलतयानेककोटिस्फुरणस्यैव सन्देह त्वात् इह तु तत्पदोत्प्रेक्षाप्रतिसम्बन्धिभेदव्यापनादेर्नि रूपेण रञ्जनादेः स्फुरणञ्च । अन्ये त्वनिह्नारूपविच्छित्त्या अवत्वेनैककोट्यधिकोऽपि भिन्नोऽयं सन्देहप्रकारइतिवदन्ति । तदप्ययुक्तं निगीर्यरूपसान्यतादात्म्यप्रतीतिर्हि सम्भा वना तस्याश्चात्र स्फुटतया सद्भावात् तुशब्देन चैवशब्दवत्तस्या द्योतनादुत्प्रेक्षैवेयं भवितुं युक्ता अत्रमदृष्टसन्देहप्रकार-कल्पनया । "यदेतच्चन्द्रान्तर्जलदलवलीलां वितनुते तदा चटे लोकः शबलकृति नो मां प्रति तथा । अहन्त्विन्दुं मन्ये त्वदरिविरहाक्रान्तरुणीकटाक्षोल्कापातव्रणकिण कलङ्काङ्कितततनुम्" इत्यत्र मन्येशब्दप्रयोगेऽपि उक्तरूपायाः सम्भावनाया अप्रतीतेर्वितर्कमात्रम्" नासावपह्नवोत्प्रेक्षा।

२९ उदात्तम् "लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत्" सा० द०। "अधः कृताम्भोधर-मण्डलानां यस्यां शशाङ्कोपलकुट्टिमानाम् । ज्योत्स्नानिपा-तात् चरतां पयोभिः केलीवनं हंसकुलीकरोति" । "नाभि प्रभिन्नाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा । अस्तं युगान्तोचितयोगनिद्रः संक्रान्त लोकान् पुरुषोऽधिशेते" ।

३० उपमा "साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमा द्वयोः" सा० द०। रूपकादिषु साम्यस्य व्यङ्ग्यत्वं व्यतिरेके च वैधर्म्यस्याप्युक्तिः उपमेयोपमायां वाक्यद्वयम् अनन्वये च एकस्यैव साम्यो-क्तिरित्यस्याभेदः । "सा पूर्णा यदि सामान्यधर्म्म औपम्यवाचि च । उपमेयं चोपमानं भवेद्वाच्यम्" सा उपमा साधारणोधर्म्मो द्वयोः सादृश्यहेतुर्यक्रियामनोज्ञत्वादि, औपम्यवाचकमिवादि, उपमेयं मुखादि,उपमानं चन्द्रादि। "इयं पुनः । श्रौती यथेवशब्दा इवार्थो वा वतिर्वदि । आर्थी तुल्यसमानाद्यास्तुल्यार्थो यत्र वा वतिः" । यथेव-वादयः शब्दा उपमानान्तरप्रयुक्ततुल्यादिपदसाधारण्या अपि श्रुतिमात्रेणोपमानोपमेयगतसादृश्यलक्षणसम्बन्धं बोधय-न्तीति तत्सद्भावे श्रौती उपमा । एवं "तत्र तस्येवेत्यनेन" इत्यर्थे विहितस्य वतेरुपादाने । तुल्यादयस्तु "कमलेन तुल्यं मुखमित्यादौ"उपमेय एव। "कमलं मुखस्य तुल्यं"-मित्यादावुपमान एव"कमलं मुखञ्च तुल्यं"मित्यादावुभयत्रापि विश्रामन्तीति तत्सद्भावे आर्थी । एवं "तेन तुल्यंमित्या-दिना" तुल्यार्थे विहितस्य वतेरुपादाने। हे श्रौती आर्थी-च। उदाहरणम् "सौरभसम्भोरुहबन्धुरस्य कुम्भाविव स्तनौ पीनौ। हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले! ॥"अत्र क्रमेण त्रिविधा श्रौती। "मधुरः सुधावदधरः पल्लवतुल्यो-ऽतिपेलवः पाणिः । चकितहरिणलोचनाभ्यां सदृशौ चपले च लोचने तस्याः" ॥ "अत्र क्रमेण त्रिविधा आर्थी

"पूर्णा षड्वेव तत्। "लुप्ता सामान्यधर्मादेरेकस्य यदि वा द्वयोः। त्रयाणां वानुपादाने त्रैत्वार्थी सापि पूर्ववत्॰॥ सा लुप्ता। तद्वदमाह। "पूर्णावद्धर्मलोपे सा विना त्रैतीन्तद्धिते"। वा लुप्तोपमा धर्मस्य साधारणगुणक्रियारूपस्य लोपे पूर्णावदिति पूर्वोक्तरीत्या षट्प्रकारा, किन्त्वत्र तद्धिते त्रैत्या असम्भवात् पञ्चप्रकारा। उदाहरणम्। "मुखमिन्दुरिवा पाब्धिः पद्मवेन समः प्रिये!। वाचः सुधा इवौष्ठस्ते बिम्बतुल्या मनोऽनुजवत्"॥ "आधारकर्मणि विहिते द्विविधे च क्यचि क्याङि। कर्मकर्तृगेऽनुजि च स्यादेवं पञ्चधा पुनः"॥ धर्मलोपे लुप्तेत्युक्तम्। क्रमेणोदाहरणम्। "अन्तःपुरीयसि रथेषु, सुतीयसि त्वंपौरं जनं, तव सदा रमणीयते श्रीः। दृष्टः प्रियाभिरसतद्युतिदर्गमिन्द्रसञ्चार मत्र भुवि सञ्चरसि चितीयं"!॥ अत्रान्तःपुरीयसीत्यत्र सुखविहारासक्तत्वस्य "सुतीयसीत्यत्र" स्नेहनिर्भरत्वस्य च साधारणधर्मस्य लोपः। एवमन्यत्र द्रष्टव्यं यद्यादि तुल्यादिविरहात् त्रैत्यादिविशेषचिन्ता नास्ति। इदञ्च केचित् औपम्यप्रतिपादकस्य वतेर्लोपे उदाहरन्ति तदयुक्तम् क्यङादेरपि तदर्थविहितत्वेनौपम्यप्रतिपादकत्वात्। ननु क्यङादिषु सम्यगौपम्यप्रतीतेर्नास्ति प्रत्ययत्वेनाप्रकृतन्त्रत्वात् इवादिप्रयोगाभावाच्चेति चेन्न कल्पवादावपि तथा प्रसङ्गात्। न च कल्पवादीनामिवादितुल्यतयौपम्यस्य वाचकत्वं, क्यङादीनान्तु द्योतकत्वम्" इवादीनामपि वाचत्वे नियमाभावात्। वाचकत्वे वा समुदितं पदं वाचकं "प्रकृतिप्रत्ययौ स्वस्वार्थबोधकाविति च" मतद्वयेऽपि वत्यादिक्यङाद्योः साम्यमेवेति। यच्च केचिदाहुः 'वत्यादय इवाद्यर्थेऽनुशिष्यन्ते क्यङादयस्त्वाचारार्थे इति" तदपि न। न खलु क्यङादय आचरमात्रार्था अपि तु सदृशाचारार्था इति। तदेवं धर्मलोपे दशप्रकारा लुप्ता।"उपमानानुपादाने द्विधा वाक्यसमासयोः"। उदाहरणम्। "तस्या मुखेन सदृशं रम्यं नास्ते न वा नयनतुल्यम्"। अत्र मुखनयनप्रतिनिधिवस्त्वन्तरयोर्गम्यमानत्वादुपमानलोपः। अत्रैव च"मुखेन सदृशम्" इत्यत्र मुखं यथेदमिति""नयनतुल्यमित्यत्र" "इगिवेति" पाठे त्रैत्यपि सम्भवतीत्यनयोर्भेदयोः प्रत्येकं त्रैत्यार्थीत्वभेदेन चतुर्विधत्वसम्भवेऽपि प्राचीनरीत्या द्विप्रकारत्वमेवोक्तम्।"औपम्यवाचिनो लोपे समासे व्यपि च द्विधा"।"वदनं मृगशावाक्ष्याः सुधाकरमनोहरम्" "गर्हमति स्तुतिपरत्वं व्यक्तं निनदन्मृगाक्षनां पुरतः"॥ अत्र 'गर्हमतीत्यत्र' औपम्यवाचिनः क्विपो लोपः। न चेह उपमेयस्यापि लोपः। "निनदन्निति" अनेनैव निर्देशात्। "द्विधा समासे वाक्ये च लोपे धर्मोपमानयोः"। "तस्या मुखेनेत्यादौ" "रम्यमिति" स्थाने "लोके इति" पाठेऽनयोरुदाहरणम्। "क्रियासंगता हेधा धर्मेवादिविलोपने"। उदाहरणम्। "विधवति सुखाब्जमस्याः"। अत्र "विधवतीति" मनोहरत्वधर्मलोपः। केचित्त्वत्रापि क्विप्प्रत्ययलोपमाहुः। "सुखाब्जमिति" अत्र समासगा। "उपमेयस्य लोपे तु स्यादेका प्रत्यये क्वचि"।"अरातिविक्रमालोकविकस्वरविलोचनः। लपाशोदग्रदोर्दण्डः स सहस्रायुधीयति"॥ अत्र स सहस्रायुधमिव आत्मानमाचरतीति वाक्ये उपमेयस्यात्मनो लोपः। न चेह औपम्यवाचकलोपः उक्तादेव न्यायात्। अत्र केचिदाहुः सहस्रायुधेन सह वर्त्तत इति ससहस्रायुधः स इवाचरतीति वाक्यात् ससहस्रायुधीयतीति पदसिद्धेः विशेष्यस्य शब्दानुपात्तत्वादिहोपमेयलोप इति तन्न विचारसहम्। कर्त्तरि क्यचोऽनुशासनविरुद्धत्वात्। "धर्मोपमेयलोपेऽन्या" यथा "यशसि प्रसरति भवतः क्षीरोदीयन्ति सागराः सर्वे"। अत्र क्षीरोदमिवात्मानमाचरन्तीत्युपमेय आत्मा साधारणधर्मः शुक्लता च लुप्तौ।"त्रिलोपे च समासगा"। यथा। "राजते मृगलोचना"। अत्र मृगस्य लोचने इव चञ्चले लोचने यस्या इति समासे उपमाप्रतिपादकसाधारणधर्मोपमानानां लोपः। "तेनोपमाया भेदाः स्युः सप्तविंशतिसंख्यकाः"। पूर्णा षड्विधा लुप्ता चैकविंशतिविधेति मिलित्वा सप्तविंशतिप्रकारोपमा। एषु चोपोमाभेदेषु मध्ये केषुप्रसाधारणधर्मेषु भेदेषु विशेषः प्रतिपाद्यते "एकरूपः क्वचित् क्वापि भिन्नः साधारणो गुणः। भिन्ने बिम्बानुबिम्बत्वं शब्दभावेन वा भिदा"॥ तत्र एकरूपे यथा "मधुरः सुधावदधरः" इत्यादि। बिम्बप्रतिबिम्बो यथा। "भल्लापवर्जितैस्तस्याः शिरोभिः प्रकटैर्भूमौ। तस्कार सरघाव्याप्तैः स चौद्रपटलैरिव"॥ अत्र "प्रकटैरित्यत्र" "सरघाव्याप्तैरिति" च दृष्टान्तवत्प्रतिबिम्बनम्। शब्दभावेन भिन्नत्वे यथा। "क्षीरं विधाय नयनं विकसितमिव नीलमुत्पलं मयि सा। कथयामास कृशाङ्गी मनोगतं निखिलमाकूतम्"॥ अत्र एके एव क्षीरत्वविकसितत्वे प्रतिवस्तूपमावच्छब्दभेदेन निर्दिष्टे। "एकदेशविवर्त्तिन्युपमावाच्यत्वगम्यते। भवेतां यत्र साम्यस्य" यथा॥ "नलैरिवोत्पलैः पद्मैर्मुखैरिव सरः श्रियः। पदे पदे विभान्ति स्म चक्रवाकैः स्तनैरिव"

अत्र नेत्रादीनां उत्पलादिसादृश्यं वाच्यं, सरःश्रीघ्राङ्गनासादृश्यं गम्यम् । "कथिता रसनोपमा । यथोर्वीमुपमेयस्य यदि स्यादुपमानता" ॥ "चन्द्रायते शुक्लरुचापि हंसो हंसायते चारुगतेन कान्ता । कान्तायते सर्वसुखेन वारि वारीयते स्वच्छतया विहायः" ॥ "मालोपमा यदेकस्योपमानं बहु दृश्यते" । यथा । "वारिजेनेव सरसी मणिनेव निशीथिनी । यौवनेनेव वनिता नवेन श्रीर्मनोहरा" ॥ क्वचिदुपमानोपमेययोर्हीनोरपि प्रकृतत्वं दृश्यते ॥ "हंसयन्द्र इवाभाति जलं व्योमतलं यथा । विमलाः कुसुदानीव तारकाः शरदागमे" ॥ "अस्य राज्ञो गृहे भान्ति भूपानीता विभूतयः । पुरन्दरस्य भवने कल्पवृक्षभवा इव" ॥ अत्रोपमेयभूतविभूतिभिः कल्पवृक्षवैभवा इवेति" उपमानभूता विभूतय आक्षिप्यन्त इति आक्षेपोपमा । अत्रैव "गृहे इत्यस्य" "भवने इत्यनेन प्रतिनिर्देशात् प्रतिनिर्देशोपमा इत्यादयश्च न लक्षिताः एवंविधैश्चित्रास्य सङ्ख्या सन्दर्शनात्" सा०द० । "प्रसिद्धेरनुरोधेन यः परस्परमर्थयोः । भूयोऽवयवसामान्ययोगः सेहोपमा मता" स०कण्ठा० ।

११ उपमानम् । "सदृशात् सदृशज्ञानमुपमानं द्विधेह तत् । स्यादेकमनुभूतार्थैर्ननुभूते द्वितीयकम्" ।स०कण्ठा०तत्रानुभूतार्थे यथा"सर्वं प्राग्वपुषमधवन्मृगमाक्ष्य वक्त्रसत्संज्ञाता द्विघटितदलत्खण्डमुडुखण्डरोचिः । एवं वेगात् कुलिशकरोत् व्योम विद्युत्सहस्रं भर्त्तुर्वैभ्रज्वलनकपिशास्ते च रोषाङ्कुराराः" ॥ अननुभूते "तां रोहिणीं विजानीहि ज्योतिषामत्र मण्डले । समूहस्तारकाणां यः शकटाकारमाश्रितः" ॥

१२ उपमेयोपमा "पर्य्यायेण द्वयोरेतदुपमेयोपमा मता" दर्पणे । "कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः"

१३ उल्लासः "एकस्य गुणदोषाभ्यामुल्लासोऽन्यस्य तौ यदि" । च० । तत्र गुणे "अपि मां पावयेत् साध्वी स्नात्वेतीच्छति जाह्नवी । दोषे, "काठिन्यं कुचयोर्दृष्टं वक्रत्वमुरुपादपद्मयोः । निन्दन्ति विश्वधातारं त्वद्गोष्ठीवरियोषितः" ।

१४ उल्लेखः "क्वचिद्भेदाद्गृहीतृणां विषयाणां तथा क्वचित् । एकस्यानेकधोल्लेखः यः स उल्लेख इष्यते" सा०द० "प्रिय इति गोपबधूभिः शिशुरिति दृङ्भिरधीश इति देवैः । नारायण इति भक्तैर्ब्रह्मेत्यन्यादृशि योगिभिर्देवः" । "ब्राह्मीर्ध्येष सहस्रोऽसि गौरवेणासि पर्वतः" ।

१५ उर्जस्वि "उर्जस्वि रुढाहङ्कारम्" इति "अपकर्षांहसश्लीति हृदि ते मा स्म भूद्भवम् । विक्षेपे न मे खड्गः प्रहर्त्तुं जातु वाञ्छति एवसङ्गा परोक्षेऽरिर्दर्पशालिना । पुंसा केनापि तज्ज्ञेयमूर्जस्वीत्थे वमादिकम्" इति च दण्डी ।

१६ एकावली पूर्वं पूर्वं प्रति विशेषणत्वेन परं परम् । स्थाप्यतेऽपोह्यते वाचा स्यात्तथैकावली द्विधा" । सा०द० स्थापने । "सरोविकसिताम्भोजमम्भोजं भृङ्गसङ्कुलम् । भृङ्गाश्च ससङ्गीताः सङ्गीतं सरसोदयम्" । वर्जने । "न तज्जलं यत्र सुचारुपङ्कजं न पङ्कजं तद्यदलीनषट्पदम् । न षट्पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्न जहार यन्मनः' ।

१७ कारकदीपकम् "क्रमिकैकगतानान्तु गुणः कारकदीपकम्" । च० अत्र कारकः क्रिया कर्त्तृत्वादिसंज्ञाकारित्वात् "गच्छत्यागच्छति पुनः पान्थः पश्यति पृच्छति" ।

१८ कारणमाला "परंपरं प्रति यदा पूर्वपूर्वस्य हेतुता । तदा कारणमाला स्यात्" । सा०द० "श्रुतं श्रुतधियां सङ्गाज्जायते, विनयः श्रुतात् । लोकानुरागो विनयाद्व किं लोकानुरागतः" ॥

१९ काव्यलिङ्गम् "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्" । सा०द० "जितोऽसि मन्द! कन्दर्प! यच्चित्तेऽसि त्रिलोचनः" अत्र पदार्थस्य हेतुता । वाक्यार्थस्य यथा । "यच्चन्द्रेणसमानकान्तिसलिले मग्नं तदिन्दीवरं मेघेष्वक्षरितं प्रिये तव मुखच्छायानुकारी शशी । वेऽपि त्वद्गमनानुकारिगतयस्ते राजहंसा गतास्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते" । अत्र चतुर्थपादार्थे आद्यपादत्रयार्थानां हेतुता ॥

२० काव्यार्थापत्तिः "कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते" । च० "स जितस्तन्मुखेनेन्दुः का वार्त्ता सरसीरुहाम्" ।

२१ कैतवापह्नुतिः "कैतवापह्नुतिर्व्यक्ते व्याजाद्यैर्निह्नवे यदि" । च० "निर्यान्ति शरनारावा बालाहत्कपातकैतवात्" । इयम् व्याजापह्नुतिरित्यन्ये अपह्नुतिशब्दे विदुषः ।

२२ गूढोक्तिः "गूढोक्तिरन्योद्देश्या गीर्यदन्यं प्रति गद्यते" । च० "इषायेहि परश्चेत्वादायाति शेवरचकः" । जारोद्देश्येन इयं प्रत्युक्तिः ।

२३ चपलातिशयोक्तिः चपलातिशयोक्तिस्तत् पौर्वापर्य्यव्यतिक्रमः" । च० "अग्रे मानोगतः पश्चादहुनीता प्रियेण सा" ॥

२४ श्लेषापह्नुतिः "श्लेषापह्नुतिरन्यस्य शङ्कातस्य निह्नवे" ।

च० "प्रजल्पन् मत्पदे लग्नः कान्तः किं? न हि नूपुरः"

३५ तद्गुणः "तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः"। च० "नयन् मधुलिहः स्वैत्यसदंशुदशनांशुभिः" ॥

३६ तुल्ययोगिता "वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता" "सङ्कुचन्ति सरोजानि खैरिणीवदनानि च"। सा त्रिधा। हिताहिते दृष्टितोल्लादमपरा तुल्ययोगिता। "प्रदीयते परामूतिर्भिन्नगात्रवयोस्तया"। परा चेष्टा भूतिरैश्वर्यं पराभूतिः पराभवश्च "गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता" च०। "लोकपालोयमः पापी त्वादृशः सत्को भवानपि"। यमादिभिरुत्कृष्टैः लोकपालत्वेन समीकृतिरत्र।

३७ दीपकम् "वदन्ति वस्तुधर्माणां धर्मैक्यं दीपकं बुधाः"। च० दर्पणे तु "अत्र कारकमेकं स्यादनेकासु क्रियासु चेत्। "सतो च योषित् प्रकृतिश्च निश्चला पुमांसमभ्येति भवान्तरेष्वपि अत्र अनुगमनरूपैककियासम्बन्धः वाक्यार्थयोः।

३८ दीपकावृत्तिः "त्रिविधा दीपकावृत्तिर्भेदादावृत्तिहेतुतः वस्तुनो वा स्वभावेन यत्नेवा हानिहेतुना। अवृत्तावौपयिकार्थः स्यादहेतुर्व्यावृत्तस्तु यः" स० क०। "न विरचिता ललाटतटस्थ्य करोध्रुकुटी न परुषञ्च दृतेन मुदुस्मितं मन्तरितम्। न तव निशुम्भसंभ्रमवशादपि दारुणया भगवति! चेटया कलुषितं वदनाम्बुजम्"। अत्र कालुष्यस्य कारणे सत्यपि तज्जनने वदनसामर्थ्यं तत्र त्वन्मुखाम्बुज वस्तुनः स्वभावोनिमित्तमतो न विशेषोक्तेरभेदः। यक्तिहानितोयथा। "अनुरागवती सन्ध्या दिवसश्च पुरस्सरः। अहो दैवगतिश्चित्रा तथापि न समागमः"॥ अत्र दैवगत्या विद्यमानस्यापि समागमसामर्थ्यस्य कुण्ठीकरणात् हेतुशक्तिहानिरुक्तम् दीपकम्। पदपदार्थोभयावृत्तिभेदात्त्रैविध्यमुक्तं चन्द्रालोके। यथा। "वर्षत्यम्बुदमालेयं वर्षत्येषा च शर्वरी उन्मीलन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः। नृत्यन्ति चातकास्तृप्ता नृत्यन्ति च शिखाबलाः"

३९ दृष्टान्तः दृष्टान्तस्तु सधर्म्मैरः वस्तुनः प्रतिबिम्बनम्। सा० द० स च साधर्म्यवैधर्म्याभ्यां द्विधा। "तत्र साधर्म्ये अविदितं गुणापि सत्कविभिरितिः कर्णेषु वसति मधुरधाराम्। अनधिगत परिमलापि हि हरति दृशं मालतीमाला,, । वैधर्म्ये। त्वयि दृष्टे क्रूरकाक्ष्याः शंसते मदनव्यथा। दृष्टोत्तुदयथा जीन्दो ग्लानिः कुमुदसंहते ,,।

४० निदर्शना "सम्भवन् वस्तुसम्बन्धोऽसम्भवन्नपि कुत्रचित्। यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शना" ॥ सा० द० अत्र सम्भवद्वस्तुसम्बन्धनिदर्शना यथा। "कोऽत्र भूमिवलये जनानां मुधा तापयन् सुचिरमेति सम्पदम्। वेदयन्निति दिनेन भानुमानसमाद चरमाचलं ततः"॥ अत्र रवेरीदृशार्थवेदनक्रियायां कर्तृत्वेनान्वयः सम्भवत्येव ईदृशार्थज्ञापनसमर्थचरमाचलप्राप्तिरूपधर्म्मवत्त्वात्, स च रवेरस्ताचलगमनस्य परतापिनां विपत्प्राप्तेश्च बिम्बप्रतिबिम्बभावं बोधयति। असम्भवद्वस्तुसम्बन्धनिदर्शनाप्येकवाक्यानेकवाक्यगतत्वेन द्विविधा। तत्रैकवाक्यगा यथा। "कलयति कुवलयमालालालितं कुटिलः कटाक्षविक्षेपः। अधरः किसलयलीलामाननमस्याः कलानिधेर्विलासम्" ॥ अत्रान्यस्य धर्म्मं कथमन्यो वहत्विति कटाक्षविक्षेपादीनां कुवलयमालादिगतललितादीनां कलनमसम्भवत् तल्ललितादिसदृशं ललितादिकमवगमयत् कटाक्षविक्षेपादेः कुवलयमालादेश्च बिम्बप्रतिबिम्बभावं बोधयति यथा वा। "प्रयाणे तव राजेन्द्र! मुक्ता वैरिस्त्रीगीतयाम्। राजहंसगतिः पद्मारामाननेन यशिष्यति"॥ अत्र पादाभ्यासम्बद्धराजहंसगतेरयोगोऽनुपपन्न इति तयोस्तत्सम्बन्धः कल्प्यते, स चासम्भवन् राजहंसगतिमिव गतिं बोधयति। अनेकवाक्यगा यथा। "इदं किलाव्याजमनोहरं वपुस्तपः क्षमं साधयितुं य इच्छति। ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिव्यवस्यति" अत्र यत्तच्छब्दस्यनिर्दिष्टवाक्यार्थयोरभेदेनान्वयोऽनुपपद्यमानस्तादृशतपुस्तपःक्षमत्वसाधनेच्छा नीलोत्पलपत्रधारया शमीलताच्छेदनेच्छेवेति बिम्बप्रतिबिम्बभावे पर्य्यवस्यति।

५१ निरुक्तिः "निरुक्तियोगतो नाम्नामन्यार्थत्वप्रकल्पनम्"। "दर्शयैरितैर्जाने सत्यं दोषाकरोविधौ"। दोषाकरस्य रात्रिकरस्य दोषाणामाकरत्वरूपान्यार्थकल्पनमिह।

५२ निश्चयः "अन्यन्निषिध्य प्रकृतस्थापनं निश्चयः पुनः"। च० "वदनमिदं न सरोजं नयने नेन्दीवरे एतौ। इह सविधे मुग्धदृशो मधुकर! न सुधा परिभाव्य"।

५३ निषेधाभासः। आक्षेपभेदः विध्याभासे ४० पृष्ठे विवृतिः।

५४ परिकरः "उक्तिर्विशेषणैः साभिप्रायैः परिकरोमतः"। च० "सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः"।

५५ परिकराङ्कुरः "साभिप्रायोविशेष्यश्चेत् भवेत् परिकराङ्कुरः"। च० "चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः"

५६ परिणामः "विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनि। परिणामोभवेत्तुल्याद्तुल्याधिकरणोद्विधा"। सा० द० "क्षितेर्नो पावनं दूरादागतस्य श्रुतं यस। स्तनोपनीडमाक्षेपः श्रुतोद्यूते पणस्त्रया" अत्यन्त पणीपावने वसनाभरणादिना

उपयुज्यते अत्र तु नायकसम्भावनं क्षितसुपायनम् द्यूते च दृढतया आक्षेपरूपणम्। अत्र प्रथमार्द्धे वैयधिकरण्येन द्वितीयार्द्धे सामानाधिकरण्येनेति भेदः।

५७ परिवृत्तिः "परिवृत्तिर्विनिमयः समन्यूनाधिकैर्भवेत्" च० "दत्त्वा कटाक्षलक्ष्मीं सा जग्राह हृदयं मम। मयापि हृदयं दत्तं गृहीतो मदनज्वरः" "पूर्वार्द्धे समेन शेषार्द्धे न्यूनेन" "येन जर्जरकलेवरव्ययात् क्रीतमिन्दु-किरणोज्ज्वलं यशः" अन्योन्यान्नभोविनोति स० कण्ठा०।

५८ परिसंख्या "परिसंख्या निषिध्यैकमेकस्मिन् वस्तु यन्त्रयणम्" च०। "क्वेहजयः प्रदीपेषु न स्वान्तेषु नतभ्रुवाम्"।

५९ पर्य्यस्तापह्नुतिः "अन्यत्र तत्सारोपार्था पर्य्यस्तापह्नुतिस्तु सा" च०। नायं सुधांशुः किंतर्हि सुधांशुः प्रेयसीमुखम्"।

६० पर्य्यायः "क्वचिदेकमनेकस्मिन्ननेकं चैकगं क्रमात्। भवति क्रियते वा चेत्तदा पर्य्याय इष्यते॥" सा०द० क्रमेण यथा। "स्थिताः क्षणं पक्ष्मसु ताडिताधराः पयोधरोत्सेधनिपातचूर्णिताः। बलीषु तस्याः स्खलिताः प्रपेदिरे क्रमेण नाभिं प्रथमोदबिन्दवः"॥ "विचरन्ति बिलासिन्यो यत्र श्रोणिभरालसाः। हंसकाकशिवाक्षत्र धावन्त्यरिपुरे तव"॥ "विश्लेषरागादधरान्निवर्त्तितस्तनाङ्क-रागादरुणाच्च कन्दुकात्। कृशाङ्गुरादानपरिच्युताङ्गुलिः कृतोऽञ्जलस्तत्प्रणयी तया करः"। "वयोरारोपितस्तारो हारस्तारैरिवधूजनैः॥ निधीयन्ते तयोः स्थूलाः स्तन-योरश्रुबिन्दवः"॥ एषु च क्वचिदाधारः संहतरूपोऽसंहतरूपश्च। क्वचिदाधेयमपि यथा "स्थिताः क्षणमित्यत्र उदबिन्दवः पक्ष्मादावसंहतरूप आधारे क्रमेणाभवन्। "विचरन्ति" इत्यत्राधेयभूता हंसादयः संहतरूपारिपुरे क्रमेणाभवन्।

६१ पर्य्यायोक्तम् "पर्य्यायोक्तं यदा भङ्ग्या गम्यमेवाभिधीयते" सा०द० "सृष्टास्त्वा नन्दने पश्यन्नकोसम्भोगलालिताः। सावज्ञं पारिजातस्य मञ्जर्य्यो यस्य सैनिकैः"।

६२ पिहितम् "पिहितं परवृत्तान्तज्ञानाद्यत्साकूतचेष्टितम्" च०। "प्रिये गृहागते प्रातः कान्ता तत्प्रभवकौशलात्"। प्रिये गृहा-गते परनारिकया सह रात्रिजागरणेन प्रातःशयन-सूचितमिति ज्ञापनाय कान्तया तत्प्रभवकौशलं साकूतं चेष्टितम्।

६३ पुनरुक्तवदाभासः आपाततो यदर्थस्य पौनरुक्त्यावभासनम्। पुनरुक्तवदाभासः स भिन्नाकारशब्दगः" सा०द० "भुजङ्ग-कङ्कणो व्यक्तः शशिशुभ्रांशुशीतगुः। जगन्त्यपि सदापाया-दव्याच्चेतोहरः शिवः"। अत्र भुजङ्गकङ्कणादिशब्दानाम् आपातमात्रेण सर्पादार्थतया पौनरुक्त्यप्रतिभासनम्। पर्य्य-वसाने तु भुजङ्गरूपं कङ्कणं विद्यते यस्येत्याद्यन्यार्थत्वम्। पावादित्यस्यापावादित्यत्व पर्य्यवसानम्। भुजङ्गकङ्कणी-तिशब्दयोः प्रथमस्यैव परिवृत्तिसहत्वम्। हरः शिव इत्यत्र द्वितीयस्यैव। शशिशुभ्रांशुपदयोरपि। शब्दपरिवृत्तिसहत्वासहत्वाभ्याम् अस्योभयालङ्कारत्वम्। "भाति सदा न त्वाग इति" अत्र तु न द्वयोरपीति शब्दालङ्कारत्वमिति भेदः।

६४ पूर्वरूपम् "पुनः स्वगुणसंप्राप्तिः पूर्वरूपमुदाहृतम्। पूर्वावस्थानुवृत्तिश्च विद्यते सति वस्तुनि"। च० "हरकण्ठा-शुदीप्तोऽपि शेषस्तद्यशसा सितः"। "दीपे निर्वापितेऽप्या-सीत् काञ्चीरत्नैर्भवन्मुहः"।

६५ प्रतिवस्तूपमा "प्रतिवस्तूपमा सा स्याद्वाक्ययोर्गम्यसाम्ययोः। एकोऽपि धर्म्मः सामान्यो यत्र निर्दिश्यते पृथक्" सा०द० "धन्यासि वैदर्भि! गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि। इतः स्तुतिः का खलु चन्द्रिकाया यदब्धिमप्युत्तरलीकरोति"॥ अत्र समाकर्षणमुत्तरलीकरणञ्च क्रिया एकैव पौनरुक्त्यनिरासाय भिन्नरूपतया निर्दिष्टा। इयं मालयापि दृश्यते यथा। "विमल एव रविर्विशदः शशी प्रकृतिशोभन एव हि दर्पणः। शिवगिरिः शिवहास-सहोदरः सहजसुन्दर एव हि सज्जनः"॥ अत्र विम-लत्वविशदादिरर्थत एक एव। वैधर्म्येण यथा। "चकोर्य एव चतुरास्चन्द्रिकापानकर्म्मणि"॥

६६ प्रतिषेधः "प्रतिषेधः प्रसिद्धस्य निषेधस्यानुकीर्त्तनम्"। च० "न द्यूतमेतत् कितवाः! क्रीडनं निशितैः शरैः"।

६७ प्रतीपम् "प्रतीपमुपमानस्याप्युपमेयत्वकल्पनम्१। अन्योप-मेयलाभेन वर्ण्यस्यानादरश्च तत्२। वर्ण्योपमानलाभेन तथान्यस्याप्यनादरः३। वर्ण्यान्यस्योपमाया अनिष्पत्ति-र्वेति च तत्४। प्रतीपमुपमानस्य कैमर्थ्यमपि मन्यते"५ च० "क्रमेण यथा। "त्वद्वीक्षणसमं पद्मम्"१ "अलं गर्वेण ते वक्त्र! कान्त्या चन्द्रोभवादृशः"२। "कः कौर्य्य दर्पस्ते हन्त्यो! त्वत्तुल्याः सन्ति हि स्त्रियः" ३। "मिथ्यावादोऽहि सुमुखि! त्वन्मुखाभं किलाम्बुजम्"। ४। "इदं चेत् वदनं तस्याः किं पद्मेन किमिन्दुना"। ५।

६८ प्रत्यक्षम्। "प्रत्यक्षमक्षजं ज्ञानं मानसं चाभिधीयते। स्वानुभूतिभवं चैवमुपचारेण कथ्यते"। स० कण्ठा०। तच्च युगपदेकयोगा तत्र युगपत् यथा। "क्रान्तकान्तवदन-प्रतिबिम्बे मग्नबालसहकारसुगन्धौ। खादति प्रण-

दितालिनि गीते निर्विचार मधुनोन्द्रियवर्गः" एकगो यथा। "मन्दमन्दविगलत्तपसोषङ्कुरङ्कितपक्ष्मदधत्या। वीक्ष्यते स्म घनकैर्नवध्या कामिनो सुखमधोसुखयेव", सुखादिविषयं मानसं यथा अस्तोकविक्रयमविस्मृत पूर्व्वदत्तसङ्गतनूतनभयज्वरजर्ज्जरं नः। एकक्षणलुटित संघटितप्रमोदमानन्दसेकगवलत्वसुपैति चेतः ,,।

६६ प्रत्यनीकम् "प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः" च० "जैत्रेतेत्रानुगौ कर्णावत्पलाभ्यामधःकृतौ"।

७० प्रस्तुताङ्कुरः "प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुताङ्कुरः"। च० किं भद्र! सत्यां मालत्यां जातया कण्टकस्थया"।

७१ प्रहर्षणम् "उत्कण्ठितार्थसिद्धिर्विना यत्नं प्रहर्षणम्। वाञ्छितादधिकार्थस्य संसिद्धिश्च प्रहर्षणम्२। बलादुपायसिद्धार्थात् साक्षाल्लाभः फलस्य तत्३" च०। क्रमेण "तामेव ध्यायते तस्मै विरहेऽसौ च दूतिका"। "दीपस्तूपयेद्यावत्तावदभ्युदितो रविः" २ "निध्यङ्कनोधोमूलं खनताऽऽसादितोनिधिः"। ३।

७२ प्रेयः "प्रेयः प्रियतराख्यानम्" दण्डी "अद्य या मम गोविन्द! जाता त्वयि मदागते। कालेनैषा भवेत् प्रीतिस्तवैव गमनात् पुनः। इत्याह युक्तं विदुरो नान्यतस्ताढगोष्टतिः। भक्तिमात्रसमाराध्यः स प्रीतश्च ततो हरिः" इदञ्च दर्पणकारादिभिरनुक्तमपि काव्यादर्शादावुक्तम्।

७३ प्रौढोक्तिः "प्रौढोक्तिरुत्कर्षहेतौ तद्धेतुत्वप्रकल्पनम्" च०। "कथाः कलिन्दजातीरतमालस्तोममेचकाः"।

७४ भावः। "अभिप्रायानुकूल्ये तु प्रवृत्तिर्भाव उच्यते सोद्भेदोऽथ निरुद्भेदश्चैकतश्चाभितश्च सः। हृद्यं सूक्ष्मञ्च सिध्येत न हि भावात् कथञ्चन" तत्र प्रार्थनावेदनाभ्यासङ्गिद्यमानः सोद्भेदो भावोहृद्यमित्युच्यते। "निरुद्भेदस्तु यो भावः स सूक्ष्मस्तु निगद्यते। इङ्गिताकारलक्ष्यात्वात् स सूक्ष्मात् स्याद्भूमिकान्तरमिति" स०कण्ठा०। स भावः भूमिकान्तरमवस्थान्तरम्। तत्र हृद्यभावयोरुदाहरणे तत्रैव दृश्ये सूक्ष्मस्य सूचमालङ्कारे वक्ष्यते।

७५ भाविकम् "अद्भुतस्य पदार्थस्य भूतस्यापि भविष्यतः। यत् प्रत्यक्षायमाणत्वं तद्भाविकमुदाहृतम्"२। सा०द० तत्र भूतस्य "मुनिर्जयति योगीन्द्रो महात्मा कृष्णसम्भवः यैर्नेक्षुलुञ्चे दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ"। भाविनः "आसीदङ्गनमत्रेति प्रत्यामि तव लोचने। भाविभूषसंभारां साक्षाद्भूर्वं तवाकृतिम्"।

७६ भेदकातिशयोक्तिः "भेदकातिशयोक्तिः स्यात् तस्यैवान्यत्वकल्पनम्"च०। "अन्यद्देवस्य गाम्भीर्य्यमन्यद्धैर्य्यञ्च भूपतेः।

७७ भ्रान्तापह्नुतिः "अन्यस्य शङ्कया भ्रान्तापह्नुतिः भ्रान्तिवारणे"। च० "तापं करोति सोत्कम्पं ज्वरः किन्नु? सखे! स्मरः"।

७८ भ्रान्तिमान् "साम्यादतस्मिंस्तद्बुद्धिर्भ्रान्तिमान् प्रतिभोत्थिता" सा०द० "सुरभा दुग्धधिया गवां विदधते स्नानधौ वल्लवाः कण्ठे कैरवशङ्कया कुवलयं कुर्वन्ति कान्ता अपि। कर्कन्दूफलमङ्गिनोति शबरी मुक्तफलाशङ्कया सान्द्रा चन्द्रमसोन कस्य कुरुते चित्तभ्रमं चन्द्रिका" प्रतिभेतिविशेषणात् स्मरसंसिद्धे शुक्तिकायां रजतभ्रमे न। साम्यादित्युक्तेः "सङ्गमविरहविकल्पे वरमिह विरहो न सङ्गमस्तस्याः। सङ्गे सैव तथैका त्रिभुवनमपि तन्मयं विरहे" इत्यादौ त्रिभुवनवर्त्तिपावहस्तुनः साम्याभावान्न भ्रान्तिमान्। अयं भ्रान्तिरित्यन्ये।

७९ मालादीपकम् "मालादीपकं पुनः। धार्म्मिणामेकधर्म्मेण सम्बन्धोयत् यथोत्तरम्" सा०द०। "त्वयि सङ्गरसंप्राप्ते धनुषासादिता शराः। शरैरसिरिरक्तेन भूक्तया त्वं, त्वया यशः" अत्रासादनक्रियाधर्म्मस्य यथोत्तरं सम्बन्धः।

८० मिथ्याध्यवसितिः "किञ्चिन्मिथ्यार्थसिद्ध्यर्थं मिथ्यार्थान्तरकल्पनम् मिथ्याध्यवसितिर्वैश्यां वशयेत् खञ्जनं वहन्"। च० मिथ्यापह्नुतिस्तु अपह्नुतिभेदः।

८१ मौलितम् "मौलितं यदि साद्यश्चेद् एव न दृश्यते" च० "रसोनालशि लक्षायावरणे सङ्गजारुणे"।

८२ मुद्रा "सूच्यार्थसूचनं मुद्रा प्रकृतार्थ परैः पदैः"। च० "नितम्ब गुर्व्वी तरुणी दृगुत्सविपुला च सा"।

८३ यथासंख्यम् "यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः" च० "शत्रु मित्रं विपत्तिं च जय रक्षय भक्षय"। क्रम इत्यन्ये

८४ युक्तिः "युक्तिः पराभिसन्धान क्रियया सर्म्मगुप्तये" च०। "त्वामालिखन्ती दृङ्मान्यां धनुः पौष्पं करेऽलिखत्"।

८५ रत्नावली "क्रमिकप्रकृतार्थानां न्यासः रत्नावली विदुः" च०। "चतुराक्षः पतिर्लक्ष्म्याः सर्व्वैश्वर्य्यस्य भूपते!"। चत्वारि आखानि चतुरं निपुणमाखमाखव्यापारो वचनं च यस्य।

८६ रसवत्। "रसवदरसपेशलम्" दण्डी "रसेन पेशल मारब्धानिर्व्वहणञ्च रसवत्। "स्पृशेति प्रेम सङ्गन्तु यया मे मरणं शतम्। सैषा तन्वी मया लब्धा कथमत्रैव जन्मनि" तत्समर्थनञ्च तत्रैव "प्राक् प्रतिदर्शिता शैव रतिः स्पृष्टारतां गता। रूपवाक्यक्रियायोगेन तदिदं रसवद्वचः। वाच्यस्यास्यावतारोनिर्व्वर्ण्ये दर्शितोरसः।

इह त्वदरसायत्ता रसवत्ता स्फुटा गिराम्' । दण्डी ।
८७ रूपकम् "रूपकं रूपितारोपात् विषये निरपह्नवे । तत् परम्परितं साङ्गं निरङ्गमिति च त्रिधा" । तत्र "यस्य कस्यचिदारोपः पराारोपणकारणम् । प्रत्येकं केवलं मालारूपश्चेति चतुर्विधम्" सा० द० । तत्र श्लिष्टशब्द-निबन्धनं केवलपरम्परितं यथा । "आहवे जगदुद्दण्ड-राजमण्डलराहवे । श्रीनृसिंह ! महीपाल ! खड्गस्तु तव बाहवे" ॥ अत्र राजमण्डलं नृपसमूह एव चन्द्रबिम्ब मित्यारोपो राजबाहोराहुत्वारोपे निमित्तम् । तदेव मालारूपं यथा । "पद्मोदयदिनाधीशः सदागतिसमीरणः । भूभृदावलिदम्भोलिरेक एव भवान् भुवि" ॥ अत्र पद्माया उदय एव पद्मानामुदयः, सतामागतिरेव सदागमनं भूभृतो राजान एव पर्वता इत्याद्यारोपो राज्ञः सूर्य्यत्वारोपे निमित्तम् । श्लिष्टशब्दनिबन्धनं केवलं यथा "पान्तु वो जलदश्यामाः शार्ङ्गज्याघातकर्कशाः । त्रैलोक्यमण्डपस्तम्भा दशत्वारो हरिबाहवः" । अत्र त्रैलोक्यस्य मण्डपत्वारोपो हरिबाहूनां स्तम्भत्वारोपे निमित्तम् । श्लिष्टमालारूपं यथा । "मनोजराजस्य सितातपत्रं श्रीखण्डचित्रं हरिदङ्गनायाः । विराजति व्योमसरःसरोजं कर्पूरपूरप्रभमिन्दुबिम्बम्" अत्र मनो-जादेराजत्वाद्यारोपचन्द्रबिम्बस्य सितातपत्रत्वाद्यारोपे निमित्तम् । एषु च "राजभुजादीनां राहुत्वाद्यारोपो राजमण्डलत्वारोपे निमित्तमिति" केचित् । "अङ्गिनो यदि साङ्गस्य रूपणं साङ्गमेव तत् । समस्तास्तु विष-यमेकदेशविवर्त्ति च" । तत्र "आरोप्यारोपविषयौ शाब्दत्वे प्रथमं मतम्" । प्रथमं समस्तवस्तुविषयं, यथा । "रावणावग्रहक्लान्तमिति वागमृतेन सः । अभिषिच्य मरु-च्छस्यं क्षणमेवास्तिरोदधे" ॥ अत्र क्षणस्य मेघत्वारोपे वागादीनामप्यमृतत्वाद्यारोपितत्वम् । "यत्र कस्यचिदार्थत्वमेक-देशविवर्त्ति तत्" । कस्यचिदारोप्यमाणस्य । यथा । "लावण्य-मधुभिः पूर्णमास्यमस्या विकस्वरम् । लोकलोचनरोलम्ब-कदम्बैः कैर्न पीयते" ॥ अत्र लावण्यादौ मध्वाद्यारोपः शाब्दो मुखे पद्मत्वारोप आर्थः । न चेयमेकदेशविवर्त्ति-न्युपमा विकस्वरत्वधर्म्मस्यारोप्यमाणे पद्मे मुख्यतया वर्त्तनात् मुखे चोपचरितत्वात् । "निरङ्गं केवलस्यैव रूपणं तदपि त्रिधा । माला केवलरूपत्वात्" तत्र मालारूपं निरङ्गं यथा । "निर्म्माणकौशलं धातुश्चन्द्रिका लोकचक्षुषाम् । क्रीड़ाम्भोरुहमनङ्गस्य सेयमिन्दीवरेक्षणा" ॥ केवलं यथा । "दोषे क्षतागसि भवत्युचितः प्रभूणां पादप्रहार इति सुन्दरि ! नात्र दूये । उद्यत्कठोरपुलकाङ्कुरकण्टकार्घै-र्द्विद्यते स्म पदं ननु सा व्यथा मे" ॥ "तेनाष्टौ रूपके भिदाः" । चिरन्तनैरुक्ता इति शेषः । क्वचित् परम्परित-मप्येकदेशविवर्त्ति यथा । "खड्गः क्षमासौविदल्लः समिति विजयते मानवाखण्डलस्य" । अत्रार्थः क्षमाया महिषी-त्वारोपः खड्गे सौविदल्लत्वारोपे हेतुः । अस्य भेदस्य पूर्ववन्मालारूपत्वेऽप्युदाहरणं स्वयम् । "दृश्यन्ते क्वचिदा-रोप्याः श्लिष्टाः साङ्गेऽपि रूपके" । तत्रैकदेशविवर्त्ति श्लिष्टं यथा । "करमुदयमहीधरस्तनार्घे गलिततमःपटलां-शुके निवेश्य । विकसितकुसुदेक्षणं विचुम्ब्यत्वयममरेश-दिशो मुखं सुधांशुः" समस्तवस्तुविषयं यथा । अत्रैव "विचुम्बतीत्यादौ" "चुचुम्बे स्फुरदबलासुखमिन्दुनायकेन इति" पाठे । न चात्र श्लिष्टपरम्परितम् तत्र हि । "भूभृदावलिदम्भोलिरित्यादौ" राजादौ पर्वतत्वादिरूपणं विना वर्णनीयस्य राजादेर्दम्भोलितादिरूपणं सर्व्वथैव साद्दश्यासम्भवादसङ्गतम् । तर्हि कथं "पद्मोदयदिनाधीश इत्यादौ" परम्परितं, राजादेः सूर्य्यादिना साद्दश्यस्य तेजस्वितादिहेतुकस्य सम्भवादिति न वाच्यम् तथा हि राजादेस्तेजस्वितादिहेतुकं सुव्यक्तं साद्दश्यं न तु प्रकृते तद्विवक्षितं पद्मोदयादेरेव द्वयोः साधारण्यधर्म्मतया विवक्षितत्वात्, इह तु महीधरादेः स्तनादिना साद्दश्यं पीनोत्तुङ्गत्वादिना सुव्यक्तमेवेति न श्लिष्टपरम्परितम् । क्वचित् समासाभावेऽपि रूपकं दृश्यते । यथा । "मुखं तव कुरङ्गाक्षि ! सरोजमिति नान्यथा" । क्वचिद्वैयधिकर-ण्येऽपि । यथा । "विदधे मधुपश्रेणीमिह भूलतया विधिः" । क्वचिद्वैधर्म्येऽपि यथा । "सौजन्याम्बुमरुस्थली सुचरिताम्भोरुहद्युभित्तिर्गुणज्योत्स्नाक्षणचतुर्दशी सरल-तायोगस्रजुच्छटा । यैरेषापि दुराशया कलियुगे राजावली सेविता तेषां मूर्द्धनि भक्तिभालतिलके सेवा कियत् कौशलम्" ॥ अत्र च केषाञ्चिद्रूपकाणां शब्दश्लेष-मूलत्वेऽपि रूपकविशेषत्वादर्थालङ्कारमध्ये गणनम् । एवं वक्ष्यमाणालङ्कारेषु बोद्धव्यम् । "अधिकारूढवैशिष्ट्यं रूपकं यत्तदेव तत्" । तदेवाधिकारूढवैशिष्ट्यमङ्गरू-रूपकम् । यथा । "इदं वक्त्रं साक्षाद्विरहितकलङ्कः शशधरः सुधाधाराधारश्चिरपरिणतं बिम्बमधरः । इमे नेत्रे रात्रिन्दिवमधिकशोभे कुवलये तदुल्लासस्थानां जल-धिरवगाढे सुखतरः" ॥ कलङ्करात्रित्वादिनाधिकम् ।

८८ रूपकातिशयोक्तिः "रूपकातिशयोक्तिः स्यात्सिद्धगीर्याध्यवसानतः" च० "पश्य नीलोत्पलदलश्रेणिरत्र निशितः शरः"

८९ ललितम् "प्रस्तुते वर्ण्यवाक्यार्थप्रतिबिम्बस्य वर्णनम्"। ललितं निर्गते नीरे हेतुमेघा चिकीर्षति च०।

९० लेशः "लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनम्"। च० "अखिलेषु विहङ्गेषु हन्त स्वच्छन्दचारिषु। शुक! पिञ्जरबन्धस्ते मधुराणां गिरां फलम्"। स०क०ह लवत्वेनायसक्तः।

९१ लोकोक्तिः "लोकप्रवादानुक्तिर्लोकोक्तिरिति" कथ्यते च०। "सहस्र कतिचिन्मासान् मौलयित्वा विलोचने"।

९२ विकल्पः "विकल्पस्तुल्यबलयोर्विरोधाद्वातुरीयुतः" च०। "सद्यः शिरांसि चापान् वा नमयन्तु महीभुजः"।

९३ विकस्वरः "यस्मिन् विशेषसामान्यविशेषाः स विकस्वरः"। च० "स न जिग्ये महानोहि दुर्जयाः सागरादृव"।

९४ विचित्रम् "विचित्रं तद्विरुद्धस्य कृतिरिष्टफलाय चेत् च०। "प्रणमत्युन्नतिहेतोर्जीवनहेतोर्विसृजति प्राणान्। दुःखीयति सुखहेतोः कोमूढः सेवकादन्यः"।

९५ वितर्कः "ऊहो वितर्कः सन्देहनिर्णयान्तरधिक्षितः। द्विधासौ निर्णयान्तश्चानिर्णयान्तश्च कीर्त्यते। तत्त्वानुपात्यतत्त्वानुपाती यथोभयात्मकः" स०कण्ठा०। तेषु निर्णयान्तस्तत्त्वानुपाती यथा। "मैनाकः किमयं रुणद्धि गगने मन्मार्गमभ्याहता शक्तिस्तस्य कुतः? स वज्रपतनाद्भीतो महेन्द्रादपि। तार्क्ष्यः सोऽपि समं निजेन विभुना जानाति मां रावणमा ज्ञातं स जटायुरेष जरसा क्लिष्टो वधं याच्छति"। स एवातत्त्वानुपाती यथा। "अस्याः सर्गविधौ प्रजापतिरभूच्छन्द्रो नु कान्तिप्रदः श्रृङ्गारैकनिधिः स्वयं नु मदनो मासोनु पुष्पाकरः। वेदाभ्यासज डः कथं नु विषयव्यावृत्तकौतूहलो निर्मातुं प्रभवेत् मनोरमिदं रूपं पुराणो मुनिः" चन्द्रादिव्यत्यतमेन प्रजापतिना भवितव्यमित्यतत्त्वानुपाती निर्णयान्तोवितर्कः। स एव उभयात्मा यथा "चित्ते निवेश्य परिकल्पितसत्त्वयोगाद्रूपोद्भवेन रचिता मनसा कृता नु। स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः" अत्र तत्त्वातत्त्वानुपातित्वादुभयात्मा निर्णयान्तो वितर्कः। अनिर्णयान्तो मिथ्याविषयो यथा। "अद्रेः श्रृङ्गं हरति पवनः किंस्विदित्युन्मुखीभिर्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः"। स एवाभिधारूपो यथा। "अयमसौ भगवानुत पाण्डवः स्थितमवाङ्मुनिना शमि मौलिना। समधिरूढमनेन च जिष्णुना स्खिदिति वेगवशान्मुदे गणैः"। स एव उभयात्मा यथा। माया स्विदेषा मतिविभ्रमो वा ध्वस्तं तु मे वीर्यमथाहमन्यः। गाण्डीव सक्ता हि यदा पुरा मे पराक्रमन्ते न शराः किरीटे"।

९६ विधिः "सिद्धस्यैव विधानं यत् तामाहुर्विध्यलङ्कृतिम्" च०। "पश्चमोदञ्चने काले कोकिलः कोकिलोऽभवत्"।

९७ विध्याभासः वस्तुनोवक्तुमिष्टस्य तु विशेषप्रतिपत्तये। निषेधाभास आक्षेपो वक्ष्यमाणोक्तगोद्विधा। अनिष्टस्य तथार्थस्य विध्याभासः परोमत इति" सा०द०। उदाहरणं तत्र ज्ञेयम्। आक्षेपभेद इत्यन्ये।

९८ विनोक्तिः "विनोक्तिः स्याद्विना किञ्चित् प्रस्तुतं हीनमुच्यते। तच्चेत् किञ्चिद्विना रम्यं विनोक्तिः सापि कथ्यते"। च० हीनत्वे "विद्या ह्रदयापि सावद्या विना विनयसम्पदम्"। रम्यत्वे "विना खलैर्विभात्येषा राजेन्द्र! भवतः सभा"। विनार्थगम्यतायामपि सा०द०। "निरर्थकं जन्मगतं नलिन्या यया न दृष्टं तुहिनांशुबिम्बम्। उत्पत्तिरिन्दोरपि निष्फलैव दृष्टा विनिद्रा नलिनी न येन"।

९९ विभावना "विभावना विनापि स्यात् कारणं कार्यजन्म चेत्१ हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सा मता२। कार्योत्पत्तिस्तृतीया स्यात् सत्यपि प्रतिबन्धके३ अकारणात् कार्यजन्म चतुर्थी स्याद्विभावना४। विरुद्धात् कार्यसम्पत्तिर्दृष्टा काचिद्विभावना५। कार्यात् कारणजन्मापि दृष्टा काचित् विभावना६" च०। क्रमेण यथा। "अपि लाक्षारसाऽसिक्तं रक्तं ते चरणद्वयम्"१। "अस्त्रैरतीक्ष्णकठिनैर्जगज्जयति मन्मथः"।२। "नरेन्द्रानेव ते राजन्! दशत्यसिभुजङ्गमः"।३। नरेन्द्रोद्वेषो गरुड़विद्याभिज्ञस्य दंशनप्रतिबन्धकगारुड़विद्या सन्निधानेऽपि दंशनोत्पत्तेस्तृतीया विभावना" "शङ्काहीनानिनादोऽयमिति मुहुरद्भुतम्"।४। "शीतांशुकिरणास्त्वेनां हन्त सन्तापयन्ति ताम्"।५। "यशःपयोराशिरभूत् करकल्पतरोस्तव"।६। दर्पणे तु "विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते। उक्तानुक्तनिमित्तत्वात् द्विधा सा परिकीर्त्तिता" इति लक्षयित्वा "विना कारणमुपनिबध्यमानोऽपि कार्योदयः किञ्चिदन्यत् कारणमपेक्षैव भवितुं युक्तं तच्च कारणान्तरं क्वचिदुक्तं क्वचिन्नेति" व्यवस्थाप्य उदाहृतम् "अनायासकृशं मध्यमगाधतरसे दृशौ। अभूषणमनोहारि वपुर्वयसि सुभ्रुवः"। अत्र वयोरूपं निमित्तमुक्तम् "वपुर्भाति मतभ्रुव इति पाठे तदनुक्तमिति भेदः।

१०० विरोधः "जातिद्रव्यक्रियाद्यैर्गुणो गुणादिभिस्त्रिभिः।

क्रिया क्रियाद्रव्याभ्यां यद् द्रव्यं द्रव्येण वा मिथः । विरुद्धमिवभासेत विरोधोऽसौ दयालतिः"। सा०द०क्रमेण यथा। "तव विरहे मलयमरुदावानलः शशिरुचोऽपि सोष्माणः । हृदयमलिरुतमपि भिन्ने नलिनीदलमपि निदाघविरसाः"। "सन्ततसंसर्गाद्गुरुतरसंस्कारकर्मघटनया रूपतो । द्विजपत्नीनां कठिनाः सति भवति कराः सरोजसुकुमाराः"। "अजस्य सृष्टयतो जन्म निरीहस्य हतद्विषः । स्वपतो जागरूकस्य यार्थ्यं वेद कस्यवः"?। "वल्गुभोत्सङ्गसङ्गेन विना हरिणचक्षुषः । राकाविभावरीजानिर्विषज्वालाकुलोऽभवत्"। "नयनयुगमेचनकं मानसहत्त्यापि दुष्प्रापम्। रूपमिदं मदिराक्ष्या मदयति हृदयं दुनोति च मे"। "त्वदाज्ञिराजीत्यादि" "वल्गुभोत्सङ्गेत्यादि" श्लोके चतुर्थपादे "मध्यन्दिनदिनाधिप" इति पाठे द्रव्ययोर्विरोधः । अत्र "तव विरहे"इत्यादौ पवनादीनां बहुव्यक्तिवाचकत्वाज्जातिशब्दानां दावानलोष्णहृदयभेदनस्वभावजातिगुणक्रियाद्रव्यरूपैरन्योन्यं विरोधो सुखत आभासते। विरहहेतुकत्वेन समाधानम् । अजस्येत्यादौ अजत्वादिगुणस्य जन्मसृष्ट्यादिक्रियाविरोधः । भगवतः प्रभावस्यातिशयितत्वात्तु समाधानम् । "त्वदाज्ञीत्यादौ" "हरोऽपि शिरसा गङ्गां न धत्ते" इति विरोधः। "त्वदाज्ञीत्यादिकविमोढोक्त्या तु समाधानम् । स्पष्टमन्यत् । विभावनायां कारणाभावेनोपनिबध्यमानत्वात् कार्यमेव बाध्यत्वेन प्रतीयते । विशेषोक्तौ च कार्याभावेन कारणमेव । इह त्वन्योन्यं द्वयोरपि बाध्यत्वमिति भेदः ।

१०१ विरोधाभासः ।"आभासत्वं विरोधस्य विरोधाभासउच्यते चन्द्रा० "अमित्रजिन्मित्रिजिदोजसा स यत् विचार दक्चारदगभ्यवर्त्तत"नैषधम् ।

१०२ विशेषोक्तिः "विशेषोक्तिः स्फुटं कविनाविपक्षतं यदि" च० । "इमामेहि परश्चेत्यादिति वक्ति सस्फुचनम्" ।

१०३ विशेषः "यदाधेयमनाधारमेकस्यानेकगोचरम् । किञ्चित् प्रकुर्वतः कार्यमथवाप्येतरस्य वा । कार्यस्याकरणं दैवाद्विशेषस्त्रिविधस्मृतः"। सा०द०क्रमेण यथा । "दिवमध्युपयातानामाकल्पसुखगन्धा येषाम् । रमयन्ति जगन्ति गिरः कथमपि कव्यो न ते वन्द्याः" । "कानने सरिदुद्देशे गिरीणामपि कन्दरे । मग्नस्यानन्तकसङ्गाशं त्वामेकं रिपवः शरैः"। "गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ । करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम्?" ।

१०४ विशेषोक्तिः"सति हेतौ फलाभावो विशेषोक्तिस्तथा द्विधा" सा०द० । तथेत्युक्तानुक्तनिमित्तत्वात् । तत्रोक्तनिमित्ता यथा ।"धनिनोऽपि निरुन्नादा युवानोऽपि न चञ्चलाः । प्रभवोऽप्यप्रमत्तास्ते महामहिमशालिनः"अत्र महामहिमशालित्वं निमित्तमुक्तम् । अत्रैव चतुर्थपादे "क्वियन्तः सन्ति भूतले" इति पाठे त्वनुक्तम् । अचिन्त्यनिमित्तत्वं च अनुक्तनिमित्तस्यैव भेद इति पृथग्नोक्तम् यथा "स एक शस्त्रोजयति जगन्ति कुसुमायुधः । हरतापि तनुं यस्य शम्भुना न हृतं बलम्" । अत्र तनुहरणेऽपि बला हरणे निमित्तमचिन्त्यम् । इह च कार्याभावः कार्यविरुद्धसद्भावसुखेनापि सा०द० ।

१०५ विषमम् । "गुणैः क्रिये वा यत् स्यातां विरुद्धे हेतुकार्ययोः । यद्वाऽऽरब्धस्य वैफल्यमनर्थस्य च सम्भवः । विरूपयोः सङ्घटना या च तद्विषमं मतम्"।सा०द०क्रमेण यथा।"सद्यः करस्पर्शमवाप्य चित्रं रणेरणे यस्य कृपाणलेखा । तमालनीला शरदिन्दुपाण्डु यशस्त्रिलोकाभरणं प्रस्तुते" । अत्र कारणरूपासितायाः "कारणगुणा हि कार्यगुणमारभन्ते" इति स्थितेर्विरुद्धा शुक्लयशस उत्पत्तिः । "आनन्दममन्दमिमं कुवलयदललोचने ! ददासि त्वम्। विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे" । अत्रानन्दजनकस्त्रीरूपकारणात्तापजनकविरहोत्पत्तिः । "अयं रत्नाकरोऽम्भोधिरित्यसेवि धनाशया । धनं दूरेऽस्तु वदनमपूरि क्षारवारिभिः" । अत्र केवलं काङ्क्षितधनलाभो नाभूत् प्रत्युत क्षारवारिभिर्वदनपूरणम् । "क्व वनं तरुवल्कभूषणं नृपलक्ष्मीः क्व महेन्द्रवन्दिता । नियतं प्रतिकूलवर्त्तिनोवत धातुश्चरितं सुदुःसहम्" । अत्र वनराजश्रियोर्विरूपयोः सङ्घटना ।

१०६ विषादनम् "दृश्यमाणविरुद्धार्थसंप्राप्तिश्च विषादनम्" च० । "दीपस्तद्दीपवेद्यावत्तावच्चिर्वाण एव सः"।

१०७ व्यतिरेकः "आधिक्यमुपमेयस्योपमानान्न्यूनतापवा । व्यतिरेक एक उक्ते हेतौ नोक्ते स च त्रिधा॥ चतुर्विधोऽपि साम्यस्य बोधनाच्छब्दतोऽर्थतः । आक्षेपाच्च द्वादशधा श्लेषेऽपीति त्रिरष्टधा । प्रत्येकं स्वान्विति त्यष्टचत्वारिंशद्विधः पुनः" ॥ सा०द० उपमेयस्योपमानादाधिक्ये हेतुरूपमेयगतस्तत्कर्षकारणमुपमानगतं निकर्षकारणञ्च । तयोर्द्वयोरप्युक्तावेकः" प्रत्येकं सप्तदशेन वानुक्तौ त्रिविध इति चतुर्विधेऽप्यस्मिन्नुपमानोपमेयस्य निवेदनं शब्देनार्थेनाक्षेपेण चेति द्वादशप्रकारोऽपि श्लेषेऽपिप्र-

व्दादशभेदेऽपि चतुर्विंशतिप्रकारः । उपमानान्यूनतायामनयैव भङ्ग्या चतुर्विंशतिप्रकारतेति मिलित्वाऽष्टचत्वारिंशत्प्रकारो व्यतिरेकः । उदाहरणम् । "अकलङ्कं सुखं तस्या न कलङ्की विधुर्यथा" । अत्रोपमेयगतमकलङ्कत्वमुपमानगतञ्च कलङ्कित्वं हयमभ्युक्तम् । यथाशब्दप्रतिपादनाच्च शाब्दौपम्यम्। अत्रैव "न कलङ्कि विधूपमम्" इति पाठे आर्षम् "जयतीन्दुं कलङ्किनमिति" पाठे तु इवादितुल्यादिपदविरहादाक्षिप्तम् । अत्रैवाकलङ्कपदत्यागे चोपमानगतनिकर्षकारणानुक्तिः" हयोरनुक्तौ हयोरनुक्तिः । श्लेषे यथा । "अतिगाढगुणायाच्च नाजवल्लङ्कुरा गुणाः"। अत्र इवार्थे वतिरिति शाब्दौपम्यम् उत्कर्षनिकर्षकारणयोर्हयोरनुक्तिः । गुणशब्दः श्लिष्टः । अन्ये भेदाः पूर्ववदूह्याः । एतानि चोपमेयस्योपमानादाधिक्ये उदाहरणानि । न्यूनत्वे दिङ्मात्रम् । यथा । "चीणः चीणोऽपि शशी भूयोभूयोऽभिवर्द्धते नित्यम् । विरम प्रसीद सुन्दरि! यौवनमनिवर्त्ति यातं तु"॥"अत्रोपमेयभूतयौवनास्थैर्यस्याधिक्यं तेनात्र "उपमानादुपमेयस्याधिक्ये विपर्य्यये वा व्यतिरेक इति" केषाञ्चिल्लक्षणे "विपर्य्यये वेति पदमनर्थकमिति" यत् केचिदाहुः तन्न विचारसहम् । तथा ह्यत्राधिक्यन्यूनत्वे सत्त्वासत्त्वे एव विवक्षिते । अत्र च चन्द्रापेक्षया यौवनस्थासत्त्वं स्फुटमेव । अस्तु वातोदाहरणे कथञ्चिद्गतिः । "हनूमदाद्यैर्यशसा मया पुनर्द्विषां हृत्सैर्दृतपथः सितीकृतः" ॥ इत्यादिषु का गतिरिति सुधीभिः "न्यूनताया वेति" ।

१०८ व्याघातः "व्याघातः स तु केनापि यस्तु येन यथा कृतम् तेनैव चेदुपायेन कुरुतेन्यस्तदन्यथा । । सौकर्य्येण च कार्य्यस्य विरुद्धं क्रियते यदि२। सा०द० "इयादृग्धं मनसिजं जीवयन्तिदमेव याः"। "इहैव त्वं तिष्ठ द्रुतमहमहोभिः कतिपयैः समागन्ता कान्ते! सुदृशि नचावासमहना । सुदृत्वं मे हेतुः सुभग! भवता गन्तुमधिकं न सुहृदो मोढा यद्विरहकृतमायासमसमम्" ॥ अत्र विदेशं जिगमिषुणा नायकेन नायिकायाः सुदृत्वं सङ्गमनाभावहेत्वेनोक्तं नायिकया तु प्रत्युत सङ्गमने ततोऽपि सौकर्य्येण तदेव हेतुतयोक्तम् ।

१०९ व्याजनिन्दा "निन्दायानिन्दया व्यक्तिर्व्याजनिन्देति गीयते" च०। "विधेः स निन्द्योयस्तेप्रागेकमेवाक्षरच्छिदः"। अत्र एकशिरोहर्तृ शिवनिन्दाव्याजेन विधेर्निन्दाया व्यक्तिः।

११० व्याजस्तुतिः "उक्ता व्याजस्तुतिः पुनः । निन्दास्तुतिभ्यां ताभ्यां गम्यते स्तुतिनिन्द्ये" । सा०द० । निन्दाया स्तुतेर्गम्यत्वे व्याजेन स्तुतिरिति व्युत्पत्त्या व्याजस्तुतिः स्तुत्या निन्दाया गम्यत्वे व्याजरूपा स्तुतिः । क्रमेण यथा । "स्तनयुगसङ्गाभरणाः कण्टककलिताङ्गयष्टयो देव! त्वयि कुपितेऽपि प्रागिव विश्वस्ता रिपुस्त्रियो जाताः" ॥ "व्याजस्तुतिस्तव पयोद! मयोदितेयं यज्जीवनाय जगतस्तव जीवनानि । सोढव्यन्तु ते सकृदिदं घन! धर्म्मराजसाहाय्यमर्ज्जयसि यत् पथिकाद्विरुद्ध" ॥

१११ व्याजोक्तिः "व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनम्" च०।"सखि! पश्य स्फटिकारामपरागैरिव धूसरा" ।

११२ गुह्यापञ्चुतिः "गुह्यापञ्चुतिरन्यसारोपार्थे धर्म्मनिह्नवः" । च० "नायं सुधांशुः किं तर्हि? व्योमगङ्गासरोरुहम्"।

११३ श्लेषः शाब्दोऽलङ्कारः आर्थश्च शाब्दस्तूक्तः २८६ पृष्ठे आर्थो यथा "शब्दैः स्वभावादेकार्थे श्लेषोऽनेकार्थवाचनम्" सा०द०। स्वभावादेकार्थैरिति शब्दश्लेषाद्व्यवच्छेदः । "सर्व्वदो माधवःपायात् स यो गङ्गामदीधरत्"।

११४ संसृष्टिः "यद्येत एवालङ्काराः परस्परविभिन्नाश्रिताः । तदा पृथगलङ्कारौ संसृष्टिः सङ्करस्त्वया" सा०द० "देवः पायादपायान्नः श्रीरेन्दीवरलोचनः । संसारध्वान्तविध्वंसहंसः कंसनिसूदनः। अत्र पायात्पायादिति यमकम् श्रीरेन्दीवरेत्यादौ चानुप्रास इति शब्दालङ्कारयोः, संसारध्वान्तेत्यत्र उपमा, हंस इत्यत्र रूपकमित्यर्थालङ्कारयोः, शब्दार्थालङ्कारयोश्च परस्परानपेक्षयैवात्र संसर्गः ।

११५ सङ्करः "अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितः । सन्दिग्धत्वे च भवति सङ्करस्त्रिविधः पुनः" सा०द० । तत्राङ्गाङ्गिभावे यथा।"आक्रष्टश्लेषविगलद्भुजगेन्द्रभोगनिर्म्मोकपट्टपरिवेष्टनयाम्बुराशेः । मन्थव्यथाव्युपशमार्थमिवाशु यस्य मन्दाकिनी चिरमवेष्टत पादमूले" । अत्र निर्म्मोकपट्टापङ्गवेन मन्दाकिन्या आरोप इत्यपह्नुतिः । सा च मन्दाकिन्या वस्तुवृत्तेन यत्पादमूलवेष्टनं तच्चरणमूलवेष्टनमिति श्लेषसत्त्वापयतीति तस्याङ्गम् श्लेषस्य पादमूलवेष्टनमेव चरणमूलवेष्टनमित्यतिशयोक्तेरङ्गम् अतिशयोक्तिश्च "मन्थव्यथाव्युपशमार्थमिव" इत्युत्प्रेक्षाया अङ्गम् । उत्प्रेक्षा चाम्बुराशिमन्दाकिन्योर्नायकनायिकाव्यवहारं गमयतीति समासोक्तेरङ्गम् । यथा वा । "अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः । अहो दैवगतिश्चित्रा तथापि न समागमः" ॥ अत्र समासोक्तिर्विशेषोक्तेरङ्गम् । सन्देहसङ्करो यथा । "इदमाभाति गगने भिन्नानं सन्ततं तमः । खमन्दनेत्रनानन्दकरं मण्डलमैन्दवम्" ॥ अत्र किं तमस

चन्द्रत्वाध्यवसानादतिशयोक्तिः, उत इदमिति सुखं निर्दिश्य चन्द्रत्वारोपाद्रूपकं, अथ वा इदमिति सुखस्य चन्द्रमण्डलस्य च इयोरपि प्रकृतयोरेकधर्म्माभिसम्बन्धात्तुल्ययोगिता, आहोस्विच्चन्द्रस्याप्रकृतत्वाद्दीपकं किं वा विशेषणसाम्याद-प्रस्तुतस्य सुखस्य गम्यत्वात् समासोक्तिः, यद्वा अप्रस्तुतस्य सुखस्यावगतिरित्यप्रस्तुतप्रशंसा, यद्वा मन्मथोद्दीपनः कालः स्वकार्यभूतचन्द्रवर्णनासुखेन वर्णित इति पर्य्यायोक्तिरिति बहूनामलङ्काराणां सन्देहात् सन्देहसङ्करः। यथा वा सुख-चन्द्रं पश्यामीत्यत्र किं सुखं चन्द्र इवेत्युपमा उत चन्द्र एवेति रूपकमिति सन्देहः साधकबाधकयोर्द्वयोरेकतरस्य सद्भावे पुनर्न सन्देहः। यथा "सुखचन्द्रं चुम्बति" इत्यत्र चुम्बनं सुखस्यानुकूलमित्युपमायाः साधकम्। चन्द्रस्य तु प्रतिकूलमिति रूपकस्य बाधकम्, "सुखचन्द्रः प्रकाशते" इत्यत्र प्रकाशाख्यो धर्म्मो रूपकस्य साधको मुखे उपचरितेन सम्भवतीति नोपमाबाधकः। "राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम्"। अत्र योषित आलिङ्गनं नायकस्य सदृशेनोचितमिति लक्ष्म्यालिङ्गनस्य राजन्यस-म्भवादुपमाबाधकं नारायणे सम्भवाद्रूपकम्। "एवं वदान-म्बुजमेणाक्ष्या भाति चञ्चललोचनम्"। अत्र वदने लोच-नस्य सम्भवादुपमायाः साधकता, अम्बुजे चासम्भवाद्रूप-कस्य बाधकता। एवं "सुन्दरं वदनाम्बुजम्" इत्यादौ साधारणधर्म्मप्रयोगे, "उपमितं व्याघ्रादिभिः सामान्या-प्रयोगे" इति वचनादुपमासमासो नं सम्भवतीति उपमाया बाधकः। एवञ्चात्र मयूरव्यंसकादित्वाद्रूपकसमास एव। एकाश्रयानुप्रवेशो यथा। "कटाक्षेणापीषत् क्षणमपि निरीक्षेत यदि सा तदानन्दः सान्द्रः स्फुरति पिहितात्मेतर-विषयः। सरोमाञ्चोद्भूतैकचकलशनिर्भिन्नवसनः परीरम्भा-रम्भः क इव भवितास्मीरहृदयः"॥ अत्र "कटाक्षेणा-पीषत्क्षणमपि" इत्यत्र क्षेकानुप्रासस्य "निरीक्षेत" इत्यत्र क्षकारमादाय इत्यनुप्रासस्य चैकाश्रयेऽनुप्रवेशः। एवं चात्रैवानुप्रासार्थापत्त्यलङ्कारयोः। यथा वा। "कुरवका रवकारवतां वपुरिति" अत्र रवकारवका इत्येकं वकारव-कार इत्येकमिति यमकयोः। सा०द०।

११६ सन्देहः "स्यात् क्वतिभ्यान्निसन्देहैस्सदृङ्गालङ्कृतित्रयम्" च०"पङ्कजं वा सुधांशुर्वा अब्जाक्षन्तु न निर्णयः"॥

११७ समम् "समं स्यादानुरूप्येण ज्ञाधार्योन्यस्य वस्तुनः"। सा०द० "अधिनसुपगतेयं कौसुदी मेघसङ्गं जलनिधि-मनुरूपं जह्नुकन्याऽवतीर्णा"। आनुरूप्यञ्च कारणा-नुरूप्यं तदन्यानुरूप्यम् इष्टपदार्थस्यावश्यसिद्धिहेतुकत्वञ्च। "सरूपमपि कार्य्यस्य कारणेन समं विदुः। विना यत्नेन। तत्सिद्धिर्यदयं कर्त्तुमुद्यममिति" च०उक्तेः तत्का-रणानुरूप्यसङ्गम् कारणानुरूप्यं यथा "नीचप्रवणता लक्ष्मि! जलजायास्वयोचिता"। इतीयं यथा "युक्तोया-रत्नलाभोऽयं भूपतेर्वारणार्थिनः"।

११८ समाधिः "समाधिः सुकरे कार्य्ये दैवाद्यत्नान्तरागमात्" च०। "मानमस्यानिराकर्त्तुं पादयोर्मे पतिष्यतः। उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम्"। सं० कण्ठा० तु "समाधि मन्यधर्म्मांणामन्यत्रारोपणं विदुः। निरङ्गेदोऽत्र सोङ्गेदः स द्विधा परिपठ्यते" इति लक्षितम्। उदाहरणं द्रष्टव्यम्।

११९ समासोक्तिः "समासोक्तिः समैर्यत्र कार्य्यं लिङ्गविशेषणैः। व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः" सा०द०॥ तत्र समेन कार्य्येण प्रस्तुतेऽप्रस्तुतव्यवहारसमारोपः यथा। "व्याधूय यद्वसनमम्बुजलोचनाया वक्षोजयोः कनककुम्भविलास-भाजोः। आलिङ्गसि प्रमदमङ्गमशेषमस्या धन्यस्त्वमेव मलयाचलगन्धवाह!"। अत्र गन्धवाहे हठकामुकव्यवहार-समारोपः। लिङ्गसाम्येन यथा। "असमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः। अनाक्रम्य जगत् कृत्स्नं नो सन्ध्यां भजते रविः"॥ अत्र पुंस्त्वोल्लिङ्गत्वसाम्येन रविसन्ध्ययोर्नायकनायिकाव्यवहारः। विशेषणसाम्यन्तु श्लिष्टतया साधारण्येनौपम्यगर्भत्वेन च त्रिधा। तत्र श्लिष्टतया यथा। "विकसितसुखो रागासङ्गाद्गलत्ति मिराततिं दिनकरकरस्पृष्टामेन्द्रीं निरीक्ष्य दिशं पुरः। जरठलवलीपाण्डुच्छायो भृशं कलुषान्तरः त्यजति हरितं हन्त प्राचेतसीं तनुहिनद्युतिः"॥ अत्र सुखरागादि श्लिष्टता। अन्यदुदाहार्य्यम् सा०द०।

१२० संसृष्टयः "संसृष्टयोऽयमेकस्मिन् सति कार्य्यस्य साधके। खलेकपोतिकान्यायात्तत्करः स्यात् परोऽपि चेत्॥ गुणौ क्रियेवा युगपत् स्यातां तद्वा गुणक्रिये" सा०द०। यथा। "हंहो धीर! समीर! हन्त जननं ते चन्दनश्लाघितो दाक्षिण्यं जगदुत्तरं परिचयो गोदावरीवारिभिः। प्रत्यङ्गं दहसीह मे त्वमपि चेद्दुह्यादवाग्निवन्मत्तोऽयं मलिनात्मको वनचरः किं वक्ष्यते कोकिलः"॥ अत्र दाहे एकस्मिंश्चन्दनभूरुज्झन्मरुमे कारणे सत्यपि दाक्षिण्यादीनां हेत्वन्तराणामुपादानम्। अत्र सर्व्वेषामपि हेतूनां शोभनत्वात् सद्योगः। अतैव चतुर्थपादे मत्ता-दीनामशोभनानां योगादसद्योगः। सदसद्योगो यथा।

"यथा दिवसधूसरो गलितयौवना कामिनी सरो विगत-वारिजं सुखमनक्षरं स्वाक्षतेः। प्रभुर्धनपरायणः सतत-दुर्गतःसज्जनो नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे"॥ "अरुणे च तरङ्गि! नयने तव मलिनञ्च प्रियस्य मुखम्। सुखमानतञ्च सखि! ते ज्वलितवाक्शानरे खरज्वलनः"॥ अत्रादोर्ऽङ्गे गुणयोर्यौगपद्यं हितीये क्रिययोः। उभयो-र्यौगपद्ये यथा। "कलुषञ्च तवाक्षितेष्वकस्मात् सितपङ्के रुहसोदरश्रि चक्षुः। पतितञ्च महीपतीन्द्र! तेषां वपुषि प्रस्फुटमापदां कटाक्षैः॥ "धुनोति चासिं तनुते च कीर्त्तिम्" इत्यादावेकाधिकरण्येऽप्येष दृश्यते।

१२१ सम्बन्धातिशयोक्तिः "सम्बन्धातिशयोक्तिः स्यादयोगे योग कल्पनम्। योगेऽप्ययोगसम्बन्धातिशयोक्तिरितीर्य्यते"२ च० "सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमण्डलम्"।१। "त्वयि दातरि राजेन्द्र! सर्व्वमाचाट्टियामहे"।

१२२ सम्भवः "प्रभूतकारणालोकात् स्यादेवमिति सम्भवः। स विधौ१ वा निषेधे२ वा हवे३ वा नह्येऽपि वा"४ स०क० क्रमेण यथा "त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे न स्यात् सिन्धोः पृथुरपि ततो दूर भावात् प्रवाहः। प्रेङ्खिश्यन्ते गगनगतयो न्यूनभावञ्च दृष्टीरेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम्"। अत्र उक्तरूपेण दृश्योभविष्यतीति विधेः सम्भाव्यमानत्वादयं विधिरूपसम्भवः अत्रैव पूर्व्वार्द्धे सिन्धुप्रवाहस्य पृथुत्व निषेधरूपसम्भवश्च एवंविधनिषेधतदुभयानात्मकसम्भवयो रुदाहरणे द्रष्टव्ये।

१२३ सम्भावनम् "सम्भावनं यदीदं स्यादित्यूहोऽन्यस्य सिद्धये" च०। "यदि त्रिलोकी गणनापरा स्यात्तस्याः समाप्तिर्यदि नायुषः स्यात्। पारेपरार्द्धं गणितं यदि स्याद् गण्येयनिः-शेषगुणोऽपि स स्यात्"।

१२४ सहोक्तिः "सहार्थस्य बलादेकं यत्र स्याद्वाचकं द्वयोः। सा सहोक्तिर्मूलभूतातिशयोक्तिर्यदा भवेत्" सा०द०। अति-शयोक्तिरप्यभेदाध्यवसायमूला कार्य्यकारणपौर्व्वापर्य्य-विपर्य्ययरूपा च। अभेदाध्यवसायमूलापि श्लेष-निमित्ता अन्यथा च क्रमेणोदाहरणम्। "सहाधर-दलेनास्या यौवने रागभाक् प्रियः" अत्र रागपदे श्लेषः। "सह कुसुदकदम्बैः कामसुल्लासयन्तः सह घनतिमि-रौघैर्धैर्य्यसत्त्वाहरयन्तः। सह सरसिजषण्डैः स्वान-मामीलयन्तः प्रतिदिशमसृतांशोरंशवः सञ्चरन्ति"॥ अत्रो-ल्लासादीनां सम्बन्धिभेदादेव भेदो न तु क्लिष्टतया।

१२५ सामान्यम् "सामान्यं प्रकृतस्यान्यतदात्म्यं सदृशैर्गुणैः"। च० "मल्लिकाचितधम्मिल्लाश्चारुचन्दनचर्चिताः। अवि-भाव्याः सुखं यान्ति चन्द्रिकासभिसारिकाः।

१२६ साम्यम् "द्वयोर्यत्रोक्तिवार्त्तयांदौपम्यार्थोऽवगम्यते। उप-मारूपकान्यत्वे साम्यमित्यामनन्ति तत्। तदानन्त्येन भेदानां संख्यानं तस्य दुष्करम्। दृष्टान्तोक्तिः प्रपञ्चोक्तिः प्रतिवस्तूक्ति रेव च। तत्रेवादेः प्रयोगेण दृष्टान्तोक्तिं प्रचक्षते। इवा-देरप्रयोगेण प्रपञ्चोक्तिं मनीषिणः। वस्तु किञ्चिदुपन्यस्य न्यसनात् तत् सधर्म्मणः। साम्यप्रतीतिरुक्तीति प्रतिवस्तूक्ति-रुच्यते। तत्र क्रियाजातिगुणद्रव्ययोगादिहेतुके। साम्ये पूर्व्वादिभेदेन दृष्टान्तोक्तिर्विधीयते" स०क०॥ तत्र क्रिया-निमित्तम् "स्थितः स्थितासङ्गलितःप्रयातां निषेदुषीमास-नबन्धधीरः। जलाभिलाषी जलमाददानां आवेव तां भूपतिरन्वगच्छत्"॥ इदं पूर्व्वम्। उत्तरं यथा। "रूपं तदोजस्वि तदेव वीर्य्यं तदेव नैसर्गिकमुन्नतत्वम्। न कारणात् स्वाद्विभेदे कुमारः प्रवर्त्तितो दीप इव प्रदीपात्"। अन्यान्युदाहार्य्याणि।

१२७ सारः "उत्तरोत्तरमुत्कर्षो वस्तुनः सार उच्यते"। च० "मधुरं मधु, पीयूषं तस्मात्, तस्मात् कर्वेर्वचः"।

१२८ सूक्ष्मम् "संलक्षितस्तु सूक्ष्मार्थ आकारेणेङ्गितेन वा। कयापि सूच्यते भङ्ग्या यत्र सूक्ष्मं तदुच्यते"। सा०द०सूक्ष्मः स्थूल-मतिभिरसंलक्ष्यः। तत्राकारेण यथा। "वक्त्रस्यन्दिस्वेदबिन्दु प्रबन्धैर्द्दा भिन्नं कुङ्कुमं कापि कण्ठे। पुंस्त्वं तन्वी व्यञ्जयन्ती वयस्या स्मित्वा पाणौ खड्गलेखां लिलेख" अत्र कयाचित् कुङ्कुमभेदेन संलक्षितं कस्याश्चित् पुरुषा-यितं रतं पाणौ पुरुषचिह्नखड्गलेखालिखनेन सूचितम्। इङ्गितेन यथा। "सङ्केतकालमनसं विटं ज्ञात्वा विद-ग्धया। हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम्"॥ अत्र विटस्य भ्रूक्षेपादिना लक्षितः सङ्केतकालाभिप्रायो रजनिकालभाविना पद्मनिमीलनेन प्रकाशितः।

१२९ लोकोक्तिः "लोकोक्तिर्यत्र लोकोक्तिः स्यादर्थान्तरगर्भिता"। च० "भुजङ्ग एव जानीते भुजङ्गाचरणं सखे"।

१३० स्मरणम् "सदृशानुभवाद्दस्तुस्मृतिः स्मरणमुच्यते"। सा०द० "अरविन्दमिदं वीक्ष्य खेलत्खञ्जनमञ्जुलम्। स्मरामि वदनं तस्याश्चारुचञ्चललोचनम्"। स० कण्ठा० तु भेदो-दर्शितः। "सदृशादृष्टचिन्तादेरनुभूतार्थवेदनम्। स्मरणं प्रत्यभिज्ञानरूपमपि न तद्वहिः"। तत्र सदृशवस्तुदर्शन जन्यं स्मरणमुदाहरणे। अदृष्टहेतुकं यथा "सुनिस्तुताप्रणय-

स्मृतिरोधिना मम विमुक्तमिदं तमसा मनः। मनसिजेन सखे! प्रहरिष्यता धनुषि चूतशरश्च निवेशितः" । अत्र कस्यचिता यत्नलताप्रथयस्मृतिविरोधिना अज्ञानेन मम मनो विमुक्तमित्यादृष्टकृतं स्मरणम् न सदृशवस्तुदर्शनजन्यम्। चिन्ताजन्यम् यथा "पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां विपर्य्यासं यातो घनविरलभावः क्षितिरुहाम्। अहो दृष्टं कालादपरमिव जातं वनमिदं निवेशः शैलानां तदिदमिति बुद्धिं जनयति,, । अत्र प्रत्यक्षेषु स्रोतस्तरुवनादिषु चिन्ताजन्यत्वात् चिन्तोद्भूतं स्मरणम् आदिपदग्रहात् परप्रयत्नादपि यथा "दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन। स्मृतिकारिका त्वया मे पुनरपि चित्रीकृता बाला"। अत्र परप्रयत्नजन्यत्वात्तथात्वम्। प्रत्यभिज्ञानं यथा। "सर्गः पुरा परिचितो नियतं स एवसंजीवनश्च मनसः परिमोहनश्च"। अत्र य एव पूर्वानुभूतः स एवैषः इति प्रत्यभिज्ञा स्मरणम्। स्वप्नरूपं यथा। नागानन्दे "अद्य खलु स्वप्ने जानामि सैव प्रियतमा अत्र चन्दनलताम्हे चन्द्रकान्तमणिशिलायामुपविष्टा प्रणयकुपिता किमपि मानुषलभमानेव रुदती मया दृष्टा" जीमूतवाहनेन विदूषकसमीपे स्वप्नस्य वर्णनम्। स्वप्नप्रत्यभिज्ञयोः पूर्वानुभूतसंस्कारजातत्वात् स्मरणत्वम्।

१२१ स्वभावोक्तिः "नानावस्थं पदार्थानां रूपं साक्षाद्विवृण्वतो। स्वभावोक्तिश्च जातिश्चेत्याख्या सालङ्कृतिर्मता" दण्डी "तुण्डैः रागाक्तकुटिलैः पक्वैर्हरितकोमलैः। त्रिवर्णैराजिभिः कण्ठैरेजे मञ्जुगिरः शुकाः"। "कलकणितगर्भेण कण्ठेनार्पयितेक्षणः। पारावतः परिष्वज्य रिरंसुरुपगूहति प्रियाम्"। "बध्नन्न मन्दरोभाङ्गं कुर्वन् मनसि निर्वृतिम्। नेत्रे वामीकृत स्नेह प्रियास्पर्शः प्रवर्त्तते"। "कण्ठेकालः करस्थेन कपालेनेन्दुशेखरः। जटाभिः स्निग्धताम्राभिराविरासीद्वृषध्वजः"। "जातिक्रियागुणद्रव्यस्वभावाख्यानमीदृशम्। यास्वेषु स्यैव साक्षाच्च काव्येषु तदीक्षितम्" । इयं जातिरपि ।

१२२ हेतुः "हेतोर्हेतुमता सार्द्धं वर्णनं हेतुरुच्यते १। हेतु हेतुमतोर्वैक्यवर्णनं हेतुरुच्यते२,,। "च॰ असावुदेति शीतांशु र्मानग्लेदेन सुभ्रुवाम्,,१। "लक्ष्मीविलासोभवतः कटाक्षावेक्षणं प्रभो ! २।

१२३ हेत्वपह्नुतिः "युक्ता स एव पूर्वं हेतूच्यते हेत्वपह्नुतिः।" च॰ स एव धर्म्मनिश्चय एव। "नेन्दुस्त्रीणां न निष्कर्षः सिन्धोरौर्व्योऽवधारितः"। अत्रेऽलङ्काराएवैवानर्भूताः। देह भूषणानि च शिरस्कादीनि तानि च प्रायान्वादष्टौ "शिरस्कटं हारः कुण्डलं चाङ्गदं तथा। कङ्कणं वलयञ्चैव मेखलेत्यष्टौ वरम्,, वरं प्रधानं तेन अप्रधानानि षाट्कटकादीन्यपि। तत्र भूषणद्रव्याणि "पद्मरागश्च वज्रञ्च गोमेदो विजयस्तथा। शुक्ता वैदूर्य्यनीलानि तथा मरकतादयः। सुवर्णेनापि घटना सर्वेषामुपदिश्यते। प्रधानभूषणेष्वेवमप्रधाने न निश्चयः। प्रधानभूषणं प्रायः शिरसोर्द्ध्वं विधीयते,, । भरु॰ "सुखदा मथयः शुद्धा दुःखदा दोषशालिनः" युक्ति क॰ नवालङ्कारधारणे विहितनवत्वादि यथा "रेवत्यश्विधनिष्ठासु हस्तादिष्वपि पञ्चसु। गुरुशुक्रबुधाहेषु वस्त्रालङ्कारधारणम्" ज्योति॰ अत्रापवादः "उद्वाहे राजसम्माने ब्राह्मणानाञ्च सम्मतौ। अनिष्टेष्वपि निर्हृष्टं वस्त्रालङ्कारधारणम्"। ऐनायकयोरङ्गजादिभावभेदेषु ते च यथा "यौवने सत्वजास्तासामष्टाविंशतिसंख्यकाः। अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः। शोभा कान्तिश्च दीप्तिश्च माधुर्य्यञ्च प्रगल्भता। औदार्य्यं धैर्य्यमित्येते सप्तैव स्युरयत्नजाः। लीला विलासोविच्छित्तिर्विब्बोकः किलकिञ्चितम्। मोट्टायितं कुट्टमितं बिब्बोकललितं मदः। विक्रतं तपनं मौग्ध्यं विक्षेपश्च कुतूहलम्। हसितं चकितं केलिरित्यष्टादशसंख्यकाः। स्वभावजाश्च भावाद्याद्य पुंसां भवन्त्यपि"। पूर्व्वे भावादयो धैर्य्यान्ता दश नायकानामपि सम्भवन्ति किन्तु सर्व्वेऽप्यमी नायिकाश्रिता एव विशिष्यन्ति विशेषं पुष्णन्ति" सा॰द॰ उक्ताः। एषां लक्षणानि तत्तच्छब्देवक्ष्यन्ते। ७अनगुरौ चतुष्कले"॥३हारे गणभेदे च ॥ [समर्थे धनादौ।

अलङ्कुमारि स्त्री॰ अलंकुमार्य्यै तद्वरणार्थे। कुमारीभरणे।

अलङ्कृत त्रि॰ अलम्+कृ-कर्म्मणि क्त। भूषिते मण्डिते। "अदोषं गुणवत् काव्यमलङ्कारैरलङ्कृतम्" सा॰द॰ "सत्कृतालङ्कृतां कन्यां वोढ्दाति स कूजद" इत्यमरः।

अलङ्कृति स्त्री अलम्+कृ-भावे क्तिन्। १भूषणे करणे क्तिन्। २भूषणसाधने अलङ्कारशास्त्रोक्ते ३उपमाद्यलङ्कारे च "तदोषौ शब्दार्थावनलङ्कृती पुनःक्वापि" काव्य॰प्र॰ "यो विद्वान् मन्यते काव्यं शब्दार्थावनलङ्कृती। असौ न मन्यते कस्मादनुष्णमनलङ्कृती" चन्द्रा॰।

अलङ्क्रिया स्त्री अलम्+कृ-भावे य। भूषायाम्।

अलङ्गामिन् त्रि॰ अलं पर्य्याप्तं गच्छति गामि स्त्रियांङीप्। गमनसमर्थे रिपुं प्रति गन्तरि।

अलङ्घनीय त्रि॰ न लङ्घनीयः। अनतिक्रमणीये। "तत्त्वमितरा नाद्दौ नेदं सिन्धावगाधता। अलङ्घनीयता-हेतुरुभयं तन्मनस्विनि" माघः।

अलङ्घ्य त्रि० न लङ्घ्यः । अनतिक्रमणीये । "लिलङ्घयिषतो लोकानलङ्घ्यानलघोयसः" माघः ।

अलजी स्त्री अला पर्य्याप्ता सती जायते जन–ड गौरा० ङीष् । सुश्रुतोक्ते सन्निपातरोगभेदे यथा । "पूयानसः सोपनाहः स्रावा पर्व्वणिकालजी । क्रमिपन्थिच वित्तेवा रोगाः सन्निपाता नव" । तल्लक्षणं तत्रैव "जाता सन्धौ शुक्लरुग्णोऽलजी स्रात्तस्मिन्नेवास्थापिता पूर्व्वलिङ्गैः" इति ।

अलज्जा स्त्री न लज्जा विरोधे न० त० । १धार्ष्ट्ये अभावे न० त० । २लज्जाभावे । न० ब० । ३लज्जाशून्ये त्रि० ।

अलक्षुर पु० अलं सामर्थ्यं क्षृणाति क्षृ–अच् ष्ट० उत्० मणिबन्धे अलिङ्गरे वड्डजलाधारे (जाला) हस्तमये पात्रे । [धनादौ ।

अलक्षौविक त्रि० अलं जीविकायै ४त० । जीविकापर्य्याप्ते

अलक्षुध त्रि० अलं क्षुध्यते कर्म्मणि वा० क । भक्षणपर्य्याप्ते मांसादौ । "अथ तच्छृतस्य परिहरन्ति तदलक्षुधम्" शत० ब्रा० "मांसं हि जोषाय भक्षणायालं पर्य्याप्तंभवति" भा० ।

अलति पु० अल–वा अतिच् । गीतिमार्गकायाम् स्वरसाधनार्थे सारिगामादिस्वरभेदे तदुपक्रमेणैव हि गीतेः प्रारम्भात्तेषां गीतिमार्गकात्वम् ।

अलन्धन त्रि० अलं प्रभूतं धनमस्यस्य अच् । पर्य्याप्तधने समृद्धे । "निरादिष्टधनेषु प्रतिभूःस्राद्धनवन्धनः" मनुः ।

अलन्तराम् अव्य० अलम्+अतिशये तरप् आम् । अत्यर्थं पर्य्याप्तप्रादार्थे । "पुरोडाशभुजाभिष्टमिष्टं कर्त्तुमलन्तराम्" माघः । एवं तमप् आम् । अलन्तमाम् तत्रैवार्थे अव्य० ।

अलन्धूम पु० अलमत्यर्थो धूमः । धूमसमूहे जटाध० । [श्रीधरः ।

अलब्ध त्रि० न लब्धः । प्राप्तभिन्ने "अलब्धस्य प्राप्त्युपायोयोगः"

अलभ्य त्रि० न लभ्यः । अप्राप्ये । "रोगे चालभ्ययोगे च सीमन्ते पुंसवेऽपि च । यद्ददाति सुहृष्टः पूर्व्वतापि न दुष्यति" कालमा० मरी० "अलभ्ययोगे पुनरप्राप्तसम्बन्धनिमित्ते अयौचान्तदिवसे पूर्व्वत्र मलमासे" शु० त० रघु० ।

अलम् अव्य० अल–वा० असु १भूषणे "जनविलीमलङ्कृते यः प्रत्यय इव स्त्रियम्" अस्य उपपदसंज्ञा अलङ्कृत्य "अलङ्कृत्य सुतादानं देवं धर्म्मं प्रचक्षते" मनुः । २सामर्थ्ये यङ्लो "विनाग्यक्रदलमूभूष्णु रिज्यायै तपसः सुतः" "कथा हि खलु पापानामलमन्येषसे यतः" इति च माघः "वरेण यमितं लोकानलं दग्धुं हि तत्तपः" कुमा० ३पर्य्याप्तौ ४संपूर्णतायां ५प्राचुर्य्ये "प्रतिभूःस्राद्धनवन्धनः" मनुः "अलमस्यस्य धनम् अच् बहुधनत्वार्थः कुल्लु० । ७वारणे, "अलं विवादेन यथा श्रुतं त्वया" कुमा० "अलं विवादेन यमोविधीयताम्" भट्टाना० ८निषेधे "आलयालमिदं वध्वोर्यत् स दारानपाहरत्" माघः ९निरर्थकत्वे १०अलङ्कारे ११अवधारणे १२अत्यर्थे च गद्गद० ॥ "विजयायेत्यलमनवद्यान्युनिर्मास्" किरा० "अलं भूयः" भट्टि० । लक्षणा रः अरम् । तदर्थे अरङ्कृतशब्दे उदा० ।

अलम्पशु पु० अलं यज्ञे निरर्थः पशुः । "अप्रयत्ने पशौ "अलम्पशोरपशोर्वा" कात्या० १६,१,४, पशुर्योग्यः सन् यो नाम पशुत्वमिन्द्रते सोऽलम्पशुरपशुः" कर्क० ।

अलम्पुरुषीण पु० अलं समर्थः पुरुषाय "अवडक्षेत्रादिना" पा० खार्थे ख । युद्धादिसमर्थे प्रतिमल्लादौ पुरुषे ।

अलम्बुद्धि स्त्री अलम् व्यर्था बाधितविषयत्वात् पर्य्याप्ता वा बुद्धिः । मिथ्याबुद्धौ, पर्य्याप्तबुद्धौ च । "पक्षेऽपि नालम्बुद्धिमवाप" किरा० १२,३६, श्लोक० व्या० मल्लि० ।

अलम्बुष पु० अलं पुष्णाति पुष–क षु० पस्य बः । १वमने ऋषौ । २प्रहस्ते रावणमन्त्रिराक्षसे ३घटोत्कचहते राक्षसभेदे च "अलम्बुषं तथा युद्धे विचरन्तमभीतवत् । हैडिम्बिः प्रययौ तूर्णम्" इत्युपक्रम्य "रिपुं निहत्याभिननन्द वै तदा कृतम्बुषं पक्वमलम्बुषं यथा" भा० द्रो० प० । अलम्बुषनामानौ च द्वौ राक्षसौ कुरुक्षेत्रयुद्धे समागतौ अयमेको घटोत्कचेन निहतः भी० प० अपरोपि निहतः इत्यविरोधः । ४अप्सरोभेदे तच्छब्दे विवृतिः । ५सरघीस्थाम् मेदि० हैमन्यालु लतायाम् ७अन्याप्रवेशार्थं दत्तजलरेखायाञ्च स्त्री राज० । तस्याः फलम् अच् लुप् तत्फले न० । "कृतम्बुषं पक्वमलम्बुषं यथा" भा० द्रो० प० ।

अलम्भूष्णु त्रि० अलम्+सामर्थ्ये भू–ष्णुच् । "समर्थे "विनाग्यक्रदलम्भूष्णु रिज्यायै तपसः सुतः" माघः ।

अलय पु० न लयः विरोधे न० त० । १लयविरोधिनि उद्भवे । "शक्रादिष्वपि लोकेषु त्रयमाणो लयालयौ" रामा० अभावे न० त० । २विनाशाभावे । नास्ति लयोयस्या २अवस्थानशून्ये भगवच्छीले "स्थानमानमति काङ्क्षिमालया" माघः "लयो लयनं क्वचिदवस्थानं नास्ति यस्याः" मल्लि० ३विनाशशून्ये च त्रि० ।

अलम्बुसा पु० ब० व० । देशभेदे ।

अलर्क पु० अलमर्कतेऽर्च्यते वा अर्क–अच् अर्च–घञ् वा शक० । १श्वेतार्कवृक्षे २चित्रकुक्कुरे ३क्षत्रियभेदे च स च भा० शा० प० दर्शितः यथा "अथ क्षमिः क्षेत्रमेदोमांसशोणितभोजनः । दारुणो दारुणस्पर्शः कर्कशाभ्यासमागतः । स तस्योर-

मघासाद्य विभेद रुधिराशनः। न चैनमशकत् वेधुं हन्तुं वापि गुरोर्भयात्। स दह्यमानस्तु तया क्रमिणा तेन भारत! । गुरोः प्रबोधनायङ्गी तमुपैक्षत सूर्य्यजः। कर्णस्तु वेदनां धैर्यादसह्यां विनिगृह्य ताम्। अक्लमयन्नव्यथयन् धारयामास भार्गवम्। तदास्य रुधिरेणाङ्गं परिस्रुतं भृगूद्वहः। तदाऽबुध्यत तेजस्वी सन्नस्यस्वेदमब्रवीत्। अहोऽशुचिताम्भाग्नः किमिदं क्रियते त्वया। कथवस्व भयं त्यक्त्वा याथातथ्यमिदं मम। तस्य कर्णस्तदाचष्ट क्रमिणा परिभक्षणम्। ददर्श रामस्तं चापि क्रमिं शूकरसन्निभम्। अष्टपादन्नोच्छ्रयंदंष्ट्रं सूचिभिरिव संवृतम्। रोमभिः सन्निरुद्धाङ्गमलर्कं नाम नामतः। स दृष्ट्वा रामेण क्रमिः प्राणानवासृजत्। तस्मिन्नेवासृजि क्लिन्नछदङ्गुतमिवाभवत्। ततोऽन्तरीक्षे ददृशे विश्वरूपः करालवान्। राक्षसो लोहितग्रीवः कृष्णाङ्गो मेघवाहनः। स रामं प्राञ्जलिर्भूत्वा बभाषे पूर्णमानसः। स्वस्ति ते भृगुशार्दूल । गमिष्यामि यथागतम्। मोक्षितो नरकाद्दस्याद्भवता मुनिसत्तम! । भद्रन्तु तेऽस्तु वन्दे त्वां प्रियं मे भवता कृतम्। तमुवाच महाबाहुर्जामदग्न्यः प्रतापवान्। कस्त्वं कस्माच्च नरकं प्रतिपन्नो ब्रवीहि तत्। सोऽब्रवीद्दस्युसं प्राग्दंशो नाम महासुरः। पुरा देवयुगे तात! भृगोस्सुखवया इव। सोऽहं भृगोः सुदयितां भार्य्यामपहरं बलात्। महर्षेरभिशापेन क्रमिभूतोऽमतं भुवि। अब्रवीद्धि स मां क्रोधात्तव पूर्व्वपितामहः। मूलच्छेदाशनः पाप निरयं प्रतिपत्स्यसे। शापस्यान्तो भवेदुग्रक्षत्रियैर्वं तमथाब्रुवम्। भविता भार्गवाद्रामादिति मामब्रवीद्भृगुः"।

अलपस् न०न रपः पापम् न०त० रस्य लः। अपापे पुण्ये।

अलबाल न० लबमालाति ला–क न०त०। वृक्षसेकार्थे वृक्षमूले कृदादिकृते जलाधारे वेष्टने स्वार्थेऽण्। आलवालमप्यत्र।

अलस त्रि० न लसति व्याप्रियते लस–अच्। अवश्यकर्त्तव्येषु शरीरापाटवमभिनीय १कृताप्रयासे, "मृदुतरतनवोऽलसाः प्रकृत्या" माघः अयुक्तः प्राकृतः स्वल्पः शठो नैकृतिकोऽलसः। २क्रियामन्दे च (पाकुँड) ३पादरोगभेदे, ४वृक्षभेदे च पु०।५हंसपदीलतायां स्त्री। पादरोगो यथा "क्लिन्नाङ्गुल्यन्तरौ पादौ कण्डूदाहरुजान्वितौ। दृष्ट्वा कर्दम संस्पर्शादलसं च विभावय" पादौ सिक्थारनालेन लेपनं हरितालजं हितम्" इति च सुश्रुतः। गर्गादिगणपाठात् ४सुनिभेदे ततः स्वार्थे यञ् आलस्यस्तदर्थेऽलोहिता०यूनि फक्आलस्यायनः। अलसस्य भावः ष्यञ्। आलस्यम् न०तल् अलसता स्त्री त्व अलसत्वं न०। क्रियाकरणाय अप्रयत्ने।

अलसक पु० न लसति अनेन लस करणे–बा०वुन्। १रोगभेदे। यथाह सुश्रुतः "अजीर्णभामं विष्टब्धं विदग्धं च यदीरितम्। विसूच्यलसकौ तस्माद्भवेताम्" इत्युपक्रम्य "कुक्षिरानह्यतेऽत्यर्थं तास्यत्यत्यर्थं च कूजति। निरुद्धोमारुतोवापि कुक्षावुपरि धावति। वातवर्चोनिरोधश्च यस्यात्यर्थं भवेदपि। तस्यालसकमाचष्टे तत्त्रयोद्वारौ च यस्य तु"। तच्चिरुक्तिरपि अन्यत्र दर्शिता "प्रयाति नोर्द्धं नाधस्ताद्दाहारो न च पच्यते। आमाशयोऽलसीभूतस्तेन सोऽलसकः स्मृतः"। अलस+स्वार्थे कन्। २अलस शब्दार्थे त्रि०।

अलात पु० न० । ला–क्त न०त०। (कोयाला) इति ख्याते (आङ्गार) इति ख्याते च अर्द्धदग्धकाष्ठे। "निर्वाणालातसाधर्म्यम्" कुमा०।

अलाढ्य त्रि० अलमत्यर्थमाढ्या आतर्दना: अलम्+आ+ढद नि० दस्य न लोपश्च। आतर्दनशीले। "अलाढ्यासो विदथेषु सुष्टुताः" ऋ०१,१६६,७, "अलाढ्यासः अलमत्यर्थं शत्रूणामातर्दनाः" भा०।

अलाबु स्त्री न लम्बते न+लबि–उ णित् नलोपश्च ढत्वि:। (लाउ), तुम्ब्याम्। वा ऊङ्। अलाबूपात्र। "अलाबूं वर्त्तुलाकारां वार्ताकुं कुन्दसन्निभाम् स्मृतिः"।

अलाबुमय त्रि० अलाबु+विकारे मयट्। शुष्कालाबुत्वङ्निर्मिते पात्रे "यतिपात्राणि रुद्रेणुदार्वलाबुमयानि च। सलिलैः शुद्धिरेतेषां गोवालैश्चावधर्षणम्" या० स्मृतिः।

अलाबूकट न० अलाबूनां रजः अलाबू+रजोऽर्थे कटच्। तुम्बीरजसि।

अलाभ पु० न लाभः अभावे न०त०। १लाभाभावे "नायं नलः खलु तवातिमहानलाभः" नैष०। "सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ" गी०। "अलाभे चैव कन्यायाः स्नातकव्रतमाचरेत्" स्मृतिः "अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत्" मनुः। न०ब०। २लाभशून्ये त्रि०।

अलाय्य त्रि० अ–आय–रस्य लः। १गमनशीले २अभिलष्य गन्तरि शत्रौ च। "अलाय्यस्य परशुर्ननाश" ऋ०८,६७,३०, "अलाय्यस्य अभिगमनशीलस्य शत्रोः" भा०।

अलार न० अरार्थं ते ऋ–यङ् लुक् अच् रस्य लः। कपाटे शब्दरत्न०।

अलास पु० न लसति अनेन लस–करणे घञ् न०त०।

जिह्वागतरोगभेदे यथाह सुश्रुतः। "जिह्वागास्तु कण्ठकाख्यविधाख्यभिर्दोषैरसाध्य उपजिह्विका च" इत्युक्त्वा "जिह्वाऽनिलेन स्फुटिता प्रसुप्ता भवेच्च शाकच्छदनप्रकाशा। पित्तेन पीता परिदह्यते च चिता सरक्तैरपि कण्टकैश्च। कफेन गुर्वी बद्धलाचिता च मांसोद्गतैः शोणितकण्टकाभैः। जिह्वातले यः श्वयथुः प्रगाढः सोऽलासंज्ञः कफरक्तमूर्त्तिः। जिह्वां स तु स्तम्भयति प्रवृद्धो मूलेतु जिह्वा ऋगमेति पाकम्"। स तु असाध्यरोगः यथोक्तं तत्रैव। "असाध्या अपि वक्ष्यन्ते रोगा ये यत्र वादशा" इत्युपक्रम्य "जिह्वागतेष्वलासस्तु तालव्येष्वुदितं तथा" इत्यध्यायं "असाध्याः कीर्त्तिताह्येते रोगा नव दशैव च"

अलि पु० अलति दंशे, कूजिते, गच्छिते, वा समर्थो भवति अल–इन्। १भ्रमरे, "अलमलेरिव गन्धरसावहम्" माघः। "श्यामीभूताः कुसुमसमूहेऽलीनाम्" "मङ्क्षूदपति पटलैरलीनाम्" इति च माघः "अलिपङ्क्तीरनेकगस्त्वया" कुमा०। २वृश्चिके, ३काके, ४कोकिले, ५वृश्चिकराशौ च स च द्वादशधा विभक्तराशिचक्रस्याष्टमो भागः विशाखाद्यपादानुराधाज्येष्ठारूपः। ६सुरायां च।

अलिक न० अल्यते भूष्यते अल–कर्म्मणि इकन्। ललाटे। "असंस्कृतालकिनीमलिकलेखाम्" काद०।

अलिकुलसङ्कुल पु० अलिकुलेन सङ्कुलः व्याप्तः। १कुवलये राजनि०। २भ्रमरकुलव्याप्ते त्रि०"अलिकुलसङ्कुलकुसुमनिराकुलनवदलमालतमाले" जयदेवः।

अलिगर्द्द पु० अलिरिव वृश्चिक इव स्पर्द्धते स्पर्ध–अच्। (आलय) इतिख्याते सर्पभेदे शब्दर०।

अलिगु पु० अलिरिव दुःसहा गौर्वाणी अस्य। गर्गादिगणपठिते ऋषिभेदे। ततः गोत्रे यञ् आलिगव्यः। तदपत्ये पुंस्त्री०स्त्रियां तु लोहिता० फक्। आलिगवायनी।

अलिङ्ग त्रि०नास्ति लिङ्गं ज्ञापकहेतुश्चिह्नं वा यस्य। १अनुमापकहेतुशून्ये २चिह्नशून्ये च। वेदान्तिमतसिद्धे परमात्मनि पु०। न०त०। लिङ्गभिन्ने ३अननुमापके तच्च सांख्यमते "हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्। सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्" सा०का० उक्तमव्यक्तम्। "अकार्य्यं नित्यं व्यापि अक्रियम् एकमनाश्रितमलिङ्गमनवयवं स्वतन्त्रमव्यक्तमिति" सा०त०कौ०। तद्धि न कस्यापि लिङ्गम् कार्य्येण कारणानुमानमिह विवक्षितं तेन सहस्यकारित्वेन परार्थतया तस्य पुरुषानुमाकत्वेऽपि न क्षतिरिति च तत्रानुसन्धेयम् "तदलिङ्गमेकद्रव्यत्वात् कर्म्मणः" वै०सू०। "कर्म्म न तावत् समवायिकारणतया आकाशमनुमापयति कर्म्मच एकद्रव्यत्वात् एकमात्रमूर्त्तसमवायिकारणत्वात्" वै०सू० उ०। ४दुष्टचिह्ने च। [भिन्ने ब्रह्मचारिप्रभृतौ।

अलिङ्गिन् त्रि० न लिङ्गी वेषधारी। कपटवेषधारिणि।

अलिजिह्वा स्त्री अलिरिव क्षुद्रा जिह्वा। जिह्वामूलस्थायां क्षुद्रजिह्वायाम् (आलजिभ) स्वार्थे कन् अत इत्त्वम्। तत्रैव।

अलिञ्जर पु० अलनमलिः अल–इन् तं जरयति जॄ–अच् ष्टषो० सम्। (जाला) इति ख्याते मृण्मये जलाधारे पात्रभेदे मणिके। "उदकान्तमुपानीय मत्स्यं वैवस्वतो मनुः। अलिञ्जरे प्राक्षिपत्तं चन्द्रांशुसदृशप्रभम्" भा०व०प०।

अलिदूर्व्वा स्त्री अलिरिवाकारेण दूर्व्वा। मालादूर्व्वायाम्।

अलिन् पु० अलं इष्टिकपुञ्जस्थकण्टकं विद्यतेऽस्य इनि, अल–इनि वा। १इष्टिके, २भ्रमरे च। "मलिनिमाऽलिनि माधवयोषिताम्" माघः स्त्रियां ङीप् अलिनी "रमतालिनी शिलीन्ध्रे" माघः।

अलिन त्रि० अल–वा० इनन्। पर्य्याप्ते तपोभिरतिवृद्धे। "आ एक्यासोभलानसोभनन्नालिनासो विषाणिनः" ऋ० ७।१८।७। "अलिनाः तपोभिरतिवृद्धाः" भा०।

अलिन्द पु० अल्यते भष्यते अल+कर्म्मणि किन्दच्। १द्वार प्रकोष्ठे २बहिर्द्वारवर्त्तिनि चत्वराकारे प्रदेशे। "यस्यालिन्देषु न चक्रुरेव सुरभाङ्गना गोमयगोमखानि:" माघः २बहिर्द्वारभागमात्रे ३देशभेदे ४वृद्धेयतालिनि५तद्राजनि च ब०व०। "अलिन्दाः कालवाश्चैव कुरुटकाः करटा खगा" भा० उ० प० जम्बूखण्डविभागे प्राच्यजनपदभेदे। गौरादिगणपाठात् स्त्रियां ङीष्। अलिन्दी।

अलिपक पु० कुत्सितवर्णेन लिप्यते लिप–वा० कर्म्मणि वुन्। १कोकिले २भृङ्गे ३कुक्कुरे च मेदि०।

अलिपत्रिका स्त्री अलिर्द्रष्टिक इव पत्रमस्याः वा कपि ह्रस्व इत्त्वम्। वृश्चिकपत्राख्यलतायाम्। अलिपर्ण्यपि।

अलिप्रिय न०ष०त०। १कोकनदे रक्तोत्पले २भ्रमरप्रिये त्रि० ३पाटलावृक्षे राजनि०।

अलिमक पु० अलिरिव मक्कते–मक्क अच् पृ०कलोपः। १भेके २कोकिले ३भृङ्गे ४मधूकवृक्षे ५पद्मकेसरे च मेदि०।

अलिमोदा स्त्री अलीन् मोदयति मुद+णिच्अच्। गणिकारीवृक्षे

अलिम्यक पु० कुत्सितं लिप्यते वर्णेन लिप–वा कर्म्मणि म न०त० संज्ञायां कन्। १भृङ्गे २कोकिले ३मधूकवृक्षे ४भेके ५पद्मकेसरे च।

अलिल् पु०क्ष–इलच् रस्य लः। वेदान्तप्रसिद्धे गगनचारिणि षड्भेदे–अलिलः पक्षिणः पुत्रो गगनाद्याति भूतलम्। स्वबोधाभावतः, स स्वबोधे यात्यम्बरं पुनः"। वेदा० वा०। अलिन इति पाठस्तु सम्यक्।

अलिवल्लभ पु० ६त०। १फलेरुहाडचे २पाटलौ।

अलिवाहिनी स्त्री अलिं याहयति गन्धेन वह–णिच–णिनि ङीप्। कोङ्कणदेशप्रसिद्धे कदाकाडचे।

अलीक न० अल–ईकन् १अप्रिये, २असत्ये, ३खराटे, च। अलति गच्छत्यधोऽनेन। ४असत्ये। मिथ्याकथने हि नरकपातः। तत्र अप्रिये "गुरोरालीकनिर्बन्धः समानि ब्रह्महत्यया" मनुः "तद्यथा स सङ्गारोऽलीकमधिगच्छति" रामा०। विशेषेण अलीकम् व्यलीकम् अत्यन्तार्थे "व्यलीकनिश्वासमिवोत्ससर्ज" कुमा०। अलीकस्यस्य सुखा०इनि न ठन्। अलीको तद्वति त्रि० स्त्रियां ङीप्। अलीके भवः दिगा० यत् अलीक्यः। मिथ्याभूतभवे त्रि०।

अलीकमत्स्य पु० "मार्षपिष्टिकयालिङ्ग्य नागवल्लीदलैर्वृतम्" तत्तु संखेदवेद्युक्त्वा स्वाख्यामङ्गारकोपरि। ततोनिष्काषितं खण्ड्यं तिलतैलेन भर्जयेत्। अलीकमत्स्यउक्तोऽयं प्रकारः पाकपण्डितैः। तं हृत्वाक्षं भटित्वेण वास्तूकेन च भक्षयेत्" राजनि०उक्तोपिटकभेदे।

अलु स्त्री अल–उन्। जुद्रकलखाम्।

अलुक्समास पु०नास्ति विभक्तेः लुक्–यत्र। विभक्तेर्लुक्शून्ये समासे यथा मनसिजः सरसिजमित्यादि।

अलुब्ध त्रि० न लुब्धः। निर्लोभे लोभशून्ये।

अलूच त्रि० न रूक्षः वेदे रस्य लः। रूक्षभिन्ने स्निग्धे "अलूक्षाधर्म्मकायाः" तैत्ति०उ०।

अलेपक त्रि० नास्ति लेपः संबन्धोयस्य वा कप्। निस्सम्बन्धे परात्मनि पु०। लिप–ण्वुल् न०त०। लेपकभिन्ने त्रि०।

अलोक पु०न लोक्यते लोक–कर्म्मणि घञ्। अक्षदादिभिरदृश्ये १पातालादौ २अदृश्यमात्रे त्रि० "लोकालोकइवाचलः" रघुः। लोकालोकयतीति विग्रहे। ३लोकशून्ये निर्जने त्रि० ३लोकशून्ये रक्षसि च न०"रक्ष सर्व्वानिमान् लोकान् नालोकं कर्त्तुमर्हसि" रा०।लोकस्याभावः अभावे अव्ययी०।४लोकाभावे अव्य०। नास्ति लोकोभोग्यलोको यस्य। ५अकृतपुण्ये त्रि०६तत्त्रिगादौ ७अलोका ऋत्विजः यत० ब्रा० तेषां दक्षिणाग्रहणेन पुण्यभागित्वाभावात् च भोग्यलोकशून्यत्वम्। ७दृष्टकाभेदे स्त्री अलोका इष्टका उपदधाति"। लोकते कर्तरि घञ्। दर्शकभिन्ने।

अलोक्य त्रि० लोकाय स्वर्गादिलोकप्राप्तये हितः तत्र साधुर्वा यत् न०त०। स्वर्गादिलोकासाधने। "यदलोक्यामग्निचित्याहुरथ किमर्चैषीरिति "सहोवाच किं नु लोक्यं किमलोक्यम् लोक्या यतायुतेत्येवाहुस्तद्वह पुरायुषः स्वःकामी न प्रेयादलोक्यं हि तत्" शत०ब्रा० "यथास्यो हिजते वाचा नालोक्यां तामुदीरयेत्" मनुः।

अलोभ पु०लोभःधनादिष्वतितृष्णा अभावे न०त०। धनादिष्वतितृष्णाभावे। लोभोहि सत्यास्तेयापरिग्रहविरोधी १सति हि लोभे सत्यादयो लुप्यन्ते। "लोभस्य पुरतः केऽमी सत्यास्तेयापरिग्रहाः"प्रबो च०। "लोभात् सद्यः प्रणश्यन्ति सत्यास्तेयापरिग्रहाः" पुरा० अतएव "लोभस्य यमादिप्रतिपक्षत्वं पातञ्जले उक्तम् "वितर्कबाधने प्रतिपक्षभावनम्" एतेषां यमनियमादीनां वितर्कैः हिंसादिसंकल्पैः "हननाख्येवम्" "खण्डनं वक्ष्यामि" "परस्मादास्ते" इत्येवंरूपैः बाधने प्राप्ते सति यमपरः ब्राह्मणः प्रतिपक्षभावनं कुर्य्यादित्यर्थः।

अलोभिन् त्रि०अलोभोस्यस्य इनि लोभोऽनुपदं व्याख्यातः। तच्छून्ये "अलोभी स्यात् प्रजावित्ते मत्सरी वात् सम्मितं करम्" भा०शा०प०।

अलोल त्रि० न लोलः। १अचञ्चले २विष्णौ च।

अलोलुप त्रि० न०त०। लोभनीयद्रव्येन्द्रियसन्निधानेऽपि अविक्रिये लोभशून्ये पुरुषे।

अलोह पु० पाणिन्युक्ते नड़ादिगणीये ऋषिभेदे। गोत्रापत्ये नड़ा०फक् आलोहायनः। तस्य गोत्रापत्येषु०स्त्री०।

अलोहित न०त०। १लोहितभिन्ने रक्तताशून्ये। नास्ति लोहितं यस्मात्। २रक्तपद्मे रत्नमाला।

अलौकिक त्रि० लोके विदितः ठक् न०त०। लोकेषु अविदिते स्त्रियां ङीप्। "अधिहरि हरि डिः इत्यलौकिकं विषयवाक्यम्" सि०कौ०। इन्द्रियादिलौकिकसन्निकर्षाभावेऽपि २सामान्यलक्षणाद्यधीने प्रत्यक्षे न० इति नैयायिकाः तथाहि प्रत्यक्षं द्विविधं लौकिकमलौकिकञ्च। आद्यं चक्षुरादिजन्यमन्यं तदजन्यम्। तत्र सामान्यलक्षणादिसन्निकर्षजन्यमलौकिकम् ते च सन्निकर्षा अनुपदं वक्ष्यन्ते।

अलौकिकसन्निकर्ष पु० लोकेषु अविदितः सन्निकर्षः। "अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः। सामान्यलक्षणा ज्ञानलक्षणा योगजोमत" इति भाषा० उक्ते प्रत्यक्षसाधनसन्निकर्षभेदे सामान्यलक्षणादिलक्षणं

च तत्सच्छब्दे वक्ष्यते तथाहि यत्किञ्चिद्घटादौ चक्षुःसन्निकर्षे घटत्वसामान्यधर्म्मज्ञानेन सकलघटादिज्ञानं सामान्यलक्षणाधीनं घटादिज्ञाने न घटादिज्ञानं ज्ञानलक्षणाधीनम्, योगविशेषजनितं सकलघटज्ञानं च एतत्त्रयमलौकिकं प्रत्यक्षं तस्य च अलौकिकत्वात् तदुत्तरं तत्तद्विषये साक्षात्करोमीति नानुव्यवसायः किन्तु जानामीत्येवानुव्यवसाय इति भेदः ।

अल्प त्रि० अल्प-प । १क्षुद्रे, २दैवदर्वे, ३स्वल्पे, ४अरणार्हे । "अथ यदल्पं तन्मर्त्यम्" छा० उ० । स्वार्थे कन् अल्पकमप्यत्र । ५यवासे पु० । अल्पत्वञ्च यस्य वस्तुनः यावती द्रव्यत्वादिजातिरुचिता ततोन्यूनत्वम् तत्त्वं च परिमाणभेदः अपेक्षाबुद्धिविशेषविषयत्वमपकर्षाधायकधर्म्मविशेषो वा तेन द्रव्यगुणादिधर्म्मत्वं तस्य । तच्च जातिगुणक्रियाद्रव्येषु भवति अल्पा नदी अल्पः श्यामः अल्पं ज्ञानं अल्पः पाकः अल्पोऽवकाशः । "क्वचाल्पविषया मतिः" रघुः । "अल्पप्रयोजनक्लेशैरुत्तरप्रयासैः" माघः । "प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते" मनुः । अस्य गुणपरतापि "करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्येति" पाणिन्युक्तेः अल्पान्मुक्तः अल्पतया मुक्त इत्यर्थः । वीप्सार्थे शस् । अल्पशः अव्य० । "पतितापतत्तैरल्पशः" पा० । अस्य संख्यावद्गुणवचनत्वात् अतिशायने इष्ठन् ईयसुन् च । अल्पिष्ठः अल्पीयान् स्त्रियां ङीप् । "संख्यायाः अल्पीयस्याः" वार्त्ति० अत्र प्रकृतेर्वा कन् । कनिष्ठः कनीयान् "कनीयान् इयसुन्स्तृज्ञेतृ" स्मृतिः "भ्राता ज्येष्ठः कनिष्ठो वा" स्मृतिः । भावे इमनिच् अल्पिमा पु० अञ् आल्पम् पु० स्त्री तल् अल्पता । स्त्रीत्व-अल्पत्वं न० क्षुद्रपरिमाणे ।

अल्पकेशी स्त्री अल्पः केश इव पत्रमस्याः । भूतकेशीवृक्षे ।

अल्पगन्ध न० अल्पो गन्धोयस्य । १रक्तकैरवे । २स्वल्पगन्धयुक्त मात्रे त्रि० । एकान्तसम्बन्धे इच् समा० । अल्पगन्धिः तत्रैव त्रि० ।

अल्पतनु त्रि० अल्पा क्षुद्रपरिमाणा तनुः शरीरं यस्य १खर्व्वे, २दुर्बले, ३स्वल्पास्थियुक्ते च । पत्रके २क्षुद्रमात्रे च ।

अल्पपत्र पु० अल्पं पत्रं यस्य । १क्षुद्रपत्रयुक्ततुलसीभेदे स्वल्प-

अल्पपद्म न० अल्पमसम्पूर्णं पद्मम् । रक्तकमले रत्नमा० ।

अल्पप्रमाण पु० अल्पं प्रमाणमस्य वा कप् । (तरमुज) (खरमुज) वा इति ख्याते वृक्षे २अल्पप्रमाणयुक्ते त्रि० ।

अल्पप्राण पु० अल्पः प्राणः प्राणनक्रिया यस्मिन् । वर्णभेदे यस्योच्चारणे अल्पप्राणवायोर्व्यापारस्तस्मिन् । स च यिञा-

वासुक्तः 'अयुग्मवर्गयमगायणश्चाल्पासवः स्मृताः" इति तथा च वर्गेषु प्रथमद्वितीयपञ्चमवर्णाः यमगाः यवरलाश्च अल्पासवः । कर्म्म० । २ताडशवर्णोच्चारणवान्वाच्यत्रे । बाह्यप्रयत्नास्तु एकादशधा "विवारः संवारः श्वासोनादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति" सि० कौ० । अल्पः प्राणः प्राणहेतुकं बलमस्य । २अल्पबले त्रि० । [शाके]

अल्पमारिष पु० अल्पः मारिषः शाकः कर्म्म० । (नटिया)

अल्पमेधस् त्रि० अल्पा मेधाऽस्य असिच् समा० । अल्पधारणायुक्तबुद्धौ धारणा च दृढसंस्कारः ।

अल्पपच त्रि० अल्पं पचति पच-घञ् ख मुम् उप० स० १मितव्यये आत्मम्भरौ कृपणे । करणस्य कर्त्तृत्वविवक्षायाम् । २अल्पपाकसाधने पात्रादौ ।

अल्पगमी स्त्री कर्म्म० । क्षुद्रायां गम्यां गम्याकारे क्षुद्रवृक्षे ।

अल्पसर न० अल्पं सरः कर्म्म० । (डोवा) क्षुद्रजलाशये ।

अल्पायुस् पु० अल्पमायुः जीवनकालो यस्य । १छागे पशुभे तस्यैवाल्पायुष्कत्वात् तथात्वम् । २अल्पजीवनकाले त्रि० । "दुराचारोहि पुरुषो लोके भवति निन्दितः । दुःखभागी च सततं व्याधितोऽल्पायुरेव च" मनुः वा कप् अल्पायुष्कोऽप्यत्र । कर्म्म० । यस्य यावदायुरुचितं ततोऽल्पमिते । जीवनकाले ३आयुश्च जीवनकालः "शतायुर्वै पुरुषः" इति श्रुतेः शतवर्षावच्छिन्नजीवनकालोनराणामादुः । एवमन्येषामायुःपरिमाणमायुःशब्दे वक्ष्यते । तत्र विशेषकालतायां ज्योतिषोक्तपञ्चयोगस्य सूचकता यथा जातकालङ्कारे । "आयुर्मूलं जन्मिनां जीवनं स्यादाजीवानां निर्जराणां सुधेव । एवमाहुः पूर्व्वमाचार्य्यवर्य्यास्तस्मादायुर्योगजाख्यं प्रवक्ष्ये । लग्नाधीशोऽतिवीर्य्यो यदि शुभविहगैर्वीक्षितः केन्द्रयातैर्दत्ते हृद्यायुः सुदीर्घं गुणगणरहितं श्रीयुतं मानवानाम् । सौम्याः स्त्रीयालयस्था जनुषि च रजनीनायके स्त्रीयतुङ्गे वीर्य्याढ्ये लग्ननाथे वपुषि च शरदां षष्टिरायुर्नराणाम् ॥ सौम्याः केन्द्रालयस्थावपुषि सुरगुरौ लग्ननाथो सुधांशोरायुर्युक्तं न हृष्टं न च गगनगतैः सप्रतिवेत्तरराणाम् । याता मूलत्रिकोणे शुभगगनचराः स्त्रीयतुङ्गे सुरेज्ये लग्नाधीशोऽतिवीर्य्यो गगनवसु ८० समासंख्यमायुर्नराणाम् ॥ सौम्ये केन्द्रेऽतिवीर्य्ये यदि निधनपदं खेटहीनं समाः स्युस्त्रिंशत् सौम्येक्षितं चेद्गगनरिपुकरैः संयुतोऽद्य स्वभे चेत् । खल्वांशे चामरेज्ये सुनिनयन २७ मितं स्वर्गगो लग्नगो वा चन्द्रोद्यूने शुभे चेद्-

गगनरसमितं ६० कोणगाः सौम्यखेटाः ॥ कोटे लग्ने सुरेज्ये यदि भवति तदा खाष्ट ८०तुल्यं लवेगे धर्माङ्के-बाङ्गनाथे निधनभवनगे क्रूरदृष्टेऽम्बुहस्ताः२४ । लग्नाधी शाष्टनाथौ लयभवनगतौ सप्तविंशत् २७ विलग्ने क्रूरेज्यो चन्द्रदृष्टौ यदि निधनगतः कथनास्ते हिमघ्नाः २२॥ लग्नेन्दू क्रूरहीनौ वपुषि सुरगुरौ रन्ध्रभं खेटहीनं केन्द्रे सौम्ये खशैलाः ७० सितविबुधगुरू स्याच्छतं १०० केन्द्र-गौ चेत् । वागीशे कर्कलग्ने शतमिह भृगुजे केन्द्रगेऽर्काकं-सूनौ धर्माङ्गस्थे सुधांशौ व्ययनवमगते द्वायनानां शतं स्यात् ॥ धीकेन्द्रायुर्नवस्था यदि खलखचरा नो गुरोर्भे विलग्ने केन्द्रे काव्ये गुरौ वा शतमथ निधनं सौम्य दृष्टं शतं स्यात् । लग्नादिन्दोर्न खेटा यदि निधन-गता वीर्यभाजौ सितेज्यौ पूर्णायुः स्रोयरागौ शुभगगन-चराः षष्टिरङ्गोऽङ्गगेज्ये ॥ कोदण्डान्त्याङ्गमङ्गं यदि सकल-खगाः खोऽङ्गगा वे निजांशे गोस्थे पूर्णे च केन्द्रे सुरगुरुभृगुजो लाभगेऽजे परायुः । शुक्रे नीचे तनुस्थे निधनपदगते सौम्यदृष्टे सुधांशौ जीवः केन्द्रे शतं स्यादथ तनुसुहृत्पञ्चिदङ्गः पुष्करेऽजे॥ वागीशोवीर्यदुक्तो नवमभवनगाः सर्वखेटाःशतायुः कर्केऽङ्के चन्द्रजीवौ सहजरिपुभगे स्यात् कवित्तौ च केन्द्रे । केन्द्रे सूर्यार-मन्दायुरूनवलवगा वाक्पतौ लग्नयाते व्यष्टस्थानेषु शेषाः शरगज ८५ कलितं स्याच्छराणां तदायुः ॥ क्रूराः सौम्यां-शयाता उपचयसहगाः २,६,१०,११, कातराः कण्टक १,४,७,१०स्थाः सौम्या व्योमार्कसङ्ख्य १२०यदि तपनसुजौ रन्ध्रगो नो परायुः । केन्द्रे लग्नेऽजजीवौ नवसुतनिलये कण्टके१४,७१०,नो ख लाख्याःसम्पूर्णं पापखेटायदि गुरुल-बगा जीवभागे च सौम्याः।युग्मर्क्षांशे गता वा व्ययधनसहगाखे च्युताः शीतभानुः सम्पूर्णो लग्नयायी शतमिह हि रुषा-मिन्दिरामन्दिरं स्यात्। लग्नेशः सौम्ययुक्तो वपुषि च लयपो रन्ध्रगो नाष्टदृष्टो विंशत् केन्द्रे लवेगे बलवियुजि तथा लग्नपे त्रिंशदायुः॥ इन्दावापोक्लिमस्थे ३,६,८,१२, तदनु तनुपतौ निर्बले पापदृष्टे दलैस्तुल्यं२२ततोऽर्कोऽशुभखगविरहेलग्नतो-ऽब्जान्त्रिसंख्यम्।रिपुफेकेन्द्रे सुरेज्ये गुरुरिपुसहजे स्यात् स पापोऽङ्गनाथो रामाब्दं कर्कलग्ने कुजतुहिनकरौ केन्द्ररन्ध्रे यदा नो। रामाब्दं २स्याच्चवेगो वपुषि च निधनं सौम्यहीनं खवेदाः ४०लग्ने शोरन्ध्रयातो वपुषि निधनपः स्याच्छशी वाणसंख्यम्५ । नक्षे तिग्मांशुमन्दौ सहजरिपु-गतौ कण्टके१,४,७,१०रन्ध्रनाथः पारावाराब्धिसंख्यं ४३ तदनु शुभखगाः खांशगास्त्रिंशदायुः॥ चन्द्रेऽगे सौम्यदृष्टे यदि शुभविहगावीर्यवल्लक्षदानीम् यातः सौम्ये गणेऽब्जो गुण खनिर्गणितं ७२ रन्ध्रेगैर्मध्यमायुः । स्याच्चन्द्रादङ्गि पादे रथ तपनसुते द्यूनलग्नं प्रयाते रिपुफेगोवायुरीज्यो यदि बलरहितं कद्रुपत्नीसंख्यम् ५५ ॥ कर्काङ्के चण्डधामा खलविहगयुतः पुष्करे ज्ञो द्विजेन्द्रो वागीशोऽनन्तयायी विधिखपवनयुक्७५स्याच्चतुर्वासदस्यः । सौम्यः पीयूष धामान्तिमतनुविलये संस्थितोऽसौ कवीज्यावेकर्णे पुष्क-राज्ञं ५० व्ययरिपुनिधने मूर्त्तिपचन्द्रयुक्तः ॥ मन्दांशे लग्ननाथो भुजगशरमितं ५८ स्यादथो सौम्यखेटा रन्ध्रे नो देहनाथो व्ययरिपुनिधने पापयुक् यदि स्यै०रायुः। रागीशोलग्ननाथो दिनमणिसहितो स्वल्पगोवासवेज्यो नो केन्द्रे षष्टिरायुर्ज्वपुषि दिनकरः शतुनौमान्वितश्चेत् ॥ वागीशोहीनवीर्यो व्ययतनुजगते यामिनीशे खशैला ७० धर्मे सर्वैः परायुः खलखगसवगैः केन्द्रयातैरशीतिः ८० । क्रूरैः क्रूरव्ययातैः शुभभवनगतैः सौम्यखेटैः सवीक्ष्य लग्नेशे स्यात् परायुः शुभभवनगतैः षष्टिरायुर्नराणाम्॥ सारङ्गस्यान्त्यभागे यदि वपुषि गते चाद्यभागे च केन्द्रे सौम्याः खेटाः शतं स्याद्दश ८ सहज २सुखे ४स्याद्विरायुः समस्ताः । लग्नात् प्रालेयधाम्नो निधनसदनपोरिपुफ-केन्द्रेऽष्टविंशत् २८ केन्द्रे सौम्यग्रहेऽने यदि सुतिभवने कश्चिदास्ते खरामाः २० ॥ चीखे प्रालेयभानौ यदि खलखचरो रन्ध्रगोरन्ध्र नेता केन्द्रस्थो लग्ननाथो निजबल रहितः खाब्धि २० तुल्यं तदायुः । सौम्यैरापोक्लिमस्थै र्दिनमणिजविधू वैरिरन्ध्रालयस्थौ तुल्यं कामाङ्गुणैः२२स्या-दथ धनलयगौ रिपुफगौ पापखेटौ ॥ क्षीणौ खर्भानुना वा यदि हिममहसाकाशबाणै २० प्रमाणं केन्द्रस्थौ सूर्य-मन्दौ यदि वपुषि कुजः पुष्पबाणाङ्गुणः २५ स्यात् । शुक्रेज्यावङ्क्यातौ तनयभवनगौ भानुपापावनायुर्जन्मेशः सार्कलग्ने खलखगसहितो वेक्षितः स्यादनायुः ॥ यत् सम्मोक्षं योगजातम्पुराणैर्हेरापारावारपारप्रयातैः । तस्मादायुः सारमंशं गृहीत्वा पुंसामुक्तम्पुण्यभाजाम्यथेदम् ॥बलाबलविवेकेन पुनरागमयायिनाम् । सुखनोभिरिदं देयमायुर्धर्मादिशालिनाम्" ॥

"पापक्षिकोणकेन्द्रे सौम्याः षडष्टमव्ययगताः । सूर्यादये प्रसृतः सद्यः प्राणांस्त्यजति जन्तुः" । सूर्यरिष्टम् । "षडेऽष्टमे च चन्द्रः सद्योमरणाय पापसंदृष्टः । अष्टा-भिश्च शुभैर्दृष्टोवर्षैर्भिन्नैस्तदर्द्धेन" । चन्द्ररिष्टम् । "सुत

मदननवान्त्यलग्नरन्ध्रेष्वशुभयुतोमरणाय शीतरश्मिः । अशुभतनगशिपुत्रदेपपूर्व्वार्द्धदि बलिभिर्न युतोऽवलोकितो-वा" । पापयुतचन्द्ररिष्टम् । "द्यूनचतुरस्रसंस्थे पाप-द्वयमध्यगे शशिनि जातः । विलयं प्रयाति नियतं देवैरपि रक्षितोबालः" । पापमध्यगचन्द्ररिष्टम् । "क्षीणे शशिनि विलग्ने पापैः केन्द्रेषु मृत्युसंस्थैर्वा । भवति विपत्तिरवश्यं जननाधिपतेर्मतस्तेतत्" । क्षीणचन्द्ररिष्टम् । "नागदगो। सिद्ध२४ जातो२२ षु५ दमा। ख्वि४ त्रयि २२ धृति।८ नैखाः २० । दमाग्नि२। दिक्।० चेत्यजा द्यंगे तत्तुल्याब्दैर्विधौ व्यसुः" । मेषादीनां त्रिंशांग-विशेषस्थचन्द्ररिष्टम् । "भौमे विलग्ने शुभदैरदृष्टः षडे-ऽष्टमे वार्कसुतेन युक्तः । सद्यः शिशुं हन्ति वदेन्नृनेन्द्रः खरे दमारौ न शुभेक्षितौ च" । त्रिविधभौमरिष्टम् । "कर्कटधामनि सौम्यः षडष्टमराशिगोविलग्नर्क्षात् । चन्द्रेण दृष्टमूर्त्तिर्वर्षचतुष्टयेन मारयति" । बुधरिष्टम् । "बृहस्पतिर्भौमसमेऽष्टमस्थः सूर्येन्दुभौमार्कजदृष्टमूर्त्तिः । वर्षैस्त्रिभिर्मार्गगदृष्टिहीनोलोकान्तरं प्रापयति प्रसूतम्" बृहस्पतिरिष्टम् । "रविशशिभवने शुक्रोद्दादशरिपुरन्ध्र-गोऽशुभैः सर्व्वैः । दृष्टः करोति मरणं षड्भिर्वर्षैः किमिह विचित्रम्" । शुक्ररिष्टम् । "मारयति षोडशाब्दात् शनैश्चरः पापवीक्षितोलग्ने । संयुक्तोमासेन वर्षाच्छुक्रस्तु मारयति" । त्रिविधशनिरिष्टम् । "राहुश्चतुर्थस्योमर-णाय वीक्षितोभवति पापैः । वर्षैर्वदन्तिदशभिः षोड़शभिः केचिदाचार्य्याः । षष्ठसिंहदृष्टिकोदयकृतस्थितिर्जीवितं हरति राहुः । पापैर्निरीक्षमाणः सप्तमितैर्निहितं वर्षैः" । राहुरिष्टम् । "केतुर्यस्मिन्नृक्षेऽभ्युदितस्तस्मिन् प्रसूयते जन्तुः । रौद्रे सर्पसृक्षे प्राणैः संत्यज्यते चाशु" । केतुरिष्टम् । "लग्नेऽर्के द्रेक्काणा निगड़ाहिविच्छ्रूकपाश-धरसंज्ञाः । मरणाय सप्तवर्षे क्रूरयुताः खपतिदृष्टाः" । द्रेक्काणरिष्टम् । "मीनकर्कटयोरन्त्यौ वृश्चिकस्याद्यमध्यमौ । सर्पाश्चत्वार एवैते द्रेक्काणा निगड़ाश्च ते । तुलाकुम्भान्त्य-सिंहाश्च कुम्भाद्याः पक्षिणः स्मृताः । वृषाद्यमकरादन्त्या द्रेक्काणाः पाशधारिणः" । लग्नाधिपजन्मपती षष्ठाष्टमरिपु-स्थगौ प्रसवकाले । अस्तमितौ मरणकरौ राशिप्रमितैर्वदेद्व-र्षैः । जन्मपतिर्जन्मराश्यधिपः । लग्नाधिपजन्माधिपरिष्टम् "सौम्याः षडष्टमगाः पापैर्वक्रोपगतैर्दृष्टाः । मासेन मृत्यु-दाने यदि न शुभैस्तत्र संदृष्टाः" । सौम्यग्रहरिष्टम् । "एकः पापोऽष्टमगः प्रत्युत्स्थो प्रत्युवीक्षितोवर्षात् । मार-यति नरं प्रसूतं सुधारसोयेन पीतोऽपि" । पापग्रहरिष्टम् । "होरायाः सप्तमे सौरिर्हिबुकस्थश्च भास्करः । अस्मिन् योगे तु योजातः सोऽल्पायुर्भवति ध्रुवे । दशषष्ठगते जीवे समसप्तगते शनौ । द्वादशस्थोयदा भानुर्वर्षमेकं न जीवति । "प्रतिपद्युत्तराषाढा नवम्यामेव कृत्तिका । पूर्व्वाभाद्रपदाष्ट-म्यामेकादश्यां च रोहिणी । द्वादश्यां च यदा ज्येष्ठा त्रयोदश्यां यदा मघा । एभिर्जातो न जीवेत यदि शक्र-समोभवेत्" । एवमन्येऽपि अल्पायुर्योगा आकरे द्रष्टव्याः । मनुना तु "अनभ्यासेन वेदानामाचारस्य तु वर्জ্জनात् । आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति" इति अन्न-दोषादेरपि अल्पायुर्हेतुतोक्ता । अन्नदोषश्चाभक्ष्यभक्षणादि तच्चाभक्ष्यशब्दे उक्तम् आचारश्च आचारशब्दे वक्ष्यते ।

अल्पाल्प त्रि० अल्पप्रकारः अतिशयेन वा अल्पः अल्प+ प्रकारादौ द्विरुक्तिः । अत्यन्ताल्पे पादादौ "फलं चाल्पाल्पकं तस्य धर्म्मस्यार्द्धत्रयो भवेत्" ति०त० स्मृ० ।

अल्पिका स्त्री अल्पा प्रमाणेन कन् । १सुद्गपर्ण्यां । अल्पार्थे कन् २अल्पमात्रायाम् ।

अल्पित त्रि० अल्पं क्रियते स्म अल्प+कृतर्थे णिच्-कर्म्म-णि क्त । अल्पीकृते "स्मृषा न चक्रेऽल्पितकल्पपादपः" नै० ।

अल्पिष्ठ त्रि० अतिशयेन अल्पः इष्ठन् । अतिशयिताल्पे ।

अल्पीयस् त्रि० अतिशयेन अल्पः ईयसुन् स्त्रियां ङीप् । अतिशयिताल्पे ।

अलक्ष्मी स्त्री अलक्ष्यते इत्यल् क्विप् अले भूषायै लाति स्मृष्णाति ला-क ३त० । १मातरि । अलतीति अल् पर्य्याप्तः सन् लाति सर्व्वानत्ति स्मृष्णाति जानाति वा ला-क । २सर्व्वत्रायां सर्व्वभक्षिकायां परमात्मदेवतायाम् सा च अथर्व्ववेदे अलक्ष्म्यादिसूक्ते प्रसिद्धा ।

अव रक्षणे, गतौ, स्पृहायां, तृप्तौ, शोभायां, प्रवेशे, व्याप्तौ, आलिङ्गने, प्रार्थने, प्रवेशे, सत्तायां, इच्छौ, स्मरणे, बधे, सामर्थ्ये, अवगमे, करणे, इच्छोत्पादने च यथायथं सक० अक० च भ्वादि० सेट् पर० । अवति अवीत् । आव । अव्यात् । अविता । अवितः । अवनु । अविषः । "अ-वतवोगिरिसुता शशिभृतः प्रियतमा" उज्ज्व० । "अरि-सदृवादवतः" नलोदयः । "प्रविष्टोभिनमाविषुः" । य० २२,२९, तत्र तर्पणे "न मामवति महीपा रत्नसूरपि मेदिनी" रघुः । रक्षणे "यदाविथ सखीयतो यदाविथ" ऋ०१,१२१,५, "आविथ रक्षसि अन्यत्र तपसि" भा० गतौ च आनो "बर्हिः सदताविता" ७,५९,६, "अविता

आगच्छत्" भा० । भविष्यति च "प्रोथदश्वो न यवसेऽविष्यन् यदा" । ७,३,२, "अविष्यत् भविष्यत्" "भा० ह्यश्वविष्यद्व्रतसेषु तिष्ठति" १,४८,२, "अविष्यत् भविष्यत्" भा० एवमन्यार्थेषूदाहार्यम् ।

अव अव्य० अव–अच् । १निश्चये, २व्याप्तौ, ३अनादरे, ४असाकल्ये ५आलम्बने, ६शुद्धौ, ७परिभवे, ८नियोगे, ९निम्नतायां च । अयं चादिः प्रादिश्च "अव ज्ञानावज्ञालम्बशुद्धीषदर्थव्याप्तिपराभवातियोगेषु" गण० र० ज्ञाने अवगतोऽर्थः । अवज्ञायामवजानाति । आलम्बने आलम्ब्य यष्टिं गच्छति शुद्धौ अवदातम् । ईषदर्थे अवहन्ति अल्पं हन्ति, व्याप्तौ अवकीर्णः । परिभवे अवज्ञन्ति । अतियोगे अवघात इत्युदाहृतञ्च । अनादरे "अवजानासि मां यस्मात्" रघुः अवमानः । व्याप्तौ अवकाशः असत्यां व्याप्तौ न सर्व्वतः प्रवेशः इति तस्य व्याप्त्यर्थकता । अवगाहते । निश्चये अवस्यति अवसायः अवधारयति । निम्नतायाम् अवनमति अवतरति अवक्षिपति अवाचीनः इत्यादि । असाकल्यमीषदर्थः । त्रोहीनवहन्ति अवघातश्च वितुषीकरणार्थं एकदेशमात्रे घातः न तु सर्व्वावयवे इति असाकल्यद्योतकता पराभवे भवन् अवहन्ति पराभवतीत्यर्थः नियोगे अवक्लृप्तिः "एवेचानियोगे" वा० अनियोगोऽनवक्लृप्तिः सि० कौ० अवकल्पते । अस्य धातोर्लोपः वक्तव्यः । "अवादयः क्रुष्टाद्यर्थं तृतीयया" वा० उक्तेः क्रोशार्थेऽपि अवक्रुष्टं कोकिलया अवकोकिलः ।

अवकट अव+स्वार्थे कटच् । १अवशब्दार्थे अतिशयिताधरे ततः स्वार्थे कन् तत्रैव । [पु० ।

अवकल्पित अव+कृपि कर्त्तरि–क्त । १विचलिते २वृद्धभेदे

अवकर पु० अव+कृ–अप् । १उपहतौ "लोभानवकरगन्धहि" सा० ना० "अवकर उपहतिः" भा० । २सम्मार्ज्जन्यादिचिह्ने धूल्यादौ । "अवकरशोधनेन" ५,१२४, मनुव्या० कुल्लू० ।

अवकर्षण न० अव+कृष–ल्युट् । बलपूर्व्वकाकर्षणे स्थानान्तरनयनार्थं बलेनाकर्षणे ।

अवकलित त्रि० अव+कल–क्त । १दृष्टे २ज्ञाते ३गृहीते च

अवका स्त्री अव–अञ्चणे कर्म्मणि कृन् णिलोपश्च० न ङीष् । शैवाले "तद्वत् करोत्यवकासुपदधाति अवकाभिः प्रच्छादयति आपोषा वा अवकाः" शत० ब्रा० "अरत्निमात्रेऽषाढां दक्षिणेनावकारूपरिष्टाच्च" कात्या० १७,४,२८ "अवकासु शैवालेषु कर्क० । "मण्डूकावकावेतसशाखावेणौ वह्नावकर्षति" का० १,२,१०, ।

अवकाश पु० अव+काश–घञ् । अवस्थितियोग्यतासम्पादके छाद्ये, देशे च । तत्र कालिकोऽवकाशः क्रियान्तरस्थितियोग्यतासम्पादकः स चावसर इत्युच्यते, "क्षत्रावकाशे रुचि संकृतम्" इति भट्टिः । द्रव्यान्तरस्थितिप्रवेशयोग्यतासम्पादको दैशिकः स चावकाश इत्येव "अवकाशं किलोदन्वानिति" रघुः ।

अवकीर्ण त्रि० अव+कृ–क्त । १व्याप्ते "चतुष्कपुष्यप्रकारावकीर्णः कुमा० । २चूर्णिते ३ध्वस्ते च" भावे क्त । ४ "अवकीर्णिस्ते, ब्रह्मचर्य्यव्रतभङ्गे । अवकीर्णिनिमित्तं तु ब्रह्महत्याव्रताचरेत्" । अङ्गि० ।

अवकीर्णिन् पु० अवकीर्णमनेन इष्टा० इनि । ध्वस्तव्रते ब्रह्मचारिण्योऽव्रतसक्ते स्त्रीसङ्गमादिवर्जनं तस्य भ्रंशेऽवकीर्णिता । "अवकीर्णी तु कालेन गर्द्दभेन चतुष्पथे । पाकयज्ञविधानेन नैर्ऋतं निर्यि याजयेत्" अङ्गि० "कुण्डगोलोऽवकीर्णी च दासीपतिरेव च" मनुः अवकीर्णिलक्षणञ्च–"कामतोरेतसः सेकं व्रतस्थस्य द्विजन्मनः । अतिक्रमं व्रतस्याहुर्धर्म्मज्ञा ब्रह्मवादिनः "अवकीर्णी भवेदुक्त्वा ब्रह्मचारी तु योषितम् । गर्द्दभं पशुमालभ्य नैर्ऋतं स विशुध्यति" या० रु० स्त्रियं विनाऽपि रेतसः स्रावे व्रतलोपः "ब्रह्मचारी चेत् स्त्रियमुपेयात् अरण्ये चतुष्पथे लौकिकेऽग्नौ रक्षोदेवतं गर्द्दभं पशुमालभेत नैर्ऋतं वा चरुं निर्वपेत् तत्र जुहुयात् कामाय स्वाहा कामकामाय स्वाहा निर्ऋत्यै स्वाहा रक्षोदेवताभ्यः स्वाहेति एतदेव रेतसः प्रवत्रोत्सर्गे" इति वसिष्ठोक्तेः तेन कामतोरेतस उत्सर्गेऽपि अवकीर्णित्वम् । अकामतस्तु नावकीर्णित्वं किन्तु प्रायश्चित्ताल्पत्वं यथोक्तं मनुना "स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः । स्नात्वार्कमर्च्चयित्वा त्रिः पुनर्मामित्यृचं जपेत्" ।

अवकुञ्चन न० अव+कुञ्च–ल्युट् । आकुञ्चने आकुञ्चनञ्च सत् स्वेवावयवानामारम्भकसंयोगेषु परस्परमवयवानामनारम्भकसंयोगोत्पादकं यत्कार्य्यनयवकौटिल्योत्पादकं च कर्म्म यतो भवति सङ्कुचति पद्मं सङ्कुचति वस्त्रं सङ्कुचति चर्म्मेति प्रत्ययः, तादृशं कर्म्म" वै० सू० उ० । करणे ल्युट् "अतज्ज्ञं सर्व्ववेदनाभवन्ति उपक्रम्य" "तोदनभेदनस्रस्रावकुञ्चनाङ्गुलिका भवन्तीति" सुश्रुतोक्ते २रोगभेदे च ।

अवकीर्णिव्रतम् अवकीर्णिनो व्रतम् प्रायश्चित्तम् । "अथातोऽकार्य्ये प्रायश्चित्तं व्याख्यास्यामः ब्रह्मचारी यदवकीर्य्येत स चतुर्थकालमद्यं भैक्षं चरेदेव पूतो भवतीति"

यातातपोक्ते "एतस्मिन्नेव संप्राप्ते वसित्वा गर्हभाजिनम् । तप्तवानचरेत् भैक्ष्यं स्वकर्म परिकीर्त्तयन् । तेभ्यो लब्धेन भैक्ष्येण वर्त्तयन्नेककालिकम् । उपस्पृशंस्त्रिषवनमेनस स विशुध्यति" मनूक्ते अवकीर्णिव्रतमुपक्रम्य "तत्र प्रायश्चित्तं महाव्याहृतिभिर्जुहुयात् ओङ्कारपूर्व्विकाभिः । संवत्सरं वा नक्तं भैक्ष्यं चरेत् चतुर्थकाले मितभुग्गायत्रीं वत्सरानुगां जपेदिति" शङ्खलिखितोक्ते च "अवकीर्णिनिभिस्तन्तु ब्रह्महत्याव्रतञ्चरेत् । खरचर्म्मवासा वत्सरात्संस्तस्मान्मुच्येत किल्बिषात्" अङ्गिरसोक्ते च व्रतभेदे । एतस्य विषयभेदः प्रायश्चित्तविवेकतोज्ञेयः ।

अवकुटार त्रि० अव+खार्थे अतिशये वा कुटारच् अत्यल्पनिन्दादौ १अवशब्दार्थे २वैरूप्ये न० ।

अवकृष्ट त्रि० अव+कृष–क्त । १दूरीकृते २अपसारिते, ३वहिष्कारिते च । अवकृष्टं स्वहावकरादेरवकर्षणमस्यास्य अर्श० अच् । ४स्वहावकरमार्जकेदासभेदे पु० । "पक्षोदेयोऽवकृष्टस्य वहुत्कृष्टस्य वेतनम् । धान्यद्रोणस्तु मासिकः" मनुः । "अवकृष्टस्य स्वहादिसंमार्जकोदकादिवाहादेः कर्म्मकरस्य कुलू०" ।

अवकृष्य त्रि० अव+कृष कर्म्मणि क्यप् । १आकर्षणीये २दूरीकार्य्ये अव+कृष ल्यप् । ३आकृष्येत्यर्थे अव्य० ।

अवकृष्टि स्त्री अव+कृष–क्तिन् रोगः । सम्भावनायाम् "अनवकृष्टिप्रा सर्वयोः" पा० "अनवकृष्टिरसम्भावना" सि० कौ० "क्वेव भोज्यसे अनवकृष्टाविव" सि० कौ० ।

अवकेशिन् त्रि० अवच्युतं कं सुखं यस्मात् प्रा० व० अवकं फलशून्यतामोसितुं शीलमस्य अवक+दृश–णिनि । १अफले वृक्षे । अवसन्नाः केशा विद्यन्ते अस्य इनि । २अल्पकेशयुक्ते । [लया कृष्टे ।

अवकोकिल त्रि० अवकृष्टः कोकिलया प्रा० स० । कोकि-

अवकव्य त्रि० न वक्तव्यः । १वक्तुमनर्हे अश्लीलादौ वाक्ये २निषिद्धवचने ३मिथ्याभूते च ।

अवक्त्र त्रि० नास्ति वक्त्रं यस्य । सुश्रुतोक्ते शोणितादिनिष्कारणसंशून्ये व्रणादौ "अन्तःपूयेष्ववक्त्रेषु तथैवोत्सङ्गवत्सु च । नेत्यवर्त्तयुदावर्त्तनाड्योऽवक्त्राः सशोणिताः" ।

अवक्र त्रि० विरोधे न० त० । वक्रताविरोधिनि सारल्ययुक्ते ।

अवक्रक्षिन् त्रि० अव+कृष णिनि षु० । अवकर्षणशीले "अवक्रक्षिणं वृषभं यवा शुरम्" ऋ० ८, १, २, अवक्रक्षिणमवकर्षणशीलम्" भा० ।

अवक्रन्द त्रि० अव+क्रन्द कर्त्तरि अच् । १नीचैः क्रन्दनशीले "क्रन्दते स्वाहाऽवक्रन्दाय स्वाहा" य० २२७। भावे घञ् । नीचैः २क्रन्दने पु० । भावे ल्युट् अवक्रन्दनमप्यत्र न० ।

अवक्रम पु० अव+क्रम–भावे घञ् । अवक्रमणे निष्क्रमणे ।

अवक्रय पु० अवक्रीयते प्रतिरूपदानेन स्वामीभं क्रियतेऽनेन अव+क्री–अच् । प्राह्यस्य प्रतिरूपत्वेन देये १मूल्ये २भाटके च भाटकञ्च स्वहवस्त्रादिवस्तुनः एतावत् उपभोगे धनं ग्राह्यमिति समयेन परायत्तीकरणम् करणेऽच् । ३तत्साधने द्रव्ये शुल्कादिस्थाने वणिग्भिर्दीयमाने देये (माशुल) ४करे च ।

अवक्रान्ति स्त्री अव+क्रम–क्तिन् । निष्क्रमणे अधोगमने ।

अवक्रुष्ट त्रि० अव+क्रुश–कर्म्मणि क्त । कृताक्रोशे यमुद्दिश्य क्रोशः कृतस्तस्मिन् । "अवक्रुष्टः कोकिलया" सि० कौ० ।

अवक्लिन्न त्रि० अव+क्लिद–क्त । पाकादधस्तात् १क्लिन्ने (पचा) १फलादौ जलादिना २अत्यन्तार्द्रे च । पूर्व्वं पक्वंततोऽवक्लिन्नं राज० पूर्व्वनि० । अवक्लिन्नपक्वम् ।

अवक्लेद पु० अव+क्लिद–भावे घञ् । पाकोत्तरं क्लेदे (पचाइत्योया) क्लेदश्च जलविशेषसंयोगेन वस्तुनो गौरवजनकः अवयवसंयोगशैथिल्यसंपादको व्यापारः ।

अवक्षय पु० अव+क्षि–भावे अच् । हृद्व्युत्तरं नाशोन्मुखावस्थायां भावविकारभेदे ।

अवक्षयण न० अव+क्षि–णिच्–भावे ल्युट् । अवक्षयसाधने व्यापारभेदे । "ब्राह्मणा उन्मुखावक्षयणमकृत" शत० ब्रा० । [यस्यावक्षेपः कृतस्तस्मिन् ।

अवक्षिप्त त्रि० अव+क्षिप–कर्म्मणि क्त । कृतावक्षेपे वस्तुनि

अवक्षीण त्रि० अव+क्षि–क्त । १अवक्षयप्राप्ते विनाशोन्मुखे पदार्थे । भावे क्त । २अवक्षये न० ।

अवक्षुत त्रि० अव+क्षु–क्त । उपरि कृतक्षुते । यस्योपरि क्षुतं कृतं तस्मिन् । "द्विषदन्नं नमर्थञ्च पतितान्नमवक्षुतम्" मनुः ।

अवक्षेपण अव+क्षिप–भावे ल्युट् । अधःसंयोगात्कूर्दने क्रियाभेदे । "हस्तसमवधिपामीतीच्छाजनितेन प्रयत्नेन प्रयत्नवदात्मसंयोगरूपादसमवायिकारणात् हस्ते क्रिया जायते ततोऽवक्षेपणविशिष्टहस्तनोदनादसमवायिकारणात् हस्तसंयुक्तमुसले उवक्षेपणं कर्म्म युगपद्वा जायते" वै० सू० उ० टक्कं द्रष्टव्यम् । "उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्म्माणि" वैशे० "उत्क्षेपणं तथावक्षेपणमाकुञ्चनं तथा । प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च" भाषा० । भावे घञ् । अवक्षेपोऽप्यत्रार्थे । करणे ल्युट् ङीप् । २वलायामोषधौ स्त्री ।

अवखात न० निम्नः खातः । गभीरगर्त्ते ।

अवखाद पु० अवज्ञातः निन्दितः खादः खाद्यम् प्रा०स०। निन्दितखाद्ये "नात्रावखादो अस्ति वः" ऋ०१,४६,४ "अवखादः अवज्ञातः खादः जुगुप्सितहविर्विशेषः" भा०

अवगणन न० अव+गण–भावे ल्युट्। १अवज्ञायां २निन्दने ३तिरस्कारे ४परिभवे च। [च ३तिरस्कृते ४पराभूते च।

अवगणित त्रि० अव+गण–कर्म्मणि क्त। १अवज्ञाते २निन्दिते

अवगण्ड पु० अव+गम+ड डकारस्य नेत्त्वम्। गण्डस्यव्रणभेदे गण्डोपरिजाते रोगभेदे (गरगण्ड)।

अवगत त्रि० अव+गम–क्त। १निम्नगते, २ज्ञाते च। "तस्माद्भावगतब्रह्मात्मभावस्य यथापूर्व्वं संसारित्वं यस्य तु यथापूर्व्वं संसारित्वं नास्यावगतब्रह्मात्मभाव" इति भा० भा०।

अवगति स्त्री अव+गम–भावे क्तिन्। १ज्ञाने २निश्चयात्मकज्ञाने च "आगतिपर्य्यन्तं ज्ञानं सनुप्रत्ययवाच्यायाः इच्छायाः कर्म्मफलविषयत्वादिच्छायाः ज्ञानेन हि प्रमाणेनावगन्तुमिष्टं ब्रह्म" "ब्रह्मावगतिर्हि पुरुषार्थः" ब्रह्मावगतिस्वप्रतिज्ञातेति" च भा०भा०। [उच्च०।

अवगथ पु० अव+गा–कर्त्तरि थ नि०हुस्वः। प्रातःस्नाते

अवगदित त्रि० अव+गद–कर्म्मणि क्त। १अपवादयुक्ते २निन्दिते

अवगम पु० अव+गम–भावे घञ्। १ज्ञाने २निश्चयात्मकज्ञाने "प्रत्यवायगमं धर्म्म्यं सुसुखं कर्त्तुमव्ययम्" गीता।

अवगाढ त्रि० अव+गाह–क्त। १निविष्टे, २अन्तःप्रविष्टे, ३निमग्ने। यस्मिन् अवगाढः कृतस्तस्मिन् ४जलादौ ५विषयभूते पदार्थे च। यथा घटज्ञानेन घटत्वविशिष्टघटाज्ञानसंसर्गेण अवगाढः। अस्य वा अतोऽन्योऽवगाढोऽणुकार्य्येषु

अवगाह पु० अव+गाह–घञ्। १स्नाने, २अन्तःप्रवेशे ३ज्ञानेन वियोगीकरणे च। आधारे घञ्। ४स्नानस्थाने। वा अङ्गोपे वगाहोऽयत्नार्थे। ल्युटि। अवगाहनमप्यत्र न०।

अवगाह्य त्रि० अव+गाह–कर्म्मणि ण्यत्। १अवगाहनादियोग्ये जलादौ २अन्तःप्रवेश्ये ३विषयीकार्य्ये च। अव+गाह–ल्यप्। ४अवगाहनं कृत्वेत्यर्थे अव्य०।

अवगीत त्रि० अव+गै–क्त। २निर्व्वादे जनापवादे २दुष्टे ३गर्हिते ४कुत्सिते भेदि०भावे क्त। ४निन्दायाम् ४लोकापवादे च भ०।

अवगुण पु० अव+गुण–क। दोषे। "परावगुणस् अन्यदोषमिति किरा० १३।४८। लोकव्या० मल्लि०।

अवगुण्ठन न० अव+गुण्ठ–ल्युट्। योषितां १शिरःप्रावरणक्रियायाम्। करणे ल्युट्। २सुखाद्याच्छादने वस्त्रे। "अवगुण्ठनसंवीता कुलजाभिसरेद्यदि" मा०द० "घण्टालम्बिरावगुण्ठनपटवेषं विधत्ते विधुः" मा०द०। स्त्रावगुण्ठपटलक्षणलक्ष्यमाणः "माघः। २आच्छादनमात्रे च क्ष्मिल्यवगुण्ठनं कृत्वेति" तत्त्वम्।

अवगुण्ठनमुद्रा स्त्री अवगुण्ठनाय मुद्रा। "सव्यहस्तस्तता सदृष्टिर्दीर्घाधोमुखतर्जनी। अवगुण्ठनसंज्ञेयमभितो भ्रमिता मता" तन्त्रसारोक्ते मुद्राभेदे।

अवगुण्ठिका स्त्री अवगुण्ठयति आवृणोति अव+गुण्ठ–ण्वुल् स्त्रीत्वात् टापि अत इत्त्वम्। स्त्रीणां १मुखावरणशाट्याम्, २जवनिकायाञ्च। अव–गुण्ठ–धात्वर्थे ण्वुल्। ३अवगुण्ठनक्रियायाम्।

अवगुण्ठित त्रि० अव+गुण्ठ–क्त। १कृतावगुण्ठने आवृते "रजनीतिमिरावगुण्ठिते" कुमा०। २चूर्णिते च।

अवगुम्फित त्रि० अव+गुम्फ–कर्म्मणि क्त। ग्रथिते।

अवगूर्य्य अव्य० अव+गुरी–उद्यमे ल्यप्। वधार्थं दण्डसद्यस्त्वेत्यर्थे "अवगूर्य्य चरेत् कृच्छ्रमतिकृच्छ्रं निपातने" मनुः।

अवगृह्य न० अव+ग्रह–ण्यप्। व्याकरणसिद्धे प्रग्रह्यसंज्ञके पदे। पाणिनीये प्रग्रह्यमिति संज्ञा प्रातिशाख्ये तु अवग्रह्यमिति संज्ञा। यस्यावग्रहः विशेषेण ग्रहः विच्छेदवत्तेन भवति न सन्धिकार्य्यं तत् पदं प्रग्रह्यमवग्रह्यमिति च भण्यते। यथा हरी एतौ इत्यादि।

अवगीरण न० अव+गुर–उद्यमे ल्युट्। वधायाद्युद्यमे। दण्डनिपातनप्रायश्चित्तेन नाम्नीकृतया प्रसङ्गेन अवगोरणनिमित्तप्रायश्चित्तस्य सिद्धिः" प्रा० वि०।

अवग्र(ग्रा)ह पु० अव+ग्रह–घ १घञ् वा। १दृष्टिजलप्रतिबन्धे "दृष्टिर्भवति सख्यानामवग्रहविशोषिणाम्" "रावणावग्रहक्लान्तमिति वागस्तेन सः"। नभोनभस्ययोर्दृष्टिमवग्रहदृवान्तरे" इति च रघुः २अनावृष्टौ च "दृषेव सीतां तदवग्रहक्षताम्" कुमा०। ३निग्रहे "स्वयं विधाता तपसः फलानां मनुग्रहाणामवग्रहाणां द्वाराय" माघः। व्याकरणोक्ते सन्धिराहित्यरूपे ४विच्छेदे "इन्द्रोऽसि विशौजाः य०१०, २८ मन्त्रे विड्भौजा इति प्राप्ते विशौजाश्चान्द्रसमतेन पदकारो नावग्रहं चकार" वेददी०। ५प्रतिबन्धमात्रे "अवग्रहमवेक्षन्तवग्रहया यथा दिशा धावति वेधसः सृष्टा" नै०। ६गजसमूहे हारा०। ७गजललाटे मेदि०। ८स्वभावे त्रिका०। अवग्राहस्तु ६भागे। [भेदि०। २ज्ञाने च।

अवग्रहण न० अव+ग्रह–भावे ल्युट्। १प्रतिरोधे २अनादरे

अवघट्ट पु० अव+घट्ट–आधारे घञ्। भूमिरन्ध्रे। छिद्रे त्रिका०।

करणे घञ्। २घरट्टे (याँता) पेषणयन्त्रभेदे। भावे घञ्। ३चालने घट्टनाक्रियायाम् भावे ल्युट्। अवघट्टनं तत्रैवार्थे न०। "प्रदेशस्य वङ्क्षणोऽवघट्टनादयोहि व्यधा" सुश्रुतः। युच्। तत्रैवार्थे स्त्री।

अवघट्टित त्रि० अव+घट्ट–कर्म्मणि क्त। चालिते।

अवघर्षण न०अव+घृष–ल्युट्। अधःस्थापयित्वा १घर्षणे सर्वतो २ घर्षणे "दुर्न्यासात् व्रणवर्त्मावघर्षणम्" सुश्रुतः ३मार्जने च मलावघर्षणम् पात्रावघर्षणम्" सलिलैः शुद्धिरेतेषां गोवालैश्चावघर्षणात्" या० स्मृ०।

अवघात पु० अव+हन–घञ्। १अवहनने तण्डुलादेर्विदलीकरणव्यापारे। अवघातश्च व्रीहिसंस्कारार्थः व्यापारभेदः तदकरणे यज्ञासिद्धिः "व्रीहीन् प्रोक्षति व्रीहीनवहन्ति" इत्यादौ प्रोक्षणादिजन्यः। कालान्तरभाव्यवघातजनको व्यापारो व्रीहिनिष्ठः कल्प्यते प्रोक्षिता व्रीहय एवावघाताय कल्प्यन्ते" कुसु० तथाचावघातजन्यः संस्कारः व्रीहिनिष्ठ इति मीमांसकाः। नैयायिकास्तु "संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिषु" कुसु० उक्तेः पुरुषएव संस्कारोऽदृष्टविशेषो जन्यत इत्याहुः अवघातश्च धर्म्मिणि सत्येव तदीयविदलीकरणरूपपरिस्काररूपः २हननमात्रे ३ताड़नमात्रे च "कर्णावघातैरपि ताड्यमाना दूरीकृताकरिवरेण" "अधरे दत्तदन्तावघाते" सा०द०।

अवघातिन् त्रि० अव+हन–णिनि। अवघातके स्त्रियां ङीप्।

अवघुष्ट त्रि० अव+घुष–क्त। घोषणया प्रचारिते।

अवघूर्णन न० अव+घूर्ण–भ्रमणे भावे ल्यु। सर्व्वतोभ्रमणे।

अवघोटित अव+घुट–परिवर्त्तेक्त। सर्व्वतोवेष्टिते समन्तात् परिवृते। सह "शिविकया प्रायादवघोटितया खनगरमनुप्राप्य" भा०व०प०। [युच्। अवघोषणाप्यत्र स्त्री।

अवघोषण न०अव+घुष–भावे ल्युट्। सर्वजनज्ञानायोच्चैर्घोषणे

अवघ्राण न० अव+घ्रा–भावे ल्युट्। आघ्राणे "पिण्डपितृयज्ञवहानप्रभृति प्रागवघ्राणात्" का० २०५,११ "अवघ्राणमितरेषु" का०२२,१०,४। इदञ्च भोजनानुकल्पतया शिष्टैरुक्तम्। अतएव श्राद्धशेषभोजनस्यावश्यकतया उपवासदिने तदवघ्राणमात्रम् विहितम् "आघ्राय पिण्डसेवितमिति" स्मृतेस्तथाचरणम्।

अवचक्षण त्रि० अव+चक्ष–ल्यु। निन्दिताख्यानकर्त्तरि "कुत्साभीक्ष्ण्ययोरर्थे एतस्य तिङः परत्वे अनुदात्तत्वम्।

अवचन न० न वचनं कुत्सायां न०त० १निन्दायाम्। अभावे न०त०। २ कथनाभावे "प्रकृतौ चावचनात्" कात्या०।

२०,७,२१, "अवचनेऽग्निष्टोमः"। कात्या० २२,१,२। न०ब०। ३वचनशून्ये त्रि० "शकुन्तला साध्वसादवचनातिष्ठति"। शक०।

अवचनीय त्रि० वक्तुमनर्हः वच–अर्हार्थे अनीयर् न०त०। १वक्तुमनर्हे अश्लीलादौ शब्दे "वादेष्ववचनीयेषु तदेव द्विगुणं भवेत्" मनुः १वचनीयं निन्द्यम् न०त०। २निन्द्याभिन्ने त्रि०

अवचय पु० अव+चि–अच्। पुष्पफलाद्यादाने। "ततः प्रविगतः कुसुमावचयमभिनयन्त्यो सख्यौ" शक०।

अवचाय पु० अव+चि "हस्तादाने चेरस्तेये" पा० अचोवाधको घञ्। हस्तेन पुष्पफलाद्यादाने। "अविरतकुसुमावचायखेदा" माघः। अव+चि–यत्तल् अवचायम्। अभीक्ष्णमवचिन्वत्यर्थे अव्य०।

अवचारण त्रि० अव–चर–णिच्–ल्युट्। १प्रचारणे सुश्रुतोक्ते २क्षारपाकविधौ च "विशेषक्रियावचारणाच्च" "क्षेत्राणि यद्यं जातीः पोषणं सावचारणम्" "शुक्रदोषक्षयकरं यथास्वमवचारणम्" सुश्रुतः।

अवचूड(ल) पु० अवनता चूड़ाग्रं यस्य वा डोलः। १ध्वजाधोवद्धे वस्त्रे। "पिच्छावचूड़कलनामिवोरः" "पिच्छावचूड़मनुमाधवधाम जगमुः" इति च माघः "अस्योच्चूड़ावचूड़ाख्यौ मूर्द्धाधोमुखचूड़योरिति" हला० उक्तेः २ध्वजाधोमुखाग्रे चामरादौ च।

अवचूर्णन न० सुश्रुतोक्ते १व्रणरोगभेदे। "तत्र व्रणस्य प्रविरपक्रमा भवन्ति" इत्युपक्रम्य "सर्पिस्तैलं रसक्रियावचूर्णनव्रणधूपनम्" इत्युक्त्वा "तेषु कषायो वर्त्तिः कल्कः सर्पिस्तैलं रसक्रियावचूर्णनमिति योधनरोपणानीति"। अव+चूर्ण–भावे ल्युट्। २प्रेषणे। चूर्णैरध्वंसते अवचूर्णयति अव+चूर्ण+अवध्वंसार्थे णिच्–भावे ल्युट्। ३चूर्णनेनावध्वंसे।

अवचूर्णित त्रि० अव+चूर्ण–प्रेषे कर्म्मणि क्त। १पिष्टे। अवचूर्णयतेर्नामधातोः क्त २चूर्णने नावध्वस्ते।

अवचूल न० अवचूड़वत् विप्रहः। ध्वजाधःस्थे १चामरादौ ध्वजाग्रे "दिवसकरवारणस्यावचूलचामरकलाप इव" काद०। [चामरे त्रिका०

अवचूलक न० अवचूलमिव स्वार्थे कन् संज्ञायांवा कन्।

अवच्छिन्न त्रि० अव+छिद–क्त। अवच्छेदः विशेषणोपाधिना विशेषकरणम्। उपाध्यादिना विशेषिते अवच्छेदकतानिरूपिते च "प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगिताच्छेदकावच्छिन्न' यत्र

भवतीति" चिन्तामणिः। अवच्छेदकता हि स्वरूपसम्बन्धविशेषः अनतिरिक्तवृत्तित्वं वा तन्निरूपितत्वमवच्छिन्नत्वं यथा दण्डादीनां घटकारणतावच्छेदकं दण्डत्वादिकं तस्य तदतिरिक्तदेशेऽवृत्तित्वात् एवं घटादीनामत्यन्ताभावप्रतियोगितायाः तदतिरिक्तदेशेऽवृत्तित्वात् घटत्वादिकमवच्छेदकम् अतः प्रतियोगितायां घटाद्यवच्छिन्नत्वम्। परिमाणादौ च अवच्छिन्नत्वमियत्ताकरणम् यथा द्रोणावच्छिन्नो व्रीहिः द्रोणपरिमाणेन कृतपरिच्छेदोव्रीहिरित्यर्थः। सीमाकरणमप्यवच्छेदः। मठावच्छिन्न आकाशः मठाकाशः कर्णशष्कुल्यवच्छिन्न आकाशः श्रोत्रमित्यादि। एवमन्तःकरणावच्छिन्नं चैतन्यं जीव इति वेदान्तिनः।

अवच्छिन्नवाद पु० अवच्छिन्नतया अन्तःकरणावच्छिन्नतया जीवस्य वादोव्यवस्थापनम्। वेदान्तिमतप्रसिद्धे चैतन्यस्य अन्तःकरणावच्छिन्नतया व्यवस्थापके मतभेदे। तथा हि तेषां मतद्वैधम् केचित् अन्तःकरणे प्रतिबिम्बितं चैतन्यं जीव इति प्रतिपेदिरे केचिच्च तदवच्छिन्नं चैतन्यं जीव इति। तत्र नीरूपस्य चैतन्यस्यान्तःकरणे प्रतिबिम्बासम्भवेन प्रतिबिम्बस्य च मिथ्यात्वेन जीवस्य सत्यत्वानुपपत्तेः बन्धमोक्षयोः सामानाधिकरण्याभावापत्तेः प्रतिबिम्बवादं दूषयित्वाऽवच्छिन्नवादं समर्थयाञ्चक्रिरे। यथा च नैयायिकादीनामेकस्यापि नभसः कर्णशष्कुल्यादिभेदेन उपाधिकृतं नानात्वं नवस्तुकृतमेवमेकस्यापि चैतन्यस्यान्तःकरणोपाधिभेदेनावच्छिन्नतया नानात्वं तेन "तद्गुणसारत्वात्" या०सू०"घटसंवृत आकाशे नीयमाने यथा घटो। घटोनीयेत नाकाशस्तद्वज्जीवोनभोपम" इत्युक्तेश्च जीवस्य न खल्वितलोकपरलोकगामित्वमपि तु बुद्धिरूपाधिभेदेन तथा व्यवहारः अतो न बन्धमोक्षव्यवस्थानुपपत्तिः यच्चोपाधौ अज्ञानाधीना संसारप्रवृत्तिस्तस्य जीवभावात्मकतया बन्धः, यत्र च तन्निवृत्तिः न तत्र तथा, किन्तु मोक्षः। विस्तरस्त्वाकरे।

अवच्छुरित न०। अव+छुर–भावे क्त। १अट्टहासे–स्वार्थे कन् तत्रैव। कर्मणि क्त। २मिश्रिते त्रि०।

अवच्छेद पु० अव+छिद–भावे घञ्। १छेदने २सीमाकरणे ३विशेषकरणे ४अवधारणे "शब्दार्थानामवच्छेदे विशेषस्मृतिहेतवः" वाक्य प०५ दृश्यताकरणे ६व्याप्तौ च। अवच्छिद्यतेऽनेन करणे घञ्। ७वृत्तिकारणसाधने ७एकदेशे अवयवादौ। यः कश्चित् पदार्थः कस्मिंश्चिदाधारे एकदेशे तिष्ठति तत्रैव प्रदेशान्तरे चेन्न तिष्ठतीति स अव्याप्यवृत्तिः तस्याव्याप्यवृत्तिताया निरूपकोऽवयवादिः। यथा वृक्षे अग्रदेशे कपिसंयोगः मूलदेशे तदभावः अतः कपिसंयोगः अव्याप्यवृत्तिः तादृशाव्याप्यवृत्तिताया नियामकश्च मूलादिप्रदेशः तत्रावच्छेदशब्देनाभिधीयते। तादृशावच्छेदश्च द्विविधः देशः कालश्च। तत्र देशसत्त्वे कालविशेषे तदभावात् कालएव तत्राव्याप्यवृत्तितायानियामकः। यथा आत्मनि ज्ञानादौ ज्ञानं क्षणौ तदभावः। देशरूपस्तूक्तः। अवच्छेदावच्छेदेन साध्यसिद्धौ सामानाधिकरण्यसिद्धिः प्रतिबन्धिका इति शिरोमणिः। अवच्छेदाः यावन्तः साध्यसिद्धौ प्रदेशास्तावतामेवावच्छेदेन साध्यसम्बन्धव्यापकत्वेनेति तदर्थः।

अवच्छेदक त्रि० अवच्छिनत्ति अव+छिद–ण्वुल्। १छेदके २दृश्यताकारके ३सीमाकारके ४अवधारके ५अव्याप्यवृत्तितानिरूपके च। अवच्छिद्यतेऽनेन विशेषणे। "प्रतियोगितावच्छेदकावच्छिन्नमिति" चिन्तामणिः। अवच्छेदकत्वं च अवच्छेदकत्व एव तदवच्छेदकोऽपि स्वीक्रियते यथा वह्निमान् पर्वत इति बुद्धौ वह्न्यभाववान् पर्वत इति निश्चयः प्रतिबन्धकः तत्र प्रतिबन्धकतावच्छेदकं निश्चयत्वमिव तत्तद्विषयताऽपि तत्तावच्छेदिका तथा च वह्नित्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतात्वावच्छिन्नं प्रति वह्नित्वावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नविशेष्यतासमानाधिकरणप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतात्वावच्छिन्नं निश्चयत्वेन प्रतिबन्धकत्वे निश्चयत्वस्येव तत्तद्विषयतायाऽपि तत्प्रतिबन्धकतावच्छेदकत्वं तथा तादृशज्ञानत्वस्येव तत्तद्विषयतायाऽपि प्रतिबन्धतावच्छेदकत्वम्। इयांस्तुभेदः अनुच्छेद्यमानजातेः स्वरूपतोऽवच्छेदकत्वं न तदवच्छेदकतायाः अवच्छेदकमस्ति तेन घटवद्भूतलमिति बुद्धौ घटत्वनिष्ठप्रकारतावच्छेदकतायाः नान्यदवच्छेदकम् तथा च यथा घटनिष्ठप्रकारतायाः अवच्छेदकम् घटत्वम् एवं घटत्वनिष्ठप्रकारतायानान्यदवच्छेदकमतस्तत्स्वनिरूपितावच्छेदकता अनुच्छिद्यमानेत्युच्छिद्यमानजातेर्नस्वरूपतोऽवच्छेदकत्वंतेन घटत्ववत्त्वान् देश इत्यादौ घटत्वप्रकारतायाः अवच्छेदकमस्तीति। अत्राशयं विशेषः धर्म्यंशे भासमानः धर्म्मः विशेष्यतावच्छेदकः प्रकारांशे भासमानः प्रकारतावच्छेदक एवं सर्वत्र। किन्तु प्रतियोग्यंशे भासमानधर्म्मस्य न प्रतियोगितावच्छेदकत्वमपि तु अतिप्रसङ्गादनापादकस्यैव धर्म्मस्य तथात्वं यथा कम्बुग्रीवादिमान्नास्ति इत्याद्यभावबुद्धौ घटत्वस्यैव प्रतियोगितावच्छेदकत्वम् "सम्भवति तत्रौ

धर्म्मे गुरौ तदभावात्" दीधितिगुक्तेः गङ्गतावच्छेदकत्वं विषयतावच्छेदकत्ववत् गुरुधर्म्मस्यापि स्वीकृतमाकरे।

अवच्छेदकत्वनिरुक्ति स्त्री रघुनाथशिरोमणिकृते अवच्छेदकतापदार्थनिरूपिते अनुमानखण्डान्तर्गते ग्रन्थभेदे।

अवच्छेद्य त्रि० अव+छिद-ण्यत्। १छेदनार्हे २अवधार्य्ये विशेषणीये ३अवच्छेदार्हे च पदार्थे यथा दण्डत्वेनावच्छेद्या घटादिकारणता घटत्वेनावच्छेद्या घटप्रतियोगिता।

अवजय पु० अव+जि-अच्। पराजये "येनेन्द्रलोकावजयाय दग्नः" रघुः।

अवज्ञा स्त्री अव+ज्ञा-अङ्। अनादरे। आत्मन्यवज्ञां शिथिलीचकार" रघुः। "गत्यर्थमन्यतेर्ढे चेदावज्ञबोः" दुग्ध०। "अविज्ञावज्ञेयं परितपति नोर्ज्जैरपि बुधम्" उद्भटः।

अवज्ञात त्रि० अव+ज्ञा क्त। १ अनादृते २तिरस्कृते ३ज्ञतावमाने च

अवज्ञान न० अव+ज्ञा-भावे ल्युट्। १अवमाने २तिरस्कारे ३अनादरे "ईप्सितं तदवज्ञानात् विद्धि सार्गलमात्मनः" रघुः

अवज्ञेय त्रि० अव+ज्ञा-कर्म्मणि यत्। १अनादरणीये २तिरस्कार्य्ये "विप्रा हि क्षत्रियात्मानोनावज्ञेयाः कदाचन" या० स्मृ०।

अवट पु० अव+अट्-अच्। १गर्त्ते, २कूपे। "रजसां गतसत्त्वानामेष धर्म्मः सनातनः। अवटे ये निधीयन्ते" रामा०। "भूतौदनो निवेद्यश्च स्नात्वापक्रारिणोऽवटे" स्मृ० "अवटेऽवनयति" शत० ब्रा०। ३देहस्थनिम्नस्थाने कण्ठमूलादौ च "अवटश्चैवमेतानि स्थानान्यत्र शरीरके" या० स्मृ० "शरीरे यः अवटः कश्चिन्निम्नोदेशः कण्ठमूलकक्षादि" मिता० ४ऐन्द्रजालिकजीविकावति च गर्गा० यञ् आवट्यः। अवटभवे त्रि०। [आधारे ल्युट्। नरकभेदे नरकशब्दे विवृतिः।

अवटनिरोधन पु० अवटे गर्त्ते निरुध्यतेऽत्र अव+नि+रुध

अवटि स्त्री अव+अटि। १गर्त्ते २कूपे च वा ङीप् अवटीत्यपि।

अवटीट त्रि० अवनता नासिका प्रा०स० नतार्थे नासायाः टीटादेशः अर्श आदित्वादच्। (खाँदा) नतनासिके जने।

अवटु पु० अव+टीक-मितद्वा०डु। १गर्त्ते, २दृढभेदे, ३कूपे च। ४ग्रीवापश्चाद्भागे, ५ग्रीवाया उन्नतभागे च स्त्री ४देहस्थे निम्नदेशे "अवटुश्चैवमेतानि स्थानान्यत्र शरीरके" इति या० स्मृ० पाठान्तरम् "अवटावथ हन्वोश्च प्रस्तरघ्नोन्नमेन्नरम्" सुश्रु०। न०त० ५वटुभिन्ने पु०।

अवटुज पु० अवटौ जायते जन-ड ७त०। शिरःस्थचरमकेशे घाटास्थकेशे "रागवानवटुजेष्ववलम्ब्य" माघः।

अवटोदा स्त्री न०त० अवटस्य कूपस्योदकमिव उदकमस्याः उदादेशः। भारतवर्षीये नदीभेदे।

अवडङ्क पु० अवगतो डङ्कः शब्दो यस्मात्। कट्टस्थाने जटा०।

अवडीन न० अव+डी-भावे क्त। अवरोहणरूपे पक्षिगतिभेदे।

अवत पु० अव-अटच् वेदे पृ० टस्य तः। अवटरूपे कूपादौ निरु० "सिक्तमवतम्" ऋ० १,१२०,२ "अवतमवटमिति" भा० "अवते न कोशम्" ऋ० ४,१७,१६।

अवतंस पुंन० अव+तनस-घञ्। १कर्णपुरे, २शिरोभूषाभेदे च। "कर्णावतंसहिगुणाच्चलत्वम्" "स्रवाहनक्षोभचलावतंसाः" "गणा नामेरप्सवावतंसाः" इति च कुमा०।

अवतंसित त्रि० अव+तनस-क्त। भूषिते "समदनमवतंसितेऽधिकर्णम्" माघः। वा अच्चोपे वतंसितोत्पल।

अवतमस न० अवततं व्याप्तं तमः प्रा०स०अच् समा०। व्याप्तान्धकारे। "अवतमसभिदायै भास्वताभ्युद्गतेन" माघः।

अवतरण अव+तॄ-भावे ल्युट्। तीरादिप्रदेशात् १जलाद्यवगाहाद्यर्थमवरोहणे। २अन्यरूपेण प्रादुर्भावे "अंशावतरणम्" भा०आ०प०। वस्तुमात्रस्य स्वस्थानात् ३अवरोहणे (नामा) "स्नान्यावतरणे चैव ज्वरोदोषैः प्रवर्त्तते। स्त्रीणामप्रजातानां स्नान्यावतरणे च यः" सुश्रु०। अवतीर्य्यतेऽनेन करणे ल्युट्। नद्यादेः सोपानादौ ४तीर्थे।

अवतरणी स्त्री अवतरति अन्योऽनया अवतॄ करणे ल्युट्। ङीप्। ग्रन्थप्रस्तावार्थं प्रथमसोपोद्घातरूपायां सङ्गतौ (आभास) इत्याख्यायां २परिपाट्याञ्च स्वार्थे कन् अवतरणिकाऽप्यत्र।

अवतान पु० अव+तन-घञ् कर्म्मणि घञ्। १ स्नाने २अधोमुखे ३लताप्रताने च "लताग्रतैरवततामवतानग्रतैस्तथा" रामा०।

अवतार पु० अव+तॄ करणे घञ्। १तीर्थे, (पुष्करिण्यादेः सोपानपङ्क्तौ) "स्नेहे गजेन सरितः सरघाऽवतारे" माघः। भावे घञ्। २प्रादुर्भावे "नवावतारं कमलादिवोत्पलम्" मा भूत् परीवादनवावतारः" इति च रघुः ३देवानामंशावेशरूपेण प्रादुर्भावे च। "अवताराह्यसंख्येया" इत्युक्तेः तेषां बहुत्वेऽपि प्राधान्याद्दशैव विष्णोरवताराः शास्त्रप्रसिद्धाः यथा "मत्स्यः कूर्म्मोवराहश्च नरसिंहोऽथ वामनः। रामो रामश्च रामश्च बुद्धः कल्की च ते दश" पुरा० तत्रभागवतां तु प्रकृतेरेव एते अवतारा उक्ताः 'प्रकृतिर्विष्णुरूपाच पुंरूपश्च महेश्वरः। एवं प्रकृतिभेदेन भेदास्तु प्रकृतेर्दश। कृष्णरूपा कालिका स्यात् रामरूपा च तारिणी। कमला कूर्म्ममूर्त्तिः स्यात् मीनो धूमावती भवेत्। छिन्नमस्ता नृसिंहः स्याद्वराहश्चैव भैरवी। सुन्दरी जामदग्न्यः स्यात् वामनो भुवनेश्वरी। कमला

बौद्धरूपा स्यात् मातङ्गी कल्किरूपिणी। स्वयं भगवती काली कृष्णस्तु भगवान् स्वयम्। स्वयं च भगवान् कृष्णः कालीरूपोऽभवद् व्रजे"। भागवते १स्क०३अ प्राधान्यतः अन्येऽप्यवतरा उक्ताः यथा "लीलावतारानुरतोदेवतिर्यङ्नरादिषु" इत्युपक्रम्य। "जग्टहे पौरुषं रूपं भगवान् महदादिभिः। संभृतं षोड़शकलमादौ लोकसिसृक्षया। यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः। नाभिह्रदाम्बुजादासीद्ब्रह्मा विश्वसृजां पतिः। यस्यावयवसंस्थानैः कल्पितोलोकविस्तरः। तद्वै भगवतोरूपं विशुद्धं सत्वमूर्जितम्। पश्यन्त्यदोरूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतम्। सहस्र मूर्द्धश्रवणाक्षिनासिकं सहस्रमौल्यम्बरकुण्डलोल्लसत्। एतन्नानावतारानां निधानं बीजमव्ययम्। यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः। स एव प्रथमं देवः कौमारं सर्गमाश्रितः। चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखण्डितम्१। द्वितीयस्तु भवायास्य रसातलगतां महीम्। उद्धरिष्यन्नुपादत्त यज्ञेशः शौकरं वपुः२। तृतीयऋषिसर्गं वै देवर्षित्वमुपेत्य सः। तन्त्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः३। तुर्ये धर्मकलासर्गे नरनारायणावृषी। भूत्वात्मोपशमोपेतमकरोद्दुश्चरं तपः४। पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम्। प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम्५। षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया। आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान्६। ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत सतामाद्यैः सुरगणैरपात् स्वायम्भुवान्तरम्७। अष्टमे मेरुदेव्यान्तु नाभेर्जात उरुक्रमः। दर्शयन् वर्त्म धीराणां सर्वाश्रमनमस्कृतम्८। ऋषिभिर्याचितोभेजे नवमं पार्थिवं वपुः। दुग्धेमामोषधीर्विप्रास्तेन यः स उशत्तमः९। रूपं स जग्टहे मात्स्यं चाक्षुषान्तरसंप्लवे। नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुम्१०। सुरासुराणामुदधिं मथ्नतां मन्दराचलम्। दध्रे कमठरूपेण पृष्ठ एकादशे विभुः११। धान्वन्तरं द्वादशमं त्रयोदशममेव च१२। अपाययत् सुरानन्यान्मोहिन्याऽमोहयत् स्त्रिया १३। चतुर्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्जितम्। ददार करजैरूरावेरकां कटकृद्यथा१४। पञ्चदशं वामनकं कृत्वागादध्वरं बलेः। पदत्रयं याचमानः प्रत्यादित्सुस्त्रिपिष्टपम् १५। अवतारे षोड़शमे पश्यन् ब्रह्मद्रुहोऽसुरान्। त्रिसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीम् १६। ततः सप्तदशे जातः सत्यवत्यां पराशरात्। चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः१७। नरदेवत्वमापन्नः सुरकार्यचिकीर्षया। सप्तद्वनिग्रहादीनि चक्रे वीर्याण्यतःपरम् १८। एकोनविंशे विंशति मे ब्रह्मणि प्राप्य जन्मनी। रामकृष्णाविति भुवो भगवानहरद्भरम् १९। २०। ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषाम्। बुद्धो नाम्नाजिनसुतः कीकटेषु भविष्यति२१। अथासौ युगसन्ध्यायां दस्युप्रायेषु राजसु। जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः२२। अवतारास्ह्यसंख्येया हरेः सत्वनिधेर्द्विजाः। यथा विदासिनः कुल्याः सरसः स्युः सहस्रशः। ऋषयो मनवोदेवा मनुपुत्रा महौजसः। कलाः सर्वे हरेरेव सप्रजापतयः स्मृताः। एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्। इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे"। "कस्मिन् काले स भगवान् किंवर्णः कीदृशोऽनघः। नाम्ना केन विधानेन पूज्यते तदिहोच्यताम्" । इति प्रश्ने। "कृते शुक्लश्चतुर्बाहुर्जटिलो वल्कलाम्बरः। कृष्णाजिनोपवीताक्षान् बिभ्रद्दण्डं कमण्डलुम्। मनुष्यास्तु तदा ज्ञाना निर्जैराः सुहृदः समाः। यजन्ति तपसा देवं शमेन च दमेन च। हंसः सुपर्णो वैकुण्ठोधर्मोयोगेश्वरोऽमलः। ईश्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते। त्रेतायां रक्तवर्णोऽसौ चतुर्बाहुस्रु मेखलः। हिरण्यकेशस्त्रय्यक्षः स्रुक्स्रुवादिपलक्षणः। तं तदा मनुजा देवं सर्वदेवमयं हरिम्। यजन्ति विद्यया त्रय्या धर्मिष्ठा ब्रह्मवादिनः। विष्णुर्यज्ञः पृश्निगर्भः सर्वदेव उरुक्रमः। वृषाकपिर्जयन्तश्च उरुगाय इतीर्यते। द्वापरे भगवान् श्यामः पीतवासा निजायुधः। श्रीवत्सादिभिरङ्कैश्च लक्षणैरुपलक्षितः। तं तदा पुरुषं मर्त्या महाराजोपलक्षणम्। यजन्ति वेदतन्त्राभ्यां परं जिज्ञासवो नृप!। नमस्ते वासुदेवाय नमः सङ्कर्षणाय च। प्रद्युम्नाय निरुद्धाय तुभ्यं भगवते नमः। नारायणाय ऋषये पुरुषाय महात्मने। विश्वेश्वराय विश्वाय सर्वभूतात्मने नमः। इति द्वापर उर्वीश स्तुवन्ति जगदीश्वरम्। नानातन्त्रविधानेन कलावपि यथा शृणु। कृष्णवर्णं त्विषाकृष्णं साङ्गोपाङ्गास्त्रपार्षदम्। यज्ञैः संकीर्त्तनप्रायैर्यजन्ति हि सुमेधसः। ध्येयं सदापरिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्। भृत्यार्तिहं प्रणतपालभवाब्धिपोतं वन्दे महापुरुष! ते चरणारविन्दम्॥ भा० ११ स्कन्द०। अन्यत्र अवतारभेदस्तत्रैवोक्तः "हंसस्वरूप्यवदद्च्युतआत्मयोगं दत्तः कुमार ऋषभोभगवान् पिता नः। विष्णुः शिवाय जगतां कलयावतीर्णस्तेनाहृतामधुभिदा

श्रुतयोर्हयास्ये। गुप्तोऽथवे मनुरिलोषधवच्च मात्स्ये क्रौड़े हतो दितिज उद्धरताम्भसः ष्माम्। कौर्म्मेऽर्दितोऽद्रि रसनोन्मथने स्वपृष्ठे धार्ताप्रपद्ममिवराजमसञ्जदार्षम्। संस्तुन्वतोनिपतितान् श्रमणानृषींश्च शक्रञ्च दत्तवधतस्तमसि-प्रविष्टम्। देवस्त्रियोऽसुरगृहेपिहिता अनाथा जघ्ने ऽसुरेन्द्र-मभयाय सतां नृसिंहे। देवासुरे युधि च दैत्यपतीन् सुरार्थे हत्वान्तरेषु भुवनान्यदधत् कलाभिः। भूत्वाथ वामन इमामहरद्बलेः ष्मां याच्ञाच्छलेन समदाददितेः सुतेभ्यः। निःक्ष-त्रियामकृतगाञ्च त्रिसप्तकृत्वोरामस्तु हैहयकुलाप्ययबाड़-वाग्निः। सोऽब्धिं बबन्ध दशवक्त्रमहन् सलङ्कं सीता-पतिर्जयति लोकमलघ्नकीर्त्तिः। भूमेर्भरावतरणाय यदु-ष्वजन्मा जातः करिष्यति सुरैरपि दुष्करााणि। वादै-र्विमोहयति यज्ञकृतोऽतदर्हान् स्थानं कलौ चिति-भुजोन्महनिष्यदन्ते। एवंविधानि जन्मानि कर्म्माणि च जगत्पतेः। भूरीणि भूरियशसो वर्णितानि महाभुज!"। सुरासुराद्यावतारा भारते आदिपर्व्वणि दर्शिताः यथा "इत्युक्त्वा स महीं देवो ब्रह्मा राजन्! विसृज्यताम्। आदि-देव तदा सर्व्वान् विबुधान् भूतकृत्तमम्। अस्या भूमेर्निर-सितं भारं भागैः पृथक् पृथक्। अस्मामेव प्रसूयध्वं विरो-धायेति चाब्रवीत्। तवैव च समानीय गन्धर्व्वाप्सरसां गणान्। उवाच भगवान् सर्व्वानिदं वचनमर्थवत्"। इत्युप-क्रम्य "स्वैः स्वैरंशैः प्रसूयध्वं यदेतं मानुषेषु च। अथ शक्रादयः सर्वे श्रुत्वा सुरगुरोर्वचः। तथ्यमर्थ्यञ्च पथ्यञ्च तस्य ते जगृहुस्तदा। अथ ते सर्व्वशोंऽशैः स्वैर्गन्तुं भूमिं कृतत्वराः। नारायणमभिप्रेत्य वैकुण्ठमुपचक्रमुः। यः स चक्रगदापाणिः पीतवासाः स्थितिप्रभः। पद्मनाभः सुरारिघ्नः पृथुश्रीरच्युतेक्षणः। प्रजापतिपतिर्हृषैः सुर-नाथो महाबलः। श्रीवत्साङ्को हृषीकेशः सर्व्वदैवपू-जितः। तं भुवः शोधनावेन्द्रः उवाच पुरुषोत्तमम्। अंशे-नावतरेत्येवं तत्रेत्याह च तं हरिः" इत्युपक्रम्य च "अथ नारायणेनेत्थं चकार सह संविदम्। अवतर्त्तुं महीं स्वर्गादंशतः सहितः सुरैः। आदिश्य च स्वयं शक्रः सर्व्वा-नेव दिवौकसः। निर्जगाम पुनस्तस्मात् क्षयाच्चारायणस्य च। तेऽमरारिविनाशाय सर्व्वलोकहिताय च। अवतेरुः क्रमे-णैव महीं स्वर्गाद्दिवौकसः। ततो ब्रह्मर्षिवंशेषु पार्थि-वर्षिकुलेषु च। जज्ञिरे राजशार्दूल यथाकामं दिवौकसः"। इति सामान्यत उक्त्वा। "मानुषेषु मनुष्येन्द्रः संभूता ये दिवौकसः। प्रथमं दानवांश्चैव तांस्ते वक्ष्यामि सर्व्वशः। विप्रचित्तिरिति ख्यातो य आसीद्दानवर्षभः। जरासन्ध इति ख्यातः स आसीन्नृपसत्तमः। दितेः पुत्रस्तु वो राजन्! हिरण्यकशिपुः स्मृतः। सञ्जज्ञे मानुषे लोके शिशुपालो नरर्षभ!। संह्लाद इति विख्यातः प्रह्लादस्यानुजस्तु यः। स शल्य इति विख्यातो जज्ञे वाह्लीकपुङ्गवः। अनुह्लादस्तु तेजस्वी योऽभूत् ख्यातो जघन्यजः। धृष्टकेतुरिति ख्यातः स बभूव नरेश्वरः। यस्तु राजञ्छिबिर्नाम दैतेयः परिकीर्त्तितः। द्रुम इत्य-भिविख्यातः स आसीद्भुवि पार्थिवः। वाल्हको नाम यस्तेषामासीदसुरसत्तमः। भगदत्त इति ख्यातः स जज्ञे पुरुषर्षभ!। अयःशिरा अश्वशिरा अयःशङ्कुश्च वीर्य्यवान्। तथा गगनमूर्द्धा च वेगवांश्चाल पञ्चमः। पञ्चैते जज्ञिरे राजन् वीर्य्यवन्तो महासुराः। केकयेषु महात्मानः पार्थिवर्ष-भसत्तमाः। केतुमानिति विख्यातो यस्ततोऽन्यः प्रताप-वान्। अमितौजा इति ख्यातः सोऽन्यकर्म्मा नराधिपः। सुधर्मेति विख्यातः श्रीमान् यस्तु महासुरः। उग्रसेन इति ख्यात उग्रकर्म्मा नराधिपः। यस्तत्र इति विख्यातः श्रीमानासीन्महासुरः। अशोको नाम राजाऽभून्महा-विर्य्योऽपराजितः। तस्मादवरजो यस्तु राजन्नृपतिः स्मृतः। दैतेयः सोऽभवद्राजा हार्दिक्यो मनुजर्षभः। वृषपर्व्वेति विख्यातः श्रीमान् यस्तु महासुरः। दीर्घप्रज्ञ इति ख्यातः पृथिव्यां सोऽभवन्नृपः। अजकस्त्वपरो राजन्! य आसीद्वृषपर्व्वणः। स शाल्व इति विख्यातः पृथिव्यामभव-न्नृपः। अश्वपीव इति ख्यातः सत्ववान् यो महासुरः। रोचमान इति ख्यातः पृथिव्यां सोऽभवन्नृपः। सूक्ष्मस्तु मतिमान् राजन्! कीर्त्तिमान् यः प्रकीर्त्तितः। वृहद्रथ इति ख्यातः क्षितावासीत्स पार्थिवः। तुरुष्क इति विख्यातो य आसीदसुरोत्तमः। सेनाबिन्दुरिति ख्यातः स बभूव नराधिपः। द्रुपदो नाम यस्तेषामसुराणां बलाधिकः। नग्नजिच्चाभ राजासीद्भुवि विख्यातविक्रमः। एकचक्र इति ख्यात आसीद्यस्तु महासुरः। प्रतिविन्ध्य इति ख्यातो बभूव प्रथितः क्षितौ। विरूपाक्षस्तु दैतेयश्चित्रयोधी महासुरः। चित्रवर्म्मेति विख्यातः क्षितावासीत्स पार्थिवः। हरस्त्वरि-हरो वीर आसीद्यो दानवोत्तमः। सुबाहुरिति विख्यातः श्रीमानासीत्स पार्थिवः। वृहत्तस्तु महातेजाः शत्रुपक्षक्षय-ङ्करः। वाह्लीको नाम राजा स बभूव प्रथितः क्षितौ। निचन्द्रचन्द्रवक्त्रस्तु य आसीदसुरोत्तमः। सुदक्षेण इति ख्यातः श्रीमानासीत् स पार्थिवः। निकुम्भस्त्वजितः संख्ये

महामतिरजायत । भूमौ भूमिपतिश्रेष्ठो देवाधिप इति स्मृतः । शरभो नाम यस्तेषां दैतेयानां महासुरः । पौरवो नाम राजर्षिः स बभूव नरोत्तमः । सुक्रतुस्तु महावीर्य्यः श्रीमान् राजन्महासुरः । सुपार्श्व इति विख्यातः क्षितौ जज्ञे महीपतिः । क्रतुस्तु राजन् ! राजर्षिः क्षितौ जज्ञे महासुरः । पार्व्वतेय इति ख्यातः काञ्चनाचलसन्निभः । द्वितीयः शलभस्तेषामसुराणां बभूव ह । प्रह्लादो नाम वाह्लीकः स बभूव नराधिपः । चन्द्रस्तु दितिजश्रेष्ठो लोके ताराधिपोपमः । चन्द्रकर्मेति विख्यातः काम्बोजानां नराधिपः । अर्क इत्यभिविख्यातो यस्तु दानवपुङ्गवः । ऋषिको नाम राजर्षिर्बभूव नृपसत्तमः । स्तनपा इति विख्यातो य आसीदसुरोत्तमः । पश्चिमानूपकं विद्धि तं नृपं नृपसत्तम ! । गविश्वस्तु महातेजा य प्रख्यातो महासुरः । द्रुमसेन इति ख्यातः पृथिव्यां सोऽभवन्नृपः । मयूर इति विख्यातः श्रीमान् यस्तु महासुरः । स विश्व इति विख्यातो बभूव पृथिवीपतिः । सुपर्ण इति विख्यातस्तस्मादवरजस्तु यः । कालकीर्त्तिरिति ख्यात पृथिव्यां सोऽभवन्नृपः । चन्द्रहन्तेति यस्तेषां कीर्त्तितः प्रवरोऽसुरः । शुनको नाम राजर्षिः स बभूव नराधिपः । विनाशनस्तु चन्द्रस्य य आख्यातो महासुरः । जानकिर्द्रामविख्यातः सोऽभवन्मनुजाधिपः । दीर्घजिह्वस्तु कौरव्य य उक्तो दानवर्षभ ! । काशिराजः स विख्यातः पृथिव्यां पृथिवीपते ! । यहन्तं सुषुवे यन्तु सिंहिकाऽर्केन्दुमर्द्दनम् । स क्राथ इति विख्यातो बभूव मनुजाधिपः । अनायुषस्तु पुत्राणां चतुर्णां प्रवरोऽसुरः । विप्ररो नाम तेजस्वी वसुमित्रो नृपः स्मृतः । द्वितीयो विप्रराट्तस्तु नराधिप ! महासुरः । पाण्ड्यराड्राधिप इति विख्यातः सोऽभवन्नृपः । बलीन इति विख्यातो यस्यासीदसुरोत्तमः । पौण्ड्रमात्स्यक इत्येवं बभूव स नराधिपः । इल इत्यभिविख्यातो यस्तु राजन्महासुरः । मणिमान्नाम राजर्षिः स बभूव नराधिपः । क्रोधहन्तेति यस्तस्य बभूवावरजोऽसुरः । दण्ड इत्यभिविख्यातः स आसीन्नृपतिः क्षितौ । क्रोधवर्द्धन इत्येव यस्तस्यः परिकीर्त्तितः । दण्डधार इति ख्यातः सोऽभवन्मनुजर्षभः । कालेयानान्तु ये पुत्रास्तेषामष्टौ नराधिपाः । जज्ञिरे राजशार्दूल ! शार्दूलसमविक्रमाः । मगधेषु जयत्सेनस्तेषामासीत्स पार्थिवः । त्वष्टानाम्नवरस्तेषां कालेयानां महासुरः । द्वितीयस्तु ततस्तेषु श्रीमान् हरिहयोपमः । अपराजित इत्येवं स बभूव नराधिपः । तृतीयस्तु महातेजा महामायो महासुरः । निषादाधिपतिर्जज्ञे भुवि भीमपराक्रमः । तेषामन्यतमो यस्तु चतुर्थः परिकीर्त्तितः । श्रेणिमानिति विख्यातः क्षितौ राजर्षिसत्तमः । पञ्चमस्त्वभवत्तेषां प्रवरो यो महासुरः । महौजा इति विख्यातो बभूवेह परन्तपः । षष्ठस्तु मतिमान् यो वै तेषामासीन्महासुरः । अभीरुरिति विख्यातः क्षितौ राजर्षिसत्तमः । सप्तसेनस्तु नृपस्तेषामेवाभवन्नृणात् । विश्रुतः सागरान्तायां क्षितौ धर्म्मार्थतत्त्ववित् । दृढनामाष्टमस्तेषां कालेयानां नराधिप ! । बभूव राजा धर्म्मात्मा सर्वभूतहिते रतः । कुक्षिस्तु राजन् ! विख्यातो दानवानां बलाबलः । पार्वतीय इति ख्यातः काञ्चनाचलसन्निभः । क्रथनश्च महावीर्य्यः श्रीमान्राजन्महासुरः । सूर्य्याक्ष इति विख्यातः क्षितौ जज्ञे महीपतिः । असुराणान्तु यः सूर्य्यः श्रीमांश्चैव महासुरः । दरदो नाम वाह्लीको वरः सर्वमहीक्षिताम् । गणः क्रोधवशो नाम यस्ते राजन् ! प्रकीर्त्तितः । ततः सङ्क्षत्रिरे वीराः क्षितावित्र नराधिपाः । मद्रकः कर्णवेष्टश्च सिद्धार्थः कीटकस्तथा । सुवीरश्च सुबाहुश्च महावीरोऽथ वाह्लिकः । क्रथो विचित्रः सुरथः श्रीमाञ्छीलश्च भूमिपः । चीरवासाश्च कौरव्य ! भूमिपालश्च नामतः । दन्तवक्त्रश्च नामासीद्दुर्जयश्चैव दानवः । रुक्मी च नृपशार्दूलो राजा च जनमेजयः । आषाढो वायुवेगश्च भूरितेजास्तथैव च । एकलव्यः सुमित्रश्च वाटधानोऽथ गोसुखः । कारूषकाश्च राजानः क्षेमधूर्त्तिस्तथैव च । श्रुतायुरद्भुतश्चैव दृढसेनस्तथैव च । क्षेमोऽप्यवीर्य्यः कुहरः कलिङ्गेषु नराधिपः । मतिमांश्च मनुष्येन्द्र ईश्वरश्चेति विश्रुतः । गणात् क्रोधवशादेव राजपूगोऽभवत् क्षितौ । जातः पुरा महाभागो महाकीर्त्तिर्महाबलः । कालनेमिरिति ख्यातो दानवानां महाबलः । स कंस इति विख्यात उग्रसेनसुतो बली । यस्यासीद्देवको नाम देवराजसमद्युतिः । स गन्धर्व्वपतिर्मुख्यः क्षितौ जज्ञे नराधिपः । दृढस्यतेर्दृढकीर्त्तिर्द्वैवर्षेविधि भारत ! । अंशात् द्रोणं सप्तपद्मं भारद्वाजमयोनिजम् । धन्विनां नृपशार्दूल ! यः सर्व्वास्त्रविदुत्तमः । महाकीर्त्तिर्महातेजाः स जज्ञे मनुजेश्वर ! । धनुर्वेदे च वेदे च यं तं वेदविदो विदुः । गरिष्ठं चित्रकर्म्माणं द्रोणं खलवर्द्धनम् । महादेवान्तकाभ्याञ्च कामात् क्रोधाच्च भारत ! । एकलव्यपपन्नानां जज्ञे शूरः परन्तपः । अश्वत्थामा महावीर्य्यः शत्रुपक्षक्षयावहः । वीरः कमलपत्राक्षः क्षितावा-

क्षीरराधिप !। जज्ञिरे वसवस्त्वष्टौ गङ्गायां शान्तनोः सुताः। वशिष्ठस्य च शापेन नियोगाद्वासवस्य च। तेषामवरजो भीष्मः कुरूणामभयङ्करः। मतिमान्वेदविद्वाग्मी शत्रुपक्षक्षयङ्करः। जामदग्न्येन रामेण सर्वास्त्रविदुषां वरः। योऽयुध्यत महातेजा भार्गवेण महात्मना। यस्तु राजन्! ऋषो नाम ब्रह्मर्षिरभवत् क्षितौ। स्कन्दाच्चन्तु गणाद्दुविद्धि संभूतमतिपौरुषम्। शक्तिनिर्नाम यस्यासीद्राजा लोके महारथः। द्वापरं विद्धि तं राजन्! संभूतमरिमर्दनम्। सात्यकिः सत्यसन्धश्च योऽसौ वृष्णिकुलोद्वहः। पक्षात् स जज्ञे मरुतां देवानामरिमर्दनः। द्रुपदश्चैव राजर्षिस्तत एवाभवद्गणात्। मानुषे नृप! लोकेऽस्मिन् सर्वशस्त्रभृतां वरः। ततश्च क्रतवर्म्माणं विद्धि राजन्! जनाधिपम्। तमप्रतिमकर्म्माणं क्षत्रियर्षभसत्तमम्। मरुतान्तु गणाद्विद्धि सञ्जातमरिमर्दनम्। विराटं नाम राजानं परराष्ट्रप्रतापनम्। अरिष्टायास्तु यः पुत्री हंस इत्यभिविश्रुतः। स गन्धर्वपतिर्जज्ञे कुरुवंशविवर्द्धनः। धृतराष्ट्र इति ख्यातः कृष्णद्वैपायनात्मजः। दीर्घबाहुर्महातेजाः प्रज्ञाचक्षुर्नराधिपः। मातुर्दैशाढ्यपेः कोपादन्ध एव व्यजायत। तस्यैवावरजो भ्राता महासत्त्वो महाबलः। स पाण्डुरिति विख्यातः सत्यधर्म्मरतः शुचिः। अलेषु सुमहाभागं पुत्रं पुत्रवतां वरम्। विदुरं विद्धि तं लोके जातं बुद्धिमतां वरम्। कलेरंशस्तु सञ्जज्ञे भुवि दुर्य्योधनो नृपः। दुर्बुद्धिर्दुर्म्मतिश्चैव क्रूरकर्म्मकरः शरः। जगतो यस्तु सर्वस्य विद्विष्टः कलिपूरुषः। यः सर्वां घातयामास पृथिवीं पृथिवीपते!। उद्दीपितं येन वैरं भूतानामकरणं महत्। पौलस्त्या भ्रातरश्चास्य जज्ञिरे मनुजेष्विह। शतं दुःशासनादीनां सर्वेषां क्रूरकर्म्मणाम्। दुर्मुखो दुःसहश्चैव ये चान्येनानुकीर्त्तिताः। दुर्य्योधनसहायास्ते पौलस्त्या भरतर्षभ!। वैश्यापुत्रो युयुत्सुश्च धार्त्तराष्ट्रः शताधिकः" इति। "धर्म्मस्यांशन्तु राजन्! विद्धि राजन्! युधिष्ठिरम्। भीमसेनन्तु वातस्य देवराजस्य चार्जुनम्। अश्विनोस्तु तथैवांशौ रूपेणाप्रतिमौ भुवि। नकुलः सहदेवश्च सर्वभूतमनोहरौ। यस्तु वर्द्धा इति ख्यातः सोमपुत्रः प्रतापवान्। सोऽभिमन्युर्महत्कीर्त्तिरर्जुनस्य सुतोऽभवत्। यस्यावतरणे राजन्! सुरान् सोमोऽब्रवीदिदम्। नाहं दद्यामिमं पुत्रं मम प्राणैर्गरीयसम्। समयः क्रियतामेष न शक्यमतिवर्त्तितुम्। सुरकार्य्यं हि नः कार्य्यमसुराणां क्षितौ वधः। इति यास्यत्ययं वर्द्धा न च स्थास्यति वै चिरम्। ऐन्द्रिरस्तु भविता यस्य नारायणः सखा। सोऽर्जुनेत्यभिविख्यातो पाण्डोः पुत्रः प्रतापवान्। तस्यायं भविता पुत्रो बालो भुवि महारथः। ततः षोडश वर्षाणि स्थास्यत्यमरसत्तमाः!। अस्य षोडशवर्षस्य स संग्रामो भविष्यति। यत्रांशा वः करिष्यन्ति कर्म वीरनिसूदनम्। नरनारायणाभ्यां तु स संग्रामो विनाकृतः। चक्रव्यूहं समास्थाय योधयिष्यन्ति वः सुराः। विसुखाञ्छात्रवान् सर्वान् कारयिष्यति मे सुतः। बालः प्रविश्य च व्यूहमभेद्यं विचरिष्यति। महारथानां वीराणां कदनञ्च करिष्यति। सर्वेषामेव शत्रूणां चतुर्थांशं नयिष्यति। दिनार्द्धेन महाबाहुः प्रेतराजपुरं प्रति। ततो महारथैर्वीरैः समेत्य बहुभो रणे। दिनक्षये महाबाहुर्मया भूयः समेष्यते एकं वंशकरं पुत्रं वीरं वै जनयिष्यति। प्रनष्टं भारतं वंशं स भूयो धारयिष्यति। एतत् सोमवचः श्रुत्वा तथाऽस्त्विति दिवौकसः। प्रत्यूचुः सहिताः सर्वे तारापिपमपूजयन्। एवं ते कथितं राजंस्तव जन्म पितुः पितुः। अग्नेर्भागन्तु तं विद्धि धृष्टद्युम्नं महारथम्। शिखण्डिनञ्चोराजन्! स्त्रीपूर्वं विद्धि राक्षसम्। द्रौपदेयाश्च ये पञ्च बभूवुर्भरतर्षभ!। विश्वान्देवगणान् विद्धि सञ्जातान् भरतर्षभ!। प्रतिविन्ध्यसुतः सोमः श्रुतकीर्त्तिस्तथाऽपरः। नाकुलिस्तु शतानीकः श्रुतसेनश्च वीर्य्यवान्। शूरो नाम यदुश्रेष्ठो वसुदेवपिताऽभवत्" । सूर्य्यस्य कर्णरूपेणावतारः यथा "प्रकाशकर्त्ता भगवांस्तस्यां गर्भं दधौ तदा। अजीजनत् सुतं चास्यां सर्वशस्त्रभृतां वरम्। सकुण्डलं सकवचं देवगर्भश्रियान्वितम्। दिवाकरसमं दीप्त्या चारुसर्व्वाङ्गभूषितम्। निगूहमाना जातं वै बन्धुपक्षभयात्तदा। उत्ससर्ज्ज जले कुन्ती तद्भारं यशस्विनम्। तमुत्सृष्टं जले गर्भं राधाभर्त्ता महायशाः। राधायाः कल्पयामास पुत्रं सोऽधिरथिस्तदा"। "पुरा नाम च तस्यासीद्वसुषेण इति क्षितौ। ततो वैकर्त्तनः कर्णः कर्म्मणा तेन सोऽभवत्। आसन्नकवचो वीरो यस्तु जज्ञे महायशाः। स कर्ण इति विख्यातः पृथायाः प्रथमः सुतः। स तु सूतकुले वीरो वव्रधे राजसत्तम!। कर्णं नरवरश्रेष्ठं सर्वशस्त्रभृतां वरम्। दुर्य्योधनस्य सचिवं मित्रं शत्रुविनाशनम्। दिवाकरस्य तं विद्धि राजन्नंशमनुत्तमम्"। "यस्तु नारायणोनाम देवदेवः सनातनः। तस्यांशो मानुषेष्वासीद्वासुदेवः प्रतापवान्। शेषस्यांशश्च नागस्य बलदेवो महाबलः। सनत्कुमारं प्रद्युम्नं विद्धि

राजन्महौजसम्। एवमन्ये मनुष्येन्द्रा बहवोऽंशा दिवौकसाम्। जज्ञिरे वसुदेवस्य कुले कुलविवर्द्धनाः। गन्धस्वसरसां यो वै मया राजन् प्रकीर्त्तितः। तस्य भागः चितौ जज्ञे नियोगाद्दासवस्य च। तानि षोड़श देवीनां सहस्राणि नराधिप!। बभूवुर्मानुषे लोके वासुदेवपरिग्रहाः। श्रियास्तु भागः सञ्जज्ञे रत्यर्थं पृथिवीतले। भीष्मकस्य कुले साध्वी रुक्मिणी नाम नामतः। द्रौपदी त्वथ सञ्जज्ञे यज्ञीभागादनिन्दिता। द्रुपदस्य कुले कन्या वेदिमध्यादनिन्दिता। नातिह्रस्वा न महती नीलोत्पलसुगन्धिनी। पद्मायताक्षी सुश्रोणी खसिताङ्गितमूर्द्धजा। सर्वलक्षणसम्पूर्णा वैदूर्य्यमणिसन्निभा। पद्मानां पुरुषेन्द्राणां चित्तप्रमथनी रहः। सिद्धिर्धृतिश्च ये देव्यौ पद्मानामातरौ तु ते। कुन्ती माद्री च जज्ञाते मतिस्तु सुबलात्मजा। इति देवासुराणां ते गन्धर्व्वाप्सरसां तथा। अंशावतरणं राजन्! राक्षसानाञ्च कीर्त्तितम्। ये पृथिव्यां समुद्भूता राजानो युद्धदुर्मदाः। महात्मानो यदूनाञ्च ये जाता विपुले कुले" इति। भा०व०रामावतारकथने। "न स देवासुरैः शक्यो युद्धे जेतुं विभावसो!। विहितं तत्र यत् कार्य्यमभितस्तस्य नियतैः। तदर्थमवतीर्णोऽसौ मन्नियोगाद्धतर्भुजः। विष्णुः प्रहरतां श्रेष्ठः स तत् कर्म करिष्यति। पितामहस्ततस्तेषां सन्निधौ शक्रमब्रवीत्। सर्वैर्देवगणैः सार्द्धं सम्भवः त्वं,महीतले। विष्णोः सहायान्क्षीणे वानरीषु च सर्वशः। जनयध्वं सुतान् वीरान् कामरूपबलान्वितान्। ततो भागानुभागेन देवगन्धर्वदानवाः। अवतीर्त्तुं महीं सर्वे मन्त्रयामासुरञ्जसा। तेषां समभवद् गन्धर्व्वी दुन्दुभी नाम नामतः। यशास वरदो देवो गच्छ कार्य्यार्थसिद्धये। पितामहवचः श्रुत्वा गन्धर्वी दुन्दुभी ततः। मन्थरा मानुषे लोके कुब्जा समभवत्तदा। शक्रप्रभृतयश्चैव सर्वे ते सुरतत्तमाः। वानरर्क्षवरस्त्रीषु जनयामासुरात्मजान्। तेऽप्यवर्त्तन् पितॄन् सर्वे यशसा च बलेन च। भेत्तारो गिरिशृङ्गाणां शालतालशिलायुधाः। वज्रसंहननाः सर्वे सर्वे चातिबलास्तथा। कामवीर्य्यबलाश्चैव सर्वे दुष्टविशारदाः। नागायुतसमप्राणा वायुवेगसमा जवे। यत्रेच्छकनिवासाश्च केचिदत्र वनौकसः" इति एवमन्येऽवतराः पुराणादौ श्रेया।

अवतरत्वनेन रूपेण करणे वञ्। येन रूपेणाविर्भूतस्तस्मिन् ४रूपे "मत्स्यादिभिरवतारैरवतारवता वताऽवतावसुधाम्। परमेश्वर! परिपाह्यो भवता भवतापभीतोऽहम्" भट्टरः।

अवतारण न० अव+तॄ-णिच्-ल्युट्। भूतादीनामावेशनेन १प्रादुर्भावने, (भूतनाशन) २अवरोपणे, ३यज्ञप्रस्तावने च करणे ल्युट् स्त्री। अवतारयत्यत्र।

अवतारित त्रि० अव+तॄ-णिच् क्त। अवरोपिते "सन्तानार्थाय विधये स्वभुजादवतारिता" रघुः।

अवतीर्ण त्रि० अव+तॄ-कर्त्तरि क्त। १जलावगाहने २क्षतावरोहणे "कौबेरदिग्भागमपास्य मार्गमागस्त्यसख्यांशुरिवावतीर्णः" माघः ३अन्यरूपेण प्रादुर्भावे च "तदर्धमवतीर्णो ऽसौ मन्नियोगाद्धतर्भुजः" भा०व०प०।

अवतूलन न० तूलैरवकृष्णाति तूलेन तूलमपमवघट्टयति अव+तूल+अवघट्टनार्थे णिच्-भावे ल्युट्। तूलेन तूलापावघट्टने। [स्त्रियाम्।

अवतोका स्त्री अवपतितं तोकमस्याः प्रा०ब०। स्वदुग्धभोग्यां

अवत्त त्रि० अव+दो-खण्डने कर्म्मणि क्त। खण्डिते "तत् पयोरवत्तं भवति यत् हृदयस्याग्रेऽवद्यति" शत०ब्रा०।

अवत्तिन् त्रि० अवत्तमनेन इष्टा० इनि। कृतखण्डने जने "विविधायजमानाश्चतुरवत्तिनः पञ्चावत्तिनश्चेति" आश्व०श्रौ०

अवत्सार पु० ऋषिभेदे स हि "अवत्सारस्य सूनवाम" इति ऋ०५,४४,१०, उक्तः।

अवदंश पु० अवदश्यते पानरूपेऽर्थे अव+दन्श-कर्म्मणि घञ्। मद्यपानादिप्रोत्साहनसाधने भक्षणीयद्रव्ये "अन्यतममासवं पायवेदङ्कारमुल्लावदंशम्" सुश्रु०।

अवदरण न० अव+दॄ-भावे ल्युट्। विदारे "हरणयोवरदरणम्" "वेदनाप्रादुर्भावोऽवदरणम्" इति सुश्रु०।

अवदाघ पु० अव+दह-भावे घञ्न्यङ्क्वा०हस्य घः। निदाघे।

अवदात पु० अव+दै-क्त। १शुभ्रे,२पीते च वर्णे। ३तद्वति ४ विशुद्धे "अत्यक्षिन् जन्मनि च न कृतमवदातम्" काद०। ५ मनोज्ञे च त्रि०।

अवदान न० अव+दो-ल्युट्। १खण्डने,२पराक्रमे ३अतिक्रमे ४ शुद्धिकरणे च, अवद्यति रोगमनेन करणे ल्युट्। ५वीरणमूले न०।

अवदारक त्रि० अवदारयति अव+दॄ-णिच्-ण्वुल्। १विदारके अवयवविभागकारके। २खनित्रे पु०।

अवदारण न० अव+दॄ-णिच्-भावे ल्युट्। १विदारणे अवयवविभाजने। करणे ल्युट्। २खनित्रे। [विभाजिते।

अवदारित त्रि० अव+दॄ-णिच् कर्म्मणि क्त। विदारिते

अवदाह न० अवसादितो दाहो येन प्रा० ब०। वीरणमूले तस्य सेवने हि तापनिवृत्तिर्वैद्यके प्रसिद्धा

अव+दह–भावे घञ्। २ज्वरादिहेतुके दाहे।

अवदाहेष्ट न० अवदाहे ज्वरादिहेतुके देहतापे तन्निवारणाय इष्टम्। वीरणमूले उशीरे (वेणार मूल)।

अवदाहेष्टकापथ न० अवदाहे तन्निवारणाय इष्टकापथं सोपानमिव। वीरणमूले (खस्खस्)।

अवदीर्ण त्रि० अव+दृ–क्त। १ईषोभूते २विभक्ते च।

अवदोह पु० अवदुह्यते अव+दुह–कर्म्मणि घञ्। १दुग्धे विका०। भावे घञ्। २दोहने आकर्षणपूर्ब्बकान्तःस्थित द्रवद्रव्यनिस्सारणरूपे व्यापारे।

अवद्य त्रि० वद–यत् न०त०। १अयशे, २पापिनि, ३निन्द्ये, ४दोषे ५कथनायोग्ये च। "निरवद्यविद्योद्द्योतेन द्योतितः" दायभा०। "अध्यमूकेऽनवद्योऽस्ति" भट्टिः।

अवद्योतन न० अव+द्युत–णिच् भावे ल्युट्। प्रकाशने।

अवधातव्य न० अव+धा–भावे–तव्य। १अवधाने "तदत्र हेत्वेनावधातव्यम्" प्रबोधच०। कर्म्मणि तव्य। २अवधेये त्रि०

अवधान न० अव+धा–ल्युट्। मनोयोगविशेषे, यद्द्वारात् विषयान्तरतो मनोनिवर्त्तते। "अवधानपरे चकार सा प्रलयान्योन्मिषिते विलोचने" कुमा०। "सावधानावधारय" त०

अवधार पु० अव+धृ–णिच्–भावे अच्। निश्चये तदभावाप्रकारकत्वे सति तत्प्रकारके ज्ञाने "तदभावाप्रकारा धीस्तत्प्रकारा तु निश्चय" इति भाषा०। "सर्व्वत्र यदवधारणेनोच्यते स एकान्तः" सुश्रु०।

अवधारण न० अव+धृ–णिच्–ल्युट्। १इयत्तापरिच्छेदे, अयमित्थमेवेति विषयपरिच्छेदके २निश्चये च। संख्यादिना ३इयत्ताकरणे "यावदवधारणे" पा०। ४अन्यतोव्यावर्त्तने च।

अवधारणीय त्रि० अव+धृ–णिच्–कर्म्मणि अनीयर्। ईदृक्तया निश्चेतुं योग्ये। "विष्णोरिवास्यानवधारणीयम्" रघु।

अवधारित त्रि० अव+धृ–णिच्–क्त। यस्य संख्यारूपादिना निश्चयः कृतः १तस्मिन् अन्यतः कृतव्यावृत्तिके २पदार्थे च।

अवधार्य्य त्रि० अव+धृ–णिच्–कर्म्मणि यत्। निश्चेतुं शक्ये इदमित्थमेवेति। निश्चये अव+धृ–णिच्–ल्यप्। २निश्चयेऽर्थे अव्य०।

अवधि पु० अव+धा–कि। १सीमायां, २काले "सर्व्वे निदाघावधिना विसृष्टाः" रघुः। "निदाघावधिना निदाघकालेन" मल्लि०। ३चित्ताभिनिवेशे च। अपादाने कि। ४अपादाने। "भेदानारब्धक्रियापेक्षमवधित्वं पृथक् तयोः" भर्त्तृ०। आधारे कि। ५विले गर्त्ते। सीमा च द्विविधा पूर्व्वा परा च तत्र "प्रवाहमवधिं कृत्वा यावद्वस्तुव्यवस्थितिः" पूर्व्वा "सञ्चारोरतिमन्दिरावधीत्यादौ परा" प्रकारान्तरेण सा त्रिविधा कालकृता देशकृता बुद्धिकल्पिता च। पूर्व्वोक्ते दैशिकी। "यावधि विमोक्ष्यन्मित्यादौ" पूर्व्वा "यामकालं समारभ्य जपेन्मोक्षावधि प्रिये" इत्यादौ परा कालिकी "सखीकर्णावधि व्याहृतमित्यादौ बुद्धिकल्पिता"। अवधित्वञ्च स्वाभिधेयापेक्षया विभागाश्रयत्वम्। तच्च पञ्चम्यार्थेऽपि बोध्यते नद्यावनमित्यादौ वनस्य नद्यपेक्षविभागाश्रयत्वात् तथात्वम्। एवं मासात् पूर्व्वं घट इत्यादौ मासतो विभागाश्रयत्वात् घटादेस्तदवधिकत्वम् तत्र अयमर्थात् पूर्व्वकालवर्त्ती इत्यादौ कालिकम् अयमर्थात् पूर्व्वदेशवर्त्तीत्यादौ दैशिकं "माथुराः पाटलिपुत्रेभ्य आढ्यतरा इत्यादौ बुद्धिकल्पितम्। "स्वाभिधेयापेक्षोऽवधिनियमोव्यवस्थेति सि०कौ० "सञ्चारोरतिमन्दिरावधि सखीकर्णावधि व्याहृतं हरस्याधरपल्लवावधि महामानोऽपि मौनावधि। चेतः कान्तसमीहितावधि पदन्यासावधि प्रेक्षितं सर्व्वं सावधि नावधिर्म्मदनस्य प्रेम्णः परं केवलमित्यादौ" दैशिकं बुद्धिकल्पितञ्चावधित्वम् "सरस्वतीमवधिं सरस्वतीम्" कुमा० इत्यत्र कालिकं "जनपदतदवध्योः" पा० इत्यत्र दैशिकम्।

अवधिमत् त्रि० अवधिरस्यास्य मतुप्। अवधिविशिष्टे अवधिमत्त्वमेव पञ्चम्यर्थ इति नव्यनैयायिकाः तेन तस्य स्वरूपसम्बन्धेन इतरपदार्थेऽन्वयः अवधित्वस्य पञ्चम्यर्थत्वस्वीकारे तु निरूपकतासम्बन्धेनान्यपदार्थेऽन्वयस्य वक्तव्यतया नञ्समभिव्याहारे च तेनैवसम्बन्धेनाभावान्वयस्याभ्युपगम्यत्वेन निरूपकतासंसर्गस्य वृत्त्यनियामकतया तत्सम्बन्धस्य प्रतियोगितावच्छेदकतयानन्वयः वृत्तिनियामकसम्बन्धस्यैव तथात्वात्। अवधिमत्त्वस्य तदर्थत्वे तु तस्य स्वरूपसम्बन्धेनान्वयात् नञ्समभिव्याहारे अन्वयसम्भवः स्वरूपसम्बन्धस्य वृत्तिनियामकतया तस्य प्रतियोगितावच्छेदकत्वसंभवेन बाधकाभावात् "अतएव व्युत्पत्तिवादे गदाधरेण अवधित्वमवधिमत्त्वं वा पञ्चम्या अर्थ इति प्रथमपक्षेऽरसं सूचनाय तस्यान्ते निवेशः कृतः। "उत्तरादिभ्य एनप् स्यादवध्यवधिमतोः सामीप्ये" सि०कौ०।

अवधीयमान त्रि० अव+धा कर्म्मणि शानच्। यस्मिन् विषये चित्ताभिनिवेशः क्रियते तस्मिन् विषये।

अवधीर अवज्ञायाम् अद०चुरा० उभय०सक०सेट्। अवधीरयति ते आववधीरत् त। अवेत्यस्योपसर्गत्वे अवादिधीरत् त। अवधीरितः अवधीरी "रसैः कषा यस्य हृषावधी-

रिणी" नै० अवेत्यस्योपसर्गत्वे "इतीव धारामरधीर्योति नैषध० धात्ववयवरूपत्वे तु अवधीरयितेति भेदः ।

अवधीरणा स्त्री अवधीर–भावे युच् । १अवज्ञायां २तिरस्कारे च "कृतवत्यसि नावधीरणामपराद्धेऽपि यदा चिरं मयि" रघुः "अयं स यस्मात् प्रणयावधीरणामशङ्कनीयां करभोरु ! मन्यसे" शकु० । भावे ल्युट् । तत्रार्थे न० ।

अवधीरित त्रि० अवधीर–कर्मणि क्त । १अवज्ञाते २तिरस्कृते च

अवधूत त्रि० अव+धू–क्त । १कम्पिते "पवनावधूतवसनान्तवैकया" माघः "विदधेऽवधूतसुरसङ्गसम्पदम्" माघः । कृष्णयजुर्वेदान्तर्गते २उपनिषद्भेदे । ३अभिभूते, ४निवर्त्तिते, "अवधूत" रजो अवधूता अरातयः" शत० ब्रा० ५अनादृते च । "यो विलङ्घ्याश्रमान् वर्णान् आत्मन्येव स्थितः पुमान् । अतिवर्णाश्रमी योगी अवधूतः स उच्यते" इत्युक्तलक्षणे वर्णाश्रमधर्मत्यागिनि ६संन्यासिनि पु० । "अवरत्वात् वरेण्यत्वात् धूतसंसारबन्धनात् । तत्त्वमस्यर्थसद्भावादवधूतोऽभिधीयते । यथा रविः सर्वरसान् प्रभुङ्क्ते शुभाशनादपि हि सर्व्वभक्षकः । तथैव योगी विषयान् प्रभुङ्क्ते न लिप्यते पुण्यपापैश्च गुहः" इति च तन्निरुक्तिलक्षणे एवमवधूतगीतशब्दे तल्लक्षणं द्रष्टव्यम् ।

अवधूतगीत न० ३त० । भागवते ११ स्क० भगवदुद्धवसंवादे यदुनृपं प्रति कस्यचिदवधूतस्य उपदेशभेदे । यथा "अत्राप्युदाहरन्तीममितिहासं पुरातनम् । अवधूतस्य संवादं यदोरमिततेजसः । अवधूतं द्विजं कञ्चिच्चरन्तमकुतोभयम् । कविं निरीक्ष्य तरुणं यदुः पप्रच्छ धर्मवित् । कुतो बुद्धिरियं ब्रह्मन्नकर्तुः सुविशारदा । यामासाद्य भवाँल्लोकं विद्वांश्चरति बालवत् । प्रायोधर्मार्थकामेषु विवित्सायाञ्च मानवाः । हेतुनैव समीहन्ते आयुषा यशसा श्रिया । त्वन्तु कल्पः कविर्दक्षः सुभगोऽमितभाषणः । न कर्त्ता नेहसे कर्त्तुं जडोन्मत्तपिशाचवत् । जनेषु दह्यमानेषु कामलोभदवाग्निना । न तप्यसेऽग्निना मुक्तो गङ्गाम्भःस्थ इव द्विपः । त्वं नः संपृच्छतां ब्रह्मन् ! आत्मन्यानन्दकारणम् । ब्रूहि स्पर्शविहीनस्य भवतः केवलात्मनः" इति यदुनृपेण तल्लक्षणाक्रान्तम् । एवं यदुना प्रटःस यदाह तदेव अवधूतगीतम् । तेन च "सन्ति मे बहवोराजन् ! गुरवोबुद्ध्युपाश्रिताः । यतो बुद्धिमुपादाय मुक्तोऽटामीह तान् शृणु । पृथिवी वायुराकाशमापोऽग्निश्चन्द्रमा रविः । कपोतोऽजगरः सिन्धुः पतङ्गोमधुकृद्गजः । मधुहाहरिणो मीनः पिङ्गला कुररोर्भकः । कुमारी शरकृत् सर्प ऊर्णनाभः सुपेशकृत् । ततो मे गुरवो राजन् ! चतुर्विंशतिराश्रिताः । शिक्षार्थन्ति भिरेतेषामन्वशिक्षमनुक्रमात्" इत्युपक्रम्य चित्त्यादिभ्यश्चतुर्विंशतेर्यच्च यत् शिक्षितं तदुक्तिम् तद्विस्तरस्तु ६ नवमाध्यायसमाप्तिपर्य्यन्ते तत्रैवानुसन्धेयः ।

अवधूनन न० अव+धू–णिच्–ल्युट् । १चालने । (झाड़ा) इति ख्याते व्यापारे "पादस्पर्शस्तु रजांसि दुष्कृतीनवधूननम्" मनुः । २चिकित्साभेदे च "तत्र तूर्णं गलापीड़ं कुर्य्यात्तत्रावधूननम्" सुश्रु० । [ल्युट्] अवचूर्णने ।

अवधूलन न० धूलिं करोति अव+धूलि–कृत्यर्थे णिच्–भावे

अवधृत त्रि० अव+धृ–अन्तर्भूतण्यर्थः कर्म्मणि क्त । १अवधारिते निश्चिते "अनवधृतात्मज्ञानसंशयविपर्य्यासस्तु यं कञ्चित् पुरुषं प्रति प्रवर्त्तमानः" इति सा० कौ० । २कृतनियमे ३विषयविशेषे व्यवस्थापिते ४स्थापिते च ।

अवधृष्य त्रि० अव+धृष–कर्म्मणि क्यप् । १अवधर्षणीये २तिरस्कार्य्ये । ३निश्चयेनावधार्य्ये "नियतं यत्ते रजसं ह्यधोऽनवधृष्यम्" स्मृतिः "अनवधृष्योहि भवत्यनवधृष्यः" शत० ब्रा० । ५पराभवनीये च । अव+धृष–ल्यप् । ६धर्षित्वेत्यर्थे अव्य० ।

अवधेय त्रि० अव+धा–यत् । १निवेश्ये २स्थापनीये यत्र चित्ताभिनिवेशः क्रियते तस्मिन् ३श्रद्धेये "प्रतिपित्सितमर्थं प्रतिपादयन् प्रतिपादयिताऽवधेयवचनो भवति" "अनवधेयवचनतया प्रेक्षावद्भिरुन्मत्तवदुपेक्ष्येत" इति च सा० कौ० । ४ज्ञेये च । भावे यत् । ५अवधाने न० ।

अव(व)भ्र त्रि० अव+भृ–मूलविभु० क बध–रक् न० त० वा । अहिंसके । "अव(व)भ्र-ज्योतिरदितेर्ऋताद्यधः" ऋ० ७,८२,१०, "अव(व)भ्रमहिंसकम्" भा० ।

अवध्वंस पु० अव+ध्वनस–घञ् । १परित्यागे, २चूर्णिते, ३निन्दायाञ्च "अवध्वंसद्वारुणः" अथ० ५,२२,३ ।

अवध्वस्त त्रि० अव+ध्वनस–क्त । १नष्टे २निन्दिते ३अवचूर्णिते ४त्यक्ते च ।

अवन न० अव+ल्युट् । १प्रीणने, २रक्षणे, ३प्रीतौ च "समनिन्द्रावनागंजनतालिकुलं यथैव दानवनागम्" नलोद०

अवनत त्रि० अव+नम–क्त । १अधोभूते २आनते च । "अवनतशिखिकण्ठकण्ठलक्ष्मीम्" माघः । "चतुरश्रां क्रमात्त्रा० ष्ण आवनतीयः, अवनतसन्निवेशदेशादौ त्रि० ।

अवनति स्त्री अव+नम–क्तिन् । औद्धत्याभावे, १विनये, २अधोनमने च । "धनुषामवनतिः" कादम्बरी । ३प्रणामे च ।

अवनद्ध त्रि० अव+नह–क्त । १खचिते, २रोपिते ३वेष्टिते ४बद्धे च "चर्म्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः"

मनुः । ६ऋदङ्गादिवाद्ये न० । [वकावनद्धा" कुमा० ।

अवनम्र त्रि० अव+नम–र । अतिशयनम्रे "पर्य्याप्तपुष्पस्त-

अवनय पु० अव+नी–भावे अच् । १अधःपातने २निपातने ।

अवनयन न० अव+नी–ल्युट् । अवस्थापने । "अवनयनावस्तरणे चावटवत्" कात्या० ८।५।२४ । "मन्त्रेण प्रोक्षणं शेषोदकसेचनम्" वेददी० तेन ३तदर्थेऽपि ।

अवनाट त्रि० अवनता नासिका प्रा० स० नतार्थे नासिकाया-नाटादेशः अर्श आद्यच् । (खांदा) अवनतनासिके जने ।

अवनाथ पु० अव+नी "अवोदोर्नियः" पा० अचोबाधकः घञ् । १अधोनयने अधःप्रापणे । [नतौ ।

अवनाम पु० अव+नम–घञ् । अवनतौ अधोभूत्वा क्रतायां

अवनि (नी) स्त्री अव–अनि । भूमौ । "सुसाधितायामवनौ" इति स्त्री० सि० । वा ङीप् अवनीत्यपि । "दीनदयालुतया-ऽवनिपाल" "सुसमृद्धवनी इयाऽवनी सुवनी संप्रवदत्-पिकापि का इति च नैष० । करणे अनि । २अङ्गुलीषु व० व० निरु० । अव प्रीणने कर्त्तरि अनि । ३नद्यां निरु० "सं यं सुभोऽवनयः न यन्ति सस्रुतं सवतोरोध-चक्रा" ऋ० १,१६०,७ । दीर्घान्तः ४लतायामाग्नलतायां राजनि० ।

अवनिक्त त्रि० अव+निज–क्त । १क्षालिते २शोधिते च ।

अवनि(नी)नाथ पु० ६त० । रूपे भूपतौ अवनी(नि) नायकादयोऽप्यत्र ।

अवनि(नी)पति ६त० । रूपे अवनिस्वाम्यादयोऽप्यत्र । "पतिर-वनीपतीनां तैश्चक्राले चतुर्भिः" रघुः ।

अव(नि)नीपाल ६त० । रूपे "इत्यसकं विलपन्तमसङ्ग-हीनदयालुतयावनिपालः नैष० । "कतिचिदवनिपालः पर्व्वरीः पर्वकल्पः" रघुः ।

अवनीश पु० ६त० । भूपतौ भूमीश्वरे अवनीश्वरादयोऽप्यत्र ।

अवनेजन न० अव+निज–ल्युट् । १प्रक्षालने "न कुर्य्यादुगुरु पुत्रस्य पादयोरावनेजनम्" मनुः । श्राद्धे पिण्डदानार्थं भास्तृतकुशस्य जलेन सेकरूपे २संस्कारभेदे च । "दक्षि-णस्थितप्रागग्रकुशमूलमध्यायेषु मातादिभ्यस्तदुत्तरं मध्य-स्थितप्रागग्रकुशमूलमध्यायेषु पितादिभ्यस्तदुत्तरं स्थित प्रागग्रकुशमूलमध्यायेषु मातामहादिभ्यः प्राङ्मुखेना वनेजनं कर्त्तव्यम्" कल्पप्रदीपः । रघुनन्दनेन श्राद्ध-चोनाहत इति भेदः ।

अवन्ति पु० अव–झि । मालवदेशे । स च ६त० कूर्म्मचक्रविभागे "अथ दक्षिणेन लङ्केत्युपक्रम्य "आक-रवणावन्तिकदग्रपुरनोनर्हा" इति उक्तः दक्षिणदेशस्थः । तत्र शिप्रा नदी महाकालनामा शिवमूर्त्तिविशेषः उज्ज-यिनी राजधानी । तत्पुरीपरत्वे स्त्री वा ङीप् । "अवन्तिनाथोऽयमुदग्रबाहुरित्युपक्रम्य "असौ महा-कालनिकेतनस्य वसन्नदूरे किल चन्द्रमौलेः" । "अनेन यूना सह पार्थिवेन शिप्रातरङ्गानिलकम्पि-तासु विहर्त्तुम् ? च रथौ तवावर्त्तितम् । ज्योतिर्वि० विक्रमसंवत्सरे "यद्राजधान्युज्जयिनी महापुरी सदा महाकालमहेशयोगिनी । समाश्रिता प्राप्य-पवर्गदायिनी श्रीविक्रमार्कोऽवनिपो जयत्यपि" तत्रिनृ सदा विक्रममेदिनीशे विराजमाने शमवन्तिकायाम् । सर्व्वप्रजामण्डलसौख्यसम्भृत्यै सर्व्वत्र च वेदकर्म्म" । तथाच अवन्ती उज्जयिनी च नामान्तरं यथोक्तं सि० शि० । "यथोज्जयिन्याः कुचतुर्थभागे प्राच्यां दिशि स्याद्यम कोटिरेव । ततश्च पश्चान्न भवेदवन्ती लङ्कैव तस्याः ककुभि प्रतीच्याम्" । इयञ्च लङ्कास्थानात् भूवृत्तषोड़शांशे मेरु पर्य्यन्तगतरेखायां समस्थलस्थाने स्थिता यथोक्तं तत्रैव । "निरक्षदेशात् क्षितिषोड़शांशे भवेदवन्ती गणितेन यस्मात् । तदन्तरं षोड़शसंगुणं स्याद्भूमानमस्मात् बुध किं तदुक्त्या" । इंलण्डीयमानचित्रवेदिनस्तु सम स्थलस्थानात् किञ्चिदन्तरपश्चिमस्थेति वर्णयन्ति । इयञ्च मोक्षपुरी "अयोध्या मथुरा माया काशी काञ्ची अवन्तिका । पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः" । पुरा० । भा० उ० प० जम्बुखण्डविभागे जनपदगणनायाम् "कुन्तयोऽवन्तयश्चैव तथैवापरकुन्तयः" इति उक्तेरस्य जन-पदवाचितया इदन्तत्वाच्च ततो भवादौ अ । आवन्त्यः तद्भवादौ त्रि० । बहुषु च तद्राजनि अस्य लुक् । अवन्तयः तद्देशवासिषु ब० व० । तद्देशरूपे च । स्वार्थे कन् अवन्तीनगर्य्यां "काशीकाञ्ची अवन्तिका" पुरा० ।

अवन्तीपुर न० अवन्तिः पूः अच् स० । अवन्तिनगरे उज्जयिन्याम् । [अवन्तिस्थे ब्राह्मणे ।

अव(न्ति)न्तीब्रह्म पु० अवन्तिषु ब्रह्मा अच् स० ।

अव(न्ति)न्तीसोम पु० अवन्तिषु सोम इव । आङ्किके ।

अवपत्र त्रि० अव+पद–क्त । १सदृष्टे २सदृपक्के च "केशकी-टावपन्नञ्च पदा स्पृष्टञ्च कामतः" मनुः । "अवपन्नं संसर्गदूषितम्" कुल्लू० । "केशकीटावपन्नं च स्त्रीभिःस्पृष्टं तथैव च" हारी० अवपन्नं सदृपक्वम् प्रा० त० रघु० ।

अवपाक पु० अव+अपकर्षे पच–घञ् । १अपक्वपाके । कर्म्मणि

घञ्। २अपकृष्टपक्वे। "त्यज उत्कर्त्तनमवपाकानां संव्रश्चनम्" शत०ब्रा०।

अवपात पु० अव+पत–भावे घञ्। अधःपतने। पत–णिच्–भावे अच्। २पातने "यस्यावपाते गर्भस्य पातने "घोतमोदमः" या०स्मृ०। आधारे घञ्। ३गर्त्ते "अवपातस्तु हस्त्यर्थे गर्त्ते ऋक्षे तृणादिना" इति यादवोक्ते गजधारणार्थे ४गर्त्तभेदे च "रोधांसि निम्नावपातमग्नम्" रघुः

अवपात्र त्रि०अवरं भोजनायोग्यं पात्रं यस्य। यस्य भोजनेन पात्रे दुष्टेऽन्यस्य भोजनायोग्यता भवति ताडके पतितस्त्रेच्छादौ जने। [अवपात्रितशब्दार्थे।

अवपात्रित त्रि० अवपात्र+ऋद्यर्थे णिच्–क्त। भिन्नोदकीकृते

अवपाद पु० अव+पद–घञ्। अधःपतने "देवावै आदित्याः स्वर्गाल्लोकादवपादाद्बिभियुः" ता०ब्रा०।

अवपाशित त्रि०अवपाशः समन्तात् पाशोजातोऽस्य तारा०इतच्। पाशबद्धे "पश्वाश्वैव हि कण्ठेत्वं कालपाशावपाशितम्" रा०

अवपीड त्रि०अवपीड़यति अव–पीड़–अच्। १समन्तात् पीड़के "चिकित्साविशेषे पु०२वेगान्तेषु चावपीड़ं दद्यात्" सुश्रु० "प्रतिमर्शेऽवपीड़श्च नस्यं प्रशमनं तथा। शिरोविरेचनं चेति नस्तः कर्म्म च षड्विधं" इति चक्रदत्तोक्ते ३नासिकाचिकित्साभेदे च। तल्लक्षणं तत्रैवोक्तं यथा "अवपीड्य दीयते यस्मादवपीड़स्ततस्तु सः। शोधनः स्नेहनश्च स्यादवपीड़ो द्विधा मतः" इति।

अवपीडन न० अव+पीड़–णिच् ल्युट्। १निष्पीड़ने। सुश्रुतोक्ते २पीड़नदोषभेदे "अतिपीड़िततां शिथिलपीड़िततामभीक्ष्णमभीक्ष्णमवपीड़नं कालातिक्रम इति चत्वारः पीड़नदोषाः"। युच्। अवपीड़ना निष्पीड़ने स्त्री "अङ्गावपीड़नायाञ्च व्रणशोणितयोस्तथा" सुश्रु०। [तीर्थे च।

अवप्रुत त्रि०अव+प्रु–क्त। समन्तात् सिक्ते १आर्द्रभूते २अव-

अवबन्ध पु० अवबध्यते आच्छाद्यते नेत्रवर्त्मानेन करणे घञ्। सुश्रुतोक्ते नेत्रवर्त्मान्तरे। "पृथग्दोषाः समस्ताश्च यदा वर्त्म व्यपाश्रयाः। शिरा व्याप्यावतिष्ठन्ते वर्त्मस्वधिकमूर्च्छिता" इत्युपक्रम्य "उत्सङ्गिन्यश्च कुम्भीका पोथिक्यो वर्त्मशर्कराः। तथार्शो वर्त्मशुष्कार्शस्तथैवाञ्जननामिका। बहलं वर्त्म यच्चापि व्याधिर्वर्त्मावबन्धकः" इत्यादीन्युक्त्वा "न सम्यगादेदेदिति भवेद्बन्धः स वर्त्मनः" इति लक्षिते १रोगभेदे वर्त्मावबन्धः, इत्येकं नामेत्युचितम्। भावे घञ्। समन्तात् २बन्धने च। [बन्धे च।

अवबाधा स्त्री अव+बाध–अ। १समन्तात् बाधायां २प्रति-

अवबाहुक पु० अवबद्धो बाहुर्येन प्रा०ब०। सुश्रुतोक्ते वायुरोगभेदे यथा "अंसदेशस्थितोवायुः शोषयित्वांसबन्धनम्। शिरास्नायुक्षयं तस्मो जनयत्यवबाहुकम्"। [शातरि।

अवबुद्ध त्रि० अव+बुध–कर्म्मणि क्त। १ज्ञाते कर्त्तरि क्त। २ज्ञानमात्रे च "स्वभर्त्तुर्नामयत्नेषाद्बबन्ध सान्द्रे रजस्यात्मपरावबोधः" रघु० "भावावबोधकलुषा दयितेव रात्रौ" रघुः। प्रतिकूलेषु तेष्वस्यावबोधः क्रोध इष्यते" सा०द०।

अवबोधक पु०अवबोधयति अव+बुध–णिच्–ण्वुल्। १अर्के। रूपाणां निद्राभङ्गकारके २स्तुतिपाठकादौ च ३ज्ञापके त्रि०।

अवबोधन न०अव+बुध–णिच्–ल्युट्। ज्ञापने। "स्वेतरार्थानच्छिन्नयत्स्वार्थस्यावबोधने" शब्दशक्ति०।

अवभर्ज्जित त्रि०अव+भर्ज्ज–क्त भर्ज्जादेयः। १भृष्टे २दग्धे च।

अवभाषण न० अव+भाष–ल्युट्। कथने "व्यापारान्तरसक्तस्यथावभाषणविलोकनादिकरो" सा०द०।

अवभास पु० अव+भास–भावे घञ्। १ज्ञाने २प्रकाशे अन्यस्य अन्यरूपेण प्रकाशरूपे ३मिथ्याज्ञाने च।

अवभासक त्रि० अवभासयति अव+भास–णिच् ण्वुल्। १प्रकाशके सर्व्वावभासकेकूटस्थे चैतन्ये न०। "यस्य भासा सर्व्वमिदं विभाति"श्रुतेः "यदादित्यगतं तेजो जगद्भासयतेऽखिलम्। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्" गीतोक्तेश्च तस्य सर्व्वावभासकत्वम्।

अवभासित त्रि०अव+भास+णिच्–कर्म्मणि क्त। प्रकाशिते।

अवभृथ पु० अव+भृ–क्थन्। सत्रयज्ञसमाप्तौ क्रियमाणे १यज्ञशेषकर्म्मणि,यज्ञाङ्गभूते यज्ञान्ते कार्य्ये २स्नाने च। "नावभृथं सरस्वत्याम्" कात्या०२४,६,२२, "सरस्वत्यां नावभृथं कुर्य्यात्" कर्क० "परिषार्श्वेषूदकेषु" "असत्सङ्कल्प्य ततः" कात्या० २४,६,२३,२४ "मङ्क्षति पात्रे कटाङ्कादौ" कर्क०। अवभृथस्नानविधिश्च तैत्तिरीयब्राह्मणे २अष्टके ६अ०६अनु०, "यद्वै देवा देवहेड़नम्" इत्यारभ्य "समिदसि जगच्छ्रीणि "चेत्यनुवाकपर्य्यन्ते उक्तः। "स्नातवत्यवभृथे ततस्त्वयि" माघः "सर्व्वेनोऽभृथस्नातो हयमेधे विमुच्यते"। "तथाऽश्वमेधावभृथस्नानाद्वा यद्विमाद्रुयात्"। या०स्मृ० "भुवं कोणेन कुण्डोघ्नो मेध्येनावभृथादपि" "प्रीत्याश्वमेधावभृथार्द्रमूर्त्तेः" "भ्रातरावभृथाप्लुतौ सनिः" इति च रघुः।

अवभ्रट त्रि० अवनता नासिका प्रा०स० नतार्थे नासिकाया-

भटादेयः अस्यर्थे अच्। अवनतनासिके (खांदा)।

अवम त्रि० अव+अमच्। १रज्जौ २पितृगणभेदे पु० "अवमैस्तु अर्व्वैः काव्यैस्तु पितृभिर्भवितस्य मधुमतोनाराशंसस्य" ता०ब्रा० "त्रिविधाः पितरः अवमाः अर्व्वाः काव्याश्चेति अनुसवनं नाराशंसदेवताः। हे सोम! अवमैः रज्जुकैः एतत्संज्ञकैः पितृभिः" भा०। अपादानेऽमच्। ३पापे ४तद्वति ५कुत्सिते च त्रि०। अवोभवः अवस्ताद्भवः "अवोऽधसोर्लोपश्चेति" मः अन्त्यलोपः। ६अधमे त्रि० "अनलकानलकानमवमां पुरीम्" रघुः। "या त अक्षिरवमा या परमा" ऋ०६,२५,१,"उतावमस्य पुरुहूत वोधि" ऋ०६, २१,५ "ग्रहतानां सावनानाञ्चान्द्राणाञ्चानरसवमानीत्यते सावनदिनेभ्यश्चान्द्राहा यावद्भिरधिकास्ते दिनत्रयाहा" इति च प्रमिताक्षरोक्ते ७दिनत्रये न०। तदानयनप्रकारश्च सि०शि० "शशाङ्कमासोनितसावनेन ०,२८,१० त्रिंशद्धृताः लब्धदिनैस्तु चान्द्रैः। रूद्रांशकोनाब्धिरसैः ६३,५४,१२ त्रयाहः, स्यात् सावनोऽतश्च युगेऽनुपातात्"। युगे चान्द्राणां सावनानां च यदन्तरं तान्यवमानि। तत्र एकस्मिन् मासे चान्द्रसावनान्तरं कुदिनात्मकं गृहीतम्। तत्र दिवसः शून्यम् अष्टाविंशतिर्घटिकाः दश पानोयपलानि ०,२८,१० इदमेकस्मिन् चान्द्रमासे त्रिंशत्तिथ्यात्मके कुदिनात्मकमवमखण्डम्। यद्यनेन ०,२८,१०, त्रिंशद्दिनानि चान्द्राणि लभ्यन्ते तदा संपूर्णैरेकैरवमैन किियन्नीति त्रैराशिकेन लब्धैः रूद्रांशकोनाब्धिरसैः ६३,५४,१२ एकः त्रयाहो भवति स च सावनः एवं कल्पेऽपि अनुपातात्। "सावनान्यवमानि स्युश्चान्द्रेभ्यः साधितानि चेत्। सावनेभ्यस्तु चान्द्राणि तच्चैवं तद्वदाख्यया" इति सि०शि०। कल्पेऽवमप्रमाणञ्च दर्शितं तत्रैव। "दिनत्रयास्तत्र सहस्रनिघ्नाः खवाणवाणाब्धिखेषुदस्राः" २५०८२५५०००। अन्तरं तरणिचन्द्रचक्रजं यद्भवेत् स विधुमाससंचयः। चन्द्रचक्रदिवसैक्यसूनितं चन्द्रमासभदिनैर्दिनत्रयाः" "अथ चन्द्रचक्रदिनैक्ये चन्द्रमासभदिनैक्येन वर्ज्यन्ते त्रयाहाः स्युः। अत्र वासना। चन्द्रभगणा रविभगणैरूनाश्चान्द्रमासाः स्युः अतो विपर्यासाच्चान्द्रमासोनाश्चन्द्रभगणा रविभगणा भवन्ति तैरूना भभवसाः सावना दिवसा भवन्ति। चान्द्राहाः त्रयाहा भवन्ति" प्रमिता०। "तिथ्यूनद्वयमेको दिनवारः स्यृतति यत्र तद्वत्स्यमवदिनम्" ज्योति० त०

अवमत त्रि० अव+मन–क्त। १अवज्ञाते २तिरस्कृते च।

अवमताङ्कुश पु० अवमतोऽङ्कुशस्तदाघातोऽत्र। दुर्दान्ते गजे।

अवमति स्त्री अव–मन भावे क्तिन्। १अवज्ञायाम् २अनादरे ३तिरस्कारे च। [वमा तिथिः" ज्योतिषोक्ते दिनक्षये।

अवमतिथि स्त्री कर्म्म०। "क्षुत्तिक्षतिथयो वारे एकस्मिंश्च

अवमदिन न० कर्म्म०। "तिथ्यूनद्वयमेकोदिनवारो यत्र तद्वत्स्यमवदिनम्" ज्योतिषोक्ते दिनक्षये।

अवमन्तव्य त्रि० अव+मन–तव्य। १अवज्ञेये २अनादरणीये– "बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः" मनुः।

अवमन्तृ त्रि० अव+मन–तृच् स्त्रियां ङीप्। १अवज्ञातरि– २तिरस्कर्त्तरि च।

अवमन्थ पु० अवमथ्नाति अव+मन्थ–अच्। सुश्रुतोक्ते पाकोक्ते उपद्रवरूपे १रोगभेदे "अतजर्ह्व" नामलिङ्गे वक्ष्ये पाल्यास पद्रवान्। उत्पाटकश्वोत्पुटकः ग्रन्थावः कण्डूयुतो भृशम्। अवमन्थः सकण्डूको ग्रन्थिको जम्बुलस्तथेति"। "प्रलेपनमिदं दद्याद्वसित्वा वमन्थके" सुश्रु०। तत्रोक्ते शूकदोषनिमित्ते २व्याधिभेदे च यथा "लिङ्गदृङ्मिश्चितामक्रम प्रवृत्तानां शूकदोषनिमित्ता दश चाष्टौ च व्याधयो जायन्ते तद्यथा सर्षिका अष्ठीलिका ग्रथितं कुम्भीका अलजी शृदितं सम्मृदपिडका अवमन्थ"इत्युपक्रम्य। "दीर्घा वङ्क्षण पिडका दीर्घन्ते मध्यतस्तु याः। सोऽवमन्थः कफासृग्भ्यां वेदनारोमहर्षकृत्" तत्रैव लक्षितः। "अवमन्थे गते पाकं भिन्ने तैलं विधीयते" सुश्रु०। ३अवमन्थनकारके त्रि०

अवमर्द पु० अव+मृद–घञ्। १पीडने। "सर्व त्वमासाद्य रणावमर्दम्" रामा०२राज्याङ्गभेदे "अवमर्दः प्रतीघात स्तथा चैव बलीयसाम्" इति भा० शा० राजधर्म।

अवमर्ष पु० अव+मृष–घञ्। १आलोचनायाम्, "सुखं प्रतिसुखं गर्भोऽवमर्ष उपसंहृतिः। इति पञ्चास्य भेदाः स्युः" इत्युपक्रम्य "यत्र सुखफलोपाय उद्विग्नो गर्भतोऽधिकः। शापाद्यैः सान्तरायश्च सोऽवमर्ष" इति सुश्रुतः सा०द० लक्षिते २नाटकस्य सन्ध्यंगभेदे च। विमर्ष इति पाठान्तरम्।

अवमान पु० अव+मन–भावे घञ्। १अवज्ञायाम् २अनादरे च "अवृत्तस्येव चाकाङ्क्षेदवमानस्य सर्व्वदा" मनुः।

अवमानना स्त्री अव+चुरा० मन–युच्। अपमानकरणे "तत्त्वज्ञानादृतेर्निर्वेदैः स्यादवमानना" सा०द०। भावे ल्युट्। अवमानन तत्रैव न० निर्वेदैः स्यादवमाननम्" हेमच०।

अवमानित त्रि० अव+चुरा० मन–क्त। १कृतापमाने २कृतानादरे च विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता" सा०द०।

अवमानिन् त्रि० अव+मन–णिनि स्त्रियां ङीप्। अवज्ञातरि २अनादरणीये च "धिङ्मामसुपनतश्रेयोऽवमानिनम्" शकुन्तला। [२अनादरणीये च।

अवमाननीय त्रि० अव+चु०–मन–अनीयर्। १अवज्ञेये

अवमान्य त्रि० अव+मन–ण्यत्। १अवज्ञेये २तिरस्कार्य्ये च सानुशाय्याधिवेत्तव्या नावमान्या च कर्हिचित्" मनुः अव+चु०मन–ल्युप्। ३अवज्ञायेत्यर्थे अव्य०।

अवमार्जन न० अव+मृज–भावे ल्युट्। १प्रक्षालने करणे ल्युट्। २तत्साधने जलादौ "इमा ते वाजिन्नवमार्ज्जनानाम्" ऋ० १,१६३,५, "अवमार्ज्जनानि अङ्गप्रक्षालनसाधनान्युदकानि" भा०।

अवमूर्द्धन् त्रि० अवनतो मूर्द्धाऽस्य। अवनतमस्तके।

अवमूर्द्धशय पु० अवमूर्द्धा सन् शेते शी–अच्। अधोमुखतया शायिनि मनुष्ये। "उत्तानशयादेवा अवमूर्द्धशया मनुष्याः" इत्युक्तेः गर्भादौ तथाशयनाद्वा नरस्य तथात्वम् २तथाभूततया शायिमात्रे त्रि०। [उत्कोचने।

अवमोचन न० अव+मुच–भावे ल्युट्। बन्धनराहित्ये

अवमोटन न० अव+मुट्–णिच्–ल्युट्। (मोचड़ान) परिवर्त्तनेनान्यथापादनरूपे परिमोटने।

अवयजन न० अव+यज–गतौ करणे ल्युट्। अपगमसाधने "देवकृतस्यैनसोऽवयजनमसि पितृकृतस्यैनसोऽवयजनमसि मनुष्यकृतस्यैनसोऽवयजनमस्यात्मकृतस्यैनसोऽवयजनमसि यद्दिवा च नक्तं चैनश्चकृम तस्यावयजनमसि यत् स्वपतश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि यद्दिद्यांसश्चाविद्यांसश्चैनश्चकृम तस्यावयजनमस्यैनसएनसोऽवयजनमसि" ताण्ड्यब्रा० "अवयजनम् अपगमनसाधनम्" भा०।

अवयव पु० अवयूयते कार्य्यद्रव्येण संबध्यते अव+यु–कर्मणि अप। १द्रव्यारम्भके द्रव्ये "यथा परमाणुः द्व्यणुकं द्व्यणुकस्त्रसरेणुमारभते इत्यादिक्रमेण अन्त्यावयविपर्य्यन्तानि सर्व्वाणि द्रव्याणि स्वाश्रिततया अवयविद्रव्यान्तरमारभन्ते "द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरम्" वै०सू० उक्तेः। अन्त्यावयविविभुद्रव्याणि विहाय द्रव्याणां सजातीयद्रव्यान्तरारम्भकत्वं तदर्थः अन्त्यावयवी नित्यद्रव्यं च न कस्यचिदारम्भकम्। आरम्भकद्रव्ये च द्रव्यान्तरस्य समवायेनाऽवस्थित्याऽवयवत्वम्। आरम्भकद्रव्यञ्च उपादानकारणतया समवायिकारणतया च व्यवह्रियते अधिकमवयविशब्दे वक्ष्यते "अनित्या च तदन्या स्यात् क्रियावयवयोगिनी" भाषा०। अवच्छिन्नपरिमाणवत्त्वम् अवयवत्वमिति केचित् प्रतिपेदिरे तन्न सम्यक्, घटादौ अवच्छिन्नपरिमाणवत्त्वेन तत्रातिव्याप्तेः किन्तु द्रव्यारम्भकद्रव्यत्वमेवावयवत्वम्। यु अभिश्रणे अप्। २देहे तस्यान्यावयवितया द्रव्यान्तरानारम्भकत्वेन इतरद्रव्यसमवायशून्यत्वात् तथात्वम् ३इक्षुदण्डादिषु देहावयवत्वात्तेषामवयवत्वम्। ते च प्राधान्येन पञ्च स्मृतौ दर्शिताः ७२ पृष्ठे अङ्गशब्दे उक्ताः। अङ्गप्रत्यङ्गानि च सूक्ष्मरूपेण गर्भे एव उत्पद्यन्ते क्रमशो विवर्द्धमानानि दृश्यन्ते यथोक्तं स्मृतौ "सर्व्वाङ्गप्रत्यङ्गानि युगपत् सम्भवन्त्योह धन्वन्तरिः गर्भस्य सूक्ष्मत्वान्नोपलभ्यन्ते वंशाङ्कुरवच्चूतफलवच्च तद्यथा चूतफले परिपक्वे केशरसांस्यभिव्यक्तानि प्रत्यक् दृश्यन्ते कालप्रकर्षात्, तान्येव तरुणे नोपलभ्यन्ते सूक्ष्मत्वात्। तेषां सूक्ष्माणां केशरादीनां कालः प्रव्यक्ततां करोति एतेनैव वंशाङ्कुरोऽपि व्याख्यातः एवं गर्भस्य तारुण्ये सर्व्वेष्वङ्गेषु सत्स्वपि सौक्ष्म्यात्तदनुपलब्धिः। तान्येव काल प्रकर्षात् प्रव्यक्तानि भवन्ति"। अधिकं गर्भशब्दे वक्ष्यते। "तृतीये तु मासङ्गैरिन्द्रियैश्च संयुक्तो भवतीत्याहुः क्रियासु व्यक्ताकृतापरा।४समुदायस्य एकदेशे "पदे न वर्णाविद्यन्ते वर्णेष्ववयवा न च" भर्तृहरिः "क्षणाहोरात्रावयवाः" भा०। "क्रियाहि नामेयमत्यन्तापरिदृष्टा पूर्व्वापरीभूतावयवा न शक्यते पिण्डीभूता निदर्शयितुम्" फ०भा० "गुणभूतैरवयवैः समूहः क्रमजन्मनाम्। बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यवदिश्यते" वाक्यप०। एकदेशाभिप्रायेणैव नास्तिकादीनां मते परमाण्वादौ अवयवव्यवहारः तैः परमाणुषु सङ्घस्यैव घटादिरूपतास्वीकारात्। न्यायादिमतसिद्धपरार्थानुमानसाधनेषु ५वाक्येषु च। ते चावयवाः पञ्च इति बहवः तत्र दृश्यन्ते। यथा प्रतिज्ञाहेत्वुदाहरणोपनयनिगमरूपाः पञ्च, प्रतिज्ञाहेत्वुदाहरणरूपाः हेत्वुदाहरणोपनयरूपा वा मतभेदेन त्रयः। यथा पर्व्वतो वह्निमान्, धूमात्, योयोधूमवान् स वह्निमान् यथा महानसम्, वह्निव्याप्योधूमो धूमवांश्चायम् तस्माद्वह्निमान्। प्रतिज्ञादीनां लक्षणानि च तत्तच्छब्दे वक्ष्यन्ते उपचारात् तत्प्रतिपादके चिन्ताभिक्षते अनुमानखण्डान्तर्गते द्रष्टव्ये। ६उपकरणमात्रे च।

अवयविन् त्रि० अवयवः कारणत्वेनास्त्यस्य इनि। अवयवजन्ये द्रव्ये। अवयवित्वं च कार्य्यद्रव्यत्वम्। तच्च नैयायिकादिभिरवयवाद्विततया उत्पद्यते इत्युरीकृतम्। तत्र युक्ता० प्रमाणमनुपन्यस्तम् "ननु अवयविनि किं मानं ? परमाणुषुङ्क्तैरेवोपपत्तेः न च परमाणूनामतीन्द्रियत्वात् घटादेः प्रत्यक्ष न स्यादिति वा-

च्यम् एकस्य परमाणोरप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वात् यथा एकस्य केशस्य दूरेऽप्रत्यक्षत्वे तत्समूहस्य प्रत्यक्षत्वम् । न च एकः स्थूलो महान् घट इति बुद्धेरनुपपत्तिरिति वाच्यम् एको महान् धान्यराशिरितिवदुपपत्तेः, नैवं परमाणोरतीन्द्रियत्वेन तत्समूहस्यापि प्रत्यक्षायोग्यत्वात् दूरस्थकेशस्तु नातीन्द्रियः सन्निधाने तस्यैव प्रत्यक्षत्वात्। न च तदानीम् अदृश्यपरमाणुपुञ्जात् दृश्यपरमाणुपुञ्जस्योत्पन्नत्वात् न प्रत्यक्षत्वे विरोध इति वाच्यम् अदृश्यस्य दृश्यानुपादानत्वात् अन्यथा चक्षुरुन्मादिसन्ततौ कदाचिद् दृश्यत्वप्रसङ्गात् । न चातितप्तत्रैलादौ कथमदृश्यदहनसन्ततेः दृश्यदहनोत्पत्तिरिति वाच्यं तत्र तदन्तःपातिभिः दृश्यदहनावयवैः स्थूलदहनोत्पत्तेरुपगमात् । न च अदृश्यद्व्यणुकेन कथं त्रसरेणोरुत्पत्तिरिति ? वाच्यम् । यतो न वयं दृश्यत्वमदृश्यत्वं वा कस्यचित् स्वभावादाचक्ष्महे परन्तु महत्त्वोद्भूतरूपादिकारणसमुदायवशात् दृश्यत्वं तथा च त्रसरेणोर्महत्त्वात् प्रत्यक्षं न तु द्व्यणुकादेःतदभावात् न हि तन्ततेऽपीदं सम्भवति परमाणौ महत्त्वाभावात् इत्थं चावयविसिद्धौ तेषामुत्पादविनाशयोः प्रत्यक्षत्वादनित्यत्वं तेषां चावयवावयविधाराया अनन्तत्वे मेरुसर्षपयोरपि साम्यप्रसङ्गः । अतः क्वचिद्विश्रामो वाच्यः यत्र च विश्रामस्तस्यानित्यत्वे तत्समवेतकार्योत्पत्तिप्रसङ्गः स्यात् अतस्तस्य नित्यत्वं महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिवाणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वमस्ति इति तस्य परमाणुत्वसिद्धिः न च त्रसरेणावेव विश्रामोऽस्तिति वाच्यं त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन तदवयवसिद्धौ त्रसरेणोरवयवाः सावयवाः महदवयवत्वात् कपालवदित्यनुमानेन तदवयवसिद्धेः न चेदमप्रयोजकम् अपसटमहत्त्वं प्रति अनेकद्रव्यवत्त्वस्य प्रयोजकत्वात् नचैवं क्रमेण तदवयवधारापि सिध्येदिति वाच्यम् अनवस्थाभयेन तदसिद्धेः" । अस्खलत्त्वं तत् दिनकर्यांम् । 'बौद्धः षड्ढते नन्विति नन्वयं घटपटादि प्रतीतिरेव तत्र प्रमाणं भविष्यतीत्यत आह परमाणुपुञ्जैरेवेति विलक्षणसंस्थानविशिष्टैः परमाणुभिरेवेत्यर्थः उपपत्तेरिति अयं घट इत्यादिप्रतीतेरुपपत्तेरित्यर्थः । तत् समूहस्य परमाणुसमूहस्य । तत्र दृष्टान्तमाह यथेति । तत्समूहस्य केशसमूहस्य। अनुपपत्तिरिति परमाणुविषयत्वादिति शेषः उपपत्तेरिति तत्र यथा धान्यसमूहस्यैकत्वादेक इति प्रतीतिरेवं संयोगविशेषस्यैव महत्त्वाकलनतया महानिति प्रतीतिस्तथा परमाणुपुञ्जेष्वपीति भावः । प्रत्यक्षायोग्यत्वादिति तथाच स्वभावतोऽयोग्यानां परमाणूनां परस्परसंयोगमात्रेण योग्यत्वं न सम्भवतीति भावः । दूरस्थकेशस्तु स्वभावतो नातीन्द्रिय इति त्वदुक्तदृष्टान्तस्य वैषम्यमित्याह दूरस्थकेशस्येति तस्य दूरस्थ केशस्य । तस्यैवेति एवकारस्य प्राक्तनसन्निधानपदेनान्वेति तथाच सन्निधान एव तस्य प्रत्यक्षत्वादित्यर्थः तथाच दूरत्वस्य प्रतिबन्धकत्वात्तद्दशायाम् अप्रत्यक्षत्वमात्रं तस्य, न तु स्वाभाविकी प्रत्यक्षत्वमिति भावः । उत्पन्नत्वादिति क्षणभङ्गवादिनां मते परमाणूनामुत्पत्तिस्वीकारादिति भावः । अन्यथा अदृश्यस्य दृश्योत्पादकत्वे। तत्र तादृशदहनोत्पत्तिस्यात्) । तदन्तःपातिभिः अतितप्तत्रैलान्तःपातिभिः । स्वभावात् कारणैरपेक्षात् उद्भूतरूपादीति आदिनालोकादिपरिग्रहः । तदभावे महत्त्वोद्भूतरूपाद्यभावे महत्त्वाभावादित्यर्थः । अत्र नास्तिकमतानुयायिनः परस्परविभक्तपरमाणूनां महत्त्वाभावादप्रत्यक्षत्वेऽपि परस्परसंयुक्तानां पुञ्जात्मनामेषां प्रत्यक्षे बाधकाभावः नच महत्त्वाभावएव बाधकः परस्परविलक्षणसंयोगस्यैव महत्त्वरूपस्य प्रत्यक्षजनकत्वात् नच परमाणूनां नित्यत्वाद्घटादावुत्पत्तिनाशयोः प्रतीत्यनुपपत्तिरिति वाच्यम् तन्मते पदार्थमात्रस्यैव क्षणिकत्वात् परमाणूनामुत्पत्तिनाशयोः स्वीकारात् नच परमाणुपुञ्जेषु घटत्वाद्यङ्गीकारे कपालाद्यट इति प्रतीतेरनुपपत्तिः परमाणूनां कपालजन्यत्वाभावादिति वाच्यं तन्मते कपालस्यापि परमाणुपुञ्जरूपतया घटरूपपुञ्जेषु कपालरूपपुञ्जजन्यत्वस्वीकारात् पुञ्जात् पुञ्जोत्पत्तिरिति तेषां सिद्धान्तादित्याहुः, तत्र घट इत्यादिप्रतीतिविषयतायां अनेकपरमाणुषु कल्पने गौरवात् अवयवातिरिक्तावयविसिद्धिरिति दिक्। मेरुसर्षपयोरपीति अपिशब्दः साम्यप्रसङ्ग इत्युत्तरं सम्बध्यते तेन च द्व्यणुकस्य सावयवारब्धत्वे महत्त्वापत्तिः समर्थ्यते साम्यं परिमाणतारतम्याभावः परिमाणकारणीभूताया अवयवसंख्याया उभयत्र साम्यादिति भावः । नच मेर्ववयवानां न सर्षपतुल्यपरिमाणवत्त्वं, सर्षपावयवानां च न मेर्ववयवतुल्यपरिमाणवत्त्वमित्यपकर्षपरिमाणविशेषाहिशेष इति वाच्यम् मेर्ववयवसर्षपावयवयोरनन्तावयवत्वेन तत्परिमाणतारतम्याभावस्याप्रयोजनीयत्वात् नच मेरुसर्षपयोरवयवगतप्रचयाख्यसंयोगविशेष इति वाच्यम् प्रचयविशेषस्यापि संख्याविशेषनियम्यत्वेन संख्याविशेषाभावे तद्वि-

षेणानुपपत्तेरिति । ननु तथापि विश्रामाभावस्य नित्यत्वे मानाभाव इत्यत आह यत्र त्विति । असमवेतकार्योत्पत्ति प्रसङ्ग इति असमवेतभावकार्योत्पत्तिप्रसङ्ग इत्यर्थः । ननु तस्य नित्यत्वसिद्धावपि अणुत्वे किं मानमित्यत आह महत्परिमाणेति । चाक्षुषद्रव्यत्वादिति अत्रात्मनि व्यभिचारवाराय चाक्षुषपदं घटाभावे व्यभिचारवारणाय द्रव्यपदम् तदवयवसिद्धाविति त्रसरेण्ववयवसिद्धावित्यर्थः । तदसिद्धेरिति अवयवधारायां असिद्धेरित्यर्थः । अत्र नव्याः त्रसरेणोरवयवाः सावयवा इत्याद्यनुमानयोरुक्तयोरप्रयोजकत्वेन त्रुटावेव विश्रामः नच चाक्षुषं प्रति महत्त्वं कारणं तथाच त्रुटौ महत्त्वाभावश्यकं तच्चावयवसंख्याजन्यमिति अवयवं विना नोत्पद्यते इत्यनुकूलतर्कसत्त्वाद्व्यणुकसाधकानुमानस्येति वाच्यम् त्रसरेणुमहत्त्वस्य नित्यत्वस्वीकारेणोक्ततर्कानवतारात् नचाणुव्यवहारस्याणुपरिमाणनिबन्धनतया तदाश्रयद्रव्यसिद्धिरावश्यकीति वाच्यम् तस्यापेक्षापरिमाणनिबन्धनत्वात् महत्यपि महत्तमादणुव्यवहारात् न चैवं त्रसरेणुप्रत्यक्षएवास्तवयवीति वाच्यम् विगलितेष्वपि तेषु घट इत्यादिप्रत्यय प्रसङ्गात् नच तत्संयोगसत्त्वेव घटत्वं घटोद्रव्यमित्यादि प्रतीतौ च परम्परया तद्ज्ञानमिति वाच्यं सम्भवति साक्षात् सम्बन्धविषयत्वे परम्परासम्बन्धविषयकत्वकल्पने गौरवादित्याहुः । ननु परमाणुत्वेन कुतो न द्रव्यान्तरोत्पत्तिः परमाणुद्वयेन द्व्यणुकवत् द्व्यणुकद्वयेन द्रव्यान्तरोत्पत्त्यापत्तिस्त्रिभिर्द्व्यणुकैस्त्र्यणुकवदिति चेन्न प्रमाणाभावेन तादृशद्रव्यासिद्धौ परमाणुत्वे द्व्यणुकद्वये च द्रव्यारम्भकसंयोगाऽकल्पनात् । अत्रेदं चिन्त्यं त्रिभिः परमाणुभिरेव त्र्यणुकमस्तु परमाणुभ्यामनारम्भे सिद्धान्तिनां द्व्यणुकाभ्यामनारम्भ इव मानाभावात् फलबलेन त्रयाणामेव युगपद्द्रव्यारम्भसंयोगकल्पनात् वस्तुतो गवाद्यारम्भे दृश्यमानानां द्व्यणुकत्वमेव युक्तमणुद्वयारब्धत्वे लाघवादिति"। अवयवयवी कारणात् भिन्नएव कार्यकारणयोरैक्याभावात् नियतपूर्ववर्त्तिन एव कारणतया कारणस्य प्राक्सत्त्वनियमेन कार्यस्य च तदाऽसत्त्वेन तयोर्भेदात् । अतएव "द्रव्याणि द्रव्यान्तरमारभन्ते" इति वै० सूत्रे अन्तरपदमुपात्तम् इति वैशेषिकादयः स्वीचक्रुः । सांख्यावेदान्तिनस्तु कार्यस्य कारणैक्यमेव स्वीचक्रुः तथाहि "तदनन्यत्वमारम्भणशब्दादिभ्यः" "युक्तेश्च यद्वान्तराञ्च" या० सू० तद्भाष्ये चोक्तम् । "युक्तेश्च प्रागुत्पत्तेः कार्यस्य सत्त्वं मनन्यत्वञ्च कारणादवगम्यते यद्वान्तराञ्च । युक्तिस्तावदर्थ्यते दधिघटरुचकाद्यर्थिभिः प्रतिनियतानि कारणानि क्षीरमृत्सुवर्णमृत्तिकादीन्युपादीयमानानि लोके दृश्यन्ते न हि दध्यर्थिभिर्मृत्तिकोपादीयते न घटार्थिभिः क्षीरम् । तच्चासत्कार्यवादे नोपपद्यते । अविशिष्टे हि प्रागुत्पत्तेः सर्वत्र सर्वस्यासत्त्वे कस्मात् क्षीरादेरेव दध्युत्पद्यते न मृत्तिकायाः, मृत्तिकाया एव घट उत्पद्यते न क्षीरात् । अथाविशिष्टेऽपि प्रागसत्त्वे क्षीरएव दध्नः कश्चिदतिशयो न मृत्तिकायां, मृत्तिकायामेव घटस्य कश्चिदतिशयो न क्षीरेऽस्तुच्येत तर्ह्यतिशयवत्त्वात् प्रागवस्थाया असत्कार्यवादहानिः सत्कार्यवादसिद्धिव । यक्तिश्च कारणस्य कार्यनियमार्था कल्प्यमाना नान्याऽसतो वा कार्यं नियच्छेत् असत्त्वाविशेषादन्यत्वाविशेषाच्च । तस्मात् कारणस्यात्मभूता शक्तिः शक्तेश्चात्मभूतं कार्यम् । अपिच कार्यकारणयोर्द्रव्यगुणादीनां चात्मक्षितिवद्भेदबुद्धभावात्तादात्म्यमभ्युपगन्तव्यम् । समवायकल्पनायामपि समवायस्य समवायिभिः सम्बन्धेऽभ्युपगम्यमाने तस्य तस्यान्योऽन्यः सम्बन्धः कल्पयितव्यः इत्यनवस्थाप्रसङ्गः अनभ्युपगम्यमानेऽत्र विच्छेदप्रसङ्गः । अथ समवायः स्वयं सम्बन्धरूपत्वादनपेक्ष्यैवापरं सम्बन्धं सम्बध्यते, संयोगोऽपि तर्हि स्वयं सम्बन्धरूपत्वादनपेक्ष्यैव समवायं सम्बध्येत । तादात्म्यप्रतीतेश्च द्रव्यगुणादीनां समवायकल्पनानर्थक्यम् । कथञ्च कार्यमवयविद्रव्यं कारणेष्ववयवेषु वर्त्तमानं वर्त्तते किं समस्तेष्ववयवेषु वर्त्ततउत प्रत्यवयवम् । यदि तावत् समस्तेषु वर्त्तेत ततोऽवयव्यनुपलब्धिः प्रसज्येत, समस्तावयवसन्निकर्षस्याशक्यत्वात् नहि बहुत्वं समस्तेष्वाश्रयेषु वर्त्तमानं व्यस्ताश्रयग्रहणेन गृह्यते । अथावयवशः समस्तेषु वर्त्तेत तदाऽऽरम्भकावयवव्यतिरेकेणावयव्यनुपलब्धेः कल्प्यैरनन्तैरवयवैरारम्भकैरवयवशवयवी वर्त्तेत । कोशावयवव्यतिरिक्तैरनन्तैरवयवैरसिः कोशं व्याप्नोति । अनवस्था चैवं प्रसज्येत तेषु तेष्ववयवेषु वर्त्तयितव्यमन्येषामन्येषामवयवानां कल्पनीयत्वात्।अथ प्रत्यवयवं वर्त्तेत तत्रैकत्र व्यापारेऽन्यत्राव्यापारः स्यात् न हि देवदत्तः शुक्ले सन्निधीयमानस्तदक्षरेव पाटलिपुत्रे सन्निधीयते युगपदनेकत्र ह्यसावनेकत्व प्रसङ्गात् देवदत्तयज्ञदत्तयोरिव शुक्लपाटलिपुत्रनिवासिनोः। गोत्वादिवत् प्रत्येकं परिसमाप्तेरदोष इति चेन्न तथा प्रतीत्यभावात् । यदि गोत्वादिवत् प्रत्येकं परिसमाप्तोऽवयवी स्यात् यथा गोत्वं प्रतिव्यक्ति प्रत्यक्षं गृह्यते एवमवय-

व्यपि प्रत्ययवत् प्रत्ययेन स्पृश्येत नवं चैवं नियतं स्पृश्यते। प्रत्येकं परिसमाप्तौ चावयविनः कार्य्येणाधिकारात्तस्य चैकत्वात् स्पृश्येरपि स्तनकार्य्यं कुर्य्यात् उरसा च पृथुकार्य्यं, न चैवं दृश्यते। प्रागुत्पत्तेश्च कार्य्यस्यासत्त्वे उत्पत्तिरकर्तृका निरात्मिका च स्यात्। उत्पत्तिश्च नाम क्रिया सा सकर्तृकैव भवितुमर्हति गत्यादिवत्। क्रिया च नाम स्यादकर्तृका चेति विप्रतिषिद्धेयं। घटस्य चोत्पत्तिरुच्यमाना न घटकर्तृका किन्तर्ह्यन्यकर्तृकेति कल्पा स्यात् तथा कपालादीनामप्युत्पत्तिरुच्यमानान्यकर्तृकैव कल्पेत तथाच सति घटउत्पद्यते इत्युक्ते कुलालादीनि कारणान्युत्पद्यन्त इत्युक्तं स्यात् न च लोके घटउत्पद्यत इत्युक्ते कुलालादय उत्पद्यमानाः प्रतीयन्ते उत्पन्नतापतीतेश्च। अथ स्वकारणसत्ता सम्बन्ध एवोत्पत्तिरात्मलाभश्च कार्य्यस्येति चेत् कथमसत्स्वात्मकं सम्भ्येतेति वक्तव्यं, सतोर्हि द्वयोः सम्बन्धः सम्भवति न सदसतोरसतो वा। अभावस्य च निरूपाख्यत्वात् प्रागुत्पत्तेरिति मर्य्यादाकरणमनुपपन्नम्। सतां हि लोके चेत्रस्पृहादीनां मर्य्यादा दृष्टा नाभावस्य। न हि वन्ध्यासुतो राजा बभूव प्राक्पूर्ब्बवर्मणोऽभिषेकादित्येवं जातीयकेन मर्य्यादाकरणेन निरूपाख्यो वन्ध्यासुतो राजा बभूव भवति भविष्यतीति वा विशेष्यते। यदि च वन्ध्यासुतः कारकव्यापारादूर्द्धमभविष्यत्ततः इदमभ्युपपत्स्यत कार्य्याभावोऽपि कारकव्यापारादूर्द्धं भविष्यतीति। वयन्तु पश्यामो वन्ध्यासुतस्य कार्य्याभावस्य चाभावत्वाविशेषात् यथा वन्ध्यासुतः कारकव्यापारादूर्द्धं न भविष्यति एवं कार्य्याभावोऽपि कारकव्यापारादूर्द्धं न भविष्यतीति। तत्त्वेवं सति कारकव्यापारोऽनर्थकः प्रसज्येत, यथैव हि प्राक्सिद्धत्वात् कारकस्य स्वरूपसिद्धये न कञ्चिद्व्यापृियते एवं प्राक्सिद्धत्वात् तदनन्यत्वाच्च कार्य्यस्वरूपसिद्धयेऽपि न कञ्चिद्व्यापृियेत व्यापृियते च, अतः कारकव्यापारार्थवत्त्वाय मन्यामहे प्रागुपपत्तेरभावः कार्य्यस्येति। नैष दोषः यतः कार्य्याकारेण कारणं व्यवस्थापयतः कारकव्यापारस्यार्थवत्त्वमुपपद्यते। कार्य्याकारोऽपि कारणस्यात्मभूत एव अनात्मभूतस्यानारभ्यत्वादित्यभाणि। न च विशेषदर्शनमात्रेण वस्त्वन्यत्वं भवति न हि देवदत्तः सङ्कोचितहस्तपादश्च विशेषेण दृश्यमानोऽपि वस्त्वन्यत्वं गच्छति, स एवेति प्रत्यभिज्ञानात्। यथा प्रतिदिनमनेकसंस्थानानामपि पित्रादीनां न वस्त्वन्यत्वं भवति, मम पिता मम माता मम भ्रातेति प्रत्यभिज्ञानात्। जन्मोच्छेदानन्तरित्वात्तत्र तत्र युक्तं नान्यतेति चेन्न क्षीरादीनामपि दध्याद्याकार संस्थानस्य प्रत्यक्षत्वात्। अदृश्यमानानामपि घटपटादीनां समानजातीयावयवान्तरोपचितानामङ्कुरादिभावेन दर्शनगोचरतापत्तौ जन्मसंज्ञा तेषामेवावयवानामपचयवशाददर्शनापत्तावुच्छेदसंज्ञा। तत्रेदमुज्जन्मोच्छेदान्तरितत्वेन चेदसतः सत्त्वापत्तिः सतश्चासत्त्वापत्तिः तथा सति गर्भवासिन उत्तानशायिनश्च भेदप्रसङ्गः। तथा बाल्ययौवनस्थाविरेष्वपि भेदप्रसङ्गः पित्रादिव्यवहारलोपप्रसङ्गश्च। एतेन क्षणभङ्गवादः प्रतिवर्दितव्यः। यस्य पुनः प्रागुत्पत्तेरसत् कार्य्यं तस्य निर्व्विषयः कारकव्यापारः स्यात् अभावस्य विषयत्वानुपपत्तेः आकाशस्याङ्कननप्रयोजनखड्गादानेकायुधप्रसक्तिवत्। समवायिकारणे व्यापारः कारकव्यापारः स्यादिति चेन्न अन्यविषयेण कारकव्यापारेणान्यनिष्पत्तेरतिप्रसङ्गात्। समवायिकारणस्यैवात्मातिशयः कार्य्यमितिचेन्न अतस्तर्हि सत्कार्य्यापत्तिः। तस्मात् क्षीरादीन्येव दध्यादिद्रव्यादिभावेनावतिष्ठमानानि कार्य्याख्यां लभन्त इति न कारणादन्यत्कार्य्यं वर्षशतेनापि शक्यं कल्पयितुम्। तथा च मूलकारणमेवान्यात्कार्य्यात् तेन तेन कार्य्याकारेण नटवत् सर्व्वव्यवहारास्पदत्वं प्रतिपद्यते। एवं युक्तेः कार्य्यस्य प्रागुत्पत्तेः सत्त्वमनन्यत्वञ्च कारणादवगम्यते। शब्दान्तराच्चैतदवगम्यते। पूर्व्वस्तुते असद्व्यपदेशिनः शब्दस्योदाहृतत्वात्ततोन्यः सद्व्यपदेशी शब्द शब्दान्तरः "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमित्यादि।" "तद्धैक आहुरसदेवेदमग्र आसीदिति" चासत् पक्षमुपक्षिप्य "कथमसतः सज्जायेत?" इत्याक्षिप्य "सदेव सोम्येदमग्र आसीत्" इत्यवधारयति। तत्रेदं शब्दवाच्यस्य कार्य्यस्य प्रागुत्पत्तेः सच्छब्दवाच्येन कारणेन सामानाधिकरण्यस्य श्रूयमाणत्वात् सत्त्वानन्यत्वे प्रसिद्धयतः यदि तु प्र। गुत्पत्तेरसत्कार्य्यं स्यात् पश्चाद्योत्पद्यमानं कारणे समवेयात् तदन्यत्कारणात् स्यात् तत्र "येनाश्रुतं श्रुतं भवतीय" प्रतिज्ञा पीड्येत सत्त्वानन्यत्वावगतेस्त्वियं प्रतिज्ञा समर्थ्यते" भा०। "पटवच्च" भा०सू०। "यथा च संवेष्टितः पटो न व्यक्तं स्पृश्यते किमयं पटः किञ्चान्यद्द्रव्यमिति स एव प्रसारितो यत् संवेष्टितं द्रव्यं स पट एवेति प्रसारणेनाभिव्यक्तो स्पृश्यते यथा च संवेष्टनसमये पट इति स्पृश्यमाणोऽपि न विशिष्टायामविस्तारोस्पृश्यते स एव प्रसारणसमयेऽपि विशिष्टायामविस्तारो स्पृश्यते न संवेष्टितरूपादयं भिन्नःपटः इति। एवं तन्वादिकारणावस्थं पटादि

कार्यं सच्चेष्टं सह तरीवेमकुविन्दादिकारकव्यापाराभिव्यक्तं सत् दृष्टते। ततः संवेष्टितपटप्रसारितपटन्यायेनानन्यत् कारणात् कार्यमित्यर्थः" भा०। सां०कौ० कारणात् कार्यस्यानन्यता दर्शिता यथा "कार्यस्य कारणभेदसाधकानि च प्रमाणानि। न पटस्तन्तुभ्योभिद्यते तद्धर्मत्वात् इह यद्यतोभिद्यते तत्तस्य धर्मो न भवति यथा गौरश्वस्य। धर्मश्च पटस्तन्तूनां तस्माद्नार्थान्तरम्। उपादानोपादेयभावाच्च नार्थान्तरत्वम्। नाप्ययोरुपादानोपादेयभावः यथा घटपटयोः उपादानोपादेयभावश्च तन्तुपटयोः। तस्माद्नार्थान्तरत्वमिति। इतश्च नार्थान्तरत्वं तन्तुपटयोः संयोगाप्राप्त्यभावात्। पदार्थान्तरत्वे हि संयोगोदृष्टो यथा कुण्डबदरयोः अप्राप्तिर्वा यथा हिमवद्विन्ध्ययोः" नचेह संयोगाप्राप्ती तस्माद्नार्थान्तरत्वमिति। इतश्च पटस्तन्तुभ्यो न भिद्यते गुरुत्वान्तरकार्यारब्धत्वात्। इह यद्यद्भिन्नं तत्तस्य गुरुत्वान्तरकार्यं दृष्टते यथैकपलिकस्य खलिकस्य वा गुरुत्वकार्योऽवनतिविशेषोऽधिकः न च तथा तन्तुगुरुत्वकार्यात् पटगुरुत्वस्य कार्यान्तरं दृश्यते तस्माद्भिन्नस्तन्तुभ्यः पटइति। तान्येतान्यवीतान्यभेदसाधनानि। तदेवमभेदे सिद्धे तन्वव एव तेन तेन संस्थानभेदेन परिणताः पटः, न तन्तुभ्योऽर्थान्तरं पटः। स्वात्मनि क्रियानिरोधबुद्धिव्यपदेशार्थक्रियाक्रियाव्यवस्थाभेदाच्च नैकान्तिकं भेदं साधयितुमर्हन्ति एकस्मिन्नपि तत्तद्विशेषाविर्भावतिरोभावाभ्यामेतेषामविरोधात्। यथाहि कूर्मस्याङ्गानि कूर्मशरीरे निविशमानानि तिरोभवन्ति निःसरन्ति चाविर्भवन्ति न तु कूर्मतस्तदङ्गान्युत्पद्यन्ते प्रध्वंसन्ते वा एवमेकस्या मृदः सुवर्णस्य वा घटसुकुटादयोविशेषा निःसरन्त आविर्भवन्त उत्पद्यन्त इत्युच्यन्ते न पुनरसतासत्पादः सतां वा निरोधः। यथाह भगवान् कृष्णद्वैपायनः "नासतोविद्यते भावो नाभावो विद्यते सतः" इति यथा कूर्मः स्वावयवेभ्यः सङ्कोचविकाशिभ्योन भिन्नः एवं घटसुकुटादयोऽपि मृत्सुवर्णादिभ्यो न भिन्नाः। एवञ्चेत् तन्तु पटइति व्यपदेशो यथेह वने तिलका इत्युपचारः। न चार्थक्रियाभेदोऽपि भेदमापादयति एकस्यापि नानार्थक्रियादर्शनात् यथैक एव यष्टिर्दाहकः प्रकाशकः पाचकश्चेति। नाप्यर्थक्रियाव्यवस्था वस्तुभेदे हेतुः तेषामेव समस्तव्यस्तानामर्थक्रियाव्यवस्थादर्शनात् यथा प्रत्येकं विटपो वर्त्मदर्शनलक्षणामर्थक्रियां कुर्वन्ति न तु शिबिकापक्षं मिलितास्तु शिबिकां वहन्ति एवं तन्वः प्रत्येकं प्रावरणमकुर्वाणा अपि मिलिताः आविर्भूतपटभावाः प्रावरिष्यन्ति। स्यादेतत् आविर्भावः पटस्य कारणव्यापारात् प्राक् सन्नसन्वा असंश्चेत् प्राग्वत् तर्ह्यसत उत्पादनम्। अथ सन्, कृतं तर्हि कारणव्यापारेण। न हि सति कार्ये कारणव्यापारप्रयोजनं पश्यामः। आविर्भावे चाविर्भावान्तरकल्पनेऽनवस्याप्रसङ्गः। तस्मादाविर्भूतपटभावास्तन्तवः क्रियन्ते इति रिक्तं वचः। अथासदुत्पद्यत इत्यत्रापि मते केयमसदुत्पत्तिः सतो असतो वा, सतो चेत् कृतं तर्हि कारणैः, असतो चेत्तस्या अप्युत्पत्त्यन्तरमित्यनवस्था। अथोत्पत्तिः पटाद्नार्थान्तरम् अपि तु पटएवासौ तथापि यावदुक्तं भवति पटइति तावदुक्तं भवत्युत्पद्यतइति न वाच्यं पौनरुक्त्यात् विनश्यतीत्यपि न वाच्यं उत्पत्तिविनाशयोर्युगपदेकत्र विरोधात्। तस्मादियं पटोत्पत्तिः स्वकारणसमवायो वा स्वकारणसत्तासमवायोवा उभयथापि नोत्पद्यते अथ च तदर्थानि कारणानि व्यापार्यन्ते एवं सत एव पटादेराविर्भावाय कारणाप्रेक्षेत्युपपन्नम्। न च पटरूपेण कारणानां सम्बन्धः, तद्रूपस्याक्रियात्वात् क्रियासम्बन्धित्वाच्च कारकाणाम् अन्यथा कारणत्वाभावात्" व्याख्यातञ्चैतदक्षाभिसट्टीकायां यथा "तद्धर्मत्वात् तेषां तन्तूनां धर्मत्वात् अवस्थाविशेषात्मकत्वात् स्वसत्त्वनियतसत्ताकत्वाद्वा। तत्सत्त्वनियतसत्ताकत्वरूपहेतुसध्ये एव व्याप्तेः प्रवेशात् व्यतिरेकव्याप्तिं दर्शयति यत् यतोभिद्यते इत्यादि तथा च व्यापकस्य धर्मत्वाभावस्य निवृत्त्या व्याप्यस्य भेदस्य निवृत्तेरभेदसिद्धिरिति भावः। पक्षे धर्मत्वरूपहेतुसत्त्वप्रदर्शनाय उपनयरूपन्यायावयवमाह धर्मश्चेत्यादि। धर्मत्वं च प्रागुक्तम्। निगमयति तस्माद्नार्थान्तरमिति। अन्योऽर्थः पदार्थः अर्थान्तरं मयूरव्यंसकादित्वात् समासे ङीषता। पटः तन्तुभ्यो न भिन्नः पदार्थः किन्तु अभिन्न एवेत्यर्थः। उपादीयते कार्यजननाय विशेषरूपेण गृह्यते इत्युपादानम् कार्यस्यानागतावस्थाविशेषाश्रयरूपं कारणं तदाश्रितसदृशावस्थापन्नं कार्यन्तूपादेयं तद्भावात् कार्यकारणविशेषरूपत्वादित्यर्थः तथा च कार्यस्यानागतावस्थाश्रयत्वमेवोपादानकारणत्वम्, तच्च अनागतावस्थापन्नकार्यरूपमेव अन्यस्य दुर्वचत्वात् अन्यथा सर्व एव सर्वकार्यजननाय उपादेयेरन् न च तथा उपादीयन्ते। उपादीयन्ते च पटादिजननाय तन्तवः न तु मृदादयः। न च प्रागभाव एव तस्य नियामकः, तस्य अभावत्वेन स्वतोविशेषकत्वाभावात्

प्रतियोग्युपरक्तस्य तस्य तथात्वकल्पनन्तु प्रतियोग्यसत्त्वकाले ऽसम्भवात् उत्पत्तेः प्राक् प्रतियोगिनोऽसत्त्वेन तेन सह प्रागभावस्य संबन्धस्यानौचित्यात् इत्यनागतावस्थापन्नकार्य्यात्मकत्वमुपादानस्य युक्तम् तस्मात् पटः न तन्तुभ्यो भिन्न इत्युपेयमिति भावः। संयोगाप्राप्त्यभावादिति। संयोगश्च अप्राप्तिः विभागश्च तयोरभावात्। तथाच संयोगाभावः विभागाभावश्च पृथक् अभेदसाधकः यथा पटसन्तुयो न भिद्यते तत्संयोगानाश्रयत्वात् यद्यतो भिद्यते तयोः संयोगोदृष्टः यथा घटपटयोः। न च गुणेषु व्यभिचारः इष्यते तत्र तन्त्वभेदस्येष्टत्वात् द्रव्यत्वे सतीति हेतोर्विशेषणे च व्यभिचाराभावाच्च। अप्राप्तिर्वेति विभागश्चेत्यर्थः तथा च संयोगानाश्रयत्वस्येव विभागानाश्रयत्वस्यापि अभेदसाधकत्वमिति भावः। गुरुत्वान्तरकार्य्यानुपलम्भादिति। अयमाशयः। अवयवतन्तुपरिमाणेनैव तदुगुरुत्वेन स्वाश्रयेणाधिकं महत्परिमाणमिव गुरुत्वम् जन्यते, गुरुत्वञ्च स्वपतन एव स्वाश्रिततुलादण्डादेरवनतिविशेषे हेतुरिति नैयायिकादिभिरभ्युपगम्यते। तत्र यदि पटसन्तुभ्योभिद्येत तदा तदाश्रितगुरुत्वविशेषेण स्वाश्रिततुलादण्डादेरवनतिविशेषो ऽत्र दृश्येत यथा एकपलिकस्वर्णापेक्षया द्विपलिकस्वर्णस्य, तथा च पटसन्तुभ्यो न भिद्यते गुरुत्वान्तरप्रयुक्तस्वाश्रिततुलादण्डाद्यवनतिविशेषदृश्यायोग्यत्वात् गुरुत्वान्तरयुक्तस्वर्णादिवत् तुल्यगुरुत्वयुक्तपदार्थे व्यभिचारवारणाय दृश्यायोग्यत्वादियुक्तं तस्य च पृथक् तुलादण्डारोपणेऽवनत्यन्तरस्य दृश्यसम्भवात् तन्तुपटयोश्च न तथासम्भव इति अभिप्रेत्यान्यत्र विस्तरः। तन्तुगुरुत्वस्य कार्य्यं स्वाश्रिततुलादण्डादेरवनतिविशेषस्तस्मात् कार्य्यान्तरम् अवनत्यन्तरं न दृश्यते न दृश्यते इत्यर्थः। अथैतानि व्यतिरेकव्याप्रयुक्तानि यथा च तत्र तत्र व्यतिरेकव्याप्तिस्तथानुपदं तत्तत्र दर्शितं प्राक्। पटइति बुद्धिविषयाः व्यपदेशभाजश्चेति शेषः। फलितमाह न तन्तुभ्योऽर्थान्तरमिति। अभेदसाधकहेतोः सत्प्रतिपक्षितत्वमाशङ्कते स्यादेतदित्यादि। क्रिया उत्पादनक्रिया, निरोधः प्रध्वंसस्तयोर्बुद्धिः तथा च कार्य्यकारणयोरभेदे कार्य्यस्य कारणात्मकत्वेन सतः स्वस्योत्पत्तिविनाशयोर्ब्रह्म सम्भव इत्यर्थः। व्यपदेशः व्यवहारः अर्थक्रिया प्रयोजनोत्पादनं क्रियाव्यवस्था प्रावरणादिकार्य्यनियमः तेषां भेदः पश्चात्पुनर्हेतुः। तथा च कार्य्यकारणयोरभेदे तन्तुषु पट इति कथं भेदव्यपदेशः? कथं वा प्रयोजनान्तरजनकता, ? प्रयोजनान्तरनियमश्च स्यादित्यर्थः। इत्यज्ञात्वा प्रयोगः पटसन्तुभ्यो भिद्यते तत्कार्य्यत्वेन, तत्र नष्टत्वेन वा प्रतीयमानत्वात्, तन्तुषु पट इति व्यपदेशप्रयोजकसंज्ञाभेदात्, विभिन्नार्थसाधकत्वात्, कार्य्यभेदवत्त्वाच्च। इति पञ्चभिर्हेतुभिः सत्प्रतिपक्षितोऽभेदसाधकहेतुर्नाभेदसाधनायालमित्याशङ्क्याह। समाधत्ते नैकान्तिकमिति। ऐकान्तिकं वास्तवमित्यर्थः तथा च तत्र तत्रावास्तवएव भेदव्यवहारो न वास्तवाभेदप्रतिक्षेपीति भावः। एवञ्च बुद्धिमात्रस्य, व्यवहारमात्रस्य वा वास्तविकत्वप्रयोजकत्वे इदं रजतमितिबोधात् व्यवहाराच्च शुक्तिरजतस्यापि वास्तवत्वापत्तिः। तथा अर्थक्रियाक्रियाव्यवस्थाभेदयोश्च न भेदसाधकत्वम् एकस्यैव वस्त्रादेः प्रकाशनपाचनादिरूपनानाकार्य्याणां, विष्टीनां व्यस्तानां मार्गदर्शनादिकार्य्यस्य समस्तानां तु शिबिकावाहनादिविभिन्नकार्य्यस्य च सम्पादनस्य दृष्टत्वात् तत्र तत्र हेतोर्व्यभिचाराच्च तयोर्भेदसाधकतेति न सत्प्रतिपक्षितत्वमभेदसाधकहेतोरिति भावः। तदेव क्रमश उपपादयति एकस्मिन्नपीति। प्रध्वंसन्ते नश्यन्ति। कूर्मस्य इत्यनुषङ्गः अस्मिन् पक्षे च कूर्मे इत्यर्थः सार्व्वविभक्तिकः सप्तम्यास्तसिल्। यथाहेति भगवद्गीतायामितिशेषः। असतोऽसत्त्वाश्रयस्य, भावः सत्त्वम्, सतः सत्त्वाश्रयस्य न अभावः असत्त्वम्, सदसतोरेकत्र समावेशाभावादिति शेषः। आपादयति व्यतिरेकव्याप्त्या साधयति तथा च प्रावरणादिक्रियाभेदः कारणभेदं विना अनुपपन्न इति व्यापकः प्रावरणादिप्रयोजनभेदाभावः निवर्त्तमानः व्याप्यं कारणभेदाभावं निवर्त्तयन् कार्य्यस्य कारणाद्भेदम् साधयतीत्यर्थः। इति यन्मतं तदनूद्य नत्वा दूषयित्वा तत्र हेतुप्रदर्शनाय व्यभिचारं दर्शयति एकस्यापीति तथा च कार्य्यभेदाभावः न कारणभेदाभावव्यापकः एकस्मिन् वस्त्रादौ नानाकार्य्यदर्शनात् तथा च भेदसाधकहेतुर्व्यभिचारीति भावः। एवम् भेदसाधकहेतुषु दूषितेषु इदानीं आविर्भावादेः सदसत्त्वे विकल्पेन दूषयितुं यतते स्यादेतदित्यादि। मतमित्यव्ययम् अलमर्थकं कारणव्यापारेणेतितृतीयान्तेनान्वयि तथा च कारणव्यापारसाध्यं नास्ति तस्य स्वतएव सिद्धत्वादित्यर्थः। क्रियन्ते उत्पाद्यन्ते पटरूपेण व्यवस्थियन्ते इत्यपि बोध्यम्। यद्वा उभयवादिनोस्तुल्यदोषत्वं न तदुद्भूयमित्याशयेन प्रतिवन्दिरूपदूषणदानायाह अथासदुपादान इत्यादि। उत्पत्तिः

आद्यक्षणसंबन्धः स च स्वरूपसंबन्धविशेषः न तु संयोगमात्रः गुणक्रिययोरसदसम्भवात् तयोश्च उत्पत्तिव्यवहारस्य सर्व्वसिद्धत्वात्। प्रकृते स्वरूपसंबन्धविशेषश्च अनुयोगिस्वरूपएव एवञ्च उत्पत्तिः पटरूप एव नार्थान्तरमिति पटस्य उत्पत्तेः प्राक् असत्त्वात् तत्र कारणव्यापारापेक्षा भविष्यतीति शङ्कते अथोत्पत्तिरित्यादि। दूषयति तथापीति। पटादिशब्देन पटत्वविशिष्टस्यैव उत्पत्तिमतोऽभिधानात् उत्पद्यते इति न प्रयोक्तव्यम् तद्वाच्यार्थस्योक्तत्वात् तद्वृत्तौ च पौनरुक्त्यात् घटो घट इतिवत् न तत्र शाब्दबोध इति भावः। पटादिशब्दस्य उत्पत्त्यर्थकत्वे दूषणान्तरमाह विनश्यतीत्यादि न वाच्यं प्रयोक्तुं न शक्यम् अयोग्यत्वादिति शेषः। पटशब्देन पटत्वविशिष्टस्यैव उत्पत्तिमतोऽभिधानात् उत्पत्तिमति चैकदा विनाशप्रतियोगित्वासम्भवेनायोग्यत्वादित्यर्थः। अयोग्यत्वे हेतुमाह उत्पत्त्यादीति एकत्र एकस्मिन् धर्म्मिणि युगपदेकदा विरोधात् सहानवस्थानात्। कालान्तरे भवितुमर्हतीति द्योतनाय युगपदिति। विनश्यतीति वर्त्तमानताप्रतीतेर्न विभिन्नकालता तयोरिति भावः। एवमुत्पत्तेः पटस्वरूपत्वाभावासम्भवमुक्त्वा अन्यरूपतास्वीकारेऽपि उत्पत्तेरुत्पत्त्यसम्भव एवेत्याह तस्मादियं पटोत्पत्तिरित्यादि। स्वकारणसमवायः स्वस्य कारणेषु तन्तुषु समवायः तत्संबन्धविशेषरूपा पटोत्पत्तिः। समवायस्य च सर्वदा विद्यमानत्वात् न तस्या उत्पत्तिः। समवायस्य नित्यत्वात् पटस्य कादाचित्कोत्पत्तिः कथं स्यादित्यतः पक्षान्तरमाह स्वसत्तासमवाय इति। स्वसत्तया स्वकारणे विद्यमानतया यः कारणे समवायस्तथा च स्वसत्ताकालिकत्वविशिष्टसमवायस्य पूर्व्वमसत्त्वान्न कादाचित्कत्वव्याघात इति भावः। उभयथापि उत्पत्तेरुभयरूपमध्येऽन्यतरूपत्वेऽपीत्यर्थः न उत्पद्यते उत्पत्तिरिति शेषः। सिद्धस्वरूपत्वेऽपि सर्व्वजनानुभवसिद्धायाः कारणव्यापारापेक्षाया अनौचित्यस्य उभयमतेऽपि तुल्यत्वात् प्रतिबन्दिसमाधानमिति भावः। उत्पत्तेः कार्य्यस्य रूपेण सम्बन्धरूपतां शङ्कते न चेति। पटरूपस्य तन्तुरूपजन्यत्वात् तेन सह कारणानां संबन्धएव कार्य्यस्य उत्पत्तिस्तथा च तस्य जन्यत्वात् कारणव्यापारापेक्षेति न समानं दूषणमिति भावः। दूषयति रूपस्येति। रूपस्य भवन्मते गुणत्वेन क्रियारूपत्वाभावात् उत्पत्तेश्च क्रियारूपतायाः सर्व्वैरिष्यमाणत्वात् कारणानां च क्रियानुबन्धित्वेनैव कारकत्वाभ्युपगमात्। तन्तुभ्यः पटउत्पद्यते इत्यादिषु च तन्तवादेर्नाम्नुत्पत्तिकारकत्वप्रतीतेश्च नोत्पत्तेः पटरूपसंबन्धरूपतेति" भावः।

अवयाज् पु० अव+यज–क्विप्। अपकृष्टयाजके संवृद्धौ अवयाः

अवयाट त्रि० अव+या–क्विच् + पृषक् कर्त्तरि। "अदितिर्भवास्यवयाता हरस्य दैव्यस्य" ऋ०८,४८,२। "अवयाता पृथक्कर्त्ता" भा०।

अवयान न० अव+या–ल्युट्। अपगतौ "इयं धीर्भूया अवयानमेषाम्" ऋ०१,१८५,८, "एषां पापानामवयानमपगमम्" भा०।

अवयुन त्रि० वयुनं प्रज्ञा निरु० न०ब०। प्रज्ञाशून्ये। "सदृक्षमोऽवयुनम्" ऋ०२,२१,३,

अवर पूजायां कण्ड्वा० प०सक०सेट। अवर्य्यति पूजयतीत्यर्थः।

अवर त्रि० वृ–बा० अप् न०त०। १चरमे, २अधमे, ३कार्य्ये च। पक्षाद्वर्त्तिनि प्रदेशे दैकाले पु० ७दिशि स्त्री टतद्वर्त्तिनि त्रि०। वृक्षिजङ्घायाः टपक्षाद्देशे न०। "दूरेह्यवरं कर्म्म बुद्धियोगाद्धनञ्जय" गी०अस्य व्यवस्थावाचित्वे सर्व्वनामकार्य्यम् ङसिङोरसु वा। "श्रद्दधानः परां विद्यामाददीतावरादपि" मनुः अवरस्मादिति च। व्यवस्था च देशकृता कालकृता बुद्धिकल्पिता च तत्र देशकृता यदवरं कौशाम्ब्याः। कालकृता यदवरमायद्दायणस्याः। बुद्धिकल्पिता अवरादपीतिमात्रे। मासेनावरः मासावरः इत्यादौ समासे विषद्दयाक्षे च न सर्व्वनामकार्य्यं मासावराय इत्यादि। च "द्वयुमात्रावरंस्खण्डलक्षुपलिप्य" ऋ० स्क०। ५त०। अत्यन्तनीचे त्रि०।

अवरज पु० अवरस्मिन् काले जायते जन–ड। १कनिष्ठसोदरे भ्रातरि, २शूद्रे च। मनुष्येषु प्रथमोत्पत्तौ तस्य जघन्यजत्वात् तथात्वम् ३कनिष्ठसोदरभगिन्यां, ४शूद्रायाञ्च स्त्री टाप्। "अस्य चावरजं विद्धि भ्रातरं मां तु लक्ष्मणम्" रामा० "यदि स्त्री यद्यवरजः श्रेयःकिञ्चित् समाचरेत् "मनुः "विदर्भराजावरजा तवैवम्"। "रावणावरजा तत्र राघवं मदनातुरा" इति च रघुः ५पक्षाज्जातमात्रे त्रि०। "आत्मभूरवरजाखिलप्रजः स्वर्पतेरवरजत्वमाययौ" माघः।

अवरत त्रि० अव+रम–क्त। विरान्ते अवरतं सततम्।

अवरतस् अव्य० अवर+तसिल्। अवरः अवरस्मिन् अवरस्मादित्यर्थे। अवरतः रमणीयम् आगतः, वसति वा।

अवरति स्त्री अव+रम–क्तिन्। १विरामे, २निवृत्तौ च।

अवरवर्ण पु० कर्म्म०। शूद्रे।

अवरवर्ण ज पु० अवरवर्णः सन् जायते जन–ड। शूद्रे "श्वा त्व दृष्टिनिपातेन स्वर्गेनावरवर्ण जः" "ब्राह्मणान् बाधमानन्तु कामादवरवर्ण जम्" इति च मनुः।

अवरव्रत पु० अवरं अत्यन्तश्रेष्ठं व्रतमस्य। १सूर्य्ये २अर्कवृक्षे च। अवरम् अधमं व्रतमस्य। ३हीनव्रते त्रि०।

अवरशैल पु० अवरः पश्चाद्वर्त्ती शैलः। अस्ताचले।

अवरस्तात् अव्य० अवर+प्रथमाद्यर्थे अस्ताति। प्रथमा प्रश्नभोसप्तमीदृक्तेरवरशब्दस्यार्थे। अवरस्तात् रमणीयम्, आगतः वसति वा। [अत्यन्तनिर्जने।

अवरहस न० अवतं रहः अच् समा०। अवतते रहसि

अवरार्द्ध न० कर्म्म०। अपरभागे "सकृत्कर्म्म पितृणामपरार्द्धं देवानाम्" इति। "अपरार्द्धतश्च परार्द्धतश्च परिस्कन्द" शत०ब्रा० २देहस्य पश्चाद्भागे च।

अवरार्द्धिक त्रि० अवरार्द्धे भवः यत्। शेषभागभवे। न वरत्वेन अर्ध्यते अर्च–णिच्–कर्मणि यत्। न्यूने। "नावरार्द्धं ततः कुर्यात् पूर्वपात्रमिति स्थितिः" छन्दो० परि०। "अवरार्द्धा न्यूनम्" स०त०रघु०। "दृगवावरार्द्धा दक्षिणा" आ० श्रौ०।

अवरोण त्रि० अव+रिङ–क्त। तिरस्कृते। [म्लाने।

अवरीयस् त्रि० न वरीयान् न०त०। स्त्रियां ङीप्। अल्प-

अवरुग्ण त्रि० अव+रुज–क्त। १भग्ने २रोगान्विते च।

अवरुद्ध त्रि०अव+रुध–क्त। १प्रतिरुद्धे अन्यैरसंलक्षिते २गुप्ते च "अस्ति कश्चिद्राजरक्षुरवरुद्धवरम्" दशकु० इतर गमननिषेधेन रक्षितायां ३स्त्रियां स्त्री। (राखनी)।

अवरुद्धि स्त्री अव+रुध भावे क्तिन्। १अवरोधने २प्रतिरोधे "इन्द्रियाणां वीर्य्याणाञ्चावरुद्धौ" स्मृतिः।

अवरूढ त्रि० अव+रुह–क्त। १ऊर्द्धावरोहणे उच्चस्थानात् निम्नगते। २उत्पाटिते इत्यादौ च।

अवरोचक अवरोचयति रुचिहीनं करोति अव+रुच–णिच्–ण्वुल्। अवरोचके रोगभेदे "स्वेदगन्धिरुचं तत्र कासवाक्यावरोचकः" सुश्रु०।

अवरोध पु० अव+रुध–भावे घञ्। १निरोधे "क्षेत्रायत्तं फलोत्पत्तौ तत्तस्यावरोधः" मनु० बलादि० मतुप् वा ठनौ बाधक इनि अवरोधवान् अवरोधी अवरोधयुक्ते त्रि०। कर्म्मणि घञ्। राजान्तःपुरस्थायां २योषिति, ३राजदारेषु च। "तत्र भूत्वावरोधानां भर्त्तुर्व्यसनविक्रमम्। "कलत्रवन्मात्रमवरोधे महत्यपि" रघुः आधारे घञ्। ४राजान्तःपुरे। "पश्चावरोधे मतयोऽदीर्घाः" इति रघुः। "निन्ये विनीतैरवरोधदक्षैः" कुमा०। "विश्रब्धवञ्चनमवरोधवधूषपात" माघः। ल्युट्। अवरोधनं निरोधे न०।

अवरोधक त्रि०अव+रुध–ण्वुल्। १प्रतिरोधके २आवरके च। "सुधन्वा वीर्य्यवाञ्जाजा मिथिलामवरोधकः" रामा० आर्षत्वात् कर्म्मणि न षष्ठी।

अवरोधायन न० ऐत०। अन्तःपुरे।

अवरोधिक पु०अवरोधे तद्रक्षणादौ नियुक्तः ठन्। राजान्तःपुररक्षणार्थं नियुक्ते १वामनादौ। अवरोधः स्थानं निवासत्वेनास्यास्य ठन्। "ष्टपान्तःपुरस्थायां स्त्रियां स्त्री। "यमुत्सङ्गाधिरूढोऽवरोधिका" माघः।

अवरोधिन् त्रि० अवरुणद्धि अव+रुध–णिनि स्त्रियां ङीप्। १रोधके २आवरके च।

अवरोपण न० अव+रुह–णिच्–ल्युट्। उत्पाटने।

अवरोपित त्रि० अव+रुह–णिच्–क्त। उत्पाटिते।

अवरोह पु० अव+रुह–घञ्। १अवतरणे, (नामा) ऊर्द्धदेशाच्चिन्नदेशगमने। कर्त्तरि संज्ञायां च। तरोर्मूलादग्रपर्य्यन्तमारूढायां २गुडूच्यादिलतायाम्। ३अपादाने घञ्। चन्द्रादिलोके स्वर्गे, ततो हि भोगावसाने सर्व्वेऽवतरन्ति। तत्र देहिनां चन्द्रलोकादवरोहप्रकारस्तावदुक्तः गी० स्फुटे तद्भाष्ये च यथा "ऋतात्यये-ऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवञ्च" गी० सू०। "इष्टादिकारिणां धूमादिवर्त्मना चन्द्रमण्डलमारूढानां ततः प्रत्यवरोह आम्नायते "तस्मिन् यावत्सम्पातमुषित्वाथैतमेवाध्वानं पुनर्निवर्त्तन्ते यथेत" मित्यारभ्य यावत् "रमणीयचरणाभ्याशादियोनिमापद्यन्ते कपूयचरणाः श्वादियोनिमिति"। तत्रेदं विचार्य्यते किं निरनुशया भुक्तऋतुफलं कर्म्माणोऽवरोहन्ति? आहोस्वित् सानुशयाः?इति।किं तावत् प्राप्तं निरनुशया इति। कुतः? यावत्सम्पातमितिविशेषणात्। सम्पातशब्देनात्र कर्म्मोच्यते उच्यते सम्पतत्यनेनाऽऽकाशोकादनं लोकं फलभोगायेति। यावत्सम्पातमुषित्वेति च ऋतुफलस्य तस्य तत्रैव भुक्ततां दर्शयति। "तेषां यदा तत्पर्य्यवैतीति' च शब्दान्तरेणैष एवार्थः प्रदर्श्यते। स्यादेतत् यावदनुशयं लोक उपभोक्तव्यं कर्म्म तावदुपभुङ्क्त इति कल्पयिष्यामीति नैवं कल्पयितुं शक्यते यत् किञ्चेत्यन्यत्र परामर्शात्। "प्रायणं कर्म्मणस्तस्य यत् किञ्चेह करोत्ययम्। तथाऽऽकाशात् पुनरेत्यस्मै लोकाय कर्म्मणे" इति स्मृतिर्वक्ति शेषविशेषपरामर्शेन ऋतुफलैरेव ऋतस्य कर्म्मणस्तत्र घटितां दर्शयति। अपि च प्रायणमनारभ्य-

फलस्य कर्मणोऽभिव्यङ्क्तं प्राक् प्रायणादारब्धफलेन कर्मणा प्रतिबद्धस्य अभिव्यक्त्यनुपपत्तेः । तज्जातिभेदेन यद्यावत् किञ्चिदनारब्धफलं तस्य सर्वस्याभिव्यङ्क्तं न हि साधारणे निमित्ते नैमित्तिकमसाधारणं भवितुमर्हति नह्य विशिष्टे प्रदीपसन्निधौ घटोऽभिव्यज्यते, न पट इत्युपपद्यते । तस्माच्चिरानुशया अवरोहन्तीत्येवं प्राप्ते ब्रूमः "कृतात्यये अनुशयवानिति" । येन कर्मणेन्द्रेण चन्द्रमसमारूढाः फलोपभोगाय तस्मिन्नुपभोगेन क्षपिते तेषां यदन्नमयं शरीरं चन्द्रमस्युपभोगायारब्धं तदुपभोगक्षपदर्शनशोकाग्निसंपर्कात् प्रलीयते सवित्रकिरणसंपर्कोद्भिन्नकरकादिवद्धृतघृतादिसंपर्कादिव च धृतकाठिन्यम् । ततः कृतात्यये कृतस्वेष्टादेः कर्मणः फलोपभोगेनोपक्षये सति सानुशया एवेममेव रोहन्ति । केन हेतुना? दृष्टस्मृतिभ्यामित्याह । तथाहि प्रत्यक्षा श्रुतिः सानुशयानामवररोहं दर्शयति "तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रियोनिं वा वैश्ययोनिं वाथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा शूकरयोनिं वा चाण्डालयोनिं वेति" । चरणशब्देनानेनानुशयः स्मृत्यत इति वर्णयिष्यति । दृष्टार्थं जन्मनैव प्रतिप्राणमुच्चावचरूपउपभोगः प्रविभज्यमानः आकस्मिकत्वासम्भवात् अनुशयसद्भावं सूचयति अभ्युदयप्रत्ययायोः सुकृतदुःकृतयोः हेतुत्वस्य सामान्यतः शास्त्रेणावगमितत्वात् । स्मृतिरपि वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तवित्तसुखमेधायै जन्म प्रतिपद्यन्त इति सानुशयानामेवावरोह दर्शयति । कः पुनरनुशयो नामेति केचित्तावदाहुः स्वर्गार्थस्य कर्मणो भुक्तफलस्यावशेषः कश्चिदनुशयो नाम भाण्डानुसारिस्नेहवत् यथाहि स्नेहभाण्डं विरिच्यमानं न सर्वात्मना विरिच्यते भाण्डानुसार्येव कश्चित् स्नेहशेषोऽवति ते तथानुशयोऽपीति । ननु काम्यं विरोधित्वाददृष्टस्य न भुक्तफलस्यावशेषेणावस्थानं न्याय्यम् । नायं दोषः न हि सर्वात्मना भुक्तफलत्वं कर्मणः प्रतीज्ञानीमहे । ननु निरवशेषकर्मफलभोगाय चन्द्रमण्डलमारूढः । बाढं तथापि स्वल्पकर्मावशेषमात्रेण तत्रावस्थातुं न शक्यते यथा किल कश्चित् सेवकः सकलैः सेवोपकरणैः राजकुलमुपगम्य चिरप्रवासात् परिक्षीणबहूपकरणः अल्पादुत्क्रादिमात्रावशेषो न राजकुलेऽवस्थातुं शक्नोति, एवमनुशयलेशमात्रपरिग्रहो न चन्द्रमण्डलेऽवस्थातुं शक्नोतीति । न चैतदुपपद्यते । न हि स्वर्गार्थस्य कर्मणो भुक्तफलस्यावशेषानुवृत्तिरुपपद्यते काम्यत्वविरोधित्वादित्युक्तम्। नन्वेतदप्युक्तं न स्वर्गफलस्य कर्मणोऽखिलस्य भुक्तफलत्वं भविष्यतीति । तदेतदशेषं स्वर्गार्थं किल कर्म स्वर्गस्यैव स्वर्गफलं निखिलं जनयति स्वर्गच्युतस्यापि कञ्चित् फलांशं जनयतीति" न शब्दप्रमाणकानामीदृशी कल्पनावकल्पते । स्नेहभाण्डे तु स्नेहलेशानुवृत्तिर्दृष्टत्वादुपपद्यते । तथा सेवकशेषकरणलेशानुवृत्तिर्दृश्यते न त्विह तथा स्वर्गफलस्य कर्मणोलेशानुवृत्तिर्दृश्यते नापि कल्पयितुं शक्यते स्वर्गफलत्वशास्त्रविरोधात् । अवश्यञ्चैतदेवं वित्तेयं न स्वर्गफलस्वेष्टादेः कर्मणो भाण्डानुसारिस्नेहवदेकदेशोऽनुवर्त्तमानोऽनुशय इति यदि हि येन सुकृतेन कर्मणेष्टादिना स्वर्गमन्वभूवन् तस्यैव कश्चिदेकदेशोऽनुशयः कल्पेत ततो रमणीयएवैकोऽनुशयः स्याद्न विपरीतः । तत्रेयमनुशयविभागश्रुतिरुपरुध्येत "तद्य इह रमणीयचरणाः अथ य इह कपूयचरणा इति" । तस्मादानुष्मिकफले कर्मजाते उपभुक्तेऽवशिष्टमैहिकफलं कर्मान्तरजातमनुशयः तद्वन्तोऽवरोहन्ति । यदप्युक्तं यत्किञ्चित्यविशेषेण परामर्शात् सर्वस्नेहक्षयस्य कर्मणः फलोपभोगेनान्तं प्राप्य निरनुशया अवरोहन्तीति । नैतदेवम् अनुशयसद्भावस्यावगमितत्वात् । यत्किञ्चिदिहकृतमानुष्मिकफलं कर्मारब्धभोगं तत् सर्वं फलोपभोगेन क्षपयित्वेति गम्यते । यदप्युक्तं प्रायणमविशिष्टत्वादनारब्धफलं कृतस्मेव कर्माभिव्यनक्ति तत्र केनचित् कर्मणानुष्मिकेऽकेफलमारभ्यते केनचिदक्षिप्तमित्ययं विभागो न सम्भवतीति । तदप्यनुशयसद्भावप्रतिपादनेनैव प्रत्युक्तम् । अपि च केन हेतुना प्रायणमनारब्धफलस्य कर्मणोऽभिव्यङ्क्तं प्रतिपद्यत इति वक्तव्यम् आरब्धफलेन कर्मणा प्रतिबद्धस्येतरस्य दत्त्युद्भवानुपपत्तेस्तदुपशमात् प्रायणकाले दत्त्युद्भवो भवतीति यदुच्येत "ततोवक्तव्यं यद्यैव हि प्राक्प्रायणादारब्धफलेन कर्मणा प्रतिबद्धस्येतरस्य दत्त्युद्भवानुपपत्तिरेव" प्रायणकालेऽपि विरुद्धफलस्यानेकस्य कर्मणः युगपत्फलारम्भासम्भवाद्बलवता प्रतिबद्धस्य दुर्बलस्य दत्त्युद्भवानुपपत्तिरिति । भवत्वारब्धफलत्वसामान्ये जात्यन्तरोपभोग्यफलभेदेनैककर्मैकक्षिप्तं प्रायणे युगपदभिव्यक्तं सदेकां जातिमारभतइति शक्यं वक्तुं प्रतिनियतफलत्वविरोधात्। नापि कस्यचित् कर्मणः प्रायणे अभिव्यक्तिः कस्यचिच्छेद इति

शक्यं वक्तुम् ऐकान्तिकफलत्वविरोधात्। नहि प्रायश्चित्तादिभिर्हेतुभिर्विना कर्मणोऽनुच्छेदः सम्भाव्यते। स्थितिरपि विरुद्धफलेन कर्मणा प्रतिबद्धस्य कर्मान्तरस्य चिरमप्यवस्थानं दर्शयति। "कदाचित् सुकृतं कर्म कूटस्थमिव तिष्ठति। पच्यमानस्य संसारे यावद्दुःखाद्विमुच्यते" इत्येवंजातीयका। यदि च क्षुद्रमनारब्धफलं कर्मैकस्मिन् प्रायणेऽभिव्यक्तं सदेकां जातिमारभेत ततः सर्गनरकतिर्यग्योनिष्वधिकारानवगमात् धर्माधर्मानुत्पत्तौ निमित्ताभावाद्योत्तरा जातिरुपपद्येत ब्रह्मक्षत्रादीनां चैकैकस्य कर्मणोऽनेकजन्मनिमित्तत्वं स्मर्यमाणमुपरुध्येत। अथ धर्माधर्मयोः स्वसदृशफलसाधनतादि समधिगमे शास्त्रादतिरिक्तं कारणं शक्यं सम्भावयितुम्। नच दृष्टफलस्य कर्मणः कारीर्यादेः प्रयाणमभिव्यञ्जकं सम्भवतीत्यप्यपिकापीयं प्रायणस्याभिव्यञ्जकत्वकल्पना। प्रदीपोपन्यासोऽपि कर्मबलाबलप्रदर्शनेनैव प्रतिनीतः। स्थूलसूक्ष्मरूपाभिव्यक्तिवदेतद् द्रष्टव्यं यथा हि प्रदीपः समानेऽपि सन्निधाने स्थूलरूपमभिव्यनक्ति नसूक्ष्मम्, एवं प्रायणं समानेऽप्यनारब्धफलस्य कर्मजातस्य प्राप्तावसरत्वे बलवतः कर्मणोवृत्तिसम्भावयति न दुर्बलस्येति। तस्मात् श्रुतिस्मृतिन्यायविरोधादस्तीयमशेषकर्माभिव्यक्तेरभ्युपगमः। शेषकर्मसद्भावेऽनिर्मोक्षप्रसङ्ग इत्ययमस्य स्थाने संभ्रमः सम्यग्दर्शनादशेषकर्मक्षयश्रुतेः। तस्मात् स्थितमेतदनुशयवन्तोऽवरोहन्तीति। ते चावरोहन्तो यथेतमनेवञ्चावरोहन्तीति। यथेतमिति यथागतमित्यर्थः। अनेवमिति तद्विपर्ययेणेत्यर्थः। धूमाकाशयोः पितृयानेऽध्वन्युपात्तयोरवरोहे सङ्कीर्त्तनात् यथेतशब्दाच्च यथागतमिति प्रतीयते। रात्र्यादिसंकीर्त्तनादध्वादिसंख्यानाच्च विपर्ययोऽपि प्रतीयते" भा०। अनतिदूरे च तल्लिङ्गं "स्वाभाव्यापत्तिरुपपत्तेः" शा०सू०। "इष्टादिकारिण्यस्तु चन्द्रमसमारुह्य तस्मिन् यावत्सम्पातमुषित्वा ततः सानुशया अवरोहन्तीत्युक्तम् अथावरोहप्रकारः परीक्ष्यते तत्रेयमवरोहश्रुतिर्भवति "अथैतमेवाध्वानं पुनर्निवर्त्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमोभवति धूमोभूत्वाभ्रं भवति अभ्रं भूत्वा प्रवर्षतीति"। तत्र संशयः किमाकाशादिस्वरूपमेवावरोहन्तः? प्रतिपद्यन्ते किं वाऽऽकाशादिसाम्यमिति? तत्र प्राप्तावदाकाशादिस्वरूपमेव प्रतिपद्यन्ते इति कुतः? एवं हि श्रुतिर्भवति इतरथा लक्षणा स्यात् श्रुतिलक्षणाविषये च श्रुतिर्न्याय्या न लक्षणा, तथा च वायुर्भूत्वा धूमो भवतीत्येवमादीन्यक्षराणि तत्स्वरूपोपपत्तावेवकल्पन्ते तस्मादाकाशादिस्वरूपप्रतिपत्तिरित्येवं प्राप्ते ब्रूमः आकाशादिसाम्यं प्रतिपद्यन्त इति। चन्द्रमण्डले यदन्नमयं शरीरमुपभोगार्थमारब्धं तदुपभोगक्षये सति दह्यमानं सूक्ष्ममाकाशसमं भवति ततोवायोर्वशमेति ततो धूमादिभिः संसृज्यत इति तदेतदुच्यते यथेतमाकाशाद्वायुमित्यादिना। कुतः एतत्? उपपत्तेः एवं हि उपपद्यते। नह्यन्यस्यान्यभावोदृष्टस्य उपपद्यते। आकाशस्वरूपप्रतिपत्तौ च वाय्वादिक्रमेणावरोहोनोपपद्यते। विभुत्वाच्चाकाशेन नित्यसंबन्धाच्च तत्सादृश्यापत्तेरन्यसत्संबन्धो घटेत। श्रुत्यसम्भवे च लक्षणाश्रयणं न्याय्यमेव अत आकाशादितुल्यत्वापत्तिरेवात्राकाशादिभाव इत्युपचर्यते" भा०। नातिचिरेण विशेषात्" शा०सू०"तत्राकाशादिप्रतिपत्तौ प्राग्व्रीह्यादिप्रतिपत्तेर्भवति विशयः किं दीर्घं कालं पूर्व्वपूर्व्वसादृश्येनावस्थायोत्तरोत्तरसादृश्यं गच्छन्ति? उताल्पमल्पमिति?। तत्रानियमः, नियमकारिणः शास्त्रस्याभावादित्येवं प्राप्ते इदमाह नातिचिरेणेति। अल्पमल्पकालमाकाशादिभावेनावस्थाय वर्षधाराभिः सहेमां भुवमापतन्ति। कुत एतत्? विशेषदर्शनात्। तथा हि व्रीह्यादिभावापत्तेरनन्तरं विशिनष्टि "अतो वै खलु दुर्निष्प्रपतरमिति"। तकार एकः छान्दस्यां प्रक्रियायां लुप्तोमन्तव्यः दुर्निष्प्रपततरं दुर्निष्क्रमतरं दुःखतरमस्माद्व्रीह्यादिभावान्निःसरणमवतीत्यर्थः। तदत्र दुःखनिःप्रपतनं प्रदर्शयन् पूर्व्वेषु सुखनिःप्रपतनं दर्शयति। सुखदुःखताविशेषाय निःप्रपतनस्य कालाल्पत्वदीर्घत्वनिमित्तः तस्मिन्नवधौ शरीरानिष्पत्तेरुपतापासम्भवात्। तस्माद्व्रीह्यादिभावापत्तेः प्रागल्पेनैव कालेनावरोहः स्यादिति" भा०। "अन्याधिष्ठिते पूर्व्ववदभिलापात्" सू०"तस्मिन्नेवावरोहे प्रवर्षणानन्तरं पञ्चते "इह व्रीहियवाओषधिवनस्पतयस्तिलमाषा जायन्त" इति। तत्र संशयः किमस्मिन्नवधौ स्थावरजात्यापन्नाः स्थावरसुखदुःखभाजोऽनुशयिनो भवन्ति? आहोस्वित् क्षेत्रज्ञान्तराधिष्ठितेषु संक्षेपमात्रं गच्छन्तीति? किं तावत् प्राप्तं स्थावरजात्यापन्नास्तत्सुखदुःखभाजोऽनुशयिनो भवन्तीति। कुतः एतत्? जनेर्सुख्यार्थत्वोपपत्तेः स्थावरभावस्य च श्रुतिस्मृत्योरुपभोगस्थानत्वप्रसिद्धेः पशुहिंसादियोगाच्चेष्टादेः कर्मजातस्यानिष्टफलत्वोपपत्तेः। तस्मादनुशयमेवेदमनुशयिनां व्रीह्यादिजन्म श्वादिजन्मवत्। अथवा श्वयोनिं वा शूकरयोनिं वा चाण्डालयोनिं वेति

सङ्गमेवानुशयिनां व्रीह्यादिजन्म सुखदुःखान्वितमवति एवं व्रीह्यादिजन्मापीत्येवं प्राप्ते ब्रूमः । अन्यैर्जीवैरधिष्ठितेषु व्रीह्यादिषु संसर्गमात्रमनुशयिनः प्रतिपद्यन्ते न तत्सुखदुःखभाजो भवन्ति पूर्ववत् । यथा वायुधूमादिभावोऽनुशयिनान्तःसंश्लेषमात्रमेवं व्रीह्यादिभावोऽपि स्थावरैः संश्लेषमात्रम् । कुत एतत् ? तद्देवेक्षाभिलाषात् कोऽभिलाषस्तद्भावः । कर्मव्यापारमन्तरेण संकीर्त्तनं यथाऽकाशादिषु न कञ्चित् कर्मव्यापारं पराक्षयति एवं व्रीह्यादिजन्मन्यपि । तस्मान्नास्यत्र सुखभाक्त्वमनुशयिनाम् यत्र तु सुखदुःखभाक्त्वमभिप्रैति, परामृशति तत्र कर्मव्यापारं "रमणीय चरणाः कपूयचरणा" इति च । अपि च सङ्गेऽनुशयिनां व्रीह्यादिजन्मनि व्रीह्यादिषु लूयमानेषु भज्यमानेषु पच्यमानेषु भक्ष्यमाणेषु च तदभिमानिनोऽनुशयिनः प्रवसेयुः यो हि जीवोयच्छरीरमभिमन्यते स तच्छित् पीड्यमाने प्रवसतीति प्रसिद्धम् । तत्र व्रीह्यादिभावाद्रेतःसिग्भावोऽनुशयिनां नाभिलष्येत, यतः संसर्गमात्रमनुशयिनामन्याधिष्ठितेषु व्रीह्यादिषु भवति । एतेन जनेर्मुख्यार्थत्वं प्रतिक्षिप्तम् उपभोगस्थानत्वञ्च स्थावरभावस्य । न च वयमुपभोगस्थानत्वं स्थावरभावस्यावजानीमहे । भवत्वन्येषां जन्तूनामपुण्यसामर्थ्येन स्थावरभावमुपगतानामेतदुपभोगस्थानं, चन्द्रमसं त्वरोहन्तोऽनुशयिनो न स्थावरभावमुपभुञ्जत इत्याचक्ष्महे" भा०। "अशुद्धमिति चेन्न शब्दात्" सू०। "यत् पुनरुक्तं पशुहिंसादियोगादशुद्धमाध्वरिकं कर्म तस्यानिष्टमपि फलमवकल्पत इत्यतो सङ्गमेवानुशयिनो व्रीह्यादिजन्मास्तु तत्र मौघो कल्पनाऽनर्थिकेति तत् परिहियते । न शास्त्रहेतुत्वाद्वर्मधर्मविज्ञानस्य अयं धर्मः अयमधर्म इति शास्त्रमेव विज्ञाने कारणम् अतीन्द्रियत्वात्तयोरनियतदेशकालनिमित्तत्वाच्च । यस्मिन्देशे काले निमित्ते च योधर्मोऽनुष्ठीयते स एव देशकालनिमित्तान्तरेषु अधर्मो भवति तेन न शास्त्राद्धते धर्माधर्मविषयं ज्ञानं कस्यचिदस्ति । शास्त्राच्च हिंसानुपक्षाद्याकोज्योतिष्टोमोधर्म इत्यवधारितं स कथमशुद्ध इति शक्यते वक्तुम् । ननु "मा हिंस्यात् सर्व्वाभूतानीति" शास्त्रमेव भूतविषयां हिंसामधर्मं इत्यवगमयति" । बाढं उत्सर्गस्तु सः । अपवादः "अग्नीषोमीयं पशुमालभेतेति" उत्सर्गापवादयोश्च व्यवस्थितविषयत्वम् तस्माद्विशुद्धं वैदिकं कर्म विहितैरनुष्ठीयमानत्वादनिन्द्यमानत्वाच्च । तेन न तस्य प्रतिरूपं फलं जातिस्थावरत्वम् । नच व्रीह्यादिजन्मवदपि व्रीह्यादिजन्म भवितुमर्हति तद्धि कपूयचरणानधिकृत्योच्यते नैवमिह वैशेषिकः कश्चिदधिकारोऽस्ति । अतश्चन्द्रस्थलात् सुखिता-नामनुशयिनां व्रीह्यादिसंश्लेषमात्रं तद्भाव इत्युपचर्य्यते" भा० "रेतःसिग्योगोऽथ" सू० । "इतश्च व्रीह्यादि संश्लेषमात्रं तद्भावः यत्कारणं व्रीह्यादिभावस्यानन्तरमनुशयिनां रेतःसिग्भाव आम्नायते । "योयोह्यन्नमत्ति योरेतः सिञ्चति तदूभूय एव भवतीति"। न चात्र सुखोरेतःसिग्भावः सम्भवति चिरजातो हि प्राप्तयौवनो-रेतःसिग्भवतीति कथमिवानुपचरिततद्भावमद्यमानान्नानुगतोऽनुशयो प्रतिपद्येत तस्मादवश्यं रेतःसिग्योग एव रेतःसिग्भावोऽभ्युपगन्तव्यः । तद्वद्व्रीह्यादिभावोऽपि व्रीह्यादियोग एवेत्यविरोधः" भा०॥ "योनेःशरीरम्" सू० ॥ "अथ रेतःसिग्भावस्यानन्तरं योनौ सिक्ते रेतसि योनेरधिशरीरमनुशयिनामनुशयफलोपभोगायतनम् इत्याह शास्त्रम् "तद्य इह रमणीयचरणा" इत्यादि । तस्मादध्यवगम्यते नावरोहे व्रीह्यादिभावावरे तच्छरीरमेव सुखदुःखान्वितं भवतीति । तस्माद्व्रीह्यादिसंश्लेषमात्रमनुशयिनां तज्जन्मेति सिद्धम्" भा०। संज्ञायां कर्त्तरि घञ् "वटादितरोः शाखातो मूलावधि अवतारकेऽभेदे च । "अवरोहतरोर्यस्तं वटमाद्यं तमस्मतः" रामा० । ज्योतिषोक्ते दशाभेदे स्त्री अवरोहिणञ्च उदा० ।

अवरोहण न० अव+रुह भावे ल्युट् । अवतरणे (नामा) "एवमारोहणावरोहणमतः" । काल्पा० १८।३।६ ।

अवरोहशाखिन् पु० अवरोहति छिन्नोऽपि पुनः प्ररोहति अव+रुह-अच् कर्म्म०, अवरोहति अधोगच्छति मूलमस्याः ताडगी शाखा कर्म्म० ततः बाहुले मत्वर्थीय इनिर्वा । वटवृक्षे, तस्य छेदनेऽपि पुनः प्ररोहः तस्य च शाखातोऽपि बहूनि मूलान्यवतरन्तीति तस्य तथात्वम् । ब० । अवरोहिशाखोऽप्यत्र ।

अवरोहिका स्त्री अवरोहति अल्पमधोगच्छति अव+रुह-ण्वुल् टाप् कापि अतइत्त्वम् । अल्पगन्त्रीलतायाम् ।

अवरोहित पु० अवरोहितो वर्णः । अल्परक्तवर्णे मध्वादि० अधोबाधकः मतुप् । अवरोहितवान् अल्परक्तवर्णयुक्ते त्रि० स्त्रियां ङीप् ।

अवरोहिन् त्रि० अव+रुह-णिनि । १वटवृक्षे । २अवतरणकर्त्तरि माले त्रि० स्त्रियां ङीप् । सा च ज्योतिषोक्ते २दशाभेदे तथा हि दशाशब्देवक्ष्यमाणस्य "आद्यं कुराजीयबुद्धेगुपूर्वा"

दृत्यादिक्रमस्यानुसारेण जन्मनक्षत्रावधितत्तद्दशाधिपानामनुक्रमेण या दशा सा आरोहिणी तेषु चन्द्रादिपर्य्यन्तानां क्रमेण यथासम्भवं तेषामेव भोगेन पुनरवरोहेण सूर्य्यादीनां या दशा सावरोहिणी। तथाहि "आग्नेयादि त्रिराहृत्या तानि विंशोत्तरीयके" इत्युक्तदिशा जन्मनक्षत्रानुसारेण दशाधिपे आनीते तदुत्तरं तदुत्तरोत्तरपठितानां यथाक्रमं दशा। तत्र यस्य सूर्य्यदशायां जन्म तस्य आरोहिण्येव दशा यस्य तु चन्द्रादिदशायां जन्म तस्य तदुत्तरारोहक्रमेण कुजादिदशा आरोहिणी एवं शुक्रान्तदशाः परिसमाप्य सूर्य्यादीनां या दशा सैव अवरोहिणीति व्यपदिश्यते इति सम्प्रदायविदः। अन्ये तु स्वस्वोच्चकालसार्द्धं प्रथममारोहिणी दशा शेषार्द्धं अवरोहिणीत्याहुः। सा च यत्तद्विशेषे विशेषफलदा। यथोक्तम् "उच्चाद्रूपञ्चभस्थस्य दशा स्यादवरोहिणी। तस्यामल्पमवाप्नोति फलं क्लेशाच्छुभं नरः। मित्रोच्चांशगतस्यैषा नूनं मध्यफला भवेत्। सैवानिष्टफलानर्था नीचार्क्षांशगतस्य च। नीचाद्रूपञ्चभस्थस्य दशावरोहिणी मता। तस्यां शुभफलं श्रेष्ठमल्पक्लेशादेव जायते। शत्रुनीचांशगतस्यैषा किञ्चित्कष्टफलाऽधमा। मित्रोच्चांशगतस्यास्य सैव सम्पूर्णदा मता"। इति सामान्यतोऽभिधाय "दशाऽवरोहा दिननायकस्य ऋधिक्रियावित्तसुहृन्नाशम्। चौराग्निपीड़ां कलहं विरोधं नरेशकोपं कुरुते विदेशम्" स्मृ०। "निशाकरस्याप्यवरोहकाले स्त्रीपुत्रमित्राम्बरसौख्यहानिम्। मनोविकारं स्वजनैर्विरोधं चौराग्निभूतैर्भयमेति कष्टम्"। च०। "धरासुतस्यावरोहकाले स्थानार्थनाशं कलिकोपदुःखम्। विदेशवासं स्वजनैर्विरोधं चौराग्निभूपैः सततं करोति"। म०। "शशाङ्कसूनोस्त्ववरोहिणी या दशा महत्कष्टतरं तु दत्ते। विज्ञानहीनं पदरारसङ्गं नृपाग्निचौरैर्भयमत्र कष्टम्"। बृ०। "देवेन्द्रपूज्यस्य दशाऽवरोहा करोति सौख्यं सकलैव नाशम्। सकृद्यशःकान्तिविशेषजालं नरेश्वरत्वं सकलैव याति"। द०। "भृगोः सुतस्यावरोहकाले प्रचण्डवेश्यागमनं धनाग्निम्। स्त्रीपुत्रबन्धुर्त्तिमनोविकारम् भूमूलरोगं मदनार्त्तिमेति" गु०। "दिनेशसूनोस्त्ववरोहकाले राज्यच्युतिं दारसुतार्थनाशम्। भाग्यक्षयं भूपतिकोपयुक्तं प्रेष्यत्वमायाति युदाच्छिरोगम्" सर्वार्थचि० राहुकेतोस्त्वारोहावरोहयोर्विशेषो नास्ति

अवर्ग पु० अकारसजातीयस्वराणां वर्गः अकार+प्रातिशाख्योक्तः वर्ग वा। १स्वरवर्णमाले, "अकचटतपयशाः वर्गा" इतिकेरलम्। वर्गः समूहः न०ब०। २वर्गशून्ये त्रि०।

अवर्ण पु० अकारैकस्थानिको वर्णः शा०त०। ह्रस्वदीर्घप्लुतोदात्तानुदात्तस्वरितानुनासिकाननुनासिकभेदेन अष्टादशसंज्ञकेषु (अ)वर्णेषु" "अष्टावष्टादशानां संज्ञा" शि०कौ०। वर्ण्यतेऽनेन वर्ण्यः प्रशंसा विरोधे न०त०। प्रशंसाविरोधिनि २अपवादे। "सोढुं न तत्पूर्व्वभवर्ण्यभीशे "न चावदद्भर्त्तुरवर्ण्यमार्या" इति च रघुः।

अवर्त्तन न० वृत-ल्युट् अभावे न०त०। १वर्त्तनाभावे २अस्थितौ। वर्त्ततेऽनेन करणे ल्युट् वर्त्तनं जीविका न०ब०। ३जीविकाशून्ये त्रि०। [पदार्थे।

अवर्त्तमान त्रि० न०त०। १अस्थिते २भूते ३भविष्यति च

अवर्द्धमान त्रि० न वर्द्धमानः विरोधे न०त०। वृद्धिशून्ये ऋणिनौ। [शून्ये त्रि०।

अवर्षण न० अभावे न०त०। १वर्षणाभावे न०ब०। २वर्षण-

अवलक्ष पु० अवलक्ष्यते अव+लक्ष-घञ्। १श्वेतवर्णे अमरः आदाच्। २तद्वति त्रि०। अतोलोपे वलक्षोऽप्युभयत्र।

अवलग्न पु० अव+लग-क्त नि० दृडभावः लस्ज-क्त वा। (माजा) १देहमध्यभागे। २सम्बद्धमात्रे त्रि०। "विपुलतरोन्नतस्तनावलग्नम्" माघः।

अवलत्तिका स्त्री अव+लत-तिकन्। गोधायाम् उज्ज्व०।

अवलम्ब पु० अव+लबि-आधारे घञ्।१आश्रये। भावे घञ्। २द्रव्यान्तराश्रये। "सावलम्बगमना स्खलुस्खना" रघुः। करणे घञ्। २अवलम्बसाधने दण्डादौ।

अवलम्बन न० अव+लबि-भावे ल्युट्। आलम्बने पतनादिनिवारणाय द्रव्यान्तराश्रये "अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि" माघः। "सहिष्यते तत्प्रथमावलम्बनम्" कुमा०। "प्रस्थानविक्लवगतेरवलम्बनाय" शकु०। आधारे ल्युट्। २आश्रये। करणे ल्युट्। आलम्बसाधने २दण्डादौ।

अवलम्बित त्रि० अव+लबि-कर्मणि क्त। १आश्रिते २आलम्बिते "अवलम्बितकर्णशष्कुलीकलसीकं रचयन्नवोचत"-नैषध०। ३शीघ्रे न० ४तद्वति त्रि०जटा०। अव+लम्ब-कर्त्तरि क्त। ५अवतीर्णे।

अवलम्बिन् त्रि०अव+लबि-णिनि। १आलम्बनकर्त्तरि "यस्या भवानपरधूर्य्यपदावलम्बी" रघुः "स गोपतिं नन्दिभुजावलम्बी" कुमा० "अथ धूमाभिताम्राक्षं दृष्ट्वा शाखावलम्बिनम्" रघुः। २अवतारके उच्चस्थानात् अधःपतिनि। "भगवति मरीचिभालिनि अस्ताचलचूड़ावलम्बिनि" काद०।

अवलिप्त त्रि० अव+लिप-क्त। १गर्विते "न मूर्खैर्नावलिप्तैश्च

नान्यैर्नान्यावसाविभिः" मनुः। २क्षतलेपने ३समन्तात् लिप्ते च

अवलीढ त्रि० अव+लिह–क्त। १भक्षिते २क्षतावलेहे ३जिह्वायेणास्वादिते ४व्याप्ते च "अस्रज्वालावलीढप्रतिवलजलधेरन्तरौर्वायमाणः" वेणी०। "पतत्त्रिणावलीढञ्च शुना संसृष्टमेव च" मनुः।

अवलीला स्त्री अवरा लीला। १अनायासे २अनादरे च।

अवलुञ्चन न० अव+लुञ्च–ल्युट्। १छेदने २उत्पाटने ३केशादेरबन्धने ४अपनयने "दूराद्रुजो ब्रणौष्ठस्य सन्निकृष्टेऽवलुञ्चनम्" च। सुश्रु०। [अक्षतबन्धने च।

अवलुञ्चित त्रि० अव+लुञ्च+क्त। उत्पाटिते अपनीते

अवलुण्ठन न० अव+लुठि–भावे ल्युट्। भूमौ पतित्वा परिवर्तने (लोटा)।

अवलेख पु० अव+लिख भेदने भावे घञ्। अवभेदने "वंशावलेखसंयुक्ते मूले चाजाविके भिषक्" सुश्रु०।

अवलेप पु० अव+लिप् भावे घञ्। १गर्वे "प्रियसङ्गमेष्वनवलेपमदा" माघः बलावलेपादधुनापि पूर्ववत्" माघः। "ऐरावतमदावलेपलूनापारिजातशाखा" काद०। २लेपने ३भूषणे ४सम्बन्धे च।

अवलेपन न० अव+लिप–भावे ल्युट्। १विलेपे, २अक्षणे, ३सम्बन्धे ४गर्वे च। करणे ल्युट्। ५चन्दनादौ।

अवलेह पु० अव+लिह–घञ्। १जिह्वायेणास्वादने। कर्मणि घञ्। २तदास्वाद्ये औषधादौ च। "अतोऽवलेहान्वक्ष्यामः खदिरासननिम्बराजवृक्षगोक्षुरसारकाथे तत्सारपिण्डान् श्लक्ष्णपिष्टान् प्रक्षिप्य विपचेत् ततो नातिद्रवं नातिसान्द्रमवतार्य्य तस्य पाणितलपूर्णमप्रातरायोमधुभिश्चं लिह्याद्देवं सालसारादौ न्यग्रोधारम्वधादौ च लेहान्वारयेत्" इति सुश्रु०। [द्रो मधुप्रभृतौ द्रव्ये।

अवलेह्य त्रि० अव+लिह–कर्मणि ण्यत्। जिह्वायेणास्वा-

अवलोक पु० अव+लुक–लोक–वा घञ्। दर्शने चाक्षुषज्ञाने "कृष्णाङ्गभङ्गनयनभीलनाङ्गावलोकवत्" सा०द०।

अवलोकन न० अव+लुक–लोक–वा ल्युट्। १दर्शने, २अनुसन्धाने च। "न बभूवुरवलोकनक्षमाः" रघुः। करणे ल्युट्। ३आलोके, ४नेत्रे च। योगनिद्रान्तविषदैः पावनैरवलोकनैः" रघुः।

अवलोकित त्रि० अव+लोक–कर्मणि क्त। १दृष्टे। भावे क्त। २दर्शने न०। ततोऽस्यर्थेऽच् ३वृक्षभेदे पु०।

अवलोकिन् त्रि० अव+लुक–लोक वा णिनि स्त्रियां ङीप्। लोचके दर्शके "तव प्रियं यद्यतरावलोकिनः" कुमा०।

अवलोप पु० अव+लुप–घञ्। १स्खलने २नाशने ३विलोपने "यदध्वयदधरावलोपनत्वत्" माघः। [अनुकूले।

अवलोम पु०अवनद्धं लोम आनुकूल्यम् प्रा०त० अच् समा०।

अवल्गुज पु०अवल्गोरगोभनाज्जायते जन–ड।१सोमराजीलतायाम्। (हाकुच) २असाधुजाते त्रि०।

अववर्षण न० अव+वृष–भावे ल्युट्। क्षुत्स्ववर्षणे। "स्वप्ने नदीतरणाववर्षणाभेध्यदर्शनप्रयाणेषु तु सकृत्कालद्रव्यैकार्थत्वात्" कात्या० १।७।१२। "तथा नदीं दृष्ट्वा क्षुत्स्वामेवाभिसन्धाय मन्त्रं प्रयुङ्क्ते न चावान्तरनिद्रां नाप्येकं स्रोतः, नाप्येकां वर्षधाराम् तस्मात् सकृत्प्रयोगः तत्र नदीसन्तरणे स्रोतसां भेदेऽपि नदीद्रव्यैकत्वात् सकृन्मन्त्रः अववर्षणे कालैकत्वादेव" कर्कः।

अववाद पु० अव+वद–घञ्। १निन्दायाम्, २विश्वासे, ३अवज्ञायाम्, ४अवलम्बने च।

अवश त्रि०नास्ति वशमायत्तत्वं यस्य। १अस्वाधीने, २कामादिपरवशे, ३पराधीने च। "जगध्वाङ्क्षविधिना मांसं प्रेत्य तैरद्यतेऽवशः" मनुः। कार्य्यतेऽङ्क्षवशः कर्म्म सर्वः प्रकृतिजैर्गुणैः" "कार्य्यतेऽङ्क्षवशोऽपि सन्" इति च गीता।

अवशस् त्रि० अव+शन्स–क्विप्। अववादे अवशंसने "अवशसा निःशसा यत् परागसो पारिम जायतो यत्स्व पनः" ऋग्० ६।४५।२।

अवशातन न०अव+शद–णिच्–तङ् ल्युट्। १नाशने २शीर्णता करणे। "मांसानामवशातनं ऋषयुर्दं शकोष" इति सुश्रुतः

अवशिरस् त्रि० अवनतं शिरोऽस्य प्रा०ब०। अवाङ्मस्तके।

अवशिष्ट त्रि० अव+शिष–क्त। १अतिरिक्ते, २परिशिष्टे, ३अधिके च। "सुराकामद्यूतलत दण्डशुल्कावशिष्टकम्" या० स्मृ० "वाजिभ्योवाजिनमिति श्रुतौ वाजिनं यामि त्यवशिष्टं जलमिति रघु०।

अवशीभूत त्रि०न वशीभूतः। अनायत्ते। अवशीकृतोऽत्र।

अवशीर्ष(क) त्रि०अवनतं शीर्षं यस्य वा कप्। १अवाङ्मस्तके। अवाक्शीर्षाख्ये सुश्रुतोक्ते २शय्यादोषभेदे पु० "अवाक् शीर्षे दीर्घनुज्जोत्तानसङ्कुचितदेहस्थिततादक्षिणपार्श्वशायिनः प्रदानमिति सप्त शय्यादोषा" इति। ३नेत्ररोगभेदे नेत्रव्यापदोऽभिधाय "अतियोड़ितवहोषान् विधिं चाप्यवशीर्षके" इति सुश्रुतः।

अवशेष पु० न० अव+शिष–भावे घञ्। १क्षतपदार्थस्य शेषे २समाप्तौ च "तोयावशेषेण हिमागमभ्रम्" भट्टिः कर्मणि घञ्। अवशिष्टे।

अवशोष पु० अव+शुष–भावे घञ्। अत्यन्तशोषे।

अवश्य त्रि० न वश्यः। अनायत्ते १अनधीने २उदासीने।

अवश्यकरण न० अवश्यं करणं योगविभागात् मलोपः। नियतकरणे अकरणाच्चिदृत्तौ "अवश्यकरणाकरणाच्चिदृत्तिः" प्रा०त० रघु०।

अवश्यपुत्र पु० अवश्यः पुत्रः। शासितुमशक्ये अवशीभूते पुत्रे। तस्य भावः मनोज्ञा०वुञ्। आवश्यपुत्रकम् तद्भावे न०।

अवश्यम् अव्य०अव+श्यै–डमु। १निश्चये २अगत्यनिवारणे च। "अवश्यं यातितिर्य्यक्त्वं जग्धा चैवाऽऽतं हविः" मनुः "अवश्यम्भाविन्यर्थे वै सन्नापो नेह विद्यते" भा०शा०प०। "तुमेदवश्यमःक्त्वे तुमर्थकमनसोरपि" इत्युक्तेः क्त्वान्ते मलोपः अवश्यपाच्यम्। "अवश्यमव्ययेऽनवश्यकृत्यहा" नैष० अवश्यम् भवः ठञ् अव्यवस्यटिलोपः आवश्यकः। अवश्यम्भवे त्रि०। "एतेष्वावश्यकस्तसौ" भाषा०।

अवश्या स्त्री अव+श्यै–क। १कुज्झटिकायाम् २अनायत्तायां स्त्रियाञ्च।

अवश्याय पु० अव+श्यै–घ। १कुज्झटिकायाम्, "अवश्यायकणाखावायारुसङ्गाफलत्विषः" भट्टिः। २अभिमाने च। पृ० हुस्वः अवश्यथोऽपि कुज्झटिकायाम्।

अवश्रयण न० अव+श्रि–ल्युट्। चूल्हीतोऽवतार्य्य स्थापने। "अधिश्रयणावश्रयणान्तादिपूर्व्वापरीभूतः व्यापारकलापः पाकादिशब्दवाच्यः" सा०द०।

अवष्टब्ध त्रि० अव+स्तभ–क्त षत्वम्। १आसक्ते, २आक्रान्ते, ३अवलम्बिते, "अवष्टब्धा धृष्टः" सि०कौ०४प्रतिरुद्धे च।

अवष्टभ्य अव्य० अव+स्तम्भ ल्यप् षत्वम्। अवलम्ब्येत्यर्थे।

अवष्टम्भ पु०अव+स्तम्भ–घञ् षत्वम्। १प्रारम्भे २अनम्रतायाम् ३आलम्बने। "अवष्टम्भकरं वापि भवत्रं दण्डधारणम्"। सुश्रु० कर्म्मणि घञ्। ३स्तम्भे, "रघोरष्टम्भवेन पतिणा" रघुः "न पर्य्यायप्रकावष्टम्भपादप्रसारणानि गुरुसन्निधौ कुर्य्यात्" सुश्रुतः ४सुखे च भावे ल्युट्। अवष्टम्भनम्। प्रारम्भे आलम्बने च न०। [स्थान इत्येव।

अवसाण पु० अव+सन–घञ् षत्वम्। भोजने शब्दे अव-

अवस् अव्य० अवर+प्रथमायाः पञ्चम्याः सप्तम्या वार्थे असि अवादेशः। १अवरशब्दार्थे २पश्चादर्थे च। अवोरमणीयम्, आगतः, वसति वा। अव–भावे असिच्। २रक्षणे न०। कर्म्मणि असिच्। २यशसि ३अन्ने ४धने च न०। "मित्रस्य चर्षणी धृतोऽवो देवस्य" य०११,६,२ "अवोरक्षं द्युम्नं यशोऽन्नं वा" वेददी०गमने च "आवां रथेनियुत्वान् वक्षदवसे" ऋ०१,१२५,४, "अवसे रक्षणाय गमनाय वा" भा०।

अवस पु० अव+असच्। १तृणे २रक्षणे त्रि०कौ० ३अर्कवृक्षे ४पाथेयभेदे च "एतत्ते रुद्रावसं तेन" य०३,६१ "अवस शब्देन देशान्तरं गच्छतो मार्गमध्ये तटागादिसमीपे भोक्तव्य ओदनविशेष उच्यते" वेददी०।

अवसक्त त्रि०अव+सनज–क्त। १संलग्ने। 'अनुज्ञानुमध्यमवसक्तेति" किरा०। भावे क्त। २संसर्गे न०।

अवसक्थिका स्त्री अवबद्धे सक्थिनी यस्याः कप्। १पर्य्यङ्कबन्धे "शयानःप्रौढापादमुत्कृत्य चैवावसक्थिकाम्" मनुः "अक्थिना अवसक्थिकाबन्धहेतुभूतेन" किरा० १२,२२,टी० मल्लि०।

अवसण्डीन न०अव+सम्+डी–क्त। विहगादीनां पतनरूपे गतिभेदे।

अवसथ पु० अव+सो–कथन्। १निलये, २ग्रामे च। अवस्थति शास्त्रमत्र अव+सो कथन्। ३शास्त्रनिलये मठे हेम०।

अवसथ्य पु० अवसथ+स्वार्थे यत्। अवसथशब्दार्थे।

अवसन्न त्रि०अव+सद–कर्त्तरि क्त। १विषादप्राप्ते २विनाशोन्मुखे "अवसन्नतापमतमिवमात्" माघः। ३रुद्धकार्य्यादिमति च

अवसर पु०अव+सृ–अच्। १प्रस्तावे, जिज्ञासानिवृत्तावेऽवश्यं वक्तव्ये २सङ्गतिभेदे सङ्गतयश्च तच्छब्दे वक्ष्यन्ते ३वत्सरे, मन्वन्तरभेदे, ५वर्षणे, क्रियास्थितियोग्यतासम्पादकरूपे दैकालिकेऽवकाशे च। "शशंस देवावसरं सुरेभ्यः" कुमा० "अन्योन्यदर्शनप्राप्तौविक्रमावसरं चिरात्" रघुः "अवसरमधिगम्य तं हरन्त्यः" माघः।

अवसरालय पु० अवसराय आलयो यत्र। अर्द्धरात्रे तत्र हि काले सर्व्वैः आलयएव स्थीयते इति तस्य तथात्वम्।

अवसर्पिन् त्रि०अव+सृप–णिनि। अधोगन्तरि स्त्रियां ङीप्।

अवसर्ग पु० अव+सृज–घञ्। १अप्रतिबन्धे यथेष्टं क्रियतामिति २कामचारानुज्ञायां "अस्त्वसर्गः कामचारानुज्ञा" सि०कौ०। २स्वतन्त्रतायाञ्च। [चरे।

अवसर्प पु० अवसर्पति प्रभुनिदेशात् परम्। अव+सृप–अच्।

अवसर्पिन् त्रि० अव+सृप-णिनि। अधोगन्तरि स्त्रियां ङीप्। सा च बौद्धानां कल्पकाले हेम० सच दशकोटिकोटिसागरवर्षमितः।

अवसाद पु०अव+सद–घञ्। १नाशे, २विषादे, ३रुद्धकार्य्यादिमत्व रूपावसन्नतायाञ्च। "विषदेति तावदवसादकरी" किरा० "वैद्यासनावसादो वा रोगी वा स्यादधोमुखः" "स्रावसादो घुर्घुरक" इति च सुश्रुतः।

अवसादक त्रि० अवसादयति अव+सद–णिच्-ख्वुल्। १अवसन्नताकारके २खेदकारके। "एष शोकः परित्यक्तः

सर्वकार्य्यावसादकः" रामा०। २कार्य्याऽनुमतासम्पादके च।

अवसादन न० अव+सद णिच्-भावे ल्युट्। १विनाशने २कार्य्याऽनुमतासम्पादने सुश्रुतोक्ते ३व्रणचिकित्साभेदे च "अपतर्पणमालेप" इत्युपक्रम्य "व्रणधूपनसुत्सादनमवसादनम्" इत्यादिना षष्टिरुपक्रमा दर्शिताः "उत्सन्नमेदुमांसानां व्रणानामवसादनम्" इति च तत्र दर्शितम्।

अवसान न०अव+सो-ल्युट्। १विरामे, २समाप्तौ, ३सीमायां, ४समापने ५मृत्यौ च। "न योषिद्भ्यः पृथगुद्यादवसान दिनादृते" उ०त० स्मृतिः। "विरामोऽवसानम्" पा० "होमावसाने ऋतवृर्त्यनादः" हेमा०दा०ख्र०पुरा०। "दोहावसाने पुनरेव दोग्ध्रीम्" "तच्छिष्याध्ययननिवेदितावसानाम्"। "दिनावसानोत्सुकबालवत्साम्" इति च रघुः "ब्रह्मारम्भेऽवसाने च पादौ वाह्यौ गुरोः सदा" मनुः। "दिवावसानश्चाबेव" शक०अवस्यति स्वाप्यतेऽस्मिन्"आधारे ल्युट्। ६स्थाने। "अदाद्यमोऽवसानं पृथिव्याः य०१२,४५, "अवसानं स्थानमिति" वेददी०।

अवसाम न० अवरं साम अच् समा०। अधमसामनि अरण्यादौ अन्त्यकर्म्मणि च गेये सामनि।

अवसाय पु०अव+सो-घञ्। १समाप्तौ, २गेये, ३निश्चये च। ल्यप्। ४समाप्त्यर्थे ५निश्चित्यर्थे च अव्य०।

अवसायक त्रि०अव+सो-ण्वुल्। १निश्चयकारके २समापके च।

अवसिक्त त्रि०अव+सिच-क्त। १क्षतसेके २आप्लुते ३स्नाते च

अवसित त्रि०अव+सो-क्त। १समाप्ते, "वचस्यवसिते तस्मिन् ससर्ज गिरमात्मभूः" कुमा०। "अवसितं हसितं प्रसितं सदा" भट्टिः। २क्षये, ३स्नाते, ४परिपक्के ५निश्चिते, च ६महिंतथान्येन०। अव+सि-क्त। ७संबद्धे त्रि०।

अवसृष्ट त्रि० अव+सृज-क्त। १दत्ते २त्यक्ते ३निःसृते च।

अवसे अव्य०अव-तुमर्थे असेन्। रक्षितुमित्यर्थे। "आयात्विन्द्रोऽवस उप" य० २०,४७।

अवसेक पु०अव+सिच-भावे घञ्। समन्तात्सेचने। "अवसेको भवेद्लोलात्मात् दोषान् विवर्ज्जयेदिति सुश्रुतोक्ते नेत्रबस्तिरोगभेदे च।

अवसेकिम पु०असेकेन निर्वृत्तः अवसेक+इमन्। वटकभेदे।

अवसेचन न० अव+सिच+ल्युट्। १समन्तात्सेचने शोणिताधोनिस्सारणे "शोणितावसेचनोपाया जलौकसः सुश्रु० रोगभेदे च तिक्तकाद्रुमपत्राणां कार्य्यः क्वाथोऽवसेचने" सुश्रु०।

अवसेय त्रि० अव+सो-कर्म्मणि यत्। १निर्णये २समाप्ये च

अवस्कन्द पु०अव+स्कन्द-आधारे घञ्। जिगीषूणां सैन्य निवेशस्थाने १शिविरे। भावे घञ्। २अवतरणे, ३आक्रमणे च

अवस्कन्दन न० अव+स्कन्द-ल्युट्। १सर्व्वाङ्गेणावगाहने, २अवतरणे, ३आक्रमणे च।

अवस्कर पु० अव+कृ-अप् सुट्। विष्ठादिमले। "वर्चस्कोऽवस्करः" पा० "कुत्सितं वर्चः वर्चस्कमवस्करमलम्" सि०कौ। मलमात्रे च। "सद्दहारागुचिस्थानरथ्यावस्करगोधनम्" मिता०ना० स्मृ०। अस्मिन् पक्षे च पृ० सुट् इति भेदः। १अपादाने अप्। २गुह्यप्रदेशे उपस्थादौ। अवस्करे जातः वुन्। अवस्करकः अवस्करभवे त्रि०।

अवस्कव त्रि० अव+स्कु-अच्। हिंसके "अवस्कवं व्यधवरं क्षमीन् अथ० २,२१,४।

अवस्तरण न० अव+स्तृ-भावे ल्युट्। १विस्तारे। "अवनयनावस्तरणे चावटवत्" कात्या०५,५,१४।

अवस्तात् अव्य० अवरस्मिन् अवरस्मात् अवरस्मित्यर्थे अस्ताति आदेशः। अवरकालादौ। अवस्तात् रमणीयम्, आगतः, वसति वा। "अवस्तात् स्वर्गलोकं प्रापयन्तः" शत०ब्रा०

अवस्तार पु०अव+स्तृ-कर्म्मणि घञ्। (परदा) इति ख्यातायां १जवनिकायाम्, २आस्तरणे च।

अवस्तु न० कुत्सितार्थे न०त०। अपकृष्टे पदार्थे "अवस्तुनिर्बन्धपरे! कथं नु ते" कुमा०।

अवस्था स्त्री अव+स्था-अङ्। १कालकृतायां देहादेर्दशायाम् २अवस्थाने च। अवस्था च कालकृतः भावविकारभेदः "जायतेऽस्ति वर्द्धते विपरिणमतेऽपक्षीयते नश्यतीति" यास्कोक्तः षड्विधः। शारीरकैस्तु द्वे दोषविषयभेदादन्ये दर्शितः। यथा "यत्रासंख्यमवस्थाभिराभिर्योगात्तु पञ्चभिः" अविद्याऽस्मितारागद्वेषाभिनिवेशाभिप्रायेण योगशास्त्रे पञ्चावस्था दर्शिताः। सांख्यमते कार्य्याणां कारणात्मकतया सूक्ष्मरूपेण कारणे स्थितत्वात् उत्पत्तेः प्राक् याऽवस्था प्रागभावस्थानीया सा अनागतावस्था, ततः कारकव्यापारेण व्यक्ता अभिव्यक्तावस्था ततः ध्वंसस्थानीया कारणलयरूपातिरोभावावस्था इत्येवं त्रिविधा। वेदान्तिमते जाग्रत् स्वप्नसुषुप्तिरूपा जीवस्यावस्था मोक्षावस्था चेति चतस्रोऽवस्था इत्यङ्गीकृत्य गौ०सू० "सुषुप्तेर्द्वे सम्पत्तिः" इत्यनेन सुषुप्तावस्थायाः सुषुप्त्यावेशान्तर्भावो दर्शितः" "कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि। कैशोरमापञ्चदशात् यौवनं तु ततः परम्। आ षोडशाद्भवेद्वृद्धिस्ततश्चैतत उच्यते। वृद्धस्तु सप्ततेर्द्वर्षीयान् नवतेः परम्" इति च स्मृत्युक्ता अवस्था अपौ

आषञ्चदशवर्षान्तं बाल्यम् आ त्रिंशद्वर्षं कौमारम्। आ पञ्चाशद्वर्षं यौवनम् ततऊर्द्धं वृद्धत्वमिति वैद्यकोक्ताश्चतस्रोऽवस्थाः । जीवमात्रस्य कौमारयौवनवार्द्धकरूपा अवस्थास्तिस्रः एवमन्येषामपि वस्तूनां तत्तत्क्षणभेदेनावस्थाभेदा उह्याः । सर्व्वेषां पदार्थानां कालादिकृतपरिणामान्तरत्वेऽवस्थेत्युच्यते यथा नायकयोः "अवगाढ़ैर्यनाद्यापि स्निग्धः संरूढ़रागयोः । दशाविशेषैरेवोऽप्राप्तौ पूर्व्वरागः स उच्यते" इत्युपक्रम्य "अभिलाषचिन्ता स्मृतिगुणकथनोद्वेगसंलापाश्च । उन्मादोऽथ व्याधिर्जड़ता मृतिरिति दशा कामदशाः" सा०द० उक्ता कामदशा दशविधाः । भल्लिनाथेन तु "इङ्गनः सङ्गसङ्कल्पौ जागरः क्षयताऽरतिः । ह्रीत्यागोन्मादमूर्च्छाना इत्यनङ्गदशा दश" इत्यन्यविधा दश दशा उक्ताः।एवं दैन्यावस्था-कारुण्यावस्था-शौकावस्था-मदावस्थादयोपि।"रसावस्थः परंभावः स्थायितां प्रतिपद्यते" "भवेदभिनयोऽवस्थानुकारः स चतुर्विधः" इति च सा०द० । "अन्तर्मदावस्थइव द्विपेन्द्रः"रघुः । "अपवित्रः पवित्रो वा सर्व्वावस्थाङ्गतोऽपि" वा पुरा० "तस्मात् सर्व्वास्वस्थासु मान्याः पूज्याश्च पार्थिवाः"रामा० २आकारे च । "कुम्भकर्णः कपीन्द्रेण तुल्यावस्थः स्वतः कृतः" रघुः । [२स्थापने च ।

अवस्थापन न० अव+स्था-णिच्-युक् ल्युट् । १निवेशने

अवस्थापित त्रि० अव+स्था-णिच्-कर्म्मणि क्त । १निवेशिते २स्थापिते च। [स्थापयितव्येत्यर्थे अव्य०।

अवस्थाप्य त्रि०अव+स्था-णिच्-युक् यत् । निवेशनीये ख्यप्।

अवस्थायिन् त्रि० अव+स्था-णिनि स्त्रियां ङीप् । अवस्थितियुक्ते ।

अवस्थित त्रि०अव+स्था-क्त । १वर्त्तमाने २स्थिते "अन्यानपि प्रकुर्व्वीत शुचीन् प्रज्ञानवस्थितान्" "आधिर्योपनिधिश्चैव" इत्युपक्रमे "दीर्घकालमवस्थितौ" इति च मनुः ।

अवस्थिति स्त्री अव+स्था-क्तिन् । अवस्थाने

अवस्यन्दन न० अव+स्यन्द्-ल्युट्। चरणे गङ्गा० ङ्क । अवस्यन्दनीयः तद्वादौ त्रि० ।

अवस्यु त्रि० अवोरक्षणम् इच्छति-क्यच्-उन्। रक्षणेच्छायुक्ते । "वह्निरिवस्युरसि इवस्वान्" ता० ब्रा० । "ईशानासवस्वे यविष्ठ" ऋ०२,६,६, "अवस्वे स्वरणमिच्छवे" भा०" ।

अवस्रंसन न०अव+स्रन्स-ल्युट्। १अधःपतने, २च्युतौ च ।

अवस्रंसित त्रि०अव+स्रन्स-णिच्-क्त। १दलिते २पातिते च।

अवस्रस् त्रि० अवस्रंसते क्विप्। १भ्रंसनशीले २स्रंसिते च।

अवस्वत् त्रि० अवोरक्षणमस्यास्य मतुप् मस्य वः। रक्षणयुक्ते ।

अवह त्रि० न वहति वह-अच् न०ब० । नद्यादेःस्रोतःशून्ये १देशे "सव्याहतो व्रजत्यनवेक्षमाणा यत्रोदकमवहं भवति तत् प्राप्य सकृदवगाह्यैकं जलाञ्जलिमुत्सृज्य नामगोत्रे संकीर्त्तयेत्तीर्थान्यानि वासांसि परिधापेति" आश्व० गृ० "अवहं यत्र देशे नद्याः स्रोतो नास्ति तदिति" गु०त०रघु०।२हतोयरूक्षत्वस्थे वायुभेदे च विष्टतिर्वायुशब्दे।

अवहत त्रि० अव+हन-कर्म्मणि क्त। अल्पाघातेन विशुद्धीकृते

अवहति अव+हन-क्तिन् । अवघाते अल्पावघातेन विशुद्धीकरणार्थे व्यापारे ।

अवहनन न०अव+हन भावे ल्युट् । अवघाते धान्यादेः विशुद्धीकरणसम्पादके १व्यापारे । अवहन्यतेऽनेन शोधितम् करणे ल्युट् । देहस्थे शोणितवहे स्थानभेदे २उपपेसे च । "वपावसावहननानाभिः क्लोम यकृत् प्लिहा" या० स्मृ० "अवहननं पुप्पसः" मिता० ।

अवहरण न० अव+हृ-ल्युट् । १स्थानान्तरनयने सैन्यानां युद्धस्थानात् शिविरस्थाने २नयने च ।

अवहस्त पु० अवरं हस्तस्य एक० त० । हस्तपृष्ठे हेम० ।

अवहार पु० अव+हृ-कर्त्तरि ण । १चोरे, २व्याहृनामके जलजन्तुभेदे (झाङ्कोर) च । भावे घञ् । ३निमन्त्रितविप्रादिभ्यो द्रव्यहरणे।४स्थानान्तरनयने सैन्यानां युद्धस्थानात् ५शिविरनयने च । "ततोऽवहारं सैन्यानां तव तेषाञ्च भारत !" भा०भी०प० ईप्सिरामे ७निद्रासौ च "क्रियतामवहारोऽस्माद्युद्धाद्ब्राह्मणसंवृतात्" भा०आ०प० ।

अवहारक त्रि०अव+हृ-ण्वुल् । १स्थानान्तरनायके २निवारके ३युद्धात् सैन्यादिनिवारके च । (झाङ्कोर)४जलजन्तुभेदे पु० ।

अवहार्य्य त्रि०अव+हृ-ण्यत् । अवहरणीये १स्थानान्तरं नेये २अवश्यदेये । "आधिर्योपनिधिश्चैव न कालात्ययमर्हति अवहार्य्यौ भवेतां तौ दीर्घकालमवस्थितौ" मनुः "अवहार्य्यौ भवेच्चैव सान्वयः षट्पणो दमः"मनुः। ३समाप्ये च ।

अवहालिका स्त्री अवहलति अधःस्थित्वा ऊर्द्धं सर्पति अव+हल-विक्षेपे ण्वुल् टाप् अत इत्त्वम् । प्राचीरे झारावली । ["यज्ञापहासार्थमसत्कृतोऽसि" गीता ।

अवहास पु० अव+हस-घञ् । १मृदुहासे २उपहासे च ।

अवहास्य त्रि० अव+हस कर्म्मणि ण्यत् । उपहास्ये

अवहित त्रि० अव+धा-क्त । कृतावधाने सावधाने ।

अव(व)हित्था स्त्री न वहित्थेऽति स्था—क पृषो० । छद्मत-भावे । "भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था, व्यापारान्तरासक्त्यन्यथाभावभावणाविलोकनादिकरी" सा०द०उक्ते व्यभिचारिभावभेदे। "एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी लीलाकमलपत्राणि गणयामास पार्व्वती" कुमा० । अयं वर्त्मवमध्यस्तु न्याय्यः । [अनादरे ।

अवहेल स्त्री न० अव+हेड्—अङ् स्त्रियां, घञर्थे क वा ड्स्य लः।

अवहेलन अव+हेड् अनादरे भावे ल्युट् डस्य लः । अनादरे ।

अवहेलित त्रि० अव+हेड—कर्म्मणि क्त डस्य लः । अवज्ञाते ।

अवङ्कर त्रि० अव+डु—अच् । कुटिले । [पुष्पिकायाम् ।

अवाक्पुष्पी अवाक् अधोमुखं पुष्पमस्याः । (शुलफा) वृत-

अवाक्शाख पु० अवाची शाखाऽस्य । "ऊर्द्धमूलमधःशाख-मश्वत्थं प्राहुरव्ययम् । छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् । अधश्चोर्द्धं च प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः । अधश्च मूलान्यनुसन्ततानि कर्म्मानुबन्धीनि मनुष्यलोके । न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा । अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा । ततपदं तत्परिमार्गितव्यम्" गीतोक्ते संसारवृक्षे । "ऊर्द्धं सत्तरः चराचराश्चासृत्प्रवृत्तः पुरुषोत्तमोमूलं यस्य तम् । अधश्चति ततोऽर्वाचीनाः कार्य्योपाधयोहिरण्यगर्भादयोऽवान्तरे ते तु शाखादव शाखायस्य तम् । विनश्वरत्वेन न ऋःमभातपर्य्यन्तमपि स्थास्यतीति विश्वासानर्हत्वादश्वत्थं प्राहुः । प्रवाहरूपेणाविच्छेदादव्ययञ्च । काः प्राहुः ? "ऊर्द्धमूलोऽर्वाक्शाखएषोऽश्वत्थः सनातन" इत्याद्याः श्रुतयः । छन्दांसि वेदावस्य पर्णानि धर्म्माधर्म्मप्रतिपादनद्वारेण शाखास्थानीयैः कर्म्मफलैः संसारवृक्षस्य सर्व्वजीवाश्रयणीयत्वप्रतिपादनात् पर्णस्थानीयावेदाः । यस्त्रमेवम्भूतमश्वत्थं वेद स एव वेदार्थवित् संसारप्रवृद्धवृक्षस्य मूलमीश्वरोब्रह्मादयस्तदंशाः शाखास्थानीयाः सच संसारवृक्षोऽविनश्वरः प्रवाहरूपेण नित्यः वैदोक्तैः कर्म्मभिः सेव्यतामापादितश्च इत्येतावानेव हि वेदार्थः अत एवं विद्वान् वेदवित्ति स्मृयते । किञ्च अधश्चेति । हिरण्यगर्भादयः कार्य्योपाधयोजीवाः शाखास्थानीयत्वेनोक्तास्तेषु च ये दुष्कृतिनस्तेऽधः पश्वादियोनिषु प्रसृताविस्तारं गताः सुकृतिनस्तेर्ऊ देवादियोनिषु प्रसृतास्तस्य संसारवृक्षस्य शाखाः । किञ्च गुणैः सत्त्वादिवृत्तिभिर्जलसेचनैरिव यथायथं प्रवृद्धा वर्द्धं प्राप्ताः। किञ्च विषयरूपादवः प्रवालाः; पल्लवस्थानीया यासां शाखास्थानीयाभिरिन्द्रियवृत्तिभिः संयुक्तत्वात् । किञ्च अधः, चशब्दादूर्द्धञ्च मूलानि अनुसन्ततानि विरूढानि सख्यं मूलमीश्वर एव इमानि स्वन्तरालानि मूलानि तत्तद्भोगवासनालक्षणानि । तेषां कार्यमाह मनुष्यलोके कर्म्मानुबन्धीनि कर्म्म अनुबध्नि उत्तरभावि येषां तानि ऊर्द्धाधोलोकेष्वपि भुक्तभोगवासनाभिर्हि कर्म्मचये मनुष्यलोकप्राप्तानां तत्तदनुरूपेषु कर्म्मसु प्रवृत्तिर्भवति तस्मिन्नेव हि कर्म्माधिकारोनान्येषु लोकेषु अतोमनुष्यलोकउक्तः। किञ्च न रूपमिति । इह संसारे स्थितैः प्राणिभिरस्य संसारवृक्षस्य तथा ऊर्द्धमूलत्वादि प्रकारेण रूपं नोपलभ्यते । न चान्तोऽवसानमपर्य्यन्तत्वात् । नचादिरनादित्वात् । नच संप्रतिष्ठा स्थितिः कथं तिष्ठतीति नोपलभ्यते । यस्मादेवम्भूतोऽयं संसारवृक्षोदुरुच्छेद्यो ऽनर्थकरश्च तस्मादेनं दृढेन वैराग्येण छित्त्वा तत्त्वज्ञानाय यतेतेत्याह अश्वत्थमेनमिति" श्रीधरः ।

अवाक्शिरस् त्रि० अवाक्शिरोऽस्य । अवनतमस्तके "अवाक्-शिरसमुत्पादम्" भट्टिः ।

अवाक्श्रुति पु० नास्तिवाक् च श्रुतिश्च यस्य । वागिन्द्रियशब्दयो-रिन्द्रियशून्ये अनेऽमूके । (कालावोवा ।)

अवाकिन् त्रि० उच्यतेऽनया वच—करणे घञ् वाकः, वागिन्द्रियं नास्ति यस्य इनि न०त० । १वागिन्द्रियशून्ये परात्मनि । "सर्व्वमिदमभ्याक्तोऽवाक्यनादरः" छा०उ० । (बोवा) रमूके च

अवाच्य त्रि० अवनतमुखमस्य । नम्रमुखे ।

अवाङ्मुख त्रि० अवाङ् मुखमस्य । अधोमुखे । "अवाङ मुखस्योपरि पुष्पवृष्टिः" रघुः ।

अवाङ्मनसगोचर पु० वाक् च मनश्च वाङ्मनसौ तयोर्गोचरो न भवति । वक्तुमशक्ये मन्तुमशक्ये च निर्गुणे ब्रह्मणि "यद्वाचानाभ्युदितं येन वागभ्युद्यते" "यन्मनसा न मनुते येन मनोऽमन्यते" इत्यादि श्रुत्वा तस्य तद्विषयत्वोक्तेस्तथात्वम् । तच्चान्यदृश्यवच्छिन्नचैतन्याविषयत्वञ्च तद्विषयत्व तयोर्वृत्तिविषयत्वस्य तच्चिन्नित्वात् "फलव्याप्यत्व-मेवास्य शास्त्रलक्षणनिरूपितम् । ब्रह्मणश्चाननाशाय दोषव्याप्तिरपेक्षिता" इत्युक्तेः अतएव "मनसैवानुद्रष्टव्यः" "तन्त्वौपनिषदं वेदेत्यादि" श्रुतिषु तद्विषय यतोक्तिः सङ्गच्छते "अखण्डसच्चिदानन्दमवाङ्मनसगोचरम्" वे०सा० ।

अवाच् त्रि० अवाञ्चति अव+अनुच—क्विप् । १अधोमुखगते, "अवाक्शिरसमुत्पादम्" भट्टिः । अवरे २देशे, ३काले च । ४दक्षिणस्यां दिशि स्त्री ङीप् । नास्ति वाक् यस्य ब० । ५वाक्यरहिते त्रि० वागिन्द्रियशून्ये ६ब्रह्मणि

न० । "अवचक्षुष्कमन्योन्यमनोऽतेजस्कम्" शत० ब्रा० पूर्वार्धे ओ अवाङ्मौ अत्र अवाचौ इत्यादिभेदः । कालाद्यर्थे प्रथमादीनां स्थानेऽस्ताति तस्य लुक् । ७अवरकालादावर्थे अव्य० । अञ्चतेर्गत्यर्थत्वे नलोपः पूजार्थत्वे तु न नलोपः । उच्यते प्रशस्यते वाक् स्तुतिः । ८तद्रहिते च "दुष्ट्वाव्रो-ऽवङ्मे देवाचः" ऋ० ४,२५,६, अवाचःस्तुति रहिताः भा० भवादौ स । अवाचीनस्तङ्गवादौ त्रि० । तिरुभि-र्भस्त्वावाचीनविला" ता० ब्रा०"अवाचीनविला अवाङ्मुख-विला" भा० । दिगा० यत् । अवाच्यस्तङ्गवादौ त्रि० ।

अवाच्य न०वच-ण्यत् न कुत्वम् न०त० । १दुष्टवचने, "अवा-च्यवादांश्च बहून् वदिष्यन्ति तवाहिताः" गीता २वचना-नर्हे,निन्दनीये त्रि० ३अकथनीये च "अवाच्यो दीक्षितो नाम्ना यवीयानपि योभवेत्" मनुः अवाच्+भवार्थे यत् । ४अवरकालादौ भवे त्रि० । ५अभिधातुन्या बोधयितुम शक्ये च । "अवाच्यत्वादिकं तस्य वक्तुं व्यञ्जनरूपणे" सा० द० । यदुद्दिश्य कथ्यते ६तद्विधे च ।

अवात त्रि०नास्ति वातो यत्र । १वायुशून्यदेशे वा-क्त न०त० । २अन्यैरप्रतिगते च "वन्वन्नवातोऽस्तृतः" ऋ०६,१६,२० । वातव्यापारशोषशून्ये "न स्रष्यन्ते युवतयोऽवातोः" ऋ०६,६,७ "अवाताः वातस्य शोषणहेतुत्वात् तच्छून्य-तया अशुष्काः" भा० ।

अवाञ्चित त्रि० अव+अनूच-णिच्-क्त । आनमिते "हस्त-वाञ्छया सुरुवाञ्चितान्" माघः । [देशे तिका० ।

अवाच्यदेश पु० अवाचि भवः यत् कर्म० । स्त्रीणामधो-

अवादिन् त्रि०वद-णिनि न०त०स्त्रियां ङीप् । १अविरोधिनि २अवदनशीले च । [कादृष्टमेकमाश्रफलं किल"भा०स०प०

अवान त्रि० अव+अन-अच् । शुष्कफलादौ "अवानमशु-

अवान्तर त्रि०अवगतमन्तरं मध्यम् प्रा०स० । १प्रधानान्व-यातिनि अङ्गादौ,२सामान्यस्य विशेषे ३प्रसङ्गागते च "इयं फलश्रुतिः निःश्रेयसपरमपुरुषार्थ साधनपरा भवति किन्तु बर्हिर्मुखानां मोक्षविवक्षाऽवान्तर कर्मफलैः कर्मसु रुच्यर्थतो-त्पादनमात्रम्" श्रीधरः। यथा "पिब निम्बं प्रदास्यामि खलु ते खण्डगुडूकान् । पित्तैवसक्तः पिबति तिक्तमप्यतिवाञ्छकः"पुरा०।"तएतामवान्तरां दीक्षामपश्यन्" शत० ब्रा० ।

अवान्तरदिश् स्त्री अवान्तरा द्वयोर्दिशोर्मध्ये दिक् । अन्त-रालदिशि ऐशान्यादिदिशि कीर्त्ते । "दिशोः प्रान्तेऽ-वान्तरदिशः पर्वतः" ह०उ० ।

अवान्तराम् अव्य०अवान्तर+ब्रा०आप् । सर्वमध्यपातिनि । "तदेतमवान्तरामात्मानमनुपद्यते" इति शत० ब्रा० ।

अवापित त्रि० वप-णिच्-क्त न०त० । यस्य वपनं न कृतं ताडने आरोपिते १धान्यादौ २अच्छेदिते केशादौ च । अव+आप-णिच्-क्त-३प्रापिते च । "विधमां कुरुकुलना-मवापिता" नैष० ।

अवाप्त त्रि० अव+आप-क्त । प्राप्ते । "नानवाप्तमवाप्तव्यं त्रिषु लोकेषु किञ्चन" गीता । [मवाप्तव्यम्" गीता ।

अवाप्तव्य त्रि० अव+आप-तव्य । प्राप्तव्ये । "नानवाप्त-

अवाप्ति स्त्री अव+आप-क्तिन् । प्राप्तौ । "तपः किलेदं तद-वाप्तिसाधनम्" कुमा० "इष्टानवाप्तेरौत्सुक्यम्" सा०द० ।

अवाप्य त्रि० अव+आप ण्यत् । १प्राप्ये। "ज्येष्ठता च निवर्त्तेत ज्येष्ठायाश्च" यद्वनम्" मनुः । न वाप्यः। २आरोप्ये ३अच्छेद्ये केशे च अव+आप-ण्यप् । ४प्राप्तेरर्थे अव्य० ।

अवाम न० । न०त० । वामभिन्ने १दक्षिणे "अवामे वामार्द्धे" नैष० । वामः प्रतिकूलः सुन्दरो वा विरोधे न०त० । २अनुकूले सुन्दरभिन्ने ३अशोभने च त्रि० ।[ऋ० १०,४,२

अवाय पु० अव+इण् घञ् । अन्वये । "अनवायं किमीदिने"

अवार न०न वार्यते जलेन इ-कर्मणि घञ् । मद्यादेरर्वाक् तीरे । [भावे । न०ब० । तच्छून्ये त्रि० ।

अवारण न० इ-णिच्-ल्युट् अभावे न०त० । निषेधा-

अवारणीय त्रि० न वारणीयः वारयितुमशक्यः । वारयि-तुमशक्ये १रिपुप्रभृतौ २रोगादौ च । अवारणीयाश्च रोगाः सुश्रुते दर्शिता यथा "अथातोऽवारणीयमध्यायं व्याख्यास्यामः । उपद्रवेषु ये जुष्टा व्याधयो यान्त्यसा-ध्यताम् । रसायनाहिना वत्स ! तान् श्रृणुष्वैकमना मम ॥ वातव्याधिः प्रमेहश्च कुष्ठमर्शोभगन्दरः । अश्मरी मूढगर्भश्च तथैवोदरमष्टमम् ॥ अष्टावेते प्रकृत्यैव दुश्चि-किल्म्या महागदाः ॥ प्राणमांसक्षयश्वासक्षयाग्नीषवमि-ज्वरैः ॥ मूर्च्छातिसारहिक्काभिः पुनश्चैतैरुपद्रुताः । वर्ज्जनीया विशेषेण भिषजा सिद्धिमिच्छता ॥ श्लीपदं सुप्रतीतं भग्नं कम्पाध्माननिपीडितम् । नरं रुजार्त्तिमन्तञ्च वातव्या-धिर्व्विनाशयेत् ॥ यशोक्तोपद्रवाविष्टमतिप्रसृतमेव वा । पिडकापीडितं गाढं प्रमेहो हन्ति मानवम् ॥ प्रभिन्नं प्र-स्रुताङ्गञ्च रक्तनेत्रं हतस्वरम् । पञ्चकर्मगुणातीतं कुष्ठं ह-न्तीह कुष्ठिनम्॥ क्षणारोचकमूलार्त्तमतिप्रस्रुतशोणितम् । शोफातिसारसंयुक्तमर्शोव्याधिर्व्विनाशयेत् ॥ वातमूत्रपुरी-षाणि क्लिन्नयः शुक्रमेव च । भगन्दरात् प्रस्रवन्ति यस्य तं परिवर्जयेत् ॥ प्रस्फुरनाभिहृदयं रुद्धमूत्रं रुजान्वितम् ।

अक्षरी ज्वरवत्यासु सिकतार्करान्विता ॥ गर्भकोषपरासङ्गो मक्कलो योनिसंहतिः । हन्यात् स्त्रियं मूढगर्भं ययोक्ताश्चाप्युपद्रवाः ॥ पार्श्वभङ्गाङ्गविद्वेषगोफातिसारपीड़ितम् । विरिक्तं पूर्वभाणञ्च वर्ज्जयेदुदरार्दितम् । यस्यास्यति विसंज्ञञ्च येते निपतितोऽपि वा । शीतार्दितोऽन्नरुग्णश्च ज्वरेण म्रियते नरः ॥ यो लूतरोमा रूक्षाङ्गो हृदि संघातशूलवान् । नित्यं वक्त्रेण चोच्छ्वसेत् तं ज्वरो हन्ति मानवम्॥ हिक्काश्वासपिपासार्त्तं मूढं विभ्रान्तलोचनम् । सन्ततोच्छ्वासिनं क्षीणं नरं ज्वरयति ज्वरः ॥ आविलाक्षं प्रतास्यन्तं निद्रायुक्तमतीव च । क्षीणशोणितमांसञ्च नरं ज्वरयति ज्वरः ॥ श्वासशूलपिपासार्त्तं क्षीणं ज्वरनिपीड़ितम् । विशेषेण नरं दृङ्गमतीसारो विनाशयेत् ॥ शुक्लाक्षमन्नद्वेषारमूर्द्ध्वश्वासनिपीड़ितम् । श्लेष्मणा बद्धमेहन्तं यक्ष्मा हन्तीह मानवम् ॥ श्वासशूलपिपासान्नविद्वेषग्लानिमूढताः । भवन्ति दुर्बलत्वञ्च गुल्मिनोरुत्यु मेघ्यतः ॥ आध्मानं बद्धनिष्यन्दं हर्दिहिक्काविड़न्वितम् । रुजाश्वाससमाविष्टं विद्धिनांग्येश्वरम् ॥ पाण्डुदन्तनखो यश्च पाण्डुनेत्रश्च मानवः । पाण्डुसङ्क्रातदर्शी च पाण्डुरोगी विनश्यति ॥ लोहितं छर्दयेद्यश्च बद्धगोलोहितेक्षणः । रक्तानाञ्च दिशां दृष्टा रक्तपित्ती विनश्यति॥ अवाङ्मुखमूर्द्धपादो वा क्षीणमांसबलो नरः । जागरिष्णुरसन्देहसन्नादेन विनश्यति ॥ बद्धगोऽपस्मरन्नन्तं प्रक्षीणं चलितभ्रुवम्। नेत्राभ्याञ्च विकुर्व्वाणमपस्मारो विनाशयेत्"॥

अवारपार पु० अवारमर्वाक्तीरं पारञ्चोत्तरतीरंचस्तो यस्य अर्शआद्यच्। उभयकूलवति समुद्रे ।

अवारपारीण त्रि० अवारपारे गच्छति+ख । पारगामिनि।

अवारिका स्त्री नास्ति वारि यत्र । धन्वाके, तस्य अतिशुष्कत्वेन जलशून्यत्वात्तथात्वम् ।

अवारित त्रि० न वारितः । अनिषिद्धे "ग्रामेषु सैन्यैरकरोदवारितः" माघः । [गन्तरि ।

अवारीण त्रि० अवारं गच्छति ख । नद्यादेरर्वाक्पार

अवार्य्य त्रि० न वार्य्यः ।अवारणीये। "उपद्रवैस्तु ये जुष्टाव्याधयो यान्त्यवार्य्यताम्" सुश्रु० ।

अवावट पु० "द्वितीयेन तु यः पित्रा सवर्णायां प्रजायते । अवावट इतिख्यातः शूद्रधर्म्मा स जातितः"स्मृत्युक्ते कुण्डगोलकादौ ।

अवावन् त्रि० ओष्-अपसारणे क्वनिप् । अपसारके । स्त्रियां ङीप् वनोरच । अवावरी ।

अवासस् त्रि०न वासोऽस्य । १वस्त्ररहिते नग्ने २बौद्धभेदे च।

अवासिन् त्रि० न वसति वस-णिनि न० त० । निवासशील भिन्ने । स्त्रियां ङीप् ।

अवास्तव न० न वास्तवम् । सत्यभिन्ने मिथ्याभूते ।

अवाह्य त्रि० न० त० । वोढुमशक्ये ।

अवि पु० अव-इन् । १सूर्य्ये, २अर्कवृक्षे ३मेषे, ४छागे, "महान्त्यपि समृद्धानि गोजाविधनधान्यतः" जिनकार्ष्णकवस्त्रादौ पृथक् दद्याद् विशुद्धये" इति च मनुः ५पर्व्वते, ६मूषिककम्बले, ७भ्रमौ च । टलक्षायां स्त्री वा ङीप् । स्वार्थे कन् । अविशब्दार्थे । भावादौ प्रशंसिता० यक्। आविक्यम् तद्भावादौ न० ।

अविकट पु० अवि+समूहे कटच् । १मेषसंघाते । विकट उत्पः न०त० । २उत्पभिन्ने सौम्ये त्रि० ।

अविकटोरण पु०अविकटे मेषसंघे देवः उरणःमेषः । रूपाय शुक्लरूपेण देवे मेषसंघातमध्ये मेषरूपे करे ।

अविकत्थन त्रि न०त० । श्लाघाशून्ये "सन्तुष्टाश्च क्षमायुक्ता भवेयुरविकत्थनाः" देवीपुरा० ।

अविकल त्रि०न विकलः व्याकुलः। १व्याकुलभिन्ने २अविसंवादिनि च "कलमविकलताले गायकैर्बोधहेतोः" माघः "अधिकलोऽविसंवादी" मल्लि० ।

अविकार पु० अभावे न०त० । विकाराभावे न०ब० । विकारशून्ये । विकारश्च परिणामभेदः भावधर्म्मः ।

अविकार्य्य त्रि०नविकार्यः। १विकार्य्यभिन्ने परिणामिगुणशून्ये "अविकार्य्योऽयमुच्यते" गीता । विकार्यञ्च द्वेधा "प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत् । किञ्चिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्" इति वाक्यप० उक्तं प्राक्तम् यादृशवस्तुनश्च विकार्यकर्मत्वम् तद्भिन्ने २पदार्थे परात्मनस्तु तदुभयाभावात् सर्वथाऽविकार्य्यत्वमेव ।

अविकृत त्रि०न विकृतः । परिणामिगुणशून्ये ।

अविकृति स्त्री अभावे न०त०। १विकाराभावे न०ब०२विकारशून्ये च । "३सांख्योक्तायां मूलप्रकृतौ स्त्री "मूलप्रकृतिरविकृतिः" सा० का० ।

अविक्रिय त्रि० नास्ति विक्रिया यस्य । विकारशून्ये ।

अविक्रीत त्रि० न विक्रीतः । विक्रीतस्याऽपि कालविशेषमध्ये पुनः प्रत्यर्पणं यत्र द्रव्यभेदे।तत्र कालनियमो यथा "क्रीत्वा विक्रीय वा किञ्चित् यस्येहानुशयो भवेत् । सोऽन्तर्दशाहं तद्द्रव्यं दद्याच्चैवाददीत वा" मनुः । क्रीतानुशयकालवत् द्रव्यविशेषे विक्रयानुशयकालविशेषोप्याहुः। "दशैकपञ्च-

प्राङ्मासलाङ्गार्द्धमासिकम्। बीजायोवाङ्गरत्नस्त्रीदोह्य पुंसां परोक्षणम्" या० स्मृ०। तथाच बीजे-व्रीहयदौ षड्याहं, रत्ने-सुक्ताप्रवालादौ सप्ताहं, स्त्रियां-दास्यां मासं, दोह्ये-गोमहिष्यादौ त्र्याहम्, पुंसि-दासे पञ्चदशाहं, व्याप्य परीक्षणं कर्त्तव्यम् तावत्कालमध्ये अनुशये प्रत्याहृत्तं यज्यते इत्यवगम्यते एवञ्च मनुवचनमेतदतिरिक्तविषयम् एवं विक्रयस्यानुशयकालविशेषोऽव्यविशेषे बोध्यः।

अविक्रेय त्रि० विक्रेतुमनर्हः। स्मृतिनिषिद्धविक्रये लाक्षालवणादौ अपण्यशब्दे विवृतिः। "अविक्रेयस्य विक्रयः" स्मृतिः।

अविक्षत विक्षतः नष्टः भोगादिना दुष्टोवा न०त०। १अविनष्टे भोगादिना २अदूषिते च। "विक्रेतुः प्रतिदेयं तत्तस्मिन्ने वाङ्गविक्षतम्" स्मृतिः।

अविक्षित त्रि० नास्ति विशेषेण क्षितम् क्षयोऽस्य भावे क्त। विशेषक्षयशून्ये "अविक्षितास आयुषा सुवीराः ऋ०७, १२३४। वा दीर्घत्वे। अविक्षीणः तत्रैव कर्त्तरि क्त न०त०। अविक्षीण इत्येव।

अविक्षिप त्रि० विक्षेप्तुं न शक्तः क्षिप-क-। विक्षेप्तुमशक्ते। स्वार्थे कन् तत्रैव। [अजगन्धाशब्दे।

अविगन्धा स्त्री अवेर्गन्धागस्य गन्ध इव गन्धः पुषादावस्याः।

अविगर्हित त्रि० न०त०। १अनिन्दिते

अविगीत त्रि० न०त०। अनिन्दिते "अविगीतशिष्टाचार परम्पराप्राप्तत्व नेति" सुक्ता०। [२उद्विग्नभिन्ने त्रि०।

अविग्न पु० विज-क्त न०त०। (करभचा) १करभईकट्टके।

अविग्रह त्रि० नास्ति विग्रहेण यज्ञो यस्य। १विग्रहशून्येषाद्याते "अविग्रहा गतादित्या यजा यामादिकर्म्मभिः" हरिः। न विग्रहो दृत्तिसमानार्थकं वाक्यं यस्य। २व्याकरणोक्ते नित्यसमासे। नास्ति विग्रहो देहो यस्य। ३निरवयवे परमेशे पु० नास्ति मीमांसकोक्ते ४विग्रहशून्ये देवे च। तैर्हि देवानां विग्रहवत्त्वं खण्डितं तच्च शङ्कापूर्व्वकं जै० सू० भाष्ये च दर्शितं यथा-"देवता वा प्रयोजनेदतिथिवद्भोजनस्य तदर्थत्वात्" सू० "नैतदस्ति,-अग्न्यादयोऽप्रयोजकाः-इति, सर्व्वा देवताः सर्व्वेषां धर्म्माणां प्रयोजिकाः भवितुमर्हन्ति। कुतः?। 'भोजनस्य तदर्थत्वात्',—भोजनं हि इदं देवतायाः, यागो नाम, भोज्यं द्रव्यं देवतायै प्रदीयते, सा भोक्ष्यते—इति, देवतासम्प्रदानको हि अयं यागः श्रूयते, सम्प्रदानं च नाम कर्म्मणोऽपि ईप्सिततमादभिप्रेततरम्, तस्मात् न गुणभूता देवता, देवतां प्रति गुणभूते द्रव्यकर्म्मणी। अपि च यागो नाम देवतापूजा, पूजा च पूजनीयं प्रति गुणभूता लोके दृश्यते, तदेतत् 'अतिथिवत्' द्रष्टव्यं, यथा यावत्किञ्चित् अतिथेः परिचरणं, सर्व्वं तत् अतिथिप्रयुक्तम् एवम् इदमपि—इति। आह,—"ननु एवं ब्रुवता, विग्रहवती देवता भुङ्क्ते च—इत्यभ्युपगतं भवति"। उच्यते, बाढं, विग्रहवती देवता भुङ्क्ते च। कुतः?। स्मृतेः, उपचारात्, अन्यार्थदर्शनाच्च,—एवं हि स्मरन्ति, विग्रहवती देवता—इति, स्मृतिश्च नः प्रमाणम्। तथा विग्रहवतीं देवताम् उपचरन्ति,—यमं दण्डहस्तमासिखन्ति, कथयन्ति च, तथा वरुणं पाशहस्तम्, इन्द्रं वज्रहस्तं, उपचारादपि स्मृतेर्द्दिग्रहान् कल्पयामः। तथा अन्यार्थवचनं, विग्रहवतीं देवतां दर्शयति,-"जस्भ्या ते दक्षिणम् इन्द्र! हस्तम्"-इति, पुरुषविग्रहस्य हि दक्षिणः सव्यश्च हस्तो भवति। तथा "इमे चित् इन्द्रः रोदसी अपारे यत् संगृभ्णा मघवन्! काशिरित्ते,—इति, काशिर्मुष्टिः, सोऽपि पुरुषविग्रहस्य एव उपपद्यते। तथा, "द्विर्यावो वयोदरः सुहाङ्रन्वसो मदे। इन्द्रो दधन्वि जिन्वते" इति, योवा उदरं बाहू इति पुरुषविग्रहदर्शनं भवति। तस्मात् विग्रहवती देवता इति। भुङ्क्ते च। कथम् अवगम्यते?। स्मृतेः, उपचारात् अन्यार्थदर्शनाच्च, एवं स्मरन्ति, भुङ्क्ते देवता इति। तथा च एनान् भुञ्जानान् इव उपचरन्ति, यदस्यै विविधान् उपचारान् उपहरन्ति। तथा च अन्यार्थवचनं भुञ्जानां देवतां गमयति,-"अग्नीन्द्र! पिब च प्रस्थितस्य-इति, तथा च, "विश्वासनानि जठरेषु धत्ते" इति, "एकया प्रति धा पिबत्साकं सरांसि त्रिंशतम्" इति। आह, "न देवता भुङ्क्ते, यदि च भुञ्जीत देवतायै हविः प्रक्तं क्षीयेत"। उच्यते, अक्षरसभोजिनी देवता मधुकरीवत् अवगम्यते। कथम्?। देवतायै हविः प्रक्तं नीरसं भवति, तस्मात् अक्षरसं भुङ्क्ते देवता इति गम्यते" भा०। "आर्थपत्याच्च" सू०। "यदि कस्यचित् अर्थस्य ईशाना देवता उपचर्यमाणा च प्रसीदेत् ततः तदाराधनार्थम् इयं देवतापूजा अभिनिर्वर्त्त्येत, न च एतदुभयम् अपि अस्ति इति, तत् उच्यते, अर्थपतिर्हि देवता इति। कथम् अवगम्यते?। स्मृतेः, उपचारात् अन्यार्थदर्शनाच्च, एवं हि स्मरन्ति, अर्थानाम् ईष्टे देवता इति। तथा, देवस्वामी देवक्षेत्रम् इत्युपचारस्तामेव स्मृतिं द्रढयति। तथा अन्यार्थवचनम् ईशानां देवतां दर्शयति, "इन्द्रो दिवं इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत् पर्वतानां, इन्द्रो दधाम् इन्द्र इन्नेधिराणाम् इन्द्रः

हेमे योगे हव्ये इन्द्रः' इति, तथा, "ईशानम् अस्य जगतः स्व ईशम् ईशानम् इन्द्र तस्थुषे" इति। तथा, स्तुत्युपचाराभ्यां प्रसीदति इत्युपगच्छामः, एवं हि स्मरन्ति, प्रसीदति देवता इति। तथा उपचरन्ति, प्रसन्नोऽस्य पशुपतिः, पुत्रोऽस्य जातः, प्रसन्नोऽस्य वैश्रवणो धनम् अनेन लब्धम् इति। तथा अन्यार्थदर्शनं भवति, आहुतिभिरिव हुतादो देवान् प्रीणाति इति, तथा प्रीता इषमूर्जं नियच्छन्ति इति" भा०। "ततश्च तेन सम्बन्धः" सू०। "ततो" देवतायाः, तेन फलेन सम्बन्धः परिचरितुर्भवति, यो देवताम् इज्यया परिचरति, तं सा फलेन सम्बध्नाति। कथम् एतत् अवगम्यते?। स्तुत्युपचाराभ्यां स्मरन्ति हि, देवता यष्टुः फलं ददाति इति, तामेव उपचारेण स्तुतिं द्रढयति, पशुपतिः, अनेनोपचरितः पुत्रोऽनेन लब्धः इति। तथा अन्यार्थदर्शनम् इदमेव अर्थं दर्शयति, "स, इत् जनेन स विशा स जन्मना स पुत्रैर्वाजमश्नते धना रभिः। देवानाम् यः पितरमाविवासति श्रद्धासना हविषा ब्रह्मणस्पतिम्" इति तथा, "तृप्त एवैनम् इन्द्रः प्रजया पशुभिः तर्पयति" इति तस्मात् हविर्द्रव्येण गुणवचनैश्च देवता आराध्यते, सा प्रीता सती फलं प्रयच्छति येन कर्मणा अग्निराराधितः, तस्य फलस्य दृष्टे, तत् कर्त्रे प्रयच्छति, न तत् स्वर्यः प्रदातुमर्हति, वचनादेतत् अवगम्यते। कः किं प्रयच्छति? इति यथा अग्नौ वचनं, न तत् स्वर्ये" भा०। "अपि वा शब्दपूर्वत्वाद्यत्कर्म प्रधानं स्याद्गुणत्वे देवास्तुतिः" सू०। "अपि वा इति पक्षो व्यावर्त्तते। न चैतदस्ति यदुक्तं देवता प्रयोजिका" इति, "यत्कर्म प्रधानं स्यात्" यजतेर्जातम् अपूर्वम्। कुतः?। "शब्दपूर्वत्वात्", यत् हि फलं ददाति, तत् प्रयोजकम् इदं फलं ददाति इत्येतत् ज्ञानं शब्दपूर्वकं न प्रत्यक्षादिभिः अवगम्यते, शब्दश्च यजतिवाच्यात् फलम् आह, न देवतायाः। कथम् अवगम्यते?। दर्शपूर्णमासयोः करणत्वेन निर्देशः "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इति, तथा, "ज्योतिष्टोमेन स्वर्गकामो यजेत" इति, यजत्यर्थस्य हि स्वर्गकामेन समभिव्याहारो न देवतायाः। "ननु द्रव्यदेवताक्रियं यजत्यर्थः"। सत्यमेवं, किन्तु "गुणत्वे देवतास्तुतिः", द्रव्यदेवतं हि भूतं, भावयितव्यो यजत्यर्थः, भूतभव्यसमुच्चारणे च भूतं भव्याय उपदिश्यते, तस्मात् न देवता प्रयोजिका। अथ यदुक्तं "कर्मण ईप्सितादभिप्रेततरम्" इति न अस्य अभिप्रेतताम् अपह्नुमहे, तद्धितशब्देन चतुर्थ्या वा संयुक्तस्य देवतार्थस्य वाक्यात् अभिप्रेतता अवगम्यते,। फलसंयोगस्तु वाक्यादेव यजत्यर्थस्य। तस्य च श्रुत्या करणता अवगम्यते, न देवतायाः। तत्र यद्यपि देवतार्थता यागस्य गम्यते। पदार्थतापि तेन न प्रतिषिध्यते, फलं च पुरुषार्थः पुरुषार्था च नः प्रवृत्तिः, न च असौ देवतायाः, तस्मात् न देवताप्रयुक्ताः प्रवर्त्तिष्यामहे, या तु, सम्प्रदानस्य अभिप्रेतता सा फलवतो यजेः, साधनत्वे सति उपपद्यते। यच्च,—यजिर्द्देवतापूजा सा पूज्यमानप्रधाना लोके लक्ष्यते—इति, न लोकवत् इह भवितव्यम्, इह पूज्यमानपूजा प्रधानं, यत् हि फलवत् तत् प्रयोजकं, तस्मात् यत्कर्म प्रयोजकम्। अपिच, एतस्मिन् पक्षे विप्रहवती देवता भुङ्क्ते च—इति अध्यवसनीयं भवति, न हि अविप्रहायै अभुञ्जानायै च दानं भोजनं वा सम्भवति—इति"। यच्च उक्तं स्तुत्युपचारान्यार्थदर्शनैर्विप्रहवती, भुङ्क्ते च—इति। तत्र, स्तुतेर्मन्त्रार्थवादमूलत्वात्,—मन्त्रेभ्यश्च अर्थवादेभ्यश्च स्तुतिमूलं विज्ञानम् उत्पद्यते—इति प्रत्यक्षम् अवगम्यते, ते च मन्त्रार्थवादा नैवंपराः—इत्येतत् वक्ष्यामः। आह, 'यदि नैवंपरा न तर्हि मन्त्रार्थवादमूलं तद्विज्ञानम्'—इति। उच्यते,—ये आलोचनमात्रेण मन्त्रार्थवादान् पश्यन्ति, तेषाम् तत् स्तुतिमूलम् ये पुनर्निपुणतः पश्यन्ति, तेषां तत् बाधितम्। अपि च कस्यचित् स्तुतिमूलं भवति। तस्मात् ततः एव स्तुतिः। उपचारोऽपि स्तुतिमूल एव। यत्तु अन्यार्थदर्शनम्, उक्तं—'जग्मुषा ते दक्षिणम् इन्द्र! हस्तम्'—इति। नैतत् एवम्परं,—इन्द्रस्य हस्तो विद्यते—इति" यः तस्य दक्षिणो हस्तस्तं वयमग्रहीतवन्त इति। तस्मात् वाक्यात् इन्द्रस्य हस्तसत्ता न प्रतीयते। आह, 'यदि त्वसौ नास्ति, वयं ते हस्तं ग्रहीतवन्तः—इत्येवं न अवकल्पते—इति हस्तसत्ता अध्यवसीयते,—अस्त्यसौ हस्तः, वयं यं ग्रहीतवन्तः'—इति। तत्र उपपद्यते यद्यस्य हस्तो भवेत्, तथापि न तम् उपग्रहीतवन्तः—इति प्रत्यक्षमेतत्, तथाप्येतत्र अवकल्पत एव, तत्र एतत् असम्बद्धं वा अवकल्पयितव्यं, स्तुतिर्वा, तत्र मतुप्लोपोऽपि तुल्यम्। अथ एवम् उच्यते,—'तस्य एतद्वचनं, यो ग्रहीतवान् तस्य हस्तम्'—इति। उच्यते, नैतत् अध्यवसेयम्, आदि मत्तादोषो वेदस्य प्रसज्येत, न च, ग्रहीतवान् आसीत्—इत्युच्यते, प्रमाणाभावात्। 'एतस्मात् एव वचनात् अर्थात्

कल्प्यते हस्तपहीता इति चेत्' । तत्र, अयथार्थस्यापि उच्चारणं सम्भवत्येव यतः, यथा, 'दश दाड़िमानि षड़-पूपाः' इति । यस्यापि च एष पक्षो, विष्णुरुवान् इन्द्रः इति, यस्यापि इन्द्रशब्देन आमन्त्रणं सम्बोधनार्थं, सम्बो-धनम् अनुवचनात्, तत्र सम्बुद्धः इत्यवगते अनुवचनं न्याय्यम्. न च, असौ केनचित् प्रकारेण सम्बुद्ध इति अव-गम्यते, अनवगते सम्बोधनं व्यर्थम् । 'वचनप्रामाण्यात् सम्बुध्यते इत्येवं गम्यते इति चेत् उक्तम् अदृष्टकल्प-नायां हस्तादिकल्पनानुपपत्तिरिति । न च, असौ सम्बुद्धः इति अवधार्यते, प्रमाणाभावात् । तस्मात् सम्बोधनवचनं न सम्बोधनात्, निर्देशार्थमेव । अविग्रह-पक्षेऽपि तत् निर्देशार्थमेव भविष्यति । तत्र आमन्त्रितवि-भक्तिवचनं स्तुतये, एवम् इदं देवताख्यं साधयिष्यतम, यज्ञेतनादिवत् सम्बुध्य साधयति इति चेतनवदिव उपच-र्यमाणः सम्बुद्धिशब्देन आमन्त्र्यते, तथा सम्बोधनशब्देन निर्देश्य उच्यते, यद्धोतवन्तो वयं तव हस्तं क्वदात्रया वयम् इत्यर्थः, अस्माभिः इन्द्रकर्म कर्त्तव्यम् इत्येतत् अनेन स्मार्यते । तथा "इमे द्यावापृथिव्यौ दूते अपारे यत् संग्रहासि मघवन्नहो ते पूजितो सृष्टिः,, इति सन्तमिव सृष्टिं स्तुत्यर्थेन वदति, । तस्यापि भावे न प्रमाणमस्ति, न इदं वचनं, 'इत् महान् कार्षिः" अस्ति, किन्तर्हि, यस्तव कार्षिः, स महान् इति, अन्यार्थस्तव कार्षिरस्ति इति, अन्यः तव कार्षिर्महान् इति । "सता हि स्तुतिः उपप-द्यते इति चेत्" । नैतत्,नियोगतो यस्यापि पौरुषविधि-कैरङ्गैर्योगः, पौरुषविधिकैरङ्गैः तस्यापि स्तुति-र्भवति, यथा "एते वदन्ति शतवत् सहस्रवत् अभिक्रन्दन्ति हरितेभिरासभिः । विष्णो यावाणः शुक्रतः, शुक्रत्वया होतश्चित् पूर्वे हविरद्यमाशत" इति । तथा, "सुखं रथं युयुते सिन्धुरश्विनम्" इति। तस्मात् न स्तुतिवचनात् अर्था-पत्तिर्भवति पुरुषविधत्वे देवतायाः । तथा, "तुविग्रीव इन्द्रः, इति नैतत् युक्तं भवति, ग्रीवावान् इन्द्रः इति, किन्तर्हि यादृश ग्रीवा, सा महती, ग्रीवावत्त्वे नास्ति प्रमाणम् । न च, ग्रीवास्तुतिः अर्थापत्तिः, अपुरुषविधेऽपि स्तुत्युपपत्तेः । अपि च, "इन्द्रो हत्वाहि जिघ्नते" इत्येता-भ्यां पदाभ्याम् इन्द्रशब्दः सम्बुद्धो न शक्नोति तुविग्रीवादिभिः सम्बन्धं यातुं, द्विरुच्चारणम् अस्य प्रसज्यते, तुविग्रीववान् इन्द्रो वेदितव्यः हत्वाहि च इन्द्रो हन्ति—इति, तथा हि सति भिद्येत, अभिन्नं च वाक्यम् उपलभ्यते, तदेवम् अवकल्पते, यदि तुविग्रीवादयोऽस्य न उपदिश्यन्ते—इति स्तुत्यर्थं सङ्कीर्त्यन्ते तुविग्रीवादिः, 'अन्वसो मदे इन्द्रो हत्वाहि हन्ति'—इति एषा तु वचनव्यक्तिः, हतवधोपदेशपरम् इदं वचनम्—इति । यदपि वचनं,—बाहू ते इन्द्र रोमशौ, अक्षी ते इन्द्र पिङ्गले'—इति, तदपि बाह्वोः रोमशत्वम् अक्ष्णोश्च पैङ्गल्यम् आह, न बाह्वसत्तामक्षिसत्तां च । यदपि अक्षिसत्तां वदति—इति गम्यते,—'चक्षुभ्यते ग्रहणते ते ब्रवीमि'—इति, तदपि न चक्षुःसम्बन्धार्थं, चक्षुभ्यते ब्रवीमि—इति वचनसम्बन्धार्थं, तत् सतीमिव चक्षुभ्यत्तां स्तुत्यर्थम् उच्चारयति । कुतः एतत् अवगम्यते? । चतुर्थी-निर्देशात्, यदि प्रातिपदिकार्थोऽध्यवसीयते, तथा वाक्य-मिद्येत, चक्षुभ्यान्—इत्येवं च उद्दिश्येत, चक्षुभ्यते ते ब्रवीमि—इति च । तस्मात् न किञ्चित् अन्यार्थदर्शनं पुरुषविधतां देवतायाम् इदं ख्यापयति—इति, न च, इदं भोजनं, न हि देवता भुङ्क्ते, तस्मात्, भोजनस्य तदर्थत्वात्—इति तत् असङ्गतम् । यदपि ऋत्वुप-चारान्यार्थदर्शनैर्भुङ्क्ते—इति, तत् अविग्रहत्वेन प्रत्युक्तम् । अपि च, भुञ्जानायै देवतायै प्रत्तं हविः क्षीयेत । न च, मधुकरीवत् अग्ररसभोजिन्यो देवताः —इति प्रमाणमस्ति, मधुकरीषु प्रत्यक्षं, न च तद्वत् देवतायाम् । तस्मात् न भुङ्क्ते देवता इति। यदुक्तम् देवतायै हविः प्रत्तं नीरसं भवति—इति । नैषदोषः, वातोपहतं नीरसम्भवति—इति, शीतीभूतं च । न च, असौ कस्य चित् अर्थस्य ईष्टे, अनीशा कथं दास्यति ? ।—इति । यदुक्तं, ऋत्वुपचारान्यार्थदर्शनैः ईशाना देवता-इत्यव-गम्यते—इति । तत्र, ऋतेः मन्त्रार्थवादमूलत्वात्—इत्युक्तम् , उपचारोऽपि,—'देवयामो देवक्षेत्रम्'—इति उपचारमात्रम्,—यो यदभिप्रेतं विनियोगमर्हति, तस्य स्वं, न च यागं क्षेत्रं वा यथाभिप्रायं विनियुङ्क्ते देवता । तस्मात् न सम्भवत्यति—इति, देवपरिचारकाणान्तु ततो भूतिर्भवति, देवताम् उद्दिश्य, यत् त्यक्तम् । यदुक्तम्, अन्यार्थदर्शनम् ईशानां देवतां ख्यापयति,—'इन्द्रो दिव इन्द्र ईशे'—इत्येवमादीति, तत् प्रत्यक्षम् अनीशानां देवताम् उपलभ्य अध्यवस्यामः,—भाक्त एष शब्दः—इति । 'तत्र आह,+—वचनप्रामाण्यादेव अस्य ईशानता अवगम्यते, यद्देवलोका अर्थान् विनियुञ्जते, तद्देवताभिप्रायादेव-इत्यध्यवस्यामः'—इति । तत्र,

प्रत्यक्षात् प्रमाणात् देवतापरिचारकाणाम् अभिप्रायः इत्यवगम्यते, स न शक्यो बाधितुम्। येऽपि देवताम् ईशानां वर्णयन्ति, तेऽपि न अपह्नुवते परिचारकाणाम् अभिप्रायम्। किं चाङ्गः, तथा देवता करोति, यथा परिचारकाणाम् अभिप्रायो भवति इति, न च, स ईशानो भवति, यः पराभिप्रायम् अनुरुध्यते, यस्य न स्वाभिप्रायात् विनियोगो भवति। अपि च, न च एतद्वचनं, वर्त्तमानकालोपदेशत्वात्, प्रत्यक्षविरोधात्, स्तुतिवादोऽवधार्यते, स्तुतिवादे च सम्भवति न वचनप्रामाण्यात् ईशिष्यते इति गम्यते। न च, देवता फलेन सम्बध्नाति, या तदर्थं परिचर्येत। यदुक्तं, स्तुत्युपचारान्यार्थदर्शनैर्ईदाति प्रीयति च इति। तत्र स्तुत्युपचारयोर्यत् अन्यार्थदर्शनं तत्र प्रीता इषमूर्ज्जम् इति, तन्न, अन्यस्य विधेराम्नानात् दक्षिणतः सम्परिहर्त्तव्या इत्याह" तथा "इन्द्र एवैनम् इन्द्रः प्रजया पशुभिस्तर्पयति" इति अत्र ऐन्द्रस्य हविषो विधातारम्। तस्मात् देवता न प्रयोजिका इति" भा०। "अतिथौ तत्प्रधानत्वमभावः कर्म्मणि स्यात्तस्य प्रीतिप्रधानत्वात्" सू०। "यदुक्तम् अतिथिवत् इति तत् परिहर्त्तव्यम् आतिथ्यम् अतिथिप्रयुक्तं स्यात् आतिथ्ये हि तत् प्रीतिर्विधीयते अतिथिः परिचरितव्यः यथा प्रीयते तथा कर्त्तव्यम् इति। भोजनं दानं वा कार्य्यम् इति यद्यत् अतिथये रोचते तत् कर्त्तव्यं यत् तस्मै न रोचते न तत् बलात् कारयितव्यम् इति इह तु कर्म्मणि अभावः प्रीतिविधानस्य। तस्मात् विषमम् अतिथिना" शबरभाष्यम्। तदेतद्देवानभिज्ञं मन्यते तर्हि तेषां विग्रहवत्त्वमङ्गीकृतं तथाच शङ्कापूर्व्वकं देवानां विग्रहवत्त्वं भा०सूत्रे तद्भाष्ये च व्यवस्थापितं यथा। "विरोधः कर्म्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्" भा०सू०। "स्यादेतत् यदि विग्रहवत्त्वाद्यभ्युपगमेन देवादीनां विद्यास्वधिकारोवर्ण्यते विग्रहवत्त्वात्तत्त्वादिवदिन्द्रादीनामपि स्वरूपसन्निधानेन योगेऽङ्गभावोऽवगम्यते न च सम्भवति। बहुषु युगपदेकस्येन्द्रस्य स्वरूपसन्निधानानुपपत्तेरिति चेन्नायमस्ति विरोधः कस्मात्? अनेकप्रतिपत्तेः एकस्यापि देवात्मनोयुगपदनेकस्वरूपप्रतिपत्तिः सम्भवति। कथमेतदवगम्यते? दर्शनात्। तथाहि "कति देवाः" ? इत्युपक्रम्य "त्रयश्च त्री च शता च त्रयश्च त्री च सहस्रेति" निरूप्य कतमे ते? इत्यस्यां पृच्छायां "महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति ब्रुवती श्रुतिरेकैकस्य देवतात्मनो युगपदनेकरूपतान्दर्शयति। तथा त्रयस्त्रिंशतोऽपि षड्विद्यन्तर्भावक्रमेण "कतमएको देव इति प्राण" इति प्राणैकरूपतान्देवानां दर्शयन्ती तस्यैवैकस्य प्राणस्य युगपदनेकरूपतान्दर्शयति। तथा स्मृतिरपि "आत्मनो वै सहस्राणि बहूनि भरतर्षभ! कुर्य्याद्योगी बलं प्राप्य तैश्च सर्वैर्महीञ्चरेत्। प्राप्नुयाद्विषयान् कैंचित् कैंचिदुत्पन्नपञ्चरेत्। संक्षिपेत्तु पुनस्तानि सूर्य्यो रश्मिगणानिव" इत्येवङ्जातीयका प्राप्तप्राणिमाद्यैश्वर्य्याणां योगिनामपि युगपदनेकशरीरयोगं दर्शयति किंतु बह्वभ्यासजानसिद्धानां देवानाम्। अनेकरूपप्रतिपत्तिसम्भवाच्चैकैका देवता बहुरूपैरात्मानं प्रविभज्य बहुषु यागेषु युगपदङ्गभावं गच्छति, परंच न दृश्यते उन्नद्धानादिशक्तियोगादित्युपपद्यते। अनेकप्रतिपत्तेर्दर्शनादित्यस्यापरा व्याख्या। विग्रहवतामपि कर्माङ्गभावश्चोदनाखनेका प्रतिपत्तिर्दृश्यते। क्वचिदेकोविग्रहवाननेकत्र न युगपदङ्गभावं गच्छति यथा बहुभिर्भोजयद्भिर्नैकोब्राह्मणो युगपद्भोज्यते। क्वचिच्चैको विग्रहवाननेकत्र युगपदङ्गभावं गच्छति यथा बहुभिर्नमस्कुर्वद्भिरेको ब्राह्मणो युगपन्नमस्क्रियते तद्वदिहोद्देश्यपरित्यागात्मकत्वाद्यागस्य विग्रहतीमथैकां देवतामुद्दिश्य बहवः स्वं स्वं द्रव्यं युगपत् परित्यजन्तीति विग्रहवत्त्वेऽपि देवानां न किञ्चित् कर्म्मणि विरुध्यते" भा०। "शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्" सू०। "मा नाम विग्रहवत्त्वे देवादीनामुपगम्यमाने क्वचिद्विरोधः प्रसज्जि, शब्दे तु विरोधः प्रसज्येत, कथम्? औत्पत्तिकं हि शब्दस्यार्थेन सम्बन्धमाश्रित्यानपेक्षत्वादिति वेदस्य प्रामाण्यं स्थापितम्। इदानीन्तु विग्रहवतो देवताऽभ्युपगम्यमाना यद्यपैश्वर्य्ययोगाद्युगपदनेककर्मसम्बन्धीनि हवींषि भुञ्जीत तथापि विग्रहयोगादक्षादिवज्जननमरणवतो सेति नित्यस्य शब्दस्यानित्येनार्थेनानित्यसम्बन्धे प्रसीयमाने यद्दैदिके शब्दे प्रामाण्यं स्थितं तस्य विरोधःस्यादिति चेन्नायमस्ति विरोधः कस्मात्? अतः प्रभवात् अतएव हि वैदिकाच्छब्दाद्देवादिकं जगत् प्रभवति। ननु जन्माद्यस्य यत इति ब्रह्मप्रभवत्वं जगतोऽवधारितं कथमिह शब्दप्रभवत्वमुच्यते?। अपि च यदि नाम वैदिकाच्छब्दाद्देव प्रभवोऽभ्युपगतः कथमेतावता विरोधः शब्दे परिहृतः? यावता वसवोरुद्रा आदित्याविश्वेदेवामरुत इत्येतेऽर्था अनित्या एव, उत्पत्तिसत्त्वात् तदनित्यत्वे तद्वाचकानां वैदिकानां वस्वा-

दिशब्दानामनित्यत्वं केन वार्यते ? प्रसिद्धं हि लोके देवदत्तस्य पुत्रे उत्पन्ने यज्ञदत्त इति तस्य नाम क्रियते इति। तस्माद्विरोध एव इति चेन्न गवादिशब्दार्थसम्बन्धनित्यत्वदर्शनात्। न हि गवादिव्यक्तीनामुत्पत्तिमत्त्वे तदाकृतीनामप्युत्पत्तिमत्त्वं स्यात्। द्रव्यगुणकर्मणां हि व्यक्तयएवोत्पद्यन्ते नाकृतयः। आकृतिभिश्च शब्दानां सम्बन्धो नव्यक्तिभिः व्यक्तीनामानन्त्यात् सम्बन्धग्रहणानुपपत्तेः। व्यक्तिषूत्पद्यमानास्वाकृतीनां नित्यत्वान्न गवादिशब्देषु कश्चिद्विरोधो दृश्यते। तथा देवादिव्यक्तिप्रभवाभ्युपगमेऽपि आकृतिनित्यत्वान्न कश्चिद्वस्वादिशब्देषु विरोध इति द्रष्टव्यम्। आकृतिविशेषस्तु देवादीनां मन्त्रार्थवादाभ्यां विग्रहवत्त्वाद्यवगमादवगन्तव्यः। स्थानविशेषसम्बन्धनिमित्ताश्चेन्द्रादिशब्दाः सेनापत्यादिशब्दवत्। ततश्च योयस्तत्तत्स्थानमधितिष्ठति स स इन्द्रादिशब्दैरभिधीयते इति न दोषो भवति। नचेदं शब्दप्रभवत्वं ब्रह्मप्रभवत्ववदुपादानकारणत्वाभिप्रायेणोच्यते कथन्तर्हि ? स्थितिवाचकात्मना नित्यशब्दे नित्यार्थसम्बन्धिनि शब्दव्यवहारयोग्यार्थं व्यक्ति निष्पत्तिरतः प्रभव इत्युच्यते" भा०। "ज्योतिषि भावाच्च" सू०। "यदिदं ज्योतिर्मण्डलं द्युस्थानमहोरात्राभ्यां बंभ्रमज्जगदवभासयति तस्मिन्नादित्यादयो देवतावचनाः शब्दाः प्रयुज्यन्ते लोकप्रसिद्धेर्व्याकरणेषु प्रसिद्धेश्च। न च ज्योतिर्मण्डलस्य ह्रदयादिना विग्रहेण, चेतनतया अर्थित्वादिना वा योगोऽवगन्तुं शक्यते ह्रदादिवदचेतनत्वावगमात्। एतेनाग्न्यादयो व्याख्याताः। स्यादेतत् मन्त्रार्थवादेतिहासपुराणलोकेभ्यो देवादीनां विग्रहवत्त्वाद्यवगमादयमदोष इति नेत्युच्यते। न तावल्लोको नाम किञ्चित् स्वतन्त्रं प्रमाणमस्ति प्रत्यक्षादिभ्यएव तद्व्यभिचरितविशेषेभ्यः प्रमाणेभ्यः प्रसिद्ध एवार्थो लोकात् प्रसिद्ध इत्युच्यते न चात्र प्रत्यक्षादीनामन्यतमं प्रमाणमस्ति। इतिहासपुराणमपि पौरुषेयत्वात् प्रमाणान्तरमूलतामाकाङ्क्षते। अर्थवादा अपि विधिनैकवाक्यत्वात् तत्स्तुत्यर्थाः सन्तोन पार्थक्येन देवादीनां विग्रहादिसद्भावे कारणभावं प्रतिपद्यन्ते। मन्त्रा अपि स्तुत्यादिविनियुक्ताः प्रयोगसमवायिनोऽभिधानार्थाःन कस्यचिदर्थस्य प्रमाणमित्याश्रयन्ते। तस्मादभावो देवादीनामधिकारस्य" भा०। "भावन्तु बादरायणोऽस्ति हि" सू०। तुशब्दः पूर्वपक्षं व्यावर्तयति। बादरायणस्त्वाचार्यो भावमधिकारस्य देवानामपि मन्यते। यद्यपि मध्वादिविद्यासु देवतादिव्यभिन्नासु तत्सम्भवोऽधिकारस्य तथाप्यस्ति शुद्धायां ब्रह्मविद्यायां सम्भवः अर्थित्वसामर्थ्याद्यप्रतिषेधापेक्षितत्वादधिकारस्य। न च क्वचित्सम्भव इत्येतावता यत्र सम्भवस्तत्राधिकारोऽवधार्यते। मनुष्याणामपि न सर्वेषां ब्राह्मणादीनां सर्वेषु राजसूयादिष्वधिकारः सम्भवति तत्र योग्यायः सोऽत्रापि भविष्यति। ब्रह्मविद्यायां प्रकृत्य भवति लिङ्गदर्शनं श्रौतं देवाद्यधिकारस्य सूचकं "तद्धोचुः देवानां प्रत्यबुध्यत स एव तदभवत्" तथर्षीणामिति "ते होचुर्हन्त तमात्मानमन्विच्छामो यमन्विष्य सर्वांश्च लोकानाप्नोति सर्वांश्च कामानिति" "इन्द्रो ह वै देवानामभिप्रवव्राज विरोचनोऽसुराणामित्यादि" च। आर्षेऽपि च गन्धर्वाप्सरस्कल्पसंवादादि। यदप्युक्तं ज्योतिषि भावाच्चेति अत्र ब्रूमः। ज्योतिरादिविषया अप्यादित्यादयो देवतावचनाः शब्दाश्चेतनावन्तमैश्वर्याद्युपेतं तं तं देवतात्मानं समर्पयन्ति मन्त्रार्थवादेषु तथा व्यवहारात्। अस्ति ह्यैश्वर्ययोगाद्देवतानां ज्योतिरादात्मभिन्नावस्थातुं यच्चेष्टञ्च तं तं विग्रहं यद्गृहीतुं सामर्थ्यम्। तथाहि श्रूयते सूत्रब्राह्मणार्थवादे "मेधातिथिं ह काण्वायनमिन्द्रोमेधो भूत्वा जघारेति"। स्मर्यते च "आदित्यः पुरुषो भूत्वा कुन्तीमुपजगाम स" इति। ह्रदादिष्वपि चेतना अधिष्ठातारोऽभ्युपगम्यन्ते "ह्रदमब्रवीत्" "आपोऽब्रुवन्" इत्यादिदर्शनात्। ज्योतिरादिभूतधातोरादित्यादिव्यपचेतनत्वमभ्युपगम्यते चेतनास्वधिष्ठातारो देवतात्मानो मन्त्रार्थवादादिव्यवहारादित्युक्तम्। यदप्युक्तम् मन्त्रार्थवादयोरन्यार्थत्वान्न देवताविग्रहादिप्रकाशनसामर्थ्यमिति। अत्र ब्रूमः प्रत्ययाप्रत्ययौ हि सद्भावासद्भावयोः कारणं नान्यार्थत्वमनन्यार्थत्वं वा। तथाहि अन्यार्थमपि प्रस्थितः पथि पतितं तृणपर्णादीन्दृष्ट्वेवं प्रतिपद्यते। अत्राह विषम उपन्यासः तत्र हि तृणपर्णादिविषयं प्रत्यक्षं प्रवृत्तमस्ति येन तदस्तित्वं प्रतिपद्यते अत्र पुनर्विध्युद्देशैकवाक्यभावे स्तुत्यर्थैवादेन पार्थक्येन नवृत्तान्तविषया प्रवृत्तिः शक्याऽध्यवसाययितुम्। न हि महावाक्ये प्रत्यायके इवान्तरवाक्यस्य पृथक् प्रत्यायकत्वमस्ति यथा 'न सुरां पिबेदिति नञ्श्रुति वाक्ये पदत्रयसम्बन्धात् सुरापानप्रतिषेध एवैकोऽर्थो गम्यते, न पुनः सुरां पिबेदिति पदद्वयसम्बन्धात् सुरापानविधिरपीति। अत्रोच्यते। विषमउपन्यासः युक्तं यत् सुरापानप्रतिषेधे पदान्वयस्यैकत्वादवान्तरवाक्यार्थस्यायहणं" विध्युद्देशार्थवादयोस्त्वर्थवादस्थानि पदानि पृथगन्वयं वृत्तान्तविषयमतिपद्यानन्तरं कैमर्थ्यवशेन विधिस्तावकत्वं प्रतिपद्यन्ते।

यथाहि "वायव्यं श्वेतमालभेत भूतिकामः" इत्यत्र विध्युद्देशवर्त्तिनां वायव्यादीनां पदानां विधिना सम्बन्धः "वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिङ्गमयतीति" इत्येवमर्थवादगतानाम् पदानाम् । नहि भवति वायुर्व्वा आलभेत क्षेपिष्ठा देवता वा आलभेतेत्यादिवायुस्तावत्सङ्कीर्त्तनेन त्वदान्तरमन्त्यं प्रतिपद्य एवंविशिष्टदैवत्यमिदं कर्म्मेति विधिं तु वक्ति । तदयत्र योऽवान्तरवाक्यार्थः प्रमाणान्तरगोचरोभवति तत्र तदनुवादेनार्थवादः प्रवर्त्तते । यत्र प्रमाणान्तरविरुद्धस्तत्र गुणवादेन । यत्र तु तदुभयं नास्ति तत्र किं प्रमाणान्तराभावाद्गुणवादः स्यात् आहोस्वित् प्रमाणान्तराविरोधाद्विद्यमानार्थवाद इति प्रतीतिश्चरथैर्व्विद्यमानार्थवादवाक्यवशेयो न गुणवादः । एतेन मन्त्रो व्याख्यातः । अपि च विधिभिरेवेन्द्रादिदैवत्यानि हवींषि चोदयद्भिरपेक्षितमिन्द्रादीनां स्वरूपम् । न हि स्वरूपरहिता इन्द्रादयश्चेतसि आरोहयितुं शक्यन्ते । न च चेतसश्चनारूढायै तस्यै तस्यै देवतायै हविः प्रदातुं शक्यते । श्रावयति च "यस्यै देवतायै हविर्गृहीतं स्यात् तामभ्यावेत् वषट्करिष्यन्निति" । न च शब्दमात्रमर्थस्वरूपं सम्भवतीति शब्दार्थयोर्भेदात् तत्र वाडयं मन्त्रार्थवादयोरिन्द्रादीनां स्वरूपमवगतं न तत् वाडयं शब्दप्रमाणकेन प्रत्याख्यातुं युक्तम् । इतिहासपुराणमपि व्याख्यातेन मार्गेण सम्भवन्मन्त्रार्थवादमूलत्वात् प्रभवति देवताविग्रहादि प्रपञ्चयितुम् । प्रत्यक्षमूलमपि सम्भवति, भवति ह्यक्षाकलप्रत्यक्षमपि चिरन्तनानां प्रत्यक्षम् । तथाच व्यासादयो देवताभिः प्रत्यक्षं व्यवहरन्तीति श्रूयते। यस्तु ब्रूयादिदानीन्तनानामिव पूर्व्वेषामपि नास्ति देवादिभिर्व्यवहर्त्तुं सामार्थ्यमिति स जगद्वैचित्र्यमतिषेधेत् इदानीमिव च नान्यदापि सार्वभौमः क्षत्रियोऽस्तीति ब्रूयात् ततश्च राजसूयादिचोदना उपरुध्यात् इदानीमिव च कालान्तरेऽपि अव्यवस्थितप्रायान् वर्णाश्रमधर्म्मान् प्रतिजानीत ततश्च व्यवस्थाविधायिशास्त्रमनर्थकं कुर्य्यात् । तस्मात् धर्म्मोत्कर्षवशाद्विरलनाः देवताभिः प्रत्यक्षं व्यवहर्त्तुरिति शिष्यते। अपिच स्मरन्ति "स्वाध्यायादिष्टदेवतासम्प्रयोग" इत्यादि योगोऽप्यणिमाद्यैश्वर्य्यप्राप्तिफलकः स्वर्गमात्रो न शक्यते साहसमात्रेण प्रत्याख्यातुम् । श्रुतिश्च योगमाहात्म्यं प्रत्याख्यापयति "पृथ्व्यप्तेजोऽनिलखे समुत्थिते पञ्चात्मके योगगुणे प्रवृत्ते । न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरमिति" । अपीषामपि मन्त्रब्राह्मण दर्शनात् सामर्थ्यं नास्मदीयेन सामर्थ्येनोपमातुं युक्तम् । तस्मात् सम्भवमितिहासपुराणम् । लोकप्रसिद्धिरपि न सति सम्भवे निरालम्बनाध्यवसातुं युक्ता । तस्मादुपपन्नो मन्त्रादिभ्यो देवादीनां विग्रहवत्त्वाद्यवगमः । ततश्चार्थित्वादिसम्भवादुपपन्नो देवादीनामपि ब्रह्मविद्यायामधिकारः । क्रममुक्तिदर्शनान्यथैवमेवोपपद्यन्ते इति"भा०।

विग्रहादिपदेन"विग्रहोहविषां भोगऐश्वर्य्यञ्च प्रसक्तता । फलप्रदानमित्येतत् पञ्चकं विग्रहादिकमिति" आन०गि० उक्तं पञ्चकं याह्यं तच्च क्रमेण मीमांसाभाष्ये पूर्व्वपक्षे दर्शितम् । शब्दचिन्तामणावपि देवानां विग्रहवत्त्वं चेतनत्वञ्च व्यवस्थापितम् यथा "एवं देवतादावपि इन्द्रमुपासीतेत्यादौ लोके प्रयोगस्थानियमादृगौणतयैव व्यवहाराङ्गार्थाद्यनध्यवसायेन लौकिके सहस्राक्षादाविन्द्रादिपदशक्तिग्रहः प्रमाणञ्च इन्द्र सहस्राक्ष इत्यादिविधिसमभिव्याहृतोऽर्थवादएव स्वर्गपदवत्। अथ स्वर्गपदे प्रवृत्त्यन्यथानुपपत्त्या "तत्सुखं स्वःपदाप्यदमिति"श्रुतेश्चार्थवादादेव शक्तिग्रहः नचेह तथार्थवादः किन्तु "इन्द्रः सहस्राक्षः इत्यादिस्तावकत्वेन प्रवृत्तिपर इति चेत् न इन्द्रः सहस्राक्षः" इत्यादिप्रसिद्धपदसामानाधिकरण्यश्रुतितो बाधकं विना सहस्राक्षत्वेनेन्द्रादिपदवाच्यत्वावधारणात् प्रसिद्धपदसमन्वयबलेन प्रतीयमानमर्थमबाधितमादायैव तेषां प्रवृत्तिपरत्वात् मन्त्रप्रकाशितयज्ञियेश्वराद्युपेतस्यहविष्प्रक्षेपेण तत्रैव याज्ञिकानां देवताव्यवहारात् अपि च शिवाय गां ददादित्यादौ देवतासंप्रदानत्वश्रुतेः, शिवादिसहस्रनाम्नां पर्य्यायत्वेन श्रुते र्महाजनपरिग्रहेण प्रमाणत्वात्आराधितदेवतायां वरदात्वश्रुतेश्च बाधकं विना चेतनैव देवता । अथ देवताचैतन्ये तत्प्रीतिरेव यागव्यापार इति नापूर्वसिद्धिरिति चेत् न प्रीतेः सुखस्य तदनुभवस्य चाशुतरविनाशित्वात् तज्जन्यसंस्कारस्य स्वाविषये फलाहेतुत्वात् फलहेतुस्वाविक्षतिव्यापारापेक्षायां लाघवेन श्रुतिसमानाश्रयस्यैव व्यापारत्वकल्पनात् नानायागेष्वेकदाज्ञाने चैकदा सन्निधानं तद्वद्विशेष एव प्रतिहितविधिना प्रतिमादावह्वारवत् । अथ राजसूयादिफलत्वेन श्रुतेरिन्द्रादिरचेतनएव । देवता चेतना नास्ति मानाभावात् किन्तु देवनादेद्योतितचतुर्थ्यन्तपदनिर्द्दिश्यत्वं देवतात्वम् इन्द्रायेत्यादिपदमेव देवता । अतएवाग्निप्रकाशक मन्त्रेऽग्निप्रणयनस्थानान्तरम् अग्नये इति नियमतो हविस्त्यागः न पर्य्यायान्तरेण । न चेन्द्रोद्देशेन हविस्त्यागः

इन्द्रनिष्ठकिञ्चिज्जनकः तत्स्वरूपाजनकत्वे सति तदुद्देश्येन क्रियमाणत्वात् ब्राह्मणायदानवदिति वाच्यम् अप्रयोजकत्वात् तदर्थत्वेन क्रियमाणत्वस्योपाधित्वाच्च इन्द्रायस्वाहेत्यत्र न तादर्थ्ये चतुर्थी किन्तु स्वाहादि पद-योगउपपदविभक्तिरेव अन्यथा नमःस्वस्तिस्वाहास्वधेत्यादिस्थलवैयर्थ्यात् एवं चतुर्थ्यन्तपदस्य देवतात्वे मानाभावात् चतुर्थी विनापि इन्द्रो देवतेति व्यवहारदर्शनात् अग्नये कव्यवाहनायेत्यादौ देवताद्वय प्रसङ्गाच्च" इन्द्र सहस्राक्ष इत्यर्थवादस्य "इन्द्रसुपासीत" इत्यादिविधिसमभिव्याहारेण ऐकवाक्यतयोपास्यत्वात् देवस्वं नाददीतेत्यत्र देवसद्दिश्य त्यक्ते शिष्टानां देवस्वत्वेन व्यवहारात् अग्नय इति पदेन नियमतस्त्यागस्य स्तुतिबोधितत्वेन तत्त्यागस्य फलहेतुत्वात्। नच बीजाक्षराणां देवतात्वात् तत्रैव शिवादिपदशक्तिग्रह इति वाच्यम् बीजाक्षराणांचतुर्थ्यन्तत्वानियमात् तदप्रतीतावपि प्रकाशितगणिशेखराद्युपेतसद्दिश्य हविस्त्यागेन तत्रैव याज्ञिकानां व्यवहारः। बीजाक्षराणां हविस्त्यागित्वेनानुद्देश्यत्वात् शिवस्य प्रतिमन्त्रं बीजाक्षराणां नानात्वादननुगमेन तत्तत्पदशक्तिग्रहस्यागत्यत्वाच्च नच मूर्त्तिभेदेन शिवशरीराणामननुगतत्वेन तवापि न शक्तिग्रह इति वाच्यम् वाक्यादिना भिन्नशरीरेषु चैत्रत्वबल्लिवत्वजातेरदृष्टविशेषोपस्थापितस्य चानुगतत्वात् अदृष्टशून्यस्य चेश्वरस्य न देवतात्वम्। ईशानश्च तद्भिन्न एव"।

अविघ्न न० न विघ्नं कार्य्यप्रतिबन्धकम् अभावे न०त०। १विघ्नाभावे "अविघ्नमस्तु तेस्वेयाः पितेव धुरि पुत्रिणाम्" रघुः "अविघ्नमस्तु सावित्र्याः प्रदाने दुहितुस्तव" भा०व०प० न०ब० २विघ्नशून्ये त्रि० "अविघ्नं गच्छ पन्थानम्" रामा०। अर्थाभावे अव्ययी० ३विघ्नाभावे अव्य०।

अविचक्षण त्रि० विरोधे न०त०। विचक्षणभिन्ने मन्दे अपटौ

अविचार पु० विचारः अभावे त०त०। १विचाराभावे "अविचारेण कर्त्तव्यम्" स्मृतिः न०ब०। २विचारशून्ये "अविचारपुरे देशे यः पलायति जीवति" हितो०। अधीनां चारो यत्र। ३मेषचारणयोग्ये देशे न विगतचारो दूतो यस्य न०ब०। ४चारयुक्ते त्रि०। [विवेकाभावेनाऽऽह।

अविचारित त्रि० न विचारितः। इदं कर्त्तव्यं न वेति

अविचाल्य त्रि० न विचाल्यः अन्यथा कार्य्यः। अन्यथाकार्य्याभिन्ने स्थिरैकरूपे। "अविचाल्यमेतदुक्तं तवाग्रज भवता वचः" भा०व०प०।

अविचेतन विशेषेण चेतना विचेतना प्रा०त० न०ब०। विशेषतोज्ञानशून्ये १संज्ञारहिते २नष्टचैतन्ये। "यद्वाग्वदन्त्यविचेतनानि" ऋ०८,१००,१०।

अविच्छिन्न त्रि० न०त०। सन्ते। अविच्छिन्ना तैलधारा।

अविच्छेद पु० न विच्छेदः अभावे न०त०। १विच्छेदाभावे सन्ततौ न०ब०। २विच्छेदशून्ये सन्ते। विच्छेदो नाम एकजातीयद्रव्यगुणादीनामन्यजातीयेन व्यवधानम्।

अविज्ञात त्रि० न०त०। १विशेषेणाज्ञाते "अविज्ञातं तु यत् क्रीतं क्रेता वा यदि वा मृतः" नाविजाते जलाशये" इति च स्मृतिः अर्थनिश्चयशून्ये त्रि०२यदधीतमविज्ञातं निगदेनैव शब्द्यते" इति वेदानु०।

अविज्ञातृ पु० विज्ञाता जीवस्तद्भिन्नत्वात्। १परमेश्वरे जीवेन हि आत्मनि कर्त्तृत्वाभिमानेन ज्ञातृत्वं कल्पितमिति तद्वासनया च तेन कुण्ठीभूयते ईश्वरस्तु ततो विलक्षणः। "अविज्ञाता सहस्रांशुः" विष्णुस० २तत्तद्विषयज्ञातृभिन्ने त्रि० स्त्रियां ङीप्।

अविज्ञेय त्रि० न०त०। १अवेद्ये २इदन्तया विज्ञातुमशक्ये परमेश्वरे पु० स हि प्रमाणान्तरावेद्यतया स्थूलदृष्ट्या न विज्ञेयः।

अविडीन न० न विडीनम्। पक्षिणामभिसख्येन गमने

अवित त्रि० अव-क्त। रक्षिते पालिते च।

अवितथ न० वितथं मिथ्या विरोधे न०त०। सत्ये वचनादौ "तदवितथमवादीर्यन्नाम त्वं प्रियेति" माघः "य आहथोत्यवितथं ब्रह्मणा अवणावुभौ" मनुः २तद्वति त्रि०। "अवितथा वितथा सखि! मा गिरः" माघः।

अवितर्क्य न०तर्कयितुमशक्यः। तर्कयितुमशक्ये १औतार्थे। "अचिन्त्याः खलु ये भावा न तांस्तर्केण बाधयेत्" इत्युक्तेः विपरीततर्केणाबाध्यः औतार्थः। २तर्कमात्रेणाविज्ञेये च।

अवितारिन् त्रि० वितारो विगमोऽस्यास्य न०त० स्त्रियां ङीप्। अनपायिनि "सुमेधामवितारिणीम्"। ऋ०२८, ५,६,। "अवितारिणीम् वितारः विगमनमपायः अनपायिनीम्" भा०।

अविद त्रि० अव-क्विप् स्त्रियां ङीप्। रक्षितरि "सखीयतामविता बोधि सखा" ऋ०४,१७,१८, सा नो बोध्यविती" ऋ०७,९६,२।

अवित्त त्रि० न०त०। १अविख्याते। न०ब०। २धनशून्ये त्रि०

अवित्ति स्त्री विद्-क्तिन् अभावे न०त०। लाभाभावे

"अहमवित्त्यान्यानद्मि" छा० उ० । "अवित्त्याऽलाभेन" भा० । २ज्ञानाभावे च । न०ब० । ३लाभशून्ये ४ज्ञानशून्ये च त्रि०अव्ययी० । ५ज्ञानाभावे ६लाभाभावे च अव्य०

अवित्यज पु० न विशेषेण त्यज्यते रसायनादिषु त्यज–कर्म्मणि बा०क न० त० । पारदे राजनि० ।

अविधुर त्रि० व्यध–उरच् कित् तेन संप्रसारणम् वेदे न वध्र यः न०त० । अविधुरे । "अनानता अविधुरा ऋजीषिणः" ऋ० १,८७,१ । "अविधुरा वियुक्ताः संघीभूता इति भा० लोके तु अविधुरइत्येव ।

अविध्या स्त्री अवये हिता अवि+ध्यन् । अजाहितायां यूथौ

अविदुग्ध न० ६त० । मेषीदुग्धे ।

अविदित त्रि०न विदितः । १अज्ञाते । २परमेश्वरे पु० "अन्यत्र विदितादन्यत्राविदितादधि ऋताऋतादिति" श्रुतिः ।

अविदाहिन् त्रि० न विदाही न० त० । १असन्तापके २अदाहके च ।

अविदूर न०न०त० । १समीपे अनतिदूरे २तद्वर्त्तिनि त्रि० ।

अविदूस न०अवेर्दुग्धम् अवि+दुग्धे दूसच् न वत्वम् । मेषीदुग्धे ।

अविद्वत्कर्णी स्त्री न विद्वः अविद्वद्वः पर्णरूपः कर्णोऽस्याः । पाठान्तरतायाम् ।

अविद्या स्त्री न विद्या विरोधे न०त० । विद्याविरोधिनि १अज्ञाने २ज्ञानाभावे च । अविद्या च न्यायमते ज्ञानाभावः । सांख्यादिमते ज्ञानप्रागभावापरपर्य्यायज्ञानानगतावास्था सा च पञ्चभेदा "अविद्या पञ्चपर्व्वैषा प्रादुर्भूता महात्मनः" इति पुरा० पञ्च पर्व्वाणि च "अविद्याऽस्मितारागद्वेषाभिनिवेशा" इति पात० सूत्रोक्तानि । तत्र "अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या" पात० सू० । व्याख्यातञ्च तद्वृत्तौ यथा अविद्या "अतस्मिन् तद्बुद्धिरित्यर्थः अमरा देवा इत्यनित्येषु नित्यत्वभ्रान्त्या देवत्वार्थं कर्म कृत्वा बध्यन्ते, एवमशुचौ स्त्रीकाये शुचित्वभ्रान्त्या बध्यन्ते तदुक्तं भगवता व्यासेन "स्थानाद्बीजादुपष्टम्भान्निष्यन्दाभिनादपि । कायमाधेयशौचत्वात् पण्डिताश्चाशुचिं विदुरिति" विस्रं त्वसृङ् मांसरुदरं स्थानं, शुक्रशोणितं बीजम्, अन्नपरिणामस्रेहादिरुपष्टम्भः सर्वद्वारैर्मलानां स्रवणं निष्यन्दः । निधनं मरणम् । तेन हि शोणितकायोत्पत्तावशुचिर्भवति आधेयशौचत्वं स्नानानुलेपनादिना शुचित्वापादनम् । तथा परिणामदुःखे भोगे सुखत्वभ्रान्तिः अनात्मनि बुद्ध्यादावात्मख्यातिः अविद्या तत्त्वविद्याविरोधिनीत्यर्थः । यद्यपि शुक्तिरूपादाविद्याः सन्ति तथापि पञ्चविधैवाविद्या बन्धमूलमितिभावः" इयमविद्याऽद्वैतत्वेन नैयायिकैरङ्गीकृता "इत्येषा सह कारिशक्तिरसमा माया दुरतीतितो मूलत्वात् प्रकृतिः प्रबोधभयतोऽविद्येति यस्योदिता" कुसु० "यस्मै यस्य सहकारि शक्तिः कारणम् एषा सहकारिरूपा माया असमत्वात् सर्व्वकार्य्यापेक्षणीयत्वात् दुरन्नेयत्वसाद्दश्यात् मायापदेऽदृष्टे लक्षणा । मूलत्वात् प्रकृतिः सैव, तत्त्वज्ञानप्रतिबध्यत्वात् सैवाविद्या उदिता उक्ता" हरिदासः । क्षणिकविज्ञानवादिनस्तु "अभिन्नोऽपि हि बुद्ध्यात्मा विपर्य्यासनिदर्शनैः । ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते" इत्युक्तदिशा क्षणिकविज्ञानमेवैकं तत्त्वं बाह्यं वस्तु नास्ति तथाहि बाह्यपदार्थाभावेऽपि मिथ्याज्ञानरूपयाऽविद्यया सर्व्वं वस्तु कल्पितमित्याहुः । तदेतत् सांख्ये निराकृतम् । यथा "नाविद्यातोऽप्यवस्तुना बन्धायोगात्" सू० "अविद्यातोऽपि न साक्षाद्बन्धयोगः अद्वैतवादिनां "तेषामविद्याया अध्यासत्वेन तया बन्धायोगात् न हि स्वाप्नरज्ज्वा बन्धनं दृष्टम् । नच "न निरोधो न चोत्पत्तिर्न बन्धो न च साधकः । न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता" इति "बन्धमोक्षौ मृषा दुःखं मोहापत्तिश्च मायया । स्वप्ने यथात्मनःख्यातिः संसृतिर्न तु वास्तवी" इतिवोक्तेः बन्धोऽप्यवास्तव इति वाच्यम् विज्ञानाद्वैतश्रवणोत्तरं बन्धनिवृत्तये योगाभ्यासविरोधात् बन्धमिथ्यात्वश्रवणेन बन्धनिवृत्त्यासिद्धत्व निश्चयात् तदर्थं बद्धायाससाध्ययोगाङ्गानुष्ठानासम्भवात्" भा० "वस्तुत्वे सिद्धान्तहानिः" सू० "यदि चाविद्याया वस्तुत्वं स्वीक्रियते तदा स्वाभ्युपगतस्वाविद्याद्वैतस्य हानिः" भा० । "विजातीयद्वैतापत्तिश्च" सू० । "किञ्चाविद्याया वस्तुत्वे क्षणिकविज्ञानसन्तानाद्विजातीयम् द्वैतं प्रसज्यते तच्च भवतामनिष्टम् । सन्तानान्तःपातिव्यक्तीनामानन्त्यात् सजातीयं द्वैतमिष्यतएव तैरित्याग्रहेण विजातीयेति । नन्वविद्याया अपि ज्ञानविशेषत्वादविद्यया कथं विजातीयद्वैतमिति चेन्न ज्ञानरूपाविद्याया बन्धोत्तरकालीनतया वासनारूपाविद्याया एव तैर्बन्धहेतुत्वाभ्युपगमात् । वासना तु ज्ञानाद्विजातीयेतिभावः" भा० । "नासद्रूपा न सद्रूपा माया नैवोभयात्मिका । सदसद्भ्यामनिर्वाच्या मिथ्याभूता सनातनी" त्युक्तिमनुसृत्याह शङ्कते "विरुद्धोभयरूपा चेत्" सू० "विरुद्धं यदुभयं सदसच्च ततो विलक्षणं वा तद्रूपैवाविद्या वक्तव्या अतो न तया पारमार्थिकाद्वैतभङ्ग इति चेदित्यर्थः । व्यक्ताव्यक्तरूपसदसत्तयोः स्वमतसिद्धयोर्विरोधोनास्तीति

सूचनाय विरुद्धेतिपदम्" भा० दूषयति । "न तादृक्पदार्थाप्रतीतेः" सू० । विरुद्धधर्मवत्पदार्थस्यासिद्धेरित्यर्थः। अपि चाविद्यायाः साक्षादेव दुःखयोगाख्यबन्धहेतुत्व ज्ञानेन विद्यानन्तरं प्रारब्धभोगानुपपत्तिः बन्धपर्य्यायस्य दुःखभोगस्य कारणनाशात् । अस्मदादिमते तु नायं दोषः संयोगद्वारैवाविद्याकर्मादीनां बन्धहेतुत्वात् जन्माख्यः संयोगः प्रारब्धसमाप्तिं विना न नश्यति"भा० । पुनः शङ्कते । "न वयं षट्पदार्थवादिनो वैशेषिकादिवत्" सू० "वैशेषिकाद्यास्तिकवच्च वयं षट्षोड़शादिनियत पदार्थवादिनः । अतोऽप्रतीतोऽपि सदसदात्मकः सदसल्लक्षणो वा पदार्थोऽविद्येत्यभ्युपेयमिति भावः" भा० । परिहरति । "अनियतत्वेऽपि नायौक्तिकस्य संग्रहोऽन्यथा वा लोनूमत्तादिसमत्वम्" सू० । "पदार्थनियमोमास्तु तथापि भावाभावविरोधेन युक्तिविरुद्धस्य सदसदात्मकपदार्थस्य संग्रहो भवद्वचनमात्राच्छिष्याणां न सम्भवति । अन्यथा बालकाद्युक्तस्याप्ययौक्तिकस्य संग्रहः स्यादित्यर्थः । श्रुत्यादिकमस्मिन्पक्षे स्फुटं नास्ति युक्तिविरोधेन च सन्दिग्धश्रुतेरर्थान्तरसिद्धिरिति भावः"भा० । एवं क्षणिकविज्ञानवादनिरसनेन वेदान्तिसम्मतावाविद्याऽपि प्रकृतिरेवेति तत्रैव व्यवस्थापितम् । यथा "पारम्पर्येऽप्येकत्र परिनिष्ठेति संज्ञामात्रम्"सू० ॥ "अविद्यादिद्वारेण परम्परया पुरुषस्य जगन्मूलकारणत्वेऽप्येकस्मिन्नविद्यादौ यत्र कुत्रचिन्निष्ठे द्वारे परम्परायाः पर्य्यवसानं भविष्यति पुरुषस्यापरिणामित्वात् । अतो यत्र पर्य्यवसानं सैव नित्या प्रकृतिः । प्रकृतिरिह मूलकारणस्य संज्ञामात्रमित्यर्थः" भा० ॥ नन्वेवं अविद्या स्थानीय प्रकृतेर्नित्यत्वानुपपत्तेस्तस्या उत्पत्तिश्रुतेर्ज्ञाननाश्यत्वाच्चेत्याशयेन मूलसमाधानमाह । "समानः प्रकृतेर्द्वयोः" सू० ॥ "वस्तुतस्तु प्रकृतेर्मूलकारणविचारे द्वयोर्वादिप्रतिवादिनोरावयोः समानः पक्षः । एतदुक्तं भवति यथा प्रकृतेरुत्पत्तिः श्रूयते एवमविद्याया अपि । "अविद्या पञ्चपर्वेषा प्रदुर्भूता महात्मनः" इत्यादिवाक्यैः । अत एकस्या अवश्यं गौण्युत्पत्तिर्वक्तव्या । तत्र च प्रकृतेरेव पुरुषसंयोगादिभिरभिव्यक्तिरूपा गौण्युत्पत्तिर्युक्ता । "संयोगलक्षणोत्पत्तिः कथ्यते कर्मज्ञानयोरिति" कौर्मवाक्ये प्रकृतिपुरुषयोर्गौणोत्पत्तिस्मरणात् । अविद्यायाश्च क्वापि गौणोत्पत्त्यश्रवणात् । तस्या अनादितावाक्यानि तु प्रवाहरूपेणैव वासनाद्यनादिवाक्यवद्व्याख्येयानीति । अविद्या च मिथ्याज्ञानरूपा बुद्धिधर्म इति योगे स्खलितमतो न नित्यत्वहानिः । अथ वा द्वयोः प्रकृतिपुरुषयोः समान एव न्याय इत्यर्थः । "यतः प्रधानपुरुषौ यतश्चैतच्चराचरम् । कारणं सकलस्यास्य स नो विष्णुः प्रसीदतु" इत्यादिवाक्यैः पुरुषस्याप्युत्पत्तिश्रवणादिति भावः । तथा च पुरुषस्येव प्रकृतेरपि गौण्येवोत्पत्तिः नित्यत्वश्रवणात्तदपि समानमिति । तस्मात् प्रकृतिरेवोपादानं जगतः प्रकृतिधर्मश्चाविद्या जगन्निमित्तकारणं तथा पुरुषोऽपीति सिद्धम् । यत् तु । "अविद्यामाहुरव्यक्तं सर्गप्रलयधर्मिणम्" सर्गप्रलयनिर्मुक्तं विद्यां वै पञ्चविंशकम्" इति मोक्षधर्मे प्रकृतिपुरुषयोरविद्याविद्येति वचनं तत् तदुभयविषयतयोपचरितमेव। परिणामित्वेन हि पुरुषापेक्षया प्रकृतिरसतीति तस्या अविद्याविषयत्वमुक्तम् । एवमेव तस्मिन् प्रकरणे स्वस्वकारणापेक्षया भूतान्तं कार्यजातमविद्येत्युक्तं स्वस्वापेक्षया च स्वस्वकारणं विद्येति । पुरुषस्य परिणामरूपं जगदुपादानत्वं तु प्रकृत्युपाधिकमेव कर्तृत्वादिवच्छ्रुतिस्मृत्योरुपासार्थमेवानूद्यते । अन्यथा "अस्थूलमनण्वह्रस्वमित्यादि" श्रुतिविरोधापत्तेरिति मन्तव्यम् । मायाशब्देन च प्रकृतिरेवोच्यते "मायां तु प्रकृतिं विद्यादिति" श्रुतौ "तस्मान्मायी सृजते विश्वमेतत्" "तस्मिंश्चान्यो मायया सन्निरुद्धः"इति पूर्वप्रक्रान्तमायायाः प्रकृतिस्वरूपतावचनात् । "सत्त्वं रजस्तम इति प्राकृतं तु गुणत्रयम् । एतन्मयी च प्रकृतिर्माया या वैष्णवी श्रुता" ॥ "लोहितशुक्लकृष्णेति तस्यास्ताद्रूपभेदतः प्रजाः" इत्यादिस्मृतिभ्यश्च । न तु ज्ञाननाश्याविद्या मायाशब्दार्थो नित्यतानुपपत्तेः । किञ्चाविद्याया द्रव्यत्वे शब्दमात्रभेदो गुणत्वे च तदाधारतया प्रकृतिसिद्धिः पुरुषस्य निर्गुणत्वादिभ्यः । अथ द्रव्यगुणकर्मविलक्षणैवाख्याभिरविद्या वक्तव्येति चेन्न तादृक्पदार्थाप्रतीतेरुक्तत्वादिति" भा० । वेदान्तिनस्तु ज्ञानविरोधि अज्ञानापरपर्य्यायं पदार्थान्तरमविद्येति स्वीचक्रुः तच्च विस्तरेण अज्ञानशब्दे ८२ पृष्ठे दर्शितम् । इयञ्चाविद्या मूलाविद्यातूलाविद्याभेदेन द्विविधा । तत्र हिरण्यगर्भोपाधिर्मूलाविद्या तूलाविद्याश्च प्रतिजीवभेदं नाना मायाशब्देनाभिधीयन्ते । "मायोपाधिरयं जीवः अविद्योपाधिरीश्वर" इत्युक्तेः "इन्द्रोमायाभिः पुरुरूपईयते" इतिश्रुतेश्च तथात्वम् । मायानाञ्च मूलाविद्याकार्य्यत्वात् अविद्याशब्दवाच्यताऽपि । अतएव आविद्यिको जीव इति तत्तत्स्थाने भाष्यकारादिभिरुक्तम् । अस्यानःकरणरूपाविद्योपाधौ तत्त्वज्ञाने सत्युत्पन्ने तदीयैवाविद्या निवर्त्तते नान्यत्र इत्येकदेशी न सर्वमुक्ति-

रिति बन्धमोक्षव्यवस्था । अधिकमाकरे द्रष्टव्यम् । वैशेषिकास्तु विपर्ययसंशयज्ञानमविद्येत्याहुः तत्कारणप्रदर्शनपूर्वकमविद्या लक्षिता वै० सू० उपस्कारे च यथा "इन्द्रियदोषात् संस्कारदोषाच्चाविद्या" ॥ "अविद्येति सामान्यवाच्यपि पदं विपर्यये वर्त्तते प्रकरणात् संशयस्वज्ञानाध्यवसायानामुक्तत्वात्, तत्रेन्द्रियदोषोवातपित्तादभिभवक्लमपाटवम्, संस्कारदोषोविशेषादर्शनसाहित्यं तदधीनं हि मिथ्याज्ञानं जायते" ॥ "तच्च दुष्टज्ञानम्" सू० ॥ तदिदमव्ययपदं सर्व्वनामसमानाधिकमविद्यां पराहृशति' साऽविद्या, दुष्टज्ञानं व्यभिचारि ज्ञानमतस्किंस्तदितिज्ञानं व्यधिकरणप्रकारावच्छिन्नविशेष्याद्वत्तिप्रकारकमिति यावत्, दोषश्च ज्ञानस्वानिष्यरूपत्वमपि, तेनैककोटिसत्वेऽपि संशयोदुष्ट एवानवधारणात्मकत्वात्' तदनेन संशयोविपर्ययश्चस्वज्ञानाध्यवसायानाञ्चतुर्णामप्युपसंग्रहः" उप० ॥ "विद्याविद्याद्वैविध्यात् संशयः" गो० सू० । नास्ति विद्या शास्त्रादिज्ञानं यस्य । २शास्त्रादिज्ञानशून्ये त्रि० "अविद्यो वा सविद्यो वा ब्राह्मणो सामकी तनुः" छुरा० । "वैद्योऽविद्याय नाकामो दद्यादंशं स्वतो धनात्" दा० भा० स्मृतिः । "अविद्यानान्तु सर्व्वेषामीक्षातश्चेदनं भवेत्' मनुः" ।

अविद्वेष पु० अभावे विरोधे वा न० त० । १विद्वेषाभावे २अनुरागे च । न० ब० । ३विद्वेषशून्ये ४अनुरागयुक्ते च त्रि० ।

अविधवा स्त्री विरोधे न० त० । सधवायां पतिवत्यां स्त्रियाम् "इमा नारीरविधवाः सपत्नीः" ऋ० १०,१८ ।

अविधा स्त्री अभावे न० त० । प्रकाराभावे न० ब० । प्रकारशून्ये

अविधान न० अभावे न० त० । १विधानाभावे २इतिकर्त्तव्यताक्रमाद्यभावे । "अविधानेन यत् कुर्य्यात् तत्सर्व्वं विफलं भवेत्" स्मृतिः न० ब० । ३विधानशून्ये त्रि० ।

अविधि पु० अभावे न० त० । विध्यभावे इतिकर्त्तव्यताक्रमाद्यभावे न० ब० । विधानशून्ये त्रि० ।

अविन पु० अवति यज्ञम् अव–इनन् । अध्वर्य्यौ उज्ज्व० ।

अविनय पु० अभावे न० त० । १विनयाभावे । विरोधे न० त० । २दुर्नये । "अविनयमपनय विष्णो" शङ्करा० "अहवोऽविनयाच्चष्टा राजानः सपरिच्छदाः" "वेणोविनष्टोऽविनयाच्चक्षुषश्चैव पार्थिवः" इति च मनुः न० ब० । "विनयशून्ये त्रि० ।

अविनश्वर त्रि० विरोधे न० त० । १विनश्वरभिन्ने चिरस्थायिनि, २कूटस्थे परमेश्वरे पु० ।

अविनाभाव पु० विना व्यापकत्वते न भावः स्थितिः अस० स० । १व्यापकस्थित्यनुरोधिसत्तारूपायां व्याप्तौ । २सम्बन्धमात्रे च "अविनाभावोऽत्र सम्बन्धमात्रम्" काव्यप्र० "अथ ज्ञेयमाकाङ्क्षा न तावत् अविनाभावः" इति शब्दचिन्ता० ।

अविनाभाविन् त्रि० न विना व्यापकम् भवति भू–णिनि । व्याप्ये "व्यक्त्यविनाभावित्वात्तु ज्ञात्वा व्यक्तिराश्रियते" का० प्र० ।

अविनाभूत त्रि० न विना व्यापकत्वते भूतः । १व्याप्ये २संबन्धमात्रे च "अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते" का० प्र० । ["अविनाशी वा अरे अयमात्मा" श्रुतिः ।

अविनाशिन् त्रि० न विनाशी स्त्रियां ङीप् । अविनश्वरे नित्ये

अविनीत त्रि० न विनीतः । १विनयशून्ये २कुत्सितक्रियानुरते ३उद्धते ४अदान्ते च । "वदते विनीतमविनीतमाशिभिः" माघः । ५अशिक्षिते च "नाविनीतैर्न्नेतृभिर्न च क्षुद्रैरधिष्ठितैः" मनुः । ६कुलटायां स्त्री ।

अविनीय पु० विनीयः कल्कः कपटश्च न० ब० । कपटशून्ये "अविनीयसंभ्रमविकाशिभक्तिभिः" माघः ।

अविनेय त्रि० न विनेतुं शक्यः । दुर्दमे अशक्ते ।

अविन्ध्य पु० राक्षसभेदे हरिवंशे विवरणम् ।

अविपट अवीनां विस्तारः अवि+पटच् । मेषविस्तारे ।

अविपश्चित् पु० विरोधे न० त० । विचारशून्ये तात्पर्य्यज्ञानशून्ये २अविवेकिनि च ।

अविपाक पु० विशेषेण पच्यते फलरूपेण वि+पच घञ् न० त० । फलरूपेणापरिणते १धर्म्माधर्म्मादौ । "विपाकश्च जात्यायुर्भोगाः" इति पातञ्जले उक्तः तद्भोगेनापरिणामश्च फलरूपतयाऽनाविर्भावः विहितविहितकर्म्मणोविशिष्टदेशकालनियतत्वात् यदा कर्म्म बलीयसा प्रतिबद्धं तदा तत् कर्म अविपाक इत्युच्यते । विपाकः अन्नादेः पाकः अभावे न० त० । सुश्रुतोक्ते १पाकाभावे २"अरोचकाविपाकौ तु गर्करास्थे भवन्ति च" । नास्ति विपाको यत्र । अग्निमान्द्यहेतुके २रोगभेदे च "एतद्व्यायसमेतेन जाड्यं न भवति सन्नोऽग्निराप्यायते दुर्नामशोफपाण्डुकुष्ठरोगाविपाककासश्वासप्रमेहाश्च न भवन्ति" सुश्रुतः ।

अविपाल त्रि० अवीन् पालयति पा–णिच् क उप० स० । मेषपालके ।

अविपुल त्रि० विरोधे न० त० । विपुलभिन्ने क्षुद्रे ।

अविप्रकृष्ट त्रि० विरोधे न० त० । सन्निकृष्टे ।

अविप्रिय पु० अवीन् मेषान् प्रीणाति प्री–क । १श्यामाकवृक्षे विप्रियमपकारः न० त० । २अनपकारे ३आहुकूल्ये ।

न०व० । ४अपकारशून्ये त्रि० । ५मुखेतालतायां स्त्री ।

अविप्लुत त्रि० न विप्लुतः नष्टः । अविनष्टे "अविप्लुतब्रह्मचर्य्यः सवर्णां स्त्रियमुद्वहेत्" स्मृतिः ।

अविभक्त त्रि० वि+भज–क्त न०त० । १संसृष्टे विभागरहिते २द्रव्ये ३तत्स्वामिनि च । "अविभक्तं स्थावरं यत् सर्व्वेषामेव तद्विदुरिति" "अविभक्ता विभक्ता वा सपिण्डाः स्थावरे समाः" इति च स्मृतिः । ४अभिन्ने एकभावापन्ने ५अर्थे ६अव्याहते अधिष्ठानतया ७सर्व्वत्रानुस्यूते बाधाशून्यत्वेन स्वस्मिन् ७वर्त्तमाने च ।

अविभावित त्रि० न विभावितः । २अलक्षिते २अचिन्तिते साक्षिप्रभृतिप्रमाणादिना २स्वकीयत्वेनानुद्भाविते स्वरूपेण ४अज्ञापिते च ।

अविमुक्त त्रि० वि+मुच–क्त न०त० । १मुक्तभिन्ने । "न विमुक्तं शिवाभ्यां यदविमुक्तं ततो विदुः" इत्युक्तलक्षणे २काशीक्षेत्रे न० । ३भ्रूभुंचिबुकान्तरालस्थाने च । "यएषोऽनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठितः" इति जाबा०उ० । "आमनन्ति चैनमस्मिन्" भा० शु० । "आमनन्ति चैनं परमेश्वरमस्मिन् भ्रूभुंचिबुकान्तराले" भा० इत्यमेव श्रुतिं केचित् काशीविषयतया वर्णयन्ति वाक्यशेषे "अविमुक्तः कस्मिन् प्रतिष्ठित" इति प्रश्ने नासीवरणानाम्न्यस्थितत्वप्रत्यभिज्ञानात् । "अपरोक्षवचना देवा इत्युक्तेः असीतिवक्तव्ये नाशीतिवर्षव्यत्यय इति तेषामाशयः । अविमुक्तक्षेत्रञ्च असीवरणयोर्मध्ये गङ्गापश्चिमतटस्थं परितः पञ्चक्रोशात्मकम् । तद्विवरणं काशीखण्डेऽनुसन्धेयम् ।

अवियोग पु० अभावे न०त० । १वियोगाभावे । विरोधे न०त० । २संयोगे । न०व० । ३वियोगशून्ये ४संयुक्ते च । वियोगः विच्छेदः संयोगाभावः विभागश्च ।

अवियोगव्रत न० अवियोगार्थं व्रतम् । मार्गशीर्षशुक्लतृतीया कर्त्तव्ये स्त्रीणां व्रतभेदे "अवैधव्यप्रदं स्त्रीणामवियोगव्रतं त्विदम् । मार्गशीर्षे सिते पक्षे स्नातो शुक्लाम्बरप्रिया । हृदा चन्द्रं द्वितीयायां नक्तं भुञ्जीत पायसं" मित्युपक्रम्य कालिकापुराणे दर्शितम् । तद्विधिश्च हेमा० व्र०ख० तृतीयाव्रतप्रकरणे उक्तरीत एवावसेयः ।

अविरण न० विरमणं विनाशः अभावे न०त० वेदे मस्य नुक् । विनाशाभावे "सद्यो जातोऽविरणाय पूर्व्वीः" ऋ० १,१७४,८ "अविरणाय अविनाशाय" भा० ।

अविरत न० विरतं विरामः भावे क्त अभावे न०त० । १विरामाभावे नैरन्तर्य्ये । कर्त्तरि क्त न०त० । २विरामशून्ये २सन्तते द्रव्यादौ त्रि० क्रियाविशेषणत्वे न० । ४कार्य्यादनिवृत्ते त्रि० । "अविरतदयिताङ्गसङ्गसञ्जारितेन" माघः ।

अविरति स्त्री विरामो विरतिः भावे क्तिन् अभावे न०त० । १निवृत्त्यभावे २विषयादौ–स्थिरचित्ततायाम् ३विरामाभावे च न०व० । ४विरामशून्ये त्रि० ।

अविरल त्रि० न विरलः न०त० । घने, निबिड़े । विरलता च विच्छित्तिः तद्विपरीतं निबिड़त्वं मध्येऽविच्छेदः ।

अविराम पु० अभावे न०त० । १विरामाभावे २विच्छेदाभावे । न०व० । ३विरामशून्ये ४सन्तते च त्रि० "अनिमिषमविरामा रागिणां सर्व्वरात्रम्" माघः ।

अविरुद्ध त्रि० । न० त० । १विरुद्धभिन्ने २विरोधशून्ये ३एकत्रसद्भावस्थायिनि ४अप्रतिबद्धे च ।

अविरोध पु० विरोधः सहानवस्थानमेकदेशे समावेशो वा अभावे न०त० । सहानवस्थानाभावे १एकत्रावस्थाने २एकत्र समावेशे च । "श्रुतिस्मृतिविरोधे च श्रुतिरेव गरीयसी । अविरोधे तयोः कार्य्यं स्मार्त्तं वैदिकवत् सदा, स्मृतिः "सर्व्वेषामविरोधेन ब्रह्मकर्म समारभेत्" पुरा० "श्रेयं वाऽविरोधात्" काद्या० २।६।२६। "नाविरोधात्" काद्या०५।१।१।८ । ३विवादाभावे च ।

अविलक्षण त्रि० विलक्षणो भेदकधर्म्माश्रयः विरोधे न०त० । १तुल्यरूपे २भेदकधर्म्मशून्ये ।

अविलक्ष्य त्रि० नास्ति विशेषेण लक्ष्यं व्याजः उद्देश्यं शरव्यं वा यस्य । १व्याजशून्ये २उद्देश्यशून्ये ३शरव्यशून्ये ४प्रतिकारशून्ये च "अविलक्ष्यमस्त्रमपरं कृतम्" किरा० । "अविलक्ष्यमसत्प्रतिकारम्" मल्लि० ।

अविलम्ब न० अभावे न०त० । १विलम्बाभावे शीघ्रे । न०व० । २विलम्बशून्ये त्रि० विलम्बश्च कार्य्योत्पत्तिसाधककालप्रागभावः । तच्छून्यः अविलम्बः ।

अविलम्बित त्रि० वि+लबि–क्त न०त० । विलम्बशून्ये १त्वरायुक्ते द्रव्यादौ क्रियाविशेषणत्वे न० । "अविलम्बितो द्वितीयः" काद्या० १०,१,८, ।

अविला स्त्री अव–इलच् । मेष्याम् १नास्ति विलं यस्याः । २गर्त्तशून्ये त्रि० । [न०व० । ३तच्छून्ये त्रि० ।

अविलास पु० अभावे न०त० । १विलासाभावे २अप्रकाशे

अविवक्षित त्रि० न विवक्षितः । १वक्तुमनिष्टे २तात्पर्य्यविषयीभूते "वक्तव्यमविवक्षितमिति रघु० ।

अविवर त्रि० नास्ति विवरं छिद्रं यस्य । नीरन्ध्रे घने ।

अविवाद्य न० नास्ति विशेषेण वाद्यो मन्त्रादिः यस्य ।

ज्योतिष्टोमसंस्थे दशमाहे "अत्यग्निष्टोमोऽविद्याच्यं दशमम्" कात्या० १२,२,२१, । "अत्यग्निष्टोमसंस्थमविद्याच्यं दशममहर्भवति" कर्क० । "नाक्षिन्नहनि केनचित् कस्यचित् विद्याच्यमविद्याच्यमित्याचक्षते" आश्व० श्रौ० २,१२,१० । अक्षिन्नहनि केनचित् कस्यचित् कर्त्रे मन्त्रः कर्म्म वा न विद्याच्यं नाख्यावव्यमित्यर्थः कुतः ? यस्मादेतदहः अविद्याच्यमिति श्रुतौ प्रसिद्धम् परस्परमविरुद्धनीयमेतस्मिन्नहनीत्यविद्याच्यमिदमहर्भवति ।

अविवाद पु० विरुद्धो वादः कथनं व्यवहारभेदः विरोधश्च अभावे ३न० त० । १,विरुद्धवादाभावे ऐक्यमत्ते २अव्यवहारे ३विरोधाभावे च न० ब० ४तच्छून्ये त्रि० । [विवाहसंस्कारे।

अविवाहित त्रि० न० त० । विवाहितभिन्ने अनूढे अजात-

अविविक्त त्रि० न० त० । १एकीभूते २विवेकशून्ये ३अन्योन्यतादात्म्यापन्ने "तत्प्रायःपिण्डवदविविक्तं सत् तदेव महावाक्यस्य वाच्यार्थो भवति" वेदान्तसा० ।

अविवेक पु० न विवेकः भेदकधर्म्मेण ज्ञानम् अभावे न० त० । अन्योन्यतादात्म्यारोपहेतौ १विशेषज्ञानाभावे इति नैयायिका। विरोधे न० २अन्योन्यतादात्म्यज्ञानरूपे मिथ्याज्ञाने "तद्योगोऽप्यविवेकात्" सा० सू० । "अवद्याविवेकोऽष्टधोतासंसर्गकसभवज्ञानमविद्यास्वलाभिधिक्तं विवक्षितः" "बन्धोविपर्य्यात्" विपर्ययभेदाः पञ्च "इत्यागामिसूत्रद्वयात्" "तस्य हेतुरविद्येति" योगसूत्रेऽप्यविद्याया एव पञ्चपर्व्वरूपाया बुद्धिपुरुषसंयोगहेतुतया वचनाद्यान्यथाख्यात्यनभ्युपगमएव योगतोऽत्र विशेषोचित्यात् । न पुनरविवेकोऽत्राभावमात्रं विवेकप्रागभावो वा मुक्तस्यापि बन्धापत्तेः जीवन्मुक्तस्यापि भाविविवेकव्यक्तिप्रागभावेन धर्माधर्म्मोत्पत्तिद्वारा पुनर्बन्धप्रसङ्गाच्च । तथागामिसूत्रस्थध्वान्तदृष्टान्तानुपपत्तेः अभावस्य ध्वान्तवदावरकत्वाभावात् । तथा दृङ्निदर्शनावविवेकस्य श्रूयमाणौ नोपपद्येयातामिति । अत्रोच्यते च वासनात्मकस्यैवाविवेकस्य संयोगाख्यजन्महेतुतया तमोवदावरकत्वदृङ्निदर्शनादिकमप्युपपद्यते । "तस्य हेतुरविद्येति" पातञ्जलसूत्रे च भाष्यकारैरविद्याशब्देनाविद्याबीजं व्याख्यातम् ज्ञानस्य 'संयोगोत्तरकालीनत्वेन संयोगाजनकत्वादिति । अपि च "पुरुषः प्रकृतिस्थो हि भुङ्क्ते" इत्यादिवाक्येऽभिमानाख्यसंयोगस्यैव प्रकृतिस्थताख्यसंयोगहेतुतावगम्यते । अत एव चाविद्या नाभावोऽपि तु विद्याविरोधिज्ञानान्तरमिति योगभाष्ये व्यासदेवैः प्रयत्नेनावधृतम् । तस्मादविवेकाविद्ययोस्तुल्ययोगक्षेमतयाऽविवेकस्यापि ज्ञानविशेषत्वमिति सिद्धम् । अयं चाविवेकस्त्रिधा संयोगाख्यजन्महेतुः साक्षात्,धर्माधर्म्मोत्पत्तिद्वारा, रागादिद्वारा च भवति" सां० प्र० भा० । अधिकमविद्याशब्दे द्रष्टव्यम् । [शून्ये ।

अविवेचक त्रि० न० त० । विवेचकभिन्ने कार्य्याकार्य्यविवेचना

अविवेन त्रि० "वेनतिः कान्तिकर्म्मा" निरु० वि+वेन-अच् न० त० । विगतेच्छभिन्ने इच्छारहिते । "मनसाऽविवेनं तमित् सखायम्" ऋ० ४,२४,६,। "अविवेनमिच्छाविगमन्यून्यम्" भा०

अविशङ्का स्त्री विशेषेण शङ्का अभावे न० त० । १विशेषशङ्काभावे । न० ब० २विशङ्कारहिते त्रि० ।

अविशङ्कित त्रि० वि+शकि-कर्त्तरि क्त, विशङ्का जाताऽस्य इतच् वा न० त० । १विशङ्कारहिते । "विद्ध्यादविशङ्कितः" स्मृतिः । २अजातशङ्के च ।

अविशस्तृ त्रि० न विशस्ता विशसने कुशलः । यज्ञियपशुहिंसनेऽनिपुणे शमितरि "मा ते रुद्रस्याविशस्तातिहाय" ऋ० १,१६२,२० ।

अविशुद्ध त्रि० विरोधे न० त० । विशुद्धभिन्ने सदोषे ।

अविशुद्धि स्त्री विरोधे न० त० । शुद्धिविपरीते दोषे "सङ्ग्रहविशुद्धिजयातिशयवत्त्वः" सां० का० । अविशुद्धिहिंसादोषसाधनता यथोक्तम् "अविशुद्धिः सोमादिवाक्यस्य पशुवीजादिवधसाधनता यथाह स्म भगवान् पञ्चशिखाचार्य्यः "खल्वध्वरः सपरिहारः सप्रत्यवमर्षः" इति । खल्वध्वरः ज्योतिष्टोमादिजन्यः प्राधानापूर्व्वस्य खल्वेन पशुहिंसादिजन्यनानर्थहेतुना अपूर्वेण अध्वरः । सपरिहारः कियतापि प्रायश्चित्तेन परिहर्त्तुं शक्यः । अथ प्रमादतः प्रायश्चित्तमपि नाचरितं प्रधानकर्म्मविपाकसमये च पच्यते तथापि यावदसावनर्थं कृते तावत् सप्रत्यवमर्षः प्रत्यवमर्षेण सहिष्णुतया सह वर्त्तत इति । हन्यन्ते हि पुरुषसन्मारोपनीतस्वर्गसुधामहाह्रदावगाहिनः कृतस्नाः पापमालोपमादितां दुःखवल्लिकणिकाम् । न च "मा हिंस्यात् सर्व्वाभूतानीति सामान्यशास्त्रं विशेषशास्त्रेण 'अग्नीषोमीयं पशुमालभेतेत्यनेन" बाध्यत इति युक्तं विरोधाभावात् विरोधे हि बलीयसा दुर्बलं बाध्यते । न चेहास्ति कश्चित् विरोधः भिन्नविषयत्वात् । तथा हि "मा हिंस्यादिति" निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते न त्वकृत्यत्वमपि 'अग्नीषोमीयं पशुमालभेत" इत्यनेन तु पशुहिंसायाः कृत्यत्वमुच्यते न त्वनर्थहेतुत्वाभावस्तया सति वाक्यभेदप्रसङ्गात् न चानर्थहेतुत्वकृतुपकारकत्वयोः कश्चिदस्ति विरोधः । हिंसा

हि पुरुषस्य दोषमावक्ष्यति कर्तोपरिकरिष्यति" सा०कौ०। इति सांख्या मन्यन्ते मीमांसका वेदान्तिनश्च वैधहिंसाया अनर्थहेतुत्वं निराचक्रुः तच्च शा०स्थले तद्भाष्ये च प्रपञ्चेनोक्तम् तत्तु ४४२ पृष्ठे उदाहृतम्।

अविशेष पु० विशेषोभेदकधर्म्मः अभावे न०त०। १भेदकधर्म्माभावे "वायुमब्दादविशेषविशेषाभ्याम्" भा०सू०। २अभेदे ऐक्ये च। न०ब०। ३विशेषशून्ये तुल्ये त्रि० सांख्यादिमतसिद्धेषु शान्तत्वघोरत्वमूढत्वरूपविशेषशून्येषु स्थूलभूतोपादानेषु ४सूक्ष्मभूतेषु। तानि च तन्मात्राणि यज्जातीयेषु शान्तादिविशेषत्रयं न तिष्ठति तज्जातीयानां शब्दस्पर्शरूपरसगन्धानामाधारभूतानि सूक्ष्मद्रव्याणि स्थूलानामविशेषाणि। "तस्मिंस्तस्मिंस्तु तन्मात्रास्तेन तन्मात्रता स्मृता। न शान्ता नापि घोरास्ते न मूढाश्चाविशेषिणः" इति विष्णुपुराणादिभ्यः। अस्यायमर्थः तेषु तेषु भूतेषु तन्मात्रास्तिष्ठन्तीति ज्ञात्वा धर्म्मधर्म्यभेदाद्द्रव्याणामपि तन्मात्रता स्मृता। ते च पदार्थाः शान्तघोरमूढाख्यैः स्थूलगतशब्दादिविशेषैः शून्या एकरूपत्वात्। तथा च शान्तादिविशेषशून्यशब्दादिमत्त्वमेव भूतानां शब्दादितन्मात्रत्वमित्याशयः। अतोऽविशेषिणोऽविशेषसंज्ञिता इति शान्तं सुखात्मकं, घोरं दुःखात्मकं, मूढं मोहात्मकम्। तन्मात्राणि च देवादिभात्रभोग्यत्वेन केवलं सुखात्मकान्येव सुखाधिक्यादिति" सां०प्र०भा०। नन्मात्रास्वविशेषाः" सां०का० तत्सत्त्वे च प्रमाणं तन्मात्रशब्दे दर्शयिष्यते। नित्ययोगे इनि। अविशेषोऽस्यपि तन्मात्रे।

अविशेषज्ञ त्रि० विशेषं न जानाति ज्ञा-क नञ्स०स०। विशेषानभिज्ञे भेदकधर्म्मानभिज्ञे।

अविशेषित त्रि० न विशेषितः भेदकधर्म्मेण। यस्य इतरस्मात् विशेषेण व्यावृत्तिर्न ज्ञता तस्मिन् पदार्थे। [२अविशिष्टे च

अविश्रान्त त्रि० वि+श्रम-क्त न०त०। १विरामरहिते २सन्ते

अविश्वसनीय त्रि० वि+श्वस-अनीयर् न०त०। विश्वासकरणायोग्ये। [सेदविश्वसेत्तिश्वसे नातिविश्वसेत्" हितो०।

अविश्वस्त त्रि० न०त०। विश्वासयोग्यताहीने "न विश्व-

अविश्वास पु० अभावे न०त०। १विश्वासाभावे न०ब०। २विश्वासानाधारे ३विश्वासायोग्ये पदार्थे च। [कारके।

अविश्वासिन् त्रि० न विश्वसिति विश्वस-णिनि स्त्रियां ङीप्। विश्वासा-

अविश्लिष्ट त्रि० विरोधे न०त०। विश्लिष्टभिन्ने सङ्गते।

अविष पु० अव-टिषच्। १सस्यदे, २नृपे च। टित्त्वात् ङीप्। ३नद्यां स्त्री। ४रत्नकमाले त्रि०। नास्ति विषं यत्र। ५विषशून्ये त्रि०। "अपश्चोषधीरविषा वनानि" ऋ०६,३६,५, "अविषा विषरहिता निरुपद्रवाणि वा वनानि" भा०। विश्वायाम् अतिविषायाम् (आतश्च) स्त्री टाप्।

अविषक्त त्रि०न०त०। असंलग्ने।

अविषम त्रि० विरोधे न०त०। १विषमभिन्ने समे (जोड़) २सदृशे ३सुगमे च। [२विषयशून्ये त्रि०।

अविषय पु० न०त०। १अगोचरे २अप्रतिपाद्ये। न०ब०।

अविषह्य त्रि०न विशेषेण सह्यः न०त०। १सोढुमशक्ये २इतरैर नभिभवनीये "अविषह्यविक्रमः, ३परिक्षेप्तुमशक्ये च "सीमायामविषह्यायाम् स्वयं राजैव धर्मवित्" मनुः।

अविष्टम्भ पु० अभावे न०त०। १आलम्बाभावे। न०ब०। २आलम्बनशून्ये त्रि०।

अविष्ठ त्रि० अतिशयेन अविता अवितृ+इष्ठन् तृस्थोलोपः। अतिशयेन रक्षके। "यो अर्हतो ब्रह्मकृतिमविष्ठः" ऋ०७।२८।५ "अविष्ठः अतिशयेन रक्षिता" भा०।

अविष्या स्त्री अव-गतौ इसुन् अविर्गतिमिच्छति क्यच्-भावे अ। गमनेच्छायाम्। "अविष्यामनुव्रतं सवितुः" ऋ०२,३८,३, "अविष्यां गमनेच्छाम्" भा०।

अविस् न० अव-भावे इसुन्। १रक्षणे २गतौ च।

अविसंवाद पु० विसंवादः प्रमाणानुसरणाभावः विरोधे न०त०। १प्रमाणानुसरणे २यथार्थविषयकत्वे।

अविसंवादिन् त्रि० विरोधे न०त०। प्रमाणान्तरानुसारिणि १यथार्थ विषयके २सफले पदार्थे च।

अविसोढ न० अवेर्दुग्धम् अवि+सोढ्च् न षत्वम्। १मेषीदुग्धे। न विसोढः। २असोढे त्रि०।

अविस्थल न० भारतोक्ते ग्रामभेदे। "अविस्थले हकस्थलं माकन्दीं वारणावतम्। अवसानञ्च गोविन्द! कञ्चिदेकञ्च पञ्चमम्" भा०उ०प०।

अविस्पष्ट न० विस्पष्टं श्रुतमात्रेणार्थावबोधकं सुखेन अवधारयोग्यञ्च। वि+स्पश-क्त न०त०। अस्पष्टवाक्ये।

अविस्मरण न० अभावे न०त०। १विस्मरणाभावे स्मरणे विस्मरणज्ञानानुभूतपदार्थस्य कालरोगादि प्रयोज्यः स्मरणाभावः सच अनुभूतविषयेषूद्भूतसंस्कारस्यापि प्रणिधानादिकारणान्तराभावात् अनुद्बुद्धतया सूतिरूपकार्य्याजनने, रोगादिना नाशने च भवति। तद्भावः अविस्मरणं तत्र च प्रणिधानादिसहकृतसंस्कारस्य स्मरणजनकता रोगाद्यनभिभवनीयता च। यथाह गो०सू०। "प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावाद्युगपदस्मरणम्"। "प्रणिधानं चित्तै-

काम्यं सुप्तूर्वेति यावत् लिङ्गज्ञानं उद्बोधकम् उद्बोधकानामानन्त्यादादिपदं ज्ञानात्परतोयोजनीयं तस्य क्रमात् स्मरणक्रमः यदि च युगपदुद्बोधकानि तदा तावद्विषयकमेकं स्मरणमिष्यत एव यथा पदज्ञानादाविति मन्तव्यम् इत्तिः"। प्रणिधानादीनि च स्मृतिकारणानि तत्रैवोक्तानि। "प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रित सम्बन्धानन्तर्य्य वियोगैककार्य्य विरोधातिशयप्राप्तिव्यवधान सुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्म्माधर्म्मनिमित्तेभ्यः" "स्मरणमित्यनुवर्त्तते निमित्तशब्दस्य हेत्वात् परं स्मृतस्य प्रत्येक मभेदेनान्वयः। प्रणिधानं मनसोविषयान्तरसञ्चारवारणम्, निबन्धएकग्रन्थोपनिबन्धनं यथा प्रमाणेन प्रमेयादिस्मरणम्, अभ्यासः संस्कारबाहुल्यम्, एतस्य यद्यपि नोद्बोधकत्वं तथापि तादृशे शीघ्रसद्बोधकसमवधानं स्यादित्याशयेन तदुपन्यासः। अभ्यासोदृढतरसंस्कारः उद्बोधकत्वे नोक्तइति केचित् लिङ्गं व्याप्यं व्यापकस्य स्मारकं, लक्षणं यथा कपिध्वजादि अर्जुनादेः, सादृश्यं देवदत्तादेः। परिग्रहः स्वीकारस्तस्य स्वस्वामिभावोऽर्थः तदेकतरेणान्यतरस्मरणम्, आश्रयाश्रितौ राजादि तत्परिजनौ परस्परस्मारकौ, सम्बन्धोगुरुशिष्यभावादिः, गोडपन्यायात् पृथगुक्तः। आनन्तर्यं प्रोक्षणावघातादेः, वियोगोयथा दारादेः, एककार्य्या अन्नेवासिप्रभृतयः परस्परस्मारकाः। विरोधादहिनकुलादेरन्यतरेणापरस्मरणम्। अतिशयः संस्कारउपनयनादिराचार्य्यादिस्मारकः, प्राप्तिर्धनादेर्दातारं स्मारयति, व्यवधानमावरणं यथा खड्गादेः कोषादि। सुखदुःखयोरन्यतरेणापरस्य ताभ्यां तत्प्रयोजकस्य वा स्मरणम्, इच्छाद्वेषौ बहिष्यकतया स्फुटौ तस्य स्मारकौ, भयं मरणादेर्भयहेतोर्वा स्मारकम्, अर्थित्वं दातुः, याचादेः क्रिया वाय्वादेः, रागात्प्रीतेः पुत्रादेः स्मरणं," धर्म्माधर्म्माभ्यां जन्मान्तरानुभूतसुखदुःखसाधनयोः प्रागनुभूत सुखादेश्च स्मरणमिति। तेषु च किञ्चित्,स्वरूपसत्किञ्चिच्च ज्ञातसद्बोधकं शिष्यव्युत्पादनाय चायं प्रपञ्चः" इत्तिः। कणादेन तु स्मृतिसाधारणकारणमुक्तं यथा "आत्ममनसोः संयोगविशेषात् संस्काराच्च स्मृतिः" सू०"उत्पद्यत इति शेषः संयोगविशेषः प्रणिधानादिसन्निधानम्, एतस्मादसमवायिकारणादात्मनि समवायिनि स्मृतिर्विद्याविशेष उत्पद्यते, निमित्तकारणमाह संस्कारादिति चकारेण व्यापारी पञ्चानुभवः समुच्चीयते, अनुभवव्याघाद्यर्थाया-चार्थ्रमियमनुविधत्ते, रज्जुं भुजङ्गतयोपलभ्य पलायितस्य तथैव स्मृतेः नच सततं स्मृतिप्रसङ्गः, संस्कारोद्बोधाधीनत्वात्, तदुक्तं प्रशस्तदेवपादैः "लिङ्गदर्शनेच्छानुस्मरणाद्यपेक्षादात्ममनसोः संयोगविशेषात् पङ्क्त्यभ्यासादरप्रत्ययजनिताच्च संस्काराद्दृष्टश्रुतानुभूतेषु शेषानुव्यवसायस्मरणेच्छाद्वेषहेतुरतीतविषया स्मृतिः" इति। आर्षं ज्ञानं स्वलक्षता पृथङ्न लक्षितं, योगिप्रत्यक्षान्तर्भावितं, पदार्थप्रदेशाख्ये तु प्रकरणे तदुक्तं तद्यथा "आत्मायविधात्वाप्तदीक्षाभतीतानागतवर्त्तमानेष्वर्थेषु धर्म्मादिषु यत्रोपनिबन्धेषु वा लिङ्गाद्यनपेक्षादात्ममनसोः संयोगाद्धर्म्मविशेषाच्च प्रातिभं ज्ञानं यदुत्पद्यते तदार्षम्" इति तच्च कदाचिल्लौकिकानामपि भवति यथा कन्यका वदति "श्वो मे भ्राता गन्तेति हृदयं मे कथयतीति" उप०। संस्कारनाशकानि च रोगकालजन्मान्तरादीनि। न०ब०स्मृतियुक्ते त्रि०

अविस्मृत त्रि० न०त०। विस्मृतभिन्ने स्मृते।

अविहर्य्यत त्रि०"हर्य्यतः प्रेप्साकर्म्मेति"वार्त्तिकोक्त्या वि+हर्य्य-अतच् न०त०। अनभिलषिते अनिष्टे "येनाविहर्य्यतक्रतोः" ऋ०१,६३,२। अविहर्य्यत क्रतोरनभिलषित यज्ञस्य भा०।

अविहित त्रि०न शास्त्रेण विहितः न०त०।१निषिद्धे।२अकृतेच

अविहिंस्रुत त्रि०वि+हिंस्-बा०उतच् किञ्च न०त०। अहिंस्रे। "ताहि चलमविहिंस्रुतम्" ऋ०५,६६,२, "अविहिंस्रुतमहिंस्रम्" भा०।

अविह्वल त्रि० विरोधेन०त०। व्याकुलभिन्ने स्वस्थे।

अवी स्त्री अवत्यात्मानं लज्जया अव-ई। ऋतमत्यास्।

अवीकाश पु० वीकाशः प्रकाश उपसर्गदीर्घः अभावे न०त०। २प्रकाशाभावे। न०ब०।२प्रकाशशून्ये। [नशून्ये त्रि०।

अवीक्षण न० अभावे न०त०। १दर्शनाभावे न०व०। २दर्श-

अवीक्षित त्रि० न०त०। १दृष्टभिन्ने। भावे क्त अभावे न० त०। २वीक्षणाभावे न०।

अवीचि पु० नास्ति वीचिः प्रकाशः सुखं यत्र।१नरकभेदे तत्स्वरूपं तत्कारणञ्च भागवते ५स्क० दर्शितं यथा "तामिस्रोन्धतामिस्र" इत्याद्युपक्रम्य "अवीचिरयःपानमित्यादिना अष्टाविंशतिनरकान् विभज्य 'यस्त्विहानृतं वदति साक्ष्ये, द्रव्यविनिमये, दाने वा कथञ्चित्, स वै प्रेत्य नरके अवीचिमत्यधःशिरा निरवकाशे योजनशतोच्छ्रायात् गिरिमूर्द्धः सम्पात्यते। यत्र जलमिव स्थलमश्मप्रष्ठमवभासते तदवीचिनाम तिलशोविशीर्य्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति"—अवीचिमान् अवीचिमयोऽत्यत्। २तरङ्गशून्ये जलाशये त्रि०।

अवीज त्रि० नास्ति बीजमस्य। बीजशून्ये १फलादौ।

२द्राक्षायां स्त्री।बीजानाधारके त्रि०"अबीजमपि चेत्फलं केवलं स्यच्छिद्रलं भवेत्" मनुः। अप्रागल्भ्ये न०त०। अङ्कुरोत्पादनायासमर्थे तण्डुलाद्यादौ २बीजे च। "अबीजविक्रयी चैव बीजोत्कृष्टे तथैव च" मनुः। "अबीजं प्ररोहासमर्थमिति" कुल्लू०। बीजं शुक्रं न०ब०। शुक्ररहिते ४क्लीबे न०। "न मूत्रं फेनिलं यस्य विधा चाप्सु निमज्जति। मेढ्रं चोन्नादशुक्राभ्यां स क्लीब इति कथ्यते" स्मृतेस्तस्य तथात्वम्। "उन्मत्तं पतितं क्लीबमबीजं पापरोगिणम्" इति मनुः। ५कारणशून्ये त्रि०६योगोक्ते निर्बीजे चित्तवृत्तिपरिणामनिरोधे पु०।

अवीत न० अनुमानभेदे तच्च दर्शितं सा०कौ० "तच्च प्रथमं तावद्द्विविधं वीतमवीतञ्च अन्वयसुखेन प्रवर्त्तमानं विधायकं वीतम् व्यतिरेकसुखेन प्रवर्त्तमानं निषेधकमवीतम्" व्याख्यातञ्चैतदस्माभिःयथा "वीतं विशेषेण इतं सङ्गतमन्वितम् अन्वयव्याप्तिहेतुकमित्यर्थः यद्वा विशेषेण इतं ज्ञातं प्रसिद्धसाध्यव्याप्तिकमित्यर्थः तद्भिन्नमवीतम् व्यतिरेकव्याप्तिहेतुकम् अप्रसिद्धसाध्यव्याप्तिकं वेत्यर्थः व्यतिरेकसुखेन तदसत्त्वे तदसत्त्वरूपव्यतिरेकद्वारा साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिद्वारेत्यर्थः। निषेधकं यो यः पृथिवीभेदवान् स गन्धाभाववान् इति व्यतिरेकयहणेन व्यापकस्य गन्धाभावस्य पृथिव्यां निश्चित्या पृथिवीभेदरूपस्य गन्धाभावव्याप्यस्य निवारकम्। तथा च पृथिवी पृथिवीतरभिन्ना गन्धवत्त्वादित्यनुमानमवीतम्"।

अवीर त्रि०वीरः पुत्रादिर्नास्ति यस्य। १पुत्रादिशून्ये। न०त० २वीर्य्यवद्भिन्ने त्रि०। "पतिपुत्रवती नारी वीरा प्रोक्ता मनीषिभिः" इति परिभाषिता स्त्री वीरा न०त०। ३पतिपुत्ररहितायां स्त्रियां स्त्री। "अजातपुत्रा विधवा साऽवीरा परिकीर्त्तितेति" स्मृतिः। "मा त्वा वयं सुहवावन्त्ववीराः" ऋ०७,४,६,। "अवीराः पुत्रादिरहिताः" भा०। "अवीरावाच योषितः" स्मृतिः।

अवृक त्रि० वृ-कक् वृकः आवरकः न०ब०। आवरकशून्ये "ज्योतींषि वृक्षन्नवृकाणि" ऋ०१५५,६, "वृकेणावरकेण रहितानि" भा०।

अवृत्ति स्त्री वृत्तिर्जीविनोपायः अभावे न०त०। १जीविकाभावे "आददीतामभेवाच्चादवृत्त्यावेकरात्रिकम्" अवृत्तिकर्शिता हि स्त्री प्रदुष्येत् स्थितिमत्यपि" अवृत्तिकर्शितः सीदन्निमं धर्म्मं समाचरेत्" इति च मनुः। नास्ति वृत्तिः स्थितिरस्य। २अविद्यमाने। "साध्याभावदवृत्तित्वम्" साध्यवदन्यावृत्तित्वम्" इति च अनुचिन्ता०। न०ब०। जीविकाशून्ये त्रि०

अवृद्धिक न० नास्ति वृद्धिः यत्र कप्। ऋणादौ वृद्धिः लाभरूपा (सुद) तद्रहिते १मूलधने। तच्च स्मृतौ दर्शितं यथा "ऋणं पैतामहं पैत्र्यं प्रतिभाव्यागतं स्मृतः। समं दद्यात् ततसुतो च न दाप्याविति निश्चयः"। "समं सवृद्धिकम्" "ऋणमातीयवत् पित्र्यं पुत्रैर्देयं विभावितम्। पैतामहं समं देवमदेयं तत्सुतस्य च" या०स्मृ०। "समं यावत्स्फीतं तावद्देयं न वृद्धिः" मिता०। "गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ हापिते। नष्टोदेवोविनष्टश्च देवराजबलाहते" या०स्मृ०।

अवृध त्रि० न वर्द्धते वृध-क। १वृद्धिशून्ये। अनर्भूतण्यर्थे वृध-क न०त०।अवर्द्धके।"पनीरश्वृधो अवृधो अयज्ञान्" ऋ०७,७,३, "अवृधान् स्तुतिभिरग्निमवर्द्धयतः" भा०।

अवृष्टि स्त्री अभावे न०त०। १वर्षणाभावे "अथ यदाऽवृष्टिर्भवति बलीयानेव तर्ह्यबलीयस आदत्ते धर्म्मादिग्राप्यः"। शत०ब्रा०। न०ब०। वृष्टिशून्ये मेघे पु०।

अवृहत् त्रि० विरोधे न०त०। वृहद्भिन्ने क्षुद्रे स्त्रियां ङीप्

अवेक्षक त्रि० अव+ईक्ष-ण्वुल्। १दर्शके २पर्य्यालोचके ३आयव्ययादिषु अध्यक्षे च।

अवेक्षण न० अव+ईक्ष-ल्युट्। १दर्शने, २प्रतिजागरणे, ३अवधाने च "वर्णाश्रमावेक्षणजागरूकः" रघुः "भूषाणामर्द्धरचना इवा विज्ञगवेक्षणम्"सा०द०"पित्रमन्त्रातुहरणे आत्मालम्भे ह्यवेक्षणे" आ०त०स्मृ०

अवेक्षणीय त्रि० अव+ईक्ष-अनीयर् १दर्शनीये। "तपस्विसामान्यमवेक्षणीया" रघुः। २आलोचनीये च।

अवेक्षा स्त्री अव+ईक्ष-भावे अ। अवेक्षणशब्दार्थे।

अवेक्षित त्रि०अव+ईक्ष कर्म्मणि-क्त।१दृष्टे २पर्य्यालोचिते च।

अवेक्षितृ त्रि०अव+ईक्ष-तृच् स्त्रियां ङीप्। अवेक्षकशब्दार्थे।

अवेक्ष्य त्रि०अव+ईक्ष-कर्म्मणि शतृ।१पर्य्यालोच्ये २दृश्ये च ल्यप्। ३दृष्ट्वेत्यर्थे ४पर्य्यालोच्येत्यर्थे च अव्य०।

अवेदनाज्ञ त्रि० वेदनां न जानाति ज्ञा-क अस० समा०। वेदनानभिज्ञे "अवेदनाज्ञं कुलिशव्रतानाम्" कुमा०।

अवेदि स्त्री वेदिर्वेदनम् अभावे न०त०। ज्ञानाभावे "न वेद वेदिर्भवतो विनष्टिः" इ०उ०।परिष्कृतभूमिशून्ये त्रि०

अवेद्य त्रि० न वेद्यः ज्ञेयः। १अज्ञेये। विद-ज्ञाभे यत्। २अलभ्ये ३अविवाह्यस्त्रियां स्त्री "व्यभिचारेण वर्णानामवेद्यावेदनेन च" मनुः। ४गोवत्से पु० शब्दच०।

अवेल त्रि० नास्ति वेला सीमा यत्र । १सीमारहिते निर्मर्य्यादे २अपलापे पु० ३चूर्णगुवाके स्त्री मेदि० । अप्राप्तकाले ४अनुचितकाले स्त्री ।न०व० । ५समयशून्ये त्रि० ।

अवेष्ट त्रि० अव+यज-क्त । नाशिते "अवेष्टादंदशूकाः" य० १०,१०,"अवपूर्वोवजतिर्नाशार्थः" वेददी० "अवेष्टा इति लौहायसमाविध्यति" कात्या० १५,५,२२ ।

अवैध त्रि० विधित आगतम् अण् वैधं न०त० । १विधितः अप्राप्ते २निषिद्धे च। "अवैधं पञ्चमं कुर्व्वन् राज्ञो दण्डेन मुच्यते" स्मृतिः ।

अवैधव्य न० विधवाया भावः ष्यञ् वैधव्यं पतिहीनत्वम् अभावे न०त० । पतिशून्यत्वाभावे सपतिकत्वे । 'अवैधव्यप्रदं स्त्रीणाम्" कालिकापुरा० "अवैधव्यं भवेत्तस्याः सप्तजन्मसु निश्चितम्" पुरा० ।

अवैमत्य न० वैमत्यं विरुद्धमतता अभावे न०त० । १मतद्वैधाभावे ऐकमत्ये ।न०व० । २तच्छून्ये ।

अवैयात्य न० वैयात्यं धार्ष्ट्यं निर्लज्जता अभावे न०त० । धार्ष्ट्याभावे १सलज्जत्वे न०व० । २तच्छून्ये लज्जावति त्रि० ।

अवैर न० अभावे न०त० । १विरोधाभावे न०व० । २विरोधशून्ये त्रि० ।

अवैराग्य न० वैराग्यं विषयवितृष्णा अभावे न०त० । १विषयतृष्णायाम् २सांख्योक्ते धर्म्माधर्म्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्य्यानैश्वर्य्यरूपाष्टविधप्रकृतिधर्म्मभेदे च ।

अवैलक्षण्य न० विलक्षणस्य भावः ष्यञ् वैलक्षण्यं भेदकधर्म्मः अभावे न०त० । १भेदकधर्म्माभावे अभेदे । न०व० । २तच्छून्ये अभिन्ने त्रि० ।

अवोक्षण न० अव+उक्ष-भावे ल्युट् । तिरश्चा पाणिना सेचने "उत्तानेनैव हस्तेन प्रोक्षणं परिकीर्त्तितम् ।न्यञ्चताभ्युक्षणं प्रोक्तं तिरश्चावोक्षणं स्मृतम्" स्मृतिः ।

अवोद पु० अव+उन्द-भावे घञ् नि०नलोपः । १अवक्लेदने ततः अस्त्यर्थे अर्श० अच् । क्लिन्ने २सार्द्रे त्रि० जटा० ।

अवोदेव अव्य० देवानामवस्तात् अव्ययी० । देवानामवरस्मिन् देशादौ "अवोदेवसुपरिमर्त्यं ऋवि" ऋ० ७,१६,१२ ।

अवोध पु० अव+उध-कर्मणि क । उष्णाम्बे। अपूपा०क्षितार्थे अव्ययी । अवोधीयम् अवोध्यं तद्धिते वस्तुनि त्रि० ।

अव्द पु० अव्दयत् । वत्सरे । [पृषोदरा०स्थल ।

अव्दप पु० अव्दपयत् वर्षाधिपे अव्दपशब्दे विवृतिः । अव्द-

अव्य त्रि० अविभवम् अवि+दिगा० यत् । मेषभवे लोमादौ "तिरः पवित्रं वितारमव्यम्" ऋ० ९,१०६,१६, ।

अव्यक्त पु० वि+अञ्ज-क्त न०त० । १विष्णौ,२कामे,३शिवे, सांख्यमते सर्व्वकारणे,४प्रधाने, रूपाद्यहीनतया चक्षुराद्यगोचरत्वात्तथात्वम्, वेदान्तमते नामरूपाभ्यामव्याकृते ५अज्ञाने ६सूक्ष्मशरीरे ७सुषुप्त्यवस्थायां च शब्दप्रवृत्तिनिमित्तैर्जातिगुणादिभिर्व्यक्तीते निराकारे ८ब्रह्मणि न० । ९असाधे वस्तुभावे त्रि० । "हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् । सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्" सा०का० । हेतुमत्त्वादिभिर्व्यक्तधर्म्मैर्विरहितमव्यक्तम् । "अव्यक्तं त्रिगुणाल्लिङ्गात्" सा०सू० । "तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्" सा०का० । "महत्तत्वं सुखदुःखमोहात्मकद्रव्योपादानं सुखदुःखमोहात्मकत्वे सति कार्य्यत्वात् तथाभूतघटादिवत् । महदादिकं स्वोपहितत्रिगुणात्मकोपादानं कार्य्यत्वात् घटवत् इत्यमव्यक्तानुमानम् दर्शितम्" सा०प्र०भा० । "बुद्धेरिवाव्यक्तमुदाहरन्ति" रघुः । वेदान्तिभिः नामरूपाभ्यामव्याकृतमज्ञानमेव मूलकारणतया अव्यक्ततया च स्वीकृतं तत्रैव प्रकृतिधर्म्माणां सर्वेषामन्तर्भावात् "अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ! । अव्यक्तनिधनान्येव तत्र का परिदेवनेति" गीतोक्तेरपि तत्रैव तात्पर्य्यम् तद्द्वारैव ब्रह्मणः जगज्जन्मादिहेतुत्वम् "व्यक्तकारणमव्यक्तं नित्यं सदसदात्मकम्" मनूक्तावपि तद्रूपमज्ञानमेवाव्यक्तशब्देनाभिधीयते तस्य च प्रवाहरूपेणावस्थितत्वात् नित्यत्वम् "महतः परमव्यक्तमव्यक्तात् पुरुषः परः । पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः" श्रुतौ तु अव्यक्तशब्देन सूक्ष्मशरीरमिति शा०सूत्रे भाष्ये च व्यवस्थापितम् यथा "आत्मानमित्यत्र केषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च" सू०। "आत्मानमित्यपि अनुमाननिरूपितं प्रधानमेवैकेषां शाखिनां शब्दवदुपलभ्यते । काठके हि पठ्यते "महतः परमव्यक्तमव्यक्तात् पुरुषः परः" इति तत्र य एव यत्नामानो यत्क्रमकाश्च महदव्यक्तपुरुषाः स्मृतिप्रसिद्धास्त एवेह प्रत्यभिज्ञायन्ते तत्राव्यक्तमिति स्मृतिप्रसिद्धेः शब्दादिहीनत्वान्न व्यक्तमव्यक्तमिति व्युत्पत्तिसम्भवात् स्मृतिप्रसिद्धं प्रधानमभिधीयते अतस्तस्य शब्दवत्त्वादशब्दत्वमनुपपन्नं तदेव जगतः कारणं श्रुतिस्मृतिन्यायप्रसिद्धिभ्य इति चेन्नैतदेवम् नह्येतत् काठकवाक्यं स्मृतिप्रसिद्धयोर्महदव्यक्तयोरस्तित्वपरम् नह्यत्र यादृशं स्मृतिप्रसिद्धं स्वतन्त्रं कारणं त्रिगुणं प्रधानं तादृशमत्यभिज्ञायते। शब्दमात्रं श्रूयतेऽव्यक्तमिति प्रत्यभिज्ञायते स च शब्दो न व्यक्तमव्यक्तमिति

यौगिकत्वादन्यस्मिन्नपि सूक्ष्मे दुर्लक्ष्ये प्रयुज्यते न चायं कस्मिंश्चिद्रूढः । या तु प्रधानवादिनां रूढिः सा तेषामेव पारिभाषिकी सती न वेदार्थनिरूपणे कारणभावं प्रतिपद्यते। नच क्रमसामान्यात् समानार्थप्रतिपत्तिर्भवति तद्रूपप्रत्यभिज्ञाने। न ह्यश्वस्थाने गां पश्यन्नश्वोऽयमित्यमूढोऽध्यवस्यति। प्रकरणनिरूपणाच्चात्र न परकल्पितं प्रधानं प्रतीयते शरीर रूपकविन्यस्तश्रुतेः । शरीरं ह्यत्र रथरूपकविन्यस्तमव्यक्तशब्देन परिगृह्यते कुतः ? प्रकरणात् परिशेषतश्च । तथाहि अनन्तरातीतो ग्रन्थः आत्मशरीरादीनां रथिरथादिरूपकत्वमिं दर्शयति । 'आत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च। इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् । आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" इति शेषे च "इन्द्रियादिभिरसंयतैः संसारमधिगच्छति। संयतैस्त्वध्वनः पारन्तद्विष्णोः परमं पदमाप्नोतीति"दर्शयित्वाकिं तदध्वनः पारमस्मदभिलक्षणाकाङ्क्षायान्नेभ्यएव प्रकृतेभ्य इन्द्रियादिभ्यः परत्वेन परमात्मानमध्वनः पारं विष्णोः परमदं दर्शयति। "इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः।महतः परमव्यक्तमव्यक्तात् पुरुषः परः । पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिरिति" । तत्र यएवेन्द्रियादयः पूर्वस्यां रूपकल्पनायामश्वादिभावेन प्रकृताः त एवेह परिगृह्यन्ते प्रकृतप्रक्रियाऽपरित्यागाय । तत्रेन्द्रियमनोबुद्धयस्तावत् पूर्वत्रेह च समानशब्दा एवार्थास्तु ये शब्दादयो विषया इन्द्रियहयगोचरत्वेन निर्दिष्टास्तेभ्यश्चेन्द्रियेभ्यः परत्वम् इन्द्रियाणाञ्च यद्गत्वं विषयाणामतिपद्गत्वमिति श्रुतिप्रसिद्धेः । विषयेभ्यश्च मनसः परत्वं मनोमूलत्वाद्विषयेन्द्रियव्यवहारस्य । मनसस्तु परा बुद्धिः, बुद्धिर्व्यवहर्तृ भोग्यजातं भोक्तारमुपसर्पति । बुद्धेरात्मा महान् परः यः सः आत्मानं विद्धीति रथित्वेनोपचिप्तः कुतः ? आत्मशब्दात् । भोक्तृत्व भोगोपकरणात् परत्वोपपत्तेः । महत्त्वञ्चास्य स्वामित्वादुपपन्नम्" । "तदेवं पूर्वापरालोचनायां नान्यत्र परकल्पितस्य प्रधानस्यावकाशः" भा०। "सूक्ष्मन्तु तदर्हत्वात्" सू० "उक्तमेतत्प्रकरणपरिशेषाभ्यां शरीरमव्यक्तशब्दं न प्रधानमिति । इदमिदानीमारभ्यते कथमव्यक्तशब्दार्हत्वं शरीरस्य, यावता स्थूलत्वात् सुदृष्टतरमिदं शरीरं व्यक्तशब्दार्हमसूक्ष्मवचनस्याव्यक्तशब्द इति अतउत्तरमुच्यते"सूक्ष्मन्विह" कारणात्मना शरीरं विवक्ष्यते सूक्ष्मस्यावयक्तशब्दार्हत्वात् । यद्यपि स्थूलमिदं शरीरं न स्वयमव्यक्तशब्दमर्हति तथापि तस्य त्वारम्भकं भूतसूक्ष्ममव्यक्तशब्दमर्हति प्रकृतिशब्दश्च विकारे दृष्टः यथा "गोभिः श्रीणीत मत्सरमिति"। तथाच श्रुतिः"तद्वेदं तर्ह्यव्याकृतमासीदिति"इदमेव व्याकृतं नामरूपविभिन्नं जगत्प्रागवस्थायां परित्यक्तव्याकृतनामरूपं बीजशक्त्यवस्थमव्यक्तशब्दयोग्यन्दर्शयति" भा० । परमब्रह्मपरत्वे "ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः" "क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्" इति च गीता । "योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः" मनुः विष्णोस्तु"अनेकमूर्त्तिरव्यक्तः शतमूर्त्तिः शतानन:" इति विष्णुस० । अप्रकाशितार्थं "तमग्रेणसूक्ष्मावयक्तव्यवहारलक्षितमर्थं मनसा जग्राह" काद० "ततः स्वयम्भूर्भगवानव्यक्तं व्यञ्जयन्निदम्" मनुः संख्याविशेषेणानवगते गणितशास्त्रोक्ते १०राशिभेदे तच्च बीजनाम्ना व्यवह्रियते"उत्पादकं यत् प्रवदन्ति बुद्धेरधिष्ठितं सत् पुरुषेण सांख्याः । व्यक्तस्य कृत्स्नस्य तदेकबीजमव्यक्तमीयं गणितज्ञ वन्दे । पूर्वं प्रोक्तं व्यक्तमव्यक्तबीजं प्रायप्रश्नानो विनाऽव्यक्तयुक्त्या"इत्युपक्रम्य "यावत्तावत्कालकोनीलकोऽन्यः वर्णः पीतो लोहितश्वेतदाद्याः । अव्यक्तानां कल्पिता मानसंज्ञास्तत्संख्यानं कर्त्तुमाचार्यवर्यैः" बीजग० तच्च चतुर्विधं यथोक्तम् तत्रैव "यावत्तावत्कल्पितमव्यक्तरागेर्मानं तस्मिन् कुर्वतो द्विष्टमेव । ज्ञेयौ पक्षौ साधनीयौ प्रयत्नात्त्यक्त्वा क्षिप्त्वा वापि सङ्गुण्य भक्त्वा । एकाऽव्यक्तं योगवेदन्यपक्षाद्रूपाण्यन्यस्येतरस्माच्च पक्षात् । शेषाव्यक्तेनोद्धरेद्रूपशेषं व्यक्तं मानं जायतेऽव्यक्तरागेः । अव्यक्तानां ह्यादिकानामपीह यावत्तावद्यादिनिघ्नं हृतं वा । युक्तोनं वा कल्पयेदात्मबुद्ध्या मानं क्वापि व्यक्तसैवं विदित्वा । तत्र प्रथममेकवर्णसमीकरणं द्वितीयमनेकवर्णसमीकरणं बीजम्। यत्र वर्णस्य ह्ययोर्वा बहूनां वा वर्गादिगतानां समीकरणं तन्मध्यमाहरणम् । यत्र भावितस्य तद्भावितमिति बीजचतुष्टयं वदन्त्याचार्याः । तत्र प्रथमं तावदुच्यते पृच्छकेन पृष्टे सत्युदाहरणे योऽव्यक्तराशिस्तस्य मानं यावत्तावदेकं द्व्यादिं वा प्रकल्प्य तस्मिन्नव्यक्तरागौ उद्देशकालापवत्सर्वकुट्टनभजनलैराशिकपञ्चराशिकश्रेढीफलक्षेत्रव्यवहारादिगणनेन कार्यम्। तथा कुर्वता द्वौ पक्षौ प्रयत्नेन समौ कार्यौ। यद्यालापे समौ पक्षौ न स्तः।

तदैक्यतरे न्यूने पक्षे किञ्चित्प्रक्षिप्य ततः अधिकपक्षात्तावदेव विशोध्य वा न्यूनं पक्षं केनचित्सङ्ख्येनाधिकं पक्षं तावतैव भक्त्वा समौ कार्यौ। ततस्तयोरेकस्य पक्षस्याव्यक्त मन्यपक्षस्याव्यक्ताच्छोध्यम् अव्यक्तवर्गादिकमपि।अन्यपक्षरूपाणि इतरपक्षरूपेभ्यः शोध्यानि। यदि करण्यः सन्ति तदा ताश्चपि उक्तप्रकारेण शोध्याः। ततोऽव्यक्तराशिशेषेण रूपशेषे भक्ते यल्लभ्यते तदेकस्याव्यक्तस्य मानं व्यक्तं जायते। तेन कल्पितोऽव्यक्तराशिरित्याद्यः॥ यत्रोदाहरणे द्व्यादयोऽव्यक्तरागयोभवन्ति तदा तस्यैकं यावत्तावत्कल्प्य अन्येषां द्व्यादिभिरिष्टैर्गुणितं भक्तं वा इष्टैः रूपैरूनं युतं वा यावत्तावदेव प्रकल्प्यम् ॥ अथ वा एकस्य यावत्तावदन्येषां व्यक्तान्येव मानानि प्रकल्प्यानि। सर्वं विदित्वेति यथा क्रिया निर्वहति तथा बुद्धिमता ज्ञात्वा शेषाणामव्यक्तानि व्यक्तानि वा कल्प्यानीत्यर्थः।उदाहरणम्। एकस्य रूपं त्रिगती पञ्चा अश्वा दशान्यस्य तु तुल्यमूल्याः। क्रयं तथा रूपशतं च तस्य तौ तुल्यवित्तौ च किमश्वमूल्यम्। वदा द्वात्रिंशस्य दत्तं द्वियुक्तं तत्तुल्यवित्तोयदि वा द्वितीयः। आद्योधनेन त्रिगुणोऽन्यतोवा पृथक् पृथङ्मे वद वाजिमौल्यम्। अत्राश्वमौल्यमज्ञातं तस्य मानं यावत्तावदेकं प्रकल्पितं या ? तत्र त्रैराशिकं यद्येकस्य यावत्तावन्मूल्यं तदा षण्णां किमिति न्यासः। १। या १। ६। फलमिच्छागुणं प्रमाणभक्तं लब्धं षण्णामश्वानामूल्यं या ६ अत्र रूपशतत्वे प्रक्षिप्ते जातमाद्यस्य धनं या ६ रू १०० एवं दशानां मौल्यं या १० अत्र रूपशते चर्णशते प्रक्षिप्ते जातं द्वितीयस्य धनं या १० रू १०० एतौ समधनाविति पक्षौ स्वत एव समौ जातौ समशोधनार्थं न्यासः या ६ रू १०० या १० रू १०० अथ एकाव्यक्तं शोधयेदन्यपक्षादिति आद्यपक्षाव्यक्तेऽन्यपक्षाव्यक्ताच्छोधिते शेषं या ४। द्वितीयपक्षरूपेषु आद्यपक्षरूपेभ्यः शोधितेषु शेषं रू ४०० अव्यक्तराशिशेषेण या ४ रूपशेषे रू ४०० उद्धृते लब्धमेकस्य यावत्तावतो मानं व्यक्तं १०० यद्येकाश्वस्येदं मौल्यं तदा षण्णां किमिति त्रैराशिकेन लब्धे षण्णां मौल्ये ६०० रूपशतत्रययुते ६०० जातमाद्यस्य धनम्।एवं द्वितीयस्यापि ६०० "बीजग० एवमनेकवर्णादीनामप्युदाहरणादीनि तत्रैव द्रष्टव्यानि।

अव्यक्तमूलप्रभव पु० अव्यक्तं प्रधानमविद्या वा मूलम् प्रभवत्यस्मात् प्रभवः अपादाने अच् प्रभवोऽस्या संसारश्चेति।

अव्यक्तराग पु० न व्यक्तोऽल्पव्यक्तोरागोऽरुणिमा। १ईषद्रक्ते अरुणे वर्णे २तद्वति त्रि०।

अव्यक्तलिङ्ग न० अव्यक्तस्य लिङ्गमनुमापकम्। सांख्यमते सिद्धे १महत्तत्त्वादौ। अव्यक्तं लिङ्गमस्य। २असदृष्टिङ्गे रोगादौ त्रि०। न व्यक्तं दम्भाभावेन शुभ्रं लिङ्गमस्य। शुभ्राश्रमयुक्ते ३संन्यासिनि पु०।

अव्यङ्ग स्त्री अवैरङ्गं यङ्गमिवाङ्गमस्याः। १शूकशिम्ब्याम्। न विकलमङ्गमस्य ईव०। विकलाङ्गभिन्ने पूर्णे त्रि०।

अव्यङ्गाङ्गी स्त्री अव्यङ्गमविकलं सम्पूर्णमङ्गं यस्याः ङीप्। सम्पूर्णाङ्गयुक्तायां स्त्रियाम् "अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम्"। मनुः।

अव्यञ्जन पु० नास्ति व्यञ्जनं शुभलक्षणं यङ्गे यस्य। १यङ्गहीनपशौ, २शुभलक्षणशून्ये, ३चिह्नशून्ये च त्रि०।

अव्यण्डा स्त्री न विगतमण्डं बीजमस्याः। शूकशिम्ब्याम्।

अव्यतिकर पु० अभावे न०त०। १संसर्गाभावे न०ब०। २संसर्गशून्ये त्रि०।

अव्यतिकीर्ण त्रि० वि+अति+कृ-क्त न०त०। असङ्कीर्णे "धाराः प्रसादयितुमव्यतिकीर्णरूपाः" माघः।

अव्यथ पु० न व्यथते पङ्क्त्यां न सञ्चलति व्यथभयचलनयोः अच्। १सर्पे। २व्यथाशून्ये त्रि०। नास्ति व्यथा यस्याः सेवनेन न०ब०। ३हरितक्याम् ४गुग्गुलौ च स्त्री।

अव्यथय पु० न व्यथयति गन्तारमङ्गेन गन्तव्यस्थाननयनात् व्यथ-णिच्-घा०अ घटा० ह्रस्वः न०त०। अश्वे निरु०।

अव्यथा स्त्री अभावे न०त०। व्यथाभावे।

अव्यथि त्रि० व्यथ-इन् न०त०। व्यथाशून्ये अक्लिष्टे "सस्तब्धमव्यथिर्जगन्वान्" ऋ०१,११७,१५,। [शून्ये च।

अव्यथिन् त्रि०न व्यथते व्यथ-इनि न०त०१निर्भये २व्यथा-

अव्यथिष न+व्यथ-टिषच्। १सूर्ये २सस्ये च २धरायां ४रात्रौ च स्त्री टित्त्वात् ङीप्।

अव्यथ्य त्रि० न+व्यथ-णि० कर्त्तरि यत्। व्यथाशून्ये।

अव्यपदेश्य त्रि० न व्यपदिश्यते अभिलाषवाक्येन वि+अप+दिश-ण्यत् न०त०। १कथयितुमशक्ये न्यायमते निर्विकल्पके २ज्ञाने न० तद्धि अतीन्द्रियत्वेन अनुव्यवसायाविषय तया अभिलपितुं न शक्यते। "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्" गौ०सू०। ज्ञात्वादिशून्यतया ३निर्देश्ये ४ब्रह्मणि न०।

अव्यपेक्षा स्त्री विशेषेणापेक्षा व्यपेक्षा अभावे न०त०।

१विशेषणामेक्षाभावे समर्थसूत्रभाष्योक्ते अन्वयबोधानपेक्षया सप्तदायस्य विशेष्यविशेषणभावानगाहेऽपकोपस्थिति जनकत्वरूपे २एकार्थीभावे च। "समर्थः पदविधिः" पा० सूत्रे सामर्थ्यं द्विविधं व्यपेक्षा अव्यपेक्षा च प्रपञ्चितमस्माभिः सरलायाम्। तत्र स्वार्थपर्यवसायिपदानामाकाङ्क्षादिवशात् यः परस्परं सम्बन्धः सा व्यपेक्षा। राज्ञः पुरुष इत्यादौ वाक्ये सत्यामाकाङ्क्षायां यो यो यस्मिन् सन्निहितो योग्यश्च स तेन तेन सम्बध्यते यथा राज्ञः पुरुषोऽश्वश्च राज्ञो देवदत्तस्य च पुरुषः कम्बलस्य राज्ञोऽश्वो धनञ्जेत्यादि दृष्टौ तु नैवम् दृष्टीनामेकार्थीभावात्। एकार्थीभावश्च विशेष्यविशेषणभावावगाहेऽपकोपस्थितिजनकत्वम्। तथाच राजपुरुषादिशब्देन विशिष्टैकार्थबोधकतया न तदेकदेशे कम्बलादेरन्वयः पुरुषांशे विशेषणतयोपस्थितस्य च नाश्वादिसम्बन्धिता राजादीनाम्। जनितान्वयाच्च निराकाङ्क्षतया न देवदत्तादेः स्वामितया पुरुषादावन्वय इति द्रष्टव्यम्। देवदत्तस्य गुरुकुलमित्यादौ देवदत्तादेस्तु प्रधानीभूतकुलादिनैवान्वयः सम्बन्धस्तूपस्थितगुरुद्वारक एव षष्ठ्यर्थः यथोक्तं हरिणा "सप्तदायेन सम्बन्धो येषां गुरुकुलादिना। संसृष्टावयवास्ते तु युज्यन्ते तद्वता सहेति"। यद्वा सम्बन्धिशब्दार्थस्य पदार्थैकदेशत्वेऽपि भवत्येव कोपाश्चित् सम्बन्धान्वयः तदुक्तं तेनैव "सम्बन्धिशब्दः सापेक्षो नित्यं सर्वैः समस्यते। वाक्यवत् सा व्यपेक्षापि दृष्टावपि न हीयते"। अतएव वार्त्तिककृता "सविशेषणानां दृष्टिर्न दृष्टस्य वा विशेषणं न प्रयुज्यत इति वक्तव्यमिति" सामान्यतो दृष्टिमतो विशेषणस्य स्वातन्त्र्येण प्रयोगाभावमभिप्रायम् "अगुरुकुलगुरुपुत्रादीनां वक्तव्यम्" इत्यनेन गुरुकुलगुरुपुत्रादीनां विशेषणत्वेऽपि पृथक्प्रयोगाय नञा पर्युदासः कृतः। समानाधिकरणविशेषणस्य तु "समानाधिकरणमसमर्थवद्भवती"त्यनेन सर्वथा स्वातन्त्र्येण सामर्थ्याभावात् प्रयोगाभावो भङ्ग्याऽभिहितः। एतन्मूलकमेव प्राचां गाथा "सापेक्षे प्रत्ययो न स्यात् समासो वा कथञ्चन। सापेक्षं तद्विजानीयादसमस्तविशेषणम्। प्रतियोगिपदादन्यत् यदन्यत् कारकादपि। दृष्टिशब्दैकदेशस्य सम्बन्धस्तेन नेष्यते" इति अतायं विशेषः प्रधानस्य सापेक्षत्वेऽपि समास इत्युक्तेः प्रधानस्य दृष्ट्युपस्थाप्यविशेष्यस्य राजपुरुषादेः सुन्दरादिविशेषणापेक्षयापि समासः। समासे चावयवशक्त्यैव तत्तदर्थपदार्थोपस्थित्या विशेष्यविशेषणभावाद्यभ्युपगमे सापेक्षत्वादौ समासाभावादिकं वाचनिकं कल्पद्रुम तथान्याय्यधिककल्पना स्यादतः समुदायशक्तिकल्पनम् यथोक्तं हरिणा "बहूनां दृष्टिसम्बन्धिनां वचनैरेव साधने। स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः। चकारादिनिषेधोऽत्र बहुव्युत्पत्तिभञ्जनम्। कर्त्तव्यं ते न्यायसिद्धं स्वाक्यं तदिति स्थितमिति" तथाहि इन्द्रादिविग्रहवाक्ये चकारादि प्रयुज्यते समस्ते तु न। वचनैरेव तन्निषेधः कल्पनीयः। समुदायशक्तिपक्षे तु उक्तार्थानामप्रयोग इत्युक्तन्यायादेव सिद्धम्। नामार्थयोरभेदान्वयः क्लृप्तः सच राजपदादुपस्थापितराजादेः पुरुषे स्वस्वामिभावसम्बन्धेनान्वये परिक्लृप्तः स्यात्। सम्बन्धलक्षणायान्तु किमपराद्धम् विशिष्टलक्षणया। प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानमिति नियमश्च क्लृप्तः सच प्राप्नानन्दादौ भज्येत आनन्दकर्त्तृकप्राप्तिकर्म्मत्वार्थबोधस्योभयसम्बन्धत्वेन कर्त्तृविहितक्तान्तार्थस्य कर्त्तुर्विशेष्यतौचित्येन प्रकृते तद्विपरीतत्वात् आनन्दसम्बन्धादिलक्षणास्वीकारे समुदायशक्तिपक्षे एव प्रवेशः। तथा प्राप्त आनन्दोयमिति विग्रहे आनन्दादौ अत्यन्तादिविशेषणयोगवत् समासे तद्व्यवहाराय दृष्टस्य न न विशेषणयोग इति वाचनिकत्वकल्पनाऽधिका एतन्मते न्यायसिद्धा इत्यादिबहुविप्रलापत्तिरतः समुदाये शक्तिः" नास्ति व्यपेक्षा यस्य। ३अनपेक्षे त्रि०।

अव्यभिचरित त्रि० वि+अभि+चर-क्त न०त०। १व्यभिचारशून्ये हेतौ "का व्याप्तिः? न तावदभिचरितत्वं तन्न साध्याभाववद्वृत्तित्वम्" अनुमानचिन्ता० व्यभिचारश्च द्विविधः अन्वयव्यभिचारोव्यतिरेकव्यभिचारश्चेति भेदात् अन्वयव्यभिचारोऽपि द्विधा। साध्याभाववद्वृत्तित्वं सप्तमानाधिकरणाभावप्रतियोगिसामानाधिकरण्यं चेति भेदात् यथा धूमवान् वह्नेरित्यादौ धूमाभाववति तप्तायःपिण्डे वह्नेर्वृत्तित्वात्, वह्न्यधिकरणे तप्तायःपिण्डे धूमाभावस्य विद्यमानतया तत्प्रतियोगिना सह समानाधिकरणत्वात् वह्नौ उभयविधव्यभिचारः। साध्याभावव्यापकीभूताभावाप्रतियोगित्वं व्यतिरेकव्यभिचारः यथा धूमवान् वह्नेरित्यादौ धूमाभावरूपसाध्याभावस्य तप्तायःपिण्डे सत्त्वेन वह्न्यभावस्य च तत्रासत्त्वात् वह्निना साध्याभाववद्व्यापकीभूताभावप्रतियोगित्वम्। इति तत्र उभयविधव्यभिचारः। २अबाधितार्थे च "अव्यभिचरितेभ्यः प्रमाणेभ्यः" भा० भा०।

अव्यभिचारिन् त्रि० वि+अभि+चर-णिनि न०त०। केनापि प्रतिकूलहेतुना १निवारयितुमशक्ये। न्यायमते २साध्यसाधकव्याप्तिविशिष्टे हेतौ च। ३अबाधितविषये च

'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारीति गौ०सू० [अव्यभिचरितशब्दे विवृतिः ।

अव्यभिचार पु० अभावे न०त० । १व्यभिचाराभावे २नैयत्यरूपे

अव्यय पु० न० वि+इण्–अच् न०त० । सर्वासु विभक्तिषु सर्ववचनेषु च एकरूपे १शब्दवृत्तिधर्म्मविशेषे, यथास्वरादयोवर्णाः सर्व्वत्रैकरूपाः २शिवे ३विष्णौ च पु० । आद्यन्तरहिते ४विकारशून्ये त्रि० ५परब्रह्मणि न० । "सदृशं त्रिषु लिङ्गेषु सर्व्वासु च विभक्तिषु । वचनेषु च सर्व्वेषु यन्न व्येति तदव्ययमिति" श्रुतिः । प्रवाहरूपेण सर्व्वदास्थिते च "अश्वत्थं प्राङ्ग्यमव्ययम्" गीता "मनसावयवैः सूक्ष्मं सर्वभूतकृदव्ययम्" सूक्ष्मभ्यो मूर्त्तिमद्भ्यः संभवत्व्ययादव्ययम्" मनुः ७अव्ययफलदे च "भूराद्यास्तिस्र एवैता महाव्याहृतयोऽव्ययाः । छन्दोग०"अव्ययो वा अव्ययफलदो भवति" इति आ०त०रघु० । "अव्ययः पुरुषः साक्षी" विष्णुस० । [भावे ।

अव्ययात्मन् त्रि०अव्यय आत्मा स्वभावो यस्य । अविनश्वरस्व–

अव्ययीभाव पु० अनव्ययमव्ययं भवत्येन अव्यय+च्वि–भू करणे घञ् । व्याकरणसिद्धे समासविशेषे । तत्र हि उपकुम्भमित्यादौ अनव्ययस्यापि कुम्भादिपदस्याव्ययत्वम् "अव्ययीभावश्चेति" पा० सूत्रे तथाभिधानात् । "इन्द्रोद्विगुरपि चाहं नित्यं मद्दण्डहेऽव्ययीभावः । तत्पुरुषः कर्म्मधारय येनाहं स्यां बहुव्रीहिः" उद्भटः ।

अव्यर्थ त्रि० न व्यर्थः । १सफले २सार्थके च ।

अव्यलीक त्रि० विरोधे न०त० । १प्रिये सत्ये च "इत्थं गिरः प्रियतमा इव सोऽव्यलीकाः शुश्राव सूततनयस्य तदाऽव्यलीकाः" माघः ।

अव्यवधान न० अभावे न०ब० । १व्यवधानाभावे नैकट्ये "यत् पदार्थस्य यत् पदार्थेनान्वयोऽपेक्षितस्तयोरव्यवधाने नोपस्थितिः कारणम्" आसत्तौ शक्ता० । न०ब० । २व्यवधानशून्ये अव्यवधानञ्च द्विविधं देशकृतं कालकृतञ्च । पूर्वोत्तरक्षणादौ कालिकं द्रव्यान्तरेणानावरणे दैशिकम् ।

अव्यवसाय पु० व्यवसायः निश्चयउद्यमश्च अभावे न०त० । १निश्चयाभावे२उद्यमाभावे च।न०ब०।३व्यवसायशून्ये त्रि०।

अव्यवसायिन् त्रि० न व्यवस्यति वि+अव–सो–णिनि न०त० । १उद्यमाभाववति अनुद्यते २निश्चयाभाववति निश्चयशून्ये । "बुद्धयोऽव्यवसायिनाम्" गीता ।

अव्यवस्था स्त्री वि+अव+स्था–अङ् अभावे विरोधे वा न०त० । "इदं कर्त्तव्यमिदं नेति" १नियमाभावे, २शास्त्रादिविहितायां व्यवस्थायाम् अविधौ च । "किमव्यवस्थाङ्कितोऽपि क्षेत्रवः" माघः । न०ब० । ३मर्य्यादाशून्ये ४अविहिते ५स्थितिरहिते चले च त्रि० । "स्खलदविन्दश्रियमव्यवस्थामिति" कुमारः "अव्यवस्थां सञ्चारिणीम्" मल्लि० ।

अव्यवस्थित त्रि०वि+अव–स्था+क्त न०त० । १शास्त्रादिमर्य्यादारहिते २अनियतरूपे "अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः" नीतिः ३चञ्चले च ।

अव्यवहार्य्य त्रि० वि+अव+हृ–ण्यत् न०त० । शयनासनभोजनादौ एकत्रावस्थानायोग्ये पतितादौ "कामतोऽव्यवहार्य्यस्तु वचनादिह जायते" स्मृतिः । अव्यवहार्य्यास्तु पतितत्वहेतुकर्म्मकारिणः स्मृतावुक्ताश्चेद्यास्तेषां संसर्गविशेषोऽपिनिषिद्धः यथा "याजनं योनिसम्बन्धं स्वाध्यायं सहभोजनम्। कृत्वा सद्यः पतन्त्येते पतितेन न संशयः" देवलः "शरणागतबालस्त्रीहिंसकान् संत्यजेच्च तान्। चीर्णव्रतानपि सदा कृतघ्नसहितानपि" या०स्मृ०। स्त्रीघातकस्याव्यवहार्य्यत्वञ्च हीनवर्णोपभुक्तावप्रतिरिक्तविषयम् "हीनवर्णोपभुक्ता या स्त्री वध्याऽपि वा भवेत्" इह०स्मृतौ तस्या वध्यत्वोक्तेः अत्र कृतप्रायश्चित्तानामपि अव्यवहार्य्यतोक्तेः अकृतप्रायश्चित्तानां सुतरां तथात्वम् तच्च शङ्खपूर्व्वं प्रा०त० रघुनन्दनेन समर्थितं यथा । "पापाभावे कथमव्यवहार्य्यता" इति चेत् या०स्मृतौ वचनादिह जायते इत्युक्तेस्तथात्वम् । तथाच किमिव वचनं न कुर्य्यात् नास्ति वचनस्यातिभारः तथाहि पापस्य हे शक्ती नरकोत्पादिका व्यवहारविरोधिका च । तत्रैकतरशक्तिविनाशेऽपि व्यवहारविरोधिका शक्तिरस्त्येवेति यथोक्तप्रमाणत्वेन "नास्माभिर्न लोके प्रत्यासत्तिर्विद्यते कस्यचन्तु विवृण्वते" इति प्रत्यासत्तिर्भोजनादौ साक्षिध्यम्" मिताक्षरायान्तु कामतो व्यवहार्य्य इत्येव पाठः तथैव तेन व्याख्यातं च "प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् । कामतो व्यवहार्य्यस्तु वचनादिह जायते" या०स्मृ०। "प्रायश्चित्तैः वध्यमार्षैरज्ञानाद्यदेनः पापं कृतं तदपैति अपगच्छति न कामतः कृतम्" किन्तु तत्र प्रायश्चित्तविधायकवचनबलादिह लोके व्यवहार्य्यो जायते इति" समर्थितप्रायमर्थं आशङ्कापूर्व्वकं तत्रैव यथा "ननु कामकृते प्रायश्चित्ताभावात् कथं व्यवहार्य्यत्वम्? तदभावश्च 'अनभिसन्धिजतेऽपराधे प्रायश्चित्तमिति" वसिष्ठवचनात्, "इयं विशुद्धिरुदिता प्रमाद्याकामतो द्विजम् । कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते" इति मनुवचनाच्चावगम्यते । नैतत्।

"यः कामतो महापापं नरः कुर्य्यात् कथञ्चन। न तस्य निष्कृतिर्दृष्टा भ्रूणम्निपतनादृते" इति। तथा "विहितं यदकामानां कामात्तद्द्विगुणम्भवेदिति" च कामकृतेऽपि प्रायश्चित्तदर्शनात्। यत्तु वशिष्ठवचनम् तस्याप्यकामकृतेऽपराधे प्रायश्चित्तं शुद्धिकरमित्यभिप्रायः, न पुनः कामकृते प्रायश्चित्ताभाव इति। यत्तु मनुवचनम् "इयं विशुद्धिरुदितेत्यादि" तदपीयमिति सर्वनामपराम्रष्टदृष्टादृष्टार्थिकव्रतचर्य्यापर एव "कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते" इत्यनेन प्रतिषेधो,न पुनः प्रायश्चित्तमात्रस्य, मरणान्तिकादेः प्रायश्चित्तस्य दर्शनात्। ननु यदि कामकृतेऽपि प्रायश्चित्तमस्ति तर्हि पापक्षयोऽपि कस्मान्न स्यादविशेषात् ? यदि पापक्षयोऽपि नास्ति तर्हि व्यवहार्यतापि कथम्भवति? उच्यते उभयत्र प्रायश्चित्ताविशेषः शास्त्रतोऽवगम्यते। अज्ञानकृते सर्व्वत्र पापक्षयः यत्र तु "ब्रह्महासुरापगुरुतल्पगमाद्यपितृयोनिसम्बन्धावगमक्षेत्रनास्तिकनिन्दितकर्म्माभ्यासिपतितात्याग्यपतितत्यागिनः पतिताः पातकसंयोजकाश्चेति" गौतमोक्तं महापातकादौ व्यवहार्य्यत्वं निषिद्धं तस्मिन् पतनीये कर्म्मणि कामतः कृते व्यवहार्य्यत्वमात्रं न पापक्षय इति। न च पापक्षयाभावे व्यवहार्य्यत्व मनुपपन्नम्। द्वे हि पापस्य शक्ती नरकोत्पादिका व्यवहारविरोधिका च तत्रैकतरशक्त्यविनाशेऽपि व्यवहारविरोधिकायाः शक्तेर्विनाशोनानुपपन्नत्वात् पापानपगमेऽपि व्यवहार्य्यत्वं नानुपपन्नम्। यत्तु मनुवचनम् "अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः। कामकारकृतेऽप्याहुरेकेश्रुतिनिदर्शनादिति" तदपि कामकृतेऽपि प्रायश्चित्तप्राप्त्यर्थं न पुनः पापक्षयप्रतिपादनपरम्। अपतनीये पुनः कामकृतेऽपि प्रायश्चित्तेन पापक्षयो भवत्येव। "अकामतः कृतं पापं वेदाभ्यासेन शुद्ध्यति। कामतस्तु कृतं मोहात् प्रायश्चित्तैः पृथग्विधैरिति" मनुस्मरणात्। पतनीयेऽपि कर्म्मणि कामकृते मरणान्तिकप्रायश्चित्ते कृतमपि क्षयोभवत्येव फलान्तराभावात्। "नास्याक्षिनू लोके प्रत्यासत्तिर्विद्यते कल्पन्त निर्हन्यत इत्यापस्तम्बस्मरणात्" इति।

अव्यवहित त्रि० वि+अव+धा-क्त न०त०। व्यवधानरहिते साक्षात्संबद्धे। "सिसाधयिषाविरहविशिष्टक्षणावच्छिन्नोत्तरक्षणोत्पत्तिकानुमितिकभिन्नेति" दीधितिः।

अव्यवहृत त्रि० वि+अव+हृ-क्त न०त०। १अकृतव्यवहारे यस्य व्यवहारो न कृतः तस्मिन् भोगादिना २अदूषिते च

अव्यसन न० अभावे न०त०। १व्यसनाभावे न०ब०। व्यसनशून्ये। व्यसनानि च अष्टादश मनुना दर्शितानि यथा "दश कामसमुत्थानि तथाष्टौ क्रोधजानि च। व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत्। कामजेषु प्रसक्तोहि व्यसनेषु महीपतिः। विमुञ्चतेऽर्थधर्म्माभ्यां क्रोधजेष्वात्मनैव तु॥ मृगयाक्षो दिवास्वप्नः परीवादः स्त्रियोमदः। तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः॥ पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः॥ द्वयोरप्येतयोर्मूलं यं सर्व्वे कवयोविदुः। तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ। पानमक्षाःस्त्रियश्चैव मृगया च यथाक्रमम्। एतत् कष्टतमं विद्याच्चतुष्कं कामजे गणे। दण्डस्य पातनञ्चैव वाक्पारुष्यार्थदूषणे। क्रोधजेऽपि गणे विद्यात् कष्टमेतत्त्रिकं सदा। सप्तकस्यास्य वर्गस्य सर्व्वत्रैवानुषङ्गिणः। पूर्व्वंपूर्व्वं गुरुतरं विद्याद्व्यसनमात्मवान्"।

अव्यसनिन् त्रि० न०त० स्त्रियां ङीप्। व्यसनशून्ये।

अव्यस्त त्रि० न व्यस्तः विक्षिप्तः विपर्य्यस्तः पृथग्भूतो वा। १अविक्षिप्ते २अविपर्य्यस्ते ३समस्ते च। [अव्ययादयोऽत्र

अव्याकुल त्रि० न०त०। निराकुले स्वच्छन्दे स्वस्थे।

अव्याकृत त्रि० वि+आ+कृ-क्त न०त०। वेदान्तमते अप्रकटीभूते १बीजरूपे जगत्कारणेऽज्ञाने २सांख्यादिमते प्रधाने च। "तदेदं तर्ह्यव्याकृतमासीत्"श्रुतिः। "सदेव सौम्येदमग्रआसीत्" छा०उ०भा०"इदं नामरूपाभ्यामव्याकृतम्"

अव्याज पु०न० अभावे न०त०। १छलाभावे "इदं किलाव्याजमनोहरं वपुः" शकु०। अव्याजसुन्दरीं तां विज्ञानेन ललितेन योजयता" मालवि०। न०ब०। २तच्छून्ये त्रि० व्याजश्च यथार्थभूतस्य वस्तुनः स्वरूपनिह्नवेन इतररूपेण प्रकाशार्थः व्यापारभेदः।

अव्यापक त्रि०न०त०। १व्यापकभिन्ने २परिच्छिन्ने च। व्यापकत्व स्वाधिकरणनिष्ठाभावाप्रतियोगी तद्भिन्नत्वाद्यभाव प्रतियोगो अव्यापकः यथा धूमो वह्नेरव्यापकः तस्य वह्न्यधिकरणे तप्तायःपिण्डे वर्त्तमानस्याभावस्य प्रतियोगित्वात् "अव्यापकविषयतान्यूनत्वम्" सामा०गदा०।

अव्यापार पु० अभावे न०त०। १व्यापाराभावे न०ब०। २व्यापारशून्ये। व्यापारश्च करणजन्यः क्रियाया अव्यवहित जनकः। यथा प्रत्यक्षज्ञाने इन्द्रियसन्निकर्षः। सहि इन्द्रियादुत्पन्नः प्रत्यक्षं जनयन् व्यापारो भवति एवं क्रियादिक्रियायां दात्रच्छेद्यसंयोगः। तथा यागादौ अदृष्टम्,अनुमितौ परामर्शः,शाब्दबोधे पदार्थस्मरणम् इत्यादि यथायथ-

मङ्गम्। तथा "उत्पादना क्रियाऽपि व्यापारः 'व्यापारो-भावना सैवोत्पादना सैवच क्रिया" हरिः।

अव्यापिन् त्रि० न व्याप्नोति वि–आप णिनि न०त० स्त्रियां ङीप्। १अव्यापके २परिच्छिन्ने च "हेतुमदनित्यमव्यापि सक्रियमाश्रितं लिङ्गम्" सां०सू०सा०का०च। "अव्याप्तित्वं परिच्छिन्नत्वम्" सां०प्र०भा०।

अव्याप्त त्रि०न व्याप्तः। १व्याप्तभिन्ने इयत्तया २परिच्छिन्ने च।

अव्याप्ति स्त्री अभावे न०त०। १व्याप्तेरभावे। व्याप्तिश्च तदभाव वदवृत्तित्वम् व्यापकसामानाधिकरण्यमनौपाधिकत्वं आधेयतादिवत् वस्तुस्वभावविशेषोवा मतभेदेन ज्ञेया। २लक्ष्ये लक्षणस्याप्रवृत्तौ च "अव्याप्यवृत्तिसाध्यकसङ्केता वव्याप्तिमाश्रयाह" दीधितिः।

अव्याप्य त्रि० व्याप्तिविशिष्टोव्याप्यः न०त०। व्याप्तिविशिष्ट भिन्ने १व्याप्तिशून्ये यथा वह्निर्धूमस्य अव्याप्यः वह्न्यधिकरणे तप्तायःपिण्डे धूमस्याभावेः तथात्वम्। वि+आप-ल्यप् न०त०। २सर्व्वावच्छेदमप्राप्येत्यर्थे अव्य०।

अव्याप्यवृत्ति त्रि० अव्याप्य सर्व्वावच्छेदमप्राप्य वृत्तिर्यस्य। स्वाधिकरणे अंशविशेषे कालभेदे वा अस्थिते पदार्थे यथा संयोगादिर्घटादिच न सर्व्वदेशं व्याप्य स्वाधिकरणे गृहादौ तिष्ठति। तथा आत्मनि ज्ञानादिकं न सर्व्वदा तिष्ठति। अतः संयोगादीनां स्वाधिकरण एव अंशभेदे कालभेदे च असत्त्वात्तथात्वम्। अव्याप्यवृत्तिनि-यामकश्च देशः कालश्च तत्र देशे सत्त्वे क्वचित् कालस्य देशभेदस्य वा नियामकत्वं क्वचित् कालसत्त्वे देशस्य इति अव्याप्यवृत्तित्वञ्च संयोगविभागादयो दैशिकाः कालिकाश्च तथा आत्मनि बुद्धिसुखदुःखेच्छाद्वेषयत्नधर्म्माधर्म्मभावना-ख्यसंस्काराः तेषां देहावच्छेदेन सत्त्वेऽपि घटाद्यवच्छेदे-नासत्त्वात् देहावच्छेदेऽपि सर्व्वदाऽसत्त्वाच्च तथात्वम् एवं शब्दस्य दैशिककालिकाव्याप्यवृत्तित्वम् गन्धादयस्तु कालिकाव्याप्यवृत्तयस्ते हि स्वाधिकरणे एव उत्पत्तिकाले प्रलये च परमाणौ न तिष्ठन्ति। संयोगेन घटादयोऽपि दैशिककालिकाव्याप्यवृत्तयः। "अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते" भाषा०। "अव्याप्यवृत्तिसाध्यकसङ्केता-दिति" दीधितिः।

अव्यायाम पु० अभावे न०त०। १व्यायामाभावे परिश्रम साधनव्यापाराभावे २विशेषेण विकाराभावे च न०ब०। ३तच्छून्ये त्रि०।

अव्यावर्त्तक त्रि० न व्यावर्त्तयति इतरेभ्यो निवारयति वि+आ+वृत–णिच्–ण्वुल् न०त०। १रक्षादक्षतनिवारणे २इतरस्माद्भेदासाधके ३अविशेषके च।

अव्यावर्त्तन न० वि+आ–वृत–णिच्–ल्युट् अभावे न०त०। इतरस्मादनिवारणे न०ब०। व्यावृत्तिशून्ये त्रि०।

अव्याहत त्रि० विशेषेणाहतः प्रतिरुद्धः न०त०। व्याघात-शून्ये व्याघातश्च विरोधप्रतिसन्धानेनाप्रसङ्गः २अप्रति रुद्धे च। "अव्याहताज्ञः सर्व्वत्र" पुरा० व्याहतं मिथ्यार्थकं तद्भिन्ने ३सत्ये वाक्ये न०।

अव्याहतत्व न० अव्याहतस्य भावः त्व। १व्याघाताभावे हेम चन्द्रोक्ते २वाक्यगुणभेदे च ते च गुणाः यथा "संस्कारवत्त्वमौ-दार्य्यमुपचारपरीतता। मेधनिर्व्यूढगाम्भीर्य्यं प्रतिनादविधा-यिता॥ दक्षिणत्वमुपनीतरागत्वं च महार्थता। अव्याहृत-त्वं स्निग्धत्वं संशयानामसम्भवः॥ निराकृतान्योत्तरत्वं हृद-यङ्गमिताऽपि च। मितःसाकाङ्क्षताप्रस्तावौचित्यं तत्त्वनि-ष्ठता॥ अप्रकीर्णप्रस्तुतत्वमसंक्षाप्यान्यनिन्दिता। अभि-जात्यमतिस्निग्धमधुरत्वं प्रशस्यता॥ अमर्म्मवेधितौदार्य्यं धर्म्मार्थप्रतिबद्धता। कारकाद्यविपर्य्यासोविभ्रमादिविमु-क्तता॥ चित्रकृत्त्वमद्भुतत्वं तथानतिविलम्बिता। अनेक जातिवैचित्र्यालङ्कारोपनिबन्धता॥ सत्त्वप्रधानता वर्णपद वाक्यविविक्तता। अव्युच्छित्तिरखेदित्वमुपबृंहितं च वा गुणाः"॥

अव्युत्पन्न त्रि० वि+उद्+पद–क्त न०त०। समुदायशक्त्या-वयवशोऽर्थबोधकताशक्तिः व्युत्पत्तिः तच्छून्ये अवयवार्थशून्ये शब्दे, "उणादयोव्युत्पन्नाः प्रातिपदिकम्" पा०। २शब्दावयवार्थानभिज्ञे अवैयाकरणे च।

अव्युत्थिति स्त्री वि+उद्+स्था–क्तिन् अभावे न०त०। उत्थानाभावे २वाक्यगुणभेदे च अव्याहृतत्वशब्दे विवृतिः।

अव्रण त्रि० नास्ति व्रणोऽस्य। १व्रणशून्ये व्रणश्च क्षतादि "तलादौ दलपवनं द्वादशाङ्गुलमायतम्। कनिष्ठि-कापरीणाहश्लक्ष्णपायतमव्रणम्" सुश्रु० २नेत्ररोगभेदे "यत् सव्रणं शुक्लमथाव्रणं वा पाकात्ययघ्नाञ्जका तत्तैव। चत्वार एतेऽभिहिता विकाराः क्षणाश्रयाः संग्रहतः पुरस्तात्" इति विभज्य, तत्रक्षमाप्युक्त सुश्रुते "सितं यदा भात्यसितप्रदेशे स्नन्दात्मकं नातिरुग-श्रुकृम्। विद्यात्तदव्रणं साध्यतमं वदन्ति" "अनेनापहरेच्छुक्लमव्रणं कुशलोभिषक्" सुश्रु०।

अव्रत त्रि० नास्ति व्रतं विहितनियमो यस्य। शास्त्रविहित नियमशून्ये "अव्रतानामसन्ध्यानां जातिमात्रोपजी-

विनाम्। नैषां प्रतिग्रहोदेवो न शिला तारयेच्छिलाम्" मनुः।

अव्रत्य त्रि० व्रताय हितम् यत् न०त०। व्रतकालेऽनाचरणीयेऽन्नतकथनादौ "अव्रतं वा व्याहरति तन्निष्ठ्या करोति व्रतम्" शत०ब्रा०।

अश संहतौ-व्याप्तौ च स्वादि०आत्म० सक० वेट्। अश्नुते आशिष्ट आष्ट आनशे। अशिता—अष्टा अक्ष्यते-अशिष्यते अक्षुवानः अष्टिः व्याप्तिः समष्टिः "खं प्राहुरेखैरिव चानशेऽङ्कैः" भट्टिः "प्रतापस्तस्य भानोश्च युगपद्व्यानशे दिशः" रघुः।

अश भोजने क्र्यादि० पर०सक० सेट्। अश्नाति आशीत्। आश। अशिता अशिष्यति। "ब्रह्महं परञ्च नाश्नीयात् प्राजापत्यं चरन् द्विजः, मनुः तदहं भक्षयुपहृतमश्नामि प्रयतात्मनः" गीता।

अशकुन पु० न०अप्राशस्त्ये न०त०। दुर्निमित्ते अनिष्टसूचके काकादिदर्शने। अशकुनाश्च द्विविधा औत्पातिकाः साधारणाः काकादिदर्शनादयोऽसाधारणाः। अमङ्गलशब्दे २१७, १८ पृष्ठे विवरणम् "अपयाति सरोषया निरस्ते कृतकं कामिनि चुम्बने स्तनाभ्याम्। कलयन्निव सव्यथोऽवतस्थेऽशकुनेन स्खलितं किलेतरेण" माघः। "साहस्र नैवाशकुनीभवेन्मे भाविप्रियावेदक एष हंसः" नैष०।

अशक्त त्रि० न०त० "समर्थभिन्ने १कार्य्याक्षमे" २पूर्व्वोत्पन्नमशक्तं नियतं महदादिसूक्ष्मपर्य्यन्तम्" सा०का०।

अशक्ति स्त्री अभावे न०त०। १सामर्थ्याभावे "अशेषेण तदशक्त्या वा नानुष्ठानमियत्तया" रघुः। २अपाटवे सांख्यमतसिद्धे बुद्धेः ३ज्ञानजननासामर्थ्यभेदे च सा च "एष प्रत्ययसर्गोविपर्य्ययोऽशक्तितुष्टिसिद्ध्याख्यः" इति सामान्यत उक्त्वा "पञ्च विपर्य्ययभेदाः भवन्त्यशक्तिश्च करणवैकल्यात्। अष्टाविंशतिभेदा" इति। अशक्तीर्विभज्य "एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा। सप्तदशवधा बुद्धेर्विपर्य्ययात् तुष्टिसिद्धीनाम्" सा०का० "बाधिर्यं, कुण्ठिताऽन्धत्वं, जड़ताऽजिह्मता तथा। मूकता, कौण्ठ्यपङ्गुत्वक्लैब्योदावर्त्तमन्दताः"। यथासंख्यं श्रोत्रादीनामिन्द्रियाणां वधाः एतावत्येव तद्धेतुका बुद्धेरशक्तिः स्वव्यापारे भवति। तथाचैकादशहेतुकत्वादेकादशधा बुद्धेरशक्तिरुच्यते। हेतुहेतुमतोरभेदविवक्षया च सामानाधिकरण्यम्। तदेवमिन्द्रियवधद्वारेण बुद्धेरशक्तिसञ्ज्ञा स्वरूपतोऽशक्तीराह सह बुद्धिवधैरिति। कति बुद्धेः स्वरूपतोवधा इत्यत आह सप्तदश वधा बुद्धेः, कुतः? विपर्य्ययाद्गुष्टिसिद्धीनाम्, तुष्टयोनवधेति तद्विपर्य्ययात्तच्चिरूपणाच्चवधा भवन्ति। एवं सिद्धयोऽष्टाविति तद्विपर्य्ययात्तच्चिरूपणात् अष्टौ भवन्तीति" सा०कौ०दर्शिता। व्याख्यातञ्चैतदस्माभिः,"पूर्व्वार्द्धे ज्ञानेन्द्रियाणाम् अपाटवसङ्कराद्धे कर्म्मेन्द्रियाणामिति मनसस्तु उभयेन्द्रियानुकूल्यादनेऽभिनिवेश इति भेदः। तत्र बाधिर्यं श्रोत्रगतं शब्दग्रहणापाटवम्। कुण्ठितात्वगतं स्पर्शग्रहणापाटवम्। अन्धत्वं नेत्रगतं रूपग्रहणापाटवम्। जड़ता रसनागतं रसग्रहणापाटवम्। मूकता वागिन्द्रियगतं वचनापाटवम्। कौण्ठ्यं हस्तगतमादानापाटवम्। पङ्गुत्वं पादगतं चलनापाटवम्। क्लैब्यमुपस्थगतं मैथुनासामर्थ्यम्। उदावर्त्तः अपानगतं विण्मूत्रोत्सर्गासामर्थ्यम्। मन्दता मनोगतं सुखादिविषयग्रहणासामर्थ्यम्। एकादशेति पञ्च ज्ञानेन्द्रियाणि पञ्च कर्म्मेन्द्रियाणि मनश्चेति एकादशेन्द्रियाणां वधाः स्वस्वकर्म्माक्षमत्वरूपा धर्म्मभेदाः तद्धेतुकत्वात् बुद्धेः स्वविषयाग्रहणमिष्यते अतो बुद्धेरशक्तिरेकादशविधैवेत्याह तथा चेत्यादि। ये बुद्धेः सप्तदश भेदा उत्तरार्द्धे वक्ष्यन्ते तैः सप्तदशभिः सह मिलिता एकादश भेदाः अष्टाविंशतिभेदाः स्युः।तथा च शक्तिरष्टाविंशतिभेदा इति यदुक्तं तत् समर्थितमिति"

अशकुम्भी स्त्री अश्नुते व्याप्नोति अश-अच् अशा स्तम्भाति जलमाष्टणोति स्तन्भ-बा०-ट पृषो०सलोपः टित्त्वात् ङीप् कर्म्म०। अल्पकालेन जलव्यापके जलोपरिजाते (पाना) इति ख्याते तृणभेदे।

अशक्य त्रि० न शक्यते शक-ण्यप् न०त०। असाध्ये "अशक्यशङ्व्यभिचारहेतुर्वाणी न वेदा यदि सन्तु के तुं" नैष०।

अशङ्का स्त्री अभावे न०त०। १संशयाभावे २त्रासाभावे च न०त०। ३तत्कर्त्तरि त्रि०।

अशङ्कित त्रि० अशङ्क-क्त न०त०।१अभीते २सन्देहरहिते च।

अशत्रु पु० न शातयति शद-ण्यर्थे तुन् न०त०। १चन्द्रे शब्दच०। विरोधे न०त०। शत्रुभिन्ने २मित्रे च।

अशन न० पु० अश्नुते व्याप्नोति अश-ल्युट्। १पीतसालवृक्षे दन्त्यमध्योऽयमत्रार्थे। भावे ल्युट्। २व्याप्तौ, ३भोजने च "सुनिभिर्द्विरशनं प्रोक्तं विप्राणां मर्त्यवासिनां नित्यम्" ति०त०स्मृ०। कर्म्मणि ल्युट्। ४भोज्ये अन्ने न० "पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन्। दृष्ट्वा हृष्येत् प्रसीदेच्च प्रतिनन्देच्च सर्व्वशः। पूजितं ह्यशनं नित्यं बलमूर्জ্জञ्च यच्छति। अपूजितं च तद्भुक्तम्" मनुः। "एवं

प्रयत्नं कुर्वीत यानशय्यासनाशनैः" मनुः "अशन-पते ! अशनस्य नोदेहि" श्रुतः ब्रा०।

अशनपर्णी स्त्री अशनस्य पीतशालस्य पर्णमिव पर्णमस्याः। (आराटो) इति ख्याते वृक्षभेदे सा हि पीतसालतुल्यपर्णा।

अशना स्त्री अशनमिच्छति-अशन+क्यच् क्विप्। भोजनेच्छायाम्। यस्याद्यचि अशन इत्यादि। "अशनापिपासे सौम्य ! विजानीहि" श्रा० उ०।

अशनाया स्त्री अशनमिच्छति अशन+क्यच्-स्त्रियाम् भावे अ। भोजनेच्छायाम्। "च्युतागनायः फलवद्विभूत्या" भट्टिः "अन्नाद्या अशनाया निवर्त्तते पानात् पिपासा" शत० ब्रा०। "अशनायवाशनाया हि मृत्युस्तन्मनोऽकुरुत" छ० उ०।

अशनायित त्रि० अशनमिच्छति अशन+क्यच्-कर्त्तरि क्त। १भोजनेच्छावति क्षुधिते। भावे क्त। २भोजनेच्छायां न०

अशनायुक त्रि० अशनमिच्छति अशन+क्यच्-उकञ्, उन् स्वार्थे कन् वा। भोजनाभिलाषुके। "अन्नमेव तन्मध्यतो धीयते ऽशनायुको यजमानो भवत्यशनायुकाः प्रजाः" ता० ब्रा०।

अशनि पुं० स्त्री अश्नुते संहन्ति अश-क्यनि। १मेघोत्पन्ने १ज्योतिषि २इन्द्रे "स्तनयित्नुरेवेन्द्रो यत्नः प्रजापतिः कतमः स्तनयित्नुरशनिः" शत० ब्रा० शत्रुघातके ३अनुयाजे "अशनिरेव प्रथमोऽनुयाज" इत्युपक्रम्य "अशनि-रिन्द्रोऽवहन्ति" शत० ब्रा० ४इन्द्रास्त्रे वज्रे, प्रस्तरवर्षिणि ५उल्काविशेषे, ६विद्युति च। "अशनेरन्तस्य चोभयो-र्वर्षिनवाम्बुधरास्य योनयः कुमा० ७अग्नौ ८विद्युदग्नौ "तमग्नयोदशनिरसीति तदेवस्य तन्नामाकरोद्विद्युत्तद्रू-पमभवद्विद्युद्वा अशनिस्तस्माद्यं विद्युदग्न्यशनिरवधीदि-त्याहुः" शत० ब्रा०। वज्रं च दत्तासुरवधार्थमिन्द्रेण दधीचोऽस्थीनि गृहीत्वा विश्वकर्म्मणा कारितमिति भाग० ६स्क०। "मघवन् ! वाहि भद्रं वोदध्यङ्मधिन-सत्तमम्। विद्याव्रततपःसारं गात्रं याचत मा चिरम्। स वा अधिगतो दध्यङ्ङाथर्व्वणो ब्रह्म निष्कलम्। यद्वा अश्वशिरोनाम तपोरमरतां व्यधात्। दध्य-ङ्ङाथर्व्वणस्यैष वर्म्माभेद्यं सदात्मकम्। विश्वरूपाय-यत् प्रादात्त्वष्टा यज्ञमथाप्तुतः। युष्मभ्यं याचितोऽश्विभ्यां धर्म्मज्ञोऽङ्गं स दास्यति"। ततस्तैरायुधश्रेष्ठो विश्वकर्म्मविनि-र्म्मितः। येन वृत्रगिरो हत्वा मत्तेजउपबृंहितः"। इति विष्णुनोक्तेनेन्द्रेण तथा कृते स आह "तथाभियाचितो देवैर्ब्रह्मिराथर्वणो महान्। मोदमान उवाचेदं प्रहसन्निव भारत !। अपि इन्द्रारकायूयं न जानीत शरी-रिणाम्। संस्थायां यस्त्वभिद्रोही दुःसहश्चेतनापहः। जिजीविषूणां जीवानामात्मा प्रेष्ठश्चेष्मितः। कउत्तमश्लोक तं दातुं भिन्द्यामाणाय जिष्णवे" इति दधीचोक्ते देवैः पुनरुक्तम् यथा "किं नु तद्दुष्करं ब्रह्मन् ! पुंसां भूतानु कम्पिनाम्। भवद्विधानां महतां पुण्यश्लोकैकबन्धूनाम्। नूनं स्वार्थपरोलोको न वेद परसङ्कटम्। यदि वेद न याचेत नेति नाह यदीश्वरः। इत्युक्ते दधीचोक्तम् "धर्म वःश्रोतुकामेन यूयं मे प्रत्युदाहृताः। एष वः प्रियमात्मानं दुस्त्यजं सन्त्यजाम्यहम्। योऽध्रुवेणात्मना नाथा ! न धर्मं न यशः पुमान्। इच्छेत भूतदयया स शोच्यः स्वावरैरपि। एतावानव्ययोधर्म्मः पुण्यश्लोकैरुपासितः। योभूतशोक-हर्षाभ्यामात्मा शोचति हृष्यति। अहो दैन्यमहोकष्टं पारक्यैः क्षणभङ्गुरैः। यच्चोपकुर्य्यादस्वार्थैर्मर्त्यः स्वप्नाति-विभ्रमैः। श्रीबादरायणिरुवाच। "एवं कृतव्यवसितो दध्यङ्ङाथर्व्वणस्तनुम्। परे भगवति ब्रह्मण्या-त्मानं सन्नयन् जहौ। गताह्यासुमनोबुद्धिसत्त्वदृग् ध्वस्तबन्धनः। आस्थितः परमं योगं न देहं ववृधे-ऽन्तितम्। अथेन्द्रो वज्रमुद्यम्य निर्म्मितं विश्वक-र्म्मणा। सुनेः शक्तिभिरुत्सिक्तं भगवत्तेजसान्वितम्"।

अशब्द त्रि० नास्ति शब्दो, वेदादौ वाचकशब्दो वा यस्य। १शब्दहीने, वेदे २वाचकशब्दवर्ज्जिते प्रधाने "ईक्षतेर्नाश "शब्दमिति" शारीरकसूत्रम् ३शब्दादिगुणहीने ब्रह्मणि च न० "अशब्दमस्पर्शमरूपमव्ययमिति" श्रुतिः

अशरीर त्रि० नास्ति शरीरं तदभिमानो वा यस्य। "प्रत्यग्ज्ञान निषिध्यते मिथ्याज्ञाने सहेतुके। नेतिनेतिस्वरूपत्वादश-रीरो भवत्ययम्" इत्युक्तलक्षणे सकलनिषेधरूपे १परमा त्मनि, २शरीराभिमानशून्ये जीवन्मुक्ते "अशरीरं वा वसन्तं प्रियाप्रिये न स्पृशतः" इति श्रुतिः। ३देहशून्ये ४मीमां-सकोक्ते देवे ५ईश्वरे च परमात्मस्वरूपत्वात् ईश्वरस्याशरीर-त्वम् "तदैक्षत बहु स्यां प्रजायेति श्रुत्वा तस्येच्छित्वं यदुक्तं तदसङ्गतं शरीरं विना ज्ञानानुपपत्तेरित्याशङ्क्यापूर्व्वकं शा० भा० तत् समर्थितं यथा "प्रागुत्पत्तेर्ब्रह्मणः शरी-रादिसंबन्धमन्तरेणेच्छित्वमनुपपन्नमिति न तच्छ्रोद्यमवत-दति सवितृप्रकाशवत् ब्रह्मणोज्ञानस्वरूपमित्यत्वेन ज्ञान-साधनमेक्षानुपपत्तेः। अपि च अविद्यादिसंसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिः स्यात् न ज्ञानप्रतिबन्धकारणर-हितस्येश्वरस्य। मन्त्रो चैतावीश्वरस्य शरीराद्यनपेक्षतामना-वरणज्ञानतां च दर्शयतः। "न तस्य कार्य्यं करणञ्च विद्यते न

तत्समवाय्यधिकरणदृश्यते।परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति" "अपाणिपादोजवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तमिति" च। ननु नास्ति तव ज्ञानप्रतिबन्धकारणज्ञानेश्वरादन्यः संसारी।"नान्योऽतोऽस्ति द्रष्टेति विज्ञातेति"श्रुतेः तत्र किमिदमुच्यते संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिर्नेश्वरस्येति। अत्रोच्यते सत्यं नेश्वरादन्यः संसारी तथापि देहादिसंघातोपाधिसंबन्ध दृश्यतएव घटकरकगिरिगुहाद्युपाधिसंबन्ध इव व्योम्नः, तत्कृतशब्दप्रत्ययव्यवहारा लोकस्य दृष्टाश्च, घटच्छिद्रं करकच्छिद्रमित्यादिराकाशाव्यतिरेकेऽपि तत्कृता चाकाशे घटाकाशादिभेदमिथ्याबुद्धिर्दृष्टा तथेहापि देहादि संघातोपाधिसंबन्धाविवेककृतेश्वरसंसारिभेदमिथ्याबुद्धिः। दृश्यते चात्मन एव सतोदेहादिसंघातेऽनात्मन्यात्माभिनिवेशो मिथ्याबुद्धिमात्रेण सति चैवं संसारित्वे देहाद्युपेक्षमोक्षित्वमुपपन्नं संसारिणः"भा०।जीवस्यापि अवास्तविकं सशरीरत्वं तदपि तत्रैव व्यवस्थापितं यथा "शरीरे पतितेऽशरीरत्वं स्याच्च जीवत इति चेत् न सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात्। नह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं सङ्गा अन्यतः सशरीरत्वं शक्यं कल्पयितुम् नित्यमशरीरत्वम् अकर्मनिमित्तत्वादिति चावोचामः। तत्कृतधर्माधर्मनिमित्तं सशरीरत्वमिति चेत् शरीरसम्बन्धस्यासिद्धत्वात् धर्माधर्मयोरात्मकृतत्वासिद्धेः। शरीरसम्बन्धस्य धर्माधर्मयोस्तत्कृतत्वस्य चेतरेतराश्रयत्वप्रसङ्गात्। अन्धपरम्परं वैषाऽनादित्वकल्पना क्रियासमवायाभावाच्चात्मनः कर्तृत्वानुपपत्तेः। सन्निधिमात्रेण राजप्रभृतीनां दृष्टं कर्तृत्वमिति चेन्न धनदानाद्युपार्जितभृत्यसंबन्धत्वात् तेषां कर्तृत्वोपपत्तेः। नह्यात्मनोधनदानादिवच्छरीरादिभिः स्वस्वामिसम्बन्धनिमित्तं किञ्चिच्छक्यं कल्पयितुम् मिथ्याभिमानस्तु प्रत्यक्षः सम्बन्धहेतुः" गा०भा०।

अशरीरत्व न० अशरीरस्य भावः त्व। १शरीरसम्बन्धराहित्ये २मोक्षे च। यथा मोक्षस्याशरीरत्वं तथोक्तं गा० भा०। "अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशतः" इति प्रियाप्रियस्पर्शनप्रतिषेधाच्छोदनालक्षणधर्मकार्य्यत्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते। धर्मकार्य्यत्वे हि प्रियाप्रियस्पर्शनप्रतिषेधोनोपपद्यते। अशरीरत्वमेव धर्मकार्य्यमिति चेत् तस्य स्वाभाविकत्वात्। "अशरीरं शरीरेषु अनवस्थेष्ववस्थितम्। महान्तं विभुमात्मानं मत्वा धीरो न शोचति" "अप्राणोह्यमनाः शुभ्रः अक्षरोह्यपं पुरुष" इत्यादि श्रुतिभ्यः। अतएवानुच्चैयफलविलक्षणं मोक्षाख्यमशरीरत्वं नित्यमिति सिद्धम्"। अयं भावः अभावस्याधिकरणानतिरेकेण शरीरसम्बन्धाभावस्य ब्रह्मरूपतया मोक्षस्य तदभिन्नतया च तथात्वम् इति।

अशरीरिन् त्रि०न शरीरी।१देहशून्ये ब्रह्मणि २मीमांसकोक्ते देवभेदे च। शरीरसञ्चारविरहित्वे नास्त्यस्य इनि न०त०। ३शरीरेणानुचार्य्ये आकाशशब्दे। उभयत्र स्त्रियां ङीप्। "वायुवाचाशरीरिणी" भा०आ०प०। [शून्ये त्रि०।

अशर्मन् न०विरोधे न०त०। १शर्मभिन्ने दुःखे न०ब०। २सुख

अशाखा स्त्री नास्ति शाखा यस्याः। १लतीतरुणे राजनि०। २शाखाशून्ये वृक्षभेदे त्रि०।

अशान्त त्रि० विरोधे न०त०। शान्तभिन्ने अमहीने "नास्ति बुद्धिरयुक्तस्य—अशान्तस्य कुतः सुखम्" गीता। [त्रि०।

अशान्ति स्त्री अभावे न०त०। १शमाभावे न०ब०। २शमशून्ये

अशाश्वत त्रि० न शाश्वतः। अनित्ये अस्थिरे।

अशासन त्रि०अभावे न०त०। १शासनाभावे न०त०। २शासनशून्ये। [वेदादिविरुद्धे नास्तिकागमादौ।

अशास्त्र न० शास-करणे ष्ट्रन् शास्त्रं वेदादि विरोधे न०त०।

अशास्त्रीय त्रि० शास्त्रे विहितः छ न०त०। शास्त्राविहिते निषिद्धे।

अशास्य त्रि० शास-बा० ण्यत्। शासितुमशक्ये दुर्ज्ञेये।

अशिक्षित त्रि० विरोधे न०त०। शिक्षाशून्ये गतिनैपुण्यशून्ये क्रियादौ।

अशित त्रि० अश-कर्म्मणि क्त। १भक्षिते "आपएव तदशितं नयन्ते" "अन्नमशितं त्रेधा विधीयते" "तेजोऽशितं त्रेधा विधीयते" इति च छा०उ०। कर्त्तरि क्त। २अशनेन क्षुन्ने आशितङ्वीनः भावे "क्त" ३अशनेन०।

अशिच पु० अश-संहतौ इत्र। १चौरे। भोजनार्थात् कर्म्मणि इत्र। देवभेदे २चरौ।

अशिथिल त्रि० विरोधे न०त०। शिथिलभिन्ने दृढे।

अशिपद त्रि०न शिपदः पदरोगभेदः वेदे षृ०लोपः न०ब०। शिपदरोगशून्ये। "शिवा देवीरशिपदा भवन्तु सर्वाः" ऋ० ७,५०,४।

अशिमिद त्रि० "शिमिर्वधकर्म्मा" निरु० शिमिं हिंसां ददाति दा-क उप०स०। अहिंसके "सर्व्वा नद्यो अशिमिदा भवन्तु" ऋ० ७,५०,४।

अग्निर पु० अग–इरच् । १राजसे २अग्नौ तस्य सर्व्व भक्षत्वात्तथात्वम् ३भास्करे ४वायौ च तयोर्व्यापकत्वात्तथात्वम् ईनार्थात् स्त्रो टाप् ।

अग्निरस् पु० नास्ति गिरोऽस्य । १कवन्धे २अपत्रशून्ये त्रि० ।

अग्निरस्नान न० न गिरसा स्नानम् । गिरोमज्जनशून्ये स्नाने ।

अग्निव न० विरोधे न०त० । १मङ्गलभिन्ने २तद्वति त्रि० ३उग्रे च ५त्र० । ४अमङ्गलशब्दोक्ते तत्सूचके त्रि० ।

अग्निशिषा स्त्री अग्निरभिच्छा अग–सन्–भावे अ । भोजनेच्छायाम् "इक्षते हुतकामनो ग्राणस्याग्निशिषाऽतो व्यादादातीति" छा० उ० भा० ।

अग्निशु पु० विरोधे न०त० । १शिशुभिन्ने तरुणे "जातमात्रः शिशुस्तावद्यावदष्टौ समा वयः" इति स्मृत्युक्तवयोऽतिक्रान्ते २नववर्षवयस्के च । नास्ति शिशुर्यस्य । ३शिशुशून्ये त्रि० । स्त्रियां ङीप् लोके, वेदेऽपि क्वचित् "आ धेनवोधुनयन्नासगिश्वीः" ऋ० ३,५५,१६ । "नो मा कुलानोस्वेष्वेधेनवोऽग्नःस्तनाभुजो अशिश्वीः" ऋ० १,१२०,८ ।

अग्निष्ट त्रि० न०त० । १उपदिष्टभिन्ने यस्य शासनं न कृतं तस्मिन् । शिष्टः साधुः विरोधे न०त० । २असाधौ साधुत्वञ्च वेदार्थे विश्वासवक्तृत्वमिति दिनकरो ३तद्भिन्ने नास्तिके ४वर्णसङ्करकारके व्यभिचारवति च "अशिष्टव्यवहारे दाधः प्रयोगे चतुर्थ्यर्थे ततीया" वार्त्ति० ।

अग्निष्ठ त्रि० अत्ति अग–अच् अतिशायने इष्ठन् । १भोक्तृतमे २अग्नौ पु० तस्य सर्व्वभक्षकत्वात्तथात्वम् । "अशीतमेत्यग्निष्ठो हुताग्निः" शत० ब्रा० ।

अग्नीत न० विरोधे न० त० । १उष्णस्पर्शे २तद्वति त्रि० । शीतं हिमं तद्बाधा न०ब० । हिमबाधाशून्ये त्रि० "अशीतास्तरवोभावे" नीतिः । [अशीतिकिरणादयोऽप्यत्र ।

अग्नीतकर पु० अशीत उष्णः करो यस्य । उष्णांशौ सूर्य्ये

अग्नीतम पु० अत्ति अग–बा० इनि ततः तमप् वेदे दीर्घः । भोक्तृतमे अग्नौ "अशीतमेत्यग्निष्ठो हुताग्निः" शत० ब्रा० ।

अग्नीति स्त्री दशानामवयवं दशतिः दशकम् अष्टयुक्तिता दशतिः नि० अशीत्यादेशः । अष्टयुक्तिते दशके (आशी) १संख्याभेदे, २तत्प्रकाशान्विते च । "अशीतिभागो हरिः स्यान्मासि मासि सचस्वके" या० स्मृ० । अर्वाग्दशादशवर्षीयादशीतेरूर्द्धमेव च" स्मृतिः अशीतिः परिमाणमस्य ठन् । अशीतिकः" तत्परिमिते त्रि० ।

अग्नीर्षिक त्रि० नास्ति शीर्षा यस्य ब्रीह्यादि० ठन् । अशीर्षवति १मस्तकशून्ये २अपत्रशून्ये च ।

अग्नील न० विरोधे न०त० । १दुष्टशीले न०त० २शीलशून्ये त्रि०

अशुच् त्रि० नास्ति शुगस्य । शोकशून्ये ।

अशुचि त्रि० विरोधे न०त० । १शौचशून्ये २अपवित्रे मूत्रादौ च । स्त्रियां ङीप् । "अशुच्योनैव तान्नेन देन वैकारिकं हि तत्" भट्टः । शुचितत्कालजीविनां कर्म्माधिकारित्वेनाशुचेः पर्य्युदस्तत्वम् "अशुचिद्रव्याणि च अशुद्धिशब्दे वक्ष्यन्ते" व्रतानामुपवासानां आद्धादीनाञ्च सङ्गमे । करोति यः चौरकर्म सोऽशुचिः सर्वकर्म्मसु" स्मृतिः "विरात्रमशुचिर्भवेत्" स्मृतिः । अशुचित्वं च वैदिककर्म्मानर्हत्वप्रयोजकोधर्म्मविशेषः तच्च कर्त्तृनिष्ठं द्रव्यनिष्ठञ्च । स्मृतकर्म्मनिमित्तं दुष्टद्रव्यसंसर्गजतच्च कर्त्तृनिष्ठम् । द्रव्यनिष्ठन्तु वस्तुस्वभावजतत् "यथा मलमूत्रपुरीषास्थि निर्गतं ह्यशुचि स्मृतम् । नारं स्पृष्ट्वा तु सस्नेहं सचेलं जलमाविशेदित्यादि स्मृत्युक्तं तत्संसर्गयुतद्रव्यनिष्ठञ्च अधिकमशुद्धिशब्दे वक्ष्यते । शुचिः शुभ्रः । तद्भिन्ने २क्षणवर्षे पु० ४तद्वति त्रि० स्त्रियां वा ङीप् । तस्य भावः अण् अशौचम् ष्यञ् आशौच्यम् । अशुचिभावे न० "आशौच्यात् विप्रमुच्येत ब्राह्मणान् स्खलितात्च च" स्मृतिः वा पूर्व्वपदवृद्धिः अशौच्यमपि तत्रैव । अशुचौ भवः ष्यञ् वा पूर्व्वपददीर्घे अ(आ)शौच्यः तद्भवे त्रि० ।

अशुद्ध त्रि० विरोधे न०त० । १शुद्धभिन्ने सदोषे २अपवित्रे च दोषश्च नानाविधः व्याकरणादिलक्षणानुसारित्वे शब्दस्य दोषः शास्त्रनिषिद्धतयाऽनुष्ठाने कर्म्मणां दोषः यथा हिंसादेः पापजनकतया सदोषता । स्नानाद्यपनेयमलादेश्च सदोषता विरक्षमशुद्धिशब्दे । "सर्व्वतीर्थेष्वपि स्नातोह्यशुद्धः पुनरेव सः" स्मृतिः एतच्च मनःशुद्धिप्रशंसार्थवादः ।

अशुद्धि स्त्री अभावे न०त० । १शुद्धभावे दोषे न०त० । २शुद्धिशून्ये दुष्टे । तत्राशुद्धिस्तत्प्रतियोगितया शुद्धिश्च निरूपिता हेमाद्रौ श्रा०ख० । ततः सारांशः । अशुद्धिर्नाम कर्त्तृद्रव्यादेः स्पर्शनाद्यनर्हतापादकोदोषविशेषः शुद्धिस्तदीयसंस्काराधादिता तद्भिदुक्तिः । शुद्धिमतएव सकलकर्म्मोपयोगयोग्यत्वम् "श्रौतं स्मार्त्तं तथा कर्म कर्त्तव्यमधिकारिणा । शुचिना साधनैः शुद्धैः सम्यक् श्रद्धान्वितेन च" ब्रह्मा० पुरा० उक्तेः । अतो यथाशक्ति शुचिना शुचिभिरेव द्रव्यैराचरणीयम् । ते चोभे अपि शास्त्रैकगम्ये । नन्वत्र किं शास्त्रेण लोकव्यवहारप्रसिद्धेः शुद्धाशुद्धोः, व्यवहरत्येव हि लोको जुगुप्सितमूत्रइरीषादिसंसृष्टं द्रव्यमशुद्धमिति प्रक्षालनाद्यपनीतगन्धञ्च शुद्धमिति, सत्यमयं

लोकव्यवहारः क्वचिदेव जुगुप्सितस्वर्गोपक्रमत्व द्रव्ये, न सर्व्वत्र । तत्रापि सामान्यतश्चासौ व्यवहारो न द्रव्यदेशकालावस्थादिभेदक्रमतो, नवा शुद्धाशुद्धितारतम्यविशेषक्रमतः । अतः सर्व्वत्र विशेषतश्च शुद्धाशुद्धोः शास्त्रादेव निश्चयः । यस्तु चण्डालादिस्पर्शादावपि विशेषतश्च लोकव्यवहारः स तु शास्त्रमूलप्रसिद्धिमात्रित्यैव यागदानहोमादिषु श्रेयःसाधनत्ववत् । कथं पुनः कार्य्यार्थपरेण धर्म्मशास्त्रेण शुद्धाशुद्धिरूपस्य सिद्धार्थस्यावगतिः ? श्रुतार्थापत्त्येति ब्रूमः । तथाहि यथा दर्शपौर्णमासाभ्यां स्वर्गकामोयजेतेत्यादौ ऋषिकाणां यागानां श्रूयमाणकालान्तरभाविस्वर्गसाधनत्वान्यथानुपपत्त्या पुरुषे शुभापूर्व्वसिद्धिः, यथा च ऋषिकस्यावगोरणस्य श्रुतकालान्तरभाविशतयातनासाधनत्वान्यथानुपपत्त्या दुरितापूर्व्वसिद्धिः। तथा मूत्रपुरीषादिसंस्पृष्टेन न व्यवहर्त्तव्यम् प्रक्षालनप्रोक्षणादि संस्कारवता तु व्यवहर्त्तव्यमिति श्रुतव्यवहारनिषेधतदन्यथानुपपत्त्या द्रव्यादिगतशुद्धाशुद्धिरूप सिद्धार्थकल्पना न विरुध्यते । अथ वा शुद्धाशुद्धिस्मृतीनां सिद्धार्थवादपरत्वमेवास्तु तासां च तादृशमेव वेदवाक्यं मूलं कल्प्यते कर्म्मभाषार्थानुसारिणी हि वेदकल्पना । नास्ति नियमः कार्य्यार्थपरेणैव वेदेन भाव्यमिति "तद्भूतानां क्रियार्थेन समाम्नायः" इति न्यायेन सिद्धार्थानामपि विध्येकवाक्यतया प्रामाण्यव्यवस्थापनात् । प्रकृते च कर्म्मविधायके प्रायुक्ताब्राह्मणवाक्ये अधिकारिविशेषणतया साधनविशेषणतया च शुद्धेः, अशुद्धेश्च पर्य्युदस्ततया सिद्धायाः अपि विधिनैकवाक्यतया प्रामाण्यसम्भवः । किञ्च प्रक्षालितेनैव व्यवहर्त्तव्यमिति नियमविधिर्दृश्यते अतो वेदमूलत्वकल्पना । अतः शुद्धाशुद्धी उभे अपि शास्त्रादेवावगम्ये । तदुक्तं "शुद्धयशुद्धी ह्यदृष्टत्वाद्विद्यायेते यथास्मृति" तदेवं वस्त्रा शुक्तमित्यादिभिरशुद्धिवचनैरशुद्धिर्गम्यते जलेनैव विशुध्यतीत्यादिभिश्च शुद्धिर्विधीयते । अतोऽष्टकादिस्मृतिवत् वेदमूले एव शुद्धयशुद्धिस्मृती । शुद्धिवचनैश्चाशुद्धिराक्षिप्यते शुद्धिर्हि मूलाद्युपघातेनाशुद्धानां द्रव्याणां संस्काररूपा कर्त्तव्यतया विधीयते न पुनः शुद्धानाम्, न हि स्वरसोदयः भावः स्वभावेनाशुद्धः येन प्रयोगकाले शुद्धिमपेक्षेरन् । अथाष्टार्थं व्रीहिप्रोक्षणवत् प्रयोगकाले संस्कारोविधीयते इति चेत् न तथात्वे अशुद्धिज्ञापकं वचनं विरुध्येत अतः सिद्धं शुद्धाशुद्धोः शास्त्रगम्यत्वम् । तत्र शुद्धिर्नानाविधापि संक्षेपात् द्विविधा बाह्या आभ्यन्तरा च । यथा "अथातः शौचाध्यायं व्याख्यास्यामस्तद्द्विविधम् बाह्यमाभ्यन्तरञ्च आन्तरं शौचं नाम तद्यदहङ्कारनिन्दितेभ्यो मनो निवर्त्तते, बाह्यमपि गन्धलेपस्नेहोपघातेऽद्भिरनिष्टपुरुषस्पर्शने प्रोक्षणाच्छुचिरित्यशुचिप्रतिषेधः, हृदयशौचमनुतप्तता साधुता, कर्म्मशौचमगर्हितकर्म्मत्वता, शरीरशौचं मृद्भिरद्भिश्च, वाचाम् अप्रियानृतनिष्ठुरवर्जनम्, मनसो मिथ्यासंकल्पप्रतिषेधः, बुद्धेर्ज्ञानम् । श्रूयते द्विविधं शौचं यच्छिष्टैः पर्य्युपासितम्" । "बाह्यं निर्लेपनिर्गन्धमन्तःशौचमहिंसनम्" इति च उश० । "अद्भिः शुध्यन्ति गात्राणि बुद्धिर्ज्ञानेन शुध्यति । अहिंसया च भूतात्मा मनः सत्येन शुध्यति" इति "कालोऽग्निर्मनसः शुद्धिरुदकाद्यनुलेपनम् अविज्ञानञ्च भूतानां षड्विधं शौचमुच्यते । देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम् । उपपत्तिमवस्थां च परिज्ञाय यथाविधि । शौचतः कुशलो धर्म्मे धर्म्मेप्सुः शौचमाचरेत्" इति च बौधा० "अनिलानलसोमसूर्य्यकाञ्चनरजतमक्षतोयतार्क्ष्यैः, अजमुखवालधिगोमयरजआद्यैः स्वर्गगुरुभिरिह मेध्यतां नयन्ति" हारी० "आत्मयाजिनां शरीरस्याद्भिर्मृद्भिश्च, ज्ञानेन बुद्धेः, तपसा पापानां, सन्ध्याजानां मार्हपैतृकाणां दोषाणां यमनियममन्त्रव्रतोपवासादिभिः" शङ्खलि० "ज्ञानं तपोऽग्निराहारो मृण्मयो वार्य्युपाकृतम् वायुः कर्म्मार्ककालौ च शुद्धिकर्त्तृणि देहिनाम्" सर्व्वेषामेव शौचानामन्नशौचं परं स्मृतम् । योऽन्नेशुचिर्हि स शुचिर्न मृद्वारि-शुचिः शुचिः । ज्ञान्या शुध्यन्ति विद्वांसोदानेनाकार्य्यकारिणः । प्रच्छन्नपापाजप्येन तपसा वेदवित्तमाः । शोध्यं शुध्यति मृल्लोपैर्नदी वेगेन शुध्यति रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमाः । अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति । मनुः "कालोऽग्निः कर्म्म मृद्वारि मनोज्ञानं तपो जलम् । पश्चात्तापो निराहारः सर्व्वेषां शुद्धिहेतवः । अकार्य्यकारिणां दानम्" शेलूषस्येश्वरज्ञानात् विशुद्धिः परमा मता" या० मृ० "सत्यं शौचं तपः शौचं शौचमिन्द्रियसंयमः । सर्व्वभूतदया शौचमार्जवं तु पञ्चमं मतम्" यमः "गात्रं मृदम्भसा शुध्येच्चित्तं भूताद्यसंसनात् । विद्यया तपसा देही मतिर्ज्ञानेन शुध्यति । स्वाध्यायेनानुतापेन होमेन तपसैव च । ध्यानेन शेलवासेन दानेनेह परिग्रहः । परापवादाश्रवणं परस्त्रीणामदर्शनम् । एतच्छौचं श्रोत्रदृशो जिह्वाशुद्धिरपैशुनम् । अप्राणिवधमस्तेयं

शुचित्वं पादहस्तयोः। अवलेपैः परस्त्रीणां शरीरं शौचमिष्यते" हरीतः। "उच्छिष्टोपघातेऽभ्युक्षणाच्छुचिर्विस्रब्धं संस्पृश्योन्मृज्याचम्य प्रयतोभवेत्" पैठी०। "प्राणिनामथ सर्वेषां रुद्धिरङ्गेषु कारयेत्। अत्यन्तोपहतानाञ्च शौचं नान्यत्" विष्णुः। "विस्रावोत्सर्गशुद्ध्यर्थं रुद्धार्थानां देयमर्थवत्। दैहिकानां मलानाञ्च शुद्धिषु द्वादशस्वपि। वसा शुक्रमसृङ्मज्जा मूत्रविट् घ्राणकर्णविट्। श्लेष्मास्रु दूषिकामेदो द्वादशैते नृणां मलाः" मनुः "तथा शरीरस्रोतोभ्यो मलनिष्यन्दविस्रवः। अन्त्यादीनां प्रदेयश्च स्यादशुचिर्विशेषतः। प्रभूताशुच्यमेध्यानां स्पर्शनाच्च शुचिर्भवेत्। स्वप्नाद्रस्त्रविपर्यासात् क्षुताद्दुष्टिपरिभ्रमात्। उक्त्वा वाचमनाच्छुद्धिरन्तं क्रूरमेव वा। अपविद्धं धनुर्लक्ष्यं दृष्ट्वा वा अशुचिर्भवेत्। प्रलेपस्नेहगन्धानामशुचौ चापकर्षणम्। शौचलक्षणमित्याहुर्दम्भोगोमयादिभिः। लेपे स्नेहे च गन्धे च व्यपनष्टे च दूरतः। पश्चादाचमनञ्चैव शौचार्थं वक्ष्यते विधिः" देवलः। "दुष्टाभिशस्तपतितैस्तिर्यग्योनिगतैस्तथा। संस्पर्शाच्चास्रसंदेतोयपूयशोणितदूषितलालानिर्दीवितरेणुकेशमोक्षिप्तजलविस्रावपुरीषादिभिर्वाह्यशरीरोपघातिभिरुपपृताभिरद्भिर्दृष्ट्वा च भक्षगोमयौषधिमङ्गलाचारविधिप्रयुक्तैर्वाह्यशरीरोपघातात् पूतोभवति" हारीतः। "चिताधूमसेवने सर्वे वर्णाः स्नानमाचरेयुः। मैथुने दुःस्वप्ने रुधिरोपगतकण्ठे वमनविरेकयोश्च। अशुचिकर्म्मणि कृते च। शवं शवस्पृशञ्च स्पृष्ट्वा रजस्वलाचाण्डालशवपांश्च। भक्ष्यवर्ज्यं पञ्चनखशवं तदस्थि सस्नेहञ्च। सर्व्वेष्वेतेषु पूर्व्वं वस्त्रं नाप्रक्षालितं विभृयात्। रजस्वला चतुर्थेऽह्नि स्नानाच्छुध्यति। रजस्वला हीनवर्णां रजस्वलां स्पृष्ट्वा न तावदश्नीयाद्यावत्र शुद्धा। सवर्णामधिकवर्णां वा स्पृष्ट्वा स्नात्वाऽश्नीयात्। क्षुत्वा सुप्त्वा भोजनाध्ययने पीत्वा स्नात्वा निधौव्य वासः परिधाय रथ्यामाक्रम्य मूत्रपुरीषे कृत्वा पञ्चनखस्य सस्नेहास्थि स्पृष्ट्वा चाचामेत्। चाण्डालस्नेहसम्भाषणे च। नाभेरधस्तात् प्रवाहणे च कायिकैर्मलैः सुराभिर्वोपहतोस्पृश्यैस्तदङ्गं प्रक्षाल्य शुध्यति। अन्यतोपहतोस्पृश्यैस्तदङ्गं प्रक्षाल्य स्नानेन। वक्त्रोपहतस्तूपोष्य स्नात्वा पञ्चगव्येन। दशनच्छदोपहतश्च। वसा शुक्रमसृङ्मज्जामूत्रविट्कर्णविड्नखाः। श्लेष्मास्रु दूषिका मेदोद्वादशैते नृणां मलाः। गौड़ी माध्वी च पैष्टी च त्रिविधा विद्धि सुरा। यथैवैका तथा सर्व्वा न पातव्या द्विजातिभिः। माधूकमैलवं टाङ्कं गौडं खार्জ্জूरमानसी। रूढीकारसमाध्वीकौ मैरेयं नारिकेलजम्। अमेध्यानि दशैतानि मद्यानि ब्राह्मणस्य च। राजन्यवैश्ययोश्चैव वैश्यवस्तूद्भवानि न दुष्यतः "स्नानं तपोग्निराहारो रूक्षमनोवार्य्युपाञ्जनम्। वायुःकर्म्मार्ककालौ च शुद्धिकर्तृणि देहिनाम्" विष्णुः। "जङ्घं नाभेः करौ स्कन्धा यदङ्गमुपहन्यते। तत्र स्नानमधस्तात्तु क्षालनेनैव शुध्यति। इन्द्रियेणुप्रविष्टं स्यादमेध्यं यदि कर्हिचित्। सुखेऽपि संस्पृश्यमानं तत्र स्नानं विशोधनम्" अङ्गि०। "रथ्या कर्दमतोयेन जीवनाद्येन वा तथा। नाभेरूर्द्धं नरः स्पृष्ट्वा सद्यः स्नानेन शुध्यति" शङ्खः "सकर्दमेषु वर्षासु प्रविश्य ग्राममङ्गणम्। जङ्घाभ्यां स्पृष्टिकास्त्रिस्रः पद्भ्यां च द्विगुणाः स्मृताः" यमः। "दिवाकीर्त्तिसृदक्यां च सूतिकां पतितं तथा। शवं तत्स्पृष्टिनञ्चैव स्पृष्ट्वा स्नानेन शुध्यति। आचम्य प्रयतोनित्यं जपेदशुचिदर्शनात्। सौर्य्यान्मन्त्रान् यथोत्साहं पावमानीश्च शक्तितः। नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रोविशुध्यति। आचम्यैव तु निःस्नेहं गां स्पृष्ट्वा दीक्षां वा रविम्। वान्तोविरेकी क्षुत्वा च क्षतप्राणनमाचरेत् आचामेदेव भुक्त्वान्नं स्नानं मैथुनिनः स्मृतम्" मनुः। मैथुनिनः स्नानस्मृतौ गर्भगङ्गायामेव "अस्थ्नां तु यदा गङ्गेच्छौचं मूत्रपुरीषवत्" शातातपोक्तेः। "अजीर्णेऽभ्यादिते वान्ते क्षुरकर्म्मणि मैथुने। दुःस्वप्ने दुर्जनस्पर्शे स्नानमात्रं विधीयते। शुना चैव वपाकेन स्पृष्टनिर्हारकेण वा। स्पृष्टमात्रस्तु कुर्वीत सेचनं प्लावनं जलैः" मनुः "दुःस्वप्नदर्शने चैव वान्ते वा क्षुरकर्म्मणि। मैथुने कटधूमे च सद्यः स्नानं विधीयते। पतितं सूतिकामन्त्यं शवं स्पृष्ट्वा तु कामतः। स्नात्वा सचेलं जुहुयादग्निं घृतं प्राश्य विशुध्यति। शवस्पृशं दिवाकीर्त्तिं चिताधूमं रजस्वलाम्। स्पृष्ट्वा प्रमादतोविप्रः स्नानं कृत्वा विशुध्यति" हरीतः। उदक्याशुचिभिः स्नायात्" या०स्मृ० उदक्यादिस्पृष्टैः स्पृष्टः स्नायात् हेमा०। "चण्डालं पतितं व्यङ्गं सूतकं मृतिकां नारीं रजसा च परिप्लुताम्। शवकुक्कुटचण्डालांश्च श्वानान् संस्पृश्य मानवः। सचेलं सशिरः स्नातः तदानीमेव शुध्यति। हरिगीता०। "वपाकं पतितं व्यङ्गसूतकं शवहारकम्। स्नातकमित्यादि शातातपवत्" परा० "अशुद्धान् स्वयमेवैतान् शुद्धश्च यदा स्पृशेत्। विशुध्यत्युपवासेन" "उपस्पृश्याशुचिस्पृष्टं स्तोयमपि मानवः। हस्तौ पादौ च तोयेन

(3) Vol I

मज्ज्यावसथ्य स्नुध्यति" इति च देवलः। "मानुषास्थि वसाविड्मार्त्तवं मूत्ररेतसी। मज्जानं श्लेष्मणं वापि परस्य यदि संस्पृशेत्। स्नात्वा प्रक्षाल्य लेपादीनावसथ्य स शुचिर्भवेत्। तान्येव स्नानि संस्पृश्य पूतःस्यात् परिमार्ज्य नात्" देव०। "चैत्यदग्धचितिर्यूपश्चण्डालः सोमविक्रयी। एतांस्तु ब्राह्मणः स्पृष्ट्वा सचेलोजलमाविशेत्"। परा०। "श्वपचमषिकप्रेतहारकश्ववानि संस्पृश्य देवीरापइत्यभिमन्त्रितैर्जलैः स्नातः पूतोभवत्यजीर्णवान्ने प्रक्षत्कर्म्मणि पशुदिवामैथुने च" हारीतः "अथ सांसर्गिकं व्याख्यास्यामः "चण्डालपक्षिगानस्पृतहारकरजस्वलास्तिकाः संस्पृश्याऽऽदितेऽस्तमिते स्कन्दित्वा चाप्सु स्कन्दित्वाचिरस्नन्दने कर्णक्रोडने चित्वाहरणे यूपसंस्पर्शने" इत्युपक्रम्य "सचेलं स्नात्वा पुनर्मामो जपेत्" कण्व०। "श्वानं श्वपाकं प्रेतधूमं देवद्रव्योपजीविनं ग्रामयाजकं यूपं चितिं चितिकाष्ठं समद्यभाण्डं सचेलं मानुषास्थि यस्पृशं रजस्वलां महापातकिनं शवं स्पृष्ट्वा सचेलवासा अग्नौउपगाह्याचम्यार्ग्निसपस्पृशेत्" च्यव० "शुना प्रातावलोढस्य नखैर्विदलितस्य वा। अद्भिः प्रक्षालनं प्रोक्तमग्निना चोपधूननम्" शाता०। अशुचिं संस्पृशेद्यस्तु एकएव स दुष्यति। तं स्पृष्ट्वान्यो न दुष्येत्तु सर्व्वद्रव्येष्वयं विधिः" हद्वया०। "यस्य स्पर्शे आचमनमात्रं सोऽत्राशुचिः" हेमा०। "श्ववराहखरानुष्ट्रान् शकगोमायुवानरान्। काककुक्कुटसंघांश्च स्पृष्ट्वा स्नानं समाचरेत्" संव०। "मार्जारवानरमार्जारखरोष्ट्राणां शुनां तथा। शूकराणामभेध्यस्य स्पर्शे स्नानं सचेलकम्" व्यासः "पण्डकं कुक्कुटं काकं श्वघ्नमालशिवाश्वकान्। चितियूपश्चगानानि विड्वराहखराशुचीन्। अवकीर्णिनमन्त्यं च स्पृष्ट्वा स्नानं विधीयते" हारी० "अभोज्यस्तिकापण्डमार्जारांश्चाखुकुक्कुटान्। पतितावीक्षचाण्डालं स्तहारांश्च धर्म्मवित्। संस्पृशन् शुध्यति स्नानात्" मार्क०पु०। "बौद्धान् पाशुपतान् जैनान् लोकायतिककापिलान्। विकर्म्मस्थान् द्विजः स्पृष्ट्वा सचेलोजलमाविशेत्। कापालिकांस्तु संस्पृश्य प्राणायामोऽधिको मतः" षट्त्रि०। "शैवान् पाशुपतान् स्पृष्ट्वा लौकायतिकनास्तिकान्। विकर्म्मस्थान् द्विजान् शूद्रान् सवासा जलमाविशेत्" ब्रह्मा० पुरा० "शूद्रोच्छिष्टं द्विजः स्पृष्ट्वा उच्छिष्टं शूद्रमेव च। शुचिरप्यवगाह्यैव सचेलं स्नानमाचरेत्" आग० "स्पृष्ट्वा देवलकं चैव सवासा जलमाविशेत्" संव० "रजकचर्म्म ऊर्द्धं च व्रात्यध्वजोपजीविनौ। निर्णेजकः शौण्डिकश्च नटः शैलूषकस्तथा। सूचेभगस्तथा श्वा च वनिता सर्व्ववर्णगा! चक्री ध्वजी व्याधयाजी" इत्युपक्रम्य "एभिर्यदङ्गं संस्पृष्टं शिरोवर्जं द्विजातिषु। तोयेन क्षालनं कृत्वा आचान्ताः प्रयता मताः" शाता०। "उद्धृं नाभेः करोत्क्षा यदङ्गं स्पृशते खगः। स्नानं तत्र प्रकीर्त्तितं शेषं प्रक्षाल्य शुध्यति" जाबा०। "नीली नीलीविकारं च मानुषास्थीन्यपि द्विजः। चण्डालपतितच्छायां स्पृष्ट्वा स्नानं समाचरेत्" संव० "स्पृष्ट्वा रुदस्य निर्म्माल्यं सवासा आप्लुतः शुचिः" स्कन्द०पु० "अष्टम्यां च चतुर्दश्यां दिवा पर्व्वणि मैथुनम्। कृत्वा सचेलं स्नात्वा च वारुणीभिश्च मार्जयेत्" याज्ञवल्क्यः। "रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला" अङ्गि० "रजस्वला चतुर्थेऽह्नि स्नानाच्छुद्धिमवाप्नुयात्" शङ्खः "स्पृष्ट्वा भर्त्तुश्चतुर्थेऽह्नि स्नाता नारी रजस्वला। दैवे कर्म्मणि पित्र्ये च पञ्चमेऽहनि शुध्यति" अङ्गि०। "रोगेण यद्रजः स्त्रीणामत्यर्थं तु प्रवर्त्तते। अशुच्येव तास्तेन तेन वैकारिकं हि तत्" शङ्ख०"अकाले यद्भवेत् स्त्रीणाम् रक्तमाशुर्मनीषिणः। काले तु तद्रजः प्रोक्तं शास्त्रतत्त्वैव साऽशुचिः" छाग०। एवमन्यान्यपि तद्बोधकान्यनुसन्धेयानि। शुचितत्कालजीविनः कर्म्माधिकारित्वेन शुद्धेः कर्त्तृविशेषणतया कर्म्माङ्गत्वमशुद्धेश्च तदधिकारित्वाभावः एवं तयोः कर्त्तृविशेषणतया कर्म्माधिकाराज्ञानङ्गत्वे निरूपिते। इदानीं द्रव्याणामपि कर्म्माङ्गतया द्रव्यगतशुद्ध्यशुद्धी निरूप्येते तत्र कालरूपद्रव्यस्याशुद्धिः श्रुतिदृष्टे अकालशब्दे उक्तप्राया। पर्य्युदस्तकालानां तु कर्म्मानङ्गत्वेऽपि नाशुद्धत्वम्। "रात्रौ श्राद्धं न कुर्वीत" "आसुरी रात्रिरन्यत्र तस्मात्तां परिवर्ज्जयेत्" राक्षसी नाम सा वेला गर्हिता सर्व्वकर्मसु" इत्यादौ तत्तत्कर्म्मणां तदितरकाले कर्त्तव्यतामात्रं बोध्यते न तु तेषामशुद्धत्वमपि तेन सन्ध्यावन्दनादेः सन्ध्यारात्र्योः कर्त्तव्यताविधायकं "पश्चिमां तु समासीनोयावत्तारकदर्शनमित्यादि" "दिवोदितं यत् कर्म्मोक्तस्य यस्येर्य्याः प्रथमे यामे तत् कुर्वीताविचारयन्नित्यादि" च शास्त्रं सार्थकम्। अपरद्रव्यगते शुद्ध्यशुद्धी तावदिदानीं निरूप्येते। तत्रादौ द्रव्यशुद्ध्यशुद्धिसम्पादकं द्रव्यादिकमुच्यते। "शारीरैर्मलैः सुराभिर्मद्यैर्यदुपहतं तदत्यन्तोपहतम्। अत्यन्तोपहतं सर्व्वलोहभाण्डमग्नौ प्रक्षिप्तं शुध्येत् मणिमय मङ्गमयमजं च सप्तरात्रं महीनिखनेन शुध्येत् दन्ता-

स्थिभवं संतक्षणेन, दारवं क्षणयज्ञ जक्षणात्। अत्यन्तोपहतस्य प्रक्षालितस्य विरक्तस्य तच्छिन्द्यात्" विष्णुः "अत्यन्तोपहतानां सर्व्वतैजसानामग्निना शौचं क्षणमयचर्मणां त्यागः, तन्मात्रच्छेदमित्येके धारणं हि नवासतां शौचमित्याचार्य्याः तस्मात् सर्व्ववाससामाप्लावनादेव शुद्धिः" हारी० "तैजसानां कृष्णपरेतोमूत्रपुरीषोपहतानामावर्त्तनसङ्घर्षणं भस्मना क्षारमृत्तोयैः परिमार्जनं मुञ्जेदनं वा" शङ्खलि० "मूत्रपुरीषास्रक्कृष्णपरिष्टानां तैजसानां पात्राणां पूर्व्वोक्तानामन्यतमेन क्षारसंयुक्तेन परिमार्ज्जनम्" "क्षौमाणि वाससि तेषामलाभे कार्पासिकान्यौर्णकानि भवन्ति मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानां क्षारोदकैः प्रक्षालनं वासोवदूर्ध्ववल्कलानां, वल्कलवत् कृष्णाजिनानाम्' इति च बौधा० "मद्यैर्मूत्रपुरीषैश्च क्षेष्मशिरस्युच्छ्रोणितैः। संस्पृष्टं नैव शुध्येत पुनःपाकेन क्षण्मयम्। एतैरेव यदा स्पृष्टं तारलौहरजतम्। शुध्यत्यावर्त्तितं पश्चादन्यथा केवलाम्भसा" शङ्खवशिष्ठकाश्यपाः "अलाबुदारुपात्राणां वैदलानां तथैव च। अत्यन्तोपहतानाञ्च परित्यागो विधीयते। अत्र मूत्रपुरीषाभ्यां रेतसा रुधिरेण च। लेखं यदुपहन्येत पुनः प्रक्षालयेत्तु तत्। यद्यप्यसौ न शुध्येत्तु वस्त्रं दोषदुष्टं दृढम्। छेदनं तस्य दाहो वा यस्मात्तमुपहन्यते। मृत्तिकालोष्टपातेन अशुद्धं तत् परित्यजेत्" यमः। "वस्त्रवैदलचर्मादौ शुद्धिः प्रक्षालनं स्मृतम्। अतिदुष्टस्य तत्क्षारं त्यजेच्छित्त्वात्मशुद्धये" दक्षः। "दूषितं वर्जितं दूष्यं कश्मलं चेति लिङ्गिनाम्। चतुर्विधमेध्यं च सर्व्वं व्याख्यास्यते पुनः। शुच्यप्यशुचिसंसृष्टं द्रव्यं दूषितमुच्यते। अभक्ष्यभोज्यपेयानि वर्जितानि हि वक्ष्यति। म्लेच्छः पतितचण्डालौ श्वा सूतिः शुकरकुक्कुटौ। स्त्री च नित्यं विवर्ज्याः स्युः षड्ते धर्मतः समाः। सद्रणः स्रुतकी स्रुती मत्तोन्मत्तौ रजस्वला। स्रुतस्रुग्भ्रुरशुद्धश्च पर्य्यग्नयटौ स्वकालतः। स्वेदाम्बुविन्दवः फेनोनिरस्रं नखरोम च। आर्द्रचर्म तथास्थ्येतद् दूष्यमाहुर्द्विजातयः। मानुषास्थिकफोविण्मूत्रशुक्रवर्त्मवानि च। कृष्णपः पूयमित्येतत् कश्मलं वेत्युदाहृतम्। दूषिते प्रोक्षितेनापि शुद्धिरुक्ता विधानतः। दूष्ये मार्ज्जनसंस्कारैः कश्मले सर्व्वथा भवेत्" देवलः। अथ भूमि शुद्धशुद्धयपवादादि। "प्रसूते गर्भिणी यत्र म्रियते यत्र मानुषः। चण्डालैरुषितं यत्र यत्रोपन्यस्यते शवः। विण्मूत्रे चाहिते यत्र कृष्णपोयत्र दृश्यते। एवं कल्मषं भूयिष्ठा भूरमेध्येति लक्ष्यते। कृमिकीटपदग्धैर्दूषिता यत्र मेदिनी। लक्षया कर्षणैः स्निग्धा वान्तैर्वा दूष्यतां व्रजेत्। नखदन्तनखोत्थकृत्तपर्पांशुरजोमलैः। भक्षपङ्क्तदग्धैर्वापि प्रच्छन्ना मलिना भवेत्। षड्धा वा चतुर्द्धा वा भूरमेध्या विशुध्यति। दूष्या द्विधा त्रिधा वापि शोध्यते मलिनैकधा। दग्धं खननं भूमेरुपलेपनवापने। पर्ज्जन्यवर्षणं चेति शौचं षड्विधं स्मृतम्" देवः। लक्षा घनीभूतस्तेषां "संमार्जनेनाङ्कनेन सेकेनोल्लिखनेन च। गवां च परिवासेन भूमिः शुध्यति षड्भिः" मनुः। "खननात् पूरणाद्दाहात्तक्षणेपनादभिघर्षणात्। गोभिराक्रमणात् कालाद्भूमिः शुध्यति सप्तभिः" यमः। "घनाया भूमेरुपघाते उपलेपनम् सुषिरायाः कर्षणम् आच्छन्नाया मेध्यमाहृत्य प्रच्छादनम् चतुर्भिः शोध्यते भूमिः गोभिराक्रमणात् खननाद्दहनादभिघर्षणात् पञ्चमात्तक्षेपनात्" बौधा० "कर्षणमुपलेपनमग्निरभ्युक्षणं कालोदाहृत्य भूमेः" शङ्खलि० शुद्धिरिति शेषः। "खननात् पूरणाद्दाहात्तक्षेपनादभिघर्षणात्। गोभिराक्रमणात् कालात् भूमिरेभ्यो विशुध्यति" हारी०। "मार्जनोपाङ्गनैर्वेश्म प्रोक्षणेन च पुष्कलम्। मार्ज्जनेनाङ्कनेनापि सेकेनोल्लेखनेन च। दाहेन च भुवः शुद्धिर्वासेनाथ वा गवाम्" विष्णुः "गोचर्म्मात्रमवस्थन्दुर्गोः (भूमेः) शोधयति पातितः समूढमसमूढं वा यत्र लेपो न दृश्यते" बौधा० स्मृतौ वर्षादिशेषे कालभेदः। अम्भोद्रुपतितादान्त्या स्मृताश्चेद् द्विजमन्दिरे। शौचं तत्र प्रवक्ष्यामि मनुना भाषितं यथा। दशरात्राच्छुनि प्रेते मासात् शुद्धे भवेच्छुचिः। द्वाभ्यां तु पतिते गेहे अन्त्ये मासचतुष्टयात्। अत्यन्ते वर्जवेद्गेहमित्येवं मनुरब्रवीत्" इ० मनुः। अन्त्यः श्वपाकः। द्विजस्य मरणे वेश्मविशुध्यति दिनत्रयात्। दिनैकेन बहिर्भूमिरग्निस्तोयप्रलेपनैः" यमः। यथोक्तकालानन्तरं कर्त्तव्यमाह संवर्त्तः स्मृद्विधिं प्रवक्ष्यामि अन्तःस्थवदूषिते। प्रोक्षणार्थं स्मृत्पात्रं सिद्धमन्नं तथैव च। स्मृदादाय तत्सर्वं गोमयेनोपलेपयेत्। गोमयेनोपलिप्याथ छागेनाप्लावयेद्बुधः। आङ्गणैर्मन्त्रपूतैश्च क्षिरगव्यकुशवारिभिः। सर्व्वमभ्युक्षयेद्देहं तत्र शुध्यत्यसंशयः। "दारुवदस्थि भूम्योरावपनं च भूमेः" गौत० "मार्जनाद्देहस्य शुद्धिः" क्षितेः शुद्धिस्तु सप्तभिः" शङ्खः। अशुद्धयपवादः "आङ्गणावसथे भूमिर्देवागारे तथैव च। मेध्या चैव सदा मन्ये गवां गोष्ठे च वा भवेत्" यमः। "रथ्याकर्दमतोयानि नावः पन्थास्तृणानि च। स्वर्गनाद्य प्रदुष्यन्ति पङ्केष्टरचितानि च" परा०

रक्षाकर्ड्मतोयानि सूदान्नन्यैव वायसैः । मरुताकैंश्च शुध्यन्ति पक्वेष्टरचितानि च। तथैभिश्च विशुध्यन्ति स्पर्शनो मांशुभारुतैः" विष्णुः । अथ स्फटिकाशुद्धिः "वल्मीकादुत्करात्क्षेत्राज्जलाध्वपथिष्टत्तयोः । कृतशौचावगिष्टाच्च न याच्ञाः सप्त स्फटिकाः। शुचिदेशे च संयाच्ञाः शर्कराश्मादिवर्जिताः" शाता०। अथ पक्वान्नादिशुद्धयशुद्धयोः ।"केशकीटच्युतघ्रातं वायसोपहतञ्च यत् क्लीवाभिगस्तपतितैः स्रुतिकोदक्यनास्तिकैः । दूष्यं वा स्पाद्यदन्नं तु तस्य निष्कृतिरुच्यते। अभ्युक्ष्य किञ्चिदुद्धृत्य तद्भुञ्जीता विशङ्कितः । भक्षणा वापि संस्पर्श्य संस्पर्श्य वोलमुखेन च। सुवर्णरजताभ्यां च भोक्तुं घ्रातमजेन वा" । घृतं सपायसं क्षीरं तथैवेक्षुरसो गुड़ः । स्नेहभाण्डस्थितं तक्रं तथा मधु न दुष्यति" शाता० "त्वक्केशकीटरोमनखास्थिपुरीषाणि दृष्ट्वा तद्देशपिण्डान्नमुद्धृत्याद्भिरभ्युक्ष्य भक्षणावकाश्यांभिर्वाथ पुनरपि प्रोक्षणवाचा प्रोक्षणम् ओं भूर्भुवः स्वरित्यपरि परिमोक्ष्य च पुनरेवोपयुञ्जीत" बौधा० । "मक्षूरमाषसंयुक्तं तथा पर्य्युषितं च यत् । तत्तु प्रक्षालितं कृत्वा भुञ्जीत ह्याभिधारितम्" यमः "माषाराजमाषाः" हेमा० । पर्य्युषितभोजनविधानमापद्विषयम् "शुक्तानि हि द्विजोच्छानि न भुञ्जीत कदाचन । ज्ञात्वित्वा तु निर्दोषाख्यापद्धर्म्मगतो यदा" तस्यैव वचनान्तरात् "मक्षिकाकेशमद्येषु पतितं यदि दृश्यते । मूषिकस्य पुरीषं वा च्युतं यच्चावधूनितम् । भक्षणास्पृश्य वाम्भोयादभ्युक्ष्य सलिलेन वा" यमः। च्युतेनाक्रान्तमवच्युतम् अवधूनितं वस्त्रेण । "अवच्युतं काकपतङ्गकीटैरुदक्यया वा पतितैश्च दृष्टम् । अज्ञातभक्षास्थिरमद्यगन्धैः संस्पृष्टमन्नं मनुराह भोक्तुम्" यमः। अस्यापवादः"मक्षिका मशका दंशा घुणा सूक्ष्मपिपीलिका।आसिद्धमेध्यसेवी च नैते कीटा निसर्गतः।यमः"पक्षिजग्धं गवाघ्रातमवधूतमवच्युतम् । दूषितं केशकीटैश्च स्रुत्प्रक्षेपेण शुध्यति" मनुः । गोघ्रातेऽन्ने तथा केशमक्षिकाकीटदूषिते। सलिलं भक्ष मुद्धारि प्रक्षेप्यं विशुद्धये।अत्र मक्षिका विशेषमक्षिका "केशकीटच्युतनिर्वीर्यितं वचोऽभिहतं ऋषिराघ्रातं प्रेक्षितं यच्च पर्य्युषितम् पुनः सिद्धं .चरुस्रुवेणावेक्षितमभोज्यमन्नमन्यत्र क्षिरखोदकस्मरणात्" शुमन्तुः "आकरजानां लवणवर्जितानां घृतेनाभिधारितानां शुद्धिः पुनःपचनमेव स्नेहानां, स्नेहबद्धसानां संहतानामद्भिः प्रोक्षणमतिद्रवाणामुत्पवनम्, शुष्काणामुद्धृतदोषाणां संस्कारः परिघ्राणितानां, दोषाणां ततस्त्यागः" शङ्खलि० । "परोक्षमद्भिः संस्कृत्य अग्नावा धिश्रित्याद्भिः प्रोक्षेत्तदन्नं पवित्रम्" आप०।"अनिष्टगन्धोपघ्राणश्रवणदर्शन केशकीटपिपीलिकाभिरन्नाद्योपघाते काञ्चन रजतवैदूर्य्यप्रवालगोवालाजिनदर्भाणामेकतमेनाद्भिः संसृष्टेन मन्त्रप्रोक्षणं पर्य्यग्निकरणमादित्यदर्शनात् पूतं भवति वस्त्रोपघाते ब्राह्मणस्पृष्टा तदन्नमपनीय अजमवघ्राप्य पूतं भवति त्यागोरसमयानाम्" हारी० । सिद्ध हविषां सहतां स्नेहपायसप्रभृत्युपहतानां तद्देशपिण्डमुद्धृत्य "पवमानः सुवर्जन" इत्यनुवाकेनाभ्युक्षणं मधूदके पयोविकारे च पात्रान्तरनयने शुद्धिः एवं तैलसर्पिषी, उच्छिष्टसमवाये तूदकेऽवधावोपयोजयेत्" बौधा० उच्छिष्टसमवाये उच्छिष्टसंसृष्टे" हेमा० । पयोदधिविकारादि शुचि पात्रान्तरे स्थितम् । पावनोत्पवनाभ्यां च पर्य्यग्निकरणेन च" लौगा० "पवनं वस्त्रादिना गालनम् उत्पवनं दर्भपवित्रेण "सवितुष्ट्वाप्रसव उत्पुनामि"इत्यनेन मन्त्रेण संस्करणम् । "आममांसं घृतं चौद्रं स्नेहाश्च फलसम्भवाः।स्नेहभाण्डस्थिता दुष्टा निष्क्रान्ताः शुचयः स्मृताः" यमः"अपूपं घृततैलानां स्नावणं गोरसस्य च । भाण्डानि स्नावयेद्भिः शाकमूलफलानि च । सिद्धमन्नं तथा सर्पिः क्षीरञ्च दधि चाम्बु च । एतेषामवलीढानां तैजसी शुद्धिरिष्यते काकमार्जारनकुलसर्पमूषिकपक्षिभिः । संस्कृतं तु यदाघ्रातमवलिह्येत केनचित् । सुवर्णवर्णं ताम्रोष्णं गोवालं रजतेन वा । सृष्टमेकतमेनापि भोक्तुं घ्रातमजेन वा" शङ्ख० । तैजसी शुद्धिः पर्य्यग्निकरणम् । इयं शुद्धिः केशादिकं दूषकसदृश्य कार्य्या" हेमा०। "घृतदधिपयस्त्राक्षामाकरस्थितानामदोषः" हारीतः "आधारदोषे तु नवेत् पात्रात् पात्रान्तरं द्रवम् । घृतं तु पायसं क्षीरं तथैवेक्षुरसं गुड़म्" द्रवद्रव्याणि भूरीणि परिस्राव्याणि वाम्भसा । यस्यानि व्रीहयश्चैव शाकमूलफलानि च । त्यक्त्वा तु दूषितं भागं प्रोक्षणाद्याय जलेन च । ब्रह्मा० पु० । "द्रोणादभ्यधिकं सिद्ध मन्नमुपहतं न दुष्यति । तस्योपहतमात्रमपास्य गायत्र्याभिमन्त्रितं सुवर्णाम्भः क्षिपेत् वस्त्रस्य च दर्शयेदग्नेः" । विष्णुः। "घृतं द्रोणाधिकं चान्नं शकाकैरुपघातितम् । न त्याज्यं तस्य शुद्ध्यर्थं ब्राह्मणेभ्यो निवेदयेत् । कर्त्तव्यं वचनं तेषामन्नसंस्कारकर्म्मणि" "द्रोणाधिकस्य शुद्धिस्तु धर्म्मशास्त्रेषु पठ्यते । शकाकैरवलीढं तु द्रोणात्तं न विसर्जयेत् । प्रास्य सदृश्य तन्मात्रं यच्च लालान्वितं भवेत् । सुवर्णोदकेनाभ्युक्ष्य

सर्वत्र शुद्धता न पुनर्भवेत् । तस्माच्छुद्धं तु कर्मस्थं शुचौ-लाङ्गनोत्थिः। निर्मलं संस्कृतं द्रव्यं क्रियार्हं पूतमुच्यते। वसतिश्चमशोधानं वाहनं साधनास्त्रु च । क्षुरो नीरासनं चेति स्वयं शुद्धमिति स्मृतम् । शिवश्च स्वयंशुद्धा योषितश्चानृतौ तथा । ब्रह्महत्या हि नारीणामृतु-काले न संस्पृशेत् । आकरा हि स्वयं शुद्धा द्रव्याणामिह-निर्णयः । भक्ष्य लौद्रं सुवर्णं च सदर्भाः कुतपास्तिलाः । अपामार्गशमीकाशाः पद्मनामलकं मणिः । माल्यानि सर्वपा दूर्वाः सदाभद्राः प्रियङ्गवः । अक्षतारोचनालाजा हरिद्राचन्दना यवाः । पलाशखदिराश्वत्थबिल्वधातकी-तकी । एतान्याद्याः पवित्राणि ब्राह्मणा हव्यकव्ययोः । योक्त्रिकानि मङ्गल्यानि शोधनानि च देहिनाम् । तेष्वापोगोगजक्ष्मा च पवित्राणि विशेषतः । सर्वाशौचे विशुध्यर्थं सर्वेषां सर्वतः सदा । अक्रमक्रैः समिद्धोऽपि-र्दैवतुल्यैरदूषितः । सर्वेषामप्ययौचानां समर्थः शोध-नाय सः । द्रव्याणामपिदग्धानां मेध्यत्वमुपदिश्यते । ज्वालाभिरुष्टपात्राणां शुचित्वं नियतं भवेत् । अग्ने-र्धूमसङ्गस्य स्पर्शं नास्यनापदि । श्वपाको ह्यलाभस्तु ब्राह्मणोऽग्निरनाहितः । चण्डालाग्नेरमेध्याग्नेः स्रुत-काग्नेश्च कर्हिचित् । पतिताग्नेश्चिताग्नेश्च न शिष्टैर्यज्ञ स्मृतम् । गोशकृच्छुद्धदेशस्था ग्रसमानाद्युचिता शिवा । अयाम्या स्पृष्टवेच्छुद्धा लक्षणैर्विष्मूत्रवर्जिता । जर्द्धं नाभे-र्यानि खानि तानि मेध्यानिसर्वशः" देवलः । "जर्द्धं वै पुरुषस्य नाभेर्मेध्यमवांचीनममेध्यमिति"श्रुतिः । "अजास्वं सुखतोमेध्यं न गौर्न नरजा मताः" विष्णुः जर्द्धं नाभेः पुरुषोगौर्मेध्यः पृष्ठे समन्तादश्वः स्त्रियः सर्वतो हृदय-मासामशुचि" उश० । "मेध्या रहोगता नारी स्त्री मुखे शुचिचारिणी । स्पर्शने तु न दुष्यन्ति वातो गन्धोरसः स्त्रियः । स्त्रीणां सुखरसश्चैव गन्धोनिश्वास एव च । स-खतोगौरमेध्यास्तान् मेध्योऽजोमुखतः स्मृतः । पृष्ठतोगौर्गजः स्कन्धे सर्वतोऽश्वः शुचिस्मृता । स्त्रीणां मूत्रपुरीषे तु अमे-ध्ये मल एव च । गोपुरीषं तु मूत्रं च नित्यं मेध्यमिति स्थितिः । यमः "पादौ शुची ब्राह्मणानामजाश्वस्य मुखं शुचि । गवां पृष्ठानि मेध्यानि सर्वगात्राणि योषिताम् । रोमोद्भेदे यती भुक्ते गन्धर्वाः कुचदर्शने । अनलस्तु रजोभुक्ते स्त्रियोमेध्यास्तु नान्यथा । बलात्कारोपभुक्ता वा चौरहस्तगतापि वा । स्वयं वा प्रतिपन्ना वा ह्यथवा विप्रमादिता । अत्यन्तदूषितापि स्त्री न परित्या-ज्यार्हति । सर्वेषां निष्कृतिः प्रोक्ता नार्यास्तु विशेषतः । स्त्रियः पवित्रमतुलं नैता दुष्यन्ति कर्हिचित् । मासिमासि रजस्वासां दुष्कृतान्यपकर्षति। सोमः शौचं ददौ स्त्रीणां गन्धर्वश्च शुभां गिरम् । पावकः सर्वभक्षत्वं मेध्या वै-योषितो ह्यृतः"। ज्योतिषोक्तम् स्वराश्यपेक्षया दृष्टस्थले अनिष्टस्थानस्थरव्यादिकतयानिष्टसूचनमपि अशुद्धिः ज्योतिषोक्तनञः पर्य्युदासप्रसज्यप्रतिषेधोभयपरतायाः सर्वनिबन्धृभिर्व्यवस्थापनात् तत्र निषिद्धकालस्य न केवलं रात्र्यादिकालादिवत् पर्य्युदस्तता किन्तु प्रसज्यप्रतिषेध-परतया अनिष्टविशेषसूचकतापि तेन तत्र तत्र अनि-षिद्धकालस्याशुद्धता । अतएव गोचराशुद्धिः कालाशुद्धि-रिति च व्यवह्रियते" तथाच ज्योतिषोक्तदिशा तत्तत्-कालानां तत्तत्कर्म्मकरणायोग्यताप्रयोजकतया शुक्रा-स्तादिकालस्याशुद्धता सा च अकालशब्दे उक्तप्राया । "र-विशुद्धौ यज्ञकरणं रविगुरुशुद्धौ व्रतोद्वाहौ" इत्युक्तेः गो-चरे शुभस्थानस्थितौ रव्यादीनां शुद्धित्वेतरीत्वे अशुद्धिः एवं वर्षर्तुमासदिवसानामप्यशुद्धिः सा च कन्यकानां दशवर्षाभ्यन्तरे एव विवेचनीया नातः परम् । "यज्ञशुद्धि सद्यशुद्धिं शुद्धिर्मासर्तुदिवसानाम् । अर्वागुदशवर्षेभ्यः प्रवदन्ति कन्यकाना"मित्युक्तेः ।

अशुभ न० विरोधे न० त० । १अमङ्गले "यः सर्व्वत्रानभिस्नेह-स्तत्तत् प्राप्य शुभाशुभम्" गीता । २तत्सूचके रव्यादिपा-पग्रहे "अशुभे दग्धसंयोगे वेधश्चेत्तेन लभ्यते" ज्योति० अशुभसूचका अमङ्गलसूचकास्तेच साधारणा असाधारणाश्च अमङ्गलशब्दे २१६ पृष्ठादौ दर्शिताः अन्येऽपि अशुभ-योगा अरिष्टाध्यायोक्ताः असाधारणा वेदिव्याः । ३अप-वित्रे च न० ब० । ४शुभाभाववति त्रि० । ५ब० । ६पापे न० ।

अशुभ्र पु० विरोधे न० त० । १शुभ्रभिन्ने कृष्णे २तद्युक्ते त्रि० ।

अशुष त्रि० न शुष्यति शुष-क न० त० । अशोषके । "रक्षो अग्निमशुषं तूर्वयाणम्" ऋ० १ । १७४ । २ ।

अशून्य त्रि० न० त० । अहीने पूर्णे "अशून्यशयनं भवाक्रम जन्मनि जन्मनि" शय्यादानमन्त्रः ।

अशून्यशयन न० न शून्यं शयनं यस्मात् । व्रतभेदे । "अस्ति व्रतं महापुण्यमशून्यशयनं नृप!" इत्युपक्रम्य "चातुर्मास्ये भवेद्राजन् वर्षायाम् व्रतमुत्तमम् श्रावणस्य द्वितीयायां कृष्णपक्षे नराधिप!। श्रावणादिकार्त्तिकान्तं कृत्वा-द्भुतमनुत्तमम्" इत्यादिना तस्य विधानमभिधाय "चतुर्वर्षं प्रकुर्वीत पुरुषोनियतेन्द्रियः । एवं यः कुरुते राजन्

न्यूनगयनव्रतम् । न तस्य न्यूना गया स्यादिति"च हेमा० व्रत० ख० भविष्यपुराणम् ।

अग्नृत त्रि० न नृतं पक्वम् । अपक्वे पक्वभिन्ने । आमाद्यादौ ।

अग्नेय त्रि० अग्नौ–वनिप् न० त० । सुखकरे । "अग्नेय दिद्युद्विधाभग्नेवा" ऋ० ७।२४।१२ ।

अग्नेष पु० अभावे न० त० । १शेषाभावे । न० त० । २शेषशून्ये सकले त्रि० "अग्नेषमग्नेसुषोमोषं मापसन्मामि केवलम्" उद्भटः "क्रतोरग्नेषेण फलेन युज्यताम्" रघुः "येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि" गीता "तथाविधस्तावदशेषमस्तु सः" कुमा० । "अग्नेषते धर्मोपहृताः कमण्डलोः" माघः ।

अशोक पु० नास्ति शोको यस्मात् ५ब० । १खनामख्याते वृक्षे, २बकुलवृक्षे च । २पारदे न० । ४कटुकवृक्षे स्त्री । ङीप् । ५शोकशून्ये त्रि० ६विष्णौ पु० "सत्यनामा भवाञ्शोकः" "अशोकः शोकनाशनः" इति च विष्णुस० । "अशोकसमर्थान्वितनामतायया गतान् घरण्यं स्पृशगोचिनोऽध्वगान् । अमन्यतावन्नमिवैष पल्लवैः प्रतीष्टकामज्वलदग्निजालकम्" नैष० "सनूपुररवेण स्त्रीचरणेनाभिताडनम् । दोहदं तदशोकस्य ततः पुष्पोद्गमोभवेत्" एतदनुसारेणैव कविभिस्तथा वर्ण्यते यथा "अकृत सद्यः कुसुमान्यशोकः स्वस्थात् प्रभृत्येव सपल्लवानि । पादेन नापैक्षत सुन्दरीणां संसर्गमाशिञ्जितनूपुरेण" कुमा० नवकिसलयरागेणार्द्रपादेन बाला स्खलितनखरुचा द्वौ हन्तुमर्हत्यनेन । अकृतसमितमशोकं दोहदायेक्षया वा प्रणमितशिरसं वा कान्तमार्द्रापराधम्" "अनेन तनुमध्यया सुखरनूपुराराविणा नवाम्बुरुहकोमलेन चरणेन सम्भावितः । अशोक ! यदि सद्य एव सकुसुमं सम्पत्स्यसे मुधा वहसि दोहदमिति" "सर्व्वाशोकलतानां प्रथमं स्फुटितवसन्तविभवानाम् । निर्द्दत्ते दोहदेऽस्मिन् संक्रान्तानीव सकुसुमानि" इति च मालवि० । अयमशोकः नवपत्रिकान्तर्गतः "कदली दाड़िमी धान्यं हरिद्रा मानकं कचुः । विल्वोऽशोको जयन्ती च विज्ञेया नव पत्रिकाः" द्रु०त० । एतद्वृक्षाली शोकरहिता "अशोकस्थायं शोकरहितायै" इति दुर्गापूजापद्धतिः । अशोकश्च द्विविधः रक्ताशोकः पीताशोकश्च पीतरक्तपुष्पभेदेन तयोः तथात्वम् । तत्र रक्ताशोकाभिप्रायेण "अशोकनिर्भर्त्सितपद्मरागम्" कुमा० । "रक्ताशोकलतापिनैषितगुणो विम्बाधरालक्तकः" मालवि० पीताशोकवर्णने तु मालविकाग्निमित्रे तृतीयाङ्के तपनीयाशोकवर्णने द्रष्टव्यम् । "अशोकोहेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः । कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा । अशोकः शीतलः स्निग्धो ग्राही वर्ण्यः कषायकः । दोषापचीतृषादाहकृमिशोषविषास्रजित्" भा० प्र० पर्य्यायगुणादि । चान्तः शोकाभावे त्रिका० ।

अशोकतीर्थ न० अशोकनामकं तीर्थम् । काशीक्षेत्रान्तर्गते तीर्थभेदे । काशीस्थप्रयागतीर्थमधिकृत्य "अशोकाख्यमिदं तीर्थं गत्वैकेशव एष वै । मोक्षद्वारमिदं श्रेष्ठं स्वर्गद्वारमिदं विदुः" । काशी० ।

अशोकत्रिरात्र न० न शोको यत्र ताड्यं त्रिरात्रम् । हेमा० व्र० ख० भविष्योत्तरोक्ते व्रतभेदे तत्कालादिस्तत्रैवोक्तः "अस्त्यशोकत्रिरात्राख्यं व्रतं शोकभयापहम् । त्रिरात्रं तत्र कर्त्तव्यं व्रतं शोकविनाशनम्" इत्युपक्रम्य, मासि मार्गशिरे चैव ज्येष्ठे भाद्रपदे तथा । शुक्लपक्षे पञ्चदश्यामेकभक्तं तु कारयेत्" इत्यादिना आरम्भकालसङ्कल्पः "अनेनैव विधानेन प्रतिमासं च पूजयेत् यावत् द्वादश मासान् वै कुर्य्यादुद्यापनं ततः" इत्युक्तम् ।

अशोकपूर्णिमा स्त्री नास्ति शोको यस्याः कर्म्म० । फाल्गुनपौर्णमासावधिवर्षपर्य्यन्तायां हेमा० व्र० ख० विष्णुधर्म्मोक्तव्रताङ्गे १पौर्णमास्यां तत्र प्रतिमासं कर्त्तव्ये २व्रते च यथा "अशोकपूर्णिमामेतां ग्रहणध्वेकमना मम । उपोष्य न नरः शोकं प्राप्नोति स्त्री तथापि वा । फाल्गुनामलपक्षस्य पौर्णमास्यां त्वपोषितम्" इत्युपक्रम्य विधानसङ्गा "अनेनैव प्रकारेण चत्वारः फाल्गुनादयः उपोष्या ह्यपते मासाः" इत्युक्त्वा च "आषाढादिषु मासेषु तद्वत् प्रोक्तं तथाम्बुना । चतुर्ष्वन्येषु च प्रोक्तं तथा वै कार्तिकादिषु" इत्यनेन वर्षसाध्यत्वमस्या उक्तम् ।

अशोकरोहिणी स्त्री अशोक इव रोहति रुह–णिनि । कटुकीति ख्यातायाम् कटुकायां कटुकाशब्दे विद्वतिः ।

अशोकषष्ठी स्त्री कर्म्म० । चैत्रोभयषष्ठ्याम् तत्र षष्ठीदेवीपूजनविधानात्तथात्वम्, "चैत्रे मासि सिते पक्षे षष्ठ्यां षष्ठीं प्रपूजयेत् । सुताय पुत्रलाभाय शुक्लपक्षे तथैव च" उत्तरकामाख्यातन्त्रम् ।

अशोका स्त्री नास्ति शोकोदुःखं सेवनादस्याम् । १कटुकायाम् (कटकी) शब्दा० ढक् आशोकेयस्तद्भवे त्रि० । २चैत्रशुक्लषष्ठ्याञ्च "सुते जाते तथा षष्ठ्यां षष्ठी द्वादशरूपिणी । वैशाखे चान्द्रनीत्युपक्रम्य चैत्रेऽशोका प्रकीर्त्तिता" स्कं० पु० परिभाषोक्ता ।

अशोकारि पु० अशोकं शोकाभावमृच्छति ऋ–इन् ६त० ।

शोकाभावदायके कदम्बवृक्षे शब्दच० कदम्बशब्दे विवृतिः ।

अशोकाष्टमी स्त्री नास्ति शोकोयस्याः कर्म्म० । चैत्रशुक्लाष्टम्यां,सा हि अशोककलिकापानादशोकदायिका । यथोक्तं हेमा०व्र०ख० लिङ्गपुरा० । "अशोककलिकाघाटौ ये पिबन्ति पुनर्वसौ । चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुः ।" कूर्म्मपुरा० । चैत्रेमासि सिताष्टम्यां बुधवारे पुनर्वसौ । अशोकवृक्षमभ्यर्च्चयित्वा विधानतः । अशोकाष्ट कलिका मन्त्रेणोक्तेन भक्षयेत् ।" शोकं नैवाप्नुयान्नरः" अत्र बुधपुनर्वसुयोगः प्राशस्त्यार्थः हेमा० । "अशोककलिकापानमशोकतरुपूजनम्" शुक्लाष्टम्यां तु चैत्रस्य कृत्वा प्राप्नोति निर्वृतिमिति" लैङ्गे चैत्रशुक्लाष्टमीमात्रस्य निमित्तत्वोक्तेः । मन्त्रस्तु तत्रैव द्रष्टव्यः ।

अशौच्य त्रि० शुच–कर्म्मणि ण्यत् न०त० । शोचनानर्हे वस्तुद्दिश्य शुच्यते तद्भिन्ने । "अशौच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे" गीता ।

अशोधन न० अभावे न०त० । १शोधनाभावे । न०ब० । २शोधनशून्ये त्रि० । शोधनञ्चाशुचेर्जलादिना मलाद्यपनयनम् ऋणादेः प्रतिदानञ्च तदभावोऽशोधनम् ।

अशोधित त्रि० न०त० । १अप्रक्षालिते जलादिनाऽकृत मलाद्यपनयने २अकृतर्णादिप्रतिदाने च ।

अशोभन त्रि० शुभ–कर्त्तरि ल्युट् न०त० । १शोभनभिन्ने कुत्सिते । भावे ल्युट् अभावे न०त० । २मण्डनाभावे ।

अशोष्य त्रि० शुष–णिच्–ण्यत् न०त० । शोषयितुमशक्ये । "अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च" गीता ।

अशौच न० शुचेर्भावः शौचं न०त० । १शुचित्वाभावे स्मृतिप्रसिद्धे, विहितकर्म्मानधिकारित्वसम्पादके २अधर्म्मविशेषे च । "जनने मरणे चैव त्रिरात्राशौचमुच्यते" स्मृतिः । "समानं लघु चाशौचं पूर्व्वेणैव विशुध्यति । असमानं द्वितीयेनेति"यमः । स्वार्थे ष्यञ् आशौच्यमप्यत्र "आशौच्याद्विप्रमुच्येत" स्मृतिः । "अशौचं द्विविधं कालकृतं वस्तुस्वभावकृतञ्च तत्र कालकृतं "सद्यः स्मृतकीत्यादिना" अशुद्धिशब्दे ४८० पृष्ठे दर्शितम् तथाच । सपिण्डमरणजननादिकृतं कालविशेषेऽशौचम् कालापगमे च तन्नाशः । तच्च चेतननिष्ठम् । बहुधा चास्य शुद्धितत्त्वादौ प्रपञ्चः । वस्तूनामशौचं स्वभावात् यथा मलमूत्रादेः, यत्संसर्गादितरवस्तूनामप्यशौचं शुद्धभावः एवं तेषां संसर्गादिकृतं चेतनादेरशौचं यथा उच्छिष्टचण्डालादिस्पर्शे एवमशौचिकाम्बिकद्रव्यविशेषाणामाप्यशौचम् शुद्धभावः । अथ सपिण्डासपिण्डादिभेदेनाशौचकालविशेषो यथा "जनने मरणे च सप्तमपुरुषपर्य्यन्तं विप्रस्य दशाहः, क्षत्रियस्य द्वादशाहः, वैश्यस्य पञ्चदशाहः, शूद्रस्य मासः । दशमपुरुषपर्य्यन्तं सर्व्ववर्णेषु त्र्यहः चतुर्दशपुरुषपर्य्यन्तं पक्षिणी जन्मनामकृतिपर्य्यन्तमेकाहः ततः स्नानमात्रम् । कन्यायाः सापिण्ड्यं त्रिपौरुषम् । अथ विदेशस्थाशौचम् । अशौचकालाभ्यन्तरे विदेशस्थस्याशौचश्रवणे शेषाहे शुद्धिः । अशौचकालोत्तरश्रवणे तु ज्ञातिजनाशौचं नास्त्येव । प्रेतजनने तु सचेलस्नानात् शुद्धिः । मरणाशौचे तु वर्षाभ्यन्तरश्रवणे त्र्यहात् शुद्धिः । सचेलस्नानादङ्गास्पृश्यत्वनिवृत्तिः । वर्षोत्तरश्रवणे स्नानेन शुद्धिः सपिण्डानाम् । प्रेतादीनान्तु मातृपितृभर्तृमरणे वर्षोत्तरमेकाहेन शुद्धिः, द्वितीयवर्षे श्रवणे सद्यः । संपूर्णाशौचातिक्रमे त्र्यहाशौचं न बालाद्यशौचातिक्रमे खण्डाशौचातिक्रमे वा । अथ गर्भस्रावाशौचम् । गर्भस्रावे तु स्त्रीणामेव यस्मायाभ्यन्तरेऽशौचं तच्च लौकिके कर्म्मणि मासदशमसंख्यदिनव्यापकं द्वितीयमासावधिमासदशमसंख्यदिनाधिकैकदिनात् परं ब्राह्मण्या वैदिककर्म्माधिकारः क्षत्रियाया दिनद्वयात् वैश्यायादिनत्रयात् शूद्रायास्तु दिनषट्कादिति हारलता प्रभृतयः । सप्तमाष्टममासीयगर्भपतने स्त्रीणां संपूर्णाशौचम् निर्गुणसपिण्डानामहोरात्रं यवेष्टा चरणपिण्डानां त्रिरात्रम् तच्च जातस्य तद्दिनएव मरणे ज्ञेयं द्वितीयदिनादौ तु मरणे नवमादिमासजातबालकवत् । अथ स्त्र्यशौचम् । कन्यायाः जन्मप्रभृतिद्विवर्षाभ्यन्तरमरणे सद्यः शौचं तदुपरि वाग्दानपर्य्यन्तमेकाहः । वाग्दानोत्तरविवाहपर्य्यन्तं भर्त्तृकुले पितृकुले च कन्याया आदत्तजन्मरणे सद्यः शौचम्, आ चूडादेकरात्रकम्, आ प्रदानात्त्रिरात्रं, स्यादिति विशेषः । दत्तकन्यायाः पितृगृहे प्रसवमरणयोः पित्रोः श्वशुरादिसंसर्गशून्ययोरपि त्रिरात्रं तथाविधबन्धुवर्गाणामेकरात्रम् सम्बन्धे दशरात्रम् । अथ बालाद्यशौचम् । नवमादिमासजातबालकस्याशौचकालाभ्यन्तरमरणे मातापित्रोरस्पृश्यत्वयुक्तं तदेव जननाशौचं ज्ञातीनान्तु शौचं नास्ति नवमादिमासदशतजातयोस्तु कन्यापुत्रयोः पित्रादिसपिण्डानां जननाशौचं संपूर्णम् । पुत्रजन्मनि सुखदर्शनात् पूर्व्वं सचेलस्नानं कृत्वा ब्राह्मणेभ्यश्च यथाशक्ति दत्त्वा बालकाय काञ्चनं दत्त्वा सुखं पश्येत् । ततः पुनः सचेलस्नानम् ।

कन्याशौचमध्येऽपि जातकर्म षष्ठीपूजे कर्त्तव्ये। पुत्रजन्मनिमित्तकं दद्यित्वाद्यं नाड़ीच्छेदात् पूर्व्वम् अशौचान्ते वा कर्त्तव्यम्। पुत्रकन्याजनने स्त्रीणां स्वजात्युक्तदशाहादितः परं लौकिककर्म्माधिकारः। पुत्रजनने तु वैदिककर्म्माधिकारोविंशतिरात्रोत्तरं स्नानात्, कन्याजनने तु मासोत्तरं स्नानात् ब्राह्मणाः। शूद्रायास्तूनत्रयं व मासोत्तरं स्नानात् शुद्धिः। एतत् सर्व्वं पुत्रकन्ययोर्विद्यमानत्वे बोध्यम्। जननाशौचकालोत्तरं यस्यासाध्यन्तरमजातदन्तमरणे पित्रोरेकाहः। एवं निर्गुण्यसोदरस्य, सपिण्डानान्तु सद्यः। यस्यासाध्यन्तरेऽपि जातदन्तस्य मरणे पित्रोस्त्र्यहः सपिण्डानामेकाहः यस्यासोपरि द्विवर्षपर्य्यन्तं पित्रोस्त्र्यहः। सपिण्डानामक्षतचूड़े मृते एकाहः क्षतचूड़े त्र्यहः। द्विवर्षोपरि सर्व्वेषामनुपनीतस्य मरणे मासत्रयाधिकषड्वर्षं यावत् त्र्यहः। पञ्चवर्षोपनीतस्य तदानीमपि दशाहः। मासत्रयाधिकषड्वर्षोपरि सर्व्वेषां दशाहः। शूद्राणां तु षण्मासोपरि द्विवर्षाभ्यन्तरे पञ्चाहः। अत्रापि क्षतचूड़स्य द्वादशाहः। द्विवर्षोपरि षड्वर्षाभ्यन्तरे द्वादशाहः। अत्रापि दैवात् क्षतोद्वाहेऽपि मासः। षड्वर्षोपरि मासः। अत्र मासवर्षपरिगणना सावनेन "मृतकादिपरिच्छेदोदिनमासाब्दपाख्यथा। मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तिता" इति सूर्य्य सिद्धान्तात्। अथासपिण्डाशौचं गुरु मातामहमरणे त्रिरात्रं भगिनीमातुलानी मातुलपितृष्वसृमातृष्वसृगुर्व्वङ्गनामातामहीमरणे पञ्चिणी। श्वश्वशुरयोर्भिन्नग्रामस्थयोर्मरणेऽहोरात्रम्। आचार्य्यपत्नी पुत्रयोरुपाध्यायस्य मातृवंमातृवंयस्य श्यालकस्य सहाध्यायिनः शिष्यस्य च मरणेऽहोरात्रं मातृष्वस्रीयपितृष्वस्रीयमातुलपुत्रभागिनेयमरणे पञ्चिणी। पितामहभगिनीपुत्रपितामहीभ्रातृतद्भगिनीपुत्ररूपपितृबान्धवत्रयमरणे पञ्चिणी। मातामहभगिनीपुत्रमातामहीभगिनीपुत्रमातामहीभ्रातृपुत्ररूपमातृबान्धवत्रयमरणेऽहोरात्रम्। एकग्रामवासिगोत्रजमरणेऽहोरात्रम्औरसव्यतिरिक्तपुत्रजननमरणयोः परपूर्व्वभार्य्याप्रसवमरणयोश्च त्रिरात्रम्। सजातीयपुरुषान्तरसंगृहीतस्वभार्य्यामरणे त्रिरात्रम्। मातृष्वसृपितृष्वसृमातुलभगिनीपुत्राणां गृहस्थितानामाचार्य्यस्य च मरणे त्रिरात्रम्। श्वश्वशुरयोःसन्निधिमरणे त्रिरात्रं श्वश्वशुरयोरेकग्रामस्थितयोर्म्मरणे पञ्चिणी। प्रथममन्येनोढा तेनैव जनितपुत्रा पुत्रसहितैवानूढास्थिता पश्चात्तेनापि जनितपुत्रा तयोः पुत्रयोर्यस्यासम्भवं प्रसवमरणयोर्द्वितीयपुत्रपितृत्रिरात्रं तत्सपिण्डानामेकरात्रं तथाविधपुत्रयोः परस्परप्रसवमरणयोर्मातृजात्युक्तमशौचम्। दौहित्रमरणे पञ्चिणी। पितृमातृमरणे जड़ानां कनीयानां त्रिरात्रम्। यदि मातृष्वस्रादीनां त्रिरात्राभ्यन्तरमरणश्रवणे तच्छेषेण शुद्धिः। तत्तत्कालोत्तरश्रवणे तु नाशौचं किन्त्वाचारात् स्नानम्। अथ क्षुद्रविशेषाशौचम्। शास्त्रानुमतवृद्धिपूर्व्वकालक्षयातिनोनाशौचादि। शास्त्रानुमत्याऽनशनादिकृतस्य प्रमादादनशनाशनविच्छिज्जलोद्देशप्रपतनसंग्रामगृहक्षिदंष्ट्रिनखिव्याल विषचाण्डालचौरहतस्य त्रिरात्रम्। गृहक्षतादिभिःस्त्रिया च क्रीड़ां कुर्व्वतः प्रमादहतस्यापि नाशौचादि। नागविप्रियकारित्वेन उद्धतस्य मरणोद्देशेन प्रवृत्तस्य विद्युद्धतस्य च चौर्य्यादिदोषेण राज्ञा हतस्य च कलहं कृत्वा चाण्डालादीरसमानैर्हतस्य च व्याधिजनकौषधस्य विषस्य वह्नेश्च दातुर्मरणे पाषण्डप्रायाश्रितस्य च नित्यं परापकारिणश्च क्रोधात् स्वयं प्रायोविषवह्निशस्त्रोद्बन्धनजलगिरिदृक्षप्रपातैर्हतस्य चर्म्मभांसास्थ्यादिमयपात्रनिर्म्मातुर्विप्रादेश्च मनुष्यवधस्थानाधिकारिणश्च कण्ठदेशोत्पन्नभगरोगस्य पुंस्कर्म्माशक्तनपुंसकस्य च ब्राह्मणविषयापराधकरणान्निहतस्य च बुद्धिपूर्व्वकब्राह्मणहतस्य च महापातकिनश्च एवंविधपतितानां न दाहादिकं कार्य्यम्। तत्कृत्वा तप्तकृच्छ्रद्वयं कुर्य्यात्। म्लेच्छतस्करादिभिर्युद्धे स्वाम्यर्थं हतस्य विप्रादेर्दाहादिकमस्त्येव। अकृतप्रायश्चित्तस्य गलत्कुष्ठिनोन दाहादिकं कार्य्यं शस्त्रेणाभिमुखहतस्य सद्यः शौचं दाहादि च। गवार्थे ब्राह्मणार्थे वा दण्डेन युद्धहतस्याहोरात्रमशौचम्। नृपतिरहितयुद्धे लगुड़ादिहतस्य पराङ्मुखहतस्य त्रिरात्रम्। गोविप्रपालनेऽभिमुखपराङ्मुखत्वाभ्यां हतस्य सद्यस्त्रिरात्रे। यस्यघाते तरक्षते सप्ताहाद्दूर्द्धं मरणे सम्पूर्णं, यस्यघाते त्र्यहाद्दूर्द्धं च प्रकृताशौचम्। शुद्धि०त०। एतत्प्रमाणानि तत्रैव तु सन्त्येवानि। "मातृवद्वर्णसङ्करः" इत्युक्तेर्भूम्यवसिक्ताम्बष्ठादीनां मनुलोमजानां मातृवर्णानुसारेणाशौचम् प्रतिलोमजानां तु "शूद्रेण तु सधर्म्माणः सर्व्वेऽपध्वंसजाः स्मृताः" इत्युक्तेः शूद्रवत्तुल्याशौचमिति रघुनन्दनादयः। आचारस्तु मातृतुल्यतया दृश्यते अतएव चण्डालादीनां दशाहाशौचाचारः। देवतामन्त्रादिदातुर्मरणे त्रिरात्रम्। वेदाङ्गादि शास्त्राध्यापकस्य तथाविधशिष्यस्य च मरणे एकाहः "गृहीतो देवता मन्त्रः सावित्रीयन्तथं क्रतम्। यस्यात्तस्य त्रिरात्रं स्यात् ब्रह्मविद्या यहोयतः" इति "उपनीयाध्यापकोयस्तस्यापि

त्रिरात्रकम्। वेदवेदाङ्गपारगाणां व्याख्यानं गिलितं यतः। स्नानं प्रतिष्ठितं येन वेदाभ्यासोयतः कृतः। तस्मिन्मृते चैकरात्रं गुरोःशिष्ये तथैव" च मत्स्यसूक्तोक्तेः दत्तक पुत्रस्य यज्ञोपवीतादिकृते त्रिरात्रम् जनककुलेऽशौचाभावः। तत्रायं विशेषः। सपिण्डदत्तकस्यापि त्रिरात्रं वाचनिकं तत्पुत्रादीनां तु संपूर्णमिति। असपिण्डदत्तकस्य तत्पुत्रापाद्य त्रिरात्रमिति बहवः सपिण्डासपिण्डदत्तकतत्पुत्रापां त्रिरात्रमिति "भिन्नगोत्राः पृथक्पिण्डाः पृथग्वंशकराः स्मृताः। जनने मरणे चैव त्र्यहाशौचस्य भागिनः" इत्युक्तेरिति दत्तकमीमांसादयः। शवानुगमनाशौचम्। ब्राह्मणशवस्यानुगमने ब्राह्मणस्य सचेलस्नानाग्निस्पर्शोदकप्राशनैः शुद्धिः। क्षत्रियस्यैकाहेन, वैश्यस्य द्व्यहेन, शूद्रस्य प्राणायामशतेन दिनत्रयेण च शुद्धिः। प्रमादाच्छूद्रशवानुगमने जलावगाहाग्निस्पर्शोदकप्राशनैः शुद्धिः। अनाथब्राह्मणस्य धर्मबुद्ध्या दहनवहनयोः स्नानोदकप्राशनाभ्यां सद्यः शौचम्। लोभेन सजातीयदाहे सज्जात्युक्ताशौचम्। असजातीयशवस्य दहनवहनस्पर्शैः शवजात्युक्ताशौचम्। स्नेहादसम्बन्धिदाहकविप्रस्य तद्गृहवासे त्रिरात्रं तत्कुलान्नभोजने दशरात्रं तद्गृहवासे तदन्नाभोजने चाहोरात्रं विशेषवचनाभावे सम्बन्धिनोमातुलादेरस्नेहेनापि अदाहे त्रिरात्रं चिताधूमसेवने सचेलस्नानं कृते शूद्रेऽस्थिसञ्चयनकालाभ्यन्तरे तद्गृहं गत्वाऽस्थिपातने विप्रस्य त्रिरात्रमशौचं, स्थानान्तरे विशेषवचनाभावेऽहोरात्रं तद्गृहे तदूर्ध्वं मासाभ्यन्तरेऽहोरात्रं सचेलस्नानञ्च। सजातेर्द्विजेनैव क्षत्रियवैश्ययोर्द्व्यहेन ब्राह्मणः शुध्यति शूद्रस्तु स्पर्शं विनानुगमने सर्वत्र नक्तेन। मृतस्य शूद्रस्य बान्धवैः सह रोदनरहितविलापमात्रेऽहोरात्रेण। अस्थिसञ्चयनकालश्च ब्राह्मणस्य चतुरहः शूद्रस्य दशाहः। त्र्यहाशौचे द्वितीयाहः। मरणाशौचे विप्रस्य चतुर्थेऽस्पृश्यता निवृत्तिः। शूद्रस्य दशमदिने सर्वस्य खण्डाशौचकाले त्रिभागकालेन अतिक्रान्ताशौचे सचेलस्नानेन जनने तु सपिण्डानां स्पृश्यतैव। पुत्रोत्पत्तौ स्नानात् पितुः स्पृश्यत्वं एवं विमातृणामपि। एवं मृतिकाशौचे पितुर्विमातृणाञ्च मृतिकातुल्यकालात्स्पृश्यत्वम्। अन्येषां स्नानमात्रं कन्या पुत्रजनने मातुर्दशरात्रमस्पृश्यत्वं शूद्रायास्तु दशरात्रमस्पृश्यत्वम्। अशौचकालादिविषये च प्रायोनिबन्धकर्तॄणां मतभेदोदृश्यते बाहुल्यभयात् तन्न लिखितम् स्वस्वदेशप्रचलितनिबन्धानुसारेण तदवसेयम्। अशौचे तु वर्षादि विशेषादौ दश पक्षा हारलतायां दर्शनोक्ताः यथा "सद्यःशौचं तथैकाहस्त्र्यहञ्चतुरहस्तथा। षडहं द्वादशाहञ्च पक्षोमासस्तथैव च। मरणान्तं तथा चान्यत् दश पक्षास्तु सूतके"। तत्र मरणान्तं जननमरणभिन्ननिमित्तम्। यथा "क्रियाहीनस्य मूर्खस्य महारोगिण एव च। यथेष्टाचरणस्याशुद्धिर्मरणान्तमशौचकम्" शु०त० स्मृतिः। "अस्नात्वा चाप्लुतत्वा च अदत्त्वाऽन्नं तथा द्विजः। एवंविधस्य विप्रस्य सर्व्वदा सूतकं भवेत्" दक्षः "अग्न्यपूर्व्वा यस्य गेहे भार्य्या स्यात्तस्य नित्यशः। अशौचं सर्व्वकार्य्येषु देहे भवति सर्व्वदेति" नि०सि० स्मृतिः "मरणान्तपक्षस्तु निन्दार्थवादपरः "नामधारकविप्रस्तु दशाहं सूतकी भवेदिति" माधवधृतवचने नामधारकविप्रस्यापि दशाहाशौचविधानात्" नि०सि०। दासाद्यशौचे विशेषः तत्र दासाः पञ्चदशधा दासशब्दे वक्ष्यमाणास्तेषु गर्भदासस्य सपिण्डान्नरजननमरणयोः स्वामिकार्य्ये सद्यः शौचं भक्तदासस्य त्र्यहः "सद्यःसृश्यो गर्भदासो भक्तदासस्त्र्यहाच्छुचिः" नि०सि० स्मृत्युक्तेः कर्म्मकरदासानां विशेषः "मूल्यैः कर्म्मकराः शूद्रा दासीदासास्तथैव च। स्नाने शरीरसंस्कारे स्पृष्टकर्मसु दूषिताः" शाता० उक्तः। दत्तदासदासादीनां तु, "दासी दासस्य सर्व्वोवै यस्य वर्षस्य यो भवेत्। तद्दर्षस्य भवेच्छौचं दासा मासन्तु सूतकम्" अङ्गि० "स्वामिशौचेन दासाद्याः स्पृश्याः मासात्तु कर्म्मसु। योग्याः स्युर्मासतोदासी सूतके स्पृश्यतामियात्" षट्त्रिं०। दत्तदासादीनां सपिण्डमरणादौ स्वाम्यशौचसमसंख्यकदिनादूर्द्धम् सत्यपि मासाद्यशौचे स्वामिकार्य्ये स्पृश्यतेति कश्यपदत्तः एवमन्नवासिनामपि। "दासान्नवासिभृतकाः शिष्याश्चैकत्रवासिनः। स्वामितुल्येन शौचेन शुध्यन्ति सूतसूतके" इत्त० उक्तेः। दासादेः स्वामितत्सपिण्डमरणेऽशौचमाह विष्णुः "पत्नीनां दासानामानुलोम्ये स्वामितुल्यमशौचं सूते स्वामिन्यात्मीयम्" अत्रानुलोम्येनेत्युक्तेः प्रातिलोम्येऽशौचाभाव एव तस्य शास्त्रीयदासत्वाभावात् "वर्णानामानुलोम्येन दास्यं न प्रतिलोमत" इति याज्ञ० स्मृत्या प्रातिलोम्येन दासत्वनिषेधात्। "सूतकानां परिच्छेद इत्यादि सू०सि० प्रागुक्तवचनात् सावनदिनसैव ग्राह्यता। मिताक्षरादितो तु रात्रिं विभागं कृत्वाद्यभागद्वये चेत् पूर्व्वदिनम्, अन्त्ये चेत् परदिनमिति आरम्भकाले विशेष उक्तः। प्रागर्द्धरात्रात् प्राग्वा सूर्य्योदयात् पूर्व्वदिनमिति मतान्तरम्। एतेषु देशाचारतो व्यवस्था। अशौचभङ्गेऽपि तत्तुल्य-

मशौचम् । "अथ ब्राह्मणादीनामशौचे यः सद्यदेवान्नमश्नाति तस्य तावदशौचम् यावत्तेषाम्" विष्णुः एतत् ज्ञानतः, अज्ञाने तु "अन्तर्दशाहे भुञ्जानं स्रुतके सूतकेऽपि वा तस्याशौचं भवेत्तावद्यावद्दत्तं व्रजत्यधः" अङ्गिरसोक्तेरेवम् "उभयत्र दशाहानि कुलस्यान्नं न भुज्यते" इति यमः । उभयत्र जननमरणयोः दशाहानोत्यशौचकालोपलक्षणम् । कुलस्य स्रुतकयुक्तस्य सब्रह्मचर्यमसकुल्यैर्न भोक्तव्यम् । सकुल्यानां न पुनर्दोषः "स्रुतके तु कुलस्यान्नमदोषं मनुरब्रवीत्" इति तेनैवोक्तत्वात् अयञ्च निषेधोदाहृतभोक्तोरन्यतरस्मिन् जननमरणे ज्ञाते सति द्रष्टव्यः ।"उभाभ्यामपरिज्ञाते स्रुतकं नैव दोषकृत् । एकेनापि परिज्ञाते भोक्तुर्दोषमुपावहेदिति षड्विंशन्मतदर्शनात् । तथाविवाहादिषु स्रुतकोत्पत्तेः प्राक् ब्राह्मणार्थं पृथक्कृतमन्नं भोक्तव्यमेव । "विवाहोत्सवयज्ञेषु त्वन्तरा स्रुतस्रुतके । पूर्वसङ्कल्पितार्थेषु न दोषः परिकीर्त्तितः" इति हरस्मृतिस्मरणात् तथाऽपरोऽपि विशेषः षड्विंशन्मते दर्शितः । "विवाहोत्सवयज्ञेषु त्वन्तराऽस्रुतस्रुतके । परैरन्नं प्रदातव्यमभोक्तव्यञ्च द्विजोत्तमैः । भुञ्जानेषु तु विप्रेषु त्वन्तरा स्रुतस्रुतके । अन्यगेहोदकाचानाः सर्वे ते शुचयः स्रुताः"नि०सि० इति।तथाऽशौचिपरिग्रहेऽपि केषु चित्द्रव्येषु दोषाभावः । यथाह मरीचिः । "लवणे मधुमांसे च पुष्पमूलफलेषु च । शाकशाल्यन्नेष्वक्षु दधिसर्पिःपयःसु च । तिलौषधाजिने चैव पक्वापक्वे स्वयंग्रहः । पक्वेषु चैव सर्वेषु नाशौचं स्रुतस्रुतके" इति । शाकमभक्ष्यजातम् । अपक्वान्नखण्डलादि। स्वयंग्रह इति स्वयमेव स्वास्यनुज्ञातो गृह्णीयात् न तद्भक्षात् । एतदप्यामान्नविषयं सत्प्रदत्तविषयञ्च । "अन्नसत्प्रदत्तानामामसन्नमगर्हितम् । भुक्त्वा पक्वान्नमेतेषांत्रिरात्रन्तु पयः पिबेदिति"अङ्गिरः स्मरणात्। अत्र पक्वशब्दोऽभक्ष्यव्यतिरिक्तौदनादिविषयः । शवसंसर्गनिमित्ताशौचे त्वङ्गिरसा विशेषउक्तः । "अशौचं यस्य संसर्गादापतेद्गृहमेधिनः । क्रियास्तस्यैव लुप्यन्ते गृह्याणाञ्च न तद्भवेदिति" । तदशौचङ्केवलं गृहमेधिन एव न पुनस्तद्गृहमेधानां भार्यादीनान्तद्द्रव्याणाञ्च भवेदित्यर्थः । एवमेवातिक्रान्ताशौचेऽपि । "संसर्गाद्यस्य चाशौचं यस्यातिक्रान्तकालता । तदीयस्य पदार्थस्य नाशौचं विद्यते क्वचित्" षट्त्रि० नि०सि० । कर्म्मविशेषे कर्म्मारम्भे च तत्तत्कर्म्मणि अशौचाभावः वयोक्तम् । "कारवः शिल्पिनो वैद्या दासीदासास्तथैव च । राजानो राजभृत्याश्च सद्यःशौचाः प्रकीर्त्तिताः"प्रचेतसा। लघुविष्णुना च"व्रतयज्ञविवाहेषु श्राद्धे होमार्चने जपे । आरब्धे स्रुतकं न स्यादनारब्धे तु स्रुतकम् । प्रारम्भोवरणं यज्ञे संकल्पो व्रतबन्धयोः । नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया" वरणमिति ऋत्विक्परम् तेषाञ्च मधुपर्कपर्यन्तोत्तरमशौचाभावः। "गृहीतमधुपर्कास्तु यजमानात्तु ऋत्विजः। पश्चादशौचं पतितं न भवेदिति निश्चयः" ब्रह्मपुरा० उक्तेः एतन्मूलकमेव लिंगपुराणीयं तत्तत्कार्य्येषु अशौचाभाववचनम् यथा "तत्तत्कार्य्येषु सत्रिव्रतिस्थपनूपवहीक्षितर्त्विक्स्वदेशभ्रंशापत्स्वप्यनेकश्रुतिपठनभिषक्कारुशिल्पश्रोत्रियाणाम् । संप्रारब्धेषु दानोपनयनयजनश्राद्धयुद्धप्रतिज्ञाचूडातीर्थाध्वयात्राजपपरिणयनाद्युत्सवेष्वेतदेव" "तीर्थेति आकस्मिकतीर्थप्राप्तौ तदङ्गं श्राद्धमशौचे कर्त्तव्यम् "विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि । न तत्र स्रुतकं तद्वत् कर्म्म यत्तादि कारयेत्" पैठी० उक्तेः यात्रा रथयात्रादि । जपः पुरश्चरणादि संकल्पितस्तोत्रपाठादिश्च । व्रती संकल्पेन गृहीतव्रतादिः "गृहीतनियमस्यापि न स्यादन्यस्य कस्यचिदिति" ब्राह्मोक्तेः "वरं प्राणान् परित्यक्तुं न खण्डनं शिरसोऽपि वा नत्वनभ्यर्च्च्य भोक्तव्यं भगवन्तं त्रिलोचनम्"इत्युक्तनियमवतो देवपूजायामधिकारः । ऋतनियमविषया "शिवविष्णुर्चनं दीक्षा यस्य चाग्निपरिग्रहः । औतकर्म्माणि कुर्वीत स्नातः शुद्धिमवाप्नुयात्"यमोक्तिः"जपो देवार्चनविधिः कार्य्यादीक्षान्वितैर्नरैः नास्ति पापं यतस्तेषां स्रुतकं वा यतात्मनाम्"शङ्खावली च। "अथ स्रुतकिनः पूजां वक्ष्यास्यागमचोदिताम् । स्नात्वा निर्वर्त्त्य नित्यञ्च मानसा क्रियया हि वै । बाह्यपूजाक्रमेणैव ध्यानयोगेन पूजयेत्" शारदा। मानसजपे तु अकृतनियमस्यापि अशुचेरप्यधिकारः "अशुचिर्वा शुचिर्वापि गच्छन् तिष्ठंस्तथा स्वपन् । मन्त्रं कल्मषमोक्षज्ञो मनसैव समभ्यसेत् "रामार्चनचन्द्रिकोक्तेः "मानसमप्यशुचोति" वचनं तु पठनपाठनाविषयम् । तारादिविषये तु अकृतनियमस्याप्यधिकारः "तारायाश्चैव काल्याश्च त्रिपुराया विशेषतः। जनने मरणे चैव न त्यजेयुर्जपार्चनम्"इति तन्त्रोक्तेः। अथाशौचे नियमाः नि०सि०याज्ञवल्क्यः "इति संश्रुत्य गच्छेयुर्गृहं बालपुरःसराः । विदग्धस्य निखातानि नियता द्वारि वेश्मनः । आचम्याग्न्यादि सलिलं गोमयं गौरसर्षपान् । प्रविशेयुः समाक्षम्य कृत्वाश्मनि पदं मनैः" । "प्रवेशनादिकं

कर्म प्रेतसंस्पर्शिनामपि" नि० सि०। "क्रीतलब्धाशनाभ्यौ स्वपेयुस्ते पृथक्स्थितौ वा० इदञ्चाद्येऽह्नि। यथाशुद्धि-तत्त्वे वैजवापः "शमीमालभन्ते "शमी मे पापं शमयत्विति" अश्वत्थमालभन्ते "अश्वत्थ इव स्थिरोभूयासमिति" अग्निम्-"अग्निर्नः शर्म यच्छत्विति" ज्योगित्यनरा गामजसुपस्पृशन्तः क्रीत्वा लब्ध्वान्यगेहादेकाह्नमलवणमेकरात्रं दिवा-भोक्तव्यं 'त्रिरात्रं च कर्मोपरमणम्" क्रीताद्यशनसुपवासा-शक्तस्य। आश्वलायनस्तु "नैतस्यां रात्र्यामन्नं पचेरंस्त्रि-रात्रमचारलवणाशिनः स्युर्दादशरात्रं चेत्याह महागुरुषु"। अशौचे रत्नाकरे आपस्तम्बः "भार्यां परमगुरुसंस्थायां चा-कालभोजनानि कुर्वीरन्" यदा स्मृतिः परदिने तावत्कालमि-त्यर्थः। हरिस्मृतिः "अधःशय्यासना दीना मलिना भोगव-र्जिताः। अचारलवणाद्याः स्युर्लब्धक्रीताशनास्त्रयः" अचा-रलवणशब्देऽचारलवणशब्दार्थ उक्तः। भोगोऽभ्यङ्गताम्बू लादिः "तैलाभ्यङ्गो वान्धवानामङ्गसंवाहनञ्च यत्। तेन चाप्याय-यते जन्तुर्यावन्नि स्वबान्धवाः मार्क० पुरा० वाक्यन्तु अ-न्यदिनविषयम्"अशौचान्ते तिलकल्कैः स्नाता गृहं प्रविशे-युरिति विष्णूक्तेः सपिण्डानामस्थिसञ्चयनादूर्द्धं भोगोऽप्युक्तः विष्णु० पु०। "शय्यासनोपभोगस्तु सपिण्डानामपीष्यते अस्थिसञ्चयनादूर्द्धं संयोगस्तु न योषिताम्" तिलान् ददत पानीयं दीपं ददत जायतः। ज्ञातिभिः सह भोक्तव्य मेतत् प्रेतेषु दुर्लभम्" भारतम्। भोजनं च दिवैव। दिवा चैव च भोक्तव्यमसांसं मनुजर्षभेत्यत्रैः प्रागुक्तवैजवापोक्तेश्च। "क्रीत्वा लब्ध्वा वा दिवाह्नमश्नीयुः" पारस्करोक्तेश्च अशौचमध्ये यत्नेन भोजयेच्च स्वगोत्रजान्" आदि पुरा० ज्ञातिभिः सह भोजनञ्च तृतीयादिदिनपरम्। प्रथमेऽह्नि तृतीये च सप्तमे दशमे तथा। ज्ञातिभिः सह भोक्तव्यमिति" मरीच्युक्तेः। "मांसाशनं च नाश्नीयुः शयीरंश्च पृथक् क्षितौ" मनुः। लवणक्षीरमात्राद्यापूपमांसानि पायसम्। वर्ज्यं वे-दाहृताज्येषु बालदन्तातुरैर्विना" देवज्ञानीयकारिः "मत्स्य मांसानि न भक्षयेयुरा प्रदानात्" गौतः "अपरुक्तारे ब्रा-ह्मणमन्नं आसीरन्" वसिष्ठः अशौचे पीठादिनिषेधात् अपकाले उपवेशार्थं कटस्तरः कार्यः "पाणिषु क्षुण्मयेषु पर्णपुटेषु वा ऽश्नीरन्" हारीतः। "उपवासो गुरौ प्रेते पत्न्याः पुत्रस्य चैवहि" मरीचिः। अन्यदिने विशेषः "यस्य यस्य तु वर्षस्य यदात् स्नात् पश्चिमं त्वहः। स तत्र गृह-शुद्धिं च वस्त्रशुद्धिं करोत्यपि। पाराशरस्तितोगत्वा प्रेतस्पृष्टे तु वाससी। अन्यानामाश्रितानाञ्च त्यक्त्वा स्नानं करोत्यथ" आह्निकम् अत्र तिलकल्कादिस्नानं प्रागुक्तम् अशौचहेषु सर्वदिनेषु वर्ज्जनीयधर्म्मत्वमाह शङ्खः"दानं यज्ञोहोमः स्वाध्यायः पितृकर्म च। प्रेतपिण्डक्रिया वर्ज्जमशौचे विनिवर्त्तते" अत्र विशेषोमिताक्षरायाम् "अशुचित्वेन सकलश्रौतस्मार्त्तकर्म्माधिकारनिवृत्तौ प्रस-क्तायां केषुचिदभ्यनुज्ञानार्थं माह। "वैतानोपासनाः का-र्याः क्रियाश्च श्रुतिचोदनात्"या०। वितानोऽग्नीनां विस्ता-रः तत्र भवावैताना स्तेनाग्निसाध्याः अग्निहोत्रदर्शपूर्ण मासाद्याः क्रिया उच्यन्ते। प्रतिदिनसुपासत इत्युपासनो गृह्योऽग्निसाध्यभवाः औपासनाः सायम्प्रातर्होमक्रिया उ-च्यन्ते। ता वैतानोपासना वैदिक्यः क्रियाः कार्याः कथं वैदिकत्वमिति चेत् श्रुतिचोदनात्। तथाहि। "यावज्जीव मग्निहोत्रञ्जुहुयात्" इत्यादि श्रुतिभिरग्निहोत्रादीनां चो-दना स्मृतैव।तथा "अहरहः स्नाद्वा कुर्यादहरभावे क्वेन-चिदा काडादिति" श्रुत्यौपासनहोमोऽपि चोद्यते। अत्र च श्रौतत्वविशेषणोपादानात् स्मार्त्तक्रियाणां दानादी नामनुष्ठानमुक्तम्यते। अतएव व्याघ्रपादेनोक्तम्। "स्मार्त्त कर्म्मपरित्यागो राहोरन्यत्र सूतके। श्रौते कर्म्मणि त-त्काले स्नातः शुद्धिमवाप्नुयादिति"। श्रौतानाञ्च कार्यत्वा-भिधानान्नित्यनैमित्तिकानां करणम्। यथाह पैठीनसिः। "नित्यानि निवर्त्तेरन्नैतानवर्ज्यं शालाग्नौ चैक" इति। नित्यानि निवर्त्तेरन् इत्यविशेषेणावश्यकानां नित्यनैमि-त्तिकानाञ्चिदृत्तौ प्रसक्तायां वैतानवर्ज्यमित्यग्नित्रयसा-ध्यावश्यकानामपर्युदासः। शालाग्नौ चैक इति गृह्याग्नौ भवानामप्यावश्यकानां पाक्षिकः पर्य्युदास उक्तः। अतस्ते-ष्वशौचं नास्त्येव। काम्यानां पुनःशौचाभावादनुष्ठानम्। मनुनाप्यनेनैवाभिप्रायेणोक्तम्। "प्रत्यूहेत्साग्निषु क्रिया"इ-ति। अग्निषु क्रिया न प्रत्यूहेदित्यनग्निसाध्यानाम्यज्ञम-हायज्ञादीनाञ्चिदृत्तिः। अत एव संवर्त्तः। "होमन्तत्र प्रकुर्वीत शुष्कान्नेन फलेन वा। पञ्चयज्ञविधानन्तु न कुर्यान् मृत्युजन्मनोरिति"। वैश्वदेवस्य अग्निसाध्यत्वेऽपि वचनाच्चिदृत्तिः"विप्रोदग्राहमासीत वैश्वदेवविवर्ज्जित" इति तेनैवोक्तत्वात्। "सूतके कर्मणान्त्यागः सन्ध्यादीनां विधी-यत"इतिवदपि सन्ध्यायानिदृत्तिः श्रूयते तथाप्यञ्जलिप्रक्षे पादिकङ्कार्य्यम्। "सूतके सावित्र्या चाञ्जलिमक्षिप्य प्रदक्षिणं कृत्वा सूर्य्यं ध्यायन्नमस्कुर्यादिति"पैठिनसिस्मरणात्। यद्या-पि वैतानोपासनाःकार्या इति सामान्येनोक्तं तथाप्यन्ये-न कारयितव्यम्। "अन्य एतानि कुर्युरिति" पैठीनसिस्मर-

णात्। हरिस्मृतिनाप्युक्तम्। "मृतके मृतके चैव अशक्तौ श्राद्धभोजने। प्रवासादिनिमित्तेषु हावयेच्च तु हापयेत्" इति। तथा मार्त्तत्वेऽपि पिण्डपितृयज्ञश्राद्धौकर्म्मात्वेनुज्यादिकञ्च नित्योहोमःकार्य्य एव। "मृतके तु समुत्पन्ने मार्त्तङ्कर्म्म कथञ्चन। पिण्डयज्ञं चरुं होममसगोत्रेण कारयेदिति" जातूकर्ण्यस्मरणात्। यद्यपि साङ्गे कर्म्मण्यकर्तृत्वन्तथापि स्वद्रव्यत्यागात्मकमधानं स्वबन्धुर्व्यात् तस्यान्यनिष्पाद्यत्वात्। अतएवोक्तम्। "श्रौते कर्म्मणि तत्कालं स्नातः शुद्धिमवाप्नुयादिति"। यत्पुनः "दानमग्निमुखहोमः स्वाध्यायश्च निवर्त्तत" इति होमप्रतिषेधः। स काम्याभिप्रायो वैश्वदेवाभिप्रायो वा व्यवस्थापनीयः" इत्यन्तेन। संध्यादो नामश्रपवादमाहापरार्के पुलस्त्यः "संध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत्। न त्यजेत् मृतके वापि त्यजन् गच्छेदधोद्विजः। मृतके मृतके चैव संध्याकर्म्म समाचरेत्। मनसोच्चारयेन्मन्त्रान् प्राणायाममृते द्विजः" यत्तु चन्द्रिकायां जाबालः "सन्ध्यां पञ्च महायज्ञानौत्पत्तिकं मृतिकर्म्म च। तत्सर्व्वं हापयेत्तेषां दशाहान्ते पुनः क्रियेति" यच्च संवर्तः "मृतके कर्म्मणां त्यागः सन्ध्यादीनां विधीयतेः" यच्च विष्णुपुरा०। "सर्व्वकालमुपासा तु सन्ध्ययोः पार्थिवेष्यते। अन्यत्र मृतकाशौचविभ्रमात्तरभीतितः" इति तत् संपूर्णसन्ध्यापरम् "अर्घ्यान्ता मानसी सन्ध्या कुशवारिविवर्जितेति" शुद्धिदीपे च्यवनोक्तेः पैठीनसिस्मृत्यन्तरे मन्त्रोच्चारणमध्याह "मृतके सावित्र्याञ्च लिंप्रक्षिप्य सूर्य्यं ध्यायन्नमस्कुर्य्यात्" प्रयोगपारिजाते भरद्वाजोपि "मृतके मृतके कुर्य्यात् प्राणायाममममन्त्रकम्। तथा मार्जनमन्त्रांस्तु मनसोच्चार्य्य मार्जयेत्। गायत्रीं मध्यगुच्चार्य्य सूर्य्यायार्घ्यं निवेदयेत्। मार्जनं तु न वा कार्य्यमुपस्थानं न चैवहि" एवं मिताक्षरापरिजातादौ अशौचे सन्ध्याकरणभेदश्लोक्तेः गौड़ानां तदनाचरणमनाचार एव तस्य श्रौतत्वेन स्मृत्या बाधानुचितत्वादिति द्रष्टव्यम्। "अरुणादावप्यशौचापवादमाह व्यासः "मार्त्तकर्म्मपरित्यागो राहोरन्यत्र मृतके इति" लैङ्गे "मृतके मृतके चैव न दोषो राहुदर्शने। तावदेव भवेच्छुद्धिर्यावच्छुक्लि न दृश्यते" प्रयोगपारिजाते "हरिस्मृतिः "कन्याविवाहसंक्रान्तौ मृतकं न कदाचन"। महागुरुनिपातवर्षमध्ये कर्म्मविशेषेऽशौचम्। "स्नानं चैव महादानं स्वाध्यायं चाग्नितर्पणम्। प्रथमाब्दे न कुर्व्वीत महागुरुनिपातने" हेमा० स्मृतिः। महागुरवश्च माता पिता भर्त्ता च अतिगुरुशब्देउक्ताः। "प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत्। नापि दैवं न वा पैत्र्यं यावत् पूर्णो न वत्सरः" देशे पु० अग्नितर्पणं सवहोमादि, न त्वाधानं तस्य प्रथमाब्देऽपि विधानात् यथा "पितुः सपिण्डीकरणं वार्षिकं मृतवासरे। आधानाद्युपसंप्राप्तावेतत् प्रागपि वत्सरात्" हेमा० उश०। अग्नितर्पणमित्यत्र अन्यतर्पणमिति शुद्धितत्त्वे पाठः। आधानादीत्यादिपदेन आवश्यकदहनिमित्तनित्यकर्म्मणोर्ग्रहणम्। श्राद्धकौमुद्यां देवी पु० "महातीर्थस्य गमनमुपवासव्रतानि च। संवत्सरे न कुर्व्वीत महागुरुनिपातने" एतदेकवाक्यतया प्रागुक्तवचने स्नानपदं काम्यतीर्थादिस्नानपरम् महादानसाहचर्य्यात् स्वाध्यायपदमपि काम्यवेदपारायणपरम् "तत्रैव काम्यं यत् कर्म्म वत्सरात् प्रथमाहते" लघुहा० वचनैकवाक्यत्वात् "महागुरुनिपाते तु काम्यं किञ्चित् न चाचरेत्। आर्त्विज्यं ब्रह्मचर्य्यं च श्राद्धं दैवयुतञ्च यत्" कालि० पु० "सपिण्डीकरणादूर्द्धं प्रेतः पार्व्वणभुग्भवेत्। दहनोद्भूतदोषस्य स्टहस्य सदा भवेत्" मत्स्य पु०। दहनोत्यनेन दहनिमित्तक सपिण्डनाभावे नाधिकारीत्यर्थः स्टहस्य सदा भवेदित्यनेन स्टहस्योचितनित्यपञ्चयज्ञेष्वधिकारः। अतएव पितृमरणाशौचोत्तरमेव वैश्वदेवश्राद्धं विहितम्। एवं दहनश्राद्धाभावे वर्षपर्य्यन्तं तत्तत्कर्म्मण्यशौचमिति स्थिते "प्रेतकर्म्माण्यनिवर्त्त्य चरेच्चाभ्युदयक्रियाम्। आचतुर्थं ततः पुंसि पञ्चमे शुभदं भवेदिति" ज्योतिषवाक्यं शुभदमित्युक्त्वा शुद्ध्यर्थं चतुर्थाब्दकर्त्तव्यश्राद्धोत्तरं प्राग्वत्सरमात्रपरमेव। एतच्चाशौचं वर्षमध्ये आवश्यकदहनार्थसपिण्डनाभावएव। "अर्वाक् संवत्सरात् दहनो पूर्व्वं संवत्सरेऽपि वा" इत्यादि स्मृत्यनुसारेण आवश्यकदहनिमित्तसपिण्डापकर्षे तु काम्यादिकर्म्मकरणयोग्यता। अत्र विशेषमाह लौगाक्षिः। "अन्येषां प्रेतकर्म्मणि महागुरुनिपातने। कुर्य्यात् संवत्सरादर्वाक् श्राद्धमेकं तु वर्जयेत्" प्रेतकर्म्म दाहाद्येकादशाहान्तं तत्रागौचान्तरस्याप्रतिबन्धकत्वात् "आद्यं श्राद्धमशुद्धोऽपि कुर्य्यादेकादशेऽहनीति निर्ण० सि० धृतस्मृतेः। तेन एकं सपिण्डनं वार्षिकादि च। एवं देवी० पु० वचनेऽपि पैत्र्यपदं पार्व्वणसपिण्डनवार्षिकपरम्। अत्रापवादः माधवीये कण्व० "पत्न्याः पुत्रस्य तत्पुत्रभ्रातुश्चोक्तस्तनयेषु च। स्नुषास्वसुश्च पितृव्यसंघातमरणं यदि। अर्वाग्वत्सरात्तत्रापि पूर्व्वं सपिण्डमाचरेत्" लौगा० "पत्नीपुत्रस्तथा पौत्रो भ्राता तत्पुत्रकोऽपि। पितरौ च यदेकस्मिन् म्रियेरन् वासरे तदा। आद्यमेकादशे कुर्य्यात् त्रिपक्षे तु सपिण्डनम्" इदम् एकदिनमरणविषयमेव "महागुरुनिपाते तु प्रेतकार्य्यं यथाविधि। कुर्य्यात् संवत्-

सरादर्वागेकोद्दिष्टं न पार्वणम्" इति धवलनिबन्धवाक्यात्। "माता चैव तथा भ्राता भार्या पुत्रस्तथा स्नुषा। एषां मृतौ चरेच्छ्राद्धमन्यस्य न पुनः पितुः" इति भृगुवचनं भिन्नदिनमरणेऽपि पितुर्मृतावन्यस्य सपिण्डनं न कार्य्यमेवामेव कार्य्यमित्येतत्परमिति निः सिं। "पितर्य्युपरते पुत्रो मातुः श्राद्धान्निवर्त्तते। मातर्य्यपि च मृतायां पितृश्राद्धात्ते समाम्" माध० मृत० वचनन्तु वार्षिकश्राद्धपरम् मातुः मृते इत्याकर्षः मातरं पितरं च विना अन्यस्य श्राद्धात् वार्षिकश्राद्धात् समां व्याप्य निवर्त्तते इत्यर्थः। "अन्यश्राद्धं परान्नञ्च गन्धमाल्यञ्च मैथुनम्। वर्ज्जयेदृगुरुपाते तु यावत् पूर्णो न वत्सरः" देवलवचने अन्यपदं भृगुवचनोक्तमातृादिभिन्नपरम्। अन्नपदञ्च खिन्नान्नपरं "भिक्षोऽस्त्री भक्तमन्नोऽन्नमित्यमरोक्तेः "खिन्नमन्नमुदाहृतम्" इत्युक्तेश्च न तु परस्वामिकामान्नमात्रपरम् अन्नशब्देन रूढ्या परिभाषया च सिद्धान्नस्यैव झटित्युपस्थापकत्वात् आमान्नस्य लक्ष्यार्थतया विलम्बेनोपस्थितेश्च। एवमेवाचारः "विशेषतः शिवापूजां प्रमीतपितृको नरः। यावत् वत्सरपर्य्यन्तं मनसाऽपि न चिन्तयेत्" कालिकापु० वाक्यं वार्षिकदुर्गापूजाविषयं नित्यपूजायाः कर्त्तव्यतायाः दशाहमध्येऽपि प्रागुक्तेः। "द्वयोरेव मृतायोर्यदेकमशौचकम्। नान्येषामधिकाशौचं स्वजातिविहितात् किल" आङ्गी० धृतजातू० वचनं तु पुरुषविषयम्। स्त्रीणां भर्त्तुर्मृतायुरुतायाः सर्व्वसम्मतत्वेन तन्मरणे अधिकाशौचस्योचितत्वात् अतएव "मृतायुरुविपत्तिषु इत्यादिना सामान्यतो बहुवचनमुपात्तम्। "गयाश्राद्धं मृतानां तु पूर्णे त्वब्दे प्रशस्यते" हेमा० भवि० पु०। तीर्थश्राद्धं गयाश्राद्धम् श्राद्धमन्यच्च षट्कम्। अब्दमध्ये न कुर्वीत मृतायुरुविपत्तिषु त्रिस्व० गरु० पु०। इदं इत्यर्थसपिण्डनाभावे। इदौ सपिण्डनापकर्षे तु वर्षमध्येऽपि दर्शादिकं कार्य्यमेव "पितुः सपिण्डनं कृत्वा कुर्य्यान्मासानुमासिकम्" छन्दोगप० वचनात् "सपिण्डीकरणादूर्द्धं नरः पार्व्वणभुग्भवेत्" मात्स्यात् "ततः प्रभृति वै प्रेतः पितृसामान्यमश्नुते। विन्दते पितृलोकं च ततः श्राद्धं प्रवर्त्तते" इति हारीतवचनाच्चेति शूल पाणिः। "उद्वाहोपनयनं प्रथमेऽब्दे महीपते!। कृते सपिण्डनेऽप्यूर्द्धमस्त्यां चोद्वरणं त्यजेत्। तथापि कर्त्तुमिच्छन्ति त्रीणि चैतानि वै सुताः। मासिकान्यब्दिकानि चापलभ्य चरेत् पुनः" ब्रह्म वै० पु०। अत्रेदं बोध्यं इदौ विना कुलधर्म्मैकपुत्रत्वादिवशतः वर्षमध्ये सपिण्डनापकर्षेऽपि पितृत्वप्राप्तिर्वर्षान्तएव "कृते सपिण्डीकरणे नरः संवत्सरात् परम्। प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते" विष्णु ध० उक्तेः "अर्वाक् संवत्सराद्यस्य सपिण्डीकरणं भवेत्। प्रेतत्वमपि तस्यापि विज्ञेयं वत्सरं नृप!" इत्यग्निपु० उक्तेश्च। तेन एतद्विषये महागुरूणां प्रेतत्वसत्त्वेन विवाहोपनयनादौ दैवपैत्रेषु च नाधिकारः इदौ निमित्ते सपिण्डने संवत्सरमप्राप्यापि प्रेतत्वविश्लिष्टेन सर्व्वत्राधिकारः। "अर्वाक् संवत्सराद्वृद्धौ पूर्णे संवत्सरेऽपिवा। ये सपिण्डीकृताः प्रेता न तेषां च पृथक्क्रिया" भाता० वाक्ये पूर्णवत्सरस्येव इदारभ्य कालस्यापि प्रेतत्वविमोचनहेतुत्वोक्तेः तथात्वम्। यतः सपिण्डीकृता अतो न प्रेताः प्रेतपदप्रतिपाद्या विमुक्त प्रेतभावा इत्यर्थः। तत्र विशेषः। "अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपाक्षिकम्। प्रथमेऽब्देऽपि कुर्वीत यदि स्याद्भक्तिमान् सुतः" मदनपारिजातधृतवचनम्। "भक्तिमान् भक्त्याख्यश्राद्धकारीति मदनपारिजाताद्यः। "भक्तिश्राद्धं तु त्रिस्थलीसेतौ उक्तम् तच्च गयाश्राद्धादिपद्धतौ अस्माभिर्दर्शितं ततएवावगन्तव्यम्। एवं कृताशौचमपि कर्म्म विशेषानर्हत्वन्नयोजकम्। विवरणं कृताशौचशब्दे" वक्ष्येऽशौचं वक्ष्यमाणशब्दे वक्ष्यते। रजस्वलाशौचन्तु अशुद्धिशब्दे उक्तप्रायम्। "अपाटशाद्यशौचाद्यैर्यदि विघ्नं प्रजायते। तदशौचे व्यतीते तु तेषां श्राद्धं विधीयते" तिथि० त० स्मृतिः।

अशौचसङ्कर अशौचयोः सङ्करः। जननमरणाशौचयोर्मध्ये पुनर्जननामरणाशौचयोः पातेन जनिते अशौचविशेषे। तत्कालभेदो यथा जनना शौचमध्ये जननाशौचान्तरपाते पूर्व्वाशौचकालेन शुद्धिः। पूर्णाशौचान्त्यदिने पूर्णाशौचान्तरपाते अन्तिमदिनोत्तरदिनद्वयेन शुद्धिः। अन्तिमदिनोत्तरप्रभाते सूर्य्योदयात् पूर्व्वं तत्प्राते सूर्य्योदयावधिदिनत्रयेण शुद्धिः। एवं मरणाशौचेऽपि। वर्द्धितदिनद्वयत्रयाभ्यन्तरे अशौचान्तरपाते पूर्व्वेणैव शुद्धिः। अशौचवित्तयान्नलक्ष्यमेकदैव। तद्द्वितीयदिनलक्ष्यं तत्परदिने। अत्र दशमदिनतत्प्रभातयोः पितृमातृभर्त्तृमरणे तु न दिनद्वयत्रयाच्छुद्धिः किन्तु स्वावधेरेव सम्पूर्णाशौचमिति। भ्रातृजनमाशौचमध्ये स्वपुत्रजनने पूर्व्वार्द्धे पूर्व्वेण, परार्द्धे परेण शुद्धिः। एवं भ्रातृमरणमध्ये पितृमातृभर्तृमरणे पूर्व्वार्द्धे पूर्व्वाशौचकालेन, परार्द्धे पित्राद्याशौचकालेन शुद्धिः। स्वपुत्रजननाशौचान्तिमदिनतत्प्रभातयोर्भ्रातृ-

जनने, पितृमातृभर्तृमरणाशौचान्निमदिनतत् प्रभातयोर्न्नाति-मरणेऽपि न दिनद्वयत्रयवृद्धिः। स्वपुत्रयोस्तु तथा जनने मातापित्रोस्तु तथा मरणे न हिनद्वयत्रयवृद्धिः। जननाशौचयोस्तु सन्निपाते पूर्व्वार्द्धे जातोयदाऽशौचाभ्यन्तरे मृतस्तदा सपिण्डानां सद्यः शौचेन पूर्व्वाशौचस्य नाशः। तद्वादेव परार्द्धजातमातापितृव्यतिरिक्तानां परजननाशौचस्य निवृत्तिः। परजातमरणे तु न तथा तस्य पूर्वजननावधित्वाभित्वादिति गुरुचरणाः। एवं द्वितीयजातस्य पित्रोस्तु पूर्व्वार्द्धे जातमरणे पूर्व्वाशौचकालावधि अङ्गास्पृश्यत्वयुक्तमशौचं, परार्द्धजातमरणे तु स्वावधिजननाशौचमङ्गास्पृश्यत्वयुक्तमिति। औत्सर्गिकसमसंख्यदिवसीयजननमरणाशौचयोः सन्निपाते मरणाशौचकालेन शुद्धिः। तदन्यकालयोस्तु दीर्घकालाशौचकालेन शुद्धिः। ततश्च पुत्रवत्यां विंशतिरात्राशौचान्त्यदिने पत्युर्मरणे बृहत्कालेन जननाशौचकालेन शुद्धिः तथा सपिण्डद्वयजननजातद्वादशाहान्त्यदिने पितृमातृभर्तृमरणेऽपि बृहत्कालीनाशौचकालेन शुद्धिः। प्रथमदिने सपिण्डमरणद्वये यावदशौचं सर्वगोत्रास्पृश्यत्वयुक्तम् एवं प्रथमाहे सकृल्लद्वयरणेऽङ्गास्पृश्यत्वयुक्तं त्रिरात्रम्। तेनैतत् त्रिरात्रं गुरु विदेशमरणादौ त्रिरात्रं तु लघु स्नानेनैवाङ्गास्पृश्यत्वनिवृत्तेः। ततश्चोभयोः सन्निपाते गुरुणैव शुद्धिः। एवं विदेशस्थमृतज्ञातित्रिरात्राद्विदेशस्थमृतपितृमातृभर्तृत्रिरात्रं गुरु। संपूर्णाशौचे तु अयुक्तानामपि यावदशौचमाचारलक्षणाशित्वदर्शनात्। अत्रापि तावत्कालं तथासिद्धत्वात्तत्रापि गुरुणैव शुद्धिः। तत्रत्रिरात्रयोस्तु सन्निपाते पूर्व्वेणैव शुद्धिः। तथा कन्यापुत्रत्रयमजोत्पत्तौ मातुर्मासेन शुद्धिः। तयोरशौचमध्ये मातुः कन्यामरणे सद्यः शुद्धिर्न पुत्रमरणात्, अन्येषान्तु प्रथमजातमरणात् शुद्धिः। न परजातमरणात् एवमन्यद्बाह्यं सुधीभिः" शुद्धितत्त्वम्।

अशौचान्त पु० अशौचस्यान्तोयत्र। स्वजात्युक्ताशौचावसानाधारे दशमादौ दिने "अशौचान्ताद् द्वितीयेऽह्नि यस्यां दद्याद्धिलक्षणाम्"। "अशौचान्ताद्द्वितीयेऽह्नि यस्य नोत्क्षुज्यते ज्वरः" इत्यादि च स्मृतिः। [२तच्छून्ये त्रि०।

अशौर्य्य न० अभावे न० त०। १शौर्य्याभावे अपराक्रमे न० ब०।

अश्न त्रि० अश्नुते व्याप्नोति अश्नाति वा अश-नन्। १व्यापनशीले २भोजनशीले च "स्तृगोनाञ्चो अति यज्जुगुर्य्यात्" ऋ० १।१७३।२ "अश्नोव्यापकः अशनशीलश्च" भा० "कर्म्मणि नन्। ३व्याप्ते "तस्य भ्राता मध्यमो अस्त्यश्नः" ऋ० १।१६४।१। "अश्नः व्याप्नः भा० ४असुरभेदे पु० सुष्वाणासुषः स्तुर्य्येण स्तवानश्नस्य" ऋ० २।२०।५। "अश्नुते स्वतेजसा सर्वं जगदित्यश्नः कश्चिदसुरः भा०। "अध्वर्य्वोश्वः स्वश्नं जघान" ऋ० २।१४।५।५। करणे नन्। सोमकरणप्रस्तरे। "ऋभिर्धृतः सुतोश्नैरश्वो वारैः" ऋ० ८।२।२। अश्नैः अश्नभिः करणभूतैः सुतोऽध्वर्युभिरभिषुतः" भा०। अश्नुतेऽध्वरम्। ईमेघे निरु०।

अश्नीतपिबता स्त्री अश्नीत पिबत इत्युच्यते यस्यां निदेशक्रियायाम् मयू० स०। भोजनादिनिदेशक्रियायाम् "अश्नीतपिबतीयन्ती प्रहृता करकर्म्मणि" भट्टिः।

अश्मक पु० अश्मेव स्थिरः निश्चलत्वात् स्वार्थे कन्। १ऋषिभेदे "वेदस्थानेन वात्स्येन तथाश्मकसुमन्तुना" भा० शा० प०। २दक्षिणदेशस्थे देशभेदे। "गन्तव्योमलयः श्रीमान् पर्व्वतो धातुमण्डितः" इत्युपक्रम्य "तथाश्मका पुलिन्दाश्च कलिङ्गाश्च विशेषतः" रा० कि० का०। बृहत्संहितायान्तु स देशः पश्चिमोत्तरस्यां दिशि। "दिशि पश्चिमोत्तरस्यां माण्डव्यतुषारताल्वहनमद्राः। अश्मककुलूतनवृडस्त्रीराज्यसिन्धवनखण्डाः" इति कूर्म्मविभागे उक्तम्" अतउभतत्रापि तद्भाजको देशः। तस्य जनपदवाचित्वात् तद्देशवासिषु तद्राजनि च ततः कृताणो बहुषु लुक्। २तद्देशवासिनि ४तद्राजनि च ब० व०। "साल्वावयवप्रत्यन्यवकनकूलाश्मकादिञ्" पा० सू० साल्वजनपदावयवत्वेनोक्तेः ५साल्वदेशावयवे च साल्वदेशश्च बृह० सं० कूर्म्मविभागे नवसु खण्डेषु मध्यखण्डे उक्तः "भारतवर्षे मध्यात् प्रागादि विभाजिता देशाः भद्रारिमेदमाण्डव्यसाखनीपोल्विवृद्धसंख्याताः" इत्युपक्रम्य "गजाङ्गवदेति मध्यमिदम्" इति नवखण्डे कूर्म्मभागे मध्यखण्डे तस्य स्थितिरुक्ता अतः साल्वावयवनामकोऽश्मकः तदीयदक्षिणप्रदेशस्थः इति गम्यते तेन रामायणवाक्यं तद्विषयकमिति न विरोधः। अश्मके साल्वावयवे भवः वृञ् आश्मकिः। तद्देशभवे त्रि० तद्राजनि च बहुषु लुक् आश्मकाः साल्वावयवावश्मकवासिषु तद्राजसु च ब० व०। स्त्रियां न लुक् आश्मकयः। साल्वशब्देऽस्य विवृतिः।

अश्मकदली स्त्री अश्नुते अश-मनिन् कर्म्म०। काष्ठकदल्याम्।

अश्मकुट्ट पु० अश्मनि प्रस्तरएव धान्यादिकं कुट्टयति कुट्ट-अच्-उप० स०। वानप्रस्थभेदे, तस्योदूखलादिशून्यत्वेन तण्डुलादेर्विशीकरणस्य तत्रैव विधानात्तथात्वम्। "अश्मकुट्टोभवेद्वापि दन्तोलूखलिकोऽपि वा" मनुः। स्वुञ्।

अश्मकुट्टकोऽस्त्रि। "दन्तोलूखलिकः कालपक्वाशी वाश्मकुट्टकः" या० स्मृतिः।

अश्मकेतु स्त्री अश्मैव केतुरस्य। क्षुद्रपाषाणभेदवृक्षे।

अश्मगन्धा अश्मन इव गन्धो यस्याः। पृश्निपर्णीलक्षणावामास्वौ लतायाम्। "विशाखयोरश्मगन्धापृश्निपर्ण्यौ ध्यखण्डाव" कात्या० २०,७,१७, "अश्मगन्धा आसन्धिः पृश्निपर्णीलक्षणेति" कर्क०। "न शरं नाश्मगन्धां नाध्यखां न पृश्निपर्णीं नाश्वत्थस्थान्तिके कुर्यात्" शत०ब्रा०। [मरकतमणौ। राजनि०।

अश्मगर्भ पु० अश्मैव कृतो गर्भोऽस्य। "पद्मा इति" ख्याते

अश्मगर्भज पु० अश्मगर्भाज्जायते जन-ड ५त०। मरकतमणौ अश्मयोनिरत्नत्व" राजनि० २प्रस्तरजे वङ्गे पु०।

अश्मगुड पु० अश्मनिर्म्मितो गुडः गोलाकारः पदार्थः। प्रस्तरनिर्म्मिते (गुली) प्रसिद्धे युद्धसाधने अस्त्रभेदे स्त्रीत्वमपि "स्थूलान् भुशुण्ड्यश्मगुड़ाः स्थूलाः कार्ष्णायसीस्तथा" भा०द्रो०प०। भुशुण्डीनिर्मुक्ता अश्मगुड़ास्तदर्थः।

अश्मघ्न पु० अश्मानं हन्ति हन-ड। पाषाणभेदवृक्षे।

अश्मज न० अश्मनो जायते जन-ड ५त०। प्रस्तरजाते शिलाजतुनि,। अश्मैव जायते जन-ड। २लौहे च।

अश्मजतु न० अश्मनो जायते जन-तुन् डिच्च। शिलाजतुनि स्वार्थे कन् अश्मजतुकं तत्रैव।

अश्मजाति स्त्री अश्मनो जातिः सामान्यमस्य। "पद्मा" ख्याते मरकतमणौ। अश्मन इव जातिरस्य। रत्नमात्रे अमरः रत्नानि च। "वज्रं गारुत्मतं पुष्परागो माणिक्यमेव च। इन्द्रनीलश्च गोमेदस्तथा वैदूर्यमेव च। मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव" भाव०प्र०। "शुक्ताफलं हीरकं च वैदूर्यं पद्मरागकम्। पुष्परागं च गोमेदं नीलं गारुत्मतं तथा। प्रवालयुक्तान्येतानि महारत्नानि वै नव" विष्णुध०। अत्र पुष्परागादीनां क्लीवतोऽपि। अत्र चैषां महारत्नतैतोक्तेः तद्भिन्नानामपि रत्नत्वमस्त्येव यथोक्तं गारुड़े "तेषु रत्नोविषव्याधिव्यालघ्नान्यघहानि च। प्रादुर्भवन्ति रत्नानि तथैव विगुणानि च। वज्रं शुक्ता मणयः पद्मरागाः समरकताश्च मौक्ताः। अपि चेन्द्रनीलमणयो वैदूर्याः पुष्परागाश्च। कर्केतनकुरुविन्दौ रुधिराजसमन्वितं स्फटिकम्। विद्रुममणिश्च"।

अश्मदारण पु० अश्मानं दारयति दृ-णिच्-ल्यु। पाषाणभेदके वृक्षनामख्याते।

अश्मदिद्यु त्रि० अतिशयेन द्योतते यङ्लुक् वा० ड विद्यु आयुधम् अश्म व्यापकं अश्ममयं वा दिद्यु यस्य। अश्ममयायुधयुक्ते। "विद्युन्महसो नरो अश्मदिद्यवः" ५,५४।२। अश्मदिद्युरो व्याघ्रायुधाः अश्ममयायुधा वा" भा०।

अश्मन् पु० अश्नुते व्याप्नोति, संहन्यनेन वा कर्त्तरि करणे वा मनिन्। पाषाणे। "अथ यदस्य संचरित मासीत् सोऽश्म पृश्निरभवत्" शत०ब्रा०। "इयत्तकः कुशुम्भकस्तकं भिनद्म्यश्मना" ऋ० १।१९१।५। "अशिगकिभ्यां ऊन्दसि" इत्युणेः वेदेऽस्य भूरिप्रयोगः क्वचित् लोकेऽपि "भारावच्चेषवीयाश्मनिव्येषपतितानलम्" रघुः। दन्तोलूखलिकः कालपक्वाशी वाश्मकुट्टकः" या० "अश्मानं इदं मन्ये मन्ये काष्ठमदूखलम्। अन्धायाश्च सुतं मन्ये यस्य माता न पश्यति" जिनेन्द्रः। २मेघे निरु० तस्मान्मरव्यापकात्वात्तथात्वम् ३भूमिव्यापके पर्व्वते पु०। "अश्मानं चिद्ये विभिदुः" ऋ० ४,१६,६। "अश्मानं पर्व्वतं मेघं वा" भा०। "अश्मानं चिच्छवसा दिद्युतः ऋ० ५।२०।४। "अश्मानं पर्व्वतम्" भा०। ४व्यापके त्रि० अश्मदिद्युशब्दे उदा०। त०स० उत्तरपदस्थः संज्ञायां जातौ च टच् समासान्तं लभते। संज्ञायाम् शिखाश्मः जातौ अश्मताश्मः। नित्यसमा०। अश्मना तुल्यः आश्मनः। कश्यादि० चतुरर्थ्यां क। अश्मकः। अश्मादि० चतुरर्थ्यां रः अश्मरः। उत्करा० चतुरर्थ्यां छ। अश्मीयः। तदर्हतीत्यर्थे अश्म। दि० ठण्। आश्मिकः। तत्र कुशल इत्यर्थे आर्कषादि० कन्। अश्मकः। अपत्येगुरुषा० ढक्। आश्मेयः। अश्वा० गोत्रापत्ये फञ्। आश्मायनः। अश्मनोविकारः अण् टिलोपः आश्मः मयट् च अश्ममयः स्त्रियां ङीप्। अवयवार्थे तु न टिलोपः आश्मन इत्येव।

अश्मन्त न० अश्मनोऽन्तोऽत्र शक०परूपम्। १अशुभे क्षेत्रे, २युद्धाङ्गे च। अश्मनामन्तः। अश्मनोऽस्त्रि।

अश्मन्तक पु०न० अश्मानमन्तयति अन्त-णिच् ण्वुल् शक०। १क्षुद्राम् २दीपाधारे ३क्षादने, (आउड़)ख्याते वृक्षविशेषे च। "सुक्षालाभे तु कर्त्तव्याः कुशाश्मान्तकवल्वजैः" मनुः। ४अश्लोटवृक्षे, ५अश्वत्थे ६कोविदारवृक्षे च पु०।

अश्मन्मय त्रि० अश्मनोविकारः मयट् वेदे न लोपः। पाषाणमये स्त्रियां ङीप्। "शतमश्मन्मयीनां पुरामिन्द्रो व्यास्यत्" ऋ० ४।३०।२०। "लोके तु अश्ममयः। "अश्मन्मयमयश्चैव" इति मनुः। [गन्धद्रव्ये।

अश्मपुष्प न० अश्मनः पुष्पमिव। शिलाजतुनि, गोदन्ते

अश्मभाल न० अश्मेव भाजयति चूर्णितं करोति। भज-णिच् अण् पृषो० जस्य लत्वम्। द्रव्यचूर्णकारके (हामानदिस्ते) इति ख्याते लौहपात्रभेदे शब्दचन्द्रिका।

अश्मभिद् पु० अश्मानमद्भिद्य जायते। पाषाणभेदके वृक्षे। क, अश्मभिदः। अण् अश्मभेदः। ख्युन् । अश्मभेदकोऽप्यत्र पु०।

अश्मयोनि पु० अश्मा योनिरस्य। मरकतमणौ।

अश्मर त्रि० अश्म-चतुरर्थ्यां र। प्रस्तरसंबन्धिनि।

अश्मरथ पु० अश्मेव दुर्भेदो रथोऽस्य। ऋषिभेदे गर्गा० यञ्। आश्मरथ्यः। "अभिव्यक्तेरित्याश्मरथ्यः" या० स्मृ०

अश्मरी स्त्री अश्मानं राति रा-क गौरा० ङीष्। मूत्रकृच्छ्ररोगे स हि मूत्रद्वारा प्रस्तरमिव कठिनमांसं रेचयति इति तस्य तथात्वम्। तन्निदानादि सुश्रुते उक्तं यथा। "अथातोऽश्मरीणां निदानं व्याख्यास्यामः॥ चतस्रोऽश्मर्यो भवन्ति श्लेष्माधिष्ठानास्तद्यथा श्लेष्मणा वातेन पित्तेन शुक्रेण चेति॥ तत्रासंशोधनशीलस्यापथ्यकारिणः प्रकुपितः श्लेष्मा मूत्रसम्पृक्तोऽनुप्रविश्य वस्तिम्, अश्मरीं जनयति तासां पूर्वरूपाणि वस्तिपीड़ारोचकौ मूत्रकृच्छ्रं वस्तिशिरोमुष्कशेफसां वेदना कृच्छ्रा ज्वरावसादौ वस्तिगन्धित्वं मूत्रस्येति॥ यथास्वं वेदनावर्णं दुष्टं सान्द्रमविलम्। पूर्वरूपेऽश्मनः कृच्छ्रान्मूत्रं सृजति मानवः॥ अथ जातासु नाभिवस्तिसेवनीमेढ्रनेष्वन्यतमे मेढ्रतोवेदना मूत्रधारासङ्गः सरुधिरमूत्रता मूत्रविकिरणञ्च गोमेदं प्रकाशमनाविलं सस्निग्धं विसृजति धावनलङ्घनप्लवनपृष्ठयानाध्वगमनैश्चास्य वेदना भवति॥ तत्र श्लेष्माश्मरी श्लेष्मलमद्यमभ्यवहरतोऽत्यर्थसुपलिप्याधः परिदहिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतिघाताद्व्यथते भिद्यते निस्तुद्यत इव वस्तिर्गुरुः शीतश्च भवति। अश्मरी चात्र श्वेता स्निग्धा महती कुक्कुटाण्डप्रतीकाशा मधूकपुष्पवर्णा वा भवति तां श्लैष्मिकीमिति विद्यात्॥ पित्तयुक्तस्तु श्लेष्मा सङ्घातमुपगम्य यथोक्तां परिदहिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतिघातादुष्यते क्वथ्यते दह्यते पच्यत इव वस्तिरुष्णवातश्च भवति। अश्मरी चात्र सरक्ता पीतावभासा कृष्णा भल्लातकास्थिप्रतिमा मधुवर्णा वा भवति तां पैत्तिकीमिति विद्यात्॥ वातयुक्तस्तु श्लेष्मा सङ्घातमुपगम्य यथोक्तां परिदहिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतिघातात्तीव्रा वेदना भवति तथात्यर्थं पीड्यमानो दन्तान् खादति नाभिं पीड़यति मेढ्रं मृद्नाति पायुं स्तृणति विशर्दते विदहति वातमूत्रपुरीषाणि कृच्छ्रेण वास्य मेढ्रतो निःसरन्ति। अश्मरी चात्र श्यामा परुषा विषमा खरा कदम्बपुष्पवत्कण्टकाचिता भवति तां वातिकीमिति विद्यात्। प्रायेणैतास्तिस्रो ऽश्मर्यो दिवास्वप्नसमशनाध्यशनशीतस्निग्धगुरुमधुराहारप्रियत्वाद्विशेषेण बालानां भवन्ति। तेषामेवाल्पवस्तिकायत्वादनुपचितमांसत्वाच्च वस्तेः सुखग्रहणा हरणा भवन्ति॥ महतान्तु शुक्राश्मरी शुक्रनिमित्ता भवति। मैथुनाभिघातादतिमैथुनाद्वा शुक्रस्खलितमनिर्गच्छद्बहिर्मार्गगमनादनिलोऽभितः संदूष्य मेढ्रदूषणयोरन्तरे संहरति संघात्योपशोषयति सा मूत्रमार्गमाद्दणोति मूत्रकृच्छ्रं वस्तिवेदनां दूषणयोश्च स्वयथुमापादयति पीड़ितमात्रे च तस्मिन्नेव प्रदेशे प्रविलयमापद्यते तां शुक्राश्मरीमिति विद्यात्॥ भवन्ति चात्र॥ शर्करा सिकता मेहो भस्माख्योऽश्मरिवैकृतम्॥ अश्मर्याः शर्करा ज्ञेया तुल्यव्यञ्जनवेदना॥ पवनेऽनुगुणे सा तु निरेत्यल्पा विशेषतः। सा भिन्नमूत्रिवर्चांसि शर्करेत्यभिधीयते॥ श्लीपदासक्थिसदनं कुक्षिशूलः सवेपथुः। श्लेष्मोर्ध्वगोऽनिलः कार्श्यं दौर्बल्यं पाण्डुगात्रता॥ अरोचकाविपाकौ तु शर्करासु भवन्ति च। मूत्रमार्गप्रदुष्टत्वा सा सक्ता कुर्यादुपद्रवान्॥ दौर्बल्यं सदनं कार्श्यं कुक्षिशूलमरोचकम्। पाण्डुत्वमुष्णवातश्च श्लेष्मा श्लीपदनं वस्तिम्॥ नाभिपृष्ठकटीमुष्कगुदवङ्क्षणशेफसाम्। एकद्वारस्तनुत्वक्को मध्ये वस्तिरधोमुखः॥ अलाबा इव रूपेण सिरास्नायुपरिग्रहः। वस्तिर्बस्तिशिरश्चैव पौरुषं वृषणौ गुदम्॥ एकसम्बन्धिनो ह्येते गुदास्थिविवरस्थिताः। मूत्राशयो मलाधारः प्राणायतनसुत्तमम्॥ पक्वाशयगतास्तत्र नाड्यो मूत्रवहास्तु याः॥ तर्पयन्ति सदा मूत्रं सरितः सागरं यथा॥ सूक्ष्मत्वान्नोपलभ्यन्ते सुखान्यासां सहस्रशः। नाडीभिरुपनीतस्य मूत्रस्यामाशयान्तरात्॥ जायतः स्वपतश्चैव स निःष्यन्देन पूर्यते। आसुखात्सलिले न्यस्तः पार्श्वेभ्यः पूर्यते नवः॥ घटो यथा तथा विद्धि वस्तिर्मूत्रेण पूर्यते। एवमेव प्रवेशेन वातः पित्तं कफोऽपि वा॥ मूत्रयुक्त उपस्नेहात् प्रविश्य कुरुतेऽश्मरीम्। अभ्रु स्वच्छास्वपि यथा निष्पक्वासु नवे घटे॥ कालान्तरेण पङ्कः स्यादश्मरीसम्भवस्तथा। संहन्त्यपो यथा दिव्या मारुतोऽग्निश्च वैद्युतः॥ तद्वद्बलासं वस्तिस्थमुष्मा संहन्ति सानिलः। मारुते प्रगुणे वस्तौ मूत्रं सम्यक् प्रवर्त्तते॥ विकारा विविधास्त्वापि प्रतिलोमे भवन्ति हि॥ मूत्राघाताः प्रमेहाश्च शुक्रदोषास्तथैव च। मूत्रदोषाश्च ये केचिद्दृश्यन्ते भवन्ति हि" सुश्रु० "अश्मरीं अप-

यत्राशु सिकताशर्करान्विताम्" सुश्रु०। अयञ्च महापायजत्वान्महारोगः। "उन्मादस्वग्दोषौ राजयक्ष्मा श्वासोमधुमेहौ भगन्दरः। उदरोऽश्मरीत्यष्टौ महारोगाः" शु०त० नार०।

अश्मरीघ्न पु० अश्मरीं मूत्रकृच्छ्रं हन्ति हन-टक्। वरुणवृक्षे

अश्मरीहर पु० अश्मरीं हरति हृ-अच्। (देधान) देवधान्ये।

अश्मवत् त्रि० अश्माऽस्त्यत्र मतुप्। पाषाणभूयिष्ठे देशे स्त्रियां ङीप्। तथाविधभूमेर्गुणाद्य। "तत्राश्मवती स्थिरा गुर्व्वी श्यामा कृष्णा वा स्थूलदृढशस्यप्राया गुणभूयिष्ठा। स्निग्धा शीतलासन्नोदका स्निग्धशस्यदृढकोमलदृढप्राया शुक्लाम्बुगुणभूयिष्ठा नानावर्णा लघ्वश्मवती प्रविरलाल्प पाण्डुदृढप्ररोहाऽग्निगुणभूयिष्ठा इति" सुश्रुतः।

अश्मसार पु०न० अश्मनः सार इव। लौहे। "फल्गुदक्षिणदर्भाश्मसारचूर्णकवारिणा" सुश्रु०। "प्राणाः स्त्वत्मश्मसारकठिना गच्छन्ति गच्छन्त्वमी" सा०द०। ६त०। तत्तुल्यकठिने त्रि०।

अश्महन्मन् न० हन्यतेऽनेन हन-मनिन् हन्म आयुधम् अश्मनिर्म्मितं हन्म। लौहनिर्म्मिते आयुधे "अग्नितप्तेभिर्युवमश्महन्मभिः" ऋ० ७,१०३,५।

अश्मादि पु० ६त०। चतुरर्थ्यां पाणिन्युक्तप्रत्ययनिमित्ते शब्दगणे स च गणः अश्मन्, यूष, जघ, मोन, नद, दर्भ, इन्द, गुद, खण्ड, नग, शिखा, कोट, पाम, कन्द, कान्द, कुल, गड्ड, गुड़, कुण्डल, पीन, गुह्य।

अश्मार्म न० अश्मकारकमर्म्म। (पाथुरे) अश्मरीरोगे।

अश्मीर पु०न० अश्माऽस्त्यस्य ईरन्। (पाथुरे) अश्मरीरोगे।

अश्मीत्थ न० अश्मनः उत्तिष्ठति उद्+स्था-क ५त०। शिलाजतुनि राजनि०।

अश्र न० अश्नुते नेत्रम् अश-रक्। नेत्रजले "सखीभिरश्रोत्तरमीक्षिताभिमाम्" कुमा० "नेत्राध्यासश्रुतस्रजन्" रामा०। सुखा० अस्त्यर्थे इनि न मतुप्। अश्री अश्रुयुक्ते त्रि० स्त्रियां ङीप्।

अश्रद्धा स्त्री अभावे न०त०। १श्रद्धाभावे विरोधे न०त०। अश्रद्धाविरोधिनि २चित्तवृत्तिभेदे। "कामः संकल्पोविचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव" श्रुतिः "अश्रद्धया च यद्दत्तं तत्तामसमुदाहृतम्" गीता। न०ब०। २श्रद्धाशून्ये त्रि०। [शून्ये त्रि०।

अश्रद्धेय त्रि० न०त०। अश्रद्धानर्हे अविश्वसनीये।

अश्रम पु० अभावे न०त०। १श्रमाभावे अनायासे न०ब०।

अश्रवण न० अभावे न०त०। १श्रवणाभावे न०ब०। २श्रवणशून्ये त्रि० श्रोत्रेन्द्रियशून्ये बधिरे त्रि० ३सर्पे पु०।

अश्राद्धभोजिन् त्रि० श्राद्धं न भुङ्क्ते भुज-णिनि असमर्थस०। सति भोजने श्राद्धमेव यो भुङ्क्ते तच्छिन्। "अश्राद्धभोजीत्यत्र सति भोजनेऽश्राद्धमेव भुङ्क्ते न श्राद्धमिति नियमः तथात्वे व्रतलोपः स्यात्" दुर्गसिंहः प्रा०त०।

अश्रान्त त्रि० श्रम-कर्त्तरि न०त०। श्रान्तभिन्ने १श्रमशून्ये २अविरते ३क्रियाविशेषशून्ये न०। "अश्रान्तस्तुतिपाठपूतरसनाविभूतभूरिस्रवेति नैष०। भावे क्त न०त०। ४अविश्रामे न०।

अश्रि(श्री) स्त्री अश्नुते संहन्यतेऽनया अश-क्विप् ना० क्रि। १मुद्गरे कोषे। आश्रीयते संघातार्थम् आ+श्री-"आङि श्रीहनिभ्यां हुस्वश्च" उपा० इन् स च डित्। २खड्गादेरग्रभागे उभयत्र वा ङीप्। "इलस्य हन्तुः कुलिशं कुण्ठितास्त्रीवलक्ष्यते" कुमा० वाजपेययूपं प्रशस्य। "स वा अष्टाश्रिर्भवति तस्मादष्टाश्रिर्भवति" शत०ब्रा०। चतुःपूर्व्वादस्मात् कच्समा० चतुरस्रः। "कृपोपचारात् चतुरस्रवेदोम्" कुमा० योगविभागात् अन्यस्मादप्यच्। तेन त्रास्रं षड्भमित्यादि "आयताचतुरस्राय त्रास्रा मण्डलिनस्तथा" यज्ञलक्षणे सुश्रुतः "इष्टान्तस्त्रास्रपूर्व्वाणां नानाश्राणां पृथक् पृथक्" लीला०। समासान्तविधेरनित्यत्वात् कचिन्नाच्। "त्रिरश्रिं हन्ति चतुरश्रिरुग्रः ऋ०१,२५२,२। [कप्। शोभाशून्ये।

अश्री(क) नास्ति श्रीर्यस्य नदीत्वाभावात् न ह्रस्वः तेन वा

अश्रीर त्रि० न श्रीः अश्रीः अस्त्यर्थ०र। १कुत्सितश्रीके "अश्रीर इव जामाता" ऋ० ८,२,२०। "अश्रीरः गुणैर्हीनः कुत्सितः" भा०। २अमङ्गले च। "क्वं चिदश्रीरम्" ऋ० ६,२८,६। "अश्रीरमङ्गलम्" भा०।

अश्रु न० अश्नुते व्याप्नोति नेत्रमदर्शनाय अश-क्रुन्। नेत्रजले "ययात भूमौ सह धैनिकाश्रुभिः" दूषयामास कैकेयी श्रोकोष्णैः पार्थिवाश्रुभिः" "तमश्रु नेत्रावरणं प्रमृज्य" इति च रघुः। "श्लेष्मास्तु दूषिका स्वेदः" मनुः।

अश्रुत त्रि० न०त०। १श्रुतभिन्ने श्रवणाविषयीभूते "येनाश्रुतं श्रुतं भवति येनामतं मतं भवति" छ०उ० श्रूयते श्रुतं शास्त्रं तज्ज्ञानं न०ब०। २शास्त्रज्ञानशून्ये मूर्खे "भाग्यं विद्याधनात्तस्मात् स लभेताश्रुतोऽपि सन्" दा०भा० स्मृतिः।

अश्रुति स्त्री अभावे न०त०। १श्रवणाभावे न०ब०। २श्रवणशून्ये त्रि० "अश्रुतिमेव तदर्थं गमयति" शत०ब्रा०।

अश्रुपात पु० ६त०। नेत्रजलपाते क्रन्दने। "न चाश्रुपातः

पिण्डो वा कार्यं श्राद्धादिकं शु०त० क्वचित्" ब्रह्मपुरा०।

अश्रुमुख त्रि० अश्रुपूर्णं मुखं यस्य । नेत्रजलप्लुतमुखे स्त्रियां ङीप् । "पतिघ्नानाश्रुमुखी क्षुधकर्षी च क्रोधन" अथ०११,११,७। [स्त्रियां ङीप् नेत्रजलयुक्ते ।

अश्रुग्राहिन् त्रि० अश्रुणा ग्रहते ग्रह–णिनि २त० ।

अश्रेयस् त्रि० न श्रेयान् । हीनतरे । "अश्रेयान् श्रेयसीं जातिं गच्छत्या सप्तमाद्युगात्" मनुः । स्त्रियां ङीप् ।

अश्रौत त्रि० श्रुतौ विहितः विरोधे न०त० । श्रुतिविहितविरुद्धे निषिद्धे नास्तिकाचारादौ । २वेदविहितभिन्ने स्मृतिमात्रविहिते च ।

अश्राद्धा स्त्री श्रद्धाभावे न०त० । विकल्पनाभावे १आत्मगर्भाभावे न०ब० । विकल्पनशून्ये गर्भशून्ये २विनीते त्रि० । [च ।

अश्लिष्ट त्रि० न०त० । १असङ्गते २असम्बन्धे ३श्लेषशून्ये काव्ये

अश्लीक त्रि० नास्ति श्रीर्यस्य कप् रस्य लः । श्रीप्रतिकूले श्रीनाशके । "अश्लीकमेतत् साधूनां यत्र जुह्वत्यमी हविः" मनुः ।

अश्लील न० श्रियं लाति ला–क रस्य लः, श्री+सिध्मादित्वात् ल वा न०त० । १लज्जादिसम्पादके वाक्ये २व्यम्यभाषायाम् । "भास्करालोकनाश्लील परिवादांश्च वर्जयेत्" या०स्मृ० ३काव्यदोषभेदे न० तच्च त्रिविधं यथा "दुःश्रवं त्रिविधाश्लीलानुचितार्थाप्रयुक्तता" सा०द० अश्लीलत्वं व्रीड़ाजुगुप्साग्रम्यत्वव्यञ्जकत्वाच्त्रिधा यथा "इन्द्रारिविजये राजन् ! साधनं सुमहत्तव" "प्रससार शनैर्वायुः" । "विनाशे तन्वि ! ते सदा" । "अत्र साधनवायुविनाशशब्दा अश्लीलवाचकाः" सा०द०। तत्र साधनशब्दस्य शिश्नस्यापि वाचकतया व्रीडायाः, वायुशब्दस्यापानवायुवाचकतया जुगुप्सायाः, विनाशशब्दस्य भरणवाचकतयाऽमङ्गलस्य च द्योतकता । यथाक्रमं च प्रकृते हेतुपवनविरहबोधकतायै प्रयुक्ता अपि ते अश्लीलव्यञ्जकत्वाद्दुष्टाः । ४निन्द्याव्यञ्जके वाक्ये च "यमनुत्यश्लीला वा वदन्तीति" ता०ब्रा०"अश्लीला निन्द्यरूपा वाक्" भा० न श्रियं लाति ला–क । ५अश्रीके त्रि० । "यैर्वैनमसावश्लीलं वाग् वदति" ता०ब्रा० "अश्लीलमश्रीकरम्"भा०।

अश्लेषा स्त्री न श्लिष्यति यत्रोत्पन्नेन शिशुना श्लिष–घञ् न० त०। सप्तविंशतिधा विभक्तराशिचक्रस्य नवमे नक्षत्रे तत्रजात जातस्य शिशोःपित्रादिभिरायुष्यासं दर्शनाभावस्याश्लेषाशान्तियज्ञे वक्ष्यमाणस्य सूचकतया तस्या अश्लेषात्वम्। तत्स्वरूपादि निरूपणाय सर्वतारायां स्वरूपं, संख्याविशेषः, योगतारायै प्रसङ्गादभिधीयन्ते यथाह श्रीपतिः । "१तुरगमुखसदृशं २योनिरूपं ३क्षुराभं ४शकटनिभमथैषसोत्तमाङ्गेन ५तुल्यम् । ६मणि ७अहि ८शर ९चक्राभानि १०शालोपमं च ११शयनसदृशमन्यच्छात्र १२पर्यङ्करूपम्। १३हस्ताकारमजस्रमौक्तिकसमं १४ चान्यत् १५प्रवालोपमम् चित्रं तोरणवत् १६स्थितं १७वह्निनिभं स्यात् कुण्डलाभं १८परम्। क्रुध्यत्केशरिविक्रमेण सदृशं १९शय्या समानं २०परम् चान्यद्दन्तिविलासवत् २१स्थितमतः (अभिजित्) शृङ्गाटकव्यक्ति च । २२त्रिविक्रमाभञ्च २३शकटरूपं २४हस्तं ततोऽन्यद्यमलद्वयाभम् २५ । २६पर्यङ्कतुल्यं २७तुरङ्गानुकारमित्येवमश्वादिभचक्ररूपस्" अत्राङ्कानुसारेणाश्वादीनां रूपाणि ज्ञेयानि।"वह्नित्रिऋत्विगुणेन्दुहुताग्निभूतवाणाग्निनेत्रशरभूकृतनागाग्निरामाः । रुद्राब्धिरामशुचिवेदशतद्वियुग्मदन्ता बुधैर्निगदिताः क्रमशोभतारा:"। यथा त्रितारात्विनो भरणी च। षट्तारा: कृत्तिका । पञ्चतारा रोहिणी । त्रितारा मृगशिरा । एकतारा आर्द्रा, चतुस्तारा पुनर्वसुः त्रितारा पुष्या, पञ्चतारा अश्लेषा मघा च त्रितारा पूर्वफल्गुनी द्वितारा उत्तरफल्गुनी पञ्चतारा हस्ता, एकतारा चित्रा, स्वातिश्च सप्ततारा विशाखा, त्रितारा अनुराधा ज्येष्ठा च । एकादशतारा मूला, चतुस्तारा पूर्वाषाढ़ा त्रितारा उत्तराषाढ़ा, श्रवणा चतुस्तारा धनिष्ठा शततारा शतभिषा । द्वितारा पूर्वभाद्रपदा उत्तरभाद्रपदा च द्वात्रिंशत्तारा रेवती" एषां योगतारा सूर्यसि०। "फाल्गुन्योर्भाद्रपदयोस्तथैवाषाढ़योर्द्वयोः । विशाखाश्विनसौम्यानां योगतारोत्तरा" स्मृता एषामष्टकनक्षत्राणां प्रत्येकं स्वतारासु हस्ता उत्तरा उत्तरदिक्स्था तारा योगतारा । "पश्चिमोत्तरतारा या द्वितीया पश्चिमे स्थिता । हस्तस्य योगतारा सा श्रविष्ठायाश्च पश्चिमा" सू०सि० । हस्तनक्षत्रं पञ्चतारात्मकं हस्तपञ्चाङ्गुलिसन्निवेशाकारं ततो नैर्ऋत्यदिगवस्थिता पश्चिमावस्थिततारायाः उत्तरदिगाश्रिततारायाः द्वितीया पूर्व्योक्तातिरिक्ता पश्चिमे वायव्याश्रिते स्थिता सा हस्तस्य योगतारा ज्ञेया, उत्तरतारासञ्ज्ञा पश्चिमाश्रिता तारा हस्तस्य योगतारा" धनिष्ठायास्तारासु या पश्चिमदिक्स्था सा तस्या योगतारा इति च रत्नमा० । "ज्येष्ठा श्रवणमैत्राणां वाहस्यत्वस्य मध्यमा । भरण्यामेवपित्र्यायां रेवत्यार्द्रे च दक्षिणा" सू०सि० "ज्येष्ठाश्रवणानुराधानां पुष्यस्य च प्रत्येकं तारात्रयात्मकत्वात् मध्यमतारा योग-

तारा" रत्नमा० । "रोहिण्यादिनक्षत्रमूलानां प्राची सार्पस्य चैव हि । तथा प्रत्यवशेषाणां स्थूला स्यात् योगतारका" सू०सि० रोहिणीपुनर्वसुमूलानामश्लेषायाश्च प्रत्येकं स्वतारासु पूर्वदिक्स्था तारा योगतारा । अवशिष्टानां आर्द्राचित्रास्वात्यभिजिच्छतताराणां यथायोग्यं स्वतारासु यावन्तं स्थूला सा योगतारा नक्षत्रप्रसङ्गात् ब्रह्मादिनक्षत्राणामपि स्थितिस्थानमुक्तं तत्रैव । "पूर्व्वस्यां ब्रह्महृदयादंशकैः पञ्चभिः स्थितः । प्रजापतिर्द्वितीये-ऽसौ सौम्येऽष्टत्रिंशदंशकैः" सू०सि० ब्रह्महृदयस्थानात् पूर्व्वभागे पञ्चभिरंशैः इषान्तिकटे एकराशिसप्तविंशत्यंशैः प्रजापतिस्तारात्मको ब्रह्मा क्रान्तिवृत्ते स्थितः । अस्य विशेषमाह असाविति । असौ ब्रह्मा सौम्ये उत्तरस्यां अष्टत्रिंशैः स्थित इत्यर्थः रत्नमा० । "अपांवत्सस्य चित्रायाउत्तरेऽंशैस्तु पञ्चभिः । इहत् किञ्चिदतो भागैरापः षड्भिस्तथोत्तरे" सू०सि० । "तिष्यपुनर्वसू इन्द्वे पा०सू० व्याख्यायां सरलायामस्माभिर्यत् पुनर्वसोर्हितारत्वमुक्तं तन्नक्षत्रादिमूलतया प्रामादिकमेव । एतच्छास्त्रालोचनेन पुनर्वसुनक्षत्रस्य चतुस्तारात्मकत्वं पुष्यस्य त्रितारात्मकत्वं तेन बहुत्वे प्राप्ते हित्वविधायकं सूत्रं सार्थकमिति द्रष्टव्यम् ।'पादः पुनर्वसोरन्त्यः पुष्यो श्लेषा च कर्कट"। ज्योति० नक्षत्राधिपा उक्ताः इहत्संo । "अश्वियमदहनकमलजगणिन्मूलभददितिजोवफणिपितरः । योन्यर्यमदिनकृत्त्वष्टृपवनशक्राग्निमित्राः । शक्रोनिर्ऋतिस्तोयं विश्वविरिञ्ची हरिर्विरुधः । अजपादोहिर्बुध्नः पूषा चेतीश्वरा भानाम्" । "चित्राश्लेषास्वातिविशाखाभरणीपित्र्यशक्तिकाः । नातिशस्ताः प्रयाणेषु" ज्यो०त० अस्य क्लीवत्वमपि "अश्लेषवङ्क्रियमपित्र्यविशाखयुक्तं पूर्व्वालयं शतभिषा च नवाष्यूङ्नि" एतान्यधोमुखगणानि कथितानि नित्यं विद्यार्थभूमिखननेषु च भूषितानि" ज्यो०त० । तथा च नक्षत्रपरत्वे न० तारापरत्वे स्त्रीत्वम् । एवं मूलाश्वत्थादीनामपि द्विलिङ्गत्वम् । इदं तीक्ष्णगणः "तीक्ष्णोऽहिरुद्रेन्द्रयुक्" ज्यो०त० नास्ति श्लेषो यस्य । २असंबन्धे त्रि० । श्लेषः काव्ये नानार्थपरता स नास्ति यत्र । ३श्लेषशून्ये काव्ये न० ।

अश्लेषाज पु० अश्लेषानक्षत्रे जायते जन-ड ईत० । केतुग्रहे तस्याश्लेषाजातत्वात्तथात्वं अश्लेषाजातादयोऽस्य अण् ।

अश्लेषाशान्ति स्त्री अश्लेषाजननिमित्ता शान्तिः शाक०त० । अश्लेषाजननिमित्तशान्तौ । तत्र अश्लेषाजनने दोषमाह" ज्यो०त० । "अश्विनीमघमूलानां गण्डाद्याद्यास्त्रि नाड़िकाः । अन्त्याः पौष्णेरगेन्द्राणां पञ्चैव यवनाः जगुः" मूलेन्द्र्योर्दिवा गण्डोनिशा च पित्र्यसर्पयोः । सन्ध्याद्वये तथा ज्येष्ठे रेवतीतुरगर्क्षयोः" सन्ध्यारात्रिदिवाभागे गण्डयोगोद्भवः शिशुः । आत्मानं मातरं तातं वित्तं हन्ति यथाक्रमम् । सर्वेषां गण्डजातानां परित्यागो विधीयते । तातेनादर्शनं वापि यावत् धारयति को भवेत्" ज्यो०त० । त्यागासामर्थ्ये धरणासपर्य्यन्तं सुखं न पश्येत् ज्ञात्वा सर्वत्र शुभम् । त्रिपञ्चादिघटिकोक्तिर्दोषबाहुल्यार्था वस्तुतः सर्वचरणेष्वेव दोषविशेषः यथाह नारदः । "आद्ये पिता नाशमुपैति मूलपादे द्वितीये जननी हतीये । धनं चतुर्थेऽस्य शुभोऽस्य ज्ञात्वा सर्वत्र तत्क्षादक्षिभे विलोमम्" । सन्ध्यादिविशेषोक्तिरधिकदोषार्था । यथाह ज्योतिर्निबन्धः । "मूलाश्विपित्र्यचरणे प्रथमे च नूनं पौष्णेन्द्र्योश्च क्षणिनश्च तुरीयपादे । मातुः पितुः स्वयमुशेच करोति नाशं जातो यदा निशिदिनेऽप्यथ सन्ध्ययोर्वा" । कन्यायां विशेषः विधानपारिजाते । "न बाला हन्ति मूलर्क्षं पितरं मातरं तथा । मूलजा श्वशुरं हन्ति श्यालजा च तदङ्गनाम् । श्लेषेन्द्राऽप्यजं हन्ति देवरन्तु हिदेवजा । शान्तिर्वा पुष्कलास्त्रेत्तर्हि दोषो न कश्चन" । हिदेवजा अश्विनीजाता तस्याः अश्विनीसुतदेवताकत्वेन तयोश्च हित्वात् तथात्वम् । तच्छान्तिश्च "अश्लेषायान्तु जातानां शान्तिं वक्ष्याम्यतः परम् जातस्य द्वादशाहे च शान्तिहोमं समाचरेत् । विभवे पञ्च कुम्भांस्तु हयं वा तदशक्तितः" इत्यादिना मानवसंकलितोक्ता । सा च विधानपारिजाते अश्लेषाशान्तिविधानप्रकरणे दृश्या । तत्फलं च मन्त्रलिङ्गात् श्रेयस् मन्त्रो यथा । "अश्लेषाकृतजातस्य मातापित्रोर्धनस्य च । भ्रातृज्ञातिकुलस्थानां दोषं सर्वं व्यपोहतु । योऽसौ वागीश्वरो देवो ह्याधिदेवो बृहस्पतिः । मातापित्रोः शिशोश्चैव गण्डदोषं व्यपोहतु । पितरं सर्वभूतानां रक्षन्तु पितरः सदा । सर्पनक्षत्रजातस्य वित्तं ज्ञातिं च बान्धवान्" वि०पा० पुरा० ।

अश्व पु० अश्नुते व्याप्नोति मार्गम् अश-क्वन् । घोटके "गच्छन्नश्वलितवामरवारमश्वम्" माघः । "जितमिंहभयानामाटवानां विलयोनयः" कुमा० । "अश्नुताह्याप्नोतीवङ्वेर्देवेभ्योऽण्डाङ्च गर्भतः । साम्नो ह्यानात्समुत्पत्तिः सप्रभा परिकीर्त्तिताः इत्युक्ते श्लेषामश्नुताद्युत्पत्तिस्थानम् ।

ह्रस्वोत्पत्तिस्थानसंख्यासास्थाश्च २सप्तमंख्यायाम्"कामतल्लवपुर्दुष्टो मिथ्याचारश्च निर्भयः। ह्रादशाङ्गुलमेढ्रश्च दरिद्रस्तु हयो मत" इत्युक्तलक्षणपुरुषभेदे "पक्षिनो गजके तुष्टा हये तुष्टा च हस्तिनीति" रस०। अत्र प्रसङ्गात् अश्वानामङ्गविभागविशेषसंज्ञालक्षणादिकमुच्यते जयदत्तस्तादत्र शास्त्रात् सारंगः "अतिप्रसिद्धा जिह्वा तु तस्याः त्वना भवेदधः। ऊर्द्धं तालु भवेत्तस्यास्ततोऽग्रे दन्तपोठकम्। ततोदन्ताः समुद्दिष्टा ऊर्द्धदन्ता भवन्त्यधः। चिबुकं चाधरे भागे तेषां प्रोक्तं विचक्षणैः। चिबुकस्योपरिष्टात्तु अधरोष्ठः प्रकीर्त्तितः। चिबुकात्पार्श्वभागे तु हनुनामाभिधीयते। हनुद्वयं विजानीयात् वक्त्रपार्श्वे गतं बुधः। उत्तरोष्ठं प्रयाणाख्यं तदूर्द्धं ग्रीव उच्यते नासाच्छिद्रे तथा पार्श्वे ग्रीवस्यैव व्यवस्थिते। नासाच्छिद्रान्तरालमध्ये तु घोणाख्या समुदाहृता। घोणापार्श्वगतौ गण्डौ लोरिके च ततःपरम्। नेत्रयोरुत्तरे भागे अनुपात उदाहृतः। कर्णान्ते चैव नेत्रान्तमपाङ्गं ब्रुवते बुधाः। कनीनिकाख्यो विज्ञेयो यत्र नाससमीपगः। सितासितौ च तन्मध्ये नेत्रयोर्मण्डलं हि तत्। प्रच्छादनं भवेद्वर्त्म चाक्षिकूटमतःपरम्। तस्माद्भ्रुवोर्लेखा ललाटं च तदुत्तरम्। ऊर्द्धं ललाटदेशात्तु केशान्तं च ततः श्रवः। ततः शिरो विजानीयात् श्रवादूर्द्धगतं बुधः। शिरःपार्श्वगतौ कर्णौ तयोर्मूलं सकुल्लकम्। अपाङ्गादूर्द्धभागे चैव शङ्खं विद्याद्विचक्षणः। शङ्खकर्णान्तरे चैव कटाक्षं समुदाहृतम्। विटोमर्म्म विटुचैव कर्णस्याधः प्रकीर्त्तिते। घण्टावन्मसमीपस्थो निगालः परिकीर्त्तितः। अधस्तले निगालस्य गलभाङ्मनीषिणः। ततः कण्ठं विजानीयादधोभागे नतं बुधः। ग्रीवा लोकप्रसिद्धा तु तस्याश्चोपरि केशरः। ग्रीवास्कन्धान्तरे चैव वाहं प्राङ्मनीषिणः। वाहस्योपरि वस्तु स्यात्काकसं ककुदं च तत्। ततः पृष्ठं विजानीयादासनं पृष्ठमध्यगम्। अंसके ककुदयैव निबन्धः परिकीर्त्तितः। स्तामंसादधोबाहू तयोर्बाह्वोः प्रकीर्त्तिते। मन्दिरः पश्चिमोभागः कलापी जानुनोऽग्रिमः। जानुनश्चाधरे भागे जङ्घां विद्याद्विचक्षणः। जङ्घापार्श्वे कलां विद्यात् सव्यं चैषिकसंज्ञकम्। अयतः पाणिहस्तः स्यात् पश्चात्कूर्च उदाहृतः। किणस्तत्रैव मध्यस्थोऽधोभागे च कृष्टको। खुरसन्धिं ततोविद्यादधोभागे ततः खुरम्। खुरस्य पार्श्वे पार्ष्णिः स्यादग्रभागे नखो भवेत्। खुरस्याधस्तलं चैव मण्डली तलमध्यगा। खुरमांसं विजानीयात् वीरकाख्यं विचक्षणः। हृदयात्परतः कुक्षी पार्श्वं तस्य विभागतः। जठरं पार्श्वमध्यस्थं तस्य नाभिश्च मध्यतः। रोमराजीं ततो विद्यान्मूलकोशमतःपरम्। आ कक्षाः पश्चिमे भागे पृष्टौ स्फिचौ च कीर्त्तितौ। पुच्छमूलं च वाहानां भवते पुच्छमूलतः। तस्याधः कीर्त्तितः पायुः सीवनी च ततः परम्। सुक्कौ च कटिसन्धिं च ततोविद्यात्परं बुधः। अधस्तात्कटिसन्धेस्तु जरुसन्धिरुदाहृतः। सक्थिनी फलसन्धेस्तु जरू पादाभिधायके। ततः स्थूरं विजानीयात्तस्याधोमन्दिरं भवेत्। किणं चैव ततो विद्यान्मन्दिराख्ये समंस्थितम्। ततः परं विजानीयात् कालकूर्चं च कृष्टिकम्। खुरान्तसंज्ञं मण्डूकं ततो विद्याद्विचक्षणः। अग्रे जङ्घाद्वयं चैव वक्षो ग्रीवाशिरोमुखम्। पूर्वकायःसमुद्दिष्टः पृष्ठदेशस्तु मध्यमः। आ कटेः पश्चिमे भागे खुरान्तावरं स्मृतम्"।

तेषां लक्षणानि"अशुभैर्लक्षणैर्युक्ता हया न यज्ञयोचिताः। अतो लक्षणमेवादौ तेषां वक्ष्यामि देहजम्। ओष्ठयोः सृक्कणोश्चैव जिह्वायां दशनेषु च। वक्त्रे तालुनि नासायां मण्डयोर्नेत्रयोस्तथा। ललाटे मस्तके चैव केशे कर्णपुटे तथा। ग्रीवायां केशरे चापि स्कन्धे वक्षसि वाहुके। जङ्घायां जानुनोश्चाधः कूर्चे पादे तथैव च। पार्श्वयोः पृष्ठभागे च कुक्षौ कक्षां सवालधौ। मेहने मुष्कयोश्चापि तथा चैवोरुकट्टये। आवर्त्ते च खुरे पुच्छे गतौ वर्णे स्वरे तथा। सप्तादोषे त्यजेत्प्राज्ञस्तथायां गन्धसत्वयोः। प्रमाणस्यैव वाहानां लक्षणं यत्प्रतिष्ठितम्। शुभाशुभविवेकाय तद्विद्याद्बुद्धिमान्भिषक्। शालिहोत्रादिभिःसम्यक् त्रिकालज्ञानकोविदैः। ज्ञाताश्चौ पूजिताश्चोष्ठौ बलिष्ठौनौ मृदुत्वचौ। सुप्रोष्ठोत्तरसंस्थं च विपरीतं विवर्जयेत्। सृक्कणोरुद्गता शस्ता जिह्वायां रक्तता तथा। यतश्चान्यद्धि दोषाय न तदीर्घा च सा शुभा। घना स्निग्धा सुवद्धा च समा दन्ताः सुशोभनाः। षट्संख्ये वत्सरे दन्ते तेषु व्यङ्गसंभवः। आयतं तुङ्गतोष्ठं च निर्मांसं प्रियदर्शनम्। सुवद्धं पूजितं वक्त्रं विपरीतं विगर्हितम्। तालुरक्तं प्रशस्तं च सुपुटे चैव नासिके। नातितनू समौ गण्डौ वाहानां कीर्त्तितौ शुभौ। अल्पनिर्गते चैव सुवद्धे नैव चाविले। प्रशस्ते वाजिनां नेत्रे मध्याभे मलतारके। स्निग्धायते विशाले च श्वेते मधुनिभाक्षिणी। कनकप्रतिसंकाशे श्मश्रु वाहस्य लोचने। सावर्त्तं च विशालं च अनिम्नं चैव वाजिनः। ललाटं पूजितं प्राङ्मुनयः शास्त्र-

कोविदाः। शिरः समं तथा वृत्तमावर्त्तहयभूषितम्। केशाश्च मृदवश्चैव बहवश्चैव पूजिताः। ऋजुता कर्णयोश्चैव तीक्ष्णता तनुता तथा। अदीर्घरोमता चैव प्रशस्ता विप्रकीर्त्तिता। सुवृत्ताङ्गुलिताश्चैव धन्यां ग्रीवां विदुर्बुधाः। केशरश्च जटाहीनो मृदुश्चैव प्रशस्यते। मुखश्च मृदुश्चैव स्कन्धो-वाहश्च पूजितः। वक्षः प्रशस्तं विपुलं निर्मितं विशरं च तत्। ऋजुवृत्तसमौ बाहू गूढं जानु प्रशस्यते। अवक्रा मांसहीना च वाजिजङ्घा प्रशस्यते। शुभं वृत्तं सुवृत्तं च समं चैव नतोन्नतम्। कूर्चमेवंविधं विद्यादृग्यन्थिव्रणवि-र्जितम्। दृढसन्धिकिकायुक्तो वर्त्तुलः श्लिष्टसन्धिकः। खुरः खरखुराकारः प्रशस्तः सदृढावृतः। पार्श्वे चैव समे वृत्ते जङ्घामांसोपशोभिते। अविलम्बि सुवृत्तं च उदरं चातिपूजितम्। नातिदीर्घं समं पृष्ठं किञ्चिच्च विनतं शुभम्। सुवृत्ता चैव पीना च कटिर्धन्या प्रकीर्त्तिता। मृदुस्निग्धायतैर्युक्तं बालैः पुच्छं प्रशस्यते। वृषणौ च समौ वृत्तौ रेमवल्म्यावलोमशौ। अण्डवर्णविहीनं तु वृक्षं मेहन-मिष्यते। अनुपूर्वं परं चैव शोभनं चोरुकद्वयम्। पूर्व-जङ्घे च जङ्घादि खुरान्तं चापि पश्चिमम्। शालिहो-त्रादिभिः प्रोक्तं मुनिभिः पूर्ववेदिभिः"।

आवर्त्तलक्षणम् "विंशतिस्तु शुभाः प्रोक्ताः षट्सप्तत्यशुभाः" स्मृताः। उत्तरोत्तरप्राणस्यास्तावावर्त्ताः शुभावहाः। मुकुणोद्व या प्रोक्ताः सर्वकामफलप्रदाः। त्रयश्चैवाथ चत्वारो वाजिनो-ऽस्य रोमजाः। द्वौ वा ललाटजौ यस्य स तु धन्यतमः स्मृतः। आनुपूर्व्या स्थिताश्चोर्द्धं ललाटे रोमजास्त्रयः। त्रिःश्रेणी नाम सा ख्याता भर्तुः सर्वार्थसाधिनी। शिरःकेशान्त-योर्मध्ये भ्रुवोनामाभिधीयते। तत्रावर्त्तः स्थितोऽस्यस्य भर्तुर्जयविवर्द्धनः। घण्टावन्नसमीपस्थो निगालः कीर्त्तितो बुधैः। तस्मिन्देवमणिर्नाम रोमजः शुभकृत् स्मृतः। कर्णमूले तथा बाह्वोः केशान्ते मस्तके तथा। आवर्त्ताः पूजिता नित्यं विशेषेण तु मस्तके। आवर्त्तो यस्य चत्वारो वाजिनो वक्षसि स्थिताः। एका कण्ठे भवेत् स्रष्टा स धन्यः सर्वकामदः। रम्भे चैव सदा भर्तुः संस्तावप्रदोमतः। उपरम्भोद्भवश्चैव रोमजश्चाति पूजितः। शङ्खचक्रगदापद्मशुक्तिवज्रोपमाश्च ये। विशेषेण शुभाः प्रोक्ता रोमजाः शुभदेशजाः। अत ऊर्द्धं प्रव-क्ष्यामि रोमजानशुभाय यान्। भर्तुः क्लेशवहान् सर्वा-न्धनप्राणापहारकान्। नासिकाकुटयोर्मध्ये प्रदेशः प्रोच उच्यते। तत्र भर्तुर्विनाशाय रोमजोऽस्यस्य कीर्त्तितः। ऊर्द्धस्थो नासिकाच्छिद्रात् स्वामिनः क्लेश-दायकः। गण्डजश्चैव भर्त्तारं हन्यावर्त्तो दुरासदः। अधोगतः ससृष्टिः प्रदेशश्चक्षुषोरधः। तत्रावर्त्तोभवेद्धीनः स्वामिनः कुलनाशनः। अपाङ्गादुद्भवश्चैव प्रदेशः शङ्ख उच्यते। तत्र भर्तुर्विनाशाय भवेद्वालस्य रोमजः। भ्रुवो देशे समुद्भूत आवर्त्तो नैव पूजितः। सृष्टद्वियोगकृत्स्व-स्याद्भर्तुरर्थावसादकः। सव्यां ग्रीवां शिरां विद्यात्तत्रावर्त्तस्तु कुत्सितः। कक्षयोरपि संग्रामे स्वामिनं चाशु घातयेत्। चिबुकस्य समीपस्थो वामदक्षिणभागतः। प्रदेशस्तु हनुर्नाम तत्रावर्त्तो हि दारुणः। अधरोष्ठस्य चाधस्तु चिबुको हि प्रसिद्धकः। तस्मिन् पापो भवेद्भर्तुः कर्णयोश्चापि रोमजः। कण्ठस्याथ निगालस्य मध्ये वालक उच्यते। तत्रावर्त्तः स्थितः पापः स्कन्धसन्धिगतश्च यः। अधस्ताच्चक्षुषो-श्चैव सन्धिः कूर्च इति स्मृतः। तत्रावर्त्तः स्मृतो भर्तुः संग्रामे जीवितान्तकृत्। कूर्चादुद्भवकं चोर्ध्वं पार्श्वयोः ककुदा स्मृता। तत्र भर्तुः पराघातो जीवितान्ताय रोमजः। ककुदं वृषभस्येव सुव्यक्तमुपलक्ष्यते। वाजिनो यस्य तस्य स्यादावर्त्तस्तु विनाशकृत्। ककुदस्य पुरोभागे समीपे बाह उच्यते। भर्तुः सुतसमेतस्य तस्मिन् नाशाय रोमजाः। काक्षे तु हृदयस्य स्यादावर्त्तो यस्य दारुणः। रणे हतः समं भर्त्रा ऊर्व्यादेः स विलुप्यते। क्रोडे चैवासने चापि हृदये चैव वाजिनः। आवर्त्ताः स्वामिघाताय भवन्त्येते न संशयः। पार्श्वयोरोमजो यस्य स चाश्वोनयति क्षयम्। सपत्नं चाशु भर्त्तारं नीहाराम्बु यथाम्बुजम्। कूर्चस्याधःप्रदेशस्तु कुक्षिश्च परिकीर्त्तितः। अधस्तस्य वाहस्य जघन्यो जानु-जश्च यः। नाभिजोगुह्यजश्चैव लिङ्गजश्च विशेषतः। गुह्यमूलस्थितश्चापि नैव धन्यः प्रकीर्त्तितः। कुक्षौ व्याधिः, क्षयायैव रोमजाः कुक्षिसंभवाः। पायुलि-ङ्गमध्यस्था नैव धन्या प्रकीर्त्तिताः। स्फिचिजः खुरजश्चैव यस्यावर्त्तो हि वाजिनः। लङ्घावर्त्तः स विख्यातो भर्तुः सर्वार्थनाशकः। शतपादीति विख्यातस्तथा वै शुकुलोऽपरः। आवर्त्तश्चैव संघातः पादुकश्चार्द्धपादुकः। शुक्तिश्चैवावली-दश्च आवर्त्तः कीर्त्तितोऽष्टधा। वाजिदेहगतः सम्यक् शुभाशुभनिवेदकः। शतपादीसमाकारः शतपादीति कीर्त्तितः। जातीसुकुलसंकाशो सुकुलः सदृढावृतः। आवर्त्तो भ्रमितो बालैः संघातो रोमपुञ्जकः। शुक्तिश्च शुक्तिसंस्थानै-रोमभिर्व्यक्तलक्षणैः। एतेषामेव लीढस्तु आवलीढः प्रकी-र्त्तितः। पादुकः पादुकाकारस्तथाचैवार्द्धपादुकः। बालै-

विशेषसंस्थानैर्निर्दिशेन्नतिमान्भिषक् । शास्त्रमार्गानुसारेण यथा प्रोक्तं तपोधनैः एतेषामेव सर्वेषामावर्त्तानां विचक्षणैः । रोमणां तिलकता संज्ञा वाजिलक्षणवेदिभिः । शुभाशुभौ तु यत्र द्वौ तत्रैको न फलप्रदः । एवं चेन्मा दहेत्पापं तेन दोषो न दुष्यति । अथ वा वाजिनो सख्याः ये चाङ्गादिगुणाधिकाः । दत्त्वा याङ्गाः क्रयेणैव दुरावर्त्तस्तु काकुदी । श्रोत्रयो रोमजश्चैव रोचमानस्तथैव च । अङ्गादी मेषली नाम राजरत्नप्रदाः सदा । प्रवाणे मारुतं विद्याल्ललाटे च हुताशनम् । उरसि चाश्विनौ देवौ चन्द्रसूर्य्यौ च मूर्द्धनि । रन्ध्रे स्कन्दविशाखौ च उपरन्ध्रे हरीहरौ । इत्येवं पूजिताङ्गेषु ते दग्धव्यास्तु वाजिनः । अप्येकेन विहीना ये भवेयुरशुभास्तदा" ।

अथ पुण्ड्रलक्षणम् अत ऊर्द्धं प्रवक्ष्यामि पुण्ड्राणां लक्षणम् शुभम् । शुक्तिशङ्खगदापद्मखड्गचक्राङ्कुशोपमाः । शिरोललाटं वदनं यः पुण्ड्रो व्याप्य तिष्ठति । स धन्यः पूजितोनित्यं महुकश्चैव योभवेत् । पर्वतेन्दुपताकाभा ये च रुद्रामसन्निभाः । ते सर्वे पूजिताः पुण्ड्रा धनधान्यफलप्रदाः । इति पुण्ड्राः समाख्याताः पूर्व्वशास्त्रानुसारतः । अशुभांश्चैव वक्ष्यामि यथायोगं समासतः । काककङ्कबन्धाहिमद्गगोमायुसन्निभाः । असिताः पीतका रक्ताः पुण्ड्रका न च पूजिताः । तिर्य्यगग्राश्चैव विच्छिन्नाः श्रृङ्खलापाशशोभिताः । जिह्वालम्बाक्षिरुग्णाश्च भक्षवर्णनिभाश्च ये । मूलाग्रा वामदेहस्थाः पुण्ड्रका न शुभप्रदाः । पुण्ड्रकाणि विनश्यन्ति भिन्नवर्णानि वाजिनः" ।

अथ पुष्पलक्षणम् । "आगतं वत्सरान्तस्थे भवन्त्यन्यवर्णकाः । बिन्दवः पुष्पसंज्ञा वाञ्छिताञ्छितत्वकारकाः । तेषां प्रदेशभेदे च लक्षणं यद्व्यवस्थितम् । तत्तथैव समासेन विस्पष्टं कीर्त्तयेऽधुना । प्रवाणे च ललाटे च कचे मूर्द्धनि कर्णयोः । निगाले चैव केशान्ते पुष्पं धन्यतमं स्मृतम् । स्कन्धे वक्षसि कक्षे च सृक्कयोर्वाङ्कके सुखे । हनौ पृष्ठे च वाहानां पुष्पं स्वामिहितप्रदम् । नाभौ केशे तथा कण्ठे दन्ते चैव हि वाजिनाम् । पुष्पं धन्यतमं प्रोक्तं भर्त्तुः सर्वार्थसाधकम् । अप्रशस्तानि दृष्टानि मुनिभिर्यानि शास्त्रतः । तानि सम्यक् प्रवक्ष्यामि पुष्पाण्यन्यानि दर्शनात् । अधरोष्ठे करे प्रोथे उत्तरोष्ठे तथैव च । घोणायां गण्डयोश्चैव शङ्खयोश्च तथा भ्रुवोः । ग्रीवायां चैव वाहे च स्फिक्योःस्फूरके स्थिचि । पार्श्वे क्रोडे च पुष्पाणि निन्दितानीति निश्चयः । रक्तं पीतं तथा कृष्णं पुष्पं सर्वत्र नेष्यते । शुभप्रदेशे सञ्जातं भवेत्साधारणं ततः । पुत्रलाभधनप्राप्तिमारोग्यं विजयं तथा । विद्यात्पुष्पैः शुभैर्भद्रं रशुभैश्च विपर्य्ययम् । सर्वाङ्गपुष्पितो वाहो परित्याज्यो न संशयः" ।

अथ गतिशुभादिलक्षणम् "दूरसंतृप्तिमयः पादांस्त्रीन्नारान् स्पृशन्निव । पुलं याति शुभं हृष्टो वाजी भद्रगतिस्तु सः । पूजितो दृषमातङ्गसिंहशार्दूलगामिनः । अतोऽन्यगतयो नेष्टाः सर्वशुद्धतुरङ्गमाः । संकीर्णा एकतोभद्रा वङ्कभौघविवर्जिताः । अत्यूर्द्धा चैव वक्रा च वाजिनां निन्दिता गतिः । षोडशाश्वोटिकाभिस्तु करवेष्टितजानुभिः । शतं द्विगुणितं गत्वा हृष्टानां पुनरेति यः । स शीघ्रगतिरित्युक्तो वाजी धन्यस्तपोधनैः । दशहीना भवन्त्ये ते मध्यमाधमगा हयाः ।

अथ वर्णभेदेन नामभेदः "श्वेतः कोकाह इत्युक्तः कृष्णः खुग इ उच्यते । पीतको हरितः प्रोक्तः कषायो रक्तकः स्मृतः । पक्वतालनिभो वाजी कयाहः परिकीर्त्तितः । पीयूषवर्णः शेराही गर्दभाभः सुरूहकः । नीलो नीलक एवाश्वः त्रिपूहः कपिलः स्मृतः । शिखहः कपिशो वाजी पाण्डुकेशः सुवालधिः । हरिताहश्चित्रकर्बुरितपुलाहः श्वेतपीतकः । ईषत्पीतः कुलाहस्तु यो भवेत् कृष्णजानुकः । कृष्णा चाक्षे भवेद्रेखा पृष्ठवंशानुगामिनी । उराहः कृष्णजानुस्तु मनाक्पाण्डुस्तु यो भवेत् । वेरुहाभः स्मृतो वाजी पाटलो यः प्रकीर्त्तितः । रक्तपीतकषायोत्थो वर्णजो यस्य दृश्यते । दुकुलाहःस विख्यातो वर्णो वाहस्य देहजः । पूर्वोक्तानां च वर्णानां सुखपुण्ड्रेण वाजिनाम् । ये भवन्ति परे भेदास्तान् ब्रवीम्यनुपूर्वशः । कोकाहः पुच्छिकको नाखः कोकुराहः प्रकीर्त्तितः । खुराहखरगाहौ च हरिकोहरिराहिकः । कलाहर्यश्च वोल्लाहः सिराहः सिङराहकः । कुलाहः कुलुराहस्तु सराहः शुभराहकः । चारुराहो जवेदश्वो वोरुराहो न यः स्मृतः । कुलीहो दुरुणाहस्तु युद्धके नैव कीर्त्तितः । त्रिपुहस्त्रिपुलाहश्च युद्धके नैव कीर्त्तितः । त्रिपुहस्त्रिपुलाहश्च चित्रलाङ्गश्च यो भवेत्' ।

अथ रोमवर्णभेदेन शुभाशुभलक्षणम् । "यस्य गौराणि पीतानि गात्ररोमाणि वाजिनः । स भर्त्तुः श्रियमाधत्ते यस्य शुक्लासितानि च । यस्य पादाः सिताः सर्वे पुच्छं वक्षो मुखं तथा । जङ्घाजङ्घा सिता यस्य तं विद्यादष्टमङ्गलम् । प्रभूतासिततारायश्च प्रशस्ता मुनिभिः स्मृताः । यस्तु पीतासितैस्तारैः स धन्यः कीर्त्तितो हयः । प्रशस्तः

कृष्णतारस्तु मल्लिकाक्षः प्रकीर्त्तितः । श्वेतजालावेष्टितं कृष्ण रेखया तारकं च यत् । मल्लिकाक्षः सविज्ञेयः स्वामिनः सुखवर्द्धनः । सिततयाऽग्रयस्तश्च स्वामिनः क्लेशवर्द्धनः । सर्वश्वेतश्च कृष्णश्च रक्तपीतस्तथैव च । एते सांग्रामिकाः प्रोक्तास्तुरगा मुनिसत्तमैः । हरिताः किल जायन्ते वाजिनः पुण्यदर्शनाः । यतो हिता नरेन्द्राणामायुरारोग्यश्रीप्रदाः । रक्ताक्षमेहनः शस्तः श्यामकर्णस्तु यः सितः । कपोतेन च वर्णेन योज्ञवः शुक्लकेसरः । शुक्लपादसखो वाजी प्रशस्तः परिकीर्त्तितः । चतुर्णां चैव पादानां शुक्लता यस्य वाजिनः । सुखं सिततरं चैव पञ्चभद्रः स उच्यते । श्वेतमण्डलचित्रश्च भर्त्तुः सर्वार्थसाधकः । पाण्डुरा यस्य रेखा स्यात् पृष्ठवंशानुगामिनी श्वेतकृष्णशिरा यश्च नैव धन्यः प्रकीर्त्तितः । अन्यवर्णं शिरो यस्य पुच्छं वा यस्य वाजिनः । पुच्छेन शिरसा वापि नानावर्णेन निन्दितः । अव्यक्तवर्णो योवाक्षस्तथा तित्तिरिसन्निभः । कुत्सितो वानराक्षश्च योवा व्याघ्रावलोढकः"

तथाङ्गविकृतितोऽशुभलक्षणम् । "काकुदी कृष्णजिह्वश्च कृष्णसेफास्खतालुकः करालो हीनदन्तश्च ह्रस्वो वाधिकदन्तकः । एकाण्डश्चैव जाताण्डः कङ्कुको तिसरी तथा । मार्ज्जारपादो व्याघ्राभस्त्रिकर्णी द्विखुरी खनी । यमयो वामनश्चैव काकतित्तिरसंनिभः । वानराक्षो विड़ालाक्षो शशली चेन्द्रडड्डिकः । येषां पृष्ठे हतो भर्त्ता जातदन्तस्तथैव च । एते दोषान्विता वाहास्त्याज्या वै भूतिमिच्छता । धनप्राणहराह्येते बन्धुविप्रकारकाः । एषां चिह्नं प्रवक्ष्यामि येन जानन्ति सादिनः । पूर्व्वशास्त्रानुसारेण मुनीनां वचनं यथा । आवर्त्ता यत्र कक्षदे काकुदी स उदाहृतः । करालश्चाधरे दन्तैर्ज्ञायते यस्य चोत्तरम् चतुर्भिः पञ्चभिश्चैव हीनदन्तः प्रकीर्त्तितः । सप्तभिश्चाष्टभिर्दन्तैर्ज्ञातश्चाधिकदन्तकः । अङ्गुष्ठपर्वसंकाशं छागशङ्कोपमन्तथा । जम्बूदरप्रभं चैव तथा चामलकोपमम् । आक्षास्थिसदृशं चापि हरीतक्याः फलोपमम् । दग्धवर्म्मनिभं चापि वालं संस्थानमेव च । कालकृष्णान्तरे यस्य केशाग्रे चापि दृश्यते । धीरैयः सर्वपापानां वाहः शृङ्गी स कीर्त्तितः । एवंविधेन शस्त्रेण शस्त्री राष्ट्रे न वासयेत् । एकतोलप्रमाणेन सुक्ष्मैर्यैकाण्डसंज्ञकः । अत्यन्तरोमशाभ्यां तु ताभ्यां जाताण्ड उच्यते । स्तब्धे वक्षसि बाह्वोश्च अंसदेशे तथैव च । अन्यवर्णो भवेद्वाजी कङ्कुको स प्रकीर्त्तितः । यस्यान्यवर्णा रेखा स्यात्पादे मूर्द्धे च वाजिनः । मार्ज्जारपादः प्रोक्तोऽसौ सोऽधन्यः कुलनाशनः । अन्यवर्णस्य वाहस्य शिरः कृष्णं यदा भवेत् । तित्तरी नाम स प्रोक्तो भर्त्तुः कुलविनाशनः । द्विखुरं गोखुराकारखुरैर्विद्याद्विचक्षणः । अथ वा तिर्यगुक्तौ निम्नमध्यंच निर्दिशेत् । दृषणाभ्यां भुजाताभ्यां स्तनाभ्यां विहिता स्तनी । तिभिः कर्णैस्त्रिकर्णी च व्याघ्राभो व्याघ्रवर्णकः । एकेनाक्षेण हीनेन निम्नेन च विशेषतः । यमयं वाजिनं विद्याद्वामनं वामनाकृतिम् । वर्णादेकेन पादेन अन्यवर्णेन यो हयः । शशलीति स विख्यातो भर्त्तुः कुलविनाशनः । विरोधं नैव यो याति दृढावान् सुखवर्जितः । इन्द्रदड्डिः स विख्यातो भर्त्तुः कुलविनाशनः । अथ चेद्दृढवां दृढा विरोधमधिगच्छति । निगूढ दृषणाक्षस्तु स धन्यः सर्वकामदः । द्विवर्षं तु समारभ्य यावद्दा पञ्चवार्षिकः । दन्तानां सुखयोश्चैव सम्भवो वाजिनः स्मृतः । अत ऊर्द्धं न जायन्ते सुखौ दन्ताश्च वाजिनः । अशुभं तु फलं पाश्चमभावे न ततस्तथा" ।

अथाश्वाङ्गचेष्टादिशुभाशुभम् । अतःपरं प्रवक्ष्यामि तुरगाणां विभागतः ज्वलितेन यथाङ्गेन फलं वाच्यं शुभाशुभम् । यदा ज्वलति वाहानां सर्व्वगात्रे हुताशनः । तदा विद्यादनाहृष्टिमवृष्टिमेकं न संशयः । अन्तःपुरविनाशस्तु मेहने ज्वलिते भवेत् । उदरे वित्तनाशस्तु पायौ पुच्छे पराजयः । उत्तमाङ्गे च वक्त्रे च स्कन्धे चैवासने तथा । भर्त्तुर्जयाय वाहानां ज्वलनं यत्र नेत्रके । धूमं ललाटे वाह्वोश्च तथा वक्षसि निन्दितम् । तत्रैव ज्वलनं शस्तं तथा नासासमुद्भवः । यदा व्याधिं विना वाजी श्वासं त्यजति दुर्म्मनाः । अङ्गपातं च कुरुते तदा भर्त्तुरशोभनम् । स्वयमेव यदा वक्त्रं क्षुतो लोकयते हयः । रक्षायप्रदाने तु तदा विद्याज्जयं प्रभोः । सर्वदेव शिरोग्रस्तु सर्वेषां नैव पूजितः । वामपादाभिघातस्तु प्रभोर्यात्रानिषेधकः । स्वामिनारूढमात्रेण दक्षिणं पार्श्वमाक्षनः । तुरङ्गो यदा न्यस्येत्तदा भर्त्तुर्जयो भवेत् । पुच्छं वाहं यदा वाहो वामतो विकिरेद्यदा । तदा भर्त्तुः प्रवासः स्यात् दक्षिणे विजयस्तथा । प्रकिरन्ति यदात्यर्थं सर्वपुच्छं तुरङ्गमाः । अकस्मादेव जाता च तेषां भीतिः प्रभोःस्मृता" ।

अथाङ्गमानम् "हस्तोऽङ्गुलानां विंशत्या चतुरुत्तरया स्मृतः । चतुर्हस्तस्तु विख्यातः शास्त्रोक्तोनोत्तमो हयः । अर्द्धहस्तेन हीनस्तु भवेन्मध्यस्तुरङ्गमः । सृष्टिन्यूनेन हस्तेन हीनश्चाश्वधमः स्मृतः । अर्द्धमानप्रमाणं तु परिवाहं विनिर्दिशेत् ।

उत्तमानाञ्च मध्यानां हीनानां चैव वाजिनाम्। अर्द्धसप्तहस्तं तु त्रेडं दैर्घ्येण निर्दिशेत्। षड्भिश्च सप्तभिर्हीनं मध्यं च विचक्षणः। पञ्चहस्तप्रमाणस्तु जघन्यः समुदाहृतः। द्वात्रिंशदङ्गुलं वक्षःसमाश्वस्य कीर्त्तितम्। पृष्ठं वक्षः कटीं चैव समतुल्यं समादिशेत्। अङ्गुलीद्वयहीनं तु सुखादि मध्यमाधमम्। निर्दिशेन्मतिमान्वैद्यः वाजिशास्त्रविशारदः। सप्ताङ्गुलं खुरं चैव उत्तमाश्वस्य कीर्त्तितम्। षडङ्गुलं भवेन्मध्ये जघन्ये चतुरङ्गुलम्। षोड़शाङ्गुलदीर्घा तु जङ्घा चैवोत्तमे हये। चतुर्दशाङ्गुला मध्ये हीने च द्वादशाङ्गुला। एवंविधं प्रमाणं तु निर्दिष्टं शास्त्रवादिभिः। अपाङ्गात् पुच्छमूलं तु दैर्घ्येणार्द्धं प्रमाणयेत्। खुरान्तात् कटिं यावद्दीर्घमानेन बुद्धिमान्। वक्षोभागे तु सर्वेभ्यो रज्ज्वा वा सूत्रकेण च। परिणाहं तुरङ्गस्य मापयेन्मतिमान्भिषक्। एवं प्रमाणभागेन विभक्ताङ्गश्च पूजितः। अतो हीनाधिकाङ्गाश्च हयो नैव पूजिताः"।

आवर्त्तादिकं विशेषयति हेमा० प०ख० ज्योति० पराशरसंहिता। "आवर्त्तो बर्हिमुखदत्तमण्डलरोमा, दीर्घदत्तार्द्धरोमा शुक्तिः। कनकमन्तर्मुखदत्तरोमसंघातं, प्रफुल्लविकचरोम पुष्परमिति"। पुष्पं विशेषयति तत्रैव। "श्वेतं स्निग्धमन्यवर्णस्य प्रशस्तं श्वेतस्य कृष्णं पीतं रूक्षं रक्तं वा। यस्यान्यवर्णं ललाटे श्वेतं बालेन्दुतारकसंस्थानं वा पुष्पम्"।

अथाश्वायुर्लक्षणम् "आयुर्लक्षणमश्वानामतश्चार्द्धं प्रवक्ष्यते। शालिहोत्रादिनिर्दिष्टं यथा पूर्व्वं तपोधनैः। सुसंहताश्च ये वाहा ह्रस्वकर्णास्तथैव च। स्थिरनेत्रस्वभावेषु न दीर्घायुरजीविनः। महाघोषा महाकायाये चाश्वाः पृथुवक्षसः। तेषां दीर्घं भवेदायुः स्निग्धाङ्गाश्चैव ये सदा। कर्णान्ते पीड़िते येषां सिन्दूराभस्य दर्शनम्। शोणितस्य भवेत् क्षिप्रं ते मताश्चिरजीविनः। न विक्षिपन्ति ये वालं स्वपायाय तुरङ्गमाः। न वा जिघ्रन्ति ये चापि तेऽपि दीर्घायुषो मताः। कुटिकानां किणा येषां दृश्यन्ते वाजिनां स्फुटाः। प्रतिस्रोतः पिबन्त्यम्भो ये च ते दीर्घजीविनः। पद्मपत्रदलाकारं जिह्वाग्रं यदि वाजिनः। दन्ताश्च मौक्तिकाकारा स्निग्धं येषां च निर्मलम्। सीत्कारं च भवेद्येषां लाङ्गूले चालनं पुनः। प्रस्वेदः शुभगन्धस्तु नखा वा दर्पणोपमाः। येषां च हृद्रोमाणि ते सर्वे चिरजीविनः। स्निग्धा गम्भीरदीर्घाश्च ग्रीवगा यस्य वाजिनः। भवन्ति विपुला रेखास्तं विद्याद्दीर्घजीविनम्। चलचामरहङ्कारखड्गयङ्काङ्गुयानिभाः। शुक्तिवज्रगदाकारा ध्वजपद्मसमोपमाः। श्रीवृक्षस्वस्तिकाभासाः ग्रीवरेखाश्चिरायुषाम्। ऊर्द्धं ग्रीवोत्थिता रेखा यस्य वामेन चानता। छुप्ता वा यस्य वाहस्य न चिरं तस्य जीवितम्। ऊर्द्धं ग्रीवसमा रेखा दृश्यते यस्य वाजिनः। तस्य स्युः सप्तविंशो दशमं प्राप्य वत्सरम्। लाङ्गुला चेद् दशे द्वे च वर्षाणां तस्य जीवितम्। त्रयोदशाब्दं स जीवेद्यस्याग्रे चतुरङ्गुले। तिर्यग्गे चोद्गते स्यातां द्वे रेखे चैव वाजिनः। ग्रीवगे वाप्य वाहस्य तस्य विद्याच्चतुर्दशम्। दक्षिणेन च पार्श्वेन यः शेते सर्वदा हयः। बद्धमूलोऽल्पमूलश्च चिरं जीवति नो हयः। विनतः पूर्व्वकायेन स्थूलजानुश्च योहयः। न्यूनाधिकुटस्तब्धाक्षः खल्वायुः स प्रकीर्त्तितः। जातन्द्रन्तहयं वाह्ये पतत्यब्दे ह्यतीयके। चतुरो दशनान् विद्याच्चतुर्थे पतितोत्थितान्। पञ्चमे पतितोद्भूतान् षट् च दन्तान् मनीषिणः। षडाद्येषु च वर्षेषु कालिकादिसम्भवः। कालिका हरिणी शुक्ला कृष्णा काचा समक्षिका। शङ्खा चैव क्रमेणाश्ववयसः परिसूचिकाः। वक्त्रान्ते कालिका रेखा कृष्णा दन्ताग्रसंस्थिता। षष्ठे च सप्तमे वर्षे चाष्टमे च भवेत् क्रमात्। आपीता हरिणी ज्ञेया कालिका स्थानमाश्रिता। नवमे दशमे वर्षे भवेदेकादशे तथा। कृष्णा चैव भवेच्छुक्ला दन्ते मूर्द्धि समुद्भवा। द्वादशाब्दं समारभ्य भवेद्यावच्चतुर्दशम्। सिता सिद्धार्थकाकारा काचेति परिकीर्त्तिता। पञ्चदशाब्दमारभ्य यावत्सप्तदशादितः। मक्षिका मक्षिकाकारा भवेदष्टादशादिषु। विंशत्यन्तेषु वर्षेषु वाजिनां दशनोद्भवा। त्रयोविंशावसानेषु एकविंशादिषु त्रिषु। शङ्काकारा भवेच्छङ्का प्रकृतस्थानमाश्रिता। छिद्रं च चलनं चैव तथा पतन मेव च"। "अतिबद्धाः कषायाश्च तनवश्चेति तत्त्वतः। ते भवन्ति द्विवर्षस्य युक्ताश्चैव द्विजन्मना। रेखाश्च शिरसः सूक्ष्मा भवेच्च पतितोत्थिता। खल्वाट्या विपुला दन्ता भवन्ति पतितोत्थिताः। खल्वभागे विनापूर्णे व्यङ्गनानां न सम्भवः। पूर्णेषु खल्वभागेषु जायन्ते कालिकादयः। निम्नं क्षुण्णं च दन्ताग्रं खल्वमित्यभिधीयते। पूर्णतां चास्य जानीयात् षडग्रभूतवत्सरे। खल्वेषु कालिकाऽऽयाति नैव कार्य्या विचारणा। नियता कालिका रेखा सुपूर्णे दन्तमस्तके। द्वयोर्भवति षष्ठे द्वे चतुर्थी सप्तमे तथा। खल्वमस्तु वर्षेषु दन्तानां कालिका क्रमात्। कालिकानुक्रमेणैव हरिणयादिषु बुद्धिमान्। द्वौ द्वौ वर्षेण जानीयाद्वाजिनां व्यङ्गनं प्रति"।

विचेष्टितमिदं नेष्टं क्षतं वाजिनाम्। आरोहणमन्यवाजिनां पर्य्याणादियुतस्य वाजिनः। उपवाह्यतुरङ्गमस्य वा अविकलस्यैव विपन्न शोभना। क्रौञ्चवद्विप्लवधाय क्षेपितं ग्रीवया त्वचलया च सोन्मुखम्। स्निग्धसञ्चमनुनादि क्षुटवद् घासरुद्धवदनैव वाजिभिः। पूर्णपात्रदधिविप्रदेवता गन्धपुष्पफलकाञ्चनादि वा। द्रव्यमिष्टमथ वापरं भवेद्वेषतां यदि समीपतो जवः। भक्ष्यपानसलिलाभिनन्दिनः पत्युरौपयिकनन्दिनोऽथवा। सव्यपार्श्वगतदृष्टयो ऽथवा वाञ्छितार्थफलदास्तुरङ्गमाः। वामैव पादैरभिताड्यन्तो महीं प्रवासाय भवन्ति भर्तुः। सन्ध्यासु दीप्तामवलोकयन्तो क्षेपन्ति वेद्मन्यपराजयाय। अतोव क्षेपन्ति किरन्ति बालान् निर्द्वारताश्च प्रवदन्ति यात्राम्। रोमत्यजो दीनखरस्वराश्च पांशून् यसन्तश्च भयाय दृष्टाः। सप्तद्वद्क्षिणपार्श्वगाविनः पदं सप्तत्क्षिप्य च दक्षिणं स्थिताः। जयाय शेषेष्वपि वाहनेष्विदं फलं यत्रासन्नभमादिशेद्बुधः। आरोहति क्षितिपतौ विनयोपपन्नो यात्रानुगोऽन्यतुरगं प्रति क्षेपते च। वल्गेण वा स्पृशति दक्षिणमात्मपार्श्वं योऽश्वः स भर्तुरचिरात्प्रचिनोति लक्ष्मीम्। सङ्कुसुकुमूलशकृत् करोति न ताद्यमानोऽप्यनुलोमयायी। अकार्यभीतोऽश्वविलोचनश्च शुभं न भर्तुस्तुरगोऽभिधत्ते"।

अश्वतर पु० तनुरश्वः अश्व+तनुत्वे टरच्। अश्वायामश्वेनोत्पन्नत्वेऽश्वत्वं तस्य तनुत्वञ्चान्यपिण्डकत्वे। १गर्दभेनाश्वायास्तु जाते १खरेऽश्वविशेषे" २सर्पभेदे च। जातित्वेन स्त्रियामभवत् ङीप्। "जानन्ति: पौलावणः षट् शतानि सवां निष्कमश्वतरीरथः" इति आ० उ०। दक्षेणोपपन्नतं यत्नमनुष्टच्छति योनरः। स क्षत्नुसुपष्टच्छीयाद्गर्भमश्वतरी यथा" मनुः। "बहुत्वान्नामधेयानि पन्नगानां तपोधन! न कीर्त्तयिष्ये सर्वेषां प्राधान्येन तु मे शृणु। शेषः प्रथमतो जातो वासुकिस्तदनन्तरम्" इत्युपक्रम्य "कम्बलाश्वतरौ चापि नागः कालीयकस्तथा" भा० आ० प०। अयञ्च वरुणलोकेस्थितः" भा० स० प० वरुणसभावर्णने "कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ" २गन्धर्वभेदे। "तद्यथैवादोधावतोऽश्वो वा अश्वतरो वा गदायेत" शत० ब्रा०।

अश्वत्थ पु० न स्थिरं शालमलिवृक्षादिवत् तिष्ठति स्था-क पृषो०नि०। १खनामख्याते वृक्षे, "बोधिद्रुः पिप्पलोऽश्वत्थश्चल पत्रोगजाशनः। पिप्पलो दुर्जरःशीतः पित्तक्षे व्रणाश्वजित्। गुरुस्तुवरकोरूक्षोवल्कोयोनिविशोधनः" भा० पू०।

"अश्वत्थः सर्ववृक्षाणाम् गीता" तस्य विष्णुरूपित्वेन सर्वाभीष्टसाधकत्वम् अश्वत्थोत्पत्तिः "पार्वतीशिवयोर्देवैः सुरतं कुर्वतोः किल। अग्निं ब्राह्मणवेशेन प्रेष्य विघ्नं कृतं पुरा। शशाप पार्वती क्रुद्धा सर्वानेव दिवौकसः" इत्युपक्रम्य "तस्मान्मम सुखभंशात् यूयं वृक्षत्वमाप्नुत" पार्वतीशापमुक्ता "तस्माद्वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः। तस्मादिमौ विष्णुमहेश्वरावुभौ भवतुर्बोधिवटौ मुनीश्वराः!"। बोधिरूपं चार्किदिनं विनैव त्वस्पृश्यतामापदलक्ष्मीयोगात्" पद्मपु० क्रिया० १६० अध्या० उक्ता। "तस्य शनिवारमात्रे स्पृश्यताकारणमप्युक्तं तत्रैव १६१ अध्या०। लक्ष्मीज्येष्ठभगिन्या अलक्ष्म्या सह उद्दालकस्य विवाहसङ्गे पत्या "यावदागमनं मम तावत् अश्वत्थमूले त्वं निषीद" इत्युक्तया अलक्ष्म्या तत्रैव स्थितया बहुतिथे काले गतेऽपि पत्युरागमनमनालोक्य क्रन्दितं, तच्छ्रुत्वा च लक्ष्म्या कनिष्ठभगिन्या नोदितो विष्णुस्तत्रागत्य तामुवाच यथा। "लक्ष्म्या सह ततो विष्णुस्तत्रागात् कृपयान्वितः। आश्वासयन्नलक्ष्मीं तामिदं वाक्यमथाब्रवीत्। अश्वत्थमासाद्य सदा लक्ष्मीः स्थिरा भव। ममांशसम्भवोह्येष आवासस्ते मया कृतः। मन्द्वारे सदा ह्येनं लक्ष्मीरत्रागमिष्यति। अस्पृश्योऽसौ भवेत्तस्मान्मन्द्वारं विना किल" एवञ्च अलक्ष्म्याः सर्वदावासादन्यदिने तस्यास्पृश्यत्वं मन्द्वारे लक्ष्मीसमागमाच्च स्पृश्यत्वमिति मर्य्यादा कृता। "अश्वत्थरूपो भगवान् विष्णुरेव न संशयः। रुद्ररूपो वटस्साक्षात् पलाशो ब्रह्मरूपधृक्। दर्शनस्पर्शनादेव ते वै पापहराः स्मृताः" तत्रैवोक्तम् अश्वत्थस्पर्शस्तु शनिवारे एव प्रागुक्तवचनात्। तस्य वैशाखे सेचनफलं पद्मपु० क्रिया० ११ अध्या०। यथा "वैशाखे सेचयेच्चित्यं विष्णुमश्वत्थरूपिणम्। चतुर्वर्गफलावाप्तिहेतवे वैष्णवोजनः। गच्छन्प्रमादतोवेग कुर्य्याद्योऽश्वत्थसेचनम्। सोऽपि याति परं स्थानं विमुक्तः पापकोटिभिः" तन्मूलबन्धफलम् तत्रैव "अश्वत्थमूलं विप्रर्षे! यो बध्नाति शिलादिभिः। अश्वत्थरूपी भगवान् किं तस्य न हि यच्छति"। तत्प्रणामफलं तत्रैव। "अश्वत्थद्रुममालोक्य प्रणामं कुरुते तु यः। आयुर्दद्भिर्भवेत्तस्य वर्द्धन्ते सर्वसम्पदः"। अतएव दुःस्वप्नदर्शनादौ "अश्वत्थरूपी भगवान् दुःस्वप्नं शमयाशु मे" इति मन्त्रेण प्रणामोविहितः। "तन्मूले धर्म्मकर्म्मचरणप्रशंसा तत्रैव। "यदाश्वत्थतले विप्र! धर्म्मकर्म्म विधी-

यते । न्यूनातिरिक्तता न स्यात्तस्मिन् कर्मणि जैमिने ! । तत्र तीर्थानि सर्व्वाणि तिस्रोतादीनि सन्ति वै !"। तत्-पूजनफलं तत्रैव । "अश्वत्थपूजकोयस्तु सएव हरिपूजकः । अश्वत्थरूपी भगवान् स्वयमेव यतो हरिः" ॥ तस्य तच्छा-खायाश्च छेदने निषेधः तत्रैव । "तरुज्ञानात् द्विजश्रेष्ठ ! योऽश्वत्थं हन्ति मूढधीः । संसारे नास्ति तत् कर्म यत् कृत्वा स च शुध्यति । अश्वत्थोऽक्षराजोऽयं हरिमूर्त्तिः प्रकी-र्त्तितः । तस्मादश्वत्थहन्तॄणां त्राता कोऽपि न विद्यते । अश्वत्थशाखामेकां च स्वप्नेऽपि छिनत्ति यः । स कोटि ब्रह्महत्यानां फलं प्राप्नोति मानवः" इति च । अन्यान्यपि तच्छेदने पापानि तत्रैवोक्तानि द्रष्टव्यानि । तच्छाखा-च्छेदनमयज्ञार्थमेव निषिद्धं यज्ञार्थच्छेदने तु न दोषः पशुहिंसावत्तस्यापि विहितत्वात् "अर्कः पलाशखदिर-अपामार्गोऽश्व पिप्पल" इत्यादिना जीवहोमे तस्यैव समिधो विधानात् । २नन्दीवृक्षरूपे अश्वत्थभेदे च "नन्दीवृक्षोऽश्वत्थभेद-प्ररोही गजपादपः । स्यालोदुम्बरजन्तरुः क्षीरी च स्याद्-नस्पतिः । नन्दीवृक्षो लघुः स्वादुस्तिक्तस्तुवरउष्णकः । कटु-पाकरसस्पाकीविषपित्तकफास्रनुत्" भा०प्र० । ३गर्दभाण्ड वृक्षे (वेलियापिप्पल) तद्गुणादि गर्दभाण्डशब्दे द्रष्टव्यम् । ४संसारवृक्षे तस्य चिरस्थायित्वाभावत् तथात्वम् । "ऊर्द्ध-मूलमधःशाखमश्वत्थं प्राहुरव्ययम्" गीता तद्विपरीतमधः-शाखशब्दे । अश्व इव तिष्ठति स्था-क पृ० । ५अश्विनीनक्षत्रे तस्याश्वगीर्षाकारस्थत्वे पाशब्दे उक्तत्वात्तथात्वम् । अश्वत्थ-नक्षत्रेण युक्तः कालः इत्यण् तस्य संज्ञायां लुप् । "अश्वत्थो मूहूर्त्तः" सि०कौ० । असंज्ञायान्तु आश्वत्थ-महः आश्वत्थी रात्री । चतुर्थ्यां काशा० इल । अश्वत्थिलः उत्क० ङ अश्वत्थोवः तत्सन्निकृष्टदेशादौ त्रि० । अश्वत्थेन युक्ता पौर्णमासी अण् । तस्य पौर्ण-मास्यामपि "अश्वत्थयुक्तत्वात्ठक्" पा० निर्देशात् नि० लुप् अश्वत्थयुक्तायां पौर्णमास्याम् । लुपि व्यक्ति वचनोक्तेः पुंस्त्वम् । तत्र भवः ठक् । आश्वत्थिकः । चान्द्राश्विनमासे ।

अश्वत्थक पु० अश्वत्थस्तत्फलम् तदुक्तः कालोऽस्य-अश्वत्थत्र देवदृष्टम् वुन् । अश्वत्थफलकाले वैशाखादौ १देशे ग्रन्थे । स्वार्थे, कन् । २अश्वत्थवृक्षे ।

अश्वत्थकुण पु० अश्वत्थस्य पाकः पील्वा० कुणच् । अश्वत्थ-पाके फलादौ । [अश्वत्थशब्दे विवृतिः ।

अश्वत्थभेद पु० अश्वत्थस्य भेदोविशेषो यत्र । नन्दीवृक्षे

अश्वत्थामन् पु० अश्वस्येव स्थाम बलमस्य अश्वइव तिष्ठति युद्धे स्थिरत्वात् स्था-क वा पृषो० । भारतप्रसिद्धे द्रोणाचार्य्यपु-त्रेवीरे । "गोतमान्निधुनं जज्ञे शरस्तम्बाच्छरद्वतः । अश्वत्थाम्नस्तु जननी कृपश्चैव महाबलः । अश्वत्थामा ततो-जज्ञे द्रोणादेव महाबलः" भा०आ०प० । तस्य नाम-निरुक्तिरपि दर्शिता भा०आ० १२०अध्या० । यथा "शारद्वतीं ततोभार्य्यां कृपीं द्रोणोऽन्वविन्दत । अग्निहोत्रे च धर्मे च दमे च सततं रताम् । अलभद्गौतमी पुत्र-मश्वत्थामानमेव च । स जातमात्रो व्यनदद्यथैवोच्चैः-श्रवा हयः । तच्छ्रुत्वान्तर्हितं भूतमन्तरीक्षस्थमब्रवीत् । अश्वस्येवास्य यत् स्थाम नदतः प्रदिशो गतम् । अश्वत्था-मैव बालोऽयं तस्मान्नाम्ना भविष्यति" "अश्वस्य स्था-म्नोऽकारः वार्ति० अकारः । अश्वत्थामः । भवार्थे तु तस्य लुप् अश्वत्थामा तद्भवे । २भारतप्रसिद्धे पाण्डवसैन्यस्थे मालवेशेन्द्रवर्म्मणः २गजभेदे तत्कथा च "मतिमान् श्रेयसे युक्तः केशवोऽर्জ্জुनमब्रवीत् । नैव युद्धेन संग्रामे जेतुं शक्यः कथञ्चन । सधनुर्धन्विनां श्रेष्ठो देवैरपि सवासवैः । न्यस्तशस्त्रस्तु संग्रामे शक्यो हन्तुं भवेन्नृभिः । आस्थी-यतां जये योगो धर्मस्तत्रज्य पाण्डवाः ! । यथा नः संयुगे सर्व्वान् हन्याद्युक्तारथनः । अश्वत्थाम्नि हते नैव युध्येदिति मतिर्मम । तं हतं संयुगे कश्चिदस्त्रै र्यंसतु मानवः । एतन्नारोचयद्राजन् ! कुन्तीपुत्रो धनञ्जयः । अन्ये त्वरोचयन् सर्वे कृच्छ्रेण तु युधिष्ठिरः । ततो भीमो महाबाहुरनीके स्वे महागजम् । जघान गदया राज-न्नश्वत्थामानमित्युत । परप्रमथनं घोरं मालवस्येन्द्रवर्म्मणः । भीमसेनस्तु सव्रीड उवेत्य द्रोणमाहवे । अश्वत्थामा हत इति शब्दञ्चैवाकार सः । अश्वत्थामेति हि गजः ख्यातो नामाहतोऽभवत् । श्रुत्वा मनसि तं भीमो मिथ्या व्या-हृतवांस्तदा । भीमसेनवचः श्रुत्वा द्रोणस्तत्परमप्रियम् । मनसा सन्नगात्रोऽभूत् यथा सैकतमम्भसि । शङ्कमानः स तन्मिथ्या वीर्य्यघ्नः सततस्य वै । हतः स इति च श्रुत्वा नैव धैर्य्यादकम्पत" । "सन्दह्यमानो व्यथितः कुन्तीपुत्रं युधिष्ठिरम् । अहतं वा हतं वेति पप्रच्छ सुतमात्मनः । स्थिरा बुद्धिर्हि द्रोणस्य न पार्थो वक्ष्यते ह्यनृतम् । तथा-प्यमपि लोकानामैश्वर्य्यार्थे कथञ्चन । तस्मात्तं परिपप्रच्छ नान्यं कञ्चिद्द्विजर्षभः । तस्मिंस्तस्य हि सत्यागा बाल्यात्प्रभृति पाण्डवे । ततो निष्पाण्डवामुर्व्वीं करि-ष्यन्तं युधाम्पतिम् । द्रोणं ज्ञात्वा धर्मराजं गोविन्दो

व्यवितोऽब्रवीत् । यदार्द्धदिवसं द्रोणो युध्यते मत्युमास्थितः । सत्यं ब्रवीमि ते सेना विनाशं समुपैष्यति । स भवांस्त्रातु नो द्रोणात् सत्याज्जाम्बोऽन्वतं पुनः । अन्वतं जीवितस्यार्थे वदन्ति स्त्रियतेऽन्वतैः । कामिनीषु विवाहेषु गवां भक्ष्ये तथैव च । ब्राह्मणाभ्युपपत्तौ च अन्वते नास्ति पातकम् । तयोः संवदतोरेवं भीमसेनोऽब्रवीदिदम् । श्रुत्वैवं ते महाराज वधोपायं महात्मनः । गाढमानस्य मे सेनां मालवस्येन्द्रवर्म्मणः । अश्वत्थामेति विख्यातो गजः शत्रुगजोपमः । निहतो युधि विक्रम्य ततोऽहं द्रोणमब्रुवम् । अश्वत्थामा हतो ब्रह्मन्निवर्त्तस्वाहवादिति । नूनं नाद्य कृपावाक्यमेवं मे प्रत्यभाषत । स त्वं गोविन्दवाक्यानि मानयन्न जयैषिणः । द्रोणाय निहतं शंस राजन् ! शारद्वतीसुतम् । त्वयोक्तो नैष युध्येत जातु राजन् द्विजर्षभः । सत्यवान् हि त्रिलोकेऽस्मिन् भवान् ख्यातो जनाधिप ! । तस्य तद्वचनं श्रुत्वा कृष्णवाक्यप्रचोदितः । भावित्वाच्च महाराज ! वक्तुं समुपचक्रमे । ततस्त्वमब्रवी मन्नो जये सक्तो युधिष्ठिरः । अव्यक्तमब्रवीद्वाक्यं हतः कुञ्जर इत्युत । तस्य पूर्व्वं रथः पृथ्व्यां चतुरङ्गुलमुन्नतः । बभूवैवन्तु तेनोक्ते तस्य वाहोऽस्पृशन्महीम्" । "अश्वत्थामा हत इति प्रियाख्यानाय सत्यवाक् । स्वैरं शैवे गज इति किञ्च व्याहृतं सत्यवाचा" इति वेणीसं० । [चारित्रि स्त्रियां ङीप् ।

अश्वत्थिक त्रि० अश्वत्थेन चरति पर्या० ठन् । अश्वत्थफलक

अश्वत्थी स्त्री० क्षुद्रोऽश्वत्थः अल्पार्थे ङीप् । क्षुद्रपिप्पले क्षुद्रपत्रे वनजाते अश्वत्थाकारे क्षुद्रवृक्षभेदे स्वार्थे कन् अश्वत्थिकाऽप्यत्र ।

अश्वदंष्ट्रा स्त्री अश्वस्य दंष्ट्रेवाकारेण । गोखरक्षुपे ।

अश्वनाय पु० अश्वं नयति अण्-उप०स० । अश्वपालके ।

अश्वन्त पु० अश्वस्य व्यापकस्य धर्मस्यान्तो यत्र शक० । १अश्वमेधे २क्षेत्रे ३क्षत्रे ४क्षुद्रायां च हेम० प्राणिहिंसास्थानत्वात्तस्यास्पदत्वम् ।

अश्वप पु० अश्वं पाति पा-क । हयपालके । [रूपभेदे च ।

अश्वपति पु० ऐत० । वाजिपालके रामायणप्रसिद्धे कैकेये

अश्वपत्यादि पु० प्राग्दीव्यतीयेऽर्थे अण्प्रत्ययनिमित्ते पाणिन्युक्ते यज्ञसमूहेसच गणः अश्वपति ज्ञानपति शतपति ज्ञनपति गवपति स्थानपति यज्ञपति वाटपति, कुलपति गृहपति धान्यपति धन्यपति वस्तुपति, धर्म्मपति सभापति प्राणपति क्षेत्रपति, । आश्वपतम् पत्न्यन्तत्वेऽणवादात् न ख्यः ।

अश्वपर्ण त्रि० अश्वानां पर्णं गमनं यत्र । अश्वगमनयुक्ते १रथे अश्वं व्याप्य पर्णं पतनं यस्य । २व्याप्यगमने मेघे च । "आविद्युन्मद्भिर्मरुतः स्वर्के रथेभिर्याति ऋष्टिमद्भिरश्वपर्णैः" ऋ० १,८८,३ । यथा व्युत्पत्तिर्दर्शिता तथैव भाष्ये उक्ता । [लोपः । हयपादतुल्यचरणे ।

अश्वपाद त्रि० अश्वस्य पाद इव पादोऽस्य हस्या० नाल्व

अश्वपाल पु० अश्वान् पालयति पा+णिच्-ल्यु अण् । घोटकरक्षके । ख्युल् । अश्वपालकोऽप्यत्रार्थे ।

अश्वपुच्छी स्त्री अश्वस्य पुच्छमिव केसरोऽस्य । माषपर्णीवृक्षे ।

अश्वपेज पु० ऋषिभेदे । तेन प्रोक्तमधीयते गौत्रादि० णिनि । आश्वपेजिनः तत्प्रोक्ताध्यायिषु ब० व० ।

अश्वपेशस् त्रि० अश्वेन पेशोरूपंरूपणीयं निरू० यस्य । अश्वेन रूपणीये । "गोअश्वामश्वपेशसम्" ऋ० २,५,१६ । "अश्वपेशसमश्वेन निरूपणीयां रातिम्" भा० ।

अश्ववडव पु० अश्वश्च वडवा च । अश्ववडवरूपसमासार्थे न परवल्लिङ्गम् ।

अश्ववाल पु० अश्वस्य वालः केशर इव तदाकारपुष्पत्वात् । (व्याघा) इति ख्याते १काशे । ऐत० अश्वस्य २केशेच ।

अश्ववाज पु० यदुवंशचित्रकस्य पुत्रभेदे । "क्रोष्टोस्तु श्रृणु राजेन्द्र ! वंशमुत्तमपौरुषम् । यदोर्वंशधरस्यापि" इत्युपक्रम्य । "गान्धारी चैव माद्री च क्रोष्टोर्भार्ये बभूवतुः" इत्युक्त्वा "माद्र्याः सुतौ च जज्ञाते सृतौ-ष्णजिदनन्तरौ । जज्ञाते तनयौ कृष्णेः शमिकचित्रकस्तथा" इत्युक्त्वा शमिकवंशमुक्त्वा च । चित्रकस्यापि पुत्राः पृथुर्विपृथुरेव च । अश्वग्रीवोऽश्ववाजश्च सुपार्श्वकगवेषणौ । अरिष्टनेमिरश्वश्च सुधर्म्मा धर्म्मविच्तथा । सुवाहुर्बहुवाहुश्च अविक्षायणे स्त्रियौ" हरि० ३४,३५, अध्या० ।

अश्वमहिषिका अश्वमहिषयोर्वैरम् वुन् । अश्वमहिषयोर्वैरे ।

अश्वमार पु० अश्वं मारयति मृ-णिच् अण् । करवीरे ख्युल् । अश्वमारकोऽप्यत्र ।

अश्वमुख पु० अश्वस्य मुखमिव मुखमस्य । अश्वाकारमुखे पुरुषाकारान्यङ्गे किन्नरे । जातित्वात् स्त्रियां ङीप् "भिन्दन्ति मन्दां गतिमश्वमुख्यः" कुमा० अश्ववदनादयोऽत्र ।

अश्वमेध पु० अश्वः प्रधानतया मेध्यते हिंस्यतेऽत्र मेध-हिंसने घञ् । यज्ञभेदे स च शत० ब्रा० १३काण्डे पञ्चभिरध्यायैरुक्तः । यजु० २४ अ० तदीययूपपशुविशेषा विहिता यथा । तत्राद्यमन्त्रोपोद्घाते यजु० वे० दी० उक्तम् अ-

मेधे एकविंशतिर्यूपा सन्ति तत्र मध्यमोयूपोऽग्नि-
र्वरुणः तत्र सप्तदश पशवोनियोजनीयाः अन्यः१
तुपरः२ (ह्रस्वोत्पत्तिकालेऽतीतेऽपि ह्रस्वहीनः आगः)
गोमृगः गवयः ३ । द्वौ चाग्नेयौ ४ एकादशावयवयुक्तौ ।
अग्निमन्वे वक्ष्यमाणा रोहितादयः द्वादश गाव इति
सप्तदश पशवोमध्यमयूपे बन्धनीयाः । द्वयोरेकादशावयवाश्च
मध्ये कृष्णग्रीवः, अश्वस्य ललाटे पुरस्तात् ललाटे द्वयोरध-
स्तात् मेषौ, अधोभागे शुक्लौ आगौ, बाह्वोरन्तस्य पूर्व्वपादयो
रेकैकः । अश्वस्य नाभ्यां श्यामश्वेतकृष्णरोमाऽजः श्वेतः
आगः दक्षिणपार्श्वे, वामे कृष्णः । बभ्रुरोमयुग्मकौ
आगौ पश्चात् पादयोरेकैकः । अश्वस्य पुच्छे श्वेतः, वेहत्
गर्भघातिनी, वामनः खर्व्वः पशुः पुच्छे एवम् एका-
दशानामवयवतया कल्पयित्वा तथाविधौ एकादशि
नौ द्वौ मध्ययूपे बन्धनीयौ अन्येषु एकैक इति भेदः
पृषतीवादीनां श्वेताः सौर्य्या इत्यन्तानां शतत्रयसङ्ख्यकानां
पशूनां मध्ये पञ्चदश पशवः एकैकस्मिन् अश्वादयस्त्रयः
एते द्वादश च इत्येते पर्य्यङ्ग उच्यन्ते । अतोऽश्वस्य शरीरं
तुम्बीफलवत् रज्ज्वा गुम्फनीयम् । ततः कृष्णग्रीव
इत्यादयः अश्वस्य शरीरे यथोक्तस्थाने संबद्धा रज्ज्वा
बन्धनीयाः ततो रोहितादयः वक्ष्यमाणा द्वादश नियोज्याः
इतरेषु विंशतौ यूपेषु पञ्चदश पञ्चदश पशवः प्रत्येकमेका-
दशिनः इतिषोड़श इति भेदः"।

अश्वादिपशुभेदाः देवसंहितायां यजु अ०२४ उक्ता यथा
"अश्वस्तूपरो गोमृगस्ते प्राजापत्याः कृष्णग्रीव आग्नेयो
ललाटे । पुरस्तात्सारस्वतो मेध्यस्ताभ्यामेवाश्विनावधोरा-
मौ बाह्वोः सौमापौष्णः, श्यामोनाभ्यां, सौर्य्यवामौ श्वेतव
कृष्णव, पार्श्वयोस्ताभ्यौ लोमशसक्थौ, सक्थ्योर्वायव्यः
श्वेतः, पुच्छइन्द्राय खपसाय, वेहद्वैष्णवोवामनः१ । रोहि-
तोधूम्ररोहितः कर्कन्धुरोहितस्ते सोम्या, बभ्रुरुरुबभ्रुः
शुकबभ्रुस्ते वारुणाः, शितिरन्ध्रोऽन्यतःशितिरन्ध्रः समन्त
शितिरन्ध्रस्ते सावित्राः, शितिबाहुरन्यतःशितिबाहुः
समन्तशितिबाहुस्ते बार्हस्पत्याः, पृषती क्षुद्रपृषती स्थूल
पृषती ता मैत्रावरुण्यः२ । शुद्धबालः सर्वशुद्धबालो
मणिबालस्ताश्विनाः, श्वेतः श्वेताक्षोऽरुणस्ते रुद्राय
पशुपतये, कर्णायामा अवलिप्ता रौद्रनभरूपाः, पार्ज-
न्याः ३ । पृश्निसिरत्रपर्ण्यूपृश्निरूर्ध्वपृश्निस्ते मारुताः,
कल्गलोहितोक्षीपलङ्गीताः सारस्वत्यः, श्रीहाकर्णः शुण्ठा
कर्णोऽज्ञालोहकर्णस्ते त्वाष्ट्राः, कृष्णग्रीवः शितिकक्षोऽ-
ङ्गिसक्थस्तऐन्द्राग्नाः" कृष्णाङ्गिरस्याङ्गिर्मेहाङ्गिरसउ-
क्षाः४। शिल्पा वैश्वदेव्यो, रोहिण्यस्तूपरयो वाचे, ऽवि-
ज्ञाता अदित्यै, सरूपा धात्रे, वत्सतर्यो देवानां पत्नीभ्यः।५।
कृष्णग्रीवा आग्नेयाः, शितिभ्रयो वरुणानां, रोहिता रुद्राणां,
श्वेता अवरोकिण आदित्यानां, नभोरूपाः पार्जन्याः।६।
उद्वत ऋषभो वामनस्त ऐन्द्रवैष्णवाः, उद्वतः शितिबाहुः
शितिपृष्ठस्त ऐन्द्राबार्हस्पत्याः, शुकरूपा वाजिनाः, क-
ल्माषा आग्निमारुताः, श्यामाः पौष्णाः ।७। एता ऐन्द्रा-
ग्ना, द्विरूपा अग्नीषोमीया, वामना अनड्वाह आग्ना-
वैष्णवा, वशा मैत्रावरुणी, उग्रत एन्यो मैत्राः ।८। कृष्ण-
ग्रीवा आग्नेया, बभ्रवः सौम्याः, श्वेता वायव्या, अविज्ञाता
अदित्यै, सरूपा धात्रे, वत्सतर्यो देवानां पत्नीभ्यः।९। कृष्णा
भौमाः, धूम्रा आन्तरिक्षा, इडन्तो दिव्याः, शबला, वैद्युताः
सिद्धान्तारकाः १०। धूम्रान् वसन्तायालभते, श्वेतान् ग्रीष्माय,
कृष्णान् वर्षाभ्यो, रुणाञ्छरदे, पृषतो हेमन्ताय, पिशङ्गाञ्छि
शिराय ११। त्र्यवयो गायत्रै, पञ्चावयश्छिद्रुभे, दित्यवाहो
जगत्यै, विवत्सा अनुष्टुभे, तूर्यवाह उष्णिहे १२। पृष्ठवाहो
विराजे, उक्षाणो वशाया, ऋषभाः, ककुभे, उक्षाणः पङ्क्त्यै,
धेनवोऽतिच्छन्दसे १३। कृष्णग्रीवा आग्नेया, बभ्रवः सौम्या,
उपधूसाः सावित्रा, वत्सतर्यः सारस्वत्याः, श्यामाः
पौष्णाः, पृश्नयो मारुता, बडरूपा वैश्वदेवा, वशा द्यावा-
पृथिवीयाः १४। उक्षाः संचरा एता ऐन्द्राग्नाः, कृष्णा
वारुणाः, पृश्नयो मारुताः, कायास्तूपराः १५। अग्नयेऽनी-
कवते प्रथमजानालभते, मरुद्भ्यः सान्तपनेभ्यः सवत्सान्,
मरुद्भ्यो गृहमेधिभ्यो बभ्रिकान्, मरुद्भ्यः क्रीडिभ्यः संहृ-
तान्, मरुद्भ्यः सतवद्भ्योऽनुहृतान् १६। उक्षाः संचरा एता
ऐन्द्राग्नाः, प्राग्रहा माहेन्द्रा, बडरूपा वैश्वकर्म्मणाः१७।
धूम्रा बभ्रुनीकाशाः पितॄणां सोमवतां, बभ्रवो धूम्रनीकाशाः
पितॄणां बर्हिषदां, कृष्णा बभ्रुनीकाशाः पितॄणामग्निष्वा-
त्तानां, कृष्णाः पृषन्त स्थैषम्बकाः १८ । उक्षाः संचराः
एता नृनासीरीयाः, श्वेता वायव्याः, श्वेताः सौर्य्याः१९ ।
एवं समाप्ता यूपाः कृत्याद्याः सौर्य्यान्ताः सप्तविंशत्यधिक-
शतत्रयमिताः प्राच्याः पशवः सर्वे उक्ताः । आरण्यानाह ।
"वसन्ताय कपिञ्जलानालभते, ग्रीष्माय कलविङ्कान्, वर्षा
भ्यस्तित्तिरान्,शरदे वर्त्तिका, हेमन्ताय ककरान्,शिशिराय
विककरान् २० । सतताय शिशुमारानालभते, पर्जन्याय
मण्डूकान्,नद्यृषभतृष्णाय,स्निताय कुलीपयान्, वरुणाय
नाक्रान् २१ । सोमाय हंसानालभते, वायवे बलाका

इन्द्राग्निभ्यां कुङ्कान्, मित्राय मद्गून्, वरुणाय चक्रवाकान् २२। अग्नये कुटरूनालभते, वनस्पतिभ्य उलूकान्, नाग्नीषोमाभ्यां वाशान्, अश्विभ्यां मयूरान्, मित्रावरुणाभ्यां कपोतान्२३। सोमाय लवानालभते, त्वष्टे कौलीकान्, गोपादीर्देवानां पत्नीभ्यः, कुलीका देवजामिभ्यो, अग्नये रुद्रपतये पारुष्णान्२४। अद्भ्ये पारावतानालभते, रात्र्यै सीचाप्, रहोरात्रयोः संधिभ्यो जत्रू, मासेभ्यो दात्यौहान्, संवत्सराय महतः सुपर्णान् २५। भूम्या आखूनालभते, अन्तरिक्षाय पाङ्क्तान्, दिवे कर्णात्, दिग्भ्यो नकुलान्, बभ्रुकानवान्तरदिशाभ्यः २६। वसुभ्य ऋक्षानालभते, रुद्रेभ्योरुरून्, आदित्येभ्योन्यङ्कून्, विश्वेभ्यो देवेभ्यः पृषतान्, साध्येभ्यः कुलङ्गान् २७। ईशानाय परस्वत आलभते, मित्राय गौरान्, वरुणाय महिषान्, बृहस्पतये गवयान्, त्वष्टृउक्षान् २८। प्रजापतये पुरुषान् हस्तिन आलभते, वाचे मुखे, चक्षुषे मशका, श्रोत्राय भृङ्गाः, २९। प्रजापतये च वायवे च गोमृगो, वरुणायारण्योमेषो, यमाय कृष्णो, मनुष्यराजाय मर्कटः, शार्दूलाय रोहिद्, ऋषभाय गवयी, क्षिप्रश्येनाय वर्तिका, नीलङ्गोः ऊर्णिः, सप्तदाय शिशुमारी, हिमवते हस्ती ३०। मयुः प्राजापत्य, उलो हस्तिच्छो बृहदंशस्ते धात्रे, दिशां कल्पो, धुङ्काग्नेयी कलविङ्को लोहिताक्षिः पुष्करसादस्ते त्वाष्ट्रा, वाचे क्रुञ्चः ३१। सोमाय कुलुङ्ग, आरण्योऽजो नकुलः शका ते पौष्णाः, क्रोष्टा मायो, रिन्द्रस्य गौरमृगः, पिङ्गोन्यङ्कुःकङ्कटः, क्लेऽनुमत्यै, प्रतिश्रुत्कायै चक्रवाकः ३२। सौरी बलाका, शार्ङ्गः सृजयः शबाखङ्कस्ते मैत्राः, सरस्वत्यै, शारिः पुरुषवाक्, त्वाष्ट्रौभी, शार्दूलो हंसः पृदाकुस्ते मन्यवे, सरस्वते शुकः पुरुषवाक् ३३। सुपर्णः पार्जन्य, आतिर्वाहसो दर्विदा ते वायवे, बृहस्पतये वाचस्पतये, पैङ्गराजो, ऽजज आन्तरिक्षः, ध्रुवोभङ्गुर्मृतस्ते नदीपतये, द्यावापृथिवीयः कूर्मः ३४। पुरुषस्यग्नयन्द्रमसो, गोधा सालका दार्वाघाटस्ते वनस्पतीनां, शकवाकुः सावित्रो, हंसो वातस्य, नाक्रो मकरः कुलीपयस्ते,कूपारस्य, क्षिप्रं शल्लकः ३५। एणकृष्णो, मण्डूको मूषिका तित्तिरिस्ते सर्पाणां, लोपाश आश्विनः। कृष्णो रात्र्या, ऋक्षो जत्रुः सृमिलीका तरुतरजनानां, जरूका वैष्णवो ३६। अन्यवापोऽर्धमासानामश्वो मयूरः सुपर्णस्ते गन्धर्वाणां, मधुमद्रो मासां, कश्यपो रोहित् कृष्णशाची गोलक्षिका तेऽप्सरसां, स्वावेऽसितः २।७। वर्षाभू र्जत्रुना,मारुः कपो माल्यवास्ते पितॄणां, बलाबाजगरो, वसूनां कपिञ्जलः, कपोत उलूकः शशस्ते निर्ऋत्यै, वरुणायारण्यो मेषः ३८। क्षित आदित्याना, मुष्टो श्वोवान् वाघ्रीनसस्ते मित्रा, वरुणाय सृमरो, रुरु रौद्रः, कपिः कुटरुदाखौहस्ते वाजिनां, कामाय पिकः ३९। खड्गो वैश्वदेवः, श्वा कृष्णः कर्णो गर्दभस्तारुष्ते रक्षसा, मिन्द्राय शूकरः। सिंहो मारुतः, शरभोवयः पिप्पका शकुनिस्ते गरव्यायै विश्वेषां देवानां पृषतः। ४०। एवं षट्यधिकं शतत्रयमारण्याः पशव उक्ताः। मध्यमयूपे द्वौ एकादशिनौ अन्येषु एकैके एकादशिनः इति एकविंशतियूपेषु द्वाविंशतिरेकादशिनः। अतः सप्तविंशत्यधिकशतत्रयम् अश्वादि सौर्यान्तं द्वाविंशत्या सह मिलितासत् ऊनपञ्चाशदधिकं शतत्रयम्। ताः ग्राम्यापशवः आरण्यास्तु २६० मिलिताः ६०९ पशवोऽश्वमेधे विहिताः तदुक्तं श्लोके। "षट् शतानि नियुज्यन्ते पशूनां मध्यमेऽहनि। अश्वमेधस्य यज्ञस्य नवभिश्चाधिकानि च"। तेषु ग्राम्या आलभ्या आरण्या बन्धनान्मोच्या न तु हिंस्या इति। एवञ्चालभ्यस्य प्रधान्यात् अश्वमेधत्वम्। अश्वलक्षणं तु" काताम्रोधरसङ्काशः स्वर्णवर्णसुखोवली। यस्य पार्श्वोदुभावर्द्धचन्द्राकारौ सुशोभनौ। पुच्छं विद्युत्प्रतीकाशमुदरं कुन्दसन्निभम्। पादाश्चैव हरिद्वर्णाः कर्णौ सिन्दूरसन्निभौ। ज्वलदग्निनिभा जिह्वा चक्षुषी भास्करोपमे, विराजितो रोमराज्या सानुलोमविलोमया। विचित्रैर्विविधैर्वर्णैश्चित्रोरजतबिन्दुभिः। यो वेगे वायुतुल्यः स्यादुच्चैरुच्चैःश्रवायथा। यस्य गात्रोद्भवोगन्धो गन्धर्वमपि मोहयेत्। एवं लक्षणसंयुक्तो वक्तव्यः पशुरुच्यते"वाजि०रा०। 'गोक्षीरसमवर्णञ्च कुन्देन्दुहिमसन्निभम्। पीतपुच्छं श्यामकर्णं सर्वतोगतिमत्तमम्। श्यामं वापि महीपाल यज्ञेऽश्विंस्तुरगं विदुरिति'पुरा०। शत०ब्राह्मणे तु "हिरूपएवैषोऽश्वः स्यात् कृष्णसारङ्गः प्रजापतेर्वाएषोऽश्वः समभवत् हिरूपं वा इदं चक्षुः शुक्लं चैव कृष्णं च तदेनं स्वेन रूपेण समर्धयतीति। अथ होवाच सात्ययज्ञिः त्रिरूप एवैषोऽश्वः स्यात्तस्य कृष्णः पूर्वार्धः शुक्लोऽपरार्धः कृत्तिकाङ्गिः पुरस्तात्तद्यत् कृष्णः पूर्वार्धो भवति यदेवेदं कृष्णमच्छ्वसदस्य तदय यच्छुक्लोऽपरार्धो भवति यदेवेदं शुक्लमच्छ्वसदस्य तदय यत्कृत्तिकाङ्गिः पुरस्तात्ता कनीनिका स एवं रूपसङ्घोऽतो यतमोऽस्योपकल्पेत बभ्रुरूपो वा हिरूपो वा त्रिरूपो वा कृत्तिकाङ्गिरुपालभेत जवेन त्वेव सङ्घः स्यात्"। "कृत्तिकाकारं कृत्तिकान्तिकरोहिणीशकटा

कारमङ्गिं पुरुषं ललाटे यस्य भा० । ललामम्" । का त्या० २० । १ । २३ । "नीलपीतङ्कयुक्तमिति" कर्क० । तस्योत्सर्ज्जनं चोत्तरपूर्व्वदिशि । "पशुवदुत्सर्ज्जनं निरष्टे ऽश्वयते" कात्या० २० । २ । १ । "पशुवदित्युत्तरपूर्व्वा दिग् लक्ष्यते निरष्टे निरमणे ऽङ्गतया । अध्वर्युयजमानौ अश्वयते शतानामश्वानां मध्ये पशुवदुत्सर्ज्जनं कुरुतः क्रीडने निरष्टे अश्वस्य वयोव्यङ्कनानि एकैकं त्रीणि त्रीणि वर्षाणि अनुवर्त्तन्ते तानि निर्गतान्यश्वादिति निरष्टम् अतीतवर्त्तिंशतिवर्षमित्यर्थः" कर्कः । तेन ऽङ्गतया स्कन्दनसामर्थ्यराहित्यं सूचितम् तथा हि तस्याश्वस्य "वड़वाभ्यो वारणम्" "प्रस्रवेयाद्योदकात्" कात्या० २० । २ । १ । २ । ३ । वाक्येन वड़वाभ्यो निवारणं, प्रस्रवेयात् यवेच्छस्नानार्हादुदकाच्च निवारणम् विहितम् । अतएव "प्रजाते वायव्यम्" कात्या० २० । ३ । २० । वड़वायां रेतःस्कन्दने प्रजातइत्युच्यते तस्मिन् वायव्यपयोनिर्वापोविहितः । तस्य रज्जवाद्य यथारूपाः कर्त्तव्यास्तथाच्च शत० ब्रा० । "तस्यैते पुरस्ताद्रक्षितार उपकॢप्ता भवन्ति । राजपुत्राः कवचिनः शतं राजन्या निषङ्गिणः शतं सूतग्रामण्याः पुत्रा इषुधिमन्तः शतं क्षत्तृसंग्रहीतॄणां पुत्रा दक्षिणतः शतमश्वशतं निरष्टं निरमणं यक्ष्मिणेनमपिदधत्य रक्षन्ति" अवधिकालमाह "तस्मात् पारिप्लवं षट्त्रिंशतं दशाहा नाचष्टे" इति शत० ब्रा० सावनगणनया संवत्सरे गते दीक्षा । "अग्नापदीज्या चरुभिः सावित्रम्" इत्यादिना "ऋतेचादर्शने च" इत्यन्तेन कात्या० २० । ३ । २० । प्रायश्चित्तविशेषानुक्ता "अन्यस्य रथनादानादि करोत्यश्वयुक्तम्" ऋते अश्वस्यादर्शने च" का० २० । ४ । १ । अपुनरागमसम्बन्धे च अन्यस्याश्वस्य रथनादानादि अश्वयुक्तमश्वसंबन्धि अश्वोपकारकं सर्व्वं कर्म्म पुनः करोति" कर्कः । अश्वमेधारम्भकालश्च । "अष्टम्यां नवम्यां वा फाल्गुनीशुक्लस्य" कात्या० २० । १ । २ । फाल्गुनशुक्लपक्षेऽष्टम्यां नवम्यां वा प्रारम्भः । "यास्वौ फाल्गुनी पौर्णमासी भवतीति" प्रकृत्य "तस्यै पुरस्तात् षड़हे वा सप्ताहे वा ऋत्विज उपसमायन्तीति" शत० ब्रा० यौग्नेत्वेके" कात्या० २० । १ । २ । "ज्यैष्ठ्याषाढ़योः शुक्लाष्टम्यां नवम्यां वेत्येके" कर्कः । एकविंशतिपूपसञ्चिनेशमानादि यथा "एकविंशतिर्वै पूपाः सर्व्व एकविंशत्य रत्नयोराज्युद्गातोऽग्निष्टो भवति पैतत्तदारवावभितः, षड्वैत्वाक्षय इत्याक्षय इत्यात्, षट् खादिराक्षय एवेत्याक्षय इत्यात्, षट् पालाशाक्षय एवेत्याक्षय इत्यात्, शत० ब्रा० । एतेषां नामनिर्व्वचनं तत्रैव द्रष्टव्यम् ।

अश्वमेधस्य यौगिकानि द्वादश नामानि दर्शितानि शत० ब्रा० १३ काण्डे । "एष वै प्रभूर्नाम यज्ञः १ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव प्रभूतं भवति । एष वै विभूर्नाम यज्ञः २ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव विभूतं भवति । एष वै व्यष्टिर्नाम यज्ञः ३ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव व्यष्टं भवति । एष वै विष्टतिर्नाम यज्ञः ४ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव विष्टतं भवति । एष वै व्याप्तिर्नाम यज्ञः ५ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव व्याप्तं भवति । एष वा ऊर्जस्वान्नाम यज्ञः ६ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेवोर्जस्वद्भवति । एष वै पयस्वान्नाम यज्ञः ७ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव पयस्वद्भवति । एष वै ब्रह्म वर्चसी नाम यज्ञः ८ । यत्रैतेन यज्ञेन यजन्त आत्राह्मणो वर्चसी जायते । एष वाव्यतिव्याधिनामयज्ञः ९ । यत्रैतेन यज्ञेन यजन्त आराजन्योऽतिव्याधिर्जायते । एष वै दीर्घो नाम यज्ञः १० । यत्रैतेन यज्ञेन यजन्तऽआदीर्घारण्यं जायते । एष वै क्षुद्रिनाम यज्ञः ११ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव क्षुद्रं भवति । एष वै प्रतिष्ठा नाम यज्ञः १२ । यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव प्रतिष्ठितं भवति" । "तरति ब्रह्महत्यां योऽश्वमेधेन यजते" शत० ब्रा० "अश्वमेधेन शुध्यन्ति महापातकिनस्त्विमे" भा० अश्व० प० ।

अश्वमेध पु० अश्वमेधोऽस्यास्य अर्श० अच् । राजर्षिभेदे । "यो मरुतः प्रवोचत्यश्वमेधाय सूरये" ऋ० ५, २७, ४ । अश्वमेधाय राजर्षये" भा० ।

अश्वमेधिक न० अश्वमेधमधिकृत्य कृतः ग्रन्थः ठक् ठञ् वा । महाभारतान्तर्गते चतुर्दशे पर्व्वणि । "ततोऽश्वमेधिकं पर्व सर्व्वपापप्रणाशनम्" "ततोऽश्वमेधिकं पर्व प्रोक्तं तच्च तदुत्तमम्" इति च भा० आ० प० ।

अश्वमेधीय पु० अश्वमेधाय हितः "अश्वमेधाच्च च" पा० छ । अश्वमेधयोग्ये पशौ तल्लक्षणम् अश्वमेधशब्दे उक्तम् । यात् ठञ् । अश्वमेधिकोऽप्युक्तार्थे ।

अश्वया स्त्री अश्वमिच्छति अश्व-क्यच् "न छन्दस्युपसर्गस्येति" पा० नेत्त्वदीर्घौ भावे अ । इच्छायाम् "अप्रराश्वयोत रथया" ऋ० ८, ४६, १० । "अश्वया अश्वेच्छया" भा० ।

अश्वयु त्रि० अश्वोऽस्यास्ति युच् । १अश्वयुक्ते "गव्युरश्वयुरीयते" ऋ० २१, १५ । अश्वमिच्छति क्यच् वेदे नि० नेत्त्व दीर्घौ उन् । २अश्वेच्छावति । अश्वयुर्गव्यूरश्वयुः" ऋ० १, २१, १४ । "अश्वयुरश्वानिच्छन्" भा० ।

अश्वयुज् स्त्री अश्वेन हयसदृशाकारेण युज्यते युज–क्विप्। १अश्विनीनक्षत्रे तस्य तथाकारत्वमस्मिन्नाख्यायिकाग्रन्थे उक्तम्। अश्वयुजि जातः अण् तस्य वा लुक्। अश्वयुक् २तन्नक्षत्रजाते त्रि० लुगभावे आश्वयुजः स्त्रियां ङीप्। अश्वेन हयाकारवता नक्षत्रेण युज्यते पौर्णमास्यन्ते मासे आधारे क्विप्। ३चान्द्राश्विनमासे "अश्वयुक्कृष्णपक्षस्य आद्यं कुर्य्यादहर्दिने" स्मृतिः। अश्वेन नक्षत्रेण युक् पौर्णमासी अस्यस्य अर्थ० अच्। अश्वयुजोऽप्यत्र रत्नमाला० अश्वयुजा युक्ता पौर्णमास्यस्मिन् प्रज्ञा० अण् आश्वयुजोऽप्यत्र। कर्म्मणि क्विप्। अश्वेन युक्ते ४रथादौ। अश्वेन युनक्ति रथम् कर्त्तरि क्विप्। रथादौ ५अश्वयोजके त्रि०। "वयोद्यो अश्वयुजः परिज्मयः" ऋ०भा०५,५४,२।

अश्वरक्षक पु० अश्वं रक्षति रक्ष–ण्वुल्। घोटकपालके।

अश्वरत्न न० अश्वोरत्नमिव उपमि०स०। उच्चैःश्रवसि तस्य हयश्रेष्ठत्वात्तथात्वम् "मध्यमानेऽम्बुधौ जातमश्वरत्नमनुत्तमम्" भा० आ०प० १७अ०। हयरत्नादयोऽप्यत्र "हयरत्नमहारि च" कुमा०।

अश्वरथ पु० अश्वयुक्तोरथः। १अश्वयुक्ते रथे। गन्धमादनसन्निकटायाम् २नद्यां स्त्री। "पञ्चवर्षाणि पुष्पाणि पातन्ते भरतर्षभ!। प्रत्यक्षं सर्वभूतानां नदीमश्वरथां प्रति" भा० व०प० १६०अ०।

अश्वराज पु० अश्वानां राजा श्रेष्ठत्वात् टच्। उच्चैःश्रवसि "यत्र जज्ञे महावीर्य्यः सोऽश्वराजो महाद्युतिः" भा० आ०प०१७अ०। भगवद्विभूतित्वादपि तस्य श्रेष्ठत्वम् "उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम्" गीता।

अश्वरोधक पु० अश्वं रुणद्धि रुध–ण्वुल्। करवीरवृक्षे।

अश्वरोह पु० अश्वं रोहति रुह–अच् उप०स०। अश्वारोहे सादिनि।

अश्वल त्रि० अश्वं लाति ला–क इत०। १हयग्राहके ऋषिभेदे "अथ हजनकस्य वैदेहस्य होताश्वलो बभूव" इ०उ०। तत्प्रश्नैः याज्ञवल्क्यं प्रति प्रश्नप्रतिवचनरूपाख्यायिकाप्रतिपादके २ब्राह्मणे च तत्र "अथ हजनकस्येत्यारभ्य ततोऽहोताश्वलोविरराम" इत्यन्तम्" इ०उ०। गोत्रापत्ये नडा० फक्। आश्वलायनः। तद्गोत्रापत्ये तेन प्रोक्तसूत्रग्रन्थसूत्रे कृतम् तस्मिन्।

अश्वलक्षण न० अश्वानां शुभाशुभसूचकत्वं लक्ष्यतेऽनेन लक्ष–करणे ल्युट् इत०। अश्वस्य शुभाशुभसूचके चिह्नभेदे अश्वशब्दे तल्लक्षणोक्तम्।

अश्वललित न० उत्तरत्राकरोक्ते त्रयोविंशत्यक्षरपादके वर्णवृत्तभेदे "यदि ह नजौ भजौभ्जभलगास्तदाश्वललितं हरार्कयतिमत्"। इदमहितनयेति छन्दोम०।

अश्वलाला स्त्री अश्वस्य लालेवाकृत्या। अक्षसर्पे हलाहलसर्पे जटाध०। अश्वलोमेति पाठान्तरम्। अश्वस्य लोमेव आकृतिरस्य" तत्र विषहः।

अश्ववक्त्र पु० अश्वस्य वक्त्रमिव वक्त्रमस्य। १किम्पुरुषे देवयोनिभेदे अश्ववदनहयमुखादयोऽप्यत्र। २हयग्रीवे विष्णुमूर्त्तिभेदे अश्वशिरःशब्दे विवृतिः। तद्ध्यानेन च तन्मूर्त्तिरुक्ता तन्त्रसा०। "शरच्छशाङ्कप्रभमश्ववक्त्रं सुकान्तमैराभरणैः प्रदीप्तम्। रथाङ्गशङ्खान्वितबाहुयुग्मं जानुद्वयन्यस्तकरं भजामः"।

अश्ववत् त्रि० अश्वोऽस्यास्ति मतुप् मस्य वः। १अश्वयुक्ते। "दधानो गोमदश्ववत् सुवीर्य्यम्" ऋ० ८,४६,५। मन्त्रे क्वचित् दीर्घः अश्वावान्। "भोजनमश्वावन्तं गोमन्तमाघृणे नरः" ऋ० १,८२,४। अश्व इव अश्वस्येव वा वति। २हयसदृशे अव्य०। अश्वेन तुल्यं क्रिया वति। ३हयकृतक्रियातुल्यक्रियायाम् अव्य०। अश्वमर्हति वति। ४हयार्हे अव्य०। [नोहेः सादिनि।

अश्ववह पु० अश्वेन उह्यते वह–कर्म्मणि वा अच्। हयनिवारके सादिनि "दुःखेन निवर्त्तकस्त्रश्ववाराः" भाषः। ण्वुल्। अश्ववारकः तत्रैव। ल्युअश्ववारोऽप्यत्र। अश्ववारलक्षणादिकमुक्तमश्वशास्त्रे यथा "ब्राह्मणान् यज्ञिदानेन साम्ना चैव तु क्षत्रियान्। वैश्यं दण्डेन शब्देन शूद्रं दण्डेन वाहयेत्। प्रत्यूषे वाहयेद्विप्रं क्षत्रियं प्रहरे गते। वैश्यं संन्ध्यागते काले शूद्रं रात्रौ च वाहयेत्। सत्त्वं च त्रिविधं प्रोक्तमुत्तमाधममध्यमम्। उत्तमं चोपशामेन साम्ना दण्डेन मध्यमम्। शब्दाङ्केन च दण्डेन वाहये दधमम्बुधः। सहजे निर्मले वाहे तैलदुग्धसमद्युतिः। प्राणिश्च द्विविधा प्रोक्ता बलदौर्बल्यसम्भवा। बलिनो दुर्बलस्येन दुर्बलोऽपि बलेन वा। श्रमेणोपाधिकायांश्च मत्वा ज्ञात्वा च वाहयेत्। सार्द्रां सुकठिनां चैव पाषाणोदकसंयुताम्। तृणकाष्ठसमायुक्तां रङ्गभूमिं तु वर्ज्जयेत्। समां च विपुलां चैव किञ्चित्पांशुसमन्विताम्। एकान्ते विजने रम्ये रङ्गभूमिं तु कारयेत्। स्थूलः क्रोधी च मूर्खश्च चित्तोत्सुकचलासनः। अस्थाने दण्डपाती यो वाजी तस्य न सिध्यति। प्रचलति यस्य कटिरूर्द्धं बाह्वोर्दण्डपातः। न

तस्य वाहनं वाजी दुर्लभं वाजिवाहितम् । दृढासनोऽथ तत्त्वज्ञो जितसुश्चिरिरालसः । अविरागी स्थिरश्चापि यदेते वाजिवाहकाः । चित्तं यो नैव जानाति तुरगस्य समासतः । न वहन्ति हयास्तस्य दण्डपातेन ताड़िताः । क्षेपिते वलिते भीते तथा चोन्मार्गगामिनि । कुपितोद्भ्रान्तचित्ते वा षट्सु दण्डं निपातयेत् । क्षेपिते ताड़येन्मूर्द्धि जानुभ्यां वलिते तथा । क्रुद्धे उरसि हन्तव्यो भ्रान्तचित्ते तथोदरे । भीतं च ताड़येत्पश्चान्मुखे चोन्मार्गगामिनम् । ज्ञात्वा दोषं च रूपं च स्थानेष्वेतेषु ताड़येत् । अस्थानताड़ितोवाजी यावज्जीवं न सिध्यति । भो जहाति च तद्दोषं यावज्जीवत्वसौ हयः । धाराः पञ्च प्रवक्ष्यामि मुनिभिर्याः प्रकीर्त्तिताः । प्रथमा विक्रमा धारा द्वितीया पुलका स्मृता । तृतीया पूर्णकण्ठी तु चतुर्थी त्वरिता स्मृता । पञ्चमी चैव या धारा निरालम्बा प्रकीर्त्तिता । यदी चैव तु या धारा श्रूयते न तु दृश्यते । विक्रमा गतिधारा च चतुष्का पुलका मता । मुखपादसमायुक्ता पूर्णकण्ठी तु सा भवेत् । स्वेच्छया त्वरिता धारा ताड़िता चैव पञ्चमी । यदी चैव तु या धारा स्वर्गलोकेषु गीयते । वल्गाश्च संप्रवक्ष्यामि मुनिभिः परिकीर्त्तिताः । पुष्पवन्ती च गोकर्णी तूलोत्तुला तुला दृढा । नागखण्डी पुष्पधारी दुष्टी च रक्तनासा । द्विरन्ध्री चैकरन्ध्री च शुभगा शोभना मता । इत्येता द्वादश वल्गा मुनिभिः परिकीर्त्तिताः" "आरूढकर्णमध्ये तु मनो लगति वाजिनः" शनैस्तु वाहयेत्पूर्वं पश्चात्तस्य समादिशेत् । न वक्रो न तथोत्तानो न कुब्जो नाग्रगोमुखः । न भवेत्तस्याग्रगात्तस्तु स भवेद्दुष्टवाहकः । स्थिरोरुः स्थिरपादश्च त्रिकोन्नतस्थिरासनः । दक्षिणादिदृढस्तस्य वासने तु दृढः सदा । अश्ववाराः समाख्याताः शेषास्तु भयदायकाः । ग्रीष्मादिषु न वर्त्तव्यमृतुषु त्रिषु वाहनम् । हेमन्तादिषु वर्त्तव्यं सादिभिः शास्त्रवेदिभिः । प्रतिपत्सु त्रयोदश्यां पञ्चम्यां वा सिते दले । धृतसिद्धातियोगेषु वासरे चन्द्रसूर्ययोः । मूलरोहिणीहस्तेषु पुष्ये चैवोत्तरासु च । एवंविधे दिने सादी वाहान् संवाहयेत् शुभे । रङ्गभूमौ च रेवन्तं स्थापयेत् पूजयेत्ततः । पुष्पैर्धूपैः प्रदीपैस्तु चन्दनैः पायसैस्तथा । पक्वान्नैः पञ्चशब्दैश्च प्रातःशुचिसुवाससा । रक्ताम्बरधरोभूत्वा रक्तपुष्पधरस्तथा" । "एकविंशतिवारांश्च ततः पर्य्याणयेद्धयम् । क्रोशमेकं तमारुह्य नवेच्छिक्षां शनैःशनैः । वल्गाग्रहश्च कर्त्तव्यः सव्यापसव्यमेव च । विक्रमा पुलका पूर्णकण्ठी च त्वरिता तथा । खल्लीनादौ प्रयोक्तव्या सादिना वाजिनां क्रमात् । नातिस्थूलं नाति ह्रस्वं न स्रव्यं नातिकर्कशम् । सप्ताङ्गुलप्रमाणन्तु खल्लीनं कारयेद्बुधः । खल्लीनादिषु लोहेषु धारयेद्विक्रमादिषु । क्रमेणैव तुरङ्गाणां कटानि संप्रयोजयेत् । खल्लीनादौ तु धारास्तु यदा सुशिक्षितो हयः । तदा कटेषु तं सादी भ्रामयेद्विक्रमादिभिः । शतहस्तादिकां भूमिं सप्तहस्तावसानिकाम् । भ्रामयेद्वाजिनं सादी सव्यं चैवापसव्यकम् । मण्डलं चतुरस्रं च गोमूत्रं चार्द्धचन्द्रकम् । नागपाशं क्रमेणैव भ्रामयेत्कटपञ्चकम् । एवमन्येषु लोहेषु त्रिष्वेव भ्रामयेत्कटे । एवं वाहयेद्वाहं तस्य कष्टं न जायते । दद्याद्वयमभीतस्य भीतस्यापि हरेद्भयम् । रहस्यं सादिनामेतद्वाहनेऽस्मिन्निवेदितम् । पूर्वोक्तेषु च देशेषु षट्सु दोषेषु ताड़येत् । न जातु सादिनान्यस्मिन् काले दोषशतैरपि । दृश्यमानस्य अशुभ्रं यो दोषः सादिदोषतः । जायते ऽसौ निराकर्त्तुं सादिना नैव शक्यते । एवं शास्त्रविधानेन यः सादी वाहयेद्धयान् । हयस्तस्य सिध्यन्ति भवन्ति फलदायकाः । वाहनं यच्च दुष्टं च धूपलेपनमन्त्रकैः । तदहं संप्रवक्ष्यामि मुनिभिः कीर्त्तितं यथा । अस्थिभिर्दग्धनैर्द्धैव हकाणां च यथा बुधैः । विषमत्रिकादंष्ट्राभिः धूमसंवह सर्षिषा । एलागुरुमदोशीरनागकेसरचन्दनैः । सर्ज्जिकातैलसंयुक्तो धूपयेद्दुष्टवाजिनम् । विषलोहगदैलाभिस्तैलाज्यदधिचन्दनैः । निःशेषदोषनाशाय धूप उक्तो हि वाजिनाम् । विशिष्य गोमयैः प्रातर्निशीथे सर्वसन्धिषु । अष्टम्यां च विशेषेण दुष्टाः सिध्यन्ति धूपिताः । काश्मीरं चन्दनं कौतीसिद्धार्थमरिचानि च । सैन्धवं वड़वामूत्रं गोमूत्रं कर्णजं मलम् । सुनिगुप्तानि पित्तानि कषायाः सवचानि च । अङ्गनं सर्वदुष्टानां देयं पर्वणि पर्वणि । अनेनाभ्यङ्क्तितो वाजी निर्बाधमधिगच्छति । कोपभोहं भयं त्यक्त्वा वश्यः स्यात्सादिनोऽचलम्" ।

अश्ववाह पु० अश्वं वाहयति चालयति वह–णिच्–अण् । अश्वचालके सादिनि । ण्वुल् । अश्ववाहकोऽप्यत्र । ण्वु अश्ववाहनोऽप्यत्र पु० ।

अश्वविक्रयिन् त्रि० अश्वं विक्रेतुं शीलमस्य वि+क्री–शीलार्थे इनि ईत० । हयविक्रयाजीविकायुक्ते त्रिका० ।

अश्वविद् पु० अश्वं हयहृदयं वेत्ति विद–क्विप् ईत० । १ नलनामके तस्याश्वहृदयज्ञता वर्णिता" भा० व० अ० ७२ अध्या० । यथा "हृतपर्णं प्रति बाहुकरूपस्य नलस्योक्तिः "बाहुकस्तु-

वाचाथ देहि विद्यामिमां मम। मत्तोऽपि चाश्वहृदयं मत्तोऽपि पुरुषर्षभ!। ऋतुपर्णस्ततोराजा बाहुकं कार्य्यगौरवात्। हयज्ञानस्य लोभाच्च तं तथेत्यब्रवीद्वचः। यथोक्तं त्वं मत्तोऽप्येतन्मत्तोऽपि हृदयं परम्। निक्षेपोमेऽश्वहृदयं त्वयि तिष्ठतु बाहुक'। अश्वं विन्दते विद्-क्विप्। २अश्वलब्धरि त्रि० "परि णो अश्वमश्ववित्पुमत्" ऋ० ६,६१,२। "अश्ववित् अश्वस्य लम्भकः" भा०।

अश्ववैद्य पु० ६त०। घोटकचित्सके तच्चिकित्साप्रकारः। जयदत्तकृतेऽश्वशास्त्रेऽवसेयः।

अश्वशङ्कु पु० ६त०। १अश्ववन्धनार्थे कीले। अश्वस्य शङ्कुरिव। २दनुपुत्रभेदे "चत्वारिंशद्दनोः पुत्राः ख्याताः सर्वत्र भारत"। इत्युपक्रम्य "अयःशिरा अश्वशिरा अश्वशङ्कुश्च वीर्य्यवान्" भा०आ०प० ६० अध्या०।

अश्वशाला स्त्री ६त०। हयस्थाने मन्दुरायां वाजिशालायाम् तत्करणविधिश्चाश्वशास्त्रे। यथा "प्रागुदक्प्रवणे देशे वालुकाकाष्ठवर्जिते। चितायैत्यविहीने च शालां कुर्वीत पण्डितः। सुशुक्ला सा च कर्त्तव्या दृढकोटाद्यसंयुता। शिशिरे स्थापयेद्देवं रेवन्तं पूजयेत्सदा। कार्य्या त्रिहस्तविस्तीर्णा तालाख्या पिण्डिका शुभा। शालाप्रमाणदीर्घा च तस्यां वासं प्रकल्पयेत्। द्वौ हस्तावुच्छ्रये तस्या मानं चैवं प्रकीर्त्तितम्। कर्कन्धूकाष्ठदण्डं च प्रान्तेऽस्याः स्थापयेद्बुधिः" वालुका पूरितं कार्य्यं संस्कृतं चत्वरं तथा। लुण्ठनाय च वाहानां भवेच्चङ्क्रमणाय च" "जय०अश्व०या०। "दहति ते मत्तं कोषागारमायुधागारमश्वशालां हस्तिशालाञ्च क्रुद्धः" भा०व० प० १६७ अ०।

अश्वशास्त्र न० अश्वलक्षणादिज्ञापकं शास्त्रम्। शालिहोत्रजयदत्तादयो हयलक्षणादिज्ञापके १शास्त्रे तन्मूलके जयदत्तकृते २शास्त्रे च।

अश्वशिरस् न० ६त० १वाजिमस्तके। अश्वस्य शिरइव शिरोऽस्य। २दानवभेदे अश्वशङ्कुशब्दे विवृतिः। "अयःशिरा अश्वशिरा अश्वःशङ्कुश्च वीर्य्यवान्। तथागगनसूर्य्यश्च वेगवांश्चात्र पञ्चमः। पञ्चैते जज्ञिरे राजन्! वीर्य्यवन्तोमहासुराः। कैकयेषु महात्मानः पार्थिवर्षभसत्तमाः" भा०आ०प० ६६अध्या०। ३हयशिरसि विष्णुमूर्त्तिभेदे, ताडङ्कमूर्त्तिधारणशब्दे "भा०शा०प० ३४२अध्या०। "तेऽनुशिष्टा भगवता देवाः सर्षिगणास्तदा। नमस्कृत्य भगवते जग्मुर्देवान् यथेप्सितान्। गतेषु तिदिवौकस्सु ब्रह्मैकः पर्य्यवस्थितः। दिदृक्षुर्भगवन्तं तमनिरुद्धतनौ स्थितम्। तं देवो दर्शयामास कृत्वा हयशिरोमहत्। साङ्गानावर्त्तयन् वेदान् कण्ठताल्वदिरुद्भवान्। व्यास उवाच। ततोऽश्वशिरसं दृष्ट्वा तं देवमिततेजसम्। लोककर्त्ता प्रभुर्ब्रह्मा लोकानां हितकाम्यया। सूक्ष्मं प्रणम्य वरदं तस्थौ प्राञ्जलिरग्रतः। स परिष्वज्य देवेन वचनं श्रावितस्तदा। श्रीभगवानुवाच। लोककार्य्यगतीः सर्वास्त्वं चिन्तय यथाविधि। धाता त्वं सर्व्वभूतानां त्वं प्रभुर्जगतो गुरुः। त्वय्यावेशितभारोऽहं धृतिं प्राप्स्याम्यधोक्षजा। यदा च सुरकार्य्यस्य अविषह्यं भविष्यति। प्रादुर्भावं गमिष्यामि तदात्वज्ञानदैशिकम्। एवमुक्त्वा हयशिरास्तत्रैवान्तरधीयत"। "कपर्द्दिने वराहाय एकशृङ्गाय धीमते। विवस्वतेऽश्वशिरसे चतुर्मूर्त्तिष्टते सदा" इति च तत्रैव।

अश्वशृगालिका स्त्री अश्वशृगालयोर्वैरं इवात् वैरे वुन्। हयशृगालयोर्वैरे शब्दरत्ना०।

अश्वश्वन्द्रा त्रि० अश्वैश्चन्द्रयति आह्लादयति चदि-णिच् रक् ३त० वेदे ष्टुत्वं सुट्। हयेनाह्लादिकायां स्त्रियां "गोमघा जरित्रे अश्वचन्द्राः" ऋ० ६,२५,४। "अश्वचन्द्राः अश्वैराह्लादयन्त्यः" भा०।

अश्वषड्गव न० अश्व+षट्के षड्गवच्। हयषट्के।

अश्वसनि त्रि० अश्वं सनुते ददाति-सन-क्विन् ६त०। हयदायके। "यस्तेऽश्वसनिर्मत्तः"। यजु० ८,१२। अश्वसवनादि०।

अश्वसा त्रि० सन-विट-ङा ६त०। हयदातरि। "गोषणिं धियमश्वसां वाजसातम" ऋ० ६,५२,१०।

अश्वसाद पु० अश्वं सादयति गमयति सद-गतौ णिच्-अण् उप०स०। सादिनि।

अश्वसादिन् पु० अश्वे सीदति सद-णिनि ७त०। सादिनि (घोड़सओयार) "प्रतिप्रहाराञ्चमश्वसादी" रघुः।

अश्वसेन पु० १जिनपितृभेदे २रूपभेदे यस्य पुत्रः सनत्कुमारः कुरुक्षेत्रस्थेक्षुमतीनदीसमीपवासिनि तक्षकसुते ३नागभेदे च। "तक्षकश्चाश्वसेनश्च नित्यं सानुचरावुभौ। कुरुक्षेत्रे च वसतां नदीमिक्षुमतीमनु" भा०आ०प० २अध्या०। "अश्वसेनोऽभवत्तस्य तक्षकस्य सुतो बली। स तीक्ष्णमकरोद्यत्नं मोक्षार्थं जातवेदसः"। भा०आ०प० २२६अध्या०।

अश्वसेनसूपनन्दन पु० ७त०। सनत्कुमारे त्रिका०।

अश्वस्तन त्रि० श्वोभवः श्वस्+ट्यु-तुट्च श्वस्तनः न०त०। परदिनास्थायिनि वर्त्तमानदिनमात्रभवे। "अश्वस्तनविधानेन कर्त्तव्यं मनुरब्रवीत्" मनुः स्त्रियां ङीप्।

अश्वस्तनिक त्रि० अश्वस्तनस्यास्य मत्वर्थे ठन् न०त०। परदिनास्वाविधने वर्त्तमानदिनपर्य्याप्तधनसञ्चयकारिणि गृहस्थभेदे "कुम्भधान्यकोवा स्यात् कुम्भीधान्यक एव वा। त्र्यहैहिकोवापि भवेदश्वस्तनिक एव वा" मनुः।

अश्वस्तोमीय न० अश्वस्य स्तोमं स्तुतिरस्यस्य मत्वर्थे छ। हयस्तुतियुक्ते सूक्तभेदे तच्च सूक्तम्" ऋ० १,१६२। मानोमित्र इत्यादि द्वाविंशत्यृचम्। २ तदाध्ये होमजाते च। "अश्वस्य वाऽआलब्धस्य मेध उदक्रामत्तदश्वस्तोमीय मभवदश्वस्तोमीयं जुहोत्यश्वमेव मेधसा समर्धयति। आज्येन जुहोति। मेधोवा आज्यं मेधोऽश्वस्तोमीयं मेधमेवाभिसंस्कृतो दधात्याज्येन जुहोत्येतद्वै देवानां प्रियं धाम यदाज्यं प्रियेणैवैनाधाम्ना समर्धयति। अश्वस्तोमीयं हुत्वा द्विपदा जुहोति। अश्वोवाऽअश्वस्तोमीयं पुरुषो द्विपदा, द्विपाद्वै पुरुषो द्विप्रतिष्ठस्तदेनं प्रतिष्ठा समर्धयति तदाहुः अश्वस्तोमीयं पूर्वं होतव्यं द्विपदा इति पशवो वा अश्वस्तोमीयं पुरुषो द्विपदा यदश्वस्तोमीयं हुत्वा द्विपदा जुहोति तस्मात् पुरुष उपरिष्टात् पशूनधितिष्ठति षोडशाश्वस्तोमीया जुहोति" शत०ब्रा०।

अश्वस्थान न० ६तत्०। वाजिशालायाम् "अश्वस्थानात् गजस्थानात् सङ्गमात् वल्मीकात् ह्रदात्" विष्णुध०पुरा०।

अश्वहनु पु० अश्वस्य हनुरिव हनुरस्य। "दानवभेदे हरिश्चाश्व हनुश्चैव वीरौ तावथ सृष्टिमौ" हरिवं० २६ अध्या०।

अश्वहन्तृ पु० अश्वं हन्ति हन-तृच् ६तत्०। १करवीरे "वीजं विड्वराश्वहन्तोर्हरिद्रे ह्रस्वतोद्वयम्" भावप्र०। २हयनाशके त्रि०।

अश्वहय पु० अश्वेन हियते गच्छति हि-कर्त्तरि अच्। अश्वेन गतिमति "प्रत्यर्द्धि यत्तानामश्वहयो व रथानाम्" ऋ०१०,२६,५। अश्वेन हीयते व्याप्यते कर्म्मणि अच्। अश्वव्याप्ये। "सृजन्त्यश्वहयैरनिशितं नभोभिः ऋ०६,६६,,२।

अश्वहृदय न० अश्वस्य हृदयं मनोगतभावादि। हयाभिलाषे २४दावेदकविद्याभेदे च अश्वविच्छब्दे उदा०।

अश्वाक्ष पु० अश्वस्याक्षीव अच् समा०। देवसर्षपवृक्षे।

अश्वादि पु० पाणिन्युक्ते गुणागुणसूचकनिमित्ते संयोगरूपेऽर्थे ठञ्प्रत्ययनिमित्ते १शब्दसमूहे सच गणः अश्व, अश्वत्थ गण, अर्णा उमा गङ्गा वर्षा वसु। गोत्रापत्ये २फञ्प्रत्ययनिमित्ते शब्दसमूहे च स च गणः अश्व, अश्वत्थ गर्ग, शूद्रक, विद, पुट, रोहिण, खर्जूर, खड्गार, वक्त्र, पिजल भड्गिल, भण्डिल, भड्गित, भण्डित, प्रक्षत, रामोद, चान्त्र, काश, तीक्ष्ण, गोलाङ्ग अर्क, खर, स्फुट, चक्र, अविष्ट, पविन्द, पवित्र, गोभिल, श्याम, धूम, धूम्र, वाग्मिन्, विश्वानर कुट, यप (आत्रेये)। जन, जड़, खड़, योध, अर्ह, कित, विशम्भ, विशाल, गिरि, चपल, चुप, दासक, वैल्व प्राच्य, धर्म्म, आनडुह, (पुंसि)जात, अर्जुन, प्रहृत, दुमनस् दुर्मनस्, मनस्, प्रान्त, ध्वन, आत्रेय (भरद्वाजे) भरद्वाज, (आत्रेये) उत्स, आतव, कितव, वद, धन्व, पाद, शिव, खदिर अश्वादि।

अश्वामघ त्रि० अश्वोमघं धनमस्य बहु० दीर्घः। "अश्वरूपधनस्वामिनि 'अश्वामघा गोमघा वा इत्येवम्" ऋ०७,०३१,१

अश्वायुर्वेद पु० अश्वस्यायुर्वेदोऽनेन विद-घिञ् धञ्। हयायुर्व्वृद्धिकरे शास्त्रे तच्च शालिहोत्रेण सुश्रुतनामानं स्वसुतं प्रत्युपदिष्टम् तन्मूलञ्च जयदत्तकृतञ्च अश्वशब्दे विवृतिः।

अश्वारि पु० अश्वस्यारिः ६तत्०। महिषे।

अश्वारूढ पु० अश्वमारूढोऽनेन। सादिनि अश्वारोहिणि।

अश्वारोह पु० अश्वमारोहति आ+रुह-अण् उप०स। हयवाहके, हयारोहणेन २युद्धकर्त्तरि च। अश्वसम्बन्धिद्रुमिवारोहोमूलमस्य। ३अश्वगन्धायां स्त्री।

अश्वावतान पु० अश्वस्येवावतानोऽस्य। ऋषिभेदे। विदा० अपत्ये अञ्। आश्वावतानः तद्गोत्रापत्ये बहुषु गोपवना० न लुक्। आश्वावतानाः। [गन्धाढ्ये॥

अश्वावरोहक पु० अश्वस्यारोहति ण्वुल्। अश्व-

अश्विन् पु० द्वि० अश्वाः सन्ति ययोः इनि, अश्विन्यां नक्षत्रे भवौ "सन्धिवेलाद्यृतुनक्षत्रेभ्यः पा० अण् "नक्षत्रेभ्योवृद्धलुक्" पा० वा लुक् लुकि स्त्रीप्रत्ययस्य लुक्, अश्वा उत्पत्तिः स्थानत्वेनास्त्यस्य इनिवा। १सूर्य्यवैद्ययोः। "किमश्विनौ सोमरसं पिपास्तः" भट्टिः "वासोदवन्द्रसालोक्यमश्विसालोक्यमत्रदः" मनुः। "त्वाष्ट्री तु सवितुर्भार्य्या बडवारूपधारिणी। असूयत महाभागा सान्तरीक्षेऽश्विनावुभौ" भा०आ०प०। "या वां कशा मधुमत्यश्विना सूनृतावती" यजु० ७,२। अश्वसद्दिक्प्राप्तैः अस्त्यर्थे इनि। "कपोलयोस्तयावर्त्तौ विद्येते वाजिनोर्यदि। तावाश्विनाविति प्रोक्तौ राज्यहर्द्धिकरौ परौ" इत्युक्तलक्षणयोः २हययोश्च द्वि०व०। ३हययुक्ते त्रि०। स्त्रियां ङीप्। "गोमा अग्नेऽविमाँ अश्वी" ऋ०४,२,५।

अश्विनी स्त्री अश्वस्येदमाकारोऽस्यास्य इनि ङीप्। सप्तविंशतिधाविभक्तराशिचक्रस्य प्रथमे भागे। अस्या-स्याकारत्वमस्यैषाशब्दे उक्तम्। "अश्विनीमघमूलानां गण्डा आद्यास्त्रिनाड़िकाः" ज्यो० नक्षत्रपरत्वे न०। "पुष्याश्विहस्ता लघुः" ज्यो० अश्वाया आकारोऽस्याः इनि ङीप्। हयरूपधारिण्यां त्वष्टृसुतायां २संविद्भार्या-यामरण्यात्सजशब्दे २६६८ पृ० विवृतिः।

अश्विनीकुमार पु० द्वि०व०। सूर्येण त्वष्टृसुतायां संज्ञायां वड़वारूपायामुत्पादितयोः स्वर्वैद्ययोः तदुत्पत्तिकथा भा० आ० प० ६६ अध्याये अश्विनीतनयपुत्रसुतादयोऽत्र। अरण्यात्सजशब्दे २६६८ पृ० विवरणम्।

अश्वीय न० अश्वानां समूहः छ। १हयसमूहे। अश्वस्य हितम् अपूपा० छ। २हयहिते। पक्षे यत्। अश्व्योऽप्युक्तार्थे।

अश्वीरस न० अश्वानासुर इव सख्यम् अच्समा०। सख्येहये।

अष दीप्तौ अक० गतौ, यज्ञे च सक० भ्वा०उभ०सेट्। अषति ते आषीत् आषिष्ट।

अषडक्षीण त्रि०न षन्निषड्क्षीणि श्रोत्रे न्द्रियाणि यस्य स बहुव्री०। तृतीयजनकर्णोक्तौ ह्यस्यामेव कृते मन्वादौ।

अषाढ(गाड़) पु०अषाढ(गाड़)या युक्ता पौर्णमासी आषाढी (गाड़ी)सा यत्र मासे अण् वा ह्रस्वः। वैशाखादितृतीये चान्द्राषाढ(ड)मासे। आषाढी पूर्णिमा प्रयोजनमस्य प्रयो-जनार्थे अण्। २ब्रह्मचारिधार्य्ये दण्डे, तस्य हि आषाढ-पौर्णमास्यां विहितकर्म्मोपयोगित्वात् तथात्वम् पृ०ह्रस्वः। अषाढोऽप्युभयत्र। स्वार्थे कन् तत्रैव। सह क्त बहे-ओत्त्वाभावः षत्वञ्च न०त०। असोढ़े त्रि० "अषाढं युत्सु पृतनासु पप्रिम्" यजु० २४,२०। "अषाढाय सहमानाय वेधसे" ऋ० २,२१,२।

अषाढा(ड़ा) स्त्री षाढिः साहनं सह-णिच्+क्तिन् टत्वम् अर्श आद्यच् न०त० पृषो० वा षत्वञ्च। अश्विन्यवधिके पूर्व्वादिके विंशे, उत्तरादिके एकविंशे च नक्षत्रे।

अष्टक न० अष्टौ अध्यायाः परिमाणमस्य अष्टन्+कन्। १पाणिनेरष्टाध्यायीरूपे, प्रत्येकमष्टाध्यायात्मके २ऋग्वे-दांशभेदे च ३अष्टसंख्यापरिमिते त्रि० "पैशुन्यं साहसं द्रोहईर्ष्यासूयार्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोध-जोऽपि गणोऽष्टकः" मनुः। "संख्यायाः संज्ञासङ्घसूत्रा ध्ययनेषु" पा०उक्तेः ३अष्टाङ्कसाध्ययनेऽपि। अष्टकं वि-दन्ति अधीयते वा "सूत्राच्च कोपधात्" पा० अध्येतृवेदि-तृप्रत्ययस्य वाऽलुक्ते लुक्। अष्टकाः पाणिनेः ४सूत्रा-ध्यायिषु ब०व०। ५अष्टसंख्यायाम् "ताराष्टकमिदं पुण्यं भक्तिमान् यः पठेन्नरः" तन्त्रम्। गङ्गाष्टकं पठति यः प्रयतः प्रभाते" वाह्नी०। [द्विकर्मत्वात्तत्त्वम्।

अष्टकर्ण पु० अष्टौ कर्णा अस्य। चतुर्मुखे ब्रह्मणि प्रतिसर्गं

अष्टकर्म्मन् अष्टौ कर्म्माण्यस्य। "आदाने च विसर्गे च तथा प्रैषनिषेधयोः। पञ्चमे चार्थवचने व्यवहारस्य वेक्षणे। दण्डशुद्धोः सदा रक्षेन्नाष्टमतिकोऽन्यः" उशनसोक्ताष्टविधकर्म्मयुक्ते नृपतौ "अष्टकर्म्मा दिवं याति राजा शक्राभिपूजितः" उश०। अष्टगतिकोऽत्र "तत्रा-दानं करादीनाम्। विसर्गो भृत्यादिभ्यो धनदानम् प्रैषोऽमात्यादीनां इष्टाइष्टानुष्ठानेषु। निषेधो इष्टा-इष्टविरुद्धक्रियासु। अर्थवचनं कार्यसन्देहेन राजा-ज्ञयैव तत्र नियमनम्। व्यवहारेक्षणं प्रजानाम्ह-णादिविप्रतिपत्तौ। दण्डः पराजितानां शास्त्रोक्त धनग्रहणम्। शुद्धिः पापे कर्म्मणि जाते तत्र प्राय-श्चित्तसम्पादनमिति" कुल्लूकभट्टः। मेधातिथिस्तु। अ-कृतारम्भः। कृतानुष्ठानम्। अनुष्ठितविशेषणम्। कर्म्मफलसंग्रहः। तथा सामदानभेददण्डाः। एत-दष्टविधं कर्मेत्याह। अथवा "ऋणिः ऋणिकृपयः। उदकसेतुबन्धनम्। दुर्गकरणम् कृतस्य संस्कारः नि-र्णयः। हस्तिबन्धनम्। खनिखननम्। सैन्यनिवेश-नम्। दारुणवनच्छेदनञ्चेत्यष्टौ"। तन्मूलन्तु अष्टवर्ग-शब्दे वक्ष्यते।

अष्टका स्त्री अश्नन्ति पितरोऽस्यां तिथौ अश-तकन्। "अष्टका पितृदैवत्ये" इत्यजादिपाठात् न ह्रस्वम्। "अष्टका तु समाख्याता सप्तम्यादिदिनत्रयम्" इत्युक्त-लक्षणे १सप्तम्यादिदिनत्रये, २दिनत्रयसाध्ये कर्मभेदे च तच्चा-श्वलायन गृ० दर्शितम् तदपि पौषमाघफाल्गुनानां कृष्ण सप्तम्यादिषु कर्त्तव्यं तत्र प्रधानमष्टमी, सप्तम्यामारम्भः अष्टम्यां क्रियं नवम्यामन्वष्टकेति भेदः। "अमावास्या चतुर्दश्योः पौर्णमास्यष्टकासु च" "अष्टकासु त्रयोदशरात्रत्रयात्मासु च रात्रिषु" इति च मनुः तच्च न पितृमात्रदैवत्यम् अन्यदैवत्य-मपि यथाह "पितृप्रदानाय मूले सुरष्टकासिक्थ एव च। कृष्णपक्षे वरिष्ठाहि पूर्व्वा चैन्द्री हि भाष्यते। प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदेविकी। आद्या पूर्वैः सदा कार्य्या मांसैरन्या भवेत्तथा। शाकैः कार्य्या तृतीया स्यादेष द्रव्यगतो विधिः वायु०पुरा०। मूले प्रधानस्थाने अमावस्या हि आद्यस्य प्रधानं कालः तद्दिति

यावत् रघु० । पञ्चभागे स्थालीपाकेन कार्य्यं "अपि वा स्थालीपाकं कुर्वीतेति" गोभिलः । एतद्विधानन्तु "स्थालीपाकं पशुस्थाने कुर्यात् यद्यानुकल्पिकम् । अपवेत्तं सवत्सायास्तरुण्या गोः पयस्तु" छन्दोगपरिशि० । अन्विति ओदनचरोः पश्चात् । अतएव । "पितरः स्नुहयस्त्वष्टकासु मघासु च । तस्माद्दद्यात् सदोद्युक्तो विद्वत्सु ब्राह्मणेषु च" याज्ञ० । तस्मादन्नं प्रधानं पूपादिकलूरकरणत्वेन शक्तानामावश्यकं, सदेति चवणात् । "अमावस्याष्टका द्वेधा कृष्णपक्षेऽवनद्यम्" । "पौषमासस्य रोहिण्यामष्टकायामथापि वा" या० स्मृ० । अत्रायं भेदः हेमन्तशिशिरयोश्चतुर्ष्वमपरपक्षाणामष्टमीष्वष्टका एकस्यां वा" आश्व० सू० उक्तेः समर्थासमर्थभेदेन चतुर्षु मासेषु कृष्णाष्टमीषु एकस्यां वा अष्टका कार्य्येति । आग्रहायण्या ऊर्द्धं तिसृष्वष्टकासु" ऋतन्तरोक्तत्वात्सम् । अन्वष्टकाशब्दे विवृतमेतत् । अष्टपरिमाणमस्याः कन् । अजादिपाठा० टाप् पित्त्वदैत्वे इति अस्य प्रायिकत्वात् ह्रिपका० नेत्त्वम् । ४अष्टमीतिथिमात्रे "अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी । ब्रह्माष्टका पौर्णमासी तस्मात्ताः परिवर्जयेत्" मनुः एतद्विधायां स्त्रियामष्टिका अत इत्वम् ।

अष्टकाङ्ग पु० अष्टकमङ्गं यस्य । नयपीठे त्रिका० तानि चाङ्गानि स्वाम्यमात्यसुहृत्कोषराष्ट्रदुर्गबलानि च । राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि चेत्युक्तानि अङ्गानि

अष्टकिक त्रि० अष्टकाः प्रत्यस्य ब्रोह्या० ठन् । अष्टकायुक्ते अत्र वा इनि अष्टकी । अर्थार्थे त्रि० स्त्रियां ङीप् ।

अष्टकृत्वस् अव्य० अष्टन्+क्रियाभ्यावृत्तौ कृत्वसुच् । अष्टधाभ्यावृत्तक्रियायाम् ।

अष्टकोण त्रि० अष्टौकोणा अस्य । १अष्टकोणयुक्तक्षेत्रे तन्त्रोक्ते २यन्त्रभेदे च "विन्दुत्रिकोणवसुकोणदशारयुग्ममिति" तन्त्रम् "२कुण्डभेदे अष्टकोणमथैशान्यामत्यन्तं च भयप्रदम्" हेमा० ब्र० ख० कुण्डप्र० । [क्रीते ।

अष्टक्य त्रि० अष्टकेन क्रीतः गवा० यत् । अष्टसंख्यान्वितेन

अष्टगव न० अष्टानां गवां समाहारः वीगवि० अच् । गवाष्टके तद्युक्ते शकटे तु अष्टागवमित्येव । "अष्टागवं धर्म्मं हरन्ति" स्मृतिः ।

अष्टगुण त्रि० अष्टभिर्गुण्यते गुण-अभ्यासे कर्म्मणि क । अष्टभिर्गुणिते अष्टाङ्के । "मिथ्यावादी च संख्याने दाप्योऽष्टगुणमत्ययम्" मनुः । "ददावष्टगुणैश्वर्य्यं तेषां तुष्टस्तु केशवः" भा० व० प्र० ८२ अध्या० "ततश्चाष्टगुणं पार्थ ! ब्राह्म्यमैश्वर्य्यमुत्तमम्" ८५ अध्या० । अष्टौ गुणा यस्य अष्टविधगुणयुक्ते ३ब्राह्मणे ते च गुणा गौतमेनोक्ताः यथा अथाष्टावात्मगुणा दया सर्व्वभूतेषु क्षान्तिरनसूया शौचमनायासोमङ्गलमकार्पण्यमस्पृहेति । यश्चैते न चत्वारिंशत् संस्काराः न चाष्टावात्मगुणाः न स ब्राह्मणः" । अष्टाङ्को गुणोऽस्य इतौ अष्टगशब्दस्य तदाङ्कपरता । ४अष्टाङ्कगुणके पदार्थे "अक्षादष्टगुणं चूर्णं चूर्णादष्टगुणं पयः । पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम् । घृतादष्टगुणं तैलं मर्द्दयेन्न तु खादयेत्" वैद्यकम् ।

अष्टगृहीत त्रि० अष्टकृत्वो गृहीतः इतौ सुजर्थोलुप्तः । अष्टवारगृहीते "रसमाज्यं मांसं पायसमिति संयूयादष्टगृहीतं गृहीत्वा जुहूयात्" गोभि० अष्टगृहीतं केवलमेवाघेनाष्टवारान् गृहीतम्" स० त० रघुनन्दनः ।

अष्ट(ष्टा)चत्वारिंशत् स्त्री अष्टाधिका चत्वारिंशत् मा० त० आत्वम् । (आटचङ्गिय) १संख्यायां २तत्संख्येये च । "अष्टचत्वारिंशत्संस्कारैः संस्कृत" इति मिताक्ष० गौत० । तत्र गौतमेन चत्वारिंशदेव संस्काराः अष्टौ गुणाश्च ब्राह्मण्यहेतुत्वेन दर्शिताः चत्वारिंशत् संस्काराः गुणसहिता अष्टचत्वारिंशदित्येके । ते च "गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्म्मनामकरणान्नप्राशनचौड़ोपनयनम् । चत्वारि वेदव्रतानि स्नानं सहधर्म्मचारिणीसंयोगः पञ्चानां यज्ञानामनुष्ठानं देवपितृमनुष्यभूतब्रह्मणामित्येषाञ्चाष्टकान्वष्टकापार्व्वणश्राद्धश्रावण्याग्रहायणीचैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्था, अग्न्याधेयमग्निहोत्रदर्शपौर्णमासावग्रयणं चातुर्मास्यनिरूढपशुबन्धसौत्रामणीति सप्त हविर्यज्ञसंस्था अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोड़शी वाजपेयोऽतिरात्रोऽप्तोर्य्याम इति सप्त सोमसंस्था इत्येते चत्वारिंशत् संस्काराः । अथाष्टावात्मगुणा दया सर्व्वभूतेषु क्षान्तिरनसूया शौचमनायासोमङ्गलमकार्पण्यमस्पृहेति यश्चैते न चत्वारिंशत् संस्कारा नवाष्टावात्मगुणा न स ब्राह्मणः सायुज्यं सालोक्यञ्च गच्छति । यस्य तु खलु संस्काराणामेकदेशोऽप्यष्टावात्मगुणा अथ स ब्राह्मणः सायुज्यं सालोक्यञ्च गच्छति अधिकं संस्कारशब्दे वक्ष्यते" गौ० संहितायां तु चत्वारिंशत्संस्कारैः संस्कृत इत्येव पाठः । मिताक्षरादृतं पाठस्तु उक्तरीत्या समर्थितः ।

अष्टतय त्रि० अष्टावयवा अस्य अष्टन्+तयप् । अष्टावयवे । "टिड्ढाणञ्" इति पा० सूत्रे तयपोऽदृष्टात् स्त्रियां ङीप् ।

अष्टयो । अवयवमाले तयप् । २अष्टसंख्यायां न० ।

अष्टतारिणी स्त्री ब०व० कर्म० संज्ञात्वात् द्विगुः । "तारा चोग्रा महोग्रा च वज्रा काली सरस्वती । कामेश्वरी च चामुण्डा इत्यष्टौ तारिण्योमताः" इत्युक्तासु तारादिषु अष्टसु तारिणीरूपदेवीमूर्त्तिषु ।

अष्टत्रिंश न० अष्टाधिकं त्रिंशम् । १चतुर्विंशतिसंख्यायां तत्संख्याते च "वैश्यस्याष्टत्रिंशाद्वर्षात् सावित्रीपतनं भवेत्" मार्कण्डेय पु० । "अष्टत्रिंशाच्चतुर्विंशतेः" म०त०रघु० ।

अष्टत्व न० अष्टनां भावः त्व । अष्टसंख्यायाम् ।

अष्टदंष्ट्र पु० ६त० दानवभेदे "अष्टदंष्ट्रयतदंष्ट्रो मेघनादो जनध्वजः" हरि० २२८ अ० ।

अष्टदल न० अष्टौ दलानि यस्य । अष्टपत्रकमले "लिखेदष्टदलं पद्मं भूतत्त्वत्रिकभूषितम्" तन्त्रम् ।

अष्टदिश् स्त्री ब०व० । कर्म० संज्ञत्वात् द्विगुः । पूर्व्वाग्नेयदक्षिणनैर्ऋतपश्चिमवायव्योत्तरैशानीरूपासु अष्टसु दिक्षु । "इन्द्रादीन् लोकपालांश्च अष्टदिक्षु च पूजयेत्" तन्त्रम् ।

अष्टदिक्करिणी स्त्री ब०व० अष्टदिक्स्थाः करिणः । "करिण्योऽभ्रमुकपिलापिङ्गलानुपमाः क्रमात् । ताम्रकर्णी शुभ्रदन्ती चाङ्गना चाञ्जनावतीत्युक्तासु ऐरावतादीनां प्रियासु अष्टसु हस्तिनीषु इत्यमरः ।

अष्टदिक्पाल पु० अष्टौ दिशःपालयन्ति पा-क्विच्-अण् उप०स० । "इन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशानरूपेषु अष्टसु दिक्पालेषु ।

अष्टदिग्गज पु० ब०व० अष्टदिक्स्था गजाः । "ऐरावतः पुष्करोको वामनः कुमुदोऽञ्जनः । पुष्पदन्तः सार्व्वभौमः सुप्रतीकश्च दिग्गजाः" इत्युक्तेषु अष्टसु दिक्स्थेषु ऐरावतादिषु गजेषु एतत्संख्यामाम्नाद्गजशब्दस्याष्टसंख्यार्थकत्वम् ।

अष्टद्रव्य न० ब०व० कर्मधा० संज्ञात्वात् द्विगुः । "अश्वत्थोडुम्बरप्लक्षन्यग्रोधसमिधश्चिताः । सिद्धार्थपायसाज्यानि द्रव्याण्यष्टौ विदुर्बुधाः" इत्युक्तेषु होमसाधनेषु अष्टसु द्रव्येषु । "लिखादयुक्तैर्जुह्वयाद्यैरष्टद्रव्यैर्दिगांगतः" तन्त्रसा० ।

अष्टधा अव्य० अष्टन्+प्रकारे धाच् । अष्टप्रकारे "भिन्नप्रकृतिरष्टधा" गीता । "सुरद्विपानामिव सामयोनिर्भिन्नोऽष्टधा विप्रससार वंशः" रघुः ।

अष्टधातु पु० ब०व० अष्टौ धातवः कर्म० संज्ञात्वात् द्विगुः । "स्वर्णं रूप्यञ्च ताम्रञ्च रङ्गं यशदमेव च । शीसं लौहं रसश्चेतिधातवोऽष्टौ प्रकीर्त्तिताः" इत्युक्तेषु अष्टसु स्वर्णादिषु सप्तसु तु रसवर्ज्जिताः सप्तैव धातवोऽभिहिताः किन्तु रसनिरूपणे "ततो रस इति प्रोक्तः स च धातुरपि स्मृतः" इत्युक्तेरष्टधातुताऽपि तस्याभियता "अष्टधातुमयप्रतिमा निर्माणे तु रसं विहाय पित्तलस्य ग्रहणम् "आरकूटं तथैव चेति" हेमा० भविष्योक्तेरिति भेदः ।

अष्टन् त्रि०ब०व०अव्य-व्याप्तौ कनिन् तुट् च । (आट) १"संख्याभेदे द्वयेकयोर्द्विवचनैकवचने" पा० निर्द्देशेन संख्यावाचकमात्रस्य संख्यापरत्वनिर्णयात् । २तत्संख्यान्विते च । "अष्टौ तान्यव्रतघ्नानि आपोमूलं फलं पयः । हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम्" स्मृतिः "निन्द्याश्चाष्टासु चान्यासु स्त्रियोरात्रिषु वर्जयेत्" मनुः "अष्टानां लोकपालानां वपुर्धारयते नृपः" । "अष्टाविमान् समासेन स्त्रीविवाहान् निबोधत" इति च मनुः । दशविंशतिशब्दयोः परतः समासे आदन्तादेश अष्टादशः । अष्टाविंशतिः त्रिंशदादौ वा अष्टत्रिंशत् अष्टात्रिंशत् अष्ट(ष्टा) चत्वारिंशत् अष्ट(ष्टा) पञ्चाशत् अष्ट(ष्टा)षष्टिः अष्ट(ष्टा)सप्ततिः अष्टाशीतिः अष्ट(ष्टा)नवतिः संख्याव्ययपूर्व्वकात् ततः बहुव्रीहौ डच् । "निरष्टे अश्नुते" शत०ब्रा० सप्ताष्टानि अहानि ।

अष्टप.द्(द) पु० अष्टौ पादा अस्य वा अन्यलोपः । १शरभे तच्छब्दे तल्लक्षणम् २लतायाञ्च हेम० ।

अष्टपदिका स्त्री अष्टौ पादा अस्याः अन्यलोपः ङीपि पद्भावे संज्ञायां कन् हुस्वः । (छापरमालि) लतायाम् । कनभावे । अष्टपदीत्यपि स्त्री ।

अष्टपल न० अष्टौ पलानि परमाणमस्य अण् द्विगोर्लुगनपत्ये" पा० तस्य लुक् "अपणत्तिफलाकल्के वज्रमाने गुडात् पले" । सर्पिषोऽष्टपलं पञ्चा मात्रां सन्दानलः पिबेत्" चक्रदत्तोक्ते घृतभेदे" ।

अष्टपुष्पी स्त्री अष्टानां पुष्पाणां समाहारः । अनिर्ज्ञीत संज्ञकत्वात् द्विगुः । पुष्पाष्टके । "कदाचिर्दुन्यस्ताष्टपुष्पिकापानोत्पादितक्रोधेन" कादं० अज्ञाताऽष्टपुष्पीति कन् । तत्रैव ।

अष्टभुजा स्त्री अष्टौ भुजा अस्याः । देवी माहात्म्यस्य तृतीयचरितदेवतायां महासरस्वत्यां तन्मूर्त्तेर्ध्यानशब्दे विवृतिः ।

अष्टम त्रि० अष्टानां पूरणः डट् मट् च । येन अष्टसंख्या पूर्य्यते तस्मिन् । "पैंगाचत्वाष्टमोऽध्वनः" "अष्टमं चायुषः स्थानमष्टमादष्टमं च यत् । तयोरपि व्यवस्थानं मारकस्थानमुच्यते" ज्योतिः परा० "गर्भाष्टमेऽब्दे कुर्व्वीत ब्राह्मणस्योपनायनम्" मनुः स्त्रियां ङीप् । "सौविष्टलाष्टमी" आम्र० सिद्धिकृत संबन्धिनी अष्टमी आकृतिः" कर्क० । सा च चन्द्रस्याष्टमकलाक्रियाकूटाधारूपे तिथिभेदे" । "चतुर्दशष्टमी चैव

अमावस्या च पूर्णिमा पर्व्वाण्येतानि राजेन्द्र ! रवि-संक्रान्तिरेव च" "अष्टम्यां बलिदानेन पुत्रनाशो भवेद्ध्रुवम् पुरा० । "अष्टम्याः शेषदण्डे च नवम्या आद्य एव च । अत्र या क्रियते पूजा विज्ञेया सा महाफला" ति०त०पुरा० । "अपरपक्षाष्टमीप्रदोषकाः" आह्नि० ।

अष्टमकालिक त्रि० अष्टमः कालः भोजनेऽस्यस्य ठन् । सार्द्धदिनत्रयोपवासानन्तरं चतुर्थदिवसे रात्रौ भोक्तरि-वानप्रस्थभेदे "नक्तं चान्नं समश्नीयाद्दिवा वाग्यत्व यत्नितः । चतुर्थकालिको वा स्यात् स्याद्वाप्यष्टमकालिकः" मनुः । "सु-निभिर्हिरण्यनं प्रोक्तं विप्राणां मर्त्यवासिनां नित्यम्" इत्युक्त्या दिवसे वारद्वयभोजनस्य विधानात् सार्द्धदिने सप्ताहार-मतोत्य चतुर्थदिवसे रात्रौ भोजने हि तथात्वं भवति ।

अष्टमङ्गल न० अष्टसंख्यितं मङ्गलम् या०त० । "सृगराजो वृषो नागः कलशो व्यजनं तथा । वैजयन्ती तथा भेरी दीप इत्यष्टमङ्गलम्" इत्युक्तेषु "लोकेऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणो गोर्हुताशनः । हिरण्यं सर्पिरादित्य आपोराजा तथाष्टम" इत्युक्तेषु च अष्टसु द्रव्येषु व०व० । अत्र कर्म्म० संज्ञा-त्वान्न द्विगुरिति भेदः ।

अष्टमङ्गलघृत न० अष्टभिर्द्रव्यैर्मङ्गलार्थं घृतम् । चक्रोदत्तोक्ते घृतभेदे "वचा कुष्ठं तथा ब्राह्मी सिद्धार्थकमथापि च । शारिवा सैन्धवञ्चैव पिप्पलीघृतमष्टमम् । मेध्यं घृतमिदं सिद्धं पातव्यञ्च दिने दिने । बुद्धिर्मेधाः क्षिप्रमेधः कुमारो बुद्धिमान् भवेत् । न पिशाचा न रक्षांसि न भूता न च मातरः । प्रभवन्ति कुमाराणां पिबतामष्टमङ्गलम्" ।

अष्टमभाव पु० अष्टमोभावः । ज्योतिषोक्ते जन्मलग्नावधिके १अष्टमस्थाने तन्नादिद्वादशभावमध्ये २अष्टमे भावे च भावच इष्टकालेऽर्कलाविकलादिना स्पष्टीकृतलग्नादिः । तदा-नयनं यथा "पूर्व्वं नतं स्याद्दिनरात्रिखण्डं दिवानिशोरिष्टघटीविहीनम् । दिवानिशोरिष्टघटीषु शुद्धं द्युरात्रि खण्डं त्वपरं नतं स्यात् । ततकाले सायनार्कस्य भुक्त-भोग्यांशसंगुणात् । खोदयात् खाग्निलब्धं यत् भुक्तं भोग्यं रवेस्त्यजेत् । इष्टनाड्योपलेभ्यच गतगम्याच्च्योदयात् । शेषं खखाहतं भक्तमशुद्धेन लवादिकम् । अशुद्धशुद्धभे हीनयुक् तनुर्व्यत्ययनांशकम् । एवं लग्नोदयैर्भुक्तं भोग्यं भोग्यं पलीकृतात् । पूर्व्वपश्चात्तदन्यत् प्राग्वत्तद्दृश्यं भवेत् । सषड्भे लग्नभे जाया, तुर्य्यो, लग्नोनतुर्य्यतः । षडांशयुक् तनोःसन्धिरप्ये षडांशयोजनात् । लवः स-म्बन्धयोभावाः षडांशेनैकयुक् सखात् । अर्के लवः षडेवं ते भार्द्धयुक्ताः परेऽपि षट्" । नील०ता० । स्वस्वदेशो-दयमानं देशान्तरयोगादिना आनेयम् लङ्कोदयमानानि तु मेषस्य २७८, वृषस्य २९९, मिथुनस्य २२३, कर्कटस्य २२१ सिंहस्य २९९, कन्यायाः २७८, तुलायाः २७८, वृश्चि-कस्य २९९, धनुषः २२३ मकरस्य २२१, कुम्भस्य २९९, मीनस्य २७८, पलानि । एतदनुसारेण दशमराशेः उदय-मानं गृहीत्वा दशमभावानयनम् "खेटे भावसमे पूर्णं फलं सन्धिसमे तु खम् । होनेऽधिके द्विसन्धिभ्यां भावे पूर्व्वा-परे फलम्" नील०ता० । "भुक्तं भोग्यं खेटकालान्न शुध्येत् लिप्तशिन्ना स्फोदयाप्तं लवाद्यम् । हीनं युक्तं भास्करे तत्तनुः स्यात् रात्रौ लग्नं भार्द्धयुक्ताद्रवेस्तु । खेटे सन्धिद्वयान्तःस्थे फलं तद्भावजं भवेत्" । नील०ता० । "अष्टमस्थाने च चिन्त्यान्याह दीपिकायाम्" "रन्ध्रायुर्द्वे तयोऽष्टमे" इति । ताजके तु अन्यान्यपि चिन्त्यान्याह । "स्त्रीधनं चिरलग्नं द्रव्यं भूतिर्वित्तं रत्ने रिपुः । दुर्गस्थानं मृतिर्नाशः परीवादो मनोव्यथा" एतानि साधारणानि चिन्त्यानि विशेषतस्तत्र पक्षयोगादिदोषयुक्तं जातके यथा । "आयुः स्थानाधीश्वरः पापयुक्तः षष्ठान्त्यस्थः खलमायुष्टनोति । लग्नेशाढ्यदृतिखलमेव दीर्घायुष्यं चाष्टमस्थः करोति । निधनतनुसुखभेगाः केन्द्रकोणत्रिलाभे १,२,४,५,७,९, १०,११, दृवति हि विपुलायुर्भानुजोऽत्र प्रशस्तः । पनफरचतुरस्रेमध्यगं त्वायुरेते विदधति खलु नेटाः प्रान्त्य-षडे बलिष्ठाः । कमलकुसुदबन्धू स्फुरन्त्यंशुमाल्ये विपदमव धराजो द्विद्विवर्षेऽष्टमस्थः । धनलवमव यच्छेच्छत्रुतत्त्वे बुधो-ऽब्दे क्षितिसुतदृगमंख्ये रोगभोगापचारौ । अरिदोच्छास निर्यांणोच्छासयोरत्र चिन्तनम् । दैवविद्भिः सदा कार्य्यमष्टमे भावचिन्तने" जातकप० वर्षप्रवेशकाले तु अन्यथा योग-विशेषात् फलमुक्तम् यथा "भौमेऽब्दमे क्रूरहते पत्या घातेऽव-लोकिते । अग्निभीरग्निभे क्रूरलग्नदृष्टिपदभे मृतिः । विपत्ति-र्नरपालोत्था रिपुतस्करतोभयम् । तुर्य्ये मातुः पितुर्व्या हा मातुलार्त्तिर्मृतोगुरुः । लग्नेन्दिहापतिसमापतयो मृतीशाश्चेदिष्टशालिन इमे निधनप्रदाः स्युः । चेत् पाक-रिष्टसमये मृतिरेव तत्र सार्के कुजे रूपभयं दिवसेऽब्दगेवे । कूर्ये सूपरिफे सितेन जनने वर्षेऽधिकारी तथा केन्द्रे राज गदाढ्यं च रुगस्थस्थानेऽधिकारीन्दुजे । सौम्ये क्रूरदृशा कुजस्य रुगस्थगुरोर्यदि नाशस्थिते दृग्वे वन्धुमृती विदे-शतरति प्राड्बुधे ताद्दशे । भौमस्थानेऽधिकारीन्दौ सुप्तं रूपभयं रुजः । मन्देऽधिकारी खे चोपहते पीड़ाकरः

स्कृतः । भौमस्थानेऽधिकद्वयौ प्रहारो वा तदाद्वयम् । आरे खस्थे चतुर्थाद्वयः पातोदुःखरुजोऽस्रजः । वित्ताष्टगेज्यो धनहा यद्यद्वेगः शुभेक्षितः । मन्दे दूने दुर्वचनापवादकलिभर्त्सनम् । पतिते त्रौ क्रूरदृगाऽरेत्यशाले स्मृतिं वदेत् । कुजस्फुटास्थिते नाशः सौम्यदृष्ट्या शुभं वदेत् । यत्वर्क्षे जन्मनि कुजः सोऽब्दलग्नपगोयदा । नग्नाधिपोनदृग्भोयोविद्वादाः शुभान्विते । जन्मन्यष्टमगे जीवे साधिव्याधिकलिः पृथुः । जयः शुक्रेक्षणादुक्तप्रत्युत्तरवशेन तु । भौमेऽन्त्यगे धने स्वर्क्षे वादक्लेशं विनिर्दिशेत् । रिपुगोलकलिर्भीतिः संस्थे कुजस्फुतेऽब्दपे । दग्धोजन्माङ्गपोवर्षेऽष्टमोरोगकली दिशेत् । स्वत्यब्दयोरधिक्रतो भौमस्थाने गुरुस्फुतः । पापैर्वादः स्फुटोऽथैवं तादृशीन्दौ शनेः पदे । स्वल्पब्दयोरधिक्रते चन्द्रे बुधपदे स्फुते । क्रूरैर्विदेशगमनं वादः स्याद्दिमनस्कता । मेषे सिंहे धनुःस्थारेऽब्दमेरन्ध्रे सिते भयम् । स्फुटौ स्फुटोशलग्नेशौ स्वल्पदौ पापदृग्युतौ । यत्वर्क्षे जन्मनि कुजः सोऽब्दलग्नपगोयदा । बुधोवर्षमतिर्नष्टबलस्वल्प न शोभनम् । सार्के शनौ भौमयुतेस्वाष्टस्थे वाहनाद्भयम् । सार्के भौमेऽष्टमस्थे तु पतनं वाहनाद्वदेत् । सारेऽब्दपे सगे स्वल्पुचन्द्रेऽन्यारिस्फुतौ स्मृतिः । उदिते स्मृतिसङ्क्षेगे निर्बले जीविते स्मृतिः । मुख्यसङ्ख्येश्वरः मुख्यसङ्ख्यादष्टमोपगः । स्वल्पष्टमेगपुख्येशोमृतिदः पापदृग्युतः । स्वल्पष्टमगतो राशिः मुख्यसङ्ख्यानि नाथयुक् । अब्दलग्नाष्टमर्क्षं तच्चेदित्थं स्यात्तदा स्मृतिः । मुख्यभं चाशुभाक्रान्तं स्मृतीशोऽन्यारिरन्ध्रगः । सुखेशोऽब्दपोवापि स्वल्पं तत्र विनिर्दिशेत् । सक्रूरे जन्मपे स्वल्पौ स्मृतिर्वेदिन्यिहार्कियुक् । भौमस्मृतेस्तगे तत्र मृत्युः स्यादात्मघाततः । मन्दोऽष्टमोस्मृतीशेत्यशालान्मृत्युकरः स्मृतः । शुभेत्यशालात् सर्वेऽपि योगाः स्युः शुभदायकाः । स्मृतिरन्ध्रपतिर्मन्दोऽष्टमोऽब्दलग्नपेन चेत् । इत्यशाली क्रूरदृगा ततुकालं स्वल्पुदायकः, नील० ता० । [अष्टसृष्टिमिते परिमाणभेदे ।

अष्टमान न० अष्टौ सुटवः परिमाणमस्य । कुड़वरूपे

अष्टमिका स्त्री वैद्यकोक्ते चतुस्तोलकपरिमाणे ।

अष्टमी स्त्री अष्टानां पूरणी । षोड़शकलात्मकचन्द्रस्य अष्टमकलाक्रियारूपायां स्वनामख्यातायां तिथौ २अष्टसंख्यापूरणाच्च अष्टमशब्दे उदा० । अश्नु+क्त अष्टं संघातं व्याप्तिं वा माति मा–क गौरा० ङीष् । कोटालतायाम् ।

अष्टमुष्टि पु० अष्टौ मुष्टयः परिमाणमस्य अण् "द्विगोर्लुगिति" लुक् । कुञ्चिपरिमाणे "अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कल" इति हेमाद्रिदानखण्डे परिभाषायां इरा० ।

अष्टमूर्त्ति पु० अष्टौ भूम्यादयो मूर्त्तयोऽस्य । "क्षितिर्जलं तथा तेजो वायुराकाशमेव च । यष्टार्कश्च तथा चन्द्रः मूर्त्तयोऽष्टौ पिनाकिनः" इत्युक्ताष्टमूर्त्तिधारिणि शिवे । "महेश्वरेण यो राजन्नजीर्णो दृष्टमूर्त्तिना । कस्तमुत्सहते वीरोयुद्धे जरयितुं पुमान् । भा०व०अ० ४९ "अवेहि मां किङ्करमष्टमूर्त्तेः" रघुः । "स्वमेव मूर्त्त्यन्तरमष्टमूर्त्तिः" "जघ्राह ताञ्चाङ्गुलिमष्टमूर्त्तिः" इति च कुमा० । क्षित्यादिमूर्त्तिभेदेन तस्य नामभेदः यथा सर्व्वः क्षितिमूर्त्तिः एवं भवोजलमूर्त्तिः रुद्रोऽग्निमूर्त्तिः । उग्रोवायुमूर्त्तिः भीम आकाशमूर्त्तिः पशुपतिर्यजमानमूर्त्तिः । महादेवः" सोममूर्त्तिः ईशान सूर्य्यमूर्त्तिः । एतएव तस्याष्टौ मूर्त्तयः शाकुन्तले वर्णिताः "या सृष्टुः सृष्टिराद्या वहति विधिहुतं या हविर्या च होत्री ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् । यामाहुः सर्व्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः प्रत्यक्षाभिः प्रसन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः" । अष्टन्शब्दयोऽप्यत्र । कर्म्म०संज्ञात्वान्न द्विगुः । शिवस्य क्षित्यादिषु अष्टसु २मूर्त्तिषु स्त्री ब०व० ।

अष्टमूर्त्तिधर पु० ष–अच् धरः अष्टानां मूर्त्तीनां धरः । शिवे "अष्टमूर्त्तिधरमूर्त्तिरष्टमी" भाग० "तद्व्याख्याने अष्टानां मूर्त्तीनां समाहारः इति वदन् मल्लिनाथः "दिक्संख्ये संज्ञायामिति" समासस्मरणेन ज्ञानएव मूर्त्तीनां प्रकृते क्षित्यादिविशेष संज्ञायाश्चित्यात् कर्म्मधारयस्यैव तत्र प्रसक्तेः त्रिलोकनाथवत्यादिवत् उत्तरपदद्विगुत्वेनोपपत्तौ तत्पुरुषसङ्कोचानुपपत्तेः इत्यलम्

अष्टरत्नि त्रि० अष्टौ रत्नयः अर्हमानमस्य । बहुव्रीहौ अष्टन्शब्दस्योत्तरे "अष्टरत्निमहाबाहुर्व्यूढोरस्कः सुदुर्जयः" भा० क०प० ७२ अध्या० ।

अष्टलोहक न० ब०व०कर्म्म० संज्ञात्वान्न द्विगुः । "सुवर्णं रजतं ताम्रं सीसकं कान्तिकं तथा । वङ्गं लौहं तीक्ष्णलौहं लौहान्यष्टौ क्रमानि तु" इत्युक्तेषु अष्टसु धातुषु ।

अष्टवर्ग पु० अष्टानामराड्वरव्यादीनां वर्गो यत्र । ज्योतिषोक्ते रेखाविशेषेण शुभाशुभसूचके चक्रभेदे यथा । "जन्मकालग्नस्थिलग्नात् फलं वक्ष्ये शुभाशुभम् । "स्वाद्दिनकृत् शुभदः क्षितिपत्रसप्तद्रुनगादिकपङ्क्तिगतो १,२,४,७,८,९,१०,११, अथ विभावरिभर्तृस्वाङ्कदृग्वेदगतो २,६,१०,११, अथ कुजाङ्कविवत्,१,२,४,७,८,९,१०,११, अथ सोमसुतात्त्रिग-

रर्त्तुनवादिषु यातः, ३,५,६,६,१०,११,१२, देवगुरोर्विष-यर्त्तुनवेशगतो, ५,६,६,११, अथ सुरारिगुरोः समयाचल-भास्करयातः, ६,७,१२, तीक्ष्णमरीचिसुतादपि भास्करवत्, १,२,४,७, ८,६,१०,११, अथ लग्नगटहात्त्रिलताङ्कदशा-दिषु यातः, ३,४,६,१०,११,१२। रविरेखाः। ४८। "चन्द्रः शुभोऽर्कात्त्रिकालाद्रिदनावलाशाशिवस्थः, ३,६,७,८,१०, ११, ततः खात्कुरामर्तुगवाशाशिवस्थः, १,३,६,७,१०,११, क्षमाजादत्रिवह्नीषुषड्गोदिगीशेष्व, २,३,५,६,६,१०,११, अ त्रात् कुरामाब्धिवाणागदनावलाशाशिवस्थः, १,३,४,५, ७,८,१०,११, जीवात् कुदग्वेदशैलेभकाष्ठाशिवस्थो,१,२,४, ७,८,१०,११, अथ शुक्रात्त्रिवेदेषुशैलयटहाशाशिवस्थः, ३,४,५,७,६,१०,११, तीक्ष्णांशुदेहोद्भवाद्रामबाणर्त्तुगम्भु-स्थित,३,५,६,११, उदयाद्व्यवाहर्त्तुकाष्ठाशिवस्थः',३,६, १०,११, चन्द्ररेखाः। ४६। 'कूजोऽर्काब्धिभो वह्निबा-णर्त्तुदिक्शम्भुगो,३,५,६,१०,११, अवेन्दुतोरामकालेशगम, ३,६,११, स्वतः स्वात् कुदग्वेदसुन्यष्टदिक्शम्भुगः,१,२,४, ७,८,१०,११, स्वात्त्रिशानाषसुताद्गुणेष्वङ्करुद्रोपयातः। ३,५,६,११, ततोजीवतः कालकाष्ठाशिवार्कोपयातो, ६, १०,११,१२, अथ देवारिपूज्यादनेहोगजेशार्कसंस्थः,६,८, ११,१२, ततः सूर्यपुत्रात् कुवेदागनागयटहाशाशिवस्थो, १,४,७,८,६,१०,११, अथ लग्नात् कुरामाङ्कदिक् शम्भु-यातः। १,३,६,१०,११,कुजरेखाः ३६। बुधोऽर्कतः शरर्त्तुगोशिवार्कगो,५,६,६,११,१२, अथ चन्द्रतोद्विवे-दकालनागदिङ्महेश्वरोपगः। २,४,६,८,१०, ११, भूमि-जात्कुदक्कृतागनागगोदग्वेशग, १,२,४,७,८,६,१०,११,स्व-तः स्वतः कुवह्निपञ्चषड्नवादिकेषुगः,१,३,५,६,६,१०, ११,१२, वाक्पतेरसाङ्गशम्भुसूर्य गो, ६,८,११,१२, अथ शुक्रतः कुवाङ्गवह्निवेदपञ्चनागगोशिवेषुगः १,२,३,४,५,८,६, ११,पङ्क्तुतःकुदक्कृतागनागादिपञ्चकस्थितोऽथ, १,२,४,७, ८,६,१०,११,१२,लग्नतः क्षितिद्विवेदकालनागदिक्शिवे-षुगः'। १,२,४,६,८,१०,११,बुधरेखाः।५५।'सुरराजगुरुः शुभदोरवितः कुयमानलवेदनगादिकपञ्चगतो १,२,३,४,७, ८,६,१०,११, अथ विधोर्हिशराचलगोशिवगो, २,५,७,६, ११, वसुधातनयात् कुयमाब्धिनगाष्टदग्वेशगतो, १, २, ४, ७,८,१०,११, अथ बुधात् क्षितियुग्मलतेषुरसयटहदिग्गि-रिशोपग। १,२,४,५,६,६,१०,११,स्वदतु स्वतएकयमानल-वारिधिपर्व्वतनागदग्वेशगतो, १, २, ३, ४, ७, ८, १०, ११, अथ सितादृयमपञ्चरसयटहदिक्शिवगो २, ५, ६, ६, १० ११, रविनन्दनतोदहनेषुरसार्कगत, ३, ५, ६, १२, स्वथ लग्नगटहात् कुयमाब्धिशरर्त्तुनगयटहदिग्गिरिशोप-गतः"। १, २, ४, ५, ६, ७६, १०, ११, गुरुरेखाः, ५६, 'भृगुः शुभोरवेर्गजेशसूर्य्यगो ८,११,१२, अथ चन्द्र-तः, क्ष्मादिपञ्चकाष्टगोशिवार्कगः, १, २, ३, ४, ५, ८, ६' ११, १२, कुजात्त्रिवेदकालगोशिवार्कगो, ३, ४, ६, ६, ११, १२, अथ बुधात्त्रिकालरन्ध्ररुद्रसंस्थितः, ३, ६, ६, ११, गुरोः शराष्टरन्ध्रदिङ्महेशग, स्वतः ५, ८६, १०, ११, स्वतः कुपञ्चकाष्टरन्ध्र,दिक्शिवोपगः। १, २, ३, ४, ५ ८, ६, १०, ११, अनेर्गुणाब्धिपञ्चनाग-गोदशेशगो, ३, ४,५, ८६, १०, ११,अथ लग्नतः कुप-ञ्चकाष्टगोशिवस्थितः शुभः। १, २, ३, ४, ५, ८, ६, ११, शुक्ररेखाः, ५१, 'शुभः पङ्क्तुरर्कात् यमाब्धोधिशैलाष्ट-दिक्शम्भुग, १, २ ४, ७, ८, १०, ११, इन्दुतोरामका-लेशगतः, ३, ६, १२, क्ष्मासुताद्गुणर्त्तुकाष्ठाशिवार्कोप-गो, ३, ५, ६, १०, ११, १२, अथ सूतः कालदनाव-लादिस्थितः ६, ८, ६ ,१०, ११, १२, जीवतोवाणकालेश-मार्त्तण्डयात, ५, ६, ११, २२, सूतोदैत्यपूज्यादनेहः-शिवार्कोपयातः। ६, ११,१२, स्वतोवीतिहोत्रेषुकालेशयात, ३, ५, ६, ११, सूतोलग्नतः क्ष्मायुगाब्धोधिषड्दि-ङ्महेशस्थितः। १, ३, ४, ६ १०, ११, शनिरेखाः, ३६, । 'राहुःशुभोऽर्कादृभुजवह्निवेदर्त्तुरन्ध्रगो, २, ३, ४, ६,६, अथ चन्द्रात् कुरामवेदाङ्कग १, ३' ४, ६, स्वतः कुजाद्वह्निवाणाङ्करन्ध्रगतो, ३, ५, ६, ६, अथ बुधाच्छ-शिपञ्चवह्निबाणरन्ध्र,ग, १, २, ३, ५, ६, स्वतोजीवाद्व्य-वाक्वेदाङ्करन्ध्र,ग, ३, ४, ६, ६, स्वतः शुक्रात् पञ्चवह्नि-बाणरन्ध्र,गत, २, ३, ५, ६, स्वतः सौरात् पञ्चबाणर्त्तुग, २,५,६,स्वतः स्वतः शशिवेदबाणरिपुरन्ध्रगो, १,४,५,६,६, अथ लग्नाद्दिदरन्ध्रदिग्युद्गसूर्य्यगतः, ४, ६,१०,११, १२। राहुरेखाः, ३६। सूर्य्यादेकद्विचतुःसप्ताष्टदशैकादशेषु, १, २, ४, ७, ८, १० ११, सोमात्त्रिषड्दशैकादशेषु, ३, ६, १०, ११, भौमात्त्रिपञ्चषड़ेकादशेषु, ३, ५, ६, ११, बुधात् षड़ष्टनवदशैकादशेषु, ६,८,६,१०,११, गुरोः पञ्चषड़ेकादशद्वादशेषु, ५,६,११,१२, शुक्रात्षड़ेकादश-द्वादशेषु,६,११,१२, शनेस्त्रिषट्सप्ताष्टदशैकादशेषु ३,५,८,१०, ११, लग्नादेकत्रिचतुःषड़्दशैकादशेषु, १,३,४,६,१०, ११, लग्नरेखाः ३८। इति निगदितमिदं नेटमन्यद्विशे-षादधिकफलविपाकं जन्मना तत्र दद्युः। उपचयसटह-

मित्रस्योच्चगाः पुष्टमिष्टं त्वपचयस्थहनीचारातिभे नेष्टसम्मत् । यावती यावती रेखा यस्याधामष्टवर्गके । तावतीं द्विगुणीकृत्य अष्टाभिः परिशोधयेत् । अष्टोपरि भवेद्रेखा अष्टाभ्यन्तरविन्दवः । अष्टाभिस्तु समं यत्र तत्समं परिकीर्त्तितम् । रेखा यस्याच्छुभे देया विन्दवस्त्विततरत्र तु । रेखाविन्दु समानौ चेत् समस्तत्र निगद्यते । रेखाधिक्ये शुभं ज्ञेयं तद्विन्दोरधाशुभम् । श्रीरानन्दस्तथा श्रेयोभोगो राज्यं भवेत्तथा । मलिनोऽथ विपच्चैव हानिर्नष्टं त्वशुभं वेत्तथा । द्वयादिरेखा द्वयादिविन्दोः फलान्येतान्यनुक्रमात् । रेखायां वत्सरोत्थेयः सार्द्धसप्तदिनं समे । अष्टवर्गदशायुः स्यात् दिनं चतुर्षु विन्दुषु" । इत्यष्टवर्गः । "अष्टवर्गशुभैः श्रीमान् कर्म्म कुर्य्यान्नभचरैः । गोचरस्थैस्तदप्राप्तौ तदप्राप्तौ च वेधगैः । व्रतारम्भे विवाहे च यात्रायां क्षुरकर्म्मणि । अविशुद्धाष्टवर्गस्य समस्ता निष्फलाः क्रियाः । सततं दिशति नराणां राशौ मध्येऽष्टवर्गफलं निखिलम् । भावफलं प्रथमार्द्धे दृष्टिफलान्यर्द्धभुक्तेषु" ज्यो०त० । अष्टानामकचटतपयशानां वर्गः । ज्योतिषादौ शुभाशुभज्ञापनाय विशेषरूपेण अष्टधा विभक्तेषु २वर्गसमूहभेदेषु यथा स्वरवर्णाः १ई। अवर्गः, कादयोभावसानाः पञ्चपञ्चाक्षराः कवर्गादयः५ । यरलवाः ४यवर्गः । शषसहा४शवर्गः इत्येवमष्टौ कल्पिताः । तेषां विभागक्रमेण संख्याभेदः । "वर्गवर्गप्रमाणञ्च स्वरैस्ताड़ितं मिथः । पिण्डसंख्या भवेत्तस्य यथा भागैस्तु कल्पना" केरलम् । "स्वं वर्गं द्विगुणं विधाय परवर्गेणान्वितं सप्तहृत्" इति ज्योति० । तन्त्रोक्ते मन्त्रस्य शुभाशुभज्ञानार्थं अवर्गादनुसारेण ३ पञ्चिमाञ्जारादयष्टवर्गे च । यथा आगमकल्पद्रुमे "इदानीं वर्गचक्रस्य विधानमभिधीयते । मन्त्रयामविशोधार्थं नामाद्यक्षरपूर्व्वकम् । अष्टौ कोष्ठान् समालिख्य वर्गानष्टौ लिखेत्ततः । पञ्चिमाञ्जारपञ्चास्यवानरः सर्पाखुदन्तिनः । मेषः क्रमात्कारादि वसुवर्गाश्रिता इमे । साध्यसाधकयोः प्रीतिर्ज्ञातव्या जातितः सदा" । इत्युक्त्वोक्तमे "वर्णशुद्धिं समासाद्य मन्त्रं दद्याद्गुरूत्तमः । अवर्गः पञ्चिमोलोको माञ्जारश्च कवर्गकः । चवर्गश्च तथा सिंहश्टवर्गश्चैव कुक्कुरः । तवर्गो नाग इत्युक्तो मूषिकश्च पवर्गकः । यवर्गश्च गजोज्ञेयः शवर्गश्चैव मेषकः । पञ्चिभुजगयोर्व्वैरं तथा च गजसिंहयोः । माञ्जारमूषिकयोश्चैव तथा कक्कुरमेषयोः । भुजङ्गसिंहयो मैत्री मेषमूषिकयोस्तथा । लोकादन्यच्च विज्ञेयं व्यवहारप्रयोगतः" इति तन्त्रसा० । "जीवकर्षभको भेदे काकल्याङ्घ्रिहिङ्के । अष्टवर्गोऽष्टभिर्द्वैरिति" वैद्यकोक्ते ४जीविका द्यष्टद्रव्ये । "राज्ञामप्यष्टवर्गस्तु यतोऽयमतिदुर्लभः । तस्मादस्य प्रतिनिधिं गृह्णीयान्नदुगुणं भिषक् । मेदाजीवककाकोलीद्वयद्विहिन्द्वेऽपि चासति । वरीविदार्य्यश्वगन्धा वारणीश्च क्रमात् क्षिपेत्" वैद्य० । नीतिवेदिनां वह्नीवे ५वर्गभेदे च । "ऋषिर्वेणिकृपथो दुर्गं सेतुः कुक्कुरबन्धनम् । खन्याकरबलादानं सैन्यानाञ्च निवेशनम् । अष्टवर्गमिमं साधु कृत्वये परिवर्जयेत्" नीतिः ।

अष्टविध न० अष्ट विधाः प्रकारा अस्य । राज्याङ्गाष्टप्रकारे कर्म्मणि तच्च अष्टकर्मशब्दे दर्शितम् । "ऋत्विक्चाष्टविधं कर्म्म पञ्चवर्गञ्च तत्त्वतः" मनुः ।

सुश्रुतोक्ते विषयविशेषविषये छेद्यादौ अष्टप्रकारे शस्यकर्म्मणि तानि च यथा "छेद्यभेद्यलेख्यवेध्येष्याहार्य्यसाव्यसीव्यरूपाणि । तेषां विषयविशेषा अपि तत्रैव दर्शिता यथा । "छेद्या भगन्दरस्यन्थिः क्लैष्किकश्लीलकालकः । व्रणवर्त्मार्बुदार्शश्चर्म्मकीलोऽस्थि मांसगम् ॥ शल्यं जतुमणिर्म्मांससंघातो गलशुण्डिका । स्नायुमांससिराकोथो वल्मीकं शतपोनकः॥ अधुपचोपदंशाश्च मांसकन्द्यधिमांसकः । भेद्या विद्रधयोऽन्यत्र सर्जादपन्यग्रलयः ॥ आदितो ये विसर्पाश्च ग्रन्थयः सविदारिकाः । प्रमेहपिड़कागोफक्षतनरोगावमन्थकाः । कुम्भीकात्तुग्रयीनाद्यो वृन्दौ पुष्करिकालजी । प्रायशः क्षुद्ररोगाश्च पुप्पुटौ तालुदन्तजौ ॥ तुण्डिकेरी गिलायुश्च पूर्व्वं ये च प्रपाकिणः । वस्तिस्तथाश्मरीहेतोर्म्मेदोजा ये च केचन ॥ लेख्याश्चतस्रो रोहिण्यः किलासस्पर्जिजिह्विका । मेदोजो दन्तवैदर्भौ ग्रन्थिवर्त्मार्धिजिह्विका ॥ अर्शांसि मस्तकं मांसकन्दो मांसोन्नतिस्तथा । वेध्याः शिरा बडविधा मूलवृद्धिर्गलोदरम् ॥ एष्या नाड्यः सशल्याश्च व्रणा उन्मार्गिणश्च ये । आहार्य्याः शर्कराश्चित्रो दन्तकर्णमलाश्मरी ॥ शल्यानि मूढगर्भाश्च वर्चश्च निचितं गुदे । साव्या विद्रधयः पञ्च भवेयुः पर्वजाश्च ते ॥ कुशवायुं सरुजः शोफो वर्षकदेशजः । पाल्लासयाः स्त्रीपदानि विषजुष्टञ्च शोणितम् ॥ अर्ब्बुदानि विसर्पाश्च ग्रन्थयश्चादितस्तु ये । लयस्थयश्चोपदंशाः स्नायुरोगा विदारिका ॥ शौषिरो गलशालूकम् कण्ठकाः क्रमिदन्तकः । दन्तवेष्टः शोपकुशः शीतादोदन्तपुप्पुटः ॥ पित्तासृक्कफजाश्चौष्ठ्याः क्षुद्ररोगाश्च भूरिशः । सीव्या मेदःसमुत्थाश्च मिश्राः सुलिखिता गदाः ॥ सद्योव्रणाश्च ये चैव चलसन्धिव्यपाश्रयाः । न क्षाराग्निविषैर्जुष्टा न वा मारुतवा-

क्षिनः ॥ नान्तर्लोहितशल्यादि तेषु सम्यग्विशोधनम् ॥ पांशुरोमनखादीनि चलमस्थि भवेच्च यत् । अच्छतानि यतोऽमूनि पाचयेयुर्भृशं व्रणम् । रुजश्च विविधाः कुर्युस्तस्मादेतान्विशोधयेत् । ततोव्रणं सस्नेह्य स्थापयित्वा यथास्थितम् ॥ सीव्येत् स्नेहमेव स्नेहेन वस्त्रेणाश्लक्ष्णकस्य वा । शणजक्षौमसूत्राभ्यां स्नायुना बालेन वा पुनः । मूर्व्वागुडूचीतानैर्व्वा सीव्येद्वेल्लितकं शनैः ॥ सीव्येद्वोफणिकां वापि सीव्येद्वा तन्तुसेवनीम् । ऋजुग्रन्थिमथो वापि यथायोगमथापि वा ॥ देशेऽल्पमांसे सन्धौ च सूचीं दत्त्वाङ्गुलद्वयम् । आयता त्वाङ्गुला त्वास्रा मांसले वापि पूजिता ॥ धनुर्वक्रा हिता मर्म्मफलकोद्दरोपरि । इत्येतास्त्रिविधाः सूचीस्तीक्ष्णाग्राः सुसमाहिताः । कारयेन्नातितीक्ष्णाग्रा नात्यपरिमण्डलाः । नातिदूरे निकटे वा सूचीं कर्म्मणि पातयेत् । दूराद्व्रणो व्रणौषस्य सन्निकृष्टेऽवलुञ्चनम् । अथ क्षौमपिचुच्छन्नं सुस्नुतं प्रतिसारयेत् । प्रियङ्ग्वञ्जनयष्ट्याह्वलोध्रचूर्णैः समन्ततः । शल्कीफलचूर्णैर्व्वा क्षौमश्यामेन वा पुनः । ततो व्रणं यथायोगं ब्रह्मचारिकमादिशेत् । एतदष्टविधं कर्म समासेन प्रकीर्त्तितम्" ।

अष्टश्रवण पु० अष्टौ श्रवणान्यस्य । चतुर्मुखे ब्रह्मणि चतुर्मुखस्य प्रतिमुखं द्विकर्णत्वाच्च तथात्वम् अष्टश्रवआदयोऽत्र ।

अष्टाकपाल त्रि० अष्टसु कपालेषु संस्कृतः अण् तस्य लुक् । "अष्टनः कपाले ङ्विधि" वार्त्ति० आत् । अष्टसु कपालेषु संस्कृते पुराडाशादौ "आग्नेयोऽष्टाकपालः पुराडाशो भवति" । "अष्टाकपालाः मध्ये पुरोडाशा भवन्ति" इति च श्रुत० ब्रा० ।

अष्टाक्षर त्रि० अष्टावक्षराणि यत्र पादे । १अष्टाक्षरयुक्तपादके अनुष्टुप्जातिके वर्णवृत्तभेदे । "अष्टाक्षरा वै गायत्री" श्रुतिः गायत्र्याः षडक्षरचतुष्पादत्वेऽपि अष्टाक्षरत्रिपादरूपत्वं सर्व्वत्र प्रसिद्धम् । २वक्त्रनामके मात्रावृत्तविशेषे विषमवृत्ते । "पञ्चमं लघु सर्व्वत्र सप्तमं द्विचतुर्थयोः । गुरु षष्ठञ्च पादानां श्लोकेष्वनियमोमतः । प्रयोगे प्रायिकं प्राहुः केऽप्येतल्लक्षणक्षणम् । लोकेऽनुष्टुविति ख्यातम् तस्मादाक्षरता क्षता" छन्दोम० ।

अष्टाङ्ग पु० अष्टावङ्गानि यस्य । यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपे योगशास्त्रोक्ते १योगविशेषे "यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानीति पात० सू०" । यमोनियमश्चासनञ्च प्रजाषायामस्ततःपरम् । प्रत्याहारोधारणा च ध्यानं सार्द्धं समाधिना । अष्टाङ्ग्याङ्गरेतानि योगिनां योगसिद्धये इति" पुरा० । एतेषां लक्ष्म अष्टाङ्गयोगशब्दे वक्ष्यते । "जानुभ्याञ्च तथा पद्भ्यां पाणिभ्यान्तुरसा धिया । शिरसा वचसा दृष्ट्या प्रणामोऽष्टाङ्ग ईरित" इत्युक्तलक्षणे २प्रणामे "आपः क्षीरं कृशाग्रं च दधि सर्पिः सतण्डुलम् । यवः सिद्धार्थकश्चैवाष्टाङ्गोऽर्घः प्रकीर्त्तितः" इत्यष्टद्रव्यघटिते ३पूजोपकरणेऽर्घे, "आपः क्षीरं कुशाग्राणि दधि मधु तथा घृतम् । रक्तानि करवीराणि तथा वै रक्तचन्दनम् अष्टाङ्ग एष वा अर्घो भानवे परिकीर्त्तितः" काशीख० उक्ते ४अष्टद्रव्यात्मके सूर्य्यार्घे ५धारीफलके च तस्य प्रत्येकपञ्चौ अष्टपदरूपाङ्गकत्वात्तथात्वम् । "६शल्याद्यष्टाङ्गके आयुर्व्वेदे यथा "तद्यथा शल्यं शालाक्यं कायचिकित्सा भूतविद्या कौमारभृत्यमगदतन्त्रं रसायनतन्त्रं वाजीकरणतन्त्रमिति । अथास्य प्रत्यङ्गलक्षणसमासः । तत्र शल्यं नाम विविधतृणकाष्ठपाषाणपांशुलोहलोष्टास्थिबालनखपूयास्रावान्तर्गर्भशल्योद्धरणार्थं यन्त्रशस्त्रक्षाराग्निप्रणिधानव्रणविनिश्चयार्थञ्च ॥ २शालाक्यं नाम ऊर्द्ध्वजत्रुगतानां रोगाणां श्रवणनयनवदनघ्राणादिसंश्रितानां व्याधीनामुपशमनार्थम् ॥ ३कायचिकित्सा नाम सर्व्वाङ्गसंश्रितानां व्याधीनां ज्वरातीसाररक्तपित्तगोलोन्मादापस्मारकुष्ठमेहादीनामुपशमनार्थम् ॥ ४भूतविद्या नाम देवासुरगन्धर्व्वयक्षरक्षःपितृपिशाचनागग्रहाद्युपसृष्टचेतसां शान्तिकर्म्मबलिहरणादिग्रहोपशमनार्थम् ॥ ५कौमारभृत्यं नाम कुमारभरणधात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्यग्रहसमुत्थानाञ्च व्याधीनामुपशमनार्थम् ॥ ६अगदतन्त्रं नाम सर्पकीटलूताद्यूषिकमूषिकादिदष्टविषव्यङ्गनार्थं विविधविषसंयोगविधोपशमनार्थम् ॥ ७रसायनतन्त्रं नाम वयःस्थापनमायुर्मेधाबलकरं रोगापहरणसमर्थञ्च ॥ ८वाजीकरणतन्त्रं नाम अल्पदुष्टविशुष्कक्षीणरेतसामाप्यायनं प्रसादोपचयजननिमित्तं हर्षजननार्थञ्च ॥ एवमस्यायुर्व्वेदोऽष्टाङ्ग उपदिश्यते" सुश्रुतः ॥ कर्म० संज्ञात्वाच्च द्विगुः । अष्टसु तत्तदङ्गेषु न० ब० व० ।

अष्टाङ्गधूप पु० कर्म० "पलद्वयं निम्बपत्रं वचा कुष्ठं हरीतकी । सर्षपाः सयवाः सर्पिर्धूपनं ज्वरनाशनम्" इति चक्रदत्तोक्ते ज्वरनाशने धूपभेदे ।

अष्टाङ्गमैथुन न० कर्म०। "स्मरणं कीर्त्तनं केलिः प्रेक्षणम् गुह्यभाषणम्। संकल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च। एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः" दक्षोक्ते स्त्रीणां स्मरणादिषु अष्टसु। यदभावो ब्रह्मचर्य्यम्।

अष्टाङ्गयोग पु० अष्टावङ्गान्यस्य कर्म०। यमनियमाद्यष्टाङ्गे योगे स च अङ्गसहितोदर्शितः तन्नसारे। "ऐक्यं जीवात्मनोराहुर्योगं योगविशारदाः। तत्र क्षेत्रात् समाख्याता योगविघ्नकरास्तु ये। कामक्रोधलोभमोहमदमात्सर्य्यसंज्ञकाः। योगाङ्गैरेतान्निर्जित्य योगिनो योगमाप्नुयुः। यमनियमावासनं प्राणायामस्ततःपरम्। प्रत्याहारो धारणाख्यं ध्यानं सार्द्धं समाधिना। योगाङ्गान्याहुरेतानि योगिनो योगसाधने। यमादयस्तु "अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यं दयार्জ্জবম्। क्षमा धृतिर्मिताहारः शौचञ्चेति यमा दश। तपःसन्तोष आस्तिक्यं दानं देवस्य पूजनम्। सिद्धान्तश्रवणञ्चैव ह्रीर्मतिश्च जपोऽुतम्। दशैते नियमाः प्रोक्तायोगशास्त्रविशारदैः। आसनानि आसनशब्दे वक्ष्यन्ते। "दृढ़यार्कयवेहायुं वाहुं षोड़शमात्रया। धारयेत् पूरितं योगी चतुर्वक्षात्तु मात्रया। सुषुम्णा मध्यगं, सम्यगुद्वाविंशन्मात्रया यमैः। नाड्या पिङ्गलया चैव रेचयेद्योगवित्तमः। प्राणायामभिमं प्राहुर्योगशास्त्रविशारदाः। भूयोभूयः क्रमात्तस्य व्यत्यासेन समाचरेत्। मात्राद्वित्रिक्रमेणैव सम्यगुद्वादश षोड़श। जपध्यानादिभिर्युक्तं सगर्भं तं विदुर्बुधाः। तदेतं निगर्भञ्च प्राणायामं परं विदुः। क्रमादभ्यस्यतः पुंसोदेहस्वेदोद्गमोऽधमः। मध्यमः कम्पसंयुक्तो भूमित्यागः परोमतः। उत्तमस्य गुणावाप्तिर्यावच्छीलनमिष्यते" इन्द्रियाणां विचरतां विषयेषु निरर्गलम्। बलादाहरणं तेभ्यः प्रत्याहारोऽभिधीयते। अङ्गुष्ठगुल्फजानूरुसीमनी लिङ्गनाभिषु। हृदुपीवाकण्ठदेशे तु लम्बिकायां तथा नसि। भ्रुमध्ये मस्तके मूर्द्ध्नि द्वादशान्ते यथाविधि। धारणं प्राणमरुतोधारणेति निगद्यते। समाहितेन मनसा चैतन्यान्तरवर्त्तिना। आत्मन्यभीष्टदेवानां ध्यानं ध्यानमिहोच्यते। समत्वभावनां नित्यं जीवात्मपरमात्मनोः। समाधिमाङ्मुनयः प्रोक्तमष्टाङ्गलक्षणम्। इत्यादि कथितं देवि कामादिरिपुनाशनम्"। पात०सू०त अन्यत्रोक्तम्।

अष्टाङ्गावलेहिका स्त्री कर्म०। "कटुकं पौष्करं मूलं शोषं मासञ्च कारवी। लक्ष्मणं क्षौद्रतन्द्रधुना रुद्र लेहयेत्। एषावलेहिका हन्ति सन्निपातं सुदारुणम्। हिक्काश्वासं च कासञ्च कण्ठरोगं नियच्छति। अर्द्धगर्द्धोद्गरणे उष्णे स्वेदादिकर्म्मणि। विरोध्युष्णे मधु त्यक्त्वा कार्य्या स्नादार्द्रजैरसैः"। चक्रदत्तोक्ते श्लेष्महरे।

अष्टादश त्रि० अष्टादशानां पूरणः डट् स्त्रियां ङीप् अष्टादशसंख्यापूरणे। अष्टौ च दश च अष्टाधिका दश वा अष्टादशन्। १ (आठारो) संख्यायाम् २ तत्संख्याते च त्रि०। "विद्या ह्यष्टादशैव तु" विष्णुपु० "अगाहताष्टादशतां जिगीषया नवद्वयद्वीपपृथग्जयश्रियाम्" नैष० "अष्टादश पुराणानि कृत्वा सत्यवतीसुतः" भा०आ०प०।

अष्टादशधान्य न०ब०व०कर्म०संज्ञात्वान्न द्विगुः। अष्टादशविधेषु धान्येषु। तानि च यथा। "यवगोधूमधान्यानि तिलाः कङ्गुकुलीत्थकाः। माषा मुद्गमसूराश्च निष्पावाः श्यामसर्षपाः। गवेधुकाश्च नीवारा आढ़क्योऽथ सतीनकाः। चणकाद्यीनकाश्चैव धान्यान्यष्टादशैव तु हेमा० दा०ख०स्व० पु०। धान्यानि, व्रीहयः, गवेधुकाः, कसेरकाः। नीवाराः आरण्यव्रीहयः सतीनका, वर्त्तुलकलायाः। चीनकाः षष्टिकविशेषाः। निष्पावाः शिम्बीभेदाः। हेमा०।

अष्टादशपरिशिष्ट स्त्री ब०व० कर्म० संज्ञात्वान्न द्विगुः। यूपादिलक्षणादिषु अष्टादशसु परिशिष्टविद्यासु "परिशिष्टास्तु संख्याता अष्टादश मनुष्व ताः। यूपलक्षणं शागलक्षणं प्रतिष्ठानुवाकसंख्याचरणब्रह्मत्वाङ्गकल्पस्वस्त्ययनानि परिषदभ्यञ्जनमिष्टकापूरणं प्रवराध्यायोच्छ्वासाख्यं क्रतुसंख्यानिगमा यज्ञपार्श्वहोलकम्। व्रतञ्च प्रसवोत्थाच्च कूर्म्मलक्षणसंयुतम्। कथिताः परिशिष्टास्तु ह्यूनविंशति संख्यया" हेमा०दा०ख०देवीपु०।

अष्टादशपुराण न०ब०व०कर्म०संज्ञात्वान्न द्विगुः। ब्राह्मादिषु अष्टादशसु पुराणेषु "ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा तथान्यन्नारदीयञ्च मार्कण्डेयञ्च सप्तमम्। आग्नेयमष्टमं प्रोक्तं भविष्यन्नवमन्तथा। दशमं ब्रह्मवैवर्त्तं लिङ्गमेकादशं तथा। वाराहं द्वादशं प्रोक्तं स्कान्दञ्चात्र त्रयोदशम्। चतुर्दशं वामनञ्च कौर्म्मञ्चैव तथा दशम्। मात्स्यञ्च गारुड़ञ्चैव ब्रह्माण्डमष्टादशं तथा" हेमा०दा०ख०वरा०पु०।

अष्टादशभुजा स्त्री अष्टादश भुजा यस्याः। देवीमाहात्म्यस्य द्वितीयचरितदेवतायां महालक्ष्म्यां तन्मूर्त्तिर्ध्यानशब्दे वक्ष्यते

अष्टादशविद्या स्त्री ब०व० कर्म० संज्ञात्वान्न द्विगुः। वेदादिषु अष्टादशसु विद्यासु। "अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः। धर्मशास्त्रं पुराणञ्च विद्याह्येताश्चतुर्दश। आयुर्वेदो धनुर्वेदो गान्धर्व्ववेति ते त्रयः।

अर्थशास्त्रं चतुर्थं तु विद्याह्यष्टादशैव तु" हेमा० व्र० ख० विष्णुरा० । अङ्गानि अङ्गशब्दे उक्तानि शिक्षादीनिषट् इति अष्टादशसंख्यापूर्त्तिः ।

अष्टादशविवादपद न० ब० व० कर्म्म० संज्ञात्वात्र द्विगुः। ऋणादानादिषु अष्टादशसु विवादस्थानेषु "तानि च मनुनोक्तानि यथा "तेषामाद्यऋणादानं निक्षेपोऽस्वामिविक्रयः । सम्भूय च समुत्थानं दत्तस्यानपकर्म च । वेतनस्यैव चादानं संविदश्च व्यतिक्रमः । क्रयविक्रयानुशयो विवादः स्वामिपालयोः । सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके । स्तेयञ्च साहसञ्चैव स्त्रीसंग्रहणमेव च । स्त्रीपुंधर्म्मौ विभागश्च द्यूतमाह्वय एव च । पदान्यष्टादशैतानि व्यवहारस्थितावहि" ।

अष्टादशस्मृतिकारिन् पु० ब० व० कर्म्म० संज्ञात्वात्र द्विगुः।विष्णुप्रभृतिषु अष्टादशसु स्मृतिकारकेषु "विष्णुः पराशरो दक्षः संवर्त्तव्यासहारिताः । यातातपोवशिष्ठश्च यमापस्तम्ब गौतमाः । देवलः शङ्खलिखितौ भरद्वाजोशनोऽत्रयः । मौनको याज्ञवल्क्यश्च दशाष्टौ स्मृतिकारिणः । हेमा० दा० ख० इन्दुमनुः ।

अष्टादशाङ्ग पुंन० अष्टादश अङ्गानि यत्र । वैद्यकप्रसिद्धे पाचनभेदे तच्च वातादिभेदेन भिन्नभिन्नप्रकारं दर्शितं चक्रदत्तेन । "दशमूली शटी शल्की पौष्करं सदुरालभम् । भार्गी कुटजबीजञ्च पटोलं कटुरोहिणी । अष्टादशाङ्ग इत्येष सन्निपातज्वरापहः । कासश्वासपरिपार्श्वार्त्तिच्छर्द्यरुचिहिक्कावमीहरः ॥ भूनिम्बदारुदशमूलमहौषधाभ्यां तिक्तेन्द्रबीजधनिकाभक्तशाकपायः । तन्द्रीप्रलापकसनारुचिदाहमोहश्वासादिषुक्तमखिलं ज्वरमाशु हन्ति२॥ सुस्तपर्पटकोशीरदेवदारुमहौषधम् । त्रिफलाधन्वयासञ्च नीलोत्पलयुतं पिबेत् । किराततिक्तकं पाठावलाकटुकरोहिणी । मधूकं पिप्पलीमूलं सुखाम्बो गण उच्यते । अष्टादशाङ्गमुदितमेतद्वा सन्निपातनुत् । पित्तोत्तरे सन्निपाते हितञ्चोक्तं मनीषिभिः । मन्यास्तम्भे उरोघाते उरःपार्श्वशिरोग्रहे"३ । अन्यविधमप्यत्रत्योक्तं विस्तरात्र तदुक्तम् ।

अष्टादशोपचार पु० ब० व० कर्म० संज्ञात्वात्र द्विगुः । तन्त्रोक्तेषु आसनादिषु अष्टादशसूपचारेषु यथा "आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् । स्नानं वस्त्रोपवीतञ्च भूषणानि च सर्व्वशः । गन्धपुष्पे तथा धूपदीपावन्नञ्च तर्पणम् । माल्यानुलेपनञ्चैव नमस्कारविसर्जने । अष्टादशोपचारैस्तु मन्त्री पूजां समाचरेत्" तन्त्रसारः ।

अष्टादशोपपुराण न० ब० व० कर्म० संज्ञात्वात्र द्विगुः । सनत्कुमारादिषु अष्टादशसु उपपुराणेषु "अन्यान्युपपुराणानि मुनिभिः कथितानि तु । आद्यं सनत्कुमारोक्तं नारसिंहमतः परम् । तृतीयं नारदं प्रोक्तं कुमारेण तु भाषितम् । चतुर्थं शिवधर्म्माख्यं साक्षान्नन्दीशभाषितम् । दुर्व्वाससोक्तमाश्चर्यं नारदोक्तमतः परम् । कापिलं मानवं चैव तथैवोशनसेरितम् । ब्रह्माण्डं वारुणं चाथ कालिकाह्वयमेव च । माहेश्वरं तथा शाम्बं सौरं सर्व्वार्थसञ्ज्ञयम् । पराशरोक्तं प्रवरं तथा भागवतह्वयम् । इदमष्टादशं प्रोक्तं पुराणं कौर्म्मसंज्ञितम् । चतुर्द्धा संस्थितं पुण्यं संहितानां प्रभेदतः । हेमा० दा० ख० कूर्म्मपु० ।

अष्टादिशाब्दिक पु० कर्म्म० संज्ञात्वात्र द्विगुः । "इन्द्रचन्द्रः काशकृत्स्नापिशली शाकटायनः । पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः" इत्युक्तेषु अष्टसु प्रथमशब्दशास्त्र प्रवर्त्तकेषु इन्द्रादिषु ।

अष्टापद पुंन० ब० व० अष्टौ अष्टौ पदानि पङ्क्तावस्य इत्वौ संख्या शब्दस्य वीप्सार्थत्वाङ्गीकारः आत्वम् अर्द्धर्चादिः । १शारीफलके । अष्टसु धातुषु पदं प्रतिष्ठा यस्य ।२स्वर्णे । आवर्ज्जिताष्टापदकुम्भतोयैः"कुमा० । "अचेष्टाताष्टापदभूमिरेषुः" माघः । उपचारात् स्वर्णमयेऽपि"अष्टापदेन बलवान् राजा वज्रधरोपमः" इति हरिवंशः ३शरभे ४लूतायाञ्च पुं० । तयोरष्टपदत्वात् । अष्टं यथा स्यात्तथा पद्यते । ५क्रमौ । अष्टसु दिक्षु आपद्यते ६कीलके । अष्टाभिः सिद्धिभिरापद्यते । आ+पद-अप् ३त० । अणिमाद्यष्टसिद्धियुक्ते ७कैलासे पु० ।

अष्टापाद्य त्रि० अष्टभिरापद्यते गच्छते आ+पद-कर्म्मणि यत् । अष्टभिर्गुणनीये "अष्टापाद्यम् शूद्रस्य स्त्रेये भवति किल्बिषम्" मनुः ।

अष्टाविंशति स्त्री अष्टाधिका विंशतिः शा० त० आदन्तादेशः ।(आटाऽस) १संख्याभेदे २तत्संख्यान्विते च । विंशशब्देन समासे तत्रैव "अष्टाविंशद्दिनम्" भरुः ज्यो० । पूरणे डट् । अष्टाविंशः । तत्संख्यापूरणे त्रि० स्त्रियां ङीप् । पूरणे तमप् अष्टाविंशतितमः । तत्रैवार्थे त्रि० ।

अष्टाविंशतितत्त्व न० अष्टाविंशतौस्थानेषु तत्त्वंतत्त्वज्ञानं यत० । रघुनन्दनभट्टाचार्य्यकृते मलमासादिषु अष्टाविंशतिस्थानेषु तत्त्वज्ञापके स्मृतिनिबन्धे । तानि च स्थानानि तेन प्रतिज्ञायां दर्शितानि यथा "मलिम्लुचे दायभागे संस्कारे शुद्धिनिर्णये । प्रायश्चित्ते विवाहे च तिथौ जन्माष्टमीव्रते, दुर्गोत्सवे व्यवहृतावेकादश्यादिनिर्णये । तड़ागभवनोत्सर्गे हुयोत्सर्गत्रये व्रते । प्रतिष्ठायां परीक्षायां ज्योतिषे

वास्तुयज्ञके। दीक्षायामाङ्गिके कर्म्मणि होमे। सामश्राद्धे वसुःश्राद्धे मूढजत्वविचारणे। इत्यष्टाविंशति-स्थाने तत्त्वं वक्ष्यामि यत्नतः"। [श्राटकोणादयोऽत्र।

अष्टार त्रि० अष्टौ अरा इव कोणा यस्य। अष्टकोणे। अष्टा-

अष्टारचक्रवत् पु० अष्टारमष्टकोणं चक्रमस्यास्ति मतुप् मस्य वः। अष्टकोणचक्रधारके जिनभेदे।

अष्टाल पु० षोटकदेशभेदे अश्वयन्त्रे विहतिः।

अष्टावक्र पु० अष्टवक्रत्वोवक्रः दन्तौ संज्ञा सुजर्थपरा ष्ट०दीर्घः। ऋषिभेदे स च उद्दालकशिष्यकहोडसुतः। तदुत्पत्तिकथा भा० व० १३२ अ०। "उद्दालकस्य नियतः शिष्य एको नाम्ना कहोड इति विश्रुतोऽभूत्। गुरुशुश्रूषार्थमागतवर्त्ती दीर्घं कालं सोऽध्ययनञ्चकार। तं वै विप्रः पर्य्यचरत् स शिष्य-स्तञ्च ज्ञात्वा परिचर्य्यां गुरुः सः। तस्मै प्रादात् सदा एव सुतञ्च भार्य्याञ्च वै दुहितरं स्वां सुजाताम्। तस्यां गर्भः समभवदग्निकल्पः सोऽधीयानं पितरञ्चाभ्युवाच। सर्व्वां रात्रिमध्ययनं करोषि नेदं पितः सम्यगिवोपवर्त्तते। वेदान् साङ्गान् सर्व्वशास्त्रैरुपेतानधीतवानस्मि तव प्रसादात्। इहैव गर्भे तेन पितर्ब्रवीमि नेदं त्वत्तः सम्यगिवोपवर्त्तते। उपालब्धः शिष्यमध्ये महर्षिः स तं कोपादुदरस्थं शशाप। यस्मात् कुक्षौ वर्त्तमानो ब्रवीषि तस्माद्वक्रो भविताऽस्यष्टवक्रत्वः। स वै तथा वक्र एवाभ्य-जायदष्टावक्र प्रथितो वै महर्षिः"। सचाष्टावक्रसंहिताकारो

अष्टावक्रीय न० अष्टावक्रमधिकृत्य कृतः ग्रन्थः अ०। भा० व० प० १३२ अध्यायमारभ्य अध्यायत्रयात्मक ग्रन्थभेदे यत्र वादेन वन्दिनं जित्वाऽष्टावक्रेण वन्दिपरा-जितं तेनैव जलेनिमज्जितं पितरं कहोडनामानं मुनिं मो-चयामास तेन प्रसन्नेन पित्रा तस्याष्टवक्रतादूरीकरणेन सौम्या-कारता कृतेति वर्णितम्।

अष्टि स्त्री अश्नुते भूमौ क्षिपते अश-क्तिन् षुत्वो० तत्वम्। (आटि) इति ख्याते १बीजे, २षोडशाक्षरपादके छन्दोभेदे च। "अष्ट्यत्यष्टी ततः स्फूर्ते" ह० र०। अक्ष-व्याप्तौ-क्तिन्। २व्याप्तौ। अश-करणे क्तिन्। ४भोगसाधने देहे "शतशारदीया युष्मान् न जरदष्टिर्यासम्" यजु० ३४,५२। जरती अष्टिः शरीरं यस्य "वेददो० अष्टेः षोड़शाक्षरपा-दत्वेन तत्संख्यासाम्यात् ५षोड़शसंख्यायां ऐतत्संख्येवे च। "सप्ताद्रिपञ्चाङ्कदिने विवाहाद्यूध्वमवेशोऽष्टिदिनान्तराले। इति मुहू० चि० फलाभ्यन्तरस्थास्थितत्वकठिनांशवाची तु चकारमध्यः अस्थिशब्दएव ज्यायान् अस्थितत्वतया तस्मा-स्थित्वम्। तकारयुक्तः पाठस्तु असमीचीनः। रसमयस्त्वग-ग्यादेरभावात् फलमेव रसं पिबतेति" भाग०टी०श्रीधरः।

अष्ट्रा स्त्री अश्नुते व्याप्नुतेऽनया अश-करणे ष्ट्रन्। १प्रतोदे "गुनमष्ट्रासुदिङ्गय" ऋ०४,५७,४। "अष्ट्रांप्रतोदम्" भा० २रथचक्रावयवभेदे च। "अष्ट्रां पूषा शिथिरास्वङ्गुरीडजत्" ऋ० ६,५८,२। "अष्ट्रामाराभिति" भा०।

अष्ठीला स्त्री अस्थिवत्तुल्यकठिनाश्मानं रा-क रस्य लः दीर्घः "आश्मापवन् वस्तिस्थं रुद्धा वातबलोद्धताम्"। कुर्य्यात्तीव्रार्त्तिमष्ठीलां मूत्रस्य मार्गरोधिनीमिति वैद्यकोक्त-लक्षणयुक्ते वातजे १व्याधिभेदे। २मूत्राघातरोगभेदे सुश्रुतः तल्लक्षणादि तत्र यथा "अथातो मूत्राघातप्रतिषेधमध्यायं व्याख्यास्यामः वातकुण्डलिकाष्ठीला वातवस्तिस्तथैव च" द्वादशभेदानभिधाय लक्षितं यथा "शङ्खमार्गस्य वस्तेश्च वायु-रन्तरमाश्रितः। अष्ठीलावद्घनं यन्त्रं करोत्यचलसुत्तमम्। विण्मूत्रानिलसङ्गश्च तत्राध्मानं च जायते। वेदना जायते वस्तौ वाताष्ठीलेति तां विदुः"। ३वर्त्तुलाकारे पाषाणखण्डे च। तदाकारत्वेन वाताष्ठीलाया अपि तथा-त्वम् "ततोजघ्ने मांसपेशी लोष्ठाष्ठीलेव संहता" भा०आ० प०११५ अध्या०। मूत्राघाते स्त्रीत्वमपि भेदनं दीपनं छेद्यमानाष्ठीलसुल्लेषु" सुश्रुतः।

अष्ठीवत् पु० नास्ति अतिशयितमस्थि यस्मिन् मतुप् ष्ठुत्वो० नि०। (आंटु) इति ख्याते जानुसन्धिस्थाने। अष्ठीवन्तौ परिकृष्णौ च देहे" ऋ०७,५०,२, अरुष्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम्' अथ०१०,१६२,४, अस्य अरुष्पूर्व्वपदत्वे हस्वे १अदन्तता अर्वष्ठीवं न०। "चत्वार्य्यर्वष्ठीवानि" शत०ब्रा०। २ष्ठीवद्विशिष्टे त्रि०।

अस दीप्तौ अक०सकर्के गतौ च सक०भ्वादि०उभ०सेट्। असति ते आसीत् आसिष्ट। "लावस्य उत्पाद्य द्रवास यत्रः" कुमा०।

अस विद्यमानतायाम् अदा०अक०पर०सेट्। अस्ति स्तः सन्ति असि स्थः स्थ अस्मि स्वः स्मः। स्यात् स्युः। असु स्ताम् सन्तु एधि-असानि। आसीत्। अस असार्व्वधातुके भूादेशः। तेन भूधातुवद्रूपम्। विद्यमानता च काल संबन्धधारणं तदुक्तं हरिणा "आत्मानमात्मना विश्वदृश्यो व्यवदिश्यते। अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मकः" "अस्त्युत्तरस्यां दिशि देवतात्मा" कुमा० यज्ञावहासार्थम सत्कृतोऽसि गीता" "प्रपन्नोऽस्मि स्वैरं रतिरसमहानन्दनिरताम्" श्यामास्तवः। "स्याद्वा संख्यावतोऽर्थस्य समुदायोऽभिधायकः" फणिभा० "स्यादासंसिद्धे भिक्षे च सहज

प्राकृतावपि" माघः कामतस्तु प्रदृक्षानामिमाः स्युः क्रमशो वराः" मनुः "दिनेदिने त्वं तनुरेधि रेऽधिकम्" नैष० "आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्" मनुः । "नत्वेवाहं जातु नासमिति" गीता । सत् सन्नौ सन्नः । "सदेव सोम्येदमग्र आसीत्" छा० उ० "योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते" मनुः । "नासतोविद्यतेऽभावोनाभावो विद्यते सतः" गीता स्त्रियां ङीप् "सती सतो योगविसृष्टदेहा" कुमा० "सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी हरिः वि+अति+व्यतिहारे परस्परमेकरूपेण स्थितौ "अन्यो व्यतिरेके तु समापि धर्म्मः" भट्टिः ।

अस क्षेपे दिवा०पर०सक०सेट् । अस्यति अस्येत् अस्यत आस्यत् आस्यत् आस । असिता-अस्ता असिष्यति । अस्यन् अस्यमानः अस्तः । असितुम्-अस्तुम् । असित्वा-अस्त्वा अभ्यस, निरस "आरे अस्मद्वैरं हेतो अस्यतु" । ऋ० १,११४,४, "दस्यवे हेतिमस्यार्य्यम्" ऋ० १,१०३,२, अति-अतिदूरक्षेपणे "बहुभिरेकमत्यस्यन्नेकेन च बहून् जनान्" भा०अत्यस्तः पा० । वि+अति । वैपरीत्येन स्थापने "व्यत्यस्तपाणिना कार्य्यमुपसंग्रहणं गुरोः" मनुः "व्यत्यासश्चेतयोगतः" स्मृतिः अधि-आरोपे आरोपश्च अतस्मिन् तद्बुद्धिः अन्योपरिस्थापनञ्च आद्यार्थे "अप्रत्यक्षेऽपि हुताशने बालास्तलमलिनताद्यध्यस्यन्ति" "आह कोऽयमध्यासोनाम" उच्यते स्मृतिरूपः परत्वपूर्व्वदृष्टावभासः" भा०भा० । अनु-पश्चात् सह वा क्षेपणे अन्वस्तः । "सङ्गमेखलावल्कलेनान्वस्ता भवति" शत०ब्रा० । अप-दूरीकरणे "गतिरपास्तसंस्था मतिः" मालतीमा० "किमित्यपास्याभरणानि यौवने" कुमा० । अभि-अभ्याहत्तौ, "अभ्यस्यन्ति तटाघातं निर्जितैरावता गजाः" कुमा० "अभ्यासेन तु कौन्तेय ! वैराग्येण च गृह्यते" गीता । "शैशवेऽभ्यस्तविद्यानाम्" रघुः । अव-अवक्षेपे "तामवास्यतो गच्छति च सूजम्" शत०ब्रा० समन्तात्क्षेपे "तामवास्यत्यागच्छति सदम्" शत० ब्रा० उद्-ऊर्द्धोत्क्षेपणे "पुच्छमुदस्यति" सि०कौ० । परि+उद् भिन्नतया बोधने । "प्राधान्यं हि विधेर्यत्र प्रतिषेधेऽप्रधानता । पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्" मीमां० यथा श्राद्धादौ पर्य्युदस्तकालेरात्र्यादिः "अमावास्यायां पितृभ्योदद्यात्" "रात्रौ श्राद्धं न कुर्वीत" उभयोरेकवाक्यतया रात्रीतरामावस्यायां श्राद्धं कुर्वीतेति हि बोधः तत्र रात्रिः पर्य्युदस्ता एवमन्यत्रापि । परितःक्षेपणे च "अन्याः सर्वे पर्य्युदस्ता ऋषिभिर्निवेशने" भा०स०प० । वि+उद्-निवारणे । "चीराणीव व्युदस्तानि रेजुस्तत्र महावने" "रामा०त्वन्त हेतूनतीत्यैतान् कामक्रोधौ व्युदस्यच" । भा०स०प० । उप-समीपस्थापने "तस्याधस्तात्सदृक्षिरुपास्यति चमसेषु" कात्या० १०,५, नि-अर्पणे "न मद्विधे न्यस्यति भारमन्याम्" । निक्षेपरूपेणार्पणे च "न्यासीकृता स्थानभिदाक्षरेण" कुमा० "राज्यं न्यासमिवाभुनक्" रघुः । उच्चारणपूर्व्वकं तत्र तत्र स्थाने अर्पणीतया ध्याने च । "आदाङ्ष्ठादिकन्यासः करशुद्धिस्ततः परम् । अङ्गुलिव्यापकन्यासौ हृदादिन्यास एव च" तन्त्रम् । उप+नि+आचारम्भणे "उपन्यासस्तु वाङ्मुखम्" अमरः । प्रथमप्रयोगे च "भूतमर्थमुपन्यस्तं पूर्व्वमावेदितं न चेत् । क्षीयते व्यवहारेण" स्मृतिः "स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः" किरा० सम्+नि त्यागे "व्रीड़ादस देवसदोऽस्य मन्ये संन्यस्तदेहः स्वयमेव कामः" कुमा० विहितकर्म्मणां विधानेन त्यागे च "दशलक्षणकं धर्म्ममनुतिष्ठन् समाहितः । वेदान्तं विधिवच्छ्रुत्वा सन्यस्येदनृणो द्विजः" मनुः । "न हि संन्यसनादेव सिद्धिं समधिगच्छति" "मयि संन्यस्य कर्म्माणि" गीता । निस्-निर्-निष्ठीवने दूरीकरणे च । निरस्यति "निष्ठीवति निरस्यति" पा०धातुपा० "निरस्तः परावसुः क्षणनिरसने भवदेवः "निरस्तगाम्भीर्य्यमपास्तधैर्य्यम्" माघः "निरास भट्टं कुपितेव पद्मिनी" भट्टिः "क्षणदलितलनूपुरा निरासे" किरा० । त्वरितोद्धारणे च "निरस्तं त्वरितोदितम्" अमरः ।

परा-निराकारणे "एतेन खण्डनकारमतमपि परास्तम्" चिन्ता०

परि-परावर्त्तनेन स्थापने "सुखेन पर्य्यस्यविलोचनेन" कुमा० । "पर्य्यस्यन्निह निचयः सहस्रसंख्याम्" किरा० । अर्पणे च "तान्कौशपर्य्यस्तरुचः क्षितस्थ" कुमा० । वि-परि-वैपरीत्ये, परिवर्त्तने स्थानान्तरे च "इतरथा पात्रे विपर्य्यस्येते" शत०ब्रा० । "संशयविपर्य्यासनिवारणेनेति" चिन्ता० "विपर्य्यासितदर्शनैः" बौद्धका० ।

प्र-प्रक्षेपे "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते" गीता । "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते" मनुः

अनु-प्र-आनुलोम्येन अनुगततया एकरूपेण निवेशने अनुप्रासः

प्रति-प्रतिरूपक्षेपणे । "तद्यथाऽहिर्निर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीत" शत० ब्रा० ।

वि-विशेषरूपेण सम्यगवबोधनाय निवेशने व्यासः विग्रहवाक्यम् तस्य समस्तवाक्यार्थस्य विशेषेणावबोधहेतुतया निवेशनात्

तद्भावस्म् विभागे "विव्यास वेदान् यस्मात् स तस्मात् व्यास इति स्मृतः" भा०आ०प०। पारावारेति व्यसं समसं विपरीतञ्च" सि०कौ०। व्यस्तः "व्यस्तरात्विन्द्विस्त ते" कुमा० पृथक्करणे एवैकशः प्रयोगे व्यस्तः "व्यस्तसमस्तमहाव्याहृतिहोमे" भवदेव। निवारणे च "व्यस्तद्रुदलां गिरिरैः पयोभिः" भट्टिः। विक्षेपे "व्यस्तास्तारागणाइव" भा०।

वि-नि-अर्पणे "विष्णोर्बिभसि विघ्ननायकतिना सिद्धान्तसङ्कावली विन्यस्ता" सि०सु० "विभागविन्यस्तमहार्थरत्नम्" भट्टिः।

सम्-संक्षेपे "समासेन निबोधत" पुरा०समस्ता। संक्षिप्यन्यसने यथा पीतम् अम्बरमिति समुदायस्य पीताम्बर इति संक्षेपेण प्रयोगः समासः। "सर्व्वोऽप्येकदेशोऽङ्गा सह समस्यते" वार्त्ति०। "समस्तमानपदार्थातिरिक्तपदार्थबोधकत्वं बहुव्रीहित्वमिति सारमञ्जरी। "समासः पडिबधोबुधैः" हरिः साकल्ये च समस्तम् "ज्ञानमस्ति समस्तस्य देवीमा० "व्यस्तसमस्त महाव्याहृति होमे विनि०" भवदे० संयोजने च समस्य समादयत गुर्वरिमाम्" किरा०।

असंयत त्रि० न०त०। बन्धनशून्ये "असंयतोऽपि मोक्षार्थी" काद०। असंयतः अबद्धः अकारे विष्णौ भक्तच।

असंयुक्त त्रि० विरोधे न०त०। १वियुक्ते। २अङ्गनवर्णामिश्रिते व्यङ्गनवर्णे ३द्रव्यान्तरैरसंसृष्टे च।

असंयुत त्रि० न०त०। संयुतभिन्ने "हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्। औरस्यं तं विजानीयात् कण्ठ्यमाङ्गरसंयुतम्" पा० शिक्षा।

असंयोग पु० अभावे न०त०। १संयोगाभावे न०ब०। २संयोगशून्ये त्रि०। संयोगः क्रियाजन्यः द्रव्याश्रयगुणविशेषः हलवर्द्धयोरचाऽव्यवधानञ्च। "असंयोगोपधात्" पा०।

असंलग्न त्रि० न०त०। १संलग्नभिन्ने विभक्ते २असंबन्धे च।

असंवृत त्रि० न संवृतः। १अनाहते "नासंवृतमुखः कुर्यात् क्षुतं जिम्भां तथैव च" स्मृतिः "संवृतं संवरणम् न०७त०। आत्मनावरणे २नरकभेदे न० "योऽस्य धर्म्ममाचष्टे यद्वोपदिशति व्रतम्। सोऽसंवृतं नाम तमः सह तेनैव गच्छति" मनुः।

असंशय पु० अभावे न०त०। १सन्देहाभावे न०ब०। २सन्देहशून्ये "असंशयं क्षत्रपरिग्रहक्षमा यदार्य्यमस्यामभिलाषि मे मनः" रघु०सन्देहश्च एकस्मिन् धर्म्मिणि विरुद्धकोटिद्वयज्ञानम् यथा पर्व्वतो वह्निमानुनवा दहनतदभावरूपविरुद्धकोटिद्वयमेकस्मिन् पर्व्वते धर्म्मिणि भावते "स्थाणुः पुरुषो वेत्यत्र अस्थाणुत्वस्य पुरुषत्वव्याप्यतावच्छेदकतया स्थाणुत्वधर्म्मे कत्वेन विरुद्धत्वात्तथात्वमिति वेदः ३निश्चये च

असंश्रव त्रि० नास्ति संश्रवः सम्यक् श्रवणं यत्र। सम्यक्श्रवणाभावेऽन्ये दूरदेशादौ। "असंश्रवे चैव गुरोर्न किञ्चिदपि कीर्त्तयेत्" मनुः।

असंश्लिष्ट त्रि० न०त०। संश्लेषशून्ये १विभक्ते २असङ्गते च।

असंसर्ग पु० अभावे न०त०। १संसर्गाभावे। न०त०। २संसर्गशून्ये निस्सम्बन्धे।

असंसर्गाग्रह पु० असंसर्गस्य परस्परसम्बन्धाभावस्याग्रहः। मीमांसकोक्तस्य इदमिति रजतमित्यादि ज्ञानहेतवस्यापि प्रवृत्तिजनकताप्रयोजके परस्परसम्बन्धाभावस्यावोधे। विस्तरः असत्ख्यातिशब्दे अख्यातिपक्षनिरूपणे ५३२पृष्ठे द्रष्टव्यः।

असंसृष्ट त्रि० न० त०। १संसर्गरहिते। संसर्गश्च द्रव्ययोः सम्बन्धः धनिनोरेकत्र द्रव्ये विभागानन्तरं समुदायस्वामित्वसम्पादनञ्च "विभक्तेषु पुनः पित्रा भ्रात्रा चैकत्र संस्थितः। पित्र्यैश्वर्य्यात् वा प्रीत्या स तु संसृष्ट उच्यते इह० उक्तेः। संसृष्टं द्रव्यमस्यास्ति अर्शा०अच् संसृष्टः। इति संसृष्टी च विभागानन्तरमेकत्र द्रव्येऽन्येन सह सम्बन्धवान् तद्भिन्नः असंसृष्टः असंसृष्टी च "अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यधनं हरेत् असंसृष्टापि चादद्यात् संसृष्टीनान्यमाद्यजः" या०स्मृ०। "तस्माद्विभक्ताऽसंसृष्टिन्यपुत्रे स्वर्याते पत्नी धनं प्रथमं स्पृशतीति" मिता०।

असंस्कृत त्रि० सम्+कृ-क्त सुट् न०त०। १गुणान्तराधानरहिते २अपरिष्कृते ३गर्भाधानादिसंस्काररहिते, च। "असंस्कृतः सुतो ज्ञेयोनापरो वेदपारगः" स्मृतिः "असंस्कृतास्तु संस्कार्य्या ब्राह्मणैः पूर्व्वसंस्कृतैः" या०स्मृ०। व्याकरणसंस्कारशून्ये ४अपशब्दे पु० "संस्कारोहि सतो गुणान्तराधानम् स च लौकिकालौकिकहेतुकः। तत्र यथा गर्भाधानादिना अलौकिकेन हेतुना देहः संस्क्रियते तत्संस्काराच्च तदभिमानी देही। एवं स्नानाचमनादिनाऽपि। लौकिकेन तु पाकादिना द्रव्यान्तरयोगेन वा अन्नादौ गुणान्तराधीयते अतएव संस्कृतं भक्ष्यः इति पा० सूत्रे भक्ष्यस्य दध्याद्युपसेकेन संस्कार उक्तः। यत्रावे संस्कृतः शावः सक्तुः दधि संस्कृतः दाधिकः सूपः" सि०कौ०।

असंस्तुत त्रि० न०त०। १अपरिचिते। "प्रेयानयमसंस्तुत इव परित्यक्तः" काद०। २सम्यगस्तुते च।

असंस्थित त्रि० न०त०। १अप्रेते परलोकं प्रति अप्रस्थिते "असंस्थितान् प्राणान् संस्थापयेत्" शत०ब्रा०२असुस्थिते

अवस्थितभिन्ने २चले च। "गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः" इति शक्रः।

असंहत त्रि० न संहन्यते इतरेण संहन्यते सम्+हन-क्त न०त०। १संघातमनापन्ने २असंश्लिष्टे "सर्वतश्छिन्नं पश्चाद्धतं वा बहुभमयुग्मसंहतं प्रागग्रं मूलमाच्छादयन्" गोभि०। "असंहतमसंलग्नम्" सं०त० रघु०। सांख्यमतसिद्धे २पुरुषे पु०। तन्मते हि प्रकृत्यादेः शय्याप्रहादिवत् संहत्यैव (इतरसापेक्षतयैव) पुरुषार्थकारित्वम् पुरुषस्य तु प्रकाशरूपक्रियायां नेतरापेक्षाऽस्तीति तस्यासंहतत्वम्। संहतपरार्थत्वात् पुरुषस्य" सां०भा०। "विवादास्पदं प्रकृतिमहदादिकं परार्थं स्वेतरस्य भोगापवर्गफलकं संहतत्वात् शय्यासनादिवदित्यनुमानेन प्रकृतेः परोऽसंहत एव पुरुषः सिद्धति तस्यापि संहतत्वेऽनवस्थापत्तेः। पातञ्जले च "परार्थं संहत्य कारित्वादिति" सूत्रकारेणानुमानं कृतं तत् तु यथाश्रुत मेवान्यावयवसाधारणम्। इतरसाहित्येनार्थक्रियाकारित्व मेव संहत्यकारिताशब्दार्थत्वात्। पुरुषस्तु विषयप्रकाशनरूपायां स्वार्थक्रियायां नान्यदपेक्षते नित्यप्रकाशरूपत्वात्। पुरुषस्यार्थसम्बन्धमात्रे बुद्धिरूपत्वापत्तेश्च। सम्बन्धस्तु नासाधारण्यव्यक्तिरेति। "संहतपरार्थत्वात्" सां०सू०भा० "अतोऽसंहतः संहतदेहादिभ्यःपरः पुरुषः सिध्यति"।

असकृत् अव्य० न सकृत् न०त०। पौनःपुन्ये। "असकृदेकरथेन तरस्विना" रघुः "अन्यादोनासकृच्चैतान् गुणैश्च परिनोदयेत्" "असकृद्गर्भवासेषु वासं जन्म च दारुणम्" इति च मनुः। "आवृत्तिरसकृदुपदेशात्" शा०सू०।

असक्त त्रि० सञ्ज-क्त न०त०। १आसक्तिशून्ये २फलाभिलाषशून्ये च "असक्तः सुखमन्वभूदि"ति रघुः। "कुर्यात् विद्वांस्तथाऽसक्तः" इति गीता "असक्तमारभवतो यथा यथम्" किरा०। [सक्तिशून्ये

असक्थ्य (कित्र) त्रि० नास्ति सक्थि यस्य वा टच् समा०।

असक्रा स्त्री सम्+क्रम-क्विप् पृ० सकोऽन्तलोपः न०त०। संक्रान्त्यर्थां स्त्रियाम्। "न इदं पित्र्यमसक्राम्" ऋ०६,६३,८, असक्रामसक्रमणीम्" निरु०।

असखि पु० न सखा न टच् समा०। सखिभिन्ने रिपौ।

असगोत्र त्रि० न समानं गोत्रमस्य वा समानस्य सः। भिन्नगोत्रे "असगोत्रः सगोत्रोवा यदि स्त्री यदि वा पुमान्। यस्याग्निदाता प्रेतस्य पिण्डं दद्यात् स एव हि" स्मृतिः पक्षे न सादेशः। असमानगोत्रः "असमानगोत्रार्षेयीम् भार्यां विन्देत" स्मृतिः।

असङ्कल्प पु० विरोधे न० संकल्पाभावे। न०ब०। संकल्पशून्ये त्रि०।

असङ्कसुक त्रि० न०त०। स्थिरमतौ।

असङ्कुल त्रि० न सङ्कुलः। १परस्परावियुक्ते। २व्यासादिपदे ३विस्तीर्णे पथि च पु०।

असङ्क्रान्तमास पु० न संक्रान्तः न राश्यन्तरं प्राप्तोरविर्यत्र चान्द्रमासे। शुक्लप्रतिपदादिदर्शान्ते रविसङ्क्रमशून्ये मलमासे। "असङ्क्रान्तमासोऽधिमासोनिरुक्तः" विवरणमधिमासशब्दे १२१ पृ०।

असङ्क्षेप पु० अभावे न०त०। १संक्षेपाभावे विरोधे न०त०। २विस्तारे न०ब०। ३संक्षेपशून्ये विस्तीर्णे त्रि०।

असङ्ख्य त्रि० नास्ति संख्या इयत्ता यस्य। इयत्ताशून्ये। "प्रसह्य तेजोभिरसंख्यतां गतैः" माघः। [संख्यान्विते च

असङ्ख्यात त्रि०स्स-ख्या-क्त न०त०। १इयत्ताशून्ये २बहु-

असङ्ख्येय त्रि० संख्यातुमशक्यः १इयत्तारहिते २विष्णौ पु० "असंख्येयोऽप्रमेयात्मा" विष्णुस० संख्यार्हभेदादि न विद्यते इत्यसंख्येयः भा०।

असङ्ग पु० अभावे न०त०। १सम्बन्धाभावे नास्ति सङ्गो विषयैर्यस्य २पुरुषे जीवे तस्य सर्वसम्बन्धशून्यत्वात् तथात्वम्। "असङ्गोऽयं पुरुषः" सां०सू०। ३सम्बन्धशून्ये ४प्रतिबन्धशून्ये च त्रि०। "असङ्गमद्भिरपि सारवत्तया" रघुः। [२असंबन्धे ४सङ्गतिशून्ये च।

असङ्गत त्रि० न०त०। सङ्गतभिन्ने १अयुक्ते २युक्तिशून्ये

असङ्गति स्त्री अभावे न०त०। १सङ्गत्यभावे। सङ्गतिश्च "सङ्गतिरनन्तराभिधानव्याप्ता, आनन्तर्याभिधानप्रयोजकविवक्षाजनकज्ञानविषयोऽर्थः सङ्गतिः, जायते च कार्ये कारणे वा ज्ञाते कारणत्वस्य कार्यत्वस्य ज्ञानात् किमस्य कारणं कार्यं वेति जिज्ञासा" दीधितिकृता सा च षोढा तदुक्तमभियुक्तैः "सप्रसङ्गोपोद्घातो हेतुतावसरस्तथा। निर्व्याहकैककार्यत्वम् षोढा सङ्गतिरिष्यते" इति व्याख्यातञ्चैतत् जगदीशेन। "निर्दिष्टोपपादकत्वमुपोद्घातत्वम् "चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः" इति प्राचीनोक्तौ चिन्ता पदं कृदभिहितोभाव इति न्यायेन चिन्तनीयपरं तथा च तस्याऽपि प्रकृतसिद्ध्युपपादकतया चिन्तनीयत्वं प्रकृतसिद्ध्युपपादकत्वपर्यवसन्नमित्यर्थः। हेतुत्वं कारणत्वम्। अवसरोऽनन्तरवक्तव्यत्वम् अनन्तरोद्दिष्टत्वम् तथा इति श्रीभास्करः। निर्व्याहकं कारणतानिर्व्याहकं कार्यत्वमिति यावत् एकं कार्यं ययोरिति व्युत्पत्त्या एककार्य-

कारित्वम् प्रसङ्गवन्तु सङ्गतित्वे सत्युपोद्घातादिभिन्नत्वम् "श्रुतस्य उपेक्षानर्हत्वं प्रसङ्ग" इति प्रवादेऽपि श्रुतत्वमनन्तराभिधानप्रयोजकश्रुतिविषयत्वम् उपेक्षानर्हत्वञ्च प्रसङ्गलक्षणोपेक्षा एव उपोद्घातादवस्तदन्वयं तेन ततोऽपि प्रागुक्तस्यैवार्थस्य लाभः" इति न्यायमतम् । वेदान्तिमते तु सङ्गतिस्त्रिविधा "शास्त्रेऽध्याये तथा पादे न्यायसङ्गतयस्त्रिधा। शास्त्रादिविषये ज्ञाते तत्तत्सङ्गतिरूह्यताम्" । शास्त्रप्रतिपाद्यमध्यायप्रतिपाद्यं पादप्रतिपाद्यमर्थमवगम्य शास्त्रसङ्गतिरध्यायसङ्गतिः पादसङ्गतिश्च तिस्रः सङ्गतय ऊहितुं शक्यन्ते इति तदर्थः । तत्र "शास्त्रं ब्रह्मविचाराख्यमध्यायाः सुबहुर्विधाः । समन्वयाविरोधौ द्वौ साधनं च फलं तथा" ब्रह्मविचाराख्यशास्त्रस्य प्रथमेनाध्यायेन समन्वयः, (सर्व्वेषां वेदान्तानां ब्रह्मणि तात्पर्य्येणावधारणम्) प्रतिपाद्यते । द्वितीयेन अविरोधः । तृतीयेन साधनम् चतुर्थेन फलम् । इत्येवमध्यायार्थाः एवमेषां प्रतिपाद्यसङ्गा षोड़शपादप्रतिपाद्यानर्थानभिधाय। "ऊहित्वा सङ्गतोक्तिस्तो वाक्यवाक्यान्तरसङ्गतीः तत आक्षेपदृष्टान्तप्रत्युदाहरणादिकाः । पूर्व्वपक्षस्य सिद्धान्तयुक्तिं वीक्ष्य परे नये । पूर्व्वपक्षोक्तयुक्तिं च तत्राक्षेपादियोजयेत्" इति वेदान्तभा० अवान्तरसङ्गतित्वेनकथा । आक्षेपसङ्गतिर्दृष्टान्तसङ्गतिः प्रत्युदाहरणसङ्गतिरित्येवमादि । उदाहृतञ्च तत्रैव तद्यथा प्रथमाधिकरणे ब्रह्मविचारशास्त्रमारभ्यमाणीयमिति सिद्धान्तः । तत्र युक्तिः ब्रह्मणः संदिग्धत्वमिति । द्वितीयाधिकरणस्य जगज्जन्मादि ब्रह्मलक्षणं न भवतीति पूर्व्वपक्षः तत्र युक्तिः जन्मादेर्जगद्भिन्नत्वादि । तदुभयमवलोक्य तयोराक्षेपसंगतिं योजयेत् । संदिग्धत्वादुक्तं विचार्य्यमित्यनुक्तं जन्मादेरन्यनिष्ठत्वेन ब्रह्मलक्षणत्वाभावे सति ब्रह्मैव नास्ति कुतस्तस्य संदिग्धत्वं विचार्य्यत्वं वेत्याक्षेपसंगतिः । दृष्टान्तप्रत्युदाहरणसङ्गतौ अपि योजयितुं शक्येते । यथा संदिग्धत्वहेतुना ब्रह्मणो विचार्य्यत्वं तथा जन्मादन्यनिष्ठत्व हेतुना ब्रह्मणो लक्षणं नास्तीति दृष्टान्तसंगतिः । यथा विचार्य्यत्वे हेतुरस्ति न तथा लक्षणसद्भावहेतुं पश्याम इति प्रत्युदाहरणसंगतिः । एते दृष्टान्तप्रत्युदाहरणसंगती सर्व्वत्र सुलभे पूर्वाधिकरणसिद्धान्तदृष्टोत्तराधिकरणपूर्व्वपक्षे हेतुमत्त्वसाम्यस्योत्तराधिकरणसिद्धान्ते हेतुशून्यत्ववैलक्षण्यस्य च मन्दैरप्युत्प्रेक्षितं शक्यत्वात् । आक्षेपसंगतिर्यथायोगसुज्ञेया। प्रासङ्गिकसंगतिरुच्यते । देवताधिकरणस्याधिकारविचाररूपत्वात्समन्वयाध्याये ज्ञेयब्रह्मवाक्यविषये तृतीयपादे च संगत्यभावेऽपि बुद्धिस्थावान्तरसंगतिरस्ति । तथाहि पूर्व्वाधिकरणेऽङ्गुष्ठमात्रवाक्यस्य ब्रह्मपरत्वादङ्गुष्ठमात्रत्वं ब्रह्मणो मनुष्यमात्रहृदयापेक्षं मनुष्याधिकारत्वाच्छास्त्रस्येति उक्तम् तत्प्रसङ्गेन देवताधिकरणं बुद्धिस्थम् सेयं प्रासङ्गिकी संगतिः । तदेवंन्यायसंगतिर्व्युत्पादिता" । एवं मीमांसासङ्गतिरपि अधिकरणमालायां दृश्या विस्तरभयान्नोक्ता दृष्टसङ्गत्यभावेऽसङ्गतिः । २असम्बन्धमात्रे ३अर्थालङ्कारभेदे च अलङ्कारशब्दे ३९४ पृष्ठे दृश्यः । [२तच्छून्ये त्रि० ।

असङ्गम पु० अभावे न०त०। १सङ्गाभावे मेलनाभावे न०त०

असङ्गिन् त्रि०सङ्ग-घिनुण् न०त० । सम्बन्धशून्ये "संसर्गासङ्गिसख्यगृधीहेतता या गिरामियम्" वे० परि० ।

असच्छास्त्र न०असत् असद्विषयकत्वेनानिष्टप्रयोजकम् शास्त्रम्। बौद्धागमे । तस्यासदर्थप्रतिपादकत्वात् वैदिकधर्म्मविरुद्धार्थकत्वाच्च तथात्वम्। "असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्इत्यादिनां तेषामीश्वरानङ्गीकारेण वासत्त्वं ज्ञेयम्"।

असज्जन पु० विरोधे न०त० । सज्जनभिन्ने दुर्जने "न मामसज्जनेनार्थो समानयितुमर्हसि" रामा० ।

असञ्ज्ञा स्त्री अभावे न०त०। १संज्ञाभावे न०ब० । संज्ञाशून्ये त्रि० । संज्ञा च ज्ञानं नाम ईक्षितादित्तापनञ्च तेषामभावः । "तेभ्योऽसञ्ज्ञां चकार" शत०ब्रा० ।

असत् त्रि० अस+शतृ न०त०। १सद्भिन्ने, निरुपाख्ये निःस्वरूपे निषेधरूपेण प्रतीयमाने, २अभावत्वात्यये, "अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् । असदित्युच्यते पार्थे"ति गीतोक्ते अश्रद्धया कृते ३होमादौ च ।४इन्द्रे पु०।५दुष्टाचारिणि असाधौ त्रि० "नच सत् नासदुच्यते" गीता।स्त्रियां ङीप् सा च ६कलटायाम् । "परितस्तार रवेरसत्यवस्थम्" माघः नामरूपाभ्यामव्याकृते कारणात्मनास्थिते सूक्ष्मरूपे ईश्वरव्यक्ते च "असदेवाग्र आदीत्" कथमसतः सज्जायेत" च इति छा०उप० बौद्धागमसिद्धं सत्त्वमर्थक्रियाकारित्वम् तच्छून्ये ७अकिञ्चित्करे अभावादौ८अविद्यमाने "नासतो विद्यते भावः" इति यत्तत् सदसतोः परमिति च" गीता "विभेदजनकाज्ञाने नाशमात्यन्तिकं गते । आत्मनोब्रह्मणाऽभेदमसन्तं कः करिष्यति" संक्षे०भा० ।

असत्कर्म्मन् न० कर्म्म० । १वेदादिशास्त्रनिषिद्धे दुष्कर्म्मणि न सत् कर्म्म यस्य । २साध्वाचारशून्ये त्रि०स्त्रियां ङीप्

असत्कृत त्रि० न०त०। १अपूजिते २असम्मानिते "असत्कृतमवज्ञातम् तत्तामसमुदाहृतम्" गीता। "अवज्ञावहासार्थमसत्कृतोऽसि" गीता।

असत्ख्याति स्त्री असतः सत्त्वशून्यस्यानिर्वचनीयस्य ख्यातिर्ज्ञानम्। अनिर्वचनीयस्य रजतप्रपञ्चादेर्ज्ञाने। यथा शुक्तिकायां रजतमनिर्वचनीयतयोत्पद्यमानमिव प्रतीयते एवं ब्रह्मणि जगत् अनिर्वचीयतयोत्पन्नमिव ख्यायते इति हि वेदान्तिनां मतम्। अस्ति हि सर्वलोकेषु प्रसिद्धम् इदं रजतमित्यादिज्ञानं तच्च प्रवर्त्तकतया सर्वैरभ्युपगम्यते। तत्र चतस्रोविधाः अख्यातिः अन्यथाख्यातिः आत्मख्यातिः असत्ख्यातिश्चेति विवरणे स्थितम्। तत्राख्यातिवादिनामयमाशयः। इदं रजतमित्यादौ चक्षुरादिसन्निकर्षात् पारिशेष्यात् रजतं स्मर्य्यते न तु ज्ञाप्यते इति तस्य स्मरणख्यातित्वमिति। तदेतन्न सम्यक् रजतस्य प्रत्यक्षत्वेनानुभयमानत्वात् स्मर्य्यमाणस्याप्रवर्त्तकत्वाच्च नचेदमंशस्यैव प्रत्यक्षत्वं न रजतस्येति वाच्यम् यथा सत्यरजतस्थलेषु इदं रजतम् अयं घट इत्यादिषु इतरेतर संसृष्टौ सामान्यविशेषौ अपरोक्षतयाऽनुभूयेते अत्रापि तथानुभवात्। अथ सामान्यविशेषयोर्नैरन्तर्य्येण प्रतिभासात् तथा व्यवहारो न तु संसर्गज्ञानरूपविशिष्टज्ञानसम्भवादिति वाच्यम् सत्यस्थलादौ चक्षूरजतायाः अदर्शनात्। अथ पुरोवर्त्तिनि रजतसंसर्गाभाव एवज्ञानेति चेन्न पुरोवर्त्तिनि रजतसत्त्वासत्त्वयोरेवावयोर्विवादात् तदभावस्य न्यूनत्वे साधकत्वात्। किञ्च पुरोवर्त्तिनि रजतसंसर्गाभावः कथं निश्चीयते किं तद्गोचरज्ञानाभावात्? किं वा नेदं रजतमिति बाधज्ञानात्? नाद्यः तद्गोचरज्ञानाज्ञानयोरेवावयोर्विवादात् अर्थाभावेन ज्ञानाभावनिश्चयेऽन्योन्याश्रयात्। तस्मादपरोक्षज्ञानोदयादेव पुरोवर्त्तिनि रजत सत्ताङ्गीकार्य्या। न च अर्थसत्तानिश्चयाधीनः ज्ञानसत्तानिश्चय इति कल्पनात् प्रकृते चार्थासत्त्वात् न ज्ञानसत्त्वमिति वाच्यम् अर्थसत्तानिश्चयस्यापि निश्चयान्तराधीनतयाऽनवस्थाप्रसङ्गात्। तस्मात् संविन्निश्चयः स्वयंप्रकाशमयीप्रयोज्यतया स्वतएव। तदधीनस्तु अर्थसत्तानिश्चयः। नापि द्वितीयः रजतमिति उत्तरज्ञानविरोधिज्ञानसत्त्वे नेदं रजतमिति ज्ञानानुदयेन तेन बाधायोगात्। किञ्च इदं रजतमित्यत्र यथा इदमाकाररजताकारयोरविवेकस्तया कल्प्यते तथा नेदं रजतमित्यत्रापि तयोरविवेक एव कल्प्यतां न तु विशिष्टसंसर्गसंवित्त्यापि अस्माभिर्नेतुं शक्यते। अथ विशिष्टज्ञानस्यैव संवादिप्रवृत्तिजनकत्वमिव विशिष्टनिषेधबोधस्यैव निवर्त्तकत्वमिति निषेधस्य विशिष्टसंसर्गविषयकत्वमिति चेन्न प्रवृत्तिनिवृत्तिभ्यां प्रत्येव संसर्गतदभावयोर्ज्ञेयतयैवोपपत्तौ संवादिविसंवादित्वयोः तत्र प्रवेशे गौरवात् किञ्च प्रवृत्तेः संवादित्वमपि वस्तुसत्त्वासत्त्वनिबन्धनम्। तच्च सत्त्वासत्त्वयोरुभयत्राप्यस्ति। न च पुरोवर्त्तिनि रजताभावः सर्वसम्मतः। शुक्तिकायां यथाभासमेवासत्यरजतस्य शुक्तिज्ञानेन निरसनयोग्यत्वेनाङ्गीकाराभिः स्वीकारात्। दृश्यांस्तु भेदः तत्र मिथ्यारजताभ्युपगमेऽपि नेदं रजतमिति त्रैकालिक रजतनिषेधः परमार्थिकरजतविषयत्वाच्च विरुध्यते। नचाप्रसक्तनिषेधानुपपत्तिः। मिथ्याभूतेऽपि रजते परमार्थ रजतार्थिनां प्रवृत्तिदर्शनेन परमार्थरजतस्य सामान्योपाधिना रजतत्वेन प्रसिद्धिसम्भवात् अन्यथा भूतलादौ घटादि निषेधोऽपि अप्रसक्तनिषेधः स्यात् तत्र घटादिसत्त्वे तदभावोव्याहन्येत। तदसत्त्वे तु अप्रसक्तनिषेधः स्यात्। ततश्च देश सामान्योपाधिना कालसामान्योपाधिना वा यथा घटादि प्रसक्तिर्नतु तत्कालिकभूतलत्वादिना तथा परमार्थरजतस्य प्रसक्तिर्भविष्यति। एवञ्च उत्तरकाले नास्त्यत्र रजतमिति प्रत्यक्षं सत्यरजतविषयम् मिथ्यैव रजतमभादिति प्रत्ययश्च मिथ्यारजतविषयइत्युभयमप्युपपद्यते। एतेन रजतापरोक्ष्यं विशिष्टसंसर्गज्ञानं विनाप्यपरोक्ष शुक्तिज्ञानाविवेकादुपपद्यते इत्यपि परास्तम्। विवेकज्ञानकालेऽप्येतावन्तं कालं रजतमनेनाविविक्तमित्येव विवेकस्यैव परामर्शप्रसङ्गात् एतावन्तं कालमिदं रजतमित्यभादिति प्रत्यभिज्ञाया अनुपपत्तेश्च। अतश्च पुरोवर्त्तिनि असद्रजतसत्पद्यते इत्यङ्गीकार्य्यम्। अन्यथा शुक्तिज्ञानात् रजते प्रवृत्तौ अतिप्रसङ्गः स्यात् समानविषयकज्ञानस्यैव प्रवर्त्तकत्वात् ततश्च न स्मर्य्यमाणमिदं रजतं किन्तु स्मर्य्यमाणसदृशमेव तदङ्गीक्रियते। तत्सादृश्यञ्च पूर्व्वानुभवसापेक्षज्ञानजन्यत्वेन। नह्यननुभूतरजतस्य पुरुषस्य रजतभ्रमोभवति। ज्ञानरूपाध्यासस्य तु संस्कारजन्यत्वेन स्मृतिसादृश्यमिति भेदः।

अथ ज्ञानस्य प्रमाणस्मृतिर्द्वैविध्यनियमेन अध्यासस्य बाधितविषयकत्वात् परिशेषात् संस्कारमात्रजन्यज्ञानत्वाच्च स्मृतित्वमेवास्तु। न च स्मृतित्वे अतिसादृश्यात्स्मृत्यन्तरमेव कुतो न स्मर्य्यते इति वाच्यं कर्त्तृगतरागादिदोषाणामपि तन्निमित्तत्वात् शुक्त्यन्तरे तदभावात् एवं तैरेव दोषैः स्मरणाभिमानस्य प्रसुप्तितत्वाच्च रजतस्मरणेऽपि तत्तांश उक्ति-

ख्यते नवा स्मरामीत्यनुव्यवसायः तथा तैरेव विशेषाभासस्य प्रतिरोधान्न शुक्तिग्रहणेऽपि तदीयनीलपृथ्वादिविशेषग्रहः। तथा च इदमंशे ग्रहणं रजतांशे स्मरणमुभयात्मकमपि ज्ञानमविविक्ततया प्रवर्त्तकमिति तादृशग्रहणस्मरणाभ्यां रजतार्थी पुरोवर्त्तिनि प्रवर्त्तते इति चेन्न ग्रहणस्मरणे किं हे अपि प्रवर्त्तके आहोस्विदेकैकम् आद्येऽपि किं संभूय प्रवर्त्तके! क्रमेण, वा नाद्यः स्मृतिग्रहणयोः युगपदुदयासम्भवात्। क्रमविशिष्टयोर्द्वयोः प्रवर्त्तकत्वमपि न युक्तम् पूर्वज्ञानस्य उत्तरज्ञानेन व्यवधानात् प्रवृत्तिहेतुत्वानुपपत्तेः इदमिति रजतमिति च विशेष्यविशेषणयोरपि ज्ञानयोः प्रवर्त्तकत्वापत्तेश्च। नाप्येकैकस्य प्रवर्त्तकत्वं व्यवहारस्य विशिष्टविषयकतया विशिष्टप्रवृत्तये विशिष्ट संसर्गग्रहस्यैव हेतुतायाः स्वीकार्यत्वादिति।

अत्र ग्रहणस्मरणैरन्यथोत्पत्त्या प्रवर्त्तकत्वसम्भवेनासत्ख्यातिर्नाङ्गीकार्या अपि तु विशिष्टसंसर्गख्यातिरेवेति अख्यातिवादिनामेकदेशिनः आहुः।

तदपि वेदान्तिभिः निराकृतं यथा कोयमख्यातिर्नाम किं ख्यात्यभावः? उत अन्यार्थिनोऽन्यत्र प्रवृत्तिहेतुभूतविज्ञानम्? यथाविविक्तानेकपदार्थज्ञानम्?। आद्ये सुषुप्तावेव सर्वज्ञानाभावसत्त्वेन तत्रैव भ्रमः स्यात् नान्यत्र जाग्रत्स्वप्नयोः। द्वितीये झटिति बाधादाकस्मादिना वा यत्र प्रवृत्तिर्न जाता तत्र भ्रान्तित्वं न स्यात्। तृतीयेऽप्यविविक्तत्वप्रतियोगिविविक्तत्वं नाम किम् भेदग्रहः? उत अभेदाग्रहः? आहोस्विदितरेतराभावभेदद्वित्वादिसंख्याविशिष्टज्ञानम्? नाद्यः इदमिति रजतमिति च पुनरुक्तशब्दद्वयहेतुत्वेन सामान्यविशेषयोर्भेदग्रहे सत्यपि अविवेकासङ्गात्। न द्वितीयः उत्तरोक्ता भेदस्य गृहीतत्वादेव तद्विरुद्धस्याभेदस्याग्रहे सति तदग्रहनिषेधरूपस्याविविक्तत्वस्य दुःसम्पादत्वात्। तृतीयेऽपि द्वित्वादिज्ञानमपेक्षितं किमव्यासज्यवृत्ति उतानुषङ्गिकमपि पर्याप्तम् आद्ये गामानय दण्डेनेत्यत्र गोदण्डयोरपि साक्षाद् द्वित्वाद्यप्रतीतेरविवेकः प्रसज्येत। द्वितीये तु पुरोवर्त्तिरजतयोरव्यानुषङ्गिक द्वित्वादिज्ञानस्य सद्भावेन दुष्परिहरणीयत्वात्। नन्वविवेको नाम असंसर्गाग्रहः स च प्रतीयमानयोरिदं रजतयोः संभवति इदंरजते असंसृष्टे इति प्रत्ययादर्शनात् इति चेत् तदापि किं ग्रहणस्मरणयोरेवासंसर्गो विवक्षितः? उत ययोः कयोश्चित्? आहोस्वित् संसर्गज्ञानरहितयोः? आद्ये अहं मनुष्य इति भ्रमो न स्यात् उभयोरपि ग्रहणत्वात्। द्वितीये गवयोगौः शुक्लः पटस्त्वपि भ्रमः स्यात् असंसर्गप्रतीत्यभावात्। तृतीयेऽपि सएव दोषः स्यात् न हि तत्र संसर्गज्ञानं संभवति तद्विषयसङ्ख्याभावात् ऐक्यस्य च तद्विषयत्वस्य प्रत्यभिज्ञायमानत्वात्। यदि गुणगुण्यादि संबन्ध एव तद्विषयवोरैक्यमिष्यते तर्हि इदं रजतमित्यत्रापि साक्षात्तत्सम्बन्धस्तद्विषयत्वस्यापि वक्तुं शक्यत्वेन संसर्गप्रत्ययोदरदरः। अथ तत्रेदं रजतमित्यसंसर्गतत्प्रत्ययेन बाधान्न संसर्गतत्प्रत्ययौ सम्भवतः। तर्हि त्वत्पक्षेऽपि गुणगुण्यादेरितरेतराभावज्ञानाख्योऽसंसर्गप्रत्ययोऽस्त्येवेति संसर्गतत्प्रत्ययोरसम्भवात् भ्रमत्वापत्तिस्तदवस्था तस्मान्नासंसर्गाग्रहोऽप्यविवेकः।

अस्तु तर्हि ग्रहतेऽपि संस्कारजन्यैव रजतस्मृतिरिति चेत् न रजतस्य पुरोवस्थितत्वेन प्रतिभासादित्युक्तोत्तरत्वात् न च पुरोऽवस्थितत्वमविवेकग्रहमिति वक्तुं शक्यम्। अविवेकस्य भ्रमं प्रत्यप्रयोजकत्वात्। तथा हि किं ग्रहप्रमाणयोरविवेकः? किं वा ग्रहप्रमाणस्मर्यमाणयोः? किं वा स्मर्यमाणयोः? नाद्यः स्वप्रदशायामात्मव्यतिरिक्तस्य कस्याप्यग्रहणेन ह्योर्ग्रहप्रमाणयोरभावे तदविवेकस्य भ्रमाप्रयोजकस्याप्यभावेन भ्रमाभावप्रसङ्गात्। न द्वितीयः स्वप्ने ग्रहप्रमाणेनात्मना स्मर्यमाणस्य नीलादेरविवेके सति अहं नीलमिति प्रतिभासप्रसङ्गात्। तृतीये तु परोक्षमेव सर्वं भ्रान्ताववभासेत, सर्वस्यापि स्मर्यमाणत्वात् एवं च सति प्रकृतस्य पुरोऽवस्थितरजतज्ञानस्य स्मृतित्वानुमाने परोक्षावभासित्वोपाधिर्द्रष्टव्यः। यथार्थांस्तु मानस चायं प्रतिप्रयोगः। विमताः प्रत्यया न यथार्थाः बाध्यमानत्वाद्भ्रान्तिज्ञानवदिति तस्मात् बोधहेराक्षदुराग्रहं परित्यज्य तृतीयं भ्रान्तिज्ञानमङ्गीकर्त्तव्यम्।

अन्यथाख्यातिरिति नैयायिकादयः। ते हीत्थमुररीचक्रुः ननु तर्हि सा भूदख्यातिः अस्त्वन्यथाख्यातिः। तथा हि देशकालान्तरगतं हि रजतं शुक्तिसंप्रयुक्तेन दोषोपहितेनेन्द्रियेण शुक्त्यात्मना गृह्यते न चैवमननुभूतस्यापि ग्रहणप्रसङ्गः। साक्षादेर्नियामकत्वादिति"।

तदेतदसत् किं ज्ञानेऽन्यथात्वं? किं वा? फले उत वस्तुनि?। नाद्यः रजताकारं ज्ञानं शुक्तिमालम्बते इति ज्ञानेऽन्यथात्वं वाच्यम्। तत्र शुक्तेरालम्बनत्वं नाम किं ज्ञानं प्रति स्वाकारसमर्पकत्वम् उत ज्ञानप्रयुक्तव्यवहारविषयत्वम् नाद्यः। रजताकारग्रहं ज्ञानं प्रति शुक्तेः स्वाकारसमर्पणासम्भवात्। न द्वितीयः व्याघ्रादिदर्शन

प्रयुक्तव्यवहारविषयस्य खड्गशकुन्यधनुरादेर्व्यावृत्तादि ज्ञानालम्बनत्वप्रसङ्गात्। नापि फलेऽन्यथात्वम् फलस्य स्फुरणस्य भ्रान्तौ सम्यग्ज्ञाने वा स्वरूपतो वैषम्यादर्शनात्। वस्तुन्यपि कथमन्यथात्वं किं शुक्तिकायां रजतादात्म्यं किंवा रजताकारेण परिणामः। आद्येऽपि किं शुक्तिरजतयोरत्यन्तभेदः किंवा भेदाभेदौ। नाद्यः। अत्यन्तभिन्नयोर्वास्तवतादात्म्यासम्भवात् अनिर्वचनीयस्य त्वया अनभ्युपगमात् शून्यतादात्म्यप्रतीतौ च गुण-गुणित्वादावपि तत्सम्भवेन भ्रान्तित्वं दुर्वारम्। समवायस्य च प्रक्रियामात्रसिद्धस्य तादात्म्यानतिरेकात्। भेदाभेदपक्षे तु षण्डोगौरितिवद्भ्रान्तिः स्यात्। परिणामपक्षेऽपि बाधेन स्यात्। विमतं रजतज्ञानमबाध्यं परिणामज्ञानत्वात् क्षीरपरिणामदुग्धज्ञानवत्। अतः क्षीरवदेव शुक्तिर्न पुनर्बाध्येत। ननु कमलसुकुलविकाशरूपपरिणामहेतोः सूर्यतेजसोऽपगमे पुनर्मुकुलीभावदर्शनपरिणामहेतोर्दोषस्यापगमे पुनः शुक्तिभावोऽस्तु इति चेत् सैवं विकसितमेव सुकुलमासीदितिवत् रजतमेव शुक्तिरासीदिति प्रतीत्यभावात् कथञ्चित् तद्भावेऽपि न परिणामपक्षो युक्तः निर्दोषस्यापि रजतप्रतीतिप्रसङ्गात् नचैकमेव क्षीरं दधिरूपेण कञ्चित् पुरुषं प्रति परिणतमन्यं प्रति नेति दृष्टचरं तस्मान्यथाख्यातिः सुनिरूपा। ज्ञानलक्षणया देशान्तरगतरजतभानन्तु साक्षात्करोमीति साक्षात्कारोल्लेखिबुद्धेरन्यथानुपपत्त्या न सम्भवतीति द्रष्टव्यम्। किञ्च ज्ञानलक्षणायाः प्रत्यासत्तित्वे तथैव पर्यन्ते वह्निज्ञानसम्भवेनानुमानादेरुच्छेदः स्यात् अनुव्यवसायात्तत्सत्त्वकल्पने तु प्रकृतेऽपि साक्षात्कारानुव्यवसायसत्त्वेन तुल्यत्वात्। आत्मख्यातिरिति बौद्धाः। तथाहि सर्वासां बुद्धीनां विषयमन्तरेणापि तदाकारोल्लेखसम्भवेन रजतज्ञानमपि बुद्धिरूपतया न विषयान्तरमपेक्षते इत्यात्मनः बुद्धेरेव ख्यातिः प्रतिभासः "सहोपालम्भनियमादभेदोनीलतद्धियोः। भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वयः। अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः। ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते" इति तेषां सिद्धान्तात्। तथाच विमतं रजतं बुद्धिरूपं चक्षुरादिसंप्रयोगं विनाऽपरोक्षत्वात् सम्मतबुद्धिवत् इत्यनुमानेन रजतादेर्ग्राह्यतासिद्धिः। ते हि मन्यन्ते शब्दस्पर्शरूपरसगन्धविषयाः सुखादिविषयाश्च षडपि प्रत्ययाः आलम्बनसमनन्तरसहकार्यधिपतिरूपान् प्रत्ययपदवाच्यान् चतुरो हेतूनपेक्ष्यैव उत्पद्यन्ते। तत्र नीलावभासरूपस्य चित्तरूपज्ञानस्य नीलालम्बनवतो नीलाकारता भवति। समनन्तरप्रत्ययात् पूर्वतनज्ञानवासनारूपात् बोधरूपता, सहकारिप्रत्ययादालोकात् स्पष्टतावभासः। चक्षुरादेरधिपतिप्रत्ययात् विषयप्रतिनियम इति। तदेतदसङ्गतं प्रकृते न तावत् सहकारिप्रत्ययव्याख्यादालोकात् रजताकारोदयो भवति तस्य स्पष्टतामात्रहेतुत्वात्। नाप्यधिपतिप्रत्ययव्याख्याच्चक्षुरादेः सम्भवति तस्य विषयविशेषं प्रत्येव नियमनमात्रहेतुत्वात्। नापि समनन्तरप्रत्ययाख्यात् पूर्वज्ञानात्। विजातीयघटादिज्ञानानन्तरं विजातीयरजतभ्रमोदयप्रसङ्गात्, नाप्यालम्बनप्रत्ययाख्याद्ग्राह्यार्थाद्भवति विज्ञानवादिभिस्तस्यानङ्गीकारात्। ततश्च रजतादिबाह्यार्थासत्त्वे विज्ञानस्य कथं रजताकारतासमर्पणम्। संस्कारसामर्थ्येन तत्कल्पनेऽपि न निस्तारः संस्कारस्य क्षणिकस्यायित्वविकल्पासहत्वात्। तथाहि स्थायित्वे सिद्धान्तहानिः। क्षणिकत्वे पूर्वानुभवोत्तरसुतपन्नस्य तस्य द्वितीयक्षणेनाशात् रजताकारोल्लेखसमये तस्यासत्त्वात् कथं तेन तदाकारोल्लेखः सम्भवति। किञ्च संस्कारस्य विज्ञानातिरिक्तत्वे क्षणिकविज्ञानमात्रसिद्धान्तहानिः। अथानादिज्ञानसन्ततौ यदा कदाचित् पूर्वं रजतज्ञानसुतपन्नं तदेव संस्कार इत्यङ्गीक्रियते स च यद्यपि विजातीयानेकज्ञानव्यवहितः तथापि कदाचित् सजातीयं ज्ञानान्तरसुत्पादयत्येव यथा व्रीहिबीजमनेकाङ्कुरादिकार्यव्यवधानेऽपि कदाचित् सजातीयान्तरसुत्पादयति तद्वत्। अथ न पूर्वबीजादुत्तरबीजोत्पत्तिः किन्तु पूर्वबीजजन्याङ्कुरसन्तानादेव तदुत्पत्तिरिति चेत् तर्ह्यत्रापि पूर्वरजतज्ञानजन्यज्ञानसन्तानएव संस्कारोऽस्तु अतो न सिद्धान्तहानिः। एवं पूर्वरजतज्ञानमपि ततः पूर्वतररजतज्ञानादुत्पद्यते ततोऽनादिवासनाप्रापितं रजतं बुद्धिरूपमेव सत् स्वान्या बहिर्ददभासते इति चेत् अत्रोच्यते वेदान्तिभिः, किं तद्रजतमलौकिकं लौकिकं वा अलौकिकत्वेऽपि किं जन्मरहितम् उत लौकिकरजतवदेव जायते। अलौकिकत्वे जन्मरहितत्वे च जायमानस्य ज्ञानस्य रूपं न स्यात्। द्वितीयेऽपि किं बाह्यार्थात् जायते, उत ज्ञानात् नाद्यः तैर्बाह्यार्थानङ्गीकारात् ज्ञानादेव तदुत्पादाभ्युपगमे दुष्करकरजन्यज्ञानादुत्पादो वाच्यः तथा च जनकस्य पूर्वसत्त्वनियमेन तज्जनिका प्रतीतिः न रजतं सद्गृह्णीयात् वर्त्तमानपदार्थस्यैवाकारार्थकत्वनियमात् क्षणिकयोर्जन्यजनकयोर्भिन्नकालीनत्वेन रजतस्यापरोक्षकाले पूर्वज्ञानस्यासत्त्वात्

तेन गृहीतग्रहकत्वात् अतोरजतापरोक्षव्यवहारो विलुप्तः स्यात्। यदि अन्येन केनचित् दुष्टकरणजन्यज्ञानेन तदुत्पादस्तत: स्वात्मकविद्या तदुपहःस्यादित्यङ्गीक्रियते तदाऽतिप्रसङ्गः किञ्च दुष्टकरणजन्यज्ञानस्यैव तदुत्पादकत्वं वाच्यं तत्र करणस्य दुष्टत्वञ्च अर्थक्रियाकारितान्यविषयग्राहित्वेनैव तथा च असति रजते कथं करणस्य दुष्टत्व निर्णयः। अथ अदुष्टकरणजन्यज्ञानं तदुत्पादयति तदा तस्य घटादिवत् अर्थक्रियाकारित्वरूपसत्त्वसम्भवेन देशान्तरवर्त्ति-रजतविषयकादविशेषः स्यात्। किञ्च रजतस्यानुत्पत्तौ न तस्य ज्ञानविषयता ज्ञानाकारार्पकतयैव विषयत्वस्य त्वया स्वीकारात् अनुत्पन्नस्य कथं ज्ञाने स्वाकारार्पकत्वसम्भवः। तस्मादात्मख्यातिपक्षे रजतमेव ज्ञानेन न प्रतीयेत।

एवमख्यात्मन्यथाख्यात्मात्मख्यातिपक्षेषु निरस्तेषु इदानीमसत्ख्यातिपक्षः वेदान्तिभिरभ्युपगतः आक्षेपपूर्वकं प्रदर्श्यते इदं रजतमिति ज्ञानं श्रुतियुक्तिभ्यामन्यत् अध्यासनामकं ज्ञानं यत्र असतोऽनिर्वचनीयस्य उत्पन्नस्य रजतादेर्भानमीदृशं ज्ञानमसत्ख्यातिपदवेदनीयमस्ति। ननु ज्ञानस्य श्रुतियुक्तिभ्यामन्यः प्रकारो न सम्भवति इति चेन्न किं विलक्षणसामग्र्यनिरूपणात् तदसम्भवः? उत विलक्षणज्ञानस्वरूपानिरूपणात्? उत विलक्षणविषयानिरूपणात्? नाद्यः संप्रयोगसंस्कारदोषाणामेव तत्सामग्रीतया कल्पनात् न च दोषस्य पूर्वप्राप्तकार्योदयं प्रत्येव हेतुत्वं न पूर्वकार्योदयं प्रतीति वाच्यं कार्योदयस्य तत्प्रागभावरूपतयाऽनादित्वे तत्र दोषहेतुत्वासम्भवात्। वातपित्तश्लेष्मणाञ्चापूर्वकार्योत्पादकत्वदर्शनाच्च न च दोषस्य संस्कारोद्बोधकत्वेनान्यथासिद्धिः तदुद्बोधस्य तद्व्यापारत्वात् न हि व्यापारेण व्यापारिणोऽन्यथासिद्धिरिति नियमात् नह्युत्पतननिपतने कुर्वन् कुठारः छिदिक्रियां प्रति अहेतुर्भवति। ननु इन्द्रिय संप्रयोगस्य इदन्तामात्रे सत्त्वात् रजतांशेऽसत्त्वात् इदन्ताबोधनेन तस्योपजीव्यत्वात् एवं संस्कारस्य स्मृतिमात्र जनकत्वनियमेन वेदान्तिमते अध्यासात्मकज्ञानस्य स्मृतित्वानङ्गीकारात्, दोषस्य च स्वातन्त्र्येण ज्ञानहेतुत्वस्य कुत्राप्यदर्शनाच्च कथं रजतावभास इति चेत् उच्यते प्रथमं दोषसहितेनेन्द्रियेण इदन्तामात्रविषयाऽन्तःकरणवृत्तिर्जन्यते तत्र इदन्तायां तदुपाहकवृत्तौ च चैतन्यमभिव्यज्यते तच्चैतन्यनिष्ठा शुक्लविद्या च दोषबलात्संक्षुब्धा भवति तत्रेदमंशावच्छिन्नचैतन्यस्थाऽविद्या दोषेण क्षुभिता सती सादृश्याद्बोधितसंस्कारबलात् रजताकारेण विवर्त्तते। इदन्त्वावच्छिन्नचैतन्यस्थाऽविद्या तु रजतप्राक्तनवृत्तिसंस्कार सहकृता वृत्तिरूपेण विवर्त्तते। तौ च रजततद्वृत्तिरूपविवर्त्तौ स्वाधिष्ठानेन साक्षिचैतन्येनावभास्येते इत्येवं रजतावभासः कल्प्यते। यद्यप्यन्तःकरणवृत्तिरविद्यावृत्तिश्चेतिज्ञानद्वयम् तथापि तद्विषयौ सत्यान्वेते इदंरजते अन्योन्यात्मकतामापन्नौ इति विषययोरैक्यात् वृत्तिद्वयस्यैक्यम् ततश्च विषयावच्छिन्नफलस्याप्येकत्वेन ज्ञानैक्यमुपपद्यते। एवं मिथ्याज्ञानतद्विषययोर्निरूपणेन द्वितीयतृतीयविकल्पौ निरस्तौ वेदितव्यौ। यद्यप्यत्र संप्रयोगसंस्कारौ परस्परं निरपेक्षौ प्रमितिरूपयोर्जनने समर्थौ दृष्टौ तथापि क्रमेण स्मृतिप्रमित्योरुत्पत्तौ प्रवर्त्तकत्वानुपपत्तौ प्रवृत्त्यन्वयानुपपत्त्या ताभ्यां प्रत्यभिज्ञाव देकं विशिष्टं मिथ्याज्ञानं जन्यते इति कल्प्यते यथा नैयायिकादिभिः निरन्तरोत्पन्नेष्वपि वर्णज्ञानेषु यौगपद्याभावात् पदार्थज्ञानानुपपत्त्या पूर्वज्ञानजन्य संस्कारसहितमन्त्यवर्णज्ञानमेव पदार्थबुद्धिहेतुत्वेन कल्प्यते तद्वत्। ननु विमतं ज्ञानं नैकं भिन्नकारणजन्यत्वात् रूपरसादिज्ञानवदिति चेत् न अनुमानप्रत्यभिज्ञानयोर्व्यभिचारात् उभयोरपि नानाकारणजन्यत्वात्। अनुमानं हि व्याप्तिज्ञानसंस्कारलिङ्गदर्शनपरामर्शजन्यम्। प्रत्यभिज्ञा च इन्द्रियसंप्रयोगसंस्काररजन्येति सर्वैरङ्गीक्रियते न च शुक्तौ अनिर्वचनीयस्य रजतस्योत्पत्तौ तस्य च शुक्तौ संसर्गात् कथं तस्य मिथ्यात्वमसत्त्वञ्च स्यादिति वाच्यम् सत्तात्रैविध्याङ्गीकारेण तत्र व्यावहारिकसत्तान्यत्वेनैव तस्य मिथ्यात्वस्य कल्पनात्। तथाहि सत्त्वं त्रिविधं पारमार्थिकं त्रैकालाबाध्यत्वरूपं यथा ब्रह्मणः। व्यावहारिकं ब्रह्मज्ञाननिवर्त्त्यम् यथा आकाशादेः प्रातीतिकम् अधिष्ठानज्ञाननिवर्त्त्यं यथा शुक्तिरजतादेः। न च मिथ्यात्वकल्पनं मानहीनम्" "अथ रथान् रथयोगान् पथः सृजते" इति श्रुतेः मिथ्यैवात्र रजतमभादिति रजततज्ज्ञानयोर्मिथ्यात्वप्रत्यभिज्ञानस्य च मानत्वात्। अतो मतान्तरवत् वेदान्तमते नानुभवविरोधोनिर्मूलत्वं वा। अख्यातिपक्षे अपरोक्षावभासिनः सर्व्यभाणत्वं विरुध्यते। ज्ञानद्वयपक्षे रजतस्य पारोक्ष्यं श्रुतौ स्मरणाभिमानमोषादिकम्, अन्यथाख्यातौ रजतस्य अपरोक्षानुभवविरोधः आत्मख्यातिपक्षे विषयाभावेनापरोक्षावभासविरोधः"। प्रमेयविवरणसारांशः।

शुक्तिरजतादि ज्ञानदृष्टान्तेनज्ञाननिवर्त्त्यतया सर्व्वेषां घटपटादिज्ञानानामसत्ख्यातित्वं तद्विषयाणां वस्तु-

तोऽसत्त्वात् असत्त्वेऽपि सत्त्वेन व्यवहार्यतामात्रमिति शुक्तिरजतादिभ्यो घटादीनां विशेषः इति अध्यासरूपमिथ्याज्ञानमाक्षिप्य तत् समर्थयता च भाष्यकृता तथैव व्यवस्थापितम्" यथा "युष्मदस्मत् प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिरित्यतोऽस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणाञ्चाध्यासस्तद्विपर्ययेण विषयिणस्तद्धर्माणाञ्च विषयेऽध्यासोमिथ्येति भवितुं युक्तम्। तथाप्यन्योन्यस्मिन्नन्योन्यात्मतामन्योन्यधर्मांश्चाध्यस्येतरेतराविवेकेणात्मनविविक्तयोर्धर्म्मधर्म्मिणो र्मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्याहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः॥ आह कोऽयमध्यासोनामेति उच्यते स्मृतिरूपः परत्र पूर्व्वदृष्टावभासः। तं केचिदन्यत्रान्यधर्म्माध्यास इति वदन्ति। केचित्तु यत्र यदध्यासस्तद्विवेकाग्रहणनिबन्धनो भ्रम इति। अन्येतु यत्र यदध्यासस्तत्रैव विपरीतधर्म्मत्वकल्पनामाचक्षते इति सर्वथापि तु अन्यत्रान्यधर्म्मावभासतां न व्यभिचरति। तथा च लोकेऽनुभवः शुक्तिका हि रजतवदवभासते एकश्चन्द्रः स द्वितीयवदिति। कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयधर्म्माणाम्?। सर्व्वो हि पुरोऽवस्थिते विषये विषयान्तरमध्यस्यति। युष्मत्प्रत्ययगोचरस्य च प्रत्यगात्मनोऽविषयत्वं ब्रवीषि। उच्यते। न तावदयमेकान्तेनाविषयः अस्मत्प्रत्ययविषयत्वात् अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः। नचायमस्तिवियमः पुरोऽवस्थित एव विषये विषयान्तरमध्यसितव्यमिति अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनतादध्यस्यन्ति। एवमविरुद्धः प्रत्यगात्मन्यन्यत्रानात्माध्यासः। तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते। तद्विवेके च वस्तुस्वरूपावधारणं विद्यामाहुः। तत्रैवं सति यत्र यदध्यासस्तत्कृतेन दोषेण गुणेन वा अणुमात्रेणापि स न संबध्यते। तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्व्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि। कथं पुनरविद्याविषयाणि प्रत्यक्षादीनि प्रमाणानि? शास्त्राणि चेति। उच्यते। देहेन्द्रियादिष्वहंममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाण प्रवृत्त्यनुपपत्तेः। नह्यनिन्द्रियाणामुपादाय प्रत्यक्षादिव्यवहारः संभवति। नचाधिष्ठानमन्तरेण इन्द्रियादिव्यापारः संभवति। नचानध्यस्तात्मभावेन देहेन कश्चित् व्याप्रियते। न चैतस्मिन् सर्व्वस्मिन्नसत्यसङ्गस्यात्मनः प्रमातृत्वमुपपद्यते। न च प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति। तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति"। चतुर्थसूत्रभाष्ये च जगतोव्यावहारिकत्वे अन्यदीयमतं संवादितम् यथा "गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात्। सद्ब्रह्मात्माहमित्येव बोधे कार्य्यं कथं भवेत्?" इत्याक्षिप्य। "अन्येष्वात्मविज्ञानात् प्राक् प्रमातृत्वमात्मनः। अन्विष्टः स्यात् प्रमातैव पाशदोषादिवर्ज्जितः। देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः। लौकिकं तद्वदेवेदं प्रमाणं त्वाऽऽत्मनिश्चयात्" यथा च लौकिकव्यवहार्य्यपदार्थानां पारमार्थिकसत्त्वाभावेऽपि तत्सत्त्वमङ्गीकृत्य सर्वे व्यवहाराः तेषां च व्यवहारिकसत्त्वत्वम् तथा प्रपञ्चेन समर्थितं खण्डनकृता खण्डनखण्डाद्ये। यथा "अथ कथायां वादिनोनियममेतादृशं मन्यन्ते प्रमाणादयः सर्व्वतन्त्रसिद्धान्ततया सिद्धाः पदार्थाः सन्तीति कथकाभ्यामभ्युपेयम्। तदपरे न क्षमन्ते। तथाहि प्रमाणादीनां सत्त्वं यदभ्युपेयं कथकेन, तत् कस्य हेतोः? किं तदनभ्युपगच्छद्भ्यां वादिप्रतिवादिभ्यां तदभ्युपगमसाक्षित्वनियतस्य तस्य प्रवर्त्तयितुमशक्यत्वात्, उत कथकाभ्यां प्रवर्त्तनीयवाग्व्यवहारं प्रति हेतुभावात्, उत लोकसिद्धत्वात्, अथ वा तदनभ्युपगमस्य तत्त्वनिर्णयविजयातिप्रसङ्गकत्वात्। न तावदाद्यः तदनभ्युपगच्छतोऽपि चार्व्वाकमाध्यमिकादेर्वागविषयविस्तराणां प्रतीयमानत्वात् तस्यैव वा अनिष्पत्तौ भवतस्त्रिरात्रप्रयासानुपपत्तेः। सोयमपूर्व्वः प्रमाणादिसत्त्वानभ्युपगमाग्रहो वाक्स्तम्भनमन्त्रो भवताभ्यूहितो नूनं, यस्य प्रभावाद्भगवता सुरगुरुणा लोकायतसूत्राणि न प्रणीतानि, तथागतेन वा मध्यमागमा नोपदिष्टाः भगवत्पादेन वा बादरायणीयेषु सूत्रेषु भाष्यं नाभाषि। प्रमाणाद्यनभ्युपगमेऽपि प्रवर्त्तनां तन्वते वाचोभङ्ग्यः तासु साधनबाधनक्षमा न भवन्ति तावतेति ब्रूमइति चेन्न प्रमाणाद्यनभ्युपगम्य प्रवर्त्तितत्वं तदीयसाधनबाधनाक्षमतायां न नियामकं किन्तु सद्वचनाभासलक्षण्योगित्वमित्यवश्याभ्युपेयं भवता, येनाभ्युपगम्यापि प्रमाणादीनि प्रवर्त्तिताः मतान्तरानुसारिभिर्व्यवहारा अभ्युपगतप्रमाणादिसत्त्वैर्मतान्तरव्यवहारानुसारिभिरपरैस्तथाभूता इति कथ्यन्ते। यदि त्वद्वचसि सद्वचनाभासलक्षणं न भवान् दर्शयितुमीष्टे तदा अनभ्युपगम्य प्रमाणादि भवताप्र-

वर्त्तितोऽयं व्यवहारइति यतस्तत्स्वयोच्यमानेऽपि साक्षात्कारादरः। अन्यथाभ्युपगम्य प्रमाणादीनि भवता प्रवर्त्तितोऽयं व्यवहार इत्येतावता भवदीयो व्यवहाराभास इत्यस्माभिरपि वक्तुं शक्यतएव। ननु यदि प्रमाणादीनि न सन्ति व्यवहारएव धर्म्मी कथं सिद्धेत् दूषणादिव्यवस्था वा कथं स्यात् सर्व्वविधिनिषेधानां प्रमाणाधीनत्वात्। मैवम्। न ब्रूमोवयं न सन्ति प्रमाणादीनीति, स्वीकृत्य कथारभ्येति। किन्नाम सन्ति न सन्ति वा प्रमाणादीनीत्यस्यां चिन्तायामुदासीनैर्वयं स्थित्वा तानि भवता व्यवस्थियते तथा व्यवहारिभिरेव कथा प्रवर्त्तयितव्येति। अन्यथा न सन्ति प्रमाणादीनीति मतमस्माकमारोप्य यदिदम्भवता दूषणसूक्तं तदपि न वक्तुं शक्यं कीदृशीं मर्य्यादामालम्ब्य प्रवर्त्तितायां कथायां दूषणसूक्तं किं प्रमाणादीनां सत्त्वमभ्युपगम्योभाभ्यां वादिभ्यां प्रवर्त्तितायां कथायाम् उतासत्त्वमभ्युपेत्य अद्यैकेन सत्त्वमपरेण चासत्त्वमङ्गीकृत्य। न तावदाद्यः अभ्युपगत प्रमाणादिसत्त्वं प्रति तादृक्पर्य्यनुयोगानवकाशात्। द्वितीये तु स्वतोऽप्यापत्तेः न तृतीयः तथैव कथान्तरस्य प्रसक्तेः उभयाभ्युपगमानुरोधित्वाच्च कथानियमस्य। अन्यथा स्वाभिप्रायमालम्ब्य तेनापि तद्वचसि यत्किञ्चिद्वागात्मनि दूषणेऽभिहिते कस्य जयो व्यवतिष्ठताम् प्रमाणाद्यभ्युपगन्तुरेव वावच्चियमभरयन्त्रणा महती स्यात्। तस्मात् प्रमाणादिसत्त्वासत्त्वाभ्युपगमौदासीन्येन व्यवहारनियमे समयं बद्ध्वा कथायां प्रवर्त्तितायां भवतेदं दूषणसूक्तं युक्तमेव तथा सति स्यात्। योऽयं भवान् स्वाभिप्रायमपि नावधारयितुं शक्नोऽतिदूरतस्त्वयि परामिसन्धानावधारणप्रत्याशा। अथ वादीकृत्य दुर्वैतण्डिकं तस्मिन् बाधोऽभिधीयत इत्येव नेष्यते शिष्यादयस्तु तस्य कथानधिकारं ज्ञापयन्ते अतएव भाष्यकारः "सप्रयोजनमनुयुक्तो यदि प्रतिपद्यत" इत्याहस्म न तु प्रतिपद्यस इति। मैवम् शिष्यादीन् प्रत्यपि चार्व्वाकादेर्दोषोऽयमित्येवाभिधातव्यम्। कथञ्च तथा स्यात् तस्य कथाप्रवेशाप्रवेशयोस्तद्बाधाबाधमत्वात्कथायामेव हि निग्रहः। नापि द्वितीयः तथाहि स्यादेवं यदि कथकप्रवर्त्तनीयवाग्व्यवहारं प्रति प्रमाणादीनां हेतुता तत्सत्त्वानभ्युपगमे निवर्त्तेत नचैवं सम्भवति तथा सति तत्सत्त्वानभ्युपगन्तृणां वाग्व्यवहारस्वरूपमेव न निष्पद्येत हेत्वनुपपत्तेः। उक्तोपालम्भौ यन्माध्यमिकादिवाग्व्यवहाराणां स्वरूपापलापो न शक्यत इति। अथ मन्यसे कथकवाग्व्यवहारं प्रति हेतुत्वात् प्रमाणादीनां सत्त्वं सत्त्वाभ्युपगमः यत्सत्तदभ्युपगम्यतइति स्थितेरिति। मैवम्। कथापि नियमस्थित्या प्रवृत्तायां कथायां कथकवाग्व्यवहारं प्रति हेतुत्वात् प्रमाणादीनां सत्त्वं सत्त्वाभ्युपगमो भवता प्रसाध्यः। कथनात्पूर्व्वं तत्तत्त्वावधारणं वा परपराजयं वा अभिलषद्भ्यां कथकाभ्यां यावता विना तदभिलषितं न पर्य्यवस्यति तावदनुरोद्धव्यम् तच्च व्यवहारनियमस्यानुबन्धादेव द्वाभ्यामपि ताभ्यां सम्भाव्यतइति व्यवहारनियमसमयमेव बध्नीतः सच प्रमाणेन तर्केण च व्यवहर्त्तव्योवादिना प्रतिवादिनापि कथाङ्गतत्तत्त्वज्ञानविपर्य्ययलिङ्गप्रतिज्ञाहान्याद्यन्यतमनिग्रहस्थानं तस्य दर्शनीयम् तदुद्भावने प्रथमस्य भङ्गोव्यवहर्त्तव्योऽन्यथा द्वितीयस्यैव। तादृशेतरौ च जेतृतया व्यवहर्त्तव्यौ प्रामाणिकपक्षस्वीकृततया व्यवहर्त्तव्य इत्यादिरूपः। अतएव व्यवहारनियमबन्धेऽपि हेतुर्वक्तव्यः तथा च सोऽपि हेतुः कथायां प्रवृत्तायामभिधातुं युक्तइति प्रमाणसत्त्वाभ्युपगमहेत्वभिधानवत् प्रत्यवस्थानमनवकाशम्। द्वाभ्यामपि वादिभ्यां विचारप्रवृत्त्याभिलष्यमाणतत्त्वव्यवस्थाजयमूलत्वेन व्यवहारनियमस्य स्वेच्छयैव परिगृहीतत्वात् नचैवं प्रमाणानुपपत्तेस्वेच्छामात्रगृहीतमूलत्वान्मूलापरिशुद्धिसम्भवेन सर्व्वविचारविचार्य्यं तत्फलविप्लवापत्तिः स्यात्। अविद्याविद्यमानानादिपारम्पर्य्यायातस्य लोकव्युत्पत्तिसंवादस्य च तस्यान्यथाभावासम्भाव्यतालक्षणस्वतःसिद्धिमत्त्वात्। नच प्रमाणादीनां सत्तापीत्थमेव ताभ्यामङ्गीकर्त्तुमुचिता। तादृशव्यवहारनियममात्रेणैव कथाप्रवृत्त्युपपत्तेः प्रमाणादिसत्तामभ्युपेत्यापि तथा व्यवहारनियमव्यतिरिक्तकथाप्रवृत्तिं विना तत्त्वनिर्णयस्य जयस्य वाभिलषितस्य कथकयोर्विपर्य्यवसानात्। नापि तृतीयः लोकव्यवहारो हि प्रामाणिकव्यवहारो वा स्यात् पामरादिसाधारणव्यवहारो वा। नाद्यः। विचारप्रवृत्तिमन्तरेण तस्य दुर्निरूपत्वात् तदर्थमेव च पूर्व्वं नियमस्य गवेषणात्। नापि द्वितीयः शरीरात्मतादीनामपि तथा सति भवता स्वीकर्त्तव्यतापातात्। पश्चात्तद्विचारबाध्यतया नाभ्युपेयतइति चेत् तर्हि प्रमाणादयोऽपि यदि विचारबाध्या भविष्यन्ति तदा नाभ्युपेया एव अन्यथा तूपगन्तव्या इति लोकव्यवहारसिद्धतया सत्त्वमभ्युपगम्यत इति तावन्न भवति। नापि चतुर्थः यादृशोभवता प्रमाणादीन्यभ्युपगम्य व्यवहारनियमः कथायामालम्ब्यते। तस्यैव प्रमाणादिसत्त्वासत्त्वानुसरणोदासीनैरस्माभिरप्यवलम्बनात्। तस्य

दहि मां प्रति फलातिप्रसङ्गकत्वं तदा त्वां प्रत्यपि समानः प्रसङ्गः । स्यादेतन्नियतव्यवहारक्रियासमयबन्धेन कथां प्रवर्त्तयतापि व्यवहारसत्ताभ्युपगन्तव्या नहि सत्तामनभ्युपगम्य व्यवहारक्रियाभिधातुं शक्या । क्रिया हि निष्पादना असतः सद्रूपताप्रापणमिति यावत् प्रमाणैर्व्यवहर्त्तव्यमिति नियमबन्धने प्रमाणानां कारणभावो नियतः तद्भावश्च नियतपूर्वसत्तारूपं कारणत्वम् प्रमाणानामनादाय न पर्य्यवस्येत् । दूषणानाङ्गास्तित्वेन भङ्गावधारणनियमबन्धने साधनाङ्गानां व्याप्त्यादीनां सत्त्वेन तद्विषयस्य तत्त्वरूपतायाव्यवहारनियमनादौ च कण्ठोक्त्यैव तस्य तस्य सत्त्वमङ्गीकृतमिति रिक्तमिदमुच्यते प्रमाणादीनां सत्तामनभ्युपगम्य कथारम्भाः शक्यन्त इति । मैवम् । एभिरपि बाधकैः कथायामारब्धायामेवाभिमतस्य प्रसाधनीयत्वे पूर्व्वोक्तबाधायामनिस्तारात् । न च व्यवहारनियमस्य स्वेच्छाकृतस्यैव प्रमाणादिसत्तास्वीकारपर्य्यवसायितया नायं दोषः स्यात् । यतः सत्ताज्ञानस्य तदङ्गत्वं न तु सत्तायाः । तत्र किं सत्तावगममात्रात्सत्ताभ्युपगम्येति मन्यसे अबाधितात्तदवगमाद्वा । न तावदाद्यः मरुमरीचिकादौ जलरूपतासद्भावाभ्युपगमप्रसङ्गात् । द्वितीयेऽपि किं वादिप्रतिवादिमध्यस्थमात्रस्य तस्यापि किं कथाकालमात्रएव बाधितत्वावगमाभावात् । अथवा कस्यचिदपि कालान्तरेऽपि च बाधितत्वबोधविरहात् । नाद्यः अतिप्रसङ्गात् पुरुषत्ववावगतस्य एकक्षणावगतस्य च पुरुषान्तरेण तेनापि क्षणान्तरे बद्धत्वं बाध्यतादर्शनादिति । नचासावर्थोऽसन्नपि द्वित्वादिपुरुषमात्रपूर्व्वजाततत्प्रतीत्यनुरोधाद्दाधर्दर्शने सत्यपि तथैव सन्निध्यभ्युपगम्यते । तस्माद्द्वितीयः पक्षः परिशिष्यते यत्र सर्व्वप्रकारेण बाधितत्वं नास्ति तत्रादित्यभ्युपगन्तव्यम् । तदित्थं यदि नाम वादिप्रतिवादिमध्यस्थमात्रस्य दूषणादिसत्तावगमः कथाकालमात्रे तैरबाध्यमानः कथाङ्गत्वेनाभ्युपेयते किमायातं सर्व्वप्रकारेणाबाधिततत्तत्सत्तावगमायत्ततत्तत्सत्त्वाभ्युपगमकथानङ्गताङ्गीकारस्य । कतिपयप्रतिपत्तृकतिपयकालतत्तावगमादेव च प्रायेण लौकिकव्यवहारः प्रतीयते तादृग्वार्यं सत्त्वावगमः कथाङ्गमेतत्तदुच्यते व्यवहारिकीं प्रमाणादिसत्तामादाय विचारारम्भ इति । तस्माद्यादृग्व्यवहार नियमः कृतः तन्मर्य्यादानेन नोल्लङ्घितेति । यद्वादिवाग्व्यवहारे मध्यस्थावगमः स विजयते यस्य च वचसि नैवं तस्यावगमस्यैव पराजयः । यत्र वाद्युक्तनियतसत्त्वावगमः स निग्रहीतः तदितरस्तु न तथेत्यादिनियम एव कथारम्भाय याच्यः । अनेन नियमेन व्यवहर्त्तव्यमित्यस्य हृदयमर्थोऽनेन नियमेनोल्लङ्घनेन नेति मध्यस्थावगमस्य विषयो भवितव्यमिति । नच वाच्यमन्तत्तत्सदवगमस्यापि सत्ताभ्युपेयेति । तस्यापि सत्ताचिन्तायां तत्सत्तावगमान्तरस्यैव शरणत्वात् । नचैवमनवस्था तदनुसरणावश्यम्भावानङ्गीकारात् । एवं त्रिचतुरज्ञानजन्मनोनाधिकमतिरिति न्यायात् । नचान्निमासत्त्वे पूर्व्वपूर्व्वप्रवाहासत्त्वापत्तिस्तथावगममादावपि न निस्तार इति वाच्यम् । अस्त्येव हि तथापि त्रिचतुरज्ञानकलागवेषणमात्रविश्रान्तेन विचारेण ततःपरमननुसरणरमणीयेनैव समयं बद्ध्वा कथाया मिथःसम्मतिपत्त्या प्रवर्त्तनात् । अन्यथा प्रमाणादिसत्ताभ्युपगमेऽपि ज्ञानानवस्थावादुपरिहरत्वात् । नच वाच्यं सत्पक्षे स्वरूपसता ज्ञानेन व्यवहारस्य चरितार्थयितुं शक्यत्वात् न ज्ञानस्य परम्परानुसरणमुचितं नत्वेवं त्वत्पक्षे ज्ञानस्वरूपसत्ताङ्गीकारप्रसङ्गादिति । स्वरूपसत्तामादायापि परिहरतोऽनवस्थाप्रसङ्गस्य स्वप्रकाशप्रस्तावे वक्ष्यमाणत्वात् । यथा त्वत्पक्षे स्वरूपसद्विशेषेऽपि ज्ञानस्वरूपसत्तैव परं व्यवहारोपपादिका न घटादिसत्ता । एवमेवासत्ताऽविशेषेऽपि ज्ञानमेवासद्व्यवहारोपपादकं नान्यत् । असद्ग्रोपपादकत्वेति व्याहतमिति चेन्न सदुपपादकमिति कुतो न व्याहृतम् । नहि सदुपपादकमसद्ग नेति क्वचिदावयोः सिद्धम् । ननु तदसत्ताऽविशेषात्तत्कार्य्यस्यान्यदापि प्रसङ्गः, न कार्य्यस्याद्यसत्ताक्षण इवान्यदापि सामग्रीसत्त्वाविशेषात्तवापि किं नान्यदा कार्य्यजन्म । अथ न मम तदानीन्तनं सामग्रीसत्त्वं तदातनस्य कार्य्यजन्मनो नियामकं किन्तु ततः प्राक् सामग्रीसत्त्वं तथादर्शनात् । तर्हि ममापि कालान्तरस्थमपि तदसत्त्वं तदातनकार्य्यजन्मनोनियामकं तथादर्शनादेव । मम तदव्यवहितोत्तरत्वं तदा कार्य्यजन्मनियामकमिति चेत् न समसमयत्वादागन्तुकत्वाद्यविशेषेण नियम्यनियामकव्यवस्थानुपपत्तेः तस्मादन्यदास्त्वावा एव सामग्र्यास्तदा कार्य्यनियमोऽभ्युपेयः तथादर्शनादित्येव मन्तव्यम् । तथा च समः समाधिः । तथापि कार्य्यजन्मकालस्य कोविशेषः । कार्य्यजन्मैव । अन्यथा यद्विशेषान्तरं तदपि विशेषान्तरवतः कालस्य स्यादिति अपर्य्यवसानमेव पर्य्यवस्येत् । तथापि तत्कालस्यानुगतं किं रूपमिति चेन्न रूपान्तरवतोपि किं रूपमित्यपि पर्य्यनुयोगस्यानुद्धरत्वेः । किञ्च

"अनभ्यावितसत्त्वङ्गीकारं तदसत्ततः ।

नान्तर्भावितसत्त्वहेत्कारणं तद सत्ततः ।"

तथाह्यन्तर्भूतसत्त्वे यदि कारणत्वं तदा स्वविशिष्टे खडक्तिरसतः खाम्रवत्वमापादयति । विशिष्टस्यावान्तरत्वेऽपि च खस्मिन् खडक्तिव्यतिरेकवत् स्वविशिष्टे खडक्तिव्यतिरेके नियमदर्शनात् न सैव सत्ता तस्मिन्निति अन्यस्यासत्स्वाविशिष्टस्त्वभ्युपगमे तामसद्विशेष्य कारणत्वमभ्युपगन्तुः सर्व्वमेव कारणमसत्यर्थं वक्ष्यति । अपरापरसत्तानिवेशने वा पर्य्यवसानमेव । न च सत्ताभेदानन्त्यमस्त्येवेत्यपि वादप्रसारिका निस्तारायं, सत्ताभेदे हि सद्बुद्धिव्यवहारानुगमननिबन्धनलक्षिनः प्रथमापि सत्ता न स्यादिति । सत्त्वदृष्टिमिच्छतो मूलमपि ते नष्टमिति कष्टतरम् । न च स्वरूपसत्तोपगमाय स्वस्मिन् भिन्नान्यनुगतबुद्ध्याद्याधानपदेऽभिधिक्षता त्वया जातिमात्राय जलाञ्जलिर्वितीर्येत । माभूदनुगतिः स्वरूपसत्त्वस्येति च वदन् तद्गर्भिणीं कारणतां कथमनुगमयितासीति । किञ्च स्वरूपसत्त्वं स्वरूपात् घटाद्यात्मनो नाधिकमसतोपि स्वरूपं स्वरूपमेव न ह्यसन् घटादिर्न घटादिः तथा सति घटादिर्नेत्यपि न स्यात् असतोऽघटादित्वात् । अथ सदपि सत्तामनन्तर्भाव्य कारणं तदानीमसदपि तत्त्ववास्तु सत्तासत्त्वयोः कारणकोक्षप्रवेशाविशेषात् । अथ न सत्ता कारणकोटिनिविष्टा किन्तु कारणत्वं सत्त्वं नियतपूर्व्वसत्तां हि कारणतामन्यइति मन्यसे, तर्हि मत्पक्षे सैव कारणतास्तु तर्हि कारणसत्तामभ्युपगतवानसीति षड्कक्षां प्रभातमिति चेन्न भावानवबोधात् सत्तामसतीमभ्युपगच्छतापि सत्ता मयाभ्युपगतैव । अन्यथा कासावसतीति त्वमपि किं सत्तान्तस्तामन्तर्भाव्य कारणत्वमिच्छसि । नत्वेवं पूर्व्ववत् क्वापि सत्तात्यागो वा अनवस्थायां पर्य्यवसानं स्यात् । असत्ताऽविशेषात् कारणनियमः कथं स्यादिति चेन्न सत्ताविशेषेऽपि तुल्यत्वात् । सत्त्वेऽस्यन्यथाद्यनुविधानं तस्य तज्जातीयस्य वा त्वत्पक्षे त्वसत्त्वाविशेषात् व्यतिरेकः परं सोऽप्यनियतो यदा कारणाभावस्तदा कार्य्याभावावश्यम्भावानभ्युपगमात् नित्यासतः कारणस्यासत्त्वएव कदाचित्कार्य्योत्पादात् । अन्वयस्तु न कदाचिदपीति चेन्न तुल्यत्वात् अन्वयो नास्तीत्यभ्युपगच्छतापि अन्वयोपगमात् अन्वयस्यापि सत्तान्तर्भावने कथितदोषापत्तेः । एतेन

"आशामोदकदृष्टा ये ये चोपार्ज्जितमोदकाः ।
रसवीर्य्यविपाकादि तेषां तुल्यं प्रसज्यते" ॥

इत्यस्यापि बाधकत्वमाशामोदकायते । सत्तान्तर्भावानन्तर्भावाभ्यां प्रत्यादेशात् आशामोदकादिनापि च रसवीर्य्यविपाकादिजननात् । तदसत्कथं कार्य्यं स्यादिति चेन्न सत्तामन्तर्भाव्य कार्य्यत्वोपगमे कारणवत्कार्य्येऽप्युक्तदोषस्यानन्तर्भावे वा अविशेषस्य पूर्व्ववदाहत्तेः तस्मात् ।

"पूर्व्वं सन्त्वनियमे हेतुत्वे तुल्यएव नौ ।"
"हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा ।"

आस्तां प्रतिवन्दिग्रहग्रहः कथं पुनरसतः कारणत्वमवसेयं प्राक्सत्त्वनियमस्य विशेषस्यानभ्युपगमात् असत्त्वस्य चाविशेषादिति चेन्न इदमस्माभिरुक्तं प्राक्सदितिबुद्ध्याविशेषात् । भ्रान्त्यैवंबुद्धिगोचरेऽतिप्रसङ्ग इति चेन्न यादृक्षा हि धिया त्रिचतुरक्षणावाधानवरोधविश्रान्तया वस्तुसत्त्वनिश्चयस्ते, तादृक्ष्येव विषयीकृतस्त्र ममापि कारणतानिश्चयः । केवलन्ततः परोक्षेऽपि कक्षास्तु बाधात् पूर्व्वपूर्व्वभ्रान्तिसम्भवेन न तावता सत्त्वावधारणं वयं मन्यामह इति विशेषः । परदर्शनसिद्धान्तस्य भूरिक्षणाधाविनोऽपि ततः परक्षणाबाध्यमानत्वेनातथाभावोपगमात् अन्यदैकदर्शनपरिशेषः स्यात् । एतेन सत्त्वाविशेषात् कथं कस्यचित् पक्षस्य त्रिचतुरक्षणाधावित्वसाक्षात्मित्यपि निरस्तम् । अनेवंबुद्धिविषयतादशायां कोविशेष इति चेत् यदा कदापि तादृग्बुद्धिविषयतैव । अन्यथा कथय कथमन्यदा तादृग्बुद्धिविषयतया अन्यदा सत्त्वं स्यात् । तदा सत्त्वमन्यदास्येन रूपेण इति चेत् अन्यकालिकमेव तर्हि तत्तदानीनकारणत्वोपयोगीति समानम् तदेतत् संवित्तिसत्त्वमिति गीयते असतो सा न विशेषिका सती सा नेष्टेत्यभिसन्धानेन द्वैतापत्तेरि संवित्तिरपि सती न वेति पृच्छन् प्रतिवक्तव्यः ज्ञानं तावद्व्यवहारोपपादकतया ह्यभ्यमनुमतं तस्यापि जिज्ञासायां त्रिचतुरक्षणाविच्छान्तगवेषणस्य यदि सत्तोपपन्ना भविष्यति तदा सत्ता, तेनेदमुपपादितमभविष्यति । अथासत्ता तस्य पर्य्यवस्थति तदा असत्त्वेव तेनेदमुपपादित इति स्वीकर्त्तव्यं भ्रमविषयेणेव भ्रमेण विशिष्टव्यवहारः । अविचार्य्यैव तावत्तस्य सदसत्त्वं विचार आरब्धव्यः । अन्यथा प्रथममेव मतिकर्षे मे कथारम्भक्षमगक्षमापद्येत। स्वीकृतञ्च भवतापि भविष्यदादिविषये विज्ञाने विशिष्टव्यवहारनिदानत्वमसतो विषयस्य, कारणशक्तेश्च विशेषकमसदेव कार्य्यम् । न च कालान्तरसम्बन्धिनी सत्ता तस्या एकत्वान्यत्व नान्यदापीति वैधर्म्यमेतयोरपीति वक्तव्यम् विशिष्टव्यवहारप्रवृत्तिसमये द्वयोरप्यसत्ताऽविशेषात्

प्रयोजनानुपयुक्ते काले तस्य स्वरूपतोऽवस्थानं पाटच्चरलुण्ठिते वेश्मनि यामिकजागरणवत्तस्मान्मनुष्करति तथापि कालान्तरस्थित्या घटादिकं स्वरूपतो विशेषणतश्च व्यवच्छिन्नं, तद्विज्ञानेन स्वभाववलात् स्वविशेषणत्वेनोपादीयते। नत्वेवमसन्नासङ्गवितुमर्हति तस्य स्वरूपतो विशेषणतश्च व्यवच्छिन्नतयानङ्गीकारात् कुत स्वभावतोविज्ञानं सम्बन्धि निरूप्यते। उक्तमत्र असतोऽपि तदेव रूपं तस्य नियतस्वरूपस्यैव नियतविशेषणस्यैवासत्त्वादन्यथातिप्रसङ्गात् भ्रान्तिविषयेण दृष्टोत्तरत्वाच्चेत्यलमतिविस्तरेण" । खण्डनखण्डखाद्यम् । [२अव्यक्तत्वे च ।

असत्ता स्त्री असतोभावः तल् । १अविद्यमानत्वे २असाधुत्वे

असत्त्व न० असतो भावः त्व । १अविद्यमानत्वे २अव्यक्तत्वे ३असाधुत्वे च सत्त्वं द्रव्यं न०त०। ४द्रव्यभिन्ने "सोऽसत्त्वप्रकृतिर्गुणः" इति फणिभा० । "क्रिया न युज्यते लिङ्गक्रियानाधारकारकैः । असत्त्वरूपता तस्या द्रव्यमेवावधार्यतां" हर्युक्तायां लिङ्गसंख्यानन्वयिन्यां कर्तृकर्मत्वभिन्नकारकत्वशून्यायां साध्यरूपायां ५क्रियायाञ्च। सत्त्वं प्रकाशादिसम्पादकं प्रकृतेर्गुणभेदः न०त०। तद्भिन्ने ईरजसि ७तमसि च न० । सत्त्वं जन्तुमात्रम् न०व० । ८जन्तुशून्ये त्रि० । सत्त्वं सात्त्विकः गुणभेदः । ९तच्छून्ये तामसादिगुणयुते त्रि० । सत्त्वमर्थक्रियाकारित्वम् अभावे न०त० । १०प्रयोजनानुपयुक्ते उदा० असत्ख्यातिशब्दे "सत्त्वासत्त्वकथा इत्थं" खण्डनख० ।

असत्पथ पु० असन् पन्थाः अच् समा०। १शास्त्रादिनिषिद्धे कार्य्यादौ २दुष्टे वर्त्मनि च । [दुष्टपथालम्बने ।

असत्परिग्रह पु० असतः पतितस्य परित्यक्तः स्वीकारः ।

असत्प्रतिग्रह पु० असतः निषिद्धस्य तिलादेः असद्भ्यो वा शूद्रादिभ्यः प्रतिग्रहः । १निषिद्धद्रव्यप्रतिग्रहे २शूद्रादिभ्यः प्रतिग्रहे च । प्रतिग्रहश्च अदृष्टार्थत्वात्तद्द्रव्य स्वीकारः । पारितोषिकौपढौकनादिग्रहणे तु न दोषः । विस्तरस्तु प्रतिग्राह्यशब्दे द्रष्टव्यम्। "यतस्ततस्समस्तप्रतिग्रहेभ्यः" विष्णु० "असत्प्रतिग्रहेषु उभयतोमुखादिप्रतिग्रहेभ्यः" शु०त० रघुनन्दनः ।

असत्य न० विरोधे न०त०। सत्यभिन्ने १मिथ्याभूते । २मृषार्थके वाक्यादौ "अपाक्रीकरणं स्तेयमसत्यस्य च भाषणम्" मनुः। असत्यवादी असत्यभाषी असत्यवचनः । ३ तत्प्रयोक्तरि मिथ्याभूते ४वस्तुनि च त्रि० । "असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्" इति गीता । असत्यं वस्तुस्वभावविरोधिधर्मभेदः वाक्यस्य तु तथाभूतपदार्थप्रतिपादकत्वेन यथा इदं रजतमितिवाक्यं शुक्तिकायां रजतत्वादात्म्यं प्रतिपादयत् असत्यं भवति एवमन्यदपि। सत्यत्वञ्च त्रैकालिकबाधशून्यत्वम् तच्छून्यमसत्यत्वम्। शंयुप्रजापतेः ५भार्य्याभेदे, स्त्री "शंयोरप्रतिमा भार्य्या सत्याऽसत्याच धर्मजा" भा०व०प०२१६ अध्या० ।

असत्यसन्ध त्रि० असत्ये सन्धाऽस्य । १मृषार्थाभिसन्धानवति २अन्यथास्थितस्वात्मनोऽन्यथारूपाभिमानवति च । यथा देहादिषु असत्येषु आत्माभिमानोऽसत्यसन्धा । अत एव छा०उप० तस्य अनर्थहेतुत्वं दृष्टान्तेन समर्थितम् । "पुरुषं सोम्योत हस्तगृहीतमानयन्त्यपाहार्षीत् स्तेयमकार्षीत् परशुमस्मै तपतेति स यदि तस्य कर्त्ता भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्द्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यते ॥ अथ यदि तस्याकर्त्ता भवति तत एव सत्यमात्मानं कुरुते स सत्याभिसन्धः सत्येनात्मानमन्तर्द्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यतेऽथ मुच्यते । स यथा तत्र नादहेत्तँतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो !" "यथा सोम्य ! पुरुषं चौर्य्यकर्म्मणि सन्दिहमानं नियच्छाय परीक्षणाय चोतापि हस्तगृहीतं ब्रूहस्तमानयन्ति राजपुरुषाः । किं कृतवानयमिति पृष्टावाऽनृतमाहार्षीदनेनमस्यायम् । ते चाऽऽहुः किमपहरणमात्रेण बन्धनमर्हति । अन्यथा दत्तेऽपि धने बन्धनप्रसङ्गादित्युक्ताः पुनराहुः स्तेयमकार्षीच्चौर्य्येण धनमपाहार्षीदिति । तेष्वेवं वदत्सु इतरोऽपह्नुते नाहं तत्कर्त्ता इति । ते चाऽऽहुः सन्दिहमानाः स्तेयमकार्षीस्तस्मै धनस्येति । तस्मिंश्चापह्नुवति आहुः परशुमस्मै तपतेति शोधयत्वात्मानमिति स यदि तस्य स्तेयस्य कर्त्ता भवति बहिश्चापह्नुते स एवमनृतस्तत एवानृतमन्यथा आत्मानं कुरुते स तथानृताभिसन्धोऽनृतेनात्मानमन्तर्द्धाय परशुं तप्तं मोहात् प्रतिगृह्णाति स दह्यतेऽथ हन्यते राजपुरुषैः स्वकृतेनानृताभिसन्धिदोषेण । अथ यदि तस्य कर्म्मणोऽकर्त्ता भवति तत एव सत्यमात्मानं कुरुते स तया सत्याकर्त्तृतयात्मानमन्तर्द्धाय परशुं तप्तं प्रतिगृह्णाति सत्याभिसन्धः सन्न दह्यते सत्यव्यवधानादव मुच्यते च मृषाभियोक्तृभ्यः । तप्तपरशुहस्तसंयोगस्तु तुल्यत्वेऽपि स्तेयकर्त्तृत्वस्य, अनृताभिसन्धो दह्यते न तु सत्याभिसन्धः । स यथा सत्याभिसन्धस्तप्तपरशुग्रहणकर्म्मणि सत्यव्यवहितहस्ततलत्वान्नादह्येत न

दृश्यते इत्येतदेवं सदुब्रह्म सत्याभिसन्धेतरयोः शरीरपातकाले च तुल्यायां सत्सम्पत्तौ विद्वान् सत्सम्पद्य न पुनर्व्याघ्रदेवादिदेहेष्वहणायावर्त्तते,, इति भा० ।

असदध्येत पु० असत् निषिद्धशास्त्रमधीते अधि-इङ् तृच् । स्वशाखां परित्यज्यान्यशाखाध्येतरि शाखारण्डे । "स्वशाखां यः परित्यज्य अन्यत्र कुरुते श्रमम् । शाखारण्डः स विप्रेषोवर्ज्जयेत् तं क्रियासु चेति" स्मृतिः तत्राध्ययननिषेधात्तस्यासदध्येतृत्वम् । स्वशाखाध्ययनोत्तरम् क्रमेणान्यशाखाशास्त्रान्तराध्ययनकर्त्तृत्वे तु न असदध्येतृत्वम् ।

असदागम पु० विरोधे न०त०। १सच्छास्त्रभिन्ने नास्तिकादिशास्त्रे २असतः द्रव्यस्यागमे च दुष्टद्रव्यलाभे च कर्म० १दुष्टे आगमे । "सप्त वित्तागमाधर्म्यादायो लाभः क्रयो जयः । विभागः संप्रयोगश्च सत्प्रतिग्रहएव चेत्युक्तधर्म्योपायभिन्नः सदागमस्तद्भिन्नः असदागमः ।

असदाचार पु० अभावे न०त० । १सदाचाराभावे न०ब० । २सदाचारशून्ये त्रि० । सदाचारश्च वेदादिशास्त्रानुसारी आचारः सतामाचारश्च ।

असदृश त्रि० न०त० । अयुक्तरूपे अननुरूपे । "यदुक्तवत्य सदृशं वैदेह्या पश्चिमं वचः" भा०व०प० २७८ अ० । स्त्रियां ङीप् ।

असद्ग्रह पु० असति अविद्यमाने वस्तुनि ग्रहः आग्रहः । बालादीनाम् (आवदार) इति ख्याते १आग्रहभेदे । ६त० । २मिथ्याज्ञाने शुक्तिकारजतमित्यादिज्ञाने च ।

असद्धेतु पु० असन् व्यभिचारादिदोषवान् हेतुः । न्यायोक्ते व्यभिचारादिदोषयुक्ते हेतौ । यथा धूमवान् वह्नेरित्यादौ धूमाभाववति तप्तायःपिण्डे वह्नेः सत्त्वेन व्यभिचारात् धूमसाधने वह्निहेतोर्दुष्टत्वादसत्त्वम् एवमन्यत्रापूह्यम् । हेतुदोषाश्च सामान्यतः पञ्चविधाः "अनैकान्तोविरुद्धश्चाप्यसिद्धः प्रतिपक्षितः । कालात्ययापदिष्टश्च हेत्वाभासाश्च पञ्चधा" भाषा० विस्तरो हेत्वाभासशब्दे वक्ष्यते ।

असद्भाव पु० सतोविद्यमानस्य भावः अभावे न०त० । १असत्त्वे अविद्यमानत्वे सत् भावः अभिप्रायः विरोधे न०त० । २दुष्टाभिप्राये । ब० २तद्वति त्रि० ।

असद्वृत्ति स्त्री सतो वेदादिविहिता वृत्तिःस्वभावश्च अभावे न०त० । १सदाचाराभावे विरोधे न०त० । २निषिद्धाचारे । न०ब० । २तद्वति त्रि० । [२तद्वति त्रि० ।

असद्व्यवहार पु० असन् दुष्टः व्यवहारः । १दुष्टव्यवहारे न०ब० ।

असन पु० अस-क्षेपे-युच् । पीतसालवृक्षे (पेयासाल) "प्रियविमानितमानवतीरुषां निरसनैरसनैरदशार्थता" माघः तालद्वयमध्यतापि "वृन्दावने तु विकसितकन्दलदशनैर्बीभवति दरीसुखेच कन्दलदशनैः" उज्ज्वल० । भावे ल्युट् । २क्षेपणे न० । "हृषनिरसने विनियोगः" भवदेवः । धातूनामनेकार्थत्वात् कर्त्तरि युच् । ३चलनशीले त्रि० "ह्रशानोरस्तु रसनाऽरुग्मयः" ऋ० १,१५५,२, "गर्भाससनामतु द्यून्" ऋ० १,१४८,४ । [सातलवृक्षे ।

असनपर्णी स्त्री असनस्य पर्णमिव पर्णमस्याः गौ० ङीष् ।

असनि त्रि० अस-अनि । क्षेपके कश्यादि० चतुरर्थ्यांक । असनिकः तत्सन्निकृष्टदेशादौ त्रि० ।

असन्तति स्त्री सन्ततिर्धारा अभावे न०त० । तदभावे १विच्छेदे सन्ततिर्धारा वंशश्च न०ब० २तच्छून्ये त्रि० ।

असन्तान पु० सन्तानोविस्तारः अभावे न०त० । १विस्ताराभावे सन्तानोवंशोविस्तारश्च न०ब० । २विस्तारशून्ये ३वंशशून्ये च त्रि० । [पशून्ये त्रि० ।

असन्ताप पु० अभावे न०त० । १सन्तापाभावे न०ब० । २सन्ता-

असन्तुष्ट त्रि० न०त० । सन्तोषशून्ये अधिकलाभेऽपि पुनरन्य धनाशावति "असन्तुष्टा द्विजा नष्टाः सन्तुष्टाः पार्थिवास्तथा" नीतिः । [२सन्तोषशून्ये अधिकलाभवति ॥

असन्तोष पु० अभावे न०त० १सन्तोषाभावे दृष्टप्रभावे । न०ब० ।

असन्दिग्ध त्रि० न०त० । १सन्देहाविषये २सन्देहशून्ये च । "स्वल्पाक्षरसन्दिग्धं सारवत् विश्वतोमुखम् । अस्तोभमनवद्यञ्च सूत्रं सूत्रविदोविदुः" ।

असन्दित त्रि० सम्+दो-क्त दृत्तम् सन्दितं बद्धं न०त० । बन्धनशून्ये अनिरुद्धे "पतङ्गानसंदितो वि सृज" ऋ० ४,४,१, "असन्दितः परैरनिरुद्धः" भा० ।

असन्दिन् त्रि० सन्दा बन्धनं मत्वर्थे इनि न०त० । बन्धनशून्ये । "अदर्तं वर्हिस्तस्यावसन्दिनम्" ऋ० ८,१०२,१४ "असन्दिनमबन्धनम्" भा० ।

असन्धि पु० अभावे न०त० । व्याकरणोक्तसन्धिकार्य्याभावे सन्धिः पूर्व्वापरवर्णयोः सन्निकर्षविशेषात् वर्णान्यथाभावलोपः उभयोर्मेलनस्थानम् रात्रासुपायभेदश्च न०ब० । तच्छून्ये त्रि० ।

असन्नद्ध त्रि० न सम्यक् नद्धः स्वकार्य्ये क्षमः । दृप्ते गर्व्विते पण्डितम्मन्ये तस्य सम्यक्पटुत्वाभावेऽपि दर्पेण तथात्वेनाभिमानात्तथात्वम् ।

असन्निकर्ष पु० अभावे न०त० । १सन्निकर्षाभावे विरोधे न०

त० । २दूरत्वे न०व० । ३सन्निकर्षशून्ये दूरस्थे त्रि० ।

असन्निकृष्ट त्रि० विरोधे न०त० । १दूरस्थे ।

असन्निधि पु० अभावे न०त० । १नैकट्याभावे" विरोधे न० त० । २दूरत्वे । न० व० । ३दूरस्थे त्रि० ।

असन्निहित त्रि० विरोधे न०त० । १दूरस्थे । २असम्यग्-निवेशिते च ।

असपत्न त्रि० विरोधे न०त० । १शत्रुभिन्ने मित्रे न०व० । २शत्रुशून्ये त्रि० "इमं देवा असपत्नम्" यजु०८,४, स्त्रियां ङीप् ङीन् "असपत्नी सपत्नघ्नी जयन्त्यभिभूरो" ऋ० १०, १५८,५ । यज्ञे उपाधीयमाने इष्टकाभेदे "पञ्चस्वामन्नेष्वग्निनीदसपत्नो" कात्या० १७,१।१। "असपत्नी इष्टका" कर्क० ।

असपिण्ड पुंस्त्री०न समानः पिण्डः देहारम्भकावयवभेदो यस्य । सप्तमपुरुषाद्यनन्तर्गतयोः स्त्रीपुरुषयोः । "असपिण्डा च या मातुरसगोत्रा च या पितुः" मनुः असपिण्डः स-पिण्डो वा यदृच्छातोपनायितः" स्मृतिः । सपिण्डशब्द-निर्वचनेन च सापिण्ड्यं मिताक्षराकृता "अनन्यपूर्विकां कान्तामसपिण्डां यवयसोमिति" या० स्मृतिव्याख्याने दर्शितम् । असपिण्डां समान एकः पिण्डोदेहो यस्याः सा सपिण्डा न सपिण्डा असपिण्डा ताम् । सपिण्डता चैकशरीरावयवान्वयेन पित्रा सह एकपिण्डता । एव मितामहादिभिरपि पितृद्वारेण तच्छरीरावयवान्वयात् । एवं मातृशरीरावयवान्वयेन माता । तथा मातामहादिभि-रपि मातृद्वारेण । तथा मातृष्वसृमातुलादिभिरपि एक शरीरावयवान्वयात् । तथा पितृव्यपितृष्वसादिभिरपि । तथा पत्या सह पत्न्या एकशरीरारम्भकतया । एवं भ्रातृभार्याणामपि परस्परमेकशरीरारम्भैः सह एक शरीरारम्भकत्वेन । एवं यत्र यत्र सपिण्डशब्दः तत्र तत्र साक्षात् परम्परया वा एकशरीरावयवान्वयो वेदितव्यः । अवश्यञ्चैकशरीरावयवान्वयेन सापिण्ड्यं वर्णनीयम् । "आत्मा हि जज्ञ आत्मन इत्यादि" श्रुतेः तथा "प्रजा-मनु प्रजायस" इति तथा "स एवायमिदृक् पृथक् पृथक् प्रत्यक्षेणोपलभ्यत" इत्यापस्तम्बवचनाच्च । तथा गर्भोप-निषदि । "एतत्षाट्कौशिकं शरीरस्त्रीणि मातृतस्त्रीणि पितृतः अस्थिस्नायुमज्जानः पितृतः । त्वङ्मांसरुधिराणि मातृत" इति । तत्र तत्रावयवान्वयप्रतिपादनात् । निर्व्यापपिण्डान्वयेन तु सापिण्ड्ये मातृसन्ताने भ्रातृ-आदिषु च सापिण्ड्यं न स्यात् । समुदायशब्दाङ्गीकारेण रूढपरित्यागे अवयवशक्तिस्तत्र तत्रावगम्यमाना परित्यक्ता स्यात् । "असत्त्वयवार्थेषु योऽन्यत्रार्थे प्रयुज्यते । तत्रा नन्यगतित्वेन समुदायः प्रसिध्यति" । एवम्मारभ्यैकशरीरा-वयवान्वयेन सापिण्ड्ये यथा नातिप्रसङ्गस्तथा वक्ष्यामः" । "असपिण्डामित्यत्रैकशरीरावयवान्वयद्वारेण साक्षात् पार-म्पर्येण वा सापिण्ड्यसङ्कल्पनञ्च सर्व्वत्र सर्व्वत्र यथाकथ-ञ्चिदनादौ संसारे सम्भवतीत्यतिप्रसङ्ग इत्यत आह" । "पञ्चमात्प्रभृतिर्दूरं मातृतः पितृतस्तथा" या०स्मृ० । "मातृ-तोमातृसन्ताने पञ्चमादूर्द्धम् । पितृतः पितृसन्ताने सप्तमा-दूर्द्धं सापिण्ड्यं निवर्त्तते इति शेषः । ततश्चायं सपिण्ड-शब्दोऽवयवशक्त्या सर्व्वत्र प्रवर्त्तमानोऽपि निर्णीय पञ्चजादि-शब्दवच्चियतविषय एव । तथा च पित्रादयः षट् सपिण्डाः पुत्रादयश्च षडात्मा च सप्तमः । सन्तानभेदेऽपि यतः सन्तान-भेदः, तस्मादाद्य गणयेदुर्ध्वमात्सप्तम इति सर्व्वत्र योज-नीयम् । तथा च मातरमारभ्य तत्पितृपितामहादि-गणनायां पञ्चमपुरुषसन्तानवर्त्तिनी मातृतः पञ्चमीत्युपचर्य्यते एवं पितरमारभ्य तत्पित्रादिगणनायां सप्तमपुरुषस-न्तानवर्त्तिनी पितृतः सप्तमीति" मिता० । एवमेषामृणेऽपि सापिण्ड्यम् पिण्डपत्नीयं ज्ञेयं अदत्तस्त्रीणां तु त्रिपौरुषं सापिण्ड्यम् दत्तानां तु सगोत्रत्वाभावाच्छागौचमिति" भेदः दायपरिणोपयोगिसापिण्ड्यं तु दातृत्वभोक्तृ-त्वान्यतरसम्बन्धेनैकपिण्डत्वमिति दायभागानुसारिणः ।

असभ्य त्रि० सभायामर्हति यत् न०त० । सभायामनुपयुक्ते १स्त्रीवर्णनादौ, २खले च ।

असम त्रि० नास्ति समोयस्य । १अतुल्ये । "संप्रधार्यान्वीक्षाता न समौ नासमाविति" मनुः । समःयुग्मसंख्यान्वितः २तद्भिन्ने अयुग्मे विषमे (विजोड) एकत्रिपञ्चादि संख्यान्विते च यथा मेषादिषु द्वादशराशिषु मेषमिथुनसिंह तुलाधनुःकुम्भाः असमराशयः एवमन्यत्रापि। ३बुद्धभेदे पु०।

असमञ्च न० न समञ्चम् । १अप्रत्यक्षे अनुमित्यादिज्ञाने अर्थ० अच् । २तद्विषये त्रि० ।

असमग्र त्रि० न०त० । असम्पूर्णे असकले ।

असमञ्जस न० समञ्जसं युक्तियुतं न०त० । १असङ्गते । "यद्यपि का नोहानिः परस्य द्राक्षां रासभश्चरति । असमञ्जसमिति मत्वा तथापि तरलायते चेतः" उद्भटः ।

असमञ्जस् पु० सम्+अञ्ज—असुन् न०त० । सगरदग्धपञ्चेष्ट-पुत्रे अंशुमतः पितरि कुर्य्यवंशे क्षत्रियभेदे तत्कथा "अयोध्याधिपतिः श्रीमान् पूर्व्वमासीद्धराधिपः । सगरो-

नाम धर्म्मात्मा प्रजाकामः स चाप्रजाः। विदर्भराजदुहिता केशिनी नाम नामतः। ज्येष्ठा सगरपत्न्यासीद्धर्भिष्ठा सत्यवादिनः। अरिष्टनेमिदुहिता सुमेधाप्रतिमा भुवि। द्वितीया सगरस्यासीत् पत्नी परमधार्म्मिकी" इत्युपक्रम्य। "अथ कालेन महता पुत्रं ज्येष्ठा व्यजायत। असमञ्जा इति ख्यातं काकुत्स्थं सगरात्मजम्" रामा० आ० २ अ०। "असमञ्जा इति ख्यातः सगरस्य सुतोऽभवत्। यं वैद्या जनयामास पौराणां स हि दारकान्। गलेषु क्रोशतो गृह्य नद्यामिक्षेप दुर्बलान्। ततः पौराः समाजग्मुर्भयशोकपरिप्लुताः। सगरञ्चाभ्ययाचन्त सर्व्वे प्राञ्जलयः स्थिताः। त्वं नस्त्राता महाराज! परचक्रादिभिर्भयात्। असमञ्जोभयाद्घोरात्ततो नस्त्रातुमर्हसि। पौराणां वचनं श्रुत्वा घोरं न्यपतिसत्तमः। मुहूर्त्तं विमना भूत्वा सचिवानिदमब्रवीत्। असमञ्जाः पुरादद्य सुतो मे विप्रवास्यताम्। यदि वो मत्प्रियं कार्य्यमेतच्छीघ्रं विधीयताम्। एवमुक्ता नरेन्द्रेण सचिवास्ते नराधिप!। यथोक्तं त्वरिताश्चक्रुर्यथा ज्ञापितवान्नृपः। एतत्ते सर्व्वमाख्यातं यथा पुत्रो महात्मना। पौराणां हितकामेन सगरेण विवासितः" भा० व० प० १०७ अ०। असच्। असमञ्जसोऽपि तन्निघण्टौ "असमञ्जस इत्युक्तः स केशिन्या न्यपात्मजः। तस्य पुत्रोंऽशुमान्नाम पितामहहिते रतः"। "असमञ्जस आत्मानं दर्शयन्नसमञ्जसम्। जातिस्मरः पुरा सङ्गाद्योगी योगाद्विचालितः। आचरन् गर्हितं लोके ज्ञातीनां कर्म्म विप्रियम्। सरय्वां क्रीड़तोबालान् प्राक्षिपद्वेजयन् जनान्। एवंदुष्टः परित्यक्तः पित्रा स्नेहमपोह्य वै। योगैश्वर्य्येण बालांस्तान् दर्शयित्वा ततो ययौ। अयोध्यावासिनः सर्व्वे बालकान् पुनरागतान्। दृष्ट्वा विस्मिरे राजन्! राजा चाप्यन्वतप्यत" भाग० ६स्क० ८अ०।

असमद त्रि० सह मदेन गर्वेण समदः कलहःस नास्ति यत्र। कलहरहिते विरोधशून्ये। "तस्मैभ्योऽसमदं करोति तदभिजपति" "ताभ्यएवैतत्सह सतीभ्योऽसमदं करोति" इति च शत० ब्रा०। "असमदमकलहं परस्पराविरोधम्" भा०।

असमन त्रि० असमस्तुल्यत्वं भिन्नवर्णत्वात् नयति नी-ड। विभिन्नवर्णे "असमना अजिरासो रघुष्यदः" ऋ० १।१४०,४, असमना भिन्नवर्णाः भा०।

असमनेत्र पु० असमानि अयुग्मानि नेत्राण्यस्य। त्रिनेत्रे शिवे असमलोचनादयोऽप्यत्र।

असमय पु० अपगतोऽर्थो न० त०। १दुष्टकाले २अयोग्यकाले च "असमये मतिरुन्मिषति ध्रुवम्" नैषधचरिते ४सर्गः।

असमर्थ त्रि० समर्थः शक्तः न० त०। १अशक्ते २दुर्बले च। समर्थः सङ्गतार्थः न० त०। असङ्गतार्थे, व्याकरणशास्त्रप्रसिद्धे यत्र यस्यान्वययोग्यता तत्सङ्गतारानपेक्षायुक्ते २समासे यथा अश्नाद्भोजीत्यादौ असमर्थसमासः नञ्पदस्य आद्येन सहान्वयायोग्यत्वात् भोजनेन च सङ्गतारामावेऽपि तत्रान्वयस्य अपेक्षणीयत्वात्तथात्वम्।

असमर्थसमास पु० कर्म्म०। येन सह यस्य अन्वयस्तद्व्यतिरेकेण अन्यान्वितेन पदेन समासे। यथा अश्नाद्भोजीति अश्नुयं पश्येत्यादि। [कन्दर्पे असमसायकादयोऽप्यत्र।

असमवाण पु० असमा अयुग्मानि बाणा अस्य। पञ्चबाणे

असमञ्ज त्रि० सम+अञ्च-क्त न० त०। अव्याप्ते। "पितामतीनामसमञ्जकाव्यः" ऋ० ६,७६,४, "असमञ्जकाव्यः अव्याप्तकर्म्मेति" भा०।

असमवायिकारण न० समवैति सम+अव-इण-णिनि न० त० कर्म्म०। न्यायमते समवायिकारणं द्रव्यं तद्भिन्नं द्रव्यवृत्ति यत् गुणादिकं कारणं तद्भिन्नं। यथा कपालद्वयसंयोगरूपो गुणोघटस्य, द्रव्याश्रिता क्रिया संयोगविभागादेः। "समवायिकारणत्वं त्वेयमथाप्यसमवायिहेतुत्वम्"। "यत् समवेतं कार्य्यं भवति त्वेवन्तत् समवायि जनकं तत्"। "तत्रासन्नं जनकं द्वितीयम्" "गुणकर्म्मान्यवृत्ति त्वेयमथाप्यसमवायिहेतुत्वम्" इति च भाषा० व्याख्यातन्त्वेतत् सूत्रा०। "तत्र समवायिकारणे आसन्नं प्रत्यासन्नं कारणं द्वितीयमसमवायिकारणमित्यर्थः अत्र यद्यपि तुरीतन्तुसंयोगानां पटासमवायिकारणत्वंस्यात्, एवं वेगादीनामपि अभिघाताद्यसमवायिकारणत्वं स्यात्, एवं ज्ञानादीनामिच्छाद्यसमवायिकारत्वं स्यात् तथापि पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगभिन्नत्वं देयं, तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रत्यसमवायिकारणं भवत्येव, एवं वेगादिकं वेगस्तन्द्याद्यसमवायिकारणं भवत्येवेति तत्तत्कार्य्यासमवायिकारणलक्षणे तत्तद्भिन्नत्वं न देयम्, आत्मविशेषगुणानान्तु कुत्राप्यसमवायिकारणत्वं नास्ति तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेव। अत्र समवायिकारणे प्रत्यासत्तिं द्विविधं कार्य्यकार्यप्रत्यासत्त्या कारणैकार्थप्रत्यासत्त्या च आद्यं यथा घटादिकं प्रति कपालसंयोगादिकं, तत्र कार्य्येण घटेन सह कारणस्य कपालसंयोगस्य एकस्मिन् कपाले प्रत्यासत्तिरस्ति, द्वितीयं यथा घटरूपं प्रति कारणं घटः तेन सह कपालरूपस्य एकस्मिन् कपाले

प्रत्यासत्तिरस्ति, तथाच क्वचित् समवायसम्बन्धेन, क्वचित् स्वसमवायिसमवायसम्बन्धेनेति फलितार्थः । इत्थञ्च कार्यं कार्यकारणैकार्थान्यतरप्रत्यासत्त्या कारणज्ञानादिभिन्नमसमवायिकारणमिति सामान्यलक्षणं पर्य्यवसन्नम्" ।

कुत्र कुत्र किंकिमसमवायिकारणं? वैशेषिकस्तत्रे तदुक्तं ततउद्धृत्य किञ्चित् प्रदर्श्यते ।

"आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म्म१ । तथा हस्तसंयोगाच्च मुषले कर्म्म२ । अभिघातजे मुषलादौ कर्म्मणि व्यतिरेकादकारणं हस्तसंयोगः३ । तथात्मसंयोगो हस्तकर्म्मणि४ । अभिघातान्मुषलसंयोगाच्च हस्ते कर्म्म५ । आत्मकर्म्म हस्तसंयोगाच्च ६ । संयोगाभावे गुरुत्वात् पतनम्७ । नोदनविशेषाभावान्नोर्द्धं न तिर्य्यग्गमनम्८ । प्रयत्नविशेषान्नोदनविशेषः९ । नोदनविशेषादुदसनविशेषः१० । हस्तकर्म्मणा दारकर्म्म व्याख्यातम्११ । तथा दग्धस्य विस्फोटने१२ । यत्नाभावे प्रसुप्तस्य चलनम्१३ । दग्धे कर्म्म वायुसंयोगात्१४ । मणिगमनं सूच्यभिसर्पणमदृष्टकारणम्१५ । दृषद्युगपत्संयोगविशेषाः कर्म्मान्त्ये हेतुः १६ । नोदनाद्याभिर्यः कर्म्म तत्कर्म्मकारिताच्च संस्काराद्दुत्तरं तथोत्तरमुत्तरञ्च१७ संस्काराभावे गुरुत्वात् पतनम्" १८ वै०सू० "संयोगश्च प्रयत्नश्च संयोगप्रयत्नौ आत्मनः संयोगप्रयत्नौ ताभ्यां हस्ते समवायिकारणे कर्म्म, तस्य च कर्म्मणः प्रयत्नवदात्मसंयोगोऽसमवायिकारणम्, प्रयत्नश्च निमित्तकारणम्, इयमेव चेष्टा, प्रयत्नवदात्मसंयोगासमवायिकारणकक्रियायाश्चेष्टात्वात् स्वासमवेतस्वातिरिक्तस्वसंबद्धान्यप्रयत्नजन्यक्रियाया वा१ । तथा हस्तसंयोगादुत्क्षेपणबहुसंयोगादित्यर्थः अत्र च यत्नवदात्मसंयुक्तेन हस्तेन मुषलस्य संयोगोऽसमवायिकारणम्, मुषलं समवायिकारणम्, प्रयत्नगुरुत्वे निमित्तकारणे २। उदूखलाभिहतमुषलस्योर्द्धादु यदुत्पतनं जायते तत्र कारणमाह । तत्र यद्यपि मुषलेन उत्पतता हस्तस्य संयोगोऽस्ति तथापि स संयोगोऽन्यथासिद्धः किन्तु उदूखलाभिघात एव असमवायिकारणम्, कुत एवमित्यत आह व्यतिरेकादिति प्रयत्नस्य व्यभिचारादित्यर्थः । यदि तदा प्रयत्नः स्यात् मुषलस्यैवाकस्मिकमुत्पतनं न भवेत् विधारकेण प्रयत्नेन मुषलस्य धारणमेव भवेत् चेष्टाधीनं मुषलस्य पुनरुत्पतनं वा भवेत् इति भावः३ । मुषलेन सहोत्पततोहस्तस्य कर्म्मणि कारणविशेषमभिधातुं प्रयत्नवदात्मसंयोगस्यासमवायिकारणत्वं निराकर्तुमाह । मुषलेन सहोत्पततोहस्तस्य कर्म्मणि आत्मसंयोगः प्रयत्नवदात्मयोगस्तथा अकारणमित्यर्थः अकारणमिति पूर्व्वसूत्रस्थं तच्चेत्यतिदिश्यते४ । कुतस्तर्हि हस्ते तदोत्पतनमत आह । यथा मुषले उत्पतति मुषलसंस्थं लोष्टमुत्पतति तथा हस्तोऽपि तदोत्पतति । अत्राभिघातशब्देन अभिघातजनितः संस्कार उच्यते उपचारात्, उत्पततो मुषलस्य पटुतरेण कर्म्मणा अभिघातसंस्कृतेन स्वाश्रये मुषले संस्कारोजनितस्तत्कृतं संस्कारमपेक्ष्य हस्तमुषलसंयोगादसमवायिकारणाद्धस्तेऽप्युत्पतनं न तु तदुत्पतनं प्रयत्नवदात्मसंयोगासमवायिकारणकम्, अवशो हि हस्तो मुषलेन सहोत्पततीति भावः५ । ननु शरीरे शरीरावयवे वा यत्कर्म्मोत्पद्यते तत्र प्रयत्नवदात्मसंयोगः कारणं प्रकृते कथं न तथेत्यत आह । आत्मशब्दः शरीरावयवपर उपचारात् अन्यथानुपपत्तिरेवोपचारबीजम् । तथाचात्मनः शरीरावयवस्यापि हस्तस्य यत् कर्म तत् हस्तमुषलसंयोगात् चकाराच्च वेगसमुद्भवः, हस्तकर्म्मणि हस्तसंयोगस्तावदसमवायिकारणं तत्र व्यभिचारो नास्ति स च क्वचित् प्रयत्नवदात्मसंयोगः क्वचिद्वेगवन्मुषलादिसंयोगो यथा वातूलस्य शरीरावयवकर्म्मेति भावः ६ ॥ प्रयत्नानधीनकर्म्मप्रकरणमारभते । संयोगपदेन प्रतिबन्धकाभावमुपलक्षयति तेन प्रतिबन्धकाभावे गुरुत्वादसमवायिकारणात् पतनम् अधःसंयोगफलिका क्रिया जायते, तत्र गुरुत्ववति फलादौ प्रतिबन्धकः संयोगः, विहङ्गमादौ तु विधारकः प्रयत्नः पतनप्रतिबन्धकः, एतेषामभावे गुरुत्वाधीनं पतनमित्यर्थः । अभिध्यानादिना विषादेरन्तरीक्षस्थापने अदृष्टवदात्मसंयोगो मन्त्रादिरेव वा प्रतिबन्धकस्तेषामपि संयोगपदेन संग्रहः७ ॥ ननु गुरुत्वाद् यदि पतनं तदा लोष्टादेरुत्क्षिप्तस्य क्वचिदूर्द्धं क्वचिच्च तिर्य्यग्गमनं कथमुपपद्यतेत्यत आह । गुरुत्ववतोऽपि लोष्टकाष्ठादेर्यदूर्द्धं तिर्य्यक् च गमनं तन्नोदनविशेषात् तीव्रतरान्नोदनात् । तथाच फलपक्वितावादौ संयोगप्रयत्नसंस्काराभावे यत् पतनं तत्र नोदनविशेषो नास्ति तेन न तिर्य्यक्,नवोर्द्धं गमनमिति भावः८ । ननु नोदनविशेष एव कुत उत्पद्यते तत्राह । तिर्य्यक् ऊर्द्धं दूरम् आसन्नं वा क्षिपामीतीच्छाकारणकः प्रयत्नविशेषः तज्जनितो नोदनविशेषस्ततो गुरुत्ववतो द्रव्यस्य लोष्टादेरूर्द्धं तिर्य्यक् च गमनमुपपद्यते उदसनं दूरोत्क्षेपणम् ९,१०॥ उदूखलाभिघातात् मुषलेन सह हस्ते यत्कर्म्म उत्पन्नं तत्तावत् प्रयत्नपूर्व्वकं न भवति नापि गुरुत्वापेक्षकमतस्तत्तुल्यतया बालकस्य क्रीड़ाकरचर-

णादिचालनं यत्नवातिदिशति । बालकस्य यद्यपि कर-चरणादिचालनं प्रयत्नपूर्वकमेव तथापि हिताहितप्राप्ति-फलकं न भवति न पुण्यपापहेतुकमित्यतिदेशार्थः ११ ॥ इदानीं प्रयत्नपूर्वकोऽपि कर्म्मणि यत्र पुण्यपापहेतुत्वं तत्र दारककर्म्म तुल्यतामतिदिशन्नाह । आततायिना केनाप्यगारे दाह्यमाने तत्र दग्धस्य पुरुषस्य विस्फोटे वह्निक्षते जाते सति तस्यातताय्यिनो बधानुकूलेन प्रयत्नेन हत्यादौ यत्कर्म्म जनितं तत्र पुण्यहेतुकं न वा पापहेतुकं यथाह्नः । "नाततायिवधे दोषो हन्तुर्भवति कश्चन । प्रकाशं वाऽप्रकाशं वा मन्युस्तन्मन्युमृच्छति" । "अग्निदोगरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहारी च षडेते ह्याततायिनः" १२। इदानीं यत्नं विना यानि कर्म्माणि भवन्ति तान्याह । प्रसुप्तस्येति चैतन्याभावदशासुपलक्षयति तेन मूर्च्छितस्य जीवतोऽचैतन्येऽपि वायुकृतं चलनं द्रष्टव्यम् तत्र १३ ॥ शरीरकर्म्माणि व्याख्याय तदितरायाह । तृणपदेन दूर्वागुल्मलतावतानादिकं सर्व्वमुपलक्षयति १४। अदृष्टाधीनं कर्म परिगणयन्नाह । मणिपदेन कांस्यादिकमुपलक्षयति तेनाभिमन्त्रितं मणिकांस्यादि तस्कराभिमुखं यद् गच्छति तत्र गमने मणयादि समवायिकारणम्, अदृष्टवत्तस्कराद्यमणिसंयोगोऽसमवायिकारणम्, तस्करस्य पापं निमित्तकारणम् । सूच्यभिसर्पणमिति सूचीपदेन लौह-मात्रं तृणञ्चोपलक्षयति तथा चायस्कान्ताभिमुखं यत् सूच्यादेर्गमनं तृणकान्ताभिमुखं यत् तृणस्य गमनं तत्र सूच्यादि समवायिकारणम्, यस्य हितमहितं वा तेन तृणसूच्यादि-गमनेन तददृष्टवदात्मसंयोगोऽसमवायिकारणम्, तददृष्टमेव निमित्तकारणम्, एवमन्यदप्यूह्यम् । तदुयथा वह्नेरूर्द्ध्व-ज्वलनं वायोस्तिर्य्यग्गमनं सर्गादौ परमाणुकर्म्मादि १५ । ननु शरविरुङ्गमालातचक्रादीनामुपरमपर्य्यन्तमेकमेव कर्म्म नाना वेति संशये निर्णयहेतुमाह । इषाविति षष्ठ्यर्थे सप्तमी, इदमलाकृतं वेगेन गच्छतां शरादीनां कृष्णादि-संयोगानन्तरं शरादौ सत्येव गत्युपरमो दृश्यते आश्रय-नाशस्यावश्य तन्नाशकः आश्रयस्य विद्यमानत्वात् विरोधि-गुणान्तरञ्च नोपलभ्यते तेन स्वजन्यः संयोग एव कर्म्म-नाशक इत्युद्घोष्यते स च संयोगश्चतुर्थक्षणे जातः पञ्चमक्षणे कर्म्म नाशयति । तथा हि कर्म्मोत्पत्तिरेव विभागः अथ पूर्व्वसंयोगनाशः उत्तरसंयोगः कर्म्मनाशः तेना-युगपत्संयोगविशेषाः कर्म्मनानात्वज्ञापका इत्यर्थः सं-योगविशेषा इति संयोगे विशेषः स्वजन्यत्वमेव अन्यथा संयोगमात्रस्य कर्मनाशकत्वे कर्म्म क्वचिदपि न तिष्ठेत् १६ । नोदननिघ्नाद्यकर्मप्रकरणानन्तरं संस्कारनिघ्नाद्यकर्मप्रकर-णमारभते । पुरुषप्रयत्नेनाऽऽकृष्टया पतञ्जिकया तूत्तरदेशोदीर्य्यं कर्म जायते तत्र नोदनमसमवायिकारणम्, इषुः समवा-यिकारणम्, प्रयत्नगुरुत्वे निमित्तकारणे, तेन चाद्येन कर्म्मणा समनाधिकरणो वेगाख्यः संस्कारो जन्यते न च वेगेन, गच्छतीति प्रत्यक्षसिद्ध एव तेन संस्कारेण तत्रैव कर्म्म जायते तत्रासमवायिकारणं संस्कारः, समवायि-कारणमिषुः, निमित्तकारणन्तु तीव्रो नोदनविशेषः, एवञ्च यावदिषुपतनमनुवर्त्तमानेन संस्कारेण उत्तरोत्तरः कर्म-सन्तानो जायते स्वजन्योत्तरसंयोगेन कर्म्मणि नष्टे संस्का-रेण कर्मान्तरजननात् एक एव संस्कारः कर्मसन्तानजनकः न तु कर्मसन्तानवत् संस्कारसन्तानोऽभ्युपगन्तुमुचितो गौरवादिति दर्शयितुमाह तथोत्तरमुत्तरञ्चेति तत्कर्मकारि-तान्च संस्कारादित्येकवचनञ्च, न्यायनये तु कर्मसन्तानवत् संस्कारसन्तानस्वीकारे गौरवम्, यत्तु युगपत्प्रक्षिप्तयोरेक-स्य तीव्रो वेगोऽपरस्य तु मन्दस्तत्र नोदनतीव्रत्व-मन्दत्वे निमित्तम् १७। ननु संस्कार एक एव चेत् कर्मसन्ता-जनकस्तदा कदाचिदपि शरपातो न स्यात् कर्मजनकस्य संस्कारस्य सत्त्वादित्यत आह । गुरुत्वन्नावत् पतनकारण-मनुवर्त्तमानमेव तच्च गुरुत्वं संस्कारेण प्रतिक्षणं पतनं नाजीजनत् अथ प्रतिबन्धकाभावे तदेव गुरुत्वं पतनं करोतीत्यर्थः" १८। उपस्करः ।

"नोदनाभिघातात् संयुक्तसंयोगाच्च पृथिव्यां कर्म१ । तद्-विशेषेणादृष्टकारितम्२ । अपां संयोगाभावे गुरुत्वात् पतनम्३ । द्रवत्वात् स्यन्दनम्४ । नाड्यो वायुसंयोगादारो-हणम्५। नोदनापीड़नात् संयुक्तसंयोगाच्च६ । इच्छाभिस-र्पणमित्यदृष्टकारितम्७ । अपां संघातो विलयनञ्च तेजः-संयोगात्८। तत्र विस्फुर्ज्जथुर्द्विकृम्९। वैदिकञ्च१०। अपां संयोगाद्विभागाच्च स्तनयित्नोः११। पृथिवीकर्म्मणा तेजःकर्म वायुकर्म च व्याख्यातम्१२। अग्नेरूर्द्ध्वज्वलनं वायोस्तिर्य्यक् पवनमणूनां मनसश्चाद्यं कर्मादृष्टकारितम्१३। इष्वाकर्म्मणा मनसः कर्म व्याख्यातम्१४। आत्मेन्द्रियमनोऽर्थसन्निकर्षात् सुखदुःखे१५। तदारब्धे आत्मस्थे मनसि शरीरस्य दुःखा-भावः स योगः १६। अपसर्पणमुपसर्पणमशितपीतसंयोगाः कार्य्यान्तरसंयोगाश्चेत्यदृष्टकारितानि" १७। वै० सू० नोदनादि निघ्नाद्य कर्मपरीक्षाप्रकरणम् तत्राह। नोदनं संयोगविशेषः येन संयोगेन जनितं कर्म संयोगिनोः परस्परं विभागहेतु

नं भवति यः संयोग शब्दनिमित्तकारणं न भवति वा। यः संयोगः शब्दनिमित्तकारणं भवति यज्जनितं कर्म संयोगिनोः परस्परविभागहेतुश्च भवति स संयोगविशेषोऽभिघातः। ताभ्यामपि प्रत्येकं कर्म जन्यते पङ्क्ष्याख्यायां पृथिव्याञ्चरणेन नोदनात् चरणाभिघाताच्च कर्म जायते तत्र पङ्क्षः समवायिकारणम्, नोदनाभिघातौ यथायथमसमवायिकारणम्, गुरुत्ववेगप्रवृत्ना यथासम्भवं निमित्तकारणम्। संयुक्तसंयोगादिति नोदनादभिघाताद्वा पङ्के कर्म तत्पङ्क्षस्थिते घटादावपि तत्समकालमेव कर्मदर्शनात्१। ननु भूकम्पादौ नोदनाभिघातावन्तरेण जायमाने किमसमवायिकारणमत आह। तदिति पृथिवीकर्म पराहृयति पृथिव्यामेव कर्म यदि विशेषेण आशुवेग भवति तदाऽदृष्टकारितम्, तेन भूकम्पेन यस्य दुःखं सुखं वा भवति अदृष्टवत्तदात्मसंयोगस्तत्रासमवायिकारणम्, भूः समवायिकारणम्, अदृष्टं निमित्तकारणम्, यद्वा तदा नोदनाभिघातौ पराहृयति विशेषो व्यतिरेकः तथा च नोदनाभिघातव्यतिरेकेण यत् पृथिव्यां कर्म तददृष्टकारितमित्यर्थः२। इदानीं द्रवद्रव्यसमवेतकर्मपरीक्षाप्रकरणम्, तत्राह। अपां यत् पतनं वर्षणरूपं तद्गुरुत्वासमवायिकारणकम्, तत्संयोगस्य मेघसंयोगस्याभावे सति भवति तेन संयोगाभावस्तन्निमित्तकारणमित्यर्थः३। तेषामेव दृष्टविन्दूनामन्योन्यसंयोगजनकं कर्म कथमत आह। क्षितौ पतितानामपां विन्दूनां परस्परं संयोगेन महज्जलावयवि स्रोतोरूपं यज्जायते तस्य यत् स्यन्दनं दूरसंसरणं तत् द्रवत्वादसमवायिकारणाद्गुरुत्वान्निमित्तकारणाद्दृष्टं समवायिकारणेषु४। ननु यदि भूमिनामपाम् ऊर्द्धं गमनं भवति तदा गुरुत्वात् पतनवर्षणं सम्भाव्यते तदेव तु कुत इत्यत आह। कारयन्तीतिशेषः यदपामूर्द्धमारोहणं तत् नाड्याः सूर्यरश्मयो वायुसंयोगात् कारयन्ति ग्रीष्मे वाय्वभिहताः सूर्यरश्मय एव आरोहयन्त्यप इत्यर्थः। क्वचित् पाठो नाड्यावायुसंयोगादिति स च नाड्यो नाडीसम्बन्धी यो वायुसंयोग इत्युपपादनीयः ५। ननु सूर्यरश्मीनां कथमयं महिमा यत् भूमिजा अप ऊर्द्धं नयन्तीत्यत आह। नोदनेन बलवद्वायुनोदनेन आपीड़नादाक्रन्दनात् वायुसंयुक्ता रश्मयस्तत्संयुक्ता आप ऊर्द्धं धावन्ति यथा स्त्रोत्या अपः क्रियमाणाः वायुसम्बन्धिरश्मय ऊर्द्धं नयन्ति, वकार इवार्थस्तत्र च उपमानं स्त्रोत्या एवापो द्रष्टव्याः६। ननु मूले सिक्तानामपां दृष्टाभ्यन्तरेणोर्द्धगमनम् अभितः, तत्र नोदनाभिघातौ न वादित्यरश्मयः प्रभवन्ति तत्कथं तदित्यत्राह। अभितः सर्पणमभिसर्पणं तदभिसर्पणं मूले निषिक्तानामपां दृष्टे तददृष्टकारितं पत्रकाण्डफलपुष्पादिदृढिकृतं सुखं दुःखं वा येषामात्मनाम्, अदृष्टवत्तदात्मसंयोगादसमवायिकारणात् अदृष्टाभिनिमित्तादपु समवायिकारणेषु तत् कर्म भवति। येन कर्मणा आप ऊर्द्धं गत्वा दृष्टं वर्द्धयन्तीत्यर्थः७। नन्वपां सांसिद्धिकद्रवत्वं लक्षणसूत्रं ताडगानामेवापामूर्द्धमधस्तिर्यक् च गमनमुपपादितं हिमकरकादेर्नाद्य वैत्यादप्रसिद्धविवादसिद्धम्, तत्कथं तेषां संघातः काठिन्यम्, कथञ्च विलयनमित्यत आह। दिव्येन तेजसा प्रतिबन्धादाद्याः परमाणवो द्व्यणुकमारभमाणा द्व्यणुकेषु द्रवत्वं नारभन्ते ततो द्रवत्वन्तु वैरव्यवर्द्धद्व्यणुकादिप्रक्रमेण द्रवत्वशून्या हिमकरकादय आरभन्ते तेन तेषां काठिन्यमुपलभ्यते। नन्वेवं हिमकरकादीनामाप्यत्वे किं प्रमाणमत उक्तं विलयनञ्च तेजःसंयोगादिति तेजःसंयोगेन बलवता हिमकरकारम्भकपरमाणूनां क्रिया क्रियातो विभागस्ततः आरम्भकसंयोगनाशपरम्परया हिमकरकादिसङ्घावयविनाशस्तत्र द्रवत्वप्रतिबन्धकतेजःसंयोगविगमात् त एव परमाणवः द्व्यणुकेषु द्रवत्वमारभन्ते ततो द्रवत्ववतां हिमकरकादीनां विलयनं तत्र च बलवत्तेजोऽनुप्रवेशो निमित्तम्८। ननु बलद्दिव्यतेजोऽनुप्रवेशस्तत्र द्रवत्वे किं प्रमाणमित्यत आह। तत्र दिव्यासु अप्सु दिव्यानां तेजसामनुप्रवेशे विस्फुर्ज्जथुर्लिङ्गं वज्रनिर्घोष एव लिङ्गमित्यर्थः आत्मन्निकविद्युत्प्रकाशस्तावत्प्रत्यक्ष एव तदनुपदञ्च स्फुर्ज्जथुः सोऽपि प्रत्यक्ष एव तेनानुमीयते वज्रान्नेघात् करकाः प्रादुर्भवन्ति तत्र दिव्यतेजोविद्युद्रूपमनुप्रविष्टं तदुपष्टम्भेन करकारम्भकाप्सामपां द्रवत्वप्रतिबन्ध इति९। अत्रैव प्रमाणान्तरमाह। अपां मध्ये तेजोऽनुप्रवेश आगमसिद्ध एवेत्यर्थः। तथा हि "आपस्ता अग्निं गर्भमादधीरन् या अग्निं गर्भं दधिरे सुवर्णम्" इत्यादि१०। ननु विस्फुर्ज्जथुः कथमुत्पद्यते संयोगविभागौ शब्दयोनी तौ च नानुभूयेते इत्यत आह। विस्फुर्ज्जथुरितिशेषः अद्भिः स्तनयित्नोः संयोगविभागौ निमित्तकारणीभूय स्तनयित्नोरेवाकाशेन संयोगादसमवायिकारणादाकाशे समवायिकारणे, शब्दं गर्ज्जितं जनयतः। क्वचिच्च वायुबलाहकसंयोगविभागौ निमित्तकारणे बलाहकावयवसंयोगविभागावसमवायिकारणे, कर्मकारणाधिकारेऽपि प्रासङ्गिकमिदमुक्तम्,

यद्वा मेघाकाशसंयोगे विभागे वा शब्दासमवायिकारणे कारणम् अपामेव नोदनाभिघातजनितं कर्मेति क्वचितं कर्मण एवाधिकारप्राप्तत्वात् ११। भूकर्म प्रत्यदृष्टवदात्मसंयोगः कारणमुक्तं तत्रैवाकस्मिकदिग्दाहहेतोस्तेजसः आकस्मिकदाहादिहेतोश्च प्रभञ्जनस्य कर्म यत् संजायते तत्रादृष्टवदात्मसंयोगोऽसमवायिकारणम्, वायुतेजसी समवायिकारणम्, अदृष्टं निमित्तकारणमित्यर्थः, कर्मशब्दस्य द्व्याद्यत्तिर्मेघोल्कादिकर्मसूचनार्था १२। अदृष्टवदात्मसंयोगासमवायिकारणकं कर्मान्तरमाह। आद्यमिति सर्गाद्यकालीनमित्यर्थः, तदा नोदनाभिघातादीनामभावात् अदृष्टवदात्मसंयोग एव तत्रासमवायिकारणम् आद्यमूर्ध्वज्वलनम् आद्यं तिर्यक्पवनमिति, इतरेषां ज्वलनपवनकर्मणां वेगासमवायिकारणकत्वमेव मन्तुसूचितं दृष्टे कारणे सत्यदृष्टकल्पनानवकाशात् १३। अनाद्यं कर्माधिकृत्याह। सुप्तोत्क्षेपणादौ यथा प्रयत्नवदात्मसंयोगासमवायिकारणकं दृष्टकर्म तथाऽभिमतविषयग्राहिण्यिन्द्रिये सन्निकर्षार्थं यन्मनसः कर्म तदपि प्रयत्नवदात्मसंयोगासमवायिकारणकमेव। यद्यपीन्द्रियं मनो न साक्षात्प्रयत्नविषयस्तथापि मनोवहनाड़ीगोचरेण प्रयत्नेन मनसि कर्मोत्पत्तिर्द्रष्टव्या, नाड्यास्तु त्वगिन्द्रियपार्श्वत्वमङ्गीकर्त्तव्यम् अन्यथा प्राणवहनाडीगोचरेण प्रयत्नेनाशितपीताद्यभ्यवहरणमपि न सम्भवेत् १४। ननु मनसि कर्म्म उत्पद्यत इत्यत्रैव न प्रमाणमत आह। सुखदुःखे इत्युपलक्षणं ज्ञानप्रयत्नाद्यपि द्रष्टव्यं मनसोवैभवं पूर्व्वमेव निराकृतम्, अणुत्वञ्च साधितम्, युगपज्ज्ञानानुत्पत्तिश्च मनसो लिङ्गमित्युक्तं तेन तत्तदिन्द्रियप्रदेशेन मनःसंयोगमन्तरेण सुखदुःखे न स्यातामेव यदि मनसि कर्म्म न भवेत् न भवेच्च पादे मे सुखं शिरसि मे वेदनेत्याद्याकारोऽनुभव इत्यर्थः। यद्यपि मनःसन्निकर्षाधीनः सर्व्वोऽप्यात्मविशेषगुणस्तथापि सुखदुःखे तीव्रसंवेगितयाऽतिस्फुटत्वादुक्ते १५। नन्वेवं यदि चपलं मनस्तदा चित्तनिरोधाभावाद्योगं विना नात्मसाक्षात्कारो न वा तमन्तरेण मोक्ष इति शास्त्रारम्भवैफल्यमतआह विषयेष्वलम्पटस्यैव उदासीनस्य बहिरिन्द्रियेभ्योव्याहृत्तं मनो यदात्मस्थमात्मभावनिष्ठं भवति तदा तत्कर्मानुगुणप्रयत्नाभावात् कर्म्ममनसि नोत्पद्यते स्थिरतरं मनो भवति स एव योगः चित्तनिरोधलक्षणत्वाद् योगस्य, तदनारम्भ इति मनसः कर्मानारम्भ इत्यर्थः। यद्वा तत्पदेन सुखदुःखे एवाभिधीयेते प्रकान्तत्वात्, दुःखाभाव इति दुःखाभावसाधनत्वाद्योग एव दुःखस्याभावः "अन्नं वै प्राणः" इति वत्, यद्वा दुःखस्याभावो यत्रेति बहुव्रीहिः, शरीरस्येति शरीरावच्छिन्नस्यात्मनः, स योग इति प्रसिद्धिसिद्धतया तत्पदम्, अयं स योगः। यद्वात्मपदेनात्र प्राण उच्यते उपचारात् प्राणानुमेयत्वादात्मनः तथा च प्राणवहनाद्यां कर्मणा प्राणकर्मापि जायते यद्वा जीवनयोनियत्नवदात्मप्राणसंयोगासमवायिकारणकं प्राणकर्म, जीवनयोनिश्च यत्नोऽतीन्द्रियः प्राणसञ्चारानुमेयः कथमन्यथा सुषुप्त्यवस्थायामपि श्वासप्रश्वासगतागतमिति भावः १६। ननु प्राणस्य मनसश्च कर्म यदि प्रयत्ननिमित्तकं तदा प्राणमनसी यदा मरणावस्थायामपसर्पतः देहाद्बहिर्भवतः देहान्तरोत्पत्तौ तत्र पुनरुपसर्पतः प्रविशतः तत्र प्रयत्नाभावात्तदुभयमनुपपन्नम्, अशितपीतं भक्तपानीयादि तस्यापि शरीरावयवोपचयहेतुर्यः संयोगस्तज्जनकं यत् कर्म यच्च गर्भवासदशायां संयोगविभागजनकं कर्म तेषां कथमुत्पत्तिरत आह। अत्र "नपुंसकमपुंसकेनैकवच्चान्यतरस्यामिति" पा० नपुंसकनिर्देशः, संयोगपदञ्च तत्कारणे कर्मणि लाक्षणिकम्, अपसर्पणं देहारम्भककर्मजन्ये देहादेव प्राणमनसोरुत्क्रमणम्, उपसर्पणञ्च देहान्तरोत्पत्तौ तत्र प्राणमनसोः प्रवेशनम्, अशितपीतादिसंयोगहेतुश्च कर्म, कार्य्यान्तरं गर्भशरीरं तत्रत्संयोगहेतुश्च यत् कर्म तत् सर्व्वमदृष्टवदात्मसंयोगासमवायिकारणकम्, इतिकारेण धातुमत्कर्मणामप्यदृष्टवदात्मसंयोगासमवायिकारणकत्वं सूचयति" १७ उप०।

असमवायिन् त्रि० न समवैति सम्+अव+इन-इणि न० त० स्त्रियां ङीप्। १असंबन्धे अमिलिते न्यायेऽक्षे २समवायसम्बन्धशून्ये जात्यादौ ३असमवायिकारणे च "कारणत्वसमवायिनो गुणाः" वै० सू० "नन्वेवं यद्यमूर्त्तत्वात् गुणाः कर्मसमवायिकारणं न भवन्ति तदा गुणैर्गुणाः कर्म्मभिश्च कथमुत्पद्यन्ते न हि समवायिकारणातिरिक्तत्वरूपेणापि कारणता संभवतीत्यत आह गुणा असमवायिकारणं न तु समवायिकारणमपि येन कर्माधाराः स्युः। सा चासमवायिकारणता क्वचित् कार्य्यैः कार्य्यसमवायात् यथाऽऽत्ममनःसंयोगस्यात्मविशेषगुणेषु संयोगविभागशब्दानां शब्दे, क्वचित् कारणैकार्थसमवायात् यथा कपालादिरूपादीनां घटादिरूपादिषु" उपस्करः।

असमशृत्त न० न समानि भिन्नलक्षणकत्वात् न तुल्यानि पदानि यत्र कर्म०। छन्दःशास्त्रोक्ते १विषमवृत्ते तानि च "सुखपादोऽष्टभिर्वर्णैः परेऽक्षान्धकरालवैः क्रमाद्वाः"

रत्नादीनि इत्त० उक्तानि ज्ञेयानि।ब०।२अनुपसचरिते त्रि०

असमस्त त्रि० समं+अस–क्त न०त०। १असंक्षिप्ते २व्यस्ते "एते व्यस्ताः समस्ता वेति" विश्वामित्रवचनव्याख्याने "व्यस्ताः असमस्ताः" प्रा०त० रघु०। २असमये व्याकरणोक्त-समासशून्ये विभक्त्यादिकार्य्ययुक्ते ४विग्रहवाक्ये न०।

असमाति त्रि० समं साम्यमतति अत–इन् न०त०। अतुल्ये अनुपमे "एवाहि जातो असमात्योजाः" ऋ० ६,२६,६।

असमान त्रि० न०ब०। अतुल्ये। "समानं लघु चागौचं पूर्व्वेणैव विशुध्यति। असमानं द्वितीयेन" यमः।

असमानयानकर्म्मन् पु० न समानं तुल्यकालिकं यानकर्म्म-यत्र। सन्धिभेदे। त्वमग्रे याहि ततोऽहं यास्यामीति समयं कृत्वा यत्र पूर्व्वोत्तरं जिगीषुभ्यां गम्यते ताडग्रे यानकर्म्मरूपे सन्धौ। [२समाप्तिशून्ये त्रि०।

असमापन न० अभावे न०त०। १संपूर्त्त्यभावे न०ब०।

असमाप्त त्रि० न समाप्तः। १असम्पूर्णे "असमाप्ते व्रते चैव नैव कुर्य्यात् व्रतान्तरम्" स्मृतिः। संकल्पपूर्व्वं कृतहीनव्रतस्यास-मापने व्रतान्तरस्यात्राकर्त्तव्यतोक्ता। आरब्धकर्म्मणः सपूर्त्तिता समाप्तिः। २तच्छून्ये च "असमाप्ते परि-कर्म्मणि स्मृतः" कुमा०। ३सम्यगप्राप्ते च।

असमाप्ति स्त्री अभावे न०त०। १समाप्त्यभावे न०ब०। २समाप्तिशून्ये त्रि०। ३सम्यगप्राप्तौ स्त्री ४तच्छून्ये त्रि०

असमावृत्त पु० न०त०। समावृत्तः वीर्णब्रह्मचर्य्यतया गुरु-णानुमतः गुरुकुलादावृत्तः स्वस्वकर्म्मकरणाय कृत समावर्त्तसंस्कारः न०त०। तद्भिन्ने ब्रह्मचारिणि स्नातके कन् असमावृत्तकोऽप्युक्तार्थे। "मासिकान्नं तयो-स्त्रीवादसमावृत्त(र्त्त)को द्विजः" मनुः। असमावर्त्त-कोऽप्यत्र।

असमाहार पु० समाहारो मेलनं संघातः सम्यगाहरणञ्च अभावे न०त०। १तदभावे न०ब०। २तच्छून्ये त्रि०।

असमाहित त्रि० न०त०। १समाधिशून्ये चित्तैकाग्र्यशून्ये २असन्निवेशिते च।

असमीक्ष्यकारिन् त्रि० समीक्ष्य विविच्य न करोतीति क्त+णिनि। १विवेचनामकृत्वैव कर्म्मकारके, २मूर्खे च।

असमृद्धि स्त्री ऋद्धेराधिक्यं समृद्धिः अभावे न०त०। १ऋद्ध्याधिक्याभावे "नात्मानमवमन्येत पूर्व्वाभिरसमृद्धिभिः" मनुः। न०ब०। २समृद्धिशून्ये त्रि०।

असम्पत्ति स्त्री अनुरूपात्मलाभः सम्पत्तिः लक्ष्मीश्च अभावे न०त०। १सम्पत्त्यभावे। न०ब०। २तच्छून्ये त्रि०।

असम्पन्न त्रि०। सम्पन्नः सम्पद्युक्तः अनुरूपात्मस्वरूपप्राप्तश्च न०त०। तद्भिन्ने। [२संबन्धशून्ये त्रि०।

असम्बन्ध पु० अभावे न०त०। १संबन्धाभावे न०ब०।

असम्पूर्ण त्रि० यावत्प्रयोजनानुसरणे समाप्तिलाभात् सम्पूर्णः न० त०। ताडग्रपूर्त्तिशून्ये। यथा असम्पूर्णं चन्द्रमण्डलम् "क्रूरग्रहः सकेतुश्चन्द्रमसं पूर्णं मण्डलं भिदानीम्" बृहत्सा०।

असम्पृक्त त्रि० न०। १असंबद्धे २असंयुक्ते।

असम्प्रज्ञात त्रि० न सम्यक् ज्ञातः ज्ञेयादिभेदो यत्र। पातञ्ज-लोक्ते ज्ञेयज्ञानज्ञाढभेदशून्ये निर्विकल्पके १समाधौ। समाधिस्तावत् द्विविधः सम्प्रज्ञातः असम्प्रज्ञातश्च तत्राद्यः सविकल्पकः ग्राह्यग्रहणग्रहीतृप्रतिभासत्वात् तत्-प्रतिभासशून्यो निर्विकल्पकः सर्व्वविकल्पशून्यत्वादसम्प्रज्ञातो द्वितीयः यथाह पात० सूत्रादौ "वीतरागविषयं वा चित्तं ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः" यथाऽ-भिजातस्यातिस्वच्छस्य मणेः स्फटिकादेः कुसुमाद्युपरक्तस्य स्वरूपाभिभवेन रक्ताद्याकारता भवति तथा अभ्यासवैरा-ग्याभ्यां क्षीणवृत्तेरभिजातस्येव ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः" यथाऽ-भिजातस्यातिस्वच्छस्य मणेः स्फटिकादेः कुसुमाद्युपरक्तस्य स्वरूपाभिभवेन रक्ताद्याकारता भवति तथा अभ्यासवैरा-ग्याभ्यां क्षीणवृत्तेरभिजातस्येव चित्तस्य ग्रहीतृग्रहणग्राह्यात्मकपार्श्वेषु यस्तैरिन्द्रियादिवृत्तिभिः यद्ग्रहीता च वितर्कविचारानन्दास्मितानुगमात् तदाकारतापत्तिः समा-धिर्भवति सैव सम्प्रज्ञाताख्या समापत्तिः। तद्भिन्ना च असम्प्रज्ञाता समापत्तिः। संप्रज्ञातभेदादिकं च तत्रैव वक्ष्यते। अस्या एव च निर्बीज इति संज्ञान्तरम् "तस्यापि-निरोधात् निर्बीजः समाधिः" पात०सू०। सत्पुरुषान्यत्वख्यात्यनन्तरं परवैराग्यसंस्कारप्रचयेन तस्य सम्प्रज्ञात-समाधिसंस्कारस्य तत्प्रज्ञायाश्च निरोधे सति सर्व्वस्य सम्प्रज्ञातजन्यसंस्कारप्रवाहस्य निरोधात् समाप्ताधिकार-त्वेन चित्तस्य कृतकृत्यता स्यात् निमित्तापाये नैमित्तिकापाय इति न्यायेन निर्बीजः समाधिर्जायते स च "आगमेनानु-मानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयेत् प्रज्ञां लभते योगमुत्तमम्" श्रुत्युक्तैः आगमेन श्रवणेन अनुमानेन मननेन ध्यानाभ्यासे योरसः परमवैराग्यं तेन प्रज्ञाप्रसादेन प्रज्ञां पुरुषख्यात्याकारं संपादयन् योगं निर्बीजसमाधिं लभते इति तदर्थः कालक्रमेण निर्बीजसमाधिसंस्कार प्रलये सति स्वप्रकृतौ चित्तं लीयते हेत्वभावात्, कृत्यशेष-लक्षणाधिकारोहि चित्तस्य स्थितिहेतुः न हि कृतभोग-विवेकख्यातिकस्य चित्तस्य कृत्यशेषोऽस्ति येन तदधि-क्रियेत। प्रकृतौ चित्तस्य प्रलये च पुरुषः स्वरूपमात्रप्रतिष्ठः केवलो मुक्तो भवतीति" इत्ति०। २सम्यग्ज्ञाते च।

असम्प्रति अव्य० तिङन्तप्र० समा०। १ अवोग्ये काले अनुपस्थितकाले च। "यद्वैव सम्प्रति दह्येवद्वैवासम्प्रति" शत० ब्रा०।

असम्बद्ध न० सम्बद्धं परस्परमन्वितं न भवति सम्+बन्ध-क्त न०त०। अर्थानवबोधेऽन्वितार्थके १वाक्ये। "असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम्" मनुः यथा "यावज्जीवमहं मौनीत्यादि" वाक्यम्। २सम्बन्धशून्ये असङ्गते च त्रि०।

असम्बद्धप्रलाप पु० कर्म०। १असङ्गते २अप्रस्तुतस्य वा कथने, ३निष्प्रयोजने कथने च।

असम्बन्ध पु० अभावे न०त०। १सम्बन्धाभावे "व्याप्तिः साध्यवदन्यत्रिघ्नसम्बन्धउदाहृतः" भाषा० २परस्परमन्वयाभावे च "गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यात्" जै०सू० न०ब०। ३सम्बन्धशून्ये त्रि०। "असंबन्धकृतश्चैव व्यवहारो न सिध्यति" या०स्मृतिः।

असंबाध त्रि० नास्ति सम्बाधा अन्योन्यं पीड़ा प्रतिबन्धो वा यत्र। १परस्परसंघर्षरूपपीड़ारहिते विरले, २बाधारहिते च। "असंबाधा देवमही स्वर्गसम्पादिनी शुभा" भा०आ० ५०। न सम्यग् बाधा अभावे न०त०। ३सम्यग्बाधाभावे ४चतुर्दशाक्षरपादके वृत्तभेदे च स्त्री मृतौ नृसो गावज्जपहविरतिरसंबाधा" वृत्त०र०।

असम्भव पु० अभावे न०त०। १सम्भवाभावे "अन्यदेवाङ्कुरः सम्भवादन्यदाङ्कुरसम्भवात्" य० ४०६० "निषिक्तस्य तदसम्भवात्" सां०सू० न्यायोक्ते लक्ष्यभावे २लक्षणानुसरणे। असम्भवनिवारणाय प्रतियोगितावच्छेदकावच्छिन्नं यत्र भवतीतिव्याप्तिलक्षणे प्रतियोगितानवच्छेदकं साध्यतावच्छेदकमिति कैश्चिदुक्तम्। सम्भवः समावेशः ३तदभावे। सम्भवश्च प्रमाणान्तरमिति अद्वैतप्रमाणवादिनः पौराणिकाः। सांख्यादिभिस्तु अनुमाने एव तस्य गतार्थत्वमुक्तम् यथाह" सा०कौ०। "सम्भवस्तु यथा खार्यां द्रोणादूर्ध्वप्रस्थाद्यवगमः स चानुमानमेव खारीत्वं हि द्रोणादिविनाभूतं प्रतीतं सत् द्रोणादिसत्त्वमवगमयति"। व्याख्यातञ्चैतदस्माभिः। "खारीत्वं खारीपरिमाणं महाढ़ापरिमाणेऽवान्तरपरिमाणसमावेशोऽनुभवसिद्धः तथा च खारीपरिमाणं द्रोणादिपरिमाणव्यापकमिति खारीत्वस्य द्रोणादिपरिमाणाविनाभूततया अनुमानेनैव खारीपरिमाणे द्रोणादिपरिमाणसिद्धिः"।

असम्भवत् त्रि० सम्+भू-शतृ न०त० स्त्रियां ङीप्। असम्भवे वस्तुनि "असम्भवद्घनरसा शतावीपरिषेविता। करं न सहते राजन्! भूमिर्नववधूरिव" उद्भटः।

असम्भाव्य त्रि० सम्+भू-कर्त्तरि नि०यत्। सम्भावाविषये वस्तुनि "असम्भाव्यं न वक्तव्यमिति" नीतिः। सम्+भू-णिच्-कर्मणि यत् असम्भाव्यमप्यत्र त्रि०। "असम्भाव्यं पराभवत्" अथ० ५,१८,१२, "तिर्यग्योनावसम्भाव्यमावश्यकमवस्थितः" भा० आदि०प०।

असम्भावना स्त्री अभावे न०त०। सम्भावनाभावे। सम्भावना च यत्किञ्चित्कर्षमाविष्कर्तुमशक्तिः निश्चयप्रायौत्कट्यापन्नसंशयश्च।

असम्भावनीय त्रि० न०त०। सम्भावनानर्हे वस्तुनि।

असम्भूति स्त्री सम्+भू-क्तिन् अभावे न०त०। १सम्भवाभावे सम्भूतिः कार्योत्पत्तिः सा नास्ति यस्याः। अव्याकृताख्ये प्रकृतिरूपे कारणे "अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते" यजु०४०,९। "असम्भूतिः प्रकृतिः कारणम्" वेददी०। २असत्कार्ये च।

असम्भृत त्रि० न०त०। १अयत्नसिद्धे "असम्भृतं मण्डनमङ्गयष्टेः" कुमा०। २असम्यक्कृष्टे च।

असम्भेद पु० सम्भेदोमेलनं संसर्गः अन्योन्यरूपताप्राप्तिः भेदश्च अभावे न०त०। १तदभावे न०ब०। २तच्छून्ये त्रि०।

असम्भ्रम पु० सम्भ्रमः औत्सुक्यहेतुकार्य्यत्वरा सम्यग् भ्रान्तिः भयहेतुकचित्तक्षोभश्च अभावे न०त०। १सम्भ्रमाभावे "शशंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसम्भ्रमम्" रघुः। न०ब०। २सम्भ्रमशून्ये।

असम्मत त्रि० न०त०। सम्मतभिन्ने अननुमते "असम्मतः कस्य सक्तिमार्गम्" कुमा०। [२तच्छून्ये त्रि०।

असम्मति स्त्री अभावे न०त०। १सम्मत्यभावे। न०ब०

असम्मित त्रि० न०त०। अपरिमिते "तस्मादिमा अतिरिक्ता असम्मिता ओषधयः प्रजायन्ते" शत० ब्रा०।

असम्मुग्ध त्रि० सम्+मुह-क्त न०त०। १अक्लान्तसन्दे हे २पाण्डित्याभिमानरहिते च।

असम्मूढ त्रि० न०त०। सम्मूढभिन्ने १स्थिरनिश्चये २भ्रान्तिशून्ये "असम्मूढः स मर्त्येषु" "स्थिरबुद्धिरसम्मूढो ब्रह्मविद् ब्रह्मणि स्थितः" इति च गीता।

असम्मृष्ट त्रि० न०त०। १परस्परसंघर्षशून्ये २बाधाशून्ये च "असंसृष्टोजायसे मातरि" ऋ० ५,११,३। "असम्मृष्टः अबाधितः" भा०। ३संमार्जनशून्ये च। "अग्निमग्नीत्संसृष्टमित्यसंसृष्टमेव भवति सम्पेषितम्" शत० ब्रा०।

असम्मोह पु० अभावे न०त०। १भ्रमाभावे। विरोधे न०त०। प्रमात्मके यथार्थे २ज्ञाने "बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं

दमःशमः" इत्युपक्रम्य "भवन्ति भावा भूतानां मत्त एव पृथग्विधा" इति गीतायां तेषां भावरूपत्वोक्तेः अयथार्थज्ञानपरत्वम् न०व०। २तच्छून्ये स्त्रिप्रत्ते त्रि०।

असम्यच् त्रि० न०त०। सम्यग्भिन्ने १अनुचिते २अयुक्ते। "असम्यग्व्यवसीलैः" देवीभा०। स्त्रियां ङीप् असमीची

असर पु० सरति सृ-उन् न०त०। (कुक्कुरमोड़ा) वृक्षे

असल न० अस्यते क्षिप्यतेऽनेन अस+कलच्। अस्त्रक्षेपोपयुक्ते १सन्नभेदे २लौहे च।

असवर्ण त्रि० न समानो वर्णोऽस्य समानस्य सादेशः। असजातीये भिन्नवर्णे यथा ब्राह्मणस्य क्षत्रियादिः। "द्विजानामसवर्णासु कन्यास्वयमसंस्कृतासु" वृद्धमनुः।

असवृत् त्रि० सवृतिर्गत्यर्थः निरु०सव-शतृ न०त०। १अगमनशीले स्त्रियां ङीप् "अस्य प्रजावती गृहेऽसवृत्नी" ऋ० ८।२१।४। "असवृत्नी अगमनशीला" भा०। २अपराजिते च "मधुजिह्वा असवृतः" ऋ०८।७२।४। "असवृतः अपराजितान्" भा०।

असवुस् त्रि० सव-वा उसुन् न०त० स्त्रियां ङीप्। अप्रतिबद्धे "वानो दोहते त्रिरहन्नसवुषी द्रुमत्" ऋ०९।८९।१८। "असवुषी अप्रतिबद्धा" भा०।

असस् त्रि० सस-क्विप् शतृ न०त० स्त्रियां ङीप्। स्वव्यापारे जागरूके "रेजन्ते असस्नो अजराः" ऋ० १।१४२।२। "असस्नः स्वव्यापारेष्वस्वप्नः" भा०।

असह त्रि० न सहते सह-अच् न०त०। अक्षमे असहने

असहन पु०न सहति सह-ल्युट् न०त०। १अलौ। २क्षमाशून्ये त्रि०। भावे ल्युट् अभावे न०त०। ३क्षमाभावे

असहाय त्रि० नास्ति सहायोयस्य। १सहचरशून्ये अन्यसाहाय्यरहिते २सङ्गरहिते च "कपालं हस्तमूलानि कृचेलमसहायता। समता चैव सर्व्वस्मिन्नेतन्मुक्तस्य लक्षणम्," मनुः। ["स्वजनबन्धुजनेष्वसहिष्णुता" नीतिः

असहिष्णु त्रि० न सहिष्णुः। अक्षमे सहनशीलभिन्ने

असह्य त्रि० न सह्यः। सोढुमशक्ये "असह्यपीड़ं भगवद्वपुर्मम व्यमनवेहि मे" "द्विषामसह्यः सुतरां तरूणाम्" इति च रघुः। "नवबैधव्यमसह्यवेदनम्" कुमा०।

असाक्षात् अव्य० न०त०। १परोक्षे २इन्द्रियायोग्ये च।

असाक्षात्कार पु० अभावे न०त०। १प्रत्यक्षाभावे विरोधे न०त०। २ परोक्षज्ञाने न०ब०। ३ प्रत्यक्षाविषये ४तच्छून्ये च त्रि०।

असाक्षिक त्रि० नास्ति साक्षी साक्षाद्दृष्टा अधिष्ठाता वा यस्य कप्। १साक्षिशून्ये "असाक्षिकेषु त्वर्थेषु मिथोवि वदमानयोः" मनुः। २अधिष्ठातृशून्ये च असाक्षिका जड़प्रकृतिरनुचितेति वेदा०प्रक०।

असाक्षिन् त्रि० न साक्षी। स्मृत्युक्ते वचनतो दोषादितोवा साक्षिकर्म्मसु अप्राप्ते श्रोत्रियादौ। असाक्षिणश्च मिता० दर्शिताः "उक्तलक्षणानां साक्षिणामसम्भवे प्रतिषेधरहितानामन्येषामपि साक्षित्वप्रतिपादनार्थमसाक्षिणो वक्तव्याः ते च पञ्चविधा नारदेन दर्शिताः "असाक्ष्यपि हि शास्त्रेषु दृष्टः पञ्चविधो बुधैः। वचनाद्दोषतोभेदात्क्षयसृक्किर्मृतान्तर" इति। के पुनर्वचनादसाक्षिण इत्याह। "श्रोत्रियास्तापसा व्रह्मा ये च प्रव्रजितादयः। असाक्षिणस्ते वचनाद्यत्र हेतुरुदाहृतः" या०स्मृ० तापसावानप्रस्थाः। आदिशब्देन पित्राविवदमानादीनां ग्रहणम्। यथाह शङ्खः। "न पित्राविवदमानगुरुकुलवासिपरिव्राजकवानप्रस्थनिर्ग्रन्थयः साक्षिणः" इति दोषादसाक्षिणो दर्शिता नारदेन "स्तेनाः साहसिकाश्चण्डाः कितवा वञ्चकास्तथा। असाक्षिणस्ते दुष्टत्वात्तेषु सत्यन्न विद्यते" इति। चण्डाः कोपनाः कितवाद्यूतकृतः। भेदादसाक्षिणाञ्च स्वरूपन्नैव दर्शितम्। "साक्षिणां लिखितानां च निर्दिष्टानाञ्च वादिना। तेषामेकोऽन्यथा वादी भेदात्सर्वे न साक्षिणः" इति। तथा स्वयमुक्तिस्वरूपञ्चोक्तम्। "स्वयमुक्तिरनिर्दिष्टः स्वयमेवेत्य यो वदेत्। सूचीमुक्तः समाख्येषु न स साक्षित्वमर्हतीति"। स्मृत्यन्तरेष्वपि लक्षणमुक्तम्। "योऽर्थः श्रावयितव्यः स्यात्तस्मिन्नसति चार्थिनि। क तद्वदत साक्षित्वमित्यसाक्षी स्मृत्यन्तर" इति। येनार्थिना प्रत्यर्थिना वा साक्षिणां योऽर्थः श्रावयितव्यो भवेत् युयमत्रार्थे साक्षिण इति। तस्मिन्नर्थिनि प्रत्यर्थिनि वा असति स्मृतेऽर्थे च अनिवेदिते साक्षी क कस्मिन्नर्थे कस्य वा कृते साक्ष्यं वदत्विति स्मृत्यन्तरः साक्षी न भवति। यत्र तु सुमूर्षुणा स्वस्थेन वा पित्रा भ्रात्रादयः श्राविताः अस्मिन्नर्थे अमी साक्षिण इति। तत्र स्मृत्यन्तरोपि साक्षी। यथाह नारदः। "स्मृत्यन्तरोऽर्थिनि प्रेते सुमूर्षुश्राविताऽथवे"। तथा। "श्रावितोऽन्यतरेणापि यस्त्वर्थो धर्मसंहितः। स्मृतेऽपि तत्र साक्षी स्यात् षट्सु चान्यादृितादिषु"। तानेवानसाक्षिणो दर्शयति। "स्त्रीबालवृद्धकितवमत्तोन्मत्ताभिशस्काः"। रङ्गावतारिपाषण्डकूटकृद्विकलेन्द्रियाः। पतिताप्तार्थसम्बन्धिसहायरिपुतस्कराः। साहसी दृष्टदोषश्च निर्भूतादयस्त्वसाक्षिणः"। स्त्री प्रसिद्धा। बालोऽप्राप्तव्यव-

हारः। इहोऽगीतिकावरः बृहत्यहणं वचननिषिद्धा नामन्येषामपि श्रोत्रियादीनामुपलक्षणम्। कितवोऽक्षदेवी। मत्तः पानादिना, उन्मत्तो यक्षाविष्टः। अभिशस्तः, अभियुक्तो ब्रह्महत्यादिना। रङ्गावतारी चारणः पाषण्डिनो निर्ग्रन्थिप्रभृतयः। कूटकृत् कपटलेख्यादिकारी विकलेन्द्रियः श्रोत्रादिरहितः पतितः ब्रह्महादिः। आप्तः सुहृत्, अर्थसम्बन्धी विप्रतिपद्यमानार्थसम्बन्धी। सहाय एककार्यः रिपुः शत्रुः तस्करः स्तेनः साहसी सहसावटस्मकारी इष्टदोषो इष्टवितथ वचनः। निर्धूतो बन्धुभिस्त्यक्तः। आदिशब्दात्यन्येषामपि स्मृत्यन्तरोक्तानां दोषादसाक्षिणामन्येषां दोषसाक्षिणां स्वयमुक्तेर्हतान्तरस्य च ग्रहणम्। एते स्त्रीबालादयः साक्षिणो न भवन्ति" मिता०। अत्रापवादः "सर्व्वः साक्षी संग्रहणे चौर्ये पारुष्यसाहसे"। या० स्मृ० संग्रहणादौ सर्व्वे वचननिषिद्धाः श्रोत्रियादयः तपःप्रभृति गुणरहिताश्च साक्षिणोभवन्ति। दोषादसाक्षिणो भेदादसाक्षिणः स्वयमुक्तिकालापि साक्षिणो न भवन्ति सत्त्वाभावादिहेतोस्तेषु विद्यमानत्वादिति" मिता०।

असाधन न० अभावे न०त०। १सम्यादनाभावे साधनं हेतुः न०त०। २अकारणे न० ब०। ३कारणशून्ये।

असाधारण त्रि०साधारणं सामान्यधर्मयुक्तं न०त०। १तद्भिन्ने, तन्मात्रवृत्तिधर्मयुक्ते विशेषे २अधिके च। न्यायमते "यस्तूभयस्माद्व्यावृत्तः स त्वसाधारणो मत" इत्युक्ते ३सपक्षविपक्षाव्यावृत्तौ हेतौ पु०। यथा वह्निसाधने गगनादिहेतुः स च पक्षे पर्व्वतादौ, पक्षभिन्ने जलादौ च न विद्यते गगनादेः कुत्रापि विद्यमानत्वाभावात् इति तस्य तथात्वम् "साधारणासाधारणयोर्मध्येऽसाधारणे कार्य्यसंप्रत्यय" इति न्यायः। ४समानत्वासदीभूते इतरत्वरहिते धनादौ च। स्त्रियां ङीप् गौरा०। "पिता पुत्रान्तरेष्वपि साधारणः माता त्वसाधारणी" मिता०।

असाधारणानैकान्तिक पु० कर्म०। न्यायोक्ते सर्व्वसपक्षव्यावृत्ते हेत्वाभासभेदे यथा शब्दोनित्यः शब्दत्वात् अत्र शब्दत्वं सर्व्वनित्येभ्यो व्यावृत्तं शब्दमात्रवृत्तिरिति तस्य तथात्वम्।

असाधु त्रि० न०त०। १साधुभिन्ने, २असज्जनिते, ३दुष्टे "अतोऽहंसि चन्तुमसाधु साधु वा" किरा ४संस्कृतशब्दभिन्ने, अप्रशस्तादौ च। "असाधुरनुमानेन" "असाधूनां प्रयोगेण मत्ववायोऽपि नो तथा इति" च हरिः। स्त्रियां ङीप्। असाध्वी भारती असाध्वी योषित् इत्यादि।

असाध्य त्रि० साधयितुमशक्यः। १साधयितुमशक्ये रिपौ रोगादौ च "असाध्यं कुरुते कोपं प्राप्ते काले गदो यथा" माघः। असाध्यरोगाश्च सुश्रुते उक्ताः ते च अवारणीयशब्दे ४४६ पृष्ठे दर्शिताः "अर्द्धं साध्यमधोयाप्यमसाध्यं युगपद्गत" मित्यादयोऽपि विशेषतोऽसाध्या वैद्यके उक्ताः ततएव ते वेदितव्याः। [समर्थे

असान्तापिक त्रि० सन्तापाय न प्रभवति ठञ्। सन्तापायाः

असान्द्र त्रि० विरोधे न०त०। अनिविड़े विरले।

असामञ्जस्य न०अभावे न०त०। १सामञ्जस्याभावे २अयुक्तत्वे ३सन्निवेशासम्भवे च न०ब० तच्छून्ये त्रि०।

असामर्थ्य न० अभावे न०न०। सामर्थ्याभावे अपाटवे। "कालदोषादसामर्थ्यात् सर्व्वं तत् सफलं स्मृतम्" "असमार्थ्यात् शरीरस्य कालशब्दाद्यपेक्षया। मन्त्रस्नानादितः सप्त केचिदिच्छन्ति सूरयः" योगिया०।

असामयिक त्रि० समयोऽस्य प्राप्तः ठञ् न०त०। अप्राप्तकाले "किमसामयिकं वितन्वता मनसः क्षोभमुपात्तरंहसः" किरा०।

असामान्य त्रि० नास्ति सामान्यं तुल्यता यस्य। अनुपमे। अभावे न०त०। तुल्यत्वाभावे त्रि०। असाम्यमत्यत्र।

असाम्प्रतम् अव्य० न साम्प्रतम् युक्तं न०त०। अयुक्ते। "विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतम्" कुमा० "सम्प्रत्यसाम्प्रतं वक्तुमुक्ते सुचरितार्थिना" माघः "अविधाय विवाहसत्क्रियामनयोर्गन्तुमसाम्प्रतम्" रघुः।

असार पु० न०नास्ति १सारो यस्य। सारहीने एरण्डे वृक्षभेदे। २निस्सारे त्रि०। "असारः खलु संसारः" इत्युद्भटः। "निदर्शनमसाराणां लघूनां तृणमेव नरः" माघः "धिगिमां देहभृतामसारताम्" रघुः। ३अगुरुचन्दने न० राजनि०। न०त०। २सारभिन्ने तुच्छत्वे पु०।

असावधान त्रि० न०त०। अवधानहीने प्रमत्ते।

असाहाय्य न० अभावे न०त०। १साहाय्याभावे। न०ब०। २साहाय्यशून्ये त्रि०।

असि अव्य०अस-दोप्रौ इन् विभक्ति प्रतिरूपकम्। त्वमित्यर्थे "कृतवानसि विप्रियं न मे" कुमा०"धन्यासि वैदर्भि! गुणैरुदारैः" नैष०। "शूरोऽसि कृतविद्योऽसि दर्शनीयोऽसि पुत्रक! इति नीतिः।

असि पुंस्त्री०अस्यति सेवनेन पापानि इन् वा ङीप्। वाराणसी दक्षिणस्थे १नदीभेदे वाराणसीशब्दे विवृतिः। अस्यते क्षिप्यते

खस-इन्। २खड्गे पु०"असितिंशसनः खड्गस्त्रीच्छधारो दुरासदः। श्रीगर्भो विजयश्चैव धर्मपालो नमोऽस्तु ते। इत्यष्टौ तव नामानि खयसुक्तानि वेधसा"। खड्गपूजामन्त्रः, "सर्व्वाः श्यामाः असिकरा मुण्डमाला विभूषिताः" श्यामाकवचम् खड्गलक्षणन्तु दृष्ट०उक्तम् "अङ्गुलगतार्धसप्तम जनः स्यात्पञ्चविंशतिः खड्गः। अङ्गुलमानाज्ज्ञेयो व्रणोऽशुभो विषमपर्व्वस्थः॥ श्रीष्टवर्धमानातपत्रशिवलिङ्गकुण्डलाङ्गानाम्। सदृशा व्रणाः प्रशस्ता ध्वजायुधस्वस्तिकानां च॥ शकलासकाककङ्कक्रव्यादकबन्धदृश्चिकाकृतयः। खड्गे व्रणा न शुभदा वंशानुगाः प्रभूताश्च॥ स्फुटितो मुखः कुब्जो वंशच्छिन्नो न दण्डमनोऽनुगतः। अस्खन इति चानिष्टः प्रोक्तविपर्य्यस्त इष्टफलः॥ कथितं मरणायोक्तं पराजयाय प्रवर्त्तनं कोशात्। खयमहीर्ये युद्धं ज्वलिते विजयो भवति खड्गे॥ नाकारणं विदधीत न विधेयेच्च पण्डिते वदनम् न वदेच्च मूल्यम्। देशं न चास्य कथयेत् प्रतिभानवेच्च नैव स्पृशेद्नृपतिरप्रतोऽसियष्टिम्॥ गोजिह्वा संस्थानो नीलोत्पलवंशपत्रसदृशश्च। करवीरपत्रशूलाग्रखड्गधाराः प्रशस्ताः स्युः॥ निष्प्रभो न च क्षेप्यो निकषैः कार्ष्यः प्रमाणयुक्तः सः। मूले स्थिते स्वामी जननी तस्यायतस्थिरत्वे॥ यस्मिन् त्वरूपदेशे व्रणो भवेत्तद्देव खड्गस्य। वनितानामिव तिलको युद्धेऽग्र्यो मुखे दक्षः॥ अथ वा स्पृशति यदङ्गं प्रहा निस्त्रिंशभृत्तदवधार्य्य। कोशस्यस्यादेशो व्रणोऽस्ति गास्तं विदित्वेदम्। शिरसि स्पृष्टे प्रथमे भ्रूकुले द्वितीये ललाटसंस्पर्शे। भ्रूमध्ये च तृतीये नेत्रे स्पृष्टे चतुर्थे च॥ नासोत्कपोलहनुत्वक्कर्णग्रीवांसकेषु पञ्चाद्याः। उरसि द्वादशसंख्यस्तथोदरे कक्षयोर्द्वयोः॥ सानद्धदरोदरकुक्षिनाभीषु चतुर्दशादयो ज्ञेयाः। नाभीमूले कक्षां गुह्ये चैकोनविंशतितः॥ अर्वाङ्नाभिविंशे स्याद् अर्वाग्मध्ये व्रणस्त्रयोविंशे। जानुनि च चतुर्विंशे जङ्घायां पञ्चविंशे च॥ जङ्घामध्ये गुल्फे पार्ष्ण्यां पादे तदङ्गुलीष्वपि च। षड्विंशतिकाद्याश्चिंशदिति मतेन मनोः॥ पुत्रमरणं धनाग्निर्धनहानिः सम्पदश्च वध्यश्च। एकाद्यङ्गुलसंस्थैर्व्रणैः फलं निर्दिशेत्क्रमशः॥ सुतलाभः कलहो हस्तिलाभः पुत्रमरणधनलाभौ। क्रमशो विनाशवनिताग्निचिन्तादुःखानि षट्प्रभृति॥ लक्ष्मिहानिस्त्रीलाभयो वधो हृद्भिमरणपरितोषाः। ज्ञेयाश्चतुर्दशादिषु धनहानिश्चैकविंशे स्यात्॥ वित्ताग्निरनिर्वाणं धनागमो मृत्युसम्पदोऽस्त्रत्वम्। ऐश्वर्य्यमृत्युराज्यानि च क्रमाच्चिंशदिति यावत्॥ भरतो न विशेषफलं विषमसमस्यास्तु पापशुभफलदाः। कैश्चिदफलाः प्रदिष्टास्त्रिंशत्परतोऽप्यमिति यावत्॥ करवीरोत्पलगजमदधृतकुङ्कुमकुन्दचम्पकसगन्धः। शुभदोऽनिष्टो गोमूत्रपङ्कभेदःसदृशगन्धः॥ कूर्म्मवसासृक्क्षारोपमश्च भयदुःखदो भवति गन्धः। वैदूर्य्यकनकविद्युत्प्रभो जयारोग्यहृद्विकरः॥ हृद्भोजनसं च शस्त्रपानं रुधिरेण स्त्रियमिच्छतः प्रदोग्राम्। हविषा गुग्गुलुसुतामिश्रोः सलिलेनाज्यमिच्छतश्च वित्तम्॥ वडवोष्ट्रकरेणुदुग्धपानं यदि पामेन समीहते ऽसिसिद्धिम्। अजपित्तसृगाश्ववसादुग्धैः करिहस्तच्छिन्ने सतालगर्भैः॥ आर्कं पयो ऽहिविषाणमसीसमेतं पारावताखुगलता च युतं प्रलेपः। शस्त्रस्य तैलमथितस्य ततोऽस्य पानं पद्माच्छितस्य न भिलाषु भवेद्विघातः॥ क्षारे कदल्या मथितेन युक्ते दिनोषिते पाचितमायसं यत्। सम्यक् घितं चाक्षणि नैति भङ्गं न चान्यलोहेष्वपि तस्य कौशलम्" इ०स०। हेमा०परि० ख० तु तज्जात्यादिभेदात् फलभेदादिकं दर्शितं यथा "वत्स! पुरा भूतपूर्वैराचार्यैरुपदिष्टश्चैव यन्मयास्तुतं तदुपदिशामि निबोध खड्गस्य लोहं षड्विधं भवति। योनयः पञ्चविधाः संस्थानं चतुर्विधं करणमा,ऋतिर्द्विधा द्वादश सस्थानि गौरवं पञ्चदशधा विस्तारस्त्रिविधः वर्णकायाव्रणपुङ्गन्धस्वरेण वा यत्र विशेषा भवन्ति तत्कीर्त्यमानं निबोध तीक्ष्णं मृदु स्निग्धं खरं मृदुतीक्ष्णं वज्रं चेति जातयः षट्भवन्ति वालुका मृत्पाषाणः पद्मोधातुस्रावश्चेति योनयः पञ्चधा भवन्ति। पीतेभ्यस्तीक्ष्णं भवति। नीलेभ्योमृदु भवति। स्निग्धेभ्यःस्निग्धं खरेभ्यः खरं भवति। रक्तेभ्योऽन्येभ्योमृदुतीक्ष्णं भवति। रक्तसैन्धवसन्निभैरिद्धिः स्निग्धं वदन्तः उत्पद्यते लोहं तद्वज्रायुधवज्रं भवति। तच्च पाषाण एव पूजित इति। भवन्ति चात्रश्लोकाः। तार्क्ष्यं चिरादेव विचूर्णितञ्च भिन्नाञ्जनाभं वज्रसुतञ्चक्षीरम् पीतं भवेत् निर्म्मलरक्तवर्णं सर्वाणि लोहानि भिनत्ति तीक्ष्णम्। सञ्जय्यते तापसुपैति चाशु श्वेतं भवत्येव मलावनद्धम्। यत्स्थूलहीरन्नपुवङ्कवर्णं सर्वेषु कार्य्येष्वपि तन्मृदु स्यात्। श्वेतं भवत्यधिकं स्थिरञ्च संघट्टनामेति चिराच्च तापम्। संघातलोहेन चिराद्वियोगं स्निग्धञ्च लोहं प्रवदन्ति हज्ज्ञाः। खरं विशीर्य्येत न चैति योगम् सर्वत्र योग्यं मृदुतीक्ष्णमाहुः। वज्रातरूपं न च दह्यतेऽग्नौ तद्वज्रलोहं प्रसमीक्ष्य

वाच्यम् । तीक्ष्णस्य मृदुनः खरस्य स्निग्धस्य मृदुतीक्ष्णस्य वज्रलोहस्य च विज्ञेयं कृष्टिमद्वोयगर्भमेककोशगर्भं कृष्टिमकोशगर्भम् । तीक्ष्णं करणप्रवरं भवति । मृदुतीक्ष्णं मध्यमगर्भं कृष्टिमञ्च कारयेत् मृदुतीक्ष्णकृष्टिमं कोशगर्भमेकगर्भालयं वेति तथा तीक्ष्णं मन्दं वेति विविधमायसं भवति । तीक्ष्णस्य कुलानि उपकुलानि पुनः मृदूनि वीतकंपुष्पकलावेतकं यावद्वागिकमङ्कोल्लं मयूरं हमालं वोरंकां वरं पुष्पराकं पुष्पराङ्कोडिनं वर्वरं रौद्रं शालिकं किस्किन्धं विस्फुलिङ्गं वाह्लीकं सुराष्ट्रायसं वेति तीक्ष्णयोनयो भवेयुरेकविंशतिरथ मन्दायसो वक्ष्यते । काम्बोजं काण्डवारं हंसपादं नीलाख्यं खर्यारङ्काष्टमलयं पुन्नागपर्वतं यावतन्द्रं तीक्ष्णं कलिपार्वतीयं सिंहालकं वानवासीसिन्धुकं मूषकं नीलाख्यं मागधं देवान्तं मेनकं वाह्लीकं पारवं क्रथं शङ्काकं शाखिलं पालकं क्षुरतोलकं विल्वपालं नीलासुखं कूणीराष्ट्रं मलेन्द्राष्ट्रं विचर्तुकं वेति लोहाः त्रिंशदेका भवन्ति । कुलानां संग्रहाद्विविधा लोहा तद्विबोधसम्म भवन्ति । माईवस्य खरस्य त्वटौ स्नेहान्वितस्य पुनः षड्गवन्ति । मृदुतीक्ष्णस्य दशैवस्युर्वज्रायसस्यैकमेवेति कुलान्येतानि संग्रहादुक्तानि तत्र काम्बोजं काण्डवारं हंसपादं नीलाख्यं खरह्रस्वैतानि भवन्ति । पावनं वटतीक्ष्णं कालिङ्गं पार्वतीयं सिंहालं लङ्कावालञ्च चेति स्नेहान्वितस्यैतानि कुलानि षड्भवन्ति । नीलासुखं कूणीराष्ट्रं मलेन्द्राष्ट्रं विचर्तुकं सौपरं काष्टमलयं पुन्नागपर्वतं सिन्धुकं मूषिकं दक्षिणासुखं चेति मृदुतीक्ष्णस्य दशैतानि कुलानि भवन्ति । षष्टन्तु लोहं वेद्यन्तरमुहाहृत्य जायते तच्च वज्रलोहमिति विद्यात् । परमेतानि वज्रायसविवर्जितानि त्रिंशदेकाधिकानि । मृदु तीक्ष्णं मृदुतीक्ष्णं स्निग्धं खरं चेति । वीतकादीन्येकविंशतिं कुलानि वक्ष्यन्ते यत्र दृढत्वं बलवत्त्वं स्निग्धतां लाघवगौरवं च विशेषात्तत्र तत्र विविधं भवति क्षुताग्रनकर्म्मणि तत्र छिन्नपाटलानिभं भवति । यत्र वर्चस्यां दृश्यन्ते त्रुटिते चूर्णिते वा क्षुताग्रनेऽपि त्रुट्यमानं सकृदेव प्रभज्यते मलेऽप्ये च सर्वदक्षिणतो वैवर्ण्यं भल्लेन्दुत्वकण्टकच्छायावा स्यात् सिंहासीसविभा वा श्वेतक्षतनिस्रावतोरुह्यान्वैव तत् मृदुलोहमिति विद्यात् । त्रयाणां चीनकादीनां लक्षणं वक्ष्यते चाकृत्या संस्थानेन वर्णेन गन्धेन शब्देन क्रमशः स्यात् पृथक् वेतसवल्लपत्राणामाकृतिः करवीरपत्राणां वा भवति । षड्भिर्यतं मित्रकैरष्टाभिश्चतुरश्रैर्वा वृत्तं विपुलं वा नालमूलाकृतिर्वेति । संस्थानतःपरीक्षणीयम् तिर्गुच्छीकृतमानामिव यत्र वर्णोऽञ्जनालक्तकयोर्वा मयूरकण्ठच्छविः शुकपिच्छनिभः । काकोलिकिलसदृशोमक्षिकाभो वेति । वर्णतः परीक्षितीयं चानुलोहम् । तथा अङ्कोलस्योत्पलस्य मूषिकायाः पत्रस्य मधुकस्य वा गन्ध इति गन्धतः परीक्षणीयम् । तथा कांस्यघण्टाया वल्गाकानां शब्दइव शब्दो विस्फुलिङ्गायास्येति शब्दतः परीक्षणीयानि ज्ञातव्याः" । उपकुलादि विस्तरभयान्नोक्तम् "युग्माङ्कुशाः प्रशस्ताः अयुग्माङ्कुशा विगर्हिताः खड्गास्ते केऽपि ब्राह्मणस्य परिग्रहाधमनाशं दिशन्ति क्षत्रियस्यार्थविनाशं कुलक्षयं कुर्वन्ति वैश्यस्य तु सद्योवधमावहन्ति शूद्रस्य न कदाचिदपि दृष्टिकराः सुस्नावा व्रणाः छायास्निग्धवर्णाः पूजिताः छिन्ना रूक्षवर्णाश्चरूपानुज्वलाश्च भर्तुरपजयाय स्मृतिगर्हिताः" । त्रिकोणाःपञ्चकोणाश्चतुरस्राव्रणाः प्रशस्ताः । अनुलोमाश्च प्रतिलोमाश्च प्रशस्तादीर्घतायै खड्गस्य भवन्ति । ते प्रतिलोमावेदितव्याः खड्गस्यानुगता अनुलोमा व्रणापदेशो वक्ष्यते । पूजितोनिन्दितश्च यदि खड्गस्याद्येऽङ्कुशे दृश्येत तदा पुत्रमरणम् । द्व्यङ्कुशे पुत्रद्वित्रिव्यङ्कुशे पुत्रधननाशश्चतुर्थे पुत्रमङ्गलम् पञ्चाङ्कुशे मरणं नरपत्यूनाम् । षड्ङ्कुशे कर्म्मसिद्धिः पशुलाभश्च सप्ताङ्कुशे कलहेन विनाशं भर्तुः करोति । व्रणोऽष्टाङ्कुशे मित्रप्राप्तिं धनस्थितिं च कुर्यात् । नवाङ्कुशे भ्रातृवधधान्यविनाशञ्चभर्तुः करोति, दशाङ्कुशे मित्रभृत्यानां लाभं सम्यद्विवृद्धिञ्च, एकादशाङ्कुशे संग्रहणं मित्रविरोधञ्च । द्वादशाङ्कुशे मित्रलाभभोगं सुखं च । त्रयोदशाङ्कुशे प्रभुविनाशं चतुर्दशाङ्कुशे प्रियतां गौरवञ्चलाभं च, पञ्चदशाङ्कुशे शत्रुविवृद्धिम् । षोडशाङ्कुशे शत्रुविजयं सप्तदशाङ्कुशे भयम्, स्त्रीलाभम् अष्टादशाङ्कुशे, शत्रुवधम् जनविरोधं, वृद्धिं विंशाङ्कुशे, मरणम् एकविंशत्यङ्कुशे, शत्रुजनितं भयञ्च । द्वाविंशत्यङ्कुशे राष्ट्रपालनं परराष्ट्रविनाशं च त्रयोविंशत्यङ्कुशे विंशतिवर्षादेव मरणम् । चतुर्विंशत्यङ्कुशे भूयश्चागमम् । पञ्चविंशत्यङ्कुशे, भार्याविरागम्, षड्विंशत्यङ्कुशे प्रियसुखलाभं, स्वभार्याविरागन्तु सप्तविंशत्यङ्कुशे, विपुलश्रियोलाभमष्टाविंशत्यङ्कुशे, एकोनत्रिंशत्यङ्कुशे एहभावे भ्रातृभि र्भेदम्, त्रिंशदङ्कुशे वृद्धिमजिरंचेति खड्गे व्रणः करोति । तथा एकत्रिंशदङ्कुशे सभृत्यस्त्रीवाहनं भर्त्तारं विनाशयति । द्वात्रिंशदङ्कुशे पराजयमरिभिः करोति । त्रयस्त्रिंशदङ्कुशे भर्त्तारं पीड़यति नीचस्य च कर्म्मणो वशगङ्करोति ।

चतुस्त्रिंशदङ्गुले धन्यं दानधर्मभाजनं च पञ्चत्रिंशदङ्गुले मरणं सद्यः करोति । षट्त्रिंशदङ्गुले विजयं भर्त्तुर्ददाति सप्तत्रिंशदङ्गुले पराभवमरिभिः करोति । अष्टत्रिंशदङ्गुले शत्रुप्रमर्दनं करोति नवत्रिंशदङ्गुले कुलनरैरेव परिक्लेशं नयति । चत्वारिंशदङ्गुले कन्यालाभमरिजयं च प्राप्नोति व्रणेन खड्गस्थितेन । तथैकचत्वारिंशदङ्गुले शत्रुभ्यः पीड़नाद्भयं लभते द्विचत्वारिंशदङ्गुले खराड्वर्द्विमन्त्रिणं त्रिचत्वारिंशदङ्गुले दुःखं प्राप्नोति सेनापतिरेव भर्त्ता भवति । चतुश्चत्वारिंशदङ्गुले श्रियं विपुलां लभते । पञ्चचत्वारिंशदङ्गुले व्रणो भयञ्च षट्चत्वारिंशदङ्गुले व्रणाः सुखावाप्ता भवन्ति । सप्तचत्वारिंशदङ्गुले स्वपक्षं पीड़यति परपक्षं वर्द्धयति अष्टाचत्वारिंशदङ्गुले राजश्रियं भुङ्क्ते एकोनपञ्चाशदङ्गुले शत्रोर्विजयं लभते । पञ्चाशदङ्गुले कुलवृद्धिर्भवति" । एकत्रिंशदाद्यङ्गुलिषु व्रणे फलविशेषोऽभिहितः । अतः परं प्रवक्ष्यामि खड्गलक्षणमुत्तमम् । प्रधानदेहसंभूतैरन्यास्थिभिररिन्दम: । लोहं प्रधानं खड्गानां प्रशस्तं तद्विशेषतः । खरीकटुरुक्षिकावक्त्रस्त्र्यारकेषु च । विदेहेषु तथाङ्गेषु मध्यमश्यामदेहिषु । सह्याग्नेयु वीरेषु तथा कालञ्जरेऽपि च । लोहं प्रधानं खड्गानां नवानां ग्रहणे लक्षणम् । खरी कटुरुजा ये च दर्शनीयाश्च ते स्मृताः । कार्यं दक्षाश्च क्षत्रिकाश्चदवो गुरवस्तथा" तीक्ष्णाग्रच्छेदसहा वक्त्रा दृढाः स्त्र्यारकोद्भवाः । सुदृढार्यव वित्तेया प्रभवन्ति विदेहजाः । अङ्गदेशोद्भवास्तीक्ष्णाः सह्यजास्ते दृढास्तथा । वेगवन्तस्तथा तीक्ष्णमध्यश्यामसम्भवाः । असारलघवस्तीक्ष्णाश्चेदिदेशसमुद्भवाः । सह्यश्यामोद्भवाः खड्गाः सुतीक्ष्णालघवस्तथा । निर्मला निर्मला खड्गाश्चोरदेशसमुद्भवाः । कालञ्जराभारसह्यास्तेषां वक्ष्यामि लक्षणम् । शताङ्गभङ्गुलानां तु श्रेष्ठः खड्गः प्रकीर्त्तितः । तदधोमध्यसंज्ञाभाक् ततोहीनं न धारयेत् । प्रमाणाभ्यधिकं देव ! स्निग्धवंशन्तथैव च । दीर्घः सुमधुरः शब्दोयस्य खड्गस्य भार्गव ! ॥ किङ्किणीसदृशस्यस्य धारणम् श्रेयसुच्यते । खड्गः पलपलाशाभोमण्डलाग्रश्च शस्यते । करवीरपलाशाग्रसदृशश्च विशेषतः । मक्षीहतसमश्चैव पद्मोत्पलसुगन्धिकः । वर्त्तुलोत्पलाकारः सर्वसौ गननस्य च । समाङ्गुलस्याः शस्यन्ते व्रणाः खड्गेषु भार्गव ! । श्रीवृक्षपर्वताकारवंशवस्तनिभाश्च ये । मङ्गल्यानां तथान्येषां सदृशा ये च भार्गव ! । काकोलूकार्कवन्ध्या श्च विषमाङ्गुलिसंस्थिताः । वंशानुगाः प्रनृत्ताश्च न प्रशस्ता कदाचन । खड्गे न पश्येद्वदनं दृशा न दृशुयादसम् । न चास्य कथयेन्मूलं जातिं देशं कथञ्चन । उत्सृष्टो न स्पृशेत् खड्गं निशि कुर्याच्च शीर्षके । दिवा च पूजयेदेनं गन्धमाल्यादि सम्पदा । खड्गं प्रशस्तं मणिहेमचित्रं कोशे सदा चन्दनवर्द्धयाद्राम् । संस्थापयेद्भूमिपतिः प्रयत्नान् यतेत चेह स्वशरीरवच्च" विष्णुध० । देवीपु० । "खड्गस्य लक्षणं वक्ष्ये लिखितस्य तु सुन्दरि ! । नान्यशस्त्रोद्भवं कार्यं मृदुलोहमयन्तथा । स्फुटितं स्खलितं क्षुण्णं व्रणं साधितं तथा । मृदुलोहेनचारब्धं सन्धितो मरणं भवेत् । व्रणेनापि क्षुद्रोगी रेखायां पातकी भवेत् । भार्य्या माता तथा पुत्रो म्रियते खण्डितेन च । क्षुण्णेन लाघवं लोके दीर्घतापि क्षुच्छिद्रिदा । अन्यशस्त्रोद्भवेनापि संभवेन्मरणम् ध्रुवम् । पञ्चाशदङ्गुलं खड्गं लिखित्वा सुरेश्वरि । दैर्घ्यद्वारयेत्खड्ग माशु सिद्धिफलप्रदम्" । असते क्षिप्यते असु-क्रन् । २त्रासे "तिस्रः पत्न्योऽसिपयान् कल्पयन्त्यस्य सूचीभिः" काल्या० २०।७।१ । "असेः त्रासस्य पथः मार्गान्" कर्क० त्रि० । ४क्षिप्ते असगस्तुः । [हेम० ।

असिक न० असि-संज्ञायां कन् । अधरचिबुकयोर्मध्यभागे-

असिक्नी स्त्री सो-क्त सिता केशादौ शुभ्रा जरती तद्विद्या अदृष्टा क्रादेशः ङीप् च । अन्तःपुरचारिरक्षामहद्वायां १प्रेष्यायाम्, २नदीभेदे च । ३रात्रौ निरु० तस्याश्च सूर्य्यतेजःशून्यतया असितत्वात् तथात्वम् "त्वचमसिक्नीं भूमनो दिवस्परि" ६।७२।५। "त्वद्भिया विश्वमायन्नसिक्नीरसमानाः" ऋ० ७।५।३ । असिक्नीरसितवर्ष्मा राजस्वः" भा० वीरस्य प्रजापतेः ४कन्याभेदे । असिक्नीमावहत् पत्नीं वीरस्य प्रजापतेः" इति हरि० ३अ० । "छन्दसि क्रमेके" वार्त्ति० उक्तेः छन्दस्येवायं क्रादेशः लोके तु क्वचित् । "असिक्नी स्यादृष्टद्वायामित्यमरः" ।

असिगण्ड पु० असिः छिन्नोगण्डो यत्र । गण्डोपधाने ।

असिजीविन् पु० असिना तद्व्यापारेण जीवति जीव-णिनि । शस्त्रव्यापारेण युद्धादिनाजीविकायति विप्रस्य तथात्वे निन्द्यत्वम् "असिजीवी मसीजीवी काण्ड पृष्ठश्च धावक" इत्युक्तेः ।

असित पु० सितः शुभ्रः विरोधे न० त० । १शुभ्रवर्णभिन्ने तद्विरुद्धे कृष्णवर्णे । २तद्वति त्रि० । ३कृष्णपक्षे पु० । ४नीलोपधौ अन्तःपुरचारिरक्षामहद्वायां ५प्रेष्यायाञ्च स्त्री ङीप् कृष्णवर्णपरतया क्रश्च असिक्नीत्येव । "असितगिरिनिभं स्यात् कज्जलं सिन्धुपात्रम्" पुष्पदन्तः "तन्तुमवव्ययन्नसितम्" ऋ० ४, १२, ४, ५यमुनायां तस्याः कृष्णवर्णत्वात् तथात्वम्

स्त्री "सितासिते यत्र सरिद्वरे शुभे" काशी०। अस्याः स्त्रीत्वेऽपि छन्दसीत्युक्तेः न ङीः तेन ङीवपि न। ६देवले ऋषिभेदे पु०। "असितोदेवलोव्यासः स्वयञ्चैव ब्रवीषि मे" गीता। असितशृङ्गे हिमवतः एकपर्णा नाम सुतामुपयेमे यथाह हरि० १८ अ०। "तिस्रः कन्यास्तु मेनायां जनयामास शैलराट्। अपर्णामेकपर्णाञ्च तृतीयामेकपाटलाम्। तपश्चरन्त्यः सुमहद्दुश्चरं देवदानवैः। लोकान् सन्तापयामासुस्तास्तिस्रः स्थाणुजङ्गमान्। आहारमेकपर्णेन एकपर्णा समाचरत्। पाटलापुष्पमेकञ्च आदधावेकपाटला। एका तत्र निराहारा तां माता प्रत्यषेधयत्। उमा इति निषेधन्ती मातरञ्चैव दुःखिता। सा तथोक्ता तदा माता देवी दुश्चरचारिणी। उमेत्येवाभवत् ख्याता त्रिषु लोकेषु सुन्दरी तथैव नाम्ना तेनेह विश्रुता योगधर्मिणी"। एवं त्रिस्रःकुमारीर्वर्णयित्वा। "सर्व्वाश्च ब्रह्मवादिन्यः सर्व्वाश्चैवोर्द्ध्वरेतसः। उमा तासां वरिष्ठा च ज्येष्ठा च वरवर्णिनी। महायोगबलोपेता महादेव उपस्थिता। असितश्चैकपर्णा तु देवलश्च महातपाः। पत्नी दत्ता तथा ब्रह्मन्! योगाचार्य्यांश्च धीमते। जैगीषव्याय तु तथा विद्धि तामेकपाटलाम्। एते कन्ये महाभागे योगाचार्य्यसुपस्थिते"। ७अनौच ८अक्षरोभेदे स्त्री "असिता च सुवाङ्गश्च सुदत्ता बहुला तथा"। हरि०व०।

असितकार्चिस् पु० असितयति क्षिप्-क्युन् सा अर्चिः शिखा यस्य। वह्नौ तच्छिखासम्बन्धेन हि सर्व्वेषामसितत्वम्।

असितगिरि पु० कर्म्म०। नीलपर्व्वते नीलाचले। "असितगिरिनिभं स्यात् कज्जलं सिन्धुपात्रम्" पुष्पद०। असित नगादयोऽत्र। "असितनगनितम्बश्यामभासां घनानाम्"। किरा०। [प्रोवन्ध्यागैः" यजु० २२।२।

असितग्रीव पु० असिता ग्रीवा धूम्रेन यस्य। वह्नौ "असित

असितफल पु० असितं कृष्णं फलं यस्य। मधुनारिकेले।

असितमृग पु० कर्म्म०। कृष्णसारमृगे।

असिताभ्रशेखर पु०। बुद्धभेदे।

असिताम्बुज न० कर्म्म०। नीलपद्मे। [शिखे वह्नौ।

असितार्चिस् पु० असिता कृष्णा अर्चिः शिखाऽस्य। धूम-

असितालु पु० कर्म्म०। नीलालौ आलुभेदे।

असिताश्मन् पु०कर्म्म०। जातित्वेऽपि अनित्यत्वात् न०समा०। इन्द्रनीलके मणिभेदे "निलवेषु नक्तमसिताश्मनां चयैः" माघः

असिद त्रि० अस-घञे दच् स्त्रियां ङीप्। क्षेपके "स वज्रसर्गरूपाणामस्त्राणामसितारिषु" भा०भी०प०।

असितोत्पल न० कर्म्म०। नीलोत्पले।

असितोपल पु० कर्म्म०। इन्द्रनीलमणौ।

असिदंष्ट्र पु० असिरिव तीक्ष्णा दंष्ट्रा यस्य। मकराख्ये यादसि। स्वार्थे कन् तत्रैव।

असिद्ध त्रि० सिद्धोनिष्पन्नः पक्षश्च न०त०। १अपक्के, २अनिष्पन्ने च न्यायमते आश्रयासिद्धत्वादिभिर्दोषैर्दुष्टे २हेतौ पु०। "अनैकान्तोविरुद्धश्चाप्यसिद्धःप्रतिपादितः। कालात्ययोपदिष्टश्च हेत्वाभासाश्च पञ्चधा" भाषा०। असिद्धिशब्दे विवरणम्। अनुमानेन ४अनधिगते च "तस्मादपि चासिद्धं परोक्षमाप्तवचनात् सिद्धम्" सां०का०। ५सिद्धिशून्ये च "स्वयमसिद्धः कथं परान् साधयेत्" न्यायः।

असिद्धि स्त्री सिध-क्तिन् न०त०। १अनिष्पत्तौ, २पक्षाभावे ३योगोक्तसिद्ध्यभावे न्यायमते ४आश्रयासिद्धिपक्षप्रतिहेतुदोषे च। सिद्धयश्च त्रिविधाः। "आश्रयासिद्धिराद्या स्यात् स्वरूपासिद्धिरन्यथा। व्याप्यतासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा। पक्षासिद्धिर्यत्र पक्षोभवेन्नद्यामियोगिरिः। ह्रदोद्रव्यं धूमवत्त्वादत्रासिद्धिरद्यापरा व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत्, इति च भाषा०। नीलधूमत्वं गुरुतया न हेतुतावच्छेदकम् समानाधिकरणव्याप्यतावच्छेदकधर्म्मान्तरावटितत्वेन व्याप्यतावच्छेदकत्वात् एतासां दूषकतावीजं तु असिद्धिसामान्यविशेषलक्षण कथनपूर्व्वकं दर्शितं सद्भा० यथा "आश्रयासिद्ध्याद्यन्यतमत्वमसिद्धित्वम्। आश्रयासिद्धिः पक्षे पक्षतावच्छेदकाभावः। यत्र काञ्चनमयः पर्व्वतो वह्निमानिति साध्यते तत्र पर्व्वतो न काञ्चनमय इति ज्ञाने विद्यमाने काञ्चनमयपर्व्वते परामर्शप्रतिबन्धः फलम्। स्वरूपासिद्धिस्तु पक्षे व्याप्यत्वाभिमतस्याभावः। अत्र च ह्रदोद्रव्यं धूमादित्वादौ पक्षे व्याप्यत्वाभिमतस्य हेतोरभावे ज्ञाते पक्षे साध्यव्याप्यहेतुमत्ताज्ञानरूपपरामर्शप्रतिबन्धः फलम्॥ साध्यासिद्धिरपि व्याप्यत्वासिद्धिः। सा च साध्ये साध्यतावच्छेदकाभावः। तथा च काञ्चनमयवह्निमानित्वादौ साध्ये साध्यतावच्छेदकाभावे ज्ञाते साध्यतावच्छेदकविशिष्ट साध्यव्याप्यवत्ताज्ञानरूपपरामर्शप्रतिबन्धःफलम्।

सिद्धिः साध्यवत्तानिश्चयः अभावे न०त०। ५साध्यवत्तानिश्चयाभावे "दृष्टान्तासिद्धेश्च" सां०सू०। दृष्टान्ते "क्षणिकत्वासिद्धेश्च न क्षणिकत्वानुमानम्" भा०। "स्थिर-

कार्य्यासिद्धेः अधिकत्वम्" सां सू०।

असिधारा स्त्री ६त० । खड्गस्य तीक्ष्णाग्रभागे । "असिधारापरिच्छूतःकामं चक्रस्य तेन ते"। सुरगज इव दन्तैर्भग्नदैत्यासिधारैः" इति च रघुः ।

असिधाराव्रत न० असिधारायां स्थितिरिव दुष्करं व्रतम् । असिधारास्थिति तुल्यदुष्करे व्रते असिधारायां स्थितौ मनाक् स्खलने यथा नाशः एवं मनाक्स्खलने यत्रानिष्टं, तादृशे व्रते तच्च यादृशेन दर्शितं यथा । "युवा युवत्या सार्द्धं वनं सुखा भर्त्तृवदाचरेत् । अत्यन्तनिष्टत्तसङ्गःस्यादसिधाराव्रतं हि तत् "असिधाराव्रतमिदं सखे यदरिणा सह संवासः" हितो० सतां केनोद्दिष्टं विषुलमसिधाराव्रतमिदम्"नीतिः ।

असिधाव पु० असिं खड्गं धावयति मार्ज्जयति धाव-अण् । यस्त्वाणां मार्ज्जनकरे । खुल् । असिधावकोऽप्यत्र ।

असिधेनुका स्त्री असिर्धेनुरिव यस्याः वा कप् । असेर्धेनुतुल्यत्वेन तद्वत्तुल्यायाम् छुरिकायाम् । कबभावे असिधेनुरप्यत्र ।

असिपत्र पु० असिरिव तीक्ष्णं पत्रमस्य वा कप् । १इक्षुवृक्षे "जातं तमात्मन्यसिपत्रवृक्षम्" रघुः । २शुष्कनामकवृक्षे च असेः पत्रमिवाच्छादकम् । ३खड्गकोषे न० । असिपत्राकारोऽस्यस्य अर्श०अच् । इक्षुपत्राकारे ४उभयतोधारे खड्गे च "अत्याचीत् स्वासिपत्रादीनबभासत् परश्वधान्" भट्टिः ।

असिपत्रवन न० असिरिव पत्रमस्य तादृशं वनम् । असिपत्रवने नरकभेदे तत्स्वरूपादि भाग०५स्क०। अम्बतासिस्तादिकमुपक्रम्य "कालसूत्रमसिपत्रवनं सूकरमुखं"मित्यादिना नरकभेदान् दर्शयित्वा तत्स्वरूपं कारणञ्चोक्तं तत्रैव 'यस्त्विह वै निजपथादनापद्यपगतः पाषण्डञ्चोपगतस्तमसिपत्रवनं प्रवेश्य कशया प्रहरन्ति तत्रासावितस्ततो धावमान उभयतोधारैस्तालवनासिपत्रैश्छिद्यमानसर्वाङ्गोहाहतोस्मीतिपरमया वेदनया मूर्च्छितः पदेपदे निपतति स्वधर्म्मं हा पाषण्डानुगमनफलं भुङ्क्ष्वे' 'असिपत्रवनं नाम नरकम् शृणु चापरम् योजनानां सहस्रं वै ज्वलदग्न्यास्तृतावनिः । तप्तास्तूर्य्यकरैस्तत्र खण्डैः कल्पकालाग्नि दारुणैः । प्रपतन्ति सदा तत्र प्राणिनो नरकौकसः । तत्रैकध्ये च वनं शीतं स्निग्धपत्रं विभाव्यते । पत्राणि यत्र खड्गानि फलानि द्विजसत्तम! । स्थानन्तु तत्र यत्नेन चरन्त्यसिपलोभिनः । महावक्त्रा महादंष्ट्रा व्याघ्रा इव महानखाः । ततस्तद्वनमालोक्य शिशिरच्छायमव्ययः । प्रयान्ति प्राणिनस्तत्र तप्तापपरिपीड़िताः । हा तात ! हा मातरिति क्रन्दन्तोऽतीव दुःखिताः । दह्यमानाङ्गिदुगलाधरशिस्थेन वह्निना । तेषां गतानां तत्रासिपत्रव्याप्ते समीरणः । प्रवाति तेन पात्यन्ते तेषां खड्गास्तथोपरि । छिद्राः पतन्ति ते भूमौ ज्वलत्पावकसन्निभे । लेलिह्यमाने चातीव व्याघ्राश्येनमहीतले । सारमेयास्ततः शीघ्रं शातयन्ति शरीरतः । तेषां खण्डानि रुदतामदन्त्यान नभीक्ष्णशः । असिपत्रवनं तात ! मयैतत् परिकीर्त्तितम्" इति मार्क० पु० । "असिपत्रवनं चैव लोहदारकमेव च" मनुः ।

असिपत्रव्रत न० अश्वमेधे कर्त्तव्ये व्रतभेदे । [जलजन्तुभेदे ।

असिपुच्छ पु० असिरिव धारायुक्तः पुच्छोऽस्य । शिशुमारे

असिपुत्रिका स्त्री असेः पुत्रीव स्वार्थे कन् ह्रस्वे अत इत्त्वम् । छुरिकायाम् । कनभावे असिपुत्रीत्यप्यत्र ।

असिभेद पु० असिरिव तीक्ष्णः भेदो निर्यासो यस्य । विट्खदिरे

असिर त्रि० अस+क्षेपे किरच् । क्षेपके । "यःसूर्य्यस्यासिरेण स्तृण्यते" ऋ० ६,७६,४ ।

असिलोमन् पु० असिरिव तीक्ष्णं लोमास्य । दनोःपुत्रभेदे । "चत्वारिंशद्दनोः पुत्राः ख्याताः सर्वत्र भारतेत्युपक्रम्य "असिलोमा च केशी च दुर्जयश्चैव दानवः" भा०आ०प० ६५ अध्या० हरिवंशे तु "अभवन् दनुपत्राश्च शतं तीव्रपराक्रमा" इत्युपक्रम्य शतपुत्रमध्ये "असिलोमा च केशी च शठश्च बलकोऽमदः" इत्युक्तम् । "असिलोमा पुलोमा च वाष्कलः प्रमदोऽमद" इति च हरि० । स च देवासुरयुद्धे वायुना सह युयुधे "असिलोमाथ बलिना मारुतेन महाहवे" हरिवं २४४ अध्या० । त्रिविक्रमावसरे च स हरिणा सह युयुधे विष्णुना हतश्च "असिलोमा हरिश्चैव जम्भतश्चैव परस्परमित्युपक्रम्य १६१अध्या० "विप्रचित्तिः शिबःशङ्कुरित्युपक्रम्य च "असिलोमा पुलोमाचेत्यादिना बहून् दैत्यान् युयुधानानभिधाय" "प्रमथ्य सर्वान् दैतेयान् पादहस्ततलैः प्रभुः । जघार त्रिदिवं देवस्त्रिभिर्विक्रमणैर्हरिः" हरि० २६३ अ० वामनेन तद्धननसङ्गम् । "असिलोमोऽपहन्ता वै तथा रावणनाशनः" विष्णुस्तवः ।

असिहत्य त्रि० असिना हत्यः घात्यः हन-बा० क्यप् ३त० । खड्गेन हननीये । भवादौ अण् अनुशतिका० द्विपदबहुः आसिहात्यः ।

असिहेति पु० असिर्हेतिः साधनमस्य । खड्गेन युद्धकर्त्तरि ।

असु पु० असते क्षिप्यते अस-उन् । १क्षिप्ते । कर्त्तरि उन् ।

२तापे । करणे उनु । २पञ्चवृत्तिषु वायुभेदेषु पु० ब०व० । "ग्रीवे जातो भवेद्व्याप्तः ज्योति०" । "आवस्योदक् पराङ्मत्य तिरोचम्य शनैरसून्" मनुः । "शरीरेष्वोऽमरारीणामसूनिव विचिन्वति" देवीमा० "त्यजन्त्यसून् शर्म्म च मानिनो वरं त्यजन्ति नत्वे कमयाचितव्रतम्" नैषधम् । प्राणवृत्तीनां भेदविवक्षायामेव बहुत्वम् एकत्वविवक्षायां तु एकवचनान्तामिच्छन्ति अतएव- "प्राणापानौ समौ कृत्वा" गीता "प्राणोह्य पिता प्राणोह्य माते-त्यादौ प्राणशब्दवत् असुशब्दोप्येकवचनः" नानदद्वं ऋ० १,१४०,८ । "उदीर्घं जीवो असुर्न आगादप" ऋ० १,११३,१६, ४दग्धुर्ब्रह्मचरोच्चारणकाले पलपञ्च-भागे च "गुर्व्वक्षरैः खेन्दुमितैरसुभिः षड्भिः पलं तैर्घटिका खषड्भिः" सि०शि० ५प्रश्नायाम् निरु० ।

असु उपतापे कण्ड्वा० यक् । असूयति आसूयीत् असूयामास । असूया । असूज इत्येके असूयति ते ।

असुकर त्रि० सुखेन क्रियते सु+कृ-खल् विरोधे न०त० । दुष्करे ।

असुख न० विरोधे न०त० । १दुःखे असुखोदयः असुखावहः असुखोदर्कः "तत्तत् प्राप्य सुखासुखम्" गीता "याभ्यां प्राप्नोति संसृक्षाः प्रेत्येह च सुखासुखम्" मनुः । न०ब० । २सुखशून्ये । [१दुर्गमे २दुर्व्वोधे च ।

असुगम त्रि० सुखेन गम्यते सु+गम-खल् विरोधे न०त० ।

असुतृप पु० असुना परकीयप्राणनाशनेन तृप्यति तृप-क ३त० ॥ यमदूतभेदे "अरूणसावसुतृपा उदुम्बलौ यमस्य दूतौ चरतोजनाँ अनु" ऋ० १०,१४,१२ । [जीवने ।

असुधारण न० असूनां प्राणादिपञ्चवायुवृत्तीनां धारणम् ।

असुन्दर त्रि० विरोधे न०त० । सौन्दर्य्यहीने असुष्ठुरूपे कुत्सिते ।

असुन्व त्रि० सु-अभिषवे बा०ण न०त० । सोमाभिषवाकर्त्तरि "असुन्वामिन्द्र । सखंदम्" ८,१५,१४ । "असुन्वां सोमा-भिषवहीनाम्" भा० ।

असुस्रत् त्रि० असून् विसर्क्ति भ्र-क्विप् तुक् त० । १प्राणिनि

असुमत् त्रि० असवःसन्त्यस्य मतुप् । प्राणिनि "सततम-समतामगम्यरूपाः" माघः ।

असुर पु० अस-दीप्तौ उर० । १सूर्य्ये । अस्यति क्षिपति देवान् उर विरोधे न०त० वा । सुरविरोधिनि २दैत्ये । २रात्रौ स्त्री । असुरप्रभेदाश्च भारते आ०प० दर्शिताः "एकएव दितेः पुत्रो हिरण्यकशिपुः" स्मृतः । नाम्ना ख्यातास्तु तस्येमे पञ्च पुत्रा महात्मनः । प्रह्लादः पूर्व्व-जस्तेषां संह्लादस्तदनन्तरम् । अनुह्लादस्तृतीयोऽभूत्तथाच शिविवाष्कलौ । प्रह्लादस्य त्रयः पुत्राः ख्याताः सर्व्वत्र भारत । विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत । विरो-चनस्य पुत्रोऽभूद्बलिरेकः प्रतापवान् । बलेश्च प्रथितः पुत्रो बाणो नाम महासुरः । रुद्रस्यानुचरः श्रीमान्महा-कालेति यं विदुः । चत्वारिंशद्बलेः पुत्राः ख्याताः सर्व्वत्र भारत । तेषां प्रथमजो राजा विप्रचित्तिर्महायशाः । शम्बरो नमुचिश्चैव पुलोमा चेति विश्रुतः । असिलोमा च केशी च दुर्ज्जयश्चैव दानवः । अयःशिरा अश्वशिरा अश्वशङ्कुश्च वीर्य्यवान् । तथा गगनमूर्द्धा च वेगवान् केतु-मांश्च सः । स्वर्भानुरश्वोऽश्वपतिर्ह्यश्वाजकस्तथा । अश्व-ग्रीवश्च सूक्ष्मश्च तुहुण्डश्च महाबलः । एकपादेकचक्रश्च विरूपाक्षमहोदरौ । निचन्द्रश्च निकुम्भश्च कपटः कपट-स्तथा । शरभः शलभश्चैव सूर्य्याचन्द्रमसौ तथा । एते ख्याता दनोर्व्वंशे दानवाः परिकीर्त्तिताः । अन्यौ तु खलु-देवानां सूर्य्याचन्द्रमसौ स्मृतौ । अन्यौ दानवसङ्घानां सूर्य्याचन्द्रमसौ तथा । इमे च वंशाः प्रथिताः सत्त्ववन्तो महाबलाः । दनुपुत्रा महाराज दश दानववंशजाः । एकाक्षोऽमृतपो वीरः प्रलम्बनरकावपि । वातापी शत-तपनः शठश्चैव महासुरः । गविष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः । असंख्येयाः स्मृतास्तेषां पुत्राः पौत्राश्च भारत ! । सिंहिका सुषुवे पुत्रं राहुं चन्द्रार्कमर्द्दनम् । सुचन्द्रं चन्द्रहन्तारं तथा चन्द्रप्रमर्द्दनम् । क्रूरस-भावं क्रूरायाः पुत्रपौत्रमनन्तकम् । गणः क्रोधवशो नाम क्रूरकर्म्माऽरिमर्द्दनः । दनायुषः पुनः पुत्राश्चत्वारो-ऽसुरपुङ्गवाः । विक्षरोबलवीरौ च वृत्रश्चैव महासुरः । कालायाः प्रथिताः पुत्राः कालकल्पाः प्रहारिणः । प्रवि-ख्याता महावीर्य्या दानवेषु परन्तपाः । विनाशनश्च क्रोधश्च क्रोधहन्ता तथैव च । क्रोधः शत्रुस्तथैवान्ये कालकेया इति श्रुताः" । हरिवंशे तु अन्येऽपि बहवोऽसुरभेदा उक्ता यथा । "दितेः पुत्रद्वयं यत्ते कश्यपादिति नः श्रुतम् । हिरण्य-कशिपुश्चैव हिरण्याक्षश्च वीर्य्यवान् । सिंहिका चाभवत्कन्या विप्रचित्तेः परिग्रहः । सैंहिकेया इति ख्याता यस्याः पुत्रा महाबलाः । गणश्च सह राजेन्द्र ! दशसाहस्र-मुच्यते । तेषां पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः । असंख्याता महावाहो हिरण्यकशिपोः स्मृताः । हिरण्य-कशिपोः पुत्राश्चत्वारः प्रथितौजसः । अनुह्लादश्च ह्लादश्च प्रह्लादश्चैव वीर्य्यवान् । संह्लादश्च चतुर्थोऽभूत् ह्लादपुत्रो

ह्रदस्तथा। संह्रादपुत्रः सुन्दश्च निसुन्दश्चैव तावुभौ। ह्रदस्य पुत्रौ ह्रावुर्व्वै शिविः कालस्तथैव च। विरोचनश्च प्राह्लादिर्बलिजज्ञे विरोचनात्। बलेः पुत्रशतन्वासीद्बाणज्येष्ठं नराधिप। धृतराष्ट्रश्च सूर्य्यश्च चन्द्रमाश्चेन्द्रतापनः। कुम्भनाभो गर्द्दभाक्षः कुक्षिरित्येवमादयः। बाणस्तेषामतिबलो ज्येष्ठःपशुपतिप्रियः। पुराकल्पे हि बाणेन प्रसाद्योमापतिं प्रभुम्। पार्श्वतो विहरिष्यामि इत्येवं याचितो वरः। बाणस्य चेन्द्रदमनो लोहित्यात्तदपद्यत। गणास्तथा सुरा राजन् शतसाहस्रसम्मिताः। हिरण्याक्षसुताः पञ्च विद्वांसः सुमहाबलाः। ऋक्षरः शकुनिश्चैव भूतसन्तापनस्तथा। महानाभश्च विक्रान्तः कालनाभस्तथैव च। अभवन्। दनुपुत्राश्च शतं तीव्रपराक्रमाः। तपस्विनो महावीर्य्याः प्राधान्येन निबोध तान्। द्विमूर्द्धा शकुनिश्चैव तथा शङ्कुशिराः प्रभुः। शङ्कुकर्णो विराधश्च गवेष्ठो दुन्दुभिस्तथा। अयोमुखः शम्बरश्च कपिलो वामनस्तथा। मरीचिर्म्बवांश्चैव इरा गर्गशिरा इकः। विलोभश्च केतुश्च केतुवीर्य्यशतह्रदौ। इन्द्रजिच्चार्व्वजिच्चैव वज्रनाभस्तथैव च। महानाभश्च विक्रान्तः कालनाभस्तथैव च। एकचक्रो महाबाहुस्तारकश्च महाबलः। वैश्वानरः पुलोमा च विद्रावणमहागिराः। स्वर्भानुर्वृषपर्व्वा च तुङ्गश्च महासुरः। शुक्रश्चैव निचन्द्रश्च अर्चनाभो महागिरिः। अश्विलोमा च केशी च शठश्च बलको मदः। तथा गगनमूर्द्धा च कुम्भनाभो महासुरः। प्रमदो मयश्च कपयो हयग्रीवश्च वीर्य्यवान्। वैरूपः स विरूपाक्षः सुपयोऽथ हराहरौ। हिरण्यकशिपोश्चैव शतमायश्च शम्बरः। शरभः शलभश्चैव विप्रचित्तिश्च वीर्य्यवान्। एते सर्व्वे दनोः पुत्राः कश्यपादभिजज्ञिरे। विप्रचित्तिप्रधानास्ते दानवाः सुमहाबलाः। एतेषां वदपत्यन्तु न तच्छक्यं नराधिपः। प्रसंख्यातुं महीपाल! पुत्रपौत्रमनन्तकम्। स्वर्भानोस्तु प्रभा कन्या पुलोम्नस्तु सुतात्रयम्। उपदानवी हयशिराः शर्म्मिष्ठा वार्षपर्व्वणी। पुलोमा कालका चैव वैश्वानरसुते उभे। वङ्गपत्ये महावीर्य्ये मारीचेस्तु परिग्रहः। तयोः पुत्रसहस्राणि षष्टिं दानवनन्दनान्। चतुर्हैव शतान्यान्यान् हिरण्यपुरवासिनः। मारीचिर्ज्जनयामास महता तपसान्वितः। पौलोमाः कालकेयाश्च दानवास्ते महाबलाः। अवध्या देवतानाञ्च हिरण्यपुरवासिनः। हताः पितामहेनाजौ निहताः सव्यसाचिना। प्रभाया नहुषः पुत्रः शतञ्जयश्च शचीसुतः। पूरञ्जयेऽथ शर्म्मिष्ठा द्रुह्यनुसुपदानवी। ततोऽपरे महावीर्य्या दानवास्तितिदारुणाः। सिंहिकायामथोत्पन्ना विप्रचित्तेः सुताश्च या। दैत्यदानवसंयोगाज्ज्ञातास्तीव्रपराक्रमाः। सहिकेया इति ख्याताश्चयोदश महाबलाः। बंगः शल्यश्च बलिनौ नभश्चैव महाबलः। वातापिर्नमुचिश्चैव इल्वलः खसृमस्तथा। आञ्जिको नरकश्चैव कालनाभस्तथैव च। राहुर्ज्येष्ठसुतेषां वै सूर्य्यचन्द्रप्रभेदनः। शुकः पोतरणश्चैव वज्रनाभश्च वीर्य्यवान्। मूकश्चैव तुङ्गश्च ह्रादपुत्रौ बभूवतुः। मारीचः सुन्दपुत्रश्च ताडकायां व्यजायत। एते वै दानवाः श्रेष्ठा दनुवंशविवर्द्धनाः। तेषां पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः। संह्रादस्य तु दैत्यस्य निवातकवचाः कुले। सहस्रपदाः सुमहता तपसा भावितात्मनः। तिस्रः कोट्यः सुतास्तेषां मणिमत्यां निवासिनाम्। तेऽप्यवध्याश्च देवानामर्জ্জुनेन निपातिताः। षट्सुताः सुमहासत्त्वास्ताम्राया परिकीर्त्तिताः"। "वासेन यस्य जनिताऽसुरभोरुवश्रीः" नैष०। "समत्सरेष्वासुर इत्युपेयुषा" माघः। "ततः कानीयसा एव देवा ज्यायसा असुराः, य एषु लोकेष्वसर्द्धन्त ते ह देवा ऊचुर्हन्तासुरान् यज्ञ उद्गीथेनात्ययामेति" छा०उ०। "असुषु विष्वग्विषयासु प्राणनक्रियासु रमन्ते रम्-डु। ४स्वाभाविकीं तम आत्मिकायामिन्द्रियवृत्तौ। "देवासुरा वै यत्र संयेतिरे" बृ०उ०। देवाश्चासुराश्च देवादीव्यतेर्द्योतनार्थस्य रूपं शास्त्रोद्भासिता इन्द्रियवृत्तयः। असुरास्तद्विपरीताः स्वेष्वेवासुषु विष्वग्विषयासु प्राणनक्रियासु रमणात् स्वाभाविकस्तम आत्मिका इन्द्रियवृत्तय एव" भा०। स्वार्थे प्रज्ञा० अण् आसुरः तत्रार्थे। तस्येदम् अण् आसुरः तत्सम्बन्धिनि त्रि० स्त्रियां ङीप् "आसुरीरात्रिरन्यत्र तस्मात्ताः परिवर्জ্জयेत्" स्मृतिः "आसुरीं योनिमापन्नाः" गीता। हितार्थे यत्। असुर्य्यः। "असुर्य्यानाम ते लोका अन्धेन तमसा वृताः" कठ०उ०। सुरा सुधा सहीत्यनेनास्यस्य अर्श० अच् न०त०। "सुराप्रतिग्रहाद्देवाःसुरा इत्यभिस्तुताः। अप्रतिग्रहणाच्चास्या दैतेयाश्चासुराः स्मृताः इत्युक्तनिर्व्वचनादपि तेषामसुरत्वम्। जातौ ङीप् असुरी "असुरी जिह्वा देवानां प्रातः सवनसत्रालेट्" ऋष०। ४कांस्ये तस्यासुराद्भवत्वात्तत्त्वात्वम्। मेदे पु० निरु०। [रक्षणीये।

असुरत्व त्रि० सुखेन रज्यते सु+रज-खल् न०त०। सुखेनासुरराज् पु० असुरेषु राजते राज् क्विप् ७त०। प्रह्लाद-

पौत्रे बलिदैत्ये २असुराध्यक्षमात्रे च भा० आ० प० बकासुरवर्णने । "पुरो मानुषमांसेन दुर्बुद्धिः पुरुषादकः । रक्षत्यसुरराट् नित्यमिमं जनपदं बली" ।

असुररिपु पु० असुराणां रिपुः । दानवशत्रौ विष्णौ । असुरारिप्रभृतयोऽत्र । [तुलसीभेदे

असुरसा स्त्री न सुष्ठु रसो यस्याः ५ब० । (वायुदृतुलसी)

असुरहन् त्रि० असुरं हन्ति-हन् क्विप् । असुरनाशके । "प्राग्नये विश्वशुचे धियन्धेऽसुरघ्ने" ऋ०७'१२,१ । स्त्रियां नान्तत्वात् ङीप् । असुरघ्नी ।

असुरार्य्य पु० ६त० । शुक्राचार्य्ये । [ध्यक्षमात्रे च ।

असुराधिप पु० ६त० । १प्रह्लादपौत्रे बलिदैत्ये २असुरा-

असुराङ्क न० असुरस्याङ्का आङ्का यस्य । कांस्ये हेम० ।

असुर्य्य त्रि० असुराय हितः गवा० यत् । १असुरहिते तत्स्वभूते च असुरशब्दे उदा० ।

असुष्वि त्रि० सु-वा०कि द्वित्वम् न०त० । सोमाभिषवाकर्त्तरि "विपश्चिदाददुष्वीन् ऋ०४,२४,५ । जघ्नुषुष्वीन् प्रहत्या पृणत" ऋ०६,४४,११ । "असुषुवीन् अनभिषोतॄन् यजमानान्" भाष्यम् ।

असुलभ त्रि० न सुलभः विरोधे । दुर्लभे दुःखेन प्राप्ये ।

असुसु पु० असून् प्राणान् सुवति सू-क्विप् । बाणे "स सासिः सासुसूः सासोवेवायवेवायवायवः" किरा० । [भूते च ।

असुस्थ त्रि० विरोधे न०त० । १दुःखेन स्थातरि २रोगाद्यभि-

असुहृद् पु० विरोधे न०त० । सुहृद्भिन्ने रिपौ "गलभतां लभतामसुहृद्गणः" माघः ।

असू स्त्री न प्रसूते सू-क्विप् । अप्रसवायां स्त्रियाम् "याभिर्धेनुमसम्" ऋ०१,११२,२ । [अनादरे अवज्ञायाम्

असू(च्च)च्चण न०सू(सूच्च)च आदरे ल्युट् अभावे न०त० ।

असूक्ष्म त्रि० विरोधे न०त० । सूक्ष्मताविरोधिस्थूलत्ववति ।

असूत त्रि० न०त० । अप्रसूते । [दोषारोपणशीले ।

असूयक त्रि० (असू)असूञ्-कण्ड्वादि० यकि-ख्वुन् । गुणेषु

असूया स्त्री असू (असू)-उपतापे कण्ड्वा० यक् अ । परगुणेषु दोषाविष्करणे "पैशुन्यं साहसं द्रोहईर्षासूयार्थदूषणम् । वाग्दण्डजञ्च पारुष्यं क्रोधजोदशकोगणः" मनुः । "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः, पा० । "असूया परगुणेषु दोषाविष्करणम्" सि०कौ० ।

असूयु त्रि० असू(सू)-कण्ड्वा० यक् उनु । असूयाशीले "इदन्तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे" गीता ।

असूर त्रि० सूरी सम्भे धातूनामनेकार्थत्वात् स्तुतौ भावे घञ् न०ब० । स्तोत्ररहिते । "असूरे सन्ति सूरयः" ऋ०८,१०,४ । ["असूर्त्ते सूर्त्ते रजसि" यजु०१७,१७ ।

असूर्त्त त्रि० सूरी क्त ऋडभावः न तस्य नत्वम् । अप्रेरिते

असूर्य्यम्पश्या त्रि० सूर्य्यमपि न पश्यति दृश-खश् मुम् च अस०समा० । अत्यन्तगुप्ते सूर्य्यादर्शिनि राजदारादौ । "असूर्य्यम्पश्यरूपा त्वं किमभीरुरराय्यसे ?" भट्टिः ।

असृक्कर पु० असृक् शोणितं करोति कृ-ट । शरीरस्थे रसधातौ, अन्नादेरग्नितप्तस्य प्रथमं रसरूपता, रसस्य रक्तरूपतेति वैद्यके प्रसिद्धम् । अथ रसस्य यथा रक्तकरत्वम् तथोक्तं सुश्रुते । "रसाद्रक्तं ततोमांस मांसान्मेदः प्रजायते । मेदसोऽस्थि ततोमज्जा मज्ज्ञः शुक्रस्य सम्भवः" तत्पाकप्रकारमाह भाव० प्रका० । "यात्यामाशयमाहारः पूर्व्वं प्राणानिलेरितः । माधुर्य्यं फेनभावञ्च षड्रसोऽपि लभेत सः" । "आहार्य्यं पञ्चविधं भोज्यं भक्ष्यं चर्व्यं तथैव च । लेह्यं चूष्यं तथा पेयं तदुदाहरणानि तु । भोज्यमोदनपूपादि, भक्ष्यं मोदकमण्डकम् । चर्व्यं चिपिटधानादि-रसलादि तु लिह्यते । चूष्यमाम्रफलेक्षादि पीयते पानकं पयः" । आमाशयमाह चरकः "नाभिसनाभ्यन्तरे जन्तोरङ्गरामाशयं बुधाः" । तत्र विशेषमाह । "उरोरक्तामाशयस्तस्मादधःस्रोमाशयः स्मृतः । आमाशयस्तु तदधस्तदधोहि मलाशयः" । अनिलेरित इति हृदयाधिष्ठानेन प्राणनाम्ना वायुना मुखंगतेनान्तःप्रवेशितः । तथाह सुश्रुते । 'योवायुः प्राणनामासौ मुखं गच्छति देहभृत् । सोऽन्तः प्रवेशयत्यन्नं प्राणांश्चाप्यवलम्बते' इति । तमाहारमामाशयस्थं क्लेदननामकफः क्लेदयति क्लेदनात्तं हतं भिनत्ति च । उक्तं च सुश्रुते । "क्लेदनः क्लेदयत्यन्नं संहतं च भिनत्त्यतः" इति स आहारः षड्रसोऽप्यामाशये माधुर्य्यं लभते आमाशयस्यस्य मधुरस्य कफस्य योगात् । उक्तं च स्रोम स्वरूपम् "स्रोभा श्वेतो गुरुःस्निग्धः पिच्छिलः शीतलस्तथा । तमोगुणाधिकः स्वादुर्विदग्धोलवणो भवेदिति" । "फेनभावं च लभते जठरानलतेजसा" । यतआह वाग्भटः "संधुक्षितः समानेन पचत्यामाशयस्थितम् । औदर्य्योऽग्निर्यथा बाह्यः स्थालीस्थं तोयतण्डुलम्" इति । अथ सएवाहारः प्राणवायुना प्रेरितस्ततः किञ्चित्स्खलितः पाचकाख्यपित्तोष्मणेषत्पक्वोऽम्लोभवति । उक्तं च । "अथ पाचकपित्तेन विदग्धश्चाम्लतां व्रजेदिति" पाचकपित्तेन पाचकपित्तोष्मणा ततः स एवाहारो नाभिमण्डलाधिष्ठानेन समाननाम्ना वायुना प्रेरितोग्रहणीम् प्रति नीयते उक्तञ्च । "ततः समान

सरता यकृतीमभि नीयते" । यकृतीलक्षणमाह "यत्तो-पित्तधरा नाम पाचका परिकीर्त्तिता। आमपक्वाशयान्तःस्था यकृतीत्यभिधीयते"। पित्तधरा पाचकाख्यं पित्तं तदन्यधिष्ठानं तद्धारयति। तत्र यकृत्खामाशयपक्वाशयमध्यवर्त्ति-पाचकाख्यपित्ताधिष्ठानेनाग्निनाहारः पच्यते स कटुक-भवति । तथा च "यकृत्याम्पच्यते कोष्ठवह्निना जायते कटुरिति" । अयमर्थः । आहारो यकृत्यां कोष्ठवह्निना यकृतीस्थितपाचकपित्तेन वह्निना पच्यते पच्यमानः स यकृतीस्थितस्य कटुरसस्य पित्तस्य योगात्कटुर्भवति । एत-दाहारपाके विशेषमाह । "शरीरं पाञ्चभौतिकम्" तत्र प-ञ्चसु भूतेषु पञ्चाग्नयः तिष्ठन्ति । उक्तं च चरकेण । "भौमा-प्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः । पञ्चाहारगुणान् स्वान् स्वान् पार्थिवादीन् पचन्त्यत्र"।अत्रोष्मपदेनाग्निरुच्यते आहारोऽपि पाञ्चभौतिकः तत्र पाचकपित्तस्थेनाग्निनो त्तेजितेन शरीरवर्त्तिभूभागाग्निनाहारवर्त्तिभूभागः पच्यते पक्वोभूभागः स्वकीयान् गुणानभिवर्द्धयति एवं जलादिभागा अपि पच्यन्ते । तथा च सुश्रुते "पञ्चभूता-त्मके देहे आहारः पाञ्चभौतिकः । विपक्वः पञ्चधा-सम्यक्गुणान् स्वानभिवर्द्धयेदिति" । गुणशब्देनात्र गुणिनः पृथिव्यादय उच्यन्ते तेन गुणान् शरीरवर्त्तिनः पार्थि-वादीन् भागानभिवर्द्धयेदित्यर्थः । एवमहोरात्रेण पक्वाहारो मिश्रश्च कटुश्च मधुरोभवति अम्लस्त्वम्लोभवति । कटुस्तिक्तः कषायश्च कटुर्भवति उक्तञ्च "मिश्रःकटुश्च मधुरमम्लोऽम्लं पच्यते रसः । कटुतिक्तकषायाणां विपाको जायते कटुरिति" एवं विपक्वाहारस्य सारो निगदितोरसः श्लेष्मोयकृती-स्थोमलद्रवः । मलद्रवस्य जलभागः शिराभिर्वस्तिद्वीतो-मूत्रम्भवति । उक्तञ्च "आहारस्य रसःसारः सारश्लेष्मो-मलद्रवः । शिराभिस्तज्जलं नीतं वस्तौ मूत्रत्वमाप्नुयात् । श्लेष्मं किट्टञ्च यत्तस्य तत्पुरीषं निगद्यते । समानवायुनानीतं तस्तिष्ठति मलाशये" । तत्र मलाशयेनापानवायुना प्रेरितं मूत्रं मेढ्रभगमार्गेण, पुरीषं गुदमार्गेण शरीराद्बहिर्याति उक्तञ्च "मूत्रं मूत्रस्रमार्गेण पुरीषं गुदमार्गतः । अपानवायुना-त्तिप्रं बहिर्याति शरीरतः"। उपस्थः शिश्नोभगञ्च । रसस्तु समानवायुना प्रेरितोधमनीमार्गेण शरीरारम्भकस्य रसस्य स्थानं हृदयं गत्वा तेन सहमिश्रितोभवति उक्तञ्च "रसस्तु हृदयं याति समानमरुतेरितः । स तु व्यानेन पु-विच्छिप्रः सर्व्वान्धातून् विवर्द्धयेत् । केदारेषु यथा कुल्याः पूर्णान्ति विविधौषधीः तथा कलेवरे धातून् सर्वान्वर्द्धयते रसः" रसस्तु तत्र तत्र त्रिधा विभिद्यते । उक्तं च चरके "स्थूला एवं मलभेदैश्चतत्र त्रिधा रसः । खं स्थूलेऽंशः परं सूक्ष्म सन्मलो याति तन्मलम्"। अयमर्थः स्थूलेऽंशः खं याति । यथास्थितं तिष्ठति सूक्ष्मस्त्वंशःपरं द्वितीयं धातुं याति-तन्मलः रसादिमलस्तन्मलं शरीरारम्भकं तत्तद्धातुमलं यातीत्यर्थः यथा लौकिकाग्निनेक्षुरसः पच्यते तथा शरी-रारम्भकस्य रसस्य अग्निनाहाररसः पच्यते पच्यमानः स पञ्चाहोरात्रात्सार्द्धदण्डमेकं च यावत्प्राक्तनरसधातावेव तिष्ठते उक्तञ्च सुश्रुते "स खलु रसस्त्रीणि त्रीणि कला-सहस्राणि पञ्चदशकला एकैकस्मिन्धातावेव तिष्ठति" इति । अत्र कलानां विंशतिः मुहूर्त्तः स च दण्डद्वयात्मकः तथा च भोजः "धातौ रसादौ मज्जान्ते प्रत्येकं क्रमतोरसः । अहोरात्रात्सपञ्च सार्द्धं दण्डं च तिष्ठति" । प्रत्येकम् एक-स्मिन्नेकस्मिन्नित्यर्थः ततो यथा पच्यमानादिक्षुरसान्मलोनिर्ग-च्छति । तथा पच्यमानादाहाररसान्मलो निर्गच्छति सः कफः उक्तञ्च सुश्रुते "कफपित्तमलाः खेषु प्रस्वेदोनखरोम च नेत्रविट्चक्षुषःस्नेहोधातूनां क्रमयोमलाः । खेषुमलः कर्णादिस्रोतोमलः । स च कफः प्राणानिलप्रेरितोधम-नीमार्गेण शरीरारम्भकं क्लेदनाख्यं कफं गत्वा पुष्णाति । ततः सारभूतस्याहाररसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च तत्र सूक्ष्मोभागः शरीरारम्भकं रसं पोष-यति सकलशरीराधिष्ठानेन व्यानवायुना प्रेरितोधम-नीभिः सञ्चरन् पोषणस्नेहनजठरानलोष्मशमनसन्तापनि-वारणादिभिर्गुणैः सकलं पुष्णाति शरीरम् ततः "स्थूलो-भागः प्राणवायुना प्रेरितोधमनीमार्गेण शरीरारम्भकस्य रक्तस्य स्थानं गत्वा यकृत्प्लीहरूपङ्कृत्वा तेन सह मिश्रितो भवति । ततः प्राक्तनरक्तस्याग्निना पुनः पच्यमानः पञ्चाहोरात्रात्सार्द्धदण्डञ्च यावत्प्राक्तनरक्तधातावेव तिष्ठति ततो यथाग्निना पुनःपुनः पच्यमानादिक्षुविकारा-द्वारंवारं मलं निर्गच्छति । तथा पुनःपुनः पच्यमाना दाहाररसात्प्रतिवारं मलं निर्गच्छति तत्र रक्ताग्निना-पच्यमानान्मलं पित्तं निर्गच्छति । तच्च पित्तं समानवा-युना प्रेरितं धमनीमार्गेण शरीरारम्भकं पाचकाख्यं पित्तं गत्वा पुष्णाति । ततः सारभूतस्याहाररसस्य द्वौ भागौ भवतः । स्थूलः सूक्ष्मश्च । तत्र सूक्ष्मोभागोरञ्जकाख्येन पित्तेन रञ्जीकृतः शरीरारम्भकं रक्तं पोषयन् व्यान-वायुना प्रेरितो धमनीभिः सञ्चरन् सकलशरीरगतानि रुधिराणि पुष्णाति । ततः स्थूलोभागो व्यानवायुना-

प्रेरितोधमनीभिः शिराभिश्च शरीरारम्भकाणि मांसानि याति ततो मांसाग्निना पुनः पच्यमानः पञ्चाहोरात्रात्सार्द्धदण्डं यावन्मांसेष्वेव तिष्ठति ततः पच्यमानात्तस्मान्मलं निर्गच्छति तद्व्यानवायुना क्षिप्रं कर्णावागत्य कर्णविड्भवति ततः सारभूतस्य रसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च ततः सूक्ष्मोभागो मांसानि पुष्णाति ततः स्थूलोभागोव्यानवायुना प्रेरितोधमनीभिः शरीरारम्भकस्य मेदसःस्थानमुदरं याति ततोमेदसोऽग्निना पुनः पच्यमानः पञ्चाहोरात्रात्सार्द्धदण्डञ्च यावन्मेदस्येव तिष्ठति ततः पच्यमानात्तस्मान्मलो निर्गच्छति प्रस्वेदरूपः स च शीतः स्रोतस्येव तिष्ठति शरीरोष्णता तप्तञ्च तदा व्यानवायुना प्रेरितः शिरामार्गैः स्रोमकूपेभ्यो बहिर्याति जिह्वादन्तकशमश्रादिमलञ्च मेदोमलमित्येके। ततः सारभूतस्य रसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च तत्र सूक्ष्मोभागो मेदः पुष्णाति उदरे तिष्ठन् व्यानवायुना प्रेरितः स्रोतोमार्गैः सूक्ष्मास्थितान्यपि मेदांसि पुष्णाति स्थूलोभागोव्यानवायुना प्रेरितोधमनीभिः शिराभिश्च शरीरारम्भकास्थीनि याति ततोस्थ्यग्निना पुनः पच्यमानः पञ्चाहोरात्रात् सार्द्धदण्डं च यावदस्थिष्वेव तिष्ठति ततः पच्यमानात्तस्मान्मलो निर्गच्छति स च व्यानवायुनाप्रेरितः शिराभिर्मार्गैरागत्यानुलिप्तु नखाःस्नौ लोमानि भवन्ति ततः सारभूतस्य रसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च तत्र सूक्ष्मोभागोव्यानवायुना प्रेरितः स्रोतोमार्गैर्मज्जस्थानानि स्थूलास्थ्यभ्यन्तराणि याति ततो मज्जाग्निना पुनः पच्यमानः पञ्चाहोरात्रात्सार्द्धदण्डञ्च यावन्मज्ज्न्येवावतिष्ठति। ततः पच्यमानात् तस्मान्मलं निर्गच्छति। तच्च व्यानवायुना प्रेरितं शिरामार्गैर्नेत्रयोरागत्य नेत्रविट् चक्षुष्कञ्च भवति ततःसारभूतस्य रसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च। तत्र सूक्ष्मोभागोमज्जानं पुष्णाति ततः स्थूलोभागोव्यानवायुना प्रेरितोधमनीभिः शिराभिश्च शुक्रस्य स्थानं सकलं शरीरं गत्वा शरीरारम्भकेण शुक्रेण सह मिश्रितो भवति। ततः शुक्रस्याग्निना पुनः पच्यते पच्यमाने तस्मिन्मलं नास्ति स हि सप्तधाधात्वग्निवर्णवत्। उक्तञ्च "स्वाग्निभिः पच्यमानेषु सप्तसु रसादिषु। न शुक्रे पच्यमानेऽपि हेमनीवाग्नये मलः"। अन्यच्च "स्वाग्निभिः पच्यमानेषु सप्तधान्येषु रसादिषु। षट्सु धातुषु जायन्ते मलानि खलयोजयुः। यथा सप्तधाधाते न मलं किञ्चित्काञ्चने। तथा रसे सप्तधा पक्वे न मलं शुक्रतां गते"। ततः सारभूतस्य रसस्य द्वौ भागौ भवतः। स्थूलःसूक्ष्मश्च तत्र सूक्ष्मश्लेष्मभागः ओजसश्च लक्षणमाह। "ओजः सर्वशरीरस्थं स्निग्धं शीतं स्थिरं सितम्। सोमात्मकं शरीरस्य बलं पुष्टिकरं मतम्" बलं चेष्टापाटवं तथा च। "चेष्टासु पाटवं यत्तु बलमदभिधीयते इति" यत्तु सुश्रुते रसादीनां शुक्रान्तानां धातूनां परमस्तेजसस्तु खल्वोजसस्तेव बलमिति तेजस्तेजोद्भवः"। अत्रायमभिप्रायः। यस्माद्रसादोजो भवति रसः सर्वधातुस्थानगतत्वात्तद्धातुवन्मन्यत इति। सर्वधातूनां स्नेहमोजःक्षीरे घृतमिव तदेव बलमिति" तत्कार्यकारणयोरभेदोपचारात् अभेदकथनं च विकित्सैक्यार्थम्। "अन्यच्च "गुरु शीतं मृदु स्निग्धं सान्द्रं स्थिरं तथाप्रसन्नं पिच्छिलं श्लक्ष्णमोजो दशगुणं स्मृतम्"। चरके तु "अष्टविन्दुप्रमाणन्तदौषद्रक्तं सपित्तकम्। अग्निसोमात्मकत्वेन द्विरूपं वर्णितं तु तत्"। वाग्भटश्च "ओजस्तु तेजो धातूनां शुक्रान्तानां परं स्मृतम्। हृदयस्थमपि व्यापि देहस्थिति निबन्धनम्। यस्य प्रणष्टौ देहस्य तदिष्टविलोदयाः। यच्चाश्रे नियतोनाशो यस्मिंस्तिष्ठति जीवनम्। निष्पद्यन्ते यतो भावाविविधा देहसंश्रयाः। उत्साहः प्रतिभा चैव लावण्यं सुकुमारता"। ततः स्थूलभागो रसोमासेन पुंसां शुक्रं स्त्रीणां त्वार्त्तवं शुक्रं च भवति। उक्तञ्च सुश्रुते "एवं मासेन रसः शुक्रीभवति स्त्रीणामार्त्तवं च भवतीति चेति" चकारात् स्त्रीणामपि शुक्रं भवति। अतएवोक्तं सुश्रुते। "योषितोऽपि सवत्येव शुक्रं पुंसः समागमे। तच्च गर्भस्य किञ्चित्तु करोतीति न चिन्त्यते" गर्भस्य शुक्रस्य, विद्धतस्य तु गर्भस्य कारणत्वादपि भवति यत उक्तं "यदा नार्यावुपेयातां हृष्टस्त्रीपौ कथञ्चन। सङ्गत्यौ शुक्रमन्योन्यमनस्थित्वात् जायते" इति। एतेन स्त्रीणां सप्तमोधातुरार्त्तवं शुक्रमष्टम इति बोधितम् आशयाधिक्यवत्। "स्त्रीणां गर्भोपयोगी स्यादार्त्तवं सर्वसम्मतम् तासामपि बलं वर्षं शुक्रं पुष्टिं करोति हि"। एवं रसएव केदारकुल्यान्यायेन सर्वान्धातून् पूरयति मासेन नवदण्डोत्तरेण शुक्रमार्त्तवञ्च भवति इति सिद्धान्तः। एवं सति रसाद्रक्तमिति मक्तमेव ततोमांसन्ततो रक्तोत्पत्तेरनन्तरंमांसं जायते रसादेवेत्यर्थः मांसान्मेदः प्रजायते इति मांसादनन्तरं मेदः प्रजायते रसादेवेत्यर्थः। मेदसोऽस्थि मेदसोऽप्येऽस्थि जायते रसादेवेत्यर्थः। एवं ततोमज्जा मज्ज्ञोऽप्ये शुक्रस्य सम्भव इत्यर्थः। रसःशरीरे त्रिधा सञ्चरति तथाचोक्तम्। "रसः

शरीरे यद्वार्चिर्ज्वलनवत् त्रिधा । संचरत्यतुरूपोऽयं नित्यमेव हि देहिनाम्" । अस्यायमभिप्रायः पुरुषास्त्रीष्वाग्नयोऽध्यमाग्नयोमन्दाग्नयश्च भवन्ति तत्र तीक्ष्णाग्नीनां रसः शब्दज्वलनवच्छीघ्रं सञ्चरति । मध्यमाग्नीनामर्चिःसन्तानवन्मध्यवेगेन सञ्चरति । मन्दाग्नीनां जलसन्तानवन्मन्दं सञ्चरति । तेन मासेन रसः शुक्रं भवति यदुक्तं तन्मध्यमाग्नीनधिकृत्योक्तं दीप्ताग्नीनां तु रसः किञ्चिदूनेन मासेन शुक्रं भवति । मन्दाग्नेस्तु किञ्चिदधिकेन मासेनेति सिद्धान्तः" ।

असृग्धरा स्त्री असृक् धरति धृ+अच् । शोणितधारिण्यां त्वचि । अण् असृग्धाराप्यत्र ।

असृग्वहा स्त्री असृक् शोणितं वहति अच् । शोणित वहावां नाड्यां तद्विवरणं शुश्रुते "सप्त सिराशतानि भवन्ति । याभिरिदं शरीरमारामइव जलवाहिनीभिः केदारइव च कुल्याभिरुपस्निह्यतेऽनुस्नेह्यते चाकुञ्चनप्रसारणादिभिर्विशेषैः ॥ द्रुमपत्रसेवनीनामिव च तासां प्रतानानासां नाभिर्मूलं ततश्च प्रसरन्त्यूर्ध्वमधश्चिर्यक् च । भवतश्चात्र ॥ यावत्यस्तु सिराः काये सम्भवन्ति शरीरिणाम् । नाभ्यां सर्वा निबद्धास्ताः प्रतन्वन्ति समन्ततः ॥ नाभिस्थाः प्राणिनां प्राणाः प्राणाच्चाभिर्व्यपाश्रिता । सिराभिराततां नाभिमक्षनाभिरिवारकैः ॥ तासां मूलसिराश्चत्वारिंशत्तासां वातवाहिन्यो दश पित्तवाहिन्यो दश कफवाहिन्यो दश दश रक्तवाहिन्यः । तासान्तु वातवाहिनीनां वातस्थानगतानां पञ्चसप्ततिशतं १७५ भवति तावत्य एव १७५ पित्तवाहिन्यः पित्तस्थाने, कफवाहिन्यश्च कफस्थाने रक्तवाहिन्यश्च यकृत्प्लीह्नोरेवमेतानि सप्त सिराशतानि ॥ तत्र वातवाहिन्यः सिरा एकस्मिन् सक्थि पञ्चविंशतिः । एतेनेतरसक्थिबाहू च व्याख्यातौ ॥ विशेषतस्तु कोष्ठे चतस्रिंशत्तासां शुद्धमेट्राञ्चिताः स्रोत्याभटौ । द्वे द्वे पार्श्वयोःषट् पृष्ठे तावत्यश्च हृच्छोदरे दश वक्षसि ॥ एकचत्वारिंशच्चतस्रश्च ऊर्ध्वं, तासां चतुर्दश ग्रीवायाम् । कर्णयोश्चतस्रः । नव जिह्वायां । षट्नासिकायां । अष्टौ नेत्रयोः । एवमेतत् पञ्चसप्तत्यधिकशतं वातवहानां सिराणां व्याख्यातम् । एष एव विभागः शेषाणामपि ॥ विशेषतस्तु पित्तवाहिन्यो नेत्रयोर्दश कर्णयोर्द्वे । एवं रक्तवहाः कफवहाश्च । एवमेतानि सप्त सिराशतानि सविभागानि व्याख्यातानि । स्राः सिराः स्रुश्चरक्तं कुर्यात्स्रान्यान् शुद्धानपि ॥ यदा तु कुपितं रक्तं सेवते स्रवहाः सिराः । तदास्य विविधा रोगा जायन्ते रक्तसम्भवाः ॥ नहि वातं सिराः काश्चित् पित्तं केवलं तथा । श्लेष्माणं वा वहन्त्येता अतः सर्व्ववहाः स्मृताः ॥ प्रदुष्टानां हि दोषाणामुच्छ्रितानां प्रधावताम् । ध्रुवस्रोतोगमनमतः सर्व्ववहाः स्मृताः ॥ तत्रारुग्वा वातवहाः पूर्णत्वे वायुना सिराः । पित्तादुष्णाद्विलोहाच्च शीता गौर्व्यः स्थिराः कफात् ॥ अस्रग्वहास्तु रोहिण्यः सिरा नात्युष्णशीतलाः" ।

असृग्विमोक्षण न० असृजः शोणितस्य देहाद् विमोक्षणं स्रावणम् ६त० । देहात् दुष्टस्य दुष्टस्य वा रक्तधातोः स्रावणे निस्सारणे । तत्प्रकारादिकन्तु शुश्रुते "तस्माच्च शीते नात्युष्णे नास्निग्धे नातितापिते । वयसः प्रतिपीतस्य शोणितं मोक्षयेद्भिषक् । सम्यगास्वा यदा रक्तं स्वयमेवावतिष्ठते । शुद्धं तदा विजानीयात्सम्यग्विस्रावितञ्च तत् ॥ लाघवं वेदनाशान्तिर्व्याधेर्ह्रासपरिक्षयः । सम्यग्विस्राविते लिङ्गं प्रसादो मनसस्तथा ॥ त्वग्दोषा ग्रन्थयः शोफा रोगाः शोणितजाश्च ये । रक्तमोक्षणशीलानां न भवन्ति कदाचन ॥ अथ खल्वप्रवर्त्तमाने रक्ते एलाशीतशिवकुष्ठतगरपाठा भद्रदारुविडङ्गचित्रकत्रिकटुकागारधूमसुरहरिद्राकाकोलुरनक्तमालफलैर्यवाचाभं त्रिभिश्चतुर्भिः समैर्वा चूर्णीकृतैः सर्षपतैललवणप्रगाढैर्घृतसमवर्धयेदेवं सम्यक् प्रवर्त्तते । अथातिप्रवृत्ते रोध्रमधुकप्रियङ्गुपद्मकेशरैरिकसर्जरसरसाञ्जनशाल्मलीपुष्पमञ्जुष्ठाशिरीषधवगोधूमचूर्णैः शनैर्घृतसमवचूर्णाङ्कुरक्षयेद्वावपीडयेत् । सालसर्ज्जार्जुनारिमेदमेषशृङ्गधवधन्वनत्वग्भिर्वा चूर्णिताभिः क्षौमेण वा घ्राणितेन सघृतफेनलाजाचूर्णैर्वा व्रणोक्तैर्व्रणबन्धनद्रव्यैर्गाढं बध्नीयात् । शीताच्छादनभोजनागारैः शीतैः परिषेकप्रदेहैरुपाचरेत् क्षारेणाग्निना वा दग्ध्वोक्तं व्यधनादनन्तरं वा तामेवातिप्रवृत्तां सिरां विध्येत् । काकोल्यादिक्वाथं वा शर्करामधुमधुरं पाययेत् एणहरिणोरभ्रगवयमहिषवराहाणां वा रुधिरं क्षीरयूषरसैः स्निग्धैर्वा श्रीयादुपद्रवांश्च यथास्वमुपाचरेत्" । उपद्रवास्तत्रैवोक्ता यथा ॥ "धातुत्वाच्छुते रक्ते मन्दः सञ्जायतेऽनलः । पवनश्च परं कोपं याति तस्मात् प्रयत्नतः ॥ तस्मात्तीक्ष्णैर्लघुभिः स्निग्धैः शोणितवर्द्धनैः । ईषदम्लैरनम्लैर्वा भोजनैः समुपाचरेत् ॥ चतुर्विधं यदेतद्धि रुधिरस्य निवारणम् । सन्धानं स्कन्दनञ्चैव पाचनं दहनं तथा ॥ व्रणं कषायः

स्रवते रक्तं स्कन्दयते च्छिनम्। तथा सम्याचयेद्व्रणं दाहः सङ्कोचयेत् शिराः। अस्कन्दमाने रुधिरे सन्धानानि प्रयोजयेत्। सन्धाने भ्रश्यमाने तु पाचनैः सम्पाचयेत्॥ कर्म्मभिरेतैस्त्रिभिर्व्वैद्यः प्रयतेत यथाविधि। असिद्धिमत्सु चैतेषु दाहः परम इष्यते। सप्तसूदोषे रुधिरे न व्याधिरतिवर्त्तते। सावशेषे ततः स्थेयं न तु कुर्य्यादतिक्रमम्॥ देहस्य रुधिरं मूलं रुधिरेणैव धार्य्यते। तस्माद्यत्नेन संरक्ष्यं रक्तं जीव इति स्थितिः॥ शुतरक्तस्य सेकाद्यैः शीतैः प्रकुपितेऽनिले। शोफं सतोदं कोष्णेन सर्पिषा परिषेचयेत्॥

रूपाढ्यवातस्त्रविरशीरुदुर्ब्बलनारीसुकुमाराणामनुपद्रवं परमसुकुमारोऽयं शोणितावसेचनोपायोऽभिहितो जलौकसः। तत्र वातपित्तकफदुष्टशोणितं यथासंख्यं कृष्णजलौकालाबुशिरवसेचयेत् स्निग्धशीतरूक्षत्वात् सर्व्वाणि सर्व्वेषां। भवन्ति चात्र। उष्णं समधुरं स्निग्धं गवां रक्तं प्रकीर्त्तितम्। तस्माद्दातोपसृष्टे तु हितं तद्वसेचने। शीताधिवासा मधुरा जलौका वारिसम्भवा। तस्मात्पित्तोपसृष्टे तु हिता सा स्रवसेचने। अलाबु कटुकं रूक्षं तीक्ष्णञ्च परिकीर्त्तितम्। तस्माच्छ्लेष्मोपसृष्टे तु हितं तद्वसेचने। तत्र प्रच्छिते तनुवस्त्रपटलावनद्धेन श्लक्ष्णेन शोणितमवसेचयेदाशूपघात्। सान्तर्दीपयाज्ञाम्बा"। जलौकसां विवरणम् अस्रपायशब्दे वक्ष्यते।

"अथ जलौकोऽवसेक्तुमाध्यव्याधितमुपवेश्य संवेश्य वा विरुक्षं चास्य तमवकाशं श्लक्ष्णोमवचूर्णेवैद्यरजः स्यात्। स्निग्धोताश्च ताः सर्षपरजनीकल्कोदकप्रदिग्धगात्रीः सलिलसरकमध्ये मुहूर्त्तस्थिता विगतक्लमा ज्ञात्वा ताभीरोगं याचयेत्। सूक्ष्मशुक्लार्द्रपिच्छिलोतावच्छ्वां ज्ञात्वा सुखमपाहरणायादश्लक्ष्णं क्षीरविन्दुं शोणितविन्दुं वा दद्याच्छस्त्रपदानि वा कुर्वीत यद्येवमपि न स्निग्धोयात्तदान्यां याचयेत्। यदा च निविशते ऽस्यशुरवदाननं ज्ञात्वोद्गम्य च स्रस्तं तदा जानीयादुत्सृष्टोतीति स्निग्धां चार्द्रवस्त्रावच्छन्नां धारयेत् सेचयेच्च। दंशे तोदकण्डूप्राडभावैर्जानीयाच्छ्लेष्मनियमादस्य इति शुद्धमाददानमपनयेत्। अथ शोणितगन्धेन न सुप्तेनुखसखाः सैन्धवचूर्णेनावकिरेत्। अथ पतितां तण्डुलकणेन प्रदिग्धगात्रीं तैलसवर्णाभ्यक्तसर्षी वामहस्ताङ्गुष्ठाङ्गुलिभ्यां स्निग्धोपुच्छां दक्षिणहस्ताङ्गुष्ठाङ्गुलिभ्यां शनैः शनैरनुलोममनुमार्जयेदा सुखाद्दामयेत्तावद्यावत्सम्यग्वान्तलिङ्गानीति। सम्यग्वान्ता सलिल सरकन्यस्ता भोक्तुकामा सती चरेत्। वा सीदति न चेष्टते सा दुर्व्वान्ता तां पुनः सम्यग्वामयेत्। दुर्व्वान्तायां व्याधिरसाध्य इन्द्रमदो नाम भवति। अथ सुवान्तां पूर्व्ववत्सञ्चिदध्यात् शोणितस्य च योगायोगानवेक्ष्य जलौकोव्रणान्मधुनावघट्टयेच्छीताभिरद्भिश्च परिषेचयेद्भीत वा व्रणं कषायमधुरस्निग्धशीतैश्च प्रदेहैः प्रदिह्यादिति। भवति चात्र। चेतांसि मथ्नं जातीः पोषणं सावचारणम्। जलौकसाञ्च यो वेत्ति तन्त्राध्यानं स जयेद्गदान्"।

अस्रज् न० न स्रज्यते इतररागवत् संसृज्यते सहजत्वात् न+सृज्-किन्, अस्यते क्षिप्यते इतस्ततो नाडीभिः अस् अञ्जि वा। १शोणिते २मङ्गलपद्मे च तस्य रक्तवर्णत्वात्तथात्वम्। कुङ्कुमे, ३विष्कम्भावधिके ४षोड़शे योगे। शोणितोत्पत्तिरुक्ता भाव०प्र०। "यदा रसोयकृद्याति तत्र रञ्जकपित्ततः। रागं पाकञ्च संप्राप्य स भवेद्रक्तसंज्ञकः। रक्तं सर्व्वशरीरे तु जीवस्याधार उत्तमः। स्निग्धं गुरु चलं स्वाद्य विदग्धं पित्तवद्भवेत्"। तस्योत्तमत्वञ्चोक्तं तत्रैव "जीवोवसति सर्व्वस्मिन् देहे तत्र विशेषतः"। वीर्य्यं रक्ते मले तस्मिन् क्षीणे याति क्षयं क्षणात्"। वीर्य्यं रक्ते मले च शरीरारम्भके वाग्भटोक्तपरिमाणयुक्ते शुद्धे जीवोवसति न तु दुष्टे प्रदुष्टे रक्तस्रावणोपदेशस्य विधानात्। पित्तवद्भवेदस्रं भवेदित्यर्थः॥ तस्य स्थानम्" "यकृत् प्लीहा च रक्तस्य मुख्यस्थानं तयोः स्थितम्"। अन्यत्र संस्थितवतां रक्तानां पीतता भवेत्" इति भा०प्रका०। सुश्रुते शोणितोत्पादविवरणमन्यथोक्तं यथा "अथातः शोणितवर्णनीयमध्यायं व्याख्यास्यामः। तत्र पाञ्चभौतिकस्य चतुर्विधस्य षड्रसस्य द्विविधवीर्य्यस्याष्टविधवीर्य्यस्य वानेकगुणस्योपयुक्तस्य आहारस्य सम्यक् परिणतस्य यस्तेजोभूतः सारः परमसूक्ष्मः स रसइत्युच्यते। तस्य च हृदयं स्थानं स हृदयाच्चतुर्विंशतिं धमनीरनुप्रविश्योर्द्ध्वगा दश दश चाधोगामिन्यश्चतस्र स्तिर्य्यगाः कृत्स्नं शरीरमहरहस्तर्पयति वर्द्धयति धारयति यापयति जीवयति चाहरहेतुकेन कर्म्मणा। तस्य शरीरमनुधावतोऽनुमानादनिरूपणीयतिव्या क्षयवृद्धिभ्यां क्षयतः। तस्मिन् सर्व्वशरीरावयवदोषाद्यमलाशयानुसारिणि रसे जिज्ञासा किमयं सौम्यस्तैजस इति। अत्रोच्यते स खलु द्रवानुसारिस्नेहनजीवनतर्पणधारणादिभिर्विशेषैः सौम्य इत्यवगम्यते। स खल्वाद्यो रसो यकृत्प्लीहानौ प्राप्य रागमुपैति। भवतश्चात्र॥ "रञ्जितास्तेजसा त्वापः शरीरस्थेन देहिनाम्।

अव्यापन्नाः प्रसन्नेन रक्तमित्यभिधीयते ॥ रसादेव स्त्रिया रक्तं रजःसंज्ञं प्रवर्त्तते । तद्वर्षाद्द्वादशाद्ध्वं याति पञ्चाशतः क्षयम् ॥ आर्त्तवं शोणितं स्त्रीणामेवमग्नेरोमीयत्वादर्भस्य पाञ्चभौतिकत्वापरे जीवरक्तमाङ्कुराचार्याः ॥ "विस्रता द्रवता रागः स्पन्दनं लघुता तथा । भूम्यादीनां गुणा ह्येते दृश्यन्ते चात्र शोणिते" । [वाम् ।

असृपाटी स्त्री असृजः पाटी परिपाटी ष० । शोणितधारा-

असेचनक त्रि० न सिच्यते क्षयति मनोऽत्र सिच–ल्युट् संज्ञायां कन् । १अत्यन्तप्रियदर्शने यद्दर्शनान्मनो न क्षयति तत्र "नयनयुगासेचनकम् मानसहन्त्यपि दुष्प्रापम्" सा०द० । सेचनं सेकः अभावे न०त० स्वार्थे कन् । २सेचनाभावे न०ब० । ३सेचनशून्ये त्रि० ।

असेवन न० अभावे न०त० । १सेवाभावे न०ब० । २सेवाशून्ये

असौ अव्य० सो–वा०–डौ न०त० । अदःशब्दार्थे । "असौनामाऽयमिदं रूप इति" शत०ब्रा० । अयञ्च साक्षादादिः इति बहवः । असौऽत्र । गकारत्वे तु तत्र गणे अग्नौ इति पठितम् व्याख्यातञ्च अग्नौ इति तीक्ष्णत्वे अग्नोऽत्रेति" इति । [२सौन्दर्य्यशून्ये त्रि० ।

असौन्दर्य्य न० अभावे न०त० । १सौन्दर्य्याभावे न०ब० ।

असौम्य त्रि० विरोधे न०त० । सौम्यत्वविरोधिघोरत्वयुक्ते

असौम्यस्वर त्रि० असौम्यः स्वरोयस्य । १काकतुल्यमन्दस्वरयुक्ते । २कठोरस्वरे च । [२सौम्यस्वरशून्ये त्रि० ।

असौष्ठव न० अभावे न०त० । १सौष्ठवाभावे न०ब० ।

अस्कन्न त्रि० स्कन्द–क्त न०त० । अक्षरिते । "स्वस्कन्नं हविरसादिति" शत०ब्रा० ।

अस्कम्भन त्रि० स्कम्भ–ल्युट् न०त० । १रोधनाभावे न०ब० । २रोधनशून्ये । "अस्कम्भने सविताद्यामदंहत्" । १०,१४८,१

अस्कृधोयु त्रि० क्षतः हसः निरु० न०त० पृ० साधु । १अविच्छिन्ने २अहसे च । "अस्रे धत्तं यदसदस्कृधोयु" ऋ० ७,५३,२ । "युवोर्मित्रावरुणावस्कृधोयु" ऋ० ६,६७, ११ । अस्कृधोयुरजरः ६,२२,३ । "अस्कृधोयुरविच्छिन्नः" भा० ।

अस्खलित त्रि० न०त० । १अप्रच्युते स्वकर्त्तव्ये २अप्रमत्ते च "भूभृद्भिरप्यस्खलिता खलूक्तैः" माघः । "स मे चिरायास्खलितोपचाराम्" रघुः ।

अस्त च० अस्यन्ते सूर्य्यकिरणा यत्र आधारे क्त । १पश्चिमाचले, "अधिरोढुमस्तगिरिमध्यपतत्" माघः । "विडम्बय त्वस्तनिमग्नसूर्य्यम्" रघुः । कर्मणि क्त २क्षिप्ते ३अवसिते च त्रि० "निरस्तः परावसुः" भवदेवः । "गतिरप्यास्तसंस्था मतिः" मालती० । "निरस्तगाम्भीर्यमपास्तधैर्यम्" माघः । भावे क्त । ४दर्शनायोग्यत्वे ५अवसाने न० । आधारे क्त । ज्योतिषोक्ते ६लग्नात् सप्तमे स्थाने न० । लग्नात् सप्तमस्थानस्य तथात्वञ्च तस्योदये लग्नस्यादर्शनहेतुत्वात् । तथा हि द्वादशराशिचक्रात्मकस्य प्रवहवायुनानिशं पश्चात्क्रीयमाणस्य भचक्रस्य मध्ये दिवा षट् राशयो रात्रौ च षट् क्रमेणोद्गच्छन्ति तत्रोदितलग्नानां च षण्णामेव दर्शनयोग्यता इतरेषां षण्णां तु भूमण्डलेनाच्छादनात्र दृश्यता । तत्र यस्य यस्य राशेरुदयः यस्मिन् समये जायते ततः सप्तमराशेरुदयसमये तस्य तस्यास्तत्वम् अदर्शनयोग्यत्वं भवतीति सप्तमराशेरुदयकालस्यास्तकारित्वम् । "अस्तलग्नात् सुखास्तान्यरिपुरन्ध्रेष्वशोभना" नील०ता० । ७अदर्शनप्राप्ते रव्यादिग्रहे त्रि० सूर्य्यादिग्रहाणामपि प्रागुक्तरीत्यास्वाधिष्ठितराश्युदयापेक्षया सप्तमराश्युदयेऽस्तत्वम् यथोक्तं सि०शि० । "निजनिजोदयलग्नसप्तमे सप्तदयोऽपि भवेद्घनभःसदाम् । भवति चास्तविलग्नसप्तमे प्रतिदिनेऽस्तसमयः प्रवक्रमात्" निशीथलग्नादुदयास्तलग्ने न्यूनाधिके यस्य खगः स दृश्यः । दिनेऽपि चन्द्रोरविसन्निधानात् नास्तंगतत्वेन सति दर्शने भा" । "नक्षत्राणामप्युदयास्तज्ञापनमपि तत्रैव "दृक्कर्मणा पलभवेन तु केवलेन भानां सुनेर्ह्यरिपोरुदयास्तलग्ने । कृत्वा तयोरुदयलग्नमिनं प्रकल्प्य लग्नं ततो निजनिजे पठितेष्टकाले" । यत् स्यादसावुदयभानुरथास्तलग्नादुच्यस्तं विभार्धमपि लग्नकमस्तसूर्यः । इष्टोनयुक् ई० घटिकास्यच यास्तलग्नाल्लग्नं क्रमेण मदनोनितमस्तसूर्यः । स्याद्वुद्भो निजनिजोदयभानुतुल्ये सूर्येऽस्तभास्करसमेऽस्तमयश्च भानाम् । अत्राधिकोनकलिका रविभुक्तिभक्ता यातैष्यवासरमितिश्च तदन्तरे स्यात् । यस्योदयार्कादधिकोऽस्तभानुः प्रजायते सौम्यशरातिदैर्घ्यात् । तिग्मांशुसान्निध्यवशेन नास्ति विस्पष्टमस्तासमयः कथञ्चित्" । "भानामगस्त्यस्य लुब्धकस्य च पूर्ब्बवदुदयास्तलग्ने साध्ये परन्तु केवलेन पलभवेन दृक्कर्मणा । ध्रुवस्य क्रतायनदृक्कर्मकत्वात् पुनरावर्त्तं दृक्कर्म न कर्त्तव्यमित्यर्थः । तत्रोदयलग्नमर्कं प्रकल्प्य लग्नं साध्यम् । तच्च स्वकीये पठितेष्टकाले । एवं यल्लग्नं सिध्यति स उदयार्को ज्ञातव्यः । अथ यदस्तलग्नमानीतं तच्चार्कं प्रकल्प्य निजनिजेष्टकाले विलोमं लग्नं साध्यम् । तद्राशिषट्कोनमस्तसूर्यसंज्ञं

भवति । अथवेष्टघटिकोनाभिः षष्टिघटिकाभिरस्त लग्नात् क्रमेण लग्नं साधितं तद्भदलोनितमस्तसूर्यो-भवति यदोदयभानुसमो भानुर्भवति तदा तस्य नक्षत्रस्योदयो भवति । यदास्तसूर्यसमस्तदास्तभवः । यदा-गस्योदयः किलाभीष्टदिनात् कियद्भिर्दिनैरिति विज्ञातुमिष्यते तदेष्टदिनार्कस्यागस्योदयार्कस्य चान्तरकला रवि-भुक्त्या भाज्याः । लब्धदिनैरगस्त्योदय एष्यः यद्युदयार्को महान् । यद्यूनस्तदा गतः । अतोपपत्तिः उदयास्तलग्नसाधने तु पूर्व्वं कथितैव । उदयलग्नोदये किल भस्योदयः यदोदयलग्नसमो रविर्भवति तदा रविणा सह तन्नक्षत्रमुदेति । तस्मादुदयात् प्राक् पठितेष्टघटिकातुल्यं कालं यावत् तन्नक्षत्रं रविप्रभाभिर्हृतं क्षितिजादुपरि-स्थमपि न दृश्यते । अथ पठितेष्टकाले यत् क्रमलग्नं तत्स्थानस्थितो रविस्तदयार्कतुल्यो भवति तथा रव्यस्तमयादनन्तरं नक्षत्रास्तमयात् पूर्व्वं प्रत्यक् क्षितिजादुपरि-स्थमपि नक्षत्रं पठितेष्टकालं यावन्न दृश्यते । अथ नक्ष-त्रस्य क्षितिजादुपरिस्थितत्वात् प्रत्यक्क्षितिजस्थेनार्केण न्यूनेन भवितव्यम् । अतोऽस्तलग्नात् पठितेष्टकाले व्यस्तं कार्यम् । तल्लग्नं प्राक्क्षितिजस्थं भवति । अतः षड्भो-नितं प्रत्यक्क्षितिजेऽस्तसूर्यो भवतीत्युपपन्नम् । इष्टोन-षष्टि ६०घटिकास्विष्टादौ वासना सुगमैव । यस्य नक्षत्रस्यो-दस्तार्कादस्तार्कोऽधिको भवति तस्य नक्षत्रस्यार्कसान्निध्यव-शादस्तं नास्तीति वेदितव्यम् । इदं कुत इत्यत आह सौम्यगरातिदैर्घ्यात् । यस्य भस्य सौम्यः शरो दीर्घो भवति तस्य पलोद्भवासवो बहवो भवन्ति ॥ तैर्विलोमलग्ने क्रिय-माणे उदयलग्नमूनं भवति । अस्तलग्नं क्रियमाणमधिकं भवति । ताभ्यां क्षुद्रदयास्तार्कौ साध्यौ । तदा-स्तार्केण किल न्यूनेन भवितव्यम् । अस्तार्कसमे रवौ किलादृश्यतारम्भस्ततः कियन्ति च दिनान्यदृश्यं भूत्वोदया-र्कसमे रवौ तद्भिन्नमुदेति । अत उदयार्केणाधिकेन भवितव्यम् । यतोऽर्कसन्निधिवशेनैतावुदयास्तौ । यदा यदा सौम्यशरस्य दीर्घत्वं यदा यदायनवशेन गोलस्य दक्षिणतो नामनं तदा तदोदयास्तार्कयोरल्पमन्तरं भवति । अल्पान्तरेऽल्पान्येव दिनानि तन्नक्षत्रमदृश्यं भवति । एवं यस्मिन् देशे उदयास्तार्कौ तुल्यौ भवतस्ततः परं तस्मिन् देशे तस्य नक्षत्रस्यार्कसन्निधावेनादृश्यता इति युक्तितः सिद्धम्" इति० । अस्तलग्नसाधनमप्युक्तं तत्रैव "यत्र लग्नमपमण्डलं कुजे तद्दृष्टाद्यमिह लग्नमुच्यते । प्राचि । पश्चिमकुजेऽस्तलग्नकं मध्यलग्नमिति दक्षिणोत्तरे" कुजे भूमिमण्डलगते रेखाद्वये अपमण्डलं ततो निरक्षदेशम-ण्डलम् । यद्राशावुदयास्तांशानाह तत्रैव । "प्राच्या-मुदेति क्षितिजोऽदर्शैः २८ शक्रै १४ गुरुः सप्तकु-भिश्च १७मन्दः । स्वोदयान्लोनित ३६०चक्रभागै-२२२ । २४६ । २४३ । स्त्रयो व्रजल्वस्तमयं प्रतीच्याम् । खार्त्तै ५० र्जिनै २४ र्क्षसितयोरुदयः प्रतीच्यामस्तञ्च पञ्चतिथिभि १५५ र्मुनिसप्तभूभिः १७७ । प्रागुड्डमः शरनखै २०५ स्त्रिधृतिप्रमाणै-१८२ रस्तञ्च तत्र दश-वह्निभि २१० रङ्गदेवैः २२६ । अवक्रवक्रास्तम-योदयोक्तभागाधिकोनाः कलिका विभक्ताः । द्राक्केन्द्रभुक्ता-प्रदिनैर्गतैर्ध्यैरवक्रवक्रास्तमयोदयाः स्युः" । "बाले वा यदि वा वृद्धे शुक्रे चास्तमुपागते । मलमास इवैतानि वर्ज्जयेद्वेदवर्शनम् । पक्षं वृद्धस्तु पूर्व्वेण दशाहं पश्चिमेन तु । प्रत्यग्बालो दशाहन्तु पूर्व्वेण च दिनत्रयम्" ज्यो०त० पूर्व्वेणेति प्रातःप्रातः पूर्व्वदिशि वृद्धा रविकिरणाच्छन्न-तया न दृश्यते चेद्यदहस्तदा प्रागस्तमितः तत्रास्तमितात् प्राक् पक्षं वृद्धः । पश्चिमेनेति । एवं सायंसायं अपरदिशि वृद्धा रविकिरणाच्छन्नतया न दृश्यते चेद्यदह-स्तदा प्रत्यगस्तमितस्तत्रास्तमितात् प्राक् दशाहं वृद्धः" । "बालिं यद्दिवसाद्यास्ते जीवस्य भार्गवस्य च । द्वासप्ततिर्मे-लस्ते पादास्ते द्वादश क्रमात्" । इति ज्योतिर्विदुक्त-कालानन्तरमपरदिशि दृश्यते चेत्तदा दशाहं प्रत्यग्बालः पूर्व्वदिशि चेत्तदा दिनत्रयं प्राग्बाल इति भङ्गान्तरेणाह । "पक्षं वृद्धोमहास्ते तु बालत्वात् दशाहिकः । पादास्ते तु दशाहानि वृद्धोबालोदिनत्रयम्" इति च ज्यो०त०रघु० ।

अस्तक पु० अस्तं अपुनरावृत्तिम् अवसानं वा करोति अस्त+ ण्वुच्-ण्वुल् । निर्व्वाणमोक्षे ।

अस्तग त्रि० अस्तमदर्शनं गच्छति गम-ड दैत० । १ सूर्य्य-किरणाच्छन्नतया अदृश्ये ग्रहे २अदर्शनगतमात्रे च । अस्त-गतादयोऽत्र ।

अस्तगमन न० अस्तस्यादर्शनस्य गमनम् । यद्राशां स्वाक्रान्त-राश्यमेक्षया सप्तमराश्युदये अदर्शनगमने "भीमसेन भजे-यास्त्वं प्रागस्तगमनाद्रवेः" भा० आ० प० १५५ अ० ।

अस्तम् अव्य० अस-तमि । १नाशे, २अदर्शने च । "दण्डे-नास्तमितत्विषा" कुमा० । "राज्ञमस्तमिरेश्वरम्" रघुः । "सर्व्वञ्च तिलसंबन्धं नाद्यादस्तमिते रवौ" । "नेक्षेतोद्य-नास्तमितौ नाक्षांशान्तं कदाचन" चतुरोऽस्तमिते सूर्य्ये

शिशुचान्द्रायणं स्मृतम्" मनुः। "धृतिरस्तमिता गतिश्च्युता" रघुः। [पञ्चम्यां[ङसि

अस्तमती स्त्री० अस्तमतति अत-अच्-गौरा० ङीष्। शाल-

अस्तमन न० अस-ल्युट्-भावेऽप् अस्तम् अस्यस्य अनःगतिः। भगोलकत्वया तिरोधानेन, १ सूर्य्यादेरदर्शनगमने "तिरोधानञ्च यत्रैति तदेवास्तमनं रवेः। नैवास्तमनमर्कस्योदयः सर्व्वदा सतः" इति ज्योतिषोक्तेस्वात्मम् ब०। "उदयास्तमने नाथ! दर्शनादर्शने रवेः" पुरा० "उदयास्तमनक्लेशैर्न क्लिश्यति न शोचति" भा०ब० २५७ अ०। सूर्य्यास्तमनवेलायामासेदुस्ते महद्वनम्" भा०आ०प०२अ० "उदयास्तमने भानुः प्रदक्षिणमवर्त्तत" भा०भी०प०। २तत्काले च।

अस्तमय पु० अस्तीयते क्षीयते यत्र मिनु-अच् वा न ह्रस्वः। १प्रलये, २सूर्य्यादेरदर्शने "करोत्यकालास्तमयं विवस्वतः" किरा०। "उदयवनाम सवितुरस्त्रिवासिनां प्राणिनां चक्षुर्गोचरापत्तिस्तदत्ययश्चास्तमयः न परमार्थत उदयोऽस्तमयोवा" तन्निवासिनाञ्च प्राणिनामभावे तान् प्रति तेनैव मार्गेण गच्छन्नपि नैवोदेता नास्तमेतेति चक्षुर्गोचरतापत्तेस्तदत्ययस्य च तत्राभावात्" शा०उ०भाष्यम्। तथा च भूवृत्तार्द्धान्तरालस्थानएवोदयास्तमयौ भवतः "लङ्कापुरेऽर्कस्य यदोदयः स्यात् तदा दिनार्द्धं यमकोटिपुर्य्याम्। अधस्तदा सिद्धपुरेऽस्तकालःस्याद्रोमके रात्रिदलं तथैव" सि०शि०। भूवृत्तचतुर्थांशे स्थितानां पुरांमध्ये प्रथमपुर्य्यासदृशे तृतीयेऽस्तमयोक्तेस्वात्मम्। भा० भाष्ये तु यदाऽरावल्यां मध्याह्नगतः सविता तदा संयामित्यास्तुद्यन् दृश्यते तत्र मध्याह्नगोचरोवारुण्यास्तुद्यन् दृश्यते इत्युक्तम्" यहाणां च सूर्य्यस्यातिप्रत्यासत्त्या प्रकाशाभावोऽस्तमयः तद्वियोगे चोदयः। "रविणास्तमयोयोगो वियोगस्तूदयो भवेत्" स्मृतेः अन्यग्रहाणां २ रवियोगे च।

अस्तरण न० अभावे न०त०। स्तरणाभावे। तत्र दीयते कार्य्यम् वा ल्युटा० अण्। आस्तरणम् तत्र देये कार्य्ये च त्रि०।

अस्ताघ त्रि० अस्तमघं कालुष्य-यत्र। अतिगभीरे हेम०।

अस्ताचल पु० अस्यन्ते किरणा यत्र आधारे क्त कर्म०। पश्चिमाचले अस्तगिरौ। "अस्ताचलचूड़ावलम्बिनि भगवति मरीचिमालिनि" काद० अस्ताद्रिप्रभृतयोऽप्यत्र।

अस्ति अव्य० अस्-क्तिप्। १स्थितौ, विद्यमानतायाञ्च "अस्ति नास्ति न जानातीति" चाण०। २तद्वति च अस्तिवीरा अस्तिपरलोक इति मतिर्यस्य आस्तिकः नास्तिकः। चतुरर्थ्यां पञ्चा० फक्। आस्तायनः। तत्सन्निकृष्टदेशादौ त्रि०।

अस्तिकाय पु० अस्ति कायः स्वरूपं यस्य। जैनमतसिद्धे विद्यमानतास्वरूपे पदार्थभेदे। अस्तिकायाश्च पञ्चविधाः जीवास्तिकायः पुद्गलास्तिकायः धर्म्मास्तिकायः अधर्म्मास्तिकायः आकाशास्तिकायश्चेति अर्हच्छब्दे ३८६ पृष्ठे विवरणम्। भा०भाष्ये तन्मतमन्यस्य निराकृतं यथा "सर्व्वेषामप्यन्येषामवान्तरप्रभेदान् बहुविधान् स्वसमयपरिकल्पितान् वर्ज्जयन्ति। सर्वत्र चेमं सप्तभङ्गीनयन्यायमवतारयन्ति। स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च स्याद वक्तव्यः स्यादस्ति चावक्तव्यः स्यान्नास्ति चावक्तव्यः स्यादस्ति नास्ति चावक्तव्य इति। एवमेवैकत्वनित्यत्वादावपीमं सप्तभङ्गीनयं योजयन्ति। अत्राचक्ष्महे नायमभ्युपगमोयुक्त इति। कुतः "एकस्मिन्न सम्भवात्" सू०। नह्येकस्मिन् धर्म्मिणि युगपत्सदसत्त्वादि विरुद्धधर्मसमावेशः सम्भवति शीतोष्णवत्। यदपि सप्त पदार्था निर्द्धारिता एतावन्त एवंरूपाश्चेति ते तथैव वा स्युः। नैव वा तथा स्युः। इतरथा हि तथा वा स्युर्न तथा वेत्य निर्द्धारितरूपं ज्ञानं संशयज्ञानवदप्रमाणमेव स्यात्। ननु अनेकात्मकं वस्त्विति निर्द्धारितरूपमेव ज्ञानमुत्पद्यमानं संशयज्ञानवदप्रमाणं सम्भवितुमर्हति। नेति ब्रूमः निरङ्कुशं ह्यनेकान्तं सर्व्ववस्तु प्रतिजानानस्य निर्द्धारणफलस्यापि वस्तुत्वाविशेषात् स्यादस्तिस्यान्नास्तीत्यादिविकल्पोपनिपातादनिर्द्धारणात्मकतैव स्यात्। एवं निर्द्धारयितुर्निर्द्धारणफलस्य च स्यात्। पक्षेऽस्तिता स्याद्यपक्षे नास्तितेत्येवं सति कथं प्रमाणभूतः संस्तीर्थकरः प्रमाणप्रमेयप्रमातृप्रमितिष्वनिर्द्धारितारूपदेष्टुं शक्नुयात् कथं वा तदभिप्रायानुसारिणस्तदुपदिष्टेऽर्थेऽनिर्द्धारितरूपे प्रवर्त्तेरन्। ऐकान्तिफलत्वनिर्द्धारणे हि सति तत्साधनानुष्ठानाय सर्व्वोलोकोऽनाकुलः प्रवर्त्तते नान्यथा। अतस्वानिर्द्धारितार्थं शास्त्रं प्रणयन्नुन्मत्तवदनुपादेयवचनः स्यात्। तथा पञ्चानामस्तिकायानां पञ्चत्वसंख्यास्ति वा नास्ति वेति विकल्पप्रमाणं स्यादिति तदेकस्मिन् पक्षे। पक्षान्तरे तु न स्यादित्यतोन्यूनसंख्यात्वमधिकसंख्यात्वं वा प्राप्नुयात्! नचैषां पदार्थानामवक्तव्यत्वं सम्भवति अवक्तव्यश्चेदुच्चैरनुच्चैश्चावक्तव्यश्चेति विप्रतिषिद्धम्। उच्चमानाच्च तथैवावधार्य्यन्नावधार्य्याच्च इति च तथावदवधारणफलं सम्यग्दर्शनमस्ति वा नास्ति

वा एवं तद्विपरीतमसम्यग्दर्शनमस्ति वा नास्ति वेति प्रत्यक्षलोकसपक्षत्वेव स्वात्र प्रत्यायवितरूपपक्षत्व। स्वर्गापवर्गयोश्च पक्षे भावः पक्षेचाभावः तथा पक्षे नित्यता तथा पक्षेचानित्यता इत्यनवधारणायां प्रवृत्त्यनुपपत्तिः। अनादिसिद्धजीवप्रवृत्तीनाञ्च स्वयास्वावबद्धभावानामयथावबद्धत स्वभावत्वप्रसङ्गः। एवं जीवादिषु पदार्थेष्वेकस्मिन् धर्मिणि सत्त्वासत्त्वयोर्विरुद्धयोरसम्भवात् सत्त्वे चैकस्मिन् धर्मेऽसत्त्वस्य धर्मान्तरस्यासम्भवादसत्त्वे चैवं सत्त्वस्यासम्भवाद सङ्गतमिदमार्हतं मतम्। एतेनैकानेकनित्यव्यतिरिक्ताव्यतिरिक्ताद्यनेकान्ताभ्युपगमानिराकृतामन्तव्याः। यत्तु पुद्गलसंघातेभ्योऽणुभ्यः सङ्घाताः सम्भवन्तीति कल्पयन्ति तत् पूर्व्वमेवाणुवादनिराकरणेन निराकृतम्भवतीत्यतोन पृथङ्निराकरणाय प्रयत्यते"। अस्तिनास्तिकायादयोऽप्युन्नेयाः। अणुवादनिराकरणद्वारम्भवादशब्दे दृश्यम्।

अस्तिचीरा स्त्री अस्ति चीरं यस्याः। बहुदुग्धवत्यां स्त्रीगव्यादौ।

अस्तित्व न० अस्ति भावः त्व। विद्यमानत्वे। "न हि देहान्तरसम्बन्धिन आत्मनः प्रत्यक्षेणास्तित्वज्ञाने लौकायतिकाः बौद्धाश्च प्रतिकूलाः स्युः नास्त्यात्मेति" ह० उ० भा०। "सर्व्वोहयात्मास्तित्वं प्रत्येति न नाहमस्मीति" शा०भा०। तल्। अस्तितायत्र स्त्री। "गौरस्तितावान् अस्तिपदसमभिव्याहृतगौःपदस्मारितत्वात्" शब्दश्र०। [स्त्रियां ङीप्।

अस्तिमत् त्रि० अस्ति विद्यमानं धनमस्य मतुप्। धनिनि

अस्तु अव्य० अस-दोप्तौ तुन्। १अनुज्ञायां, २पीड़ायाम् ३प्रतिज्ञेये ४अरुचायाम्, ५प्रकर्षे, ६अङ्गीकारे, ७प्रशंसायाम्, ८लक्षणे, ९अस्त्यापूर्वकाङ्गीकारे च। "अस्तोर्येति वक्तव्यम्" वार्त्ति० सम्। अस्तुङ्कारः अभ्युपगमः।

अस्तेन त्रि० न०त०। चोरभिन्ने।

अस्तेय न० अभावे न०त०। १स्तेयाभावे। "लोभस्य पुरतः केऽमी सत्यास्तेयापरिग्रहाः" प्रबोधच०। "अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहायमाः" पात०सू० उक्ते २यमभेदे च "बलाद्धरति वा परवित्ताहरणं स्तेयं तदभावोऽस्तेयम्" इत्तिः। तादृशयमानुष्ठानेऽवान्तरफलमपि तत्र दर्शितम्। "अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्" पात०सू०। दिव्यरत्नानां स्वयमागत्यनिकटे उपस्थितिरित्यर्थः।

अस्तोभ त्रि० नास्ति स्तोमः हुंफड़ादिः निरर्थकः शब्दोयत्र निरर्थकशब्दशून्ये "अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः" विवरणं स्तोभशब्दे। [पाठान्तरम्।

अस्त्य न० अस्ति विद्यमानतायै हितम् यत्। सत्ये निरुक्ते

अस्त्यान न० स्त्यै-क्त भावे न०त०। १निन्दायाम्, २मर्द्दने च। कर्त्तरि क्त स्त्यानः संहत न०त०। तद्विशे त्रि०।

अस्त्र न० अस्यते क्षिप्यते अस-ष्ट्रन्। १ क्षोपास्त्रे शरादौ करणे ष्ट्रन्। २चापे, धनुषि ३रिपुक्षेपणसाधने प्रहरणमात्रे खड्गादावपि। "प्रयुक्तमप्यस्त्रमितो ह्यथा स्यात्" "प्रत्याहृतास्त्रो गिरिशप्रभावात्"। "अतिप्रबन्धप्रहिताश्च दृष्टिभिः" इति च रघुः। "अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्वायमाणः" वेणी०। [कारत्वात्तयात्वम्।

अस्त्रकण्टक पु० अस्त्रं कण्टकइव। बाणे तस्यापस्य कण्टका-

अस्त्रकार त्रि० अस्त्रं करोति निर्म्मिमीते कृ-अण् उप० स०। शस्त्रनिर्म्माणकारके। ख्युल्। अस्त्रकारकोऽप्यत्र।

अस्त्रचिकित्सा स्त्री अस्त्रेण चिकित्सा। सुश्रुतोक्ते अस्त्रेण चिकित्साभेदे सा च यथा। "अस्मिन् शास्त्रे शस्त्रकर्म्मप्राधान्याच्छस्त्रकर्म्मैव तावत् पूर्व्वमुपदेक्ष्यामस्तत्सम्भारांश्च॥ तच्च शस्त्रकर्म्माष्टविधम्। तद्यथा। छेद्यं भेद्यं लेख्यं वेध्यमेष्यमाहार्य्यं विस्राव्यं सीव्यमिति॥ अतोऽन्यतमं कर्म्म चिकीर्षता वैद्येन पूर्व्वमेवोपकल्पयितव्यानि तद्यथा यन्त्रशस्त्रक्षाराग्निशलाकाग्रहकुशलौकालाबूजाम्बवोष्ठपिचुशोणितस्रुतपत्रपद्मधृतवसापयस्तैलघृतपेणकषायालेपनकल्कव्यञ्जनयोतोष्णोदककटाहादीनि परिकर्म्मिणस्तु स्निग्धाः स्थिरा बलवन्तः॥ ततः प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु दध्यक्षताम्नपानरत्नैरग्निं विप्रान् भिषजञ्चार्च्चयित्वा कृतबलिमङ्गलस्वस्तिवाचनं लघु भुक्तवन्तं प्राङ्मुखमातुरमुपवेश्य यन्त्रयित्वा प्रत्यङ्मुखो वैद्यो मर्म्मसिरास्नायुसन्ध्यस्थिधमनीः परिहरन्ननुलोमं शस्त्रं निदध्यादापूयदर्शनात् सद्यश्चापहरेच्छस्त्रमाशु च। महत्स्वपि च पाकेषु द्व्यङ्गुलं त्र्यङ्गुलं वा शस्त्रपदमृजं तत्रायतो विशालः समः सुविभक्त इति व्रणगुणाः भवन्त्यत्र॥ आयतस्तु विशालस्तु सुविभक्तो निराश्रयः। प्राप्तकालक्रियश्चापि व्रणः कर्म्माणि शस्यते॥ गौर्य्यमाणक्रिया शस्त्रतैक्ष्ण्यमस्रे दवेषधू। असंमोहश्च वैद्यस्य शस्त्रकर्म्माणि शस्यते॥ एकेन वा व्रणेनाशुध्यमानेनान्तरा बद्धावेष्ट्यापरान् व्रणान् कुर्य्यात्। भवति चात्र॥ यतो यतो गतिं विद्यादृजुको यत्र यत्र च। तत्र तत्र व्रणं कुर्य्याद्यथा दोषो न तिष्ठति॥ तत्र भ्रूगण्डशङ्खललाटाक्षिपुटौष्ठदन्तवेष्टकजानुजिह्वङ्गुलेषु तिर्य्यक्छेदं वदन्ति। चन्द्रमण्डलवच्छेदान् पाणिपादेषु कारयेत्। अर्द्धचन्द्रोक्तरोष्ठेपि गुदे मेढ्रे च बुद्धिमान्॥ अन्यथा

ह सिरास्नायुच्छेदनादतिमात्रं वेदना चिराद्व्रणसंरोहो मांसकन्दोप्रादुर्भावश्चेति । मूढगर्भोदरार्शोऽश्मरीभगन्दरक्षतरोगेष्वभुक्तवतः कर्म्म कुर्व्वीत । ततः शस्त्रमवचार्य्य शीताभिरद्भिराहरमाश्वास्य समन्तात्परिषेच्याङ्गुल्या व्रणमभिस्पृश्य प्रज्ञाल्य कषायेण क्षौद्रेणोदकमादाय तिलकल्कमधुसर्पिःप्रमाढ्यौषधयुक्तां वर्त्तिं प्रक्षिपेत् । ततः कल्केनाच्छाद्य नातिस्निग्धां नातिरूक्षां घनाङ्गुलिकान्दत्त्वा वस्त्रपट्टेन बद्ध्वा वाहयेदनारोग्नैर्धूपैर्धूपयेद्रोग्नैश्च मन्त्रैश्चां कुर्वीत । ततोगुग्गुल्वगुरुसर्जरसवचागोरसर्षपचूर्णैर्लवणनिम्बपत्रव्याभिश्चाज्ययुक्तैर्धूपैर्धूपयेत् । आज्यमेवेषु चास्य प्राणान् समालभेत" । "ततः क्षतरक्षमातुरमागारं प्रवेश्याचारिकमादिशेत् । ततस्तृतीयेऽहनि विस्रच्यैवं बद्ध्वा वाहयेत्पट्टेन नचैनं त्वरमाणोऽपरेद्युर्मोचयेत् । द्वितीयदिवसे परिमोक्षणादिष्यतो व्रणशिराद्युपसंरोहति तीव्ररुजश्च भवन्ति । अत ऊर्द्धं देशकालबलादीनवेक्ष्य कषायालेपनबन्धाहाराचारान्विदध्यात् । नचैनं त्वरमाणः सान्तर्दोषं रोपयेत् स हृच्छ्लेष्माग्न्यपचारेणाभ्यन्तरसङ्गं कृत्वा भूयोऽपि विकरोति ॥ भवन्ति चात्र । तस्मादन्तर्व्वहिश्चैव सुशुद्धं रोपयेद्व्रणम् । रूढेऽप्यजीर्णव्यायामव्यवायादीन् विवर्जयेत् । हर्षं क्रोधं भयञ्चापि यावदास्थैर्य्यसम्भवात् ॥ हेमन्ते शिशिरे चैव वसन्ते चापि मोक्षयेत् । त्वाक्षादृङ्मांसाच्छरङ्नाड्यवर्मांसपि च बुद्धिमान् ॥ प्रदोषागारवच्छौद्रं तत्र कुर्य्यात् प्रतिक्रियाम् ॥ या वेदना शस्त्रनिपातजाता तीव्रा शरीरं प्रदुनोति जन्तोः । एतेन सा याति सुखं क्षिप्रं कोष्णेन यष्टीमधुकान्वितेन ॥ अतिपातितेषु रोगेषु नेत्रद्विधिमिमं भिषक्" अस्त्राकारादि विवरणं तत्रैव "विंशतिः शस्त्राणि ॥ तद्यथा । मण्डलाग्रकरपत्रदृद्धिपत्रनखशस्त्रसूचिकोत्पलपत्रकार्द्धधारसूचीकुशपत्राटीमुखशरारीमुखान्तर्मुखवृद्धिकूर्चककुठारिकाव्रीहिमुखाराबेतसपत्रकवडिशदन्तशङ्खेषणय इति । तत्र मण्डलाग्रकरपत्रे स्यातां छेदने लेखने च । दृद्धिपत्रनखशस्त्रसूचिकोत्पलपत्रकार्द्धधाराणि छेदने भेदने च । सूचीकुशपत्राटीमुखशरारीमुखान्तर्मुखवृद्धिकूर्चकानि विस्रावणे । कुठारिकाव्रीहिमुखाराबेतसपत्रकाणि व्यधने सूची च । वडिशोदन्तशङ्खाहरणे । एषणेबन्धे आनुलोम्ये च । सूच्यः सेवने । इत्यष्टविधे कर्म्मण्युपयोगः शस्त्राणां व्याख्यातः । तेषामथ यथायोगप्रहणमालोपायः कर्म्मसु वक्ष्यते । तत्र दृद्धिपत्रं दृन्तफलसाधारणे भागे गृहीयाद्छेदनान्येवं सर्वाणि । दृद्धिपत्रं मण्डलाग्रञ्च किञ्चिदुत्तानपाणिना लेखने वक्रयोऽवचार्य्य दृन्ताग्रे विस्रावणानि । विशेषेण बालवृद्धसुकुमारभीरुनारीणां राज्ञां राजपुत्राणाञ्च तिक्रूर्चकेन विस्रावयेत् । तत्प्रच्छादितदृन्तमङ्गुष्टप्रदेशिनीभ्यां व्रीहिमुखम् । कुठारिकां वामहस्तन्यस्तामितरहस्तमध्यमाङ्गुल्याङ्गुष्ठविष्टब्धयाभिहन्यात् । आराकरपत्रं वक्रयो मूले । शेषाणि तु यथायोगं गृह्णीयात् । तेषां नामभिरेवाकृतयः प्रायेण व्याख्याताः । तत्र नखशस्त्रमेषणयावटाङ्कुशे सूच्यो वक्ष्यन्ते वडिशो दन्तशङ्कुवानताग्रे तीक्ष्णकण्टकप्रथमवयवपत्रमुखे । एषणी गण्डूपदाकारमुखी । प्रदेशिन्यग्रपर्व्वप्रदेशप्रमाणा सुद्रिका । दशाङ्गुला शरारीमुखी सा कर्त्तरीति कथ्यते । शेषाणि तु षडङ्गुलानि । तानि सुग्रहाणि सुलोहानि सुधाराणि सुरूपाणि सुसमाहितमुखायासकराणीति शस्त्रसम्पत् । तत्र वक्रं कुण्ठं खण्डं खरधारमतिस्थूलमत्यल्पमतिदीर्घमतिह्रस्वमित्यष्टौ शस्त्रदोषाः । अतो विपरीतगुणमाददीतान्यत्र करपत्रात्तद्धि खरधारमस्थिच्छेदनार्थम् । तत्र धारा भेदनानां क्षुरी । लेखनानामर्द्धक्षुरी । व्यधनानां विस्रावणानाञ्च कैशिकी । छेदनानामर्द्धकैशिकीति । तेषां पायना त्रिविधा क्षारोदकतैलेषु । तत्र क्षारपायितं शस्त्रमस्थिच्छेदनेषु । उदकपायितं मांसच्छेदनभेदनपाटनेषु तैलपायितं सिराधनस्नायुच्छेदनेषु । तेषां निशानार्थं श्लक्ष्णशिला भाण्डवर्षा । धारासंस्थापनार्थं शाल्मलीफलकमिति । भवति चात्र । यदा सुनिर्गतं शस्त्रं रोमच्छेदि सुसंस्थितम् । सुगृहीतं प्रमाणेन तदा कर्म्मसु योजयेत् ॥ अनुशस्त्राणि तु त्वक्सारस्फटिकाब्जकुरुविन्दजलौकाग्निक्षारनखशोजीशेफालिकाशाकपत्रकरीरबालाङ्कुरा इति । शिशूनां शस्त्रभीरूणां शस्त्राभावे च योजयेत् । त्वक्सारादि चतुर्व्वर्गं छेद्ये भेद्ये च बुद्धिमान् ॥ आहार्य्यच्छेद्यभेद्येषु नखं शस्त्रेषु योजयेत् । विधिः प्रवक्ष्यते पश्चात् क्षारवह्निजलौकसाम् ॥ ये सूक्ष्मगता रोगा नेत्रवर्त्मगताश्च ये । शोजीशेफालिकाशाकपत्रैर्व्विस्रावयेत्तु तान् ॥ एष्वेष्वेषणलाभे तु बालाङ्कुरा हिताः । शस्त्राण्येतानि मतिमान् शुद्धशैक्षाण्यसन्ति च । क्षारयेत्करणैः प्राप्तं कर्म्मक्षारं कर्म्मकोविदम् ॥ प्रयोगज्ञस्य वैद्यस्य सिद्धिर्भवति नित्यशः । तस्मात्परिचयः कार्य्यः शस्त्राणामादितः सदा" ॥

अस्त्रजित् पु० अस्त्रं तदाघातजं व्रणं जयति निवारकत्वात्। (कवाटवेट्) वृक्षभेदे।

अस्त्रजीविन् पु० अस्त्रेण जीवति णिनि। अस्त्रव्यापारेण जीविकावति शस्त्रजीव्यादयोऽप्यत्र अणु अस्त्रजीवोऽप्यत्र।

अस्त्रधारिन् त्रि० अस्त्रं धारयति धारि-णिनि। अस्त्र धारके। ख्वुल्। अस्त्रधारकोऽप्यत्र।

अस्त्रमन्त्र पु० अस्त्राणां प्रयोगसंहारयोर्मन्त्रः। १शस्त्रप्रयोगादिमन्त्रभेदे। "सम्प्रोक्षणं नाम सखे! ममास्त्रं प्रयोगसंहारविभक्तमन्त्रम्"। "उदङ्मुखः सोऽस्त्रविदस्त्र-मन्त्रम्" इति च रघुः। तन्त्रोक्ते अङ्गन्यासान्तर्गते फडिति २मन्त्रे च। [ख्तताकारके। ख्वुल् अस्त्रमार्जकोऽप्यत्र।

अस्त्रमार्ज्ज पु० अस्त्रं मार्ष्टि मृज-अण् उप०स०। शस्त्रती-

अस्त्रयुद्ध न० ६त०। अस्त्रेण युद्धे।

अस्त्रविद् पु० अस्त्रं तत्प्रयोगादि वेत्ति विद्-क्विप् ६त०। शस्त्रप्रयोगाद्यभिज्ञे "सोऽस्त्रविदस्त्रमन्त्रम्" रघुः।

अस्त्रविद्या स्त्री ६त०। १अस्त्रप्रयोगसंहारज्ञापकविद्यायाम् २तद्बोधके शास्त्रे च धनुर्वेदशब्दे विदृतिः।

अस्त्रवेद पु० अस्त्रस्य तत्प्रयोगादेः ज्ञापकोवेदः शास्त्रम्। धनुर्वेदे तच्छब्दे विदृतिः।

अस्त्रसायक पु० अस्त्रं क्षेप्यं सायकइव। १नाराचास्त्रे तस्य सायकतुल्यतया क्षेप्यत्वात्तथात्वम्। अस्यते शत्रुरनेन अस-करणे ष्ट्रन् कर्म्म०। २सर्व्वलौहमये बाणे।

अस्त्रहीन त्रि० अस्त्रेण तत्प्रयोगेण वा हीनः। १अस्त्रशून्ये २शस्त्रव्यापारशून्ये वाग्युद्धादौ।

अस्त्रागार न० ६त०। आयुधागारे शस्त्रादिस्थापनगृहे।

अस्त्राघात पु० ६त०। अस्त्रेणाघाते।।

अस्त्राहत त्रि० अस्त्रेणाहतः। १शस्त्रहते २शस्त्रेण क्षते च।

अस्त्रिन् त्रि० अस्त्रं धनुरस्यास्ति इनि। १धनुर्द्धरे, २शस्त्रधा-रिमात्रे च। "अस्त्रीजनः पुनरनेन कृतः किलस्त्री" उद्भटः।

अस्थाग त्रि० अस्थामस्थितिं गच्छति गम-ड। अगाधे हेम०।

अस्थान न० अप्राशस्त्ये न०त०। अपशस्तस्थाने अयोग्यस्थाने "अस्थाने पततामतोव महतामेतादृशी स्खलतिः" सा०द०।

अस्थाने अव्य० स्थाने युक्तं न०त०। अयुक्ते।

अस्थायिन् त्रि० विरोधे न०त०। चञ्चले स्त्रियां ङीप्।

अस्थावर त्रि० विरोधे न०त०। स्थावरभिन्ने जङ्गमे। "प्रयोजयर्थ्यन्तरहितस्य कृतस्य विभक्तविभक्तस्थावरास्था-वरधने पत्नी प्रथममधिकारिणीति दायभागानुसारिणः।

अस्थि न० अश्नुते अस+क्थिन्। मांसाभ्यन्तरस्थे (हाड़) इति ख्याते धातुभेदे। अस्थिस्वरूपाद्युक्तं भावप्रका०। "मेदोयत्स्थाग्निना पक्वं वायुना चातिशोषितम्। तदस्थिसंज्ञां लभते स सारः सर्व्वविग्रहे। अभ्यन्तरगतैः सारैर्यथा-तिष्ठन्ति भूरुहाः। अस्थिसारैस्तथा देहाधिष्ठन्ते देहिनां ध्रुवम्। तस्मादस्थिविनाशेषु त्वङ्मांसेषु शरीरिणाम्। अस्थीनि न विनश्यन्ति सारा एतानि सर्व्वथा"। अथास्थां संख्या-माह। "शल्यतन्त्रेऽस्थिखण्डानां शतत्रयमुदाहृतम्। तान्येवाल निगद्यन्ते तेषां स्थानानि यानि च। सविंशति-शतन्त्वस्थां शाखासु कथितं बुधैः। पार्श्वयोः श्रोणिफलके-वक्षःपृष्ठोदरेषु च। जानीयाद्विंशगतेषु शतं सप्तदशोत्तरम् ग्रीवायामूर्द्धगां विद्यादस्थां षष्टिं त्रिसंयुताम्"। तत्र शाखागतान्याह। "एकैकस्यां पादाङ्गुल्यां त्रीणि त्रीणि तानि पञ्चदश पादतले पञ्चास्थिशलाकास्तदाधारभूत-मेकमस्थि। एवं षट् कूर्चे द्वे २ गुल्फे द्वे २ पार्ष्णावेकैकं २जङ्घयोर्द्वे २ जानुन्येकैकम् २ एवं त्रिंशदेक-स्मिन् सक्थिनि भवन्ति। एतेनेतरसक्थि बाहू च व्याख्यातौ। अथ पार्श्वादिगतान्याह। "पार्श्वयो षट्त्रिंशत् ३६ षट्त्रिंशत् ३६। शिश्ने भगे वा एकं १ नितम्बयोरेकैकं २ त्रिके एकम् १ वक्षसष्टौ ८ पृष्ठे-त्रिंशत् अष्टकसंज्ञे द्वे २" योगात् ११७। अथ ग्रीवोर्ध्व-गतान्याह। ग्रीवायां नव ९कण्ठनाड्यां चत्वारि ४ हन्वो-रेकैकं २ दन्तेषु द्वात्रिंशत् ३२ नासायां त्रीणि ३ तालु-न्येकं १ गण्डयोरेकैकं २ कर्णयोरेकैकं २ शङ्खयोरेकैकं २ शिरसि षट्। एतान्यस्थीनि पञ्चविधानि भवन्ति तानि यथा "तरुणानि कपालानि रुचकानि भवन्ति च। वल-यान्यपि तानि स्युर्नलकानि च कानिचित्। अक्षिकोषस्रुति प्राणयोर्वासु तरुणानि हि। शिरःशङ्खकपोलेषु तालु-सन्धौ वजादिषु। कपालानि भवन्त्येषु, दन्तेषु रुचकानि च। प्रायः पार्श्वयुगे पृष्ठे वक्षोजठरपार्श्वयु। पादयोर्वलयानि स्युर्नलकानि भुजेऽपना। हस्तपादाङ्गुलितले कूर्चे च मणि-बन्धयोः। बाहुजङ्घाद्वये चापि जानीयान्नलकानि तु"। अथैषां प्रयोजनमाह "मांसान्यन्त्राणि वद्धानि शिराभिः स्नायुभिस्तथा। अस्थीन्यालम्बनं कृत्वा न दीर्य्यन्ते पतन्ति न" सुश्रुते। यात्र० तु "प्राधान्यात् अन्यासांख्याऽभिहिता यथा। "स्यालैः सह चतुःषष्टिर्दन्ता वै विंशतिर्नखाः। पाणि-पादशलाकाश्च तासां स्थानचतुष्टयम्। पञ्चाङ्गुलीनां द्वे पार्ष्ण्योर्गुल्फेषु च चतुष्टयम्। चत्वार्यरत्निकास्थीनि जङ्घयो-स्तावदेव तु। द्वे द्वे जानुकपोलोरुफलकांससन्धिषु। अन्य-

तालवके योषोफलके च विनिर्दिशेत् । भगास्थ्यर्कं तथा पृष्ठे चत्वारिंशच्च पञ्च च । ग्रीवा पञ्चदशास्थिः स्याज्जत्वेकैकं तथा हनुः । तन्मूले हे ललाटास्थिगण्डे नासा धनास्थिका । पार्श्वकाः स्युर्दशैकैः सार्द्धमर्धं दैव हि सप्रतिः । द्वौ शङ्खौ कपालानि चत्वारि शिरसस्तथा । उरःसप्तदशास्थीनि पुरुषस्यास्थिसंग्रहः" "अस्थिभिरस्थीनि मांसैर्मांसानि त्वचा त्वचम्" इति श्रुतिः "मलमूत्रपुरीषास्थि निर्गतं ह्यशुचि स्मृतम्" मनुः अस्यार्थे कन् । अस्थिकं तदर्थे ।

अस्थिकृत् पु० कृ–क्विप् दैत० । अस्थिकारके मेदसि धातौ । यथा मेदोऽस्थिकरत्वं तथोक्तम् अस्थिकरशब्दे ५५८ पृष्ठे ।

अस्थिच्छलित न० "काण्डकमस्थकर्षं चूर्णितं पिच्छितमस्थिच्छलितं काण्डभग्नं मज्जानुगतमतिपातितं वक्रं छिन्नं पाटितं स्फुटितमिति हादशविधमिति" काण्डभग्नसुपक्रम्य "पार्श्वयोरस्थिहीनोन्नतमस्थिच्छलितमिति" सुश्रुतोक्ते काण्डभग्नरूपरोगनिदानभेदे ।

अस्थिज पु० अस्थो जायते जन–ड । अस्थिधातोर्जाते मज्जनि यथा चास्थोमज्जजन्म तथोक्तमस्थिकरशब्दे ५५८ पृष्ठे ।

अस्थिति स्त्री अभावे न०त० । १स्थित्यभावे अस्थैर्ये । "अस्थितेव शरीरस्य पुंसां चैवायुषः क्षयात् । आनन्त्यात् कुलधर्माणां हादशाहः प्रशस्यते" इति स्मृतिः । अस्थितिः सङ्गीतसुरजध्वनीनाम्" काद० । २मर्य्यादाभावे । न०व० । ३मर्य्यादाशून्ये ४स्थैर्यशून्ये च त्रि० ।

अस्थितुण्ड पु० अस्थीव कठिनं तुण्डमस्य । विहङ्गमे ।

अस्थिधन्वन् पु० अस्थि अस्थिमयं धनुरस्य अनङ् समा० । शिवे । [पिङ्गराकारे कङ्काले ।

अस्थिपञ्जर पु० अस्थि पञ्जर इव । शरीरस्थास्थिसंहतौ

अस्थिप्रक्षेप पु० मृतस्यास्थां गङ्गाजले विधानेन प्रक्षेपः । विधानेन मृतस्यास्थां गङ्गाजले क्षेपणे तत्प्रकारश्च आदित्यपु० "भागीरथी यत्र यत्रास्ति तीर्थं कुलहये चापि यदा विपन्नः । तदा तदा तत्र तस्याथ भक्त्या भावेन चास्थीनि विनिक्षेपेच्च । स्नात्वा ततः गन्धगव्येन सिक्त्वा हिरण्यमध्याज्यतिलैश्च योज्य । ततश्च मृत्पिण्डपुटे निधाय पश्यन् दिशं प्रेतगणोपगूढाम् । नमोऽस्तु धर्माय वदन् प्रविश्य जलं स मे प्रीत इति त्रिमेज्य । उत्थाय भास्वन्तमवेक्ष्य सूर्यं स दक्षिणां विप्रसुखाय दद्यात्" । "एतद्धूर्तं तीर्थचिन्तामणौ अन्यथा पठितम्" तदुभयथा । "स्नात्वा तथोत्तीर्य च भास्करञ्च दृष्ट्वा प्रदद्यादथ दक्षिणान्तु" इति । "एवं कृते प्रेतपुरस्थितस्य स्वर्गे स्थितिः स्याच्च मन्वन्तरन्तु" इति च । तत्प्रयोगश्च प्रा० त० दृश्यः ।

अस्थिभक्त पु० अस्थि भक्षयति भक्ष–अण् । (हाड़गिला) १पक्षिणि, २कुक्कुरे च । भुज–क्विप् । अस्थिभुगादयोऽप्यत्र ।

अस्थिभङ्ग पु० अस्थो भङ्गः । अस्थिभङ्गने "अस्थिभङ्गे गवाञ्चैव लाङ्गूलस्य च भेदने" स्मृतिः ।

अस्थिमत् त्रि० अस्थीनि सन्त्यस्य मतुप् । अस्थियुक्ते प्राणिनि "अस्थिमतां तु सत्त्वानां सहस्रञ्च प्रमाथ च । पूर्वं वानस्थस्यां तु न्यूढस्त्याव्रतं चरेत्" । किञ्चिदेव तु विप्राय दद्यादस्थिमतां वधे । अनस्थां चैव हिंसायां प्राणायामेन शुध्यति" मनुः अस्थिमतां कलासादीनामनस्थां मत्कुणादीनाम्" कुल्लू० । [निर्म्मिते अस्थादौ ।

अस्थिमय त्रि० अस्थोविकारः मयट् स्त्रियां ङीप् । अस्थि

अस्थिमाला स्त्री अस्थिनिर्म्मिता माला । अस्थिनिर्म्मितगुटिकायां १मालायाम् दैत० । २अस्थिश्रेणौ च ।

अस्थिमालिन् पु० अस्थिमयो मालाऽस्यास्ति इनि । शिवे ।

अस्थियुज् पु० अस्थि युनक्ति युज–क्विन् । (हाड़जोड़ा) हस्तिगण्डास्थौ । [ध्वजनाम्" काद० ।

अस्थिर त्रि० न०त० । स्थिरभिन्ने चञ्चले । "अस्थिरत्व

अस्थिविग्रह पु० अत्यन्तलघुत्वात् अस्थिसारो विग्रहो देहो यस्य । १शिवानुचरे भृङ्गिरीटे । २अतिशीर्णदेहे त्रि० ।

अस्थिशृङ्खला स्त्री अस्थां शृङ्खलेव योजनहेतुः । (हाड़जोड़ा) सन्धिमति देहे । "काण्डं त्वग्विरहितमस्थिशृङ्खलाया मार्द्धं द्विदलमकण्डुकं तदर्द्धम्। सस्नेहं लुलतु ! ततस्तिलस्य तैले संपक्वं वटकमतीव वातहारि" वैद्य० ।

अस्थिशेष त्रि० अस्थिमात्रं शेषोऽस्य । मांसादिशून्ये अतिकृशे ।

अस्थिसंहार पु० अस्थीनि संहरति योजयति सम्+हृ–अण् (हाड़जोड़ा) सन्धिमति देहे । "अस्थिसंहारकः प्रोक्तो वातश्लेष्महरोऽस्थियुक् । उष्णः सारः क्षमिघ्नश्च दुर्नामघ्नोऽस्थिरोगजित् । रूक्षः स्वादुर्लघुर्ग्राही पाचनः पित्तलः स्मृतः" भा० प्र० । [हृ–ण्वुल् । (हाड़जोड़ा) सन्धिमति देहे

अस्थिसंहारिका स्त्री अस्थीनि संहरति योजयति सम्+

अस्थिसञ्चय पु० मृतस्यास्थां गङ्गाजले प्रक्षेपार्थं सञ्चयः । गङ्गायां प्रक्षेपार्थं प्रथमादिदिने मृतस्य अस्थिसंग्रहे "नान्येऽहनीस्थिसञ्चयः स्मृतिः" ल्युट् । अस्थिसञ्चयनमप्यत्र न० । अस्थिसञ्चयनञ्च प्रथमादिदिनेषु कार्य्यम् । यथाह संवर्त्तः । "प्रथमेऽह्नि तृतीये वा सप्तमे नवमे तथा । अस्थिसञ्चयनङ्कार्य्यं दिने तद्गोत्रजैः सह" । क्वचित् "द्वितीये त्वस्थिसञ्चय" इत्युक्तम् । वैष्णवे तु "चतुर्थे दिवसेऽस्थि

सञ्चयनं कुर्य्यात्तेषाञ्च गङ्गाम्भसि प्रक्षेप" इति। अतोऽन्यतमदिने खण्डहोक्तविधिना तस्थिसञ्चयनङ्कार्य्यम्" मिता०। अङ्गिरसा चात्र विशेषो दर्शितः। "अस्थिसञ्चयने यागोदेवानाम्परिकीर्त्तितः। प्रेतोभूतलमुद्दिश्य यः शुचिर्न करोति चेत्। देवतानान्तु यजनन्तं शपन्त्यथ देवताः"। देवताचात्र श्मशानवासिन्यः भूतपूर्व्वदग्धाः। श्मशानवासिनोदेवाः शवानाम्परिकीर्त्तिता" इति तेनैवोक्तम्। अतस्तान्देवान् अचिरम्मृतञ्च प्रेतमुद्दिश्य धूपदीपादिभिः पिण्डरूपेण चान्नेन तत्र पूजा कार्य्यैवान्यथा भवति" मिता०प्रा०अध्या०।

अस्थिसम्भव पु० सम्भवत्यस्मात् सम्भवः अपादाने अप् ब०। अस्थिजाते १मज्जधातौ यथा च अस्थिजत्वं मज्जशब्दोल्लेखशब्दे ५५८पृ०। २वज्रे च तस्य दाधीचास्थिजत्वात् तथात्वम् "तमुवाचेन्द्रमाक्रन्दे गरुड़ः पततां वरः। प्रहसन् श्लक्ष्णया वाचा तथा वज्रसमाहतः। ऋषेर्मानं करिष्यामि वज्रं यस्यास्थिसम्भवम्" भा० आ० ३३अ०। यथा चास्य तदस्थिजातत्वं तथोक्तमग्निशब्दे २७४ पृष्ठे २अस्थिजातमात्रे त्रि०।

अस्थिसार पु० अस्थ्नः सारः पाकपरिणामः। अस्थिजाते मज्जधातौ। अस्थ्नैव सारो यस्य। रक्तमांसशून्यदेहे त्रि०

अस्थिस्नेह पु० ६त०। मज्जनित स्नास्थिसारभूतत्वात्तथात्वम्।

अस्थूरि पु० स्था-बा० कूरि। एकाश्वयुक्तशकटे स्थूरि न०त० तद्विपरीतम्। बहुभिरश्वादिभिर्युते शकटे। "अस्थूरि गार्हपत्यानि सन्तु" ऋ० ६,१५,१६।

अस्थैर्य्य न० अभावे न०त०। १स्थैर्य्याभावे विरोधे न०त०। २चाञ्चल्ये। न०ब०। ३स्थैर्य्यहीने त्रि०।

अस्नाविर त्रि० न०त०। शिरावर्জ্জिते, स्थूलशरीरशून्ये च।

अस्निग्धदारु न० अस्निग्धं रूक्षं दारु कर्म्म०। देवदारुभेदे।

अस्नेह पु० अभावे न०त०। १स्नेहाभावे न०ब०। २स्नेहशून्ये त्रि०। स्नेहस्तैलादेर्युक्तभेदः प्रेम च। [शून्ये त्रि०।

अस्पन्दन न०अभावे न०त०। १चलनाभावे न०ब०। २क्रियाअस्पर्श पु० अभावे न०त०। १स्पर्शाभावे न०ब०। २स्पर्शशून्ये त्रि० "अशब्दमस्पर्शमरूपमव्ययम्" श्रुतिः।

अस्पर्शयोग पु० नास्ति स्पर्शःविषयसंबन्धोयत्र कर्म्म०। विषय प्रतिभासशून्ये निर्विकल्पके ज्ञाने "अस्पर्शयोगो वै नाम सर्वसत्त्वसुखो हितः। अविवादो विशुद्धश्च देशितस्तं नमाम्यहम्"।

अस्पष्ट त्रि० न०त०। अव्यक्ते। "अथेदानीमस्पष्टब्रह्मलिङ्गानि वेदान्तवाक्यानि विचार्य्यन्ते" शा०भा०।

अस्पृश्य त्रि० न स्पृष्टुमर्हः अर्हार्थे क्यप् न०त०। स्पर्शायोग्ये मलमूत्रादौ "मलमूत्रपुरीषास्थि निर्गतं ह्यशुचि स्मृतम्" नारं स्पृष्ट्वा तु सस्नेहं सचेलं जलमाविशेत् मनुः। अस्पृश्यस्पर्शने चैव सद्यः स्नानं समाचरेत्" स्मृतिः। अस्पृश्यद्रव्याणि च प्रायेण अशौचाशुद्धिशब्दयोः उक्तानि।

अस्पृहा स्त्री अभावे न०त०। "स्पृहाभावे"। "नास्पृहेषु परेषु साऽस्पृहा परिकीर्त्तिता"। न०ब०। २स्पृहाशून्ये त्रि०।

अस्फुट त्रि० न स्फुटः। व्यक्तभिन्ने। अनलङ्कृतौ पुनः क्वापीति का०प्र०व्याख्यायां "अनलङ्कृतौ अस्फुटालङ्कारौ"। "क्वचित्प्रकाशां क्वचिदस्फुटार्थसम्" नैष०।

अस्फुटवाक् त्रि० अस्फुटा अव्यक्ता वाक् यस्य। कहदे।

अस्मद् त्रि० अस-मदिक्। अहंप्रत्ययावलम्बनत्वेन वेद्ये १प्रत्यगात्मनि, २देहाभिमानिनि जीवे च। "अहं देवो न चान्योऽस्मि ब्रह्मैवाहं न शोकभाक्" "अहमात्मा गुडाकेश" गीता "आवां जहि न यत्नोर्वीसत्रिवेन परिप्लुता" देवी भाग०। "सर्व्वं वयमतः परम्" "मान्तु वेद न कश्चन" गीता "यः सर्व्वं दाक्षायणपुरतः स्वपोषम्" भट्टिः। "मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्" गीता। अस्य लिङ्गत्रयेऽपि एकविधं रूपम्। आत्मवाचित्वे एवास्य सर्व्वनामता शब्दपरत्वे न गणकार्य्यम् "अस्मदोद्वयोच्च" पा०। द्विवचनपरत्वे अस्मद्-अण्। आस्माकः। खञ् आस्माकीन ञ अस्मदीयः। एकवचनपरत्वे अण् मामकम् खञ् मामकीनम् ञ मदीयम्"। तस्मिन् अस्मत्तः एकवचने मत्तः "मत्तः परतरं नान्यत्" गीता।

अस्मत्रा अव्य० अस्मद्+बा० त्राच्। अस्मास्वित्यर्थे। "अस्मत्रा ते सधमाद्यः सन्तु" ऋ० १,१३२।

अस्मदीय त्रि० अस्माकमिदम् छ। अस्मत्सम्बन्धिनि "सङ्गस्तदीयैरपि योधसङ्घैः" गीता।

अस्मद्युनच् त्रि० अस्मानद्युति अस्मद्+अनच्-किन् अद्युआदेशः। अस्मदभिसखे। "तुभ्यमस्मद्युद्दोददतो मघानि" ऋ०७,१६,१० शसादावचि अस्मद्दीच इत्यादि। स्त्रियाम् ङीप् अस्मद्दीची।

अस्मदिध त्रि० अस्माकमिव विधास्य। अस्मादृशे एकवचनपरत्वे महिधः "न महिधे न्यृञ्जति भारमग्नाम्" भट्टिः।

अस्मयु त्रि० आत्मन अस्मान् इच्छति क्यच् उ बा० व्यत्ययेन एत्त्वम्। कविःस्तोकारार्थम् आत्मनः अस्मान् इच्छति। "उत त्वमस्मयुर्ऋषो!" ऋ० १,४१,७।

अस्माक त्रि० अस्माकमिदम् अण् अस्माकादेशः नि० वेदे अदहिः।

ऋक्तत्सम्बन्धिनि "स रथेन रथीतमोऽक्षाकेनाभिशुभ्वना" ऋ० ६,४५,१५। लोके तु आक्षाकः।

अस्मि अव्य० अस्-मिन्। अहमर्थे, "त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति" सा०द०। "अस्मिता"। "दुडुमनास्मि सागरम्" रघुः "ब्रह्मैवास्मि न शोकभाक्"।

अस्मिता स्त्री अस्मि-भावः तल्। अहमिति ममेतिवेत्यभिमाने "अविद्यास्मितारागद्वेषाभिनिवेशाः" पात०सू०। स्वाभिमानोमोह इत्युच्यते यथाह सां०को०। "दैवा ह्यष्टविधमैश्वर्यमासाद्याहताभिमानिनोऽणिमादिकमात्मीयं शाश्वतिकमभिमन्यन्ते इति सोऽयमस्मितामोहोऽष्टविधैश्वर्यविषयत्वादष्टविधः" तल्लक्षणमुक्तं पात०सू०। "दृग्दर्शनशक्त्योरेकात्मतेवास्मिता" दृक्शक्तिः पुरुषः दृश्यते इति दर्शनं तच्छक्तिः बुद्धिः यत्किंशब्दोयोग्यतार्थः भोक्तृभोग्ययो रत्यन्तविविक्तयोर्गृहीतृग्रहणयोरविद्याकृता आत्मता तादात्म्यम् दृग्शब्देन अहमस्मीत्यस्य भ्रान्तिकृतत्वम् तादात्म्यस्य द्योतितम् सास्मितेत्यर्थः इयं हृदयग्रन्थिरित्युच्यते ब्रह्मवादिभिः इति" उक्तिः।

अस्मृति स्त्री अभावे न०त०। स्मरणाभावे।

अस्यवामीय न० अस्य वामेति शब्दोऽस्यत्र सूक्ते मत्वर्थे छ। अस्य वामेति शब्दयुक्ते सूक्ते तच्च सूक्तम् "अस्य वामस्य पलितस्य" इत्यादिकं द्विपञ्चाशदृचम् ऋ०१,१६४, सूक्तम्। "क्षेयं कृत्वा द्विजोमोहात् त्रिरात्रोपोषितः शुचिः। सूक्तं जघ्राऽस्यवामीयं क्षिप्रं सच्येत किल्बिषात् "ऋग्विधाने १,२२६,। महाव्रते वैश्वशस्त्रं वैश्वदेवं निविद्धानं द्विप्रतीकं तत्रास्य वामदेवस्येत्यादिकमेकचत्वारिंशदृचं प्रथमं, प्रतीकम् तच्च पञ्चमारण्ये सूक्तितम् "अस्य वामस्य पलितस्य क्षेत्रवित्" दैर्घतमसम् एकचत्वारिंशदृचम् तच्च तस्मिन्नेव सूक्ते "गौरीर्मिमाय सलिलानि" इत्यन्तमेकचत्वारिंशदृचम्। "सकृत् जघ्राऽस्यवामीयं शिवसङ्कल्पमेव च अपहृत्य सुवर्णन्तु क्षणाद्भवति निर्मलः" मनुः कुल्लू० एतदाख्याने अस्य वामस्य पलितस्येति पाठः लिपिकरप्रमादकृतः पलितस्येत्येव सूक्ते पाठदर्शनात्।

अस्यहत्य पु० हन-वा क्यप् न०त०असिना अहत्यः ३त०। खड्गेनाहननीये अनुगतिकादिकार्य्यम्। [गतिका०।

अस्यहेति पु० असिरहेतिर्यस्य। खड्गासाधने योधे। अनुअस्युद्यत त्रि० असिरुद्यतोयेन वा परनि०। उद्धृतखड्गे।

असृ पु० अस-रन्। १कोषे २केशे च। ३रुधिरे ४चक्षुर्जलेचन० अत्रशब्दे उदा०।

असृकण्ठ पु० असृः कोष इव कण्ठोऽस्य अक्षयुक्तकण्ठो वास्य। पाषे ह्वारा० तस्य पातने हि शत्रुरुधिराक्त सख्त्वात् कोषाकारसख्त्वाच्च तस्य तथात्वम्।

असृखदिर पु० असृवर्णः रक्तवर्णः खदिरः। विट्खदिरे।

असृज न० असात् रुधिरात् जायते। मांसे। तस्य रुधिरजातत्वमसृक्करशब्दे ५५८ पृष्ठे दृश्यम्।

असृप पु० असं रुधिरं पिबति पा-क। १राक्षसे २तद्देवताके मलानत्वले च। "हिरागमं लघुध्रुवे चरेऽसृमे मृदूदुनि" मुहूर्त्ते चि० क्विप् असृपाध्यत्व। [रक्तपाके भिखडादृश्ये।

असृपतक पु० असृमिव रक्तं पत्रमस्य संज्ञायाम् कन्।

असृपा स्त्री असं पिबति पा-क्विप् क वा। (जोंक) जलौकसि। तस्याः भेदादिकं सुश्रुते दर्शितं यथा "अथ जलायुका वक्ष्यन्ते। जलमासामायुरिति जलायुका जलमासामोक इति जलौकसः। ता द्वादश तासां सविषाः षट् तावत्य एव निर्विषाः। तत्र सविषाः कृष्णा कर्ब्बुरा अलगर्दा इन्द्रायुधा सामुद्रिका गोचन्दना चेति। ताश्चक्रनक्रमुखवर्णा पृथुशिराः कृष्णा। कूर्ममत्स्यादायता किञ्चोन्नतकुक्षिः कर्ब्बुरा। रोमशा महापार्श्वा कृष्णसस्यलगर्दा। इन्द्रायुधवद्बहुराजिभिश्चित्रिता इन्द्रायुधा। ईषदसितपोतिका विचित्रपुष्पाकृति चित्रा सामुद्रिका। गोदधिवदधोभागे द्विधाभूताकृतिरणुसखी गोचन्देति। ताभिर्दष्टे पुरुषे दंशे श्वयथुरतिमात्रं कण्डूर्मूर्च्छा ज्वरोदाहश्चर्दिर्भेदः सदनमिति लिङ्गानि भवन्ति। तत्र महागदः पानालेपननस्यकर्म्मा द्विपयोज्यः। इन्द्रायुधादष्टमसाध्यमित्येताः सविषाः सचिकित्सिता व्याख्याताः॥ अथ निर्विषाः। कपिला पिङ्गला शङ्खमुखी मूषिका पुण्डरीकमुखी सावरिका चेति। तत्र मनःशिलारञ्जिताभ्यामिव पार्श्वाभ्यां पृष्ठे स्निग्धसङ्गवर्णा कपिला, किञ्चिद्रक्ता दृप्तकाया पिङ्गायुगा च पिङ्गला। यवलवर्णा शीघ्रपायिनी दीर्घतीक्ष्णमुखी शङ्खमुखी। मूषिकाकृति वर्णानिष्टगन्धा च मूषिका। सङ्गवर्णा पुण्डरीकतुल्यवक्त्रा पुण्डरीकमुखी। स्निग्धा पद्मपत्रवर्णाष्टादशाङ्गुलप्रमाणा सावरिका सा च पञ्चधैं। इत्येता अविषा व्याख्याताः॥ तासां वदनपार्श्वमुखप्रपीतनादीनि चेत्थानि। तेषु महागरोरा बलवत्यः शीघ्रपायिन्यो महायना निर्विषाश्च विशेषेण भवन्ति॥ तत्र सविषमत्स्यकीटदर्दुरमूलपुरीषकोचजाताः कलुषेक्ष्वम्भःसु च सविषाः॥ पद्मोत्पलनलिनकुमुदसौगन्धिककुवलयपुण्डरीकशैवालकोचजाता विमलेष्व

म्भःसु च निर्विशाः ॥ भवति चात्र ॥ क्षेत्रेषु विचरन्त्येताः सलिलेषु सुगन्धिषु । न च सङ्कीर्णचारित्रो न च पङ्केशयाः सुखाः । तासां प्रपङ्कणमार्द्रचर्म्मणान्यैर्व्या प्रयोगैर्न हरीयात् । अथैता नवे मृत्ति घटे सरसङ्गामो दक्षपङ्कमावाप्य निदध्यात् । मध्यार्द्धे चासासुपहरेच्चैवलं वङ्क्रमौदकांश्च कन्दांश्च मूलीत्य, मध्यार्द्धे दलमौदकानि च पत्राणि, द्वाहाच्चाहाच्चान्यच्चलं मद्यं च दद्यात् सप्तरात्रात्परात्राच्च घटमन्यं संक्रामयेत् । भवति चात्र । स्थूलमध्याः परिक्लिष्टाः पृथ्वो मन्दविचेष्टिताः । अयाद्विष्योऽल्पपाविन्यः सविषाश्च न पूजिताः" । अधिकमस्मिन्भोजनशब्दे ५६१ पृष्ठे दृश्यम् ।

असफला(ली) स्त्री असमिव लोहितं फलमस्याः । सङ्कीर्णे । मत्वादिपूर्व्वकत्वाभावेन फलान्तस्य प्रागादिकः टाप् जातित्वात् ङीर्वेव युक्तः ।

असमाढका स्त्री असस्य रुधिरस्य मातेव पोषिका संज्ञायां कन् । अशिताद्यादेः रसरूपे देहस्थे प्रथमे धातौ ।

असरोधिनी स्त्री असं क्षतजमागु रुणद्धि रुध–णिनि । लज्जालुलतायाम् ।

असवत् त्रि० न स्रवति स्रु–शतृ न०त० स्त्रियां ङीप् । १स्रवद्रिक्ते अचरिते "अनागसमसवन्तोमारुहेमाम्" ऋ० १०, ९२,१०, असमस्यस्य मतुप् मस्य वः । २रुधिरयुक्ते त्रि०स्त्रियां ङीप् असवती । सौ असवान् इति भेदः ।

असविन्दुच्छदा स्त्री असविन्दुः रुधिरविन्दुरिव छदो दलं यस्याः । लक्षणानामके वृक्षे ।

असार्जक पु० असं रुधिरं सेचनेनार्ज्जयति अर्ज्ज–ण्वुल् । १श्वेततुलसीवृक्षे । २रुधिरोत्पादके रसे च यथाऽस्रं रक्तोत्पादकत्वं तथोक्तमस्रक्करशब्दे ३गोणित्पादकमात्रे त्रि० ।

अस्रि स्त्री अस–क्रि । असृग्शब्दार्थे कोषे अस्रिशब्दवत् समानान्तभाक् । चतुरस्रशोभीत्यादि तच्छब्दे उदा० दृश्यम् ।

अस्रिष् त्रि० न स्रेधते स्रिध–क्विप् न०त० । अच्योतने "मित्रमदितिं दक्षमस्रिधम्" यजु० २५,१५ ।

अस्रु न० असते क्षिप्यते अस–रु । चक्षुर्जले असृग्वत्तालव्यान्तोऽपि "श्रुत्वास्रुत्वास्रुधारां त्यजतीति" कौचकवधः ।

अस्रेमन् त्रि० स्रिव–मनिन् गुणश्चलोपौ । १प्रगल्भे निघ० । २क्षयशीले च "अमर्त्यासोऽस्रेमाणं तरणिम्" ऋ० ३,२८,१३ । "अस्रेमाणं क्षयिरहितम् भा० ।

अस्व त्रि० नास्ति स्वं धनमस्य । १निर्द्धने । स्वः स्वकीयः न० त० । २स्वकीयभिन्ने त्रि० । एतदर्थोऽस्य सर्व्वनामतया अकच् । अस्वकः स्त्रियां तु नित्यमत इत्त्वम् अस्विका ।

अस्वच्छन्द त्रि० विरोधे न०त० । स्वच्छन्दभिन्ने पराधीने ।

अस्वजाति त्रि० न स्वस्येव जातिर्यस्य । भिन्नजातौ यथा विप्रस्य क्षत्रियादि

अस्वतन्त्र त्रि० विरोधे न०त० । स्वाधीनभिन्ने पराधीने । "अस्वतन्त्रा स्त्री पुरुषप्रधाना इति" वसि० । तथा अस्वातन्त्र्यञ्च तत्रैव दर्शितम् "पिता रक्षति कौमारे भर्त्ता रक्षति यौवने । पुत्रश्च स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति" तथा पुत्रादीनामपि जन्माधीनं स्वत्वमिति स्वाकर धनादेर्यथेष्टविनियोगे पित्रादेरस्वातन्त्र्यमिति मिताक्षरायाम् व्यवस्थापितं यथा "तस्मात्पैतृके पैतामहे च द्रव्ये जन्मनैव स्वत्वम् । तथापि पितुरावश्यकेषु धर्म्मकृत्येषु याचनिकेषु प्रसाददानकुटुम्बभरणापद्विमोक्षादिषु च स्थावरव्यतिरिक्त द्रव्यविनियोगे स्वातन्त्र्यमिति स्थितम् । स्थावरे तु स्वार्जिते पित्रादिप्राप्ते च पुत्रादिपारतन्त्र्यमेव । "स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्ज्जितम् । असंभूय सुतानूर्ध्वान् न दानञ्च न विक्रयः"।"ये जातावेऽप्यजाताश्च ये च गर्भे व्यवस्थिताः । दृष्ट्वैव तेऽभिकाङ्क्षन्ति न दानञ्च न विक्रयः" इत्यादि स्मरणात् । अस्यापवादः "एकोऽपि स्थावरे कुर्य्यादानाधमनविक्रयम् । आपत्काले कुटुम्बार्थे धर्म्मार्थे च विशेषतः" इति । अस्यार्थः । अप्राप्तव्यवहारेषु दानानुज्ञादावसमर्थेषु वा तथाविधेष्वविभक्तेष्वपि सर्व्वकुटुम्बव्यापिन्यामापदि तत्पोषणे चावश्यकर्त्तव्ये स्थावरस्य दानाधमनविक्रयमेकोपि समर्थः कुर्य्यादिति" । यत्तु वचनम् । "अविभक्ता विभक्तावा सपिण्डाः स्थावरे समाः । एकोद्यमोगः सर्व्वत्र दानाधमनविक्रये" इति । तदप्यविभक्तेषु द्रव्यस्य मध्यस्थत्वादेकस्यानीश्वरत्वात्सर्व्वाभ्यनुज्ञा अवश्यं कार्य्या विभक्तेषु तु तदुत्तरकालं विभक्ताविभक्तसंशयव्युदासाय व्यवहारसौकर्य्याय च सर्व्वाभ्यनुज्ञानं न पुनरेकस्यानीश्वरत्वेन अतो विभक्तानामनुमतिव्यतिरेकेणापि व्यवहारः सिध्यत्येवेति व्याख्येयम्" मिता० व्य०अ० ।

अस्वन्त न० असनाम् अन्तो यस्मात् ५ब०।? चूल्यां तस्याः प्राणिवधहेतुतया मूनास्थानरूपत्वात् तथात्वम् । सुष्ठु न अन्तो यस्य । २अशुभोदर्के त्रि० । ३मरणे पु० ।

अस्वप्न पु० नास्ति स्वप्नोनिद्रा यस्य । १देवे । २निद्रारहिते त्रि० । देवानां स्वप्नावस्थाराहित्यसूक्तम् शत० ब्रा० । यथा "न वै देवाः स्वपन्त्यनवरुद्धो वा एतस्यास्वप्नो भवति" दिवास्वप्नाभावेऽपि रात्रौ स्वप्नवतोऽस्वप्नत्वसूक्तम् भा० ब्रा०५०

२२१३ अ०। "दानित्यः पवित्रश्च अस्तप्रश्च दिवाऽस्वपन्"।

अस्वर पु० अप्रशस्तः स्वरोयत्र। १मन्दस्वरयुक्ते "वचनं दीनमस्वरम्" रामा०। २स्वरवर्णरहिते व्यञ्जनवर्णभावे पु०। ३उदात्तादिस्वररहिते लौकिकोच्चारणे च।

अस्वरूप त्रि० न स्वस्येव रूपमस्य। समानस्वभावशून्ये "न तस्वरूप" इति सुग्धबो०।

अस्वर्ग्य त्रि० स्वर्गाय हितं स्वर्ग+यत् न०त०। स्वर्गासाधने "अस्वर्ग्यं लोकविद्विष्टं तत्तात्तत् परिवर्जयेत्" मनुः "अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु" स्मृतिः।

अस्वस्थ त्रि० न स्वस्मिन् स्वभावे तिष्ठति स्था-क ७त०न० त०। स्वस्वभिन्ने १अप्रकृतिस्थे २रोगादिना उपद्रुते च।

अस्वाच्छन्द्य न०अभावे न०त०। १स्वाच्छन्द्याभावे पराधीनत्वे न०त०। २तद्वति त्रि०।

अस्वातन्त्र्य न० अभावे न०त०। स्वातन्त्र्याभावे पराधीनत्वे न०त०। २तद्वति त्रि०। [अतिकृषावे गोखुरटत्वे।

अस्वादुकण्टक पु० अस्वादुरमधुरः कण्टको यस्य। (गोखुरि)

अस्वाध्याय त्रि० न स्वाध्यायो वेदाध्ययनमस्य। १वेदाध्ययनहीने "अ(नि:)स्वाध्यायवषट्कारमिति" श्रुतिः। न स्वाध्यायो यस्मिन्। २अध्ययननिषिद्धकाले अष्टम्यादौ अनध्यायशब्दे विवृतिः। अधीयते अधि+इङ्-कर्म्मणि घञ् अध्यायः स्वस्य स्ववर्णानुसारेण अध्यायः स्वाध्यायः न०त०। "स्वाध्यायोऽध्येतव्य" इति श्रुत्युक्तस्वाध्यायभिन्ने ३वेनापाठे शास्त्रादौ।

अस्वामिक त्रि० न स्वामी यस्य। १स्वामिरहिते "अटव्यः पर्व्वताः पुरुषा नद्यस्तीर्थानि यानि च। सर्व्वाण्यस्वामिकान्याहुर्न हि तेषु परिग्रहः" इति स्मृतिः। २निष्यादौ च। "प्रनष्टमस्वामिकमधिगम्य" गौत०।

अस्वामिकृत त्रि० अस्वामिना कृतः। अस्वामिना कृते विक्रयादौ "अस्वामिकृतत्वेन तुल्यत्वादिति" मिता०

अस्वामिविक्रय पु० अस्वामिना कृतो विक्रयः। १अस्वामिना कृते विक्रये २तद्विषये व्यवहारभेदे च। यथाह नारदः "निक्षिप्तं वा परद्रव्यं नष्टं लब्धाऽपहृत्य वा। विक्रीयतेऽसमक्षं यत् स ज्ञेयोऽस्वामिविक्रय" इति। तत्र किमित्याह या०। "स्वं लभेतान्यविक्रीतं क्रेतुर्दोषोऽप्रकाशिते। हीनाद्रव्यो हीनमूल्ये वेलाहीने च तस्करः" "स्वमात्र सम्बन्धि द्रव्यं अन्यविक्रीतमस्वामिविक्रीतं यदि पश्यति तदा लभेत ग्रहणीयात्। अस्वामिविक्रयस्य स्वत्वहेतुत्वाभावात्। विक्रीतग्रहणन्तूक्तयोरुपलक्षणार्थम् अस्वामिकृतत्वेन तुल्यत्वात्। अतएवोक्तम्। "अस्वामिविक्रयन्दत्तमाधिञ्च विनिवर्तयेदिति" क्रेतुः पुनरप्रकाशिते गोपिते क्रये दोषो भवति। तथा हीनाद्रव्यागमोपायहीनात्। रत्नेषु चैकान्ते सम्भाव्यद्रव्यादपि हीनमूल्येनाल्पतरेण मूल्येन च क्रये वेलाहीने वेलया हीनोवेलाहीनः क्रयोरात्रादौ तत्र कृतः क्रेता तस्करो भवति तस्करवत् दण्डभाग्भवतीत्यर्थः। यथोक्तम्। "द्रव्यमस्वामिविक्रीतमाप्य स्वामी तदाप्नुयात्। प्रकाशक्रयतः शुद्धिः क्रेतुः स्वेयं रहःक्रयादिति" स्वाम्यभियुक्तेन क्रेता किं कर्तव्यमित्यत आह। "नष्टापहृतमादाद्य हर्तारं याचयेद्वरम्। देशकालातिपत्तौ च गृहीत्वा स्वयमर्पयेत्" या० नष्टमपहृतं वान्यदीयं क्रयादिना प्राप्य हर्तारं विक्रेतारं याचयेद्बौरोद्धरणकादिभिः आत्मविशुध्यर्थं राजदण्डाप्राप्त्यर्थञ्च। "अथाविदितदेशान्तरकृतः कालान्तरे वा विपन्न स्वदा मूलसमाहरणायक्रेविक्रेतारमदर्शयित्वैव स्वयमेव तद्धनञ्चाष्टिकस्य समर्पयेत् तावतैवासौ शुद्धो भवतीति" श्रीकराचार्य्येण व्याख्यातम्। तदिदमनुपपन्नम्। विक्रेतुर्दर्शनाच्छुद्धिरित्यनेन पौनरुक्त्यप्रसङ्गात्। अतोऽन्यथा व्याख्यायते। नष्टापहृतमिति नाष्टिकस्यति अवयवपदेशः। नष्टमपहृतं आत्मीयद्रव्यमासाद्य क्रेतृहस्तस्थं ज्ञात्वा तं हर्तारं क्रेतारं स्वानपालादिभिर्याचयेत् देशकालातिपत्तौ देशकालातिक्रमे स्वानपालाद्यसन्निधाने तद्विज्ञापनकालात्प्राक् पलायनाशङ्कायां स्वयमेव गृहीत्वा तेभ्यः समर्पयेत्। याचिते हर्त्तरि किं कर्त्तव्यमित्यत आह। "विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्यं यथोदयम्। क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी" या० यद्यसौ गृहीतः क्रेता न मवेदमपहृतम् अन्यसकाशात् प्राप्नमिति वक्ति तदा तस्य क्रेतुर्विक्रेतृदर्शनमात्रेण शुद्धिर्भवति। न पुनरसावभियोज्यः। किन्तु तत्प्रदर्शितेन विक्रेता सह नाष्टिकस्य विवादः। यथाह वृद्धगर्गः। "मूले समाहृते क्रेता नाभियोज्यः कथञ्चन। मूलेन सह वादस्तु नाष्टिकस्य विधीयत" इति। तस्मिंश्च विवादे यद्यस्यास्विक्रयनिश्चयो भवति तदा तस्य नष्टापहृतस्य गवादिद्रव्यस्य यो विक्रयी विक्रेता तस्य सकाशात्स्वामी नाष्टिकः स्वेयं द्रव्यमवाप्नोति रूपद्वापराधानुरूपन्दण्डं क्रेता च मूल्यमवाप्नोति। अथासौ देशान्तरकृतस्तदा योजनसंख्ययाऽऽगमनार्थं कालोदेयः। "प्रकाशं वा क्रयं कुर्यान्मूलं वापि समर्पयेत्। मूलानयनकालस्य देयस्तावत्सयोजनेति"

स्मरणात् । अथाविज्ञातदेशतया मूलमाहर्तुञ्च शक्नोति तदा क्रयं शोधयित्वैव शुद्धो भवति । "अस्माद्दार्यमूलस्तु क्रयमेव विशोधयेदिति" मनुवचनात् । यदा पुनः साक्ष्यादिभिर्दिव्येन वा क्रयं न शोधयति मूलञ्च न प्रदर्शयति तदा स एव दण्डमाप्नुयादिति । "अनुपस्थापयन्मूलं क्रयं वाप्यविशोधयन् । यथाभियोगन्यूनिने धनन्दाप्योदमञ्च स" इति स्मरणात् । स्वं लभेतान्यविक्रीतमित्युक्तम् तच्चिन्त्यम् किं कर्त्तव्यमित्यत आह । "आगमेनोपभोगेन नष्टम्माध्यमतोऽन्यथा । पञ्चबन्धोदमस्तस्य राज्ञे तेना विभावितं" आगमेन रिक्थक्रयादिना उपभोगेन च मदीयमिदन्द्रव्यं तच्चैवं नष्टमपहृतं वेत्यपि भाव्यं साधनीयन्तत्स्वामिना । अतोऽन्यथा तेन स्वामिना अविभावितं पञ्चबन्धो नष्टद्रव्यस्य पञ्चमांशोदमोनाष्टिकेन राज्ञे देयः । अत्रैवायं क्रमः । पूर्व्वं स्वामी नष्टमाप्तोयं साधयेत्ततः क्रेतावौर्य्य परिहारार्थं मूल्यलाभाय च विक्रेतारमानयेत् । अथानेतुन्न शक्नोति तदात्मदोषपरिहाराय क्रयं शोधयित्वा द्रव्यं नाष्टिकस्य समर्पयेदिति । तस्करस्य प्रच्छादकत्वात् । "हृतं प्रनष्टं योद्रव्यम्परहस्तादवाप्नुयात् । अन्निवेद्य नृपे दण्ड्यः स तु षण्णवतिम्पणान्" या० । हृतम्म नष्टं वा चौरादिहस्तस्थं द्रव्यम् अनेनमदीयन्द्रव्यमपहृतमिति नृपस्यानिवेद्यैव दर्पादिना योमूढ्भावात्सौ षण्णवतिपणान्दण्डनीयस्तस्करपक्षपातकत्वेन दुष्टत्वात् । राजपुरुषानीतं प्रत्याह । "शौल्किकैः स्थानपालैर्व्वा नष्टापहृतमाहृतम् । अर्व्वाक् संवत्सरात्स्वामी हरेत परतोन्नृपः" या० । यदा तु शुल्काधिकारिभिः स्थानरक्षिभिर्वा नष्टमपहृतन्द्रव्यं राजपार्श्वं प्रत्यानीतन्तदा संवत्सरादर्वाक् प्राप्तचेन्नाष्टिकस्तद्द्रव्यमवाप्नुयात् । अर्द्धं पुनः संवत्सराद्राजा ग्रहणीयात् । स्वपुरुषानीतञ्च द्रव्यं जनसमूहेषूद्घोष्य यावद्वत्सरं राज्ञा रक्षणीयम् । यथाह गोतमः । "प्रनष्टस्वामिकमधिगम्य राज्ञे प्रब्रुवुर्विख्याप्य संवत्सरं राज्ञा रक्ष्यमिति" यत्पुनर्म्मनुनावध्यन्तरसङ्क्रम् । प्रनष्टस्वामिकं द्रव्यं राजा लब्ध्वं निधापयेत् । अर्व्वाक् लाब्धाद्य चेत्स्वामी परतोन्नृपतिर्हरेत्" इति । तच्छ्रुतशास्त्रसम्बन्धब्राह्मणविषयम् । रक्षणनिमित्तं षड्भागादियाचनञ्च तेनैवोक्तम् । "आददीताथ षड्भाग मनष्टाधिगताद्नृपः । दशमं द्वादशं वापि सतान्वर्म्म मनुस्मरन्निति" । तृतीयद्वितीयप्रथमवत्स्मरेषु यथाक्रमं षडादयो भागावेदितव्याः । प्रपञ्चितञ्च तत्पुरस्तात् । सनूनषड्भागादियाचनस्य द्रव्यविशेषे अपवादमाह । "पणानेकशफे दद्याच्छतरःपञ्च मानुषे । महिषोष्ट्रगवां द्वौ द्वौ, पादमादमजाविके" या० । एकशफे अश्वादौ प्रनष्टाधिगते तत्स्वामी राज्ञे रक्षणनिमित्तञ्छतरःपणान् दद्यात् । मानुषे मनुष्यजातीये द्रव्ये पञ्च पणान् महिषोष्ट्रगवां रक्षणनिमित्तम्मूल्येकं द्वौ द्वौपणौ, अजाविके पुनः प्रत्येकम्पादमादं दद्यादिति सर्व्वत्रानुषज्यते । अजाविकमिति समासनिर्द्देशेऽपि पादमादमिति वीप्सावलात्प्रत्येकं सम्बन्धोगम्यते' मिता० ॥ प्रायश्चित्ततत्त्वे तु चौराद्यभविषये विशेषोदर्शितो यथा "प्रकाशक्रये तु स्वामिनोपहरणे नारदेनोक्तम् । वणिग्वीथीपरिगतं विज्ञातं राजपुरुषैः । अविज्ञाताश्रयात् क्रीतं विक्रेता यदि वा हृतः । स्वामी दत्त्वार्द्धमूल्यन्तु प्रगृह्णीत सकन्धनम् । अर्द्धं द्वयोरपहृतं तत्र स्यात् व्यवहारतः । अविज्ञातक्रये दोषस्तथा चापरिपालने । एतत्त्रयं समाख्यातं द्रव्यहानिकरं परम्" इति ।

अस्वाम्य न० अभावे न०त० । १स्वाम्याभावे स्वत्वाभावे न० ब० । २ स्वत्वशून्ये त्रि० । अस्वाम्यं हि भवेत्तस्य" स्मृतिः

अस्वावेश त्रि० स्वस्मिन् स्वस्याने स्वभावे वा आविशति आ+विश-अच् ७त० । स्वस्याने स्वभावे वा स्थिते "जरदष्ट्रस्वावेशम्" ऋ० ७,३८,७ ।

अस्वास्थ्य न० अभावे न०त० । १स्वास्थ्याभावे "य इत्यस्वास्थ्यमहर्दिवं दिवः" माघः । २रोगादिद्यभिभवे च न०ब० । ३तद्वति त्रि० ।

अस्वीकार पु० अभावे न०त० । १स्वीकाराभावे न०ब० । २तत्कर्त्तरि त्रि० । स्वीकारोऽङ्गीकारः प्रतिग्रहश्च ।

अस्वीकृत त्रि० न स्वीकृतः १गृहीतभिन्ने २अङ्गीकृतभिन्ने च ।

अस्वैरिन् पु० स्वैरी स्वाधीनः न०त० । १परतन्त्रे । स्त्रियां ङीप् ।

अह गतौ आत्म०भ्वा०सक० इदित् सेट् । अंहते आंहिष्ट । आनंहे "आनंहिरेऽद्रिं प्रति चित्रकूटम्" "आंहिषातां रघुव्याघ्रौ शरभङ्गाश्रमं ततः" भट्टिः । रि अंहिः पादः अंहतृ अंहः पापम् । इन् वा० नलुक् । अहिःसर्पः केदारश्च । "एवा त इन्द्रोचयमहेम" ऋ० २,१८,७, वेदे तु वा० नलुक् । लटः पञ्चानां लिटः पञ्चकादेशे ब्रुवाहादेशः आह आहतुः आहुः आत्थ आहथुः "इत्याह भगवान् मनुः" इत्यादौ तु चादिगणपठितं विभक्तिप्रतिरूपमाहेति । [आङ्गिरुत् त ।

अह दीप्तौ चुरा० इदित् उभ०सक० सेट् । अंहयति ते

अह व्याप्तौ स्वा०प०सक० सेट् । अश्नोति । आहीत् आह ।

अह अव्य० अहि-घञ् पृ०नलोपः। १प्रशंसायां, २ क्षेपे, ३वियोगे, ४निश्चये, ५आचारातिशये, ६ऐश्वर्य्ये च। "अथह तदिन्द्रोऽसुप्त देवो हि सः" "इदमहेदं सर्वं कृतपश्चाल्लक्षमथायम्" शत०ब्रा०।

अहंयु त्रि० अहमहङ्कारोऽस्यास्य युस्। १गर्व्वयुक्ते २अभिमानिनि "अहंयुनाथ चितिपः शुभंयुः" भट्टिः।

अहंश्रेयस् त्रि० अहमित्यव्ययम् अहमेव श्रेयान् यत्र। अहंश्रेयानितिनिर्द्देशप्रयोजने। "अथ ह प्राणा अहंश्रेयसे व्यूदिरेऽहंश्रेयानहंश्रेयानस्मीति" छा०उ० "अथ ह प्राणाः एवं यथोक्तगुणाः सन्तोऽहंश्रेयान् अहंश्रेयान् अहंश्रेयानस्मीति एतस्मिन् प्रयोजने व्यूदिरे नाना विरुद्धं वा ऊदिरे उक्तवन्तः" भा०। "ते हेमे प्राणा अहंश्रेयसे विवदमाना ब्रह्म जग्मुः" बृ०उ०। "ते इमे प्राणा वागादयोऽहंश्रेयसे अहंश्रेयानित्येतस्मै प्रयोजनाय विवदमानाः विरुद्धं वदमाना ब्रह्म जग्मुः" भा०।

अहः(हस्क)कर पु० अहः करोति कृ-ट वा सत्वम्। सूर्य्ये २अर्कवृक्षे च। [रो रः। १सूर्य्ये २अर्कवृक्षे।

अहः(हर्प)पति पु० अह्नः पतिः उदयेन प्रवर्त्तकत्वात्। वा

अहः(हग्शे)शेष पु० अह्नः शेषः वा सत्वम्। १दिवावसाने अहःशेषो यत्र ब०। २अशौचाद्यन्तिमदिने।

अहङ्कार पु० अहमिति क्रियतेऽनेन कृ-घञ्। १अहमित्यभिमाने आत्मनि उत्कर्षावलम्बने २गर्व्वे ३तदाश्रये अन्तःकरणभेदे "मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम्। संशयोनिश्चयो गर्व्वःस्मरणं विषया इमे" वेदा०परि०। सांख्यमतसिद्धे ४अभिमानकारणे महत्तत्त्वजन्ये पञ्चतन्मात्रादीनां कारणे तत्त्वभेदे च यथोक्तं सां०का०। "प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोड़शकः। तस्मादपि षोड़शकात् पञ्चभ्यः पञ्च भूतानि" इत्युद्दिश्य तल्लक्षणकार्य्यं तत्रैवोक्तं यथा 'अभिमानोऽहङ्कारस्तस्मात् द्विविधः प्रवर्त्तते सर्गः। एकादशकश्च गणस्तन्मात्रपञ्चकं चैव"। व्याख्यातं च कौ० "अभिमानोऽहङ्कारः यत् खल्वालोचितं, मतञ्च तत्राहमधिकृतः, अहं खल्वहमत्र, मदर्थाः एवामी विषयाः, मत्तोनान्योऽत्राधिकृतः कश्चिदस्यतोऽहमस्मीति योऽभिमानः सोऽसाधारणव्यापारत्वादहङ्कारः तमुपजीव्य हि बुद्धिरध्यवस्यति "कर्त्तव्यमेतन्मयेति"। तस्य कार्य्यभेदमाह तस्मात् द्विविधः प्रवर्त्तते सर्गः। प्रकारद्वयमाह एकादशकश्च गणः इन्द्रियाङ्गयः तन्मात्रपञ्चकञ्चैव द्विविधएव सर्गोऽहङ्कारात् न तत्यदृत्तेरकारेणावधारयति"। "सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोऽहङ्कारोऽहङ्कारात् पञ्च तन्मात्राण्युभयमिन्द्रियम्" सा०सू०। अहङ्कारसत्त्वे प्रमाणमपि दर्शितम् "बाह्याभ्यन्ताभ्यां तैर्वाहङ्कारस्य" सा०सू० "बाह्याभ्यन्ताभ्यामिन्द्रियाभ्यां तैः पञ्चतन्मात्रैश्च कार्य्यैस्तत्कारणतयाहङ्कारस्यानुमानेन बोधः इत्यर्थः। अहङ्कारश्चाभिमानवृत्तिकमन्तःकरणद्रव्यं नत्वभिमानमात्रं द्रव्यस्यैव लोके द्रव्योपादानत्वदर्शनात्। सुषुप्त्यादावहङ्कारवृत्तिनाशेन भूतनाशप्रसङ्गाद्धासनाश्रयत्वेनैवाहङ्काराख्यद्रव्यसिद्धेश्चेति। अत्रेत्थमनुमानम्। तन्मात्रेन्द्रियाणि अभिमानवद्द्रव्योपादानकानि अभिमानकार्यद्रव्यत्वात्। यन्नैवं तन्नैवम्। यथा पुरुषादिरिति। नन्वभिमानवद्द्रव्यमेवासिद्धमिति चेदहं गौर इत्यादिवत्त्युपादानतया चक्षुरादिवत् तत्सिद्धेः। अनेन चानुमानेन मन आद्यतिरेकमात्रस्य तत्कारणतया प्रसाध्यत्वात्। अत्र चायमनुकूलतर्कः। "बहु स्यां प्रजायेय" इत्यादि श्रुतिस्मृतिभ्यस्तावद्भूतादिसृष्टेरभिमानपूर्व्वकत्वाद्बुद्धिसृष्टिपूर्व्वकसृष्टौ कारणतयाभिमानः सिद्धः। तत्रैकार्थसमवायप्रत्यासत्त्यैवाभिमानस्य सृष्टिहेतुत्वं लाघवात् कल्प्यत इति। नन्वेवं कुलालाहङ्कारस्यापि घटोपादानत्वापत्त्या कुलालसूत्रौ तदन्तःकरणनाशे तन्निर्म्मितघटनाशः स्यात् न चैतद्युक्तम् पुरुषान्तरेण स एवायं घट इति प्रत्यभिज्ञायमानत्वादिति चेन्नैवम् सूत्रपुरुषभोगहेतुपरिणामस्यैव तदन्तःकरणभोक्तृशरीरसम्बन्धात्। न तु परिणामसामान्यस्यान्तःकरणस्वरूपस्य वोच्छेदः "कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वादिति" योगसूत्रे सूत्रपुरुषोपकरणस्याप्यन्यपुरुषार्थसाधकत्वसिद्धेरिति। अथ वा घटादिष्वपि स्थिरस्थूलभागोऽहङ्कार एव कारणमस्तु न कुलालाद्यहङ्कारस्तत्रापि सामान्यव्याप्तौ न व्यभिचारः समष्टिबुद्ध्याद्युपादानकत्वं हि सृष्टिः पुराणादिषु सांख्ययोगयोश्च प्रतिपाद्यते न तु तदंशव्यष्टिबुद्ध्याद्युपादानकत्वं यथा महाभूतिथिव्या एव स्थावरजङ्गमाद्युपादानत्वं न तु पृथिव्यंशगन्धोदादेरिति" सां०प्र०भा०। मनुनाप्युक्तम् "मनसश्चाप्यहङ्कारमभिमन्तारमीश्वरम्"। "अहङ्कारश्च वीररसे व्यभिचारिभावः। अस्याधिष्ठाता" शङ्करः। निरहङ्काररूपत्वाद्ब्रह्मादीनामीश्वरादिरेव नः" सा०सू० "नाहङ्कारात् परोरिपुः"। "अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते" गीता।

अहङ्कारिन् त्रि० अहमभिमानं करोति कृ-णिनि। १अभिमानवति २गर्व्वयुक्ते।

अहङ्कृत त्रि० अहमिति कृतं येन । १ सगर्वे २अभिमानवति च । "जातिरूपवयोवृत्तिविद्यादिभिरहङ्कृतः" वाय्र० । "यस्य नाहङ्कृतोभावो बुद्धिर्यस्य न लिप्यते" गीता ।

अहङ्कृति स्त्री अहम्+कृ-क्तिन् । अहङ्कारशब्दार्थे ।

अहत न० हन-क्त न०त० । "ऐणहौतं नवं श्वेतं सदृशं वस्त्र धारितम् । अहतं तद्विजानीयात् पावनं सर्वकर्मसु" १दृष्टलक्षणे "निर्ग्रन्थिकाक्षालितं यदहतं तत् प्रचक्षते २दृष्टलक्षणे च वस्त्रे "अहतैश्चैव वासोभिर्माल्यैरुच्चावचैरपि" भा०श०प० ४ अ० । अहतवासा इत्यादौ करकडुखादिवत् तत्काले अहतत्वादिबोधनाय । ३भोगे-नानाश्रिते "पञ्चद्रौणिक एवैकः सुवर्णस्याहतस्य वै" भा०स०प० ३६ अ० ४हतभिन्ने च त्रि० ।

अहति स्त्री अभावे न०त० । १हननाभावे अविनाशे "अजीवातवेऽहतवे पवस्व" ऋ०९,९६४ न०त० । २हन-नशून्ये विनाशशून्ये त्रि० ।

अहन् न० न जहाति न त्यजति सर्वथा परिवर्त्तनम् । न+हा-कनिन् । १दिवसे । "अहनि च तमस्विन्यां सार्द्ध-प्रहरयामान्तः" स्मृतिः । "अन्योन्यसंसक्तमहस्त्रियामम्" रघुः । अहःशब्दस्य दिवसएव प्रसिद्धः "अहो अहोभि-र्हिमा हिमागमे" नैष० क्वचित्तु दिनरात्रिपरः यथा "मासैर्द्वादशभिर्वर्षं दिव्यं तदहरुच्यते" स्मृ०सि० । "विप्रः शुध्येत् दशाहेन द्वादशाहेन भूमिपः । वैश्यः पञ्चदशा-हेन" मनुः । "अथाहेषु निवृत्तेषु" "द्वादशाहः प्रशस्यते" स्मृतिः तत्परिमाणमुक्तं कालमाध० विष्णुध० । "लघ्वक्षर-सामान्या निमेषः परिकीर्त्तितः । ततः सूक्ष्मतरः कालोनो-पलभ्योभ्रगूत्तम ! नोपलभ्यं यथा द्रव्यं सूक्ष्मं पर-माणुतः । द्वौ निमेषौ त्रुटिस्तैर्यैः प्राणः षड्भस्त्रुटिः स्मृतः । विनाडिका तु षट्प्राणा तत्षष्टिर्नाड़िका स्मृता । अहोरात्रं तु तत्षष्ट्या नित्यमेतत् प्रकीर्त्तितम् । त्रिंशत्-मुहूर्त्ताश्च तथा अहोरात्रे प्रकीर्त्तिताः । तत्र पञ्चदश-प्रोक्ता राम ! रात्रौ दिवा तथा । उत्तरां तु यदा काष्ठां क्रमादाक्रमते रविः । तदा क्रमाद्वेदवृद्धिर्दिवसस्य महाभुज !। तदाश्रितमुहूर्त्तानां तदा वृद्धिः प्रकीर्त्तिता । दिन-वृद्धिर्यदा राम ! दोषाहानिस्तदा भवेत् । तदाश्रितमुहू-र्त्तानां हानिर्ज्ञेया तथा तथा । यदा तु दक्षिणां काष्ठां क्रमादाक्रमते रविः । दिवसस्य तदा हानिर्ज्ञातव्या ताव-देव तु । यौवने तस्य हानौ च तन्मुहूर्त्तास्तथैव च । रात्र्याश्रिताश्च वर्द्धन्ते रात्रयश्च क्रमेण तु । यदा मेषं मकरांशुस्तुलाञ्चैव प्रपद्यते । समरात्रिन्दिवः कालो मुहूर्त्तश्च तदा समः" । मुहूर्त्तानां सौरसार्क्ष ज्यौतिषाणि नामानि त्रिविधानि तत्र सौरानि कालमा० द्रष्टव्यानि । ज्यौतिषाणि आह कश्यपः "गौरीवल्लभसर्पमित्रपितरो वस्वम्बुविश्वाश्रया ब्रह्माम्भोरुहसम्भवेन्द्रहुतवहेवेशनक्त-ञ्चराः । तोयेशार्यमयोनयोदश तथा पञ्चाप्यमी वासरे" । रुद्राजाहिर्बुध्नपूषाश्विनाः स्युः कीनाशोऽग्निर्वाहिचन्द्रादि-तीज्याः । विष्णुर्भानुस्त्वष्टृधात्रा मुहूर्त्ता रात्रौ क्रूरास्वलका-जाग्निरुद्राः" । सार्त्तनामानि तु "रौद्रश्चैत्र मैत्रश्च तथा सारस्वतः स्मृतः । सावित्रो वैन्द्र-देवश्च गान्धर्वः कुतपस्ततः । रोहिणस्तिलकश्चैव विभ-वोनिर्ऋतिस्तथा । यम्बरोविजयश्चैव दिवा पञ्चदश-स्मृताः । अजैकपाजपादश्च तथाहिर्बुध्नमैत्रकौ अश्विनौ याम्य आग्नेयो वैधातश्चान्द्र एव च । आदितेयोऽथ जैवश्च वैष्णवः सौर एव च । ब्राह्मोनक्तस्तथैव मुहूर्त्ताः क्रम-शोनिशि" । एतदनुसारेणैव "ब्राह्मे मुहूर्त्ते किल तस्य देवीति" रघुः "मैत्रे मुहूर्त्ते गणलाञ्छनेन" कुमा० "आरभ्य कृतपे श्राद्धं कुर्यादारोहिणं बुधः" इत्यादि प्रयोगः । अङ्कश्च द्विधा त्रिधा चतुर्द्धा पञ्चधा पञ्चदशधेति पञ्चधा विभागकल्पनापि दृश्यते । तत्र द्विधा विभागाभि-प्रायेण । "यथा चैवापरः पक्षः पूर्वं पश्चात् विशिष्यते । यथा श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यते" मनुः त्रिधा विभागे "अर्द्धं सूर्योदयात् प्रोक्तं मुहूर्त्तानां तु पञ्च-कम् । पूर्वाह्णः पञ्चकं प्रोक्तं मध्याह्नस्तु ततः परम् । अपराह्णस्ततः प्रोक्तं मुहूर्त्तानां तु पञ्चकम्" । "तस्मा-दृक्षः पूर्वाह्णे देवा अयनमभ्यवहरन्ति मध्यंदिने मनुष्याः अपराह्णे पितरः" गौत० "पूर्वाह्णोवै देवानां मध्यन्दिनं मनुष्याणामपराह्णः पितॄणाम्" श्रुतिः चतुर्द्धा विभागे गोभिलः । "पूर्वाह्णः प्रहरं यावत् मध्याह्नःप्रहरस्ततः । आहतीयादपराह्णः सायाह्नश्च ततः परम्" । पञ्चधा विभागमाह व्यासः । "मुहूर्त्तत्रितयं प्रातस्तावदेव तु सङ्गवः । मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णोऽपि तादृशः । सायाह्नस्त्रिमुहूर्त्तः स्यात् स्वस्वकाळें पुरस्कृतः" एवमेव दक्षोक्त-विभागः तच्चाहः नवविधम् "ब्राह्मं दिव्यं तथा पैत्रं प्राजा-पत्यं गुरोस्तथा । सौरञ्च सावनञ्चान्द्रमार्क्षं मानानि वै नव" स्मृ०सि० । तत्र ब्राह्मम् "इत्थं युगसहस्रेण भूत-संहारकारकः । कल्पो ब्राह्ममहःप्रोक्तं शर्वरी तस्य तावतीति" । दिव्यमुक्तं तत्रैव "मासैर्द्वादशभिर्वर्षैर्दिव्यं

तदहरुच्यते"। सुरासुराणामन्योन्यमहोरात्रं विपर्य्ययात् यत् प्रोक्तं तद्भवेद्दिव्यं भानोर्भगणपूरणात्। पित्र्यमाह "त्रिंशत्तिथ्यात्मको मासश्चान्द्रः पित्र्यमहः स्मृतम् निशा च मासपक्षाभ्यां तयोर्मध्ये विभागतः"। "भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते। मन्वन्तरव्यवस्था च प्रजापत्यमुदाहृतम् इति संक्रान्त्यासौरमुच्यते इति च सू०सि० वार्हस्पत्यमब्दशब्दे उक्तम् तेषु नवसु मध्ये चतुर्भिरेव व्यवहारः "चतुर्भिर्व्यवहारोऽत्र सौरचान्द्रार्क्षसावनैः" वार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यशः। सू० सि० तत्र सौरनाक्षत्रादिप्रमाणमुक्तम्। "नाड़ीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्त्तितम्। तन्त्रिंशताभवेन्मासः सावनोऽर्कोदयैस्तथा इति चान्द्रमाह "अर्कोद्विनिःसृतः प्राचीं यद्याल्लहरहः शशी तच्चान्द्रमसमंशैस्तु ज्ञेया द्वादशभिस्तिथिः" एतेषां कार्य्यभेदे यत्नमाह स एव "तिथिः करणमुद्दाहः चौरं सर्व्वाः क्रियास्तथा। व्रतोपवासयात्राणां क्रिया चान्द्रेण मुद्दिशेत्। उदयादुदयः भानोः सावनं परिकीर्त्तितम्। सावनानि स्युरेतेन यज्ञकालावधिस्तु तैः। मृतकादिपरिच्छेदो दिनमासाब्दपास्तथा। मध्यमग्रहभुक्तिश्च सावनेनैव मुद्दिशेत्। अस्य तत्पुरुषान्ते टच् समा० पुंस्त्वञ्च एकाहः दीर्घाहः पुण्याहं तु न०। अव्ययादिपूर्व्वपदत्वे एकदेशिसमासे द्विगौ च टच् अह्नादेशश्चान्तश्च मध्याह्नः पूर्व्वाह्ण"पु०। उत्तरपदद्विगावेव अह्नादेशः न समाहारद्विगौ द्व्यहः त्र्यहः। उत्तरपदे तु द्व्यह्नप्रिय एवं तद्धितार्थे नाह्नादेशः द्व्यहीनः इत्यादि। कालत्वात् भवादौ ठञ् अह्नादेशः आह्निकः स्व अहीनः दिनभवे त्रि०। २विष्णौ तस्य सर्व्वदा प्रकाशमानत्वात् तथात्वम्" "अहः संवत्सरो मासः" विष्णुस०। अर्च्चिरादिमार्गे आतिवाहिके ३अहरभिमानि देवे—च। "ते अर्च्चिषमभिसम्भवन्ति अर्च्चिषोऽहः अह्न आपूर्य्यमाणपक्षम्" छा०उ०। एतदधिलक्ष्य "अतिवाहिकास्तल्लिङ्गात्" शा०सूत्रे आतिवाहिकत्वमेषां निर्णीतम् ४रात्रौ च। "यामवत्वारश्चारोर्मत्यानामहनी उभे"। "अयने अहनो प्राङ्मुखरिति च" भा०३स्क०

अहना स्त्री अहर्मुखत्वेनास्यस्याः अच् नि० टिलोपाद्यभावः। उषायाम् निरु०। "यदहंस्तदहना यात्यक्ता" ऋ०१,१२३,४ "अहना उषसेति" भाष्यम्।

अहन्ता स्त्री अहमित्यव्ययमब्दर्थं तस्य भावः तल्। अब्दर्थभावे २समतायाञ्च।

अहम् अव्य० अह-असु। अहङ्कारार्थे, अब्दर्थे "अहमर्थौदयोर्योऽयं चित्तात्मा वेदनात्मकः। एतच्चित्तद्रुमस्यास्य बीजं विद्धि महामते" वासि०। अहंप्रत्ययः। अहङ्कारः

अहमहमिका स्त्री अहमहंशब्दोऽस्यत्र वीप्सायां द्वित्वम् ठन् न टिलोपः। १परस्पराहङ्कारे २अहमेवाग्रे यास्यामीति रूपायामन्योन्योक्तौ च।

अहम्पूर्व्विका स्त्री अहं पूर्व्वोऽहं पूर्व्वं इत्यभिधानं यत्र। योधादीनां औत्सुक्यात् अहमेव पूर्व्वं यास्यामीत्यध्यवसायेनोक्तौ "जवादहंपूर्व्विकया वियातुभिः" किरा०।

अहम्प्रत्यय पु० अहमित्याकारकः प्रत्ययः। अहमस्मि समेत्याद्याकारे बोधे। "अहम्प्रत्ययवलिङ्गानि च वैदिकानि" द०उ०भा०। "नचायमेकान्तेनाविषयः अहम्प्रत्ययविषयत्वात्" शा० भा०। अहंशब्दालम्बनशाक्ता स च देह एवेति चार्वाकाः। क्षणिकविज्ञानमेवेति बौद्धाः देहादिव्यतिरिक्त इति आत्मिकदर्शनानुसारिणः।

अहम्भट्ट त्रि० अहमेव भट्ट इति निर्ब्बन्धोयत्र। अहंश्रेयः शब्दार्थे "अथातोमनसश्च वाचश्च अहंभट्ट उदितम् मनश्च ह वै वाक्चाहं भट्ट ऊदाते। तद्ध मन उवाच अहमेव त्वच्छ्रेयोऽस्मि न मया त्वं किञ्चनानभिगतं वदसि यन्मम त्वं कृतानुवत्तर्त्यस्यहमेव त्वच्छ्रेयोऽस्मीति अथ ह वागुवाच अहमेव त्वच्छ्रेयस्यस्मि यद्वै त्वं वेत्थाहं तद्विज्ञापयाम्यहं संज्ञापयामीति" शत०ब्रा०।

अहम्मति स्त्री अहमित्याकारा मतिः ज्ञानं मन+क्तिन्। १अविद्यायाम् अन्यस्मिन्नन्यधर्म्मावभासके २अज्ञाने।

अहर त्रि० न हरति अच् न०त०। १हारकभिन्ने हरोहारकः न०ब०। २हारकशून्ये गणितोक्ते शुद्धे ३राशौ ४असुरभेदे पु० असुरशब्दे उदा०।

अहरादि पु० अह्नः आदि। प्रभाते "यशधरमहरादौ रामवासुत्थरश्मिः" माघः। वार्त्तिके कोक्ते पत्यादिशब्दे परे रोःस्थाने रेफादेशनिमित्ते अहन् गिर्—धुर् इति शब्दगणे।

अहर्गण पु० अह्नां गणः। दिनसमूहे। यज्ञाङ्गानां मध्यभावादिज्ञानसाधनानि सूच्यवधि ज्ञेतवराहकल्पावधि कल्पारम्भावधि वा इष्टदिनपर्य्यन्तं यानि दिनानि गतानि तेषां समूहे। तत्र सूच्यवहगणस्तावत् "इत्थं युगसहस्रेण भूतसंहारकारकः। कल्पोब्राह्ममहःप्रोक्तं शर्व्वरी तस्य तावती। परमायुः शतं तस्य तथाहोरात्रसंख्यया। आयुषोऽर्द्धमितं तस्य शेषे कल्पोऽयमादिमः। कल्पादह्नश्च

मनवः षट् व्यतीताः ससन्धयः । वैवस्वतस्य च मनोर्युगानां त्रिघनो गतः । अष्टाविंशाद्युगादस्माद्यातमेतत् कृतं युगम् । अतः कालम् प्रसंख्याय संख्यामेकत्र पिण्डयेत्" । सू०सि० तदानयनप्रकार उक्तः । तत्र सृष्ट्यादिकस्य अहर्गणस्यानयनमित्थम् । ब्राह्मदिनमानं मनुष्यपरिमाणेन ४३२०००००० वर्षाः रात्रिमानञ्च तथा, इत्यहोरात्रमानम् ८६४०००००० वर्षाः ब्राह्माहोरात्रमानम् ३६०गुणितं तस्य वर्षमानम् १७५१०४०००००००० एवं वर्षशतं ब्रह्मणः परमायुः ३१५०४००००००००० तस्यायुषोऽर्द्धम् ८७५५२०००००००००वर्षागताः । मन्वन्तरसंख्या३०६७२०००० षड्भिर्गुणिताः १८४०३२०००० एते वर्षाः षण्णां मनूनां गताः । तथा सन्धयश्च सप्त कृतयुगप्रमाणा गतास्तत्र युगसन्धिमानम् १७२८००० कृतप्रमाणवर्षाः सप्तभिर्गुणिताः १२०९६००० वर्षाः । सप्तमस्य वैवस्वतमनोः २७युगानि गतानि तेषां समष्टिः११६६४०००० वर्षाः सत्यादीनां त्रयाणां गतानां युगानां मानम् ३८८८००० । एवमादिरुक्तितः वर्त्तमानयुगान्तर्गतद्वापरयुगपर्य्यन्तम् । ८७५५२१८७२८४४००० वर्षाः गताः परार्द्धतः १८७२८४४०००वर्षा गताः । वर्त्तमान महायुगात् ३८८८००० वर्षागताः । एवमब्दपिण्डं कृत्वा तत्र कलियुगगताब्दापिण्डं योज्यम् । एतानि च सौरकल्पाणीति३६० गुणितानि सौरदिनवृन्दानि गतानि भवन्ति । "मध्यमग्रहभुक्तिश्च सावनेन दृक्तुल्या सावनैरेव ग्रहमध्यमावग्रानमतस्तेभ्यः सि०शि० चान्द्रसावनानयनं दर्शितम् । यथा "कथितकल्पगतोऽर्कसमागमो रविगुणो गतमासससमन्वितः । खदहनै ३०गुणितस्त्रिथिसंयुतः पृथगतोऽधिकमास १५८३३०००० समाहतात् । रविदिनानि १५५५२०००००००० गताधिकमासकैः कृतदिनैः सहितो द्युगणो विधोः । पृथगतः पठितावम २५०८२५५०००० संगुणाद्विधुदिना १६०२८८८००००० प्रगतावमवर्जितः । भवति भास्करवासरपूर्वको दिनगणो रविमध्यमसावनः । अधिकमासदिनत्रयशेषतोद्युघटिकादिकमत्र न गृह्यते" । "अत्र वासना । कल्पगताब्दा द्वादशगुणिता रविमासा जातास्ते चैत्रादिगतचान्द्रतुल्यैः सौरैरेव युतास्त्रिंशद्गुणा दृष्टमासप्रतिपदादिगततिथितुल्यैः सौरैरेव दिनैर्युताः । एवं ते सौरा जातास्तेभ्यः पृथक्स्थितेभ्योऽधिमासानयनं त्रैराशिकेन । यदि कल्पसौरदिनैः कल्पाधिमासा लभ्यन्ते तदैभिः किमिति । फलं गताधिमासाः । तैर्दिनीकृतैः पृथक् स्थितः सौराहर्गणैः सहितश्चान्द्रो भवति । यतः सौरचान्द्रान्तरमधिमासदिनान्येव । अथ चान्द्राद् द्युगणादवमानयनं त्रैराशिकेन । यदि कल्पचान्द्रैः कल्पावमानि लभ्यन्ते तदैभिः किमिति । फलं गतावमानि । तैरूनश्चान्द्रोऽहर्गणोऽतः कर्त्तव्यः । यतः सावनचान्द्रान्तरेऽवमान्येव । एवं कृते सति रवेर्मध्यमः सावनाहर्गणो भवति न स्फुटः । मध्यमस्फुटाहर्गणयोर्भेदो गोले कथितः । स चाहर्गणोऽर्कादिः । यतः कल्पादौ रविवासरः । अत्राऽधिमासानयनेऽधिमासशेषं न स्थाप्यम् । न पुनस्तस्माद्दिनाद्यवयवा ग्राह्याः । एवमवमशेषमपि । न तस्माद्घटिकादिकं ग्राह्यम् । नन्वनुपातः सावयवो भवति कृतस्तदवयवा न ग्राह्याः । तत्कारणं गोले कथितं व्याख्यातं च" प्रमिता० । मध्यमग्रहाद्यहर्गणानयनं तत्रैवोक्तम् । "साध्यात् स चक्राच्च खगात् कृतघ्नात् तत्कल्पचक्राप्तमहर्गणः स्यात्" । निरयचक्रादपि कुट्टकेन वक्ष्येऽयतोऽयाच्च तथाप्ययोगात् । "यद्दस्य भगणराशिभागकला विकला अन्ये विकलाशेषं च कुदिनैः संगुण्य स्वच्छेदेन विभज्योपर्युपरि निक्षिपेत् । तद्यथा । भगणादिग्रहे विकलाशेषावधि कल्पकुदिनगुणे विकलाशेषस्थाने कुदिनैर्विभज्य विकलास्थाने फलं प्रक्षिप्य तत्र पक्षा ६० विभज्य कलास्थाने निक्षिप्यैवं भगणान्तं यावत् । तत्र कल्पभगणैर्हृतेऽहर्गणः स्यात् । अत्रोपपत्तिर्विलोमगणितेन । तथा निरयचक्रादपि यद्वात् तथा केवलाद्यादपि तथा शेषयोः शेषाणां वा योगादहर्गणानयनमप्यत इति ग्रन्थाध्याये कुट्टकविधिना वक्ष्यते" प्रमि० । कलिगताद्यहर्गणानयनं तत्रैव । "कलिगताद्य वा दिनसञ्चये दिनपतिर्भुजप्रहतिस्तदा । कलिसुखध्रुवकेण समन्वितो भवति तद्द्युगणोद्भवखेचरः" । "अत्र कलिगताहर्गणेऽयं विशेषः । शुक्रादयो वारो गणनीयः । यतः कल्पगताहर्गणात् कलिसुखे शुक्रवारो भवति । तत्र च ये ग्रहाणां ध्रुवसंज्ञाः कल्पिताः । तद्द्युगणभवः खेचरश्च कलिसुखध्रुवकेण समन्वितः कार्य इत्यत्र वासनापि सुगमा" प्रमि० । कुट्टकविधिश्च बीजगणिते दर्शितो यथा । "अस्य गणितस्य यद्गणिते महानुपयोगः । तदर्थं किञ्चिदुच्यते । "कल्पाद्य शुद्धिर्विकलाशेषं यद्दिश्य भाज्यः

कुदिनानि हारः । तज्जं फलं खुविकला गुणस्तु लिप्ता-षष्टिघ्नाच्च कला लवाप्तम् । एवं तदूर्द्धं च तथाधिमासाव-मायकाभ्यां दिवसा रवीन्दोः" । "यस्य विकलावशेषाद्यहर्गणयोरानयनम् । तद्यथा । षष्टिभाज्यः । कुदिनानि हारः । विकलावशेषं शुद्धिरिति प्रकल्प्य साध्ये गुणाप्ती । तत्र लब्धिर्विकलाः खुर्गुणस्तु कलावशेषम्। एवं कलावशेषं शुद्धिः षष्टिर्भाज्यः कुदिनानि हारः । फलं कलाः । गुणोऽशशेषम् । एवमंशशेषं शुद्धिस्त्रिंश-द्भाज्यः कुदिनानि हारः । फलं भागाः । गुणो-राशिशेषम्। एवं राशिशेषं शुद्धिर्द्वादश भाज्यः । कुदिनानि हारः । फलं गतराशयोगुणोभगणशेषम् । एवं कल्पभगणा भाज्यः । कुदिनानि हारः । भगणशेषं शुद्धिः । फलं गतभगणाः । गुणोऽहर्गणः स्यादिति । अस्योदाहरणानि त्रिप्रश्नाध्याये । एवं कल्पाधिमासा-भाज्यो रविदिनानि हारोऽधिमासशेषं शुद्धिः । फलं गताधिमासाः । गुणो गतरविदिवसाः । एवं युगावमानि भाज्यश्चन्द्रदिवसा हारोऽवमशेषं शुद्धिः । फलं गतावमानि । गुणोगतचन्द्रदिवसाइति" ग्रन्थि० ।

अहर्गणानयने अधिमासावमपरित्यागे कारणमाह" सि० शि०"अहर्गणस्यानयनेऽर्कमासावैलादिचान्द्रैर्गणकान्विताः किम् । कुतोऽधिमासावमशेषके च त्यक्ते यतः सावयवो-ऽनुपातः । दर्शावधिचान्द्रमसो हि मासः सौरस्तु संक्रान्त्यवधिर्यतोऽतः । दर्शात्यतः संक्रममानतः प्राक् सदैव तिथ्यधिमासशेषम् । दर्शान्ततो यातति-थिप्रमाणैः सौरैस्तु सौरा दिवसाः समेताः । यतोऽ-धिशेषोत्थदिनाधिकास्ते त्यक्तं तदस्मादधिमासशेषम् । तिथ्यन्तसूर्योदययोस्तु मध्ये सदैव तिथ्यवमावशेषम् । त्यक्तेन तेनोदयकालिकः स्यात् तिथ्यन्तकाले द्युगणोऽ-नुपातः" । "मध्यमसाधनेन यावत्प्रमाणा तदन्ते चान्द्रामासान्तः । मध्यमार्कस्य यस्मिन् दिने संक्रान्ति-स्तत्र संक्रान्तिकाले रविमासान्तः । तयोः रविचन्द्रमा-सान्तयोरन्तरे यावत्तिथयः सावयवास्ता अधिमास-शेषतिथयः । यतः सौरचान्द्रान्तरमधिमासाः । अहर्ग-णानयने गताब्दा रविगुणास्ते सौरा मासा जाताः । अतस्तेषु चैत्रादिचान्द्रतुल्याः सौरा एव मासा योजि-तास्ते संक्रान्त्यवधयो जातास्तेषु त्रिंशद्गुणेषु गततिथि-तुल्याः सौरा एव दिवसा योजिताः । अतः सौर-चान्द्रान्तरेणाधिका जातास्तदन्तरमधिमासशेषदिनानि भवन्ति सौरचान्द्रान्तरत्वात् । अतोऽधिमासशेषदिना-नेभ्यः शोध्याः । अथ चाधिमासानयनेऽनुपातलब्धै-रधिमासैर्दिनीकृतैस्तच्छेषदिनैश्च युक्ताः सौराश्चान्द्रा-श्च भवितुमर्हन्ति । एवमत्राधिमासशेषदिनानि ज्ञेयानि । तत्र शोध्यानि । अतः कारणादधिमासशेषं त्यक्तम् । अथावमशेषत्यागकारणमुच्यते । तिथ्यन्तानन्तरं यावतीभिर्घटीभिः सूर्योदया अवमशेषघटिकाः ततश्चान्द्रसावनान्तरमवमानि । यद्यवमशेषं न त्यज्यते तदाऽवमैरवमशेषघटिकाभिश्च तिथय जनीक्रियन्ते तदा तिथ्यन्ते सावनोऽहर्गणो भवति । अथ च सूर्यो-दयोऽवधिः साध्यः । तिथ्यन्ताहर्गणोऽवमशेषघटी-भिर्युक्तः सन्नुदयावधिर्भवति । अतोऽवमशेषे त्यक्ते सति सूर्योदयावधिर्भवति" ग्रन्थि० । "अहर्गणोमध्यम-सावनेन कृतस्फुटत्वात् स्फुटसावनस्य । तदूनखेटा उदयान्तराच्च कर्मोद्भवेनोनयुताः फलेन" सि० शि० अह-र्गणे विशेषमाह सि० शि० । "अभीष्टवारार्थमहर्गणश्चेत् सैको निरेकस्तिथयोऽपि तद्वत् । तदाधिमासावमशेषके च कल्पाधिमासावमयुक्तहीने" । "इह किल स्थूलतिथ्यानयने यस्यां तिथौ यो वार आगतः स चेदहर्गणे नागच्छति तदाहर्गणं सैकं निरेकं कृत्वा यदाः साध्या इति ज्योति-र्विदां संप्रदायो युक्तियुक्त एव । यतोऽहर्गणस्य वारो नियामकः । एवं कृते यो विशेषः सोऽभिधी-यते । तिथयोऽपि तद्वदित्यादि । अत्रैतदुक्तं भवति । यदा वारार्थं सैकोऽहर्गणः कृतस्तदाधिमासावमशेषाभ्यां चन्द्रार्कानयने कोद्धृतैरङ्कृतेन्दुविश्वैरित्यादौ द्वादश-गुणास्तिथयोऽर्कभागेषु याः शेषास्ताः सैकाः कृत्वा द्वादशगुणाः शेषाः । यदा निरेकोऽहर्गणः कृतस्तदा निरेकम् । तथा यदि सैकोऽहर्गणस्तदाधिमास-शेषं कल्पाधिमासैर्युतं कार्यम् । अवमैरवमशेषं च । यतः सैकासु तिथिषु सैकोऽहर्गणो निरेकासु निरेकः । तथा प्रतिदिनमधिमासशेषस्याधिमासैरूपचयोऽवमैरवमशेषः स्यात् युक्तमुक्तम्" इति प्रमिता० ।

अहर्जर पु० अहोभिः परिवर्त्तमानो लोकान् जरयति जृ-षिच्-अच्, अहानि वाऽस्मिन् जीर्य्यन्ति आधारे अप् वा । "संवत्सरे "यथाप्रः प्रवता यन्ति यथा मासा अहर्जरम्" ६०उ०।

अहर्दिव न० अहश्च दिवा च समा० ह्रस्वार्थकतया वीप्सा गम्यते। प्रतिदिने इत्यर्थे "यदत्यमस्यास्यामहर्दिवं

दिवः" माघः अर्थं आद्यच्। २तद्वृत्तौ त्रि०। "अह-र्दिवाभिरूतिभिः"। [दयोऽयच।

अहर्नाथ पु० ६त०। १दिनपतौ २अर्कवृक्षे चाहरधिपा-

अहर्निश न० अहश्च निशा च समा०द्व०। अहोरात्रयोः "तयोः सप्तत्रयो मासः पितॄणां तदहर्निशम्" भा० ६स्क०। "तस्य सोऽहर्निशस्यान्ते प्रसुप्तः प्रतिबुध्यते" मनुः

अहर्बान्धव पु० अह्नि बान्धव इव प्रकाशकत्वात्। १सूर्ये। २अर्कवृक्षे च।

अहर्भाज् स्त्री इष्टकाभेदे। "रात्रिसहस्रेण रात्रिसहस्रेणैकैकां परिश्रितं सम्यक्चासुपाशीताहःसहस्रेणाहःसहस्रेणैकैकामहर्भाजम्"। शत०ब्रा०। [दृक्षे च।

अहर्मणि पु० अह्नि मणिरिव प्रकाशकत्वात्। १सूर्ये २अर्क-

अहर्लोक पु० इष्टकाभेदे। "ततोयाः षट्त्रिंश त्रीणि च शतान्यहर्लोकास्ता अह्नामेव साप्तिः क्रियते" शत०ब्रा०।

अहर्विद् पु० अहः एकाहसाध्यम् अग्निष्टोमं वेत्ति विद-क्विप्। एकाहसाध्याग्निष्टोमवेत्तरि "सुतसोमा अहर्विदः" ऋ० १,२,२।

अहल्य त्रि० न हलेन कृष्यम्। १हलाकृष्ये क्षेत्रे। २देशभेदे पु०। ३गोतमर्षिपत्न्यां स्त्री। अहल्योत्पत्तिर्यथा। "मौद्गल्यस्य सुतो ज्येष्ठोब्रह्मर्षिः सुमहायशाः। इन्द्रसेना ततोगर्भं वज्रस्वं प्रत्यपद्यत। वज्रस्यान्विषुनं जज्ञे सेनकायामिति श्रुतिः। दिवोदासश्च राजर्षिरहल्या च यशस्विनी। शरद्वतश्च दायादमहल्या सुषुवे यतानन्दर्षिश्रेष्ठम् तस्यापि सुमहायशाः" हरि०३२अ० शरद्वतः इति गोतमस्य नामान्तरम्। यद्वंशजातः कृपाचार्यः शारद्वत इति गौतम इति चाख्यायते। तस्यागोतमशापकथा अहल्याशब्दे २६८ पृष्ठेऽस्या। तस्याः शापविमोचनसङ्गम्। "तस्मात् प्रविश्य रामाशु गौतमस्याश्रमं विभो!। तारयैनां महाभागामहल्यां शापविप्लुताम्। विश्वामित्रवचः श्रुत्वा रामः सौमित्रिणा सह। विश्वामित्रं पुरस्कृत्य प्रविवेशाश्रमं ततः। स ददर्श सुरभासां तपसा द्योतितप्रभाम्। सेन्द्रैरपि सुरैः साध्यादनाद्यां सभागतैः। प्रयत्नाच्चिन्तितां धात्रा दिव्यां मायामयीमिव। धूमेनापि परिताङ्गीं दीप्तामग्निशिखामिव। तुषारेणावृतां साभ्रां पूर्णचन्द्रप्रभामिव। मध्येऽम्भसो दुराधर्षां दीप्तां सूर्यप्रभामिव। सा हि गौतमवाक्येन दुर्निरीक्ष्या बभूव ह। त्रयाणामपि लोकानां सावद्यस्य दर्शनम्। इहैव राघवौ तस्याः पादौ जगृहतुस्तदा। सा च तौ पूजयामास कृत्वा गौतमभाषितम्। पाद्यार्घासनसत्कारैर्यथावत् प्रीतमानसा। प्रतिजग्राह रामस्य पूजां तां विधिवत् तदा। ससृजुर्देववाद्यानि पुष्पवृष्टिः पपात खात्। गन्धर्वाप्सरसां चैव महानासीत् समागमः। साधु साध्विति देवाश्च तदाहल्यामपूजयन्। विशुद्धां तपसोग्रेण तदा रामसमागमे। गौतमोऽथ महातेजा दृष्ट्वा दिव्येन चक्षुषा। स्वमाश्रमपदं रामागतं प्रत्यपूजयत्। सभेत्य भार्यया चैव पूतयाऽहल्यया तदा। तत्रैव न्यवसत्सोऽपि सप्तमे महायशाः" इति रामा०आ०। "अहल्या द्रौपदी कुन्ती तारा मन्दोदरी तथा। पञ्च कन्याः स्मरेन्नित्यं महापातकनाशनम्" प्रातःस्मरणीये पुरा०।

अहल्याजार पु० ६त०। इन्द्रे तत्कथा अकृतशब्दे २६८पृष्ठे।

अहल्यानन्दन पु० ६त०। शतानन्दे ऋषौ। तस्योत्पत्ति-कथा अहल्याशब्दे उक्ता अहल्यासुतादयोऽत्र।

अहल्याह्रद पु० ३त०। गोतमाश्रमस्थे स्वनामख्याते तीर्थ-भेदे "ततोगच्छेत ब्रह्मर्षेर्गौतमस्य वनं प्रियम्। अहल्या यां ह्रदे स्नात्वा व्रजेत परमां गतिम्" भा०वन ८३अ०।

अहल्लिक पु० अहनि लीयते ली-ड नि० संज्ञायां कन्। प्रेते। प्रेताहि रात्रौ चरन्तो दिवा लीयन्ते इति प्रसिद्धम्। "अहल्लिकेतिहोवाच याज्ञवल्क्यः" श०उ०। "अहल्लिकेति होवाच याज्ञवल्क्यो नामान्तरेण संबोधनं कृतवान्" भा०। "नामान्तरेण अहनि लीयते इति प्रेत-वाचिनेति" श्वेतः आनन्दगिरिः।

अहस्कर पु० अहःकरवत्। १सूर्ये, "अलङ्कारास्य बधू-रहस्करः" माघः। २अर्कवृक्षे च।

अहस्त त्रि० न हस्तः हस्तौ यस्य। हस्तशून्ये प्राणिनि १ऋगादौ "अहस्ताश्च सहस्तानां शूराणां चैव भीरवः" मनुः २छिन्नहस्ते च। "अपादहस्तो अपृतन्यदिन्द्रम्" ऋ० १,३२,७।

अहस्पति पु० अहःपतिवत्। १सूर्ये २अर्कवृक्षे च।

अहह अव्य० अहं जहाति अहम्+हा-क पृषो०॥ १सम्बो-धने २आश्चर्ये, ३खेदे, ४क्लेशे, ५प्रकर्षे च। "अहहारे त्वा मृद" छा०उ०"अहह महतां निःसीमानश्चरित्रविभूतयः" वीरच०। "अहह कष्टमशिक्षितता विधेः" माघ०।

अहहा अव्य० अहं जहाति हा-डा। "अहहशब्दार्थे" "भिक्षित्वाऽपि बुभुक्षितं यदहहा" गणरत्न०।

अहार्य पु० हृ-ण्यत् न०त०। १पर्वते। २हर्तुमशक्ये ३अभेद्ये च त्रि०। "तत्रात्मभूतैः कालज्ञैरहार्यैः परि-

चारकैः" मनुः अहार्य्यैरभेद्यैः" कुल्लू०। अहार्य्यमेवं स्वगनाभिपट्टम्" गणरत्न०। "अहार्य्यं ब्राह्मणद्रव्यं राज्ञां नित्यमिति स्थितिः" मनुः।

अहि पु० आहन्ति आ+हन+डिन् टिलोपः आडो ह्रस्वश्च। १सर्पे, लोकप्रसिद्धसर्पभेदादि सुश्रुते दर्शितम्। "अशीतिस्त्वेव सर्पाणां भिद्यते पञ्चधा तु सा"। "दर्वीकरा मण्डलिनो राजिमन्तस्तथैव च। निर्विषा वैकरञ्चाश्च त्रिविधास्ते पुनः स्मृताः॥ दर्वीकरा मण्डलिनो राजिमन्तश्च पन्नगाः। तेषु दर्वीकरा ज्ञेया विंशतिः षट् च पन्नगाः। द्वाविंशतिर्मण्डलिनो राजिमन्तस्तथा दश। निर्विषा द्वादश ज्ञेया वैकरञ्चास्त्रयस्तथा। वैकरञ्जोद्भवाः सप्त चित्रामण्डलिराजिलाः। पदाभिस्पृष्टा दुष्टा वा क्रुद्धा व्यासार्दितोऽपि वा। ते दशन्ति महाक्रोधास्तद्वि त्रिविधमुच्यते। सर्पितं रदितं वापि हतोद्यमञ्च निर्विषम्। सर्पाङ्गाभिहतं केचिदिच्छन्ति खलु तद्विदः। पदानि यत्र दन्तानामेकं द्वे वा बहूनि च॥ निमग्नान्यल्परक्तानि यान्युद्वृत्य करोति हि। चञ्चुमालक्यचिह्नानि वैकल्यकरणानि च। सङ्क्षिप्तानि सशोफानि विद्यात्तत् सर्पितं भिषक्। राज्यः सलोहिता यत्र नीलाः पीताः सितास्तथा। विज्ञेयं रदितं तत्तु ज्ञेयमल्पविषञ्च तत्। अशोफमल्पदुष्टासृक् प्रकृतिस्थस्य देहिनः। पदं पदानि वा विद्यादविषं तच्चिकित्सकः। सर्पस्पृष्टस्य भीरोर्हि भयेन कुपितोऽनिलः। करोति शोफं सर्पाङ्गाभिहतन्तु तत्। व्याधितोद्विग्नदष्टानि ज्ञेयान्यल्पविषाणि तु। तथातिवृद्धबालातिदष्टमल्पविषं स्मृतम्। सुपर्णदेवब्रह्मर्षियक्षसिद्धनिषेविते॥ विषन्नौषधियुक्ते च देशे न क्रमते विषम्। रक्ताङ्गलाङ्गलच्छत्रसक्तिकाङ्गुधारिणः॥ ज्ञेयादर्वीकराः सर्पाः फणिनः शीघ्रगामिनः। मण्डलैर्विविधैश्चित्राः पृथवो मन्दगामिनः॥ ज्ञेया मण्डलिनः सर्पा ज्वलनार्कसमप्रभाः। स्निग्धा विविधवर्णाभिस्त्विग्भिर्गूढन्ति राजिभिः॥ चित्रिता इव ये भान्ति राजिमन्तस्तु ते स्मृताः। सुताम्रप्रभा ये च कपिला ये च पन्नगाः॥ सुगन्धिनः सवर्णाभास्ते ज्ञात्या ब्राह्मणाः स्मृताः। क्षत्रियाः स्निग्धवर्णास्तु पन्नगा भयकोपनाः॥ सूर्य्यचन्द्रार्कति ज्ञेयं लक्ष्म तेषां तथास्वजम्। कृष्णा वज्रनिभा ये च लोहिता वर्णतस्तथा। धूम्राः पारावताभास्तु वैश्यास्ते पन्नगाः स्मृताः॥ सङ्किमद्वीपिवर्णाभास्तथैव परुषत्वचः। भिन्नवर्णाश्च ये केचिच्छूद्रास्ते परिकीर्त्तिताः॥ कोपयन्त्यनिलं जन्तोः फणिनः सर्व्व एव तु। पित्तं मण्डलिनश्चापि कफञ्चानेकराजयः॥ अपत्यसमवर्णाभ्यां द्विदोषकरलक्षणम्। ज्ञेयौ दोषौ च दम्पत्योर्विशेषस्तात्र वक्ष्यते॥ रजन्याः पश्चिमे यामे सर्पाश्चित्राशरन्ति हि। शेषेषूक्ता मण्डलिनो दिवा दर्वीकराः स्मृताः॥ दर्वीकरास्तु तरुणा दृष्ट्वा मण्डलिनस्तथा। राजिमन्तो वयोमध्ये जायन्ते क्षतुहेतवः॥ नकुलाकृतिता बाला वारिविप्रहताः क्षयाः। दृष्ट्वा सक्षत्वचो भीताः सर्पास्त्वल्पविषाः स्मृताः। तत्र दर्वीकराः। कृष्णसर्पो काहाकृष्णः कृष्णोदरः श्वेतकपोतो महाकपोतो वलाहको महासर्पः शङ्खपालो लोहिताक्षो गवेधुकः परिसर्पः खण्डफणः कर्कटपद्मो महापद्मो दर्भपुष्पो दधिमुखः पुण्डरीको भ्रुकुटीमुखो विष्किरः पुष्पाभिकीर्णो गिरिसर्पः ऋजुसर्पः श्वेतोदरो महाशिरा अलगर्दो आशीविष इति॥ मण्डलिनस्तु। आदर्शमण्डलः श्वेतमण्डलो रक्तमण्डलश्चित्रमण्डलः पृथतो रोध्रपुष्पो भिलिन्दको गोनसो दृङ्गोनसः पनसो महापनसो वेणुपत्रकः शिशुको मदनः पालिंहिरः पिङ्गलस्तन्तुकः पुष्पाण्डुः षडगोऽग्निको बभ्रुः कषायः कलुषः पारावतो हंसाभरण्यश्चित्रक एणीपद इति॥ राजिमन्तस्तु। पुण्डरीको राजिचित्रोऽङ्कुशराजिर्बिन्दुराजिः कर्दमकृष्णगोधकः सर्षपकः श्वेतहस्तुर्दर्भपुष्पचक्रको गोधूमकः किङ्किणाद इति॥ निर्विषास्तु। गलगोली शुक्लपत्रोऽजगरो दिव्यको वर्षाहिकः पुष्पशकली ज्योतीरथः क्षीरिकापुष्पकोऽन्धाहिकोऽहिपताकोगौराहिको हंसोदय इति। वैकरञ्जास्तु त्रयाणां दर्वीकरादीनां व्यतिकराज्जाताः। तद्यथा। माकुलिः पोटगलः स्निग्धराजिरिति। तत्र कृष्णसर्पेण गोनस्यां वैपरीत्येन वा जातो माकुलिः। राजिलेन गोनस्यां वैपरीत्येन वा जातः पोटगलः। कृष्णसर्पेण राजिमत्यां वैपरीत्येन वा जातः स्निग्धराजिरिति। तेषामाद्यस्य पित्तवह्निपोत्कर्षो द्वयोर्मांसबलदित्वेके। त्रयाणां वैकरञ्जानां पुनर्दिव्येलकरोध्रपुष्पकराजिचित्रकाः पोटगलः पुष्पाभिकीर्णो दर्भपुष्पो वेल्लितकः सप्त तेषामाद्यास्त्रयो राजिलवत् ज्ञेया मण्डलिवत्। एवमेतेषां सर्पाणामशीतिरिति। तत्र महानेत्रजिह्वास्यशिरसः पुमांसः, क्षुद्रनेत्रजिह्वास्यशिरसः स्त्रियः। उभयलक्षणमन्द्विधा अक्रोधा नपुंसका" इति। तेषां

बहूनि पुराणे नामान्युक्तानि तेषां प्राधान्यतो भारते कतिचिदुक्तानि "बहुत्वान्नामधेयानि पन्नगानां तपोधन !। न कीर्त्तयिष्ये सर्व्वेषां प्राधान्येन तु मे शृणु। शेषः प्रथमतो जातो वासुकिस्तदनन्तरम्। ऐरावतस्तक्षकश्च कर्कोटकधनञ्जयौ। कालियो मणिनागश्च नागश्चापूरणस्तथा। नागस्तथा पिञ्जरक एलापत्रोऽथ वामनः। नीलानीलौ तथा नागौ कल्माषशबलौ तथा। आर्य्यकश्चोग्रकश्चैव नागः कलशपोतकः। सुरामुखो दधिमुखस्तथा विमलपिण्डकः। आप्तः करोटकश्चैव शङ्खो वालिशिखस्तथा। निष्टानको हेमगुहो नहुषः पिङ्गलस्तथा। बाह्यकर्णो हस्तिपदस्तथा मुद्गरपिण्डकः। कम्बलाश्वतरौ चापि नागः कालीयकस्तथा। वृत्तसंवर्त्तकौ नागौ द्वौ च पद्मावितिश्रुतौ। नागः शङ्खशिरश्चैव तथा कुम्भाण्डकोदरः। चेमकश्च तथा नागो नागः पिण्डारकस्तथा। करवीरः पुष्पदंष्ट्रो बिल्वको बिल्वपाण्डरः। मूषकादः शङ्खशिराः पूर्णभद्रो हरिद्रकः। अपराजितो ज्योतिकश्च पन्नगः श्रीवहस्तथा। कौरव्यो धृतराष्ट्रश्च शङ्खपिण्डश्च वीर्य्यवान्। विरजाश्च सुबाहुश्च शालिपिण्डश्च वीर्य्यवान्। हस्तिपिण्डः पिठरकः सुमुखः कौणपाशनः। कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः। कुमुदः कुमुदाक्षश्च तित्तिरिर्हलिकस्तथा। कर्दमश्च महानागो नागश्च बहुमूलकः। कर्कराकर्करौ नागौ कुण्डोदरमहोदरौ। एते प्राधान्यतो नागाः कीर्त्तिता द्विजसत्तम !। बहुत्वान्नामधेयानामितरे नानुकीर्त्तिताः। एतेषां प्रसवो यश्च प्रसवस्य च सन्ततिः। असंख्येयेति मत्वा तान्न ब्रवीमि तपोधन !। बहूनीह सहस्राणि प्रयुतान्यर्ब्बुदानि च। अशक्यान्येव संख्यातुं पन्नगानां तपोधन ! भा० आ० ३५ अ०। "अहिपरिकरभाजो भासनैरङ्गरागैः" माघः। महतोऽप्येनसोमासात्त्वचेवाहिर्विमुच्यते" "न पक्षहिंस्रेष्यनास्थां न च भोगेषु नाभिकाम्" लूताहि शरटानाञ्च तिरश्चां चाप्युचारिणमिति" च मनुः। ३स्वर्थे, इन् ४राहौ, ५पथिके, अह-व्याप्तौ इन्। ६इन्द्रवासुरे तस्य सर्व्वलोकव्यापकत्वात्तथात्वम् स च विश्वरूपमितस्वष्टृपुत्रः तदुत्पत्तिकथा भाग० ६स्क० ९अ० "ततपुत्रस्ततस्त्वष्टा जुहावेन्द्राय शत्रवे। इन्द्रशत्रो ! विवर्द्धस्व मा चिरं जहि विद्विषम्। अथान्वाहार्य्यचनादुत्थितो घोरदर्शनः। क्रतान्त इव लोकानां युगान्तसमये यथा। विष्वग्विवर्द्धमानं तमिषुमात्रं दिनेदिने। ददृशुस्ते प्रतीकाशं सन्ध्याभ्रानीकवर्च्चसम्॥ तप्ततास्रशिखाश्मश्रुं मध्याह्नार्कोग्रलोचनम्। देदीप्यमाने त्रिशिखे शूल आरोप्य रोदसी॥ अत्यन्तसुप्रयत्नश्च चालयन्तं पदा महीम्। दरीगम्भीरवक्त्रेण पिबता च नभस्तलम्॥ लिहता जिह्वयार्क्षाणि ग्रसता भुवनत्रयम्। महता रौद्रदंष्ट्रेण जृम्भमाणं मुहुर्मुहुः। विलम्बादुद्वृत्तोत्कावीक्ष्य सर्व्वे दिशोदिश॥ येनाहताहमे लोकास्तपसा त्वाष्ट्रमूर्त्तिना। सर्व्वेऽहत इति प्रोक्तः पापः परमदारुणः" ॥ ७खले, ८वञ्चके, ९सर्पस्वामिके अहेर्यानञ्चले च। "अहुगणस्त्रीच्छोऽहि रहेन्द्रयुक्" व्यो०। "हुतं घनुःखण्डमिवाहिविषः" किरा०। "अहिषस्त्वद्भवता निशम्यताम्" माघः। १०आहन्तरि त्रि० "अहिरसि बुध्नः" ताण्ड्र०। अहिराहन्तारिप्रभृतीनाम्" भा०। अह-व्याप्तौ इन्। ११जले महोव्यापित्वात्तत्त्वम् १२व्यापके १३व्याप्ते च त्रि०। १४द्यावापृथिव्योः द्वि०व० १५पृथिव्यां १६स्त्रीगव्याच्च स्त्री वा ङीप् नागनामत्वात् तज्जातत्वाच्च १७सीसे धातौ। तस्योत्पत्त्यादिकम् भावप्र० "इह भोगिसुतां रम्यां वासुकिस्तु व्यमोचयत्" वीर्य्यं जातस्ततो नागः सर्वरोगापहोऽभवत्" सीसं बद्धं तथा बद्धं योगेष्टं नागनामकम् (नागोभुजगः) सीसं रङ्गगुणं ज्ञेयं विशेषाक्केहनाशनम्। नागस्तु नागवल्लवलं ददाति व्याधिं विनाशयति जीवनमातनोति। वह्निं प्रदीपयति कामबलं करोति स्थूलं च नाशयति सन्ततसेवितः सः। पाकेन हीनो किल बङ्गनागो कुष्ठानि गुल्मांश्च तथातिकटम्। पाण्डुप्रमेहानिलमादयोऽभगन्दरादीन् कुरुतः प्रभुक्तौ" तस्य पाकविधिमाह तत्रैव। ताम्बूलरस संपिष्टशिलालेपात् पुनः पुनः। द्वात्रिंशद्भिः पुटैर्नागो निरुष्यं भस्म जायते। (शिखा मनःशिला) अन्यच्च। "अश्वत्थचिञ्चात्वक्चूर्णं चतुर्थांशेन निक्षिपेत्। तत्पात्रे विद्रुतो नागो लोहदर्व्या प्रचालितः। यामैकेन भवेद्भस्म तस्तुल्या खान्मनःशिला। काञ्जिकेन इयं पक्वा पचेत् दृढपुटेन तम्। खल्वशीतं पुनः पिष्ट्वा शिखया काञ्जिकेन च। पुनः पचेत् समेताभ्यामेवं षष्टिपुटैर्भवेत्"।

अहिंसक त्रि०न हिनस्ति हिंस्-ण्वुल् न०त०। हिंसारहिते

अहिंसा स्त्री हिंस्-अङ् न०त०। १वाङ्मनःकायैः परपीड़ाभावे, २प्राणिपीड़ानिवृत्तौ, ३अन्यासाधीयप्राणिपीड़नाभावे च "अहिंसापरमो धर्म्मः" इति स्मृतिः। "या वेद विहिता हिंसा नियतास्मिंश्चराचरे। अहिंसामेव तां विद्यात् वेदाद्धर्म्मोहि निर्बभौ" मनुना जैवहिंसायां दोषाभावउक्तः एतच्च मीमांसकादिमते सांख्यमते तु

शास्त्रोक्तहिंसायामपि दोषः यथोक्तं सां०का० । "दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः" । अविशुद्धिर्हिंसादोषसंसर्गः यथा च वैधहिंसायां दोषसंसर्गस्तथोक्तमशुद्धिशब्दे ४७६ पृष्ठे । एतस्याश्च भावरूपत्वं गीतायामुक्तम् "बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः । अहिंसा समता तुष्टिः" इत्युपक्रम्य "भवन्ति भावा भूतानां मत्त एव पृथग्विधाः" । इयञ्च साधारणधर्म्मः । "अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः, एतत् सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः" इति मनूक्तेः "क्षमा सत्यं दमः शौचं दानमिन्द्रियसंयमः । अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया, आर्जवं ह्रीरलोभश्च देवब्राह्मणपूजनम् । अनभ्यसूया च तथा धर्म्मः सामान्य उच्यते "विष्णूक्तेः "अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः । दानं दमोदया शान्तिः सर्वेषां धर्म्मसाधनमिति" याज्ञ०उक्तेश्च "सर्वेषां पुरुषाणां ब्राह्मणाद्याचण्डालानां धर्म्मसाधनमिति" "साधारणधर्मश्चाहिंसादिः" "न हिंस्यात् सर्वाभूतानीति" स्मृत्युक्तः आचाण्डालं साधारणधर्मः" मिता० । इयञ्च "अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः" पात०उक्तो यम भेदः, "अहिंसा नाम मनोवाक्कायैः सर्वदा सर्वभूतानामपीड़नं सा परमः शुद्धोधर्मः" "अहिंसा परमोधर्म" इत्युक्तेः अन्ये सत्यादय एतस्या एव शुद्ध्यर्थाः तथा चोक्तं "स खल्वयं ब्राह्मणो यथा यथा तानि व्रतानि समादित्सति तथा तथा प्रमादकृतेभ्यो हिंसानिदानेभ्यो निवर्त्तमानस्तामेवावदातरूपामहिंसां करोतीति" इतिः । तस्याश्च कथंकर्त्तव्यता तदपि "वितर्कबाधने प्रतिपक्षभावनम्" पात०सू० दर्शितम् "एतेषां यमनियमानां वितर्काहिंसादिसंकल्पैः कृतिकारितानुमोदितैः सलोभक्रोधमोहपूर्वकैर्मृदुमध्याधिमात्रैर्दुःखाज्ञानानन्तफलैरिति प्रतिपक्षभावनं कुर्य्यात् घोरेषु संसाराङ्गारेषु पापप्रचलमानेन येन मया शरणमुपगतः सर्वभूताभयप्रदानेन यमादिधर्म्मः स खल्वहं त्यक्त्वा हिंसादीन् पुनस्तानाददानस्तुल्यः शुना । यथा श्वा वान्ताशी तथा त्यक्तस्य पुनरादाने इति वितर्कप्रतिपक्षान् भावयेदित्यर्थः" इतिः । वितर्काणां स्वरूपप्रकारकारणावान्तरभेदफलानि पञ्चभिः पदैः क्रमेण वदन् प्रतिपक्षभावनं स्फुटयति । "वितर्काः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम्" पात०सू० । "वितर्का न इति वितर्काहिंसादयः इति स्वरूपोक्तिः । तत्र हिंसा त्रिप्रकारा स्वयंकृता, कर्त्रिति कारिता, साधुसाध्वित्यनुमोदिता चेति तत्रैकैका पुनस्त्रिविधा भवति कारणभेदात् मांसादिलोभेन, अपकृतमनेनेति क्रोधेन, धर्म्मो भविष्यतीति मोहेन च । एवं नवविधा ज्ञाता हिंसा । लोभक्रोधमोहा अपि प्रत्येकं त्रिविधा भवन्ति मृदुमध्याधिमात्रत्वेन । तत्पूर्व्वकाहिंसादयोऽपि मृदवोमध्या अतिमात्राश्च भवन्ति । तथा कृतकारितानुमोदिताश्च प्रत्येकं नवधा भवन्तीति हिंसायाः सप्तविंशतिर्भेदा भवन्ति । मृदुमध्याधिमात्रा अपि प्रत्येकं त्रिधा भवन्ति मृदुमृदुर्मध्यमृदुस्तीव्रमृदुः मृदुमध्योमध्यमध्यस्तीव्रमध्यः मृदुतीव्रोमध्यतीव्रस्तीव्रतीव्रश्चेति एवं लोभो नवविधः एवं क्रोधमोहाविति तत्पूर्व्वकृताहिंसा सप्तविंशतिभेदाभवन्ति तथा कारितानुमोदिता चेत्येकाशीतिभेदा हिंसा भवति" इतिः । तेषां फलान्याह दुःखाज्ञानानन्तफला इति । मनुनापि "अनुमन्ता विशसिता निहन्ता क्रयविक्रयी । संस्कर्त्ता चोपहर्त्ता च खादकश्चेति घातकाः स्मृताः" इत्यनेन अनुमत्यादीनां हिंसासाधनत्वमुक्तम् यममध्येऽहिंसाफलमप्याह पात०सू० । "अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः" । अहिंसासिद्धौ सत्यां तस्याः हिंसकस्य सन्निधौ स्वभावविरुद्धानामपि अहिनकुलादीनां वैरत्यागः अस्या एव प्रभावात् । अतएव कविभिः अहिंसायमप्रभावादेव शान्ताश्रमः "विरोधिसत्त्वोज्झितपूर्व्ववृत्तरसित्यादि" वर्ण्यते ।

अहिंसक त्रि०न हिनस्ति हिंस्–ण्वुल् नञ् स०त० । हिंसाशीलभिन्ने "धर्म्मस्यहिंसकस्य सद्गिरे" ऋ०५,६४,२ ।

अहिंस्र त्रि० न हिंसः । १हिंसाशीलभिन्ने । "अहिंस्रोदमदानाभ्यां जयेत् स्वर्गं तथा व्रतैः" मनुः "हिंस्राहिंस्रे मृदुक्रूरे धर्म्माधर्म्माविहतान्वदे । यदृच्छया सोऽधात्सर्गे तत्तस्य स्वयमाविशत्" मनुः । "हिंस्राहिंस्रे मृदुक्रूरे धर्म्माधर्म्माविहतान्वदे । ते एव प्रतिपद्यन्ते सृज्यमानाः पुनः पुनः" भा०भा० स्मृतिः । (कुलेखाड़ा) २कुलिकवृक्षे पु० राजव० ।

अहिका स्त्री अहिरिव कायति प्रकाशते दुराक्रमत्वात् । १शालमलिवृक्षे शब्दच० । २भूवनजले पु० ।

अहिकान्त पु० अहेः कान्तः भक्षत्वात् । वायौ सर्पस्य पवनाशनत्वेन वायोस्तत्कान्तत्वम् ।

अहिक्षेत्र पु० अहेः क्षेत्रमिव। प्राग्देशवर्त्ति देशभेदे । भा०व० २५३ अ० कर्णदिग्विजये । "अवतीर्य्य ततः शैलात् पूर्व्वां दिशमभिद्रुतः । अङ्गान् वङ्गान् कलिङ्गांश्च" इत्युपक्रम्य

"आवशीरांश्च योधांश्च अहिक्षेत्रं च योधयन्। पूर्व्वां दिशं विनिर्जित्य वत्सभूमिं तथाऽगमत्"।

अहिगण पु० १अन्तःशास्त्रप्रसिद्धे पञ्चमात्रात्मके आद्यगुरुके अन्त्यलघुत्वयरूपे सप्तमभेदे। ६त०। २सर्पाणां समूहे।

अहिच्छत्र पु० अहेः फणाकारः छत्रमस्यादकः। १मेघशङ्कीवृक्षे, २नगरीभेदे स्त्री। ३देशभेदे पु०। स च देशः पार्थेन निर्जित्य द्रोणाय दत्तः। "अहिच्छत्रं च विषयं द्रोणः समभिपद्यत। एवं राजन्नहिच्छत्रा पुरीजनपदायुता युधि निर्जित्य पार्थेन द्रोणाय प्रतिपादिता" भा०आ०प० १३६ अ०। तत्र द्रुपदराज्यं पूर्व्वमासीत् यथोक्तं हरिवंशे २०अ० "अहिच्छत्रं स्वकं राज्यं पितृं प्राप महाद्युतिः। द्रुपदस्य पिता राजन्! समेवानुमते तदा। ततोऽभूद्द्रुपदोराजा द्रोणस्तेन निराकृतः। ततोऽर्জ্জुनेन तरसा निर्জित्य द्रुपदं रणे। अहिच्छत्रं सकाम्पिल्यं द्रोणायाऽपवर्জितम्। प्रतिगृह्य ततोद्रोणः उभयं जयतांवरः। काम्पिल्यं द्रुपदायैव प्रायच्छद्दिदितं तव" हरि०२०अ० तत्सीमाबन्धश्च भा० आ० प० १३७अ० उक्तः। "कामन्दीमथ गङ्गायास्तीरे जनपदायुताम्। सोऽध्यवात्सीद्दीनमनाः काम्पिल्यञ्च पुरोत्तमम्"। दक्षिणांशापि पञ्चालान् यावच्चर्म्मण्वतीं नदीम्। द्रोणेन चैवं द्रुपदं परिभूयाथ पालिता"। अहिच्छत्रस्य नामान्तरं प्रत्यग्रथः शेष०। अहिच्छत्रे भवः अण् आहिच्छत्रः। स्त्रियां ङीप् गुरूपोत्तमत्वेऽपि गोत्रार्थभिन्नत्वात् न ष्यङ् आहिच्छत्री" सि०कौ०।

अहिजित् पु० अहिं सर्पं हत्वासुरं वा जितवान् जि-क्विप् तुक् च। १कृष्णे, २इन्द्रे च। तत्र कृष्णस्य कालियदमनात्तथात्वम् तत्कथा हरि०६६अ०। "कृष्ण कृष्ण! महाबाहो! गोपानां नन्दिवर्द्धन!। दश्यतामेष वै क्षिप्रं सर्पराजो विषायुधः। इमे नो बान्धवास्तात! त्वां मत्वा मानुषं विभो!। परिदेवन्ति करुणं सर्वे मानुषबन्धवः। तच्छ्रुत्वा रौहिणेयस्य वाक्यं संज्ञासमीरितम्। विक्रोशाऽस्फोटयन् बाहू भित्त्वा तं भोगबन्धनम्। तस्य पद्भ्यां समाक्रम्य भोगराशिं जलोत्थितम्। शिरस्सु कृष्णो जग्राह खड्गेनावनाम्य च। तस्मारुरोह सहसा मध्यमं तन्महच्छिरः। सोऽस्य मूर्द्धिस्थितः कृष्णः ननर्त्त रुचिराकृतिः। स्तूयमानः स कृष्णेन आत्ममूर्त्ता भुजङ्गमः"। इति। इन्द्रस्य वृत्रासुरजयकथा भाग० ६स्कन्धे ६अ० "अथेन्द्रो वज्रमुद्यम्य निर्म्मितं विश्वकर्म्मणा। मुनेः शक्तिभिरुत्सिक्तं भगवत्तेजसान्वितम्" इत्युपक्रम्य इन्द्रवृत्रासुरयुद्धं वर्णयित्वा "भित्त्वा वज्रेण तत्कन्धं निष्क्रम्य बलभिद्विभुः उच्चकर्त्त शिरः शत्रोर्गिरिशृङ्गमिवोजसा" इत्युक्तम्। [जिह्वाश्लक्षतायाम्।

अहिजिह्वा स्त्री अहेर्জिह्वेव तदाकारशिखत्वात्। नाग-

अहिण्डुका स्त्री हिण्ड-उकञ् न०त०। सुश्रुतोक्ते कीटभेदे कीटशब्दे विवृतिः "अहिण्डुकाभिर्दष्टे तोददाहकण्डूश्वयथवोभवेत्" "अहिण्डुकाभिर्दष्टानामापदो विषनाशनम्" इति च सुश्रुतः।

अहित पु० न०त०। १शत्रौ। २पथ्यभिन्ने त्रि०। सुश्रुतोक्तानि अहितानि अपथ्यशब्दे २२६ पृष्ठे उक्तानि "अहितानिलोद्भूतैस्तर्জयद्भिव केतुभिः" रघुः "रामनाम इति हल्लमात्मजे वर्त्तमानमहिते च दारुणे" रघुः "निन्दन्तस्तव सामर्थ्यं मद्विध्यन्ति तवाहिताः" गीता। चतुर्णामपि वर्णानां प्रेत्य चेह हिताहितान्। अष्टाविमान् समासेन स्त्रीदिवाहाद्विबोधत" मनुः। "अहितो देहजोव्याधिर्हितमारण्यमौषधम्"।

अ(आ)हितुण्डिक पु० अहेस्तुण्डं मुखं तेन दीव्यति ठन् ठञ् वा। १व्यालग्राहिणि, २सर्पखेलके च।

अहिहिंस् पु० अहिं सर्पं हत्वासुरं वा हिंसितवान् हिंस-भृते क्विप्। १गरुडे, २मयूरे, ३नकुले, ४इन्द्रे गरुड़ मयूरनकुलानां स्वभावसिद्धं तथात्वम् इन्द्रस्य वृत्रासुर हेतृत्वमहिजिच्छब्दे उक्तम् "अहिहिंसासङ्गवता निगम्यताम्" भाघः। क। अहिहिंसोऽप्युक्तार्थेषु। [स्वभावसिद्धे वैरे।

अहिनकुलिका स्त्री अहिनकुलयोर्वैरम् वुन्। सर्पनकुलयोः

अहिनिर्मोक पु० अहिना निर्मुच्यते निर्+सुच-कर्म्मणि घञ् ६त०। सर्पकञ्चुके (खोलस) इति ख्याते।

अहिनिर्लयणी स्त्री अहिर्निर्लीयतेऽस्याम् निर्+ली-ल्युट् ङीप्। (खोलस) इति ख्याते सर्पनिर्म्मोके। "तद्यथाऽहिनिर्लयणी वल्मीके मृता प्रत्यस्ता शेते" छ०उ०।

अहिपताक पु० अहिरिव पताका तदाकारोऽस्यास्य अच्। सर्पभेदे अहिशब्दे ५८१ पृष्ठे सुश्रुतोक्तशब्दे दोषश्चः।

अहिपति पु० ६त०। वासुकिनागे। अहिनाथादयोऽप्यत्र।

अहिपुत्रक पु० अहेः पुत्र इव कायति प्रकाशते कै-क। सर्पाकारे नौकाविशेषे (छिप्)।

अहिपूतन न०सुश्रुतोक्ते क्षुद्ररोगभेदे यथा "समासेन चतस्रिंशत् क्षुद्ररोगा भवन्ति" इत्युपक्रम्य "निरुद्धगुदोऽहिपूतनं दृषकच्छूर्गुदभ्रंशश्चेति" तान् गणयित्वा "शकृन्मूत्र-

समायुक्तेऽधौतेऽपाने शिशोर्भवेत् । खिन्नस्याक्ष्याध्मानस्य कण्डूरक्तकफोद्भवा । कण्डूयनात्ततः क्षिप्रं स्फोटाः सावश्च जायते । एकीभूतं व्रणैर्घोरं तं विद्यादहिपूतनम्" इति तस्य लक्षणाद्युक्तम् । अस्य स्त्रीत्वमपि ॥ "धात्र्याः स्तन्यं शोधयित्वा बाले साध्याहिपूतना" । "पटोलपत्रत्रिफलारसाञ्जनविपाचितम् । पीतं घृतं नाशयति क्रूरामप्यहिपूतनाम्" "चिकित्सन् सुष्ककण्डूत्वाप्यहिपूतनपानवत्" सुश्रु० ।

अहिफेन पु० अहेः फेनः गरलमिव तीक्ष्णगुणत्वात् । (आफिङ्) इति ख्याते १द्रव्यनिर्यासभेदे । ६त० २सर्पफेनायाञ्च ।

अहि(वु)बुध्न पु० अहेरिव बुध्नो मूलं यस्य । १रुद्रभेदे २तद्देवताके २उत्तरभाद्रपदनक्षत्रे ३सप्तर्षिभेदे च । ष० अहिर्बु-(र्बु)ध्नोऽहि(र्बु)र्बुध्नोऽस्यत्र । तत्स्वरूपं ध्यानशब्दे वक्ष्यते । "अजैकपादहिर्बुध्नः विरूपाक्षश्च रैवतः" विष्णुध० । सप्तर्षिभेदश्च ऋक्षशब्दे ५७६ पृष्ठे उक्तः तच्चरितस्य तद्देवताकत्वञ्च ऋक्षेषाशब्दे ४६८ पृष्ठे उक्तम् ।

अहिभय न० अहेः, मटहस्यत्वात् आहृताकारत्वाच्च अहिरुल्यात् स्वपत्नात् भयम् । रात्रां स्वपत्नजनिते १भये ६त० । २सर्पभये च । [भयनाशिकायाम् भूम्यामलक्याम् ।

अहिभयदा स्त्री अहिभयं द्यति खण्डयति दो-क । सर्प

अहिभानु पु० अहिर्व्याप्तो भानुस्सङ्गतिरस्य । सूर्य्यगतिहेतौ वायौ प्रवाहानिलेनैव सूर्य्यगतेर्ज्योतिषोक्तेस्तथात्वम् । "मरुतो अहिभानवः" ऋ० १,१७२,१ ।

अहिभुज् पु० अहिं भुङ्क्ते क्विप् । १गरुडे, २मयूरे, ३नकुले च

अहिमर्हत् पु० अहिमाभूषणतया बिभर्त्ति भृ-क्विप् । १शिवे

अहिम न० विरोधे न० त० । १उष्णस्पर्शे २तद्वति त्रि० ।

अहिमद्युति पु० अहिमा उष्णा द्युतिरस्य । १सूर्य्ये २अर्कवृक्षे च अहिमकरादयोऽप्यत्र ।

अहिमन्यु त्रि० अहिरिव हिंस्रोमन्युरस्य । १हननशीले २अहितुल्यहिंसक्रोधे च "गवसाऽहिमन्यवः" ऋ० १, ६४,८ । ६त० । ३सर्पक्रोधे च । [कुलीनामलतायाम् ।

अहिमर्दनी स्त्री अहिर्मर्द्यतेऽनया मृद-ल्युट् । गन्धना-

अहिमाय त्रि० अहेरिव कुटिला मायाऽस्य । वृत्रासुरादौ "वृत्रस्तेरहिमायान् अभि द्यून्" ऋ० १,१८०,४ ।

अहिमार पु० अहिं मारयति मृ-णिच्-अण् । १अरिमेदवृक्षे सर्पमारके २गरुडे ३मयूरे ४वृत्रासुरनाशके इन्द्रे च । [अरिमेदवृक्षे ।

अहिमेद(क) पु० अहिराहन्ताऽरिरिव मेदोऽस्य वा कप् ।

अहिरिपु पु० ६त० । १गरुडे २मयूरे ३नकुले ४कृष्णे च ५वृत्रासुरौ इन्द्रे च । अहिजिच्छब्दे विवृतिः ।

अहिलता स्त्री अहिलोकस्य पातालस्य लता शाक० त० अहिरिव लता वा दीर्घाकारत्वात् । १ताम्बूल्याम् २अहिहेड्डी लता शा० त० । ३गन्धनाकुल्याम् ।

अहिविद्विष् पु० ६त० । १गरुडे २मयूरे ३नकुले ४कृष्णे ५गन्धनाकुलीवृक्षे वृत्रासुरौ इन्द्रे च "द्रुतं धनुःखण्डमिवाहिविद्विषः" किरा० । क । अहिविद्विषोऽप्यत्र ।

अहिशुष्म त्रि० अह-व्याप्तौ इन् अहि व्यापि शुष्मं यस्य व्यापकबले । "आस्याङ्गमन्यादहिशुष्म !" ऋ० ५,३३,५ ।

अहिसक्थ त्रि० अहिरिव दीर्घं सक्थि यस्य । १सर्व्वतस्यदीर्घसक्थियुक्ते उपचारात् २तदाधारदेशे पु० । तद्देशादूरभवम् सुवास्वा० अण् । आहिसक्थः । तद्देशादूरभवे देशादौ त्रि० ।

अहिहत्य न० हत्वा हननं भावे क्यप् वेदे न० । १वृत्रासुरहनने "अर्कमहिहत्ये जघ्नुः" ऋ० १,६१, । लोके स्त्रीत्वम् । २सर्पहनने स्त्री । [२इन्द्रे च ।

अहिहन् पु० अहिं सर्पं वृत्रासुरं वा हतवान् क्विप् । १गरुडे

अहीन पु० अहोभिः साध्यते ख । अहःसमूहसाध्ये द्विरात्रादियागभेदे । स च ताण्ड्य० आ० भाष्ये षोडश ऋत्विज उपक्रम्य "एतेऽहीनैकाहैर्याजयन्ति" आपस्त० उक्तः "तएते ज्योत्यादिनामका षोडशर्त्विजोद्विरात्रादिभिरहीनसंज्ञकैरग्निष्टोमादिभिरेकाहसंज्ञकैर्याजयन्ति" भा० "अहीन यजनमशुचिकरमिति" श्रुतिः "अभिचारमहीनञ्च त्रिः कृत्वेह विशुध्यति" मनुः । अहीनानामिनःस्वामी । २सर्पराजे वासुकौ पु० । न हीनः । ३अन्यूने त्रि० न न महीन महीन पराक्रमम् रघुः "वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्म्मसु" मनुः "त्वत्तः कृतमहीनकीर्त्तेः" भा० आ० प० ।

अहीनगु पु० सूर्य्यवंश्ये नृपभेदे "अहीनगुर्नाम स गां समग्रां महीनवाङ्महिषः यशांसि" रघुः "रामस्य तनयोजज्ञे कुशो दृढपराक्रमः । अतिथिस्तु कुशाज्जज्ञे निषधस्तस्य चात्मजः । निषधस्य नलः पुत्रो नभः पुण्डरीकस्तु तस्य वै । नभस्य पुण्डरीकस्तु क्षेमधन्वा ततः स्मृतः । क्षेमधन्वसुतस्त्वासीद्देवानीकः प्रतापवान् । आसीदहीनगुर्नाम देवानीकात्मजः प्रभुः । अहीनगोस्तु दायादः सुधन्वा नाम पार्थिवः" । हरि० व० १६३ अ० ।

अहीनवादिन् त्रि० न हीनः वादो । "अन्यवादी क्रियाद्वेषी नोत्थापता निरुत्तरः । आहूतप्रपलायी च हीनः प्रज्ञविधः स्मृतः" इति स्मृत्युक्तहीनभिन्ने वादिनि ।

अहीमती स्त्री अहिरस्त्यस्याम् मतुप् मरादि०दीर्घः । नदीभेदे
अहीर पु० आभीरस्य पृषो० साधुत्वम् । आभीरे । [उक्तः ।
अहीरणादि पु० अरीहणादिगणे पाठान्तरम् स च गणः तच्छब्दे
अहीरणि पु० अहीन् रैरयति दूरीकरोति रैर-अनि । द्विजिह्वसर्पे तद्दर्शनाद्धीतरे सर्पाः पलायन्ते ।
अहीशुव पु० अहिरिव शूयते शु-क बा० दीर्घः । शत्रौ "पिप्रुं-दासमहीशुवम्" ऋ०८,२२,२ । "अहीशुवं शत्रुम्" भा० ।
अहु त्रि० अह-आप्तौ उन् । व्यापके स्त्रियां ङीप् "पर उर्वीर्वा अन्या उपसदः परोऽहूरन्याः" शत० ब्रा० । अंहते आधारे उन् अंड भगे न० । "यदस्य अंडभेद्या ऽधुं" य०२२,२८, "अंडभगं भेद्यं विदार्य्यं यस्याः" दीपः ।
अहुत पु० नास्ति हुतं हवनं यत्र । धर्मसाधनत्वेऽपि अहोमे श्रुतिपाठे । "अहुतं च हुतञ्चैव तथा प्रहुतमेव च । ब्राह्मं हुतं प्राशितञ्च पञ्च यज्ञान् प्रचक्षते" जपोऽहुतो हुतो-होमः प्रहुतो भौतिको बलिः । ब्राह्मं हुतं द्विजायार्च्चां प्राशितं पित्रतर्पणम्" मनुः यस्य हवनं न हुतं ताडगे २हविरादौ त्रि० । "अथ यत् पुराणा नाश्नन्ति यथा अहुतस्य हविषो नाश्नीयात् एवं तत्सम्बन्धीचितस्य नाश्नी-यात्" शत० ब्रा० ।
अहृणान त्रि० हृणी-रोषणे कण्डा० ताच्छील्ये चानश् वेदे नि०न०त० । अक्रोधने । "किं मे हव्यमहृणानो-जुषेत" ऋ०७,८६,२ । लोके क्वचित् वेदे च अहृणीय-मानः । "राजाना क्षत्रमहृणीयमानाः" ऋ०५,६२,६ ।
अहे अव्य-अह+ए । १खेदे, वियोगे च । "अहे राम ! घनश्याम ! तुम्बामि मुखपङ्कजम् । यदि जीवामि शोकेन पुनः पश्यामि ते मुखम्" ।
अहेड त्रि० हेड-अनादरे अच् न०त० । अवज्ञाशून्ये
अहेडमान त्रि० हेड-शानच् न०त० । आद्रियमाणे अव-ज्ञाशून्ये "अहेडमानो वरुणः" ऋ० १,२४,११ ।
अहेतु पु०न०त० । १हेतुभिन्ने न०ब० । २हेतुशून्ये त्रि० वा कप् अहेतुकोऽप्युक्तार्थे । हेतुः कारणसदृश्यञ्च । कारणञ्च कार्य्याव्यवहितक्षणे कार्य्याधिकरणे स्थितिशाली यथा घटा-दिकं प्रति मृत्तिकादि कटकादिकं प्रति वेत्रादि । तयोस्तद-धिकरणे तत्पूर्व्वं स्थितत्वात् तथात्वम् । कारणताव्याहृतौ च अन्वयव्यतिरेकौ । मतभेदे तदुव्याहृतिः कारणशब्दे वक्ष्यन्ते
अहेरु पु० न हिनोति हि-रु न०त० । मतभूखाम् ।
अहेतुक त्रि० हेतुत आगतम् ठञ् न०त० । १हेतुतोऽ-प्राप्ते २उद्दिश्यान्तरासक्ततयाऽक्षते । ३उपपत्तिशून्ये च । "यत्तु कृतघ्नवदेकस्मिन् कार्य्ये सङ्गमहैतुकम् । अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम्" गीता ।
अही अव्य० न+हा-डी । १शोके, २धिगर्थे, ३विषादे, ४दयायां, ५सम्बोधने, ६विस्मये, ७प्रशंसायाम्, ८वितर्के, ९असूयायाञ्च "अहो महत्त्वं महतामपूर्व्वम्" नीतिः "कुसुमधनुषोमन्दिरमहो" श्यामास्तवः । "अहो अहो-भिर्महिमाहिमागमे" नैष० ।
अहोरात्र पु० अहश्च रात्रिश्च टच् समा० । सूर्य्योदयहय-मध्यवर्त्तिकाले षष्टिदण्डात्मके मानुषे दिने पित्र्याद्यहोरा-त्रमानन्तु-अहश्शब्दे ५७६९पृष्ठे उक्तम् । तिथ्यात्मा सहूर्त्तः स्याद्दिनरात्रस्तु तावतः । अहोरात्रे विभजते सूर्य्योमानु-षदैविके" मनुः । "रात्राह्नाहाः पुंसि" पा०उक्तेः पुंस्त्वे-ऽपि आर्षत्वात् क्लीवम् "रात्रिञ्च तावतीमेव तेऽहोरात्र विदोविदुः" मनुः । [दिवसे गेये रथन्तरनामकसामभेदे ।
अहोरथन्तर न० अह्नि गेयं रथन्तरम् सामभेदः न रो रः ।
अहोरूप न० अह्नो रूपम् न रो रः । दिवसरूपे ।
अहोवत अव्य०अहो च वत च द्व० । १खेदे, २सम्बोधने ३अनु-कम्पायाञ्च । "अहोवत महत् कष्टम्" गणरत्न० "अहोवत महत् पापम्" गीता "अहोवतासि स्मृहणीयवीर्य्यः" कुमा० ।
अह्नवाय्य त्रि० हनु-बा० आय्य न०त० । निह्नवाकर्त्तरि । "सत्यं तत्तुर्व्वशे यदौ विदानो अह्नवाय्यम्" ऋ०८,४५,२७
अह्नाय अव्य० हनु-घञ् द्वित्वं पृषो० वस्य यत्वं न०त० । गौण्ये । "अह्नाय सा नियमजं क्रमसत्ससर्ज" कुमा० "अह्नाय तावदरुणेन तमो निरस्तम्" रघुः स्वच्छन्दो-ऽम्बुदच्छकच्छकुहरच्छातेतराम्बुच्छटा-मूर्च्छन्मोसमहर्द्धि हर्षविहितस्नानाह्निकाऽह्नाय वः" का० प्रा० ।
अह्नर्षु त्रि० अहिमाहन्तारं शत्रुमृहति वध-उ । शत्रुं प्रति आभिमुख्येन गन्तरि "अह्नर्षूणां चित्रायां अवि-ष्याम्" ऋ० २।३८।३ ।
अह्नय त्रि० न जिह्नेति ह्री-अच् न०त० । निर्लज्जे "इणीमहे अह्नयं वाजसन्मियम्" ऋ०१,२,४, ।
अह्नयाण त्रि०ह्री-बा० "आनच् न०त० । निर्लज्जे "अप्स एति युवतिरह्नयाणा" ऋ० ७,८०,२ । [ऋ०६,५४,१ ।
अह्रि पु०हृ-क्रि न०त० । कवौ । "शुक्रं दुदुह्रे अह्नयः"
अह्रुत त्रि० हृ-क्त न०त० पृ० । अकुटिले "समेनमह्रुत द्रमा गिरः" ऋ०६,२४,६ ।
अह्रीक पु० नास्ति ह्रीर्यस्य । १ जघन्यके तस्य दिगम्बरत्वेन लज्जाहीनत्वात्तथात्वम् २निर्लज्जे त्रि० ।

अस्खल त्रि० न स्खलति चलति स्खल–अच् न० त० १भ्रान्तके। २विस्खलभिन्ने त्रि०।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसङ्कलिते वाचस्पत्ये बृहदभिधाने अकारादिकशब्दसमूहः समाप्तः।

आ

आ अव्य० आप–किप् पृ० पलोपः। १वाक्ये (वाक्यस्यान्यथात्वद्योतने पूर्व्वमेवमसंस्था इदानीमेवमिति प्रतिपादने) २स्तुतौ (आ एवं मन्यसे इति स्तुतस्यान्यथा प्रतिपादने) ३अनुकम्पायाम्। ४समुच्चये, ५अङ्गीकारे, ६ईषदर्थे ७क्रियायोगे, ८सीमायां ९व्याप्तौ च। वाक्यस्तुतिभिन्नेऽस्य ङित्त्वमिच्छन्ति अडितोऽस्य एकाज्निपातत्वात् प्रग्रह्यसंज्ञा ङितस्तु न। अतएवोक्तम् "मर्य्यादायामभिविधौ क्रियायोगेषदर्थयोः। य आकारः स ङित् प्रोक्तः वाक्यस्मरणयोरङित्" तत्र सीमायाम् आ–आत्मबोधात् आत्मबोधात् "लौकिकं तद्देवेदं प्रमाणं त्वात्मनिश्चयात्"। व्याप्तौ ब्रह्मास्यासकलात्। सकलं व्याप्येत्यर्थः। एतदर्थे विकल्पेन अव्ययीभावः। आत्मबोधम्। आसकलम्। धातुयोगः उपसर्गः। यथा आगच्छत् यामात्। ईषदर्थे आकल्पः आकेकरः। वाक्यञ्च वाक्यार्थद्योतकता। स्मरणं प्रमाणान्तरावावगतस्य नतु शब्दमात्रेणावगतस्येति तयोर्भेदः।

आकन पु० आ+कन–अच्। ऋषिभेदे कर्ण्णा० फिञ्। आकनायनिः तद्वंशे आनक इति वा पाठः।

आकम्प पु० आ+ईषदर्थे कपि–घञ्। ईषत्कम्पे।

आकम्पन त्रि० आकम्पते आ+कपि–युच्। १ईषत्कम्पनशीले। २भावे ल्युट्। ईषत्कम्पे न०। आ+कपि–णिच्–ल्यु। ३ईषज्ज्ञालके त्रि०। ततएव भावे ल्युट्। ४ईषज्ज्ञालने न०।

आकम्पित त्रि० आ+कपि–कर्त्तरि क्त। १ईषत्कम्पिते "अनोकहाकम्पितपुष्पगन्धी" रघुः। भावे क्त। २ईषत्कम्पने न०। णिच्–कर्म्मणि क्त। ३ईषज्ज्ञालिते त्रि०।

आकल्य न० न कतः स्वच्छताकारी अकतस्तस्य भावः ष्यञ्। अस्वच्छत्वकारित्वे। "न नञ्पूर्व्वात्तत्पुरुषादि त्यादि" पा० सूत्रे तस्य पर्य्युदासात् तत्पुरुष एव ष्यञ्। बहुव्रीहौ तु तलादि। अकतता अकतत्वम्।

आकम्पृ त्रि० आ+कपि–र। ईषत्कम्पशीले।

आकर पु० आकुर्व्वन्ति संघीभूय कुर्व्वन्ति व्यवहारमत्र आ+कृ–घः। १समूहे, "शब्दाकरकरग्रामग्रामणीग्रामणीम्" कविकल्पद्रु०। "बभूव वज्राकरभूषणायाः रघुः"। २श्रेष्ठे च। आकीर्य्यन्ते धातवोऽत्र कृ–अप्। ३रत्नाद्युत्पत्तिस्थाने "आकरे पद्मरागाणां जन्म काचमणेः कुतः" हितो० "शुचीनाकरकर्म्मान्ते भीरुनन्दनिवेशने" "आयव्ययौ च नियतावाकारान् कोषमेव च" "सर्व्वाकरेष्वधीकारो महायन्त्रप्रवर्त्तनम्" मनुः। "दिलीपस्तुर्भणिराकरोद्भवः" रघुः। ४स्थानमात्रे च कमलाकरः पद्माकरइत्यादि। "हरिदश्वः कमलाकरानिव" रघुः "शैलोन्द्रोहिमवान्नाम धातूनामाकरो महान्" रामा०। आकरः स्वपरभूरिकथानां प्रायशो हि सुहृदां सहवासः" नैष०।

आकरिक त्रि० आकरे नियुक्तः ठञ्। खन्यादुत्पत्तिस्थानेषु राज्ञा नियुक्ते तत्र हि निषुक्तस्य लोभाधिक्येन पापसम्भवात् तत्राधिकारस्य मनुना उपपातकमध्ये परिगणना कृता। "सर्व्वाकरेष्वधीकार इति"।

आकरिन् त्रि० आकरः उत्पत्तिस्थानं प्राशस्त्येनास्त्यस्य इनि स्त्रियां ङीप्। "प्रशस्ताकरजाते। "दधतमाकरिभिः करिभिः क्षतैः" किरा०।

आकर्ण अव्य० कर्णपर्य्यन्तम् अव्य०। कर्णपर्य्यन्ते "आकर्ण सङ्कसितमस्य विकाशिकाशम्" माघः।

आकर्णन न० आ+कर्ण–ल्युट्। श्रवणे "सदा तदाकर्ण न तत्पराभूत्" नैष०।

आकर्ष पु० आकृष्यते विषयान्नरतोऽनेन आ+कृष–घञ्। १पाशके, २शारिफलके, ३द्यूते, ४इन्द्रिये धन्विनो ५धनुरभ्यासे च। भावे घञ्। ६आकर्षणे। आधारे घञ्। ७निकषे उपले। खलादिगतं धान्यमाकृष्यतेऽनेन करणे घञ्। अङ्कुशाकारे (आकुड़ा) इति ख्याते टङ्कभेदे। "आकर्षः स्वेव आकर्षश्चः" सि० कौ०। आकर्षति कर्त्तरि अच्। ८आकर्षके त्रि०। मध्यमाकर्षैः कुर्य्यैः" कात्या० १२,३,२०। मध्याकर्षैः कुर्य्यैः" कर्क०। "आकर्षस्तोऽवाक्फलः सुप्रणीतोच्छ्रिते प्रोढोमन्त्रपदः समाधिः" भा० स० ६अ० आकर्षकः हृदयाकर्षकः समाधिः चिन्तनम् अवाक्फलः नीचफलः। आकर्षं (षे) णं चरति उञ् आकर्षिकः। आकर्षणचारिणि त्रि० स्त्रियां ङीप्।

आकर्षक पु० आकर्षति सन्निकृष्टस्यं लौहं आ+कृष-ण्वुल्। (चुम्बक) इति ख्याते १अयस्कान्ते। २आकर्षणकर्त्तरि त्रि० आकर्षे नियुक्तः आकर्षादि०कन्। आकर्षनियुक्ते "आकर्षः निकषोपल इति रेफरहितः पाठः युक्तः" सि० कौ०।

आकर्षण त्रि० आ+कृष-ल्युट्। अन्यत्र स्थितस्य वस्तुनः १बलेन अन्यत्र नयने "योषिदाकर्षणे चैव विनियोगः प्रकीर्त्तितः" तन्त्रम्। आकृष्यतेऽनेन करणे ल्युट्। २आकर्षणसाधने तन्त्रोक्ते षट्कर्म्मान्तर्गते विधानभेदे च। यथा "अथाकर्षणविधानानि कथयामि समासतः। यदुक्तं त्रैपुरे तन्त्रे यद्योक्तं भूतडामरे। श्रीबीजं मान्मथं बीजं लज्जाबीजं समुद्धरेत्। प्रथमं प्रणवं दत्त्वा त्रिपुरादेविपदन्ततः। अमुकीति पदं ह्यन्तमाकर्षेति द्विधा पदम्। खाहान्तं मन्त्रमुद्धृत्य जपेदयुतमुत्तमम्। षट्कोणञ्च समालिख्य रक्तचन्दनकुङ्कुमैः। षड्भिरङ्गैरथो मन्त्रो लज्जाबीजसमन्वितम्। षड्दीर्घभाक्षरैश्चैव नादबिन्दुविभूषितम्। रक्तपुष्पाक्षतधूपनैवेद्यैः परिपूज्य ताम्। भावयेत्तेजसा देवीं त्रिनेत्रां चन्द्रशेखराम्। बालार्ककिरणप्रख्यां सिन्दूरारुणविग्रहाम्। पद्मञ्च दक्षिणे पाणौ जपमालाञ्च वामके। मन्त्रस्यास्य प्रसादेन रम्भामपि तथोर्व्वशीम्। आकर्षयेच्च सन्देहः किं पुनर्मानुषीमिह। भूर्ज्जपत्रे समालिख्य कुङ्कुमालक्तवारिणा। काश्मीरागुरुकस्तूरीरोचनाभिलितेन तु। अनामारक्तमिश्रेण कामलाक्षीमनुं जपेत्। (ॐ श्रीं कामलाक्षि अमुकीमाकर्षय आकर्षय ॐ फट्)। इमं मन्त्रं जपेदादौ सहस्रैकं जपेत् पुनः। भूर्जपत्रं समादाय गुलिकां कारयेत् सुधीः। तेनैव साध्यपादोत्थरजसाप्लुत्य वेष्टितम्। गोधिकं तेजसा भानोर्वेष्टयेत् कटुभिस्त्रिभिः। प्रतिमां स्त्रीनिभां कृत्वा तस्यां त्रिषेसयोदरे। गुलिकां पातयेत् पात्रे प्रतिमां साध्यरूपिणीम्। ताडयाभिमुखीभूत्वा निर्जने निशि साधकः। यावद्रुदति चित्तञ्च तावद्रूपं जपेन्मनुम्। यावदायाति संतप्ता मदनालसविग्रहा" तन्त्रसा०। तत्र होमसाधनद्रव्यमुक्तं तत्रैव। "आकर्षणे तथा लोध्रं सतिलं मधुरान्वितम्"।

आकर्षणी स्त्री आकृष्यतेऽनया आ+कृष-ल्युट् ङीप्। उञ्छस्यपुष्पाद्याहरणार्थे (आङ्गि) १यष्टिकाभेदे। २सुद्राभेदे च सुद्राशब्दे विवरणम्।

आकर्षा(र्या)दि पु० पाणिन्युक्ते कन् प्रत्ययनिमित्ते शब्दगणभेदे आक(र्ष)र्ष, तृणक, पिशाच, पिचण्ड, अजिन, अजकर्ण, चय, निचय, विजय, जय, आचय, नय, पाद, दीप, हृद, ह्राद, ह्लाद, गड्ड, शकुनि "आकर्षा(र्या)दिभ्यः कन्" पा०।

आकर्षिन् त्रि० आ+कृष-णिनि। आकर्षकारके स्त्रियां ङीप्। समुपपूर्वात् तु। दूरगामिनि गन्धे। सहि दूरादेव नासिकां प्राप्य प्राणपुरुषं स्वपरिणामानुकूलयन् समाकर्षतीवेति तस्य तथात्वम्।

आकलन न० आ+कल-ल्युट्। १आकाङ्क्षायाम्, २स्वरूपे ३संग्रहे ४गणने ५अनुसन्धाने च "सेव्यापि सानुनयमाकलनाय यन्त्रा" माघः।

आकलित त्रि० आ+कल-क्त। १अनुसृते २ग्रथिते च। प्रक्षिप्तभुजाऽऽकलितस्तनेन निन्ये"। "सुखेसुखाकलिताधराम्बराम्" इति च माघः।

आकल्प पु० आ+कृप-णिच्-घञ्। १वेशरचनायाम्, २भूषणे च "रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्" शिवध्यानम्। "आकल्पसाधनैस्तैस्तैरूपसेदुः प्रसाधकाः" "अकृतकविधिसव्यापारणीयमाकल्पजातम्" रघुः। ३कल्पयत्यर्थे नो अव्य०। 'आकल्पं नरकं भुङ्क्ते" इति स्मृतिः

आकष पु० आकष्यते यत्र कष-अच्। स्वर्णादिकषणसाधने (कोष्टि) प्रस्तरभेदे। आकषे नियुक्तः कन्। आकषकः तत्रनियुक्ते त्रि० तेन चरति ठक् आकषिकः तेन चारिणि। स्त्रियां ङीष्।

आकस्मिक त्रि० अकस्मादित्यव्ययं कारणाभावे कारणं विना भवः विनया०ठक् ठिलोपः। अकस्माद्भवे। स्त्रियां ङीष्। जगत आकस्मिकत्ववादिनश्चार्वाका इत्यमाडुः। अकस्मादेव भवति कार्य्यं न किञ्चिदपेक्षमिति तदेतन्मतम् गौ० ख० उक्तम्। "अनिमित्ततोभावोत्पत्तिः कण्टकतैक्ष्ण्यादिवत्" एतदवतरणिकायां इत्तिः। यदि कार्य्याणामाकस्मिकत्वं तदा न परमाण्वादीनामुपादानत्वं न वेश्वरस्य निमित्तत्वमत आकस्मिकत्वनिराकरणाय प्रकरणमारभते तत्र पूर्व्वपक्ष सूत्रम् अनिमित्तत इत्यादि। प्रथमार्थे तसिल्। अनिमित्ता भावोत्पत्तिरित्यर्थः तथा च घटाद्युत्पत्तिर्न कारणनियम्या उत्पत्तित्वात् कण्टकतैक्ष्ण्यमयूरचित्रतादयुत्पत्तिवत् इति सूत्रतात्पर्य्यम्" कुसुमा० हरि० "अकस्मादिति किं हेतुनिषेधपरं वा स्वातिरिक्त हेतुनिषेधपरं परमार्थिकहेतुनिषेधपरं वा। अलोभयथाहेतुकत्वमन्यैर्लोकहेतुकत्वं पर्य्यवस्थति"। तथा च आकस्मिकशब्दस्य ताडयार्थचक्षुष्टयपरता। "स्वभावा-

दित्यर्थे परं वेत्युक्तेश्च स्वाभाविकार्थताऽपि तु सर्व्वद०सं० "नन्वडटानिटौ जगद्वैचित्र्यमाकस्मिकं स्यादिति चेन्न तद्वद्रं स्वभावादेव तदुपपत्तेः" अतएवोक्तम् "अग्निरुष्णो जलं शीतं शीतस्पर्शस्तथानिलः। केनेदं चित्रितं तस्मात् स्वभावादेव तत्स्थितिरिति चार्व्वाकमतम् तस्मायुक्तत्वपरोक्षं चार्व्वाकशब्देषे द्रष्टव्यम्।

आकाङ्क्षा स्त्री आ+काङ्क्ष—अङ्। १अभिलाषे, न्यायमते २वाक्यार्थज्ञानहेतौ यत्पदं विना यत्पदस्यानन्वयस्तत्पदे तत्पदवत्त्वरूपे, संबन्धे ३ पदान्तरव्यतिरेकेणान्वयाभावे च "यत्पदेन विना यस्यानुभावकता भवेत् आकाङ्क्षा" भाषा० शब्दचिन्तायां तु "अथ केयमाकाङ्क्षेत्याशिष्य" उच्यते अभिधानापर्य्यवसानमाकाङ्क्षेति" लक्षयित्वा स्वयमेव तद्विदूतं यथा "यस्य येन विनास्वार्थान्वयानुभावकत्वं तस्य तदपर्य्यसानं नाम, विभक्तिधात्वाख्यातक्रियाकारकपदानां परस्परं विना परस्परस्य न स्वार्थान्वयानुभावकत्वम्। परमते नीलोघटोनास्तीति नीलं घटमानयेत्यादौ नामार्थानां कारकाणाञ्च न परस्परमन्वयबोधः। विशेषणान्वितविभक्त्यर्थानन्वयादिति विशिष्टवैशिष्ट्ये नैवान्वयः। किन्त्वर्थः समाजः। अस्माकन्तु नीलघटयोरभेदानुभवबलादभेद एव संसर्गः। विशेषणविभक्तिः साधुत्वार्था। यद्वा समानविभक्तिकयोरभेदानुभवबलाद्विशेषणान्वितविभक्तेरभेदार्थकत्वम् अतोविशेषणविशेष्यभावानुभावकत्वं तत्तत्पदयोर्न परस्परं विना। द्वारमित्यध्याहारं विना प्रतियोग्यलाभाच्च स्वार्थान्वयानुभावकत्वम् विवक्षिता यजेत "भवेदं कार्य्यमिति प्रवर्त्तकं तात्पर्य्यविषयज्ञानं नाधिकारिणं विनेति तदाकाङ्क्षा। यद्वा कर्त्तुरेवाधिकारिणोऽध्याहारेणैव लाभ इति तदन्वयेन शाब्दः किन्त्वानुमानिकः। गौणलाक्षणिकयोरनुभावकत्वपक्षे तदुपस्थापितस्याध्याहृतस्येतरपदं विना नानुभावकत्वम् घटः कर्मत्वमानयनं क्रतिरित्यादावभेदेन नान्वयबोधोऽयोग्यत्वात् तत्तत्पदेभ्यस्तात्पर्य्यविषयतत्तत्पदार्थस्वरूपज्ञानञ्च पदान्तरं विनैव घटमानयतीत्यत्रैव क्रमेण तथान्वयतात्पर्य्येऽपि क्रियाकारकभावेन नान्वयबोधः नामविभक्तिधात्वाख्यातक्रियाकारकपदार्थानामन्वयबोधे तान्येव समर्थानि न तु तदर्थकानि पदान्तराणि अग्निः करणत्वमोदनः कर्म्मता पाकः क्रतिरिष्टसाधनता इति पदेभ्योऽग्निनौदनं पचेतेत्यत्रैवान्वयाबोधनात् अग्निकरणकौदनकर्मकपाकविषयक्रतिरिष्टसाधनमिति वाक्यं न पदम्। अतएव द्वारमित्यत्र पिधेहीति पदाध्याहारः। क्रियापदार्थस्यान्यत उपस्थितावपि कारकान्वयात्। असामर्थ्यन्तु स्वभावात्। अनासन्नमध्यासन्नदण्डायासन्नभेदेनैवान्वयबोधसामर्थ्यमेव। वह्निना सिञ्चतीत्यत्र क्रियाकारकपदयोरन्वयबोधसामर्थ्येऽप्ययोग्यताज्ञानं प्रतिबन्धकं दाहे समर्थस्याग्नेर्मणिरिव। अतएव योग्यताभ्रमात् प्रतिबन्धकाभावे ततोऽन्वयबोधः। न हि स्वभावतोऽसमर्थमारोपितसामर्थ्यं भिन्न भवति पचतिवेति प्रकृते तु पदार्थस्वरूपज्ञानं न त्वन्वयस्यभोऽपि। पुरुषपदं विनापि राज्ञ इत्यस्य पुत्रेण समं स्वार्थानुभावकत्वमिति न तदाकाङ्क्षा यद्वा त्वयाणां स्मरणेऽजनितान्वयबोधदशायां पुरुषान्वयतात्पर्य्याभावान्नान्वयबोध इत्यपेऽपि तथा। न च पुत्रस्योत्थिताकाङ्क्षत्वात्तेनैवान्वयबोध इति वाच्यं तात्पर्य्यवशात् क्वचित् पुरुषेणैव प्रथमसन्वयबोधात् अतएवान्वयबोधसमर्थत्वे सत्यजनिततात्पर्य्यविषयान्वयबोधकत्वमाकाङ्क्षेति केचित्। प्रकृतिप्रत्ययाभ्यामन्वयबोधे जनितेऽपि वाक्यैकवाक्यतावत् क्रियाकारकपदयोरजनितान्वयबोधकत्वमाकाङ्क्षा। नव्यास्तु पदविशेषजन्या पदार्थोपस्थितिः, घटः कर्मत्वमानयनं क्रतिरित्येवंविधपदाजन्यपदार्थोपस्थितिर्याऽसत्तिरन्वयबोधाङ्गमित्यासत्त्यभावादेवं विधशब्दाच्चान्वयबोधः त्वयाप्येवंविधपदार्थोपस्थितेनाकाङ्क्षाहेतुत्वे नावश्यमपेक्षितत्वात् जनितान्वयबोधान्वयानन्तरबोधस्तात्पर्य्याभावादित्याकाङ्क्षायाः कारणत्वमेव नास्ति किन्तु स्वजनकोपस्थितेः परिचायकत्वमिति"। अत्र दिङ्मात्रं माथुरी व्याख्या प्रदर्श्यते प्रपञ्चस्तु तत एवावगन्तव्यः। "सिद्धान्त्यति अभिधानेति अभिधानपदं करणव्युत्पत्त्याशब्दोच्चारणपरम् अभिधत्ते यतस्तस्यापर्य्यवसानं फलानुत्पादश्च तदुच्चारणजन्यतादृशशाब्दबुद्धौ तदुच्चारणजन्यतादृशशाब्दधीप्रागभाव आकाङ्क्षा इति फलितं तच्च पूर्व्वोक्तरूपेण दुष्टम्। न चाभिधानपदं भावव्युत्पत्त्या शाब्दबोधपरं तस्यापर्य्यवसानम् अभावः तथा च तादृशशाब्दबोधे तादृशशाब्दबोधाभाव आकाङ्क्षा इति फलितमिति वाच्यं घटः कर्मत्वमित्यादावतिव्याप्तेरित्यतः पारिभाषिकमभिधानापर्य्यवसानपदार्थमाह यस्येति। यत्पदमिह यत्पदं विनेत्यर्थः। न स्वार्थान्वयानुभावकत्वमिति न तादृशान्वयबोध इत्यर्थः तस्य तदिति तत्पदस्य तत्पदवत्त्वमित्यर्थः। अपर्य्यवसानं तादृशान्वयबोधेऽभिधानापर्य्यवसानं तथा च यत्पदनिष्ठयत् पदव्यतिरेकप्रयुक्तयादृशबुद्ध्यभावः तत्पदस्य तत्पदवत्त्वं तादृशान्वयबुद्धेरभिधानापर्य्यवसानमिति फलितार्थः। पदत्वमत्र शब्दत्वम्।

प्रयुक्तत्वञ्च कारणाभावात् कार्य्याभाव इति प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः तत्प्रतियोगिजन्यतादृशप्रतियोगिकत्वं तत्प्रयुक्तत्वम् । भवति चाव्यवहितपूर्ब्ववर्त्तितारूपसमभिव्याहारसम्बन्धेन घटपदनिष्ठस्यानुस्वारपदस्य व्यतिरेक प्रयुक्तो घटवत्कर्मत्वमिति भेदान्वयबुद्ध्यभाव इति । घटपदस्यानुस्वारपदवत्त्वं तादृशान्वयबोधस्याकाङ्क्षा । एवं विनिगमनाविरहेणाव्यवहितोत्तरवर्त्तितारूपसमभिव्याहारसम्बन्धेनानुस्वारपदनिष्ठस्य घटपदव्यतिरेकप्रयुक्तोऽपि घटवत् कर्मत्वमिति भेदान्वयबुद्ध्यभाव इति तादृशबोधेऽनुस्वारपदस्य घटपदवत्त्वमपि आकाङ्क्षा । अव्यवहितपूर्ब्ववर्त्तितारूपसमभिव्याहारसम्बन्धेन घटपदस्य कर्मत्वपदवत्त्वम्, अव्यवहितोत्तरवर्त्तितारूपसमभिव्याहारसम्बन्धेन कर्मत्वपदस्य घटपदवत्त्वञ्च न घटवत् कर्मत्वमिति भेदान्वयबोधे आकाङ्क्षा-अव्यवहितपूर्ब्ववर्त्तितारूपसमभिव्याहारसम्बन्धेन घटपदनिष्ठस्य कर्मत्वपदस्याव्यवहितोत्तरवर्त्तितारूपसमभिव्याहारसम्बन्धेन कर्मत्वपदनिष्ठस्य घटपदस्य च व्यतिरेकयोर्घटवत् कर्मत्वमिति भेदान्वयबुद्ध्यभावाप्रयोजकत्वात् । कारणाभावस्यैव कार्य्याभावप्रयोजकत्वात् अव्यवहितपूर्ब्ववर्त्तितासम्बन्धेन घटपदनिष्ठस्य कर्मत्वपदस्याव्यवहितोत्तरवर्त्तितासम्बन्धेन कर्मत्वपदनिष्ठस्य घटपदस्य भेदान्वयबुद्ध्यहेतुत्वात्" ।

"वेदान्तपरिभाषायान्तु अन्यथोक्तं यथा तत्र पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वमाकाङ्क्षा क्रियान्वये कारकस्य कारकत्वये क्रियायाः करणत्वये इतिकर्त्तव्यतायाश्च जिज्ञासाविषयत्वात् । अजिज्ञासोरपि वाक्यार्थबोधात् योग्यत्वमुपात्तं तदवच्छेदकञ्च क्रियात्वकारकत्वादिकमिति नातिव्याप्तिः । अभेदान्वये च सनानविभक्तिकपदप्रतिपाद्यत्वं तदवच्छेदकमिति तत्त्वमस्यादि वाक्येषु नाव्याप्तिः । एतादृशाभिप्रायेणैव बलाबलाधिकरणे "सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिन"मित्यत्र वैश्वदेवयागस्याभिक्षान्वितत्वेन न वाजिनाकाङ्क्षेत्यादिव्यवहारः । ननु तत्रापि वाजिनस्य जिज्ञासाविषयत्वेऽपि तद्योग्यत्वमस्त्येव, प्रदेयद्रव्यत्वस्य यागनिरूपितजिज्ञासाविषयतावच्छेदकत्वात् इति चेन्न स्वसमानजातीयपदार्थान्वयबोधविरहसहकृतप्रदेयद्रव्यत्वस्यैव तदवच्छेदकत्वेन वाजिनद्रव्यस्य स्वसमानजातीयाभिक्षाद्रव्यान्वयबोधसहकृतत्वेन तादृशावच्छेदकत्वाभावात् । आभिक्षायान्तु नैवं, वाजिनान्वयस्य तदानुपस्थानात् । उदाहरणान्तरेष्वपि दुर्ब्बलत्व प्रयोजकाकाङ्क्षाविरह एवमेव द्रष्टव्यः" । "आकाङ्क्षेयं तनुरुतया नैव गन्तुं समर्थेति" पदाङ्कदूतम् "साकाङ्क्षः शब्दैर्योबोधः पदार्थान्वयगोचरः" इति "योग्यतार्थगताकाङ्क्षा शब्दनिष्ठानुभाविका" इति शब्दशक्ति०"वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः" सा०द०"आकाङ्क्षाप्रतीति पर्य्यवसानविरहः स च जिज्ञारूपः" सा०द०।

आकाङ्क्षित त्रि० आ+काङ्क्ष–कर्म्मणि क्त । इच्छाविषये ।

आकाङ्क्षिन् त्रि० आकाङ्क्षति आ+काङ्क्ष–णिनि । इच्छावति "अफलाकाङ्क्षिभिर्यज्ञोविधिदृष्टोव इज्यते । यष्टव्यमेवेति मनः समाधाय स सात्विकः" गीता । स्त्रियां ङीप् । "तं भावार्थप्रसवसमयाकाङ्क्षिणीनां प्रजानाम्" रघुः ।

आकाय पु०आ+चि-कर्म्मणि घञ् चितौ कृत्यम् । १चीयमानेऽग्नौ "आकायमग्निं चिन्वीत" त्रि०कौ०उ० २निवासे इति केचित् तत्र कृत्यं चिन्त्यमूलम् ।

आकार पु० आ+कृ–घञ् । १ मूर्त्तौ, २अवयवसंस्थानविशेषे च । आक्रियते आविष्क्रियते हृदृतोभावोऽनेन आ–कृ–करणे घञ् । २हृदृतभावावेदके सुखप्रसादवैवर्ण्यरूपे प्रीत्यप्रीतिसूचके देहचेष्टने । भावे घञ् । ४हृदृगतभावावेदने, ५इङ्गिते च । "आकारस्याद्यसानोऽपि न शक्योविनिगूहितुम् । बलाद्धि विवृणोत्येव भावमन्तर्गतं क्षणात्" "आकारसदृशप्रज्ञः" रघुः । "तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च" रघुः । इङ्गितं हृदृतोभावो बहिराकार आकृतिः" । सज्जनः । ऐतादात्म्ये ७अभेदोपगमे च । आकारश्च सांख्यादिमतसिद्धः अभेदस्थानीयः पदार्थभेदः विषयितानिरूप्यो वा । "यत् संबद्धं सत् तदाकारोल्लेखि विज्ञानं तत् प्रत्यक्षमिति" सां०सू० । "सम्बद्धं भवत् सम्बद्धवस्त्वाकारधारि भवति यद्विज्ञानं बुद्धिवृत्तिस्तत् प्रत्यक्षम् स्वार्थसन्निकर्षजन्याकाराश्रयो वृत्तिः प्रत्यक्षमिति फलितम् । "वृत्तिः संबन्धार्थं सर्पती"त्यागामिसूत्रात् वृत्तेर्न सन्निकर्षजन्यत्वमित्याकाराश्रयग्रहणम् चक्षुरादिद्वारकबुद्धिवृत्तिश्च प्रदीपस्य शिखातुल्या बाह्यार्थसन्निकर्षानन्तरमेव तदाकारोल्लेखिनी भवतीति नासम्भवः" भा० । वेदान्तिभिरपि अन्तःकरणस्य सावयवत्वस्वीकारेण बुद्धिवृत्तेस्तदाकारत्वमङ्गीकृतं यथोक्तं वेदा०परिभा० । "यथा तड़ागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते । स एव परिणामो वृत्ति-

रिष्यते। अनुमित्यादिस्थले तु अन्तःकरणस्य न वह्न्यादिदेशगमनं वह्न्यादेश्चक्षुरादिसन्निकर्षात् तथा चायं घटस्त्वादि प्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहिरेकत्र देशे समवस्थानात् तदुभयावच्छिन्नं चैतन्यमेकमेव विभाजकयोरन्तःकरणवृत्तिघटादिविषययोरेकदेशस्थितत्वेन भेदाजनकत्वात्"। सचाकारस्त्वेषां मते बाह्यवस्तुविषयसत्त्वेन तत्सन्निकर्षेण सम्भवति। बाह्यवस्तुसत्त्वानङ्गीकर्तृमते तु अनादिवासनयैव तदाकारोल्लेख इति यथोक्तं सर्व्वदर्शन स०"। "तस्मात् स्वव्यतिरिक्तग्राह्यविरहात्तदाकिका बुद्धिः स्वयमेव स्वात्मरूपप्रकाशिका प्रकाशवदिति सिद्धम्। तदुक्तम् "नान्योऽनुभाव्यो बुद्धास्ति तस्या नानुभवोऽपरः। ग्राह्यग्राहकवैधुर्य्यात् स्वयं सैव प्रकाशते" इति। ग्राह्यग्राहकयोरभेदश्चानुभातव्यः यत् येन वेद्यते तत्ततो न भिद्यते यथा ज्ञानेनात्मा, वेद्यन्ते ज्ञानेन नीलादयः। भेदे हि सत्यधुना अनेनार्थस्य सम्बन्धित्वं न स्यात् तादात्म्यस्य नियमहेतोरभावात् तदुत्पत्तेरनियामकत्वात् यच्चायं ग्राह्यग्राहकसंवित्तीनां पृथगवभासः स एकस्मिंश्चन्द्रमसि द्वित्वावभास इव भ्रमः अत्राधनादिविच्छिन्नप्रवाहाऽभेदवासनैव निमित्तम्। यथोक्तम् "सहोपालम्भनियमादभेदो नीलतद्धियोः। भेदश्च भ्रान्तविज्ञानैर्दृश्येतेन्दाविवाद्वये" इति। अविभागोऽपि बुद्ध्यात्मा विपर्य्यासितदर्शनैः। ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यत इति" च। न च रसवीर्य्यविपाकादि समानमाम्राम्रोदकोपार्जितमोदकानां स्यादिति वेदितव्यं वस्तुतो वेद्यवेदकाकारविधुरायाः अपि बुद्धेर्व्यवहारपरिज्ञानानुरोधेन विभिन्नग्राह्यग्राहकाकाररूपवत्तया तिमिरादुपहताक्षाणां केशेन्द्रनाड़ीज्ञानभेदवदनाद्युपप्लववासनासामर्थ्याद्द्वयस्योपपत्तेः पर्य्यनुयोगायोगात्। यथोक्तम् "अवेद्यवेदकाकारा यथा भ्रान्तैर्निरीक्ष्यते। विभक्तलक्षणाग्राह्यग्राहकाकारविप्लवाः। तथा कृतव्यवस्थेयं केशादिज्ञानभेदवत्। यदा तदा न सम्बोद्या ग्राह्यग्राहकलक्षणेति"। तस्माद्बुद्धिरेवानादिवासनावशादनेकाकारावभासत इति सिद्धम्"। "अन्येतु न तन्मन्यन्ते तथा हि यदुक्तं ग्राह्यं वस्तुजातं नास्तीति तदयुक्तं प्रमाणाभावात्। न च सहोपलम्भनियमः प्रमाणमिति वक्तव्यं वेद्यवेदकयोरभेदसाधकत्वेनाभिमतस्य तस्याप्रयोजकत्वेन सन्दिग्धविपक्षव्यावृत्तिकत्वात्। नन्वभेदे सहोपालम्भनियमात्मकं साधनं न स्यादिति चेन्न ज्ञानस्यान्तर्मुखतया च भेदेन प्रतिभासमानतया एकदेशत्वैककालत्वलक्षणसंसृष्टत्वनियमसम्भवाच्च। नीलाद्यर्थस्य ज्ञानाकारत्वे अहमिति प्रतिभासः स्यात् नत्विदमिति प्रतिपत्तिः प्रत्ययादव्यतिरेकात्। अथोच्येत ज्ञानस्वरूपोऽपि नीलाकारो भ्रान्त्या बहिर्वद्भेदेव प्रतिभासत इति न तत्राहन्तोल्लेख इति। यथोक्तं "परिच्छेदात्मरादृष्टोऽयं भागो बहिरिव स्थितः। ज्ञानस्याभेदिनो बाह्य प्रतिभासोऽप्युपप्लव" इति "यदन्तर्ज्ञेयतत्त्वं तद्बहिर्वदवभासत" इति च। तदयुक्तं बाह्यार्थाभावे तदुत्पत्तिरहिततया बहिर्वदित्युपमानोक्तेरयुक्तेः न हि वस्तुमिलो वन्ध्यापुत्रवदवभासत इति प्रेक्षावानाचक्षीत भेदप्रतिभासस्य भ्रान्तत्वे अभेदप्रतिभासस्य प्रामाण्यं, तत्प्रामाण्ये च भेदप्रतिभासस्य भ्रान्तत्वमिति परस्पराश्रयप्रसङ्गात् अविसंवादाक्षीणतादिकमेव संविदाना बाह्यमेवोपाददते जगत्युपेक्षन्तेऽवान्तरमिति व्यवस्थादर्शनाच्च। एवञ्चायमभेदसाधको हेतुर्गोसव्यपायसौवन्न्यायवदाभासतां भजेत्। अतोबहिर्वदिति वदता बाह्यं तद्ग्राह्यमेवेति भावनीयमिति भवदीय एव वाणो भवन्तं प्रहरेत्। ननु ज्ञानाभिन्नकालस्वार्थस्य बाह्यत्वमनुपपन्नमिति चेत् न तदनुपपन्नम् इन्द्रियसन्निकृष्टस्य विषयस्योत्पादो ज्ञाने स्वाकारसमर्पकतया समर्पितेन चाकारेण तस्यार्थस्यानुमेयतोपपत्तेः अतएव पर्य्यनुयोगपरिहारौ समञ्जसीभूतौ। "भिन्नकालं कथं ग्राह्यमिति चेत् ग्राह्यतां विदुः। हेतुत्वमेव च व्यक्तेर्ज्ञानाकारार्पणक्षममिति"। तथा च यथा पुष्टा भोजनमनुभोयते यथा च भाषयया देशः यथा वा सम्भ्रमेण क्षेत्रः तथा ज्ञानाकारेण ज्ञेयमनुमेयम्"।

आकारे कुशलः ठञ् आकारिकः। तत्र निपुणे त्रि०।

आकारगुप्ति स्त्री गुप-क्तिन् आकारस्य कृत्रिमभावस्य गुप्तिर्गोपनम्। रत्नादिजनितसुखप्रसादस्य भयजनितविषादादेश्च अन्यहेतुकत्वप्रख्यापनेन वास्तविकत्वापह्नवे गोपने।

आकारण न० आ+कृ-णिच् ल्युट्। १आह्वाने। युच् स्त्रीत्वात् टाप्। आकारणाद्यत्र।

आकाल अव्य० कालपर्य्यन्तम् अव्ययी०। यत्काले निमित्तं पूर्व्वदिने जातम् तत्परदिने तत्कालपर्य्यन्ते "भार्य्याः परमगुरुसंस्थायां चाकालमभोजनं कुर्व्वीरन्निति" आपस्त०।

आकालिक त्रि० अकाले भवं ठञ्। १असमयोत्पन्ने वस्तुनि। स्त्रियां ङीप् "आकालिकौ वीक्ष्य मधुप्रवृत्ति"मिति कुमारः। समानकालौ आद्यन्तौ यस्य समानकालस्य आकलादेशः

दृकञ् च नि० इति मल्लि०। २आशुविनाशिनि, आद्यन्तयोरभावात्, । आकालं व्याप्नोति ठञ्। ३पूर्व्वदिवसे यज्ञसमये उत्पत्तिः परेद्युस्तत्समयपर्य्यन्तव्यापके काले "आकालिकमनध्यायमेतेष्विति" "एतानाकालिकान् विद्यादनध्यायान्ततावपि" "आकालिकमनध्यायं विद्यात् सर्व्वार्द्रेषु च" इति च मनुः। आशुविनाशित्वात् ४विद्युति स्त्री।

आकाश पुंन० समन्तादाकाशन्ते स्वर्य्यादयोऽत्र। १स्वनामख्याते द्रव्यभेदे। स च न्यायादिमते नित्यः सर्व्वमूर्त्तसंयोगी शब्दमात्रविशेषगुणकः संख्यापरिमाणपृथक्त्वसंयोगविभागरूपसामान्यगुणकश्च। तत्सत्त्वे प्रमाणञ्च मुक्ता० दर्शितम् यथा "शब्दोविशेषगुणः चक्षुर्ग्रहणायोग्यबहिरिन्द्रियप्रत्यक्षजातिमत्त्वात्, स्पर्शवत्। शब्दोद्रव्यसमवेतः गुणत्वात् संयोगवत् इत्यनुमाने शब्दस्य द्रव्यसमवेतत्वे सिद्धे शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्व्वकप्रत्यक्षत्वात्, सुखवत्। पाकजरूपादौ व्यभिचारवारणाय सत्यन्तं, पटरूपादौ व्यभिचारवारणाय अकारणगुणपूर्व्वकेति, जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षेति। शब्दोन दिक्कालमनोगुणः विशेषगुणत्वात्, नात्मविशेषगुणः बहिरिन्द्रियग्राह्यत्वात् रूपवत् इत्यत्र शब्दाधिकरणं नवमं द्रव्यं गगननामकं सिध्यतीति। न च वाच्यवर्णेषु सूक्ष्मशब्दक्रमेण वायौ कारणगुणपूर्व्वकः शब्दउत्पद्यतामिति वाच्यम् अवयवद्रव्यभावित्वेन वायुविशेषगुणत्वाभावात्"। "व्याख्यातञ्च दिनक०"शब्दः पृथिव्यादिद्रव्यातिरिक्तद्रव्याश्रितः अद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वात् इत्येवंरूपं बोध्यम्। दर्शितं सूचितम्।अत्रानुमाने स्वरूपासिद्धिं परिहर्त्तुमाह तथाहीति घटादौ व्यभिचारवारणाय चक्षुर्ग्रहणायोग्येति आत्मनि व्यभिचारवारणायबहिरिन्द्रियग्राह्येति रसत्वादौ व्यभिचारवारणायजातिमदिति एतच्चानुमानमग्निद्रव्यसमवेतत्वसाधकानुमाने स्वरूपासिद्धिनिरासायेति बोध्यम्। गुणत्वादिति एतदनुमानेनोक्तपरिशेषानुमानहेतौ विशेष्यासिद्धिर्निरस्ता। विशेषणासिद्धिद्वारमाह शब्दोन स्पर्शवद्विशेषगुण इति। न स्पर्शवतोद्रव्यस्य पृथिव्यादिचतुष्टयस्य विशेषगुण इत्यर्थः। अकारणगुणपूर्व्वकप्रत्यक्षत्वादिति अकारणगुणपूर्व्वकत्वे सति प्रत्यक्षत्वादित्यर्थः। हेतुसत्त्वं प्रतिपादयितुं पाकज इति। जलपरमाणविति अनित्यानां पार्थिवरूपादीनां केषाञ्चिदग्निसंयोगासमवायिकारणत्वात् केषाञ्चित्कारणपूर्व्वकत्वादवोभेदा। न दिक्कालेति शब्द इत्यनुवर्त्तते बहिरिन्द्रियेति। मनसोऽन्यदिन्द्रियं बहिरिन्द्रियं तेन प्रत्यक्षत्वादित्यर्थः। एतेनानाकृगुणग्राह्येकेन्द्रियत्वं बाह्येन्द्रियत्वं तच्च मनस्यतिप्रसक्तं तेनापि रूपादिग्रहणादिति निरस्तम्। इत्यत्र अनेन प्रकारेण पृथिव्यादिद्रव्यानाश्रितत्वसिद्धौ च। सिद्ध्यति इति पूर्व्वोक्तपरिशेषानुमानेन सिद्ध्यतीत्यर्थः। नन्वेतत्सर्वं तदोपपद्येत यदि शब्दस्य विशेषगुणत्वे किञ्चिन्मानं स्यात् तत्तु वच न मानं पश्याम इति चेत् न शब्दोविशेषगुणः लौकिकप्रत्यासत्त्येन्द्रियग्राह्यत्वे सति लौकिकप्रत्यासत्त्या ह्येन्द्रियग्रहणयोग्यतारहिते च सति गुणत्वव्याप्यजातिमत्त्वादित्यनुमानस्यैव तत्र प्रमाणत्वात् प्रभात्वमादाय व्यभिचारवारणाय गुणत्वव्याप्येति गुरुत्वमादाय व्यभिचारवारणाय प्रथमं सत्यन्तं, संख्यात्वमादाय व्यभिचारवारणाय द्वितीयं सत्यन्तम्। सांसिद्धिकद्रवत्वस्नेहधर्माधर्मभावनास्तु प्रकृतहेतोरभावेऽपि तत्र हेत्वन्तरेणैव विशेषगुणत्वं साधनीयमिति भावः। पूर्व्वोक्तानुमाने बाधं स्वरूपासिद्धिं च आशङ्कते न चेति। वायाविति तथा च स्पर्शवद्वायुगुणत्वस्य तत्र सत्त्वात्तदभावसाधने बाध इति भावः। कारणगुणपूर्व्वकत्वकथनं तु अकारणगुणपूर्व्वकत्वघटितहेतोरसिद्धिप्रदर्शनार्थम्। अपावद्द्रव्यभावित्वेनेति स्वाश्रयनाशजन्यनाशप्रतियोगि यद्यत् तद्भिन्नत्वेनेत्यर्थः। ननु तथाप्याकाशे प्रत्यक्षमेव प्रमाणं किमिति नोपन्यस्तमिति चेन्न चाक्षुषत्वे प्रयोजकस्य महत्त्वे सत्यद्भूतरूपवत्त्वस्याकाशेऽसंभवेन चक्षुषः प्रमाणत्वासम्भवात्। ननु यदि आकाशे न चाक्षुषस्तर्हि पचीति चाक्षुषेऽधिकरणत्वेन किंभासत इति चेदालोक एवेति कल्पद्रुमः"। निष्क्रमणप्रवेशनाद्युत्क्षेपणधर्म्मवत्त्वादाकाशसिद्धिरिति सांख्यादयोमन्यन्ते" सांख्यमतानभिप्रायेणैव सूत्रते। "आन्तरीक्षास्तु शब्दः शब्देन्द्रियं सर्व्वच्छिद्रसमूहो विविक्तता चेत्युक्तम्"। "शब्दःश्रोत्रेन्द्रियञ्चापि छिद्राणि च विविक्तता। वियतोदर्शिता एते गुणा गुणविचारिभिरिति" च वेदान्तिभिरुक्तमिति वेदितव्यम्।तदेतन्मतं वै० सूत्रे निराकृतम् यथा "निष्क्रमणं प्रवेशनमित्याकाशस्य लिङ्गम्२०। तदलिङ्गमेकद्रव्यत्वात् कर्म्मवच्च२१। कारणान्तरानुकृतिर्व्यवस्थाभ्यश्च२२। संयोगाद्भावः कर्म्मणः२३। कारणगुणपूर्व्वकः कार्य्यगुणो दृष्टः२४। कार्य्यान्तराप्रादुर्भावाच्च शब्दः स्पर्शवतामगुणः२५ परत्र समवायात् प्रत्यक्षत्वाच्च नात्मगुणो न मनोगुणः२६।

परिशेषाल्लिङ्गमाकाशस्य २७ । द्रव्यत्वनित्यत्वे वायुना व्याख्याते२८ । तत्त्वभावेन २९ । शब्दलिङ्गाविशेषाद्विशेषलिङ्गाभावाच्च३० ।" सू० "इतिशब्दः प्रकारार्थः उत्क्षेपणादीन्यपि कर्म्माणि संगृह्यते सर्ग्गवद्द्रव्यसञ्चारो, निष्क्रमणं, प्रवेशनञ्च तत्कार्य्यमाकाशस्य लिङ्गमिति सांख्याः २० । तदेतद् दूषयितुमाह । निष्क्रमणप्रवेशनादिकर्म्म न तावत् समवायिकारणतया आकाशमनुमापयति कर्म्मण एकद्रव्यत्वात् एकमात्रमूर्त्तसमवायिकारणकत्वात् न कर्म्मापि व्याप्यवृत्तीत्यक्तं न वाऽमूर्त्तवृत्तीति २१। ननु चासमवायिकारणतयैवाकाशमनुमापयिष्यति निष्क्रमणप्रवेशनादीत्यत आह । अनुकूलिङ्गम् अनुकल्प्यते ज्ञाप्यतेऽनेनेति व्युत्पत्त्या, कारणान्तरस्य असमवायिकारणस्य याऽनुकूलिङ्गं तद्वैधर्म्म्यादित्यर्थः । द्रव्यत्वावदसमवायिकारणं न भवत्येव असमवायिकारणता च कारणैकार्थप्रत्यासत्त्या कार्य्यैकार्थप्रत्यासत्त्या च, प्रथमा तन्तुरूपाणां पटरूपं प्रति, द्रव्यत्वासमवायिकारणता मन्यतेति संज्ञां लभते गुरुप्रतिपत्तिकत्वात्, द्वितीया च यथा आत्ममनःसंयोगस्य ज्ञानादिकं प्रति, द्रव्यत्वासमवायिकारणता लघ्वीति संज्ञां लभते लघुप्रतिपत्तिकत्वात्, आकाशस्य तु निष्क्रमणप्रवेशनादौ कर्म्मणि न समवायिकारणता नाप्यसमवायिकारणता तथाच न कर्म्माकाशसत्त्वे लिङ्गमिति२२ । ननु निमित्तकारणमस्तु कर्म्मण्याकाशम्, दृश्यते ह्याकाशे पक्षिकाण्डादीनां सञ्चारमत आह । मूर्त्तसंयोगेन कर्म्मकारणस्य वेगगुरुत्वादेः प्रतिबन्धात् कर्म्मणोऽभावोऽनुत्पादो नत्वाकाशाभावात् तस्याव्यापकत्वात्, तस्मादाकाशान्वयोऽन्यथासिद्ध एव नाकाशनिमित्ततां साधयतीत्यर्थः२३। एवं सांख्यमते दूषिते शब्दमाकाशे लिङ्गमुपपादयिष्यन् परिशेषानुमानाय पीठमारचयन्नाह । पृथिव्यादिलक्षणे कार्य्ये ये विशेषगुणा रूपादयस्ते कारणगुणपूर्व्वका दृष्टाः शब्दोऽपि विशेषगुणः जातिमत्त्वे सति बाह्येकेन्द्रियमात्रग्राह्यत्वात् रूपादिवत् तथाच तादृशं कार्य्यं नोपलभ्यते यत्र कारणगुणपूर्व्वकः शब्दः स्यादित्यर्थः२४। ननु वीणावेणुमृदङ्गशङ्खपटहादौ कार्य्ये शब्द उपलभ्यते तथाच तत्कारणगुणपूर्व्वकः स्यादत आह । भवेदेवं यदि तन्तुकपालादिषु रूपरसाद्यनुभूयते तत्सजातीयञ्च रूपरसाद्यनरं पटघटादावुपलभ्यते तथा वीणावेणुमृदङ्गाद्यवयवेषु यः शब्द उपलभ्यते तत्सजातीयश्चेत् वीणावेणुमृदङ्गादावप्युपलभ्येत नचैवम्, प्रत्युत निःशब्दैरेवावयवैर्वीणाद्यारम्भदर्शनात् नीरूपैस्तु तन्तुकपालादिभिः पटघटाद्यारम्भदर्शनात् किञ्च यदि शब्दः सर्ग्गवतां विशेषगुणः स्यात् तदा तत्र तार-तारतर-मन्द्र-मन्द्रतरादिभावो नानुभूयेत नह्येकावयवव्याश्रिता रूपादयो वैचित्र्येणानुभूयन्ते तस्मान्न सर्ग्गवद्विशेषगुणः शब्दः २५ । नन्वात्मगुणो मनोगुणो वा शब्दो भविष्यतीत्यत आह । शब्दो यद्यात्मगुणः स्यात् तदाऽहं सुखी यते जाने इच्छामीत्यादिवत् अहं पूर्व्वं अहं वाद्ये अहं शब्दवानित्यादि धीः स्यात् नत्वेवमस्ति, किन्तु शङ्खः पूर्य्यते, वीणा वाद्यते इति प्रतिसन्धिलौकिकाः । किञ्च शब्दो नात्मगुणः बाह्येन्द्रियग्राह्यत्वात् रूपादिवत् अपि च शब्दो यद्यात्मव्योम्नविशेषगुणः स्याद्बुधिरेणाप्युपलभ्येत दुःखादिवत् । तस्मात् सुष्ठूक्तं परत्र समवायादिति, अमनोगुणत्वे हेतुमाह प्रत्यक्षत्वादिति, नात्ममनसोर्गुण इति समासे कर्त्तव्ये यदसमासकरणं तेन तुल्यन्यायतया प्रत्यक्षत्वादित्यनेनैव हेतुना दिक्कालयोरपि गुणत्वं शब्दस्य प्रतिषिद्धमिति सूचितम् २६ । यदर्थमयं परिकरस्तदाह शब्द इति शेषः । अत्रापि शब्दः क्वचिदाश्रितो गुणत्वात् रूपादिवदिति सामान्यतोदृष्टोदृष्टद्रव्यातिरिक्तद्रव्यसिद्धिः । गुणश्चायं बाह्यैकेन्द्रियग्राह्यजातीयत्वात् रूपादिवत् अनित्यत्वे सति विभुसमवेतत्वात् ज्ञानादिवत् अनित्यत्वञ्च साधयिष्यते । परिशेषसिद्धस्य द्रव्यस्यावयवकल्पनायां प्रमाणाभावान्नित्यत्वं, सर्व्वत्र शब्दोपलब्धेर्विभुत्वम् २७ । शब्दलिङ्गस्य द्रव्यस्य द्रव्यत्वनित्यत्वे अतिदेशेन साधयन्नाह । अद्रव्यवत्त्वाद्यथा वायोर्नित्यत्वं तथाकाशस्यापि, गुणवत्त्वादृयथा वायोर्द्रव्यत्वं तथाकाशस्यापीत्यर्थः २८। तत् किं बहून्याकाशानि एकमेव वेत्यत आह । व्याख्यातमिति विपरिणतेनान्वयः । भावः सत्ता सा यदेका तथाकाशमप्येकमेवेत्यर्थः २९ । नन्वनुगतप्रत्ययमहिम्ना सत्ताया एकत्वं सिद्धम् आकाशे कथमेकत्वं तदुदाहरणेन सेत्स्यतीत्यत आह । तत्त्वमाकाशस्य सिद्धमित्यर्थः । वैभवे सति सर्व्वेषां शब्दानां तदेकाश्रयतयैवोपपत्तावाश्रयान्तरकल्पनायां कल्पनागौरवप्रसङ्गः अन्यदपि यदाकाशं कल्पनीयं तत्रापि शब्द एव लिङ्गं तद्भाविशिष्टं न च विशेषसाधकं भेदसाधकं लिङ्गान्तरमस्ति । आत्मनां यद्यपि ज्ञानादिकमविशिष्टमेव लिङ्गं तथापि व्यवस्थातो लिङ्गान्तरादात्मनानात्वसिद्धिरिति वक्ष्यते' २०उप० । इत्थं च तस्य नित्यत्वं

निरवयवत्वात्वादिति सिद्धम् । सांख्यादयस्तु शब्दतन्मात्रात-स्तदुत्पत्तिं सुरीचक्रुः "प्रकृतेर्महान् महतोऽहङ्कारोऽह-ङ्कारात् पञ्चतन्मात्राणि" इत्युक्त्वा "पञ्चभ्यः पञ्चभूतानि" इत्युक्तेः । वेदान्तिनस्तु अविद्यासहकृतब्रह्मण एव सकाशात्तदुत्पत्तिमक्रीचक्रुः तस्य चोत्पत्तिमत्त्वे "तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः" इति श्रुति र्मानम् । यतो वा इमानि भूतानि जायन्ते इत्यादिश्रुत्या ब्रह्मणः सर्वभूतकारणत्वान्यथानुपपत्त्याऽपि तस्योत्पत्तिमत्त्वम् । श्रुतेर्गौणोत्पत्तिपरत्वं च आशङ्का-पूर्वकं भा०सूत्रभाष्ययोर्निराकृतं यथा । "नविय दश्रुतेः सू० "वेदान्तेषु तत्र तत्र भिन्नप्रस्थाना उत्पत्तिश्रुतय उपलभ्यन्ते । केचिदाकाशस्योत्पत्तिमामनन्ति केचिन्न । तथा केचिद्वायोरुत्पत्तिमामनन्ति केचिन्न । एवं जीवस्य प्राणानाञ्च । एवमेव क्रमादिहारकोऽपि विप्रतिषेधः श्रुत्यन्तरेषु लक्ष्यते । विप्रतिषेधाच्च परपक्षाणामनपेक्षत्वं स्यापितं तद्वत् स्वपक्षस्यापि विप्रतिषेधादेवानपेक्षत्वमा-शङ्क्येतेत्यतः सर्ववेदान्तगतसृष्टिश्रुत्यर्थनिर्मिलत्वाय परः प्रपञ्च आरभ्यते । तदर्थं निर्मिलत्वे च फलं यथोक्ताश-ङ्कानिवृत्तिरेव। तत्र प्रथमं तावदाकाशमाश्रित्य विचिन्यते किमस्योत्पत्तिरश्रुत नास्तीति । तत्र तावत् प्रतिपद्यते । न वियदश्रुतेरिति न खल्वाकाशश्रुत्पद्यते कस्मात् अश्रुतेः नह्याकाशोत्पत्तिप्रकरणे श्रवणमस्ति । छान्दोग्ये हि "सदे-व सोम्येदमग्र आसीदेकमेवाद्वितीयमिति" सच्छब्दवाच्यं ब्रह्म प्रकृत्य "तदैक्षत तत्तेजोऽसृजतेति च पञ्चानां महा-भूतानां मध्यमं तेजआदिं कृत्वा त्रयाणां तेजोऽबन्नानामु-त्पत्तिः श्राव्यते । श्रुतिश्च नः प्रमाणमतीन्द्रियार्थविज्ञानो-त्पत्तौ । न चात्र श्रुतिरस्याकाशोत्पत्तिप्रतिपादिनी तस्मा-न्नास्याकाशस्योत्पत्तिरिति" भा० "अस्ति तु" सू० । तुशब्दः पक्षान्तरपरिग्रहे । भा नामाकाशस्य छान्दोग्ये भूतोत्पत्तिः श्रुत्यन्तरे त्वस्ति तैत्तिरीयकाः समामनन्ति "सत्यं ज्ञानमनन्तं ब्रह्मेति" प्रकृत्य "तस्माद्वा एतस्मादात्मन आकाशः सम्भूत" इति । ततश्च श्रुत्योर्विप्रतिषेधः क्वचित्तेजःप्रमुखा सृष्टिः क्वचिदाकाशप्रमुखेति । नन्वेकवाक्यतानयोः श्रुत्यो-र्युक्ता । सत्यं युक्ता न तु सावगन्तुं शक्यते कुतः "तत्ते-जोऽसृजतेति" सकृच्छ्रु तस्य स्रष्टुः स्रष्टव्यद्वयेन सम्ब-न्धानुपपत्तेः तत्तेजोऽसृजत तदाकाशमसृजतेति । ननु सकृच्छ्रुतस्य कर्तुः कर्तव्यद्वयेन सम्बन्धो दृश्यते यथा स रूपं पक्त्वौदनं पचतीति । एवं तदाकाशं सृष्ट्वा ते-जोऽसृजतेति योजयिष्यामः। नैवं युज्यते प्रथमजत्वं हि छान्दोग्ये तेजसोऽवगम्यते तैत्तिरीयके त्वाकाशस्य । नचो-भयोः प्रथमजत्वं सम्भवति । एतेनेतरद्व्युत्क्रमविरो-धोऽपि व्याख्यातः । तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इत्यत्रापि तस्मात् आकाशः सम्भूतस्याकाशात्तेजः सम्भूतमिति सकृच्छ्रुतस्यापादानस्य सम्भवनस्य च विय-त्तेजोभ्यां युगपत्सम्बन्धानुपपत्तेः । वायोरग्निरिति च पृथगाम्नानात् । अस्मिन् विप्रतिषेधे कश्चिदाह । "गौण्यसम्भवात्" सू०। नास्ति वियत उत्पत्तिः अश्रुतेरेव। या त्वितरा वियदुत्पत्तिवादिनी श्रुतिरुदाहृता सा गौणी भवितुमर्हति । कस्मात् ? असम्भवात् । नह्याकाशस्योत्-पत्तिः सम्भावयितुं शक्या श्रीमत्कणभुगभिप्रायानुसारिषु जीवत्सु । ते हि कारणसामग्र्यसम्भवादाकाशस्योत्-पत्तिं वारयन्ति । समवाय्यसमवायिनिमित्तकारणेभ्यो हि किल सर्वं सदुत्पद्यमानमुत्पद्यते । द्रव्यस्य चैकजाती-यमनेकञ्च द्रव्यं समवायि कारणमस्ति । नचाकाशस्यैकजा-तीयमनेकञ्च द्रव्यमारम्भकमस्ति यस्मिन् समवायिकारणे ऽसमवायिकारणे च तत्संयोगे आकाशमुत्पद्येत । तद-भावात्तदनुपमृद्यमानं निमित्तकारणं दूरापेतमेवाकाशस्य भवति । उत्पत्तिमताञ्च तेजःप्रभृतीनां पूर्वोत्तरकालयो-र्विशेषः सम्भाव्यते प्रागुत्पत्तेः प्रकाशादिकार्यं न बभूव पश्चाच्च भवतीति । आकाशस्य पुनर्न पूर्वोत्तरकाल-योर्विशेषः सम्भावयितुं शक्यते । किं हि प्रागुत्पत्तेर-नवकाशमशुषिरमच्छिद्रं बभूवेति शक्यतेऽध्यवसातुम् । पृथिव्यादिवैधर्म्याच्च विभुत्वादिलक्षणादाकाशस्याजत्व सिद्धिः । तस्मादृग्यथा लोके आकाशं कुरु आकाशो-जात इत्येवं जातीयको गौणः प्रयोगो भवति यथा च घटाकाशः करकाकाशो मठाकाश इत्येकस्याप्याकाशस्यैव-जातीयको भेदव्यपदेशो भवति । वेदेऽपि आरब्धाना-काशेष्वालभेरन्निति । एवमुत्पत्तिश्रुतिरपि गौणी द्रष्टव्या भा० "शब्दाच्च" सू०। शब्दःखल्वप्याकाशस्याजत्वं ख्याप-यति । अत आह "वायुश्चान्तरिक्षञ्चैतदमृतमिति" न चा मृतस्योत्पत्तिरुपपद्यते । "आकाशवत् सर्वगतश्च नित्य इति" चाकाशेन ब्रह्मणोनित्यत्वसर्वगतत्वाभ्यां धर्म्माभ्या-मुपमिमानः आकाशस्यापि तौ धर्म्मौ सूचयति । न च तादृशस्योत्पत्तिरुपपद्यते । यथाऽनन्तोयमाकाश एवमनन्त-आत्मा वेदितव्य इति चोदाहरणम् । आकाशशरीरं ब्रह्म आकाशआत्मेति । नह्याकाशस्योत्पत्तिमत्त्वे ब्रह्मण-

स्तेन विशेषणं सम्भवति नीलेनेवोत्पलस्य। तस्माद्विद्यमेवाकाशेन साधारणं ब्रह्मेति गम्यते" भा०। "स्याच्चैकस्य ब्रह्मशब्दवत्" सू०। इदंपदोत्तरं सूत्रम्। स्यादेतत् कथं पुनरेकस्य सम्भूतशब्दस्य तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इत्यस्मिन्नधिकारे परेषु तेजःप्रभृतिष्वनुवर्त्तमानस्य मुख्यत्वं आकाशे च गौणत्वमिति। अत उत्तरमुच्यते। स्याच्चैकस्यापि सम्भूतशब्दस्य विषयविशेषवशाद्गौणोमुख्यश्च प्रयोगः ब्रह्मशब्दवत्। यथैकस्यापि ब्रह्मशब्दस्य "तपसा ब्रह्म विजिज्ञासस्व तपो ब्रह्म" इत्यस्मिन्नधिकारेऽन्नादिषु गौणः प्रयोग आनन्दे च मुख्यः यथा च तपसि ब्रह्मविज्ञानसाधने ब्रह्मशब्दोभक्ष्या प्रयुज्यते अक्षसा तु वित्तेये ब्रह्मणि तद्वत्। कथं पुनरनुत्पत्तौ नभसः "एकमेवाद्वितीय" मितीयं प्रतिज्ञा समर्थ्यते। ननु नभसा द्वितीयेन सहितीयं ब्रह्म प्राप्नोति, कथञ्च ब्रह्मणि विदिते सर्वं विदितं स्यादिति। तदुच्यते। एकमेवेति तावत्कार्य्यापेक्षयोपपद्यते। यथा लोके कश्चित् कुम्भकारकुले पूर्व्वेद्युर्दृष्टं दण्डचक्रादीनि चोपलभ्यापरेद्युश्च नानाविधान्मत्पात्राणि प्रसारितान्युपलभ्य ब्रूयात् दृष्टेवैकाकिनी पूर्व्वेद्युरासीदिति। स च तयावधारणया दृष्टकार्य्यजातमेव पूर्व्वेद्युर्नासीदित्यभिप्रेयात् न चक्रदण्डादि तद्वत्। अद्वितीय श्रुतिरधिष्ठात्रन्तरं वारयति यथा दृष्टोऽभिप्रकृतेः कुम्भकारोऽधिष्ठाता दृश्यते नैवं ब्रह्मणोजगत्प्रकृतेरन्योऽधिष्ठितास्तीति। न च नभसापि द्वियोवेन सहितीयं ब्रह्मप्रसज्यते। लक्षणान्यत्वनिमित्तं हि नानात्वं न च प्रागुत्पत्तेर्ब्रह्मनभसोर्लक्षणान्यत्वमस्ति। क्षीरोदकयोरिव संसृष्टयोर्व्यापित्वामूर्त्तत्वादिधर्म्मसामान्यात्। सर्गकाले तु ब्रह्म जगदुपादित्सु यतते स्निग्धमितरत्तिष्ठति तेनान्यत्वमवसीयते। तथाकाशशरीरं ब्रह्मेत्यादि श्रुतिभ्योपि ब्रह्माकाशयोरभेदोपचारसिद्धिः। अतएव च ब्रह्मविज्ञानेन सर्वविज्ञानसिद्धिः। अपि च सर्वं कार्य्यं सदुत्पद्यमानमाकाशेनाव्यतिरिक्तदेशकालमेवोत्पद्यते ब्रह्मणा चाव्यतिरिक्तदेशकालमेवाकाशं भवतीत्यतो ब्रह्मणा तत्कार्य्येण च विज्ञातमेवाकाशं भवति यथा क्षीरपूर्णे घटे कतिचिदविन्दवः प्रक्षिप्ताः सन्तः क्षीरग्रहणेनैव गृहीता भवन्ति। न हि क्षीरग्रहणादविन्दुग्रहणं परिशिष्यते एवं ब्रह्मणा तत्कार्य्येणाव्यतिरिक्तदेशकालत्वादृहीतमेव ब्रह्मग्रहणेन नभो भवति। तस्माद्ब्रह्मं नभसः सम्भवत्वमिति एवं प्राप्ते इदमाह। "प्रतिज्ञाऽहानिरव्यतिरेकात्शब्देभ्यः"।सू०"येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति""आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितमिति" "कस्मिन्नु भगवोविज्ञाते सर्वमिदं विज्ञातं भवतीति"न काचन सङ्कुचिता विद्यास्तीति "चैवंरूपा प्रतिवेदान्तं प्रतिज्ञा विज्ञायते तस्याः प्रतिज्ञाया एवमहानिरनुपरोधः स्यात् यद्यव्यतिरेकः कृत्स्नस्य वस्तुजातस्य विज्ञेयाद्ब्रह्मणः स्यात्। व्यतिरेके हि सत्येकविज्ञानेन सर्वं विज्ञायत इयं प्रतिज्ञा क्षीयेत। सचाव्यतिरेक एवमुपपद्यते यदि कृत्स्नं वस्तुजातमेकस्मात् ब्रह्मण उत्पद्यते। शब्देभ्यश्च प्रकृतिविकारव्यतिरेकन्यायेनैव प्रतिज्ञासिद्धिरवगम्यते। तथा हि "येनाश्रुतं श्रुतं भवतीति" प्रतिज्ञाय दृष्टादिदृष्टान्तैः कार्य्यकारणाभेदप्रतिपादनपरैः प्रतिज्ञैषा समर्थ्यते। तत्साधनायैव चोत्तरे शब्दाः"सदेव सोम्येदमग्र आसीत्" "एकमेवाद्वितीयं ब्रह्म" "तदैक्षत तत्तेजो सृजते" इत्येवंकार्य्यजातं ब्रह्मणः प्रदर्शयन्ति व्यतिरेकं प्रदर्शयन्ति"ऐतदात्म्यमिदं सर्व्वम्" इत्यारभ्या प्रपाठकपरिसमाप्तेः। तदुत्पद्यमानं न ब्रह्मकार्यं स्यात् न ब्रह्मणि विज्ञाते आकाशं विज्ञायेत ततश्च प्रतिज्ञाहानिः स्यात्। न च प्रतिज्ञाहान्या वेदस्याप्रामाण्यं युक्तं कर्त्तुम्। तथा च प्रतिवेदान्तं ते ते शब्दास्तेन तेन दृष्टान्तेन तामेव प्रतिज्ञां ज्ञापयन्ति "इदं सर्वं यदयमात्मा" "ब्रह्मैवेदममृतं पुरस्तात्" इत्येवमादयः। तस्मात् ज्वलनादिवदेव गगनमप्युत्पद्यते यदुक्तमनुतेन वियदुपपद्यत इति तदयुक्तं वियदुत्पत्तिविधेश्च श्रुत्यन्तरस्य दर्शितत्वात् "तस्माद्वा एतस्मादात्मन आकाशः सम्भूत" इति। सत्यं दर्शितं विरुद्धन्तु "तत्तेजोऽसृजत" इत्यनेन श्रुत्यन्तरेण। न एकवाक्यत्वात् सर्वश्रुतीनाम्। भवत्येकवाक्यत्वमविरुद्धानाम् इह तु विरोध उक्तः। सङ्कल्पस्य स्रष्टुः सृष्टव्यस्य सम्बन्धासम्भवात्, द्वयोश्च प्रथमजत्वासम्भवाद्विकल्पासम्भवाच्चेति। नैष दोषः तेजःसर्गस्य तैत्तिरीयके तृतीयत्वश्रवणात् "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः आकाशाद्वायुः वायोरग्निरिति"। अगत्या चीयं श्रुतिरन्यथा परिणेतव्या। शक्या तु परिणेतुं छान्दोग्यश्रुतिः तदाकाशं वायुञ्च सृष्ट्वा "तत्तेजोऽसृजतेति"। न चीयं श्रुतिस्तेजोजनिप्रधाना सती श्रुत्यन्तरप्रसिद्धामाकाशोत्पत्तिं वारयितुं शक्नोति एकस्य वाक्यस्य व्यापारद्वयासम्भवात्। स्रष्टा त्वेकोपि क्रमेणानेकं सृष्टव्यं सृजेत् इत्येकवाक्यत्वकल्पनायां सम्भवन्त्यां न विरुद्धार्थत्वेन श्रुतिर्हातव्या। नचाख्याभिः सङ्कल्पस्य स्रष्टुः सृष्टव्यस्य

सम्बन्धोऽभिधेयते शब्दान्तरवशेन सर्वज्ञान्तरोपसंग्रहात्। यथा च "सर्वं खल्विदं ब्रह्म तज्जलान्" इत्यत्र साक्षादेव सर्वस्य वस्तुजातस्य ब्रह्मजत्वं श्रूयमाणं न प्रदेशान्तरविहितं तेजःप्रमुखसृत्पत्तिक्रमं वारयति एवं तेजसोऽपि ब्रह्मजत्वं श्रूयमाणं न शब्दान्तरविहितं नभःप्रमुखसृत्पत्तिक्रमं वारयितुमर्हति। ननु शमविधानार्थमेतद्वाक्यं "तज्जलानिति शान्त उपासीतेति" श्रुतेः नैतत्सृष्टिवाक्यं न तस्मादेतत्प्रदेशान्तरप्रसिद्धं क्रममनुरोद्धुमर्हति। "तत्तेजोऽसृजतेत्येतत्सृष्टिवाक्यं तस्मादत्र यथाश्रुति क्रमोऽभ्युपगन्तव्य इति। नेत्युच्यते। न हि तेजःप्राथम्यानुरोधेन शब्दान्तरप्रसिद्धोवियत्पदार्थः परित्यक्तव्यो भवति पदार्थधर्मत्वात् क्रमस्य। अपि च तत्तेजोऽसृजतेति नात्र क्रमस्य वाचकः कश्चित् शब्दोऽस्ति अर्थात्तु क्रमोगम्यते स च वायोरग्निरित्यनेन शब्दान्तरप्रसिद्धेन क्रमेण निवार्यते। विकल्पसमुच्चयौ तु यित्तेजसोः प्रथमजत्वविषयौ असम्भवानभ्युपगमाभ्यां निवारितौ। तस्माद्नास्ति श्रुतोर्विप्रतिषेधः। अपि च छान्दोग्ये "येनाश्रुतं श्रुतं भवतीत्येतां प्रतिज्ञां वाक्योपक्रमे श्रुतां समर्थयितुमसमाम्नातामपि वियदुत्पत्त्यादिप्रपञ्चमुपसंख्यातव्यं किमङ्ग पुनस्तेत्तिरीयके समाख्यातं न संशयते। यच्चोक्तमाकाशस्य सर्वैकानन्यदेशत्वात् ब्रह्मणा तत्कार्यैश्च सह विदितमेव तद्भवति अतो न प्रतिज्ञा हीयते। न च "एकमेवाद्वितीयमिति" श्रुतिकोपो भवति क्षीरोदकवत् ब्रह्मनभसोरव्यतिरेकोपपत्तेरिति। अत्रोच्यते न क्षीरोदकन्यायेनेदमेकविज्ञानेन सर्वविज्ञानं नेतव्यम्। स्थूलादिदृष्टान्तप्रणयनाद्धि प्रकृतिविकारन्यायेनैवेदं सर्वविज्ञानं नेतव्यमिति गम्यते। क्षीरोदकन्यायेन सर्वविज्ञानं कल्प्यमानं न सम्यग्विज्ञानं स्यात्। न हि क्षीरज्ञानमवहीतं क्षोदकस्य सम्यग्ज्ञानमवहोतव्यमस्ति। न च वेदस्य पुरुषाणामिव मायालोकरञ्जनादिभिरवांधारणमुपपद्यते। सावधारणा चेयम् "एकमेवाद्वितीयमिति" श्रुतिः क्षीरोदकन्यायेन नीयमाना पीड्येत। न च स्वकार्योपेक्षयैवेदं वस्त्वेकदेशविषयं सर्वविज्ञानमेकाद्वितीयतावधारणञ्चेति न्यायम्। स्थूलादिष्वपि हि तत्सम्भवाच्च तदपूर्ववदुपन्यसितव्यम्भवति "श्वेतकेतो यद्नु सोम्येदं महामना अनूचानमानीक्षोऽस्युत तमादेशमप्राक्षोर्येनाश्रुतं श्रुतमभवती"त्यादिना। तस्मादशेषवस्तुविषयमेवेदं सर्वविज्ञानं सर्वस्य ब्रह्मकार्यत्वात्मैकत्वोपन्यस्त इति द्रष्टव्यम्। यत् पुनरेतदुक्तमसम्भवाद्धीरो गगनस्योत्पत्तिरिति। अत्र ब्रूमः "यावद्विकारन्तु विभागो लोकवत्" सू०। तुशब्दोऽसम्भवाशङ्काव्यावृत्त्यर्थः। न खल्वाकाशोत्पत्तावसम्भवाशङ्का कर्त्तव्या यतोयावत् किञ्चित् विकारजातं दृश्यते घटपटिकोदञ्चनादि वा कटकेयूरकुण्डलादि वा सूचीनाराचनिस्त्रिंशादि वा तावानेव विभागोलोके लक्ष्यते नत्वविकृतं किञ्चित् कुतश्चिदिभक्तमुपलभ्यते। विभागश्चाकाशस्य पृथिव्यादिभ्योऽवगम्यते तस्मात् सोऽपि विकारो भवितुमर्हति। एतेन दिक्कालमनःपरमाणूनां कार्यत्वं व्याख्यातम्। नन्वात्मापि आकाशादिभ्यो विभक्त इति तस्यापि कार्यत्वं घटादिवत् प्राप्नोति, न "आत्मन आकाशः सम्भूत इति श्रुतेः। यदि ह्यात्मापि विकारः स्यात्तस्मात् परमन्यच्च श्रुतमित्याकाशादि सर्वं कार्यं निरात्मकमात्मनः कार्यत्वे स्यात् तथा च शून्यवादः प्रसज्येत। आत्मत्वादेवात्मनो निराकरणं शङ्कानुपपत्तिः। नह्यात्मागन्तुकः कस्यचित्, स्वयंसिद्धत्वात्। नह्यात्मात्मनः प्रमाणमपेक्ष्य सिध्यति। तस्य हि प्रमेयत्वादीनि प्रमाणान्यन्यसिद्धये उपादीयन्ते। नह्याकाशादयः पदार्थाः प्रमाणनिरपेक्षाः स्वयंसिद्धाः केनचिदभ्युपगम्यन्ते। आत्मा तु प्रमाणादिव्यवहाराश्रयत्वात् प्रागेव प्रमाणादिव्यवहारात् सिद्धति,नचेदस्य निराकरणं सम्भवति। आगन्तुकं हि वस्तु निराक्रियते न स्वरूपम्। य एव हि निराकरणकर्त्ता तदेव तस्य स्वरूपम्। नह्यग्नेरौष्ण्यमग्निना निराक्रियते। तथाहमेवेदं जानामि वर्त्तमानं वस्तु अहमेवातीततरञ्चात्तासिषम् अहमेवानागततरञ्च ज्ञास्यामीत्यतीतानागतवर्त्तमानभावेनान्यथाभवत्यपि ज्ञातवेर्न ज्ञातुरन्यथाभावोऽस्ति सर्वदा वर्त्तमानस्वभावत्वात्। तथा भस्मीभवत्यपि देहे नात्मन उच्छेदोवर्त्तमानस्वभावत्वादन्यस्वभावत्वं वा न सम्भावयितुं शक्यम्। एवमप्रत्याख्येयस्वभावत्वादेवाकार्यत्वमात्मनः कार्यत्वञ्चाकाशस्य। यत्तूक्तं सदृशजातीयमनेकं कारणद्वयं दृष्टमिति तदप्यनुचितम्। न तावत् सदृशजातीयमेवारभते न भिन्नजातीयमिति नियमोऽस्ति न हि तन्तूनां तत्संयोगानाञ्च समानजातीयत्वमस्ति द्रव्यत्वगुणत्वाभ्युपगमात्। न च निमित्तकारणानामपि तुरीवेमादीनां समानजातीयत्वनियमोऽस्ति। स्यादेतत् समवायिकारणविषयएव समानजातीयत्वाभ्युपगमो न कारणान्तरविषय इति तदप्यनैकान्तिकम्। सृत्पिण्डगोबालैर्नानेकजातीयैरेका रज्जुः क्रियमाणा दृश्यते। तथा सृत्पिण्डकुलालादिभिश्च विचित्रान् कलशान् वितन्वते। सत्त्व-

द्रव्यत्वाद्यपेक्षया वा समानजातीयत्वे कल्प्यमाने नियमानर्थक्यम् सर्वस्य सर्वेण समानजातीयत्वात्। नाप्यनेकमेवारभते नैकमिति नियमोऽस्ति अणुमनसोराद्यकर्मारम्भाभ्युपगमात्। एकैकोहि परमाणुर्मनश्चाद्यं स्वकर्म्मारभते न द्व्यान्तरैः संहत्येत्यभ्युपगम्यते। द्व्यारम्भ एवानेकद्व्यारम्भकत्वनियम इति चेन्न परिणामाभ्युपगमात्। भवेदेष नियमो यदि संयोगसचिवं द्व्यं द्व्यान्तरस्यारम्भकमभ्युपगम्येत तदेव तु द्व्यं विशेषवदवस्थान्तरमापद्यमानं कार्यं नामाभ्युपगम्यते तच्च क्वचिदनेकं परिणमते बृहीजाद्यङ्कुरादिभावेन क्वचिदेकं परिणमते क्षीरादि दध्यादिभावेन। नेश्वरशासनमस्ति अनेकमेव कारणं कार्यं जनयतीति। अतः शास्त्रप्रामाण्यादेकस्माद्ब्रह्मण आकाशादि महाभूतोत्पत्तिक्रमेण जगज्जातमिति निश्चीयते। तथा चोक्तं "उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धीति"। यच्चोक्तमाकाशोत्पत्तौ न पूर्वोत्तरकालयोर्विशेषः सम्भावयितुं शक्यत इति तदयुक्तं येनैव हि विशेषेण पृथिव्यादिभ्यो व्यतिरिच्यमानं नभः स्वरूपवदिदानीमध्यवसीयते स एव विशेषः प्रागुत्पत्तेर्नासीदिति गम्यते। यथा च न ब्रह्मस्वाभाविकैः पृथिव्यादिस्वभावैः स्वभाववत् "अस्थूलमनण्वित्यादि" श्रुतिभ्यः एवमाकाशस्वभावेनापि न स्वभाववत् अनाकाशमिति श्रुतेरवगम्यते। तस्मात् प्रागुत्पत्तेरनाकाशमच्छद्रमिति स्थितम्। यदप्युक्तं पृथिव्यादिवैधर्म्यादाकाशस्याजत्वमिति तदप्यसत्। श्रुतिविरोधे सत्युत्पत्त्यसम्भवानुमानस्याभासत्वोपपत्तेः उत्पत्त्यनुमानस्य च दर्शितत्वात् अनित्यमाकाशमनित्यगुणाश्रयत्वात् घटादिवदित्यादिप्रयोगसम्भवाच्च। आत्मनानैकान्तिकमिति चेन्न तस्यौपनिषदं प्रति अनित्यगुणाश्रयत्वासिद्धेः। विभुत्वादीनाञ्चाकाशस्योत्पत्तिवादिनं प्रत्यसिद्धत्वात्। यच्चैतदुक्तं यद्वाच्चेति। तत्राऽऽहतत्वश्रुतिस्तावद्विद्यते "अस्ता दिवौकस इतिवदुद्दृष्टव्या उत्पत्तिप्रलययोरुपपादित्वात्। "आकाशवत् सर्वगतश्च नित्यः" इत्यपि प्रसिद्धमहत्त्वेनाकाशेनोपमानं क्रियते निरतिशयमहत्त्वाय नाकाशसमानत्वाय। यथेश्वरः सविता धावतीति क्षिप्रगतित्वायोच्यते नेषुतुल्यगतित्वाय तद्वत्। एतेनानन्तत्वोपमानश्रुतिर्व्याख्याता। "उत्पत्त्यनाकाशादिति" श्रुतिश्च ब्रह्मणः सकाशात् आकाशस्योनपरिमाणत्वसिद्धिः। "न तस्य प्रतिमास्तीति च ब्रह्मणोऽनुपमानत्वं दर्शयति। "अतोऽन्यदार्त्तमिति" च ब्रह्मणोऽन्येषामाकाशादीनामार्त्तत्वं दर्शयति। तथा च ब्रह्मशब्दवदाकाशस्य जन्मश्रुतेर्गौणत्वमित्येतदाकाशसम्भवश्रुत्यनुमानाभ्यां परिहृतम्। तस्माद्ब्रह्मकार्यं वियदिति सिद्धम्"।

तस्य जन्मत्वेऽपि आप्रलयस्थायित्वात् मौख्यनित्यत्वम्। वैशेषिकाणां नित्यत्वानुमानं तु बलवदागमविरुद्धत्वात् नरकपालशुचित्वानुमानवत् बाधितमिति द्रष्टव्यम्। सांख्यमते दिक्कालयोराकाशवान्तर्भावः अतएव सां० कौमुद्यां कालरूपतत्त्वान्तरं निराकृतं यथा "कालश्च वैशेषिकाभिमत एकोऽनागतादिव्यवहारभेदं प्रवर्त्तयितुमर्हतीति तस्मादयं वैरूपादिभेदैरनागतादिभेदं प्रतिपद्यते सन्तु त एवोपाधयोऽनागतादिव्यवहारहेतवः कृतमत्रान्तर्गडुना कालेनेति सांख्याचार्याः तस्मान्न कालरूपतत्त्वान्तराभ्युपगम इति" स्मृते तु आकाशप्रकृतिकत्वं तयोरुक्तम् यथा "दिक्कालावाकाशादिभ्यः" सू०। नित्यौ यौ दिक्कालौ तावाकाशप्रकृतिभूतौ प्रकृतेर्गुणविशेषाभावे। अतो दिक्कालयोर्विभुत्वोपपत्तिः। "आकाशवत् सर्वगतश्च नित्यः" इत्यादि स्मृयुक्तं विभुत्वं चाकाशस्योपपन्नम्। यौ तु खण्डदिक्कालौ तौ तत्तदुपाधिसंयोगादाकाशादुत्पद्येते इत्यर्थः। आदिशब्देनोपाधिग्रहणमिति। यद्यपि तत्तदुपाधिविशिष्टाकाशमेव खण्डदिक्कालौ तथापि विशिष्टस्यातिरिक्तताभ्युपगमवादेन वैशेषिकनयेनास्य कार्य्यतावत् तत्कार्य्यत्वमत्रोक्तम्" सां०भा०। पदार्थखण्डने शिरोमणिनाऽस्य ईश्वरस्वरूपानतिरेक उक्तः "दिक्कालावीश्वराद्यातिरिच्येते गगनमपि तथेति"। सौगतमतसिद्धे आवरणाभावरूपे निरूपाख्ये २पदार्थभेदे च। तदेतत् मतम्" शा०सू०भाष्ययोर्निराकृतम् "आकाशे चाभावात्" सू०। "यच्च तेषामेवाभिप्रेतं निरोधद्वयमाकाशञ्च निरूपाख्यमिति तत्र निरोधद्वयस्य निरूपाख्यत्वं पुरस्ताच्चिराकृतम् आकाशस्येदानीं निराक्रियते। आकाशे चायुक्तो निरूपाख्यत्वाभ्युपगमः प्रतिसंख्याप्रतिसंख्यानिरोधयोरिव वस्तुत्वप्रतिपत्तेरविशेषात् आगमप्रामाण्यात्तावदात्मनः आकाशः सम्भूत इत्यादि श्रुतिभ्यः आकाशस्य वस्तुत्वसिद्धिः। विप्रतिपन्नानपि प्रति यद्गुणानुमेयत्वं वक्तव्यं गन्धादीनां गुणानां पृथिव्यादिवस्त्वाश्रयत्वदर्शनात्। अपि चावरणाभावमात्रमाकाशमिच्छतस्तव एकस्मिन्नुपर्यधः पतत्यावरणस्य विद्यमानत्वात् नूपर्यन्तरस्य पित्सतोऽनवकाशत्वप्रसङ्गः यत्रावरणाभावस्तत्र पतिष्यतीति चेत् येनावरणाभावो विशिष्यते तत्तर्हि वस्तु भूतमेवाकाशं स्यान्नावरणाभावमात्रम्

अपि चावरणाभावमात्रमाकाशं मन्यमानस्य सौगतस्य स्वाभ्युपगमविरोधः प्रसज्येत । सौगते हि समये पृथिवी-भगवन् ! किंसंज्ञिन्यवेत्यस्मिन् प्रश्नप्रतिवचनप्रवाहे पृथिव्यादीनामन्ते वायुः किंसंज्ञिन्यय इत्यस्य प्रश्नस्य प्रति-वचनं भवति वायुराकाशसंज्ञिन्यय इति तदाकाशस्यावस्तुत्वे न समञ्जसं स्यात् तस्मादयुक्तमाकाशस्यावस्तुत्वम् । अपि च निरोधद्वयमाकाशश्च त्रयमप्येतद्विरूपाख्यमवस्तु नित्यश्चेति विप्रतिषिद्धं नह्यवस्तुनोनित्यत्वमनित्यत्वं वा सम्भवति वस्त्वा-श्रयत्वाद्धर्मधर्मिव्यवहारस्य । धर्म्मधर्मिभावे हि घटादिव-दस्तुत्वमेव स्यात् न निरूपाख्यत्वम्" भा० । आ समन्तात् काशते अच् । "रतिमाकाशभवा सरस्वती" कु० "आकाशगङ्गापयसः पतेताम्" माघः आकाशात्तु विकु-र्वाणात् सर्व्वशब्दवहः शुचिः मनुः" "घटसंवृतआकाशे नीयमाने यथा घटे" सां०प्र०भा० "आकाशो जायते तस्मात् तस्य शब्दगुणः स्मृतः" मनुः । रूपादिषु मध्ये शब्दमात्रग्राहकतया श्रोत्रग्राह्याकाशात्मकत्वेऽपि कर्णशष्कु-लीरूपोपाधिभेदाद्नानात्वमौपाधिकमेकस्यादित्यः प्राचीत्वा-दिवत् एकस्य कालस्य घटादिवच्च । २परब्रह्मणि "आकाशोहवै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं तदात्मा विजिज्ञासितव्यम्" श्रुतिः "यावानयमाकाशस्तावान-यमन्तर्हृदयाकाश" इति छा०उ० । "आकाशस्तल्लिङ्गात्" शा०सू० । "आकाशवत् सर्वगतश्च नित्यः" श्रुतिः गीता च । ३छिद्रे गणितादिप्रसिद्धे ४ शून्यार्थे च ।

आकाशकक्षा स्त्री ऐत० । ब्रह्माण्डपुटवेष्टने लोकालोकपर्वत-रूपसीमापर्य्यन्तव्यापके सूर्य्यकिरणसञ्चारावधिभूते वृत्ताकारे गगनस्थे गोलक्षेत्रे । तन्निरुक्ता" सि०शि० "कोटिघ्नैर्नेत्र नन्दषट्कनखभूभृद्भृगेन्दुभिर्ज्योतिःशास्त्र-विदोवदन्ति नभसः कक्षाभिमां योजनैः १८७१२-०६८२०००००००। तदुब्रह्माण्डकटाहसम्पुटतटे केचि-च्चतुर्थेटनम् केचित् प्रोचुरदश्यदृश्यकगिरिं पौराणिकाः सूरयः । करतलकलितामलकवदमलं सकलं विदन्ति ये गोलम् । दिनकरकरनिकरकरम्बितततमसो नभसः परिधि-रुदितस्तैः ।" तथा च सूर्य्यकिरणप्रचारावधिस्थानस्य नभःकक्षात्वेन कल्पितम् । वस्तुतोऽपरिच्छिन्नत्वादाकाशस्य ततोऽपि सत्त्वात् न तन्मात्रमानम् । अतएव "ब्रह्माण्डमे-तन्मितमस्तु नो वेति" ब्रह्माण्डस्यानिर्द्धारितप्रमाणत्वं तत्रोक्तम् । व्याख्यातं च प्र०शि० "एभिस्तुल्यां गणकाः नभसः कक्षामाकाशपरिधिं वदन्ति तत्र कथमनन्तस्याकाश-स्येयत्ता वक्तुं शक्यते इत्याशङ्क्य ऋक्षपतिद्युतिभाजोनभसः परिधेरिदं मानं वदन्ति अतएव पौराणिका-गणकाः ब्रह्माण्डपरिधिं वदन्ति केचिल्लोका-लोकं वदन्ति यतस्तदन्तर्वर्त्तिन एवार्करश्मयः । एवमन्ये वदन्तीति नास्माकं मतमित्यर्थः प्रमाणशून्यत्वात्" । कर-तलकलितसकलब्रह्माण्डगोला एवं वक्तुं शक्नुवन्ति न वयम्" । तेन पौराणिकमतमेतत् सूर्य्यकिरणसञ्चार-स्थानपर्य्यन्तत्वोपाधिना तत्कल्पनमिति द्रष्टव्यम् ।

आकाशकल्प पु० ईषदसमाप्त आकाशः आकाश+कल्पप् । ब्रह्मणि "निष्कलत्वाद्विभुत्वाच्च तथाऽनन्यस्वभावतः । ब्रह्म-व्योम्नोर्न भेदोऽस्ति चैतन्यं ब्रह्मणोऽधिकम्" इत्युक्तेः व्योम-गतजडताशून्यतया ततोवैलक्षण्यात् तस्य तत्कल्पत्वम् ।

आकाशगङ्गा स्त्री आकाशपथवाहिनी गङ्गा । मन्दाकिन्याम् । "उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगङ्गापयसः पतेताम्" माघः । आकाशनद्यादयोऽप्यत्र । आकाशस्याव-लम्बनत्वाभावेऽपि मेरुशिखरस्थात्युन्नतया स्वर्गतात्कल्पनेन तस्यैवाकाशतुल्यता ततएव वचने आकाशे वचनोत्प्रे-क्षणात् तथात्वम् । अतएव गङ्गाया स्वर्गपथगामित्वं पुराणे-ष्वूक्तम् यथा च गङ्गायास्स्वर्गपथगत्वं तथा गङ्गाशब्दे वक्ष्यते

आकाशगा स्त्री आकाशे अत्युच्चस्थाने सुमेरुशिखरे गच्छति गम-ड । १स्वर्गगङ्गायाम् २आकाशगामिमात्रे त्रि० ।

आकाशजननी स्त्री आकाशस्य छिद्रस्य जननीव पोषिका । छिद्रवत्यां प्रगण्ड्याम् । दुर्गमध्यस्थितानां जनानां बाह्यार्थ-दर्शनार्थं छिद्रवती भित्तिः प्रगण्डी तद्द्वारैव हि रिपुप्रत्या-सत्तौ आग्नेयास्त्रं स्वयमलक्षिततया वहिः सैन्यैः क्षिप्यते। दुर्गनिर्माणोपदेशे "प्रगण्डीः कारयेत् सम्यगाकाशजननी-स्तथा। आपूरयेच्च परिखां स्थाणुनक्रझषाकुलाम्" भा०भा० प०६६ अ० "सञ्चारो यत्र लोकानां दूरादेवावबध्यते प्रगण्डी सा च विज्ञेया बहिःप्राकारसंज्ञिता" प्रगण्डीं परि-भाष्य "दुर्गप्राकारभित्तौ बाह्यार्थदर्शनार्थस्थानानि प्रगण्डी। आकाशजननी तत्रैव एकस्यां भित्तौ तत्स्थानां रन्ध्र-भूतायां बाह्यार्थदर्शनानि क्षुद्रच्छिद्राणि यद्द्वारान्याग्ने-यास्त्रगुलिकाः प्रक्षिप्यन्ते इति" नीलक० ।

आकाशदीप पु० आकाशे दीयमानोदीपः । "तुलायां तिलतै-लेन सायंसन्ध्यासमागमे । आकाशदीपं यो दद्यात् मासमेकं निरन्तरम्" ब्रह्माण्डपु० उक्ते तुलास्थरवौ सायंसन्ध्यास्थाने दीयमाने दीपे ।

आकाशभाषित न० आकाशे भाषितम् । अलक्ष्यशरीराणां

अदृश्यानां देवादीनां गगनोद्भवे वचने आकाशवाक्याम्।

आकाशमण्डल न० आकाशोमण्डलमिव। १नभोमण्डले आकाशस्य निरवयवत्वेन अनवच्छिन्नत्वेन च वेष्टनाकार मण्डलाभावेऽपि भूगोलदृत्तोपाधिकृतं तदीयं मण्डलमिव भवति। योहि नभोभागो भूगोलेनानावृतः सन् दृष्टिप्रचार पथवर्त्तीलोकानां तस्यैव भूगोलोपाधिना गोलाकारत्वं कल्प्यते। एतेनापि प्रमाणेन भूमेर्गोलाकारत्वानुमानम् यदि भूमिर्गोलाकारा न स्यात् कथं तदाऽनन्तानवच्छिन्नस्याकाशस्य गोलाकारत्वमुपलक्ष्येत कस्यचिदुपाधेरेव च खभावात् तस्य गोलाकारत्वमुपलक्ष्यते इति कल्प्याम् अन्यस्य च परिधेरदर्शनात् परिशेषात् भूमेरेव तथात्वसिद्धिरिति तस्या गोलाकारता तद्गाङ्गाकाशस्य तथात्वकल्पनमिति "आकाशमण्डलमध्यमध्यास्ते" काद० नभोमण्डलादयोऽत्र "नैतन्नभोमण्डलमम्बुराशिः" सा०द० तन्त्रोक्ते भूतशुद्धौ चिन्तनीये भ्रूमध्यावधिब्रह्मरन्ध्रान्तस्थिते वृत्ताकारे स्वच्छे २नभोमण्डले च "वृत्तं दिवस्तत् पङ्कविन्दुलाञ्छितं मातरिश्वनः" तन्त्र०। पदार्थादर्शे, भूतशुद्धौ वायोराकाशे विलापनमभिधाय "ततोभ्रूमध्यादि ब्रह्मरन्ध्रपर्य्यन्तं स्वच्छं वर्त्तुलमाकाशमण्डलम्" इत्युक्तम्। तदेव मण्डलं विद्वेषे चिन्तनीयम् यथोक्तं "जलस्य मण्डलं प्रोक्तं" मित्युपक्रम्य "वृत्तं दिवस्तद्विद्वेषे" मन्त्रमहो०।

आकाशमय पु० आकाश+प्रायार्थे मयट्। आकाशप्राये आत्मनि। "स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयो वाङ्मयः प्राणमयः चक्षुर्मयः श्रोत्रमय आकाशमयो वायुमयस्तेजोमयः अम्मयः पृथिवीमयः" शत०ब्रा०। "योऽयमात्मनः संसारसंबन्धः स वास्तवो न भवति किन्त्वौपाधिक एवेति तदुपाधीन् दर्शयितुमात्मनो वास्तवरूपमाह स वा इति। स प्रकृतः संसारी अयमविद्यातत्कार्य्यविनिर्मुक्तः स्वप्रकाशोऽपरोक्षः आत्मा कूटस्थःसाक्षी चिद्धातुरेवमभूतः सोऽयमात्मा वै ब्रह्म अथनायाद्यतीतः परमात्मैव। ब्रह्मैव सन्नयमात्माऽविद्यावाऽब्रह्मवत् प्रतिपन्नः पुनः सम्यग्ज्ञानात्तत्प्रध्वंसे ब्रह्मैवावतिष्ठतइति भावः। इदानीं यत्प्रयुक्तमेवंविधब्रह्मात्मनो बन्धस्तानुपाधीनाह, विज्ञानमय इति विज्ञानं बुद्धिस्तत्प्रायः बुद्धेरैक्याध्यासाद्धि तद्धर्मस्य कर्त्तृत्वादेरात्मनि आरोपितत्वं तत्प्रायत्वम्। अस्मिन् प्रकरणे सर्वोऽपि मयट् प्रायार्थे न तु विकारार्थे तत्र तदसम्भवात्" भा०भाष्यम्। [राजनि०।

आकाशमांसी स्त्री आकाशभवा मांसी। जटाजटामांसाम्

आकाशमूली स्त्री आकाशे भूमिशून्यदेशे मूलमस्याः ङीप्। कुम्भिकायाम् (पाना)।

आकाशयान न० आकाशे यायते ऽनेन या-करणे ल्युट् ७त०। आकाशगमनसाधने विमाने।

आकाशरज्जिन् पु० आकाशे इव अल्पत्वप्राचीरोपरिस्थितः सन् रज्जति रज्ज-णिनि। दुर्गबहिःप्राचीरोपरिस्थिते रक्षके। "सञ्चारोयत्र लोकानां दूरादेवावबुध्यते। प्रगण्डो सा च विज्ञेया बहिःप्राकारसंश्रिता। प्रणिधिस्तत्र यत्नेन कर्त्तव्यो भूतिमिच्छता। स एवाकाशरज्जीति च्युच्यते शास्त्रकोविदैः"। भा०शा०अ०६८ व्या०नी०क०।

आकाशवचन न० आकाशे वचनम्। पात्राप्रवेशेऽपि तदीयवाक्यं प्रविष्टपात्रेण श्रुत्वा आकाशवाक्यत्वेन कथ्यते नाटकादौ १वाक्यभेदे "नेपथ्योक्तं श्रुतं तत्र आकाशवचनं तथा। समाश्रित्यापि कर्त्तव्यमासुखं नाटकादिषु" सा०द०। अलक्षितपरोरतया देवादिभिरुच्चार्य्यमाणे २वाक्ये च।

आकाशवत् त्रि० आकाशः गम्यतयाऽस्यास्ति मतुप् मस्य वः स्त्रियां ङीप्। आकाशगामिनि "प्रतिसृष्टा दक्षिणमूरुमपाच्छाद्य तस्मिन् सादयित्वाऽकाशवतीभिरङ्गुलीरपिदध्यात्" आश्व०श्रौ०सू०। [पथि।

आकाशवर्त्मन् न० आकाशोवर्त्मेव गम्यत्वात्। आकाशरूपे

आकाशवल्ली स्त्री आकाशस्य वल्ली शाखेव अल्पत्वशिखत्वात्। (अमरवेल इति) ख्यातायां लतायाम् राजनि०।

आकाशवाणी स्त्री आकाशे भवा वाणी। अदृश्योत्पादकपुरुषत्वेनाकाशादिवोत्पद्यायां देवादिवाचि।

आकाशसलिल न० आकाशात् पतितं सलिलम्। आकाशात् पतिते जले। तच्च चतुर्विधं मेघादिधारानिस्तं धारं, चन्द्रकरत्वागतं कारम्, तुषारक्षतं तौषारम्, संक्षत हिमखण्डेननिर्वृत्तं च हैमम्। तच्च शुद्धतेदर्शितम् अम्बुशब्दे ३३० पृष्ठे उक्तम्।

आकाशस्फटिक पु० आकाशेभवः स्फटिकइव। वर्षोपले करकाख्ये संहतजलखण्डे। तदुत्पादविधयौ श्रीपतिराह। "उद्भूतैः पांसुभिर्भूमेः प्रचण्डपवनोद्धतात्। मेघमण्डलमानीतैर्जालिन्यपरिवर्जितैः। मिश्रणाज्जलबिन्दूनां पिण्डभावोभवेदिह। इषद्विपतन्त्येते द्रवन्ते च पुनश्चितौ"।

आकाशास्तिकाय पु० कर्म्म०। अर्हन्मतसिद्धे जीवभिन्ने आवरणाभावरूपे पदार्थभेदे। सच अर्हच्छब्दे २८२ पृष्ठे दर्शितः

अपि चावरणाभावमात्रमाकाशं मन्यमानस्य सौगतस्य स्वाभ्युपगमविरोधः प्रसज्येत । सौगते हि समये पृथिवी-भगवन् ! किंसन्निश्रयेत्यस्मिन् प्रश्नप्रतिवचनप्रवाहे पृथिव्यादीनामन्ते वायुः किंसन्निश्रय इत्यस्य प्रश्नस्य प्रति-वचनं भवति वायुराकाशसन्निश्रय इति तदाकाशस्यावस्तुत्वे न समञ्जसं स्यात् तस्मादप्ययुक्तमाकाशस्यावस्तुत्वम् । अपि च निरोधद्वयमाकाशञ्च त्रयमप्येतन्निरूपाख्यमवस्तु नित्यञ्चेति विप्रतिषिद्धं नह्यवस्तुनोनित्यत्वमनित्यत्वं वा सम्भवति वस्तु-त्वयत्वाद्धर्म्मधर्म्मिव्यवहारस्य । धर्म्म धर्म्मिभावे हि घटादिव-द्वस्तुत्वमेव स्यात् न निरूपाख्यत्वम्" भा० । आ समन्तात् काशते अच् । "रतिमाकाशभवा सरस्वती" कु० "आकाशगङ्गापयसः पतेताम्" माघः आकाशात्तु विकु-र्व्वीणात् सर्व्वशब्दवहः शुचिः मनुः" "घटसंवृतआकाशे नीयमाने यथा घटे" सां०प्र०भा० "आकाशो जायते तस्मात् तस्य शब्दगुणः स्मृतः" मनुः । रूपादिषु मध्ये शब्दभावप्राहकतया श्रोत्रस्याकाशात्मकत्वेऽपि कर्णशष्कुली-रूपोपाधिभेदात्नानात्वमौपाधिकमेकस्यादिवः प्राचीत्वा-दिवत् एकस्य कालस्य क्षणादित्ववच्च । ३परब्रह्मणि "आकाशोहवै नामरूपयोर्निर्व्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं तदात्मा विजिज्ञासितव्यम्" श्रुतिः "यावानयमाकाशस्तावान-यमन्तर्हृदयाकाश" इति छा०उ० । "आकाशस्तल्लिङ्गात्" शा०सू० । "आकाशवत् सर्व्वगतश्च नित्यः" श्रुतिः गीता च । ४छिद्रे गणितादिप्रसिद्धे ५शून्यार्द्धे च ।

आकाशकक्षा स्त्री ऐत० । ब्रह्माण्डपुटवेष्टने लोकालोकपर्वत-रूपसीमापर्य्यन्तव्यापके सूर्य्यकिरणसञ्चारावधिभूते दृक्षाकारे गगनस्थे गोलक्षेत्रे । तन्निरुक्ता" सि०शि० "कोटिघ्नैर्नेत्र नन्दघटकनखभूभृद्भुजगेन्दुभिर्ज्योतिःशास्त्र-विदोवदन्ति नभसः कक्षामिमां योजनैः १८७१२-०६८२०००००००। तद्ब्रह्माण्डकटाहसम्पुटतटे केचि-दमुर्नेटनम् केचित् प्रोचुरदश्यदश्यकगिरिं पौराणिकाः सूरयः । करतलकलितामलकवदमलं सकलं विदन्ति ये गोलम् । दिनकरकरनिकरकरम्बिततमसो नभसः परिधि-रुदितस्तैः ।" तथा च सूर्य्यकिरणप्रचारावधिस्थानस्य नभःकक्षात्वेन कल्पितम् । वस्तुतोऽपरिच्छिन्नत्वादाकाशस्य ततोऽपि सत्त्वात् न तन्मात्रमानम् । अतएव "ब्रह्माण्डमे-तन्मितमस्तु नो वेति" ब्रह्माण्डस्यानिर्द्धारितप्रमाणकत्वं तत्रोक्तम् । व्याख्यातं च प्र०मि० "एभिस्तुल्यां गणकाः नभसः कक्षामाकाशपरिधिं वदन्ति तत्र कथमनन्तस्याकाश-क्षेयत्ता वक्तुं शक्यते इत्याशङ्क्य अर्कपतिद्युतिभाजोनभसः परिधेरिदं मानं वदन्ति अतएव पौराणिका-गणकाः ब्रह्माण्डपरिधिं वदन्ति केचिल्लोका-लोकं वदन्ति यतस्तदन्तर्वर्त्तिन एवार्करश्मयः । एवमन्ये वदन्तीति नाक्षार्कं मतमित्यर्थः प्रमाणशून्यत्वात्" । कर-तलकलितसकलब्रह्माण्डगोला एवं वक्तुं शक्नुवन्ति न वयम्" । तेन पौराणिकमतमेतत् सूर्य्यकिरणसञ्चार-स्थानपर्य्यन्तत्वोपाधिना तत्कल्पनमिति द्रष्टव्यम् ।

आकाशकल्प पु० ईषत्समाप्त आकाशः आकाश+कल्पप् । ब्रह्मणि "निष्कलत्वाद्विभुत्वाच्च तथाऽनश्वरभावतः । ब्रह्म-व्योम्नोर्न भेदोऽस्ति चैतन्यं ब्रह्मणोऽधिकम्" इत्युक्तेः व्योम-गतजडताशून्यतया ततोवैलक्षण्यात् तस्य तत्कल्पत्वम् ।

आकाशगङ्गा स्त्री आकाशपथवाहिनी गङ्गा । मन्दाकिन्याम् । "उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगङ्गापयसः पतेताम्" माघः । आकाशनद्यादयोऽत्र । आकाशस्याव-लम्बनत्वाभावेऽपि मेरुशिखरस्थात्युच्चतया सूर्गताकल्पनेन तस्यैवाकाशगतत्वता ततएव वह्नेः आकाशे वह्नोत्प्रे-क्षणात् तथात्वम् । अतएव गङ्गाया स्वर्गपथगामित्वं पुराणे-ष्वुक्तम् यथा च गङ्गायास्स्वर्गपथगत्वं तथा गङ्गाशब्दे वक्ष्यते

आकाशगा स्त्री आकाशे अत्युच्चस्थाने सुमेरुशिखरे गच्छति गम-ड । १स्वर्गगङ्गायाम् २आकाशगामिमात्रे त्रि० ।

आकाशजननी स्त्री आकाशस्य छिद्रस्य जननीव पोषिका । छिद्रवत्यां प्रगण्ड्याम् । दुर्गमध्यस्थितानां जनानां बाह्यार्थ-दर्शनार्थं छिद्रवती भित्तिः प्रगण्डी तद्द्वारैव हि रिपुप्रत्या-सत्तौ आग्नेयास्त्रं स्वयमलक्षिततया बहिः सैन्यैः क्षिप्यते। दुर्गनिर्माणोपदेशे "प्रगण्डीः कारयेत् सम्यगाकाशजननी-स्तथा । आपूरयेच्च परितां स्थाणुनक्रझषाकुलाम्" भा०भा० प०६६ अ० "सञ्चारो यत्र लोकानां दूरादेवावबध्यते प्रगण्डी सा च विज्ञेया बहिःप्राकारसंज्ञिता" प्रगण्डीं परि-भाष्य "दुर्गप्राकारभित्तौ नृणामासन्नवेशस्थानानि प्रगण्डी । आकाशजननी तत्रैव एककक्षायां भित्तौ तत्तत्स्थानां रक्ष-णभूतायां बाह्यार्थदर्शनानि क्षुद्रच्छिद्राणि यद्द्वाराग्नेया-स्त्रगुलिकाः प्रक्षिप्यन्ते इति" नीलक० ।

आकाशदीप पु० आकाशे दीयमानोदीपः । "तुलायां तिलतै-लेन सायंसन्ध्यासमागमे । आकाशदीपं यो दद्यात् मासमेकं निरन्तरम्" ब्रह्माण्डपु० उक्ते तुलास्थरवौ सावसङ्क्रस्थाने दीयमाने दीपे ।

आकाशभाषित न० आकाशे भाषितम् । अलक्ष्यशरीराणां

अदृश्यानां देवादीनां गगनोद्भवे वचने आकाशवाक्याम्।

आकाशमण्डल न० आकाशोमण्डलमिव। १नभोमण्डले आकाशस्य निरवयवत्वेन अनवच्छिन्नत्वेन च वेष्टनाकार मण्डलाभावेऽपि भूगोलदृत्तोपाधिकृतं तदीयं मण्डलमिव भवति। योहि नभोभागो भूगोलेनानावृतः सन् दृष्टिप्रचार पथवर्त्याकृत्वात् तस्यैव भूगोलोपाधिना गोलाकारत्वं कल्प्यते। एतेनापि प्रमाणेन भूमेर्गोलाकारत्वानुमानम् यदि भूमिर्गोलाकारा न स्यात् कथं तदाऽनावच्छिन्नस्याकाशस्य गोलाकारत्वमुपलक्ष्येत कस्यचिदुपाधेरेव च स्वभावात् तस्य गोलाकारत्वमुपलक्ष्यते इति कल्पम् अन्यत्र च परिधेरदर्शनात् परिधेयात् भूमेरेव तथात्वसिद्धिरिति तस्या गोलाकारता तद्वदाकाशस्य तथात्वकल्पनमिति "आकाशमण्डलमध्यमध्यास्ते" कादं० नभोमण्डलादयोऽप्यत्र "नैतन्नभोमण्डलमम्बुराशिः" सा०द० तन्त्रोक्ते भूतशुद्धौ चिन्तनीये भ्रूमध्यावधिब्रह्मरन्ध्रान्तस्थिते दृत्ताकारे स्वच्छे २नभोमण्डले च "दृत्तं दिवस्तत् षड्बिन्दुलाञ्छितं मातरिश्वनः" तन्त्र०। पदार्थादर्शे, भूतशुद्धौ वायोराकाशे विलापनमभिधाय "ततोभ्रूमध्यादि ब्रह्मरन्ध्रपर्य्यन्तं स्वच्छं वर्त्तुलमाकाशमण्डलम्" इत्युक्तम्। तदेव मण्डलं विहेये चिन्तनीयम् यथोक्तं "जलस्य मण्डलं प्रोक्तं"मित्युपक्रम्य "दृत्तं दिवस्तद्विहेये" मन्त्रमहो०।

आकाशमय पु० आकाश+प्रायार्थे मयट्। आकाशप्राये आत्मनि। "स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयो वाङ्मयः प्राणमयः चक्षुर्मयः श्रोत्रमय आकाशमयो वायुमयस्तेजोमयः अम्मयः पृथिवीमयः" शत०ब्रा०। "योऽयमात्मनः संसारसंबन्धः स वास्तवो न भवति किन्त्वौपाधिक एवेति तदुपाधीन् दर्शयितुमात्मनो वास्तवरूपमाह स वा इति। स प्रकृतः संसारी अयमविद्यातत्कार्य्यविनिर्मुक्तः स्वप्रकाशोऽपरोक्षः आत्मा कूटस्थःसाक्षी चिद्धातुरेवाभूतः सोऽयमात्मा वै ब्रह्म अशनायाद्यतीतः परमात्मैव। ब्रह्मैव सन्नयमात्माऽविद्यया ब्रह्मवत् प्रतिपन्नः पुनः सम्यग्ज्ञानात्तत्प्रध्वंसे ब्रह्मैवावतिष्ठतइति भावः। इदानीं यत्प्रयुक्तमेवंविधब्रह्मात्मनो बन्धस्तदुपाधीनाह विज्ञानमय इति विज्ञानं बुद्धिस्तत्प्रायः बुद्धेरैक्याध्यासाद्धि तद्धर्म्मस्य कर्तृत्वादेरात्मनि आरोपितत्वं तत्प्रायत्वम्। अस्मिन् प्रकरणे सर्वोऽपि मयट् प्रायार्थे न तु विकारार्थे तत्र तदसम्भवात्" या०भाष्यम्। [राजनि०।

आकाशमांसी स्त्री आकाशभवा मांसी। क्षुद्रजटामांसाम्

आकाशमूली स्त्री आकाशे भूमिशून्यदेशे मूलमस्याः ङीप्। कुष्मिकायाम् (पाना)।

आकाशयान न० आकाशे यायते अनेन या-करणे ल्युट्। ७त०। आकाशगमनसाधने विमाने।

आकाशरञ्जिन् पु० आकाशे इव अत्युच्चप्राचीरोपरि स्थितः सन् रजति रज-णिनि। दुर्गबहिःप्राचीरोपरिस्थिते रक्षके। "सञ्चारोयत्र लोकानां दूरादेवावबुध्यते। प्रगल्भो सा च विज्ञेया बहिःप्राकारसंश्रिता। प्रणिधिस्तत्र यत्नेन कर्त्तव्यो भूतिमिच्छता। स एवाकाशरञ्जीति रूढ्यते शास्त्रकोविदैः"। भा०शा०अ०६६ व्या०नी०क०।

आकाशवचन न० आकाशे वचनम्। पातालप्रवेशेऽपि तदीयवाक्यं प्रविष्टपात्रेण श्रुत्वा आकाशवाक्यत्वेन कल्प्यते नाटकादौ १वाक्यभेदे "नेपथ्योक्तं श्रुतं तत्र आकाशवचनं तथा। समाश्वित्यापि कर्त्तव्यमाश्रुतं नाटकादिषु" सा०द०। अलक्षितशरीरतया देवादिभिरुच्चार्य्यमाणे २वाक्ये च।

आकाशवत् त्रि० आकाशः गम्यतयाऽस्त्यस्य मतुप् मस्य वः स्त्रियां ङीप्। आकाशगामिनि "प्रतिस्पर्द्धा दक्षिणमूरुमपाच्छाद्य तस्मिन् सादयित्वाऽकाशवतीभिरङ्गनीरपिदध्यात्" आश्व०श्रौ०सू०। [पक्षि।

आकाशवर्त्मन् न० आकाशोवर्त्मैव गम्यत्वात्। आकाशरूपे

आकाशवल्ली स्त्री आकाशस्य वल्ली शाखेव अत्युच्चशिखत्वात्। (अमरबेल इति) ख्यातायां लतायाम् राजनि०।

आकाशवाणी स्त्री आकाशे भवा वाणी। अदृश्योत्पादकपुरुषत्वेनाकाशादिवोत्पन्नायां देवादिवाचि।

आकाशसलिल न० आकाशात् पतितं सलिलम्। आकाशात् पतिते जले। तच्च चतुर्विधं मेघादिधारानिस्तं धारं, चन्द्रकरतप्तागतं कारम्, तुषारक्षतं तौषारम्, संहत हिमखण्डेननिर्वृत्तं च हैमम्। तच्च सुश्रुते दर्शितम् अम्बुशब्दे ३२० पृष्ठे उक्तम्।

आकाशस्फटिक पु० आकाशेभवः स्फटिकइव। वर्षोपले करकाख्ये संहतजलखण्डे। तदुत्पादविधयौ ओषतिराह। "उद्भूतैः पांसुभिर्भूमेः प्रचण्डपवनोद्धतात्। मेघमण्डलमानीतैर्नालिन्यपरिवर्जितैः। मिश्रणाज्जलविन्दूनां पिण्डभावोभवेदिह। इषद्द्रवित्वतन्त्येते द्रवन्ते च पुनःक्षितौ"।

आकाशास्तिकाय पु० कर्म्म०अर्हन्मतसिद्धे जीवभिन्ने आवरणाभावरूपे पदार्थभेदे। सच अर्हच्छब्दे ३८२ पृष्ठे दर्शितः

आकाशीय त्रि० आकाशस्येदं छ। नभसे "वायव्यमिदमाकाशीयमिति"। "शब्दवद्धलमाकाशीयं तन्मार्दवगौरिरलाघवमिति"च सुश्रुतः। दिगा०यत् आकाशमभवत्र त्रि०।

आकाशे अव्य० आ+काश-के। "दूरस्थाभाषणं यत् स्यादशरीरनिवेदनम्। परोक्षान्तरितं वाक्यं तदाकाशे निगद्यते" भरतोक्ते नाटकाङ्गे वाक्यभेदे "कञ्चुकी (इहा आकाशे) विहङ्गिके। अपि स्वभूजनपादवन्दनं कृत्वा प्रतिनिवृत्ता भानुमती" (कर्णं दत्त्वा) किं कथयसि आर्या एषा भानुमतीत्यादि" वेणीसं०।

आकिञ्चन्य न० अकिञ्चनस्य भावः ष्यञ्। दरिद्रतायाम्।

आकिदन्ति पु० १देशभेदे २तद्देशवासिनि च। दाक्षिण्या० आयुधजीविसंघार्थे छ। आकिदन्तीयः तद्देशीयायुधजीविसंघे। बहुषु लुक्। आकिदन्तयः।

आकीर्ण त्रि० आ+कॄ-क्त। १व्याप्ते, २विक्षिप्ते च। "आकीर्णैरूधिपत्रीणासटजङ्घाररोधिभिः" रघुः। "खपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो" श्यामास्तवः।

आकोम् अव्य० आ-कन्-वा० डीमि। १वर्जने २वितर्के च चादिगणे माकीमित्यत्र आकोम् इति पाठान्तरम् "आकोर्ल्लक्ष्मेक्ष रोचनाहिंस्यादेवं उपर्बुधः" ऋ०१,१४,६,।

आकुञ्चन न० आ+कुच-ल्युट्। सङ्कोचे, प्रसारितस्य संश्लिष्टसम्पादनसाधने क्रियाभेदे "आकुञ्चनन्तु सत्स्वेवावयवानामारब्धकसंयोगेषु परस्परमवयवानामनारब्धकसंयोगोत्पादकं वस्त्राद्यवयविकौटिल्योत्पादकं कर्म्म, यतो भवति सङ्कुचति पद्मं सङ्कुचति वस्त्रं सङ्कुचति चर्म्मेति प्रत्ययः" वै०सू० उप०। स च कर्म्मभेदः कर्म्म च पञ्चविधम्। "उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्म्माणि" वै०सू०। अत्र च उत्क्षेपणत्वावक्षेपणत्वाकुञ्चनत्वप्रसारणत्वगमनत्वानि कर्म्मत्वसाक्षाद्व्याप्याः पञ्च जातयः" वै०सू०उ०। कर्म्म च "एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्म्मलक्षणम्" वै०सू० उक्तलक्षणकम्। विवृतञ्च उप०। "एकमेव द्रव्यमाश्रयोऽस्य तदेकद्रव्यं न विद्यते गुणोऽस्मिन्नित्यगुणम्" संयोगविभागेष्वनपेक्षकारणमिति स्वोत्पत्त्यनन्तरोत्पत्तिकभावभूतानपेक्षमित्यर्थः तेन समवायिकारणापेक्षायां पूर्व्वसंयोगाभावापेक्षयाञ्च नासिद्धत्वम्। स्वोत्पत्त्यनन्तरोत्पत्तिकानपेक्षत्वं वा विवक्षितम् पूर्व्वसंयोगध्वंसस्यापि स्वोत्पत्त्यनन्तरानुत्पत्तिकत्वेन अभावत्वेन तस्माद्यत्रे सम्बन्धाभावात् तेन नित्यावृत्तिवत्तासाक्षाद्द्रव्याश्रयजातिमत्त्वं कर्म्मत्वम्। प्रचलतीति प्रत्ययासाधारणकारणतावच्छेदकजातिमत्त्वं वा गुणान्यनिर्गुणसमवेतवृत्तिजातिमत्त्वं वा स्वोत्पत्त्यव्यवहितोत्तरक्षणवृत्तिविभागकारणतावच्छेदकजातिमत्त्वं वा" "उत्क्षेपणं तथावक्षेपणमाकुञ्चनं तथा। प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च" भाषा० "सन्निगतः प्रोद्यमानो न प्रवर्त्तत आकुञ्चनप्रसारणोल्मनविनमनप्रधावनोत्कासनप्रवाहणैश्च स्यति" "प्रसारणाकुञ्चनबन्धनपीडनैर्भृशमुपचरेत्" अनुसृत्यते चाकुञ्चनप्रसारणादिभिर्विशेषैः" इति च सुश्रुतः।

आकुञ्चित त्रि० आ+कुचि-क्त। १आभुग्ने २सङ्कोचिते च। "नतांसमाकुञ्चितसव्यपादम्" भट्टिः।

आकुल त्रि० आ+कुल-क। व्याप्ते। "तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम्" गीता "त्रासाकुलः परिपतन् परितो निकेतान्यूर्ध्वैः" "अभिचोद्य प्रतिश्वासुरासीत् कार्य्यहयाकुलः" इति च माघः। निराकुलः पर्य्याकुलः व्याकुलः समाकुलः। आकुलत्वञ्च मनश्चाञ्चल्यसम्पादकमानसावस्थाभेदः स्वक्रियाऽसामर्थ्यञ्च। कृत्यर्थे णिच् आकुलयति अभूततद्भावे चि क्राद्यनुप्रयोगः आकुलीभूतः आकुलीकृतः "द्रविणं परिमितमधिकव्ययिनं जनमाकुलीकुरुते"

आकुलाकुल त्रि० आकुल+प्रकारे द्वित्वम्। १आकुलप्रकारे २अत्यन्ताकुले च।

आकुलि पु० आ+कुल-इन्। व्याकुलत्वे।

आकुलित त्रि० आ+कुल-क्त। व्याकुलीभूते आकुल+कृत्यर्थे णिच् कर्म्मणि क्त। आकुलीकृते "मार्गाचलव्यतिकराकुलितेव सिन्धुः" कुमा०।

आकुलीकृत त्रि० अनाकुलः आकुलः कृतः आकुल+चि-कृ कर्म्मणि क्त व्याकुलतां प्रापिते। [भूते।

आकुलीभूत त्रि० आकुल+चि-भू-क्त। स्वयं तथा-

आकूत न० आ+कू-भावे क्त। आशये अभिप्राये। "स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहेतुकां वृत्तिम्" सां० का० यथा याज्ञीकादयः-"कृतसङ्केताः पराक्रन्दने प्रवृत्ताः तत्रान्यतमस्याकूतमवगम्यान्यतमः प्रवर्त्तते तथा अन्यतमस्य करणस्याकूतात् स्वकार्य्यकरणाभिसन्धादन्यतमं करणं प्रवर्त्तते" इति सां० कौ०। "इतीरिताकूतमनीलवाजिनः" किरा०। [वेदनाकूथितत्रिभागेषु" काद०।

आकूणित आ+कूण-क्त। ईषत्सङ्कुचिते। "मदनशरस्य

आकूति स्त्री आ+कू-भावे क्तिन्। अभिप्राये। "आकूतीनाञ्च चित्तीनां प्रवर्त्तक! नमामि ते" भा०व० २६२

क्र० । द्रौपदीकृतलक्षणस्तवः । "आकूतिः सत्या मनसो मे अस्तु" ऋ० १०,१२४,४ । "सं म आकूतिर्ऋध्यात्" ऋ० ४,३६,२ । संज्ञायां क्विच् । स्वायम्भुवमनोः शतरूपायां पत्न्यामुत्पादिते कन्याभेदे तत्कथा यथा । "कस्य रूपमभूद्द्वेधा यत् कायमभिचक्षते। ताभ्यां रूपविभागाभ्यां मिथुनं समपद्यत । वस्तु तत्र पुमान् सोऽभून्नतः स्वायम्भुवः स्मराट्। स्त्री यासीत् शतरूपाख्या महिष्यस्य महात्मनः । तदा मिथुनधर्मेण प्रजा ह्येधाम्बभूविरे । स चापि शतरूपायां पञ्चापत्यान्यजीजनत् । प्रियव्रतोत्तानपादौ तिस्रः कन्याश्च भारत ! । आकूतिर्देवहूतिश्च प्रसूतिरिति सत्तम ! । आकूतिं रुचये प्रादात् कर्दमाय तु मध्यमाम् । दक्षायादात् प्रसूतिञ्च यतश्चापूरितं जगत्" भा० ३स्क०।

आकृति स्त्री आक्रियते व्यज्यते जातिरनया करणे क्तिन् । जातिव्यञ्जकेऽवयवसंस्थानभेदे । "आकृतिग्रहणा जातिः" महाभा० । "जात्याकृतिव्यक्तयस्तु पदार्थः" गौ०सू० तत्राकृतिलक्षणं तत्रैवोक्तम् "आकृतिर्जातिलिङ्गाख्या" गौ० । "जातेर्गोत्वादेः सास्नादिः संस्थानविशेषो हि लिङ्गमिति । "इयमाकृतिरेव शक्यार्थः इति केचिन्मन्यन्ते । तदभिप्रायेण, महाभा०। "येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्द इति" अनाकृतिः संज्ञा आकृतिमन्तः संज्ञिन" इति । "लोकेऽपि ह्याकृतिमतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते" इति च महाभा० । गौतमेन तु इतरपक्षनिराकरणेन त्वयाप्यमेव शक्यार्थत्वेऽवधारितं यथा।"आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः" सू०। आकृतिः पदार्थः कुतः सत्त्वस्य प्राणिनोगवादेर्व्यवस्थानसिद्धेर्व्यवस्थितत्वसिद्धेः तदपेक्षत्वादाकृत्यपेक्षत्वात् अयमश्वोगौरवमित्यादि व्यवहारस्याकृतत्यपेक्षत्वात् आकृतिरेव शक्यार्थः । इति यत्तत् तदुद्भावयिता जातेः पदार्थत्वमाह "व्यक्त्याकृति युक्तेष्वप्रसङ्गात् प्रोक्षणादीनां कदुगवके जातिः" सू० । कदुगवके व्यक्त्याकृतियुक्तेऽपि प्रोक्षणादीनामप्रसङ्गात् जातिः पदार्थः।इतरथा कदुगवकस्यापि व्यक्तित्वात् गवाकृतिमत्त्वाच्च वैधप्रोक्षणादिप्रसङ्ग इति भावः। एवं जात्याकृतिव्यक्तीनां प्रत्येकस्य शक्यत्वपक्षं निराकृत्य त्वयाप्यमेव शक्यत्वमित्याह । 'जात्याकृतिव्यक्तयस्तु पदार्थः" सू० "तुशब्देन एकमात्रपदार्थत्वव्यवच्छेदः एकवचनं तु तिस्रष्वप्येकैव शक्तिरिति सूचनाय, विभिन्नशक्तौ कदाचित् कस्यचिदुपस्थितिः स्यात् । शक्तेस्तुल्यत्वेऽपि व्यक्तेर्विशेष्यत्वं तथैव शक्तिग्रहात् । नचाकृत्यादिसाधारणशक्यतावच्छेदकाभावात् न शक्यैक्यम् इति वाच्यम् तथा नियमे मानाभावात् इदं गवादिपदमभिप्रेत्याह तेन पदादिपदस्य जात्यवाचकत्वेऽपि न क्षतिः जातिपदं वा धर्मे परं तथैव लक्षणस्य वक्तव्यत्वादिति" वृत्तिः । एवं शक्यतां व्यवस्थाप्य आकृतेर्लक्ष्यत्वं "आकृतिर्जातिलिङ्गाख्या" सू० प्राग्विवृतम्। एतेनाकृतिशब्दस्य जातिव्यक्त्योः संबन्धपरत्वकल्पनमर्वाचीनानां परास्तम् सम्बन्धस्य जातिलिङ्गत्वाभावात् तस्य शक्यतावच्छेदसम्बन्धत्वेन शक्यत्वाभावाच्च। गा०भा० आकृतीनां नित्यत्वोक्तिः तुल्याकृतिग्रहानित्यत्वाभिप्रायेण द्रष्टव्या "यत्राकृतिस्तत्र गुणा वसन्ति" नीतिः "न तुलाविषये तवाकृतिः" "त्वदुदाहरणाकृतौ गुणाः"इति च नैष०२ आकारे"इङ्गितं हृद्गतोभावो बहिराकार आकृतिरिति" सज्जनोक्तेः ३व्याकृतियुक्ते देहे "किमिव हि मधुराणां मण्डनं नाकृतीनाम्" शक० । "स्पष्टाकृतिः पत्तरश्चेन्द्रकेतोः" रघुः । "स्फुरितं मनोगतमिवाकृतयः" "गोवर्द्धनस्याकृतिरन्यकारि"इति च माघः । "नाकृतिगुरुता गुरुता" उद्भटः । ४आकरे मूलग्रन्थादौ च आकृतिगणः ।

आकृतिगण पु० आकृतौ आकारप्रसिद्धौगणः शाक०त० । पाणिन्युक्ततत्तत्कार्य्यनिमित्ते शब्दसमूहे । यथा खरादिराकृतिगणः कण्ड्वादिरित्यादि गणपाठे भूरिप्रयोगः ।

आकृतिच्छ्वा स्त्री आदयति क्षद–क्विप् कर्त्तरि इत् हस्वः २त० । (घोषा) घोषातकीलतायाम् ।

आकृष्ट त्रि० आ+कृष–क्त । लताकर्षणे । "नाकृष्टं न च टङ्कितं न नमितं नोत्थापितं स्थानतः" महाना० ।

आकृष्टि स्त्री आ+कृष–क्तिन् । आकर्षणे ।

आंके अव्य० आ+कन–डे । १अन्तिके २दूरे च निरु० । "त्वमग्ने यज्ञमाके नमस्" ऋ०२,१,१०

आकेकरा स्त्री आके अन्तिके कीर्य्यते कृ–कर्म्मणि अप् । "दृष्टिराकेकरा किञ्चित्स्फुटापाङ्गे प्रसारिता । मौलितार्द्धाऽपरा लोके तारा व्यर्द्धनोद्भवा"इत्युक्तलक्षणे दृष्टिभेदे नेत्रादिविशेषणत्वे न० "निमीलदाकेकरलोलचक्षुषा"माघः।

आकेनिप त्रि० आकेऽन्तिके निपतन्ति नि+पत–ड । अन्तिकपातिनि "आकेनिपासो अवृभिर्दविध्वतः"ऋ० ४,४५,६,

आकोकेर पु० ज्योतिषोक्ते मकरराशौ । "क्रियतावुरिजित्त मकुलीरलेयपाथेयवृककौर्पाख्याः । तैश्चिक आकोकेरोऽ-

द्रोगधान्तर्भं चेत्यम्" ज्यो०। [पूर्वस्य वा। अपाटवे।

आ(श्र)कौशल न० अकुशलस्य भावः अण्। द्विपदद्वद्विः

आक्रन्द आ+क्रन्द-घञ्। १सारवे रोदने, २आह्वाने, ३शब्दे, च। कर्मणि घञ्। ४मित्रे, ५भ्रातरि च। आधारे घञ्। ६दारुणे युद्धे, दुःखिनां ७रोदनस्थाने च। आक्रन्दयति अच्। ८पार्ष्णिग्राहपदाहर्त्तरि नृपभेदे। अरिशब्दे २५५ पृष्ठे विवृतिः "आक्रन्दे चाग्रपैहीति न दण्डं मनुरब्रवीत्' मनुः पार्ष्णिग्राहञ्च संप्रेक्ष्य तथाक्रन्दञ्च मण्डले" मनुः।

आक्रन्दन न०आ+क्रन्द-ल्युट्। १सारवरोदने २आह्वाने च।

आक्रन्दिक त्रि० आक्रन्दे दुःखिनां रोदनस्थानं धावति ठञ् ठक् वा। दुःखिनां रोदनस्थानधावके ठञि स्त्रियां ङीप्

आक्रन्दिन् त्रि० आक्रन्दति आ+क्रदि+णिनि। रोदनपूर्व्वकाह्वायके। "परस्पराक्रन्दिनि चक्रवाकयोः" कुमा०।

आक्रन्दे अव्य० आ+क्रन्द-आधारे के। युद्धे निरु०।

आक्रम पु०आ+क्रम-घञ् अदृद्विः। १बलेनातिक्रमणे। ल्युट्। आक्रमणमप्यत्र न०। आक्रम्यते परलोकोऽनेन करणे घञ्। परलोकप्राप्तिसाधने २विद्याकर्म्मादौ। "अथ यथाक्रमोऽयं परलोके स्थाने भवति तमाक्रममाक्रम्योभयान् पाप्मन आनन्दांश्च पश्यति" ह०उप। "अयं पुरुषः परलोकस्थाने प्रतिपत्तव्ये निमित्ते यथाक्रमो भवति यादृशेन परलोकप्रतिपत्तिसाधनेन विद्याकर्म्म पूर्व्वप्रज्ञालक्षणेन युक्तोभवति तमाक्रमं परलोकस्थानायोन्मुखीभूतं प्राप्नाङ्कुरीभावमिव बीजं तमाक्रममाक्रम्यावेदयं" भा०। "अथ केनाक्रमेण यजमानः स्वर्गं लोकमाक्रमते" शत०ब्रा०। ३कृताक्रमणे ४अभिभूते ५वह्नाप्ते ६आयत्ते च। आक्रामति पराभवति क्षुधाम् आ+क्रम-अच्। ७अन्ने "आक्रमोऽस्याक्रमाय त्वा" यजु० १५,६। "आक्रमोऽन्नम्" वेददीपः।

आक्रान्त त्रि० आ+क्रम-क्त। १पराभूते २स्वोपरिगत्या व्याप्ते "समेव समाक्रान्तं ह्यं हिरसगामिना" रघुः। "नितान्तमाक्रान्त इवाङ्गनानाम्" माघः।

आक्रान्ति स्त्री आ-क्रम भावे क्तिन्। आक्रमणे उपरिस्थानेन प्राप्तौ "आक्रान्तिसम्मानितपादपीठम्" कुमा०।

आक्रीड पु० आक्रीड्यतेऽत्र आ+क्रीड-घञ्। क्रीड़ास्थाने उद्यानादौ। "आक्रीड़पर्व्वतास्तेन कल्पिताः खेषु वेश्मसु" कुमा० "कमप्याक्रीड़मासाद्य तत्र विश्रम्यमिषुः" दशकु०। कर्त्तरि अच्। २विहारशीले त्रि०।

आक्रीडिन् त्रि०आ+क्रीड़-णिनुन्। क्रीड़ाशीले स्त्रियां ङीप्

आक्रुष्ट त्रि० आ+क्रुश-क्त। १कृताक्रोशे यं प्रति आक्रोश कृतस्तस्मिन्। २शब्दिते ३निन्दिते च। "भेरीनिराकुष्टमहाशुहासम्" माघः। भावे क्त। ४परुषभाषणे न० "मार्ज्जारमूषिकास्यर्थे आक्रुष्टे क्रोधसम्भवे" काल्पा० "आक्रुष्टे परुषभाषणे" आ०त० रघुनन्दनः।

आक्रोश पु० आ+क्रुश-घञ्। १विरुद्धचिन्तने, २शापे ३निन्दायाञ्च ल्युट् आक्रोशनमप्यत्र न०। ४अपवादे "पूर्ण्णमासीदुराक्रोशं स्वनतस्तस्य भूतले" रामा० "कुलाक्रोशकरं लोके धिक् ते चारित्रमीदृशम्" रामा०।

आक्रोशक त्रि० आ+क्रुश-ण्वुल्। आक्रोशकारके।

आक्रोष्टृ त्रि० आ+क्रुश-तृच्। आक्रोशकारके। आक्रुश्यमानेनाक्रोशेन्नान्यरेव तितिक्षतः॥ आक्रोष्टारं निर्दहति सुकृतं चास्य विन्दति" भा०आ०प० ८६ अ०।

आक्ली अव्य० आ+क्लिद-डी। विकारे उर्य्यादि। आक्लीत्य।

आक्लेद पु० आ+क्लिद-घञ्। आर्द्रीभावे। [जाते वैरे।

आक्षद्यूतिक न० अक्षद्यूतेन निर्व्वृत्तम् ठक्। आक्षद्यूतवा

आक्षपाटिक पु०अक्षपटे क्रीड़ास्थाने व्यवहारस्थाने वा नियुक्तः ठक्। १अक्षक्रीड़ाध्यक्षे २व्यवहाराध्यक्षे प्राड्विवेके च।

आक्षपाद त्रि०अक्षपादस्येदम् अण्। १गौतमसम्बन्धिमते। तेन प्रोक्तम् अण्। तत्कृते २शास्त्रे च तच्च शास्त्रं प्रमाणादि षोडशपदार्थतत्त्ववेदकं पञ्चाध्यायात्मकम्। प्रमाणप्रमेयादि सूत्रमारभ्य हेत्वाभासाश्च यथोक्ताः द्रव्यगुणसूत्रसमुदायात्मकम्। तस्य संक्षिप्तार्थः न्यायशब्दे वक्ष्यते। अक्षपादप्रणीतं वेत्ति अण्। न्यायमताभिज्ञे ३नैयायिके च।

आक्षार पु० आ+क्षर-णिच्-घञ्। अगम्यागमनं कृतं त्वयेति पुरुषं प्रति, अगम्यगमनं त्वया कृतमिति स्त्रियं च प्रति दूषणे। ल्युट् आक्षारणमप्यत्र न०। युच् टाप्। अत्रार्थे स्त्री। [यापवादस्तेन दूषिते।

आक्षारित त्रि० आ+क्षर-णिच्-क्त। आक्षारोमिथुनविष-

आक्षिक त्रि० अक्षेण दीव्यति जयति जितं वेति अक्ष+ठक्। १अक्षेण देवके २अक्षेण जयिनि ३अक्षजिते च। "प्रातिभाव्यं वृथादानमाक्षिकं सौरिकं च यत्" मनुः भारभूतानज्ञान् हरति वहत्यावहति वा वंश्या० अञ्। पूर्व्वात् भारात् ठक्। आक्षभारिकः अक्षभारवाहकादौ त्रि० अक्षोऽत्र वंश्यादिसाहचर्य्यात् कलिङ्गुमः।

आक्षित् त्रि० आ+क्षि-क्विप्। "आवर्त्तमाने "आक्षित् पूर्व्वापरा" ऋ०३,५५,५। "आक्षित् आवर्त्तमानः" भा०।

आक्षिप्त त्रि० आ+क्षिप-क्त । १ऊताक्षेपे यस्याक्षेपः कृतस्तस्मिन् २आकृष्टे च ।

आक्षीव पु० आ+क्षीव-णिच्-अच् । १शोभाञ्जनवृक्षे । क्षीव-क्त नि० क्षीवोमत्तः प्रादि० । २दैवन्मत्ते ३सम्यक्प्रमत्ते च त्रि० ।

आक्षेप पु० आ+क्षिप-घञ् । १भर्त्सने, २अपवादे, ३आकर्षणे, धनादिन्यासरूपे, ४निक्षेपे ५अर्थालङ्कारभेदे स च २६४पृष्ठे दृश्यः। ६निवेदने "गोरोचनाक्षेपनितानगौरैः" कुमा० ७उपस्थापने "खण्डिक्षे पराक्षेपः परार्घे खण्डमर्पणम् । उपादानं लक्षणं चेति" काव्यप्र० । ८अनुमाने यथा जातिशक्तिवादिनां मते व्यक्तेराक्षेपात् बोधः । सचानुमानमेव । तथा हि गामानयेति वाक्ये गोत्वकर्म्मकानयनं गोकर्म्मकानयनं विनाऽनुपपन्नमित्यनुपपत्तिज्ञानेन गोत्वाश्रयस्य व्यक्तेरनुमानेन भानम् । यथोक्तं शब्दशक्ति० "गामानयेत्यादौ गोत्वादिकर्म्मकत्वेनैवानयनादेरन्वयधीः गोत्वादिशक्यत्वेन पदज्ञानस्य गोत्वाद्यानयनबुद्धिं प्रत्येवहेतुत्वात् गामनयेत्यादौ स्वाश्रयवृत्तित्वसम्बन्धेनैव प्रकृत्यर्थस्य गोत्वादेः साकाङ्क्षत्वात् गवादिकर्म्मताकत्वेन बोधस्योत्तरकालमाक्षेपात् । कर्म्मत्वं गोवृत्ति गोत्वनिष्ठकर्मतात्वात्, आनयनं गोवृत्तिकर्मताकम् गोत्ववृत्तिकर्मताकत्वादित्याद्यनुमानसाच्चाख्यात्" । ६सतिस्कारवचने च "विरुद्धमाक्षेपवचस्तितिक्षतः" किरा० ।

आक्षेपक त्रि०आ+क्षिप-ण्वुल् । १निन्दके २आकर्षके । "यदा तु धमनीः सर्व्वाः कुपितोऽभ्येति मारुतः । तदा क्षिपत्याशु सुदुर्मुक्तदेहं नभवरः । सुदुर्मुक्तस्तदाक्षेपादाक्षेपक इति स्मृत" इत्युक्तलक्षणे २वातरोगभेदे ३व्याधे च पु०मेदि० ।

आक्षेपण न० आ+क्षिप-ल्युट् । आक्षेपार्थे "पतनपीडनप्रहाराक्षेपणव्यालरुद्गदशनप्रभृतिभिरभिघातविशेषैः" सुश्रु० ।

आ(अ)क्षैवक्षा न० अक्षेतत्र एव ब्राह्मणा० स्वार्थे ष्यञ् । द्विपदवृद्धिः पूर्व्वपदस्य वा । अक्षेतत्रे क्षेत्रानभिज्ञे ।

आक्षेपिन् त्रि०आक्षिपति आ+क्षिप-णिनि । १आकर्षके । आक्षेपः सूक्ष्मदृष्ट्या पर्य्यालोचनमस्यास्ति इनि । २सूक्ष्मदृष्ट्या आलोचनपूर्व्वकाकर्षके च । "बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः" पात०सू० । प्राणायामशब्दे विवृतिः ।

आक्षोट पु० आ+अक्ष-ओट । शैलपीलुभेदे ।

आक्षोड पु० आ+अक्ष-ओड़ । शैलपीलुवृक्षे (आखरोट) इति ख्याते । "बिल्वामलकबदरीकाफलमाक्षातदाड़िमम् । भव्यं पानिवताक्षोडम्" स्मृतिः "आक्षोडजम्बुफलकारफलं काश्मीरमस्त्रिदम्" श्राद्धतत्त्वे रघुनन्दनः ।

आख पु० आखनत्यनेन आ+खन-ड । खनित्रे । अच् स्वार्थे कन् गौरा० पाठान्तरम् ङीप् । आखको क्षुद्रखनित्रे स्त्री ।

आखण्डल पु० आखण्डयति भेदयति पर्व्वतान् आ+खडि-डलच् डस्य नेत्त्वम् । इन्द्रे । "आखण्डलः कामभिदं बभाषे" कुमा० "तमोघः कामरूपाणामत्याखण्डलविक्रमः" रघुः । [पूर्व्वपदाद्युदात्तम् ।

आखण्डि आ+खण्ड-इन् आखण्डके भेदके पत्रगादि०

आखन पु० आखनत्यनेन आ+खन-घ । खननसाधने खनित्रे । वेदे तु पृ०णत्वम् । "एवं तथाज्ञानमाखण्ड्य मृत्वा" आ०उ० । न शक्यते खनितुं कुद्दालादिभिरपि ढुण्ढ्येत्तुं न शक्योऽखण्डमृत्वा" शा०भाष्यम् ।

आखनिक आ+खन-कर्त्तरि ण्वुल् । १चौरे, २शूकरे, ३मूषिके च ४खननकर्त्तरि त्रि० ।

आखनिवक पु०आ+खन-करणे कर्त्तरि वा ण्वुक्वक । खनित्रे १चौरे २शूकरे ३मूषिके च ५खनके त्रि०। डर । आखरोथल । पालेसमितादिः युक्तारोहादिश्च ।

आखर पु० आ+खन-करणे ड । खनित्रे ।

आखरेष्ठ त्रि० आखरे तिष्ठति स्था-क षत्वम् वेदे निपातनात् । आखरे स्थिते "कृष्णोऽप्याखरेष्ठः" सि०कौ० ।

आखान पु० आ+खन घञ् । समन्तात् खनने ।

आखु पु० आ+खन-डु । १मूषिके, २चौरे, ३शूकरे च । कर्म्मणि डु । ४देवताविशेषे । "विभवे सति नैवात्ति न ददाति जुहोति न । तमाखुराखु"मित्युक्तलक्षणे ५क्षपणे च

आखुकर्ण(र्ण)पर्णिका स्त्री आखुकर्णीविव पर्णान्यस्या वा कप् । (उन्दुरकाणी) लतायाम् ।

आखुकर्णी स्त्री आखोः मूषिकस्य कर्ण इव पर्णमस्याः ङीप् (उन्दुरकाणी) मूषिककर्णतुल्यपर्णयुक्तायां लतायाम्।

आखुग पु० आखुना मूषिकेण गच्छति । गम-ड । मूषिकवाहने गणेशे । तस्य यथा मूषिकवाहनत्वं तथा गणेशशब्दे वक्ष्यते आखुवाहनादयोऽप्यत्र ।

आखुपर्णिका स्त्री आखुः तत्कर्णीविव पर्णमस्याः वा कप् । (उन्दुरकाणी)वृक्षे । कबभावे ङीप् । आखुपर्णीत्यपि तत्रैव ।

आखुभुज् पु०आखुं भुङ्क्ते भुज-क्विन् । मूषिकभक्षके विड़ाले । क । आखुभुजोऽप्यत्र ।

आखुकरीष न० ६त०। मूषिकशुष्कपुरीषरूपकरीषे "तस्मादाखुकरीषं सम्मरति" शत० ब्रा०।

आखुपाषाण पु० आखुः खनकः पाषाणः कर्म० "आखुपाषाणनामायं लोहसङ्करकारकः" इत्युक्तो पाषाणभेदे राजनि०।

आखुविषहा स्त्री आखुविषं मूषिकविषं हन्ति हन-ड। मूषिकविषहरे १देवताडहत्ते, २देवताल्लोलतायाञ्च।

आखूत्कर पु० आखुभिरुत्कीर्य्यते उत्+कृ-कर्म्मणि-अप्। मूषिकैरुत्कीर्य्यमाणेषु पांसुषु। (उन्दुरमाटि)। "हिरण्यं निधायोखूत्करान्निवपति" कात्या० ४,८,१६।

आखूत्थ त्रि० आखुभ्य उत्तिष्ठति उद्+स्था क। १आखूत्क्षये। भावे क। २आखूनामुत्थाने न० सि० कौ०।

आखेट पु० आखिद्यन्ते लाक्ष्यन्ते प्राणिनोऽत्र आ+खिट-घञ्। प्राणिलाभार्थायां मृगयायाम्। स्वार्थे कन् आखेटकोऽप्यत्र

आखेटशीर्षक न०। आखेट इव शीर्षमस्य॥ "कपिशीर्षं दृषच्छीर्षं तथा चाखेटशीर्षकम्। इति कृत्रिमसंभेदाः स्युः" इत्युक्ते (सुड़ङ्ग) कृत्रिमभेदे। [२ततत्कुशलमात्रे च।

आखेटिक पु० आखेटे कुशलः ठक्। मृगयाकुशले १कुक्कुरे।

आखोट पु० आखुः खनित्रमिव उटानि पर्णान्यस्य। (आखरोट) इति ख्याते वैद्यकीये।

आख्या स्त्री आ+ख्यायते अनेन आ+ख्या-अङ्। संज्ञायां रूढेनाभिधानशब्दे। "पदादुताख्यां सुखमेधि जगाम" कुमा नाम च "येन स्वीयपदार्थस्य सुख्यतः प्रतिपादनं। खोत्तरप्रथमापेक्षा तन्नाम स्यात्तदर्थकमिति" शब्दर० उक्तलक्षणकम् "यत् प्रातिपदिकं नाम तन्नाम्नो नातिरिच्यते" इति च तत्रोक्तं "यादृगशब्देन स्वोपस्थाप्ययदर्थसुख्यविशेष्यकान्ययबोधार्थं स्वोत्तरप्रथमाविभक्तिरपेक्ष्यते तादृशः शब्द एव तदर्थकं नाम। घटादयोहि शब्दाः प्रथमान्तत्वेन निश्चिता एव स्वार्थसुख्यविशेष्यकं बोधमुत्पादयन्ति नत्वन्यथा न हि घट इत्यादित इव घटादित्यादितोऽपि घटादिसुख्यविशेष्यकः सुबर्थसंख्यादेरवगमः। पीतपटेत्यादिकः समासोऽपि स्वोत्तरं प्रथमाप्रतिसन्धानदशायामेव पटादिसुख्यधर्म्मितावच्छेदकस्य पीताद्यन्वयबोधस्य जनकः अतएव "नापदं प्रयुञ्जीतेति" इद्धाः। पदं विभक्त्यन्तं पीतपटरूपमित्यादावपि नावान्तरवाक्यार्थबोधपूर्व्वको महावाक्यार्थबोधः पटादिनाम्नः प्रथमान्तत्वाभावेन तदर्थे पीताद्यन्वयधियः पूर्व्वमसम्भवात् विशिष्टवैशिष्ट्यावगाहितया प्रमाणान्तरेण पटधर्म्मितापीतनिश्चयादपि तत्र सम्भवात्। नचान्योन्यपरस्परादिनामसव्याप्तिः "एधः प्रथमा नाभिधीयते" इति इद्धैः करणादिति वाच्यं मल्लाभ्यामन्योन्यं हन्यत इत्यादौ मल्लयोः परस्परकर्तृकहननकर्म्मत्वान्व्याहतोधेन तेषामपि प्रथमान्तत्वादन्यथा सकर्म्मकस्य हन्तेर्भावाख्यातसाकाङ्क्षत्वानुपपत्तेरकर्म्मकस्यैव धातोस्तथात्वात्"। तेन न्यायमते प्रथमान्तसुख्यविशेष्यकशाब्दबोधस्वीकारेण तथात्वं वैयाकरणादिमते तु न तथा "भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानीति या० उक्तेः भावप्रधानत्वे नैव बोधः तथाच "अर्थवदधातुरप्रत्ययः प्रातिपदिकं" "कृत्तद्धितसमासाश्चेति" पा० उक्तं लक्षणं प्रातिपदिकमेव नामेत्यभिधीयते अतएवोक्तम् "उणादयो बहुलन्तु तद्धितान्ताः समासजम्। नामसंज्ञा भवेत्तस्य स्याद्युत्पत्तिस्तदुत्तरम्" तच्च नाम चतुर्विधम् "रूढञ्च लक्षकञ्चैव योगरूढञ्च यौगिकम्। तच्चतुर्द्धा परे रूढ़यौगिकं मनुतेऽधिकम्" शब्दर० व्याख्यातं च स्वयमेव जगदीशेन। "निरुक्तं नामविभजते। रूढञ्चेत्यादि तत् नाम। चलयमवधारयार्थं तेन किञ्चिन्नाम क्वचिदर्थे रूढमेव यथा गोप्रभृतौ गवादि, गमेर्डो दाभाभ्यां नुर्घेटडाचेत्यादेरौणादिकप्रत्ययस्य शक्तिविरहेण यौगिकत्वविरहात्। किञ्चिल्लक्षकमेव यथा तीरादौ मङ्गादि, आद्युत्पत्त्या पूर्ववत्तीरे शक्तिग्रहस्याविशिष्टत्वेऽप्याजानिकप्रयोगापत्त्या तदप्रामाण्यकल्पनात् शक्तेः पूर्व्वपूर्व्वप्रयोगनियतत्वात्। किञ्चिद्योगरूढमेव यथा पङ्कजातपङ्कादौ पङ्कजादि "किञ्चित् यौगिकमेव यथा पाककर्त्तादौ पाचकादि। रूढयौगिकमप्यधिकं नाम यथा मण्डपमन्दारजतादि तद्धि कदाचिदवयवद्वयेन योगार्थमेव कदाचिच्च समुदायशक्त्या रूढार्थमेवाभिधत्ते इत्यपरेषामाशयः। गौर्व्वाहीक इत्यादौ तु शक्त्यार्थसङ्गत्यावच्छिन्नबोधकतया गौणं गवादिपदं गोसदृशादौ लक्षकमेव न तु ततोभिद्यते" तत्र रूढादिलक्षणानि तत्रैवोक्तानि यथा "रूढं सङ्केतवन्नाम सैव संज्ञेति कीर्त्यते। नैमित्तिकी पारिभाषिकौपाधिकापि तद्विदा। यन्नाम यादृशार्थे सङ्केतितमेव न तु यौगिकमपि तद्रूढं योगरूढन्तु पङ्कजादिकं न तथा रूढनामैव च संज्ञापदेनाभिलप्यते न तु रूढादिवत् संज्ञापि नाम्नोऽवान्तरभेदः, येन विभागव्याघातः स्यात्। संज्ञायाश्च त्रयोभेदाः नैमित्तिकी पारिभाषिकी औपाधिकी चेति। पाचकपाठकादयस्तु न संज्ञाः सङ्केतशून्यत्वादिति ये तु रूढस्य नाम्नश्चतुर्व्विधत्वमाहुस्तन्मतमुन्मत्तप्रलपितम्। जातिद्रव्यगुणसम्बन्धैर्मैः सङ्केतवत्तया। जातिशब्दादिभेदेन चाहुर्विध्यं परे जगुः। गोसदृशादीनां गोत्वादि

जात्या पश्वादयादीनां लाङ्गूलधनादिद्रव्येण धन्यपिशुनादीनां पुण्यहेत्वादिगुणेन चलचपलादीनाञ्च शब्दानां कर्म्मणावच्छिन्नशक्तिमत्त्वाच्चातुर्विध्यमेव रूढानामिति। यदुक्तं दण्ड्याचार्य्यैः "शब्दैरेव प्रतीयन्ते जातिद्रव्यगुणक्रियाः। चातुर्विध्यादमीषासु शब्द उक्तचतुर्विध" इति तदेतज्जड़मूकमूर्खादीनामव्युत्पन्नादीनाञ्च शब्दानामपरित्यक्तया परित्यक्तमकाभिः। नैमित्तिकसंज्ञां लक्षयति। जात्यवच्छिन्नसङ्केतवती नैमित्तिकी मता। जातिमात्रे हि सङ्केतादृब्यक्तेर्भानं सुदुष्करम्। यन्नाम जात्यवच्छिन्नसङ्केतवत् सा नैमित्तिकी संज्ञा यथा गोचैत्रादिः सा हि गोत्वचैत्रत्वादिजात्यवच्छिन्नमेव गवादिकमभिधत्ते न तु गोत्वादिजातिमात्रं गोपदं गोत्वे सङ्केतितमित्याकारकप्रहात्गामानयेत्यादौ गोत्वादिना गवादेरन्वयानुपपत्तेः एकयक्तत्वप्रहस्यान्यानुभावकत्वे ऽतिप्रसङ्गात्। ननु गामानयेत्यादौ गोत्वादिकर्मताकत्वेनैवानयनादेरन्वयधीर्गोत्वादिशक्तत्वेन पदज्ञानस्य गोत्वाद्यन्वयबुद्धिं प्रत्येव हेतुत्वात् सुवर्धकर्म्मत्वादौ स्वाश्रयवृत्तित्वसम्बन्धेनैव प्रकृत्यर्थस्य गोत्वादेः साकाङ्क्षत्वात् गवादिकर्मताकत्वेन बोधस्योत्तरकालभोज्येपात् कर्मत्वं गोवृत्ति गोत्वनिष्ठकर्मतात्वात् आनयनं गोवृत्तिकर्म्मताकं गोत्ववृत्तिकर्मताकत्वादित्याद्यनुमानसाच्चाच्च्यात्। न च वस्तुगत्या यद्गोत्वशक्तत्वं तज्ज्ञानस्य हेतुत्वे गोपदं जातिशक्तमित्येवं यदादपि शुद्धगोत्वस्यान्वयबोधापत्तिः गोत्वत्वावच्छिन्नशक्तत्वप्रकारकज्ञानत्वेन तथात्वे च लाघवाद्गोत्वावच्छिन्नशक्तताप्रकारकज्ञानत्वेनैव हेतुत्वं गोत्वाद्यप्रवेशादिति वाच्यम् गोपदं गोत्वशक्तमित्याकारज्ञानत्वेन हेतुतायां शुद्धस्यैव गोत्वस्य विषयितासम्बन्धेन शक्यांशे विशेषणत्वेन गोत्वाद्यप्रवेशगौरवस्यायोगात्। न हि समवायान्धसम्बन्धेन जातेः प्रकारतायां धर्म्मावच्छिन्नत्वनियमोमानाभावात् अयं गौरित्यादिव्यवसायोत्तरमिमं गोत्वेन जानामीत्याकारे तस्य भाततालिङ्गकानुमानेऽनुव्यवसाये वा व्यभिचाराच्च प्रागनुपस्थित्या गोत्वत्वादेस्तत्रोपनयायोगात्। एतेन जातेर्निरवच्छिन्नप्रकारत्वस्य समवायसंसर्गावच्छिन्नत्वनियमात् केवलस्य गोत्वादेः शक्यांशे विषयतया सुवर्धकर्म्मत्वांशे च परम्परया प्रकारत्वायोग इत्यपि प्रत्युक्तम् उक्तस्थल एव व्यभिचारात्। नचैवं कालोगौः पदं गौरित्यादिप्रत्ययोऽपि प्रमा स्यात् कालिकादिसम्बन्धेन गोत्वादिमति तत्प्रकारकत्वादिति वाच्यं कालिकादिसम्बन्धेन गोत्वादेः प्रामाण्यस्य गोत्वत्वाद्यवच्छिन्नप्रकारतागर्भत्वेन तादृशमतेः प्रमात्वायोगात् अन्यथा घटत्वादिजातेः संस्थानसमवेतत्वमते संयोगोघट इत्यादिप्रतीतेः समवायेन प्रमात्वस्य दुर्वारतापत्तेः शाब्दस्थेव प्रत्यक्षस्यापि कालोगौरित्यादिबोधस्य नियमतोगवाद्यभेदावगाहित्वेनैवाप्रमात्वसम्भवाच्चेति भट्टमतानुवर्त्तिनः। तन्मन्दं विनाप्याक्षेपं गामानयेत्यादितोगवादिकर्म्मताकत्वेनानयनादेरन्वयबोधस्यानुभविकत्वात् गौर्गच्छतीत्यादौ शुद्धगोत्वे गतिमत्त्वाद्यन्वयस्यानुभवेनास्वर्शनात् गोत्वत्वाद्यनुपस्थित्या च गोत्वं गच्छतीत्याद्यनुभवस्यासम्भवात् स्वाश्रयवृत्तित्वसम्बन्धेन गतिमत्त्वादिहेतुना गवादौ साक्षात्सम्बन्धेन गतिमत्त्वाद्याक्षेपस्य व्यभिचारादिदोषेण दुःशकत्वाच्च। एतेन कर्म्मत्वादौ गोत्वादेः स्वाश्रयवृत्तित्वसम्बन्धेनान्वयबोधोत्तरं कर्मत्वस्य गोत्ववृत्तित्वं गोवृत्तित्वं विनानुपपद्यमित्यनुपपत्तिधीसहकृतेन गामित्यादिवाक्येनैव कर्मत्वं गवीयमित्यौपादानिकोगवादिव्यक्तेर्बोध इति श्रीकरमतमप्यनादेयं श्रियोविरुद्धाभ्यां शाब्दत्वार्थापत्तित्वाभ्यामवच्छिन्नबोधस्यालीकत्वेन शब्दानुपपत्तिभ्यां सम्भूय तथाविधोपादानिकबोधस्य जननायोगाच्च। यत्तु गौर्ज्ञायते गौर्नश्यति सर्व्वत्र गोत्वादिजातिशक्तेनैव गवादिपदेन लक्षणया गोत्वादिविशिष्टा व्यक्तिर्बोध्यते व्यक्तीनां बहुत्वेनान्यलभ्यत्वेन च तत्र शक्तेरकल्पनात् तात्पर्य्यानुपपत्तेरपि लक्षणाया बीजत्वात् यदाङ्गमण्डनाचार्य्याः "जातेरस्तित्वनास्तित्वे न हि कश्चिद्विवक्षति। नित्यत्वाल्लक्षणीयायाव्यक्तौ हि विशेषणे" इति तदपि तच्चं व्यक्तिविशंक्षतायां गोत्वादिजातौ गवादिपदस्य सङ्केतग्रहे गौरवेण तत्तात्पर्य्यग्राहकत्वे तद्धि गवादौ लक्षणाया बहुलभ्यकत्वात् शक्यसम्बन्धस्यैव लक्षणात्वात्। न च गोरन्यो महिष इत्यादौ पञ्चम्यर्थेऽवधित्वे प्रतियोगित्वे वा स्वावच्छेद्यत्वसम्बन्धेन शुद्धस्य गोत्वादेरन्वयात्तथाविधस्यल एव जातौ सङ्केतग्रहः तत्र पञ्चम्याः स्वार्थेऽवधित्वादौ स्वनिरूपितत्वावच्छेद्यत्वसंसर्गेण प्रकृत्यर्थस्य गवादेरन्वयबोधकत्वात् अन्यथा गोगोत्वयोर्भेदक्रियाभ्यां गोपदेन बोधने वृत्तिद्वयवैयर्थापत्तेः वस्तुतः शुद्धस्य गोत्वादेः शाब्दीप्रकारतायाः समवायावच्छिन्नत्वनियमात्तस्यावधित्वादौ स्वावच्छेद्यत्वादिसम्बन्धेनान्वयोदुर्घटएव। द्रव्यं घट इत्यादिप्रतीतेः समवायेन प्रमात्वानुरोधाद्घटत्वजातेर्नानात्वोपगमादिति। प्रभाकारास्तु गोत्वशक्तत्वेन

ज्ञातं पदं तादृशेन गोशाब्दत्वावच्छिन्नं प्रत्येव हेतुरतोगोत्वशक्तिग्रहान्न गोत्वेन गवादेः न वा द्रव्यत्वादिना गोरन्यधियोऽतिप्रसङ्गः। नचैवं जातेरिव व्यक्तेरपि शक्यत्वमावश्यकं न हि गवादिपदस्य शक्यत्वं जन्यत्वमपि तु जन्यशाब्दधीविषयत्वं तच्च गोत्वस्येव गोरथविशिष्टस्येति वाच्यं गवादिपदधर्मिकस्वशक्तताज्ञानत्वावच्छिन्नशाब्दधीजनकतावच्छेदकत्वेन गोत्वादेरेव गवादिपदशक्यत्वात् गोत्वशक्ततापेक्षया गोशक्तत्वस्य गुरुतया तज्ज्ञानत्वस्य शाब्दं प्रति जनकतानवच्छेदकत्वात्। अतएवान्वयबुद्धेरात्मस्वात्मत्वाद्यवगाहित्वेऽपि न तेषां पदशक्यत्वम्। यत्तु वा गोत्वादिशक्तत्वेन ज्ञातं पदं गोत्वादिशाब्दत्वावच्छिन्नं प्रत्येव हेतुर्विशेष्यतया तादृशशाब्दं प्रति समवायेन गोत्वस्य नियामकत्वकल्पनाच्च नातिप्रसङ्गः गोत्वादिना गवादेरिव गवयादेर्गोत्वादिनान्वयबोधत्वावच्छिन्नं प्रत्यपि विनिगमकाभावेन गोत्वादिशक्तिज्ञानत्वेन हेतुत्वमपेक्ष्य गोत्वशाब्दत्वावच्छिन्नं प्रत्येव गोत्वस्य तच्छक्तत्वज्ञानस्य च द्वयोः कारणतायामेव लाघवात् वस्तुतो गोत्वशाब्दं प्रति गोत्वशक्तिज्ञानमेव हेतुर्नतु गोत्वमपि जातिव्यक्तोस्तुल्यविप्रतिपत्तिवेद्यत्वनियमादेव गोव्यक्तीनान्तद्विषयत्वसिद्धेः प्रमाणविरहादेव गोत्वादिना गवयादिविषयत्वस्य तत्वासिद्धेश्च। यद्यपि जातेर्विषयत्वं तत्समवायिव्यक्तिविषयतया निरूपितमिति न व्याप्तिर्गोत्वाद्यालोचने कालोगोत्ववानित्यादिबोधे च व्यभिचारात् नापि जातेर्निरवच्छिन्नप्रकारतायास्तथात्वनियमः गौरयमित्यादिज्ञानस्य प्रत्यक्षे गोत्वेनेमं जानामीत्याकारे तथात्वात्तथाप्यन्वयबोधस्य निरवच्छिन्नगोत्वादिप्रकारत्वं गवादिविशेष्यतानिरूपितमेवेति व्याप्तिस्तादृशविशेष्यताकत्वं विना गुरुस्य गोत्वादेरन्वयबोधेनास्पर्शनात् गुरूणां गोत्वेन गवयादिबोधस्यालीकत्वात्। अतएव गवाद्यंशे गोत्वादिप्रकारकबोधः समवायेनैव सम्बन्धान्तरेणापि तत्प्रकारकः स्याद्गोत्वप्रकारतायां गोविशेष्यताकत्वस्येव समवायावच्छिन्नत्वस्यापि व्याप्तिबलेन सिद्धावपि सम्बन्धान्तरावच्छिन्नत्वस्य प्रमाणविरहेणासिद्धेः। एवञ्च गोत्वादिशक्तिज्ञानत्वेन जनकतायां विषयतावच्छेदकत्वाद्गोत्वादिरेव गवादिपदस्यार्थः गवादौ तद्व्यवहारस्तु तादृशावच्छेदकधर्मवत्त्वप्रयुक्तोगौणः। नचैवं गम्यादिधातोरपि गत्वादौ शक्तिर्न स्याद्गतित्वादिशक्तिज्ञानादेव तादृशेन गत्वादेर्गम्यादिधातुतोबोधसम्भवादिति वाच्यं गुरूणां गतित्वादेः संस्थानाव्यङ्ग्यत्वेन जातित्वासम्भवात् उत्तरसंयोगाद्यवच्छिन्नक्रियात्वाद्युपाधिरूपे च तत्र स्वरूपतः शक्तिग्रहायोगात् सखण्डस्य निरवच्छिन्नप्रकारत्वाभावात् निरुक्तक्रियात्वत्वावच्छिन्नशक्ततायास्तत्वेन हेतुतामपेक्ष्य लघुतया तादृशक्रियात्वावच्छिन्नशक्तिमत्त्वज्ञानत्वेनैव तथात्वौचित्यात् गुरुत्वादिप्रवोध्यस्य पतनत्वादेरखण्डत्वे पत्त्वादिधातूनान्तत्र शक्तत्वेऽपि चत्वभावाच्च पत्त्वादिपदानामपि लोमवल्लाङ्गूलादिपर्य्यवसिते पशुत्वादिभावे न शक्तिग्रह इति यदप्योक्तं तन्मात्रस्यैवानुभवेन तदाश्रयस्यालाभात् लोमादीनां स्वाश्रयतुल्यविप्रतिपत्तिवेद्यत्वस्य लोमवल्लाङ्गूलवान् देव इत्यनुभवे व्यभिचारादिति प्राहुः" तत्र परिभाषिकी औपाधिकी च तत्रैव लक्षिता यथा "उभयावृत्तिधर्म्मेण संज्ञा स्यात् परिभाषिकी। औपाधिकी त्वनुगतोपाधिना या प्रवर्त्तते। उभयावृत्तिधर्मावच्छिन्नसङ्केतवती संज्ञा पारिभाषिकी यथाकाशखण्डित्यादिः सा हि द्वितीयावृत्तिरेव शब्दादिना रूपेण तदाश्रयमभिधत्ते नचाकाशादिपदस्य गगनादौ निरवच्छिन्नैव शक्तिः पटादिपदस्यापि पटादौ तादृशशक्त्यापत्तेः पटे शक्तमपि पटपदं न पटत्वावच्छिन्ने शक्तिमदित्यादिप्रयोगः ततः पटत्वविशिष्टस्यानुभवादवश्यं तच्छक्तिरवच्छिन्नेति चेत् शब्दवति शक्तमप्याकाशपदं न शब्दवत्त्वावच्छिन्नशक्तिमदित्येवं महदाद्याकाशादिपदाच्च शब्दवत्त्वेन गगनस्य प्रतीतिरतस्तस्यापि शब्दवत्त्वावच्छिन्नैव तत्र शक्तिरिति विभाव्यताम्। एतेन पटत्वाद्युपलक्षिते धर्म्मिण्येव शक्तिग्रहस्य तादृशेन पटाद्यनुभवं प्रति हेतुत्वान्नास्तु पटादिपदस्यापि पटत्वाद्यवच्छिन्ने शक्तिः। परन्तु पटत्वाद्युपलक्षितव्यक्तिरेवेति शिरोभक्षणमपि प्रत्युक्तं शब्दोपलक्षिते धर्मिणि शक्तिग्रहादेवाकाशादिपदात्तदंशे निर्विकल्पकात्मकस्मरणमन्वयानुभवश्चोत्पद्यत इति तु नानुभविकं न वा यौक्तिकम्। वा चानुगतोपाध्यवच्छिन्नसङ्केतवती संज्ञा सा त्वौपाधिकी यथा भूतदूतादिः सा हि सचेतनावृत्तिविशेषगुणवत्त्ववार्त्ताहारकत्वाद्यनुगतोपाधिपुरस्कारेणैव प्रवर्त्तते शब्दादिस्तु सखण्डत्वेनोपाधिरपि नानुगतोद्वितीयावृत्तित्वादतः पारिभाषिके गगनादिपदे नातिप्रसङ्गः। पटत्वादेः संस्थानवृत्तित्वमते यदि घटादिपदं विलक्षणसंस्थानवत्त्वेन शक्तं तदौपाधिकमेव यदि च परम्परया वैलक्षण्यवत्त्वेन। तदा नैमित्तिकमेव। वस्तुतः सामान्यस्य शाब्दबुद्धौ स्वरूपतः

प्रकारत्वं समवायेनैवान्विधिष्टं प्रागिति"। लक्षकलक्षणमुक्तं तत्तैवं "वाक्यार्थस्य सम्बन्धवति शक्तन्तु यद्भवेत्। तत्र तल्लक्षकं नाम तच्छक्तिविधुरं यदि। वाक्यार्थसम्बन्धवति वक्तामङ्गेतितं तदेव वाक्यार्थे लक्षकं यदि वाक्यार्थे शक्तिशून्यं भवेत्। मैत्रवाक्यस्य गङ्गास्तुरगादिसम्बन्धिनि लक्षकाश्रयेऽपि लक्षणादाविव तुरगादावपि शक्ताएव।गङ्गादयस्तु तीरादावसङ्केतिताः तत्सम्बन्धिनीरादिशक्तत्वेन स्वीकृताएव तीराद्यन्वयं बोधयन्तीति तत्र लक्षका एव। शक्तत्वे पूर्व्वपूर्व्वप्रयुक्तत्वापत्तेः तस्य तदव्याप्यत्वात् कथञ्चित्तीरादिसम्बन्धित्वेन स्वीकृतादपि गङ्गादिपदात्तीरादेरन्वयबोधेन तीराद्यशक्तत्वे सति तत्सम्बन्धितामात्रन्तु न लक्षणा गङ्गागङ्गायां घोष इत्यादावपि गङ्गागङ्गेतिभागस्य निरूढलक्षणायाः सत्त्वेन वैयर्थ्याभावप्रसङ्गाच्च। एतेन तीराद्यशक्तत्वे सति तीरादिपरत्वं तीरादिसम्बन्ध्यनुभावकत्वं वा तल्लक्षकत्वमित्यपि प्रत्युक्तम् अपभ्रंशस्यापि लक्षकत्वापाताच्च नचेष्टापत्तिः शक्तिलक्षणान्यतरवृत्तिमत्त्वे तस्य साधुतापत्तेः पदसाधुतायां वृत्तिमत्त्वस्यैव तन्त्रत्वात्। किञ्चानुभावकत्वं यद्यनुभवस्योपधायकत्वं तदा घोषादिपदसाकाङ्क्षस्य गङ्गादिपदस्य तीरलक्षकता न स्यात् तेन तीरसम्बन्धिनो नीरस्यानुभवानर्ज्जनात् स्वरूपयोग्यत्वन्तु गङ्गायामिति वाक्यस्य दुर्व्वारं तस्माद्याधेयतावाधर्मिकनीरानुभवं प्रति नीरार्थकगङ्गाशब्दोत्तरसप्तम्यर्थेन तथात्वात् नीराधेयत्वस्य च नीरसम्बन्धित्वानपायात्। ननु वाक्यमपि लक्षकं भवत्येव कथमन्यथा चित्रगुसस्तदायस्य लक्षणया चित्रगोस्वामिनां बोधः कथं वा गभीरायां घोष इत्यादौ गभीरनदीतीरस्य न हि तत्र नदीपदं तीरलक्षकं गभीरायामित्यस्यान्वयापत्तेः न हि तीरं गभीरं नापि गभीरपदम्। तथा नद्यामित्यस्यायोग्यतापत्तेः नापि तीरं नदी तस्माद्वाक्यमेव तत्र गभीरनदीतीरलक्षकमिति मीमांसकाः तन्न गभीरायां नद्यामिति विभक्त्यन्तभागस्य तादृक्तीरलक्षकत्वे घोषाद्याधेयत्वेन तदन्वयानुपपत्तेः समासादन्यत्र नामार्थयोर्भेदान्वयस्याव्युत्पन्नत्वात्। एतेन तादृशतीरवृत्तितायामेव तद्भागस्य लक्षणयापि न निस्तारः तादृशतीरवृत्तेरेव लक्ष्यत्वे घोषादावभेदेन तदन्वयायोगः समासभिन्नस्थले नामार्थयोरभेदान्वये तात्पर्य्ययोः समानविभक्तिकत्वस्य तन्त्रत्वात्। न च गभीरायां नदीति भागस्यैव तादृक्तीरलक्षकत्वम्। तदर्थे विभक्त्यर्थस्यान्वयापत्तेर्नेहि स भागः प्रकृतिर्येन तदर्थे विभक्त्यर्थस्यान्वयः स्यात् गभीरायां नदीं व्रजेत्यादितोऽपि गभीरनदीतीरकर्म्मकव्रजादिबोधापत्तेश्च भागस्य वाक्यादन्यत्वाच्च तस्माद्गभीरापदं नदीपदं वा तत्र गभीरनदीतीरलक्षकं पदान्तरन्तु तत्र तात्पर्य्यग्राहकमिति सिद्धान्तविदः। चटपटाद्यनुकरणस्य डंफड़ादिस्रोतस्य च स्वानुभावकत्वमपभ्रंशानामिव शक्तिभ्रमादेव। गौर्व्वाहीक इत्यादौ तु शक्यार्थसदृशत्वावच्छिन्नबोधकतया गौणं गवादिपदं गोसदृशादौ लक्षकमेव न ततोभिद्यते"। तस्य विभागोऽपि दर्शितस्तत्रैव। "जहत्स्वार्थाजहत्स्वार्थनिरूढाधुनिकाद्यादिकाः। लक्षणा विविधास्ताभिर्लक्षकं स्यादनेकधा। काचिल्लक्षणा शक्यासंसृष्टेन बोधकतया जहत्स्वार्थेत्युच्यते यथा तीरत्वादिना गङ्गादिपदस्य। काचिच्छक्यलक्ष्योभयसंसृष्टिना शक्यसंसृष्टिनैव वा रूपेणानुभावकत्वादजहत्स्वार्था यथा द्रव्यत्वादिना नीलघटत्वादिना च घटपदस्य। काचित्लक्ष्यतावच्छेदकीभूततत्तद्रूपेण पूर्व्वपूर्व्वं प्रत्यायकत्वात् निरूढा यथा आरुण्यादिप्रकारेण तदाश्रयद्रव्यानुभावकत्वादरुणादिपदस्य। काचिच्च पूर्व्वपूर्व्वं तादृशेनाप्रत्यायकत्वादाधुनिकी यथा घटत्वादिना पटादिपदस्य। आदिना शक्यसदृशत्वप्रकारेण बोधकतया गौण्युपलक्षणे यथा अग्निर्माणवक इत्यादावग्निसदृशत्वादिना अग्न्यादिपदस्य। तदेवं विविधलक्षणावत्त्वाल्लक्षकं नामापि जहत्स्वार्थादिभेदादनेकविधमिति सिद्धं। स्यादेतत् यदि तीरादिलक्षकतया गङ्गादिपदस्य ज्ञानं तीराद्यनुभवे भवेत्तेतर्भवेदयुक्तक्रमेण लक्षकाणां विभागः नत्वेतदस्ति तीराद्यन्वयबोधं प्रति तीरादिशक्तेरेवैव पदज्ञानस्य लाघवेन हेतुतया लक्षकाणामननुभावकत्वात् गुरूणाम् अग्नौ शैत्यं स्पृशेदित्यादौ शक्तेन दहनादिनेव गङ्गायां घोष इत्यादौ लक्षितेन तीरादिना सार्द्धं भ्रष्टसंसर्गकस्यैव सम्प्रत्ययाधेयत्वादेरन्वयबोधप्रविष्टत्वादिति चेन्न प्रत्ययार्थावच्छिन्नस्यैव प्रत्ययार्थस्य धर्म्मान्तरेऽन्वयबुद्धेर्व्युत्पन्नतया तीराद्यविशेषितस्य तु तथात्वादर्शनात्। न च शक्तस्यैव पदस्य स्वसाकाङ्क्षपदान्तरोपस्थाप्यार्थान्वितस्वार्थधर्म्मिकान्वयबोधं प्रति हेतुत्वात्तदन्वयबुद्धौ लक्ष्यार्थस्य प्रवेशः कुन्ताः प्रविशन्तीत्यादौ लक्ष्यस्य कुन्तधरादेरन्वयविशेष्यतानुपपत्तेः कुमतिः पशुरित्यादौ लक्ष्यार्थयोर्भिन्नोऽन्वयबोधस्याननुभविकत्वाच्च तस्माच्छक्तेरिव भक्तेरपि ज्ञानमनुभावकं भवत्येव कार्य्यतावच्छेदकस्य सङ्कोचाच्च न व्यभिचारः"।

लक्षणाभेदेन लक्षकशब्दभेदा बहवः लक्षणाभेदाच्च सा०द०दर्शिताः लक्षणशब्दे विस्तरतः । तत्र योगरूढलक्षणसूत्रं शब्द० । "खान्तनिविशिष्टशब्दार्थस्यार्थयोर्बोधलक्षिणः । योगरूढं न यत्तैकं विनान्वयस्य शाब्दधीः । यद्यपि खावयवशक्तिलभ्यार्थेन समं स्वार्थस्यान्वयबोधकत्वं तद्यपि योगरूढं यथा पङ्कजलक्षणसर्पाधर्मादि तर्हि खान्तनिविष्टानां पङ्कादिशब्दानां शक्तिलभ्येन पङ्कजनिकर्तृत्वादिना सर्वं स्वयुक्तस्य पद्मादेरन्वयानुभावकम् । पङ्कजमित्यादितः पङ्कजनिकर्तृ पद्ममित्यनुभवस्य सर्वसिद्धत्वात् । इयांस्तु विशेषोयद्रूढमपि मण्डपरथकारादिपदं योगार्थविनाकृतस्य रूढ्यर्थस्यैव रूढ्यर्थविनाकृतस्यापि योगार्थस्य बोधकं, मण्डपमे शेते इत्यादौ योगार्थस्य मण्डपानकर्त्रादेरिव मण्डपं भोजयेदित्यादौ सशक्तितार्थस्य स्टक्काद्देरेवोन्यत्वेनान्वयाबोधात् । योग रूढन्तु पङ्कजादिपदमवयवशक्त्या रूढ्यर्थमेव सशक्तावयवलभ्यार्थमेवानुभावयति नत्वन्यं व्युत्पत्तिवैचित्र्यात्तथैव साकाङ्क्षत्वात् । अतएव पङ्कं कुत्सितमित्यत्र पङ्कजनिकर्तृत्वेन, भूमौ पङ्कजसत्पद्ममित्यादौ च पद्मत्वेन पङ्कजपदस्य लक्षणयैव कुत्सितस्वत्वपद्मयोर्बोध इति वार्त्तिकम् । ननु पुष्पं पङ्कजेत्यादौ पङ्कजादेरन्वयाबोधात् बोधाच्च पङ्कजपुष्पमित्यादौ निर्विभक्तिकेन पङ्कजादिपदेनोपस्थाप्यार्थं खान्वयधीसामान्यं प्रत्येव तादृशपङ्कजादिपदोत्तरशब्दोपस्थाप्यत्वं तन्त्रम् एवं पुष्पं पङ्कजमित्यादौ अन्वयबोधदर्शनात्तदनुरोधेन सविभक्तिकपङ्कजादिपदोपस्थाप्यार्थान्वयबोधं प्रति स्वसमानविभक्तिकपदोपस्थाप्यत्वञ्च अतस्तदुपस्थापितस्य पङ्कजातादेः कथं पदान्तरानुपस्थापिते पद्मादावन्वय इति चेदपङ्कजवृत्तिः मत्तेत्यादौ स्खलदन्तरसंगोभि तरुण्या सुखपङ्कजमित्यादौ च व्यभिचारादुक्तव्युत्पत्तेः सङ्कोचेनेति स्टक्काण । न च धेनुपदस्य धानकर्मत्वविशिष्टायां गवीव पङ्कजादिपदस्यापि पङ्कजातत्वादिविशिष्टपद्मादौ रूढिरेवास्तु न तु योगरूढिरिति साम्प्रतम् अन्यत्र कृत्प्रत्ययशक्तिकेभ्यः पङ्कजन्यादिपदेभ्य एवाकाङ्क्षादिसाचिव्येन पङ्कजनिकर्तृत्वादेर्लाभसम्भवे तद्विशिष्टस्य पद्मस्य गुरोः सशक्तायाशक्यत्वादनन्यालभ्यस्यैव शब्दार्थत्वात् । यद्यपि कर्तृवाचकडप्रत्यय एव पद्मत्वविशिष्टस्य लक्षणया लाभसम्भवान्न पङ्कजभागस्य तत्र शक्तिरुचिता प्रकारान्तरालभ्यस्यैव शब्दशक्त्यभियुक्तत्वात् कृतिवर्त्तमानत्वयोरिवैकपदार्थयोरपि कर्तृपद्मयोर्भिन्नोऽन्वयस्य सम्भवित्वात् तथाप्यवयवानां शक्तेरग्रहे ग्रहेऽपि वा पद्मादौ तदर्थस्यान्वयबोधिरोधिधीदशायां पङ्कजमस्तीत्यादितः पद्मस्तीत्याद्यनुभावार्थं मवश्यमभ्युपेत्यादिविशिष्टे पङ्कजादिभागस्य रूढिरूपेया इतरथा प्रत्ययार्थावच्छिन्नस्यैव प्रत्ययार्थस्य पदार्थान्तरेणान्वयस्य व्युत्पन्नतया प्रत्ययोपस्थापितस्यापि पद्मस्यास्तित्वादिना सहान्वयानुपपत्तेः अतएव पङ्कजादिपदादुत्पन्नोतशक्तिकस्य पुंसः पङ्कजमस्तीत्यादितो जातेपि कर्त्तास्तीत्याकारकोनान्वयबोधः प्रत्ययमात्रोपस्थाप्यस्य कर्तुरन्यतान्वये निराकाङ्क्षत्वादिति वक्ष्यते । किञ्चैवमेकाक्षरकोषावधृतशक्तिकानां कखादिप्रत्येकवर्णानामेव निरूढलक्षणया तत्तदर्थानुभावकत्वसम्भवादकनखादिसमुदायस्यापि तत्तदर्थे शक्तिर्विलीयेत कादिप्रत्येकवर्णस्य शक्तिग्रहं विनापि अकादिशब्दादकादेरनुभवार्थं तत्र समुदाये शक्तिरिति तु प्रकृतेऽपि समानं डादिप्रत्ययमात्रस्य पद्मादौ वृत्तिमत्त्वाग्रहेपि पङ्कजादिसमुदायात् पद्मादेरनुभवस्य सर्वसिद्धात् । नचैवं चित्रगुरित्यादावपि चित्रगोखाद्यादौ समुदायस्य शक्तिप्रसङ्गः समासत्वस्याविशिष्टत्वादिति वाच्यम् अस्मदुक्तावयवशक्तिकस्य पुंसस्तोऽर्थानधिगमेनावयवानां शक्तेरवश्याश्रयेणायां तेषामेव तथाविधार्थबोधकत्वौचित्यस्य वक्ष्यमाणत्वादिति" योगरूढभेदस्तत्रैवोक्तः । "सामासिकं तद्धिताक्तमिति तत् द्विविधं भवेत् । योगरूढं कदन्तस्य समासत्वव्यवस्थितेः । तत् योगरूढं सामासिकं समासात्मकं कृष्णसर्पादि तद्धिताक्तं वासुदेवादि । कदन्तस्य पङ्कजादियोगरूढस्य सामासिक एवान्तर्भाव इति नाधिक्यम् । यौगिकलक्षणविभागो तत्रैव । "योगलभ्यार्थमात्रस्य बोधकं नाम यौगिकम् । समासस्तद्धिताक्तश्च कदन्तश्चेति तच्त्रिधा । यद्यपि खान्तनिविष्टशब्दानां योगलभ्यस्यैव यादृशार्थस्यान्वयबोधं प्रति हेतुत्वन्तादृशार्थं यौगिकम् । योगरूढन्तु कृष्णसर्पादिपदं योगेनावच्छिन्नस्य रूढ्यर्थस्य बोधकं न तु तन्मात्रस्य तच्च यौगिकं त्रिविधं समासस्तद्धिताक्तं कदन्तश्चेति । तन्मोऽपि समासः खघटकशब्दानामाकाङ्क्षया लभ्यस्य धवखदिरार्थस्यानुभवोटकतया यौगिकएव । सर्वञ्चेदं रूढान्यत्वेन विशेषणीयं नातः कृष्णसर्पादौ वासुदेवादौ पङ्कजादौ च योगरूढेतिप्रसङ्गः । ब्राह्मणी स्वयं शूद्रे त्यादौ स्त्रीत्वादेः स्त्रीत्वाचित्वे तादृशं नाम यौगिकमेव अन्यथा तु स्त्रीत्वादिमति तत्तदर्थे रूढमेव नातोविभागस्य व्याघातः" ।

वैयाकरणमते सत्रासानां योगरूढत्वमेव युक्तम्" वै०भू० । "समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत् । बहूनां हस्तिधर्म्माणां वचनैरेव साधने । स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः । चकारादिनिषेधोऽपि बहुव्युत्पत्तिभङ्गनम् । कर्त्तव्यं ते न्यायसिद्धं त्वन्मतं तदिति स्थितिः । अवश्यंबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना । कृत्प्रत्ययश्चास्ति तव तत् किं शक्तिं न कल्पयेः । समास इति हस्तिमात्रोपलक्षणम् । "समर्थः पदविधिः "इत्यत्र पदमुद्दिश्य योविधीयते समासादिः स समर्थः विग्रहवाक्याभिधानशक्तः सन् साधुरिति स्वार्थस्य भाष्यात्साभात् । पदोद्देश्यकविधित्वञ्च तत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपासु पञ्चस्वपि हस्तिवत्स्वेव । विशिष्टशक्तिस्वीकर्तृणां मते दूषणं शक्तिसाधकमेवेत्याशयेनाह पङ्कजशब्दवदिति । पङ्कजनिष्कर्षकरूपि योगादेवोपस्थितौ तत्रापि समुदायशक्तिर्न सिध्येत् । न च पङ्कत्वरूपेणोपस्थितये सा कल्प्यत इति वाच्यम् । चित्रगवादिपदेऽपि स्वामित्वेनोपस्थितये तत्कल्पनावश्यकत्वात् । लक्षणयैव तयोपस्थितिरिति चेत् पङ्कजपदेऽपि सा तुल्या । एवं रथकारपदेऽपि तथा च "वर्षासु रथकारोऽग्निमादधीत" इत्यत्रापि विना लक्षणां कृत्प्रयोगेण ब्राह्मणादिविषयतयैवोपपत्तौ तत्कल्पनां कृत्वा जातिविशेषस्याधिकारित्वं प्रकल्प्यापूर्व्वकल्पनमयुक्तं स्यादिति भावः । साधकान्तरमाह बहूनामिति दृष्टधर्म्मा विशेषणलिङ्गसंख्याद्ययोगादवस्तेषां वचनैरेव साधने गौरवमित्यर्थः । अयं भावः विशिष्टशक्तिस्वीकारे राज्ञः पुरुष इत्यत्रेव राजपुरुष इत्यत्रापि स्वाद्यविशेषाद्यन्वयः राजपदेन स्वतन्त्रोपस्थितिसत्त्वात् । विभाषावचनञ्च समासनियमवारणाय कार्य्यमिति । ननु "सविशेषणानामिति" वचनान्न विशेषणाद्यन्वयः विभाषावचनञ्च कृतमेवेत्याशङ्क्य समाधत्ते वचनैरेवेति । न्यायसिद्धमेव स्वत्वम् । व्यपेक्षाविवक्षायां वाक्यस्य एकार्थीभावे समास इति स्वभावत एव प्रयोगनियमसम्भवात् । सविशेषणत्वेपि विशिष्टशक्तौ राज्ञः पदार्थैकदेशतयान्वयासम्भवात् न्यायसिद्धमिति भावः । अतएव व्यपेक्षापक्षसङ्काय्य अवश्यंतस्मिन् व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभावस्ततो विशेषः स वक्तव्य इति भाष्यकारेण दूषणमयुक्तम् । तथा धवखदिरौ, निष्कौशाम्बिर्गोरथो हतघटो गुडधानाः केयूरः सुवर्णालङ्कारो हिदशाः सप्तपर्ण इत्यादावितरेतरयोगादिकान्तयुक्तपूर्णमिश्रसङ्कातविकारसुच्प्रत्ययलोपो, वीप्साद्यर्थोशचनिको वाच्य इत्यतिगौरवं स्यादिति । दूषणान्तरमाह । चकारादीति आदिना धनश्यामः हंसगमनइत्यादाविवादीनां पूर्व्वोक्तानाञ्च संग्रहः । दूषणान्तरमाह । बहुव्युत्पत्तिभङ्गनमिति । अवमागयः चित्रगुरित्यत्र स्वाम्यादिप्रतीतिरनुभवसिद्धा । न च तत्र लक्षणा प्राप्नोदकोग्राम इत्यादौ तदसम्भवात् । प्राप्निकर्त्रभिन्नसदकमित्यादिबोधोत्तरं तत्सम्बन्धिग्रामलक्षणायामप्युदककर्त्रकप्राप्निकर्म्मग्रामइत्यर्थान्लाभात् । प्राप्नेति कृत्प्रत्ययश्चैव कर्त्रर्थकस्य कर्म्मणि लक्षणेति चेत्तर्हि समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरुदकाभिन्नप्राप्निकर्म्मेति स्यात् । अन्यथा समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिभङ्गापत्तेः प्राप्नेर्धात्वर्थतया कर्त्तासम्बन्धेन भेदेनोदकस्य तत्रान्वयासम्भवाच्च । अन्यथा देवदत्तः पच्यतइत्यत्र कर्त्तासम्बन्धेन देवदत्तस्यान्वयसम्भवेनानन्वयानापत्तेः । अथोदकाभिन्नकर्त्रका प्राप्निरिति बोधोत्तरं तत्सम्बन्धीग्रामो लक्ष्यत इति चेन्न प्राप्नेर्धात्वर्थतया कार्थकर्तारं प्रति विशेष्यताया असम्भावात् । प्रकृतिप्रत्यययोः प्रत्ययार्थप्राधान्यमिति व्युत्पत्तेः । प्राप्नपदे प्राप्नेर्विशेष्यत्वे तस्यैव नामार्थत्वेनोदकेन समभेदान्वयापत्तेश्च । एवमूढरथः उपहृतपशुः उद्धृतौदनो बहुपाचिकेत्यादावपि द्रष्टव्यम् । अत्र हि रथकर्म्मकवहनकर्त्ता, पशुकर्म्मकोपहरणोद्देश्यः, ओदनकर्म्मकोद्धरणावधिः बहुपाककर्त्रधिकरणमिति बोधाभ्युपगमात् अतिरिक्तशक्तिपक्षे च षट्त्वविशिष्टे षट्पदत्वेनोदककर्त्रकप्राप्निकर्म्मत्वविशिष्टे प्राप्नोदकइत्यादिसमुदायशक्तेश्चैव निर्वाहइति भावः । साधकान्तरमाह । अवश्यंचेति । अयं भावः चित्रगुरित्यादिषु चित्रगवत्वस्वाम्यादिप्रतीतिर्न विना शक्तिमुपपद्यते । नच तत्र लक्षणा सा हि न चित्रपदे चित्रस्वामी गौरिति बोधापत्तेः । गवादिमात्रस्य लक्ष्यैकदेशत्वेन तत्र चित्रादेरन्वयायोगात् । नच चित्रभिन्नो गौरिति शक्त्युपस्थाप्ययोरन्वयबोधोत्तरं तादृशगवस्वामी गोपदेन लक्ष्यतेइति वाच्यम् । गोपदस्य चित्रपदस्य वा विनिगमनाविरहेण लक्षकत्वासम्भवात् । नच गोपदे साक्षात् सम्बन्धएव विनिगमक इति वाच्यम् । एवमपि प्राप्नोदकः कृतविश्व इत्यादावप्यवश्यंबहुव्रीहौ विनिगमकाप्राप्तेः । यौगिकानां कर्त्रादार्थकतया साक्षात्सम्बन्धाविशेषात् । नच पदद्वये लक्षणेति नैयायिकोक्तं युक्तम् बोधाद्वैतप्रसङ्गात् । न च परस्परं तात्पर्य्यग्राहकत्वादेकस्यैवैकदा लक्षणा न द्वयो-

रिति न बोधाद्वृत्तिरिति वाच्यम् एवमपि विनिगमनाविरहतादवस्थ्येन लक्षणाया असम्भवात् । नच चरमपदे एव सा प्रत्ययार्थान्वयानुरोधात् प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तेरिति वाच्यम् एवं हि बहुव्रीह्यसम्भवापत्तेः "अनेकमन्यपदार्थे" इत्यनेकसुबन्नानामन्यपदार्थं प्रतिपादकत्वे तद्विधानात् । किञ्च एवं सति घटादिपदेष्वपि चरमवर्ण एव वाचकताकल्पना स्यात् पूर्ववर्णानां तात्पर्यग्राहकत्वेनोपयोगसम्भवात् एवं सति चरमवर्णमात्रश्रवणेऽर्थबोधापत्तिरिति चेदत्राप्युदकपदमात्रश्रवणादर्थप्रत्ययापत्तिस्तुल्येत्यन्यत्र विस्तरः । एवञ्च अथङ्यर्थबहुव्रीहौ वृत्युत्पत्त्यन्तरकल्पना उक्तयुक्तेः अगत्या शक्त्यन्तरकल्पनेत्यर्थः क्रुप्रत्ययागः इत्यस्य क्रुप्रशक्त्योपपत्तिरिति वृत्युत्पत्तित्यागश्च तवास्तु तत्किम् सर्वत्र समासे शक्तिं न कल्पयेरिति वाक्यार्थः । यत्तु वृद्धेत्यादिनो नैयायिकमीमांसकादायः न समासे शक्तिः राजपुरुष इत्यादौ राजपदादेः सम्बन्धिलक्षणयैव राजसम्बन्ध्यभिन्नः पुरुषइति बोधोपपत्तेः । अतएव राज्ञः पदार्थैकदेशतया न तत्र शोभनस्वेत्यादिविशेषणान्वयः । न वा धनश्यामनिष्कोशाम्बिर्गोरवइत्यादौ इवादिप्रयोगापत्तिः उक्तार्थतया इवक्रान्तादिपदप्रयोगासम्भवात् । न वा "विभाषेति" सूत्रानावश्यकत्वम् लक्षणया राजसम्बन्ध्यभिन्नइति बुबोधयिषायां समासस्य, राजसम्बन्धवानिति बुबोधयिषायां विग्रहस्येत्यादिप्रयोगनियमसम्भवात् । नापि षड्जपदप्रतिवन्दी शक्तिसाधिका तत्तावयवशक्तिमजानतोऽपि बोधात् । नच शक्त्यपक्षे लक्षणया तेभ्योऽविशिष्टार्थप्रत्ययः सम्भवति । अतएव राजादिपदशक्त्यपक्षे राजपुरुषश्चित्रगुरित्यादौ न बोधः । नच चित्रगुरित्यादौ लक्षणासम्भवेऽप्यथङ्यर्थबहुव्रीहौ लक्षणाया असम्भवः बहुव्रुत्पत्तिभङ्गापत्तेरिति वाच्यम् प्राप्नोदकइत्यादावुदकपदे एव लक्षणास्वीकारात् । पूर्वपदस्यौगिकत्वेन तल्लक्षणाया धातुप्रत्ययतदर्थज्ञानसाध्यतया विलम्बितत्वात् । प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्त्यनुरोधाच्च । घटादिपदे चातिरिक्ता शक्तिः कल्प्यमाना विशिष्टे कल्प्यते विशिष्टस्यैव सङ्केतितत्वात् बोधकत्वस्यापि प्रत्येकं वर्णेष्वसत्त्वात् । प्रकृते चाव्यवसन्निधानेन प्रत्ययार्थान्वयसौलभ्यायोत्तरपदे एव सा कल्प्यतइति विशेषः स्वीकृतश्च घटादिपदेष्वपि चरमवर्णस्यैव वाचकत्वं मीमांसकमन्यैरित्याहुः । अत्रोच्यते । समासे शक्त्यस्वीकारे तस्य प्रातिपदिकसंज्ञादिकं न स्यात् अर्थवत्त्वाभावात् "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इत्यस्याप्रवृत्तेः । नच "कृत्तद्धितसमासा"श्चेत्यत्र समासग्रहणात् ना । तस्य नियमार्थतया भाष्यसिद्धतायां वैयाकरणभूषणे स्पष्टं प्रतिपादितत्वात् । समासवाक्ये शक्त्यभावेन शक्त्यसम्बन्धरूपलक्षणाया अयुक्तत्वेन लाक्षणिकार्थवत्त्वस्याप्यसम्भवात् । अथ तिप्तस्झि इत्यारभ्य ङ्योस्सुविति तिप्प्रत्याहारोभाष्यसिद्धः तमादायातिप्प्रतिपदिकमित्यर्थे एव सूत्रयतां कृतमर्थवदादिसूत्रद्वयेन । समासग्रहणञ्च नियमार्थमस्तु तथा च सुप्तिङन्तमित्यं प्रातिपदिकमित्यर्थात्समासस्यापि सा स्यादिति चेत्तथापि प्रत्येकं वर्णेषु संज्ञावारणायार्थवत्त्वावश्यकत्वेन समासाव्याप्तिदवस्थ्यमेव । तथा च प्रातिपदिकसंज्ञारूपं कार्यमेवार्थवत्त्वमनुमापयति धूमइव वह्निम् । किञ्चैवं चित्रगुमानयेत्यादौ कर्मत्वाद्यनन्वयापत्तिः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः विशिष्टोत्तरमेव प्रत्ययोत्पत्तेर्विशिष्टस्यैव प्रकृतित्वात् । यत्तु सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तिरेव कल्प्यत इति तत्र उपकुम्भं वह्निपिप्लोत्यादौ पूर्वपदार्थे विभक्त्यर्थान्वयेन व्यभिचारात् । न च तत्रापि सन्निधानमेव आनुपूर्व्यासन्निकर्षसन्निधेर्विवक्षितत्वात् तथा च यत्पदोत्तरं यानुपूर्व्या सा तदर्थगतं स्वार्थं बोधयति । समासे च समस्यमानपदोत्तरमेवानुशासनमिति वाच्यम् अर्थवत्सूत्रेण विशिष्टस्यैव विहितत्वानुशासनात् । अथ प्रकृतित्वाश्रये विभक्त्यर्थान्वय इत्येव कल्प्यत इति चेत्तर्हि षड्जमानय दण्डिनं यस्य न्यूनिं पूजयेत्यादौ षड्दण्डन्यूनेष्वानयनदर्शनपूजनादेरन्वयप्रसङ्गात् अघटमानयेत्यत्र घटेष्वानयनान्वयापत्तेश्च । न च दण्डादीनां विशेषणतया न तत्रानयनाद्यन्वयः । पाकाद्योः धर्म्यात्मकयोः इत्यादौ पाकधर्म्यादिहेतुतायां रूपसुखादावनन्वयप्रसङ्गात् । यच्च प्रकृत्यर्थत्वं तज्जन्यज्ञानविषयत्वमात्रं तच्चात्राविरुद्धमिति तन्न घटं पश्येत्यत्र घटपदात्प्रत्ययेनोपस्थिताकाङ्क्षावारणाय इच्छा प्रकृत्यर्थत्वस्यावश्यकत्वात् । अथ प्रत्ययप्राग्वर्त्तिपदजन्योपस्थितिविशेष्यत्वं प्रकृत्यर्थत्वमितिचेन्न गामानयति कृष्णोदण्डेनेत्यत्र कृष्णे तृतीयार्थान्वयप्रसङ्गात् । अथ समस्यमानपदार्थबोधकत्वं समासोत्तरविभक्तेः कल्प्यत इति चेन्न अकृप्रकल्पनां कृप्रव्युत्पत्तित्यागञ्चापेक्ष्य समुदायशक्तिकल्पनस्यैव युक्तत्वादिति दिक् । अपि च समासे विशिष्टशक्त्यस्वीकारे राजपुरुषः

चित्रगुः नीलोत्पलमित्यादौ सर्व्वत्रान्वयप्रसङ्गः। राजपदादेः सम्बन्धिनि लक्षणायामपि तरङ्गुलः पचतीत्यादौ कर्मत्वादिसंसर्गेण तरङ्गादेः पाकादावन्वयवारणाय प्रातिपदिकार्थप्रकारकबोधं प्रति विभक्तिजन्योपस्थितेर्हेतुतायां आवश्यकत्वात् पुरुषादेस्तथात्वाभावात्। तरङ्गुलः शुक्ल इत्यादौ च प्रातिपदिकार्थैकप्रयमार्थे तरङ्गादेरस्य च शुक्ले अभेदेनैवान्वयः। शुक्लेन तरङ्गुलेनेत्यादौ च विशेषणविभक्तिरभेदार्था पार्श्विकोवान्वय इति नातिप्रसङ्गः। तथा च समासे परस्परमन्वयासम्भवादवश्यिकैव समुदायस्य ताडगे विशिष्टार्थे शक्तिः। किञ्च राजपुरुषपदादेः सम्बन्धिनि सम्बन्धे वा लक्षणा। नाद्यः राज्ञः पुरुष इति विग्रहविरोधात् समानार्थकवाक्यस्यैव विग्रहत्वात्। अन्यथा तस्माच्छक्तिनिर्णयोन स्यात् नान्त्यः राजसम्बन्धरूपः पुरुष इति बोधप्रसङ्गात् विग्रहविभक्तिरहितप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरित्यादि प्रपञ्चितं वैयाकरणभूषणे। अतएव "षष्ठ्यर्थः प्रथमभक्त्यः" इत्यत्र न भक्तिग्रहिण्या प्राधान्यविधानं युक्तम् एकप्रसरत्वभङ्गापत्तेरिति तृतीये, "अङ्गैः खिटक्रतं यजति" इत्यत्राङ्गानुवादेन न तित्वविधानं युक्तम् एकप्रसरत्वभङ्गापत्तेरिति दशमे च निरूपितं सङ्गच्छते। सङ्गच्छते चारुणाधिकरणारम्भः। अन्यथा "अरुणया एकहायन्या पिङ्गाक्ष्या सोमं क्रीणातीत्यत्रारुणपदव्यतिरेकयोरपि एकत्वादिगुणमात्रवाचकतया अमूर्त्तत्वात् क्रीणातौ करणत्वासम्भवस्य तुल्यत्वादारुणस्यैव वाक्याङ्गत्वेदगङ्गाया असम्भवादिति प्रपञ्चितं भूषणे। तस्मात्समासशक्तिपक्षो जैमिनीयैरवश्याभ्युपेयइत्यास्तां विस्तरः"।

आख्यात त्रि० आ+ख्या-कर्मणि क्त। १कथिते। आख्यायतेऽनेन वा०करणे क्त। तिङ्रूपे प्रत्यये तल्लक्षणमाह शब्दश० "धात्वर्थेन विशिष्टस्य विधेयत्वेन बोधने। समर्थः सार्थयत्नस्य शब्दोवाख्यातसञ्ज्ञकः" इति। आख्यातं चैतत् स्वेनैव "धात्वर्थावच्छिन्नस्वार्थयत्नविधेयताकान्वयबोधसमर्थः शब्दो वाख्यातं तदेव च तिङ् इत्यर्थाल्लभ्यते तिङाख्यातयोः पर्य्यायत्वात्। पाकश्चैत्रस्येत्यादौ नामार्थेनैव विशिष्टस्वार्थकर्तृत्वस्याभिधायकः षष्ठ्यादिकोन तु धात्वर्थेन विशिष्टस्य। चैत्रः पचतीत्यादौ धात्वर्थावच्छिन्नस्य यत्नस्य विधेयतया बोधकावपि नामधातू न स्वार्थस्य। चैत्रः पाचक इत्यादौ तु धात्वर्थविशेषितस्य यत्नस्य न विधेयता किन्तु कर्त्तुरेव कृतां धर्म्मिग्रकत्वात्अन्यथा पाचकश्चैत्र इत्यादिकम योग्यमेव प्रतिपादकार्थयोः पाचकचैत्रयोर्भेदेनान्वयस्याव्युत्पन्नतया क्लृप्तेर्हेतुतादात्म्यायोगाच्च। अयं पक्तुं कालइत्यादौ तुमादिना धात्वर्थावच्छिन्नोऽनुकूलत्वादिः, इयं चिकीर्षेत्यादौ च सनादिनेच्छादिरेव विधेयत्वेनानुभाव्यते इति न तेष्वतिप्रसङ्गः। अत्रेदं तत्त्वम्। जीवनयोन्यादिनिखिलयत्नगतं यत्नत्वमेव तिङः शक्यतावच्छेदकं न तु चेष्टाया जनकत्वस्य चिकीर्षाया वा जन्यत्वस्यावच्छेदकतया सिद्धं प्रवृत्तित्वम्। चैत्रोनिश्वसितीत्यादितोऽपि त्वासाद्यनुकूलप्रयत्नस्य प्रतीतेः। तिङर्थक्रतौ च धात्वर्थस्य तं करोमीतिप्रतीतिनियामकः साध्यत्वाख्यविषयतया प्रभेदस्तद्विशिष्टफलोपधायकत्वलक्षणप्रसक्तत्वं वा संसर्गमर्य्यादया भासते तथैव साकाङ्क्षादतोगत्यादिगोचरनिश्चित्तिदशायां गच्छतीत्यादिको न प्रयोगः। "तत्र निश्वासदत्त्वमात्रप्रतीतावपि प्रयत्नत्वमेव तिङः शक्यतावच्छेदकं न तु प्रवृत्तित्वं पचतीत्यतः पाकक्रतिमानिति प्रतीतेः नहि प्रवृत्तित्वमेव क्रतित्वं पाके प्रवृत्तोऽस्मीत्यस्याप्यनुभवस्य पाकं करोमीत्यतोविषयवैलक्षण्यस्य सर्वसिद्धत्वात्नित्यक्रतौ रागप्रयोज्यस्य प्रवृत्तित्वस्य बाधादीश्वरः करोतीत्यादिवाक्यस्यायोग्यतापाताच्च। निविड़निखातस्तु पुरुषः सम्पत्तानगोचरप्रयत्नवानपि न तदुपधायकप्रयत्नवान् अतस्तत्प्रायसत्तिश्चतीत्यादिकोन प्रयोगः नचैवमीश्वरः पचतीत्यपि स्यात् तस्यापि पाकानुकूलप्रयत्नवत्त्वादिति वाच्यं तिङर्थक्रतेरवच्छेदकत्वेनैव संसर्गेण नामार्थान्वयस्य व्युत्पन्नत्वादनुकूलो पचतीत्यादि प्रयोगसिद्धत्वात् अन्यावयविनिष्ठावच्छेदकत्वस्यैव ताडगतिङर्थक्रतेः संसर्गत्वे लघुत्वाच्च। नित्यप्रयत्नव्यावृत्तसर्व्वानुकूलत्वविशेषस्य तिङर्थक्रतौ धात्वर्थस्य संसर्गत्वमित्यास्ताम्"। ईश्वरो जानातीच्छति रथोगच्छतीत्यादौ च ज्ञानादिमत्त्वमात्रप्रतीतेः समवायित्वे, चैत्रोजानातीत्यादावच्छेदकत्वे, बुद्धिरवगाहते घटोभासत इत्यादौ वैशिष्ट्यत्वे, नश्यतीत्यादौ च प्रतियोगित्वे, तिङोनिरूढलक्षणा। क्रतित्वव्यापारत्वादेरखण्डत्वे तदवच्छेदेऽपि ज्ञानेच्छादेरपि तिङः शक्तिरेव। हस्तादिकस्त्ववयवः प्रयत्नस्यैवावच्छेदको न तु ज्ञानेच्छादेरपि प्रमाणाभावादतः करोजानातीत्यादिको न प्रयोगः। प्रागुक्तं वा रीतिरत्रापि। पयः पतति स्रन्दते इत्यादावपि पतनादेः समवायित्वमेव तिङानुभाव्यते न तु तदनुकूलं गुरुत्वद्रवत्वादि येन क्रतितुल्यशरीरेषु तेष्वपि तिङः शक्तिरापाद्यते। पटानां शतं पततीत्यादौ च शतपदार्थस्यैकदेशएव शतत्वसंख्यायां

प्रत्ययैर्यत्राप्रेरन्यत्वात् संख्यायाः पतनादिसमवायित्वविरहेऽपि न क्षतिः पटानां शतं संख्या इत्याद्यनुरोधेनैव शतादेर्गुणवाचित्वसम्भवात् ।

तत्र क्त्वादिकं नाख्यातस्यार्थः किन्तु कालः संख्या च तयोः प्रकारान्तराऽलभ्यत्वात् चैत्रः पचति रथेन गच्छतीत्यादौ धात्वर्थस्यैव पाकगत्यादेः क्रृतिमत्तावच्यत्वादिसम्बन्धेन चैत्रादौ प्रकारत्वात् चैत्रः पच्यत इत्यादितोमैत्रादेः कर्तृत्वादिना तण्डुलः पचतीत्यादौ तण्डुलादेः कर्मत्वादिना संसर्गेण पाकादावननुवेन धात्वर्थ एव धर्मिणि नामार्थस्य भेदेनानुवेऽव्युत्पन्नेन तु नामार्थेऽपि धात्वर्थस्य । नचैवं ज्ञानं चैत्र इत्यादितोऽपि बोधरूपस्य धात्वर्थस्याश्रयत्वसम्बन्धेन चैत्रे धर्मिण्यनुयप्रसङ्गः, तत्र ज्ञानादिपदस्य बुद्ध्यर्थकनामतया तदर्थस्य नामान्तरार्थे भेदेनानुवस्याव्युत्पन्नत्वादेव तदसम्भवात् इति प्राभाकराः । तदसत् धात्वर्थानुविद्धस्यार्थकर्तृतायामेव लडादेः स्वोपस्थाप्यवर्त्तमानत्वाद्यनुभावकत्वव्युत्पत्तेः क्त्वादेस्तिङर्थत्वं विना तदनुपपत्तेः अन्यथातिप्रसङ्गात् । न च प्रकृत्यर्थ एव तिङः स्वार्थवर्त्तमानत्वाद्यनुभावकत्वनियमः पाकर्मनिष्पाद्य क्रियान्तरव्यासक्तेऽपि पुरुषे पचतीतिप्रयोगापत्तेः तदानीमपि पाकस्यानुवर्त्तमानत्वात् तिङाद्यन्तधात्वर्थस्य पाकादेर्वर्त्तमानक्त्वादिसम्बन्धेनैव प्रथमान्तस्य नाम्नोऽर्थे साकाङ्क्षत्वात्तथैवमिति चेत् किं कालस्यापि तिङर्थत्वप्रत्याशया संसर्गविधयैव तस्य लभ्यत्वात् । पचतीत्यादितोवर्त्तमानत्वादिवत्क्रृतिप्रकारकप्रतीतेरानुभविकत्वाच्च । किञ्च धात्वर्थस्यैव क्त्वादिसम्बन्धेन चैत्रादावन्वये पचत्यपि चैत्रे नायं पचतीतिप्रयोगप्रसङ्गः संयोगादिसम्बन्धेन पाकाद्यभावस्य तत्र सत्त्वात् कर्तृत्वादेर्दृष्टनियामकतया तत्सम्बन्धावच्छिन्नपाकाद्यभावस्यालीकत्वेन प्रत्येतुमशक्यत्वात् । एतेन मण्डनमते फलस्य धात्वर्थत्वात् तदनुकूलक्रियैवाख्यातेन चैत्रादावनुभाव्यते इति क्रृतेस्तिङर्थत्वाभावादुक्तलक्षणमसम्भवीत्यपि प्रत्युक्तं फलस्य धात्वर्थत्वे संयोगोगुणश्रुतिवद्भूतिर्गुणोऽनेकाश्रिता इत्यादिप्रयोगापत्तेश्च न हि भावक्रतावपि क्रियार्थः प्रमाणाभावात् । ननु यदि स्वार्थकर्तृत्वएव लडादिना वर्त्तमानत्वमनुभाव्यते इति नियमः कथं तर्हि केवलात् पच्यत इत्यादितः पाकादौ वर्त्तमानत्वधीरिति चेत् कएवमाह तत्राप्येकपदोपात्तत्वेन कर्मख्यातोपस्थापिते कर्तृत्वएव वर्त्तमानत्वस्यान्वयात् । इयान् परं विशेषोयत् कर्तृविहितेन लटा धात्वर्थस्य विशेष्यत्वेन, कर्मविहितेन तु तस्य विशेषणत्वेन स्वार्थकर्तृत्वमनुभाव्यते तथैव साकाङ्क्षत्वात् । एतेन चैत्रेण पक्वमित्यादाविव चैत्रेण पच्यते इत्यत्रापि क्रृतीययैव कर्तृत्वमनुभाव्यते नत्वाख्यातेन, तिङर्थक्रृतेर्धात्वर्थविशेष्यत्वनियमादिति दीधितिक्रन्मतमप्यनादेयम् एकपदोपात्तत्वेन स्वार्थएव कर्तृत्वे गडादेरिव लडादेर्वर्त्तमानत्वबोधकतया स्तुवर्थक्रृतौ तदन्वयासम्भवात् स्तुवर्थे तिङर्थान्वयस्याऽदृष्टचरत्वाच्चेति । शाब्दिकास्तु चैत्रः पचतीत्यादितः पाकादिक्रृतिमत्तयैव तत्कर्मभेदेनापि चैत्रादेरन्वयस्यानुभविकत्वात् क्रृतिरिव कर्त्तापि तिङर्थः क्रृतित्वमपेक्ष्य कर्तृत्वस्य गुरुत्वाच्च तदाख्यातस्य शक्यतावच्छेदकमिति तु रिक्तं वचः लक्ष्यतावच्छेदके लक्षणाया इव शक्यतावच्छेदकेऽपि शक्तेरसत्त्वमते तद्गुरुत्वस्याकिञ्चित्करत्वात् एकैकात्मनिष्ठानामनन्तक्रृतीनां शक्यत्वमपेक्ष्य निखिलात्मनामेव कर्तृत्वे शक्यतायां विपरीतलाघवाच्च । न च कर्तृनुभवजनकतया सङ्केतितत्वरूपं कर्तृशक्तत्वमेव तिङामसिद्धं, कर्त्रन्वयानुभवजनकतासत्त्वे तत्प्रकारकेश्वरसङ्केतस्य तत्रावश्यम्भावादीश्वरेच्छायाः सदर्थावगाहित्वनियमादन्यथा कर्तृनुभवरूपायोग्यत्वादेव तिङां कर्त्तर्यशक्तत्वसम्भवे क्त्वप्रेच्छया कर्त्तरि गुरुत्वोपन्यासस्योन्मत्तप्रलपितत्वापत्तेः । अथैवं घटपदस्यापि लक्षणादिना घटाद्यनुयानुभावकत्वात् तत्प्रकारकनित्यसङ्केतवत्त्वेन तदपि घटशक्तं स्यात्, न स्यात् पटपदं घटे न शक्तमित्यादिव्यवहारस्य प्रामाणिकत्वेन घटादिपदनिरूढैव घटानुभावकतया नित्यसङ्केतितत्वस्य घटशक्तित्वात् इत्याख्यातं न कर्तृशक्तमित्येवं व्यवहारस्यासत्त्वात् प्रत्युत पाणिन्यादिप्रामाणिकैस्तिङः कर्तृशक्तत्वेन व्यवहृतत्वात् । एतेन गुणवचनस्य नीलादेर्गुणिशक्तत्वमपि व्याख्यातम् इति प्राञ्चः" ।

आख्यातार्थस्य धात्वर्थादौ विशेषणतयैवान्वय इति तु वैयाकरणाः यथाह वै०भू०सा०। "फलव्यापारयोर्धातुराश्रये तु तिङः श्रुताः । फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्" इति। अस्य व्याख्यायाम् 'कर्त्तरि क्रृत्' "तः कर्मणि च" पा०सूत्राभ्यां चकारेण कर्त्तरि कर्मणि च तिङः शक्तिरिति लाभे तत्र व्यापाराश्रयः कर्त्ता फलाश्रयः कर्मेति फलव्यापाररूपयोः विशेषणयोर्धातुनैवोपस्थाप्यत्वात् अनन्वभ्यस्याश्रयस्यैव तिङर्थत्वम् इत्येवं व्यवस्थाप्येत्यमाह। "पदार्थं निरूप्य वाक्यार्थं निरूपयति

फले इत्यादि। विक्लित्त्यादि फलं प्रति। तिङर्थैः कर्तृकर्मसंख्याकालाः। तत्र कर्तृकर्मणो फलव्यापारयोर्विशेषणे, संख्या कर्तृप्रत्यये कर्त्तरि, कर्मप्रत्यये कर्म्मणि, समानप्रत्ययोपात्तत्वात्। तथाचाख्यातार्थसंख्याप्रकारकबोधं प्रत्याख्यातजन्यकर्तृकर्म्मोपस्थितिर्हेतुरिति कार्य्यकारणभावः फलितः। नैयायिकादीनामाख्यातार्थसंख्यायाः प्रथमान्तार्थ एवान्वयादाख्यातार्थसंख्याप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्य्यकारणभावो वाच्यः सोऽपि चन्द्रइव सुखं डक्षते, देवदत्तोभुङ्क्ते व्रजतीत्यादौ चन्द्रक्षार्थयोः आख्यातार्थाननुयादितराविशेषणत्वघटित इत्यतिगौरवम्। इदमपि कर्तृकर्मणोराख्यातार्थत्वे मानमिति स्पष्टं भूषणे। कालस्तु व्यापारे विशेषणम्। तथा हि "वर्त्तमाने लट्" इत्यत्राधिकाराद्धातोरिति लब्धम् तच्च धात्वर्थं वदत्प्राधान्याद्व्यापारमेव याचयतीति तत्रैव तदन्वयः। न च संख्यावत् कर्तृकर्मणोरेवान्वयः शङ्क्यः अतीतभावनाके कर्त्तरि पचतीत्यापत्तेः अपाक्षीदित्यनापत्तेश्च पाकानारम्भदशायां कर्तृसत्त्वे पक्ष्यतीत्यनापत्तेश्च। नापि फले तदन्वयः फलानुत्पत्तिदशायां व्यापारसत्त्वे पचतीत्यनापत्तेः पक्ष्यतीत्यापत्तेश्चेत्यवधेयम्। न चामवातजड़ीकृतकलेवरस्योत्थानानुकूलबलसत्त्वादुत्तिष्ठतीति प्रयोगापत्तिः। परत्रस्थानादप्रयोगात्। किञ्चिच्चेष्टादिनावगतौ चायमुत्तिष्ठति शब्दभावात् फलन्तु न जायत इति लोकप्रतीतेरिष्टत्वात्। एवञ्च तिङर्थौ विशेषणमेव भावनैव प्रधानम्। यद्यपि प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमन्यत्र दृष्टं, तथापि "भावप्रधानमाख्यातं सत्वप्रधानानि नामानीति" निरुक्तोक्तेः भूवादिरूपादिस्थक्रियाप्राधान्यबोधकभाष्याच्च धातुर्भावनाप्राधान्यमध्यवसीयते। अपि च आख्यातार्थे प्राधान्ये तस्य देवदत्तादिभिः समभेदान्वयात्प्रथमान्तस्य प्राधान्यापत्तिः। तथा च पश्य मृगो धावतीत्यत्र भाष्यसिद्धैकवाक्यता न स्यात् प्रथमान्तमृगस्य धावनक्रियाविशिष्टस्य दर्शनक्रियायां कर्मत्वापत्तौ द्वितीयापत्तेः। न चैवम् अप्रथमासामानाधिकरण्यात् शब्दप्रसङ्गः। एवमपि द्वितीयावाद्वर्थारूढेन पश्य मृगदित्यादिवाक्यैरेवासङ्गत्यापत्तेः। न च पश्येत्यत्र तमिति कर्म्माध्याहार्य्यम्। वाक्यभेदप्रसङ्गात् उत्कटधावनक्रियाविशेषस्यैव दर्शनकर्मतयान्वयस्य प्रतिपिपादयिषितत्वात् अध्याहारे अननुगमापत्तेश्च। एवञ्च भावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणमिति नैयायिकोक्तं नादरणीयम् किन्तु आख्यातार्थकर्तृप्रकारकबोधे धातुजन्योपस्थितिर्भावनात्वावच्छिन्नविषयतया कारणमिति कार्य्यकारणभावोद्रष्टव्यः। भावनाप्रकारकबोधं प्रति तु क्रज्यन्योपस्थितिवत् धात्वर्थभावनोपस्थितिरपि हेतुः पश्य मृगो धावति, पचति भवतीत्याद्यनुरोधादिति दिक्। इत्यञ्च पचतीत्यत्रैकाश्रयिका पाकानुकूला भावना, पक्ष्यते इत्यत्रैकाश्रयिका या विक्लित्तिस्तदनुकूला भावनेति बोधः। देवदत्तादिपदप्रयोगे त्वाख्यातार्थकर्त्रादिभिस्तदर्थस्याभेदान्वयः। घटोनश्यतीत्यत्रापि घटाभिन्नैकाश्रयकोनाशानुकूलोव्यापार इति बोधः। स च व्यापारः प्रतियोगित्वविशिष्टनाशसामग्रीसमवधानम्। अतएव तस्यां सत्यां नश्यति, तदत्यये नष्टः, तद्भाविनि नङ्क्ष्यतीति प्रयोगः। देवदत्तोजानातीच्छतीत्यादौ च देवदत्ताभिन्नैकाश्रयकोज्ञानेच्छाद्यनुकूलोवर्त्तमानो व्यापार इति बोधः स चान्तत आश्रयतैवेति रीत्योह्यम्"। एवञ्च वैयाकरणमते सुबभिन्नत्वे सति संख्याबोधकप्रत्ययत्वमाख्यातत्वमिति लक्षणम् "सुपां कर्म्मादयोऽर्था संख्या चैव तथा तिङामित्युक्तेः यद्यपि आख्यातसामान्यस्य संख्यासामान्यशक्तत्वज्ञापकं सूत्रं नास्ति तथापि लड़ादेशैकवचनादीनां तत्तत् संख्याशक्तताज्ञापकसूत्रेण आदेशगतं तथात्वं स्थानिनि लकारे कल्पितमिति संख्याबोधनयोग्यत्वमादाय लक्षणसमन्वय इति बोध्यम् "आख्यातमाख्यातेन क्रियासातत्ये" भट्टैर० गणसूत्रम् तत्र आख्यातपदं च तदन्तपरम् "प्रत्ययग्रहणे तदन्तग्रहणम्। इति नियमात् २आख्यातान्ते च।

आख्याति स्त्री आ+ख्या–क्तिन्। कथने।

आख्यात त्रि० आ+ख्या–क्त। उपदेशके। "आख्यातो पयोगे" पा०।

आख्यान न० आ+ख्या–भावे ल्युट्। १कथने। २पूर्व्ववृत्तकथने "आख्यानं पूर्व्ववृत्तोक्तिः" सा० द०। "यथा देवः सोऽमरातिगोत्रितजलैर्यस्मिन् ह्रदाः पूरिताः" वेणी० ३प्रतिवचने च। प्राङ्आख्यानयोः" पा० "विभाषाख्यानपरिप्रश्नयोरिञ्" पा०। करणे ल्युट्। ४भेदके धर्म्मे। "लक्षणेत्थम्भूताख्यानेत्यादि" पा० इत्थंभूतः कञ्चित् प्रकारं प्राप्त आख्यायते अनेन इति व्युत्पत्तेः कञ्चित्प्रकारं प्राप्तस्य भेदकोधर्म्म इति सूत्रार्थः यथा भक्तोविभुमभि। ५आर्ष महाकाव्यान्तर्गतसर्गभेदे तेन हि कथाविशेषेण वर्त्तनीयचरिताख्यानात्तदाख्यम् महाकाव्यं लक्षयित्वा

तदीयसर्गनामकरणे विशेषमाह" सा० द० "नामास्य सर्गोपादेयकथया सर्गनाम तु" इत्यभिधाय "अस्मिन्नार्थे पुनः सर्गा भवन्त्याख्यानसंज्ञकाः" यथा भारते रामोपाख्यानम्। नलोपाख्यानं शकुन्तलोपाख्यानमित्यादि आख्यान+अस्त्यर्थे अर्श० अच्। ६प्रसिद्धाख्यानसंज्ञकसर्गयुक्ते आर्षमहाकाव्यभारतादौ। "स्वाध्यायं श्रावयेत् पित्रोर्धर्मशास्त्राणि चैव हि। आख्यानानीतिहासांश्च पुराणानि खिलानि च" मनुः साङ्गोपनिषदान् वेदान् चतुराख्यानपञ्चमान्" भा०व०। स्वार्थे कन् तत्रैव "नाटकाख्यानकादेयव्याख्यानादिक्रियानिपुणैः" काद०।

आख्यानकी स्त्री "आख्यानकी तौ जगुरू गन्धोजे जतावनोजे जगुरू गुरुश्चेदिति" छन्दसि विषमवृत्तभेदे।

आख्यायक पु० आ+ख्या–ण्वुल्। परोक्षाख्यात्रे कथके १दूते "आख्यायकेभ्यः श्रुतसन्तुदृत्तिः भट्टिः" २कथकमात्रे त्रि०।

आख्यायिका स्त्री आ+ख्या–ण्वुल् "आख्यायिका कथावत् स्यात् कवेर्वंशादिकीर्त्तनम्। अस्यामन्यकवीनाञ्च वृत्तम् गद्यं क्वचित् क्वचित्। कथांशानां व्यवच्छेद आश्वास इति बध्यते। आर्यावक्त्रापवक्त्राणां छन्दसा येन केनचित्। अन्योपदेशेनाश्वासः मुखे भाव्यर्थसूचनम्" सा०द० उक्ते कथाभेदे कथा च "कथायां सरसं वस्तु गद्यैरेव विनिर्म्मितम्। क्वचित्तत्र भवेदार्या क्वचिद्वक्त्रापवक्त्रके। आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्त्तनं" भिन्नवृत्तलक्षणयुक्ता तत्र आख्यायिका यथा हर्षचरितादि" कथा कादम्बर्य्यादिः। २उपलब्ध्यर्थबोधककथायाञ्च" अमरः।

आख्यायिन् त्रि० आ+ख्या–णिनि। १कथके। २आवेदके दूतादौ च "रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः" शकु०। "रहस्याख्यायिनाञ्चैव प्रणिधीनाञ्च चेष्टितम्" याज्ञ०

आगत त्रि० आ+गम–क्त। १आयाते, २उपस्थिते, ३प्राप्ते च। "हेयं दुःखमनागतम्" पात० "क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेत्तु यत्" स्मृतिः। "पितृतआगतम् पितृप्रमिति" दायभा०। "तत आगतः" पा०। आगता वत जरेव हिमानी सेव्यतां सुरतरङ्गिणी" उद्भटः भावे क्त। ४आगमने न० "गतागतं कामकामा लभन्ते" गीता।

आगति स्त्री आ+गम–क्तिन्। १आगमने "लोकस्यास्य गतागतिम्" रामा०। २प्राप्तौ च तासामभ्यर्थुरागतौ यवो इमौ मोदते" ऋ०२,५,६। वेदैः शास्त्रैः सविज्ञानैर्जन्मना मरणेन च। आत्मा गत्वा तथाऽऽगत्वा" याज्ञवल्क्यः।

आगत्य(स्य) अव्य० आ+गम–ल्यप् वा भोजोपेक्षत्। आगमनं कृत्वेत्यर्थे तत्त्वमागत्य सत्वेन" याज्ञ०। "आगत्य बिल्वशाखायां चरिष्यामि! कुरु सन्निधिम्" पुरा०।

आगन्तव्य त्रि० आ+गम–तव्य। १आगम्ये प्राप्ये "आगन्तव्यं तु नोद्दृष्टं पुनरात्ममनश्चलम्" भावे तव्य। २अवश्यागमने न० आगन्तव्यं झटितिमधुरामण्डलात् गोपकान्ते! पदाब्जदूतम्।

आगन्तु पु० आ+गम–तृन्। १अनियतस्थायिनि अतिथौ "वैदर्भमागन्तुमजं स्म हेतुम्" रघुः। २कृठादुपस्थिते च आगन्तुना सह मैत्री न कर्त्तव्या" हितो०। ३आगमनशीले त्रि०। स्वार्थे कन्। आगन्तुकोऽप्यत्र।

आगन्तुज त्रि० आगन्तोः कृठादुपस्थितात् जायते जन–ड। कृठोपस्थितजाते रोगादौ। "आगन्तुजे भिषग्रोगे शस्त्रक्षीतृत्वमत्र यत्नतः"। "दोषागन्तुजमृत्युभ्योरसमन्त्रविशारदौ" सुश्रुतः।

आगम पु० आ+गम–घञ्। १आगतौ २प्राप्तौ ३उत्पत्तौ च "आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत!" गीता, आगम्यते प्राप्यतेऽनेन करणे घञ्। ४सामाद्युपाये "आगमैः सदृशारम्भ आरम्भसदृशोदयः" रघुः आगम्यते स्वत्वमनेन। स्वत्वप्रापके ५क्रयप्रतिग्रहादौ "आगमोनिष्फलस्तत्र भुक्तिःसोकापि यत्र नो" या० स्मृतिः "अनागमन्तु यो भुङ्क्ते बहून्यब्दशतान्यपि" स्मृतिः" यादृशागमस्य प्रामाण्यं तद्विरूपितम् मिता०। "भोगमात्रस्य स्वत्वव्यभिचारात् कीदृगोभोगः प्रमाणमित्यत आह। "आगमोऽभ्यधिकोभोगादिना पूर्व्वक्रमागतात्" या० स्वत्वहेतुः प्रतिग्रहक्रयादिरागमः। स भोगादभ्यधिकोबलीयान् स्वत्वबोधने भोगस्यागमसापेक्षत्वात्। यथाह नारदः। "आगमेन विशुद्धेन भोगोयाति प्रमाणताम्। अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छतीति"। न च भोगमात्रात्स्वत्वावगमः परकीयस्याप्युपहारादिनोपभोगसम्भवात्। अतएव "भोगं तु केवलं यस्तु कीर्त्तयेद्वागमं क्वचित्। भोगच्छलापदेशेन विद्धेयः स तु तस्करः" इति स्मर्य्यते। अतश्च सागमोदीर्घकालो निरन्तरो निराक्रोशः प्रत्यर्थिप्रत्यक्षश्चेति पञ्चविशेषणयुक्तो भोगः प्रमाणमित्युक्तम्भवति। तथा च स्मर्य्यते। 'सागमो दीर्घकालश्चाविच्छिन्नोऽन्यैरवोज्झितः। प्रत्यर्थिसन्निधानश्च परिभोगोऽपि पञ्चधेति"। क्वचिद्वागमनिरपेक्षस्यापि भोगस्य प्रामाण्यमित्याह। विना पूर्व्वक्रमागतादिति।

पूर्व्वैर्यां पित्रादीनां त्रयाणां क्रमः पूर्वक्रमस्तेनागतो यो भोगस्तस्माद्विना आगमोऽभ्यधिक इति सम्बन्धः। स पुनरागमाद्भ्यधिकः आगमनिरपेक्षः प्रमाणमित्यर्थः तत्राप्यागमज्ञाननिरपेक्षो न सत्त्वनिरपेक्षः सत्ता तु तेनैवावगम्यत इति बोद्धव्यम्। विना पूर्व्वक्रमागतादित्येतच्च स्मार्त्तकालप्रदर्शनार्थम्। "आगमोऽभ्यधिको भोगादिति" च स्मार्त्तकालविषयम्। अतश्च स्मरणयोग्ये काले योग्यानुपलब्ध्यागमाभावनिश्चयसम्भवादागमज्ञानसापेक्षस्यैव भोगस्य प्रामाण्यम्। स्मार्त्ते तु काले योग्यानुपलब्ध्यभावेनागमाभावनिश्चयासम्भवादागमज्ञान निरपेक्ष एव सन्ततो भोगः प्रमाणम्। एतदेव स्फुटीकृतङ्कात्यायनेन। "स्मार्त्ते काले क्रिया भूमेः सागमा भुक्तिरिष्यते स्मार्त्तेत्वनुगमाभावात् क्रमात् त्रिपुरुषागता"। स्मार्त्तश्च कालो वर्षशतपर्य्यन्तः "शतायुर्वै पुरुष इति" श्रुतेः। अनुगमाभावादिति योग्यानुपलब्ध्यभावेनागमाभावनिश्चयाभावादिति। अतश्च वर्षशताधिको भोगः सन्ततोऽप्रतिरवः प्रत्यधिप्रत्यवत्तागमाभावे चानिचिते व्यभिचारादाशङ्क्यागमः स्वत्वं गमयति। स्मार्त्तेऽपि कालेऽनागमस्मृतिपरम्परायां सत्यां न भोगः प्रमाणम्। अतएव "अनागमन्तु यो भुङ्क्ते वर्षाणामधिकं शतम्। चौरदण्डेन तस्मात्तं दण्डयेत्पृथिवीपतिः" इत्युक्तम्। न चानागमन्तु यो भुङ्क्ते इत्येकवचननिर्देशाद्बहूनां वर्षशतान्यपीत्यपिशब्दप्रयोगात् प्रथमस्य पुरुषस्य निरागमे चिरकालोपभोगेऽपि दण्डविधानमिति मन्तव्यं द्वितीये तृतीये वा पुरुषे निरागमस्य भोगस्य प्रामाण्यप्रसङ्गात् नचैतदिष्यते "आदौ तु कारणज्ञानं मध्ये भुक्तिस्तु सागमेति" नारदस्मरणात्। तस्मात् सर्व्वत्र निरागमोपभोगे "अनागमन्तु योभुङ्क्ते इत्येतदुदाहृत्यम् यदपि "अन्यायेनापि यद्भुक्तं पिता पूर्व्वतरैस्त्रिभिः। न तच्छक्यमपाकर्त्तुं क्रमात्त्रिपुरुषागतमिति"। पिता सह पूर्व्वतरैस्त्रिभिरिति योज्यम्। तत्रापि क्रमात् त्रिपुरुषागतमित्यस्मार्त्तकालोपलक्षणम्। त्रिपुरुषविवक्षायामेकवर्षाभ्यन्तरेऽपि पुरुषत्रयातिक्रमसम्भवाद्द्वितीये वर्षे निरागमस्य भोगस्य प्रामाण्यप्रसङ्गः तथा सति "स्मार्त्ते काले क्रिया भूमेः सागमा भुक्तिरिष्यते" इति स्मृतिविरोधः। "अन्यायेनापि यद्भुक्तमित्येतज्ञान्यायेनापि भुक्तमपाकर्त्तुञ्च शक्यं किमुनरन्यायानिचय इति व्याख्येयमपिशब्दश्रवणात्। यज्ञोक्तम्। "यद्विनागममत्यन्तमुक्तं पूर्व्वैस्त्रिभिर्वेत्। न तच्छक्यमपाकर्त्तुं क्रमात् त्रिपुरुषागतमिति" तत्राप्यत्यन्तमागमं विनेत्यत्यन्तमुपलभ्यमानमागमं विनेति व्याख्येयम्। न पुनरागमस्वरूपं विनेति आगमस्वरूपाभावे भोगसत्तेनापि न स्वत्वं भवतीत्युक्तं क्रमात्त्रिपुरुषागतमित्येतदुक्तार्थम्। ननु स्मरणयोग्ये काले भोगस्यागमसापेक्षस्य प्रामाण्यमनुपपन्नम्। तथाहि। यद्यागमः प्रमाणान्तरेणावगतस्तदा तेनैव स्वत्वावगमान्न भोगस्य स्वत्वे आगमे वा प्रामाण्यम् अथ प्रामाणान्तरेण नागमोऽवगतः, कथन्द्विशिष्टोभोगः प्रमाणम्। उच्यते। प्रामाणान्तरेणावगतागमसहित एव निरन्तरोभोगः कालान्तरे स्वत्वङ्गमयति। अवगतोऽप्यागमोभोगरहितो न कालान्तरे स्वत्वङ्गमयितुमलं मध्ये दानविक्रयादिना स्वत्वापगमसम्भवादिति सर्वमनवद्यम्। आगमसापेक्षो भोगः प्रमाणमित्युक्तम्। आगमस्तर्हि भोगनिरपेक्ष एव प्रमाणमित्यत आह। "आगमेऽपि बलं नैव भुक्तिस्तोकापि यत्र नो" या० यस्मिन्नागमे स्वल्पापि भुक्तिर्नोनास्ति तस्मिन्नागमे बलं सम्पूर्णं नैवास्ति। अयमभिसन्धिः स्वत्वनिवृत्तिपरस्वत्वापादनञ्च दानम्। परस्वत्वापादानं च परो यदि स्वीकरोति तदा सम्पद्यते नान्यथा। स्वीकारस्त्रिविधोमानसो वाचिकः कायिकश्चेति। तत्र मानसोममेदमिति संकल्परूपः। वाचिकस्तु ममेदमित्याद्यभिव्यवहारोल्लेखी स विकल्पकः प्रत्ययः। कायिकः पुनरुपादानाभिमर्शनादिरूपोऽनेकविधः तत्र च नियमः स्मर्य्यते "दद्यात्कृष्णाजिनम्पुच्छे गां पुच्छे करिणङ्करे। केशरेषु तथैवाश्वान्दासीं शिरसि दापयेदिति"। आश्वलायनोऽप्याह। "अनुमन्त्रयेत् पाणिनाभिसृजेत् प्राणिनं कन्यां चेति"। तत्र स्थिरस्थावरस्यादावुदकदानान्नभेदोपादानादिसम्भवात् त्रिविधोऽपि स्वीकारः सम्पद्यते। क्षेत्रादौ पुनः फलोपभोगव्यतिरेकेण कायिकस्वीकारासम्भवात् स्वल्पेनाप्युपभोगेन भवितव्यम्। अन्यथा दानक्रयादेः सम्पूर्णता न भवतीति फलोपभोगलक्षणकायिकस्वीकारविकलत्वागमो दुर्बलो भवति तत्सहितादागमात्। एतच्च द्वयोः पूर्व्वापरकालापरिज्ञाने। पूर्वापरकालज्ञाने तु विद्यमानोऽपि पूर्व्वकालागम एव बलीयानिति। अथ वा "लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधं स्मृत"मित्युक्तम्। एतेषां समवायेकृत्व कस्य प्राबल्यमित्यत्र दर्शयिष्यते। "आगमोऽभ्यधिको भोगादिनापूर्व्वक्रमागतात्। आगमेऽपि बलं नैव भुक्तिः स्तोकापि यत्र नो" इति अयमर्थः। आद्ये पुरुषे साक्षिभिर्भावितत्वागमो भोगादभ्यधिकोबलवान् पूर्वक्रमागताद्भोगादिना। स पुन पूर्व्वक्रमागतो भोगस्तृतीये पुरुषे लिखितेन भावितादागमात्बलवान् मध्यमे तु भोगरहितादागमात् स्तोकभोगसहितोऽप्यागमो बलवानिति। एतदेव

नारदेन स्वयोक्तं "आदौ तु कारणन्दानं मध्ये भुक्तिस्तु सागमा। कारणं भुक्तिरेवैका सन्तता वा चिरन्तनीति" "पश्चतो न्यूनत इत्यत्र विंशतिवर्षभोगादूर्द्धं भूमेर्द्विगुणस्यापि दशवर्षभोगादूर्द्धं फलानुसरणं न भवतीत्युक्तम्। तत्र फलानुसरणवद्दण्डानुसरणमपि न भविष्यतीत्याशङ्क्य पुरुषव्यवस्थया प्रमाणव्यवस्थया च दण्डव्यवस्थां दर्शयितुमाह। "आगमस्तु कृतोवेन सोऽभियुक्तस्तदुद्धरेत्। न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी" या०। येन पुरुषेण भूम्यादेरागमःस्वीकारः कृतः। स पुरुषः कृतस्ते चेत्यादिकमित्यभियुक्तस्तमागमं प्रतिपन्नादिकं लिखितादिभिरुद्धरेत् भावयेत्। अनेनचाद्यपुरुषस्यागमस्तदुद्धरतोदण्ड इत्युक्तं भवति ततस्सुतो द्वितीयोऽभियुक्तोनागमस्तदुद्धरेत्, किन्तु अविच्छिन्नाप्रतिरवसमत्तभोगम्। अनेनचागमस्तदुद्धरतो द्वितीयस्य न दण्डोऽपि तु विशिष्टभोगमतुद्धरतो दण्ड इति प्रतिपादितम्। तत्सुतस्तृतीयोनागमं नापि विशिष्टभोगस्तुद्धरेदपि तु क्रमागतभोगमात्रम्। अनेनापि तृतीयस्य क्रमायातभोगानुद्धरणे दण्डोनागमानुद्धरणे न विशिष्टभोगानुद्धरणे वेत्यभिहितम्। तत्र तयोर्द्वितीययोर्भुक्तिरेव गरीयसी। तत्रापि द्वितीये गुरुः कृतीये गरीयसीति विवेक्तव्यम्। विंशत्यागमानुद्धरणेऽर्थहानिः समानैव दण्डे तु विशेष इति तात्पर्यार्थः। उक्तञ्च। "आगमस्तु कृतोवेन स दण्डस्तमनुद्धरन्। न तत्सुतस्तत्सुतो वा भोगहानिस्तयोरपि"। अस्यार्त्तकालोपभोगस्यागमज्ञाननिरपेक्षस्य प्रामाण्यशङ्कं विना पूर्व्वक्रमागतादित्यत्र तस्यापवादमाह। "योऽभियुक्तः परेतः स्यात्तस्य रिक्थी तदुद्धरेत्। न तत्र कारणम्भुक्तिरागमेन विनाकृता" या० यदा पुनरार्त्तत्वादिरभियुक्तोऽकृतव्यवहारनिर्णय एव परेतःस्यात्परलोकगतोभवेत्तदा तस्य रिक्थी इत्यादि स्तमागमस्तदुद्धरेत्। यस्मात्तत्र तस्मिन् व्यवहारे भुक्तिरागमरहिता साक्ष्यादिभिः साधितापि न प्रमाणम्।" व्यव०त०रघुनन्दनेन तु पश्चाद्वएव शब्दात्कालतया उक्तः। यथा तद्धृतं व्यासवाक्यम् "वर्षाणि विंशतिं भुक्ता स्वामिनाऽव्याहृता मही। भुक्तिः सा पौरुषी भूमेर्द्विगुणा तु द्विपौरुषी। त्रिपौरुषी तु त्रिगुणा न तत्रान्वेष्य आगम" इति। त्रिपुरुषभोगे विशेषमाह तत्रैव व्यासः। प्रपितामहभुक्तं यत् तत्पुत्रेण विना च तत्। तौ विना यस्य पिता च तस्य भोगस्त्रिपौरुषः। पिता पितामहोवस्य जीवेच्च प्रपितामहः। तत्राणां जीवतां भोगो विंशेवत्येकपुरुषः" इति एवञ्च शतपष्टिवर्षयोः कार्त्तकालत्वं देशभेदात् व्यवस्थापनीयम्। अत्रापवादः। "भुक्तिस्त्रैपौरुषी सिध्येदपरेषां न संशयः। अनिष्टत्ते सपिण्डत्वे सङ्कल्पानां न सिध्यति। अस्वामिना च यद्भुक्तं स्वदत्तेत्यपणादिकम्। सङ्कल्पन्युसङ्कल्पस्य न तद्भोगेन क्षीयते। विवाहाग्नोत्रियैर्भुक्तं राज्ञाऽमात्यैस्तथैव च। सुदीर्घेणापि कालेन तेषां स्वत्वं न सिध्यति" इत्य०। अत्रापि विशेषमाह तत्रैव "स्त्रीधनञ्च श्रोत्रियाणां कदाचन न जीर्य्यति। अनागमं भुज्यमानमपि वर्षशतैरपि" आगम्यते तत्त्वमनेन। इतत्त्वावेदकशास्त्रे "तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम्" सा०का०। "सिद्धं सिद्धैः प्रमाणैस्तु हितं वात्र परत्र वा आगमः शास्त्रमाप्तानामाप्तास्तत्त्वार्थवेदिनः" इत्युक्तौ ७शास्त्रमाले "श्रद्धतां जायते भक्तिस्ततो गुरुमुपासते। स च विद्यागमान् वक्ति विद्यायुक्तान्वितो नृप!" देवीपु०। स च गुरुः विद्यासाधनमागमं वक्ति उपदिशतीत्यर्थः। ऋवेदे च "रज्ञोहागमलक्षसन्देहाः प्रयोजनम्" "आगमः खल्वपि ब्राह्मणेन निष्कारणो धर्मः षड्ङ्गोवेदोऽध्येयः ज्ञेयश्चेति" क०भा०। "आगमः प्रयोजकः प्रवर्त्तकः नित्यकर्मतां व्याकरणाध्ययनस्य दर्शयति प्रयोजनशब्देन फलं प्रयोजकश्चेति कैयटः। "आगमशब्देन श्रुतिरिति" उद्योतः। "बहवोऽागमैर्भिन्नाः पन्थानः सिद्धिहेतवः" रघुः। ६ मन्त्रे च "सर्ववेदः क्रियामूलं ऋषिभिर्बहुधोदितः। कालोदेशः क्रिया कर्त्ता कारणं कार्य्यमागमः। द्रव्यं फलमिदं ब्रह्मन्नवरोक्षोऽजयाहरिः" । भा०१२,११अध्या० "तत्र कालः प्रातरादिः देशः समादिः क्रियाऽनुष्टानं कर्त्ता ब्राह्मणादि, कारणं स्रुवादि कार्य्यं यागादि आगमोमन्त्रादिः द्रव्यं व्रीह्यादि फलं स्वर्गादि" इति श्रीधरः।

आ+गम–गत्यर्थत्वात् ज्ञाने भावे घञ्। १०शब्दजन्यबोधे "प्रत्यक्षमनुमानञ्च शास्त्रञ्च विविधागमम्। त्रयं सुविदितं कार्य्यं धर्म्मशुद्धिमभीप्सुना" मनुः। विविधानां धर्म्माणामागमोयस्मात्विविधागमम्। करणे घञ्। ११शब्दबोधसाधने शब्दरूपप्रमाणे च "ऐन्द्रियमनुमानञ्च प्रत्यक्षमपि चागमम्। ये तु सम्यक्परीक्षन्ते कृतस्तेषामवञ्चिता" रामा० "आगतः शिववक्त्रेभ्यो गतश्च गिरिजानने। मतश्च वासुदेवस्य तस्मादागम उच्यते" यामलोक्ते ११ तन्त्रशास्त्रे पुंन० तथा च आगतादीनामाद्यवयवयुक्तत्वात् तथात्वम्

रुद्रयामले तु मतं श्रीवासुदेवस्येति पाठः क्लीवत्वेन "आगमोक्तविधानेन कलौ देवान् यजेत् सुधीः न हि देवाः प्रसीदन्ति कलौ चान्यविधानतः। पञ्चवर्त्मैर्नवेहोक्तागमोक्तैः शृणु प्रिये !। यां ज्ञात्वा कलिकाले च सर्वाभीष्टं लभेन्नरः" तन्त्रसारे यामलम्" प्रसङ्गात् तन्त्ररूपागमस्य प्रामाण्यं तदुपासनादिषु कलौ अधिकारिविशेषस्य कर्त्तव्यता च प्रदर्श्यते। निजनिजकर्मवासनारूपपाशवद्धान् अनात्मज्ञान् जन्ममरणादिक्लेशभाजः संसारपारं गन्तुमसमर्थान् प्राणिनो विलोक्य परमेश्वरः वेदेन कर्मकाण्डोपासनाकाण्डब्रह्मकाण्डात्मकार्थान् सप्तपदिदेश। तत्र वेदानाम् उच्छिन्नप्रायतया क्रमशो रागवाहुल्येन तदुक्तधर्मेषु उच्छिन्नप्रायेषु सत्सु अनुच्छिन्नानामप्यर्थस्य दुर्बोधसामिदानीन्तनादीनां दुरधिगमतया आयासबाहुल्येन च तत्राप्रवर्त्तमानानां क्रमशोविलुप्तेषु श्रौतधर्मेषु कथङ्कारमुद्धारः स्यादित्याकलय्य कारुण्योदयेन वेदार्थप्रकाशनार्थं सुगमोपायेन जैमिनिव्यासनारदादिरूपोपाधिभिरुपहितः सन् तत्तद्ग्रन्थान् प्रणीतवान्। तत्र कर्म्मकाण्डार्थं जैमिना मन्वादिभिश्च सम्यक्तया व्याकृतः उपासनाकाण्डार्थः स्वयं शिवमूर्त्त्या तन्त्रशास्त्रं, नारदादिमूर्त्त्या च पञ्चरात्रादिकं विधाय विहृतः ब्रह्मकाण्डार्थश्च वेदव्यासमूर्त्त्येति विवेकः। ततश्च धर्मे वेदस्यैव स्वतःप्रामाण्येन वेदमूलकत्वादन्येषां प्रामाण्यं तत्र स्मृतीनामिव आगमस्यापि वेदमूलकत्वमनुमीयते। वेदएव रामतापनीवज्रसिंहतापनीयाद्यात्मके आगमोक्तोपासनादिसंवादात् तन्मूलकत्वाधिगमात् येषां च मूलानि नाधिगम्यन्ते तेषामपि प्रामाण्यं स्मृति वाक्यवत् अनुमातव्यम् भ्रमप्रमादादिशून्यत्वहेतोः स्मृतिकर्त्तुरिव आगमकर्त्तुः शिवस्य सत्त्वात् तन्त्रवाक्यस्य स्मृतिवाक्यवत् प्रामाण्यम् न च बौद्धागमादिवत् विप्रलम्भकवाक्यत्वं रागद्वेषादेस्तत्रिरस्तत्वात्। तत्र कर्मकाण्डार्थे सर्वेषामपर्युदस्तानामधिकारः सप्तधोरपि तत्त्वज्ञानपर्य्यन्तं चित्तशोधनार्थं प्रत्यवायपरिहारार्थं च कर्म्मणां कर्त्तव्यतोपदेशात् "तमेतं ब्राह्मणा विविदिषन्ति वेदानुवचनेन यज्ञेन तपसेत्यादि" श्रुतेः "आरुरुक्षोर्मुनेर्योगम् कर्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते" गीतावाक्याच्च। ततोऽन्येषामपि ईश्वरार्पणेन फलानभिसन्धानेन च कृतानां कर्म्मणां बन्धाहेतुत्वात् क्रमशोमुक्तिः फलम्। एवमुपासनाकाण्डार्थेऽपि सर्वेषामधिकारः श्रुतौ तपसेति निर्देशात् "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत स क्रतुं कुर्वीतेति" श्रुत्या सोपाधिकस्य ब्रह्मोपासनाविधानाच्च। उपासना च मानसी क्रिया ध्यानपरपर्य्याया तत्र निराकारस्य ब्रह्मणोऽसम्भवात् सोपाधिकेश्वरविषयैवोपासना कर्त्तव्या। सा च गुणोपाधिविशिष्टस्यैव तत्तदाकारोपहितस्यापि सम्भवति "चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः। उपासकानां सिद्ध्यर्थं ब्रह्मणोरूपकल्पना" इत्युक्तेः। कल्पना च न स्वेच्छया किन्तु शास्त्रादिसिद्धैव। तथा चागमपुराणादिषु यानि यानि रूपाणि वर्णितानि तद्रूपेणैव उपासना कर्त्तव्या। ब्रह्मकाण्डार्थे तु कर्मभिश्चित्तशुद्धौ साकारोपासनेन तदैकाग्र्यवतः वेदान्तोक्तसाधनचतुष्टयवत एवाधिकार इति भेदः। तत्र तान्त्रिकोपासने कर्त्तव्येऽपि "देवोभूत्वा देवं यजेत्" इत्युक्तेः भूतशुद्धादिना आत्मानं शोधयित्वा उपास्यदेवेनैकीभूतमात्मानं ध्यात्वैवोपासनं कार्य्यम् "अथ योऽन्यां देवतामुपास्ते ऽन्योऽसावन्योऽहमस्मि न स वेद यथा पशुरेव स देवानामिति" श्रुत्या भेदेनोपासनाया निन्दनात् तान्त्रिकोपासनेऽपि कर्त्तव्ये वैदिककर्म्मसु सावित्रजातरूपो पनयनसंस्कारस्येव तन्त्रोक्तदीक्षायाएवाधिकारप्रयोजकत्वम् तत्र दीक्षायाञ्च सर्वेऽपि वर्णा अनुलोमप्रतिलोमजादाधिकारिणः "मां हि पार्थ ! व्यपाश्रित्य येऽपि स्युः पापयोनयः। स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिमिति" गीतायां भगवदुपासने सर्वेषामधिकारस्य प्रतिपादनात्। अत्र "पुराणादौ क्वचित् विशेषो दर्शितः यथा "यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन् विविधानि च। श्रुतिस्मृतिविरुद्धानि तेषां निष्ठा तु तामसी। करालभैरवञ्चापि यामलं वाममाश्रितम्। एवंविधानि चान्यानि मोहनार्थानि तानि तु। मया सृष्टानि चान्यानि मोहायैव भवार्णवे" इति देवीपुराणवचने वाममाश्रितमिति विशेषणात् श्रुतिस्मृतिविरुद्धवाममार्गस्यैव निन्दनात् तत्रैवाधिकारिविशेषस्यानधिकारो न तु तन्त्रोक्तेष्वपि इतरांशेषु वेदाविरुद्धेषु इति निर्णयः। वस्तुतः "सौत्रामण्यां सुरां पिबेत्" इति श्रुत्या विहितस्य सौत्रामण्यां सुरासेवनस्यैव वामदेवसामोपासकस्य "न कञ्चन परिहरेदिति" सर्व्वस्त्रीगमनस्यैव अधिकारिविशेषविषये तस्यापि प्राप्तता। अतएव मनुना "न मांसभक्षणे दोषो न मद्ये न च मैथुने। प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफलेति" सामा-

न्यतो विहितमद्यादौ न दोष इत्युक्तम्। कुलाचारशब्दे वक्ष्यमाणस्य कुलाचारधर्मस्य प्रावेण्येदानीन्तनानां दुष्करत्वेन सुतरां तत्प्रागस्य तन्त्रनिर्दिष्टाधिकारिणामिदानीमसत्त्वात् नैव कर्त्तव्यता। अथ कश्चित् प्राग्भववासनावशादधिकारी सम्पद्यते तथापि कूलचूडामणौ "यत्प्रसवं तु देवं स्यात् ब्राह्मणस्तु विशेषतः। तत्प्रार्द्धकरसं दद्यात् ताम्रे वा विल्वजेऽम्बु। देव्यास्तु दक्षिणे भागे चक्रपार्श्वे निवेदयेत्। मद्यद्रव्यं तु शूद्रस्य नान्येषान्तु कदाचन"। "वैश्यस्य माक्षिकं शुद्धं क्षत्रियस्य तु साव्यकम्। ब्राह्मणस्य गवां क्षीरं ताम्रे वा विल्वजेऽम्बु। नारिकेलोदकं कांस्ये सर्वेषां चैव शोधनम् इति" च द्विजातीनामासवदाननिषेधेन गौणकल्प एवाधिक्रियते न मुख्यकल्पे। "पीत्वा पीत्वा पुनः पीत्वा पतितोधरणीतले। उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते" इति वचनन्तु चतुर्थाश्रमविषयमिति तन्त्रसारः। "निस्त्रैगुण्यपथि विचरतां को विधिः को निषेध" इत्युक्तेश्चतुर्थाश्रमस्य विधिनिषेधातिक्रान्तत्वेऽपि परमहंसाश्रमस्यैव दोषाभाव इति युक्तमुत्पश्यामः। "वरं प्राणाः प्रयच्छन्तु ब्राह्मणोनार्पयेत् सुराम्" ब्राह्मणो मद्यदानेन ब्राह्मण्यादेव हीयते" इत्यत्सङ्गमतन्त्रम्। अतएव कालिका पु० "अवश्यं विहितं यत्र मद्यं तत्र द्विजः पुनः। नारिकेलोदकं कांस्ये ताम्रे वा विल्वजेऽम्बु" इत्यनुकल्पो गृहस्थद्विजातिमात्रे विहितः एवं मत्स्यमांसयोर्निषिद्धयोरपि वाममार्गिणां दानादिकं न श्रुतिविरुद्धं "देवान् पितॄन् समभ्यर्च्य खादन् मांसं न दोषभाक्" इति मनुना देवार्चनावशिष्टमांसभोजनस्य विधानात्। एतदपि दिव्यभावविषयमिति तन्त्रसारः "मादृक् सर्वदा वर्ज्यं मद्यं मांसं सुलोचने!। ज्ञानेन संस्कृतं तत्तु महापातककृन्नाशनमिति" कुलार्णवोक्तेः। ज्ञानेन सर्वनरेषु आत्मत्वज्ञानेनेत्यर्थः। तदपि न श्रुतिविरुद्धं विश्वनरेषु आत्मदृष्टिमतो वैश्वानरसोमोपासकस्य सर्वान्नभक्षणविधानवत् तस्यापि तादृग्ज्ञानमाहात्म्येन तत्र पापानुत्पत्तिसम्भवात् यथा वैश्वानरसोमोपासकं प्रकृत्य "न किञ्चनान्नं भवति आत्मन्य आयत्तनिन्य इति" छा० उ० सर्वान्नभोजनं विहितमेवमस्यापि ज्ञानेन पूतत्वान्न तद्भक्षणं दोषावहमिति। "श्रुते स्मृतितोमार्गस्त्रेतायां श्रुतिनोदितः। द्वापरे तु पुराणोक्तः कलावागमसम्मतः" इत्यागमवचनं तु प्रशंसापरम् रागादिबाहुल्येन श्रौतादिधर्मस्य कलावसम्भवइति तादृशानां तन्त्राधिकारित्वसूचनार्थञ्च "चकार मोहशास्त्राणि केशवः सगिवस्तथा। कापिलं नाकुलं वामं भैरवं पूर्वपश्चिमम्। पाञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः, कर्म्म पु० "शृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमम्। येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि। प्रथमं हि मयैवोक्तं शैवं पाशुपतादिकम्" पद्मपु० इत्यादिवचनैरागमस्य तामसत्वेन मोहशास्त्रत्वेन निषिद्धत्वेऽपि वेदाविरुद्धांशस्य ग्राह्यत्वात्। "तथापि योऽशोभार्गाणां वेदेन न विरुध्यते। सोऽंशः प्रमाणमित्युक्तः केषाञ्चिदधिकारिणाम्" स्मृतिसंहितावचनात् अत्र केषाञ्चिदित्युक्तेः न सर्वेषामधिकारितेति सूचितम् तदधिकारिणः शास्त्रेषु० दर्शिताः। "श्रुतिभ्रष्टः स्मृतिप्रोक्तप्रायश्चित्तपराङ्मुखः। क्रमेण श्रौतसिद्ध्यर्थं ब्राह्मणस्तन्त्रमाश्रयेत्" "पाञ्चरात्रं भागवतं तन्त्रं वैखानसाभिधम्। वेदभ्रष्टान् समुद्दिश्य कमलापतिरूचवान्" इति च। ततश्च इदानीन्तनानां विशेषतो गौड़देशवासिनां श्रौतधर्म्मानभिज्ञोद्वादिधर्म्मोच्छेददर्शनेन तत्पापनाशाय प्रायश्चित्तपराङ्मुखतादर्शनेन च श्रौतमार्गभ्रष्टतया क्रमेण श्रौताधिकारस्य प्राप्त्यर्थं तन्त्रोक्तोपासनादिषु वेदाविरुद्धेषु अधिकारः। वेदविरुद्धेषु वाममार्गेषु तु चतुर्थाश्रमस्य तन्त्रोक्ताङ्गताश्रमस्यैवाधिकारः न गृहस्थद्विजानाम् प्रागुक्तैः वचनजातैः ब्राह्मणादिषु सुरामद्यादानसेवनयोर्निषेधात् गृहस्थशूद्रस्य तु सुरेऽप्यधिकारः द्विजानामनुकल्पाचरणेन तन्मार्गाश्रयेऽप्यधिकार इतिविवेकः। तच्चरणन्तु "दृष्टिश्च प्रलयश्चैव देवानां च तथार्च्चनम्। साधनञ्चैव सर्व्वेषां पुरश्चरणमेव च। षट्कर्म्मसाधनञ्चैव ध्यानयोगश्चतुर्विधः सप्तभिर्लक्षणैर्युक्तं त्रागमं तद्विदोविदुः" इति आगमभेदाश्च तन्त्रशब्दे वक्ष्यन्ते। अतएव कलिधर्म्मप्रकरणे" एवं क्रियायोगपरैः पुमान् वैदिकतान्त्रिकैः। अर्च्चन्नुभयतः सिद्धिम् मत्तोविन्दत्यभीप्सितम्" भाग० १२स्कन्धे२७अध्याये तान्त्रिकपदेनार्च्चनं विहितम्। "अथ स्तुतिनः पूजां वक्ष्याम्यागमनोदिताम्" या० रा०। आगच्छति प्रकृतिप्रत्ययावनुपहृत्य उत्पद्यते कर्त्तरि संज्ञायां च। १२व्याकरणोक्ते प्रकृतिप्रत्ययानुपघातके अट् इट् इत्यादौ शब्दभेदे "आगमादेशयोर्मध्ये बलीयानागमोविधिः" व्याकरणान्तरपरि० "यदागमास्तद्गुणीभूतास्तद्रूपहरणेन रूपहृन्ने"। "आगमशास्त्रमनित्यम्" इति च परिभा०। "आगमा आप्तोपदेशाः" "आगमा अविद्यमानवद्भवन्तीति" च का० वा०

आगमन न० आ+गम–भावे ल्युट्। १ किञ्चिद्देशावधिकविभानजनकक्रियायामागतौ। "संवत्सरे व्यतीते तु पुनरागमनाय च" दुर्गाविसर्जनमन्त्रः। २ प्राप्तौ "एतत्ते सर्व्वमाख्यातं वैरस्यागमनं महत्" रामा०। ३उत्पत्तौ च "आगमापायिनोऽनित्याः" गीता। [आगमयुक्ते

आगमवत् त्रि० आगमः अस्त्यर्थे मतुप् मस्य वः स्त्रियां ङीप्।

आगमशुद्ध त्रि० आगमेन तज्ज्ञानेन शुद्धः। शास्त्रालोचनाजनितपरिणतज्ञाने "प्रतीप इत्यागमशुद्धमेवी" रघुः।

आगमवेत्तृ त्रि० आगमं वेत्ति विद्–तृच् ६त० स्त्रियां ङीप्। आगमाभिज्ञे।

आगमवेदिन् त्रि० आगमं वेत्ति विद्–णिनि ६त०। १ आगमवेत्तरि २ शङ्कराचार्य्यपरमगुरौ गौड़पादाचार्य्ये पु०।

आगमापायिन् त्रि० आगमश्च अपायश्च तौ विद्येते अस्य इनि स्त्रियां ङीप्। उत्पत्तिविनाशशीले "आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत!" गीता।

आगमावर्त्ता स्त्री आगममात्रेण प्राप्तिमात्रेण आवर्त्तते कण्डूयनमस्याः आ+वृत–अपादाने घञ्। वृश्चिकाख्यां (बिछाति) क्षुपभेदे।

आगमिक त्रि० आगमादागतः ठञ्। आगमप्राप्ते।

आगमित त्रि० आ+गम–स्वार्थे–णिच्–क्त। अधीते ज्ञाते २पठिते। प्रेरणे णिच् क्त। प्रापिते ३प्रापिते च।

आग(गा)मिन् त्रि० आ+गम–भविष्यति णिनि गम्यादीनामुपसंख्यानमित्युक्तेः वा ह्रस्वः। भविष्यदागमने "यामगमी" सि०कौ०। "यद्वागामिक्रियासुखकालस्याभेदरान्वयात्" काव्या०सू०। "आगामिवर्त्तमानाभ्यामुकायां निनि पञ्चिणी" अमरः स्त्रियां ङीप्। "आगामिनीं जगृहिरे जनतास्तरूणाम्" माघः।

आगर पु० आगोर्य्यते उद्गमितुमारभ्यते चन्द्रमा अत्र आ+गृ–आधारे अप्। अमावास्यायां तत्र शेषयामे भक्षिता हि चन्द्रकलाः देवैः उद्गमितुमारभ्यते इति तस्यास्तथात्वम्। "चर्ब्बणटमांशे च क्षीणो भवति चन्द्रमाः। अमावास्याष्टमांशे चतत: किल भवेदणुः" इत्युक्तेस्तथात्वम्।

आगवीन त्रि० गोः प्रत्यवसानपर्य्यन्तं कर्म्म करोति मय्यादायामव्ययीभा० आयु+कर्म्मकारकार्थे ख। गोः प्रत्यवसानपर्य्यन्तकर्म्मकरे गोपालकभेदे। गोपालकश्च द्विविधः दिवामात्रं गोःप्रचारणे नियुक्तः। दिवारात्रं योगक्षेमे नियुक्तश्च। "दिवैकव्यता पाले रात्रौ स्वामिनि तद्गृहे। योगक्षेमेऽन्यथा चेत्तु पालोवक्तव्यतामियात्" मनुना दिवारात्रभेदेन पालकद्वयविषये दोषभेदविधानात् तथा विभागः। तत्र दिवापालकविषये यात्त०। "यथार्पितान् पशून् गोपः सायं प्रत्यर्पयेत्तथा। प्रमादस्खलनञ्चात्र प्रदाप्यः कृतवेतन" इति।

आगस् न० "इण आग अपराधे" उणा० इण्–असुन् आगादेशः। १अपराधे "अदोषे हृदये नूनं सखि! नागो न विद्यते। वदन्तो सर्पसर्पेति किं नालिङ्गसि मामिति" उज्ज्वलदत्तोक्तेः। "सहिष्ये शतमागांसि खलोक्त इति यत्त्वया" माघः। "अभ्यस्यमागस्कृतमस्मृशद्भिः" रघुः। "दासे कृतागसि भवत्युचितः प्रहारः" सा०द० अपराधश्च स्वकर्त्तव्यकर्म्मणः स्खलनम्। अपराधशब्दे २२२पृ० विवृतिः आगस्कर्त्ता आगस्कारी। २पापे ३दण्डे च।

आगस्ती स्त्री अगस्त्येयम् अण् स्त्रियां ङीप् यलोपः। दक्षिणस्यां दिशि। [अगस्त्यहितकारके।

आगस्तीय त्रि० अगस्त्याय हितम् छ अण् यलोपः।

आगस्त्य त्रि० अगस्त्यस्येदम् यञ् यलोपः। अगस्त्यसम्बन्धिनि दक्षिणदिग्भागे "कौबेरदिग्भागमपास्य मार्गमागस्त्यसुप्तांशुरिरावतीर्ण्णः" माघः "अगस्त्यस्य स्थितिस्थानसूक्तम्" सू०सि० "अशीतिभागैर्य्याम्यायामगस्त्योमिथुनान्तगः"। स्वकीयक्रान्तिविभागस्थानात् दक्षिणस्थाशीत्यंशैस्तारात्मकः अगस्त्यः मिथुनान्तगः ककर्दिभागे स्थितः" रङ्गनाथः। एवञ्च तस्य दक्षिणदिग्भागगतत्वेन तद्भागस्थागस्त्यसम्बन्धित्वम् अगस्तेरपत्यं गर्गा० यञ्। २अगस्तेरपत्ये पुंस्त्री० अगस्त्य+कखादि० अण्। ३तद्गोत्रापत्ये पुंस्त्री उभयत्र स्त्रियां ङीप् यलोपः।

आगाध त्रि० अगाध एव स्वार्थे अण्। १अतलस्पर्शे २दुरधिगमे च। [न्तकशब्दार्थे च।

आगान्तु पु० आ+गम–तुन् नि०इडिः। १अतिथौ २आगन्तुकशब्दार्थे च।

आगामक त्रि० आगमयति भविष्यद्वस्तु बोधयति आ+गम–णिच्–ण्वुल्। भविष्यद्बोधके। "मतिरागामिका श्रेया बुद्धिस्तत्कालदर्शिनी"। [कालज्ञातरि च।

आगामिन् त्रि० आगमिवत्। १आगन्तुके २भविष्यत्।

आगामुक त्रि० आ+गम–उकञ्। आगमनशीले। "सुग्रीवस्त्वार्जितं मित्रं सर्व्वागामुकान् द्रुतम्" भट्टिः।

आगार न० अग–कुटिलायां गतौ घञ् आगच्छति कर–अण् उप०स०। गृहे भवने।

आगारगोधिका स्त्री ७त०। गृहगोधिकायाम्(टिकटिकि)।

आगारधूम पु०आगारं गृहं धूमयति धूमान्वितं करोति

धूम+णिच्-अण्। (भुव) ३तद्भवधूमे। ७तत्०तद्भवत्तिधूमे च

आगुर् स्त्री० आ+गुर्-किप्। प्रतिज्ञायाम् "अस्य यज्ञस्यागुर उदृचमशीय" श्रुतिः। [शमशत।

आगुरण न० आ+गुर-ल्युट्। उद्यमे पृ० दी०। आगुर-

आगू स्त्री० आ+गम-किप् "ऊ च गमादीनाम् सम्प्रसारणे ऊकारादेशः प्रतिज्ञायाम्। वधूवद्रूपम्।

आगूर्ण त्रि०आ+गुर-क्त। १उद्यते। भावे क्त २उद्यमे न०।

आगूर्त्त त्रि०आ+गुर-क्त "नसत्तेत्यादिना" पा०नि० वेदे नत्वाभावः १उद्यते। भावे क्त। २उद्यमे न०।

आगूर्त्तिन् त्रि०आगूर्त्तमनेन इष्टा०इनि। कृतोद्यमे "आगूर्त्तो वा एष भवति यो दर्शपौर्णमासाभ्यां यजते" श्रुतिः।

आग्नापौष्ण त्रि० अग्निश्च पूषा च द्व०आनङ् अग्नापूषाणौ तौ देवते अस्य अण् द्विपदवृद्धिः वा०नेत्। अग्नापूषदेवताके हविरादौ। "आग्नापौष्णः ऐन्द्रापौष्णः" कात्या०१५,२।

आग्नावैष्णव त्रि० अग्निश्च विष्णुश्च द्व०आनङ् अग्नाविष्णू तौ देवते अस्य अण् द्विपदवृद्धिः "वृद्धौ" पा०इत्येव प्राप्ते "विष्णौ न" वार्त्ति०नेत्त्वम्। अग्नाविष्णुदेवताके हविरादौ। "अथ खोभूते आग्नावैष्णवमेकादशकपालं पुरोडाशं निर्वपति" "तत्कादाग्नावैष्णव एकादशकपालः पुरोडाशो भवति" इति च शत०ब्रा०। "आग्नावैष्णव ऐन्द्रावैष्णवः" कात्या० १५,२ अग्नाविष्णुशब्दौ विद्येते यत्र विग्रहे० अण्। अग्नावैष्णवशब्दयुक्ते २अध्याये ३अनुवाके च।

आग्निक त्रि०अग्नेरिदं वा०ठक्। अग्निसम्बन्धिनि। "प्रकृतान्यौदुम्बराणि हुत्वा सप्ताग्निकान्याकूतिमिति" कात्या० १६,५। "द्वित्र स्थाल्याः स्रुवेणेत्येतदग्नाग्निके भवति" कर्कष्टता श्रुतिः। [दत्तसन्निकृष्टदेशादौ।

आग्निदात्तेय त्रि० अग्निदत्त+चतुरर्थ्यां सख्या०ढक्। अग्नि-

आग्निपद त्रि० अग्निपदे दीयते कार्य्यं वा व्युत्पा० अण्। अग्निस्थाने १दीयमाने २कार्य्ये वा पदार्थे।

आग्निमारुत त्रि० अग्निश्च मरुतश्च द्व० आनङ् अग्नामरुतौ तौ देवते अस्य अण् द्विपदवृद्धिः "वृद्धौ" पा०इत्। अग्नामरुतदेवताके १शस्त्रे स्तोत्रभेदे २हविरादौ च।

आग्निवारुण त्रि० अग्निश्च वरुणश्च द्व० इत् अग्नीवरुणौ तौ देवते अस्य अण् द्विपदवृद्धिः "वृद्धौ" पा०इत्। अग्नीवरुणदेवताके हविरादौ।

आग्निवेश्य पुंस्त्री० अग्निवेश्यस्य ऋषेरपत्यम् गर्गा० यञ्। तदृषेरपत्ये "पुरोहितञ्च कौरव्य! वेदवेदाङ्गपारगम्। आग्निवेश्यञ्च राजानम्" भा०आश्व०प०६४अ० स्त्रियां ङीप् यस्येति लोपः। आग्निवेशी तद्गोत्रजस्त्रियाम्।

आग्निशर्म्मि पुंस्त्री० अग्निशर्म्मणोऽपत्यं वाक्षा० इञ्। तदपत्ये ततः गोत्रे फक्। आग्निशर्म्मायणः तद्गोत्रजे पुंस्त्री०आग्निशर्म्मौभरः गर्गा०ञ्य। अग्निशर्म्मीयः तद्वेत्ति त्रि०

आग्निष्टोमिक पु० अग्निष्टोमं क्रतुं वेत्ति तत्प्रतिपादकमन्त्रमधीते वा ठक्। १अग्निष्टोमयज्ञाभिज्ञे २तत्प्रतिपादकमन्त्रपाठके च। अग्निष्टोमग्रन्थस्य व्याख्यानः ग्रन्थः ठञ्। अग्निष्टोमयज्ञव्याख्याने ३ग्रन्थे ४विहितौ स्त्री ङीप्। [अग्निष्टोमदक्षिणायाम्।

आग्निष्टोमिकी स्त्री० अग्निष्टोमस्य दक्षिणा ठञ् ङीप्।

आग्नीध्र न० अग्निमिन्धे अग्नीत् तस्य शरणम् "अग्नीधः शरणे रण् भञ्च" वार्त्ति० रण् भत्वाच्च जश्। अग्नीधो-यजमानस्य स्थाने उपचारात् २साग्निके द्विजे सि०कौ०। अग्निं धारयति धृ-मूल०क पूर्व्वपददीर्घश्च स्वार्थे अण् इति वा। साग्निके यजमाने द्विजे। "प्रति वीक्षि प्रस्थितं सौम्य मधु पिबाग्नीध्रात्" ऋ० २,३६,१। अग्नीध्र+स्वार्थे अण्। २अग्नीध्रस्थाने स्त्रियां ङीप् अग्निध्रो तदाधारभूमौ स्त्री। स्वार्थे गर्गा०ञ्य आग्नीध्रीयः। अग्निस्थाने "गार्हपत्याद्वा आग्नीध्रीयमागच्छति" श्रुतिः आग्नीध्रस्येदम् वृद्धात् ञः। आग्नीध्रसम्बन्धिनि त्रि०। "आग्नीध्रीयं प्रथमं चिनोति" श्रुतिः।

आग्नीध्रा स्त्री अग्नीध्रस्थानमर्हति यत्। अग्निस्थानार्हशालायाम्।

आग्नेन्द्र त्रि० अग्निश्च इन्द्रश्च द्व०आनङ् तौ देवते अस्य अण् "नेन्द्रस्य परस्य" इति पा० नोत्तरपदवृद्धिः वृद्ध्यभावात् नेत्। अग्नेन्द्रदेवताके हविरादौ स्त्रियां ङीप्। "या वा आग्नेन्द्रैन्द्राग्नी सा" श्रुतिः।

आग्नेय त्रि०अग्नेरिदम् अग्निर्देवता वास्य ढक्। अग्निदेवताके १हविरादौ "आग्नेयः पुरोडाशो भवति" शत०ब्रा० २अग्निसम्बन्धिनि च २क्लीबे कानच्लोपे न० तस्य अग्निदेवताकत्वात्तथात्वम् "आग्नेयाप्पतिदैवतेति" ज्योति०। अग्निना प्रोक्तं पुराणं ढक्। "आग्नेयं वेदसम्मितम्" इत्युक्ते अग्निप्रोक्ते महापुराणभेदे अग्निपुराणशब्दे विद्वतिः ४प्रतिपदि तिथौ स्त्री तस्याः तद्देवताकत्वमुक्तं यथा "अग्निः प्रजापतिः गौरी गणेशोऽहिर्गुहोरविः। शिवोदुर्गायमोविश्वोहरिः कामोहरः शशी। पितरः प्रतिपदादीनां तिथीनामधिपाः क्रमात्"। "५स्वर्गे तस्य तद्वीर्य्यजातत्वात् तथात्वम्। अग्निरेतःशब्दे विद्वतिः।

दे कार्त्तिकेये पु० तस्य तद्बीजजातत्वात् तथात्वम् अग्निकुमारशब्दे विवृतिः। ७ रुधिरे न० जठरानल-जायमानत्वात् देहस्थपित्तरूपाग्नेर्विकारत्वात् वाऽस्य तथात्वम्। अग्नये हितम् ढक्। जठरानलादिहिताकरे वैद्यकोक्ते ८ द्रव्यभेदे त्रि० ९ बाह्याग्निवर्द्धके जतुप्रभृतौ च। १० अग्निपर्व्वते ११ देशभेदे च पु० तस्य देशस्याग्न्यधिष्ठितत्वात् तथात्वम् स च देशः। दक्षिणा-पथवर्त्तिनटकिष्किन्ध्यादेशसमीपस्थः माहेश्मतीपुरीयुक्तः तत्र हि वह्निः नीलराजकन्यासौन्दर्य्येण मोहितःताङ्कमेऽथ ताङ्कोढा तत्साहाय्यार्थं तत्रैव पुर्य्यां स्वयं स्थितः यथोक्तम् "भा० स० प०"तत्र माहिष्मतीवासी भगवान् हव्यवाहनः। श्रूयते हि स्टहीतो वै पुरस्तात् पारदारिक। नीलस्य राज्ञो दुहिता बभूवातीव शोभना। साग्निहोत्रसपातिव्रद्योधनाय पितुः सदा। व्यजनैर्धूयमानोऽपि तावत् प्रज्वलते न सः। यावद्वारुपुटौष्ठेन वायुना न विधूयते। ततः स भगवानग्निश्चकमे तां सुदर्शनाम्। नीलस्य राज्ञः सर्व्वैवासुपनीतश्च सोऽभवत्। ततो ब्राह्मणरूपेण रममाणो यदृच्छया। चकमे तां वरारोहां कन्यासप्तललोचनाम् तन्तु राजा यथाशास्त्रमग्निवह्नाम्निकस्तदा। प्रज्वाल ततः कोपाद्भगवान् हव्यवाहनः। तं दृष्ट्वा विस्मितो राजा जगाम शिरसावनिम्। ततः कालेन तां कन्यां तथैव हि तदा नृपः। प्रददौ विप्ररूपाय वह्नये शिरसा नतः। प्रतिगृह्य च तां सुभ्रूं नीलराज्ञः सुतां तदा। चक्रे प्रसादं भगवांस्तस्य राज्ञो विभावसुः। वरेण च्छन्दयामास तं नृपं स्विष्टिकृत्तमः। अभयञ्च स जग्राह स्वसैन्ये वै महीपतिः। ततः प्रभृति ये केचिद्राजानात्तां पुरीं नृपाः। जिगीषन्ति बलाद्राजंस्ते दह्यन्ते स वह्निना। तस्यां पुर्य्यां तदा चैव माहिष्मत्यां कुरूद्वह!। बभूवुरनतिक्रान्ता योषितस्तस्य कन्यतः किल। एवमग्निर्व्वरं प्रादात् स्त्रीणामप्रतिवारणे। स्वैरिण्यस्तत्र नार्य्यो हि यथेष्टं विचरन्त्युत। वर्ज्जयन्ति च राजानस्तत्पुरं भरतर्षभ। भयादग्नेर्म्महाराज! ततः प्रभृति सर्व्वदा। सहदेवस्तु धर्म्मात्मा सैन्यं दृष्ट्वा भयार्दितम्। परीतमग्निना राजन्नाकम्पत यथाऽचलः। उपस्पृश्य शुचिर्भूत्वा सोऽब्रवीत् पावकं ततः। सहदेव उवाच। त्वदर्थोऽयं समारम्भः कृष्णवर्त्मन्नमोऽस्तु ते। सुखं त्वमसि देवानां यज्ञस्त्वमसि पावक!। पावनात् पावकश्चासि वहनाद्धव्यवाहनः। वेदास्त्वदर्थं जाता वै जातवेदास्ततो ह्यसि। चित्रभानुः सुरेशश्च अनलस्त्वं विभावसो!। स्वर्गद्वारञ्च यज्ञासि शुक्रोगो ज्वलनः शिखी। वैश्वानरस्त्वं विभ्रेयः प्रवहो भूरितेजसः। कुमारस्त्वं भगवान् रुद्रगर्भो हिरण्यकृत्। अग्निर्ददातु मे तेजो वायुः प्राणं ददातु मे। पृथिवी बलमादध्याच्छिवञ्चापो दिशन्तु मे। अपां गर्भ! महाशक्त्य! जातवेदः! सुरेश्वर!। देवानां मुखमग्ने! त्वं सत्येन विमुनीहि माम्। ऋषिभिर्ब्राह्मणैश्चैव दैवतैरसुरैरपि। नित्यं सुहुतयज्ञेषु सत्येन विमुनीहि माम्। धूमकेतुः शिखी च त्वं पापहानिलसम्भवः। सर्व्वप्राणिषु नित्यस्थः सत्येन विमुनीहि माम्। एवं स्तुतोऽसि भगवन् प्रीतेन शुचिना मया। तुष्टिं पुष्टिं स्मृतिञ्चैव प्रीतिञ्चाग्ने! प्रयच्छ मे। वैशम्पायन उवाच। इत्येवं मन्त्रमाग्नेयं पठन् यो जुहुयाद्घृतम्। ऋद्धिमान् सततं दान्तः सर्व्वपापैः प्रमुच्यते। सहदेव उवाच। यत्तविघ्नमिमं कर्त्तुं नार्हस्त्वं हव्यवाहन!। एवमुक्ता तु माद्रेयः कुशैरास्तीर्य्य मेदिनीम्। विधिवत् पुरुषव्याघ्रः पावकं प्रत्युपाविशत्। प्रमुखे तस्य सैन्यस्य भियोद्विग्नस्य भारत। न चैनमत्यगाद्वह्निर्वेलामिव महोदधिः। ततश्चैत्य शनैर्वह्निरुवाच कुरुनन्दनम्। सहदेवं नृणां देवं सान्त्वपूर्वमिदं वचः। उत्तिष्ठोत्तिष्ठ कौरव्य! जिज्ञासेयं मया कृता। वेद्मि सर्व्वमभिप्रायं तव धर्म्मसुतस्य च। मया तु रक्षितव्येयं पुरी भरतसत्तम। यावद्वारुपुटौष्ठेन नीलस्य कुले वंशधराः नृपः" १२ अग्न्युपासने मन्त्रे १३ अग्निसम्बन्धिधारणाभेदे स्त्री "आग्नेय्या धारणया देहं दग्ध्वेति भूतशुद्धिः। "देहं धारणयाग्नेय्या दग्ध्वा धामाविशत् स्वकम्" भाग० १४ दक्षिणपूर्व्वायां दिशि स्त्री। अग्नेर्भक्तः ढक्। १५ अग्निभक्ते आग्नेयो वै ब्राह्मणो देवतया" श्रुतिः अग्नेरपत्यम् अग्नेरागतम् अग्नौ भवः अग्निनादृष्टं साम्नेति वा ढक्। १६ अग्नेरपत्ये १७ अग्नितआगते १८ त्रि० अग्निना दृष्टे सप्तमि न० "मन्त्रं भौमं तथा तत्राग्नेयं वारुणं दिव्यमेव च। वारुणं मानसञ्चैव सप्त स्नानानि चक्षते" इति विभज्य "आग्नेयं भस्मना स्नानमिति" पराशरोक्ते भस्ममर्दनपूर्व्वके १९ स्नाने न०। "प्रतापयुक्तस्तेजस्वी नित्यं स्यात् पापकर्मसु दुष्टसामन्तहिंसस्य तदाग्नेयं व्रतं स्मृतमिति" मनुक्ते २० नृपतिचरितभेदे न० अग्नौ अग्न्युद्दीपने साधु ढक्। २१ अग्न्युद्दीपनसाधने जतुहतादौ त्रि० "जिघ्राणोऽस्य वसागन्धं सर्पिर्जतुविमिश्रितम्। हुतं हि व्यक्तमाग्नेयमिदं वेद्मि परन्तप!" "यदीदं स्टहमाग्नेयं विहितं मन्यते भवान्"

इति च भा० आ० प० १४४ अध्या० । २२ अग्न्युद्दीपन साधने हते २२अस्त्रविशेषे च न० । तत आगतः ठक् । अग्निप्रकृतिके २४कीटभेदे ते च चतुर्विंशतिविधाः यथाह सुश्रुतः । "कौण्डिल्यकः करभको वरटी पत्रदृष्टिकः । विनायिका ब्रह्मणिका विन्दलोभ्रमरस्तथा । वाह्यकी पिच्छिटः कुम्भो वर्चःकीटोऽरिसेदकः । पद्मकीटो दुन्दुभिच मकरः शतपादकः । पद्मालकः पाकमत्स्यः क्षुण्णतुण्डोऽथ गर्दभी । क्षीतः क्षमिसरारीच यवाग्वुत्क्लेदकः क्षतः । एते ह्यग्निप्रकृतयश्चतुर्विंशतिरेव च । तैर्भवन्तीह दष्टानां रोगाः पित्तनिमित्तजाः । "अग्नायी देवताऽस्य ठक् डुगन्नावः । २५ स्वाहादेवताकेस्वाहाकारे पाके । [अग्न्याधानदक्षिणायाम् ।

आग्न्याधानिकी स्त्री० अग्न्याधानस्य यत्तस्य दक्षिणा ठञ् ।

आग्रभोजनिक पु० अग्रभोजनं नियतं दीयतेऽस्मै ठञ् । नियतम् अग्रभोजनदानसम्बन्धदाने विप्रभेदे । (अग्रदानी) ।

आग्रयण त्रि० अग्रे अग्रं भोजनं यस्मादेर्येन कर्म्मणा ट्यु० ह्रस्वदीर्घः व्यत्ययः । नवान्नागमनिमित्ते साग्निककर्त्तव्ये यज्ञभेदे तत्प्रकारः आश्वलायनश्रौतसूत्रे दर्शितो यथा "आग्रयणं व्रीहियवानाम् १। यस्यं नाश्नीयादग्निहोत्रमङ्कृत्वा २ । यदा वर्षस्य ह्रस्वः स्यादाग्रयणेन यजेत ३। अपि हि देवा आङ्कसृप्तो नूनं वर्षस्याग्रयणेन हि यजत इति अग्निहोत्रीं वै नानादधित्वा तस्याः पयसा जुहुयात् ४। अपि वा क्रिया यवेषु ५। इष्टिस्तु रात्रैः ६ । सर्वेषां चैके ७। श्यामाकेष्वां सौम्यवरुः ८ । सोम ! यास्ते मयोभुवो या ते धामानि दिवि या पृथिव्यामित्यन्तरेडाया नित्यं जपस्तूष्णीं सव्ये पाणौ कृत्वेतरेणाभिघारयेत् प्रजापतये त्वा यज्ञं गृह्णामि मह्यं श्रियै मह्यं यशसे मह्यमन्नाद्यायेति । भद्रान्नः श्रेयः समनैष्ट देवास्तयावसेन समशीमहि त्वा । स नो मयोभूः पितवाविशे रुद्र शन्तमो भव द्विपदे यं चतुष्पद इति प्राश्नाचम्य नाभिमालभेतामोऽसि प्राणः तदहं त्वयीन्द्रियमासि सर्व्वायुरसि प्रविष्टः । स मे जरां रोगमपनुद्य शरीरादमा म एधि मात्मधाम इन्द्रेति १०। एतेन भक्षिणो भक्षान् सर्वत्र नवभोजने ११। अथ व्रीहियवानां धाम्ने विराजौ १२ । अग्नीन्द्राविन्द्राग्नी वा विश्वे देवाः सोमो यदि तत्र श्यामाको द्यावापृथिवी १३। आद्या ये अग्निमिन्धते सुकर्माणः सुरुचो देवयन्तो विश्वे देवास आगत ये के च जसामहि नो अहिमाया सहो द्यौः पृथिवी च नः प्रपूर्वजे पितरानव्यसीभिरिति १४ । "अग्ने अयनं भक्षणं येन कर्म्मणा तदाग्रयणम् । प्रथमद्वितीययोर्ह्रस्वदीर्घत्वव्यत्ययः । एषान्व्रयाणां द्रव्याणां संवत्सरे प्रथमनिष्पन्नानाम् आग्रयणं नाम कर्म कर्त्तव्यमित्यर्थः । व्रीहिशब्दस्य प्रथमनिपातो व्रीहीणां प्राधान्यख्यापनार्थम् । तेन कालचोदना व्रीह्याग्रयणस्यैव भवति । श्यामाकशब्दस्य मध्यनिपातो व्रीहिकालाद्-यवकालो भिन्न इति ज्ञापयति । यस्यं नवनिष्पन्नं, तन्नाश्नीयात् आग्रयणेनानिष्ट्वा । यद्याग्रयणेनानिष्टवतो नवनिष्पन्नेनाशनेन विना निर्व्वाहो न स्यात् तदा तेषां द्रव्याणां तत्कालनिष्पन्नेन सायम्प्रातरग्निहोत्रं हुत्वाऽश्नीयात् । ततः काल आगते त्वाग्रयणं कुर्य्यात् । अग्निहोत्रमहुत्वा नाश्नीयादितिवचनादाग्रयणेनानिष्ट्वाप्यग्निहोत्रं हुत्वाऽतो न दोष इति गम्यते । यस्यग्रहणं व्रीह्याद्यन्यदपि यन्निष्पन्नं तस्य सर्वस्य प्रतिषेधार्थम् २। यदा वर्षस्य ह्रस्वो भवति तदाग्रयणेन यजेत । अनेन प्रकारेण व्रीह्याग्रयणस्य शरत्काल उक्तो भवति । एतमेव कालं स्मृत्या समर्थयति ३ । अथाग्रयणेन यजेतेति इष्टिरेवाग्रयणशब्देनोक्ता, इदानीमिदमुच्यते । अग्निहोत्रहोमार्था धेनुरग्निहोत्रीत्युच्यते । तां व्रीहियवानामन्यतमम् आगत्य तस्याः पयसा सायंप्रातरग्निहोत्रं जुहुयात् । इष्टिः प्रथमकल्पः, तदसम्भवेऽयमनुकल्पः इति द्वावेवाग्रयणकल्पावत्रोच्येते ४। यदैराग्रयणस्य क्रिया भवेत् अक्रिया वेति विकल्पः ५। । त्रयाणां वर्षाणामविशेषेण कालग्रहणे प्राप्ते राज्ञो विशेष उच्यते इष्टिरेव नान्य इतिदं । सर्वेषामपि वर्षाणामिष्टिरेवेत्येके मन्यन्ते ७ । श्यामाकाग्रयणे इष्ट्वा सोमदैवत्यवरुर्भवति । कालो वर्षा ऋतुः, शास्त्रान्तरे दर्शनात् ८ । इतिकाराध्याहारेण सूत्रच्छेदः । नित्यजपशब्देनेडे भागमिति मन्त्र उच्यते । तस्य नित्यत्वे सत्यपि नित्यवचनम् एतेन भक्षिण इति विध्यतिदेशे तद्विधितस्य प्रापणार्थम् ९ । ऋतिप्राप्तस्याचमनस्य विधानं यस्मिन् देशे आचमनं कृतं तस्मिन्नेव देशे स्थितस्य च नाभ्यालम्भनसिद्ध्यर्थम् १० । एतेन विधानेन सर्वभक्षेषु सर्वे भक्षिणः सर्वान् भक्षान् भक्षयेयुः । सर्वत्रवचनं प्रकरणोत्कर्षार्थम् । नवभोजनवचनं लौकिकेऽपि नवभोजने प्रापणार्थम् । सर्वत्रवचनात् प्रकरणादुत्कृष्टमपि नवभोजनवचनाल्लौकिक एव व्यवतिष्ठते । वैदिकेऽग्निहोत्रहोमे "नवानां सवनीयानु, इत्यत्र न प्राप्नुयात्, तत्रापि प्रापणार्थं भक्षणवचनम् ११ । अथानन्तरं व्रीहीणां यवानां चाग्रयणेष्टिरु-

च्यते । तत्र व्रीह्याग्रयणस्य काल उक्तः ,वसन्तो वयाग्रयणस्य । तत्र हि तेषां प्रथमः पाक इति तत्रैव विशेषाभावात् उभयोः सङ्ग्रहवचनं तयोर्धाय्ये विराजौ च भवतः । "इतरत् पौर्णमासं तन्त्रं वैराजम्" इत्येता वतैवोक्तेऽपि तावन्मात्रविकारसिद्धौ सत्यां धाय्याविराजग्रहण विकल्पेन द्वयन्वतोरपि प्रापणार्थम्।२। आद्ययोर्विकल्पेनैता देवता सङ्ग्रन्ते । यदि श्यामाकाग्रयणमस्यामेवेष्टौ समानतन्त्रेण क्रियते तदा सोमसूतीयो भवति१३। इन्द्राग्न्योः सोमस्य चोक्ता याज्यानुवाक्याद्वत्तिः"१४। "य आहिताग्निराग्रयणेनानिष्ट्वा प्राग्नीयात्" श्रुतिः अतोऽकरणे दोषश्रवणान्नित्यत्वम् । अतएव कर्कपद्धतौ नित्यानि तु अग्निहोत्रदर्शपौर्णमासदाक्षायणाग्रयणपशुचातुर्मास्यादीनि अवश्यं कर्त्तव्यानीत्युक्तम् । २तन्निमित्तकेष्टौ नवशस्येष्टौ स्त्री गौरा० ङीप् । "इन्द्रेण सहितं यस्य हविराग्रयणं स्रुतम् । अग्निराग्रयणीनाम भानोरैवान्वयस्तु स इत्युक्ते ३सूर्य्यान्वयजे वह्निभेदे पु० । उपचारात् ४आग्रयणकाले "व्रीह्याग्रयणानन्तरं वयाग्रयणाद्वागग्रीहिभिरेव दर्शपौर्णमासौ कार्य्यौ वयाग्रयणानन्तरं प्राग्व्रीह्याग्रयणादृयर्वरेव । अथवा व्रीहिभिरेव इति"कर्कः । "शस्यान्ते नवशस्येष्ट्या तदन्ते द्विजोऽध्वरैः" मनुव्याख्यायां पूर्व्वाक्तिधान्यादिशस्ये समाप्ते ग्रदि यवानामिति स्रुतकारवचनात् असमाप्ते पूर्व्वशस्ये नवशस्योत्पत्तौ आग्रयणेन यजेतेति शस्यत्रयसानिध्यतत्वात् धनिनां बह्वहायनजीवनोचितशस्यसम्भवाच्च" कुल्लू० आग्रयणञ्च कर्म्मागुद्गकाले न कर्त्तव्यम् यदोक्तम् "वाधारामतडागकूपेत्यादिनोपक्रम्य" "गोदानाग्रयण प्रपाप्रथमकोपाकर्म्मवेदव्रत"मित्यादीन्युद्दिश्य "अवश्ययोर्वेधं परीक्षां त्यज द्वद्वत्वात्तिगुत्व द्व्यसितयोर्न्युनामासे तथा" सुद्द०चि० उक्तेः । "सोमयोगादिकर्माणि त्याज्यानि स्युर्मलिम्लुचे । तथैवाग्रयणाधानचातुर्य्यास्यादिकान्यङ्ग्रपि"स्मृ०परि०उक्तेः।"वाले वा यदि वृद्धे शुक्रे वास्तं गते गुरौ । मलमासद्वयेतानि वर्ज्जयेत्"द्वद्गर्गोक्ते ।

आग्रह पु० आ+ग्रह–अप् । १आवेशे आसक्तौ अभिनिवेशे "चलेऽपि काकस्य पदार्पणाग्रहः" नैष० । २आक्रमे ३अनुग्रहे ४ग्रहणे च ।

आग्रहायण पु०अग्रहायण्या मृगशीर्षनक्षत्रेण युक्ता पौर्णमासी आग्रहायणी अस्यत्र मासे ज्योत्स्ना० अण् । १चान्द्रमार्गशीर्षे मासि अग्रहायण्या युक्ता पौर्णमासी अण् । २चान्द्रमार्गशीर्षमासपौर्णमास्यां स्त्री । "आग्रहायण्या अर्द्धं तिष्यप्रेवाटकासु"स्मृतिः । "कार्त्तिक्या आग्रहायणी मासे" सि०कौ० । यथा च मृगशीर्षनक्षत्रसम्बन्धात् मासस्य मार्गशीर्षत्वं तथोक्तम् स्मृ०सि० "नक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्व्वान्तयोगतः" इति "पूर्णमास्यां मृगशीर्षनक्षत्रयोगात् मार्गशीर्षश्चान्द्रमासः मृगशीर्ष एव अग्रहायणीनामा पौर्णमास्यां तत्सम्बन्धयोग्यत्वमेव तदर्थः अत एव "कार्त्तिक्यादिषु संयोगे कृत्तिकादि द्वयं द्वयम् । अन्त्योपान्त्यौ पञ्चमश्च त्रिधा मासत्रयं स्मृतम्" स्मृ०सि० तेन कृत्तिकारोहिणीभ्यां कार्त्तिकी मृगार्द्राभ्यां मार्गशीर्ष इत्यादि क्रमेण नक्षत्रद्वयसम्बन्धस्तल्लोक्तः ।

आग्रहाय(ण)णिक न० आग्रहायण्यां देवस्वं वुञ् ठञ् वा । आग्रहायण्यां देवे स्वे ।

आग्रहायणिक पु० आग्रहायणी पूर्णिमाऽस्मिन्मासे ठक् । चान्द्रमार्गशीर्षे मासि । [(अग्रदानी) विप्रे ।

आग्रहारिक त्रि० अग्रहारोऽस्यभोगेनियतं दीयतेऽत्रेति ठञ् ।

आग्रायण पुंस्त्री अग्रनामकस्य ऋषेः गोत्रापत्यम् नडा० फक् । अग्रनामर्षेः गोत्रापत्ये १अग्रेऽयनं शस्यस्यास्य ज्योत्स्ना० अण् । २नवशस्येष्टौ ।

आघट्टक पु० आघट्टयति रोगान् ण्वुल् । रक्तपामार्गे राजनि० चालके त्रि० । [नयो नमस्कृतः" माघः ।

आघट्टना स्त्री आ+घट्ट–युच् । चालनायां "रणद्भिराघट्ट-

आघट्टित त्रि० आ+घट्ट–क्त । चालिते ।

आघमर्षण न० अघमर्षणे विहितम् अण् । अघानां नाशनाय विहिते स्नानभेदे अघमर्षणशब्दे तत्र दर्शितम् ।

आघर्ष पु० आ+घृष–घञ् । मर्द्दने "गण्डस्थलाघर्षगलन्मदोदक" माघः । भावे ल्युट् । आघर्षणमप्यत्र न० ।

आघाट पु० आ+हन–कर्त्तरि . संज्ञायां घञ् पृ० नि० तस्य टः । १अपामार्गे २आघातके त्रि० । "यत्राघाटाः कर्कन्धवः संवदन्ति" श्रुतिः ।

आघाटिन् त्रि० आ+हन–णिनि पृ०नि० । आघातके "आघाटिभिरिव धावयन्" ऋ०१,०,१४६,२ ।

आघात पु० आ+हन–घञ् । १वधे २आहनने ३ताडने च तीव्राघातप्रतिहतरवस्वल्पसंकुचितः" मेघ० । "अभ्यस्यन्ति तटाघातं निर्जितैरावतागजाः" कुमा० । "मूलाघातःस उच्यते" सुश्रुतः । आधारे घञ् । ४वधस्थाने । "आघातं नीयमानस्य वध्यस्येव" ।

आघातन न० आहन्यतेऽत्र आ+हन–स्वार्थे णिच्–आधारे

ल्युट्। १वधस्थाने क्षीरा० भावे ल्युट्। २हनने।

आघार पु० आ+घृ-णिच्-कर्मणि अच्। १हते। भावे अच्। आहितवह्नेः वायव्यकोणादारभ्याग्नेयं यावत् नैर्ऋतीमारभ्य ऐशानीं यावच्छावच्छिन्नधारया २हतसेचने। "तूष्णीमाघारावाघार्याज्यभागौ जुहोदग्नये स्वाहा सोमाय स्वाहा" आश्व०श्रौ०। "तूष्णीं मन्त्रवर्जम् उत्तरपश्चिमाया आरभ्य दक्षिणपूर्व्याम् प्रत्यविच्छिन्नामाज्यधारां क्षरेत् तथा दक्षिणपश्चिमामारभ्य उत्तरपूर्व्यां प्रत्यावारयेत्" तद्वृत्तिः इति ऋग्वेदिनाम्। यजुर्वेदिनान्तु मन्त्रोच्चारपूर्व्वकं तत्सेचनमिति भेदः उभयवेदिनामपि आघारकाले प्रजापतीन्द्रयोर्मनसा ध्यानम् आज्यं च स्रुवे चतुर्धारं गृह्यमिति विवेकः।

आघूर्णित त्रि० आ+घूर्ण-क्त। १चलिते, २भ्रान्ते च।

आघृणि पु० आगतो घृणिर्दीप्तिरस्य। सूर्य्ये। "एहि वां विशुचो न पादाघृणे! संसचावहै"। "रायोधारास्याघृणे वसो!" ऋ० ६,५५,१,२। आघृणे! आगतदीप्ते! हे पूषन्!" भा०।

आघोषण न० आ+घुष-ल्युट्। सर्व्वत्र प्रचारणायोच्चैः-शब्दकरणे। णिच्-युच्। आघोषणायत्र स्त्री।

आघ्राण त्रि० आ+घ्रा-क्त। १गृहीतगन्धे पुष्पादौ नासिकया यस्य गन्धज्ञानं जातं तस्मिन् २हृष्टे च भावे क्त। ३ गन्धग्रहणे ४ हर्षे च न०।

आघ्रात त्रि० आ+घ्रा-क्त वा तस्य नत्वाभावः। १गृहीतगन्धे पुष्पादौ २हृष्टे ३ अस्पृष्टे च "युष्माद्यनाघ्राततिथि-विषयम्" तिथितत्त्वं रघुनन्दनः।

आघ्रेय त्रि० आ+घ्रा-यत्। घ्राणेन ग्राह्ये "आघ्रेयः सर्व्वदेवानाम्" धूपदानमन्त्रः।

आङ् अव्य० अत-बा० डाङ् प्रयोगे तस्य ङित्त्वम्। आगन्तार्थे तच्छब्दे विहितः तत्र ईषदर्थे आताम्रः आपिङ्गलः अभिव्याप्तौ ब्रह्माण्डमाकलात्। सीमावाम् "आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्" रघुः धातुविशेषयोगेनार्थ-विशेषे आगच्छति आतिष्ठते आलम्बते "ह्लां यदारोहति दन्तवाससा" अध्यासे आदत्तिः अध्याहृत्तः। प्रत्याहृत्तौ प्रत्यागच्छति। समन्ताहृत्तौ आचितः आकीर्णः।

आङ्गायन त्रि० अङ्गुयेन निर्वृत्तादि सङ्घा० चतुरर्थ्याम् फक्। अङ्गुयनिर्वृत्तादौ। [रघुवंशे।

आङ्गुष्ठिक त्रि० अङ्गुयः प्रहरणमस्य ठक्। अङ्गुष्ठप्रह-

आङ्ग न० अङ्ग+स्वार्थे अण्। १कोमलाङ्गे अङ्गादागतः अण्। व्याकरणप्रसिद्धे २अङ्गाधिकारविहिते कार्य्ये "वर्णादङ्ग वलीयः" परिभाषा अङ्गदेशे भवः अण्। ३अङ्गदेशभवे त्रि० बहुवचने तु तस्य लुक् आङ्गाः। आङ्गानां राजा अण्। ४अङ्गदेशस्य राजनि बहुषु लुक् आङ्गाः तद्राजषु। स्त्रियां ग्राम्यत्वान्न लुक्, आङ्गी।

आङ्गिक त्रि० अङ्गेषु जनपदेषु भवः वुञ्। १अङ्गदेशभवे। अङ्गाः क्षत्रियाः तद्देशबन्धुपतयो भक्तिरस्य वुञ्। अङ्गदेश-क्षत्रिया यस्य सेव्याः तस्मिन् २बहूनामङ्गदेशक्षत्रियाणां सेवके। अङ्गा जनपदोभक्तिरस्य वुञ्। ३बहुत्वबद्धजन-पदसेवके च त्रि०।

आङ्गविद्य त्रि० अङ्गविद्यां वेद "अङ्गतत्वधर्म्मविवागादिद्या-न्नेति वक्तव्यम्" वार्त्ति० ठको निषेधात् अण्। १व्या-करणाद्यङ्गविद्यावेत्तरि। तद्व्याख्यानो ग्रन्थः ऋग-यनादि० अण्। २अङ्गविद्याव्याख्याने ग्रन्थे अङ्गविद्यायां भवः अण्। ३तद्विद्याभवे। [समूहे।

आङ्गार न० अङ्गाराणां समूहः भिक्षादि० अण्। अङ्गार-

आङ्गिक त्रि० अङ्गेन अङ्गचालनेन निर्वृत्तम् अचतुरा० ठक्। भावव्यञ्जके अङ्गनिष्पन्ने नटादीनां १भ्रूविक्षेपादौ। "भवेदभिनयोऽवस्थानुकारः स चतुर्विधः। आङ्गिको-वाचिकश्चैवमाहार्य्यः सात्विकस्तथा" सा०द०। स्त्रीणां चेष्टाविशेषे २हावादौ। "यौवने सत्वजास्तासामष्टाविंशति सङ्ख्यकाः। अलङ्कारास्तत्र हावभावहेलास्तयोऽङ्गजाः" सा०द०। हावादयश्च तत्तच्छब्दे वक्ष्यन्ते "अङ्गं स्पृदङ्गं तद्वाद्यं शिल्पमस्य ठक्। स्पृदङ्गवादनशिल्पके त्रि०।

आङ्गिरस पुंस्त्री० अङ्गिरसोऽपत्यम् अण्। १अङ्गिरस ऋषेरपत्ये "अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः" मनुः। बहुत्वेऽण्लुक्। अङ्गिरसः स्त्रियां न लुक् ङीप्। "आथर्वणीराङ्गिरसीर्देवोर्मनुष्यजाउत" अथ० ८,५,६। २वृहस्पतौ तस्य तदपत्यत्वम् भा० आ०प० ६६अ०। "अङ्गिरसस्यवः पुत्राः लोके सर्व्वत्र विश्रुताः। वृहस्पतिरुतथ्यश्च संवर्त्तश्च धृतव्रतः"। अङ्गिरसा वृष्टम् अण्। अथर्ववेदोक्ते ३सूक्तभेदे "अथर्वाङ्गिरसं नीलरुद्रं देव्यपराजिता। मधु सूक्तं रौधसञ्च शान्तिकाध्यायमेव च। अथर्वाणौ द्वारपालौ पठेतामुत्तरान्वितौ" दानपारि० पुरा०। तच्च सूक्तं अथर्वसंहितायां १८,१,५८,५९,६०, ६१ मन्त्र चतुष्कात्मकम्, "अङ्गिरसो नः पितरः" इत्यादिकम्। तच्च हवनादानादिपद्धतौ अस्माभिः १८५४० दर्शितम् अङ्गिनामङ्गानां रसः सारः स्वार्थे अण्।

ङ आत्मनि । "सोऽयास्य आङ्गिरसोऽङ्गानां हि रसः" इति ह० उ० । "आङ्गिरस आत्मा कार्य्यकरणानाम् कथमाङ्गिरसः ! । प्रसिद्धं हि यदङ्गिनामङ्गानां रसत्वं तदपायेशेषप्राप्तेरिति वक्ष्यामः यस्माच्चायमङ्गिरसत्वात् विशेषानाश्रयत्वाच्च कार्य्यकरणानां साधारण आत्मा विशुद्धश्च तस्माद् वागादीनपास्य प्राण एवात्मत्वेनाश्रयितव्य इति वाक्यार्थः" भ० भा० ।

आङ्गिरसेश्वर पु० आङ्गिरसेन प्रतिष्ठितः ईश्वर : । काशीक्षेत्रस्थे आङ्गिरसप्रतिष्ठिते शिवलिङ्गभेदे ।

आङ्गुरि(लि)क पु० अङ्गुलि (रि) य इदार्थे कन् । वा रत्वम् । अङ्गुल्याकृतौ पदार्थे ।

आङ्गूष पु० अङ्गति गच्छति देवान् अगि–ऊषच् अङ्गूषः ततः स्वार्थे अण् । स्तोत्रे । "तिरः पुरू चिदश्विना रजांस्याङ्गूषः" ऋ० ३,५८,५ । "आङ्गूषं स्तोत्रम्" भा० । "प्रमन्महे शवसानाय शूषमाङ्गूषम्" यजु० २४,१६ । "अस्मा इदुग्रमिव प्रयंसि भराम्याङ्गूषं बाधे सुदक्षि" ऋ० १,६१,२ । [भवसच्चिकटदेशादौ ।

आङ्ग्य त्रि० अङ्गे भवः आङ्गः चतुरर्थ्यां संकाशा० यत् । अङ्ग-

आचके अव्य० आ+चक ए–विभक्तिप्रतिरूपकम् । कामनायाम् निरु० । "त्वामवस्युराचके" यजु० २१,१ । आचके कामये" वे० दी० । "रक्षोतुरुद्रोवसुभिराचके"य० ४,२१ ।

आचक्षाण त्रि० आ+चक्ष–शानच् । आख्यानं कुर्व्वति ।

आचतुर अव्य० चतुःपर्य्यन्तम् अव्ययी० अच् समा० । चतुःपर्य्यन्ते "आचतुरं क्षीमे पशवोहन्यं मिथुनायन्ते" । माता पुत्रेण मिथुनं गच्छति पौत्रेण प्रपौत्रेण "तत्पुत्रादिनापीति मर्य्यादार्थः" सि० कौ० ।

आचक्षुस् त्रि० आ+चक्ष–वा० उसि । आख्यानकर्त्तरि ।

आचतुर्य न० अचतुरस्य भावः "न नञ्पूर्व्वात् इत्यादि" पा० सू० चतुरादिपर्य्युदासात् भावे ष्यञ् प्रत्ययः । अनैपुण्ये

आचम पु० आ+चम–घञ् वा हस्वः । आचमनशब्दार्थे "दध्ना सक्तु पलंकन्तु शुद्धं वारि तथाचमे" तन्त्रसा० ।

आचमन न० आ+चम–भावे ल्युट् । १जलादेः पाने स्वल्पके कर्म्माङ्गे २कर्त्तृसंस्कारके ३क्रियाभेदे च, आ० तत्त्वे "आचमने उदकपरिग्रहप्रकारपरिमाणञ्चाह भरद्वाजः । 'आयतं पर्व्वयां कृत्वा गोकर्णाकृतिमत्करम् । संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः । सङ्गाङ्गुष्ठकनिष्ठाभ्यां शेषेष्वाचमनं चरेत् । मासमज्जनमात्रास्तु हंसवद्वा त्रिः पिबेदपः' । पाणिना दक्षिणेन "त्रिःपिबेल्लिखेन्नापः"इति आदिपुराणोक्तेः । मार्कण्डेयः । "सपवित्रेण हस्तेन कुर्य्यादाचमनक्रियाम् । नोच्छिष्टं तत्पवित्रन्तु भुक्तोच्छिष्टन्तु वर्जयेत्' । मदनपारिजाते हारीतः । 'यन्मिर्यस्य पवित्रस्य न तेनाचमनञ्चरेत्' । यन्मना यन्मिरिति समुद्गरोऽपि । आचमनानुष्ठातौ देवलः । 'न गच्छन् न शयानश्च न क्रमन् न परान् स्पृशन् । न हसन् नैव संजल्पन् नात्मानञ्चैव वीक्षयन्' । क्रमन् क्रम्यमान इति रत्नाकरः । आत्मानं आत्मस्थानं हृदयं वीक्षयन् इति स्वार्थे णिच् । नेत्यनुष्ठातौ । 'केशान्नीवीमधःकायं संस्पृशन् धरणीमपि । यदि स्पृशति चैतानि भयः प्रक्षालयेत् करम्" । अधःकायं नाभेरधः प्रदेशम् । करं दक्षिणम् । आचमनानुष्ठातौ गोभिलः । 'नान्तरीयैकदेशेन कल्पयित्वोत्तरीयकम्" इति । अन्तरीयमधःपरिधानं तदेकदेशेन उत्तरीयं कृत्वा । मरीचिः । 'न बर्हिर्जानुस्थरया नासनस्थो नचोत्थितः । न पादुकास्थो नाचिरसः शुचिः प्रयतमानसः । उपस्पृश्य द्विजो नित्यं शुद्धः पूतो भवेन्नरः । भुक्त्वासनस्थोऽप्याचामेत् नान्यकाले कदाचन" । जलस्थलोभयकर्म्मानुष्ठानार्थं जलस्थलैकचरणेनाचमनं कर्त्तव्यमित्याह पैठीनसिः । 'अन्तरुदके आचान्तोऽन्तरेव पूतोबहिरुदके आचान्तो बहिरेव शुद्धो भवति तस्मादन्तरेकं बहिरेकं च पादं कृत्वा आचामेत् सर्वत्र शुद्धो भवति" इति । जानुनऊर्द्ध जलेषु तिष्ठन्नाचामेत् । 'जानोरूर्द्धं जले तिष्ठन्नाचान्तः शुचितामियात् । अधस्तात् गतकल्पोऽपि समाचान्तो न शुध्यति" इति विष्णुः । हारीतः । "आर्द्रवासा जले कुर्य्यात् तर्पणाचमनं जपम् । शुष्कवासा स्थले कुर्य्यात् तर्पणाचमनं जपम् । कात्यायनः । 'स्नानमाचमनं होमं भोजनं देवतार्च्चनम् । प्रौढ़पादो न कुर्व्वीत स्वाध्यायं पितृतर्पणम् । आसनारूढ़पादस्तु जानुनोर्ऊर्द्ध्वयोस्तथा । कृतावसक्थिको यस्तु प्रौढ़पादः स उच्यते" । आसनारूढ़पादः आसनारूढ़पादतलः । जानुनोर्ऊर्द्ध्वयोः कृतावसक्थिकः वस्त्रादिना कृतवृष्टजानुजङ्घावन्धः तद्वत्वेन भेदप्रतीतेः । अत्र च "अनेको ह्यत्र दारुशिले भूमिसमे इष्टकाश्च संकीर्णभूता" इति बोधायनवचनात् तथाविधपादोऽपि कुर्य्यात् । व्यासः । "शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा । अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत् । अपः पाणिनखाग्रेषु आचामेदयस्तु वै द्विजः । सुरापानेन तत्तुल्यमित्येवमृषिरब्रवीत् संवर्त्तेति" । मुखं संवृत्य अलोम-

ल्युट्। १वधस्थाने हारा० भावे ल्युट्। २हनने।

आघार पु० आ+घृ-घिच्-कर्मणि अच्। १हते। भावे अच्। आहितवह्नेः वायव्यकोणादारभ्याग्नेयं यावत् नैर्ऋतीमारभ्य ऐशानीं यावज्जावच्छिन्नधारया २हुतसेचने। "तूष्णीमाघारावाघार्य्यांज्यभागौ जुहोत्यग्नये स्वाहा सोमाय स्वाहा" आश्व०श्रौ०। "तूष्णीं मन्त्रवर्जम् उत्तरपश्चिमाया आरभ्य दक्षिणपूर्व्वाम् प्रत्यविच्छिन्नामाज्यधारां क्षरेत् तथा दक्षिणपश्चिमामारभ्य उत्तरपूर्व्वां प्रत्याघारयेत्" तद्वृत्तिः इति ऋग्वेदिनाम्। यजुर्वेदिनान्तु मन्त्रोच्चारपूर्व्वकंतत्प्रोक्षणमिति भेदः उभयवेदिनामपि आधारकाले प्रजापतीन्द्रयोर्मनसा ध्यानम् आज्यं च स्रुवे चतुर्व्वारं याह्यग्निमिति विवेकः।

आघूर्णित त्रि० आ+घूर्ण-क्त। १ चलिते, २भ्रान्ते च।

आघृणि पु० आगतो घृणिर्दीप्तिरस्य। सूर्य्ये। "एहि वां विमुचो न पादाघृणे! संव्यावर्हे"। "रायोधाराघृणे वसो!" ऋ० ६,५५,१,२। आघृणे! आगतदीप्ते! हे घृणवन्!" भा०।

आघोषण न० आ+घुष-ल्युट्। सर्व्वत्र प्रचारणायोच्चैःशब्दकरणे। णिच्-युच्। आघोषणाप्यत्र स्त्री।

आघ्राण त्रि० आ+घ्रा-क्त। १गृहीतगन्धे पुष्पादौ नासिकया यस्य गन्धज्ञानं जातं तस्मिन् २हृष्टे च भावे क्त। २ गन्धग्रहणे ३ हृष्टौ च न०।

आघ्रात त्रि० आ+घ्रा-क्त वा तस्य नत्वाभावः। १गृहीतगन्धे पुष्पादौ २हृष्टे ३ अस्पृष्टे च "युष्माद्यनाघ्राततिथिविषयम्" ति०त० रघुनन्दनः।

आघ्रेय त्रि० आ+घ्रा-यत्। घ्राणेन याह्ये "आघ्रेयः सर्व्वदेवानाम्" धूपदानमन्त्रः।

आङ् अव्य० अत-बा० डाङ् प्रयोगे तस्य ङित्त्वम्। आरम्भार्थे तच्छब्दे विहितः तत्र ईषदर्थे आताच्यः व्याप्तिलक्षः अभिव्याप्तौ ब्रह्मास्त्रासकलात्। सीमायाम् "आसमुद्रात्तीरानामाकरवर्त्मनाम्" रघुः धातुविशेषयोगेनार्थविशेषे आगच्छति आतिष्ठते आलम्बते "तृतां यदारोहति दन्वाससा" अभ्यासे आदत्तिः अभ्यादत्तः। प्रत्यादत्तौ प्रत्यागच्छति। समन्तादृत्तौ आचितः आकीर्णः।

आङ्कणायन त्रि० अङ्कुनेन निर्वृत्तादि सङ्घा० चतुरर्थ्याम् फक्। अङ्कुनिर्वृत्तादौ। [रघुयुक्ते।

आङ्कुशिक त्रि० अङ्कुशः प्रहरणमस्य ठक्। अङ्कुशप्रहरणयुक्ते।

आङ्क न० अङ्क+स्वार्थे अण्। १कोमलाङ्के अङ्कादागतः अण्। व्याकरणप्रसिद्धे २अङ्काधिकारविहिते कार्य्ये "वर्णादाङ्कं बलीयः" परिभाषा अङ्कदेशे भवः अण्। ३अङ्कदेशभवे त्रि० वङ्गवचने तु तस्य लुक् अङ्गाः। अङ्गानां राजा अण्। ४अङ्गदेशस्य राजनि बहुषु लुक् अङ्गाः तद्राजषु। स्त्रियां प्राच्यत्वान्न लुक्, आङ्गी।

आङ्गिक त्रि० अङ्गेषु जनपदेषु भवः वुञ्। १अङ्गदेशभवे। अङ्गाः क्षत्रियाः तद्देशबन्धुतयो भक्तिरस्य वुञ्। अङ्गदेशक्षत्रिया यस्य सेव्याः तस्मिन् २बहूनामङ्गदेशक्षत्रियाणां सेवके। अङ्गा जनपदोभक्तिरस्य वुञ्। ३बङ्गत्ववदङ्गजनपदसेवके च त्रि०।

आङ्गविद्य त्रि० अङ्गविद्यां वेद "अङ्गवलधर्म्मतियागादिद्यान्नाधेति वक्तव्यम्" वार्त्ति० ठको निषेधात् अण्। १व्याकरणाद्यङ्गविद्यावेत्तरि। तद्ग्राख्यानो ग्रन्थः ऋगयनादि० अण्। २अङ्गविद्याव्याख्याने ग्रन्थे अङ्गविद्यायां भवः अण्। ३तद्विद्याभवे। [समूहे।

आङ्गार न० अङ्गाराणां समूहः भिक्षादि० अण्। अङ्गार-

आङ्गिक त्रि० अङ्गेन अङ्गचालनेन निर्वृत्तम् अङ्गवृता० ठक्। भावव्यञ्जके अङ्गनिष्पन्ने नटादीनां १भ्रूविक्षेपादौ। "भवेदभिनयोऽवस्थानुकारः स चतुर्विधः। आङ्गिकोवाचिकश्चैवमाहार्य्यः सात्विकस्तथा" सा०द०। स्त्रीणां चेष्टाविशेषे २हावादौ। "यौवने सत्वजास्तासामष्टाविंशति सङ्ख्यकाः। अलङ्कारास्तत्र हावभावहेलास्तयोऽङ्गजाः" सा०द०। हावादयश्च तत्तच्छब्दे वक्ष्यन्ते "अङ्गं स्पृदङ्गं तद्वाद्यं शिल्पमस्य ठक्। स्पृदङ्गवादनशिल्पके त्रि०।

आङ्गिरस पुंस्त्री० अङ्गिरसोऽपत्यम् अण्। १अङ्गिरसऋषेरपत्ये "अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः" मनुः। बह्वपत्येऽण्लुक्। अङ्गिरसः स्त्रियां न लुक् ङीप्। "आथर्व्वणोराङ्गिरसैर्देवोर्मनुष्यजाउत" अथ० ८,५,६। २बृहस्पतौ तस्य तदपत्यत्वम् भा० आ०प० ६६अ०। "अङ्गिरसस्त्रयः पुत्राः लोके सर्व्वत्र विश्रुताः। बृहस्पतिरुतथ्यश्च संवर्त्तश्च घृतव्रतः"। अङ्गिरसा दृष्टम् अण्। अथर्ववेदोक्ते ऋक्षभेदे "अथर्व्वाङ्गिरसं नीलरुद्रं देव्यपराजिता। मधु सूक्तं रौद्रसूक्तं शान्तिकाध्यायमेव च। अथर्व्वाणौ द्वारपालौ पठेतामुत्तराश्रितौ" दानपारि० पुरा०। तच्च सूक्तं अथर्वसंहितायां १८,१,५८,५९,६०, ६१ मन्त्रचतुष्कात्मकम्, "अङ्गिरसो नः पितरः" इत्यादिकम्। तच्च तुलादानादिपद्धतौ अस्माभिः १८५१० दर्शितम् अङ्गिनामङ्गानां रसः सारः स्वार्थे अण्।

ष्ठाक्तनि । "सोऽयास्य आङ्गिरसोऽङ्गानां हि रसः" इति ह०उ० । "आङ्गिरस आत्मा कार्यकरणानाम् कथमाङ्गिरसः ! । प्रसिद्धं हि यदङ्गिनामङ्गानां रसत्वं तदपायेशेषप्राप्तेरिति वक्ष्यामः यस्माच्चायमङ्गिरसत्वात् विशेषानाश्रयत्वाच्च कार्यकरणानां साधारण आत्मा विशुद्धश्च तस्माद् वागादीनपास्य प्राण एवात्मत्वेनाश्रयितव्य इति वाक्यार्थः" भ०भा० ।

आङ्गिरसेश्वर पु० आङ्गिरसेन प्रतिष्ठितः ईश्वर : । काशीक्षेत्रस्थे आङ्गिरसप्रतिष्ठिते शिवलिङ्गभेदे ।

आङ्गुरि(लि)क पु० अङ्गुलि (रि) व इदार्थे कन् । वा रत्वम् । अङ्गुल्याकृतौ पदार्थे ।

आङ्गूष पु० अङ्गति गच्छति देवान् अगि–ऊषच् अङ्गूषः ततः स्वार्थे अण् । स्तोत्रे । "तिरः पुरू चिदश्विना रजांस्याङ्गूषः" ऋ०३,५८,५ । "आङ्गूषं स्तोत्रम्" भा० । "प्रमन्महे शवसानाय शूषमाङ्गूषम्" यजु०२४,१६ । "अश्वा इदुप्रय इव प्रयंसि भरास्याङ्गूषं बाधे सुदक्षि" ऋ० १,६१,२ । [भवसन्निकृष्टदेशादौ ।

आङ्ग्य त्रि०अङ्गे भवः आङ्गः चतरर्थ्यां संकाशा०यत् । अङ्ग-

आचके अव्य०आ+चक ए–विभक्तिप्रतिरूपकम् । कामनायाम् निरु० । "त्वामवस्युराचके" यजु० २१,१ । आचके कामये" वे०दी० । "रक्षोतृदोवसुभिराचके" य०४,२१ ।

आचक्षाण त्रि० आ+चक्ष–शानच् । आख्यानं कुर्वति ।

आचतुर अव्य० चतःपर्य्यन्तम् अव्ययी० अच् समा० । चतःपर्य्यन्ते "आचतुरं क्षीमे पशवोऽन्नं मिथुनायन्ते" । माता पुत्रेण मिथुनं गच्छति पौत्रेण प्रपौत्रेण "तत्पुत्रादिनापीति मर्य्यादार्थः" सि०कौ० ।

आचक्तृ त्रि० आ+चक्ष–वा० उसि । आख्यानकर्त्तरि ।

आचतुर्थ न०चतुरस्य भावः "न नञ्पूर्व्यात् इत्यादि" पा० सू०चतुरादिपर्य्युदासात् भावे ष्यञ् प्रत्ययः । अनैपुण्ये

आचम पु० आ+चम–घञ् वा ह्रस्वः । आचमनशब्दार्थे "दध्ना सह पलैकन्तु शुद्धं वारि तथाचमे" तन्त्रसा० ।

आचमन न०आ+चम–भावे ल्युट् । १जलादेः पाने ह्रस्वत्वे कर्म्माङ्गे २कर्त्तृसंस्कारके ३क्रियाभेदे च, आ०तत्त्वे "आचमने उदकपरिषणप्रकारपरिभाषणञ्चाह भरद्वाजः । 'आयतं पर्वणां कृत्वा गोकर्णाकृतिमत्करम् । संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः । सङ्गाङ्गुष्ठकनिष्ठाभ्यां शेषेणाचमनं चरेत् । मासमज्जनमात्रास्तु संगृह्य त्रिः पिबेदपः' । पाणिना दक्षिणेन "त्रिःपिबेद्-

द्भिरेनापः" इति आदिपुराणोक्तेः । मार्कण्डेयः । "सपवित्रेण हस्तेन कुर्य्यादाचमनक्रियाम् । नोच्छिष्टं तत्पवित्रन्तु भुक्तोच्छिष्टन्तु वर्जयेत्' । मदनपारिजाते हारीतः । 'यन्निर्यस्य पवित्रस्य न तेनाचमनञ्चरेत्' । यन्त्रना यन्निरिति सङ्ग्रहकरोऽपि । आचमनानुष्ठातौ देवलः । 'न गच्छन् न शयानश्च न क्रमन् न परान् स्पृशन् । न हसन् नैव संजल्पन् नात्मानञ्चैव वीक्षयन्' । क्रमन् क्रम्यमान इति रत्नाकरः । आत्मानं आत्मस्थानं हृदयं वीक्षयन् इति स्वार्थे णिच् । नेत्यनुष्ठातौ । 'केशास्थीवीभत्सःकायं संस्पृशन् धरणीमपि । यदि स्पृशति चैतानि भयः प्रक्षालयेत् करम्" । अधःकायं नाभेरधः प्रदेशम् । करं दक्षिणम् । आचमनानुष्ठातौ गोभिलः । 'नान्तरीयैकदेशेन कृत्वोत्तरीयकम्" इति । अन्तरीयमधःपरिधानं तदेकदेशेन उत्तरीयं कृत्वा । मरीचिः । 'न बर्हिर्जानुस्थरया नासनस्थो नचोत्थितः । न पादुकास्थो नाचिरस्थः शुचिः प्रयतमानसः । उपस्पृश्य द्विजो नित्यं शुद्धः पूतो भवेद्गरः । भुक्त्वासनस्थोऽप्याचामेत् नान्यकाले कदाचन" । जलस्थलोभयकर्म्मानुष्ठानार्थं जलस्थलैकचरणेनाचमनं कर्त्तव्यमित्याह पैठीनसिः । 'अन्तरुदके आचान्तोऽन्तरेव पूतोबहिरुदके आचान्तो बहिरेव शुद्धो भवति तस्मादन्तरेकं बहिरेकं च पादं कृत्वा आचामेत् सर्वत्र शुद्धो भवति" इति । जानुनऊर्द्ध जलेषु तिष्ठन्नेवाचामेत् । 'जानोरूर्द्धं जले तिष्ठन्नाचान्तः शुचितामियात् । अधस्तात् यतस्तोऽपि समाचान्तो न शुध्यति" इति विष्णुक्तेः । हारीतः । "आर्द्रवासा जले कुर्य्यात् तर्पणाचमनं जपम् । शुष्कवासा स्थले कुर्य्यात् तर्पणाचमनं जपम् । कात्यायनः । 'स्नानमाचमनं होमं भोजनं देवतार्च्चनम् । प्रौढ़पादो न कुर्वीत स्वाध्यायं पितृतर्पणम् । आसनारूढ़पादस्तु जानुनोर्जङ्घयोस्तथा । कृतावसक्थिको यस्तु प्रौढ़पादः स उच्यते" । आसनारूढ़पादः आसनारूढ़पादतलः । जानुनोर्जङ्घयोः कृतावसक्थिकः वस्त्रादिना कृतगुप्तजानुजङ्घावन्धः तद्वयेन भेदप्रतीतेः । अत्र च "अनेको ह्याहृतो दारुशिले भूमिसमे दृष्टकाष्ठे संकीर्णभूता" इति बौधायनवचनात् तथाविधपादोऽपि कुर्यात् । व्यासः । "शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा । अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत् । अपः पाणिनखाग्रेषु आचामेद्यस्तु वै द्विजः । सुरापाणेन तत्तुल्यमित्येवमृषिरब्रवीत् संवत्सर्त" । मुखं संवृत्य रोम-

कौष्टस्यौ यथा न भवतीति तात्पर्य्यम् । तथाच यमिष्ठः । "आचान्तः पुनराचामेत् वासोविपरिधाय च । ओष्ठौ संसृज्य च तथा वत्स स्नातमलोमकौ"। एवञ्च प्रागुक्तहारीतवचने यत् ओष्ठयोर्मार्जनसूक्तं तल्लोमकयोरेवेति । एतदनन्तरं वामहस्तं पादौ शिरश्च दक्षिणेन पाणिना जलेनाभ्युक्षयेत् । तथाच कामधेनावापस्तम्बः । "त्रिराचामेत् छृद्गताभिरद्भिस्त्रिरोष्ठौ परिमृजेत् । द्विरित्येके दक्षिणेन पाणिना सव्यं प्रोक्ष्य पादौ शिरश्च" । गोभिलः । 'त्रिराचामेत् द्विः प्रमृजीत पादावभ्युक्ष्य शिरोऽभ्युक्षयेत् इन्द्रियाण्यद्भिः स्पृशेत् अक्षिणी नासिके कर्णाविति" । इन्द्रियाणि इन्द्रियायतनानि इन्द्रियाख्यामूर्त्तत्वात् तिसृभिरिति तर्ज्जनीमध्यमानामिकाभिः "तर्ज्जन्यनामामध्याभिर्मुखं पूर्वं स्पृशेदिति ब्रह्मचारिकाखण्डधृतभविष्यात् । 'प्राणं नासापुटद्वयं "तर्ज्जन्यङ्गुष्ठयोगेन स्पृशेन्नासापुटद्वम्" इति यङ्गात् । एवं पुनःपुनरिति चक्षुःश्रोत्रद्वयाभिप्रायेण श्रीदत्तोऽप्येवम् । तेन दक्षिणं स्पृष्ट्वा वामं स्पृशेत् । व्यक्तं कामधेनावाचारचिन्तामणावापस्तम्बः । 'चक्षुषी नासिके कर्णौ सकृत् सकृदुपस्पृशेत्" । द्विरित्येके द्विरिति शाखान्तरीयम् अत्र गोभिलीयापस्तम्बीयपाठक्रमो न याज्ञः तत्क्रमस्य "श्रुत्यर्थपठनस्थानमुख्यप्रावर्त्तिकाः' इति जैमिनिसूत्रात् 'प्राणं पश्चादनन्तरमिति" दक्षोक्तयङ्क्रमेण बलवता बाधात् । अतएव दक्षेणैव प्रतिज्ञातम् । "उक्तं कर्म्म क्रमो नोक्तः न कालस्तत एव हि । द्विजानान्तु हितार्थाय दक्षस्तु स्वयमब्रवीत्" । अतश्छन्दोगपरिशिष्टेन गोभिलाम्नष्टक्रमः सम्पोषितः । यथा 'त्रिःप्राश्यापोहिरुन्मृज्य मुखमेतान्युपस्पृशेत् । आस्यनासाक्षिकर्णांश्च नाभिवक्षःशिरोऽसकान्' । अत्र नासाग्रीत्युक्तम् । सर्वत्राङ्गुष्ठयोगेन करणमाह पैठीनसिः । "अग्निरङ्गुष्ठसंस्पर्शात्तेनैव सर्व्वाणि स्थानानि स्पृशेत्" । नाभिस्पर्शानन्तरं जलस्पर्शमाह व्यासः । "ततः स्पृष्ट्वाभिदेशं पुनरपश्च संस्पृशेत्' । इन्द्रियस्पर्शानन्तरं भविष्ये । "यद्भूमावुदकं वीर ! समुत्सृजति मानवः । वासुकिप्रमुखान् नागान् तेन प्रीणाति मानवः' । पैठीनसिः । "स्पृष्ट्वा प्राणान् यथासंख्यं पादौ प्रोक्ष्य पयः शुचिः । सव्ये पाणौ ततः शेषा अपो विनिनयेदिति" प्राणान् इन्द्रियाणीति रत्नाकरः । शेषा आचमनावशिष्टाः इति मदनपारिजातः । एतत्परमेव 'अन्तः प्रत्युपस्पृश्य शुचिः' इति गोभिलसूत्रम् । अक्षादिस्पर्शसहितमाचमनं कृत्वा उदकं स्पृष्ट्वा शुचिरिति सरला । अन्तत उपस्पर्शनात् पाणिना उदकस्पर्शं कृत्वा शुचिर्भवतीति भट्टभाष्यम् । अतएवोपस्पर्शमभिधाय ततो जलशेषं वामहस्ते त्यजेदिति पिहदवियता । एतेन द्विजातीनामपि द्विराचमने ओष्ठजलस्पर्शमात्रं शास्त्रार्थः "प्रत्युपस्पृश्यान्ततः शुचिर्भवति" इति गोभिलसूत्रादिति छन्दोगाह्निकं निरस्तम् । "हृदयं स्पृशंस्त्वेवमेवाचामेत्" इति तदनन्तरसूत्रेण हृदयस्पृग्जलनियमात् । "उच्छिष्टोऽन्तर्वातोऽन्यथा भवत" इति सूत्रान्तरेण हृद्गतत्वाभावे "उच्छिष्टत्वाभिधानात् एतदनन्तरमेवाथ प्रत्युपस्पर्शनम्" इत्यादिना द्विराचमनादिविधानाच्च । वायुपुराणे । 'निर्जीवने तथाभ्यङ्गे तथा पादावसेचने । उच्छिष्टस्य च संभाषात् अशुच्युपहतस्य च । सन्देहेषु च सर्वेषु शिखां मुक्त्वा तथैव च । विना यज्ञोपवीतेन नित्यमेवमुपस्पृशेत् । उद्वासससंस्पर्शे दर्शने चान्त्यवासिनाम्" । प्रागर्द्धं कृत इति शेषः । सन्देहेषु अप्रायश्चित्तेति शेषः । शिखां मुक्त्वा अनन्तरं बद्ध्वा यज्ञोपवीतेन विना स्थित्वा पुनः परिधाय चाचामेदित्यर्थः । हारीतः । "स्त्रीशूद्रोच्छिष्टसंभाषणे मूत्रपुरीषोत्सर्गदर्शने देवमभिगन्तुकाम आचामेदिति" । देवलः । "उच्छिष्टं मानवं स्पृष्ट्वा भोज्यं चापि तथाविधम् । तथैव कृत्वा पादौ च प्रक्षाल्याचम्य शुद्ध्यति" । तथाविधमुच्छिष्टम् । याज्ञवल्क्यः । "स्नात्वा पीत्वा क्षुते स्वप्ने भुक्त्वा रथ्योपसर्पणे । आचान्तः पुनराचामेत् वासोविपरिधाय च" । ब्रह्मपुराणम् "क्षौमे भोजनकाले च सन्ध्ययोरुभयोरपि । आचान्तः पुनराचामेत् अन्यत्रापि सकृत् सकृत् । द्विराचम्य ततः शुद्धः स्मृत्वा विष्णुं सनातनम्" स्मृतिः । "क्षुते निष्ठीविते स्वप्ने परिधानेऽनुपातने । कर्म्मस्वेषु नाचामेद्दक्षिणं श्रवणं स्पृशेत्" । साङ्ख्यायनः । "आदित्यावसवोरुद्रा वायुरग्निश्च धर्म्मराट् । विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठन्ति देवताः" । अत्र हेतुमाह पराशरः । "प्रभासादीनि तीर्थानि गङ्गाद्याः सरितस्तथा । विप्रस्य दक्षिणे कर्णे वसन्ति मनुरब्रवीत्" । मार्कण्डेयपुराणम् । "कुर्य्यादाचमनं स्पर्शं गोपृष्ठस्यार्कदर्शनम् । कुर्य्यीतालभनञ्चापि दक्षिणश्रवणस्य च । यथाविभवतोऽप्येतत् पूर्व्वाभावे ततः परम् । न पूर्व्वस्मिन् विद्यमाने उत्तरप्राप्तिरिष्यते" । पुराणसारवायुपुराणयोः । "यः कर्म कुरुते मोहादनाचम्यैव नास्तिकः । भवन्ति हि वृथा तस्य क्रियाः सर्व्वा न संशयः" । इत्यलम् ।

मदनपारिजातेऽत्र विशेष उक्तः । हृद्वयाता "कृत्वाथ शौचं प्रक्षाल्य स्नात्वैव इन्द्रियोपहतस्तूपोष्य स्नात्वा" "कृत्वाथ शौचं प्रक्षाल्य पादौ हस्तौ च मृज्जलैः । निबद्धशिखकच्छस्तु द्विज आचमनं चरेत्" प्रचेताः । "अनुष्णफेनगोताभिराचामेदिति" । आतुराणामुष्णोदकमप्यविरुद्धम् । तथाचापस्तम्बः "उदकेनातुराणाञ्च तथोष्णेनोष्णपायिनामिति" । अथाचमनं भवतीति शेषः । योगीश्वरः "अनर्जानु शुचौ देशे उपविष्टउदङ्मुखः । प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत् । तथा "कनिष्ठादेशिन्यङ्गुष्ठमूलान्यपं करस्य च । प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्" । दक्षः । "प्रक्षाल्य पादौ हस्तौ च त्रिःपिबेदम्बु वीक्षितम् । संहताङ्गुष्ठमूलेन द्विःप्रमृज्यात्ततोमुखम् । वीक्षितमित्येतदहर्विषयम् । "रात्रावनीक्षितेनैव शुद्धिरुक्ता मनीषिभिरिति" यमस्मरणात् मनुः । त्रिराचामेदपः पूर्वं द्विःप्रमृज्यात्ततोमुखम् । खानि चोपस्पृशेदद्भिरात्मानं शिरएव च" गौतमः । "त्रिश्चतुर्वा अप आचामेदिति" चतुर्थहणं पित्रपक्षेति केचित् । त्रित्वं हणेन तुल्यभाव इत्यन्ये । भरद्वाजः । संहताङ्गुलिभिस्तोयं गृहीत्वा दक्षिणेन तु । सङ्काङ्गुष्ठकनिष्ठे तु शेषेणाचमनं चरेत् । ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् । कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन । कायं प्राजापत्यं त्रैदशिकं दैवम् । यस्मिन् आचमनप्रयोगे चयेन ब्राह्मादितीर्थं स्वीकृतं तेनैव स प्रयोगः कार्यो न तीर्थान्तरेण । दक्षः । "संहताङ्गुलिभिः पूर्वं आस्यमेवमुपस्पृशेत् । अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम् । अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनः पुनः । नाभिं कनिष्ठाङ्गुष्ठाभ्यां हृदयन्तु तलेन वै । सर्वाभिश्च शिरः पश्चात् बाहू चाग्रेण संस्पृशेत् । याज्ञवल्क्यः । "अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः । त्रिःप्राक्षाल्य द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत्" । अत्र विशेषमाह पैठीनसिः । "सव्ये पाणौ शेषा अपो निनयेदिति" । शेषा आचमनावशिष्टाः । हृहत्पराशरस्त्वन्यथोपस्पर्शनमाह । "तर्जन्यङ्गुष्ठयोगेन स्पृशेत् स्कन्धहयन्ततः । अङ्गुष्ठानामिकाया योगेन श्रवणे स्पृशेत् । कनिष्ठाङ्गुष्ठयोगेन स्पृशेत् स्कन्धहयं ततः । नाभिञ्च हृदयं तद्वत् स्पृशेत् पाणितलेन तु । संस्पृशेच्च तथा शीर्षमिति" । शङ्खस्तु "ततोऽङ्गुलिचतुष्केण स्पृशेन्मूर्द्धानमादितः । तर्जन्यङ्गुष्ठयोगेन स्पृशेच्चेतहयं पृथक् । मध्यमानामिकाभ्यान्तु स्पृशेच्चासाद्वटे क्रमात् । अङ्गुष्ठेन कनीयस्याः कर्णौ संयोगतः स्पृशेत् । तर्जन्यङ्गुष्ठयोगेन नाभिं हृदि तु संस्पृशेत्" । पैठीनसिः । "अग्निरङ्गुष्ठसङ्गात्तेनैव सर्वाणि स्थानानि स्पृशेदिति" । अत्र स्वस्वशाखानुसारेण व्यवस्थितो विकल्पः । यत्र शाखायामङ्गमेव नाम्नातम् अङ्गुष्ठादिविशेषो वा नाम्नातः । तच्छाखीयानां त्वैच्छिको विकल्पः येषान्तु स्वशाखायां कतिपयाङ्गस्पर्शनं नाम्नातम् । तेषान्तु स्वशाखोक्तक्रमानुसारी शाखान्तरोक्तक्रमः अनुक्ताङ्गस्पर्शे भवतीति व्यवस्था । उदकपरिमाणमाह याज्ञवल्क्यः । हृत्कण्ठतालुगाभिश्च यथासंख्यं द्विजातयः । शुध्येरन् स्त्री च शूद्रश्च सकृत् स्पृष्टाभिरन्ततः" । अन्तस्तालुगाभिः । हृदङ्गमापरिमाणमाह उशनाः । "मासमज्जनमात्रा हृदयङ्गमा भवन्ति" । आचमनप्रसङ्गात् सपवित्राचमने कश्चन विशेषः प्रदर्श्यते । तत्र मार्कण्डेयः । "सपवित्रेण हस्तेन कुर्यादाचमनक्रियाम् । नोच्छिष्टं तत्पवित्रन्तु भुक्तोच्छिष्टन्तु वर्जयेत् । एतद्दक्षिणकराभिप्रायम् । हारीतेन वामे निषेधात् । "वामहस्तं कृशानूक्त्वा समाचामति योद्विजः । उपस्पर्शी भवेत्तेन रुधिरेण मलेन चेति" । एतत् केवलवामहस्ताभिप्रायम् । हस्तहयान्यस्पर्शने गोभिलेन फलस्मरणात् । "उभयत्र स्थितैर्दर्भैः समाचामति योद्विजः । सोमपानफलं तस्य भुक्त्वा यज्ञफलं भवेदिति" । अत्र विशेषमाह हारीतः । सव्यापसव्यौ कुर्वीत सपवित्रकरो बुधः । यन्न्यस्य पवित्रस्थ न तेनाचमनं भवेदिति । पवित्रलक्षणमाह कात्यायनः । "अनन्तर्गर्भिणं सूत्रं कौशं द्विदलमेव च । प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्" । मार्कण्डेयः । "चतुर्भिः कुशपिङ्गलैर्ब्राह्मणस्य पवित्रकम् । एकैकं नूनसुद्दिष्टं वर्णे वर्णे यथाक्रमम् । त्रिभिर्दर्भैः शान्तिकर्म पञ्चभिः पौष्टिकं तथा । चतुर्भिश्चाभिचाराख्यं कुर्वन् कुर्यात् पवित्रकमिति" । अथाचमननिमित्तानि तत्र मनुः । "उच्छ्वासनिष्ठीवितेष्वसंवृतमुखोनृते । पीतशुक्तान्नसंभोजनेषु चाशुचिरुच्यते" । हारीतः । "स्त्रीशूद्रोच्छिष्टाभिभाषणे मूत्रपुरीषोत्सर्गदर्शने देवतामभिगच्छंस्तु काम आचमेत्" । अथ हिराचमननिमित्तानि । तत्र याज्ञवल्क्यः । "स्नात्वा पीत्वा क्षुते क्षुण्णे भुक्त्वा रथ्योपसर्पणे । आचान्तः पुनराचामेदासोविपरिधाय च" बौधायनः । "भोजने हसने दाने उद्गारे च प्रतिग्रहे । हविर्भक्षणकाले वा तद्धिराचमनं स्मृतम्" । ब्रह्मपुराणे । होमे भोजन-

काले च सन्ध्ययोरुभयोरपि । आचान्तः पुनराचामेत् अन्यत्र च सकृत् सकृत्" । अङ्गिराः । "चण्डालादीन् जपे होमे ह्याचम्य विशुद्ध्यति । श्वादीन् ह्यापि वाचामेत् कर्णं वा दक्षिणं स्पृशेत् । जानुनोरधस्तात्खादिस्पर्शे आचमनमन्यत्र स्नानविधानात् । उदकाभावेऽसामर्थ्ये वा दक्षिणश्रवणस्पर्शः । अनेनैवाभिप्रायेण ह्यङ्गिरसः । "पित्तमन्त्रोऽङ्गरे रौद्रे आमालम्भेऽधमेऽग्नये । अधोवायुसृत्सर्गे आक्रन्दे क्रोधसम्भवे । मार्जारमूषिकस्पर्शे प्रवासेऽन्नतभाषणे । निमित्तेषु च सर्वेषु दक्षिणं श्रवणं स्पृशेत्" । तथा "आर्द्रं ह्यणं गोमयं वा भूमिं वा संस्पृशेद्द्विजः" । सांख्यायनः । क्षुते निष्ठीवने इत्यादि प्रागुक्तम् । आचारसागरे । अपःपीत्वौषधं जग्ध्वा क्त्वा ताम्बूलचर्वणम् । सौगन्धिकानि सर्वाणि नचाचामेद् विचक्षणः । अपोजग्ध्वेति अस्तोपधानमसीत्यादिभिर्मन्त्रैरपोजग्ध्वानन्तरं नित्यं नाचामेदित्यर्थः । बौधायनः । "पादक्षालनशेषेण नाचामेद्धारिणा द्विजः । शुभाभावे पिबेत् किञ्चित्तच्छिष्टा भूमौ जलं स्पृशेत्" । आपस्तम्बः । "सन्ध्यार्थे भोजनार्थे वा पित्यर्थे वा तथैव च । शूद्राङ्गुष्ठेन नाचामेत् जपेच्छ्राद्धवनेषु च" । यमः । तावन्नोपस्पृशेत् विप्रोयावद्धामेन संस्पृशेत् । उदके चोदकस्थस्तु स्थलस्थस्तु स्थले शुचिः । पादौस्थाप्योभयत्रापि आचान्तोभयतः शुचिः" । जले स्थले चैकैकं पादं कृत्वाचान्त उभयत्र जलकर्मणि स्थलकर्मणि च शुद्धो भवतीत्यर्थः । "अकृत्वा पादयोः शौचं तिष्ठन्मुक्तशिखोऽपि वा । विना यज्ञोपवीतेन आचान्तोऽप्यशुचिर्भवेत्" । तिष्ठन्निति स्थलविषयम् । विष्णुना तिष्ठतोपि जलेऽप्यनुज्ञानात् । "जान्वोरर्धं जले तिष्ठन्नाचान्तः शुचितामियात् । अधस्तात् शतकृत्वोपि समाचान्तो न शुद्ध्यति" । अधस्ताद्विधेयाज्ज्ञातुर्दध्नेऽप्यविरुद्धम् । तथा च स्मर्यते । "जानुमात्रे जले तिष्ठन्निति" अत्राचान्तः शुचिरिति वाक्यशेषः । तथा "सोपानत्कोनचोष्णीषी पर्यङ्कस्थश्चयानगः । दुर्दिने प्रपतंश्चैव नाचमेत् शुद्धिमाप्नुयात् । नरगोखरयानाश्वहस्त्यवीरोहकस्तथा । आचान्तः कर्म शुद्धः स्यात्तावत्कालौषधञ्चिरम् । भुक्त्वासनस्थोऽप्याचामेत् नान्यकाले कदाचन । न पादुकास्थो न त्वरितो नचायज्ञोपवीतवान् । स्पृशन्ति बिन्दवः पादौ जङ्घे चामतः परान् । मौञ्जिकैस्ते समाख्येया नचैवाप्रयतो भवेत् । परेषामाचमनोदके दीयमाने ये बिन्दवः पादयोः पतन्ति ते नाशुद्ध्यार्थः" । "न तिष्ठन्भुक्तोदकेनाचामेच्च शूद्राशुच्येकपाणावर्च्छितेन" गो० स्मृ० क्रमः काशीखण्डे उक्तः । "प्रागास्य उदगास्यो वा स्रुपविष्टः शुचौ भुवि । उपस्पृशेद्विहीनायां तृणाङ्गारास्थिभस्मभिः । अनुष्णाभिरफेनाभिरद्भिर्जुष्टाभिरत्वरः । ब्राह्मणोब्राह्मतीर्थेन हृष्टपूताभिराचमेत् । कण्ठगाभिर्नृपः शुध्येत्तालुगाभिस्तथोरजः । स्त्रीशूद्रावास्यसंस्पर्शमात्रेणापि विशुध्यतः । समस्ताङ्गुलिनोद्धृत्य पाणिना दक्षिणेन तु । व्यङ्गाङ्गुष्ठकनिष्ठाभ्यां शेषेणाचमनं विदुः । शिरः प्राश्य कण्ठं वा जले सक्थिखोऽपि वा । अक्षालितपदस्तस्य आचान्तोऽप्यशुचिर्मतः । त्रिःपीत्वाम्बु विशुद्ध्यर्थं ततः खानि विशोधयेत् । अङ्गुष्ठमूलदेशेन द्विर्द्विरोष्ठावधरौ स्पृशेत् । अङ्गुलीभिस्त्रिभिः पश्चात् पुनरास्यं स्पृशेत् सुधीः । तर्जन्यङ्गुष्ठकोष्ठौ च घ्राणरन्ध्रे पुनः पुनः । अङ्गुष्ठानामिकाभ्यां च चक्षुःश्रोत्रे पुनः पुनः । कनिष्ठाङ्गुष्ठयोगेन नाभिरन्ध्रमुपस्पृशेत् । स्पृशेत्तलेन हृदयं समस्ताभिः शिरः स्पृशेत् । अङ्गुल्यग्रैस्तथास्रस्रौ साम्बु सर्वत्र संस्पृशेत् । आचान्तः पुनराचामेत् क्षुते रथ्योपसर्पणे । स्नात्वा भुक्त्वा पयः पीत्वा प्रारम्भे शुभकर्मणाम् । सुप्त्वा वासः परीधाय तथा ह्यध्वमकृतम् । प्रमादादशुचिं स्पृष्ट्वा हिराचान्तः शुचिर्भवेत्" । सन्ध्याङ्गाचमने शाखिभेदे मन्त्रविशेषोऽपि स्मर्यते । "सायमग्निञ्च मेत्युक्त्वा प्रातः सूर्येत्यपः पिबेत् । आपः पुनन्तु मध्याह्ने ततश्चाचमनं चरेत्" एभिराचमनं चरेदिति गौनकीये पाठः । मैत्रायणीय सूत्र परि० । "प्रातः सूर्येत्यमेत्युक्त्वा सायमग्निञ्च मेति च । आपः पुनन्तु मध्याह्ने कुर्यादाचमनं ततः" । "ततः प्राणायामानन्तरमिति" आ० त० रघु० "प्राणस्यायमनं कृत्वा आचामेत् प्रयतोऽपि सन् । अन्तरं खिद्यते यस्मात्तस्मादाचमनं स्मृतम्" योगि० या० । मदनपारिजाते । "सन्ध्याचमने बौधायनः अथातः सन्ध्योपासनविधिं व्याख्यास्यामः तीर्थं गत्वा प्रयतोऽभिषिक्तः प्रक्षालितपाणिपादः अप आचम्याग्निञ्च मा मन्युश्चेति सायमपः पीत्वा, सूर्यञ्च मामन्युश्चेति प्रातरपः पीत्वेति" अग्निञ्च सूर्यञ्चेति यजुर्वेदिनामिमौ मन्त्रौ ऋग्वेदिनां तु सन्ध्याचमने गौतमोक्तौ मन्त्रौ द्रष्टव्यौ "अहश्च मादित्यश्च पुनात्विति प्रातः रात्रिश्च मा वरुणश्च पुनात्विति सायमिति" "एतौ च मन्त्रौ प्रजापतिदृष्टौ लिङ्गोक्तदेवतौ चेति" अनयोश्च मन्त्रयोः सामविदिविषयकत्वेन तत्रोक्तावपि तयोः सम्यगज्ञानात् "यजुः सर्वत्र पीयते" इत्युक्तेश्च यजुर्वेदोक्ता-

वेव प्रागुक्तौ सामवेदिभिः प्रयुज्येते । तज्ज्ञाने तु तावेव प्रयोक्तव्यौ । काशीकाण्डे तु "इमं मन्त्रं ततश्चोक्त्वा कुर्यादाचमनं द्विजः । आचार्याः केचिदिच्छन्ति शाखाभेदेन चापरे । अन्तश्चरसि भूतेषु गुहायां विश्वतोमुख ! । त्वं यज्ञस्त्वं वषट्कार आत्माज्योतीरसोऽमृतम्" । आचमने मन्त्रान्तरमुक्तम् । तदपि शाखिभेदाद्व्यवस्थाप्यम् । मधुपर्कानाङ्गाचमने वेदिभेदेन मन्त्रभेदा मत्कृत तुलादानादिपद्धतौ द्रष्टव्याः । विस्तरभयात्तेऽत्रानोक्ताः । तान्त्रिकाचमनन्तु शाक्तवैष्णवभेदात् द्विधा तत्र । शाक्ताचमनं यथा । "आत्मविद्याशिवैस्तत्त्वैराचामेत् साधकाग्रणीः । वह्निकान्तां परे दत्त्वा शुद्धेन पायसाचमेत्" स्वतन्त्रतन्त्रम् "आचामेदात्मतत्त्वाद्यैः प्रणवाद्यैर्हृदन्तकैः" मालिनीत । तथा च ओं आत्मतत्त्वाय स्वाहा ओं विद्यातत्त्वाय स्वाहेति मन्त्राः । काल्यादौ विशेषः तन्त्रसारे "कालिकाभिस्तिभिः पीत्वा काल्यादिभिरुपस्पृशेत् । द्वाभ्यामौष्ठौ द्विरुन्मृज्य चैकेन चालयेत् करम् । सुखप्राणेक्षणश्रोत्रनाभ्युरस्कं भुजौ क्रमात् । आचम्यैवं भवेत् कालो वत्सरात्तां प्रपश्यति" भैरवोत० । काल्यादयश्च "काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी । विप्रचित्ता तथोग्योग्रप्रभा दीप्ता ततःपरम् । नीला घना बलाका च मात्रा मुद्रा मिता च ताः" इत्युक्ताः प्रयोगस्तु क्रीमित्यादिमूलमन्त्रेण त्रिरपः पीत्वा ओं काल्यै नमः कपालिन्यै नमः इति द्विरुन्मृजेत् । ओं कुल्लायै नमः करं चालयेत् ओं कुरुकुल्लायै नमः सुखस्य स्पर्शः । ओं विरोधिन्यै नमः ओं विप्रचित्तायै नमः दक्षवामनासिकयोः । ओं उग्रायै नमः ओं उग्रप्रभायै नमः नेत्रयोः । ओं दीप्रायै नमः ओं नीलायै नमः श्रोत्रयोः । ओं घनायै नमः इति नाभेः । ओं बलाकायै नमः वक्षसः, ओं मात्रायै नमः शिरसः । ओं मुद्रायै नमः ओं मितायै नमः इत्यंसौ स्पृशेत् । ताराचमनं तु "ताराभेदैस्त्रिभिः पीत्वा मायया चालयेत् करम् । स्त्रीं हूमोष्ठौ द्विरुन्मृज्य फट्कारैः चालयेत् करम् । आस्यं नासे दृशौ श्रोत्रे नाभिवक्षःशिरोभुजान् । वैरोचनादिभिः स्पृष्ट्वा सर्वपापैः प्रमुच्यते आचम्य भैरवो भूत्वा वत्सरात्तां प्रपश्यति" भैरवीत० । यथा ओं उग्रतारायै नमः ओं एकजटायै नमः ओं नीलसरस्वत्यै नमः इति त्रिरपः पीत्वा स्त्रीमिति बीजेन करं चालयेत् । स्त्रीं हूं त्रिस्तेताभ्यामोष्ठौ द्विरुन्मृज्य फडिति करं चालयेत् । ओं वैरचनाय नमः इति सुखम् ओं रत्नपाण्डराय नमः ओं पद्मनाभाय नमः दक्षवामनासिके । ओं तावकाय नमः ओं मासकाय नमः नेत्रे । ओं पाण्डवाय नमः तारकाय नमः श्रोत्रे, ओं असिताभाय नमः नाभिम् ओं पद्मान्तकाय नमः वक्षः । ओं यमान्तकाय नमः शिरः । ओं विघ्नान्तकाय नमः ओं नरान्तकाय नम इति असौ स्पृशेत् ।

वैष्णवाचमनं तु "केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत् करौ । द्वाभ्यामौष्ठौ च संमृज्य द्वाभ्यां मृज्यात् सुखं ततः । एकेन हस्तं प्रक्षाल्य, पादावपि तथैकयः । संप्रोक्ष्यैकेन मूर्द्धानं ततः सङ्कर्षणादिभिः । आस्यनासाक्षिकर्णांश्च नाभ्युरस्कं भुजौ क्रमात् । स्पृशेदेवं भवेदाचमनञ्च वैष्णवाग्र्ये" गौत० सचतुर्थीनमोऽन्तैश्च नामभिर्विन्यसेत् सुधीः" निबन्धे । ततश्च ओं केशवाय नमः इत्यादि नामभिराचमनम् । केशवादयश्च "केशवनारायण माधवगोविन्दविष्णुमधुसूदनत्रिविक्रमवामनश्रीधरहृषीकेशपद्मनाभदामोदरसङ्कर्षणवासुदेवप्रद्युम्नानिरुद्धपुरुषोत्तमाधोक्षजनृसिंहाच्युतजनार्द्दनोपेन्द्रहरिविष्णवः" तन्त्रसा० एताश्च चतुर्विंशतिर्विष्णुमूर्त्तयः । विष्णोर्द्विधोत्कीर्त्तनं मूर्त्ति भेदाभिप्रायेण चतुर्विंशतिमूर्त्तिशब्दे च तद्विवरणम् । अन्यदेवतानान्तु मूलमन्त्रेणाचमनमिति विवेकः । आचम्यते अनेन करणे ल्युट् । २आचमनसाधने देवतार्चनोपचारभेदे । "जातीफलत्वक्कक्कोलतोयञ्च षट्पलम् । प्रोक्तमाचमनमिति" तन्त्रसारोक्ते जातीफलादिचूर्णमिश्रिते षट्पलमिते जले तत्साधने ३जलमात्रे च भावे ल्युट् । पूजायां दत्ताचमनीयजलस्य ४पाने च । "सुवर्णकलसेनैवाचमनं कुरु केशव ! । पद्मचक्रधरो देव ! कृपालो ! परमेश्वर !" विष्णुपूजाचमनदानमन्त्रः ।

आचमनक न० आचमनस्य कं जलमत्र । १ पतद्ग्रहे (पिकदानि) (डावर) आचम्यतेऽनेन करणे ल्युट् । स्वार्थे कन् । २आचमनीयजलादौ ।

आचमनीय न० आचमनाय दीयते दृढात् छ आ+चम–करणे वा० अनीयर् वा । आचमनीयार्थे देवे जातीफलादिचूर्णमिश्रिते षट्पलमिते १जले आचमनशब्दे प्रमाणमुक्तम् । "आचमनीयमाचनीयमाचमनीयं प्रतिगृह्यतामिति" भवदे० कर्मणि अनीयर् । पेयजले २स्वार्थे कन् तत्रैव । अर्घ्यमाचनीयकम्" षोड़शोपचारः "उच्छिष्टोऽप्यशुचिर्वापि यस्य स्मरणमात्रतः । शुद्धिमाप्नोति तस्यै ते पुनराचमनीयकम्" गौतमीयम् ।

आचम्य अव्य० आ+चम-ल्यप्। १आचमनं कृत्वेत्यर्थे आ+चम-कर्मणि यत्। २आचमनीये जलादौ त्रि०।

आचय पु० आ+चि-अच्। दूरस्थस्य पुष्पादेरवनये। हस्तेन चयने तु घञ् आचाय इत्येव। तत्र नियुक्तः आकर्षादि० कन्। आचयकः आचितौ नियुक्ते त्रि०।

आचरण न० आ+चर-ल्युट्। १आचारे "अधीतिबोधाचरणप्रचारणैः" नैष०। "आचरत्यनेन करणे ल्युट्। २रथे ३शकटे च त्रि०। "यथा प्रयोग्य आचरणे युक्तः एवमस्मिन् शरीरे युक्तः" ऋ०उ०। "प्रयुज्यते इति प्रयोग्योऽश्वोवल्लीवर्दोवा आचरत्यनेन आचरणो रथोऽनोवा तस्मिन् आचरणे युक्तः तदाकर्षणाय, एवमस्मिन् शरीरे रथस्थानीये प्राणः पञ्चवृत्तिः इन्द्रियमनोबुद्धियुक्तः प्रज्ञात्मा विज्ञानरूपक्रियासूर्च्छितात्मा युक्तः स्वकर्म्मफलोपभोगनिमित्तं नियुक्तः ईश्वरेण राज्ञेव सर्वाधिकारे दर्शनश्रवणचेष्टाव्यापारेऽधिकृत" इति भ०भा०।

आचरित न० आ+चर-भावे क्त। १आचारे "वाग्देवताचरितचित्तितचित्त सद्मा" जयदेवः। २ऋणिकादृणग्रहणोपायभेदे। "धर्मेण व्यवहारेण छलेनाचरितेन च। प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च" मनुः। "तत्र ऋणिको यदि निःस्वो व्यवहारेण दापयितव्यः अन्यत् कर्म्मोपकरणं धनं दृष्ट्वा ऋणिकाधिष्ठादिना व्यवहारयितव्यः तदुत्पन्नं धनं तस्मात् गृह्णीयादिति" मेधा०। छलाचरितबलान्याह दृढ़०। "छद्मना याचितं चार्थमानीय ऋणिकाद्धनी। अन्याद्दृतादि व्याहृत्य दाप्यते तत्र सोपधिः। दारपुत्रपशून् हृत्वा कृत्वा द्वारोपवेशनम्। यत्रार्थोदाप्यतेऽर्थं स्वं तदाचरितमुच्यते। बद्ध्वा स्वगृहमानीय ताड़नार्थैरुपक्रमैः। ऋणिकोदाप्यते यत्र बलात्कारः स उच्यते" कात्या०। इता। कर्मणि घञ्। ३अनुष्ठिते त्रि०। "जलं वामकरे कृत्वा या सन्ध्याऽऽचरिता द्विजैः" काशी०।

आचरणीय त्रि० आ+चर-अनीयर्। अनुष्ठेये "यद्यपि शुद्धं लोकविरुद्धं नाचरणीयं नाचरणीयमिति स्मृतिः। तव्य। आचरितव्यमात्र त्रि०।

आचर्य्य न० आचर्यतेऽत्र आ+चर-आधारे यत्। अनुष्ठानयोग्ये देशे "आचर्य्यमनित्ये" पा० स्त्री० उक्तेः आचर्य्यम्। अद्भुते त्रि०।

आचान्त त्रि० आ+चम-क्त। आचमनकर्त्तरि "१आचान्तः पुनराचामेत्" काशी० स्मृतिश्च। कृतमाचमनं यस्य तादृशे २ जलादौ च "आचान्तोदकाय गौरिति नापितस्किर्ज्जूयात्" संत० गोभिलस्मृतम्।

आचाम पु० आ+चम-भावे घञ् वा दृद्धिः। आचमने कर्म्मणि घञ्। २भक्ते ३भक्तनिस्रावे मण्डे (माड़) "पिण्याकाचामतक्राम्बुसक्तूनां प्रतिवासरम्। एकरात्रोपवासः स्यात् कृच्छ्रः सौम्योऽयमुच्यते" या०। पिण्याकः निष्कृततैलक्लिन्नः खदननिस्रावोदक्लिन्नदुष्कसक्तूनां पञ्चानामेकैकं प्रतिदिवसमुपभुञ्जन षष्ठेऽह्नि उपवसेदिति" मिता०। "पिण्याकः खलिः आचामः भक्तमण्डः" भा०वि०। "आचाममथ पिण्याकं तक्रञ्चोदकसक्तुकान्। त्र्यहं त्र्यहं प्रयुञ्जानोवायुभक्षस्त्र्यहदृयम्। एकविंशतिरात्रेण तुला पुरुष उच्यते" यमः। ४सौत्रामणीयागाङ्गे सुरासाधने भक्तमण्डे च "कृत्वा तांश्च व्रीहिश्यामाकौदनयोः पृथगाचामौ निषिच्य चूर्णैः संसृज्य निदधाति तन्मासरम्" कात्या० १९,१,२०। "दक्षिणेन द्वारेण प्रवेश्याग्न्यागारं नग्नहुचूर्णानि कृत्वा। नग्नहुः किञ्च उच्यते। तांश्च यष्ट्यादौ चूर्णयित्वा व्रीहिश्यामाकौदनयोः पृथगाचामौ निषिच्य चूर्णैः संसृज्य निदधाति तन्मासरमुच्यते। व्रीहियवाभ्यान्तु सुरा निष्पाद्यते सा च यागसाधनम् तेन सा तद्धर्म्मैरभिसंबध्यते। अतस्तयोचतुर्मुष्टिप्रहणपूर्व्वकं पृथगोदनौ निष्पाद्येते। नग्नहुरर्थं माह। "सज्जत्वक्त्रिफला चैव शुण्ठी चैव पुनर्नवा। चतुर्ज्जातकसंयुक्ता पिप्पली गजपिप्पली। वंशोऽवका दृढ़च्छत्रा चित्रकं चेन्द्रवारुणी। अश्वगन्धा सशुत्पाद्य मूलान्येतानि निर्हरेत्। धान्यकं च यवानी च जीरकं कृष्णजीरकम्। हे हरिद्रे वचा चैव विरूढा व्रीहयो यवाः"। क्रयणानन्तरं यष्ट्यादीन्यादाय दक्षिणेन द्वारेणाग्न्यागारं प्रवेश्य नग्नहुचूर्णानि कृत्वा सज्जत्वगाद्यौषधानि तूष्णीं पिष्ट्वा तान् यष्टितोऽजाजान् चूर्णीकृत्य दर्शपार्ष्णमासधर्मेण पात्रासादनादि। श्यामाकचतुर्मुष्टिप्रहणपूर्व्वकं फलीकरणानां समन्त्रकं कृत्वा वह्नितरोदके पृथक् पृथक् चरू पक्त्वा गृहीतान्यनानान्यं व्रीहिश्यामाकौदनयोः पृथगाचामौ परिषिच्य पृथग्भिन्नयोः पात्रयोरुर्व्वीमध्यादतिरिक्तमण्डोदकम् (मण्डम्) अवस्राव्य तदुदकं (मण्डम्) नग्नहुप्रभृतिभिश्चतुर्भिश्चूर्णैः संसृज्य निदधाति स्थापयति तन्मासरं तस्य चूर्णसंसृष्टस्याचामस्य मासरमिति संज्ञा" "एवमाचामयोश्चूर्णसंसर्गानन्तरमिति" च कर्कः। सौत्रामणीशब्दे तदीयसुरासाधनसंस्कारप्रकारोवक्ष्यते

आचार पु० आ+चर-भावे घञ्। १आचरणेऽनुष्ठाने स च

अनुष्ठाननिवृत्त्यात्मकभावाभावरूपः तत्र सदाचारः वेदस्मृत्यादिविहितः तत्र निषिद्धश्च कदाचारः इति भेदात् द्विविधः। सदाचारलक्षणोक्तं काशी०। "सदाचारे हि सर्वोऽर्थो नाचारात् रिष्यते पुनः। तस्मात् विप्रेण सततं भाव्यमाचारशालिना। विद्वेषरागरहिता अनुतिष्ठन्ति यं द्विजाः। विद्वांसस्तं सदाचारं धर्ममूलं विदुर्बुधाः"। प्रसङ्गादाचारपदार्थो निरूप्यते तत्र शा०सू०भा०।"चरणादितिचेद्वोपलब्धार्थेति काष्णाजिनिः" सू०। "अथापि स्यात् या श्रुतिरनुशयसद्भावप्रतिपादनायोद्धृता "तद्यइहरमणीयचरणा इति" सा खलु चरणाद्योन्यापत्तिं दर्शयति नानुशयात्" अन्यश्चरणमन्योऽनुशयः" चरणं चारित्रम् आचारःशीलमित्यनर्थान्तरम्। अनुशयस्तु भुक्तफलात्कर्म्मणोऽतिरिक्तं कर्म्माभिप्रेतम्। श्रुतिश्च कर्मचरणे भेदेन व्यपदिशति "यथाऽऽचारी तथा भवतीति यान्यनवद्यानि कर्म्माणि तानि सेवितव्यानि नेतराणि यान्यस्माकं सुचरितानि तानि त्वयोपास्यानीति च"। तस्माच्चरणाद्योन्यापत्तिश्रुतेर्नानुशयसिद्धिरितिचेन्नैष दोषः यतोऽनुशयलक्षणार्थैवेषा चरणश्रुतिरिति काष्णाजिनिराचार्योमन्यते" भा०। "आनर्थक्यमिति चेन्न तदपेक्षत्वात्" शा०सू०। "स्यादेतत्कस्मात्पुनश्चरणशब्देन श्रौतं शीलं विहाय लाक्षणिकोऽनुशयः प्रत्याय्यते। ननु शीलस्यैव तु श्रौतस्य विहितप्रतिषिद्धस्य साध्वसाधुरूपस्य शुभाशुभयोन्यापत्तिः फलं भविष्यति अवश्यञ्च शीलस्यापि किञ्चित् फलमभ्युपगन्तव्यम् अन्यथा ह्यानर्थक्यमेव शीलस्य प्रसज्येतेति चेन्नैष दोषः कुतः तदपेक्षत्वात् दृष्टादि हि कर्म्मजातं चरणापेक्षं न हि सदाचारहीनः कश्चिदधिकृतः स्यात्। "आचारहीनं न पुनन्ति वेदा" इत्यादि स्मृतिभ्यः पुरुषार्थत्वादाचारस्य नानर्थक्यम्। दृष्टादौ हि कर्म्मजाते फलमारभमाणे तदपेक्षएवाचारस्तत्रैव कञ्चिदतिशयमारभ्यते कर्म च सर्व्वार्थकारीति स्मृतिस्मृतिप्रसिद्धिः। तस्मात्कर्म्मैव च शीलोपलक्षितमनुशयभूतं योन्यापत्तौ कारणमिति काष्णाजिनेर्मतम्। न हि कर्म्मणि संभवति शीलाद्योन्यापत्तिर्युक्ता न हि यद्वां पलायितुं पारयमाणोजानुभ्यां रंहितुमर्हतीति" भा०। "सुकृतदुष्कृते एवेति बादरिः" शा०सू० "बादरिस्त्वाचार्य्यः सुकृतदुष्कृते एव चरणशब्देन प्रत्याय्येते इतिमन्यते चरणमनुष्ठानं कर्मेत्यनर्थान्तरम्। तथा ह्यविशेषेण कर्म्ममात्रे चरतिः प्रयुज्यमानो दृश्यते यो हि दृष्टादिलक्षणं पुण्यं कर्म करोति तं लौकिका आचक्षते धर्म्मं चरत्येष महात्मेति। आचारोऽपि धर्म्मविशेषएव। भेदव्यपदेशस्तु कर्म्मचरणयोर्ब्राह्मणपरिव्राजकन्यायेनाभ्युपपद्यते। तस्माद्रमणीयचरणाः पुण्यकर्म्माणः कपूयचरणा निन्दितकर्म्माण इति निर्णयः" भा०। अत्र शीलाचारयोः पर्य्यायत्वोक्त्या "वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदाम्। आचारश्चैव साधूनामात्मनस्तुष्टिरेव च" मनुवचने शीलस्य पृथगुक्तिर्ब्राह्मणपरिव्राजकन्यायेनेति बोध्यम्। अतएवानन्तरं मनुनैव "वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः। एतच्चतुर्विधं प्राहुः साक्षाद्धर्म्मस्य लक्षणम्" शीलाचारान्तर्भावाभिप्रायेण चतुष्कस्य धर्म्ममूलत्वमुक्तम्। शीलञ्च "ब्रह्मण्यता देवपितृभक्तता, सौम्यता अपरोपतापिता अनसूयता मृदुता, अपारुष्यं मैत्रता, प्रियवादित्वं कृतज्ञता, शरण्यता, कारुण्यं प्रशान्तिश्चेति त्रयोदशविधं शीलमिति" हारीतोक्तं तच्चाचार भेद एव। मेधातिथिस्तु शील समाधाविति धातोरौपसर्गिका "शीलं समाधानम् समाधानञ्च मानसोव्यापारः यच्चेतसोऽन्यविषयेषु विक्षेपपरिहारेण शास्त्रार्थनिरूपणप्रवणता तच्छीलमुच्यते" इत्याह। तदप्याचार एवान्तर्भवति। तत्र सदाचाराणां वेदस्मृतिमूलकत्वेन तयोरेव तन्मूलत्वं स्यादाचाराणामित्याह्न याहशाचारस्य धर्म्ममूलत्वं तमाह मेधातिथिः। "आचारोव्यवहारोऽनुष्ठानम्। यत्र श्रुतिस्मृतिवाक्यानि न सन्ति शिष्टाश्च धर्म्मबुद्ध्याऽनुतिष्ठन्ति तदपि वैदिकवत् प्रतिपत्तव्यम् यथा विवाहादौ कङ्कणधारणादि माङ्गलिकत्वेन यत् क्रियते। याच विवाहयिष्यमाणायाः कन्यायाः प्रख्यातदत्तचतुष्पथादिपूजा देशभेदेनेत्यादि" एवं लोकाद्याचरणम्। यन्यादौ देवतास्तुतिनमस्कारादिमङ्गलाचरणञ्च बोध्यम्। स्पष्टमुक्तं प्रयोगपारिजाते स्कन्दपु०। "न यत्र साक्षाद्विधयो न निषेधाः श्रुतौ स्मृतौ। देशाचारकुलाचारैस्तत्र धर्म्मो निरूप्यते" अत्र न निषेधा इत्युक्तेः श्रुतिस्मृत्योर्विरोधे आचारस्य न प्रामाण्यमिति गम्यते। तच्चानुपदं विवेक्तव्यम्। स च देशभेदात् कुलभेदात् पुरुषभेदाच्च नानाविधः प्रातिस्विकरूपेण गणयितुमशक्यः। श्रुतिस्मृत्यविरुद्धः सर्व्वोऽपि सदाचारः धर्म्ममूलमतएवास्माल्लाक्षत्यसूक्तम् 'देशानुगिष्टं कुलधर्म्ममन्यां स्वजातिधर्म्मं न हि संत्यजेच्च'। एवं पित्राद्याचारोऽपि धर्म्ममूलतया याह्यः "येनास्य पितरोयाता येन याताः पितामहाः।

तेन यायात् सतां मार्गं तेन गच्छन् न रिष्यते" मनुक्तेः। अत्र सन्मार्गमिति विशेषणात् कदाचारो न धर्ममूलमिति गम्यते ततश्च षोडशिग्रहणाग्रहणयोरुदितानुदितहोमयोः वैकल्पिकयोरेव पित्राद्याचारस्य प्रामाण्यं तदज्ञाने आत्मतुष्टेः इति द्रष्टव्यम्। तदयं निर्गलितार्थः। यत्र श्रुतिस्मृतिहैधम् तत्र सदाचारदर्शनेन शास्त्रार्थं निश्चित्य सद्भिराचरितमार्गेणाचरणं प्रथमः कल्पः। तदसम्भवे तु पित्राद्याचारदर्शनेन एकतरपक्षाश्रयणं तस्याप्यज्ञाने आत्मतुष्टयेत्र तदेवाचरितव्यमिति। यत्र साक्षात् श्रुतिस्मृतौ मूलं नोपलभ्येते एवं विरुद्धार्थश्रुतिस्मृती वा नोपलभ्येते तत्रापि सदाचारस्य धर्ममूलत्वम् "न यत्र साक्षाद्विधयो न निषेधाः श्रुतौ स्मृतौ" इति प्रागुक्तस्कान्दवाक्यात् यत्र तु विरुद्धार्थश्रुतिस्मृती उपलभ्येते तत्र न सदाचारः प्रमाणम् यथा दाक्षिणात्यानां शिष्टानां मातुलकन्यादि परिणयनाद्याचारः। स त्वनाचारोऽपि तद्देशीयानां स्वल्पदोषावेति व्यवस्थापितमनाचारशब्दे १५७ पृष्ठे द्रष्टव्यम्। सदाचारस्य च स्मृतेरिव न साक्षात् श्रुतिकल्पकता किन्तु स्मृतिद्वारैवेति जैमिनीयन्यायमालायां प्रथमाध्याये निरूपितं तत्रैव विस्तरो द्रष्टव्यः। एवञ्च श्रुतेः स्मृत्युपजीव्यत्ववत् आचारस्य स्मृत्युपजीव्यतया ततोदुर्बलत्वम् दुर्बलेन च तेन बलीयसोबाधायोगाच्च नाचारेणोपजीव्यजातीयस्मृतिबाधोयुक्तः अतएव जैमिनिना "विरोधे त्वनपेक्षत्वमसति ह्यनुमानमिति" सूत्रे उपजीव्योपजीवकयोर्विरोधे उपजीवकस्यानपेक्षता अननुष्ठानम् असति तु विरोधे उपजीवकेन स्मृत्याचारपदार्थेन उपजीव्ययोः श्रुतिस्मृत्योरनुमानमित्युक्तम्" ततश्च स्मृतिविरोधे आचारस्य न प्रामाण्यमिति स्थितम्। अतएव दुर्बलत्वाभिप्रायेणैव भा० आ० प०। "धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः। द्वितीयं धर्मशास्त्रञ्च तृतीयं लोकसंग्रहः" इति लोकाचारस्य तृतीयत्वं, श्रुतेः परमत्वोक्ता च स्मृतेर्द्वितीयत्वमुक्तम्। स्वपक्षमुक्तम्" प्रयो० पा०स्मृतौ। "स्मृतेर्वेदविरोधे तु परित्यागो यथा भवेत्। तथैव लौकिकाचारं स्मृतिबाधे परित्यजेत्" "तदलाभे शिष्टाचारः प्रमाणम्" इति वशिष्ठेन शास्त्रालाभे एव शिष्टाचारस्य साक्षात्ताऽभिहिता। शिष्टाचारश्च यद्यपि देशभेदात् नानाविधः तथापि मनुना ब्रह्मावर्त्तदेशीयानामेव पारम्पर्यागताचारस्यैव सदाचारतायाः व्यवस्थापनात् तत्तत्पारम्पर्यक्रमागताचारएव सदाचारः। ब्रह्मावर्त्तं परिभाष्य यथाह मनुः "तस्मिन् देशे य आचारः पारम्पर्यक्रमागतः। वर्णानां सान्तरालानां स सदाचार उच्यते" इति तथा "कुरुक्षेत्रं च मत्स्याश्च पञ्चालाः शूरसेनकाः एष ब्रह्मर्षिदेशोवै ब्रह्मावर्त्तादनन्तरम्। एतद्देशप्रसूतस्य। सकाशादग्रजन्मनः। स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः" इति मनुना ब्रह्मर्षिदेशवासिविप्रसकाशात् सदाचारस्य शिक्षणीयत्वोपदेशात् तद्देशीयाचारोऽपि सदाचार इति गम्यते। सदाचारोऽपि न केवलं शास्त्रमूलकः किन्तु शास्त्रमूलकोऽपि तच्च शास्त्रं मानवादिसंहितादि। तत्र काशीखण्डे शास्त्रमूलकाः सदाचाराः सङ्क्षिप्तप्रशंसापूर्वं केचित् दर्शिता यथा।

"लक्षणैः परिहीनोऽपि सम्यगाचारतत्परः। श्रद्धावाननसूयश्च नरोजीवेच्छमाः शतम्। दुराचाररतोलोके गर्हणीयः पुमान् भवेत्। व्याधिभिश्चाभिभूयेत तथाल्पायुः सदुःखभाक्। त्याज्यं कर्म्म पराधीनं कार्य्यमात्मवशं सदा। दुःखी यतः पराधीनः सदैवात्मवशः सुखी। यस्मिन् कर्म्मण्यन्तरात्मा क्रियमाणे प्रसीदति। तदेव कर्म्म कर्त्तव्यं विपरीतं न चाचरेत्। प्रथमं धर्म्मसर्वस्वं प्रोक्ता यच्चियमायमाः। अतस्तेष्वेव वै यत्नः कर्त्तव्योधर्म्मभिच्छता। सत्यं क्षमाञ्चैवं ध्यानमानृशंस्यमहिंसनम्। दमः प्रसादोमाधुर्य्यं स्मृतुतेति यमा दश। शौचं स्नानं तपोदानं मौनेज्याध्ययनं व्रतम्। उपोसनोपस्थदण्डोदकेति नियमाः स्मृताः। कामं क्रोधं मदं मोहं मात्सर्य्यं लोभमेव च। अमून् षट् वैरिणो जित्वा सर्वत्र विजयी भवेत्। शनैः शनैः सञ्चिनुयाद्धर्म्मं वल्मीकमिवकृत्स्नवत्। परपीड़ामकुर्व्वाणः परलोकसहायकः। धर्म्म एव सहायी स्यादसत्र न परिच्छदः। पिण्डमात्रसुतभ्रात्रयोपिद्भृज्यजनादिकः। जायेत चैकलः प्राणी म्रीयेत तथैकलः। एकलः सुकृतं भुङ्क्तेऽश्नीयाद्दुष्कृतमेकलः। देहं पञ्चत्वमापन्नं त्यक्त्वासौ काष्ठलोष्ठवत्। बान्धवाविमुखायान्ति धर्म्मोयान्तमनुव्रजेत्। नित्यं सञ्चिनुयाद्धर्म्मं ततोऽसत्र सहायिनम्। धर्म्मं सहायिनं लब्ध्वा सन्तरेद्दुस्तरं तमः। सम्यग्ज्ञानाचरेच्चित्यसत्तमैरुत्तमैः सुधीः। अधमानधमांस्त्यक्त्वा कुलमुत्कर्षतां नयेत्। उत्तमानुत्तमानेव कुर्व्वन् हीनांश्च वर्ज्जयन्। ब्राह्मणः श्रेष्ठतामेति प्रत्यवायेन शूद्रताम्। अनध्ययनशीलञ्च सदाचारविलङ्घिनम्। अलसं च दुराचारं ब्राह्मणं बाधतेऽल्पकः।

ततोऽभ्यस्येत्प्रयत्नेन सदाचारं सदा द्विजः । तीर्थान्य-
भिलषन्ति सदाचारसमागमम्" इति । प्रयत्न "रजनी-
प्रान्त्ययामार्द्धं ब्राह्मः समयउच्यते । स्मरितं चिन्तयेत्-
प्राज्ञस्तस्मिंश्चोत्थाय सर्वदा । गजास्यं संस्मरेदादौ ततश्चैवं
सहाम्बया । श्रीकान्तं श्रीसमेतं तु ब्रह्माख्या कमलोद्भवम्
इन्द्रादीन् सकलान्देवान् वशिष्ठादीन् मुनीनपि । गङ्गाद्याः
सरितः सर्वाः श्रीशैलाद्यखिलान् गिरीन् । क्षीरोदादीन्
समुद्रांश्च मानसादिसरांसि च । वनानि नन्दनादीनि धेनूः ।
कामदुघादिकाः । कल्पवृक्षादिवृक्षांश्च धातून् काञ्चनसु-
खतः । दिव्याः स्त्रीरूर्वशीसुख्या गरुडादीन् पतत्रिणः ।
नागांश्च शेषप्रमुखान् गजानैरवतादिकान् । अश्वानुच्चैः-
श्रवान् मुख्यान् कौस्तुभादीन् मणीन् शुभान् । खरेदरम्भा-
तीसख्याः पतिव्रतवतीर्वधूः । नैर्ऋतादीन्धरण्यादि पुरीः
काशीपुरीमुखाः । विश्वेशादीनि लिङ्गानि वेदानृक्
प्रमुखानपि । गायत्रीप्रमुखान् मन्त्रान् योगिनः सनका-
दिकान् । प्रणवादि महाबीजं नारदादींश्च वैष्णवान् ।
शिवभक्तांश्च वाणादीन् प्रह्लादादीन् दृढव्रतान् । वदान्यांश्च
दधीच्यादीन् हरिश्चन्द्रादिभूपतीन् । जननीचरणौ स्मृत्वा
सर्वतीर्थोत्तमोत्तमौ । पितरं च गुरुं चापि हृदि ध्यात्वा-
प्रसन्नधीः । ततश्चावश्यकं कर्तुं नैर्ऋतीं दिगमाश्रयेत् ।
यामाद्दुःश्रुतं गच्छेन्नगराच्च चतुर्गुणम् । तृणैराच्छाद्य
वसुधां गिरः प्रच्छाद्य वाससा । कर्णोपवीत्युदग्वक्त्रो
दिवसे सन्ध्ययोरपि । विण्मूत्रे विसृजेन्नौनी निशायां
दक्षिणामुखः । न तिष्ठन्नाप्सु नोविप्रगोवह्न्यनिलसंमुखः ।
न फालकृष्टे भूभागे न रथ्यासेव्यभूतले । नालोकवेद्दिशो-
भागान् ज्योतिश्चक्रं नभोऽमलम् । वामेन पाणिना लिङ्गं
धृत्वोत्तिष्ठेत् प्रयत्नवान् । अधो मृदं समादत्ते जन्तुकर्कर-
वर्जिताम् । विहाय मूषिकोत्खातां गौचोच्छिष्टाञ्च नाकु-
लाम् । गुह्ये दद्यान्मृदश्चैकां पायौ पञ्चाम्बुसान्तराः ।
दश वामकरे चापि सप्त पाणिद्वये मृदः । एकैकां पादयो-
र्दद्यात्तिस्रः पार्ष्णोर्मृदः स्मृताः । इत्थं शौचं स्मृतौ कुर्या-
द्गन्धलेपक्षयावधि । क्रमादिदं गुणमेतत्स्माद्धृच्चार्य्यादिषु
त्रिषु । दिवा विहितशौचानां रात्रावर्द्धं समाचरेत् । रात्रर्द्धं
च तदर्द्धं च पथि चौरादिगर्हिते । तदर्द्धं योषितां सुख्ये-
नूनं चातो न कारयेत् । अपि सर्वैर्नदीतोयैर्मृत्कूटैश्चापि-
गोमयैः । आषादमाचरन् शौचं भावदुष्टो न शुद्धि-
भाक् । अर्द्धामलीफलोन्माना मृदः शौचे प्रकीर्त्तिताः ।
सर्वाचाम्तयोऽप्येवं यासाचान्द्रायणेऽपि च" ततः
आचमनप्रकारोऽभिहितः स च ६२८ पृष्ठे दर्शितः ।
"अथो मुखं विशुद्ध्यर्थं स्मृतीयाह्नधावनम् । आचान्तोऽथ
शुचिर्यस्मादक्षता दन्तधावनम् । प्रतिपद्दर्शषष्ठीषु नवम्यां
रविवासरे । दन्तानां काष्ठसंयोगे दहत्यासप्तमं कुलम् ।
अलाभे दन्तकाष्ठानां निषिद्धेऽह्नि वासरे । गण्डूषा द्वा-
दश प्राह्या मुखस्य परिशुद्धये । कनिष्ठाग्रपरिमाण-
सत्वचं निर्व्रणं दृढम् । द्वादशाङ्गुलमानञ्च साग्रं स्या-
द्दन्तधावनम् । एकैकाङ्गुलिहासेन वर्षैर्ध्वन्येषु तूदितम् ।
आस्याम्लातकधात्रीजम्बीठखदिरोद्भवम् । शम्यपामार्ग-
खर्जूरीवेल्वौपर्ष्यपीलुजम् । राजादनं च नारङ्गं
कषायं कटुकरुक्षकम् । क्षीरवृक्षोद्भवं वापि प्रशस्तं दन्तधा-
वनम् । जिह्वोल्लेखनिकां वापि कुर्याद्वापाङ्गतिं शुभाम् ।
"अन्नाद्याय व्यूहध्वं सोमोराजायमागमत् । स मे मुखं
प्रमार्ष्ट्वैतं यशसा च भगेन च । आयुर्बलं यशोवर्च्चः प्रजाः पशु-
वस्तनि च । ब्रह्म प्रज्ञां च मेधां च तन्नो धेहि वनस्पते" ।
मन्त्रावेतौ समुच्चार्य्य यः कुर्याद्दन्तधावनम् । वनस्पतिगतः
सोमस्तस्य नित्यं प्रसीदति । मुखे पर्य्युषिते यस्माद्भवेच्च शुद्धि-
भाङ्नरः । ततः कुर्यात्प्रयत्नेन शुद्ध्यर्थं दन्तधावनम् ।
उपवासेऽपि नो दुष्येद्दन्तधावनमञ्जनम् । गन्धालङ्कार-
द्रव्यं पुष्पमाल्यानुलेपनम् । प्रातः सन्ध्यां ततः कुर्याद्दन्धा-
वन पूर्विकाम् । प्रातः स्नानं चरित्वाथ शुद्धेतोर्थे विशेषतः ।
प्रातः स्नानाद्यतः शुद्धेरुत्कायोऽयं मलिनः सदा । क्लिद्यितो
नवभिश्छिद्रैः स्रवत्येव दिवानिशम् । उत्साहमेधासौ-
भाग्यरूपसंपत्प्रवर्त्तकम् । मनःप्रसत्तताहेतुः प्रातः स्नानं
विधिष्यते । प्रस्वेदलालाद्याखिन्नो निद्राधीनोयतोनरः ।
प्रातः स्नानात्ततोऽङ्गानि स्नान्मन्त्रस्तोत्रजपादिषु । प्रातः प्रात-
स्तु यत् स्नानं संजाते चारुणोदये । प्राजापत्यसमं प्राहु-
स्तन्महापविधातकृत् । प्रातः स्नानं हरेत्पापमलक्ष्मीं
ग्लानिमेव च । अशुद्धित्वञ्च दुःस्वप्नं दुष्टिं पुष्टिं प्रय-
च्छति । नोपसर्पन्ति वै दुष्टाः प्रातः स्नायिजनं क्वचित् ।
दृष्टादृष्टफलं तस्मात्प्रातः स्नानं समाचरेत्" । अन्यत्राध्याये
च "अथवा प्रातरुत्थाय कृत्वावश्यकमेव च । शौचाचमन-
माधाय भक्त्यवेद्दन्तधावनम् । विशोध्य सर्वगात्राणि प्रातः
सन्ध्यां समाचरेत् । वेदार्थानधिगच्छेच्च शास्त्राणि
विविधानि च । अध्यापयेच्छुचीन् शिष्यान् हितमेधा
समर्द्धितात् । उमेशादीश्वरं चापि योगक्षेमार्थसिद्धये ।
ततो मध्याह्नसिद्ध्यर्थं पूर्व्वोक्तं स्नानमाचरेत् । स्नात्वा
माध्याह्निकीं सन्ध्यासुपासीत विचक्षणः । देवतां परिपूज्याथ

नैत्यिकं विधिमाचरेत् । पचनाग्निं समुज्ज्वाल्य वैश्वदेवं समाचरेत् । निष्पावान् कोद्रवान् माषान् कलायांश्चनकांस्त्यजेत् । तैलपक्वं च पक्वान्नं सर्वं लवणयुक्त्यजेत् । आढकांश्च मसूरांश्च वर्त्तुलान् वर्वटीस्तथा । भुक्तशेषं पर्य्युषितं वैश्वदेवे विवर्ज्जयेत् । दर्भपाणिः समाचम्य प्राणायामं विधाय च । पृथ्वीदेवेति मन्त्रेण पर्य्युक्षणमथाचरेत् । प्रदक्षिणञ्च पर्य्युक्ष्य त्रिः परिस्तीर्य्य वै कुशान् । एषोऽर्घदेवमन्त्रेण वह्निं कुर्य्यात् समंसुखम् । वैश्वानरं समभ्यर्च्य वाच्य पुष्पाक्षतैरथ । भूराद्याद्याहुतीस्तिस्रः स्वाहान्ताः प्रणवादिकाः । ओं भूर्भुवः स्वः स्वाहेति विप्रोदद्यात्तथाहुतिम् । तथा देवकृतस्याद्याज्जुह्वाच्च षड़ाहुतीः । यमाय त्वेणीमेकाञ्च तथा क्षिप्तते हयम् । विश्वेभ्यश्चापि देवेभ्योभूमौ दद्यात्ततो बलीन् । सर्वेभ्यश्चापि भूतेभ्योनमोदद्यात्तदुत्तरे । तद्दक्षिणे पितृभ्यश्च प्राचीनावीतिकोददेत् । निर्णेजनोदकार्थं वैशान्यां वै यक्ष्माणार्द्धयेत् । ततो ब्रह्मादिदेवेभ्यो नमोदद्यात्तदुत्तरे । निवीती सनकादिभ्यः पितृभ्यस्तर्पयेत्ततः । हन्त षोड़शभिर्मासैश्चतुर्भिः पुष्कलं हृतम् । यासमात्रा भवेद्भिक्षा गृहस्थस्यामृतप्रदा । अध्वगः क्षीणवृत्तिश्च विद्यार्थी गुरुपोषकः । यतिश्च ब्रह्मचारी च षड़ेते धर्मभिक्षुकाः । अतिथिः पान्थकोत्तेयोऽनूचानः श्रुतिपारगः । मान्यावेतौ गृहस्थानां ब्रह्मलोकमभीप्सताम् । अपि श्वपाके शुनि वा नैवान्नं निष्फलं भवेत् । अन्नार्थिनि समायाते पात्रापात्रं न चिन्तयेत् । शुनाञ्च पतितानाञ्च श्वपचां पापरोगिणाम् । काकानाञ्च कृमीणाञ्च बहिरन्नं किरेद्भुवि । "ऐन्द्रावरुणवायव्याः सौम्या वै नैर्ऋताश्च ये । प्रतिगृह्णन्त्विमं पिण्डं काका भूमौ मयार्पितम् । द्यौश्चानौ श्यामशबलौ वैवस्वतकुलोद्भवौ । ताभ्यां पिण्डं प्रदास्यामि स्यातामेतावहिंसकौ । देवा मनुष्याःपशवो वयोरक्षोरगाः खगाः । दैत्याः सिद्धाः पिशाचाश्च प्रेताभूताश्च दानवाः । कृमयानि तरवश्चापि मदन्नेनाभिलाषुकाः । कृमिकोटपतङ्गाद्याः कर्म्मबन्धा बुभुक्षिताः । तत्प्रार्थमन्नं हि मया दत्तं तेषां सुदेऽस्तु वै" । इत्थं भूतबलिं दत्त्वा कालं गोदोहमात्रकम् । प्रतीक्षेतातिथिं यावन्न विशेद्भोज्यमद्दहं ततः । अदत्त्वा वायसबलिं नित्यश्राद्धं समाचरेत् । नित्यश्राद्धेषु सामर्थ्यात् त्रीन् द्वावेकमथापि वा । भोजयेत् पितृयज्ञार्थं दद्याद्वृत्त्य दुर्बलः । नित्यश्राद्धं देवहीनं नियमादि विवर्ज्जितम् । दक्षिणारहितञ्चैतत् दाहभोक्तृव्रतोज्झितम् । पितृयज्ञं विधायेत्थं स्वकुटुम्बिरनाहरः । अदुष्टासनमध्यास्य भुञ्जीत शिशुभिः सह । सुगन्धिः सुमनाः स्वग्वी शुचिवासोऽद्यान्वितः । प्राणाग्न उदगास्योवाभुञ्जीत पितृसेवितम् । विधायाचमनन्नद्वदुपरिष्टादधस्तथा । आपोशानविधानेन कृत्वाऽश्नीयात् सुधीर्द्विजः । प्रदद्याद्भुवःपतये भुवनपतये तथा । भूतानां पतये स्वाहेत्युक्त्वा भूमौ बलित्रयम् । सकृज्जाप उपस्पृश्य प्राणाद्याहुतिपञ्चकम् । दद्याज्जठरकृष्णाग्नौ दर्भपाणिः प्रसन्नधीः । दर्भपाणिस्तु योभुङ्क्ते तस्य दोषो न बाधते । केशकीटादिसंभूतं तदश्नीयात् सदर्भकः । यावत्तद्भुक्तमश्नीयान्न ब्रूयात्तद्गुणागुणान् । भुञ्जते पितरस्तावद्यावन्नोक्ता गुणागुणाः । अतोमौनेन योभुङ्क्ते स भुङ्क्ते केवलामृतम् । अनुपीय ततः क्षीरं भक्ष्यं पानीयमेव वा । अस्तापिधानमसीत्येवं प्राश्योदकं सकृत् । पीतशेषं चिपेद्भूमौ तोयं मन्त्रमिमं पठन् । शुभ्रक्षालित हस्तस्य दक्षिणाङ्गुष्ठमूलतः । "रौरवेःपुण्यनिलये पद्मार्बुदनिवासिनाम् । उच्छिष्टोदकमिच्छूनामक्षय्यमुपतिष्ठताम्" । पुनराचम्य मेधावी शुचिर्भूत्वा प्रयत्नतः । हस्तेनोदकमादाय मन्त्रमेतदुदीरयेत् । "अङ्गुष्ठमात्रः पुरुषस्त्वङ्गुष्ठञ्च समाश्रितः । ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक्" । इत्थं परिसंकल्प्य प्रक्षाल्य चरणौकरौ । ततोऽग्निपरिषाकार्थं मन्त्रानेतानुदीरयेत् । "अग्निराप्याययेद्धातून् पार्थिवान् पवनेरितः । दत्तावकाशोनभसा जरयत्वस्तु मे सुखम् । प्राणापानसमानानामुदानव्यानयोस्तथा । अन्नं सुपिकरं चास्तु मयास्वव्याहृतं सुखम् । सप्तद्रोवड़वाग्निश्च ब्रह्मोब्रह्मस्य नन्दनः । मयाऽभ्यवहृतं यत्तदग्नेयं जरयन्त्विमे" । सुखशुद्धिं ततः कृत्वा पुराणश्रवणादिभिः । अतिवाह्य दिवाग्नेयं ततः सन्ध्यां समाचरेत् । गृहे गोष्ठे नदीतीरे सन्ध्या दशगुणा क्रमात् । संभेदे स्याच्छतगुणा ह्यनन्ता शिवसन्निधौ । उपासिता बहिः सन्ध्या दिवासैथुनपातकम् । शमयेदस्ततोऽक्षार्थं मद्यगन्धजमेव च । पश्चिमास्योजपेत्तावद्यावन्नक्षत्रदर्शनम् । अतिथिं सायमायान्तमपि वा भूतशोदकैः । सम्भाव्य परिकल्पेत्थं निशः प्राक् प्रहरं सुधीः । इत्थं दिवा कर्म कृत्वा श्रुतेः पठनपाठनैः । एककाष्ठमयीं शय्यां नातिह्रस्वोऽथ संविशेत् । उद्देशतः समाख्यात एष नित्यतनोविधिः । इत्थं समाचरन् विप्रोनावसीदति कर्हिचित्" । इत्थं नित्यधर्माचरणमुक्ता गृहस्थवर्ज्यावर्ज्यविशेषमाह वोक्तः

"ऋतुकालाभिगमनं धर्म्योऽयं गृहिणः परः। स्त्रीणां वर मनुस्मृत्य यथाकाम्यथ वा भवेत्। दिवाभिगमनं पुंसामनायुष्यंपरं मतम्। श्राद्धाहः सर्व्वपर्व्वाणि यत्नात् त्याज्यानि धीमता। तत्र गच्छन् स्त्रियं मोहात् धर्म्मात्प्रच्यवते परात्। ऋतुकालाभिगामी यः स्वदारनिरतश्च यः। स ब्रह्मचारी धर्मज्ञोविज्ञेयः स गृहाश्रमी। ऋतुःषोड़शयामिन्यश्चतस्रस्तासु गर्हिताः। पुत्रास्तासपि वा युग्माः अयुग्माः कन्यकाप्रजाः। त्यक्त्वा चन्द्रमसं दुःस्थं मघां मूलां विहाय च। शुचिः संनिविशेत्पत्नीं पुंनामश्च विशेषतः। शुचिं पुत्रं प्रसूयेत पुरुषार्थप्रसाधकम्। आर्षे विवाहे गोद्वन्द्वं यदुक्तं तन्न गृह्यते। शुल्कमप्यपि कन्यायाः कन्याविक्रयपापकृत्। अपत्यविक्रयी कल्पं वसेद्विट्कृमिभोजने। अतोनाप्यपि कन्यायाः उपजीवेत्पिता धनम्। स्त्रीधनान्युपजीवन्ति ये मोहादिह बान्धवाः। न ते परं निरयगास्तेषामपि हि पूर्व्वजाः। पत्या तुष्यति यत्र स्त्री तुष्येद्यत्र स्त्रिया पतिः। तत्र तुष्टा महालक्ष्मीर्निवसेद्दानवारिणा" "वाणिज्यं नृपतेः सेवा वेदानध्ययनं तथा। कृषिवाहः क्रियालोपः कुले पतनहेतवः। कुर्य्याद्वैवाहिके वह्नौ गृह्यं कर्म्मान्वहं गृही। पञ्चयज्ञक्रियां वापि पक्तिं दैवन्दिनीमपि। गृहस्थाश्रमिणः पञ्चसूनाकर्म्म दिनेदिने। कण्डनी पेषणी चूल्ही उदकुम्भस्तु मार्ज्जनी। तासाञ्च पञ्चसूनानां निराकरणहेतवः। क्रतवः पञ्च निर्द्दिष्टास्तद्विज्ञैर्योऽभिवर्द्धनाः। पठनं ब्रह्मयज्ञः स्यात्तर्पणञ्च पितृव्रतः। होमोदैवो बलिर्भौतोऽतिथ्यर्च्चा क्रतवः क्रमात्। पितृप्रीतिं प्रकुर्व्वाणः कुर्वीत श्राद्धमन्वहम्। अन्नोदकं पयोमूलफलैर्वापि गृहाश्रमी। गोदानेषु च यत्पुण्यं पात्राव विधिपूर्वकम्। सत्कृत्य भिक्षवे भिक्षां दत्त्वा तत्फलमाप्नुयात्। तपोविद्यासमिद्धोग्रे हुतं विप्रास्यपावके। तारयेद्विघ्नसंघेभ्यः पापाब्धेरपि दुस्तरात्। अनर्च्चितोऽतिथिर्गेहात् भग्नाशो यस्य गच्छति। आजन्म सञ्चितात् पुण्यात् तत् क्षणात् स बहिर्भवेत्। सान्त्वपूर्व्वाणि वाक्यानि शय्यार्थं भूस्तृणोदकैः। एतान्यपि प्रदेयानि सदा सन्तुकृतुष्टये। गृहस्थः परपाकाढ्यः प्रेतः सन् पशुपतां व्रजेत्। त्रेधः परार्थपुष्टस्य गृह्णीयादन्नदोषतः। आदित्योढ़ोऽतिथिः सायं सत्कर्त्तव्यः प्रयत्नतः। असत्कृतोऽन्यतोगच्छन् दुष्कृतं भूरि यच्छति। भुञ्जानोऽतिथिशेषान्नमिहायुर्धनभाग्भवेत्। प्रणोद्यातिथि सन्ध्यायी किल्बिषी च गृहाश्रमी। वैश्वदेवान्तसंप्राप्तः सूर्य्योढोवाऽतिथिः स्मृतः। न पूर्व्वकाल आयातो न च ह्यटवरः क्वचित्। बलिपात्रकरे विप्रे यद्यन्योऽतिथिरागतः। अदत्त्वा तं बलिं तस्मै यथाशक्त्यन्नमर्पयेत्। कुमाराश्च सुवासिन्योगर्भिण्योऽतिवृजान्विताः। अतिथेरादितोऽप्येते भोज्या नात्र विचारणा। पितृदेवमनुष्येभ्योदत्त्वान्नाद्यमृत्तमं गृही। स्वार्थं पचन्नघं भुङ्क्ते केवलं खोदमश्नुते। माध्याह्निकं वैश्वदेवं गृहस्थः स्वयमाचरेत्। पत्नी सायं बलिं दद्यात् सिद्धान्नैर्मन्त्रवर्जितम्। एतत्सायन्तनं नाम वैश्वदेवं गृहाश्रमे। सायं प्रातर्भवेद्देवं वैश्वदेवं प्रयत्नतः। वैश्वदेवेन ये हीना आतिथ्येन विवर्जिताः। सर्व्वे ते वृषलास्तेया प्राग्वेदा अपि द्विजाः। अकृत्वा वैश्वदेवं तु भुञ्जते ये द्विजाधमाः। इह लोकेऽन्त्यहीनाः स्युः काकयोनिं व्रजन्त्यथ। वेदोदितं स्वकं कर्म्म नित्यं कुर्य्यादतन्द्रितः। तद्धि कुर्व्वन् यथाशक्ति प्राप्नुयात् स्वर्गतिं पराम्। षष्ठ्यष्टम्योर्वसेत्पापं तैले मांसे सदैव हि। पञ्चदश्यां चतुर्दश्यां तथैवच भगे क्षुरे। उदयन्तं न चेक्षेत नास्तं यान्तं न मध्यगम्। न राहुग्रस्तं च नाम्बुस्थं दिवाकरम्। न वीक्षेतात्मनोरूपमशुद्धावेव वर्षति। नोलूकवेदलतन्त्रीं न नग्नोजलमाविशेत्। देवतायतनं विप्रं धेनुं मधु घृतं गुरुम्। जातिवृद्धं वयोवृद्धं विद्यावृद्धं तपस्विनम्। अश्वत्थं चैत्यवृक्षं च गुरुं जलभृतं घटम्। सिद्धान्नं दधि सिद्धार्थं गच्छन् कुर्य्यात्प्रदक्षिणम्। रजस्वलां न सेवेत नाश्नीयात् सह भार्य्यया। एकवासा न भुञ्जीत न भुञ्जीतोत्कटासने। नाशुतौ स्त्रीं समश्नेत तेजस्कामोद्विजोत्तमः। असंतर्प्य पितॄन् देवान् नाद्यादन्नं नरः क्वचित्। पक्वान्नं चापि नो मांसं दीर्घकालं जिजीविषुः। न मूत्रं गोव्रजे कुर्य्यान्न वल्मीके न भस्मनि। न गर्त्तेषु ससत्त्वेषु न तिष्ठन्न व्रजन्नपि। गोविप्रसूर्य्यवाय्वग्नि चन्द्रार्काम्बुगुरूनपि। अभिपश्यन्न कुर्वीत मूत्रोच्चारविसर्ज्जनम्। तिरस्कृत्यावनीं लोष्ट्र काष्ठपर्णतृणादिभिः। प्राङ्मुख्यवाससा मौलिं मौनो विण्मूत्रमुत्सृजेत्। यथासुखसुखोरात्रौदिने छायान्धकारयोः। मीतिषु प्राणबाधायां कुर्य्यान्मलविसर्ज्जनम्। मुखेनोपधमेन्नाग्निन्नग्नां नेक्षेत योषितम्। नाङ्घ्री प्रतापयेदग्नौ न वस्तु शुचि निक्षिपेत्। प्राणिहिंसां न कुर्वीत नाश्नीयान्मध्ययोर्द्वयोः। न संविशेच्च सन्ध्यायां प्रत्यक्सौम्यशिरा अपि। विण्मूत्रक्षीवनं नाम्नु कुर्य्याद्दीर्घं जिजीविषुः। नाचक्षीत धयन्तीं गां नैन्द्रं चापं प्रदर्शयेत्। नैकः सुप्यात् क्वचित् शून्ये न श्वयानं प्रबोधयेत्। पन्थानं

नैकको यायाच्च वार्य्यञ्जलिना पिबेत् । न दध्युद्धृतसारं च भक्षयेद्दधि नो निशि । स्त्रीधर्म्मिणीं नाधिवसेत् नाद्यादा हृप्रि रात्रिषु । तौर्यत्रिकप्रियोनस्यात् कांस्ये पादौ न धावयेत् । न धारयेदन्यभुक्तं वासश्चोपानहावपि । न भिन्नभाजनेऽश्नीयाच्चाम्बादिपरिदूषिते । आरोहणं गवां पृष्ठे प्रेतधूमं परित्यजेत् । बालातपं दिवास्वापं त्यजेद्दीर्घं जिजीविषुः । स्नात्वा न मार्ज्जयेद्गात्रं विसृजेच्च शिखां पथि । हस्तौ शिरोन धुनुयाच्चाकर्षेदासनं पदा । श्राद्धं कृत्वा परश्राद्धेऽश्नीयात् ज्ञानविवर्ज्जितः । दातुः श्राद्धफलं नास्ति भोक्ता किल्बिषभुग्भवेत् । नोत्पाटयेल्लोमनखं दशनेन कदाचन । करजैः करजक्लेदं हस्तक्लेदं विवर्ज्जयेत् । शुभाय न यदायत्यां त्यजेत्तत्कर्म यत्नतः । अपद्वारे न गन्तव्यं स्वेश्वरपरवेश्मनोः । क्रीडेद्बालैः सहासीत न धर्म्मघ्नैर्न रोगिभिः । न शयीत क्वचिन्नग्नः पाणौ भुञ्जीत नैव च । आर्द्रपादकराक्षोऽश्नन्दीर्घकालं च जीवति । संविशेदार्द्रचरणो नोच्छिष्टः क्वचिदाव्रजेत् । शयनस्थोनचाश्नीयान्न पिबेन्न जपेद्द्विजः । सोपानत्कश्च नाचामेन्न तिष्ठन् धारया पिबेत् । सर्व्वं तिलमयं नाद्यात्स्नायं गर्म्माभिलाषुकः । न निरीक्षेत विण्मूत्रे नोच्छिष्टः संस्पृशेच्छिरः । नाधितिष्ठेत्तुषाङ्गार भस्मकेशकपालिकाः । पतितैः सह संवासः पतनायैव जायते । आवयेद्वैदिकं मन्त्रं न शूद्राय कदाचन । ब्राह्मण्याद्धीयते विप्रः शूद्रोधर्म्माच्च हीयते । धर्म्मोपदेशः शूद्राणां स्वश्रेयः प्रतिघातवेत् । द्विजशुश्रूषणं धर्म्मः शूद्राणां हि परोमतः । कण्डूयनं न शिरसः पाणिभ्यां शुभदं मतम् । न ताडयेत् कराभ्यां च क्रोधनं केशलुञ्चनम् । अशास्त्रवर्त्तिनोभूपाद्भीत्या कृत्वा प्रतिग्रहम् । ब्राह्मणः सान्वयोयाति नरकानेकविंशतिम् । अकालविद्युत्स्तनिते वर्षतीं पांशुवर्षणे । महावातध्वनौ रात्रावनध्यायाः प्रकीर्त्तिताः । उल्कापाते च भूकम्पे दिग्दाहे मध्यरात्रिषु । सन्ध्ययोर्वृषलोपान्ते राजचन्द्रस्य सूतके । दर्शेऽष्टकासु भूतानां श्राद्धिकं प्रतिगृह्य च । प्रतिपद्यपि पूर्णायां गजकुम्भात् कृतान्तरे । खरोष्ट्रक्रोडविक्षते समवाये रुदत्यपि । उपाकर्म्मणि चोत्सर्गे नावि मार्गे तरौ जले । आरण्यकमधीत्यापि वाणसान्नोरपि ध्वनौ । अनध्यायेषु चैतेषु नाधीयीत द्विजः क्वचित् । कृतान्नरागो न पठेद्वेदाक्षुद्वाहिबस्तुभिः । भूताद्यैर्भोः पञ्चदश्यैर्ब्रह्मचारी सदा भवेत् । अनायुष्यकरञ्चेह परदारोपसेवनम् । पर्व्वद्विभिः परित्यक्तमात्मानं नावमानयेत् । सदोद्यमवतां यस्माच्छ्रियोविद्या न दुर्लभाः । सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् । प्रियं च नानृतं ब्रूयादेष धर्म्मोघटोद्भव ! । भद्रमेव वदेच्छ्रेयं भद्रमेव विचिन्तयेत् । भद्रैरेव हि संसर्गोनाभद्रैश्च कदाचन । रूपवित्तकुलैर्हीनान् सुधीर्नाधिक्षिपेन्नरान् । पुष्पवन्तौ न लेखेत त्वशुचिर्ज्योतिषाङ्गणम् । वातवेगं मनोवेगं जिह्वावेगञ्च वर्ज्जयेत् । उत्को च द्यूतदौत्यार्त्तद्रव्यं दूरात् परित्यजेत् । गोब्राह्मणाग्नीनुच्छिष्टः पाणिना नैव संस्पृशेत् । न स्पृशेदनिमित्तं च स्वानि स्वानि त्वनातुरः । गुह्यांङ्गान्यपि लोमानि तत्स्पर्शादशुचिर्भवेत् । पादशौचोदकं मूलसेक्तोच्छिष्टोदकानि च । निर्जीवनञ्च श्लेष्माणं स्वहाहूरं विनिःक्षिपेत् । अहर्न्नियं स्नुतेर्जघ्याच्छौचाचरणनिषेधणात् । अहोरात्रात्यागत्या च पूर्व्वजन्म स्मरेद् द्विजः । दद्यान् प्रयत्नाद्गन्धेत दद्यात्तेषां स्वमासनम् । विनघ्नधर्मनिस्तब्धादनुयायाद्यतस्तान् । श्रुतिभूदेवदेवानां नृपसाधुतपस्विनाम् । पतिव्रतानां नारीणां निन्दां कुर्य्यान्न कर्हिचित् । न मनुष्यस्तुतिं कुर्य्यान्नात्मानमवनामयेत् । अभ्युद्यतं न प्रणुदेत्परमर्म्माणि नोच्चरेत् । अधर्म्मादेधते पूर्व्वं विद्वेष्टृनपि संजयेत् । सर्वतोभद्रं पश्येच्च ततोनश्येच्च सान्वयः । उद्धृत्य पञ्च स्नत्पिण्डान् स्नायात् परजलाशये । अनुद्धृत्य च तत्कर्त्तुरेनसः स्यात्तुरीयभाक् । श्रद्धया पात्रमासाद्य यत्किञ्चिद्दीयते वसु । देशे काले च विधिना तदानन्त्याय कल्पते । भूप्रदो मण्डलाधीशः सर्वत्र सुखितोऽमदः । तोयदाता सदा हृष्टो रूपवान् रूपदो भवेत् । प्रदीपदो निर्मलाक्षो गोदातार्यमलोकभाक् । स्वर्णदाता च दीर्घायुस्त्रिलदः स्याच्च सुप्रजाः । वेश्मदोऽत्युच्चसौधेशोवस्त्रदश्चन्द्रलोभाक् । हय प्रदोदिव्ययानोलक्ष्मीवान् छत्रभप्रदः । सुभार्य्यः शिबिकादाता सुपर्य्यङ्कप्रदोऽपि च । धर्म्मैः सर्वैर्द्विभाक् नित्यमभयप्रदईरिता । ब्रह्मदोब्रह्मलोकेज्यो ब्रह्मदः सर्व्वदोमतः । उपायेनापि योब्रह्म दापयेत्सोपि तत्समः । श्रद्धया प्रतिगृह्णाति श्रद्धया यः प्रयच्छति । स्वर्गिणौ तावुभौ स्यातां पततोऽश्रद्धया ह्युभः । अनृतेन चरेद्यस्तपोविक्रयतः चरेत् । चरेत्कीर्त्तनतोदान मायुर्विप्रापवादतः । गन्धपुष्पकृशान् शय्यां शाकं मांसं पयोदधि । मणिमत्स्यौ गृहं धान्यं याचमेतदुपस्थितम् । मधूदकं फलं मूलमेषांसुभयदक्षिणाम् । अभ्युद्यतानि याचमानि त्वेतान्यपि निशेषतः । दासनापितगोपालकुलमित्राद्धसीरिणः । भोज्यान्नाः शूद्रवर्गोऽयं तथात्मविनिवेदकः । दत्त्वमानुषमापाद्य दे-

वर्षपिण्डजाद्यात्। माध्यस्थ्यमाश्रयेत् गेही सुते विघ्नियेऽज्ञे च। मृद्देऽपि ज्ञानमभ्यस्येत्कार्यो वाद्य समाश्रयेत्। सम्यग्ज्ञानेन वा मुक्तिः किं न विन्देभवेन्नृणि ?। सम्यग्ज्ञानं भवेत् पुंसां कुत एकेन जन्मना ?। वाराणस्यां ध्रुवा मुक्तिः शरीरत्यागमात्रतः। अद्यश्वोवा परश्वोवा कालाद्वाद्य परंशतात्। सत्वरं गलरोदेहः काश्यां चेदस्थतो भवेत्। सा च वाराणसी लभ्या सदाचारवता सता। मनसापि सदाचारमतो विद्वान्न लङ्घयेत्"। वसिष्ठस्मृतौ च "आचारहीनं न पुनन्ति वेदा यद्यप्यधीताः सह षड्भिरङ्गैः। छन्दांस्येनं मृत्युकाले त्यजन्ति नीडं शकुन्तादव जातपक्षाः। आचारहीनस्य तु ब्राह्मणस्य वेदाः षडङ्गाश्चखिलाः सपक्षाः। कां प्रीतिमुत्पादयितुं समर्थाश्छन्दस्य दाराइव दर्शनीयाः। नैनं छन्दांसि वृजिनात्तारयन्ति मायाविनं मायया वर्त्तमानम्। तत्तादृशे सम्यगधीयमाने पुनाति तद्वृत्तं यथावदिष्टम्। दुराचारोहि पुरुषोलोके भवति निन्दितः। दुःखभागी च सततं व्याधितोऽल्पायुरेव च। आचारात् फलते धर्म्ममाचारात् फलते धनम्। आचारात् श्रियमाप्नोति आचारोहन्यलक्षणम्। सर्वलक्षणहीनोऽपि यः सदाचारवान्नरः। श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति। आहारनिद्राविहारयोगाः सुसंवृता धर्म्मविदा तु कार्य्याः। वाग्बुद्धिदोर्य्यांश्च तपस्तथैव धनायुषो गुप्ततमे च कार्य्ये। उभे मूत्रपुरीषे तु दिवा कुर्य्यादुदङ्मुखः। रात्रौ कुर्य्याद्दक्षिणास्य एवं ह्यायुर्न रिष्यते। प्रत्यग्निं प्रतिसूर्यञ्च प्रति गां प्रति च द्विजम्। प्रतिसोमोदकं सन्ध्यां प्रज्ञा नश्यति मेहतः। न नद्यां मेहनं कार्य्यं न पथि न च भस्मनि। न गोमये नवा कृष्टे नोप्ते चैत्ये न गाहले। छायायामन्धकारे वा रात्रावह्नि वा द्विजः। यथासुखमुखः कुर्य्यात् प्राणबाधाभवेषु च। उद्धृताभिरद्भिः कार्य्यं कुर्य्याच्च स्नानमनुद्धृताभिरपि। न हरेन्मृत्तिकां विप्रः कूलात् सरित कतां तथा। अनर्जले देवगृहे वल्मीके मूषिकस्थले। कृतशौचावशिष्टे च न याचेताः पञ्च मृत्तिकाः। एका लिङ्गे करे तिस्रोऽभ्यां द्वे तु मृत्तिके। पञ्चापाने दशैकस्मिन्नुभयोः सप्त मृत्तिकाः। एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः। वानप्रस्थस्य त्रिगुणं यतीनान्तु चतुर्गुणम्। अष्टौ शतानि सुनेर्भक्तं वानप्रस्थस्य षोडश। द्वात्रिंशत्तु गृहस्थस्य अमितं ब्रह्मचारिणः। अनड्वान् ब्रह्मचारी च आहिताग्निश्च ते त्रयः। भुञ्जानाएव सिध्यन्ति नैषां सिद्धिरनश्नताम्। तपोदानोपहारेषु व्रतेषु नियमेषु च। दृज्याध्ययनधर्म्मेषु योन शक्तः स निष्क्रयः। योगस्तपोदमोदानं सत्यं शौचं दया श्रुतम्। विद्या विज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणम्। सर्वत्र दान्ताः श्रुतपूर्णकर्णा जितेन्द्रियाः प्राणिवधे निवृत्ताः। प्रतिग्रहे सङ्कुचिता गृहस्थाश्चे ब्राह्मणास्तारयितुं समर्थाः। अस्रवुः पिशुनश्चैव कृतघ्नो दीर्घरोषकः। चत्वारः कर्म्मचाण्डाला जन्मतश्चापि पञ्चमः। दीर्घवैरमसूयाञ्च असत्यं ब्रह्मदूषणम्। पैशुन्यं निर्हृयत्वञ्च जानीयाच्छूद्रलक्षणम्। किञ्चिद्वेदमयं पात्रं किञ्चित् पात्रं तपोमयम्। पात्राणामपि तत्पात्रं शूद्रान्नं यस्य नोदरे। शूद्रान्नरसपुष्टाङ्गोह्यधीयानोऽपि नित्यशः। हुत्वापि च जपित्वापि गतिमूर्द्धां न विन्दति शूद्रान्नोदरस्थेन यः कश्चिन्मियते द्विजः। स भवेच्छूकरोग्राम्यसक्तस्य वा जायते कुले। शूद्रान्नेन तु भुक्तेन मैथुनं योऽधिगच्छति। यस्मात्तं तस्य ते पुत्रा नच स्वर्गाईकोभवेत्। स्वाध्यायाद्यं योनिमित्रं प्रयान्तं चैतन्यस्थं पापभीरुं बहुश्रुतम्। स्त्रीयुक्तान्नं धार्म्मिकं गोचरस्थं व्रतैः स्नातं तादृशं पात्रमाहुः। आमपात्रे यथा न्यस्तं क्षीरं दधि घृतं मधु। विनश्येत् पात्रदौर्बल्यात्तच्च पात्रं रसाश्च ते। एवं गात्रं हिरण्यञ्च वस्त्रमन्नं महीं तिलान्। अविद्वान् प्रतिगृह्णानो भस्मीभवति दारुवत्। नाक्रुष्टस्तु वदेत्किञ्चिन्नवाघोऽङ्गुलिना क्षिपेत्। न पादेन पाणिना वा राजानमपि हन्यात् न जलेन जलम्। नेष्टकाभिः फलानि पातयेत् न फलेन फलम्। न कल्कपुटकोभवेत्। नस्थेच्छभाषां क्षिपेत। अथाप्युदाहरन्ति। न पाणिपादचपलो न नेत्रचपलोभवेत्। नचाङ्गचपलोविप्र इति शिष्टस्य गोचरः। पारम्पर्य्यागतोवेषां वेदः सपरिबृंहणः। ते शिष्टा ब्राह्मणाज्ञेयाः श्रुतिप्रत्यक्षहेतवः। यत्र सन्तं नचासन्तं नाश्रुतं न बहुश्रुतम्। न सुवृत्तं न दुर्वृत्तं वेद कश्चित् स ब्राह्मण" एवंमन्वादिसंहितादौ बहव आचारा उक्तप्रायाः दर्शिताः। भावापरपर्य्यायः तन्त्रोक्ताचारश्च दिव्याचारवीराचारपशवाचारभेदात् त्रिविधः यथोक्तं तन्त्रसारे।

"अथ भावविधिं वक्ष्ये शृणुष्व कमलानने !। विना येन न सिध्येत्तु जन्मकोटिशतैरपि। भावस्तु त्रिविधो देवि ! दिव्यवीरपशुक्रमात्। दिव्यवीरौ महाभावौ अधमः पशुभावकः। वैष्णवः पशुभावेन पूजयेत् परमेश्वरम्। शक्तिमन्त्रे वरारोहे ! पशुभावो भयानकः। दिव्ये वीरे-

महेशानि। जायते सिद्धिरुत्तमा। दिव्ये वीरे न भेदोऽस्ति-तास्यां भेदःपशोस्मृतः। दिव्यवीरौ प्रवक्ष्यामि सर्वभावोत्तमोत्तमौ। विना शक्रेण पूजास्ति मत्स्यं मांसं विना प्रिये!। मुद्राञ्च मैथुनञ्चापि विना नैव प्रपूजयेत्। स्त्रीभगं पूजनाधारं स्वर्गं रूपकमेव च। अभावे सर्वद्रव्याणा-मनुकल्पः कलौ युगे। अथ वा परमेशानि। मानसं सर्व्व-माचरेत्। स्नानन्तु मानसं प्रोक्तं वैदिके मानसं सदा। यत्र भुक्त्वा महापूजा मानसं भोजनन्तु तत्। स्वकीयां परकीयां वा मानसन्तु रमेत् स्त्रियम्। मानसं मद्यमीनादि स्वीकुर्य्यात् साधकोत्तमः। स्वैरन्तु कुसुमं तद्वत् मानसं समुपाचरेत्। मानसं भगरोमादि मानसं भगपूजनम्। सर्व्वन्तु मानसं कुर्य्यात् तेन सिद्धिमवाप्नुयात्" इति पिच्छिलातन्त्रे पूर्व्वखण्डे दशमःपटलः। तद्विवरणं तत्तच्छब्दे द्रष्टव्यम्। आचारचन्द्रिका आचारचिन्तामणिः आचारदीपः आचारमाधवः आचारमयूखः आचारादर्शः आचारार्कः इत्यादायश्च ग्रन्थाः आचारवेदनार्थाः भारत-वर्षे देशभेदे च प्रसिद्धाः। तत एवाचारभेदा अवसेयाः। निषिद्धाचारश्च अनाचारः स च अनाचारशब्दे २५७ पृष्ठे उक्तप्रायः। अधिकं निषिद्धशब्दे वक्ष्यते।

आचारदीप पु० आचारार्थः नीराजनार्थोदीपः। राज्ञां वाजिप्रभृतीनां वा नीराजनार्थे दीपे।

आचारवत् त्रि० आचारः शास्त्रोक्तानुष्ठानं कर्त्तव्यतयाऽस्यास्ति मतुप् मस्य वः। शास्त्रोक्तानुष्ठानयुक्ते स्त्रियां ङीप्।

आचारवर्जित त्रि० आचारेण वर्जितः। शास्त्रोक्ताचारहीने आचारहीनादयोऽप्यत्र।

आचारवेत्तृ त्रि० आचारं वेत्ति विद्–क्विप् स्त्रियां ङीप्। आचाराभिज्ञे। [स्त्रियां ङीप्।

आचारविदिन् त्रि० आचारं विद्–णिनि। आचाराभिज्ञे

आचारवेदी स्त्री आचारस्य वेदीव। पुरुषभूमौ हेम०।

आचाराङ्ग न० आचारमङ्गमिव। दृष्टिवादे द्वादशस्य अङ्गेषु मध्ये अङ्गभेदे हेमचन्द्रः।

आचारिन् त्रि आचरति शास्त्रोक्तानुसारेण आ+चर–णिनि। शास्त्रोक्तानुष्ठानवति स्त्रियां ङीप्।

आचारी स्त्री० सम्यक् चारः प्रसरणं यस्याः गौ० ङीष्। (हेलञ्चा) क्षिलमोचिकालतायाम्।

आचार्य्य पु० आ+चर–ण्यत्। "उपनीय तु यः शिष्यं वेदमध्यापरेत् द्विजः। सकल्पं सरहस्यं च तमाचार्य्यं प्रचक्षते" इति मनूक्तलक्षणे १ वेदाध्यापयितरि, "आम्नायतत्त्वविज्ञानाद्गुराचरसमानतः। यमादियोगसिद्धत्वादाचार्य्य इति कथ्यते" इत्युक्तलक्षणे २ मतप्रस्थापके शङ्कराचार्य्यादौ च। स्त्रियां टाप् आचार्य्या। आचार्यपत्न्यान्तु ङीप् आनुक् च आचार्य्यानी न णत्वम्। "अग्निहोत्री तपस्वी च वेदमध्यापयेद्यः। सकल्पं सरहस्यं च तमाचार्य्यं प्रचक्षते" दक्षः "कञ्चादाचार्य्य आचारं ग्राहयत्याचिनोत्यर्थान् आचिनोति बुद्धिमिति वा" निरु० "आचार्य्यस्तु ते गतिं वक्ष्यति" आ० उप० "आचार्य्यात् पादमादत्ते पादं शिष्यः स्वमेधया। कालेन पादमादत्ते पादं सब्रह्मचारिभिः" नीलकण्ठधृता स्मृतिः। "क्रमेणाचार्य्यसच्छिष्यधर्म्माभावे कतीर्थिनः" याज्ञ०। यज्ञादौ कर्म्मोपदेशके ३ गुरौ "आचार्य्यस्तु यथा स्वर्गे शक्रादीनां हरस्मृतिः तथा त्वं मम यज्ञे स्विन्द्राचार्य्यो भव सुव्रत! यथा शक्रस्य वागीश आचार्य्यः सर्व्वकर्म्मसु। तथा मया त्वमाचार्य्यः कृतोऽस्मिन् यज्ञकर्म्मणि" इति विधानपारि० पुरा०। ४पूज्यमात्रे त्रि० गुराचार्य्यः दैत्याचार्य्यः ५शिल्पकर्म्मादौ च "लङ्कास्त्रीणां पुनश्चक्रे विलापाचार्य्यकं शरैः" रघुः।

आचार्य्यक न० आचार्य्यस्य कर्म्म भावो वा योपधगुरूपोत्तमत्वात् वुञ्। आचार्य्यकर्म्मणि। "लङ्कास्त्रीणां पुनश्चक्रे विलापाचार्य्यकं शरैः" रघुः "नैष जातु मनेष्वासः पार्थमक्लिष्टकारिणम्। हन्यादाचार्य्यकं दोग्धं संस्मृत्य शरनिर्मितम्" भा०उ०प०१६६ अध्या०। "आचार्य्यकं विजयि मान्मथमाविरासीत्" त्व आचार्य्यत्वं तत्रैव न० तल् आचार्य्यता तत्रैव स्त्री। सोऽचिरेणैव कालेन परमाचार्य्यतां गतः"।

आचार्य्यभोगीन त्रि० आचार्य्यभोगाय हितम् ख "आचार्य्यादणत्वम्" वार्तिकोक्तेः न णत्वम्। आचार्य्यभोग-पर्य्याप्ते द्रव्यादौ।

आचार्य्यमिश्र पु० आचार्य्यो मिश्रः। अतिशयपूज्ये।

आचिख्यासा स्त्री आख्यातुमिच्छा आ+ख्या–सन–अ। आख्यातुमिच्छायाम्। [आख्यातुमिच्छौ।

आचिख्यासु त्रि० आख्यातुमिच्छु आ+ख्या–सन उ।

आचित त्रि० आ+चि+क्त। व्याप्ते, "कचाचितौ विष्वगिवा-गजौ गजौ" किरा० "फलैरुपचितैर्दिव्यैराचितां स्वादुभिर्भृशम्" (बदरीं दृष्ट्वा) भा०व०प० १४५ अ०। २गुम्फिते ग्रथिते "अङ्गाचिता सलयरुक्तिलतायाः" कुमारः रघुश्च "तुला पलशतं तासां विंशत्या भार आचितः" इत्युक्ते

भाराक्रान्ते २हिंसहसपरुषमाने । आचितं दश भाराः स्यात् शाकटोभार आचित इत्युक्ते ४ दशभारमाने न० शाकटभारे पु० । परिमाणयाचकत्वात् ५तन्मितेऽपि । ६संश्लिष्टे ७ ऊर्ध्वे च । "आढकाचितपात्राभ्यां खोऽन्यतरस्याम्" पा० "आचितं सम्भवति (खचिन् सञ्चिनयति) अवहरति पचति वा स्व ठञ् वा । आचितीनः आचितिकः । आचितपरिमाणद्रव्यस्य खचिन् समावेशनार्हे तदवहारके तत्पाचके च त्रि०। ठञि स्त्रियां ङीप्खे टाप्।

आचितादि पु० आचित आदिर्यस्य । गतिकारकोपपदात् कृत्स्वरोदात्ततायां पाणिना पर्य्युदस्ते गणभेदे आचित, पर्य्याचित, आस्थापित, परिस्पृष्टीत, निरुक्त प्रतिपन्न, अपस्थित, प्रस्थित, उपस्थित संहितागवि ।

आचूषण न० आ+चूष-ल्युट् । ओष्ठसंयोगविशेषेण रसानुभवार्थं रसाकर्षके व्यापारभेदे (चोषा) विषशल्याद्युपकर्षणार्थं २औषादिसंयोगभेदेनाकर्षणे च । "नाडीयन्त्राख्यनेकप्रकाराणो" त्युपक्रम्य "तानि आचूषणार्थमिति" । सुश्रु० करणे ल्युट् ३तत्साधने(शिङ्गा) "तत्प्रच्छिते तनुवस्त्रपटलावनद्धेन शृङ्गेण शोणितमवसेचयेदाचूषणात्" सुश्रु० ।

आच्छद् त्रि० आच्छाद्यतेऽनेन आ+छद-णिच्-क्विप् तुगभ्यः । आच्छादने वस्त्रे घञर्थे क । आच्छदोऽत्यल पु० ।

आच्छन्न त्रि० आ+छद-क्त । आवृते "मेघाच्छन्नेऽभ्रि दुर्दिनम्" अमरः । [आवरणे ।

आच्छाद पु० आच्छाद्यतेऽनेन आ+छद-णिच्-करणे घञ् ।

आच्छादक त्रि० आ+छद-णिच्-ण्वुल् । आच्छादनकर्त्तरि

आच्छादन न० आ+छद-णिच्-करणे ल्युट् । आवरणसाधने १वस्त्रे भावे ल्युट् । २आवरणे न० ।

आच्छादित त्रि० आ+छद-णिच्-क्त । आवृते ।

आच्छादिन् त्रि० आ+छद-णिच्-णिनि । आच्छादके "स्तनयुगपरिणाहाच्छादिना वल्कलेन" भट्ट० ।

आच्छाद्य अव्य० आ+छद-णिच्-ल्यप् । १आवृत्यर्थे "आच्छाद्य चार्च्य वित्वा च श्रुतशीलवते स्वयम्" मनुः आ+छद-णिच्-कर्मणि यत् । २आवरणीये स्तनादौ ३गोप्ये च त्रि० । [च ।

आच्छिन्न त्रि० आ+छिद-क्त । १बलेन गृहीते २खण्डकृच्छिन्ने

आच्छृक पु० आ+क्षृ-वा० डु संज्ञायां कन् । (आदृच्) । इक्षौ ।

आच्छुरित न० आ+क्षुर-क्त । १सगन्धद्रव्ये, २नखाघाते ३नखघाते च । स्वार्थे क । आच्छुरितकमत्र ।

"सामोन्मुखेनाच्छुरिता प्रियेण दत्तेऽथ काचित् पुलकेन भेदे" भट्टिः । ४मिश्रिते च त्रि० ।

आच्छेद पु० आ+छिद-घञ् । १समन्ताच्छेदने २ईषच्छेदने बलात्कारेण ३अपहरणे च । ल्युट् । आच्छेदनमत्र न०

आच्छोटन न० आ+स्फुट-ल्युट् ष्टु० । अङ्गुलिस्फोटने (तड़िदेओया) । [अङ्गुल्यादौ ।

आच्छोटित त्रि० आ-स्फुट-क्त ष्टु० । स्फोटनेन कृतध्वनौ ।

आच्छोदन न० आच्छिद्यतेऽत्र छिद-ल्युट् ष्टुत्वं० इतश्चोत् । मृगवायाम् अमरः ।

आच्युतदत्ति पु० अच्युतदत्तस्यापत्यम् इञ् । आयुधजीविभेदे ततः दामन्यादि० स्वार्थे कन् आच्युतदत्तीयः । संघीभूते आयुधजीविभेदे ।

आच्युतन्ति पु० अच्युतन्तस्यापत्यम् इञ् । आयुधजीविभेदे ततः दामन्यादि० स्वार्थे कन् । आच्युतन्तीयः । संघीभूते आयुधजीविभेदे ।

आच्युतिक त्रि० अच्युतस्य ज्ञातः कागादि० ठञ् ञिठ् वा । अच्युतज्ञाते ठञि स्त्रियां ङीप् ।

आञ्छ आयामे (दीर्घविस्तारे) इदित् भ्वादि० पर० सक० सेट् । आञ्छति आञ्छीत् । आनाञ्छ-आञ्छ आञ्छिता । कर्मणि आञ्छ्यते । णिच् आञ्छयति ते आञ्छिछत्-त । सन् आञ्छिच्छिषति । क्विप् आन् आञ्छो । क्वोरिति सूत्रे अतुकोऽपि ग्रहणमिति आन् आंशौ इत्येके । "आञ्छितः आञ्छित्वा "आञ्छेदतिक्रिप्रम्" । "चक्रयोगेनाञ्छेर्द्रव्यनिर्गतम्" इति च सुश्रु० ।

आज न० आञ्छतेऽनेन आ+अञ्ज-घञर्थे क । १छते जटा० । अजस्येदम् अण् । २छागमांसादौ त्रि० । "अलङ्कृतं कुमारं कुशलीकृतशिरसमक्षतेन वाससा संवीतमैक्षवेण वाजिनेन ब्राह्मणम्, रौरवेण क्षत्रियम्, आजेन वैश्यम्" आश्व० । स्मृ० "गव्यमाजं तथा चौष्ट्रमाविकं माहिषञ्च यत् । अश्वायाश्चैव नार्य्याश्च करेणूनाञ्च यत् पयः" सुश्रुतः । अजभावे घञ् न वीभावः । ३विशेषे आजानेवः ।

आजक न० अजानां समूहः वुञ् । छागसमूहे ।

आजकरोण त्रि० आजकेनोपलक्षिता रोणीनदीभेदः तस्याः सन्निकृष्टदेशादि अण् । अजसमूहोपलक्षितनदीसन्निकृष्टादौ

आजकार पु० अजस्यायमाजः कारो यस्य । शिवस्य त्रिपुरासुरवधकाले विष्णुना वृषभरूपत्वकरणात् तस्य तथात्वम् यथा । "अथ विष्णुर्महायोगी सर्व्वतोऽश्वतत्त्वतः । वृषरूपं समास्थाय प्रोज्जहार रथोत्तमम् । समा-

क्रान्तं देवगर्भैः समप्रबलपौरुषैः । बलवांस्तोलयित्वा तु विषाणाभ्यां महाबलः । ननाद प्राणयोगेन मध्यमान इवार्णवः । ततोऽयं वायुविषयं समाक्रम्य विषाणवान् । ननाद बलवान्नादं मेघस्तुह इव पर्व्वणि" हरि० २२४ अ० ।

आजगर न० अजगरं सर्परूपं नडुषमधिकृत्य कृतोऽण्यः अण् । अजगरत्वापेनाजगररूपतां प्राप्तस्य नडुषस्य युधिष्ठिरेण संवादरूपे भारतान्तर्गतवनपर्व्वणि अवान्तर पर्व्वभेदे तच्च भा० वनपर्व्वणि १७६ अ० अवधि १८० अध्यायपर्य्यन्ताध्यायषट्कात्मकं तत्कथा तत्रैव दृश्या । "निवातकवचैर्युद्धं पर्व्व चाजगरं ततः" भा० आ० प० १अ० ।

आजगव न० अजगवमेव प्रज्ञाद्यण् । १शिवधनुषि अजगवयञर्थे विदितः अजगवं तत्साङ्ग्रामिकत्वात् अण् । तत्तुल्य डढे २धनुषि च "आजगवं नाम धनुः शरान्मेऽङ्गोद्धरावहे" भा० व० प० १२७ अ० "तथेत्युक्त्वा पृथुर्वैन्योऽहोत्वाजगवं धनुः" भा० द्रो० प० ६६ अ० ।

आजधेनवि पुंस्त्री० अजैव धेनुरस्य इ० पुंवत् तस्यापत्यम् वाह्वादेः आकृतिगणत्वादिञ् । छागीरूपधेनुयुक्तस्नेरपत्ये ।

आजनन अव्य० आ+जन-ल्युट् । १विख्यातजनने "तेषामाजननं पुण्यं कर्म्मणः प्रीतिमावहेत्" भा० आ० प० सोमावास् अव्ययी० । २जन्मपर्य्यन्ते अव्य० ।

आजन्म(न) अव्य० जन्मनः पर्य्यन्तम् सीमायाम् अव्ययी० वा अच् । जन्मपर्य्यन्ते "सोऽहमाजन्मशुद्धानाम्" रघुः ।

आजन्मसुरभिपत्र पु० आजन्मम् सुरभि पत्रमस्य । मरुवक वृक्षे राजनि० । [मारापत्ये ।

आजमार्य्य पुंस्त्री० अजमारस्यापत्यम् कूर्व्यादि० ण्य । अज-

आजमीढ पु० अजमीढो देशभेदस्तत्र भवः अण् । (आजमीर) १देशभवे तस्य राजा अण् । तद्देशाधिपे २बहुषु तस्य लुक् । अजमीढाः । "सधस्तुतिमाजमीढासोऽग्मन्" ऋ० ४, ४३, ६, "अजमीढासः तत्सम्बन्धिन" भा० । ३यादव नृपभेदे च "भरतस्य कुरोः पूरोराजमीढस्य चानघ ! यादवानामिमं वंशम्" इत्युपक्रम्य भा० आ० प० ७५ अ० । "ओभिस्तेव वशिष्ठोऽपि भारतान् प्रत्यपद्यत । अथाश्वमिद्धृत् साम्राज्ये सर्व्वत्रत्यस्य पौरवम् । विषाणभूतं सर्व्वस्यां पृथिव्यामिति नः श्रुतम् । भरताधुषितं पूर्व्वं सोऽभ्यतिष्ठत् पुरोत्तमम् । पुनर्वसिभृतश्चैव चक्रे सर्व्वमहीक्षितः । ततः स पृथिवीं प्राप्य पुनरोजे महाबलः । आजमीढो महावीर्यैर्बहुभिर्भूरिदक्षिणैः ६४अ० । अजमीढेषु भवः वुञ् । आजमीढक: बहुत्वबहुमीढभवे त्रि० ।

आजयन न० आजीयतेऽत्र आ+जि-आधारे ल्युट् । युद्धे

आजरस अव्य० जरापर्य्यन्तम् अव्ययी० अच् जरसादेशः । जरापर्य्यन्ते । आगता जरा यस्य प्रा० ब० अच् जरसादेशश्च । प्राप्तजराभावे "आजरसाय समनक्त्वर्यमा" ऋ० १०, ८५, ४२, ।

आजवस्तेय पुंस्त्री० अजवस्त्रेर्ऋषेरपत्यम् गुभा० ढक् । अजवस्त्रिनामकर्षेरपत्ये भृग्वा० ढञ् । "आवस्त्रिकोऽथ स्त्रियां ङीप् ।

आजवाह त्रि० अजोवाहमृतेऽत्र वह-क्विप् आधारे षच् अजवाहोदेशभेदः तत्र भवादि अण् । अजवाहदेशभवादौ । सच देशः बदरिकाश्रमादुत्तरस्यां पर्व्वतोपरिस्थः तत्र हि अजैरेव भारो वाह्यते इति तस्य तथात्वम् ।

आजातशत्रव पु० अजातशत्रोरपत्यम् अण् । १युधिष्ठिरापत्ये न जातः शत्रुरस्य । अशत्रुकस्य रूपभेदस्यापत्ये २भद्रसेने नृपे च । "एतदा वै भद्रसेनमाजातशत्रवमारुणिरभिप्रचार" शत० ब्रा० अजातशत्रुश्च काशीराजः यदोक्तम्" बृ० उ० "सहोवाचाजातशत्रुः काश्यं ब्रह्म ते ब्रवाणीति" ।

आजाति स्त्री आ+जन-क्तिन् । आजनने जन्मनि "ताडयित्वा हनेनापि संवादान्मतिपूर्व्वकम् । एकविंशतिमाजातीः पापयोनिषु जायते" । "साक्ष्येऽनृतं वदन्पाशैर्बध्यते वारुणैर्भृशम् । विवशः शतमाजातीस्तस्मात्साक्ष्ये वदेदृतम्" इति च मनुः ।

आजाद्य पु० स्त्री अजमत्ति अद-अण् उप० स० तस्यापत्यम् गर्गा० यञ् । छागभक्षकस्य मुनेरपत्ये स्त्रियांङीप् बहोपच ।

आजान अव्य० जनोजननमेव अण् ज्ञानः तत्पर्य्यन्तम् अव्ययी० । सृष्टिकालपर्य्यन्ते सख्ये । "अद्भ्यः सम्भृतः पृथिव्यै रसः विश्वकर्म्मणः समवर्त्तताग्रे तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे" यजु० ३१, १७, "पूर्व्वकल्पे पुरुषमेधयाजी आदित्यरूपं प्राप्तः स्तूयते । "अद्भ्यः जलात् पृथिव्याः सकाशात् पृथिव्यपां महत्तं भूतपञ्चकोपलक्षकम् भूतपञ्चकात् योरसः सम्भृतः पुष्टः तथा विश्वं कर्म्म यस्य विश्वकर्म्मणः कालस्य रसात्प्रीतेः योरसोऽग्रे प्रथमं समवर्तत समभवत् भूतपञ्चकस्य कालस्य च सर्व्वं प्रति कारणत्वात् पुरुषमेधयाजिनो लिङ्गशरीरे पञ्चभूतानि पुष्टानि कालश्च ततः पुष्टेभ्यः कश्चिद्रसविशेषफलरूपोत्तमजन्मप्रद उत्पन्न इत्यर्थः । तस्य रसस्य रूपं विदधत् धारयन् त्वष्टा, आ-

दिवः एति मत्वहस्तदवं करोति अथो प्रथमं मर्त्यस्य मनुष्यस्य सतस्य पुरुषमेधयाजिनः आजानं देवत्वं मुख्यं देवत्वम् सूर्यरूपेण । द्विविधा देवाः कर्मदेवा आजानदेवाश्च कर्मणोत्कृष्टेन देवत्वं प्राप्ताः कर्मदेवाः सूर्यादावुत्पन्ना आजानदेवाः ते कर्मदेवेभ्यः श्रेष्ठाः "ये मृतं कर्मदेवानामानन्दाः स एक आजानदेवानामानन्द इति श्रुतेः" वेदा० । जननसाधने २प्रकृतौ च । "न हस्तिनं प्रतिहन्तीवात् पुरुषाजानोऽहं हन्तीति" शत० भा० पुरुषाजानः पुरुषप्रकृतिकः" इति भा० । आ+जन घञ् दीर्घः" ३उत्पत्तौ पु० ।

आजानज त्रि० आजानं जायते । सृष्टिकालादारभ्यजाते देवादौ । द्विविधा हि देवाः केचित् कर्मदेवाः केचिदाजानदेवाश्च यथ "ते ये मृतमाजनजानां देवानामानन्दाः स एकः ये कर्मणा देवानपियन्ति" ऐत० उ० ।

आजानदेव पु० आजानं सृष्टिकालमारभ्य देवः देवत्वमाप्तः । कर्मणानुत्पन्नदेवभावे चिरप्रसिद्धे देवे "अथ ये मृतं कर्मदेवानामानन्दाः स एक आजानदेवानामानन्दो यश्चोत्रियोऽहृजिनोऽकामहतोऽथ ते मृतमाजानदेवानामानन्दाः" बृ० उ० । "आजानदेवानामेक आनन्दः उत्पत्तितएव ये देवास्ते आजानदेवाः" भा० ।

आजानि त्रि० आ+जन-अन्तर्भूतण्यर्थे इण् उन्दसीति दीर्घः । जनके जननकर्त्तरि । "त्रीण्यायूंषि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने !" ऋ० ३, १७, २ । आजानीः जनयित्र्यो मातरः" भा० । अन्तर्भूतण्यर्थाभावे । २अनुजाते च "तत्रैव पश्चान्तरे आजनयः अनुजाताः स्वसार इति भाष्यकृता व्याख्यातम् ।

आजानिक्य न० आजानो भवः ठन् तस्य भावादौ पुरो० यक् । आजन्मसिद्धपदार्थस्य भावे कर्मणि च ।

आजानेय पु० आजे विशेषेऽपि आनेयोऽश्ववाहो यथा स्थानस्थ । "यत्किभिर्भिन्नहृदयाः स्खलन्तश्च पदेपदे । आजानन्ति यतः संज्ञामाजानेयास्ततः स्मृताः" इत्युक्तलक्षणे उत्तमाश्वे । [स्थ ब्रह्मणोऽपत्ये ।

आजायन पुंस्त्री० अजस्यापत्यम् नडा० फक् । अजनामकस्यपि

आजि स्त्री० अजन्त्यस्याम् अज-इण् न वीभावः । १समरभूमौ २संग्रामे, "आजिं न जग्मुर्गिरयो न भोजाः" ऋ० ६, २३, ६, "ते वावन्तराजो तावान् स दाश्वे परैः" रघुः । "अस्माञ्जिन्द्र! दुदर पुरोयावानमाजिषु" ऋ० १, ३१, ७ "आजिषु संग्रामेषु" भा० । ३सप्तदीपावां स्त्री वा ङीप् । "अतोवान्यानि वीर्यवन्ति कर्माणि यदाग्नेर्मन्थनम् आजेः सरणम् दृढस्य धनुषआयमनम्" आ० उ० "आजेः मर्यादायाः सरणं धावनम्" यङ्लुगा० ५अग्नौ ६मार्गे पु० । "धन्वना गा धन्वनाजिं जयेम" यजु० २१, २९ । "धन्वना आजिं मार्गं जयेम अजन्ति गच्छन्ति यस्मिन्नसावाजिर्मार्गः" वेददी० । भावे क्विप् ७आजौ मे ।

आजिनीय त्रि० अजिन+चतुरर्थीं छगाद्या० छण् । चर्मसञ्चिकृदेशादौ । [सञ्चिकृदेशादौ ।

आजिरि त्रि० अजिर+चतुरर्थीं सुतङ्गमा० रञ् । अङ्गन-

आजिरेय त्रि० अजिर+शुभ्रादि० ढक् । अङ्गनभवादौ ।

आजिहीर्षा स्त्री० आहर्त्तुमिच्छा आ-हृ सन्-भावे अ । आहरणेच्छायाम् । उ । आजिहीर्षुः । आहरणेच्छौ त्रि० ।

आजीकूण न० आजीं कूणति आहवोति यस्मिन् आ+कूण-आधारे क । मर्यादावरके देशभेदे ततः धूमादि०भवादौ पथ्यादौ वुञ् । आजीकूणिकः । आजीकूणदेशभवे-पथि अध्वनि, न्याये, विहारे, मनुष्ये, हस्तिनि, गोमये च ।

आजीगर्त्ति पुंस्त्री० अजीगर्त्तस्यापत्यम् बाह्वा० इञ् । अजीगर्त्तस्यापत्ये ।

आजीव पु० आजीव्यतेऽनेन आ+जीव-करणे घञ् । १आजीवनोपाये द्रव्यादौ २उपाये च । अध्ययनमुपक्रम्य "तस्मिन् काले स्थापयेत्तत्पुरस्तात् वस्त्रं यस्त्रं पुस्तकं लेखनीञ्च । स्वर्णं रौप्यं यच्च रुच्यति बालस्तैराजीवैस्तस्य वृत्तिः प्रदिष्टा" सु० चि० । रुच्यां जन्मलग्नावधि दृग्गमभावे मेषादीनां श्वेतहोराद्रेक्काणनवांशद्वादशांशत्रिंशांशरूपैः षड्भिर्वर्गैः क्रमेणाजीवोपायविशेषज्ञानं भवति यथोक्तं जातके "अथ कल्याणवर्ण्योक्तां दृग्गमेऽर्यविभेदजाम् । वृत्तिचिन्तां लिखेत्कर्म्माजीवोक्तामपि चिन्तयेत् । "वाटिकाक्षितिवणिक्पशुसेवाकृत्यतोऽजगणतः स्वभे भवेत् । जीवनं वृषगणाच्चतुष्पदैः मल्लिधान्यगणकादिसंग्रहैः । मौक्तिकादिजलजैर्लिपिलेखैर्विद्रुमादिकवणिक्क्रियादिभिः । इन्दुभागत अथो कुलीरतो नीरजैर्विषमगाग्निगरूजैः । वनाद्रिकाष्ठसञ्चाहकृष्याकृष्यैश्च धान्यकैः । क्षितिपाषाणवाणिज्यैर्वृत्तिः सिंहांशगतः स्वभे । गान्धर्वशिल्पगणकैर्मणिहेमकर्म्मगन्धक्रयैर्नभसि षट्कगणैश्च लेखैः । हेमाम्बुगोमहिषधान्यक्षितिक्रयैश्च मूलैर्धनैर्नृपतितोऽपि तुलोत्थवर्गे । स्त्रीरङ्गमाल्यधनचौर्यचिकित्सितैश्च निन्द्योद्यमैर्नृपतिसेवनतोऽलिवर्गे । भैषज्यरूपगणितादिकयन्त्रविद्याभूपालमन्त्रगिरिदुर्गवणाहृतुस्थे ।

वराङ्गना वारिभयोत्सवित्ताः श्रेष्ठा रताद्यापि रसायने स्युः । क्रीड़ासु रामासु महापणेषु द्यूतासवर्गे दृगमेऽतिवित्ताः । यस्याग्निभेदखननादिकार्य्यभारस्कन्धोपदृढिरपि बाहुबलाढ्यटोत्थे । खस्थे गवे भावभवे जवशस्त्रवाहयोनि प्रपायनधनानि नरस्य पश्चात्" । भावे घञ् । २आजीवार्थमालम्बने । आजीवति कर्त्तरि अच् । ३आजीवनकारिणि" कर्म्माजीवः रूपाजीव इत्यादौ तु आ+जीव–अण् । उप०स० इति भेदः ।

आजीवन न० आजीवत्यनेन करणे ल्युट् । इत्त्युपाये भावे ल्युट् । इत्त्यर्थसंपादनपूर्वके "आजीवनार्थं धर्म्मस्तु दानमध्ययनं यजिः" मनुः "स्त्रीणामाजीवनार्थञ्च प्रदेयं प्रीतिपूर्व्वकम्" । "स्त्रीणामाजीवनञ्चादिति" च स्मृतिः ।

आजीविका स्त्री आजीवयति आ+जीव णिच्–ण्वुल् । जीविकायां इत्तौ जीवनार्थे व्यापारे । आ+जीव–कर्त्तरि ण्वुल् । आजीवकः आजीवनकर्त्तरि त्रि० ।

आजीव्य त्रि० आजीव्यतेऽनेन वा० करणे ण्यत् । आजीवनोपाये १इत्त्यादौ "आजीव्यः सर्व्वभूतानाम्" रामा० आजीव्यते इत्त्यर्थमालम्ब्यतेऽसौ आ–जीव–कर्म्मणि अच् । २इत्त्यर्थमालम्बनीये रूपादौ । आजीव्यतेऽत्र आधारे वा० ण्यत् । ३आजीवनीयदेशे "रम्यमानत सामन्तं स्वाजीव्यं देशमावसेत्" मनुः । तेऽपि सर्वे निवर्त्तन्तां येऽपि स्युर्दातुयायिनः मया यथोचिताजीव्यैः संविभक्ताश्च वृत्तिभिः" भा०व०प० ६३अ० ।

आजू स्त्री आजवति आ+जु–क्विप् दीर्घः । भृतिं विना कर्मकारके । (बेगार) "हठादभृतिकः क्लेशैर्दृढराजुश्च कीर्त्यते । इत्युक्ते कर्म्मकरभेदे ।

आजूर् स्त्री आ+ज्वर–क्विप् ऊठ् । विष्टौ सुकटः ।

आज्ञप्त त्रि० आ+ज्ञा–णिच् क्त क्त ज्ञस्यः । आदिष्टे श्रुतादेशे

आज्ञप्ति स्त्री आ+ज्ञा–णिच् क्तिन् ज्ञस्यः । आज्ञायाम् ।

आज्ञा स्त्री आ+ज्ञा–अङ् । १आदेशे आदेशश्च निकटस्थ भृत्यादेः कृत्यादौ प्रवर्त्तयितृव्यापारभेदः । "आज्ञया नरपतेर्हि जन्मनां दारकर्म्मसुतसूतके तथा । बन्धमोक्षमख-दीक्षणेष्वपि चौरमिष्टमखिलेषु चोडुषु" ज्योति० । "तथेति शेषामिव भर्त्तुराज्ञाम्" कुमा० । "पश्चात् वनाय गच्छेति तदाज्ञां सुदितोऽग्रहीत्" रघुः । "अनतिक्रमणीया दिवस्पतेराज्ञा" शकु० । "दूरापवर्ज्जितच्छत्रैस्तस्याज्ञां शासनार्पिताम्" रघुः "शिरोभिराज्ञामपरे महीभुजः" । माघः । २ज्योतिषोक्ते लग्नावधिदशमभावे तन्त्रोक्ते भ्रूमध्यस्थे सुषुम्णानाड्यन्तर्गते ४आज्ञाचक्रे च विवरणमाज्ञाचक्रशब्दे । "आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्त्यते" तन्त्रम् ।

आज्ञाकर त्रि० आज्ञया करोति कृ–अच् ३त० । आज्ञानुसारेण कर्मकर्त्तरि दासादौ स्त्रियां ङीप् । क्विप् आज्ञाकृत् तत्रैवार्थे त्रि० ।

आज्ञाचक्र न० आज्ञासंज्ञकं चक्रम् । तन्त्रप्रसिद्धे देहावस्थितसुषुम्णानाड़ीमध्यगते भ्रूमध्यस्थे द्विदले पद्माकारे चक्रभेदे । विशुद्धचक्रसंज्ञा "आज्ञाचक्रं तदूर्द्धन्तु आत्मनोऽधिष्ठितं परम् । आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्तिता" । तत्र निहितचित्तस्य पुरुषस्य सर्व्वपदार्थसाक्षात्कारेण "एवं भूतम्, एवं वर्त्तते, एवं भविष्यतीति" ज्ञानेन गुरोरीश्वरस्य तदूर्द्धं सहस्रदलकमले स्थितस्याज्ञायाः "इतः परं त्वया इत्थं कर्त्तव्यमिति" नियोगस्य संक्रमणं भवति तेन तदाज्ञाख्यं चक्रमित्यर्थः । यथा च षट्चक्राणां देहे स्थितिस्तथोक्तं शारदायाम् । "यत्खल्वत्यद्भुतायामं शरीरमुभयात्मकम् । शुद्धज्ञानान्वये कन्दसुतसेधाद्वयङ्गुलं विदुः । तस्य द्विगुणविस्तारं विन्दुरूपेण शोभितम् । नाड्यस्तत्र समुद्भूता मुख्याश्चिह्नैः प्रकीर्त्तिताः । इड़ा वामे स्थिता नाड़ी पिङ्गला दक्षिणे मता । तयोर्म्मध्यगता नाड़ी सुषुम्णा ब्रह्ममार्गिता । पादाङ्गुष्ठादपक्रान्ता शिखाभ्यां शिरसा पुनः । ब्रह्मस्थानं समापन्ना सोमसूर्य्याग्निरूपिणी । तस्यामध्यगता नाड़ी चित्राख्या योगिवल्लभा । ब्रह्मरन्ध्रं विदुस्तस्यां पङ्कजन्तुनिभं परम् । आधारांत्र विदुस्तत्र मतभेदानेकधा । दिव्यमार्गमिमं प्राहुरस्तानन्दकारकम् । इड़या सङ्गतेऽनन्तः पिङ्गलायां दिवाकरः । ज्ञातौ योगनिदानज्ञैः सुषुम्णायाञ्च तावुभौ । आधारकन्दमध्यस्थं त्रिकोणमति सुन्दरम् । ज्योतिषां निलयं दिव्यं प्राहुरागमवेदिनः । तत्र विद्युल्लताकारा कुण्डली परदेवता । परिस्फुरति सर्व्वात्मा सुप्राड्मिसदृशाकृतिः । विभर्त्ति कुण्डली यस्मिन्नाज्ञानं हंसमास्थिता । हंसः प्राणास्त्रयोनित्यं प्राणा नाड़ी यथाश्रयाः । आधारादुत्थितोवायुर्यावत् सर्व्वं देहिनाम् । देहं प्राप्य खनाड़ीभिः प्रयाणं कुरुते वहिः । द्वादशाङ्गुलमानेन तस्मात् प्राण इतीरितः" । तत्त्वचिन्तामणौ षट्प्रकाशे । "आज्ञानामाम्बुजं तद्विमकरसदृशं ध्यानधाम प्रकाशम् हृद्याभ्यां वै कलाभ्यां प्रविल-

सितवर्णमम्बुजपत्रं सुशुभ्रम्। तन्मध्ये डाकिनी सा शशिसमधवला वक्त्रषट्कं दधाना विद्यामुद्रां कपालं डमरूजपवटीं बिभ्रती शुद्धचित्ता। एतत्पद्मान्तराले निवसति च मनः सूक्ष्मरूपं प्रसिद्धम्" एतदभिप्रायेणैव "मनोऽपि भ्रूमध्ये निवसत्यानन्दलहर्य्यासुक्तम्। मनसस्तत्र स्थित्या च तदुपहितजीवस्यापि तत्रैव स्थितिः। एवञ्च श्रुतौ डाईविद्यायां "हृदयं तत आहृदयम्" इत्युक्तिस्तु हृदये ध्यानार्थादत्यविरोधः। महानिर्वाणतन्त्रे शरीर एव चतुर्दश भुवनानि सूक्ष्मरूपेण स्थितानि तानि च तत्रैव ध्येयानीत्युक्तं तत्र कुत्र किं ध्येयमित्याकाङ्क्षायां मूलाधारादिकं भ्रूरादिलोकतया ध्येयमित्युक्तम् तत्र विशुद्धचक्रस्य जनोलोकतया ध्येयतामुक्ताह।

"एतत्पद्मद्वयोर्द्देशे ज्ञानपद्मं सुदुर्लभम्। दलद्वयसमायुक्तं पूर्णचन्द्रस्य मण्डलम्। पद्ममध्ये बीजकोषे स्फटिकाभमिन्दुरोम्। तन्मध्ये नवकोणञ्च यन्त्रं परमदुर्लभम्। यन्त्रबीजं हि तन्मध्ये साकारं हंसरूपकम्। हंसः परब्रह्मरूपः साकारः शिवरूपकः। तारचक्रुर्वरारोहे निर्गमागमपत्रवान्। शिवशक्तिपदद्वन्द्वं विन्दुत्रयविलोचनः। विहारश्चास्य हंसस्य हेमपङ्कजपूजिते। एवं हंसोमणिद्वीपे तस्य क्रोड़े परः शिवः। वामे तस्य स्थितकाली सदानन्दस्वरूपिणी। तस्याः प्रसादमासाद्य सर्वकर्त्ता महेश्वरः। तपोलोक इदं भद्रे! सर्वलोकस्य दुर्लभम्। यत्र ब्रह्मादयो देवा ध्यानयोगं सदाभ्यसेत्। मनसापि न लभ्येत योगेन तपसा न च। तपोलोकं गोलोकस्य चतुर्लक्षगुणं शिवे!। ब्रह्मलोकेषु ये देवा वैकुण्ठे ये सुरादयः। यन्त्रलोके वसेद्योहि तेजोभक्तिपरायणः। तपसापि न लभ्येत तपोलोकगतिं शिवे। तपोलोकसमोनास्ति लोकमध्ये सुलोचने!। सालोक्यं हि महोलोके सारूप्यं जनलोकके। सायुज्यं च तपोलोके निर्व्वाणं हि तदूर्द्धके। ततो ब्रह्मादयो देवास्तपोलोकार्थिनः सदा। इति ते कथितं कान्ते! चक्रषट्कस्य लक्षणम्। यज्ज्ञानादमरत्वञ्च जीवन्मुक्तश्च साधकः। यज्ज्ञात्वा जननीगर्भं न विशेत्तु कदाचन"।

आज्ञात त्रि० आ+ज्ञा-क्त सम्यग्ज्ञाते "आज्ञातं यदनाज्ञातं यस्य क्रियते भिषः" यजु० शिवसङ्कल्पः।

आज्ञातीर्थ न० ६त०। तन्त्रे मानसस्नानाङ्गे ध्येयतयोक्ते आज्ञाचक्राख्ये तीर्थे। "आज्ञाचक्रे सदा ध्यात्वा स्नाति निर्व्वाणसिद्धये"। रुद्रयामलम्।

आज्ञान न० आ+ज्ञा-ल्युट्। आज्ञाकरणे मानसवृत्तिभेदे। मानसवृत्तयश्च यथा। "संज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः संकल्पः क्रतुरसुः कामोवशः इति सर्व्वाण्येवैतानि प्रज्ञानस्य नामधेयानि" ऐ०उ०। "तदन्तःकरणोपाधिकक्षोपलक्षुः प्रज्ञानरूपस्य ब्रह्मण उपलब्ध्यर्थो अन्तःकरणवृत्तयो बाह्यान्तर्वर्त्तिविषयविषयास्ता इमा दृक्षुव्यन्ते। संज्ञानं संज्ञप्रिचेतनभावः। आज्ञानम् आज्ञप्रिरीश्वरभावः। विज्ञानं कलादिपरिज्ञानम्। प्रज्ञानं प्रज्ञप्रिः प्रज्ञता। मेधा यन्धारणे सामर्थ्यम्। दृष्टिरिन्द्रियद्वारा सर्वविषयोपलब्धिः। धृतिर्धारणमवसन्नानां शरीरेन्द्रियाणां ययोत्तम्भनं भवति। धृत्या शरीरमुद्वहन्तीति हि वदन्ति। मतिर्मननम्। मनीषा तत्र स्वातन्त्र्यम्। जूतिर्वेगसोरुजादिदुःखिभावः। स्मृतिः स्मरणम्। संकल्पः शुक्लकृष्णादिभावेन संकल्पनम् रूपादीनाम्। क्रतुरध्यवसायः। असुः प्राणनादिजीवनक्रियानिमित्ता वृत्तिः। कामोऽभिलषितविषयाकाङ्क्षा। वशः स्त्रीव्यतिकराद्यभिलाष इत्येवमाद्याः अन्तःकरणवृत्तयः" शङ्करभाष्यम्।

आज्ञानुग त्रि० आज्ञामनुगच्छति अनु+गम-ड ६त०। आदेशानुसारेण गन्तरि दासादौ स्त्रि आज्ञानुगतेऽप्यत्र त्रि०।

आज्ञानुगामिन् त्रि० आज्ञामनुगच्छति अनु+गम-णिनि ६त० स०। आज्ञानुगते स्त्रियां ङीप्।

आज्ञानुयायिन् त्रि० आज्ञामनुयाति अनु+या-णिनि ६त०स स्त्रियां ङीप्। आज्ञानुसारेण गन्तरि दासादौ।

आज्ञानुवर्त्तिन् त्रि० आज्ञामनुवर्त्तते अनु+वृत-णिनि ६त० स्त्रियां ङीप्। आज्ञानुसारेण वर्त्तमाने दासादौ।

आज्ञानुसारिन् त्रि० आज्ञामनुसरति अनु+सृ-णिनि ६त० स्त्रियां ङीप्। आज्ञानुसारेण कर्म्मकारके दासादौ

आज्ञापक त्रि० आज्ञापयति आदिशति आ+ज्ञा-णिच्-ण्वुल्। आज्ञाकारके स्वामिप्रभृतौ। [पत्रे(ङकुमनामा)

आज्ञापत्र न० आज्ञाज्ञापकं पत्रम् शाक०त०। आदेशज्ञापके

आज्ञाभङ्ग पु० आज्ञाया आदेशस्य भङ्गः स्वविषयेषु प्रचाराभावः। आदेशस्याकरणेन आदिष्टविषयेषु प्रचाराभावे (ङकुम नामाना)। "दंष्ट्राभङ्गं मृगाणामधिपतय इव त्यक्तमानावलेपाज्ञाज्ञाभङ्गं सहन्ते नरप! नृपतयस्त्वादृशाः सार्व्वभौमाः" इति "चन्द्रगुप्तस्य चेतसः पीड़ासमुपजिघ्यता चाणक्येन क्रियमाणे चाज्ञाभङ्गे त्वयोपलोकैरुपलोक-

यितव्य" इति च सङ्गारावसम् । [आज्ञानुकूले दासादौ
आज्ञावह पु० आज्ञां वहति वह-अच् । आदेशवाहके
आज्ञासम्पादिन् पु० आज्ञाम् आदिष्टविषयं सम्पादयति सम्+पद+णिच्-णिनि ईत०स० स्त्रियां ङीप् । आदिष्ट विषयसम्पादके अनुकूले दासादौ ।

आज्य न० आज्यते आ+अञ्ज-क्यप् नलोपः । १ घृते । "सर्पिर्विलीनमाज्यं स्याद्घृतीभूतं घृतं भवेदित्युक्ते २ विलीने सर्पिषि "स्रुवेण दत्तभागादाज्यं गृहीत्वा" भवदेवः "पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः" ऋ पदमन्त्रः ३ श्रीवासे चन्द्रने पु० अजयपालः । "आजिमोयुक्तस्मादाज्यानामाज्यत्वमिति निरुक्ते सामस्तोमभेदे । स च "स्तोमः सामवि० ब्रा० भा० उक्तः "बर्हिष्मवमानस्तक्षत आज्यम् अग्न आयाहिवीतये" इत्यादि सूक्तम्, आनो मित्रावरुण इति द्वितीयम् "आयाहि सुष्ठ आहुत इति तृतीयम् । "इन्द्राग्नी आगतमित्यादि चतुर्थम्" उत्तरा० १ प्र० ३, ५, ६, ७, सूक्तानि तान्येतानि प्रातः सवने गायत्रसाम्ना गीयमानानि आज्यस्तोत्राण्युच्यन्ते तेषु चाज्यस्तोत्रेषु पञ्चदश स्तोमो भवति तस्य स्तोमस्य विष्टुतिरेवमाम्नायते । "पञ्चभ्योऽहिंकरोति स तिसृभिः स एकया स एकया पञ्चभ्योऽहिंकरोति स एकया स तिसृभिः स एकया पञ्चभ्योऽहिङ्करोति स एकया स एकया स तिसृभिः" सामविधानब्राह्मणम् "एवं त्रिरावर्त्यं तत्र प्रथमाष्टत्तौ प्रथमायास्त्रिराष्टत्तिः द्वितीयाष्टत्तौ मध्यायाः स्त्रिरभ्यासः । तृतीयाष्टत्तौ उत्तमायास्त्रिरभ्यासः । सोऽयं पञ्चदशस्तोम इति"
आज्यदोह न० सामवेदिपाठे सूक्तभेदे "वामदेव्यं वृहत्साम ज्येष्ठसाम रथन्तरम् । तथा पुरुषसूक्तञ्च रुद्रसूक्तं ततः परम् । आज्यदोहानि सामानि शान्तिकं भारुडानि च । पश्चिमे द्वारपालौ तु पठेतां सामगौ तथा" दानपारि० पु० तानि च सामानि देवव्रतसंज्ञकानि त्रीणि यथा । "अधि पतायि मित्र पतायि वरुण पतायि स्वाः प पतायि धनप ता २, यि ना २, माः । मन्युना वृत्रहा सूक्तेन स्वराज्यञ्चेन मघवा दक्षिणास्य प्रिया तनूरान्ना विश्वं दाधार । त्वष्टास्यत्वष्टा वृत्रेण शचीपतिरन्नेन पयः पृथिव्या सृष्टिकोऽग्निना विश्वं भूतम् । व्यभवो वायुना विद्वाः । प्रजा अस्यपत्था वषट्कारेणाहुभाक् सोमेन सोमपाः समिज्या परमेष्ठी । ये देवादेवाः । दिविषदः । स्वलेभ्यो वो देवादेवेभ्यो नमः । ये देवादेवाः । अन्तरिक्षसदः । स्वलेभ्यो० । ये देवा० । पृथिवीषदः । स्वलेभ्यो० । ये देवा० । असुषदः । स्वलेभ्यो० । ये देवा० दिवुसदः । स्वलेभ्यो० । ये देवा० । आशासदः । स्वलेभ्यो० । अवज्यामिव धन्वने विते मन्युञ्चयामसि सूढ्तां नद्रह अस्मभ्यम् । इडा २, ३, भा । यद्दं विश्वं भूतं युयो २, । आउ । वा २, ३, ना २, ३, ४, माः ॥१॥ अधिप तायि मित्रप तायि वरुणप तायि । स्वाः-प तायि धनप ता २, यि । ना २, माः । नम उत्तमिभ्यश्चोत्तमानेभ्यश्च नमो नीपङ्क्तिभ्यश्चोपवीतिभ्यश्च नमोऽस्यद्भ्यश्च प्रतिदधानेभ्यश्च नमः प्रविध्यद्भ्यश्च प्रव्याधिभ्यश्च नमः क्षुरद्भ्यश्च क्षुरिभ्यश्च नमः श्रीतृभ्यश्च आयिभ्यश्च नमस्तिष्ठद्भ्यश्चोपतिष्ठद्भ्यश्च नमो वते च वियते च नमः पथे च विपथाय च अवज्यामिव धन्वने इत्यादि प्राग्वत् ॥२॥ अधिप । तायि । मित्रप । तायि वरुणप । तायि । स्वाःप । तायि । धनप । ता २, यि । ना २, माः । नमोऽस्याय नमोऽस्यपतव एकाक्षाय चापपक्षादाय च नमो नमः । रुद्राय तीरसदे नमः स्थिराय स्थिरधन्वने नमः प्रतिपदाय च पटरिषे च नमस्थियन्धकाय च कपर्दिने च नम आश्वेभ्यश्च प्रत्याश्वेभ्यश्च नमः क्रव्येभ्यश्च विरिम्फेभ्यश्च नमः संवते च विवते च अवज्यामित्यादि पूर्ववत् २ । (सामारण्यौ ५ प्र० १ अ० ६, ७, ८ गा०) गानाग्रन्थौ अधिपतये इत्याद्यनुवाकं त्रिधा जपेत् अधिपतये मित्रपतये वरुणपतये स्वःपतये धनपतये नम इत्येव पठनीयमेवमन्येऽपि अस्मभ्यमित्यनन्तरं य इदं विश्वं भूतं युयोवे नम इति नीपङ्क्तीत्यत्र निषङ्क्तीत्येव पठनीयमन्यत् गानांशं स्तोभं विहाय समानम् ।

आज्यप पु० आज्यं पिबन्ति आज्य+पा-क उप०स० । पुलस्त्यस्य पुत्रे वैश्यानां पितृदेवेषु । "सोमपा नाम विप्राणां क्षत्रियाणां हविर्भुजः । वैश्यानामाज्यपा नाम शूद्राणान्तु स काल्पिनः" मनुः । "पुलस्त्यस्याज्यपाः पुत्राः" इति भा० आ० प० । "देवाँ आज्यपाँ आवहेति" "देवा आज्यपा अग्निंहोत्रायावहेति" च श्रुत० ब्रा० ।

आज्यभाग पु० आज्यस्य भागः । १ हुतैकदेशे "सरस्वत्याज्यभागा भवति" श्रुत० ब्रा० । हुतस्य २ वैदिकाहुतिभेदे च स च ऋग्वेदिनामग्नेरुत्तरभागे स्रुवेणाग्नये दीयमान आहुतिविशेषः तद्दक्षिणभागे सोमाय दीयमान आहुतिभेदश्च । "तूष्णीमाघार्याघारावाज्यभागौ जुहुयादग्नये स्वाहा सोमाय स्वाहेति" आश्व० श्रौ० । यजुर्वेदिनान्तु अग्नये स्वाहा इदमग्नये इति उत्तरपूर्वार्द्धे सोमाय स्वाहा इदं

सोमायेति दक्षिणपूर्वार्द्धे इति भेदः । "ता उहैता देवताऊचुः यादृमा अग्नीषोमावन्याजग्नुरग्नीषोमौ युवं वै नौभूधिवमाजौस्थोययोर्वामिदं युवयोरक्षानन्वाभजतमिति। तौहोचतुः किमावयोस्ततः स्यादिति यस्मै कस्मै च देवतायै हविर्निर्वपास्तद्वां पुरस्तादाज्यस्य यजानिति तस्माद्यस्मै कस्मै च देवतायै हविर्निर्वपन्ति ततपुरस्तादाज्यभागावग्नीषोमाभ्यां यजन्ति" शत०ब्रा० । इति तयोः सर्व्वदेवानां यज्ञस्यादौ आज्यभागदानं विहितम् । "आज्यभागाभ्यां चरत्याग्नेयेन सौम्येन" कात्या० ३,३,१, ।

आज्यभुज् पु० आज्यं मन्त्रेण प्रक्षिप्तं विलीनं सर्पिः भुङ्क्ते भुज-क्विप् । १हविर्भुजि वह्नौ तन्मुखेन हविर्भोजे २देवे च ।

आञ्जन न० आ+अञ्ज-ल्युट् । समन्ताद्भ्यञ्जने । "तेजो वा एतच्चक्षुषोर्यदाञ्जनम्" ऐ०ब्रा० अञ्जनायां भवः अण् । २हनुमति वानरभेदे स च दाशरथिसहायः "दाशरथिबलैरिवाञ्जननीलनलपरिगतप्रान्तैः" काद० । अञ्जनस्येदम् अण्, । ३अञ्जनसम्बन्धिनि त्रि० ।

आञ्जनिक न० अञ्जनाय हितम् ठन् ततः पुरो० भावे कर्म्मणि च यक् । अञ्जनसाधनत्वे ।

आञ्जनेय पु० अञ्जनाया अपत्यं ढक् । अञ्जनागर्भजाते हनूमति वानरे । "अञ्जनागर्भसंभूतो वायुपुत्रो महाबलः" । हनुमत्स्तुतिः । [अञ्जलिकरणे ।

आञ्जलिक न० आञ्जलिरेव स्वार्थे कन् ततः पुरो० यक् ।

आञ्जिनेय पु० अञ्जिन्यां भवः ढक् (आजनाद्र) कीटभेदे ।

आञ्जिहिषा स्त्री आंहितमिच्छा आ+अनृह-सन्-अ । आगमनेच्छायाम् "आंहिष्ट जातांञ्जिहिषः" भट्टिः ।

आटरूष पु० अटरूष एव स्वार्थे अण् । वासकवृक्षे स्वार्थे कन् तत्रैव "आटरूषकवर्षाभाहयाः यान्त्यनुयायिनाम्" भा०द्रो० प० ।

आटविक त्रि० अटव्यां चरति भवो वा ठक् । अरण्यचारिणि "प्रच्छन्नवञ्चकास्तेते ये स्तेनाटविकादयः" मनुः "दण्डेषु सुहृत्कुमाराटाविकाः सामन्तसैनिकाद्याश्च" सा०द० २"सैन्यभेदे। सैन्यानि च षड्विधानि। यथा "मौलं भृत्यः सुहृच्छ्रेणी द्विषदाटविकं बलम्" भरतेन नाथ धृतकोषः । तदभिप्रायेण "षड्विधं बलमदायेति" रघुः ।

आटवी स्त्री अटव्याः सन्निकटा पूः अण् । दक्षिणदिक्स्थयवनपुरीभेदे । सहदेवदिग्विजयवर्णने । "दूतैरेव वशे चक्रे करदानानदापयत् "पाण्ड्यांश्च द्रविड़ांश्चैव सहितांश्चोड्रकेरलैः । अन्ध्रांस्तालवनांश्चैव कलिङ्गानुष्ट्रकर्णिकान् । आटवीञ्च पुरीं रम्यां यवनानां पुरं तथा" भा०स०प० ।

आटि पु०आ+अट्-इन् । १शरारिपक्षिणि । २मत्स्यभेदे च जातित्वेन स्त्रियां वा ङीप् । ज्ञात्रादिषु पाठात् णत्वाभावे परेऽप्योदात्तत्वम् ।

आटिक त्रि० आटाय गमनाय प्रहृत्तः ठण् । गमनप्रवृत्ते स्वार्थे यञ् । आटिक्यमप्यत्र न० ।

आटिकी स्त्री आटम् अटनमर्हति अण्-ङीप् । मद्दाद्वहिर्गन्तुमर्हायामनुपजातपयोधरायां स्त्रियाम् । "मटचीकृतेषु कुरुष्वाटिक्या सह जाययोषस्तिं चाक्रायण इभ्यग्रामे प्रद्राण उवास" छा०उ० । आटिक्याऽनुपजातपयोधरादि स्त्रीव्यञ्जनया जायया सह" इति भा० ।

आटीकन न० आटीक्यत ईषद्गम्यते आ+टीक-ल्युट् । वत्सानां प्रथममल्पगतौ स्वार्थे कन् तत्रैव हारी ह्रान्तत्वा पाठः प्रामादिकः ।

आटीमुख न० आद्याः शरारिभेदस्य मुखमिव मुखमस्य । सुश्रुतोक्ते शस्त्रभेदे "सूचीकुशपत्राटीमुखशरारीमुखेत्यादि विंशतिशस्त्रगणनायाम् सुश्रु० अर्द्धधारशब्दे विवृतिः ।

आटोप आ+टुप-घञ् पृषो० ठत्वम् । १दर्पे, २संरम्भे, ३आडम्बरे च । "आटोपमखर्वीमनिशं नैदन्तः" माघः "मदजलदुर्दिनान्धकारगजघटितघनघटाटोपपरिपालितापि"काद०"साटोपं परिक्रम्य"वेणी०"कलापरुचिराटोपनिचितान् सकुटानिव" भा०व०प० । ४वातजन्ये उदरशब्दभेदे "आमाटोपार्पचित्ते अगुल्मे क्रिमिविकारिणाम्" सुश्रु० ।

आडम्बर पु० आ+डबि-घञ्, अरन् । १हर्षे, २दर्पे, ३तूर्यस्वने, ४आरम्भे ५संरम्भे, ६व्यलिलोम्नि, घनगर्ज्जिते, ७व्यायोजने च । मत्वर्थे इनि । आडम्बरिन् तद्युक्ते त्रि० । [भेदे । ततः स्वार्थप्रत्ययस्य बहुषु लुक् ।

आडारक पु० अड-उद्यमे घञ् ततः आरक् ऋधि-

आडि पु० अड-उद्यमे इन् । खनामख्याते मत्स्यभेदे । शरारीवृक्षे च पुंस्त्री० स्त्रीत्वे वा ङीप् स्वार्थे कन् आडिकाप्यत्र ।

आडु पु० अल ज लस्य डः नि० डुः । (भेला) उडुपे ।

आढक पु० आढ्यौकते आ+ढौक-घञ् पृ० । "अष्टसृष्टिर्भवेत् कुञ्चिःकुञ्चयोऽष्टौ तु पुष्कलम्। पुष्कलानि च चत्वारि आढकः परिकीर्त्तित इति" मतभेदे चतुर्विंशत्यधिकसप्तसृष्टिमाने "द्वादशप्रसृतिभिः कुड़वस्तच्चतुर्गुणोऽरः प्रस्थाढकद्रोणा, इत्युक्ते द्विनवत्युत्तरशतप्रसृतिमाने च

एतच्च धान्यादेर्मानं । सुवर्णादिमाने तु तुलतः । "द्वादश धान्यमाषाः मध्यमाष्टसुवर्णमाषकः ते षोड़श सुवर्णम् । अथ मध्यमनिष्पावा एकोनविंशतिर्द्धरणं तान्यष्टौ तोलितानि कर्षं ततश्चतुर्गुणमभिवर्द्धयन्नः पलकुड़वप्रस्थाढकद्रोणा इत्यभिनिष्पद्यन्ते इत्युक्ते २५६ पलमाने च । अर्द्धर्चादिपाठात् कोपधादन्तत्वेऽपि अस्य पु०न०लिङ्गता । अस्य परिमाणवाचकत्वात् आढ़कोन्नी हिरित्यादौ प्रथमायाः परिमाणमर्थः आढ़कपरिमाण परिच्छेद्योन्नीहिरित्यादि बोधः । आढकं सम्भवति अवहरति पचति वा ख टञ् वा । आढ़कीनः आढ़किकः आढ़कमितधान्यस्थापने तदवहारके च पात्रे तत्पाचके स्थादौ त्रि० ठञि स्त्रियां ङीप् इति भेदः ।

आढकजम्बु पु० आढकमिता जाम्बूर्यत्र देशे । स्थूलजम्बुयुक्तदेशे तत्र भवः तद्धातप्राचाम् ठञ् लुप्तापवादकः । आढकजम्बुकः । तत्र भवे त्रि० ।

आढकी स्त्री आढौकते अच् पृषो०मौ० ङीष् । (अरहर) इति ख्याते शमीधान्यभेदे । "आढकी तुवरी रूक्षा मधुरा शीतला लघुः स्याद्विषी वातजननी वर्ण्या पित्तकफास्रजित्" भावप्र० फले अस्य पुस्त्वमपि "आढकांश्च मसूरांश्च कोद्रवान् लवणं त्यजेत्" काशी०ख० वैश्वदेवे वर्जने ।

आढ्य त्रि० आ+ध्यै–क पृषो० । १युक्ते, २विशिष्टे ३सम्पन्ने ४धनिनि च । युक्ते धनाढ्यः पुण्याढ्यः विनयाढ्यः । सम्पन्नः सम्पद्युक्तः "आढ्यास्तथाऽव्यसनिनः सततक्रतवः सर्व्वदा" भा०स०प० ५अ० । "आढ्योऽत्यति दम्भोधर्म्ममतिक्रामति धर्ममतिक्रामन् पापं करोतीति नीलकण्ठधृता स्मृतिः "षेड्डःपञ्चभिराढ्यानाम्" स्मृतिः "आढ्यादिव प्रापथिकादजस्रम्" माघः ।

आढ्यकुलीन पुंस्त्री आढ्यकुले भवः खः । आढ्यकुलभवे ।

आढ्यङ्करण न० अनाढ्यमाढ्यं करोत्यनेन आढ्य+च्विकरणे ल्युट् सुम् उप०स० । अभूताढ्यस्य आढ्यताकरणे ।

आढ्यचर त्रि० भूतपूर्व्वं आढ्यः चरट् । भूतपूर्व्वार्थे स्त्रियां ङीप् ।

आढ्यतम त्रि० अतिशयेन आढ्यः तमप् । अतिशयाढ्ये ।

आढ्यपदि अव्य० आढ्यं पदं प्रहरणं यत्र इदमर्थेऽण् ङीच् इजन्तत्वादव्ययत्वम् । आढ्यपदप्रहरणयुक्ते युद्धे ।

आढ्यभवन न० अनाढ्य आढ्यो भवत्यनेन आढ्य+भू-करणे ल्युट् सुम् उप०स० । अनाढ्यस्य आढ्यभवनसाधने ।

आढ्यभविष्णु त्रि० अनाढ्य आढ्यो भवति आढ्य+भू-खिष्णुच् सुम् उप०स० । अभूतपूर्व्वार्थे आढ्यताम् प्राप्ते "आढ्यभविष्णुर्यशसा कुमारः" भट्टिः ।

आढ्यम्भावुक त्रि० अनाढ्य आढ्योभवति आढ्य+भू-खुकञ् सुम् उप०स० । अनाढ्ये आढ्यतया भूते ।

आढ्यवात पु० आढ्योवातोयत्र । "ककमेदोहतो वायुर्यदोरू प्रतिपद्यते । तदाङ्गमर्द्दगौरिख्यरोमहर्षरुजाज्वरैः निद्रया चार्द्दितौ स्यातां शीतलावप्रचेतनौ । गुरुकावस्थिरावूरू न स्वापिव च मन्यते । तमूरुस्तम्भमित्याहुराढ्यवातमथापरे" सुश्रुतोक्तलक्षणे ऊरुस्तम्भरोगे ।

आणक त्रि०अणक एव स्वार्थे अण् । १अधमे कुत्सिते शुद्रटः । "आणकं सुरतं नाम दम्पत्योः पार्श्वसंस्थयोः" इत्युक्त लक्षणे २सुरतभेदे न० ।

आणव न० अणोर्भावः वृद्धादि० वा अण् । अणुत्वे ।

आणवीन त्रि० अणुधान्यानां गर्षपादीनां भवनं क्षेत्रम् वा खञ् । (सुनाडाङ्गा) क्षेत्रभेदे तत्र गर्षपाद्यणुधान्यान्युत्पद्यन्ते तस्मिन् । पक्षे यत् अणव्यमप्यत्र ।

आणि पुंस्त्री०अण–इन् स्त्रियां वा ङीप् । रथचक्राग्रस्थे १कीलके, २कोटौ ३सीम्नि च । "मयोभुवा सरथा यातमर्वाङ्मनो निधिं धुरमाणि न नाभिम्" ऋ० ४, ४३,८ । "आणिं न रथ्यममृताधितस्थुः"ऋ० १,३५,६, सुश्रुतोक्ते मर्म्मस्थानभेदे, अत ऊर्द्धं प्रत्येकयोमर्म्मस्थानं व्याख्यास्याम" इत्युपक्रम्य । "जानुन ऊर्द्धं सभयतस्त्र्यङ्गुलमाणिनाम तलयोर्फाभिदन्ध्रिः स्वाश्वसक्थिता च" उक्तम् ।

आणीवेय पुंस्त्री० अणिरस्त्यस्य वा दीर्घः अणीवः ऋष्यभेद स्वार्थापत्यम् गुझा० ढक् । अणीवर्षेरपत्ये ।

आण्ड त्रि० अण्डेभवः अण् । १अण्डसम्भवे पक्षिप्रभृतौ स्त्रियां ङीप् वेदे तु क्वचित् टाप् । "आण्डेव भित्त्वा शकुनस्य गर्भम्" ऋ० १,६८,७, २अण्डजाते हिरण्यगर्भे पु० "तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । तस्मिन् जज्ञे स्वयं ब्रह्मा सर्व्वलोकपितामह" इति मनूक्तेस्तस्याण्डजातत्वात् तथात्वम् । "विराड्वक्षेमावाखौ स्वराट् च" शत०ब्रा० । अण्डमेव स्वार्थे अण् । ३पुरुषवृषणे स्वार्थिकप्रत्ययस्य क्वचित् लिङ्गवचनातिक्रमस्रष्टत्वात् पु० "यस्य ह्याण्डौ भवतः रेतः सिञ्चति" शत०ब्रा० । "आनन्दनन्दाभाण्डौ मे" यजु० २०,६, "आण्डौ वृषणौ" वेददी० । "अण्डं वृषणोऽस्यास्य अण् । ४वृषणयुक्ते "आण्डौ वै रेतःसिचौ" शत०ब्रा० । अण्डेन निर्वृत्तः अण् । अण्डनिर्वृत्ते ५कपालरूपे द्युलोके भूलोके च । "तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरम्

स्वयमेवात्मनो ध्यानात्तदण्डमकरोद्द्विधा । ताभ्यां स शकलाभ्याञ्च दिवं भूमिञ्च निर्ममे इति" मनुनाऽण्डशकलाभ्यां तयोरुत्पत्तिप्रतिपादनात्तयोस्तद्धात्वम् ।

आण्डज पु० अण्डात् जायते जन–ड स्वार्थे अण् । १अण्डजे पक्षिसर्पादौ । २तच्छरीरे न० "तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जम्" इति छा० उ० । "तेषां जीवाविष्टानां खल्वेषां पक्ष्यादीनां भूतानामेषामिति प्रत्यक्षनिर्देशात्तु तेजःप्रभृतीनाम् । तस्मात्तेषां खल्वेषां भूतानां पशुपक्षिस्थावरादीनां त्रीण्येव नातिरिक्तानि बीजानि कारणानि भवन्ति । कानि तानीत्युच्यते । अण्डजमण्डाज्जातम् अण्डजमेवाण्डजं पक्ष्यादि । पक्षिसर्पादिभ्यो हि पक्षिसर्पादयो जायमाना दृश्यन्ते । तेन पक्षी पक्षिणां बीजम् सर्पः सर्पाणां बीजम् । तथाऽन्यदप्यण्डाज्जातं तज्जातीयानां बीजमित्यर्थः ॥ नन्वण्डाज्जातमण्डजमुच्यते ऽतोऽण्डमेव बीजमिति युक्तं कथमाण्डजं बीजमुच्यते । सत्यमेवं स्यादपि त्वदिच्छातन्त्रा श्रुतिः स्यात्स्वतन्त्रा श्रुतिर्यत आहाण्डजाद्येव बीजं नाण्डादीति । दृश्यते चाण्डजाद्यभावे तज्जातीयसन्तत्यभावो नाण्डाद्यभावे । अतोऽण्डजादीन्येव बीजान्यण्डजादीनाम्" भा० ।

आण्डायन त्रि० अण्डेन निर्वृत्तः पक्षा० फक् । अण्डनिर्वृत्ते त्रि० । [खोर इत्येव साधुरित्यन्ये ।

आण्डीर पु० आण्डमस्यास्ति रच् । दण्डयुक्ते इत्यपरे अ०

आण्डीवत पु० राजभेदे । तेन निर्वृत्तम् कथा० फिञ् । आण्डीवतायनिः तन्निर्वृत्ते त्रि० ।

आत् अव्य० अत–विच् । १अनन्तरमित्यर्थे । "आदस्य वातो अनुवाति शोचिः" ऋ० १,१४८,३ २अपिचेत्यर्थे "विश्वकर्मा विमना आद्विहायाधाता विधाता परमोत सन्दृक्" यजु० १७,२९, "आत् अपि च" वेददी० आ+स्वरूपे तकार । ३आकाररूपे वर्णे पु० "आतश्चोपसर्गे कः" पाणिनिसूत्रम् ।

आत त्रि० आ+अत् अच् । सततगते प्रस्रुते । "पशोभिः श्रयमाणा उदातैः" यजु० २९,५, "आतैः प्रस्रुतैः" वेददी०

आतक त्रि० अत+ण्वुल् । १सततगन्तरि २सर्पभेदे पु० "बाष्कयाजश्चक्रुश्च धूर्तकः प्रातरातकौ । कौरव्यकुलजाश्चेते प्रयाता हव्यवाहनम्" भा० आ० ५७ अ० ।

आतङ्क पु० आ+तकि–घञ् । १रोगे, "दीर्घतीव्रामयग्रस्तं ब्राह्मणं गामथापि वा । हत्वा पथि निरातङ्कं स्नात्वा वा ब्रह्महा शुचिः" या० २स्नाने, "मन्त्रेण च विजानीयात् देशं कालं जातिसात्म्यमातङ्कं सत्पत्तिं वेदनासमुच्छ्रायम्" इत्यादि सुश्रुतः । ३सन्देहे, ४सरजशब्दे, ५भये च । "पुरुषायुषजीविन्यो निरातङ्कानिरीतयः" रघुः ।

आतञ्चन न० आ+तनच–ल्युट् । १वेगे, २प्रापणे, ३आघायने दुग्धादौ दध्यादिभावापादनाय ४अम्लद्रव्यप्रक्षेपे, (दम्बल देओया) ५निक्षेपे, ६उपद्रवे, ७द्रवद्रव्यप्रक्षेपेण कठिनद्रव्यस्य चूर्णने गलितस्वर्णादेर्द्रव्यान्तरयोगेन टञ्जारणे च । करणे ल्युट् । ८दधिसाधन द्रव्ये (दम्बल) । गोभ्योऽधिदुग्धविधाः दुग्धादय उत्पद्यन्ते यथोक्तं श्रुतौ "प्रतिधुक् तस्यै ह्रदं तस्यै शरस्तस्यै दधि तस्यै मस्तु तस्या आतञ्चनं तस्यै नवनीतं तस्यै घृतं तस्या आमिक्षा तस्यै वाजिनम्" शत० ब्रा० । तत्र प्रतिधुक् सद्योदुग्धम् १ह्रदं पक्वं पयः२ । शरः पक्वक्षीरस्योपरि सारभूतम्३ । घनीभूतं वस्तु दधि४ । दधिभवं सारभूतसुदकं मस्तु ५, । नवनीतघृते ६,७, प्रसिद्धे आतञ्चनं दधिभावकारणम् ८। आमिक्षा तप्ते पर्यसि दध्यानयने सति यत् घनीभूतं वस्तु जायते सामिक्षाः। द्रवात्मकं वाजिनम्१०"भा० "यत्पूर्व्वेद्युर्दुग्धं हविरातञ्चनं तत्कुर्वीत कात्या० । [ससंसदा" रघुः ।

आतत त्रि० आ+तन–क्त । विस्तृते "आततज्यमकरोत्

आततायिन् त्रि० आततेन विस्तीर्णेन शस्त्रादिना अयितुं शीलमस्य अय–णिनि । वधोद्यते । विषयभेदेन आततायिवधे दोषादोषौ" प्रा० वि० उक्तौ यथा हरिः "नाततायिवधे हन्ता किल्बिषं प्राप्नुयात् क्वचित् । विनाशार्थिनमायान्तं घातयन्नापराध्नुयात्" । किल्बिषाभावः प्रायश्चित्तनिषेधार्थः अपराधाभावो दण्डनिषेधार्थः । यतः "सर्वत आत्मानं गोपायेतेति" श्रुतिमूलमिदम् अतः पलायनादिनापि रक्षणाभावे इदं बोद्धव्यम् । कात्यायनः । "आततायिनमायान्तमपि वेदान्तगं रणे । जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्" जिघांसी सन् इत्यादृच्छेदित्यर्थः । देवलः । "उद्यम्य शस्त्रमायान्तं भ्रूणमप्याततायिनम् । निहत्य भ्रूणहा न स्यादहत्वा भ्रूणहा भवेत्" । भ्रूणो ब्राह्मणविषेयः । दोषदर्शनं नियमार्थम् । मनुविष्णू । "गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम् । आततायिनमायान्तं हन्यादेवाविचारयन्" एवकारो नियमार्थः । तथा "नाततायिवधे दोषो हन्तुर्भवति कश्चन । प्रकाशं वाऽप्रकाशं वा मन्युस्तन्मन्युमृच्छति" । यस्माद्धन्तृमन्युर्हन्यमानमन्युं नाशयति न पुनः पुरुषोहन्ति हन्यते वेति हननविधेरपवादः । आततायिन-

माह वशिष्ठः । "अग्निदोगरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहारी च षड़ेते आततायिनः" । विष्णुकात्यायनौ । उद्यतासिविषाग्निञ्च शापोद्यतकरस्तथा । आथर्वणेन हन्तारं पिशुनञ्चैव राजसु । भार्यातिक्रमिणञ्चैव विद्यात्प्राततायिनः । यशोवित्तहरानन्यानाक्रुद्धस्तार्थहारकान्" । विशेषमाह कात्यायनः । "अनाचारितपूर्व्वोयस्त्वपराधे प्रवर्त्तते । प्राणद्रव्यापहारे च प्रहृत्तस्यातताविता" । अनाचारितोऽनपकृतः । तेन पूर्व्वकृतापकारस्य मारणोद्यतस्य नाततायिता । तेन प्रत्युपकारकरणे दोषएव । ननु आततायिनोरपि गोब्राह्मणयोर्हननेदोषमाह शमन्तः । "नाततायिवधे दोषोऽन्यत्र गोब्राह्मणात् यदा हन्यात् प्रायश्चित्तं कुर्य्यात्" । तथा भविष्ये । "घातकानपि गोविप्रान्न हन्याद्वै कदाचनेति" । अतः पूर्व्ववचनविरोधः । सत्यम् । अत्र व्यवस्थामाह कात्यायनः । "आततायिनि चोत्कृष्टे तपःस्वाध्यायजन्मतः । वधस्तत्र तु नैव स्यात् पापे हीने वधोमतः" । जन्मपदेन जातिः कुलञ्चोच्यते । तेन हन्तृपेक्षया तपोविद्याजातिकुलैरुत्कृष्टोनायतायी वध्यस्तदन्योवध्यएव । अतएव भगवद्गीतायामाह । "पापमेवाश्रयेदस्मान् हत्वैतानाततायिन" इति । एतान् भीष्मादीन् अत्यन्तोत्कृष्टगुणानित्यर्थः । एवंभूतातताविनश्चाहनने फलमप्याह हरिस्मृतिः । "आततायिनमुत्कृष्टं ब्रह्मस्वाध्यायसंयुतम् । योन हन्याद्वधप्राप्तं सोऽश्वमेधफलं लभेत्" । यद्यपि "गुरुमप्युद्यतं हन्यादिति" । श्रूयते । तथापि गुरोः सकाशात् कुलविद्यातपोभिः शिष्यस्याप्युत्कर्षसम्भवः । एवं बहुश्रुतादावपि । एवमधमवर्णस्योत्तमवर्णो न वध्यः । पूर्व्वकृतापकारविषयं वा शमन्तुवचनम् । गौराततायिपि न वध्यः । "नखिनां शृङ्गिणाञ्चैव दंष्ट्रिणाञ्चाततायिनाम् । हरस्थानान्यधान्येषां वधे हन्ता न दोषभागिति" कात्यायनवचनं गोव्यतिरिक्तशृङ्गिविषयम् । विशेषमाह कात्यायनः । उद्यतानान्तु पापानां हन्तुर्दोषो न विद्यते । निहत्तस्तु यदारम्भात् हरणं न वधःस्मृतः" इत्यत्नेन । तत्रत्यस्य शब्दार्थमाह देवलः "अनूचानो गुणोपेतो यज्ञस्वाध्यायवन्मितः । भ्रूण इत्युच्यते शिष्टैः श्रेष्ठभोजी जितेन्द्रियः" । मिताक्षरायामपि "गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम् । आततायिनमायान्तं हन्यादेवाविचारयन् । नाततायिवधे दोषो हन्तुर्भवति कश्चन । प्रकाशं वा प्रकाशं वा मन्युस्तन्मन्युमृच्छति" । तथा "आततायिनमायान्तमपि वेदान्तगं रणे । जिघांसन्ब्रह्महा भवेत्" इत्याद्यर्थशास्त्रम् । "इयं विशुद्धिरुदिता प्रमाप्याकामतोद्विजम् । कामतो ब्राह्मणवधे निष्कृतिर्न विधीयत" इत्यादि धर्म्मशास्त्रमनयोर्विरोधे धर्मशास्त्रं बलवदिति युक्तम् । अनयोरेकविषयत्वासम्भवेन विरोधाभावाद्व बलावलचिन्ता अवतरति । तथा हि "शस्त्रंहिजातिभिर्ग्राह्यन्धर्म्मोयत्रोपरुध्यते" इत्युपक्रम्य "आत्मनश्च परित्राणे दक्षिणानाञ्च सङ्गरे । स्त्रीविप्राभ्युपपत्तौ च धर्मेण न्यग्न दुष्यति" त्यात्मरक्षणे दक्षिणादीनां यज्ञोपकरणानां च रक्षणे युद्धे च स्त्रीब्राह्मणहिंसावाञ्च आततायिनमकूटशस्त्रेण हन्तु न दण्डभागित्युक्त्वा तस्यार्थवादार्थमिदमुच्यते । "गुरुं वा बालवृद्धौ वेत्यादि" । गुर्वादीनत्यन्तावध्यानप्याततायिनोहन्यात् किमुतान्यानिति । वाशब्दश्रवणादपि वेदान्तगमित्यत्राप्यपिशब्दस्य श्रवणान्न गुर्वादीनां वध्यत्वप्रतीतिः "नाततायिवधे दोषोऽन्यत्र गोब्राह्मणवधादिति" शमन्तुवचनात् । "आचार्य्यं च प्रवक्तारम् पितरञ्चातरं गुरुम् । न हिंसाद्ब्राह्मणान् गाश्च सर्वांश्चैव तपस्विन" इति मनुवचनाच्च । आचार्य्यादीनामाततायिनां हिंसाप्रतिषेधेनेदं वचनमर्थवन्नान्यथा हिंसामात्रप्रतिषेधस्य सामान्यशास्त्रेणैव सिद्धत्वात् । "नाततायिवधे दोषोहन्तुर्भवति कश्चन" इत्यतदपि ब्राह्मणादिव्यतिरिक्तविषयमेव । यतः "अग्निदोगरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षड़ेते आततायिनः" तथा "उद्यतासिर्विषाग्निश्च शापोद्यतकरस्तथा । आथर्वणेन हन्ता च पिशुनश्चापि राजनि । भार्यातिक्रमकारी च रन्ध्रान्वेषणतत्परः । एवमाद्यान् विजानीयात्सर्वानेवाततायिन" इति सामान्येनाततायिनोदर्शिताः । अतश्च ब्राह्मणादय आततायिन आत्मादित्राणार्थं हिंसानभिसन्धिना निवार्यमाणाः प्रमादाद्यदि विपद्येरंस्तत्र लघु प्रायश्चित्तं राजदण्डाभावश्चेति" । ब्राह्मणाद्याततायिवधे दोष उक्तः । अतएव भीष्मादीनामाततायिनामपि हननेन "अश्वमेधेन शुध्यन्ति महापातकिनस्त्विमे" इति भारते युधिष्ठिरादीनां महापातकित्वमुक्तम् ।

आतनि त्रि० आ–तन–इन् । आतानके विस्तारके । "त्वं विश्विग्रुरसि यज्ञमातनिः" ऋ० २,१,१० ।

आतप् त्रि० आतपति आ+तप–क्विप् । तापके "परिवाम-रुषायवोष्णावरन्त आतपः" ऋ०५,७३,५ । "आतपः आतापिनः" भा० ।

आतप पु० आ–तप–घ । १उद्द्योते, २निर्विड़किरणे रौद्रे च । "आतपः कटुकोरूक्षः स्वेदमूर्च्छाक्षयपा-

प्रदः । दाहवैवर्ण्यजननोनेत्ररोगप्रकोपनः" सुश्रुतः । "भवति वपुरवाप्नुच्छायमेवातपेऽपि" माघः । "आतपात्ययसंछिन्ननीवारासु निषादिभिः" रघुः । "तमातपक्लान्तमनातपत्रम्" रघुः । "भ्रष्टकान्ति यस्यातपवन्ति सिद्धाः" कुमा० । "शीतातपाभिघाताश्च विविधानि भयानि च" मनुः । आतपश्च विरलसंयोगापन्नः सूर्यस्य किरणभेदः स एव रौद्रशब्दाभिधेयः प्रकाशस्तु ततोऽपि विरलसंयोगापन्न इति प्रकाशरौद्रयोर्भेदः । अस्य च निविड़तेजस्कत्वादुष्णस्पर्शवत्त्वम् तेन दुःखदायकत्वं मनुनोक्तम् । एवं "आतापतापितभूमौ माधव ! माधव ! मा धावेति" यशोदावाक्येऽपि । २ प्रकाशे "छायातपौ ब्रह्मविदो वदन्ति" श्रुतिः ।

आतपत्र न० आतपात् त्रायते त्रै-क । छत्रे । स्वार्थे कन् । आतपत्रकमप्यत्र । "तमातपक्लान्तमनातपत्रम्" । "एकातपत्रं जगतः प्रभुत्वम्" । "पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम्" इति च रघुः । "राज्ञं स्वहस्तधृतदण्डमिवातपत्रम्" शक्रु० । "तस्मातपत्रं बिभराम्यभवे" माघः । "निजातपत्रस्य तलस्थले नलः" नैष० आतपत्रोत्पत्तिर्यथा भार०आनु०प० ९२,९३ अ० । "यदिदं श्राद्धकल्पेषु दीयते भरतर्षभ ! । छत्रोपानहौ चैव केनैतत् संप्रवर्त्तितम् । कथञ्चैतत् सतत्पत्रं किमर्थञ्चैव दीयते । न केवलं श्राद्धकल्पे पुण्यकेष्वपि दीयते । बहुष्वपि निमित्तेषु पुण्यमाश्रित्य दीयते । एतद्विस्तरतो ब्रह्मन् ! श्रोतुमिच्छामि तत्त्वतः । भीष्म उवाच । शृणु राजन्नवहितश्छत्रोपानहविस्तरम् । यथैतत् प्रथितं लोके यथा चैतत् प्रवर्त्तितम् । यथा चाचरितव्यं प्राग्नं पुण्यताञ्च यथा गतम् । सर्वमेतदशेषेण प्रवक्ष्यामि नराधिप ! । जमदग्नेश्च संवादं सूर्यस्य च महात्मनः । पुरा स भगवान्साक्षाद्धनुषाऽक्रीडत प्रभो ! । सन्धाय सन्धाय शरांश्चिक्षेप किल भार्गवः । तान् सर्वान् रेणुका छित्त्वा तस्थौ तेषु दीप्ततेजसः । आनीय सा तदा तस्मै प्रादादसदृशच्युत ! । अथ तेन स शब्देन ज्यायाश्चैव शरस्य च । प्रहृष्टः सस्मचिक्षेप सा च प्रत्याजहार तान् । ततो मध्याह्नमारूढे ज्येष्ठामूले दिवाकरे । स सायकान् द्विजो दृष्ट्वा रेणुकामिदमब्रवीत् । गच्छानघ विशालाक्षि ! शरानेतान् धनुश्च्युतान् । यावदेतान् पुनः शुभ्रु ! क्षिपामीति जनाधिप ! । सा गच्छन्यत्नरा ज्यायां छत्त्वमाश्रित्य भाविनी । तस्थौ तस्य हि सन्नह्य शिरः पादौ तथैव च । स्थित्वा सा तु मुहूर्त्तं वै भर्तुः शापभयाच्छुभा । यथावानयितुं भूयः सायकानसितेक्षणा । प्रत्याजगाम च शरांस्तानादाय यशस्विनी । सा वै खिन्ना सुचार्वङ्गी पद्भ्यां दुःखं नियच्छती । उपाजगाम भर्त्तारं भयाद्भर्तुः प्रवेपती । स तामृषिस्तदा क्रुद्धो वाक्यमाह शुभाननाम् । रेणुके ! किं चिरेण त्वमागतेति पुनः पुनः । रेणुकोवाच । शिरस्तावत् प्रदीप्तं मे पादौ चैव तपोधन ! । सूर्यतेजोनिरुद्धाङ्गं छत्रच्छायां समाश्रिता । एतस्मात् कारणाद्ब्रह्मंश्चिरायैतत् कृतं मया । एतच्छ्रुत्वा मम विभो ! मा क्रुध्यस्व तपोधन ! । जमदग्निरुवाच । यद्येनं दीप्तकिरणं रेणुके ! तव दुःखदम् । शरैर्निपातयिष्यामि सूर्यमस्त्राग्नितेजसा । भीष्म उवाच । स विस्फार्य धनुर्दिव्यं गृहीत्वा च शरान् बहून् । अतिष्ठत् सूर्यमभितो यतो याति ततोमुखः" । इत्येवं क्रोधेन आत्मानं (सूर्यं) पातयितुमिच्छवे जमदग्नये विप्ररूपं धृत्वागत्य तं च परितोष्य तस्मै छत्रोपानहौ च सूर्योददावित्युक्तं ततोऽध्यायान्तरे यथा ।

"एतावदुक्त्वा स तदा तूष्णीमासीद्भृगूत्तमः । अथ सूर्योऽददत्तस्मै छत्रोपानहमाशु वै । सूर्य उवाच । महर्षे ! शिरस्त्राणं छत्रं महद्भिस्त्रवारणम् । प्रतिगृह्णीष्व पद्भ्याञ्च त्राणार्थं चर्मपादुके । अद्यप्रभृति चैवेह लोके सञ्चरिष्यति । पुण्यकेषु च सर्व्वेषु परमञ्चयमेव च । भीष्म उवाच । छत्रोपानहमेतत्तु सूर्येणैतत् प्रवर्त्तितम् । पुण्यमेतदभिख्यातं त्रिषु लोकेषु भारत ! । तस्मात् प्रयच्छ विप्रेषु छत्रोपानहमुत्तमम् । धर्मज्ञेषु महान् भावो न भेदास्ति विचारणा । छत्रं हि भरतश्रेष्ठ ! यः प्रदद्याद्द्विजातये । शुभम् शतशलाकं वै स प्रेत्य सुखमेधते" । एतल्लक्षणं छत्रशब्दे वक्ष्यते ।

आतपवत् त्रि० आतपोऽस्यत्र मतुप् मस्य वः । आतपयुक्ते "भ्रष्टकान्ति यस्यातपवन्ति सिद्धाः" कुमा० ।

आतपवर्ष त्रि० आतपे निमित्तेसति वर्षन्ति वा० कर्त्तरि यत् । वृष्टिजले "अन्तरिक्षात् प्रतिगृह्यातपवर्ष्याः" कात्या० १५,४,५, अन्तरिक्षात् गृहीतव्या आतपवर्षणाः या आतपे वर्षन्ति ताः । अन्तरिक्षात् प्रतिगृह्य भूमिपतनात् प्रागेवाकाशात् पतन्तीरादाय गृहीतव्या" कर्क० । अतएव वृष्टिजलस्यातपनिमित्तत्वात् नैमित्तिकत्वाभिप्रायेण तासां यज्ञकाले यज्ञसम्बन्धेन पूर्वं संग्राह्यतोक्ता "यूपसत्तरेण नैमित्तिकसम्भवात्" कात्या० १५,४२

"या आपोनिमित्तेन प्राप्यन्ते ता नैमित्तिक्यः यथा गोरुग्राः आतपवर्ष्मास्तासामस्मिन् काले सङ्घातसम्भवात् अतः पूर्वं गृहीत्वा वृषसुत्तरेण पुनर्ग्रहणमिति" कर्कः । अतएव श्रुत्या दृष्टेरातपनिमित्तत्वमुक्तम् "तस्माद्यत्र क्वचित् शोचति स्वेदते वा पुरुषस्तेजस एव तदध्यापोजायन्ते" इति ऋ०७० पुरुषदेहस्य सन्ताप स्वेदयोरातपनिमित्तत्वात् दृष्टेरातपहेतुकत्वम् । व्यक्तमाह यादवः "तासां शतानि चत्वारि रश्मीनां वृष्टिसर्ज्जने चतुःशतं वृष्टिवाहाः सप्तांशा अमृताः स्मृताः" इति सूर्य्यरश्मीनां मध्ये चतुःशतस्य वृष्टिसर्ज्जकत्वेन दृष्टेरातपनिमित्तकत्वमत्र व्यक्तमेव ।

आतपवारण न० आतपं वारयति वृ–णिच् ल्यु । छत्रे । "वृषपतिकृतं दत्त्वा यूने सितातपवारणम्" "अनुदितान्यसितातपवारणम्" इति च रघुः ।

आतपात्यय पु० ६त० । रौद्रापगमे सूर्य्यकिरणविगमे । "आतपात्ययसंछिन्नवीरासु निषादिभिः" रघुः ।

आतपाभाव ६त० पु० आतपस्याभावरूपायाम् छायायाम् ।

आतपीय त्रि० आतपस्य सन्निकृष्टदेशादि उत्करा० छ । आतपसन्निकृष्टदेशादौ ।

आतपोदक न० आतपे लक्ष्यमाणमुदकम् शा०त० । सूर्य्यमरीचौ–लक्ष्यमाणे उदके मृगतृष्णिकायाम् ।

आतमाम् अव्य० आ+तमप् आत्व । अतिशयाभिमुख्ये अत्यन्तसमन्ताद्भावे च "महोदेवं कथमात्मानमाख्यायत आत्मा हि महदुक्थम्" शत०ब्रा० ।

आतर पु० आतरत्वेनेन आ+तॄ–अप् । नद्यादेःतरणार्थं देये शुल्के "आतरत्नावहेतोर्मुरहर ! तरणिं तवावलम्बे" इत्युद्भटः द्रव्यभेदे आतरमानसूत्रं मनुना "षण्णं यानन्तरे दाप्यमुरुपोऽर्द्धपथन्तरे । पादमग्रुच योषिच्च पादार्द्धं रिक्तकः पुमान् । भाण्डपूर्णानि यानानि तार्यं दाप्यानि सारतः । रिक्तभाण्डानि यत् किञ्चित् पुमांसश्चापरिच्छदाः"

आतर्पण न० आ+तृप–ल्युट् । १तृप्तौ । णिच्–ल्युट् । २मोचने ३मङ्गलालेपने । कर्त्तरि ल्युट् । ४तृप्तिकारके त्रि० ।

आतव पु० आ+तु–अप् । १हिंसने कर्त्तरि अच् । २हिंसके त्रि० ३राजभेदे पु० तस्यापत्यम् अश्वा०फक् । आतवायनः तदपत्ये पुंस्त्री० ।

आता स्त्री आभिमुख्येन अत्यते गम्यते प्राणिभिः आ+अत–कर्म्मणि घञ् । दिशि निरु० । "प्रये हितादिव अञ्जन्त्याताः" ऋ०२,४२,६ ।

आतान पु० आतन्यते आ+तन–घञ् । १आभिमुख्येन विस्तारे २दीर्घविस्तारे पटादिवयनार्थं दीर्घविस्तारे (टाना देओया) "वया लुता आतानवितानाभ्यां जालं विस्तारयतीति" वेदान्तप्र० कर्म्मणि घञ् । ३विस्तार्ये ४क्रियमाणे च "एष एव निश्च एकाहातानः" शत०ब्रा० ।

आतानक त्रि० आ+तन–ण्वुल् । विस्तारके ।

आतापि पु० आ+तप इण् । असुरभेदे स वातापिरूपेण भक्षितः "आतापिर्भक्षितोयेन वातापिश्च महासुरः । सप्तर्षिशोषितोयेन स मेऽगस्त्यः प्रसीदतु" मन्त्रलिङ्गादवगम्यते ।

आतापिन् पु० आतपति आ+तप–णिनि । (चिल) पक्षिभेदे क्षीरस्वामी ।

आतायिन् पु० आ+ताय–णिनि । (चिल) इतिख्याते पक्षिभेदे ।

आतार पु० आतीर्य्यतेऽनेन आ+तॄ–बा० घञ् । नावातरणार्थे देये शुल्के ।

आतालौ अव्य० आ+तल बा० ईण् । विधुरस्याकुलीकरणे जर्या० "आतालौल्य विधुरमाकुलीकरणेत्यर्थः" गणरत्नम् ।

आति पु० अत–इण् । अरारिपक्षिणि । "सुपर्णः पार्ज्जन्य आतिर्वाहसोः" यजु० २४,३४ । "ता आतयोन तन्वः शुम्भतः स्वा" ऋ० १६,६५ । २सततगन्तरि त्रि० ।

आतिथिग्व पु० अतिथिमभिगच्छति गम–ड अतिथिग्वो-दिवोदासोराजा तस्यापत्यम् अण् । दिवोदासराजपुत्रे । "पराङ्नातिथिग्वाय शर्धं करिष्यन्" ऋ०६,२६,३ "अतिथिग्वाय अतिथीनामभिगन्त्रे दिवोदासाय" भाष्योक्तेः दिवोदास एव ऋग्वेदेऽतिथिग्वत्वेन प्रसिद्धः "सुरथा आतिथिग्वे खभीशू राजी" "षड्वाँ आतिथिग्व इन्द्रोते बधूमतः" ऋ० ८,६८,१६,१७ । "आतिथिग्व एतन्नामकराजस्य पुत्रः तस्मै" भा० ।

आतिथेय न० आतिथये इदं ढक् । १अतिथिनिमित्तके भोजनादौ । "आतिथेयमनिवारितातिथिः" माघः "दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु" मनुः । तत्र साधु ढञ् । २अतिथिसपर्य्यायां कुशले त्रि० । "प्रयवाबातिथेयेषु वसन्नृषिकुलेषु सः" रघुः । "मध्योत्थायं मृगान् विध्यन्नातिथेयो बिचक्रमे" भट्टिः "प्रत्युज्जगामातिथिमातिथेयः" रघुः । स्त्रियां ङीप् । "तमातिथेयी बहुमानपूर्व्वया" कुमा० ।

आतिथ्य न० अतिथेरिदं ञ्य । १अतिथिपरिचर्य्यायाम् । "तमातिथ्यक्रियागान्तरश्लोभपरिश्रमम्" रघुः "लघुपतन कस्य यथोचितमातिथ्यं विधाय" हितो० । स्त्रीत्वमपि "आतिथ्यायाः प्राक्प्रायणीयम्" शत०ब्रा० भाष्यम्

अतिथिपरिचर्यांप्रकारश्च परिशिष्टखण्डे वक्ष्यते । स्वार्थे ष्यञ् । २अतिथौ हेम० ।

आतिदेशिक त्रि० अतिदेशादागतः ठक् । अतिदेशप्राप्ते । यथा प्रकृतिधर्मस्य विकृतौ आतिदेशिकत्वम् । "आतिदेशिकमनित्यम्" इति वृ० परिभाषा ।

आतिवाहिक त्रि० अतिवाहाय नियुक्तः ठक् । आतिवाहिकदेवे विवरणमातिवाहिकशब्दे ।

आतिरेक्य न० अरिच्यते कर्मणि घञ् तस्य भावः ष्यञ् । अतिरेके हवौ स्वपरिष्वातिरेके ।

आतिवाहिक त्रि० अतिवाहे इहलोकात् परलोकप्रापणे नियुक्तः ठक् । एतल्लोकात् परलोकप्रापणे ईश्वरनियुक्ते अर्चिराद्यभिमानिदेवगणे धूमाद्यभिमानिदेवगणे च । "आतिवाहिकास्तल्लिङ्गात्" वा० सू० । अतिवाहने नियुक्ताश्च द्विविधाः दक्षिणमार्गे उत्तरमार्गे च तत्र कर्मिणां दक्षिणमार्गेण ज्ञानिनाञ्चोत्तरमार्गेण गमनात् तत्र नयनाय ईश्वरनियुक्ता धूमादयः अर्चिरादयश्च ते च छा० उ० दर्शिता यथा ।

"अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान्षड्दक्षिणैति मासांस्तान्नैते संवत्सरमभिप्राप्नुवन्ति मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति" । "इष्टापूर्ते इष्टमग्निहोत्रादि वैदिकं कर्म, पूर्तं वापीकूपतडागारामादिकरणम् । दत्तं च बह्विर्वेदि, यथाशक्त्या हेम्नो द्रव्यसम्भागो दत्तम् । इत्येवंविधं परिचरणपरत्वाद्युपासते । इतिशब्दश्च प्रकारदर्शनार्थत्वात् । ते दर्शनवर्ज्जितत्वाद्धूमं धूमाभिमानिनीं देवतामभिसम्भवन्ति प्रतिपद्यन्ते । तदाऽतिवाहिता धूमाद्रात्रिं रात्रिदेवतां, रात्रेरपरपक्षदेवताम्, एवमेव कृष्णपक्षाभिमानिनीमपरपक्षात् यान् षण्मासान् दक्षिणा दक्षिणां दिशमेति सविता तान् मासान् दक्षिणायनान् षण्मासाभिमानिनीर्देवताः प्रतिपद्यन्त इत्यर्थः । सङ्कुचितरश्मयो हि षण्मासदेवता इति मासानिति बहुवचनप्रयोगस्तासु । नैते कर्म्मिणः प्रकृताः संवत्सरं संवत्सराभिमानिनीं देवतामभिप्राप्नुवन्ति । कुतः पुनः संवत्सरप्राप्तिप्रसङ्गो यतः प्रतिषिध्यते । अस्ति हि संवत्सरस्य प्रसङ्गोऽहोरात्रकलावयवभूते दक्षिणोत्तरायणे तत्रार्चिरादिमार्गप्रहृत्तानामुदगयनमासेष्वोऽवयविनः संवत्सरस्य प्राप्तिरुक्ता । अत इहापि तदवयवभूतानां दक्षिणायनमासानां प्राप्तिं श्रुत्वा तदवयविनः संवत्सरस्यापि पूर्ववत्प्राप्तिरापद्येतातस्तत्प्राप्तिः प्रतिषिध्यते नैते संवत्सरमभिप्राप्नुवन्तीति । मासेभ्यः पितृलोकं, पितृलोकादाकाशमाकाशाच्चन्द्रमसम् । कोऽसौ यज्ञैः प्राप्यः चन्द्रमाः य एष दृश्यतेऽन्तरिक्षे सोमो राजा ब्राह्मणानां तदन्नं देवानां तं चन्द्रमसमन्नं देवता इन्द्रादयो भक्षयन्ति । अतस्ते धूमादिना गत्वा चन्द्रभूताः कर्म्मिणो देवैर्भक्ष्यन्ते नन्वनर्थावेष्टादिकरणं यद्यन्नभूता देवैर्भक्ष्येरन् नैष दोषः । अन्नमित्युपकरणमात्रस्य विवक्षितत्वात् । न हि ते कवलीकृत्येषेव देवैर्भक्ष्यन्ते । किं तर्ह्युपकरणमात्रं देवानां भवन्ति ते स्त्रीपशुभक्ष्यादिवत् । दृष्टयान्नशब्द उपकरणेषु स्त्रियोऽन्नं पशवोऽन्नं राज्ञामित्यादि । न च तेषां स्त्र्यादीनां पुरुषोपभोग्यत्वेऽप्युपभोगो नास्ति । तस्मात्कर्मिणो देवतानामुपभोग्या अपि सन्तः सुखिनो देवैः क्रीड़न्ते । शरीरञ्च तेषां तेषूपभोगयोग्यं चन्द्रमण्डले आप्यमारभ्यते । तदुक्तं "पुरुषाक्षुद्धा श्रद्धा आपो द्युलोकाग्नौ हुताः सोमो राजा सम्भवन्तीति" । ता आपः कर्म्मसमवायिन्य इतरैश्च भूतैरनुगताः द्युलोकं प्राप्य चन्द्रत्वमापन्नाः शरीराद्यारम्भिका इष्टाद्युपासकानां भवन्ति । इति" भा० पितृयानःपन्था दर्शितः देवयानस्तु ।

"अथ यदु चैवास्मिञ्छव्यं कुर्व्वन्ति यदि च नार्चिषमेवाभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्य्यमाणपक्षमापूर्य्यमाणपक्षाद्यान् षडुदङ्केति मासांस्तान्मासेभ्यः संवत्सरं, संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तन्ते नावर्त्तन्ते" "अथेदानीं यथोक्तब्रह्मविदो गतिरुच्यते यद्यपि उ च एवाक्षरवेदविदि शव्यं शवकर्म्म सदृशं कुर्व्वन्ति यदि च न कुर्व्वन्ति ऋत्विजः, सर्व्वथाप्येवंवित्तेन शवकर्म्मणा अकृतेनापि न प्रतिबद्धो ब्रह्म प्राप्नोति न च कृतेन शवकर्म्मणाऽस्य कश्चनाभ्यधिको लोकः "न कर्म्मणा वर्द्धते नो कनीयानिति" श्रुत्यन्तरात् । शवकर्म्मग्रहणादरं दर्शयन् विद्यां स्तौति, न पुनः शवकर्म्म एवंविदो न कर्त्तव्यमिति । अक्रियमाणे हि शवकर्म्मणि कर्म्मणां फलारम्भे प्रतिबन्धः कश्चिदनुमीयते अन्यत्र । यत इह विद्याफलारम्भकाले शवकर्म्म स्याद्वा न वेति विद्यावतोऽप्रतिबन्धेन फलारम्भं दर्शयति । ये सुखाकाशमक्षिस्थं संयद्वामनीत्वेनोपासते प्राणसंहितामग्निविद्यां, तेषामन्यत्कर्म्म भवतु मा वा भूत्

सर्व्वेऽपि तेऽर्च्चिषमेवाभिसम्भवन्त्यर्च्चिरभिमानिनीं देवतामभिसम्भवन्ति प्रतिपद्यन्त इत्यर्थः । अर्च्चिषोऽर्च्चिर्देवतायाः अहरहरभिमानिनीं देवतामङ्ग आपूर्य्यमाणपक्षं शुक्लपक्षदेवतामापूर्य्यमाणपक्षात् षण्मासानुदङ्ङुत्तरां दिशमेति सविता तान्मासानुत्तरायणदेवतां, तेभ्यो मासेभ्यः संवत्सरं संवत्सरदेवतां ततः संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्तत्स्थांस्तान् पुरुषः कश्चिद्ब्रह्मलोकादेत्यमानवो मानव्यां सृष्टौ भवो मानवो न मानवोऽमानवः स पुरुष एतान् ब्रह्म सत्यलोकस्थं गमयति गन्तृगन्तव्यगमयितव्यव्यपदेशेभ्यः । सन्मात्रब्रह्मप्राप्तौ तदनुपपत्तेः । "ब्रह्मैव सन् ब्रह्माप्येतीति हि वक्तुं न्याय्यम् । सर्व्वभेदनिरासेन सन्मात्रप्रतिपत्तिं वक्ष्यति । न चादिष्टो मार्गो गमनायोपतिष्ठते । "स एनमविदितो न भुनक्तीति" श्रुत्यन्तरात् । एष देवपथो देवैरर्चिरादिभिर्गमयितृत्वेनाधिष्ठितैरुपलक्षितः पन्था देवपथ उच्यते । ब्रह्म गन्तव्यं तेन चोपलक्षित इति ब्रह्मपथः । एतेन प्रतिपद्यमाना गच्छन्तो ब्रह्म इमं मानवं मनुसम्बन्धिनं मनोः सृष्टिलक्षणमावर्त्तं नावर्त्तन्ते । आवर्त्तन्तेऽस्मिन् जननमरणप्रबन्धचक्रारूढा घटीयन्त्रवत् पुनः पुनरित्यावर्त्तं न प्रतिपद्यन्ते । नावर्त्तन्त इति द्विरुक्तिः सकलायाः विद्यायाः परिसमाप्तिदर्शनार्था" भा० ।

यथा चैषामातिवाहिकत्वं तथा निरूपितम् शा० सू०भा० । "आतिवाहिकास्तल्लिङ्गात्" सू० । "तेष्वेवार्चिरादिषु संशयः किमेतानि मार्गचिह्नान्युत भोगभूमयोऽथ वा नेतारोगन्तृणामिति । तत्र मार्गलक्षणता अर्चिरादय इति तावत् प्राप्तं तत्स्वरूपत्वादुपदेशस्य । यथा हि कश्चिल्लोको ग्रामं नगरं वा प्रतिष्ठासमानोऽनुशिष्यते गच्छेस्तमसं गिरिं ततोन्यग्रोधं ततोनदीं ततोग्रामं ततोनगरं वा प्राप्स्यसीति । एवमिहाप्यर्चिरर्चिषोऽहरङ्ग आपूर्य्यमाणपक्षमित्याह । अथ वा भोगभूमयएता इति प्राप्तम् । तथा हि लोकशब्देनान्यादीनुपलभ्यते अग्निलोकमागच्छतीत्यादि । लोकशब्दश्च प्राणिनां भोगायतनेषु भाष्यते मनुष्यलोकः पितृलोको देवलोक इति च । तथा च ब्राह्मणम् 'अहोरात्रेषु लोकेषु स्कुर्व्वन्ति'इत्यादि । तस्मादातिवाहिका अर्चिरादयः । अचेतनत्वादपि तेषामातिवाहिकत्वानुपपत्तिः । चेतना हि लोके राजनियुक्ता पुरुषाः दुर्गेषु मार्गेष्वतिवाह्यानतिवाहयन्तीत्येवं प्राप्ते ब्रूमः । आतिवाहिका एवैते भवितुमर्हन्ति । कुतः तल्लिङ्गात् । तथा हि चन्द्रमसोविद्युतं तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयतीति सिद्धवद्गमयितृत्वं दर्शयति । यावद्वचनं वाचनिकमिति न्यायात् । तद्वचनं तद्विषये एवोपयोक्ष्यमि तिचेन्न प्राप्तमानवत्वनिवृत्तिमात्रपरत्वाद्विशेषस्य । यद्यर्चिरादिषु पुरुषा गमयितारः प्राप्तास्ते च मानवास्ततोयुक्तं तच्चिह्नत्वमिति पुरुषविशेषणममानव इति । नतु लिङ्गमात्रमगमकं न्यायाभावात् । नैष दोषः । उभयव्यामोहात्तत्सिद्धेः । एतावदर्चिरादिमार्गगास्ते देहवियोगात्पिण्डितकरणग्रामाद्बलवत्तन्त्राः । अर्च्चिरादीनामप्यचेतनत्वादस्वातन्त्र्यमित्यतोऽर्चिराद्यभिमानिनश्चेतना देवताविशेषा अतिवाह्यायां नियुक्ता इति गम्यते । लोकेऽपि हि भक्तमूर्च्छितादयः संपिण्डितकरणग्रामाः परप्रयुक्तवर्त्मानो भवन्ति । अनवस्थितत्वादप्यर्चिरादीनां न मार्गलक्षणत्वोपपत्तिः । न हि रात्रौ प्रेतस्याङ्गस्वरूपाभिसम्भव उपपद्यते । न च प्रतिपाद्यमानत्वमस्तीत्युक्तमधस्तात् । ध्रुवत्वाद्देवतात्मनां नायं दोषो भवति । अर्चिरादिशब्दतायैषामर्चिराद्यभिमानादुपपद्यते । अर्चिषोऽङ्गरित्यादिनिर्देशस्यातिवाहिकत्वेऽपि न विरुध्यते । अर्चिषा हेतुनाऽहरभिसम्भवन्ति अङ्गा हेतुनापूर्य्यमाणं पक्षमिति । तथा च लोके प्रसिद्धेष्वध्वातियातृकेष्वेवंजातीयक उपदेशोऽवश्यते गच्छ त्वमितोवत्सवर्त्मा ततोजवसिंहं ततः कृष्णगुप्रमिति । अपिचोपक्रमे तेऽर्चिषमभिसम्भवन्तीति सम्बन्धमात्रमुक्तं न सम्बन्धविशेषः कश्चित् । उपसंहारे तु "स एतान् ब्रह्म गमयतीति" सम्बन्धविशेषोऽतिवाह्यातिवाहकत्वलक्षण उक्तः तेन सएवोपक्रमेऽपीति निर्द्धार्य्यते । संपिण्डितकरणग्रामत्वादेव च गन्तॄणां न तत्र भोगसम्भवः । लोकशब्दस्तु अनुपभुक्तानेष्वपि गन्तृषु गमयितुं शक्यते अन्येषां तल्लोकवासिनां भोगभूमित्वात् । अतोऽग्निस्वाभिकं लोकं प्राप्तोऽग्निनाऽतिवाह्यते वायुस्वाभिकलोकं प्राप्तो वायुनेति योजयितव्यम् । कथं पुनरातिवाहिकत्वमेषां वरुणादिषु तत्सम्भवः विद्युतोऽग्रधिवरुणादय उपलिप्साः । विद्युत्तत्क्षणानन्तरमा ब्रह्मप्राप्तेरमानवस्यैव पुरुषस्य गमयितृत्वं श्रुतमित्यतउत्तरं पठति । "वैद्युतेनैव तच्छ्रुतेः" । ततो विद्युदभिसम्भवादूर्द्धं विद्युदनन्तरवर्त्तिनैवामानवेन पुरुषेण वरुणलोकादिष्वतिवाह्यमाना ब्रह्मलोकं गच्छन्तीत्यवगन्तव्यम् । तान् वैद्युतान् पुरुषोऽमानवः स एतान् ब्रह्मलोकं गमयतीति तस्यैव गमयितृत्वश्रुतेः । वरुणादयस्तु

तस्यैवाप्रतिबन्धकरणेन 'साहचर्यानुष्ठानेन वा केनचिदनुग्राहकादुत्क्रमणमवगन्तव्यम्। तस्मात्सूक्ष्ममातिवाहिकादेव तात्कालोऽचिरादय इति" शाङ्करभाष्यम्।

आतिवाहे आतिवाहकाले इतोलोकान्तरगतिकाले भवः ठञ्। मनुष्याणां सूक्ष्मकालभवे २देहभेदे पु० शरीरविशेषत्वे न०। "तत्तस्मादेव सूक्ष्माति शरीरमातिवाहिकम्। ऊर्द्धं व्रजन्ति भूतानि त्रीण्यबाधात्तस्य विग्रहात्"। विष्णुध०। त्रीणि भूतानि तोजोवायुाकाशानि ऊर्द्धं गच्छन्ति गुरुत्वाभावात् पृथिवीजले तु गुरुत्वादधोगच्छत इत्यभिप्रायः तत्तस्मात् मृत्युचक्रं प्राप्येत्यर्थः "आतिवाहिकसंज्ञोऽसौ देहो भवति भार्गव! केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित्"। इति च तत्रैवोक्तम्। पञ्चभूतानामुर्द्धाधोगतित्व स्थूलभूतविषया सूक्ष्माणान्तु लिङ्गशरीराश्रयतया सर्वजीवानां देहान्तरप्राप्तौ तद्देहारम्भसाधनतया सहैव गमनम् यथाह "तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्" शा०सू० व्याख्यातमिदं शङ्कराचार्येण "जीवोत्क्रान्तिप्राणसचिवः सेन्द्रियः समनस्कोविद्याकर्म्मपूर्वप्रज्ञापरिग्रहः पूर्वदेहं विहाय देहान्तरं प्रतिपद्यत इत्येतदवगतं अथैनमेते प्राणा अभिसमायन्तीत्येवमादेरन्यत्रावतरं रूपं कृत्वेत्येवमन्तात् संसारप्रकरणस्याच्छेदात् धर्माधर्मफलोपभोगसंभवाच्च। स किं देहबीजैर्भूतसूक्ष्मैरसंपरिष्वक्तो गच्छति आहोस्वित् संपरिष्वक्त इति चिन्त्यते किं तावत् प्राप्तं असंपरिष्वक्त इति। कुतः करणोपादानवत् भूतोपादानस्याश्रुतत्वात्। 'स एतास्तेजोमात्राः समभ्यादत्ते"इत्यत्र तेजोमात्राशब्देन करणानामुपादानं संकीर्त्तयति वाक्यशेषे चक्षुरादिसंकीर्त्तनात्। नैवं भूतमात्रोपादानसंकीर्त्तनमस्ति सुलभाच्च सर्वत्र भूतमात्रा यत्रैव देह आरब्धव्यस्तत्रैव सन्तीति ततश्च तासां नयनं निष्प्रयोजनम्। तस्मादसंपरिष्वक्तोयातीत्येवं प्राप्ते पठत्याचार्यः "तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः" इति। तदन्तरप्रतिपत्तौ देहात् देहान्तरप्रतिपत्तौ देहबीजैर्भूतसूक्ष्मैः संपरिष्वक्तो गच्छतीत्यवगन्तव्यं कुतः प्रश्ननिरूपणाभ्याम्। तथा हि प्रश्नः "वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति"। निरूपणञ्च प्रतिवचनं द्युपर्जन्य पृथिवीपुरुषयोषित्सु पञ्चस्वग्निषु श्रद्धासोमराजन्नरेतोरूपाः पञ्चाहुतीर्दर्शयित्वा "इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति"। तस्माद्दृष्टिः परिवेष्टितो जीवोरंहतीति गम्यते। अन्यथा श्रुतिर्जलौकावत् पूर्वं देहं न मुञ्चति यावद्देहान्तरं न क्रामतीति दर्शयति तद्यथा जलजलायुकेति तत्रापरिवेष्टितस्यैव जीवस्य कर्म्मोपस्थापितप्रतिपत्तव्यदेहविषयभावाय दीर्घीभावमात्रं जलौकयोपमीयत इत्यविरोधः। एवं श्रुत्युक्तौ देहान्तरप्रतिपत्तिप्रकारे सति याः पुरुषमतिप्रभवाः कल्पनाः व्यापिनां करणानामात्मनश्च देहान्तरप्रतिपत्तौ कर्म्मवशाद्वृत्तिलाभस्तत्र तत्र भवति केवलस्यैव वाक्मनोवृत्तिलाभस्तत्र तत्र भवति। इन्द्रियाणि तु देहवदभिनवान्येव तत्र तत्र भोगस्थान उत्पद्यन्ते, मनएव वा केवलं भोगस्थानमभिप्रतिपद्यते जीवएव वा उत्सृज्य देहाद्देहान्तरं प्रतिपद्यते शुकइव डिम्भाद्डिम्भान्तरमित्येवमाद्याः, ताः सर्व्वाएवानादर्त्तव्याः श्रुतिविरोधात्। ननूदाहृताभ्यां प्रश्नप्रतिवचनाभ्यां केवलाभिरद्भिः संपरिष्वक्तो रंहति इति प्राप्नोति आपःशब्दश्रवणसामर्थ्यात् तत्र कथं सामान्येन प्रतिज्ञायते सर्व्वैरेव भूतसूक्ष्मैः संपरिष्वक्तो रंहतीत्यतउत्तरं पठति। "त्र्यात्मकत्वात्तु भूयस्त्वात्"सू०। "तदशब्देन चोदितामाशङ्कासङ्किनत्ति त्र्यात्मिका आपः तिसृत्करणश्रुतेः तास्वारम्भिकासश्रुपगताखितरदपि भूतद्वयमवश्याभ्युपगन्तव्यं भवति त्र्यात्मकश्रुतेः त्रयाणामपि तेजोबन्नानां तस्मिन् कार्य्योपलब्धेः पुनश्च त्र्यात्मकः त्रिधातुकत्वात् त्रिभिर्वातपित्तश्लेष्मभिर्व्याप्तत्वात् न सभूतान्तराणि प्रत्याख्याय केवलाभिरद्भिरारब्धुं शक्यते। तस्माद्भूयस्त्वापेक्षोऽयम्"आपः पुरुषवचसइति"प्रश्नप्रतिवचनयोरप्यशब्दो न कैवल्यापेक्षः सर्व्वदेहेषु हि रसलोहितादिद्रवभूयस्त्वं दृश्यते। ननु पार्थिवोधातुर्भूयिष्ठोदेहेषूपलभ्यते नैष दोषः इतरापेक्षयापां बाहुल्यं भविष्यति दृश्यते च शुक्रशोणितलक्षणेपि देहबीजे द्रवबाहुल्यम्। कर्म्म च निमित्तं कारणं देहान्तरारम्भे कर्म्माणि चाग्निहोत्रादीनि सोमाज्यपयःप्रभृतिद्रवद्रव्यव्यपाश्रयाणि कर्म्मसमवायिन्यश्चापः श्रद्धाशब्दोदिताः सह कर्म्मभिर्द्युलोकाख्येऽग्नौ हूयन्त इति वक्ष्यति तस्मादप्यपां बाहुल्य प्रसिद्धिः। बाहुल्याच्चाप्शब्देन सर्व्वेषामेव देहबीजानां भूतसूक्ष्माण्युपादानमिति निरवद्यम्। "प्राणगतेश्च"सू० "प्राणाच्च देहान्तरप्रतिपत्तौ गतिः श्राव्यते "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्व्वे प्राणाअनूत्क्रामन्तीत्यादि" श्रुतिभिः। सा च प्राणानां गतिर्नाश्रयमन्तरेण सम्भवतीत्यतः प्राणगतिप्रयुक्तानां तदाश्रयभूतानामपामपि भूतान्तरोपसृष्टानां गतिरवगम्यते। न हि निराश्रयाः प्राणाःक्वचिद्गच्छन्ति तिष्ठन्ति वा जीवतोऽदर्शनात्"

भा०। मनुरपि "यदाणुमात्रिको भूत्वा बीजं स्थास्नु चरिष्णु च। समाविशति संसृष्टस्तदा मूर्त्तिं विमुञ्चति" सूक्ष्मभूतैः संसृष्टस्यैव गतिमाह। अत्र अणुपदं पुर्य्यष्टकोपलक्षणम्। "भूतेन्द्रियमनोबुद्धिवासनाकार्य्यवायवः। अविद्या चाष्टकं प्रोक्तं पुर्य्यष्टकमिदं पुनः" सनन्दोक्तेः "पुर्य्यष्टकेन लिङ्गेन प्राणाद्येन स युज्यते। तेन ब्रह्मण वै बन्धो मोक्षोऽप्यस्य तेन वै" ब्रह्मपु० उक्तेश्च संसृतिकाले पुर्य्यष्टकस्य परलोकगामित्वसिद्धेः। आतिवाहिकशरीरसत्त्वे ऽन्यथानुपपत्तिरेव प्रमाणम् तत्स्वरूपञ्चोक्तं सांख्यसूत्रभाष्यादौ। "तद्बीजात् संसृतिः" सू०। तस्य शरीरस्य बीजात् त्रयोविंशतितत्त्वरूपात् सूक्ष्माद्धेतोः पुरुषस्य संसृतिर्गतागते भवतः क्रूटस्थस्य विभुतया स्वतो गत्याद्यसम्भवादित्यर्थः त्रयोविंशतितत्त्वे ऽवस्थितो हि पुरुषस्तेनैवोपाधिना पूर्व्वकृतकर्मभोगार्थं देहाद्देहं संसरति। "मानसं मनसैवायमुपभुङ्क्ते शुभाशुभम्। वाचा वाचा कृतं कर्म कायेनैव तु कायिकम्" इत्यादिश्रुतिभिः पूर्वसर्गीयकरणैरेवोल्लसतः सर्गान्तरेष्वपभोगसिद्धेः। अतएव ब्रह्मसूत्रम् "तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्त इति"। संसृतेरवधिमप्याह। "आविवेकाच्च प्रवर्त्तनमविशेषाणाम्" सू०। "ईश्वरानीश्वरत्वादिविशेषरहितानां सर्वेषामेव पुंसां विवेकपर्य्यन्तमेव प्रवर्त्तनं संसृतिरावश्यकी विवेकोत्तरं च न सा तत्र हेतुमाह। "उपभोगादितरस्य" सू०। इतरस्याविवेकिन एव स्वीयकर्मफलभोगावश्यम्भावादित्यर्थः। देहसत्त्वेऽपि संसृतिकाले भोगो नास्तीत्याह। "सप्तभिः परिसृष्टो ह्याभ्याम्" सू०। सप्तभिः संसृतिकाले पुरुषो ह्याभ्यां शीतोष्णसुखदुःखादिद्वन्द्वैः परिसृष्टो भवतीत्यर्थः। तदेतत्कारिकयोक्तम्। "संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्" इति। भावा धर्माधर्मवासनादयः। अतः परं शरीरद्वयं विभिद्य वक्तुमुपक्रमते। "मातापित्रजं स्थूलं प्रायश इतरन्न तथा" सू०। स्थूलं मातापित्रजं प्रायशो बाहुल्येनायोनिजस्यापि स्थूलशरीरस्य करणादितरच्च सूक्ष्मशरीरं न तथा न मातापित्रजं सर्गादावुत्पन्नत्वादित्यर्थः। तदुक्तं कारिकया। "पूर्व्वोत्पन्नमसक्तं नियतं महदादि सूक्ष्मपर्यन्तम्। संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्" इति नियतं नित्यं द्विपरार्धस्थायि नैमित्तिकं प्रतिशरीरं लिङ्गोत्पत्तिकल्पने गौरवात्। प्रलये तु तत्त्रयः श्रुतिस्मृतिप्रामाण्यादिष्यते। गतिकाले भोगाभाववचनन्तत्सर्गाभिप्रायेण। कदाचित् तु वायवीयशरीरप्रवेशतो गमनकालेऽपि भोगो भवति। अतो यममार्गे दुःखभोगवाक्यान्युपपद्यन्ते। स्थूलसूक्ष्मशरीरयोर्मध्ये किञ्चिदाधिक्यं पुरुषस्य द्वन्द्वयोगस्तदवधारयति। "पूर्वोत्पत्तेश्चात्कार्यत्वं भोगादेकस्य नेतरस्य" सू०। पूर्वं सर्गादावुत्पत्तिर्यस्य लिङ्गशरीरस्य तस्यैव तत्कार्यत्वं सुखदुःखकार्यकत्वं कृतं एकस्य लिङ्गदेहस्यैव सुखदुःखाख्यभोगात् न त्वितरस्य स्थूलशरीरस्य मृतशरीरे सुखदुःखाद्यभावस्य सर्वसम्मतत्वादित्यर्थः। उक्तस्य सूक्ष्मशरीरस्य स्वरूपमाह। "सप्तदशैकं लिङ्गम्" सू०। सूक्ष्मशरीरमव्यधाराधेयभावेन द्विविधं भवति तत्र सप्तदश मिलित्वा लिङ्गशरीरं तच्च सर्गादौ समष्टिरूपमेकमेव भवतीत्यर्थः। एकादशेन्द्रियाणि पञ्च तन्मात्राणि बुद्धिश्चेति सप्तदश। अहङ्कारस्य बुद्धावेवान्तर्भावः। चतुर्थस्तवे वक्ष्यमाणप्रमाणादेतान्येव सप्तदशलिङ्गं मन्तव्यं न तु सप्तदश एकं चेत्यष्टादशपरतया व्याख्येयम्। उत्तरसूत्रेण व्यष्टिभेदस्योपपाद्यतयात्र लिङ्गैकत्वे एकशब्दस्य तात्पर्यावधारणाच्च। "कर्माऽऽत्मा पुरुषो योऽसौ बन्धमोक्षैः प्रयुज्यते। स सप्तदशकेनापि राशिना युज्यते च सः" इति मोक्षधर्मादौ लिङ्गशरीरस्य सप्तदशत्वसिद्धेश्च सप्तदशावयवा अत्र सन्तीति सप्तदशको राशिरित्यर्थः। राशिशब्देन स्थूलदेहव्यावृत्तलिङ्गदेहस्यावयवित्वं निराकृतम्। अवयविरूपेण द्रव्यान्तरकल्पनायां गौरवात्। स्थूलदेहस्य चावयवित्वमेकतादिप्रत्यक्षानुरोधेन कल्पयत इति। अत्र च लिङ्गदेहे बुद्धिरेव प्रधानेत्याग्रहेण लिङ्गदेहस्य भोगः प्रागुक्तः। प्राणश्चान्तःकरणस्यैव वृत्तिभेदः। अतो लिङ्गदेहे प्राणपञ्चकस्याप्यन्तर्भाव इत्यस्य सप्तदशावयवकस्य शरीरत्वं स्वयं वक्ष्यति "लिङ्गशरीरनिमित्तक इति सनन्दनाचार्य" इति सूत्रेण। अतो भोगायतनत्वमेव सुखं शरीरलक्षणम्। तदाश्रयतया त्वन्यत्र शरीरत्वमिति यथाश्रुतीभविष्यति। "चेष्टेन्द्रियार्थाश्रयः शरीरमिति" तु न्यायेऽपि तस्यैव लक्षणं कृतमिति। ननु लिङ्गं चेदेकं तर्हि कथं पुरुषभेदेन विलक्षणा भोगाः सुखलाह। "व्यष्टिभेदः कर्मविशेषात्" सू० यद्यपि सर्गादौ हिरण्यगर्भोपाधिरूपमेकमेव लिङ्गं तथापि तस्य पश्चाद्व्यष्टिभेदो व्यष्टिरूपेणांशतो नानात्वमपि भवति। यद्येदानीमेकस्य पितृलिङ्गदेहस्य नानात्वमंशतो भवति पुत्रकन्यादिलिङ्गदेहरूपेण। तत्र कारणमाह कर्मविशेषादिति। जीवानुराणां भोगहेतुकर्मादेरित्यर्थः। अत्र विशेषवचनात् समष्टिसृष्टिर्जीवानां साधारणैः कर्मभिर्भवतीत्यायातम्। अयं

च व्यक्तिभेदो मन्वादिष्वप्युक्तः । यथा मनौ समष्टिपुरुषस्य षडिन्द्रियोत्पत्त्यनन्तरम् । "तेषां त्ववयवान् सूक्ष्मान् षण्णामप्यमितौजसाम् । सन्निवेश्यात्ममात्रासु सर्वभूतानि निर्ममे" इति षण्णामिति समस्तलिङ्गशरीरोपलक्षणम् । आत्ममात्रासु चिदंशेषु संयोज्येत्यर्थः । तथा च तत्रैव वाक्यान्तरम् । "तच्छरीरसमुत्पन्नैः कार्यैस्तैः करणैः सह । चेष्टन्ते सर्वजन्तूनां गात्रेष्वसमधीमतः" । इति नन्वेवं भोगायतनतया लिङ्गस्यैव शरीरत्वे स्थूले कथं शरीरत्वव्यवहारस्तत्राह । "तदधिष्ठानाश्रये देहे तद्वादात् तद्वादः" सू० । तस्य लिङ्गस्य यदधिष्ठानमात्रयो वक्ष्यमाणभूतपञ्चकं तस्याश्रये षाट्कौशिके देहे तद्वादो देहवादस्तद्वादात् तस्याधिष्ठानशब्दोक्तस्य देहस्य वादादित्यर्थः लिङ्गसम्बन्धादधिष्ठानस्य देहत्वमधिष्ठानाश्रयत्वाच्च स्थूलस्य देहत्वमिति पर्यवसितोऽर्थः । अधिष्ठानशरीरं च सूक्ष्मपञ्चभूतात्मकं वक्ष्यते तथा च शरीरत्रयं सिद्धम् । यत्तु "आतिवाहिक एकोऽस्ति देहोऽन्यस्ताधिभौतिकः । सर्वेषां भूतजातानां ब्रह्मणस्त्वेक एव किम्" इत्यादिशास्त्रेषु शरीरद्वयमेव श्रूयते तल्लिङ्गशरीराधिष्ठानशरीरयोरन्योन्यनियतत्वेन सूक्ष्मत्वेन चैकतामिप्रायादिति । ननु षाट्कौशिकातिरिक्ते लिङ्गशरीराधिष्ठानभूते शरीरान्तरे किं प्रमाणमित्याकाङ्क्षायामाह । "न स्वातन्त्र्यात् तदृते छायावच्चित्रवच्च" सू० । "तल्लिङ्गशरीरं तदृतेऽधिष्ठानं विना स्वातन्त्र्यान्न तिष्ठति । यथा छाया निराधारा न तिष्ठति यथा वा चित्रमित्यर्थः तथा च स्थूलदेहं त्यक्त्वा लोकान्तरगमने लिङ्गदेहस्याधारभूतं शरीरान्तरं सिध्यतीति भावः । तस्य च स्वरूपं कारिकायामुक्तम् । "सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः । सूक्ष्मास्तेषां नियता मातापितृजा निवर्तन्ते" इति । अत्र तन्मात्रकार्यं मातापितृजशरीरापेक्षया सूक्ष्मं यद्भूतपञ्चकं यावल्लिङ्गस्थायि प्रोक्तं तदेव लिङ्गाधिष्ठानं शरीरमिति लब्धं कारिकान्तरेण । "चित्रं यथाश्रयमृते स्थाणवादिभ्यो विना यथा छाया । तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्" । इति । विशेषैः स्थूलभूतैः सूक्ष्माख्यैः, स्थूलशरीरान्तरभेदैरिति यावत् । अस्यां कारिकायां सूक्ष्माख्यानां स्थूलभूतानां लिङ्गशरीरारम्भदावगमेन "पूर्वोत्पन्नमसक्तं नियतं महदादि सूक्ष्मपर्यन्तम्" । इत्यादिपूर्वोदाहृतकारिकायां सूक्ष्मभूतपर्यन्तस्य लिङ्गत्वं व्यर्थः किन्तु महदादिरूपं यल्लिङ्गं तत् स्वाधारसूक्ष्मपञ्चभूतं संसरति तेन सह संसरतीत्यर्थः । नन्वेवं लिङ्गषट्कपदार्थाः कियन्त इति कथमवधार्यमिति चेत् । "वासनाभूतसूक्ष्मं च कर्माविद्ये तथैव च । दशेन्द्रियं मनो बुद्धिरेतल्लिङ्गं विदुर्बुधाः इति वार्षगण्यादिवाक्येभ्यः । अत्र लिङ्गशरीरप्रतिपादनेनैव पुर्यष्टकमपि व्याख्यातमित्याशयेन बुद्धिधर्माणामपि वासनाकर्माविद्यानां पृथगुपन्यासः । भूतसूक्ष्मं चात्र तन्मात्रा । दशेन्द्रियाणि च ज्ञानकर्मेन्द्रियभेदेन पुरोहवमित्याशयः । यत् तु मायावादिनो लिङ्गशरीरस्य तन्मात्रस्थाने प्राणादिपञ्चकं प्रक्रियन्ति पुर्यष्टकं चान्यथा कल्पयन्ति तदप्रामाणिकमिति । ननु मूर्तद्रव्यतया वायुादेरिव लिङ्गस्याकाशमेवासङ्गेनाधारोऽस्तु व्यर्थमन्यत्र सङ्गकल्पनमिति तत्राह । "मूर्तत्वेऽपि न सङ्घातयोगात् तरुवत्" सू० मूर्तत्वेऽपि न स्वातन्त्र्यादसङ्घतयावस्थानं प्रकाशरूपत्वेन सूर्यस्येव सङ्घातसङ्घातुभानादित्यर्थः । सूर्यादीनि सर्वाणि तेजांसि पार्थिवद्रव्यसङ्गेनैवावस्थितानि दृश्यन्ते लिङ्गं च सत्त्वप्रकाशबहुलतो भूतसङ्घतमिति । लिङ्गस्य परिमाणमवधारयति । "अणुपरिमाणं तत्कृतिश्रुतेः" सू० तल्लिङ्गमणुपरिमाणं परिच्छिन्नं न त्वत्यन्तमेवाणु सावयवत्वोक्तत्वात् । कुतः कृतिश्रुतेः क्रियाश्रुतेः । "विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च" इत्यादिश्रुतेर्विज्ञानाख्यबुद्धिप्रधानतया विज्ञानस्य लिङ्गस्याखिलकर्मव्यवस्थादित्यर्थः । विभुत्वे सति क्रिया न सम्भवति । तद्गतिश्रुतेरिति पाठस्तु समीचीनः । लिङ्गशरीरस्य च गतिश्रुतिः "तत्सङ्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वेऽनूत्क्रामन्ति सविज्ञानो भवति सविज्ञानमेवान्वक्रामतीति" सविज्ञानो बुद्धिसहित एव जायते सविज्ञानं यथा स्यात् यथा संसरति चेत्यर्थः । परिच्छिन्नत्वे युक्त्यन्तरमाह । "तदुभयवत्त्वश्रुतेश्च" सू० तस्य लिङ्गस्यैकदेशतोऽन्नमयत्वश्रुतेर्न विभुत्वं सम्भवतीति । विभुत्वे सति नित्यतापत्तेरित्यर्थः । सा च श्रुतिः "अन्नमयं हि सौम्य! मन आपोमयः प्राणस्तेजोमयी वागित्यादिः" । यद्यपि मन आदीनि न भौतिकानि तथाप्यन्नसंसृष्टसजातीयांशपूरणादन्नमयत्वादिव्यवहारो बोध्यः । अचेतनानां लिङ्गानां किमर्थं संसृतिर्देहाद्देहान्तरसञ्चार इत्याशङ्क्याह । "पुरुषार्थं संसृतिर्लिङ्गानां सूपकारवद्राज्ञः" सू० यथा राज्ञः सूपकाराणां पाकशालासु सञ्चारो राजार्थं तथा लिङ्गशरीराणां संसृतिः पुरुषार्थमित्यर्थः" भ० भाष्यस्य सूक्ष्मदेहसत्त्वे प्रमाणं सांख्यतत्त्वकौमुद्यामित्थं दर्शितम् ।

"स्यादेतद्बुद्धिरेव साहङ्कारेन्द्रिया कस्माद्व संसरति इतं सूक्ष्मशरीरेत्यामाणिकेनेत्यत आह। "चित्रं यथाश्रयमृते स्थाण्वादिभ्योविना यथा छाया। तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्"। लिङ्गनात् ज्ञापनात् बुद्ध्यादयोलिङ्गं तत् अनाश्रितं न तिष्ठति। जन्मप्रयाणान्तराले बुद्ध्यादयः प्रत्युत्पन्नशरीराश्रिताः प्रत्युत्पन्नपञ्चतन्मात्रवत्त्वे सति बुद्ध्यादित्वात् दृश्यमानशरीरवृत्तिबुद्ध्यादिवत्। विना विशेषैरिति सूक्ष्मैः शरीरैरित्यर्थः। आगमश्चात्र भवति 'अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमोबलादिति"। अङ्गुष्ठमात्रत्वेन सूक्ष्मतामुपलक्षयति आक्रमनोनिष्कर्षसम्भवेन सूक्ष्ममेव शरीरं पुरुषस्यदपि हि पुरि स्थूलशरीरे शेते"। एवञ्च सर्वेषां भूतानां संसरणकाले सूक्ष्मदेहस्यावश्यकत्वे स्थिते मनुष्याणामेव दाहादूर्ध्वम् आतिवाहिकदेहान्तरोत्पत्तिर्नेत्यन्येषां पूर्वोक्तवचनात् अमति तु दाहादौ नष्टां श्लाघानिकभूतभावप्राप्तिरिति भेदः यथोक्तम्" शुद्धित० विष्णु०। "अतिवाहिकसंज्ञोऽसौ देहो भवति भार्गव!। केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित्" इत्युपक्रम्य प्रेतपिण्डैस्तथा दत्तैर्देहमाप्नोति भार्गव!। भोगदेहमिति प्रोक्तं क्रमादेव न संशयः। प्रेतपिण्डा न दीयन्ते यस्य तस्य विशोधनम्। श्लाघानिकेभ्यो भूतेभ्यो नाकल्पमेव विद्यते। तत्राऽस्य यातना घोरा शीतवातातपोद्भवा इति" अत्र प्रेतकार्य्याकरणे दोषाभिधानम्। निन्दार्थवादो विधेयस्तुत्यर्थम् "न निन्द्यं निन्द्यनेयं निन्दति किन्तु विधेयं स्तौतीति" न्यायात्। एतच्च विद्वद्विषयम् छा०उ० विदुषः देवात्तदकरणेऽपि अर्चिरादिप्राप्तेरुक्तेः "अथ यदु चैवास्मिन् शव्यं कुर्वन्ति यदि न, अर्चिषमेवाभिसम्भवन्तीति"। एतद्भाष्यञ्च ६५१ पृष्ठे प्राग् दर्शितम्। एवं गयाश्राद्धादावपि "अग्निदग्धाश्च ये जीवा नाग्निदग्धास्तथाऽपरे तेषामुद्धरणार्थाय इदं पिण्डं ददाम्यहमिति। मन्त्रलिङ्गेनानग्निदग्धस्याप्युद्धारप्रतिपादनात्। निष्कर्षस्तु संसृतिकाले प्राणिमात्रस्य सूक्ष्मदेहप्राप्तिः तत्र पञ्चादीनां दाहादिकर्म्मादिकमन्तरेणापि स्वस्वकर्म्मानुसारेण देहान्तरप्राप्तिः मनुष्याणान्तु विहदादिव्यतिरिक्तानां दाहादिकमन्तरेण श्लाघानिकभूतभावप्राप्तिः कृते तु दाहादौ आतिवाहिकदेहप्राप्तिः पूरकपिण्डादौ पुनः मेतदेहप्राप्तिः सपिण्डीकरणात्परं भोगदेहप्राप्तिः। तीर्थस्थितानां न तु प्रेतदेह इति भेदः"कृते सपिण्डीकरणे नरः संवत्सरात्परम्। प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते इत्युक्तेः""ततः स नरकेयाति स्वर्गे वा स्वेन कर्मणा" इत्युक्तेश्च विदुषां महातीर्थस्थितानां तु दैवात् दाहादिकार्य्याकरणेऽपि अर्चिरादिमार्गेण तत्तत्स्थानयोग्यदेहप्राप्तिरिति।

आतिशय्य न० अतिशय एव स्वार्थे ष्यञ्। अतिशये।

आतिश्वायन त्रि०अतिक्रान्तः श्वानम् नि० न समासान्तः अतिश्वा दासः अन्यधीनत्वात् अतिश्वन्+चतुरर्थ्यां पक्षा० फक्। दासमिश्रितदेशादौ।

आतिष्ठ न० अति+स्था-क षत्वम् अतिष्ठस्य भावः अण्। अतिक्रम्य स्थितौ उत्कर्षे। "आधिपत्याय स्वाराज्यायातिष्ठायाऽऽरोहामि" ऐ०ब्रा०।

आतु पु० अत-उण्। भेलके। (भेला) उडपे।

आतुच् पु०"आतुच्चिर्गमनार्थ इति"क्र०भा० आधारे क्विप्। सूर्य्यस्यास्तगतिकाले तस्य निम्नोचनकाले अस्तकाले"यदद्य उदिते यन्मध्यदिन आतुचि" ऋ० ८,२७,२१, "आतुचि सायम्" भा०।

आतुजि त्रि० आ+तुज-हिंसाबलादाननिकेतनेषु क्विन्। हिंसके बलस्यादायके च। "पिबतं सोममातुजी" ७,६६ ६८, "आतुजी हिंसको आदातारौ वा" भा०।

आतुर त्रि० ऋदर्थे आ+अत-उरच्। कार्य्याक्षमे उज्ज्व० "हतसुतसमं विधिविपक्षमाहितं प्रपिबन्निदं जयति कृतमातुरः" उज्ज्व० वैद्य० २पीड़िते च। "रावणावरजा तत्र राघवं मदनातुरा" रघुः। "न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि" "बालवृद्धातुरैर्विना" "आकाशेशासु विज्ञेया बालवृद्धकृशातुरा" इति च मनुः। आतुरे नियमो नास्ति" स्मृतिः। [धिर्वक्ष्यते।

आतुरसंन्यास न० ६त०। संन्यासभेदे सन्यासशब्दे तद्वि-

आतुरोपक्रमणीय पु० आतुरमधिकृत्य रोगनिवारणाय उपक्रमणीयम्। आतुरस्य चिकित्सार्थमायुर्व्याधित्वग्निवयोदेहबलसत्वसात्म्यप्रकृतिभेषजदेशानुसारेण उपक्रमणीये। व्यापारभेदे तदधिकृत्यकृतोग्रन्थः कृ। २तत्प्रतिपादकग्रन्थे च। स च सुश्रुतान्तर्गतोऽध्यायभेदः। तत्रोक्तविधेयं ज्ञात्वा वैद्यैरातुरस्य रोगनिवारणायोपक्रमणीयम्। स चाध्यायस्तावदृश्यते यथा "अथात आतुरोपक्रमणीयमध्यायम् व्याख्यास्यामः। आतुरसोपक्रमणार्थेन भिषजातुरेवादौ परीक्षेत। सत्म्यायुषि व्याधित्वग्निवयोदेहबलसत्वसात्म्यप्रकृतिभेषजदेशान् परीक्षेत। तत्र महापाणिपादपार्श्वपृष्ठ-

नासादशनवदनस्कन्धललाटम् दीर्घाङ्गुलिपर्व्वोच्छ्वासप्रेक्षणबाहुम् विस्तीर्णभ्रूस्तनान्तरोरस्कम् हस्वजङ्घामेढ्रवीवसम् गम्भीरसत्त्वस्वरनाभिमनुद्धतस्तनसुपचितमहारोमशकर्णम् पश्चान्मस्तिष्कम् सातानुलिप्तमृदुस्नायुपूर्व्वाङ्गं विशुद्धमांसशरीरम् पश्चाच्च विशुद्धमांसहृदयम् पुरुषम् जानीयाद्दीर्घायुः खल्वयमिति। तमेकान्तेनोपक्रमेत्। एभिर्लक्षणैर्विपरीतैरल्पायुषमिति मध्यमायुरिति॥ भवन्ति चात्र॥ गूढसन्धिसिरास्नायुः संहताङ्गः स्थिरेन्द्रियः। उत्तरोत्तरसत्त्वेद्धो यः स दीर्घायुरुच्यते॥ गर्भात्प्रभृत्यरोगो यः शनैः समुपचीयते॥ शरीरज्ञानविज्ञानैः स दीर्घायुः समासतः॥ मध्यमस्यायुषो ज्ञानमत ऊर्द्धं निबोध मे। अधस्तादङ्गिगायस्य लेखाः स्युर्व्यक्तमायताः॥ हे वा तिस्रोऽधिका वापि पादौ कर्णौ च मांसलौ। नासाग्रमूर्द्ध्व भवेद्दृग्लेखाश्च प्रततः॥ यस्य सुप्तस्य परममायुर्भवति सम्प्रतिः। जघन्यस्यायुषो ज्ञानमत ऊर्द्धं निबोध मे॥ हस्वानि यस्य पर्व्वाणि समहृद्यापि मेहनम्। तथोरस्यवलीढानि नच स्यात्पृथमायतम्॥ ऊर्द्धञ्च श्रवणौ स्थानान्नासा चोद्वा शरीरिणः। हसतो जल्पतो वापि दन्तमांसम् प्रदृश्यते। प्रेक्षते यश्च विभ्रान्तम् स जीवेत्पञ्चविंशतिम्॥ अथ पुनरायुषो विज्ञानार्थमङ्गप्रत्यङ्गप्रमाणसारानुपदेक्ष्यामः। तत्राङ्गान्यन्तराधिसक्थिबाहुशिरांसि तदवयवाः प्रत्यङ्गानीति। तत्र स्वैरङ्गुलैः पादाङ्गुष्ठप्रदेशिन्यौ द्व्यङ्गुलायते। प्रदेशिन्यास्तु मध्यमाऽनामिका कनिष्ठिका यथोत्तरम् पञ्चमभागहीना। चतुरङ्गुलायते पञ्चाङ्गुलविस्तृते प्रपदपादतले। पञ्चचतुरङ्गुलायतविस्तृता पार्ष्णिः। चतुर्दशाङ्गुलायतः पादः। चतुर्दशाङ्गुलपरिणाहानि पादगुल्फजङ्घाजानुमध्यानि। अष्टादशाङ्गुला जङ्घा जानुपरिमण्डलानि द्वाविंशदङ्गुलमेवं पञ्चायत्। जङ्घायामसमावूरू। द्व्यङ्गुलानि वृषणचिबुकदशनानासापुटभागकर्णमूलनयनान्तराणि। चतुरङ्गुलानि मेहनवदनान्तरनासाकर्णललाटपीवोच्छ्रायहृच्छ्रवणान्तराणि। द्वादशाङ्गुलानि भगविस्तारमेहननाभिहृदयपीवास्तनान्तरहस्वायाममणिबन्धप्रकोष्ठस्थौल्यानि। इन्द्रबस्तिपरिणाहांसपीठकूर्परान्तरायामः षोड़शाङ्गुलः। चतुर्विंशत्यङ्गुलो हस्तः। द्वात्रिंशदङ्गुलपरिमाणौ भुजौ द्वात्रिंशत्परिणाहावूरू। मणिबन्धकूर्परान्तरं षोड़शाङ्गुलम्। तलं षट्चतुरङ्गुलायामविस्तारम्। अङ्गुष्ठमूलप्रदेशिनीश्रवणापाङ्गान्तरमध्यमाङ्गुल्यौ पञ्चाङ्गुले। अर्द्धचतुरङ्गुले प्रदेशिन्यनामिके। सार्द्धत्र्यङ्गुलौ कनिष्ठाङ्गुष्ठौ। चतुर्विंशतिविस्तारपरिणाहं हस्तपीवसम्। त्रिभागाङ्गुलविस्तारा नासापुटमर्य्यादा। नवनत्रिभागपरिणाहा तारका। नवमसारकांशो दृष्टिः। केशान्तमस्तकान्तरमेकादशाङ्गुलम्। मस्तकादवटुकेशान्तो दशाङ्गुलः कर्णावट्वन्तरं चतुर्दशाङ्गुलम्। पुरुषोरःप्रमाणविस्तीर्णा स्त्रीश्रोणिः। अष्टादशाङ्गुलविस्तीर्णसरः। तत्प्रमाणा पुरुषस्य कटी। सविंशमङ्गुलशतं पुरुषायाम इति। भवन्ति चात्र। पञ्चविंशे ततो वर्षे पुमान् नारी तु षोड़शे। समत्वागतवीर्य्यौ तौ जानीयात् कुशलो भिषक्। देहः स्वैरङ्गुलैरेष यथावदनुकीर्त्तितः। युक्तःप्रमाणेनानेन पुमान् वा यदि वाऽङ्गना। दीर्घमायुरवाप्नोति वित्तञ्च महदश्नुते। मध्यमं मध्यमैरायुर्व्वित्तं हीनैस्तथाऽवरम्। अथ सारान् वक्ष्यामः। स्मृतिमतिप्रज्ञागौरव्यगौचोपेतं कल्याणाभिनिवेशं सत्त्वसारं विद्यात्। स्निग्धं संहतश्वेतासिदन्तनखं बहुलकामप्रजं शुक्रेण। अक्षयसुसमबलं स्निग्धगम्भीरस्वरं सौभाग्योपपन्नं महानेत्रञ्च मज्ज्ञा। महाशिरःस्नायुदृढदन्तस्नायुनखमस्थिभिः, स्निग्धमूलसंदंशरं हृष्टशरीरमायाससहिष्णुं मेदसा। अच्छिद्रगात्रं गूढास्थिसन्धिं मांसोपचितञ्च मांसेन। स्निग्धताम्रनखनयनतालुजिह्वौष्ठपाणिपादतलं रक्तेन। सुप्रसन्नस्निग्धत्वग्लोमाग्रं त्वक्सारं विद्यादित्येषां पूर्व्वं पूर्व्वं प्रधानमायुःसौभाग्ययोरपि। भवति चात्र। सामान्यतोऽङ्गप्रत्यङ्गप्रमाणादथ सारतः। परीक्ष्यायुः कुशलो भिषक् सिध्यति कर्म्मसु। व्याधिविशेषास्तु प्रागभिहिताः सर्व्व एवैते त्रिविधाःसाध्या याप्याः प्रत्याख्येयाश्च तत्रैतान् भूयस्त्रिधा परीक्षेत किमसावौपसर्गिकः प्राक्केवलोऽन्यलक्षण इति। तत्रौपसर्गिको यः पूर्व्वोत्पन्नं व्याधिं जघन्यकालजातो व्याधिरुपसृजति स तन्मूलएवोपद्रवसंज्ञः। प्राक्केवलो यः प्रागेवोत्पन्नो व्याधिरपूर्व्वरूपोऽनुपद्रवश्च। अन्यलक्षणो यो भविष्यद्व्याधिख्यापकः स पूर्व्वरूपसंज्ञः। तत्र सोपद्रवमन्योन्याविरोधेनोपक्रमेत बलवन्तमुपद्रवं वा। प्राक्केवलं यथास्वं प्रतिकुर्व्वीत। अन्यलक्षणे त्वादिव्याधौ प्रयतेत। भवति चात्र। नास्ति रोगो विना दोषैर्यस्मात्तस्मादिदंक्षणः। अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत्। प्रागभिहिता ऋतवः। शीते शीतप्रतीकारउष्णे चोष्णनिवारणम्। ज्ञात्वा कुर्य्यात् क्रियां प्राप्तां क्रियाकालं न चापयेत्। अप्राप्ते वा क्रियाकाले प्राप्ते वा न कृता क्रिया। क्रियाहीना-

ऽतिरिक्ता वा साध्येष्वपि न सिध्यति। वायुर्दीप्तं शमयति नान्यं व्याधिं करोति च। सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत्। (अष्टमन्त्रे) प्रागभिहितोऽग्निरत्र पाचकः। स चतुर्विधो भवति दोषानभिपद्य एको विक्रियामापद्यस्त्रिविधो भवति विषमो वातेन, तीक्ष्णः पित्तेन, मन्दः श्लेष्मणा, चतुर्थः समः सर्वसाम्यादिति। तत्र यो यथा कालमन्नमुपयुक्तं सम्यक्पचति। स समः समैर्दोषैः। यः कदाचित्सम्यक्पचति कदाचिदाध्मानशूलोदावर्त्तातिसारजठरगौरवान्नकूजनप्रवाहणानि कृत्वा। स विषमः। यः प्रभूतमप्युपयुक्तमन्नमाशु पचति स तीक्ष्णः स एवाभिवर्द्धमानोऽत्यग्निरित्याख्यायते स मुहुर्मुहुः प्रभूतमप्युपयुक्तमाशुतरं पचति पाकान्ते च गलतालोष्ठशोषदाहसन्तापान् जनयति। यः स्वल्पमप्युपयुक्तमुदरगुरुरोगौरवकासश्वासप्रसेकच्छर्दिगात्रसदनानि कृत्वा महता कालेन पचति स मन्दः। विषमो वातजान् रोगान् तीक्ष्णः पित्तनिमित्तजान्। करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान्। तत्र समे परिरक्षणं कुर्वीत, विषमे स्निग्धाम्ललवणैः क्रियाविशेषैः प्रतिकुर्वीत, तीक्ष्णे मधुरस्निग्धशीतैर्विरेकैश्च, एवमेवाल्पाग्नौ विशेषेण माक्षिकैश्च क्षीरदधिसर्पिर्भिर्मन्दे कटुतिक्तकषायैर्वमनैश्च। जाठरो भगवानग्निरीश्वरोऽस्य पाचकः। सौक्ष्म्याद्रसानाददानो विवेक्तुं नैव शक्यते। प्राणापानसमानैस्तु सर्व्वतः पवनैस्त्रिभिः। ध्मायते पाल्यते चापि स्वे स्वे स्थाने व्यवस्थितैः। वयस्तु त्रिविधम् बालम् मध्यम् वृद्धमिति। तत्रोनषोडशवर्षा बालास्तेऽपि त्रिविधाः क्षीरपाः क्षीरान्नादा अन्नादाश्चेति तेषु संवत्सरपराः क्षीरपा द्विसंवत्सरपराः क्षीरान्नादाः परतोऽन्नादा इति॥ षोडशसप्तत्योरन्तरे मध्यम् वयस्तस्य विकल्पो द्वाविंशैनम् संपूर्णता हानिरिति। तत्रा विंशतेर्द्वात्रिंशः, आ त्रिंशतो यौवनम्, आ चत्वारिंशतःसर्व्वधात्विन्द्रियबलवीर्य्यसम्पूर्णता। अतऊर्द्धमीषत् परिहाणिर्य्यावत्सप्ततिरिति। सप्ततेरूर्द्धं क्षीयमाणधात्विन्द्रियबलवीर्य्यौजोऽहमहन्यहनि वलीपलितखालित्यजुष्टं कासश्वासप्रसृतिभिरुपद्रवैरभिभूयमानम् सर्व्वक्रियाक्षमक्षमम् जीर्णागारमिवाभिदृष्टमवसीदन्तम् वृद्धमाचक्षते॥ तत्रोत्तरोत्तरांस्तु वयोऽवस्थान्तरोत्तरा भेषजमात्राविशेषा भवन्यृते च परिहाणेस्तत्रापेक्षया प्रतिकुर्वीत। भवन्ति चात्र॥ बाले विवर्द्धते श्लेष्मा मध्यमे पित्तमेव तु। भृशं वर्द्धते वायुर्वृद्धे तद्वीक्ष्य योजयेत्॥ अग्निसारविरेकैस्तु बालवृद्धौ विवर्जयेत्। तत्साध्येषु विकारेषु मृदुमेव कुर्यात्क्रियाम् शनैः॥ देहः स्थूलः कृशो मध्य इति प्रायुपदिष्टः। कर्शयेद्दृढवेज्ञापि सदा स्थूलकृशौ नरौ। रक्षणञ्चैव मध्यस्य कुर्वीत सततम् भिषक्॥ बलमभिहितगुणम् दौर्ब्बल्यञ्च स्वभावदोषजरादिभिरवेक्षितव्यम्॥ यस्माद्बलवतः सर्व्वक्रियाप्रवृत्तिस्तस्माद्बलमेवप्रधानमधिकरणानाम्॥ केचित् कृशाः प्राणवन्तः स्थूलाबाल्यबला नराः। तस्मात् स्थिरत्वव्यायामैर्बलं वैद्यः प्रतर्कयेत्॥ सत्वन्तु व्यसनाभ्युदयक्रियादिस्थानेष्वैकल्यकरम्। सत्त्ववान् सहते सर्व्वं संस्थाप्यात्मानमात्मना। राजसः स्थाप्यमानोऽन्यैः सहते नैव तामसः॥ प्रकृतिम् भेषजम् चोपरिष्टाद्वक्ष्यामः॥ सात्म्यानि तु देशकालजात्यौहरोगव्यायामोदकदिवास्वप्नरसप्रभृतीनि प्रकृतिविरुद्धान्यपि यान्यबाधकराणि भवन्ति। यो रसः कल्पते यस्य सुखायैव निषेवितः। व्यायामजातमन्यद्वा तत्तस्यात्मेति निर्दिशेत्॥ देशस्त्वनूपो जाङ्गलः साधारण इति॥ तत्र बहूदकनिम्नोन्नतनदीपर्वतशीतानिलो बहुमहापर्वतटजो बहुसुकुमारोपचितशरीरमनुष्यप्रायःकफवातरोगभूविशेषानूपः॥ आकाशसमः प्रविरलाल्पकण्टकिवृक्षप्रायोऽल्पवर्षप्रस्रवणोदपानोदकप्रायउष्णदारुवातः प्रतिरलाल्पशैलः स्थिरकृशगुरुशरीरमनुष्यप्रायोवातपित्तरोगभूविशेषो जाङ्गलः॥ उभयदेशलक्षणः साधारण इति॥ भवन्ति चात्र॥ समाः साधारणे यस्माच्छीतवर्षोष्मभारताः। दोषाणाम् समता जन्तोस्तस्मात्साधारणो मतः॥ न तथा बलवन्तः स्युर्जङ्गला वा स्वलाङ्कृताः। स्वदेशे निचिता दोषा अन्यस्मिन् कोपमागताः॥ उचिते वर्त्तमानस्य नास्ति देशकृतम् भयम्। आहारस्यप्रचेष्टादौ तद्देशस्य गुणे सति। देशप्रकृतिसात्म्यर्त्तुविपरीतोऽचिरोत्थितः। सम्यक्तौ भिषगादीनां बलसत्वायुषां तथा॥ केवलः समदेहाग्नेः सुखसाध्यतमो गदः। अतोऽन्यथा त्वसाध्यः स्यात् कृच्छ्रो व्यामिश्रलक्षणः॥ क्रियायास्तु गुणाभावे क्रियामन्यां प्रयोजयेत्। पूर्व्वस्यां शान्तवेगायां न क्रियासङ्करो हितः॥ गुणाभावेऽपि सर्पादि यदि नैव क्रिया हिता। कर्त्तव्यैव तदा व्याधिः कृच्छ्रसाध्यतमो यदि॥ यश्चैवमेनं विधिमेकरूपं बिभर्त्ति कालादिवशेन धीमान्। स मृत्युपाशान् जगतो गदौघानुच्छिनत्ति भैषज्यपरश्वधेन॥

आतुरोपद्रव पु० ६त०। आतुरस्य उपद्रवे ते च उपद्रवा संप्रतीकारोपायाः सुश्रुते दर्शिता यथा

"अथात आतुरोपद्रवचिकित्सितं व्याख्यास्यामः । स्नेहपीतस्य वान्तस्य विरिक्तस्य सुतासृजः । निरूढस्य च कायाग्निर्मन्दो भवति देहिनः ॥ सोऽन्नैरत्यर्थगुरुभिरुपयुक्तैः प्रशाम्यति । अल्पोमहद्भिर्बहुभिश्चादितोऽग्निरिवेन्धनैः ॥ सचाल्पैर्लघुभिश्चान्नैरुपयुक्तैर्विवर्द्धते । काष्ठैरणुभिरल्पैश्च सन्धुक्षित इवानलः । हृतदोषप्रमाणेन सदाहारविधिः स्मृतः । त्रीणि चात्र प्रमाणानि प्रस्थोऽर्द्धाढकमाढकम् ॥ तत्रावरं प्रस्थमात्रं हे शेषे मध्यमोत्तमे । प्रस्थे परिस्रुते देया यवागूः स्वल्पतण्डुला । हे चैवार्द्धाढके देया तिस्रश्चाढके गते ॥ विलेपीसुचिताङ्गस्य क्षुधितस्य तथांशतः । दद्याद्यथोक्तेन विधिना क्षिप्तस्निक्ताममिच्छिलाम् ॥ स्निग्धलवणां स्वच्छसुद्रयूषयुतान्ततः । अंगुष्ठप्रमाणेन दद्यात्सुस्निग्धमोदनम् ॥ ततः सप्ततमेनैव हृद्येनेन्द्रियबाधिना । त्रीनंशान् वितरेद्भोक्तुमातुरायौदनं मृदुम् । ततो यथोचितं भक्तमोक्तुमस्मै विचक्षणः ॥ लावर्णैरिणादीनां रसैर्द्यात्सुसंस्कृतैः । हीनमध्योत्तमेष्वेव विरेकेषु विधिः स्मृतः ॥ एकद्वित्रिगुणः सम्यगाहारस्य क्रमो हि सः । कफपित्ताधिकान्मध्यनित्यानूहीनविशोधितान् ॥ पेयाभिष्यन्दवत्तेषां तर्पणादिक्रमो हितः । वेदनालाभनियमशोकवैचित्त्यहेतुभिः ॥ नरानुपोषितांश्चापि विरिक्तवदुपाचरेत् । आढकार्द्धाढकप्रस्थसङ्ख्या ह्येषा विरेचने ॥ एको विरेकः श्लेष्मान्तो न द्वितीयोऽस्ति कश्चन । बलं यच्चिविधं प्रोक्तमतस्तत् क्रमसिद्धये ॥ तत्रानुक्रममेकन्तु बलस्थः सकृदाचरेत् । द्विराचरेन्मध्यबलस्त्रीन्वारान्दुर्बलस्तथा ॥ केचिदेवं क्रमं प्राहुर्मन्दमध्योत्तमाग्निषु । संसर्गेण विदह्येऽग्नौ दोषकोपभयाद्भृशम् ॥ प्राक्स्नादुतिक्तौ स्निग्धाम्ललवणानुकटुकं ततः । स्नाद्म्ललवणानभूयः स्नादुतिक्तावतः परम् ॥ स्निग्धरूक्षानुसांश्चैव व्यत्यासात्सस्नेवत्ततः । केवलं स्नेहपीतो वा वान्तो यद्यपि केवलम् ॥ स सप्तरात्रं मनुजो भुञ्जीत लघु भोजनम् । कृतः सिराव्यधो यस्य कृतं यस्य च शोधनम् ॥ स नरो परिहरेन्मासं यावद्वा बलवानभवेत् । एकैकस्मिन्परिहरेद्वौ वा त्र्यहं त्र्यहम् ॥ कृतीये तु परीहारे यथायोगं समाचरेत् । तैलपूर्णाभ्यङ्गाक्तस्वधर्माणो व्रणातुराः ॥ स्निग्धगुदाग्निरोगार्त्ता ज्वरातीसारिणश्च ये । क्रुध्यतः कुपितं पित्तं कुर्यात्तांस्तानुपद्रवान् ॥ आयासतः शोचतो वा चित्तं विभ्रमयेच्छ्रुतिः । मैथुनोपगमाद्घोरान् व्याधीनाप्नोति दुर्मतिः ॥ आक्षेपकं पक्षघातमङ्गप्रत्यङ्गमेव च । गुह्यप्रदेशे व्रणशुं कासश्वासौ च दारुणौ ॥ शुक्रवच्चापि रुधिरं सरजस्कं प्रवर्त्तते । लभते च दिवास्वप्नात्तांस्तान् व्याधीन् कफात्मकान् ॥ श्लीपोदरं प्रतिश्यायं पाण्डुतां क्षयशुं ज्वरम् । मोहं सदनमङ्गानामविपाकं तथारुचिम् ॥ तमसा चाभिभूतस्तु स्वप्नमेवाभिनन्दति । उच्चैः सम्भाषणाद्वायुः शिरस्यापादयेद्रुजम् ॥ क्षान्यं जाड्यमजिघ्रत्वं बाधिर्यं मूकतां तथा । हनुमोक्षमधीमन्थं मर्हितञ्च सदारुणम् । नेत्रस्रावं निमेषं वा दृष्ट्वां कासं प्रजागरम् ॥ लभते दन्तचालं च तांस्तांश्चान्यानुपद्रवान् । यानयानात्तु लभते ऋर्द्धिमूर्द्धाभ्रमक्लमान् ॥ तथैवाक्ष्यहं घोरमिन्द्रियाणाञ्च विभ्रमम् । विरासनात्तथा स्नानाच्छ्रोणयां भवति वेदना ॥ अतिचङ्क्रमणाद्वाहुजङ्घयोः कुरुते रुजः । सक्थिप्रपोथं शोफं वा पादहर्षमथापि वा ॥ शीतसम्भोगतोयानां सेवा मारुतहृद्भये । ततोऽङ्गमर्दं विष्टम्भशूलाध्मानप्रवेपकाः ॥ वातातपाभ्यां वैवर्ण्यं ज्वरं चापि समाप्नुयात् । विरुद्धाध्यशनान्मृत्युं व्याधिं वा घोरमृच्छति ॥ असात्म्यभोजनं हन्याद्बलवर्णसमुद्यम् । अनात्मवन्तः पशवङ्क्षते येऽप्रमाणतः ॥ रोगानीकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि । व्यापदां कारणं वीक्ष्य व्यापत्स्वेतासु बुद्धिमान् ॥ प्रयतेतातुरारोग्ये प्रत्यनीकेन हेतुना ॥ विरिक्तवान्तैरिरणैषणलावकाः शशश्च सेव्याः समयूरतित्तिरिः । सपष्टिकाश्चैव पुराणशालयस्तथैव सद्मा लघु यच्च कीर्त्तितम्" ॥ एवमन्येऽपि ततएवावगम्याः ।

आतुर्य्य न० आतुरस्य भावः ष्यञ् । १आतुरत्वे २फलनाशके ज्वरांशभेदे च "ज्वरांशाश्च वस्तुभेदेन नानाविधाः" हरि० १८२अध्या० दर्शिताः। "ऋषउवाच । ऋणुष्व ज्वर ! सन्देशं यथा लोके चरिष्यसि । सर्व्वजातिषु विन्यस्तस्तथा स्थावरजङ्गमे । त्रिधा विभज्य चात्मानं मत्प्रियं यदि काङ्क्षसे । चतुष्प्रदान् भजैकेन द्वितीयेन च स्थावरान् । तृतीयो यश्चतुर्भागो मानुषेषु प्रपत्स्यसे । त्रिधा भूतं वपुः कृत्वा पञ्चसु त्वं भव ज्वर ! ।। चतुर्थो यस्तृतीयस्य भविष्यति च ते ध्रुवम् । एकान्तश्चतुर्भागः खोरकश्च चतुर्थकः । मानुषेष्वेकपादेन वस त्वं प्रविभज्य वै । जातिष्वथ विशेषासु शिवसत्वं शृणुष्व मे । वृक्षेषु कीटरूपेण तथा सङ्घोच पत्रकः । पाण्डुपत्रश्च विख्यातः फलेष्वातुर्य्यमेव च । पक्षिणोषु शिखीभूत्वा वृद्धिष्यामपि चोपरः । अपान्तु पोलिकां विद्याः शिखोद्भेदश्च वर्हिणाम् । गैरिकः पर्वतेष्वेव मत्प्रसादाद्भविष्यसि । गोष्वपस्मारको भूत्वा खोरकश्च भविष्यसि । एवं विविधरूपेण भविष्यसि महीतले । दर्शनात्

स्वर्गनाशैव प्राणिनां वधमेव्यसि । कृते देवमनुष्यांश्च नान्यस्तां विवहिष्यते" । "आतुर्ये जालकैकदेशे सङ्कोचः नीलकण्ठः ।

आहरण त्रि० आ+हृद-ल्यु । १हिंसिते २क्षिप्ते च । "तज्जादाहरणात् प्रेरितो दृष्टादिवाहृतात्" शत० ब्रा० ।

आहार्य न० आहृत्यत्वेन आ+हृ-घञ् कर्मणि क्यप् । (आता) फलभेदे ।

आतोद्य न० समन्तात् तुद्यते आ+तुद-खल् । वीणादौ वाद्ये । "सज्जमातोद्यगिरोनिवेशितास्" "आतोद्यं याहयामास समन्ताजयदाशुधम्" इति च रघुः । [रघुः ।

आत्त त्रि० आ+दा-क्त । गृहीते "गामात्तसारां रघुरप्यवेक्ष्य"

आत्तगन्ध त्रि० आत्तोगृहीतोऽरिष्टा गन्धो गर्वो यस्य । १गर्वणाभिभूते, २गृहीतगन्धे पुष्पादौ च । "नात्तगन्धवधूयत्नैः" माघः आत्तगन्धसनाघ्रातसौरभमनभिभूतश्चेति" मल्लिनाथः ।

आत्तगर्व त्रि० आत्तोगृहीतोगर्वोयस्य । १अभिभूते ।

आत्मकर्मन् त्रि० ईत० । आत्मनः स्वस्य कर्त्तव्ये कार्य्ये "आत्मकर्मस्थं देहं चात्रोधर्म्म इवाश्रितः" रघुः ।

आत्मकाम त्रि० आत्मानं कामयते कम-णिच् अण् उप० स० । विषयान्तरेच्छानिवर्त्तनेन १आत्ममात्राभिलाषुके २आत्ममात्रज्ञानेच्छायुक्ते । "योऽकामोनिष्काम आप्तकाम आत्मकामः न तस्य प्राणा उत्क्रामन्ति" बृ० उ० । "आप्ताः कामा येन स आप्तकामः काम्यन्ते कामाः आत्मकामत्वेन यस्मात्सैव नान्यःकामयितव्यो वस्त्वन्तरभूतः पदार्थोभवति । "आत्मैवान्तरोबाह्यः कृत्स्नः प्रज्ञानघन एवरसोनोर्ज्झं न तिर्य्यगनाधः" नात्मनोऽन्यत् कामयितव्यं वस्त्वन्तरं यस्य "यस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् श्रुणुया तविजानीयाद्वा" सर्वात्मभूतं विजानन् किं कामयेत ज्ञायमानोऽन्यत्वेन पदार्थः कामयितव्यो भवति नचासावन्यो ब्रह्मविद आप्तकामस्यात्" भा० । आत्मकामस्यैव यथाप्तकामता तथाप्तकामशब्दे वक्ष्यते ।

आत्मकामेय त्रि० आत्मकामाया इदम् ढक् । आत्मकामासम्बन्धिनि ततः स्वार्थे राजन्या० वुञ् । आत्मकामेयकःतदर्थे ।

आत्मगुप्त त्रि० आत्मना गुप्तः । स्वगर्व्वैव रक्षिते । (आलकुशी) लताभेदे स्त्री तस्याःस्वर्गने हि अतिकण्डूयनं स्त्रीणां भवति तद्वयाजान्मैथुनसा सृज्यते इति तस्या आत्मगुप्तत्वम् ।

आत्मग्राहिन् त्रि० आत्मानं आत्मार्थमेव वा गृह्णाति ग्रह-णिनि । १उदरम्भरौ २आत्मज्ञे च ।

आत्मघातिन् त्रि० आत्मानं देहं हन्ति हन्-णिनि ईत० । "व्यापादयेत् तथात्मानं स्वयं योऽम्बुदकादिभिः । अवैधेनैव मार्गेण आत्मघाती स उच्यते" इत्युक्तलक्षणे आत्मनः स्वशरीरस्य प्राणेन सह वियोजयितरि जने आत्मघातश्च द्विविधः वैधोऽवैधश्च अवैधोऽपि द्विविधः ज्ञानपूर्व्वकस्तदपूर्व्वकश्च । तत्र वैधात्मघाते न दोषः तदाहुः मनुहरिगर्गौ "हरिः गौचस्थते लुप्तः प्रत्याख्यातभिषक्क्रियः । आत्मानं घातयेद्यस्तु भक्तवन्नशनाम्बुभिः । तस्य विरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः । तृतीये तृदकं कृत्वा चतुर्थे श्राद्धमाचरेत्" हेमाद्रौ अवैधात्मघातनिन्देन तत्राधिकारिणमाह विष्णुधः । "नरस्तु व्याधिरहितो न त्यजेदात्मनस्तनुम् अस्वर्य्या नाम ते लोका अन्धेन तमसावृताः । तांस्ते प्रत्यभि गच्छन्ति ये के चात्महनोजनाः । अरिष्टैरात्मनोज्ञात्वामृत्युकालमुपस्थितम् । व्याधितोभिषजा त्यक्तः पूर्णे चायुषि चात्मनः । यथायुगानुसारेण संत्यजेदात्मनस्तनुम् । तस्मिन् काले तनुं त्यक्त्वा यत्रेष्टफलमाप्नुयात्" अपरार्के ब्रह्मगर्भः "यो जीवितं न यत्नोति महाव्याध्युपपीडितः । सोऽम्बुप्रदकं महायात्रां कुर्व्वन्नपि न दुष्यति" । तेन प्रयागाद्यतिरिक्तेऽपि क्वचित्सरोगादीनामधिकारः । एतच्च वानप्रस्थस्यैवेति विज्ञानेश्वरादयः । "आसां महर्षिचर्य्याणां त्यक्त्वान्यतमया तनुम् । वीतशोकभयो विप्रो ब्रह्मभूयाय कल्पते" इति मनुना वानप्रस्थस्यैव मरणाधिकारप्रतिपादनात् । गृहस्थस्याप्यधिकार इति निर्णयसिन्धुः । प्रयागाद्यतिरिक्ते विप्रस्य तु नाधिकारः "शूद्राच चत्रिया वैश्या अन्यजातास्तथाधमाः । एते त्यजेयुः प्राणान् वै वर्ज्जयित्वा द्विजं गुरुम् । पतित्वा ब्राह्मणस्तत्र ब्रह्महा चात्मघातकृत्" तद्धृतवचनात् अब्राह्मणस्यैव स्वर्गादि महाफलजिगीषया । प्रविश्योज्ज्वलनं तोयं करोत्यनशनं तथेति" आदित्य पु० वाक्याच्च । तत्र प्रयागादिषु सर्व्वेषां वैधात्मघाताधिकारिणः यथा "दुश्चिकित्स्यैर्महारोगैः पीड़ितस्तु नुमानपि । प्रविश्योज्ज्वलनं दीप्तं करोत्यनशनं तथा अगाधतोयराशिं च भृगोः पतनमेव च । गच्छेन्महापथं वापि तुषारगिरिमादरात् । प्रयागवटशाखायां देहत्यागं करोति च । स्वयं देहविनाशञ्च काले प्राप्ते महामतिः । उत्तमान् प्राप्नुयाल्लोकान्नात्मघातो भवेत् क्वचित् । महापापक्षयात् स्वर्गे दिव्यान् भोगान् समश्नुते । एवमेवाधिकारस्तु सर्व्वेषां सर्व्वजन्तुषु । नराणामथ नारीणां सर्व्ववर्ण्येषु सर्व्वदा । देहं मरणं

येषां जीवानां कुलचिद्भवेत्। अयौचं तु तत्प्रेतं तेषां वक्ष्यामि तत्त्वतः" आदि० पु० "वाराणस्यां म्रियते यः प्रत्याख्यातभिषक्क्रियः काष्ठपाषाणमध्यस्थो जाह्नवीजलमध्यगः। अविमुक्तोन्मुखस्तस्य कर्णमूलगतोहरः। प्रणवं तारकं ब्रूते नान्यथा कुलचित् क्वचित्" भाग्वे, भारते च" न लोकवचनात्तात! न वेदवचनादपि मतिरुत्कर्षणीया ते प्रयागमरणं प्रति" अतएव विष्णुधर्मे रोग्यादिमरणमुक्तम् "यथायुगानुसारेण संत्यजेदात्मनस्तनुमिति" प्रयागादौ विशेषः त्रिस्थलीसेतौ स्कान्दे "यथा कथंचित्तीर्थेऽस्मिन् प्राणत्यागं करोति यः। तस्यात्मघातदोषो न प्राप्नुयादीक्षितान्यपि। पाद्मे विष्णुः "देहत्यागं तथा धीराः कुर्वन्ति मम सन्निधौ। मत्तनुं प्रविशन्त्येव न पुनर्जन्मने नराः" कौर्मे "व्याधितो यदि वा दीनः क्रुद्धोवापि भवेन्नरः। गङ्गायमुनमासाद्य वस्तु प्राणान् परित्यजेत् ऐप्सितान् लभते कामान्वदन्ति मुनिपुङ्गवाः" तथा "या गतिर्योगयुक्तस्य सत्त्वस्थस्य मनीषिणः। सा गतिस्त्यजतः प्राणान् गङ्गायमुनसंगमे"। वाराहे "तत्र योऽनुत्रति प्राणान् वटमूलेषु सुन्दरि! सर्वलोकानतिक्रम्य मम लोकं प्रपद्यते"। तथा "अकामोवासकामो वा वटमूलेषु सुन्दरि! योत्रं प्राणान्प्रमुञ्चेत यदीच्छेत्परमां गतिम्" तथा "पञ्चयोजनविस्तीर्णं प्रयागस्य तु मण्डले। व्यतीतान् पुरुषान् सप्त भविष्यांश्च चतुर्दश। नरस्तारयते सर्वान् यस्तु प्राणान्परित्यजेत्" ब्राह्मे "ध्यात्वा विष्णुपदान्मोक्षं प्रयागे विष्णुतत्परः। तनुन्यजति वै माघे तस्य मुक्तिर्न संशयः। दुष्कृतोऽपि दुराचारो ब्रह्महत्यादिपातकी। हरिं ध्यात्वा त्यजेद्देहं प्रायशो मुक्तिभाग्भवेत्" भविष्योत्तरे "समाः सहस्राणि तु सप्त वै जले दशैकमग्नौ पतने च षोडश। महाह्रदे पञ्चदशेति गोपदे अनागते भारत! चाक्षया गतिः अग्निप्रवेशं ये कुर्युरविमुक्ते विधानतः प्रविशन्ति सुखन्ते मे निःसंदिग्धं वरानने! इति सामान्यतोऽपि फलमुक्तम् एवमन्येऽपि विधयोऽत्रेवाः। एवं विहित मरणं तु कलौ निषिद्धमेव "भृग्वग्निमरणं चैव इद्धादिमरणं तथेति माधवीये कलिवर्ज्यप्रकरणे यत्तु गौडाः प्रयागादिमरणं ब्राह्मणभिन्नविषयमित्याद्युक्तम् तत् त्रिस्थलीसेतूक्तया दूषितं प्रागुक्तवचनात् "सर्वेन्द्रियवियुक्तस्य स्वव्यापारासमस्य च प्रायश्चित्तमनुज्ञातमग्निपातो महापथः। धर्मार्जनासमर्थस्य कर्तुः पापाङ्कितस्य च। ब्राह्मणस्याप्यनुज्ञातं तीर्थे प्राणविमोक्षणमिति" हेमाद्रौ विष्णुधर्मोत्तरेऽपि अपरार्के चैवमेव। सङ्गमनं कलौ भवत्येव "कलौ नान्या गतिः स्त्रीणां सङ्गानुगमनादृते" इति ब्रह्मवैवर्तात् एतेन मरणान्तिकप्रायश्चित्तमपि व्याख्यातम् कार्यं खण्डादौ चातुर्वर्ण्यस्य तत्त्यागविधयश्च युगान्तरपरा एवं प्रयागेऽपि। अवैधात्मघाते तु "आत्मघातिनस्तपक्रम्य" विहितं तस्य नाशौचं नाग्निर्नोदकक्रियेति कू० पु० वचनात् नाशौचादि। तस्य च क्रियाकरणे चान्द्रायणद्वयसहितं वर्षिवधप्रायश्चित्तं नारायणबलिं च कृत्वा वत्सरादूर्द्धं क्रिया कर्तुं शक्यते। वत्सरान्ते तु सर्वमौर्ध्वदेहिकं कुर्यात् इति हेमाद्रिप्रभृतयः। "गोब्राह्मणहतानाञ्च पतितानां तथैव च। ऊर्द्धं संवत्सरात् कुर्यात्सर्वमेवौर्ध्वदेहिकमिति हेमाद्रौ षट्त्रिंशन्मतात्, ब्राह्मे "क्रियते पतितानान्तु गते संवत्सरे क्वचित् देशधर्मप्रमाणत्वाद्व्यक्ते स्वबन्धुभिः मातंगखरादूले वाश्वादं करिहरौ स्मरन्" स्वर्यपद इत्यर्थः तत्र वर्षमध्येऽपि ज्ञात्यसङ्गमपरार्के वायुपुराणे "शुक्लपक्षे तु द्वादश्यां कुर्यात् श्राद्धन्तु वत्सरे। द्वादशाहनि वा कुर्याच्छुक्ले च प्रथमेऽहनि" ज्ञागलेयः "नारायणबलिः कार्योलोकगर्हाभयान्नरैः। तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्व्यासः" व्यासः "नारायणं समुद्दिश्य शिवं वा यत्प्रदीयते। तस्य शुद्धिकरं कर्म तद्भवेच्चैतदन्यथेति" सचात्मघातादिप्रायश्चित्तं कृत्वा कार्यः तदुक्तं हेमाद्रौ षट्त्रिंशन्मते "कृत्वा चान्द्रयणं पूर्वं क्रिया कार्या यथाविधि। नारायणबलिः कार्योलोकगर्हाभयान्नरैः। पिण्डोदकक्रियाः पश्चात्पोत्रगार्हिकं च यत्। एकोद्दिष्टानि कुर्वीत सपिण्डीकरणं तथा। इन्द्रियैरपरित्यक्ता ये च मूढाविषादिनः। घातयन्ति स्वमात्मानञ्चाण्डालादिहताश्च ये। तेषां पुत्राश्च पौत्राश्च दयया समभिप्लुताः यथा श्राद्धं प्रतन्वन्ति विष्णुनामप्रतिष्ठितम् तथा ते संप्रवक्ष्यामि नमस्कृत्य स्वयम्भुवम्" इति हेमाद्रौ तेनैवोक्तेश्च तत्रैव बौधायनोऽपि "अथ नारायणबलिं व्याख्यास्यामोऽभिशस्तपतितस्तुरापात्मत्यागिनां ब्राह्मणहतानाञ्च द्वादशवर्षाणि त्रीणिवा कुर्वीतेति" स्मृत्यपरिशिष्टे तु चण्डालादीत्याद्युक्ता "दग्ध्वा शरीरं प्रेतस्य संस्काप्यास्थीनि यत्नतः। प्रायश्चित्तं तु कर्त्तव्यं पुत्रैश्चान्द्रायणत्रयमित्युक्तम्। प्रमादमरणे तु नदोषः मदनरत्ने ब्राह्मे "प्रमादादपि निःशङ्कस्खड्गाद्यभिघोदितः चाण्डालैर्ब्राह्मणैर्वैरैर्निहतोयत्र कुत्रचित्। तस्य दाहादिकं कार्यं यथान्न पतितस्तु सः। चान्द्रायणं तप्तकृच्छ्रद्वयं तस्य विशुद्धये। यद्वा कृच्छ्रान् पञ्चदश कृत्वा

तु विधिना दद्येत् "बुद्धिपूर्व्वकृतानां तु त्रिंशत्कृच्छ्रं समाचरेदित्युक्तम्" स्मृतिरत्नावल्यां तु द्विगुणं प्रायश्चित्तं कृत्वाऽवांगप्यङ्गात्सर्वं कार्यमित्युक्तम् आत्मनोघातशुद्ध्यर्थं चरेच्चान्द्रायणद्वयं तप्तकृच्छ्रचतुष्कञ्च त्रिंशत्कृच्छ्राणि वा पुनः। अर्वाक् संवत्सरात्कुर्य्याद्दहनादि यथोदितम् कृत्वा नारायणबलिमनित्यत्वात्तदाद्युप इति" इदञ्चात्मवधनिमित्तं तत्सजातिवधप्रायश्चित्तेन समुच्चितं कार्य्यम्। प्रमादमरणे तु "अथ कथञ्चित् प्रमादेन त्रिवेतामम्बुदकादिभिः तस्याशौचं विधातव्यं कर्त्तव्या चोदकक्रिया" इत्युक्तेः सर्वं कार्य्यं तत्र तु "तोयाग्निरज्जुपगोविप्रैरन्यत्रात्मघातिनाम्" याज्ञवल्क्येन सद्यःशौचं विहितं प्रायुक्तवचने त्र्यहाशौचमिति तत्र त्र्यहाशौचसद्यःशौचयोर्विकल्पइति भेदः। त्र्यहाशौचमिति रघुनन्दनादयः। सद्यः शौचमिति मिताक्षरा। ख, ल् आत्मघातकोऽप्यत्र त्रि०।

आत्मघोष पु० आत्मानं घोषयति स्वयञ्चैः। १काके, २कुक्कुटे, च, ताभ्यां हि (का का) (कु कु) स्वस्वध्वनिनैवात्मनामैकदेशो घोष्यते इति तथोक्तत्वम्।

आत्मज पु०आत्मनो मनसो देहाद्वा जायते, आत्मा वा जायते जन-ड। १मनोभवे २पुत्रे च "अङ्गादङ्गात् सम्भवति पुत्रवत् दुहिता नयामिति" स्मृतिः "आत्मा वै जायते पुत्र इति" श्रुतिः ३कन्यायां, ४मनोजन्यायां बुद्धौ च स्त्री। "बलिताः पुरःपतिसुपेतमात्मजाः" माघः वन्द्यं युगं चरणयोर्जनकात्मजायाः" रघुः। क्ली। आत्मजातोऽप्यत्र पुंस्त्री०।

आत्मजन्मन् पु०आत्मनो जन्म यस्य। अपत्ये "अत आर्हर्तुमिच्छामि पार्वतीमात्मजन्मने" कुमा०। "तमात्मजन्मानमजं चकार" रघुः। ङीप्०। पुत्ररूपात्मोपत्तौ न० "तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः" रघुः।

आत्मज्ञान न० आत्मनोज्ञानम्। यथार्थरूपेणात्मनो ज्ञाने तज्ज्ञानस्य च मोक्षसाधनत्वं श्रुतावुक्तम् "अभयं वै जनक! प्राप्तोऽसि येनात्मानमेवावेः" "महान्तं विभुमात्मानं मत्वा धीरो न शोचति" श्रुतिः आत्मस्वरूपञ्च आत्मशब्दे वक्ष्यते तस्य इतरस्मात् भेदज्ञानं यत्रास्वरूपज्ञानञ्चात्मज्ञानम् तच्च साक्षात्काररूपम् तस्यैव मोक्षसाधनत्वात् "आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान्"। "सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम्। तद्ह्यग्र्यं सर्वविद्यानां प्राप्यतेऽमृतं यतः" इति च मनुः। ङीप्०। आत्मबोधादयोऽप्यत्र।

आत्मतत्त्व पु० आत्मनस्तत्त्वम्। आत्मनो यथार्थस्वरूपे १चैतन्यरूपे मतभेदे२कर्त्तृत्वादिरूपे। आत्मतत्त्वं च उदयनाचार्यैः चार्व्वाकादिमतनिरसनेन आत्मतत्त्वविवेके दर्शितम् यथा "इह खलु निसर्गप्रतिकूलस्वभावं सर्व्वजनसंवेदनसिद्धं दुःखं जिहासवः सर्वएव तद्धानोपायमविद्वांसोऽनुसरन्तः सर्वाध्यात्मविद्देकवाक्यतया तत्त्वज्ञानमेव तदुपायमाकर्णयन्ति न ततोऽन्यम्, प्रतियोग्यनुयोगितया आत्मैव तत्त्वतोज्ञेयः। तथाहि यदि नैरात्म्यं यदि वात्मास्ति वस्तुभूत उभयथापि नैसर्गिकमात्मज्ञानमतत्त्वज्ञानमेवेत्यलमाग्रहेणैकवाक्यतैव वादिनाम् अत आत्मतत्त्वं विविच्यते इत्यादिना, विस्तरस्तु तत्रैव अवगन्तव्यः आत्मैव तत्त्वं परमपदार्थः। २आत्मरूपे परमपदार्थे च।

आत्मतुष्टि स्त्री० आत्मन्येव तुष्टिरस्य। आत्ममात्रज्ञानलाभेन १प्राप्ततुष्टौ आत्मन्ये ब्रह्मविदि। ङीत०।२आत्मनः सन्तोषे स्त्री। सा च विकल्पविषये धर्म्मे प्रमाणम् "वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदाम्। आचारश्चैव साधूनामात्मनस्तुष्टिरेव चेति" मनूक्तेः। [घातिनि आत्मघातिशब्दे उदाहरणम्

आत्मत्यागिन् त्रि०आत्मानं देहं त्यजति त्यज-घिनुण्। आत्म-

आत्मदर्श पु० आत्मा देहः दृश्यतेऽत्र दृश-आधारे घञ्। १दर्पणे आदर्शे हेम०। "प्रसादमात्मीयमिवात्मदर्शः" रघुः। भावे घञ् ङीत०।२आत्मनोदर्शने आत्मसाक्षात्कारे।

आत्मदर्शन न०आत्मा दृश्यते साक्षात्क्रियतेऽनेन दृश-करणे ल्युट् ङीत०। आत्मसाक्षात्कारसाधने १श्रवणे २मनने ३निदिध्यासने, "आत्मा वा अरे द्रष्टव्यः श्रोतव्योमन्तव्योनिदिध्यासितव्यः" इति श्रुतौ साक्षात्कारसाधनतया श्रवणादीनां त्रयाणां विधानात् तेषां तथात्वम् "श्रोतव्यः श्रुति वाक्येभ्यो मन्तव्यश्चोपपत्तिभिः" इत्युपक्रम्य "एते दर्शनहेतव" इत्युक्ते च तेषां तथात्वम् भावे ल्युट्। २आत्मसाक्षात्कारे "एष वै परमोधर्म्मो यद्योगेनात्मदर्शनम्", ३आत्मत्वेन सर्वभूतेषु ज्ञाने च "स्त्रालोकालम्भविगमः सर्वभूतात्मदर्शनम्" या०।

आत्मद्रोहिन् त्रि०आत्मने द्रुह्यति द्रुह-णिनि। आत्मघातिनि

आत्मध्यान न० आत्मनोध्यानम् योगविशेषः। आत्मसाक्षात्कारसाधने मानसवृत्तिभेदे। तत्प्रकारश्च यज्ञवल्क्येनादर्शितः "ध्यानं प्रोक्तं प्रवक्ष्यामि सर्वस्मादुत्तमं शुभम्। हृदिस्थादेवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः। हृदि ज्योतींषिभूयश्च हृदि सर्व्वं प्रतिष्ठितम्। स्वदेहमरणिं कृत्वा प्रणवञ्चोत्तरारणिम्। ध्याननिर्म्मथनाभ्यान्तु विष्णुं पश्येद्धृदि स्थितम्। हृदयर्क्षेन्द्रमःसूर्य्याः सोममध्ये हुताशनः। तेजोमध्ये स्थितं तत्त्वं तत्त्वमध्ये स्थितोऽच्युतः। अणो-

रणोयान् महतो महीयानात्मास्य जन्तोर्निहितोगुहायाम् । तेजोमयं पश्यति वीतशोकोधातुः प्रसादान्महिमानमात्मनः । वासुदेवस्तमोऽन्धानां प्रत्यक्षोनैव जायते । अज्ञानपटसंवीतैरिन्द्रियैर्विषयेषुभिः । एष वै पुरुषोविष्णुर्व्यक्ताव्यक्तः सनातनः । एष धाता विधाता च पुराणोनिष्कलः शिवः । वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् । मन्त्रैर्विदित्वा न बिभेति मृत्योर्नान्यः पन्था विद्यतेऽयनाय । पृथिव्यापस्तथा तेजोवायुराकाशमेव च । पञ्चेमानि विजानीयान्महाभूतानि पण्डितः । चक्षुः श्रोत्रे स्पर्शनञ्च रसना घ्राणमेवच । बुद्धीन्द्रियाणि जानीयात् पञ्चेमानि शरीरके । शब्दोरूपं तथा स्पर्शोरसोगन्धस्तथैव च । इन्द्रियस्थान् विजानीयात् पञ्चैव विषयान् बुधः । हस्तौ पादावुपस्थञ्च गुदं पायुस्तथैव च । कर्मेन्द्रियाणि पञ्चैव नित्यं सन्ति शरीरके । मनोबुद्धिस्तथेवात्मा अव्यक्तं तथैव च । इन्द्रियेभ्यः परान्योह चत्वारि प्रवराणि च । तथात्मानं तद्व्यतीतं पुरुषं पञ्चविंशकम् । तन्तु ज्ञात्वा विमुच्यन्ते वै जनाः साधुदृष्टयः । इदन्तु परमं गुह्यमेतदक्षरसंज्ञितम् । अशब्दमरसस्पर्शमरूपं गन्धवर्जितम् । निर्दुःखमसुखं शुद्धं तद्विष्णोः परमं पदम् । विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् । आराग्रशतभागाभः कल्पितस्तु सहस्रधा । तस्यापि शतभागाभ्योजीवः सूक्ष्मउदाहृतः । महतः परमव्यक्तमव्यक्तात् पुरुषः परः । पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः । एष सर्वेषु भूतेषु तिरस्कार इवः सदा । दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः" । जीवात्मपरमात्मानोरेकतया क्वचिदीश्वरधर्मेण क्वचिच्च जीवधर्मेण ध्यानमुच्यते । आत्मस्वरूपसङ्ख्या तस्य ध्यान प्रकारः या० स्मृतौ उक्तः यथा । "अनन्यविषयं कृत्वा मनोबुद्धिस्मृतीन्द्रियम् । ध्येय आत्मा स्थितोयोऽसौ हृदये दीपवत् प्रभुः" "आत्मव्यतिरिक्तविषयेभ्यो मनोबुद्धिस्मृतीन्द्रियाणि प्रत्याहृत्यात्मैकविषयाणि कृत्वात्मा ध्येयः योऽसौ प्रभुर्निर्वातस्थप्रदीपवद्देदीप्यमानो निष्प्रकम्पोहृदि तिष्ठति एतदेव तस्य ध्येयत्वं यच्चित्तवृत्तेर्बहिर्विषयावभासतिरस्कारेणात्मप्रवणतानाम शरावसम्पुटनिरुद्धप्रभाप्रतानप्रसरस्येव प्रदीपस्य कनिष्ठत्वम्" मिता० ।

आत्मन् पु०अव-मनिण् । १स्वरूपे, २यत्ने, ३देहे, ४मनसि, ५बुद्धिस्थे निजे, ६बुद्धौ, ७ब्रह्मणि, ८वह्नौ, ९वायौ, १०जीवे, ११ब्रह्मणि च । "आत्मानं चेद्विजानीयदयमस्मीति पूरुषः । किमिच्छन् कस्य कामाय शरीरमनुसञ्ज्वरेत्" श्रुतिः । अहं प्रत्ययविषयत्वे च बह्वात्मवादिविप्रतिपत्तयः या० भाष्येदर्शिताः । "देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृताजना लौकायतिकाश्च प्रतिपन्नाः । इन्द्रियाण्येव चेतनान्यात्मेत्यपरे । मनइत्यन्ये । विज्ञानमात्रं क्षणिकमित्येके । शून्यमित्यपरे । अस्ति देहादिव्यतिरिक्तः संसारी कर्त्ता भोक्तेत्यपरे । भोक्तैव केवलं न कर्त्तेत्येके । अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित् । आत्मा सभोक्तृरित्यपरे । एवं हि बह्वयोविप्रतिपन्नाः युक्तिवाक्यतदाभाससमाश्रयाः सन्तः" । विस्तरस्त्वेतत् विप्रतिपत्तिकारणसामान्यधर्मप्रदर्शनपुरःसरं विवरणोपन्यासे भाष्यकारेण "यथा रज्जुद्रव्यस्य दण्डसर्पधारादावनुभूतरूपेण प्रतीयमानत्वमेव सामान्यम् तथाऽऽत्मनः शरीरेन्द्रियमनोबुद्धिशून्यकर्तृभोक्तृसर्वज्ञब्रह्माख्यपदार्थेषु विप्रतिपत्तिस्कन्धेषु अनुभूतत्वेन प्रतीयमानत्वमेव सामान्यं भविष्यति प्रत्यक्षसिद्धेऽपि शरीराद्यर्थे प्रयुज्यमानस्यात्मवाचिनोऽहंशब्दस्य गोशब्दवदर्थविप्रतिपत्तिरूपपद्यते । गोशब्दस्य हि तत्तत्प्रत्यक्षसिद्धव्यक्त्याकृतिजातिक्रियागुणाद्यर्थेषु प्रयुज्यमानस्य जातिरर्थत्वेन वैदिकैः प्रतिपन्ना, व्यक्तिः सांख्यादिभिः, उभयं वैयाकरणैः, सावयवसंस्थानाख्याकृतिराईतादिभिः । त्रितयमपि नैयायिकाद्यैः । अथ गोशब्दप्रयोगे जात्यादीनामन्यव्यतिरेकेनियमात्तदर्थत्वयुक्ता । तत्राहंशब्दप्रयोगेऽपि शरीरादीनामन्वयव्यतिरेकेनियमात्तदर्थत्वयुक्तास्तु । तत्र विचारविरहितं प्रत्यक्षमेव प्रमाणमाश्रित्य चेतयमानोऽहमात्मेति प्राकृताः शास्त्रसंस्कारवर्जिता जनाः प्रतिपन्नाः । तथा भूतचतुष्टयमात्रतत्त्ववादिनो लौकायतिकाश्च, मनुष्योऽहं जानामीति शरीरस्याहंप्रत्ययालम्बनत्वेन ज्ञानाश्रयत्वेन चावगम्यमानत्वात्तदेवात्मेति मन्यन्ते । अन्ये पुनरेवमाहुः सत्यपि शरीरे चक्षुरादिभिर्विना रूपादिज्ञानाभावादिन्द्रियाण्येव चेतनानि । न चेन्द्रियाणां करणतया ज्ञानान्वयव्यतिरेकयोरन्यथासिद्धिः । करणत्वकल्पनादुपादानत्वकल्पनस्याभ्यर्हितत्वात् । अतः अन्योऽहं काणोऽहं मूकोऽहमित्यहं प्रत्ययालम्बनानि चेतनानीन्द्रियाणि प्रत्येकमात्मत्वेनाभ्युपेयानि शरीरे त्वहंप्रत्ययालम्बनत्वं चेतनत्वञ्चात्मभूतेन्द्रियाश्रयत्वादन्यथासिद्धम् । नन्वेकस्मिन् शरीरे बह्वनामिन्द्रियाणां चेतनत्वे यएवाहं पूर्वं रूपमद्राक्षं स एवेदानीं शब्दं शृणोमीति प्रत्यभिज्ञा न स्यात् ।

तथा भोक्तृत्वं रूपादिषु युगपदेव स्यान्न क्रमेणेति चेत् मैवम् न हि चेतनैकत्वं प्रत्यभिज्ञाक्रमभोगयोर्निमित्तं किन्त्वेकशरीराश्रयत्वमेव। ततो यद्यैकस्मिन् शरीरे बहूनां पुरुषाणामेकैकस्य विवाहेऽन्येषामसृजन्नत्वं तथेन्द्रियात्मनामपि एकैकस्योपभोगकालेऽन्येषामसृजन्नत्वम्। अन्ये तु मन्यन्ते स्वप्नेचक्षुराद्यभावेऽपि केवले मनसि विज्ञानाश्रयत्वमहं प्रत्ययालम्बनत्वं चोपपद्यते। न च रूपादिविज्ञानानां चक्षुराद्याश्रयत्वं, तथासति केवले मनसि रूपादिस्मृत्यनुपपत्तेः। ततः करणान्येव चक्षुरादीनि अहंप्रत्ययस्तु तत्र कर्तृत्वोपचारात् सिद्धति। न चानेकात्मस्वेकशरीराश्रयत्वमात्रेण प्रत्यभिज्ञा युज्यते एकप्रासादमाश्रितानामपि तत्प्रसङ्गात्। तस्माच्चक्षुरादिकरणकं शरीराद्याधारं मनएवात्मेति। विज्ञानवादिनस्तु क्षणिकविज्ञानव्यतिरिक्तवस्तुनः सद्भावमनुभवविरुद्धम् मन्वानास्तस्यैव विज्ञानस्यात्मत्वमाहुः। प्रत्यभिज्ञानं तु ज्वालावामिव सन्ततविज्ञानोदयसादृश्यादुपपद्यते विज्ञानानां हेतुफलसन्तानमात्रादेव कर्मज्ञानबन्धमोक्षादिसिद्धिः। साध्यमिकास्तु सुषुप्तौ विज्ञानस्याप्यदर्शनाच्छून्यमेवात्मतत्त्वमित्याहुः यदि सुषुप्तौ विज्ञानप्रवाहः स्यात्तदा विषयावभासोऽपि प्रसज्येत। निरालम्बनज्ञानायोगात् जाग्रत्स्वप्नज्ञानानामेव सालम्बनत्वं न सौषुप्तिकज्ञानानामिति चेत् न विशेषाभावात् विमतं सालम्बनम् प्रत्ययत्वात् संमतवदिति। उक्तिरस्य सौषुप्तविषयस्फुटत्वाभावनियमात्र तत्र विषय इति चेत्। तर्हि तत्र नियमेनार्थाभासत्वादेव ज्ञानमपि मा भूत्। न चेच्छून्ये विवादितव्यं यथा सविकल्पकः स्वविषयविपरीतनिर्विकल्पकजन्यसत्ता सत्प्रत्ययोऽपि स्वविपरीतशून्यजन्य इत्यभ्युपेयत्वात् एवं चोत्पाने सति जायमानस्याहमस्मीति सत्प्रत्ययस्य समनन्तरपूर्वप्रत्ययलक्षणकारणरहितस्य वास्तवत्वायोगाच्छून्यमेव तत्त्वमिति। अपरे पुनः शरीरेन्द्रियमनोविज्ञानशून्यव्यतिरिक्तं स्थायिनं संसारिणं कर्तारं भोक्तारमात्मानमाहुः। न च शून्येऽहंप्रत्यय उपपद्यते बन्ध्यासुतादावपि तत्प्रसङ्गात्। नापि क्षणिकविज्ञाने क्रमभावी व्यवहारो युज्यते सर्वो हि लोकोऽनुकूलं वस्तु प्रथमतो जानाति ततः इच्छति ततः प्रयतते ततस्तत् प्राप्नोति ततः सुखं लभते। यद्येतादृशमेककर्तृकतया भासमानं व्यवहारमेकसन्तानवर्त्तिनो बहव आत्मानः परस्परवार्त्तानभिज्ञा अपि निश्चादयन्ति तदा भिन्नसन्तानवर्त्तिनः किन्न निश्चादयेयुः। तस्मादहमेवाहमिदं वस्त्वाश्रिषं सएवाहमिदानीमिच्छामीत्यादावाधितप्रत्यभिज्ञाननिर्वाहाय स्थायी चात्माभ्युपेयः। न चासौ विज्ञानरूपः अहंविज्ञानमित्येकत्वानुभवाभावात्। ममेदं विज्ञानमिति संबन्धोल्लेखानुभूयते। नचायमनुभवोभ्रमात्मेतिवदौपचारिकः बाधकाभावात्। एतेन शरीरेन्द्रियमनसामात्मत्वं प्रत्युक्तम्। तत्रापि संबन्धतत्प्रत्ययस्यानिवार्यत्वात् अहमुल्लेखस्यात्माध्यासिकत्वात्। नचायमात्मा सादिः। शरीरोत्पत्तिसमनन्तरमेव सुखदुःखप्राप्तिमालोक्य तद्धेतुभूतयोः पुण्यपापयोः कर्त्ता पूर्वमप्यसावित्यवगमात्। नचायमनित्यः विनाशानिरूपणात्। न तावत् स्वतोविनाशः निर्हेतुकविनाशस्यातिप्रसंङ्गिनः सुगतेतरैरनङ्गीकारात्। नापि परतः। निरवयवस्य विनाशहेतुसंसर्गासंभवात् संभवे वा न विनाशः सिद्धेत्। कर्मनिमित्तोऽन्यस्य संसर्गः स च तत्कर्मफलोपभोगायात्मनोऽवस्थितिमेव साधयेन्न विनाशं तस्मादनादेरविनाशिनोऽनन्तशरीरेषु यातायातरूपः संसारः सिद्धः। निर्विकारस्य भोगासंभवाद्विकारस्य क्रियाफलरूपस्याभ्युपगमे क्रियावेशात्मकं कर्तृत्वमनिवार्यम्। भोक्तृत्वमप्यनुभूयमानं शरीरादिषु विज्ञानपर्यन्तेषु अनुपपन्नत्वादुक्तात्मन्येव पर्यवस्यति। तथा हि। शरीरं तावत् पञ्चभूतसंघातरूपम् "पञ्चभूतात्मके तत्तच्छरीरे पञ्चताङ्गते" इत्यादिशास्त्रात्। यत्तु नैयायिका मन्यन्ते मूलोकवासिनां शरीरं पार्थिवमेव तत्र क्लेदनादुपलब्धिर्यूषादाविव भूतान्तरोपष्टम्भादिति। तदसत्। शोषणादिना जलाद्यपगमेऽपि यथा वस्त्रादिस्वरूपस्य नापचयः। तथा क्लेदनपाचनव्यूहनावकाशानामपगमेऽपि शरीरस्यापचयाभावप्रसङ्गात्। यच्च वैशेषिकैरुच्यते पञ्चभूतात्मकत्वे शरीरस्यात्यन्तत्वप्रसङ्गः वायुाकाशयोरप्रत्यक्षतया प्रत्यक्षाप्रत्यक्षवृत्तित्वादिति तदप्ययुक्तम्। तथासति सर्वावयविनामप्रत्यक्षत्वापातात्तेषां प्रत्यक्षाप्रत्यक्षावयववृत्तित्वात्। न हि रूक्षाः परभागस्थितास्तावयविनोऽवयवाः प्रत्यक्षीकर्तुं शक्यन्ते। तस्माद्भूतसंघातः शरीरम्। न च गन्धादिमतां तद्रहितानाञ्च भूतानामेककार्यजनकत्वं परस्परविरोधादिति वाच्यम् तथा सति नीलादीनामेकावयविजनकत्वस्यैकचित्ररूपारम्भकत्वस्य चासम्भवप्रसङ्गात्। अनुभवबलादेव तत्र तथा स्वीकारे प्रकृते पि न तद्दण्डवारितम्। तत्र शरीरस्य भोक्तृतां यदन्ये लौकायतिकाः प्रत्यूष्याः किं व्यस्तानां भूतानां प्रत्येकं भोक्तृत्वमुत समु-

स्थानाम्, आद्योऽपि न तावद्युगपत् सर्वेषामभोक्तृता। तदा-स्वार्थप्रवृत्तानां तेषाम् अन्योऽन्यमङ्गाङ्गिभावानुपपत्तौ संघातापत्त्यभावप्रसङ्गात्। अन्तरेणैव संघातमभोक्तृत्वे देहा-दहिरप्येकैकस्य भूतस्य भोक्तृतोपलभ्येत। नापि क्रमेण तेषां भोक्तृत्वं संघातानुपपत्तितादवस्थ्यात्। न च वर-विवाहन्यायेन गुणप्रधानभावेन तदुपपत्तिः, वैषम्यात्। य-थैकैकवरस्यासाधारणत्वेनैकैका कन्या भोग्या न तथा चतुर्णां पृथिव्यप्तेजोवायूनां भोक्तृणां रूपरसगन्धस्पर्शा भोग्या व्य-वस्थिताः। कथं क्रमभोगः। अथ कथञ्चित् व्यवतिष्ठेरन्। तदा युगपत्सर्वविषयसन्निधाने सति क्रमानुपपत्तिः। यथैकस्मिन् मुहूर्ते प्रत्येकं भोग्यकन्यावस्तुनि सन्निहिते वराणां क्रम-विवाहोगुणप्रधानतया संघातोवा नास्ति तद्वत्। नापि स-मस्तानां भोक्तृत्वसम्भवः। प्रत्येकमविद्यमानस्य चैतन्यस्य संघातेऽप्यभावाद्भोगानुपपत्तेः। अथ मन्यसेऽग्नौ प्रक्षिप्तेषु तिलेषु तैकस्य ज्वालाजनकत्वाभावेऽपि तिलसमूहस्य यथा-तज्जनकत्वं तथा संघातस्यैव चैतन्यं स्यादिति तदपि संघा-तापत्तौ हेतुवक्तव्यः। आगामिभोगो हेतुरिति चेन्न यदि तावद्भोगस्य गुणभावः तदा प्रधानभूतानामन्योऽन्यं गुणप्रधानभावरहितानां कथं संघातापत्तिः प्राधान्यं तु भोगस्यानुपपन्नम् भोक्तृशेषत्वात्। नच वाच्यं शे-षिणं भोगं प्रति शेषभूतयोः स्त्रीपुंशरीरयोः भोक्तोः संघातापत्तिर्दृष्टेति, तत्रापि शरीरे भोक्तृत्वासंप्रतिपत्तेः। ज्वालां प्रति तिलानां संघातापत्तिरिति योऽयं दृष्टान्तः सोऽपि तवासिद्धः संघातानिरूपणात्। न तावत् संघातोनाम भोग्यभोगिनोर्वनवदेकदेशतामात्रम् तथा सति तेन न्याये-न व्यापिनां भूतानां सर्वत्र सत्त्वाच्चैतन्यभोगयोः सार्व-त्रिकत्वप्रसङ्गात्। नापि तदारब्धोऽवयवी संघातः तस्य भूते-भ्योभेदे पञ्चभूतत्वाभ्युपगमप्रसङ्गात्। अभेदे भूतमात्रतया संघातत्वासम्भवात्। भेदाभेदयोश्चानङ्गीकरणात्। अथावय-वविनः पारतन्त्र्याद्न पञ्चभूतत्वापत्तिस्तर्हि जलादेः पृथि-व्यादितत्त्वत्वाच्च तत्त्वचतुष्टयमपि सिध्येत्। न चैकद्रव्यबुद्धा-वन्वयोभयापत्तिः संघातः, वस्तुतो ऽनेकेषु कृत्यबु-द्धेर्विभ्रममात्रत्वात्। न चैकार्थक्रियायां युगपदन्वयः संघातः, तदानीं काष्ठाग्नयेव वह्निना वायुसंसृष्टे जले-ताप्यमाने सति तत्र भूतचतुष्टयसंघाताद्भोगप्रसङ्गात्। नचान्ययःपिण्डवत्संश्लेषः संघातः, शरीरे वाबोस्तथा श्लेषाभावात्। वह्निव्याप्तेनायःपिण्डेन सन्तापितजले वायुसंयुक्ते भोगप्रसङ्गात्। न चोक्तदोषपरि-हारायैकस्यैव भूतस्य भोक्तृत्वनियतिः शङ्कनीया सर्वसन्निधानात् कस्य भोक्तृत्वमित्यनिर्धारणात्। यत् तु लोकायतैकदेशिनां मतद्वयम् इन्द्रियाणां भोक्तृत्वम्। शरीरेन्द्रियसङ्घातस्य च भोक्तृत्वमिति। तदुक्तन्यायेन निराकरणीयम्। ननु कानि पुनरिन्द्रियाणि येषां भोक्तृत्वं निराक्रियते। तत्र गोलकमात्राणीति सुगताः। तच्छक्तय इति मीमांसकाः। तद्व्यतिरिक्तानि द्रव्यान्तरा-णीत्यन्ये सर्वे वादिनः। तत्र न तावत् गोलकमात्रत्वं युक्तं कर्णशष्कुल्यादिविरहिणामपि सर्पादीनां शब्दाद्युपलब्धि-सद्भावात् इच्छाणां सर्वगोलकरहितानां विषयोपलम्भ-सत्त्वाच्च "तस्मात्पक्षन्ति पादपा" इत्यादि शास्त्रात्। न च इच्छाणामचेतनत्वं हिंसाप्रतिषेधेन प्राणित्वावगमात् एवं गोलकशक्तित्वमिन्द्रियाणाम् न। अथ मन्यसे शक्तिमद्द्रव्यान्तरकल्पनात् प्रतिपत्तस्थानेषु शक्तिमात्रकल्प-ने लाघवमिति। तर्ह्यत्पन्नलाघवादात्मन एव क्रमकारिस-र्वविज्ञानसामर्थ्यं कल्प्यतां किमेभिरिन्द्रियैः। न च सर्व-गतस्यात्मनो गोलकप्रदेशेष्वेव ज्ञानपरिणामोऽनुपपन्नः, त्वया तस्यैव शरीरप्रदेशमात्रे ज्ञानपरिणामाङ्गीकारात्। एवं चानिन्द्रियेष्वपि गोलकप्रदेशेषु ज्ञानान्वयव्यति-रेकौ शरीरएवान्यथासिद्धौ। अतो मीमांसकमतमनु-पपन्नम्। सन्तु तर्हि द्रव्यान्तराणीन्द्रियाणि तानि गोलके विशेषसंबन्धाच्चक्षुरादिशब्दवाच्यानीति। तदप्ययुक्तम्। तेषु प्रमाणाभावात्। विमताः रूपाद्युपलब्धयः करण पूर्विकाः कर्तृव्यापारत्वाच्छिदिक्रियावदिति चेत् करण प्रेरणाजन्ये कर्तृव्यापारे करणान्तराभावात् अन्यथाऽन वस्थानात्। "एतस्माज्जायते प्राणोमनः सर्वेन्द्रियाणि" चे-त्यागमगम्यानीन्द्रियाणीति चेन्न आगमसंस्कारविरहि-णामपीन्द्रियप्रतिपत्तेः। न च मनोवत्साक्षिवेद्यानीन्द्रि-याणि, रूपादिज्ञानाख्यं लिङ्गमनपेक्ष्य साक्षिमात्रेण चक्षु-रादीनां प्रतिपत्तेरभावात्। तस्माच्च सन्त्येवेन्द्रियाणीति। अत्रोच्यते। गोलकव्यतिरिक्तानीन्द्रियाणि आगमादेवाव-गम्यन्ते। न हि तत्संस्काररहितास्तानि जानन्ति किन्तु गोलकान्येव। यत्तु तेषामिन्द्रियाणामहङ्कारकार्यत्वं सा-ङ्ख्यैरुच्यते। तत्र किमध्यात्माहङ्कारः कारणं किं वा कृत्स्नकार्यव्यापिनी काचिदहङ्काराख्या प्रकृतिः, उभयत्रा-पि नास्ति किमपि मानम्। अथ द्वितीयपक्षे नानापुराण वचनानि मानमत्र श्रुतिविरोधात्। "अन्नमयं हि सौम्य-मन आपोमयः प्राणस्तेजोमयी वागित्यादि" श्रुतौ

भूतविकारत्वावगमात्। अतः पुराणवचनानीन्द्रियाणामहङ्काराधीनतामात्रं प्रतिपादयन्ति। यच्च शुष्कतार्किकैः भौतिकत्वमिन्द्रियाणामुक्तम्। तदप्ययुक्तम्। तेषामनेकबहुभूतग्राह्यत्वात्। इन्द्रियाणि भौतिकानि सावयवत्वात् घटादिवत् सावयवत्वं च मध्यमपरिमाणत्वादितिचेत् न, इन्द्रियाणामणुपरिमाणत्वेऽपि बाधाभावात् हेत्वसिद्धेः विषयावभाससाध्यणुत्वप्रसङ्गोबाध इति चेत् न तत्र तेजोऽणुपरिमाणेनापि मनसा विस्तृतात्मादिवस्तुदर्शनसङ्गावात्। चक्षुः रूपगुणवत्प्रकृतिकं रूपादिषु पञ्चसु मध्ये रूपस्यैवाभिव्यञ्जकत्वात् यस्य यन्नियमेनाभासकं तत्तद्गुणवत्प्रकृतिकं यथा रूपाभिव्यञ्जकरूपवत्प्रकृतिकोदीपः एवमन्यत्राप्यूहनीयमिति चेत् न शब्दस्यैवाभिव्यञ्जके श्रोत्रे शब्दगुणवदाकाशारब्धेऽनैकान्तिकत्वात् कर्णशष्कुल्यवच्छिन्नाकाशमात्रस्य त्वया श्रोत्रत्वाभ्युपगमात् विशेषव्याप्तौ नानैकान्तिकत्वमिति चेत्। एवमप्यतिप्रसङ्गोदुर्वारः। रूपादिचतुष्टयाभिव्यञ्जकस्य मनसोभूतचतुष्टयारब्धत्वस्य सुसाध्यत्वात्। अभूतस्वाभाव्यादेर्व्याहतकतया मनोन भूतारब्धमिति चेत् तर्हि संख्यापरिमाणादेरपि व्याहतकतया चक्षुरादीनां भूतारब्धत्वं न स्यात् असाधारणविषयारब्धत्वाङ्गीकारे सति भौतिकत्वसिद्धिरिति चेत् तर्हि मनोऽप्यसाधारणविषयेणारब्धेत एकद्रव्यस्यात्मनः सावयवद्रव्यानारब्धकत्वे निरवयवं मनोद्रव्यं प्रत्यारब्धकत्वं किन्न स्यात्। तस्माद्व शुष्कतर्कादिन्द्रियाणां भौतिकत्वसिद्धिः किन्तु आगमादेव। तानि पुनरिन्द्रियाणि सर्वगतानीति योगाः प्रतिपेदिरे तदपि मानहीनम्। आक्षेन्द्रियमनांसि सर्वगतानि सर्वत्रदृष्टकार्यत्वात् आकाशतत्त्ववत् दृश्यते हि ज्ञानं तत्कार्यं च सर्वत्रेति चेत् न सर्वत्रत्वेनेह तत्सजगद्विज्ञानामसिद्धिप्रसङ्गात्। यत्र शरीरं तत्र सर्वत्रेति विवक्षायां शरीर एवानैकान्तिकत्वात्। दृश्यते हि यत्र सर्वत्र शरीरं तत्र शरीरकार्यं न च शरीरस्य सर्वगतत्वमस्ति। अथेन्द्रियाणि सर्वगतानि परोपाधिकगमनत्वात् आकाशवत्। यथाऽऽकाशस्य गमनं घटाद्युपाधिकं तथेन्द्रियाणां गमनं शरीरोपाधिकमिति चेत् न शरीरावयवेष्वनैकान्तिकत्वात्। प्राणोपाधिकं हि तेषां गमनम्। किं च इन्द्रियाणां सर्वगतत्वे युगपत्सर्वविषयोपलब्धिः स्यात्। शरीर एव इष्टत्वाभाव्र दोष इति चेत् तर्हि बहिरिन्द्रियसङ्घावकल्पना न प्रमाणं प्रयोजनवती च। तस्मादसर्वगतानीन्द्रियाणि। यत्तु तान्त्रप्राभाकरोणीति सुगताः कल्पयन्ति तदप्ययुक्तम्। तत्र किं चक्षुःश्रोत्रयोरप्राप्यकारित्वम् उत तदितरेषामपि न तावदितरेषां दूरत एव स्पर्शरसगन्धोपलिप्रसङ्गात् नापि प्रथमः विमते चक्षुःश्रोत्रे प्राप्यकारिणी बाह्येन्द्रियत्वात् घ्राणादिवत्। तेजसश्चातिदूरशीघ्रगमनदर्शनात् उन्मीलन मात्रेण चक्षुषो ध्रुवादिप्राप्तिरविरुद्धा शब्दस्य च पीचिसन्तानवत् परम्परया श्रोत्रसमवायप्राप्तिरिति" वक्तार्किकैरुच्यते। तदसत् तथा सति इह श्रोत्रे शब्द इति प्रतीयेत प्रतीयते तु तत्रशब्द इति। तस्माद्यथानुभवं श्रोत्रस्यैव तत्र गमनं कल्पनीयम्। तदेवं भौतिकानि परिच्छिन्नानि प्राप्यकारीण्येन्द्रियाणि सन्तीति सिद्धम्। किं तर्हि मनोनाम यस्मिन्नात्मत्वमपरे लौकायतिकैकदेशिनोमन्यन्ते। नित्यं निरवयवमणुपरिमाणं मन इति तार्किकाः। तत्र न तावन्नित्यं परिच्छिन्नत्वात् घटवत्। विमतं नित्यं निरवयवद्रव्यत्वात् आत्मवदिति चेत् न हेत्वसिद्धेः। विमतं सावयवद्रव्यत्वाच्चक्षुरादिवत्। अन्यथा मनसोऽनुमेयत्वं सुदुष्करं बाध्येत। कथं तर्हि मूर्तद्रव्यानभिघात इति चेत् जीवनदशायां देहाद्बहिर्निर्गमनाभावादिति ब्रूमः। मरणदशायां तु सावयवत्वेनाभिमतानां चक्षुरादीनामप्यप्रतिघातोविद्युत एव। अतएव सावयवत्वात् संयोगवत्त्वाच्च घटादिवन्नाणुपरिमाणत्वम् सर्वगतत्वेच युगपत् सर्वेन्द्रियसंयोगात् सर्वज्ञानप्रसङ्गः। मध्यमपरिमाणत्वे तु न कोऽपि दोषः। स्थूलसूक्ष्मेषु हस्तिपुत्तिकादिदेहेषु क्रमेण प्राप्यमाणेषु कथं तद्देहसमानत्वेन वृत्तिरिति चेत् अवयवोपचयापचयाभ्यामिति ब्रूमः। शाक्यास्तु समनन्तरप्रत्ययएवोत्तरज्ञानकारणतया मन इति प्रतिपेदिरे तन्न सङ्गतं व्याप्तिमनपेक्ष्य केवलस्य पूर्वज्ञानस्योत्तरज्ञानजनकत्वायोगात् लिङ्गज्ञानस्य व्याप्तिसापेक्षस्यैव लिङ्गिज्ञानजनकत्वदर्शनात्। यद्ज्ञानं व्याप्तिज्ञानमनपेक्ष्यैवार्थज्ञानजनकमिति चेत् न तत्रापि शब्दस्मृतिमानान्तःपातितयावापि व्याप्तिमपेक्षत्वात्। विशेषवत्ज्ञानं व्याप्तिज्ञानमपेक्षमेव विशिष्टज्ञानजनकमिति चेत् न विशिष्टज्ञानस्य संप्रयोगजन्यत्वात्। अथ समनन्तरातीतप्रत्ययः उत्तरज्ञानं न जनयति किं तु तस्याकारमात्रं समर्पयतीति चेत् न आकाराकारिणोरभेदात्। आकारस्य स्वाभाविकतयाऽन्यापेक्षितया अन्यापेक्षाभावात्। तस्मादन्यदेव सावयवं मन इति सिद्धम्। ननु कथायं वास्तव आत्मा योदेहादिषु विज्ञानान्तेषु स्मार्त्तादिभिरारोप्यते। तत्र सर्वगतोऽयं जीव आत्मेति कोचित् तदसत्। शुष्कतार्किकाणां साधकाभावात्। अथ मतं देहाद्बहि-

रन्तः सर्वाणि भोगसाधनान्यात्मभोगायैव व्याप्रियन्ते तद्व्यापारत्वाद्दृष्टवदात्मसंयोगापेक्षः । अतोऽसौ सर्वगत इति । तत्र किं यस्मिन्नात्मप्रदेशेऽदृष्टं तत्प्रदेशसंयोगोऽपेक्ष्यते उता दृष्टोपलक्षितात्मसंयोगः । नाद्यः । देहावच्छिन्नात्मसमवेताददृष्टस्य स्वर्गभोगाहेतुत्वात् । न द्वितीयः मोक्षेऽपि भोगप्रसङ्गात् । तस्मादागमादेव सर्वगतत्वसिद्धिः । नचायमात्मा जड़ः प्रत्यक्षानुमानागमैः स्वप्रकाशत्वावगमात् । तच्च प्रत्यक्षं सौषुप्तमवगन्तव्यम् । अनुमानान्यपि आत्मा स्वप्रकाशः स्वसत्तायां प्रकाशव्यतिरेकरहितत्वात् प्रदीपवत् संवेदनवच्च तथा विषयप्रकाशकर्तृत्वात् प्रदीपवत्, विषयप्रकाशाश्रयत्वादालोकवत् । अनिन्द्रियगोचरत्वे सति अपरोक्षत्वात् संवेदनवत् । अयमात्मा सति धर्मिणि अजन्यप्रकाशगुणः प्रकाशगुणत्वादादित्यवत् । आगमश्चात्र "अयं पुरुषः स्वयंज्योतिरित्यादिः । सचायमात्मा सर्वशरीरेष्वेक एव सर्वत्राहमित्येकाकारप्रत्ययवेदनीयत्वात् गोत्ववत् । शरीराणां भिन्नत्वादेवातीतशरीरादाविव न भोगानुसन्धानप्रसङ्गः । ननु तर्ह्यस्यापि मनुष्यशरीरस्य प्रतिक्षणं परिणामभेदे सत्यपि आत्मनोभोगानुसन्धानं प्रसज्येतेति चेत् न तदेवेदं शरीरमिति प्रत्यभिज्ञया तदेकत्वावगमात् । न च ज्वालाप्रत्यभिज्ञावद्भ्रान्तत्वम् तत्र सूक्ष्मदर्शनेन प्रत्यक्षत एव ज्वालानां भेददर्शनात् अत्र तदभावात् । तदेवमेकः स्वप्रकाश आत्मेति सिद्धम् । तमेतमात्मतत्त्वमवैदिका देहादिवद्भ्रान्तपदार्थरूपत्वेन प्रतिपद्यन्ते मीमांसकादयस्तु तस्य देहादिव्यतिरेकं प्रतिपद्यापि कर्तारमेवोल्लिखन्ति । तदेतत् सांख्या न सहन्ते । न तावदात्मनः कर्तृत्वं स्वाभाविकम् सर्वगतस्य निरवयवस्यात्मनः परिस्पन्दपरिणामलक्षणक्रियावेशायोगात् । स्वाभाविकत्वे चैतन्यवत् क्रियावेशो न कदाचिदपि व्यभिचरेत् । नापि कर्तृत्वमागन्तुकं निरवयवे कर्तृत्वहेतूपरागायोगात् । नापि बुद्धेः कर्तृत्वमात्मन्यारोपयितुं शक्यं अख्यातिवादे भ्रान्त्यभावात् । तस्मान्नास्ति कर्तृत्वम् । न चैवं भोक्तृत्वमपाकर्तुं शक्यम् । न हि सुखदुःखान्वयोभोगः येन कर्तृत्ववत् व्यभिचरेत् । किन्तु चिद्रूपत्वेन दृश्यसाक्षित्वम् । तस्माद्भोक्तैवात्मेति सांख्यानां पक्षः । वैशेषिकयोगनैयायिकाः उक्ताद्भोक्तुर्जीवादतिरिक्तः सर्वज्ञः सर्वशक्तिः ईश्वरः कश्चिदस्तीत्यनुमिमते । विमतं जगत् स्वरूपोपादानाद्य भिन्नकर्तृकं विविधकार्यत्वात् प्रासादादिवत् तत्र कल्पनालाघवेनैककर्तृत्वोपादानात् प्रवन्नत्वादिसिद्धिरिति वैशेषिकाः । विमताः भ्रान्तैश्वर्यं शक्तयः क्वचित् पराङ्काष्ठा प्राप्ताः सातिशयत्वात् परिमाणवदिति योगाः । विमतं धर्माधर्मफलं कर्म तत्फलभोक्त्राद्यभिन्नेन दीयते व्यवहितकर्मफलत्वात् सेवाफलवदिति नैयायिकाः । नन्वीश्वर पक्षोपन्यासो न युक्तः यतोऽत्र जिज्ञास्ये प्रत्यगात्मरूपे लक्ष्ये विप्रतिपत्तिर्दर्शयितुं प्रक्रान्ता, नैषदोषः प्रत्यगात्मा तस्मादीश्वरादन्योऽनन्योवेति प्रत्यगात्मविप्रतिपत्तावेव पर्यवसानात्" इत्यलम् । प्रपञ्चस्तु चार्वाकादिशब्दे वक्ष्यते । भाषापरिच्छेदे सङ्क्षेपेणात्मनिरूपणायेत्यमभ्यधायि "आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् । शरीरस्य न चैतन्यं स्मृतेषु व्यभिचारतः । तथात्वे छेदिन्द्रियाणामुपघाते कथं स्मृतिः । मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत् । धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः । प्रवृत्त्याद्यनुमेयोऽयं रथस्येव सारथिः । अहङ्कारास्पदोऽयं मनोमात्रस्य गोचरः । विभुर्बुद्ध्यादिगुणवान्" भाषा० । "आत्मानं निरूपयति आत्मेन्द्रियेति आत्मत्वजातिस्तु सुखदुःखादिसमवायिकारणतावच्छेदकतया सिध्यति ईश्वरेऽपि सा जातिरस्त्येव अदृष्टादिरूपकारणाभावाच्च न सुखदुःखाद्युत्पत्तिः नित्यस्य स्वरूपयोग्यस्य फलावश्यम्भाव इति नियमस्याप्रयोजकत्वात् । परे तु ईश्वरे सा जातिर्नास्त्येव प्रमाणाभावात् न च दशमद्रव्यत्वापत्तिः ज्ञानवत्त्वेन विभजनादिति वदन्ति । इन्द्रियादीति । इन्द्रियाणां शरीरस्य च परम्परया चैतन्यसम्पादकः । यद्यप्यात्मनि "अहं जाने अहं सुखीत्यादि" प्रत्यक्षविषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्नस्तत्प्रतीतिगोचर इति प्रतिपादयितुं न शक्यत इत्यतः प्रमाणं दर्शयति करणमिति । कुठारादीनां छिदादिकरणानां कर्तारमन्तरेण फलानुपधानं दृष्टम् एवं चक्षुरादीनां ज्ञानकरणानां फलोपधानमपि कर्तारमन्तरेण नोपपद्यत इत्यतिरिक्तः कर्ता कल्प्यते । ननु शरीरस्यैव कर्तृत्वमस्तु अत आह शरीरस्येति ननु चैतन्यं ज्ञानादिकमेव सङ्घातानां तन्मात एव मृतशरीराणामपि तदभावे का क्षतिः प्राणाभावेन ज्ञानाभावस्य सिद्धेरिति चेन्न शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थाविरे स्मरणानुपपत्तेः शरीराणामवयवोपचयापचयैरुत्पादविनाशशालित्वात् न च पूर्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरे संस्कार उपपद्यत इति

वाच्यम् अनन्तसंस्कारकल्पने गौरवात् एवं शरीरस्य चैतन्ये बालकस्य स्तनपानादौ प्रवृत्तिर्न स्यात् इष्टसाधनताज्ञानस्य तद्धेतुत्वात्तदानीमिष्टसाधनतास्मारकाभावात् मन्यते जन्मान्तरानुभूतेष्टसाधनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः न च जन्मान्तरानुभूतमन्यदपि स्मर्यतामिति वाच्यम् उद्बोधकाभावात् अत एवनायत्या जीवनादृष्टमेवोद्बोधकं कल्प्यते इत्यस्य संस्कारस्यानादितया आत्मनोऽपि अनादित्वसिद्धौ अनादिभावस्य नाशासम्भवात् नित्यत्वं सिध्यतीति बोध्यम्। ननु चक्षुरादीनां ज्ञानादौ करणत्वं कर्तृत्वं चास्तु विरोधे साधकाभावादत आह तथात्वमिति चैतन्यमित्यर्थः उपघाते नाशे सति अर्थाच्चक्षुरादीनामेव, कथमिति ? पूर्वं चक्षुषा साक्षात्कृतानाच्चक्षुषोऽभावे स्मरणं न स्यात् अनुभवितृरभावात् अन्यदृष्टस्य अन्येन स्मरणासम्भवात् अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावादिति भावः। ननु चक्षुरादीनां चैतन्यं मास्तु मनसस्तु नित्यस्य चैतन्यं स्यात् अत आह मनोऽपीति न तथा न चेतनम्। ज्ञानादीति। मनसोऽणुत्वात् प्रत्यक्षे च महत्त्वस्य हेतुत्वान्मनसो ज्ञानसुखादिमत्त्वे तत्प्रत्यक्षानुपपत्तेरित्यर्थः यथा मनसोऽणुत्वं तथा वक्ष्यते। नन्वस्तु विज्ञानमेव आत्मा तस्य स्वतः प्रकाशरूपत्वात् चेतनत्वं ज्ञानसुखादिकन्तु तस्यैवाकारविशेषः तस्यापि भावत्वादेव क्षणिकत्वं पूर्वविज्ञानस्योत्तरोत्तरविज्ञाने हेतुत्वात् सुषुप्तावालयविज्ञानद्वारा निराबाधैव स्मृतमदवासनाया वसनइव पूर्वं पूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञाने संक्रान्तत्वान्नानुपपत्तिः स्मरणादेरिति चेन्न तस्य जगद्विषयत्वे सार्वज्ञ्यापत्तेः यत्किञ्चिद्विषयत्वे विनिगमनाभावात् सुषुप्तावपि विषयावभासप्रसङ्गः। तदानीं निराकारा चित्सन्ततिरनुवर्त्तत इति चेन्न तस्य स्वप्रकाशत्वे प्रमाणाभावात् अन्यथा घटादीनामपि ज्ञानत्वापत्तिः न चेष्टापत्तिः विज्ञानव्यतिरिक्तवस्तुनोऽभावादिति वाच्यं घटादेरनुभूयमानस्यापलपितुमशक्यत्वात्। आकारविशेष एवायं विज्ञानस्येति चेत् किमयमाकारोऽतिरिच्यते विज्ञानात्तर्हि समायातं विज्ञानव्यतिरिक्तेन। नातिरिच्यते चेत्तर्हि समूहावलम्बने नीलाकारोऽपि पीताकारः स्यात् स्वरूपतो विज्ञानस्याविशेषात्, अपोहरूपो नीलत्वादिर्विज्ञानधर्म्म इति चेन्न नीलत्वादीनां विरुद्धानामेकस्मिन्समावेशात् इतरथा विरोधस्यैव दुरपपन्नत्वात्। न च वासनासंक्रमः सम्भवति मातृपुत्रयोरपि वासनासंक्रमप्रसङ्गात् न च उपादानोपादेयभावो नियामक इति वाच्यं वासनायाः संक्रमासंभवात्। उत्तरक्षिप्तुत्पत्तिरेव संक्रम इति चेन्न तदुत्पादकाभावात्। उत्तरविज्ञानस्यैव उत्पादकत्वे तदानन्त्यप्रसङ्गः। क्षणिकविज्ञानेऽतिशयविशेषः कल्प्यत इति चेन्न मानाभावात् कल्पनागौरवाच्च। एतेन क्षणिकशरीरेष्वेव चैतन्यमपि प्रत्युक्तं गौरवादतिशये मानाभावाच्च बीजादावपि सहकारिसमवधानादेवोपपत्तेः कुर्व्द्रूपत्वाकल्पनाच्च अस्तु तर्हि क्षणिकविज्ञाने गौरवाद्विज्ञानमेवात्मा "अविनाशी वा अरे अयमात्मा सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादि श्रुतेरिति चेन्न तस्य विषयत्वासम्भवस्य दर्शितत्वात् निर्व्विषयस्य ज्ञानत्वे मानाभावात् सविषयत्वस्यानुभवात्। अतो ज्ञानभिन्नो नित्य आत्मेति सिद्धम्। सत्यं ज्ञानमिति ब्रह्मपरं जीवेषु नोपयुज्यते ज्ञानाज्ञानसुखित्वदुःखित्वादिभिर्जीवानां भेदसिद्धौ श्रुतरामीश्वरभेदः, अन्यथा बन्धमोक्षानुपपत्तेः, योऽपीश्वराभेदबोधकोवेदः सोऽपि तदभेदेन तदीयत्वं प्रतिपादयन् स्तौति अभेदभावने च यतितव्यमिति वदति। अतएव "सर्व्व एव आत्मनि समर्पिता" इति श्रूयते मोक्षदशायामज्ञाननिवृत्तावभेदो जायते इत्यपि न, भेदस्य नित्यत्वे नाशायोगात् भेदनाशेऽपि व्यक्तिद्वयं स्वाश्रयत्वेव। न च द्वित्वमपि नश्यतीति वाच्यं तत्र निर्द्वन्द्वके ब्रह्मणि सत्यत्वाभावेऽपि सत्यस्वरूपं तदितिवत् द्वित्वाभावेऽपि द्वयात्मको तावति सुवचत्वात् मिथ्यात्वाभावोऽधिकरणात्मकस्तत्र सत्यत्वमिति चेत् एकत्वाभावो व्यक्तिद्वयात्मको द्वित्वमप्युच्यतां प्रत्येकमेकत्वेऽपि पृथिवीजलयोर्न गन्ध इतिवदुभयं नैकमित्यस्य सर्वजनसिद्धत्वात्। योऽपि तदानीमभेदप्रतिपादक आगमः सोऽपि निर्दुःखत्वादिना साम्यं प्रतिपादयति संपदाधिक्ये पुरोहितोऽयं राजा संवृत्त इतिवत्। अतएव "निरञ्जनः परमं साम्यमुपैति दिव्यमिति" श्रूयते ईश्वरो न ज्ञानसुखात्मा किन्तु ज्ञानाद्याश्रयः नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादौ विज्ञानपदेन ज्ञानाश्रय एवोक्तः, "यः सर्वज्ञः" इत्यनुरोधात् आनन्दम् इत्यस्यापि आनन्दवदित्यर्थः अर्श आदित्वान्मत्वर्थीयाच्प्रत्ययात्, अन्यथा पुंस्त्वभङ्गापत्तेः आनन्दोऽपि दुःखाभावे उपचर्यते भारादापन्ने सुखी संवृत्तोऽहमितिवत् दुःखाभावेन सुखित्वप्रत्ययात्। अस्तु वा तथापि ज्ञानन्दो न त्वसौ, आनन्दम् इत्यत्र मत्वर्थीयप्रत्ययविरोधात्। "आनन्दं ब्रह्मणो विद्वान्

विभेति कदाचन" इत्यत्र भेदस्य स्मृत्याद्येति संक्षेपः । एतेन प्रकृतिः कर्त्री पुरुषः पुष्करपलाशवन्निर्लेपः किन्तु चेतनः कार्य्यकारणयोरभेदात् कार्य्यनाशे कार्य्यरूपतया नाशः स्यादित्यकारणत्वं तस्य, बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्या तत्कल्पनम् । बुद्धिश्च प्रकृतेः प्रथमः परिणामः । सैव महत्तत्त्वमन्तःकरणमप्युच्यते । तत्सत्त्वासत्त्वाभ्यां पुरुषस्य संसारापवर्गौ । तस्या एवेन्द्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिना सम्बन्धः । पुरुषे कर्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्च भेदाग्रहात् ममेदं कर्त्तव्यमिति मदंशः पुरुषोपरागो बुद्धेः स्वच्छतया चेतनप्रतिबिम्बादात्त्विको दर्पणस्येव सुखोपरागः । इदमिति विषयोपरागः इन्द्रियप्रणालिकया परिणतिभेदसात्त्विको निश्वासाभिहतदर्पणस्येव मलिनिमा । कर्त्तव्यमिति व्यापारावेशः । तेनांशत्रयवती बुद्धिस्तत्परिणामेन ज्ञानेन पुरुषस्यात्त्विकः सम्बन्धो दर्पणमलिनिम्नेव सुखोपलब्धिरुच्यते । ज्ञानादिवत् सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि बुद्धेरेव । क्रतिसामानाधिकरण्येन प्रतीतेः । न च बुद्धिश्चेतना परिणामित्वादिति सांख्यमतमपास्तम् । ज्ञात्यदृष्टभोगानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेस्तद्विद्धे मानाभावाच्चेतनोऽहं करोमीति प्रतीतेः । बुद्धेः परिणामित्वाच्चैतन्यांशे भ्रम इति चेत् ज्ञात्यंशे किं नेष्यते । अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावोऽनित्यत्वे तत्पूर्व्वमसंसारापत्तिः । अचेतनायाः प्रकृतेः कार्य्यत्वात् बुद्धेश्चैतन्यं कार्य्यकारणयोस्तादात्म्यादिति चेन्न असिद्धेः कर्त्तुर्जन्यत्वे मानाभावात् । "वीतरागजन्मादर्शनात्" अनादित्वम् । अनादेर्नाशासम्भवान्नित्यत्वम् । तत् किं प्रकृत्यादिकल्पनेन । न च "प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः । अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते" इत्यनेन विरोध इति वाच्यम् प्रकृतेरदृष्टस्य गुणैरदृष्टजन्यैर्गुणैः इच्छादिभिः कर्त्ताहं कर्त्ताहमेव इत्यस्य तदर्थत्वात् "तत्रैवं सति कर्त्तारमात्मानं केवलं तु यः" इत्यादि वदता भगवता प्रकटीकृतोऽयमुपरिष्टादाशय इति संक्षेपः । धर्माधर्माश्रयः इति । आत्मेत्यनुषज्यते । शरीरस्य तदाश्रयत्वे देहान्तरकृतकर्म्मणां देहान्तरेण भोगानुपपत्तिः । विशेषगुणयोगत इति । योग्यविशेषगुणसम्बन्धेनात्मनः प्रत्यक्षं भवति न त्वन्यथा अहं जाने अहङ्करोमि इत्यादि प्रतीतेः । प्रकर्त्तीति । अयमात्मा परदेहादौ प्रकर्त्त्यादिनाऽनुमीयते । प्रकर्त्तरत्र चेष्टा ज्ञानेच्छाप्रयत्नादीनां देहे अभावस्तोक्तप्रायत्वात् चेष्टायाश्च यत्नसाध्यत्वात् चेष्टया प्रयत्नवानात्माप्यनुमीयत इति भावः । तत्र दृष्टान्तमाह । रथेति यद्यपि रथकर्म्म चेष्टा न भवति तथापि तेन कर्म्मणा सारथिर्यथाऽनुमीयते तथा चेष्टात्मकेन कर्म्मणा परात्मापीति भावः । अहङ्कारस्येति । अहङ्कारोऽहमिति प्रत्ययः तस्याश्रयो विषयः आत्मा न शरीरादिरिति । मन इति मनोभिन्नेन्द्रियजन्यप्रत्यक्षाविषयो मानसप्रत्यक्षविषयश्चेत्यर्थः । रूपाद्यभावेनेन्द्रियान्तरायोग्यत्वात् । विभुरिति । विभुत्वं परममहत्त्वं तच्च पूर्व्वोक्तमपि स्मृत्यर्थमुक्तम् । बुद्ध्यादीति बुद्धिसुखदुःखेच्छादयश्चतुर्दश गुणाः पूर्व्वोक्ता वेदितव्याः" । ते च "बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा । धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश" इत्युक्ताः बुद्धिः सुखं दुःखमिच्छाद्वेषः यत्नःसंख्या परिमाणं पृथक्त्वं संयोगः विभागः भावनाख्यसंस्कारः धर्मः अधर्म्मश्चेति । एते च गुणा मनस एवेति सांख्यादयः । "कामः संकल्पोविचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मनएवेति" श्रुतेः कामादीनां मनोधर्मत्वावगमात् तथा दृष्टे आत्मानशब्दोदिता अपि । मिता० "किं पुनर्वैषयिकज्ञानेन्द्रियव्यतिरिक्तात्मसद्भावे प्रमाणमित्याशङ्क्याह । "महाभूतानि सत्यानि यथात्मापि तथैव हि । कोऽन्यथैकेन नेत्रेण दृष्टमन्येन पश्यति । वाचं वा कोविजानाति पुनः संश्रुत्य संश्रुताम्" या० स्मृ० । "यथा हि पृथिव्यादिमहाभूतानि सत्यानि प्रमाणप्राप्तत्वात्तथात्मापि सत्यः, अन्यथा यदि बुद्धीन्द्रियव्यतिरिक्तोज्ञाता ध्रुवो न, तर्ह्येकेन चक्षुरिन्द्रियेण दृष्टं वस्त्वन्येन स्पर्शनेन्द्रियेण को विजानाति । यमहमद्राक्षमहं स्पृशामीति । तथा कस्यचित्पुरुषस्य वाचं पूर्वं श्रुत्वा पुनः श्रूयमाणां वाचमन्यस्य वागियमिति कः प्रत्यभिजानाति तस्मात् ज्ञानेन्द्रियाद्यतिरिक्तो ज्ञाता ध्रुव इति सिद्धम् किञ्च ! "अतीतार्था स्मृतिः कस्य कोवा स्मर्त्तुः कारकः । जातिरूपवयोदृष्टविद्यादिभिरहंकृतः । शब्दादिविषयोद्योगश्चकर्म्मणा मनसा गिरा" या० । "यद्यात्मा ध्रुवो न स्यात्तर्ह्यनुभूतार्थगोचरा स्मृतिः पूर्वानुभवभावितसंस्कारोद्बोधनिबन्धना कस्य भवेत्, नह्यन्येन दृष्टे वस्तुन्यन्यस्य स्मृतिरुपपद्यते । तथा कः स्मर्त्तानस्य कारकः । नह्यौन्द्रियाणाम् उपरतव्यापाराणामन्तःकारकत्वम् । तथाहमेवाभिजानत्यादि सम्मर्श इत्येवंविधानुसन्धानप्रत्ययःकस्य भवति स्थिरात्मव्यतिरिक्तस्य" तथा शब्दस्पर्शादिविषयोपभोगसिद्ध्यर्थमुद्योगं मनोवाक्कायैः कःकुर्यात्तस्मादपि बुद्धीन्द्रियव्यतिरिक्त आत्मा-

स्थिरः" इत्यनेन आत्मविवेके च उदयनाचार्यैः अहमिति प्रत्यक्षविषयत्वमादौ आत्मनोऽवस्थाप्य देहाद्यतिरिक्तविषयत्वं तत्प्रत्यक्षस्य व्यवस्थापितं यथा ।

"अथात्मसद्भावे किममाणं प्रत्यक्षमेव तावत् अहमिति वि. कल्पस्य प्राणश्चन्मात्रसिद्धितात् । नचायमवस्तुकः सन्दिग्ध वस्तुको वा, अबाध्यत्वादप्रतिक्षेपाच्च न च लैङ्गिकः, अननुसंहितलिङ्गस्यापि संप्रत्ययात् । नच स्मृतिरियम्, अननुभूते तदनुपपत्तेः । अनादिवासनावशादनादिरयमवस्तुकोविकल्पश्चत्यपि न युक्तं, नीलादिविकल्पसाधारण्यात् । इह वासनानुपादायानाश्वासे प्रमाणान्तरेऽपि कः समाश्वासः, यतो नीलादिविकल्पेषु समाश्वासःस्यात् । तस्माद्दास नामात्मवादं विहायागन्तुकमपि किञ्चित् कारणं वाच्यम् । तच्चाप्राप्तप्रागभावौ वा लिङ्गतदाभासौ वा प्रत्यक्षतदाभासौ वेति । तत्र यथा प्रथममध्यमप्रकाराभावान्नीलविकल्प स्वरसं कल्पमालम्बते तथाऽहमिति विकल्पोऽपि, तत्रापि "प्रत्यक्षपृष्ठभावित्वे साक्षादेव सवस्तुकः । तदाभासे तु मूलेऽस्य पारम्पर्यात् सवस्तुतेति" । न च बाह्यप्रत्यक्षनिरूपणायेव निर्मूलत्वं, बुद्धिविकल्पस्यापि तथात्वप्रसङ्गात् । तत्र स्वसंवेदनं मूलम्,इहापि मानसप्रत्यक्षमिति न कचिद्विशेषः । शरीरादिवस्तुको भविष्यतीति चेन्न निरूपाधिशरीरेन्द्रियबुद्धितत् सङ्घातात्मत्वेऽतिप्रसङ्गात् । स्वसम्बन्धिशरीरादावयं स्यादिति वाच्यं तत्र कः स्वीयइति वचनीयम् । अनन्यत्वं स्वत्वं सर्वभावानां, तथा च यदा तेनैव तदनुभूयते तदा प्रत्येतुः प्रत्येतव्यादव्यतिरेकादहमिति स्यात् । अतएव घटादेर्वान कदाचिदनन्यानुभविता इति न कदाप्यहमास्पदमिति चेत् एवन्तर्हि त्वन्मतेऽप्यहंप्रत्ययः शरीरादावारोपरूपएव ततः प्रत्येतुरन्यत्वात् । बुद्धौ सत्यएवेति चेन्न तस्याः क्रियात्वेनानुभूयमानाया भिन्नस्य कर्तुरहं क्रिनद्मीतिवदहं जानामीत्यनुभवात् । नीलादिप्रत्ये तव्याकारवत् प्रतिपत्त्याकारोऽपि प्रतिपत्तेरेवायमात्मा तथा भासत इति चेत् तर्हि प्रत्येतव्यप्रतिपत्त्याकारयोस्तुल्ययोगक्षेमत्वात् सिद्धं नः समीहितम् । अस्तु स्वोपादानमात्मेति चेन्न तत्प्रतिभासने तदाकारस्यापि प्रतिभासप्रसङ्गात् आकारसन्नरेष्वाकारिणोऽनवभासात् । प्रवृत्तिसन्नानान्यो बुद्धिसन्तानः प्रतिपत्ता, वयं तमालयविज्ञानमाचक्ष्महे इति चेत् अस्तु तर्हि प्रवृत्तिविज्ञानोपादानसन्तानादिनिधनः प्रतिपत्ता । स किं सन्तत्यसानज्ञानरूपः तद्विपरीतोवा इति चिन्तावशिष्यते निःशेषिता चासौ प्रागिति" । स्थानान्तरे च तत्रैव

"ननु सिद्धमिदं विशेषणं देहस्यैव चेतनत्वात् नैवं देहत्वमूर्तत्वरूपादिमत्त्वादिभ्यः । नच भूतानां समुदायपर्यवसितं चैतन्यं, प्रतिदिनं तस्यान्यत्वे पूर्वपूर्वानुभूतस्यास्मरण प्रसङ्गात् । नच प्राक्पर्यवसितं, करचरणाद्यवयवविगमे तदनुभूतस्यास्मरणप्रसङ्गात् । देहस्य चेतनत्वे बालस्य प्रथममन्यप्रवृत्तिप्रसङ्गाच्च इच्छाद्वेषावनरेण प्रयत्नानुपपत्तेः इष्टाप्युपायताप्रतिसन्धानं विना चेच्छानुपपत्तेः । इह जन्मन्यनुभूतस्य प्रतिबन्धस्मारकत्वे प्रतिसन्धानायोगात्, जन्मान्तरानुभूते चानुभवितरि भस्मासाद्भूते अन्येन स्मरणायोगात् अनुभवादीनां प्रवृत्त्यन्तानाञ्च कार्यकारणभावस्य इहैव जन्मनि निश्चितत्वात् । तथा च तद्भावे तद्भावस्य सुलभत्वात् अन्यथा स्वतस्त्वप्रसङ्गः । अतएव नेन्द्रियाणि चेतयन्ते दर्शनस्पर्शनाभ्यामेकार्थग्रहणाच्च । नच मनस्तथा, तस्य करणत्वेनानुभवादिति प्रतिबन्धसिद्धिः परदेहात्मसिद्धिश्च । अनादिवासौ वीतरागजन्मादर्शनात्, अनन्तश्च सतोऽनादित्वात्, द्रव्यञ्च समवायिकारणत्वात्, विभुश्च नित्यद्रव्यत्वे सत्यमूर्त्तत्वात्, अमूर्त्तश्च निष्क्रियत्वात्, निष्क्रियश्च नित्यद्रव्यत्वे सत्यस्पर्शादिप्रत्यक्षत्वात्, प्रत्यक्षधर्माश्रयत्वाच्च । तर्हि यदि भवन्ति आदिमत्त्वे प्रथमप्रवृत्त्यनुपपत्तौ सर्वदैवाप्रवृत्तिप्रसङ्गः । सान्तत्वेऽनादेः सत्त्वानुपपत्तिप्रसङ्गः। अद्रव्यत्वे निर्गुणत्वप्रसङ्गः अविभुत्वे दहनपवनादेः क्रियानुपपत्तिप्रसङ्गः। नच संयुक्तसंयोगात् तदुत्पत्तिः साक्षात्क्रियाद्वारकस्य तस्याभावात् अतथाभूतस्य तद्धेतुत्वेऽतिप्रसङ्गात् । मूर्त्तत्वे नित्यास्मदादिप्रत्यक्षधर्म्माणामाधारत्वप्रसङ्गः विशेषगुणवत्तारम्भकत्वप्रसङ्गः, सक्रियत्वे मूर्त्तत्वप्रसङ्ग इति शास्त्रार्थ संग्रहः । अणुरेवासौ विज्ञानासमवायिकारणसंयोगाधारत्वात् मनोवत् "अणीयांसमणोरपीति" बाधविरोधादिति कश्चित् तदयुक्तम् आत्मन्यविभौ मनसोऽणुत्वाद्विशेषतस्संयोगक्रमादेव क्रियाक्रमोपपत्तेः आगमस्तु "महतोऽपि महीयांसमिति" प्रथमपदमपहाय उपन्यस्तस्तदलमिदानीम्" । स्कन्धपञ्चकस्यात्मत्ववादिनां मतं संघातानुत्पत्त्या शा०सू० भा० निराकृतम् यथा "समुदाय उभयहेतुकेऽपि तदप्राप्तिः" सू० "तत्रैते त्रयोवादिनो भवन्ति । केचित् सर्व्वास्तित्ववादिनः केचिद्विज्ञानास्तित्वसात्मवादिनः अन्ये पुनः सर्व्वशून्यत्ववादिनः इति । तत्र ये सर्व्वास्तित्ववादिनोबाह्यमान्तरञ्च वस्त्वभ्युपगच्छन्ति भूतं भौतिकं चित्तं चैत्तञ्च तान् तावत् प्रति ब्रूमः । तत्र भूतं पृथिवीधात्वादयः । भौतिकं रूपादयश्चक्षुरादयश्च चतुष्टये च पृथि-

व्यादिपरमाणवः खरस्नेहोष्णप्रेरणस्वभावाः ते पृथिव्यादिभावेन संहन्यन्त इति मन्यन्ते तथा रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकाः पञ्च स्कन्धास्तेऽध्यात्मं सर्व्वव्यवहारास्पदभावेन संहन्यन्ते इति मन्यन्ते । तत्रेदमभिधीयते । योऽयमुभयहेतुक उभयप्रकारः ससुदायः परेषामभिप्रेतोऽणुहेतुकश्च भूतभौतिकसंहतिरूपः पञ्चस्कन्धहेतुकश्च पञ्चस्कन्धरूपः । तत्रोभयहेतुकोऽपि ससुदायेऽभिप्रेयमाणे तदप्राप्तिः स्यात् ससुदायाप्राप्तिः ससुदायिनामचेतनत्वात् चित्ताभिज्वलनस्य च सप्रयत्नसिद्धाधीनत्वात् अन्यस्य च कस्यचिच्चेतनस्य भोक्तुः प्रशासितुर्वा स्थिरस्य संहन्तुरनभ्युपगमात् निरपेक्षप्रवृत्त्यभ्युपगमे च प्रवृत्तेरनुपरमप्रसङ्गात् । आशयस्याप्यन्यत्वानन्यत्वाभ्यामनिरूप्यत्वात् क्षणिकत्वाभ्युपगमाच्च निर्व्यापारत्वात् तत्प्रवृत्त्यनुपपत्तेः तस्मात् ससुदायानुपपत्तिः । ससुदायानुपपत्तौ च तदाश्रया लोकयात्रा लुप्येत । "इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात्" सू० । यद्यपि भोक्ता प्रशासिता वा कश्चिच्चेतनः संहन्ता स्थिरोनाभ्युपगम्यते तथाप्यविद्यादीनामितरेतरकारणत्वादुपपद्यते लोकयात्रा तस्माच्चोपपद्यमानायां न किञ्चिदपरमपेक्षितव्यमस्ति । ते चाविद्यादयः अविद्या संस्कारोविज्ञानम् नाम रूपं षड़ायतनम् स्पर्शोवेदना तृष्णोपादानम् भवोजातिर्जरा मरणं शोकः परिवेदना दुःखं दुर्मनस्त्वेवम् जातीयका इतरेतरहेतुकाः सौगते समये क्वचित् संक्षिप्ता निर्दिष्टाः क्वचित् प्रपञ्चिताः । सर्व्वेषामप्ययमविद्यादिकलापोऽप्रत्याख्येयः । तदेवमविद्यादिकलापेऽपि परस्परनिमित्तनैमित्तिकभावेन घटीयन्त्रवदनियमावर्त्तमानेऽर्थाच्चित्र उपपन्नः संघात इति चेत्तत्र कस्मात्? उत्पत्तिमात्रनिमित्तत्वात् । भवेदुपपन्नः संघातो यदि संघातस्य किञ्चिन्निमित्तमवगम्येत न त्ववगम्यते यत इतरेरेतरप्रत्ययत्वेऽप्यविद्यादीनां पूर्व्वं पूर्व्वमुत्तरस्योत्तरस्योत्पत्तिमात्रनिमित्तं भवद् भवेत् न तु संघातोत्पत्तेः किञ्चिन्निमित्तं सम्भवति । नन्वविद्यादिभिरर्थादाक्षिप्यते संघात इत्युक्तमत्रोच्यते । यदि तावदयमभिप्रायः अविद्यादयएव संघातमन्तरेणात्मानमलभमाना अपेक्षन्ते संघातमिति ततस्तस्य संघातस्य किञ्चिन्निमित्तं वक्तव्यं तच्च नित्येषूपजनापायिष्वभ्युपगम्यमानेष्वाश्रयाश्रयीभूतेषु च भोक्तृषु सत्सु न सम्भवतीत्युक्तं वैशेषिकपरीक्षायां किमङ्ग पुनः क्षणिकेषूपजनापायिषु भोक्तृरहितेष्वाश्रयाश्रयीभावशून्येषु चाभ्युपगम्यमानेषु सम्भवेत् । अथायमभिप्रायः अविद्यादय एव संघातस्य निमित्तमिति । कथं तमेवाश्रित्यात्मानं लभमानास्तस्यैव निमित्तं स्युः । अथ मन्यसे संघात एवानादौ संसारे सन्तत्यानुवर्त्तते तदाश्रयाश्चाविद्यादय इति । तदपि संघातात् संघातान्तरसुत्पद्यमानं नियमेन सदृशमेवोत्पद्येत अनियमेन वा सदृशम्, विसदृशं वोत्पद्येत । नियमाभ्युपगमे मनुष्यपुद्गलस्य देवतिर्य्यग्योनिनारकप्राप्त्यभावः प्राप्नुयात् । अनियमाभ्युपगमेऽपि मनुष्यपुद्गलः कदाचित् क्षणेन हस्ती भूत्वा देवो वा पुनर्मनुष्योभवेत् इति प्राप्नुयात् । उभयमभ्युपगमविरुद्धम् । अपि च यद्भोगार्थं संघातः स्यात् स जीवोनास्ति स्थिरोभोक्तेति तवाभ्युपगमः ततश्च भोगो भोगार्थएव सन्नाऽन्येन प्रार्थनीयः तथा मोक्षोमोक्षार्थ एवेति सुखेच्छुनान्येन भवितव्यम् । अन्येन चेत् प्रार्थ्यतेऽयं, भोगमोक्षकालावस्थायिना तेन भवितव्यम् । अवस्थायित्वे क्षणिकत्वाभ्युपगमविरोधः । तस्मादितरेतरोत्पत्तिमात्रनिमित्तत्वमविद्यादीनां यदि भवेत् भवतु नाम न तु संघातः सिध्येत् भोक्तृभावादित्यभिप्रायः इत्यलम्" । एतन्मत मनुसृत्यैव "सर्व्वकार्य्यशरीरेषु सङ्घातस्कन्धपञ्चकम् । सौगतानामिवाक्षान्योनास्ति मन्त्रोमहीभृता मिति" माघः । आत्मनो देहपरिमाणत्वमार्हता मन्यन्ते । तदेतन्मतमुत्थाप्य दूषितं भा० सू० भा० यथा । "एवं चात्माकात्स्न्यम्" सू० । "यद्येकस्मिन् धर्म्मिणि विरुद्धधर्मासम्भवोदोषः स्याद्धादे प्रसक्तः एवमात्मनोऽपि जीवस्याकात्स्न्यमपरोदोषः प्रसज्यते । कथं शरीरपरिमाणो हि जीव इत्यार्हता मन्यन्ते । शरीरपरिमाणतावाच्च सत्यामकृत्स्नोऽसर्व्वगतः परिच्छिन्न आत्मेत्यतो घटादिवदनित्यत्वमात्मनः प्रसज्येत । शरीराणाञ्चानवस्थितपरिमाणत्वान्मनुष्यजीवोमनुष्यशरीरपरिमाणोभूत्वा पुनः केनचित् कर्म्मविपाकेन हस्तिजन्म प्राप्नुवन्न कृत्स्नं हस्तिशरीरं व्याप्नुयात् पुत्तिकाजन्म च प्राप्नुवन्न कृत्स्नः पुत्तिकाशरीरे संभीयते । समान एष एकस्मिन्नपि जन्मनि कौमारयौवनस्थाविरेषु दोषः । स्यादेतत् अनन्तावयवोजीवस्तस्य तएवावयवा अल्पे शरीरे सङ्कुचेयुर्महति विकसेयुरिति । तेषां पुनरनन्तानां जीवावयवानां समानदेशत्वं प्रतिहन्येत वा न वेति वक्तव्यम् । प्रतिघाते तावन्नानावयवाः परिच्छिन्ने देशे सम्भवेरन् । अप्रतिघातेऽप्येकावयवदेशत्वोपपत्तेः सर्व्वेषाम-

वयवानां प्रथिमानुपपत्तेर्जीवस्याणुमात्रत्वप्रसङ्गः स्यात् । अपि च शरीरमात्रपरिच्छिन्नानां जीवावयवनामानन्त्यं नोत्प्रेक्षितुमपि शक्यम् । अथ पर्य्यायेण दृष्टशरीरप्रतिपत्तौ केचिज्जीवावयवा उपगच्छन्ति तनुशरीरप्रतिपत्तौ च केचिदपगच्छन्तीत्युच्येत । तदाप्युच्यते । "न च पर्य्यायादप्यविरोधो विकारादिभ्यः" सू० । न च पर्य्यायेणाप्यवयवोपगमापगमाभ्यामेव तद्देहपरिमाणत्वं जीवस्याविरोधेनोपपादयितुं शक्यते कुतः ? विकारादिदोषप्रसङ्गात् । अवयवोपगमापगमाभ्यां ह्यनित्यमापूर्य्यमाणस्योपचीयमानस्य च जीवस्य विक्रियावत्त्वं तावदपरिहार्य्यं विक्रियावत्त्वे चर्म्मादिवदनित्यत्वं प्रसज्येत ततश्च बन्धमोक्षाभ्युपगमोबाध्येत कर्म्माष्टकपरिवेष्टितस्य जीवस्यालाबुवत् संसारसागरे निमग्नस्य बन्धनोच्छेदादूर्द्ध्वगामित्वमेव तीति । किञ्चान्यत् आगच्छतामपगच्छतां चावयवानामागमापायधर्म्मकत्वादेवानात्मत्वं शरीरादिवत् । ततश्चावस्थितः कश्चिदवयव आत्मेति स्यात् । न च स निरूपयितुं शक्यते अयमसाविति । किञ्चान्यत् आगच्छन्त्यपैते जीवावयवाः कुतः प्रादुर्भवन्ति, अपगच्छन्त्यपि क्व वा लीयन्त इति वक्तव्यम् । न हि भूतेभ्यः प्रादुर्भवेयुः भूतेषु च निलीयेरन्, अभौतित्वाज्जीवस्य । नापि कश्चिदन्यः साधारणोऽसाधारणो वा जीवानामवयवाधारो निरूप्यते प्रमाणाभावात् । किञ्चान्यत् अनवस्थितस्वरूपत्वेन सत्त्वात्मा स्यात् आगच्छतामपगच्छतां ह्यवयवानामनियत परिमाणत्वात् । अतएवमादिदोषप्रसङ्गान्न पर्य्यायेणाप्यवयवोपगमापगमाभ्यामात्मन आश्रयितुं शक्यते । अथ वा पूर्व्वेण सूत्रेण शरीरपरिमाणस्यात्मन उपचितापचित शरीरान्तरप्रतिपत्तावकार्त्स्न्यादोषप्रसङ्गनद्वारेणानित्यतायाश्चोदितायाम् पुनः पर्य्यायेण परिमाणानवस्थानेऽपि स्रोतःसन्ताननित्यतान्यायेनात्मनोनित्यता स्यात् यथा रक्तपटादीनाम् विज्ञानानवस्थानेऽपि तत्सन्ताननित्यता तद्दिदृक्षिषामपोह्यायङ्घातेन सूत्रेणोत्तरमुच्यते । सन्तानस्य तावदवस्तुत्वे नैरात्म्यप्राद प्रसङ्गः वस्तुत्वेऽप्यात्मनो विकारादिदोषप्रसङ्गादस्य पक्षस्यानुपपत्तिरिति । "अन्यावस्थितेश्चोभयनित्यत्वाद्विशेषः" सू० । अपि चान्यस्य मोक्षावस्थाभाविनो जीवपरिमाणस्य नित्यत्वमिष्यते जैनैः तद्धि पूर्व्वयोरण्वाद्यमध्यमयोर्जीवपरिमाणयोर्नित्यत्वप्रसङ्गाद्विशेषप्रसङ्गः स्यात् एकशरीरपरिमाणत्वं स्यात् नोपचितापचितशरीरान्तरप्राप्तिः । अथ वाऽन्यस्य जीवपरिमाणस्यावस्थितत्वात् पूर्व्वयोरण्वस्थयोरवस्थित परिमाणएव जीवः स्यात् । ततश्चाविशेषेण सर्व्वदैवाऽणुर्महान् वा जीवोऽभ्युपगन्तव्यो न शरीरपरिमाणः । अतश्च सौगतवदार्हतमपि मतमसङ्गतमित्युपेक्षितव्यम्" । इत्यनेन जीवस्याणुपरिमाणत्वं ये स्वीचक्रुः तन्मतमुपन्यस्य भा० सू० भा० दूषितं यथा ।

"उत्क्रान्तिगत्यागतीनाम्" सू० । इदानीन्तु किंपरिमाणो जीव इति चिन्त्यते किमणुपरिमाणः उत मध्यमपरिमाण आहोस्वित् महापरिमाण इति । ननु च नात्रोत्पद्यते नित्य चैतन्यरूपश्चायमित्युक्तमतश्च परएवात्मा जीव इत्यापतति, परस्य चात्मनोऽनन्तत्वमाम्नातं तत्र कुतोजीवस्य परिमाणचिन्तावतार इति उच्यते सत्यमेतत् उत्क्रान्तिगत्यागतिश्रवणानि तु जीवस्य परिच्छेदं प्रतायन्ति स्वशब्देन चास्य क्वचिदणुपरिमाणत्वमाम्नायते तस्य सर्व्वशरीराकुलत्वोपपादनायायमारम्भः । तत्र प्राप्तं तावदुत्क्रान्तिगत्यागतीनां श्रवणादणुर्जीवइति उत्क्रान्तिश्रवत् "स यदाएतस्माच्छरीरादुत्क्रामति सर्व्वैरेवैतैः सर्व्वैरुत्क्रामतीति" गतिरपि "येवै के चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्व्वे गच्छन्तीति" । आगतिरपि "तस्माल्लोकात् पुनरैत्यस्मै लोकाय कर्म्मणे" इति व्यासाच्चोत्क्रान्तिगत्यागतीनां श्रवणात्परिच्छिन्नस्तावज्जीवः इति प्राप्नोति न हि विभोश्चलनसम्बन्धकल्पत इति । सति च परिच्छेदे शरीरपरिमाणत्वस्यार्हतमतपरीक्षायां निरस्तत्वादणुरात्मेति गम्यते । "स्वात्मना चोत्तरयोः" सू० । उत्क्रान्तिः कदाचिदचलतोऽपि ग्रामस्यान्यनिवृत्तिवद्देहस्यान्यनिवृत्त्या कर्म्मवशेनावकल्पेत उत्तरे तु गत्यागती नाचलतः सम्भवतः स्वात्मना हि तयोः सम्बन्धोभवति गमेश्च कर्त्तृस्थक्रियात्वात् । अतोऽध्यम परिमाणस्य च गत्यागती अणुत्व एव सम्भवतः । सत्येव गत्यागत्योरुत्क्रान्तिरपक्रमिरेव देहादिति प्रतीयते नह्यनपक्रमस्य देहाद्गत्यागती स्यातां देहप्रदेशानाञ्चोत्क्रान्तावपादानत्ववचनात् "चक्षुषो वा मूर्द्धो वा अन्येभ्यो वा शरीरदेशेभ्यः" इति । "एवमेवैतेजोमात्राः समभ्याददानोहृदयमेवान्ववक्रामति शुक्रमादाय पुनरेति स्थानमिति" चान्यरेऽपि शरीरे शरीरस्य गत्यागती भवतः तस्मादपरिमाणत्वसिद्धिः । "नाणुरतच्छ्रुतेरितिचेन्नेतराधिकारात्" सू० । अथापि स्यात् नाणुरयमात्मा, कस्मात्, अतच्छ्रुतेः अणुत्वविपरीतपरिमाणश्रवणादित्यर्थः । "स वा एष महानजः" "आत्मा योऽयं विज्ञानमयः प्राणेषु" "आकाशवल्सर्व्वगतश्च नित्यः" "सत्यंज्ञानमनन्तं ब्रह्म" इत्येवं जातीयका हि श्रुति-

रात्मनोऽणुत्वे विप्रतिषिध्येतेति चेत् नैष दोषः । कस्मात् इतराधिकारात् । परस्य ह्यात्मनः प्रक्रियायामेषा परिमाणान्तरश्रुतिः, परस्यैवात्मनः प्राधान्येन वेदान्तेषु वेदितव्यत्वेन प्रकृतत्वात्, "विरजः पर आकाशात्" इत्येवं विधानाच्च परस्यैवात्मनस्तत्र तत्र विशेषाधिकारात् । ननु- "योऽयं विज्ञानमयः प्राणेष्विति" शारीरोमहत्त्वसम्बन्धित्वेन प्रतिनिर्दिश्यते । शास्त्रदृष्ट्या त्वयं निर्देशो वामदेववद्दृष्टव्यः । तस्मात्प्राप्तविषयत्वात्परिमाणान्तरश्रवणस्य, न जीवस्याणुत्वं विरुध्यते । "स्वशब्दोन्मानाभ्यां च" सू० इतश्चाणुरात्मा यतः साक्षादेवास्याणुत्ववाचो शब्दः श्रूयते "स एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेशेति" प्राणसम्बन्धाच्च जीवएवायमणुरभिधीयत इति गम्यते तथाचोन्मानमपि जीवस्याणिमानं गमयति "बालाग्रशतभागस्य शतधा कल्पितस्य च । भागोजीवः स विज्ञेय" इति । "आराग्रमात्रोह्यवरोऽपि दृष्ट" इति चोन्मानान्तरम् । नन्वणुत्वे सत्येकदेशस्थस्य सकलदेहगतोपलब्धिर्विरुध्यते दृश्यते च जाह्नवीह्रदनिमग्नानां सर्व्वाङ्गे शैत्योपलब्धिर्निदाघसमये च सकलशरीरपरितापोपलब्धिरितिचेत् उच्यते । "अविरोधश्चन्दनवत्" सू० । यथा हि हरिचन्दनबिन्दुःशरीरैकदेशे सन्नपि सकलदेहव्यापिनमाह्लादं करोत्येवमात्मापि देहैकदेशस्थः सकलदेहव्यापिनोपलब्धिं करिष्यति । त्वक्सम्बन्धाच्च सकलशरीरगता वेदना न विरुध्यते । त्वगात्मनोर्हि सम्बन्धः क्षेत्रक्षायान्वचि वर्त्तते त्वक् च सर्व्वशरीरव्यापिनीति । "अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि" सू० । अत्राह यदुक्तम् "अविरोधश्चन्दनवदिति" तदयुक्तं दृष्टान्तदार्ष्टान्तिकयोरतुल्यत्वात् सिद्धे ह्यात्मनोदेहैकदेशस्थत्वे चन्दनदृष्टान्तो भवति । प्रत्यक्षन्तु चन्दनस्यावस्थितिवैशेष्यमेकदेशस्थत्वं सकलदेहाह्लादनञ्च । आत्मनः पुनः सकलदेहोपलब्धिमात्रं प्रत्यक्षं नैकदेशवर्त्तित्वम् । अनुमेयमन्यदिति यदुच्येत न तावदनुमानं सम्भवति । किमात्मनः सकलशरीरगता वेदना त्वगिन्द्रियस्येव सकलदेहव्यापिनः सतः किं विभोर्नभसइव, आहोस्विच्चन्दनबिन्दोरिवाणोरेकदेशस्थस्येति संशयानिवृत्तेरिति । अत्रोच्यते- नायं दोषः । कस्मात् अभ्युपगमात् । अभ्युपगम्यतेऽह्यात्मनोपि चन्दनस्येव देहैकदेशवर्त्तित्वमवस्थितिवैशेष्यम् । कथमिति उच्यते । हृदि ह्येष आत्मा पश्यते वेदान्तेषु 'हृदिह्येष आत्मा" "स वाएष आत्मा हृदि कतमः ? आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिःपुरुष" इत्यादिषु देशेभ्यः । तस्माद्दृष्टान्तदार्ष्टान्तिकयोरवैषम्याद्युक्तमेवैतदविरोधश्चन्दनवदिति । "गुणाद्वालोकवत्" सू० । चैतन्यगुणव्याप्येवाणोरपि सतोजीवस्य सकलदेहव्यापि कार्यं न विरुध्यते । यथा लोके मणिप्रदीपप्रभृतीनामपवरकैकदेशवर्त्तिनामपि प्रभा अपवरकव्यापिनी सती तत्स्थेऽपवरके कार्यं करोति तद्वत् । स्यात्कदाचिच्चन्दनस्य सावयवत्वात् सूक्ष्मावयवविसर्पणेनापि सकलदेहाह्लादयित्वं नत्वणोर्जीवस्यावयवाः सन्ति यैरयं सकलदेहं विसर्पेदित्याशङ्क्य "गुणाद्वालोकवत्" इत्युक्तम् । कथं पुनर्गुणो गुणिव्यतिरेकेणान्यत्र वर्त्तेत न हि पटस्य शुक्लोगुणः पटव्यतिरेकेणान्यत्र वर्त्तमानोदृश्यते । प्रदीपप्रभावद्भवेदिति चेन्न तस्या अपि द्रव्यत्वाभ्युपगमात् । निबिड़ावयवं हि तेजोद्रव्यं प्रदीपः विरलावयवन्तु तेजोद्रव्यमेव प्रभेति अत उत्तरं पठति । "व्यतिरेके गन्धवत्" सू० यथा गुणस्यापि सतोगन्धस्य गन्धद्रव्यव्यतिरेकेण वृत्तिर्भवति अप्राप्तेष्वपि कुसुमादिषु गन्धोपलब्धेः एवमणोरपि सतोजीवस्य चैतन्यगुणव्यतिरेकोभविष्यति । अतश्चानैकान्तिकमेतद्गुणत्वात् रूपवदाश्रयविश्लेषानुपपत्तिरिति गुणस्यैव सतोगन्धस्याश्रयविश्लेषदर्शनात् । गन्धस्यापि सह्यैवाश्रयेण विश्लेष इति चेन्न यस्मान्मूलद्रव्यादिश्लेषस्य क्षयप्रसङ्गात् । अक्षीयमाणमपि ततूपूर्व्वावस्थातोऽवगम्यते अन्यथा ततूपूर्व्वावस्थैर्गुरुत्वादिभिर्हीयते । स्यादेतत् गन्धाश्रयाणां विश्लिष्टानामल्पत्वात्तद्गन्धोपि विश्लेषो नोपलक्ष्यते सूक्ष्मा हि गन्धपरमाणवः सर्व्वतो विप्रसृतागन्धबुद्धिमुत्पादयन्ति नासिकापुटमनुप्रविशन्त इति चेन्न अतीन्द्रियत्वात् परमाणूनां स्फुटगन्धोपलब्धेश्च नागकेशरादिषु । न च लोके प्रतीतिर्गन्धवद्द्रव्यमात्रातमिति गन्धएवाघ्रात इति लौकिकाः प्रतियन्ति । रूपादिश्चाश्रयव्यतिरेकानुपलब्धेर्गन्धस्याप्यगुक्ताश्रयव्यतिरेक इति चेन्न प्रत्यक्षत्वादनुमानाप्रवृत्तेः । तस्माद्यद्यत्र लोके दृष्टं तत्तथैवानुगन्तव्यं निरूपकैर्नान्यथा । न हि रसोगुणोजिह्वयोपलभ्यतद्वत्तो रूपादयोपि गुणाजिह्वयोपलभ्येरन्निति नियन्तुं शक्यते । "तथा च दर्शयति" सू० । श्रुतिर्हृदयायतनत्वमणुपरिमाणत्वं चात्मनोऽभिधाय तत्रैव "आलोमभ्य आनखाग्रेभ्यः" इति चैतन्येन गुणेन सकलशरीरव्यापित्वं दर्शयति । "पृथगुपदेशात्" सू० । "प्रज्ञया शरीरं समारुरोहेति" चात्मप्रज्ञयोः कर्त्तृकरणभावेन पृथगुपदेशाच्चैतन्येन गुणेनैवास्य शरीरव्यापित्वमवगम्यते । "तदेषां प्राणानां विज्ञानेन विज्ञानमा-

दावेति च" कर्तुः शरीरादृष्टयभिज्ञानसेत्यपदेश एतमेवाभिप्रायमुपोद्बलयति तस्मादणुरात्मेत्येवं प्राप्ते ब्रूमः। "तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्" सू०। तुशब्दः प्रक्षं व्यावर्त्तयति। नैतदस्ति अणुरात्मेति उत्क्रान्त्यादिश्रवणात्। परस्यैव तु ब्रह्मणः प्रवेशश्रवणात् तादात्म्योपदेशाच्च परमेव ब्रह्म जीव इत्युक्तम्। परमेव चेद्ब्रह्मजीवस्तदाद्यावत्परं ब्रह्म तावानेव जीवो भवितुमर्हति परस्य च ब्रह्मणो विभुत्वमाम्नातं तस्मादिभुर्जीवः। तथा च "स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु, इत्येवंजातीयका जीवविषया विभुत्ववादाः श्रौताःस्मार्त्ताश्च समर्थिता भवन्ति। नचाणोर्जीवस्य सकलशरीरगता वेदनोपपद्यते। त्वक्सम्बन्धात् स्यादिति चेन्न त्वक्कण्टकतोदनेऽपि सकलशरीरगतैव वेदना प्रसज्येत त्वक्कण्टकयोर्हि संयोगः क्षुत्क्षामायां त्वचि वर्त्तते त्वक् च क्षुत्क्षामशरीरव्यापिनीति पादतलएव तु कण्टकतुन्नां वेदनां प्रतिलभन्ते। नचाणोर्गुणस्य व्याप्तिरुपपद्यते गुणस्य गुणिदेशत्वात् गुणत्वमेव हि गुणिनमनाश्रित्य गुणस्य हीयेत। प्रदीपप्रभायाश्च द्रव्यान्तरत्वं व्याख्यातम्। गन्धोऽपि गुणत्वाभ्युपगमात् सान्वय एव सञ्चरितुमर्हति अन्यथा गुणत्वहानिप्रसङ्गात्। तथा चोक्तं भगवता द्वैपायनेन "उपलभ्याणु तद्वन्वं केचिदूचुरनैपुणाः। पृथिव्यामेव तं विद्यादपोवायुञ्च संश्रितमिति"। यदि च चैतन्यं जीवस्य समस्तं शरीरं व्याप्नुयाद्वाणुर्जीवः स्यात् चैतन्यमेव ह्यस्य स्वरूपं अग्नेरिवौष्ण्यप्रकाशौ, नात्र गुणगुणिविभागोविद्यत इति। शरीरपरिमाणत्वञ्च प्रत्याख्यातं परिशेषाद्विभुर्जीवः कथं तर्ह्यणुत्वादिव्यपदेश इति अत आह "तद्गुणसारत्वात्तु तद्व्यपदेशः" इति। तस्यावबोधगुणाः तद्गुणा इच्छा द्वेषः सुखं दुःखमित्येवमादयः तद्गुणाः सारः प्रधानं यस्यात्मनः संसारित्वे सम्भवति स तद्गुणसारः तद्भावस्तद्गुणसारत्वम्। न हि बुद्धेर्गुणैर्विना केवलस्यात्मनः संसारित्वमस्ति बुद्ध्युपाधिधर्माध्यासनिमित्तं हि कर्त्तृत्वभोक्तृत्वादि लक्षणं संसारित्वमकर्त्तुरभोक्तुश्चासंसारिणोनित्यमुक्तस्य सत आत्मनः। तस्मात्तद्गुणसारत्वाद्बुद्धिपरिमाणेनास्य परिमाणव्यपदेशः तदुत्क्रान्त्यादिभिश्चास्योत्क्रान्त्यादिव्यपदेशो न स्वतः। तथा च "बालाग्रशतभागस्य शतधा कल्पितस्य तु। भागोजीवः स विज्ञेयः स चानन्त्याय कल्पते" इत्यणुत्वं जीवस्योक्त्वा तस्यैव पुनरानन्त्यमाह तच्चैतमेव समञ्जसं स्यात् यद्यौपचारिकमणुत्वं जीवस्य भवेत् पारमार्थिकं चानन्त्यम्। नह्युभयं मुख्यमवकल्पेत। नचानन्त्यमौपचारिकमिति शक्यं विज्ञातुं सर्व्वोपनिषत्सु ब्रह्मात्मभावस्य प्रतिपिपादयिषितत्वात्। तथैतस्मिन्नध्याये "बुद्ध्यैगुणेनात्मगुणेन चैव आराग्रमात्रोह्यवरोऽपि दृष्ट" इति बुद्धिगुणसम्बन्धेनैवाराग्रमात्रतां शास्ति न स्वेनैवात्मना। "एषोऽणुरात्मा चेतसा वेदितव्य" इत्यत्रापि न जीवस्याणुपरिमाणत्वं शिष्यते। परस्यैवात्मनश्चुरादिनयव्याह्यत्वेन ज्ञानप्रसादावगम्यत्वेन च प्रकृतत्वात्, जीवस्यापि च सुख्याणुपरिमाणत्वानुपपत्तेः। तस्मादुदरान्नित्याभिप्रायमिदमणुत्ववचनमुपाध्यभिप्रायं वा द्रष्टव्यम्। तथा "प्रज्ञया शरीरमारुह्य" इत्येवंजातीयकेष्वपि भेदोपदेशेषु बुद्ध्युपाधिभूतया जीवः शरीरं समारुह्येत्येवं योजयितव्यं व्यपदेशमात्रं वा पिण्डापुत्रकस्य शरीरमित्यादिवत्। नह्यत्र गुणगुणिविभागो विद्यत इत्युक्तम्। हृदयायतनत्ववचनमपि बुद्धेरेव तदायतनत्वात्। तयोत्क्रान्त्यादीनामप्युपाध्यायत्ततां दर्शयति "कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि" इति "कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृज्यतेति"। उत्क्रान्त्यभावे हि गत्यागत्योरप्यभावो विज्ञायते, नह्यनपसृप्तस्य देहादुत्क्रान्तिर्गतिर्वा स्यात्। एवमुपाधिगुणसारत्वाज्जीवस्याणुत्वव्यपदेशः प्राज्ञवत् यथा प्राज्ञस्य परमात्मनः सगुणेषूपासनेषूपाधिगुणसारत्वादणीयस्त्वादिव्यपदेशः "अणीयान्व्रीहेर्वा यवाद्वा, मनोमयः प्राणशरीरः सर्वगन्धः सर्वरसः सत्यकामः सत्यसंकल्पः" इत्येवं प्रकारः तद्वत्" इत्यन्तेन। इति शाङ्करानुयायिनः रामानुजमाध्वादयश्च जीवस्याणुत्वपक्षमररीचक्रुः। तत्रपक्षस्तच्छास्त्रे दृष्टः तयोर्युक्त्याभासत्वं नैयायिकवैशेषिकाङ्गीकृतविभुत्वप्रदर्शकयुक्तीरवलोक्य सुधीभिः समर्थनीयम् न्यायरत्नदृष्टौ चात्मनोदेहाद्यतिरिक्तत्वं प्रदर्शितं यथा "तत्रेन्द्रियं ज्ञानवत्त्वेति संशये करणत्वेन सिद्धानामिन्द्रियाणां चैतन्यमस्तु लाघवात्तथा चात्मशब्दस्य नानार्थत्वादिन्द्रियाणामभौतिकत्वाद्वा न साङ्ख्यमतोन्द्रियचैतन्यवादिनस्तद्विराकरणायाह। "दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्"१। "न विषयव्यवस्थानात्"२। "तद्व्यवस्थानादेवात्मसद्भावाद्प्रतिषेधः"३। "शरीरदाहे पातकाभावात्"४। "तदभावः सात्मकप्रदाहेऽपि तच्छितत्वात्"५। "न कार्य्यान्त्रयकर्तृवधात्"६। "सव्येन दृष्टस्येतरेण प्रत्यभिज्ञानात्"७। "नैकस्मिन्नासाद्यव्यवहिते द्वित्वाभि-

मानात्" ८। "एकनाशे द्वितीयाविनाशात्" ९। "अवयवनाशेऽप्यवयव्युपलब्धेरहेतुः" १०। "दृष्टान्तविरोधादप्रतिषेधः" ११। "इन्द्रियान्तरविकारात्" १२। "न स्मृतेः कर्त्तव्यविषयत्वात्" १३। "तदात्मगुणत्वसद्भावादप्रतिषेधः" १४। "अपरिसङ्ख्यानाच्च स्मृतिविषयस्य" १५। "नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात्" १६। "ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम्" १७। "नियमश्च निरनुमानः" १८। "पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेः" १९। "पद्मादिषु प्रबोधसम्मीलनविकारवत्तद्विकारः" २०। "नोष्णशीतवर्षाकालनिमित्तत्वात् पञ्चात्मकविकाराणाम्" २१। "प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात्" २२। "अयसोऽयस्कान्ताभिगमनवत्तदुपसर्पणम्" २३। "नान्यत्र प्रवृत्त्यभावात्" २४। "वीतरागजन्मादर्शनात्" २५ सूत्राणि "एकस्यैव दर्शनस्पर्शनाभ्यामर्थस्य गृहीतात् दर्शनस्पर्शने ज्ञानविषयौ गृहीतौ च प्रकारे तेन चाक्षुषस्पार्शनोभयत्वेनैकस्य धर्मिणः प्रतिसन्धानादित्यर्थः। तथा च योऽहं घटमद्राक्षं सोऽहं स्पृशामीत्यनुभवादात्मेन्द्रियव्यतिरिक्त एक इति १। अत्र वदन्ति चक्षुस्त्वगादीनां रूपस्पर्शादि नियतविषयत्वाच्चक्षुरादेश्चाक्षुषादिसमवायित्वमित्यज्ञाभेदप्रत्ययोभ्रान्त इति भावः २। समाधत्ते उक्तप्रतिषेधोन युक्तः उक्तविषयव्यवस्थानादेवात्मसद्भावादतिरिक्तात्मकल्पनादित्यर्थः। अयंभावः तत्तदिन्द्रियाणां तत्तद्विषयकप्रत्यक्षं प्रति समवायित्वं वाच्यं न तु प्रत्यक्षत्वावच्छिन्नं प्रति, अनुमित्यादिजनकत्वेतु विनिगमकाभावात्। तेन जन्यज्ञानत्वावच्छिन्नजनकतावच्छेदकमात्मत्वं चक्षुरादेरनित्यत्वादात्मनश्च नित्यतायावच्छ्यमाणत्वाच्चक्षुरादिनाशेऽपि स्मरणाच्चक्षुरहमित्याद्यप्रतीतेश्च नेन्द्रियात्मवादोयुज्यत इति ३। समाप्तमिन्द्रियप्रकरणम्। ननु गौरोऽहं जानामीत्यादिप्रतीतेरस्तु शरीरमात्मेत्याशङ्क्य दूषयति। पातकाभावात् पातकादेरभावप्रसङ्गात् तथाचोत्तरकालिकं दुःखादिकं न स्यादिति। यद्वा दाह्येनाशः तथा च शरीरनाशे सति कर्त्तरि शरीरे विनष्टे पातकं न स्यादित्यर्थः। यद्यपि भूतचैतन्यवादिना पातकादिकं नोपेयते तथापि तस्य प्रसाध्यत्वकत्वादेकदेशिनः पूर्वपक्षित्वाद्वा न दोष इति भावः ४। तथापि दृष्टान्तदोष इत्याशङ्क्ते। तदभावः पातकाभावः सात्मकशरीरस्य प्रदाहेऽपि प्रसक्तः तद्भिन्नत्वात् तस्य आत्मनोनित्यत्वात् नित्यत्वेन निर्विकारत्वं तेन जन्यधर्म्मानाश्रयत्वमभिमतमितिकेचित्। तन्निरस्तं शरीरनाशे शरीरविशिष्टात्मनाशस्य नियतत्वादित्यपि कश्चित्। किञ्च सात्मकशरीरनाशेऽपि कर्त्तुः पातकाभावः स्यात् तस्यात्मनोनित्यत्वेन तन्नाशकत्वाभावात् ५। परिहरति। कार्य्याश्रयस्य चेष्टाश्रयस्य कर्त्तुः ज्ञत्वावच्छेदकस्य शरीरस्य नाशः नत्वात्मन इति न पातकाभावः। यद्वा न कर्त्तुः पातकाभावः कार्य्याश्रयकर्त्तुर्बाधात् शरीरस्य नाशात् ब्राह्मणत्वादेः शरीरवृत्तित्वात्तन्नाशादेव पापोत्पत्तिरिति भावः। वस्तुतस्तु अपूर्वशरीरावच्छिन्नप्राणसंयोगात्मकोत्पत्तिवत् शरीरावच्छिन्नप्राणसंयोगध्वंसविशेषात्मकं मरणमप्यात्मनः सम्भवति अन्यथा शरीर विनाशनोद्बन्धनसलिलनिरोधादेर्हिंसात्वं न स्यात् पातकानभ्युपगन्तृचार्व्वाकादिमते शरीरभेदसाधनन्तु वक्ष्यमाणयुक्तिभिरिति ध्येयम् ६। समाप्तदेहभेदप्रकरणम् प्रसङ्गाच्चक्षुरद्वैतप्रकरणमारभते। वामेन चक्षुषा दृष्टस्य दक्षिणेन चक्षुषा प्रत्यभिज्ञानात् स्थिरात्मसिद्धिरिति केषाञ्चिन्मतं तन्निराकरणायैतदुपन्यासः ७। एतद्दूषयति। मध्यस्थसेतुना तडागस्येव नासास्थिव्यवहितगोलकान्तरावच्छिन्नतया द्वैतप्रत्ययोभ्रम इत्यर्थः ८। आक्षिपति। चक्षुरैक्ये एकचक्षुर्नाशेऽन्धत्वं स्यादिति भावः ९। अत्रैकदेशी परिहरति। अवयवस्य शाखादेर्नाशेऽप्यवयविनोदृष्टस्य प्रत्यभिज्ञानाच्चावयवनाशे सर्व्वत्रावयविनाशनियमस्तथा चैकनाशेऽपि नान्धत्वमिति १०। एकदेशिमतस्य पूर्व्वोक्ताक्षेपस्य च समाधानाय सिद्धान्तिनः सूत्रम्। उक्तप्रतिषेधोन युक्तः दृष्टान्तस्य विरोधादयुक्तत्वात् न हि शाखाच्छेदे दृश्यते तथा सति दृश्यानाशप्रसङ्गादतोऽवस्थितावयवैश्च खण्डदृश्योत्पत्तेर्नैकदेशिमतं युक्तम्। एतेनैकनाशे द्वितीयाविनाशाच्छेदसाधनमपि प्रत्युक्तं चक्षुर्नाशेऽपि गोलकान्तरावच्छिन्नावयवैः खण्डचक्षुःसम्भवात् इत्यपि लाघवाच्चक्षुरद्वैतमिति टीकाक्षरसंसिद्धम्। परे तु चक्षुर्द्वैतमेव सूत्रार्थं मन्यमाना व्याचक्षते सिद्धान्तिनः। सूत्रं सर्व्वनेति। शङ्कते नैकस्मिन्निति। समाधत्ते एकेति। शङ्कते अवयवेति। निराकरोति दृष्टान्तेति। शाखानाशे दृश्यनाशावश्यकत्वात् दृष्टान्तोन युक्तः। यद्वा दृष्टान्तस्य गोलकभेदस्य विरोधात्यधासुपपन्नत्वाद्दृष्टं हि सूत्रस्य चक्षुरधिष्ठानगोलकद्वयं भेदेनैवोपलभ्यत इति वदन्ति ११। आत्मन इन्द्रियभेदे युक्त्यन्तरमाह। चिरविलम्बाद्यन्धद्रष्टे दृष्टे तद्दृश्यस्मरणाद्गन्धोदकसंसृष्टरूपरसनेन्द्रियविकारादिन्द्रियव्यतिरिक्त

आत्मा सिद्ध्यति १२। आक्षिपति। स्मृतिर्हि स्मर्त्तव्यविषयिणीति नियमस्तस्माच्च दर्शनादिना सामानाधिकरण्ये सामानाभावात् अस्तु वा विषयतयैव सामानाधिकरण्यमिति भावः १३। समाधत्ते। उक्तप्रतिषेधेन युक्तः धर्म्मिग्राहकमानेन स्मृतेरात्मगुणत्वात्परिशेषेणात्मगुणत्वसिद्धेरहं स्मरामीत्यनुभवात् विषयनिष्कार्य्यकारणभावे चैतस्य ज्ञानान्नैतस्य स्मरणापत्तेरिति भावः १४। विषयाणां स्मर्त्तव्यानां स्मृतिसमवायित्वम् स्मादित्याशङ्क्य समाधत्ते। अपरिसङ्ख्यानात् आनन्त्यात् तथा च लाघवादतिरिक्तात्मसिद्धिः। इदं न सूत्रं किन्तु भाष्यमिति केचित् १५। समाप्तं चक्षुरहैतप्रकरणम्। ननु मनसोनित्यत्वादात्मत्वमस्त्वित्याशङ्कते। नातिरिक्त आत्मा आत्मसाधकमानानां मनसार्थान्तरत्वमिति भावः १६। समाधत्ते। यदि मनसो ज्ञातृत्वं तदा व्यासङ्गाद्युपपादनाय करणान्तरमवश्यं वाच्यं तथा चैकोज्ञाता ज्ञानसाधनं चैकं सिद्धं मन आत्मास्त्विति संज्ञामात्रं किन्तु व्यासङ्गोपपादकतया मनसोऽणुत्वं सिद्धमात्मनश्च प्रत्यगोपपादकतया महत्त्वमिति भेद आवश्यक इति भावः १७। ननु रूपादिप्रत्यक्षत्वम् सकरणकमस्तु न तु सुखादिप्रत्यक्षत्वम् एवंपरमाखन्तरस्यातीन्द्रियत्वेऽपि मनसः प्रत्यक्षत्वम् स्यादत्राह। उक्तोनियमविशेषोनिरनुमानः निष्प्रमाणकः गौरवाद्वैपरीत्ये च विनिगमकाभावाच्चेति भावः १८। समाप्तम् मनोभेदप्रकरणम्। एवं साधितेऽपि देहादिभिन्ने आत्मनि विना तच्चित्रतां न परलोकार्थिनः प्रवृत्तिरतः आत्मनित्यतापूतिपादनाय सूत्रम्। जातस्य बालस्य एतज्जन्मानुभूतेष्वपि हर्षादिहेतुषु सत्सु हर्षादीनां सम्प्रतिपत्तिः उत्पत्तिस्तस्याः पूर्व्वापूर्व्वानुभवाधीन स्मृतिसम्बन्धादेव सम्भवात् इत्थं चेदानीन्तनस्यात्मनः पूर्व्वपूर्व्वसिद्धौ तस्यानादित्वमनादेश्च भावस्य न नाश इति नित्यत्वसिद्धिरिति भावः १९। अत्र शङ्कते। बालस्य हर्षादयोसुखविकासाद्यनुमेया न च तत्सम्भवः पद्मादीनां प्रबोधादिवददृष्टविशेषाधीनक्रियावशादेव तदुपपत्तेरिति भावः २०। सिद्धान्तयति। उक्तं न युक्तं यतः पद्मात्मकानां पाञ्चभौतिकानां पद्मादीनां वे विकाराणामेषाम् उष्णकालादिनिमित्तत्वात् मनुष्यादीनान्तु हर्षादिनिमित्तका सुखविकासादय इति न दुरुक्तमिति भावः २१। आत्मनित्यत्वे हेत्वन्तरमाह। प्रेत्य मृत्वा जातमात्रस्य यः स्तन्याभिलाषः स तावदाहाराभ्यासजनितः जन्मान्तरीयाहारेष्टसाधनताधीजन्यजीवनादृष्टोद्बोधितसंस्काराधीनेष्टसाधनतास्मरणेन हि बालःस्तनपाने प्रवर्त्तत इत्यनेनादित्वमिति २२। शङ्कते। यथाऽयस्कान्तसन्निहितस्यायसोऽयस्कान्ताभिमुखतया गमनं तथैव बालस्यापि स्तनोपसर्पणं न त्विष्टसाधनताज्ञानाधीनप्रवृत्तिजन्या चेष्टेयमित्यर्थः २३। समाधत्ते। स्तनपानएव बालः प्रवर्त्तते नत्वन्यत्रेति नियमः कथं स्यात्। वस्तुतस्तु अन्यत्र अवसि प्रवृत्त्यभावात् प्रवृत्तिर्हि चेष्टानुमिता लिङ्गं न तु क्रियामात्रमतोन व्यभिचार इति भावः २४। हेत्वन्तरमाह वीतरागोरागशून्यस्यावश्योत्पद्यतेऽपि तु सरागतएव जन्मान्तरीयेष्टसाधनताज्ञानाधीनस्मरणं हेतुरिति पूर्व्वं स्तन्याभिलाषउक्तः सम्प्रति तु पतगादीनां कणादिभक्षणाभिलाषसाधारणं रागमात्रमित्यपौनरुक्तम् २५" इति। वैशेषिकसूत्रोपस्करयोरात्मसाधनपुरस्सरं तस्य देहादितिरिक्तता साधिता यथा "इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्यो ऽर्थान्तरस्य हेतुः"१। "सोऽनपदेशः"२। "कारणाच्चानात्"३। "कार्य्येषु चानात्" ४। "अज्ञानाच्च" ५। अन्यदेव हेतुरित्यनपदेशः" ६। "अर्थान्तरं चार्थान्तरस्याऽनपदेशः" ७ सू० "इन्द्रियार्थप्रसिद्धेरात्मपरीक्षायामुपयोगमाह। हेतुर्लिङ्गमर्थान्तरस्य आत्मनः इन्द्रियार्थेभ्य इति इन्द्रियेभ्योऽर्थेभ्यश्च रूपादिभ्यश्चाहृद्भ्यश्च यदर्थान्तरम् आत्मा तस्य लिङ्गमित्यर्थः। यद्यपि ज्ञानमेव लिङ्गमिह विवक्षितं तथापीन्द्रियार्थप्रसिद्धेरुपादिसाच्चात्कारस्य प्रसिद्धतरतया तादृश्येवैव लिङ्गत्वसूक्तम्। तथाहि प्रसिद्धिः क्वचिदाश्रिता कार्य्यत्वात् घटवत् गुणत्वाद्वा क्रियात्वाद्वा सा च प्रसिद्धिः करणजन्या क्रियात्वात् छिदिक्रियावत् यच्च प्रसिद्धेः करणं तदिन्द्रियं तच्च कर्त्रप्रयोज्यं करणत्वात् वास्यादिवत् तथा यत्रेयं प्रसिद्धिराश्रिता, यः घ्राणादीनां करणानां प्रयोक्ता स आत्मा १। ननु शरीरमिन्द्रियाणि वा प्रसिद्धेराश्रयोऽस्तु प्रसिद्धिं प्रति तदुभयान्वयव्यतिरेकयोः स्फुटतरत्वात् किं तदन्याश्रयकल्पनया तथाहि चैतन्यं शरीरगुणः तत्कार्य्यत्वात् तद्रूपादिवत् एवमिन्द्रियगुणत्वेऽपि वाच्यमित्याशङ्क्याह। अपदेशो हेतुः तदाभासोऽनपदेशः तथाच तत्कार्य्यत्वं प्रदीपजन्यज्ञानादावनैकान्तिकत्वादनपदेशइत्यर्थः २। ननु तत्कार्य्यत्वं चैतन्यत्वावच्छिन्नस्यैव कार्य्यत्वं विवक्षितं प्रदीपादीनाञ्च समस्तमेव चैतन्यं न कार्य्यमिति न व्यभिचार इत्याशङ्क्याह। शरीरकारणानां करचरणादीनां तदवयवानां वा अज्ञानात् ज्ञानशून्यत्वादित्यर्थः। पृथिव्यादि-

विशेषगुणानां हि कारणगुणपूर्वकता दृष्टा तथाच शरीरकारणेषु यदि ज्ञानं स्यात्तदा शरीरेऽपि सम्भाव्येत नचैवम्। नन्वस्तु शरीरकारणेष्वपि चैतन्यमिति चेन्न ऐकमत्याभावप्रसङ्गात् न हि बहूनाञ्चेतनानामैकमत्यं दृष्टम्, करावच्छेदेनानुभूतस्य करच्छेदेऽस्मरणप्रसङ्गात् यतः "नान्यदृष्टं स्मरत्यन्यः" इति। किञ्च शरीरनाशे तत्कृतहिंसादिफलानुपभोगप्रसङ्गात् नहि चैत्रेण कृतस्य पापस्य फलं मैत्रो भुङ्क्ते ततश्च कृतहानिरकृताभ्यागमश्च स्यात् ३। ननु शरीरकारणेषु सूक्ष्ममात्रेण ज्ञानमस्ति शरीरे तु स्फुटमतो नाऽकारणगुणपूर्वकता नचैकमत्यानुपपत्तिरित्याशङ्क्याह। यदि हि शरीरमूलकारणेषु परमाणुषु चैतन्यं स्यात् तदा तदारब्धेषु कार्येषु घटादिष्वपि स्यात् किञ्च पार्थिवविशेषगुणानाम् सर्वपार्थिववृत्तित्वाभ्युपगमेन कार्येष्वपि घटादिषु चैतन्यं स्याच्च तत्र चैतन्यमुपलभ्यते इत्यर्थः ४। ननु घटादावपि सूक्ष्ममात्रेण चैतन्यमस्त्येवेत्याशङ्क्याह। सर्वैः प्रमाणैरज्ञानात् कृत्स्नादौ न चैतन्यमितरार्थः। सर्वप्रमाणागोचरस्याभ्युपगमे खपुष्पादेरप्यभ्युपगमप्रसङ्गः न हि घटादौ चैतन्यं केनापि प्रमाणेन ज्ञायत इति ५। ननु श्रोत्रादिभिः करणैरधिष्ठाताऽनुमीयते इत्युक्तं तदयुक्तं नहि श्रोत्रादिभिरात्मनस्तादात्म्यं तदुत्पत्तिर्वा न च ताभ्यामन्तरेणाऽविनाभावसिद्धिः नचाविनाभावमन्तरेणाऽनुमितिरित्यत आह। हेतुः साध्यादन्य एव भवति न तु साध्यात्मा साध्यविशेषप्रसङ्गात् तस्मात्तादात्म्यघटितो हेतुरहेतुरनपदेश इत्यर्थः ६। ननु श्रोत्रादिभिरिन्द्रियैरात्मनो यथा न तादात्म्यं तथा तदुत्पत्तिरपि नास्ति नहि वह्नेर्धूम इव व्यात्मनः श्रोत्रादिकरणमुत्पद्यते इत्यत आह। हि यतः कार्यं धूमादि यथा रासभादेरर्थान्तरम् तथा कारणाद्वह्नेरप्यर्थान्तरमेव तथा चार्थान्तरत्वाविशेषात् धूमो रासभं न गमयति किन्तु वह्निमेव गमयतीत्यत्र स्वभावविशेष एव नियामकः स च स्वभावो यदि कार्यादन्यस्यापि भवति तदा सोऽप्यपदेशोभवत्येव तथा च कार्यमविवक्षितस्वभावभेदमनपदेशः, अथ च तादात्म्यतदुत्पत्ती एवाऽविनाभावः तयोरेवाविनाभावपर्यवसानम् ताभ्यां समानोपायौ वा तदुभयमात्र ग्रहाधीनग्रहौ वेति स्वशिष्यव्यामोहनाय परिभाषामात्रमिति भावः" ७॥ उपस्क०। अनतिदूरे च तत्रैव "आत्मेन्द्रियार्थसन्निकर्षाद्विष्यद्यते तदन्यत्" १८ सू०। "ज्ञानमात्मन्यथवा लिङ्गम्, ज्ञानं क्वचिदाश्रितं कार्यत्वाद्रूपादिवदिति वा, प्रत्यभिज्ञारूपतया वा योऽहमद्राक्षं सोऽहं स्पृशामीति, तत्र ज्ञानगतं कार्यत्वं नासिद्धं वह्निप्रभृत इत्यभिधानात्, न विरुद्धं सामान्यतोदृष्टेऽत्र विरोधाभावात्। नचानैकान्तिकम्, तत एव, तथा च स्वगतकार्यत्वगुणत्वद्वारा सामान्यतोदृष्टेन ज्ञानमेवात्मनि लिङ्गम्, प्रत्यभिज्ञानन्तु भिन्नकर्तृकोर्ध्वाद्यवर्त्तमानमेककर्तृकतावां पर्य्यवस्यति। न च बुद्धिचैतन्येऽपि कार्यकारणभावनिबन्धनमेव प्रतिसन्धानम्, शिष्यगुरुबुद्धेरपि प्रतिसन्धानप्रसङ्गात्। उपादानोपादेयभावस्तत्र नास्ति स च प्रतिसन्धानप्रयोजक इति चेदुपादानत्वस्य द्रव्यधर्म्मतया बुद्धावसम्भवात्, सम्भवे वा बुद्धीनां क्षणिकतया पूर्व्वानुभूतप्रतिसन्धानानुपपत्तेः, न हि पूर्व्वबुद्ध्या उत्तरासु बुद्धिषु कश्चित् संस्कार आधीयते, स्थिरस्य तस्य त्वयाऽनभ्युपगमात्, क्षणिकबुद्धिधारारूपस्य च कालान्तरस्थितौ प्रतिसन्धाने वाऽसामर्थ्यात्। आलयविज्ञानसन्तानः प्रवृत्तिविज्ञानसन्तानादन्य एव कर्त्ता च प्रतिसन्धाता चेति चेत् स यदि स्थिरः तदा सिद्धं नः समीहितम्, क्षणिकबुद्धिधारारूपश्चेत् तदा पूर्व्वदोषानतिवृत्तेः, न हि तत्रापि स्थिरः कश्चित् संस्कारः। किञ्च प्रवृत्तिविज्ञानातिरिक्ते तत्र प्रमाणाभावः। अहमिति बुद्धिधारैव प्रमाणमिति चेत् भवतु तत्र प्रवृत्तिविज्ञानान्यालयविज्ञानमेव चेदुपादत्ते तदा प्रवृत्तिविज्ञानानामुपादानतारिरहे निमित्तताऽपि न स्यात् उपादानताव्याप्यत्वान्निमित्तताया:, भाऽस्तु निमित्तताऽपीति चेत् तर्हि सत्त्वमपि गतम्, अर्थक्रियाकारित्वस्य सत्त्वलक्षणत्वात् प्रवृत्तिसन्तानालयविज्ञानसन्तानाभ्यां सम्भूय सन्तानद्वयमुपादीयत इति चेत् तर्हि किमपराद्धमवयविसंयोगादिभिः, व्यासज्यवृत्तितायास्त्वयाप्यभ्युपगमात्। तस्माज्ज्ञानेनाश्रयतयाऽनुमितमात्मानं प्रतिसन्धानं स्थिरत्वेन साधयतीति न किञ्चिदनुपपन्नम्। यद्वा नित्या बुद्धिर्नात्मानं कारणत्वेन गमयितुमर्हतीति साङ्ख्यमतनिरासाय सूत्रमिदमुपतिष्ठते "आत्मेन्द्रियार्थसन्निकर्षाद् यद्विष्यद्यते तदन्यत्" बुद्धितत्त्वं यत्त्वयोच्यते तज्ज्ञानमेव, बुद्धिरुपलब्धिर्ज्ञानमिति हि पर्य्यायाभिधानं, तच्चात्मादिसन्निकर्षादुत्पद्यम्। अन्यदेव त्वदभ्युपगतादन्तःकरणादित्यर्थः तथाच भवति तत् आत्मनोलिङ्गमिति भावः" १८। "प्रवृत्तिनिवृत्ती च प्रत्यगात्मनि दृष्टे परत्र लिङ्गम्" १९। "आत्मन्यनुमानमभिधाय इदानीं परात्मानुमानमाह। प्रत्यगात्मनोति स्वात्मनीत्यर्थः, इच्छाद्वेषप्रयत्नाः प्रवृत्तिनिवृत्ती

प्रयत्नविशेषौ तस्माच्च हिताहितप्राप्तिपरिहारफलके शरीरकर्म्मणी चेष्टालक्षणे जन्येते तथाच परशरीरे चेष्टां दृष्ट्वा इयं चेष्टा प्रयत्नजन्या चेष्टात्वात् मदीयचेष्टावत् स च प्रयत्न आत्मजन्यः आत्मनिष्ठो वा प्रयत्नत्वात् मदीयप्रयत्नवदिति परात्मात्मानुमानम्" १६ उपस्क०। आह्निकान्तरे "आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्य भावोऽभावश्च मनसोलिङ्गम्" १। "तस्य द्रव्यत्वनित्यत्वे वायुना व्याख्याते" २। "प्रयत्नायौगपद्याज्ज्ञानायौगपद्याच्चैकम्" ३। प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि" ४। "तस्य द्रव्यत्वनित्यत्वे वायुना व्याख्याते" ५। "यत्तदत्त इति सन्निकर्षे प्रत्यक्षाभावादृष्टं लिङ्गं न विद्यते" ६। "सामान्यतोदृष्टाच्चाविशेषः" ७। "तस्मादागमिकः" ८। "अहमितिशब्दस्य व्यतिरेकान्नागमिकम्" ९। "यदि दृष्टमन्वक्षमहं देवदत्तोऽहं यत्तदत्त इति" १०। "दृष्टयात्मनि लिङ्गे एक एव दृढत्वात् प्रतत्रवत् प्रतत्रयः" ११। "देवदत्तो गच्छति यत्तदत्तो गच्छतीत्युपचाराच्छरीरे प्रत्ययः" १२। "सन्दिग्धस्तूपचारः" १३। "अहमिति प्रत्यगात्मनि भावात् परत्राभावादर्थान्तरप्रत्ययः" १४। "देवदत्तो गच्छतीत्युपचाराद्भिमानाच्चावच्छरीरप्रत्ययोऽहङ्कारः" १५। "सन्दिग्धस्तूपचारः" १६। "न तु शरीरविशेषाद् यत्तदत्तविष्णुमित्रयोर्ज्ञानं विषयः" १७। "अहमिति सुख्यस्योम्याभ्यां शब्दवद्व्यतिरेकाव्यभिचाराद्विशेषसिद्धेर्नागमिकः" १८। "सुखदुःखज्ञाननिष्पत्तिविशेषादैकात्म्यम्" १९। "व्यवस्थातोनाना" २०। वैशेषिकसूत्राणि "इदानीमात्मपरीक्षायोग्यम् उद्देशक्रमलक्षणेन मनःपरीक्षामवतारयन्नाह। मनोगतिमात्मनोलिङ्गं वक्ष्यति तद् यदि मनो ज्ञानकरणत्वेन मूर्त्तत्वेन च परीक्षितं भवति तदा यत्प्रेरितं मनः इन्द्रियान्तरादभिमतविषयग्राहिणि इन्द्रिये सम्बध्यते स आत्मेति सिद्धं भवतीत्येतदर्थं क्रमलक्षणम्। आत्मेन्द्रियार्थसन्निकर्षे सति यस्मिन् इन्द्रियसन्निकृष्टे ज्ञानस्य भावः उत्पादः, असन्निकृष्टे ज्ञानस्याभावोऽनुपादस्तन्मन इत्यर्थः। नतु मनोवैभवेऽपि करणधर्म्मत्वादेव ज्ञानायौगपद्यमुपपद्यते किञ्च मनो विभु विशेषगुणशून्यद्रव्यत्वात् कालवत् ज्ञानासमवायिकारणसंयोगाधारत्वादात्मवत् स्पर्शशून्याभाववत्त्वादाकाशवदित्यादि वैभवसाधकं प्रमाणमिति चेत् मैवं यदि मनो विभु स्यात्तदा सर्व्वेन्द्रियसन्निकृष्टात्ततः सर्व्वेन्द्रियकमेकमेव ज्ञानं स्यात्, कार्य्यविरोधाच्चैवमिति चेन्न हि सामग्री विरोधाविरोधमाकलयति येन चाक्षुषत्वरासनत्वादिविरोधाय विश्लेष्येत, चित्ररूपवत् चित्राकारमेव वा स्यात्। भवत्येव दीर्घशष्कुलीभक्षणस्थले इति चेन्न तत्रापि व्यासङ्गदर्शनात्, तर्हि रूपरसगन्धस्पर्शान् युगपत् प्रत्येमीति कथमनुव्यवसाय इति चेन्न शीघ्रसञ्चारिमनोजनितेषु पद्मपत्रशतव्यपनीतज्ञानेषु यौगपद्याभिमानात्। व्यासङ्गोऽपि करणधर्म्माधीन इति चेन्न उक्तोत्तरत्वात्, बुभुत्साधीनो व्यासङ्ग इति चेन्न सर्व्वबुभुत्सायां सर्वविषयकसर्व्वोदयप्रसङ्गात् बुभुत्सायाश्च अभिमतार्थग्राहीन्द्रियमनःसम्बन्धमात्रफलकत्वात्, तस्माज्ज्ञानायौगपद्यान्यथानुपपत्त्या सिध्यति अणु मनः। ततोधर्म्मिग्राहकमानबाधिताः वैभवहेतवः। किञ्च मनोवैभवे पादे मे सुखं शिरसि मे वेदनेति प्रादेशिकत्वं सुखादीनां न स्यात्, विभुकार्य्याणामसमवायिकारणावच्छिन्नदेशे उत्पादनियमात्। तवापि सुखादीनामणुदेशापत्तिरिति चेन्न असमवायिकारणं विभुकार्य्यं स्वदेशे जनयत्येवेति नियमात्। तथाच निमित्तचन्दनाद्यवच्छेदादधिकदेशेऽपि जननाविरोधात्। समापि निमित्तसमवधानानुरोध इति चेन्न उक्तनियमभङ्गप्रसङ्गात् किञ्चात्मना विभुनो मनसः संयोगोऽपि कथं स्यात्, अजोऽस्मीति चेन्न विभागस्याप्यजत्वप्रसङ्गात्, अवच्छेदभेदेनोभावस्याविरुद्धाविति चेन्न संयोगविभागयोरवच्छेदभेदस्य स्वकारणाधीनत्वात् अजयोस्तु तदभावादितिदिक्। १। ननु सुखाद्युपलब्धिः करणसाध्या क्रियात्वात् रूपोपलब्धिवदित्याद्यनुमानात् युगपज्ज्ञानानुत्पत्त्या वा यन्मनः सिद्धं तत्करणतया, तथाच तस्य द्रव्यत्वं नित्यत्वञ्च कुत इत्यत आह। यत्तावयविद्रव्यानुमितो वायुपरमाणुर्गुणवत्त्वात् क्रियावत्त्वाच्च द्रव्यम्, तथा युगपज्ज्ञानानुत्पत्त्याऽनुमितं मनो गुणवत्त्वाद्द्रव्यं, नहि तस्य इन्द्रियसंयोगमन्तरेण ज्ञानोत्पादकत्वं येन गुणवत्त्वं न स्यात्। किञ्च सुखादिसाक्षात्कारः इन्द्रियकरणकः साक्षात्कारत्वात् रूपादिसाक्षात्कारवदिन्द्रियत्वेन मनः सिद्धम्, इन्द्रियत्वञ्च ज्ञानकारणमनःसंयोगाश्रयत्वमित्यवयविसिद्धमेव मनसोद्रव्यत्वम्, नित्यत्वञ्च तस्यानाश्रितत्वात्, तस्यावयवकल्पनायां प्रमाणाभावादनाश्रितत्वमिति २। तत् किं प्रतिशरीरमेकमनेकं वेति सन्देहे निर्णायकमाह। मनः प्रतिशरीरमिति शेषः यद्येकैकस्मिन्नपि शरीरे बहूनि मनांसि स्युस्तदा ज्ञानप्रयत्नानां यौगपद्यं स्यात्। यत्तु नर्त्तकीकरचरणाङ्गुलीषु

युगपत् कर्मादर्शनाद्युगपदेव बहवः प्रयत्ना उत्पद्यन्ते इति मतं तदयुक्तं मनसः शीघ्रसञ्चारादेव तदुपपत्तेः अविनश्यदवस्थयोग्यात्मविशेषगुणानां योगपद्यानभ्युपगमात्। एतेनैकस्मिन्नपि शरीरे पञ्च मनांसि तेषां हिलिचलःपञ्चानां तत्तदिन्द्रियसंयोगे हे लोष्ठि चत्वारि पञ्च वा ज्ञानानि युगपज्जायन्ते इति मतं निरस्तं कल्पनागौरवप्रसङ्गात्, यौगपद्याभिमानस्तु समर्थित एव, रसनेन्द्रियावच्छेदेन त्वगिन्द्रियसम्बन्धेन मनसश्चक्षोगुड इति ज्ञानद्वययौगपद्यापत्तिरपि करणधर्मत्वादेव नास्ति, छिन्नेऽङ्गगोधाभुजगादावपि अवयवद्वये कर्म खड्गाद्यभिघाताद्वा मनस आशुसञ्चाराद्वा तदानीमेवाद्वयेन पञ्चमनोन्तरप्रसङ्गाद्वा। यत्तु मनोऽवयव्येव जलौकावत् तच्छ्रोत्रविकाराभ्यां ज्ञानयौगपद्ययौगपद्ये इति तत्, तदवयवकल्पनागौरवप्रतिहतमिति दिक् ३। इदानीं क्रमसङ्कनप्रयोजनमादर्शयन्नेवात्मपरीक्षायेयं वक्तव्यिष्यन्नाह। प्रसिद्धिर्ज्ञानमेव केवलमात्मनो लिङ्गमिति न मन्तव्यं प्राणादयोऽपि सन्ति चात्मनो लिङ्गानि। तथाहि शरीरान्तरादिषि समीरणे प्राणापानलक्षणे ऊर्ध्वाधोगतौ उत्क्षेपणावक्षेपणे सुखलादाविव प्रयत्नं विनाऽनुपपद्यमाने यस्य प्रयत्नादुभवतः स नूनमात्मा, नहि तिर्य्यग्गमनस्वभावस्य वायोरेवंस्वभावविपर्य्ययो विना प्रयत्नात्, न च विरुद्धदिक्क्रिययोर्वाय्वोः सन्निपत्योर्विरोधेन गतिः स्यादिति वाच्यम् एवं सत्यूर्द्ध्वगमनमेव स्याच्चत्वधोगमनं फुत्कारादौ वा तिर्य्यग्गमनम्, तथाचास्ति कश्चित्, यः प्रयत्नेन वायुमूर्द्ध्वमधो वा प्रेरयति। सुषुप्तिदशायां कथं प्राणापानयोरूर्द्ध्वाधोगतौ इति चेन्न तदानीं योग्यप्रयत्नाभावेऽपि प्रयत्नान्तरस्य सद्भावात् स एव जीवनयोनिः प्रयत्न इत्युच्यते। एवं निमेषोन्मेषावपि शरीरस्याधिष्ठातारमनुमापयतः। तथा हि निमेषस्तावत् ऊर्ध्वपक्ष्मणोः संयोगजनकं कर्म उन्मेषस्तयोरेव विभागजनकं कर्म, एते च कर्मणी नोदनाभिघातादिदृष्टकारणमन्तरेण निरन्तरमुत्पद्यमाने प्रयत्नं विना नोत्पद्येते यथा दारुघटनकर्त्तनं कस्यचित् प्रयत्नात्, तथाऽक्षिपक्ष्मनर्त्तनमपि, तेन प्रयत्नवाननुमीयते। एवं जीवनमप्यात्मलिङ्गं तथाहि जीवनपदेन लक्षणया जीवनकार्य्यं द्रढिमतभग्नसंरोहणादि लक्ष्यते। तथा च यथा स्थपतिर्भग्नस्य गृहस्य निर्म्माणं करोति, लग्नेयो वा गृहं वर्द्धयति, तथा देहाधिष्ठाता गृहस्थानीयस्य देहस्याहारादिना द्रढिमापचयं करोति क्षतञ्च भेषजादिना प्ररोहयति भग्नञ्च करचरणादि संरोहयति तथा च गृहपतिरिव देहस्याधिष्ठाता सिध्यतीति। एवं मनोगतिरप्यात्मलिङ्गं तथा हि मनस्तावन्मूर्त्तमस्तु चेति पूर्व्वप्रकरणे साधितम्, तस्य चाभिमतविषयाकृष्टिरिन्द्रिये निवेशनम् इच्छाप्रणिधानाधीनम्, तथा च यस्येच्छाप्रणिधाने मनः प्रेरयतः स आत्मेत्यनुभीयते यथा गृहकोणावस्थितोदारकः कन्दुकं लाक्षागुटकं वा गृहाभ्यन्तर एव इतस्ततः प्रेरयति। ननु दारुघटनकर्त्तयिता गृहपतिर्दारको वा न शरीरादन्यो यो दृष्टान्तः स्यात् किन्तु शरीरमेव चैतन्याश्रयः अहङ्कारास्पदत्वात्, भवति हि गौरोऽहं स्थूलोऽहमित्याद्यहङ्कारसामानाधिकरण्येन प्रत्ययः। यत्तु बाल्येऽनुभूतं यौवने वार्द्धके वा स्मरति तत्र चैत्रमैत्रयच्छरीरभेदेऽपि स्मरणं न स्यात् "नान्यदृष्टं स्मरत्यन्य" इति तत्र चैत्रमैत्रयोर्भिन्नसन्तानत्वेन प्रतिसन्धानं मास्तु बाल्यकौमारभेदेऽपि सन्तानैकत्वात् कार्य्यकारणभावेन प्रतिसन्धानमुपपत्स्यत इति। तत्र ब्रूमः पित्राऽनुभूतस्य पुत्रेणापि स्मरणप्रसङ्गः, तत्र शरीरभेदप्रबोधक इति चेत् द्वयेन बालशरीराद्यवयवेनैव स्वशरीरस्य गृहीतत्वात् प्रतिसन्धानानुपपत्तेः अनुपलब्धिपिहितस्य बालस्य शरीरभेदाप्रहस्यापि सत्त्वात्। मम शरीरमिति ममकारसामान्येनाहङ्कारस्य भानात्। ममात्मेत्यत्रापि तथेति चेन्न तत्र ममकारस्यौपचारिकत्वात् राहोः शिर इति वदभेदेऽपि षष्ठ्युपपत्तेः। हिंसादिफलञ्च कर्त्तरि न स्यात् शरीरस्यान्यत्वात्, घातकभिन्नतोभूतचैतन्यनिरूप्य कृतहानमकृताभ्यागमश्च दोष इति दिक्। इन्द्रियान्तरविकारात् स्वल्पेऽपि दृश्यते हि नागरङ्गस्य चिरविल्वस्य वा रूपविशेषसहचरितं रसविशेषमनुभूय पुनस्तादृशं फलमुपलभमानस्य रसगर्द्धि प्रवर्त्तितो दन्तोदकसम्भवः, स च नास्मरसानुमितिमन्तरेण, अनुमितिर्न व्याप्तिस्मृतिमन्तरेण, सा च न संस्कारं विना, स च न व्याप्त्यनुभवमन्तरेण, स च न भूयोदर्शनमन्तरेणेति इयं ज्ञानपरम्परा नैकं कर्त्तारमन्तरेण कार्य्यकारणभूता सम्भवतीति तथा च गौतमीयं सूत्रम् "इन्द्रियान्तरविकारात्" इति। सुखादयश्च ज्ञानवदेवात्मलिङ्गानि द्रष्टव्याः। तथाहि सुखादिकं क्वचिदाश्रितं द्रव्याश्रितं सामान्यतोदृष्टमेव अदृष्टव्यातिरिक्तद्रव्याश्रितत्वं विषयीकरोति न हि पृथिव्यादिदृष्टकाश्रिता इच्छा द्रव्याश्रितेति प्रतिज्ञा अदृष्टव्यातिरिक्तद्रव्याश्रितत्वं प्रकारमनादाय पर्य्यवस्यति यत्तु पृथक् न बाधावता-

रत्नत्वादद्रव्यातिरिक्तद्रव्याश्रितत्वं व्यतिरेकिसाध्यमिति भावः । व्यापकतावच्छेदकप्रकारिकैवानुमितिरिति तु तुच्छम्, येन विना प्रतीतिर्न पर्य्यवस्यति तस्यैव तत्र प्रकारत्वात् अन्यथा द्व्यणुकं कार्य्यानाश्रितं सत् क्वचिदाश्रितम् अवयवित्वादित्यादावकार्य्याश्रितत्वप्रकारिकाऽनुमितिर्न स्यात्४ । ननु सिद्धन्तु आत्मा स्थिरः, स तु नित्य इति कुतः, कुतश्च द्रव्यमित्यत आह । यथा वायुपरमाणोरवयवकल्पनायां न प्रमाणमतोनित्यत्वं तथात्मनोऽपि, यथा गुणवत्त्वाद्वायुपरमाणुर्द्रव्यं तथात्माऽपीत्यर्थः५ । पूर्व्वं पक्षमाह । सन्निकर्षे सति अयं यज्ञदत्त इति प्रत्यक्षं नास्ति चेत् तदा दृष्टं प्रत्यक्षतो गृहीतव्याप्तिकं लिङ्गं नास्ति, यथा वह्निना प्रत्यक्षेण सहचरितो गृहीतो धूमो वह्नौ दृष्टं लिङ्गं तथात्मसाधकं लिङ्गं दृष्टं नास्तीत्यर्थः६ । ननु प्रत्यक्षदृष्टव्याप्तिकस्य दृष्टलिङ्गस्याभावेऽपि सामान्यतोदृष्टमेव लिङ्गं भविष्यति नहि ततो नानुमितिरित्याशङ्क्य पुनः पूर्व्वपक्षी आह । सामान्यतोदृष्टमपि लिङ्गं भवति न तु तत आत्मत्वेन अदृष्टद्रव्यातिरिक्तद्रव्यत्वेन वा स्यादात्मसिद्धिः किन्तु तेनेच्छादीनां क्वचिदाश्रितत्वमात्रं सिद्धेत् तच्च नात्ममननौपयिकमित्यर्थः तदेतदाह अविशेष इति७ । तत् किं "योऽपहतपाप्मा स आत्मा" इत्याद्यागमोऽनर्थक एवेत्याशङ्क्य स एवाह । आगममात्रसिद्ध एवात्मा न त्वनुमेयः दृष्टसामान्यतोदृष्टयोर्लिङ्गयोरभावात् तस्मात् सम्यगुपनिषदां श्रवणात् तत्त्वसाक्षात्कार उत्पद्यते न तु मननप्रणालिकया, तथाच मननप्रयोजनकमिदं तत्त्वमतत्त्वम्, दृष्टं हि भूतदृक्कनदीसन्तरणादावुपदेशमात्रादेव साक्षात्कारि ज्ञानम्८ । तदेवं त्रिभिः सूत्रैः पूर्व्वपक्षे सिद्धान्तवाद्याह । नागममात्रं प्रमाणमात्मनि, किन्त्वहमिति पदमात्मपदं वा साभिधेयं पदत्वात् घटादिपदवत् इत्यनुमानाद्यात्मसिद्धिः । ननु पृथिव्यादेव तदभिधेयं स्यादित्यत आह व्यतिरेकादिति पृथिव्यादितोऽहमिति पदस्य व्यतिरेकाद्व्यावृत्तेरित्यर्थः । नहि भवत्यहं पृथिवी अहमापः अहमेजः अहं वायुः अहमाकाशम् अहं कालः अहं दिक् अहं मन इति व्यपदेशः, प्रत्ययो वा । शरीरे भवतीति चेन्न परशरीरेऽपि तत्प्रसङ्गात्, स्वशरीरे भवतीति चेन्न स्वशब्दस्याभिन्नस्वामिनिरूक्तेः मम शरीरमिति वैयधिकरण्येन प्रत्ययाच्च । नन्विदमपि सामान्यतोदृष्टमेव तच्च विशेषापर्य्यवसन्नमिति दूषितमेवेति चेन्न अहम्पदेऽहन्त्वमात्मत्वमेव प्रकारः तथा च पक्षधर्म्मताबलादेवाऽहन्त्वस्य प्रवृत्तिनिमित्तत्वं पर्य्यवसन्नं तच्चानन्यसाधारणमेवेति विशेषसिद्धेः एवं सामान्यतोदृष्टादपि बाधसहकृतादविशेषसिद्धिः । यच्चोक्तं श्रवणादेव साक्षात्कारः किं मननेनेति तदयुक्तम् नहि मननमन्तरेण सद्गुरुकस्याश्रद्धामलक्षालनम्, नच तदन्तरेण तत्र निदिध्यासनाधिकारः, नच निदिध्यासनमन्तरेण सवासनमिथ्याज्ञानोन्मूलनक्षमसाक्षात्कारः, अभ्यासादेव हि कामातुरस्याकस्मात् कामिनीसाक्षात्कारः, नहि शाब्दमानुमानिकं वा ज्ञानं मिथ्याज्ञानोन्मूलनक्षमं दिङ्मोहादौ दृष्टमिति भावः । ननु तथापि परोक्षे आत्मनि कथं सङ्केतग्रह इति चेत् क एवमाह नात्मा प्रत्यक्ष इति, किन्तु मनसा संयोगप्रत्यासत्त्यात्मग्रहः । कथमन्यथाऽहं सुखी जानामीच्छामि यते दुःखीत्यादिप्रत्ययः नह्ययमवस्तुकः सन्दिग्धवस्तुको वा, नीलादिप्रत्ययवत् अस्यापि निश्चितवस्तुकत्वात्, नच लैङ्गिकः, लिङ्गज्ञानमन्तरेणापि जायमानत्वात्, नापि शाब्दः, तदनुसन्धानानुविधानात्, प्रत्यक्षाभासोऽयमिति चेत्, तर्हि क्वचिदनाभासविषयोऽपि । नह्यप्रमितमारोप्यते इत्यावेदयिष्यते९ । एवञ्चेत् किमनुमानेनेति पूर्व्वपक्षवादी आह । इतिशब्दो ज्ञानप्रकारमाह दृष्टमिति भावे क्तप्रत्ययान्तम्, अन्यच्चमित्यध्याहृत्य तेनायमर्थः अयं देवदत्तः अयं यज्ञदत्त इति प्रकारकं दृष्टं दर्शनं अध्यक्षमेवास्तिवादि किमनुमानप्रयासेन "नहि करिणि दृष्टे चीत्कारेण तमनुमिमतेऽनुमातारः"१० । अत्र सिद्धान्त्याह । दृष्टे प्रत्यक्षेण गृहीते आत्मनि लिङ्गे सम्भूतसामग्रीके सति एक एव एकविषयक एव प्रत्ययः । प्रत्यय इति निरवयवसमस्तविभक्तिशङ्कित्वमाह, कुत एवमित्यत आह दृढत्वात् प्रमाणसंप्लवेनान्यथाभावशङ्कानिवर्त्तनपटुत्वात्, तत्र दृष्टान्तमाह प्रत्यक्षवदिति यथा दूरात्तोयप्रत्यक्षे सत्यपि संवादार्थं बलाकालिङ्गेनाऽपि तदनुमानं तदुक्तम् "प्रत्यक्षपरिकलितसमर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः" इति, इदमत्राकूतम् यद्यात्मा कदाचित् प्रत्यक्षे चैतसे भासत एव तथापि अहं गौरः अहं कृश इत्यादिविरोधिप्रत्ययान्तरतिरस्कृतो न तथा स्वेमानमास्वादयति विद्युत्प्रभातसङ्गतज्ञानवत्, तत्र लिङ्गेन जन्यथासिद्धेन ज्ञानान्तरसत्यमानं पूर्व्वज्ञानमेव स्थिरीकरोति । किञ्च "श्रोतव्यो मन्तव्य" इत्यादिविधिबोधितस्यात्ममननस्य दृष्टसाधनत्वावगतौ अनुमित्यवाऽवश्यमात्मन्यनुमानप्रवृत्तिः तद्व्यतिरेके निदिध्यासनासम्भवे साक्षात्कारासम्भवादिति भावः । अहं देवदत्तोऽहं यज्ञदत्त इति प्रती-

तिह्वाभिधानमात्मनः प्रत्यात्मवेदनीयत्वं सूचयितुम् ११। ननु यदि यज्ञदत्तोऽहमिति प्रत्यय आत्मनि तदा यज्ञदत्तो गच्छतीति गमनसामानाधिकरण्यानुपपत्तिमित्यत आह। अस्ति हि अहं गौरः अहं स्थूल इति प्रत्ययः अस्ति च मम शरीरमिति भेदप्रत्ययः तत्र देवदत्तो गच्छतीति गतिसामानाधिकरण्यानुभवो व्यवहारश्च भाक्तः, समेति प्रत्ययस्य यथार्थत्वात् यद्यपि देवदत्तत्वं शरीरवृत्तिजातित्वेन देवदत्तो गच्छतीति सूत्र एव प्रयोगे यथार्थ एव च प्रत्ययः। तथापि देवदत्तपदं तदवच्छिन्नात्मनि प्रयुक्तमिति तदौपचारिकं बोद्धव्यम् १२। अत्र शङ्कते। तुशब्दः पूर्वपक्षद्योतकः। आत्मशरीरयोस्तावदहमिति प्रत्ययः प्रयोगश्च दृश्यते तत्र क्व सूत्रयः क्व वौपचारिक इति सन्देहः १३। समाधत्ते। अर्थान्तरमात्मस्वरूपं प्रत्यक्षं यत्र प्रत्यये स प्रत्ययोऽर्थान्तरप्रत्यक्षः। अयमर्थः अहमिति प्रत्ययस्य प्रत्यगात्मनि स्वात्मनि भावाद् परत्र परात्मनि अभावात् अर्थान्तरे स्वात्मन्येव सूत्रयः कल्पयितुमुचितः यदि तु शरीरे सूत्रयः स्यात् तदा बहिरिन्द्रियग्राह्यः स्यात् न हि शरीरं मानसप्रत्यक्षं मानसश्चायमहमिति प्रत्ययः बहिरिन्द्रियव्यापारमन्तरेणापि जायमानत्वात् अहं दुःखी अहं सुखी जाने यते इच्छाम्यहमिति योग्यविशेषगुणोपहितस्यात्मनो मनसा विषयीकरणात्, नायं लैङ्गिको लिङ्गानुसन्धानमन्तरेणापि जायमानत्वात्, न शाब्दः शब्दाकलनमन्तरेणापि जायमानत्वात्, तस्मान्मानस एव। मनसश्च बहिरसातन्त्र्येण शरीरादायप्रवृत्तेरिति भावः। किञ्च यदि शरीरे स्यात्, परशरीरे स्यात्, स्वात्मनि यदि स्यात् तदापि परात्मनि स्यादिति चेन्न परात्मनः परस्यातीन्द्रियत्वात् तद्विशेषगुणानामयोग्यत्वात् योग्यविशेषगुणोपरक्तेण तस्य योग्यत्वात्, न केवलमात्मन इदं यौगं किन्तु द्रव्यमात्रस्य, द्रव्यं हि योग्यविशेषगुणोपरक्तेणैव प्रत्यक्षं भवति। आकाशमपि तर्हि शब्दोपरक्तेण प्रत्यक्षं स्यादितिचेत् स्यादेवं यदि श्रोत्रं द्रव्यग्राहकं भवेत्, आकाशं वा रूपवत् स्यात्। आत्मनोऽपि नीरूपत्वं तुल्यमिति चेत् बहिर्द्रव्यमात्र एव प्रत्यक्षतां प्रति रूपवत्त्वस्य तन्त्रत्वात्, प्रत्यगित्ययं शब्दोऽन्यव्यावृत्तमाह १४। पुनः शङ्कते। अहङ्कारोऽहमिति प्रत्ययः स च शरीरप्रत्यक्षः शरीरं प्रत्यक्षं विषयो यत्र स शरीरप्रत्यक्षः। देवदत्तो गच्छतीत्युपचारात्तावत् प्रयोगः प्रत्ययो वा त्वया समाश्रितः श्रयोपचार आभिमानिकः यतोऽहं गौरः अहं कृशः सौभागिनेयोऽहं पुनरुक्तजन्मेत्यादयः प्रत्ययाः प्रयोगाश्चोपचारेण समन्वयितुमशक्या इत्यर्थः १५। सिद्धान्तमाह। तुशब्दोऽयं सिद्धान्तमभिव्यनक्ति। उपचारोऽयमाभिमानिकः किन्तु शरीर एवायमहमित्यय इति यदुक्तं तत्रापि सन्देह एवेत्यर्थः तथाच प्रत्ययस्योभयत्रापि कूटसाक्षित्वेन विशेषावधारणाय यतितव्यं तत्र यत्रे क्रियमाणे निमीलिताक्षस्याहमिति प्रत्ययदर्शनात् शरीरभिन्ने बहिरिन्द्रियागोचरे वस्तुनि स मन्तव्यः, शरीरे भवन् परशरीरेऽपि स्यात् चक्षुर्नैरपेक्ष्येण च न स्यात्। अहं कृशः स्थूलो वा सुखीति कथं सामानाधिकरण्यमिति चेन्न सुखादिवच्छेदकत्वेनापि तत्र शरीरभानसम्भवात् सिंहनादवदिदं मङ्गनमितिवत्, अङ्गत्वमात्रं शरीरे समारोप्यते मनसोपस्थितम्, त्वगिन्द्रियोपनीतमौष्ण्यम् उष्णं जलम् उष्णं शरीरमितिवत् १६। सिद्धान्तमुपसंहरन्नाह। ज्ञानमिति योग्यं सुखदुःखादिकमात्मगुणमुपलक्षयति, यथा यज्ञदत्तविष्णुमित्रयोः शरीरं परस्परभिन्नं तथा ज्ञानसुखादिकमपि भिन्नमेव तथा च यथा यज्ञदत्तस्येदं शरीरं तथा यज्ञदत्तस्य ज्ञाने सुखादौ वाऽनुत्पन्ने अहं सुखी ज्ञाने यते इच्छामीति ज्ञानादिकं विषयो भवति योग्यशरीरविषयकत्वेन तदीयरूपादिवत्तदीयज्ञानादीनामपि प्रत्यक्षत्वसम्भवात् न च सम्भवति, तस्मात् ज्ञानसुखादीनां शरीरादन्य एवाश्रयो वक्तव्य इति भावः। शरीरविशेषात् शरीरस्य भेदादित्यर्थः तथा च शरीरभेदं प्राप्य ज्ञानं, न तु विषय इति स्थूलोपे पञ्चमी १७। नन्वात्मा न प्रत्यक्षः नीरूपद्रव्यत्वात् निरवयवद्रव्यत्वाद्वा आकाशवत्, यथा चाह कश्चिद् गौर इति बुद्धेः शरीरमेव विषयो वाच्यः, क्वचिदहं सुखीत्यादिधीरपि यद्यस्ति, तथाप्याश्रयमन्तरेण भासमानानां सुखादीनां शरीरे समारोप इत्येव कल्पमिहोचितम्, यथोष्णं सुरभि जलम् इत्याश्रयमन्तरेण प्रतीयमानयोरौष्ण्यसौरभयोर्जले समारोपः, नन्वेतदनुरोधेन जलप्रत्यक्षस्यापि प्रसिद्धजलमन्तरेणान्यविषयत्वम्, तथाऽहमित्यधिकरणत्वं शरीर एव वास्तवम्, सुखादिकन्तु कदाचित्तत्रारोप्यते तेनात्मनि प्रत्यक्षाकारं ज्ञानं नास्त्येव सुखाद्याधारत्वेन यत्कल्पनीयं तदागमसिद्धं भवतु न तत्रापि पक्ष इत्यत आह। अयमर्थः अहं सुखी अहं दुःखीति प्रत्ययो नागमिको न शाब्दो नापि लैङ्गिकः शब्दलिङ्गयोरनुसन्धानमन्तरेणापि जायमानत्वात् प्रत्यक्षत्वे च नीरूपत्वं निरवयवत्वञ्च यद्बाधकमुक्तं तद्बहिरिन्द्रियप्रत्यक्षतायां भवति

तत्र हि रूपवत्त्वानेकद्रव्यवत्त्वयोः प्रयोजकत्वात्, मानसप्रत्यक्षता च तदन्तरेणापि । ननु स्यादेवं यद्यात्मनि प्रमाणं स्यात् तदेव तु नास्तीत्यत आह यद्वद्व्यतिरेकाव्यभिचारादिभेदसिद्धेरिति यथा क्षित्यादिषु द्रव्येषु गन्धस्य व्यतिरेकोऽव्यभिचारी नियतत्वेन तदाश्रयस्यापद्रव्यातिरिक्तस्याकाशरूपस्य विशेषस्य सिद्धिः एवमिच्छायाः पृथिव्यादिषु व्यतिरेकस्याव्यभिचारात् तदाश्रयेणापि अपद्रव्यातिरिक्तेन भवितव्यम् । नन्वेतावता प्यानुमानिक एव आत्मा न तु प्रत्यक्ष इत्यत आह अहमिति सख्ययोग्याभ्यामिति अहमितीतिकारेण ज्ञानाकारमाह तेनाहमिति ज्ञानं यद्लिङ्गानुसन्धानमन्तरेण निमीलिताक्षस्य यदुत्पद्यते तत्सख्येन अहन्त्ववता योग्येन प्रमाणसिद्धेन उपपादनीयम्, न तु शरीरादिना, तत्र च्छाया व्यतिरेकस्य व्यभिचारात् अभावात् । सख्ययोग्याभ्यामित्यनन्तरम् उपपादनीयमिति पूरणीयम् आत्मनि प्रमाणानि बहूनिसन्ति यन्थगौरवभिया नोक्तानि मयूखेऽन्वेष्टव्यानि ।८। आत्मपरीक्षाप्रकरणं समाप्य इदानीमात्मनानात्वप्रकरणमारभते तत्र पूर्वपक्षसूत्रम् । एक एव आत्मा चैत्रमैत्रादिदेहभेदेऽपि, कुतः सुखदुःखज्ञानानां निष्पत्तेरुत्पत्तेरविशेषात् सर्व्वं शरीरावच्छेदेन सुखदुःखज्ञानानामुत्पत्तिरविशिष्टैव यतः यद्यात्मभेदसाधकं लिङ्गान्तरं भवेत्तदा सिद्धेदात्मभेदः, न च तदस्ति, यथा तत्तत्प्रदेशावच्छेदेन यद्यपि यद्लिङ्गाविशेषादेकमेवाकाशम् यौगपद्यादिप्रत्ययलिङ्गाविशेषादेक एव कालः पूर्व्वापरादिप्रत्ययलिङ्गाविशेषादेकैव दिक् ।९। सिद्धान्तमाह । नाना आत्मानः कुतः ? व्यवस्थातः व्यवस्था प्रतिनियमः । यथा कश्चिदाढ्यः, कश्चित् रङ्कः, कश्चित् सुखी, कश्चिद्दुःखी, कश्चिद्ब्राह्मणजनः, कश्चिन्नीचाभिजनः, कश्चिद्विद्वान्, कश्चित् जात्या इतीयं व्यवस्था आत्मभेदमन्तरेणानुपपद्यमाना साधयत्यात्मनां भेदम्, न च जन्मभेदेन बाल्यकौमारवार्द्धक्यभेदेन वा, एकस्यापात्मनो यथा व्यवस्था तथा चैत्रमैत्रादिदेहभेदेऽपि स्यादिति वाच्यं कालभेदेन विरुद्धधर्माध्याससम्भवात्" २० । उपस्करः सांख्यसूत्रभाष्ययोश्च प्रत्येकं भूतेषु चैतन्यादर्शनेन सङ्घातेऽपि न चैतन्यमित्युक्तं यथा "न सांसिद्धिकं चैतन्यं प्रत्येकादृष्टेः"१ । "प्रपञ्चमरणाद्यभावश्च"२ । "सदशक्तिवच्चेत् प्रत्येकपरिदृष्टे सांघात्ये तदुद्भवः३" सां०सू० "देहस्य भौतिकत्वेन यत् सिध्यति तदाह । भूतेषु पृथक्कृतेषु चैतन्यादर्शनाद्भौतिकस्य देहस्य न स्वाभाविकं चैतन्यं किन्त्वौपाधिकमित्यर्थः १ । बाधकान्तरमाह । प्रपञ्चस्य सर्वस्यैव मरणसुषुप्त्याद्यभावश्च देहस्य स्वाभाविकचैतन्ये सति स्यादित्यर्थः । मरणसुषुप्त्यादिकं हि देहस्याचेतनता सा च स्वाभाविकचैतन्ये सति नोपपद्यते स्वभावस्य यावद्द्रव्यभावित्वादिति २ । प्रत्येकादृष्टेरिति यदुक्तं तत्राशङ्क्य परिहरति । ननु यथा मादकता शक्तिः प्रत्येकद्रव्यादृष्टापि मिलितद्रव्ये वर्त्तते एवं चैतन्यमपि स्यादिति चेन्न प्रत्येकपरिदृष्टे सति सांघात्ये तदुद्भवः सम्भवेत् । प्रकृते तु प्रत्येकपरिदृष्टत्वं नास्ति । अतो दृष्टान्ते प्रत्येकं शास्त्रादिभिः सूक्ष्मतया मादकत्वे सिद्धे संहतभावकाले मादकत्वाविर्भावमात्रं सिद्ध्यति । दार्ष्टान्तिके तु प्रत्येकभूतेषु सूक्ष्मतया न केनापि प्रमाणेन चैतन्यं सिद्धमित्यर्थः ननु सर्वशरीरे चैतन्यदर्शनेन प्रत्येकभूते सूक्ष्मचैतन्यशक्तिरनुमेयेति चेन्न अनेकभूतेष्वनेकचैतन्यशक्तिकल्पनायां गौरवेण लाघवादेकस्यैव नित्यचित्स्वरूपस्य कल्पनौचित्यात् । ननु यथावयवेऽवर्त्तमानमपि परिमाण्डल्यादि कार्यं घटादौ दृश्यते एवमेव शरीरे चैतन्यं स्यादिति चेत् मैवम् भूतगतविशेषगुणानां सजातीयकारणगुणजन्यतया कारणे चैतन्यं विना देहे चैतन्यासम्भवादिति" भा० अयमात्मा सांख्यैः पुरुषशब्देनाभिधीयते ते च नाना "जन्मादिव्यवस्थातः पुरुषबहुत्वम्" सां०सूत्रात् । वेदान्तिनस्तु तत्त्वैक्येऽपि उपाधिभेदेन कर्णशष्कुल्यादिभेदेनाकाशभेदवत् नानात्वं वस्तुत एकत्वम् "इन्द्रो मायाभिः पुरुरूप ईयते" "रूपंरूपं प्रतिरूपो बभूवेति" श्रुतेः "अंशीननाव्यपदेशात्" "तद्गुणसारत्वादिति" च न्यायाच्चेति । एतत्प्रपञ्चस्तु भा०भा० द्रष्टव्यः ।

मिताक्षरायामपि देहाद्यतिरिक्तात्मास्तित्वे प्रमाणं दर्शितं यथा "भूतचैतन्यवादिपक्षम्परिजिहीर्षुराह" । "वेदैः शास्त्रैः सविज्ञानैर्जन्मना मरणेन च । आत्मा गत्या तथाऽऽगत्या सत्त्वेन ह्यस्तेन च । श्रेयसा सुखदुःखाभ्यामुभयैश्च शुभाशुभैः । निमित्तप्रकृतिज्ञानप्रहर्षसंयोगजैः फलैः । तारानक्षत्रसञ्चारैर्जागरैः स्वप्नजैरपि । आकाशपवनज्योतिर्जलभूतमिरैस्तथा । मन्वन्तरयुगप्राप्त्या मन्त्रौषधिफलैरपि । विद्यात्मानं विद्यमानम् कारणङ्गतस्तथा" या० वेदैः "सएष नेति नेतीत्यात्मेति" "अस्थूलमनण्वह्रस्वमदीर्घमशरीरम्" इत्यादिभिः । शास्त्रैश्च मीमांसान्वीक्षिक्यादिभिः विज्ञानैश्च मयेदं शरीरमित्यादि देहव्यतिरिक्तात्मानुभवैः । तथा जन्ममरणाभ्यां जन्मान्तरानुष्ठितधर्म

नियताभ्यान्देहातिरिक्तात्मानुमानम् । आत्मा जन्मान्तर गतकर्मानुष्ठाननियततया । तथा गमनागमनाभ्यां ज्ञानेच्छाप्रयत्नाधारनियताभ्यामपि भौतिकदेहातिरिक्तात्मानुमानम् । न हि देहस्य चैतन्यादि सम्भवति यतः कारणगुणप्रक्रमेण कार्यद्रव्ये वैशेषिकगुणारम्भोदृष्टः । न च तत्कारणभूतपार्थिवपरमाण्वादिषु चैतन्यादि समवायः सम्भवति तदारब्धस्यकृष्णादिभौतिकेष्वनुपलम्भात् । न च मदशक्तिवदुदकादिद्रव्यान्तर संयोगज इति वाच्यम् शक्तेःसाधारणगुणत्वादतो भौतिकदेहातिरिक्तश्चैतन्यादिसमवायोऽङ्गीकर्त्तव्यः । सत्वान्दते प्रसिद्धे । श्रेयो हितप्राप्तिः । सुखदुःखे आमुष्मिके । तथा शुभकर्मानुष्ठानमशुभकर्मपरित्यागः । एतैश्च ज्ञाननियतैर्देहातिरिक्तात्मानुमानम् । निमित्तं भूकम्पादि शकुनज्ञानमिङ्गितादिपतत्रिचेटालिङ्गकम् ज्ञानम् ग्रहाःसूर्य्यादयः तत्संयोगजैः फलैः । तारा अश्विन्यादिव्यतिरिक्तानि ज्योतींषि नक्षत्राख्यान्यनुकम्पन्तीनि एतेषां सञ्चारैः शुभाशुभफलद्योतनैः । जागरैर्जागरावस्थाजन्यैश्च सच्छिद्रादिव्यादिदर्शनैः । तथा स्वप्नैः खरवराहशुक्रस्थारोहणादिज्ञानैः । तथा आकाशाद्यैश्च जीवोपभोगार्थतया सृष्टैः । तथा मन्वन्तरप्राप्त्या युगान्तरप्राप्त्या देहेऽनुपपद्यमानया तथा मन्त्रौषधिफलैः प्रेक्षापूर्व्वकैः क्षुद्रकर्म्मादैः साक्षात्परम्परया वा देहेऽनुपपद्यमानैर्विद्यमानं देहेनयो वित्त जानीत । किञ्च । "अहङ्कृतिः स्मृतिर्मेधा हर्षोबुद्धिः सुखं धृतिः । इन्द्रियान्तरसञ्चार इच्छा धारणजीविते । स्वप्नः स्वप्नच भावानाम्रेरणं मनसोगतिः । निमेषचेतना यत्न आदानम्चाङ्गभौतिकम् । यत एतानि दृश्यन्ते लिङ्गानि परमात्मनः । तस्मादस्ति परोदेहादात्मा सर्वग ईश्वरः" या० । अहङ्कृतिः अहङ्कारः । स्मृतिः प्रागनुभवीयानुभवभावितसंस्कारोद्बोध निबन्धना स्तन्यपानादिगोचरा । सुखमैहिकम् । धृतिर्धैर्यम् । इन्द्रियान्तरेण दृष्टेऽर्थे इन्द्रियान्तरस्य सञ्चारः यमहमद्राक्षन्तमहंस्मृशामीत्येवमनुसन्धानरूप इन्द्रियान्तरसञ्चारः । अन्येच्छाप्रयत्नचैतन्यानां स्वरूपेण लिङ्गत्वम् । पूर्व्वश्लोकेऽनुगमनसत्यवचनादिहेतुतयार्थिकम् लिङ्गत्वमित्यपौनरुक्त्यम् । तथा धारणं शरीरस्य, जीवितं प्राणधारणम् । स्वर्गोनियतदेहान्तरोपभोग्यः सुखविशेषः । स्वप्नः प्रसिद्धः पूर्व्वश्लोके तु स्वप्नस्य शुभफलद्योतकतया लिङ्गत्वमत्र स्वरूपेणेत्यपौनरुक्त्यम् । भावानामिन्द्रियादीनाम्प्रेरणं मनसोगतिश्चेतनाधिष्ठानव्याप्ता । निमेषः प्रसिद्धः तथा पञ्चभूतानामुपादानम् । यस्मादेतानि लिङ्गानि भूतेष्वनुपपन्नानि साक्षात्परम्परया वात्मनोद्योतकानि दृश्यन्ते । तस्मादस्ति देहातिरिक्त आत्मा सर्वग ईश्वर इति सिद्धम्" इत्यन्तेन मिता० ।

देहात्मनोः स्वभावभेदपर्य्यालोचनयाऽपि न यथा तयोरैक्यं तथा दर्शितं विवेकचूड़ामणौ "देहोऽयमन्नभवनोऽन्नमयस्तु कोषस्याद्येन जीवति विनश्यति तद्विहीनः । त्वक्चर्म्ममांसरुधिरास्थिपुरीषराशिर्नायं स्वयं भवितुमर्हति नित्यशुद्धः । पूर्व्वं जनेरपि मृतेरधुनापमस्ति जातक्षणः क्षणगुणोऽनियतस्वभावः । नैकोजड़श्च घटवत्परिदृश्यमानः स्वात्मा कथं भवति भावविकारवेत्ता । पाणिपादादिमान् देहो नात्मा व्यङ्गेऽपि जीवनात् । तत्क्षत्क्षेरनाशाच्च न नियम्योनियामकः । देहस्तदर्म्मतत्कर्म्मतदवस्थादिसाक्षिणः । स्वतएव स्वतः सिद्धं तद्वैलक्षण्यमात्मनः । यत्त्वराशिर्मांसलिप्तो मलपूर्णोऽतिकश्मलः । कथं भवेदयं वेत्ता स्वयमेतद्विलक्षणः । त्वङ्मांसमेदोऽस्थिपुरीषराशावहंमतिं मूढजनः करोति । विलक्षणं वेत्ति विचारशीलो निजस्वरूपं परमार्थभूतम् । देहोऽहमित्येव जडस्य बुद्धिर्देहे च जीवाविदुषस्त्वहंधीः । विवेकविज्ञानवतोमहात्मनो ब्रह्माहमित्येव मतिः सदात्मनि । अत्रात्मबुद्धिं त्यज मूढबुद्धे! त्वङ्मांसमेदोऽस्थिपुरीषराशौ । सच्चिदात्मनि ब्रह्मणि निर्विकल्पे कुरुष्व शान्तिं परमां भजस्व । देहेन्द्रियादावसति भ्रमोदितां विद्वानहन्तां न जहाति यावत् । तावन्न तस्यास्ति विमुक्तिवार्त्तापस्त्वेष वेदान्तनयान्तदर्शी । छायाशरीरे प्रतिबिम्बगात्रे यत्स्वप्नदेहे हृदि कल्पिताङ्गे । यथात्मबुद्धिस्तव नास्ति काचित् जीवच्छरीरे च तथैव मास्तु । देहात्मधीरेव नृणामसद्धियां जन्मादिदुःखप्रभवस्य बीजम् । यतस्ततस्त्वं जहि तां प्रयत्नात् त्वक्लेद्य चित्ते न पुनर्भवाशा" । आत्मस्वरूपसङ्गे विवेकचूड़ामणौ "अस्ति कश्चित् स्वयं नित्यमहंप्रत्ययलम्बनः । अवस्थात्रयसाक्षी सन् पञ्चकोषविलक्षणः । योविजानाति सकलं जाग्रत्स्वप्नसुषुप्तिषु । बुद्धितद्वृत्तिसद्भावमभावमहमित्ययम् । यः पश्यति स्वयं सर्व्वं यं न पश्यति कश्चन । यश्चेतयति बुद्ध्यादिं न तु यं चेतयत्यसौ । येन विश्वमिदं व्याप्तं यन्न व्याप्नोति किञ्चन । आभारूपमिदं सर्व्वं यं भान्तमनुभात्य-

यम् । यस्य सन्निधिमात्रेण देहेन्द्रियमनोधियः । विषयेषु स्वकीयेषु वर्त्तन्ते प्रेरिता इव । अहङ्कारादिदेहान्ता विषयाश्च सुखादयः । वेद्यन्ते घटवद्येन नित्यबोधस्वरूपिणा । एषोऽन्तरात्मा पुरुषः पुराणोनिरन्तराखण्डसुखानुभूतिः । सदैकरूपः प्रतिबोधमात्रो येनेषिता वाक्सवचरन्ति । अतैव सत्यात्मनि धीगुहायामव्याकृताकाशउरुक्रमायः । आकाश उच्चैरविवत् प्रकाशते खतेजसा विश्वमिदं प्रकाशयन् । ज्ञाता मनोऽहङ्कृतिविक्रियाणां देहेन्द्रियप्राणकृतक्रियाणाम् । अयोऽग्निवत्तानुवर्त्तमानो न चेष्टते नो विकरोति किञ्चन । न जायते नो म्रियते न वर्द्धते न क्षीयते नो विकरोति नित्यः । विलीयमानेऽपि वपुष्यशेषित् न लीयते कुम्भइवाम्बरं स्वयम् । प्रकृतिविकृतिभिन्नः शुद्धबोधस्वभावः सदसदिदमशेषं भासयन्निर्विशेषः । विलसति परमात्मा जाग्रदादिष्ववस्थास्वहमहमिति साक्षात् साक्षिरूपेण बुद्धेः । नियमितमनसास्तं त्वं स्वमात्मानमात्मन्यवमहमिति साक्षाद्विद्धि बुद्धिप्रसादात् । जनिमरणतरङ्गापारसंसारसिन्धुं प्रतर भव कृतार्थो ब्रह्मरूपेण संस्थः । अत्रानात्मन्यहमिति मतिर्बन्ध एषोऽस्य पुंसः प्राप्तोऽज्ञानाज्जननमरणक्लेशसंपातहेतुः । येनैवायं वपुरिदमसत् सत्यमित्यात्मबुद्ध्या पुष्यत्यत्ति त्यवति विषयैस्तन्तुभिः कोशकृदत् । अतस्मिंस्तद्बुद्धिः प्रभवति विमूढस्य तमसा विवेकाभावाद्वै स्फुरति भुजगे रज्जुधिषणा । ततोऽनर्थव्रातो निपतति समादातुरधिक स्ततो योऽसद्ग्राहः स हि भवति बन्धः ग्रहण सखे ! । अखण्डनित्याद्वयबोधशक्त्या स्फुरन्नमात्मानमनन्तवैभवम् । समाहृणोत्याहतिगह्वरेषा तमोमयी राहुरिवार्कबिम्बम् । तिरोभूते स्वात्मन्यमलतरतेजोवति पुमाननात्मानं मोहादहमिति शरीरं कलयति । ततः कामक्रोधप्रभृतिभिरसद्बन्धनगुणैः परं विक्षेपाख्या रजस उरुशक्तिर्व्यथयति । महामोहव्यापव्यसनगलितात्मावगमनो धियोनानावस्थास्वयमभिनयंस्तद्गुणतया । अपारे संसारे विषयविषपूरे जलनिधौ निमज्जन्नुन्मज्जन्यायं भ्रमति कुमतिः कुत्सितगतिः । भानुप्रभासङ्गनिताब्भ्रपङ्क्तिर्भानुं तिरोधाय विजृम्भते यथा । आत्मोदिताहङ्कृतिरात्मतत्त्वं तथा तिरोधाय विजृम्भते स्वयम्" ।

शरीरमध्ये आत्मध्यानस्थानं स्वरूपञ्च या० स्मृतौ मिताक्षरायाञ्चोक्तम् । "हासप्रतिसहस्राणि हृदयादभिनिःसृताः । हिताहिता नाम नाड्यस्तासां मध्ये यशिप्रभम् । मण्डलन्तस्य मध्यस्थ आत्मा दीपइवाचलः । सन्नेयस्तं विदित्वेह पुनर्जायते न तु" या० । "हृदयप्रदेशादभिनिःसृताः कदम्बकुसुमकेशरवल्लम्बतो निर्गता हिताहितकरत्वेन हिताहितेति संज्ञा हासप्रतिसहस्राणि नाड्यो भवन्ति । अपराश्चिरोनाड्यस्तासामिडापिङ्गलाख्ये द्वे नाड्यौ सव्यदक्षिणपार्श्वगते हृदि विपर्य्यस्ते नासाविवरसम्बद्धे प्राणापानावतने । सुषुम्णाख्या पुनस्तृतीया दण्डवन्मध्ये ब्रह्मरन्ध्रविनिर्याता । तासां नाडीनां मध्ये मण्डलमिन्द्रप्रभम् । तन्मध्यात्मा निवातस्थदीपइवाचलः प्रकाशमान आस्ते । सएवम्भूतो ज्ञातव्यः । यतस्तज्ज्ञात्वात्मकरणादिह संसारे न पुनः संसरत्यस्ततत्वम्प्राप्नोति" मिता० ।

आत्मशब्दनिर्वचनञ्च वेदान्तसङ्गावस्थाम् "यदाप्नोति यदादत्ते यच्चात्ति विषयान् बहून् । यच्चास्य सन्ततोभावस्तस्मादात्मेति कथ्यते" अन्यत्र च "प्रत्यगूपः परागूरूपात् व्याप्तोऽनुभवात्मकः । प्रथते यः स आत्मेति प्राज्ञैरात्मविदोजनाः इति" स च षड्विधः । "भूतात्मा चेन्द्रियात्मा च प्रत्यगात्मा तथा भवान् । आत्मा च परमात्मा च त्वमेकः षड्विधः स्मृतः" इत्येकस्यैवात्मनो भूतादिषु अधिष्ठानत्वेनावस्थितेः षड्विधत्वम् । "त्रियमाणेऽपि न त्रियते प्राग्यस्मान्नोऽपि नाप्यते । आगमापायसाक्षी यः स आत्मानुभवात्मकः" इति तत्र देहे "भर्त्तृरूपसखि निक्षिपतीनामात्मनोमधुमदोद्भितानाम्" किरा० "आत्मनोदेहान्" मल्लि० "प्रभाविनं भाविनमन्तमात्मनः" माघः । आत्मनोनित्यत्वेन देहस्यैवान्तत्वमिह विवक्षितम् तदवच्छिन्नचैतन्यस्यात्मशब्दार्थत्वेऽपि विशेषे नाशान्वयासम्भवात् विशेषणे तदन्वयः । एवं "व्यापादयेद्य आत्मानमित्यादौ" "ये केचात्महनोजना" इत्यादावपि "स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना" रघुः । "आत्मना शरीरेण" मल्लि० "अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्" गीता । यत्ने "कर्म्मात्मा त्वपरोयोऽसौ बन्धभोद्यैः स युज्यते" इति कर्म्मणि आत्मा यत्नोयस्येत्यर्थः । भूतात्मेत्यादौ आत्मशब्दः गौणः आत्मोपकरणत्वात् आत्मजन्यत्वाद्वा "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" इत्यादिश्रुत्या भूतानामात्मन उत्पत्तिप्रतिपादनात् । स्वभावे, बुद्धौ च "तमात्मसम्पन्नमनिन्दितात्मा" रघुः । "अनिन्दितात्मा अगर्हितस्वभावः आत्मसम्पन्नं बुद्धिसम्पन्नम्" मल्लि० । १२देहावच्छिन्ने चैतन्ये च "आत्मैवह्यात्मनो बन्धुरात्मैव रिपुरात्मनः" स्मृतिः । अन्तःकरणे, "आत्मानमात्मना वेत्सि" कुमा० । "तन्मनोऽकृतात्मनां स्याम्"

छ०उ० "अनेनात्मना मनसा आत्मन्वी मनस्वी स्याम्" भा० स्वरूपे" अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति" छा०उ० । जीवात्मनि "आत्मानं रथिनं विद्धि शरीरं रथमेव तु । बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च । इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् । आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" कठ०उ० । "आत्मानं संसारिणं रथिनं रथस्वामिनं विद्धि" भा० । बुद्धादौ "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसश्च परा बुद्धिर्बुद्धेरात्मा महान् परः । महतः परमव्यक्तमव्यक्तात् पुरुषः परः । पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः । एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते । दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः । यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि । ज्ञानमात्मनि महति यच्छेत्तद्यच्छेच्छान्त आत्मनि" कठ०उप० "ज्ञाने प्रकाशस्वरूपे बुद्धावात्मनि बुद्धिर्हि मनआदिकरणानि प्राप्नोतीत्यात्मा तेषां प्रत्यग्ज्ञानम् । बुद्धिमात्मनि महति प्रथमसत्पन्ने यच्छेत् प्रथमजत्वात् स्वच्छस्वभावमात्मनो विज्ञानमापादयेदित्यर्थः । तच्च महान्तमात्मानं यच्छेच्छान्ते सर्वविशेषप्रत्यस्तमिते अविक्रिये सर्व्वान्तरे सर्व्वबुद्धिसाक्षिणि सत्त्वे आत्मनि" भा० तत्र पुत्रादौ आत्मशब्दोगौणः ममात्मा भद्रसेन इति वत् देहादौ तु मिथ्याभिमान इति भेदः एतदभिप्रायेणैव "गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनादिति" गा० भा० उक्तम् । परमात्मनि "तस्माद्वा एतस्मादात्मनः आकाशःसंभूतः" । "आत्मा वा अरे द्रष्टव्यः" इति च श्रुतिः स्वरूपे तदात्मा पृथगात्मा "आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते" वाक्यप० । बुद्धिविशेषस्वधर्म्मोपलक्षितार्थे स्वशब्दार्थे "यामेषुमात्मविश्लष्टेषु" रघुः "देवात्मशक्त्या स्वगुणैर्निगूढाम्" स्मृतिः । भावे त्व आत्मत्वम् आत्मधर्म्मे न० । "अभावविरहात्मत्वं वस्तुनः प्रतियोगिता" उदयनः । तल् तत्त्वार्थे स्त्री "तदात्मताध्यातधवा रते च का" नै० । ष्यञ् टिलोपः । आत्मम् तत्त्वार्थे न० । हितार्थे ख । आत्मनीनः आत्महिते त्रि० । तस्येदं छ आत्मीयः । तत्सम्बन्धिनि त्रि० । मूढात् परत्वेऽस्य पृ० वर्णविकृतौ मूढोत्मा "मूढोत्मावर्णविकृतेरिति" व्या० कारिका "मूढोत्मा न प्रकाशते" इति कठ०उप० । स्वात्मनः प्रत्यक्त्वं, परात्मनः पराक्त्वमिति भेदः तयोर्भेदाभेदपक्षौ च मद्भेदेन प्राक् दर्शितौ ।

आत्मनिष्ठ त्रि० आत्मनि आत्मज्ञाने निष्ठा यस्य । आत्मज्ञानमात्रान्वेषिणि ब्रह्मनिष्ठे सत्त्वौ ।

आत्मनीन त्रि०आत्मने हितम् ख । १आत्महिते "तामात्मनीनासदवोढ रामः" भट्टिः ।"अद्यापि नैवात्मनीनं क्षतं कर्म यातं जनुः" नीतिः २पुत्रे ३ श्लाघे नाटकप्रसिद्धे विदूषके च पु० अजयः ४ प्राग्धारके बलिनि त्रि० ।

आत्मनेपद न० आत्मने आत्मार्थफलबोधनाय पदम् अनुक्स० ।आत्मगामिफलबोधके व्याकरणप्रसिद्धे तङादौ । "तङानावात्मनेपदम्" पा० "अनुदात्तङितः आत्मनेपदम्" । "स्वरितञितः कर्त्रभिप्राये क्रियाफले" पा० उक्तेः आत्मगामिन्येव क्रियाफले तत्पदस्य विधानात् तथात्वम् तङ् प्रत्याहारः स च "तबाताँ झवास् आथांध्वम् इड्वहिमहिङ्" पाणिन्युक्तः" एतेषां स्थाने एव लकारभेदे तत्तद्रूपाणि आदिष्टानि ।

आत्मनेपदिन् पु० आत्मनेपदं विहितत्वेनास्त्यस्य इनि । पाणिन्युक्ते धातुभेदे ते च गणपाठे अनुदात्तेतोऽल्नान्ताः स्वरान्तश्चित्त्व पठिता धातवः । एवमन्येऽपि धातवः स्वरितेतोञ्जितश्च कर्त्रभिप्राये क्रियाफले एव तथा अर्थविशेषे उपसर्ग विशेषयोगेन कर्त्तरि वाच्ये चात्मनेपदिनोऽपि भवन्ति ते च पाणिन्यनुशिष्टाः संक्षिप्य आशुबोधेऽस्माभिर्दर्शिताः यथा । "विपराभ्यां परस्मात्तु जयतेरात्मनेपदम् । परिव्यवेभ्यः क्रीणातेस्तङ् स्यात् कर्त्तरि नेर्विशः । आङो दोऽनास्यविसारे शपथे शपतेर्भवेत् । पर्य्यन्वाङः क्रीडः स्यादक्रीजार्थात्तु तङ् मतः । आङो नौतेः प्रश्नतेच्छमायामागमेर्भवेत् । नाशतेरात्मिन भवेत् जिज्ञासायान्तु शिष्यतेः । हर्षात् भक्षाद्यवासाय लेखनार्थात् किरस्तु तङ् । उपात् कर्त्तरि सुट् तस्य चतुष्पादेऽथ पक्षिणि । प्रतिज्ञायां, निर्णयार्थमात्मने,ऽभीष्टबोधने । वर्त्तमानार्त्तिष्टतेस्तङ् तथा कर्मविवर्जितात् । देवपूजासंगमयोर्मैत्रां मार्गगतौ तथा । उपात्तङ् तिष्ठतेश्चैव मन्त्रसाधनकात्र तङ् । तथा संप्रपरिभ्यःस्य उदश्वानूर्द्ध्वकर्म्मणि । स्वाङ्गकर्माकर्म्मकात् तङुद्भ्यां तपतेर्भवेत् । हनो यमस्तथाभूतादाङः कर्त्तरि तङ् भवेत् । समः कर्म्माविवक्षायां गम्यर्त्तिशुटगो भवेत् । उपसर्गादृतेस्तङ्कृतेश्च विभाषया । निसंव्युपेभ्यो हृयतेः सर्व्वायामाङ एव तङ् । सूचने, भर्त्सने, दुष्टे–सङ्कथैव प्रवर्त्तने । सतो गुणान्तराधाने, सेवायां विनियोजने । कथने च क्रमस्तङ् स्यादधेस्तु सङ्कथने तथा । वेः शब्दकर्मणस्तस्मात् कर्मणा र-

ङ्हितात्च तङ्। शास्त्रार्थवेदनेनैव सम्माने तत्त्वनिश्चये। उत्क्षेपणे प्रार्थने च ऋणनिर्यातने तथा। अन्तिकप्रापणे भृत्यां व्यये चापनये तथा। अमूर्त्ते कर्त्तृगे कर्मण्येष तङ्। नयतेर्भवेत्। उत्क्षिप्ते चाप्रहितौ दृष्टौ च क्रमतेस्तु तङ्। परोपाभ्याङ्क्षेतरार्थे तङाङोज्योतिरुद्गमे। प्रोपाभ्यां तङ् समारम्भे वेः पादचलनार्थकात्। विभाषया क्रमेस्तङ् स्यादुपसर्गविवर्जितात्। निष्क्रये प्रोऽकर्मकाच्च संप्रतिभ्यामचिन्तने। यत्ने च ज्ञानपूर्व्वौक्तौ विमतावुपसान्त्वने। प्रार्थने च वदेर्व्यक्तौ संभवोच्चारणे तु तङ्। अनोरकर्मकाद्वृक्षे सङ्घोक्षे विमते तु वा। अवाग्गिरः कर्त्तरि तङ् प्रतिज्ञायां समस्तथा। उदश्वरः कर्म्मयुक्तात् समोयुक्तात् तृतीयया। तृतीया चेच्चतुर्थ्यर्थे दाणः संपूर्व्वकात्तु तङ्। ज्ञाश्रुस्मृदृशस्तेच स्यात् सनन्तात्कर्त्तरीष्यते। अनोर्जिज्ञासतेर्नैव प्रत्याङ्भ्याञ्च तथा स्रुवः। खरादान्नोपसर्गात्तङ् युजे र्न यत्तपात्रके। अपाजने भुजेस्तङ् स्यात् क्षुवः संपूर्व्वकात्तु तङ्। अस्त्यर्थस्य धातोर्यत् कर्म्माख्यलस्य चेद्भवेत्। ख्यलस्य कर्त्ता स, तदा तस्मात् ख्यलात् भवेत्तु तङ्। णिजन्ताच्च सधेर्ब्बुद्धेः प्रतारार्थे तु तङ् भवेत्। कविकल्पद्रुमस्त्वन्ये जित्त्वेन पठितास्तु ये। णिजन्ताश्चोभयपदास्तेभ्यस्तङ् कर्तृगे फले। अपाहदोयमोऽन्ये तस्तदाङ्यस्तथैव तङ्। उपसर्गाहते त्वत्र तथा तङ् कर्त्तृगे फले। समोपस्थपदेनैव कर्त्तृस्थफलस्य चेत्। द्योतनं स्यात्तदा तत्र तङ् कर्त्तरि विभाषया" उदाहरणं तत्रैव द्रष्टव्यम्। "परस्मैपदमिच्छन्ति आत्मनेपदिनः क्वचित्" व्या०कारिका। [स०। व्याकरणप्रसिद्धे आत्मनेपदशब्दार्थे।

आत्मनेभाषा स्त्री आत्मने तदुद्देश्येन भाषा परिभाषा अलुक्

आत्मन्वत् त्रि०आत्माऽस्यास्य मतुप् वेदे भत्वात् न नलोपः स्त्रियां ङीप्। १आत्मविशिष्टे "तमूहथुर्नौभिरात्मन्वतीभिः" ऋ० १,११६,३। "आत्मन्वभोदृहते दृतं पवः" ऋ० ९,७४,४। लोके तु आत्मवान् इत्येव। २यत्नवति ३सुमनस्के च त्रि० स्त्रियां ङीप्।

आत्मन्विन् त्रि० आत्मन्+अस्त्यर्थे वा० विनि भत्वम्। मनस्विनि "तनूमनोऽकृतात्मन्वी स्यामिति" द०उप०"आत्मन्वी मनस्वी" भा०।

आत्मपुराण न० आत्मनः पुराणं स्रष्ट्यादिकर्त्तृत्वादिरूपमितिहासमधिकृत्य कृतो ग्रन्थः अण्। आत्मनोजगत्स्रष्ट्यादिरूपेतिहासाधिकारेण शङ्करानन्दकृते अष्टादशाध्यायात्मके उपनिषदर्थप्रकाशके ग्रन्थभेदे। तत्र प्रतिपाद्यानि १अ० ऐतरेयोपनिषदर्थविवृतिः। २ अ० बृहदारण्यस्य कौषीतकिब्राह्मणार्थविवृतिः। ३अ० ब० गार्ग्यजातशत्रुसंवादार्थविवृतिः। ४ अ० ब० मधुकाण्डार्थविवृतिः। ५अ० ब० याज्ञवल्क्यकाण्डार्थविवृतिः। ६अ०ब० याज्ञवल्क्यजनकसंवादार्थविवृतिः। ७अ० ब० याज्ञवल्क्यमैत्रेयी संवादार्थविवृतिः। ८अ० श्वेताश्वतरोपनिषदर्थविवृतिः। ९ अ० काठकोपनिषदर्थविवृतिः। १० अ० तैत्तिरीयोपनिषदर्थविवृतिः। ११अ० गर्भाद्युपनिषदर्थविवृतिः। १२ अ० छान्दोग्यस्य श्वेतकेतुसंवादार्थविवृतिः। १३ अ० छा० सनत्कुमारनारदसंवादार्थविवृतिः। १४ अ०छा० प्रजापतीन्द्रसंवादार्थविवृतिः। १५अ० तलवकारोपनिषदर्थविवृतिः। १६ अ० सुबालोपनिषदर्थविवृतिः। १७अ० प्रश्नोपनिषदर्थविवृतिः। १८अ० माण्डूक्येशाजावालिप्रभृतीनामुपनिषदां सारांशार्थविवृतिः। एतत्पुराणञ्च सुगमोपायेन वेदान्तमतज्ञानार्थमतीवोपयोगि विवृतञ्चैतत् काकाराममशास्त्रिणा ततएव तत्रत्याशेषार्थाः सुग्रहाः।

आत्मप्रकाश त्रि०आत्मनः प्रकाशः। आत्मनश्चैतन्यस्य पदार्थावभासनरूपे प्रकाशे। "आत्मनस्तत्प्रकाशत्वं यत्पदार्थावभासनम्। नाग्न्यादिदीपवह्नीन्द्रभवत्वान्ध्यं यतोनियि" इत्युक्तेः अग्न्यादिप्रकाशविलक्षणनित्यप्रकाशत्वेन तत्प्रकाशेनैव घटादिस्फुरणेन च तस्य तथात्वम्। "बुद्धिवृत्तिचिदाभासौ द्वावेतौ व्याप्नुतो घटम्। तत्राज्ञानं धियानश्येदाभासात्तु घटः स्फुरेत्" इत्युक्तेस्तस्य सर्वप्रकाशकत्वम्।

आत्मप्रभ त्रि०आत्मना स्वयमितरनैरपेक्ष्येण प्रभा यस्य। १स्वयंप्रकाशमाने "लोकानात्मप्रभान् पश्यन् फाल्गुनोविस्मयान्वितः" भा०व०प०४२अ०। २परमात्मनि पु०"हृदन्तः स्वयं ज्योतिरिति" श्रुतेः "न तद्भासयते सूर्य्यो न शशाङ्को न पावकः" इत्युक्तेश्च तस्य भासने इतरापेक्षाभावात्तस्य तथात्वम्। ३त०। ४स्वयंप्रभायां स्वयं प्रकाशे स्त्री।

आत्मप्रभव पु० प्रभवत्यस्मात् प्र+भू—अपादाने अप् आत्मा देहः मनो वा प्रभवो यस्य। १तनुजे पुत्रे मनोभवे २कामे च ३कन्यायां ४बुद्धौ च स्त्री आत्मभवादयोऽप्यत्र। ५आकाशादिषु च च परमात्मनः प्रभवत्वात्तेषां तथात्वम्।

आत्मबन्धु पु० आत्मनो बन्धुः। १आत्मभिन्ने "आत्ममातुःस्वसुः सुताः आत्मपितुःस्वसुः सुताः। आत्ममातुलसुताश्च विज्ञेयास्त्वात्मबान्धवाः २इत्युक्ते" मात्रादिपितृस्वसॄणां २सुते ३मातुलसुते च। "पत्नीदुहितरश्चैव पितरौ भ्रातर-

स्वधा। तत्सुतो गोत्रजोबन्धुः शिष्यः सब्रह्मचारिणः" या० वचने बन्धुपदेन एतेषामात्मबन्धूनां पितृमातृबन्धूनाञ्च ग्रहणम्। आत्मबान्धवादयोऽप्यत्र। ४आत्मनि च "आत्मैव ह्यात्मनोबन्धुरात्मैव रिपुरात्मनः" इत्युक्तेरात्मनएव आत्मोपकारज्ञानसाधनत्वेन बन्धुत्वात्तथात्वम्।

आत्मभू पु० आत्मनोमनसो देहात् वा भवति भू-क्विप् ६त०। मनोभवे १कामे देहभवे २पुत्रे ३कन्यायां ४बुद्धौ च स्त्री। आत्मनैव भवति भू-क्विप्। ५ईश्वरे पु० स हि "बहु स्यां प्रजायेयेति" ईक्षणपूर्व्वकं सृज्यवस्त्वाकारेण विवर्त्तनात् तथा। "सर्वज्ञस्त्वमवित्तातः सर्वयोनिस्त्वमात्मभूः" रघुः "आत्मभूरवरजाखिलप्रजः" इति माघः ईशिवे ७विष्णौ च परमेश्वराभेदात्तयोस्तथात्वम्। आत्मनः ब्रह्मणः भवति भू-क्विप्। आदिजीवे हैरिण्यगर्भे "यो वै ब्राह्मणं विदधाति पूर्व्वम्" इति श्रुत्वा "यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेतत् ब्रह्म नाम रूपमन्नञ्च जायते इति" श्रुत्वा च चतुर्मुखस्यात्मजन्यत्वोक्तेस्तस्य तथात्वम् ब्रह्मेति क्लीवं छान्दसम् "यमामनन्त्यात्मभुवोऽपि कारणम्" "वचस्यवसिते तस्मिन् ससर्ज गिरमात्मभूः" कुमा० अच् आत्मनो भवति भू+अच् ६त०। आत्मभवादयोऽप्युक्तार्थेषु।

आत्मभूत त्रि० आत्मनोदेहात् मनसो वा भूतः। तनुजे १पुत्रे मनोभवे २कामे च। ३कन्यायां ४बुद्धौ च स्त्री ५मनोजन्यमात्रे त्रि०। अनात्मा आत्मा भूतः श्येन्या० कर्म्म०। अनात्मनि आत्मरूपेण भवितरि देहेन्द्रियादौ त्रि० "आत्मभूतानीन्द्रियाणीति भा० भा०। ७अनुकूले सेवकभेदे च। "तवात्मभूतैः कालभैरवार्थैः परिचारकैः" मनुः।

आत्मभूय न० आत्मनो भावः भू-भावे क्यप् ६त०। आत्मत्वे ब्रह्मरूपे "आत्मभूयाय कल्पते" पुरा०।

आत्ममय त्रि० आत्मात्मकः आत्मन्+मयट्। आत्मस्वरूपापन्ने "सर्वमात्ममयं जगत्" पुरा० स्त्रियां ङीप्

आत्ममानिन् त्रि० आत्मानमुत्कर्षेण मन्यते मन-णिनि ६त०। १आत्मोत्कर्षाभिमानिनि गर्व्विते २सर्वभूतेषु आत्मत्वेन ज्ञातरि च स्त्रियां ङीप्।

आत्ममूर्त्ति पु० आत्मनोमूर्त्तिरिव मूर्त्तिरस्य। १भ्रातरि तस्य एकदेहोत्पन्नत्वेन, "भ्राता स्योमूर्त्तिरात्मनः" इति मनुना भ्रातुः स्वतुल्यमूर्त्तित्वोक्तेश्च तथात्वम्। ६त०। वेदान्तिमते आत्मनः स्वरूपे २चैतन्यादौ न्यायमते ३कर्त्तृत्वादौ च स्त्री।

आत्ममूली स्त्री आत्मैव रज्जवे मूलमस्याः दुःखगर्तयेतरं मूलमतः स्वस्य स्वयं रज्जुत्वात् गौ०ङीष्। १दुरालम्भतावाम्। आत्मा परमात्मा मूलं यस्य। २जगति न०। तस्यात्मप्रभवत्वात् तथात्वम् "ब्रह्म खानिलतेजांसि जलं भूरेति धातवः। इमे लोका एष चात्मा तस्माच्च सचराचरम्। सृष्टण्डचक्रसंयोगात् कुम्भकारो यथा घटम्। करोति लक्षसृत्काष्ठं मृद्दं वा स्टष्टकारकः। हेममात्रमुपादाय रूप्यं वा हेमकारकः। निजलालासमायोगात् कोशं वा कोशकारकः। कारणान्येवमादाय तास्तास्विह योनिषु। सृजत्यात्मानमात्मा च संहृत्य करणानि च" या०स्मृतावात्मनो भूतसृष्टिमभिधाय अनतिदूरे "सहस्रात्मा मया योव आदिदेव उदाहृतः। सलवाक्सृष्टप्रजाः सु तस्य वर्षां यथाक्रमम्। पृथिवी पादतस्तस्य शिरसोद्यौरजायत। नभःप्राणा दिशः" इत्युक्तेः जगतामात्ममूलत्वात्तथात्वम् "आत्ममूलमिदं सर्व्वमात्मन्येव प्रलीयते" इति पुरा०।

आत्मम्भरि त्रि० आत्मानं बिभर्त्ति भृ-खि मुम् च उप०स०। स्वोदरमात्रपूरके देवातिथ्यनादरेण आत्मपोषकत्वात्तस्य तथात्वम् "आत्मम्भरिस्त्वं पिशितैर्नराणाम्" भट्टिः। "यथा तवात्मम्भरयोऽकल्याणाद्यासङ्गवत्त्वात् ब्राह्मणादयः न तथात्मम्भरिर्मुख्यः प्राणः किन्तर्हि सर्वार्थः, कथमित्युच्यते तेन मुखेन यदन्नाति यत्पिबति तेनानेनेतरान् प्राणादीन् प्रतिपालयति" छा०उ०भा०।

आत्मयाजिन् आत्मानं ब्रह्मरूपेण कर्म्मकरणादिकं भावयन् यजते यज-णिनि। "ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्" इत्युक्तरूपभावनया ज्योतिष्टोमादिकर्म्मकर्त्तरि आरुरुक्षौ ब्रह्मनिष्ठे १कर्म्मयोगिनि "सर्व्वभूतेषु चात्मानं सर्वभूतानि चात्मनि। समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छतीति" मनूक्ते आत्मतया २सर्व्वभूतदर्शिनि च

आत्मयोनि पु० आत्मा योनिरस्य। १चतुर्मुखे ब्रह्मणि २शिवे ३मनोभवे "प्रहर्त्तुमभ्युद्यतमात्मयोनिम्" कुमा०। ४विष्णौ च "आत्मयोनिः स्वयं ज्ञाता" विष्णुस०। आत्मैव योनिरुपादानकारणं नान्यदिति" भाष्योक्तेः विष्णौ स्त्रीत्वमपि।

आत्मरक्षा स्त्री आत्मन एव रक्षा यस्याः। १इन्द्रवारुणीवृक्षे ६त०। आत्मनो रक्षा। २शास्त्रोक्ते विघ्नकर्त्तृभ्य आत्मनो रक्षणे च "आत्मरक्षायां जपे विनियोगः" सन्ध्याप्रयोगः।

आत्मराम पु० आत्मनि रमते संज्ञायां कर्त्तरि घञ्। आत्मज्ञानमात्रेण तृप्ते योगीन्द्रे।

आत्मलाभ पु० आत्मनोलाभः। आत्मनो यथास्वरूपज्ञानेन

आत्मस्वरूपप्राप्तौ "आत्मलाभात्परो लाभो नास्तीति मुनयो विदुः" पुरा० "आत्मलाभपरित्राणनिरोधैः" किरा०।

आत्मलोक पु० आत्मैव लोकः प्रकाशः। स्वप्रकाशे आत्मनि।

आत्मलोमन् न० ६त०। मुखजाते लोमभेदे १श्मश्रुणि(दाड़ि) २आत्मलोममात्रे च।

आत्मवत् त्रि० आत्मा चित्तं वश्यतयाऽस्यास्ति मतुप् मस्य वः स्त्रियां ङीप्। १वश्यचित्ते। "उदयादिष्वविकृतिर्मनसः सत्त्वमुच्यते। आत्मवान् सत्त्ववानुक्तः" इत्युत्पलमालोक्ते २निर्विकारचित्ते च "प्रकृतिष्वात्मजमात्मवत्तया" रघुः "तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः"। "दृष्टे गुरावरण्ये वा निवसन्नात्मवान् द्विजः" "पूर्वं पूर्वं गुरुतरं विद्यात् व्यसनमात्मवान्" "ब्रह्महत्यासमं पापं व्यपोहत्यात्मवत्तया" इति च मनुः। "न त्वामेवंविधो भावः स्प्रष्टुमर्हति मानद!। आत्मवन्तमिव व्याधिः पुरुषं दुरसेविनम्" भा० व० प० २७६ अ०। आत्मा प्रकाश्यतया विद्यतेऽस्य। आत्मप्रकाशके ३शास्त्रे "श्रुतमाविष्कृतमात्मवत् त्वया" रघुः। आत्मना तुल्या क्रिया वर्तते। ४आत्मतुल्यक्रियायाम् अव्य०। "आत्मवन्मन्यते जगत्" इति नीतिः "मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्। आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः" इति चाणक्यः।

आत्मवश क्लि० आत्मनोवश आयत्ततात्। आत्माधीने। "यदृच्छालाभसंतुष्टः स्वात्मतत्र सेवेत यत्नतः" "सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्" इति च मनुः।

आत्मवश्य त्रि० आत्मा मनो वश्योयस्य। वशीभूतमनस्के "आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति" गीता २आत्मनोवश्ये च।

आत्मविक्रय पु० ६त०। स्वदेहविक्रये। स च "गोवधोऽयाज्ययाज्यपारदार्यात्मविक्रय" इति मनूक्तोपपातकभेदः।

आत्मविद् त्रि० आत्मानं यथार्थरूपेण वेत्ति विद्-क्विप् ६त०। आत्मस्वरूपाभिज्ञे "आत्मविदोजनाः" आत्मशब्दे उदा० "अधीयन्नात्मविद्याम्" भट्टिः "तरति शोकमात्मवित्" श्रुतिः "ध्यानयोगमुपागम्य प्रसन्नमनसः सदा। सुखेन चयमव्यक्तं प्रविशन्त्यात्मवित्तमाः" भा० आश्व० प० ५१ अ०। आत्मानं स्वपक्षं वेत्ति क्विप्। २स्वपक्षज्ञातरि "य इहात्मविदो विपक्षमध्ये" माघः।

आत्मविद्या स्त्री आत्मनोविद्या। आत्मनो यथास्वरूपावेदकविद्यायाम् "आन्वीक्षिकीत्मविद्यां वार्त्तारम्भांश्च लोकतः" मनुः। "आत्मविद्या च पौराणी धर्मशास्त्रात्मिका तथा" नन्दिपु० सा च उपनिषद्रूपा तदुपकारिशारीकविद्या च। तद्विद्यासाधने २शास्त्रे च।

आत्मवीर त्रि० आत्मा प्राणः वीरइव यस्य। १विशिष्टबलयुक्ते २श्यालके ३पुत्रे विदूषके च पु० मेदिनिः।

आत्मवृत्ति स्त्री आत्मनोवृत्तिः। १आत्मनोवर्त्तनोपाये। आत्मनि वृत्तिः स्थितिर्यस्य। २स्वस्थौ पदार्थे त्रि०।

आत्मशक्ति स्त्री ६त०। आत्मानुरूपसामर्थ्ये। "दैवं निहत्य कुरु पौरुषमात्मशक्त्या" नीतिः शक्तिश्च कार्य्यजननानुकूलः सामर्थ्यभेदः सा च देहप्राणादिनिष्ठा। आत्मनः परमात्मनो जगज्जननशक्तौ २माधायाञ्च "देवात्मशक्तिं स्वगुणैर्निगूढाम्" श्रुतिः। [र्याम् राजनि०।

आत्मशला स्त्री आत्मा स्वरूपं शल्यमिव यस्याः। शतावरी-

आत्मशुद्धि स्त्री आत्मनः देहस्य मनसो वा शुद्धिः। १देहशुद्धौ २चित्तशुद्धौ च शुद्धिशब्दे अशुद्धिशब्दे व्याख्याता।

आत्मश्लाघा स्त्री ६त०। आत्मनोऽसत्यगुणाविष्करणे गर्वभेदे "आत्मश्लाघा विवर्जितः" महापुरुषलक्षणम्।

आत्मसंयम पु० आत्मनो मनसः संयमः। चित्तसंयमने "आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते" गीता।

आत्मसमुद्भव पु० आत्मा देहोमनः परमात्मावा समुद्भवोऽस्य। १पुत्रे "इतान्विहन्मेह नरर्षभेम वयं सुरेशात्मसमुद्भवेन" भा० द्रो० प० ११८ अ०। २मनोभवे कामे च पु० ३मनोजन्ये सुखादौ त्रि० ४कन्यायां ५बुद्धौ च स्त्री परमात्मसम्भूते ६आकाशादौ त्रि०। ७चतुर्मुखे ८शिवे ९विष्णौ १० परमात्मनि च पु०।

आत्मसम्भव पु० सम्भवत्यस्मात् सम्+भू-अपादाने अप् आत्मा सम्भवो यस्य। तनूजे १पुत्रे। "एवमात्मरतिरात्मसम्भवान् तान् निवेश्य चतुरोऽपि तत्त्वतः"। "चकार नाम्ना रघुरात्मसंभवम्" "तदात्मसम्भवं राज्ये मन्त्रिवृद्धाः समादधुः" इति च रघुः २मनोजन्ये त्रि० ३काम्ये सुखादौ पु० ४कन्यायां ५बुद्धौ च स्त्री। ६आकाशादौ ७भूते त्रि०। "तस्माद्वा एतस्मादात्मनः आकाशः सम्भूत आकाशाद्वायुर्वायोरग्निरग्नेरापः अद्भ्यः पृथिवीति" श्रुत्युक्तेषेषां तत्तत्वस्य आत्मसंभूतादयोऽत्र। आत्मा परमात्मा सम्भवोऽस्य। ७चतुर्मुखे पु० आत्मना सम्भवति क्विप्। ८शिवे ९विष्णौ १० परमात्मनि च पु०।

आत्मसाक्षिन् त्रि० आत्मनः बुद्धिवृत्तेः साक्षी प्रकाशकः। वेदान्तादिमतसिद्धे बुद्धिवृत्तिप्रकाशके चैतन्ये।

आत्मसात् अव्य० कार्त्स्न्येनात्मनोऽधीनो भवति सम्पद्यते

अधीनं करोति या साति। कात्स्न्येंनात्माधीनतया सम्पन्ने तथा भूते तथा क्रियमाणे च। अस्य च सम्पद्यादियोगे एव साधुत्वम् आत्मसाद्भूतः आत्मसात् सम्पन्नः आत्मसात्कृत इत्यादि। "दुरितैरपि कर्त्तुमात्मसात्" रघुः "अग्नेर्न वाप्यात्मसात्कृत्व" या०स्मृतिः। [च।

आत्मसिद्ध त्रि०आत्मना सिद्धः। १स्वयंसिद्धे २अयत्ननिष्पन्ने

आत्मसिद्धि स्त्री आत्मरूपा सिद्धिः। आत्मभावलाभे मोक्षे

आत्मसुख त्रि० आत्मैव सुखमस्य। आत्मलाभमात्रेण सुखिनि १आत्मैव सुखं सच्चिदानन्दरूपत्वात्। २आत्मरूपे परमानन्दे न०।

आत्मस्थ त्रि० आत्मने आत्मज्ञानाय तिष्ठते वर्त्तते स्था-क ४त०। १आत्मस्वरूपज्ञानाय यतमाने आत्मनि मनसि तिष्ठति स्था-क ७त०। २मनोवृत्तिपदार्थे त्रि०। [वियोजने।

आत्महत्या स्त्री आत्मनो देहस्य हननम्। देहस्य प्राणै-

आत्महन् त्रि०आत्मानं हतवान् हन-क्विप्। "वेऽन्यथा सन्तमात्मानमकर्त्तारं स्वयंप्रभुम्। कर्त्ता भोक्तेति मन्यन्ते तएवात्महनो जनाः," इत्युक्तलक्षणे आत्मनो यथार्थज्ञानरहिते, १देहाद्यभिमानिनि, "अन्धं तमस्ते प्रविशन्ति ये के चात्महनोजनाः" कठ०उ०"लब्ध्वा कथञ्चिन्नरजन्म दुर्लभं तत्रापि पुंस्त्वं श्रुतिपारदर्शनम्। यस्त्वात्मसत्यं न यतेत मूढधीः स आत्महा स्वं विनिहन्त्यसद्ग्रहात्"विवे०चू०। आत्मनो यथार्थज्ञानाभावे आत्महत्यसङ्गम्। "असुर्य्यानाम ते लोका अन्धेन तमसा वृताः। तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनोजनाः" ईशोप०। "मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत् स आत्महा"भाग० २आत्मघातिनि जने च। आत्मघातिनृशब्दे विवृतिः।

आत्माधीन पु० आत्मनोऽधीनः। १पुत्रे, २स्वामिके ३विद्वत्के च हेम० ४बलयुक्ते ५स्वाधीने त्रि०।

आत्मानुरूप त्रि० आत्मनोऽनुरूपम्। जातिवयआदिना सदृशे "तस्यामात्मानुरूपायामात्मजन्मसमृद्धकः" रघुः।

आत्मापहारक त्रि० आत्मानमपहरति निह्नुते अप+हृ-ण्वुल्। आत्मनो यथास्वरूपनिह्नवकारिणि "योऽन्यथा सन्तमात्मानमन्यथा सत्सु भाषते। स पापकृत्तमो लोके स्तेन आत्मापहारकः" मनुः। णिनि। आत्मापहारी अपत्र "किं तेन न कृतं पापं चौरेणात्मापहारिणा" स्मृतिः स्त्रियां ङीप्।

आत्माराम त्रि० आत्मा आरामभिव रतिस्थानं रतिसाधनं वा यस्य। ज्ञानाय यतमाने योगिनि "आत्मारामाविहितरतयोनिर्विकल्पे समाधौ" वेणी०। "आत्मक्रीड़स्य सततं सदात्मिथुनस्य च। आत्मन्येव सुहृत्प्रस्य योगसिद्धिर्न दूरतः। यस्यात्मव्यतिरेकेण किञ्चिद्विश्वं न पश्यति। आत्मारामः स योगीन्द्रोब्रह्मभूतो भवेदिति" काशी० उक्ते २योगीन्द्रभेदे च।

आत्मालम्भ पु०ईत०। हृदयस्पर्शे "पिताभन्वानुहरणे आत्मालम्भेवेक्षणे" कात्या०सू०"आत्मालम्भे हृदयस्पर्शे" रघु०।

आत्माग्निन् पु० आत्मानं स्वकुलभक्षानि अग-णिनि ईत०। स्वकुलभक्षके मीने तस्य सकुलभक्षकत्वात् तथात्वम् अतएव "अबलस्वकुलाग्निनो झषात्" नैष० "मत्स्या इव जनानित्यं भक्षयन्ति परस्परमिति च" रामा० वर्णितम्।

आत्माश्रय पु०आत्मानमाश्रयति आ+श्रि-अच् ईत०। १स्वस्य स्वापेक्षित्वहेतुकानिष्टप्रसङ्गरूपे तर्कदोषभेदे। तर्कः पञ्चविधः तर्कशब्दे वक्ष्यते तत्र "स्वस्य स्वापेक्षित्वेऽनिष्टप्रसङ्ग आत्माश्रयः स च उत्पत्तिस्थितिज्ञप्तिद्वारा त्रेधा यथा यद्ययं घटएतद्घटजन्यः स्यात्तदैतद्घटानधिकरणक्षणोत्तरवर्त्ती न स्यात्, यद्ययं घटएतद्घटवृत्तिः स्यात् एतद्घट्याश्रोन स्यात्, यद्ययं घटएतद्घटज्ञानाभिन्नः स्यात् ज्ञानसामग्रीजन्यः स्यात् एतद्घटभिन्नः स्यादिति वा सर्व्वत्रापाद्यम्" न्यायसूत्रवृत्तिः। २स्वाश्रिते ३चित्तस्थिते च त्रि०ईत०। ४स्वस्याश्रये पु०।

आत्मीय त्रि० आत्मनोऽयम् छ। आत्मसंबन्धिनि। "आत्मीयां मतिमादाय कुरु सज्जनरञ्जनम्" सा०द० "किमिदं द्युतिमात्मीयां न बिभ्रति यथा पुरा" कुमा० "प्रसादमात्मीयमिवात्मदर्शः" रघुः अहमेनं प्रभावेणात्मीयं करिष्यामि" हितो०।

आत्मेश्वर त्रि० आत्मनो मनस ईश्वरः। चित्तविकारनिवारके मनःसंयमकारके "आत्मेश्वराणां न हि जातु विघ्नाः समाधिभेदप्रभवोभवन्ति" कुमा०।

आत्मोत्पत्ति स्त्री आत्मन उत्पत्तिः स्वोपाध्यन्तःकरणवृत्तिकर्म्मणाऽपूर्व्वदेहसंयोगः। स्वोपाधीभूतान्तःकरणवृत्तिकर्म्मणाऽपूर्व्वं देहसंयोगरूपे आत्मनो जन्मनि। तदुत्पत्तिप्रकारः मिताक्षरायां दर्शितो यथा।

"निमित्तमक्षरः कर्त्ता बोद्धा ब्रह्म गुणी वशी। अजःशरीरग्रहणात्स जात इति कीर्त्यते" "आत्मनः सकलजगत्प्रपञ्चाविर्भावेऽविद्यासमावेशवशात्समवायसमवायिनिमित्तमित्येवं स्वयमेव त्रिविधमपि कारणम्। न पुनःकार्य्यकोटिनिविष्टः यस्मादक्षरोऽविनश्वरः। ननु सत्त्वादिगुणविकारस्य सुखदुःखमोहात्मकस्य कार्य्यभूते जगत्प्रपञ्चे दर्शनाद्गुण-

वत्याः प्रकृतेरेव जगत्कर्त्तृत्वोचिता न पुनर्निर्गुणस्य ब्रह्मणः। नैवं मंस्थाः। आत्मैव कर्त्ता। यस्मादसौ जीवोपभोग्य सुखदुःखहेतुपुण्यापुण्यादेर्वोढा नह्यचेतनायाः प्रकृतेर्नामरूपव्याकृतविचित्रभोक्तृवर्गभोगानुकूलभोग्यभोगायतनादि योगिजगत्प्रपञ्चना घटते। तस्मादात्मैव कर्त्ता। तथा स एव ब्रह्म हंहकोविस्तारकः। नचासौ निर्गुणः, यतः तस्य त्रिगुणा शक्तिरविद्या प्रकृतिप्रधानाद्यपरपर्याया विद्यते। अतः स्वतोनिर्गुणत्वेऽपि शक्तिसम्बन्धेन सत्त्वादिगुणयोगी कथ्यते। नचैतावता प्रकृतेः कारणता यस्मादात्मैव वशी स्वतन्त्रो न प्रकृतिर्नाम स्वतन्त्रत्वान्तरन्नाङ्गीकरोति प्रमाणाभावात्। न च वचनीयं शक्तिरूपापि सैव कर्तृभूतेति। यतः शक्तिमत्कारकं न शक्तिस्तस्मादात्मैव जगतस्त्रिविधमपि कारणम्। तथा अजउत्पत्तिरहितः। अतस्तस्य यद्यपि साक्षाज्जननं नोपपद्यते। तथापि शरीरग्रहणमात्रेण जात इत्युच्यते। अवस्थान्तरयोगितयोत्पत्तिर्गृह्योजात इति वत्" मिता० देहोत्पत्तिप्रकारःकायशब्दे वक्ष्यते।

आत्मोद्भवा स्त्री आत्मनैवोद्भवति भू-अच्। मायपर्णीवृक्षे आत्मा उद्भवो यस्याः। २कन्यायां ३वुद्धौ च ४पुत्रे पु०। "आत्मोद्भवे वर्णचतुष्टयस्य" रघुः। ५मनोभवे कामे ७चित्तभवे शोकादौ च ८आत्मभवार्थमात्रे च त्रि०।

आत्मोपजीविन् त्रि० आत्मना देहव्यापारेण उपजीव्यति उप+जीव-णिनि ३त०। स्वदेहव्यापारोपजीवके भारिकदासादौ "शूद्रांचात्मोपजीविनः" "नैष चारणदारेषु विधिर्नात्मोपजीविषु" इति च मनुः। [च त्रि०।

आत्मोपम त्रि० आत्मा देहउपमा यस्य १पुत्रे २निजसदृशे

आत्मौपम्य न० उपमायाभावः ष्यञ् औपम्यम् आत्मन औपम्यम्। आत्मसादृश्ये "आत्मौपम्येन सर्व्वत्र" गीता।

आत्यन्तिक त्रि० अत्यन्त+भवार्थे ठञ्। अतिशयेन जाते। "आत्यन्तिकासिद्धिर्विलम्बसिद्धेः" नै०"नात्राह्मणे गुरौ शिष्यो वासमात्यन्तिकंवसेत्" मनुः। "विभेदजनकाज्ञाने नाशमात्यन्तिकं गते। आत्मनो ब्रह्मणा भेदमसन्तं कः करिष्यति" वे०प० स्त्रियां ङीप्। "आत्यन्तिकी खलनिवृत्तिः" मिता०

आत्यन्तिकदुःखनिवृत्ति स्त्री आत्यन्तिकीदुःखनिवृत्तिः। अपवर्गे मुक्तौ। सा च स्वाधिकरणदुःखप्रागभावासमानाधिकरणा दुःखनिवृत्तिः यादृशी दुःखनिवृत्तेरुत्तरं पुनर्दुःखान्तरं नोत्पद्यते तादृशी दुःखनिवृत्तिः। दुःखञ्च अनागतत्वेनावश्यं "हेयं दुःखमनागतमिति" पात० सूत्रात् अतीतदुःखस्य नष्टत्वात् वर्त्तमानदुःखस्य च तृतीयक्षण एव स्वयं नाशात् न तन्निवृत्तेः पुरुषार्थत्वमिति बोध्यम्।

आत्यन्तिकप्रलय पु० कर्म०। प्रलयभेदे। प्रलयस्तावत् चतुर्विधः" यथाह वेद०प० "स च चतुर्विधः नित्यः प्राकृतो नैमित्तिक आत्यन्तिकश्चेति। तत्र नित्यप्रलयः सुषुप्तिः तस्याःसकलकार्य्यप्रलयरूपत्वात् धर्म्माधर्म्मपूर्व्वसंस्काराभावात् तदा कारणात्मनाऽवस्थानं तेन सुप्तोत्थितस्य न सुखदुःखाद्युपपत्तिः न वा कारणानुपपत्तिः। न च सुषुप्तावन्तःकरणस्यापि विनाशे तदधीनप्राणनादिक्रियानुपपत्तिः वस्तुतः श्वासाद्यभावेऽपि तदुपलब्धेः पुरुषान्तरविभ्रममात्रत्वात् सुषुप्तशरीरोपलम्भवत्। नचैवं सुषुप्तस्य परेतादविशेषः, सुषुप्तस्य हि लिङ्गशरीरं संस्काराक्षमं तत्रैव वर्त्तते परेतस्य तु लोकान्तरे इति वैलक्षण्यात्। यद्वा अन्तःकरणस्य हे शक्ती ज्ञानशक्तिः क्रियाशक्तिश्चेति तत्र ज्ञानशक्तिविशिष्टान्तःकरणस्य सुषुप्तौ विनाशः न तु क्रियाशक्तिविशिष्टस्येति प्राणनाद्यवस्थानमविरुद्धम्। "यदा सुप्तः स्वप्नं न कञ्चन पश्यति अथास्मिन् प्राण एवैकधा भवति अथैनं वाक् सर्व्वैर्नामभिः सहाप्येति सता सौम्य! तदा सम्पन्नो भवति स्वमपीतोभवतीत्यादि" श्रुतिरूक्त सुप्तौ मानम्। प्राकृतप्रलयस्तु कार्य्यब्रह्मविनाशनिमित्तकः सकलकार्य्यविनाशः। यदा तु प्रागेवोत्पन्नब्रह्मसाक्षात्कारस्य कार्य्यब्रह्मणो ब्रह्मलोकाधिकारलक्षणप्रारब्धकर्म्मसमाप्तौ विदेहकैवल्यात्मिका परा मुक्तिः तदा तल्लोकवासिनामप्युत्पन्नब्रह्मसाक्षात्काराणां ब्रह्मणा सह विदेहकैवल्यम् "ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमिति" श्रुतेः। एवं स्वलोकवासिभिः सह कार्य्यब्रह्मणि सञ्चयमाने तदधिष्ठितब्रह्माण्डतदन्तर्व्वर्त्तिनिखिललोकतदन्तर्व्वर्त्तिस्थावरादीनां भूतानाञ्च प्रकृतौ मायायां लयः न तु ब्रह्मणि, बाधरूपविनाशस्यैव ब्रह्मनिष्ठत्वादतः प्राकृत इत्युच्यते। नैमित्तिकप्रलयस्तु कार्य्यब्रह्मणोदिवसावसाननिमित्तकः त्रैलोक्यमात्रप्रलयो नैमित्तिकप्रलयः। ब्रह्मदिवसश्चतुर्युगसहस्रपरिमितः "चतुर्युगसहस्राणि ब्रह्मणोदिनमुच्यते" इत्यादिवचनात्। प्रलयकालोऽपि दिवसकालपरिमितः रात्रिकालस्य दिवसकालतुल्यत्वात्। प्राकृतप्रलये नैमित्तिकप्रलये च पुराणवचनानि प्रमाणानि "द्विपरार्द्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः। तदा प्रकृतयः सप्त कल्पन्ते प्रलयाय हि। एष प्राकृतिकोराजन्! प्रकृतौ यत्र लीयते" इति वचनं प्राकृतप्रलये मानम्।

"एष नैमित्तिकः प्रोक्तः प्रलयोयत्र विश्वसृक्। शेतेऽनन्याशने नित्यमात्मसात्कृत्य चात्मभूरिति" वचनं नैमित्तिक प्रलये मानम्। तुरीयप्रलयस्तु ब्रह्मसाक्षात्कारनिमित्तकः सर्व्वमोक्षः सचैकजीववादे युगपदेव नानाजीववादे तु क्रमेण "सर्व्व एकीभवन्ति" इत्यादि श्रुतेः। तत्राद्यास्त्रयोऽपि लयाः कर्म्मोपरमनिमित्ताः तुरीयस्तु ज्ञानोदयनिमित्तोलयोऽज्ञानेन सहैवेति विशेषः"। अत्र तुरीयः आत्यन्तिकः तत्र विशेषमाह सि० शि० "इद्विर्विधेरङ्गि भुवः समन्तात् स्राद्योजनं भूभवभूतपूर्वैः। ब्राह्मे लये योजनमात्रदहेर्नाशो भुवः प्राकृतिकोऽखिलायाः। दिनेदिने यन्म्रियते हि भूतैर्दैनंदिनं तं प्रलयं वदन्ति। ब्राह्मं लयं ब्रह्मदिनान्तकाले भूतानि यद्ब्रह्मतनुं विशन्ति। ब्रह्मात्मये यत् प्रकृतिं प्रयान्ति सर्वाश्रयतः प्राकृतिकं क्रतीन्द्राः। क्षीणान्यतः कर्मपुटान्तरत्वात् पृथक् क्रियन्ते प्रकृतिर्विकारैः। ज्ञानाग्निदग्धाखिलपुण्यपापा मनः समादाय हरौ परेशे। यद्योगिनो यान्त्यनिवृत्तिमस्मादात्यन्तिकं चेति लयचतुर्धा"। "अत्र लयो भूतविनाशः। स तु साक्षात् प्रलयहेतुत्वाद्यते स दैनंदिन उच्यते। यो ब्रह्मदिनान्ते चतुर्युगसहस्रावसाने लोकत्रयस्य संहारः स ब्राह्मो लय उच्यते। तत्रा-क्षीणपुण्यपापा एव लोकाः कालवशेन ब्रह्मशरीरं प्रविशन्ति। तत्र मुखं ब्राह्मणाः, बाहुभ्यां क्षत्रियाः, ऊरुद्वयं वैश्याः, पादद्वयं शूद्राः। ततो निशावसाने पुनर्ब्रह्मणः सृष्टिं चिन्तयतो मुखादिस्थानेभ्यः कर्मपुटान्तरत्वाद्ब्राह्मणादयस्त्रात एव निःसरन्ति। तस्मिन् प्रलये भुवो योजनमात्रदहेर्विलयो नाखिलायाः। अथ यदा ब्रह्मण आयुषोऽन्तस्तदा यः प्रलयः स महाप्रलय उच्यते। तत्र ब्रह्मा ब्रह्माण्डे, तत् पाञ्चभौतिके, भूर्जले, जलं तेजसि, तेजो वायौ, वायुराकाशे, आकाशमहंकारे, अहंकारो महत्तत्त्वे, महत्तत्त्वं प्रकृतौ। एवं सकलभुवनलोका अक्षीणपुण्यपापा एवाव्यक्तं प्रविशन्ति। यदा भगवान् सिसृक्षुः प्रकृतिपुरुषौ क्षोभयति। तदा तानि भूतानि कर्म्मपुटान्तरत्वात् प्रकृतेः स्वत एव निःसरन्ति। यथाह श्रीविष्णुपुराणे परावरो जगदुत्पत्तिकारणम्। "प्रधानकारणीभूता यतो वै सृज्यसंक्षयौ" इति सृज्यसंक्षयस्तत्कर्माणि। तान्येव सृष्टौ सृज्यं कारणम्। इतराणि निमित्तकारणानि। अन्यैरप्युक्तम्। "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि"। "तच्चात्मनां भवति कर्मफलोपभोगः कायाद्विनेत्यादि"। अस्मिन् प्रलये ऽखिलाया भुवो नाश इत्यर्थः। तथा "ज्ञानाग्निदग्धाखिलपुण्यपापा योगिनो विषयेभ्यो मनः समादाय समाहृत्य तद्धरौ समाहितं कृत्वा यान्ति देहं त्यजन्ति। अनिवृत्तिं यान्ति। स आत्यन्तिको लय इति" प्रमिता०।

आत्ययिक त्रि० अत्ययः नाशः प्रयोजनमस्य ठक्। नाशप्रयोजनके कर्म्मणि "व्यग्रिश्चत्रात्ययिकं समेत्य" भट्टिः। "एकाकिनश्चात्ययिके कार्य्ये प्राप्ते भयप्रदे" मनुः। "कच्चिदात्ययिकं श्रुत्वा तदर्थमनुचिन्त्य च। प्रियाख्यनुभवन् श्रेष्ठे न त्वमन्तःपुरे रूप!" भा०स०प०५अ०।

आत्रेय पु० अत्रेरपत्यम् ढक्। अत्रिमुनेरपत्ये तस्यापत्यानि बहूनि तेषु मन्वन्तरभेदे केचित् सप्तर्षिमध्यपातिनः यथा ५मन्वन्तरे "वेदबाहुर्यदुघ्नश्च मुनिर्वेदशिरास्तथा। हिरण्यरोमा पर्জन्य ऊर्द्धबाहुश्च सोमजः। सत्यनेत्रस्तथात्रेय एते सप्तर्षयोऽन्तरे"। ८मन्वन्तरे। "रामोव्यासस्तथात्रेयो दीप्तिमानिति विश्रुतः भारद्वाजस्तथाद्यौश्चिरत्वात्मा महाद्युतिः। गोतमस्त्वात्मजश्चैव शरद्वान्नाम गौतमः। कौशिको दानवश्चैव रुरुः काश्यप एव च। एते सप्त महात्मानो भविष्यास्तनिसत्तमाः। ब्रह्मणः सदृशाश्चेति धन्याः सप्तर्षयः स्मृताः"। ९ मन्वन्तरे। "मेधातिथिस्तु पौलस्त्यो वसुः काश्यप एव च। ज्योतिष्मान् भार्गवश्चैव द्युतिमानङ्गिरास्तथा। सवनश्चैव वाशिष्ठ आत्रेयोऽभ्यवाहनः पौलहः सप्त इत्येते सप्तयो रौहितेऽन्तरे"। १०मन्वन्तरे "हविष्मान् पौलहश्चैव सुकृतिश्चैव भार्गवः। आपोमूर्त्तिस्तथात्रेयो वाशिष्ठश्चाष्टकः स्मृतः। पौलस्त्यः प्रमतिश्चैव नभोगश्चैव काश्यपः। अङ्गिरा नभसः सप्त एव परमर्षयः" ११ मन्वन्तरे। "हविष्मान् काश्यपश्चापि हविष्मान् यश्च भार्गवः। तरुणश्च तथात्रेयो वाशिष्ठस्तनयस्तथा। अङ्गिरास्तोदधिघ्नश्च पौलस्त्योनिश्चरस्तथा। पौलहश्चाग्नितेजाश्च भाव्याः सप्त महर्षयः" १२ मन्वन्तरे। "द्युतिर्वशिष्ठपुत्रश्च आत्रेयः सुतपास्तथा। अङ्गिरास्तमसोमूर्त्तिस्तपस्वी काश्यपस्तथा। पयोऽग्नश्च पौलस्त्यः पौलहश्च तपोरविः। भार्गवः सप्तमस्तेषां विष्वक्सेनश्च तत्सुतः"। १३ मन्वन्तरे। अङ्गिराश्चैव धृतिमान् पौलस्त्यो हव्यपस्तथा। पौलहस्तत्त्वदर्शी च भार्गवश्च निरुत्सुकः। निष्प्रकम्पस्तथात्रेयो निर्मोहः काश्यपस्तथा। सुतपाश्चैव वाशिष्ठः सप्तैते तु महर्षयः" १४ मन्वन्तरे। अग्नीध्रः

काश्यपश्चैव पौलस्त्यो भार्गवस्तथा । भार्गवो ऋतिबाहुश्च शुचिराङ्गिरसस्तथा । शुक्रश्चैव तथात्रेयः शुक्रो वासिष्ठ एव च । अजितः पौलहश्चैव अन्त्याः सप्तर्षयोमताः" हरिवं० ७अ० । तथा च मन्वन्तरभेदे सप्तर्षिमध्ये अत्रिपुत्रा सत्यनेत्रादयः । वैवास्वते तु मन्वन्तरे दत्तः दुर्वासाः सोमश्चेति त्रय आत्रेयाः प्रसिद्धाः । ते च ब्रह्मयोनयः "च्युतांशजाः तथोक्तम्" भाग० ४स्क० १अध्या० । "अत्रेःपत्न्यनसूया त्रीन् जज्ञे सुयशसः सुतान् । दत्तं दुर्वाससं सोममात्रेयं ब्रह्मसंभवान् । श्रीविदूरउवाच । अत्रेर्गृहे सुरश्रेष्ठाः स्थित्युत्पत्त्यन्तहेतवः । किञ्चित्किर्षवोजाता एतदाख्याहि मे गुरो । श्रीमैत्रेयउवाच । ब्रह्मणा नोदितः सृष्टावत्रिर्ब्रह्मविदांवरः । सहपत्न्या ययाञ्चक्रे कुलाद्रिं तपसिस्थितः । तस्मिन् प्रसूनस्तवकपलाशाशोककानने । वार्भिः स्रवद्भिरुद्घुष्टे निर्ब्विन्ध्यायाः समन्ततः । प्राणायामेन संयम्य मनो वर्षशतं मुनिः । अतिष्ठदेकपादेन निर्द्वन्द्वोऽनिलभोजनः । शरणं तं प्रपद्येऽहं य एव जगदीश्वरः । प्रजामात्मसमां मह्यं प्रयच्छत्विति चिन्तयन् । तप्यमानम् त्रिभुवनम् प्राणायामैधसाग्निना । निर्गतेन मुनेर्मूर्द्धः समीक्ष्य प्रभवस्त्रयः । अप्सरोमुनिगन्धर्व्वसिद्धविद्याधरोरगैः । वितायमानयशसस्तदाश्रमपदं ययुः । तत्प्रादुर्भावसंयोगविद्योतितमना मुनिः । उत्तिष्ठन्नेकपादेन ददर्शे विबुधर्षभान् । प्रणम्य दण्डवद्भूमावुपतस्थेऽर्हणाञ्जलिः । हंसस्तुपर्णस्थानृक्षैः खंचिद्भिः सुविद्योतितान् । रूपावलोकेन हृष्टहृदनेनोपलम्भितान् । तच्चोक्षिषा प्रतिहते निमील्य मुनिरक्षिणी । चेतस्तत्प्रवणं युञ्जन्नस्तावीत् संहताञ्जलिः । श्लक्ष्णया सूक्तया वाचा सर्वलोकगरीयसः । अत्रिरुवाच । विश्वोद्भवस्थितिलयेषु विभज्यमानैर्मायागुणैरनुयुगं विगृहीतदेहाः । ते ब्रह्मविष्णुगिरिशाः प्रणतोऽस्म्यहम् वस्तेभ्यः कएव भवतां म इहोपहूतः । एकोमयेह भगवान् विविधप्रधानैर्विस्रीजतः प्रजननाय कथं नु यूयम् । अत्रागतास्तनुभृतां मनसोऽपि दूरा ब्रूत प्रसीदत महानिह विस्मयोमे । श्रीमैत्रेयउवाच । इति तस्य वचः श्रुत्वात्रयस्ते विबुधर्षभाः । प्रत्याहुः श्लक्ष्णया वाचा प्रहस्य तमृषिं प्रभो ! । श्रीदेवाऊचुः । यथा कृतस्ते संकल्पोभव्यक्षेनैव नान्यथा । स ते सदृक्ष्यते ब्रह्मन् यद्वै ध्यायति ते वयम् । यथाङ्गदंगभूतास्ते आत्मजालोक विश्रुताः । भवितारोऽङ्ग भद्रन्ते विश्रुष्यन्ति च ते यशः । एवं कामवरं दत्त्वा प्रतिजग्मुः सुरेश्वराः । समाजितास्तयोः सम्यगृष्यमूकोभिषोस्तः । सोमोऽभूद्ब्रह्मणोऽंशेन दत्तोविष्णोस्तु योगवित् । दुर्वासाः शङ्करस्यांशोनिबोधाङ्गिरसः प्रजाः" । आत्रेयश्च शुक्रवंशः सम्प्रदायप्रवर्त्तकः वंशगणनायाम् "भरद्वाज आत्रेयात् आत्रेयोमाष्टेः" शत० ब्रा० पठितः स्त्रियां ङीप् । "आत्रेय्यश्च" उत्तरच० शुक्रयजुषां सम्प्रदायप्रवर्त्तक वंशगणनायाम् "आत्रेयीपुत्रादात्रेयीपुत्र इति" शत० ब्रा० । "पुत्रमन्यनकर्मणः स्त्रीसंस्काराङ्गत्वेनोक्तत्वात् तत्सन्निधानादयं वंशः स्त्रीप्राधान्येनोच्यते" भा० । २अत्रिगोत्रमध्ये भेदे पु० । "आत्रेयाय चाग्नीध्रवत्सदसःपुरस्तादुपविष्टाय क आत्रेयं क आत्रेयमिति लिरुक्ता"कात्या० १०,२,२१ । "आत्रेयायात्रिसगोत्राय अत्रिप्रवराय"वा कर्कः "आत्रेयाय हिरण्यं ददाति" शत० ब्रा० । बहुषु टकोलुक् अत्रयः अत्रिपुत्रेषु क्वचित्र । "आगस्त्याय महाभागा आत्रेयाश्चोत्तमव्रताः । सर्वस्य जगतः श्रेष्ठाः पूजिता ब्राह्मणास्तथा" भा० व० २१ अ० । तेषां श्रेष्ठत्वं च यज्ञे अनिच्छत्यिद्धोऽपि तेभ्यो दक्षिणादानस्य" शत० ब्रा० उक्तेः यथा "आत्रेयाय हिरण्यं ददातीत्युपक्रम्य "अत्रिर्वा ऋषीणां होतासावेतत् स दोऽस्तुरतमसमभिषुण्वे त ऋषयोऽत्रिमब्रुवन् हि प्रत्यङ् इदं तमोऽपजघ्नीति स एतत्तमोऽपाहन्नयं वै ज्योतिर्य इदं तमोऽपाबधीदिति तस्मा एतद्दक्षिणामनयन् ज्योतिर्हिरण्यं तद्दैस तत्तेजसा वीर्येणर्षिस्तमोऽपजघानाथैष एतेनैवैतज्ज्योतिषा तमोऽपहन्ति तस्मादात्रेयाय हिरण्यं ददातीति" । अत्रिप्रशंसया च तद्वंशजानां प्रशंसा । सचान्यत्रिभेद एव "आत्रेयाय चाग्नीध्रवदित्यनन्तरम् "ऋत्विग्भ्यो दक्षिणां ददातीति कात्या० स्मृते" ऋत्विक्त्वविशेषणात् तत्पूर्वस्य अन्यत्वमिति"कर्कः । ३देहस्थरसभेदे"हेम० ४नदीभेदे स्त्री"करतोया तथात्रेयी लौहित्यश्च महानद" भा०स०प०९अ०वर्णिता । "आत्रेयीं वक्ष्यामो रजस्वलास्नातस्नातामात्रेयीमाहुः अत्रेरियमपत्यं भवतीत्यात्रेयीमिति" वशिष्ठोक्तनिर्वचनयुक्तायामृतस्नातायां ५स्त्रियां स्त्री "हत्वा गर्भमविज्ञातमेतदेव व्रतं चरेत् । राजन्यवैश्ययोर्जानावात्रेयीमेव च स्त्रियम्" मनुः "आहिताग्नेर्ब्राह्मणस्य हत्वा पत्नीमनिन्दिताम् । ब्रह्महत्याव्रतं कुर्यादात्रेयीमस्तथैव च" अङ्गि० । "यागस्थवत्सविड्घाती चरेद्ब्रह्म-

ब्रह्मनोव्रतम् । गर्भहा च यथावर्णं तथाऽऽत्रेयीनिसूदकः" या० । आत्रेयीमिति ज्ञात्वा तस्या वधे तु ब्रह्महत्याव्रतद्विगुणव्रतम् कार्य्यम् ब्रह्महत्याव्रतसङ्का "एवं तु समभिज्ञातामात्रेयीं वा निपातयेत् । द्विगुणा ब्रह्महत्या वै आत्रेयीनिधने भवेत्" भा० शा० प० १६५ अ० उक्तेः। अत्रादि० भरद्वाजार्थे फञ्। आत्रेयायणः भारद्वाजरूपे तद्गोत्रजे पुं स्त्री०। आगस शब्दात् आत्रेयार्थे अण्। आगस आत्रेयः अन्यः आगसिः सि० कौ०। आत्रेयी+स्वार्थे कन्। आत्रेयिका ऋतुमत्यात्मतत्स्नातायां स्त्रियाम् स्त्री।

आथर्वण पु० अथर्वणा मुनिना दृष्टो वेदः अण् आथर्वणः तमधीते वेत्ति वा पुनः अण्। १अथर्ववेदवेत्तरि ब्राह्मणे, आथर्वणिकस्य धर्म आम्नायो वा अण् इकक्षोपश्च। २अथर्ववेदिधर्म्मे ३तदाम्नाये च। अथर्वाणं वेदमधीते वेत्ति वा अण्। ४अथर्ववेदाध्येतरि ५वेत्तरि च तत्कल्पज्ञातरि ६पुरोहिते पु०। तेषां समूहः अण्। ७अथर्वसमूहे न०। अथर्वणा प्रोक्तमधीयते अण् तस्य तु बह्वपु लुक्। अथर्वाण इत्येव। अथर्वणि विहितं कर्म अण्। अथर्ववेदविहिते ८अभिचारादौ कर्मणि न "आथर्वणेन हन्या च" स्मृतिः ९तत्तुल्ये कर्म्ममात्रे च "अग्नौ साङ्गिरसाथर्वणेन विधिनाऽर्थमन्थम्" दशकुमा०।

आथर्वणिक त्रि० अथर्वाणं वेदमधीते वेत्ति ठक् दाण्डा० नि०। अथर्ववेदपाठके विप्रे।

आदंश पु० आ+दन्श-भावे घञ्। दंशने। "आदंशः सर्वलूतानामेतदादंशलक्षणम्" सुश्रु०। आदंशश्च दन्तादि साध्यव्यापारभेदः। आदश्यते अत्र आधारे घञ्। २आदंशस्थाने "आदंशं खेदितं चूर्णैः प्रच्छितं प्रतिसारयेत्" सुश्रु०। करणे घञ्। ३दन्ते

आदंशिन् त्रि० आ+दन्श-णिनि द्विच। आदानकर्त्तरि "वीलु हेषा अनुवश आणमादंशिन्" ऋ० २,२४,१२।

आदर पु० आ+दृ-कप्। १गौरवहेतुके कर्म्मणि सम्माने,। "न जातहार्देन न विद्विषादरः" किरा० "दरादराभ्यां दरकम्पिनो पये" नैष०। "तद्दर्शनादभूच्छम्भोर्भूयान् दारार्थमादरः" कुमा०। २आरम्भे ३आसक्तौ। "तां प्रणामादरस्खलज्जाम्बूनदविभूषणाम्" कुमा०। ४यत्ने च "यद्दयन्नपताकाश्रीरपौरादरनिर्मिता" कुमा०।

आदरणीय त्रि० आ+दृ-अनीयर्। सम्माननीये। तव्य। आदर्त्तव्योऽत्र त्रि०।

आदर्श पु० आदृश्यतेऽत्र दृश-आधारे घञ्। १दर्पणे, तत्र हि बिम्बपदार्थस्य प्रतिबिम्बपतनात्, तत्संयोगेन नयनरश्मीनां परावर्त्तने वा बिम्बग्राहितया बिम्बं दृश्यते इति तस्य तथात्वम्। "आदर्शबिम्बसिमितायताक्षी" कुमा० नेपथ्यदर्शिनश्छाया तस्यादर्शहिरण्मये" रघुः। आदृश्यते सम्यगूपेण ज्ञायते अन्वार्थोऽस्मिन्। टीकायां २प्रतिरूपपुस्तकादौ यत्तत्समक्षरसन्निवेशं दृष्ट्वा तदनुरूपं मन्यलिख्यते तादृशे पुस्तके। "यथादर्शं तथा लिखितमिति भूरिप्रयोगः। आदर्शोगुणानाम् काद०। तत्र तदीयगुणान् दृष्ट्वा परस्वेष्वगुणा आश्रीयन्त इति तस्य तथात्वम् ३जनपदसोमाभेदे च। ततोभवादौ वुञ्। आदर्शकः। जनपदावधिसूचकस्थानभवे त्रि०।

आदर्शमण्डल पु० आदर्शइव मण्डलमस्य। आदर्शाकार मण्डलयुक्ते सर्पभेदे सर्पभेदात्तुल्या। "मण्डलिनस्तु आदर्शमण्डलः श्वेतमण्डलः" इति सुश्रु० उक्तः। आदर्शोमण्डलमिव। २मण्डलाकारे दर्पणे न०।

आदहन न० आ+दह-भावे ल्युट्। १दाहे २हिंसायां ३कुत्सने च। आदह्यतेऽत्र आधारे ल्युट्। ४श्मशाने। "अङ्गादङ्गादहनं प्राप्य आसीनोदक्षिणासुखः" ऋन्दो० प०। "आदह्यतेऽग्निनिति आदहनं श्मशानम्" शु० त० रघु०।

आदाता त्रि० आ+दा-तृच्। ग्रहीतरि "दाता नित्यमना दाता सर्वभूतानुकम्पकः" या० आदाननित्याच्चादातुः" मनुः।

आदादिक त्रि० अदादिगणे पठितः ठक्। अदादिगणपठिते धातुभेदे। "आदादिकस्य यङ्लुगं" सि० कौ०।

आदान न० आ+दा-भावे ल्युट्। ग्रहणे। "कृपाङ्कुरादान परिवृताङ्गी" कुमा०। "आदानं हि विसर्गाय सतां वारिमुचामिव" रघुः। "आदानमप्रियकरं दानञ्च प्रियकारकम्" "आदाननित्याच्चादातुः" "निन्दितेभ्योधनादानं वाणिज्यं शूद्रसेवनम्" मनुः आदाने नियमविधेयाश्च स्मृतौ दर्शिताः। "भूमेः प्रतिग्रहं कुर्य्याद्भूमेः कृत्वा प्रदक्षिणम्"। विष्णुध०। प्रदक्षिणं न सर्व्वत्रा भूमेः किन्तु तत्स्थायाः प्रदक्षिणावर्त्तनमात्रं भूमेरसन्निधाने तासन्निधे प्रदक्षिणम् रघु० तत्रैव। "करे गृह्य तथा कन्यां दासदासौ द्विजोत्तमाः ॥ करन्तु हृदि विन्यस्य धर्म्मोदात्तेयः प्रतिग्रहः। आरुह्य च गजस्योक्तः कर्णे चास्य कीर्त्तितः। तथार्चकगणानान्तु सर्व्वेषामविशेषतः। प्रतिगृह्णीत गां पुच्छे पुच्छे कृष्णाजिनं तथा। आरण्याः पशवश्चान्ये याज्ञाः पुच्छे विचक्षणैः। प्रतिग्रहमधोदृष्ट्वा आरुह्य च तथा चरेत्। बीजानां मुष्टिमादाय रत्नान्यादाय सर्व्वतः।

वस्त्रं दशान्तमादद्यात् परिधाय तथा पुनः । आरुह्योपनाहौ यानमारुहैव च पादुके । ईषायान्तु रथो यात्रा स्वस्तदण्डौ च धारयेत् । आयुधानि समादाय तथा भूषं विभूषणम् । धर्म्मध्वजौ तथा स्पृक्षा प्रविश्य च तथा गृहम् । अवतीर्य च सर्व्वाणि जलस्थानानि वै द्विजाः ! । द्रव्याण्यन्यान्यथादाता स्पृक्षा योत्राह्मणः पठेत् । प्रतिगृहीता सावित्रीं सर्वत्रैव प्रकीर्त्तयेत् । ततस्तु सार्द्धं द्रव्येण तस्य द्रव्यस्य दैवतम्" । भूमिर्विष्णुदेवताकेत्यादि कीर्त्तयेदित्यर्थः । "समापवेत्ततः पश्चात् कामस्तुत्वा प्रतिगृहम् । विधिं धर्म्ममथोक्त्वा वस्तु कुर्य्यात् प्रतिगृहम् । दात्रा सह तरत्येव कालदुर्गाणि वै द्विजः" । विष्णुध० "गां पुच्छे करिणं करे" मिता० वाक्यस्य प्रथमं करे गृहीत्वा पश्चादारोह इत्यर्थः एवमन्यत्र विरोधः समाधेयः । आदीयते औषधार्थं वैद्यैः आ+दा–कर्मणि ल्युट् ङीप् । २हस्तिबोधायां स्त्री रत्नमाला ।

आदाय अव्य० आ+दा–ल्यप् । गृहीत्वेत्यर्थे "तेषां सर्व्वमादाय राजा राष्ट्रात् प्रवासनम्" मनुः । आ+दा–भावे घञ् । २आदाने पु० ।

आदायचर त्रि० आदाय चरति चर–ट उप०स० । गृहीत्वा चारिणि । "हिंसन् वनेचराण्याणां त्वमादायचरोवने" भट्टिः ।

आदायिन् त्रि० आ+दा–णिनि स्त्रियां ङीप् । गृहीतरि "योऽदत्तादायिनो हस्ताच्छिनत्ति ब्राह्मणोधनम् । याजनाध्यापनेनापि यथा स्तेनस्तथैव सः" मनुः ।

आदार पु० आ+दृ–वेदे बा० घञ् । आदरे "आदारो वा सभानाम्" ऋ० १,४६,४ ।

आदारिविम्बी स्त्री आदारिणी विम्बीव नि०पुंवत् । (आनेरी) अस्यवेतसतुल्यपुष्पायां लतायां "आदारिविम्बीं शुकदम्ब पुष्पीं विषाच्च सर्पिर्विषचेत् कषायें' सुश्रु० ।

आदि पु० प्रथमं दीयते गृह्यते आ+दा–कि । १प्रथमे, २प्राक्सत्तायाम्, ३कारणे, ४सामीप्ये, ५प्रकारे, ६अवयवे च । ७आद्ये त्रि० अमरः । "जगदादिरनादिरस्तम्" कुमा० । "अपएव ससर्जादौ तासु बीजमवाहजत्" । "वेदशब्देभ्यएवादौ पृथक्संस्थाश्च निर्ममे" "मरीच्यादींस्तथा सृष्टीन्" इति च मनुः । "कथमेतत् विजानीयां त्वमादौ प्रोक्तवानिति" । "अहमादिश्च भूतानाम्" इति च गीता । "भूवादयोधातवः" पा० । भूश्च वाश्च भूवौ आदिश्च आदिश्च आदी भूवौ आदी येषाम् आद्य आदि शब्दः प्रथमार्थः द्वितीयःप्रकारार्थस्तेन भूप्रभृतयो वाप्रकाराः क्रियावाचित्वेन धातवश्चार्थः । एवमेव वैया० भू० । आदिशब्देन गणोऽपि गृह्यते । "भ्वाद्यदादो जुहोत्यादिर्दिवादिः स्वादिरेव च । तुदादिश्च रुधादिश्च तनक्रयादि चुरादयः" व्या० कारिका । तत्र भवः दिगा० यत् । आद्यः डिमच् । आदिमः । आदिभवे त्रि० ।

आदिकर त्रि० आदिं करोति अच्इतावपि ट स्त्रियां ङीप् । प्रथमकारके प्राक्सत्ताकर्त्तरि ।

आदिकर्त्तृ पु० आदिः कर्त्ता । आद्यकारके ईश्वरे "कस्माच्च ते न नमेरन् महात्मन् ! गरीयसे ब्रह्मणोऽप्यादिकर्त्रे" गीता ।

आदिकर्म्मन् न० कर्म्म०स० । १क्रियाकूटात्मकस्य कर्मणोऽवयवभूते प्रथमे कर्म्मणि प्रथममारभ्यमाणक्रियायाम् । "उदुपधाद्भावादेर्विभाषा भावादिकर्मणोः" "भावादिकर्मणोरन्यतरस्याम्" "आदिकर्म्मणि क्तः कर्त्तरि च" पा० । २प्रथमजे कर्म्मणि च । ब० । ३तद्याक्कर्म्मयुक्ते त्रि० ।

आदिकवि पु० आदिरादयःकविः । हिरण्यगर्भेतस्य प्रथमोत्पन्नत्वात् स्वयंप्रतिभातवेदत्वाच्च कवितया तथात्वम् । "तेने ब्रह्म हृदा य आदिकवये" भाग० । २वाल्मीकौ च ।

आदिकारण न० आद्यं कारणम् । १परमेश्वरे तदधीनत्वात् इतरकारणानाम् स हि प्रथमं स्रोपाधिभूताविद्यया सृज्यमानजीवाद्दृष्टवशादिदमित्थं कर्त्तव्यमिति ईक्षणपूर्व्वकं सृष्टव्यपदार्थाकारेण विवर्त्तमानः सूक्ष्मभूतानि प्रथमसृत्पाद्य ततः स्थूलभूतानि भौतिकानि च सृजतीत्यागमसिद्धम् इति वेदान्तिनः । सांख्यमते २प्रधाने प्रधानं हि मूलकारणं तस्यैव महदाद्याकारेण परिणमनात्तथात्वम् । नैयायिकादिमते कारणशब्दस्य निमित्तार्थत्वे ईश्वरस्यैव तथात्वम् । समवायिकारणार्थत्वेपरमाणूनां मूलकारणत्वमिति भेदः इति तेन तन्त्रते २ईश्वरे ४परमाणुषु च ।

आदिकाव्य न० आदि आद्यं काव्यं पादचतुष्टयरूपच्छन्दोबद्धं वाक्यम् । वाल्मीकिरचिते रामायणे तस्य चाद्यकाव्यत्वं दर्शितं तत्रैव आदिका० २सर्गे "ददर्श क्रौञ्चयोस्तत्र मिथुनं चारुदर्शनम् । तस्माच्च मिथुनादेकमागत्यानुपलक्षितः । जघान बद्धानुगयो निषादो हृतनिर्घृणः । तं शोणितपरीताङ्गं वेष्टमानं महीतले । दृष्ट्वा क्रौञ्ची रुरोदार्त्ता करुणं सेपरिभ्रमा । तं तथा निहतं दृष्ट्वा निषादेनाकृतं वने । ऋषेः शिष्यस्तदा कारुण्यं समजायत । ततः करुणवेदित्वाद्धर्म्मात्मा स द्विजोत्तमः ।

निशम्य करुणं क्रौञ्चीं रुदतीं तां जगाविदम् । मा नि-
षाद ! प्रतिष्ठां त्वमगमः शाश्वतीःसमाः । यत्क्रौञ्चमिथुना-
देकमवधीः काममोहितम् । तस्मेदमुक्ता वचनं चिन्तामापत्
तदनन्तरम् । शकुनं शोचता ह्येवं किमेतद्व्याहृतं मया
सुहूर्त्तमिव च ध्यात्वा वाक्यं तत् प्रविस्मृत्य च । शिष्यमाह
स्थितं पार्श्वे भारद्वाजमिदं वचः । पादैश्चतुर्भिः संयुक्तमिदं
वाक्यं समाक्षरैः । शोचतोक्तं मया यस्मात् तस्माच्छ्लोको
भवत्विति" । एवं चिन्तयतस्तस्याश्रमे स्वयं ब्रह्मणागत्यो-
पदिष्टम् । "महर्षे ! यदयं प्रोक्तस्त्वया क्रौञ्चवधाश्रयः ।
श्लोक एवास्त्वयं बन्धस्तव वाक्यस्य शोचतः । चकार ना-
देव ते ब्रह्मन् ! प्रवृत्तेयं सरस्वती । रामस्य चरितं कृत्स्नं
कुरुत्वमृषिसत्तम" ! इत्युपदिष्टस्य वाल्मीकेःरामायणरचने-
मतिरभूत् यतोऽहं तत्रैव । "तस्य बुद्धिरभूत् तत्र वाल्मी-
केरथ धीमतः । कृत्स्नं रामायणं श्लोकैरीदृशैः करवाण्यहम्"
इत्येवमभिनिवेशं कृत्वा कृत्स्नं रामायणं कृतमिति सर्गशेषे तत्रैवोक्तम् "ततः स रामस्य चकार कीर्तिमान्।
समाक्षरैः श्लोकशतैर्यशस्विनो यशस्करं काव्यमुदा-
रधीः परम्" । इह लोके चतुष्पादश्लोकस्यादौ तेनैव प्रचा-
रणात् तत्कृतकाव्यस्यादिकाव्यत्वम् । वेदे तु बहूनामनुष्टु-
प्छन्दस्कानां श्लोकानां सत्त्वेऽपि लोके प्रथमप्रचारा
भावात्तस्याद्यत्वम् । तेन "ईशा वास्यमिदं सर्व्वं यत् किञ्च
जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य
स्विद्धनम्" इत्युपक्रमे "असुर्यानाम ते लोका अन्धेन तमसा
वृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः"
इत्यादयः श्लोकाः शु०य० वे० ४० अध्याये पठिताः ।
एवम् ऋग्वेदादावपि बहवः तथाविधाः सन्ति" तथा
च वेदे सत्त्वेऽपि लोके तेन प्रथमप्रचारणात्तस्याद्यकाव्यत्वम् । यत् तु उत्तरचरिते "चित्रमाम्नायाद-
न्योऽयं नूतनश्छन्दसामवतार" इति वर्णितम् तत् यथा
श्रुतार्थेऽसङ्गतमेव । अन्यः लोकविद्विषाक्यादित्यध्याहारेण
आम्नायात् आम्नायं वेदं मूलत्वेन प्राप्य छन्दसां
नवावतारइति व्याख्याने तु न कोऽपि दोष इति युक्तम् ।

आदिकेशव पु० कर्म० काशीस्थे केशवमूर्त्तिभेदे "आदिकेशव
पूर्व्वेण स्वयमादित्यकेशवः" "आदिकेशवसख्यांश्च केश-
वान् परितोष्य च" इति च काशी० ।

आदिगदाधर पु० १काशीस्थे विष्णुमूर्त्तिभेदे 'दत्तात्रये-
श्वरात् पूर्व्वमेव आदिगदाधर' इति काशी० २६ अ० ।
२गयातीर्थस्थे विष्णुमूर्त्तिभेदे च । "आद्येन गदया चासौ
यस्माद्दैत्यः स्थिरीकृतः । स्थित इत्येव हरिणा तस्मादादि
गदाधरः" इति वायु० गया० २अ० तन्नामनिरुक्तिः उक्ता ।
"गयाशिरस्यादवित्वा गुरुत्वादास्थिता शिला । काला-
न्तरेण व्यक्तश्च स्थित आदिगदाधरः । तथा व्यक्तोऽव्यक्त
रूपी आसीदादौ गदाधरः । आदिरादौ पूजितोऽत्र
देवैर्ब्रह्मादिभिर्यतः । पाद्यार्घगन्धपुष्पाद्यैरत आदि
गदाधरः" इति गारु० पु० निरुक्तिः । "आगत्य विष्णुः
क्षीराब्धेः शिलायां संस्थितोऽभवत् । शिलायां स्थितत्वाय
स्वयमादिगदाधरः" वायुपुराणम् ।

आदिजिन पु० कर्म० स० । ऋषभदेवे हेम० ।

आदितस् अव्य० आदि+तसि । १आदौ इत्यर्थे "पतीन् प्र-
जानामसृजन्महर्षीनादितोदशं" मनुः । आद्या० पञ्चम्या-
स्तसिः । २आदेरित्यर्थे च । "इदं शास्त्रन्तु कृत्वादौ मामेवं
स्वयमादितः" मनुः आदित आदिमारभ्येत्यर्थः ।

आदिताल पु० कर्म्म० । "एकएव लघुर्यत्र आदितालः स
लघ्यते । गुरुस्तत्परतोवाच्यः प्रायेणैतद्विदर्शनम्" सङ्गी-
तशास्त्रवर्णिते तालभेदे ।

आदितेय पु० अदितेरपत्यम् ढक् । १सुरमात्रे २सूर्य्ये
च अदितिजगद्धे विवृतिः पृ० २१५ । "यदेनमदधुर्यज्ञि-
यासो दिवि देवाः सूर्य्यमादितेयम्" ऋ० १०, ८८, ११ ।

आदित्य पु० अदितेरपत्यं ण्य । १देवमात्रे "तस्मा आदित्याश्च
विश्वे च देवास्तृतीयसवने संप्रयन्ति" छा० उ० ।
२सूर्य्ये च "आदित्योग्निश्चेत्यादेशः" छा० उ० "जिगी-
षुरेष दिनऊदादित्येष्विव कल्पते इति" माघः । "अमी-
च कवयमादित्याः प्रतापज्वलितौजसः" कुमा० । ३तद-
धिष्ठिते गगने दिवामिशं बंभ्रुस्थमाने लोकप्रकाशकरे तेजो
मण्डले च "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" मनुना
अग्निहुतद्रव्याणां हविराज्यादीनां परमाणुभावतयाऽव-
स्थितानां दग्धशेषाणां सूर्य्यरश्मिनाकर्षणेन सूर्य्यलोक-
प्राप्त्या दृष्टिहेतुत्वसङ्गम् तच्च मण्डलार्थपरत्वएव सम्भवति
"अथ यदेतदादित्यस्य शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं
तद्रूपम्" "अथ यदेवैतदादित्यस्य शुक्लं भाः सैवसा, अथ
यन्नीलं कृष्णं तदम" इति च छा० उ० । अत्र शुक्लकृष्णभा-
युक्ततया मण्डलपरत्वं गम्यते । "असौ वा आदित्यो देवमधु"
छा० उ० अत्र च मण्डलपरत्वम् उत्तरत्र आकाशे रश्मिसम्बन्ध
कीर्त्तनात् स्पष्टमेव । "ज्योतिश्चरणाभिधानात्" या० सू०
भाष्ये च चक्षुर्वृत्तेर्निरोधकं मार्त्तण्डादिकं तमउच्यते तस्मा

एवानुग्राहकमादित्यादिकं ज्योतिः" इत्यादित्यस्य चक्षुर्ग्रहणेरनुग्राहकतया ज्योतिःपदार्थपरत्वमुक्तम् । ४आदित्यमण्डलान्तर्गते हिरण्मयपुरुषे" विष्णौ "स्वयंभूः शम्भुरादित्यः" विष्णुस० । विष्णोरादित्यशब्दशक्त्यत्वे कारणमुक्तं भाष्ये यथा "आदित्यमण्डलान्तःस्थोहिरण्मयः पुरुष आदित्यः, द्वादशादित्येषु विष्णुर्वा, "आदित्यानामहं विष्णुरिति"श्रुतेः, अदितेरखण्डिताया महत्या अयं पतिरिति वा "इयं वा अदितिर्मही" "देवी विष्णुपत्नीति" श्रुतेः यथादित्यएकएवानेकजलेष्वनेकवत् प्रतिभासते एवमनेकेषु शरीरेषु एकएवानेकवत् प्रतिभासत इत्यादित्यसाधर्म्याद्वा आदित्यः" तत्र हिरण्मयपुरुषस्य सूर्य्यमण्डलमध्यवर्त्तित्वे च "य एषोऽन्तरादित्ये हिरण्मयः पुरुषोदृश्यते हिरण्यश्मश्रुः हिरण्यकेश आप्रणखात् सर्वएव सुवर्णः" इति छां०उ० श्रुतिर्मानम् "अथ य एषोऽन्तरादित्ये आदित्यस्यान्तर्मध्ये हिरण्मयो हिरण्मय इव हिरण्मयो नहि सुवर्णविकारत्वम् देवस्य सम्भवति, ऋक्सामगेषणत्वापहतपाप्मत्वासम्भवात् । नहि सोवर्णेऽचेतने पाप्मादिप्राप्तिरस्ति येन प्रतिषिध्येत चाक्षुषे चाक्षुषत्वात् । अतो लुप्तोपम एव हिरण्मयशब्दो ज्योतिर्मय इत्यर्थः । उत्तरेष्वपि समाना योजना । पुरुषः पुरि शयनात्, पूरयति वा स्वेनात्मना जगदिति । दृश्यते निष्टप्तचक्षुर्भिः समाहितचेतोभिर्ब्रह्मचर्य्यादिसाधनापेक्षैः । तेजस्विनोऽपि श्मश्रुकेशादयः कृष्णाः स्मर्य्यन्ते विशिनष्टि हिरण्मयश्मश्रुर्हिरण्यकेश इति । ज्योतिर्मयान्येवास्य श्मश्रूणि केशाश्चेत्यर्थः" शाङ्करभाष्यम् । उपासकानामतिवाहनाय ईश्वरनियुक्ते अर्चिरादिमार्गस्थिते आतिवाहिके देवभेदे च "संवत्सरादादित्यमादित्याच्चन्द्रमसम्" छा०उ० । आदित्याश्च द्वादश यथोक्तं विष्णुधर्मोत्तरे भारते च "धाता मित्रोऽर्य्यमा रुद्रो वरुणः सूर्य्य एव च । भगो विवस्वान् पूषा च सविता दशमः स्मृतः । एकादशस्तथा त्वष्टा विष्णुर्द्वादश उच्यते" इति विष्णुध० । "धाताऽर्य्यमा च मित्रश्च वरुणोऽंशुर्भगस्तथा । इन्द्रो विवस्वान् पूषा च पर्জ্জन्यो दशमः स्मृतः । ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यज" इति भा०आ०प० कल्पभेदादनयोर्व्यवस्था । मासभेदे आदित्यभेदा आदित्यहृदये दर्शिता यथा "अरुणो माघमासे तु सूर्य्यो वै फाल्गुने तथा । चैत्रे मासि च वेदज्ञो वैशाखे तपनः स्मृतः । ज्यैष्ठे मासि तपेदिन्द्रः आषाढे तपते रविः । गभस्तिः श्रावणे मासि यमोभाद्रपदे तथा । आश्वे हिरण्यरेताश्च कार्त्तिके च दिवाकरः । मार्गशीर्षे तपेद्भित्रः पौषे विष्णुः सनातनः । इत्येते द्वादशादित्याः काश्यपेयाः प्रकीर्त्तिताः" । ६अर्कवृक्षे पु० । आदित्यस्यापत्यम् यञ् यलोपः । ७आदित्यापत्ये पुंस्त्री० ।

आदित्यकेतु पु० धृराष्ट्रपुत्रभेदे तद्गणनायां भा०आ०प० ६७ अ० । "आदित्यकेतुर्बह्वाशी नागदत्तानुयायिनौ" ६त० । आदित्यस्य केतौ अरुणे ।

आदित्यकेशव पु० आदित्यपूजितः केशवः । काशीस्थे "केशवमूर्त्तिभेदे "आदिकेशवपूर्व्वेण स्वयमादित्यकेशवः" काशीख० ।

आदित्यपत्र पु० आदित्यस्य अर्कवृक्षस्य पत्रमिव पत्रमस्य । क्षुपभेदे । ६त० । अर्कवृक्षपत्रे न० ।

आदित्यपर्णिनी स्त्री आदित्यवर्णं नित्यं पर्णमस्त्यस्या इनि । "मूलिनी पञ्चभिः पत्रैः सुरक्ता शुकसोमलैः । आदित्यपर्णिनी ज्ञेया सदादित्यानुवर्णिनी" "आदित्यपर्णिनी ज्ञेया तथैव हि हिमत्वये" सुश्रुतोक्तलक्षणायामोषधौ ।

आदित्यपुराण न० आदित्येनोक्तं पुराणम् । उपपुराणभेदे । उपपुराणगणनायाम् "माहेश्वरं तथा साम्बं सौरं पाराशराह्वयम्" । कौर्म्मे सौरत्वेनेदं पठितम् । मत्स्यपुराणे तु "यत्र साम्बं पुरस्कृत्य भविष्योत्पत्तिकथानकम् । प्रोच्यते तत्पुनर्लोके साम्बमेव शुचिव्रतम् । एवमादित्यसंज्ञं च तत्रैव परिपठ्यते" आदित्यसंज्ञमित्युक्तं देवीपु० "पराशरोक्तमपरं भारीचं भास्कराह्वयम्" भास्करत्वेनोक्तं तथा चादित्यपुराणस्यैव नामान्तरं सौरं भास्करश्चेत्यादि । अधिकमुपपुराणशब्दे वक्ष्यते । एतदीयप्रतिपाद्यविषयाः सौरशब्दे दृश्याः ।

आदित्यपुष्पिका स्त्री आदित्यवर्णं रक्तं पुष्पमस्याः । रक्तपुष्पे अर्कवृक्षे । [वल्लभायाम् ओषधौ ।

आदित्यभक्ता स्त्री आदित्ये भक्ता । (छड्डुड़िया) अर्क-

आदित्यव्रत न० आदित्यस्य तदुपासनार्थं व्रतम् । सूर्य्योपासनार्थे व्रतभेदे । आदित्यव्रतस्य ब्रह्मचर्य्यमस्य ठञ् । आदित्यव्रतिकः तद्व्रतार्थब्रह्मचर्य्ययुक्ते त्रि० ।

आदित्यसूनु पु० ६त० । सूर्य्यपुत्रे १सुग्रीवे २कर्णे ३यमे ४शनैश्चरे च अरुणात्मजशब्दे विवृतिः दृ० ।

आदित्सु पु०आ+दा-सन्-उ । ग्रहीतुमिच्छौ, "आदित्सुभिर्नूपुरशिञ्जितानि" कुमा० ।

आदिदेव पु० आदौ द्योतते स्वयं राजते दिव-अच् ७त० । १नारायणे २शिवे । आदिः कारणं देवः । ३आदिकारणे परमात्मनि । "सहात्मा मया योव आदिदेव

उदाहृतः" या० स्मृ०। "पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम्" गीता। "वासुदेवो हृषीकेशानुरादिदेवः पुरन्दरः" विष्णुस० "आदिः कारणं देव इत्यादिदेवः दानादिगुणवान् वा" भा० "देवोदानात्दीपनात् भवतीति" यास्कोक्तदेवशब्दनिरुक्तिमाश्रित्य भाष्ये तथोक्तम्।

आदिदैत्य पु० कर्म्म०। हिरण्यकशिपौ दैत्ये तस्य दैतेः प्रथमजत्वात्तथात्वम्। "एक एव दितेः पुत्रः हिरण्यकशिपुः पुरा" भा० आ०प०६५ अ०। आदिदैत्योमहावीर्य्यो हिरण्यकशिपुः पुरा" भा०व०प० १०४ अ०।

आदिन् त्रि० अत्तीति अद-णिनि। भक्षके। स्त्रियां ङीप्।

आदिनव पु० आदीनवस्य पृ०वेदे ह्रस्वः। आदीनशब्दार्थे "आदिनवं प्रतिदीव्ने दृतेनार्षां अभिश्वर" ऋग्०७,११०,४।

आदिपर्व्वन् न० आदि आद्यं पर्व्व। महाभारतान्तर्गते आद्ये पर्व्वणि। "इत्येतदादिपर्वोक्तं प्रथमस्यद्यविस्तरम्" भा०आ०।

आदिपुराण न० आदि आद्यं पुराणम् कर्म्म०। पुराणभेदे सर्वेषामष्टादशानां पुराणानामुपपुराणानाञ्चादिभूते चतुर्लक्षात्मके ब्रह्मनिर्म्मिते पुराणभेदे। नारदपुराणे उपसंहारपादग्रन्थे मरीचिं प्रति ब्रह्मवाक्यम् "अष्टादशमनौपम्य सारात् सारतरं द्विज!। ब्रह्माण्डञ्च चतुर्लक्षं पुराणत्वेन पठ्यते। तदेव व्यस्य गदितमष्टादशधा पृथक्। पाराशर्य्येण मुनिना सर्वेषामपि मानद"। वस्तुप्रहाय तेनैव मुनीनां भावितात्मनाम्। मत्तः श्रुत्वा पुराणानि लोकेभ्यः प्रचकाशिरे। मुनयो धर्म्मशीलास्ते दीनानुग्रहकारिणः। मया चेदं पुराणन्तु वसिष्ठाय पुरोदितम् तेन शक्तिसुतायोक्तं जातूकर्ण्याय ते न च। व्यासोलब्ध्वा ततश्चैतत् प्रभञ्जनसुखोद्गतम्। प्रमाणीकृत्य लोकेऽस्मिन् प्रावर्त्तयदनुत्तमम्" तथा च व्यासोक्तब्रह्माण्डन्तु द्वादशसाहस्रं तस्यैव संक्षेपार्थप्रतिपादकम्। एवञ्च तस्यैव चतुर्लक्षात्मकस्य सर्वपुराणमूलतया आद्यत्वात् आदिपुराणत्वम्। देवलोके तु आदिपुराणस्य शतकोटिश्लोकात्मकता यथोक्तं तत्रैव। प्रथमपादे मरीचिं प्रति ब्रह्मवाक्यम्। "शृणुवत्स! प्रवक्ष्यामि पुराणानां समुच्चयम्। यस्मिन् ज्ञाते भवेज्ज्ञातं वाङ्मयं सचराचरम्। पुराणमेकमेवासीत् सर्वकल्पेषु मानद!। चतुर्वर्गस्य बीजञ्च शतकोटिसुविस्तरम्। प्रवृत्तिः सर्वशास्त्राणां पुराणादभवत्ततः। कालेन ग्रसनं दृष्ट्वा पुराणस्य महामतिः। कृष्णद्वैपायनो व्यासः स्वरूपेण जायते च युगे युगे। चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा। तदष्टादशधा कृत्वा भूलोके निर्दिशत्यपि। अद्यापि देवलोके तु शतकोटिसुविस्तरम् अस्त्येव तस्य सारस्तु चतुर्लक्षेण वर्त्तते" एवञ्च तदानीं लोकप्रसिद्धचतुर्लक्षात्मकस्य ब्रह्माण्डनामकपुराणान्तरस्यैव व्यासप्रणीत चतुर्लक्षात्मकाष्टादशपुराणानामादिभूतत्वादादिपुराणत्वेन प्रसिद्धमासीत्। तच्च क्रमशउच्छिन्नप्रायं संक्षत शालायान्तु तस्य खल्वांशमात्रस्य सत्त्वेऽपि सर्वांशस्य प्रायशः कृत्स्नापीदानीमलाभात् न तत्तत्प्रतिपाद्यविषया वर्णयितुं शक्याः। हेमाद्रि माधवादिभिरादित्यपुराणनाम्ना बहूनि वचनानि लिखितानि। तेषां काले च तत्पुराणस्य प्रचार आसीत् क्रमश इदानीमुच्छिन्नप्रचारतया समग्रलाभासम्भवः इति तत्तत्प्रतिपाद्यविषयप्रदर्शनादुपरतमस्माभिः।

आदि(पु)पूरुष पु० आदौ पुरि देहे वसति वस-उषन् स्वेनात्मना पूरयति जगत् पूर-उषन् वा पृ०वा ह्रस्वः। आदिजीवे १हिरण्यगर्भे २नारायणे च। "ते च प्रादुरुदन्वन्तं बुबुधे चादिपु(पू)रुषः" रघुः। "दैत्येश्वरसभां गत्वा पाणिं संस्पृश्य पाणिना। दैत्यानामादिपुरुषः सुरारिरिति नन्दनः" भा०व०प०२७१अ०। ह्रस्वाभावे पूरुषोऽप्यत्र "तमर्य्यमर्षादिकयादिपूरुषः" माघः।

आदिभव पु० आदौ भवतीति भू-अच्। १हिरण्यगर्भे "हिरण्यगर्भः समवर्त्तताग्रे" इति श्रुतौ तस्याग्रभवत्वोक्तेः तथात्वम्। २सर्व्वस्यादिः कारणं भवति। सर्व्वस्य कारणभूततयाविर्भूते ३विष्णौ च "रसातलादादिभवेन पुंसा" रघुः २अग्रजमात्रे त्रि०।

आदिम त्रि० आदौ भवः आदि+डिमच्। आदौ भवे।

आदिमत् त्रि० आदिरस्यास्य मतुप् स्त्रियां ङीप्। आदियुक्ते १सकारादे २ आदिसीमायुक्ते च।

आदिराज पु० आदिराद्योराजा टच् समा०। पृथुनामके नृपतौ तस्य राज्ञामादित्वात्तथात्वम् तत्कथा भाग०४स्क० "अथ तस्य पुनर्विप्रैरुदस्य महीपतेः। बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्यत। तदृष्ट्वा मिथुनं जातं विन्यया ब्रह्मवादिनः। ऊचुः परमसंतुष्टा विदित्वा भगवत्कलाम्। एष विष्णोर्भगवतः कला भुवनपालिनी। इयञ्च लक्ष्मीसंभूतिः पुरुषस्यानपायिनी। क्षत्रियः प्रथमो राज्ञां पुमान् प्रथयिता यशः। पृथुर्नाम महाराजोभविष्यति पृथुश्रवाः"। तस्य वेणस्येत्यर्थः।

आदिवराह पु० आदिरादौ वराहः। यज्ञवराहरूपेणाविर्भूते विष्णोरवतारभेदे तत्कथा "ततो महात्मा मनसा दिव्यं रूपमचिन्तयत्। किं नु रूपमहं

ङ्गत्वा उद्धरेयं वसुन्धराम्। जले निमग्नां धरणीं येनाहं वै समुद्धरे। इति सञ्चिन्त्य मनसा हरिर्नारायणः प्रभुः। जलक्रीडारुचिस्तस्याहाराहं वपुरक्षरत्। हरिरुद्धरणे युक्तस्तदाऽभूदस्य भूमिधृक्। अधश्च सर्व्वभूतात्मा वाङ्मयं ब्रह्मसंज्ञितम्। दशयोजनविस्तारमुच्छ्रितं शतयोजनम्। नीलजीमूतसङ्काशं मेघस्तनितनिस्वनम्। गिरिसंहननं भीमं श्वेतदीप्तोग्रदंष्ट्रिणम्। विद्युदग्निप्रकाशाक्षमादित्यसमतेजसम्। पीनदृत्तायतस्कन्धं दृप्तशार्दूलविक्रमम्। पीनोन्नतकटीदेशं दृप्तलक्षणलक्षितम्। रूपमास्थाय विपुलं वाराहममितं हरिः। पृथिव्युद्धरणार्थाय प्रविवेश रसातलम्। वेदपादो यूपदंष्ट्रः क्रतुहस्त्वचितीमुखः। अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः। अहोरात्रेक्षणधरो वेदाङ्गश्रुतिभूषणः। आज्यनासः स्रुवतुण्डः सामघोषस्वनो महान्। सत्यधर्म्ममयः श्रीमान् क्रतुविक्रमसत्कृतः। क्रियाकलमहाघोषः पशुजानुर्म्महाकृतिः। उद्गात्रन्त्रो होमलिङ्गो वीर्य्यौषधिमहाफलः। वायुन्तरात्मा सत्रस्फिक् विकृतः सोमशोणितः। वेदिस्कन्धो हविर्गन्धो हव्यकव्यातिवेगवान्। प्राग्वंशकायो द्युतिमान्नानादीक्षाभिरन्वितः। दक्षिणाहृदयो योगी महासत्रमयो महान्। उपाकर्मौष्ठरुचकः प्रवर्ग्यावर्त्तभूषणः। नानाच्छन्दोगतिपथो गुह्योपनिषदासनः। छायापत्नीसहायो वै मणिशृङ्ग इवोच्छ्रितः। भूत्वा यज्ञवराहोऽसौ द्रागधः प्राविशद्भुवः। अद्भिः सञ्छादितास्तुर्व्वीं स तामार्च्छत् प्रजापतिः। रसातलजले मग्नां रसातलतलं गतः। प्रभुर्लोकहितार्थाय दंष्ट्राग्रेणोज्जहार गाम्। ततः स्वस्थानमानीय पृथिवीं पृथिवीधरः। समोच पूर्व्वं सहसा धारयित्वा धराधरः। ततो जगाम निर्व्वाणं मेदिनी तस्य धारणात्। चकार च नमस्कारं तस्मै देवाय विष्णवे। एवं यज्ञवराहेण भूत्वा लोकहितार्थिना। उद्धृता पृथिवी देवी सागराम्बुधरा पुरा" हरिवं० २२४ अ०।

आदिविद्वस् पु० आदिरादौऽखिलसम्प्रदायप्रवर्त्तकत्वात् विद्वान्। सांख्यशास्त्रकारके सर्वसम्प्रदायप्रवर्त्तके उपासनयासिद्धे जगत्कर्त्तरि कपिले। "आदिविद्वान् सिद्ध" इति कापिलाः" कुसुमा० कपिलशब्दे विवृतिः।

आदिशक्ति स्त्री आदिराद्या शक्तिः। परमेश्वरस्य १मायारूपशक्तौ २देवीमूर्त्तिभेदे च। आद्याशब्दे विवृतिः।

आदिशरीर न० आदि आद्यं शरीरम्। भोगार्थं परमेशसृष्टे आद्ये लिङ्गाख्ये शरीरे। "अयमादिशरीरेण देवसृष्टेन मानवः। शुभानामशुभानाञ्च कुरुते सञ्चयं महत्। आयुषोऽन्ते प्रहायेदं लोकप्रायं कलेवरम्। संभवत्येव युगपद्यतो नास्त्यन्तरा भवः। तत्रास्य स्वकृतं कर्म्म ह्यावेवानुगतम् तदा। फलत्यथ सुखार्हो वा दुःखार्हो वाऽथ जायते" भा० व० प० १८४ अ०। आदि कारणं शरीरं कर्म०। २अविद्याख्ये २सूक्ष्मशरीरे च वेदान्तिमते शरीरं त्रिविधं कारणसूक्ष्मस्थूलभेदात् तत्राविद्यावाः कारणशरीरत्वं सर्वकारणत्वात् विद्यया शीर्य्यमाणत्वाच्च अविद्यां प्रकृत्य "सा कारणशरीरं स्यात्" पञ्चद०। [त्यर्थे च।

आदिश्य अव्य० आ+दिश-ल्यप्। १अनुशिष्यत्यर्थे २उक्त्वे-

आदिष्ट न० आ+दिश-भावे क्त। १आज्ञायाम्, २उपदेशे च। कर्म्मणि क्त। ३उपदिष्टे, ४व्याकरणप्रसिद्धे स्थानिजाते वर्णे च त्रि० यथा इकः स्थाने यण् आदिश्यते इति इकोयणादिष्टइत्युच्यते। ५आज्ञप्ते ६उक्तिष्टे ७अनुशिष्टे च त्रि० "उपपातकयुक्तानामनादिष्टेषु चैव हि" विष्णु०।

आदिष्टिन् पु० आदिष्टमादेशोव्रतादेशः अस्त्यस्य इनि। व्रतादेशोयस्य कृतसाङ्गे, ब्रह्मचारिणि। "आदिष्टी नोदकं कुर्य्याद्वा व्रतस्य समापनात्" मनुः आदिष्टं व्रतादेशोऽस्त्यस्येति आदिष्टी ब्रह्मचारी" कुल्लू०। आदिष्टमनेन दृष्टा० इनि। २आदेशकर्त्तरि त्रि० स्त्रियां ङीप्।

आदिसर्ग पु० कर्म्म०। प्राकृतप्रलयोत्तरं प्रथमसृष्टौ "अव्यक्तात् पूर्व्वसत्पन्नो महानात्मा महामतिः। आदिर्गुणानां सर्वेषां प्रथमः सर्ग उच्यते। महानात्मा मतिर्विष्णुर्जिष्णुः सत्यश्च वीर्य्यवान्। बुद्धिः प्रज्ञोपलब्धिश्च तथा ख्यातिर्धृतिः स्मृतिः। पर्य्यायवाचकैः शब्दैर्म्महानात्मा विभाव्यते। तं जानन् ब्राह्मणो विद्वान् प्रभोर्हं नाधिगच्छति। सर्व्वतः पाणिपादश्च सर्व्वतोऽक्षिशिरोमुखः। सर्व्वतःश्रुतिमान् लोके सर्व्वं व्याप्य स तिष्ठति। महाप्रभावः पुरुषः सर्व्वस्यैव हि निश्चितः। अणिमा लघिमा प्राप्तिरीशानो ज्योतिरव्ययः। तत्र बुद्धिविदो लोके सद्भावनिरताश्च ये। ध्यानिनो नित्ययोगाश्च सत्यसन्धा जितेन्द्रियाः। ज्ञानवन्तश्च ये केचिदनुज्ञा जितमन्यवः। प्रसन्नमनसो धीरा निर्म्मा निरहङ्कृताः। विमुक्ताः सर्व एवैते महत्त्वमुपयान्त्युत। आत्मनो महतो वेद यः पुरुषां गतिमुत्तमाम्। अहङ्कारात् प्रसूतानि महाभूतानि पञ्च वै। पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम्। तेषु भूतानि युज्यन्ते महाभूतेषु पञ्चसु। ते शब्दस्पर्शरूपेषु रसगन्धक्रियासु च।

महाभूतविनाशस्तु प्रलये प्रत्युपस्थिते। सर्व्वप्राणभृतां धीरा महदुत्पद्यते भयम्। स धीरः सर्व्वलोकेषु न मोहमधिगच्छति। विष्णुरेवादिसर्गेषु स्वयम्भूर्भवति प्रभुः। एवं हि यो वेद गुहाशयं प्रभुं परं पुराणं पुरुषं विश्वरूपम्। हिरण्मयं बुद्धिमतां परां गतिं स बुद्धिमान् बुद्धिमतीत्य तिष्ठति" भा०आद्य०प०अ०४०। स च सर्गः दशविधः प्राकृतः षड्विधः, वैकृतस्त्रिविधः, उभयात्मक एकविधः इति भेदात् तद्विपरीतम्" भाग०२स्क०१०अ०। "विश्वं वै ब्रह्म तन्मात्रं संस्थितं विष्णुमायया। ईश्वरेण परिच्छिन्नं कालेनाव्यक्तमूर्त्तिना १२। यथेदानीं तथाग्रे च पश्चादप्येतदीदृशम् १३। सर्गोनवविधस्तस्य प्राकृतोवैकृतश्च यः। कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रयः १४। आद्यस्तु महतः सर्गोगुणवैषम्यमात्मनः। द्वितीयस्त्वहमोयत्र द्रव्यज्ञानक्रियोदयः १५। भूतसर्गस्तृतीयस्तु तन्मात्रोद्रव्यशक्तिमान्। चतुर्थ ऐन्द्रियः सर्गो यस्तु ज्ञानक्रियात्मकः १६। वैकारिको देवसर्गः पञ्चमोयन्मयं मनः। षष्ठस्तु तमसः सर्गोयस्तु बुद्धिकृतः प्रभोः १७। षडिमे प्राकृताः सर्गा वैकृतानपि मे शृणु रजोभाजो भगवतोलीलेयं हरिमेधसः १८। सप्तमोमुख्य सर्गस्तु षड्विधस्तस्य वाह्य यः। वनस्पत्योषधिलतात्वक् सारावीरुधो द्रुमाः१९। उत्स्रोतसस्तमःप्राया अन्तःस्पर्शा विशेषिणः२०। तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधोमतः। अविदो भूरितमसो ब्राणज्ञा हृद्यवेदिनः२१। गोरजोमहिषः क्षत्राः शूकरो गवयोरुरुः। द्विशफाः पशवश्चैमे अविरुष्ट्र्य सप्तम। खरोऽश्वोऽतरोगौरः शरभश्चमरी तथा एते चैकशफाः क्षत्तः। शृणु पञ्चनखान् पशून्२२। श्वा शृगालोवृकोव्याघ्रोमार्जारः शशशल्लकौ। सिंहः कपिगजः कूर्म्मो गोधा च मकरादयः। कङ्कगृध्रबकश्येनभासभल्लकबर्हिणः। हंससारसचक्राह्वकाकोलूकादयः खगाः२३। अर्व्वाक्स्रोतस्तु नवमः क्षत्तरेकविधोनृणाम्। रजोऽधिकाः कर्म्मपरा दुःखे च सुखमानिनः२४। वैकृतास्त्रयएवैते देवसर्गश्च सत्तम। वैकारिकस्तु यः प्रोक्तःकौमारस्तूभयात्मकः२५। देवसर्गश्चाष्टविधोविबुधाः पितरोऽसुराः। गन्धर्व्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः। भूतप्रेतपिशाचाश्च विद्याधाः किन्नरादयः। दशैते विदुराख्याताः सर्गास्ते विश्वसृक्कृताः"। "स्वव्यतिरिक्तसृज्याभावं दर्शयन् कालस्य सृष्टिनिमित्ततां दर्शयति विश्वमिति। विष्णुमायया संस्थितं संहृतम्। ब्रह्म तन्मात्रं सत विश्वं ईश्वरेण कर्त्रा कालेन निमित्तेन परिच्छिन्नं पृथक् प्रकाशितम्। अव्यक्ता मूर्त्तिः स्वरूपं यस्येति स्वतोनिर्ब्भिन्नेषता दर्शिता १२। अप्रतिष्ठत्वं दर्शयितुं तत्कार्य्यविश्वप्रवाहस्याप्रतिष्ठामाह यथेदानीमस्ति तथाग्रे पूर्व्वमप्यासीत्। पश्चादपि तथा भविष्यति १३। एवं सामान्यतः कालं निरूप्य विशेषतो निरूपयिष्यन् तन्निमित्तस्य पूर्व्वसर्गस्य पूर्व्वोक्तानेव भेदान् अनुवदति सर्गइति। यस्तु प्राकृतोवैकृतश्च स तु दशमः तन्निमित्तमेव त्रिविधं प्रलयमाह कालेनैव बलेन नित्यप्रलयः द्रव्येण सङ्घर्षसुखाम्बुदादिना नैमित्तिकः गुणैः स्वस्वकार्य्यसङ्घैः प्राकृतिकः १४। तानेव सर्गान् प्रपञ्चयति। आद्य इत्यादिना यावदध्यायसमाप्ति। महतो लक्षणम् आत्मनोहरेः सकाशात् गुणानां वैषम्यमिति। अहमः अहङ्कारस्य। तस्य लक्षणं यत्रेति। द्रव्यादयोवक्ष्यमाणास्त्रयः सर्गाः १५ तन्मात्रो भूतसर्गः। ततःसूक्ष्मसर्ग इत्यर्थः। द्रव्यशक्तिमान् महाभूतोत्पादकः ज्ञानकर्म्मेन्द्रियात्मकश्चतुर्थः १६। पञ्चमोवैकारिकः। इन्द्रियाधिष्ठातारोदेवाः मनश्च। षष्ठस्तु तमसः पञ्चपर्व्वाविद्यायाः। अबुद्धिजीवानामावरणम् विक्षेपञ्च तां करोतीत्यबुद्धिकृत् तस्य १७। मे मत्तः शृणु अनुद्वेगेन श्रोतव्यतामाह। यद्विषया मेधा संसारं हरति तस्य हरेर्लीला। यद्वा दृश्यमिति तमआदिसर्गरूपा। रजोभाज इति ब्रह्मरूपस्येत्यर्थः। अस्मिन् पक्षेऽबुद्धिकृत इति प्रथमान्तं अनवधानकृत इत्यर्थः १८। सत्त्वमिव प्रथमं कृतःसत्त्वः सर्गः। तस्यृषां स्थावराणाम्। षड्विधमेवाह। ये पुष्पं विना फलन्ति ते वनस्पतयः। ओषधयः फलपाकान्ताः। लताः आरोहणापेक्षाः। त्वक्सारा वेणुवेतसादयः। लता एव काठिन्येनारोहणानपेक्षा वीरुधः। ये पुष्पैः फलन्ति ते द्रुमाः १९। तेषां साधारणलक्षणमाह ऊर्द्ध्वंस्रोत आहारसञ्चारो येषाम्। तमःप्राया अव्यक्तचैतन्याः। अन्तःस्पर्शमेव जानन्ति नान्यत् तदन्तरेव न बहिः। विशेषिणः अव्यवस्थितपरिणामाद्यनेकभेदवन्तः २०। तिर्य्यक्स्रोतसां सर्गमाह तिरश्चामिति। स चाष्टाविंशतिभेदः। तिरश्चां लक्षणम् अविदः स्वजनादिज्ञानशून्याः। भूरितमसः आहारादिमात्रनिष्ठाः। ब्राणज्ञाः ब्राणेनैवेष्टमर्थं जानन्ति हृदि अवेदिनः दीर्घानुसन्धानशून्याः। तथा च श्रुतिः। "अथेतरेषां पशूनाम् अशनायिपासे एवाभिज्ञानं न विज्ञातं वदन्ति न विज्ञातं पश्यन्ति न विदुः स्वजनं न लोकालोकाविति" २१। अष्टाविंशतिभेदानाह

गवादयश्चत्वारः द्विशफाः द्विखुरानव । खरादयः चमर्यन्ता एकशफाः षट् । श्वादयोगोधान्ताःपञ्चनखा द्वादश२१। एवमेते भूचराः सम्प्रकीर्तिताः । मकरादयोजलचराः कङ्कादयश्च खगाः अभूचरत्वेनैकीकृत्य गृहीताः । तदेवमष्टाविंशतिभेदान् वदन्ति । तेषु कृष्णरुरुगौराः मृगविशेषाः अन्येषामपि तिर्यक्प्राणिनामेतेष्वेव यथायथमन्तर्भावः२२। अध आहारसञ्चारोयस्य सोऽर्वाक्स्रोताः । क्षुद्रमार्यम् । नृणां सर्गः । नृणां लक्षणम् । रजः अधिकं येषु२४। एते त्रयोवैकृताएव न कौमारवदुभयात्मकाः; देवसर्गोवैकृत इत्यनुषङ्गः । वैकारिकस्तु देवसर्गः प्राकृतेषु पूर्वमेव प्रोक्तः; अयन्तु ततोन्यूनत्वाद्वैकृतः; देवसर्गएवन्यूनभूतः; सनत्कुमारादीनान्तु सर्गः; प्राकृतोवैकृतश्च देवत्वेन मनुष्यत्वेन च स्तुत्य इत्यर्थः२५ । वैकृतश्च देवसर्गोऽष्टविधः अत्र विबुधादयस्त्रयोभेदाः गन्धर्वाप्सरसएकः यक्षरक्षांस्येकः । भूतप्रेतपिशाचाएकः सिद्धचारणविद्याध्राः एकः किन्नराएकः आदिशब्दात् किंपुरुषाश्वमुखादयः" श्रीधरव्याख्या ।

एवं सामान्यतः सर्गसङ्गा तत्रैव २६अध्यायेविशेष उक्तः "भगवानुवाच १० । यत्तत् त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् । प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् ११ । पञ्चभिः पञ्चभिः ब्रह्म चतुर्भिर्दशभिस्तथा । एतच्चतुर्विंशतिकं गुणं प्राधानिकं विदुः १२ । महाभूतानि पञ्चैव भूरापोऽग्निर्मरुद्भमः । तन्मात्राणि च तावन्ति गन्धादीनि मतानि मे । इन्द्रियाणि दश श्रोत्रं त्वग्दृग्रसननासिकाः । वाक्करौ चरणौ मेढ्रं पायुर्दशम उच्यते । १३ । मनोबुद्धिरहङ्कारश्चित्तमित्यरात्मकम् । चतुर्धा लक्ष्यते भेदोवृत्त्या लक्षणरूपया १४ । एतावानेव संख्यातो ब्रह्मणः सगुणस्य च । सन्निवेशोमयाप्रोक्तोयः कालः पञ्चविंशकः १५ । प्रभावं पौरुषं प्राहुः कालमेके यतोभयम् । अहङ्कारविमूढस्य कर्तुः प्रकृतिमीयुषः १६ । प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानवि ! । चेष्टा यतः स भगवान् काल इत्युपलक्षितः १७। अन्तः पुरुषरूपेण कालरूपेण यो बहिः । समन्वेत्येष सत्त्वानां भगवानात्ममायया १८ । दैवात् क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान् । आधत्त वीर्यं सासूत महत्तत्त्वं हिरण्मयम् १९ । विश्वमात्मगतं व्यञ्जन् कूटस्थो जगदङ्कुरः । स्वतेजसा पिबन्नीहमात्मप्रस्रापनं तमः २० । यत्तत् सत्त्वगुणं स्वच्छं शान्तं भगवतः पदम् । यदाऽऽत्मान्तर्हृदाख्यं चित्तं तन्महदात्मकम् २१ । स्वच्छत्वमविकारित्वं शान्तत्वमिति चेतसः । वृत्तिभिर्लक्षणं प्रोक्तं यथाऽपां प्रकृतिः परा २२ । महत्तत्त्वाद्विकुर्वाणाद्भगवद्वीर्यसम्भवात् । क्रियाशक्तिरहङ्कारस्त्रिविधः समपद्यत २३ । वैकारिकस्तैजसश्च तामसश्च यतोभवः । मनसश्चेन्द्रियाणाञ्च भूतानां महतामपि २४ । सङ्कल्पविकल्पाख्यं यन्मनन्तं प्रचक्षते । सङ्कर्षणाख्यं पुरुषं भूतेन्द्रियमनोमयम् २५ । कर्तृत्वं करणत्वञ्च कार्यत्वञ्चेति लक्षणम् । शान्तघोर विमूढत्वमिति वा स्यादहङ्कृतेः २६। वैकारिकाद्विकुर्वाणान्मनसस्त्त्वमजायत । यत्संकल्पविकल्पाभ्यां वर्तते कामसम्भवः २७ । यद्विदुर्निरुक्ताख्यं हृषीकाणामधीश्वरम् । शारदेन्दीवरश्यामं संराध्यं योगिभिः शनैः २८ । तैजसात्तु विकुर्वाणाद्बुद्धितत्त्वमभूत् सति ! । द्रव्यस्फुरणविज्ञानमिन्द्रियाणामनुग्रहः २९ । संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च । खाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् ३० । तैजसानीन्द्रियाण्येव क्रियाज्ञानविभागतः । प्राणस्य हि क्रिया शक्तिर्बुद्धेर्विज्ञानशक्तिता ३१ । तामसाच्च विकुर्वाणाद्भगवद्वीर्यसंभवात् । शब्दमात्रमभूत्तस्मान्नभः श्रोतन्तु शब्दगम् ३२ । अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिङ्गत्वमेव च । तन्मात्रत्वञ्च नभसो लक्षणं कवयो विदुः ३३ । भूतानां छिद्रदातृत्वं बहिरन्तरमेव च । प्राणेन्द्रियात्मधिष्ण्यत्वं नभसोवृत्तिलक्षणम् ३४ । नभसः शब्दतन्मात्रात् कालगत्या विकुर्वतः । स्पर्शोऽभवत्ततोवायुस्त्वक् स्पर्शस्तु संग्रहः ३५ । मृदुत्वं कठिनत्वञ्च शैत्यमुष्णत्वमेव च । एतत्स्पर्शस्य स्पर्शत्वं तन्मात्रत्वं नभस्वतः ३६ । चालनं व्यूहनं प्राप्तिर्नैष्ठुर्यं द्रव्यशब्दयोः । सर्वेन्द्रियाणामात्मत्वं वायोः कर्माभिलक्षणम् । वायोश्च स्पर्शतन्मात्राद्रूपं देवेरितादभूत् । सत्तित्रितं ततस्तेजश्चक्षूरूपोपलम्भनम् । द्रव्याकृतित्वं गुणताव्यक्तिसंस्थात्वमेव च । तेजस्त्वं तेजसः साधि ! । रूपमात्रस्य वृत्तयः ३८ । द्योतनं पचनं पानमदनं क्षिमदर्शनम् । तेजसोवृत्तयस्त्वेताः शोषणं क्षुत्तृडेव च । रूपमात्राद्विकुर्वाणात्तेजसोदेवनोदितात् । रसमात्रमभूत्तस्मादम्भो-जिह्वा रसग्रहः ४०। कषायोमधुरस्तिक्तः कटुश्च इति नैकधा । भौतिकानां विकारेण रस एकोविभिद्यते ४१ । क्लेदनं पिण्डनं तृप्तिः प्राणनाप्ययनोद(न्द)नम् । तापापनोदौभूयस्त्वमम्भसो वृत्तयस्त्विमाः ४२ । रसमात्राद्विकुर्वाणादम्भसो देवनोदितात् । गन्धमात्रमभूत्तस्मात् पृथ्वी घ्राणस्तु गन्धगः ४३ । करम्भपूतिसौरभ्यशाक्लोदग्रा-

दिभिः पृथक् । द्रव्यावयववैषम्याद्गन्ध एकोविभिद्यते४४। भावनं ब्रह्मणःस्थानं धारणं सद्विशेषणम् । सर्वसत्व गुणोद्भेदः पृथिवीङ्गित्तिलक्षणम् ४५ । नभोगुणविशेषोऽर्थो यस्य तत् श्रोत्रमुच्यते । वायोर्गुणविशेषोऽर्थो यस्य तत् स्पर्शन विदुः । तेजोगुणविशेषोऽर्थो यस्य तच्चक्षुरुच्यते । अम्भोगुणविशेषोऽर्थो यस्य तद्रसनं विदुः भूमेर्गुणविशेषोऽर्थो यस्य घ्राणः स उच्यते४६ । परस्य ब्रह्मणो धर्मोऽपरस्मिन् समन्वयात् । अतो विशेषो भावानां भूमावेवोपलभ्यते ४७ । एतान्यसंहत्य यदा महदादीनि सप्त वै । कालकर्मगुणोपेतो जगदादिरुपाविशत् ४८ । ततस्तेनानुविद्धेभ्यो युक्तेभ्योऽण्डमचेतनम् । उत्थितं पुरुषो यस्मात् उदतिष्ठदसौ विराट । एतदण्डं विशेषाख्यं क्रमवृद्धैर्दशोत्तरैः । तोयादिभिः परिवृतं प्रधानेनावृतं बहिः । यत्र लोकवितानोऽयं रूपं भगवतोहरेः ५० । हिरण्मयादण्डकोषादुत्थाय सलिलेशयात् । तमाविश्य महादेवो बहुधा निर्विभेद खम्५१। निरभिद्यताक्ष प्रथमं सखं वाणी ततोऽभवत् । वाचश्च वह्निरथो नासे प्राणोतो घ्राण एतयोः ५२ । घ्राणाद्वायुरभिद्येतामक्षिणी चक्षुरेतयोः । तस्मात् सूर्योऽन्वभिद्येतां कर्णौ श्रोत्रं ततोदिशः ५३ । निर्विभेद विराजस्त्वयोमयस्त्वादयस्ततः । ततः ओषधयश्चासन् शिश्नं निर्व्विभिदे ततः । रेतस्तस्मादाप आसन्निरभिद्यत वै गुदम् । गुदादपानोऽपानाच्च मृत्युर्लोकभयङ्करः ५४ । हस्तौ च निरभिद्येतां बलं ताभ्यां ततः खराट् । पादौ च निरभिद्येतां गतिस्ताभ्यां ततोहरिः ५५ । नाड्योऽस्य निरभिद्यन्त ताभ्योलोहितमाप्लुतम् । नद्यस्ततः समभवन्नुदरं समभिद्यत । क्षुत्पिपासे ततः स्यातां समुद्रस्त्वेतयोरभूत् । अथास्य हृदयं भिन्नं हृदयान्मन उत्थितम् ५६ । मनसश्चन्द्रमाजातोबुद्धिर्ब्रह्मैर्गिरांपतिः । अहङ्कारस्ततोरुद्रः चित्तञ्चैत्यस्ततोऽभवत्५७ । एते चान्ये च देवा नैवास्योत्थापनेऽशकन् । पुनराविशुः खानि तस्तत्थापयितुं क्रमात् । वह्निर्वाचा मुखं भेजे नोदतिष्ठत्ततोविराट् । घ्राणेन नासिके वायुर्नोदतिष्ठत्ततो विराट् । अक्षिणी चक्षुराक्रिम्यो नोदतिष्ठत्ततो विराट् । दृक्शाविन्द्रोबलेनैव नोदतिष्ठत्ततो विराट् । विष्णुर्गत्यैव चरणौ नोदतिष्ठत्ततो विराट् । नाड्यैर्नद्यो लोहितेन नोदतिष्ठत्ततो विराट् । क्षुत्तृड्भ्याञ्जठरं सिन्धुर्नोदतिष्ठत्ततो विराट् । बुद्ध्या ब्रह्मापि हृदयं नोदतिष्ठत्ततो विराट् । श्रोत्रेण कर्णौ च दिशोनोतिष्ठत्ततो विराट् । रेतसा शिश्नमापस्तु नोदतिष्ठत्ततो विराट् । गुदं मृत्युरपानेन नोदतिष्ठत्ततो विराट् । रुद्रोऽभिमत्या हृदयं नोदतिष्ठत्ततो विराट् । चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्यदा । विराट् तदैव पुरुषः सलिलादुदतिष्ठत ५९ । यथा प्रसुप्तं हृदयं प्राणेन्द्रिय मनोन्वयाः । प्रभवन्ति विना येन नोत्थाप्रयितुमोजसा । तस्मिन् प्रत्यगात्मानं धिया योगविदुत्तया । भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिन्तयेत्" ६०। व्याख्यातमेतत् श्रीधरेण "दैवाज्जीवादृष्टवशात् क्षुभिता धर्म्मा गुणावस्थाः । योनौ अभिव्यक्तिस्थाने प्रकृतौ वीर्यं चिच्छक्तिम् । सा प्रकृतिर्गर्भतत्त्वमसृत । महतः स्वरूपमाह हिरण्मयं प्रकाशबहुलम् १९ । विश्वं अहङ्कारादिप्रपञ्चं आत्मगतं स्वस्मिन् सूक्ष्मरूपेण स्थितं व्यञ्जन् प्रकटयन् तमोऽपिबत्, कूटस्थः लयविक्षेपशून्यः, आत्मानं प्रत्यापयतीति तथा यत् पूर्व्वं प्रलयसमये महान्तं प्रकृतौ विलापयमासेति २० । प्रसङ्गात् चतुर्व्यूहोपासनमाह यत्तदिति सर्व्वागमप्रसिद्धत्वमाह । स्वच्छं विशदं शान्तं रागादिरहितं भगवतः पदमुपलब्धिस्थानम् । अतएव वासुदेवाख्यं यदाहुः । अयमर्थः अधिभूतरूपेण तस्यैव महानिति, अध्यात्मरूपेण चित्तमिति, उपास्यरूपेण वासुदेव इति, अधिष्ठाता तत्त्वस्य क्षेत्रज्ञः, एवमहङ्कारे सङ्कर्षण उपास्यः,रुद्रोऽधिष्ठाता, मनसि अनिरुद्ध उपास्य ब्रह्माधिष्ठाता, बुद्धौ प्रद्युम्न उपास्य ब्रह्माधिष्ठातेति ज्ञातव्यम् २१ । स्वच्छत्वं भगवद्विभूतिव्याप्तित्वम् अविकारित्वं लयविक्षेपराहित्यं अपांप्रकृतिः फेनतरङ्गादिरहितावस्थापरा भूतसंसर्गात् प्राक्तनी सा यथा मधुरा स्वच्छा शान्ता च तद्वदित्यर्थः २२ अहङ्कारस्योत्पत्तिपूर्व्वकं लक्षणमाह महत्तत्त्वादिति चतुर्भिः । क्रियासु शक्तिर्यस्य स क्रियाशक्तिः २३ । तस्य त्रैविध्यमाह वैकारिक इति । तस्य कार्य्यमाह यतोयस्मान्मन आदीनाम् भवत्युत्पत्तिरिति २४ । तस्मिन्नुपास्यत्वमूहमाह सहस्रशिरसमिति २५ । कर्त्तृत्वं देवतारूपेण, करणमिन्द्रियरूपेण, कार्य्यत्वं भूतरूपेण, शान्तत्वादिकं तत्कारणगुणत्रयरूपेण२६ । मनस उत्पत्तिपूर्व्वकं लक्षणमाह वैकारिकादितिद्वाभ्याम् । संकल्पश्चिन्तनम् विकल्पोविशेषचिन्तनं यस्य मनसः संकल्पविकल्पाभ्यां कामसम्भवोवर्त्तते इति कामरूपा वृत्तिर्लक्षणत्वेनोक्ता न तु प्रद्युम्नोत्पत्तिलक्षस्य संकल्पादिकार्य्यत्वाभावात् उपास्यव्यूहस्यानिरुद्धस्योक्तेः २७ । शारदं शरत्कालोनमिन्दीवरं नीलोत्पलं

तदिव श्यामं तच्चनैः संराध्यं वशीकर्त्तुमवोध्यं दुर्ग्रहत्वात् २८। बुद्धेरुत्पत्तिपूर्व्वकं लक्षणमाह तैजसादितिद्वाभ्याम् हे सति!। द्रव्यस्फुरणरूपं विज्ञानमिति चित्त व्याहत्यर्थसङ्गम्। इन्द्रियाणामनुग्रह इति सविकल्पज्ञाने हृषीकाणामधीश्वर इति यदुक्तं तत्तु निर्व्विकल्पक ज्ञाने २९। द्रव्यस्फुरणस्यैव प्रपञ्चः संशयादिः। विपर्य्यासो मिथ्याज्ञानं निश्चयः प्रमाणज्ञानं स्वापोनिद्रा, "प्रमाणविपर्य्ययविकल्पनिद्रास्मृतयः" इति पातञ्जलोक्ते ३०। इन्द्रियाणामुत्पत्तिमाह तैजसाहङ्काराज्जातानि वैकारिकत्वमङ्गानिइत्यर्थमेवकारः द्विविधान्यपीन्द्रियाणि तैजसान्येवेत्यर्थः। तत्र हेतुः प्राणस्येति हि यस्मात्प्राणस्य क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता अतः प्राणस्य तैजसत्वात् तदीयशक्तिमतामिन्द्रियाणां तैजसत्वम्। तथा बुद्धेस्तैजसत्वात् तदीयज्ञानशक्तिमतामपि ज्ञानेन्द्रियाणां तैजसत्वमपीत्यर्थः३१। तन्मात्रोत्पत्तिपूर्व्वकमाकाशादिमहाभूतोत्पत्तिलक्षणमाह। तामसादिति पञ्चभिः। श्रोत्रन्तु शब्दगमित्यादिभिर्विषयोत्पत्त्यनन्तरं तत्सम्बन्धमात्रं कथ्यते नतूत्पत्तिःप्रागेवोत्पन्नत्वात् शब्दं गच्छति प्राप्नोतीति शब्दगम् ३२। शब्दस्य लक्षणमाह अर्थाश्रयत्वं अर्थवाचकत्वं, द्रष्टुलिङ्गत्वं कुड्यान्तरितस्य द्रष्टुर्ज्ञापकत्वं तदुक्तं "लिङ्गं यद्दृष्टस्मृतयोरिति, नभसः तन्मात्रत्वं सूक्ष्मत्वं शब्दस्य लक्षणमित्यन्वयः३३। छिद्रादात्मत्वमवकाशदात्वं बहिरान्तरव्यवहारास्पदत्वम् आत्मानः। प्राणादीनामिष्णुत्वमाश्रयत्वं नाड्यादिच्छिद्ररूपेण वृत्तिः कार्य्यमेतल्लक्षणम्। एवमुत्तरत्रापि एकेन श्लोकेन तन्मात्रमहाभूतयोरुत्पत्तिः द्वितीयेन तन्मात्रलक्षणं तृतीयेन महाभूतलक्षणं द्रव्यानुसन्धेयम्। आकाशात्त्वक्स्पर्शस्य संग्रहः सम्यग्ग्रहणं यया पुंस्त्वं नियतलिङ्गत्वात्। यद्वा स्पर्शस्य संग्रहस्ततोभवतीति शेषः। शब्दतन्मात्रादित्यादि तन्मात्राणामुत्तरोत्तरान्वयार्थसङ्गम् ३५। स्पर्शत्वं स्वरूपलक्षणमित्यर्थः। नभसतो वायोस्तन्मात्रत्वञ्च ३६। चालनं वृक्षशाखादेः। व्यूहनं मेलनं तृणादेः प्राप्तिः संयोगः द्रव्यस्य गन्धवतोघ्राणं प्रति नेतृत्वं यथा गौरादिमतः स्पर्शनं, शब्दस्य श्रोत्रं प्रति नेतृत्वं सर्व्वेन्द्रियाणामात्मत्वम् उपोद्बलकत्वं कर्म्मणा कार्य्येणाभिलक्षणं भावे ल्युट्। कर्म्मेवाभिलक्षणमिति विग्रहे तु करणे३७। द्रव्यान्वितत्वं द्रव्यस्वाकारसमर्पकत्वं गुणता द्रव्योपसर्जनतया प्रतीतिः शब्दस्य तु स्वातन्त्र्येणैव प्रतीतिः। अमूर्त्तत्वद्रव्यस्य स्पर्शादेरपि स्वातन्त्र्येणैव प्रतीतिः रूपस्य तु नैवमिति तस्यायं विशेषउक्तः। व्यक्तिसंस्थात्वं द्रव्यस्य या संस्था सन्निवेशः सैव संस्था यस्य द्रव्यपरिणामतया प्रतीतिरित्यर्थः। तेजस्त्वोजस्त्वमसाधारणत्वम् ३८। द्योतनं प्रकाशनं पचनं तण्डुलादेः क्षुत्तृट् अशनाया पिपासा च तदुद्धारेण पानमदनञ्च ३९। जिह्वा रसनेन्द्रियं रसोऽश्नुतेऽनेनेति रसयत्तस्ततो भवतीत्यर्थः ४०। कषायादिषु लवणोऽपि द्रष्टव्यः। भौतिकानां संसर्गिद्रव्याणां यएकोमधुरएव सन् अनेकधा भिद्यते स रसइत्यर्थः ४१। क्लेदनमार्द्रीकरणं मृदादेः पिण्डीकरणं हविर्दादत्वं प्राणनं जीवनम्"आपोमयः प्राण" इति" श्रुतेः आप्यायनं वृद्धिकव्यनिवर्त्तनं उदनं मृदुकरणम् उन्दनमितिपाठे सएवार्थः। भूयस्त्वं कूपादावुद्धृतस्यापि पुनःपुनरुद्गमः ४२। गन्धगः गन्धं प्राप्नोति ४३। करम्भोमिश्रगन्धः यथा व्यञ्जनादीनां हिङ्ग्वादिसंस्कारेणैव। पूतिर्दुर्गन्धः सौरभ्यं कर्पूरादेः, शान्तः शतपत्रादेः, उदग्रोलशुनादेः, संसर्गिणां द्रव्यावयवानां वैषम्यात् यएवंविभिद्यते स गन्धइत्यर्थः४४। ब्रह्मणोभावनं प्रतिमादिरूपेण साकारतापादनं, स्थानं जलादिविलक्षणतया नैरपेक्ष्येण स्थितिः। धारणं जलाद्याधारत्वं सतामाकाशादीनां विशेषणमवच्छेदकत्वं प्राणिनां तत्तद्गुणानाञ्च पुंस्त्वादीनामुत्तन्नेदः परिणामविशेषैः प्रकटीकरणम् ४५। श्रोत्रादीनां शब्दादिग्राहकत्वसङ्गं तेषाञ्च लक्षणमेतदेव इत्याशयेनाह पञ्चभिः श्लोकार्द्धैःनभसोगुणविशेषः शब्दोयस्यार्थोविषयः ४६। गुणविशेषं शब्दव्याहृत्यर्थं दर्शयति परस्य कारणस्य धर्म्मः शब्दादिः अपरस्मिन् कार्य्ये वायुादौ कारणान्वयाद् दृश्यते अतोभावानामाकाशादीनां विशेषगुणः सर्व्वोऽपि शब्दादिः भूमावेवोपलभ्यते चतुर्णां तत्रान्वयात्, जलादिषु यथान्वयमेव न सर्व्वम् आकाशेऽन्यान्वयाभावेन एकएवेति ४७। एवं कारणोत्पत्तिमुक्त्वा कार्य्योत्पत्तिमाह सार्द्धश्लोकैः। एतान्यसंहत्य असिलित्वा यदा स्थितानि तदा जगदादिरीश्वरः प्राविशत् सृष्टेति प्राधान्याभिप्रायेणोक्तं प्रवेशस्तु सर्व्वेष्वपि विवक्षितएव ४८। अनुविद्धेभ्यः क्षुभितेभ्यः यस्मादसौ विराट्पुरुष उदतिष्ठत् ४९। भगवतोरूपमिति पुरुषाभेदाभिप्रायेण ५०। तस्मिन्नध्यात्मादिविभागमाह हिरण्मयादिति नवभिः। उत्थाय औदासीन्यं विहाय, तमाविश्य अधिष्ठाय। महांश्चासौ देवश्चेति खं छिद्रम्५१। वाग्या सह वह्निरभवत् प्राविशत्। नासे निरभिद्येतां प्राणोतः प्राणेन अतः सूतः सन् प्राणएतयोर्नासिकयोरभवदिल-

तुषङ्ग :५२ । प्राणादनन्तरं वायुः । प्राणोतदिति विशेषणं सर्वेन्द्रियेष्वपि द्रष्टव्यं व्यभिद्योतामिति अन्वभिद्योतामिति पाठद्वयेऽप्येकएवार्थः । श्रोत्रं दिशः प्राविशन्५३। आदिशब्देन केशाः५४। स्वराट् इन्द्रः। हरिर्विष्णुः५५। आभ्रतं जातम्५६। बुद्ध्यादिषु हृदयमेवाधिष्ठानम् । गिरांपतिर्ब्रह्मा, चैत्यः चेतज्ञः ५७। अन्वयव्यतिरेकाभ्यां चेतज्ञं विवेक्तुं सर्वेषां पुनः प्रवेशमाह एत इति नवभिः ५८। विराड्देहस्य व्यष्टिदेहं दृष्टान्तत्वेन दर्शयन् साङ्गोपाङ्गकथनस्य प्रयोजनमाह यमेतिद्वाभ्याम्५९ । प्रथमं परमेश्वरे भक्तिः ततोऽन्यत्र विरक्तिः ततोयोगप्रदस्य धीः एकाग्र चित्तं ततोयज्ज्ञानं तेन प्रत्यगात्मानं चेतज्ञं स्वस्मिन्नात्मनि कार्यकारणसङ्घाते विविच्य चिन्तयेत्" ई०।

वेदान्तिमते अत्र कश्चिद्विशेषः पञ्चदश्यासक्तः । "चिदानन्दमयब्रह्मप्रतिबिम्बसमन्विता । तमोरजःसत्त्वगुणा प्रकृतिर्द्विविधा च सा । सत्त्वशुद्धविशुद्धिभ्यां मायाऽविद्या च ते मते । मायाबिम्बोवशीकृत्य तां स्यात् सर्वज्ञ ईश्वरः । अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा । सा कारणशरीरं स्यात् प्राज्ञस्तत्राभिमानवान् । तमःप्रधानप्रकृतेस्तद्भोगायेश्वराज्ञया । वियत्पवनतेजोऽम्बुभूवोभूतानि जज्ञिरे । सत्त्वांशैः पञ्चभिस्तेषां क्रमाद्धीन्द्रियपञ्चकम् । श्रोत्रत्वगक्षिरसनघ्राणाख्यमुपजायते । तैरन्तःकरणं सर्वं वृत्तिभेदेन तत् द्विधा । मनोविमर्शरूपं स्यात् बुद्धिः स्याच्चिच्छायात्मिका । रजोंऽशैः पञ्चभिस्तेषां क्रमात् कर्मेन्द्रियाणि तु । वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे । तैः सर्वैः सहितैः प्राणोवृत्तिभेदात् स पञ्चधा । प्राणोऽपानः समानश्चोदानव्यानौ च ते पुनः । बुद्धिकर्मेन्द्रियप्राणपञ्चकैर्मनसा धिया । शरीरं सप्तदशभिः सूक्ष्मं तल्लिङ्गमुच्यते । प्राज्ञस्तत्राभिमानेन तैजसत्वं प्रपद्यते । हिरण्यगर्भतामीशस्तयोर्व्यष्टिसमष्टिता । समष्टिरीशः सर्वेषां स्वाम्यताद्यात्मवेदनात् । तदभावात्ततोऽन्ये तु कथ्यन्ते व्यष्टिसंज्ञया । तद्भोगाय पुनर्भोग्यभोगायतनजन्मने । पञ्चीकरोति भगवान् प्रत्येकं वियदादिकम् । द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः । स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते । तैरण्डस्तत्र भुवनोभ्यभोगाश्रयोद्भवः । हिरण्यगर्भस्त्वण्डेऽस्मिन् देहे वैश्वानरोभवेत् । तैजसा विश्वतां यातादेवतिर्यङ्नरादयः । ते परार्थार्थिनः । प्रत्यक्तत्त्वबोधविवर्जिताः । कुर्वते कर्म भोगाय कर्म कर्तुञ्च भुञ्जते" ।

एतन्मतप्रपञ्चस्तु "तत्र सर्गाद्यकाले परमेश्वरः सृज्यमानप्रपञ्चवैचित्र्यहेतुप्राणिकर्मसचिवतापरिमितानिरूपितशक्तिविशेषविशिष्टमायासहितः सन्नामरूपात्मकं निखिलप्रपञ्चं प्रथमं बुद्धावाकलय्य इदं करिष्यामीति सङ्कल्पयति "तदैक्षत बहु स्यां प्रजायेयेति" श्रुतेः । तत आत्मन आकाशादीनि पञ्च भूतानि अपञ्चीकृतानि तन्मात्रपदप्रतिपाद्यानि उत्पद्यन्ते । तत्राकाशस्य शब्दोगुणोवायोस्तु शब्दस्पर्शौ तेजसस्तु शब्दस्पर्शरूपाणि अपान्तु शब्दस्पर्शरूपरसाः पृथिव्यास्तु शब्दस्पर्शरूपरसगन्धाः । न तु शब्दस्याकाशमात्रगुणत्वं वायुत्वादावपि तदुपलम्भात् । नासौ भ्रमः बाधकाभावात् । इमानि भूतानि त्रिगुणमायाकार्याणि अतस्त्रिगुणात्मकानि । एतैव सत्त्वगुणोपेतैः पञ्चभूतैः श्रोत्रत्वक्चक्षूरसनघ्राणानि पञ्चेन्द्रियाणि मनोबुद्ध्यहङ्कारचित्तानि च जायन्ते । श्रोत्रादीनां पञ्चानां क्रमेणैव दिग्वातार्कवरुणाश्विनोऽधिष्ठातृदेवताः मन आदीनां चतुर्णां क्रमेण चन्द्रचतुर्मुखशङ्कराच्युताः अधिष्ठातृदेवताः । एतैरेव रजोगुणोपेतैः पञ्चभूतैर्यथाक्रमेण वाक्पाणिपादपायूपस्थाख्यानि कर्मेन्द्रियाणि जायन्ते । तेषाञ्च क्रमेण वह्नीन्द्रोपेन्द्रमृत्युप्रजापतयोऽधिष्ठातृदेवताः । रजोगुणोपेतैः पञ्चभूतैरेव पञ्च वायवः प्राणापानव्यानोदानसमानाख्याजायन्ते । तत्र प्राग्गमनवान् वायुः प्राणोनासाग्रस्थानवर्त्ती । अवाग्गमनवानपानः पायुादिस्थानवर्त्ती । विष्वग्गमनवान् व्यानः अखिलशरीरवर्त्ती । ऊर्ध्वगमनवानुदानः कण्ठस्थानवर्त्ती । अशितपीतान्नादिसमीकरणः समानः नाभिस्थानवर्त्ती । तैरेव तमोगुणोपेतैरपञ्चीकृतभूतैः पञ्चीकृतभूतानि जायन्ते "तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति" त्रिवृत्करणश्रुतेः पञ्चीकरणोपलक्षणार्थत्वात् । पञ्चीकरणप्रकारश्चेत्थम् । आकाशादौ द्विधा विभज्य तयोरेकं भागं पुनश्चतुर्धा विभज्य तेषां चतुर्णांभागानां वायुादिषु चतुर्भूतेषु संयोजनम् । एवं वायुं द्वेधा विभज्य तयोरेकं भागं पुनश्चतुर्धा विभज्य तेषाम् आकाशादिषु संयोजनम् । एवं तेजोऽप्पृथिव्यंशानामपि । तदेवमेकैकभूतस्यार्धं स्वांशात्मकं अर्धान्तरञ्च चतुर्विधभूतमयमिति पृथिव्यादौ स्वांशाधिक्यात् पृथिव्यादिव्यवहारः । तदुक्तम् । "वैशेष्यात्तद्वादस्तद्वाद" इति शा०सू० । पूर्वोक्तैरपञ्चीकृतभूतैर्लिङ्गशरीरं परलोकयातानिर्वाहकं भोगपर्यन्तस्थायि मनोबुद्ध्यात्मकेतं ज्ञानेन्द्रियपञ्चककर्मेन्द्रियपञ्चकप्राणादिपञ्चकसंयुक्तं जायते । तदुक्तम् । "प्रञ्चप्राणमनोबुद्धि

दशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनमिति" । तच्च द्विविधं परमपरञ्च । परं हिरण्यगर्भलिङ्गशरीरम् । अपरमक्षादिलिङ्गशरीरम् । तत्र हिरण्यगर्भलिङ्गशरीरं महत्तत्त्वम् अक्षादिलिङ्गशरीरञ्चाहङ्कारतत्त्वमित्याख्यायते । एवं तमोगुणयुक्तेभ्यः पञ्चीकृतभूतेभ्योभूर्भुवस्वर्लोकमहोजनस्तपःसत्यात्मकस्योर्द्धलोकसप्तकस्य अतलवितलसुतलतलातलरसातलमहातलाख्यस्याधोलोकसप्तकस्य ब्रह्माण्डस्य जरायुजाण्डज स्वेदजोद्भिज्जाख्यचतुर्विधस्थूलशरीराणाञ्चोत्पत्तिः । तत्र जरायुजानि जरायुभ्योजातानि मनुष्यपश्वादिशरीराणि । अण्डजानि अण्डेभ्योजातानि पक्षिसर्पगादिशरीराणि । स्वेदजानि स्वेदाज्जातानि यूकमशकादिशरीराणि । उद्भिज्जानि भूमिमुद्भिद्य जातानि वृक्षादिशरीराणि वृक्षादीनामपि पापफलभोगायतनत्वेन शरीरित्वम् । तत्र परमेश्वरस्य पञ्चतन्मात्राद्युत्पत्तौ सप्तदशावयवोपेतलिङ्गशरीरोत्पत्तौ हिरण्यगर्भस्थूलशरीरोत्पत्तौ च साक्षात्कर्तृत्वम्, इतरनिखिलप्रपञ्चोत्पत्तौ च हिरण्यगर्भद्वारा "हन्ताहमिमास्तिस्रोदेवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति" श्रुतेः । हिरण्यगर्भो नाम मूर्त्तित्रयादन्यः प्रथमोजीवः "स वै शरीरी प्रथमः स वै पुरुषउच्यते । आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्त्तत""हिरण्यगर्भः समवर्त्तताग्रे इत्यादि"श्रुतेः" । वेदा० प० सूक्ष्मादिस्थूलभूतान्तोत्पत्तिसङ्घा ब्रह्माण्डोत्पत्तिमाह आत्म पु० "उत्पाद्य स्थूलभूतानि भगवान् भूतभावनः नीरेषु स्वात्मनो बीजं सहसैव समासिषत् । चिप्तं तेन हि तद्वीर्यं नीराणासुपरिस्थितम् । दधिमण्डोपमम् कालात् काठिन्यमगमद् घनम् । कठिना पृथिवी सैवं रूढा सा दृश्यतेऽधुना । तस्याः सारसमुद्भूतो गोलकोऽभून्महालयः । कुक्कुटाण्डसमाकारःसप्तलोकस्य संस्थितिः । अनुसंवत्सरं कालं नीरेष्वासीत्तमन्ततः । शुष्कालाबुसमोनित्यं वायुनाभ्याहतोभृशम् । स तु संवत्सरे पूर्णे विभिन्नः कुक्कुटाण्डवत् । तदन्तःपुरुषोजज्ञे सप्तलोकशरीरभृत् । इदं सर्वं भुमानेव भूतं भावि स्थितं च यत् । एष भोगस्य भोक्तस्य सर्वदृष्टेर्महेश्वरः । यज्ञेन वर्धयत्येष स्थावराणि चराणि च । यज्ञमाणोऽस्य महिमा विज्ञेयः सर्वदा ऋषिः । पादःसर्वाणि भूतानि त्रिपादात्मनि तिष्ठति । महिमात्रयभूतो यो महिम्नः सोऽधिको यथा । तथैवास्य महिम्नोऽपि पुमानभ्यधिकोमतः । मार्गद्वयस्य कर्त्तारं वैदिकस्य यदा प्रभुः । प्रवृत्तेच निवृत्तेच स्वर्गमोक्षपुरं प्रति । अयमभ्यधिको यस्मात् सर्वस्माद्भौतिकादजः । तस्मात् विराडिति प्रोक्तो विशेषाद्राजते यतः । अधिष्ठाय पुरः सर्वास्थिरजङ्गमदेहिनाम् । पूरयत्यात्मना यस्मात् अतोयमधिपूरुषः । यस्मादभ्यधिकः सोऽयं ब्रह्माण्डान्तःस्थितः पुमान् । तस्य कार्य्यमिदं सर्वं गिरिदेहधरादिकम् । अयं यत्पुमान् हेतुर्ऋक्सामयजुषामपि । छन्दांस्यपि च सर्वाणि गायत्र्यादीनि जज्ञिरे । अस्मादजादवद्यापि विराजः पुरुषोत्तमात् । इन्द्राग्निच विप्राच मुखतोऽस्य विनिर्गताः । क्षत्रियाबाहुतस्तद्वत् ऊर्व्वो वैश्यास्च जज्ञिरे । भूमिःसुदास्तथा पद्भ्यां जाता अस्य महात्मनः । चन्द्रमामनसोजातो नेत्रात् तद्वत् दिवाकरः । प्राणात् प्रभञ्जनोजातो नाभेस्तु गगनं महत् । मस्तकात् स्वर्गलोकोऽयं श्रोत्राज् जाता दृगादिशः । एवमन्येऽपिये सोऽस्मात् जाता लोका महात्मनः । द्रव्याणि वा तथा कालोवसन्तादात्मको महान् । देवता यजमानो वा क्रियावातःपरा न हि । सहस्रमस्तको देवः सहस्रेन्द्रियवानपि । भूतभौतिकजातं स आवृत्यात्मा परःस्थितः । बुद्धिसाक्षिणमात्मानमेतस्मात् परतः स्थितम् । स्वप्रकाशमहं वेदसर्वाज्ञानविवर्जितम् । नामरूपात्मकं सर्वं कृत्वाऽसौयोवदत्यिव शक्र ! त्वं धाढ्यवदनात् सम्यक् वित्तास्यते भवान् । दिशोऽपि प्रदिशस्तद्वदध ऊर्द्धं सएव हि । यतस्ततोऽत्र यज्ञेन यज्ञान्ते तेन तं द्विजाः । धर्म्मयज्ञेन तेनैते स्वर्गं यास्यन्ति तत्क्षिरः । पुंसोऽस्य मूर्द्धा स्वर्गः स्यात् चन्द्रसूर्य्यौ च चक्षुषी । प्राणः प्रभञ्जनः प्रोक्तो मध्यदेहोऽन्तरिक्षकम् । स्थलानि विविधान्यस्य मूलाग्रय उदीरितः । भूर्लोकस्तु समस्योऽयं पादावस्य प्रकीर्त्तितः । वक्ष्यमाणवनीयस्तद्हृदयं चावसथ्यकः । सगार्हपत्यनाभिः स्याद्दक्षिणाग्निर्मनोमतम् । उरोवेदिस्तथा दर्भालोमजातस्तरुःस्थितम् । व्रीषध्योवनस्पतयः शेषाः केशाः शरीरगाः । किं बहूक्तेन शक्राद्य संक्षेपेणावधारय । यदस्ति यच्च नास्यत्र तत्सर्वं स महेश्वरः" ।

काणादादिमते तु आदिसर्गे वायवीयेषु परमाणुषु सृज्यमानजीवादृष्टवशात् क्रियोत्पद्यते सा च क्रिया स्वाश्रयं परमाणुं परमाण्वन्तरेण संयुनक्ति ततो द्व्यणुकादिक्रमेण महान् वायुरुत्पद्यते तेन नोदितेषु तैजसपरमाणुषु क्रियोत्पद्यते तया परमाण्वः परमाण्वन्तरेण संक्रन्यमानाः संयुज्यन्ते इत्येवंरूपेण महाभूतोत्पत्तिरेवं शरीराणि चेन्द्रियाणि चतुर्दश भुवनान्युत्पद्यन्ते सर्वत्र चेश्वरोनिमित्तकारणम् । एतद्विस्तरमारम्भवादशब्दे

द्रष्टव्यम् । तथा च आदिसर्गे एवैतेषां सर्वेषां सृष्टिः । नैमित्तिकप्रलयोत्तरन्तु न सर्वेषाम् किन्तु केषांमेव ताडग्प्रलयदशायां नागस्रोपामेव कतिपयानामिति भेदः । बीजाङ्कुरवत् सृष्टेः प्रवाहरूपेणानादित्वेऽपि एतत्सृष्टेः सादित्वमपि तत्तद्बीजव्यक्तेरङ्कुरव्यक्तेश्च यथा सादित्वमेवमेव वर्त्तमानब्रह्मण आदिसर्गकाले मत्स्यादेरुत्पत्तेरादिसर्गत्वमवगन्तव्यम् "यथेदानीमित्यादि" भागवतवचनेन "सूर्य्याचन्द्रमसौ धाता यथापूर्व्वमकल्पयदिति" मन्त्रलिङ्गेन च प्रवाहरूपेवानादित्वं सृष्टिर्न तु तत्तद्व्यक्तेः । कर्म्मसापेक्ष स्यैव ईश्वरस्य सृष्टृत्वोक्तेः पूर्वं कर्म्मणामभावे विचित्रसृष्ट्यसम्भवः । अन्यथा वैषम्यनैर्घृण्ये ईश्वरस्य प्रसज्येयाताम् जीवस्य च कृतहान्यकृताभ्यागमप्रसङ्गश्चेति दिक् ।

आदीनव पु० आ+दी-भावे ल्युट् आदीनस्य भावः प्राप्तिः वा० क १दोषे, २क्लेशे, च । कर्म्मणि क । २दुर्दशे ३परिक्लिष्टे च त्रि० ।

आदीपक त्रि० आदीपयति अन्यमुद्दीपयन्निना आ+दीप-णिच्-ण्वुल् । १परमुद्दीपके । "राज्ञोवधं चिकीर्षेद्यस्तस्य चित्तो वधो भवेत् । आदीपकस्य स्तेनस्य वर्षसङ्करिकस्य च" भा० शा० ८६ अ० । २उद्दीपके च ।

आदीपन न० आ+दीप-णिच्-ल्युट् । तण्डुलादिचूर्णमिश्रितजलेन मुखादौ १चित्राकारलेपनभेदे (आल्पना) २उद्दीपने च । [क्लीबादौ । २उद्दीपिते च ।

आदीपित त्रि० आ+दीप-णिच्-क्त । दत्तादीपने १मुखा-

आदुरि त्रि० आ+दृ-अन्तर्भूतण्यर्थे कि । दारयितरि "वामं वामं त आदुरे देवोददात्वर्यमा" ऋ० ४,३०,२४ । "हे आदुरे ! शत्रूणां दारयितः !" भा० ।

आदृत त्रि० आ+दृ-कर्त्तरि क्त । १सादरे कृतादरे । कर्म्मणि क्त । यस्यादरः कृतस्तस्मिन् २सम्मानिते ३पूजिते च ।

आदृत्य त्रि० आ+दृ-कर्म्मणि क्यप् । आदरणीये १आदर्त्तव्ये । ल्यप् । २सम्मान्येत्यर्थे अव्य० ।

आदृष्टि स्त्री प्रा० स० । त्रिविधभागसंकोचितदृष्टौ ।

आदेय त्रि० आ+दा-यत् । ग्राह्ये । "पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः" "अनादेयस्य चादानादादेयस्य च वर्ज्जनात्" इति च मनुः ।

आदेवक त्रि० आदीव्यति आ+दिव-ण्वुल् । द्यूतकारके

आदेवन न० आ+दिव-भावे ल्युट् । १द्यूतक्रीड़ायाम् करणे ल्युट् । २द्यूतसाधने पाशकादौ । आधारे ल्युट् । द्यूतक्रीड़ाधारे (अक्ष) ३द्यूतफलके ।

आदेश पु० आ+दिश-भावे घञ् । १उपदेशे २आज्ञायाम् "अथातआदेशोनेति नेतीति" छ० उ० "उत तमादेशमप्राक्ष्यः" "उत स क आदेशः" । "आदिशोऽन्यतरस्यामित्यादेश" इति च का० उ० "आदेशं देशकालज्ञः शिष्यः शास्त्रविशारदः" रघुः व्याकरणप्रसिद्धे कस्यचित् वर्णादितः २कस्यचिद्वर्णस्योत्पत्तौ च । आदिश्यते कर्म्मणि घञ् । ४आदिष्टे ५कथिते ६उपदिष्टे कस्यचित् स्थाने जाते कस्मिंश्चिद्वर्णे च "धातोः स्थान इवादेशः सुग्वीवं सत्रवेशवत्" रघुः "आदेशप्रत्यययोः" पा० "आगमादेशयोर्मध्ये बलीयानागमोविधिः" व्या० कारि० "स्थानिवदादेशोऽनल्विधौ" पा० "लोपोऽप्यादेशउच्यते" व्या० का० "ज्योतिर्विदुक्ते दृष्टाशुभफले च "नादेशास्तस्य निष्फलाः" बृहत्सं० । [कारके २आज्ञाकारके ।

आदेशक त्रि० आदिशति आ+दिश+ण्वुल् । १आदेशकारके

आदेशन न० आ+दिश-भावे ल्युट् । आदेशे "ऋतोपनयनस्यास्य व्रतादेशनमिष्यते" मनुः ।

आदेशिन् त्रि० आदिशति आ-दिश-णिनि । १आदेशकारके "कपोलपाटलादेशि बभूव रघुवेष्टितम्" रघुः २दैवज्ञे गणके पु० हेम० । [३कथनीये च ।

आदेश्य त्रि० आ+दिश-कर्म्मणि यत् । १उपदेश्ये २आज्ञाप्ये

आदेष्टृ पु० आ+दिश-तृच् । ऋत्विजं प्रति यमेतस्मादनार्थं कर्म क्रियतामित्यादेशकर्त्तरि १यजमाने, २आज्ञाकर्त्तरि त्रि० स्त्रियां ङीप् ।

आद्य त्रि० आदौ भवः दिगा० यत् । १आदिभवे । "एतदन्ताश्च मनवो ब्रह्माद्याः समुदाहृताः" । "स्वायम्भुवाद्याः सप्तैते मनवो भूरितेजसः" मनुः । अयौचान्तद्वितीयदिनकर्त्तव्ये २प्रेतश्राद्धभेदे न० "मृताहनि तु कर्त्तव्यं प्रतिमासन्तु वत्सरम् । प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि" या० स्मृ० । तस्य षोड़शश्राद्धानामादिभूतत्वात् आद्यत्वम् । "आद्यमग्निमतः कुर्य्याद्दाहादेकादशेऽहनि । ध्रुवाणि तु प्रकुर्व्वीत प्रमीतानां च सर्व्वदा । द्वादश प्रतिमासानि आद्यं श्राद्धमाधिके तथा । सपिण्डीकरणञ्चैव दशमे तत् समाचरेत्" ऊन्दो ग० प० । निरग्नेस्तु मरणावध्येवैकादशाहे तत् कर्त्तव्यमिति भेदः । एकादशपदञ्च खजाद्यौचान्तद्वितीयदिनपरम् । २प्रधाने श्रेष्ठे त्रि० "आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव" रघुः अद+कर्म्मणि यत् । ४अदनीयद्रव्यमात्रे त्रि० ५धान्ये न० राजनि० तस्यादनीयत्वात् "अन्नमूलं हि जीवनम्" इत्युक्तेश्च जीवनमूलत्वेन प्रधानत्वाद्वा आद्यत्वम् । [स्त्रीको च

आद्यकवि पु० कर्म० । आदिकवौ चतुर्मुखे १हिरण्यगर्भे २वा-

आद्यमाषक पु० मध्यतेऽनेन करणे घञ् कर्म्म० । पञ्चगुञ्जापरिमाणे, (माषा) इति ख्याते "माषकः सप्त क्रष्णलाः" इत्युक्तेराद्यत्वविशेषणम् तस्य कार्य्यविशेषोपयोगितया गौणत्वान्न सख्यत्वम् अतएव "दशार्द्धगुञ्जं प्रवदन्ति माषमिति" भास्कराचार्य्येण माषस्य पञ्चगुञ्जात्मकत्वमेवोक्तम् ।

आद्यबीज न० कर्म्म० । मूलकारणे आदिकारणे, १ईश्वरे सांख्यमते २प्रधाने च ।

आद्या स्त्री आदौ भवा दिगा० यत् । १दुर्गायां तन्त्रोक्तायां युगभेदे २सुन्दर्य्यादौ च "सत्ये तु सुन्दरी आद्या, त्रेतायां भुवनेश्वरी, द्वापरे तारिणी आद्या कलौ काली प्रकीर्त्तिता" सरस्वतीतन्त्रोक्तेस्तासां तथात्वम् । आदिभवायां तिथ्यादौ च । "युगाद्या वर्षर्तुदिनेति" ति० त० पुरा० ।

आद्याकाली स्त्री नित्यस० संज्ञात्वान्न पुंवत् । "कालसंग्रसनात् काली सर्वेषामादिरूपिणी । कालत्वादादिभूतत्वात् आद्याकालीति गीयते" निर्वाणतन्त्रोक्तायां परमप्रकृतौ

आद्यादि पु० आदिराद्यो यस्य । पञ्चम्याःस्थाने तसिप्रत्यय निमित्ते का० वा० उक्ते शब्दगणभेदे । स च आदि, मध्य, अन्त, पृष्ठ, पार्श्व, आकृतिगणः तेन "खरतो वर्षतो वेति" सिद्धम् ।

आद्युदात्त त्रि० आदिः उदात्तो यस्य । यस्य आदिरुदात्तः ताडगे प्रत्ययादौ । स च पाणिन्यादिभिर्दर्शितः "प्रत्ययः" इत्यधिकारे "आद्युदात्तः" पा० असति अपवादे सर्वोऽपि प्रत्यय आद्युदात्तः । कर्त्तरि तेति उदात्तः । "स्वपादिहिंसामच्यनिटि" पा० अदाद्यन्तर्गणस्वपादेर्हिंनस्तेच अनिटि अजादौ तसार्वधातुके परे आदिरुदात्तो वा । स्वपन्ति इत्यत्र स्वेत्यस्य वा उदात्तता । "अभ्यस्तानामादिः" पा० पूर्व्वोक्तविषये अभ्यस्तसंज्ञकानामादिरुदात्तः । दधति, इत्यादौ देत्यस्योदात्तता "अनुदात्ते च" पा० अविद्यमानोदात्ते ल सर्वधातुके परे अभ्यस्तानामादिरुदात्तः । दधासि अनजादावपि देत्यस्योदात्तता "आदिर्ञमुण्यन्यतरस्याम्" पा० अभ्यस्तानामादिर्ञमुणि परे उदात्तो वा । लोलूयं लोलूयम् पक्षे लित्स्वरः । "अचः कर्त्तृयकि" पा० कर्म्मकर्त्तरि यकि परे उपदेशेऽजन्तानामादिरुदात्तो वा । लूयते केदारः स्वयमेव । "सर्वस्य सुपि" पा० सुपि परे सर्वशब्दस्य आदिरुदात्तः सर्वे अत्र सेत्यस्योदात्तता । "अनित्यादिनित्यम्" पा० ञिदन्तस्य निदन्तस्यादिरुदात्तः । ञ्यङोञित्त्वात् तदन्तस्यादिरुदात्तः "पतिसमयोः सर्वनामस्थाने" पा० अनयोरादिरुदात्तः सर्वनामस्थाने परे । पत्न्याः मेत्युदात्तः । "क्षयोनिवासे" पा० निवासार्थे क्षयस्यादिरुदात्तः । "जयः करणम्" पा० करणवाची जयशब्द आद्युदात्तः । "ह्रषादीनाञ्च" पा० एषामादिरुदात्तः ! ह्रष जन ज्वर यक्ष ह्रय गय नय तायं तय चय अम वेद स्वद अंग गुह्य (शमरणौ संज्ञायाम्) (संमतौ भावकर्म्मणोः)। मन्त्र शान्ति काम याम तारा धारा कारा वह कल्प पाद । "आकृतिगणत्वात् अविच्छिन्नलक्षणमाद्युदात्तत्वं ह्रषादिषु द्रष्टव्यम्" सि० कौ० । "संज्ञायामुपमानम्" पा० चञ्चेव चञ्चा । "निष्ठा च द्व्यजनात्" पा० निष्ठान्तस्य द्व्यचः संज्ञायामादिरुदात्तः नत्वाकारान्त । दत्तः । आकारस्तु स्नातः । "शुष्कधृष्टौ" पा० एतावाद्युदात्तौ असंज्ञायाम् "आशितः कर्त्ता" पा० कर्त्तृवाची आशितशब्द आद्युदात्तः "रिक्ते , विभाषा" पा० रिक्तस्यादिरुदात्तः असंज्ञायाम् । "जुष्टार्पिते च छन्दसि" पा० एतौ आद्युदात्तौ असंज्ञायाम् "युष्मदस्मदोर्ङसि" पा० अनयोः ङसि परे आदिरुदात्तः । "ङयि च" पा० अनयोर्ङयि परे आदिरुदात्तः । "यतोऽनावः" पा० यत्प्रत्ययान्तस्य द्व्यच आदिरुदात्तः नावं विना । गव्यम् काम्या । "ईडवन्दवृहसदुहां ण्यतः" पा० ण्यदन्तानामेषामादिरुदात्तः । "विभाषा वेष्विच्मनोः" पा० एतयोरादिरुदात्तः । "त्यागरागहासकुहश्वठक्रथानाम्" पा० एषाम् आदिरुदात्तः । फिट्सूत्रे धान्यनवाचार्थैरन्येऽपि आद्युदात्ता उक्ता यथा "दक्षिणस्य साधौ" फि० स्वाङ्गार्थकदक्षिणशब्दस्यादिरुदात्तो वा दक्षिणोबाहुः "छन्दसि च" फि० "शुक्लगौरयोरादिः" फि० "अनयोरादिरुदात्तः "अङ्कुठोदकवकवयानां छन्दस्यनः" फि० लोके तु आदिरुदात्तः । "अथादिः प्राक् शकटेः" फि० २पादे १सू० । अधिकारोऽयम् शकटिशकख्योरिति यावत् । "हस्वान्तस्य स्त्रीविषयस्य२" । आदिरुदात्तः स्यात् । वलिःतनुः । "नब्विषयस्यानिसन्तस्य" ३। वनं वयः । इसन्तस्य तु सर्पिः । नपुनपुंसकम् । "क्षयधान्यानां च द्व्यषाम्" ४। द्व्यचामित्यर्थः। कुशाः, काशाः, माषाः, तिलाः, बहुवचान्त गोधूमाः । "नृः संख्यायाः" ५ । पञ्च, चतस्रः । "स्वाङ्गशिटामदन्तानाम्" ६ । शिट् संज्ञेनाम, "कर्णाभ्यां च्चुचूकादयि" "ओष्ठावित्र मधु" "विन्दो विन्दायाः"। "प्राणिनां कुपूर्वम्" ७। कवर्गात् पूर्व्वं आदिरुदात्तः । काकः, ढकः, "शुकेषु मे" । प्राणिनां किम्, "घीरसर्पिर्मधूदकम्" । "क्षयुवर्षं क्षत्रियाख्या चेत्" ८। खयि परे उवर्णश्चादात्तं स्यात्, कन्दूकः, "उनर्थं नन्तानाम्" ९ । उन । "वरुणं वोऽरि-

षादस्म्" । ऋ । "खसारन्वाऋषैं" । वनु । "पीवानं मेवम्" । "वर्षीनान्तणतिनितान्तानाम्" १० । आदिरुदात्तः, एतः हरिणः, शितिः, घृश्निः, हरित् । "हुस्वान्तस्य हुस्वमन्द ताच्छील्ये" ११ । अद्यर्ङ हुस्वान्तस्यादिभूतं हुस्वमुदात्तं स्यात् । सुनिः । "अचस्यादेवनस्य" १२ । आदिरुदात्तः, "तस्य नाचः" देवने तु "अक्षैर्मा दीव्य" । "अर्द्ध खासमद्योतने" १३ । अर्द्धो यामस्य, समेऽंशके तु अर्द्धं पिप्पल्याः । "पीतद्रुचीनाम्" १४ । आदिरुदात्तः, पीतद्रुः, सरलः । "यामादीनाञ्च" १५ । यामः, शोभः, यामः । "लुबन्तसोपमेयनामधेयस्य" १६ । चञ्चेव चञ्चा, स्किगन्तस्येति पाठान्तरम् । स्किगिति लुपः प्राचां संज्ञा । "न इक्षपर्वतविशेषव्याघ्रसिंहमहिषाणाम्" १७ । एषामुपमेयनामादिरुदात्तो न । ताल इव तालः, मेरुरिव मेरुः, व्याघ्रः, सिंहः, महिषः । "राजविशेषस्य यमन्वा चेत्" १८ । यमन्वा इङ्गः, आङ्क उदाहरणम् । अङ्काः प्रत्युदाहरणम् । "स्त्रीविषयवर्षाकुपूर्व्वाणाम्" २० । एषान्वयाणामाद्युदात्तः, स्त्रीविषयः, मल्लिका, वर्षः, श्येनी, हरिणी, अनुशब्दात् पूर्वोऽस्येत्यन्ते अनुपूर्वाः, तरनुः । "शकुनीनाञ्च लघुपूर्वम्" २१ । पूर्वं लघु उदात्तं स्यात्, कुक्कुटः, तित्तिरिः, । "नर्क्षप्राख्यायाम्" २२ । यथालक्षणं प्राप्तमुदात्तत्वञ्च, वसन्तः, कलशः । "धान्यानाञ्च इडचान्तानाम्" २३ । आदिरुदात्तः, कान्तानाम्, श्यामाकाः, यान्तानाम्, राजमाषाः । "जनपदशब्दानामन्तानाम्" २४ । केकयः, "हयादीनामसंयुक्तलान्तानामन्तः पूर्वं वा" २५ । हयिति हलः संज्ञा । पललम्, शललम्, हयादीनां किम् एकलः असंयुक्तेति किं मल्लः । "इगन्तानाञ्च ह्रस्वानाम्" २६ । आदिरुदात्तः, ऋषिः एतानि २पादस्थानि । "मकरवरुड़पारेवतवितस्तेक्षार्ष्टिषाचाकलोमाकाशयुतवा कारीणामादिर्वा" २,६, । एषामादिर्द्वितीयो वा उदात्तः । मकरः वरुड़ः । "छन्दसि च" १० । अमकरादयश्च आरभ्यः । लक्षानुसारादादिर्द्वितीयम् वा उदात्तं ज्ञेयम् । "कदमादीनाञ्च" ११ । आदिर्द्वितीयं वोदात्तः । "सुगन्धितेजनस्य ते वा" १२ । आदिर्द्वितीयं ते शब्देति पर्य्यायेण वोदात्ताः । "नपः फलानाम्" १३ । आदिर्द्वितीयं वोदात्तम् । राजादनफलम् । "रैवान्तस्य हलादेरादिर्वा" १४ । हलीषा लाङ्गलीषा । उशीरदाशेरकपालपलाशर्शवालश्यामाकशरीरशरावहृदयहिरण्यारण्यापत्यदेवराणाम्" १६ । "एषामादिरुदात्तः स्यात् । "महिष्यामाढयोर्ज्जावेटकाख्या चेत्" २० । आदिरुदात्तः, "महिषी जाया" आषाढा उपदधाति । एतानि २पादस्थानि । "निपाता आद्युदात्ताः" फि० ४,१२ । स्वाहा "उपसर्गाश्चाभिवर्ज्यम्" फि० ४,१३ । तथा च पाणिनिशाकटायनाचार्य्यादिभिर्यस्यादेरुदात्तत्वं विहितं ते शब्दा लोके वेदे च आद्युदात्ता भवन्ति ।

आद्यून त्रि० आ+दिष-क्त ऊठ् नत्वञ्च । औदरिके (पेटुक) जिगीषावर्ज्जिते । जिगीषायान्तु न नत्वम् । आदूनः । जिगीषया देवनकर्त्तरि । [मावधिशेषपर्य्यन्ते ।

आद्योपान्त पु० आद्यावधि उपान्तः अन्तपर्य्यन्तः । प्रथ-

आधमन न० आधीयते आ+धा-कमनन् । बन्धकदाने आधौ, । "योगाधमनविक्रीत योगदानप्रतिग्रहम् । यस्य वाप्युपधिं पश्येत्तत्तं सर्वं विनिवर्त्तयेत्" स्मृतिः "एकोऽपि स्थावरे कुर्य्याद्दानाधमनविक्रयम्" स्मृतिः एकोऽप्यनीशः सर्वत्र दानाधमनविक्रये" कात्या० स्मृतिः आधिशब्देऽस्य विवृतिः ।

आधमर्ण्य न० अधमर्णस्य भावः कर्म वा ष्यञ् । ऋणग्रहणे अवश्यदेयद्रव्यस्वामित्वे "आवश्यकाधमर्ण्ययोर्णिनिः" पा० ।

आधर्म्मिक त्रि० अधर्मं चरति ठञ् । अधर्मशीले दैववशात् अधर्म्मानुष्ठातरि तु नास्य साधुत्वम् । अधार्म्मिक इत्यत्र तु न धार्म्मिक इति विग्रह इति भेदः ।

आधर्ष पु० आ+धृष-भावे घञ् । १तिरस्कारे २बलादुपीड़ने च

आधर्षण न० आ+धृष-भावे ल्युट् । १आधर्षे २बलात्पीड़ने ।

आधर्षित त्रि० आ+धृष-क्त अवैयात्ये इट् गुणश्च । १अवमानिते २तिरस्कृते ३बलात्कारेणाभिभूते च "सृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः । आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्" या० स्मृतिःधार्ष्ण्येति आधृष्ट इत्यत्र ।

आधर्ष्य त्रि० आ+धृष-णिच्-यत् । १अवमाननीये २बलात् पीड़नीये ३दुर्बले च भावे यत् । ४ दुर्बलत्वे न० । "आधर्ष्यं पूर्व्वपक्षस्य यस्मिन्नर्थवशाद्भवेत् । विवादे साक्षिणस्तत्र प्रष्टव्याः प्रतिवादिनः" नार० । "आधर्ष्यं दुर्बलत्वम्" व्य० त० रघु० ।

आधान न० आ+धा-भावे ल्युट् । संस्कारपूर्व्वकं वह्न्यादेः स्थापने १अग्न्याधाने २गर्भाधाने च । "आधाने सोमपाने च वपनं सप्तसु स्मृतम्" प्रा० त० पु० "भार्य्यायै पूर्व्वमारिण्यै दत्त्वाग्नीनन्त्यकर्म्मणि । पुनर्दारक्रियां कुर्य्यात्

पुनराधानमेव च" मनुः। विद्यमानपदार्थेषु गुणान्तरस्य ३करणे "प्रजानां विनयाधानात् रक्षणाद्भरणादपि" रघुः सतो गुणान्तराधानं प्रतियत्नः" सि०कौ०। ४निवेशने "गुणोविशेषाधानहेतुः सिद्धो वस्तुधर्मः" सा०द०। ५बन्धकदाने च "आधानं विक्रयञ्चैव दानं नैव समाचरेत्" स्मृतिः "विक्रयावक्रयाधानयाचितेषु पणा दश" या०स्मृतिः अग्न्याधानञ्च विवाहसमये कर्त्तव्यं यदि तत्पाहिताग्नेः प्रमदादिना नाशः तदा पितृमरणोत्तरमेव कर्त्तव्यं सति तु पितरि नैव कर्त्तव्यमिति, तत्र कालनक्षत्रादिविशेषाश्च निर्णयसिन्धौ दर्शिता यथा "प्राजापत्ये पूषभे सहिदैवे पुष्यज्येष्ठास्वैन्द्रे कृत्तिकासु। अग्न्याधानं ह्युत्तराणां त्रयेऽपि चित्रादित्ये कीर्तितं गर्गसख्यैः" रत्नमा० आश्वलायनः "अग्न्याधेयं कृत्तिकासु रोहिण्यां मृगशिरसि फाल्गुनीषु विशाखयोरुत्तरयोः प्रौष्ठपदयोरेतेषां कस्मिंश्चिदहसन्ते पर्वणि ब्राह्मण आदधीत, श्रीष्मवर्षाशरत्सु चत्रियवैश्योपकल्पाः" यस्मिन् कस्मिंश्चिदहावादधीत सोमेन यक्ष्यमाणो नर्क्षं पृच्छेन्न नक्षत्रम्" सोमाधाने कृत्वाद्यनालोचनमात्तेपरम्" अथो खलु यदैवैनं अह्नोपनमेदथादधीत सैवास्यार्धरिति सोमेन यक्ष्यमाणोनर्क्षं पृच्छेन्न नक्षत्रं तदेतदार्क्षस्यातिवेलं वा श्रद्दधानस्य भवतीति" बौधायनोक्तेः मदनरत्ने हरिहारगार्ग्यः "पुष्याग्नेयत्रयुत्तरादित्यपौष्णज्येष्ठाचित्रार्कहिदैवेषु भेषु। कुर्युर्वैश्याधानमाद्यं वसन्तग्रीष्मान्तेष्वेव विप्रादिवर्णाः" कालादर्शे "अग्निहोत्रं दर्शपूर्णमासावग्न्युत्तरायणे। उपक्रम्य यथाकालमुपासीरन् द्विजातयः। सोमं च क्रतुबन्धञ्च सर्वांश्च विहृतीरपि। सोमयागेन यथाकालं विदध्युर्गृहमेधिनः" पारस्करः "आवसथ्याधानं दारकाले दायाद्यकाल एकेषामिति" दायाद्यकालोविभागकालः मदनरत्ने व्यासः "अग्निर्वैवाहिको येन न गृहीतः प्रमादिना। पितर्युपरते तेन गृहीतव्यः प्रयत्नतः। योऽग्निहोत्रा विवाहाग्निं गृह्य इति मन्यते। अन्नं तस्य न भोक्तव्यं दशाहाकोहि स स्मृतः"। ज्येष्ठभ्रातरि पितरि वा सापत्नौ कनिष्ठस्य गृहस्य वाऽग्न्यभावेऽपि न दोषः तदाह तत्रैव गार्ग्यः "पितृपाकोजीवी वा भ्रातृपाकोपजीविकः। ज्ञानाध्ययननिष्ठो वा न दुष्येताग्निना विना"। इदञ्चाधानं ज्येष्ठेऽकृताधाने न कार्य्यम् "दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते। परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वज" इति मनुयातातपोक्तेः आर्क्षेऽप्येवम् "सोदर्ये तिष्ठति ज्येष्ठे न कुर्याद्दारसंग्रहम्। आवसथ्यं तथाधानं पतितस्तु तथ भवेदिति" तत्रैव गार्ग्योक्तेः आत्तायां त्वदोषमाह शमन्तः "ज्येष्ठोभ्राता यदा तिष्ठेदाधानं नैव चाचरेत्। अनुज्ञातस्तु कुर्वीत वचनं यथा" वृद्धवसिष्ठः "अग्रजस्तु यदाऽनग्निरादध्यादनुजः कथम्। अग्रजोऽनुमते कुर्यादग्निहोत्रं यथाविधि"। हारीतः "सोदराणां तु सर्वेषां परिवेत्ता कथं भवेत्। दारैस्तु परिविद्यन्ते नाग्निहोत्रेण नेज्यया"। अधिकारिणोऽपि भ्रातुरनुज्ञया कुर्यादिति मदनपारिजातः विवाहस्त्वनुज्ञयापि नेत्यर्थः सोदरोक्तेरसोदराणां सापत्नदत्तकादीनां न दोषः। दत्तकस्यापि सोदरविवाहाभावेऽदोष एवतदाह हेमाद्रौ वसिष्ठः "पितव्य पुत्रान् सापत्नान् परनारीसुतांस्तथा दाराग्निहोत्र संयोगे परिविन्दन्न दुष्यति। परनारीसुताः दत्तकादयः। देशान्तरे विशेषमाह सएव "अष्टौ दश द्वादश वर्षाणि वा ज्येष्ठभ्रातरमनिर्विण्णमप्रतीक्षमाणः प्रायश्चित्ती भवतीति" क्लीबादावप्यदोषमाह कात्यायनः "देशान्तरस्थक्लीबैकदृष्टिकान् सहोदरान्। वेश्यानिरतंच पतितम्मूढ्रहल्यातिरोगिणः। जडमूकान्धबधिरकुब्जवामनखञ्जकान्। अतिवृद्धानार्यांश्च ऋषिसत्काचृषस्य च। धनदृद्धिप्रसक्तांश्च कामतः कारिणस्तथा। कुटिलोन्मत्तचौरांश्च परिविन्दन्न दुष्यति" अपरार्केऽपि "उन्मत्तः किल्बिषी कुष्ठी पतितः क्लीवएव वा। राजयक्ष्मामयावी च न न्याय्यः स्यात् प्रतीच्छितुम्" एवं ज्येष्ठे क्षिप्तत्वादावपि न परिवेत्तृत्वम् तदाह त्रिकाण्डमण्डनः "दर्शेष्टिं पौर्णमासेष्टिं सोमेज्यामग्निसंग्रहम् अग्निहोत्रं विवाहं च प्रयोगे प्रथमे स्थिते। न कुर्याज्जनके ज्येष्ठे सोदरेऽन्याथकुर्वति। क्षेत्रजादावनीजाने विद्यमानेऽपि सोदरे। नाधिकारविघातोऽस्ति भिन्नोदर्येऽपि चौरसे। षडङ्गवन्धमूकबधिरपतितोन्माददूषणे। संन्यस्ते क्षिप्तहृल्लादौ यद्वा षण्ढादिदूषणे। जनके सोदरे ज्येष्ठे कुर्यादेवेतरः क्रियामिति" "आरोहतं दशतं गुदमेहौ मेत्याधान मन्त्रवर्णाश्च शकरीरङ्गुलीःतन्त्ररत्ने ऽप्युक्तम् "अङ्गवैकल्यात्पूर्वमाहिताग्नित्वेऽधिकियेतैव नित्येषु। आधानन्तु न कुर्यात्तस्य नैमित्तिकत्वादिति"। एवं चतुरङ्गुलेऽपि, षडङ्गुलकाणविवर्णादेरस्वे वाधिकारः एकादशस्य दशान्यगतेः शरीरकार्श्यं वा विप्रतिषिद्धमिति" हिरण्यकेशिसूत्रे कर्माशक्तिहेतोरेवाङ्गवैकल्यस्य निषेधात् अतएव श्राद्धायणसूत्रे श्राद्धञ्च प्रथमैस्त्रिभिर्गुणैरिति न्यूनाङ्गस्याप्यधिकार उक्तः। अपरार्के उशनाः "पिता पितामहोयस्य अग्रजो वाथ कस्यचित्। तपोग्निहोत्रमन्त्रेषु न दोषः परिवेदने" पितुराधा-

मध्यदोषमाह मदनरत्ने सुमन्तुः "पिता यस्तु नाधानं कर्म पुत्रस्तु कारयेत्। अग्निहोत्रेऽधिकारोऽस्ति यज्ञस्य वचनं यथेति" नाधानं कृतमित्यर्थः एतदाज्ञायामेवेति हेमाद्रिः यत्तु "पितुः सत्यप्यनुज्ञाने नादधीत कदाचनेति" तत्स्वाधिकारे ज्ञेयम्"। एवं स्मृतिसूत्रयोराधारानुसारेण प्रत्यवायश्रवणादाधानं नित्यमेव। एतेन कलिवर्ज्येषु आदित्यपुराणेऽग्निहोत्रस्योत्कीर्त्तनदर्शनेन गौड़ानां तदनाचरणमनाचार एव स्मृतेः पुराणस्य दुर्बलतया स्मृतिविहिताधानस्य बाधकत्वायोगात् "नैवानाहिताग्निर्भवतीति" श्रुतेः सर्व्वापेक्षया बलवत्त्वाच्च। तेन ऋत्विक्कालात् पूर्व्वमग्याधानं कर्त्तव्यमिति प्रतीयते व्यक्तं भविष्यति चैतदुपरिष्टात्। आधानस्वरूपादिकम् आश्व०श्रौ०सू० नारायणीवृत्त्योर्दर्शितं यथा "अग्न्याधेयप्रभृतीन्याह वैतानिकानि" सू० १२। अग्न्याधेयप्रभृतिरादिरुपक्रमो येषां तान्यग्न्याधेयप्रभृतीनि अग्निहोत्रादीनि कर्माणि, आधानं कृत्वैव कर्त्तव्यानीत्यर्थः। तत्र हेतुमाह, वैतानिकानीति। वितानेषु भवानि वैतानिकानि, वितानसाध्यानीत्यर्थः। वितानशब्दोऽग्निन् सूत्रे भावसाधनोऽग्नेर्नानां विस्तारवाची, पूर्वस्मिंस्त्वधिकरणसाधनोऽग्निहोत्रादिकर्मवचनः। एतदुक्तं भवति, गार्हपत्यादिभिरग्निभिः साध्यानि श्रौतानि कर्माणि, अग्नयस्त्वाधानसाध्याः, तस्मादाधानप्रभृतित्वं सिद्धं श्रौतानां कर्मणाम्। बहुवचनं सर्वश्रौतपरिग्रहार्थं सर्वाणि श्रौतान्याधानादूर्द्ध्वमेव कर्त्तव्यानि न किञ्चिदपि, श्रौतत्वाधानादर्वागित्यनेन प्रकारेणाधानस्य कर्मार्थत्वनिराकरणेनाग्न्यर्थत्वमर्थात् साधितं भवति। तद्यदि कर्मार्थं स्यात् प्रति कर्म क्रियेत, तत्र कस्यचित् परस्तादपि स्यात्, यस्य परस्तादाधानं स्यात् तस्याग्न्याधेयप्रभृतित्वं विहन्येत। आधानस्याग्न्यर्थत्वे च नायं दोषः। अतो बहुवचनेनाधानस्याग्न्यर्थत्वं साधितं भवति। तस्मादनाहिताग्नेः श्रामण्यादयो न भवन्ति, अवकीर्णिना पत्न्याद्यर्थञ्चाधानं न कर्त्तव्यं, साधितं भवति न परस्तात्" इत्तिः "अग्न्याधेयम्" १,१,९, सू० प्रथमप्राप्तमाधानमुच्यते। विशिष्टकाले विशिष्टदेशे विशिष्टपुरुषेण विशिष्टैर्मन्त्रैर्गार्हपत्याद्यग्नुत्पत्त्यर्थं यदङ्गाराणां निधानं तदग्न्याधेयमुच्यते। अग्नीनामाधेयमग्न्याधेयं, तत्कर्त्तव्यमित्यर्थः इत्तिः। कस्मिन् काल इत्याह। "कृत्तिकासु रोहिण्यां मृगशिरसि फल्गुनीषु विशाखयोरुत्तरयोः प्रोष्ठपदयोः" १०सू०। एतेषां कस्मिंश्चित्११। वसन्ते पर्वणि ब्राह्मण आदधीत"१२। ग्रीष्मवर्षाशरत्सु च त्रियवैश्योपक्रुष्टाः १३। यस्मिन् कस्मिंश्चिदृतावादधीत" १४। स्मृत्यापि एषां नारायणीया इत्तिः "फल्गुनीष्विति पूर्वे उत्तरे च मन्यन्ते, अविशेषाच्छ्रुतवचनाच्च। प्रोष्ठपदास्वुत्तरे एव। अतः सप्त एतानि नक्षत्राणि, तेषामेकस्मिन्नक्षत्रेऽग्न्याधेयं कर्तव्यमित्यर्थः १०। एतेषां कस्मिंश्चित् पर्वणि। एवमेतत्सूत्रमर्थतो द्रष्टव्यम्। उत्तरञ्च सूत्रं "वसन्ते पर्वणि ब्राह्मण आदधीत" इति। एवं कृते सर्वमनुगुणं भवति एतेषां नक्षत्राणां कस्मिंश्चिन्नक्षत्रे पर्वणि वाग्न्याधेयं कर्तव्यमितीदं सूत्रं पर्वनक्षत्रसमुच्चयमग्न्याधेयस्य कालत्वेन विदधाति। पूर्वसूत्रन्तु केवलं नक्षत्राण्येवाधानसम्बन्धं विदधाति। अतो द्वौ पक्षौ स्तः। समुच्चयस्तत्र प्रथमः कल्पः। तदसम्भवे केवलं नक्षत्रमेवेति विनिवेशो युक्तः। इदं कल्पद्वयं सोमाधानवर्जितेषु सर्व्वेष्वाधानेषु भवति११। इदमपि सूत्रमर्थत एवं भवति। अनेन वसन्ते ब्राह्मणगुणकमाधानं विधीयते१२। वैश्यसाधकर्मोपजीवी उपक्रुष्ट इत्युच्यते। अस्मिन् सूत्रे त्रीण्याधानानि विधीयन्ते। ग्रीष्मे त्रियवगुणकं, वर्षासु वैश्यगुणकं, शरदि उपक्रुष्टगुणकञ्च। एते वसन्तादयः शब्दा ऋतुवाचकाः। ऋतवो नाम षट्। वसन्तग्रीष्मवर्षा शरद्धेमन्तशिशिराः। ते च चैत्रमासमारभ्य द्वौ द्वौ मासावृतवः। वसन्तादयो मासाश्चैत्रादय एव१३। आदधीतेति स्थिते पुनरादधीतेतिवचनं आपत्कल्पोऽयमाधानविधिरिति दर्शयति। आपदि समूर्द्धः सर्व्वेष्वृतुषु आधानं कर्तव्यं "नैवानाहिताग्निर्भवतीति"। इदञ्चापरमाधानं, पूर्वोक्तानि चत्वारि, तेषु सर्वेषु पर्व्वनक्षत्रविधय उपसंहर्तव्याः, न पर्व्वर्तुस्वातन्त्र्येणाधानस्य कालविधयो भवेयुः। अत एव सूत्रकारः पर्व्वनक्षत्रविधीनाम्नर्तुविधिभिः समुद्दानायैवाधानकालताप्रदर्शनार्थमेवैतेषां कस्मिंश्चिदिति पर्वनक्षत्रसमुच्चयविधिपरे सूत्रे उत्तरसूत्राय पठितव्यम् ऋतुशब्दं व्यतिष्यज्य पठितवान्। पर्व्वनक्षत्रविध्योर्ऋतुविध्युपसंहारे न्यायविरोधश्च नास्ति, तत्रैव तयोरन्तर्भावदर्शनादिति१४। "अश्वत्थाच्छमीगर्भादग्नी आहरेदनवेक्षमाणः१६। यो अश्वत्थः शमीगर्भ आरुरोहाग्नये त्वसा। तं त्वाहरामि ब्रह्मणा यत्त्वैः केतुभिः सहेति, पूर्वाङ्गृह्यन्नमग्न्याधेयम्१७। शम्या गर्भः शमीगर्भः। शमीगर्भादश्वत्थादरण्याहरणं कुर्यात्। तच्चाधानार्थम्, आहरणे कृते अध्वर्युणा अरण्याहरणे क्रियमाणे तेन सह यजमानो-

ऽग्नेन मन्त्रेणाहरेत्। अनवेक्षमाणः पृष्ठतोऽनवेक्षमाणः। अवज्ञापरोऽर्थः कुर्यां न कुर्यामिति नान्यदपेक्षमाणः, अध्यवसिताधान इत्यर्थः ।६। पूर्णाङ्गतिरन्ते यस्य तत् पूर्णाङ्गत्वम्, अग्न्याधेयं कर्तव्यम्। तच्चाग्न्याधेयमरण्याहरणादि पूर्णाङ्गत्वं भवतीत्यर्थः। अस्य सूत्रस्य प्रयोजनं पूर्णाङ्गत्वे आहिताग्नित्वप्राप्तिः। कथमिति चेत्। श्रुतावेवमाम्नातम्। "अग्नयः पुरुषार्थसाध्याः" इति प्रस्तुत्य "वसन्ते ब्राह्मणोऽग्निमादधीत" इत्येवमादीनि वसन्तादिकालानि ब्राह्मणादिकर्तृकाणि कर्तृगामिक्रियाफलयुक्तानि निरधिकाराणि आधानानि विधाय, "ततोऽरणी आहरेत्, सम्भारान् सम्भरेत्, अग्न्यायतनानि कुर्यात्, केशश्मश्रु वपेत्, ब्राह्मौदनिकमौपासनिकं निदध्यात्, तस्मिन् ब्राह्मौदनं पचेत्, समिध आदध्यात्, आयतनेषु सम्भारान्निदध्यात्, ब्राह्मौदनिकमरण्योः समारोप्य मथित्वा गार्हपत्यादीनादध्यात्, तत्र काञ्चित्, समिध आदध्यात्, अग्निहोत्रं जुहुयात्, पूर्णाहुतिं जुहुयात्, तत आग्नेयमष्टाकपालं निर्वपेत् तदहरेव, तदहरादिसंवत्सरात्नानां कालानां कस्मिंश्चित् काले एवमानहवींषि निर्वपेत् ततश्चान्यानि हवींषि" इति ।७। एवञ्च विवाहवादग्रस्तके बौधायनवचने अन्यतराभाने कार्यो प्रागग्न्याधेयेति पाठं उद्धाऽन्यथा मया व्याख्यातम् प्रागग्न्याधेयादिति पाठे तु अग्न्याधेयात् अग्न्याधानात् प्रागित्यर्थः इति बोध्यम् अयमेव पाठः समीचीनः प्रतिभाति एतच्च उद्धाहग्रन्थे विस्तरेण प्रपञ्चयिष्यामः। आधानप्रयोगश्च शाखिभेदेन पद्धतिविशेषे विस्तरतोज्ञेयः। सोमाधाने विशेषश्च विस्तरभयान्नोक्तः आश्व०श्रौतसूत्रादौ ज्ञेयः। कात्या०श्रौ०सूत्रे आधाने रथकारस्याधिकारमाह "रथकारस्याधाने" कात्या० १,१,९। आधानपूर्वकत्वादन्यत्रापि तस्याधिकारः यथोक्तं मिता०"क्षत्रियेण वैश्यायासत्पादितोमाहिष्यः वैश्येन शूद्रायासत्पादिता करणी तस्यां माहिष्येणोत्पादितो रथकारोनाम जात्याभवति तस्य चोपनयनादि सर्वं कार्यं वचनात् यथा च शङ्खः। "क्षत्रियवैश्यानुलोमानन्तरितोत्पन्नजोरथकारस्तस्याध्ययनेज्यादानोपनयनसंस्कारक्रियाश्चाप्रतिषिद्धाः" एवमेव कर्कदत्तौ स्थितम्।[ष्यञ्त्वर्थे भावे यञ्। २आधाने पु०

आधाय अव्य० आ+धा-ल्यप्। १स्थापयित्वात्यर्थे २आधानं

आधायक त्रि० आ+धा-ण्वुल्। आधानकारके।

आधानिक पु० आधानं गर्भाधानं प्रयोजनमस्य ठञ्। गर्भाधाननिमित्ते वेदविहिते गर्भशान्तसंस्कारभेदे।

आधार पु० आ+धृ-आधारे घञ्। १अधिकरणे, आश्रये, "अयमग्निराधारमनुत्तरङ्गम्" कुमा० "चराचराणां भूतानां कुक्षिराधारतां गतः" कुमा० "वस्त्वाधारश्लेषयोगाद्यथा दीपस्य संस्थितिः" या०स्मृतिः। २व्याकरणप्रसिद्धे औपश्लेषिकवैषयिकाभिव्यापकाख्येऽधिकरणकारके, शस्यसम्पादनार्थं जलरोधनार्थे ३बन्धने ४जलसेकार्थं जलधारणार्थे ४आलबाले च। "आधारबन्धप्रसवैरिति रघुः"। "आधारोऽधिकरणम्" पा०अधिकरणञ्च साक्षात्परम्परया वा क्रियाश्रयः अधिकरणशब्दे विदृतिः तच्च त्रिविधम् औपश्लेषिकवैषयिकाभिव्यापकभेदात्। तत्र औपश्लेषिक एकदेशसम्बन्धः यथा कट आस्ते। वैषयिकः मोक्षे इच्छास्ति। अभिव्यापकः तिलेषु तैलमस्ति। मुग्धबोधकारस्तु "सामीप्यात्श्लेषविषयैर्व्याप्याधारश्चतुर्विध इति सामीप्यसम्बन्धेनाप्याधारतेत्याह। तच्चिन्त्यम् "गङ्गायां घोषोवसतीत्यादाविव लक्षणयैव गङ्गासमीपतीरस्योपस्थितौ न तस्य विभक्त्यर्थत्वमिति" पाणिनीयाः। ५तन्त्रोक्ते षट्चक्रमध्ये आद्यचक्रस्याधारे "आधारे लिङ्गनाभौ तदनु च हृदये तालुमूले ललाटे" आनन्दलहरी। आधारस्य भावः तत्व आधारता सम्बन्धविशेषेण पदार्थविशेषस्याधेयतासम्बादके धर्मविशेषे तथा च आधारता आधेयायाः निरूपिका आधेयता च आधारतायाः इति तयोः परस्परं निरूप्यनिरूपकभावः आधारतायाः अनतिरिक्तवृत्तिर्धर्म आधारतावच्छेदकः। एवमाधेयतायाः अनतिरिक्तवृत्ति धर्मः आधेयतावच्छेदकः यथा संयोगेन घटाधारे भूतले भूतलत्वमाधारताच्छेदकं भूतलाधेये घटे च घटत्वमाधेयतावच्छेदकम् तयोश्चावच्छेदकत्वात् ताभ्यामाधारताऽऽधेयता चावच्छिद्यते यथा घटत्वावच्छिन्ना घटनिष्ठाऽऽधेयता तथा भूतलत्वावच्छिन्ना भूतलनिष्ठाऽऽधारता इति नव्यनैयायिकानां रीतिः आधार+त्व। तदर्थे न०।

आधारशक्ति स्त्री आधारस्य शक्तिः। सर्वाधारशक्तिरूपायां परमेश्वरशक्तौ १मायायां २प्रकृतौ च तन्त्रोक्तायां मूलाधारस्थायां कुण्डलिन्यां ३परदेवतायाम्। ४पीठपूजनीय देव भेदे च "आधारशक्तिं प्रकृतिमित्यादि" प्रकृत्य "प्रणवादिनमोऽन्तेन पीठशक्तीः प्रपूजयेत्" तन्त्रसा० पीठशक्तिशब्देऽस्य विदृतिः।

आधाराधेयभाव पु० आधारश्चाधेयश्च तयोर्भावः। एकस्य यदपेक्षया आधारत्वम् अपरस्य तदपेक्षयैव यत्

आधेयत्वं तादृशे सम्बन्धभेदे । यथा घटभूतलयोः ।

आधि पु० अधीयतेऽभिनिवेश्यते प्रतीकाराय मनोऽनेन आ+धा–कि । मानसदुःखकारके व्याधिभेदे "नाधयोव्याधयः क्लेशादैवभूतात्महेतवः" भा०प्र० । "यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः" शक० । आधिर्दैविकशब्देऽस्य विवृतिः । ईषत् अधिक्रियते उत्तमर्णोऽत्र आ+ईषदर्थे धा–अधिकारार्थे आधारे कि आधीयते ऋणशोधनार्थम् आ+धा–कर्मणि किंवा १ऋणशोधनार्थं प्रतिभूस्थानीयतया बन्धकत्वेन उत्तमर्णं समीपे अधमर्णेनाधीयमाने उत्तमर्णस्य ईषत्स्वत्वहेतुभूतव्यापारविशिष्टे २द्रव्येऽस्य विवृतिः मिता० । "धनप्रयोगे हौ विश्वासहेतू प्रतिभूराधिश्च । यथाह नारदः । "विश्वम्भहेतू द्वावत्र प्रतिभूराधिरेव चेति"। तत्र प्रतिभूर्निरूपित इदानीमाधिर्निरूप्यते । आधिर्नाम गृहीतस्य द्रव्यस्योपरि विश्वासार्थमधमर्णेनोत्तमर्णायाधिक्रियायै आधीयत इत्याधिः स च द्विधैव कृतकालोऽकृतकालश्च पुनश्चैकैकोद्विविधः गोप्योभोग्यश्च । यथाह नारदः।"अधिक्रियतइत्याधिः स विज्ञेयोद्विलक्षणः । कृतकालोऽपनेयश्च यावद्देयोद्यतस्तथा । स पुनर्द्विविधः प्रोक्तोगोप्योभोग्यस्तथैव चेति" । कृतकाल आधानकालएवास्मिन् काले दीपोल्लेखादौ मयायमाधिर्मोक्तव्योऽन्यथा तवैवाधिर्भविष्यतीत्येवं निरूपिते कालेऽपनेयः स्वात्मसमीपे नेतव्योभोक्तव्यः इत्यर्थः । देयं दानं देयमनतिक्रम्य यावद्देयम् उद्यतोनियतः स्थापितइत्यर्थः । यावद्देयम् उद्यतोयावद्देयोद्यतः गृहीतधनप्रत्यर्पणावधिरनिरूपितकाल इत्यर्थः गोप्योरृणीयः । एवञ्चतुर्विधस्याधेर्विशेषमाह । "आधिः प्रणश्येत् द्विगुणे धने यदि न मुच्यते । काले कालकृतोनश्येत् फलभोग्यो न नश्यति" या० । प्रयुक्ते धने स्वकृतया वृद्ध्या कालक्रमेण द्विगुणीभूते यद्याधिरधमर्णेन द्रव्यदानेन न मोच्यते तदा नश्यत्यधमर्णस्य धनं प्रयोक्तुः स्वं भवति । कालकृतः कृतकालः आहिताग्न्यादिषु पाठात्कालशब्दस्य पूर्वनिपातः स तु काले निरूपिते प्राप्ते नश्येत् द्विगुणात्प्रागूर्ध्वं वा । फलभोग्यः फलं भोग्यं यस्यासौ फलभोग्यः क्षेत्रारामादिः स न कदाचिदपि नश्यति । कृतकालस्य गोप्यस्य भोग्यस्य च तत्कालातिक्रमे नाशउक्तः "काले कालकृतोनश्येदिति । अकृतकालस्य भोग्यस्य नाशाभावउक्तः "फलभोग्यो न नश्यतीति" पारिशेष्यादाधिःप्रणश्येतद्भेदेतदकृतकालगोप्याधिविषयमवतिष्ठते । द्विगुणातिक्रमेण निरूपितकालातिक्रमेण च विनाशे चतुर्दशदिवसप्रतीक्षणं कर्त्तव्यम् बृहस्पतिवचनात् "स्थिरस्थे द्विगुणीभूते पूर्णे काले कृतावधौ । बन्धकस्य धनी स्वामी हिंसप्राप्तं प्रतीक्ष्य च । तदन्तरा धनन्दत्त्वा ऋणी बन्धमवाप्नुयादिति" । नन्वाधिःप्रणश्येदित्यनुपपन्नम् अधमर्णस्य स्वत्वनिवृत्तिहेतोर्दानविक्रयादेरभावात् मनुवचनविरोधाच्च "नाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः" इति । कालेन संरोधः कालसंरोधश्चिरकालमवस्थानं तस्मात्कालसंरोधान्निरकालावस्थानादाधेर्नैवनिसर्गोऽस्ति नान्यत्वाधीकरणमस्ति न च विक्रयः एवमाधीकरणविक्रयप्रतिषेधाद्धनिनः स्वत्वाभावोऽवगम्यत इति, उच्यते आधीकरणमेव लोके सोपाधिकस्वत्वनिवृत्तिहेतुः । आधिस्वीकारश्च सोपाधिकस्वत्वापत्तिहेतुः प्रसिद्धः । तत्र धनहैगुण्ये निरूपितकालप्राप्तौ च द्रव्यदानस्यात्यन्तनिवृत्तेरेनेन वचनेनाधमर्णस्यात्यन्तिकी स्वत्वनिवृत्तिरुत्तमर्णस्य चात्यन्तिकं स्वत्वं भवति । न च मनुवचनविरोधः यतः"नत्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयादिति" भोग्याधिं प्रस्तुत्यैदमुच्यते "नाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रय" इति भोग्यस्याधेश्चिरन्तनकालावस्थानेऽप्याधीकरणविक्रयनिषेधेन धनिनः स्वत्वाभावोक्तेः । दृष्टान्तयुक्तं"फलभोग्योन नश्यतीति"। गोप्याधौ तु पृथगारब्धमनुना । "न भोक्तव्यो बलादाधिर्भुञ्जानोऽहिंसतः सदृशैरिति" । दृष्टान्तेऽपि वक्ष्यते "गोप्याधिभोगे नोवृद्धिरिति" आधिःप्रणश्येद्द्विगुण इति तु गोप्याधिं प्रत्युच्यत इति सर्वमविरुद्धम् । किञ्च "गोप्याधिभोगे नो वृद्धिः सोपकारेऽवधारिते । नष्टोदेयो विनष्टश्च दैवराजकृतादृते"या० । गोप्याधेस्तत्कटाद्यादेरुपभोगे न वृद्धिर्भवति । अल्पेऽप्युपभोगे महत्यपि वृद्धिर्हातव्या समयातिक्रमात् तथा सोपकारे उपकारकारिणि बलीवर्दतत्कटाद्यादौ भोग्याधौ सवृद्धिके हारिते हानिं व्यवहाराङ्गत्वं गमिते नो वृद्धिरिति सम्बन्धः नष्टोविकृतिकृतस्तत्कटाद्यादिस्विरूपभेदादिना पूर्ववत् कृत्वा देयः तत्र गोप्याधिर्नष्टश्चेत् पूर्ववत् कृत्वा देयः । उपभुक्तोऽपि चेद्वृद्धिरपि हातव्या भोग्यादिर्यदि नष्टः तदा पूर्ववत् कृत्वा देयः । वृद्धिसद्भावे वृद्धिर्वा हातव्या विनष्ट आत्यन्तिकं नाशं प्राप्तः सोऽपि देयोमूल्यादिद्वारेण तद्धाने सवृद्धिकं मूल्यं लभते यदि न ददाति तदा मूलनाशः "विनष्टे मूलनाशः स्याद्दैवराजकृतादृते" इति नारदवचनात् । दैवराजकृतादृते दैवमग्न्युदकदेशोपप्लवादि ।

दैवकृताद्दिनाशादिना । तथा स्वापराधरहिताद्राजकृतात् । दैवराजकृते तु विनाशे सदृद्धिकं मूल्यं दातव्यमधर्मेणाध्यन्तरं वा यथार्हं। "स्रोतसापहृते क्षेत्रे राज्ञा चैवापहारिते। आधिरन्योऽथ कर्त्तव्योदेयं वा धनिने धनमिति"। तत्र स्रोतसापहृत इति दैवकृतोपलक्षणम्। अपि च "आधेः स्वीकरणाद्विद्वीरक्ष्यमाणोऽप्यसारताम्। यातत्वेदन्य आधेयोधनभाग्वा धनी भवेत्"या०। आधेर्भोग्यस्य भोग्यस्य च स्वीकरणादुपादानादाधियक्षणविद्वि सान्निध्यिखनमात्रेण नाप्युद्देशमात्रेण। यथाह नारदः। "आधिस्तु द्विविधः प्रोक्तोजङ्गमःस्थावरस्तथा। विद्विरत्नोभयस्यापि भोगोयद्यस्ति नान्यथेति"। अस्य च फलम्। "आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरेति"। या स्वीकारान्ना क्रिया सा पूर्वाबलवती स्वीकाररहिता तु पूर्वापि न बलवतीति। सचाधिः प्रयत्नेन रक्ष्यमाणोऽपि कालवशेन यद्यसारतामुपैति एव सदृद्धिकमूल्यद्रव्यापर्याप्तताङ्गतस्तदाधिरन्यः कर्त्तव्यः। "धनिने वा धनन्देयं रक्ष्यमाणोऽप्यसारतामिति"वदताऽऽधिः प्रयत्नेन रक्षणीयो धनिनेति ज्ञापितम्। आधिःप्रणश्येद्द्विगुण इत्यस्यापवादमाह। "चरित्रबन्धकृतं सदृद्धादापयेद्धनम्। सत्याद्धारकृतन्द्रव्यं द्विगुणम्प्रतिदापयेत्"या० चरित्रं शोभनाचरितम् चरित्रेण बन्धकम् चरित्रबन्धकम् तेन यत् द्रव्यमात्मसात्कृतम्तस्याधीनं वा कृतम्। एतदुक्तम्भवति धनिनः स्वकीयत्वेन बहुमूल्यमपि द्रव्यमाधीकृत्याधमर्णेनाल्पमेव द्रव्यमात्मसात्कृतम्। यदि वाऽधमर्णस्य स्वकीयत्वेनाल्पमूल्यमाधिं गृहीत्वा बहुद्रव्यमेव धनिनाधमर्णाधीनं कृतमिति तद्धनं गृहीतद्द्विगुणं सह दापयेत्। अयमाशयः एवंरूपं बन्धकं द्विगुणीभूतेऽपि द्रव्ये न नश्यति किन्तु द्रव्यमेव द्विगुणन्दातव्यमिति। तथा सत्यङ्कारकृतं करणङ्कारः भावे घञ् सत्यस्य कारः सत्यङ्कारः"कारे सत्यागदस्येति"पा०सुम् सत्यङ्कारेण कृतं सत्यङ्कारकृतम्। अयमभिसन्धिः यदा बन्धकार्पणसमय एवेत्थं परिभाषितं द्विगुणीभूतेऽपि द्रव्ये मया द्विगुणं द्रव्यमेव दातव्यम् नाधिनाश इति तदा तद्द्विगुणन्दापयेत् इति। अन्योऽर्थः। चरित्रमेव बन्धकञ्चरित्रबन्धकम्। चरित्रशब्देन गङ्गास्नानाग्निहोत्रादिजनितमपूर्वमुच्यते यत्र तद्देवाधीकृत्य यद्द्रव्यमात्मसात्कृतम्। तत्र तदेव द्विगुणभूतन्दातव्यमाधिनाश इति। "आधिप्रसङ्गादन्यदुच्यते। सत्यंकारकृतमिति क्रयविक्रयादिव्यवस्थानिर्वाहाय यद्यङ्गीकारादि परहस्ते कृतं तद्व्यवस्थातिक्रमे द्विगुणन्दातव्यं तत्रापि येनाङ्गीकाराद्यर्पितं सएव चेद्व्यवस्थातिवर्त्ती तेन तदेव दातव्यम्। इतरश्चेद्व्यवस्थातिवर्त्ती तदा तदेवाङ्गीकारादिद्विगुणव्यतिदापयेदिति। किञ्च "उपस्थितस्य मोक्तव्य आधिः स्वेनोऽन्यथा भवेत्। प्रयोजकोऽसति धनं कुर्यादन्यस्याधिमाप्नुयात्"या०। धनदानेनाधिमोक्षणायोपस्थितस्याधिर्मोक्तव्योधनिना द्विद्विलोभेन न स्थापयितव्यः। अन्यथा अमोचणे स्तेन चौरदण्डयो भवेत्। असन्निहिते पुनःप्रयोक्तरि कृते तदाग्रहस्ते सदृद्धिकं धनं निधायाधमर्णः स्वीयं बन्धकं गृह्णीयात्। अथ प्रयोक्ताप्यसन्निहितस्तदाग्राह्य धनस्य ग्रहीतारोन सन्ति यदि वा असन्निहिते प्रयोक्तरि आधिविक्रयेण धनदित्साऽधमर्णस्य तत्र किं कर्त्तव्यमित्यपेक्षिते आह। "तत्कालकृतमूल्योवा तत्र तिष्ठेद्द्विकः" या०। तस्मिन् काले यत्तस्याधेर्मूल्यन्तत्परिकल्प्य तत्रैव धनिनि तमाधिं द्विद्विरहितं स्थापयेन्न तत ऊर्द्धं धनं वर्द्धते यावद्धनी धनं गृहीत्वा तमाधिं मुञ्चति यावद्वा तन्मूल्यद्रव्यमृणिने। प्रवेशयति यदा तु द्विगुणीभूतेऽपि धने द्विगुणत्वमेव ग्रहीतव्यम् नत्वाधिनाश इति विचारितलक्षणग्रहणकालएव तदा द्विगुणीभूते द्रव्ये असन्निहिते वाऽधमर्णे धनिना किं कर्त्तव्यमित्यतआह। "विना धारणकाद्वापि विक्रीणीत ससाक्षिकम्" या०। धारणकादधमर्णादिना असन्निहिते साक्षिभिस्तदाग्रे च सदृतमाधिं विक्रीय तत् धनं गृह्णीयाद्धनी वाशब्दो व्यवस्थितविकल्पार्थः। यदर्णग्रहणकाले द्विगुणीभूतेऽपि धने धनमेव गृहीतव्यम् नत्वाधिनाश इति न विचारितम्। तदा आधिः प्रणश्येत् द्विगुण इत्याधिनाशः। विचारिते त्वयं पक्ष इति। भोग्याधौ विशेषमाह। "यदा तु द्विगुणीभूतलक्षणमाधौ तदा खलु। मोक्ष्य आधिरुदपन्ने प्रविष्टे द्विगुणे धने"या० यदा प्रयुक्तं धनं स्वकृतया वृद्ध्या द्विगुणीभूतन्तदाधौ कृते तदुत्पन्ने आधुत्पन्ने द्विगुणे धनिनः प्रविष्टे धनिनाधिर्मोक्तव्यः यदि वादावेवाधौ दत्ते द्विगुणीभूते द्रव्ये त्वयाधिर्मोक्तव्य इति परिभाषया कारणान्तरेण वा भोगाभावेन यदा द्विगुणीभूतलक्षणन्तदाधौ भोगार्थं धनिनि प्रविष्टे तदुत्पन्ने द्रव्य द्विगुणे सत्याधिर्मोक्तव्यः। अधिकोपभोगे तदपि देयम्। सर्वथा सदृद्धिकमूलर्णापाकरणार्थाध्युपभोगविषयमिदं वचनम्। तमेनं त्वयाधिमाचक्षते लौकिकाः यत्र तु वृद्ध्यादे

एवाध्युपभोग इति परिभाषा तत्र ईगुरुखातिक्रमेऽपि यावन्मूलदानं तावदुपभुङ्क्ते एवाधिम् एतदेव स्पष्टीकृतं बृहस्पतिना "ऋणी बन्धमवाप्नुयात्। फलभोग्यं पूर्णकालं दत्त्वा द्रव्यञ्च सामकम्। यदि प्रकर्षितं तत्स्यात्तदा स धनभाग्धनी ऋणी च न लभेद्बन्धं परस्परमतं विना" अस्यार्थः। फलभोग्यं यस्यासौ फलभोग्यः बन्ध आधिः स च द्विविधः सद्विगुणमूलापाकरणार्थो द्विगुणमूलापाकरणार्थश्च तत्र सद्विगुणमूलापाकरणार्थं बन्धं पूर्णकालं पूर्णः कालो यस्यासौ पूर्णकालस्तमाप्नुयादृणी। यदा सद्विगुणं मूलं फलद्वारेण धनिनः प्रविष्टन्तदा बन्धमवाप्नुयादित्यर्थः द्विगुणमूलापाकरणार्थन्तु बन्धं सामकन्दत्त्वा प्राप्नुयादृणी। समं मूलं सममेव सामकम्। अस्यापवादमाह। यदि प्रकर्षितं तत्स्यात्तद्बन्धकं प्रकर्षितमतिशयितं द्विगुणमूलाधिकफलं यदि स्यात्तदान धनभाग्धनी। सामकं न लभेद्बन्धं, मूलमदत्त्वेवर्णी बन्धमवाप्नुयादिति यावत्। अथाप्रकर्षितं तद्बन्धकं द्विगुणेऽप्यपर्याप्तन्तदा सामकं दत्त्वापि बन्धम् न लभेतमर्णः द्विगुणेपदत्त्वैव लभेतेत्यर्थः। पुनरुभयलाभवादमाह। परस्परमतं विना उत्तमर्णाधर्णयोः परस्परानुमत्यभावे यदि प्रकर्षितमित्याद्युक्तम्। परस्परानुमतौ तूत्कृष्टमपि बन्धकं यावन्मूलदानन्तावदुपभुङ्क्ते धनी निकृष्टमपि मूलमात्रदानेनैवाधमर्णोलभत इति"।

आधिकरणिक पु० अधिकरणे विचारस्थाने नियुक्तः ठक्। विचारस्थाने नियुक्ते प्राड्विवेकादौ।

आधिक्य न० अधिकस्य भावः ष्यञ्। अधिकतायाम् अतिशयितायाम्। "यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः" मनुः "युग्मावामपि रात्रौ चेत् योषितं प्रचुरं तदा। कन्या च पुंवत् भवति शुक्राधिक्ये पुमान् भवेत्" ज्योतिस्तत्त्वम् "प्रातिपदिकमात्रे लिङ्गमात्राद्याधिक्ये" सि० कौ० "एवमेतद्गुणाधिक्यं द्रव्ये द्रव्ये व्यवस्थितम्" सुश्रु०।

आधित्त त्रि० आधिं मनःपीड़ां जानाति अनुभवति त्ता-क इत०। व्याधानुभवके व्यथिते अजयपालः।

आधिदैविक त्रि० अधिदेवं भवः देवान् वातादीन् अधिकृत्य प्रवृत्तः वा ठञ् अनुगतिका० द्विपदवृद्धिः। देवाधिकारेण प्रवृत्ते, १शास्त्रे "अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च" मनुः देवताऽधिकारेण प्रवृत्तवेदभागस्तु उपनिषत्सु प्रसिद्धः। वातादिनिबन्धने २दुःखे च। दुःखं हि त्रिविधमाध्यात्मिकादिभेदात् तेषां स्वरूपकारणविभागादिः सुश्रुते दर्शितः यथा

"तच्च दुःखं त्रिविधमाध्यात्मिकमाधिभौतिकमाधिदैविकमिति। तत्तु सप्तविधे व्याधावुपनिपतति। ते पुनः सप्तविधा व्याधयः। तद्यथाऽऽदिबलप्रवृत्ता जन्मबलप्रवृत्ता दोषबलप्रवृत्ताः संघातबलप्रवृत्ताः कालबलप्रवृत्ताः दैवबलप्रवृत्ताः स्वभावबलप्रवृत्ता इति। तत्रादिबलप्रवृत्ता ये शुक्रशोणितदोषान्वयाः कुष्ठार्शःप्रभृतयः। तेऽपि द्विविधा मातृजाः पितृजाश्च॥ जन्मबलप्रवृत्ता ये मातृरुपचारात्प्रजाजन्मबधिरमूकक्लिष्टखलवामनप्रभृतयो जायन्ते तेऽपि द्विविधा रसजता दौहृदापचारजताश्च॥ दोषबलप्रवृत्ता य आतङ्कसमुत्पन्ना मिथ्याहाराचारभवाश्च तेऽपि द्विविधा आमाशयसमुत्थाः पक्वाशयसमुत्थाश्च पुनश्च द्विविधाः शारीरा मानसाश्च त एत आध्यात्मिकाः॥ संघातबलप्रवृत्ता य आगन्तवो दुर्बलस्य बलवद्विषहाश्चेऽपि द्विविधाः शस्त्रजता वज्रादिजताश्च। एत आधिभौतिकाः॥ कालबलप्रवृत्ता ये शीतोष्णवातवर्षाप्रभृतिनिमित्तास्तेऽपि द्विविधा व्यापन्नर्तुजता अव्यापन्नर्तुजताश्च॥ दैवबलप्रवृत्ता ये देवर्षीदाभिशस्ता अथर्वजता उपसर्गजताश्च तेऽपि द्विविधा विद्युदशनिजताः पिशाचादिजताश्च पुनश्च द्विविधाः संसर्गजा आकस्मिकाश्च॥ स्वभावबलप्रवृत्ताः क्षुत्पिपासाजराव्याधिनिद्राप्रभृतयस्तेऽपि द्विविधाः कालजताश्चाकालजताश्च तत्र परिरक्षणजताः कालजता अपरिरक्षणजता अकालजता एत आधिदैविकाः"। एतदभिप्रायेणैव "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" इति सा० सू० "दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ" सा० का० दुःखत्रयसूत्रं विवृतञ्च सां० त० कौ०। "दुःखानां त्रयं दुःखत्रयं तत् खलु आध्यात्मिकमाधिभौतिकमाधिदैविकञ्च तत्राध्यात्मिकं द्विविधं शारीरं मानसञ्च। शारीरं वातपित्तश्लेष्णाम् वैषम्यनिमित्तं, मानसं कामक्रोधलोभमोहभयेर्ष्याविषादविषयविशेषादर्शननिबन्धनम्। सर्वं चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम्। बाह्योपायसाध्यञ्च दुःखं द्वेधा आधिभौतिकमाधिदैविकञ्च तत्राधिभौतिकं मानुषपशुपक्षिसरीसृपस्थावरनिमित्तम्। आधिदैविकं यक्षराक्षसविनायकग्रहावेशनिबन्धनम्"। "तापत्रयोन्मूलनम्" भाग० १स्क० उक्तम्। दुःखञ्चात्मधर्म इति वैशेषिकादयः। अन्तःकरणादि धर्म इति सांख्यादयः। अन्तःकरणादेः त्रिगुणात्मकप्रकृतिकार्य्यत्वात् प्रीत्यप्रीतिविषादानां त्रिगुणधर्म्माणां स्वकार्य्ये संक्र-

मात् सर्वेषां विषयाणामेव दुःखादिमत्त्वमिति भेदः ।

आधिपत्य न० अधिपतेर्भावः कर्म्म वा पत्यन्तत्वात् यक् । स्वामित्वे "अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम्। गीता। "राष्ट्रस्याधिपत्यं मे देहि" ऋ० १०, ११४, ५। "तदेनमासां प्रजानामाधिपत्याय राज्याय" शत० ब्रा० "सर्वलोकाधिपत्यञ्च वेदशास्त्रविदर्हति" इति मनुः "यत्राणामाधिपत्यञ्च राजराजत्वमेव च" भा० व० २७४ अ० । २राजकार्य्ये प्रजापालनादौ । "दुर्य्योधनं त्वहितं वै निगृह्य पाण्डोः सुतं प्रकुरुष्वाधिपत्ये। अजातशत्रुर्हि विशुद्धरागो धर्म्मेणेमां पृथिवीं शास्तु राजन्" भा० व० ४ अ० ।

आधिबन्ध पु० आधिः बद्धप्रजानां कथं पालनं स्यादिति चिन्ता एव बन्धः । बद्धप्रजारक्षणार्थचिन्तारूपबन्धे । "कथं राजन् ! प्रजारक्षाधिबन्धेन युज्यते" युधिष्ठिरप्रश्ने तच्चिन्ताधिरूपबन्धनिवारणाय यथा राज्ञाचरणीयं तथोक्तं तं प्रति भीष्मेण भा० शा० ७० अ० "समासेनैव ते राजन् ! धर्मान् वक्ष्यामि शाश्वतान्। विस्तरेणेह धर्माणां न जात्वन्तमवाप्नुयात्। धर्मनिधान् श्रुतवतो देवव्रतसमाहितान्। अर्चयित्वा यजेथास्त्वं मूर्द्धे मुख्यवतो द्विजान्। प्रत्युत्थायोपसंगृह्य चरणावभिवाद्य च। अथ सर्व्वाणि कुर्व्वीथाः कार्य्याणि सपुरोहितः। धर्म्मकार्य्याणि निर्वर्त्त्य मङ्गलानि प्रयुज्य च। ब्राह्मणान् वाचयेथास्त्वमर्थसिद्धिजयाशिषः। आर्জ্জवेन च सम्पन्नो दृष्ट्वा वृद्धाञ्च भारत ! । यथार्थं प्रतिगृह्णीयाः कामक्रोधौ च वर्জ্জयेः । कामक्रोधौ पुरस्कृत्य योऽर्थं राजाऽनुतिष्ठति । न स धर्म्मं न चार्थं प्रतिगृह्णाति वालिशः । मा स्म लुब्धांश्च मूर्खांश्च कामार्थेषु प्रयोजयः । अलुब्धान् बुद्धिसम्पन्नान् सर्वकर्म्मसु योजयेः । मूर्खो ह्यधिकृतोऽर्थेषु कार्य्याणामविचारदः। प्रजाः क्लिश्नात्ययोगेन कामक्रोधसमन्वितः । वणिग्वदेन शुल्केन दण्डेनापराधिनाम् । शास्त्राणि तेन लिप्सेथा वेतनेन धनागमम् । दापयित्वा करं धर्म्मं राष्ट्रं नीत्वा यथाविधि । तथैतं कल्पयेद्राजा योगक्षेममतन्द्रितः । गोपायितारं दातारं धर्म्मनित्यमतन्द्रितम् । अकामद्वेषसंयुक्तमनुरज्यन्ति मानवाः । मा स्माधर्म्मेण लोभेन लिप्सेथास्त्वं धनागमम् । धर्मार्थावध्रुवौ तस्य यो न शास्त्रपरो भवेत् । अर्थशास्त्रपरो राजा धर्मार्थाभ्यामधिगच्छति । अस्थाने चास्य तद्धितं सर्वमेव विनश्यति । अर्थमूलो हि हिंसाञ्च कुरुते स्वयमाक्रमः । करैरशास्त्रदृष्टैर्हि मोहात् सम्पीडयेत् प्रजाः । अधस्विन्द्यात्तु यो धेनोः क्षीरार्थी न लभेत् पयः । एवं राष्ट्रमयोगेन पीड्यमानं न विवर्द्धते । यो हि दोग्ध्रीमुपास्ते च स नित्यं विन्दते पयः । एवं राष्ट्रमुपायेन भुञ्जानो लभते फलम् । अथ राष्ट्रमुपायेन भुञ्जानं सुरक्षितम् । जनयत्यतुलां नित्यं कोषवृद्धिं युधिष्ठिर ! । दोग्ध्री धान्यं हिरण्यञ्च मही राज्ञा सुरक्षिता । नित्यं स्वेभ्यः परेभ्यश्च त्रात्मा माता यथा पयः । मातृकारोपमो राजन् ! भव नाङ्गारिकोपमः । तथा युक्तश्चिरं राज्यं भोक्तुं शक्ष्यसि पालयन् । परचक्राभियानेन यदि ते स्यादनामयः । अथ सान्त्वेन लिप्सेथा धनमब्राह्मणेषु यत् । मा स्म ते ब्राह्मणं दृष्ट्वा धनस्थं प्रच्छेन्मनः । अन्यायामव्यवस्थायां किन्तु स्यीतस्य भारत । धनानि तेभ्यो दद्यास्त्वं यथार्थमिति यथार्हतः । सान्त्वयन् परिरक्षंश्च स्वर्गमाप्स्यसि दुर्জ্জयम् । एवं धर्म्मेण तुष्टेन प्रजास्त्वं परिपालय । स्वर्गं सुखं यशो नित्यं प्राप्स्यसे कुरुनन्दन ! । धर्म्मेण व्यवहारेण प्रजां पालय पाण्डव ! । युधिष्ठिर ! यदा युक्तो नाधिबन्धेन योक्ष्यसे । एष एव परो धर्म्मो यद्राजा रक्षति प्रजाः । भूतानां हि यदा धर्म्मो रक्षणं परमा दया । तस्मादेव परं धर्म्मं मन्यन्ते धर्म्मकोविदाः । यो राजा रक्षणे युक्तो भूतेषु कुरुते दयाम् । यदृच्छा कुरुते पापमरक्षन् भयतः प्रजाः । राजा वर्षसहस्रेण तस्यान्मधिगच्छति । यदृच्छा कुरुते धर्म्मं प्रजा धर्म्मेण पालयन् । दश वर्षसहस्राणि तस्य भुङ्क्ते फलं दिवि । खिष्टिः सुधीतिः सुतपा लोकान् जयति यावतः । तावेन तावाप्नोति प्रजा धर्म्मेण पालयन् । एवं धर्मं प्रयत्नेन कौन्तेय ! परिपालय । ततः पुण्यफलं लब्ध्वा नाधिबन्धेन योक्ष्यसे" ।

आधिभोग पु० आधेर्ब्बन्धकद्रव्यस्य भोगः । बन्धकद्रव्यस्य भोगे "गोष्याधिभोगे नो वृद्धिः" आधिशब्दे उदा० आधेर्मनोव्यथाया अनुभवरूपे २भोगे च ।

आधिभौतिक त्रि० भूतानि व्याघ्रसर्पादीन्यधिकृत्य जातम् । अधिभूत+ठञ् द्विपदवृद्धिः । व्याघ्रसर्पादिजनिते दुःखे । आधिदैविकशब्दे विवृतिः ।

आधिमन्यव अधिमन्यवे हितः अण् । ज्वरार्त्तौ हारा० ज्वरसन्तापे हि अधिकव्यथोद्भवात्तस्य तथात्वम् ।

आधिरथि पु० अधिरथः धृतराष्ट्रसारथिः तस्यायम् इञ् । सूतपुत्रे कर्णे "हिरण्यकण्ठीः प्रमदाः पामानं वा बहुगोकुलान्। किं ददानीति तं विप्रस्तवाचाधिरथिस्ततः भा०

व० प० ३०८ अध्या०। तस्याधिरवपुत्रत्वप्राप्तिकथा स हि कन्यावस्थायां सूर्येण कुन्त्याम् उत्पादितः पश्चाच्च तया स्वकुलभयात् जले त्यक्तः अधिरथेन गृहीतो वर्द्धितश्च यथोक्तं "निगूहमाना जातं वै बन्धुपक्षभयात्तदा। उत्ससर्ज्ज जले कुन्ती तं कुमारं यशस्विनम्। तत्तृष्टं जले गर्भं राधाभर्त्ता महायशाः। राधायाः कल्पयामास पुत्रं सोऽधिरथस्तदा। चक्रतुर्नामधेयञ्च तस्य बालस्य तावुभौ। दम्पती वसुषेणेति" भा०आ०६७अ०।

आधिराज्य न० अधिराजस्य भावः कर्म्म वा ष्यञ्। आधिपत्ये "बभौ भूयः कुमारत्वादाधिराज्यमवाप्य सः" रघुः।

आधिवेदनिक त्रि० अधिवेदनाय विवाहोपरिविवाहाय हितं ठक् तत्र काले दत्तं ठञ् वा। अधिवेदनार्थे तत्र काले च स्त्रियै पत्या दीयमाने स्त्रीधनभेदे। "पितृमातृपतिभ्राद्दत्तमध्यग्न्युपागतम्। आधिवेदनिकञ्चैव स्त्रीधनं परिकीर्त्तितम्" या०स्मृ०। "यच्च द्वितीयविवाहार्थिना पूर्वस्त्रियै पारितोषादिकं धनं दत्तं तदाधिवेदनिकमधिकस्त्रीलाभार्थत्वात्तथेति" दायभा०। मिताक्षरायां तु "आधिवेदनिकाद्येति" पठित्वा आधिवेदनिकम् अधिवेदननिमित्तमिति व्याख्याय आद्यपदेन क्रयविक्र्यादिप्राप्तस्य ग्रहणमित्युक्तम्। तत्र अधिवेदननिमित्तदाने विशेषः या० स्मृत्युक्तः "अधिविन्नस्त्रियै देयमाधिवेदनिकं समम् न दत्तं स्त्रीधनं यस्या दत्ते त्वर्द्धं प्रकल्पयेत्" "एतदपि सामर्थ्ये असामर्थ्ये तु यत् किञ्चित् भरणपर्य्याप्तं दत्त्वा परितोषयेदिति भेदः। "एकामूढ्वा तु कामार्थमन्यां वोढुं यदृच्छति। समर्थस्तोषयित्वाऽग्नेः पूर्व्वोढामपरां वहेत्" स्मृतौ समर्थपदस्वारस्यात्तथात्वम्। एवमेव मदनपारिजातविधानपारिजातादयः।

आधिसेन पु० आधेर्गोप्याधेर्भोगात् सेनइव। गोप्याधेर्बलात्कारेण भोक्तरि। "न भोक्तव्यो बलादाधिर्भुञ्जानोऽर्द्धवृद्धिमुत्सृजेत्। मूल्येन तोषयेदेनमाधिसेनोऽन्यथा भवेत्" मनुना तद्भोगे सेनत्वस्योक्तेस्तथात्वम्।

आधीकरण न० अनाधिराधिक्रियते आधि+च्वि+कृ-ल्युट्। बन्धकीकरणे आधिशब्दे मिताक्षरावाक्ये उदा०" क्त आधीकृतः। दत्तबन्धके द्रव्यादौ त्रि०।

आधुत त्रि० आ+धु-क्त। चालिते। [अप्राचीने च स्त्रियां ङीप्

आधुनिक त्रि० अधुना भवः ठञ्। १साम्प्रतभवे २अर्वाचीने

आधृष्टि स्त्री० आ+धृष-भावे क्तिन्। १परिभवे २बलाद् निग्रहे च।

आधेय त्रि० आ+धा-कर्म्मणि यत्। १उत्पाद्ये। "आधेयश्चाक्रियाजन्यो योऽसत्त्वप्रकृतिर्गुणः" व्या०का०। यस्य सतो गुणान्तरमुत्पाद्यम् २तादृशे उत्पाद्यगुणान्तरे विद्यमाने एव यत्र घटादिपदार्थे पाकादिना रक्तताद्यन्तरमाधीयते तादृशे घटादौ। आधानविधिना ३स्थापनीये वह्नौ पु०। ४अधिकरणेऽभिनिवेशनीये "अधिकं दृढमाधाराद्याधेयाधिक्यवर्णनम्" चन्द्रा०। ५स्थापनीये द्रव्ये च। भावे यत्। ६आधाने न०। "अग्न्याधेयम्" आश्व० औ०सू०। "अन्यतराभावे कार्या प्राग्नग्न्याधेयात्" गौभा०सू०।

आधोरण पु० आ+धोर-गतिचातुर्य्ये ल्यु। हस्तिगतिचातुर्य्ये हस्तिपके। स्वल्पबलेनापि महाबलस्य हस्तिनः सङ्केतादिनैव चालनात्तस्य गतिचातुर्य्यवत्त्वात्तथात्वम्।

आध्मात त्रि० आ+ध्मा-क्त। १ग्रन्थिते, २दग्धे, ३वातदोषजातोदरस्फीततासम्पादकरोगयुक्ते "साटोपमल्पमल्पस्मादाध्मातमुदरंभव्यम्" सुश्रु०। भावे क्त ४आध्माने न०।

आध्मान पु० आ+ध्मा-आधारे ल्युट्। "आध्मानमिति जानीयाद्दोषं वातनिरोधजम्" इत्युक्ते १वातव्याधौ। "मुखञ्च मूलं सर्व्वस्य प्रवृत्तिं वक्ष्यतोदराध्मानञ्च" सुश्रु० भावे ल्युट्। २उदरस्फीततायाम्। ३अग्निसंयोगजे शब्दभेदे न०। करणे ल्युट्। ४नलिकानामगन्धद्रव्ये स्त्री०ङीप्।

आध्मापन न० आ+ध्मा-णिच्-युक्-भावे ल्युट्। १शब्दनिष्पादने २आध्माननिष्पादने सुश्रुतोक्ते ३शस्त्रापसारणीयव्यापारभेदे च। "अशून्यशयखानि परिषेचनाध्मापनैर्बालवस्त्रपाणिभिः प्रमार्ज्जयेत्" सुश्रु०।

आधृत्य न० अध्यक्षस्य भावः ष्यञ्। १अधिष्ठातृत्वे २अधिकर्त्तृव्यापारे ३प्रत्यक्षत्वे च। [स्मृतौ

आधा स्त्री आ+ध्यै-भावे अङ्। १चिन्तने २औत्सुक्येन

आध्यात्मिक त्रि० आत्मानं मनःशरीरादिकमधिकृत्य भवः ठञ्। मोक्षमोहज्वरादिरूपे दुःखे। आधिदैविकशब्देऽस्य विवृतिः। [र्व्यक्करणे च।

आध्यान न० आध्यै+-ल्युट्। १चिन्तायाम्, २उत्कण्ठाप्

आध्यापक पु०अध्यापकएव स्वार्थेऽण्। अध्यापके शब्दरत्ना०

आध्यायिक पु० अधीयतेऽध्यायोऽध्येयोवेदस्तमधीते ठञ्। अधीतवेदे "युवा स्यात् साधुयुवाध्यायिकः" तैत्ति०उ०। "आध्यायिकोऽधीतवेदः" भा०।

आध्यासिक त्रि० अध्यासेन कल्पितः ठक्। वेदान्तिमते अध्यासेन कल्पिते अतद्वति तत्त्वारोपेण कल्पिते पदार्थे यथा शुक्तिकादौ रजतादि कल्पितम् एवं ब्रह्मणि जगदादि

आरोपितमिति तस्याध्यासिकत्वमिति वेदान्तसिद्धान्तः ।

आध्र पु० आ+ध्र-क । आधारे । "आध्रस्य चित् प्रमतिरुच्यसे" ऋ० १,३१,१४ । "आध्रेण चित्तद्वेकं चकार" ऋ०७,१८,१७ ।

आध्वनिक त्रि० अध्वनि कुशलः ठक् । पथिकुशले "आन्तारेऽपि विश्रामे जनस्याध्वनिकस्य वै" भा० आ० ।

आध्वरायण पुंस्त्री० अध्वरोपज्ञाभिन्नस्य गोत्रापत्यम् नडा० फक् । यज्ञविद्गोत्रापत्ये ।

आध्वरिक पु० अध्वरस्य व्याख्यानो ग्रन्थः ठक् । अध्वरव्याख्याने ।ग्रन्थे । अध्वरं यज्ञं वेत्ति तत्प्रतिपादकपन्थमधीते वा ठक् । २यज्ञवेत्तरि २तत्प्रतिपादकग्रन्थाध्येतरि च त्रि० ।

आध्वर्यव त्रि० अध्वर्योर्यजुर्वेदविद इदम् अञ् । अध्वर्यु सम्बन्धिनि कर्म्मादौ । "यदि वाध्वर्यवं राजा नियुनक्ति पुरोहितम्" अथ० १०,५२,२ । "ऋग्वेदेन होत्रमृक्वत यजुर्वेदेनाध्वर्यवं सामवेदेनोद्गीथम्" शत०ब्रा० ।

आन पु० आनित्यनेन आ+अन-करणे किप् आ प्राणवायुः ततः सुपास्था०अदूरभवादौ अण् । सम्यग्जीवनसाधनस्य अन्तःस्थितस्य प्राणवायोर्नासिकया बहिर्निस्सारणेऽच्छ्वासे

आनक पु० आनयति सोत्साहान् करोति अन-णिच् ख्वुल् । १पटहे, २मर्दले, "ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः सहसैवाभ्यहन्यन्त" गीता ३सशब्दभेदे च । ४उत्साहके त्रि० । कर्णादि० चतुरर्थ्यां फिञ् । आनकायनिः । तत्सन्निकृष्टदेशादौ त्रि० ।

आनकदुन्दुभि पु० आनकः प्रोत्साहकोदुन्दुभिर्दैववाद्यविशेषो यस्य । १कृष्णपितरि वसुदेवे । कृष्णजन्मोत्सवे हि तथा वाद्यं तदुत्पन्ने जातमिति तस्य तथात्वम् । २दृष्टदुन्दुकायां स्त्री वा ङीप् ।

आनकस्थली स्त्री आनकप्रधाना स्थली या०त० । आनकप्रधानस्थल्यां देशभेदे तस्यां भवः अदूरदेशादौ धूमा० वुञ् । आनकस्थलकः तत्सन्निकृष्टदेशादौ त्रि० ।

आनडुह न० आनडुह इदम् अण् । १वृषसम्बन्धिनि गोमय चर्म्मादौ । "आनडुहोगोमयः क्षरः स्यात्पीलाकः" गोभि० "चर्म्मण्यानडुहे रक्षो स्याद्यं भद्रासने तथा" या०स्मृ० । आनडुहा कृतम् अण् । २खनामख्याते तीर्थभेदे तच्च तीर्थं सङ्गगिरिसन्निकृष्टदेशस्थितम् यथा क्रौञ्चपुरं वर्णयित्वा । "तमद्यैव राजानं निवासाय गतेऽहनि । तीर्थमानडुहं नाम गमिष्यामः सनातनम् । ततश्च तं गमिष्यामः सङ्गस्य विवरे गिरिम्" । गोमन्तमिति विख्यातम्" हरिवं० २९अ० ।

आनडुहक त्रि० आनडुहा कृतम् संज्ञायां कुलसा० वुञ् । आनडुत्कृते गोमयादौ ।

आनडुह्य पु० आनडुहोगोत्रापत्यम् गर्गा० यञ् । आनडुह्यामकस्य मुनेर्गोत्रापत्ये । ततः पुनः गोत्रापत्ये अश्वा० फञ् । आनडुह्यायनः तदपत्ये पुंस्त्री० । चतुरर्थ्यां कर्णा० फिञ् । आनडुह्यायनिः तत्सन्निकृष्टदेशादौ त्रि० ।

आनत त्रि० आ+नम-क्त । १कृतप्रणामे, २अधोमुखे, ३विनयेन नते च "तं व्यासस्तनुमनसं मुनिमानतोऽस्मि" भा० १मस्कर्त्रे । "स्मृगृनृकरेष्वानतपूर्व्वकायम्" रघुः ।

आनति स्त्री आनमति प्रह्वीभवत्यनया आ+नम-करणे क्तिन् । आनुगत्यजन्ये १सन्तोषे "यच्च चिरावस्थितेर्व्यभिचारात् न प्रतिग्रहकारणत्वमानतेरिति" "आनतिद्वारा न प्रतिग्रहार्थत्वं द्रव्यस्येत्युक्तं तन्मन्दतरम् आनतिद्वारेण चिरान्नयनादीनां प्रतिग्रहकारणत्वादिति" "आनतेरनियतोपायपरिणामादिति" च दाय०भा० । भावे क्तिन् । २नम्रीभावे, ३अधोभवने, ४नम्रतायाञ्च "आत्मजातिसदृशीं क्रियानतिम्" किरा० ।

आनद्ध न० आ+नह+क्त । चर्म्मणा बद्धमुखे १पटहमृदङ्गादौ वाद्यभेदे, । २यन्त्रिते, ३व्याप्ते, ४बद्धे केशभूषादिके च त्रि० । "मूलबद्धे हे तयोर्मूलं बध्नितेर्द्वयञ्च तत्र विद्यानद्धवल्लिता" भरतः ।

आनन न० अनित्यनेन आ+अन-करणे ल्युट् । मुखे मुखेन हि जलपानादिना प्राणादेः स्थितिरतस्तस्य तथात्वम् "सारसैः कलनिर्हादैः क्वचिदुन्नमिताननौ" "तदाननं मृत्सुरभि क्षितीश्वरः" नृपस्य कान्तं पिबतः सुताननम्" इति च रघुः ।

आनन्तर्य्य न० अनन्तरमेव चतुर्व० स्वार्थे ष्यञ् । १अव्यवहिते अनन्तरस्य भावः ष्यञ् । २अव्यवधाने । "आनन्तर्य्यात् स्वयोन्यास्तु तथा बाह्येष्वपि क्रमात्" मनुः "पयसः कालानन्तर्य्यधर्मानुपचरेभ्यः" कात्या० ४,२,१६ ।

आनन्त्य न० अनन्तएव स्वार्थे अण् । १अनन्ते २असीमे अनन्तस्य भावः ष्यञ् । ३सीमाशून्यत्वे ४नागराजत्वे "हविर्यच्चिररात्राय यज्ञानन्त्याय कल्पते" मनुः । "लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः" या० स्मृतिः । "आनन्त्यात् कुलधर्म्माणां द्वादशाहे विधीयते" या०त० पु०५ शाश्वतप्रतिज्ञायाञ्च "यस्तु नित्यं कृतमतिर्धर्म्ममेवाभिपद्यते । अयङ्मानः

कल्याणि ! सोऽमूनानन्यमनुते" भा०व०प०२१अ०।

आनन्द पु० आ+नन्द्-घञ्। १हर्षे सुखे, २दुःखाभावे, ३ब्रह्मणि च। अर्शआदित्वादच्। ४आनन्दवति त्रि० "सत्यं ज्ञानमानन्दं ब्रह्मेति श्रुतिः। नैयायिका आनन्दशब्दः दुःखाभावे लाक्षणिकत्वाद्दुःखाभावे ब्रह्मणि आनन्दाभावेऽपि दुःखाभावरूपानन्दस्य तत्र सत्त्वात् आनन्दवत्त्वमिति ते मन्यन्ते वेदान्तिनस्तु ज्ञानं नपुंसकमिति आनन्दस्वरूपत्वमेव ब्रह्मणः दुःखाभावरूपस्यानन्दस्याधिकरणस्वरूपत्वादित्याहुः एतदभिप्रायेणैव विवरणे "आनन्दोविषयानुभवो नित्यत्वश्रुतेति सन्ति धर्म्मा अपृथक्त्वेऽपि पृथगिवावभासन्ते इत्युक्तम्" यथा च ब्रह्मण आनन्दप्रचुरत्वादानन्दमयत्वं तथा "आनन्दमयोऽभ्यासात्" भा०सू०भा० व्यवस्थापितम् तैत्ति०उप० आनन्दमयं प्रकृत्य "तस्य प्रियमेव शिरोमोदोदक्षिणः पक्षः प्रमोद उत्तरःपक्षः आनन्द आत्मा ब्रह्म पुच्छं प्रतिष्ठा"। "तस्यायानन्दमयस्यात्मन इष्टपुत्रादिदर्शनजं प्रियं शिर इव शिरः प्राधान्यात्। मोद इति प्रियलाभनिमित्तो हर्षः। स एव च प्रकृष्टो हर्षः प्रमोदः। आनन्द इति सुखसामान्यम्, आत्मा प्रियादीनां सुखावयवानां तेष्वनुस्यूतत्वादानन्द इति परं ब्रह्म। तद्धि शुभकर्म्मणा प्रसादयिष्यमाणे पुत्रमित्रादिविषयविशेषोपाधावन्तःकरणवृत्तिविशेषे तमसा। प्रच्छाद्यमाने प्रसन्नेऽभिव्यज्यते तद्विषयसुखमिति प्रसिद्धं लोके। तद्वृत्तिविशेषप्रसादोपस्थापकस्य कर्म्मणोऽनवस्थितत्वात्सुखस्य चाधिकत्वम्। तदुक्तं तपसा-तमोघ्नेन, विद्यया, ब्रह्मचर्य्येण, श्रद्धया च निर्म्मलत्वमापद्यते यावत्तावद्विविक्ते प्रसन्नेऽन्तःकरणविशेष आनन्द उच्छ्वसते विपुलोभवति। वक्ष्यति च "रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति एष ह्येवानन्दयाति" "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति"श्रुत्यन्तरात् एवञ्च कामोपशमोत्कर्षापेक्षया यतगुणोत्तरोत्तरोत्कर्षं आनन्दस्य वक्ष्यते। एवञ्चोत्कृष्यमाणस्यानन्दमयस्यात्मनः परमार्थब्रह्मविज्ञानापेक्षया ब्रह्म परमेव यत्प्रकृतं सत्यज्ञानानन्दलक्षणं यस्य च प्रतिपत्त्यर्थं पञ्चादादिमयाः कोशा उपन्यस्ताः। यच्च तेभ्योऽभ्यन्तरं येन च ते सर्वे आत्मवन्तस्तद्ब्रह्म पुच्छं प्रतिष्ठाः" भा० ब्रह्मण आनन्दरूपत्वमपि तत्रैव दर्शितं यथा "यदेतत् सुकृतं रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति कोह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् एष ह्येवानन्दयाति यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयेऽभयं प्रतिष्ठां विन्दते" तै० उ०। "कुतो रसत्वसिद्धिर्ब्रह्मण इत्यत आह। यदेतत्सुकृतं रसो वै सः। रसो नाम तृप्तिहेतुरानन्दकरो मधुरास्वादिः प्रसिद्धो लोके। रसमेवायं लब्ध्वा प्राप्यानन्दी सुखी भवति नासत आनन्दहेतुत्वं दृष्टं लोके। बाह्यानन्दसाधनरहिता अप्यनीहा निरेषणा ब्राह्मणा बाह्यरसलाभादिव सानन्दा दृश्यन्ते विद्वांसो नूनम्। ब्रह्मैव रसस्तेषाम् तस्मादस्ति तेषामानन्दकारणं रसवद्ब्रह्म। इतरत्रास्ति कुतः। प्राणनादिक्रियादर्शनात्। अयमपि हि पिण्डो जीवतः प्राणेन प्राणिति अपानेनापानिति। एवं वायवीया ऐन्द्रियकाश्च चेष्टाः संहतैः कार्य्यकारणैर्निर्वर्त्त्यमाना दृश्यन्ते। तद्धि कार्य्यदृष्टित्वेन संहननम् संहन्यमानं च नान्तरेण चेतनं संहतं सम्भवति अन्यत्वादर्शनात्। तदाह यद्यदि एष आकाशे परमे व्योम्नि गुहायां निहित आनन्दो न स्यान्न भवेत्को ह्येव लोकेऽन्यादपानचेष्टां कुर्य्यादित्यर्थः। कः प्राण्यात् प्राणनं कुर्य्यात्तस्मादस्ति तद्ब्रह्म। यदर्थाः कार्य्यकारणप्राणनादिचेष्टाः? तत्रैत एवानन्दो लोकस्य। कुतः! एष ह्येव परआत्मा आनन्दयाति आनन्दयति सुखयति लोकं धर्माद्यनुरूपम्। स एवात्मानन्दरूपोऽविद्यया परिच्छिन्नो विभाव्यते प्राणिभिरित्यर्थः" भा०। सर्वानन्दापेक्षया ब्रह्मरूपानन्दस्योत्कर्षस्तत्रैव दर्शितो यथा "सैषानन्दस्य मीमांसा भवति। युवा स्यात् साधुयुवाध्यायिकः। आशिष्ठो दृढिष्ठो बलिष्ठः। तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्। स एको मानुष आनन्दः। ते ये शतं मानुषा आनन्दाः स एको मनुष्यगन्धर्वाणामानन्दः श्रोत्रियस्य चाकामहतस्य। ते ये शतं मनुष्यगन्धर्वाणामानन्दाः स एको देवगन्धर्वाणामानन्दः श्रोत्रियस्य चाकामहतस्य। ते ये शतं देवगन्धर्वाणामानन्दाः स एकः पितॄणां चिरलोकानामानन्दः श्रोत्रियस्य चाकामहतस्य। ते ये शतं पितॄणां चिरलोकानामानन्दाः। स एक आजानजानां देवानामानन्दः श्रोत्रियस्य चाकामहतस्य। ते ये शतमाजानजानां देवानामानन्दाः स एकः कर्म्मदेवानामानन्दः ये कर्म्मणा देवानपि यन्ति, श्रोत्रियस्य चाकामहतस्य। ते ये शतं कर्म्मदेवानामानन्दाः स एको देवानामानन्दः श्रोत्रियस्य चाकामहतस्य। ते ये शतं

देवानामानन्दाः स एक इन्द्रस्यानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शतमिन्द्रस्यानन्दाः स एको बृहस्पतेरानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शतं बृहस्पतेरानन्दाः । स एक प्रजापतेरानन्दः श्रोत्रियस्य चाकामहतस्य । ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्दः श्रोत्रियस्य चाकामहतस्य । स यश्चायं पुरुषे यश्चासावादित्ये स एकः । स य एवंवित् अस्माल्लोकात्प्रेत्य एतमन्नमयमात्मानमुपसङ्क्रामति, एतं प्राणमयमात्मानमुपसङ्क्रामति, एतं मनोमयमात्मानमुपसङ्क्रामति, एतं विज्ञानमयमात्मानमुपसङ्क्रामति, एतमानन्दमयमात्मानमुपसङ्क्रामति" तैत्ति० उप० "तस्यास ब्रह्मण आनन्दस्यैषा मीमांसा विचारणा भवति किमानन्दस्य मीमांसमित्युच्यते । किमानन्दो विषयविषयिसम्बन्धजनितो लौकिकानन्दवदाहोस्विन्नित्याभाविक इत्येवमेषानन्दस्य मीमांसा । तत्र लौकिक आनन्दो बाह्याध्यात्मिकसाधनसम्पत्तिनिमित्तउत्कृष्टः । स य एष निर्दिश्यते ब्रह्मानन्दानुगमार्थम् । अनेन हि प्रसिद्धेनानन्देन व्याकृतविषयबुद्धिगम्य आनन्दोऽनुगन्तुं शक्यते । लौकिकोऽप्यानन्दो ब्रह्मानन्दस्यैव मात्राऽविद्यया तिरस्कृत्यमाणोऽविद्यातो उत्कृष्यमाणायां चाविद्यायां ब्रह्मादिभिः कर्मवशाद्यावद्विज्ञानं विषयादिसाधनसम्बन्धवशो विभाव्यमानश्च लोकेऽनवस्थितो लौकिकः सम्पद्यते स एवाविद्याकामकर्मापकर्षेण मनुष्यगन्धर्वाद्युत्तरोत्तरभूमिष्वकामहतविद्वच्छ्रोत्रियप्रत्यक्षो विभाव्यते शतगुणोत्तरोत्तरोत्कर्षेण यावद्धिरण्यगर्भस्य ब्रह्मण आनन्द इति । निरस्ताऽविद्याक्लेशे विषयविषयिविभागे विद्याया स्वाभाविकः परिपूर्णैक आनन्दोऽद्वैते भवतीत्येतमर्थं विभावयिष्यन्नाह । युवा प्रथमवयाः साधुयुवेति । साधुश्चासौ युवा चेति यूनो विशेषणम् । युवाप्यसाधुर्भवति साधुरप्ययुवाऽतो विशेषणं युवा स्यात्साधुयुवेति । आध्यायिकोऽधीतवेदः । आशिष्ठ आशासितृतमः । दृढिष्ठो दृढतमः । बलिष्ठो बलवत्तमः । एवमाध्यात्मिकसाधनसम्पन्नः । तस्येयं पृथिवी उर्वी सर्वा वित्तस्य वित्तेनोपभोगसाधनेन दृष्टार्थेन च कर्मसाधनेन सम्पन्ना पूर्णा । राजा पृथिवीपतिरित्यर्थः । तस्य च य आनन्दः स एको मानुषो मनुष्याणां प्रकृष्ट एक आनन्दः । ते ये शतं मानुषा आनन्दाः स एको मनुष्यगन्धर्वाणामानन्दः । मनुष्यादानन्दाच्छतगुणेनोत्कृष्टो मनुष्यगन्धर्वाणामानन्दो भवति । मनुष्याः सन्तः कर्मविद्याविशेषाद्गन्धर्वत्वं प्राप्ताः मनुष्यगन्धर्वाः ते ह्यनर्धादिशक्तिसम्पन्नाः सुकृतकार्यकारणाः । तस्मात्प्रतिघाताल्पत्वं तेषां दुःखप्रतिघातशक्तिसाधनसम्पत्तिश्च । ततोऽप्रतिहन्यमानस्य प्रतिकारवतो मनुष्यगन्धर्वस्य स्वाच्चित्तप्रसादः । तस्य प्रसादविशेषात्सुखविशेषाभिव्यक्तिः । एवं पूर्वस्याः पूर्वस्या भूमेरुत्तरस्यास्तरस्यां भूमौ प्रसादविशेषतः शतगुणेनानन्दोत्कर्ष उपपद्यते । प्रथमत्वकामहतात्यहणं मनुष्यविषयभोगकामनाभिहतस्य श्रोत्रियस्य मनुष्यानन्दाच्छतगुणेनानन्दोत्कर्षो मनुष्यगन्धर्वेण तुल्यो वक्तव्य इत्येवमर्थं साधु युवाध्यायिक इति श्रोत्रियत्वाद्विजनित्वे सत्यते । ते ह्यविशिष्टे सर्वत्र । अकामहतत्वं तु विषयोत्कर्षापकर्षतः सुखोत्कर्षापकर्षाय विशिष्यते । अतोऽकामहतमग्रहणम् । तद्विशेषतः शतगुणात् सुखोत्कर्षोपलब्धेरकामहतत्वस्य परमानन्दप्राप्तिसाधनत्वविधानार्थम् । व्याख्यातमन्यत् । देवगन्धर्वा जातित एव । चिरलोकानामिति पितॄणां विशेषणम् । चिरकालस्थायी लोको येषां पितॄणां ते चिरलोका इति । आजान इति देवलोकस्य सञ्ज्ञाजाने जाता आजानजा देवाः स्वार्जितकर्मविशेषतो देवस्थानेषु जाताः । कर्मदेवा ये वैदिकेन कर्मणाग्निहोत्रादिना केवलेन देवानपि यन्ति । देवा इति त्रयस्त्रिंशद्वर्गविभुजः । इन्द्रस्तेषां स्वामी तस्याचार्यो बृहस्पतिः प्रजापतिर्विराट् त्रैलोक्यशरीरो ब्रह्मा । समष्टिव्यष्टिरूपः संसारभरणानलव्यापी । यत्रैत आनन्दभेदा एकतां गच्छन्ति । धर्मश्च तन्निमित्तं ज्ञानञ्च तद्विषयमकामहतत्वं च निरतिशयं यत्र स एष हिरण्यगर्भो ब्रह्मा तस्यैष आनन्दः श्रोत्रियेणाविजनेनाकामहतेन च सर्वतः प्रत्यक्षमुपलभ्यते । तस्मादेतानि त्रीणि साधनानीत्यवगम्यते । तत्र श्रोत्रियत्वाद्विजनित्वे निवृते अकामहतत्वं त्वकृष्यते इति प्रकृतसाधनतावगम्यते । तस्य तस्याकामहतत्वं प्रकर्षतश्चोपलभ्यमानः श्रोत्रियप्रत्यक्षो ब्रह्मण आनन्दो यस्य परमानन्दस्य मात्रा एकदेशः । "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति" श्रुत्यन्तरात् । स एष आनन्दो यस्य मात्रा समुद्रास्मस इव विप्रुषः प्रविभक्ता यत्रैकताङ्गताः स एष परमानन्दः स्वाभाविकोऽद्वैतत्वात् । आनन्दानन्दिनोश्चाविभागोऽत्र । तदेतन्मीमांसाफलमुपसंहियते स यश्चायं पुरुष इति । गुहायां निहितः परमे व्योम्नि प्राकाशादिकार्ये बृहत्त्वमत्यन्तं

(4) Vol I

तदेवानुप्रविष्टः स य इति निर्दिश्यते । स एकोऽसावयं पुरुषे यश्चासावादित्ये यः परमानन्दः श्रोत्रियप्रत्यक्षो निर्दिष्टो यस्यैकदेशं ब्रह्मादीनि भूतानि सुखार्णवमुपजीवन्ति स यश्चासावादित्ये इति स एकः । तं मीमांसया च सिद्धमुपसंहृतं भिन्नप्रदेशस्थघटाकाशाकाशैकत्ववत् । नन्वानन्दस्य मीमांसा प्रकृता तस्या अपि फलमुपसंहर्त्तव्यम्, अभिन्नः स्वाभाविक आनन्दः परमात्मैव न विषयविषयिसम्बन्धजनित इति । ननु तदनुरूपएवायं निर्देशः स यश्चायं पुरुषे यश्चासावादित्ये स एक इति भिन्नाधिकरणस्थविशेषोपमर्दनेन । नन्वेवमप्यादित्यविशेषग्रहणमनर्थकम् । नानर्थकम् । उत्कर्षापकर्षापोहार्थत्वात् । द्वैतस्य हि यो मूर्त्तामूर्त्तलक्षणस्योत्कर्षः सवित्रभ्यन्तरगतः स चेत् पुरुषगतविशेषोपमर्देन परमानन्दमपेक्ष्य समो भवति न कश्चिदुत्कर्षोऽपकर्षो वा तां गतिं गतस्येत्युभयं प्रतिष्ठां विन्दत इत्युपपन्नम्" । "स यः कश्चिदेवं यथोक्तं ब्रह्मोत्कृष्योत्कर्षापकर्षमहैतं सत्यं ज्ञानमनन्तमश्नोति । एवशब्दस्य प्रकृतपरामर्शार्थत्वात् । स किम् ? अश्नाश्नोकाल्लेव इष्टाइष्टविषयसुखादयो ह्ययं लोकस्तस्मादश्नाश्नोकाम्लेच्छ प्रत्याडत्य निरमेक्षो भूत्वा एतं यथा व्याख्यातम् अन्नमयमात्मानमुपसङ्क्रामति विषयजातमन्नमयात्पिण्डात्मनो व्यतिरिक्तं न पश्यति सर्वं स्थूलभूतमन्नमयमात्मानं पश्यतीत्यर्थः । ततोऽभ्यन्तरमेतं प्राणमयं सर्व्वान्नमयात्मस्वभावभिन्नम् । अथैतं मनोमयं विज्ञानमयमानन्दमयमात्मानमुपसंक्रामति । अथाऽदश्चेऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते तत्रैव नान्यत्र च" शाङ्करभाष्यम्

अत्र प्रसङ्गात् सुखदुःखादीनां स्वरूपकारणादिकं तावन्निरूप्यते प्रकृतेः सुखदुःखमोहात्मकसत्त्वरजस्तमोगुणस्वरूपत्वात् सुखादीनां सत्त्वादिकार्य्यत्वम् । यथोक्तं सां०का० "प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः । अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः" अस्याः सां०कौ० व्याख्या ।

"प्रीतिः सुखं प्रीत्यात्मकः सत्त्वगुणः, अप्रीतिर्दुःखं अप्रीत्यात्मकोरजोगुणः, विषादो मोहः विषादात्मकस्तमोगुण इति । ये तु मन्यन्ते न प्रीति र्दुःखाभावादतिरिच्यते एवं दुःखमपि न प्रीत्यभावादन्यदिति तान् प्रत्यात्मग्रहणम् । नेतरेतराभावाः सुखादयः अपि तु भावाः आत्मशब्दस्य भाववचनत्वात् प्रीतिरात्मा भावो येषां ते प्रीत्यात्मानः । एवमन्यदपि व्याख्येयम् । भावरूपता चैषामनुभवसिद्धा परस्पराभावात्मकत्वे तु परस्पराश्रयापत्तेरेकस्याप्यसिद्धेरुभयासिद्धिरिति भावः । स्वरूपमेषामुक्त्वा प्रयोजनमाह प्रकाशप्रवृत्तिनियमार्थाः अत्रापि यथासंख्यमेव । रजः प्रवर्त्तकत्वात्सर्वत्र लघु सत्त्वं प्रवर्त्तयेत् यदि तमसा गुरुणा न नियम्येत । तमोनियतन्तु क्वचिदेव प्रवर्त्तयतीति भवति तमो नियमार्थम् । प्रयोजनमुक्त्वा क्रियामाह अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च इत्तिः क्रिया सा च प्रत्येकमभिसम्बध्यते । अन्योन्याभिभववृत्तयः एषामन्यतमेनार्थवशाद्भूतेनान्यदभिभूयते । तथा हि सत्त्वं रजस्तमसी अभिभूय शान्तात्मनो वृत्तिं प्रतिलभते एवं रजः सत्त्वतमसी अभिभूय घोराम्, एवं तमः सत्त्वरजसी अभिभूय मूढामिति" ।

"प्रीत्यप्रीतिविषादाद्यैर्गुणानामन्योन्यं वैधर्म्यम्" सां० सू० । "गुणानां सत्त्वादिद्रव्यत्वयोगानामन्योन्यं सुखदुःखविषादाद्यैर्वैधर्म्यम् कार्य्येषु तद्दर्शनादित्यर्थः सुखादिकं च घटादिविषयाणामपि रूपवदेव धर्म्मोऽन्यःकरणोपादानत्वात् सर्व्वकार्य्याणां, तत्तद्गुणत्वौचित्यात् एतच्चानुपदं निरूपयिष्यते । मनसः संकल्पात्मकतावत् सत्त्वादीनां सुखाद्यात्मकता धर्म्मे धर्म्मभेदात्" सा०प्र०भा० । "हेयं दुःखमनागतम्" इत्युपक्रम्य "दृष्टृदृश्ययोगो हेयहेतुः" पात०सू० हेयस्य दुःखस्य कारणं दृष्टृदृश्ययोः संयोगसंज्ञा "प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम्" पा०सूत्रे दृश्यपदार्थो निरूपितः । अयमर्थः प्रकाशशीलं सत्त्वं, क्रियाशीलं रजः, प्रकाशक्रिययोः प्रतिबन्धरूपस्थितिशीलं तमः । तत्र सत्त्वं लघुत्वात् तप्यं, तापकं रजः रञ्जकत्वात् । एवं सत्त्वरजसोस्तप्यतापकभावे सति तमसा मोहः सम ताप इत्येवं रूपभ्रान्तिरूपोमोहः पुरुषस्य भवति । तदिदं सुखत्रयं स्वस्वकार्य्यं मिथः सहायमविवेकिभोग्यं विवेकिभोग्यं परस्पराश्रयं परस्पराभिभाव्याभिभानकभावञ्च गच्छति" इत्येवं स्थिते सति कारणान्तरे रजस्तमसी अभिभूय सत्त्वं यदा प्रवर्द्धते तदा सत्त्वोद्रेकात् सुखं जायते । सत्त्वतमसी अभिभूय सति कारणान्तरे यदा रजः प्रवर्द्धते तदा रज उद्रेकात् दुःखं भवति सत्त्वरजसी अभिभूय यदा तम उद्रिक्तं भवति तदा मोह विषादादिकं जायते इति सुखादिसङ्गवप्रकारः । तत्र कारणं धर्म्माधर्म्मादिसचिवोरागादिरेव । यथाह "सुखानुशयी रागः" दुःखानुशयी, द्वेषः" पा०सू०

सुखानुभवे सति स्मृत्वा तज्जातीयसुखान्तरे तत्साधने वा तृष्णा स रागः सुखमनुशेते विषयीकरोति सुखानुशयीत्यर्थः एवं दुःखानुभवितुः स्मृत्वा दुःखे तत्साधने वा यः क्रोधः स द्वेष इत्यर्थः। एवञ्च सुखस्य स्मरणात्मकत्वज्ञानात् सुखे इच्छा नान्येच्छाधीना इति तस्य स्वतःप्रयोजनत्वम् अन्येच्छानधीनेच्छाविषयत्वमेव तथात्वात्। तत्साधने तु सुखसाधनत्वज्ञानादेवेच्छा अतस्तस्य गौणप्रयोजनत्वम्। स्मरणात्मकदुःखत्वज्ञानाच्च दुःखे द्वेषः तत्साधने तु तत्साधनत्वज्ञानात् द्वेषः यथाह भाषा० "सुखन्तु जगतामेव कार्य्यं धर्म्मेण जन्यते। अधर्म्मजन्यं दुःखं स्यात् प्रतिकूलं सचेतसाम्। निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते। इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि। चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा च या भवेत्। तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत्। बलवदुद्दिष्टहेतुत्वमतिः स्यात् प्रतिबन्धिका। तदहेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते। द्विष्टसाधनताबुद्धिर्भवेद् द्वेषस्य कारणम्"। इच्छया च तत्साधने प्रवृत्तिः। द्वेषाच्च तत्साधने निवृत्तिः। यत्र सुखनान्तरीयकविधया दुःखमुत्पद्यते तादृशे कर्म्मणि द्विष्टसाधनत्वज्ञाने सत्यपि इच्छातत्कार्य्ययोर्दर्शनात् बलवद्दुःखासाधनत्वज्ञानस्यैव इच्छायां प्रवृत्तौ च कारणत्वेन तस्य तज्ज्ञानान्तरीयकत्वाद्र बलवदुद्दिष्टत्वम्। अतएव कण्टकिमत्स्यभक्षणादौ सतुषधान्यादिभक्षणे च प्रवृत्तिः। कामुकादेः परदारादिगमने नरकसाधनत्वं विदुषोऽपि प्रवृत्तिस्तु तत्काले ऐहिकसुखापेक्षया कालान्तरभाविनि नरकादौ बलवद्दुःखाभावेन बलवद्दिष्टासाधनत्वज्ञानादेवेति न विरोधः। तत्र सुखं प्रथमं द्विविधं ज्ञानप्रसादलभ्यं ब्रह्मानन्दाद्यपरपर्य्यायं निरतिशयम्, वैषयिकं सातिशयञ्च" तच्च तैत्तिरीयश्रुतौ मनुष्यादारभ्य ब्रह्मपर्य्यन्तानाम्७१७पृष्ठे प्रादर्शितम् सातिशयञ्च सुखं विवेकिनां दुःखमेव। यथोक्तम् विषयेन्द्रियाद्यात्मकोपरतिस्वरूपतुष्टिप्रदर्शने" सां०कौ०। "अल्पनरकयन्त्रणभोगहिंसादोषदर्शनहेतुजन्मान उपरमाः पञ्च भवन्ति। तथा हि सेवादयोधनोपार्जनोपायास्ते च सेवकादीन् दुःखार्कुर्वन्ति। ह्यश्वहरीश्वरहाःस्वहस्तदत्तचरणाङ्गेचन्द्रजां वेदनां भावयन् प्राज्ञः कः सेवासु प्रसज्यते?। एवमन्येऽप्यल्पनोपाया दुःखा इति विषयोपरमे या तुष्टिः सैषा पारसुच्यते। तथार्जितं धनं राजकामारिकाग्निजलौघादिभ्योविनङ्क्ष्यतीति तद्रक्षणे महद्दुःखमिति भावयतोविषयोपरमे या तुष्टिः सा द्वितीया सुपारसुच्यते। तथा महतायासेनार्जितं धनं भुज्यमानं क्षीयते इति तत्क्षयं भावयतोविषयोपरमे या तुष्टिः सा तृतीया पारपारसुच्यते। एवं शब्दादिभोगाभ्यासादुद्वेजने कामास्ते च विषयाप्राप्तौ कामिनं दुःखयन्तीति भोगदोषं भावयतो विषयोपरमे या तुष्टिः सा चतुर्थी अनुत्तमाम्भ उच्यते। एवं नानुपहत्य भूतानि विषयोपभोगः सम्भवतीति हिंसादोषदर्शनाद्विषयोपरमे या तुष्टिः सा पञ्चमी उत्तमाम्भ उच्यते"। "परिणाम तापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः" पात०सूत्रे चोक्तम्। अयमर्थः परिणामोऽन्यथाभावः तापः वर्त्तमानः, संस्कारोभूतः एतान्येव दुःखानि तैरिति विभक्तः तथा च विषयसुखभोगात् कामानलो वर्द्धते "न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते" इति भारतोक्तेः तदुद्वृद्धौ च सत्यां कदाचित् काम्यलाभे दुःखमवश्यं भावि कदाचिद्दुलाभेऽपि कुतश्चिद्भोगसङ्कोचे दुःखम् ततः सङ्कोचके द्वेषः ततः कामद्वेषाभ्यां पापस्योपचयात् दुःखमवश्यं भावि। असङ्कोचे व्याधिः पापञ्च ततोदुःखम् एवं भोगस्य परिणामदुःखता। तथा सुखभोगस्य तत्साधनस्य नाशे तापः अनुतापः स च दुःखमेवेति तस्य तापदुःखता। तथा भोगनाशेऽपि तत्संस्कारः तिष्ठत्येव सति तस्मिन् तज्जातीये पुनः रागः रागे च पुण्यापुण्यसाधनावश्यम्भावः ततः पुनः सुखदुःखभोगः ततः पुनः संस्कार इत्यनन्तदुःखसन्ततिः तथा च यथा भोगनाशे न संस्कारो भवेत् तथा यतितव्यमिति अतएवोक्तम् "असक्तः सुखमन्वभूत्" सर्व्वमेव विषयभोगसाधनं विषयजन्यं सुखं च दुःखपक्षे निक्षिप्यम्। तत्र हेतुः गुणवृत्तिविरुद्धर्म्मादिति गुणानां चित्तात्मना परिणतानां सत्त्वरजस्तमसां वृत्तीनां सुखदुःखमोहानां विरोधात् परस्पराभिभाव्याभिभावकत्वरूपविरोधात् इति। तथा च त्रिगुणचित्तस्य यदा रजस्तमसी सत्त्वात् किञ्चिदूने भवतः तदा ते मिथुनीभूय सत्त्वाभिभवाभिमुखे भवतः। तदानीञ्च तमसा सत्त्वापिधाने कृते रजसैश्वर्य्यं कामयमानेन विषयः प्रियो भवति तदा तेन सत्त्वाच्छादनेन चित्तं विक्षिप्तं भवति। यदा तु तमः प्रधानं तदा चित्तं मूढं भवति सत्त्वोद्रेके तु सुखम् इत्येवमेकस्यैव चित्तस्य सत्त्वादिकारणोद्रेकभेदेन सुखदुःखादिरूपता।

सुखादिकञ्च अन्तःकरणधर्मः धर्म्माधर्म्मफलत्वात् "आ-

स्तदेवितं फलमनुशातरीति" न्यायेन ज्ञात्यादीनामन्तःकरण-धर्म्मत्वेन तद्धर्म्मत्वौचित्यात् पुरुषे तु तानि तद्विवेकादौ-पाधिकानि "प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्वशः। अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते" गीतोक्तेः प्रकृतिगुणानां वास्तविककर्त्तृत्वसिद्धेः। "तस्मात् संयो-गादचेतनं चेतनावदिव लिङ्गम्। गुणकर्त्तृत्वे च तथा कर्त्तेव भवत्युदासीन" इति सां०का० राजसदृष्टेः अन्तः-करणस्यैव वास्तविककर्त्तृत्वोक्तेश्च क्रियाफलस्य सुखादेरपि तत्स्वामानाधिकरण्यम्। एतदाशयेनैव "तत्र जरा-मरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः। लिङ्गस्या-विनिवृत्तेस्तत्कृतात् दुःखं स्वभावेन सां०का० उक्तिः पुरुषे औपाधिकदुःखस्य सद्भावपरा"। किञ्च अन्तः-करणस्य तावत् सुखादिभिरन्वयव्यतिरेकौ सर्व्वसम्मतौ इत्यन्वयव्यतिरेकाभ्यां सिद्धकारणभावस्य तस्योपादानत्वमेव सांख्यादिभिः कल्प्यते न पुनरस्य निमित्तत्वं प्रकल्प्य आत्मनस्तत्र समवायिकारणत्वकल्पनं गौरवपराहतत्वात् निर्गुणत्वादिश्रुतिविरोधाच्च। सत्यपि तस्यास्वाभाविककर्त्तृत्वे भोक्तृत्वमस्येवेति सांख्या आहुः यथोक्तं सांख्यसूत्रभाष्ययोः "चिदवसानो भोगः" सू०। "पुरुषस्वरूपे चैतन्येपर्यवसानं यस्य तादृशो भोगः सिद्धिरित्यर्थः। बुद्धेर्भोगस्य व्यावर्त-नाय चिदवसान इति। चितः परिणामित्वरूपधर्म्मत्वादि-शङ्कानिरासायावसानपदम्। चितौ भोगस्य स्वरूपे पर्यव-सितत्वान्न कौटस्थ्यादिहानिरित्याशयः। तथाहि प्रमाणा स्यदृत्याऽरूढं प्रकृतिपुरुषादिकं प्रमेयं दृष्ट्वा सच्च पुरुषे प्रतिबिम्बितं मन्यन्ते। अतोऽर्थोपरक्तवृत्तिपतिबिम्बाव-च्छिन्नं स्वरूपचैतन्यमेव भानं पुरुषस्य भोगः प्रमाणस्य च फलमिति। ततश्च प्रतिबिम्बरूपेणार्थसम्बन्धे द्वारतया वृत्तीनां करणत्वमिति। तदुक्तं विष्णुपुराणे। "मन्त्री-तानिन्द्रियैरर्थानात्मने यः प्रयच्छति। अन्तःकरणरूपाय तस्मै विश्वात्मने नमः" इति। राज्ञो हि करणवर्गः स्वामिने भोग्यजातं समर्पयतीति दृष्टमिति। भोग-शब्दार्थश्चाभ्यवहरणम् आत्मसात्करणमिति यावत्। स च देहादिचेतनान्तेषु साधारणः। विशेषस्त्वयम्। अपरिणामित्वात् पुरुषस्य विषयभोगः प्रतिबिम्बादान मात्रम्। अन्येषां तु परिणामित्वात् पुष्ट्यादिरपीति। अयमेव च परिणामरूपः पारमार्थिको भोगः पुरुषे प्रतिषिध्यते "बुद्धेर्भोग इवात्मनीत्यादिभिरिति" मन्तव्यम्। अस्मिन् मते पुरुषस्यापि फलव्याप्यता सिद्धा चिद-वसानतायां एवात्र भोगत्ववचनादिति। ननु कर्त्तुरेव लोके क्रियाफलभोगो दृष्टः। यथा सञ्चरत एव सञ्चारोत्थ-दुःखभोग इति तत् कथं बुद्धिगतधर्म्मादिफलस्य सुखा-द्यात्मिकाया अर्थोपरक्तबुद्धिवृत्तेर्भोगः पुरुषे घटतेत्याश-ङ्कायामाह। "अकर्त्तुरपि फलोपभोगोऽन्नाद्यवत्" सू०। बुद्धिकर्म्मफलस्यापि दृष्टेरूपभोगस्तदकर्त्तुरपि पुरुषस्य युक्तः अन्नाद्यवत्। यथान्यकृतस्यान्नादेरूपभोगो राज्ञो भवति तद्वदित्यर्थः। अविवेकस्य स्वस्वामिभावस्य वा भोगनियामकत्वात् न नातिप्रसङ्गः। सुखदुःखादेः कर्म्म-फलत्वमभ्युपेत्य बुद्धिगतं कर्म्मफलं पुरुषो भुङ्क्त इत्यु-क्तम्। इदानीं पुरुषगतभोगस्यैव कर्म्मफलत्वं स्वीकृत्य बुद्धिकर्म्मणा पुरुष एव फलवत्पद्यत इति सूत्रसिद्धान्त-माह। "अविवेकाद्वा तत्सिद्धेः कर्तुः फलावगमः" सू०। अथवा कर्तरि फलमेव न भवति सुखं भुङ्क्ष्वेत्यादि-कामनाभिभोगस्यैव फलत्वात्। अतो भोक्तृनिष्ठमेव फलं भवति "शास्त्रविहितं फलमनुशातरीति" शास्त्रेण कर्त्तुः फलावगमस्तु तत्सिद्धेरकर्तृनिष्ठाया भोगाख्यसिद्धेः कर्त्रवृद्धावविवेकादित्यर्थः। योऽहं करोमि स एवाहं भुङ्क्ष्व इति हि लौकिकानुभव इति। या च सुखं मे भूयादित्यादिकामना सा पुत्रो मे भूयादितिवत् फलसाधनत्वेनैवोपपद्यते। भोगस्तु नान्यस्य साधनम्। अतः स एव फलमिति सुखवत् सिद्धान्तः। भोगस्य पुरुषस्वरूपत्वेऽपि वैशेषिकाणां मते श्रोत्रवत् कार्यता बोध्या सुखाद्यवच्छिन्नचितेरेव भोगत्वात्। अस्मिंश्च भोगस्य फलत्वपक्षे दुःखभोगाभाव एवापवर्गो बोध्यः। अथवा भोग्यतारूपस्वत्वसम्बन्धेन सुखदुःखाभावयोरेव फलत्वमस्तु तेन सम्बन्धेन धनादेरिव सुखादेरपि पुरुषनिष्ठ-त्वादिति" प्र०भा०युक्तञ्चैतत् "कामः संकल्पोविचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति" श्रुत्या कामादेरन्तःकरण-धर्म्मत्वोक्तेस्तत्फलस्य सुखादेरन्तर्म्मौचित्यात् तेषां मनोधर्म्मत्वमिति सांख्यादीनां मतमेवं वेदान्तिनाम् "तद्गुणसारादिति" भा०सू० तथैवभाष्यकृता निर्णीतत्वात्। इदांस्तु विशेषः सांख्यैर्विषयेष्वपि त्रिगुण-कार्य्यत्वात् सुखादिकमस्तीतिमन्यते यथोक्तम्" सां०कौमु-द्याम्। "सुखदुःखमोहाः परस्परविरोधिनः स्वस्वानुरूपाणि सुखदुःखमोहात्मकान्येव निमित्तानि कल्पयन्ति। तेषाञ्च परस्परमभिभाव्याभिभावकभावाद्वानात्वम्। तद्यथा एकैव स्त्री रूपयौवनकुलशीलसम्पन्ना स्वामिनं सुखाकरोति तत्

कस्य हेतोः ? स्वामिनं प्रति तस्याः सुखरूपसम्बन्धात् । सैव स्त्री सपत्नीर्दुःखाकरोति तत्कस्य हेतोः ? ताः प्रति तस्या दुःखरूपसम्बन्धात् । एवं पुरुषान्तरं तामविन्दत् सैव मोहयति तत्कस्य हेतोः ? तत्प्रति तस्या मोहरूपसम्बन्धात् । अनया च क्रियया सर्वे भावा व्याख्याताः । तत्र यत्सुखहेतुस्तत्सुखात्मकं सत्वं, यत् दुःखहेतुस्तद्दुःखात्मकं रजः, यन्मोहहेतुस्तन्मोहात्मकं तमः, सुखप्रकाशलाघवानां त्रयेकस्मिन् युगपदुद्भूतावविरोधः सहदर्शनात् । तस्मात् सुखदुःखमोहैरिव विरोधिभिरेकैकगुणवृत्तिभिः सुखप्रकाशलाघवैर्न निमित्तभेदा उन्नीयन्ते एवं दुःखोपष्टम्भकत्वप्रवर्त्तकत्वैरेव मोहगुरुत्वावरणैरिति सिद्धं त्रैगुण्यमिति" । सां० सूत्रे प्र० भाष्ये चोक्तम् ।

"सुखदुःखमोहधर्मिणी बुद्धिः सुखदुःखमोहधर्मात्मकद्रव्यजन्या कार्यत्वे सति सुखदुःखमोहात्मकत्वात् काम्यादिवदिति कारणगुणानुसारेणैव कार्यगुणौचित्यं चात्मानुकूलस्मर्कैः श्रुतिस्मृतयोऽपीति मन्तव्यम् । ननु विषयेषु सुखादिमत्त्वे प्रमाणं नास्ति । अहं सुखीत्याद्येवानुभवात् तत् कथं काम्यादिविषयो दृष्टान्त इति चेन्न सुखाद्यात्मकबुद्धिकार्य्यतया स्वकीयसुखं चन्दनसुखमित्याद्यनुभवेन च विषयाणामपि सुखादिधर्मकत्वसिद्धेः श्रुतिस्मृतिप्रामाण्याच्च । किञ्च यस्यान्वयव्यतिरेकौ सुखादिना सह दृश्येते तस्यैव सुखाद्युपादानत्वमपरिकल्प्यान्यस्योपादानत्वकल्पने कारणद्वयकल्पनागौरवम् । अपि चान्योऽन्यसंवादेन प्रत्यभिज्ञया च विषयेषु सर्वपुरुषसाधारण्यस्थिरसुखसिद्धिः । तत्सुखप्रहणायाश्रयेऽपि वृत्तिनियमादिकल्पनागौरवं च फलसुखत्वान्न दोषावहम् । अन्यथा प्रत्यभिज्ञयावयव्यसिद्धिप्रसङ्गात् तत्कारणादिकल्पनागौरवादिति । विषयेऽपि सुखादिकं च मार्कण्डेये प्रोक्तम् ।"तत् सन्तु चेतस्यथवापि देहे सुखानि दुःखानि च किं ममात्र" इति । अहं सुखीत्यादिप्रत्ययस्तु अहं धनीत्यादीप्रत्ययवत् स्वस्वामिभावाख्यसम्बन्धविषयकस्तेषां प्रत्ययानां समवायसम्बन्धविषयकत्वस्वनिराशार्थं तु सुखिदुःखिमूढेभ्यः पुरुषो विविच्यते शास्त्रेणिति । शब्दादिषु च सुखाद्यात्मताव्यवहार एकार्थसमवायात् । अस्तु वा शब्दादिषु साक्षादेव सुखसत्त्वप्रमाणेभ्यः । विषयगतसुखादेव बुद्धिमात्रस्याह्लादं फलबलात् । यत् तु विषयासम्प्रयोगकाले शान्तिसुखं सात्त्विकं सुषुप्त्यादौ व्यज्यते तदेव बुद्धिधर्मो आत्मसुखमुच्यत इति" ।

वैशेषिकादयस्तु सुखादिकमात्मनएवधर्मान्: "बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा । धर्माधर्मौ गुणाएते आत्मनः स्युश्चतुर्दश" इति भाषा० उक्तेः । मनसोऽणुत्वाङ्गीकारेण तेषां तद्गुणत्वे ज्ञानसुखादीनामप्रत्यक्षत्वापत्तेः । प्रत्यक्षे चाश्रयमहत्त्वस्य हेतुत्वात् मनसश्च ज्ञानायौगपद्योनाणुत्वेन महत्त्वाभावादिति युक्तिं प्रदर्श्य श्रुतौ मनोधर्मत्ववचनन्तु आयुर्घृतमित्यादिवदौपचारिकमित्यूचुः । तदेतन्मतमसमीचीनम् एकदा हृदाद्यगाहे सकलदेहव्यापिशैत्योपलब्धेः क्वचिद्गीताभिनयादेरेकदा श्रवणदर्शनादेर्दर्शनात् मनसोऽणुत्वासिद्धेः श्रौतमनोधर्मत्वस्य निमित्तपरत्वकल्पनेऽपि "अन्नमशितं त्रेधा विधीयते तस्य यःस्थविष्ठोधातुस्तत्पुरीषं यन्मध्यमं तन्मांसं योऽणिष्ठस्तन्मन" इति छा०उ०श्रुत्या "अन्नमयं हि सौम्य ! । मन" इत्युक्तस्य मनसोऽन्नविकारत्वस्य समर्थनाय प्रदत्तया बोधितस्य मनसोऽन्नजन्यत्वस्य अन्नभोजनोपचयापचयाभ्यां तद्दृष्टिच्छासावगतेर्नानुमानता मनस इति आगमविरोधे अनुमानाप्रवृत्तेः अङ्गीकृतञ्च तैरपि यङ्दृष्टान्तेन प्राप्यत्वहेतुना नरकपालशुचित्वानुमाने "नारं सृष्टास्थि संस्पृष्टं सचेलं जलमाविशेत्" मनुस्मृत्या बाधात्प्रामाण्यमतः प्रवृत्तेऽपि तद्धेतेः । मनसोऽनणुत्वाभिप्रायेणैव "क्रमशोऽक्रमशश्च वृत्तयः" सां० सूत्रे मनसोऽनणुत्वनिरासेन युगपद्वृत्तयोऽङ्गीकृताः । तथा सांख्यकारिकाकौमुद्योरुक्तम् । "युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा । दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः" का० "दृष्टे यथा यदा सन्नमसान्धकारे विद्युत्सम्पातमात्राद्ग्राह्यमभिसुखमतिसन्निहितं पश्यति तदा खल्वालोचनसङ्कल्पाभिमानाध्यवसाया युगपदेव प्रादुर्भवन्ति, यतस्तत उत्पत्य तत्स्थानादेकपदेऽपसरति । क्रमशश्च यदा मन्दालोके प्रथमं तावद्वस्तुमात्रं सम्मुग्धमालोचयति अथ प्रथितमनाः कर्णान्ताकृष्टसशरः कुञ्चितपादः शिक्षितव्यामण्डलीकृतकोदण्डः प्रचण्डतरः पाटच्चरोऽयमिति निश्चिनोति अथ च सां प्रत्येतीत्यभिमन्यते अथाध्यवस्यति अपसरामीतः स्थानादिति । परीक्षे तु अन्तःकरणत्रयस्य बाह्येन्द्रियवर्ज्यं वृत्तिरित्याह अदृष्टे त्रयस्य तत्पूर्विका वृत्तिः । अन्तःकरणत्रयस्य युगपत् क्रमेण च वृत्तिर्दृष्टपूर्विकेति । अनुमानागमकृतयोर्हि परोक्षेऽर्थे दर्शनपूर्वाः प्रवर्त्तन्ते नान्यथा । यथा दृष्टे तथा, अदृष्टेऽपीति योजना" कौ० आकरेऽस्य प्रपञ्चः । तच्च सुखं त्रिविधम्" । यथा

"सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ! ३६ । अभ्यासाद्रमते यत्र दुःखान्तञ्च नियच्छति । यत्तदग्रे विषमिव परिणामेऽमृतोपमम् । तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ३७ । विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् । परिणामे विषमिव तत्सुखं राजसं स्मृतम् ३८ । यदग्रे चानुबन्धे च सुखं मोहनमात्मनः । निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ३९ । न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः । सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ४० "गीतोक्तेः । "सुखस्य त्रैविध्यं प्रतिजानीते सुखन्विति । स्पष्टोऽर्थः ३६ । तत्र सात्त्विकं सुखमाह अभ्यासादिति सार्द्धेन । यत्र यस्मिन् सुखे अभ्यासाद्रमते न तु विषयसुखवद् सहसा रतिं प्राप्नोति यस्मिन् रममाणश्च दुःखस्यान्तमवसानं नितरां यच्छति प्राप्नोति । कीदृशं, यत्तत् किमपि अग्रे प्रथमं विषमिव मनःसंयमाधीनत्वाद् दुःखवदिव भवति परिणामे त्वमृतसदृशं आत्मविषया बुद्धिरात्मबुद्धिस्तस्याः प्रसादो रजस्तमोमयत्यागेन स्वच्छतयावस्थानं ततोजातं यत् सुखं तत्सात्त्विकं प्रोक्तं योगिभिः ३७ । राजसं सुखमाह विषयेति । विषयाणामिन्द्रियाणाञ्च संयोगात् यत्तत् प्रसिद्धं स्त्रीसंसर्गादिसुखं अमृतसुपमा यस्य तादृशं भवति । अग्रे प्रथमं परिणामे च विषतुल्यं दुःखहेतुत्वञ्च दुःखहेतुत्वात् तत् सुखं राजसं स्मृतम् ३८ । तामसं सुखमाह यदिति । अग्रे च प्रथमतश्चे अनुबन्धे च पश्चादपि यत्सुखमात्मनो मोहकरम् । तदेवाह निद्रा च आलस्यञ्च प्रमादश्च कर्त्तव्यावधानराहित्येन मनोव्याप्तमेतेभ्य उत्तिष्ठति यत्सुखं तत्तामसमुदाहृतम् ३९ । अनुक्तमपि संदृष्टान् प्रकरणार्थमुपसंहरति न तदिति त्रिभिः । एभिः प्रकृतिसंभवैः सत्त्वादिभिर्गुणैर्मुक्तं हीनं सत्त्वं प्राणिजातम् अन्यद्वा यत् स्यात्तत् पृथिव्यां मनुष्यादिषु दिवि देवेषु च क्वापि नास्तीत्यर्थः" श्रीधरः ।

वैषयिके सुखदुःखे च इष्टानिष्टविषयेन्द्रियसन्निकर्षजज्ञानात् जायमाने अनुभूयेते तस्मिंके च "मात्रास्पर्शास्तु कौन्तेय ! शीतोष्णसुखदुःखदाः । आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ! इति गीतोक्तेः । वैषयिकसुखस्य च क्षणिकत्वात् परिणामादिदुःखरूपत्वाच्च विवेकिभिः त्याज्यत्वमेव "त्याज्यं सुखं विषयसङ्गमजन्मपुंसाम्" इत्युक्तेः प्रागुक्तपातञ्जलसूत्राच्च विषयेन्द्रियसंयोगाज्जातन्तु सुखं राजसं प्रागुक्तगीतावाक्यात् । तत्र विषयाच्च शब्दस्पर्शरूपरसगन्धाः यथायथं तद्भन्नत्व तत्र शब्दविशेषरूप गीतादिषु श्रवणेन्द्रियसंबन्धेषु यत् सुखं तत् वैषयिकमेव किन्तु आत्मोपासनाङ्गत्वेन गीतादिकमपि चित्तैकाग्र्यतासम्पादनद्वारा मोक्षसाधनं भवति तदुक्तं या० स्मृतौ मिताक्षरायाञ्च ।

"यस्य पुनश्चित्तवृत्तिर्निराकारालम्बनतया समाधौ नाभिरमते तेन शब्दब्रह्मोपासनं कार्यमित्याह । "यथाविधानेन पठन् सामगानमविच्युतम् । सावधानस्तदभ्यासात्परं ब्रह्माधिगच्छति"या० "स्वाध्यायावगतमार्गानतिक्रमेण सामगानं सान्नोगानात्मकत्वेऽपि गानमिति विशेषणम् अगीतमन्त्रव्युदासार्थम् । अविच्युतमस्खलितम् । सावधानः सामध्वन्यनुस्यूतात्मैकाग्र्याचित्तवृत्तिः पठन् तदभ्यासवशात्तत्र निष्णातः शब्दाकारब्रह्मण उपासने परब्रह्माधिगच्छति । तदुक्तम् । "शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छतीति" । यस्य पुनर्वैदिकाङ्गीतौ चित्तं नाभिरमते तेन लौकिकगीतानुस्यूतात्मोपासनङ्कार्यमित्याह । "अपरान्तकसङ्गीत्यं मद्रकस्मकरीन्नधा । लौवेणकं सरोविन्दुसुस्वरक्रौञ्चकानि च । ऋग्गाथापाणिकादत्तविरचिता ब्रह्मगीतिका । गेयमेतत्तदभ्यासकरणान्मोक्षसंज्ञितम्" या० । अपरान्तकोल्लोप्यमद्रकप्रकर्यलौवेणकसरोविन्दुसञ्चितक्रौञ्चरमित्येतानि प्रकरणाख्यानि सप्त गीतकानि । चमत्कारादासारितवर्द्धमानकादिमहागीतकानि स्मृतानि । गाथाद्याश्रुतस्रोगीतिका स्मृतानि । ऋग्गाथाद्याश्रुतस्रोगीतिकाश्चैतदपरान्तकादिगीतजातमध्यारोपितात्मभावमोक्ष साधनत्वान्मोक्षसंज्ञितं मन्तव्यम् तदभ्यासश्चैकाग्र्यतापादनद्वारेणात्मैकतापत्तिकारणत्वात् । किञ्च । "वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः । तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति" या० । भरतमुनिप्रतिपादित वीणावादनतत्त्ववेदी श्रूयत इति श्रुतिर्द्वाविंशतिविधा सप्तस्वरेषु । तत्रा हि षड्जमध्यमपञ्चमाः प्रत्येकं चतुःश्रुतय ऋषभधैवतौ प्रत्येकन्त्रिश्रुती । गान्धारनिषादौ प्रत्येकं द्विश्रुती इति । जातयस्तु षड्जादयः सप्त शुद्धाः सप्तरजातयश्चैकादशेत्येवमष्टादशविधास्ताश्च विशारदः प्रवीणः तालज्ञ इति गीतप्रमाणज्ञ्यते तत्स्वरूपञ्च तदनुविद्धब्रह्मोपासनतया तालादिभङ्गभयाच्चित्तवृत्तेरेकाग्र्यतायाः शुकरत्वादल्पायासेनैव सन्निप्रपद्यिष्यक्षति प्राप्नोति । चित्तविक्षेपाद्यन्तरायोपेतस्य गीतस्य फलान्तरमाह । "गीतज्ञोवदि योगेन नाप्नोति परमम्पदम् ।

रुद्रस्यानुचरोभूत्वा सह तेनैव मोदते" या०। गीतश्रोयदि-कवच्छिद्योगेन परमस्पदन्न प्राप्नोति। तर्हि रुद्रस्य सचिवो-भूत्वा तेनैव सह मोदते क्रीडति" मिता०। विहृतिर्मानशब्दे।

सुखं दुःखञ्च न प्रतिनियतविषयजन्यं व्यक्तिभेदेन कालभेदेन देशादिभेदेन च सुखहेतोरपि दुःखहेतुत्वं दुःखहेतोरपि सुखहेतुत्वम्। तथा हि खलादिं प्रति साधुभिरुक्तस्य विनयवाक्यस्यापि तं प्रति दुःखहेतुत्वं कथ-मन्यथा तस्य श्रवणात् खलादेरहितकर्म्मणि प्रवृत्तिः स्यात् एवं वैरिणं प्रत्यपि सामवादस्य दुःखहेतुत्वम् एतदा-शयेनैव "सामवादाः सकोपस्य तस्य प्रत्युत दीपकाः" इति माघे वर्णितम्। तथा चन्द्रकिरणनलिनभ्रमरध्वन्यादेरन्यत्र सुखकरस्यापि विरहिणं प्रति दुःखहेतुत्वम्,। एवंदुःखहेतो-र्विशाहारादेरपि शूकरं प्रति सुखकरत्वम् इति तत्र न वस्तु नियमः। अतएवोक्तम् "विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया। हिमसेकविपत्तिरत्र मे नलिनी पूर्व-निदर्शनं गता" रघुः एवं कालभेदेऽपि सुखदुःखकरयो-र्विपर्य्ययः यथा शीतकाले दुःखहेतोः ग्रीष्मे सुखहेतुत्वम् एवमन्नादितापस्य शीतकाले सुखकरस्य ग्रीष्मे दुःखकरत्वम् एवं देशभेदेऽपि यथा तिन्तिड्यादेरन्यत्र सेवने रोगादि दुःखदत्वं क्षारदेशे तु सुखकरत्वम् अतएवोक्तं "किमाख्यं क्षारदेशे प्राणदा यमदूतिकेति" यथा च वस्तुमात्रस्य त्रिगुणात्मकत्वात् व्यक्तिभेदेन कालादि-भेदेन च सत्त्वरजस्तमसां सस्रष्टृत्वात् विपर्य्यस्तरूपता-पत्तिः तथा प्रागुक्तसांख्यतत्त्वकौमुदीवाक्ये स्पष्टैव। अत एव रसादौ लोकसिद्धकारणविपर्य्ययः" सा०द०उक्तः यथा "हेतुत्वं शोकहर्षादेर्गतेभ्यो लोकसंश्रयात्। शोकहर्षा-दयो लोके जायन्तां नाम लौकिकाः। अलौकिकविभा-वत्वं प्राप्नेभ्यः काव्यसंश्रयात्। सुखं सङ्जायते तेभ्यः सर्व्वेभ्योऽपीति का क्षतिः। ये खलु रामवनवासादयो लोके दुःखकारणानि इत्युच्यन्ते त एव हि काव्य-नाट्यसमर्पिता अलौकिकविभावनव्यापारवत्तया कारण-शब्दवाच्यत्वं विहायालौकिकविभावशब्दवाच्यत्वं भजन्ते। तेभ्यश्च सुरते दन्तघातादिभ्य इव सुखमेव जायते। अतश्च लौकिकशोकहर्षादिकारणेभ्यो लौकिकशोकहर्षादयो जायन्ते इति लोक एव प्रतिनियमः। काव्ये पुनः "सर्व्वेभ्योऽपि विभावादिभ्यः सुखमेव जायते" इति नियमान्न कश्चिद्दोषः। कथं तर्हि रामचन्द्रादिचरितस्य काव्यनाट्ययोरपि दर्शनश्रवणाभ्यामनुपातादयो जायन्त इ-त्युच्यते। अनुपातादयस्तद्दृष्टत्वात्तेषां मताः"।

वैषयिकसुखेषु काव्यादिरसास्वादसुखमतीवचमत्कारा-धायकतया ब्रह्मानन्दतुल्यमित्याचक्षाणा मन्यन्ते यथोक्तम्" सा०द०। "सत्येद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः। वेद्या-न्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः। लोकोत्तरचमत्कार-प्राणः कैश्चित् प्रमातृभिः। स्वाकारवदभिन्नत्वे नायमास्वा-द्यते रसः। रजस्तमोभ्यामस्पृष्टं मनः सत्वमिहोच्यते। इत्युक्तप्रकारो बाह्यमेयविसुखतापादकः कश्चनान्तरो धर्म्मः सत्वं तस्योद्रेकः रजस्तमसो अभिभूयाविर्भावः। अत्र च हेतुस्तथाविधालौकिककाव्यार्थपरिशीलनम्। अखण्ड इत्येक एवायं विभावादिरत्यादिप्रकाशलक्षणचमत्कारात्मकः। अत्र हेतुं वक्ष्यामः। स्वप्रकाशत्वाद्यपि वक्ष्यमाणरीत्या। चिन्मय इति स्वरूपार्थे मयट्। चमत्कारश्चित्तविस्तार-रूपो विस्तरापरपर्य्यायः"। "रसे सारश्चमत्कारः सर्व्व-त्राप्यनुभूयते। तच्चमत्कारसारत्वे सर्व्वत्राप्यद्भुतो रसः"। "मुख्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिमिति"। यद्यपि "स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः" इत्युक्तादिशा रससास्वादानतिरिक्तत्वमुक्तं तथापि "रसः स्वाद्यते" इति कालपनिकं भेदमुररीकृत्य कर्म्मकर्त्तरि वा प्रयोगः। तदुक्तम्। "रस्यमानतामात्रसारत्वात् प्रकाशशरीरादनन्य एव हि रस" इति च। "आनन्दजाश्रुभिरुक्षितमाखमार्गान्" "स तमान-न्दमविन्दत द्विज" इति च नैषधम् एवं तत्तत्सर्व्वसर्गेषु उपाख्यानश्लोकेषु उदा०। "आनन्दाद्धेव प्रजाः प्रजायन्ते आनन्देन जीवन्ति आनन्दे प्रविलीयन्ते" इति श्रुतिः। ५विष्णौ। "आनन्दोनन्दनोनन्द" विष्णुस०। ६आदिगुरौ-त्रिकले दगणे ७षड्भिर्वर्णैरगणे रचिते दण्डकछन्दोभेदे। आनन्दयति आ+नदि–णिच्–अच्। ८आनन्दकरे त्रि०। षष्टिसंवत्सरमध्येऽष्टाचत्वारिंशे ४वर्षभेदे पु०। "निष्पत्तिः सर्व्वशस्यानां सर्व्वशस्यमहार्घता। इतं तैलं समं याति आनन्दे नन्दिनी प्रजा" ज्योति०तल्लक्षणम्। १०मद्ये न०। ११स्टहभेदे च तल्लक्षणं स्टहशब्दे वक्ष्यते। १२विष्णु-गणभेदे पु०।

आनन्दकानन न० आनन्दहेतुः काननम्। अविमुक्ते काशीक्षेत्रे आनन्दवनादयोऽप्यत्र। तत्रानन्दवननामनि-रुक्तिः काशीखण्डे २६ अ० दर्शिता यथा अविमुक्तं प्रकल्प्य। "अस्यानन्दवनं नाम पुराऽकारि पिनाकिना। क्षेत्रस्यानन्दहेतुत्वादविमुक्तमनन्तरम्। आनन्दकन्दधी-जानामङ्कुरोत्थि यतस्ततः। श्रेयांसि सर्व्वाण्यत्र तस्मि-

ज्ञानन्दकानने"। तस्य चानन्दहेतुत्वं तत्र मरणेन तत्त्वज्ञानसम्पादनद्वारा ब्रह्मस्वरूपानन्दप्राप्तिहेतुत्वात् यथोक्तं जाबालोपनिषदि अविमुक्तं प्रकृत्य "तत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृतीभूय मोक्षी भवति"।

आनन्दज त्रि० आनन्दात् जायते जन–ड ५त०। आनन्दजातेऽश्रुपातादौ सत्त्वगुणोद्रेके हि चेतसो द्रुतत्वात् नेत्रादिद्वारेण तत्प्रेरितस्य जलबिन्दोः जरत्वं भवति यथोक्तम् "सा० द०" "अश्रुपातादवस्तद्द्रुतत्वाच्चेतसोमताः" "आनन्दजाश्रुभिरतृप्तिवमार्गमार्गान्" नैष०।

आनन्दथु पु० आ+नदि–भावे अथुच्। आनन्दे सुखे नन्दथुरस्यत्र "वक्षासौ तस्य नन्दथुः" भट्टिः।

आनन्ददत्त पु० आनन्दोदत्तो येन। मेहने शब्दचि० मेहनाद्धि प्रचुरानन्दोभवतीति तस्य तथात्वम्।

आनन्दन न० आनन्दयत्यनेन आ+नदि–णिच् करणे ल्युट्। यातायातकाले मित्रादेः १आरोग्यस्वागतादिप्रश्ने २तात्कालिकाभिनन्दने च। भावे ल्युट्। २सुखजनने।

आनन्दपट पु० आनन्दजनकः पटः। नवोढावस्त्रे हारा०।

आनन्दपूर्ण पु० आनन्देन पूर्णस्तृप्तः। सदाप्तकामत्वेन काम्यान्तराभावात् परितृप्ते परमात्मनि। २अतिशयिता नन्दयुक्ते त्रि०॥ आनन्दप्रचुरादयोऽप्यत्र। नैयायिकादिमते तु आनन्देन दुःखाभावेन पूर्णः अपरिच्छिन्नतया विभुत्वात् इति इति भेदः।

आनन्दप्रभव पु० आनन्दः प्रभवः प्रभवापादनं यस्य। १वीर्ये रेतसि तस्य सात्विकानन्दोदयादेव प्रवृत्तेस्तथात्वम्। २भूतादिप्रपञ्चे "आनन्दाद्धेव प्रजाः प्रजायन्ते आनन्देन जीवन्ति आनन्दे प्रविलीयन्ते" इति श्रुत्या भूतानां ब्रह्मस्वरूपानन्दभवत्वात् तथात्वम्।

आनन्दभुज् पु० आनन्दं भुङ्क्ते भुज–क्विप्। सुषुप्तावस्थापन्ने प्राज्ञे जीवभेदे "आनन्दभुक् चेतोमुखः प्राज्ञः" इति श्रुतिः यथा लोके आयासशून्यः सुखी आनन्दभुगुच्यते तथा सुषुप्तोऽपि सर्वायासशून्यतया आनन्दभुगित्युच्यते।

आनन्दभैरव पु० कर्म०। शिवमूर्त्तिभेदे तस्य पत्नी ङीप्। प्रकृतिस्वरूपायां परदेवतायाम् तत्पत्न्यां स्त्री आनन्दभैरव रुद्रयामले प्रश्नप्रतिवचनकर्त्तृत्वम्।

आनन्दमय पु० आनन्दः प्रचुरोऽस्य प्राचुर्ये मयट्। प्रचुरानन्दस्वरूपे परमात्मनि "आनन्दमयोऽभ्यासात्" शा० सू०। यथा च आनन्दप्रचुरत्वात् तस्य आनन्दमयत्वं तथा तद्ब्राह्मे निरूपितम् यथा "तैत्तिरीयकेऽन्नमयं मनोमयं विज्ञानमयं चानुक्रम्याम्नायते "तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मानन्दमय" इति तत्र संशयः किमिहानन्दमयशब्देन परएवात्मोच्यते यत्प्रकृतं "सत्यं ज्ञानमनन्तं ब्रह्मेति" किं वाऽन्नमयादिवत् ब्रह्मणोऽर्वान्तरमिति। किन्तावत्प्राप्तं ब्रह्मणोऽर्वान्तरमसुख्य आत्मानन्दमयः स्यात्कस्मात्? अन्नमयासुख्यात्मप्रवाहपतितत्वात्। अथापि स्यात्सर्वान्तरत्वादानन्दमयोसुख्य एवात्मेति, न स्यात्प्रियाद्यवयवयोगाच्छारीरत्वश्रवणाच्च। सुख्यवेदात्मा स्यात् न प्रियादिसंसर्गः स्यात् दृश्यते तस्य प्रियमेव शिर"इत्यादि श्रूयते। शारीरत्वञ्च श्रूयते। "तस्यैकएव शारीर आत्मा यः पूर्वस्येति"। तस्य पूर्वस्य विज्ञानमयस्यैकएव शारीर आत्मा योऽयं आनन्दमय इत्यर्थः। न च सशरीरस्य सतः प्रियाप्रियसंसर्गोवारयितुं शक्यः। तस्मात् संसार्यवानन्दमय आत्मादृत्येवं प्राप्ते इदमुच्यते। परएव आनन्दमयो भवितुमर्हति कुतः? अभ्यासात्परस्मिन्नेव ह्यात्मन्यानन्दशब्दो बहुलत्वोऽभ्यस्यते आनन्दमयं प्रस्तुत्य "रसोवै स" इति तस्यैव रसत्वमुक्त्वोच्यते "रसं ह्येवायं लब्ध्वानन्दी भवति कोह्येवान्यात् कः प्राण्याद्यदेष आकाश आनन्दोन स्यादेष ह्येवानन्दयति सैषानन्दस्य मीमांसा भवति"। "एष आनन्दमयमात्मानमुपसंक्रामति" "आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन" "आनन्दो ब्रह्मेति व्यजानादिति" च। श्रुत्यन्तरे च "विज्ञानमानन्दं ब्रह्मेति" ब्रह्मस्वरूपेवानन्दशब्दोदृष्टः। एवमानन्दशब्दस्य बहुलत्वोब्रह्मस्वरूपेवाभ्यासादानन्दमय आत्मा ब्रह्मेति गम्यते। यत्सूक्ष्मम् अन्नमयाद्यसुख्यात्मप्रवाहपतितत्वादानन्दमयस्याप्यसुख्यात्मत्वमिति। नासौ दोषः आनन्दमयस्य सर्वान्तरत्वात्। सुख्यमेव ह्यात्मानमुपदिदिक्षु शास्त्रं लोकबुद्धिमनुसरदन्नमयं शरीरमनात्मानमत्यन्तमूढानामात्मत्वेन प्रसिद्धमनूद्य सूपानित्रिकृतताद्यादिप्रतिभावत् ततोऽन्तरमित्येवं पूर्वेण पूर्वेण समानसुत्तरसुत्तरमनात्मानमात्मेति व्याहृत्य प्रतिपत्तिसौकर्य्यापेक्षया सर्वान्तरं सुख्यमानन्दमयमात्मानमुपदिदेशेति श्लिष्टतरम्। यथाऽरुन्धतीनिदर्शने बह्वीष्वपि तारासु सुख्यारुन्धत्यां दर्शितायां वाऽन्या प्रदर्श्यते सा सुख्यैवारुन्धती भवति एवमिहाप्यानन्दमयस्य सर्वान्तरत्वान्मुख्यमात्मत्वम्। यत्तु भृग्वे प्रियादीनां शिरस्त्वादिकल्पनानुपपन्ना सुख्यात्मन इति अतीतानन्तरोपाधिजनिता सा न स्वाभाविकीत्य-

दोषः । शारीरत्वमप्यानन्दमयस्यान्नमयादिशरीरपरम्परया प्रदर्श्यमानत्वात् न पुनः साक्षादेव सशरीरत्वं संसारित्वं तस्मादानन्दमयः परएवात्मा । "विकारशब्दान्नेति चेन्न प्राचुर्य्यात्" सू० । अत्राह नानन्दमयः परात्मा भवितुमर्हति कस्मात्? विकारशब्दात् । प्रकृतिवचनादयमन्यः शब्दो विकारवचनः समधिगत आनन्दमय इति मयटोविकारार्थत्वात् तस्मादन्नमयादिशब्दवद्विकारविषय एवायमानन्दमयशब्द इति चेन्न प्राचुर्य्यार्थेऽपि मयटः स्मरणात् "तत्प्रतिज्ञातवचने मयड़िति"(पा०)प्रचुरतायामपि हि मयट् स्मर्य्यते । यथान्नमयो यज्ञ इति अन्नप्रचुर उच्यते । आनन्दप्रचुरत्वञ्च ब्रह्मणः मनुष्यत्वादारभ्योत्तरस्मिन्नुत्तरस्मिन् स्थाने शतगुण आनन्द इत्युक्त्वा ब्रह्मानन्दस्य निरतिशयत्वावधारणात् तस्मात्प्राचुर्य्यार्थे मयट् । "तद्धेतुव्यपदेशाच्च" सू० । इतश्च प्राचुर्य्यार्थे मयट् यस्मादानन्दहेतुत्वं ब्रह्मणोव्यपदिशति श्रुतिः "एष ह्येवानन्दयतीति" । आनन्दयतीत्यर्थः । योहन्यानानन्दयति स प्रचुरानन्द इति प्रसिद्धं भवति यथा लोके योऽन्येषां धनित्वमापादयति स प्रचुरधन इति गम्यते तद्वत् । तस्मात्प्राचुर्य्यार्थेऽपि मयटः सम्भवादानन्दमयः परएव आत्मा । "मान्त्रवर्णिकमेव च गीयते" सू० । इतश्चानन्दमयः परएवात्मा यस्मात् "ब्रह्मविदाप्नोति परम्" इत्युपक्रम्य हि "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यस्मिन्मन्त्रे यद्ब्रह्म प्रकृतं सत्यज्ञानानन्तविशेषणैर्निर्धारितं, यस्मादाकाशादिक्रमेण स्थावरजङ्गमानि भूतान्यजायन्त,यच्च भूतानि सृष्ट्वा तान्यनुप्रविश्य गुहायामवस्थितं सर्वान्तरं, यस्य विज्ञानायान्योऽन्तर आत्मेति प्रक्रान्तं, तन्मान्त्रवर्णिकमेव ब्रह्मेह गीयते "योऽन्योन्तर आत्मानन्दमय" इति । मन्त्रब्राह्मणयोरैकार्थ्यं युक्तम् अविरोधात् । अन्यथा हि प्रकृतहानाप्रकृतप्रक्रिये स्यातां, न चान्नमयादिभ्यइवानन्दमयादन्योन्तर आत्माऽभिधीयते एतच्चिद्वै च सैषा भार्गवी वारुणी विद्या "आनन्दो ब्रह्मेतिव्यजानादिति" । तस्मादानन्दमयः परएवात्मा" शा०भा०।

२आनन्दप्रचुरे त्रि०सर्व्वायासम्भूम्यसुप्रावस्थापन्ने ३आनन्दमयकोषाभिमानिनि जीवे च । "काचिदन्तर्मुखा वृत्तिरानन्दप्रतिबिम्बभाक् । पुण्यभोगे भोगशान्तौ निद्राख्येव जायते । कादाचित्कीत्यतोनात्मा स्यादानन्दमयोऽयम् । बिम्बभूतोय आनन्द आत्मासौ सर्व्वदा स्वतः"पञ्चद० उक्तेः जीवस्य पारमार्थिकानन्दरूपपरात्मस्वरूपत्वेऽपि सुषुप्तौ तस्य स्फुरणेऽपि च स्वल्पकालिकत्वात् ब्रह्मानन्दवैलक्षण्यम् । स्त्रियां ङीप् । साच ४दुर्गामूर्त्तिभेदे स्त्री० ।

आनन्दमयकोष पु० आनन्दमयस्य परमात्मनः कोष इवावरकः । वेदान्तिमतसिद्धपञ्चकोषमध्ये पञ्चमे कोषे अविद्यास्वरूपे कारणशरीरे । आनन्दमयकोषस्वरूपादिकमुक्तं विवे० चू० ।

"आनन्दप्रतिबिम्बचुम्बिततनुर्वृत्तिस्तमोजृम्भिता स्यादानन्दमयः प्रियादिगुणकः स्वेष्टार्थलाभोदयः । पुण्यस्यानुभवे विभाति कृतिनामानन्दरूपः स्वयं भूत्वानन्दति यत्र साधुतनुभृन्मात्रः प्रयत्नं विना । आनन्दमयकोषस्य सुषुप्तौ स्फूर्त्तिरुत्कटा । स्वप्नजागरयोरीषदिष्टसन्दर्शनादिना । नैवायमानन्दमयः परात्मा सोपाधिकत्वात् प्रकृतेर्विकारात् । कार्य्यत्वहेतोः सुकृतक्रियायां विकारसङ्घातसमाश्रितत्वात् । पञ्चानामपि कोषाणां निषेधे युक्तितः श्रुतेः । तन्निषेधावधिः साक्षी बोधरूपोऽवशिष्यते । योऽयमात्मा स्वयंज्योतिः पञ्चकोषविलक्षणः । अवस्थात्रयसाक्षी सन् निर्व्विकारो निरञ्जनः । सदानन्दः स विज्ञेयः स्वात्मत्वेन विपश्चिता" ।

आनन्दमयशब्देऽधिकमुक्तम् । "गुहाहितं ब्रह्म यत्तत् पञ्चकोषविवेकतः । बोद्धुं शक्यं ततः कोषपञ्चकं प्रविचिन्वताम् । देहादभ्यन्तरः प्राणः प्राणादभ्यन्तरं मनः । ततः कर्त्ता ततोभोक्ता गुहा सैषा परम्परा" पञ्चद० ।

आनन्दसम्भव पु० आनन्दस्य ब्रह्मानन्दस्य सम्भवः प्रकाशः । तत्त्वज्ञानप्रयोज्ये ब्रह्मानन्दस्फुरणे । "आनन्दसम्भवे लीनोनापश्यत्तुभयं सुने ! पुरा० । सम्भवत्यस्मात् अपादानेऽप् आनन्दः सम्भवोऽस्य । २भूतादौ त्रि० आनन्दप्रभवशब्दे विवृतिः।

आनन्दा स्त्री आनन्दयति सेवनात् आ+नदि-णिच्-अच् । विजयायाम् (सिद्धि) राजनि० ।

आनन्दार्णव पु०आनन्दः अर्णव इव असीमत्वात् । ब्रह्मानन्दे अखण्डानन्दरूपत्वादपरिच्छित्वाच्च तथात्वम् । प्रमोदार्णवादयोऽप्यत्र । "ब्रह्म प्रमोदार्णवमिति" नैष०।

आनन्दि पु०आ+नदि-इन् । १हर्षे "कौशल्यानन्दिवर्द्धनोराम" इति रामायणम् । २कौतुके च ।

आनन्दित त्रि०आ+नदि-क्त । १हर्षयुक्ते सुखिनि, आ+नदि-णिच्-क्त । यस्यानन्दो जनितस्तस्मिन् २अभिनन्दिते त्रि०।

आनन्दिन् त्रि० आ+नदि-णिनि । १आनन्दयुक्ते णिच्-

णिनि । २आनन्दकारके त्रि० उभयत्र स्त्रियां ङीप् ।

आनन्दी स्त्री आनन्दयति आ+नदि-णिच्-अच्-गौरा० ङीष् (आकन पाता(इङ्गभेदे शब्दच० ।

आनमन न० आनम्यते वशीक्रियतेऽनेन करणे ल्युट् । सन्नो-पार्थानुगत्वादौ १आनतौ । भावे ल्युट् । २सम्यगनमने । णिच्+ल्युट् । नम्रतापादके ३व्यापारे ।

आनमित त्रि० आ+नम-णिच्-क्त । आवर्जिते आनती-कृते अनुकूलीकृते ।

आनम्य त्रि० आ+नम-णिच्-कर्म्मणि यत् । १नम्रीकार्य्ये आ+नम-ल्यप् । २नमस्कृत्यर्थे अव्य० वा मलोपे तुकि आनम्येत्यपि अव्य० ।

आनय पु० आ+नी-भावे अच् । देशात् देशानन्तरनयने । आनीयते वेदाद्यध्ययनायात्र आधारे अच् । उपनयनसं-स्कारे हेम० । भावे ल्युट् । आनयनमप्युभयत्र न० ।

आनर्त्त ७० आन्दत्यत्र आधारे घञ् । १नृत्यशालायां २युद्धे च तत्र हि वीरैर्नृत्यात् नृत्यमिव क्रियते इति तस्य तथात्वम् । ३सूर्य्यवंश्ये राजभेदे "मनोर्वैवस्वतस्यासन् पुत्रा वै नव तत्समाः । इक्ष्वाकुश्चैव नाभागो धृष्णुः शर्य्याति-रेव च" इत्युपक्रम्य "शर्य्यातेर्मिथुनं त्वासीदानर्त्तोनाम विश्रुतः । पुत्रः, कन्या सुकन्याख्या या पत्नी च्यवनस्य ह । आनर्त्तस्य तु दायादोरेवोनाम महाद्युतिः । आनर्त्तो-विषयश्चासीत् पुरी चास्य कुशस्थली । रेवस्य रैवतः पुत्रः ककुद्मीनाम धार्म्मिकः । ज्येष्ठः पुत्रशतस्यासीद्राज्यं प्राप्य कुशस्थलीम् । स कन्यासहितं त्वत्वा गान्धर्व्वं ब्रह्मणोऽन्तिके । मुहूर्त्तभूतं देवस्य गतं बहुयुगं प्रभो ! । आज-गाम युगैर्वाथ त्वां पुरीं यादवैर्वृताम् । कृतां द्वारवतीं नाम्ना वज्रद्वाराकृतोरणाम् । भोजवृष्ण्यन्धकैर्गुप्तां वासु-देवपुरोगमैः । ततस्तद्रैवतोज्ञात्वा यथातत्त्वमरिन्दम ! । कन्यां तां बलदेवाय सुव्रतां नाम रेवतीम् । दत्त्वा जगाम शिखरं मेरोस्तपसि संस्थितः" हरिवं० १० अ० । तत्कृते ४देशभेदे आनर्त्तनामकूर्म्यवंशकृतत्वात्तस्य देशस्य आनर्त्तनामत्वम् । तत्रैव देशे च इक्ष्वाकुपुत्रहर्य्य-श्वस्य पश्चात् राज्यमासीत् यथोक्तम्"

"आनर्त्तो नाम ते राष्ट्रं भविष्यत्यायतं महत् । तद्व-विष्यमहं मन्ये कालयोगेन पार्थिव ! । अध्यास्यतां यथाकालं पार्थिवं इक्ष्वनुत्तमम् । यायातमपि वंशस्ते समेष्यति च यादवम् । अनुवंशञ्च वंशस्ते सोमस्य भविता किल । एष मे विभवस्तात तमेतं विषयोत्तमम् । दत्त्वा यास्यामि तपसे सागरं वरुणालयम् । सपत्नेन समायुक्तस्त्वमिमं विषयोत्तमम् । पालयस्वाखिलं तात ! स्वस्य वंशस्य वृद्धये । बाढमित्येव हर्य्यश्वः प्रतिजग्राह तत्पुरम् । स च दैवस्तपोवासं जगाम वरुणालयम् । हर्य्यश्वश्च महातेजा दिव्ये गिरिवरोत्तमे । निवेशयामास पुरं वासार्थममरोपमः । आनर्त्तं नाम तद्राष्ट्रं सुराष्ट्रं गोधनायुतम् । अचिरेणैव कालेन सस्फीतं प्रत्यपद्यत । अनूपविषयश्चैव वेलावनविभूषितम् । निविष्टं चैलशस्याढ्यं प्राकारपरिखासंकुलम् । यशसा स नृपः स्फीतं तद्राष्ट्रं राष्ट्रवर्द्धनः" ८४अ० । अत्र च सस्फीतवेलादिकं तत्सीमादिक-मुक्तम् । ५तद्देशवासिजनेषु चैतद्राजेषु च ७चन्द्र-वंश्ये राजभेदे पु० । "वर्षकेतोस्तु दायादो विभुनाम प्रजे-श्वरः । आनर्त्तस्तु विभोः पुत्रो सुकुमारस्ततोऽभवत्" हरि वं० ३२ । तत्र तद्देश राजपरत्वे "आनर्त्तान् कालकूटांश्च कुलिन्दांश्च विजित्य सः" भा० स० २४अ० । देशवासिपरत्वे । "उक्तवांश्च महाबाहो ! कासौ दक्षिणकुलाधमः । वासु-देवः स मन्दात्मा वसुदेवसुतो गतः । तस्य युद्धार्थिनोदर्पं युद्धे नाशयिताऽस्म्यहम् । आनर्त्तान् ! सत्यमाख्यात तत्र गन्ताऽस्मि यत्र सः" इति आनर्त्तवासिनः प्रति साम्ब-वाक्यम् देशरपत्वे । "आनर्त्तेषु विमर्दञ्च क्षेपञ्चात्मनि कौरव ! इति भा० व० १४ अ० "आनर्त्तमेवाभिसखाः शिबेन गत्वा धनुर्वेदरतिप्रधानाः" भा० व० १८३ अ० । कृत्तिकादिभिस्त्रिभिस्त्रिभिर्नक्षत्रैः क्रूरसंज्ञपीड़ितैः क्रमेण देशविशेषराजाशुभस्य दं० प्रतिपादनात् स्वात्यादिभि स्त्रिभिर्नक्षत्रैः क्रूरसंज्ञपीड़ितैस्तद्देशन्यस्याशुभं भवति यथा बृ० स० कूर्म्मवि० । "वर्गैराग्नेयाद्यैः क्रूरसंज्ञपीड़ितैः क्रमेण नृपाः । पाञ्चालोमागधिकः कालिङ्गश्च क्षयं यान्ति । आवन्तोऽथानर्त्तो वृषं चायाति सिन्धुसौवीरः । राजा च सारस्वतौरोमद्रेयशोन्यश्च कोसेन्द्रः" । आन्दत्यतीति कर्त्तरि अच् । टजले न० तस्य तरङ्गरूपेण नृत्यस्येव करणात्तथात्वम् । ६नर्त्तके त्रि० भावे घञ् । १०नर्त्तने पु०

आनर्त्तक त्रि० आनर्त्तदेशे भवः धूमा० वुञ् । १आनर्त्तदेश-भवे । आन्दत्यति आ+नृत-ण्वुल् । २समन्ता- [पुर्य्याम् ।

आनर्त्तपुर न० आनर्त्तदेशस्य प्रधानं पुरम् । द्वारवत्याम्

आनर्त्तीय त्रि० आनर्त्तदेशे भवः इदन्त्वात् ढक् । आनर्त्त-देशभवे ।

आनर्थक्य न० अनर्थस्य भावः ष्यञ् । १निष्प्रयोज-

नत्वे प्रयोजनाभावे । "श्रुत्यानर्थक्यमिति चेत्" कात्या० ७१,८,५, "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" जै०सू० । अनेन क्रियाप्रतिपादकभिन्नवेदभागानामानर्थक्योक्तेः वेदान्तवाक्यानां न स्वार्थे प्रामाण्यं सप्तद्वीपा वसुमतीत्यादिवाक्यवत् तेषां भूतार्थोपदेशकत्वात् तथा च उपासनाविधिविशेषतयैव तेषां प्रामाण्यम् इति मीमांसका मन्यन्ते । तदेतन्मतम् पूर्वपक्षत्वेनोपन्यस्य "तत्तु समन्वयादिति" शारीरकसूत्रभाष्ये निराकृतं यथा "यद्यपि शास्त्रप्रमाणकं ब्रह्म तथापि प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते । यथा यूपाहवनीयादीन्यलौकिकान्यपि विधिविशेषतया समर्प्यन्ते तद्वत् । प्रवृत्तिनिवृत्तिप्रयोजनत्वाच्छास्त्रस्य । तथा हि शास्त्रतात्पर्यविद आहुः । "दृष्टोहि तस्यार्थः । कर्मावबोधनञ्चोदनेति क्रियायाः प्रवर्त्तकं वचनम् । तस्य ज्ञानमुपदेयः । तद्भूतानां क्रियार्थेन समाम्नायः" । "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति च" । अतः पुरुषं क्वचिद्विषय विशेषे प्रवर्त्तयत् कृतश्चिद्विषयविशेषाच्चिवर्त्तयच्छास्त्रार्थवच्छास्त्रम् तच्चैतया चान्यदुपयुक्तम् । तत्सामान्याद्देदान्तानामपि तथैवार्थवत्त्वं स्यात् । सति च विधिपरत्वे यथा स्वर्गादिकामस्याग्निहोत्रादि साधनं विधीयते एवमसङ्गतत्वकामस्य ब्रह्मज्ञानं विधीयत इति युक्तम् । नन्विह जिज्ञास्यवैलक्षण्यमुक्तम् । कर्मकाण्डे भव्योधर्मोजिज्ञास्यः इह तु भूतं नित्यवस्तु ब्रह्म जिज्ञास्यमिति । तत्र धर्मज्ञानफलादनुष्ठानापेक्षाद्विलक्षणं ब्रह्मज्ञानफलं भवितुमर्हति । नार्हत्येवं भवितुम् । कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्यमानत्वात् । "आत्मा वा अरे द्रष्टव्यः" "सोऽयमात्माऽपहतपाप्मा सोऽन्वेष्टव्यः स विजिज्ञासितव्यः" । "आत्मेत्येवोपासीत" । "आत्मानमेव लोकमुपासीत" "ब्रह्म वेद ब्रह्मैव भवति" इत्यादिषु हि विधानेषु सत्सु कोऽसावात्मा ब्रह्मेत्याकाङ्क्षायां तत्स्वरूपसमर्पणेन सर्वे वेदान्ता उपयुक्ताः नित्यः सर्वज्ञः सर्वगतोनित्यशुद्धोनित्य बुद्धमुक्तस्वभावोविज्ञानानन्दं ब्रह्मत्येवमादयः । तदुपासनाच्च शास्त्रदृष्टोऽदृष्टोभोगः फलं भविष्यति । कर्त्तव्यविध्यननुप्रवेशेन वस्तुमात्रकथने हानोपादानासम्भवात् "सप्तद्वीपा वसुमती" "राजासौ गच्छति" इत्यादि वाक्यवद्देदान्तवाक्यानामानर्थक्यमेव स्यात् । ननु वस्तुमात्रकथनेऽपि रज्जुरियं सर्प इत्यादौ व्यालनिवृत्तिभीतिनिवर्त्तनेनार्थवत्त्वं दृष्टं तथेहाप्यसंसार्यात्मवस्तुकथनेन संसारित्वभ्रान्तिनिवर्त्तनेनार्थवत्त्वं स्यात् । स्यादेवं यदि रज्जुस्वरूपज्ञानवदेव सर्पभ्रान्तिः संसारित्वभ्रान्तिर्ब्रह्मस्वरूपज्ञानमात्रेण निवर्त्तते श्रुतब्रह्मणोऽपि यथापूर्वं सुखदुःखादि संसारित्वधर्मदर्शनात् । "श्रोतव्योमन्तव्योनिदिध्यासितव्यः" इति च श्रवणोत्तरकालयोर्मननिदिध्यासनयोर्दर्शनात् । तस्मात्प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युपगन्तव्यमिति" (पूर्वपक्षः) । "यद्यपि शास्त्र तात्पर्य विदामनुक्रमणम् । दृष्टोहि तस्यार्थः कर्मावबोधनमित्येवमादि । तत् धर्मजिज्ञासाविषयत्वाद्विधिप्रतिषेधशास्त्राभिप्रायं द्रष्टव्यम् । अपि च "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" इत्येतदेकान्तेनाभ्युपगच्छतां भूतोपदेशानामानर्थक्यप्रसङ्गः । प्रवृत्तिनिवृत्तिव्यतिरेकेण भूतञ्चेत् वस्तूपदिशति भव्यार्थत्वेन, कूटस्थं नित्यं भूतं नोपदिशतीत्यत्र कोहेतुः ? । न हि भूतमुपदिश्यमानं क्रिया भवति । अक्रियात्वेपि भूतस्य क्रियासाधनत्वात् क्रियार्थएव भूतोपदेश इति चेन्नैष दोषः । क्रियार्थत्वेऽपि क्रियानिर्वर्त्तनशक्तिमद्वस्तूपदिष्टमेव । क्रियार्थत्वन्तु प्रयोजनं तस्य,न चैतावता वस्तूपदिष्टं भवति । यदि नामोपदिष्टं किं तव तेन स्यादिति उच्यते । अनवगतात्मवस्तूपदेशश्च तथैव भवितुमर्हति । तदवगत्या मिथ्याज्ञानस्य संसारहेतोर्निवृत्तिः प्रयोजनं क्रियतइत्यविशिष्टमर्थवत्त्वं क्रियासाधनवस्तूपदेशेन । अपि च "ब्राह्मणोन हन्तव्यः" इति चैवमाद्या निवृत्तिरुपदिश्यते । न च सा क्रिया नापि क्रियासाधनम् । अक्रियार्थानामुपदेशोऽनर्थकश्चेत् "ब्राह्मणोन हन्तव्यः" इत्यादि निवृत्त्युपदेशानामानर्थक्यं प्राप्तं तच्चानिष्टम् । न च स्वभावप्राप्तहन्त्यर्थानुरागेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुं हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण । नञ्चैष स्वभावोयत् स्वसम्बन्धिनोऽभावं बोधयति । अभावबुद्धिस्त्वौदासीन्यकारणम् । सा च दग्धेन्धनाग्निवत् स्वयमेवोपशाम्यति । तस्मात्प्रसक्तक्रियानिवृत्त्यौदासीन्यमेव ब्राह्मणोनहन्तव्य इत्यादिषु प्रतिषेधार्थं मन्यामहे अन्यत्र प्रजापतिव्रतादिभ्यः । तस्मात् पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवादविषयमानर्थक्याभिधानं द्रष्टव्यम्" भा० । (सिद्धान्तः) वाक्यादेः स्वार्थबोधकताभावे च । मीमांसकमते कार्यान्वित एव शब्दानां शक्तिग्रहनियमात् लिङादेश कार्यतावोधकतया तच्छून्यवाक्यस्यार्थबोधकत्वाभाव इति प्राभाकरामन्यन्ते ।

आनव त्रि०अनिति क्षन-उण् आनुः प्राणी तस्येदम् अण् ।

प्राणिसम्बन्धिनि बलादौ। "आनवस्य हतसवे गयम्" ऋ०७,१८,१२। "आनोः सम्बन्धिनो बलस्य" भा०। "विद्वस आनवाय" ऋ०६,६२,६ स्त्रियां ङीप्।

आनव्य न० आनोर्नरस्य इदं यत्। नरसम्बन्धिनि तन्त्रोक्ते मलहये। "मायिकं नाम यो मोहात्मं पौरुषं कार्म्मणं मलम्। आनव्यं तद्धयं प्रोक्तं निषिद्धं तन्त्रलक्षयम्" तन्त्रसारे प्रपञ्चसारः।

आनस त्रि० अनसः शकटस्य पितुर्वा इदम् अण्। १शकट सम्बन्धिनि। "हयानि वै वानस्पत्यानि चक्राणि रथ्यानि चानसानि" शत०ब्रा०। २पितृसम्बन्धिनि च।

आनाथ्य न० अनाथस्य भावः ष्यञ्। स्वामिशून्यत्वे।

आनाम्य त्रि० आ+नम-कर्म्मणि ण्यत् अनिट्कत्वात् न हस्वः। नमस्कार्य्ये।

आनाय पु० आनीयते मत्स्योऽनेन आ+नी-करणे "जालमानायः" पा० उक्तेः घञ्। मत्स्यधारणार्थे यष्टिस्त्रादिनिर्म्मिते जाले। अन्यत्र अच्। आनय इत्येव।

आनायिन् त्रि० आनयति आ+नी-णिनि। १देशाद्देशान्तर प्रापके। आनायोजालमस्यास्ति आनाय+इनि।२जालिके धीवरे "आनायिभिस्तामपकृष्टनक्राम्" "आनायिनस्तद्धिचये नदीष्णान्" इति च रघुः। उभयत्र स्त्रियां ङीप्।

आनाय्य पु० आनाय्यते गार्हपत्यादानीय संस्क्रियतेऽसौ आ+नी-ण्यत् नि० आयादेशः। वैदिकप्रसिद्धे दक्षिणाग्निभेदे। "आनाय्योऽनित्ये" पा० "दक्षिणाग्निविशेष एवेदं निपातनम् स हि गार्हपत्यादानीयतेऽनित्यत्व सततमप्रज्वलनात् वैश्वादिकुलयोनिकत्वेन वैकल्पिकत्वाच्च। अन्यत्र तु यत् आनेयो घटादिः" सि०कौ० वैश्वकुलादेरानीतो दक्षिणाग्निस्तु आनेयएव "वैश्वकुलात् विप्रतोभ्याधात् गार्हपत्याद्वा" आश्व०श्रौ० अग्नियोनिविकल्पश्रवणात् गार्हपत्यादानेयस्यैव आनाय्यत्वं नान्यस्य।

आनाह पु०आ+नह-घञ्। १बन्धेरदैर्घ्ये आनह्यते अपसरण प्रतिरोधेन बध्यते विण्मुत्रादि अनेन आ+नह+करणे घञ्। २विण्मूत्ररोधसाधने वैद्यकोक्ते रोगभेदे "आमं यदाहृा निचितं क्रमेण भूयोविबद्धम् विगुणानिलेन। प्रवर्त्तमानं न यथास्वमेनं विकारमानाहसदाहरन्ति" मा०नि०। वातादिदोषादुक्ता स्थानविशेषाश्रयत्वेन तेषां रोगविशेषजनकत्वमुक्तं सुश्रु०। "अत ऊर्द्धं स्थाननसंश्रयं वक्ष्यामः। एवं कुपितास्तांस्तान् शरीरप्रदेशानागत्य तांस्तान् व्याधीन् जनयन्ति। ते यदोदरसन्निवेशं कुर्व्वन्ति तदा गुल्मविद्रध्युदराग्निसङ्गानाहविसूचिकातिसारप्रभृतीन् जनयन्ति"। "आनाहार्त्तं ततो दृष्ट्वा तत्सैन्यमसुखार्दितम्। पितरं दुःखितं दृष्ट्वा सुकन्येदमथाब्रवीत्" भा०व०प०१२२अ०।

आनाहिक पु० आनाहे तत्प्रतीकारे विहितः ठक्। आनाहरोगोपशमनीये विधौ। "आस्थापनं मारुतजे, स्निग्धे स्निग्धेन विशिष्यते। पुरीषजे तु कर्त्तव्यो विधिरानाहिको भवेत्" सुश्रु०।

आनिचेय त्रि० समन्नाच्चिचीयते आ+नि+चि-कर्म्मणि यत्। समन्तात् सञ्चयनीये स्त्रियां गार्ग्य०पाठात् ङीन्।

आनिरुद्ध पुंस्त्री० अनिरुद्धस्यापत्यम् दृष्णित्वात् अण्। अनिरुद्धस्य जयापतेरपत्ये स्त्रियां ङीप्। निरुद्धभिन्नस्यापत्ये तु इञ्। आनिरुद्धिरित्येव।

आनिर्हृत पु० अनिर्हृत एव स्वार्थे अण्। देवहृदयतया प्रधाने देवभेदे "नम आनिर्हृतेभ्य इत्येते ह्येभ्यो लोकेभ्योऽनिर्हृताः" शत०ब्रा०"एतानि देवहृदयानि यथा हृदयं प्रधानं तथैतेऽपि प्रधानानि" भा०।

आनिल त्रि० अनिलस्येदम् अण्। १वायुसम्बन्धिनि अनिलोदेवताऽस्य अण्। २वायुदेवताके हविरादौ स्त्रियासभयत्व ङीप्। सा च स्वातितारायाम् सा हि अनिलाधिष्ठानका

आनिलि पु० अनिलस्यापत्यम् इञ्। भीमे स हि पाण्डोः क्षेत्रे कुन्त्यां वायुनोत्पादितः यथा "ततस्तयोक्ता भर्त्रा तु वायुमेवाजुहाव सा। ततस्तामागतो वायुर्मृगारूढोमहाबलः। किन्ते कृत्ति! ददाम्यद्य ब्रूहि यत्ते हृदि स्थितम्। सा सलज्जा विहस्याह पुत्रं देहि सुरोत्तम!। बलवन्तं महाकायं सर्वदर्पप्रभञ्जनम्। तस्माज्जज्ञे महाबाहुर्भीमो भीमपराक्रमः" भा०आ०प० १२३ अ०। २हनूमति च तस्य केसरिक्षेत्रे अञ्जनायां वायुना जनितत्वात् तथात्वम् तत्कथा संक्षिप्ता यथा "अहं केसरिणः क्षेत्रे वायुना जगदायुना। जातः कमलपत्राक्ष! हनूमान्नाम वानरः" भा०व०प० १४०अ०। भीमं प्रति हनूमद्वाक्यम्। अतएव तयोः क्षेत्रभिन्नोत्पन्नत्वेऽपि एकोनोत्पादनात् भ्रातृत्वम् तेन "तद्रूपं दर्शयामास यद्वै सागरलङ्घने। भ्रातुः प्रियमभीप्सन् वै चकार सुमहद्वपुः" "भ्राता मम सुग्रीवो बुद्धिसत्त्वबलान्वितः रामायणेऽतिविख्यातः श्रीमान् वानरपुङ्गव" इति च तत्रैवाध्याये तयोर्भ्रातृत्वेनोक्तिः। अनिलसुतादयोऽप्युभयत्र।

आनीत त्रि० आ+नी-कर्म्मणि क्त। देशाद्देशान्तरं नीते।

"आनीता भवता यदा पतिरता साध्वी धरित्रीसुता" नाटकम्। [प्रियानीतिरामोरत्नोबधे स्थितः"सुखं०।

आनीति स्त्री आ+नी-क्तिन्। आनयने "चङ्क्रमित्वा

आनील पु० ईषदर्थे आङ् प्रा०स०। १ईषन्नीलवर्णे २तद्वति त्रि०। ३नीलघोटके पु०हेम०। ४तज्जातिस्त्रियां स्त्री ङीप्

आनु त्रि० अन-उण्। प्राणिनि आनवशब्दे उदा०।

आनुकल्पिक त्रि० अनुकल्पं वेत्ति तद्बोधकशास्त्रमधीते वा उक्था० ठक्। १अनुकल्पाभिन्ने २तद्बोधकशास्त्राध्येतरि च अनुकल्पेन प्राप्तः ठक्। ३अनुकल्पेन प्राप्ते। अनुकल्पाय हितम् ठक्। ४अनुकल्पसाधने। [वर्त्तमाने।

आनुकूलिक त्रि० अनुकूलं वर्त्तते ठक्। आनुकूल्येन

आनुकूल्य न०अनुकूलस्य भावः कर्म्म वा ष्यञ्। अनुकूलताचरणे १साहाय्ये २अनुगुणतायाञ्च। "यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्द्धते" या०स्मृ० "रमतश्चानुकूल्येन ययुः संवत्सरा दश" रामा०। [पश्चाद्भवादौ।

आनुगङ्ग त्रि० अनुगङ्गं भवः परिसरा० अञ्। गङ्गा-

आनुगतिक त्रि० अनुगतमनुगमनं भावे क्त तेन निर्वृत्तः अचतुरा० ठक्। अनुगमेन निर्वृत्ते सन्तोषादौ।

आनुगत्य न० अनुगतस्य भावः कर्म्म वा ष्यञ्। १अनुगमनरूपाचरणे २अनुगतत्वे च। [स्वार्थे ठक्। पश्चात्कथके।

आनुगादिक त्रि०अनुगदतीति अनुगादी स एव अनुगादिन्+

आनुगुणिक त्रि० अनुगुणमधीते वेद वा वसन्ता० ठक्। १अनुगुणाभिन्ने २तद्बोधकशास्त्राध्येतरि च। स्त्रियां ङीप्।

आनुगुण्य न० अनुगुणस्य भावः कर्म्म वा ष्यञ्। १अनुकूलताचरणे २अनुकूलत्वे च। [स्त्रियां ङीप्।

आनुग्रामिक त्रि० अनुग्रामं भवः ठञ्। ग्रामपश्चाद्भवादौ

आनुचारक न० अनुचारकस्य धर्म्मः महिष्यादि० अण्। अनुचरधर्म्मे आचरणे।

आनुति पुंस्त्री० आनुतस्यापत्यम् इञ्। आनुतनाम्नोयुनेरपत्ये। "इञः प्राचाम्" ततः युवप्रत्ययस्य लुक् तु तौल्वल्यादित्वात् न। आनुतिः पिता आनुतायनः पुत्रः। आ+नु-क्तिन्। सम्यक्स्तवने स्त्री। [पश्चाद्भवादौ।

आनुतिल्य त्रि० अनुतिलं भवः परिसरा०अञ्। तिलस्य

आनुदृष्टिनेय पुंस्त्री अनुदृष्टौभवः शुभ्रा०ढक् कल्या०आनङ् च। अनुदृष्टिभवे। [ध्वंसपश्चाद्भवे स्त्रियां ङीप्।

आनुनाश्य त्रि०अनुनाशं विनाशस्य पश्चाद् भवः संका०यत्।

आनुनासिक्य न० आनुनासिकस्य भावः ष्यञ्। अनुनासिकधर्म्मे नासासङ्कितततत्तत्स्थानोच्चार्य्यत्वे "प्रतिज्ञानुनासिक्याः पाणिनीयाः" व्याकरणीया परिभाषा।

आनुपथ्य त्रि०अनुपथं भवः परिसरा०अञ्। मार्गस्य पश्चाद्भवादौ

आनुपदिक त्रि० अनुपदं धावति ठक्। अनुपदं धावमाने पदस्य वेदपाठविशेषस्य पश्चात् अनुपदं तद्वेत्ति तद्बोधकशास्त्रं वाऽधीते उक्था० ठक्। २पदशास्त्राध्येतरि ३तदभिन्ने च स्त्रियां ङीप्। [पश्चाद्भवादौ।

आनुपद्य त्रि० अनुपदं भवः परिसरा० अञ्। पदस्य

आनुपूर्व्य स्त्री पूर्व्वमनुक्रम्य अनुपूर्व्वं तस्य भावः ष्यञ् ततो वा ङीषि यलोपः। परिपाट्याम् मूलावधिके क्रमे "षड़ानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान्" मनुः। ङीषभावपक्षे आनुपूर्व्यमप्यत्र न०। "वसीरन्नानुपूर्व्येण शास्त्रतोमाविकानि च" मनुः।

आनुमानिक त्रि०अनुमानादागतः ठक् स्त्रियां ङीप्। अनुमानप्राप्ते १युक्तिसिद्धे २व्याप्तिविशिष्टलिङ्गज्ञानादवगते अनुमिते पदार्थे यथा धूमदर्शनात् वह्निरनुमीयते स च वह्निः स्वव्याप्तिविशिष्टधूमज्ञानेनैवावगत इति तस्य तथात्वम्। अनुमानमात्रेणावगम्ये वेदे वाचकशब्दशून्ये सांख्यमतसिद्धे ३प्रधाने न०। "ऐक्षतेनाशब्दमिति" शा०सूत्र भाष्ये तस्य च वेदशब्दप्रतिपाद्यत्वं निराकृत्य "रचनानुपपत्तेर्नानुमानम्" सू० भा० अनुमानशब्दत्वमपि निराकृतम्। तस्य च यथानुमानिकत्वं तथा ४६६,६७ पृष्ठे अव्यक्तशब्दे दर्शितम् "आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च" शा०सू०।

आनुमाष्य त्रि० अनुमाषं भवः परिसरा० अञ्। माषस्य पश्चाद्भवादौ। [द्रुवादौ।

आनुयज्य त्रि० अनुयजं भवः परिसरा० अञ्। यजस्य पश्चा-

आनुयूप्य त्रि० अनुयूपं भवः परिसरा० अञ्। यूपस्य पश्चाद्भवादौ। [२आनुगत्ये च।

आनुरक्ति स्त्री आ+अनु+रञ्ज-क्तिन्। १अनुरागे

आनुराहति पुंस्त्री० अनुरहतोऽपत्यम् बाह्वा० इञ् अनुग० द्विपदवृद्धिः। मुनिभेदे युवापत्ये तु ततः फक् तौल्वल्या० न लुक्। आनुराहतायनः। तस्य युवापत्ये। आनुहारति इति पाठान्तरम्।

आनुरोहति पुंस्त्री० अनुरोहतोऽपत्यम् बाह्वा० इञ्। अनुरोहन्मुनेर्गोत्रापत्ये तस्य युवापत्ये फक् तस्य तौ०न लुक्। आनुरोहतायनः तदीययुवापत्ये।

आनुलेपिक त्रि०आनुलेपिकायाः स्त्रिया धर्म्यम् महिष्या० अण्। अनुलेपिकाया धर्म्ये कर्म्मणि।

आनुलोमिक त्रि० अनुलोमं वर्त्तते अनुलोम+ठक्। अनुलोमाचारवति। स्त्रियां ङीप्।

आनुलोम्य न० अनुलोमस्य भावः कर्म्म वा ब्राह्म० ष्यञ्। १अनुक्रमे "आनुलोम्येन सम्भूता जात्या ज्ञेयास्तएवते। "एकान्तरे त्वानुलोम्याद्द्व्यन्तरौ तथा सुतौ" इति च मनुः अनुकूलत्वे "क्रियाणामानुलोम्यञ्च करोत्यकुपितोऽनिलः" सुश्रु०। [पश्चाद्भवादौ।

आनुवंश्य त्रि० अनुवंशं भवः परिसुखा० ञ्य। वंशदत्तस्य

आनुवेश्य त्रि० "अनुवेशं वसति "अव्ययीभावाच्च" पा० ञ्य प्रातिवेश्यसन्निकृष्टगृहवासिनि। "प्रातिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजे" मनुः। "निरन्तरगृहवासी प्रातिवेश्यः तदन्तरगृहवासी आनुवेश्यः इति कुल्लू० अव्ययीभावाच्चेति सूत्रे परिसुखादिभ्य एवेष्यते इति नियमस्तु प्रायिकतेनात्रापीति बोध्यम्। [यतिकसन्निधि।

आनुशातिक अनुशतिकस्येदम् अण् द्विपदवृद्धिः। अनु-

आनुशासनिक त्रि० अनुशासनाय हितं ठक्। १अनुशासनसाधने नीतिशास्त्रादौ २राज्ञ्यनोतेरनुशासनार्थे भारतान्तर्गते पर्व्वभेदे। "ततः पर्व परिज्ञेयमानुशासनिकं परम्" भा० आ० १अ०।

आनुश्रविक त्रि० गुरूपाठादनुश्रूयते अनुश्रवोवेदस्तत्र विहितः ठक। स्वर्गादिसाधनतया वेदविहिते कर्म्मसमूहे "दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः" सां० का०। "नानुश्रविकादपि तत्सिद्धिः साध्यत्वेनाविशेषयोगादपुरुषार्थत्वम्" सां० सू०।

आनुषङ्गिक त्रि० अनुषङ्गात् आगतः ठक् स्त्रियां ङीप्। उद्देश्यान्तरप्रवृत्तस्य तत्कर्म्मनान्तरीयतया प्राप्ते प्रासङ्गिके अनुद्देश्ये "अन्यतरस्यानुषङ्गिकत्वेऽन्वाचयः" सि० कौ० यथा भो वटो! भिक्षामट यदि गां पश्येः ताञ्चानयेत्यादौ भिक्षार्थप्रवृत्तस्य दैवात् गोदर्शनात्तस्या आनयनमानुषङ्गिकं तत्रोद्देश्यत्वाभावात्। [पूर्व्वम्।

आनुषज् अव्य० आ+अनु-सृज-क्विप् सरा०। आनु-

आनुषण्ड त्रि० अनुषण्डे देशभेदे भवः कच्छा० अण्। अनुषण्डदेशभवे।

आनुष्टुभ त्रि० अनुष्टुप् छन्दोऽस्य उत्सा० अञ्। १अनुष्टुप्छन्दस्के मन्त्रादौ ऋचि स्त्री ङीप्। "अनुश्यावाश्वान्योगवे आनुष्टुभे ऋचे भवत" इति सामसं० भा० स्तुता स्तुतिः। अनुष्टुभ इदम् अञ्। २अनुष्टुप्सम्बन्धिनि। अनुष्टुप्सरस्वती देवताऽस्य अण्। ३सारस्वते ऋषिरादौ" आनुष्टुभस्य ऋषिणोयत्" ऋ० १०,१८१,१। "आनुष्टुभोवा अश्वः" आनुष्टुभेषा दिक्" शत०ब्रा०। अत्र छान्दसोऽकोऽभावः स्वार्थे अण्। ४ अनुष्टुप्छन्दस्के न० स्वार्थिकस्य क्वचित् प्रकृतिलिङ्गातिक्रमस्य देवतावदिष्टत्वात्लिङ्गान्यत्वम्।

आनुसाय्य त्रि० अनुसायं भवः परिसुखा० ञ्य। सायस्य पश्चाद्भवादौ।

आनुसीत्य त्रि० अनुसीतं भवः परिसुखा० ञ्य। सीतस्य पश्चाद्भवे। [पश्चाद्भवादौ।

आनुसीर्य्य त्रि० अनुसीरं भवः परिसुखा० ञ्य। सीरस्य

आनुसूय त्रि० अनुसूयया अत्रिपत्न्या दत्तम् अण्। अनुसूयया दत्ते "स्फुरत्प्रभामण्डलमानसूयं सा बिभ्रती शाश्वतमङ्गरागम्" रघुः। [इनङ् च। अनुसूयभवे।

आनुसृतिनेय त्रि० अनुसृतौ भवः शुभ्रा० ढक् कल्याखा०

आनुसृष्टिनेय त्रि० अनुसृष्टौ भवः शुभ्रा० ढक् कल्या० इनङ् च। अनुसर्जनभवे।

आनुहारति त्रि० अनुहरति भवः बाह्वा० इञ् अनुगति० द्विपदवृद्धिः। अनुहरणकर्त्तरि भवे।

आनूप त्रि० अनूपदेशे भवः कच्छा० अण्। अनूपदेशभवे स्त्रियां ङीप्। २जलानुगतदेशभवे प्राणिवर्गे च तत्तत्प्राणिनां मांसगुणाश्च सुश्रुते दर्शिता यथा "आनूपवर्गस्तु पञ्चविधः। तद्यथा कूलचराः प्लवाः कोशस्थाः पादिनो मत्स्याश्चेति। तत्र गजगवयमहिषरुरुचमरशरभरोहित वराहखड्गगोकर्णकालपुच्छकोड्रुलङ्गूरवानरगवयप्रभृतयः कूलचराः पशवः। वातपित्तहरा स्निग्धा मधुरा रसपाकयोः। शीतला बलिनः स्निग्धा मूत्रलाः कफवर्द्धनाः। विरूक्षणो लेखनश्च वीर्य्योष्णः पित्तदूषणः। खाद्यन्तलवणस्तेषां गजः श्लेष्मानिलापहः। गवयस्य तु मांसं हि स्निग्धं मधुरकासजित्। विपाके मधुरं चापि व्यायामश्च तु वर्द्धनम्। स्निग्धोष्णमधुरो ह्यो महिषस्तर्पणो गुरुः। वातपित्तोपशमनं गुरु शुक्रप्रवर्द्धनम्। तथा चमरमांसन्तु स्निग्धं मधुरकासजित्। विपाके मधुरं चापि वातपित्तप्रणाशनम्। शरभस्य तु मांसञ्च कषायानुरसं स्मृतम्। वातपित्तोपशमनं गुरु शुक्रविवर्द्धनम्। स्वेदनं दृंहणं ह्यं शीतलं तर्पणं गुरु। स्निग्धं श्रमानिलहरं वाराहं बलवर्द्धनम्। कफघ्नं खड्गमांसञ्च कषायमनिलापहम्। पित्तघ्नं पवित्रमायुष्यं बल्यमूत्रं विरूक्षणम्। गोकर्णमांसं मधुरं स्निग्धं स्मृतं कफा-

वहम्। विपाके मधुरञ्चापि रक्तपित्तविनाशनम्। हंससारसकौञ्चचक्रवाककुररकादम्बकारण्डवजीवञ्जीवकवकबलाकापुष्करीकञ्जवगरारीसुखनन्दीसुखमद्गुत्रोणकाचाचमल्लिकाशुक्राचप्सरायायिकाकोनालकाम्बुकुक्कुटिकामेघरावश्वेतचरणप्रभृतयः प्लवाः सङ्घातचारिणः। रक्तपित्तहराः शीताः स्निग्धा हृद्या मरुज्जिताः। मूत्रपुरीषाश्च मधुरा रसपाकयोः। गुरवश्चमधुरः स्निग्धः स्वरवर्णबलप्रदः। हंसः शुक्लस्तेषां हंसो मारुतनाशनः।

यकृत्यकृन्नखशुक्तिगण्डूकमण्डूकप्रभृतयः कोशस्थाः। कूर्मकुम्भीरकर्कटकक्षुद्रकर्कटकशिशुमारप्रभृतयः पादिनः। यकृत्कूर्मादयः स्वादुरसपाका मरुदुदः। शीताः स्निग्धा हिताः पित्ते वर्चस्याः श्लेष्मवर्द्धनाः। क्षुद्रकर्कटकस्तेषां बल्यः कोष्ठोऽनिलापहः। शुक्तिः सन्धानकृत् मूत्रविण्मूलोऽनिलपित्तहा। मत्स्यास्तु द्विविधा नादेयाः सामुद्राश्च। तत्र नादेयाः रोहितपाठीनपाटलाराजीववम्मिगोमत्स्यकृष्णमत्स्यवायुशारसरसकसहस्रदंष्ट्रप्रभृतयो नादेयाः। नादेया मधुरा मत्स्या गुरवोमारुतापहाः। रक्तपित्तकराश्चोष्णा हृद्याः स्निग्धाल्पवर्चसः। कषायानुरसस्तेषां गण्डशैवालभोजनः। रोहितो मारुतहरो नात्यर्थं पित्तकोपनः। पाठीनः श्लेष्मलो हृद्यो निद्रालुः पिशिताशनः। दूषयेदस्रपित्तन्तु कुष्ठरोगं करोत्यसौ। सरली हंसणो हृद्यः स्नेह्यश्लेष्मकरस्तथा। सरस्तडागसम्भूताः स्निग्धाः स्वादुरसाः स्मृताः। महाह्रदेषु बलिनः स्थूलेऽम्भस्यबलाः स्मृताः। तिमिझिल्लकलिशपाकमत्स्यनिरालकनन्दिवारलकमकरगर्गरकचन्द्रकमहामीनराजीवप्रभृतयः सामुद्राः। सामुद्रा गुरवः स्निग्धा मधुरा नातिपिच्छलाः। उष्णा वातहरा हृद्या वर्चस्याः श्लेष्मवर्द्धनाः। बलावहा विशेषेण मांसाशित्वात् समुद्रजाः। समुद्रजेभ्योनादेया हंसणत्वाद्गुणोत्तराः। तेषामप्यनिलघ्नत्वाच्छौष्ठ्रकौष्ठौ गुणोत्तरौ। स्निग्धत्वात् स्वादुपाकत्वात् तयोर्वाध्रा गुणोत्तराः। नादेया गुरवो मध्ये यस्मात्पुच्छाग्रचारिणः। सरस्तडागजानान्तु विशेषेण गिरौ लघु। अदूरगोचरा यस्मात्तस्मादुत्सोदपानजाः। किञ्चिन्मन्दा गिरोदेशमत्यर्थं गुरवस्तु ते। अधस्तादुगुरवो ज्ञेया मत्स्याः सरसिजाः स्मृताः। उरोविचरणात्तेषां पूर्वमङ्गं लघु स्मृतम्। इत्यानूपो महाभिस्यन्दिमांसवर्गो व्याख्यातः" "मनुष्यतत्स्थयोर्वुञ्" पा०मनुष्ये तत्स्थेकुशितादौ वाच्ये तु वुञ्। आनूपक इत्येव

आनृत त्रि० अनृतं शीलमस्य अत्रा० अण्। सततमिथ्यानुशीलनकर्त्तरि स्त्रियां ङीप्।

आनृण्य न० अनृणस्य भावः कर्म्म वा ष्यञ्। ऋणशून्यत्वे ऋणशोधने। "वक्तव्यं सर्वदा सद्भिरप्रियञ्चापि यद्धितम्। आनृण्यमेतत् स्नेहस्य सद्भिरेव कृतं पुरा" नरसिंहपु०।

आनृशंसि पुंस्त्री० अनृशंसस्यापत्यम् इञ्। दक्षाङ्गोरपत्ये गङ्गा० भवादौ ङ। आनृशंसीयः तद्भवादौ त्रि०।

आनृशंस्य न० अनृशंसस्य भावः कर्म्म वा ष्यञ्। १अनिष्ठुरतायां २कारुण्ये "आरोढुं सुमहाप्राज्ञ आनृशंस्यात्ऋते विना" भा०आश्व० २अ०। "आनृशंस्यात् ब्राह्मणस्य भुञ्जते क्षीतरे जनाः" मनुः। ३अनुकम्पायाञ्च। "अहिंसा तत्कुमारीणामानृशंस्यं हि केवलम्" उद्वा०त० स्मृतिः। "आनृशंस्यमनुक्रम्पा" रघु०। स्वार्थे ष्यञ् ३कारुण्ययुक्ते त्रि० "एष धर्म्मपरोनित्यमानृशंस्यञ्च पाण्डवः" भा०व०प०७१ अ०।

आनेतृ त्रि० आ+नी-तृच्। आनयनकर्त्तरि स्त्रियां ङीप्।

आनेय त्रि० आ+नी-कर्म्मणि यत्। देशाद्देशान्तरमानेतव्ये १घटादौ वैश्यकुलात् विप्रतोभ्याद्वाहा आनेतुं योग्ये २दक्षिणाग्नौ पु०आनाय्यशब्दे विवृतिः "आनेयो घटादि वैश्यकुलादेरानेयोदक्षिणाग्निश्च" सि०कौ०।

आ(अ)नैपुण न० अनिपुणस्य भावः अण् उत्तरपदवृद्धिः पूर्व्वपदस्य वा। अपाटवे नैपुण्याभावे ष्यञ्। पूर्ववत् वृद्धिः आ(अ)नैपुण्यमप्यत्र।

आ(अ)नैश्वर्य्य न० अनीश्वरस्य भावः ष्यञ्। उत्तरपदवृद्धिः पूर्व्वस्य पदस्य वा। १ऐश्वर्य्याभावे २ऐश्वर्य्यविरोधिनि सांख्यादिमतसिद्धे बुद्धेर्धर्म्मभेदे धर्म्माधर्म्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्य्यानैश्वर्य्यरूपा अष्टौ बुद्धेर्धर्मास्ते च भावरूपा एव तैरभावानङ्गीकारात् तत्र ज्ञानभिन्नानां सप्तानां बन्धहेतुत्वम् ज्ञानेन मोक्ष इति तेषां सिद्धान्तः यथाह सांका०कौमुद्योः" "रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः। सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण" तत्त्वज्ञानवर्जं बध्नाति धर्मादिभिः सप्तभिः रूपैरिति पुरुषार्थं प्रति भोगापवर्गौ प्रति आत्मनात्मानमेकरूपेण तत्त्वज्ञानेन विवेकख्यात्या विमोचयति पुनर्भोगापवर्गौ न करोतीत्यर्थः"।

आन्त त्रि० अम+क्त नि०वा दकारस्य नकारः उपधादीर्घः। पीड़िते दृढ़पक्वे अमितोऽत्र। [न्नान्तरोधर्म्मः सत्वम्" सा०द०

आन्तर त्रि० अन्तर्मध्ये भवः अण्। आभ्यन्तरे। "कथ-

आन्तरतम्य न० अन्तरतमस्य अल्पतरस्य भावः ष्यञ्। सौषाद्ये "वाह्यप्रयत्नाश्च यद्यपि सवर्णसंज्ञायामनुपयुक्ता-स्तथाप्यान्तरतम्यपरीक्षायामुपयोक्ष्यन्ते" सि०कौ०।

आन्तरागारिक त्रि० अन्तरागारस्य धर्म्यम् ठक्। अन्तरागारनियुक्तपुरुषस्य धर्म्ये अवरोधरक्षणादौ।

आन्तरप्रपञ्च पु० कर्म०। आध्यात्मिके आभ्यन्तरे द्वैतविस्तारे स चाद्यमयादिकोषपञ्चकं शरीरत्रयम् जन्मस्थित्यादयः षड्-भावविकाराः त्वङ्मांसादिषाट्कौशिकस्थूलदेहः अशनाया-पिपासादि षड्ऊर्म्मयः श्रोत्रादित्राणेन्द्रियपञ्चकं वागादिकर्म्मेन्द्रियपञ्चकं प्राणादिवायुपञ्चकं मनआद्यन्तःकरणचतुष्टयं सङ्कल्पाद्यन्तःकरणत्रयः जागराद्यवस्थात्रयं तदभिमानि-विश्वतैजसप्राज्ञाःसमाधिमूर्च्छादयः क्रोधादरिषड्वर्गः साध-नचतुष्टयं सत्वादिगुणत्रयं सुखदुःखज्ञानाज्ञानादि अविद्यादिक्लेशपञ्चकम् मैत्र्यादिभावनाचतुष्टयं यमाद्य-ष्टाङ्गम् प्रत्यक्षादिप्रमाणवर्गः रोगारोग्यसुखदायोप-योग्यं विविधनामरूपगुणधर्मादयः भोगापवर्गौ च। एवमन्यमतेऽप्यूह्यम्।

आन्तराल त्रि०अन्तराले मध्यस्थितिं वेत्ति अण्। देहाभ्य-न्तर एवात्मनः स्थितिवेत्तरि जीवस्याणुत्ववादिनि पूर्व-प्रन्थे माध्वे स हि आत्मनोविभुत्वखण्डनेन देहाभ्य-न्तरे एव स्थितिं मन्यमानस्तस्याणुत्वम् प्रतिषेधे आत्मशब्दे तत्मतनुक्तप्रायम् अधिकं माध्वशब्दे वक्ष्यते। "अणुं वदन्त्यान्तराला: सूक्ष्मनाडीप्रचारतः। रोमणः सहस्रभागेन नाडीषु प्रचरत्ययमिति" तस्य सिद्धान्तः "बालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेय इति" श्रुतिमनुसृत्य तथा तेनाङ्गीकृतम्। दुर्विज्ञेयत्वेन सूक्ष्मत्वमौपचारिकमिति तु वेदान्तादयः।

आन्तरि(री)क्ष त्रि० अन्तरि(री) क्षे भवः अण्। आकाश-भवे १उत्पातादौ "उत्पातांश्चिविधान् प्राह नारदो भगवान् प्रभो! दिव्यांश्चैवान्तरीक्षांश्च पार्थिवांश्च पिता-मह!" ज्यो०। २अन्तरीक्षभवे जले च। अम्बुशब्दे २३० पृष्ठेऽस्य विवृतिः।

आन्तरीपक त्रि० अन्तरीपे भवः घूमा० वुञ्। अन्तरीप-भवे धूमादिगणे द्वीपसाहचर्य्यात् देशवाचित्वाच्च अन्तरीप-शब्दएव बोध्यः अन्तरीय इति पाठस्तु प्रामादिकः।[ङीप्।

आन्तर्गणिक त्रि० अन्तर्गणं भवः ठञ्। गणमध्यभवे स्त्रियां

आन्तर्गेहिक त्रि० अन्तर्गेहं भवः ठञ्। गेहमध्यभवे स्त्रियां ङीप् अन्तर्गैहिकान्तर्गेहकादयोऽत्र।

आन्तर्य्य न० अन्तरस्य भावः ष्यञ्। अन्तर्वर्त्तित्वे।

आन्तिका स्त्री अन्तिकेन अण् अजा०टाप्। जेठ्यायाम् भगिन्याम्।

आन्त्र न० अन्त्रेण अम-गतौ क्त्र उपधादीर्घः। १वायु-वाहकनाड़ीभेदे। अन्त्रस्येदम् अण्। २अन्त्रसम्बन्धिनि त्रि० स्त्रियां ङीप्।

आन्दोल दोलने सङ्घट्टने अद०चुरा०उभय०सक०सेट्। आन्दोलयति ते आन्दुदोलत् त। क्त आन्दोलितः।

आन्दोलक पु० आन्दोलयति ण्वुल्। दोलनकर्त्तरि।

आन्दोलन न० आन्दोल-भावे ल्युट्। १पुनःपुनर्दोलने, २सङ्घट्टने "किन्त्वासामविन्दच्छन्दश्चयां द्राक् चामरा-न्दोलनात्" उद्भटः ३अनुसन्धाने च।

आन्ध्रसिक त्रि० अन्ध्रो भक्तं शिल्पमस्य ठक्। प्राचके खदे।

आन्धीगव न०अन्धीगुना ऋषिभेदेन दृष्टं साम-अण्। द्वती-यसवने गेये आर्भवपवमानसूक्तगते सूक्तभेदे तच्च सूक्तम् ऊहगाने १प्र०११क०पठितम् तच्च साम०स०भा०दर्शितम् यथा "ग्नावश्वान्धीगवेऽनुष्टुभानेये अथ्यतेऽथ वा। पुरेव लिङ्गं जगती चतुर्विंशति-कीर्त्तनम्। इदमाम्नायते "पञ्च-ऋन्दा आवापः आर्भवः पवमानः सप्तसामा, गायत्र-संहिते गायत्रेऽृचे भवतः, ग्नावाश्वान्धीगवे आनुष्टुभे ऽृचे भवतः, उष्णिहि शफम्, ककुभि पौष्कलम्, काव-मन्त्यं जगतीषु" इति। अयमर्थः अस्मिन् द्वतीयसवने पवमानः आर्भवसंज्ञकः, तस्मिन् पञ्च सूक्तानि, सप्त सामानि, "स्वादिष्ठया मदिरा" इत्येकं सूक्तम् (उ,१प्र, १५), तस्मिन् गायत्रत्रिष्टुप् ऋचः तासु "गायत्रम्" "संहितम्" (उ,१प्र,८) चेति द्वे सामनी, "पु-रोजितो वो अन्धसः" इति सूक्तान्तरम् (उ,१प्र,१८) तत्रैकानुष्टुबुत्तरे द्वे गायत्र्यौ तासु "ग्नावाश्वम्" (ऊ,१प्र,११) "आन्धीगवम्" (उ,२प्र,११) चेति द्वे सा-मनी, "इन्द्रमच्छ सुता" इत्यपरं सूक्तम् (ऊ,१प्र,१८), तस्मिन्नुष्णिहस्त्रिचः तासु "शफम्" साम, "पवस्व मधुमत्तम" इति प्रगाथः (उ,१प्र,१६), तस्मिन् पूर्व्या ककुप्, उत्तरा पङ्क्तिः। तत्र "पौष्कलम्" (ऊ,१प्र,१९) साम, "अभिप्रियाणि पवते च नोहित" इत्यन्त्यं सूक्तम् (उ,१प्र,१९), तत्र तिस्रोजगत्यः तासु "कावम्" (ऊ,१प्र,१२) साम"।

आन्ध्र न० अन्धस्य भावः ष्यञ्। दृष्टिशक्तिराहित्ये यत्र प्रतिघाते तद्भवति तद्दूषितं सुश्रु०। शिरानाड़ीरूपकस्य "भ्रूम-

च्छान्त्रयोरधोऽच्छोर्वाऽन्त्रतोऽपाकौ नाम तत्रान्त्रं ह्रस्वुपघातो वा इति" तत्कारणञ्चोक्तम् "शोणितमतिनिर्हियमाणं कण्डूशोफरागदाहपाकवेदना जनयेत् । अत्युष्णाभिस्निग्धातिविदाहिभक्षैर्विस्रावितमतिप्रवर्त्तते अतिप्रवृत्तं शिरोऽभितापमान्ध्यमधिमन्थं तिमिरमाविर्भावमित्यादि चापादयति" सुश्रु० । २प्रकाशन्यूनत्वे "जगदान्ध्यप्रसङ्गः" वे० प्र०

आन्ध्र पु० आ+अन्ध-रन् । १देशभेदे २तद्देशवासिनि ३तद्भूपे च ब० व० । "आन्ध्राःशका पुलिन्दाश्च यवनाश्च नराधिपाः" भा० व० प० १८८अ० । स च देशः इ० स० कूर्म्मविभागे आग्नेय्यां दिशि वर्त्तितः यथा "आग्नेय्यां दिशि कोशलकलिङ्गवङ्गोपवङ्गजठराङ्गाः कौशिकविदर्भवत्सान्ध्रचेदिकाशोर्द्धकण्ठाश्च" बृहन्नौ च तत्रैवोक्तम् "द्रविडविदेहान्ध्रसैन्धवकासारपुरं कौङ्कणाः समान्ध्रोषकाः । कुन्तलकेरलदण्डककान्तिपुरस्थे ऋषभरजाः । नासिक्यभोगवर्द्धनविराटविन्ध्याद्रिपार्श्वगादेशाः । ये च पिबन्ति सुतोयां तापीं ये चापि गोमतीसलिलम्" । तेन विन्ध्याद्रिपार्श्वगः गोमतीतापीनद्योःसन्निकृष्टोऽयं देश इति गम्यते ।

आन्ध्र त्रि० अन्ध्रं लब्धा अण्+अ । अन्ध्रं लब्धरि ।

आन्यतरेय पुंस्त्री० अन्यतरस्यापत्यम् गुभा० ढक् । अन्यतरस्यापत्ये स्त्रियां ङीप् ।

आन्यभाव्य न० अन्योभावोयस्य अन्यभावः तस्य भावः ब्राह्म० ष्यञ् । अन्यरूपत्वे । [स्त्रियां ङीप्

आन्वयिक त्रि० अन्वये प्रयुक्तकुले भवः ठञ् । प्रयुक्तकुलजाते

आन्वष्टक्य न० अन्वष्टका+स्वार्थे ष्यञ् । अन्वष्टकाशब्दार्थे "अपरेद्युरान्वष्टक्यम्" आश्व० श्रौ० ।

आन्वाहिक त्रि० अह्नि अह्नि अन्वहम् तत्र भवः ठञ् अनुग० द्विपदछद्विः । प्रतिदिनसाध्ये पाकादौ "वैवाहिकेऽग्नौ कुर्वीत गृह्यं कर्म्म यथाविधि । पञ्चयज्ञविधानञ्च पक्तिश्चान्वाहिकी गृहे" मनुः ।

आन्वीक्षिकी स्त्री अन्वीक्षणादनु ईक्षा पर्य्यालोचना सा प्रयोजनमस्याः ठञ् । तर्कविद्यायाम् गौतमप्रणीतायां मात्रविद्यायाम् । तत्प्रतिपादकग्रन्थश्च अक्षपादेन पञ्चाध्यायी रचितः तत्रादिमं सूत्रं "प्रमाणप्रमेयसंशय प्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम" इति अन्तिमसूत्रञ्च "हेत्वाभासाश्च यथोक्ताः" इति । तत्र प्रतिपाद्यविषयाश्च पदार्थतत्त्वज्ञानानुमुक्तिफलं तत्र क्रमोक्तिः । प्रत्यक्षानुमानोपमानागमरूपप्रमाणचतुष्टयम् तेषां लक्षणविभागादि । आत्मदेहेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गरूपप्रमेयविभागः । इच्छाद्वेषप्रयत्नसुखदुःखज्ञानानि आत्मलिङ्गानि । चेष्टावदन्यावयवित्वमिन्द्रियाश्रयत्वं वा देहलक्षणम् । घ्राणरसनचक्षुस्त्वक्श्रोत्ररूपेन्द्रियविभागः तेषां पृथिव्यादिभ्यः क्रमेणोत्पत्तिः । तत्कारणानि च क्रमेण पृथिव्यप्तेजोवायुाकाशात्मकानि पञ्च भूतानि । गन्धरसरूपस्पर्शरूपविषयपञ्चकं पृथिव्यादीनां विशेषगुणास्तेषां च क्रमेण घ्राणादिभिर्ग्राह्यता । महत्तत्त्वापर्य्यायाया बुद्धेर्ज्ञानरूपत्वम् । मनसो लक्षणम् । प्रवृत्तिलक्षणम् रागद्वेषाभिनिवेशरूपदोषत्रयलक्षणम् । पुनरुत्पत्तिरूपप्रेत्यभावलक्षणम् प्रवृत्तिजनितार्थरूपफललक्षणम् । बाधनारूपं दुःखलक्षणम् । दुःखात्यन्तनिवृत्तिरूपापवर्गलक्षणम् । एकस्मिन् धर्म्मिणि भावाभावविरुद्धकोटिद्वयज्ञानत्वं संशयलक्षणम् तत्र साधारणधर्म्मवद्धर्म्मिज्ञानमसाधारणधर्म्मवद्धर्म्मिज्ञानं विप्रतिपत्तिवाक्यजन्यकोटिद्वयोपस्थितिश्च कारणम् । प्रवृत्तिहेत्विच्छाविषयत्वं प्रयोजनलक्षणम् । वादिप्रतिवादिनोः साध्यसाधनद्वयप्रकारकतदभावद्वयप्रकारकान्यतरनिश्चयविषयत्वं दृष्टान्तलक्षणम् प्रतिवादिनिरसनेन निःसन्दिग्धतया अर्थनिश्चयरूपत्वं सिद्धान्तलक्षणम् । सर्वतन्त्रसिद्धान्तः, प्रतितन्त्रसिद्धान्तः, अधिकरणसिद्धान्तः अभ्युपगमसिद्धान्त इति सिद्धान्तचतुष्टयविभागाः तल्लक्षणानि च । प्रतिज्ञाहेतूदाहरणोपनयनिगमरूपावयवविभागः । भाष्ये तु जिज्ञासा, संशयः शक्यप्राप्तिः प्रयोजनं संशयव्युदासश्चेति अधिकाः पञ्चावयवा उक्तास्तेन दशावयवा इति स्थितम् । तात्पर्य्यटीकायां तद्व्याख्यातञ्च तत्र जिज्ञासाऽज्ञातादिबुभुत्सिते प्रवर्त्तिका इच्छा जिज्ञासा । तज्जन्यश्च संशयः शक्यप्राप्तिः प्रमाणानां ज्ञानजननसामर्थ्यं संशयव्युदासस्तर्कः इति । जिज्ञासा विप्रतिपत्तिरिति केचित् । एतेषां न्यायावयवत्वं नास्तीति वृत्तौ स्थितम् । साध्यविशिष्टतया पक्षस्य निर्देशः प्रतिज्ञालक्षणम् व्याप्तिविशिष्टहेतुबोधकः शब्दो हेतूदाहरणावयवः । व्याप्तिश्च अन्वयव्यतिरेकभेदेन द्विविधा तत्र च ज्ञातान्वय व्याप्तिकहेतुबोधकः अज्ञातव्यतिरेकव्याप्तिकहेतुबोधकश्च । साधनवत्ताप्रयुक्त साध्यवत्तानुभावकोऽवयवः साध्यसाधनव्याप्तिप्रदर्शकः उदाहरणम् तत्र व्याप्तिश्च द्विविधा अन्वयोव्यतिरेकश्च । प्रकृतोदाहरणोपदर्शितव्याप्तिमद्धेतुविशिष्टपक्षबोधक उपनयावयवः व्याप्तिश्च अन्वयव्यतिरेकभेदेन द्विधा

प्रविष्टा । व्याप्तिविशिष्टस्य हेतोः पक्षवृत्तिताकथन-पूर्वकसाध्यविशिष्टपक्षबोधकवाक्यत्वं निगमनलक्षणम् । व्यापकाभाववत्त्वेन निर्णीते धर्मिणि व्याप्यस्याहार्यारोपात् व्यापकस्याहार्यारोपः तर्क इति तर्कलक्षणम् यथा निर्वह्नित्वारोपाद्विधूमत्वारोपः निर्वह्निःस्याद्विधूमःस्यादित्यादि । सन्दिग्धपक्षस्य साधनयुक्त्या प्रतिपक्षस्य बाधनयुक्त्या च अर्थावधारणं निर्णय इति तल्लक्षणम् । इत्येते १अ० १म आह्निके पदार्था दर्शिताः । वादादिलक्षणानि । तत्र प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहोवादः इति वादलक्षणं प्रमाणतर्काभ्यां स्वपक्षस्य साधनं विपक्षस्योपालम्भो दूषणं च यत्र । पक्षप्रतिपक्षौ विप्रतिपत्तिकोटी तयोः परिग्रहः तत्साधनोद्देश्यकोक्तिप्रत्युक्तिरूपवाक्यविशेषो वाद इति तदर्थः । छलजातिनिग्रहस्थानादिकं विपक्षे सदुद्भाव्य तस्य दूषणेन स्वपक्षस्थापन वाक्यत्वं जल्पलक्षणम् । स्वपक्षस्थापनाराहित्येन परपक्षनिराकरणवाक्यत्वम् वितण्डालक्षणम् । सव्यभिचारविरुद्ध प्रकरणसमसाध्यसमातीतकालरूपान् पञ्च हेत्वाभासान् विभज्य तेषां लक्षणानि । वाद्युक्तवचनस्य अर्थान्तरपरत्वकल्पनेन युक्त्या तत्खण्डनं छलमिति छललक्षणम् । तच्च वाक्छलार्थछलोपचारछलभेदेन त्रिविधम् । व्याप्तिनिरपेक्षतया दूषणोक्तिर्जातिः तद्भेदाश्चतुर्विंशतिः १अ० २आह्निके । उद्देश्यानुगुणसम्यग्ज्ञानाभावलक्षित्वं निग्रहस्थानलक्षणमिति १अ० २आह्निके एते पदार्था उक्ताः । संशयकारणादिनिरूपणम् प्रमाणात् प्रमेयसिद्धिः । प्रत्यक्षप्रमाणलक्षणे परिशिष्टविवेचनम् । मनसोऽणुत्वे ज्ञानायौगपद्यस्य हेतुतयोक्तिः । प्रत्यक्षस्य क्वचिदनुमित्यात्मकतायङ्कायां तन्निराकरणम् । अवयवेभ्योऽवयविनोऽतिरिक्तता साधनम् । अनुमानाप्रामाण्यशङ्कातन्निरासौ । वर्त्तमानावस्थानिराकरणतत्स्थापने । उपमानाप्रामाण्यशङ्का निराकरणे । अनुमाने उपमानस्य गतार्थत्वशङ्का शाब्दबोधस्यानुमानेऽन्तर्भावशङ्का च तन्निवारणम् । सव्यभिचारस्यैव शब्दस्य बोधकत्वव्यवस्थापनम् । दृष्टादृष्टार्थकत्वेन शब्दस्य वैविध्यम् । तत्राद्यस्य वेदशब्दस्य खण्डव्याघातपुनरुक्तदोषेभ्यः अप्रामाण्यशङ्का युक्त्या प्रामाण्यसमर्थनम् । विध्यर्थवादानुवादभेदात् ब्राह्मणरूप वेदभागस्य त्रैविध्योक्तिः । विधिलक्षणम् । स्तुतिः निन्दा परकृतिः पुराकल्प इति भेदादर्थवादचातुर्विध्योक्तिः विधिविहितस्यानुकथनमनुवादस्तस्यानुवादलक्षणम् । वेदैकदेशविषहरमन्त्रादेः आरोग्यार्थौषधादिप्रतिपादकायुर्वेदभागस्य संवादिफलकत्वेन तदृष्टान्तेन इतरवेदभागस्य प्रामाण्यव्यवस्थापनम् । २अ० १आह्निके एते पदार्थाः । ऐतिह्यार्थापत्तिसम्भवाभावरूपाणामतिरिक्तप्रमाणत्वमाशङ्क्य ऐतिह्यस्य शब्देऽन्तर्भावः अर्थापत्तिसम्भवाभावानाञ्चानुमानेऽन्तर्भाव इति समर्थनम् । अभावस्य प्रमेयत्वव्यवस्थापनम् । शब्दस्यानित्यताव्यवस्थापनम् । शब्दस्य चतुष्टयात्मकत्वनिराकरणम् । व्याकरणविधौ वर्णानां विकारपक्षनिराकरणेनादेशपक्षव्यवस्थापनम् । वर्णानामविकारित्वेऽपि गुणान्तरापत्त्युपमर्द्दह्रासवृद्धिलेशश्लेषैः विकारव्यवहार इति व्यवस्थापनम् । तत्र उदात्तेऽनुदात्तत्वं गुणान्तरापत्तिः । उपमर्द्दो धर्म्मिनिवृत्तिः यथा ऋक्षेभूः । ह्रासःदीर्घस्य ह्रस्वता, वृद्धिर्ह्रस्वस्य दीर्घता, लेश एकदेशविकृतिः यथा ऋक्षोरक्षोपः । श्लेषः आगम इडादि । एतैर्विकारव्यवहारः । पदलक्षणम् । जात्यादीनां प्रत्येकं पदार्थत्वपक्षं निराकृत्य जात्याकृतिव्यक्तीनां सहितानां पदार्थत्वव्यवस्थापनम् । व्यक्त्याकृतिजातीनां लक्षणानि एते २अ० २आह्निकगतार्थाः । इन्द्रियचैतन्यवादनिराकरणम् । भूतचैतन्यवादनिराकारणम् उभयगोलकेनैक्यव्यवस्थापनम् । आत्मन इन्द्रियभेदे युक्तिप्रदर्शनम् । मनस आत्मत्वनिराकरणम् । आत्मनित्यतासाधनम् । मनुष्यदेहस्य पार्थिवत्वसाधनम् । तस्य पार्थिवाप्यतैजसत्वमतोपन्यासः चातुर्भौतिकत्वमतोपन्यासः पाञ्चभौतिकत्वमतोपन्यासः । इन्द्रियाणां गोलकातिरिक्तत्वस्य व्यवस्थापनम् । तेषामाहङ्कारिकत्वनिराकरणेन भौतिकत्वव्यवस्थापनम् । इन्द्रियाणामप्राप्यत्वेऽप्यनुमेयताव्यवस्थापनम् । चक्षुषः प्राप्यकारित्वसाधनम् । इन्द्रियैकत्वमाशङ्क्य तेषां पञ्चत्वसाधनम् । भूतानां विशेषगुणाः तेषाञ्चैकैकेन्द्रियग्राह्यतेति निरूपणम् । प्राणादीनामनुद्भूतगन्धादिसाधनम् । ३अ० १म आह्निकगतार्थाः । सांख्यमतसिद्धबुद्धेर्नित्यत्वनिराकरणम् मनसोऽणुत्वेनज्ञानानां क्रमिकत्वसाधनम् । मनसोविभुत्वेमत्यभावप्रसङ्गेन सर्वेन्द्रियैः सर्वदासम्बन्धापत्त्या च सर्वविषयकज्ञानापत्तिदोषात् विभुत्वनिरासः । भावानां नियमेन क्षणिकत्वपक्षखण्डनम् । परिणामवादखण्डनम् । इन्द्रियभेदोरन्वयव्यतिरेकसत्त्वेऽपि ज्ञानस्य न तयोर्धर्म्मित्वं किन्तु आत्मधर्म्मत्वमिति समर्थनम् । ज्ञानाऽनित्यत्वसाधनम् स्मरणायौगपद्यकारणप्रदर्शनम् । ज्ञानवत् इच्छादीनामात्मधर्म्म-

त्वव्यवस्थापनम्। इतरगुणत्वनिवारणेन ज्ञानादेरात्मधर्मत्वव्यवस्थापनम्। शरीरोपयोगिप्रणिधानादिकारणानि। बुद्ध्यादेः आशुविनाशित्वव्यवस्थापनम्। रूपादेरिव यावद्द्रव्यभावित्वाभावेन ज्ञानादिविशेषगुणानां देहधर्मत्वनिरासेनात्मधर्मत्वसमर्थनम्। केशनखादिषु सुखाद्यनुलब्धेः त्वक्पर्यन्तस्यैव देहस्य सुखाद्यवच्छेदकत्वसाधनम्। प्रतिदेहं मनसो नानात्वखण्डनम्। एकत्वेऽपि मनसः योगसंस्कारः। ज्ञानयौगपद्यस्य भ्रमत्वसमर्थनेन मनोऽणुत्वसाधनम्। देहस्य अदृष्टसापेक्षोत्पत्तिकत्व साधनम्। अदृष्टसहकारेणैव मातापित्रोर्वीर्यस्य तदारम्भकत्वसमर्थनम्। अदृष्टाभावे नित्यात्मनः संयोगेऽपि न देहोत्पत्तिरिति निरूपणम्। आत्मनोविभुत्वे सर्वशरीरैः संयोगे सत्यपि तददृष्टजन्यदेह एव तस्य विशेषसंभोगः भोगसाधक इति नियमनम्। परमाणुगतादृष्टाङ्गीकर्तुराईतस्य मतनिराकरणम् अदृष्टस्य मनोगुणत्वस्यापि तन्मतसिद्धस्य निराकरणम्। २अ० २आ० गतार्थाः। प्रवृत्तिसाधनरागद्वेषाभिनिवेशात्मकदोषत्रैविध्यकथनम्। तत्र मोहस्य सर्वानर्थमूलत्वेन पापीयस्त्वसमर्थनम्। आत्मनोनित्यत्व एव प्रेत्यभावसिद्धिः अनित्यत्वे न तत्सिद्धिस्तथा च एकजातीयशरीरेष्वाद्यःसम्बन्ध उत्पादः तत्र चरमसम्बन्धनाशोमरणं तयोरेकस्मिन् आत्मनि नित्ये एव सम्भवः शरीरादेर्नैष्टत्वात् न तदाश्रयत्वमिति समर्थनम्, उत्पत्तिप्रकारनिरूपणम्। बीजानामङ्कुरहेतुत्वदर्शनात् अभावादेव भावोत्पत्तिरिति अभावोपादानत्वमतनिराकरणम्। कर्मनिरपेक्षस्येश्वरस्यैव जगत्कारणत्वमतखण्डनेन कर्मसापेक्षस्य तस्य जगत्कारणत्वव्यवस्थापनम्। परमाण्वादिवदीश्वरस्य नोपादानत्वमिति व्यवस्थापनम्। भाष्ये तु गुणविशिष्टमात्मान्तरमीश्वर इतीश्वरलक्षणसूत्रम्। तदर्थश्च "गुणैर्नित्यज्ञानेच्छाप्रयत्नरूपविशेषगुणैः सामान्यगुणैश्च संयोगादिभिर्विशिष्टम् आत्मान्तरं जीवेभ्यो भिन्न आत्मा जगदाराध्यः सृष्ट्यादिकर्त्ता वेदद्वारा हिताहितोपदेशकोजगतः पितेति" इत्यावृत्तः। कण्टकतैक्ष्ण्यवज्जगतामाकस्मिकत्वखण्डनम्। सर्वानित्यत्वखण्डनम्। सर्वनित्यत्वखण्डनम्। घटादीनां परमाणुद्व्यणुकात्मकतावादखण्डनेन एकावयविसाधनम् सर्वभूतानामभावरूपतानिराकरणम्। संख्यैकान्तवादनिराकरणम्। संख्यैकान्तवादाद्य भाष्ये बहवो दर्शिताः। "सर्वमेकं सदविशेषात्, सर्वं द्वेधा नित्यानित्यभेदात्, सर्वं त्रेधा ज्ञाता ज्ञेयं ज्ञानमिति, सर्वं चतुर्धा प्रमाता प्रमाणम् प्रमितिः प्रमेयमिति, एवमन्येऽपि"। तत्र यथा नित्यत्वानित्यत्वाभ्यां द्वैधं तथा सत्त्वेनैकम् घटः सन् पटः सन्निति सत्त्वप्रतीतेः। अन्ये तु एकमित्यद्वैतमाङ्गीकृत्य च ब्रह्मवैकं निर्विशेषं सत् सर्वमन्यन्मिथ्या। अन्येऽपीति रूपसंख्यासंस्कारवेदनानुभवाः पञ्च स्कन्धाः षट्पदार्थी सप्तपदार्थीत्यादि मतभेदाः। तत्राद्वैतपक्षनिराकरणं यथा ब्रह्माद्वैतस्वीकारे तत्साधकप्रमाणस्यासिद्धिः प्रमाणसत्त्वे तु न सत्त्वैकत्वसिद्धिरित्यं द्वूषणेन सत्त्वैकत्ववादनिराकरणम्। यथा वृक्षमूलसेकात् तदीयावयवोपचयद्वारवशेन फलोत्पत्तिस्तथा यागादेर्नाशेऽपि तज्जन्यादृष्टरूपद्वारसत्त्वात् स्वर्गाद्युत्पत्तिरिति व्यवस्थापनम्। स्वर्गादेः स्वरूपेण फलत्वसाधनम्। फलस्य उत्पत्तेः प्रागसत्त्वेन शशशृङ्गादेरिव उत्पत्त्यसम्भवः सत्त्वे च उत्पत्त्ययोग्यतया कारणव्यापारानर्थक्यं सदसत्त्वाङ्गीकारे च विरोध इत्याशङ्क्य फलस्य उत्पत्तेः प्राक् असत्त्वव्यवस्थापनम् असत उत्पत्तौ दृष्टान्तेषु घटो भविष्यतीति प्रागभावज्ञानस्यैव प्रवर्त्तकतयाऽनियमवारणम्। कर्मकर्त्तृदेहादेर्नाशेऽपि अदृष्टस्यात्मन्येवोत्पत्तेः तेनैव चादृष्टेन जायमाने स्वर्गादिदेहे सुखभोगे सामानाधिकरण्यसम्बन्धेनादृष्टजन्यस्वर्गादिफलस्यात्मनिष्ठत्वव्यवस्थापनम्। सुखदुःखयोरेव सुखफलत्वं स्त्रीपुत्रादेस्तु तत्साधनत्वादौपचारिकफलत्वमिति नादृष्टसामानाधिकरण्यव्याघात इति समर्थनम्। देहसम्बन्धस्यैव विविधबाधनायोगक्षेमत्वाद् दुःखरूपत्वकथनम् विविधदुःखयुक्ततया शरीरस्य दुःखत्वेन भावनाकथनम् दुःखमध्ये सुखस्याप्युत्पत्तेस्तत्प्रत्याख्यानानौचित्येऽपि तदुपार्ज्जनादौ दुःखानुषङ्गात् देहसंबद्धं सर्वं दुःखमित्येव भावनीयमिति निरूपणम्। प्रतिषिद्धभोजनमैथुनादौ प्रवृत्तिनिवारणार्थमपि दुःखस्य हेयत्वोक्तिः। आर्षदैवपैत्र्यापाकरणाद्बन्धेनापवर्गकालाभावमाशङ्क्य आयुषश्चतुर्थभागेऽपवर्गसाधनकालत्वसाधनम् तथा कामनाशून्यस्य विरक्तस्य ततोऽर्वागपि तत्सेवनव्यवस्थापनम्। तत्त्वज्ञानोत्पत्तौ प्रारब्धातिरिक्तकर्मजन्यादृष्टमात्मनाशेन न स्वर्गफलकादृष्टेन प्रतिबन्ध इति कथनम्। क्लेशानुबन्धवत्तापवर्गाभावमाशङ्क्य सुषुप्तस्य सर्वक्लेशाभाववदपवर्ग इति सुषुप्तिदृष्टान्तेन हेत्वभावेनाऽपवर्गे दुःखाभावसाधनम्। रागशून्यस्याहुत्पत्तेः रागादीनां च मिथ्याज्ञाननिमित्तत्वेन तत्त्वज्ञानेन च मिथ्याज्ञाननिवृत्तौ दुःखनिवृत्तिरिति

क्रमकथनम् ४अ० १आ० गतार्थाः । देहात्मबुद्धेर्दोषजन्यतया दोषस्य च मिथ्याज्ञानाधीनत्वेन तत्त्वज्ञानात् आत्मनोदेहादिभ्यो भेदज्ञाननिष्ठत्तौ तदभेदज्ञाननिराशेन मिथ्याज्ञाननिष्ठत्तिः तस्यां च सत्यां क्रमेण प्रवृत्तिनिष्ठत्त्या दुःखनिष्ठत्तिरूपापवर्गसिद्धिः अतोऽपवर्गसाधनं तत्त्वज्ञानमित्येवंप्रतिपादनम् । साधुतया भावितानां रूपादिविषयाणां दोषहेतुत्वकथनम् । सौन्दर्यं पश्यतो रागादिर्दुर्निवारोऽप्यसुकरपरिहार इत्याशङ्क्य तत्र सौन्दर्यबुद्धे रागाधीनतया तरुण्यादिदेहे सौन्दर्याभिमानस्य त्याज्यताकथनम् । भाष्ये तु "परिष्कारबुद्धिरनुरञ्जनसंज्ञा सा हेया दोषदर्शनमशुभसंज्ञा सा भावनीया" इत्युक्तम् । तथा च "खेलत्खञ्जननयना परिणतबिम्बाधरा पृथुश्रोणी । कमलस्तुकुलस्तनीयम् पूर्णेन्दुमुखी सुखाय मे भवितेति" अनुरञ्जनसंज्ञा । "चर्मनिर्मितपात्रीयं मांसासृक्पूयपूरिता । अस्यां रज्यति यो मूढः पित्ताशयः कलतोऽधिकः" अशुभसंज्ञा एवं स्वदेहादावपि चिन्तनम् । परमाणुपुञ्जस्यैव घटादिरूपताऽतोनास्ति अतिरिक्तोऽवयवीति सौत्रान्तिकवैभाषिकयोर्मतस्य पूर्वदूषितस्यापि स्वमतदार्ढ्याय पुनर्दूषणम् । परमाणोरुत्कृष्टपरत्वव्यवस्थापनम् । आकाशस्य सर्वगतत्वं सर्वमूर्तसंयोगित्वं तत्र संयोगस्याव्याप्यवृत्तितया तदवच्छेदकभेदं विनाऽनुपपत्त्या सावयवत्वापत्तिमाशङ्क्य मूर्तपदार्थस्यैवावयवानां तदवच्छेदकत्वम् इत्युक्त्वा तस्य निरवयवत्वसमर्थनम् । सर्वत्र शब्दोत्पत्त्या तज्जनकसंयोगानुमानात् आकाशस्य सर्वमूर्तसंयोगित्वसमर्थनम् आकाशे च प्रतिहतस्य परावर्तमानस्योच्चैरुच्चारितस्य उत्तरदेशगतिप्रतिबन्धरूपविघटमानस्याभावात् विभुत्वव्यवस्थापनम् । परमाणोः संयोगवत्त्वान्यथानुपपत्त्या सावयवत्वापत्तिः संयोगस्य अव्याप्यवृत्तितया अव्याप्यवृत्तेश्चावच्छेदकभेदं विना सत्त्वासम्भवादित्याशङ्क्य तदवयवानामपि संयोगसिद्धये सावयवत्वकल्पनायामनवस्थापत्तिरतो दिग्विभागानामेव संयोगावच्छेदकत्वकल्पनेन परमाणोर्निरवयवत्वसमर्थनम् । ज्ञानातिरिक्तोबाह्यपदार्थो नास्तीत्यत्र यदि प्रमाणमस्ति तदा ज्ञानातिरिक्तप्रमाणरूपबाह्यस्य सत्त्वाद्न बाह्याभावः अथ तत्र प्रमाणं नास्ति तदा निष्प्रमाणकत्वान्न तत्सिद्धिरित्येवंरूपेण बाह्यार्थाभावाक्षेपकर्तृमतनिराकरणम् । स्वप्नस्य स्मृतिविशेषरूपत्वं व्यवस्थाप्य शुक्तिरजतविज्ञाने रजतांशस्य ज्ञानलक्षणया उपनीतस्य संसर्गभात्रोध इति व्यवस्थापननेन स्वप्नदृष्टान्तेन ज्ञानमात्रस्यासद्विषयकत्वादिमतनिराकरणम् । इत्येवंबाह्यार्थभङ्गनिराकरणम् । ज्ञानसामान्यात् तत्त्वज्ञानस्यापि क्षणिकत्वात् तत्राशे प्रतिबन्धकापाये पूर्ववासनावशात् मिथ्याज्ञानं पुनरुत्पद्येतेति तत्त्वज्ञानस्य न मिथ्याज्ञानोच्छेदकतेत्याशङ्कायां तन्निरासः । समाधिविशेषाभ्यासात् तत्त्वज्ञानस्य विदृद्धिः । तद्वृद्धा च मिथ्याज्ञानवासनातिरोभावाच्च तत् फलायालमिति समर्थनम् । ततश्च तत्त्वज्ञानसंस्कारः अन्यसंस्कारप्रतिबन्धी भवतीति व्यवस्थापनम् । तत्र प्रतिबन्धश्च कार्याजनकत्वसम्पादनं विनाशोवेति । स्वाभाविकविषयरागादिना प्रतिबन्धात् समाध्यसम्भवमाशङ्क्य पूर्वोक्तेश्वराधनादिना अभ्यासपाटवे जनिते तत्संस्कारात् समाधिसिद्धिरिति समर्थनम् । तथा च पूर्वोक्तेश्वरानुसन्धानादिसंस्कारेणैव तत्त्वज्ञाने जननीये न रागादेः प्रतिबन्धकत्वम् । अरण्यगुहापुलिनादिषु योगाभ्यासस्थानत्वकथनम् । अपवर्गे प्रारब्धकर्मानुसारेण देहादेः सत्त्वेन तदनुरूपार्थावभाससम्भावकथनम् । प्रारब्धकर्मावसाने देहाभावे विदेहकैवल्यप्राप्तिकथनम् । समाधिसिद्धये यमनियमाद्यष्टाङ्गयोगाभ्यासस्यावश्यकतोक्तिः । श्रवणमननिदिध्यासनैरात्मसाक्षात्कारोत्पत्तिकथनम् । एतच्छास्त्राभिज्ञैः सह स्वनिश्चितार्थदार्ढ्याय एतच्छास्त्रोदितार्थनिश्चयस्य संवादः कर्तव्य इति प्रतिपादनम् । संवादश्च शिष्यगुरुसब्रह्मचारिभ्येयोर्धिभिः जिगीषाहीनैः सह कार्य इति निरूपणम् । तत्त्वनिर्णयार्थं प्रतिकूलपक्षहीनतया संवादः करणीयः न जिगीषयेति निरूपणम् । तत्त्वनिश्चयसंरक्षणार्थं बीजप्ररोहसंरक्षार्थं कण्टकवरणवत् त्रयीबाह्यैः सह जल्पवितण्डे आश्रयणीये न वाद इत्येतत्कथनम् तथा च यदि त्रयीबाह्यैः स्वपक्षस्थाप्यते तदा जल्पवितण्डाभ्यां तेषां मतं खण्डनीयम् । एते अर्थाः ४अ० २आ० उक्ताः । साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनित्यानित्यकार्यसमाश्चतुर्विंशतिं जातोर्विभज्य तल्लक्षणान्युक्तानि । कथाभासप्रकरणम् । ५अ० १आ० गतार्थाः । प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासः हेत्वन्तरमर्थान्तरम् निरर्थकमविज्ञातार्थमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणज्ञानमप्रतिभा विक्षेपोमतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तोहेत्वाभासाश्च निग्रह-

स्थानानि इति नियतस्थानानि विभज्य तेषां क्रमेण लक्षणानि उक्तानि ५ अ० २ आ० गतार्थाः। यथा पदार्थ तत्त्वज्ञानादपवर्गस्तथा तन्मतं सर्व्व० द० समर्थाहि। यथा "ननु तत्त्वज्ञानान्निःश्रेयसमवगतोक्तं तत्र किं तत्त्वज्ञानादनन्तरमेव निःश्रेयसं सम्पद्यते, नेत्युच्यते तत्त्वज्ञानाद्दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभाव इति। तत्र मिथ्याज्ञानं नामानात्मनि देहादावात्मबुद्धिः तदनुकूलेषु रागः तत्प्रतिकूलेषु च द्वेषः वस्तुतस्त्वात्मनः प्रतिकूलमनुकूलं वा न किञ्चित् समस्ति परस्परानुबन्धत्वात्तु रागादीनां, मूढोर व्यति रक्तो सज्जति मूढः कुप्यति कुपितो मुह्यतीति ततस्तैर्दोषैः प्रेरितः प्राणी प्रतिषिद्धानि शरीरेण हिंसास्तेयादीन्याचरति वाचा अनृतादीनि, मनसा परद्रोहादीनि, सेयं पापरूपा प्रवृत्तिरधर्ममावहतीति। शरीरेण प्रशस्तानि दानपरपरित्राणादीनि, वाचा हितसत्यादीनि, मनसा अहिंसादीनि, सेयं पुण्यरूपा प्रवृत्तिर्धर्मम्। सेयमुभयी प्रवृत्तिः ततः स्वानुरूपं प्रशस्तं निन्दितं वा जन्म पुनः शरीरादेः प्रादुर्भावः तस्मिन् सति प्रतिकूलवेदनीयतया वासनात्मकं दुःखं भवति तदपि मिथ्याज्ञानादयो दुःखान्ता अविच्छेदेन प्रवर्त्तमानाः संसारशब्दार्थो घटीचक्रवन्निरवधिरनुवर्त्तते। यदा कश्चित् पुरुषधौरेयः पुराकृतसुकृतपरिपाकवशादाचार्योपदेशेन सर्व्वमिदं दुःखायतनं दुःखानुषक्तञ्च पश्यति तदा तत्सर्व्वं हेयत्वेन बुध्यते ततस्तन्निवर्त्तकमविद्यादि निवर्त्तयितुमिच्छति तन्निवर्त्तयितुपायञ्च तत्त्वज्ञानमिति कस्यचित्कृतसृभिर्विद्याभिर्विभक्तं भावयतः सम्यग्दर्शनपदवेदनीयतया तत्त्वज्ञानं जायते तत्त्वज्ञानान्मिथ्याज्ञानमपैति, मिथ्याज्ञानापाये दोषाः अपयान्ति, दोषापाये प्रवृत्तिरपैति, प्रवृत्त्यपाये जन्मापैति, जन्मापाये दुःखमत्यन्तं निवर्त्तते सात्यन्तिकी निवृत्तिरपवर्गः। निवृत्तेरात्यन्तिकत्वं नाम निवर्त्त्यसजातीयस्य पुनरप्रवानुत्पाद इति तथा च पारमर्षंसूत्रम् "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग" इति। ननु दुःखात्यन्तोच्छेदोऽपवर्ग इत्येतदद्यापि कफोणिगुडावित वर्त्तते तत्कथं सिद्धवत्कृत्वा व्याख्यायत इति चेन्नैवं सर्व्वेषां मोक्षवादिनामपवर्गदशायामात्यन्तिको दुःखनिवृत्तिरभ्युपेयार्थस्य सर्व्वतन्त्रसिद्धान्तसिद्धतया घण्टापथत्वात् नह्यप्रवृत्तस्य दुःखं प्रत्यापद्यते इति कश्चित् प्रपद्यते तथा हि आत्मोच्छेदो मोक्ष इति माध्यमिकमते दुःखोच्छेदोऽभ्युपेयेतावत्तावदविवादम्। अथ मन्येथाः शरीरादिवदात्मापि दुःखहेतुत्वादुच्छेद्य इति तत्र सङ्कुच्यते विकल्पानुपपत्तेः किमात्मा ज्ञानसन्तानो विवक्षितः तदरिक्तो वा। प्रथमे न विप्रतिपत्तिः कः खल्वनुकूलमाचरति प्रतिकूलमाचरेत्। द्वितीयेतस्य नित्यत्वे निवृत्तिरशक्यविधानैव प्रवृत्त्यनुपपत्तिश्चाधिकं दूषणं न खलु कश्चित् प्रेक्षावान् "आत्मनस्तु कामाय सर्वं प्रियं भवतीति" सर्व्वतः प्रियतमस्यात्मनः समुच्छेदाय प्रयतते सर्वोहि प्राणी मुक्त इति व्यवहरति। ननु धर्मिनिवृत्तौ निर्मलज्ञानोदयो महोदय इति विज्ञानवादिवादे सामग्र्यभावः सामानाधिकरण्यानुपपत्तिश्च भावनाचतुष्टयं हि तस्य कारणमभीष्टं तच्च क्षणभङ्गपक्षे स्थिरैकाधारासम्भवात् लङ्कनाभ्यासादिवदनासादितप्रकर्षं न स्फुटमभिज्ञानमभिजनयितुं प्रभवति सोपप्लवस्य ज्ञानसन्तानस्य बद्धत्वे निरुपप्लवस्य च मुक्तत्वे यो बद्धः स एव मुक्त इति सामानाधिकरण्यं न सङ्कुच्यते। आवरणमुक्तिर्मुक्तिरिति जैनजनाभिमतोऽपि मार्गो न निर्गतो निरर्गलः। अङ्ग भवान् पृष्टो व्याचष्टां किमावरणम्? धर्माधर्मभ्रान्तय इति चेत् इष्टमेव। अथ देहमेवावरणं तथा च तन्निवृत्तौ पङ्गुरान्धुक्लस्य शुक्लस्येवात्मनः सततोर्द्धगमनं मुक्तिरिति चेत्तदा वक्तव्यं किमयमात्मा मूर्त्तोऽमूर्त्तो वा। प्रथमे निरवयवः सावयवो वा निरवयवत्वे निरवयवो मूर्त्तः परमाणुरिति परमाणुलक्षणापत्त्या परमाणुधर्मवदात्मधर्माणामतीन्द्रियत्वं प्रसजेत्। सावयवत्वे यत् सावयवं तदनित्यमिति प्रतिबन्धबलेनानित्यत्वापत्तौ कृतप्रणाशाकृताभ्यागमौ निष्प्रतिबन्धौ प्रसज्येयाताम्। अमूर्त्तत्वे गमनमनुपपन्नमेव चलनात्मिकायाः क्रियायाः मूर्त्तं प्रतिबन्धात्। पारतन्त्र्यं बन्धः स्वातन्त्र्यं मोक्ष इति चार्वाकपक्षेऽपि स्वातन्त्र्यं दुःखनिवृत्तिश्चेदविवादम्। ऐश्वर्यं चेत् सातिशयतया सदृशतया च प्रेक्षावतां नाभिमतम्। प्रकृतिपुरुषान्यत्वख्यातौ प्रकृत्युपरमे पुरुषस्य स्वरूपेणावस्थानं सुकरमिति साङ्ख्यख्यातेऽपि पक्षे दुःखोच्छेदोऽभ्युपेयते विवेकज्ञानं पुरुषान्वयं प्रकृत्यान्वयं वेति एतावदवशिष्यते तत्र पुरुषान्वयमिति न श्लिष्यते पुरुषस्य कौटस्थ्यात् स्थाननिरोधापाताच्चापि प्रकृत्यान्वयः अचेतनत्वात् तस्याः। किञ्च प्रकृतिः प्रवृत्तिस्वभावा वा निवृत्तिस्वभावा वा आद्ये व्यनिर्मोक्षः स्वभावस्थानपायात् द्वितीये सम्भवति संसारोऽस्तमियात्। नित्यनिरतिशयसुखाभिव्यक्तिर्मुक्तिरिति भट्टसर्व्वज्ञाद्यभिमतेऽपि दुःखनिवृत्तिरभिमतैव परन्तु नित्यसुखं न प्रमाणपद्धतिमध्यास्ते। श्रुतिस्तत्र प्रमाणमिति

चेन्न योग्यानुपलब्धिबाधिते तदनवकाशादवकाशे वा या-वद्भावेऽपि तवाभावप्रसङ्गात्। ननु सुखाभिव्यक्तिर्मुक्ति-रिति पक्षं परित्यज्य दुःखनिवृत्तिरेव मुक्तिरिति स्वीकारः क्षीरं विहायारोचकग्रस्तस्य सौवीरस्विमनुहरतीति चेत्त-देतन्नाटकपक्षपतितत्वाच्च दूरमुपेक्ष्यते। सुखस्य सात्ति-शयत्वेन प्रत्यक्षतया बहुप्रत्यनीकाक्रान्ततया साधनप्रार्थना-परिक्लिष्टतया च दुःखाविनाभूतत्वेन विषानुषक्तमधुवत् दुःखपक्षनिक्षेपात्। नन्वेकमनुसन्धित्सतोऽपरं प्रच्यवते इति न्यायेन दुःखवत् सुखमप्युच्छिद्यत इति चेत्काम्यो-ऽयं पक्ष इति चेन्मैवं मंस्थाः सुखसम्पादने दुःखसा-धनबाहुल्यानुषङ्गनियमेन तप्तायःपिण्डे तपनीयबुद्धा प्रवर्त्तमानेन साम्यापातात् तथा हि न्यायोपार्ज्जितेषु विषयेषु कियन्तः सुखखद्योताः कियन्ति दुःखदुर्दि-नानि, अन्यायोपार्ज्जितेषु तु यद्भविष्यति तन्नानसापि चि-न्तयितुं शक्यमित्येतत् स्वानुभवमप्रच्छादयन्तः सन्तोविदां-कुर्वन्तु विदांवरा भवन्तः। तस्मात् परिशेषात् परमेश्वरा-नुग्रहवशाच्छ्रवणादिक्रमेणात्मतत्त्वसाक्षात्कारवतः पुरुषधौ-रेयस्य दुःखनिवृत्तिरात्यन्तिकी निःश्रेयसमिति निरवद्यम्। नन्वीश्वरसद्भावे किं प्रमाणं प्रत्यक्षमनुमानमागमो वा न तावदत्र प्रत्यक्षं क्रमते रूपादिरहितत्वेनातीन्द्रियत्वात् ना-प्यनुमानं तद्व्याप्तिलिङ्गाभावात् नागमः विकल्पासहत्वात् किं नित्योऽवगमयत्यनित्यो वा। आद्ये अप्रसिद्धान्नापातः द्वितीये परस्पराश्रयापातः। उपमानादिकमपक्षयङ्गमनि-यतविषयत्वात्। तस्मादीश्वरः शशविषाणायते इति चेत्त-देतन्न चतुरचेतसां चेतसि चमत्कारमाविष्करोति। विवा-दास्पदं नगसागरादिकं सकर्तृकं कार्यत्वात् कुम्भवत्। न चायमसिद्धो हेतुः सावयवत्वेन तस्य सुसाधत्वात्। ननु किमिदं सावयवत्वम् अवयवसंयोगित्वम् अवयवसमवा-यित्वं वा नाद्यः गगनादौ व्यभिचारात् न द्वितीयः तन्त्वा-दावनैकान्त्यात्। तस्मादनुपपन्नमिति चेन्मैवं वादीः समवेतद्रव्यत्वं सावयवत्वमिति निरूपयिष्यमाणत्वात्। अवा-न्तरसङ्कल्पवत्त्वेन वा कार्यत्वानुमानस्य सुकरत्वात्। नापि विरुद्धो हेतुः साध्यविपर्ययव्याप्तेरभावात्, नाप्यनैकान्तिकः, पक्षादन्यत्र दृष्टेरदर्शनात्। नापि कालात्ययापदिष्टः, बाध-कानुपलम्भात्। नापि सत्प्रतिपक्षः, प्रतिभटादर्शनात्। नन्व-गादिकमकर्तृकं शरीराजन्यत्वात् गगनवदिति चेन्नैतत् परीक्षायाममीक्ष्यते नहि कठोरकण्टीरस्य कुरङ्गशावः प्र-तिभटो भवति अजन्यत्वञ्च समर्थतया शरीरविशेषणत्वेन-व्याप्तं। तर्ह्यजन्यत्वमेव साधनमिति चेन्नासिद्धेः नापि सोपाधिकत्वशङ्काकलङ्काङ्कुरः सम्भवी अनुकूलतर्कसम्भवात् यद्ययमकर्तृकः स्यात् कार्य्योऽपि न स्यादिह जगति नास्त्येव तत्कार्य्यं नाम यत्कारकचक्रमवधीर्य्यात्मानमासादयेदिति-तदविवादम्। तच्च सर्वं कर्तृविशेषोपस्थितमर्थादं कर्तृत्वं चेतरकारकाप्रयोज्यत्वे सति सकलकारकप्रयोक्तृत्वलक्षणं ज्ञानचिकीर्षाप्रयत्नाधारत्वम्। एवञ्च कर्त्रव्याप्तेऽसदुप-स्थितसमस्तकारकव्याप्तत्वकारणकार्य्योत्पादप्रसङ्ग इति स्थूलः प्रमादः। तथा निरटङ्कि शङ्करकिङ्करेण। "अनुकूलेन तर्केण सनाथे सति साधने। साध्यव्यापकताभङ्गात् पक्षे नोपाधिसम्भव" इति। यदीश्वरः कर्त्ता स्यात्तर्हि शरीरी स्यादित्यादिप्रतिकूलं तर्कजातं जागर्त्तीति चेदीश्वरसिद्ध-सिद्धिभ्यां व्याघातात् तदुदितहृदयेन! "आगमादेः प्रमाणत्वे बाधनादनिषेधनम्। आभासत्वे तु सैव स्यादाश्रयासिद्धिरुद्भटा" इति। न च विशेषविरोधः शक्यशङ्कः ज्ञातत्वाज्ञातत्वविकल्पपराहतत्वात्। तदेतत् परमेश्वरस्य जगन्निर्म्माणे प्रवृत्तिः किमर्था स्वार्था परार्था वा आद्येऽपीष्टप्राप्त्यर्था अनिष्टपरिहारार्था वा नाद्यः अवाप्तसकलकामस्य तदनुपपत्तेः अतएव न द्वितीयः। द्वितीये प्रवृत्त्यनुपपत्तिः कः खलु परार्थं प्रवर्त्तमानं प्रेक्षावानित्याचक्षीत। अथ करुणया प्रवृत्त्यु-पपत्तिरित्याचक्षीत कश्चित् तं प्रत्याचक्षीत तर्हि सर्व्वान् प्राणिनः सुखिन एव सृजेदीश्वरः न दुःखवत्त्वात् करुणाविरोधात्। स्वार्थमनपेक्ष्य परदुःखप्रहरणेच्छा हि कारुण्यं तस्मादीश्वरस्य जगत्सर्जनं न युज्यते। तदुक्तं भट्टाचार्य्यैः। "प्रयोजनमनुद्दिश्य न मन्दो हि प्रवर्त्तते। जगच्च सृजतस्तस्य किं नाम न कृतं भवेदिति"। नास्ति-कशिरोमणे! तावदीर्ष्याकषायिते चक्षुषी निमील्य परि-भावयतु भवान् करुणया प्रवृत्तिरस्यैव न च निसर्गतः सुखमयसर्गप्रसङ्गः, सृज्यप्राणिकृतसुकृतदुष्कृतपरिपाकविशे-षापेक्षैवोपपत्तेः न च सातन्त्र्यभङ्गः शङ्कनीयः स्वाङ्गं स्वव्यवधायकं न भवतीति न्यायेन प्रत्युत तद्विपर्य्यात् एक एव रुद्रो न द्वितीयोऽवतस्थे" इत्यादिरागमस्तत्र प्रमाणम्। यद्येवं तर्हि परस्पराश्रयबाधव्याधिं समाधत्स्वेति चेत् तस्यानुत्थानात् किमुत्थितौ परस्पराश्रयः शङ्क्यते नवा। नाद्यः आगमस्येश्वराधीनोत्पत्तिकत्वेऽपि परमेश्वरस्य नित्यत्वेनोत्पत्तेरनुपपत्तेः नापि चरमे परमेश्वरस्य आगमा-धीनज्ञानविषयत्वेऽपि तस्मान्यतोऽवगमात् नापि तदनित्यत्व

ज्ञानौ आगमानित्यत्वस्य नीत्रादिधर्म्मोपेतत्वादिना सुगमत्वात् । तस्मात्त्रिवर्त्तकधर्म्मानुष्ठानवशादीश्वरप्रसादसिद्धाववमितेऽसिद्धिरिति सर्व्वमवदातम्" । अस्मात्तत्त्वज्ञानहेतुत्वादात्मविद्यात्वम् । "त्रयी चान्वीक्षिकी चैव वार्त्ता च भरतर्षभ ! दण्डनीतिश्च विपुला विद्यास्तत्र निदर्शिताः" भा० प० ५६ अध्या० । "त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिञ्च शाश्वतीम् । "आन्वीक्षिकीञ्चात्मविद्यां वार्त्तारम्भांश्च लोकतः" मनुः "तत्रौपनिषदं तात परिगेष्यन्तु पार्थिव । मद्भक्तिं मनसा तत्त्वं दृष्ट्वा चान्वीक्षिकीं पराम्" भा० शा० प० । "आन्वीक्षिकी कौशलानामिति" गीता । "सैषसान्वीक्षिकी विद्या प्रमाणादिभिः पदार्थैः प्रविभज्यमाना । प्रदीपः सर्व्वविद्यानामुपायः सर्व्वकर्म्मणाम् । आश्रयः सर्व्वधर्म्माणां विद्योद्देशे परीक्षिता" पक्षिलस्वामी । अन्वीक्षा शीलमस्याः तस्यै हितं वा ठक् । २दुर्गायाञ्च "आत्मवेदनशीलत्वादन्वीक्षणपराऽथ वा । अन्वीक्षाकारणत्वाद्वा तस्मादान्वीक्षिकी स्मृता" देवीपु० तन्निरुक्तिः ।

आन्वीपिक त्रि० अन्वीपं वर्त्तते ठक् । अनुकूले ।

आप प्राप्तौ वा चुरा० उभ० पक्षे स्वादि० प० सक० अनिट् । आपयति ते आपिपत् त । पक्षे आप्नोति आप्नुतः आप्नुवन्ति आप्नुयात् आप्नोतु आप्नोत् आप्नुवन् । आपत् आप आपथुः आपुः आपिथ । आप्ना आप्यात् आप्नुयति आप्नात् । आप्नव्यः आप्यम् आपनीयम् आप्ना आप्नः आप्निः आप्ता आप्य । क्विप् हस्वः आपः अप्सः अद्भिः । अप्सु आपः । शतृ आप्नुवन् ताच्छील्ये चानश् आप्नुवानः । "अयशोमहदाप्नोति" "इहाप्यग्रां कीर्त्तिमाप्नोति" मनुः । "नत्वेवाधौ सोपकारे कौशेदीं दृष्टिमाप्नुयात्" या० स्मृतिः "पुत्रमेवंगुणोपेतं चक्रवर्त्तिनमाप्नुहि" भट्ट० "येन त्वेवोऽहमाप्नुयाम्" गीता "स दुष्प्रापयशाः प्रापत्" रघुः । "यतं क्रतूनामपविघ्नमाप सः" रघुः । "यदिदं सर्व्वं स्वल्पनाप्नम्" श्रुतिः "नानवाप्तमवाप्तव्यं वर्त्त एव च कर्म्मणि" गीता । कर्म्मणि आपते आपि । प्रेरणे णिच् । आपयति ते आपिपत् त । सन् ऐप्सति ऐप्सितः । [प्राप्तिःसंयोगः स उदाहृतः" भाषा० । प्र-प्रकर्षेणाप्तौ प्राप्नोति प्राप्नः प्राप्निः "अप्राप्तस्य च या प्राप्तिः" गीता । सम्+संपूर्णतायां समाप्नः समाप्निः समापनम् । [साधनं" कुमा० । अव+प्राप्तौ, "अनवाप्तमवाप्तव्यम्" गीता "तपः किलेदं तदवाप्तिहेतुः" कुमा० । परि+प्रचुरत्वे समर्थत्वे वसुदित्वे पर्य्याप्नः पर्य्याप्निः । "तद्धि धर्म्मः सुपर्य्याप्तः सर्व्वस्य पदवेदने" गीताभा० । "अपर्य्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् । पर्य्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम्" गीता । अनु+प्रा-पश्चात्प्राप्तौ "नदीं गङ्गामनुप्राप्ताः" भा० आ० प० । वि+विशेषेण आप्तौ व्याप्निः व्याप्तः, व्याप्यः व्यापकः व्यापनम् "व्याप्तस्य पक्षधर्म्मत्वधीःपरामर्श उच्यते" । "व्याप्तिः साध्यवदन्यत्रसम्बन्ध उदाहृतः" भाषा० । "अस्मात्तनेपदित्वमपि स्वाराज्यं प्राप्नुते भवान्" इति दुर्गादासः ।

आप पु० आप्यते आप-कर्म्मणि घञ् । अष्टसु वसुषु मध्येऽर्थे वसौ, "धरो ध्रुवः सोमनामा तथापोऽथनिलोऽनलः । प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः" विष्णुपु० । "सव्यदक्षौ वसोर्यस्य चोर्द्धौ हस्तौ सवक्त्रिकौ । सौराङ्गुष्ठान्वितौ चाधः स भवेदापसंज्ञकः" इति तद्ध्यानम् "आपश्चैवानिलश्चैव ववर्षतुररिन्दमौ" हरिवं० २४५ अ० देवासुरयुद्धे । "आपस्य दुहिता भार्य्या सहस्य परमा प्रिया ! सूपतिर्भुवभर्त्ता चाजनयत् पावकं परम्" भा० व० २२१ अ० । भा० आ० प० ६६ अ० तु "धरोध्रुवश्च सोमश्च अहश्चैवानिलोऽनलः । प्रत्यूषश्च प्रभासश्च वसवोऽष्टाविति स्मृताः । धूम्रायास्तु धरः पुत्रो ब्रह्मविद्यो ध्रुवस्तथा । चन्द्रमास्तु मनस्विन्यां शशायाः श्रमनस्तथा । वातायायाश्च्यहः पुत्रः शाण्डिल्याच्च दमायनः । प्रत्यूषश्च प्रभासश्च प्रभातायाः सुतौ स्मृतौ" इति आपस्थाने अष्ट इति नामान्तरत्वेन कीर्त्तितम् कल्पभेदादविरुद्धम् । प्रभासस्यैव द्युनामता अष्टमस्य वसोः आपगेयशब्दे दर्शयिष्यमाणे भा० ६६ अध्याये द्युनामतोक्तेः अपां समूहः अण् । २जलसमूहे न० । ३आकाशे निरुक्त० । तस्य सर्व्वभूतसंयोगित्वात्तथात्वम् ।

आपक त्रि० आप-स्वार्थे कन् । प्राप्तरि । गौरा० स्त्रियां ङीष् ।

आपकर त्रि० अपकरे भवः अण् अञ् च । अपकरजाते स्त्रियां ङीप् ।

आपक्व न० ऐषत् पक्वम् आ+पच-क्त । १ऐषत्पक्वे कषायादौ भर्ज्जिते हरितयवादौ (छडापोडा) २ऐषत्पक्ववस्तुमात्रे त्रि० । [पक्वे स्त्रियां क्रीडा० व्यञ् । आपक्त्रिया ।

आपक्तिति पु० अपक्तिस्तस्यापत्यम् इञ् । अपक्तयापत्यस्त्रियाम्

अपगा स्त्री आपेन जलसमूहेन गच्छति वहति ड । नद्याम् । "फेनायमानं पतिमापगानाम्" "सम्भूयाम्भोधिमभ्येति महानद्या नगापगा" माघः । "गिरिरिवामिव सागरमापगाः" रघुः ।

आपगेय पु० आपगायां गङ्गायां भवः ढक् । गाङ्गेये भीष्मे तस्य

तत उत्पत्तिकथा भा०आ०९८अ० शान्तनुमार्गणे गङ्गावाक्यं यथा। "एतच्छ्रुत्वा वचो राज्ञः सस्मितं मधुरं वसु च। वसूनां समयं स्मृत्वाऽब्रात्यगच्छदनिन्दिता। उवाच चैव राज्ञः सा ह्लादयन्ती मनो गिरा। भविष्यामि महीपाल! महिषी ते यथानुगा। यत्तु कर्त्तास्महं राजन्! शुभं वा यदि वा शुभम्। न तद्वारयितव्याऽस्मि न वक्तव्या तथाऽप्रियम्। एवं हि वर्त्तमानेऽहं त्वयि वत्स्यामि पार्थिव!। वारिता विप्रियं चोक्ता त्यक्ष्येयं त्वामसंशयम्"। वैश० उक्तिः "तथेति राज्ञा सा प्रोक्ता तदा भरतसत्तम। प्रहर्षमतुलं लेभे प्राप्य तं पार्थिवोत्तमम्। आसाद्य शान्तनुस्त्वाञ्च बुभुजे कामतो वशी। न प्रष्टव्येति मन्वानो न स तां किञ्चिदूचिवान्। स तस्याः शीलवृत्तेन रूपौदार्य्यगुणेन च। उपचारेण च रहस्तुतोष जगतीपतिः। दिव्यरूपा हि सा देवी गङ्गा त्रिपथगामिनी। मानुषं विग्रहं कृत्वा श्रीमन्तं वरवर्णिनी। भार्य्योपनतकामस्य भार्य्या चोपनताऽभवत्। शान्तनोर्नृपसिंहस्य देवराजसमद्युतेः। सम्भोगक्लेशवाहुर्य्यैर्हावलास्य मनोहरैः। राजानं रमयामास यथा रेमे तथैव सः। स राजा रतिसक्तात्मा तस्यां स्त्रीगुणैर्हृतः। संवत्सरान्बहून्मासान् बुबुधे न बहून् गतान्। रममाणस्तया सार्द्धं यथाकामं नरेश्वरः। अष्टावजनयत्पुत्रांस्तस्यामरसन्निभान्। जातं जातञ्च सा पुत्रं क्षिपत्यम्भसि भारत। प्रीणयन्ती त्वभिप्रेत्य गङ्गास्रोतसमञ्जवत्। तस्य तत्प्रियं राज्ञः शान्तनोरभवत्तदा। न च तां किञ्चनोवाच त्यागाद्भीतो महीपतिः। अथैनामष्टमे पुत्रे जाते प्रहसतीमिव। उवाच राजा दुःखार्त्तः परीप्सन् पुत्रमात्मनः। मा वधीः कस्य कासीति किं क्षिपसि सुतानिति। पुत्रघ्नि! सुमहत्पापं कस्माद्यं ते सुगर्हितम्"। स्त्र्युवाच। "पुत्रकाम! न ते हन्मि पुत्रं पुत्रवतां वर!। जीवाऽस्तु मम वासोऽयं यथा स समयः कृतः। अहं गङ्गा जह्नुसुता महर्षिगणसेविता। देवकार्य्यार्थसिद्ध्यर्थमुषिताऽहं त्वया सह। इमेऽष्टौ वसवो देवा महाभागा महौजसः। वशिष्ठशापदोषेण मानुषत्वमुपागताः। तेषां जनयिता नान्यस्त्वदृते भुवि विद्यते। महिषी मानुषी धात्री लोके नास्तीह काचन। तस्मात्त्वज्जननीहेतोर्मानुषत्वमुपागता। जनयित्वा वसूनष्टौ जिता लोकास्त्वयाऽजयाः। देवानां समयस्त्वेष वसूनां संश्रुतो मया। जातं जातं मोक्षयिष्ये जन्मतो मानुषादिति। तत्ते शापाद्विनिर्मुक्ता आपवस्य महात्मनः। अस्तिं तेऽस्तु गमिष्यामि पुत्रं पाहि महाव्रतम्। एष पर्य्यायवासो मे वसूनां सन्निधौ कृतः। मत्प्रसूतं विजानीहि गङ्गादत्तमिमम् सुतम्"। श्रुत निजधेनुकान् वसून् प्रति गङ्गया वशिष्ठशापस्तत्रैवोक्तः ९९अ०। "अथाश्रमपदं प्राप्तः फलान्यादाय वारुणिः। नचापश्यद्वसुं गां तत्र सवत्सां काननोत्तमे। ततः स मृगयामास वने तस्मिंस्तपोधनः। नाध्यगमच्च मृगसंस्थां गां मुनिरुदारधीः। ज्ञात्वा तथाऽपनीतां तां वसुभिर्दिव्यदर्शनः। ययौ क्रोधवशं सद्यः शशाप च वसूंस्तदा। यस्मान्मे वसवो जह्रुर्गां वै दोग्ध्रीं सुवालधिम्। तस्मात्सर्वे जनिष्यन्ति मानुषेषु न संशयः। एवं शशाप भगवान् वसूंस्तान् भरतर्षभ!। वसवः क्रोधसम्मूढा आपवो मुनिसत्तमः। यस्मा च तान्महाभागस्तपस्येव मनो दधे। एवं स शप्तवान् राजन्! वसूनष्टौ तपोधनः। महाप्रभावो ब्रह्मर्षिर्देवान् क्रोधसमन्वितः। अथाश्रमपदं प्राप्तास्ते वै भूयो महात्मनः। शप्ताःस्म इति जानन्त ऋषिं तमुपचक्रमुः। प्रसादयन्तस्तर्षिं वसवः पार्थिवर्षभ!। ऊचिरे नच तस्मात्ते प्रसादस्तदभिसत्तमात्। आपवात्पुरुषव्याघ्र! सर्वधर्म्मविचारदात्। उवाच च स धर्म्मात्मा शप्ता यूयं धरादयः। अनुग्रं वत्सरात्सर्वे शापमोक्षमवाप्स्यथ। अयन्तु यत्कृते यूयं मया शप्ताः स वत्स्यति। द्यौस्त्वदा मानुषे लोके दीर्घकालं स्वकर्म्मणा। नान्वतं तच्चिकीर्षामि क्रुद्धो युष्मान् यदब्रवम्। न प्रजास्यति चाप्येष मानुषेषु महामनाः। भविष्यति च धर्म्मात्मा सर्वशास्त्रविशारदः। पितुः प्रियहिते युक्तः स्त्रीभोगान् वर्जयिष्यति। एवमुक्ता वसून् सर्वान् स जगाम महानृषिः। ततो भागीरथीं देवीं समेता वसवस्तदा। अब्रुवन्न च मां राजन्! वरं तच्च मया कृतम्। जातान् जातान् प्रक्षिपाम्भसि स्वयं गङ्गे! त्वमम्भसि। एवं तेषामहं सम्यक् शप्तानां राजसत्तम!। मोक्षार्थं मानुषाल्लोकाद्यावत्कृतवत्यहम्। अयं शापादृषेस्तस्य एक एव नृपोत्तम। द्यौराजन्! मानुषे लोके चिरं वत्स्यति भारत!। वैशम्पायन उवाच। एतदाख्याय सा देवी तत्रैवान्तरधीयत। आदाय च कुमारं तं जगामाथ यथेप्सितम्। स तु देवव्रतो नाम गाङ्गेय इति चाभवत्। द्युनामा शान्तनोः पुत्रः शान्तनोरधिको गुणैः"। "अथापगेयं भीष्मं तं रामेणेच्छामि धीमता। रथे विनिर्जितं द्रष्टुं कुर्य्यात्तदपि भार्गवः" "यदि त्वामापगेयो वै

न नयेद्गजसाङ्गयम्" इति च भा० उ० प० ७७अ०।

आपचिक त्रि० आपदं चिक्कति क्लन्ति चिक्क-अण् पृ० कलोपः। आपत्कर्त्तरि। गौरा०ङीष्वां ङीष्।

आपटव न० न सन्ति पटवोऽस्य तस्य भावः अण्। पटुभून्यत्वे। न पटुरपटुरिति तत्पुरुषात्तु ष्यञि उत्तरपदस्यैव वृद्धिः। अपाटवम्। "अपाटवाद्यशौचाद्यैर्यदि विघ्नं प्रजायते" स्मृतिः।

आपण पु० आपणायन्ते विक्रीणन्त्यत्र आ+पण-नि०आधारे घ। १हट्टे, २क्रयविक्रेयद्रव्यशालायाञ्च। "शकटापणवेशाश्च वणिजोवन्दिनस्तथा। नराश्च मृगयाशीलाः शतशोऽथ सहस्रशः" भा०व०प० २२८। "भक्ष्यमाल्यापणानाञ्च दद्युः स्त्रियस्तत्तस्माम्" भा०स०प० ४अ०। "अस्वामिना तु यद्भुक्तं मूल्यतोऽपणादिकम्। मूल्यद्विगुणमुत्सृज्य न तद्भोगेन शुध्यति" दा०त०धृ० "आपणः पण्यवीथिका" रघु० अ०त०। "आपणो विक्रयस्थानम्" तेनैवोक्तम्। "मूर्खापणाविपणिनो विपणीर्विभेजुः" माघः। भावे घञ् आपाघः। क्रयविक्रयव्यवहारे पु०।

आपणिक त्रि०आपणादायस्थानादागतः ठक्। १हट्टस्थानादागते राजकरादौ। आपणस्य धर्म्म्यम् ठक्। २हट्टस्थवणिग्धर्म्म्ये। आपणस्यावक्रयः राज्यपाद्यः ठक्। ३हट्टस्थ राजपाद्ये द्रव्ये (तोला) आ+पण-इकन्। ४वणिग्जने उज्ज्वलदत्त।

आपतन न०आ+पत-भावे ल्युट्। १आगमने २प्राप्तौ ३ज्ञाने "क्वचित् प्राकरणिकादर्थादप्राकरणिकार्थास्यापतनम्" सा० द० दैववशात् ४पतने च।

आपति पु० आपतति आ+पत-इन्। सततगामिनि वायौ "आपतये त्वा परिपतये स्वाहा" य० ५,५, आपतिः सततगतिर्वायुः" वेददी०। [२दैवायत्ते त्रि०उज्ज्वलदत्तः।

आपतिक पु० आपतति शीघ्रम् आ+पत-इकन्। १श्येने

आपतित त्रि०आ+पत-क्त। १हठादागते २दैवायत्तपतने च

आपत्कल्प पु० आपदुचितः कल्पोविधिः या०त०। आपत्कालिकविधौ स च विधिर्गौतमेनोक्तः यथा "आपत्कल्पोब्राह्मणस्याब्राह्मणाद्विद्योपयोगोऽनुगमनं शुश्रूषाऽसमाप्तेर्ब्राह्मणोगुरुः याजनाध्यापनप्रतिग्रहाः सर्व्वेषां पूर्व्वः पूर्व्वोगुरुस्तदलाभे क्षत्रवृत्तिस्तदलाभे वैश्यवृत्तिः तस्यापण्यं गन्धरसक्षत्रतिलगव्यक्षौमाजिनानि रक्तनिर्णिक्ते वाससी क्षीरञ्च सविकारं मूलफलपुष्पौषधमधुमांसवल्कोदकापक्वानि पयश्च हिंसासंयोगे पुरुषवशाकुमारीवेहतश्च नित्यं भूमिप्रोक्षियवाजाव्यश्च ऋषभधेन्वनड्वाहश्चैके। विनिमयस्तु रसानां रसैः पशूनाञ्च न लवणक्षताक्षयोः, तिलानाञ्च समेनामेन तु पक्वस्य संप्रत्यर्घे सर्व्वधान्यवृत्तिरशक्तावप्यवृद्ध्या तदर्घेके प्राणसंशये, तदर्घसङ्करोऽभक्ष्यनियमस्तु प्राणसंशये ब्राह्मणोऽपि यस्तमाददीत राजन्यवैश्यकर्म्म, राजन्यो वैश्यकर्म्म"

आपत्काल पु० आपद्युक्तः कालः या०त०। आपद्युक्ते समये "अब्राह्मणादध्ययनमापत्काले विधीयते" मनुः "आपत्काले तु विप्रेण भुक्तं शूद्रगृहे यदि। मनस्तापेन शुध्येत्तु द्रुपदां वा शतं जपेत्" प्रा०त०धृ०।

आपत्कालिक त्रि०आपत्काले भवः कालात्ठञ् ञिठ्वा। आपत्कालभवे ठञि स्त्रियां ङीष् ञिठित्वे टाबिति भेदः।

आपत्ति स्त्री आ+पद-क्तिन्। आपदि आपच्च रोगाद्यभिभूतावस्था सम्यगवर्त्तनोपायानुपलब्धश्च। आपदि धर्म्माचरणञ्च या० स्मृ० दर्शितम् यथा

"ज्ञात्वेष कर्म्मणा जीवेद्विद्यां वाप्यापदि द्विजः। निस्तीर्य तामथात्मानं पावयित्वा न्यसेत् पथि। फलोपलक्षौमसोमशणुष्यापूपवीरुधः। तिलौदनरसक्षारान् दधि क्षीरं घृतं जलम्। यज्ञावयमधूच्छिष्टमधुलाक्षाश्च वर्हिषः। मृद्भस्म पुष्पकुतपकेशतक्रविषपित्तितोः। कौशेयनीलवस्त्रभांसैकशफसीसकान्। शाकाद्रौपधिपिण्याकपशुगन्धांस्तथैव च। वैश्यवृत्त्यापि जीवन्तो विक्रीणीत कदाचन। धर्म्मार्थं विक्रयं नेयास्तिला धान्येन तत्समाः। लाक्षालवणमांसानि पतनीयानि विक्रये। पयोदधि च मद्यञ्च हीनवर्णकराणि च। आपद्गतः सम्भक्षयन् भुञ्जानो वा यतस्ततः। न लिप्यतेनसा विप्रोज्वलनार्कसमो हि सः। क्षुधिः शिल्पं भृतिर्विद्या कुसीदं शकटं गिरिः। सेवानूपं नृपोभैक्षमापत्तौ जीवनानि तु। बुभुक्षितस्त्वहं स्थित्वा धान्यमब्राह्मणाद्धरेत्। प्रतिगृह्य तदाख्येयमियुक्तेन धर्मतः। तस्य दत्तं कृतं शीलं श्रुतमध्ययनं तपः। ज्ञात्वा राजा कुटुम्बञ्च धर्म्म्यां वृत्तिं प्रकल्पयेत्"। विस्तरस्तु भा०आ०प०आपद्धर्म्मपर्व्वणि द्रष्टव्यः। २प्राप्तौ। "स्थानापत्तेर्द्रव्येषु धर्मलाभः" कात्या० ४,१,१६ "इतरेतरभावापत्तिः" भा०भा० व्यतिरेकव्याख्या ३अर्थादेः सिद्धौ। अर्थापत्तिः ४अनिष्टप्रसङ्गे स च व्याघातायार्थारोपात् व्यापकस्याहार्यारोपः। यदि निर्वह्निः स्यात् निर्धूमः स्यादित्येवं रूपः।

आपत्य पु० अपत्याधिकारे विहितः अण्। पाणिन्यादिभिः

तस्यापत्यमित्यधिकारे विहिते प्रत्यये। "आपत्यस्य च तद्धितेऽनाति" पा०।

आपथि पु० अभिमुखः पन्थाः यस्य वेदे नि० इत् समा०। अभिमुखमार्गसम्बन्धिनि "आपथयोविपथयोऽनक्षया अनुपथाः" ऋ० ५,५२ १०। आपथयः अभिमुखा मार्गा येषां ताडयाः" भा० स्त्रियां वा ङीप् "हिरण्ययेभिः पविभिः पयोऽधः उज्जिघ्नन् आपथ्यो न पर्वतान्" ऋ० १, १६४ ११।

आपद् स्त्री आ+पद-सम्पदा० क्विप्। विपत्तौ आपत्तिशब्दे विदृतिः" दैवीनां मानुषीणाञ्च प्रतिहर्त्ता त्वमापदाम्" रघुः। "सम्पदो मे निरापदः" रघुः "अविवेकः परमापदां पदम्" किरा० "मन्त्रयन्निविनिवारितापदः" माघः। "आपत्कल्पः आपत्काले। आपत्प्राप्तः। आपन्नतः। आपद्ग्रस्तः। आपद्गर्भः" हलन्तत्वाद्वा टाप्। आपदाध्यत्र। आपत्काले न्यूनादपि विद्याधिगन्तव्या यथा छ० उ० "वाचा ह वै पूर्व्वे उपयन्ति सहोपायनकीर्त्योवास" अत्र भाष्यम् "वाचा ह किल पूर्व्वे ब्राह्मणाः विद्यार्थिनः सन्तः क्षत्रियान् वैश्यान् वा क्षत्रिया वैश्यानुपयन्ति शिष्यदत्त्या उपगच्छन्ति नोपायनशुश्रूषाभिः अतः स गौतम उपायनकीर्त्या उपगमनकीर्त्तनमात्रेणैव उवास ऋषिवान् नोपायनं चकार"। "आपदि समादधिकाद्वा विद्याप्राप्त्यसम्भवावस्थायाम् उपायनसुपगमनं पादोपसर्पणम्" आन०।

आपदकाल पु० आपदा कृतोऽकालः। आपदा कृते दुष्टे काले "पीड़ा चापदकालस्य पत्तिज्ञानञ्च पाण्डव!" भा० शा० प० ५६ अ०।

आपदेव पु० आपस्य जलसमूहस्य देवः। वरुणे।

आपद्धर्म पु० आपदि कर्त्तव्यो धर्म्मः। १आपद्यनुष्ठेये धर्म्मे आपद्धर्ममधिकृत्य कृतोऽन्यः अण्। भारतान्तर्गतशान्तिपर्वमध्यगते व्यासकृते २अवान्तरपर्वभेदे न० तत्र भा० शा० प० १३१ अध्यायधि १७२ अध्यायपर्य्यन्तम्।

आपन न० आप+भावे ल्युट्। १प्राप्तौ। कर्मणि ल्युट्। २मरीचे शब्दच०। [मणौ २किराते च उज्ज्वलदत्तः।

आपनिक त्रि० आ+पन-स्तुतौ कर्मणि इकन्। १इन्द्रनीले

आपनेय त्रि० आ+अप+नी-कर्मणि यत्। समन्तादपनेये दूरीकार्य्ये "नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ!" कठोप०। "येयमात्मप्रतिपाद्यात्मनि मतिः सैषा तर्केण स्वबुद्ध्यभ्यूहमात्रेण नापनेया नापनेतव्या न क्षपणीया। तार्किकोह्यनागमज्ञः स्वबुद्धिपरिकल्पितं यत्किञ्चिदेव कथयति अतएव सेयमागमप्रकृता मतिः तार्किकादन्येनैवागमाभिज्ञेनाचार्य्येणैव प्रोक्ता सतीसुज्ञानाय भवति" भा०।

आपन्न आ+पद-क्त। २आपद्गते "आपन्नः संसृतिं घोरां यन्नाम विवशोऽस्मरेत्। ततः सद्योविमुच्येत यद्बिभेति स्वयं भयम्" भाग० "आपन्नाभयसत्रेषु दीक्षिताः खलु पौरवाः" शकु० "आत्मापराधादापन्नस्तत् किं भीमं जिघांससि" भा० स्त्री० प० १२ अ० १प्राप्ते मेदि० आपन्नसत्वा

आपन्नसत्वा स्त्री आपन्नं प्राप्तं गर्भरूपेण सत्वं प्राणी यया। गर्भिण्यां स्त्रियाम् "समभापन्नसत्वास्ता रेजुरापाण्डुरत्विषः" रघुः। [निमयं दत्त्वा क्रीते।

आपमित्यक त्रि० अपमित्य परिवर्त्त्य निर्वृत्तम् कक्। वि-

आपया स्त्री आपेन जलपूरेण याति या+क। १जलपूरवाहि नदीभेदे "इषइत्यां मानुष आपयायां सरस्वत्यां रेवदग्ने दिदीहि" ऋ० ३,२३,४,। "आपया नाम काचित् नदी" भा० २आपगारूपनदीमात्रे च।

आपयितृ त्रि० आप+णिच्-तृच्। प्रापयितरि "आपयिता ह वै कामानां भवति यएवं विद्वानग्नरसङ्गीयमुपास्ते" छा० उ०। "आपयिता ह वै कामानां यजमानस्य भवति" भा०। स्त्रियां ङीप्।

आपराधय्य न० अप+राध-णिच् बा० य तस्य भावः ब्राह्म० ष्यञ्। अपराधकर्त्तृत्वे।

आपराह्णिक त्रि० अपराह्णे भवः ठञ्। १अपराह्णभवे २तद्व्यापके च स्त्रियां ङीप्। "पित्र्यं चापराह्णिकी" स्मृतिः।

आपर्त्तुक पु० ऋतुमधिकृत्य अध्यायः तस्य विहितः कल्पः। ऋतावध्यायबोधके छान्दसे कल्पभेदे। "ऋतावध्यायच्छान्दसः कल्प आपर्त्तुकः" कौशीतकिसूत्रम्।

आपव पु० आपुनाति स्वर्गमात्रेण आपु जलं तदधिष्ठाता वरुणोऽपि आपूः तस्यापत्यम्। कल्पभेदे वरुणस्यापत्ये १वसिष्ठे मुनौ तस्य व्रत उत्पत्तिकथा यथा भा० आ० प० ६६ अ० "यं लेभे वरुणः पुत्रं पुरा भरतसत्तम! वसिष्ठनामा स मुनिःख्यात आपव इत्युत" "तत्ते शापाद्विवर्षुक्षा आपवस्य महात्मनः" इति च आपगेयशब्दे विवृतिः। आपं जलपूरं याति प्राप्नोति आश्रयत्वेन वा-क। २नारायणे परमपुरुषे। "आपोनारा इति प्रोक्ताः आपोवै नरसूनवः। अयनं तस्य ताः पूर्व्वं तेन नारा-

यशः कृत" इत्युपक्रम्य । "उच्चावचानि भूतानि गात्रेभ्यस्तस्य जज्ञिरे । आपश्च प्रजासर्गं सृजतो हि प्रजापतेः" स सृष्ट्वा तु प्रजास्त्वेवमापो वै प्रजापतिः" इति च हरिवं० १,२अ० ।

आपस् न० आप-असुन् । जले । "आपोभिर्मार्ज्जनं कृत्वा" स्मृतिः । "अन्नमयं हि सोम्य ! मन आपोमयः प्राणस्तेजोमयी वाक्" छा०उप० "सर्वमापोमयं जगत्" देवीभा० । "ब्रुवते कतमेऽपि नपुंसकमाप" इति हलायुधकोषात् क्लीवत्वम् । तुडभावे ह्रस्वः अप इत्येव । तट् पक्षे अप्र इत्यपि । कर्मणि ।

आपस्तम्ब पु० ऋषिभेदे स च कल्पसूत्रकारः धर्म्मशास्त्र कर्त्ता च "यमापस्तम्बसंवर्त्तौ कात्यायनबृहस्पती" इत्याद्यभिधाय "धर्म्मशास्त्रप्रयोजकाः" या० स्मृ० । तदीय संहिता च दशाध्यायी तस्यां प्रायश्चित्तविधानमात्रमुक्तम् ।तस्यापत्यम् विदा० अञ् आपस्तवः तदपत्ये पुंस्त्री स्त्रियां ङीप् । आपस्तम्बस्येदम् छ । आपस्तम्बीयः । तत्सम्बन्धिनि त्रि० आपस्तम्बेन प्रोक्तमधीयते अण् तस्य लुक् । आपस्तम्बप्रोक्तशाखाध्येष्वपु ब० व० । आपस्तम्बृषां भवः ढक् । आपस्तम्बेयः । आपस्तम्बापत्यस्त्रीभेदे त्रि० ।

आपस्तम्बिनी पु०आपः स्तम्बानि स्तनभ-णिनि । दिङ्नाग्यां लतायाम् ।

आपाक पु०समन्तात् परिवेष्ट्य पच्यतेऽत्र आ+पच-आधारे घञ् । १कुम्भकारस्य मृण्मयपात्रपचनस्थाने (पोवान) । भावे घञ् । २ईषत्पाके ३सम्यक्पाके ४पुटपाके च ।

आपाङ्क्त्र न० अपाङ्क्ते देयम् अण् । अपाङ्क्ते देये अन्नादौ । "शलाकया दक्षिणेन क्षिपेत्कानीनमञ्जनम् । आपाङ्क्त्रं वा यथायोग्यं कुर्याज्ज्ञात्र गतागतम्" सुश्रु० ।

आपात पु० हठात् अविवेकात् कारणान्तरसाचिव्याभावेऽपि आगत्य पातः । अविविच्यावगतौ "आपाततोयदर्थस्य पौनरुक्त्यावभासनम्" सा०द० २अतर्कितागमने । "गरुड़ापातविश्लिष्टमेघनादास्त्रबन्धनः" रघुः । "तदापातभयात् पथि" कुमा० आपतत्यत्राधारे घञ् । ३तत्काले वर्त्तमानकाले "आपातरम्या विषवाः पर्य्यन्तपरितापिनः" किरा० "आपातरम्यास्तत्कालरमणीयाः" मल्लि० । ४उपक्रमे च "मध्वापातोविषास्वादः स धर्मप्रतिरूपकः" मनुः । "मध्वापातो मधुरोपक्रमः" कुल्लू० ।

आपातलिका स्त्री उत्तर० उक्ते मात्राभेदे "कथितेयं भात् गुरुकावच पूर्व्वमन्यत्" तल्लक्षणं अन्यत् वैतालीयगतम् तच्च "षड्विधमेऽष्टौ समे कलास्तासु समे स्युर्नोनिरन्नराः । न समात्र पराश्रिता कला" इत्येव प्रथमं निवेश्यान्ते जगणं दत्त्वा गुरुद्वयं चतुर्षु चरणेषु देयमित्यर्थः ।

आपाततस् अव्य० आपात+तसिल् । १कारणं विनेत्यर्थे २अकस्मादित्यर्थे ३अनवधार्य्येत्यर्थे च । "एतज्ञापाततः" जगदी० "आपाततो यदर्थस्येति" सा०द० ।

आपात्य त्रि० आपतति स्वयमाक्रमितुमागच्छति । "भव्यगेयेत्यादि" पा०नि० कर्तरि ण्यत् । १स्वयमाक्रमितुमागामिनि । "आपात्यसैनिकनिराकरणाकुलेन" माघः । भावे ण्यत् । २कर्तव्यापतने ३कर्मणि ण्यत् । आपात्ये देशादौ त्रि० आ+पत-णिच् ल्यप् । ४समन्तात्पातयित्वेत्यर्थे अव्य० ।

आपाद पु० आ+पद-घञ् । फललाभे "ध्यानापादांगा इव" ह०उ० "ध्यानस्यापादनमापादः ध्यानफललाभः" इति भा० २आगतौ च पादपर्य्यन्तम् अव्ययी० । ३पादपर्य्यन्ते अव्य० ।

आपादन न० न० आ+पद-णिच्-ल्युट् । १आपत्तिविषयीकरणे आपादकज्ञानेन आपद्यनिश्चये" पद-भावे णिच्-ल्युट् । २समादने "द्रव्यस्य संख्यान्तरापादने" सि० कौ० ।

आपान न० आपीयते सम्भूय सुरा पीयतेऽत्र आधारे ल्युट् । सुरापानाय सम्भूयोपवेशनस्थाने । पानार्थसभावाम् (चक्र) "गन्धर्वाप्सरसोभद्रे ! मामापानगतं सदा" भा०व०प०२८०अ० । "आपाने पानकलिता दैवेनाभिप्रणोदिताः" ददर्श यदुवीराणामापाने वैशसं महत्" इति च भा०आ०प० २अ० । भावे ल्युट् । २सम्भूय सुरापाने । "ताम्बूलीनां दलैस्तत्र रचितापानभूमयः" रघुः । "यत्र स्फटिकहर्म्येषु नक्तमापानभूमिषु" कुमा० । स्वार्थे कन् । आपानकमपि पानगोष्ठ्याम् । सुरापाने च "आपानकसुत्सवः" काद० । [कर्त्तरि स्त्रियां ङीप् ।

आपायिन् त्रि० आपिबति आ+पा-णिनि । सुरापाने

आपालि पु० आ+पा-कालि् तदर्थमलति अल-इन् । केशकीटे (उकुन्) सहि गोर्धस्वरुधिरापानप्रसक्तः

आपि पु० आप+णिच्-इन् । १धनादिप्रापके । "त्वे देवा यूयमिदापयश्च" ऋ०२,२८,४ । "आपयः धनस्य प्रापयितारः" भा० । आप्यते कर्म्मणि इन् । २आप्ते बन्धौ तस्य भावः आपित्वं बन्धुत्वे "आपित्वे नः प्रपित्वे" ऋ०८,७,३ । "आपित्वे बन्धुत्वे" भा० ।

आपिङ्गर न० ईषत्पिङ्गरं प्रा०स०। १स्वर्णे राजनि०। २ईषत्पिङ्गरवर्णे पु० ३तद्वति त्रि० "आपिङ्गरावह्वरजः-कणत्वात्" रघुः।

आपिशलि पु० अपिशलस्य सुनेरपत्यम् इञ्। आदि-भाष्टिके मुनिभेदे। "इन्द्रचन्द्रः काशकृत्स्नापिशली शाक-टायनः। पाणिन्यमरजैनेन्द्राजयन्त्यष्टादिभाष्टिकाः" कवि क०। "वा सुप्यापिशलेः" पाणिनिनोक्तेस्ततोऽप्यस्यादित्वम् स्त्रियां क्रोड्या०ष्यञ्। आपिशल्या तस्यस्त्रापत्ये स्त्री। आपिशिलिना प्रोक्तम् अण्। आपिशलम्। तदीये शास्त्रे न०।

आपी त्रि० आ+प्याय-क्विप् पीभावः। १आपीने वर्द्धिमति।

आपीड पु० आ+पीड-अच्। १शिखामाल्ये, २शिरोभूषणे, "तस्मिन् कुलापीडनिभे विपीड़ितम्" रघुः। "विचित्र-सुकुटापीड़ा विचित्रकवचध्वजाः" भा०व०प० १७२ अ०"बद्धापीड़ांश्चारुरूपांश्च यूनो व्यूढोरस्कांस्ताम्रमालान् ददर्श" भा० आ०प० १६७अ०। २स्रष्टरवह्निर्निःसृतकाष्ठे च। ३आपीडकमाले त्रि०।

आपीडा स्त्री आ+पीड-अ। सम्यक्पीड़ने "तत्र तूर्णं गलापीडं कुर्याच्छास्त्रध्वनम्" सुश्रु० गलस्यापीडा मर्द्दनं यत्रेति तदर्थः।

आपीडित त्रि० आ+पीड-क्त। १निष्पीडिते २निर्मृदिते।

आपीत न० ईषत् पीतम् प्रा०त०। माक्षिके धातौ। २ईषत्पीतवर्णे पु० ३तद्वति त्रि०। ईषत् पानं कृतं यस्य तादृशे ४जलादौ त्रि०।

आपीन न० आ+प्याय-क्त पीभावः तस्य नत्वम्। (भेड़) १गवादेः ऊधसि "आपीनभारोद्वहनप्रयत्नात्" रघुः २कूपे पु०। "आपीनमूधः आपीनोऽम्बुः" सुश्रु०। अन्योपसर्गपूर्व्वकत्वे तु संज्ञानद्वयेऽपि आङ्-पूर्व्वकस्यापि अम्बूधसो रेवार्थयोःपीभावो नान्यत्र।

आपूपिक त्रि० अपूपः शिल्पमस्य ठक्। १अपूपपाचके अपूपे अपूपभक्षणे साधु गुड़ा०ठक्। २अपूपभक्षणसाधने गुड़ादौ। अपूपो भक्तिरस्य अचित्तत्वात् ठक्। ३अ-पूपभक्षणाभ्यासिके। अपूपःपण्यमस्य ठक्। ४अपूपविक्रे-तरि। अपूपस्तद्भक्षणं शीलमस्य ठक्। ५अपूपभक्ष-शीले। अपूपस्तद्भक्षणं हितमस्य ठक्। ६हितत्वेन अपू-पभक्षणकर्त्तरि। अपूपानां समूहः अचित्तत्वात् ठक्। ७अपूपसमूहे न०।

आपूप्य पु० अपूपाय साधुः वा ञ्य। अपूपसाधने चूर्णे त्रि०

आपूर पु० आपूर्य्यतेऽनेन आ+पूर-घञ्। जलादि प्रवाहे "खेदापूरोयुवतिसरितां व्याप गण्डस्थलानि" माघः भावे घञ्। २सम्यक्पूरणे ३ईषत्पूरणे ४अभि-व्याप्तौ च।

आपूरण न० आ+पूर-भावे ल्युट्। १"समन्तात्पूरणे आपू-रयति ल्यु। २सम्यक्पूरणकर्त्तरि त्रि० ३नागभेदे पु० "कालिको मणिनागश्च नागश्चापूरणस्तथा" भा० आ०प० ३५अ०। [२अभिव्याप्ते च।

आपूरित त्रि० आ+पूर-क्त। यत्नापूरणं कृतं १तस्मिन्

आपूर्य्यमाण त्रि० आ+पूर-कर्म्मणि यानच्। सम्यक् पूर्य्यमाणे २समन्तात्प्रस्रुते "आपूर्य्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्" गीता। आधारे यानच्। सूर्य्यकिरणैः पूर्य्यमाणचन्द्रस्याधारे पक्षे। "उदग-यने आपूर्य्यमाणे पक्षे कल्याणे नक्षत्रे चूड़ोपनयनगोदान विवाहाः" आश्व०गृह्य०। "अर्चिषोऽहरह्न आपूर्य्य-माणं पक्षम्" आप०श्रौ०।

आपूष आ+पूष-ड्वौ करणे घञ्। रङ्गे (राङ्) धातु-भेदे, तस्य पुष्टिसाधनत्वादिकमुक्तं भा० प्र० "रङ्गं वङ्गं त्रपु प्रोक्तं तथा पिच्चटमित्यपि। खरकं मिश्रकं चापि द्विविधं रङ्गमुच्यते। उत्तमं खरकं प्रोक्तं मिश्रकं गर्हितं भवेत्। रङ्गं लघु सरं रूक्षमुष्णमेहकफापहम्। निहन्ति पाण्डुं सन्तापं चक्षुष्यं पित्तलं मनाक्। सिंहो यथा हस्तिगणं निहन्ति तथैव वङ्गो ऽखिलमेहवर्गम्। देहस्य सौख्यम् प्रबलेन्द्रियत्वं नरस्य पुष्टिं विदधाति नूनम्"।

आपृच् त्रि० आ+पृच-क्विप्। संसर्गयुक्ते। "मित्रकृवोयच्छ-सान न मावः पृथिव्या आपृगसवा स यत्ने" ऋ०१०, ८६,१४।

आपृच्छा स्त्री आ+प्रच्छ-अङ्। १आलापे, २जिज्ञासायाम् ३आभाषणे गतागतकाले ४शुभप्रश्ने ५आनन्दने च।

आपृच्छ्य त्रि०आ+प्रच्छ-वेदे नि०क्यप्। जिज्ञास्ये। "आ-पृच्छ्यं वरुणं वाजसनिं" सि०कौ०धृता श्रुतिः। आ+प्रच्छ-ल्यप्। २जिज्ञासित्वेत्यर्थे अव्य०।

आपेक्षिक त्रि० अपेक्षात आगतः ठक्। अपेक्षया प्राप्ते "किन्तु मध्यत्वमापेक्षिकम्" सि०कौ० "अस्तमभ्युते इत्यापेक्षिकमस्तत्वम्" आ०उ०भा०। स्त्रियां ङीप्।

आपोक्लिम न० ज्योतिषोक्ते जन्मलग्नावधिद्वतीयषड-नवमद्वादशस्थानेषु। "द्वतीयं षडनवमसमन्यद्वापोक्लिमं विदुः" ज्यो०त०। "आपोक्लिमे यदि खगाः स किले-

व्युत्पादेन स्वाक्षरं कृत्वा तात्त्विकयाऽऽत्मगीतम्" नी० ता०।

आपोमय त्रि० आपस्+विकारे प्राचुर्ये वा मयट्। १जलविकारे "आपोमयः प्राणस्तेजोमयी वाक्" छा० उ०। "आपोमयाः सर्व्वरसाः सर्व्वमापोमयं जगत्" भा० आ० १८० अध्या० "भूमेर्गन्धगुणान् भुङ्क्ते पिबत्यापोमयान् रसान्" भा० आश्व० २८अ०। "मन्युजोऽग्निर्दहन्नापो लोकान्नापोमयाः स्मृताः" भा० आ० १८०। जलप्लाविते २जलप्रचुरे "विलोक्य ताभ्यां गदितः सर्व्वमापोमयं जगत्। आवां जहि न यत्रोर्व्वी सलिलेन परिप्लुता" देवीमा०।

आपोमूर्त्ति पु० स्वारोचिषस्य मनोः १पुत्रभेदे। "हविष्मः सुकृतिर्ज्योतिरापोमूर्त्तिरयव्ययः। प्रचितश्च नभश्च नभ ऊर्ज्जश्चैव च। स्वारोचिषस्य पुत्रास्ते मनोस्तात! महात्मनः" हरिवं० ६अ०। दशमे मन्वन्तरे आत्रेये सप्तर्षिमध्ये २ऋषिभेदे च "दशमे त्वथ पर्य्याये द्वितीयस्यान्तरे मनोः। हविष्मान् पौलहश्चैव सुकृतिश्चैव भार्गवः। आपोमूर्त्तिस्तथात्रेयो वासिष्ठश्चाष्टकः स्मृतः" इति हरिवं० ७अ०

आपोऽशान न० आपसा जलेन अशानं अश-व्याप्तौ भावे वा० ल्युट्। जलेन उपरिष्टादधस्ताच्चास्तरणरूपे अन्नाच्छादनार्थे कर्म्मणि। "आपोऽशानेनोपरिष्टादधस्ताद्व्रता तथा। अनग्नमन्नमश्नन्तश्चैव कार्य्यमन्नं द्विजन्मना" या० स्मृ०। "भुञ्जानेन द्विजन्मना उपरिष्टादधस्ताच्च आपोऽशानाख्येन कर्म्मणा अन्नमनग्नमश्नतं च कार्य्यम्" मिता०। "आपोऽशानक्रिया पूर्व्वं सत्कृताऽन्नमकृत्वयनं" या० स्मृ०। "आपोऽशानक्रिया पूर्व्वम् अन्नतोपस्तरणमसि स्वाहेत्यादिकं कृत्वा" मिता० "आपोऽशानं कर्म्म कुरु" भवदेवः।

आप्त त्रि० आप-क्त। १प्राप्ते २प्रत्ययिते विश्वस्ते। ३यथार्थज्ञानयुक्ते ४युक्तियुक्ते च "आप्तश्रुतिराप्तवचनं तु" सां० का०। "आप्ता प्राप्ता युक्तेति यावत् आप्ता चासौ श्रुतिश्चेति आप्तश्रुतिः श्रुतिर्वाक्यजनितं वाक्यार्थज्ञानं तच्च स्वतःप्रमाणम् अपौरुषेयवाक्यजनितत्वेन सकलदोषाशङ्कानिर्मुक्तत्वेन युक्तं भवति एवं वेदमूलकस्मृतीतिहासपुराणजनितज्ञानमपि युक्तम्। कपिलस्य कल्पादौ कल्पान्तराधीतस्मृतिस्मरणसम्भवः सुप्तबुद्धस्येव पूर्व्वेद्युरवगतार्थानामपरेद्युः। आप्तपदेन चायुक्ताः शाक्यभिक्षुनिर्ग्रन्थिकसंसारमोचकादीनामागमाभासा निरस्ता भवन्ति अयुक्तत्वञ्चैतेषां विसंवादात् छिन्नमूलत्वात् प्रमाणविरुद्धाभिधानात् कैश्चिदेव म्लेच्छादिभिः पुरुषापसदैः पशुप्रायैः परिग्राह्योध्यम्" सा० त० कौ०। "तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम्" सां० का०। यथार्थज्ञानविशिष्टरूपाप्तोक्तत्वनिश्चयस्य शाब्दबोधहेतुत्वमिति मीमांसकाः नैयायिकास्तत्र मन्यन्ते यथोक्तं शब्दश० प्र० "साकाङ्क्षत्वादिधीरिव वाक्यार्थगोचरज्ञानवदुक्तत्वरूपस्याप्तोक्तत्वस्यापि निश्चयः शाब्दधीहेतुरतोनैकपदार्थधर्म्मिकोऽपरपदार्थस्यान्वयबोधोऽनुमितिः सिद्धिसत्त्वे विनानुमित्यां तदसम्भवात् परन्त्वनुमितेरन्यएव किन्त्वसौ सङ्गीतपाठित्वाद्य प्रमा यज्ज्ञातीयविशिष्टज्ञानत्वावच्छेदेन समानाकारनिश्चयोत्तरत्वं तज्ज्ञातीयान्ययथार्थज्ञानस्य वाऽसङ्गीतपाठित्वेन प्रमात्वात् अतएव धारावाहिकप्रत्यक्षव्यक्तीनां समानाकारप्रत्यक्षोत्तरवर्त्तित्वेऽपि न तासां प्रमात्वहानिः हानिस्तु समानाकारानुभवसमुत्थानां स्मृतीनामिति जरन्मीमांसकानां समाधानं निरस्यति। नाप्तोक्तता तु वाक्यार्थगर्भा ज्ञातोपयुज्यते। वाक्यार्थानामपूर्व्वत्वात् संशयेऽप्यन्वयोदयात्। यद्येकपदार्थपदपरपदार्थपर्य्यवसन्नस्य वाक्यार्थस्य ज्ञानवदुक्तत्वरूपाया आप्तोक्तताया निश्चयः शाब्दमतेः कारणं स्यात् स्यादपि तेनैव रूपेण साध्यनिश्चयेन प्रतिबन्धादेकपदार्थपक्षिकावा अपरपदार्थानुमितेरनुत्पादो नचैवं, शाब्दधियः पूर्व्वं वाक्यार्थस्योपस्थित्यनियमेन तद्गर्भस्याप्तोक्तत्वस्यापि मतेरनावश्यकत्वात् अन्यथा वेदस्याप्यनुवादकतापत्तेः एकपदार्थेऽपरपदार्थस्य शब्दे वाक्यार्थज्ञानवदुक्तत्वस्य संशयेऽपि शाब्दमतेरुत्पादाच्च। अतएवाप्तोक्तत्वस्य संशये व्यतिरेकनिश्चये वान्वयबुद्धेरनुत्पादादवश्यन्निश्चयत्वात् हेत्वित्यपि प्रत्युक्तम् असिद्धेः"। ५कुशले "प्राज्ञकल्पेद्ध्वेदाप्तः" मनुः। "आप्तः कुशलः" कुक्कू०। ६सम्भूये "यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः" मनुः ७अन्वौ "नियन्तारं सत्तुरापानां बभञ्ज धनदानुजः" रघुः ८जटायां स्त्री हारा० ९सम्बद्धे १०लब्धे च त्रि० हेम०।

आप्तकाम त्रि० आप्तः प्राप्तःकामोयेन। १ब्रह्मात्मैक्यावगन्तरि यथा चाख्याप्तकामत्वं तथोक्तं ६७उप० भाष्ययोः। "तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माऽभयं रूपम्। तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्। तद्वा अस्यैतदाप्तकाममकामं रूपं शोकान्तरम्। अत्र पितापिता भवति मातामाता लोका अलोका देवा अदेवा वेदा अवेदाः। अत्र स्तेनो-

ऽस्तेनो भवति भ्रूणहाऽभ्रूणहा चाण्डालोऽचाण्डालः पौल्कसोऽपौल्कसः श्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागतं पापेन तीर्णो हि तदा सर्वान्शोकान् हृदयस्य भवति" इ० उ० "इदानीं योऽसौ सर्वात्मभावो मोक्षो विद्याफलं क्रियाकारकफलभूत्यं स प्रत्यक्षतो निर्दिश्यते। यत्राविद्याकामकर्माणि न सन्ति तदेतत्प्रस्तुतं "यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यतीति"। तद्वा अस्य रूपम्। यः सर्वात्मभावः सोऽस्य परमो लोक इत्युक्तस्तदतिच्छन्दा अतिच्छन्दमित्यर्थः रूपपरत्वात्। छन्दः कामोऽतिगतः छन्दोऽस्मिन् रूपे तदतिच्छन्दं रूपम्। अन्योऽसौ असन्तः छन्दःशब्दो गायत्र्यादिच्छन्दोवाची। अयन्तु कामवचनोऽतः स्वरान्त एव। तथाप्यतिच्छन्दा इति पाठः स्वाध्यायधर्मो द्रष्टव्यः। अस्ति च लोके कामवचनप्रयुक्तः छन्दशब्दः स्वच्छन्दः परच्छन्द इत्यादौ। अतोऽतिच्छन्दमित्येवमुचितं कामवर्जितमेतद्रूपमित्यस्मिन्नर्थे। तथाऽपहतपाप्मा पाप्मशब्देन धर्माधर्मावुच्येते। "पाप्मभिः संसृज्यते" "पाप्मनो विजहाति" इत्युक्तत्वात्। अपहतपाप्म धर्माधर्मवर्जितमित्येतत्। किञ्चाभयम् भयं हि नामाविद्याकार्यम् "अविद्याया भयं मन्यत" इति ह्युक्तम्। तत्कार्यद्वारेण कारणप्रतिषेधोऽयम् अभयं रूपमित्यविद्यावर्जितमित्येतत्। यदेतद्विद्याफलं सर्वात्मभावस्तदेतदतिच्छन्दापहतपाप्माभयं रूपं सर्वसंसारधर्मवर्जितमतोऽभयं रूपमेतत्। इदञ्च पूर्वमेवोपन्यस्तमतोतानन्तरब्राह्मणसमाप्तौ। "अभयं वै जनक प्राप्तोऽसि" इत्यागमतः। इह तु तर्कतः प्रपञ्चितम् दर्शितागमार्थप्रत्ययदार्ढ्याय। अयमात्मा स्वयंचैतन्यज्योतिःस्वभावः सर्वं स्वेन चैतन्यज्योतिषावभासयति। "स यत्तत्र किञ्चित्पश्यति रमते चरति जानाति च" इत्युक्तम्। अतः स्थितञ्चैतद्यायतो नित्यस्वरूपं चैतन्यज्योतिरात्मनः। स यद्यात्मात्मविनष्टः स्वेनैव रूपेण वर्त्तते कस्मादयमहमस्मीत्यात्मानं वा बहिर्वैमानि भूतानीति जात्यन्धस्यप्रवोरिव न जानातीत्युच्यते। अज्ञस्यात्मानहेतुम् एकत्वमेवात्मानहेतुस्तत्कथम्? इत्युच्यते। दृष्टान्तेन हि प्रत्यक्षीभवति विवक्षितोऽर्थ इत्याह। तत् तत्र यथा लोके प्रियवेष्टया स्त्रिया सम्परिष्वक्तः सम्यक् परिष्वक्तः कामयन्त्या कामुकः सन्न बाह्यमात्मनः किञ्चन किञ्चिदपि न वेद अहमस्मीति। न चान्तरमयमहमस्मि सुखी दुःखी वेति अपरिष्वक्तस्तु तया प्रविभक्तो जानाति। सर्वमेव बाह्यमाध्यन्तरञ्च। परिष्वङ्गोत्तरकालन्त्वेकत्वापत्तेर्न जानाति। एवमेव यथाऽदृष्टान्तोऽयं पुरुषः चेतनो भूतमात्रासंसर्गतः सैन्धवखिल्यवत् प्रविभक्तो जलादौ चन्द्रादिप्रतिबिम्बवत्कार्यकरणदृष्टे प्रविष्टः सोऽयं पुरुषः प्राज्ञेन परमार्थेन स्वाभाविकेन स्वेनात्मना परेण ज्योतिषा सम्परिष्वक्तः सम्यक् परिष्वक्त एकीभूतो निरन्तरः सर्वात्मा न बाह्यं किञ्चन वस्त्वन्तरं नाप्यान्तरमात्मन्यमहमस्मि सुखी दुःखी वेति वेद तत्र चैतन्यज्योतिःस्वभावत्वे कस्मादिह न जानातीति यदप्राक्षीस्तत्रायं हेतुर्मयोक्तः। एकत्वं यथा स्त्रीपुंसयोः सम्परिष्वक्तयोः। तत्रार्थाज्ञानात्वं विशेषविज्ञानहेतुरित्युक्तं भवति। नानात्वे च कारणमात्मनोवस्त्वन्तरस्य प्रत्युपस्थापिकाविद्येत्युक्तं तत्र चाविद्याया यदा प्रविविक्तो भवति तदा सर्वैक्यत्वमेवास्य भवति। ततश्च घ्राणत्वेयादिकारकविभागेऽसति कुतो विशेषविज्ञानप्रादुर्भावः कामो वा सम्भवति स्वाभाविके स्वरूपस्य चात्मज्योतिषि। यस्मादेवं सर्वैक्यत्वमेवास्य रूपमतस्त्वहं अस्मात्मनः स्वं ज्योतिःस्वभावस्यैतद्रूपमाप्तकामं यस्मात्मनस्तमेतत्तस्मादाप्ताः कामा अस्मिन्रूपे तदिदमाप्तकामं यस्य ह्यन्यत्वेन प्रविभक्तः कामस्तदनाप्तकामं भवति। यथा जागरितावस्थायां देवदत्तादिरूपम्। न त्विदं तथा कुतश्चित्प्रविभज्यतेऽतस्तदाप्तकामं भवति। किमन्यस्माद्धस्त्वन्तराद्न प्रविभज्यते आहोस्विदात्मैव तद्धस्त्वन्तरमत आह। नान्यदस्त्यात्मनः। कथम्? यतः आत्मकाममात्मैव कामा यस्मिन्रूपे वेऽत्र प्रविभक्ता इवान्यत्वेन काम्यमाना यथा जात्यन्धस्यप्रवोस्तेऽस्यात्मैवान्यत्वप्रत्युपस्थापकहेतोरविद्याया अभावादात्मकाममत एवाकाममेतद्रूपं कार्यविषयाभावाच्छोकान्तरं शोकच्छिद्रं शोकशून्यमित्येतच्छोकमध्यमिति वा सर्वथाप्यशोकमेतद्रूपं शोकवर्जितमित्यर्थः। प्रकृतः स्वयंज्योतिरात्मा अविद्याकामकर्मविनिर्मुक्त इत्युक्तम्। असङ्कृत्वादात्मन आगन्तुकत्वाच्च तेषां, तत्र वाग्ब्रा जायते चैतन्यस्वभावत्वे सत्यप्येकीभावाच्च जानाति स्त्रीपुंसयोरिव सम्परिष्वक्तयोरित्युक्तम्। तत्र प्रासङ्गिकमेतदुक्तं कामकर्मादिवत् स्वयं ज्योतिष्टमप्यात्मनो न स्वभावः। यस्मात् सङ्गसादेनोपलभ्यत इत्यारङ्कायां प्राप्तायां तन्निराकरणाय स्त्रीपुंसयोर्दृष्टान्तोपादानेन विद्यमानस्यैव स्वयंज्योतिष्टस्य सुषुप्तेऽप्यहमेकीभावाद्धेतोर्न तु कामकर्मादिवदागन्तुकम्। इत्येतत्प्रासङ्गिकमभिधाय यत्प्रकृतं तदेवानुप्रवर्त्तयति। अत्र चैतत्प्रकृत-

अविद्याकामकर्मविनिर्मुक्तमेव तद्रूपम्। यत्सुषुप्त आत्मनो स्वरूपं प्रत्यक्षत इति तदेतद्यथाभूतमेवाभिहितं सर्वसम्बन्धाधीनमेतद्रूपमिति। तस्मादेवैतस्मिन् सुषुप्तस्थानेऽतिच्छन्दापहतपाप्मभयमेतद्रूपं तस्मादत्र पिता जनकः तस्य च जनयितृत्वाद्यत्पितृत्वं पुत्रं प्रति तत्कर्मनिमित्तं तेन च कर्मणाऽयमस्मिन्काले, तस्मात्पिता पुत्रसम्बन्धनिमित्तस्य कर्मणो विनिर्मुक्तत्वात् पिताप्यपिता भवति। तथा पुत्रोऽपि पितुरपुत्रो भवतीति सामर्थ्यादुक्तं भवति उभयोर्हि सम्बन्धनिमित्तं कर्म। तदयमतिक्रान्तो वर्त्ततेऽपहतपाप्मेति श्रुतम्। तथा माताऽमाता। लोकाः कर्मणा जेतव्या जिताश्च तत्कर्मसम्बन्धाभावाल्लोका अलोकाः। तथा देवाः कर्माङ्गभूतास्तत्कर्मसम्बन्धात्ययादेवादेवाः। तथा वेदाः साध्यसाधनसम्बन्धविषयकाः ब्राह्मणलक्षणा मन्त्रलक्षणाश्चाभिधायकत्वेन कर्माङ्गभूता अधीता अध्येतव्याश्च कर्मनिमित्तमेव सम्बध्यन्ते पुरुषेण। तत्कर्मातिक्रमणादेतस्मिन् काले वेदा अवेदाः सम्पद्यन्ते। न केवलं शुभकर्मसम्बन्धातीतः। किन्तर्हि अशुभैरत्यन्तघोरैः कर्मभिरसम्बद्ध एवायं वर्त्तत इत्येतमर्थमाह अत्र स्तेनो ब्राह्मणसुवर्णहर्त्ता भ्रूणहासहपाठादवगम्यते। स तेन घोरेण कर्मणैतस्मिन् काले विनिर्मुक्तो भवति। येनायं कर्मणा महापातकी स्तेन उच्यते तथा भ्रूणहाऽभ्रूणहा तथा चाण्डालो न केवलं प्रत्युत्पन्नेनैव कर्मणा विनिर्मुक्तः। किं तर्हि सहजेनाप्यत्यन्तनिकृष्टजातिप्रापकेणापि विनिर्मुक्त एवायम्। चण्डालो नाम शूद्रेण ब्राह्मण्यासुतपन्नः चण्डाल एव चाण्डालः स जातिनिमित्तेन कर्मणाऽसम्बद्धत्वाच्चाण्डालो भवति। पौल्कसः पुल्कस एव पौल्कसः शूद्रेणैव क्षत्रियायासुतपन्नः। तथा सोऽप्यपौल्कसो भवति। तथा शुभलक्षणैश्च कर्मभिरसम्बद्धो भवतीत्युच्यते। श्रमणः परिव्राट् यत्कर्मनिमित्तो भवति स तेन विनिर्मुक्तत्वादश्रमणः। तथा तापसो वानप्रस्थोऽतापसः। सर्व्वेषां वर्णाश्रमादीनामुपलक्षणार्थमुभयोर्ग्रहणं किं बहुना। अनन्वागतं न अन्वागतमनन्वागतमसम्बद्धमित्येतत् पुण्येन शास्त्रविहितेन कर्म्मणा। तथा पापेन विहिताकरणप्रतिषिद्धक्रियालक्षणेन रूपपरत्वान्नपुंसकलिङ्गम्। अभयं रूपमिति श्रुतवर्त्तते। किं पुनरसम्बद्धत्वे कारणमिति तद्धेतुरुच्यते। तीर्णोऽतिक्रान्तो हि यस्मादेवंरूपस्तदा तस्मिन् काले सर्वाञ्छोकान् शोकाः कामा इष्टविषयप्रार्थनाः ते हि तद्विषयवियोगे शोकत्वमापद्यन्ते। इष्टं हि विषयमप्राप्तं विमुक्तं चोद्दिश्य चिन्तयानस्तद्दुःखान् सन्तप्यते पुरुषोऽतः शोको रतिः काम इति पर्य्यायाः। यस्मात् सर्वकामातीतो ह्यतायं भवति। न कञ्चन कामं कामयते अतिच्छन्दा इति श्रुतं तत्प्रक्रियापतितोऽयं शोकशब्दः कामवचन एव भवितुमर्हति। कामश्च कर्महेतुर्वक्ष्यति हि। "स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते" इति अतः सर्वकामातितीर्णत्वादुक्तलक्षणमनन्वागतं पुण्येनेत्यादि। हृदयस्य हृदयमिति पुण्डरीकाकारो मांसपिण्डस्तत्स्थमन्तःकरणं बुद्धिर्हृदयमित्युच्यते तात्स्थ्यान्नाड्याक्रोशनवत्। हृदयस्य बुद्धेर्ये शोका बुद्धिसंश्रया हि ते। "कामः संकल्पो विचिकित्सेत्यादि" "सर्वं मन एव" इत्युक्तत्वात् वक्ष्यति च "कामा येऽस्य हृदि श्रिताः" आत्मसंश्रयभावप्रदर्शनायैव हीदं वचनम्। "हृदि श्रिता हृदयकोशा" इति च। हृदयकारणसम्बन्धातीतश्चायमस्मिन् काले अतिक्रामति स्तेयरूपाणीति श्रुतम्। हृदयसम्बन्धातीतत्वात्तत्संश्रयकामसम्बन्धातीतो भवतीति युक्ततरं वचनम्। ये तु वादिनः हृदि श्रिताः कामा वासनाश्च हृदयसम्बन्धिनमात्मानमुपसर्प्योपश्लिष्यन्ते। हृदयवियोगेऽपि चात्मन्यवतिष्ठन्ते पुटतैलस्यैव पुष्पादिगन्ध, इत्याचक्षते। तेषां "कामः संकल्पः" "हृदये ह्येव रूपाणि" हृदयस्य शोका "इत्यादीनां वचनानामानर्थक्यमेव। हृदयकारणोत्पाद्यत्वादिति चेत् न हृदि श्रिता इति विशेषणात्। न हि हृदयस्य करणमात्रत्वे हृदि श्रिता इति वचनं समञ्जसम्। हृदये ह्येव रूपाणि प्रतिष्ठितानीति च। आत्मविशुद्धेश्च विवक्षितत्वादुच्छ्रयणवचनं यथार्थमेव युक्तम्। "ध्यायतीव लेलायतीवेति च" श्रुतेरन्यार्थसम्भवात्। "कामा येऽस्य हृदि श्रिता" इति विशेषणादात्माश्रया अपि सन्तीति चेत् न अनाश्रितापेक्षत्वात् न चाश्रयान्तरमपेक्षते हृदीति विशेषणं किन्तर्हि? ये हृदनाश्रिताः कामास्तानपेक्ष्य विशेषणम्। ये त्वप्ररूढा भविष्या भूताः स्वप्रतिपत्तितो निष्टप्तास्ते नैव हृदि श्रिताः, सम्भावन्ते च ते। अतो युक्तं तानपेक्ष्य विशेषणम्। ये प्ररूढा वर्त्तमानादिविषये ते सर्वे प्रभुच्यन्ते इति। तथापि विशेषणानर्थक्यमिति चेत् न तेषु यत्नाधिक्याद्धेयार्थत्वात्। इतरथाऽश्रुतमनिष्टञ्च कल्पितं स्यादात्माश्रयत्वञ्च कामानाम्। "न कञ्चन कामं कामयते" इति

प्राप्तप्रतिषेधादात्माश्रयत्वं कामानां श्रुतमेवेति चेत् न "सुषोः स्वपोभूत्वेति" परनिमित्तत्वात् कामाश्रयत्वप्राप्तेः असङ्कल्पवचनाच्च। न हि कामाश्रयत्वेऽसङ्कल्पवचनमुपपद्यते। सङ्कल्प काम इत्यवोचाम। आत्मकाम इति श्रुतेरात्मविषयेऽस्य कामो भवतीति चेत् न व्यतिरिक्तकामनाभावार्थत्वात्तस्याः, वैशेषिकादितन्त्रन्यायोपपन्नमात्मनः कामाद्याश्रयत्वमिति चेत् न हृदि श्रिता इत्यादिविशेषश्रुतिविरोधादनपेक्षत्वाच्च वैशेषिकादितन्त्रोपपत्तयः श्रुतिविरोधे न्यायाभासत्वोपगमात् स्वयंज्योतिष्ट्वबाधनाच्च। कामादीनाञ्च स्वप्ने केवलऽग्निमात्रविषयत्वात् स्वयंज्योतिष्टं सिद्धम् स्थितञ्च बाध्येतात्मसमवायित्वे। दृश्यत्वानुपपत्तेश्चक्षुर्गतविशेषवत्। द्रष्टुर्हि दृश्यमर्थान्तरभूतमिति द्रष्टुः स्वयंज्योतिष्टं सिद्धम् तद्वाधितं स्याद्यदि कामाद्याश्रयत्वं परिकल्प्येत। सर्वशास्त्रप्रतिषेधाच्च। परस्यैकदेशकल्पनायां कामाद्याश्रयत्वे च सर्वशास्त्रार्थजातं कुप्येत। एतच्च विस्तरेण चतुर्थेऽवोचाम। महता हि प्रयत्नेन कामाद्याश्रयत्वकल्पनाः प्रतिषेद्धव्याः। आत्मनः परेणैकत्वशास्त्रार्थसिद्धेः। तत्कल्पनायां पुनः क्रियमाणायां शास्त्रार्थ एव बाधितः स्यात्। यथेच्छादीनामात्माधर्मत्वं कल्पयन्तो वैशेषिका नैयायिकाश्चोपनिषच्छास्त्रार्थेन न सङ्कच्छन्ते तथेयमपि कल्पनोपनिषच्छास्त्रार्थबाधनाच्चादरणीया"।

"काममय एवायं पुरुष इति यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत् कर्म कुरुते यत् कर्म कुरुते तदभिसम्पद्यते" इत्युपक्रम्य "तदेव सक्तः सह कर्मणैति लिङ्गं मनोयत्र निषक्तमस्य। प्राप्यान्तं कर्मणस्तस्य यत् किञ्चेह करोत्ययम्। तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे" इति श्लोकमुदाहृत्य "इति तु कामयमान" इत्युक्त्वा कामयमानस्यैव जन्मादिहेतुत्वमुक्त्वा

"अथाकामयमानोयोऽकामोनिष्काम आप्तकाम आत्मकामोन तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति इ० उप०। "इति तु एवं तु कामयमानः संसरति यस्मात् कामयमान एवैवं संसरत्यथ तस्मादकाययमनो न कचित् संसरति फलासक्तस्य हि गतिरुक्ता। अकामस्य हि क्रियानुपपत्तेः अकामयमानो उच्यते। एवं कथं पुनरकामयमानो भवति?। योऽकामो भवत्यसावकामयमानः। कथमकामता? इत्युच्यते। यो निःकामो यस्माद्विगताः कामाःसोऽयं निष्कामः। कथं कामा निर्गच्छन्ति?। य आप्तकामो भवति। आप्ताः कामा येन स आप्तकामः। कथमाप्यन्ते कामाः? आत्मकामत्वेन यस्मात्सैव नान्यः कामयितव्यो वस्त्वन्तरभूतः पदार्थो भवति। आत्मैवान्तरो बाह्यः कृत्स्नः प्रज्ञानघन एकरसो नोर्ध्वं न तिर्यङ्नाधः। आत्मनोऽन्यत्कामयितुम् "यस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् श्रृणुयान्मन्वीत विजानीयाद्वा" एवं विजानन् किङ्कामयेत?। आयमानो ह्यन्यत्वेन पदार्थः कामयितव्यो भवति। न चासावन्यो ब्रह्मविद् आप्तकामस्यास्ति। य एवात्मकामतयाऽऽप्तकामः स निष्कामोऽकामोऽकामयमानश्चेति उच्यते। न हि यस्मात्सैव सर्वं भवति तस्यानात्मा कामयितव्योऽस्ति। अनात्मा चान्यः कामयितव्यः। सर्वज्ञात्सैवाभूदिति प्रतिषिद्धम् सर्वात्मदर्शिनः कामयितव्याभावात् कामानुपपत्तिः। ये तु प्रत्यवायपरिहारार्थं कर्म कल्पयन्ति ब्रह्मविदोऽपि तेषां नात्मैव सर्वं भवति। प्रत्यवायस्य जिहासितव्यस्यात्मनोऽन्यस्याभिप्रेतत्वात्। येन चाशनायाद्यतीतो नित्यं प्रत्यवायासम्बद्धो विदित आत्मा तं वयं ब्रह्मविदं ब्रूमः। यश्च नित्यमेवाशनायाद्यतीतमात्मानं पश्यति। यस्माच्च जिहासितव्यमन्यदुपादेयं वा यो न पश्यति तस्य कर्म न प्रकृत एव सम्बद्धुम्। यस्तत्ब्रह्मवित्तस्य भवत्येव प्रत्यवायपरिहारार्थं कर्मेति न विरोधः। अतः कामाभावाद्कामयमानो न जायते उच्यत एव। तस्यैवमकामयमानस्य कर्माभावे गमनकारणाभावात् प्राणा वागादयो नोत्क्रामन्ति नोर्ध्वं क्रामन्ति देहात्। स च विद्वानाप्तकाम आत्मकामतया इहैव ब्रह्मभूतः। सर्वात्मनो हि ब्रह्मणो दृष्टान्तत्वेन प्रदर्शितमेतद्रूपम्। "तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपमिति"। तस्य हि दार्ष्टान्तिकभूतोऽयमर्थ उपसंहियते। अथाकामयमान इत्यादिना। स कथमेवम्भूतो उच्यते? इत्युच्यते। यो हि सुषुप्तावस्थमिव निर्विशेषमहैतमलुप्तचिद्रूपज्योतिःस्वभावमात्मानं पश्यति तस्यैवाकामयमानस्य कर्माभावे गमनकारणाभावात् प्राणवागादयो नोत्क्रामन्ति। किन्तु विद्वान् स इहैव ब्रह्म भवति यद्यपि देहवानिव लक्ष्यते। स ब्रह्मैव सन् ब्रह्माप्येति। यस्मान्हि तस्याब्रह्मत्वपरिच्छेदहेतवः कामाः सन्ति। तस्मादिहैव ब्रह्मैव सन् ब्रह्माप्येति न शरीरपातोत्तरकालम्। न हि विदुषो मृतस्य भावान्तरापत्तिर्जीवतोऽन्यो भावः देहान्तरप्रतिसन्धानाभावमात्रेणैव तु ब्रह्माप्येतीत्युच्यते। भावान्तरापत्तौ हि मोक्षस्य सर्वोपनिषद्विज्ञितोऽयं आत्मैकताख्यः स बाधितो

भवेत् । कर्महेतुकश्च मोक्षःप्राप्नोति न ज्ञाननिमित्त इति । स चानिष्टःअनित्यत्वञ्च मोक्षस्य प्राप्नोति । न हि क्रियानिर्वृत्तोऽर्थो नित्यो दृष्टः । नित्यश्च मोक्षोऽभ्युपगम्यते । "एष नित्यो भक्तिमेति" मन्त्रवर्णात्" इ० उ०भा० । २परमात्मनि तस्य सर्व्वेषामात्मत्वेनान्यकामयितव्याभावात् आप्तकामत्वम्" आप्तः युक्तः उचितः कामः इच्छा यस्य इति विग्रहे तु । नैयायिकमतसिद्धे ३ईश्वरे च सङ्गियवकेच्छाश्रयत्वादीश्वरस्य तथात्वम् ।

आप्तकारिन् त्रि० आप्तं युक्तं करोति क्त-णिनि ईत० । १युक्तकारके आप्तवासौ कारो । २प्रत्ययिते आप्तकारके भृत्यादौ । "अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः" मनुः । "भोज्यादीनाञ्च सर्वेषां सुहृदामाप्तकारिणाम्" "अन्विष्य दाक्षयामास पुरुषैराप्तकारिभिः" भा० । भा० आश्व० प० ११अ० ।

आप्तगर्भा स्त्री आप्तो गर्भो यया । गर्भिण्याम् स्त्रियाम् ।

आप्तवाच् स्त्री आप्ता युक्ता प्रमादादिदोषशून्या वाक् । १वेदे तन्मूले २स्मृतीतिहासपुराणादौ च "आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा"रघुः आप्तवचनाप्तवाक्यादयोऽप्यत्र न० । आप्ता युक्ता वाग् यस्य । प्रमादशून्यवाक्ये महर्षिप्रभृतौ त्रि० । आप्तवचनाप्तवाक्यादयोऽप्यत्र त्रि०

आप्तश्रुति स्त्री कर्म्म० । १वेदे २स्मृत्यादौ च आप्तशब्दे उदा० ।

आप्ति स्त्री आप-क्तिन् । १संयोगे, २संप्राप्तौ ३स्त्रीसंयोगे" मेदि० ४संबन्धे, ५लाभे हेम० ६समाप्तौ "कामस्याप्तिं जगतः प्रतिष्ठाम्" कठोप० । कामस्याप्तिं समाप्तिम् तत्र हि सर्व्वे परिकामाःसमाप्ताः" भा० ७समृद्धि च "सैवास्याप्तिर्यां सम्पत्"शत० ब्रा० । तत्र संबन्धे "स्तुतोराप्तिमतिसृज्यते"शत० ब्रा० । लाभे"सर्वावाप्त्यै सर्वस्यावरुद्ध्यै" शत० ब्रा० "तपः किलेदं तदवाप्तिसाधनम्"कुमा० "दीक्षां विवेश धर्म्मात्मा वाजिमेधाप्तये ततः" भा० आश्व० १८अ० । ८उत्तरकाले आयतौ च तिकाण्ड० ।

आप्य त्रि० आप-तव्य वेदे नि० । १आप्तव्ये "पनित आप्त्रो यजतः"ऋ०५,४१,६। "आप्यः आप्तव्यः"भा० लोके तु आप्तव्य इत्येव । आप्नुमर्हति यत् । २आप्नियोग्ये त्रि० ।

आप्नवान पु० अप्नवानस्य स्वार्थे अण् । अप्नवानशब्दार्थे वत्सगोत्र प्रवरे ऋषिभेदे ।

आप्य त्रि० अपामिदम् अण् चातु० स्वार्थे ष्यञ् । १जलसम्बन्धिनि अपां विकारे तु अक्षय्यमित्येव" सि० कौ० आपयत् । २आप्ये त्रि० "योनोनेदिष्ठमाप्यम्" ऋ० ७,१५२, २चाक्षुषमन्वन्तरीये देवभेदे च । "चाक्षुषस्यान्तरे तात ! मनोर्देवानिमान् शृणु । आप्याः प्रसूता ऋभवः पृथुकाश्च दिवौकसः । लेखानाम महाराज पञ्च देवाः प्रकीर्त्तिता" हरिवं १७अ० । "मानुषा आप्यापाला अर्यते देवताप्याः साध्याः अन्याध्या मरुतः" इति शत० ब्रा० कर्म्मभिराप्यत्वात्तेषामाप्यत्वम् द्रष्टव्यम् । ४(कुड)वृक्षे पु० रायमुकुटः ।

आप्यान न० आ+प्याय-भावे क्त । १प्रीतौ २वृद्धौ च । कर्त्तरि क्त । ३प्रीते ४वृद्धे च त्रि० ।

आप्यायन न० आ+प्याय-ल्युट् । १वृद्धौ, २प्रीतौ च । णिच् ल्युट् । ३तर्पणे प्रीणने ४वर्द्धने च "अग्नेः सोमयमाभ्यां च क्रताप्यायनमादितः"मनुः । ल्यु । ५प्रीणनकर्त्तरि त्रि० । "पितृप्रसादमिच्छेयं तप आप्यायनं पुनः" भा० व० प० ८२अ० । "दैवं हि पित्रकार्य्यस्य पूर्व्वमाप्यायनं स्मृतम्" मनुः तन्त्रोक्ते दैवीजघीयमन्त्रसंस्कारभेदे "मन्त्राणां दशकल्पज्ञे संस्काराः सिद्धदायिनः । जननं जीवनं पश्चात्ताड़नं बोधनं तथा । अधाभिषेको विमलीकरणाप्यायने तथा । तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंक्रियाः" इति विभज्य ।"कुशोदकेन मन्त्रेण प्रत्यृचं प्रोक्षणं मनोः । तेन मन्त्रेण विधिवदेतदाप्यायनं मतम्" श्रा० त० उक्तम् ।

आप्यायित त्रि० आ+प्याय-णिच्-क्त । १प्रीणिते २पूरिते ३वर्द्धिते च । "एषा सूर्य्यस्य वीर्य्येण सोमस्याप्यायिता तनुः । पौर्णमास्यां स दृश्येत संपूर्णो दिवसक्रमात्"कू० पु० । ४आनन्दिते च ।

आप्र त्रि० आ+पॄ मूल०क । १पूरके । "स्वर्जेषे भर आप्रस्य वक्षणिः" ऋ० १,१३२,२ "चतुर्भिरप्रस्य वरुणस्याग्नेरापा द्यावा" सूर्य्योपस्थानमन्त्रः ।

आप्रच्छन न० आ+प्रच्छ-ल्युट् । गमनागमनसमये १बन्धूनामन्योन्यकुशलजिज्ञासायाम् २आनन्दसम्पादने च ।

आप्रच्छन्न त्रि० आ+प्र-च्छद-क्त । १अत्यन्तगुप्ते २ईषद्गुप्ते च अस्याप्रच्छन्नार्थत्वोक्तिः शब्दकल्पद्रुमे प्रामादिकी हेमचन्द्रे आप्रच्छन्नमित्येव पाठः द्वित्वनकारयुक्तपाठस्तु प्रमादिकः ।

आप्रपद अव्य० प्रपदं पदाग्रं तत्पर्य्यन्तम् अव्ययी० । पादाग्रपर्य्यन्ते

आप्रपदीन त्रि० आप्रपदं पादाग्रान्तं व्याप्नोति ख । पादाग्रान्तं व्याप्यमाने वस्त्रादौ । [ईषद्वृत्ते ।

आप्रवण त्रि० ईषत् प्रवणः । ईषद्व्यधे आ+प्रु-ल्युट् ।

आप्री स्त्री आप्रीणात्यनया आ-प्री-ड गौरा० ङीष् । प्रवाजवाज्यायाम् "प्रैषेभिः प्रैषेणाप्रोत्याप्रीभिराप्रीयैषस्य" यजु० १६,१६ । "आप्रीभिः प्रवाजवाज्याभिः"

वेददी० ताश्च याज्याः सूक्तविशेषात्मका गोत्रभेदेन भिन्नरूपाः "एकादश प्रयाजाः तेषां पैषाः प्रथमं प्रैषसूक्तसूक्तं हितीये । अध्वर्युप्रेषितोमैत्रावरुणः प्रेष्यति प्रैषैर्होतारम् । होता यजत्वाग्नीभिः प्रैषलिङ्गाभिः" इत्युपक्रम्य "समिधो अग्निरिति" शुनकानां "जुषस्व नः समिधमिति वशिष्ठानां, "समिधो अद्यौति"सर्वेषाम् यथाऋषि वा"इति आश्व० श्रौ० गोत्रभेदेन सूक्तभेदस्योक्तेः । अत्र नारायणवृत्तिः । "यो यस्य ऋषिसूदानुगुणं यथर्षिशब्देनोच्यते तथा वाऽऽग्नीसूक्तं गृहीतव्यम् । स्वयं वा ऋषिनामधेयसूक्तानुगुणा आग्नयः कर्त्तव्या इत्यर्थः । तत्र भगवता शौनकेन यथाऋषिपक्षे आग्नेयविवेकार्थमेव श्लोक उक्तः।"कण्वाङ्गिरोऽगस्त्यशुनका विश्वामित्रोऽत्रिरेव च । वशिष्ठः कश्यपो वाध्र्यश्वो जमदग्निरयोत्तमः" । तत्र दशानां सूक्तानां प्रथमं कण्वानाम् "समिधो न आवह" इति । हितीयं तद्गोत्रानामङ्गिरसाम्, "समिधो अग्न आवह"इति । तृतीयमगस्त्यानाम्, "समिधो अद्य राजसि" इति। चतुर्थं शुनकानाम्, "समिधो अग्निनिहितः" इति । पञ्चमं विश्वामित्राणाम्, "समित्समित्सुमनाः" इति । षष्ठमत्रीणाम्, "ये समिद्धाय शोचिषे" इति । सप्तमं वशिष्ठानाम्, "जुषस्व नः समिध" इति । अष्टमं कश्यपानाम् "समिधो विश्वतस्पतिः"इति । नवमं वाध्र्यश्वानाम्, "इमां मे अग्ने समिधं जुषस्वेड" इति । शुनकवाध्र्यश्वानाम् भृगूणां दशमं, "समिधो अद्य मनुषो दुरोणः" इति यथर्षिपक्षे विवेकोऽयम्" ।

आप्रीत त्रि० आ+प्री–क्त । १सम्यक्प्रीते २ईषत्प्रीते च । भावे क्त । सम्यक्प्रीतौ न० ।

आप्रीतप पु० आप्रीतं पाति पा–क । विष्णौ "अथ यद्याप्यायमानः किञ्चिदाप्रद्येत विष्णवेऽप्रीतपाय स्वाहेति जुहुयात् विष्णुर्हि स तस्मादाप्रीतपा भवत्यपपाप्मानं हत उपैनं यज्ञोनमति"शत० ब्रा० । क्विप् । आप्रीतपा अप्यत्र ।

आप्लव पु० आ+प्लु–घञ्भावपक्षे अप् । १स्नाने, जलानां सर्व्वतः सञ्चलने । ल्युट् आप्लवनम् तत्रैव न० ।

आप्लवव्रतिन् पु० आप्लवः समावर्त्तनस्नानमेव व्रतमस्यास्य इनि । स्नातके भेदे वस्तु वेदानधीत्य दारपरिग्रहार्थं कृतसमावर्त्तनस्नानः दारलाभात् प्राक् स्नार्त्तं व्रतविशेषमाचरति तादृशे द्विजे "अलाभे चैव कन्यायाः स्नातकव्रतमाचरेत्" स्मृत्युक्तं व्रतं च दर्शितं विधानपा० यथा "स्नात्वैवं विधिना काले मासमात्रमपि द्विजः । अनाश्रमी न तिष्ठेत्तु सुखस्थस्तु प्रयत्नवान् । निःक्षीरोगादितोभीत आपद्योऽन्यैव कारणैः । स्नातकः प्रयतो वह्निं न त्यजेदिति वै श्रुतिः । नित्यदा ब्रह्मचारी स्यात् पञ्चयज्ञपरायणः । जपतीर्थरतोवा स्यात् स्नातकोलौल्यवर्ज्जितः । श्राद्धे निमन्त्रितो गच्छेत् कुर्य्यात् षट्कर्म्म च द्विजः । येन केनाप्युपायेन व्रतचर्य्यां न लोपयेत् । यक्षान् जुहुयात् प्रातः" स्मृतिः अत्र प्रातरितिविशेषणात् न सायम् । तेन प्रातः सन्ध्यामुपास्याग्निकार्य्यं कृत्वा यक्षहोमः कार्य्यः तन्मन्त्राश्च तैत्तिरीयारण्यके पठिताः "दैवतस्त्वेनसोऽवयजनमसि स्वाहेत्यादिकाः । तदीय होमद्रव्यविशेषोबौधायनेनोक्तः "सएव उपनयनप्रभृति व्याहृतिभिः षड्भिरेव समिद्भिः आ समावर्त्तनात् । समावर्त्तनप्रभृति आज्येनैव आ पाणिग्रहणात् । पाणिग्रहणप्रभृति व्रीहिभिर्यवैर्वा व्यस्तेनैकेन पक्षाहुतो जुहुयात्" "वैश्वदेवं स्विष्टस्यस्य प्रत्यहारब्धं भवेत् । स्नातकेनापि तत्कार्य्यं पृथक्पाको स्विष्टे यदि" शौनकः । "यज्ञोपवीतद्वितयं सोदकं च कमण्डलुम् । ऊर्ध्वज्ञोष्णीषमाले च पादुके चाप्युपानहौ । रौक्मे च कुण्डले वेणुं ऊर्ध्वकेशनखः शुचिः । स्वाध्याये नित्ययुक्तः स्यात् बहिर्मालञ्च धारयेत् । शुक्लाम्बरधरोनित्यं सुगन्धः प्रियदर्शनः । न जीर्णमलवद्वासा भवेच्च विभवे सति । न रक्तसूत्रं चान्यद्वृतं वासो न कन्थिकाम्" कूर्म्मपु० । "उपानहौ च वासश्च धृतमन्यैर्न धारयेत् । उपवीतमलङ्कारं स्रजं कनकमेव च" मनुः । "स्नातः सन्वहेत् कन्यां प्रव्रजेत्तदनिच्छुकः । वनस्थो वा भवेद्विप्रः सुखस्थो विधिना शुचिः । अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः । आश्रमेण विना तिष्ठन् प्रायश्चीयते हि सः"इति विधा पा० धृता स्मृतिः । तस्य कन्यालाभार्थं काम्यजप उक्तः ऋग्विधाने "सुषुम्णं प्रजपेत् सूक्तमथ सम्यक् शिवालये । अयुतं तु जपेत् कन्यां यथेप्सासाद्य लभते नरः" इति ।

अथानाश्रमदोषविधये किञ्चिदुच्यते स्नातको हि स्विष्टस्यभेदोद्विजातिमात्रः समावर्त्तनस्नानस्य तेषामेव सम्भवात् । अतस्तद्विषयकमेवानाश्रमादिदोषोत्कीर्त्तनम् । तथा हि विधानपारिजातधृतयोः स्मृत्योः "स्नात्वैवं विधिना काले" इत्यादौ स्नातः सन्वहेत् कन्यामित्यादौ चोपक्रमे द्विजातिविषयकत्वावगमेन उपसंहारे अनाश्रमदोषकीर्त्तनं तद्विषयकमेव उपक्रमोपसंहारयोरेकविषयकत्वौचित्यात् । एतेन"स्वीकरोति यदा वेदं चरेद्वेद-

व्रतानि च । ब्रह्मचारी भवेदूर्द्धं ततः स्नातो भवेद्गृही । द्विविधो ब्रह्मचारी तु स्मृतः शास्त्रे मनीषिभिः । उपकुर्व्वाणकस्त्वाद्यो द्वितीयो नैष्ठिकः स्मृतः । योऽष्टचत्वारिंशदब्दं गुरुकुलाश्रमस्थाय ब्रह्मचारी भवेत् पुनः । न यतिर्न वनस्थश्च सर्वाश्रमविवर्जितः । अनाश्रमो न तिष्ठेत्तु दिनमेकमपि द्विजः । आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते हि सः । जपे होमे तथा दाने स्वाध्याये च रतस्तु यः । नासौ तत्फलमाप्नोति कुर्व्वाणोऽप्याश्रमाच्युतः । त्रयाणामानुलोम्यं हि प्रातिलोम्यं न विद्यते । प्रातिलोम्येन योयाति न तस्मात् पापकृत्तमः" दक्षवचनमपि वेदाध्ययनोत्तरस्नातकानामेवोपक्रमे कीर्त्तनात् अन्ते च त्रयाणामाश्रमाणामानुलोम्यविधानाच्च द्विजमात्रविषयकम् यत्तु तद्वाक्यैकदेशमादाय रघुनन्दनेन अनाश्रमी न तिष्ठेत्त्वित्यादि वाक्यं शूद्रोपलक्षणपरमुक्तं न तदुक्तसुपक्रमोपसंहाराभ्यां द्विजमात्रविषयकत्वनिश्चयात् । किञ्च त्रयाणामानुलोम्योक्तेरपि न शूद्रविषयकत्वं तत्प्रदर्शितवामनपुराणवचने शूद्रस्यैकमात्राश्रमावगतेः तथा च येषामेव आश्रमचतुष्टयं तत्त्रयं तद्द्वयं वा सम्भवति तेषामेवानुलोम्यप्रातिलोम्यसम्भव एकमात्राश्रमस्य शूद्रस्य कथन्तरामानुलोम्यप्रातिलोम्यसम्भवः । एतेन "व्रतेषु लोपकोपश्च आश्रमाद्विच्युतश्च यः । संदंशयातनामध्ये पततस्तावुभावपि" इति भविष्यपुराणवचनेन दक्षस्मृतेः सङ्कोचनमपि परास्तम् "श्रुतिस्मृतिपुराणानां विरोधो यत्र दृश्यते । तत्र श्रौतं प्रमाणं तु तयोर्द्वैधे स्मृतिर्वरेति" विधान पा० धृतव्यासवाक्येन पुराणापेक्षया स्मृतेर्बलवत्त्वकीर्त्तनेन पुराणेन स्मृतेर्बाधस्यायोग्यत्वात् "विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमिति" जैमिनिसूत्रेण श्रुतिस्मृत्योर्विरोधे स्मृतेरप्रामाण्यस्यैव स्मृतिपुराणयोर्विरोधेऽपि पुराणस्याप्रामाण्यस्यैवोचितत्वात् वस्तुतः नात्र विरोधः "स्मृत्यन्तु विधेर्नान्यैरुपसंहार दृश्यते" इतिन्यायेनार्थक स्मृतौ द्विजपदस्य स्मृतया अन्योपसंहारकत्वासम्भवेन पौराणिकयच्छब्दस्यास्मदार्थकतया तत्परत्वकल्पनेनैवोपपत्तौ विरोधाभावात् तथा च भविष्यपुराणवचनमेव द्विजातिविषयकं न शूद्रविषयकमिलेव कल्पनीयमिति । अत्रेदं विवेक्तव्यं किं पौराणिकास्मदार्थकयच्छब्दस्य यावद्वर्णविषयकत्वमुत स्मदार्थकस्मृत्येकवाक्यतया त्रैवर्णिकमात्रविषयकत्वं तत्र पुराणेन स्मृतेर्बाधायोगेन पौराणिकयच्छब्दस्यैव स्मृत्युक्तविप्रस्वे परत्वकल्पनं युक्तमित्युपस्थामः । यदपि 'चत्वार आश्रमास्तथैव ब्राह्मणस्य प्रकीर्त्तिताः । ब्रह्मचर्य्यञ्च गार्हस्थ्यं वानप्रस्थञ्च भिक्षुकम् । क्षत्रियस्यापि कथिता आश्रमास्त्रय एव हि । ब्रह्मचर्य्यञ्च गार्हस्थ्यमाश्रमद्वितयं विशः । गार्हस्थ्यमुचितं त्वेकं शूद्रस्य क्षणमाचरेत्" वाम० पु० वाक्यं तत् शूद्रस्य गार्हस्थ्यमात्राधिकारबोधकम् । न तु तदकरणे पापजनकताबोधकमपि उचितमिति पदस्वारस्यात् उचितपदस्य योग्यार्थकत्वात् तेनैव उद्वा० त० क्षणमुत्सवमिति व्याख्यानेन तदीयस्मृत्याश्रमस्योत्सवार्थकत्वोक्त्या काम्यत्वसूचनात् "चत्वारिंशद्वत्सरांश्चाष्टावाद्यं परे यदि । स्त्रिया वियुज्यते कश्चित् स तु रण्डाश्रमी मतः । अष्टाचत्वारिंशदब्दं वयोयावन्न पूर्य्यते । भार्य्यापुत्रवियुक्तस्य नास्ति यज्ञेऽधिकारितेति" भविष्यपुराणवचनमपि यज्ञेऽधिकारिताप्रतिषेधात् द्विजविषयकमेव शूद्रस्य यज्ञेऽनधिकारात् । द्विजातीनामेव यज्ञीयाज्यावेक्षणादेः पत्नीसाध्यतया पत्न्यभावे कथमाज्यावेक्षणाद्यङ्गसिद्धिरिति युक्तः तेषामनधिकारः" यज्ञाधिकारे शूद्रस्य पर्य्युदस्ततया तदधिकाराभावकथनमनर्थकं स्यात् । अतो येषामेव यज्ञाधिकारस्तेषामेव भार्य्याराहित्ये अनधिकारिताप्रतिपादने वचनं सार्थकम् । तेन तदुद्विजविषयकमेव । एवं प्रागुक्तदक्षवचने जपेहोमे तथा दाने स्वाध्याये निष्फलत्वकथनमपि उपक्रमोपसंहाराभ्यां होमस्वाध्याययोर्द्विजातीनामेव सम्भवाच्च द्विजातिविषयकमेव । अतः शूद्राणां विवाहस्य उत्सवार्थतया काम्यत्वेनाकरणे न पत्न्यवाय इति सुस्थितम् । एतेन बहुविवाहवादे मया दक्षवचनस्य द्विजपदस्योपलक्षणार्थकत्वं यत् खण्डितं तत् सुस्थितमेवेति द्रष्टव्यम् ।

आस्राव पु० आ+स्रु-पचे घञ् । आस्रवशब्दार्थे । [व्याप्ते ।

आस्रावित त्रि० आ+स्रु-णिच्-क्त । जलादिप्रवाहेनाभि-

आस्राव्य त्रि० आ-स्रु-नि० कर्त्तरि यत् । १आस्रवनकारके । भावे यत् । २कर्त्तव्यास्रवने न० । कर्मणि यत् । जलादिना ३अभिव्याप्ते त्रि० ।

आस्रुत त्रि० आ+स्रु-क्त । १स्नाते २आर्द्रीभूते च ३स्नातके गृहस्थभेदे पु० । भावे क्त । ४स्नाने न० ।

आस्रुतव्रतिन् पु० आस्रुतस्य स्नातस्य व्रतमस्यास्य इनि । स्नातके गृहस्थभेदे । आस्रवव्रतिशब्दे विवृतिः ।

आस्रुत्य अ० आ+स्रु-ल्यप् । स्नात्वेत्यर्थे, २उत्स्रुत्य उल्लङ्घ्येत्यर्थे च ।

आस्रुष्ट त्रि० आ+स्रुष-क्त । १दग्धे २सस्यन्दमाने च ।

आप् पु० आप-क्विप् । वायौ सि० कौ० कण्ठस्थाने उच्चल० वन्प्रत्ययाधिकारे उणादौ निपा० अदन्तश्चायम् । शब्दकल्पद्रुमे नान्तत्वकल्पनं चिन्त्यम् । [वैद्यकम् ।

आफूक न० ईषत् फूत्कारइव फेनोऽत्र ष्ठ० तलोपः । अफेने

आबद्ध न० सम्यक् आबद्धम्+बन्ध-भावे क्त । दृढबन्धने । १आधारे क्त । २प्रेमणि । कर्मणि क्त । ३बद्धे ४आप्ते ५प्रतिरुद्धे च त्रि० । "पयोधिमाबद्धचलज्जलाविलम्" माघः "आबद्धभीमभ्रुकुटीकरालम्" भट्टिः । "स्यन्दनाबद्धदृष्टिषु" रघुः । ६भूषणे च । बा०करणे क्त । ७योक्त्रे ।

आबन्ध पु० आ+बन्ध-घञ् । १दृढबन्धे, करणे घञ् । २योक्त्रे आधारे घञ् । ३प्रेमणि च । ल्युट् आबन्धनमप्यत्र न० ।

आबर्ह पु० आ+बर्ह-हिंसायां घञ् । १उत्पाटने २हिंसने च ल्युट् । आबर्हणमप्यत्र न० ।

आबर्हिन् त्रि० आबर्होऽस्यास्य इनि । उत्पाटनयुक्ते "मूलमस्यावर्हि" या० आबर्ह आबर्हणं तदस्यास्ति आबर्हि" सि० कौ० ।

आबाध पु० आ+बाध-घञ् । पीड़ायां "आबाधे" या० "आबाधे पीड़ायाम्" सि० कौ० "यथाशक्तिसङ्घः कुर्यात् प्राणाबाधभयेषु च" "न चैनं पादतः कुर्यान्न प्राणाबाधमाचरेत्" मनुः "तत्र मनःशरीराबाधकराणि शस्त्राणि" सुश्रु० नास्ति बाधा यस्य । २पीड़ाशून्ये त्रि० ।

आबाधा स्त्री आ+बाध-भावे अ । १पीड़ायाम् २तापक्लेशे च । "आबाधामरणभयार्चिषा चिराय" किरा० लोलावत्युक्ते २अबाधाशब्दार्थे २२६पृष्ठे विवृतिः ।

आबिल त्रि० आ+बिल-भेदने क । १अस्वच्छे कालुष्ययुक्ते अस्वच्छस्य हि जलादेः सम्यग्दृष्टिप्रसारभेदनात्तथात्वम् । "पयोधिमाबद्धचलज्जलाविलम्" माघः । २भेदके त्रि० ।

आबिलकन्द पु० आबिलोभूमेराभेदकः कन्दो मूलमस्य । माषाकन्दे क्षुपभेदे तस्य माषाकारकन्दतया भूमेः सम्यग्भेदनात्तथात्वम् ।

आवृत्त पु० आपनमाप् क्विप् आपे प्राप्ते उत्ताम्यति उद्+तम-ड । नाप्योक्तौ भगिनीपतौ । बडप्राप्तौ सत्योषाभावेन तु खित्वात्तस्य तथात्वम् । [२मेघसम्बन्धिनि च ।

आब्द त्रि० अब्दे मेघे भवः तस्येदम् इति वा अण् । १मेघभवे

आभग पु० सम्यक् भगं माहात्म्यं यस्य । आभाग्यदेवे "सोमोमूत्यावपानेडा भगोदेवोदेवेष्वभगः" ऋ० १,२९,४

आभञ्जन न० आ+भञ्ज-ल्युट् । निरूपणे शब्दचि० ।

आभयजात्य पुंस्त्री अभयजातस्यापत्यं गर्गा० यञ् । अभयजातस्यापत्ये स्त्रियां ङीप् यलोपः । ततः कण्वा० अण् यलोपः । आभयजातः तदपत्ये पुंस्त्री स्त्रियां ङीप्

आभरण न० आ+भृ-कर्मणि ल्युट् । भूषणे । "किमित्यपास्याभरणानि यौवने" कुमा० "वेषाभरणसंशुद्धाः स्त्रियो नृपसमाहिता" "वाङ्मयानि च सर्वाणि शस्त्रास्त्राभरणानि च" मनुः "पाण्डवानां सभामध्येऽदर्शयोधन उपागत । तस्मै गाञ्च हिरण्यञ्च सर्वास्त्राभरणानि च" विद्धशालभ० भावे ल्युट् । २सम्यक्पोषणे न० ।

आभरित त्रि० आभर आभरणं जातोऽस्य इतच् आ+भृ-बा० इतच् इट् च १पूरिते २अलङ्कृते । "हस्ताभरणपूर्णेन केयूराभरितेन च" हरिवं० १६अ० ।

आभर्त्मन् न० आ+भृ+मनिन् । १सम्यग्भरणे गर्भादेः २पोषणे

आभा स्त्री आ+भा-अङ् । १दीप्तौ, २शोभायाम् कान्तौ, ३उपमाने, आभा "वल्लपर्य्यायः कथितः कोविदैरिह" भा० प्र० उक्ते ४बबूले च । "आभाफलत्विकैर्व्याप्तैः सर्वैरेभिः समीक्षितैः तुल्यगुणगुरायोक्योभरनसन्धिप्रसाधकः" चन्द्र० ।

आभाति स्त्री आभाति तुल्यरूपतया आ+भा-क्तिच् । प्रतिबिम्बे राजनि० । तस्य बिम्बतुल्यतया दीप्तेस्तथात्वम् ।

आभाषण न० आ+भाष-ल्युट् । परस्परकथने २आलापे "सम्बन्धाभाषणपूर्वमाङ्कः" रघुः । ३सम्बोधने च ।

आभाष्य त्रि० आ+भाष-ण्यत् । आमन्त्रणीये १संबोध्ये २आलाप्ये च "जनमाभाष्यमिमं न मन्यसे" रघुः । आ+भाष-ल्यप् । ५संबोध्येत्यर्थे अव्य० ।

आभास पु० आभासते आ+भास अच् । उपाधितुल्यतया भासमाने १प्रतिबिम्बे "आभासोरूपसदृश्यं कवत्" या० स्मृ० "बुद्धिवृत्तिचिदाभासौ द्वावेतौ व्याप्नुतो घटम् । तत्राज्ञानं धिया नश्येदाभासात्तु घटः स्फुरेत्" वेदा० का० । २दुष्टे हेत्वादौ "हेत्वाभासाश्च पञ्चधा" भाषा० । "सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकालाहेत्वाभासाः" गौ० सू० । पक्षसत्त्वसपक्षसत्त्वविपक्षासत्त्वाबाधितत्वासत्प्रतिपक्षितत्वोपपन्नोहेतुर्गमकः स इवाभासत इति हेत्वाभासस्तेन तद्भिन्नत्वे सति तद्धर्मवत्त्वम् पञ्चरूपोपपन्नत्वाभावे सति तद्रूपेणाभासमानत्वं हेत्वाभासत्वमिति फलितार्थः "हेत्वाभासाश्च यथोक्ताः" गौ० सू० । एवं प्रमाणाभासः युक्त्याभासः आगमाभासश्चादावपि प्रामाण्याद्यभावत्वे सति प्रमाणादिरूपेणाभासमानत्वमर्थः । "एवं बहवो विप्रतिपन्नायुक्तिवाक्यतदाभाससमाश्रयाः सन्तः" या० भा० ।

तथा च यद्वाचकपदोत्तरमाभासशब्दः प्रयुज्यते तस्य दुष्टत्वंतेन गम्यते । रसाभासादावपि तिर्य्यग्योन्यादिगतत्वेन परनायकगतत्वेन च दुष्टत्वाद्रसाभासत्वम् । पुनरुक्तवदाभासादौ च न दुष्टत्वम् किन्तु पुनरुक्तभिन्नत्वेनाभासमानत्वात् वस्तुतोऽपुनरुक्तत्वमेव गम्यते इत्येव तत्र विशेषः । "रसत इति रस इति व्युत्पत्तिदर्शनात् भावतदाभासादयोऽपि रसाख्याः" सा० द० तत्र रसाभासः "मधु द्विरेफः कुसुमैकपात्रे" इत्यादि । "अत्र हि सम्भोग शृङ्गारस्य तिर्य्यग्विषयत्वाद्रसाभासत्वम्" सा० द० । "आपाततोवदर्थस्य पुनरुक्तावभासनम् । पुनरुक्तवदाभासः" सा० द० । भावे घञ् । २तत्प्रकाशे । आभास्यतेऽनेन आ+भास-णिच्-करणे अच् । ३तन्त्रावतारशास्त्रे ४तन्त्राभिप्रायवर्णने व्याख्यानांशभेदे च ।

आभासुर त्रि० आ+भास-उरच् । सम्यग्दीप्तिशीले ।

आभास्वर त्रि० आ+भास-वरच् । १सम्यग्दीप्तिशीले चतुःषष्टितमे २गणदेवभेदे "आत्मा ज्ञाता दमोदान्तः शान्तिर्ज्ञानं शमस्तपः । कामः क्रोधोमदोमोहो द्वादशाभास्वरा इमे" इत्युक्ते १२द्वादशमिते गणभेदे च पु० । एषाञ्च स्वस्वदत्त्याभास्वरत्वात्तथात्वम् ।

आभिचरणिक त्रि० अभिचरणं प्रयोजनमस्य ठञ् । ऋग्यजुर्वेदादिप्रोक्ते शत्रुप्रभृतेर्मारणोच्चाटनवशीकरणादिरूपाभिचारसाधने १मन्त्रादौ तत्साधने २विधानभेदे च । "रौद्रं राक्षसमासुरमाभिचरणिकं मन्त्रसङ्घा पित्र्यमात्मानं चालभ्योपस्पृशेदपः" कात्या० १,१०,१४, "अभिचरणम् अभिचारः प्रयोजनमस्यासावाभिचारणिकः प्रयोजनमित्यर्थे ठञ् । "वधान देव ! सवितः परमस्यां पृथिव्यां शतेन पाशैर्योऽस्मान् द्वेष्टि यं च वयं द्विष्म सर्वतोमा मौक्" यजु० १,२५, "द्विषतो वधोऽसि य० १२८ इत्यादि तत्र शत्रुनामादिसंयुक्तः अभिचारार्थमेव प्रयुज्यमान आभिचरणिक इत्युच्यते तेनाभिचरणबुद्ध्यभावे मन्त्रस्याभिचरणप्रयोजनाभावान्नाभिचरणिकत्वम् अतस्तदुच्चारणे उदकस्पर्शाभाव" कर्कः । एवमन्येऽपि मन्त्रा अथर्ववेदोक्ता ज्ञेयाः । तद्विधानञ्च अथर्ववेदान्तर्गते आङ्गिरसकल्पे विस्तृतम् । एवं तन्त्रोक्ताभिचारविधानम् तन्त्रसारादौ विस्तृतम् । अभिचार+प्रयोजनार्थे ठञ् । आभिचारिकोऽप्यत्र । स्त्रियामभवत्त्वे ङीप् ।

आभिजन त्रि० अभिजनादागतः अभिजनस्येदं वा अण् । अभिजनाद्यादागते "तां पार्वतीत्याभिजनेन नाम्ना" कुमा० । २वंशसम्बन्धिनि च । [खिल्ये ३सौन्दर्य्ये च ।

आभिजात्य न० अभिजातस्य भावः ष्यञ् । १कौलीन्ये २पाभिजित त्रि० अभिजिति नक्षत्रे जातः अण् । अभिजिन्नक्षत्रे जाते तस्य वा लुक् । अभिजिदपि तत्रैवार्थे । अभिजित इदम् अण् । गवामयनान्तर्गताभिजिद्नामकदिनसम्बन्धिनि सामादौ त्रि० । [अभिजिद्भवे ।

आभिजित्य त्रि० अभिजिति भवः अण् ततः स्वार्थे यञ् ।

आभिधा स्त्री अभिधैव स्वार्थेऽण् । अभिधाशब्दार्थे १शब्दवृत्तिभेदे २कथने च

आभिधानक न० आभिधां तकति सहते अच् । शब्दे

आभिधानीयक न० अभिधानीयस्य भावः योपधगुरूपोत्तमत्वात् वुञ् । कथनीयत्वे

आभिप्लविक त्रि० अभिप्लवे विहितः ठक् । अभिप्लवविहित स्तुतसामादौ । अभिप्लवशब्दार्थश्च अभिप्लवशब्दे द्रष्टव्यः । तच्च साम "ज्योतिर्गौरायुर्गौरायुर्ज्योतिरित्यादि" स्तुते गेयम् । अभिप्लवाय हितः ठक् । गवामयनान्तर्गतषड्हभेदे पु० ।

आभिमानिक त्रि० अभिमानेन निर्वृत्तः ठक् । सांख्यमतसिद्धे अभिमानोत्पादिते उभयेन्द्रिये शब्दादिपञ्चमात्रे च । यथैषाभिमानिकत्वं तथोक्तं सां० प्र० भा० "तन्मात्रेन्द्रियाण्यभिमानवदुपादानकान्यभिमानकार्यद्रव्यत्वात् यद्यदेवं तद्तथम् यथा पुरुषादिरिति । नन्वभिमानवदुपादानमेवास्त्वभिमानमिति चेत् अहं गौर इत्यादि वृत्त्युपादानतया चक्षुरादिवत् ततसिद्धेः । अनेन चानुमानेन मन आद्यतिरेकिमात्रस्य तत्कारणतया प्रसाध्यत्वात् । अत्र चायमनुकूलस्तर्कः "बह्व स्यां प्रजायेयेत्यादि" श्रुतिस्मृतिभ्यस्तावद्भूतादिसृष्टेरभिमानपूर्व्वकत्वात् बुद्धि पूर्व्वकसृष्टौ कारणतयाभिमानः सिद्धः । तत्र चैकार्थ समवायप्रत्यासत्त्यैवाभिमानस्य सृष्टिहेतुत्वं लाघवात्"

आभिमुख्य न० अभिमुखस्य भावः ष्यञ् । अभिमुखत्वे आनुकूल्यार्थसम्मुखीभवने "प्राप्ताभिमुख्यः पुरुषः क्रियासु विनियुज्यते" वाक्यप० । "अनुकूलत्वे २विशेषादाभिमुख्येन चरन्तोऽभिचारिणः । स्यादिन्युन्मनिर्मन्मास्तथा स्त्रियंयच्च तद्विदाः" सा० द० । तत्र यात्रादौ राहोराभिमुख्य निषेधः ज्यो० त० "पश्चादर्के विधौ वह्नौ सौम्यां शे वायवे कुजे । रक्षोऽधीशे भगौ याम्यां गुरावीशे धनौ दिने । राहुर्यमति यामार्द्धादस्तगत्वा च वामतः । प्रतीच्यां वह्निकोणे तु ततः सौम्यामतोऽस्पृशे । ततः प्राच्यामतोवायौ तस्माद्याम्यां ततः शिवे । रवावेवमन्यवारेष्वूह्यमेवं क्रमेण हि

द्यूते युद्धे विवादे च यात्रायां सम्मुखस्थितम्। राज्ञं विवर्ज्जयेत् यत्राद्यदोच्चेत् कर्मणः फलम्" । एवं योगिन्याभिमुख्येऽपि गमनं न शस्तम् यथा "प्रतिपन्नवमी पूर्वे रामा रुद्राश्च पावके। शरस्त्वयोदशी याम्ये वेदा मासाश्च नैर्ऋते। षष्ठी चतुर्दशी पश्चात् वायव्यां सुनिपूर्णिमे। द्वितीया दशमी यज्ञे ऐशान्यामष्टमी कुबूः। योगिनी नवदण्डाश्च श्रेष्ठा वर्ज्या विशेषतः। दक्षसम्मुख-योगिन्यां गमनं नैव कारयेदिति" ज्यो०त०। पीयूष-धारायान्तु "पृष्ठतोदक्षिणे वापि योगिनीगमने हिता। वामसम्मुखयोर्नैव वायुमेवं चिन्तयेत्" जयकल्पलता वाक्ये तन्मूलके मुहूर्त्त० चि०वाक्ये च "नवभूम्यः शिववक्त्रयोऽन्तश्चिन्त्येऽर्कसुताः शक्रस्तुरङ्गतिथ्यः। द्विदशाभावसवश्च पूर्व्वतः खुत्तिथयः सम्मुखवामगा न शस्ताः" वामगाया अशुभत्वमुक्तम्। अनयोर्व्यवस्था देशभेदेन। कालपाशयो-राभिमुख्येन यानमपि न शस्तम् "कौबेरीतो वैपतोत्तेन कालो वारेऽर्कोद्ये सम्मुखे तस्य पाशः। यात्रायुद्धे सम्मुखे वर्ज्जनीयावेतौ रात्रौ व्यस्तसंज्ञौ विचिन्त्यौ" मुहू०। स्पष्टं रत्नसारे "रवावुत्तरतः कालः सोम्ये वायव्यभागके। भौमे तु पश्चिमे भागे बुधे नैर्ऋतकोणके। जीवे च याम्य दिग्भागे भृगौ चाग्नेयकोणके। शनौ तु पूर्व्व-दिग्भागे कालचक्रं प्रकीर्त्तितम्। पाशस्तत्सम्मु-खदिशि" कालामेलया पञ्चमदिशि पाश इत्यर्थः यथा रवौ दक्षिणस्यां, सोमे आग्नेय्यां, भौमे पूर्व्वस्यां, बुधे ऐशान्यां, गुरावुत्तरस्यां, शुक्रे वायव्यां, शनौ पश्चि-मायाम्। कालपाशयोराभिमुख्यं यात्रादौ निषिद्धं वामदक्षिणयोस्तु शुभाशुभफलकत्वं यथाह खरो० "दक्षि-णस्तु शुभःकालः पाशोवामदिगाश्रयः। यात्रायां समरे त्वेष्टस्ततोऽन्यत्र न शोभनः" "अन्यत्र सम्मुखपृष्ठभाग-योः" पी०धा०। रात्रौ तु कालपाशयोर्विपर्य्यासेन स्थितेस्तदनुसारेणैव फलम्। पूर्व्वादिदिगभिमुखानि नक्ष-त्राणि। "पूर्व्वादिषु चतुर्ष्विन्दु सप्त सप्तानलर्क्षतः" मुहू० तेन कृत्तिकादीनि सप्त पूर्व्वदिगभिमुखानि। मघादीनि सप्त दक्षिणाभिमुखानि। अनुराधादीनि सप्ताभिजित्कानि सप्त पश्चिमाभिमुखानि। धनिष्ठादीनि भरण्यन्तादीनि सप्त उत्तराभिमुखानि। तैस्तैर्नक्षत्रैस्तत्तद्दिगभिमुखगृहकरणं तत्र-वेशश्च शुभाय। "बहिर्द्वारं मन्दिरं तद्दिग्भवैरृक्षैः स्यात् सन्निवेशो न सर्व्वैः" वशि०। पूर्व्वादिदिगभिमुखा रा-शयो यथा। "पूर्व्वादिदिशु मेषाद्याःक्रमादुदिग्द्वारराशयः। दिग्द्वारराशयः सर्व्वे तदुदिग्यातुः शुभप्रदाः। तद्वर्गाश्च तदंशाश्च तद्दिग्यातुस्तथाविधाः" वशिष्ठः। "दिग्द्वारभे लग्नगते प्रशस्ता यात्रार्थदात्री जयकारिणी च। हानिं विनाशं रिपुतोभवञ्च कुर्य्यात् तथा दिक् प्रति-लोमलग्ने" इति मुहू०। शुक्राभिमुख्यं त्रिविधम् "उद-यति दिशि यस्यां, याति गोलभ्रमाद्वा, विचरति च भचक्रे यत्र दिग्द्वारभेषु। त्रिविधमिह सितस्य प्रोच्यते सम्मुखत्वं सुनिभिरुदयएव त्याज्यते तत्र यत्नात्" श्रीपतिः। "उदेति यस्यां दिशि यत्र याति गोलभ्रमाद्वाथ कुजद्भचक्रे। त्रिधोच्यते सम्मुखएव शुक्रो यत्रोदितस्तां तु दिशं न यायात्" मुहू०। "शुक्रः यस्यां दिशि प्राच्यां प्रतीच्यां वा कालवशेनोदयं करोति तत्र गन्तुः पुंसः शुक्रः सम्मुखः अयमेकः प्रकारः। अथ गोलभ्रमात्उत्तर दक्षिणगोलभ्रमणवशेन यस्यां दिशि उत्तरस्यां दक्षिणस्यां वा याति तत्र गन्तुः शुक्रः सम्मुखः स्यादिति द्वितीयः प्रकारः। प्राच्यादिदिग्द्वारकृत्तिकादिगतिवशेन यद्दिङ्नक्षत्रे शुक्रश्चरति तत्र दिशि गन्तुः शुक्रः सम्मुखःस्यादिति तृतीयःप्रकारः। तत्रोदयशुक्रे दोषा-धिक्यमिति" पी० धा०। अतएव वशिष्ठः "पश्चादभ्यु-दिते शुक्रे प्रतीचीं दक्षिणां दिशम्" इति उद-यदिग्गतस्यैव शुक्रस्याभिमुख्येयात्रादि न्यषेधत्। अत्रापवादः "बुधोऽनुकूलो यदि तत्र संचलन् रिपून् जयेच्चैव जयः प्रतीन्दुजे" मुहू०। शुक्राभिमुख्यादिदोषभङ्गा। "एवं विधे-ऽप्यास्फुजिते च यायाद्बुधोयदि स्यादनुकूलवर्त्मा" श्रीपतिः। अनुकूलः पृष्ठदिक्संस्थ" इति पी०धा०। अपवादा न्तरम् "नीचगोऽरिगृहस्थो वा वक्रगोवा पराजितः। यात्राभंगप्रदः शुक्रः स्वोच्चस्थश्चेद्धनप्रदः" इति नारदः। प्रतिशुक्रादिदोषोऽन्यां प्रथमयात्रायां रात्रौ च विजय यात्रायामेव यथाह रैभ्यः। "प्रतिशुक्रादिदोषोऽयं नूतने गमने स्मृतः। रात्रौ विजययात्रायां नान्यदा दोषमावहेत्" चन्द्रश्च नक्षत्रविशेषस्थितौ तदपवादः। "यावच्चन्द्रः पूर्वभात् कृत्तिकाद्ये पादे शुक्रोऽन्यो न दृष्टोऽ यद्दर्शे" मुहू०। "पौष्णादिवह्निभाद्यार्द्धं यावत्तिष्ठति चन्द्रमाः। तावच्छुक्रो भवेदन्यः सम्मुखे गमनं हितम्" पराशरः। रात्रौ विजययात्रायां विशेषः। मध्येमार्गं भार्गवास्तेऽपि राजा तावत्तिष्ठेत् सम्मुखत्वे-ऽपि तस्य" मुहू०। अत्रान्तादि शान्तिं कृत्वा यायात्। शान्तिश्च पी०धा० यात्राप्रकरणे दर्शिता ततएव ज्ञेया।

ऋषविजययात्रायां बुधकुजशुक्राभिमुख्यमपि निषिद्धम् । "प्रतिशुक्रं प्रतिबुधं प्रतिभौमं गतोऽपरः । बलेन शक्रक्रतुख्योऽपि हतसैन्योनिवर्त्तते" इति वशिष्ठः ।

एतदभिप्रायोणैव कुमा० वर्णितम् । "दृष्टिप्रपातं परिहृत्य तस्य कामः पुरःशुक्रमिव प्रयाणे" इति । दिगीशाभिमुख्येगमनंशस्तं प्रातिमुख्येऽशस्तम् । तत्र दिगीशाः "सूर्य्यः शुक्रः क्षमापुत्रःसैंहिकेयः शनिः शशी । सौम्यस्त्विदंगमन्त्री च पूर्व्वादीनां दिगीश्वराः । दिगीशाहे शुभा यात्रा पृष्ठाहे मरणं ध्रुवम्" ज्यो०त० ।

नववध्वागमनेऽपि शुक्राभिमुख्यनिषेधः सप्रतिसवः ज्यो० त० दर्शितो यथा ।

दीपिकायां "स्त्रीशुद्धालिघटाजसंगतरवौ काले विशुद्धे भृगुं संत्यज्य प्रतिलोमगं शुभदिने यात्रा प्रवेशोचिते । त्यक्त्वाहस्तु निरंशकं नववधूयात्राप्रवेशौ पतिः कुर्य्यादेकपुरादिषु प्रतिभृगोर्नेच्छन्ति दोषं बुधाः" । पैठीनसिः "गेहारामे कुचकुसुमयोः सम्भवो वा यदि स्यात् कालः शुद्धोन भवति यदा संमुखोवापि शुक्रः । मेषे कुम्भेऽलिनि च न भवेत् भास्करश्चेत्तथापि स्वामी भद्रेऽहनि नववधूं वेशयेन्मन्दिरं स्वम् । भर्त्तुर्गोचरशोभने दिनपतौ नास्तं गते भार्गवे सूर्य्ये कीटघटाजगे शुभदिने पक्षे च कृष्णेतरे । हित्वा च प्रतिलोमगौ बुधसितौ जीवस्य शुद्धौ तथा चानीता गुणशालिनी नववधूर्निर्व्योत्सवा मोदते । एकयामे चतुःशाले दुर्भिक्षे राष्ट्रविप्लवे । पतिना नीयमानायाः पुरः शुक्रोन दुष्यति" । तथा "काश्यमेषु यशिष्ठेषु भरद्वाजाङ्गिरसेषु च । भारद्वाजेषु वात्स्येषु प्रतिशुक्रोन दोषकृत्" शम्भोराभिमुख्यं पूजने निषिद्धं यथा "न प्राचीमयतः शम्भोर्नादोचीं शक्तिसंस्थिताम् । न प्रतीचीं यतःपृष्ठमतोदक्षं समाश्रयेत्" रुद्रया० । "यजमानः शम्भोः प्राचीमवस्थितये न समाश्रयेत् । शम्भोर्जगत्संहारकस्यायतः सांमुख्यात् पक्षवक्त्रपक्षे प्रधानं वक्त्रं प्राच्यवस्थितम् एकवक्त्रपक्षे सुतरां तथा" ति०त० रघु० ।

आभिरूपक न० अभिरूपस्य भावः मनो० वुञ् । सौन्दर्य्ये

आभिरूप्य न० अभिरूपस्य भावः ष्यञ् । सौन्दर्य्ये "आभिरूप्याच्च विप्राणां देवः सन्निध्यमृच्छति" हय० रा० ।

आभिषिक्त त्रि० अभिषिक्तमभिषेकः तेन निर्वृत्तः सङ्घा० अञ् । अभिषेकनिर्वृत्ते ।

आभिषेचनिक त्रि० अभिषेचनं राज्ञाभिषेकः प्रयोजनमस्य ठञ् राजाभिषेकसाधने द्रव्यभेदे "आभिषेचनिकं यत्ते रामार्थंसमुपकल्पितम् । भरतस्तदवाप्नोतु" भा० व० २७५ अ० । तत्तत्पदव्यादिविधानानि" भा० शा० प० ४० अ० पुराकल्पव्याजेनोक्तानि यथा "ततः प्रकृतयः सर्वाः पुरस्कृत्य पुरोहितम् । दध्नुर्धर्मराजानमादाय वस्त्रमङ्गलम् । पृथिवीञ्च सुवर्णञ्च रत्नानि विविधानि च । आभिषेचनिकं भाण्डं सर्वसम्भारसम्भृतम् । काञ्चनौदुम्बरास्तत्र राजताः पृथिवीमयाः । पूर्णाः कुम्भाः सुमनसोलाजा वर्हींषि गोरसम् । शमीपिप्पलपालाशसमिधो मधुसर्पिषी । स्रुव औदुम्बरः शङ्खस्तथा हेमविभूषितः । दाशार्हैर्णाभ्यनुज्ञातस्तत्र धौम्य पुरोहितः । प्रागुदक्प्रवणे वेदीं लक्षणेनोपलिख्य च । व्याघ्रचर्म्मोत्तरे शुक्ले सर्वतोभद्र आसने । हदपादप्रतिज्ञाने ऋतायनसमत्विषि । उपवेश्य महात्मानं कृष्णाञ्च द्रुपदात्मजाम् । जुहाव पावकं धीमान् विधिमन्त्रपुरस्कृतम् । ततउत्थाय दाशार्हः शङ्खमादाय पूजितम् । अभ्यषिञ्चत्पतिं पृथ्व्याः कृष्णीपुत्रं युधिष्ठिरम् । धृतराष्ट्रञ्च राजर्षिः सर्व्वाः प्रकृतयस्तथा । अनुज्ञातोऽथ कृष्णेन भ्रातृभिः सह पाण्डवः । पाञ्चजन्याभिषिक्तश्च राजाऽभूतसुखोऽभवत् । ततोऽन्तु वादयामासुः पणवानकदुन्दुभीन् । धर्म्मराजोऽपि तत्पूर्वं प्रतिजग्राह धर्म्मतः । पूजयामास तांश्चापि विधिवद्भूरिदक्षिणः । ततो नियुक्तसहस्रेण ब्राह्मणान् स्वस्ति वाचयन् । वेदाध्ययनसम्पन्नान् वृत्तशीलसमन्वितान्" । एतानि द्रव्यादीनि राजाभिषेचनिकानि ज्ञेयानि अधिकं राजाभिषेकशब्दे वक्ष्यते स्त्रियां ङीप् । अभिषेचनमधिकृत्य कृतोऽन्यः ठक् । अभिषेकाधिकारेण कृते २भारतान्तर्गते अवान्तरपर्वभेदे "आभिषेचनिकं पर्व्व धर्म्मराजस्य धीमतः" भा० आ० १ अ० । अभिषेचनं स्नानं प्रयोजनमस्य ठञ् । २स्नानार्थे विधाने तत्तत्पे ४द्रव्यमन्त्रादौ च स्नानविभाग पूर्वकं तत्तत्पद्रव्यविधानमन्त्रा उच्यन्ते । तत्र स्नानं तावत् सप्तविधम्" मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च । वारुणं मानसं चैव सप्त स्नानान्यनुक्रमात् । "आपोहिष्ठादिभिर्मान्त्रम् स्नदानमृच्च पार्थिवम् । आग्नेयं भस्मना स्नानं वायव्यं रजसा कृतम् । अङ्गिरातवर्षाभिः स्नानं तद्दिव्यमुच्यते । वारुणञ्चावगाहश्च मानसं विष्णुचिन्तनम्" योगिया० तत्र विशेषस्तेनैवोक्तः" "शङ्ख आपस्तु द्रुपदा आपोहिष्ठाघमर्षणम् । एतैस्तु पञ्चभिर्मन्त्रैर्मन्त्रस्नानं तदुच्यते" मन्त्राणां सकृच्छ्रयोविकल्पोवा शक्तिभेदया । तत्र वारुणं स्नानं सुखसमर्थं अन्यानि

स्नानानि "स्नानं तु द्विविधं प्रोक्तं गौणमुख्यप्रभेदतः। तयोस्तु वारुणं मुख्यं तत्पुनः षड्विधं स्मृतम्। नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम्। क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्त्तितम्" व्यासोक्तेः तत्र नित्यादीन्यनुपदं वक्ष्यन्ते। "असामर्थ्याच्छरीरस्य देश कालाद्यपेक्षया। मन्त्रस्नानादितः सप्त केचिदिच्छन्ति सूरयः जा० स्मृ०। "स्मृतेऽपि च द्विजातीनां मन्त्रवत् स्नानमिष्यते। विधिलोपं न ते कुर्य्युः सामर्थ्ये सति कर्म्मसु" जैमि० स्मृ० "अल्पत्वाद्धोमकालस्य बहुत्वात् स्नानकर्म्मणः प्रातर्नं तनुयात् स्नानं होमलोपोविगर्हितः" कात्या० स्मृ०। "प्रातः संक्षेपतः स्नानं शौचार्थं तु तदिष्यते। मन्त्रैस्तु विधिनिष्पाद्यं मध्याह्ने तु सविस्तरम्" वह्नि०। अत्यन्ताशक्तौ। "अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्म्मिणाम्। आर्द्रेण वाससा वापि मार्जनं कापिलं विदुः। ऋताभिमन्त्रितैस्तोयैः प्रोक्षयेन्मूर्द्धि सर्व्वतः। अनुकल्पमिदं स्नानं सर्व्वपापहरं स्मृतम्" जाबा० स्मृ०। एकवाससाऽपि स्नानं कर्त्तुं शक्यते "एकेन वाससा स्नायाद्द्वाभ्यामनियमः स्मृतः। बहुवासोनिषेधश्च स्नाने फलमभीप्सतः" विष्णुः। नैकवासाः क्रियां कुर्य्यात् स्नानं कर्म्म विना क्वचित्" तदुक्तेश्च "अस्पृश्यस्पर्शने चैव वासोयां पुलजन्मनि। एतद्द्विवाससा कार्य्यमन्यत्रैकेन वाससा" वसि० "न नग्नोनान्यदीयेन नार्द्रेण न रूक्ष्या शयितेन न विक्लेदेन च स्नायात्" इत्याचारतिलकः। तत्र नित्यं प्रातःस्नानम्, "प्रातः समाचरेत् स्नानं तच्च नित्यमिति स्मृतम्" मार्क० पु०। चन्द्रसूर्य्योपरागे अशौचादौ अस्पृश्यस्पर्शने च स्नानं नैमित्तिकम्। "पुण्येऽर्के जन्मनक्षत्रे व्यतीपाते च वैष्टतौ। अमावास्यां नदीस्नानं पुनात्या सप्तमात् कुलम्" इत्याद्युक्तं स्नानं काम्यम्। धर्म्मकर्म्म कर्त्तुं यत् पूर्व्वस्नानं तत्क्रियाङ्गम्। "मलापकर्षणं नाम स्नानमभ्यङ्गपूर्व्वकम्। मलापकर्षणायैव तत्प्रवृत्तिस्तु नान्यथा।" तत्र स्नानविधिश्च आह्नि० स्मृ० परि० उक्तः यथा।

"अथ स्नानविधिस्तत्रार्द्रमध्याह्ने च स्मृतस्यः कुर्य्यादेकतरत्र वा प्रातरेव, ब्रह्मचारी यतिस्त्रिषु सवनेषु द्विः त्रिर्वा वानप्रस्थः। तत् प्रातः सहगोमयेन कुर्यात् स्मृदा मध्यन्दिने साद्यं शुद्धाभिरद्भिः। न प्रातःस्नानात् प्राक्सन्ध्यामुपासीत प्रातरुत्सृष्टं गोमयमन्तरिक्षस्थं सङ्गृह्य भूमिं वोपर्यधश्च संस्पृशं तीर्थमेत्य धौतपादपाणिमुख आचम्य सन्ध्योक्तवदात्माभ्युक्षणादि च कृत्वा हिराचम्य दर्भपाणिः संयतप्राणः कर्म सङ्कल्प्य गोमयं वीक्षितमादाय सव्ये पाणौ कृत्वा व्याहृतिभिस्त्रेधा विभज्य दक्षिणं भागं प्रणवेन दिक्षु विक्षिप्योत्तरं तीर्थे क्षिप्त्वा मध्यमं "आनस्तोक" इत्यृचाभिमन्त्र्य "गन्धद्वाराम्" इत्यनया मूर्द्धादिसर्वाङ्गमालिप्य प्राञ्जलिः "वरुणं हिरण्मयङ्गमिति" द्वाभ्याम् "अवते हेड" इति द्वाभ्यां "प्रसस्राजे बृहदुक्षेति" सूक्तेन प्रार्थ्य "हिरण्मयङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः। यन्मया भुक्तमसाधूनां पाप्मेभ्यश्च प्रतिग्रहः। यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम्। तन्न इन्द्रो वरुणो बृहस्पतिः सविता च पुनन्तु पुनः पुनः" इत्यथ "याः प्रवतो निवत उद्वत" इत्येतया तीर्थमभिमृश्यावगाह्य स्नातो हिराचम्य मार्जयेत् अम्बयोयन्त्यध्वभिः" इत्यष्टाभिः "आपोहिष्ठेति" च नवभिरथ तीर्थमङ्कुशेन "इमं मे गङ्गे" इत्यृचा निःप्रदक्षिणमालोड्य प्रकाशपृष्ठमग्नौ अघमर्षणसूक्तं विरावर्त्तं निमज्योन्मज्यादित्यमालोक्य द्वादशकृत्व आचम्य पाणिभ्यां शङ्खमुद्रया योनिमुद्रया वोदकमादाय मूर्ध्नि सुखे बाह्वोरुरसि चात्मानङ्गायत्र्याभिषिच्य "त्वन्नो अग्ने वरुणस्य विद्वानिति" द्वाभ्यात् "तरत्समन्दीधातीति" च सूक्तेन पुनः स्नायान्मूर्ध्नि चाभिषिञ्चेत् "तद्विष्णोः परमम्पदम् "अग्नेरन्नाणो अंहसो यत्किञ्चेदं वरुणदैव्ये जने" इत्येताजपेत् स्रोतोऽभिमुखः सरित्सु स्नायादन्यत्रादित्याभिमुखोऽथ साद्यताभिरद्भिः प्राङ्मुख उपवीती दैवतीर्थेन व्याहृतिभिर्व्यस्तसमस्ताभिर्ऋचादीन्देवान् सकृत्सकृत्तर्पयित्वाथोदङ्मुखः निवीती सव्याभिरद्भिः प्राजापत्येन तीर्थेन कृष्णद्वैपायनादीन् ऋषींस्ताभिर्व्याहृतिभिर्व्यस्ताभिस्तर्पयित्वाथ दक्षिणाभिमुखः प्राचीनावीती पितृतीर्थेन सतिलमद्भिर्व्याहृतिभिरेव सोमः पितृमान् यमो अङ्गिरस्वान्नग्निस्वत्ताः कव्यवाडन इत्यादीं स्त्रींस्त्रींस्तर्पयेदेतत्स्नानाङ्गतर्पणमथ तीरमेत्य दक्षिणाभिमुखः प्राचीनावीती "ये के चास्मत्कुले जाता अपुत्रागोत्रिणो मृताः। ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकमिति वस्त्रं निष्पीड्य यज्ञोपवीत्यप उपस्पृश्य परिधानीयमभ्युक्ष्य परिधाय हितीयञ्चोत्तरीयं पर्युक्षितं प्राहृत्य हिराचामेदथोक्तसन्ध्यामुपासीतेदं प्रातःस्नानविधानम्।

अथ मध्यन्दिने तीर्थमेत्य धौतपाणिपादमुखो हिराचम्यायतप्राणः स्नानं सङ्कल्प्य दर्भपवित्रपाणिः शुचौ देशे खनित्रेण भूमिङ्गायत्र्यस्त्रेण खात्वोपरिस्थदक्षोत्तरङ्गुलमुद्धृत्य तस्मात्तामृदं तथा खात्वा गायत्र्यादाय गर्तमुद्धासितया

हृदा परिपूर्य हृदनुपात्तां शुचौ देशे तोरे निधाय गायत्र्या प्रोक्ष्य तच्छिरसा त्रेधा विभज्यैकेन मूर्ध्न आनाभेरपरेण चावस्तादङ्गमनुलिप्याघ्राय त्रुत्य चालयित्वादित्यश्चिरोक्ष्य तं ध्यायन् स्नायादेतन्मलस्नानमाङ्गरथ तीरे हिराचम्य हृतीयमस्त्रेणादाय सर्व्वे पाणौ कृत्वा व्याहृतिभिस्त्रेधा विभज्य दक्षिणभागमस्त्रेण दिक्षु दशसु विनिक्षिप्योत्तरन्यौर्ध्वं क्षित्वा हृतीयङ्गायत्र्याभिमन्त्रितमादित्याय दर्शयित्वा तेन मूर्ध्न आपादात् गायत्र्या प्रणवेन वा सर्वाङ्गमनुलिप्य "सुमित्रियान आप ओषधयः सन्तिति" सकृदद्भिरात्मानमभिषिच्य "दुर्मित्रास्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च वयन्द्विष्म" इति सकृज्जलमद्भिः क्षालयेदथ वरुणप्रार्थना तर्पणान्तेनोक्तेन विधिना स्नायात् । नाद्भिन् प्राक् ब्रह्मयज्ञतर्पणाद्दस्तं निष्पीड़येदपुत्रादयो ह्यन्ये तर्प्या इत्येष स्नानविधिस्तदेतदसम्भवेऽद्भिरेव कुर्यान्नौमदिनादिषु च न स्पृष्टे हृदा स्नायान्न च शीतोदकेन शीतोष्णोदकेन स्पृष्टे स्नायान्मन्त्रविधिं वर्जयेद्बहिर्वा शुचौ देशे सर्वं पश्चात्कुर्यादिति । अथाघमर्षणस्य मन्त्रस्नानं शुचौ देशे शुचिराचान्तः प्राणानायम्य दर्भपाणिः सव्ये पाणावपः कृत्वा तिसृभिरापो हिष्ठेत्याभिः पञ्चः प्रणवपूर्वं दर्भोदकैर्मार्जयेत् । पादयो र्मूर्ध्नि हृदये मूर्ध्नि हृदये पादयोर्हृदये पादयोः मूर्ध्नि चार्धर्चशो मूर्ध्नि हृदये पादयोर्हृदये पादयोर्मूर्ध्नि चाथ ऋक्शो हृदये पादयोर्मूर्ध्नि चाथ हृत्वेन मूर्धीति मार्जयित्वा गायत्र्या दशधाभिमन्त्रिता अपः प्रणवेन पीत्वा हिराचामेदेतन्मन्त्रस्नानम्"। शाखिभेदेनान्यविधविधानं तत्तत्सूत्रेषु द्रष्टव्यम् । ततश्च सूत्राद्युक्तद्रव्याणां तत्तन्मन्त्राणां तद्विधानानाञ्चाभिषेचनिकत्वं बोध्यम् कर्म्मान्ते ५यजमानाभिषेकार्थे मन्त्रे च । ते च मन्त्राः वैदिकाः पौराणिकाश्च । तत्र मन्त्रास्तु मत्कृततत्तुलादानादिपद्धतौ २०६ पृष्ठादौ द्रष्टव्याः । पौराणिकतान्त्रिकतत्तत्कर्म्मस्वधिकारसिद्ध्यर्थस्याभिषेकस्य साधने ६मन्त्रादौ ७तद्द्रव्यभेदे ८तद्विधाने च तत्र पौराणिकाभिषेकद्रव्यविधानादि "शिवमन्त्राभिषेकं यः कुर्याच्छिष्यादिकञ्चिये" इत्यारभ्य "अस्त्रराजाभिषेक" इत्यन्तेन अग्निपुराणे दर्शितम् । शाक्ताभिषेकद्रव्यविधानानि च तन्त्रे ज्ञेयानि । ९रुद्राभिषेकद्रव्ये १०तद्विधाने च तद्द्रव्यविधानादि च विधानपारिजाते रुद्रकल्पपद्धतौ च द्रष्टव्यम् ११ देवाभिषेकादिसाधनद्रव्यादौ

आभिहारिक त्रि० आभिमुख्येन हारः अभिहारः प्रयोजनमस्य तत्र साधुर्वा ठञ् । अभिहारसाधने उपढौकनीये (भेटी) इति जगतीप्रसिद्धे द्रव्ये ।

आभीक न० अभीकेन दृष्टं साम अण् । अभीकर्षिदृष्टे सामभेदे "आभीकमभिनिधनमाभीशवानि चैके" कात्या० २५,१४,१५ । एके आचार्या आभीकाद्यान्यपि सामान्यावपन्ति" कर्क० ।

आभीक्ष्ण्य न० अभीक्ष्णस्य भावः ष्यञ् । सातत्ये पौनःपुन्ये आभीक्ष्ण्यञ्च क्रियाविच्छेदेनैकरूपक्रियोत्पादनम् । "नित्यवीप्सयोः" पा० सूत्रे "आभीक्ष्ण्ये वीप्सायाञ्च द्वित्वे" सि०कौ० । "वड्डलमाभीक्ष्ण्ये" पा० "आभीक्ष्ण्ये ण्मुल्" पा० । "जल्पिकर्मणा वड्डलमाभीक्ष्ण्ये कर्त्तारं चाभिदधाति" पा०ग०सू० ।

आभीर पु० समन्तात् भियं राति रा-क । गोपे सङ्कीर्ण जातिभेदे स हि अल्पभीतिहेतोरप्यधिकं बिभेतीतितस्य तथात्वम् "आभीरवामभयनाहृतमानसाय दत्तं मनोवदुपते ! तदिदं गृहाण" उद्भटः स च सङ्कीर्णवर्णः । "ब्राह्मणाद्वुपकन्यामाहतोनाम जायते । आभीरोऽम्बष्टकन्यायामायोगव्यान्तु धिग्वणः" इति मनूक्तः । "श्रीकोङ्कणादधोभागे तापीतः पश्चिमे तटे । आभीरदेशोदेविधि ! विन्ध्य शैले व्यवस्थित" इति शब्दिसङ्गम० उक्तो २देशभेदे ३तद्देशवासिनि ४तद्देशराजे च ब०व० । "एकादशकलधारि कविकुलमानसहारि । इदमाभीरमवेहि जगणमन्त्यमनुभेहि" इत्युक्तलक्षणे ५मात्रावृत्तभेदे न० ।

आभीरपल्लि(ल्ली) स्त्री ईत० वा ङीप् । गोपप्रधाने ग्रामे घोषे (गोयालपाड़ा) ।

आभीरी स्त्री आभीरस्य पत्नी आभीरजातिर्वा स्त्री ङीप् । १आभीरभार्य्यायाम् २गोपजातिस्त्रियां महाभूद्रव्याम् ।

आभील न० समन्तात् भयं लाति ददाति ला-क । १कष्टे २दुःखे ३भयानके तदस्यास्ति अच् । ४तद्वति त्रि० "आभीलानि प्राणिनः प्रत्यवस्थन्" माघः । "रात्रौ निशीथे साभीले गतेऽर्द्धसमये नृप" इति भा०व०प०११अ० ।

आभीशव अभीशुना दृष्टं साम अण् । सामभेदे "आभीकमभिनिधनमाभीशवानि चैके" कात्या० २५,१४,१५ । "आभीकाद्यानि सामान्यावपन्ति" कर्कः ।

आभु त्रि० समन्तात् भवतीत्या+भू-डु । विभौ व्यापके "तच्छेनाभूषिहितं यदासीत्" ऋ०१०१२९,२ । "आभुव्यापकम्" भा० क्विप् आभूरस्य "आभूभिरिन्द्रः श्रवयन्नभूभिः" ऋ०१,५१,९ । [२६पृष्ठके ।

आभुग्न त्रि०आ+भुज कर्म्मकर्त्तरि क्त तस्य नः । १आकुञ्चिते

आभूति स्त्री आ+भू-क्तिन्। व्याप्तौ "आभूतिरेषा भूतिः" ऐ० उ०

आभेरी स्त्री रागिणीभेदे हनुमतः।

आभोग पु० आ+भुज-आधारे घञ्। परिपूर्णतायां, यस्य यावदपेक्षितं रूपं तत्पूर्णत्वे हि आभोगाधारतेति तस्य तथात्वम्। "अकथितोऽपि ज्ञायत एव यथायमाभोगसम्पन्नस्तेति" शक्र० "पर्व्वताभोगवर्ष्माणमतिकायं महाबलम्" भा० व० १७८ अ० "ह्रदमिव्हितो भावो द्रव्यवत् प्रकाशते" इति भाष्योक्तेः आभोगवत्पर्वततुल्यदेहमित्यर्थः। "यत्रैव कविनाम स्यात् स आभोग इतीरितः" इति सङ्गीतदामोदरोक्ते गानसमाप्तौ (भणिता) ख्याते२कविनामख्यापने। आभुज्यतेऽनेन करणे घञ्। २यत्ने यत्नादिनैव हि भोगः सम्यग् सम्पद्यते इति यत्नस्य तथात्वम्। "ना सुखोऽयं नवाभोगोधरणिस्थोहि राजसः" किरा० "नवाभोगः अभिनवोल्लाहः" मल्लि० सम्यक् भोगः प्रा० स०। ३सम्यक्सुखाद्यनुभवे "विषयाभोगेषु नैवादरः" शान्तिलक्ष्म। ४वरुणस्य ऋत्वे च मेदि०।

आभोगय त्रि० आभोगं याति या-क। आपूर्णे "आभोगयं प्रयदिच्छन्त ऐतनापाकाः प्राञ्चो मम केचिदापयः" ऋ० १,११०,२।

आभोगि त्रि० आभोगं करोति आभोग+णिच्-इन्। विषयाभोगकारके "जिह्मश्ये चरितवे मघोन्याभोगय इष्टये" ऋ० १,११२,५।

आभोगिन् त्रि० आभोगोऽस्यास्ति इनि। परिपूर्णे स्त्रियां ङीप्

आभ्यन्तर त्रि० अभ्यन्तरे भवः अण्। मध्यवर्त्तिनि "कश्चिदाभ्यन्तरेभ्यश्च बाह्येभ्यश्च विशाम्पते!" भा० स० प० ५ अ०। "वर्णोच्चारणे, प्रयत्नो द्विधा आभ्यन्तरोबाह्यश्च आद्यश्चतुर्द्धा स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात्। तत्र स्पृष्टं प्रयतनं स्पर्शानाम्। ईषत्स्पृष्टमन्तःस्थानाम् विवृतमूष्मणां स्वराणाञ्च ह्रस्वस्यावर्णस्य प्रयोगे संवृतं प्रक्रियादशायान्तु विवृतमेव" सि० कौ०। "एतेषाञ्चाभ्यन्तरत्वं वर्णोत्पत्तेः प्राग्भावित्वात् "तथा हि नाभिप्रदेशात् प्रयत्नविशेषप्रेरितः प्राणवायुः ऊर्द्धमाक्रामन्नुरःप्रभृतीनि स्थानान्याहन्ति ततो वर्णस्य तदभिव्यञ्जकध्वनेर्वोत्पत्तिः तत्तोत्पत्तेः प्राक् जिह्वाद्योपायमध्यमूलानि वर्णोत्पत्तिस्थानं तालादि यदा सम्यक् स्पृशन्ति तदा स्पृष्टता, ईषत्स्पर्शे ईषत्स्पृष्टता, समीपावस्थाने संवृतता, दूरावस्थाने विवृतता। अतएव ह्रस्वत्रयाणां तालव्यत्वाविशेषेऽपि चवर्गे उच्चारयितव्ये जिह्वाग्रस्य तालुस्थानेन सम्यक्स्पर्शः, यकारे ईषत्स्पर्शः, शकारे, समीपेऽवस्थानम् इवर्णे तु दूरेऽवस्थानम्" मतङ्गसरञ्जा।

आभ्यवहारिक त्रि० अभ्यवहाराय हितं ठक्। भोजनयोग्ये अन्नादौ। [ठक्। कुटुम्बभरणव्याप्टते हेम०।

आभ्यागारिक त्रि० अभ्यागारे तत्स्थकुटुम्बाभरणे व्याप्टतः

आभ्यादायिक न० आभिमुख्येनादानमभ्यादानं तत्र निवृत्तः ठक्। पितृमातृकुलादिप्राप्ते स्त्रीधनभेदे।

आभ्यासिक त्रि० अभ्यासे निकटे भवः ठक्। १निकटस्थिते "अल्पैराभ्यासिकैर्युक्तं शुशुभे योधरक्षितम्" भा० आ० २७६ अ०। अभ्यासात् पौनःपुन्यात् आगतः ठक्। २अभ्यासप्राप्ते दृढसंस्कारादौ।

आभ्युदयिक न० अभ्युदयः प्रयोजनमस्य ठक्। १वृद्धिनिमित्ते श्राद्धभेदे तत्र छन्दोगानामाभ्युदयिकश्राद्धविधिर्गौभिलस्यछन्दोगपरिशिष्टयोरुक्तः यथा।

गोभिलः। "अथाभ्युदयिके श्राद्धे युग्मानाशयेत्। प्रदक्षिणमुपचारः ऋजवो दर्भाः यवैस्तिलार्थः सम्पन्नमिति हविष्यान्नः दधिवदाज्यतिलाः पिण्डाः नान्दीमुखाः पितरः प्रीयन्तामिति दैवे वाचयित्वा नान्दीमुखेभ्यः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च प्रीयन्तां, न स्वधाञ्च प्रयुञ्जीत" इति। "आभ्युदयिके अभ्युदयनिमित्तके अभ्युदय इष्टलाभः विवाहादिः तदर्थं श्राद्धं आभ्युदयिकम्। तच्च भूतभविष्यद्भेदेन द्विविधं तत्र भूतं पुत्रजन्मादि भविष्यद्विवाहादि एवञ्च श्राद्धविवेकादौ श्राद्धभेदगणने वृद्धिश्राद्धत्वेन कर्म्माङ्गत्वेन च यदुभयत्वमुक्तं तदुभयमेवाभ्युदयिकत्वेनोपपन्नं तेनाभिलाषे आभ्युदयिकश्राद्धमिति प्रयोज्यम्। तत्र यवैस्तिलार्थत्वेन पार्व्वणश्राद्धप्राप्तितिलस्थाने यवविधानादाभ्युदयिकस्यापि पार्व्वणप्रकृतिकत्वं प्रतीयते। अन्यथा तिलार्थत्वं पादानं व्यर्थं स्यात्। ततश्च पार्व्वणप्रकृतिकत्वेन पितृपक्षे ऽयुग्मब्राह्मणप्राप्तौ तन्निरासाय पितृपक्षे ब्राह्मणयुग्मत्वोपदेशः। दैवे युग्मत्वस्य पार्व्वणत्वेन प्राप्तत्वाच्च तदर्थोपदेशः "अपसव्यं ततः कृत्वा पितृणामप्रदक्षिणम्" इत्यादिवाक्यवचनेन देवकर्म्मानन्तरं पितृकर्म्मकरणे प्राप्तवामोपचारनिरासाय प्रदक्षिणमुपचारस्तेन दैवपितृकर्म्मकरणाय दक्षिणावर्त्तेन गन्तव्यम्। द्विगुणभुग्नत्वनिरासाय ऋजवोदर्भा इति ऋजुत्वोपदेशः। हविष्यान्नः स्य इत्यनेन हविष्यान्ने सम्पन्नमिति प्राप्ते वक्ष्यमाणच्छन्दोगपरिशिष्टवचनाच्च सुसम्पन्नमित्यु-

त्तरम् । एतद्भमयत्राह्मपक्षेऽप्यविरितत्वाद्ग्राह्यम् । दधिबदराज्ञतमिश्राद्यनेन दध्यादिमिश्रणमावश्यकम् । अक्षतोयवः "अक्षताश्च यवाः प्रोक्ता भग्ना धाना भवन्ति ते" इति भट्टनारायणधृतकोषात् अतएव वक्ष्यमाणच्छन्दोगपरिशिष्टवचनेऽक्षतमनुक्त्वा "संयोज्य यवकर्कन्धूदधिभिरिति" निःसन्दिग्धमुक्तम् । स्वधावाचनप्रश्ननिष्टत्तये नान्दीमुखाः पितरः प्रीयन्तामित्युपदेशः । तत्र स्वधां वाचयिष्य इति पिण्डपक्षएव प्रश्नः । अतएव तन्निष्टत्तये दैव इति । दैवपक्षे नान्दीमुखाः पितरः प्रीयन्तामिति प्रश्नः । उत्तरञ्च प्रीयन्तामिति । ततः पिण्डपक्षे स्वधावाचनस्थानीयत्वेन इद्धप्रमातामहेभ्यश्चेति चकारनिर्द्देशेन च स्वधोच्यतामितिवत् प्रत्येकमेव प्रीयन्तामिति पृच्छेत् । प्रत्युत्तरञ्च अस्तु स्वधेति वत् तत्रैवैव प्रीयन्तामिति । अत्र नान्दीमुखाः पितरइत्यादि नान्दीमुखेभ्यः पिण्डेभ्यः इति निर्देशेन च "नान्दीमुखं पितृगणमिति" विष्णुपुराणेन च "मातामहेभ्यश्च तथा नान्दीमुखेभ्य एव चेति" ब्रह्मपुराणेन च नान्दीमुखपदस्तुतेस्तद्विशेषणविशिष्टस्यैवाभ्युदयिके देवत्वं ततश्चात्रापि प्रीयन्तामितिवन्नान्दीमुखेभ्यः प्रपितामहेभ्य इत्यादि वाच्यम्" आ० त० रघु० । छन्दोग० "कर्मादिषु तु सर्वेषु मातरः सगणाधिपाः । पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः । प्रतिमासु च शुभासु लिखिता वा पटादिषु । अपि वाक्षतपुञ्जेषु नैवेद्यैश्च पृथग्विधैः । कृत्वालग्नां वसोर्धारां सप्त वारान् हतेन तु । कारयेत् षञ्च वारान् वा नातिनीचां नचोच्छ्रिताम् । आयुष्मानिति शान्त्यर्थं जप्त्वा तत्र समाहितः । षड्भ्यः पिण्डेभ्यस्तदनु श्राद्धदानमुपक्रमेत् । वसिष्ठोक्तविधिः कृत्स्नो द्रष्टव्योऽत्र निरामिषः । अतःपरं प्रवक्ष्यामि विशेषं इह यो भवेत् । प्रातरामन्त्रितान् विप्रान् युग्मानुभयतस्तथा । उपवेश्य कुशान्दद्यात् ऋजूनेव हि पाणिना" तथा "निपातेन हि सव्यस्य जानुनो विद्यते क्वचित् । सदा परिचरेद्भक्त्या पितॄनयत्र दैववत् । पिण्डेभ्य इति दत्तेषु उपवेश्य कुशेषु तान् । गोत्रनामभिरामन्त्र्य पितॄनर्घ्यं प्रदापयेत् । नात्रापसव्यकरणं न पित्र्यं तीर्थमिष्यते । पात्राणां पूरणादीनि दैवेनैव तु कारयेत् । ऊर्ध्वोत्तरकरान् युष्मान् करिष्याम्यवनेजनान् । इत्यर्घ्यं सकृदातव्यं नैकैकस्मात्र दीयते । मधुमधिति यत्तत्र तिर्जपोऽपितुमिच्छताम् । गायत्र्यनन्तरं सोऽत्र मधुमन्त्रविवर्जितः । नचाग्नौ जपेदत्र कदाचित् पिण्डसंहिताम् । अन्यएव जपः कार्य्यः सोमसामादिकः शुभः । प्रकारोऽन्नस्य यस्तत्र तिलवद्दूयवत्तथा । उच्छिष्टसन्निधौ सोऽत्र हव्येषु विपरीतकः । सम्यन्नमिति हव्याः स्युः प्रश्नस्यात्तु विधीयते । सुसम्पन्नमितिप्रोक्ते शेषमन्नं निवेदयेत् । प्रागग्रेष्वथ दर्भेषु आद्यमामन्त्र्य पूर्ववत् । अपः क्षिपेन्मूलदेशेऽवनेनिक्ष्वेति निस्तिलाः । हितोयज्ञ हतोयज्ञ मध्यदेशाग्रदेशयोः । मातामहप्रभृतींस्तु एतेषामेव वामतः । सर्वस्मादन्नसङ्घात्य व्यञ्जनैरुपसिच्य च । संयोज्य यवकर्कन्धूदधिभिः प्राङ्मुखस्थितः । अवनेजनवत् पिण्डान् दत्त्वा बिल्वप्रमाणकान् । तत्पात्रस्थाञ्जनेनाथ पुनरभ्यवनेजयेत् । उत्तरोत्तरदानेन पिण्डानामुत्तरोत्तरम् । भवेदधश्चाधरणमधोऽधः श्राद्धकर्म्मसु । तस्मात् श्राद्धेषु सर्वेषु इद्धिमत्क्षितरेषु च । मूलमध्याग्रदेशेषु दैवत्सक्तांश्च निर्वपेत् । गन्धादीन्क्षिपेत् तूष्णीं तत आचामयेत् द्विजान् । अन्यत्राप्येवएव स्यात् यवादिरहितो विधिः । दक्षिणाप्रवणे देशे दक्षिणाभिमुखस्य तु । दक्षिणाग्रेषु दर्भेषु एषोऽन्यत्र विधिः स्मृतः । अथाग्नभूमिमासिञ्चेत् हुतप्रोक्षितमस्त्विति । शिवा आपः सन्त्विति च युग्मानेवोदकेन च । सौमनस्यमस्त्विति च पुष्पदानमनन्तरम् । अक्षतञ्चारिष्टञ्चास्त्वित्यक्षतानपि दापयेत् । अक्षय्योदकदानन्तु अर्घ्यदानवदिष्यते । षड्भ्यो नित्यं तत् कुर्य्यान्न चतुर्थ्या कदाचन । प्रार्थनासु प्रतिप्रोक्ते सर्वास्वेव द्विजोत्तमैः । पवित्रान्निहितान् पिण्डान् सिञ्चेदुत्तानपाणिना । युग्मानेव स्वस्तिवाच्यानङ्कुर्य्यादृषं सदा । कृत्वा धूपस्य विप्रस्य प्रणम्यानुव्रजेत्ततः" ।

अत्र षड्भ्य इति कीर्त्तनं छन्दोगानां माहपक्षनिरासार्थम् अन्यवेदिनां तु माहपक्षाधिक्यमलास्ति "माहश्राद्धं तु पूर्व्वं स्यात् पितृणां तदनन्तरम् । ततो मातामहानाञ्च इद्धौ इद्धौ भवेत् तथा" आ० त० शातातपोक्तेः

अत्र कृत्याभ्युदयिकं कर्त्तव्यं तद्दर्शितं नि० सि० ब्राह्मे "जन्मन्ययोपनयने विवाहे पुत्रकस्य च । पितृश्राद्धीसुखाद्यामतर्पयेद्विधिपूर्व्वकम् । वेदव्रतेषु चाधाने यज्ञपुंसवनेषु च । नवान्नभोजने स्नाने जटायाः प्रथमार्तवे । देवारामतडागादिप्रतिष्ठासूत्सवेषु च । राजाभिषेके वाजाब्रभोजने इद्धिसंज्ञकान् । वनस्थाद्याश्रमं गच्छन् पूर्व्वेद्युःस्वधया पितॄन् । पूर्व्वोक्तविधिना सम्यक् तर्पयेत् कर्मसिद्धये" । विष्णुपुराणे "यत्तोद्वाहप्रतिष्ठासु मेखलाबन्धमोचयोः । पुत्रजन्मद्वयोत्सर्गे इद्धिश्राद्धं समाचरेत्" बह्वृचकारिका-

वाम् "स्यादाभ्युदयिकं श्राद्धं वृद्धियुक्तेषु कर्मसु । पुंसवनसीमन्तचौलोपनयनेषु च । विवाहे चानलाधेयप्रष्टतिश्चौतकर्मणि । इदं श्राद्धं प्रकुर्वन्ति द्विजा वृद्धिनिमित्तकम् । अन्यैः षोडशसंस्कारसरस्वादिषूपोह्यते । वाप्याद्युद्यापनादौ तु कुर्युः पूर्त्तनिमित्तकम्" वोपदेवकालादर्शौ "सोमन्तव्रतचौलनामकरणान्नप्राशनोपायनस्नानाधानविवाहयज्ञतनयोत्पत्तिप्रतिष्ठासु च । पुंसत्वावसथप्रवेशनसुताद्याख्यावलोकाश्वमखोकारक्षितिपाभिषेकदयिताद्यर्त्तौ च नान्दीमुखम्" श्राद्धकौस्तुभौ निर्णयामृते च भाट्टे "अन्नप्राशे च सीमन्ते पुत्रोत्पत्तिनिमित्तके । पुंसवे च विवाहे च नवेशप्रवेशने । देवद्रव्यजलादीनां प्रतिष्ठायां विशेषतः । तीर्थयात्राद्यपोत्सर्गे वृद्धिश्राद्धं प्रकीर्त्तितम् । तत्र गर्भाधाने आभ्युदयिकं छन्दोगेतरपरं यद्योक्तं श्राद्धतत्त्वे छन्दो० प० । वृषोत्सर्गे वृद्धिश्राद्धं काम्य विषयम् । अग्नौकान्द्वितीयदिनादिविहिते न वृद्धिश्राद्धमिति भेदः । "असङ्कल्पानि कर्म्माणि क्रियेरन् कर्म्मकारिणा । प्रतिप्रयोगं नैव स्युर्मातरः श्राद्धमेव च । आधाने होमयज्ञे च वैश्वदेवे तथैव च । बलिकर्म्मणि दर्शे च पौर्णमासे तथैव च । नवयज्ञे च यज्ञज्ञा वदन्त्येवं मनीषिणः । एकमेव भवेत् श्राद्धमेतेषु न पृथक् पृथक् । नाटकास्तु भवेत् श्राद्धं न श्राद्धे श्राद्धमिष्यते । न सोष्यन्तीजातकर्म्म प्रोषितागतकर्म्मसु । विवाहादिः कर्म्मगणो य उक्तो गर्भाधानं शुभस्य वक्ष्य चान्ते । विवाहादावेकमेवाल कुर्य्यात् श्राद्धं नादौ कर्म्मणः कर्म्मणः स्यात् । तथागणयः क्रियमाणेषु मातृभ्यः पूजनं सकृत् । सकृदेव भवेत् श्राद्धमादौ न पृथगादिषु । यत्र यत्र भवेत् श्राद्धं तत्र तत्रैव मातरः" । इदं चावश्यकम् । "वृद्धौ न तर्पितायै वै पितरो गृह्यमेधिभिः । तद्दोनमफलं ज्ञेयमासुरोविधिरेव स" इति मातातपोक्तेः । "अष्टकामातृश्राद्धोदयास्तीर्थे पात्रोपपत्तयः । पितृव्यामतिरेकोऽयं मासिकान्नात्प्रुवः स्मृत इति देवो० पु० उक्तेश्च ध्रुव आवश्यक इति आ० त० रघु० । अत्र श्राद्धत्रयमाह माता० । "मातृश्राद्धं तु पूर्व्वं स्यात् पितृणां तदनन्तरम् ततो मातामहानाञ्च वृद्धौ श्राद्धत्रयं स्मृतम्" तत्कालमाह पृथ्वीचन्द्रोदये गार्ग्यः "मातृश्राद्धं तु पूर्वेद्युः कर्माहनि तु पैतृकम् । मातामहं चोत्तरेद्युर्वृद्धौ श्राद्धत्रयं स्मृतम्" । अत्राभ्युदयकौ स एव "पृथक्दिनेष्वशक्तश्चेदेकस्मिन् पूर्ववासरे । श्राद्धत्रयं प्रकुर्वीत वैश्वदेवं तु तान्त्रिकमिति" वृद्धमनुरपि "अलाभेऽभिन्नकालानां नान्दीश्राद्धत्रयं बुधः पूर्वेद्युर्वै प्रकुर्वीत पूर्वाह्णे मातृपूर्वकम्" अत्र "मातृषु पूर्वेद्युस्तदुत्तरेष्विति" स्मृत्यपरिगणितव्यवस्थाश्रेया । कर्म्मदिवस एवेति गौडाचारः । तत्र प्रातरेव । "पार्वणश्चापरह्णे तु प्रातर्वृद्धिनिमित्तकमिति" निर्ण० सि० मातातपोक्तेः । अत्र प्रातःशब्दः सार्द्धत्रिप्रहरपरः "प्रहरोऽर्धसंयुक्तः प्रातरित्यभिधीत इति" गार्ग्योक्तेरिति पृथ्वीचन्द्रोदयः । "आवर्त्तनमभोमे वेवा,इक्तेः मध्याह्नावधिरिति" गौडाः । इदं च पुत्रजन्मातिरिक्तविषयम् तदाह व्यासः "पूर्व्वाह्णे दैवदद्वृद्धिर्विना जन्मनिमित्तकम् । पुत्रजन्मनि कुर्वीतश्राद्धं तात्कालिकं बुध इति" एतदनियतनिमित्तपरम् "नियतेषु निमित्तेषु प्रातर्वृद्धिनिमित्तकम् । तेषामनियतत्वे तु तदानन्तर्यमिष्यत" इति लोगाक्षिस्मृतेः । आधानाङ्गं नान्दीश्राद्धं त्वपराह्णे एव "आमश्राद्धं तु पूर्व्वाह्णे पिण्डाद्येन तु मध्यतः । पार्वणं चापराह्णे तु वृद्धिश्राद्धं तथाग्निकमिति" निर्णयामृते गालवोक्तेः "नान्दीमुखादयः प्रातराग्निकं त्वपराह्णत" इति विष्णूक्तेश्च । इदं च मातृपितृमातामहादिकमेव छन्दोगेतरैः नवदैवत्यं कार्य्यम् तत्र मातामहादयस्तु सपत्नीकाः "मातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानामिति" पृथ्वीचन्द्रोदये गद्यरूपेण गारुडवाक्यात् । हेमाद्रौ गद्यः "नान्दीमुखे सत्यवसू संकोर्त्तौ वैश्वदेविके" । वृद्धपराशरः "नान्दीमुखेभ्योदेवेभ्यः प्रदक्षिणक्रमासनम् । पितृभ्यस्तन्मुखेभ्यश्च प्रदक्षिणमिति स्मृतिः" । श्राद्धे मातृदान निषेधेऽपि वृद्धौ मातृविषेधदानं विहितम् । "मातृभ्यः शतपत्राया मल्लिकाकुब्जयोरपि । केतक्याः पाठलाया वा देया माता न लोहिता" कू० पु० उक्तेः । "कुशस्थाने च दूर्वाःस्युर्मङ्गल्याभिवृद्धय" इति हेमा० ब्रह्मा० पु० "अजयोदर्भा इति प्रायुक्तं वाक्यं तु छन्दोगविषयम् । अत्राधिकारी निरूप्यते । "जातस्य जातकर्माणि क्रियाकाण्डमशेषतः । पिता पुत्रस्य कुर्वीत श्राद्धं चाभ्युदयात्मकम्" विष्णु० पु० । "स्वपितृभ्यः पिता दद्यात् सुतसंस्कारकर्मसु । पिण्डानोद्वहनात् तेषां तदभावेऽपि सत्क्रमात्" छन्दोग० । "जीवत्पितृकस्याप्यधिकारः । अनग्निकोऽपि कुर्वीत जन्मादौ वृद्धिकर्मणि । वैश्य एव पिता दद्यात् तानेवोद्दिश्य तर्पयेदिति" हारीतोक्तेः "उद्वाहे पुत्रजनने पुत्रेष्ट्यां सौमिके मखे । तीर्थे श्राद्धत्रय आयाते षट्टेते जीवतः पितुः । मैत्रायणपरिशिष्टम् "जीवतः जीवन्त

पितरमनादृत्य उल्लङ्घ्येत्यर्थः । प्रथमविवाहे एव पितृरधिकारः द्वितीये तु स्वस्यैवेति भेदः।"नान्दीश्राद्धं पिता कुर्यात् आद्ये पाणिग्रहे बुध ! । अत ऊर्द्धं प्रकुर्वीत स्वयमेव तु नान्दिकम्"नि० सि० धृतस्मृतेः । छन्दोग० वाक्ये तदभावे तस्य पितृरभावे तत्क्रमात्"असंस्कृतास्तु संस्कार्य्या भ्रातृभिः पूर्व्वसंस्कृतैरिति"वा० यः कर्त्तृक्रमः तेन क्रमेण ज्येष्ठभ्राता-दद्यात् इति पृथ्वीचन्द्रोदयः । हेमाद्रिस्तु पितृरभावे यः पितृव्यमातुलादिः संस्कुर्य्यात् स तत्क्रमात् संस्कार्य्य पितृक्रमात् न तु स्वपितृभ्य इति व्याचख्यौ । तेन असंस्कृतेति संस्कार्य्यनामाभिधाय पितुरिति प्रयोज्यमेव मेन रघुनन्दनादयः । "दग्धौ तीर्थे च संन्यस्ते ताते च पतिते सति । येभ्य एव पिता दद्यात् तेभ्यो दद्यात् स्वयं सुतः । काल्या० स्मृतेः जीवत्पितृकस्य तीर्थादौ विशेषः पितरि संन्यस्ते प्रोषिते पतिते वा यदाऽन्यस्तत्सुतं धर्म्म वुद्धा संस्कुर्य्यात् तदा संस्कार्य्यपितुः पित्रादिभ्यो दद्यात् न संस्कार्य्यपित्रादिभ्यः निर्ण० सि० । एवं जीवन्मातृकेणापि मातरमतिक्रम्य पितामह्यादीनां तिसृणाम् श्राद्धं छन्दोगेतरेण करणीयमिति "योयो जीवति तमति दद्यादिति" स्मृतौ पुंस्त्वस्याविवक्षितत्वात् । पित्रादिविरहितस्य जीवने तु तद्वर्गश्राद्धनिवृत्तिः किन्तु जीव-द्भिरेव तैः तच्छ्राद्धं भोज्यं "पितामहो वा तत्श्राद्धं स्वयं भुञ्जीतेति"मनुवचनात् । एवं मातृादिविरहेऽपि बोध्यम् तेन जीवद्वर्गपरित्यागेनेतरवर्गश्राद्धं करणीयम् "यदि जीवति वर्गस्तु तं वर्गं तु परित्यजेत्" नि० सि० वचनात् ।

आभ्रिक त्रि० अभ्रात खनति ठक् । काष्ठकुद्दालेन खनके ।

आभ्र त्रि० अभ्रे आकाशे भवः कुर्व्वा० यत् । आकाशभवे ।

आम् अव्य० अम–गत्यादिषु णिच्–वा अच्प्रत्ययः किप् । १अङ्गीकारे २निश्चये ज्ञाने ३ स्मृतौ ४प्रतिवचने च ।

आम पु० । आम्यते ईषत्पच्यते आ+अम–कर्म्मणि घञ् । १ईषत्पक्वे अस्विन्ने २पाकरहिते । अम–करणे घञ् । २रोगमात्रे । वैद्यकोक्ते षट्विधे अजीर्णे ३रोगभेदे च आमाटोपाप-चोद्गारगुरुत्वालस्यविकारित्वानाम्" सुश्रु० । तल्लक्षणादि यथा निदा० "आहारस्य रसः सारः योन पक्वोऽग्नि-लाघवात् । आमसंज्ञां स लभते बहुव्याधिसमाश्रयः । आममत्यरसं केचित् केचित्तु मलसञ्चयम् । प्रथम दोषदुष्टिं वा वदन्ति बहुपिच्छिलाम् । सादनं सर्व्वगात्राणामालस्यमतिभूयिष्ठम्" "तेनामेन सदा युक्ता दोषा दुष्यन्ति तादृशाः । तदुद्भवा आमयाश्च सामा इति बुधैः स्मृताः" तेनास्य क्लीवत्वमपि । आमस्य निदानस्वरूपभेदादि निदाने उक्तम् "आमं विद-ग्धं विष्टब्धं तथा पित्तानिलैस्त्रिभिः । अजीर्णं केचि-दिच्छन्ति चतुर्थं रसशेषतः । अजीर्णं पञ्चमं केचिद्वि-द्यौषं दिनपाकि च । वदन्ति षडं चाजीर्णं प्राकृतं प्र-तिवासरम् । तत्रामे गुरुतोत्क्लेदः शोथो गण्डाक्षिकूटकः। उद्गारश्च यथाभुक्तमविदग्धं प्रवर्त्तते" । तस्य चामना-मत्वे कारणमप्युक्तम् तत्रैव । "भुक्तमात्रावशेषं यत् रसभूतन्त्व पाचितम् । गतमामाशये यस्मात्तस्मादामं प्रचक्षते इति ।" अधिकमामाशवशब्दे वक्ष्यते ।

अपाकरूपामात् व्रणाधिक्यं जायते तदुक्तम् सुश्रु० । "तिस्रः स्मृतास्ताः चतजा चतुर्थी चवात्तचान्यामसमुद्भवा" च इत्यादिना सप्तविधास्तृष्णाविभज्य "त्रिदो-षलिङ्गासमुद्भवा च क्लेक्लूलनिर्ह्रोवनसादयुक्ताः । स्निग्धं तथाम्लं लवणञ्च भुक्तं गुर्वन्नमेवातिद्रवी-करोति" आमस्यातिसाररोगादिहेतुत्वं सुश्रुते उक्तम् आमाजीर्णैः प्रदूताः क्षोभयन्तः कोष्ठं दोषाः संप्रदुष्टाः समक्षम् । नानावर्णं नैकशः सारयन्ति क्लेक्ष्याज्जन्तोः षड्विधं वदन्ति । संसृष्टभेदैर्दोषैस्तु मल-मप्यवसीदति । पुरीषं भृशदुर्गन्धं पिच्छिलं चामसंज्ञि-तम्"इति आमातिसारं लक्षयित्वा । अतः सर्व्वातिसारास्तु ज्ञेयाः पक्वामलक्षणैः तत्र लङ्घनमेवादौ पूर्व्वरूपेषु देहिनाम्" । तत्र लङ्घनस्य कर्त्तव्यतामुक्त्वा अनेन विधिना चामं यस्य नैवोपशाम्यति । हरिद्रादिं वचादिं वा पिबेत् प्रातः स मानवः । आमातिसारिणां कार्य्यं नादौ संग्रहणं स्मृता"मित्यनेन विशेष उक्तः तेन ४अतिसारभेदे "शस्यं क्षेत्रगतं प्राहुः सतुषं धान्यसञ्चये । आमं वित-षमित्युक्तम् स्विन्नमन्नमुदाहृतमिति" स्मृतिपरिभाषिते अपक्वे ५सतुषेऽन्ने च । "आमं शूद्रस्य पक्वान्नं पक्वमिश्रं स-मुच्यते" स्मृतिः । आपद्यनग्नौ तीर्थे च चन्द्रसूर्य्यग्रहे तथा "आमश्राद्धं द्विजैः कार्य्यं शूद्रेण तु स दैव तु" प्रचे० पाकश्च अग्निसंयोगात् कालवशात् वा वस्तुपरि-णामविशेषः तत्राद्यादीनामामत्वमग्निविशेषसंयोगाभावात् । यथा आमाद्यघटादेः। यद्यत् फलादि यद्यत्काले पच्यते तत्कालात् प्राक् तस्य पाकाभावे आमत्वम् यथाम्रादेः। तथा व्रणादेरपि परिपाकाभावे आमत्वम् कालिकम् । यथा "आमं विपच्यमानं च सम्यक् पक्वं च बोधिपक्" व्रणपा-काभावे" सुश्रुतः ।

आमगन्धि त्रि० आमस्यापक्वस्य गन्धइव गन्धो यस्य इत् समा० । अपक्वमांसादितुल्यगन्धादौ । स्त्रीत्वमित्येके ।

आमज्वर पु० आमोऽपक्वः ज्वरः । अपक्वज्वरे नवज्वरे "खेदामामज्वरं प्राज्ञः कोऽमृक्षा परिषिञ्चति" माधवः ।

आमनस्य न० अप्रशस्तं मनो यस्य तस्य भावः ष्यञ् । दुःखे ।

आमन्त्र पु० आमादजीर्णात् त्रायते स्वफलतैलेन मलनिष्कारणात् त्रै-क पृषो० । १एरण्डवृक्षे राजनि० आमखण्ड इति वा पाठः । तत्फलतैलपाने हि अजीर्णमलनिष्कारणात्तथात्वम् आ+मन्त्र-अच् । २आमन्त्रणशब्दार्थे च ।

आमन्त्रण न० आ+मन्त्र-ल्युट् । १अभिनन्दने, २संबोधने, ३कामचारानुज्ञारूपे क्रियाभेदेषु प्रवर्त्तनव्यापारे च । "विधिनिमन्त्रणामन्त्रणेत्यादि" पा० । अवश्यकर्त्तव्ये नियोगो निमन्त्रणं यथा श्राद्धादिभोजने । यज्ञाकरणे प्रत्यवायोनास्ति तादृशव्यापारे नियोजनमामन्त्रणम् यथा स्वल्पविशेषेशयनायामन्त्रणम् । नवपत्निकाप्रवेशपूर्व्वं दिवसे सायं विस्तरोः संबोधनरूपे ४व्यापारे च युच् आमन्त्रणाप्यत्र स्त्री

आमन्त्रित त्रि० आ+मन्त्र-क्त । १अनवश्यके कर्म्मणि नियोजिते २व्याकरणपरिभाषितायां सम्बोधनार्थकप्रथमाविभक्तौ न० "सामन्त्रितम्" पा० "सम्बोधने या प्रथमा सामन्त्रितसंज्ञा स्यात्" सि०कौ० । "आमन्त्रितं पूर्व्वमविद्यमानवत्" "नामन्त्रिते समानाधिकरणे सामान्यवचनम्" पा० । ३ निमन्त्रिते त्रि० "प्रातरामन्त्रितान् विप्रान्" ऋग्वेदभा० ।

आमन्त्र्य अव्य० आ+मन्त्र-ल्यप् । १सम्बोध्येत्यर्थे । "आद्यमामन्त्र्य पूर्व्ववत्" ऋग्वेदभा० आ+मन्त्र-कर्म्मणि यत् । २संबोधनीये आवश्यककार्य्ये ३नियोज्ये च त्रि० ।

आमन्द पु० आमं रोगं द्यति दो-ड वा० सुम् । वासुदेवे ।

आमन्दा स्त्री आमन्दमीषन्मन्दं करोति आमन्द+णिच्-अच् । खड्गभेदे (नेआरेरखाट) शब्दचि० ।

आमन्द्र पु० ईषन्मन्द्रः प्रा०स० । १ईषद्गम्भीरशब्दे "आमन्द्रमन्द्रध्वनिदत्ततालम्" भट्टिः । २तद्युक्ते त्रि० ।

आमपाक पु० आमस्य अजीर्णविशेषस्य पाकः । वैद्यकोक्ते ग्रोफरोगाद्यङ्गे आमस्य पाकभेदे । तल्लिङ्गमुक्तं सुश्रुते यथा "स यदा बाह्याभ्यन्तरैः क्रियाविशेषैर्न सम्भावितः प्रशमयितुं क्रियाविपर्य्ययाद्वृद्धत्वाद्वा दोषाणां, तदा पाकाभिमुखो भवति । तस्यामस्य पच्यमानस्य पक्वस्य च लक्षणमुच्यमानमवधारय । तत्र मन्दोष्मता त्वक्सवर्णता शीतग्रोफता स्तैमित्यं मन्दवेगतात्यग्रोफता चामलक्षणसंदिष्टम् । रूचिभिरिव निस्तुद्यते, दश्यत इव पिपीलिकाभिः, ताभिश्च संसृप्यत इव, छिद्यत इव शस्त्रेण, भिद्यत इव शक्तिभिः, ताड्यत इव दण्डेन, पीड्यत इव पाणिना, घट्ट्यत इव चाङ्गुल्या, दह्यत इव पच्यत इव चाग्निनाराभ्यामोषचोषपरीदाहाच्च भवन्ति दृश्चिकविद्ध इव च स्थानासनशयनेषु न शान्तिमुपैति आघातपिष्टइव । अतश्च ग्रोफो भवति त्वग्वैवर्ण्यं ग्रोफाभिहतिर्ज्वरदाहपिपासा भक्तारुचिश्च पच्यमानलिङ्गम् । वेदनोपशान्तिः पाण्डुतालग्रोफता बलीप्राद्भावस्त्वक्परिपुटनं निम्नदर्शनमङ्गुल्यावपीडिते प्रत्युन्नमनं वसाविवोदकसङ्करणं पूयस्य प्रपीड्यत्येकमन्तमन्ते चावपीड्यते मुहुर्मुहुस्तोदः कण्डूरनुन्नतता च व्याधेरुपद्रवशान्तिर्भक्ताभिकाङ्क्षा च पक्वलिङ्गम् । कफजेषु तु रोगेषु गम्भीरगतित्वादभिघातजेषु वा केषुचिदसमस्तं पक्वलक्षणं दृष्ट्वा पक्वमपक्वमिति मन्यमानो भिषग्मोहमुपैति यत्र हि त्वक्सवर्णता शीतग्रोफता स्तैमित्यमल्परुजताप्रकृतनता न तत्र मोहमुपेयादिति । भवन्ति चात्र । आमं विपच्यमानञ्च सम्यक् पक्वञ्च यो भिषक् । जानीयात् स भवेद्वैद्यः शेषास्तस्करदक्षतयः । वाताद्यते नास्ति रुजा, न पाकः पित्ताद्यते, नास्ति कफाच्च पूयः, । तस्मात्त्रयस्ताः परिपाककाले पचन्ति ग्रोफांस्त्रय एव दोषाः" ।

आमपात्र न० कर्म्म० । अपक्वे पात्रे (काँचा) मृण्मयपात्रे "विनाशं व्रजति क्षिप्रमामपात्रमिवाम्भसि" मनुः ।

आमय पु० आमं रोगं यात्यनेन या-करणे घञर्थे क आ+मीञ् हिंसायां करणे अच् वा । रोगे आमशब्दे तद्विरुक्तिं दृष्ट्वा "आमयस्यति रागसम्भवः" रघुः "तद्युक्तं विविधैर्योगैर्निर्हन्यादामयान् बहून्" सुश्रुतः । अनामयः निरामयः । "समौ हि शिष्टैराम्नातौ वर्त्तस्वेत्यामयः स च" माघः ।

आमयाविन् आमयोऽस्यास्य विनि दीर्घश्च । रोगयुक्ते । "क्षयामयाव्यपस्मारश्वित्रिकुष्ठिकुलानि च" "अन्नकर्त्तोऽऽमयावित्वम्" इति च मनुः । [आमशब्दे विवृतिः ।

आमरक्त न० आमसंपक्वं रक्तम् । रोगभेदे रक्तातिसारे

आमरणान्तिक त्रि० आमरणान्तं मरणोपसीमापर्य्यन्तं व्याप्नोति ठञ् । मरणकालपर्य्यन्तव्यापके "अन्योन्यास्याव्यभिचारो भवेदामरणान्तिकः" मनुः ।

आमर्द पु० आ+मृद-घञ् । बलात् निष्पीडने । "आमर्दकाले राजेन्द्र ! व्यपसर्पेत्तः परम्" भा० आश्र० ५० १अ० । "अर्द्धपीतस्तनं मातुरामर्दक्लिष्टकेशरम्" शकु० भावे ल्युट् । आमर्दनमप्यत्र न० ।

आमर्दिन् त्रि० आ+मृद-णिनि। बलाद्विप्पीड़के।

आमर्श पु० आ+मृष-स्पर्शे घञ्। सम्यक्स्पर्शे। ल्युट्। आमर्शनमप्यत्र न०।

आमर्ष पु० न+मृष-घञ् "अन्येषामपि" पा० दीर्घः। १कोपे असहने। "निरुद्योगं निरामर्षं निर्वीर्यमरिनन्दनम्" नीतिसा० आ+मृष-घञ्। २सम्यग्विवेके च।

आमलक त्रि० आ+मल-कुन् स्त्रीत्वे गौरा० ङीष्। (आमला) १धात्रीवृक्षे। "त्रिष्वामलकमाख्यातं धात्री तिष्यफलाऽमृता। रक्तपित्तप्रमेहघ्नं पथ्यं हृद्यं रसायनम्। हन्ति वातं तदम्लत्वात् पित्तं माधुर्यशैत्यतः। कफं रूक्षकषायत्वात् फलं धात्र्यास्त्रिदोषजित्। यस्य यस्य फलस्येह वीर्य्यं भवति यादृशम्। तस्य तस्यैव वीर्य्येण मज्जानमपि निर्दिशेत्" भावप्रका०अस्य स्त्रीत्वपक्षेऽपि तस्याः इदम् फलमण् फले लुकि स्त्रीत्वमेवेति भेदः। "यः सदामलकैः स्नानं करोति स विनिश्चितम्। वलीपलितनिर्मुक्तो जीवेद्वर्षशतं नरः" वैद्य० "श्रीकामः सर्व्वदा स्नानं कुर्व्वीतामलकैर्नरः" गरुड़ पु०। गौरादिगणे आमलशब्दपाठात् आमलशब्दोऽप्यत्र स्त्रीत्वे गौरा० ङीष् आमली। हरिद्रा० पुराणे तु अमलात् कात् नेत्रजलादागतम् अण् ङीप्। हृत्वभिप्रायेण निरुक्तान्तरम् दर्शितं यथा "सजये! विजये! देवि! नावेव स्रुतयोस्सदा। नयनेषु च जातानि अमलान्यम्बुजानि च। तानि नौ नयनेभ्यश्च निपेतुर्भुवि हे सखि!। ततो जाताद्रुमाः पृथ्व्यां चत्वारोविमलप्रभाः। ख्याता आमलकी नाम्ना जाता कादम्बादयतः। श्यामलच्छदवृन्दास्ते कर्व्वुर-स्कन्धमूलकाः। शिरायथितपत्राली मालाकलितपत्रकाः" "माघे मासि सितायां तामेकादश्यां समुद्भवाम् ब्रह्माऽगत्य देवोऽत्रदधारानन्दयुक्रतुम्। तेन धात्रीति नाम्नापि राजत्यामलकी पुनः" इति च "सर्वदामलकी श्राद्धा परित्यज्यरवेर्दिनम्"। "पयोधरैरामलकीवनाश्रिताः" माघः। "बिल्वपत्रं च माध्यञ्च तमालामलकीदलम्। कङ्कारं तुलसी चैव पद्मञ्च सनिपुष्पकम्। एतत् पर्य्युषितं न स्यात् यद्यान्यत् कलिकाल्पकम्" योगि०त०। "न धात्रीकाननं यत्र विष्णोस्तु तुलसीवनम्। तं म्लेच्छदेशं जानीयात् यत्र नो याति वैष्णवः। यत्र मालपरा मर्त्या यत्र द्वादशीक्षरः। तुलसीकाननं धात्री तत्र विष्णुः श्रिया सह। दूर्व्वा हरति पापानि धात्री हरति पातकम्" आह्नि०त०स्कन्द पु०।

आमवात पु०आमोऽपक्वहेतुः वातः। मा०प्र० उक्ते वातव्याधिभेदे तल्लक्षणाद्युक्तं तत्रैव "युगपत्कुपितावेतौ त्रिक सन्धिप्रवेशकौ। स्तब्धत्व कुरुतो गात्रमामवातः स उच्यते" (एतौ वातश्लेष्माणौ) तस्य लक्षणसक्तं निदा०। "अङ्गमर्दोऽरुचिस्तृष्णा ज्वलनाश्च गौरवं ज्वरः। अपचीमूलजङ्घा-सामामवातः स उच्यते"। तत्र निदानादि यथा "विरुद्धाहारचेष्टस्य मन्दाग्नेर्निश्चलस्य च। स्निग्धं भुक्तवतोऽत्यन्तं व्यायामं कुर्वतस्तथा। वायुना प्रेरितोऽमः श्लेष्मस्थानं प्रधावति। तेनात्यर्थमपक्वोऽसौ धमनीभिः प्रपद्यते। वातपित्तकफैर्भूयो दूषितः सोऽम्लजो रसः। स्रोतांस्यभिष्यन्दयति नानावर्णोऽतिपिच्छलः। जनयत्यग्निदौर्बल्यमिन्द्रियस्य च गौरवम्। व्याधीनामाश्रयोऽयं च आमसंज्ञोऽनिलोद्भवम्" (श्लेष्मस्थानमामाशयसम्बन्धादि)। तेन श्लेष्मस्थानगमने पाकाभावात् दूषकता पित्तस्थानगमने तु तेन पाकसम्भवाच्च दोषजनकतेति। अतिदृढस्य लक्षणसक्तं तत्रैव "स कष्टः सर्वरोगाणाम् यदा प्रकुपितो भवेत्। हस्तपादशिरोगुह्यत्रिकजानूरुसन्धिषु। करोति सरुजं शोफं यत्र दोषः प्रपद्यते। स देशो रुज्यतेऽत्यर्थं व्याविद्ध इव दृश्चिकैः। जनयेत् सोऽग्निदौर्बल्यम् प्रसेकारुचिगौरवम्। उत्साहहानिं वैरस्यं दाहनं बद्धमूलताम्। कुक्षौ शूलं कठिनतां तथा निद्राविपर्य्ययम्। हृद्धृद्धि-ष्टयमूर्च्छांच हृदयन्थिविड्विबद्धताम्। जाड्यान्द्रुजं नानारुजांस्यान्युपपद्यते" । तत्र दोषभेदे लक्षणानि "पित्ताद्दाहं सकासञ्च सशूलं पवनात्मकम्। स्तिमितं गुरु कण्डूकं कफजुष्टं तमादिशेत्। एकदोषानुगः साध्योद्विदोषोयाप्य उच्यते। सर्वदोषगतः शोफः स कष्टः सान्निपातिकः" इति हरि०।

आमश्राद्ध न०आमेन अपक्वेनान्नेन श्राद्धम्। "आमन्तु वित्तवं प्रोक्तमित्युक्तेन वित्तवेनापक्वेनान्नेन कर्त्तव्ये श्राद्धे "आपद्यनग्नौ तीर्थे च चन्द्रसूर्य्यग्रहे तथा। आमश्राद्धं द्विजैः कार्य्यं शूद्रेण च सदैव तु" प्रचे० अत्र विशेषः "निरग्नेरामश्राद्धे तु अन्नं न ज्ञापयेत् क्वचित्। दद्यौ च ज्ञापयेदन्नं संक्रमे ग्रहणेषु च, ति०त०पु०।

आमहीय त्रि०आमहाय आगमनाय हितम् छ। आगमनसाधने मन्त्रभेदे "अपाम सोमम्" इत्यस्यान्तर्हि स्त्री "उदय मित्युत्तेवोवीता आमहीयां जपन्नोगच्छन्त्यपाम सोमममृता अभूमागन्म ज्योतिरविदाम देवान् किं नूनमस्मान् कृणवदरातिः किमु धूर्त्तिरमृतमर्त्यस्येति" का० १०,६,७,

"वासःपरिधानानन्तरम् उद्दयमित्यनेन मन्त्रेणोद्वेत्योद्गीता जलमध्यात् बर्हिर्निष्काशिताः सन्तऋत्विजः सयजमानाः आमक्षीयाभिमेवंसंज्ञकाम् अपामेत्येतामृचं जपन्तः सर्वे देवयजनं प्रति गच्छन्ति" कर्कः ।

आमक्षीयव न० आमक्षीयुना ऋषिभेदेन दृष्टं साम अण् । सामभेदे तच्छब्दे उदा० सं० भा० दर्शितम् यथा "ऋतीयसवने सप्त स्तोत्राणि तेषु नव सामानि गेयानि तत्र प्रथमे स्तोत्रे गायत्रसामक्षीयवं वेति हेसामनी" आमक्षीयवञ्च साम ऊहगाने ऊहगानारम्भे प्रथमं साम ।

आमाति(ती)सार पु० आमक्षतोऽति(ती)सारः । आमक्षते षष्ठे अतिसाररोगभेदे अतिसारशब्दे तस्य विवृतिः । अस्य निदानादि उक्तं सुश्रुते यथा । "अन्नाजीर्णात् प्रदुष्टाः स्रोभयन्तः कोष्ठं दोषा धातुसंधानु मलांश्च । नाना-वर्णाञ्चैकयः सारयन्ति स्थूलोपेतं षड्भेदनं वदन्ति" आमातिसारे नो कार्य्यमादौ संग्रहणं न्यायम्" सुश्रु० ।

आमात्य पु० आमात्यएव स्वार्थे अण् । अमात्ये ।

आमानस्य न० अप्रशस्तं मानसमस्य अमानसः तस्य भावः ष्यञ् । दुःखे शब्दरत्ना० ।

आमावास्य त्रि० अमावास्यायां भवः सन्धिवेलादि० अण् । अमावास्याभवे "आमावास्येन हविषेष्ट्वा पौर्ण्णमासेन वा" ग० ब्रा० । वा वुन् अमावास्यक इत्यपि तत्रैव त्रि० ।

आमाशय पु० आमस्यापक्वस्याशयः । देहमध्यस्थे नाभेरूर्द्धस्थाने भुक्तापक्वान्नादिस्थाने । आशयाहि देहस्थाः सप्त सुश्रुते दर्शिता यथा "आशयस्तु वाताशयः पित्ताशयः श्लेष्माशयो रक्ताशय आमाशयः पक्वाशयः मूलाशयः स्त्रीणां गर्भाशयोऽष्टम इति आमाशयस्थानएव दोषरूप श्लेष्मस्थानं यथोक्तं सुश्रु० । "दोषस्थानान्यत ऊर्द्धं वक्ष्यामः तत्र समासेन वातःश्रोणिगुदसंश्रयः । श्रोणिगुदयोरपर्य्याभि पक्वाशयः पक्वाशयमध्यं पित्तस्य । आमाशयः श्लेष्मणः । तस्य स्थानं निरूपितं भावप्र० यथा "अग्निवेगवहः प्राणोगुदान्वे प्रतिहन्यते । स ऊर्द्धमागस्य पुनः सस्तृप्तिपति पावकम् । पक्वाशयस्त्वधोनाभ्यामूर्द्धमामाशयः स्थितः । नाभिमध्ये शरीरस्य प्राणाः नित्यं प्रतिष्ठिताः" चरके तु "नाभिस्थानोत्तरं जन्तोराड्डरामाशयं बुधाः" इति अत्र विशेषमाह "उरोरक्ताशयस्तस्मादधः श्लेष्माशयः स्मृतः । आमाशयस्तु तदधस्तदधःश्लेष्माशयोमतः" इति अपक्वाशय प्रसङ्गात् आहारपाकप्रकारस्तावदुच्यते भावप्रकाशे सुश्रुतः "यो वायुः प्राणनामासौ मुखं गच्छति देहधृक् सोऽन्नःप्रवेश्य गच्छेत्तं प्राणवायवलम्बते" इति तमाहारमामाशयस्थः क्लेदननामा कफः क्लेदयति क्लेदनात् संहतिं भिनत्ति च उक्तं च सुश्रुते "स आहारःषड्रसोऽप्यामाशये माधुर्य्यं लभते आमाशयस्थस्य मधुरस्य कफस्य योगात् उक्तं च श्लेष्मस्वरूपं "श्लेष्मा श्वेतो-गुरुःस्निग्धः पिच्छिलः शीतलस्तथा । तमोगुणाधिकः स्वादुर्विदग्धोलवणो भवेत् । फेनभावं च लभते जठरानलतेजसा" । अत आह वाग्भटः "संधुक्षितः समानेन पचत्यामाशयस्थितम् । औदर्य्योऽग्निर्यथा बाह्यः स्थालीस्थं तोयतण्डुलमिति" प्राणवायुना प्रेरितस्ततः किञ्चिच्छ्लिष्टः पाचकाख्यपित्तोष्मणेषत्पक्को भवति उक्तं च "अथ पाचकपित्तेन विदग्धश्चास्रतां व्रजेदिति" पाचकपित्तेन पाचकपित्त श्लेष्मणा ततः एवाहारोनाभिमध्यस्थानाधिष्ठानेन समाननाम्ना वायुना प्रेरितोयकृप्लीहौ प्रति याति उक्तं च । "ततःसमानमरुता यकृत्प्लीहमभिधावति" । यकृत्प्लीहलक्षणमाह "यष्ठी पित्तधरा नाम या कला परिकीर्त्तिता । आमपक्वाशयान्तःस्था यकृत्प्लीहौ साभिधीयते" पित्तधरा पाचकाख्यं पित्तं यदग्न्यधिष्ठानं तद्धारयति तत्र यकृत्प्लीहामाशयपक्वाशय मध्यवर्त्तिपाचकाख्यपित्ताधिष्ठानेनाग्निनाहारः पच्यते स कटुश्च भवति तथा च "यकृत्प्लीहौ पच्यते कोष्ठवह्निना जायते कटुरिति" । अयमर्थः आहारोयकृत्प्लीहौ कोष्ठवह्निना यकृत्प्लीहस्थितपाचकपित्तस्थेन च वह्निना पच्यते पच्यमानः स यकृत्प्लीहस्थितस्य कटुरसस्य पित्तयोगात्कटुर्भवति एतदाहारपाके विशेषमाह शरीरं पाञ्चभौतिकं तत्र पञ्चसु भूतेषु पञ्चाम्नयस्तिष्ठन्ति उक्तं च चरके "भौमाप्याग्नेयवायव्याः पञ्चोष्माणः । सनाभसाः पञ्चाहारगुणान् स्वान् स्वान् पार्थिवादीन् पचन्त्यतः" । अत्रोष्मपदेनाग्निरुच्यते आहारोऽपि पाञ्चभौतिकः तत्र पाचकपित्तस्थेनाग्निनोत्तेजितेन शरीरवर्त्तिभूभागः पच्यते यकोभूभागः स्वकीयान् गुणानभिवर्द्धयति एवं जलादिभागा अपि पच्यन्ते तथा च सुश्रुते "पञ्चभूतात्मको देह आहारः पाञ्चभौतिकः । विपक्वं पञ्चधा सम्यग्गुणान्स्वानभिवर्द्धयेदिति" गुणशब्देनात्र गुणिनः पृथिव्यादय उच्यन्ते तेन गुणान् शरीरवर्त्तिनः पार्थिवादीन् भागानभिवर्द्धयेदिति एवमहोरात्रेण पक्व आहारोमिष्टः कटुश्च मधुरो भवति अम्लोऽम्लो भवति कटुतिक्तःकषायश्च कटुर्भवति उक्तं च "मिष्टः कटुश्च मधुरोऽम्लोऽम्लः पच्यते रसः । कटुतिक्तकषायाणां विपाको जायते कटुरिति" एवं विपक्वाहारस्य सारो रसश्चेयकृप्लीहौस्रो मल इव

मलः। अस्य जलभागः शिराभिर्वस्तिद्वीतोमूत्रं भवति उक्तं च "आहारस्य रसः सारःसारस्नीनोमलद्रवः। शिराभिस्तज्जलं नीतं वस्तिंमूत्रत्वमाप्नुयात्। शेषं कीट्टं भवेत्तस्य तत् पुरीषं निगद्यते। समानवायुना नीतं तत्तिष्ठति मलाशये" तत्र मलाशयालयेनापानवायुना प्रेरितं मूत्रं मेढ्रभगमार्गेण, पुरीषं गुदमार्गेण, शरीराद्बहिर्याति। उक्तं च "मूत्रन्तूपस्थमार्गेण, पुरीषं गुदमार्गतः। अपानवायुना क्षिप्तं बहिर्याति शरीरतः"। उपस्थः शिश्नोभगञ्च। रसस्तु समानवायुना प्रेरितोधमनीमार्गेण शरीरारम्भकस्य रसस्य स्थानं हृदयं गत्वा तेन सह मिश्रितो भवति उक्तं च "रसस्तु हृदयं याति समानमरुतेरितः। स तु व्यानेन विक्षिप्तः सर्वान् धातून् विवर्द्धयेत्। केदारेषु यथा कुल्या पुष्णाति विविधौषधीः। तथा कलेवरे धातून् सर्वान् वर्द्धयते रसः"। रसस्तु तत्र तत्र त्रिधा भिद्यते उक्तं च चरके "स्थूलसूक्ष्म मलैर्भेदैस्तत्तत्त्रिधा रसः"। अधिकआहारपाकशब्दे वक्ष्यते।

आमिक्षा स्त्री आमिक्ष्यते सिच्यते मिश्र–सक्। तप्ते पक्के दुग्धे दधियोगाज्जाते (छाना) पदार्थे। "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा भवति वाजिभ्योवाजिनम्" श्रुतिः "आमिक्षापदसान्निध्यात् तस्यैव विषयार्पणम्" भट्ट का०।

आमिक्षीय न० आमिक्षायै हितं छ। आमिक्षोपकरणे दधि "आमिक्षीयं दधि क्षीरं पुरोडाश्यंतथौषधम्" भट्टिः। ख आमिक्षीणमप्यत्र न०। यत् आमिक्षमप्यत्र न०।

आमितौजि पुंस्त्री अमितौजसोऽपत्यम् बाह्वा० इञ् सलोपश्च। अमितौजसोऽपत्ये स्त्रियां ङीप्।

आमित्रि पुंस्त्री अमित्रस्यापत्यं इञ्। अमित्रापत्ये तत्र भवादि गर्गा० छ। आमित्रीयः तद्भवादौ त्रि० युवापत्ये तु नडा० फक्। आमित्रायणः अमित्रयुवापत्ये आमित्रेरपत्यम् तिका० फिञ्। आमित्रायणिः तदपत्ये। अमित्रस्येदम् अण्। आमित्रः शत्रोःसम्बन्धिनि त्रि० "न्रसामामित्रो व्यथिरादधर्षति" ऋ० ६,२८,३।

आमिश्र त्रि० आ+मिश्र–घञ्। मिलिते संश्लिष्टे। "चेतोजन्मशरप्रसूनमधुभिर्यामिश्रतामाश्रयत्" नैष०। वेदे क्वचित् रसलः। आमिश्रः। "स सोम आमिश्रतमः" ऋ० ६,२८,४।

आमिष न० आमिषति स्नेहम् आ+मिष–क्विप्। मांसे "आमेषवो नवर्डतत्वामिषिः" ऋ० ६,४६,१४ "आमिषि मांसे" भा०।

आमिष न० आमिषति स्नेहम् आ+मिष–सेचने क अमटिषच् दीर्घश्च, वा। १मांसे स्नेहातिरेकात्तस्य तथात्वम् २भोग्यवस्तुमात्रे ३उत्कोचे ४सुन्दररूपादौ ५लोभे ६लोभनीये विषये च। तत्रमांसे "उपानयत् पिण्डमिवामिषस्य" रघुः "आमिषं कलहं हिंसां–वर्षट्कारौ विवर्जयेत्" स्मृतिः "भुङ्क्ते यश्च निरामिषं स हि भवेज्जन्मान्तरे पण्डितः" ज्योति०। "जन्मान्तरे पाण्डित्यकामो जन्मतिथावामिषं न भुञ्जीतेति" गदाधरः। "कालशाकं महाशाकं खड्गलोहामिषं मधु" दश मासांस्तु तृप्यन्ति वराहमहिषामिषैः" मनुः "सात्विकी जपयज्ञैश्च नैवेद्यैश्च निरामिषैः" दुर्गो०त० पु० नाधोयीतामिषं जग्ध्वा" "तच्चामिषेण कर्त्तव्यम्" इति च मनुः। लोभनीये "रम्यान्नेषणदत्तानां द्विषामामिषतां यथौ" "आलभ्य सद्गुणजुषा सरसामिषेण" आनन्दवृन्दा०। "प्राणानेवात्तुमिच्छन्ति नवान्नामिषगर्द्धिनः" मनुः। "पलाण्डामामिषं पर्युं जम्बीरञ्च फलेष्वपीति" स्मृतौ निरामिषव्रते आमिषत्वस्यतया वर्ज्यनीये ७मांसे ८ जम्बीरफले च।

आमिषप्रिय पु० ईत०। १कङ्कपक्षिणि। २मांसाभिलाषिणि त्रि०।

आमिषाशिन् त्रि० आमिषमश्नाति अश–णिनि ईत०। मांसभक्षके "दिनोपवासी तु निशामिषाशी" हारा० स्त्रियां ङीप्। आमिषभुगादयोऽप्यत्र।

आमिषी स्त्री आमिषं तदाकारोऽस्यास्य जटायाम् अर्श०अच् गौरा० ङीष्। जटामांस्याम्। ततः चतुरर्थ्याम् भव्या० यत्। आमिष्यः आमिषीसन्निवेशदेशादौ त्रि०।

आमुक्त त्रि० आ+मुच–क्त। परिहिते "आमुक्तमुक्तालतमस्य वक्षः" माघः।

आमुक्ति स्त्री आ–मुच–क्तिन्। १परिधाने, मर्य्यादायाम् वा अव्ययी०। २मुक्तिपर्य्यन्ते अव्य० "आमुक्ति स्त्रियमन्विच्छेत्"। समासाभावे आ मुक्तेरित्येव।

आमुख न० आमुखयति अभिमुखीकरोति दर्शनार्थं परिषदोऽनेन आमुख+णिच्–करणे अच्। नाटकाङ्गभेदे "तच्चतुर्विधमेदोदाहरणानि" सा०द०यथा "नटी विदूषकोवापि पारिपार्श्विक एव वा। सूत्रधारेण सहिताः संलापं यत्र कुर्वते। चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः। आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा। सूत्रधारसहायत्वात् स्थापकोऽपि सूत्रधारउच्यते। तस्यानुचरः पारिपार्श्विकः। तस्मात् किञ्चिदूनोनटः"।

तस्य भेदाः पञ्च यथाह तत्रैव "उद्घात्यकः कथोद्घातः प्रयोगातिशयस्तथा। प्रवर्त्तकावलगिते पञ्च प्रस्तावना भिदाः। तत्र। पदान्यन्यगतार्थानि तदर्थगतये नराः। योजयन्ति पदैरन्यैः स उद्घात्यक उच्यते१। यथा मुद्रा-राक्षसे स्थल०। "क्रूरग्रहः सकेतुश्चन्द्रमसं पूर्णमण्डलमिदानीम्। अभिभवितुमिच्छति बलात्"। अनन्तरं नेपथ्ये आः क एव मयि जीवति यति चन्द्रगुप्तमभिभवितुमिच्छति। अत्रान्यार्थवन्त्यपि पदानि हृदिस्थार्थावगत्या अर्थान्तरे संग-मय्य पात्रप्रवेशः। स्थलधारस्य वाक्यं वा समादायार्थ-स्य वा। भवेत् पात्रप्रवेशश्चेत् कथोद्घातः स उच्यते२। वाक्यं यथा रत्नावल्याम्। "द्वीपादन्यस्मादपि घटयति विधिरभिमुखीभूतः" इत्यादि। स्थलधारेण पठिते नेपथ्ये एवमेतत् कः सन्देहः द्वीपादन्यस्मादपीत्यादि पठित्वा यौगन्धरायणस्य प्रवेशः। वाक्यार्थं यथा वेणीसंहारे। "निर्वाणवैरदहनाः प्रथमादरीणां नन्दन्तु पाण्डु-तनयाः सह माधवेन। रक्षाप्रसाधितभुवः सुतविग्रहाश्च स्वस्था भवन्तु कुरुराजसुताः सभृत्याः" इति स्थल-धारेण पठितस्य वाक्यस्यार्थं गृहीत्वा नेपथ्ये। आः दुरात्मन्! दुष्टामङ्गलपाठक! कथं "स्वस्था भवन्तु मयि जी-वति धार्त्तराष्ट्राः। ततः स्थलधारोनिष्क्रान्तः भीमसेनस्य प्रवेशः। यदि प्रयोगएकस्मिन् प्रयोगोऽन्यः प्रयुज्यते। तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा ३। यथा कुन्दमा-लायाम्। नेपथ्ये "इतइतोऽवतरत्वार्य्यो" स्थल० कोऽयं खलु आर्य्यानेन साहायकं मे सम्पादयति विलोक्य कष्टमतिकरुणं वर्त्तते। "लङ्केश्वरस्य भवने सुचिरं स्थितेति रामेण लोकपरिवादभयाकुलेन। निर्वासितां जनपदा-दपि गर्भगुर्व्वीं सीतां वनाय परिकर्षति लक्ष्मणोऽयम्"। अत्र स्थलप्रयोगार्थं स्वभार्य्याज्ञानभिच्छता स्थलधारेण "सीतां वनाय परिकर्षति लक्ष्मणोऽयमिति" सीतालक्ष्मणयोः प्रवेशं सूचयित्वा निष्क्रान्तेन स्वप्रयोगमतिशयानएव प्रयोगः प्रयोजितः। कालं प्रकृतमाश्रित्य स्थलधृक् यत्र वर्ण-येत्। तदाश्रयश्च पात्रस्य प्रवेशस्तत्प्रवर्त्तकम् ४। यथा "आसादितप्रकटनिर्मलचन्द्रहासः प्रायः शरत्समय एव विशुद्धकान्तः। उत्खाय गाढतमसं घनकालमुग्रं रामोदया-दिव सम्भृतवन्युजोघः"। ततः प्रविशति यथा निर्दिष्टोरामः। यत्रैकस्य समावेशात् कार्य्यमन्यत्प्रसाध्यते। प्रयोगे खलु तज्ज्ञेयं नाम्नावलगितं बुधैः५। यथा शाकुन्तले। स्थल० नटीमति "तवास्मि गीतरागेण हारिणा प्रसभं हृतः। एव राजेव दुष्मन्तः शारङ्गेणातिरंहसा"। ततोराज्ञः प्रवेशः। योज्यान्यत्र यथालाभं वीथ्यङ्गानीतराण्यपि। अत्र आ-मुखे उद्घात्यकावलगितयोरितराणि वीथ्यङ्गानि वक्ष्यमा-णानि। नवकृत्तस्तु "नेपथ्योक्तं श्रुतं यत्र त्वाकाशवचनं तथा। समाश्रित्यापि कर्त्तव्यमासुखं नाटकादिषु"। एषामामुखभेदानामेकं कञ्चित्प्रयोजयेत्। तेनार्थसंग-पात्रं वा समाश्रित्यैव स्थलधृक्। प्रस्तावनान्ते निर्गच्छे-त्ततोवस्तु प्रयोजयेत्। तत्र पूर्व्वं पूर्व्वरङ्गः सभार्चन मतः परम्। कवेर्वंशादेर्नाटकस्याभिधा ततः। रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः। रूपकस्य कवेराख्यां गोत्राद्यपि च कीर्त्तयेत्। अतश्च कञ्चित्प्रवेश्य भारतीं वृत्तिमाश्रितः। तस्याः प्ररोचना वीथी"।

आसुप पु० आमे पोढ़ार्थे उप्यते वप–घञर्थे क। (वेडवास वंशभेदे। [ऋ०४,३१,६।

आसुर त्रि०आ+सुर्व्व–क्विप्। हिंसके। "राधोवरन्त आसुरः"

आसुरिक त्रि० असुरिन् परलोके भवः ठक् सप्तम्याः अलुक् टिलोपः। परलोकभवे "कुर्य्यादासुरिकं श्रेयः" मनुः। स्त्रियां ङीप्। "नैवालोच्य गरीयसीरपि चिरादासुरि-कीर्य्यातनाः" सा०द०।

आसुष्यकुलक न०असुष्यकुलस्य भावः मनोज्ञा० वुञ् अलुक्। प्रशस्यकुलत्वे "आसुष्यायणासुष्यपुत्रिकासुष्यकुलिका" इति वार्त्तिकोक्तेः अस्य स्त्रीत्वमपि।

आसुष्यकुलीन त्रि० असुष्यकुले साधुः प्रतिस० खञ् तद्गणपाठात् वृद्धा अलुक्। असुष्यकुले साधौ।

आसुष्यपुत्रिका स्त्री असुष्य पुत्रस्य भावः मनोज्ञा० वुञ् अलुक्। असुष्यपुत्रस्य भावे। आसुष्यकुलकशब्दे प्रदर्शितवार्त्तिकात् स्त्रीत्वम्।

आसुष्यायण न०असुष्य ख्यातस्यापत्यम् नड्रा०फक् अलुक्। प्रख्यातवंशोद्भवे "आसुष्यायणोवै त्वमसि" श्रुतिः।

आस्पृष्ट त्रि० आ+स्पृष–क्त। १आधर्षिते २मर्दिते च "आस्पृ-ष्टास्त्रिलकरुचः स्रजोनिरस्ताः" माघः। आ+स्पृज–क्त। १परिमार्जिते २विशोधिते च। आ+स्पृग–क्त ५संस्पृष्टे च

आमोक पु० आ+मुच–घञ्। परिधाने। ह्युट्। आमो-चनमप्यत्र न०।

आमोद पु० आमोदयति आ+मुद–णिच्–अच्। १अतिदूरगे गन्धे "आमोदसूचिभ्रमनौ स्वनिश्वासानुकारिणौ" रघुः "आमोदकर्म्मव्यतिहारमीयुः" माघः। उत्तमस्त्रीणां २सुखनिश्वासादिगन्धे च। "सुखामोदं मदिरया कृतानु-

व्याधसदृगिरन्" माघः । आ+हृद-घञ् । १प्रहर्षे ल्युट् । आमोदनमप्यत्र न० ।

आमोदन त्रि० आ+हृद-णिच् ल्यु । प्रहर्षजनके सुगन्धिसम्पादने "अमुञ्चतामोदनमोदनं जनाः" नैष० । भावे ल्युट् । १प्रहर्षसम्पादने २सुगन्धसम्पादने च ।

आमोदित त्रि० आ+हृद-णिच्-क्त । १प्रहर्षिते २कृतामोदे ३सुरभीकृते च ।

आमोदिन् त्रि० आमोदयति सुरभीकरोति आमोद+कृत्यर्थे णिच्-णिनि । सुखवासने १कर्पूरादौ । आमोद+अस्त्यर्थे इनि । २आमोदयुक्ते स्त्रियां ङीप् । "नवकुटजवनस्यामोदिनो गन्धवाहाः" ।

आमोष त्रि० आमुष्णाति-आ+मुष-घञ्वाद्यच् । सम्यगपहारके चौरादौ । आ+मुष-भावे घञ् । २अपहरणे । "यथा विभ्यदामोषमोषात्" शत० ब्रा० ।

आम्नात त्रि० आ+म्ना-क्त । १सम्यगभ्यस्ते २सम्यगधीते वेदादौ । ३कथिते च "समौ हि गिष्टैराम्नातौ" माघः भावे क्त । ४सम्यगभ्यासे न० ।

आम्नातिन् त्रि० आम्नातमनेन इष्टा० इनि । १कृतवेदाद्यभ्यासे २कृतवेदाध्ययने च स्त्रियां ङीप् । "आम्नातिभिर्नीतिषु बुद्धिमद्भिः" भट्टिः ।

आम्नान न० आ+भावे ल्युट् । १वेदादिपाठे २तदभ्यासे च "विष्णु र्वामावास्यायां फौलान्नानात्" काल्या० ३,१,२५।

आम्नाय पु० आ+म्ना-घञ् । १सम्यगभ्यासे २सम्यक्पाठे च अभ्यासस्य सम्यक्त्वं च नियमधारणपूर्वकत्वं गुरुमुखश्रवणपूर्वकत्वञ्च । कर्म्मणि घञ् । ३वेदे "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" जैमि० "आम्नाये स्मृतितन्त्रे च" रघु० हतपु० । "आम्नायवचनं सत्यमित्यवं लोकसंग्रहः-आम्नायेभ्यः पुनर्वेदाः प्रसृताः सर्वतोमुखाः भा० शा० २६१अ० । [वुञ् । आम्बरीषपुत्रवंशविषयादौ ।

आम्बरीषपुत्रक पु० अम्बरीषपुत्र+चतुरर्थां राजन्या०

आम्बष्ठ पुंस्त्री० अम्बष्ठस्यापत्यम् शिवा० अण् । अम्बष्ठापत्ये अञ् । आम्बष्ठः । स्त्रियाम् चाप् ।

आम्बिकेय पु० अम्बिकाया अपत्यं शुभा० ढक् । विचित्रवीर्य्यस्य क्षेत्रे काशिराजस्य मध्यमकन्यायाम् अम्बिकायां व्यासेनोत्पादिते धृतराष्ट्रे स हि अकाले दिवं गतस्य विचित्रवीर्य्यस्य अम्बिकाम्बालिकयोरुत्तरोर्मध्ये अम्बिकायां ज्येष्ठभार्य्यायां सत्यवत्यानियुक्तेन व्यासेनोत्पादितः तत्कथा यथा "ततोऽम्बिकायां प्रथमं नियुक्तः सत्यवाग्ऋषिः । दीप्तेषु दीपेषु शरण्यं प्रविवेश ह । तस्य क्षणस्य कपिला जटा दीप्ते च लोचने । बभ्रूणि चैव श्मश्रूणि तद्दा देवी न्यमीलयत् । संबभूव तया सार्द्धं मातुः प्रियचिकीर्षया । भयात् कामीसुता तन्तु नाशक्नोदभिवीक्षितुम् । ततो निष्क्रान्त मागत्य माता पुत्रमुवाच ह । अप्यर्थां गुणवान् पुत्रोराजपुत्रो भविष्यति ? । नियम्य तद्दचोमातुर्व्यासः सत्यवतीसुतः । प्रोवाचातीन्द्रियज्ञानो विधिना संप्रचोदितः । नागायुतसमप्राणो विद्वान् राजर्षिसत्तमः । महाभागो महौदार्यो महाबुद्धिर्भविष्यति । तस्य चापि शतं पुत्रा भविष्यन्ति महाबलाः । किन्तु मातुः स वैगुण्यादन्ध एव भविष्यति" इत्युपक्रम्य यावद्विदूरोत्पत्तिस्तावच्च "एते विचित्रवीर्य्यस्य क्षेत्रे द्वैपायनादृषेः । जज्ञिरे देवगर्भाभाः कुरुवंशविवर्द्धनाः" इत्युक्तम् भा० आ० प० १०६ अ० । अम्बिकायाश्च यथा विचित्रवीर्य्यभार्य्यात्वं तथोक्तं अम्बाशब्दे ३२८पृष्ठे "आम्बिकेयेन दत्ते राज्ञा दुर्योधनेन च" भा० व० प० १२अ० "परं श्रेयः पाण्डवेया ! यथाह भीष्मस्तत्र श्रुतवान्नाम्बिकेयः" भा० व० प० ५अ० । अम्बिकायाः पार्व्वत्या अपत्यम् ढक् । २कार्त्तिकेये । तस्य तदुत्पत्तिकथा अग्निकुमारशब्दे ६५पृष्ठे दृश्या ।

आम्भसिक पु० आम्भसा वर्त्तते ठक् । मत्स्ये सि० कौ० ।

आम्भि त्रि० अम्भसो जातादि बाह्वा० इञ् सलोपश्च । अम्भोजातादौ ।

आम्र पु० अम-गत्यादिषु रन् दीर्घश्च । १खनामख्याते वृक्षे तस्य फलम् अण् तस्य लुक् । २तत्फले च न० । आम्रस्य फलगुणादिगुणा उक्ता भा० म० । यथा "आम्रपुष्पमतीसारकफपित्तप्रमेहनुत् । अक्षग्दुष्टिहरं शीतं रुचिकृत् स्वादि वातनुत् । आम्रं बालं कषायाम्लं रूक्षं मारुतपित्तकृत् । तरुणं तु तदत्यम्लं रूक्षं दोषत्रयाकृत् । आम्रमामं त्वचा हीनमातपेतीव शोषितम् अम्लं स्वादु कषायं स्याद्वातघ्नं कफवर्द्धनम् । पक्वन्तु मधुरं हृद्यं स्निग्धं शुक्रबलप्रदम् । गुरु वातहरं वृष्यं बल्यं शीतमपित्तनुत् । कषायाम्लरसं वह्निदीपनं शुक्रविवर्द्धनम् । तदेव शुष्कसम्पक्वं गुरु वातहरं परम् । मधुराम्लं सरं किञ्चित् भवेत् पित्तप्रकोपनम् । आम्रं क्वथितमपक्वं यत्तद्भवेत् पित्तनाशनम् । रसस्याम्लस्य हानेस्तु माधुर्यात्च विशेषतः । चूषितं तत् परं रूक्षं बलवीर्य्यकरं लघु । शीतलं शीघ्रपाकि स्यादातपिहरं परम् । तद्रसोगालितो बल्यो गुरुर्वात

हरः सरः। अङ्गुल्यर्पणोऽतीव हृंहणः कफवर्द्धनः। तस्य खण्डं गुरु परं रोचनं चिरपाकि च। मधुरं हृंहणं बल्यं शीतलं वातनाशनम् वातपित्तहरं रुच्यं हृंहणं बलवर्द्धनम्। हृद्यं वर्णकरं स्वादु दुग्धाक्तं गुरु शीतलम्। मन्दानलत्वम् विषमज्वरञ्च रक्तामयं बद्ध गुदोदरञ्च। आम्रातियोगो नयनामयञ्च करोति तस्मादति तानि नाद्यात्। एतदम्राम्रविषयं मधुराम्रं परं नतु। मधुरस्य परं नेत्रहितत्वाद्या गुणायतः। शुण्ठ्यम्लस्नुपानं स्वादाम्राणामतिभक्षे। जीरकं वा प्रयोक्तव्यं सह सौवर्चलेन च। आम्रबीजं कषायं स्याच्छर्दितीसार नाशनम्। रैवतस्तञ्च मधुरं तथा हृदयदाहनुत्। आम्रस्य पल्लवं रुच्यं कफपित्तविनाशनम्"। पल्लवमत्र नवदलम्। अस्य शाकपाकप्रकारस्तत्रैव "खिन्ना निर्मोड़िताः काम कोकिलाहारपल्लवाः। इतस्निग्धूलसंसिद्धा रुच्या रामठवासिताः। सर्षपा खण्डयुक्तास्ते तक्रिताम्राम्रपल्लवाः। लवङ्गार्द्रकसंयुक्तामरीचैं रुचिकारकाः"। अस्य पल्लवमुकुलानां पाकप्रकारस्तत्रैव "आम्रस्य चैव नवताम्रविप्रवालाः खण्डीकृतालवणमिश्रितपिष्पलीताः। वाल्लीकधूपनजुषोष्टतदुग्धसिद्धाः सन्दीपयन्ति पवनस्य सखायमेते। मुद्गलः सङ्कटयाखिनः घृतखण्डीकृतसैन्धवान्वितः। दधिमन्थमरीचसंस्कृतश्चिरजातामरुचिं छिनत्ति हि। कफपित्तहरौ हृद्यौ मुखवैरस्य नाशनौ। वह्निसङ्जननौ रुच्यौ घृतजौ पुष्पपल्लवौ। आम्रमामं जलक्षिप्तं मर्द्दितं दृढपाणिना। सिताशीताम्बुसंयुक्तं कर्पूरमरिचान्वितम्। प्रपानकमिदं श्रेष्ठं भीमसेननिर्म्मितम्। सद्योरुचिकरं बल्यं शीघ्रमिन्द्रिय तर्पणमिति"। [पाकभेदे राजनि०।

आम्रगन्धक पु० आम्रस्येव गन्धोऽस्य कप्। समट्टिवृक्षे,

आम्रगुप्त पु० गोत्रप्रवर्त्तके ऋषिभेदे। तस्यापत्यम् उदीचां फक्ते फिञ्। आम्रगुप्तायनिः पु० स्त्री० प्राचान्फक्ते ढक्। तदपत्ये स्त्रि० स्त्री०।

आम्रपेशी स्त्रि० आम्रस्य पेशीव। शुष्काम्रकोषे (आमसी)

आम्रमय त्रि० आम्रस्य विकारः अवयवो वा डट्त्वात् मयट्। १आम्रविकारे। २तदवयवे च।

आम्ररसाकृति स्त्री आम्ररसस्येवाकृतिः स्वादो यस्याः। पीताख्यरसालभेदे। तत्पाकप्रकारो यथा भा०प्र०"किञ्चित् कुङ्कुमसंयुक्तं विमस्तुदधिगालितम्। सघृतं भवेत् पीता पक्वाम्ररससन्निभा। पीता भिखरणी या सा ख्यो वर्ष्मवती हि सा। गुरुच्या मधुरा बल्या वातपित्तहरा मता" अत्र पीताख्यशिखरिण्याः पक्वाम्ररसतुल्यत्वोक्त्या तथात्वम्। [दाक्षायणीके वने।

आम्रवण न० आम्रस्य वनम् नित्यं षत्वम्। आम्रवृक्षसमूहे

आम्रात पु० आम्रमाम्ररसमतति अत-पचा० अच्। (आमड़ा) १वृक्षे २तत्फले न०। तत्फलस्याम्लतुल्यरसत्वात्तथात्वम्। "आम्रातमम्लं वातघ्नं गुरूष्णं रुचिकृत् परम्। सुपक्वं तुवरं स्वादु रसपाकं स्निग्धं स्मृतम्। तर्पणं श्लेष्मलं स्निग्धं रुच्यं विष्टम्भि हृंहणम्। गुरु बल्यं मरुत्पित्तक्षतदाहक्षयाजितं" भा०प्र०।

आम्रातक पु० आम्र इवातति आम्रात् किञ्चिदूनरसफलकत्वात् अत-खुञ्। (आमड़ा) १वृक्षे २तत्फले न०। आम्रेण तत्फलरसेन तकते प्रकाशते आ+तक-घञ्। शुष्काम्ररसनिर्म्मिते (आमट्) द्रव्यभेदे तत्करणप्रकारः भावप्र० उक्तः। यथा "आम्रस्य सङ्कटस्य कटे विस्तारितोरसः। धर्म्मशुष्को सुखदंत्त आम्रातक इति स्मृतः"।

आम्रातकेश्वर पु० आम्रातक इव ईश्वर ईश्वरलिङ्गमस्य। सिद्धस्थानभेदे। "आम्रातकेश्वरे स्नात्वा स्वर्गलोके परमेश्वरी" देवीपु०।

आम्रावती स्त्री आम्र आम्ररसो विद्यतेऽस्यां मतुप् मस्य वः वरा० दीर्घः। नदीभेदे। तस्या आम्रतुल्यरसतोययुक्तत्वात्तथात्वम्।

आम्रावर्त्त पु० आम्रइव तुल्यरसतया वर्त्तते आ+वृत-अच्। १आम्रातवृक्षे २तत्फले न०। आम्रेण आम्ररसेन आवर्त्त्यते निष्पाद्यते आ+वृत-णिच्-कर्मणि घञ् (आमट्) ख्याते ३पदार्थे आम्रातकशब्दे तत्करणप्रकार उक्तः "आम्रावर्त्तस्तृषाच्छर्हि वातपित्तहरः सरः। रुच्यः सूर्य्यांशुभिः पाकात् लघुश्च स हि कीर्त्तितः" भावप्र०।

आम्रिमन् पु० अम्लोरसोऽस्यस्य प्रज्ञा० अण् इदा० गणपाठात् रस्य लः ततोभावे इदा० इमनिच्। अम्लत्वे रसभेदे वा ष्यञ्। आम्र्यमम्लत्वं न०।

आम्रेडित त्रि० आ+म्रेड-उन्मादे अच् आम्रेडेन उन्मत्तेनेवाचर्य्यते आम्रेड+आचारे क्विप् ततः क्त। उन्मत्तेन यथा कथितस्य पुनःपुनः कथनं क्रियते एवं हिरुक्तिकथिते "आम्रेडितस्यान्यस्य तु वा" पा०।

आम्लवेतस पु० आम्लः अम्लरसयुक्तः वेतस इव। १अम्लवेतसवृक्षे राजनि० स्वार्थे संज्ञायां वा कन्। २तिन्तिडीवृक्षे (तेतुल)।

आस्वा स्त्री० सम्यक् आस्वो रसो यस्याः। १तिन्तिड्याम् (तेतुल) स्वार्थे कनि आस्विकाप्यत्र। २अम्लरसयुक्ते त्रि०। मनोज्ञा०भावे वुञ् आस्विका। २अम्लरसे ३अम्लोद्गारे च शब्दमाला। अम्लरसोऽस्यस्य अण् ङीप्। आम्लोत्यपि तिन्तिड्याम्।

आय पु० आ–इण–अच् अय–घञ् वा। १लाभे २प्राप्तौ, "आयव्ययविशोधितात्" स्मृतिः आयव्ययौ च नियताकरान् कोषमेव च" मनुः। ३धनागमे, ज्योतिषोक्ते लग्नावधिके राश्यवधिके च ४एकादशस्थाने, ४वनितागारपालके च कर्मणि अच् घञ् वा। यामादितः स्वामिप्राह्यभागे, लभ्ये ५धनादौ "तदस्मिन् इष्टायलाभोपदा दीयते" पा० यामेषु स्वामिप्राह्यो भाग आयः" सि० कौ० लग्नावधिकैकादशस्थानस्थायत्वं च तत्स्थाने आयस्य चिन्तनीयत्वात्। तत्र वर्षलग्नावधिकैकादशस्थाने यहविशेषयोगादिभिरायोपायविवेकः। नीलकण्ठता० "अब्दे भेऽर्घगे लाभो वाणिज्यात् शुभदृग्युते। सैन्यिहेऽस्मिन् लग्नगे तु लाभः पठनलेखनात्। अस्मिन् षडाटान्यगते सक्रूरे नीचकर्मतः। क्रूरेक्षणेन लाभोऽस्तंगतेन लिखनादिभिः। जीवेऽब्दभे क्रूरदृते लग्ने हानिर्न्दपाद्भयम्। अस्मिन्नधिपेनेत्यग्रोक्ते लाभः स्वजनगौरवम्। सर्वेऽपि लाभे विप्राद्या सबला निर्बला न तु। सवीर्योक्तः ससुखहोलग्ने ऽर्धसहमे शुभम्। ददाति खातद्रव्यं लाभः पापदृशा न तु"। आयसहमन्तु सहमशब्दे वक्ष्यते आयभावानयनञ्च ५।१६ पृष्ठे अष्टमभावशब्दोक्तदिशावसेयम्। जन्मलग्नावधिकैकादशस्थाने यहस्थित्यादिभिरायविवेकः जातकप०उक्तः यथा "स्वामिसदृग्यहयुतेक्षित आये सर्वलाभसहितः शुभवर्गे। क्रूरदृष्टिसहिते खलवर्गे नो शुभं खलशुभे च विमिश्रम्। सर्व्वखेचरयुतं त्वथ दृष्टं लाभमस्वखललाभकरन्तत्। तत्र यो बलयुतो निजदृष्ट्या स्वं धनं दिशति सम्यगतुच्छम्। उच्चे स्वमित्रसहगोबलवांश्च पूर्णं, यत्नोर्गुहे तु खचरश्चरणं ददाति। नीचारिभांशकगतोऽर्द्धफलप्रदः स्यादस्तंगतोऽल्पकफलः खलु लाभभावे। लाभर्क्षे रवियुतेक्षखवर्गैः संयुते क्षपचतुष्पदचौर्य्यैः। युद्धतोऽपि हि धनं विधुजैस्तोयदन्तियुवतिप्रभवं स्यात्। लाभे कुजे क्षितियुते कुजवर्गयुक्ते वित्तं प्रवालमणिभूषणकाञ्चनाढ्यम्। स्यात् साहसैश्च गमनागमनैस्तथाग्नियन्त्रप्रपञ्चजनितैर्वचनानुनीनाम्। बुधदृष्टेऽथ वा युक्ते लाभे बुधगतेऽपि वा। वित्तं लिखनशिल्पादैरङ्गवेसरकास्यजम्। आये इन्दुस्मितयुतीक्षखवर्गयुक्ते यत्नादिहेमसुतविक्रमनागरैः स्वम्। शौक्रेक्षणे गणयुते गमनाङ्गनाभ्योवाराङ्गनारजतपत्रभयं धनं स्यात्। शनियुक्ते लाभस्थे शनिदृष्टे शनेर्गणे। महिषी लोहक्षय्यं धनं स्यावरकर्मभिः। निजाब्दकेऽर्कैः प्रचुरार्थलाभं लक्ष्मीं कुजोऽब्जेन धनं नृपाब्दे। भृः पञ्चवेदे धनमिन्द्रपूज्यो लक्ष्मीं सितोऽर्के कुजवच्छनिस्तु"। राश्यधिकैकादस्थाने च गोचरे सर्वे ग्रहाः शुभाः "सर्वेऽप्युपान्त्ये शुभाः" इत्युक्तेः अत्र विशेषो गोचरशब्दे वक्ष्यते।

आयःशूलिक त्रि० अयःशूलेनार्थान् अन्विच्छति+अयःशूल+ठक्। "तीक्ष्णोपायेन योऽन्विच्छेत् स आयःशूलिको जन" इत्युक्ते तीक्ष्णकर्मणार्थकरे।

आयजि त्रि० आभिमुख्येन इज्यते आ+यज–कर्मणि–इन्। १आभिमुख्येन इज्यमाने "आयजे! त्वामनवे जातवेदसम्" ऋ० ८,२३,१७ भावे इन्। २आभिमुख्येन यागे।

आयज्यु त्रि० आत्मन आयजिमिच्छति क्यच् उण् नि० इलोपः। आभिमुख्येन यागमिच्छति। "आयज्वः सुमतिं विश्ववाराः" ऋ० ६,२७,२६।

आयत त्रि०आ+यम–क्त। १दीर्घे आयामयुक्ते "धनुरायतभोगवासुकिज्या" किरा०। आ+यम–अन्तर्भूतण्यर्थे कर्मणि क्त। २आकृष्टे "आरचितानायतबलगवन्यैः" माघः। "आयता आकृष्टा बलात्न्यायैः" मल्लि०। ३दूरेच आकृष्टे "प्रजविभिरायतन्तरङ्गैः" किरा०। "आयतं दूरमिति" मल्लि०। "भूयसी तव यदायतायति" माघः ४नियमिते च। त्रिर्जग्रेदायतप्राणः" योगिया०। प्राणनियमनञ्च यशेदप्राणवृत्तिनिरोधनम्। [त्रिका०।

आयतच्छदा स्त्री आयतः दीर्घश्छदोऽस्याः। कदल्याम्

आयतन न० आयतन्तेऽत्र यत–आधारे ल्युट्। १देवादिवन्दनस्थाने, २आश्रये, "स्नेहस्तदेकायतनं जगाम" कुमा०। "नरेन्द्रमूलायतना दनन्तरम्" रघुः। "रोगायतनमात्मानं न जीर्णदेवायतने न वल्मीके कदाचन" "सीमासन्धिषु कार्य्याणि देवतायतनानि" इति च मनुः। ३विश्रामस्थाने ४यज्ञस्थाने च।

आयतस्तु त्रि० आयतं स्तौति स्तु–किप् नि० दीर्घः। आयतस्तावके। "क्विब्वचिप्रच्छ्यायतस्तूकडप्रुजूश्रीणां दीर्घोऽसम्प्रसारणञ्च" वार्त्ति०।

आयति(ती) त्रि०आ+या–क्तिन् वा ङीप्। १उत्तरकाले आगामिकाले २प्रभावे कोपदण्डजे तेजसि ३फलदानकाले च।

"आयतिं सर्व्वकालानां तदात्वं च विचारयेत्" मनुः "भूयसी तव यदायतायति" माघः "नियता लघुता निरायतेः" किरा० । आ+यम-क्तिन् । ४आयामे दैर्घ्ये । "सीमानमत्यायतयोऽत्यजन्त" माघः । ५संयमे "क्षेत्रखानायतिभङ्गः" काद० ६प्रापणे ७सङ्गमे च अत्र क्तिन्नन्तत्वात् न ङीबिति भेदः । ८कर्म्मणि च "क्षिरस्यसूभिसंप्राप्तः पार्थिवो न तर्षयते । यया मित्रं ध्रुवं लब्ध्वा लभ्यमप्यायतिक्षमम्" मनुः । "आयतिक्षमं कर्म्मक्षमम्" कुल्लू० ।

आयतीगव अव्य० आयन्ति गावोऽत्र तिष्ठद्गुप्र० अव्ययी० नि० । गोदोहनागमनकाले । "आ तिष्ठद्गु जघन्यां प्रकान्तामायतीगवम्" भट्टिः ।

आयतीसम अव्य० आयन्ति समा अत्र तिष्ठद्गुप्र० नि० अव्ययी० । वत्सरागमनकाले ।

आयत्त त्रि० आ+यत-क्त । अधीने १वशीभूते "दैवायत्तं कुले जन्म ममायत्तं हि पौरुषम्" वेणी० । २कृतप्रयत्ने च ।

आयत्ति स्त्री आ+यत-क्तिन् । १स्नेहे, २वश्यत्वे, ३सामर्थ्ये, ४सौम्ये, ५शयने, ६प्रभावे ७आगतौ च उपाये च "अनायत्त्या च तत्कल्पनम्" भा० भा० ।

आयथातथ्य न० न यथातथं तस्य भावः ष्यञ् वा पूर्व्वपदवृद्धिः । अनौचित्ये यस्य यद्रूपं नोचितं तद्रूपे । उत्तरपदवृद्धौ अयाथातथ्यमप्यत्र न० ।

आयथापूर्व्य न० पूर्व्वमनतिक्रम्य यथापूर्व्वं न०त०तस्य भावः ष्यञ् वा पूर्व्वपदवृद्धिः । यथापूर्व्वानुसारित्वे उत्तरपदवृद्धौ तु अयाथापूर्व्यमप्यत्र न० ।

आयन न० अयनमेव स्वार्थे अण् आ+अयनं वा प्रा०स० । १सम्यग्गमने "आयने ते परायणे दूर्व्वा रोहन्तु पुष्पिणीः" अ० १०,१४२,८ । अयनस्येदम् अण् । यङ्गाणां दक्षिणोत्तरगमनरूपायनस्य २सम्बन्धिनि त्रि० तच्च आयनवलनायनवृत्तकर्म्मादि ज्योतिषप्रसिद्धं तत्रायनवलनं यथा सि०शि० "युतायनांशोड्यकोटिशिञ्जिनी जिनांशभौर्व्या १२६७ गुणिता विभाजिता । द्युजीवया लब्धफलस्य कार्मुकम् भवेच्चयाङ्कायनदिक्कमायनम्" । "यङ्गस्य सायनांशस्य कोटिज्या जिनांशज्यया गुणा द्युज्यया भक्ता फलस्य चापमायनं वलनं भवति यस्मिन्नयने यङ्गोवर्त्तते तद्दिक् भवति" प्रभिता० । आयनवृत्तकर्म्म त्रि०शि० उक्तं यथा । "आयनं वलनमस्फुटेषुणा संगुणं द्युगुणभाजितं कृतम् । पूर्णपूर्णधृतिभिर्भृहाश्चितव्यक्तभोदयवृद्धायनाः कलाः । अस्फुटेषुवलनाहतिस्तु वा यष्टिवृत् फलकलाः खरायनाः । ता यङ्गेऽयनवृत्तकयोः क्रमादेकभिन्नकवृत्तभोर्क्षणं धनम्" । "यङ्गस्य यदायनं वलनं तदस्फुटशरेण संगुण्य तद्द्युज्यया भजेत् । फलमष्टादशशतैः १८०० संगुण्य यस्मिन् राशौ यङ्गोवर्त्तते तस्य निरक्षोदयासुभिर्विभजेत् । फलमायनकला भवन्ति । अथ वायनवलनकला अस्फुटेन शरेण संगुण्य यच्छया विभजेत् । फलमायनकलाः खखान्तरा भवन्तीत्यनुकल्पः । यङ्गो यस्मिन्नयने वर्त्तते तस्यायनस्य यङ्गशरस्य च यद्यदा दिक् तदा ता आयनाः कला यङ्गे ऋणं कार्य्याः । यदि तयोर्भिन्ना दिक् तदा धनं कार्य्याः । एवं कृतायनवृत्तकर्म्मको यङ्गो भवति । अत्रोपपत्तिर्गोले सविस्तराभिहिता । अथेहापि किञ्चिदुच्यते । क्रान्तिवृत्ते यद्भयङ्गस्थानचिह्नं तदुदा क्षितिजे लगति न तदा यङ्गः । यतोऽसौ शराग्रे । शराग्रं हि कदम्बाभिमुखम् । यदोत्तरकदम्बः क्षितिजादुपरि भवति तदा तदुन्मुखेन शरेण यङ्गः क्षितिजादुद्भाव्यते । क्षितिजकदम्बयोरन्तरं तदेवोत्तरमायनं वलनम् । यदा क्षितिजादधः कदम्बस्तदा शरेण यङ्गो नाभ्यते क्षितिजकदम्बयोरन्तरं तदा दक्षिणं वलनम् । अतो वलनवशेन यङ्गस्योन्नामनं नामनं च । उन्नामितो यङ्ग आदावेवोदितः । नामितः पश्चादुदेष्यति । स च कियता कालेनेति तदायनं त्रैराशिकेन । यदि त्रिज्यातुल्ये कर्णे कदक्षितिजयोरन्तरकला वलनसंज्ञा लभ्यन्ते तदा अस्फुटशरतुल्ये किमिति फलं यङ्गादधोऽवलम्बरूपाः कला भवन्ति । यङ्गस्थाने यद्द्युज्याहतं तत्र ता जीवारूपाः । तासां त्रिज्याहतपरिणामायान्योऽनुपातः । यदि द्युज्याहतएतावती ज्या तदा त्रिज्याहते कियतीत्येवं याः फलकलास्ता एवासवः । फलस्य धनुःखखत्वाद्योत्पद्यत इति न कृतम् । तैः क्रान्तिवृत्ते परिणामायान्योऽनुपातः । यदि निरक्षोदयासुभी राशिकला अष्टादश शतानि लभ्यन्ते तदैभिरसुभिः किमिति फलं क्रान्तिवृत्तपरिणताः कला भवन्ति । यदोत्तरं किल वलनमुत्तरस्य विक्षेपस्तदा तेन विक्षेपेणोन्नामितो यङ्गो यावत् क्षितिजं नीयते तावत् क्रान्तिवृत्तयङ्गस्थानात् पूर्वतः क्रान्तिवृत्तं क्षितिजे लगति तदेव स्थानं कृतवृत्तकर्म्मको यङ्गः । किं बहुना गोले क्रान्तिमण्डले यत्स्थानं विमण्डलं विन्यस्य तत्र यङ्गं च दत्त्वा चिह्नं कार्यम् । अथ ध्रुवादुयङ्गोपरि नीयमानं दक्षाकारं वृत्तं यत्र क्रान्तिवृत्ते लगति तत्र

कृतदक्कर्मको यहः । एवं ध्रुवान्नीयमानेन स्वलवेण ग्रहकृतं लम्बनं भवति । क्रान्तिदृक्तुल्यदेशान्तरादयतः पूर्वतो वा आयनकलातुल्येऽन्तरे तत् स्वलं क्रान्तिदृक्ते लगति । अत आयनकला भुजः, अस्फुटविक्षेपः कोटिः, ग्रहायक्रान्तिदृक्तुल्योरन्तरे यावत् स्वलखण्डं स तत्र कर्णः । एतत् लम्बनं वलनलम्बसंभवम् । अतस्त्रैराशिकेन वलनकलानामानयनम् । यदि यष्टिकोद्या वलनकलाभुजो लभ्यते तदा अस्फुटविक्षेपकोद्या किमिति फलमायनकला इति सर्वमुपपन्नम्" ग्रहगणितादरा ।

आयमन न० आ+यम–ल्युट् । १दैर्घ्ये णिच्–ल्युट् । २नियमने ३संयतकरणे दृढस्य संकुचितस्याङ्गस्य ४दीर्घीकरणे च । "यथा दृढस्य धनुष आयमनम्" छा०उ० ।

आयलक पु० आयन्निव लोयते अत्र लो–आधारे वा०ड ततः संज्ञायां कन् । उत्कण्ठायाम् हेम० ।

आयस त्रि० अयसो विकारः अण् स्त्रियां ङीप् । लौहमये । "शक्तिञ्चोभयतस्तीक्ष्णामायसं दण्डमेव वा" "पुमांसं दाहयेत् पापं शयने तप्तआयसे" इति च मनुः । "स चकर्षपरश्वात् तत् अयस्कान्त इवायसम्" रघुः । "मूढबुद्धिमिवात्मानं हैमीभूतमिवायसम्" कुमा० । २लौहमयकवचे च ३अङ्करचिह्नयां जातिकायां स्त्री । अयस एव स्वार्थे अण् । ४लौहे । ततः विकारे मयट् लोहमये त्रि० स्त्रियां ङीप् ।

आयसीय त्रि० अयसः सन्निकृष्टदेशादि० कृत्या० छण् । लौहसन्निकृष्टदेशादौ ।

आयस्कार पु० अयस्कार एव स्वार्थे अण् । लौहकारे त्रिका०

आयस्त त्रि० आ+यस–क्त । १क्षिप्ते "आयस्तमिक्ष्वाकुतिरुत्पपात" किरा० २क्लेशिते ३प्रतिहते ४तीक्ष्णीकृते ५आयासयुक्ते च ।

आयस्थान न०ऐत० । १लाभस्थाने, राज्ञां २शुल्कग्रहणस्थाद्याकरस्थाने "ठञ् ठगायस्थानेभ्यः" पा० । ज्योतिषोक्ते ३लग्नादेकादशस्थाने च ।

आयस्थूण त्रि० अयोमयो स्थूणायस्य तस्यापत्यं शिवा० अण् । अयस्थूणापत्ये स्त्रियां ङीप् । [त्वेत्यर्थे ।

आयस्य अव्य० आ+यस–ल्यप् । आयासं कृत्वा भृशं यति-

आयात त्रि० आ+या–क्त । आगते स्थानात् स्थानान्तरं प्राप्ते । "यामोयातस्तथापि नायातः" सा०द० । "आयाता मधुयामिनी" उद्भटः । "आयाता ब्रह्मणः शक्तिर्ब्रह्मणी साभिधीयते" देवीभा० ।

आयाति पु० आ+या+क्तिच् । "यातिर्यवातिः संयाति रायातिः पश्चिमोमतः" हरि० ३०अ० "यातिर्यवातिः संयातिरायातिः सयतिस्तथा । नङ्कषोजनयामास षट्सुतान् प्रियवादिनः" इति च हरि० उक्ते १नङ्कषसुतभेदे आ+या–भावे क्तिन् । २आगमने स्थानान्तरगमने ।

आयान न० आ+या–ल्युट् । १ आगमने आयाति यावद्द्रव्यम् आ+या–ल्यु । २स्वभावे जटा० स्वभावस्य यावद्द्रव्यव्यायित्वात्तथात्वम् ।

आयाम पु० आ+यम–भावे घञ् । दीर्घपरिमाणभेदे "अणुमहद्ह्रस्वदीर्घभेदात् परिमाणचातुर्विध्यमिति वैशेषिकादयः स्वीचक्रुः । अणुमहद्रूपं परिमाणद्वयमिति साङ्ख्याः ह्रस्वदीर्घयोर्महत्त्वएवान्तर्भावात् । तत्र अल्पसंख्यकावयवत्वमणुत्वम् अधिकावयवजन्यत्वं महत्त्वम् तेषु च अवयवप्रचयेषु ययोः पार्श्वयोराधिक्यं तत्र दीर्घत्वव्यवहारः यत्र च पार्श्वयोरल्पत्वं तत्र विस्तीर्णत्वं ह्रस्वत्वं च व्यवह्रियते "अस्थूलमनघह्रस्वमदीर्घमिति" श्रुतौ च अवान्तरभेदमाश्रित्यैव परिमाणचातुर्विध्योक्तिर्द्रष्टव्या अस्य गुणमात्रत्वाच्चित्वम् न तु अणुमहदादिवत् गुणगुणिभेदव्यवहारयोग्यत्वमपि इतिभेदः । "आयामवद्भिः करिणां घटाशतैः" माघः "यावानूर्ध्वं बाहुकः पुरुषस्तावदायामः" आह्निक० "यस्य चायामः" पा० "श्रोतश्चक्षुरायामात्स्त्रियामा यान्ति साम्यतम्" रामा० । आ+यस+घञ्–अच् । २नियमने प्राणायामः प्राणवायोर्नियमनम् "प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति" "एकाक्षरं परं ब्रह्म प्राणायामः परं तपः" मनुः । आयामोऽस्यास्ति बला० वा इनि पक्षे मतुप् । आयामी आयामवान् आयामयुक्ते त्रि० स्त्रियां ङीप् । यामशब्दस्याङा मर्य्यादायाम् अव्ययीभावः । ३प्रहरपर्य्यन्ते अव्य० ।

आयास पु० आ+यस–घञ् । श्रमवत्वे "क्लेशमूलानि दुःखानि देहजानि भयानि च । शोकहर्षौ तथायासः सर्वं स्नेहात् प्रवर्त्तते" भा०व० २०० अ० "रत्नायास मनस्तापक्षुत्पिपासादिसम्भवा" सा०द० ।

आयासक त्रि० आ+यस–ण्वुल् । १आयासयुक्ते । णिच्–ण्वुल् । २आयाससम्पादके च ।

आयासिन् त्रि० आयस्यति आ+यस–णिनि । आयासयुक्ते "कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनायासि" भर्तृ० ।

आयिन् त्रि० आयोलाभोऽस्यास्ति इनि । १लाभयुक्ते मतुप् आयवानप्यत्र त्रि० इण–णिनि । २गन्तरि स्त्रियां ङीप् ।

आयु त्रि० "छन्दसीणः" उणा० इण–उण् । गमनशीले "ता अस्य

वर्षमायुर्वोनेदुः सवना धेनवः" ऋ०२,५,५ । "आयुर्वो-गन्त्वाः" भा०उवङ् छान्दसः "अभि सोमास आयवः पवन्ते मद्यं मदम्" ऋ० ९,२३,४ । २आयुषि न० "कालः-क्रीड़ति गच्छत्यायुरित्यूक्तेः कालगत्यैव तस्य गामित्वात्तथात्वम् । जीवनस्य कालरूपत्वे तु कालस्य सततगामित्वात्सततात्वं युक्तमेव "अग्ने जरस्व स्वापत्य आयुन्यूर्ज्जा" ऋ०२,३,७ । "वत्सं न पूर्व्यं आयुनि जातं रिहन्ति मातरः" ऋ० ९,१००,१ आयुनि आयुषि" भा० बाहुलकात् भाषायामपि उण् उज्ज्व० । तेन "वायुना जगदायुना" इत्यपि विवेकः । "मा बधिष्टा जटायुं मम्" भट्टिः । "तटीं विन्ध्यस्याद्रेरभजत जटायोः प्रथमजः" इति अभिनन्दः ।

आयुक्त त्रि० आ+युज-कर्म्मणि क्त । १सम्यग्व्यापारिते । "आयुक्तकुशलाभ्याञ्चासेवायाम्" पा० "आयुक्तः व्यापारितः" सि०कौ० । "कुशलोऽन्येषणस्याहमायुक्तो दूतकर्म्मणि" भट्टिः २ईषद्युक्ते च "आसेवायां किम् ? आयुक्ता गौः शकटे ईषद्युक्तः" सि०कौ० । भावे क्त । ३सम्यग्नियोजने न० । आयुक्तमनेन इष्टा० इनि । आयुक्ती सम्यग्नियोजनकर्त्तरि त्रि० स्त्रियां ङीप् ।

आयुध न० आयुध्यतेऽनेन आ+युध-करणे घञर्थे क । शस्त्रमात्रे । तस्य भेदाः समासतस्त्रिधा प्रहरणहस्तमुक्त यन्त्रमुक्तभेदात् । तत्र हस्तस्थितैर्यैः प्रक्षिप्यते तानि प्रहरणानि यथा खड्गादीनि । हस्तमुक्तानि चक्रादीनि, यन्त्रमुक्तानि शरादीनि । तेषां सर्व्वेषां युद्धसाधनत्वादायुधत्वम् । "न मे त्वदन्येन विशोढमायुधम्" रघुः । "येऽपीन्द्रपाणिप्रहितायुधस्यनपत्राः" माघः । "न छत्रं न विसन्नाहं न वस्त्रं न निरायुधम्" मनुः ।

आयुधधर्म्मिणी स्त्री आयुधस्येव धर्मोऽस्त्यस्या इनि ङीप् । जयन्तीवृक्षे शब्दच० । साहि रोगनाशने आयुधसमा

आयुधन्यास पु० आयुधानां न्यासः तत्तत्स्थानस्वरूपपूर्व्वकं तत्तन्मन्त्राणामर्पणबुद्ध्या स्थापनम् । श्रीविद्यापूजाङ्गे "एवं कामकलारूपं देवतामयमात्मनः । वपुर्विचिन्त्य शिवयोरायुधन्यासमाचरेत्" इत्यादिना ज्ञानार्णवोक्ते न्यासभेदे । तन्त्रसारे श्रीविद्यापूजाप्रकरणे विवृतिर्द्रष्टव्या ।

आयुधागार न० ६त० । राज्ञां प्रहरणस्थापनार्थे गृहे । "सखड्गमायुधागारमिदं तस्य दुरात्मनः" । "आयुधागारसादोष्म" इति च भा०आ०प०१४७,४८ अ० । "कोशागारायुधागारदेवतागारभेदकान्" मनुः । आयुधागारे नियुक्तः ठक् । आयुधागारिकः तत्रनियुक्ते त्रि० । तद्गुणसङ्गे मात्रे । "स्थापनाजातितत्त्वज्ञः सततं प्रतिजाग्रतः । राज्ञः स्यादायुधागारे दक्षः कर्म्मसु चोद्यतः" ।

आयुधिक पु०आयुधेन तद्व्यवहारेण जीवति ठञ् । शस्त्राजीवे पक्षे च आयुधीयोऽप्यत्र । आयुधाजीवादयोऽप्यत्र ।

आयुधिन् पु० आयुधमस्यास्य इनि । शस्त्रधारके ।

आयुध्य न० युद्ध्यति युध-क न०त० ततो भावे अवहरादिपाठात् ष्यञ् न त्वतलौ । १योद्धृभिन्नत्वे । आ+युध-ल्यप् । २सम्यग्युद्धं कृत्वेत्यर्थे अव्य० ।

आयुर्दाय पु० आयुषोदायः दानम् । बलविशेषस्थितियोगादिभिः ज्योतिषोक्ते रव्याधिभिः आयुषोदाने तद्विवरणं श्रीपतिपद्धतौ यथा

"आयुर्ज्ञानादेव होराफलानां कर्त्तुं यस्माच्छक्यते यत्नतोऽत्र । आयुर्दायः संप्रदायागतोऽयं सच्छास्त्राणां प्रोतवे कथ्यतेऽत्र । एकोनदीधितिसमादिह गच्छतो यद्भूपादिरूपचयसंकलितहृयं स्यात् । चेष्टोद्भरश्मिजमथ स्वमरीचिभक्तं तज्जायतेऽत्र गुणकहितयं तदाख्यम् । जन्मे भवे तां निजदीधितिभ्यः श्रेष्ठीफले ते यदि रश्मियुक्ते । तदर्द्धिते स्वांशुभिरूढते ते तद्घातमूलं गुणकः स्फुटः स्यात्" । इति गुणकानयनमलाय भेदस्तट्टीकायामुक्तः । "अल्पार्के तु किरणाः सैकाश्चतुर्भक्ता भवेद्गुणः । अधिकार्के द्विरेकास्ते दलिता गुणको भवेत्" "वर्गोऽस्मे स्वभवने स्वनवांशके च स्वलग्नके च गुणकोदितयं निरुक्तः । अध्यर्द्धरूप २/२ मधिमित्रदृष्टे सुहृद्गे सलग्नकं ४/२ समदृष्टे खलु रूपमेव । त्रिंशोनितं २/२ रिपुदृष्टेऽध्यरिभे दलं १/२ स्वादेभ्योगुणो भवति यः खलु कश्चिदेकः । वेदोद्धृतः सभगुणोगुणकैः प्रदिष्टोहोरादिवर्गगुणकस्तु भवेत्तदर्द्धम् । एतेऽपि गुण्यागदितामरुद्भिरपेक्षयानन्तर ताड़कानाम् । ७नगांशका ११रुद्रभिताह्यभीष्टरागौ सुहृद्दे भ्रमनि मूर्च्छनांशाः । १९नवाश्विनो १रूपसदासरागौ २१कुह्नांशका १३विश्वसमा द्विपद्मे । लवो नगांशा अधिमत्रुराशावेते भसंज्ञाश्च राशिवर्ज्जम् । वर्गोत्तमाख्यांशजका नवत्रिभागस्थिते यद्धे तु हितयं २गुणचेत् । एतैरभीष्टादिगुणैर्निहन्यादुदीरितैराशिगुणं पुनस्वम् । स्वर्क्षादिके वर्गगणे स्वकीये द्विकोगुणस्त्रिंगविवर्ज्जितः सः । अभीष्टभे मित्रदृष्टे नवांशा विश्वेऽथ रूपञ्च समस्य गेहे । नवांशकाः पञ्च विरोधरागौ गुणांशकः स्यादधिवैरिणोभे । पूर्वस्मपूर्व्वागुणकाय उक्ता वर्गेषु सप्तस्विह गुण्यसंज्ञाः । गुण्यागुणैस्तैस्त्वधिकारलब्धैरुक्तैः गुणैः स्यादथ भिन्नितैस्तैः । स्फुतोबुधैराश्रयसंज्ञितोऽयमस्य स्फुटस्यापि

वधो भवेद् यः । तस्यैव मूलं खलु कर्मतोऽस्य आयुर्विधाने गुणकार उक्तः । यहस्य लिप्ताः खखसिद्ध २४००भक्ताः प्रोक्ताः कलाः शेषमिहायुषोऽत्र । लग्नं यहोनं यदि षड्भहेयो हीनं तदानीं हरसंभवः स्यात् । नैवाधिके तत्र खगोनलग्ने लिप्तीकृते राशिकला १८०० विभक्ते । आयुःकलानां स हरः स्फुटः स्यात् रूपाद्यदाप्तः सहरस्तदानीम् । रूपादिशुद्धोगुणकस्तु तासामेवं हि पापद्युचरोनलग्ने । शुभोनलग्ने तु हरोहिनिघ्न आयुः कलाभ्योहरलब्धलिप्ताः । विशोधनीया यदि रूपकोनोहरस्तदानीं गुणकेन गुण्यः । चक्रार्द्धहानौ बहुषु द्वयोर्वा द्युचारिणोरेकमहस्यथोस्तु । सत्याभिधानस्य मतेन सत्यं स्वांशं हरत्येव बलोत्कटोयः । एवं कार्या चक्रपातार्द्धहानिरायुर्दाये स्वांशजे पिण्डजे च" इत्यंशायुः "नैसर्गाख्ये जीवसौम्योदिते च हारं कृत्वात्वेककोनोगुणः स्यात्" निसर्गायुर्विशेषः । "आयुर्लिप्ताः स्वगुणगुणिता व्योमसून्याब्धि २०० भक्ता अब्दामासादिवसघटिकाः स्युर्दिनाद्याः क्रमेण" "एवं यथायथं गुणकगुणिता आयुर्लिप्ताः २०० भक्ता अब्दा भवन्ति शेषं विकला द्वादशभिर्गुणयित्वा षष्ट्या विभज्य लब्धं कलासु संयोज्य पुनरपि ताः कला द्विघ्न्या विभजेत् तेन मासा भवन्ति । पुनःशेषं त्रिंशता गुणयित्वा कलासु संयोज्य द्विघ्न्या भागे दिवसा भवन्ति पुनःशेषं षष्ट्यागुण्य कलासु संयोज्य द्विघ्न्या विभज्य लब्धं घटिका भवन्ति । एवं पलानि च" । "एवं सर्वं द्युचरजनितं ह्यायुरनीय लग्नादायुः साध्यं कथितविधिना किन्तु लग्ने विशेषः"। "एवं द्युगणजनितमिति रव्यादिग्रहस्फुटितं तेन तत्तद्ग्रहदत्तायुरुच्यते इत्यर्थः"। "लग्ने तु वीर्याभ्यधिके भतुल्यैर्वर्षैर्युतं तत्र विधेयमायुः । भागादिकादग्रयनुपातलब्धं मासादिना संयुतमेव कार्यम्"वीर्याधिके षडधिके इत्यर्थः। अनुपातस्तु लग्नभागादि द्विगुणं कृत्वा पञ्चभिर्भक्ता लब्धं मासाः शेषं त्रिंशतागुण्य पञ्चभिर्भक्तं लब्धं दिनानि शेषं षष्ट्यागुण्य पञ्चभिर्भक्ता लब्धं घटिका एवं पलादिकमुह्येयम् । एवं लग्नायुः" अथ रव्यादीनां पिण्डायुः । "नन्देन्दवो १९ वाणयमाः२५ शरच्छा१५ दिवाकराः १२ पञ्चभुवः१५ कुपक्षाः २१ । नखाब्ध२०भास्वत्रसखग्रहाणां पिण्डायुषोऽब्दा निजदृग्गानाम् । निजोच्चशुद्धः खचरोविशोध्योभमखण्डनात् षड्वनोनकर्क्षैः । तत्र खाभ्रसचन्द्रविलोकै २१६०० हृते सति यदाप्यते फलम् । वर्षमासदिननाड़िकाद्यृतं तद्धि पिण्डभवमायुरिष्यते" इति पिण्डायुः । "त्रिंशुक्रं हरति शतुभे ग्रहः स्वायुषोऽत्र न तु वक्रचारगः । सूर्यलुप्तहरिणोऽर्कहारकः प्रोज्झ्य भार्गवदिनेशनन्दनौ । खचरोजायते योऽर्कत्रिंशयोरपहारकः । आयुषः स हरेदर्कं त्रिंशं शुक्रशनैश्चरौ । प्राग्वत्फलानि खहरैर्विधाय तदैक्यतो यत्पग्रहसंख्ययाप्तम् । तदत्र ह्यार्कं बलिनो ग्रहस्य जगौ मणित्थोहरिरित्यमेव । हरयुतिर्विच्छिन्नाग्रहसंख्यया स च हरोपचयश्च ततः फलम् । अधिकवीर्यतोऽन्यचारिणो निगदतीति सनिः किल देवलः। लिप्तीभूतैर्लग्नभागैर्निहन्यादादायुर्दायं खेचराणां हृचक्रस्थम्। व्योमाकाग्नर्त्विन्दुपक्षै२१६००भंजेत्तं स्वायुर्दायात् शोध्यमब्दादि लब्धम् । एवं क्रूरे लग्नगे सौम्यदृष्टे तस्मिन्दाये तत्फलार्द्धं विशोध्यम् । एतद्दाये नांशसंज्ञे विधेयं पिण्डायुर्वत् कर्म नैसर्गिकेऽपि, अत्र विशेषो लघुपक्षतौ । "लग्नेदृग्शुभसंदोदयस्थहात् क्षित्वांशनिघ्नं फलं क्रूरस्योदय भावजं यदि तनौ द्वौ तद्बलिनश्च च । चेत् साम्येऽधिक भावजेन बलयोस्तेन यहायुः कला निघ्नाः खाभ्ररसेन्दुदस्र २१६००विच्छृता लब्धं त्यजेत् स्वायुषः" । लग्नगपापस्य लग्ने सत्त्वे तु न त्यागः "योयो भावः स्वामिदृष्टो युतो वेत्यादिना" तस्य पुष्टत्वाभिधनात्, "क्रूरःसोऽपि शुभेक्षितो यदि तदा लब्धस्य खण्डं त्यजेत् नैतत् कर्म विलग्नमे तनुगते क्रूरेऽपि नांशायुषीत्युक्तेश्च" यहाणां बलं च बलशब्दे वक्ष्यते । नखाः २०शशी १द्वौ २ नवकं ९षट्तिथ१८ क्षितिः २० खवाणा५० रविपूर्वकाणाम् इयं निरुक्ताक्रमशोयहाणां नैसर्गिके ह्यायुषि वर्षसंख्या"। इति नैसर्गिकयहदत्तायुः इदानीमंशायुःप्रभृतीनां कस्य कुत्र याह्यता तदाह । "अंशोद्भवं लग्नबलात् प्रसाध्यमायुश्च पिण्डोद्भवमर्कवीर्यात् । नैसर्गिकं चन्द्रससोबलेन ब्रूमस्त्रयाणामथ वीर्यसाम्ये । अंशोद्भवं लग्नबलेन कुर्यात् पिण्डाख्यमायुश्च बलेन भानोः । नैसर्गिकं चन्द्रससो बलेन सर्वाण्यथैकत्र विधाय तानि । विलग्नतिग्मांशुहिमद्युतीनां हरैक्यलैक्येन ततो यदाप्तम् । वर्षाद्यमायुस्तदिह स्फुटं स्यात् श्रीनीलकण्ठादय एवमूचुः । लग्नार्कयोगिनोबलन्यूनाः स्युर्यदात्र परमायुरंशम्" हीनबलत्वमाह दामोदरः रूपत्रयाढ्यं किल षड्बलैक्यं भवेद्विलग्नस्य खगस्य यस्य । स्वस्वामिना नो सहितो न दृष्टः स हीनवीर्यः कथितो-

मुनीन्द्रैः"। केशवोऽपि "लग्ने हीनबली बली षडधिके वीर्ये यदृच्छोदयः"। "सर्व एव खचरा ददतीदं जीवयमेगदितं हि तदायुः। यदृः खोडुहीनः स चेत् षड्भदृहीनो भचक्राद्विशोध्योऽथ भागीकृतः सन्। कुवेदर्तुनागै ८६४१ र्हतो वेदखाब्धै ५०४ र्विभक्तोदिनाद्यम्बवत्येव आयुः" यदृोक्यः खरामै ३० र्हतेभ्योऽधिमासाः यतर्क्षैश्च तेभ्योभवेयुस्तदाद्याः। भचक्रार्द्धहान्यादिकोऽन्योविधिर्यः सपिण्डोडुवायुर्वदेवात्र कार्यः इति। आयुःखर्चतेषु बलाढ्यलग्ने विहाय राशीन् कृतलिप्तिकेऽत्र भक्ते द्विगुणा २०० फलमद्रूपं यत्स्यात् विलग्नायुषि तच्च योज्यम्। लग्नार्कयोरर्कशशाङ्कयोश्च लग्नोडुपत्योरपि वीर्यसाम्ये। तदायुषोरैक्यदलं भवेदृयत् तत् श्रीधरादौः स्फुटमायुरुक्तम्" इति लग्नायुः।"ये धर्मकर्मनिरता विजितेन्द्रियाये वे पथ्यभोजनजुषोद्विजदेवभक्ताः। लोकोत्तरन्द्धति ये कुलशीललीलां तेषामिदङ्गदितमायुरुदारधीभिः"। अष्टवर्गादपि आयुर्दायज्ञानं भवति तच्चाष्टवर्गशब्दे उक्तप्रायम्। ५२२ पृष्ठे दृश्यम् नक्षत्रायुःकेन्द्रायुःप्रभृतीनां विस्तरभयादिहानुक्तिराकरे तच्च दृश्यम्।

आयुर्द्रव्य न० आयुःसाधनं द्रव्यम् षा० त०। १औषधे रत्नमा० २आयुःसाधने घृते च "आयुर्वै घृतमित्युक्तेः घृतस्यायुर्जनकत्वात्तथात्वम्।

आयुर्योग पु० उचितस्यायुषोज्ञापकः योगः। ज्योतिषोक्ते यदृयोगभेदे सचायुःशब्दे दृश्यः।

आयुर्वृद्धि स्त्री आयुषो वृद्धिः। द्रव्यविशेषसेवनेनायुषो वृद्धौ तानि च द्रव्याणि कतिचिदुच्यन्ते। रस एव तावत् सर्वापेक्षयायुर्वृद्धिकरः "अभ्रकं तव बीजन्तु मम बीजन्तु पारदः। अनयोर्मेलनं देवि! कुरु दारिद्र्यनाशनम्" इति सर्व०द०गौरीं प्रति शिववाक्यम्" कर्मयोगेन देवेशि! प्राप्यते पिण्डधारणम्। रसश्च पवनश्चेति कर्म्मयोगो द्विधा स्मृतः। मूर्च्छितो हरति व्याधीन् मृतो जीवयति स्वयम्। बद्धः खेचरतां कुर्य्यादसौ वायुश्च भैरवि!" इति सर्व०द० तन्त्रवाक्यम्। यथा च वायोर्निरोधेनैव आयुर्वृद्धिः। तयोक्तं काशी० "संनियम्येन्द्रियग्रामं नातिनीचोच्छ्रितासनः। मध्यमञ्जोत्तमं चाथ प्राणायाममुपक्रमेत्। चले ऽनिले चलं सर्वं निश्चले तत्व निश्चले। स्थाणुत्वमाप्नुयाद्योगीततोऽनिलनिरोधनात्। यावद्देहे स्थितः प्राणो जीवितं तावदुच्यते। निर्गते तत्र मरणं ततः प्राणं निरोधयेत्। प्राणायामेन युक्तेन सर्व्वव्याधिक्षयोभवेत् अयुक्ताभ्यासयोगेन सर्व्वव्याधिसमुद्भवः" ततश्च प्राणायामस्य सर्व्वव्याधिहरत्वादप्यायुर्वृद्धिकरत्वम्। अस्यचायुर्वृद्धिकरत्वेऽन्यदपि कारणम् तथा हि "षष्टिश्वासैर्भवेत् प्राणः षट्प्राणा नाड़िका मता। षष्टिर्नाड्यस्त्वहोरात्रो जपसंख्याक्रमोमतः। एकविंशतिसाहस्रं षट्शतानि महेश्वरि!। जपति प्रत्यहं प्राणीवि"तन्त्रोक्ता २१६०० एतन्मिताः श्वासरूपाः प्राणक्रियाः अहोरात्रे भवन्ति तत्सरसंख्यया ३६० गुणितास्ताः ७७७६००० एतन्मिता वत्सरे भवन्ति। "शतायुर्वै पुरुष" इति श्रुत्या मनुष्याणां स्वाभाविकशतायुर्द्योक्तेः शतेन गुणितास्ताः ७७७६०००० एतन्मिताः प्राणक्रिया मनुष्याणां जीवनकाले भवितुमर्हन्ति तत्र प्राणायामादिना प्राणवायोर्निरोधे प्राणक्रियानुत्पत्तेः प्राणक्रिया रोधकाले च यावत्यः प्राणक्रिया भवितुमर्हन्ति तावन्तःकालाआयुषो वर्द्धन्त इति। उक्ताः प्राणक्रियाश्च सुस्थस्यैव भवन्ति रोगाद्युपसर्गे शीघ्रधावनादिपरिश्रमे च प्राणक्रियाधिक्यं भवति तेन स्वल्पकालमध्ये यावत्प्राणक्रिया अपेक्षितास्तावन्यूनकालमध्ये तासामुत्पत्तावायुःक्षयः। शतायुष्ट्वञ्च स्वाभाविकं कर्म्मवशात् ततोन्यूनताऽपि जात्यायुर्भोगानां कर्म्मविपाकत्वस्य योगशास्त्रे उक्तेः। तादृगल्पायुष्ट्वादिसूचको यदृविशेषयोगादिर्ज्योतिषे उक्तः। अत्रदोषादीनाञ्चाल्पायुष्ट्वप्रयोजकत्वं स्फुटमुक्तमष्टवर्गादेव। वैद्यकोक्तापथ्यभोजनस्य तथात्वञ्च रोगोत्पत्तिद्वारेतिभेदः। रोगोपसृष्टदेहं च जीवो दुःखहेतुत्वात् वज्रात्प्रायुपदृतदेशवत् शीघ्रं परित्यजतीति। तथा च देहो यथा न रोगादिभिरुपसृज्येत" तथा यतितव्यमित्येतदर्थं शास्त्रेषु पथ्योपदेशः इति बोध्यम्। एवं खेचरीमुद्रादीनामप्यायुर्वृद्धिकरत्वम् काशी० उक्तम्। "कपालकुहरे जिह्वा प्रविष्टा विपरीतगा। भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी। न पीड्यते स रोगेण न च लिप्येत कर्म्मणा। बाध्यते न स कालेन योमुद्रां वेत्ति खेचरीम्। चित्तं चरति खे यस्माज्जिह्वा चरति खे गता। तेनैषा खेचरी नाम मुद्रा सिद्धैर्निषेविता। यावद्बिन्दुः स्थिरोदेहे तावन्मृत्युभयं कुतः। यावद्बद्धा नभोमुद्रा तावद्बिन्दुर्न गच्छति। उड्डीनं कुरुते यस्मादहोरात्रं महाखगः। उड्डीयानं ततः प्रोक्तं तत्र बन्धोऽभिधीयते। जठरे पश्चिमं जानु नाभेरूर्द्ध्वञ्च धारयेत्। उड्डीयानं ह्ययं बन्धोमृत्योरपि भयं जयेत्। बध्नाति हि शिराजालं अधोगामि नभोजनम्। एष जालन्धरोबन्धः कण्ठे दुःखौघनाशनः। जालन्धरे कृते बन्धे कण्ठसंकोचलक्षणे।

न पीयूषं पतत्यग्नौ न च वायुः प्रधावति । पार्ष्णिभागेन संपीड्य योनिमाकुञ्चयेदुगुदम् । अपानमूर्ध्वमाकृष्य मूलबन्धोऽभिधीयते । अपानप्राणयोरैक्यं क्षये मूलपुरीषयोः । युवा भवति वृद्धोऽपि सततं मूलबन्धनात्" । एवमन्यान्यपि आर्त्तानि कर्माणि आयुर्वृद्धिकराणि "मत्स्यान् भोजयतो द्विजाय ददतोऽप्यायुश्चिरं वर्द्धते""आयुष्यं प्राङ्मुखोभुङ्क्ते" इत्यादीनि ।

रसवत् अन्यान्यपि द्रव्याणि सेवितानि आयुर्वृद्धिकराणि श्रुतेषु दर्शितानि तानि रसतुल्यतया रसायनानि यथा

"अथातः सर्व्वोपघातशमनीयं रसायनं व्याख्यास्यामः । पूर्वे वयसि मध्ये वा मनुष्यस्य रसायनम् । प्रयुञ्जीत भिषक् प्राज्ञः स्निग्धशुद्धतनोः सदा । नाविशुद्धशरीरस्य युक्तो रसायनो विधिः । न भाति वाससि क्लिष्टे रङ्गयोग इवाहितः । शरीरस्योपघाता ये दोषजा मानसास्तथा । उपदिष्टाः प्रदेशेषु तेषां वक्ष्यामि वारणम् । शीतोदकं पयः क्षौद्रं सर्पिरित्येकशो द्विशः । त्रिशः समस्तशो वा प्राक् पीतं स्यादपवेद्दयः । तत्र विडङ्गतण्डुलचूर्णमाहृत्य यष्टीमधुयुक्तं यथाबलं शीततोयेनोपयुञ्जीत शीततोयं वानुपिबेदेवमहरहर्मासं तदेव मधुयुक्तं भल्लातकक्वाथेन वा मधूदाक्षाक्वाथयुक्तं वा मध्यामलकरसाभ्यां वा गुडूचीक्वाथेन वा । एवमेते पञ्च प्रयोगा भवन्ति जीर्णे मुद्गामलकयूषेणालवणेनाल्पस्नेहेन हृतवन्मोदनमश्नीयात् । एते खल्वंशाः क्षपयन्ति क्रमोपयुक्ता यक्ष्मणधारणशक्तिं जनयन्ति मासेमासे प्रयोगे वर्षशतमायुषोऽभिवृद्धिर्भवति । विडङ्गतण्डुलानां द्रोणं पिष्टपचने पिष्टवदुत्क्लेद्य विगतकषायं स्निग्धमवतार्य्य दृषदि पिष्टमायसे दृढे कुम्भे मधूदकोत्तरं प्राग्वदपि भस्मराशावन्तर्गृहे चतुरो मासान्निदध्यात् वर्षाविगमे चोद्धृत्योपसंस्कृतशरीरः सहस्रसम्पातामिद्धृतं कृत्वा प्रातः प्रातर्यथाबलमुपयुञ्जीत, जीर्णे मुद्गामलकयूषेणालवणेनाल्पस्नेहेन हृतवन्मोदनमश्नीयात् पांशुगव्यायां गवीत । तस्य मासादूर्द्धं सर्वाङ्गेभ्यः कृमयो निःक्रामन्ति तानणुतैलेनाभ्यक्तस्य वंशपिटलेना पहरेत् । द्वितीये पिपीलिकास्तृतीये यूकास्तथैवापहरेत् चतुर्थे दन्तनखरोमाण्यवशीर्य्यन्ते पञ्चमे प्रभूतगुणबलवयांसि जायन्ते । अमानुषं चादित्यप्रकाशं वपुरधिगच्छति दूराच्छ्रवणानि दर्शनानि चास्य भवन्ति रजस्तमसी चापोह्य सत्वमधितिष्ठति । श्रुतिनिगाद्यपूर्वोत्पादो गजवल्लोऽश्ववच्च पुनर्युवाद्यौ वर्षशतान्यायुरवाप्नोति ।

तस्याणुतैलमभ्यङ्गार्थे । अजकर्णकषायमुत्सादनार्थे सौगीरं, कूपोदकं स्नानार्थे, चन्दनमुपलेपनार्थे, भल्लातकविधानमुदाहारः परिहारश्च । काश्यपीयानां निष्कृष्टीकृतानामेष एव कल्पः पांशुगव्याभोजनवर्जम् । अत्र हि पयसा मृतेन भोक्तव्यम् आश्विषश्च पूर्वेण समानाः । शोणितपित्तनिमित्तेषु विकारेष्वेतेषामुपयोगः । यथोक्तमागारं प्रविश्य बलामूलार्द्धपलं पलं वा पयसालोड्य पिबेत् । जीर्णे पयः सर्पिरोदनमित्याहारः । एवं द्वादशरात्रमुपयुज्य द्वादश वर्षाणि वयस्तिष्ठति । एवं दिवसशतमुपयुज्य वर्षशतं वयस्तिष्ठति । एवमेवातिबलानागबलाविदारीशतावरीणामुपयोगः । विशेषतस्त्वतिबलामुदकेन, नागबलाचूर्णं मधुना, विदारीचूर्णं वा क्षीरेण, शतावरीमघृतेन, पूर्वेणान्यत् समानमाश्विषश्च समाः । एतास्तौषधयो बलकामाभ्यां शोणितं हर्षयतां विरिच्यमानानां चोपदिश्यन्ते । वाराहीमूलतुलाचूर्णं कृत्वा ततोमात्रां मधुयुक्तां पयसालोड्य पिबेत् जीर्णे पयःसर्पिरोदनमित्याहारः । प्रतिषेधोऽत्र पूर्ववत् क्रियाप्रयोगमुपसेवमानो वर्षशतमायुरवाप्नोति स्त्रीषु चात्र यताम् । एतेनैव चूर्णेन पयोऽचूर्णमृतशीतमभिमथ्याज्यमुत्पाद्य मधुयुतमुपयुञ्जीत सायम्प्रातरेककालं वा जीर्णे पयःसर्पिरोदनमित्याहारः । एवं मासमुपयुज्य वर्षशतायुर्भवति । जीर्णे पयः सर्पिरोदन इत्याहारः । चक्षुःकामः प्राणकामो वा बीजकसाराग्निमन्थमूलं निःक्वाथ्य आढकप्रस्थं साधयेत् तस्मिन् सिध्यति चित्रकमूलानामक्षमात्रं कल्कं दद्यादामलकरसचतुर्थभागं ततः स्निग्धमवतार्य्य सहस्रसम्पाताभिघृतं कृत्वा शीतीभूतं मधुसर्पिर्भ्यां संसृज्योपयुञ्जीत यथाबलं लवणं परिहरन् भक्षयेत् जीर्णे मुद्गामलकयूषेणालवणेन हृतवन्मोदनमश्नीयात् पयसा वा मासमवमेवाभ्यां प्रयोगाभ्यां चक्षुःसौपर्ण्यबलवत्त्वनख्यवलो बलवान् स्त्रीषु चात्र्यो वर्षशतायुर्भवतीति । भवति चात्र ।

पयसा सह सिद्धानि नरः सनफलानि यः । भक्षयेत् पयसा सार्द्धं वयस्तस्य न शीर्य्यते ।

अथातो मेधायुष्कामीयं रसायनं चिकित्सितं व्याख्यास्यामः । मेधायुःकामः श्वेतवल्गुजफलान्यातपपरिशुष्कान्यादाय सूक्ष्मचूर्णानि कृत्वा गुडेन सह समालोड्य स्नेहकुम्भे सप्तरात्रं धान्यराशौ निदध्यात् सप्तरात्रादुद्धृत्य कृतदोषस्य यथाबलं पिण्डं प्रयच्छेदनुदिते सूर्ये उष्णोदकं चानुपिबेत् । भल्लातकविधान-

वह्नागारप्रवेशो जीर्णौषधद्वापराह्णे हिमाभिरद्भिः परिषिक्तगात्रः शालीनां षष्टिकानां च पयसा शर्करामधुरेक्षौदनमश्नीयादेवं षण्मासानुपयुञ्ज्य विगतपाप्मा बलवर्णोपेतः श्रुतिनिगादी स्मृतिमानरोगो वर्षशतायुर्भवति। कृष्णं पाण्डुरोगिणमुदरिणं वा क्षय्याया गोमूत्रेणालोड्यार्द्धपलिकं पिण्डं विगतलोहिते सवितरि पायवेत, अपराह्णे चालवणेनामलकयूषेण सर्पिष्मन्तमोदनमश्नीयात्। एवं मासमुपयुञ्ज्य स्मृतिमानरोगो वर्षशतायुर्भवति एष एवोपयोगश्चित्रकमूलानां, रजन्याश्चित्रकमूले विशेषो द्विपलिकं पिण्डं परं प्रमाणं शेषं पूर्ववत्।

स्नृतदोष एव प्रतिसंस्पृष्टभक्तो यथाक्रममागारं प्रविश्य मण्डूकपर्णीस्वरसमादाय सहस्रसम्पाताभिघृतं कृत्वा यथाबलं पयसालोड्य पिबेत् पयोऽनुपानं वा तस्यां जीर्णायां यवाग्वां पयसोपयुञ्जीत तिलैर्वा सह भक्षयित्वा त्रीन्मासान् पयोऽनुपानं जीर्णे पयः सर्पिरोदन इत्याहारः। एवमुपयुञ्जानः ब्रह्मवर्चसी श्रुतनिगादी भवति वर्षशतमायुरवाप्नोति त्रिरात्रोपोषितश्च त्रिरात्रमेनां भक्षयेत्। त्रिरात्रादूर्ध्वं पयःसर्पिरिति चोपयुञ्जीत। बिल्वमात्रं पिण्डं वा पयसालोड्य पिबेदेवं दशरात्रमुपयुञ्ज्य मेधावी वर्षशतायुर्भवति। स्नृतदोष एवागारं प्रविश्य प्रतिसंस्पृष्टभक्तो ब्राह्मीस्वरसमादाय सहस्रसम्पाताभिघृतं कृत्वा यथाबलमुपयुञ्जीत जीर्णौषधद्वापराह्णे यवागूमलवणां पिबेत् क्षीरसात्म्यो वा पयसा भुञ्जीत। एवं सप्तरात्रमुपयुञ्ज्य ब्रह्मवर्चसी मेधावी भवति। द्वितीयं सप्तरात्रमुपयुञ्ज्य अन्यभौक्षितमुत्पादयति। नष्टश्रुतं प्रादुर्भवति। तृतीयं सप्तरात्रमुपयुञ्ज्य द्विसहस्रितं शतमध्यवधारयति। एवमेकविंशतिरात्रमुपयुञ्ज्यालक्ष्मीरपक्रामति मूर्त्तिमती चैनं वाग्व्येनुप्रविशति सर्वाश्चैनं श्रुतय उपतिष्ठन्ति। श्रुतधरः पञ्चवर्षशतायुर्भवति। ब्राह्मीस्वरसप्रस्थद्वये घृतप्रस्थं विड्डतखण्डानां कुडवं हे हे पले वचाचित्रकबीजादश हरीतक्यामलकपिप्पलीकानि श्लक्ष्णपिष्टान्यावाप्यैकध्यं साधयित्वा घृतगुडं निदध्यात्। ततः पूर्वविधानेन मात्रां यथाबलमुपयुञ्जीत जीर्णे पयःसर्पिरोदन इत्याहारः। एतेनोर्द्धमधस्तिर्यक्कृमयो निःक्रामन्ति अलक्ष्मीरपक्रामति। पुष्करकर्णः स्थिरवयाः श्रुतनिगादी त्रिवर्षशतायुर्भवत्येतदेव कुष्ठविषमज्वरापस्मारोन्मादविषभूतयक्ष्मेषु च महाव्याधिषु च संशोधनमादिशन्ति। स्नृतदोष एवागारं प्रविश्य हैमवत्या वचायाः पिण्डमामलकमात्रमभिघृतं पयसालोड्य पिबेत् जीर्णे पयःसर्पिरोदन इत्याहारः। एवमादशरात्रमुपयुञ्जीत ततोऽस्य श्रोत्रं विभ्रियते द्विरभ्यासात् स्मृतिमान् भवति त्रिरभ्यासाच्छतमादत्ते चतुर्दशरात्रमुपयुञ्ज्य सर्वं तरति किल्बिषं तार्क्ष्यदर्शनमुत्पद्यते शतायुश्च भवति। हे हे पले इतरस्या वचायाः निःक्वाथ्य पिबेत् पयसा समानं भोजनं समाः पूर्ववच्चाशिषश्च। वचाशतपाकं वा सर्पिर्द्रोणमुपयुञ्ज्य पञ्चवर्षशतायुर्भवति गलगण्डापचीक्ष्वेलोपदंशस्वरभेदांश्चापहन्ति।

अथायुष्कामीयं वक्ष्यामः। मन्त्रौषधसमायुक्तं संवत्सरफलप्रदम्। बिल्वस्य चूर्णं पुष्ये तु हुडतं वारान् सहस्रशः। श्रीवृक्षेन नरः कल्ये सप्तवर्षं दिने दिने। सर्पिर्मधुयुतं लिह्यादलक्ष्मीनाशनं परम्। त्वचं बिल्वस्य मूलस्य मूलकाथं दिने दिने। प्राश्नीयात् पयसा सार्द्धं स्नात्वा हुत्वा समाहितः। दशसाहस्रमायुष्यं स्मृतं युक्तरथं भवेत्। हुत्वा विशालाकाथन्तु मधुलाजैश्च संयुतम्। अमोघं शतसाहस्रं युक्तं युक्तरथं स्मृतम्। सुवर्णपद्मबीजानि मधुलाजाः प्रियङ्गवः। गव्येन पयसा पीतमलक्ष्मीं प्रतिषेधयेत्। नीलोत्पलदलकाथो गव्येन पयसा स्मृतः। सप्तवर्षतिलैः सार्द्धमलक्ष्मीनाशनः स्मृतः। गव्यं पयः सुवर्णञ्च मधूच्छिष्टञ्च माक्षिकम्। पीतं शतसहस्राभिघृतं युक्तरथं स्मृतम्। वचाहतसुवर्णञ्च बिल्वचूर्णमिति त्रयम्। मेध्यमायुष्यमारोग्यपुष्टिसौभाग्यवर्द्धनम्। वासामूलतुलाकाथे तैलभावाप्य साधितम्। हुत्वा सहस्रमश्नीयान्मेध्यमायुष्यमुच्यते। यावकांस्तावकान्मेदभिभूय यवांस्तथा। पिप्पलीमधुसंयुक्तान् शिक्षाचरणवद्भवेत्। मध्यामलकचूर्णानि सुवर्णमिति च त्रयम्। प्राश्नारिष्टश्चरीतोऽपि मुच्यते प्राणसंशयात्। शतावरीघृतं मन्त्रयुपयुक्तं दिने दिने। सन्नीद्रं सप्तवर्षं च नरेन्द्रं स्थापयेद्गृहे। गोचन्दनामोघनिकामधूकं माक्षिकं मधु। सुवर्णमिति संयोगः श्रेयः सौभाग्यमिच्छता। पद्मनीलोत्पलकाथे यष्टीमधुकसंयुते। सर्पिरासादितं गव्यं सप्तवर्षं सदा पिबेत्। पयसानुपिबेत् सिद्धं तेषामेव समुद्भवे। अलक्ष्मीघ्नं सदायुष्यं राज्याय सुभगाय च। यत्र नोदीरितो मन्त्रो योगेष्वेतेषु साधने। यद्दिष्टा तत्र सर्वत्र गायत्री त्रिपदी भवेत्। प्राणान् नाशयन्त्येता दद्युश्चौषधयः श्रियम्। कुर्युर्नागबलं चापि मनुष्यमरोपमम्। सततोध्ययनं वादः परतन्त्रावलोकनम्। तद्विद्याचार्यसेवा च बुद्धिमेधाकरोमतः। आयुष्यं भोजनं जीर्णे वेगानाञ्चाविधा-

रणम्। ब्रह्मचर्य्यमहिंसा च साहसानाञ्च वर्जनम्"। एवम् "सद्योमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम्। घृतसक्षौद्रकं चैव सद्यः प्राणकराणि षट्" इत्याद्युक्तानि सुश्रुते हिताहितीयाध्याये हिततया चोक्तानि च आयुर्वृद्धिकराणि।

आयुर्वेद पु० आयुर्विद्यते लभ्यतेऽनेन विद–लाभे करणे घञ् आयुर्वेत्यनेन चिकित्साज्ञापनेन विद–ज्ञाने करणे घञ् वा। चिकित्साशास्त्रे तन्निरूपणादिकं सुश्रुते दर्शितं यथा। "अथ शालक्यमित्यादि अष्टाङ्गशब्दे ५२२पृष्ठे उक्तमुपक्रम्य "इह खल्वायुर्व्वेदप्रयोजनं व्याध्युपसृष्टानां व्याधिपरिमोक्षः स्वस्थस्य रक्षणञ्च। आयुरस्मिन् विद्यते ऽनेन वा आयुर्व्विन्दतीत्यायुर्वेदः। तस्याङ्गवरमाद्यमागमप्रत्यक्षानुमानोपमानैरविरुद्धमुच्यमानमुपधारय। एतद्ध्यङ्गं प्रथमं प्रागभिघातप्रणसंरोहाद्यन्नशिरःसन्धानाच्च। श्रूयते हि यथा रुद्रेण यज्ञस्य शिरश्छिन्नमिति ततो देवा अश्विनावभिगम्योचुः। भगवन्तौ नः श्रेष्ठतमौ युवां भविष्यथः। भवद्भ्यां यज्ञस्य शिरःसन्धातव्यम्। तावूचतुरेवमस्त्विति। अथ तयोरर्थे देवा इन्द्रयज्ञभागेन प्रासादयन्। ताभ्यां यज्ञस्य शिरःसंहितमिति। अष्टास्वपि चायुर्व्वेदतन्त्रेष्वेतदेवाधिकमभिमतमाशुक्रियाकरणाद्यन्नशस्त्रक्षाराग्निप्रणिधानात्सर्व्वतन्त्रसामान्याच्च। तदिदं शाश्वतं पुण्यं स्वर्ग्यं यशस्यमायुष्यं वृत्तिकरञ्चेति। ब्रह्मा प्रोवाच ततः प्रजापतिरधिजगे तस्मादश्विनावश्विभ्यामिन्द्र इन्द्रादहं मया त्विह प्रदेय मर्थिभ्यः प्रजाहितहेतोः। भवति चात्र। अहं हि धन्वन्तरिरादिदेवो जरारुजामृत्युहरोऽमराणाम्। यज्ञाङ्गमङ्गैरपरैरुपेतं प्राप्तोऽस्मि गां भूय इहोपदेष्टुम्"।

स चाथर्ववेदस्योपवेदः "विधातार्थर्व्वसर्व्वस्वमायुर्वेदं प्रकाशयन्। स्वनाम्ना संहितां चक्रे लक्षश्लोकमयीमजम्" इति भावप्रकाशोक्तेः। चरणव्यूहमते ऋग्वेदस्योपवेदः आयुर्वेदः अथर्ववेदस्य तु यस्त्रशास्त्राणुपवेदः। स च षोडशधिप्रणीतत्वात् षोडशविधः यथोक्तं ब्रह्मवै० पु० "ऋग्यजुःसामाथर्व्वाख्यान् दृष्ट्वा वेदान् प्रजापतिः। विचिन्त्य तेषामर्थं चैवायुर्वेदं चकार सः। कृत्वा तु पञ्चमं वेदं भास्कराय ददौ विभुः। स्वतन्त्रं संहितां तस्मात् भास्करश्च चकार सः। भास्करश्च स्वशिष्येभ्य आयुर्वेदं स्वसंहिताम्। प्रददौ पाठयामास ते चक्रुः संहितास्ततः। तेषां नामानि विदुषां तन्त्राणि तत्कृतानि च। व्याधिप्रणाशबीजानि साध्वि! मत्तो निशामय। धन्वन्तरिर्दिवोदासः काशीराजोऽश्विनीसुतौ। नकुलः सहदेवार्की चयवनो जनको बुधः। जाबालो जाजलिः पैलः करथोऽगस्त्यएव च। एते वेदाङ्गवेदज्ञाः षोड़श व्याधिनाशकाः। चिकित्सातत्त्वविज्ञानं नाम तन्त्रमनौपमम्। धन्वन्तरिश्च भगवान् चकार प्रथमे सति!। चिकित्सादर्शनं नाम दिवोदासश्चकार सः। चिकित्साकौमुदीं दिव्यां काशीराजश्चकार सः। चिकित्सासारतन्त्रञ्च भग्नं चाश्विनीसुतौ। तन्त्रं वैद्यकसर्व्वस्वं नकुलश्च चकार सः। चकार सहदेवश्च व्याधिसिन्धुविमर्द्दनम्। ज्ञानार्णवं महातन्त्रं यमराजश्चकार सः। च्यवनो जीवदानञ्च चकार भगवान्मुनिः। चकार जनको योगी वैद्यसन्देहभञ्जनम्। सर्व्वसारं चन्द्रसुतो जाबालस्तन्त्रसारकम्। वेदाङ्गसारं तन्त्रञ्च चकार जाजलिर्मुनिः। पैलो निदानं करथस्तन्त्रं सर्व्वधरं परम्। द्वैधनिर्णयतन्त्रञ्च चकार कुम्भसम्भवः। चिकित्साशास्त्रबीजानि तन्त्राण्येतानि षोड़श। व्याधिप्रणाशबीजानि बलाधानकराणि च। मथित्वा ज्ञानमन्थानैरायुर्वेदपयोनिधिम्। ततस्तन्त्राणुद्धृत्यहरुर्नवनीतानि कोविदाः। एतानि क्रमशो दृष्ट्वा दिव्यां भास्करसंहिताम्। आयुर्वेदं सर्व्वबीजं सर्व्वं जानासि सुन्दरि!। व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः। एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः। आयुर्व्वेदस्य विज्ञाता चिकित्सासु यथार्थवित्। धर्म्मिष्ठश्च दयालुश्च तेन वैद्यः प्रकीर्त्तितः"। तस्य लक्षणं यथा भा०प्र०। "आयुर्हिताहितं व्याधिनिदानं शमनं तथा। विद्यन्ते यत्र विद्वद्भिः स आयुर्वेद उच्यते" तस्य निरुक्तिस्तत्रैव। "अनेन पुरुषो यस्मात् आयुर्विन्दति वेत्ति च। तस्मान्मुनिवरैरेष आयुर्वेद इति स्मृतः"। "देहजीवयोर्योगोजीवनं तेनावच्छिन्नः काल आयुः आयुर्बोधद्वारा आयुष्यानायुष्याणि द्रव्यगुणकर्म्माणि ज्ञात्वा तेषां सेवनत्यागाभ्याम् आरोग्येणायुर्विन्दति तेनैव हेतुना परस्यायुर्वेत्ति च येन तद्बोधद्वारा स आयुर्वेदः" भा०प्र०अथायुर्वेदवंशप्रादुर्भावस्तावदभिधीयते यथा भावप्र० "विधाताऽथर्व्वसर्वस्वमायुर्वेदं प्रकाशयन्। स्वनाम्नासंहितां चक्रे लक्षश्लोकमयीमजम्। ततः प्रजापतिं दक्षं दत्तं सकलकर्मसु। विधिर्धीनीरधिः साङ्गमायुर्वेदमुपादिशत्। अथ दक्षप्रादुर्भावः। अथ दक्षः क्रियादक्षः स्वर्वैद्योदेववल्लभः। वेदयामास विद्वांसौ सूर्य्यांशौ सुरसत्तमौ।

अथाश्विनप्रादुभावः "दक्षादधीत्य दक्षो वितेनतुःसंहितां खोयाम् । सकलचिकित्सकलोकप्रतिपत्तिविदङ्घ्रये धन्याम् । स्वयम्भुवः शिरश्छित्त्वा भैरवेण रुषाथ तत् । अश्विभ्यां संहितं तस्मात्तौ जातौ यज्ञभागिनौ । देवासुररणे देवा दैत्यैर्यै सङ्गताः क्षताः । अक्षतास्ते क्षताः सद्योदक्षाभ्यामङ्गुतं महत् । वज्रिणोऽभूद्भुजस्तम्भः स दक्षाभ्यां चिकित्सितः । सोन्मि निपतिते चेन्द्रस्ताभ्यामेव सुखीकृतः । विशीर्षुदशनाः पूषणोनेत्रे नष्टे भगस्य च । यज्ञिनोराजयक्ष्माऽभूदश्विभ्यान्ते चिकित्सिताः । भार्गवस्यवनः कामी वृद्धः सन् विकृतिं गतः । वीर्यवर्षं स्वरोपेतः कृतोऽश्विभ्यां पुनर्युवा । एतैश्चान्यैश्च बहुभिः कर्म्मभिर्भिषजां वरौ । बभूवतुर्भृशं पूज्यावेन्द्रादीनां दिवौकसाम् । अथेन्द्रप्रादुर्भावः । संदृश्य दक्षयोरिन्द्रः कर्माण्येतानि यत्नवान् । आयुर्वेदं निरुद्देशं तौ ययाचे शचीपतिः । नासत्यौ सत्यसन्धेन शक्रेण किल याचितौ । आयुर्वेदं ययाधीतं ददतुः शतमन्यवे । नासत्याभ्यामधीत्यैव आयुर्वेदं शतक्रतुः । अध्यापयामास बहूनात्रेयप्रमुखान् मुनीन् । अथात्रेयप्रादुर्भावः । एकदा जगदालोक्य गदाकुलमितस्ततः । चिन्तयामास भगवानात्रेयो मुनिपुङ्गवः । किं करोमि क्व गच्छामि कथम् लोका निरामयाः । भवन्ति, सामयानेतान् शक्नोमि निरीक्षितम् । दयालुरहमत्यर्थं स्वभावो दुरतिक्रमः । एतेषां दुःखतोदुःखं ममापि हृदयेऽधिकम् । आयुर्वेदं पठिष्यामि नैरुज्याय शरीरिणाम् । इति निश्चित्य गतवानात्रेयस्त्रिदशालयम् । तत्र मन्दिरमिन्द्रस्य गत्वा शक्रं ददर्श सः । सिंहासनसमासीनं स्तूयमानं सुरर्षिभिः । भासयन्तं दिशोभासा भास्करप्रतिमत्विषा । आयुर्वेदमहाचार्यं शिरोधार्य्यं दिवौकसाम् । शक्रस्तु तं निरीक्ष्यैव त्यक्त्वासिंहासनो ययौ । तदर्घे पूजयामास ह्यर्घं भूरितपस्विनम् । कुशलं परिपप्रच्छ तथाऽऽगमनकारणम् । स मुनिर्वक्तुमारेभे निजागमनकारणम् । व्याधिभिर्व्यथितालोकाः शोकाकुलितचेतसः । भूतले सन्ति, सन्तापं तेषां हर्त्तुं क्षमां कुरु । आयुर्वेदोपदेशं मे कुरु कारुण्यतो मयि । तथेत्युक्तः सहस्राक्षोऽध्यापयामास तं मुनिम् । मुनीन्द्र इन्द्रतः साङ्गमायुर्वेदमधीत्य सः । अभिनन्द्य तमाशीर्भिराजगाम पुनर्महीम् । अथात्रेयो मुनिश्रेष्ठो भगवान् करुणापरः । स्वनाम्ना संहितां चक्रे नरचक्रानुकम्पया । ततोऽग्निवेशं भेड़ं च जातूकर्णं पराशरम् । सीरपाणिं च हारीतमायुर्वेदमपाठयत् । तन्त्रस्य कर्त्ता प्रथममग्निवेशोऽभवत्पुरा । ततोभेड़ादयश्चक्रुः स्वस्वतन्त्रं, कृतानि तु । आवयामासुरात्रेयं मुनिवृन्देन वन्दितम् । श्रुत्वा च तानि तन्त्राणि हृष्टोऽभूदत्रिनन्दनः । यथावत्सूत्रितन्त्राणि प्रहृष्टास्तस्य शिष्यतां भवन् । दिवि देवर्षयोदेवाः श्रुत्वासाध्विति तेऽब्रुवन्" । अथ भरद्वाजप्रादुर्भावः "एकदा हिमवत्पार्श्वे देवादागताः मुनयोबहवस्तांश्च नामभिः कवयाम्यहम् भरद्वाजोमुनिवरः प्रथमं समुपागतः ततोऽङ्गिरास्ततोगर्गो मरीचिर्भृगुभार्गवौ । पुलस्त्योऽगस्तिरसितोवशिष्ठः कश्यपाऽपरः । हारीतोगौतमः सांख्यो मैत्रेयश्चवनोऽपि च । जमदग्निश्च गार्ग्यश्च काश्यपः कश्यपोऽपि च । नारदो वामदेवश्च मार्कण्डेयः कपिञ्जलः । शाण्डिल्यः सह कौण्डिल्यः शाकुनेयश्च गौतमः । आश्वलायनसाङ्कृत्यौ विश्वामित्रः परीक्षितः । देवलोगालवोधौम्यः काप्यकात्यायनावुभौ । काङ्कायनो वैजवापः कृशिकोबादरायणिः । हिरण्याक्षश्च लौगाक्षिः शरलोमा च गोभिलः । वैखानसावालखिल्याश्चैवान्ये महर्षयः । ब्रह्मज्ञानस्य निधयो यमस्य नियमस्य च । तपस्तेजसा दीप्यमाना इवाग्नयः । सुखोपविष्टास्ते तत्र सर्वे चक्रुः कथामिमाम् । धर्म्मार्थकाममोक्षाणां मूलमुक्तं कलेवरम् । तच्च संरक्षिते शक्यं भवेद्यदि निरामयम् । तपःस्वाध्यायधर्माणां ब्रह्मचर्य्यव्रतायुषाम् । हर्त्तारः पुरतीरोगा यत्र तत्र च सर्वतः । रोगाःकार्श्यकरावलक्षयकरादेहस्य चेष्टाहरा हृद्यादीन्द्रियशक्तिसंक्षयकराः सर्वाङ्गपीड़ाकराः । धर्म्मार्थाखिलकामसत्क्रियासु महाविघ्नस्वरूपबलात्प्राणानाशु हरन्ति सन्ति यदि ते क्षेमं कुतः प्राणिनाम् । तत्तेषां प्रशमाय कश्चन विधिश्चिन्त्योभवद्भिर्बुधैर्योग्यैरित्यभिधाय संसदि भरद्वाजं मुनिन्तेऽब्रुवन् । त्वं योग्यो भगवन्! सहस्रनयनं याहि द्रुतं क्षमादायुर्वेदमधीत्य यद्वदमयान्मुक्ता भवामोवयम् । इत्थं स मुनिभिर्योग्यैः प्रार्थितो विनयान्वितैः । भरद्वाजो मुनिश्रेष्ठो जगाम त्रिदशालयम् । तत्रेन्द्रभवनं गत्वा सुरर्षिगणमध्यगम् । ददर्श हरहुंकारं दीप्यमानमिवानलम् । सोऽभिगम्य जयाशीर्भिरभिनन्द्य सुरेश्वरम् । ऋषीणां वचनं सम्यक् श्रावयामास सत्तमः । व्याधयो हि समुत्पन्नाः सर्वप्राणिभयङ्कराः । तेषां प्रशमनोपायं यथावद्वक्तुमर्हसि । तमुवाच मुनिं साङ्गमायुर्वेदं शतक्रतुः । जीवेद्वर्षसहस्राणि देही नीरुग्भिषग्वरम् । सोऽनल्पारम्भिस्वल्पमायुर्वेदं महामतिः । यथावदचिरात्सर्वं बुबुधे तन्मना मुनिः । तेनायुः सुचिरं लेभे भरद्वाजो निरामयम् । अन्यानपि मुनीँश्चक्रे नीरुजः सुचिरायुषः ।

तत्तज्जनितज्ञानचक्षुषा ऋषयोऽखिलाः। गुणान् द्रव्याणि कर्माणि ह्रा तद्विधिमान्विताः। आरोग्यं लेभिरे दीर्घमायुश्च सुखसंयुतम्। आयुर्वेदोक्तविधिनाऽन्येऽपि सुमुनयो यथा"।

अथ चरकप्रादुर्भावः "यदा मत्स्यावतारेण हरिणा वेद उद्धृतः। तदा शेषश्च तत्रैव वेदं साङ्गमवाप्तवान्। अधर्वाङ्गगतं सम्यगायुर्वेदं च लब्धवान्। एकदा स महोदत्तं द्रष्टुं चर इवागतः। तत्र लोकान् गदैर्यस्तान्व्यथया परिपीड़ितान्। द्रुमान् स्खलेषुपुष्पाढ्यान् म्रियमाणांश्च दृष्टवान्। तान् ह्रा तु दयायुक्तस्तेषां दुःखेन दुःखितः। अनन्तश्चिन्तयामास रोगोपशमकारणम्। संचिन्त्य स स्वयं तत्र मुनेः पुत्रो बभूव ह। यतश्चर इवागतोन जातः केनचिद्यतः। तस्माच्चरकनाम्नाऽसौ विख्यातः क्षितिमण्डले। स भाति चरकाचार्यो देवाचार्यो यथा दिवि। सहस्रवदनस्यांशो येन ध्वंसोरुजां कृतः। आत्रेयस्य मुनेः शिष्या अग्निवेशादयोऽभवन्। मुनयो बहवस्तैश्च कृतं तन्त्रं स्वकं स्वकम्। तेषां तन्त्राणि संकल्प्य समाकृष्य विपश्चिता। चरकेणात्मनो नाम्ना यन्योऽयं चरकः कृतः। अथ धन्वन्तरिप्रादुर्भावः। एकदा देवराजस्य दृष्टिर्निपतिता भुवि। तत्र तेन नरा दृष्टा व्याधिभिर्भृशपीड़िताः। तान् ह्रा हृदयं तस्य दयया परिपीड़ितम्। दयार्द्रहृदयः शक्रो धन्वन्तरिमुवाच ह। धन्वन्तरे! सुरश्रेष्ठ! भगवन्! किञ्चिदुच्यते,। योग्योभवसि भूतानामुपकारपरोभव। उपकाराय लोकानां केन किं न कृतं पुरा। त्वं लोकाधिपतिर्विष्णुरभूस्त्वमादिरूपवान्। तस्मात्त्वं पृथिवीं याहि काशीमध्ये नृपोभव। प्रतीकाराय रोगाणामायुर्वेदं प्रकाशय। इत्युक्त्वा सुरराड्लोकः सर्वभूतहितेच्छया। समस्तमायुषोवेदं धन्वन्तरिमुपादिशत्। अधीत्य चायुषोवेदमिन्द्राद्धन्वन्तरिः पुरा। आगत्य पृथिवीं काश्यां जातोवाङ्गजवेश्मनि। नाम्ना ततोऽभवत् ख्यातोदिवोदास इति क्षितौ। बालएव विरक्तोभूच्चचार च महत्तपः। यत्नेन महता ब्रह्मा तं काश्यामकरोन्नृपम्। ततो धन्वन्तरिर्लोकैः काशीराजोऽभिधीयते। क्षितौ दयेक्षिणां स्नेहा संक्षिता विक्षिताऽऽत्मना। अयं विद्यार्थिनो लोकान् संक्षितां तामपाठयत्"। अथ सुश्रुतप्रादुर्भावः। अथ ज्ञानदृशा विश्वामित्रप्रभृतयोऽवदन्। अयं धन्वन्तरिः काश्यां काशीराजोय उच्यते। विश्वामित्रो मुनिस्तेषु पुत्रं सुश्रुतमुक्तवान्। वत्स! वाराणसीं गच्छ विश्वेश्वरवल्लभाम्। तत्र नाम्ना दिवोदासः काशीराजोऽस्ति वाङ्मजः। स हि धन्वन्तरिः साक्षादायुर्वेदविदांवरः। आयुर्वेदं ततोऽधीष्व लोकोपकृतिहेतवे। सर्वप्राणिदयातीर्थमुपकारोमहामखः। पितुर्वचनमाकर्ण्य सुश्रुतः काशिकाङ्गतः। तेन सार्द्धं समध्येतुं मुनिरुत्तुङ्गतं ययौ। अथ धन्वन्तरिं सर्वे वानप्रस्थाश्रमे स्थितम्। भगवन्तं सुरश्रेष्ठं मुनिभिर्वृन्दभिः स्तुतम्। काशीराजं दिवोदासन्तेऽपश्यन् विनयान्विताः। स्वागतं च इति स्माह दिवोदासोयशोधनः। कुशलं परिपप्रच्छ तथाऽऽगमनकारणम्। ततस्ते सुश्रुतद्वारा कथयामासुरुत्तरम्। भगवन्मानवान्दृष्ट्वा व्याधिभिः परिपीड़ितान्। क्रन्दतोचियमाणांश्च जातास्राकं हृदि व्यथा। आमयानां शमोपायं विज्ञातुं वयमागताः। आयुर्वेदं भवानस्मानध्यापयितुमर्हति। अङ्गीकृत्य वचस्तेषां नृपतिस्तानुपादिशत्। व्याख्यातं तेन ते सर्वान्जग्रहुर्मुनयोमुदा। काशीराजं जयाशीर्भिरभिनन्द्य मुदान्विताः। सुश्रुताद्याः सुविद्वांसो जग्मुर्गेहं स्वकं स्वकम्। प्रथमं सुश्रुतस्तेषु स्वतन्त्रं कृतवान् स्फुटम्। सुश्रुतस्य सखायोऽपि पृथक् तन्त्राणि तेनिरे। सुश्रुतेन कृतं तन्त्रं सुश्रुतं बहुभिर्यतः। तस्माच्च सुश्रुतं नाम्ना विख्यातं क्षितिमण्डले" चरके तु आयुर्वेदनिरुक्तिस्तत्प्रणेतृवंशोऽन्यथाभ्यधायि यथा "ब्रह्मणा हि यथा प्रोक्तमायुर्वेदं प्रजापतिः। जग्राह निखिलेनादावश्विनौ तु पुनस्ततः। अश्विभ्यां भगवान् शक्रः प्रतिपेदे ह केवलम्। ऋषिप्रोक्तोभरद्वाजस्तस्माच्छक्रमुपागमत्" ब्रह्मादिभारद्वाजान्तवंशसङ्गा ततो यथा भरद्वाजस्य प्राप्तिस्तदपि तत्रैवोक्तम्। यथा कतिचिन्मुनीनुपक्रम्य "ब्रह्मज्ञानस्य निधयोयमस्य नियमस्य च। तपस्तेजःसादीप्ताद्भूयमाना इवाग्नयः। सुखोपविष्टास्ते तत्र पृच्छां चक्रुः कथामिमाम्। धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्। रोगास्तस्यापहन्तारः श्रेयसोजीवितस्य च। प्रादुर्भूतोमनुष्याणामन्तरायोमहानयम्। कः स्यात्तेषां शमोपायइत्युक्त्वा ध्यानमास्थिताः। अथ ते शरणं शक्रं ददृशुर्ध्यानचक्षुषा। स वक्ष्यति शमोपायं यथावदमरप्रभुः। कः सहस्राक्षभवनं गच्छेत् प्रष्टुं शचीपतिम्। अहमर्थं नियुज्येयमलेति प्रथमं वचः। भरद्वाजोऽब्रवीत्तस्माद्दधिभिः स नियोजितः। स शक्रभवनं गत्वा सुरर्षिगणमध्यगम्। ददर्श बलहन्तारं दीप्यमानमिवानलम्। सोऽभिगम्य जयाशीर्भिरभिनन्द्य सुरेश्वरम्। प्रोवाच भगवान्धीमान् ऋषीणां वाक्यसुत्तमम्। व्याधयोहि सुरश्रेष्ठाः सर्वप्राणिभयङ्कराः। तद्ब्रूहि मे शमोपायं यथावदमरप्रभो!।

तस्मै प्रोवाच भगवानायुर्वेदं शतक्रतुः । पदैरल्पैर्मतिं बुद्धा विपुलां परमर्षये । हेतुलिङ्गौषधज्ञानं स्वस्थातुरपरायणम् । तिस्रस्तं शाश्वतं पुण्यं बुबुधे यं पितामहः । सोऽनल्पारं तिस्रऊष्मायुर्वेदं महामतिः । यथावदचिरात् सर्वं बुबुधे तन्मना मुनिः । तेनायुरमितं लेभे भरद्वाजः सुखान्वितम् । ऋषिभ्योऽधिकं तन्तु यशसानवमेषयन् । ऋषयश्च भरद्वाजाज्जगृहुस्ते प्रजाहितम् । दीर्घमायुश्चिकीर्षन्तो वेदं वह्वनमायुषः । तेनर्षयस्ते ददृशुर्यथावज्ज्ञानचक्षुषा । सामान्यञ्च विशेषञ्च गुणान् द्रव्याणि कर्म च । समवायञ्च तज्ज्ञात्वा तन्त्रोक्तं विधिमास्थिताः । लेभिरे परमं धर्मं जीवितञ्चाप्यनश्वरम् । अथ मैत्रीपरः पुण्यमायुर्वेदं पुनर्वसुः । शिष्येभ्योदत्तवान् षड्भ्यः सर्वभूतानुकम्पया । अग्निवेशञ्च भेड़ञ्च जातूकर्णं पराशरम् । हारीतः क्षारपाणिञ्च जतूकर्णस्त्वनुर्बचः । बुद्धेर्विशेषतत्त्वज्ञो हेतूपदेशान्तरं मुनेः । तन्त्रस्य कर्त्ता प्रथममग्निवेशोऽतेतोऽभवत् । अथ भेड़ादयश्चक्रुः स्वं स्वं तन्त्रं । ऋतानि च । श्रावयामासुरात्रेयं सर्षिसङ्घं सुमेधसः । श्रुत्वा च स्वतन्त्रार्थानाहुरायुः पुण्यकर्मणाम् । यथावत् स्मरितमिति प्रहृष्टास्तेऽनुमेनिरे" । एवमायुर्वेदवंशसङ्गा तस्य निरुक्तिस्तत्र दर्शिता यथा "हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् । मानञ्च तच्च यत्रोक्तमायुर्वेदः स उच्यते । शरीरेन्द्रियसत्त्वादिसंयोगधारि जीवितम् । नित्यगयानुबन्धश्च पर्यायैरायुरुच्यते । तस्यायुषः पुण्यतमो वेदो वेदविदां मतः । वक्ष्यते यन्मुष्याणां लोकयोरुभयोर्हितः" ।

एवं बहूनामायुर्वेदानां सत्त्वेऽपि तेषां विरलप्रचारतया लुप्तप्रायत्वात् सुश्रुतचरकयोर्लोके प्रचाराच्च तत्प्रत्यविषयत्वात्तावत् संक्षेपेणोच्यते । तत्र सुश्रुतस्यायुर्वेदस्याष्टाङ्गत्वम् तच्च अष्टाङ्गशब्दे ५२३ पृष्ठे शल्यं शालाक्यमित्यादि दर्शितम् । तच्छास्त्रस्य प्रयोजनं रोगचिकित्सा सा च पुरुषविषयेति पुरुषस्वरूपतदुत्पत्तिगर्भादिक्रमेणाभिधाय तदीयशरीरसंस्थानं रोगनिदानरोगोपशमनद्रव्यादि दोनि क्रमेणोक्तानि । तदेतत् संक्षेपेण सुश्रुते उक्तम् "अस्मिन् शास्त्रे पञ्चमहाभूतशरीरिसमवायः पुरुषः इत्युच्यते । यस्मिन् क्रिया सोऽधिष्ठानम्, कस्मात् ? लोकस्य द्वैविध्यात् । लोको हि द्विविधः स्थावरो जङ्गमश्च । द्विविधात्मक एवाग्नेयः सौम्यश्च तद्भूयस्त्वात् । पञ्चात्मको वा । तत्र चतुर्विधो भूतग्रामः स्वेदजाण्ड ओद्भिज्जजरायुजसंज्ञः । तत्र पुरुषः प्रधानं तस्योपकरणमन्यत् । तस्मात्पुरुषोऽधिष्ठानम् । तद्दुःखसंयोगा व्याधय इत्युच्यन्ते । ते चतुर्विधा आगन्तवः शारीरा मानसाः स्वाभाविकाश्चेति । तेषामागन्तवोऽभिघातनिमित्ताः । शारीरास्त्वन्नपानमूला वातपित्तकफशोणितसन्निपातवैषम्यनिमित्ताः । मानसास्तु क्रोधशोकभयहर्षविषादेर्ष्याभ्यसूयादैन्यमात्सर्यकामलोभप्रभृतयश्चेच्छाद्वेषमोहैर्भवन्ति । स्वाभाविकाः क्षुत्पिपासाजरामृत्युनिद्राप्रभृतयः । त एते मनःशरीराधिष्ठानाः । तेषां संशोधनसंशमनाहाराचाराः सम्यक् प्रयुक्ताः नियन्तृहेतवः । प्राणिनां पुनर्मूलमाहारो बलवर्णौजसाञ्च । स षट्सु रसेष्वायत्तो रसाः पुनर्द्रव्याश्रयाः । द्रव्याणि पुनरोषधयस्ताः द्विविधाः स्थावरा जङ्गमाश्च । तासां स्थावराश्चतुर्विधाः । वनस्पतयो वृक्षा वीरुध ओषधय इति । तास्वपुष्पाः फलवन्तो वनस्पतयः । पुष्पफलवन्तो वृक्षाः । प्रतानवत्यः स्तम्बिन्यश्च वीरुधः । फलपाकनिष्ठा ओषधय इति । जङ्गमास्वपि चतुर्विधा जरायुजाण्डजस्वेदजोद्भिज्जाः । तत्र पशुमनुष्यव्यालादयो जरायुजाः । खगसर्पनरीसृपप्रभृतयोऽण्डजाः । कृमिकीटपिपीलिकाप्रभृतयः स्वेदजाः । इन्द्रगोपमण्डूकप्रभृतय उद्भिज्जाः । तत्र स्थावरेभ्यस्तत्कल्पपुष्पफलमूलकन्दनिर्यासस्वरसादयः प्रयोजनवन्तो जङ्गमेभ्यश्चर्मनखरोमरुधिरादयः । पार्थिवाः सुवर्णरजतमणिसुक्तामनःशिलास्तत्कल्पपाषाणादयः । कालकृतास्तु प्रवातनिवातातपच्छायाज्योत्स्नातमःशीतोष्णवर्षाहोरात्रपक्षमासर्त्वयनादयः संवत्सरविशेषाः । त एते स्वभावत एव दोषाणां सञ्चयप्रकोपप्रशमप्रतीकारहेतवः प्रयोजनवन्तश्च । भवन्ति चात्र । शारीराणां विकाराणामेष वर्गश्चतुर्विधः । चये कोपे शमे चैव हेतुरुक्तिकित्सकैः । आगन्तवश्च ये रोगास्ते द्विधा निपतन्ति हि । मनस्यन्ये शरीरेऽन्ये तेषान्तु द्विविधा क्रिया । शरीरपतितानान्तु शारीरवदुपक्रमः । मानसानान्तु शब्दादिरिष्टो वर्गः सुखावहः । एवमेतत्पुरुषो व्याधिरोषधं क्रियाकाल इति चतुष्टयं समासेन व्याख्यातम् । तत्र पुरुषग्रहणात्तन्मात्रद्रव्यसमूहोभूतादिरुक्तस्तदङ्गप्रत्यङ्गविकल्पाश्च त्वङ्मांसशिरास्नायुप्रभृतयः । व्याधिग्रहणाद्वातपित्तकफशोणितसन्निपातवैषम्यनिमित्ताः सर्व एव व्याधयो व्याख्याताः । ओषधिग्रहणात् द्रव्यगुणरसवीर्यविपाकप्रभावाणामादेशः । क्रियाग्रहणाच्छेदादीनि स्नेहादीनि च कर्माणि व्याख्यातानि । कालग्रहणात्तर्य-

क्रियाकालानामादेशः । भवति चात्र । बीजं चिकित्सितस्यैतत्समासेन प्रकीर्त्तितम् । सविंशमध्यायशतमस्य व्याख्या भविष्यति । तत्र सविंशमध्यायशतं पञ्चसु स्थानेषु । तत्र स्वस्थानिदानशारीरचिकित्सितकल्पेषूर्ध्ववशात्संविभज्योत्तरे तन्त्रे शेषानर्थान् व्याख्यास्यामः"। चरके तु त्रिस्कन्धमित्युक्तम् तत्र हेतुलिङ्गौषधरूपस्कन्धत्रयं बोध्यम् । अयञ्चायुर्वेद अष्टादशविद्यान्तर्गतः । "आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः" इति ५२५ पृष्ठे अष्टादशविद्याशब्दे उक्तवाक्यात् । अस्मिन् शास्त्रे द्विजानामेवाधिकारोनान्येषां यथाह सुश्रुतः । "अथातः शिष्योपनयनीयमध्यायं व्याख्यास्यामः । ब्राह्मणक्षत्रियवैश्यानामन्यतमस्यावयवः शीलशौर्य्यशौचाचारविनयशक्तिबलमेधाधृतिस्मृतिमतिप्रतिपत्तियुक्तं तनुजिह्वौष्ठदन्तायस्मृजुवक्त्राक्षिनासं प्रसन्नचित्तवाक्चेष्टं क्लेशसहञ्च भिषक् शिष्यमुपनयेत् । अतो विपरीतगुणं नोपनयेत्" ।

विप्रेण वैश्यकन्यायामुत्पन्नस्याम्बष्ठस्यापि द्विजधर्म्मतया उपनयनादिसंस्कारवत्त्वात् "अम्बष्ठस्य चिकित्सितम्" इति मनूक्तेश्च अत्राधिकार इति भेदः । तत्रायं विवेकः द्विजमात्राणां चिकित्सितेऽधिकारेऽपि तत्तद्वृत्तिग्रहणे तु तेषां निन्द्यतैव । "पूर्वं चिकित्सकस्यान्नमिति" मनुना निन्दितत्वात् । अम्बष्ठानां तु तद्वृत्तौ दोषाभावः मनुना "स्तानामश्वसारथ्यमम्बष्ठस्य चिकित्सितम्" इत्यनेन तेषां चिकित्साद्वृत्तिकत्वेनाभिधानात् अम्बष्ठस्य च यथोपनयनेऽधिकारस्तथाऽम्बष्ठशब्दे २२८ पृष्ठे निरूपितम् । अतएव- "भिषक् केशवनन्दनः । गोपदेवश्चचारेदं विप्रोवैद्यपदास्पदम्" । विप्रोपदेवस्य पितुः केशवस्य भिषक्त्वं स्वयमेव तेनोक्तम् । तस्य निन्दितत्वे तन्नोच्येत इति द्रष्टव्यम् । अन्यत्र चायुर्वेदस्य चतुर्व्यूहत्वमुक्तं रोगरोगनिदानरोगनिवृत्तितदुपायरूपविषयचातुर्विध्यात् । "सचायुर्वेदः नरगजाश्वगोवृक्षाधिकारभेदेन पञ्चविधः तत्र नरायुर्वेदः चरकसुश्रुतादिर्लोकप्रसिद्धः गजायुर्वेदोऽश्वायुर्वेदोऽपि शालिहोत्रकृतः तयोश्च लोके प्रचाराभावात् अग्निपुराणतः संक्षिप्योल्लेखतो दृश्यते तत्र गजायुर्वेदो यथा

"गजलक्षञ्च चिकित्सां च लोमपाद! वदामि ते" इत्युपक्रम्य "पाकेषु तु सर्वेषु कर्त्तव्यमनुवासनम् । घृततैलपरीपाकं स्नानं वातविवर्जितम् । स्नेहेषु च क्रिया कार्य्या तथा पाकलवणयोः । गोमूत्रं पाण्डुरोगेषु रजनीभ्यां घृतं हित ! । आनाहे तैलसिक्तस्य निषेकस्तस्य शस्यते । लवणैः पञ्चभिर्मिश्रा प्रतिपानाय शस्यते । विड्वरलिफलाब्योषसैन्धवैः कवलान् कृतान् । मूर्च्छासु भोजयेन्नागं चौद्रतोयञ्च पाययेत् । अभ्यङ्गः शिरसः शूले नस्यञ्चैव प्रशस्यते । नागानां स्नेहकटुकैः पादरोगानुपक्रमेत् । पश्चात्कल्ककषायेण शोधनञ्च विधीयते । शिखितित्तिरिलावानां पिप्पलीमरिचान्वितैः । रसैः समर्घयेन्नागं वेषवुर्यस्य जायते । बालं बिल्वं तथा लोध्रं धातकी सितया सह । अतीसारविनाशाय पिण्डीं भुञ्जीत कुञ्जरः । नस्यं कर्म्मणि देयं हितं लवणसंयुतम् । मागधीनागराजाजीयवागूर्मण्ड, कान्विताः । उत्कर्षके तु दातव्यो वारुणश्च तथा रसः । दशमूलकुलत्थाश्वकाकमाचीविपाचितम् । तैलप्राशनसंयुक्तं गलग्रहगदापहम् । अष्टाभिर्लवणैः पिष्टैः प्रसन्नं पाययेद्धितम् । मूलकंशेखरावीजं कथितं लवणस्य च । त्वग्दोषेषु पिबेच्चैव हृद्यं वा कथितं हितः । गवां मूत्रविड्भ्यानि कृमिकोष्ठेषु शस्यते । शृङ्गवेरकणाद्राक्षाशर्कराभिः कृतं पयः । घृतक्षयकरं पानं तथा मांसरसः शुभः । अक्षोदनं व्योषयुतमरुचौ तु प्रशस्यते । त्रिवृद्व्रोसाग्निदन्त्यर्कश्यामाक्षीरेभपिप्पली । एतैर्गुल्महरः स्नेहः कृतश्चैव तथा रसः । भेदनद्रावणाभ्यङ्गस्नेहपानानुवासनैः । सर्वानेव समुत्पन्नान् विद्वान् समुपाचरेत् । यष्टिकं सक्षयूषेण सारदेन तथा पिबेत् । बालविल्वैस्तथा लेपः कुञ्जरोगे प्रशस्यते । विड्भेन्द्रयवौ हिङ्गु सबलं रजनीद्वयम् । पूर्वाह्णे पाययेत् पिण्डान् सर्वगुल्मोपशान्तये । प्रधानभोजने तेषां यष्टिकव्रीहिशालयः । मध्यमौ यवगोधूमौ शेषा दन्तिनि चाधमाः । यवश्चैव तथैवेक्षुर्नागानां बलवर्द्धनः । नागानां यवसं शुष्कं तथा वातप्रकोपणम् । मदक्षीणस्य नागस्य पयः पानं प्रशस्यते । दीपनीयैस्तथा द्रव्यैः श्रृतोमांसरसस्ततः । वायसः कुरभश्चोभौ काकोलूककुलाकृतिः । भवेत् चौद्रेण संयुक्तं पिण्डोयुक्तं मदाय हि । कटुमस्य विड्भ्यानि क्षीरकोपातकीपयः । हरिद्रा चेति धूमोऽयं कुञ्जरस्य जयावहः । पिप्पली तण्डुलास्तैलं माक्षिकन्तथा । नेत्रयोः परिषेकोऽयं दीपनीयः प्रशस्यते । पुरोषं च कषायाम्ब तथा पारावतस्य च । क्षीरवृक्षकरीरस्य प्रसन्नायेक्षुनम् । अनेनाञ्जितनेत्रस्तु करोति कदनं रणे । उत्पलानि च नीलानि सुखं तगरमेव च । तण्डुलोदकपिष्टानि नेत्रनिर्वापणं परम् । नखभेदौ नखच्छेदः तैलसेकश्च मांसपि । शय्यास्थानं भवेच्चास्य करीषैः पांशुभिस्तथा । शरच्छिदा-

घयोः सेकः सर्पिषा च तथाश्नति" । इति गजायुर्वेदः

अथाश्वायुर्वेदः तत्रैव "अश्वगन्धासारं च वल्मीकस्य चिकित्सितम्" इत्युपक्रम्य "दधो निम्बहरीतक्यौ च गुडुची च समाशिका । सिंहानकहरी पिण्डी खेदश्च शिरसस्तथा । हिङ्गुपुष्करमूलञ्च नागरं साम्भवेतसम् । पिप्पलीसैन्धवयुतं मूलप्रसृतवारिणा । नागराऽतिविषा मुस्ता सानन्ता बिल्वमालिका । क्वाथमेषां पिबेद्वाजी सर्व्वातीसारनाशनम् । प्रियङ्गुलोध्रमधुभिः पिबेद्वृषरसं हयः । क्षीरं वा पञ्चकोलाढ्यं कासनाद्विप्रमुच्यते । विष्कन्धेषु च सर्व्वेषु श्रेय आदौ विशोधणम् । अभ्यङ्गावर्त्तनिस्नेहनस्यवर्त्तिक्रमः स्मृतः । त्वरितानां तुरङ्गानां पयसैव क्रियाक्रमः । लोध्रकरञ्जयोर्मूलं माहलाङ्गाग्निनागराः । कुष्ठं हिङ्गुवचा रास्ना लेपोऽयं शोधनाग्रणः । मञ्जिष्ठा मधुकं द्राक्षाहरिद्रौ रक्तचन्दनम् । त्रपुषीबीजमूलानि मृङ्गाटककशेरुकम् । अजापयःप्लुतमिदं सघीतं शर्करान्वितम् । पीत्वा निरशनोवाजी रक्तमेहात् प्रमुच्यते । मन्याहनुनिगालस्थशिरः शेफोगलग्रहः । अभ्यङ्गः कटुतैलेन तत्र तेष्वेव शस्यते । प्रत्यक्पुष्पी तथा वह्निः सैन्धवं सौरसो रसः । क्षणाद्विङ्गुयुतैरेभिः कृत्वा नस्यं न सीदति । निम्बे ज्योतिष्मतो पाठा कृष्णकुष्ठं वचा मधु । जिह्वास्तम्भे च लेपोऽयं गुडमूलयुतोद्धितः । तिलैर्यष्ट्या रजन्या च निम्बपत्रैश्च योजिता । चौद्रेण शोधनी पिण्डी सर्पिषा व्रणरोपणी । अभिघातेन खञ्जन्ति येऽश्वास्तेषामेवेदनाः । परिषेककिया तेषां तैलेनाशु रुजापहा । दोषकावाभिघाताभ्यां तनुजे लिक्षिते तथा । शालिमत्स्याम्बुवस्ताभ्यां पक्वमन्नमथ क्रमात् । अश्वत्थोडुम्बर प्लक्षमधूकवटवल्कलैः । प्रभूतनलिकाक्वाथः सुखोष्णो व्रणशोधनः । मताड्डा नागरं रास्नामञ्जिष्ठाकृष्णसैन्धवैः देवदारुवचायुग्मरजनीरक्तचन्दनैः । तैलं सिद्धं कषायेण गुडुच्या पयसा सह । व्रणं वस्तिनखे च योज्यं सर्व्वत्र लिक्षिते । रक्तस्रावो जलौकाभिर्नेत्रान्ते पित्तरोगिणः । खादिरोडुम्बराश्वत्थकषायेण च साधितम् । धात्रीदुरालभातिक्ताप्रियङ्गुकुसुमैःसमैः । गुडुच्या च कृतः क्वाथः कल्कीयुक्तो विलम्बिते । उत्पाते गिरिरे आम्रे सद्यःक्षोभे तथैव च । क्षिप्रकारिणि दोषे च सद्योवेधनमिष्यते । गोशकृत्सर्ज्जिकाकुष्ठरजनीतिलसर्षपैः । गवां मूत्रेण पिष्टैश्च मर्द्दनं कण्डुनाशनम् । शीतोमधुयुतः क्वाथो नासिकायां सशर्करः । रक्तपित्तहरः पानादश्वकण्ठोऽस्तथैव च । सप्तमे सप्तमे देयमश्वानां लवणं दिने । तथा भक्तवतां देया अतिपाते तु वारुणी । जीवनीयैः समधुरैर्ह्रीबेराशर्करायुतैः । सर्पिष्पिप्पलीकैः शरदि प्रतिपानं सपञ्चकैः । विडङ्गपिप्पलीधान्यशताह्वालोध्रसैन्धवैः । सचित्रकैस्तुरङ्गाणां प्रतिपानं हिमागमे । लोध्रप्रियङ्गुकायुक्ता पिप्पली विश्वभेषजैः । सचौद्रैः प्रतिपानं स्याद्वसन्ते कफनाशनम् । प्रियङ्गुपिप्पलीलोध्रयष्ट्याह्वैः समहौषधैः । निदाघे सगुडा देया मदिरा प्रतिपानके । लोध्रकाण्डं सलवणं पिप्पल्यो विश्वभेषजम् । भवेत्तैलयुतैरेभिः प्रतिपानं घनागमे । निदाघेऽर्द्धकृताहाराः शरत्सु पुष्टशोणिताः । प्राग्वद्भिन्नपुरीषाश्च पिबेयुर्वाजिनोत्तमम् । पिबेयुर्वाजिनस्तैलं कफवायुधिकास्तु ये । स्नेहव्यापद्भवो येषां तेषां कार्य्यं विरूक्षणम् । त्र्याहं यवागूरूक्षा स्याद्भोजनं तक्रसंयुतम् । शरद्विदाघयोः सर्पिस्तैलं शीतवसन्तयोः । वर्षासु गिशिरे चैव वस्तौ यमकमिष्यते । गुर्व्वभिष्यन्दिभक्तानि व्यायामं स्नानमातपम् । वायुर्वर्षेषु वाहस्य स्नेहनीयस्य वर्ज्जयेत् । स्नानं पानं सकृद्दृष्टमश्वानां सलिलागमे । अत्यर्थं दुर्दिने काले पानमेकं प्रशस्यते । युक्तं शीततपे काले हिः पानं भवनं सकृत् । शीघ्रे त्रिः स्नानपानं स्याच्चिरं तस्यावगाहनम् । निस्तुषाणामदातव्या यवानाञ्चतुराढकी । चणकव्रीहिमौद्गाणां, कलायान् वापि दापयेत् । अक्षोरालेन वाहस्य यवस्य तुला दश । अष्टौ शुष्कस्य दातव्या चतस्रोऽथ वुषस्य वा । दूर्व्वा पित्तं, यवः कासं, वुषश्च श्लेष्मसंज्ञकम् । नागबलार्जुनः श्वासं, तथा शालिर्बलक्षयम् । वातिकाः पैत्तिकाश्चैव श्लेष्मजाः सान्निपातिकाः । न रोगा पीड़यिष्यन्ति दूर्व्वाहारं तुरङ्गमम् । द्वौ रज्जुबन्धौ दृढानां पञ्चयोरुभयोरपि । पञ्चाङ्गुलश्च कर्त्तव्यो दूरकीलव्यपाश्रयः । वसेयुस्तास्तृते स्थाने कृतधूपनभूमयः । वनोपन्यस्तवसाः सप्रदीपाः सुरक्षिताः । कृतबन्धाश्च कपयोधार्य्यांश्चाश्वस्थे मृगाः" इत्यश्वायुर्वेदः अधिकं जयदत्तकृतेऽश्वाख्ये द्रष्टव्यम् ।

अथ गवायुर्वेदः अग्निपु० "गवाप्याहात्मगुप्तं हि चिकित्साञ्च तथा शृणु" इत्युपक्रम्य । "शृङ्गाग्रभेषु धेनूनां तैलं दद्यात् सकैन्धवम् । शृङ्गवेरबलामांसीकल्कसिद्धं सशार्ङ्गिकम् । कर्णमूलेषु मूलेषु मञ्जिष्ठाहिङ्गुसैन्धवैः । सिद्धं तैलं प्रदातव्यं रसोनेनाथ वा पुनः । बिल्वमूलमपामार्गो धातकी च सपाटला । कुटजं दन्तमूलेषु लेपोऽक्षीमूलनाशनः । दन्तमूलहरैर्द्रव्यैर्तं

वापि विपाचितम्। सुस्वरोगहरं श्रेयं जिह्वारोगेषु सैन्धवम्। शृङ्गवेरं हरिद्रे द्वे त्रिफला च गलग्रहे। हृल्लूले वस्तिशूले च वातरोगज्वरे तथा। त्रिफला घृतमिश्रा च गवां पाने प्रशस्यते। अतीसारे हरिद्रे द्वे पाठाञ्चैव प्रदापयेत्। सर्वेषु कोष्ठरोगेषु तथा साङ्गागतेषु च। शृङ्गवेरञ्च भार्गी च कासश्वासे च दापयेत्। दातव्या भग्नसन्धाने प्रियङ्गुर्लवणान्विता। तैलं वातहरं पित्ते मधुयष्टिविपाचितम्। कफे व्योषञ्च समधु संपिष्टकरजोऽन्वितं। तैलाज्यं हरितालञ्च भग्नक्षतहतं दहेत्। माषास्तिलाः सगोधूमाः पशुक्षीरं घृतन्तथा। एषां पिण्डी सलवणा वत्सानां पुष्टिदा त्वियम्। बलप्रदा हयानां स्यात् यक्ष्मनाशाय धूपकः। देवदारुवचामांसीहिङ्गुगुग्गुल सर्षपाः। यक्ष्मादिगदनाशाय एष धूपोगवां हितः। घण्टाश्चैव गवां कार्य्या धूपेनानेन धूपिता। अश्वगन्धातिलैः शुक्लैस्तेन गौः क्षीरिणी भवेत्"। इति गवायुर्वेदः

अथ हृत्तायुर्वेदस्तत्रैव "हृत्तायुर्वेदमाख्यास्ये शृङ्गोत्तरतः शुभः। प्राग्वटोयाम्यतश्चाम्र आग्नेऽश्वत्थः क्रमेण तु। दक्षिणादिसमुत्पन्नाः समीपे कण्टकिद्रुमाः। उद्यानं रक्षयेत्तेन स्वास्तिलानथ पुष्पितान्" इत्युपक्रम्य "अरिष्टाशोकपुन्नागाः शिरीषाः सप्रियङ्गवः। अशोककदलीजम्बुस्तथा बकुलदाडिमाः। सायं प्रातस्तु धर्मान्ते शीतकाले दिनान्तरे। वर्षर्त्तौ तु भवः शेषे सेक्तव्या रोपिताद्रुमाः। उत्तमं विंशतिर्हस्ता मध्यमं षोडशान्तरम्। स्थानात् स्थानान्तरं कार्य्यं हृत्ताणां हादशान्तरम्। त्रिफलाः स्नुर्घनाहृत्ताः शस्त्रेणादौ हि शोधनम्। विडङ्गहृतपक्वान्नान् सेचयेच्छीतवारिणा। फलनाशे कुलत्थैश्च माषैर्मुद्गैर्यवैस्तिलैः। घृतशीतपयःसेकः फलपुष्पाय सर्व्वदा। आविकाजशकृन्मूत्रं यवचूर्णं तिलानि च। गोमांसमुदकञ्चेति सप्तरात्रं निधापयेत्। तत्सेकः सर्वहृत्ताणां फलपुष्पादिहृद्भिदः। मत्स्यान्नमाषाऽवसेकेन हृद्भिर्भवति शाखिनः। विड्भक्षतरक्षुलोपेतं मत्स्यं मांसं हि दोहदम्। सर्वेषामविशेषेण हृत्ताणां रोगमर्दनम्"। हृक्षतसंहितोक्तो हृत्तायुर्वेद आरामशब्दे दृश्यः। आयुर्वेदमधीते वेद वा उक्थाऽ० ठक्। आयुर्वेदिकः आयुर्वेदाभिज्ञे त्रि०। आयुर्वेदे साधु कथा० ठक्। आयुर्वेदिकः आयुर्वेदे साधौ त्रि०। [स्त्रियां ङीप्।

आयुर्वेदमय पु० आयुर्वेदेन प्रचुरः प्राचुर्य्ये मयट्। धन्व-

आयुर्वेदिन् त्रि० आयुर्वेदोवेद्यतया विद्यतेऽस्य इनि। आयुर्वेदाभिज्ञे चिकित्साशास्त्रस्य वेत्तरि वैद्ये।

आयुषज् त्रि० आयुना सजते सन्+ज-क्विप् षत्वम्। आयुः सम्बन्धे "सोमः पवत आयुषक्" ऋ०९,२५,५। "पवस्व देवायुषगिन्द्रं गच्छतु ते मदः" ऋ०९,६३,२२।

आयुष्क पु० आयुषा कायति कै-क। आयुषा प्रकाशमाने प्रशस्तायुष्के।

आयुष्काम त्रि० आयुः कामयते काम-णिङ्-अण् उप०स०। आयुरभिलाषुके "अथात आयुष्कामीयं रसायनम्" इति सुश्रुतः। "आयुष्कामेन वप्तव्यं न जातु परयोषिति" मनुः।

आयुष्कृत् त्रि० आयुः करोति कृ-क्विप् तुक्। आयुर्वृद्धिकरे रसरसायनादौ आयुर्वृद्धिशब्दे ७७५ पृष्ठे तान्युक्तानि। ट। आयुष्कर इत्यपत्र त्रि० स्त्रियां ङीप्।

आयुष्टोम पु० आयुः साधनं स्तोमः शाक०त० षत्वम्। १आयुःसाधने ऋक्समुदायात्मके स्तोमभेदे २तत्स्तोमयुक्ते यागभेदे च।

आयुष्मत् त्रि० आयुर्विद्यतेऽस्य मतुप्। १चिरजीविनि "आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने" "आयुष्मन्तं सुतं सूते यशोमेधासमन्वितम्" मनुः स्त्रियां ङीप्। २विष्कम्भावधिके तृतीये योगे पु०। "विष्कम्भः प्रीतिरायुष्मान्" ज्यो०ति०। आयुरिति शब्दोऽस्यास्ति मतुप्। ३आयुःशब्दयुक्ते मन्त्रभेदे "आयुष्मानिति शान्त्यर्थं जप्त्वा चैव समाहितः" ऋ०प०। तच्च आयुष्यसूक्तशब्दे दृश्यम्। भवदादिषु पाठात् तस्मिन् परे प्रथमार्थेऽपि तसिलादि। ततआयुष्मान् तत्रायुष्मान्।

आयुष्य त्रि० आयुः प्रयोजनमस्य "स्वर्गादिभ्यो यत्" पा०भा० यत्। आयुःसाधने आयुर्वृद्धिशब्दोक्ते रसरसायनद्रव्यकर्म्मादौ। "आयुष्यं प्राङ्मुखोभुङ्क्ते घृतं भुङ्क्ते ह्युदङ्मुखः" "इदं यशस्यमायुष्यमिदं निःश्रेयसं परम्" "धन्यं यशस्यमायुष्यं स्वर्ग्यं ज्ञातिधिपूजनम्" इति च मनुः "आयुष्योहवा अस्यैष आत्मनिष्क्रयणो भवति" शत०ब्रा०।

आयुष्यसूक्त न० कर्म्मधा०। "आयुष्मानिति शान्त्यर्थं जप्त्वा तत्र समाहितः" ऋ०प० उक्ते "आभ्युदयिकश्राद्धादिषु जप्ये सूक्तभेदे तच्च सूक्तम्। "आयुर्विश्वायुर्विश्वमायुरसीमहि। प्रजान्वष्टधार निधेह्यक्षं शतं जीवेम शरदां वयन्ने। आयुषे पवस्व वर्च्चसे मे पवस्व दिवे पृथिव्या दिवोजनित्राः सूक्तवन्त्वापोऽध्वरन्नो सोमोहोदुगाय ममायुषे मम ब्रह्मवर्चसाय यजमानस्यार्द्धा अस्य राज्याय" भव-

देवभट्टकृतम् अत्रासुध्येयत्र षड्यन्नं संस्कार्थनामोल्लेखम् । सामवेदिनाञ्चैतत् पाठ्यं वेदभेदेऽन्यदाकरे ज्ञेयम् ।

आयुस् न० इण-असि णिच्च । जीवितकाले "आयुरारोग्य मतुलं देहि देवि ! नमोऽस्तु ते" देवीस्तुतिः । "आयुर्दैहातिगैः पोतं रुधिरं च पतत्त्रिभिः" रघुः । "चतुर्थमायुषोभाग-मुषित्वाद्यं गुरौ द्विजः । द्वितीयमायुषोभागं कृतदारो-ऽग्नौ वसेत्" मनुः "समारूरुक्षुर्दिवमायुषः क्षये" रघुः । "आयूंषि त्वच्छुनिर्भिद्य प्राभञ्जनिरमोचयत्" भट्टिः । "अष्टमं चायुषः स्थानमष्टमाद्दष्टमञ्च यत्" इति पराशरोक्तेः जन्मलग्नावधिके अष्टमस्थाने हतोयस्थाने च तद्विवेच्यम् । स्थानविशेषे च ग्रहविशेषयोगाच्चादिवशात् आयुर्विशेषः अष्टमस्थाने चिन्तनीयपदार्थसहितः "सर्वा० चिन्ता० दर्शितः । यथा "मरणाज्जीवितमरणं सुप्रस्थानं च मरणहेतुश्च । अन्त-सुखमरणदेयं परिभवमपि चिन्तयेत् प्राज्ञः । रन्ध्रेश्वरे पापयु-तेऽन्यराशावल्पायुरस्येति वदन्ति षडे । तत्रापि लग्नेश्वर-योगजाते त्वल्पायुरस्येति वदन्ति सन्तः । स्वक्षेत्रसंस्थे सति रन्ध्रनाथे दीर्घायुराद्यर्मुनयोमहान्तः । मन्देन वा चिन्त्य-मशेषमायुः स्वक्षेत्रमित्रोच्चसुहृत्स्थितेन । रन्ध्रेश्वरेणापि युते विलग्ननाथे रिपौ वा व्ययराशियुक्ते । षडान्त्ययो वा यदि लग्नयुक्ते दीर्घायुरस्येति शुभेक्षितश्चेत् । कर्मेश्वरेणापि विचिन्त्यमायुर्दीर्घं सुहृत्स्वोच्चयुतेन तेन । केन्द्रस्थितैः कर्म-विलग्नरन्ध्रनाथैस्तथैव रुदाहरन्ति । प्रोक्तयुतैर्व्योमचरै-स्त्रिभिर्वा सभानुजैः केन्द्रगतैस्तथैव । स्वक्षेत्रकोणादिग-तैर्विशेषाद्वदन्ति दीर्घायुरुदारचित्ताः । चतुरस्रे शुभैर्युते लग्नेशे शुभसंयुते । गुरुणा दृष्टिसंयोगे पूर्णमायुर्विनि-र्दिशेत् । केन्द्रान्विते विलग्नेशे गुरुशुक्रसमन्विते । ताभ्यां निरीक्षिते वापि दीर्घमायुर्विनिर्दिशेत् । त्रिषड़ायगताः पापाः शुभाः केन्द्रत्रिकोणगाः । लग्नेशे बलसंयुक्ते पूर्णमायुर्विनिर्दिशेत् । षट्सप्तरन्ध्रभावेषु शुभेक्षसहितेषु च । त्रिषडायेषु पापेषु पूर्णमायुर्विनिर्दिशेत् । रन्ध्राधिपे विलग्नस्थे गुरुशुक्रेक्षिते युते । लग्नेशे केन्द्रगे वापि दीर्घ-मायुर्विनिर्दिशेत् । रन्ध्राधिपे तु केन्द्रस्थे गुरुशुक्रेक्षिते युते । लग्नेशे बलसंयुक्ते दीर्घमायुर्विनिर्दिशेत् । लग्नाधिपो यदा केन्द्रे लग्नादेकादशालये । सर्वपक्षकृतं रिष्टमेकोऽपि विलयं नयेत् । उच्चान्वितैस्त्रिभिः खेटैर्लग्नरन्ध्रेशसंयुतैः । रन्ध्रे पापविहीनैस्तैर्दीर्घमायुर्विनिर्दिशेत् । रन्ध्रस्थितैस्त्रिभिः खेटैः स्वोच्चमित्रस्वगेहगैः । लग्नेशे बलसंयुक्ते दीर्घमा० । पारावतादिभागस्थाः पापाः सर्वे शुभाश्रया । केन्द्रत्रिको-णनिलयाः पूर्णमायुर्विनिर्दिशेत् । षडाष्टमव्यये पापा लग्नेशे दुर्बले यदि । अल्पायुरनपत्यो वा शुभदृग्योगव-र्जिते । क्रूरषडांशके वापि रन्ध्रेशे भानुजेऽपि वा । पापा-न्विते पापदृष्टे त्वल्पमायुर्विनिर्दिशेत् । चतुष्टयगते पापे शुभ-दृष्टिविवर्जिते । बलहीने विलग्नेशे त्वल्पमायुर्विनिर्दि-शेत् । व्ययार्थौ पापसंयुक्तौ शुभदृष्टिविवर्जितौ । क्रूरषडांशगौ वापि स्वल्पमायुर्विनिर्दिशेत् । आयुर्योगस्त्रिधा प्रोक्तः स्व-ल्पमध्यचिरायुषः । द्वात्रिंशत्पूर्वमल्पायुर्मध्यमायुस्ततो भवेत् । सप्तत्याः प्राक्, ततः पूर्णमायुरत्र वदन्ति हि । अल्पायुर्दिननाथस्य शत्रौ लग्नाधिपे यदा । समत्वे मध्य-मायुः स्यान्मित्रे दीर्घायुरादिशेत् । बलहीने विलग्नेशे जीवे केन्द्रत्रिकोणगे । षडाष्टमव्यये पापे मध्यमायुरुदाहृतम् । शुभे केन्द्रत्रिकोणस्थे शनौ बलसमन्विते । षडे वाष्टमे पापे मध्यमायुरुदाहृतम् । लग्ने त्रिकोणे केन्द्रे वा मध्यमायुश्च मिश्रिते । अल्पायुर्योगजातानां विपत्पा-के मृतिप्रदः । मध्यमे मृत्यरिभेदान्मृतिं दद्याद्विशेषतः । अष्टमेशदशा कष्टा पूर्णायुर्योगसंयुते । योगायुरिति निः-श्चित्य ज्ञातव्यं वदेद्बुधः । आयुर्विलग्नाधिपती बलेन हीनौ धरास्थान्वहितेशयुक्तौ । युद्धे मृतिं तस्य वदन्ति तज्ज्ञाः शस्त्रेण वा तन्नरणं विशेषात् । रन्ध्रार्कनाथौ यदि वा रिपुस्थौ राशून्वितौ केतुयुतौ समस्थौ । व्रणेन युद्धे मृतिमाकुरायाः शस्त्रेण वा तन्मरणं विशेषात् । रन्ध्रार्क-नाथौ यदि वा रिपुस्थौ राशून्वितौ केतुयुतौ समस्थौ । तद्भुक्तिकालेऽथ वा विपाके शस्त्रेण चौरैर्मरणं प्रयाति । रन्ध्रार्कपौ वाहननाथयुक्तौ तस्यान्मृतिं तस्य वदन्ति तज्ज्ञाः । मृतिं त्वजीर्णाद्गुरुसंयुतौ तौ देहेशजीवौ रि-पुगावजीर्णात् । लग्नेश्वरे वाहननाथयुक्ते वागीश्वरे-णापि युते त्वजीर्णात् । देहेश्वरे वाहनचित्तभावनाथान्विते वा मरणं त्वजीर्णात् । रन्ध्रेशयोगान्मरणं दशायामन्तर्दशायामथ वा वदन्ति । पित्रादिभावाधिपयोगदृष्ट्या पित्रादिकानां मरणं तथैव । सूर्यार्कपौ भानुसुतेन युक्तौ दुस्थानगौ वा विषभक्षणेन । राहुध्वजाभ्यां सहितौ च दुस्थावुद्-बन्धनात्तस्य मृतिं वदन्ति । षष्ठेश्वरे भानुसुते सराहुकेतौ मृगाद्भीतिमुदाहरन्ति । जीवेन युक्ते गजभीतिमस्य जातस्य चन्द्रेण युतेऽम्बुभीतिम् । सूर्यान्विते तादृगभानुपुत्रे मृगाद्-भल्लात् शुनकात् सभौमे । षष्ठस्थिते भानुसुतेऽपि चैवं वि-ना स्वतुल्यस्वदृशं सखेटे । सुखेशभाग्येशविलग्ननाथास्त्रि-कोणगाः केन्द्रगताश्च सर्वे । भुक्तौ यदा तत्परिपाककाले

पिता सहैवानुमृतिञ्च मातुः । रन्ध्रे शशाङ्के फणिनाथ युक्ते क्षीणे त्वपस्मारयुतः समन्दे । तत्र स्थिते क्षीणबले शशाङ्के पिशाचपीड़ा च जलाद्भिपाच्च । भौमार्किमन्दान्यतमेन युक्ते क्षीणे शशाङ्के निधनस्थितेऽपि । दुःस्थे त्वपस्मारभयान्मृतिःस्यात्पिशाचबाधादथ वा मृतिस्तु । रन्ध्रे सराहौ यदि वा सकेतौ चातुर्थिकापीड़नमाडरस्य । रन्ध्रेश्वरेणापि युते तथैव क्रूरादिषड्यांशयुते तु सद्यम् । नीचस्थिते वाऽमरनायके वा षडष्टमस्थे यदि पापदृष्टे । रात्रौ प्रकोपान्मरणं पितुश्च तत्पीडया वित्तविनाशमेति" । अधिकमल्पायुः-शब्दे ४१२पृष्ठे उक्तम् । अस्य पुरुषादिपूर्व्वपदकत्वे अच् समा० "पुरुषायुषजीविन्यः" रघुः तत्रायुषम् मनुष्यायुष मित्यादौ वा० अच् समासान्तः ।

आयुर्योगश्च सर्व्वा० चि० दर्शितः यथा "अथायुर्योगः । केचिद्योगं प्रशंसन्ति दशां केचिदृदन्ति हि । तदिना चायुषां ज्ञानं न शक्यन्तु मनीषिभिः । त्रिविधश्चायुषो योगः स्वल्पायुर्मध्यमोत्तमः । द्वात्रिंशतपूर्व्वमल्पन्तु तदूर्ध्वं मध्यमं भवेत् । आ सप्ततेस्तदूर्ध्वन्तु दीर्घायुरिति सम्मतम् । उत्तमायुः शतादूर्ध्वं सनेः शंसन्ति तद्विदः । आ द्वादशाब्दाज्जन्मनामायुर्ज्ञानं न शक्यते । जपहोमचिकित्साद्यैर्बालरक्षां तु कारयेत् । पित्रोर्हि यैर्ग्रहैर्ताः केचित्केचिद्बालस्य चैरपि । अपरे रिष्टयोगाश्च त्रिविधाःकालसम्भवः । जन्मतः प्रबलेनैव बालानां मृत्युसम्भवः । कथयेदवशेषं तु तथा योगोनिरूपितः । अल्पायुर्लग्नगे भानौ यत्नो मध्यं तु मध्यमे । मित्रे लग्नेश्वरे तस्य दीर्घमायुरुदाहृतम् । अल्पायुर्योगजातस्य विपत्तारे मृतिं वदेत् । जातस्य मध्यमे योगे प्रत्यरौ तु मृतिर्भवेत् । दीर्घायुर्योगजातानां वधभे तु मृतिर्भवेत् । त्रिषु योगेषु सर्व्वेषु प्रत्येकं त्रिविधं भवेत् । अल्पायुरल्पमध्यं तु पूर्णायुस्त्रिविधं मतम् । मध्यमादल्पमध्यं तु पूर्णायुस्त्रिविधं भवेत् । दीर्घायुषोऽल्पमध्ये तु पूर्णायुस्त्रिविधं भवेत् । एवन्नवविधं प्रोक्तमायुषां तु विनिर्णयः । पञ्चम्याराद्दशा मृत्युं दद्यात् षष्ठी गुरोस्तथा । शनेश्चतुर्थान्मृत्युः स्याद्दशा राहोश्च सप्तमी । विपद्भेदशा कटा प्रत्यरीशदशा तथा । वधभेदशा कटा पापा स्यादशुभेक्षिता । नीचारातिविमूढस्था विपत्प्रत्यरिभेदनाः । दशा दद्युर्मृतिं तस्य पापैर्युक्ता विशेषतः । राशिसन्धिषु ये जातास्ते बाला मृतजीविनः । षष्टदृष्टो युतो वाऽपि निःसंशयमृतिप्रदः । गण्डान्तेषूद्भवो मृत्युः पितृमातृबलात्ततः । यदि जीवेत्सगण्डालो गजवाजिसमन्वितः । मृतोऽथवा भानुनिशाकरौ वा क्रूरर्क्षगौ क्रूरनिरीक्षितौ च । व्याधिं नरस्यापि वदन्ति तज्ज्ञास्त्रिवर्षमात्रं त्वखिलस्यमेतत् । चन्द्रात् क्रूरेवासरनाथभौमौ कुजादथो वा मरणं दशाहात् । उद्यद्रेक्काण जामित्रे यस्य स्याद्दारुणो ग्रहः । क्षीणचन्द्रे विलग्नस्थे सद्योहरति जीवितम् । आपोक्लिमे स्थिताः सर्वे यदा बलविवर्जिताः । एकमासं द्विमासं वा तस्यायुः समुदाहृतम् । विलग्नाधिपतिर्नीचे निधने चार्कसंयुते । क्षुच्छ्वेष जीवनं विन्देन्मृतप्रायो भविष्यति । केतोरुदयः पूर्व्वे षडाद्युल्कान्निपवननिपातः । रौद्रे सति च मूहूर्त्ते प्राणेभ्यस्त्यज्यते जन्तुः । यद्दशापरिवेशकाले जातः पापान्विते विलग्नस्थे । लग्नेशे बलहीने जीवति पञ्चत्वं त्रिमासं वा । अंशाधिपतिजन्मपतिर्लग्नपश्चात्तमुपागतो यस्य । लग्नावसानमरणं भवेत् कतिपयाहेन । सन्धिचतुष्टयकाले जाते मृत्युं समादिशेत्तज्ज्ञः । पापयुते दृष्टे वा शीघ्रैः सौम्यैरदृष्टयुते । राहौ केन्द्रे पापयुक्तेक्षिते वा क्षिप्रं नाशं याति सौम्यैरदृष्टे । पापैः केन्द्रे वार्कलग्ने त्रिकोणे सौम्यैः षष्ठे चाष्टमेऽन्त्ये वदन्ति । जातः क्षीणे शीतगौ लग्नसंस्थे पापैर्दृष्टे नाशमाशु प्रयाति । उच्चक्षेत्रे मेषराशिं च हित्वा राहुर्युक्तस्तेषु प्राणनाशः । लग्नात्सप्तान्त्यौ पापयुक्तौ यदि स्यातत्पष्ठान्त्ये वा विनश्येत् क्षणेन । लग्नाद्वाले चाष्टमे पापचारैः सोमे क्षीणे त्वष्टमार्क्षं च जीवेत् । केन्द्रैश्चन्द्रात्पापयुक्तैरसौम्यैः स्वर्गं यानं प्रोच्यते वत्सरेण । जन्माधिपे लग्नगे क्रूरयुक्ते पश्यत्यार्किश्चाष्टमे जीववर्गे । षष्ठे वर्षे द्वादशे वाऽष्टमे वा सन्धौ राशेर्जातको मृत्युमेति । षष्ठेऽष्टमे वा हिमगौ च यस्य क्षीणे चन्द्रे पापयुक्तेऽथ वापि । सौम्यैर्दृष्टे त्वष्टमाद्वञ्च जीवेत् पापैः सौम्यैर्मिश्रितैस्तद्वदं स्यात् । जीवे विलग्ने मिथुने तुलायां शुक्रेण युक्ते शशिरुतुना च । पापैर्दृष्टे मृत्युराशिस्थितेवा जीवेद्वर्षं चाष्टमं चैव बालः । लग्ने क्षीणे शशिनि निधनं रन्ध्रकेन्द्रेषु पापैः पापान्तःस्थे निधनस्थिवुके द्यूनयुक्ते च चन्द्रे । एवं लग्ने भवति मदनच्छिद्रसंस्थे च पापे माता साकं यदि च न शुभैर्वीक्षितः शक्तिमद्भिः । राहुयुक्ते शीतरश्मौ विलग्ने क्रूरे युक्ते चाष्टमे भूमिसुते । माता सार्द्धं चन्द्रवद्भास्करेण यस्तो वा तेनाशु मृत्युं प्रयाति । अस्तङ्गते दिनपतौ रविजे विलग्ने भौमे ऽथ वापि निधनं व्रजति त्रिवर्षात् । एवं स्थितेऽपि हिमगावशुभैरदृष्टैराशुयते च निधनं

भवतीह चाष्टो । इन्दुस्तिर्भौमष्टेऽष्टमस्थः सूर्येन्दुभौमार्कजदृष्टमूर्त्तिः। अन्यैस्तिभिर्भागैवदृष्टिहीनो लोकान्तरं प्रापयति प्रसूतम् । वक्रो शनिर्भौमष्टं प्रयातस्थिते च षष्ठे च चतुष्टये वा । कुजेन संप्राप्तबलेन दृष्टो वर्षद्वयं जीवयति प्रजातम् । सौरिस्मरस्थे यदि वा विलग्ने जन्मस्थलग्ने धिषदुस्थिते वा । सौम्येषु केन्द्रोपगतेषु सद्यो जातस्य मृत्युर्यवनोपदिष्टः । नीचस्थे देवपूज्ये तु भौमक्षेत्रगतेऽथ वा । सन्धिस्थेऽपि जातस्तु मासान्मृत्युं स गच्छति । नक्षत्रसन्धौ तिथिराशिसन्धावेकत्र तावत्प्रसवस्त्रिपक्षात् । जातस्य मृत्युं सहसैति सद्यः शुक्रेऽङ्गि जीवेदिति नन्दिकोक्तम् । षष्ठ्यां जातश्चार्कलग्ने कुजे वा गण्डान्ते वा मृत्युयोगेऽथ वापि । भौमे हन्ति प्राणिनां तत्क्षणेन जीवेजिते चेद्ध भवेत् प्रजातः । भौमोदये तद्दिवसे क्षणेन्दौ होरेश्वरे वारसूते मृगाङ्के । जातः सुखी ब्रह्मपदं प्रयाति प्रसाधनाद्यैरिह मन्त्रसिद्धा । वर्गोत्तमे लग्नगते कुलीरे केन्द्रे गुरौ भूमिसुते कलत्रे । सिंहासनांशे भृगुजे विशेषाद्दशायनाद्यैरमितायुरेति। कर्मान्यलग्ने सबुधे कलत्रे जीवे यदा गोपुरभागयुक्ते । मृत्यंशके वा दिननाथपुत्रे जातस्यसंख्यायुरुपैति मृत्युः । देवलोकांशके शुक्रे केन्द्रस्थे धरणीसुते । सिंहासनांशके जीवे केन्द्रे जातस्यसंख्यकः । उत्तमांशे भृगो केन्द्रे शनौ पारावतांशके । स्वर्गलोके गुरौ केन्द्रे त्रौषधाधारसंख्यकः । गोपुरांशे गुरौ केन्द्रे शुक्रे पारावतांशके । त्रिकोणे कर्किलग्ने तु युग्मान्तं स तु जीवतिः । चापांशे कर्किलग्ने च तस्मिन् देवेन्द्रपूजिते । त्रिचतुर्भिर्यदैः केन्द्रे जातो ब्रह्मपदं लभेत् । तृतीयैकादशे शुक्रे गोपुराख्यांशकान्विते । दृष्टे वर्गोत्तमे लग्ने ब्रह्मणः परमं पदम् । लग्ने शुक्रे गुरौ कामे कर्मावेऽमरनायके । चापमेषांशके लग्ने जातो याति परं पदम् । पञ्चमे बुधसंयुक्ते गोपुराख्यांशकान्विते। गुरौ षष्ठे विलग्नेऽस्मिन् जातो ब्रह्मपदं लभेत् । केन्द्रे गुरौ लाभगतेऽर्कपुत्रे धने रवौ मन्दयुते कलत्रे । भाग्ये धरारूनुयुतेऽत्र जातो युगान्तकालं समसूर्पैति मन्दुः । त्रिकोणगो जीवबुधौ विशेषाल्लग्ने दृष्टे तत्र युते धराजे । निशाकरे गोपुरभागयुक्ते जातः सहस्रद्वयवर्षमेति । पक्षे स्थिते जन्म यदाऽङ्गि काले केन्द्रे गुरौ वा शशिभे विलग्ने । दारे कुजे भानुसुते सुखस्थे जातस्तु जीवेदयुताब्दसंख्यम् । जीवमन्दारशुक्राणामन्योन्यं केन्द्रसंभवे । त्रिकोणे वा यदा याते जातस्त्रयुतवत्सरैः । शुभैर्युक्ते चतुष्केन्द्रे पापैः षट्त्रिभवान्वितैः । सिंहलग्ने यदा जातो जीवेत् षडयुतानि सः । कर्कादिस्थैर्यदैः सर्वैर्गुरुचन्द्रादिभिर्यदा । शून्यन्दैः परमोच्चस्थैर्नितुख्यो भवेच्चरः । शून्यादिभौमपर्यन्ता लग्नादौ खचराः स्थिताः । वैशेषिकांशसंयुक्ताजातस्त्वमरसंभिभः । आकल्पं जीवति नरो मृगे लग्ने कुजादिकाः । रव्यन्ताः खचराः सर्वे स्वोच्चे जीवेऽङ्गि जन्मनि । मेषान्त्यलग्ने मगुरौ भृगौ वा निशाकरे गोधनमध्यमांशे । सिंहासनांशे यदि वा धराजे जातस्त्वसंख्यायुरुपैति मर्त्यः । स्थिरे रवौ सोमसुतेन युक्ते चन्द्रे दृष्टस्त्रिमिथुने च शुक्रे । गुरौ कुलीरे यदि वा विलग्ने शनौ तुलायां सनिसाम्यमेति । देवलोकांशके मन्दे भौमे पारावतांशके । सिंहांशके गुरौ लग्ने जातो सनिसमो भवेत् । मेषलग्ने रवौ याने जीवे स्वोच्चसमन्विते । त्रिषडायगते पापे जातो सनिसमो भवेत्। इति चिन्तामणौ प्रोक्ता आयुःसंख्या मनीषिणाम् यदुक्तं पूर्व्वकैः सर्व्वैस्तदेव मयाऽधुना" । पारिजातांशाद्यास्तु सर्व्वा० चिन्त दर्शिताः ।"मूलत्रिकोणकोणोच्चस्वर्क्षकेन्द्रोत्तमांशकाः । सप्तवर्गोद्भवाः स्वांशस्वाधिमित्रांशमित्रकाः । वर्गा इमे दश प्रोक्ताः पूर्व्वाचार्य्यैर्महर्षिभिः । वर्गद्वयादियोगे पारिजातादिसंज्ञकाः । उत्तमं तु त्रिवर्गैक्यं चतुर्वर्गं तु गोपुरम् । वर्गपञ्चकसंयोगे सिंहासनमिहोच्यते । वर्गषट्कं पारिजातं षट्कं पारावतांशकम् । सप्तकं देवलोकाख्यं स्वर्गलोकस्तथाऽष्टकम् । ऐरावतन्तु नवकं फलं तेषां पृथक् पृथक्" । जातकपद्धतौ तु रिष्टभङ्गसहितायुर्योगविशेषः गजाद्यायुःप्रमाण सहित उक्तः यथा

"लग्नसप्तमगौ पापौ चन्द्रः पापयुतो यदा । शुभयुक्तेन दृष्टः स्यादचिरान्मृत्युकारकः । क्षीणेन्दौ व्ययगे पापे लग्नाष्टमनिवासिभिः । केन्द्रगैः शुभहीनानि यदि स्युः तदा मृतिः । पापयुक्तः शशी लग्नसप्ताष्टद्वादशस्थितः । केन्द्रान्यस्थानगैः सौम्यैर्न दृष्टो मृत्युदायकः । पापे राशिलग्ने सन्ध्याकाले होरा विधोर्यदा । मृत्वा स्वाङ्गन्द्रपापे र्युते सर्व्वचतुष्टये । कर्कान्त्यगे चक्रपूर्व्वं पश्चाद्धे पापदृग्युते । मृत्युर्वाष्टमकेन्द्रस्थैः पापैः क्षीणे विधौ तनौ । षष्ठद्वादशगैः पापैरथवा द्वादशस्थितैः । लग्ने वा पापमध्यस्थे सप्तमे वा मृतिं व्रजेत् । चन्द्रे षष्ठेऽष्टमे वापि मरणं पापवीक्षिते । शुभैरवेक्षिते वर्षाष्टकान्तस्मिन्सदर्शितः । शुभैः षडाद्यगे पापैर्वीक्षितैः प्रविलोकिते । मासान् मृत्युः

सप्तमे वा लग्नेशे पापसंयुते। तुर्यसप्ताष्टगचन्द्रः पापान्तःस्थो मृतिप्रदः। क्षीण एवं लग्नगोऽपि पापे सप्ताष्टगे सति। शुभाऽदृष्टे विधौ भग्ने केन्द्रकोणोपगैः खलैः। मृतिराशु सचन्द्रेऽङ्के पापैर्वा सप्तमैः स्थितैः। सपापोऽङ्के विधौ यस्ते समाष्टकांशगोर्बधः। भौमेऽष्टमे रवावेवं विधे लग्ने तु शस्त्रजः। चन्द्रार्कौ वा तनौ पापैः सबलैरष्टकोणगैः। शुभैर्न युक्तादृष्टेक्षणं बालकस्य हि। लग्नाष्टनवमान्त्येषु कुजचन्द्रार्कसूर्यजैः। बलिदुर्बलदृष्टैः स्याज्जातस्य मरणं ध्रुवम्। पापयुक्तो विधुर्लग्नसप्तकोणान्त्यस्थो मृत्युगः। मरणाय बलिदोच्चस्त्रिकयुग् वीक्षितो न चेत्। योगकर्तृबलिर्नाधिष्ठिते च बलो विधुः। स्वभे वा लग्नभेऽज्ञात्तः पापदृक्तदा मृतिः। मेषालिगो गुरुर्मृत्यौ विशुक्रैरवलोकितः। त्रिवर्षान्मृत्युदोमन्दः सूर्येन्दू नवाब्दतः। दृश्याऽदृश्ये सौम्यपापैर्लग्नेऽब्दाविषुभिर्मृतिः। बुधः सार्कविधुः पापदृष्ट एकादशाब्दतः। लग्नेशो रिपुगोराशिमितैर्वर्षैर्मृतिप्रदः। मासैर्द्वैकाशनाथस्तु दिवसैरंशनायकः। लग्ने शनिः षोड़शाब्दात् पापदृष्टोऽथ संयुतः। मासाद्विशुक्रो वर्षात्तु शिशोर्मृत्युकरः मृतः। लग्नेऽर्ककुजमन्दाश्चेत् षष्ठे वा सप्तमे विधुः। क्षीणो न दृष्टो गुरुणा सप्तवर्षान् मृतिप्रदः। राशिलग्नेश्वरावस्तं यातौ षष्ठारिपुफगो। राशिद्वादशलग्नवर्षैः स्त मरणाय शिशोः मृतौ। राहुःपापेक्षितः केन्द्रसंस्थो मृत्युकरः शिशोः। वत्सरैर्दशभिः कैश्चित् मृतः षोड़शवत्सरैः। एकोऽपि पापोमृत्युस्थः शत्रुगेहे खलेक्षितः। अमरार्भकमप्येवं वर्षान् मृत्युवशं नयेत्। शुक्रः कर्कमृगारस्थोव्ययाष्टारिस्थितैः खलैः। सर्वैः प्रदृष्टः षड्वर्षैर्जातस्यारिष्टकारकः। बुधः कर्कस्थितः षष्ठेऽष्टमे वा चन्द्रवीक्षितः। वर्षैश्चतुर्भीरिष्टस्य कारकः कथितो बुधैः। सूर्यः कर्म्मणि शस्त्राग्निजस्थः पापवीक्षितः। मरणाय शिशोः केतूदयभं जन्मभं तथा। षष्ठाष्टमस्थाः शुभदाश्च पापाधर्म्मात्मजस्थाश्च यदा भवन्ति। पापैः प्रदृष्टा न शुभा प्रदृष्टा वर्षाष्टकान्मृत्युकराः प्रदिष्टाः। लग्नपः पापयुक् द्यूनेरिष्टलग्नोधनस्थितः। नवाब्दैः सखलोऽङ्गांशे व्यये चेन्दोः खलेक्षितः। सूर्यशुक्रशनीनाञ्च योगो भवति जन्मनि। गुरुदृष्टोऽपि रिष्टाय प्रदिष्टो नववत्सरैः। गजैरङ्कैर्नलनेत्रैर्द्विपञ्चैः शरैरेकेनाब्धिभिर्वह्निनेत्रैः। गजाब्जैर्भखे खगसंख्यैश्च दिग्भिर्विधोर्मेषतो भागवर्षैर्मृतिः स्यात्। कर्कलग्ने गुरौ सेन्दौ शुक्रौ केन्द्रगौ यदा। त्रिद्वाभारिगताः शेषा इष्टायुरमितं कृतम्। आयुषो योगजस्यापि रिष्टं बाधकमत्र हि। तद्बाधकोरिष्टभङ्गः स चेद्बलिदृतो भवेत्। शुभाच्चन्द्रात् षडष्टस्था नो खलान्विताः। रिष्टनाशाय गदिताः प्रज्ञामोऽष्टहरैर्यथा। शुभैरेकाधगैः सर्वैः शुभैर्युक्तोविधुः शिशोः। रिष्टहा परिपूर्णो वा द्वादशांशे शुभे स्थितः। सम्पूर्णाङ्कः शर्व्वरीनायकश्चेत् सर्वैर्दृष्टोरिष्टहा संप्रदिष्टः। उच्चस्थो वा मित्रभागस्थितो वा चन्द्रारिष्टं नाशयेत् शुक्रदृष्टः। केन्द्रे भृगुरशुक्राणामेकः कोणेऽथ वीर्यवान्। अरिष्टनाशकः केन्द्रे पापोऽपि परमोच्चगः। मित्रराशिगताः पापाः शुभाश्च नवपञ्चमाः। नाशं नयन्ति रिष्टानि क्षणोरिष्टासुरं यथा। बली जन्मेशरोमित्र शुभदृष्टो हि रिष्टहा। स सर्वथादृष्टो हि षष्ठे रिष्टविनिष्टकृत्। वर्गोत्तमे शुभाः सर्वे स्वभे चारिष्टहानिदाः। शुभवर्गगता दृष्टाः सद्दृष्टा रिष्टनिष्टिदाः। क्षत्तिकापुष्यदाखेषु चन्द्रोवाथ त्रिषड्करे। पूर्खोवर्गोत्तमगतः खीवरिष्टविनाशकृत्। मेषकर्कगतचन्द्रः केन्द्रे शुभनिरीक्षितः। अशुभं नाशयत्याशु हरिर्मत्तगजं यथा। शुक्लपक्षे निशायाञ्चेत् क्षणेजन्म यदा दिवा। शुभाशुभेक्षितचन्द्रः षडाष्टस्थोऽवकः शिशोः। व्यतीपातेऽथ गण्डान्ते वैधृतौ रिष्टसन्ध्ययोः। जातस्य रिष्टं नास्त्येव कृतिकर्तुर्मतं यथा"। इति चन्द्ररिष्टभङ्गः। "सवीर्य्ये गुरौ लग्नगे रश्मियुक्ते विनाशं तदैवाशुभं सर्व्वमेति"। बलिदैः शुभैश्चाशुभैर्वीर्य्यहीनैः शुभर्क्षं तनुः सद्ग्रहैर्वीक्षितं वा। त्रिषड़ेकादशे राशुः शुभदृष्टो यदा भवेत्। कृत्युनाशाय सविभुर्मृत्युहृत्व इवापरः। मेषोच्चकर्कलग्नस्थो राहुश्चायुर्दयो सुनेः। अगस्त्यस्य मुनीनां च सप्तानां रिष्टनाशकः। शीर्षोदयगतैः सर्वैर्मृत्युदोषो विनश्यति। पक्षैः क्षुद्रैश्चापि नभोदिग्वह्निवायुभिः। अल्पुभं यद्धीनं चेत् केन्द्रे पूर्णबले शुभे। त्रिंशद्वर्षं तदायुः स्याच्चत्वारिंशच्छुभेक्षिते। गुरुः स्वभे खड्काणे सप्तविंशतिवर्षकम्। स्वभस्थिताः शुभाश्चन्द्रे खोच्चे ऽङ्कस्थे खषट्समाः। लग्ने गुरौ शुभैः केन्द्रस्थितैर्मर्त्यो यद्दोक्षिते। सप्तत्यब्दं भवेदायुरष्टाङ्के तदवीक्षिते। कर्केऽङ्गगे गुरौ कोणस्थितैः सर्वशुभग्रहैः। अशीतिरायुषः काष्ठा केन्द्रे शुक्रे शतं समाः। सूर्ये बलिदे पित्र्यायचन्द्रे स्यात्तु निसर्गजम्। लग्नेऽशायुर्दीर्घबले त्रिकेऽस्मिन् जीवशर्म्मजम्। नन्देन्दुतत्त्वतिथ्यर्कतिथिस्वर्गनखा रवेः। वर्षायुश्चेत् यदे नीचे त्वर्कं मध्येऽनुपाततः। नखैकद्व्यष्टयो विंशत्खाब्धा निस-

गजाः। समाः सूर्य्यात् पूर्ववत् स्वादेभ्योऽप्यायुरधांशजे। दृष्टफलवाक्षिप्ता दशभक्ताश्च यत् फलम्। वर्षमासादिकं ज्ञेयं भवेद्द्वादशभिः स्फुटम्। जन्मे परायुः सप्तांशो यच्छायुः परमोच्चगे। लग्ननवांशसमत्वायुर्दद्याद्दोर्य्यायुरं च भैः। सर्वमर्द्धं हतोयोऽंशः प्राद्यः पञ्चाङ्कभागकः। व्ययाद्दामं विमोयेत पापे त्वर्द्धं शुभपक्षे। एकभावगतानां यो बलो भागहरस्तु सः। अङ्गमस्तं गतोऽन्ति त्यक्त्वा शुक्रशनैश्चरौ। कुजस्त्यक्त्वा यत्नभस्यैक्षिभागो नाश्नते निजः। लग्ने सपापैः लग्नस्थनवांशाङ्कहायुषः। अष्टोत्तरः शतांशः स्याद्दीनः सौम्येक्षिते दलम्। उच्चक्रगताक्षिप्तं छिन्नं स्वांशोत्तमादिगाः। ददत्यायुर्यहास्ते चेद्दृष्टौ नित्यं स्वरादिगाः। अपि त्रिद्वेकगुणदाः केन्द्रादाविति केचन। लग्ने सपापे हानिर्या नाशावंशभवायुषि। हानिर्द्विवेऽधिकैव स्याद्गुणोऽप्येवं वराङ्गनोः। खार्काःपरायुर्नरदन्तिनोः १२० स्याद्दन्ता ३२ हयानां च जिना २४ दृषादेः। खरोष्ट्रयोस्तत्त्वसमाः २५ शुनोऽर्का १२ व्याघ्राद्यजादेर्हिदृपाः १दै परायः। आयुर्द्वात् समानीय स्वस्वपूर्णायुषा हृतम्। लब्धपरायुर्हृतं स्वं गजाद्यायुर्भवेदिति। दीपस्तैलादियुक्तोऽपि यथा वाते विनश्यति। अजितेन्द्रियतापथ्यैरेवमायुर्विनश्यति"।

अत्र हयानां दन्तैर्यथायुर्ज्ञानं तथोक्तमन्यग्रन्थे ५०३ पृष्ठे जयदत्तकृतादश्वशास्त्रात्तद्विशेषोऽव गन्तव्यः। दन्ताद्यालिंगद्वर्षा इतीहक्रमम्

इत्थमायुष सदाचारादेव, अपथ्याजितेन्द्रियादिभ्यस्तु आयुःसत्त्वेऽपि नाशः उक्तजातकपद्धतिवचनात् अतएव भा० आनु० प० १०४ अध्याये सदाचारादितएव आयुरुद्दिश्य "शतायुश्च पुरुषः शतवीर्य्यश्च जायते। कस्मान्नियन्ते पुरुषा बाला अपि पितामह!। आयुष्मान् केन भवति अल्पायुर्वाऽपि मानवः। केन वा लभते कीर्त्तिं केन वा लभते श्रियम्। तपसा ब्रह्मचर्य्येण जपहोमैस्तथौषधैः। कर्म्मणा मनसा वाचा तन्मे ब्रूहि पितामह!। भीष्म उवाच। अत्र तेऽहं प्रवक्ष्यामि यन्मां त्वमनुपृच्छसि। अल्पायुर्येन भवति दीर्घायुर्वाऽपि मानवः। येन वा लभते कीर्त्तिं येन वा लभते श्रियम्। यथा वर्त्तयन् पुरुषः श्रेयसा संप्रयुज्यते। आचाराल्लभते चायुराचाराल्लभते श्रियम्। आचाराल्लभते कीर्त्तिं पुरुषः प्रेत्य चेह च। दुराचारो हि पुरुषो नेहायुर्विन्दते महत्। यस्मान्नश्यन्ति भूतानि तथा परिभवन्ति च। तस्मात् कुर्य्यादिहाचारं यदीच्छेद्भूतिमात्मनः। अपि पापशरीरस्य आचारो हन्त्यलक्षणम्। आचारलक्षणो धर्म्मः सन्तश्चारित्रलक्षणाः। साधूनाञ्च यथा वृत्तमेतदाचारलक्षणम्। अध्यष्टं श्रवादेव पुरुषं धर्म्मचारिणम्। भूतिकर्माणि कुर्व्वाणं तं जनाः कुर्व्वते प्रियम्। ये नास्तिका निष्क्रियाश्च गुरुशास्त्राभिलङ्घिनः। अधर्म्मज्ञा दुराचारास्ते चरन्ति गतायुषः। विशोका भिन्नमर्य्यादा नित्यं सङ्कीर्णमैथुनाः। अल्पायुषो भवन्तीह नरा निरयगामिनः। सर्व्वलक्षणहीनोऽपि सदाचारवाञ्छरः। श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति। अक्रोधनः सत्यवादी भूतानामविहिंसकः। अनसूयुरजिह्मश्च शतं वर्षाणि जीवति। लोष्टमर्द्दी तृणच्छेदो नखखादी च यो नरः। निष्ठोच्छिष्टः सङ्कुशको नेहायुर्विन्दते महत्। ब्राह्मे मुहूर्त्ते बुध्येत धर्म्मार्थौ चानुचिन्तयेत्। उत्थायाचम्य तिष्ठेत पूर्व्वां सन्ध्यां जताञ्जलिः। एवमेवापरां सन्ध्यां सदोपासीत वाग्यतः। नेक्षेतादित्यमुद्यन्तं नास्तं यान्तं कदाचन। नोपस्पृष्टं न वारिस्थं न मध्यं नभसोगतम्। ऋषयो नित्यसन्ध्यत्वाद्दीर्घमायुरवाप्नुवन्। तस्मात्तिष्ठेत्तदा पूर्व्वां पश्चिमाञ्चैव वाग्यतः। ये न पूर्व्वामुपासीरन्द्विजाः सन्ध्यां न पश्चिमाम्। सर्व्वांस्तान् धार्मिको राजा शूद्रकर्म्माणि कारयेत्। परदारा न गन्तव्याः सर्व्ववर्णेषु कर्हिचित्। नह्येतदयशस्यायुष्यं लोके किञ्चन विद्यते। यावन्तो रोमकूपाः स्युः स्त्रीणां गात्रेषु निर्मिताः। तावद्वर्षसहस्राणि नरकं पर्य्युपासते। प्रसाधनञ्च केशानामञ्जनं दन्तधावनम्। पूर्व्वाह्णएव कार्य्याणि देवतानाञ्च पूजनम्। गुरोरग्रे नोदगुच्चैराधितिष्ठेत् कदाचन। नातिकल्यं नातिसायं न च मध्यन्दिने स्थिते। नाज्ञातैः सह गच्छेत नैकोन हयैः सह। पन्थादेयो ब्राह्मणाय गोभ्यो राजभ्य एव च। दुर्ब्बलाय भारतप्राय गर्भिण्यै दुर्ब्बलाय च। प्रदक्षिणं प्रकुर्व्वीत परिज्ञातान् वनस्पतीन्। चतुष्पथान् प्रकुर्व्वीत सर्व्वानेव प्रदक्षिणान्। मध्यन्दिने निशाकाले अर्द्धरात्रे च सर्व्वदा। चतुष्पथं न सेवेत उभे सन्ध्ये तथैव च। उपानही च वस्त्रञ्च धृतमन्यैर्न धारयेत्। ब्रह्मचारी च नित्यं स्यात् पादं पादेन नाक्रमेत्। अमावास्यां पौर्णमास्यां चतुर्दश्यष्टम्यां सर्व्वशः। अष्टम्यां सर्वपक्षाणां ब्रह्मचारी सदा भवेत्।। दृषा मांसं न खादेत पृषन्मांसं तथैव च। आक्रोशं परिवादञ्च पैशुन्यञ्च विवर्ज्जयेत्। नारुन्तुदः स्यान्न

नृशंसवादी न क्षीनतः परमभ्याददीत । यया।स्य वाचा पर उद्विजेत न तां वदेदुषतीं पारलोक्याम् । वाक्-सायका वदनाच्निष्पतन्ति तैराहतः शोचति रात्र्याहानि। परस्य नो मर्म्मसु निष्पतन्ति तान् पण्डितो नावसृजेत् परेषु । रोहते सायकैर्विद्धं वनं परशुना हतम् । वाचा दुरुक्तया विद्धं न संरोहति वाक्क्षतम् । कर्ष्णिनालिका नाराचान्निर्हरन्ति शरीरतः । वाक्शल्यस्तु न निर्हर्त्तुं शक्यो हृदियो हि सः। क्षीनाङ्गानतिरिक्ताङ्गान् विद्या-हीनान् विगर्हितान् । रूपद्रविणहीनांश्च सत्त्वहीनांश्च नाक्षिपेत् । नास्तिक्यं वेदनिन्दाञ्च देवतानाञ्च कुत्सनम् । द्वेषस्तम्भाभिमानञ्च तैक्ष्ण्यञ्च परिवर्ज्जयेत् । परस्य दण्डं नोद्यच्छेत् क्रुद्धो नैनं निपातयेत् । अन्यत्र पुत्राच्छिष्याच्च शिष्टार्थं ताड़नं स्मृतम् । न ब्राह्मणान् परिवदेत् नक्षत्राणि न निर्दिशेत् । तिथिं पक्षस्य न ब्रूयात्तथाऽस्यायुर्न रिष्यते । कृत्वा मूत्रपुरीषे तु रथ्यामाक्रम्य वा पुनः। पादप्रक्षालनं कुर्य्यात् स्वाध्याये भोजने तथा । त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन् । अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते । संयावं क्षरं मांसं यष्कृली-म्यायसन्तथा । आत्मार्थं न प्रकर्त्तव्यं देवार्थन्तु प्रकल्पयेत् । नित्यमग्निं परिचरेद्बलिं दद्याच्च नित्यदा । वाग्यतो दन्तकाष्ठञ्च नित्यमेव समाचरेत् । न चाभ्युदितशायी स्यात् प्रायश्चित्ती तथा भवेत् । मातापितरमुत्थाय पूर्व्व-मेवाभिवादयेत् । आचार्य्यमथ वाप्यन्यं तथायुर्विन्दते महत् । वर्ज्जयेद्दन्तकाष्ठानि वर्ज्जनीयानि नित्यशः । भक्षयेच्चास्तदृष्टानि पर्व्वस्वपि विवर्ज्जयेत् । उदङ्मुखश्च सततं शौचं कुर्य्यात् समाहितः । अकृत्वा पादशौचञ्च नाचरेद्दन्तधावनम् । अकृत्वा देवपूजाञ्च नाभिगच्छेत् कदाचन । अन्यत्र तु गुरुं वृद्धं धार्मिकं वा विचक्षणम् । अवलोकयो न चादर्शे मलिनो बुद्धिमत्तरैः । न चात्तातां स्त्रियं गच्छेद्भगिनीं वा कदाचन । उदक्शिरा न स्वपेत तथा प्रत्यक्शिरा न च । प्राक्शिरास्तु स्वपेद्विद्वान्यदा दक्षिणाशिराः । न भग्ने नावशीर्णे च शयने प्रस्वपीत च । नान्तर्द्धाने न संवृत्ते न च तिर्य्यक्कदाचन । न चापि गच्छेत् कार्य्येण समयाद्वाऽपि नास्तिके । आसनन्तु पदाक्रम्य न प्रसव्येत्तथा नरः । न नग्नः कर्हिचित् स्नायाच्च निशायां कदाचन । स्नात्वा च नावसृज्येत गात्राणि सुविचक्षणः । न चातुलिम्पेदस्नात्वा स्नात्वा वासो न निर्द्धुनेत् । न चेवार्द्राणि वासांसि नित्यं सेवेत मानवः। स्रजञ्च नावलम्बेत न बहिर्द्वारयेत च । उदक्यया च संभाषां न कुर्व्वीत कदाचन । नोत्सृजेत पुरीषञ्च शेषे ग्रामस्य चान्तिके । उभे मूत्रपुरीषे तु नाप्सु कुर्य्यात् कदाचन । अन्नं बुभुक्षमाणस्तु तिर्यङ्मुखेन स्पृशेदपः । भुक्त्वा चान्नं तथैव तिर्हिः पुनः परिमार्ज्जयेत् । प्राङ्मुखो नित्यमश्नीयाद्दक्ष्यतोऽन्नमकुत्सयन् । प्रहृष्टश्चेन्द्रियमनसा भुक्त्वा चाग्निमुपस्पृशेत् । । आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः । धन्यं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते उदङ्मुखः । अग्निमालभ्य तोयेन सर्व्वान् प्राणानुपस्पृशेत् । गात्राणि चैव सर्व्वाणि नाभिं प्राणितले तथा । नाधितिष्ठेत्तुषं जातु केशभस्मकपालिकाः । अन्यस्य चाप्यवस्नातं दूरतः परिवर्ज्जयेत् । शान्तिहोमांश्च कुर्व्वीत सावित्राणि च धारयेत् । निपतन्तीमपि खादेत न तु गच्छन् कदाचन । मूत्रं नोत्तिष्ठता कार्य्यं न भस्मनि न गोव्रजे । आर्द्रपादस्तु भुञ्जीत नार्द्रपादस्तु संविशेत् । आर्द्रपादस्तु भुञ्जानो दीर्घमायुरवाप्नुयात् । त्रीणि तेजांसि नोच्छिष्ट आलभेत कदाचन । अग्निं गां ब्राह्मणञ्चैव तथा ह्यायुर्न क्षीयते । त्रीणि तेजांसि नोच्छिष्ट उदीक्षेत कदाचन । सूर्य्याचन्द्रमसौ चैव नक्षत्राणि च सर्व्वशः । अङ्गं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति । अभ्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते । अभिवादयेत वृद्धांश्च दद्याच्चैवासनं स्वयम् । कृताञ्जलिरुपासीत गच्छन्तं पृष्ठतोऽन्वियात् । न चासीतासने भिन्ने भिन्नकांस्यञ्च वर्ज्जयेत् । नैकवस्त्रेण भोक्तव्यं न नग्नः स्नातुमर्हति । स्नात्वा नैव नग्नेन न चोच्छिष्टोऽपि संविशेत् । उच्छिष्टो न स्पृशेच्छीर्षं सर्व्वे प्राणास्तदाश्रयाः । केशग्रहं प्रहारांश्च शिरस्येतान् विवर्ज्जयेत् । न संहताभ्यां पाणिभ्यां कण्डूयेतात्मनः शिरः । न चाभीक्ष्णं शिरःस्नायात्तथाऽस्यायुर्नरिष्यते । शिरःस्नातश्च तैलेन नाङ्गं किञ्चिदपि स्पृशेत् तिलभ्रष्टं न चाश्नीयात्तथाऽस्यायुर्नरिष्यते । नाध्यापयेत्तथोच्छिष्टो नाधीयीत कदाचन । वाते च पूतिगन्धे च मनसाऽपि न चिन्तयेत् । अत्र गाथा यमोद्गीताः कीर्त्तयन्ति पुराविदः । आयुरस्य निशानामि प्रजास्तस्यादृते तथा य उच्छिष्टः प्रवदति स्वाध्यायञ्चाधिगच्छति । यद्यानन्यायकालेऽपि मोहादभ्यस्यति द्विजः । तस्य वेदः प्रणश्येत आयुश्च परिहीयते । तस्मादुच्छो ह्यनध्याये नाधीयीत कदाचन । प्रत्यादित्यं प्रत्यनलं प्रति गाञ्च प्रति द्विजान् । ये मेहन्ति च पन्थानं ते भवन्ति

मतायुषः। उभे मूत्रपुरीषे तु दिवा कुर्यादुदङ्मुखः। दक्षिणाभिमुखो रात्रौ तथा ह्यायुर्न रिष्यते। त्रीन् क्रमान्नावजानीयाद्दीर्घमायुर्जिजीविषुः। ब्राह्मणं क्षत्रियं सर्पं सर्वं ह्याशीविषास्त्रयः। दहत्याशीविषः क्रुद्धो यावत् पश्यति चक्षुषा। क्षत्रियोऽपि दहेत् क्रुद्धो यावत् पश्यति तेजसा। ब्राह्मणस्तु क्रुद्धं हन्याद्ध्यानेनावेक्षितेन च। तस्मादेतत्त्रयं यत्नादुपसेवेत पण्डितः। गुरुणा चैव निर्बन्धो न कर्त्तव्यः कदाचन। अनुमान्यः प्रसाद्यश्च गुरुः क्रुद्धो युधिष्ठिर!। सम्यङ्निष्याप्रवृत्तेऽपि वर्त्तितव्यं गुराविह। गुरुनिन्दा दहत्यायुर्मनुष्याणां न संशयः। दूरादावसथान्मूत्रं दूरात् पादावसेचनम्। उच्छिष्टोत्सर्जनं चैव दूरे कार्यं हितैषिणा। रक्तमाल्यं न धार्यं स्यात् शुक्लं धार्यं तु पण्डितैः। वर्जयित्वा तु कमलं तथा कुवलयं प्रभो!। रक्तं शिरसि धार्यं तु तथा वानेयमित्यपि। काञ्चनीयाऽपि माला या न सा दुष्यति कर्हिचित्। स्नातस्य वर्षकं नित्यमार्द्रं दद्याद्विशाम्पते!। विपर्ययं न कुर्वीत वाससो बुद्धिमान्नरः। तथा नान्यधृतं धार्यं न चापदशमेव च। अन्यदेव भवेद्वासः शयनीये नरोत्तम!। अन्यद्रथ्यासु देवानामर्चायामन्यदेव हि। प्रियङ्गुचन्दनाभ्यां च बिल्वेन तगरेण च। पृथगेवानुलिम्पेत केशरेण च बुद्धिमान्। उपवासं तु कुर्वीत स्नातः शुचिरलङ्कृतः। पर्वकालेषु सर्वेषु ब्रह्मचारी सदा भवेत्। समानमेकपात्रे तु भुञ्जेयातां जनेश्वर!। आलोढया परिहृतं न शयीत कदाचन। तथा नोद्धृतसाराणि प्रोक्षितं नाप्रदाय च। न सन्निहितो मेधावी नाशुचेर्न च सङ्कु च। प्रतिषिद्धान्न धर्मेषु भक्ष्यान् भुञ्जीत पृथतः। पिप्पलञ्च वटञ्चैव शणशाकं तथैव च। उडुम्बरं न खादेच्च भवार्थी पुरुषोत्तम!। आर्द्रं गव्यं तथा मांसं मायूरञ्चैव वर्जयेत्। वर्जयेच्छुष्कमांसञ्च तथा पर्युषितञ्च यत्। न पाणौ लवणं विद्वान् प्राश्नीयान्न च रात्रिषु। दधिसक्तून् भुञ्जीत शुष्कमांसञ्च वर्जयेत्। सायं प्रातश्च भुञ्जीत नान्तराले समाहितः। बालेन तु न भुञ्जीत परभ्राद्धं तथैव च। वाग्यतो नैकवस्त्रश्च नासंविष्टः कदाचन। भूमौ सदैव नाश्नीयान्नासीनो न शयद्वत्। तोयपूर्वं प्रदायान्नमतिथिभ्यो विशेषतः। पश्चाद्भुञ्जीत मेधावी न चान्यमनसा नरः। समानमेकपङ्क्त्यान्तु भोज्यमन्नं नरेश्वर!। विषं हलाहलं भुङ्क्ते योऽप्रदाय सुहृज्जने। पानीयं पायसं सक्तून् दधि सर्पिर्मधून्यपि। निरम्य शेषमेतेषां न प्रदेयन्तु कस्यचित्। भुञ्जानो मनुजव्याघ्र! नैव शङ्कां समाचरेत्। दधि चाश्नन्नपानं वै कर्त्तव्यञ्च भवार्थिना। आचम्य चैकहस्तेन परिज्ञाप्यं तथोदकम्। अङ्गुष्ठं चरणस्थाप्य दक्षिणस्थावसेचयेत्। पाणिं मूर्द्धि समाधाय स्पृष्ट्वा चाग्निं समाहितः। घ्राणचक्षुश्च्रवाप्नोति प्रयोगकुशलो नरः। अद्भिः प्राणान् समालभ्य नाभिं पाणितले तथा। स्पृशंश्चैव प्रतिष्ठेत न चाप्यार्द्रेण पाणिना। अङ्गुष्ठस्यान्तराले च ब्राह्मं तीर्थमुदाहृतम्। कनिष्ठिकायाः पश्चात्तु दैवतीर्थमिहोच्यते। अङ्गुष्ठस्य च यन्मध्यं प्रदेशिन्याश्च भारत!। तेन पित्र्याणि कुर्वीत स्पृष्ट्वापो न्यायतस्तथा। परापवादं न ब्रूयान्नाप्रियञ्च कदाचन। न मन्युः कश्चिदुत्पाद्यः पुरुषेण भवार्थिना। पतितैस्तु कथां नेच्छेद्दर्शनञ्च विवर्जयेत्। संसर्गं न च गच्छेत तथायुर्विन्दते महत्। न दिवा मैथुनं गच्छेन्न कन्यां न च बन्धकीम्। न चाज्ञातां स्त्रियं गच्छेत्तथायुर्विन्दते महत्। खे खे तीर्थे समाचम्य कार्यं सप्तपकल्पिते। त्रिः पीत्वापो द्विः प्रमृज्य कृतशौचो भवेन्नरः। इन्द्रियाणि सकृत् स्पृश्य त्रिरभ्युक्ष्य च मानवः। कुर्वीत पित्र्यं दैवञ्च वेददृष्टेन कर्मणा। ब्राह्मणार्थे च यच्छौचं तच्च मे ब्रूहि कौरव!। पवित्रञ्च हितञ्चैव भोजनाद्यन्नयोस्तथा। सर्वशौचेषु ब्राह्मेण तीर्थेन सप्तपस्पृशेत्। निर्णिज्य तु तथा क्षुत्वा स्पृष्ट्वापो हि शुचिर्भवेत्। दृष्टो घ्रातिस्तथा मित्रं दरिद्रो यो भवेदपि। दृष्टे वासवितव्यास्ते धन्यमायुष्यमेव च। दृष्टे पारावता धन्याः शुकाश्च सहसारिकाः। दृष्टेष्टे तु पापाय तथा वै तैलपायिकाः। उद्दीपकाश्च दृष्टाश्च कपोता भ्रमरास्तथा। निविशेयुर्यदा तत्र शान्तिमेव तदाचरेत्। अमङ्गल्यानि चैतानि तथोत्क्रोशा महात्मनाम्। महात्मनोऽतिगुह्यानि न वक्तव्यानि कर्हिचित्। अगस्याश्च न गच्छेत राज्ञः पत्नीं सखीं तथा। वैद्यानां बालवृद्धानां भृत्यानाञ्च युधिष्ठिर!। बन्धूनां ब्राह्मणानाञ्च तथा शारथिकस्य च। सम्बन्धिनाञ्च राजेन्द्र! तथायुर्विन्दते महत्। ब्राह्मणस्य पतिभ्याञ्च निर्मितं वह्निवेश्मनम्। तदावसेत् सदा प्राज्ञो भवार्थी मनुजेश्वर!। सन्ध्यायां न स्वपेद्राजन्! विद्वान् न च समाचरेत्। न भुञ्जीत च मेधावी तथायुर्विन्दते महत्। नक्तं न कुर्यात्पित्र्याणि भुक्त्वा चैव प्रसाधनम्। पानीयस्य क्रिया नक्तं न कार्या भूतिमिच्छता। वर्जनीयाश्च वै नित्यं सक्तवो निशि भारत!। शेषाणि चाव-

दातानि पानीयञ्चापि भोजने । सौहित्यं न च कर्त्तव्यं रात्रौ न च समाचरेत् । द्विजच्छेदं न कुर्वीत भुक्त्वा न च समाचरेत् । महाकुले प्रसूताञ्च प्रशस्तां लक्षणैस्तथा । वयस्थाञ्च महाप्राज्ञः कन्यामावोढुमर्हति । अपत्यसुत्पाद्य ततः प्रतिष्ठाप्य कुलं ततः । पुत्राः प्रदेया ज्ञानेषु कुलधर्मेषु भारत ! । कन्या चोत्पाद्य दातव्या कुलपुत्राय धीमते । पुत्रा निवेश्याश्च कुलाद्वृत्त्या लभ्याश्च भारत ! । शिरःस्नातोऽथ कुर्वीत दैवं पित्र्यमथापि वा । नक्षत्रे न च कुर्वीत यस्मिन् जातो भवेन्नरः । न प्रौष्ठपदयोः कार्य्यं तथाग्नेये च भारत ! । दारुणेषु च सर्व्वेषु प्रत्यरिञ्च विवर्ज्जयेत् । ज्योतिषे यानि चोक्तानि तानि सर्व्वाणि भारत ! । प्राङ्मुखः प्रसृतकर्माणि कारयेत् सुसमाहितः । उदङ्मुखो वा राजेन्द्र ! तथायुर्विन्दते महत् । परिवादं न च ब्रूयात्परेषामात्मनस्तथा । परिवादो ह्यधर्माय प्रोच्यते भरतर्षभ ! । वर्जयेद्व्यङ्गिनीं नारीं तथा कन्यां नरोत्तम ! । समार्षां व्यङ्गिताञ्चैव मातृसकुलजां तथा । दृष्टां प्रव्रजिताञ्चैव तथैव च पतिव्रताम् । अयोनिञ्च वियोनिञ्च न च गच्छेद्विचक्षणः । पिङ्गलां कुष्ठिनीं नारीं न त्वमावोढुमर्हसि । अपस्मारिकुले जातां निह्नीनाञ्चैव वर्जयेत् । श्वित्रिणाञ्च कुले जातां क्षयिणां मनुजेश्वर ! । लक्षणैरन्विता या च प्रशस्ता या च लक्षणैः । मनोज्ञा दर्शनीया च तां भवान् वोढुमर्हति । महाकुले निवेष्टव्यं सदृशे वा युधिष्ठिर ! । अपरा पतिता चैव न श्राद्धा भूतिमिच्छता । अग्नीनुत्पाद्य यत्नेन क्रियाः सुविहिताश्च याः । वेदे च ब्राह्मणैः प्रोक्तास्ताश्च सर्व्वाः समाचरेत् । न चेर्ष्या स्त्रीषु कर्त्तव्या रक्षा दाराश्च सर्व्वशः । अनायुष्या भवेदीर्ष्या तस्मादीर्ष्यां विवर्ज्जयेत् । अनायुष्यं दिवा स्वप्नं तथाऽभ्युदितशायिता । प्रगे निशामासु तथा ये चोच्छिष्टाः स्वपन्ति वै । पारदार्य्यमनायुष्यं नापितोच्छिष्टता तथा । यत्नतो नैव कर्त्तव्यमभ्यासश्चैव भारत ! । सन्ध्यायां न च भुञ्जीत न स्नायान्न पठेत्तथा । प्रयतश्च भवेत्तस्यां न च किञ्चित् समाचरेत् । ब्राह्मणान् पूजयेच्चापि तथा स्नात्वा नराधिप ! । देवांश्च प्रणमेत् स्नातो गुरूंश्चाभ्यभिवादयेत् । अनिमन्त्रितो न गच्छेत यत्र गच्छेत दर्शकः । अनर्चिते ह्यनायुष्यं गमनं तत्र भारत ! । न चैकेन परिव्रज्यं न गन्तव्यं तथा निशि । अनागतायां सन्ध्यायामागत्य च गृहे वसेत् । मातुः पितुर्गुरूणाञ्च कार्य्यमेवानुशासनम् । हितं वाऽथहितं वाऽपि न विचार्य्यं कथञ्चन । धनुर्वेदे च वेदे ऽथ यत्नः कार्य्यो नराधिप ! । हस्तिपृष्ठेऽश्वपृष्ठे च रथचर्य्यासु चैव ह । यत्नवान् भव राजेन्द्र ! यत्नवान् सुखमेधते । अप्रदृष्यञ्च शत्रूणां ह्यात्मानं स्वजनस्य च । प्रजापालनयुक्तञ्च न क्षतिं लभते क्वचित् । युक्तिशास्त्रञ्च ते ज्ञेयं शब्दशास्त्रञ्च भारत ! । गान्धर्व्वशास्त्रञ्च कलाः परिज्ञेया नराधिप ! । पुराणमितिहासाश्च तथाख्यानानि यानि च । महात्मनाञ्च चरितं श्रोतव्यं नित्यमेव च । पत्नी रजस्वला या च नाभिगच्छेन्न चाह्वयेत् । स्नाताञ्चतुर्थे दिवसे रात्रौ गच्छेद्विचक्षणः । पञ्चमे दिवसे नारी षष्ठेऽहनि पुमान् भवेत् । एतेन विधिना पत्नीमुपागच्छेत पण्डितः । ज्ञातिसम्बन्धिमित्राणि पूजनीयानि सर्व्वशः । वदव्यञ्च यथाशक्ति यज्ञैर्विविधदक्षिणैः । अत ऊर्द्धं सरस्वत्याञ्च सेवितव्यं नराधिप ! । एष ते लक्षणोद्देश आयुष्याणां प्रकीर्त्तितः । शेषस्त्वेवंविदृद्धेभ्यः प्रत्याहार्य्यो युधिष्ठिर ! । आचारो भूतिजनन आचारः कीर्त्तिवर्द्धनः । आचाराद्धते ह्यायुराचारो हन्त्यलक्षणम् । आगमानां हि सर्व्वेषामाचारः श्रेष्ठ उच्यते । आचारप्रभवो धर्मो धर्मादायुर्विवर्द्धते । एतद्यशस्यमायुष्यं स्वर्ग्यं स्वस्त्ययनं महत् । अनुकम्प्यं सर्व्वभूतानां ब्रह्मणा समुदाहृतम्" । अन्ये चाचारा आचारशब्देरे०पृष्ठे उक्तास्तेऽपि आयुर्हितकराः । आयुःकालश्च स्वाभाविकः जीवभेदेन भिन्नः । तथा हि "ब्रह्मणोवर्षशतमिति" श्रुतेः ब्रह्मणोनिजपरिमाणेन वर्षशतायुः तच्च" सि०शि० दर्शितम् "चतुर्युगसहस्रेण ब्रह्मणो दिनमुच्यते । निजेनैव तु मानेन आयुर्वर्षशतं स्मृतम् । तत् पराख्यं तदर्द्धं तु परार्द्धमभिधीयते" "खर्त्वब्धिसंख्यया द्विविसागरैरयुताहतैः संध्यासन्ध्यांशसहितं विज्ञेयं तच्चतुर्युगम् । इत्थं युगसहस्रेण भूतसंहारकारकः । कल्पोब्राह्ममहः प्रोक्तं सर्वरी तस्य तावती । परमायुः शतं तस्य तथाहोरात्रसंख्यया" सू०सि० । तेन सौरैः४३२०००० वर्षैः चतुर्युगं तेन सहस्रगुणितेन ब्राह्ममहः ४३२०००००० रात्रिश्च तावतीति ८६४०००००० वर्षात्मकाहोरात्रमानं तस्य ३६० गुणने तस्य वर्षमानम् ३११०४०००००० एतच्चतुर्गुणितं तस्यायुर्मानम् अयमेव महाकल्पः "शतायुः सदानन्द एवं प्रदिष्टस्तदायुर्महाकल्प इत्युक्तमार्द्धैः" सि०शि० उक्तेः । जैगीषव्यस्य च दशमहाकल्पजीविता "दशसु महाकल्पेषु

विपरिवर्त्तमानेन भवेति" सा०कौ० "तद्वाक्यात् तेन ब्राह्मायुःकाला दशगुणिताः"३१०४४०००००००००० तस्यायुः। अथ मन्वन्तरमायुःप्रमाणम्। "युगानां सप्ततिः सैका मन्वन्तरमुदाहृतम्" सू० सि०। चतुर्युगमानञ्च ४३२०००० तच्च७१गुणितम् ३०६७२०००० सौरवर्षाः एकैकमन्वन्तरमायुःकालः। मार्कण्डेयस्य सप्तकल्पान्तजीवितेत्युक्तेः ४३२०००००००० सप्तभिर्गुणितम् ३०२४०००००० तस्यायुः कालः। देवानामायुस्तु ब्राह्मदिनमानम् "यदा स देवो जागर्त्ति तदेदं चेष्टते जगत्। यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति" मनूक्तेः ब्राह्मदिनपर्य्यन्तं तेषां स्थायित्वम् "कर्म्मात्मनाञ्च देवानां सोऽसृजत् प्राणिनां प्रभुः" इति मनुना कल्पादौ तेनैव तेषां सृष्टत्वोक्तेः प्रतिकल्पेऽपि तथैव सृष्टत्वमिति। एवं युगभेदेन नराणामायुर्भेदः मनुनोक्तः। "अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः। कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः" तेन सत्ययुगे ४०० वर्षाः। त्रेतायां ३०० वर्षाः। द्वापरे २०० वर्षाः। कलौ शतं वर्षाः। पुराणान्तरे सत्यादिषु लक्षायुतसहस्रशतवर्षायुर्द्वोक्तिः मनुविरोधादप्यार्षत्वेन। सत्कर्म्मभिस्तु प्राणायामतपस्यादिभिः रसायनादिभिश्चायुर्वर्द्धते तच्चायुर्वृद्धिशब्दे ७७५ पृष्ठे उक्तम्। तेन दशरथादीनां दशवर्षसहस्रराज्यकरणं रामायणोक्तं सङ्गच्छते। सत्कर्म्माभिप्रायेणैव पुराणवचनं लक्षाद्यायुर्द्वबोधकं मन्तव्यमिति तु युक्तम्। ततश्च जातकप० उक्तेः नरगजयोः,१२० वर्षाः। अश्वस्य दनसंख्यया। ३२वर्षा वा। गोमहिषादेः२४ वर्षाः खरोष्ट्रयोः २५ वर्षाः। शुनः १३ वर्षाः व्याघ्रादेः १६वर्षाः परमायुः। तत्र नरस्य शतायुरुक्तमपि विंशोत्तरीयविभागार्द्धमिह १२० वर्षोक्तिरिति बोध्यम्।

आयोग पु० आ+युज–घञ्। गन्धमाल्योपहारे, २व्यापारे ३रोधे ४सम्यक्सम्बन्धे च "शरलैः कर्णिकारैश्च किंशुकैश्च सुपुष्पितैः। स देशोऽभरायोगःप्रदीप्त इव लक्ष्यते" रामा०

आयोगव पुंस्त्री० अयोगव एव स्वार्थे अण्। वैश्यकन्यायां शूद्रेणोत्पादिते जातिभेदे। "शूद्रादायोगवः क्षत्ता चाण्डालश्चाधमो नृणाम्। वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः" "आयोगवोऽवं क्षत्ता च चाण्डालश्चाधमो नृणाम्। प्रातिलोम्येन जायन्ते शूद्रादपसदास्त्रयः" इति च मनुः "मत्स्यघातो निषादानां तद्विस्त्रायोगवस्त्रेति" मनूक्तम् काञ्चनञ्च तस्य वृत्तिः। स्त्रियां जातित्वात् ङीप्

आयोजन न० आ+युज–ल्युट्। १उद्योगे, २आहरणे च।

आयोजित त्रि० आ+युज–णिच्–क्त। १कृताहरणे २सम्यक् सम्पादिते च "कृतुमायोजितकार्मुकं मधुः" कुमा०।

आयोद पु० अयोदस्यापत्यम् वा० अण्। धौम्ये मुनौ। "एतस्मिन्नन्तरे कश्चिदृषिर्धौम्यनामायोदस्तस्य शिष्यास्त्रयो बभूवुरुपमन्युरारुणिर्वेदश्चेति" भा०आ०३अ०।

आयोधन न० आ+युध+आधारे ल्युट्। १युद्धस्थाने। "आयोधने स्यायुधमस्त्रजातम्" भट्टिः "आयोधने क्षणगतिं सहायम्" रघुः। "आयोधनायसरतां त्वयि वीर! यातेः" रघुः। भावे ल्युट्। २योधने, युद्धक्रियायाम्।

आर पु० आ+ऋ–कर्त्तरि संज्ञायां घञ्। १मङ्गलग्रहे, २यमग्रहे, "आरे खस्थे चतुष्पाद्भ्रोभवम्" नील०ता०तत्र मङ्गलस्य वक्रगत्वात् शनेश्च स्वभावेन मन्दगतित्वात् तथात्वम् कुजस्य त्रिकोणाकारत्वादपि तथात्वम् ३मधुराम्लफले वृक्षभेदे च। ४प्रान्तभागे ६सुखण्डलोहे ७पित्तले च न०। अरा इव.स्वार्थे वा अण्। ८कीले। कोणस्य चक्राकारसदृशाकारवत्त्वात् तथात्वम्। द्वादशारचक्रं षोड़शारचक्रम्। "बिन्दुत्रिकोणवसुकोणदशारयुग्मम्–श्रीचक्रमेतदुदितं परदेवतायाः" तन्त्रम्। "आरान्तरेष्वावपतत् संज्ञिप्याङ्गं क्षणेन हृ" इति भा०आ०३३अ०। भावे घञ्। ९गमने पु०। आ+ऋ–कर्म्मणि घञ्। १०दूरे च दूरस्य च बुद्धयत्नेन प्राप्यत्वात् तथात्वम्। "दूषुधिस्तारेऽस्मिन्निधेहि" यजु०१६,१२, "आरे दूरे" वेददी०। "आरेबाधस्व दुच्छुनाम्" य०१६,२८,

आरकूट पु०न०। आरं पित्तलं कूटयति स्थूलीकरोति अच्। १पित्तलाभरणे। "किमारकूटाभरणेन न स्त्रियः" इति नैषधम्। आरमतिभृशं कूयते दंदह्यते कूट–दाहे कर्म्मणि घञ्। २पित्तलमात्रे च तस्यातिशयदाहसहत्वात् तथात्वम्।

आरक्त पु० ईषत् रक्तः प्रा०स०। १ईषद्रक्तवर्णे २तद्वति ३सम्यगनुरक्ते च त्रि०। भावे क्त। ४अनुरागे न०

आरक्त पु० आ+रञ्ज–अच्। १कस्तिकुम्भाधःस्थले, "आरक्तमम्लमवलम्ब्य रुषिं शिताग्राम्" माघः २कस्तिमस्तके चर्म्मणि, ३सैन्ये च। ४रञ्जके त्रि०। "यतस्ताक्षमारक्तं मध्यगं रञ्जसां कपिः" भट्टिः। "तेषामारक्तमूतन्तु पूर्व्वं दैवं नियोजयेत्" मनुः। भावे घञ्। ४रञ्जायाम् पु० "रञ्जांसि हि विलुम्पन्ति आढ्यमारक्तवर्जितम्। भावे अ। आरक्ता तत्रार्थे स्त्री रक्ता च वैदिककर्म्मादौ श्वेतसर्षपादिक्षेपेण

मन्त्रसङ्कादिपाठेन विघ्नकारकनिवारणार्थोव्यापारः ।

आरग्वध पु० आ+रगे-गङ्गायां क्विप् आरगं रोगगङ्गामपि हन्ति अच् वधादेशश्च । (सोंदाल) इति ख्याते वृक्षे । "आरग्वधो गुरुः स्वादुः शीतलः स्रंसनोत्तमः । ज्वरकृच्छ्रोगपित्तास्रवातोदावर्त्तशूलनुत् । तत्फलं स्रंसनं रुच्यं कृमिपित्तकफापहम् । ज्वरे तु सततं पथ्यं कोष्ठशुद्धिकरं परम्" इति भावप्रकाशे तद्गुणा उक्ताः ।

आरग्वधाद्यतैलं त्वित्वरं यथा । "आरग्वधं धवं कुष्ठं हरितालं मनःशिला । रजनीद्वयसंयुक्तं पचेत् तैलं विधानवत् । एतेनाभ्यङ्गमेवेच्छत्वी क्षिप्रं त्वित्वं विनश्यति" चक्रद० ।

आरग्वधतैलं रोमहरम् । "आरग्वधमूलं कर्षद्वितयं शङ्खचूर्णस्य । हरितालस्य च खरजे सूत्रप्रस्थे कटुतैलं पक्वम् । तैलं तदिदं शङ्खहरितालचूर्णितं लेपात् । निर्मूलयति च रोमाण्यन्येषां सम्भवो नैव" चक्रद०

आरग्वधादिपाचनम् तत्रैव यथा "आरग्वधस्यन्धिकसुस्तिक्ता हरीतकीभिः कथितः कषायः । सामे समूले कफवातयुक्ते ज्वरे हितो दीपनपाचनश्च" ।

आरट त्रि० आरटति आ+रट-अच् । १सम्यक् शब्दकारके २नटे पु० स्त्रियां गौरा० ङीष् ।

आरट्ट पु० आरट्यते विख्याप्यते आ+रट टच् टस्य नेत्त्वम् । विशिष्टाश्वोत्पत्तिस्थाने (आरव) देशे । अश्वशब्दे विवृतिः ।

आरट्टज पु० आरट्टे देशे जायते जन-ड । (आरव) देशजाते घोटके । "आरट्टजघटुलनिष्ठुरपातसञ्चैः" माघः अश्वशब्दे ५०४तद्देशाश्वधर्म्मा ज्ञेयाः ।

आरणि पु० आ+ऋ-अनि । जलानां स्वयं भ्रमणे आवर्त्ते ।

आरणेय पु० अरण्यां भवः अरण्यो+ढक् । १शुकदेवे तस्यारणीसम्भवकथा अरणीसुतशब्दे ३५८पृष्ठे विवृता । अरणिमरणिकरणमधिकृत्य कृतोग्रन्थः ढक् । भारतवनपर्वान्तर्गते अरणिकरणाधिकारेण व्यासेन कृते अवान्तरपर्व्वभेदे तच्च पर्व्व,वनपर्वणि २११अध्यायावधि २१४ अध्यायपर्व्वनाम "आरणेयं ततः पर्व"भा० आ०१अ० अरण्यादृदं, स्वार्थे वा ढक् । अरण्यसम्बन्धिनि २अन्यभेदे ३अरण्यां च "आरणेयं ददुस्तस्मै ब्राह्मणाय तपस्विने । भा०व०२१३अ० ।

आरण्य त्रि० अरण्ये भवः यत् । वनभवे १पशुप्रभृतौ पशवश्च द्विविधा ग्राम्या आरण्याश्च यथाह पैठी०"ग्राम्यारण्याश्चतुर्दश गोरविरजोऽश्वोऽश्वतरोगर्दभोमनुष्यश्चेति सप्त ग्राम्याः पशवः, महिषवानरोष्ट्रसरीसृपपरुषपृषन्मृगाश्चेति सप्तारण्याः"एते च कर्मविशेषोपयुक्ता एतद्भिन्ना अन्येऽपि पशवः ग्राम्या आरण्याश्च अश्वमेधशब्दे ५०८ पृष्ठादौ उक्ताः । पशुत्वञ्चेह यागार्थालभ्यमानत्वसाम्यात् शकुनादीनामपि "उष्ट्रो वा यदि मेषश्छागो वा यदि हयः । पशुस्थाने नियुक्तानां पशुशब्दोविधीयते" इति यज्ञपार्श्वोक्तेः । अत एव अश्वमेधे "वसन्ताय कपिञ्जलानालभेत ग्रीष्माय कलविङ्कान्" इत्यादौ पक्षिणामपि य०वे०२४अ० मन्त्रव्याख्याने "अथारण्याः पशव उच्यन्ते" वेददीपे उपक्रान्तम् अन्ये च कपिञ्जलादयः पृषतान्ताः आरण्याः पशव इत्युक्तं तच्च अश्वमेधशब्दे ५१०पृष्ठे द्रष्टव्यम् तत्र स्त्रीपशूनामहिंसत्वम्"अवध्याञ्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतामपीति" शास्त्रात् ति०त० यन्निर्णीतं तत् अश्वमेधातिरिक्तविषयं तत्र स्त्रीपशूनां बहूनामालम्भनविधानात् तच्च अश्वमेधशब्दे द्रष्टव्यम् । "आरण्यानाञ्च सर्वेषां मृगाणां महिषं विना" । "आरण्यांश्च पशून् सर्वान्" इति च मनुः ।"आरण्याःसुमनसश्चैवारे न भक्ष्याः" माधः "सप्त ग्राम्या ओषधयः सप्तारण्याः" तैत्ति०ब्रा०तद्विशेषा ओषधिशब्दे वक्ष्यन्ते २अकृष्टपच्यधान्यभेदे च । "यदकृष्टे पच्यते तेनारण्यम्" शत०ब्रा० । ज्योतिषोक्ते ३मकरादिमार्द्धसिंहोदयौ दिवसेऽजवृषभौ च,ज्यो० त० उक्तः ७अरण्यभवे गोभवे पु०स्त्रि०को० । अरण्यमरण्यवासमधिकृत्य कृतोग्रन्थः अण् । युधिष्ठिरादीनां वनवासाधिकारेण व्यासेन कृते भारतार्गते ८पर्वभेदे । रामस्य वनवासाधिकारेण वाल्मीकिकृते रामायणान्तर्गते ६काण्डभेदे च ।

आरण्यक त्रि० अरण्ये भवः मनुष्यादिः वुञ् । १अरण्यभवे पशौ अध्ययनेन्याये विहारे मनुष्ये हस्तिनि च एवार्थे वुञः सापुत्वं तद्भिन्ने न वुञ् किन्तु ण एव । आरण्यः पशुः गोभवे तु वा आरण्यकः पक्षे णः । तत्र मनुष्ये "आरण्यकोपात्तफलप्रसूतिः" रघुः । अध्ययने ऐतरेयारण्यकम् तैत्तिरीयारण्यकं बृहदारण्यकम् "अरण्येऽध्ययनादेव-आरण्यकमुदाहृत"मित्युक्तेरारण्यकत्वमेषाम् । तानि च तत्तद्वेदभागभेदाः । "आरण्यकमधीत्य च" मनुः । "आरण्यकञ्च वेदेभ्यौषधिभ्योऽद्धृतं यथा" भा०१अ० । "शास्त्रे चारण्यके गुरुः" भा०उद्यो०१७४ अ० । "अनुक्तत्वात्तु शास्त्राणि कवयः समवस्थिताः । अपीह स्यादपीह स्यात् सारसारदृढत्रया । वेदवादानतिक्रम्य

आरण्याश्चारण्यकानि च। विषाश्च कदलीस्तम्भं सारं दृढगिरे नते" इति भा०शा० १८अ०। ४अरण्यनेये सामभेदे च। स्वार्थे कन्। उक्तार्थे भारतान्तर्गते ५वनपर्व्वणि "एतदारण्यकं पर्व्व भा०आ०प०१अ०। आरण्यककाण्डम्। रामायणान्तर्गते ६काण्डभेदे

आरण्यकुक्कुट पुंस्त्री० अरण्ये भवः आरण्यः कुक्कुटः कर्म्म०। वनकुक्कुटे "आरण्यकुक्कुटः स्निग्धो दृंहणः श्लेष्मणोगुरुः। वातपित्तक्षयक्लमविषमज्वरनाशनः' इति भा० प्र०तन्मांसगुणा उक्ताः। स्त्रियां जातित्वात् ङीप्।

आरण्यगान न० आरण्यं वनगेयं गानम्। सामवेदान्तर्गते गानपन्थभेदे तस्यारण्ये गेयत्वात् तथात्वम्।

आरण्यपशु पु० कर्म्म०। कक्ष्युक्ते महिषादौ सप्तविधे १पशौ आरण्यशब्दे विवृतिः।

आरण्यमुद्ग पु०नि०कर्म०। वनमुद्गे। आरण्यसदृक्षेवाकारः पर्णेऽस्यास्याः अच् टाप्। (सुगानी) क्षुद्रपर्णयां स्त्री राजनि०

आरण्यराज्ञि पु०नि०कर्म०। आरण्यशब्दोक्ते १सिंहे २मकरादिमात्रे दिवसे ३भेषे ४वृक्षे च राज्ञी।

आरति स्त्री आ+रम-क्तिन्। १उपरमे, २निवृत्तौ च।

आरत त्रि० आ+रम-क्त। १उपरते २विरते च "अनारतं तेन पदेषु लम्भिताः" किरा०। [(एका)(बगी) प्रभृतौ।

आरथ पु० रथेन वहतीति अण्। एकाश्वेन गमनसाधने रथे

आरद्ध त्रि० आ+रध-क्त। संसिद्धे तिका० फिञ्। आरद्धायनिः तदपत्ये पुंस्त्री०।

आरनाल न० आर्च्छति आ+ऋ-अच्, आरः नल-गन्धे घञ् आरो नालोगन्धो यस्य। काञ्जिके। "आरनालन्तु गोधूमैरामैः स्याच्चिरसुषीकृतैः। पक्वैर्वा सन्धितैस्तैस्तु सौवीरसदृशं गुणैः" भा०प्र०। "आरनालं दधि क्षीरं कन्दुपक्वं च सक्तवः। स्नेहपक्वञ्च तक्रञ्च क्षुद्रक्षापि न दुष्यति" अत्रिस०। वा कप्। आरनालकमप्यत्र।

आरब्ध त्रि० आ+रभ-क्त। कृतारम्भणे "प्रारब्धादन्यकार्य्याणां करणं परिवर्त्तकः" सा०द० "अनारब्धकार्य्ये एव तु" इत्यादि भा०सू०। यस्य कियदंशं कर्त्तुमारेभे तावद्यः पदार्थः आरब्धः। भावे क्त। २आरम्भे न०'व्रतयज्ञविवाहेषु श्राद्धहोमेऽर्चने जपे। आरब्धे स्तुतकं न स्यादारब्धे तु स्तुतकम्" तिथि०त० विष्णुः।

आरब्धफलयोः सुकृतदुष्कृतयोः तत्त्वज्ञानोत्पत्तावपि यावत्फलसमाप्ति नाशः इत्येतत् भा०सू०भा० स्थिरीकृतम् यथा "बन्धहेत्वोर्विद्यासामर्थ्यादप्रतिबन्धेन नाशसिद्धेरवश्यं भावि-नी विदुषः शरीरपाते मुक्तिरित्यवधारयति। "अनारब्धकार्य्ये एव तु पूर्व्वे तदवधि" भा० सू० "पूर्व्वयोरधिकरणयोर्ज्ञाननिमित्तः सुकृतदुष्कृतयोर्विनाशोऽवधारितः स किमविशेषेणारब्धकार्य्ययोर्भवत्युत विशेषेणानारब्धकार्य्ययोरेवेति विचार्य्यते तत्र "उभे ह्येवैष एतेन तरतीत्येवमादि" श्रुतावविशेषश्रवणादविशेषेणैव क्षयइत्येवं प्राप्ते प्रत्याह अनारब्धकार्य्ये एव त्विति। अप्रवृत्तफले एव पूर्व्वे जन्मान्तरसञ्चिते, अस्मिन्नपि च जन्मनि प्राक्तत्त्वज्ञानोत्पत्तेः सञ्चिते च सुकृतदुष्कृते ज्ञानाधिगमात् क्षीयेते नत्वारब्धकार्य्ये सामिभुक्तफले, याभ्यामेतद्बुद्धज्ञानायतनंजन्म निर्म्मितम्। कृतएतत्? "तस्य तावदेव चिरं यावन्न विमोक्ष्य इति" शरीरपातावधिकरणात् क्षेमप्राप्तेः। इतरथा हि ज्ञानादशेषकर्म्मक्षये सति स्थितिहेत्वभावात् ज्ञानप्राप्तानन्तरमेव क्षेममब्रुवीत तत्र शरीरपातप्रतीक्षां नाचक्षीत। ननु वस्तुबलेनैवायमकर्त्रात्मबोधः कर्म्माण्यपनयन् कथं कानिचित् क्षपयेत् कानि चिन्नोपेक्षेत नहि समानेऽग्निबीजसम्पर्के केषाञ्चिद्बीजशक्तिः क्षीयते केषाञ्चिन्न क्षीयते इति शक्यमङ्गीकर्त्तुमिति, उच्यते न तावदनाश्रित्यारब्धकार्य्यं कर्म्मांशयं ज्ञानोत्पत्तिरुपपद्यते। आश्रिते च तस्मिन् कुलालचक्रवत् प्रवृत्तवेगक्षयान्तराले प्रतिबन्धासम्भवाद्भवति वेगक्षयप्रतिपालनम्। अकर्त्रात्मबोधोऽपि हि मिथ्याज्ञानबाधनेन कर्म्मांशमुच्छिनत्ति। बाधितमपि मिथ्याज्ञानं द्विचन्द्रज्ञानवत् संस्कारवशात् कञ्चित् कालमनुवर्त्ततएव। अपि च नैवात्र विवदितव्यं ब्रह्मविदां कञ्चित् कालं शरीरं म्रियते न म्रियत इति। कथं श्लोकस्य स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधारणव्यापरेण प्रतिक्षेप्तुं शक्येत। श्रुतिस्मृतिषु च स्थितप्रज्ञलक्षणनिर्द्देशेनैतदेवनिरूप्यते। तस्मादनारब्धकार्य्ययोरेव सुकृतदुष्कृतयोर्विद्यासामर्थ्यात् क्षय इति निर्णयः" भा०। "चक्रभ्रमणवद्धृतशरीरः" सांख्यसूत्रेण फलजनकस्य कर्म्मणोनाशेऽपि चक्रजन्यवेगस्य चक्रनाशेऽपि स्थितिवत् देहरूपस्य कर्म्मफलस्य संस्कारात्कालं स्थितिरित्यवधारितम्। यथा च आरब्धफलस्य कर्म्मणो यावदधिकारस्थितिस्तथा निर्णीतं भा०सू०भा० ३अ०३पादे यथा "यावदधिकारमवस्थितिराधिकारिकाणाम्" भा०सू०"विदुषो वर्त्तमानदेहपातानन्तरं देहान्तरमुत्पद्यते न वेति चिन्त्यते। ननु विद्यायाः साधनभूतायाः सम्पत्तौ कैवल्यनिर्द्देशेः स्याच्चेति नेयं चिन्तोपपद्यते। न हि पाकसाधनसम्पत्ता-

वोदनोभवेद्यवेति चिन्ता सम्भवति नापि भुञ्जानस्तृप्यति न वेति चिन्यते । उपपन्ना त्विय चिन्ता ब्रह्मविदामपि केषाञ्चिदितिहासपुराणयोर्देहान्तरोत्पत्तिदर्शनात् । तथाह्यपान्तरतमा नाम वेदाचार्यः पुराणर्षिः विष्णु नियोगात् कलिद्वापरयोः सन्धौ कृष्णद्वैपायनः सम्भूवेति स्मरन्ति । वसिष्ठश्च ब्रह्मणोमानसः पुत्रः सन्निमिशापादपगतपूर्व्वदेहः पुनर्ब्रह्मादेशान्मित्रावरुणाभ्यां, भृग्वादीनामपि ब्रह्मण एव मानसानां पुत्राणां वारुणे यज्ञे पुनरुत्पत्तिः स्मर्य्यते । सनत्कुमारोऽपि ब्रह्मण एव मानसः पुत्रः स्वयं रुद्राय वरप्रदानात् स्कन्दत्वेन प्रादुर्बभूव । एवमेव दत्तनारदप्रभृतीनामपि भूयसी देहान्तरोत्पत्तिकथा तेन तेन निमित्तेन भवति स्मृतौ, श्रुता वपि मन्त्रार्थवादयोः प्रायेणोपलभ्यते । ते च क्वचित् पतिते पूर्व्वदेहे देहान्तरमाददते, क्वचित्तु स्थितएव तस्मिन् योगैश्वर्य्यवशादनेकदेहादानन्यायेन । सर्वं चैते समधिगतसकलवेदार्थाः स्मर्य्यन्ते । तदेतेषां देहान्तरोत्पत्तिदर्शनात् प्राप्तं ब्रह्मविद्यायाः पाप्मिकं मोक्षहेतुत्वमहेतुत्वं वेत्यत उत्तरमुच्यते । न, तेषामपान्तरतमःप्रभृतीनां वेदप्रवर्त्तनादिकलोकस्थितिहेतुत्वधिकारेषु नियुक्तानामधिकारतन्त्रत्वात् स्थितेः । यथासौ भगवान् सविता सहस्रयुगपर्य्यन्तं जगतोऽधिकारं चरित्वा तदवसाने उदयास्तमयवर्जितं कैवल्यमनुभवति "अथात ऊर्द्धं उदेत्य नैवोदेता नास्तमेतैकलएव मध्ये स्थातेति" श्रुतेः । यथा च वर्त्तमाना ब्रह्मविदः प्रारब्धभोगक्षये कैवल्यमनुभवन्ति "तस्य तावदेव चिरं यावन्न विमोक्षेऽथ सम्पत्स्ये" इति एवमपान्तरतमःप्रभृतयोऽपीश्वराः परमेश्वरेण तेषु तेष्वधिकारेषु नियुक्ताः सन्तः सत्यपि सम्यग्दर्शने कैवल्यहेतावशीयकर्म्मणो यावदधिकारमवतिष्ठन्ते तदवसाने चापइद्यन्त इत्यविरुद्धम् । सद्यःप्रहृत्तमेव हि तेऽधिकारफलदानाय कर्म्माशयमतिवाहयन्तः स्वातन्त्र्येण स्वेच्छादिव स्वेच्छान्तरमन्यमन्यं देहं सञ्जरन्तः स्वाधिकारनिर्व्वर्त्तनायापरिमुषितस्मृतयएव देहेन्द्रियप्रकृतिवशित्वात्रियामकबलेन युगपत् क्रमेण वाऽधितिष्ठन्ति । नचैते जातिस्मरा इत्युच्यन्ते तएव त इति स्मृतिप्रसिद्धेः । यथा सुलभा ब्रह्मवादिनी जनकेन विवदितुकामा व्युदस्य स्वं देहं, जानकं देहमाविश्य व्युद्य तेन, पश्चात्तं स्वमाविवेशेति स्मर्य्यते । यदि ह्युपयुक्ते सद्यःप्रहृत्ते कर्म्मणि कर्म्मान्तरं देहान्तरारम्भकारणमाविर्भवेत् ततोऽन्यदन्यदग्ध बीजं कर्म्मान्तरं तदेव प्रसज्यतेति ब्रह्मविद्यायाः पाप्मिकं मोक्षहेतुत्वमहेतुत्वं वाशङ्क्येत न तवेयमाशङ्का युक्ता ज्ञानात् कर्म्मबीजदाहस्य श्रुतिस्मृतिप्रसिद्धत्वात् । तथा हि श्रुतिः "भिद्यते हृदयग्रन्थिरित्येवमादिः" "स्मृतिलम्भे च सर्व ग्रन्थीनां विप्रमोक्ष" इति च । स्मृतिरपि "यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन ! । ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुते तथेति" । "बीजान्यग्न्युपदग्धानि न रोहन्ति यथा पुनः । ज्ञानदग्धैस्तथाक्लेशैर्नात्मा सम्पद्यते पुनरिति" चैवमाद्या । नचाविद्यादिक्लेशदाहे सति क्लेशबीजस्य कर्म्माशयस्यैकदेशदाहएकदेशप्ररोहश्चेत्युपपद्यते न ह्यग्निदग्धस्य शालिबीजस्यैकदेशप्ररोहो दृश्यते । प्रवृत्तफलस्य तु कर्म्माशयस्य सृष्टे शरीरवेगवच्चावृत्तिः "तस्य तावदेव चिरमिति" शरीरपातस्यैपकरणात् । तस्माद्युपपन्ना यावदधिकारमाधिकारिकाणामवस्थितिः" भा० । अतएव वाचस्पत्ये उक्तम् "उपासनादिसंसिद्धितोषितेश्वरनोदितम् । अधिकारं समाप्यैव प्रविशन्ति परं पदम्" इत्यवरुद्धे "ध्वान्तं घनारब्धमिवार्करश्मयः" किरा० । "घनारब्धम् मेघावरुद्धम्" मल्लि० । घनारुद्धइत्येव ज्यायान् पाठः तेनास्य अवरुद्धार्थकत्वे प्रमाणाभावेऽपि न क्षतिरिति

आरभटी स्त्री० आरभतेऽनया आ+रभ–अटि ङीप् । नाट्ये अर्थविशेषयुक्ते सा० दर्पणोक्ते रचनाभेदे सा च भेदोदाहरणसहिता सा० द० उक्ता यथा

"मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः । संयुक्ता वधबन्धाद्यैरुद्भटाऽऽरभटी मता । वस्तूत्थापनसंफेटौ संक्षिप्तिः स्यवपातनम् । इति भेदास्तु चत्वार आरभट्याः प्रकीर्त्तिताः । मायाद्युत्थापितं वस्तु वस्तूत्थापनमुच्यते । यथोदात्तराघवे । "जीयन्ते जयिनोनिशान्ततिमिरव्रातैर्ब्बिभिद्यद्यापिभिर्भास्वन्तः सकला रवेरपि करा: कस्मादकस्मादमी । एते चोद्यकबन्धकण्ठरुधिरैरुद्भायमानोदरास्तुङ्गानननकन्दरानलमुचस्तोत्रान् रवान् फेरवः" इत्यादि । संफेटस्तु समाधाय युद्धसत्परयोर्द्वयोः । यथा मालत्यां माधवाघोरघण्टयोः । संक्षिप्तिः वस्तुरचना शिल्पैरितरथाऽपि वा । संक्षिप्तिः स्यात् निष्टप्तौ च नेतुर्नैष्ठुर्यरङ्गः । उदयनचरिते किलिञ्जहस्तिप्रयोगः । द्वितीयं यथा । बालिनिहत्या सुग्रीवः यथा वा परशुरामस्यौद्धत्यनिहत्या शान्तत्वापादानं "पुण्या ब्राह्मणजातिरत्यवगुणः शास्त्रं चरित्रं च मे येनैकेन हृतान्यमूनि हरता चैतन्य मात्रात्मना । एकः सन्नपि भूरिदोषगहनं सोऽयं त्वया

प्रेवसा वत्स ! ब्राह्मणवत्सलेन शमितः क्षेमाय दर्पोऽमम" । प्रवेशश्वासनिष्क्रान्तिहर्षविस्मयसम्भवम्। अवपातनमित्युक्तम्। यथा शाकुन्तलरावणे षष्ठेऽङ्के । प्रविश्य खड्गहस्तः पुरुष इत्यतः प्रभृति निष्क्रमणपर्य्यन्तम् । सर० क० उक्ते शब्दालङ्काररूपे २वृत्तिभेदे च सा च २८८पृष्ठे दृश्या । आरः सामर्थ्येन गामी भटः । २शूरे वीरे पु० हेमचन्द्रः ।

आरभ्य अव्य० आ+रभ–ल्यप् । १उपक्रम्यत्वर्थे "आरभ्य तस्यां दशमीञ्च यावत् प्रपूजयेत् पर्व्वतराजपुत्रीम्" दुर्गो०त०पु० अनारभ्याधीतत्वात्"मीमांसा । कर्मणि क्यप् । २आरम्भणार्हे आरम्भणीये त्रि० ।

आरमण न० आ+रम–भावे ल्युट् । १आरामे, विश्रामे आरभ्यतेऽनेन करणे ल्युट् । आरतिसाधने "स आत्मन्नारमणं नाविन्दत्" तैत्ति० चतुर्थोरैवते आरमणे कुरुतः" शत० ब्रा० ।

आरम्बण न० आ+लबि–ल्युट् वेदे लस्य रः । आलम्बने "तस्मात्तान्यन्तरिक्षेऽनारम्बणान्यादायात्मानं परियन्ति" छा०उ० अनारम्बणानि अनालम्बनानि"भा० "यदिदमन्तरिक्षमनारम्बणमिव केनाक्रमेण यजमानःस्वर्गलोकमाक्रमेत्" श०उ०

आरम्भ पु०आ+रभ घञ् सम् । १उद्यमे २त्वरायां स्वार्थे परार्थे वा ३स्वहादिसम्पादनव्यापारे ४उपक्रमे प्रथमक्रतौ ५प्रस्तावने ६वधे ७दर्पे च । "अनारम्भोऽपि परस्वहरणे सर्पवत्" सा०सू०"आरम्भे कर्मणां विप्र! पुण्डरीकं स्मरेद्धरिम्" स्मृतिः "न कर्मणामनारम्भात् नैष्कर्म्यं पुरुषोऽश्नुते"गीता "मीनादिस्थोरविर्वैषामारम्भःप्रथमक्षणे । इति म०त० व्यासः "अयवावत्तमारम्भः" माघः । "आगमैः सदृशारम्भा आरम्भसदृशोदयः" इति रघुः क्रियाकूटात्मकपाकादिक्रियाणां प्राथमिकव्यापारोपक्रमश्चारम्भः । श्रौतस्मार्त्तकर्म्मविशेषे अङ्गविशेषारम्भोऽपि प्रकृतकर्म्मारम्भत्वेन आरब्धत्वाद्व स्रुतकादेः प्रतिबन्धकत्वम् । यथा "आरम्भोवरणं यज्ञे संकल्पोव्रतजप्ययोः । नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया । तथा निमन्त्रणं श्राद्धे आरम्भः स्यादिति श्रुतिः आरब्धे स्रुतकं नश्यादिति"ति०त०विष्णुः। द्रव्याणां द्रव्यान्तरेण गुणानां गुणान्तरेणोत्पादने वैशेषिकोक्ते व्यापारे "द्रव्यारम्भावतुर्षु स्यात्" भाषा० कर्मणि घञ् । ६आरभ्यमाणे "फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव" रघुः । "चित्तार्पितारम्भइवावतस्थे" कुमा० ।

आरम्भक त्रि० आरभते आ+रभ–ण्वुल् सम् । १आरम्भकारके वैशेषिकादिमतसिद्धे सङ्घात्याद्युपचयाय अवयवानां २विजातीयसंयोगे च । "तत आरम्भकसंयोगनाशः" सप्ता० आरम्भवादशब्दे या०भा०उदा० ।

आरम्भण न० आ+रभ–ल्युट् सम् । २आरम्भशब्दार्थे कर्मणि ल्युट् । २आरभ्यमाणे च । यथा "सौम्यैकेन मृत्पिण्डेन विज्ञातेन सर्वमिदं मृण्मयं विज्ञातं भवति वाचारम्भणं विकारोनामधेयं मृत्तिकेत्येव सत्यम्"छा०उ० "तदनन्यत्वमारम्भणशब्दादिभ्यः"वा०सू०आरम्भणं प्रयोजनमस्य अनुप्रचना० अण् । २आरम्भणप्रयोजनपदार्थे त्रि० । आरभ्यतेऽनेन करणे ल्युट् । ४उपादानकारणे "किं स्विदासीदधिष्ठानमारम्भणं कतमत् स्वित्कथासीत्" यजु० १७,१८ । "लोके हि घटादि चिकीर्षुः कुलालो मृद्दादिकं स्थानमधिष्ठाय मृद्रूपेणारम्भकद्रव्येण चक्राद्युपायैं निर्म्मादयति ईश्वरस्य तदाधिष्ठते । स्विदिति वितर्के द्यावाभूमी सृजतोविश्वकर्म्मणोऽधिष्ठानं किमासीत् निवासस्थानम्, अद्यतना निरधिष्ठानाः किमपि न कुर्वन्ति । स्विदिति वितर्के आरम्भणं कतमत् किमासीत् आरभ्यतेऽनेनेति आरम्भणमुपादानकारणम् मृदिव घटानाम्" वेददी० ।

आरम्भणीय त्रि० आ+रभ–अनीयर् सम् । यस्य आरम्भःकर्त्तुं शक्यते तस्मिन् प्रयोजनादियुक्ते पदार्थे "तत्पुनः शास्त्रमारम्भणीयमिति" विवरणोपन्यासः ।

आरम्भवाद पु० आरम्भस्य वादः परीक्षापूर्व्वकः कथाभेदः । वैशेषिकाद्यभिमते परमाणुभ्य एव जगदुत्पत्तिनिर्णायके वादे। स च "द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरमिति"वै०सू०दर्शितः "आत्माकाशाणुसुखतः कारणं पूर्व्वमिष्यते । कुलालादिवदखण्डन्तु घटवज्जन्मनाशभाक् । पृथिव्यम्भोऽग्निवायूनां कर्मसंयोजिताणवः । द्व्यणुकादिक्रमेणाण्डमारभन्ते इदं सदृदिति" हि तेषां वादः । शा०भाष्ये तु तदेतन्मतमत्याश्च निराकृतं यथा "परमाणुकारणवादश्चदानीं निराकर्त्तव्यः । तत्रादौ तावद्योऽणुकारणवादिना ब्रह्मवादिनि दोष उत्प्रेक्ष्यते स प्रतिसमाधीयते । तत्रायं वैशेषिकाणामभ्युपगमः कारणद्रव्यसमवायिनोगुणाः कार्य्यद्रव्यसमानजातीयं गुणान्तरमारभन्ते शुक्लेभ्यस्तन्तुभ्यः शुक्लस्य पटस्य प्रसवदर्शनात्तद्विपर्य्ययाऽदर्शनाच्च । तस्माच्चेतनस्य ब्रह्मणो जगत्कारणत्वेऽभ्युपगम्यमाने कार्य्येऽपि जगति चैतन्यं समवेयात् तद्दर्शनात्। न चेदं ब्रह्म जगत्कारणमवितुमर्हं-

तीति। इममभ्युपगमन्तोयवैव प्रक्रियया व्यभिचारयति। "महद्दीर्घवद्ध्रस्वपरिमण्डलाभ्याम्" सू०। "एषा तेषां प्रक्रिया परमाणवः किल किञ्चित्कालमनारब्धकार्या यथायोगं रूपादिमन्तः पारिमाण्डल्यपरिमाणान्तिहन्ति। ते च पश्चादणुकादिपुरःसराः संयोगसचिवाश्च सन्तोद्व्यणुकादिक्रमेण कृत्स्नं कार्यजातमारभन्ते कारणगुणाश्च कार्ये गुणान्तरम्। यदा द्वौ परमाणू द्व्यणुकमारभेते तदा परमाणुगता रूपादिगुणविशेषाः शुक्लादयोद्व्यणुके शुक्लादीनारभन्ते। परमाणुगुणविशेषस्तु पारिमाण्डल्यम् न द्व्यणुके पारिमाण्डल्यमपरमारभते द्व्यणुकस्य परिमाणान्तरयोगाभ्युपगमात्। अणुत्वह्रस्वत्वे हि द्व्यणुकवर्त्तिनी परिमाणे वर्णयन्ति। यदापि हे द्व्यणुके चतुरणुकमारभेते तदापि समानं द्व्यणुकसमवायिनां शुक्लादीनामारब्धकत्वम्। अणुत्वह्रस्वत्वे तु द्व्यणुकसमवायिनी अपि नैवारभेते चतुरणुकस्य महत्त्वदीर्घत्वपरिमाणयोगाभ्युपगमात्। यदापि बहवः परमाणवो बहूनि वा द्व्यणुकानि द्व्यणुकसहितो वा परमाणुः कार्यमारभन्ते तदापि समानैषा योजना। तदेवं यथा परमाणोः परिमण्डलात्मनोऽणु ह्रस्वञ्च द्व्यणुकं जायते महद्दीर्घञ्च त्र्यणुकादि न परिमण्डलम्। यथा वा द्व्यणुकादणोर्ह्रस्वाच्च सतोमहद्दीर्घञ्च त्र्यणुकादि जायते नाणुनोत ह्रस्वम् एवं चेतनादब्रह्मणोऽचेतनं जगज्जनिष्यत इत्यभ्युपगमे तव किं छिन्नम्। अथ मन्यसे विरोधिना परिमाणान्तरेणाक्रान्तं कार्यद्रव्यं द्व्यणुकादि ततोनारब्धकाणि कारणगतानि पारिमाण्डल्यादीनि इत्यभ्युपगच्छामि न तु चेतनाविरोधिना गुणान्तरेण जगत आक्रान्तत्वमस्ति येन कारणगता चेतना कार्ये चेतनान्तरं नारभेत। नह्यचेतनानां चेतनाविरोधी कश्चिद्गुणोऽस्ति चेतनाप्रतिषेधमात्रत्वात्। तस्मात् पारिमाण्डल्यादि वैधर्म्यात् प्राप्नोति चेतनाया आरब्धकत्वमिति, नैवं मंस्थाः यथा कारणे विद्यमानानामपि पारिमाण्डल्यादीनामनारब्धकत्वमेवं चैतन्यस्यापीत्यस्यायस्य समानत्वात्। न च परिमाणान्तराक्रान्तत्वं पारिमाण्डल्यादीनामनारब्धकत्वे कारणं प्राक् परिमाणान्तरारम्भात् पारिमाण्डल्यादीनामारब्धकत्वोपपत्तेः आरब्धमपि कार्यं द्रव्यं प्रागुणारम्भात् जघन्यमगुणं तिष्ठतीत्यभ्युपगमात्। न च परिमाणान्तरारम्भेऽपि पारिमाण्डल्यादीनीत्यतः स्वसमानजातीयं परिमाणान्तरं नारभन्ते परिमाणान्तरस्यान्यहेतुकत्वाभ्युपगमात्। "कारणवद्गुणत्वात् प्रचयविशेषाच्च महत्" "तद्विपरीतमणु"। "एतेन दीर्घत्वह्रस्वत्वे व्याख्याते" इति हि काणभुजानि सूत्राणि। न च सन्निधानविशेषात् कुतश्चित् कारणवद्गुणादीनि एवारभन्ते न पारिमाण्डल्यादीनीत्युच्यते द्रव्यान्तरे गुणान्तरे वाऽऽरभ्यमाणे सर्वेषामेव कारणगुणानां स्वाश्रयसमवायाविशेषात्। तस्मात् यथा स्वभावादेव पारिमाण्डल्यादीनामनारम्भकत्वं तथा चेतनाया अपि द्रष्टव्यम् संयोगाच्च द्रव्यादीनां विलक्षणानामुत्पत्तिदर्शनात् समानजातीयोत्पत्तिव्यभिचारः। द्रव्ये प्रकृते गुणोदाहरणमयुक्तमिति चेन्न दृष्टान्तेन विलक्षणारम्भमात्रस्य विवक्षितत्वात्। न च द्रव्यस्य द्रव्यमेवोदाहर्त्तव्यं गुणस्य वा गुण एवेति कश्चिन्नियमे हेतुरस्ति। सूत्रकारोऽपि भवतां द्रव्यस्य गुणमुदाजहार "प्रत्यक्षाणामप्रत्यक्षत्वात् संयोगस्य पञ्चात्मकत्वं न विद्यते" इति। यथा प्रत्यक्षाप्रत्यक्षयोर्भूम्याकाशयोः समवयत् संयोगोऽप्रत्यक्षः एवं प्रत्यक्षाप्रत्यक्षेषु पञ्चसु भूतेषु समवयत् शरीरमप्रत्यक्षं स्यात् प्रत्यक्षन्तु शरीरं दृश्यते तस्मान्न पाञ्चभौतिकमिति। एतदुक्तं भवति गुणश्च संयोगोद्रव्यं शरीरम्। दृश्यतेऽिति चात्रापि विलक्षणोत्पत्तिः प्रपञ्चिता। नन्वेवं सति तेनैवैतदुक्तम्, नेति ब्रूमः तत्सांख्यं प्रत्युक्तं एतत्तु वैशेषिकं प्रति। नन्वतिदेशोऽपि समानन्यायतःकृतः "एतेन शिष्टापरिग्रहा अपि व्याख्याताः" इति सत्यमेतत् तस्यैव त्वयं वैशेषिकपरीक्षारम्भे तत्प्रक्रियानुगतेन निदर्शनेन प्रपञ्चः कृतः। "उभयथापि न कर्मातस्तद्भावः" सू०। इदानीं परमाणुकारणवादं निराकरोति। स च वादस्त्वं सत्तिष्ठति। पटादीनि हि सावयवानि द्रव्याणि स्वानुगतैः संयोगसचिवैस्तन्त्वादिभिर्द्रव्यैरारभ्यमाणानि दृष्टानि तत्सामान्येन यावत्किञ्चित् सावयवं सर्वन्तत् स्वानुगतैरेव संयोगसचिवैस्तैस्तैर्द्रव्यैरारब्धमिति गम्यते। सचायमवयवावयविविभागोयतो निवर्त्तते सोऽपकर्षपर्य्यन्तगतः परमाणुः। सर्वज्ञेदं गिरिसरिदादिकं जगत् सावयवं सावयवत्वादाद्यन्तवत् न चाकारणेन कार्येण भवितव्यमित्यतः परमाणवोजगतः कारणमिति कणभुगभिप्रायः। तानीमानि चत्वारि भूतानि भूम्यप्तेजःपवनाख्यानि सावयवान्युपलभ्य चतुर्विधाः परमाणवः परिकल्प्यन्ते। तेषाञ्चापकर्षपर्य्यन्तगतत्वेन परतोविभागारम्भवाहिनश्यताञ्च पृथिव्यादीनां परमाणुपर्य्यन्तविभागो भवति स प्रलयकालः। ततः सर्गकाले च वायवीयेनाणुह्रदाख्येन कर्मोत्पद्यते तत्कर्म स्वाश्रयमणुसंयुक्तसंयोगेन संयुनक्ति ततो

द्व्यणुकादिक्रमेण वायुरुत्पद्यते एवमग्निः एवमापः एवं पृथिवी एवं शरीरं सेन्द्रियमित्येवं सर्वमिदं जगदणुभ्यः सम्भवति। अणुगतेभ्यश्च रूपादिभ्यो द्व्यणुकादिगतानि रूपादीनि सम्भवन्ति तन्तुपटन्यायेनेति काणादा मन्यन्ते। तत्रेदमभिधीयते वियोगावस्थानां तावदणूनां संयोगः कर्मापेक्षोऽभ्युपगन्तव्यः कर्मवतां तत्त्वादीनां संयोगदर्शनात्। कर्मणश्च कार्यत्वान्निमित्तं किमप्यभ्युपगन्तव्यम् अनभ्युपगमे निमित्ताभावाच्चाणुष्वाद्यं कर्म स्यात्। अभ्युपगमेऽपि यदि प्रयत्नोऽभिघातादिर्वा यदादृष्टं किमपि कर्मणोनिमित्तमभ्युपगम्येत तस्यासम्भवाद्वैवाणुष्वाद्यं कर्म स्यात् न हि तस्यामवस्थायामात्मगुणः प्रयत्नः सम्भवति शरीराभावात्। शरीरप्रतिष्ठे हि मनस्यात्ममनःसंयोगे सत्यात्मगुणः प्रयत्नो जायते। एतेनाभिघातादयपि दृष्टनिमित्तं प्रत्याख्यातव्यम्। सर्गोत्तरकालं हि तत्सर्वं नाद्यस्य कर्मणो निमित्तं सम्भवति। अथादृष्टमाद्यस्य कर्मणोनिमित्तमिष्यते तत्पुनरात्मसमवायि वा स्यादणुसमवायि वा उभयत्रापि नादृष्टनिमित्तमणुषु कर्मावकल्पेत अदृष्टस्याचेतनत्वात्। नह्यचेतनं चेतनेनानधिष्ठितं स्वतन्त्रं प्रवर्त्तते प्रवर्त्तयति वेति साङ्ख्यपरीक्षायामभिहितम्। आत्मनश्चात्मोत्पन्नचैतन्यस्य तस्यामवस्थायामचेतनत्वात्। आत्मसमवायित्वाभ्युपगमाच्च नादृष्टमणुषु कर्मणोनिमित्तं स्यात् असम्बन्धात्। अदृष्टवता पुरुषेणाप्यणूनां सम्बन्ध इति चेत् सम्बन्धसातत्यात् प्रवृत्तिसातत्यप्रसङ्गः नियामकान्तराभावात्। तदेवं नियतस्य कस्यचित् कर्मनिमित्तस्याभावाच्चाणुष्वाद्यं कर्म स्यात् कर्माभावात् तद्विबन्धनः संयोगोऽपि न स्यात् संयोगाभावाच्च तद्विबन्धनं द्व्यणुकादि कार्यजातं न स्यात्। संयोगश्चाणोरणुनारेण सर्वात्मना वा स्यादेकदेशेन वा, सर्वात्मना चेदुपचयानुपपत्तेरणुमात्रत्वप्रसङ्गोऽदृष्टविपर्ययप्रसङ्गश्च प्रदेशवतोद्रव्यस्य प्रदेशवता द्रव्यान्तरेण संयोगस्य दृष्टत्वात्। एकदेशेन चेत् सावयवत्वप्रसङ्गः। परमाणूनां कल्पिताः प्रदेशाः सन्तीति चेत् कल्पितानामवस्तुत्वादवस्त्वेव संयोग इति वस्तुनः कार्यस्यासमवायिकारणं न स्यात् असति चासमवायिकारणे द्व्यणुकादि कार्यद्रव्यं नोत्पद्येत। यथा चादिसर्गे निमित्ताभावात् संयोगोत्पत्त्यर्थं कर्म नाणूनां सम्भवति एवं महाप्रलयेऽपि विभागोत्पत्त्यर्थं कर्म नैवाणूनां सम्भवेत्। न हि तत्रापि किञ्चिन्नियतं तन्निमित्तं दृष्टमस्ति। अदृष्टमपि भोगप्रसिद्ध्यर्थं न प्रलयप्रसिद्ध्यर्थमिति अतोनिमित्ताभावाच्च स्यादणूनां संयोगोत्पत्त्यर्थं विभागोत्पत्त्यर्थञ्च कर्म। अतश्च संयोगविभागायत्तयोः सर्गप्रलययोरभावः प्रसज्येत। तस्मादनुपपन्नोऽयं परमाणुकारणवादः। "समवायाभ्युपगमाच्च साभ्यादनवस्थितेः" सू०समवायाभ्युपगमाच्च तदभाव इति प्रकृतेनाणुवादनिराकरणेन सम्बध्यते। द्वाभ्यां द्व्यणुभ्यां द्व्यणुकस्योत्पद्यमानमत्यन्तभिन्नमणुभ्यामस्योः समवैतीत्यभ्युपगम्यते भवता न चैवमभ्युपगच्छता शक्यतेऽणुकारणवादः समर्थयितुम्, कुतः? साभ्यादनवस्थितेः। यथैव द्व्यणुभ्यामत्यन्तभिन्नं सत् द्व्यणुकं समवायलक्षणेन सम्बन्धेन ताभ्यां सम्बध्यते एवं समवायोऽपि समवायिभ्योऽत्यन्तभिन्नः सन् समवायलक्षणेनान्येनैव सम्बन्धेन समवायिभिः सम्बध्येत आत्मभेदसाभ्यात् ततश्च तस्य तस्यान्योन्यं सम्बन्धः कल्पयितव्य इत्यनवस्था प्रसज्येत। नन्विच्छ प्रलयपक्षाः समवायो नित्यसम्बन्धएव समवायिभिर्गृह्यते नासम्बद्धः सम्बन्धान्तरापेक्षो वा ततश्च न तस्यान्यः सम्बन्धः कल्पयितव्योनेनानवस्था प्रसज्येत। नेत्युच्यते। संयोगोऽप्येवं सति संयोगिभिर्नित्यसम्बन्ध एवेति समवायवन्नान्यं सम्बन्धमपेक्षेत। अयार्थान्तरत्वात् संयोगः सम्बन्धान्तरमपेक्षते, समवायोऽपि तद्यार्थान्तरत्वात् सम्बन्धान्तरमपेक्षेत। स च गुणत्वात् संयोगः सम्बन्धान्तरमपेक्षते न समवायोऽगुणत्वादिति युज्यते वक्तुम् अपेक्षाकारणस्य तुल्यत्वात् गुणपरिभाषायाश्चातन्त्रत्वात्। तस्मादर्थान्तरं समवायमभ्युपगच्छतां प्रसज्येतैवानवस्था। प्रसज्यमानायां चानवस्थायामेकासिद्धौ सर्वासिद्धेर्द्वाभ्यामणुभ्यां द्व्यणुकं नैवोत्पद्येत तस्मादप्यनुपपन्नः परमाणुकारणवादः। "नित्यमेव च भावात्" सू०। अपि च अणवः प्रवृत्तिस्वभावा वा निवृत्तिस्वभावा वा उभयस्वभावा वा अनुभयस्वभावा वाऽभ्युपगम्येरन् गत्यन्तराभावात् चतुर्धापि नोपपद्यते। प्रवृत्तिस्वभावत्वे नित्यमेव प्रवृत्तेर्भावात् प्रलयाभावप्रसङ्गः। निवृत्तिस्वभावत्वेऽपि नित्यमेव निवृत्तेर्भावात् सर्गाभावप्रसङ्गः। उभयस्वभावत्वन्तु विरोधादसमञ्जसम्। अनुभयस्वभावत्वे तु निमित्तवशात् प्रवृत्तिनिवृत्त्योरभ्युपगम्यमानयोरदृष्टादेर्निमित्तस्य नित्यसन्निधानान्नित्यप्रवृत्तिप्रसङ्गः। अतत्स्वत्वेऽप्यदृष्टादेर्नित्यप्रवृत्तिप्रसङ्गः तस्मादप्यनुपपन्नः परमाणुकारणवादः। "रूपादिसत्त्वाच्च विपर्ययो दर्शनात्" सू०। सावयवानां द्रव्याणामवयवशोविभज्यमानानां यतः परोविभागो न सम्भवति ते चतुर्विधा रूपादिमन्तः परमाणवश्चतुर्विधस्य रूपा-

दिमतो भूतभौतिकस्यारम्भका नित्याश्चेति यद्वैशेषिका अभ्युपगच्छन्ति स तेषामभ्युपगमो निरालम्बन एव यतो रूपादिमत्त्वात् परमाणूनामणुत्वनित्यत्वविपर्ययः प्रसज्येत परमकारणापेक्षया स्थूलत्वमनित्यत्वञ्च तेषामभिप्रेत विपरीतमापद्येतेत्यर्थः। कुतः ? एवं लोके दृष्टत्वात्। यद्धि लोके रूपादिमद्दृस्तु तत् स्वकारणापेक्षया स्थूलमनित्यञ्च दृष्टं तद्यथा पटस्तन्तूनपेक्ष्य स्थूलोऽनित्यश्च भवति तन्तवश्चांशूनपेक्ष्य स्थूला अनित्याश्च भवन्ति। तथा चामी परमाणवोरूपादिमन्तस्तैरभ्युपगम्यन्ते तस्मात्तेऽपि कारणवन्तस्तदपेक्षया स्थूला अनित्याश्च प्राप्नुवन्ति। यच्च नित्यत्वे कारणं तैरुक्तं "सदकारणवन्नित्यमिति"। तदप्येवं सत्यणुषु न सम्भवति उक्तेन प्रकारेण कारणवत्त्वोपपत्तेः यदपि नित्यत्वे द्वितीयं कारणमुक्तम् "अनित्यमिति च विशेषतः प्रतिषेधाभाव" इति। तदपि नावश्यं परमाणूनां नित्यत्वं साधयति असति हि यस्मिन् कस्मिंश्चिद्विशेषे वस्तुनि नित्यशब्देन नञः समासो नोपपद्यते न पुनः परमाणुनित्यत्वमेवापेक्षते तस्मात्स्थैर्यं नित्यं परमकारणं ब्रह्म। न च शब्दार्थव्यवहारमात्रेण कस्यचिदर्थस्य प्रसिद्धिर्भवति प्रमाणान्तरसिद्धयोः शब्दार्थयोर्व्यवहारावतारात्। यदपि नित्यत्वे तृतीयं कारणमुक्तम्। "अविद्या चेति"। तदप्येवं विनियेत सतां परिदृश्यमानकार्याणां कारणानां प्रत्यक्षेणाग्रहणमविद्येति ततोऽणुकनित्यताप्यापद्येत। अथाद्रव्यवत्त्वे सतीति विशेष्यते तथाप्यकारणवत्त्वमेव नित्यतानिमित्तमापद्येत तस्य च प्रागेवोक्तत्वादविद्या चेति पुनरुक्तं स्यात्। अथापि कारणविभागात् कारणविनाशाच्चान्यस्य तृतीयस्य विनाशहेतोरसम्भवोऽविद्या सा परमाणूनां नित्यत्वं ख्यापयतीति व्याख्यायेत। नावश्यं विनश्यद्वस्तु द्वाभ्यामेव हेतुभ्यां विनंष्टुमर्हतीति नियमोऽस्ति संयोगसचिवे ह्यनेकस्मिंश्च द्रव्ये द्रव्यान्तरस्यारम्भकेऽभ्युपगम्यमाने एतदेवं स्यात् यदा त्वपास्तविशेषं सामान्यात्मकं कारणं विशेषवदवस्थान्तरमापद्यमानमारम्भकमभ्युपगम्यते तदा घृतकाठिन्यविलयनवत् स्वतन्त्रवस्थाविलयनेनापि विनाश उपपद्यते। तस्माद्रूपादिमत्त्वात् स्यादभिप्रेतविपर्ययः परमाणूनां, तस्मादप्यनुपपन्नः परमाणुकारणवादः। "उभयथा च दोषात्" इ०। गन्धरसरूपस्पर्शगुणा स्थूला पृथ्वी, रसरूपस्पर्शगुणाः सूक्ष्मा आपः, रूपस्पर्शगुणं सूक्ष्मतरं तेजः, स्पर्शगुणः सूक्ष्मतमोवायुरित्येवमेतानि चत्वारि भूतान्युपचितापचितगुणानि स्थूलसूक्ष्मतारतम्योपेतानि च लोके लक्ष्यन्ते तद्वत् परमाणवोऽप्युपचितापचितगुणाः कल्प्येरन् न वा। उभयथापि तद्दोषानुषङ्गोऽपरिहार्य्य एव स्यात्। कल्प्यमाने तावदुपचितापचितगुणत्वे उपचितगुणानां मूर्त्युपचयादपरमाणुत्व प्रसङ्गः। नचान्तरेणापि मूर्त्युपचयं गुणोपचयो भवतीत्युच्येत कार्य्येषु मूर्तेषु गुणोपचये मूर्त्युपचयदर्शनात्। अकल्प्यमाने तूपचितापचितगुणत्वे परमाणुत्वसाम्यप्रसिद्धये यदि तावत् सर्व्वएव एकैकगुणाएव कल्पेरन् ततस्तेजसि स्पर्शस्योपलब्धिर्न स्यात् अप्सु रूपस्पर्शयोः, पृथिव्यां रूपरसस्पर्शानां, कारणगुणपूर्व्वकत्वात् कार्य्यगुणानाम्। अथ सर्वे चतुर्गुणाएव कल्प्येरन् ततोऽप्सु पि गन्धस्योपलब्धिः स्यात् तेजसि च गन्धरसयोः, वायौ च गन्धरसरूपाणां, न चैवं दृश्यते। तस्मादप्यनुपपन्नः परमाणुकारणवादः"। एतेनाद्दष्टस्य सातत्येऽपि कालवशात् नियमसमर्थनम् परेषामकिञ्चित्करम्। महाकालस्यैकत्वेन नियामकत्वाभावात् खण्डकालस्य च तदानीं क्रियाद्यभावेन विशेषकत्वा सम्भवात् क्रियायाः मूर्त्तद्रव्याधीनत्वान्मूर्त्तस्य चावयवसंयोगाधीनत्वेन सर्गोत्तरमेवोत्पत्तेस्तदाऽसत्त्वात्। यच्च निरवयवस्य परमाणोर्दिगवच्छेदेन संयोगसम्भवसमर्थनं तदप्यकिञ्चित्करं नित्यायादिगसदवच्छेदकत्वासम्भवात् दिग्विभागस्यावच्छेदकत्वस्य लोके दृष्टत्वात् दिग्विभाजकस्य चावयवभेदस्य परमाणोरसम्भवेन तत्त्वायोगात्। किञ्च "षट्केन युगपद्योगात् परमाणोः षड़ंशतेत्यापत्तिश्च तथाहि दिगवच्छेदेन संयोगे हि पूर्व्वादिचतुर्दिग्भेदेन ऊर्द्धाधोदिग्भेदेन च षट्सु दिक्षु विनिगमनाभावेन युगपद्योगापत्त्या परमाणोः षड़ंशतापत्तिरूपेण निरवयवत्वं तस्य न सिध्येत्। वस्तुतः प्राच्यादिव्यवहारस्य उदयगिर्य्यादिसम्बन्धाधीनत्वेन तस्य च सर्गोत्तरकालीनतया तदानीं तद्व्यवहारः सर्व्वथा न सम्भवत्येवेति दिगवच्छेदेन परेषां संयोगकल्पनं सर्व्वथा युक्तमेव। अधिकम् अवयविशब्दे ४३२पृष्ठादौ द्रष्टव्यम्

आर(रा)व पु० आ+रु–अप् पक्षे घञ्। सम्यक्शब्दे। "वानराचक्रुरारवम्" रामा०। "उच्चारवान् वनारावो वानरं जलदारवम्" भट्टिः।

आरस्य न० अरसस्य भावः चतुरादि० ष्यञ्। रसभिन्नत्वे नास्ति रसोयस्य बहु० तु त्वतलौ न ष्यञ्। अरसत्वसरसता वेत्येव "उच्चैरस्ति मन्दतामरसतामिति" चन्द्रा०।

आरा स्त्री आ+ऋ–अच्। १ चर्म्मभेदकास्त्रभेदे। (टेकी) इति

ख्याते २लौहास्त्रे । "आरात्यमात्रो ह्यवरोऽपि दृष्टः" श्रुतिः २प्रतोदे च "वा पूषन् ब्रह्मचोदनीमारां बिभर्ष्यांहसे" ऋ० ६,५,८, । "उद्यम्यारामयकायोत्सितस्य" माघः । "आरां प्रतोदम्" मल्लिनाथः ।

आराग्र न० आरायाः अग्रम् । १आरायाः अग्रे "आरात्यमात्रोऽह्यवरोऽपि दृष्टः" श्रुतिः । "अर्द्धचन्द्रक्षुरप्रादिधारायं सुखसुच्यते । आराग्रन्तु सुखं तेषां पुष्पपत्रादिभेदतः" इति हलायुधोक्ते २अर्द्धचन्द्राकारक्षुरप्राद्यस्त्रसुखे च ।

आराज्ञी स्त्री सम्यक् राजते आ+राज–क्विन् ङीप् । देशभेदे घूमा० देशवाचित्वात् वुञ् । आराज्ञकः । तद्देशभवे त्रि० ।

आरात् अव्य० आ+रा घा० आति । १दूरे, २समीपे च । आदातुं दयितमिवावगाढमारात्" माघः । "तमर्च्य मारादभिवर्त्तमानम्" रघुः "विचित्रसञ्चैः ध्रुवमानमारात्" भट्टिः

आराति पु० आ+रा–क्तिच् । शत्रौ । द्विरूपकोषः ।

आरातीय त्रि० आराद्भवः जातः आगतो वा दूरत्वात् छ आराच्छब्दवर्जनात् नाव्ययस्य टिलोपः । १निकटदूरयोर्भवे २तत्र जाते ३ताभ्यामागते च ।

आरात्रिक न० अरात्रावपि निर्वृत्तं ठञ् । (आरति) नीराजनकर्म्मणि । दीपो हि रात्रावेव प्रदर्श्यते इदं दिनेऽपि दर्श्यते इति तस्य तथात्वम् "ततश्च मूलमन्त्रेण दत्त्वा पुष्पाञ्जलित्रयम् । महानीराजनं कुर्य्यात् महावाद्यजयस्वनैः । प्रज्वालयेत्सदर्पञ्च कर्पूरेण घृतेन वा । आरात्रिकं शुभे पात्रे विषमानेकवर्त्तिकम्" हरिः विलासे तद्ग्रहणादि । तस्य देहांगभेदे भ्रामणप्रमाणमपि तत्रोक्तं यथा "आदौ चतुःपादतले च विष्णोर्द्वौ नाभिदेशे सुखमस्तकेऽकम् । सर्वेषु चाङ्गेषु च सप्त वारान् आरात्रिकं भक्तजनस्तु कुर्य्यात्" । "शिरसि निहितभारं पात्रमारात्रिकस्य भ्रमयति भवि भूयस्ते जपार्द्रैः कटाक्षैः" चतुःषष्ट्युपचारे शङ्करः०

आराधन न० आ+राध–ल्युट् । १पाके, २संसिद्धौ णिच्–ल्युट् । ३साधने ४व्यवाप्तौ ५तोषणे ६सेवने तोषणसेवनयोः संसिद्धिहेतुत्वात् तथात्वम् "साध्वमाराधनमपि रमणीयमस्याः" शकु० । "आराधनायास्य सखी समेताम्" कुमा० । आराध्यतेऽनेन णिच्–करणे ल्युट् । ७सेवासाधने "इदं तु ते भक्तिनम्रं सतामाराधनं वपुः" कुमा० । "सर्व्वत्र दैत्याः समतामुपेत समत्वमाराधनमच्युतस्य" भाग० प्रह्लादोक्तिः । [सेवायाम् ।

आराधना स्त्री आ+राध–णिच्–युच् स्त्रीत्वात् टाप् ।

आराधनीय त्रि० आराधयितुम् शक्यः आ+राध–णिच्–शक्यार्थे अनीयर् । आराधनयोग्ये "सोऽहं कथं नाम तवाचरेयमाराधनीयस्य ऋषेर्विघातम्" रघुः ।

आराधय पु० आ+राध–णिच्–बा० य । आराधनकारके ब्राह्म०भावादौ ष्यञ् । आराधयम् आराधनकर्त्तरि न० ।

आराधयितृ त्रि० आ+राध–णिच्–तृच् । १परिचारके । २सेवके "नन्वयमेवाराधयिता जनस्तव समीपे वर्त्तते" शकु० ।

आराधित त्रि० आ+राध–णिच्–क्त । सेविते । "नाराधितोयैः पुरुषः प्रधानः तेषां वृथा जन्म नराधमानाम्" भाग० ।

आराम पु० आरम्यतेऽत्र आ+रम–आधारे घञ् । कृत्रिमवने १उद्यावे "आत्मारामाविक्षिप्तरतयोनिर्विकल्पे समाधौ" वेणी० आत्माआरामइव । घञन्तस्य पुंस्त्वात् शासनात् क्लीवत्वोक्तिः प्रामादिकी । "वाप्यारामतड़ागकूपभवनारम्भप्रतिष्ठाव्रतेत्यादि" सुश्रु०चि० । "क्षेत्रकूपतड़ागानामारामस्य गृहस्य च" "गृहं तड़ागमारामं क्षेत्रं वा भीषया हरन्" "तड़ागारामदारार्थामपत्यस्य च विक्रयः" इति च मनुः "जलाशयारामसुरप्रतिष्ठा सौम्यायने जीवशशाङ्कशुक्रे । ऋक्षे मृदुक्षिप्रचरध्रुवे स्यात् पक्षे सिते खर्क्षतिथिक्षये वा रिक्तारवर्ज्यं दिवसेऽतिशस्ता" इत्तर०टी०उक्ते योड़शभिच रगणैरारामः इत्युक्ते २दण्डकभेदे च । आ+रम–भावे घञ् । ३आरतौ "योऽन्तःसुखोऽन्तरारामः" गीता । अन्तरात्मनि आरामोयस्येति विग्रहः "अधायुरिन्द्रियारामोमोघं पार्थ! स जीवति" गीता । आरामकरणप्रकारः" इत्तृ सं० उक्तः यथा "प्राग्नद्यावाविनिर्मुक्ता न मनोज्ञा जलाशयाः । यस्मादतो जलप्रान्ते धारामान् विनिवेशयेत् । गृहे भूः सर्वदृक्षाणां स्थिता तस्मात् तिलान् वपेत् । पुष्पितांस्तांश्च गृह्णीयात् कर्म्मैतत्प्रथमं भुवि । अरिष्टाशोकपुन्नागगिरीषाः सप्रियङ्गवः । मल्लिकाः पूर्वमारामे रोपणीया गृहेषु वा । पनसाशोककदलीजम्बूलकुचदाडिमाः । द्राक्षापालीवताचैव बीजपूराति मुक्तकाः । एते द्रुमाः काण्डरोहा गोमयेन प्रलेपिताः । मूलच्छेदे त्वचा स्कन्धे रोपणीयाः प्रयत्नतः । अजातशाखाञ्छिखिरे जातशाखान् हिमागमे । वर्षागमे च सुस्कन्धान् यथादिक् प्रतिरोपयेत् । इतोगीरतिलक्षौद्रविड़ङ्गक्षीरगोमयैः । आमूलस्कन्धलिप्तानां कुड्मलेन विरोपणम् । शुचिर्भूत्वा तरोः पूजां कृत्वा स्नानानुलेपनैः । रोपयेद्रोपितञ्चैव पत्रैस्तैरेव जायते । सायं प्रातश्च

घर्म्मान्ते, शीतकाले दिनान्तरे। वर्षासु च भुवः शोषे सेक्तव्या रोपिता द्रुमाः। जम्बूवेतसवानीरकदम्बोदुम्बरार्जुनाः। बीजपूरकरुद्वीकालकुचाश्च सदाडिमाः। वञ्जुलो नक्तमालश्च तिलकः पनसस्तथा। तिमिरो ज्यातकश्चैव षोडशानूपजाः स्मृताः। उत्तमं विंशतिर्हस्ता मध्यमं षोडशान्तरम्। स्थानात् स्थानान्तरं कार्य्यं वृक्षाणां द्वादशान्तरम्। अभ्यासजातास्तरवः संसृशन्तः परस्परम्। पत्रैर्मूलैश्च न फलं सम्यग्यच्छन्ति पीड़िताः। शीतवातातपैरोगो जायते पाण्डुपत्रता। अवद्विश प्रवालानां शाखाशोषो रसक्षतिः। चिकित्सितमथैतेषां शस्त्रलेखादौ विशोधनम्। विड्भक्षतपङ्कात्तान् सेचयेत् क्षीरवारिणा। फलनाशे कुलत्थैश्च माषैर्मुद्गैस्तिलैर्यवैः। भृतशीतपयःसेकः फलपुष्पाभिवृद्धये। अविकाजशकृच्चूर्णखाढके द्वे तिलाढकम्। सक्तुप्रस्थो जलद्रोणो गोमांसं तुलया सह। सप्तरात्रोषितैरेतैः सेकः कार्यो वनस्पतेः। वल्लीगुल्मलतानां च फलपुष्पाय सर्वदा। वासरात्रि दश दुग्धभावितं बीजमाज्ययुतवस्त्रयोजितम्। गोमयेन वलयो विरचितं क्रौड़मार्गपिशितैश्च धूपितम्। मत्स्यशूकरवसासमन्वितं रोपितं च परिकर्मितावनौ। क्षीरसंयुतजलावसेचितं जायते कुसुमयुक्तमेव तत्। तिन्तिडीत्वपि करोति वल्लरीं व्रीहिमाषतिलचूर्णसक्तुभिः। पूतिमांसमहितैश्च सेचिता धूपिता च सततं हरिद्रया। कपित्थवल्लीकरणाय मूलान्यास्फोतधात्रीधववासकानाम्। पलाशिनीवेतसरुग्व्यवल्लीस्नामातिसक्तैः सहितास्तमूलाः। क्षीरे भृते चाश्वनया सुशीते नालाशताख्यं तु कपित्थबीजम्। दिने दिने शोषितमर्कपाकैर्मांसं विधिस्त्वेष ततो ऽधिरोप्यम्। कृत्वायतं तद्दिगुणं गभीरं खात्वा ऽवटं प्रोक्तजलावपूर्णम्। शुष्कं प्रदग्धं मधुसर्पिषा तत् प्रलेपयेद्वृक्षसमन्वितेन। चूर्णीकृतैर्मांसतिलैर्यवैश्च प्रपूरयेन्मृत्तिकयान्तरस्थैः। मत्स्यामिषाम्भःसहितं च दद्याद् यावद्घनत्वं समुपागतं तत्। उप्तं च बीजं चतुरङ्गुलाधो मत्स्यामिषा मांसजलैव सिक्तम्। वल्ली भवत्याशु शुभप्रवाला विस्तारिणी मण्डपमाददाति। घृतशोऽङ्कोल्लसम्भूतफलकल्केन भावितम्। एतत्तैलेन वा बीजं क्षौद्रातकफलेन वा। वापितं करिकोन्मिश्रं मृदि तत्क्षणजन्मकम्। फलभारान्विता शाखा भवतीति किमद्भुतम्। क्षौद्रातकस्य बीजानि निष्कुलीकृत्य भावयेत्प्राज्ञः। अङ्कोल्लच्छिन्नशाखान्यायायां सप्त कृत्वस्तु। माहिषगोमयएष्टान्यस्य करीषे च तानि निक्षिप्य। करकाजलमृद्योगे न्युप्तान्यङ्का फलकराणि। ध्रुवमृदुमूलविशाखा गुरुभं श्रवणसहायिनी हस्तम्। उक्तानि दिव्यदृष्टिः पादपसंरोपणे मानि"।

आरामशीतला स्त्री आरामे तन्नाम्ने शीतला। तुरुष्क॰ पत्रयुक्ते वृक्षभेदे राजनि॰ "आरामशीतला तिक्ता शीतला पित्तहारिणी" वैद्य॰।

आरामिक त्रि॰ आरामे तद्रक्षणे नियुक्तः ठक्। उद्यानपाले

आराल त्रि॰ ईषदरालम् प्रा॰स॰। ईषत्कुटिले तारका॰ इतच्। आरालितः ईषत्कुटिलिते त्रि॰।

आरालिक त्रि॰ अरालं कुटिलं चरति ठक्। १पाचके २कुटिलचारिणि च। धनलोभेन परप्रेरितोहि पाचकोविषादिसंदूषितं पचतीति तस्य कुटिलचारित्वम्। अतोराज्ञा यथाभूता पाचकानियोज्यास्तदुदर्शितम् सुश्रुते यथा "रिपवो विक्रमाक्रान्ता ये च स्वेऽलक्ष्यतां गताः। सिद्धव्रतः क्रोधविषं विवरं प्राप्य तादृशम्। विषैर्निहन्युर्निपुणं नृपतिं दुष्टचेतसः। स्त्रियो वा विविधान् योगान् कदाचित्सुभगेच्छया। विषकन्योपयोगाद्वा जघन्याच्छादसञ्चरः। तस्माद्वैद्येन सततं विशाद्वृद्धो नराधिपः। यस्माच्च चेतोऽनित्यत्वमश्ववत् प्रथितं नृणाम्। न विश्वस्यात्ततो राजा कदाचिदपि कस्यचित्। कुलीनं धार्म्मिकं स्निग्धं शुद्धतं सततोत्थितम्। अलुब्धमशठं भक्तं कृतज्ञं प्रियदर्शनम्। क्रोधपारुष्यमात्सर्य्यमदालस्यविवर्जितम्। जितेन्द्रियं क्षमावन्तं शुचिं शीलदयान्वितम्। मेधाविनमसंभ्रान्तमनुरक्तं हितैषिणम्। पटुं प्रगल्भं निपुणं दक्षं मायाविवर्जितम्। पूर्व्वोक्तैश्च गुणैर्युक्तं नित्यं सन्निहितागदम्। महानसे प्रयुञ्जीत वैद्यं तद्विद्यपूजितम्॥ प्रसन्नदिग्देशकृतं शुचिभाण्डं महच्छुचि। सजालकं गवाक्षाध्यमात्मवर्गनिषेवितम्। विकल्पसंदूषितं सवितानं कृतार्च्चनम्। परीक्षितस्त्रीपुरुषं भवेच्चापि महानसम्। तत्राध्यक्षं नियुञ्जीत प्रायोवैद्यगुणान्वितम्। शुचयो दक्षिणा दक्षा विनीताः प्रियदर्शनाः। संविभक्ताः सुमनसो नीचकेशनखाः स्त्रियः। स्नाता दृढं संयमिनः कृतोष्णीषाः सुसंयताः। तस्य चाज्ञाविधेयाः स्युर्विविधाः परिकर्म्मिणः। आहारस्थितयश्चापि भवन्ति प्राणिनो यतः। तस्मान्महानसे वैद्यः प्रमादरहितो भवेत्। माहानसिकबोढारः सौपौदनिकपौपिकाः। भवेयुर्वैद्यवर्गा ये चान्ये तु केचन। इङ्गितज्ञो मनुष्याणां

प्राक्चेष्टासुखवैकृतैः। विद्याद्विषस्य दातारमेभिर्लिङ्गैश्च बुद्धिमान्। न ददात्युत्तरं पृष्टो विवक्षन् मोहमेति च। व्यर्थं बद्ध सङ्कीर्णं भाषते चापि मूढवत्। स्फोटयत्यङ्गुलीर्भूमिमकस्माद्विलिखेदसेत्। वेपथुर्जायते तस्य तस्तचान्योऽन्यमीक्षते। ज्ञामो विवर्णवक्त्रश्च नखैः किञ्चिच्छिनत्त्यपि। आलभेतासकृद्दीनः करेण च शिरोरुहान्। निर्विशासुरपहारैर्वीक्षते च पुनः पुनः। वर्त्तते विपरीतस्तु विषदाता विचेतनः। केचिद्भयात् पार्थिवस्य त्वरिता वा तदाज्ञया। असतोऽपि सतोऽपि चेष्टां कुर्व्वन्ति मानवाः। तस्मात् परीक्षणं कार्य्यं भक्तानामादितो नृपैः। अन्ने पाने दन्तकाष्ठे तथाभ्यङ्गेऽवलेखने। उत्सादने कषाये च परिषेकेऽनुलेपने। स्वप्नु वस्त्रेषु शय्यासु कवचाभरणेषु च। पादुकापादपीठेषु पृष्ठेषु गजवाजिनाम्। विषजुष्टेषु चान्येषु नस्यधूमाञ्जनादिषु। लक्षणानि प्रवक्ष्यामि चिकित्सामथनन्तरम्। रूपमक्षाङ्गुलिं न्यस्तं सर्पिषं भक्षयन्ति ये। तत्रैव ते विनश्यन्ति मक्षिकावायसादयः। क्षुतभुक्तेन चाक्षेन भृशं चटचटायते। मयूरकण्ठप्रतिमो जायते चापि दुःसहः। भिन्नार्द्धिस्त्रीक्षणधूमश्च न चिराच्छोपशाम्यति। चकोरक्षाक्षिवैराग्यं जायते क्षिप्रमेव तु। दष्टान्नं विषसंसृष्टं म्रियन्ते जीवजीवकाः। कोकिलः स्वरवैकल्यं क्रौञ्चस्तु मदमृच्छति। कृष्णेक्षयूरउद्विग्नः क्रोशतः शुकसारिके। हंसः क्रीडति चात्यर्थं भृङ्गराजस्तु कूजति। पृषतो विरुजत्यक्षु विडां सञ्चति मर्कटः। सन्निकृष्टांस्ततः कुर्य्याद्राक्षस्तान् मृगपक्षिणः"।

आराविन् त्रि० आरौति आ+रु-णिनि। सम्यक्शब्दकारके उच्चैःशब्दकारके स्त्रियां ङीप्।

आरिक्विक त्रि० अरिक्वे भवादि काश्या० ठञ् ञिठ् वा। अरिक्वभवादौ स्त्रियां ठञि ङीप् ञिठि टाप्।

आरिन्दमिक त्रि०अरिन्दमे भवादि ठञ् ञिठ् वा। अरिन्दमभवादौ स्त्रियां ठञि ङीप् ञिठि टाप्।

आरिम्भीय त्रि० रिष-हिंसे मनु न०त० अरिम्भः अहिंसकः तस्य सन्निकृष्टदेशादौ छया० छण्। अहिंसकसन्निकृष्टदेशादौ।

आरीहणक त्रि० अरीहणेन निर्वृत्तं अरीहणादि० वुञ्। शत्रुघातकनिर्वृत्ते अरीहणेति गणपाठे निर्वृत्तात् दीर्घः।

आरु पु०ऋ-उण्। १क्षतभेदे, २कर्कटे, ३शूकरे, च।

आरुज त्रि० आरुजति आ+रुज-क। १सम्यक्पीड़के, २आभिमुख्येन हन्तरि च "विद्मा हित्वा धनञ्जयमिन्द्र! दृढ़ा चिदारुजम्" ऋ०८ ४५,१२। "आरुजं शत्रूणामाभिमुख्येन भञ्जकम्" भा०। रावणपत्नीवे २राक्षसभेदे पु०। "पर्व्वणः पतनोजस्मः खरः क्रोधवशो हरिः। प्रारुजश्चारुजश्चैव प्रघसश्चैवमादयः" भा०व० २८४अ०।

आरुणक त्रि० अरुणदेशे भवादि धूमा० वुञ्। अरुणदेशभवादौ।

आरुणि पु०अरुणस्यापत्यम् इञ्। १उद्दालके गोतमे मुनौ "उद्दालकोहारुणिः श्वेतकेतुं पुत्रमुवाच" छा०उ०। २वैशम्पायनान्तेवासिभेदे। तस्यान्तेवासिनश्च आलम्ब लङ्ग कमल रुचाभारुणि ताण्ड्यश्यामायन कठ कलापिनोनवेति बोध्यम्। तेनाधीतं णिनि। ब्राह्मणे तस्य लुक्। आरुणिः। ३सामवेदब्राह्मणभेदे आयोदधौम्यशिष्ये ४मुनिभेदे आयोदशब्दे उदा० ५अरुणमुनेरपत्ये पुंस्त्री स्त्रियां ङीप्। "यदारुणीषु तावधीरयुग्ध्वम्" ऋ०१,६४,७। अरुणस्येदम् इञ्। ६अरुणसम्बन्धिनि अरुणस्य सूर्य्यस्यापत्यम् इञ्। ७अरुणतनये अरुणसुतशब्दोक्ते यमादौ। अरुणस्यायमनुजातत्वात् इञ्। अरुणानुजे विनतायाः ८सुतभेदे। "तार्क्ष्यश्चारिष्टनेमिश्च गरुड़श्च महाबलः। अरुणश्चारुणिश्चैव विनतायाः सुताः स्मृताः" हरिवं०२२६ अ०"अरुणश्चारुणिश्चैव तस्य प्राङ्मुखयः स्थिताः" हरिवं० २६१अ०। अ रुणस्य गरुड़ाग्रजस्यापत्यम् इञ्। ९गरुड़ाग्रजस्यापत्ये पुंस्त्री। स्त्रियां ङीप्।

आरुणिन् पु० ब०व० आरुणिना वैशम्पायनान्तेवासिना प्रोक्तमधीयते णिनि। वैशम्पायनान्तेवासिविशेषेण आरुणिना प्रोक्ताध्यायिषु।

आरुणेय पु०आरुणेरुद्दालस्यापत्यम् ढक्। उद्दालकपुत्रे श्वेतकेतौ। "उद्दालकोहारुणिः श्वेतकेतुं पुत्रमुवाचेति" छा० उ०"श्वेतकेतोरुद्दालकपुत्रत्वोक्तेरुद्दालत्वम्" "श्वेतकेतुरारुणेयः कं स्त्रिदेवापरीषु" "श्वेतकेतुरारुणेयोब्रह्मचारी" "श्वेतकेतुनारुणेयेन" इति च शत०ब्रा०।

आरुत न० आ+रु-भावे क्त। आरावे "शकृन्नं वायसारुतम्" शकुनशा०। कर्त्तरि क्त। २आरावयुक्ते त्रि०।

आरुद्ध त्रि०आ+रुध-क्त। प्रतिरुद्धे निरुद्धे वादिना ऋतगति प्रतिरोधे प्रतिवादिनि।

आरुरुक्षु त्रि० आरोढुमिच्छति आ+रुह-सन्-उ। आरोढुमिच्छौ "आरुरुक्षोर्मुनेर्योगः कर्म्म कारणमुच्यते" गीता "कैलासगौरं वृषमारुरुक्षोः"। "समारुरुक्षुर्दिवमायुषः क्षये" इति च रघुः।

आरुषी स्त्री मनोः कन्याभेदे च्यवनपत्न्याम्। तत्कथा "तस्मिन्नियुक्ते विधिना योगक्षेमाय भार्गवे। अन्यसत्पादयामास पुत्रं भृगुरनिन्दितम्। च्यवनं दीप्ततपसं धर्मात्मानं यशस्विनम्। यः सरोषाच्च्यवनाद्गर्भान्नातुर्मोचाय भारत!। आरुषी तु मनोः कन्या तस्य पत्नी मनीषिणः। और्व्वस्तस्यां समभवद्दूरं भित्त्वा महायशाः" भा०आ०९९अ०।

आरुषीय त्रि० अरुषः अपत्यं अरुष सन्निकृष्टदेशादिः छ वा०ढक्। अरुषसन्निकृष्टदेशादौ।

आरूढ त्रि० आ+रुह-क्त। आरोहणकर्त्तरि।

आरू पु० ऋ-ऊ-क्विप्। १पिङ्गलवर्णे २तद्युक्ते त्रि०। आरुशब्दार्थे ३कर्कटशृङ्गरादौ च। ततः संज्ञायां कन्। (आड्) हिमाचलप्रसिद्धौषधीभेदे च।

आरूढ़ त्रि० आ+रुह-कर्त्तरि क्त। १आरोहणकर्त्तरि "आरूढो नैष्किं धर्मं यस्तु प्रच्यवते पुनः। प्रायश्चित्तं न पश्यामि येन शुध्येत् स आत्महा" स्मृतिः "योगारूढस्य तस्यैव शमः कारणमुच्यते" गीता। "अत्यारूढो हि नारीणामकालज्ञोमनोभवः" रघुः। २उत्पन्ने "तदागमारूढगुरुप्रहर्षः" रघुः "आरूढ उत्पन्नः" मल्लि०। कर्मणि क्त। यत्नारोहणं कृतं तस्मिन् ३कृतारोहणे प्रासादादौ "आरूढकविताशाखं वन्दे वाल्मीकिकोकिलम्" रामा० भावे क्त। ४आरोहणे न० "अत्यारूढं रिपोः सोढं चन्दनेनेव भोगिनः" रघुः।

आरूढ़ि स्त्री आ+रुह-क्तिन्। आरोहणे। "अत्यारूढिर्भवति महतामध्यपभ्रंशनिष्ठा" शुक्र०।

आरेक पु० आ+रिच-घञ्। १आकुञ्चने २अतिरेके च।

आरेचित त्रि० आ+रिच-णिच्-क्त। ईषदाकुञ्चिते "आरेचितभ्रूचतुरैः कटाक्षैः" कुमा०।

आरेवत पु० आरेवयति रेचयति मलं आ+रेव-णिच्-अतच्। अत्यन्तसारकफलके (सोन्दाल) १आरग्वधवृक्षे तस्य फलम् अण् तस्य णुक्। २तत्फले न०। तयोर्गुणादि आरग्वधशब्दे ७९४ पृष्ठे उक्तम्।

आरोग्य न० अरोगस्य भावः ष्यञ्। रोगशून्यत्वे "आरोग्यं वित्तसम्पत्तिर्गङ्गास्नानजं फलम्" प्रा०त०पु० वैद्यं क्षेमं समागम्य शूद्रमारोग्यमेव च" मनुः। "धर्मार्थकाममोक्षाणामारोग्यं साधनं यतः" वैद्यः।

आरोग्यव्रत न० आरोग्यार्थं व्रतम्। वराहपुराणोक्ते माघशुक्लसप्तमीमारभ्य वत्सरपर्य्यन्तं प्रतिशुक्लसप्तमीतिथि कर्त्तव्ये सूर्य्यव्रतभेदे। यथा "अतःपरं महाराज! व्रतमारोग्यसंज्ञितम्। सितायां माघमासस्य सप्तम्यां सप्तभोजितः" इत्युपक्रम्य "षष्ठ्याञ्चैव कृताहारः सप्तम्यामुपवासकृत्। अष्टम्याञ्चैव भुञ्जीत एष एव विधिर्मतः। अनेन वत्सरं पूर्णं विधिना योऽर्च्चयेद्रविम्। तस्यारोग्यं धनं धान्यमिह जन्मनि जायते" हेमा०ब्र० वरा०पु० इदमारोग्यसप्तमीव्रतत्वेन तत्रोक्तम्।

आरोग्यशाला स्त्री आरोग्यार्था शाला श०त०। चिकित्सार्थं राजादिकारिते गृहभेदे तत्करणप्रकारो वैद्यके उक्तो यथा "धर्मार्थकाममोक्षाणामारोग्यं साधनं यतः। अतस्तारोग्यदाता च नरो भवति सर्वदः। आरोग्यशालां कुर्वीत सद्भौषधपरिच्छदाम्। विदग्धवैद्यसंयुक्तां बहुव्रणरुजासंयुताम्। वैद्यस्तु शास्त्रवित् प्राज्ञो दृष्टौषधपराक्रमः। ओषधीमूलतत्त्वज्ञः सद्व्रणकालवित्। बलवीर्य्यविपाकज्ञः शालिमांसौषधीगणे। त्यागिवद्दीनां तद्वदनुकूलःप्रियंवदः"

आरोग्यस्नान न० आरोग्ये रोगशून्यत्वे तन्निमित्तकं स्नानम्। रोगनिर्मुक्तौ कर्त्तव्ये स्नाने तत्र नक्षत्रादिकमुक्तं ज्यो० त०। "आदित्येषु वरेषु शक्रदिनऋक्षत्रुद्युग्योश्चन्द्रेषु च क्रूराहव्यतिपातविष्टिदिवसैर्विन्दावशस्ते तथा। केन्द्रस्थेष्वशुभेषु कामतिथिषु स्नानं गदोन्मुक्तितः शस्तं तत्र न शोभनारविभुजङ्गचन्द्रसहसाराः" भुज०भीम० प०।

आरोधन न० आ+रुध-भावे ल्युट्। १अवरोधने २निरोधे "मध्व आरोधनं दिवः" ऋ०१,१०५,११। ल्यु। ३आरोधके त्रि० आरुध्यते कर्म्मणि ल्युट्। ४आरोधनीये। करणे ल्युट्। ५आरोधनसाधने "विदुष्टरोदिव आरोधनानि" ऋ०४,७,८। "आरोधनानि आरोधनसाधनानि" भा०।

आरोप पु० आ+रुह-णिच् करणे ल्युट्। अन्यपदार्थे अन्यधर्म्मस्यावभासरूपे मिथ्याज्ञाने। यस्मिन् यो धर्म्मो नास्ति तादृशधर्म्मस्य तत्र बुद्ध्या अर्पणाद्बुद्धेस्तथात्वम्। यथा शुक्तौ रजतत्वं तन्तावात्मत्वं वा नास्तिबुद्ध्या च तत्र तयोरवगाहनेन तद्धर्म्मस्यारोपणं क्रियते इति तस्या आरोपत्वम्। तथा च अतद्वति तत्प्रकारकज्ञानमारोपः इति नैयायिकाः सचाध्यास इति वेदान्तिनः अध्यासे कारणमेव तत्र कारणम् तच्च अध्यासशब्दे १४०पृष्ठे विवृतम् स च द्विविधः आहार्य्यः अनाहार्य्यश्च यत्र बाधनिश्चयसत्त्वेऽपि इच्छया तथात्वानम् स आहार्य्यः। स च इच्छाप्रयोज्य एव इतरबुद्धेर्बाधनिश्चयप्रतिबध्यत्वात्। स च प्रत्यक्षइव शाब्दोऽपि यथा सुखं चन्द्रं इति रूपकयुक्तवाक्यजबोधः तत्र हि सुखे चन्द्रत्वाभावनिश्चयेऽपि चन्द्राभेदेन सुखस्य बोधनादाहार्य्यत्वम्।

"परोक्षज्ञानमनाहार्यं निश्चयवेति सिद्धान्ते" इति प्रवादस्तु शाब्दबोधातिरिक्तपरः । एतदभिप्रायेणैव "रूपकं रूपितारोपादित्यादिकं रूपकलक्षणम्" "सारोपाद्यकलक्षणा-भेदकथनञ्च सा०दर्पणोक्तं वेदितव्यम् यथा । "विषयस्या-निगीर्णस्यान्यतादात्म्यप्रतीतिरूपः सारोपा स्यात्" इति सा०द० । "विषयस्यारोप्यस्य अनिगीर्णस्य स्फुटतया प्रतिभासमानस्यान्यतादात्म्यस्याभेदस्य प्रतीतिजनकत्वेन लक्षणायाः सारोपात्वम् । "आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोपः इति"चिन्ता० । "एवं वस्तुन्य-वस्त्वारोप :इति"वेदान्तसारः ।

आरोपक पु० आ+रुह-णिच्-ण्वुल् । इत्यादीनां वाचके "ब्रह्मसंवेद्यकोदूतो इत्यारोपक एव च" मनुः ।

आरोपण पु० आ+रुह-णिच्-ल्युट् । १आरोपशब्दार्थे २आरोहणसम्पादने च । "आर्द्राजतारोपणमन्वभूताम्" कुमा० रघुव ।

आरोपित त्रि० आ+रुह-णिच्-क्त । यत्कारोहणं कारितं १ताद्रूप्ये पदार्थे । "आरोपितं वह गिरिश्रेन पत्यात्" "तं देशमारोपितपुष्पचापः" इति च कुमा० २आसक्तिते च । "आरोपितपर्याणञ्च त्वरितहरग-परिचारकोपनीतमिन्द्रायुधम्"काद० । [आरोप्ये वस्तुनि

आरोपणीय त्रि० आ+रुह-णिच्-अनीयर् । आरोपार्हे

आरोप्य त्रि० आ+रुह-णिच्-कर्मणि यत् । १आरोपणीये यथा सुखं चन्द्र इत्यादौ सुखे चन्द्रत्वमारोप्यम् । २अध्यास-विषये च इयांस्तु भेदः आरोप्यसन्निकृष्टस्थले अन्यथा-ख्यातिः यथा जवासन्निकृष्टे स्फटिकादौ लोहित्यस्य भ्रान्तिः तदसन्निकृष्टस्थले तु अध्यासः असत्ख्यातिरेव यथा इदं रजतमित्यादौ वेदान्तिनः । वे०प० विवरणं द्रष्टव्यम् । नैयायिकास्तु उभयत्रान्यथाख्यातिः ।

आरोह पु० आ+रुह-घञ् । १आक्रमणे २नीचस्थानादूर्द्ध-देशगमने ३अङ्कुरादिप्रादुर्भावे शब्दच० ४गजवाजिना सुपरिगमने ५दीर्घत्वे ६उच्चत्वे च ७नितम्बे । "वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी" इत्यमरः "सारमानवरारोहा" उद्भटः । "आरोहैर्निविड़ैरुच्चित-त्वबिम्बैः"माघः ।

आरोहक त्रि०आ+रुह-ण्वुल् । आरोहण कर्त्तरि ।

आरोहण न०आ+रुह-ल्युट् । १नीचस्थानादूर्द्धस्थानगमने "आरोहणार्थं नवयौवनेन कामस्य सोपानमिव प्रयुक्तम्" कुमा० २अङ्कुरादिप्रादुर्भावे च आरुह्यतेऽनेन करणे ल्युट् सोपाने च "आरोहणं स्यात् सोपानम्" अमरः ।

आरोहणीय त्रि० । आरोहणं प्रयोजनमस्य अनुप्र० छ । १आरोहणसाधने पदार्थे । आ+रुह-कर्मणि अनीयर् । आरोढुं योग्ये २इत्यादौ ।

आरोहवत् त्रि० आरोहोविशिष्टनितम्बस्थानमस्त्यस्य मतुप् पक्षे इनि । प्रशस्तनितम्बयुक्ते स्त्रियां ङीप् ।

आरोहिन् त्रि०आ+रुह-णिनि । १आरोहणकर्त्तरि नीचा-दूर्द्धस्थानगामिनि स्त्रियां ङीप् । सा च यड्वाख्यां १नक्षत्र दशाभेदे । सा च अवरोहिशब्दे ४४२पृष्ठे लक्षितलक्षणा । ग्रहविशेषाणामारोहिण्याः दशायाः फलमुक्तं सर्व्वा० चि० यथा ।

सूर्य्यस्य "आरोहिणी वासरनायकस्य दशा महत्त्वं कुरुते च सौख्यम् । परोपकारं सुतदारभूमिं गोवाजिभातङ्गऋषि-क्रियादीन्"।

चन्द्रस्य "आरोहिणी चन्द्रदशा प्रपन्ना स्त्रीपुत्रवित्ताम्बरसौख्य-कान्तिम् । करोति राज्यं सुखभोजनञ्च देवार्चनं भूसुर तर्पणञ्च"।

कुजस्य "आरोहिणी भूमिसुतस्य सौख्यं दशा तनोत्यत्र नरेशपूजाम् प्रधानतां धैर्य्यमनोभिलाषं भाग्योत्तरं गोगजवाजिसंघम्"

बुधस्य "आरोहिणी सौम्यदशा प्रपन्ना यज्ञोत्सवं गोद्यवाजि संघम् । मृद्वन्नभूषाम्बरपानलाभं वाणिज्यभूम्यर्थपरोपकारम्"

गुरोः"आरोहिणी देवगुरोर्महत्त्वं दशा प्रपन्ना कुरुतेऽर्थभूमिम् गानक्रियास्त्रीसुतराजपूजां स्वधैर्य्यतः प्राप्नुयाःप्रतापम्"।

शुक्रस्य "आरोहिणी शुक्रदशा प्रपन्ना धामाम्बरालङ्कृतिकान्ति-पूजाम् । प्रवृत्तिसिद्धिं स्वजनैर्विरोधं मातृर्दिनाथं पर-दारसङ्गम्"। कुरुते इत्यनुषङ्गः सर्व्वत्र ।

शनेः"आरोहिणी वासरनायकस्नोर्दशा विपाके नृपलब्धमान्यम् । वाणिज्यलाभं क्षितिभूमिलाभं गोवाजिलाभं सुतदारलाभम्"।

आर्कलूप पु० अर्कलूपस्य ऋषिभेदस्यापत्यम् विदा० अञ् । अर्कलूपापत्ये स्त्रियां ङीप् । ततोयूनि अपत्ये हरिता० फञ् । आर्कलूपायणः । तद्भेदेयुन्यपत्ये । [भेदेपत्ये ।

आर्कलूपि पुंस्त्री अर्कलूपस्यापत्यं बाह्वा० इञ् । अर्कलूप-

आर्कायण त्रि० अर्कस्य गोत्रम् हरिता० फञ् । अर्कस्य १गोत्रे । ततः चतुर्थ्यां अश्वा०फिञ् । आर्कायणिः तत्-सन्निकृष्टदेशादौ०त्रि० अर्कस्यायनाय सूर्य्यलोकस्य प्राप्तये हितम् अण् पूर्व्वपदादिति णत्वम् । सूर्य्यलोकगतिसाधने २यज्ञादौ । "आर्कायणैः षोड़शभिश्च मन्त्रैस्तां फलेनेह च नागतोऽस्मि" भा० आनु० १०४अ०।

आर्कि पु० अर्कस्यापत्यम् इञ्। अर्कपुत्रे १यमे २शनौ, ३वैवस्वतमनौ ४सुग्रीवे ५कर्णे च अर्कसुतशब्दे तत्सुतत्वकथा।

आर्क्षोद पु० ऋक्षोदः पर्व्वतोऽभिजनोऽस्य अण्। ऋक्षोद-पर्व्वतस्थाने पित्रादिक्रमेण वासिनि द्विजभेदे सि० कौ०।

आर्क्ष त्रि० ऋक्षस्येदम् अण्। नक्षत्रदिनादौ स्त्रियां ङीप्।

आर्क्ष्य त्रि० ऋक्षे भवः गर्गा० यञ्। नक्षत्रभवे स्त्रियान्तु लोहिता० ष्फः षित्वात् गौरा० ङीष्। आर्क्ष्यायणी

आर्गय(ण)न त्रि० ऋगयनस्य व्याख्यानोपन्थः तत्र भवो वा अण् गिरिनद्या० वा णत्वम्। १ऋगयनव्याख्याने ग्रन्थे २तत्रभवे च।

आर्गल क्ली०न० अर्गलमेव स्वार्थे अण् स्त्रीत्वे ङीप्। अर्गल शब्दार्थे हाररोधककाष्ठभेदे हिरूपकोषः। [शब्दच०।

आर्गवध पु० आरग्वधस्य+पृषो०। आरग्वधवृक्षे (सोन्दाल)

आर्घा स्त्री आ+अर्घ-अच्। पीतवर्णायां दीर्घशृङ्गायां षट्पदाभायां मधुमक्षिकायाम् राजनि० आर्घ्यशब्दे विवृतिः।

आर्घ्य न० आर्घया निर्वृत्तं यत्। १आर्घाख्यमक्षिका-निर्म्मादिते २जरत्कार्य्याश्रमसधूकवृक्षनिर्य्यासरूपे च मधुनि। तद्विवृतिः भाव० प्र० "मधूकवृक्षनिर्य्यासं जरत्-कार्य्याश्रमोद्भवाः। स्वन्त्यार्घ्यं तदाख्यातं श्वेतकं मालवे पुनः। तीक्ष्णतिक्तास्तु याः पीता मक्षिकाः षट्पदोपमाः। आर्घास्तास्तत्कृतं यत् स्यादार्घ्यमित्यपरे जगुः। आर्घ्यं मधुरतिवात्युष्णं कफपित्तहरं परम्। कषायकटुकं पाके तिक्तञ्च बलपुष्टिदम्"।

आर्च त्रि० अर्चाऽस्यास्य अङ्गार्चाभ्योयः" पा० ण। अर्चायुक्ते

आर्चभिन् पु० ब० व० ऋचाभेन वैशम्पायनान्तेवासिभेदेन प्रोक्त-मधीयते णिनि। ऋचाभेन प्रोक्ताध्यायिषु। "कार्त्त-कौजपादि० आर्चाभिनोमौद्गला इत्यत्र पूर्व्वपद-प्रकृतिस्वरत्वम्।

आर्चायण त्रि० ऋचिभवः नडा० फक्। ऋचिभवे सामादौ।

आर्चिक त्रि० ऋचि भवः ऋचो व्याख्यानो ग्रन्थो वा ठञ्। ऋचिभवे १सामभेदे २तदुग्रन्थभेदे च तत्र हि ऋचि योनौ तत्तत् साम गीतमिति तस्य तथात्वम् यथा आर्चिकः उत्तरार्चिकः एष च सामवेदग्रन्थभेदः। ३तदुव्याख्याने ग्रन्थे च।

आर्चीक त्रि० ऋचीके पर्व्वते भवः अण्। १ऋचीकपर्व्वतभवे स्वार्थे अण्। २तत्पर्व्वते च। स च पर्व्वतः पुष्करतीर्थ सन्निकटः यथोक्तं भा० व० १२५ अ०।

"पुष्करेषु महाराज! सर्व्वेषु च जलं स्पृश। स्वाध्यायमन्त्रा-णि च जपन् सिद्धिं प्राप्स्यसि भारत!। सन्धिर्द्वयोर्नरश्रेष्ठ! त्रेतायाः द्वापरस्य च। अयं हि उच्यते पार्थ! सर्व्वपाप प्रणाशनः। अत्रोपस्पृश्य चैव त्वं सर्व्वपापप्रणाशने। आर्चीकः पर्व्वतश्चैव निवासोऽत्र मनीषिणः। सदाफलः सदा-स्रोतो मरुतां स्थानमुत्तमम्। चैत्यार्चते बहुविधास्त्रिद-शानां युधिष्ठिर!। एतद्वृन्दमरुद्भीर्घमृषयः पर्य्युपासते। वैखानसा बालखिल्याः पावका वायुभोजनाः। ऋङ्गाणि तीणि पुण्यानि तीणि प्रस्रवणानि च। सर्व्वाण्येतानि परि-क्रम्य यथाकामनुपस्पृश। शान्तनुश्चात्र राजेन्द्रः शुन-कश्च नराधिपः। नरनारायणौ चोभौ स्थानं प्राप्ताः सना-तनम्। इह नित्यगया देवाः पितरश्च महर्षिभिः। आर्चीकपर्व्वते तेषुस्नान् यजस्व युधिष्ठिर!। इह ते वै चरन्तु प्राणान् ऋषयश्च विशाम्पते!। यमुना चात्रयस्रोताः कृष्णश्चेह तपोरतः। यमौ च भीमसेनश्च कृष्णा चामित्र कर्षण!। सर्व्वे चात्र गमिष्यामस्तयैव सह पाण्डव!। एतत् प्रस्रवणं पुण्यमिन्द्रस्य मनुजेश्वर!। यत्र धाता विधाता च वरुणश्चोर्द्ध्वमागताः। इह तेऽभ्यवसन् राजन्! त्रातारः परमर्षिणः। मैत्रावरुणमृजुबुद्धीनामयं गिरिवरः शुभः। एषा सा यमुना राजन्! महर्षिगणसेविता। नाना-यज्ञचिता राजन्! पुण्या पापभयापहा"

आर्जव न० ऋजोर्भावः अण्। १सरलतायां "दूरं यात्युदरञ्च रोमलतिका नेत्रार्जवं धावति" सा० द० २परप्रतारणाराहित्ये सारल्यं च दैहिकं मानसञ्च। तत्र दैहिकं कुटिलसंयोग-राहित्यम्। मानसञ्च बाह्याभ्यन्तरे विहितनिषिद्धयो रेकरूपप्रवृत्तिनिवृत्तिमत्त्वम् बाह्ये यथा प्रवृत्तिनिवृत्ती अन्तरेऽपि तथैव न पुनः अन्तरस्थं भावमप्रकाश्य बाह्ये अन्यथापादनम्। तदा स्वाधिगतार्थांगोपनेन यथाज्ञा-तार्थप्रकाशनञ्च मानसं सारल्यं वाचिकमार्जवमपि मनोधीनत्वात् मानसमेव आर्जवं च समचित्तत्वेन लक्षि-तम् आ० त० भारतवाक्येन। "क्षमा हन्तसहिष्णुत्व-मार्जवं समचित्तता"। आर्जवञ्च महत्त्वसम्पादकोगुण-विशेषः यथोक्तं भा० १ प्र० १६ अ० "सत्यं शौचं दया शान्तिस्त्यागः सन्तोषआर्जवम्। शमोदमस्तपः साम्यं तितिक्षोपरतिः श्रुतम्। ज्ञानं विरक्तिरैश्वर्य्यं शौर्य्यं तेजोबलं स्मृतिः। स्वातन्त्र्यं कौशलं कान्तिर्धैर्य्यं माहवमेव च। प्रागल्भ्यं प्रश्रयः शीलं सहोद्योजोबलं भगः। गाम्भीर्य्यं स्थैर्य्यमास्तिक्यं कीर्त्तिमानोऽनहङ्कृतिः। एते चान्ये च भगवन्नित्या यत्र महागुणाः। प्राधान्यमहत्त्वमिच्छद्भिः"

एतज्ज्ञानसाधनं यथोक्तं गीतायाम् "अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् । आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः । इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च । जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् । असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु । नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु । मयि चानन्ययोगेन भक्तिरव्यभिचारिणी । विविक्तदेशसेवित्वमरतिर्जनसंसदि । अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् । एतज्ज्ञानमिति प्रोक्तम्" ज्ञानं ज्ञायतेऽनेनेति व्युत्पत्तेर्ज्ञानसाधनमित्यर्थः स्वार्थे अण् । श्वरलेऽपि । "सर्वं जिह्मं मृत्युपदमार्जवं ब्रह्मणः पदम्""किं व्याजेनार्जवे जने"रामा०।

आर्जीक त्रि० ऋजीकस्येदम् अण् । ऋजीकदेशसम्बन्धिनि "सुषोमे गर्य्यावत्याजीके"ऋ० ८,७,२६ ।"ऋजीकोदेशभेदस्तत्सम्बन्धिनि" भा० ।

आर्ज्जुनायान पुंस्त्री० अर्ज्जुनस्य गोत्रापत्यम् अश्वा० फञ् । अर्ज्जुनगोत्रापत्ये स्त्रियां टाप् । तस्य विषयोदेशः । राजन्या० वुञ् । आर्ज्जुनायनकः । तद्विषये देशे ।

आर्ज्जुनायक त्रि० अर्ज्जुनये देशे भवः धूमा० वुञ् । अर्जुनायनाभिदेशभवे ।

आर्ज्जुनि पु० अर्ज्जुनस्यापत्यं वाह्वा० इञ् । अर्ज्जुनापत्ये अभिमन्यौ । तदुत्पत्तिकथा "ततः सुभद्रा सौभद्रं केशवस्य प्रिया स्वसा । जवन्तमिव पौलोमी ख्यातिमन्तमजीजनत् । दीर्घबाहुं महोरस्कं दृढभाजनमरिन्दमम् । सुभद्रा सुषुवे वीरमभिमन्युं नरर्षभम् । अभीच मन्युमांश्चैव ततस्तमरिमर्दनम् । अभिमन्युमिति प्राहुरार्ज्जुनिं पुरुषर्षभम्" भा० आ०प० २२१ अ० । स च वर्चोनामसोमपुत्रस्यावतारः यथोक्तं भा० आ० ६७अ० । "यस्तु वर्चा इति ख्यातः सोमपुत्रः प्रतापवान् । सोऽभिमन्युर्हतस्तीक्ष्णैरर्ज्जुनस्य सुतोऽभवत् । यस्यावतरणे राजन् ! सुरान् सोमोऽब्रवीदिदम् । नाहं दद्यामिमं पुत्रं मम प्राणैर्गरीयसम् । समयः क्रियतामेष न शक्यमतिवर्त्तितुम् । सुरकार्यं हि नः कार्यं मनुष्याणां क्षितौ वधः । तत्र यास्यत्ययं वर्चा न च स्थास्यति वै चिरम् । ऐन्द्रिर्वरस्तु भविता यस्य नारायणः सखा । सोऽर्ज्जुनेत्यभिविख्यातो पाण्डोः पुत्रः प्रतापवान् । तस्यायं भविता पुत्रो बालोभुवि महारथः । ततः षोडशवर्षाणि स्थास्यत्यमरसत्तमाः ! । अस्य षोडशवर्षस्य स संग्रामो भविष्यति । बलांश्च वः करिष्यति कर्म वीरनिसूदनम् । नरनारायणाभ्यां तु स संग्रामो विना कृतः । चक्रव्यूहं समास्थाय योधयिष्यन्ति वः सुराः ! । विसुखाञ्छात्रवान् सर्वान् कारयिष्यति मे सुतः । बालः प्रविश्य च व्यूहमभेद्यं विचरिष्यति । महारथानां वीराणां कदनञ्च करिष्यति । सर्वेषामेव शत्रूणां चतुर्थांशं नयिष्यति । दिनार्द्धेन महाबाहुः प्रेतराजपुरं प्रति । ततो महारथैर्वीरैः समेत्य बहुभिर्युधे । दिनक्षये महाबाहुमया भूयः समेष्यति । एकं वंशकरं पुत्रं वीरं वै जनयिष्यति । प्रनष्टं भारतं वंशं स पुनोधारयिष्यति । एतत् सोमवचः श्रुत्वा तथाऽस्त्विति दिवौकसः । प्रत्यूचुः सहिताः सर्वे तारापिपमपूजयन् । एवं ते कथितं राजंस्तव जन्म पितुः पितुः" अभिमन्युशब्देऽस्य युद्धचर्य्या २६५ पृष्ठे उक्ता ।

आर्ज्जुनेय पु० अर्ज्जुन्या अपत्यं ढक् । अर्ज्जुनीपुत्रे "कौत्से ऋषौ"अहं कुत्समार्ज्जुनेयं न्यृञ्जेऽहम्"ऋ०४,२६,१"आर्ज्जुनेयमर्ज्जुन्याः पुत्रं कुत्सम्" भा० । आर्जुनी च गाभीः कुत्सस्य गाभ्या प्रतिपालितत्वेन तत्पुत्रत्वात् तथात्वम् ।

आर्त्त त्रि०आ+ऋ–क्त । १पीडिते,२दुःखिते, ३व्यसनस्थे च । अप्राप्तलिङ्गसंशकस्यैव धातोर्दृढिं वदन् दुर्गादासः आर्त्तपदसिद्धिं कर्त्तुमशक्नुवन् प्रत्याख्येयः। आर्त्तस्वरः आर्तनादः इत्यादि ।"हेयोऽपि समतः शिष्टस्यार्त्तस्य यथौषधम्" "तुलेनार्त्तस्वरेणेव वेजिताः"। "बलमार्त्तभयोपशान्तये" "तदीयमाक्रन्दितमार्त्तसाधोः"।"राजापि यद्वियोगार्त्तः" "अभिषेदे निदाघार्त्ता"इति च रघुः।"न दुर्वहश्रोणिपयोधरार्त्ता" कुमा० "विदितवार्त्तावार्त्तौ" दश० अत्र विदितवार्त्तौ आर्त्तौ इत्येव च्छेदः साधुः तदुव्याख्यानेऽप्याभिर्यदन्यद्वाच्छेदमभिप्रेत्य व्याख्यातं न तत् साधु ।"नार्त्तोऽप्यपवदेद्धितान्"मनुः ।"सुखेनार्त्तेन वा दत्तं श्रावितं धर्मकारणात्" शु०त०ऋतिः "आर्त्तार्त्तेऽदिता क्षुधे प्रवासे मलिना क्षुधाः" शु०त० स्त्री० पु० "आर्त्तिनामोऽस्यस्य अच्"। ४विनाशिनि"अतोन्यदार्त्तम्" ईश०उ० । "अतएतस्माद् ब्रह्मणोऽनायाद्यतीतात्मस्वरूपाच्चित्सदाद्यद्वन्यदविद्याविषयमेषणालक्षणं वस्त्वन्तरम् तद् आर्त्तं विनाशि, आर्तिपरिष्टङ्गीतम्" शाङ्क०भा० ।

आर्त्तगल पु०आर्त्त इव गलति गल–अच् । नीलभिण्टाम्

आर्त्तपर्णि पु० ऋतपर्णस्यापत्यम् इञ् । ऋतपर्णनृपस्यापत्ये सुदासे सूर्य्यवंश्ये नृपभेदे।"भगीरथसुतो राजा श्रुत इत्यभिविश्रुतः। नाभागस्तु श्रुतस्यासीत् पुत्रः परमधार्मिकः । अम्बरीषस्तु नाभागिः सिन्धुद्वीपपिताऽभवत् । अयुतायुश्च दायादः सिन्धुद्वीपस्य वीर्य्यवान् । अयुतायुश्रुतादा-

सीदतपर्णो महायशाः । दिव्याच्छ्रुदयत्तोवै राजा नलसखो बली । ऋतपर्णस्य तस्यासीदार्त्तपर्णिमहीपतिः । सुदासस्तस्य तनयो राजा इन्द्रसखोऽभवत्" हरिवंशे १५ अ०

आर्त्तभाग पुं० स्त्री० ऋतभागस्य ऋषेर्गोत्रापत्यम् विदा० अञ् । ऋतभागर्षेर्गोत्रापत्ये । स्त्रियां ङीप् ।

आर्त्तव त्रि० ऋतोरस्य प्राप्नः अण् । ऋतुभवे १पुष्पादौ "आर्तवान्यप्रभुञ्जना पुष्पाणि च फलानि च" रामा० "स्रवमङ्गेषु समेदमार्त्तवम्" कुमा० स्त्रियां ङीप् । "अभिभूय विभूतिमार्त्तवीम्" रघुः । ऋतुर्मासद्वयात्मकः हेमन्तादिः कालः "ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोड़श स्मृताः" इति मनूक्तः स्त्रीणां मध्यस्थशोणितदर्शनयोग्यः षोड़श रात्रिकः कालश्च । स कालोयस्य प्राप्नः तादृशे स्त्रीणां २रजसि च । "नोपगच्छेत् प्रमत्तोऽपि स्त्रियमार्त्तवदर्शने" । तस्मात् युग्मासु पुत्रार्थी संविशेदार्त्तवे स्त्रियम्" मनुः । स्त्रीणामार्त्तवं (शोणितविशेषः) पुंसः शुक्रमिव मासेन रस पाकेन जायते यथोक्तं सुश्रुते । "एवं मासेन रसः शुक्रीभवति स्त्रीणामार्त्तवम्" । यथा च रसस्य पाकस्तथाऽस्मृक् शब्दे ४६२ पृष्ठे उक्तम् । बाल्येतस्य सत्त्वेऽपि बालस्य शुक्रप्रादुर्भावाभाववत् न तस्यामवस्थायामभिव्यक्तिर्यथोक्तं सुश्रुते "यथा हि पुष्पफलस्नेहगन्धेन शक्यमिहास्तीति वक्तुं नैव नास्तीत्यवधार्य्य सतां भावानामभिव्यक्तिरिति ज्ञात्वा केवलं सौक्ष्म्यात्राभिव्यज्यते स एव गन्धो विदलतपत्रकेसरैः कालान्तरेणाभिव्यक्तिं गच्छत्येवं बालानामपि वयःपरिणामात् शुक्रप्रादुर्भावो भवति रोमराज्यादयोऽप्यार्त्तवादयश्च विशेषा नारीणां रजसि चोपचीयमाने शनैः शनैः स्तनगर्भाशययोन्यभिवृद्धिः"

"तदभिव्यक्तिकालादिकं तदृग्यजुषे दम्पत्योरितिकर्त्तव्यतासहितम्" भाव० प्र० दर्शितं यथा ।

"द्वादशाद्वत्सरादूर्द्धमापञ्चाशत्समं स्त्रियः । मासि मासि भगद्वारा प्रकृत्यैवार्त्तवं स्रवेत् । आर्त्तवस्रावदिवसादृतुं षोड़श रात्रयः । गर्भग्रहणयोग्यस्तु सएव समयः स्मृतः । सर्वेषामेव वर्णानां स्त्रीणां सर्वादिसंमतः" । स एव पूर्व्वोक्तः समयः । अन्यान्तरे वर्णभेदात् विशेषः । तद्यथा "स्रावदिवसादूर्द्धं द्वादशरात्रावधिर्ब्राह्मण्याः दशरात्रावधिः क्षत्रियायाः । अष्टरात्रावधिर्वैश्यायाः षड्रात्रावधिः शूद्रायाः गर्भधारणशक्तिः" । अथ स्त्रीणां नियममाह "आर्त्तवस्रावदिवसात् त्र्यहं सा ब्रह्मचारिणी । वर्जयेत् दर्भशय्यायां पश्येदपि पतिं न च । करे शरावे पर्णे वा हविष्यं त्र्यहमाचरेत् । अस्नुपातं नखच्छेदमभ्यङ्गमनुलेपनम् । नेत्रयोरञ्जनं स्नानं दिवास्वापं प्रधावनम् । अत्युच्चशब्दहसनं जृम्भाभाषणम् । आयासं भूमिखननं प्रवातं च विवर्जयेत् । एतस्यानियमाकरणे दोषमाह । "अज्ञानाद्वा प्रमादाद्वा लौल्याद्वा दैवतश्च वा । सा चेत् कुर्य्यान्निषिद्धानि गर्भोदोषांस्तदाप्नुयात् । एतस्यारोदनाद्भर्त्ता भवेद्विद्धलोचनः । नखच्छेदेन कुनखी कुष्ठी स्यभ्यङ्गतो भवेत् । अनुलेपात्तथास्नानाद्दुःखशीलोऽञ्जनादृजक् । स्वापशीलो दिवास्वापात् चञ्चलःस्नात्रधावनात् । अत्युच्चशब्दश्रवणाद्बधिरः खलु जायते । तालुदन्तौष्ठजिह्वास्तु म्लानो हसनतो भवेत् । प्रलापी भूरिकथनादुन्मत्तस्तु परिश्रमात् । स्खलतिर्भूमिखननादुन्मत्तो वातसेवनात् । अथ रजस्वलाकृत्यम् "ततश्चतुर्थे दिवसे स्नाता सद्वसनादिभिः । भूषिता सुमनाःपश्येद्भर्त्तारं समलङ्कृतम् । पूर्व्वं पश्येदृतुस्नाता यादृशं नरमङ्गना । तादृशं जनयेत्पुत्रं ततः पश्येत्पतिं प्रियम् । प्रियमिति भर्त्तृसान्निध्ये पुत्रादिकमपि पश्येत् । चतुर्थदिवसेऽपि रजोनिवृत्तौ स्नी पत्या सङ्गच्छेत न तु रजोऽनिवृत्तौ यत आह । "प्रवहत्सलिले क्षिप्तं द्रव्यं गच्छत्यधो यथा । तथा वहति रक्ते तु क्षिप्तं वीर्य्यमधोव्रजेत् । अथ भर्तृकृत्यम् । अथ गर्भाधाने निषिद्धं विहितञ्च कालं तयोः फलञ्चाह । "आयुःक्षयभयाद्भर्त्ता प्रथमे दिवसे तथा । द्वितीयेऽपि दिने भर्त्ता त्यजेदृतुमतीं स्त्रियम् । तत्र यस्याहितो गर्भो जायमानो न जीवति । आहितो यस्तृतीयेऽह्नि स्वल्पायुर्विकलाङ्गकः । अतश्चतुर्थी षष्ठी स्यादष्टमी दशमी तथा । द्वादशी चापि या रात्रिस्तासां तां विधिना भजेत् । विधिना गर्भाधानविधिना । अत्रोत्तरोत्तरं विद्यादायुदारोग्यमेव च । प्रजाः सौभाग्यमैश्वर्य्यं बलं चाभिगमात् फलम् । युग्मायुग्मरात्रीणां फलमाह । "युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु" । तत्र दम्पत्योः संभोगे यादृक् पुमान् युक्तस्तादृगुच्यते "स्नातश्चन्दनलिप्ताङ्गः सुगन्धसुमनोऽन्वितः । भुक्तवान्सुवसनः सुवेषः समलङ्कृतः । ताम्बूलवदनस्तस्यामनुरक्तोऽधिकस्मरः, । पुत्रार्थी पुरुषो नारीमुपेयाच्छयने शुभे" । तत्रायोग्यं पुरुषमाह "अत्यशितोऽतिनिद्रितः क्षुधान् सद्यश्चाङ्गः पिपासितः । बालो वृद्धोऽन्यवेगार्त्तस्त्यजेद्रोगी च मैथुनम् । तत्र स्त्री यादृशी योग्या तादृग्युच्यते । "पुरुषस्य गुणैर्युक्ता विहितन्यूनभोजना । नारी ऋतुमती पुंसा सङ्गच्छेत सुतार्थिनी । तत्रायोग्यां स्त्रियमाह । "रजस्वला व्याधि-

ऋतौ विशेषाद्योनिरोगिणी । वयोऽधिका च निष्कामा मलिना गर्भिणी तथा । एतासां सङ्गमात् पुंसां वैगुण्यानि भवन्ति हि" तत्र रजस्वला दिनत्रयं यावदतौ निषिद्धा यत उक्तम् । "प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी । तृतीये रजकी पुंसां यथा वर्ज्या तथाङ्गना । व्याधितो वर्ज्या तत्र स्त्रीणां व्याधयः । प्रदरादयः तदुक्ता निषिद्धा तत्रापि विशेषाद्योनिरोगिणी" भावप्रकाशः।

आर्त्तवदोषाश्च रुचितसाः स्रुवते दर्शिता यथा ।

"आर्त्तवमपि त्रिभिर्दोषैः शोणितचतुर्थैः पृथग्द्वन्द्वैः समस्तैर्वोपसृष्टमबीजं भवति तदपि दोषवर्णवेदनादिभिर्विद्यात्रेयम् । तेषु कृष्णपर्यन्विपूतिपूयक्षीणमूलपुरीषप्रकाशमसाध्यं साध्यमन्यद्भवति । भवन्ति चात्र । तेष्वाद्यान् शुक्रदोषांस्त्रीन् स्नेहस्वेदादिभिर्जयेत् । क्रियाविशेषैर्मतिमांस्तथा चोत्तरवस्तिभिः । पाययेत नरं सर्पिर्भिषक् कृष्णपरेतसि । धातकीपुष्पखदिरदार्ड्यर्जुनसाधितम् । पाययेद्वा घृतं सर्पिः शालसारादिसाधितम्। ग्रन्थिभूते गठीसिद्धं पालाशे वापि भक्षयेत् । पद्मकवटादिभ्यां पूयप्रस्थे च साधितम् । प्राग्रुक्तं वक्ष्यते यच्च तत् कार्य्यं क्षीणरेतसि । विट्प्रभे पाययेत् सिद्धं चित्रकक्षीरद्विट्पुभिः । स्निग्धं वान्तं विरिक्तञ्च निरूढमनुवासितम् । योजयेच्छुक्रदोषार्त्तं सम्यगुत्तरवस्तिना । विधिस्तूत्तरवस्त्यन्तं कुर्यादार्त्तवशुद्धये । स्त्रीणां स्नेहादियुक्तानां चतस्रश्चार्त्तवार्त्तिषु । कुर्यात् कल्कान् पिचूंश्चापि पथ्यान्याचमनानि च । ग्रन्थिभूते पिबेत् पाठां त्रिफलां दन्तकाथि च । दुर्गन्धे पूयसङ्काशे मज्जतुल्ये तथार्त्तवे । पिबेद्वृश्चिवः काथञ्चन्दनकाथमेव च । शुक्रदोषहराणाञ्च यथास्वमवचारयेत् । दोषाणां शुद्धिकरणं शेषास्वप्यार्त्तवार्त्तिषु । अन्नं शालियवं मद्यं हितं मांसञ्च पित्तलम् । स्फटिकाभं द्रवं स्निग्धं मधुरं मधुगन्धि च । शुक्रमिच्छन्ति केचित्तु तैलक्षौद्रनिभन्तथा । यशासृक्प्रतिमं यत्तु यद्वा लाक्षारसोपमम् । तदार्त्तवं प्रशंसन्ति यद्वासो न विरञ्जयेत् । तदेवातिप्रसङ्गेन प्रदुष्टमनृतावपि । असृग्दरं विजानीयादतोऽन्यद्रक्तलक्षणात् । असृग्दरी भवेत् सर्वः साङ्गमर्दैः सवेदनः । तस्यातिदुष्टौ दौर्ब्बल्यं भ्रमो मूर्च्छा तमस्तृषा । दाहः प्रलापः पाण्डुत्वं तन्द्रा रोगाश्च वातजाः । तरुण्या स्नेहविन्यासस्तदुल्बोपद्रवं भिषक् । रक्तपित्तविधानेन यथावत्तमुपाचरेत् । दौर्ब्बल्यादतमार्गत्वादार्त्तवं नश्यति स्त्रियाः । तत्र मत्स्यकुलत्थाम्लतिलमाषसुरा हिताः । पाने मूलसुदञ्चित्र दधि शुक्रञ्च भोजने । क्षीरं प्रागीरितं रक्तं सलक्षणचिकित्सितम् । तथाश्रय विधातव्यं विधानं नष्टरक्तवत्" ।

इत्थं दोषापसारणेन शुद्धे आर्त्तवे भोजनादिनियमवत्यां दिवसविशेषे स्त्रिया सह संवेशादि कर्त्तव्यं यथोक्तं स्रुश्रुते । एवमदुष्टशुक्रः शुद्धार्त्तवा ऋतौ प्रथमदिनमारभ्यति ब्रह्मचारिणी दिवास्वप्राङ्गनास्नुपातस्नानानुलेपनाभ्यङ्गनखक्षेदनप्रधावनहसनकथनातिशब्दश्रवणावलेखनानिद्रायासान् परिहरेत् । किङ्कारणम्—दिवा स्वपन्त्याः स्वापशीलोऽङ्गनादन्यो रोदनाद्विक्लवहृदिः । स्नानानुलेपनाद्दुःखशीलस्त्वभ्यङ्गात् कुष्ठी नखापकर्त्तनात् कुनखी प्रधावनाच्छ्लो हसनाच्छ्यावदन्तौष्ठतालुजिह्वः प्रलापी चातिकथनादतिशब्दश्रवणाद्बधिरोऽवलेखनात् खलति र्भारुतायाससेवनादुन्मत्तो गर्भो भवतीत्येवमेतान् परिहरेत् । दर्भसंस्तरशायिनीं करतलशरावपर्णान्यतमभोजिनीं हविष्यं लाजांश्च भर्त्तुः संरक्षेत् । ततः शुद्धस्नातां चतुर्थे ऽह्नयहतवाससमलङ्कृतां क्षतमङ्गलस्वस्तिवाचनां भर्त्तारं दर्शयेत् । तत् कस्य हेतोः? । पूर्व्वं पश्येदृतुस्नाता यादृशं नरसङ्गना । तादृशं जनयेत् पुत्रं भर्त्तारं दर्शयेदतः । ततो विधानं पुत्रीयमुपाध्यायः समाचरेत् । कर्म्मान्ते च क्रमं स्नेनमारभेत विचक्षणः । ततोऽपराह्णे पुमान् मासं ब्रह्मचारी सर्पिः स्निग्धः सर्पिः क्षीराभ्यां शाल्योदनं भुक्त्वा मासं ब्रह्मचारिणीं तैलस्निग्धां तैलमाषोत्तराहारां नारीमुपेयाद्रात्रौ सामादिभिरभिविश्वास्य विकल्पयंश्चतुर्थ्यां षष्ठ्यामष्टम्यां दशम्यां चोपेयादिति पुत्रकामः । एषूत्तरोत्तरं विद्यादायुरारोग्यमेव च । प्रज्ञासौभाग्यमैश्वर्यं बलञ्च दिवसेषु वै । अतः परं पञ्चम्यां सप्तम्यां नवम्यामेकादश्यां स्त्रीकामः । त्रयोदशीप्रभृतयो निन्द्याः । तत्र प्रथमे दिवसे ऋतुमत्यां मैथुनगमनमनायुष्यं पुंसां भवति । यच्च तत्राधीयते गर्भः स प्रसवमानो विपद्यते । द्वितीयेऽप्येवं स्रुतिकाम्ये वा ह्रतीयेऽप्येवमस्य मूर्खाङ्गोऽल्पायुर्वा भवति चतुर्थे तु समपूर्णाङ्गो दीर्घायुश्च भवति । न च प्रवर्त्तमाने रक्ते बीजं प्रविष्टं सुखकरं भवति यथा नद्यां प्रतिस्रोतःस्थापि द्रव्यं प्रतिक्षिप्तं प्रतिनिवर्त्तते नोह्यं रुच्छति तद्वदेव द्रष्टव्यम् । तस्मात्त्रियमवतीं त्रिरात्रं परिहरेत् अतःपरमुपेयात्" ।

दिनविशेष आर्त्तवकालगमने पुत्रादिविशेषजननमुक्तम्" नि॰सि॰ व्यासेन "रात्रौ चतुर्थ्यां पुत्रःस्यादल्पायुर्वेन वर्जितः । पञ्चम्यां पुत्रिणी नारी षष्ठ्यां पुत्रस्तु मध्यमः ।

सप्तम्यां सप्रजा योषिदष्टम्यामीश्वरः पुमान् । नवम्यां सुभगा नारी दशम्यां प्रवरः सुतः । एकादश्यामधर्म्मा स्त्री द्वादश्यां पुरुषोत्तमः । त्रयोदश्यां सुता पापा वर्ष्मसङ्करकारिणी । धर्म्मज्ञश्च कृतज्ञश्च आत्मवेदी दृढव्रतः । प्रजायते चतुर्दश्यां, पञ्चदश्यां पतिव्रता । आयुषः सर्व्वभूतानां षोड़श्यां जायते पुमान्" । मनुवचने स्वाभाविक ऋतुतोः रोगादन्यत्र कालेऽप्यार्त्तवं भवति तेन तत्राशुद्धौ विशेषः नि० सि० व्यवस्थापितो यथा "प्रथमरजोदर्शनात् सप्तदशदिनपर्य्यन्तं पुनारजोदर्शने स्नानमात्रम्, अष्टादशे एकरात्रम्, एकोनविंशे ह्यहं, विंशतिप्रभृतिदिनेषु विरामशुचिर्भवति । "अर्ह्वं चतुर्दशदिनादशुचित्वं न विद्यते" इति वाक्यन्तु स्नानदिनावधिचतुर्दशदिनमध्ये पुनारजोदर्शनेऽशुचित्वाभावपरम्" "रोगेषु यत् रजः स्त्रीणामन्यत्र हि प्रवर्त्तते । नाशुचिस्तु भवेत्तेन यस्माद्दैवकारिकं मतमिति" वचनात्। रोगजे रजसि शुद्धावपि धर्माधिकारिता रजोनिवृत्तावेव । "साध्वाचारा न तावत् स्यात् स्नातापि स्त्री रजस्वला । यावत् प्रवर्त्तमानं हि रजोनैव निवर्त्तते इति" हेमा० आ० ख० शङ्खोक्तेः ।

आर्त्ति स्त्री आ+ऋ–क्तिन् । १पीड़ायाम् २मनोव्यथायाञ्च । "आर्त्तिं न पश्यसि पुरूरवसस्तदर्व्वाम्" विक्रमो० । "पार्श्विकश्चूतचौर्य्यार्त्तिप्रतिरूपकसाहसैः" नारदः । "यदि दीक्षितमार्त्तिर्विन्देत्" शत० ब्रा० । "न विद्यमानेष्वर्थेषु नास्त्यार्त्तिरपि यत्नतः" "नचार्त्तिमृच्छति क्षिप्रम्" इति च मनुः "दाहातिसारपित्तास्रमूर्च्छामद्यविषार्त्तिषु" सुश्रु० २विनाशे च ।

आर्त्नि(नी) स्त्री आ+ऋ–बा० नि आर्त्तभावश्च वा ङीप् । गतिकर्त्तृग्राम् । "संविदाने आर्त्नी इमे" ऋ० ६, ७५, ४ । "अत्रैव वोऽपिनह्याम्युभे आर्त्नी इव ज्यया" ऋ० १०, १६६, २।

आर्त्विज त्रि० ऋत्विज इदम् अण्। ऋत्विक्सम्बन्धिनि ।

आर्त्विजीन पु० ऋत्विजं तत्कर्म्मार्हति खञ् । स्वयं यजमाने" सि० कौ० । "दक्षिणादिष्टं कृतमार्त्विजीनैः" भट्टिः "वयं वा आर्त्विजीनाःस्मोवयं दक्षिणीयाम्" शत० ब्रा० ।

आर्त्विज्य न० ऋत्विजोभावः कर्म्म वा ष्यञ् । ऋत्विक्कर्म्मणि याजने "स मा सर्व्वैरार्त्विज्यैर्यृणीते" "सहोवाच भगवन्तं वा सर्व्वैरार्त्विज्यैः" इति च" ऋ० ७० ।

आर्थ त्रि० अर्थादागतः अण्। अर्थतः प्राप्ते वाक्यार्थमर्य्यादया प्राप्ते"स्त्रियां ङीप्। सा च अलङ्कारोक्तायामर्थसम्भवायां २व्यञ्जनायाम् । तल्लक्षणादि सा० द० । यथा एवं शाब्दीं व्यञ्जनामुक्त्वा आर्थीं व्यञ्जनामाह "वक्तृबोद्धव्यवाक्यानामन्यसन्निधिवाच्ययोः । प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च । वैशिष्ट्यादन्यमर्थं या बोधयेत्सार्थसम्भवा"। व्यञ्जनेति सम्बध्यते तत्र वक्तृवाक्यप्रस्तावदेशकालवैशिष्ट्ये यथा । "कालोमधुः कुसुमितश्च पुष्पधन्वा धीरावहन्ति रतिखेदहराः समीराः । केलीवनीयमपि वञ्जुलकुञ्जमञ्जुर्दूरे पतिः कथय किं करणीयमद्य" । अत्रैतं देशं प्रति शीघ्रं प्रच्छन्नकामुकस्त्वया प्रेष्यतामिति सखीं प्रति कयाचित् द्योत्यते । बोद्धव्यवैशिष्ट्ये यथा । "निःशेषच्युतचन्दनं स्तनतटं निर्म्मष्टरागोऽधरोनेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः । मिथ्यावादिनि ! दूति ! बान्धवजनस्याख्यातपीडागमे ! वापीं स्नातुमितोगतासि, न पुनस्तस्याधमस्यान्तिकम्" । अत्र तदन्तिकमेव गतासीति विपरीतलक्षणया लक्ष्यं तस्य च रन्तुमिति व्यङ्ग्यं प्रतिपाद्यदूतीवैशिष्ट्याद्बोध्यते । अन्यसन्निधिवैशिष्ट्ये यथा "उच्चं खिञ्जइ खिप्पन्दभिसिणीपत्तम्मि रेअइ बलाआ । खिम्मलमरगअभाअण–परिट्ठिआ संखसुत्ति व्व" । उच्चं बलाकाया निस्यन्दत्वेन विश्वस्तत्वं तेनास्य देशस्य विजनत्वमतः सङ्केतस्थानमेतदिति कयापि सन्निहितप्रच्छन्नकामुकं प्रत्युच्यते । अत्रैव स्थाननिर्ज्जनत्वरूपव्यङ्ग्यार्थवैशिष्ट्यं प्रयोजनम् । भिन्नकण्ठध्वनिर्घीरैः काकुरित्यभिधीयते । इत्युक्तप्रकारायाः काकोर्भेदाः आकारादिभ्योज्ञातव्याः । एतद्वैशिष्ट्ये यथा । "गुरुपरतन्त्रतया वत दूरतरं देशमुद्यतोगन्तुम् । अलिकुलकोकिलललिते नेष्यति सखि ! सुरभिसमयेऽसौ" । अत्र नेष्यति अपि तर्हि एष्यत्येवेति काक्वा व्यज्यते । चेष्टावैशिष्ट्ये यथा । "सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया । हसन्नेत्रार्पिता कुटं लीलापद्मं निमीलितम्" । अत्र सन्ध्यासङ्केतकाल इति पद्मनिमीलनादिचेष्टया कयाचित् द्योत्यते । एवं वक्त्रादीनां व्यस्तसमस्तानां वैशिष्ट्ये बोद्धव्यम् । त्रैविध्यादियमर्थानां प्रत्येकं त्रिविधा मता । अर्थानां वाच्यलक्ष्यव्यङ्ग्यत्वेन त्रिरूपतया सर्व्वा अपनन्तरोक्ताव्यञ्जनास्त्रिविधाः तत्र वाच्यार्थस्य व्यञ्जना यथा । कालोमधुरित्यादि । लक्ष्यार्थस्य यथा । निःशेषच्युतचन्दनमित्यादि । व्यङ्ग्यार्थस्य यथा उच्चं खिञ्जइत्यादि" ।

भाट्टमते २भावनाभेदे । भावना हि भावयितुर्व्यापारः सा च द्विविधा श्रौतो आर्थी च । तत्र प्रयोजनसाधनतया तदिच्छाविषयनिष्पादको व्यापारःआर्थी भावना सा चाख्यातेनोच्यते आख्यातसामान्यस्य व्यापारवाचित्वात् । सा चां-

शक्तयवती किं भावयेत्, केन भावयेत् कथं भावयेदित्याकाङ्क्षायोदयात्। तत्रोपक्षणीयमंशक्तयञ्च साध्यं साधनमितिकर्त्तव्यता चेति। तथा च किंभावयेदिति साध्याकाङ्क्षायां स्वर्गादिफलं साध्यत्वेनान्वेति, साधनाकाङ्क्षायां यागादिःसाधनत्वेन, इतिकर्त्तव्यताकाङ्क्षायां प्रयाजाद्यङ्गजातमितिकर्त्तव्यतात्वेन। तेन प्रायाजाद्यङ्गजातेतिकर्त्तव्यताकेन यागेन स्वर्गादिफलं साधयेदिति विधिवाक्यार्थो बोधः इति भाट्टा मन्यन्ते।

आर्थिक त्रि० अर्थं गृह्णाति ठक्। १अर्थग्राहके। अर्थचेह अभिधेयं प्रयोजनं धनञ्च। अर्थादागतः ठक्। २अर्थादागते वाक्यार्थमर्य्यादया प्राप्ते च। [ङीप्।

आर्द्र त्रि० आ+अर्द्–अच्। सम्यक्पीड़के स्त्रियां गौरा०

आ(अ)र्द्रकंसिक त्रि० अर्द्रकंसेन क्रीतम् ठक् "अर्द्रात् परिमाणस्येति" पा० उत्तरपदस्य वृद्धेः "पूर्व्वपदस्य चेति" च प्राप्तौ नातः परस्येति" पा० निषेधात् नोत्तरपदवृद्धिः "कंसाट्ठिठन्" पा० इति तु न प्रवर्त्तते समासे तदन्तविधिप्रतिषेधात्। अर्द्रकंसक्रीते। एवं आ(अ)र्द्रप्रस्थिकः। अर्द्रप्रस्थक्रीते आ(अ)र्द्रकौड़विकः आ(अ)र्द्रदौणिकः इत्यादौ अदन्तत्वाभावात् उत्तरवृद्धिः। अर्द्रकुड़वादिक्रीते त्रि०।

आर्द्रधातुक न० "आर्द्रधातुकं शेषः" पा० परिभाषिते तिङ्शिदङ्गीभिन्ने धात्वधिकारविहिते प्रत्ययभेदे "आर्द्रधातुकस्येड्वलादेः" "सार्व्वधातुकार्द्धधातुकयोः" इति च पा०।

आर्द्रपुर न० अर्द्र पुरस्य एकदेशित० स्वार्थे अण्। पुरस्य समानेऽर्द्धे प्रतिपूर्व्वस्य ततपुरुषे अव्वादि० नान्तोदात्तता।

आर्द्रराजिक त्रि० अर्द्रराजे भवः ठञ्। अर्द्रराजभवे।

आर्द्रवाहनिक त्रि० "अर्द्रवाहनेन जीवति वेतना० ठक्। अर्द्रवाहनेन जीविनि।

आर्द्रिक पुंस्त्री "वैश्यकन्यासुतत्पन्नो ब्राह्मणेन तु संस्कृतः। आर्द्रिकः स तु विज्ञेयोभोज्योविप्रैर्न संशयः" इति पराशरोक्ते १अम्बष्ठवर्णे स्त्रियां जातित्वात् ङीप्। अर्द्रं चेल मस्यार्द्रमर्हति ठक्। चेलमस्यार्द्रस्य वेतनरूपतया स्वामिसकाशात् याहके २क्षत्रकभेदे पु०। "आर्द्रिकः कुलमित्रं च गोपालोदासनापितौ। एते शूद्रेषु भोज्यान्नायस्वात्मानं निवेदयेदिति" मनुनाऽऽर्द्रिकस्य शूद्रत्वेन कीर्त्तनात् अम्बष्ठस्य च शूद्रभिन्नत्वेनास्य पराशरोक्तार्द्रिकाद्भिन्नत्वं प्रतीयते। एतदभिप्रायेणैव" मिता० धृता अर्द्रशैरिण्यादौ दर्शित याज्ञवल्क्यस्मृतिव्याख्याने क्षत्रियकन्यायस्यार्द्रकारिण एव शूद्रेषु भोज्यान्नतोक्ता।

आर्द्र त्रि० अर्द्–रक् दीर्घश्च। १क्लिन्ने २सरसे ३सजले वस्तुनि तद्भेदाश्च वैद्य० दर्शिताः। "आर्द्रं द्रव्यं द्विधा प्रोक्तं सरसं नीरसं तथा। सदुग्धं गुप्तरसकं द्विधा नीरसमुच्यते। वास्तूकं सार्षपं शाकं निर्गुण्डीरण्डमार्षकम्। धन्वयाद्यमिदं सर्व्वमार्द्रं सरसमुच्यते। वटाश्वत्थकरीराद्यमार्द्रं द्रव्यं तु नीरसम्। सदुग्धं तु द्विधा प्रोक्तं मृदु तीक्ष्णमिति क्रमात्। शातलाबब्बसीड़खण्डसौरिणाद्यास्तु तीक्ष्णकाः। दुग्धिकाक्षीरिण्याद्याश्च मृदुदुग्धाः प्रकीर्त्तिताः"। आर्द्राक्षतारोपणमन्त्रभूताम्" कुमा० रघु। "तेषां गुर्वीः स्वादु शीता पिप्पल्यार्द्रा कषायका" आर्द्रां कुसुम्भरी कुर्य्यात् स्वादुसौगन्ध्यहृद्यताम्" सुश्रु० "धूपोद्गमा त्वाजितमार्द्रभावम्" कुमा० "शैकाठिन्यशून्ये आनुगुण्ययुक्ते च "धनुर्भूतोऽप्यसौ दवार्द्रभावम्" रघुः। अश्विन्यवधिके राशिचक्रस्थे मिथुनराशिघटके ५घटे नक्षत्रे स्त्री न०। "कन्यायां क्षणपत्रे तु पूजयित्वार्द्रभे दिवा। नवम्यां बोधयेद्देवीं यथाविभव विस्तरैः" दु०त० लिङ्ग पु०। "दृष्टे मासमिते पक्षे नवम्यामार्द्रयोगतः" बोधनमन्त्रः। "आर्द्रादयादि विंशाख्यान् रविचारेण वर्षति" ज्यो० मृगशिरसोऽर्द्धं चार्द्रा पुनर्वसुतिपादं मिथुनम्" ज्यो० आर्द्रास्वरूपयोगतारादिकम् अस्मच्छब्दे ४६७ पृष्ठे उक्तम् अस्याधिष्ठाता शिवः।

आर्द्रक न० अर्द्यति रोगान् अर्द्–अन्तर्भूतण्यर्थे रक् वीर्घश्च संज्ञायां कन् आर्द्रायां भूमौ जातं वा वुन् आर्द्रयति जिह्वां आर्द्र+णिच्–क्वुन् वा। (आदा) मूलप्रधाने क्षुपभेदे आर्द्रिकाशब्द स्त्री। "आर्द्रिका भेदिनी गुर्व्वी तीक्ष्णोष्णा दीपनी च सा। कटुका मधुरा पाके रूक्षा वातकफापहा, ये गुणाः कथिताः शुण्ठ्यास्तेऽपि सन्त्यार्द्रकेऽखिलाः। भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणम्। अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनम्। कुष्ठे पाण्डुगदे कृच्छ्रे रक्तपित्ते कफज्वरे। दाहे निदाघे शरदि नैव पूजितमार्द्रकम्" भा० प्र०। "चक्षुष्यं रोचनं स्वर्य्यं विकाशि विशदं सरम्। सन्नाटोपानिलघ्नञ्च लवणार्द्रकभक्षणम्। गुड़ार्द्रकं वातहरं चक्षुष्यं पित्तनाशनम्। ज्वरघ्नं शीतलञ्चैव वर्च्चोभेदिकफापहम्। सूक्ष्मत्वाद्रहितमङ्कुरतः सत् शालितं विमलकैर्वृतोयैः। मिश्रितं लवणनिम्बपयोभिर्बालमार्द्रकसुपैति योग्यताम्। तैलाक्तशरीरजनिषिञ्चितपङ्कसङ्गिप्रस्यन्दमाननवनिम्बुरसप्रसक्तम्। स्वादूत्तरं शिशिरवासरभोजनेषु कस्तैति वक्त्रनयनं खलु शुक्लवेरम्"। दीपनं हृद्यं रुच्यं

लघु शाचनम्। रोचनं तर्पणं बल्यं चार्द्रकं परिकीर्त्तितम्। वातपित्तकफेभानां शरीरवनचारिणाम्। एक एव निहन्त्यस्ति लवणार्द्रककेशरी" वैद्य०।

आर्द्रपदी स्त्री आर्द्रौ पादौ यस्याः कुम्भपद्या० नि०पाक्षावः ङीप् च पदादेशः। आर्द्रचरणायां स्त्रियाम्।[राजनि०।

आर्द्रमाषा स्त्री० नित्यकर्म०। (माषाणो) माषपर्ण्यां

आर्द्रम् अव्य० आ+अर्द्र-बा० रक्त साक्षादादिगणपाठात् नि० मान्तत्वं वा। सरसत्वे। आर्द्रीकृत्य आर्द्रीकृत्वा।

आर्द्रशाक न० आर्द्रं शाकमस्य। आर्द्रके।

आर्द्रवृक्ष पु० कर्मधा०। सरसवृक्षे ततः उत्करा० चतुरर्थ्यां ञ। आर्द्रवृक्षीयः तद्वृक्षसन्निकृष्टदेशादौ त्रि०।

आर्द्रालुब्धक पु० आर्द्रानक्षत्रे तत्सन्निकृष्टस्थाने लुब्धकइव। केतुग्रहे हलायुधः।

आर्भव पु० ऋभुणा दृष्टं साम ऋभुर्देवतास्य वा अण्। तृतीयसवने गेये पञ्चदशस्तोत्रात्मके सप्तसामात्मके पवमानभेदे। "आग्नीगव-शब्दे ७२३ पृष्ठे विवृतमेतत्। "अथ तृतीयसवने आर्भवे पवमान उद्गातारमन्वारभमाणाः ऋभुरसि जगच्छन्दाः" शत०ब्रा०। "पञ्चदशन्दा आवाप आर्भवः पवमानः सप्त सामा" सा०सं० भा० धृता श्रुतिः।

आर्य्य पु० ऋ-ण्यत्। १स्वामिनि, २गुरौ, ३शुद्धे च। ४श्रेष्ठकुलोत्पन्ने ५पूज्ये, ६श्रेष्ठे, ७सद्वृत्ते, नाथोक्तौ ८मान्ये, ९उदारचरिते, १०शान्तचित्ते "कर्त्तव्यमाचरन् कार्य्यमकर्त्तव्यमनाचरन्। तिष्ठति प्रकृताचारे स वा आर्य्य इति स्मृतः" श्रुक्लक्षणे ११जने च त्रि०। "पतीहमार्य्यान् परिचर्य्य यासुषः" माघः। "त्यजेदेकात्मकारणं, पतिरार्य्य इष्टः" "वर्णापेतमविज्ञातं नरं कलुषयोनिजम्। आर्यरूपमिवानार्यं कर्म्मभिः स्वैर्विभावयेत्" "जातो नार्य्यमनार्य्यायामार्य्यादार्य्यो भवेद्गुणैः। जातोऽप्यनार्य्यादार्य्यायामनार्य्यइति निश्चयः"। "अनार्य्यमार्यकर्म्माणमार्यं चानार्यकर्म्मिणम्, । संप्रधार्य्या ब्रवीदेतौ न समौ नासमाविति" इति च मनुः।

आर्य्यत्वेन सम्भाषणे नाटके नियमविशेषाः सा०द० उक्ता यथा "राजन्नित्यधिपिर्वाच्यः सोऽपत्यप्रत्ययेन च। स्वेच्छया नामभिर्तिप्रैर्विप्र आर्य्येति चेतरैः" विप्रेतरैर्विप्रः आर्य्येति वाच्यः "वाच्यौ नटीसूत्रधारावार्य्यनाम्ना परस्परम्"। नटो सूत्रधारः आर्य्येति वाच्यः सूत्रधारेण च नटी आर्य्या इति वाच्या। "वयस्येत्युत्तमैर्वाच्योमध्यै रार्य्येति चाधमैः"। "आर्य्यचालचरितप्रस्तावनाडिण्डिम" इति वीरच०रामचरितवर्णने लक्षणोक्तिः। "वत्स! पुत्रक तातेति संज्ञागोत्रेण वा युतः। शिष्योऽनुजश्च वक्तव्योऽमात्य आर्य्येति चेतरैः" इतरैरमात्य आर्य्येति वक्तव्यः "वृत्तेन हि भवत्यार्यो न धनेन न विद्यया" भा० उ० ८६ अ० उक्तेः सदाचारेणैव नराणामार्य्यत्वम्। आर्य्याऽप्यस्वन्वतो तत्र व्यापारं कर्त्तुमर्हति" कुमा० १२प्राकृतभाषायां स्त्री "सखवाहूरुपज्जानां या लोके जातयो बहिः। म्लेच्छवाचश्चार्य्यवाचः सर्वे ते दस्यवः स्मृताः" मनुः। १२श्वशुरे पु०। आर्य्यपुत्रः पतिः "आर्य्यौ ब्राह्मणकुमारयोः" पा० उक्तेः कर्मधारये ब्राह्मणकुमारयोः परतः प्रकृतिस्वरः।

आर्य्यक त्रि०आर्य्य+स्वार्थे कन्। आर्य्यशब्दार्थे स्त्रियां टापि वा अत इत्त्वम् आर्य्यका—आर्यिका। संज्ञायां कन्। २पितामहे पु०। "बालां मामार्य्यकस्तुभ्यं क्रीड़नीं कन्दुकस्थिकाम्। अदात्तु कुन्तिभोजाय सखा सख्ये महात्मने" भा०उ०प०८६अ० तुभ्यमार्य्यकः तवार्य्यकः पितामह इत्यर्थः। कर्णं प्रति तत्पितृस्वसुः कुन्त्या वाक्यमिदम्।

आर्य्यगृह्य त्रि० आर्य्यस्य गृह्यः पक्ष्यः। आर्य्यपक्षीये। "तमार्य्यगृह्यं निर्गृह्यीतधेनुः" रघुः।

आर्य्यदेश पु० आर्य्याणां वासार्होदेशः। आर्य्यावर्त्तादौ देशे

आर्य्यधर्म पु० आर्य्यस्य धर्मः। सदाचारे

आर्य्यपथ पु० आर्य्याणां पन्थाः अच् समा०। सदाचारे आर्य्यमार्गादयोऽप्यत्र। [पुत्रे च।

आर्य्यपुत्र पु० आर्य्यस्य श्वशुरस्य पुत्रः। १भर्तरि २मान्यस्य

आर्य्यप्राय पु० आर्य्यः प्रायो बहुलोऽत्र। आर्य्यावर्त्तादौ देशे "जाङ्गलं सस्यसम्पन्नमार्य्यप्रायमनाविलम्। रम्यमाकरवत्तसामन्तं स्वाजीव्यं देशमावसेत्" मनुः।

आर्य्यभट्ट पु० ज्योतिषग्रन्थविशेषकारके विद्वद्भेदे सहि "प्रणिपत्यैकमनेकं सत्त्वां देवतां परं ब्रह्म। आर्य्यभट्टस्त्रीणि वदति गणितं कालक्रियां गोलम्" इत्युपक्रम्य गणितकालक्रियाभूगोलं निर्णीतवान्। भूगोलखगोलशब्दयोः तन्मतमुदाहरिष्यते। तस्य च जन्मकालः स्वग्रन्थेएव तेनोक्तः "षष्ट्यब्दानां षष्टिर्यदा व्यतीतास्त्रयश्च युगपादाः। अधिका विंशतिरब्दास्तदिह मम जन्मनोऽतीताः"। तेन कलेः ३६६० वर्षेषु गतेषु तस्य जन्म। तन्मतमुत्थाप्य च वि०गि० क्वचित् क्वचित् दूषितमिति तस्य भास्कराचार्यात् प्राचीनत्वम्। [पत्र विज्ञापयामि" प्रबो०।

आर्य्यमिश्र पु० कर्म०। गौरवान्विते "एवमार्य्यमिश्रान् प्रच्छि-

आर्य्यवृत्त न० आर्य्यस्य वृत्तम्। सदाचारे "सत्यधर्मार्य्यवृत्ते

च शौचे चैवारमेत् सदा" मनुः। आर्य्यं श्रेष्ठं वृत्तमस्य। २सदाचारयुते त्रि० "रक्षणादार्य्यवृत्तानां कण्टकानाञ्च शोधनात्" मनुः। [वैशेषिक। २आर्य्यलिङ्गधारिणि त्रि०

आर्य्यवेश पु० आर्य्यस्य वेशः। १साधूनां वेशे। आर्य्यस्येव

आर्य्यव्रत न० आर्य्यस्य व्रतं नियमः। आर्य्यस्य कर्त्तव्ये १नियमभेदे। आर्य्यस्येव व्रतमस्य। २श्रेष्ठव्रतधारिणि "आर्य्यव्रतश्च पाञ्चाल्यो न स राजा धनप्रियः" भा० आ० २० १अ०।

आर्य्यश्वेत पु० आर्य्यं श्रेष्ठं श्वेतं चरितं यस्य। श्रेष्ठचरिते ततः शिवादि० अण्। आर्य्यश्वेतस्यापत्ये पुंस्त्री स्त्रियां ङीप्।

आर्य्यहलम् अव्य० आर्य्यं हन्ति हन-ड तस्मिन् लीयते ली-वा० डस। बलात्कारे बलात्कारस्य आर्य्यहन्तरि समाश्रयनिवमात् तद्भावम् स्वरा० अव्ययत्वम्।

आर्य्या स्त्री ऋ-ण्यत्। पार्वत्याम् आर्य्यागतत्वम्। २श्रद्धां श्रेष्ठायां ३स्त्रियाञ्च ४मात्राछन्तभेदे "लक्ष्मैतत् सप्तगणा गोपेता नेह भवति विषमे जः। षष्ठोऽत्र नलघू वा प्रथमेऽर्द्धे नियतमार्य्यायाः। षष्ठे द्वितीयवलात् परके नृते सुखलाञ्च सयति पदनियमः। चरमेऽर्द्धे पञ्चमके तत्कादिह भवति षष्ठोऽः" वृत्त०र०उक्ते ५ छन्दोभेदे स्त्री। आचार्य्या नवविधा यथा "पथ्या विपुला चपला मुखचपला जघनचपला च। गीत्युपगीत्युद्गीतय आर्यागीतिश्च नवधा चार्य्या" इति। तासां लक्षणम् उत्तर०। "विषमेषु पादो दलयोराद्येषु दृश्यते यस्याः। पथ्येति १नाम तस्याः प्रकीर्त्तितं नागराजेन। उक्तङ्क्र गणचतुष्टयमादिमं प्रकलयोर्द्वयोर्भवति पादः। यस्यास्तां पिङ्गलनागो विपुलामिति २ समाख्याति। उभयार्द्धयोर्जकारौ द्वितीयतृतीयौ गमध्यगौ यस्याः। चपलेति ३नाम तस्याः प्रकीर्त्तितं नागराजेन। आद्यं दलं समस्तं भजेत लक्ष्म अपलागतं यस्याः। शेषे पूर्वजलक्ष्मा सुखचपला ४सोदिता मुनिना। प्राक्प्रतिपादितमर्द्धं प्रथमे प्रथमेतरे तु चपलायाः। लक्ष्मान्वेत सोक्ता विशुद्धधीभिर्जघनचपला ५सा। आर्या प्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः। दलयोः कृतवतिशोभां तां गीतिं गीतवान् भुजङ्गेशः। आर्याद्वितीयकेऽर्द्धे यद्वृत्तं लक्षणं तत् स्यात्। उभयोरपि दलयोरुपगीतिं तां मुनिर्भूते। आर्यागलद्वितयं व्यत्ययरचितं भवेद् यस्याः। सोद्गीतिः८ किल गदिता तद्दलभेदसंयुक्ता। आर्या पूर्व्यार्द्धं यदि गुरुणैकेनाधिकेन निधने युक्तम्। इतरत्तद्वद्विखिलं यदीयमुदितेयमार्यागीतिः" ६। "पादे द्वादश विषमे मात्राष्टादश द्वितीये हि। पञ्चदश चेत् तृतीये कथिता गाथा तथैवार्य्या" ग्रन्थान्तरे यथाकथञ्चिद्द्वादशाष्टादशाक्षरादिमात्रात्मकपादत्वोक्तावपि वृत्तरत्नाकरोक्तैर्गणनियमोऽस्त्येव सामान्यशास्त्रतोऽपवादशास्त्रस्य प्रबलत्वात्। तेन यथाकथञ्चित्तथामात्रानियमोऽनुचितएव। "शिष्यपरम्परयागतमीश्वरकृष्णेन चैतदार्य्याभिः। संक्षिप्तमार्य्यमतिना सम्यग्विज्ञाय सिद्धान्तम्" सां० का० "क्वचिदत्र भवेदार्या क्वचिद्गीत्यापवक्त्रके" सा० द० कथालक्षणम्। "आर्यापवक्त्रापवक्त्रार्याणां छन्दसा येन केनचित्" सा० द०। "अतिसुललितवर्णस्वरसंस्कारवत्या गिरा राजानस्तद्दिश्यार्यामिमां पपाठ" काद०। [भेदे आर्याशब्दे तल्लक्षणमुक्तम्।

आर्य्यागीति स्त्री आर्या गीतिरिव। उत्तर० उक्ते मात्राछन्त-

आर्य्यावर्त्त पु० आर्या आवर्त्तन्ते अत्र आ+वृत-आधारे घञ्। देशभेदे स च देशोमनुना दर्शितः। "आ समुद्रात्तु वै पूर्व्वादा समुद्राच्च पश्चिमात्। तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः" इति तयोः विन्ध्यहिमाचलयोः "आवर्त्तमिति यं प्राहुरार्यावर्तनिवासिनः" मनुः।

आर्य्याविलास पु० आर्याणां प्राकृतभाषायुतमात्राछन्तानां विलासो वाक्यम् यत्र। प्राकृतभाषया रचिते "भाषा विभाषानियमात् काव्यं सर्गसमुज्झितम्। एकार्थप्रवणैः पद्यैः सन्धिसामग्र्यवर्ज्जितमिति" सा० दर्पणोक्तलक्षणयुक्ते प्राकृतकाव्यभेदे। ईत०। आर्य्यायादुर्गायाविलासे च।

आर्ष त्रि० ऋषेरिदम् अण्। १ऋषिसम्बन्धिनि तत्कृतपुराणकाव्यादौ। "धर्म्मो यस्मिन् गङ्क्रः स्यादार्षं वा दुर्बलाक्षरम्। वेदात् स्मृत्र इवापेयात् स लोकादजरामरात्" भा० व० प० २१अ०। आर्षं मन्वादिमतं यस्मिन्गङ्क्रमित्यर्थः "अस्मिन्नार्षे पुनःसंज्ञा भवेदाख्यानसंज्ञकाः" सा० द०। "इत्यार्षे रामायणे" इत्येवं रामायणसर्गसमाप्तौ भूरिप्रयोगः। ऋषिणा जुष्टम्। २ऋषिसेविते वेदे पु०। "आर्षं धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना। यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः" मनुः।

ऋषिर्वेदस्तस्येदम् अण्। ३वैदिके। "सम्युद्यौ शाकल्यस्येतावनार्षे" पा० "अनार्षे आर्षदैविके" सि० कौ०। "आर्षं प्रमाणमृक्षस्य धर्म्मं न प्रतिपालयन्" भा० व० प० २१अ०।

ऋषेरयं वाचकः अण्। ५ऋष्यभिधायिनि "ऋष्यन्धकवृष्णिकुरुभ्यश्च" पा० (आर्षात्) "ऋष्यभिधायिनः" सि० कौ० संस्कारहीनत्वेऽपि ऋषिणा प्रयुक्तः अण्।

व्याकरणोक्तानुशासनसङ्कल्प ऋषिणा प्रयुक्ते असाधुन्यपि साधुत्वेनाभिमते ५ शब्दभेदे। आर्षः प्रयोगः। ऋषीणां समूहः प्रवरगणभेदः अण्। गोत्रप्रवर्त्तकमुनीनां ७व्यावर्त्तकप्रवर्षिसमूहे न०"अरोगिणीं भ्रातृमतोमसामानार्षगोत्रजाम्"या०। मिता० तु ऋषेरिदमार्षं नाम प्रवर इति व्याख्यातम् ऋषिर्वेदस्तत्र विहितः अण्। ७विवाहभेदे "यज्ञस्थायर्त्विजे देव आर्षं आदाय गोयुगम्। चतुर्ह्यृ प्रथमजः पुनात्युत्तरजश्च षट्" या० "अष्टाविमान् समासेन स्त्रीविवाहान् निबोधत। ब्राह्मोदैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः। गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमः स्मृतः" इत्युपक्रम्य "एकं गोमिथुनं द्वे वा वरादादाय धर्मतः। कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते" मनुस्मृतौ धर्म्म इत्युपादानात् कन्याग्रहणार्थं गोयुगपरिग्रहेऽपि न दोषः। अतएव मनुना तादृशस्य गोमिथुनपरिग्रहस्य स्वभोगसाधनत्वाभावेन शुल्कत्वमेव निराकृतम् "आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तदिति" "आर्षेऽजाः सुतस्त्रीन् त्रीन्" मनुः।

गोत्रभेदे प्रवरभेदाच्च विवादार्थं दर्शिता यथा। "अत्र गोत्रप्रवराणां स्वरूपं महाप्रवरपाठादवगन्तव्यम्। तत्र महान्तः प्रवरा एकद्वित्रिपञ्चार्षेया जमदग्न्याग्नेदेव ते च सप्तानां गोत्राणां गणश उच्यन्ते। तावतैवाभेप्सितसिद्धेः। यथा वत्सानां भार्गवच्यवनाप्नुवानौर्वजामदग्न्येति १ विदानां भार्गवच्यवनाप्नुवानौर्वदेति २। आर्ष्टिषेणानां भार्गवच्यवनाप्नुवानौर्वार्ष्टिषेणेति३। जामदग्न्यानां भार्गवच्यवनाप्नुवानौर्वजामदग्न्येति ४। एते समानप्रवराः। अर्षाधिकर्षितुल्यत्वात्। यास्कानां भार्गववीतहव्यसावेदसेति ५। मित्रयुवाणां भार्गववाध्र्यश्वदैवोदासेति६। वैण्यानां भार्गववैण्यपार्थेति७। एते भार्गवानुवृत्तावपि न मिथः समानप्रवराः भृगुं सङ्कसेति वचनात्। शुनकानां गौनकेति वा गार्त्समदेति वा। अत्र गोत्रप्रवरभेदोपयोगित्वेन पक्षे प्रवरैक्यादविवाहः। एते सप्त भृगवः। अथाङ्गिरसा गौतमा भारद्वाजाः शुद्धाश्चेति त्रिविधाः। तेषु गौतमास्तावत्। आयास्यानामाङ्गिरसायास्य गौतमेति १। शारद्वतानामाङ्गिरसशारद्वतगौतमेति२। कौमण्डकानामाङ्गिरसौदक्यकाक्षीवत गौतमकौमण्डेति३। दीर्घतमसामाङ्गिरसौदक्यकाक्षीवतगौतमदैर्घतमसेति४। कारेणुपालानामाङ्गिरस गौतमकारेणुपालेति ५। वामदेवानामाङ्गिरसगौतमवामदेवेति६। औशसानानामाङ्गिरसौशसनगौतमेति७। एते सप्त गौतमाङ्गिरसाः समानप्रवराः अर्षाधिकर्षितुल्यत्वात्। भारद्वाजानामाङ्गिरसबार्हस्पत्यभारद्वाजेति १। रौक्षायणानामाङ्गिरसबार्हस्पत्यभारद्वाजचान्दनभारत्वचसेति। गर्गाणामाङ्गिरसबार्हस्पत्यभारद्वाजगार्ग्यशैन्येति। आङ्गिरसगार्ग्यशैन्येति वा २। तय एते भरद्वाजाङ्गिरसाः समानप्रवराः अर्षाधिकर्षितुल्यत्वात्। गार्ग्याणां त्रयार्षेयपक्षेऽर्षाधिकर्षितुल्यत्वाभावेऽपि पक्षे समानप्रवरत्वाद्भारद्वाजैरविवाहः। विष्णुवृद्धानामाङ्गिरसपौरुकुत्सत्रासदस्न्येति १। काण्वानामाङ्गिरसाजमीढकाण्वेति २। हरितानामाङ्गिरसाम्बरीष यौवनाश्वेति ३। सांकृतीनामाङ्गिरससांकृत्यगौरवीतेति४। रथीतराणामाङ्गिरसवैरूपारवीतरथेति५। सुव्रतानामाङ्गिरस भार्म्याश्वमौद्गलेति ६। कपीनामाङ्गिरसामहय्यवार्ज्झेति७। एते सप्त शुद्धाङ्गिरसाः भिन्नप्रवराः आङ्गिरसानुवृत्तावपि आङ्गिरसश्चुक्रेति वचनात्। अत्रीणामात्रेयार्चनानसश्यावाश्वेति १। गविष्ठिराणामात्रेयार्चनानस गविष्ठिरेति२। वभ्रूदकानाम् आत्रेयार्चनानसवभ्रूदकेति२। सुव्रतानामात्रेयार्चनानसपौर्वतिथेति" ४। एते चत्वारः समानप्रवराःतुल्यर्षित्वात्। काश्यपानां काश्यपावत्सारनैध्रुवेति १। रेभाणां काश्यपावत्सारराभेति २। शाण्डिल्यानां काश्यपावत्सारशाण्डिल्येति३। काश्यपावत्सारवैदेति वा काश्यपावत्सारासितेति वा शाण्डिल्यासितदेवलेति वा इति चतुर्धा प्रवराः। लौगाक्षीणां काश्यपावत्सारवासिष्ठेति५। एते समानप्रवराः। काश्यपानुवृत्तेः चतुर्थप्रवरे काश्यपानुवृत्त्यभावेऽपि त्रिभिः प्रवरैः समानप्रवरत्वात् काश्यपैरविवाहः। लौगाक्षीणां वासिष्ठपदानुवृत्त्या द्व्यामुष्यायणत्वाद्वसिष्ठैरविवाहः। वसिष्ठानां वासिष्ठेति १। कुण्डिनानां वासिष्ठमैत्रावरुण कौण्डिन्येति २। उपमन्यूनां वासिष्ठेन्द्रप्रमदभारद्वसिति३। पराशराणां वसिष्ठशक्तिपाराशरेति ४। एते वासिष्ठाश्चत्वारः समानप्रवराः वसिष्ठानुवृत्तेः। कृषिकानां वैश्वामित्रदैवरातौदलेति १। रौहितानां वैश्वामित्राष्टकरौहितेति २। रौत्यकानां विश्वामित्ररौत्यकरैवतेति ३। विश्वामित्राणां वैश्वामित्रारसदेवतरसेति ४। सौङ्कायनानां विश्वामित्रमधुच्छन्दसौङ्केति५। धनञ्जयानां वैश्वामित्रमाधुच्छन्दसधनञ्जयेति ६। कतकानां वैश्वामित्रकात्याक्षीलेति ७। इन्द्रकौशिकानां विश्वामित्रेन्द्रकौशिकेति ८। अघमर्षणानां वैश्वामित्राघमर्षणकौशिकेति९। मौराणां

वैश्वामित्रपौराधेति१०। एतेषां दशानां कुशिकानां विश्वामित्रपदानुवृत्तेर्मिथः समानप्रवरत्वम्। अगस्त्यानामगस्त्यिदार्ढाच्युतेध्मवाहेति। दार्भवाहानामगस्त्यागस्त्यदार्ढाच्युतदार्भवाहेति१। साम्ववाहानामागस्त्यदार्ढाच्युतसाम्ववाहेति२। सोमवाहनानामागस्त्यदार्ढाच्युत सोमवाहेति ३। यज्ञवाहानामागस्त्यदार्ढाच्युतयज्ञवाहेति४। चतुर्णामगस्त्यानामागस्त्यपदानुवृत्त्या मिथः समानप्रवरत्वमिति प्रवरनिर्णयः। अत्र संग्रहश्लोकाः। "एकोऽपि च मुनिर्येषां प्रवरेष्वनुवर्त्तते। सगोत्रास्ते मिथोज्ञेया भृगुमङ्गिरसं विना। शुनकाः स्युर्दृत्समदैः काश्यपैः शाण्डिलाऽपि। भारद्वाजास्तथा गर्गाः पञ्चे तुल्यर्षिदर्शनात्"। वह्वा। "च्यवनो गौतमोऽगस्त्योभरद्वाजोऽत्रिकश्यपौ। विश्वामित्रोवसिष्ठश्च यज्ञप्रवरेष्वमी। वर्त्तन्ते ते सगोत्राः स्युः काश्यपैः शाण्डिलास्तथा। शुनकाःस्युर्दृत्समदैर्भारद्वाजैश्च गर्गकाः" इति। अत्र प्रमादेन समानगणगोत्रप्रवरकन्योद्वाहे ज्ञानोत्तरकालं मातृवदेनामिभाष्यात्। गर्भे चेदुत्पन्नः स न दुष्यति। काश्यपो भवति गोत्रेण। ज्ञात्वा गच्छन् गुरुतल्पगः। तदुत्पन्नश्चण्डालवद्भवति। ब्राह्मणि सगोत्रप्रवराय न देयमित्याहुः। प्रवरविज्ञानात् विहीनो भवति एतत्समस्तं संप्रधार्य निश्चितं दास्यामीति तेषामुक्त्वा ते गच्छन्ति"।

तत्रैव अथ मतान्तरम्। "सर्वे समानगोत्राःस्युरिति गार्गकारिः। कथं भ्रातृपुत्रौरसक्षेत्रजानि भवेयुः। कथं भ्रातृजा इत्यपि। नानागोत्राः स्युरिति शौनकः। तन्त्राणां व्यापित्वात् गृहपतिगोत्रान्वयाविशेषात्। तस्य राद्धिरनुराद्धिः। सर्वेषां प्रवरास्त्वावर्त्तेरन् आवापधर्मित्वात्। जामदग्न्या वत्सादयः पञ्चार्षेयाः। यथा भार्गवाप्रवानौर्वजामदग्न्येति। वत्सश्रीवत्सयोश्च तथैव। आर्ष्टिषेणानां भार्गवच्यवनाप्रवानौर्वार्ष्टिषेणेति। विदानां भार्गवच्यवनाप्रवानौर्ववैदेति। याज्ञवाधूलमौलमौकशार्कराक्षिसार्टिसावर्णिशालङ्कायनदैवल्यायनानां भार्गववैतहव्यसावेदेति। गैत्यानां भार्गवगैत्यपार्थेति। भित्र्यनां भार्गवदैवोदासवार्द्धुषेति। शुनकानां भार्गवशौनकगात्समदेति। गौतमानामाङ्गिरसायास्यगौतमेति उतथ्यानामाङ्गिरसौतथ्यगौतमेति। राङ्गणानामाङ्गिरसराङ्गणगौतमेति। सोमराजिकीनामाङ्गिरससौमराजिगौतमेति। वामदेवानामाङ्गिरसवामदेवगौतमेति। हरिदुक्थानामाङ्गिरसबार्हदुक्थगौतमेति। पार्षदश्वानामाङ्गिरसपार्षदश्ववैरूपेति। अष्टादंष्ट्रा इत्येके भृगवे अतीत्याङ्गिरसम्। अष्टादंष्ट्रापोरुकुत्सत्रासदस्वेति। कश्यानामाङ्गिरसबार्हस्पत्यभरद्वाजवान्दनमातृवदवसेति। कक्षीवतामाङ्गिरसगौतमौशिजकाक्षीवतेति। दीर्घतमसामाङ्गिरसौतथ्यदैर्घतमसेति। भारद्वाजाग्निवेश्यानामाङ्गिरसबार्हस्पत्यभारद्वाजेति। शङ्खलानामाङ्गिरसभार्म्यश्वमौद्गल्येति। तार्क्ष्यं वैके भृगवे अतीत्याङ्गिरसं तार्क्ष्यभार्म्यश्वमौद्गलेति। विष्णुवृद्धानामाङ्गिरसपौरुकुत्सत्रासदस्वेति। गर्गाणामाङ्गिरसबार्हस्पत्यभारद्वाजगर्गशैन्येति। आङ्गिरसगैन्यगार्गेति वा। हरितकृत्सपिङ्गयाङ्गदर्भमैत्रेयानाम् आङ्गिरसाम्बरीषयौवनाश्वेति सङ्कृतिपूतिमाधतक्षिशङ्खौमैत्रेयानाम् आङ्गिरसगौरुवीतसांकृत्येति। शाङ्खिगौरुवीत सांकृत्येति वा। काण्वानामाङ्गिरसाजमीढकाण्वेति। घोरमिश्रे वै भृगवे अतीत्याजमीढम्। आङ्गिरसघोरकाण्वेति। कपीनामाङ्गिरसामहत्यवार्क्ष्येति। अथ शौङ्गशैशिरयः। भरद्वाजाः स्युः शुङ्गाः कताः शैशिरयः। तेषामुभयतः प्रवरोक्ते एकमितरोद्वावितरः लौनितरः। न हि चतुर्णां प्रवरोऽस्ति न पञ्चानाम्। आङ्गिरसबार्हस्पत्यभारद्वाजेत्यादि। कपी प्रसिद्धावुदितावित्र हौ स्वतन्त्र एकस्वप्रवरोऽस्वतन्त्रः। तत्र स्वतन्त्रस्य कपेर्विवाहं मिथो भरभाजकुलेन चाहुः। अथालीषामालेयार्चनानसस्यावाश्वेति। गविष्ठिराणामालेयगाविष्ठिरपौर्वातिथेति। विकितगालवकालवमनुतन्तुकुशिकानां वैश्वामित्रदेवरातौदलेति। औमतकामकायनानां वैश्वामित्रदेवश्रवसदैवोदासेति। धनञ्जयानानां वैश्वामित्रमाधुच्छन्दसधानञ्जयेति। अजानां वैश्वामित्रमाधुच्छन्दसरौक्षिणेति। पूरणवारिधापयन्तानां वैश्वामित्रदेवरातपौराणेति। कतानां वैश्वामित्रकात्याक्षीलेति। अघमर्षणानां वैश्वामित्राघमर्षणकौशिकेति। रेणूनां वैश्वामित्रगाथिनरैणवेति। वेणूनां वैश्वामित्रगाथिनवैणवेति। शालङ्कायनशालाक्षलोहितात्रलोहितजङ्घूनां वैश्वामित्रमाधुच्छन्दसधानञ्जयेति शालङ्कायनकौशिकेति वा। काश्यपानां काश्यपावत्सारासितेति। निध्रुवाणां काश्यपावत्सारनैध्रुवेति। रेभाणां काश्यपावत्साररैभ्येति। शाण्डिलानां काश्यपावत्सारदैवलेति शाण्डिलासितदैवलेति वा। वासिष्ठवसिष्ठानां योऽन्यउपमन्युपराशरकुण्डिनेभ्यः। उपमन्यूनां वासिष्ठाभरद्वसिन्द्रप्रमदेति। पराशराणां वासिष्ठशक्तिपराशरेति। कुण्डिनानां वासिष्ठमैत्रावरुण-

कौण्डिन्येति। अगस्तीनामागस्त्यदार्ढच्युतेध्मवाहेति। सोमवाहानामागस्त्यदार्ढच्युतसौमवाहेति। पुरोहितप्रवरो राज्ञाम्। अथ यदि सार्ष्टिं प्रष्टीरन्। मानवेड़-पौरुरवःकुत्सेति यस्कादयः। तान्यदक्षिणानि। तेषामन्ते ज्योतिष्टोमः पृच्छगमनीयसहस्रदक्षिणः। अन्यो वा प्रजातदक्षिणः। दक्षिणावता पृष्टा गमनीयेरन्निति विज्ञायते। स एव हेतुः प्रकृतिभावे। "भृगूणां न विवाहोऽस्ति चतुर्णामादितोऽभिषः। गौनादवस्त्रयस्तेषां विवाहो मिथ इष्यते। यस्मात् वै गौतमादीनां विवाहोनेष्यते मिथः। दीर्घतमस्त्वौतथ्यः कक्षीवांश्चैव गौतमः। भरद्वाजाग्निवेश्यार्षाः शौङ्गाः कात्याश्च गैंगिराः। एते समानगोत्राः स्युर्गर्गानेके वदन्ति वै। पृषदश्वास्सहस्रा विष्णुवृद्धाः काण्वोऽगस्त्यो हारितः सङ्कृतिश्च। यस्कश्चैषां मिथ इष्टोविवाहः सर्वैरन्यैर्जामदग्न्यादिभिश्च। ह्यार्षेयाणां त्र्यार्षेयसन्निपाते न विवाहः। त्र्यार्षेयाणां पञ्चार्षेयसन्निपाते न विवाहः। "एते समानगोत्राः स्युर्विश्वामित्रोऽनुवर्त्तते। अत्रयश्च वसिष्ठाश्च कश्यपाश्च पृथक् पृथक्। जमदग्निर्गौतमश्च भरद्वाजोऽत्रयस्तथा। विश्वामित्रः कश्यपश्च वसिष्ठोऽगस्त्यवोऽष्टमाः"। सप्तानामृषीणामगस्त्यष्टमानां यदपत्यं तद्गोत्रमित्याचक्षते "एकएव ऋषिर्यावत् प्रवरेष्वनुवर्त्तते। तावत् समानगोत्राः स्युर्भृगुमङ्गिरसं विना। वसिष्ठौ द्वौ च वित्तेयौ ब्रह्मपुत्रोऽथ शापतः। मैत्रावरुणिरित्येव वासिष्ठोविप्रकान्तरात्। ब्रह्मात्मजाच्छक्तिपराशरव्यासशुकादयः। त्रेयो विवेकस्त्वनयोर्द्वितीयात् कुण्डिनादयः। अतएव भिन्नशरीरत्वात् भिन्नगोत्रप्रवरत्वाच्च वसिष्ठवासिष्ठगणयोर्विवाहः। जामदग्न्यविश्वामित्राणां देवरातवर्जं सर्वत्र विवाहः। अत्रिविश्वामित्राणां धनञ्जयवर्जं सर्वत्र विवाहः इति" प्रवरनिर्णयः।

अथ गौत्रप्रवराः तत्रैव "जामदग्न्यावीतहव्यागार्त्समदा वाध्यश्वावैन्या गौतमाः भरद्वाजाः कपयोहारीताः काण्वा विरूपा मौद्गला विष्णुवृद्धा आत्रेया विश्वामित्राः कश्यपा वासिष्ठा आगस्त्या इत्यष्टादश गणाः स्युः। आदितः पञ्चगणा भृगवो भवन्ति। भृगुजामदग्न्या वत्सश्चीवत्सच्यवनाप्नवानाः। और्वसावर्षिजोर्वनिलजावाल्मतिमाद्यावनवैरोहित्यावटमरुड्प्राचीनयोग्यार्ष्टिषेणानां भृगवो न मिथो विवाह्याः। वीतहव्यवाक्षाधूमसौनकौक्षावेदसा भृगवो न मिथो विवाह्याः। गार्त्समदगौनकौ भार्गवौ न मिथो विवाह्यौ। वाध्यश्वमित्रयवौ भार्गवौ न मिथो विवाह्यौ। वैन्यपार्थौ भार्गवौ न मिथो विवाह्यौ। आङ्गिरसावास्तौतथ्यौशिजकाक्षीवतवामदेवहरितकृष्णात्रेया गौतमा न मिथो विवाह्याः। आङ्गिरसबार्हस्पत्यभारद्वाजकुकुटाग्निवेश्यौज्जापनसंवेस्तम्बस्तम्बशुङ्गकतगैंगिरिपक्षिकच्छवान्दनमाढवचसखतन्त्रकपिगार्ग्यकपिगैन्यात्रेया भरद्वाजा न मिथो विवाह्याः। आङ्गिरसकाण्वमहायोगाजः कण्वगर्ग्या न मिथो विवाह्याः। आङ्गिरसमौद्गपिताम्बरीषयौवनाश्वमान्धातृशङ्खपिङ्गदर्भकुत्सहारिताः न मिथो विवाह्याः। आङ्गिरसाजमीढकण्वा न मिथो विवाह्याः। आङ्गिरसविरूपपृषदश्वरथीतराष्टादंष्ट्रा विरूपाः न मिथो विवाह्याः। आङ्गिरसमौद्गल्यब्रह्मतक्षवोसङ्कृता न मिथो विवाह्याः। आङ्गिरसविष्णुवृधन्त्रासदस्यवाघमर्षणभङ्गमङ्गणवादरायणौपमित्यौपगविसात्यकिसात्यकाम्यारुणितुन्द्याविष्णुवृधा न मिथो विवाह्याः आत्रेयार्चनानसख्यावाश्वगविष्टिरधनञ्जयातिथिसमङ्गलवामरथ्यबीजवाप्यसङ्कृतान्ना आत्रेया न मिथो विवाह्याः। विश्वामित्रदेवरातचिकितमनुदन्त्यौलकिवालकियश्वघ्नकोलूकलङ्कदग्निवभ्रुशालङ्किशालावायनशालङ्कायनकालव बौद्रश्रौमतकामकायनदैवश्रवसाज्यमाधुच्छन्दसधनञ्जयाष्टकलौहितपूरणपारिधाधार्षणकौशिककतरूतुपनसधूम्रजठरवाबलौकहव्याग्निदैव्यन्ना विश्वामित्रा न मिथो विवाह्याः। काश्यपावत्सारनैध्रुवरैभ्यरैभ्याखिल्यशाखिल्यदैवरातासितान्नाः काश्यपा न मिथो विवाह्याः। वसिष्ठशक्तिपराशरवासिष्ठा न मिथो विवाह्याः। आगस्त्यदार्ढच्युतेध्मवाहदार्भवाहसाम्भवाहसोमवाहयज्ञवाहान्ना अगस्त्यो न मिथो विवाह्याः"। एवं प्रवरज्ञानस्य विवाहोपयोगितोक्ता। अस्य होमविशेषोपयोगिताऽपि आर्षेयशब्दे वक्ष्यते। निर्णयसिन्धौ अत्र कश्चिद्विशेष उक्तो यथा। "अथ गोत्राणि प्रवराश्चोच्यन्ते। तत्र बौधायनः गोत्राणां तु सहस्राणि प्रयुतान्यर्बुदानि च जनपञ्चाग्रदेवैषां प्रवरा ऋषिदर्शनात्"।

"तत्र सप्त भृगवः वत्सा विदा आर्ष्टिषेणा यस्का मित्रयवावैन्याः शुनका इति ७। वत्सानां भार्गवच्यवनाप्रवानौर्वजामदग्न्येति१। भार्गवौर्वजामदग्न्येति वा भार्गवच्यवनाप्रवानेति वा। विदानां पञ्च भार्गवच्यवनाप्रवानोर्वत्रैतेति२। भार्गवौर्वजामदग्न्येति वा एतौ

द्वौ जामदग्न्यसंज्ञौ। आर्ष्टिषेणानाम् भार्गवच्यवनाप्रवानार्ष्टिषेणानूपेति। भार्गवार्ष्टिषेणानूपेति वा। एषान्त्रयाणां परस्परमविवाहः। वात्स्यानाम् भार्गवच्यवनाप्रवानेति वत्सपुरोधसयोः पञ्च भार्गवच्यवनाप्रवानवात्स्यपौरोधसेति। वैजवननिमतिथयोः पञ्च भार्गवच्यवनाप्रवानवैजवननैमतिथेति। एते त्रयः क्वचित् एषामपि पूर्वैरविवाहः। अत्र तत्तद्गणस्याक्षपयोऽन्यश्च विशेष स्तत्तते प्रवरदर्पणे ज्ञेयः। यस्कानाम् भार्गववैतहव्यसावेदसेति। मित्रयूनाम् भार्गववाध्यश्वदिवोदासेति। भार्गवच्यवनदिवोदासेति वा वाध्यश्वेत्येको वा। वैन्यानां भार्गववैन्यपार्थेति। एतएव ग्रहैताः। शुनकानां शुनकेति वा गार्त्समदेति वा भार्गवगार्त्समदेति द्वौ वा भार्गवशौनहोत्रगार्त्समदेति त्रयो वा। वेदविद्ज्योतिषां भार्गववेदवैद्यज्योतिषेति। शाठरभाठराणां भार्गवशाठरभाठरेति एतौ द्वौ क्वचित् यस्कादीनां स्वगणन्यक्षा सर्वैर्विवाहः। तदुक्तं स्कन्दपुराणे "यस्कामित्रयवावैन्याः शुनकाः प्रवरैर्युताः। स्वं स्वंक्षित्वा गणं सर्वे विवहेयुः परापरैरिति"।

"अथाङ्गिरसः ते गौतमाः भरद्वाजाः कैवलाङ्गिरसश्चेति त्रिधा। अत्र गोतमा दश आयास्याः भरद्वन्तः कौमण्डाद्यौर्धतमसः औशनसः कारेणुपालाः राङ्गणाः सोमराजकाः वामदेवाः हरिदुक्थाश्चेति तत्रायास्यानाम् आङ्गिरसायास्यगौतमेति भरद्वतानाम् आङ्गिरसगौतमभारद्वतेति। कौमण्डानां आङ्गिरसौतथ्यकाक्षीवदिति गौतमकौमाण्डेति वा। आङ्गिरसानामायास्यौशिजगौतमकाक्षीवदिति वा आङ्गिरसौतथ्यगौतमौशिजकाक्षीवदिति वा। आङ्गिरसौशिजकाक्षीवदिति त्रयो वा। दीर्घतमसाम् आङ्गिरसौतथ्यकाक्षीवतगौतमदैर्घतमसेति आङ्गिरसौतथ्यदैर्घतमसेति त्रयो वा। औशनसानाम् आङ्गिरसगौतमौशनसेति त्रयः। कारेणुपालानाम् आङ्गिरसगौतमकारेणुपालेति त्रयः राङ्गणानां आङ्गिरसराहूगणगौतमेति। सोमराजकानाम् आङ्गिरससोमराजकगौतमेति। वामदेवानाम् आङ्गिरसवामदेव्यगौतमेति हरिदुक्थानाम् आङ्गिरसबार्हदुक्थगौतमेति। आङ्गिरसवामदेवबार्हदुक्थेति वा। उतथ्यानामाङ्गिरसौतथ्यगौतमेति। शौशिजानामाङ्गिरसौशिजकाक्षीवदित्यापस्तम्बः। आङ्गिरसायास्यौशिजगौतमकाक्षीवदिति कात्यायनः। एतौ द्वौ क्वचित् रघुवाणाम्। आङ्गिरसराघुवन गौतमेति केचित्। तत्र मूलं चिन्त्यम्। एषां सर्वेषां गौतमानामविवाहः।

अथ भरद्वाजाः ते चत्वारः। भरद्वाजा गर्गाक्षाःकपय इति भरद्वाजानामाङ्गिरसबार्हस्पत्यभारद्वाजेति त्रयः। गर्गाणामाङ्गिरसबार्हस्पत्यभारद्वाजशैन्यगार्ग्येति पञ्च। आङ्गिरसशैन्यगार्ग्येति वा अन्वयोर्व्यत्ययो वा। भारद्वाजगार्ग्यशैन्येति वा। गर्गभेदानाम् आङ्गिरसतैत्तिरकापिभुवेति क्वचाणां कपिलानां चाङ्गिरसबार्हस्पत्यभरद्वाजवान्दनमात्स्यवचसेति पञ्च। आङ्गिरसवान्दनमात्स्यवचसेति त्रयो वा। कपिलानामाङ्गिरसामहोयवक्वत्रयसेति। आत्मभुवाम् आङ्गिरसभारद्वाजबार्हस्पत्यमन्त्रवरात्मभुवेति पञ्च। अयं क्वचित् भरद्वाजानां सर्वेषामविवाहः।

अथ कैवलाङ्गिरसः हरितानाम् आङ्गिरसाम्बरीषयौवनाश्वेति। आद्योभान्धाता वा। कृत्सानाम् आङ्गिरसमान्धात्रकौत्सेति। कण्वानामाङ्गिरसाजमीढकाण्वेति आङ्गिरसघोरकाण्वेति वा। रथीतराणामाङ्गिरसवैरूपरथीतरेति आङ्गिरसवैरूपपार्षदश्वेति वा। अष्टादंष्ट्रपार्षदश्ववैरूपेति वा। अन्वयोर्व्यत्ययो वा। सुहृत्तानामाङ्गिरसभार्म्याश्वमौद्गल्येति आद्यास्त्रयो वा आङ्गिरसतावियौद्गल्येति वा। विष्णुवृद्धानामाङ्गिरसपौरुकुत्सत्रासदस्वेति। एषां स्वगणं विहाय सर्वैर्विवाहो भवति। हरितकृत्सयोस्तु न भवति।

अथात्रेयः ते चत्वारः आत्रेयाः वाङ्गुतकाः गविष्ठिराः सुहृत्ता इति। आद्यानामात्रेयार्चनानसश्यावाश्वेति। वाङ्गुतकानाम् आत्रेयार्चनानसवाङ्गुतकेति। धनञ्जयानाम् आत्रेयार्चनानसधानञ्जयेति क्वचित्। गविष्ठिराणामात्रेयार्चनानसगविष्ठिरेति। आत्रेयगाविष्ठिरपौर्वातिथेति वा। सुहृत्तानामात्रेयार्चनानसपौर्वातिथेति। वामरथ्यसुमङ्गलवैजवापानामात्रेयार्चनानसतिथेति आत्रेयार्चनानसगाविष्ठिरेवि वा। सुमङ्गलानाम् अत्रिसुमङ्गलश्यावाश्वेति केचित्। अत्रेः पुत्रिकापुत्राणाम् आत्रेयवामरथ्यपौत्रिकेति। अत्रीणां सर्वेषामविवाहः।

अथ विश्वामित्राः ते दश कुशिकाः लौहिताः रौद्रकाः कामकायनाः कताः धनञ्जयाः अघमर्षणाः पूरणाः इन्द्रकौशिका इति कुशिकानां विश्वामित्रदेवरातौदलेति। लौहितानां विश्वामित्राष्टकलौहितेति। अन्वयोर्व्यत्ययो वा वैश्वामित्रमाधुच्छन्दसाष्टकेति वा। विश्वा-

मित्राष्टकेति द्वौ वा। रौच्चकाणां वैश्वामित्रगाथिनरैवणेति वैश्वामित्ररौच्चकरैवणेति वा। कामकायनानां वैश्वामित्रदेवश्रवसदैवतरसेति वा। अजानां वैश्वामित्रमाधुच्छन्दसाजेति वैश्वामित्राश्वरथवाधूलेति वा अघमर्षणानां वैश्वामित्राघमर्षणकौशिकेति। पूरणानां वैश्वामित्रपौरणेति द्वौ वा। वैश्वामित्रदेवरातपूरणेति वा इन्द्रकौशिकानां विश्वामित्रेन्द्रकौशिकेति द्वौ। धनञ्जयानां विश्वामित्रमाधुच्छन्दसधानञ्जयेति। वैश्वामित्रमाधुच्छन्दसाघमर्षणेति वा कतानां वैश्वामित्रकात्याक्षीलेति एते बौधायनोक्ताः। रौहिणानां वैश्वामित्रमाधुच्छन्दसरौहिणेति। रेणूनां वैश्वामित्रगाथिनरैणवेति। जन्हूनां वैश्वामित्रगालङ्कायनकौशिकेति। आश्वरथ्यानां वैश्वामित्राश्वरथ्यवाधूलेति। वेणूनां वैश्वामित्रगाथिनवैणवेति एते आश्वलायनामात्योक्ताः अन्यैस्वन्येऽपि षड्गणा उक्ताः तेऽन्यत्र तत्कृतौ ज्ञेयाः एषां विश्वामित्राणामविवाहः।

अथ कश्यपाः ते पञ्च निध्रुवाः कश्यपाः शण्डिलाः रेभाः कौशाच्चयश्च। निध्रुवाणां काश्यपावत्सारनैध्रुवेति। कश्यपानां काश्यपावत्सारासितेति। रेभाणां काश्यपावत्सारैभेति। शण्डिलानां काश्यपावत्सरशाण्डिल्येति। अन्यस्थाने देवलोवासितो वा। शाण्डिलासितदैवलेति वा। कश्यपासितदैवलेति वा। अन्ययोर्व्यत्ययो वा देवलासितेति द्वौ वा। कौशाच्चीन् वक्ष्यामः। एषां कश्यपानामविवाहः।

अथ वसिष्ठाः ते पञ्च वसिष्ठाः कुण्डिनाः उपमन्यवः पराशराः जातूकर्ण्याश्चेति। वासिष्ठेन्द्रप्रमदाभरद्वसिति वासिष्ठेत्येक वा। कुण्डिनानां वासिष्ठमैत्रावरुणकौण्डिन्येति। उपमन्यूनां वासिष्ठेन्द्रप्रमदाभरद्वसिति। वासिष्ठाभरद्वसिन्द्रप्रमदेति वा। आद्ययोर्व्यत्ययो वा पराशराणां वासिष्ठशाक्त्यपाराशर्येति। जातूकर्ण्यानां वासिष्ठानां सर्वेषामविवाहः। अन्यस्माऽत्रिभिश्च।

अथागस्त्याः ते चत्वारः दृढच्युताः साम्भवाहाः सोमवाहाः यज्ञवाहाश्चेति आद्यानाम् आगस्त्यदार्ढच्युतैध्मवाहेति आगस्त्येको वा। सोमवाहानाम् आगस्त्यदार्ढच्युतसोमवाहेति। सांभवाहानां साभवाहोऽन्त्यः आद्यौ पूर्वकावेव सोमवाहानां तदन्त्यश्चयः दर्भवाहानां तदन्त्यश्चयः।

अगस्त्यानामागस्त्यमाहेन्द्रमायोभुवेति पूर्णमासानाम् आगस्त्यपौर्णमासपारणेति। हिमोदकानाम् आगस्त्यहैमवर्चिहैमोदकेति। पाण्डिकानामागस्त्यपैनायक पाण्डिकेति। एते षट् क्वचित्। अगस्त्यानां सर्वेषामविवाहः।

अथ हिगोत्राः गौङ्गयैगिरीणाम् आङ्गिरसबार्हस्पत्यभारद्वाजकात्याक्षीलेति पञ्च कात्याक्षीलयोः स्थाने गौङ्गयैगिरी वा आङ्गिरसकात्याक्षीलेति त्रयो वा एषां भरद्वाजैर्विश्वामित्रैश्चाविवाहः। एवं कपिलानां कतानाञ्च संकृतिपूतिमाषादीनाम् आङ्गिरसगौरुवीतसांकृत्येति गालवगौरुवीतसांकृत्येति वा एषां स्वगणस्थैर्वसिष्ठैः गौङ्गयैगिरैर्लौगाक्षिभिश्चाविवाहः। कश्यपैरपीति प्रयोगपारिजाते। लौगाक्षीणां काश्यपावत्सारवासिष्ठेति काश्यपावत्सारासितेति वा एतेऽपि वसिष्ठा नक्तं कश्यपाः एषां वसिष्ठैः कश्यपैः संकृताद्यैश्चाविवाहः। देवरातस्य जामदग्न्यैर्विश्वामित्रैश्चाविवाह इति प्रयोगपारिजाते यदुक्तं बह्वृचसुतौ "यश्चैवाङ्गिरसः सनुमेयात्तव पुत्रताम्। आङ्गिरसोजनन्नाख्याजीगर्तिः श्रुतःकविरित्यङ्गिरसगणस्थत्वेन भार्गवजामदग्नत्वश्रुतेर्बाधात्। तेन प्रत्यक्षश्रुत्या हरिवंशादिस्मृतेश्च बलात् तेन द्वौ देवरातौ एक आङ्गिरसः श्रुत्युक्तः अन्यो भार्गवः तयोः कल्पभेदेनाङ्गिरसेन देवरातेन जामदग्न्यैर्भवत्येव विवाहः भार्गवेण तु नेति तत्त्वम्। धनञ्जयानां विश्वामित्रैरत्रिभिश्चाविवाहः जातूकर्ण्यानां वसिष्ठैरत्रिभिश्चाविवाहः एवं दत्तकौतत्रिमस्वयंदत्तपुत्रिकापुत्रादीनाम् उत्पादकपालकयोः पित्रोर्गोत्रप्रवरा वर्ज्या इति प्रवरमञ्जरी नारायणवृत्तिप्रयोगपारिजातादयः। अत्र सर्वत्रोपपत्तयः मूलं च तत्कृते प्रवरदर्पणे ज्ञेयमिति दिक्। क्षत्रियवैश्ययोस्तु पुरोहितगोत्रप्रवरावेवेति सर्वनिबन्धाः यद्यपि बह्वृचपरिशिष्टे कपिभरद्वाजयोर्विवाह उक्तस्तथापि "भरद्वाजाश्च कपयो गर्गाश्चौचथ्या इमे। चत्वारोऽपि भरद्वाजगोत्रत्वान्नान्वयुर्मिथः। कपिगर्गभरद्वाजामिश्रौचथ्या द्विजाः। नोद्वहेयुः सगोत्रत्वात् प्रवरैक्याच्च कुत्रचिदिति" स्मृत्यर्थसाराद्युक्तेरविवाह एव तयोरिति प्रवरमञ्जर्यां यद्यपीदमुक्तम् तथापि भृग्वङ्गिरोगणेषु तु भवत्येव यथा बह्वृचपरिशिष्टे बौधायनः "एक एवर्षिर्यावत्प्रवरेष्वनुवर्तते। तावत्प्रमाणगोत्रत्वश्रुते भृग्वङ्गिरोगणात्" माधवीये स्मृत्यन्तरं "पञ्चानां त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः। भृग्वङ्गिरोगणेष्वेवं शेषेष्वेकोऽपि वारयेदिति" एवं विश्वादर्शप्रयोगपारिजाताचारमाधवीय-

निर्णयसिन्धु प्रभृतिषु भृग्वङ्गिरोगणेषु पञ्च प्रवराणां मध्ये त्रिषु साम्ये । त्रिषु प्रवरेषु द्वयोः साम्येऽपि शेषगोत्राणामेकर्षिसाम्येऽपि समानप्रवरत्वादविवाह्यत्वं सिद्धमेतेन अनूनानतिरिक्तसंख्यार्षेयाकत्वेन समानार्षत्वं यत् रघुनन्दनेनोक्तं तन्निर्मूलत्वादग्राह्यं बौधायनादिस्मृति विरुद्धत्वात्तदर्शनविजृम्भितत्वाच्च एवं वत्ससावर्णिगोत्रप्रवरेषु आप्नुवत्प्रवरत्वकथनमपि प्रवरध्यावाज्ञानविलसितम् । अधिकमार्षेयशब्दे वक्ष्यते । ऋषेरयं अण् । ऋषिकृतग्रन्थे । वेदे यन्मन्त्रं येन ऋषिणा कल्पादौ स्मृतं तन्मन्त्रस्य तदार्षत्वम् । "आर्षं छन्दश्च दैवत्यं विनियोगस्तथैव च । वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः" योगिया० । [शब्दे २उक्तआर्षविवाहे च ।

आर्षधर्म्म पु० न० कर्म्म० । १मन्वादिप्रोक्ते धर्म्मे । आर्ष-

आर्षभ त्रि० ऋषभस्य इयमस्येदम् अण् । इयमसम्बन्धिनि । "यदन्यगोषु इषभो वत्सानां जनयेच्छतम् । गोमिनामेव तत् सर्व्वं गोघं स्कन्दितमार्षभम्" मनुः ऋषभदेव चरिते न० । [ऋषभदेहे ।

आर्षभि पु० ऋषभस्यापत्यम् इञ् । ऋषभदेवपुत्रे चक्रवर्त्तिनि

आर्षभी पु० ऋषभस्येयं प्रिया अण् ङीप् । १कपिकच्छाम् राजनि० । ऋषभस्येवम् तस्याकारत्वात् अण् ङीप् । वायुपुराणोक्ते मध्यमार्गस्थवीथीत्रयमध्येवीथीभेदे ऐरावतीशब्दे विवृतिः

आर्षभ्य पु० ऋषभस्य प्रकृतिः ञ्य । इषभतायोग्ये वत्से वत्सो हि वयःक्रमेण इषभतां प्राप्नोतीति तस्य इषभ प्रकृतित्वात् तथात्वम् [यक् । ऋषिधर्म्मे

आर्षिक्य न० ऋषिरेव ऋषिकः ऋषिकस्य भावः ष्यञ् ।

आर्षिषेण पु० स्त्री ऋषिषेणस्य गोत्रापत्यम् विदा० अञ् । ऋषिषेण ऋषेर्गोत्रापत्ये स्त्रियां ङीप् । ऋष्टिषेण इति वा गणे पाठे आर्ष्टिषेणस्तदपत्ये आर्षशब्दे प्रवरनिर्णये उदा० ।

आर्षेय न० ऋषीणां समूहः ढक् । ऋषिगणरूपे प्रवर भेदे तज्ज्ञानस्य विवाहोपयोगिता आर्षशब्दे उक्ता । होमभेदोपयोगिताऽपि प्रवराध्याये दर्शिता यथा । "प्रवरान् व्याख्यास्याम आर्षेयं इणीते बन्धोरेव नैत्यचो सन्नत्वा इति विज्ञायते तदुवै न मनुष्यैरार्षेयं इणीत ऋषिभिरेवार्षेयं इणीत इति विज्ञायत आर्षेयमन्वाचष्ट ऋषिणा हि देवाः पुरुषमनुबुध्यन्त " इत्युक्तम्य ।

"योवा अन्यःसन्नन्यस्यार्षेयं प्रइणीते स वा अस्यत ऋषिरिष्टं वीतं हुङ्कृत इति विज्ञायते । त्रीन् इणीते मन्त्रकृतो इणीते यथर्षिमन्त्रकृतो इणीत इति विज्ञायतेऽ यैकेषामेकं इणीते द्वौ इणीते त्रीन् इणीते न चतुरोइणीते न पञ्चातिप्रइणीत इति विज्ञायते । तत जर्हृर्नध्यर्युर्हणीते स्रुतरेवांचोहोतेति विज्ञायते । पुरोहितस्य प्रवरेण राजा प्रइणीत इति विज्ञायते । भृगूणामेवाग्रेव्याख्यास्यामो जामदग्न्यावत्यास्तेषां पञ्चार्षेयः प्रवरो-भार्गवच्यवनाप्नवानौर्वजामदग्न्येति जमदग्निवदूर्ववदाप्नवानवच्च्यवनवदुरुगुवदिति त्र्यार्षेयसहैके भार्गवौर्वजामदग्न्येति जमदग्निवदूर्ववदुरुगुवदित्येव वा विकृतः । सावर्णिजीवन्तिजाबालैतिशायनवैरोहित्यावटमख्डप्राचीनयोग्यानामथार्ष्टिषेणानां पञ्चार्षेयो भार्गवच्यवनाप्नवानार्ष्टिषेणानूपेति । अनूपवदृष्टिषेणवदाप्नवानवच्च्यवनवदुरुगुवदिति त्र्यार्षेयसहैके भार्गवार्ष्टिषेणानूपेति अनूपवदृष्टिषेणवदुरुगुवदिति । अथ वीतहव्या वाल्कवाधूलमौनमौकास्तेषां त्र्यार्षेयो भार्गववीतहव्यसावेदसेति सवेदोवदृवीतहव्यवदुरुगुवदिति । गार्त्समदाः शुनकास्तेषामेकार्षेयो गार्त्समदेति होता वदति रटत्समदवत् इत्यध्वर्युः अथ वाध्रयश्वाभित्वयवस्तेषामेकार्षेयो वाध्र्यश्वेति होता वदति वध्र्यश्ववदित्यध्वर्युः । अथ वैन्याः पार्थास्तेषां त्र्यार्षेयो भार्गववैन्यपार्थिव्येति । पृथिवीवहेनवदुरुगुवदिति । इमे भृगवोव्याख्याताः । अथातोऽङ्गिरसामायास्यगोतमास्तेषां त्र्यार्षेयआङ्गिरसायास्यगोतमेति । गोतमवदयास्यवदङ्गिरोवदिति । अथौ तथ्यागौतमास्तेषां त्र्यार्षेय आङ्गिरसौतथ्यगौतमेति गोतमवदुतथ्यवदङ्गिरोवदिति । अथौशिजागौतमास्तेषां त्र्यार्षेयः आङ्गिरसौशिजकाक्षीवदिति कक्षीवदुशिजवदङ्गिरोवदिति । अथ वामदेवा गौतमास्तेषां त्र्यार्षेयः आङ्गिरसवामदेववार्हदुक्थेति बृहदुक्थवद्वामदेववदङ्गिरोवदिति । अथ भरद्वाजानां त्र्यार्षेय आङ्गिरसबार्हस्पत्यभारद्वाजेति भरद्वाजवदुरुक्षयवदङ्गिरोवदित्येव वा विकृतः । कुक्कुटाग्निवेश्योज्जायनानां सर्वेषां च सम्बस्तम्बशब्दानामथ द्व्यामुष्यायणानां कुलानाम् । यथा शुक्रगैरियोः भारद्वाजाः शुक्राः कताः गैरियस्तेषां पञ्चार्षेयआङ्गिरसबार्हस्पत्यभारद्वाजकात्याक्षोवदिति अक्षीवत्कतवद्भरद्वाजवदुरुक्षयवदङ्गिरोवदिति त्र्यार्षेयसहैके आङ्गिरसकात्याक्षीवदिति अक्षीवत्कतवदङ्गिरोवदिति । अथ रुक्षाणां पञ्चार्षेय आङ्गिरसबार्हस्पत्यभारद्वाजवान्दनमाढवचसेति । माढवचोवद्वन्दनवदुभरद्वाजवदुरुक्षयवदङ्गिरोवदिति त्र्यार्षेयसहैके आङ्गिरसवान्दनमाढवचसेति माढवचोवद्वन्दनवदङ्गिरोवदिति । अथ

कपोनां त्रयार्षेय आङ्गिरसामहीयवौरुक्षयेति उरुक्षयवदमहीयुवदङ्गिरोवदिति। अथ गर्गाणां त्रयार्षेय आङ्गिरसगार्ग्यशैन्येति शिनिवद्गर्गवदङ्गिरोवदिति। भरद्वाजसहैकेऽङ्गिरसःस्थाने भरद्वाजगार्ग्यशैन्येति शिनिवद्गर्गवद्भरद्वाजवदिति। अथ हरितानां त्रयार्षेय आङ्गिरसाम्बरीषयौवनाश्वेति युवनाश्ववदम्बरीषवदङ्गिरोवदिति। मान्धातारसहैकेऽङ्गिरसःस्थाने मान्धातास्बरीषयौवनाश्वेति। युवनाश्ववदम्बरीषवन्मान्धातृवदिति। अथ कुत्सानां त्रयार्षेय आङ्गिरसमान्धातृकौत्सेति। कुत्सवन्मान्धातृवदङ्गिरोवदिति। अथागमीढाः काण्वास्तेषां त्रयार्षेय आङ्गिरसाजमीढकाण्वेति कण्ववदजमीढवदङ्गिरोवदिति। अथ विरूपा रथीतरास्तेषां त्रयार्षेय आङ्गिरसवैरूपपार्षदश्वेति पृषदश्ववद्विरूपवदङ्गिरोवदिति अष्टादंष्ट्रसहैकेऽङ्गिरसःस्थान आष्टादंष्ट्र वैरूपपार्षदश्वेति पृषदश्ववद्विरूपवदष्टादंष्ट्रवदिति। अथ सुहृदानां त्रयार्षेय आङ्गिरसभार्म्यश्वमौद्गलेति सुहृदवद्भर्म्यश्ववदङ्गिरोवदिति। दृढसहैकेऽङ्गिरसःस्थाने तार्क्ष्यभार्म्यश्वमौद्गल्येति सुहृदवद्भर्म्यश्ववत्तृदवदिति। अथ विष्णुवृद्धानां त्रयार्षेय आङ्गिरसपौरुकुत्सत्रासदस्वेति। त्रसदस्युवत्पुरुकुत्सवदङ्गिरोवदित्येष एव विज्ञातः। अघमर्षणमदृष्टमदृष्टवादरायणौपमिन्यौपगविसात्यकिसात्यकाम्यारुणिनितन्द्रीनामयात्रीणां त्रयार्षेयआत्रेयार्चनानसश्रावाश्वेति श्रावाश्ववदर्चनानसवदत्रिवदिति। अथ गविष्ठिराणां त्रयार्षेयआत्रेयार्चनानसगाविष्ठिरेति गविष्ठिरवदर्चनानसवदत्रिवदिति। अथातिथीनां त्रयार्षेय आत्रेयार्चनानसातिथेति अतिथिवदर्चनानसवदत्रिवदित्येष एव वा विज्ञातो वामरथ्यसुमङ्गलबीजवापो नाम्। अथ विश्वामित्राणां देवराताऽश्चिकितमनुतन्तौलकिबालखिल्ययज्ञवल्कोलूकछदग्निबभ्रुशालङ्किशालावतशालङ्कायनकालवासेषां त्रयार्षेयो वैश्वामित्रदेवरातौदलेति। उदलवद्देवरातवद्विश्वामित्रवदिति। अथ औमलकामकायनानां त्रयार्षेयो वैश्वामित्रदैवश्रवसदैवतरसेति देवतरसवद्देवश्रवोवद्विश्वामित्रवदिति। अथाजानां त्रयार्षेयो वैश्वामित्रमाधुच्छन्दसाज्येति। अजवन्मधुच्छन्दोवद्विश्वामित्रवदिति। अथ धानञ्जयानां त्रयार्षेयो वैश्वामित्रमाधुच्छन्दसधानञ्जयेति धनञ्जयवन्मधुच्छन्दोवद्विश्वामित्रवदिति। अथाष्टकालोहितास्तेषां त्रयार्षेयो वैश्वामित्राष्टकेति। अष्टकवद्विश्वामित्रवदिति। अथ पूरणपारिधायन्यास्तेषां त्रयार्षेयो वैश्वामित्रपौरणेति पूरणवद्विश्वामित्रवदिति। अथ कतानां त्रयार्षेयो वैश्वामित्र कात्यौलेतिव्यौलवत्कतवद्विश्वामित्रवदिति। अथाघमर्षणाः कुशिकास्तेषां त्रयार्षेयो वैश्वामित्राघमर्षणकौशिकेति कुशिकवदघमर्षणवद्विश्वामित्रवदिति। अथ काश्यपानां त्रयार्षेयः काश्यपावत्सारनैध्रुवेति निध्रुववदवत्सारवत्काश्यपवदिति। अथ रैभ्यास्तेषां त्रयार्षेयः काश्यपावत्सारैरभेति। रैभ्यवदवत्सारवत्काश्यपवदिति। अथ शाण्डिल्यानां त्र्यार्षेयो दैवलासितेति। असितवद्दैवलवदिति। त्रयार्षेयसहैके काश्यपदैवलासितेति असितवद्दैवलवत्काश्यपवदिति त्र्यार्षेयास्त्वेवं न्यायेनैकार्षेया वसिष्ठा अन्यत्र पराशरेभ्यो वासिष्ठेति होता वसिष्ठवदित्यध्वर्युरुस्यार्षेयसहैके वासिष्ठेन्द्रप्रमदाभरद्वसवेति अभरद्वसुवदिन्द्रप्रमदवद्वसिष्ठवदिति। अथ पराशराणां त्रयार्षेयो वासिष्ठशाक्त्यपाराशर्येति पराशरवच्छक्तिवद्वसिष्ठवदिति अथ कृष्णिनानां त्रयार्षेयो वासिष्ठमैत्रावरुणकौण्डिन्येति। कृष्णिनवन्मित्रावरुणवद्वसिष्ठवदिति। अथ संकृतिपूतिमाषाणां त्रयार्षेयः शाक्त्यसांकृत्यगौरुवीतेति। गुरुवीतवत्सांकृतिवच्छक्तिवदिति। अथागस्त्यानाम् एकार्षेय आगस्त्येति होताऽगस्त्यवदित्यध्वर्युरुस्यार्षेयसहैके आगस्त्यदार्ढाच्युतेध्मवाहेति दृढ्यवाहवद्दृढच्युतवदगस्तिवदिति। अथ चत्वियाणां यद्ग्रहसार्षं प्रहणीरत्नेष एवैषां प्रवरो मानवेडपौरुरवसेति पुरुरवोवदिडवनुमनुवदिति अथ वेषासहमन्त्रकृतो न स्युः पुरोहितप्रवरास्ते प्रहणीरन् अथ वेषां स्युः पुरोहितप्रवरास्ते पुरोहितप्रवरार्षं यास्तेषां न्यायेनैकार्षेया एव विज्ञा वात्स प्रेति होता। वत्सप्रीवदध्वर्युः। अथाप्रज्ञातबन्धुराचार्यासुध्यायमनु ब्रूवीताचार्यप्रवरं प्रहणीतास्तु ह तास्विन एकार्षेयं सार्ववर्णिकं समामानन्ति मानवेति होता मनुवदित्यध्वर्युर्मानव्यो हि प्रजा इति हि ब्राह्मणम्"। एवं प्रवरभेदं निरूप्य होमविशेषोपयोगिता तदुत्तरग्रन्थेनोक्ता। "आर्षेयाणि सहपतेः प्रवरित्वादीनां मुख्यानाम्" आश्व०श्रौ०"आर्षेयवरणे सहपतेः प्रथमं वरित्वा आत्रादीनां मुख्यानां प्रहणीते"इति वृत्तिः। ऋषिं कुटत्सऋषिमारभ्य अयं प्रवरः त्र्यार्षेयः कि मूलपुरुषावधिप्रवरर्षिभेदेनैवायं यथोक्तः "अथार्षेयं प्रहणीते ऋषिभ्यश्चैवैनमेतद्देवेभ्यश्च निवेदयत्ययं महावीर्योयो यज्ञं प्रापदिति। तस्मादार्षेयं प्रहणीते परस्तादर्वाक् प्रहणीते। परस्तादेवार्वाच्यः प्रजाः प्रजायन्ते ह्यायस्सत्तय उ चैवैतं निश्रुतरूढं हि पितैवार्ये ह्यापुत्रोऽथ पौत्रस्तस्मात्परस्तादर्वाक् प्रहणीते। स आर्षेयसङ्काश" शत०ब्रा०। "होतर्हु

प्रवरो विधीयते। तत्र धर्म्मविशेषमाह परस्यादिति तस्मिन्नार्षेयप्रवरे कूटस्थस्यर्षिमारभ्य तत्पुत्रपौत्रादि क्रमेणार्वाचीनं वरणं कर्त्तव्यम्। यथा आङ्गिरसबार्हस्पत्यभारद्वाजेत्यादि। तथा च ज्येष्ठस्य पतये एवैतं निर्ऋते अनेन प्रवरेण निवेदयति भा०"। "असमानार्षेयां कन्यां वरयेत्" विष्णुः। "प्रवरस्तु गोत्रप्रवर्त्तक मुनेर्व्यावर्त्तको मुनिगणः" इति माधवाचार्यः।

ऋषिरेव स्वार्थेऽण्। ३मन्त्रद्रष्टरि ऋषौ "प्रजापतिः प्रथमां चिति मपश्यत्" प्रजापतिरेव तस्या आर्षेयं, देवा द्वितीयां चिति मपश्यन्देवा एव तस्या आर्षेयम्, इन्द्राग्नी च विश्वकर्म्मा च तृतीयां चितिमपश्यंस्त एव तस्या आर्षेयम् ऋषय-श्चतुर्थीं चितिमपश्यन्नृषय एव तस्या आर्षेयं परमेष्ठी-पञ्चमीं चितिमपश्यत् परमेष्ठ्येव तस्या आर्षेयं स यो हैतदेवं चितीनामार्षेयं वेदार्षेयवत्यो हास्य वस्तु मत्यश्चि-तयो भवन्ति" इति शत०ब्रा०

आर्ष्टिषेण पु० १चन्द्रवंश्ये शबलपात्रजे नृपभेदे "शबल इडात्मजस्तस्य सुनहोत्रोमहायशाः। सुनहोत्रस्य दायादा स्त्रयः परमधार्म्मिकाः। काशः शलश्च द्वावेतौ तथा मत्-समदः प्रभुः। पुत्रोमत्तस्यमदस्याथ गुनकोयस्य गौनकः। ब्राह्मणाः क्षत्रियाश्चैव वैश्याःशूद्रास्तथैव च। शलात्मज-चार्ष्टिषेणस्तनयस्तस्य काश्यपः"। हरि०वं०२०१अ०। आर्ष्टिषेणोदिलीपश्च महात्मा चाणुशीनरः" स०भा०प०। २गोत्रप्रवरभेदे आर्षभेदे उदा०।

आर्ष्टिषेणाश्रम न० ६त०। तीर्थभेदे तत्र व०प० १५१अध्याये दर्शितं यथा। "अनेनैव पथा राजन्! प्रतिगच्छ यथागतम्। नरनारायणस्थानं बदरीत्यभिविश्रु-तम्। तस्मादुवासवि कौन्तेय! सिद्धचारणसेवितम्। बहुपुण्यफलं रम्यमाश्रमं ऋषिवर्णिनः। अतिक्रम्य च तं पार्थ! चार्ष्टिषेणाश्रमे वसेः"।

आर्हत त्रि० अर्हत इदम् अण्। १जैनसम्बन्धिनि। २तन्मते न० तन्मतञ्चार्हच्छब्दे ३८२ पृष्ठे दर्शितम्।

आर्हन्ती स्त्री न०अर्हतो भावः अञ् तुम् च ङित्त्वात् ङीप् यलोपः। योग्यतायाम्। "औत्वार्हन्तीचरणुर्ण मर्हद्भिरर्हन्निगम्" सि० कौ०। स्त्रीत्वाभावपक्षे। आर्हन्त्यमित्यपि तत्रार्थे न०।

आर्हायण स्त्री अर्हस्यापत्यम् अश्वा० फञ्। अर्हन्नाम-कर्षेर्गोत्रापत्ये। स्त्रियां ङीप्।

आर्हीय पु० अर्हमभिव्याप्य आर्हम् तत्र विहितः तस्येदम् वा दृङादित्वात् छ। "आर्हात् इत्यारभ्य "तदर्हति" इत्यन्त सूत्रजातेन तत्तदर्थेषु पाणिनिविहिते १प्रत्ययभेदे। २तद्वोध्ये तत्तदर्थे च। "आर्हीयविधर्थेषु" सि०कौ०

आल न० आलति भूषयति आ+अल-भूषादौ अच्। १हरितालेतद्धि वर्णोत्कर्षेण स्वयुक्तपदार्थं भूषयतीति तस्य तथात्वम्। "ततो हरिद्राष्टङ्कधूमरोध्रपत्राङ्गचूर्णैः समनः-शिलालैः"। "मनःशिलालमधुककुङ्कुमचन्दनपङ्कैः" "रसाञ्जनं चन्दनसैन्धवञ्च मनःशिलाले लशुनञ्च तुल्यम्" सुश्रु०। हरितालभेदगुणाद्युक्तम् भा० प्र०। "हरि-तालं तु तालं स्यादालं तालकमित्यपि। हरितालं द्विधा प्रोक्तं पत्राख्यं पिण्डसंज्ञितम्। तयोराद्यं गुणश्रेष्ठं ततोहीन-गुणं परम्। स्वर्णवर्णं गुरु स्निग्धं सपत्रं चाभ्रपत्रवत्। पत्राख्यं तालकं विद्याद् गुणाढ्यं तद्रसायनम्। निष्पत्रं पिण्डसदृशं खल्वसत्यं तथा गुरु। स्त्रीपुष्पहारकं खल्व गुणं तत् पिण्डतालकम्। हरितालं कटु स्निग्धं कषा-योष्णं हरेद्विषम्। कण्डूकुष्ठास्रदोषाभ्रकफपित्तक व्रणान्। हरति च हरितालं चारुतां देहजातां स्व-जति च बहुतापानङ्गसङ्कोचपीड़ाः। वितरति कफवातौ कुष्ठरोगं विदध्यादिदमगितमशुद्धं मारितं वाप्यसम्यक्"। आ+अल-पर्याप्तौ अच्। २अनल्पे ३श्रेष्ठे च त्रि०।

आलक्ति त्रि०आ+लक्ष-इन्। ज्ञातरि स्त्रियां गौरा०ङीष्।

आलक्षित त्रि०आ+लक्ष-क्त। १सम्यग्ज्ञाते, २लिङ्गेन ज्ञाते च

आलक्ष्य त्रि० आ+लक्ष-यत्। १सम्यग्ज्ञेये २लक्षणेन वेद्ये च "आलक्ष्यपारिप्लवसारसानि" रघुः। आलक्ष्याश्चैव पुरुषाः कुले जाता महागुणाः भा०व०२०७। ल्यप्। ३सम्यक् ज्ञात्वेत्यर्थे अव्य०।

आलगर्द्द पु० अलगर्द्द एव स्वार्थे अण्। जलसर्पे। [ङीष्

आलजि त्रि० आ+लज-इन्। आभाषके स्त्रियां गौरा०

आलब्ध त्रि० आ+लभ-क्त। १संस्पृष्टे २संयुक्ते "चन्दनेन समालब्धे कुङ्कुमेन विलिपिते" दुर्गाचण्डीमन्त्रः। ३स्पृष्टे ४हिंसिते च। [क्लिन्नत्वेऽपि गौरा० वा ङीष्।

आलभि स्त्री आ+लभ-क्लिन्। स्पर्शे २हिंसायां च

आलभन न० आ+लभ-ल्युट्। १हिंसायां २स्पर्शे। पक्षे तुम् ३अर्हने च। "तिला भक्षयितव्याश्च सदा त्वालम्भनञ्च तैः" भा०आ० प०६८अ०। तत्रार्थे "आलम्भनम्" कात्या०६,२,१८।

आलभनीय त्रि० आ+लभ-अनीयर्। १स्पृश्ये २हिंसनीये च तुमु। ३अर्हनीये "मङ्गलालम्भनीयानि प्राणनीया-

नुपस्करान्" । यागादौ आलम्भनीयः पशुः ।

आलभ्य त्रि० आ+लभ-यत् । १स्पृश्ये २हिंस्ये आ+लभ-ल्यप् । ३स्पृष्ट्वेत्यर्थे ४हिंसित्वेत्यर्थे च अव्य० ।

आलम्ब पु० आ+लबि-कर्म्मणि घञ् । आश्रयणीये, "निरालम्बोलम्बोदरजननि ! कं यामि शरणम्" जगन्नाथः "इह हि पततां नास्त्यालम्बो न चापि निवर्त्तनम्" शान्ति० श "रामे सलक्ष्मणे याते सीतां शून्ये यथासुखम् । निरालम्बां हरिष्यामि" रामा० । २वैशम्पायनान्तेवासिभेदे आरुणिशब्दे ८० २श्लो दृष्टे विवृतिः । भावे घञ् । ४आश्रयणे

आलम्बन न० आ+लबि-कर्म्मणि-ल्युट् । १आश्रयणीये "यस्मादेष विभावादिसमूहालम्बनात्मकः" सा० द० उक्ते २रसालम्बने नायकादौ । "आलम्बनं नायकादिस्तमालम्ब्य रसोद्गमात्" इति तस्यालम्बनशब्दार्थत्वेकारणमुक्तं तत्रैव । रसभेदे आलम्बनभेदाश्च "सा० द० उक्ता यथा शृङ्गारे "परोढां वर्जयित्वा तु वेश्यामज्ञातनुरागिणीम् । आलम्बनं नायिकाः स्युर्दक्षिणाद्याश्च नायकाः" । रौद्रे "आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम्" । हास्ये "विकृताकारवाक्चेष्टं यदालोक्य हसेज्जनः । तदत्रालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम्" । करुणे । "शोच्यमालम्बनं मतम्" । वीरे "आलम्बनविभावास्तु विजेतव्यादयोमताः" भयानके । "यस्मादुत्पद्यते भीतिस्तदेवालम्बनं मतम्" । जुगुप्सायाम् । "दुर्गन्धमांसपिशितत्वदेवालम्बनं मतम्" । विस्मये । "विस्मये च वस्तु लोकातिगमालम्बनं मतम्" शान्ते "अनित्यत्वादिनाऽशेषवस्तुनोऽसारता तु या । परमात्मस्वरूपं वा तस्यालम्बनमिष्यते" । ४बौद्धमतसिद्धे प्रत्ययभेदे च "चत्वारः प्रत्ययाः प्रसिद्धा आलम्बनसमनन्तरसहकार्य्यधिपतिरूपाः" इति विभज्य "तत्र ज्ञानपदवेदनीयस्य नीलाद्यवभासस्य चित्तस्य नीलोल्लेखिप्रत्ययात् नीलाकारता भवतीति" सर्वदर्श० । अधिकमालयविज्ञानशब्दे वक्ष्यते ।

आलम्बि स्त्री आलम्बस्य ऋषिभेदस्यापत्यम् इञ् । वैशम्पायनान्तेवासिन आलम्बर्षेरपत्ये स्त्रियां गौ० ङीष् । सा च शुक्लयजुर्वेदशाखान्तर्गतवंशमाता "आलम्बीपुत्रात् आलम्बीपुत्रः" शत० ब्रा० । इञन्तात् यूनि फञ् । आलम्बायनः तस्य युन्यपत्ये स्त्रियां ङीप् । सा च शुक्लयजुर्वेदवंशान्तर्गतर्षिभेदमाता । "आलम्बायनीपुत्रादालम्बायनीपुत्रः" शत० ब्रा०

आलम्बित त्रि० आ+लबि-क्त । १दृते २गृहीते च ।

आलम्बिन् त्रि० आ+लबि-णिनि । आश्रयिणि । "गजाजिनालम्बि दुकूलधारि वा" कुमा० "देवस्तनभुजालम्बी-जैत्रमध्यास्त राघवः" रघुः । "आलम्बिभिरलङ्घ्रिकिणां कलापैः" माघः स्त्रियां ङीप् । आलम्बेन वैशम्पायनान्तेवासिभेदेन प्रोक्तमधीयते णिनि । आलम्बप्रोक्ताध्यायिषु ब० व० ।

आलम्भ पु० आ+लभ-घञ् नुम् । संस्पर्शे । वर्ज्जवेदित्वमुक्ते "स्त्रीणाञ्च प्रेक्षणालम्भमुपघातं परस्य च" मनुः २हिंसने च । "अश्वालम्भं गवालम्भं संन्यासं पल पैतृकम्" आदिषु० । "ऋतजानामोषधीनां जातानाञ्च स्वयं वने । दधालम्भोऽनुगच्छेद्गां दिनमेकं पयोव्रतम्" मनुः" । "साक्षं प्रीतान्यमालम्भायानुमन्यते तयानुमतमालभते" शत० ब्रा० । "आलम्भसमये तस्मिन् गृहीतेषु पशुष्वथ । ऋषयो महाभाग ! वसुः प्रत्यान्विताः" भा० आ० ६१ अध्याये । [गौः" सि० कौ"

आलभ्य त्रि० आ+लभ-नुम् यत् । हिंस्ये । "आलभ्यो

आलय पु० आलीयतेऽस्मिन् आ+ली-आधारे अच् । गृहे २आधारे च "हिमालयोनाम नगाधिराजः" कुमा० "तत्रामरालयमरालमरालकेशी" नैष० । "न हि दुष्टात्मनामार्य्या निवसत्यालये चिरम्" रामा० "आलयं देवशत्रूणां सुघोरं खाण्डवं वनम्" भा० आ० २२३ अ० । भावे घञ् । ३संश्लेषे मर्य्यादायामव्ययी० । ४लयपर्य्यन्ते अव्य० । "पिबत भागवतं रसमालयम्" भाग० ।

आलयविज्ञान न० आलयं लयपर्य्यन्तस्थायि विज्ञानम् । बौद्धमतसिद्धे अहमास्पदे विज्ञानभेदे । "तत् स्यादालयविज्ञानं यद्वेदहमास्पदम् । तत् स्यात् प्रवृत्तिविज्ञानं यच्चीलादिकं सञ्चिनोति" तेषां मते हि विज्ञानातिरिक्तो बाह्यपदार्थो नास्ति, ज्ञानस्यैवाकारविशेषः अर्थोल्लेखी । आलयविज्ञानस्य सदातनत्वेऽपि कदाचित् नीलाद्युल्लेखिता तथा हि विवादाध्यासिताः प्रवृत्तिप्रत्ययाः सत्यमालयविज्ञाने कदाचिदेव नीलाद्युल्लेखनाः काचित्कत्वात् इति विज्ञानस्य कादाचित्कत्व सिद्धिः "तस्मादालयविज्ञानसन्तानातिरिक्तः कादाचित्कः प्रवृत्तिविज्ञानहेतुर्वाह्योऽर्थो यास्क एव न, वासनापरिपाकप्रत्ययस्य कादाचित्कत्वात् कदाचिदुत्पाद इति वेदितव्यम् । विज्ञानवादिनये हि वासनानामेकसन्तानवर्त्तिनामालयविज्ञानानां तत्तत्प्रवृत्तिजननशक्तिः तस्याश्च स्वकार्य्योत्पादं प्रत्याभिमुख्यं परिपाकः तस्य च प्रत्ययः कारणं स्वसन्तानवर्त्तिपूर्व्वक्षणः कल्प्यीक्रियते सन्तानान्तरनिबन्धत्वानङ्गीकारात् । ततश्च प्रवृत्तिज्ञाननजनकालयविज्ञानवर्त्तिवासनापरिपाकं प्रति सर्व्वेऽप्यालयविज्ञानवर्त्तिनः

क्षणाः समर्था एवेति वक्तव्यम् । न चेदेवं कोऽपि न समर्थः स्यादालयविज्ञानसन्तानवर्त्तित्वाविशेषात् । सर्व्वे समर्था इति पक्षे कार्य्यक्षेपानुपपत्तिः ततश्च कादाचित्कत्वनिर्व्वाहाय शब्दस्पर्शरूपरसगन्धविषयाः सुखादिविषयाः षडपि प्रत्ययाश्चतुरः प्रत्ययान् प्रतीत्योत्पद्यन्ते इति चतुरेषानिच्छताप्यच्छमतिना स्वानुभवमनाच्छाद्य परिच्छेत्तव्यम् । ते चत्वारः प्रत्ययाः प्रसिद्धाः आलम्बनसमनन्तरसहकार्य्यधिपतिरूपाः । तत्र ज्ञानपदवेदनीयस्य नीलाद्यवभासस्य चित्तस्य नीलालम्बनप्रत्ययात् नीलाकारता भवति, समनन्तरप्रत्ययात् प्राचीनज्ञानाद्बोधरूपता, सहकारिप्रत्ययादालोकात्, चक्षुषोऽधिपतिप्रत्ययाद्विषयप्रहणप्रतिनियमः । विदितस्य ज्ञानस्य रूपादिसाधारणग्रहणप्राप्तेर्नियामकं चक्षुरधिपतिर्भवितुमर्हति लोके नियामकस्याधिपत्योपलम्भात् । एवं चित्तचैत्तात्मकानां सुखादीनां चत्वारि कारणानि द्रष्टव्यानि । एवं चित्तचैत्तात्मकस्कन्धः पञ्चविधः रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकः । तत्र रूयन्त एभिर्विषया इति रूयन्त इति च व्युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धः । आलयविज्ञानप्रवृत्तिविज्ञानप्रवाहो विज्ञानस्कन्धः । प्रागुक्तस्कन्धत्रयसम्बन्धजन्यः सुखदुःखादिप्रत्ययप्रवाहो वेदनास्कन्धः । गौरित्यादिशब्दोल्लेखिविज्ञानप्रवाहः संज्ञास्कन्धः वेदनास्कन्धनिबन्धना रागद्वेषादयः क्लेशा उपक्लेशाश्च मदमानादयो धर्म्माधर्म्मौ च संस्कारस्कन्धः" सर्व्वद० विज्ञानानां क्षणिकत्वेऽपि पूर्व्वपूर्व्वक्षणिकविज्ञानसंस्काराधानोत्तरोत्तरविज्ञाने संक्रमः ततसंक्रमाच्च स्मरणं, सुषुप्तौ च आलयविज्ञानस्य सत्त्वात् तत्रैव सर्व्वसंस्काराणामवस्थितेः सुप्रोत्थितस्य स्मरणसम्भव इत्यतो बौद्धैः आलयपर्य्यन्तं क्षणिकविज्ञानव्यक्तिधाराणां स्थायित्वमङ्गीक्रियते ।

आलर्क न० अलर्कस्येदम् अण् । विषप्रकुरविषे । "निहन्ति विषमालर्कं मेघवृन्दमिवानिलः" सुश्रु० ।

आलवण्य न० न लवणं तन्न० अलवणस्य भावः ष्यञ् । लवणरसभिन्नत्वे । नास्ति लवणं यत्र बहु० तत्त्व वा न ष्यञ् । अलवणता स्त्री अलवणत्वं तु न० लवणशून्यत्वे

आलवाल न० समन्तात् लवं जललवमालाति आ+ला–क । इक्षुमूले सेकार्थं कृदादिनिर्म्मिते जलाधारे सेतौ । "विश्वासाय विहङ्गानामालवालाम्बुपायिनाम्" रघुः । "विपुलालवालभृतवारिदर्पणः" माघः । ष० वसवः वर्म्यमध्योऽपि "जरद्दूर्व्वहसुनिभिरिव जटालबालकमखण्डधरैः" (पादपैः) काद०

आलस त्रि० आलसति ईषत् व्याप्रियते अच् । १क्रियामन्दे अलसस्यापत्यम् विदा० अञ् । २अलसापत्ये पु०स्त्री०यून्यपत्ये हरिता० फञ् । आलसायनः तस्य यून्यपत्ये पुंस्त्री० ।

आलस्य न० अलसस्य भावः ष्यञ् । विहितक्रियाकरणायानुत्साहे आलस्यञ्च "किमालस्यं च कः शोकः" इति यक्षप्रश्ने "धर्म्मनिष्क्रियतालस्यं शोकस्त्वज्ञानमुच्यते" भा० व० ३१२ अ० युधिष्ठिरेण लक्षितम् । "शक्तस्य चाप्यनुत्साहः कर्म्मालस्यमुच्यते" सुश्रुतेन लक्षितञ्च बोध्यम् "सा० द० उक्ते व्यभिचारिभावभेदे च "आलस्यं श्रमगर्भाद्यैर्जाड्यं जृम्भासितादिकृत्" यथा "न तथा भूषयत्यङ्गं न तथा भाषते सखीम् । जृम्भते सुहरासीना बाला गर्भभरालसा" सा० द० "आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति" मनुः । भारतोक्तधर्म्मक्रियान्यत्वरूपम् अत्रालस्यम् ।

आलात न० अलातमेव स्वार्थेऽण् । अलाते वह्निदीप्ताङ्गारे ।

आलान न० आलीयतेऽत्र आ–ली–ल्युट् । १गजबन्धनस्तम्भे करणे ल्युट् । २तद्बन्धनरज्ज्वाम् भावे ल्युट् । ३बन्धनमात्रे च । तत्र स्तम्भे । "अरुन्तुदमिवालानमनिर्वाणस्य दन्तिनः" रघुः । "द्रुमदमलिनमालानस्तम्भयुगलसदृशसन्निवेशोरुदण्डद्वयेन" काद० "तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः" बन्धने "गजालानपरिक्लिष्टैराघोटैः साईमानताः" रघुः ।

आलानिक त्रि० आलानमिव स्वार्थे विनयादि० ठक् । १आलाने । आलानं बन्धनं प्रयोजनमस्य ठक् । गजबन्धनसाधने काष्ठादौ "आलानिकं स्थाणुमिव द्विपेन्द्रः" रघुः

आलाप पु० आ+लप–करणे–घञ् । स्वरसाधनाक्षरे सारिगमादौ (आलापचारी) "आलापैरिव गान्धर्व्वमदीधयत पदातिभिः" माघः "आलापैः स्वरसाधनैरुरविशेषैः" मल्लि० । भावे घञ् । २कथनमात्रे च" "काव्यालापाश्च ये केचित् गीतकान्यखिलानि च" विष्णुपु० आ+लप–णिच्–अच् । ३परस्परकथने । "अये दक्षिणेन पुष्पवाटिकामालापइव श्रूयते" शकु० । एकस्य कञ्चित् प्रति कथने तेन तत्कथनप्रेरणात् तं प्रति कथ्यते इति परस्परकथनस्य इतरेतरकथनप्रयोज्यत्वात्तथात्वम् ।

आलापन न० आ+लप–णिच्–करणे ल्युट् । १परस्परकथोपकथने आभाषणे आलापशब्देऽस्य प्रवृत्तिहेतुत्वसङ्गम् "स्यादालापनमाभाषः इत्यमरः २स्तुतिवाचने च "सङ्कलालापनैर्होमैः" रामा० । [२आभाष्ये

आलाप्य त्रि० आ+लप–कर्म्मणि ण्यत् । १कथनीये णिच्–यत् ।

आलाबु(बू) स्त्री अलाबु पु० पूर्वपदीर्घः वा ऊङ्। (लाउ) तस्याम् शब्दरत्नावली।

आलावर्त्त न० आलं पर्य्याप्तमावर्त्त्यते आ+वृत-घिच् क-र्मणि-अच्। वस्त्रनिर्म्मिते व्यजने हेम०।[सम्यग्व्यजे न०

आलास्य पु० आलं पर्य्याप्तमास्यं यस्य। कुम्भीरे। मा०स०।

आलि पु० आलति दंशे समर्थो भवति आ+अल-पर्य्याप्तौ इन्। १दंशिके २भ्रमरे ३तज्जातिस्त्रियां स्त्री ङीप्। आल-यति भूषयति अलभूषणे-णिच्+इन्। ४सख्यां वयस्या-याम् "असम्भवद्घनरसा शतालिपरिवेविता। करं न सहते राजन्! भूमिर्नववधूरिव" उद्भटः वा ङीप्। आ-लोत्यत्र। "आलोव पक्ष प्रतिषेधतीयं कपोतडुण्डारगिरा वनाली" नैष०। "तत्कालमालीभिरहस्यतालम्" नैष० "ममालि! प्राचीनैः प्रचुरसुकृतैरद्य फलितम्" उद्भटः। "निवार्य्यतामालि! किमप्ययं वटुः" कुमा०"स्मित-सुपगतामालीं दृष्ट्वा सलज्जमवाङ्मुखम्" सा०द०। "आ-लति वारयति जलम् आ+अल-इन् वा ङीप्। आग-न्तुकस्य चेतस्यस्य च जलस्य निवारके ५सेतौ"। "शता-लिपरिवेविते" आ+अल-पर्य्याप्तौ इन् वा ङीप्। ६सन्ततौ श्रेणौ च वनाली नैष० "तोयान्तर्भास्कराली-व रेजे सुनिपरम्परा" कुमा० लीनामालीभिव तरवोवि-भ्राणाः" माघः। ७रेखायाञ्च स्त्री वा ङीप् "विषमहरि-चन्द्रनालिना" माघः। ८शुद्धान्तःकरणे ९अनर्थे च त्रि० मेदि०।

आलिगव्य पुंस्त्री अलिगोरपत्यं गर्गा० यञ्। अलिगुसने-रपत्ये स्त्रियां यञन्तत्वात् फक्। पित्त्वात् गौरा० ङीष्। आलिगव्यायनी।

आलिङ्गन न० आ+लिगि-ल्युट्। आश्लेषणे अङ्गेनाङ्ग-संयोजनभेदे। "आलिङ्गनान्यधिकृताः स्फुटमाकुरेव" माघः "प्रियालिङ्गननिर्वृतिम्" रघुः। तच्च सप्तधा। आमो-दालिङ्गनं सुदितालिङ्गनं प्रेमालिङ्गनं मानसालिङ्गनं रूढ्यालिङ्गनम् मदनालिङ्गनम् विनोदालिङ्गनमिति भेदात्।

आलिङ्गित त्रि० आ+लिगि-कर्म्मणि क्त। १आश्लिष्टे "तरु-रयालिङ्गितः कण्ठे नितम्बस्थानमाश्रितः" सा०द० टीकाधृतमहेलिका "योगोनाभ्यसितोव्रतं न चरितम्-नालिङ्गिता कामिनी दृष्टं जन्म निरर्थकं क्षितितलेऽरण्ये यथा मालती" सा०द०। "विंशत्यर्णात्रिंशदर्णोयः स्यादा-लिङ्गितो ह्यसौ" तन्त्रसारोक्ते विंशत्यक्षरावधि त्रिं शदक्षरके २मन्त्रे भेदे पु०

आलिङ्गिन् त्रि० आ-लिगि-णिनि। आलिङ्गनकर्त्तरि स्त्रियां ङीप्।

आलिङ्ग्य पु० आ+लिग-ण्यत्। आलिङ्गनीये प्रियादौ २आलिङ्ग्य वादनीये मृदङ्गभेदे पु० स च "चतुरङ्गुलही-नोऽङ्गान्मुखे चैकाङ्गुलेन यः। यवाकृतिःस आलिङ्ग्य आलिङ्ग्य स हि वाद्यते" इति शब्दार्थचन्द्रोदयः। आ+लिगि-ल्यप्। ३आश्लिष्येत्यर्थे अव्य०

आलिङ्ग्यायन पु० आलिङ्ग्यस्य मृदङ्गभेदस्यायनं यत्र। १ग्रामभेदे तस्यादूरभवं नगरम् अण् वरणा०तस्य लुप्। तद्ग्रामस्यादूरभवे नगरे। "लुपि व्यक्तिवचने" पाणि-न्युक्तेः नगरेऽपि पुंस्त्वम्। [इदृत्पाठे त्रिका०।

आलिञ्जर पु० अलिञ्जर एव स्वार्थे अण्। (जाला) मृण्मये

आलिन्द पु० अलिन्द एव स्वार्थे अण्। १बहिर्द्वारप्रकोष्ठे २गृहाभ्यन्तरशय्यार्थवेद्यां च शब्दर०३गृहैकदेशे अमरमा०। स्वार्थे कन्। आलिन्दकः तेष्वर्थेषु पु०।

आलिप त्रि० आ+लिप-क। आलेपनकारके।

आलिप्त त्रि० आ+लिप-क्त। १कृतालेपने २दग्धादीपने च

आलिम्पन न० आ+लिप-ल्युट् मुट्०सुम्। तक्षुलचूर्ण-मिश्रितोदकेन मङ्गलार्थं दीयमाने आलेपने आदीपने। (आलिपना,) त्रिका०।

आलीढ त्रि० आ+लिह-क्त। १आस्वादिते २कृते "सैन्यान्य मालीढमिवासुराणैः" रघुः। "स्थानानि धन्विनां पञ्च तत्र वैशाखमस्रियाम्। त्रिवितस्त्यन्तरौ पादौ मण्डलं तोरणाकृति। अन्वीढं स्यात् समपदमालीढं तु ततोऽ-यतः। दक्षिणे वाममाकृष्य प्रत्यालीढं विपर्य्ययः" इत्यु-क्तलक्षणे अयतो दक्षिणं पादं व्यवस्थाप्य वामपादाकृ-ष्टेन स्थितिरूपे २युद्धार्थे धन्विनां स्थानभेदे न०। "अतिव-दालीढविशेषशोभिना" रघुः। "पायाच्चीलोत्पलाभा रवि-रश्मिविलसत्कुण्डलालीढपादा" तन्त्रसा० रत्नाकालीध्या० अग्निपुराणे तु समपदादीन्यन्यथा निरूपितानि यथा "अङ्गुष्ठाङ्गुलफार्ष्णिप्रक्ष्णि श्लिष्टाःस्युः सहिता यदि। इदं समपदं स्थानमेतल्लक्षणतस्तथा। बाह्याङ्गुलिस्थितौ पादौ स्वाङ्गजानुसमायतौ। त्रिवितस्त्यन्तरे स्थानमेतद्वैशा-खमुच्यते। हंसपक्ष्माकृतिसमे दक्षे ते यत्र जानुनी। चतुर्वितस्त्या विच्छिन्ने तदिदं मण्डलं स्मृतम्। भग्नवाम-पदं पश्चात्, स्वाङ्गजानूरुदक्षिणम्। वितस्त्योः पञ्च विस्तारे तदालीढं प्रकीर्त्तितम्। एतदेव विपर्य्यस्तं प्रत्यालीढं-प्रकीर्त्तितम्" विकटादिस्थानं धन्विस्थानशब्दे वक्ष्यते।

"नतांसमाकृञ्चितसव्यपादम्" कुमा० टी० मल्लिनाथेन आकृञ्चितसव्यपादत्वेन आलीढस्थानके स्थितमिति व्याख्यातम् । स्वार्थे कन् तत्रैव । शुभ्रा० पाठात् ढक् । आलीढेयः तद्भवे त्रि० । संज्ञायां कन् । आलीढकम् । वत्सानां स्थलेषु क्रीड़नभेदे न० ।

आलीन त्रि० आ+ली–कर्त्तरि क्त । १आश्लिष्टे भावे क्त । २संश्लेषे न० । तत्र साधु अण् । ३वङ्गे धातुभेदे तस्य धात्वन्तरसंश्लेषकारकत्वात् तथात्वम् संज्ञायां कन् । तत्रैव । तद्गुणादि रङ्गशब्दे वक्ष्यते ।

आलु पु० आलाति आ+ला–मित० डु । ऋ–उणिञ् रस्य लः वा । १मेचके २भेलके शब्दरत्ना० स्वल्पवारिधानिकायां सनाले ३जलपात्रभेदे (झारी) स्त्री० । ४कन्दभेदे न० राजनि० । तस्य भेदा नानाविधाः "कन्दो बहुविधो लोके आलुशब्देन भण्यते । कचालुश्चैव धस्टालु पिण्डालु शर्करादिकम् काण्डालु चैवमाद्यं स्यात् तस्य भेदा अनेकशः" । इत्युक्तेः । आलुकशब्दे विवृतिः ।

आलुक पु० आ+लाति पृथ्वीं कासरोगं वा आ+ला–मित० डु संज्ञायां कन् । १श्वेतनागे २कासालौ च । आलु+स्वार्थे कन् कन्दभेदे न० तद्भेदगुणादि भा०प्र० उक्तं यथा । "आलुकमप्यालूकं तत् कथितं वीरसेनच । काण्डालुकयुक्तालुकहस्यालुकानि कथ्यन्ते । पिण्डालुकमध्यालुकरक्तालुकानि कथितानि" तत्र काण्डालुकं काठिन्ययुक्तं (कठारु) यष्टालुकं श्वेततायुक्तं यष्टाकारम् (यांखआलु) ह्रस्यालुकं दीर्घतायुक्तं महाशरीरम् (चुवड़ीआलु) पिण्डालुकं वर्त्तुलाकारं (सुथनी) मध्यालुकं माधुर्य्ययुतं दीर्घमुखं शर्करालु (शकरन्द) रक्तालुकं रक्ततायुक्तं (रतालु) तेषां गुणास्तत्रोक्ताः "आलुकं शीतलं सर्वं विष्टम्भि मधुरं गुरु । स्वादुमूलमलं रूक्षं दुर्जरम् रक्तपित्तनुत् । कफानिलकरं बल्यं हृद्यं स्तन्यविवर्द्धनम्" । गौरा० ङीष् । दीर्घाकारशुक्लयुक्तरक्तालुके स्त्री । "रक्तालुभेदो वा दीर्घा तन्वी च प्रथितालुकी । आलुकीवलजत् स्निग्धा गुर्वी हृत्कफनाशिनी । विष्टम्भकारिणीतैले तलिताऽतिरुचिप्रदा" भावप्र०

आलुञ्चन न० आ+लुचि ल्युट् । उत्पाटने । केशादेः बन्धराहित्ये च । [आलुञ्चितमूर्द्धजा" ।

आलुञ्चित त्रि० आ+लुचि–क्त । उत्पाटिते असंयते केशादौ

आलुण्टन आ+लुटि–ल्युट् । बलादपहरणे (लुट्) ।

आलुल त्रि० आ+लुल–क । उन्मुक्ते चलीभूते । भट्टा० ऋधे क्यङ्क्त–आलुलायितः असंयते त्रि० ।

आलू पु० आलूनाति आ+लू–क्विप् । आलुशब्दार्थे स्वार्थे कन् तत्रैव । "आलुकमप्यालूकमिति" भाव० प्र० । "आलूकं शीतलं सर्व्वमिति" भाव० प्र० पाठान्तरम् ।

आलून त्रि० आ+लू–क्त । १ईषच्छिन्ने २सम्यक्छिन्ने च "तेनामरवधूहस्तैः सदयालूनपल्लवाः" कुमा० । [लेखपत्रे ।

आलेख पु० आ+लिख–घञ् । १सम्यक्लेखने । आधारे घञ् ।

आलेखन न० आ+लिख–भावे ल्युट् । १सम्यग्लेखे । आलिखति ल्यु । २आलेखनकर्त्तरि त्रि० । ३ आचार्य्ये पु० तस्योपदेष्टृकर्त्तृत्वात्तथात्वम् । "संस्थिते ज्यायतीध्वभ्रंशं गमयेयुरित्यालेखनः" । आश्व० औ० । आलेखन आचार्य्यः "इत्तिः । करणे ल्युट् लेखनसाधने स्त्रियांङीष्

आलेख्य त्रि० आ+लिख–ण्यत् । चित्रादौ लेख्यदेवादिप्रतिबिम्बे "विधातुमालेख्यमयङ्कुवन्तः" माघः "इति संरम्भिणो वाणीबलस्यालेख्यदेवताः" माघः । "अङ्गोरुपमालेख्यस्य" शक्र० २लेखनीये त्रि० । आधारे ण्यत् । ३चित्रे ।

आलेख्यशेष त्रि० आलेख्यं चित्रमेव शेषो यस्य बहु० । मृते, क्षेम० । मृतस्य हि चित्रे एव प्रकृतिरूपेण अवस्थानात् तथात्वम् । "आलेख्यशेषस्य पितुर्विशेषं" । रघुः ।

आलेप पु० आ+लिप–घञ् । १उपलेपे २आलिम्पने च । (आलिपना) ल्युट् तत्रैवार्थे न० । "जातातामाङ्गरचयति चिरं चन्दनालेपनानि" सा० द० । आलिप्यते कर्म्मणि ल्युट् । ३आलिप्यमाने च ।

आलोक पु० आलोक्यतेऽनेन आ+लुक–लोक–वा करणे घञ् । (आलो) १सूर्य्यादिप्रकाशे, "भक्षयति चक्षुः सम्बन्धादालोकोद्भूतरूपवोः" भाषा० उक्तेः आलोकसंयोगस्य द्रव्यचाक्षुषप्रत्यक्षे कारणत्वम् इति नैयायिकाः अन्धकारस्य द्रव्यत्वादिनां मते तद्भिन्नद्रव्यप्रत्यक्षे कारणत्वमिति भेदः । तथाहि मेचकादिचाक्षुषस्य आलोकसंयोगमन्तरेणैव उत्पत्तिदर्शनात् आलोकसंयोगस्य न सर्व्वत्र कारणत्वमित्यतोऽन्धकारेऽपि तथा कल्पनमिति । एतदभिप्रायेणैव "दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथा परे । केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टय इति" देवीभा० केषांचिद्दिवान्धत्वोक्तिः । "आलोकमार्गं सहसा व्रजन्त्या" कुमा० रघुश्च । भावे घञ् । २दर्शने । "आलोकमात्रेण सुरानशेषान्" कुमा० । "वत्सालोकप्रवर्त्तिना" रघुः । "वैवर्ण्यकम्पवैरूप्यास्रालोकास्रगोपवत्" सा० द० । "स्त्रीणां प्रियालोकफलो हि वेषः" कुमा० । "मलिनो हि यथादर्शो रूपालोकस्य

स चमः" वा० रघु० "यदालोके लक्ष्यं व्रजति सहसा तद्विपुलताम्" मक्षु०। "अनास्तदालोकपथात् प्रतीयुः" रघुः।

आलोकन न० आ+लुक-लोक-वा भावे ल्युट्। दर्शने "ततस्तदालोकनतत्पराणाम्" । "भुवनालोकनप्रीतिः खर्गिभिर्नानुभूयते" कुमा० "व्रजति हि सफलत्वं वल्लभालोकनेन" माघः।

आलोकनीय त्रि० आ+लुक-लोक-वा अनीयर्। दर्शनीये द्रष्टुं योग्ये "चित्रन्यस्तादव गताः प्रकामालोकनीयताम्" कुमा०।

आलोकित त्रि० आ+लोक-क्त। दृष्टे। [ङीप्।

आलोकिन् त्रि० आ+लुक्-लोक-वा-णिनि। दर्शके स्त्रियां

आलोक्य त्रि० आ+लोक-ण्यत्। दर्शनीये।ल्यप्। दृष्ट्यर्थे अव्य०

आलोचक त्रि० आ+लुच-णिच् ण्वुल्। आलोचनाकारके।

आलोचन न० आ+लुच-णिच्-भावे ल्युट्। १विशेषधर्म्मादिना १विवेचने नैया० सामान्यविशेषशून्यतया इन्द्रियजन्ये निर्विकल्पकस्थानीये सांख्यमतसिद्धे २अन्तःकरणवृत्तिभेदे। यथोक्तं सां०कौ० आलोचितमिन्द्रियेण भवति इदमिति सम्मुग्धम्। इदंनैवमिति एवं कल्पनया विशेष्यविशेषणभावेन विवेचयतीति यथाऽजः। "सम्मुग्धं वस्तुमात्रन्तु प्राक्स्पृष्टक्षणवस्तुवत्। तत्सामान्यविशेषाभ्यां कल्पयन्ति मनीषिणः"। तथा हि "अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम्। बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्। ततःपरं पुनर्वस्तु धर्म्मैर्जात्यादिभिर्यया। बुद्ध्यावसीयते सा हि प्रत्यक्षत्वेन सम्मता"। तच्च विशेष्यविशेषणसंसर्गानवगाहि ज्ञानम् "शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः" सां०का० णिच्-युच्। आलोचनाप्यत्र स्त्री २दर्शने च। "पश्यार्थैरानालोचने" इगेरनालोचने कञ् च" पा०। ३लोचनपर्य्यन्ते अव्य० "आलोचनान्तं श्रवणं वितत्य" रघुः।

आलोचित त्रि० आ+लुच्-णिच्-क्त। आलोचनाविषयीभूते विशेषदर्शनादिना कृतालोचने "आलोचितमिन्द्रियेणेति" सां०कौ०। इतिकर्त्तव्यतया २अवधारिते च

आलोच्य त्रि० आ+लुच्-ण्यत्। आलोचनार्हे आलोचनाविषयीकार्य्ये। आ+लुच्-णिच्-ल्यप्। आलोचनं कृत्वेत्यर्थे अव्य०।

आलोडन न० आ+लुड-मन्थे-ल्युट्। १विलोडने २मर्द्दने मन्थने "भावनालोडने चास्य कर्त्तव्ये मेघजैर्हितैः" सुश्रु०।

आलोडित त्रि० आ+लोड़-क्त। १मथिते २मर्द्दिते ३चूर्णीकृते च "अलोडितः काञ्चनभूपरागः" इति माघः।

आलोल त्रि० ईषत् लोलः प्रा०स०। ईषच्चञ्चले "आलोलपुष्करसुखोल्लसितैरभीक्ष्णम्" माघः। "क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भीषयन्त्यः मेघदूतम्।

आलोलित त्रि० आ+लुल-णिच्-क्त। ईषच्चञ्चलीकृते

आलोष्टी अव्य० ईषत् लोष्टमिव करोत्यनेन आलोष्ट+णिच्-वा०ङी उर्य्यादि। हिंसायां गरुड०।

आलोहायन त्रि० अलोहे भवः नड़ा० फक्। अलोहभवे

आवक त्रि० अवति अव-ण्वुल्। रक्षके।

आवट्य पुंस्त्री अवटस्य अपत्यं गर्गा० यञ्। अवटवंशोत्पन्ने स्त्रियाम् "आवट्याच्चाप्" पा० चाप्। आवट्या।अवटश्च प्रवरभेदः आर्षशब्दे दृश्यः।

आवनतीय त्रि० अवनतस्य सन्निकृष्टदेशादिः कृत्या० छण्। अवनतसन्निकृष्टदेशादौ।

आवनेय पु० अवन्या अपत्यं ढक्। मङ्गलग्रहे तस्य महीतः उत्पत्तिकथा काशी० १७अ०। "उत्पत्तिं चास्य वक्ष्यामो भूरूतोऽयं यथाऽभवत्। पुरा तपस्यतः शम्भोर्ललाटस्थस्य वियोगतः। भालस्थलात् पपातैकः स्वेदबिन्दुर्महीतले। ततः कुमारः संजज्ञे लोहिताङ्गोमहीतलात्। स्नेहसंवर्द्धितः सोऽथ धात्र्या धात्रीस्वरूपया। माङ्गेय इत्यतः ख्यातिं परामयं गतस्ततः" अतएव तस्य कुजभौमेत्यादिसंज्ञा

आवन्त पु० अवन्तेरयं राजाअण्। अवन्तिदेशाधिपे चन्द्रवंश्ये नृपभेदे। "कुन्तेर्दृष्टःसुतोजज्ञे रणदृष्टः परान् प्रति। दृष्टस्य जज्ञिरे शूरास्त्रयः परमधार्म्मिकाः। आवन्त्यदशार्हश्च बली विपहरश्च यः" हरि० ३७अ०। "दृढेतुकोसलाजादाजाद्याः" पा० आद्यविधानात् आवन्त्यएवेति पाठः उचितः आवन्त इति तु लिपिकरप्रमादात्।

आवन्त्य त्रि० अवन्तिषु भवः तस्य राजा वा इदन्त्वात् अञ्। १अवन्तिदेशभवे २तद्राजे च बहुषु लुक् आवन्त्यः। विन्दानुविन्दावावन्त्यौ सैन्येन महताहतौ" भा० व० प० २०अ०। "विन्दानुविन्दावावन्त्यौ दन्तवक्त्रश्च वीर्य्यवान्" हरि०व० ६२अ०। ब्राह्म्यादुब्राह्मणात् सवर्णायामुत्पन्ने २वर्णभेदेब्राह्म्यात् तु जायते विप्रात् पापात्मा भुर्जकण्टकः "आवन्त्यवाटधानौ च पुष्पधःशैख एव च" मनुः।

आवपन न० ओप्यते स्थाप्यतेऽत्र आ+वप-आधारे ल्युट्। १धान्यस्थापनपात्रे (चरखा) इति ख्याते। "गोषी आवपनञ्चेत्" सि०कौ० आ+वप-भावे ल्युट्। २भूमौ बीजादेर्निधाने (बोना) "अथात आकृतीनामेवावपनम्" काल्या०।

प्रभुरग्निः प्रपचने भूमिरावपने प्रभुः" भा० आ० ८८अ०। करणे ल्युट्। ४वपनसाधने त्रि० "भूतानामावपनं सर्व्वेषाम्" शत० ब्रा० स्त्रियां ङीप्। त्वमस्यावपनी जनानाम्" ऋव० १२,१,६१। अन्तर्भूतण्यर्थे ल्युट्। ५केशादेः सर्व्वसण्डने।

आवपनिष्क्रिया स्त्री आवप निष्क्रिय ङ्यु च्यते यस्यां क्रियायां मयूर० स०। आवपननिष्क्रियार्थनिदेशक्रियायाम्।

आवय पु० आ+अज–अच् वीभावः। १आगतौ। कर्त्तरि अच्। २आगन्तरि ३देशभेदे पु०। धूमा० वुञ् आवयकः। आवयदेशभवे त्रि०। [आच्छादके वस्त्रादौ।

आवरक न० आ+वृ–करणे अप् संज्ञायां वुन्। अपवरके,

आवरण न० आव्रियते देहः चैतन्यं वाऽनेन आ+वृ–करणे ल्युट्। (ढाल) १चर्म्मफलके। वेदान्तिमतसिद्धे चैतन्यावरणे २अज्ञाने आवरणशक्तिशब्दे विवृतिः। ३आच्छादनसाधनमात्रे "तमस्तु नेत्रावरणं प्रमृज्य" रघुः "स्फुटमिवावरणं हिममारुतैः" माघः "लब्धान्तरा सावरणेऽपि गेहे" रघुः पुरादिषु आच्छादनसाधने ४प्राचीरादौ च यथा काश्यां सप्तावरणानि। वेड़ा) ५वेष्टने भावे ल्युट्। ६आवृतौ" "वृद्यावरणं नित्यं कुर्य्याच्च मिलमध्यगः" स्मृ०। "स्रोतसां भेदकोयत्र तेषां चावरणे रतः" मनुः। "सूर्य्ये तपत्यावरणाय दृष्टेः" "तस्य सावरण दृष्टिसम्भवः" रघुः "नलिनीदलकल्पितं स्तनावरणम्" शक०

आवरणशक्ति स्त्री आवरणे शक्तिः आवृणोति संज्ञायां कर्त्तरि ल्युट् कर्म्म वा०वा। वेदान्तिमतसिद्धे अज्ञानस्य चैतन्यापिधानशक्तिभेदे यथोक्तं वेदा०सा० आवरणशक्तिस्तावदल्पोऽपि मेघोऽनेकयोजनायतमादित्यमण्डलमवलोकयितृनयनपथपिधायकतया यथाच्छादयतीव तथाऽज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्नमसंसारिणमवलोकयितृबुद्धिपिधायकतयाच्छादयतीव तादृशं सामर्थ्यम्। तदुक्तं "घनच्छन्नदृष्टिर्घनाच्छन्नमर्कं यथा निष्प्रभं मन्यते चातिमूढः। तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोऽहमात्मा" अनयाऽऽवृतस्वात्मनः कर्त्तृत्वभोक्तृत्वसुखित्वदुःखित्वादिसंसारसंभावनाऽपि भवति यथा स्वाज्ञानावृतायां रज्ज्वां सर्पत्वसम्भावना"।

आवरसमक न० अवरं समानाम् एक० त० "श्रीष्मावरसमात् वुञ्" पा०नि० क्षुद्रः अवरसमे वर्षर्त्वाद्यकाले देवस्मरणम् वुञ्। वर्षर्त्वाद्यसमये देवे कर्त्तरि।

आवर्जित त्रि० आ+वृज–णिच्–क्त। १दत्ते २त्यक्ते "न हि तेन पथा तनुत्यजस्तनयावर्ज्जितपिण्डकाङ्क्षिणः" नूनमावर्जितं मया" "हविरावर्ज्जितं होतस्त्वया विधिवदग्निषु" इति च रघुः। ३निम्नीकृते च "अधःप्रस्थापितास्येन समावर्ज्जितकेतुना" "आवर्ज्जितजटामौलिविलम्बिशिखरोटयः" कुमा०।

आवर्त्त पु० आ+वृत–भावादौ घञ्। चक्राकारेण जलस्य स्वयं भ्रमणे, (घुरणी) प्र,वाह्ये घोटकचिह्ने २रोमसंस्थानभेदे राजावर्त्तनामके ३मणौ ४आवर्त्तने,। ५मेघाधिपभेदे च ६मानसिकधातौ न०। "रूपं तमावर्त्तमनोज्ञनाभिः" रघुः "तथापि समतावर्त्ते मोहगर्त्ते निपातिताः" देवीभा० "लिखते, शाकवर्षैस्तु चतुर्भिः शेषिते क्रमात्। आवर्त्तं विद्धि संवर्त्तं पुष्करं द्रोणमम्बुदम्। आवर्त्तो निर्जलोमेघः संवर्त्तश्च बहूदकः। पुष्करोदुष्करजलो द्रोणः सस्यक्प्रपूरकः" ज्यो०त०। "आवर्त्तिनः शुभफलप्रदशुक्तियुक्ता आपद्रदेवमणयोऽन्तरम्बुभागाः। अश्वाश्वर्षुसुमतीमतिरोचमानास्तूर्णं पयोधय इवोर्म्मिभिरापतन्तः" माघः। "आवर्त्तिनः दशावर्त्तयुक्ताः प्रशंसायां णिनि। ते च "द्वावुरस्यौ शिरस्यौ द्वौ द्वौ द्वौ रन्ध्रोपरन्ध्रयोः। एकोभाले ललाने च दशावर्त्ता ध्रुवाः स्मृताः" पयोधिपक्षे जलभ्रमः" भट्टि० आश्वावर्त्तश्च अश्वशब्दे ५०३पृष्ठे उक्तः। ७आवर्त्ताकारे देहिनां रोमसंस्थानभेदे पु० अश्वानामपि उक्तध्रुवरूपावर्त्तोरोमसंस्थानविशेष एवेति बोध्यम्। णिच्–भावे अच्। ८पुनः पुनश्चालने ९परिवर्त्तने (आलोटान) १० धातूनां द्रावणे (गलान) ११चिन्तायाञ्च चिन्तया हि चित्तं स्वविषयेषु पुनःपुनश्चाल्यते इति तस्याः तथात्वम्। आवर्त्तयते समन्तात् अनेककोटिषु आ+वृत–णिच्–कर्म्मणि अच्। अनेककोटिसंख्यिनि १२ संशये "भ्रमं संमोहमावर्त्तमभ्यासाद्विधितोजयेत्" भा०शा०२७२ अ० आवर्त्तमनेककोटिसंख्येन संशयम् अभ्यासात् तत्त्वाभ्यासात्" नीलक०। आवर्त्तते कर्त्तरि अच्। १३आवर्त्तमाने त्रि० "दक्षिणावर्त्तशङ्खोयं दत्त चूर्णीकृतोमया" "सा०द०१४ संसारे पु० तस्यानिशमावर्त्तमानत्वात्तथात्वम्। "भ्रमावर्त्तं नावर्त्तने" इति रुतिः "शङ्खनाभ्याकृतिर्योनिस्त्यावर्त्ता सा प्रकीर्त्तिता। तस्यामृतौ त्यावर्त्ते गर्भशय्या प्रतिष्ठिता" "शङ्खावर्त्तनिभाश्चापि उपर्य्युपरि संस्थिताः। गजतालुनिभाश्चापि दर्शिताः संप्रकीर्त्तिताः" इति सुश्रुतोक्ते देहान्तर्वर्त्तिनि आवर्त्ताकारे १५ नाड़ीसन्निवेशभेदे च।

आवर्त्तक पु० आवर्त्तएव स्वार्थे कन् । १मेघाधिपभेदे "रजनिकरबिम्बचुम्बितावर्त्तकाम्बुदविडम्बकेन" काद० । तदीयास्त्रोयदेष्वद्य पुष्करावर्त्तकादिषु" कुमा० जातं वंशे भुवनविदिते पुष्कराकर्त्तकानाम्" मेघदू० । आवर्त्त इव कायति कै-क । २आवर्त्ताकारे आवर्त्तयञ्ज्ञोक्ते अश्वरोमचिह्नभेदे आवर्त्तयति आ-इत-णिच्-ख्वुल् । ३पुनः पुनराघट्टके त्रि० ।

आवर्त्तकी स्त्री आवर्त्त इव कायति प्रकायते कै-क-गौ० ङीष् । कोड्डखे (भगतवल्ली) प्रसिद्धे लतभेदे सा तु विषाणाकारा रक्तपुष्पी रक्ताकारा पीतकीलकयुक्ता चर्म्मरञ्जनकारिणी "कषायास्त्रा शीतवीर्य्यकारिणी पित्तनाशिनी" वैद्य० २भट्टदन्तिकायां च राजनि० ।

आवर्त्तन न० आ+इत-आधारे ल्युट् । सूर्य्यस्य पश्चिमदिगवस्थितच्छायायाः १पूर्व्वदिग्गमनसमये मध्याह्नकाले "आवर्त्तनासु पूर्व्वाह्णोऽपराह्णस्तु ततःपरम्" स्मृतिः । "आवर्त्तनसमीपे वा इष्टिश्चाङ्गसुपक्रमेत्" स्मृतिः आ+इत-णिच्-भावे ल्युट् (आलोडने) २आलोडने ३गुणने च धातूनां ४द्रावणे(गलान) । आवर्त्तयति संसारचक्रम् आ+इत-णिच्-कर्त्तरि ल्यु । ५विष्णौ "आवर्त्तनोनिवृत्तात्मा" विष्णु सह० ६जम्बुद्वीपोपद्वीपभेदे च । आवर्त्यतेऽनया ल्युट् ङीप् । ७दर्व्यां स्त्री आधारे ल्युट् ङीप् । (सुचि) धातुद्रव्यद्रावणाधारे ८मूषायाम् स्त्री करणे ल्युट् । ९वेष्टने प्राचीरादौ न० ।

आवर्त्तनीय त्रि० आ+इत-णिच्-अनीयर् । १द्रावणीये धात्वादौ २आलोड्ये दुग्धादौ गुण्ये ३अङ्गादौ च । पुनः पुनः४पाठ्ये पदादौ च । "क्षिप्तिपदमावर्त्तनीयम्" सा० कौ० ।

आवर्त्तमणि पु० आवर्त्ताकारोमणिः । राजावर्त्तमणौ ।

आवर्त्तिक त्रि० आवर्त्तः प्रयोजनमस्य ठक् । आवर्त्ताकारधूमसाधने धूपादौ "आवर्त्तिकैर्यं मुनुभिर्धूपैरामोदिमन्दिरे" काशी० ।

आवर्त्तित त्रि० आ+इत-णिच्-क्त । १लतावर्त्तने दुग्धादौ द्राविते २घात्वादौ, ३गुणिते ४अभ्यस्ते च । आवर्त्तो जातोऽस्य तारा० इतच् । ५जातावर्त्ते जलादौ ।

आवर्त्तिन् त्रि० आ+इत-णिनि । १पुनःपुनर्वर्त्तनशीले "आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्জुन!" गीता "कालान्तरावर्त्तिशुभाशुभानि" हितो० । णिच्-णिनि । आवर्त्तके २द्रावके ३दुग्धादेरावर्त्तनकारके स्त्रियामुभयतो ङीप् ।

आवर्त्तिनी स्त्री आवर्त्तः मेघशब्दाकारवेष्टनमस्त्यस्याः इनि ङीप् । अजशब्दोक्ते राजनि० ।

आव(व)र्हित त्रि० आ+बृह-उद्यमे णिच्-क्त आ+बर्ह-हिंसायां क्त वा । उत्पाटिते उन्मूलिते ।

आव(लि)ली स्त्री आ+वल-इन् वा ङीप् । १श्रेणौ सजातीयसमुदायेन कृतपङ्क्तौ "इन्द्रावलिः धनावलिरिति । "के वा न सन्ति भुवि तामरसावतंसा हंसावलीललयिनो जलसन्निवेशाः" उद्भटः । "हिजावलीबालनिशाकरांशुभिः" माघः । "अलोकयद्व्योमकलोरकावलीः" नैष० २परम्परायाञ्च । [च ।

आवलित आ+वल-चलने क्त । ईषच्चलिते सम्यक्चलिते

आवशीर पु० अवशीरदेशे भवः तस्य राजा वा अञ् । १अवशीरदेशभवे जने २तद्भूपे च । "आवशीरांश्च योधांश्च अहिच्छत्रं च योधयन्" भा० व० २५३ । स च देशः वत्सभूमेः पूर्व्वदिग्वर्त्ती "पूर्व्वां दिशं विनिर्ज्जित्य वत्सभूमिं ततागमत्" इत्यनन्तरश्लोके पूर्व्वां दिशमित्यभिधानात् ।

आवश्यक न० अवश्यं भावः मनोज्ञा० वुञ् । १अवश्यंभावे नैवश्ये "स्यु आवश्यके" पा० अवश्यं भवः वा० २वुञ् २नियते त्रि० "एतेष्वावश्यकस्त्वसौ" भाषा० ३अवश्यकर्त्तव्ये नियमात् कर्त्तव्ये "उत्थायावश्यकं कृत्वा कृतशौचः समाहितः" मनुः । कालप्रतीक्षारहित्वेन ४निरवकाशे च "नेहेतात्र विशेषेऽन्यामन्यत्रावश्यकाद्विधेः" पु० "आवश्यकात् निरवकाशात्" मल्ल० त० रघु० ।

आवश्यपुत्रक न० न वश्यः अवश्यः पुत्रः तस्य भावः मनोज्ञा० वुञ् । पुत्रस्य वश्यत्वाभावे ।

आवसति स्त्री वसत्यत्र स्टृचे वसतिः रात्रिः सम्यक्वसतिः प्रा० स० । निशीथे वसतेः सम्यक्त्वञ्चावश्यस्टृचवासयोग्यत्वं तच्चार्द्धरात्रेऽवश्यं भवतीति तस्य तथात्वम् ।

आवसथ पु० आवसत्यत्र आ+वस-अथच् । १वसतिस्थाने, २विश्रामस्थाने ३ग्रामे ४व्रतभेदे च । तत्र वासस्थाने "दूरादावसथान्मूत्रं दूरात् पादावसेचनम्" मनुः विश्रामस्थाने । "आसनाव सथौ शय्यामनुव्रज्यासनाशनाम्" मनुः विश्रामस्थाने "स किलाश्रममन्त्यमाश्रितो निवसन्नावसथे पुराद्बहिः" रघुः । ग्रामे "सङ्घसर्व्वत आवसथान् सापयाञ्चक्रे" आ० उ० । ५आर्य्याच्छन्दोरचिते कोषभेदे । [स्टृहस्थे ।

आवसथिक त्रि० आवसथे स्टृहे वसति ठण् स्त्रियां ङीप् ।

आवसथ्य पु० अवसथस्यायं अञ् । १स्टृहसम्बन्धिनि लौकिकेऽग्नौ "आवसथ्यं द्विजाः प्राहुर्दीप्तमग्निं महाप्रभम्" भा० व० २१अ० । "आवसथ्यस्त्वधाधाने" इत्यमरः

अन्नप्राशनकर्माङ्गे २वह्नौ च। "आवसथ्याहवनीयौ दक्षिणाग्निस्तथैव च। अन्वाहार्य्योगार्हपत्य इत्येते पञ्च वह्नयः इत्युक्ते यज्ञाङ्गवह्निपञ्चकान्तर्गते३वह्निभेदे च। स च ग्रहाग्निः अवसथशब्दार्थग्रहसम्बन्धाच्च तस्य ग्रहात्वम्। [सोमान्तवासिनि स्त्रियां ङीप्।

आवसान त्रि० अवसानमभिजनोऽस्य तत्र० अञ्। ग्राम-

आवसानिक त्रि० अवसाने तत्काले भवः ठञ्। अवसानकाले (शेषकाले) भवे स्त्रियां ङीप्।

आवसित न० आ+अव+सो–क्त। १पक्वधान्ये, मर्द्दनानन्तरमपनोतदले राशीकृते २धान्ये च। ३निर्णीते ४अवधारिते ५समाप्ते च त्रि०।

आवस्थिक त्रि० अवस्थायां भवः ठञ्। कालकृतावस्थाभवे "आवस्थिकं क्रमञ्चापि मत्वा कार्य्यं निरूपणम्" स्मृत०।

आवह पु० आवहति आभिमुख्येन गच्छति आ+वह–अच्। सप्तस्कन्धप्रवहवायोः प्रथमे स्कन्धे १भूवायौ। "भूवायुरावह इह प्रवहस्तदूर्द्धम्" सि०शि०। अनिलशब्दे १६४ पृष्ठे विवृतिः "आवहः प्रवहश्चैव विवहश्च समीरणः। परावहः संवहश्च उद्वहश्च महाबलः। तथा परिवहः श्रीमान्" हरिवं० २३६ अ०। आवहति प्रापयति आ+वह–अच्। २प्रापके त्रि० "क्लेशावहा भर्त्तुरलक्षणाहम्" रघुः। फलैधःकुसुमस्तेयमधर्म्यञ्च मलावहम्" मनुः। "सस्तत्सृजेत् साङ्गसिकान् सर्वभूतभयावहान्" मनुः।

आवहमान त्रि० आ+वह–शानच्। क्रमागते।

आवाप पु० आ+वप–आधारे वा घञ्। १आलवाले तत्र हि जलसेकेन वृक्षान् आवपन्तीति तस्य तथात्वम् २धान्यादेः पात्रभेदे, (वखा) भावे घञ्। ३समन्तात् वपने। "यस्यावापे क्षीवलाः" भार० ४धान्यादिस्थापने ५यत्नचिन्तने ६परराष्ट्रचिन्तने, "तन्त्रावापविदा योगैर्मन्त्रलाभ्यधिष्ठिता" माघः। ७प्रधानहोमे च। रत्नाक्षेपे, "आवापो द्वाभ्याम्" सा० द०। आक्षेपोत्क्षेपाभ्यामित्यर्थः आ+वप–कर्म्मणि घञ्। ८आवपनीये प्रक्षेपणीये "पञ्चकन्दा आवाप चार्वयःपवमान" इति ताण्ड्य० ब्रा० अवापः आवनीयः आवापश्च सोमशब्दे सान्न आक्षेप इति भा० १०वत्सरे च"। ६यद्दृश्यतेऽत्र आधारे घञ्। ११निम्नोन्नतभूमौ तत्र हि यस्यादिकं न सम्यक् वप्तुं शक्यते इति तस्यास्तथात्वम्।

आवापक पु० आ+वप–कर्म्मणि घञ् संज्ञायां कन्। १प्रक्षोडाधारे वलयादौ। कर्त्तरि ण्वुल्। २आवपनकर्त्तरि त्रि०।

आवापन न० आ+वप–णिच्-करणे ल्युट्। (ताँत) १स्रवयन्त्रे। भावे ल्युट्। २क्षेपादेः सम्यग् सञ्चने च।

आवापिक न० आवापाय साधु ठक्। आवापे साधौ।

आवारि न० समन्तात् व्रियते आच्छाद्यते आ+वृ–बा० इण्। १समन्तादाच्छाद्ये वृक्षस्थाने शब्दच०। २सम्यग्जलयुक्ते त्रि०।

आवाल न० आवाल्यते जलमनेन आ+वल सञ्चरणे णिच् करणे अच्। १आलवाले वृक्षादेरधोभागे मृदादिनिर्म्मिते जलाधारे सेतुभेदे। आ+वल–भावे घञ्। २सञ्चारे।

आवास पु० आ+वस–आधारे घञ्। १वासस्थाने गृहादौ "आवासोन्मुखवर्हिणान्" रघुः। आवासमेवोपगमाय शीघ्रम्" भा० आ० ११६ अ०। भावे घञ्। २सम्यग्वासे

आवाहन न० आ+वह–णिच् ल्युट्। सान्निध्याय देवानामाह्वाने। "चकारावाहनं तत्र भागार्थं सर्वदैवतम्" पुरा० "प्रतिमास्वासनेष्वग्नौ नावाहनविसर्জ্জने" ति०त० पुरा०।

आवाहनी स्त्री आवाह्यतेऽनया आ+वह–णिच्–करणे ल्युट् ङीप्। देवाह्वानार्थे "हस्ताभ्यामञ्जलिं बद्ध्वाऽनामिका मूलपर्व्वयोः। अङ्गुष्ठौ निक्षिपेद्यत्र सद्भा सावाहनी स्मृता" तन्त्रोक्तलक्षणे मुद्राभेदे।

आविक त० अविना तन्तुोम्ना निर्म्मितं ठक्। १कम्बले। "सर्वञ्च तान्तवं रक्तं शाणक्षौमाविकानि च" मनुः अवेर्मेषस्य २सम्बन्धिनि त्रि० "आविकं सन्धिनीक्षीरं विवत्सायाश्च गोः पयः"। "वसीवस्त्रानुपूर्व्येण शाणक्षौमाविकानि च" मनुः। कौशेयाविकयोरूर्णैः कृतपानामरिष्टकैः" मनुः।

आविकसौत्रिक न० सूत्रमेव सौत्रं कर्म्म० आविकसूत्रेण निर्म्मितम् ठक्। मेषलोमनिर्म्मिते। "वैणस्तावि-कसौत्रिकम्" मनुः।

आविक्य न० आविकानां भावः गुरो० यक्। आविकसम्बन्धित्वे

आविग्न पु० आ+विज–कर्त्तरि क्त। उद्विग्ने (पाखिआमला) वृक्षे पु०।

आविज्ञान्य न० अविज्ञानमेव चातु० स्वार्थे ष्यञ्। विज्ञानहीने "तदाविज्ञान्यमिव हवींषि" शत० ब्रा० "आविज्ञान्यं विज्ञानविहीनमिव" भा०। [विदूर्य्ये" पा०।

आविदूर्य्य न० अविदूरस्य भावः ष्यञ्। सन्निकर्षे। "अभेषा-

आविद्ध त्रि० आ+व्यध–क्त। १ताडिते २विद्धे ३क्षिप्ते ४क्षिप्ते च "नश्यतोधर्य्यशाऽऽविद्धः" मनुः। [पाठायाम्।

आविद्धकर्णी स्त्री आविद्धौ कर्णाविव पत्रमस्याः गौ० ङीष्।

आविध पु० आविध्यतेऽनेन आ+व्यध-घञर्थे क । काष्ठादिवेधनसाधने (भमर) (तरपिन) रूच्याकारास्त्रे अस्त्रे ।

आविर्भाव पु० आविस्+भू-घञ् । १प्रकाशे सांख्यमतसिद्धे उत्पत्तिस्थानीयेऽभिव्यक्तिस्वरूपे २भावधर्मभेदे तथा हि नैयायिकादयः क्रियानिरोधबुद्धिव्यपदेशार्थक्रियाव्यवस्थाभेदात् कार्यस्य कारणात् भिन्नतया कारणादुत्पत्तिरित्याहुः तदेतन्मनूद्य सां०त०कौ० दूषयित्वा सतामेव कार्याणामाविर्भावः इति स्थिरीकरणेन कार्यकारणयोरभिन्नत्वं समर्थितम् यथा खात्मनि क्रियानिरोधबुद्धिव्यपदेशार्थक्रियाव्यवस्थाभेदाच्च नैकान्तिकं भेदं साधयितुमर्हन्ति एकस्मिन्नपि तत्तद्विशेषाविर्भावतिरोभावाभ्यामेतेषामविरोधात् यथा हि कूर्मस्याङ्गानि कूर्मशरीरे निविशमानानि तिरोभवन्ति निःसरन्ति चाविर्भवन्ति न तु कूर्मतत्तदङ्गान्युत्पद्यन्ते प्रध्वंसन्ते वा एवमेकस्या मृदः सुवर्णस्य वा घटसकुटादयोविशेषा निःसरन्न आविर्भवन्न उत्पद्यन्न इत्युच्यन्ते न पुनरसतासत्पादः सतां वा निरोधः ।यथाह भगवान् कृष्णद्वैपायनः 'नासतोविद्यते भावो नाभावो विद्यते सत' इति" । यथा कूर्मः स्वावयवेभ्यः सङ्कोचविकासाभ्यां न भिन्नः एवं घटसकुटादयोऽपि मृत्सुवर्णादिभ्यो न भिन्नाः । एवञ्चेत् तन्तुषु पटइति व्यपदेशो यथेह वने तिलका इत्युपपन्नः । न चार्थक्रियाभेदोऽपि भेदमापादयति एकस्यापि नानार्थक्रियादर्शनात् यथैक एव यष्टिर्दाहकः प्रकाशकः पाचकश्चेति । नार्थक्रियाव्यवस्था वस्तुभेदे हेतुः तेषामेव समस्तव्यस्तानामर्थक्रियाव्यवस्थादर्शनात् यथा प्रत्येकं विंशतयो वर्त्मदर्शनलक्षणामर्थक्रियां कुर्वन्ति न तु शिविकावहनं, मिलितास्तु शिविकां वहन्ति एवं तन्तवः प्रत्येकं प्रावरणमकुर्वाणा अपि मिलिताः आविर्भूतपटभावाः प्रावरिष्यन्ति । स्यादेतत् । आविर्भावः पटस्य कारणव्यापारात् प्राक् सन्नसन् वा असंश्चेत् प्राग् तर्हि सत उत्पादनम् । अथ सन्, कृतं तर्हि कारणव्यापारेण, न हि सति कार्ये कारणव्यापारप्रयोजनं पश्यामः । आविर्भावे चाविर्भावान्तरकल्पने ऽनवस्थाप्रसङ्गः । तस्मादाविर्भूतपटभावास्तन्तवः क्रियन्त इति रिक्तं वचः। अथासदुत्पद्यत इत्यत्रापि मतं केयमसदुत्पत्तिः सतो असतो वा, सतो चेत् कृतं तर्हि कारणैः, असतो चेत्तस्या अप्युत्पत्त्यन्तरमित्यनवस्था । अथोत्पत्तिः पटाद्व्यतिरिक्तापि तु पटएवासौ तथापि यावद्भवं भवति पटइति तावद्भूतां भवत्युत्पद्यतइति । ततश्च पटइत्युत्पन्नो उत्पद्यतइति न वाच्यं पौनरुक्त्यात् विनश्यतीत्यपि न वाच्यं उत्पत्तिविनाशयोर्युगपदेकत्र विरोधात् तस्मादियं पटोत्पत्तिः स्वकारणसमवायो वा स्वसत्तासमवायोवा उभयथापि नोत्पद्यते अथ च तदर्थानि कारणानि व्यापार्यन्ते एवं पटादेराविर्भावेऽपि कारणापेक्षेत्युपपन्नम् । न च पटरूपेण कारणानां सम्बन्धः, तद्रूपस्याक्रियत्वात् क्रियासम्बन्धित्वाच्च कारकाणाम् अन्यथा कारणत्वाभावात् । तस्मात् सत्कार्यमिति पुष्कलम्" सा०कौ० । प्रपञ्चस्तु अभिव्यक्तिशब्दे १०० पृष्ठादौ द्रष्टव्यः । बाह्यमेवचित्सुखतापादकः कश्चनान्तरो धर्मः सत्त्वं तस्योद्रेकः रजस्तमसी अभिभूयाविर्भावः" सा०द० । देवादीनां मनुष्याद्याकारग्रहणरूपे २अवतारे च । "तदा मे मनसाध्यातो दयासिन्धुर्जनार्दनः । भक्तानामनुकम्पार्थं ययाविर्भावमिच्छति जैमि०भा० ।

आविर्भूत त्रि० आविस्+भू-कर्त्तरि क्त ।१प्रकटिते २अभिव्यक्ते "आविर्भूता महाघोरा योगिनीकोटिभिः सह" योगि०त० आभिर्भूतप्रथमसकुलाः कन्दलीखानुकच्छम्" मेघदू० "आविर्भूतपटभावाः" सा०कौ० ।

आविल त्रि० आविलति इदिंसृणाति विल-स्तृतौ क । १कलुषे अयं विल भेदने विलप्रकृतिकत्वात् रस्य लमध्यइतिरायत्त० "समलच्छत विभ्रदाबि(वि)लाम्" "तस्याबि-(वि)लाम्भः परिशुद्धिहेतोः" । "ननन्दुरानन्दजलाबि(बि)लाक्षाः," रघुः "यथा त्वदीयैश्चरितैरनाबि(बि)लैः" कुमा० ।

आविष्करण न०आविस्+कृ-भावे ल्युट् णत्वम् । १प्रकाशने "असूया गुणेषु दोषाविष्करणम्" सि०कौ० करणे ल्युट् । २प्रकाशसाधने स्त्रियां ङीप् । घञ् । आविष्कारोऽभवत्र पु० आविष्कारातिशयश्चाभिधेयवत्प्रतीयते" सा०द० ।

आविष्कर्तृ त्रि० आविस्+कृ-तृच् । प्रकाशके स्त्रियां ङीप् ।

आविष्कृत त्रि० आविस्+कृ-कर्मणि क्त । प्रकाशिते । "कृतापचारोऽपि परैरनाविष्कृतविक्रयः" माघः "बाल्यादनाविष्कृतलाञ्छनेन" कुमा० "आविष्कृतसुदन्वता" रघुः

आविष्ट त्रि० आ+विश-क्त । १भूतादिग्रस्ते, २आवेशयुक्ते, ३निविष्टे ४व्याप्ते च ।

आविस् अव्य० आ+अव-इसुन् । प्रकाशे । ह्रस्वस्यियंगेऽस्य गतित्वम् । एतेन सह भूधातुः प्रकाशार्थे यथा आविर्भावः, कृधातुः प्रकाशकरणेऽर्थे यथा आविष्कारः । "स्वरादिपाठात् अव्ययत्वम् "तेषामाविरभूत ब्रह्मा परिज्ञानसखस्त्रियाम्" कुमा० देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा" देवीभा० । "आचार्यक विलाय भाव-

वमाविरासोत्" "सरसवतमखिलमाविष्कुरुते भुजामूलम्" सा० द० ।

आविस्तराम् अव्य० आविस्+तरप् आम । अतिशय प्रकाशे "आविस्तरां वा अग्निः कर्म्मणा" श० ब्रा० । तमप् आम आविस्तमाम् । अत्यन्तप्रकाशे ।

आवी स्त्री अवीरेव स्वार्थे अण् ङीप् । रजस्वलायां १नार्य्यां २गर्भवत्यां च । "गर्भस्रन्नमावीनां प्रणाशःस्रावणाच्छुता" सुश्रु० ।

आवीत त्रि० आ+व्ये-क्त । १समन्तात्स्यूते उत्क्षिप्य २धृते च । भावे क्त । ३सम्यक् स्यूतौ ४उत्क्षिप्य धारणे च न० ।

आवीतिन् पु० आवीतमनेन इष्टा० इनि । "उद्धृते दक्षिणे पाणावुपवीत्युच्यते बुधैः । सव्ये प्राचीन आवीती निवीती कण्ठलम्बिते" मनूक्ते सव्यपाणिं बहिष्कृत्य दक्षिणस्कन्धोपरिधृतयज्ञसूत्रे प्राचीनावीतिनि । [नाभ्योष्ठौ जनके ।

आवुक पु० अवति रक्षति अव-वा० उण् संज्ञायां कन् ।

आवीरचूर्ण पु० आ समन्तात् विशेषेण ईर्य्यते क्षिप्यते आ+वि+ईर-घञ् कर्म्म धा० । (आवीर) इति ख्याते फलगुनि "आवीरचूर्णं रुचिरं स्रष्टुतां परमेश्वरः" । पुरा० ।

आवृत् स्त्री आ+वृत-सम्प० क्विप् । १आवर्त्तने २भ्रमणे ३पुनःपुनश्चलने "सूर्य्यस्याहतमन्वावर्त्ते दक्षिणामन्वाहतम्" श्रुत० १०,५,२७, ४पुनःपुनरेकजातीयक्रियाकरणे । आधारे क्विप् । ५परिपाट्याम् अनुक्रमे ६कृतिकर्त्तव्यताप्रकारे । "अनयैवावृता कार्य्यं पिण्डनिर्वपणं बुधैः" मनुः । "आवृते सोमपीतये" ऋ० १,३२,२, ७संस्कारे च । "अ "मन्त्रिका तु कार्य्या वै स्त्रीणामावृदशेषतः । संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम्" मनुः । ८तूष्णीम्भावे च । "आवृतैव पर्य्याग्नि क्षत्रोदकं नयन्ति" आश्व० श्रौ० । "आवृतैव तूष्णीमेवेत्यर्थः" इष्टिः । कर्त्तरि क्विप् । ९आवर्त्तमाने त्रि० ।

आवृत त्रि० आ+वृ-क्त । १आवरणे अप्रकाशीकृते आच्छादिते "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" गीता एतज्ज्ञानावृतत्वेतरविषयम् आवृते तु पुनर्मार्गश्चेत्तेऽपि दोष एवेति" मिता० "ब्राह्मणादुग्रकन्यायामावृतो नाम जायते" मनूक्ते २संकीर्णवर्णभेदे पुंस्त्री स्त्रियां जातित्वात् ङीप् ।

आवृति स्त्री आ+वृ-क्तिन् । आवरणशब्दार्थे ।

आवृत्त त्रि० आ+वृत-क्त । १पुनःपुनरभ्यस्ते २आवर्त्यमाने च ३पराङ्मुखे ४प्रतिनिवृत्ते च "आवृत्तानां गुरुकुलात् विप्राणां पूजकोभवेत्" मनुः । "कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" कठोप० "आवृत्तं व्यावृत्तं चक्षुः श्रोत्रादिकमिन्द्रियजातं विषयाद्यस्य" भा० ।

आवृत्ति स्त्री आ+वृत-क्तिन् । १पुनः पुनरभ्यासे २भूयएकजातीयक्रियाकरणे "आवृत्तिः सर्व्वशास्त्राणां बोधादपि गरीयसी" उद्भटः । "उद्यावृत्तिफलेन नारदः" रघुः । "एकद्रव्ये कर्म्मावृत्तौ सङ्ख्यासंस्कारवचनम्" कात्या० १,७,६ । "आवृत्तिरसकृदुपदेशात्" भा० सू० । ३ग्रन्थावृत्तौ ४ "पुनरामतौ "अनावृत्तिः शब्दात्" भा० सू० "तत्र प्राप्तविवेकख्यातेरावृत्तिः" सां० सू० । "यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः" गीता । "मुक्तौ कामयदं हन्तुं कृतमावृत्तिसाहसम्" किरा० । "तपोवनावृत्तिपथं गताभ्याम्" रघुः ।

आवृत्तिदीपक न० आवृत्त्या दीपकम् । दीपकावृत्तिरूपे अर्थालङ्कारभेदे तल्लक्षणं २०० उक्तम् ।

आवृष्टि स्त्री आ+वृष-क्तिन् । सम्यग्वर्षणे "भूयश्च शतवार्षिक्यामनावृष्टावनम्भसि" देवीभा० ।

आवेग पु० आ+विज-घञ् । उत्कण्ठाजनके त्वरान्विते च मानसे वेगे । वेगश्च क्रियाजन्यः सुखविशेषः मानसवेगस्योत्कण्ठादिसाधनत्वे आवेगत्वम् । "सावेगमस्याङ्गिरस्य तूष्णीं" किरा० । २व्यभिचारिभावभेदे । व्यभिचारिणस्तु सा० द० दर्शिता यथा निर्वेदावेगदैन्यश्रममदजड़ता औग्र्यमोहौ विबोधः" इत्यादयः । तत्र आवेगः सम्भ्रमस्तत्र वर्षजे पीड़िताङ्गता । उत्पातजे स्तब्धताङ्गे धूमाद्याकुलताग्निजे । राजविद्रवजादेस्तु शस्त्रनागादियोजनम् । गजादेः स्तम्भकम्पादिः पांशाद्याकुलता निलात् । इष्टार्थाः शुचोऽनिष्टाज्ज्ञेया आद्यन्ते यथायथम्" ।

आवेगी स्त्री आवेगोऽस्त्यस्याः अर्श आद्यच् गौरा० ङीष् । इन्द्रदारकवृक्षे ।

आवेदक त्रि० आ+विद-णिच्-ण्वुल् । १विज्ञापके "सत्याचारव्यपेतेन मार्गेणाधार्षितं परैः । आवेदयति चेद्राज्ञे व्यवहारपदं हि तदिति" स्मृत्युक्ते व्यवहारोत्थापके २वादिनि च

आवेदन न० आ+विद-णिच्-ल्युट् । १विज्ञापने व्यवहारोत्थापने (नालिशकरा) "राज्ञे कुर्य्यात् पूर्व्वमावेदनं यः" इति नारदः । आवेद्यते अनेन करणे ल्युट् । व्यवहारोत्थापके २भाषापत्रे (आरजी) तल्लक्षणादि स्मृतौ दर्शितं यथा "प्रत्यर्थिनोऽप्यतोलेख्यं यथाऽऽवेदितमर्थिना । समासासतदर्द्धाक्षनामजात्यादि-

चिह्नितम्" या०स्मृ०। "निवेश्य कालं वर्षञ्च मासं पक्षं तिथिं तथा। वेलां प्रदेशं विषयं स्थानं जात्याकृतीवयः। साध्यं प्रमाणं द्रव्यञ्च संख्यां नाम तथात्मनः। रात्तां च क्रमयोनाम निवासं साध्यनाम च। क्रमात् पितॄणां नामानि पीड़ामाहर्त्तृदायकौ। क्रमाल्लिङ्गानि चान्यानि पत्रं संकल्प्य कीर्त्तयेत्" कात्या०। "अर्थवत्-क्रमसंयुक्तं परिपूर्णमनाकुलम्। साध्यवद्वाचकपदं प्रकृता-र्थानुबन्धि च। प्रसिद्धमविरुद्धञ्च निश्चितं साधनक्षमम्। संक्षिप्तं निखिलार्थञ्च देशकालाविरोधि च। वर्षर्त्तु-मासपक्षार्द्धवेलादेशप्रदेशवत्। स्थानावसथसाध्याख्या-जात्याकारवयोयुतम्। साध्यप्रमाणसंख्यावदात्मप्रत्यर्थिनाम च। परात्मपूर्व्वजानेकराजनामभिरङ्कितम्। क्रमाल्लिङ्गा-त्मपीड़ावत् कवितार्हर्त्तृदायकम्। यदावेद्यते रात्रे तद्भाषेत्यभिधीयते" नार०। अत्र विशेषः वीरमि०। "देशश्चैव तथा स्थानं सन्निवेशस्तथैव च। जातिः संज्ञा निवासश्च प्रमाणं क्षेत्रनाम च। पितृपैतामहञ्चैव पूर्व्वराजानुकीर्त्त-नम्। स्थावरेषु विवादेषु दर्शितानि निवेशयेत्" कात्या० संख्याविशेषनिर्द्देशे "आसनं शयनं यानं ताम्रं कांस्य-मयोमयम्। धान्यमन्नमयं यच्च द्विपदञ्च चतुष्पदम्। मणिमुक्ताप्रवालानि क्षौरकं रूप्यकाञ्चनम्। यदि द्रव्यसमूहः स्यात् संख्या कार्य्या तदैव तु। यस्मिन् देशे च यद्द्रव्यं येन मानेन मीयते। तेन तस्मिंस्तदा संख्या कर्त्तव्या व्यवहारिभिः" हारी०। "देशकालविहीनञ्च द्रव्यसंख्या विवर्ज्जितः। क्रियामानविहीनञ्च पक्षोनादेय इष्यते" कात्या०। क्रिया प्रमाणं, मानं साध्यपरिमाणम्। भाषादोषाश्च नारदोक्ता यथा। "अन्यार्थमर्थहीनञ्च प्रमाणागमवर्ज्जितम्। लेख्यहीनाधिकं भ्रष्टं भाषादोषा उदाहृताः" इति विभज्य तेषां लक्षणान्याह स एव। "अर्थे साधारणेऽप्येकोऽसम्बन्धोऽथानियुक्तकः। लेखयेत् यन्तु भाषार्थमन्यार्थं तं विदुर्बुधाः। ब्रह्महायमिति ह्येषात् क्रोधाद्वापि वदेत्तु यः। साध्यञ्च मोचयेत् पश्चादर्थहीनन्तु तं विदुः। गणिते लिखिते सेवे तथा क्षेत्रस्तहा-दिषु। यत्र संख्या न निर्दिष्टा सा प्रमाणविवर्ज्जिता। विद्यया प्राप्तमर्थं स्वं क्रीतं क्रमागतम्। न त्वेवं लिख्यते यत्र सा भाषा स्यादनागमा। समा मासस्तथा पक्षस्तिथिर्वारस्तथैव च। यत्रैतानि न लिख्यन्ते लेख्य-हीनां तु तां विदुः" लेखयित्वा तु तां भाषामनि-र्दिष्टे तथोत्तरे। निर्दिशेत् साधिपः पूर्व्वमधिकां तां विनिर्दिशेत्। यत्र स्यात्तु यथापूर्व्वं निर्दिष्टं पूर्व्व-वादिना। सन्दिग्धमेव लेख्येन भ्रष्टां भाषां तु तां विदुः"। भाषादोषान्तरमाह" कात्या०। अप्रसिद्धं वि-राबाधं निरर्थं निःप्रयोजनम्। असाध्यं वा विरुद्धं वा पक्षाभासं विवर्ज्जयेत्"। तत्र अप्रसिद्धमाह वृह०। "न केनचित् कृतोयस्तु सोऽप्रसिद्ध उदाहृतः"। यथा कृतसहस्र कृतं क्षेत्रमपह्नुतम्" वीरमि०। "मदीयं शशविषाणं गृहीत्वा न प्रयच्छति" मिता०। "खल्वापराधः खल्वार्थो निरर्थक इति स्मृतः" वृह०। "यथाहमनेन वञ्चितोक्षित इति" स्मृति-चन्द्रिका। "कार्य्यबाधाविहीनस्तु विज्ञेयोनिष्प्रयो-जनः" वृह०। "यथाऽयं देवदत्तोमदीयगृहसन्निधौ सुखरमधीते इत्यादि" मिता० निरर्थकनिष्प्रयोजनौ अन्यथाऽपि वृह० लक्षितौ यथा "कुसीदाद्यैः पदै र्हीनोव्यवहारोनिरर्थकः। वाक्पारुष्यादिभिश्चैव विज्ञे-योनिष्प्रयोजनः"। "कुसीदस्थदानं तत्प्रभृतिभिश्च-तुर्भिरर्थविषयव्यवहारैः हीनो निरर्थकः, पारुष्यादिभि-र्हिंसात्मकैश्चतुर्भिर्हीनोनिष्प्रयोजनः" वीरमि०। असा-ध्यविरुद्धावाह वृह०। "समानेन प्रदातव्यं यशश्चक्रकृतं धनुः। असम्भाव्यमसाध्यं तं पक्षमाहुर्मनीषिणः। यस्मिन्नावेदिते पक्षे प्राड्विवेकेऽथ राजनि। पुरे राष्ट्रे विरोधः स्याद्विरुद्धः सोऽभिधीयते" अन्येऽपि पक्षाभासाः स्मृतिचन्द्रिकायामुक्ता यथा "भिन्न-क्रमोव्युत्क्रमार्थः प्रकीर्णार्थो निरर्थकः। अतीत-कालोवा द्विधःपक्षोनादेय इष्यते। यथास्थानानिवेशेन नैव पक्षार्थकल्पना। मन्यते तेन पक्षः स भिन्नक्रम उदा-हृतः"। व्यत्यस्ताक्षरसन्निवेशोभिन्नक्रम इत्यर्थः। व्युत्-क्रमार्थो व्यवहितान्वयेनार्थबोधकः। प्रकीर्णार्थोऽस-ङ्गतार्थः। "मूलमर्थं परित्यज्य तद्गुणोयत्र लिख्यते। निरर्थकः स वै पक्षो भूतसाधनवर्ज्जितः। भूतकालमति-क्रान्तं द्रव्यं यत्र हि लिख्यते। अतीतकालः पक्षोऽसौ प्रमाणे सत्यविस्मृतः। यस्मिन् पक्षे द्विधा साध्यं भिन्नकाल-विभक्तम्। विरुध्यते क्रियाभेदात् द्विधः स इह चोच्यते"। अन्ये च भाषाया दोषास्तत्रैवोक्ताः। "अन्याक्षरनिवेशेन अन्यथागमनेन च। आकुलं तु भवेल्लेख्यं क्रिया चैवा-कुला भवेत्। साधनं सह साध्येन निर्द्दिष्टं यत्र लेखयेत्। उक्तिक्रमविहीनत्वात् सोऽपि पक्षो न सिद्धति। विरु-द्धश्चाविरुद्धश्च द्वावप्यर्थौ निवेशितौ। एकस्मिन् यत्र दृश्येते तं पक्षं दूरतस्त्यजेत्। परापरविरुद्धानि यः पदानि

निवेशयेत् । विरूढपदसंकीर्णा भाषा तस्य न सिध्यति" अनेकपदसंकीर्णस्य दुष्यत्वं च युगपत्तत्साधनायोग्यस्थले एव । क्रमेण तु तत्साधनयोग्यत्वे तदपि याह्यमेव "बहु प्रतिज्ञं यत् कार्यं व्यवहारेषु निश्चितम् । कामं तदपि गृह्णीयाद्राजा तत्त्वबुभुत्सयेति" कात्या० उक्तेः भाषापत्रञ्च संस्कृतदेशभाषान्यतरेण यथाबोधं लेख्यम् मूर्खाणामपि वादिप्रतिवादितादर्थ्यनात् अतएव अध्यापनेऽपि तथात्वं विष्णु० उक्तम् । "संस्कृतैः प्राकृतैर्वाक्यैर्यः विध्यमनुरूपतः । देशभाषाद्युपायैश्च बोधयेत् स गुरुः स्मृतः" इति । येन सर्वेषामवबोधस्तथा लेख्यम् व्य०त० रघु० । तच्च यावदुत्तरं पाण्डुलेखं कृत्वा शोधनीयम् यथोक्तं पूर्व्वपत्रं स्वभावोक्तं प्राड्विवेकोऽभिलेखयेत् । पाण्डुलेखेन फलके ततः पत्रे निवेशयेत्" हरि० । "पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत् । जनाधिकं तु संशोध्य पश्चात् पत्रे निवेशयेत् । शोधयेत् पूर्व्ववादन्तु यावच्चोत्तरदर्शनम् । अवष्टब्धोत्तरेण निष्टप्तं शोधनं भवेत्" नार० ।

आवेदनीय त्रि० आ+विद्–णिच्–अनीयर् । १विज्ञापनीये यं प्रति ज्ञानाय आवेदनं क्रियते तस्मिन्, यस्य पदार्थस्यावेदनं क्रियते तस्मिंश्च । व्यवहारे २आवेद्ये कृत्यादानादौ च ।

आवेदित त्रि० आ+विद्+णिच्–कर्म्मणि क्त । १विज्ञापिते यं प्रति विज्ञापनं कृतं तस्मिन्, यस्य पदार्थस्य वेदनं कृतं तस्मिंश्च । व्यवहारे आवेदनकाले २निवेदिते पदार्थे च । "लिखितं साक्षिणो वापि पूर्व्वमावेदितं न चेत्" नारदः "यथावेदितमर्थिना" या० स्मृतिः ।

आवेदिन् त्रि० आ+विद्–णिच्–णिनि । १विज्ञापके । व्यवहारे २वादिनि च । "अनिष्टावेदिनं स्वप्नं दृष्ट्वा" रामा० स्त्रियां ङीप् । आ+विद्–णिनि । २आज्ञातरि त्रि० स्त्रियां ङीप्

आवेद्य त्रि० आ+विद्–णिच्–यत् । १विज्ञाप्ये २आवेदनीयार्थे आ+विद्–णिच्–ल्यप् । ३विज्ञाप्येत्यर्थे अव्य० ।

आवेध्य त्रि० आ+विध–यत् । आवेधार्हे शल्यादिमत्यौ ।

आवेश पु० आ+विश–घञ् । १अहङ्कारभेदे, २संरम्भे, ३अभिनिवेशे, ४आसङ्गे, ५अनुप्रवेशे, यथा भूतावेशः । ६त्यक्तभये, ७भूताद्यावेशरोगे च । "तस्मै स्वयावेशविवर्জ্জिताय" रघुः "तपनं प्रविवित्क्षेदे खरावेशोऽन्यचेष्टितम्" सा०द० । "आवेशमोहौ क्रोधञ्च गान्धारीधृतराष्ट्रयोः" भा० आ० प० १अ० "पञ्चानामिन्द्रियार्थानां शोकावेशदृवात्मनः" भा०व० ११अ०

आवेशन न० आ+विश–आधारे ल्युट् । १शिल्पशालायाम् तत्र हि मनोऽभिनिवेशेनैव कार्य्यकरणात्तस्याऽऽवेशनत्वम् २भूतावेशादिरोगे ३स्फटिकेन्दुपरिधौ च । "मनःक्षेपस्तपस्कारो यत्राद्यावेशनादिजः" सा०द० । "जीर्णोद्यानान्यरण्यानि कारुकावेशनानि च" मनुः आवेशयत्यर्थे ४क्षोपादौ च आधारे ल्युट् । ५गृहे च । आ+विश–णिच्+ल्युट् । ६प्रवेशसम्पादने व्यापारे

आवेशिक त्रि० आवेशे गृहे भवः आगतो वा ठञ् तत । १अतिथौ २असाधारणे ३बान्धवादौ च । [२बेटके (बेड़ा)

आवेशित त्रि० आ+विश–णिच्–क्त । निवेशिते, "न मय्यावेशितधियां कामः कामाय कल्पते" भाग० । "मय्यावेशितचेतसः" गीता ।

आवेष्टक पु० आवेष्टयति ण्वुल् । आवरणकारके प्राचीरादौ

आवेष्टन न० आ+वेष्ट–भावे ल्युट् । १आवरणे करणे ल्युट् । आवरणसाधने २प्राचीरादौ । (बेड़ा)इति ३पदार्थे च

आविद्क त्रि० अब्दे भवः ठक् । वर्षभवे श्राद्धादौ "आब्दिके पिण्डदाने च चान्द्रं मासं विनिर्दिशेत्" स्मृतिः "तथा लाक्षोपहीतव्योराड्डाद्याब्दिकः करः" मनुः षट्त्रिंशदाब्दिकं चर्य्यम्" मनुः असंक्रान्तेऽपि कर्तव्यमाब्दिकं प्रथमं द्विजैः" लघुहा० । "एकाहः पुनराब्दिके" स्मृतिः । [मादौ

आव्य त्रि० अवेर्मेषस्य विकारः यञ् । मेषसम्बन्धिनि दुग्धादौ

आव्याध पु० आ+व्यध–घञ् उपसृष्टत्वात्तन अप् । सम्यक्पीडने

आव्याधिन् त्रि० आ+व्यध–णिनि । सम्यक्पीडके । स्त्रियां ङीप् । सा च २चोरसेनायाम् "नदीकाः पुरुषव्याघ्राः परिमोषिण आव्याधिन्यस्करा अरण्येवाजावेरन्" शत०ब्रा० "आव्याधिन्यः चोरसेनाः" भा० ।

आव्रश्चन न० ईषत् व्रश्चनं छेदनम् प्रा०स० । १ईषच्छेदने, "आव्रश्चनाद्दानस्यतयोऽनुप्रजायन्ते" शत०ब्रा० । आधारे ल्युट् । २क्षेद्यवृक्षप्रदेशे त्रि० आङ्त्या हि यो यूपः संस्कर्त्तव्यः सस्याणुः आव्रश्चनशब्देनोच्यते "अतस्त्वमित्याव्रश्चने जुहोति" कात्या० ६,१,२० । आङ्स्प्रयते यूपोऽस्मादाव्रश्चनः स्थाणौ छेदनप्रदेशः" श्रुतिः "आव्रश्चनमभिजुहोति" शत०ब्रा० ।

आव्रस्क पु० आ+व्रश्च–घञ् कुत्वम् । ईषच्छेदने । आव्रस्कनोऽनाव्रस्काय" तैत्ति०श्रुतिः । [वृक्ष । निर्लज्जदेशे ।

आव्रीडक पु० अव्रीडस्य निर्लज्जस्य विषयो देशः राजन्या०

आश पु०अश–भोजने घञ् । भोजने । प्रातराशः, सायमाशः, कर्म्मणि उपपदे कर्त्तरि अण उपपदस० । तत्तद्वस्तुभक्षके

यथा छताग्रः आम्रवाग्रः मांसाग्रः पलाग्रः हविष्याग्रः।

आग्रंसा स्त्री आ+ग्रंस-अ। अग्राग्रस्य १प्राप्तीच्छायाम्, २दृष्टावाग्रंसने च। "निदधे विजयाग्रंसां चापे सीताञ्च लक्ष्मणे" रघुः "आग्रंसायां भूतवच्च" "आग्रंसावचने" तिङ्" पा०। ल्युट् आग्रंसनमप्यत्र न०। "दृष्टावाग्रंसन माशीः" रघु०। [भूते। भावे क्त ३आग्रंसतायाम् न०।

आग्रंसित त्रि० आ+ग्रंस-क्त। १कथिते २दृष्टाविषयी-

आग्रंसिष्ट त्रि० आ+ग्रंस-इष्ट्च्। भाविशुभेच्छावति। स्त्रियां ङीप्। [कर्त्तरि स्त्रियां ङीप्।

आग्रंसिन् त्रि० आ+ग्रंस-णिनि। आग्रंसी आग्रंसा

आग्रंसु त्रि० आ+ग्रंस-उ। दृष्टाकारके भाविशुभाग्रंसावति "लक्ष्मीः पुंयोगमाग्रंसुः कुलटेव कुटुम्बिनी" भट्टिः

आग्रक त्रि० अग्राति अग्र-ख्वुल्। १भक्षके २भोगयुक्ते। णिच्-ख्वुल्। २भोगसम्पादके। "तमेतं ब्राह्मणा विविदिषन्ति-तपसाऽनाशकेन" श्रुतिः।

आग्रक्त त्रि० सम्यक् ग्रक्तः प्रा०स०। सम्यक्ग्रक्तियुक्ते

आग्रङ्कनीय त्रि० आ+ग्रकि-अनीयर्। १शङ्कया विषयीकार्य्ये २अनिष्टतया चिन्तनीये च।

आग्रङ्का स्त्री आ+ग्रकि-अ। १भये त्रासे अनिष्टतया २चिन्तने "वस्तुतोऽग्रङ्कनीयत्वाभावे" माघः। "रत्या च साग्रङ्कमनुप्रवातः" कुमा०। "गुदपरिकर्त्तनमाग्रङ्का पाण्डु-रोगग्रहणीदोष शोषाणाम्" सुश्रु०सम्यक्शङ्कायां ३सन्देहे इत्याग्रङ्कायामाह इति भूरिशः जगदीशः गदाधरश्च प्रायुङ्क्त।

आग्रङ्कित त्रि० आ+ग्रकि-कर्त्तरि क्त। १भीते कर्मणि क्त अनिष्टतया २चिन्तिते ३सन्दिग्धे च। भावे क्त। ४भये ५सन्देहे ६अनिष्टतया चिन्तने च न०।

आग्रङ्किन् त्रि० आ+ग्रकि-णिनि। आग्रङ्कायुक्ते "रघोरभिभवाग्रङ्कि चुक्षुभे द्विषतां मनः" रघुः। अशुभाग्रङ्कि हृदयम्" रामा० कुञ्जा नीचतयैव यान्ति मनकैरालेक्ष्याग्रङ्किनः" रत्ना०। स्त्रियां ङीप्।

आग्रङ्क्य त्रि० आ+ग्रकि-कर्मणि ण्यत्। १सन्देहविषयीकार्य्ये २अनिष्टतया चिन्त्ये ख्यप्। ३संदिग्धेत्यर्थे ४अनिष्टतया ज्ञात्येत्यर्थे च अव्य० अव्याप्यवृत्तिसाध्यकसन्देहावव्याप्तिमाग्रङ्क्याह" दीधितिः।

आग्रन पु० अग्रनएव स्वार्थे अण्। १अग्रनडचे हिङ्गुपकोषः अग्र-णिच् ल्यु। २भोजयितरि त्रि०। अग्रनिः अग्रनिजीवी स्वार्थे पचा० अण्। ३तज्जीविनि त्रि० आग्रनः आग्रनौ वर्द्धयु तस्य लुक् अग्रनय इत्येव। अग्रनिरेव प्रज्ञा० अण्। ४वल्के स्वार्थिकप्रत्ययस्य प्रकृतिलिङ्गत्वात् पुंस्त्री०।

आग्रय पु०आ-ग्री-अच्। १अभिप्राये, २आधारे, ३विभवे, ४मनसदृचे वैद्यकोक्ते ५स्थानभेदे च। आ फलविपाकात् चित्तभूमौ शेते इति कर्त्तरि अच् कर्मजन्ये दैवासनारूपे संस्कारे, "क्लेशजन्यकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" पात०सू०धर्माधर्मरूपे दृष्टादृष्टे च। अधारे अच्। आशयवति दृचित्ते। "अहमात्माशयस्थः" गीता०। भावे अच्। १०शयने ११स्थाने च "यो वक्षानेदमाशयः" किरा०। "यद्दोहकामादरिणाशयेन" नैष०। विषमोऽपि विगाह्यते नयः क्षततीर्थैः पयसामिवाशयः" किरा०। "यद्दोषैर्वैतानि संयाति वायुर्गन्धानिवाशयात्" वैद्यकोक्ताः देहान्तर्वर्त्तिन आशयास्तु सप्त यथा ह" सुश्रुते "त्वचः सप्त, कलाः सप्त, आशयाः सप्त" इति विभज्य आशयास्तु वाताशयः पित्ताशयः श्लेष्माशयः रक्ताशयः आमाशयः पक्वाशयः मूलाशयः, स्त्रीणां गर्भाशयोऽष्टम" इति। एषां स्थानानि भावप्र०। "उरोरक्ताशयस्तस्मादधःश्लेष्माशयः स्मृतः। आमाशयस्तु तदधः तच्छिद्रं चरकोऽवदत्" नाभिसनालान्तरं जन्तोराङ्त्रमाशयं बुधाः। आमाशयादधः पक्वाशयादूर्द्धं तु या कला। यद्गृहणीनामिका सैव कथितः पावकाशयः। अर्द्धनाभ्याशयो नाभेर्मध्यभागे व्यवस्थितः। तस्योपरि विद्धि श्रेयं तदधः पवनाशयः। पक्वाशयस्तु तदधः सएव च मलाशयः। तदधः कथिता वस्तिः सा हि मूलाशयो मतः। पुरुषेभ्योऽधिकास्तान्ये नारीणामाशयास्त्रयः। एकोगर्भाशयः प्रोक्तः पित्तपक्वाशयान्तरे। स्तनौ प्रसिद्धौ तावेव बुधैःस्तन्याशयौ स्मृतौ"। १२कोशागारे १३बौद्धमतसिद्धे आलयविज्ञान रूपे विज्ञानसन्ताने १४आश्रये १५किंपचाने पशुधारणार्थगर्त्तरूपे १६ज्ञातभेदे च। "अयञ्च पार्थो बीभत्सुर्वरिष्ठोऽद्याविकर्षणे। आस्ते परमसन्तप्तो नूनं सिंह इवाशये" भा०व० २५अ०।

आग्रयाग्र पु० आशयमाश्रयमश्नाति अश-अण् उप०स०। वह्नौ क्षीरस्वामी तस्य स्वाश्रयकाष्ठादेर्भक्षकत्वेन तथात्वम्

आग्रर पु० आग्रहणाति अ+ग्रह-अच्। १अग्नौ, २राजसे च।

आग्रव न० आग्रोर्भावः पृथ्वा० वा अण्। श्रीघ्रत्वे पचे इमनिच् आग्रिमा पु०। त्व आग्रुत्वम् न०तल् आग्रुता स्त्री तत्रार्थे।

आग्रस् त्रि०आ+ग्रस-क्विप्। १आग्रसनकर्त्तरि। भावे क्विप्

आशंसने "नमसा दृक्ष्यमानस्तवायसा जातवेदोयदोदम्" ऋ०४,५,११, "तवायसा त्वत्स्तुत्या" भा०।

आशंसन न० आ शंस-ल्युट्। १कथने २आशंसायाञ्च। "तस्या आक्षनं कृत्वा मेनिरायसनम्" अथ० १२, ५,३६, "शिप्रेऽस्यायसनं जनिष्यते" शत०ब्रा०।

आशंस्त त्रि० आ+शंस-क्त। स्तुते। "यद्धिद्धि सत्य सोमपा अनाशस्ता इव स्मसि" ऋ०१,२,६१।

आशा स्त्री समन्तात् अश्नुते आ+अश-अच्। दिशि, "अगस्त्याचरितामाशामनाशास्यजयोययौ" रघुः "करभकण्ठकठोरमाशाः" माघः। "गच्छतस्तस्य चित्तरथतनया न केवलमन्तर्बहिरपि सैव सर्व्वाशानिबन्धनमासीत्" काद०। दिक् च नैयायिकादिमते संख्यापरमितिपृथक्त्वसंयोगविभागाश्रयेद्रव्यभेदः दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया तत्सिद्धिः तस्या एकत्वेऽपि उपाधिभेदात् प्राच्यादिव्यवहारः तथा च यत्पुरुषस्य उदयगिरिसन्निहिता या दिक् सा तस्य प्राची, उदयगिरिव्यवहिता प्रतीची तत्पुरुषीयमेरुसन्निहिता दिगुदीची "सर्वेषाञ्चैव वर्षाणां मेरुरुत्तरतः स्थितः" इत्युक्तेरुत्तरावात्वम्। तद्व्यवहिता दिक् अवाची। इयञ्च दिक् ईश्वर एवेति रघुनाथः "दिक्कालावीश्वरादतिरिच्यते" इति पदार्थखण्डने तर्कोक्तेः सां०को० मते यदुपाधिना पूर्व्वापरत्वव्यवहारस्तदुपाधेरेव दिक्शब्दवाच्यत्वं न तदाश्रयत्वेनातिरिक्तदिक्कल्पनम् तथा च गगनात्मकत्वमेव दिशः "दिक्कालावाकाशादिभ्यः" सां०सू० आकाशोपाधिभ्यामेव दिक्कालयोर्नार्थान्तरत्वमिति व्यवस्थापितम्।

२अशक्योपायार्थविषयायाम् तीव्राकाङ्क्षायाम् ३अप्राप्तप्राप्तीच्छायां तृष्णायां च। "आशा बलवती राजन्! शल्योजेष्यति पाण्डवान्" "तामाशां हृदये कृत्वा" भा० शल्यप०। "आशा हि परमं दुःखं नैराश्यं परमं सुखम्। यथा संछिद्य कान्तायां सुखं सुष्वाप पिङ्गला" पुरा० "मनो बतूवेन्दुमतीनिराशम्"। "राघवोरथमप्राप्तां तामाशाञ्च सुरद्विषाम्" रघुः आशायाञ्च ब्रह्मरूपेणोपासनं श्रुतौ विहितं यथा "सराद्धाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति" प्रश्ने "आशाबाव सराद्भूयस्याशेद्धोवै सरोमन्वानधीते कर्म्माणि कुरुते पुत्रांच पशूंश्चेच्छत इमं च लोकमसुञ्चेच्छत आशासुपास्वेति। स य आशां ब्रह्मेत्युपास्ते आशयास्य सर्व्वे कामाः समृध्यन्त्यमोघाः हास्याशिषो भवन्ति यावदाशाया गतं तत्रास्य यथा कामचारो भवति य आशां ब्रह्मेत्युपास्ते" छा०उ० व्याख्यातं च भा०। यथा "आशा वाव सराद्भूयसी। अप्राप्तवस्त्वाकाङ्क्षा आशा तृष्णा काम इति यामाहुः पर्य्यायैः। सा च सरात् भूयसी। कथम्? आशया ह्यन्तःकरणस्यया सरति सर्त्तव्यम्। आशा विषयरूपं सरन्नसौ सरो भवति आशेद्ध आशयाभिवर्द्धितः सरभूतः सरद्भूगादीन्मन्त्रानधीतेऽधीत्य च तदर्थं ब्राह्मणेभ्यो विधींश्च श्रुत्वा कर्म्माणि कुरुते तत्फलायैव। पुत्रांश्च पशूंश्च कर्म्मफलभूतानिच्छतेऽभिवाञ्छति आशयैव तत्साधनान्यनुतिष्ठन् इमञ्च लोकमाशेद्धएव सरन् लोकसंग्रहसेतुभिरिच्छन्नसुञ्च लोकमाशेद्धः सरन् सराकाशादिनामपर्य्यन्तं जगद्भक्षीभूतं प्रतिप्राणि, अत आशायाः सरादपि भूयस्त्वमित्यत आशासुपास्व। यस्त्वाशां ब्रह्मेत्युपास्ते श्रुणु तस्य फलम् आशया सदोपासितयाखोपासकस्य सर्वे कामाः सस्रद्यन्ति सस्रद्धिं गच्छन्त्यमोघाहास्याशिषः प्रार्थनाः सर्व्वा भवन्ति यत् पार्थितं सर्व्वं तदवश्यं भवतीत्यर्थः"। ऐषद्ब्रह्मदमादायैव आशाकामतृष्णादेर्भेदः तदभिप्रायेणैव "आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला" इत्यादौ आशादीनां भेदेन वर्णनम्।

आशा(ड)ढ पु० आषाढ+पृ०। आषाढशब्दार्थे द्विरूपकोषः

आशाढा(डा) स्त्रीपु०आषाढानक्षत्रे "मार्गे च फाल्गुने चैव आशा(डे)ढे कार्त्तिके तथा। पञ्चयोर्भाद्रमासस्य द्वितीयां परिवर्ज्जयेत्" मल० त० पु०। आशाढा प्रयोजनमस्य अण्। २ब्रह्मचारिधार्य्ये पालाशे दण्डे। आशाढानक्षत्रयुक्ता पौर्णमासी अण्ङीप्। आशाढी चान्द्राशाढपौर्णमास्याम् स्त्री सा यत्र मासे अण्। चान्द्राशाढे पु०।

आशादामन् न० आशा दामेवोपमि० स०। आशारूप बन्धनसाधने दामनि आशारूपग्रन्थे।

आशापाल पु० आशां दिशं पालयति पा-णिच्-अण् उप०स०। १दिक्पाले इन्द्रादौ ते च "इन्द्रोवह्निः पितृपतिर्नैर्ऋतोवरुणोमरुत्। कुबेरईशः पतयः पूर्व्वादीनां दिशां क्रमात्" इत्यमरोक्ता अष्टौ ऊर्द्धाधोदिगोच ब्रह्मानन्तौ चेति दश। २अश्वमेधीयपशुरक्षके राजकुमारभेदे च। तेषां स्वरूपादिकमुक्तं शत०ब्रा०। "आदित्यानेवैनं गमयति देवा आशापाला एतं देवेभ्योऽश्वं मेधाय प्रोक्षितं रक्षतेति शतं वै तत्प्रा राजपुत्रा आशापालास्तेभ्य एवैनं परिददातीह रन्तिरिह रमतामिह धृतिरिह स्वधृतिः स्वाहेति संवत्सरमाञ्जतीर्जुहोति

षोडश नवतीरेता वा अश्वस्य बन्धनं ताभिरेवैनं बध्नाति तस्मादश्वः प्रसुक्कोबन्धनमागच्छति षोडश नवतीरेता वा अश्वस्य बन्धनं ताभिरेवैनं बध्नाति तस्मादश्वः प्रसुक्कोबन्धनं जहाति। राष्ट्रं वा अश्वमेधः राष्ट्रएते व्यायच्छन्ते येऽश्वं रक्षन्ति तेषां य उदृचं गच्छन्ति राष्ट्रमेव ते राष्ट्रं यन्ति अथ ये नोदृचं गच्छन्ति राष्ट्रात्ते व्यवच्छिद्यन्ते तस्माद्राष्ट्रियोऽश्वमेधेन यजेत परा वा एष सिच्यते योऽबलोऽश्वमेधेन यजते यद्यमित्रो अश्वं विन्देत यद्योऽस्य विच्छिद्येत पापीयान् तस्माच्छतं कवचिनो रक्षन्ति वज्रस्य संतत्या अव्यवच्छेदाय न पापीयान् भवत्यथान्यमानीय प्रोक्षेयुः, सैव तत्र प्रायश्चित्तिः" शत०ब्रा०। अधिकमश्वमेधशब्देऽस्मत्।

आशापुर न० पुरभेदे यत्र प्रसन्नयुग्मुलसन्नवस्तादशे नगरे।

आशापुरसम्भव न० आशापुरे सम्भवति सम्+भू अच्। युग्मुलभेदे।

आशाबन्ध पु० आशां दिशं बध्नाति अच्। १मर्कटजाले, -बन्ध-घञ् ३त०। २दृष्टाबन्धे ६त०। ३दिशां बन्धे च। ४समाप्तौ। आशा बन्धइव। ५आशारूपे बन्धे। "आशाबन्धः कुसुमसदृशं प्रायशोह्यङ्गनानाम्" मेघदू०।

आशाबह त्रि० बह-अच् ६त०। १आशाधारके आशासंपादके। २ऋषिभेदे "आशाबहो निरृद्धयसभीकः सारिमेजय" भा०आ०१८६अ०३दिवः पुत्रभेदे च पु०"दिवः पुत्रो बृहद्भानुश्चक्षुरात्मा विभावसुः। सविता स ऋचीकोऽर्कः भानुराशाबहो रविः" भा०आ० १अ०।

आशास्य त्रि० आ+शास-ण्यत्। आशीःसाध्ये, आशंसनीये "आशास्यमन्यत् पुनरुक्तमेव" रघुः। "अनाशास्यजयोययौ" रघुः।

आशित त्रि०आश्नाति आ+अश-क्त। १सम्यग्भुक्ते, अन्नादौ भावे क्त। २सम्यग्भक्षणे न०। आशितमक्षस्य अर्थ० अच्। ३अशनेन तृप्ते त्रि० "नातिप्रगे नातिसायं न सायं प्रातराशितः" मनुः।

आशितङ्गवीन त्रि० आशिता अशनेन तृप्ता गावो यत्र खञ् नि० सुम्। यत्र स्थले घासादिभक्षणेन गावस्तृप्तिमाप्नुवन्ति तादृशे प्रचुरघासे स्थले "स्थित्वाशितङ्गवीनानि" भट्टिः।

आशितम्भव त्रि०आशितोऽशनेन तृप्तो भवत्यनेन आशित+भू-करणे खच् सुम् उ०स०। १यस्य भोजनेन प्राणिनस्तृप्ता भवन्ति २ताडगेऽन्नादौ। भावे खच्। ३अशनेन तृप्तभवने न०। "फलैर्वेष्वाशितम्भवम्" भट्टिः। [ङीप्।

आशिष त्रि० आ+अश-क्त। कृताशीर्व्वादे। स्त्रियां

आशिन् त्रि० अश-भोजने णिनि। भक्षके "श्वसथानवासो मांसाशी खपराशी मखान्तकृत्" वटुकस्तोत्रम्। "नायन्नित-स्त्रिवेदोऽपि सर्व्वाशी सर्वविक्रयी" "भोजनार्थन्तु ते शंसन् वान्ताशीत्युच्यते बुधैः" "आगारदाही गरदः कुण्डाशी सोमविक्रयी" "विषसाशी सवेद्यित्वं नित्यं वाऽहुतभोजनः" इति च मनुः। "दिवोपवासी तु निशामिषाशी" हारीतः। "एवं कृत्वा हविष्याशी जपेद्यज्ञमनन्यधीः" तन्त्रम्।

आशिन त्रि० आशिनु+स्वार्थे अण् वेदे नि० न टिलोपः। भक्षके "नमोयुवभ्योनम आशिनेभ्यः" ऋ० १,२७,१२।

आशिमन् पु०आशोर्भावः पृथ्वा० इमनिच् डिद्वत्। शीघ्रत्वे।

आशिर् त्रि० आश्रीयते पच्यते आ+श्री-क्विप् नि०। पच्यमाने क्षीरादौ "शुक्रा आशिरं याचन्ते" ऋ०८,२,१०। "आशिरं क्षीरादिकं अपक्वद्रव्यम्" भा०। "तॉं आशिरं पुरोडाशमिन्द्रियम्" ऋ०८,२,१०। "इन्द्राय गाव आशिरं दुदुह्रे वज्रिणे मधु" ऋ०८,५८,६।

आशिर त्रि० आशीरेव स्वार्थे अण्। अपक्वीये क्षीरादौ। "अथ यद्येनुर्भवति साशिरमेवैतत् क्रीणाति" शत० ब्रा० ३,३,१। आ+अश-व्याप्तौ भोजने वा इरच्।२अग्नौ २सूर्य्ये ४राक्षसे च पु० मि०कौ०। अग्निराक्षसयोः सर्वभक्षकत्वात्, सूर्यस्य च दीप्त्या सर्व्वव्यापित्वात्तथात्वम्।

आशिषिक त्रि० आशिषा चरति ठक् "इत्तद्धितान्तात्" पा०सूत्रे प्रतिपादोक्तस्यैव इसो यच्छब्दात् न कः किन्तु इक एव। आशीर्व्वादेन चारिणि आशीरभिरते।

आशिष्ट त्रि० आ+शास-क्त। कृताशीर्व्वादे।

आशिष्ठ त्रि०अतिशयेन आशु इष्ठन् डिद्वत्। अत्यन्तशीघ्रे।

आशिस् स्त्री आ+शास् क्विप् आङ्पूर्व्वकत्वात् अतइत्त्वम्। १इष्टार्थाविष्करणे। "यां वै काञ्च यज्ञ ऋत्विज आशिषमाशासते यजमानस्यैव सा" शत० ब्रा० १,३,१,२६। "आशीर्नमस्क्रिया वस्तुनिर्देशोवाऽपि तन्मुखे" सा०द०। "जगच्छरण्यस्य निराशिषः सतः"कुमा०"अमोघाः प्रतिगृह्णन्त्यपि पादमाशिषः" रघुः। २प्रार्थनायाञ्च तस्य कामाः समृध्यन्त्यमोघाह्यस्याशिषो भवन्ति" छा०उ०। "आशिषः प्रार्थनाः" भा०"वेदोक्तमायुर्मन्त्राणामाशिषश्चैव कर्मणाम्" मनुः। आशीश्च "वात्सल्याद्यत्र मान्येन कनिष्ठस्याभिधीयते। इष्टावधारकं वाक्यमाशीः सा परिकीर्त्तिता" इत्येवं लक्षणा प्रार्थनावाक् अत्र कनिष्ठस्येत्युपलक्षणम्। "तस्मै जयाशीः सहजे पुरस्तात् सप्तर्षिभिस्तान् स्मितपूर्व्वमाह" कुमा० सप्तर्षिकृताशिवाशीर्व्वादवर्णनात्

आशी स्त्री आशीर्य्यतेऽनया आ+शॄ क्विप् ङीप् । "१सर्पदंष्ट्रायाम् । आशीविषः । "विषमाशीभिरनारतं वमन्तः साधः । "आशीमिव कलामिन्दोः" राजेश्वरः "आशी उरगदंष्ट्रायाम्" वैद्य० । "आशी तालुगता दंष्ट्रा तया विद्धो न जीवति" आशिस् ङीप् । २आशीर्व्वादे द्विरूपकोषः ३दृढिनामोषधौ च । स्त्रियां ङीप् ।

आशीयस् त्रि० अतिशयेनाशुः दृढ इदन् । अत्यन्तशीघ्रे

आशीर्त्त त्रि० आ+शी-क्त वेदे निः । आश्राणे पक्के दुग्धादौ "मध्यत आशीर्त्तः" सि०कौ० धृता श्रुतिः ।

आशीर्वत् त्रि० आशीरस्त्यस्य मतुप् वेदे मस्य वः । आशीर्व्वादयुक्ते "सवनान्याशीर्व्वन्ति" कात्या० २,८,८ लोके तु आशीर्मान्नित्येव स्त्रियां ङीप् ।

आशीर्वाद पु० आशिषो वादः वचनम् । इष्टार्थाविष्करणवाक्ये "मङ्गल्यं दीर्घवर्षान्नमाशीर्वादाभिधानवत्" मनुः "संजानन्त्यतुलं वीर्य्यमाशीर्वादपरायणाः" भा० आ०प० ८अ० । आशीर्वचनादयोऽत्र । "आशीर्वचनसंयुक्तां नित्यं यस्मात् प्रकुर्व्वते" सा०द० ।

आशीविष पु० आशां विषमस्य । १सर्पे तद्वदाद्याहिशब्दे ५८१ पृष्ठे उक्ताः । "गरुत्मदाशीविषभोगदर्शनैः" रघुः २दर्वीकरसर्पभेदे च अहिशब्दे वक्ष्यते उदा० "आशीविषैः कृष्णसर्पैर्भीमसेनमदंशयत् । सर्व्वेष्वेवाङ्गदेशेषु न ममार च सत्वहा" भा०व०१२अ० । "तैर्विषं भुञ्जते यस्तु मणिनागस्य भारत ! । दष्टस्याशीविषेणापि न तस्य क्रमते विषम्" भा०व० ८४अ० । "रक्षन् सतः सत्यशीलान् सत्यधर्म्मानुपालिनः । आशीविषानिव क्रुद्धान् पतीन् परिचरास्यरूहम्" भा०व०२३२अ० ।

आशु त्रि० अश-व्याप्तौ उण् । १शीघ्रे "यदाशुभिः पतति योजना पुरः" ऋ०२,१६,३,गुणवचनत्वात् स्त्रियां वा ङीप् । वर्षाभवे २धान्यभेदे पु० (आउस) । तस्य षष्टिदिवसमध्ये पच्यमानतयाऽऽशुपाकात् आशुत्वम् तद्गुणलक्षणानि भावप्र० । "वार्षिकाः काण्डिताः शुक्लास्त्रीहयश्चिरपाकिणः । कृष्णव्रीहिः पाटलश्च कुक्कुटाण्डक इत्यपि । शालीक्षुखोजतुसुख इत्याद्याव्रीहयः स्मृताः । कृष्णव्रीहिः स विज्ञेयो यः कृष्णतण्डुलः (कोद्रव) । पाटलः पाटलापुष्पवर्णको व्रीहिरुच्यते (राङ्गिधान्य) कुक्कुटाण्डाकृतिर्व्रीहिः कुक्कुटाण्ड इहोच्यते । शालीक्षुकः कृष्णशुकः कृष्णतण्डुल उच्यते । लाक्षावर्णं मुखं यस्य स्तोकोजतुसुखस्तु सः । व्रीहयः कथिताः पाके मधुरा वीर्य्यतो हिमाः । अल्पाभिष्यन्दिनोवृद्धवर्च्चस्काः षष्टिकैः समाः" "कृष्णव्रीहिर्वरस्तेषां तस्मादल्पगुणाः परे" २ पाटले व्रीहौ न० । ४क्रियाविशेषवत्वे न० । "प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत्" शान्तिं नेयं प्रणयिभिरतोवर्त्म भानोस्त्यजाशु" मेघदूतम् "स जीवसन्नेव मुहूर्त्तमाशु गच्छति सान्वयः" "कुलान्येव नयन्त्याशु समस्तानि च मुहूर्त्तताम्" मनुः

आशुकारिन् त्रि० आशु शीघ्रं करोति कृ-णिनि स्त्रियां ङीप् । १शीघ्रकरे "आशुकारी तथाशुत्वाद्वायुवन्मरुति तैलवत्" सुश्रुतोक्ते २द्रवभेदे च । क्विप् । आशुकृदप्यत्र त्रि० ।

आशुक्रिया स्त्री आशु यथा तथा क्रिया । शीघ्रकरणे "अष्टास्वायुर्वेदतन्त्रेषु एतदेवाधिकमभिमतमाशुक्रियेति" सुश्रु० ।

आशुग पु० आशु+गम-ड । १वायौ, २सूर्य्ये च । एतयोः शीघ्रगामित्वात् तथात्वम् । "वायुर्वै क्षेपिष्ठा देवतेति" श्रुतौ क्षिप्रगामित्वोक्तेः शीघ्र गतित्वप्रसिद्धत्वाच्च वायोस्तथात्वम् सूर्य्यस्याशुगत्वमनुपदं वक्ष्यते ३बाणे "पपावनास्वादितपूर्व्वमाशुगः" "रावणस्यापि रामास्तोभित्वा हृदयमाशुगः" रघुः ४शीघ्रगामिनि त्रि० विनीतैस्तु व्रजेच्चित्यमाशुगैर्लक्षणान्वितैः" मनुः । "दिशां गजन्तु श्वेताख्यं (ऐरावतम्) श्वेताञ्जनयताशुगम्" भा०आ०प०६६अ० । "जवनानाशुगांश्चैव करार्थं समुपानयत्" भा०स०प्र०२६३अ० "शोभमाना रथे युक्तास्तरिष्यन्त्वाशुगाः" भा०व०प०१६१अ० । आशुगत्वं च अल्पकालमध्ये गन्तव्यदेशगमनात् भवति कालाल्पत्वञ्च आपेक्षिकं ततश्च "शीघ्रोऽल्पभागे वक्रभागमन्दे" इत्यादौ नील०ता० यद्यपां शीघ्रमन्दत्वमापेक्षिकमिति बोध्यम् तथा च स्वस्वकक्षायां यद्यपां तुल्यगतित्वेऽपि कक्षाणामल्पत्वदृहत्त्वाभ्यां गन्तव्यदेशाल्पत्वाधिकत्वभेदात् गतिभेदः यद्यपां कक्षामानं च यद्यकक्षाशब्दे वक्ष्यते । तथा च स्वस्वकक्षास्थयद्यहस्य दृहत्कक्षास्थयद्यापेक्षया शीघ्रगत्वम् तच्च स्वाभाविकम् । अत्र प्रसङ्गात् यद्यपां शीघ्रमन्दगतित्वे कारणमुच्यते तथा हि सर्व्वेषां यद्यपां राशिचक्रस्वस्वकक्षासु तुल्यप्राग्गतित्वेऽपि स्वस्वकक्षाणामल्पत्वदृहत्त्वाभ्याम् अल्पाधिककालाभ्यामेव स्वस्वकक्षास्थराशिचक्रस्थस्थानभोगः दृश्यतो यस्य कक्षा लघ्वी स शीघ्रगः यस्य च दृहती स मन्दग इत्युच्यते एतदभिप्रायेणैव यद्यपां राशिभोगे कालभेदो दर्शितः यथा "रविर्मासं निशानाथः सपादद्विसहस्रयम् । पञ्चत्रिंशं भूमिसुतो बुधोऽष्टादश वासरान् । वर्षमेकं सुराचार्य्यस्त्वष्टाविंशं दिनं भृगुः ।

शनिः सार्द्धद्वयं वर्षं राहुः सार्द्धसमं तथा" ज्यो० सूर्य्यस्य यद्यपि चन्द्रबुधशुक्रापेक्षया मन्दगतित्वम् तथापि कुजगुरुराहुशन्यपेक्षया शीघ्रगतित्वात् आशुगत्वम्। स्वस्वकक्षायां सूर्य्ययोगेन च यहाणां पुनःशीघ्रगत्वं "सूर्य्ययुक्ता यहाः शीघ्रा इत्युक्तेः। यहाणां शीघ्रकेन्द्रशीघ्रफलादिकम्" सि० शि० दर्शितं विस्तरभयान्नोक्तं तत एवावसेयम्। किञ्च सर्व्वयहापेक्षया राशिचक्रस्य शीघ्रगतित्वात् प्रतिदिनं स्वगत्यनुसारेण यहाणां प्राग्गतित्वेऽपि राशिचक्रस्य प्रवहवायुना पश्चात् नीयमानतया तदारूढरव्यादेः पश्चाद्गतित्वभ्रमात् तदनुरूपशीघ्रगत्वमारोप्यते। यहाणां राशिचक्रभोगार्थं स्वस्वकक्षासु वा प्राग्गतिस्तस्या अल्पकालसाध्यत्वे शीघ्रत्वमिति बोध्यम्। एवं यहाणां स्वाभाविक्यां स्वस्वकक्षासु गतौ स्थितायामपि प्रवहानिलेन पश्चाद्भ्राम्यमाणस्य राशिचक्रस्य प्रतिदिनं पृथिवीभ्रमणात् तदुगतेश्च सर्व्वयहापेक्षयाऽतिशीघ्रत्वात् तत्र च वंभ्रम्यमाणराशिचक्रस्य गतौ तत्स्थयहगतित्वारोपेण नौकागतौ तत्स्थवस्तुगतित्वारोपवत् यहाणां राशिचक्रतुल्यशीघ्रगतित्वं पुराणादावुक्तम् यथा "योजनानां सहस्रे द्वे द्वे शते द्वे च योजने। एकेन निमिषार्द्धेन क्रममाण! नमोऽस्तु ते। नवतिर्योजनानाञ्च सहस्राणि च सप्ततिः। यावद्घटिकमात्रेण तावच्चलति भास्करः" आदित्यहृ०। "यदा चेन्द्राः पुर्य्याः प्रचलति पञ्चदशभिर्घटिकाभिर्याम्यां सपादकोटिद्वयं योजनानां सार्द्धद्वादशलक्षाणि साधिकानि चोपयाति" भाग० ५स्क० २०अ० "साधिकानि पञ्चविंशतिसहस्राधिकानि" श्रीधरः। तेन पञ्चदशभिर्घटिकाभिर्यदि २३७७५००० योजनानि तदा ६० दण्डात्मके दिने कानीति चतुर्भिर्गुणितानि तानि प्रत्यहं राशिचक्रगतिमानं तदारोपाच्च सूर्य्यादीनां तथागतित्वमिति बोध्यम्। एतदपि पुराणाश्रितं वस्तुतोराशिचक्रस्य प्रत्यहं पृथ्वीभ्रमणात् राशिचक्रपरिधिमानमेव अहोरात्रे गन्तव्ययोजनमानमेतच्च खगोलशब्दे वक्ष्यते। तथा च अल्पकालेन गन्तव्यस्थानगामित्वमाशुगत्वमिति सिद्धम्।

आशुगामिन् स्त्री आशु गच्छति गम–णिनि। १शीघ्रगामिनि स्त्रियां ङीप्। २सूर्य्ये पु० "आशुगामी तमोघ्नश्च हरिताश्वश्च कीर्त्यते" भा०व०प० ३अ० सूर्य्यस्तवः।

आशुगङ्ग त्रि० आशु गच्छति गम–खच् मुम्। शीघ्रगामिनि "निर्वाचासेतः प्रपताशुगङ्गः शिशुको यथा" अथ०६,१४,३

आशुतोष पु० आशु शीघ्रं तोषो यस्य। १शिवे स्वल्पकालार्चनेनैव तस्य तुष्टत्वात् तथात्वम्। २शीघ्रतोषिणि त्रि०।

आशुपत्री स्त्री आशु पत्रं यस्याः गौ० ङीष्। यष्टीमधुलतायाम्

आशुपत्वन् पु० आशु पतति पत–वनिप्। १शीघ्रगामिनि "श्येनःश्येनेभ्य आशुपत्वा" ऋ० ४,६,४। स्त्रियां ङीप् रत्व। आशुपत्वरी।

आशुमत् त्रि० आशु शीघ्रं विद्यतेऽस्य मतुप्। शीघ्रतायुक्ते "यथा सूर्य्यस्य रश्मयः परापतन्त्याशुमत्" अथ०६,१०५,२

आशुव्रीहि पु० कर्म्म०। वार्षिके धान्यभेदे (आउस) आशुशब्दे विवृतिः।

आशुशुक्षणि पु० आ+शुष–सन्+अनि। १अग्नौ, २वायौ च। अस्य च वेदएव प्रयोगः लोकेऽपि कचित्तेन 'सन्नद्धपूतानि हवींषि प्रतिगृह्णात्येतत्प्रीत्याशुशुक्षणिः" कादं० "अन्तरात्मा ह्ययं साक्षाद्विचित्रोह्याशुशुक्षणिः" काशी०।

आशुषाण त्रि० आ+शुष–वा० कानच्। सम्यक् शुष्यमाणे

आशुहेषस् त्रि० आशु+हेष–शब्दे–असुन्। शीघ्रं शब्दायमाने। "इन्द्राविष्णू अश्विनो वाशुहेषसा" ऋ०८,१०,२, "आशुहेषसा शीघ्रं शब्दायमानौ" भा०।

आशू त्रि० आशु+वेदे पृ०दीर्घः। शीघ्रे। "इन्द्रः प्राशूभवा सचा" यजु०३४,५६, "आशुशब्दो दीर्घश्छान्दसः" वेददीपः। [कृटति–णिनि। पर्व्वतभेदे शब्दमाला।

आशेकुटिन् पु० आशेतेऽस्मिन् आ+शी+विच् स इव

आशोकेय त्रि० अशोक+चतुरर्थ्यां सख्या० ढञ्। अशोकवृक्षसन्निकृष्टदेशादौ। अशोका+गुणा० ढक्। अशोकाया अपत्ये। स्त्रियां तु शार्ङ्गरवा० ङीन्। आशोकेयी।

आशौच न० अशुचेर्भावः अण् "नञः शुचीश्वरक्षेत्रज्ञकुशलसूतिकाकुशलाऽनिपुणानाम्" पा० पूर्व्वपदस्य वृद्धिरुत्तरपदस्य नित्यम्। अशौचशब्दार्थे ४८६ पृष्ठे विवृतिः। "दशाहं शावमाशौचं ब्राह्मणस्य विधीयते" "सर्व्वेषां शावमाशौचं मातापित्रोस्तु सूतकम्" "त्रिरात्राद्धराशौचमाचार्य्ये संस्थिते सति" मनुः ष्यञ्। आशौच्यमप्यत्र न० "आशौच्यात् विप्रमुच्येत ब्राह्मणान् क्षत्रियाच्च च" शु०त०स्मृतिः।

आश्चर्य्य न० आ+चर–यत् "आश्चर्य्यमनित्ये" पा० सुट्। १अद्भुते २विस्मयरसे ३तद्वति त्रि०। "शेषाः स्थिरत्वमिच्छन्ति किमाश्चर्य्यमतः परम्" भा०व०। "आश्चर्य्यवत् पश्यति कश्चिदेनमाश्चर्य्यवत् वदति तथैव चान्यः—आश्चर्य्यवच्चैनमन्यः शृणोति" गीता। "पुंस्यमाश्चर्य्यमेधाः" रघुः। "किमाश्चर्य्यं चारदेवे प्राणदा यमदूतिकाः" उद्भटः।

आश्रो(श्रो)तन त्रि० आ+श्रु(श्रु)त–ल्यु । १सम्यक्श्रवणशीले भावे ल्युट् । २सम्यक्श्रवणे न० । "तर्पणैः पुटपाकैश्च घृतैराश्रोतनैस्तथा" । "क्षितमर्द्दोदकं सेके तथाश्रोतनमेव" च । "क्षौमावृतं पथ्यमाश्रोतने वा सर्पिर्हितं यद्दिकाङ्गं सरोध्रम्" इति च सुश्रु० ।

आश्म पु० अश्मनोविकारः अण् वा टिलोपः । प्रस्तरविकारे

आश्मक पु० अश्मना कायति कै–क । साल्वदेशावयव यामभेदे 'साल्वावयवप्रत्ययप्रयुक्तकूटाश्मकादिञ्' पा० । तत्र भवः इञ् । आश्मकिः तद्ग्रामभवे त्रि० ।

आश्मन पु० अश्मनोविकार अण् वा टिलोपाभावः । पाषाण विकारे "यद्यापमाश्मनप्रख्यं सेतुं धत्तेऽन्यदुर्वहम्" भट्टिः । अश्मनः सूर्य्यसारथेरपत्यम् अण् तदपत्ये पुंस्त्री

आश्मन्य त्रि० अश्मन्+चतुरर्थ्याम् संज्ञायां यञः । प्रस्तरसञ्चितदेशादौ ।

आश्मभारक त्रि० अश्मभारं हरति वहति आवहति वा वंशा० ठण् । प्रस्तरस्य १हारके २वाहके ३तदावाहके च ।

आश्मरथ्य पु० अश्मरथस्य सुनेरपत्यम् गर्गा० यञ् । अश्मरथर्षेरपत्ये "अभिव्यक्तेरित्याश्मरथ्यः" शा० सू० । गोत्रापत्ये तु कण्वा० अण् । आश्मरथ इत्येव स्त्रियां ङीप् ।

आश्मरिक पु० अश्मरथ्यैव स्वार्थे वा० ठञ् । अश्मरीरोगे "भिन्नवस्तिराश्मरिको न सिध्यति" सुश्रुतः ।

आश्मायन पुंस्त्री अश्मनोगोत्रापत्यम् अश्वा० फञ् । अश्मनामर्षेर्गोत्रापत्ये स्त्रियां ङीप् ।

आश्मिक त्रि० भारभूतमश्मानं हरति वहति आवहति वा वंशा० ठण् । भारभूतप्रस्तरस्य १हारके २वाहके ३आवाहके च ।

आश्मेय पुंस्त्री अश्मन्+शुभ्रा० ढक् । अश्मनामकर्षेरपत्ये ।

आश्यान त्रि० आ+श्यै–क्त । घनीभूते शुष्कप्राये "पद्मवाश्यानकर्दमान्" रघुः । "अन्तरालग्नाश्यानहरिणरुधिरबिन्दुना" काद० ।

आश्र त्रि० अश्रमेव स्वार्थेऽण् । चतुष्कोणे ।

आश्रपण न० आ+श्रा–णिच् युक् ल्युट् । पाके ।

आश्रम पुंन० आ+श्रम–आधारे घञ् अड्विधिः । ब्रह्मचर्य्यादिके शास्त्रोक्ते १धर्मभेदे, "विनाश्रमं न तिष्ठेत्तु दिनमेकमपि द्विजः । आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते द्विजः" दक्षः । अत्र द्विजपदस्योपलक्षणपरता यत् रघुनन्दनेन स्थापितं तदाद्युतत्त्वे निराकृतम् ७५२ पृष्ठे द्रष्टव्यम् । मुनीनां २वासस्थाने, ३मठे ४तपोवने "प्रत्युद्ययावाश्रममग्रमेण" "तौ दम्पती वसिष्ठस्य गुरोर्जगृहतुराश्रमम्" । "स किलाश्रममन्त्यमाश्रितः" स दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः" "अभ्युत्थिताग्निपिशुनैः–अतिथीनाश्रमोन्मुखान्" इति च रघुः । "कमलासनमिवाश्रमगुरुम्" इति काद० । "ब्रूया देवं तव सहचरो रामगिर्य्याश्रमस्थः" मेघदू० । सर्व्वैकयत्नेन विश्रामस्थाने ५परमेश्वरे च । "आश्रमः श्रमणः शामः सुपर्णो वायुवाहनः" विष्णुसह० "आश्रमवत् सर्वेषां संसाररथ्य भ्रमतां विश्रामस्थानत्वादाश्रमः" इति भा० तत्र आश्रमेषु कुत्र कस्याधिकार इति तावच्चिन्त्यते । "चत्वार आश्रमाश्चैव ब्राह्मणस्य प्रकीर्त्तिताः । गार्हस्थ्यं ब्रह्मचर्य्यञ्च वानप्रस्थं तु भिक्षुकम् । क्षत्रिये चापि कथिता आश्रमास्त्रयएव हि । ब्रह्मचर्य्यञ्च गार्हस्थ्यमाश्रमद्वितयं विशः । गार्हस्थ्यमुचितं त्वेकं शूद्रस्य क्षणमावहेत्" माध० धृतवामनपु० । "चत्वारो ब्राह्मणस्योक्ता आश्रमाः श्रुतिनोदिताः । क्षत्रियस्य त्रयः प्रोक्ता द्वावेकोवैश्यशूद्रयोः" नि० सि० कूर्मपु० वर्णक्रमेण चातुराश्रम्यादयः इति । तत्र कलौ दीर्घकालब्रह्मचर्य्यवानप्रस्थाश्रमौ न स्तः शूद्रस्यभिक्षुकाश्रमावेव । "शूद्रो भिक्षुकश्चैव आश्रमौ द्वौ कलौ युगे" इति स्मरणात् । तत्र संन्यासे "विप्रस्यैवाधिकारः ब्राह्मणाः प्रव्रजन्तीति जाबालश्रुतेः "आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेत् गृहादिति" या० ऋतेरिति" बहवः । "ब्राह्मणः क्षत्रियोवाथ वैश्यो वा प्रव्रजेद्गृहादिति" कौर्मवाक्यात् क्षत्रियादीनामपि तत्राधिकारः पूर्ब्बवचनन्तु कषायादिवस्त्रत्रिदण्डधारणविषयम् "सुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम् राजन्यवैश्ययोर्नैव दत्तात्रेयसुनेर्मतम्" बौधा० ऋतेः । अयमेव पक्षो मल्लिनाथेन समर्थितः यथा अत्र यद्यपि "ब्राह्मणाः प्रव्रजन्ति" इति श्रुतेः "आत्मन्यग्नीन् समारोप्य ब्राह्मणाः प्रव्रजेद्गृहात्" इति मनुस्मरणात् "सुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम् । बाहुजातोरुजातानामयं धर्मो न विद्यते" इति निषेधाच्च ब्राह्मणस्यैव प्रव्रज्या न क्षत्रियादेरिति तथापि "यदहरेव विरजेत् तदहरेव प्रव्रजेत्" इत्यादिश्रुतेस्त्रैवर्णिकसाधारणत्वात् "त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमाः" इति सूत्रकारवचनात् "ब्राह्मणः क्षत्रियो वापि वैश्यो वा प्रव्रजेद् गृहात्" इति स्मरणात् "सुखजानामयं धर्मो वैष्णवं लिङ्गधारणम् । बाहुजातोरुजातानां त्रिदण्डं न विधीयते" इति निषेधस्य त्रिदण्डविषयत्वदर्शनाच्च कुत्रचिद् ब्राह्मणपदस्योपलक्षणमाचक्षाणाः केचित्

तैवर्षिकाधिकारं प्रपेदिरे । तथा सति "स किलाश्रम-मन्त्यमाचितः" इति अत्रापि कविनाप्यत्रमेव पक्षो विवक्षित इति प्रतीमः । अन्यथा वानप्रस्थाश्रमतया व्याख्याने "विदधे विधिमस्य नैष्किं यतिभिः सार्द्धमनग्नि-मग्निचित्" इति वक्ष्यमाणेनानग्निसंस्कारेण विरोधः स्यात् अग्निसंस्काररहितस्य वानप्रस्थस्यैवाभावात्" । अतएव मनुना "अनेन क्रमयोगेन परिव्रजति यो द्विजः इति द्विजमात्रस्य परिव्रज्याधिकार उक्तः । एवञ्च महता प्रयत्नेन शङ्कराचार्येण ब्राह्मणस्यैव संन्यासेऽधिकारस्य समर्थनं तिदण्डविषयमिति । एतेषु आश्रमेषु ब्रह्म-चर्य्यस्य नित्यत्वम् इतराश्रमाणां "यमिच्छेत्तु तमावसेत्" इति मिता० धृतवचनात् इच्छाधीनतया काम्यत्वम् । तत्राश्रमाणां समुच्चयपक्षः कामनावतएव, विकल्पस्तु अका-मनावतो विरक्तस्य, । अधिकारिभेदाच्च आश्रम समुच्चय-विकल्पपक्षौ मिता०समर्थितौ यथा

"वनात् गृहाद्वा कृत्वेष्टिं सार्ववेदसदक्षिणाम् । प्राजा-पत्यान्तदन्ते तानग्नीनारोप्य चात्मनि । अधीतवेदो जपयज्ञ-पुत्रवानुच्चदोऽग्निमान् । शक्त्या च यज्ञैरुत्सृज्य मोक्षे मनः कुर्य्यात्तु-नान्यथा" या०। यावता कालेन तीव्रतपःशोषितवपुषोविषय कषायपरिपाको भवति । पुनर्वमदोद्भवाशङ्कानोद्वाह्यते । तावत्कालं वनवासं कृत्वा तत्समनन्तरं मोक्षे मनः कुर्य्यात्। वनगृहशब्दाभ्यान्तत्सम्बन्ध्याश्रमोलक्ष्यते । मोक्षशब्देन च मोक्षैकफलकश्चतुर्थाश्रमः । अथ वा गृहात् गार्हस्थ्या-दनन्तरं मोक्षे मनः कुर्य्यादनेन च पूर्वोक्तचतुराश्रमसमु-च्चयपक्षःपाक्षिक इति द्योतयति । तथा च विकल्पो जाबालश्रुतौ श्रूयते । "ब्रह्मचर्य्यमरिसमाप्य गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत् यदि वेतरथा-ब्रह्मचर्य्यादेव प्रव्रजेद्गृहाद्वा वनाद्वेति"। तथा गार्हस्थ्ये-तराश्रमबाधश्च गौतमेन दर्शितः । "एकाश्रमन्त्वाचार्याः प्रत्यक्षविधानात् गार्हस्थ्यस्येति" । एवञ्च समुच्चयवि-कल्पबाधपक्षाणां सर्वेषां श्रुतिमूलत्वादिच्छया विकल्पः । अतो यत्कैश्चित् पण्डितंमन्यैरुक्तम् । आर्त्तत्वाच्चैष्टि-कत्वादीनाङ्गार्हस्थ्येन श्रौतेन बाधः । गार्हस्थ्यानधि-कृतान्धक्लीवादिविषयता वेति । तत्साध्यायाध्ययनवैधुर्य्य-निबन्धनमित्यपेक्षणीयम् । किञ्च । यथा विष्णुक्रमणा-ज्यावेक्षणाद्यङ्गतया पङ्ग्वादीनां श्रौतेष्वनधिकारस्तथा स्मार्त्तेषूपदक्रम्याहरणाभिलाषत्वात् कथं पङ्ग्वादिवि-षयतया नैष्किकत्वाद्याश्रमनिर्वाहः । अथवाश्रमे ब्राह्म-णस्यैवाधिकारः । "आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्र-व्रजेदुत्सृहात्" । तथा "एष वोऽभिहितो धर्मो ब्राह्मणस्य चतुर्विधः" इत्युपक्रमोपसंहाराभ्यां मनुना ब्राह्मणस्याधि-कारप्रतिपादनात् । "ब्राह्मणाः प्रव्रजन्तीति" श्रुतेश्चाय-जन्मन एवाधिकारो न द्विजातिमात्रस्य । अन्ये तु तैवर्षिकानाम् प्रकृतत्वात् "त्रयाणाम् वर्णानाम् वेदमधीत्य चत्वार आश्रमा" इति सूत्रकारवचनाच्च द्विजातिमात्र-स्याधिकारमाहुः । यदा वनात् गृहाद्वा प्रव्रजति तदा सार्त वेदसदक्षिणाम् सार्ववेदसी सर्वधनसम्बन्धिनी दक्षिणा यस्याः सा तथोक्ता ताम् प्रजापतिदेवताकामिष्टिं कृत्वा तदन्ते तान्तैतानग्नीन् आत्मनि श्रुत्युक्तविधानेन समा-रोप्य चरुद्वात् "उदगयने पौर्णमास्याम् पुरश्चरणमादौ कृत्वा शुक्लेन कावेन अष्टौ श्राद्धानि निर्वपेत् द्वादश वा" इति बौधायनाद्युक्तं पुरश्चरणादिकञ्च कृत्वा । तत्राऽधीतवेदो जपपरायणोजातपुत्रोदीनाग्नेयपार्थिसार्थाय यथाशक्ति-दत्त्व भूत्वा अनाहिताग्निर्ब्रह्मत्वादिना प्रतिबन्धाभावे कृताधानो नित्यनैमित्तिकान् यज्ञान् कृत्वा मोक्षे मनः कुर्य्यात् चतुर्थाश्रमं प्रविशेत् नान्यथा । अनेनान पाकृतर्णत्रयस्य गृहस्थस्य प्रव्रज्यायामनधिकारन्दर्शयति । तथाच मनुः । "ऋणानि त्रीण्यपाकृत्य मनोमोक्षे निवेशयेत्। अनपाकृत्य मोक्षन्तु सेवमानो व्रजत्यध इति"। यदा तु ब्रह्मचर्य्यात् प्रव्रजति तदा न प्रजोत्पादनादिनियमः । अकृतदारपरिग्रहस्य तत्रानधिकाराद्रागप्रयुक्तत्वाच्च विवा-हस्य । न च ऋणत्रयापाकरणविधिरेव दारानाद्रियतीति शङ्कनीयम् । विद्याधनार्जननियमवदन्यप्रयुक्तदारसम्बन्धे-तस्यानाक्षेपकत्वात् । ननु "जायमानोवै ब्राह्मणस्त्रिभि-र्ऋणवान् जायते ब्रह्मचर्य्येण ऋषिभ्यो, यज्ञेन देवेभ्यः, प्रजया पितृभ्यः" इति जातमात्रस्यैव प्रजोत्पादनादी-न्यावश्यकानीति दर्शयति, मैवम् न हि जातमात्रो-ऽकृतदारान्निपरिग्रहो यज्ञादिष्वधिक्रियते । तस्मादधि-कारी जायमानो ब्राह्मणादिर्यज्ञादीनतुतिष्ठेदिति तस्यार्थः । ततश्चोपनीतस्य वेदाध्ययनमेवावश्यकम् । कृत दारपरिग्रहस्य प्रजोत्पादनमपीति" ततश्च ब्रह्मचर्य्या-श्रमस्यैव नित्यत्वमितरेषां तु "यमिच्छेत्तु तमावसेत्" इति मिताक्षराधृतवचनात् काम्यत्वमेव । ऋणत्रयापाकरणावश्य-कता तु कृतविवाहस्यैवेति सिद्धम् ।

आश्रमाश्च चतुर्विधाः । ब्रह्मचर्य्यं गार्हस्थ्यंवानप्रस्थ-भिक्षुकभेदात् । "ब्रह्मचारी गृहस्थश्च वानप्रस्थोय-

तिस्रवा । एते गृहस्थप्रभवत्वात्चत्वारः पृथगाश्रमाः" मनूक्तेः तत्र ब्रह्मचारी द्विविधः । नैष्ठिक उपकुर्व्वाणश्च मरणान्तं गुरुकुलवासितया कृतब्रह्मचर्य्यः नैष्ठिकः । षट्त्रिंशदब्दादिकं गुरौ वसित्वा गार्हस्थ्यार्थं कृतसमावर्त्तन उपकुर्व्वाणः । गृहस्थोऽपि द्विविधः । अकृतदारः स्नातकः कृतदारश्च । तत्र कृतसमावर्त्तनोऽपि कन्यालाभात् पूर्व्वं धृतस्नातधर्म्मभेदः स्नातकः । तद्भेदाश्च आश्रुतग्रन्थे ७५२ पृष्ठेऽभिहिताः । कृतदारोऽपि द्विविधः साग्निर्निरग्निश्च साग्निरपि द्विविधः श्रौताग्नियुक्तः स्मार्त्ताग्नियुक्तश्च । वानप्रस्थोऽपि द्विविधः सदारोऽदारश्च "पुत्रेषु दारान् निक्षिप्य वनं गच्छेत् सहैव वा" मनूक्तेः सदारादारत्वपक्षयोः समधिगमात् । तत्र सदारस्य अपचमानान्नकृत्कदन्नोलूखलादिसंज्ञा । सदारस्य पचमानसंज्ञा । भिक्षुरपि चतुर्विधः कुटीचक बहूदक हंस-परमहंसेतिभेदात् । भिक्षुकोऽपि प्रकारान्तरेण द्विविधः विविदिषासन्यासी विद्वत्संन्यासी च तदेतत् जीवन्मुक्तौ विद्यारण्येन निरूपितं यथा "वक्ष्ये विविदिषान्यासं विद्वन्न्यासञ्च भेदतः । हेतू विदेहमुक्तेश्च जीवन्मुक्तेश्च तौ क्रमात् ॥ संन्यासहेतुर्वैराग्यं यदहर्विरजेत्तदा । प्रव्रजेदिति वेदोक्तेस्तद्भेदस्तु पुराणतः । विरक्तिर्द्विविधा प्रोक्ता तीव्रतीव्रतरेति च । सत्यामेव तु तीव्रायां न्यसेद्योगी कुटीचके ॥ शक्तोबहूदके तीव्रतरायां हंससंज्ञिते । सद्यः परमे हंसे साक्षाद्विज्ञानसाधने । पुत्रदारधनादीनां नाशे तात्कालिकी मतिः । धिक् संसारमितोऽहक् स्यादिरक्तेर्मन्दता हि सा ॥ अस्मिन् जन्मनि मा भूवन् पुत्रदारादयो मम । इति या सुस्थिरा बुद्धिः सा वैराग्यस्य तीव्रता ॥ पुनराऽसक्तिसहितो लोको मे मास्तु कश्चन । इति तीव्रतरत्वं स्यान्मन्दे न्यासेन कोऽपि हि ॥ वाक्यादयस्त्रिभिस्त्रिभ्यां तीव्रे न्यासद्वयं भवेत् । कुटीचको-बहूदकौ त्वसुभावेतौ विदण्डिनौ । इयं तीव्रतरे ब्रह्म-लोकमोक्षविभेदतः । तल्लोके तत्त्वविद्वंसोलोकेऽस्मिन् परमहंसकः ॥ एतेषान्तु समाचाराः प्रोक्ताः पारा-शरश्रुतेः । व्याख्यानेऽस्माभिरत्रायं परमहंसो विविच्यते । जिज्ञासुस्तत्त्वनावांचेति परमहंसो द्विधा मतः । प्राङ्मुक्तिनाय जिज्ञासोर्न्यासं वाजसनेयिनः । "प्रव्राजिनोलोक-मेतमिच्छन्तः प्रव्रजन्ति हि" । एतस्मार्थन्तु मद्येन वक्ष्ये-मन्दविबुद्धये ॥ लोको हि द्विविधः आत्मलोकोऽनात्म-लोकश्चेति । तत्रानात्मलोकस्य त्रैविध्यं बृहदारण्यके तृतीयाध्याये श्रूयते । "अथ त्रयोवाव लोकाः मनुष्यलोकः पितृलोको देवलोक" इति । सोऽयं मनुष्यलोकः पुत्रेणैव जय्योनान्येन कर्म्मणा । कर्म्मणा पितृलोको विद्यया देवलोक" इति । आत्मलोकस्य तत्रैव श्रूयते । "योऽन्यां आत्मा-लोकात् स्वंलोकमवेद्य प्रैति सएनमविदितो न भुनक्तीति" । "आत्मानमेव लोकमुपासीत" "सय आत्मानमेव लोकमुपास्ते नहास्य कर्म क्षीयत" इति च । यजुराध्यायेऽपि "किं प्रजया-करिष्यामो येषां नोऽयमात्माऽयञ्च लोक" इति । एवञ्च सति एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" इत्यत्रात्मलोको-विवक्षित इति गम्यते "सवा एष महानज आत्मेति" प्रकान्त-स्यात्मन एव एतच्छब्देन परामृष्टत्वात् । लोक्यते अनु-भूयत इति लोकः । तथा चात्मानुभवमिच्छन्तः प्रव्रजन्तीति श्रुतेस्तात्पर्य्यार्थः सम्पद्यते । स्मृतिश्च "ब्रह्मविज्ञानलाभाय परमहंससमाश्रयः । यानिदान्यादिभिः सर्वैः साधनैः सहितो-भवेदिति" । इह जन्मनि जन्मान्तरे वा सम्यगनुष्ठितैर्वेदानुव-चनादिभिरुत्पन्नया विविदिषया सम्पादितत्वादयं विविदिषा सन्यासो द्विविधः जन्मापादककर्म्मादित्यागमात्रात्मकः प्रणवोद्गारणपूर्व्वकदण्डधारणाद्याश्रमरूप इति । त्यागश्च तैत्तिरीयादौ श्रूयते "न कर्म्मणा न प्रजया न धनेन, त्यागे-नैके अमृतत्वमानशुरिति" । अस्मिंश्च त्यागे स्त्रियोऽप्यधि-क्रियन्ते । अतएव मैत्रेयीयाज्ञवल्क्यमाम्नायते "येनाहं नामृता स्यां किमहं तेन कुर्य्याम् यदेव भगवन् ! वेद तदेव मे ब्रूहीति" । ब्रह्मचारिगृहस्थवानप्रस्थानां केनचिन्निमित्तेन सद्यो-ब्राह्मसंन्यासस्वीकारे प्रतिबद्धे सति स्वाश्रमधर्म्मेष्वनुष्ठीयमानेष्व-पि वेदनार्थो मानसकर्म्मादित्यागो न विरुध्यते श्रुति स्मृतीतिहासपुराणेषु लोके च तादृशान्तत्त्वविदां बहूनामुपलम्भात् । यस्तु दण्डधारणादिरूपो वेदनहेतुः परमहंसाश्रमः स पूर्व्वैराचार्य्यैर्बहुधा प्रपञ्चित इत्यस्माभिरुपरम्यते । इति विविदिषासंन्यासः ।

"अथ विद्वत्संन्यासं निरूपयामः ॥ सम्यगनुष्ठितैः श्रव-णमननिदिध्यासनैः परतत्त्वं विदितवद्भिः सम्पाद्यमानोवि-द्वत्संन्यासः । तञ्च याज्ञवल्क्यः सम्पादयामास । तथाहि विद्व-च्छिरोमणिर्भगवान् याज्ञवल्क्योविजिगीषुकथायां बहुविधेन तत्त्वनिरूपणेनाश्वलायनप्रभृतीन्मुनीन् विजित्य वीतराग कथायां संक्षेपविस्ताराभ्यामनेकधा जनकं बोधयित्वा मैत्रेयीं बुबोधयिषुस्तस्यास्वरया तत्त्वाभिमुख्याय स्वकर्त्त-व्यं संन्यासं प्रतिजज्ञे ततस्तां बोधयित्वा संन्यासञ्चकार । तदुभयं मैत्रेयीब्राह्मणस्याद्यन्तयोराम्नायते" "अथ ह

याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन् मैत्रेयीति होवाच याज्ञवल्क्यः, प्रव्रजिष्यन् वा अरे अहमस्मात् स्थानादस्मीति, एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रव्राजेति"॥ कहोले ब्राह्मणेऽपि विद्वत्संन्यास आम्नायते "एतं वैतमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति" । नचैतद्वाक्यं विविदिषासंन्यासपरमिति शङ्कनीयं" पूर्वकालवाचिनोविदित्वेति क्त्वाप्रत्ययस्य ब्राह्मणशब्दस्य च बाधप्रसङ्गात्। नचात्र ब्राह्मणशब्दोजातिवाचकः वाक्यशेषे पाण्डित्यबाल्यमौनशब्दाभिधेयैः श्रवणमननिदिध्यासनैः साध्यं ब्रह्मसाक्षात्कारमभिप्रेत्याथ ब्राह्मण इत्यभिहितत्वात् । ननु तत्र विविदिषासंन्यासोपेतः पाण्डित्यादौ प्रवर्त्तमानोऽपि ब्राह्मणशब्देन परामृष्टः तस्मात् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेदिति" नैवं भाविनीं वृत्तिमाश्रित्य तत्र ब्राह्मणशब्दस्य प्रयुक्तत्वात् । अन्यथा कथमत्र ब्राह्मण इति साधनानुष्ठानोत्तरकालवाचिन मथशब्दं प्रयुञ्जीत । शारीरब्राह्मणेऽपि विद्वत्संन्यासविविदिषासंन्यासौ स्पष्टं निर्दिष्टौ "एतमेव विदित्वामुनिर्भवत्येवमेव प्रव्रजिनोलोकमिच्छन्तः प्रव्रजन्तीति" । मुनित्वं मननशीलत्वम् । तच्चासति कर्त्तव्यान्तरे सम्भवतीत्यर्थात् संन्यास एवाभिधीयते । एतच्च वाक्यशेषे स्पष्टीकृतम् "एतद्ध स्म वैतत् पूर्वे विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामोयेषां नोऽयमात्मायं लोक इति" "ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति" । अयं लोक इत्यापरोक्षेणानुभूयत इत्यर्थः । नन्वत्र मुनित्वेन फलेन प्रलोभ्य विविदिषासंन्यासं विधाय वाक्यशेषे स एव प्रपञ्चितः अतोन संन्यासान्तरं कल्पनीयं नैवं वेदनस्यैव विविदिषासंन्यासफलत्वात् । न च वेदन मुनित्वयोरैक्यं शङ्कनीयं विदित्वा मुनिर्भवतीति पूर्वोत्तरकालीनयोस्तयोः साध्यसाधनत्वप्रतीतेः । ननु वेदनस्यैव परिपाकातिशयरूपमपस्थान्तरम् मुनित्वम् अतोवेदनद्वारा पूर्वं संन्यासस्यैवैतत् फलमितिचेत् बाढम् अतएव साधनरूपात् संन्यासादन्यं फलरूपमेनं संन्यासंब्रूमः । यथा विविदिषासंन्यासिना तत्त्वज्ञानाय श्रवणादीनि सम्पादनीयानि तथा विद्वत्संन्यासिनापि जीवन्मुक्तौ मनोनाशवासनाक्षयौ सम्पादनीयौ । एतच्चोपरिष्टात् प्रपञ्चयिष्यामः । सत्यप्यनयोः संन्यासयो रवान्तरभेदे परमहंसत्वाकारेणैकीकृत्य चतुर्विधा भिक्षव इति स्मृतिषु चतुःसंख्योक्ता । पूर्वोक्तयोः संन्यासयोः परमहंसत्वं जाबालश्रुताववगम्यते । तत्र हि जनकेन संन्यासे दृष्टे सति याज्ञवल्क्योऽधिकारिविशेषविधानेनोत्तरकालानुष्ठेयेन च सहितं विविदिषासंन्यासमभिधाय पश्चादविद्वान् यज्ञोपवीतरहितस्त्वाचिप्रेऽब्राह्मणे पश्चादात्मज्ञानमेव यज्ञोपवीतमिति समाधौ अतोबाह्ययज्ञोपवीताभावात् परमहंसत्वं निश्चीयते । तथान्यस्यां कण्डिकायां तत्र परमहंसोनामेत्युपक्रम्य संवर्त्ताकादीन् बहुविधान् ब्रह्मविदोजीवन्मुक्तानुदाहृत्य "अव्यक्तलिङ्गा अव्यक्ताचारा अनुन्मत्ता उन्मत्तवदाचरन्तः" इतिविद्वत्संन्यासिनोदर्शिताः । तथा "त्रिदण्डं कमण्डलुं शिक्यं पात्रं जलपवित्रं शिखां यज्ञोपवीतञ्चेत्येतत्सर्वं भूःस्वाहेत्यप्सु परित्यज्यात्मानमन्विच्छेदिति" त्रिदण्डिनः सत एकदण्डलक्षणं विविदिषासंन्यासं विधाय तत् फलरूपं विद्वत् संन्यासमेवसदाजहार । "यथा जातरूपधरोनिर्द्वन्द्वो निष्परिग्रहस्तत्त्वब्रह्ममार्गे सम्यक् सम्पन्नः शुद्धमानसः प्राणसन्धारणार्थं यथोक्तकाले विमुक्तो भैक्षमाचरन्नुदरपात्रेण लाभालाभौ समौ कृत्वा शून्यागारे देवस्टहृक्षणकूटवल्मीकवल्कलमूलकुलालशालाग्निहोत्रनदीपुलिनगिरिकुहरकन्दरकोटरनिर्झरस्थण्डिलेष्वनिकेतनवासप्रयत्नोनिर्ममः शुक्लध्यानपरायणोऽध्यात्मनिष्ठः शुभाशुभकर्म्मनिर्म्मूलनपरः संन्यासेन देहत्यागं करोति स परमहंसोनामेति" । तस्मादनयोरुभयोः परमहंसत्वं सिद्धम् । समानेऽपि परमहंसत्वे सिद्धे विरुद्धधर्माक्रान्तत्वादवान्तरभेदोऽप्यभ्युपगन्तव्यः । विरुद्धधर्मत्वञ्चारुण्युपनिषत्परमहंसोपनिषदोः पर्य्यालोचनायामवगम्यते ।"केन भगवन् ! कर्म्माण्यशेषतोविसृजामीति" शिखायज्ञोपवीतस्वाध्यायगायत्रीजपाद्यशेषकर्म्मत्यागरूपे विविदिषासंन्यासे शिष्येणारुणिना पृष्टेसति गुरुः प्रजापतिः "शिखां यज्ञोपवीतम्" इत्यादिना सर्वत्यागमभिधाय "दण्डमाच्छादनं कौपीनञ्च परिग्रहेदिति" दण्डादि स्वीकारं विधाय "त्रिसन्ध्यादौ स्नानमाचरेत् । सन्ध्यासमाधावात्मन्याचरेदिति" "सर्व्वेषु वेदेष्वारण्यादावर्त्तयेदुपनिषदमावर्त्तयेदुपनिषदमावर्त्तयेदिति" वेदनहेतूनाश्रमधर्म्मानुष्ठेयतया विधत्ते । "अथ योगिनां परमहंसानां कोऽयं मार्गः" इति विद्वत् संन्यासे नारदेन पृष्टे सति गुरुर्भगवान् सनत्कुमारेत्यादिना पूर्ववत् संन्यासमभिधाय "कौपीनं दण्डमा-

च्छादनञ्च स्वशरीरोपभोगार्थाय लोकस्योपकारार्थाय च परिग्रहेदिति" दण्डादिस्वीकारस्य लौकिकत्वमभिधाय "तत्र मुख्ये नास्तीति" शास्त्रीयत्वं प्रतिषिध्य "कोऽयं मुख्य इति चेदयं मुख्येन दण्डं न शिखां न यज्ञोपवीतं नाच्छादनञ्चरति परमहंसः" इति दण्डादिलिङ्गराहित्यस्य शास्त्रीयतामुक्त्वा "न शीतं न चोष्णं" मित्यादिना वाक्येन "आशाम्बरो निर्नमस्कार" इत्यादिवाक्येन च लोकव्यवहारातीतत्वमभिधायान्ते "यत्पूर्णानन्दैकबोधस्वरूपब्रह्मात्मानुभवमात्रपर्यवसानमाचष्टे। अतोविरुद्धधर्मोपेतत्वादस्त्येवानयोर्भेदः। श्रुतिप्रत्ययं भेद उक्तदिशा द्रष्टव्यः। "संसारमेवं निःसारं दृश्यं सारदिदृक्षया। प्रव्रजन्त्यकृतोद्वाहाः परं वैराग्यमाश्रिताः। प्रवृत्तिलक्षणो योगो ज्ञानं संन्यासलक्षणम्। तस्माज्ज्ञानं पुरस्कृत्य संन्यस्येदिह बुद्धिमान्" इत्यादिविविदिषासंन्यासः। "यदा तु विदितं तत्स्यात् परं ब्रह्म सनातनम्। तदैकदण्डं संगृह्य सोपवीतां शिखां त्यजेत्। ज्ञात्वा सम्यक्परं ब्रह्म सर्वं त्यक्त्वा परिव्रजेदिति" विद्वत्संन्यासः। ननु कलाविद्यादाविव कदाचिदौत्सुक्यमात्रेणापि वेदितुमिच्छा सम्भवत्येव विद्वत्ताप्यापातदर्शिनः पण्डितं मन्यमानस्याप्यवलोक्यते। न च तौ प्रव्रजनौ दृष्टौ अतोविविदिषाविद्वत्ते कीदृक्षौ विवक्षिते इति चेदुच्यते। यथा तीव्रायां बुभुक्षायामुत्पन्नायां भोजनादन्यो व्यापारो न रोचते। भोजने च विलम्बो न सोढुं शक्यते। तथा यदा जन्महेतुषु कर्मस्वत्यन्तमरुचिः वेदनसाधनश्रवणादिषु च त्वरा महती सम्पद्यते तादृशी विविदिषा संन्यासहेतुः। विद्वत्ताया अवधिरूपदेश साहस्र्यामभिहितः। "देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकम्। आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यते" इति। श्रुतावपि "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे इति"। परमपि हैरण्यगर्भादिपदमवरं यस्मादसौ परावरः। हृदये बुद्धौ साक्षिण्यात्माध्यासोऽनाद्यविद्यानिमित्तत्वेन यन्त्रिवद्दृढसंस्कारूपत्वादृग्यन्थिरित्युच्यते। आत्मा साक्षी कर्ता वा, साक्षित्वेऽप्यस्य ब्रह्मत्वमस्ति न वा, ब्रह्मत्वेऽपि तद्बुद्ध्या वेदितुं शक्यते न वा, शक्यत्वेऽपि तद्देहनमात्रेण मुक्तिरस्ति नवेत्यादयः संशयाः। कर्माण्यनारब्धानि आगामिजन्मकारणानि। तदेतत् सर्वमादित्रयसविद्यानिमित्तत्वादात्मदर्शनेन निवर्त्तते। कृतावश्यमर्थ उपलभ्यते "यस्य नाहंकृतोभावोबुद्धिर्यस्य न लिप्यते। हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यत" इति। यस्य ब्रह्मविदोभावः सत्ता स्वभाव आत्मा, नाहं कृतोनाहङ्कारेण तदात्मग्राध्यासादाविर्भावितः, बुद्धिलेपः संशयः। तदभावे लोकत्रयवधेनापि न निबध्यते किमुतान्येन कर्मणेत्यर्थः। नन्वेवं सति विविदिषाफलेन तत्त्वज्ञानेनैवागामिजन्मनां निवारितत्वाद्दृश्यमानजन्मशेषस्य भोगमात्रेण निवारयितुमशक्यत्वादलमनेन विद्वत्संन्यासप्रयासेनेति चेन्नैवं विद्वत्संन्यासस्य जीवन्मुक्तिहेतुत्वात्। तस्माद्भेदनाय यथा विविदिषासंन्यासः एवं जीवन्मुक्तये विद्वत्संन्यासः सम्यदनीयः इति विद्वत्संन्यासः"।

"दीर्घकालं ब्रह्मचर्यम् इत्यादित्यपुराणे यदु कलिवर्ज्यं दीर्घकालब्रह्मचर्यसंन्यासाश्रमयोरुत्कीर्त्तनम् तत् नैष्ठिकब्रह्मचर्यषट्त्रिंशदब्दादिब्रह्मचर्यस्योर्निषेधपरम् न पुनर्यज्ञहानिकब्रह्मचर्यमात्रस्य निषेधः दीर्घकालेतिविशेषणसामार्थ्यात् तेन "षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम्। तदर्द्धिकं पादिकं वा ग्रहणान्तिकमेव वा" इति मनूक्तपक्षचतुष्टयमध्ये अल्पकालिकस्यैव कलौ कर्त्तव्यता। "तथाऽग्निहोत्रं गवालम्भं संन्यासं पलपैतृकमिति" निगमवाक्यमपि त्रिदण्डविषयम् "यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्त्तते। संन्यासञ्चाग्निहोत्रञ्च तावत् कुर्यात् कलौ युगे" देवलस्मरणात्। "चत्वार्यब्दसहस्राणि चत्वार्यब्दशतानि च। कलेर्यदा गमिष्यन्ति तदा तेतापरिग्रहः। संन्यासश्च न कर्त्तव्यो ब्राह्मणेन विशेषत" इति व्यासवचनन्तु त्रिदण्डविषयम्। महानिर्वाणतन्त्रे तु। "पुरैव कथितं तावत् कलिधर्मविचेष्टितम्। तपःस्वाध्यायहीनानां नृणामल्पायुषामपि। क्लेशप्रवाहयुक्तानां कुतोदेहपरिश्रमः। ब्रह्मचर्याश्रमोनास्ति वानप्रस्थोऽपि न प्रिये। गार्हस्थ्यभैक्षुकौ चैव आश्रमौ द्वौ कलौ युगे! गृहस्थस्य क्रियाः सर्वा आगमोक्ता कलौ शिवे। नान्यमार्गैः क्रियासिद्धिः कदापि गृहमेधिनाम्। भैक्षुकोऽप्याश्रमे वापि वेदोक्तं दण्डधारणम्। कलौ नास्त्येव तत्त्वज्ञे! यतस्तच्छ्रौतसंस्कृतिः। शैवसंस्कारविधिनाऽवधूताश्रमधारणम्। तदेव कथितं भद्रे! संन्यासग्रहणं कलौ। विप्राणामितरेषाञ्च वर्णानां प्रबले कलौ। उभये आश्रमे देवि! सर्वेषामधिकारिता। सर्वेषामेव संस्कारकर्म्मणी शैववर्त्मना। विप्राणामितरेषाञ्च

कर्म्म लिङ्गं पृथक् पृथक्" । उभावेवाश्रमौ विहितौ एतच्चागमाधिकारिणः पतितब्राह्मणादेरकृतप्रायश्चित्तस्यैव बोध्यम् । आगमविधावधिकारिणश्च आगमशब्दे ६।१४ पृष्ठे उक्ताः इतरेषान्तु न श्रौतदण्डादिधारणनिषेधः तेषां स्मार्त एवाधिकारात् । वस्तुतः आगमवाक्येऽपि प्रबले कलाविति विशेषोक्तेः प्रबले कलौ सर्व्वेषामेव पतित प्रायत्वस्यावश्यम्भावादागमधर्म्मस्यैवावलम्बनीयतया तेषामेव तदानीमागमोक्ताश्रयद्वयेऽधिकार इति भेद इति दिक् ।

आश्रमगुरु पु० आश्रमाणां ब्रह्मचर्य्यादीनां गुरुर्नियन्ता । आश्रमनियन्तरि रूपे । "कर्त्तुराश्रमगुरुः स नाश्रमत्" माघः ।

आश्रमधर्म्म पु० आश्रमविहितोधर्म्मः । ब्रह्मचर्य्यादिविहिते धर्म्मे धर्म्मो हि षड्विधः वर्णधर्म आश्रमधर्मो वर्णाश्रमधर्मो गुणधर्मो निमित्तधर्मोसाधारणधर्मश्चेति । तत्र वर्णधर्मो ब्राह्मणो नित्यं मद्यं वर्জ्जयेदित्यादिः । आश्रमधर्म्मोऽग्नीन्धनभैक्ष्यब्रह्मचर्य्यादिः वर्णाश्रमधर्मो ब्राह्मण्यादिक्रमेण पालाशादिदण्डधारणादि"नैमित्तिकधर्म्मो विहिताकरणनिषिद्धसेवननिमित्तं प्रायश्चित्तम्, साधारणधर्मोऽहिंसादि सार्व्वहिंस्यात् सर्व्वाभूतानीत्याचाण्डालं साधारणधर्मः, अत्युक्तः इति" मिता० । अन्यत्र चान्ये आश्रमधर्माः दर्शिताः । "ब्रह्मचारिणः स्वाध्यायः, गृहस्थस्य दानं दमो यज्ञश्च, वानप्रस्थस्य तपः, भिक्षुकस्य "अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः" इत्यादिकः तथा च "यस्त्वाश्रमं समाश्रित्य अधिकारः प्रवर्त्तते । स खल्वाश्रमधर्मस्तु भिक्षादण्डादिकं यथा । यतीनां तु शमोधर्मोनियमोवनवासिनाम् । दानमेव गृहस्थानां शुश्रूषा ब्रह्मचारिणामिति"श्रुत्वा स्मृत्वा च वेदे धर्मा यत्र यत्राश्रमे विहितास्ते आश्रमधर्म्मशब्देनोच्यन्ते ते च धर्म्मास्तत्तच्छब्दे प्रपञ्चेन वक्ष्यन्ते । [वनादौ आश्रमस्थानादयोऽत्र ।

आश्रमपद न० आश्रमस्य पदम् । सन्ध्यादेर्विश्रामस्थाने तपोवनादौ ।

आश्रमवास पु० आश्रमे वासः । सन्ध्यादीनां १तपोवनादौ वासे आश्रमवासमधिकृत्य कृतोग्रन्थः अण् । वृद्धराज्ञादीनामाश्रमवासाधिकारेण व्यासनिर्म्मिते भारतान्तर्गते २पर्व्वभेदे । "एतदाश्रमवासाख्यम्" भा०आ० १अ० ।

आश्रमवासिक न० आश्रमवासः प्रतिपाद्यतयास्त्यस्य ठन् । भारतान्तर्गते वृद्धराज्ञादेराश्रमवासप्रतिपादके पर्व्वभेदे ।

आश्रमसद् त्रि० आश्रमे सीदति सद-क्विप् । आश्रमवासिनि तपोवनवासनिरते वानप्रस्थादौ ।

आश्रमिक त्रि० आश्रमोऽस्यास्य ठन् । आश्रमयुक्ते ।

आश्रमिन् त्रि० आश्रमोऽस्यास्य इनि । आश्रमयुक्ते स्त्रियां ङीप् । "तथैवाश्रमिणः सर्व्वे गृहस्थे यान्ति संस्थितिम्" "चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः" मनुः ।

आश्रय न० आश्रीयतेऽसौ आ+श्रि-कर्म्मणि अच् । १आश्रयणीये "वह्निष्णुमाश्रयमनागतमभ्युपैति" "द्रव्याश्रयेष्वपि गुणेषु ररास नीलः" माघः । "चित्रं यदाश्रय कृते स्वाख्यादिभ्यो विना यदाच्छाया । तद्रहिना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्" सां०का० २आधारे "आसत्तिराश्रयवशात्तु सामान्यज्ञानमिष्यते" "हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता "जन्यानां जनकःकालो जगतामाश्रयो मतः" भाषा० "तमाश्रयं दुष्प्रसहस्य तेजसः" रघुः ३सर्गे । "पितृमात्राश्रये गच्छ" ४अवलम्बे "विनाश्रयं न तिष्ठन्ति पण्डिता वनिता लता" उद्भटः "निराश्रयं मां जगदीश ! रक्ष" दुरा० ५विषये "बभूव यत् प्रेमपरस्पराश्रयम्" रघुः अरिभिःपीड्यमानेन बलवदाश्रयणरूपे षड्गुणान्तर्गते राज्ञां द्वैगुण्यभेदे यथाश्रयः कर्त्तव्यस्तथोक्तमग्निपुराणे "बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन् । द्वैधीभावेन तिष्ठेत काकाक्षिवदलक्षितः । उभयोरपि संघाते सेवेत बलवत्तरम् । यदा द्वावपि नेच्छेतां संक्लेशं जातसंविदौ । तदोपसर्पेत्सच्छत्रमधिकं वा स्वयं व्रजेत् । उच्छिद्यमानो बलिना निरुपायप्रतिक्रियः । कुलोत्पन्नं सत्यमार्द्यमासेवेत बलोत्कटम् । तद्गर्भनोपास्तिकता नित्यं तद्भावभाविता । तत्कारितप्रश्रविता दत्तं संश्रविणः कृतम्" । भावे अच् । ७अवलम्बने । "योऽवमन्येत ते मूले हेतुशास्त्राश्रयेण च" मनुः । ८आश्रयणे "गुणवदाश्रयलब्धगुणोदयैः" माघः । त्व । आश्रयत्वम् आधारत्वे न० । "आश्रयत्वविषयत्वभागिनौ" सं०शा० तल् । आश्रयता । तत्रार्थे स्त्री आधारशब्दे विवृतिः ।

आश्रयण न० आ+श्रि-ल्युट् । १आसेवायाम् २अवलम्बने च । कर्त्तरि ल्युट् । २आश्रयकर्त्तरि त्रि० स्त्रियां ङीप् । "अहमेत्य पतङ्गवत्कुलं न पुनर्द्वाश्रयणी भवामि ते"कुमा० ।

आश्रयणीय त्रि० आ+श्रि-कर्म्मणि अनीयर् । यस्याश्रयः क्रियते १तस्मिन् २अवलम्बे च ।

आश्रयवत् त्रि० आश्रयोऽस्यास्य मतुप् मस्य वः स्त्रियांङीप् । आश्रययुक्ते सावलम्बे साधारे पदार्थे ।

आश्रयाश पु० आश्रयमश्नाति अश-अण् उप०स० ।

१वङ्कौ तस्य आश्रवस्य काणादेर्दूषकत्वात्तथात्वम् । "दुर्वृत्तः क्रियते धूर्तैः श्रीमानात्मविडम्बने । किं नाम खलसंसर्गः करुते नाश्रवायवत्" उद्भटः २चिलकटङ्के २क्षत्तिकानञ्जने च । ४आश्रयनाशके त्रि० ।

आश्रयासिद्ध पु० आश्रयोऽसिद्धोऽस्य । न्यायोक्ते हेत्वाभास भेदे यथा गगनपद्मं सुरभि पद्मत्वात् सरोजपद्मवदित्यादौ गगनपद्मरूपस्य हेतोराश्रयस्याप्रसिद्धत्वात् हेतोर्दुष्टत्वम् ।

आश्रयासिद्धि स्त्री आश्रयस्य सिद्धिः अप्रसिद्धिः न्यायोक्ते हेतोर्दोषभेदे असिद्धिशब्दे ५५४पृष्ठे विवृतिः ।

आश्रयिन् त्रि० आश्रयति आ+श्रि-इनि । आश्रय कारके आश्रिते । "मयूरपृष्ठाश्रयिणा शुचेन" रघुः "पर्य्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतम्" रत्ना० ।

आश्रव त्रि० आश्रूणोति वाक्यम् आ+श्रु-अच् । वाक्यस्थिते वाचि श्रवणे वाक्यं श्रुत्वा तदर्थानुष्ठायिनि । "संगवस्तु भिषजामनाश्रवः" रघुः । भावे+अप् । २अङ्गीकारे ३क्लेशे च ।

आश्राव त्रि० आ+श्रु-णिच्-अच् । १श्रावणे २अङ्गीकारणे च

आश्रि स्त्री सम्यक् अश्रिः प्रा० स० । सम्यक्कोणे शब्दच०

आश्रित त्रि० आ+श्रि-क्त । आश्रयप्राप्ते, शरणागते, आधेये "प्रायश्चलं गौरवमाश्रितेषु" कुमा० "अथ द्रव्याश्रिता गुणाः" । "अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहेष्यते इति" च भाषा० ।

आश्रित्य अव्य० आ+श्रि-ल्यप् । अवलम्बेत्यर्थे ।

आश्रिन् त्रि० आश्रं चक्षुर्जलमस्त्यस्य इनि । चक्षुर्जलयुक्ते स्त्रियां ङीप् । [किप् । २अङ्गीकर्त्तरि त्रि० ।

आश्रुत् स्त्री आ+श्रु-भावे क्विप् । १अङ्गीकारे । कर्त्तरि

आश्रुत त्रि० आ+श्रु-क्त । १अङ्गीकृते, २आकर्णिते च । "एवं सर्व्वत्राश्रुतेषु" कात्या० ३,२,६ ।

आश्रुति स्त्री आ+श्रु-क्तिन् । १अङ्गीकारे २श्रवणे च ।

आश्रेय त्रि० आ+श्रि-यत् । १आश्रयणीये २अवलम्बे च ।

आश्लिष्ट त्रि० आ+श्लिष-क्त । १आलिङ्गिते २संबद्धे "शिखाभिरालिष्टदवाग्निसांनिध्यः" "आश्लिष्टभूमिं रसितारसङ्घैः" इति च माघः ।

आश्लेष पु० देशदेकदेशेन श्लेषः संबन्धः आ+श्लिष-घञ् । १एकदेशसंबन्धे । "सामीप्याल्लेषविषयैर्व्याप्त्याधारत्वतर्द्धिभिः" सुग्धबो० । २आलिङ्गने च । "आश्लेषलोलुपवधूस्तनकार्कश्य साक्षिणीम्" माघः वेदे नि० क्वचित् लस्य रः । आश्लेषोऽस्युक्तार्थे पु० अश्लेषैव स्वार्थे अण् । अश्लेषानक्षत्रे स्त्री । "आश्लेषा नक्षत्रं सर्पा देवताः' तैत्ति०

आश्व न० अश्वानां समूहः अण् । १अश्वसमूहे अश्वैरुह्यते ठञिकः अण् अश्वस्येदं वाह्यम् अञ् वा । २अश्ववाह्ये त्रि० सि० कौ० । अश्वस्य भावः कर्म्म वा प्राणभृज्जातित्वात् अञ् । ३अश्वभावे ४तत्कर्म्मणि च न० । अश्वस्येदम् अण् । ५अश्वसंबन्धिनि त्रि० । "आश्वं कफहरं मूत्रं क्रमिदद्रुषु शस्यते" सुश्रुतः ।

आश्वतराश्वि पु० अश्वतराश्वस्यापत्यम् इञ् । वृद्धिलक्षणौ ।

आश्वत्थ न० अश्वत्थस्य फलमण् ब्रह्मा० तस्य न लुक् । १अश्वत्थफले । अश्वत्थस्येदम् अण् । २अश्वत्थसम्बन्धिनि त्रि० स्त्रियां गौ० ङीष् । आश्वत्थी शाखा समिधा । "सर्पिरासिच्याश्वत्थीस्तिस्रः समिधः" शत० ब्रा० । तस्मादाश्वत्थे अतृणत्ते स्याताम्" शत० ब्रा० अश्वत्थेन युक्ता अण् । अश्वत्थनक्षत्रयुक्तायां रात्रौ स्त्री । गहा० ङ्य । आश्वत्थीयः आश्वत्थसम्बन्धिनि त्रि० ।

आश्वत्थिक न० अश्वत्थशब्दे ५०७ पृष्ठे विस्तरादि । चान्द्राश्विने मासि । [सम्बन्धिनि ।

आश्वपत त्रि० अश्वपतेरिदम् अश्वपत्या० अण् । अश्वपति

आश्वपथ त्रि० आशु आशोति अशन् क्वसुः । शीघ्रप्राप्तरि ।

आश्वपालिक पुंस्त्री अश्वपाल्याः अपत्यं रेवत्या० ठक् । अश्वपाल्या अपत्ये । [णिनि । अश्वमेजर्षिप्रोक्ताध्यायिषु ।

आश्वमेजिन् त्रि० ब० व० । अश्वमेजेन प्रोक्तमधीयते यौनका०

आश्ववाल त्रि० अश्ववालाया ओषधेरयम् अण् । अश्ववालोषधेः संबन्धिनि । "आश्ववालः प्रस्तरः, यत्रोह देवेभ्योऽपक्राम सोऽश्वोभूत्वा पराङावर्त्त तस्य देवा अनुहाय बालानभिपेदुस्तानालुलुपुस्तानालुप्य सार्द्धं संन्यासुस्त एतत ओषधयः समभवन् यदश्ववालाः शिरो वै यज्ञस्यातिथ्यं जघनार्द्धौ बाला उभयतएवैतद्यज्ञं परिगृह्णाति यदाश्ववालः प्रस्तरोभवति" शत० ब्रा० ।

आश्वभारिक त्रि० अश्ववाह्यं भारमश्वभूतं भारं वा हरति वहति आवहति वा वंश्या० ठञ् । अश्ववाह्यस्य अश्वभूतस्य वा भारस्य १हारके २वाहके ३आवाहके च ।

आश्वमेधिक त्रि० अश्वमेधाय हितं ठन् । अश्वमेधसाधने द्रव्यादौ अश्वमेधद्रव्यादि च अश्वमेधशब्दे ५११ पृष्ठे उक्तानि अश्वमेधमधिकृत्य कृतः ग्रन्थः ठञ् । शतपथब्राह्मणान्तर्गते १३ प्रपाठके पञ्चाध्यायीरूपे ग्रन्थभेदे तत्र पञ्चसध्यायेषु अश्वमेधस्योत्पत्तिः फलञ्च । तस्य धर्मविधयः आध्वर्य्यवौद्गात्रब्रह्मत्वयाजमानविषयाः तत्र प्रथमाध्यायत्रयेण मन्त्रव्याख्यानेन सह विशेषधर्म्मा

अनुक्रान्ताः । शेषाध्यायद्वयेन च तदेव धर्म्मान्तरसहितं अनुक्रान्ता इति भेदः । अश्वमेधमधिकृत्य कृतोग्रन्थः ठण् । युधिष्ठिराश्वमेधाधिकारेण व्यासकृते भारतान्तर्गते १पर्व्वभेदे न० । "इत्याश्वमेधिकं पर्व्व प्रोक्तमेतन्महाद्भुतम्" भा०आ० प० १ अ० । अश्वमेधः प्रतिपाद्यतयाऽस्त्यस्य ठन् । अश्वमेधिकसम्बन्धि न० । "ततोऽश्वमेधिकं नाम पर्व्व प्रोक्तं चतुर्दशम्" भा०आ०प०१अ० ।

आश्वयुज पु० आश्वयुजी अश्विनीनक्षत्रयुक्ता पौर्णमासी यस्मिन् मासेऽण् । शुक्लप्रतिपदादिके दर्शान्ते चान्द्रे आश्विने मासे । "त्यजेदाश्वयुजे मासि सुप्तश्चं पूर्व्वसञ्चितम्" मनुः; "भाद्रपदाश्वयुजौ वर्षा" "गाङ्गमाश्वयुजे मासि प्रायशोवर्षति" इति च स्मृ० ।

आश्वयुजक त्रि० आश्वयुज्यासन्नो मासः वुञ् । चान्द्राश्विनपौर्णमासासन्ने मासे स हि तस्यामेव तिथौ उप्तः सन् प्ररोहति वर्द्धते च इति लोकप्रसिद्धिः ।

आश्वयुजी स्त्री अश्वयुजा अश्विनीनक्षत्रेण युक्ता पौर्णमासी "नक्षत्रेण युक्तः कालः" पा० अण् । आश्विनमासीयपौर्णमास्याम् "आश्वयुज्यां पौर्णमास्यां निकुम्भो वालुकार्ष्यात्" ब्रह्मप० । "तेन यज्ञमानाः पञ्चवर्षाण्याश्वयुजीशुक्लेषु चतस्रिंशतं पन्थानमेते भारतान्" कात्या० २३,२,४ । "आश्वयुज्या वुञ्" पा० ।

आश्वरथ त्रि० अश्वयुक्तो रथः अश्वरथस्तस्येदम् पत्रपूर्व्वकत्वात् अञ् । अश्वयुक्तरथसम्बन्धिनि ।

आश्वलक्षणिक त्रि० अश्वलक्षणं वेत्ति तज्ज्ञापकशास्त्रमधीते वा ठक् । १अश्वलक्षणज्ञापके २तद्बोधकशास्त्राध्येतरि च

आश्वलायन पु० अश्वल+अश्वयाश्वकः मुनिभेदस्यापत्यं नडा० फक् । ऋग्वेदीयशौनकशाखाकल्पकारके ऋषिभेदे "कल्पसूत्रकारं सूत्रितं सूत्रं ब्राह्मणसन्निभम् विद्याश्वलायनं प्रोच्य शौनकेन विसर्जितम्" इत्युक्तेः शौनकोपदिष्टेन तेन च "अथैतस्य सनाम्नो यस्य वितानेयोगापत्तिं वक्ष्यामः" इत्युपक्रम्य "नमः शौनकाय" इत्यन्तमु अध्यायचतुष्टयात्मकं वैतानिककर्म्मोपयोगि शौनसूत्रम् "उक्तानि वैतानिकानि सूत्राणि वक्ष्यामः" इत्युपक्रम्य "नमः शौनकाय" इत्यन्तम् अध्यायचतुष्टयात्मकं सूत्रकर्म्मोपयोगि सूत्रसूत्रं, तत् परिशिष्टाध्यायचतुष्टयात्मकं सूत्रं शौनकाचार्य्यप्रसादात् रचितम् । तदीयसूत्रोपरि देवस्वामिना भाष्यं कृतं तन्मूलकतया गर्गगोत्रेण नरसिंहसुतेन नारायणोपाध्यायेन वृत्तिः रचिता तत्र शौनसूत्रे प्रतिपाद्यविषयास्तावदभिधीयन्ते ।

तत्र प्रथमाध्याये प्रधानस्याङ्गसंकृतिज्ञानाय सर्व्वादौ दर्शपूर्णमासयोर्व्याख्यानम् । १अग्निहोत्रादिषु ऋक्समाम्नायस्य प्रयोगसरूपकथनप्रतिज्ञा । २ऋक्समाम्नातकर्म्मसु आहिताग्नेरधिकारकथनम् । ३अङ्गसङ्करूपविध्यन्तरज्ञानायादौ दर्शपूर्णमासयोर्व्याख्यान प्रतिज्ञा । ४दर्शपूर्णमासयोर्व्याख्यारम्भः । ५अनोषधिच्छविष्क्रुप्रोक्षणे कर्म्मणि अपरेणाग्नप्रपदनम् । ६ अवटरूपचात्वालवत्सु पशुसोमादिषु अपरेण चात्वालप्रपदनम् । ७ चात्वालरूपस्याध्वनो वैदिकी तीर्थसंज्ञा । ८ होतुः प्राङ्मुखत्वस्य मनोवाक्कायव्यवस्थानादीनाञ्च चेष्टाया नित्यता । इति परिभाषा संग्रहः । ९ उरूपस्थीकरणरूपाया अवधारणाया नित्यत्वम् । १० यज्ञोपवीतप्रक्षणनियमस्यान्तर्विहारे शौचनियमस्य च नित्यत्वम् । ११ विहारे कर्म्म कुर्वतस्तत्पृष्ठतः करणनिषेधः । १२ एकाङ्गोल्लेखे दक्षिणप्रतीतिः । १३ सर्व्वदक्षिणाद्यल्लेखेऽपि दक्षिणप्रतीतिः । १४ कर्त्तृरहिते क्रियाविधौ होतर्य्येव कर्त्तृज्ञानम् । १५ दानविधौ यजमाने कर्त्तृज्ञानम् । १६ कुरुते जपतीति प्रायश्चित्ते ब्रह्मणि कर्त्तृज्ञानम् । १७ ऋचो मूलपक्षे ऋत्विग्वेदनम् । १८ सूक्तादौ गायत्र्यादिभागरूपे पादे हीने स्तुशस्त्रे सूक्तज्ञानम् । १९ सूक्तादावसूक्तादौ चाधिकपादपक्षे स्तुच्छस्त्रज्ञानम् । २० अस्मिन् शास्त्रे जपादीनामुपांशुप्रयोक्तव्यत्वम् । २१ मन्त्राणां कर्म्मकरणानाञ्चोपांशुत्वकथनम् । २२ सामान्यविशेषयोर्विशेषविधेर्बलीयस्त्वम् । २३-२४ होतुरवस्थानकथनम् । २५ कर्तुरासनकथनम् । २६ वचनादतिरिक्तस्य कर्त्तव्यत्वम् । २७ सामिधेन्यर्थं प्रेषितस्य होतुर्जपविधानम् । २७सूत्राणि प्रथम कण्डिकायाम् । १साकिधेन्यर्थजपः । २तज्जपानन्तरं सामिधेनीनाम् ऋचामनुवचनम् । ३ हिङ्करणपूर्वकप्रणवान्तव्याहृतित्रयजपविधानम् । ४सजपर्हिङ्कारस्याभिहिङ्कारसंज्ञाकथनम् । ५ कौत्समते निरोङ्कारव्याहृतित्रयजपानन्तरहिङ्करणदर्शनम् । ६कौत्समते सामिधेन्यर्थौङ्कारजपस्याकरणम् । ७ऋचामेव सामिधेनीत्वप्रदर्शनम् । ८सामीधेनीनाम् ऋचामेकसूत्रेण सान्तत्वेन चानुवचनम् । ९ऐकसूत्र्यलक्षणम् १०सन्ततलक्षणम् ११सन्ततस्यावसानत्वकथनम् । १२पूर्वोच्छ्वासाविच्छेदे उत्तरोच्छ्वासारम्भः । १३प्रणवेनावसानकथनम् । १४ विच्छिते एवावसाने प्रणवस्य चतुर्मात्रत्वेनोच्चारणम् । १५ प्रणवान्तमकारस्य वर्णान्तरापत्तिकथनप्रतिज्ञा । १६ प्रणवान्तमकारेण स्वस्मात् परस्य यस्य कस्यचित् स्वर्य्यवर्णस्य तद्गो-

वान्तवर्णोपादनम् । १७ प्रणवान्तमकारेण यवलान्तस्थासु परान्तस्थानामनुनासिकत्वापादनम् । १८ रेफोष्मसु वर्णेषु प्रणवान्तमकारस्यानुस्वारत्वापत्तिः । १९ प्रथमोत्तमे ऋचौ त्रिरध्यर्धीकृत्य तयोरनुवचनम् । २० अध्यर्धयोर्ऋचोर्वचनावसानेऽध्यर्धचतुष्कात्मिकयोर्द्वयोर्ऋचोर्वचनम् । २१ उत्तमायास्तृचे आदौ द्वे पश्चात् अध्यर्धा । २२ एकादशानामृचां द्वयोस्त्रिरभ्यासयोगेन पञ्चदशसंख्यापूरणनिदर्शनम् । २३ यस्त्वयाज्यादिषु सामिधेनीनां कतिपयधर्मातिदेशः । २४ सामिधेनीभ्योऽन्यत्राध्यर्धकरणप्रतिषेधादयः २५ विच्छिते ऽवसानेऽभिहिङ्कारानभ्यासनिषेधः । २६ यस्त्वेषामेव स्तोत्रकाणामभिहिङ्कारविधानात् यावत्सुतस्तद्विधेधसाधनम् । २७ प्रणवेन निगदसम्बन्धानन्तरं तेनैव तदवसानविधानम् ।२७सू० १अ० २क०। १यजमानस्यार्षेयप्रवरणम् । २ अन्यत्रैतज्जातद्वामुष्यायणार्षमार्षेयप्रवरणप्रकारः । ३ राजन्यविशां तत्तद्वर्णिकानुलोमस्त्रीजातानाञ्च पुरोहितार्षेयभागित्वम् ।४ राज्ञां राजर्षिप्रवरणं पौरोहित्य प्रवरणं वा ५ प्रवराख्याने तत्संबंधे च वर्णत्रयस्य मानवप्रवरः । ६ चतुर्दशनिवित्पदकथनम् आवाहननिगदकथनं, सामिधेन्यादीनां चावाहनीयाभिधायित्वम् । ७ अग्निरूपप्रथमदेवतावाहनम् । ८ अग्नीषोमदैवताज्यभागयागयोराख्या । ९ अग्नेरग्नीषोमयोश्च पौरुषाख्यां प्रधानदेवतात्वम् । १० अमावास्यायां दधिपयोभ्यां यागमकुर्वतोऽग्नीषोमयोः स्थाने इन्द्राग्न्योः प्रधानदेवतात्वम् । ११ तद्विने उक्तयागरूपसन्नयनकारिणोऽग्नीषोमस्थाने इन्द्रमरुतेन्द्रयोरन्यतरावाहनम् ।१२ उभयोरपि पर्वणोरैतरेयिणाम् विष्णुदेवताकोपांशुयागकरणम् । १३ शाखान्तरीयाणाम् उभयोरपि पक्षयोरुपांशुयागभिन्नयागाभावः।१४ पित्र्याग्नेयोपांशुयागानाम् आवाहनादिनिगदचतुष्टये आवाहनादीनां षण्णां पदानाम् उच्चैरितिसंज्ञाविधानम् । १५ उपांशुयाजवचनानामन्येषाम् परोक्षाणाम् उपांशुत्वानुवादः, विकल्पेनोच्चैः संज्ञाविधानं च । १६ विहितदेवतानामरूपस्य प्रत्यक्षस्योपांशुत्वम् । १७ प्रतिनोदितदेवतमावाहनभेदः । १८ एकप्रदानानां सर्वासां देवतानामावाहने सकृद्देवावहशब्दप्रयोगः । १९ उत्तरनिगमेषु एकदेवतात्वेन संस्तवः । २० एकप्रयोजनार्थाया देवतायाः कारणवशात् एकवचनेनैव समानता । २१ अपराह्णवहितायां देवतायां निगमेषु सकृद्देववचनभाक्त्वम् ।२२ आवापोद्वारयोग्यासु प्रधानदेवतासु कृतावाहनासु देवाज्यपाक्षिप्तकृतामावाहनप्रक्रिया । २३ आश्रावयिष्यतेऽध्वर्यवेऽनुमन्त्रणं तदनन्तरकरणीयञ्च । २४ उत्थानपूर्वकं षष्टिचेतिमन्त्रपाठः । २५ अंसे पार्श्वस्थेन पाणिनाध्वर्युन्वारम्भणम् । २६ सव्येन पाणिनाङ्गेनोरुणा वाऽऽग्नीध्रकर्तृकमन्वारम्भणम् । २७ उक्षोभदान्वारम्भणे साधारणमन्त्रः । २८ इध्मसन्नहनरूपैकृष्णैरात्मसुखसंमार्जनम् । २९ संस्कारकर्मावृत्तिमात्रे सकृन्नत्वेन द्विरुक्तौ संस्करणम् । ३० उदकस्पर्शानन्तरं क्षोल्लपदनाभिमन्त्रणम् । ३१ दक्षिणोत्तरिणोपस्थेनोपवेशनं क्षोल्लपदनात् प्राक्षणनिरसनञ्च । ३२ उक्तयोरेतयोर्निरसनोपवेशनयोः सर्वासनेषु प्रथमप्रयोग एव समानत्वम् । ३३ गौतमाचार्यमते द्वितीयेऽपि प्रयोगे ताभ्यनिरसनोपवेशनयोः सद्भावः । ३३सू० १अ०३क० । १अग्न्याधेये ब्रह्मौदनप्राशनकाले ब्रह्मणो द्विर्निरसनोपवेशनकरणम् । २ सर्वेषु सोमेषु बर्हिरुपसृज्य प्रत्येत्य ब्रह्मणः पूर्वासने पुनः करणम् । ३ आसने पर्यवसृष्टस्य क्षौत्तः सदःप्रसर्पणानन्तरं तत्रैव पुनः करणम् । ४ पत्नीस्त्राहाकृत्यवयोः स्रुगवदापनयोः पुनः करणम् । ५ पत्नीसंयाजार्थोपवेशनाकरणम् । ६ कौत्समते क्षोल्लभिन्नानामेतयोर्निरसनोपवेशनयोरकरणम् । ७ उपविष्टानन्तरं देवेत्यादिमन्त्रपाठः । ८ जान्वक्ष्येण बर्हिरुपस्तृण्य अभिहिषेत्यादिमन्त्रजपः । ९ इध्मप्रदीप्ते उक्तजपानन्तरं भूपतये नम इति निगदेनाध्वर्यवे स्रुगवदापनम् । १० अग्निर्होतेति निगदमवसाय होतारमष्टधा इति मन्त्रजपः ११ अग्निर्होतेत्यादिना सह इतवतीत्यादिकमेकनिगदं विधाय तत्समापनम् । १२ उक्तनिगदे समाप्ते ऽध्वर्युकर्तृकमाश्रावणम् । १३ उत्करदेशे तिस्रः आग्नीध्रं प्रत्याश्रावणप्रकारः । १३सू० १अ०४क० । १ शाब्दलक्षणप्रयाजैर्यजनम् । २ तनूनपाद्राशंसयोरन्यतरेण प्रयाजानां पञ्चसङ्ख्याकत्वम् । ३ सकृत्प्रेषितस्य न सर्वयजनम् । ४ अननुयाजानां सर्वासां याज्यानामादिरागूर्भवतीति । ५ ये यजामह इति आगूः स्वरूपं, वषट्कारस्वरूपञ्च । ६ याज्यायाः एव उच्चैस्त्वबलीयस्त्वोभयधर्मवत्त्वम् । ७ आगूर्वषट्कारयोरादोः श्रुतिकरणम् । ८ याज्यान्तस्य श्रावणम् । ९ विवृत्तयोः सन्धिजातयोरैकारैकारयोरौकारौकारयो आ इ, इति आउ इत्येवं, व्यञ्जनान्तानां सन्ध्यक्षराणां सर्वदा स्वरूपेणैव च श्रावणम् । १० अनवर्णोपधस्य विसर्जनीयस्य रेफिभावः । ११ रेफिसंज्ञिनोऽवर्णोपधस्य विसर्जनीयस्य रेफिभावः । १२ वषट्-

कारसन्धौ अरेफसंज्ञस्यावर्णोपधस्य विसर्जनीयस्य लोपः । १३ वर्गाणां प्रथमस्य स्ववर्गीयतृतीयवर्णापादनम् । १४मकारे सानुनासिकभावस्य नित्यत्वम् । १५ वौषट्शब्दस्य वषट्कारस्वरूपत्वम् । १६इत्येवंरूपः प्रथमप्रयाजः । १७ वषट्कारोच्चारणपूर्वकोऽनुमन्त्रणप्रकारः । १८वषट्कारस्य दिवाकीर्त्तनीयत्वम् । १९ अनुमन्त्रणस्यापि दिवाकीर्त्तनीयत्वम् । २० इत्येवं याज्यास्वरूपम् । २१वधिडादिनिघ्नानां तनूनपादित्यादिः द्वितीयप्रयाजः।२२वधिडादीनां नराशंस इत्यादिः द्वितीयप्रयाजः।२३इडो अग्न इत्यादिः सर्वेषां तृतीयप्रयाजः।२४बर्हिरग्ने इत्यादिः चतुर्थः स्वाहाकृतिमित्यादि पञ्चमप्रयाजः।२५अग्निमन्थनादौ मन्द्रस्वरप्रयाजः।२६शंयुवाकादूर्ध्वं मन्द्रस्वरेण प्रयोगः।२७प्रयाजेभ्य ऊर्ध्वमास्विष्टकृतो मध्यमेन प्रयोगः । २८ इडादिशंयुवाकान्तरूपस्य शेषस्योत्तमेन प्रयोगः। २९ पूर्वोत्तरयोराज्यभागनामकयागयोरागोरणदेवतादेययाज्यासन्धानपूर्वको यागः । ३० अनुवाक्यावतीनामप्रैषाणां चान्यायात्याभ्योऽन्यासां देवतानाम् आदेयपूर्वकयागः । ३१ अङ्गप्रधानरूपे सोमकर्म्मणि वैश्वानरीयपत्नीसंयाजयाज्यानुवाक्याभ्योऽन्यासां देवतानाम् आदेयपूर्वको यागः । ३२ पौर्णमास्यामाज्यभागयोः सन्निधित्सा वार्त्तप्रसंज्ञा । ३३ अनुवाक्यातएवविचारागमादि । ३४याजयोरानुवाक्यादेवतानन्यत्वम् । ३५ आदित आरभ्याज्यभागपर्य्यन्तं वाग्यमनम् ।३६याज्यादिभ्योऽन्यदारभ्यासमाप्तेर्वाग्यमनम् । ३७ यत्तत्साधनवचसोऽन्यत्र वाग्यमननियमः । ३८ वाग्यमननियमातिक्रमे अतो देवा अवन्तु न इति वैष्णव्या ऋचो जपः । ३९उक्तातिक्रमेऽन्यस्या अपि वैष्णव्या ऋचो जपविधानम् ।३९सू०१अ०५क०।१विधिक्रमप्राप्तानां देवतानां वक्ष्यमाणव्यतिक्रमाभ्यां याज्यानुवाक्यायोजना । २प्रधानानन्तरं स्विष्टकृतो यागः सर्वत्र च पूर्वमनुवाक्यायाः पश्चाद्याज्यायाः प्रयोगः । ३ ये यजामहे इत्युक्ता यद्वा विभक्त्या देवतामात्रस्य प्रिया धामान्यग्नाडिति मन्त्रपाठः । ४प्रथमदेवतायाः पुरस्तादयाडग्निशब्दस्य च उत्तरासमवाट्शब्दस्यैव सर्व्वासामुपरिष्टात् प्रिया धामानिशब्दस्य च सन्ततप्रयोगः । ५ याज्याविशेषेऽनुच्चारस्य कर्त्तव्यत्वम् । ६याज्यापाठे अर्धर्चे वोच्चारकर्त्तव्यता ।६सू०१अ०६क० १ अध्वर्युणा प्रदेशिनीपर्वाङ्गुनपूर्वकीडापवमशोधने । २ ओडाधरशोधनस्य मन्त्रविशेषः । ३ अध्वर्युणा इडाग्रहणपूर्वकावान्तरेडावदापनप्रकारः । ४ स्वयं यजमानेन इडाया अवान्तरेडाग्रहणप्रकारः । ५ अध्वर्युकर्त्तृकं वा तद्ग्रहणम् । ६ इडोपस्थानप्रकारः । ७ सह दिवेत्यादिना तस्मिन्नुपस्थिते इत्यन्तेन मन्त्रेण इडोपस्थानम् । ८होतर्यजमानपञ्चमानां वा सर्वेषामवान्तरेडाभक्षणपूर्वकेडाभक्षणम् । ८सू०अ०७क० । १इडाभोक्तुर्मार्जनपूर्वकमनुयाजचरणम् । २मार्जनप्रकारः । ३अनुयाजलक्षणम् । ४ प्रयाजानुयाजयोर्गुणकथनम् । ५अनुयाजानां नित्यव्यवस्थापनम् । ६ एकैकं प्रेषितस्य यजनविधानम् । ७ अनुयाजमन्त्राणां स्वलविशेषे क्वचिद्वसानपूर्वकं क्वचिद्वानवसानपूर्वकं यजनविधानम् । ७सू०अ०८क०।१सूक्तवाकाय सम्प्रेषितस्य देवतादेशानन्तरम् इदं हविरित्युपसदनम् । २उत्तरा अपि देवता आदिश्येदं हविरित्येवमुपसदनम् । ३ हिदैवतबर्हिदैवतयोरर्थवशेनाक्रतत्सस्य स्थाने अक्रातामक्रतेत्यूहस्य कर्त्तव्यता । ४आवह स्वाहेतिनिगदस्य पशुयागेऽपि प्रयोगः ।५आवापिकदेवताक्रमप्राप्त्यर्थम् आवापिकान्तमित्येतदादिकथनम् । ५सू०१अ०९क०। १शंयुवाकाय प्रेषितस्य तच्छंयोरिति मन्त्रपाठे प्रणवनिषेधः। २ ताद्दगप्रेषितायाध्वर्युणा वेददानम् । ३ वेदग्रहणे वेदोऽसीति मन्त्रपाठः । ४प्रकृतिविकारभावेऽपि क्रतूक्तमन्त्रप्राप्तिः, आज्येन सोमयाग एव याज्यानुवाक्याव्यवस्थापनं यागएव केवलं देवताविशेषाणामनुवृत्तिकथनं च । ५मन्त्रभेदानां पत्नीसंयाजसंज्ञाविधानम् । ६ प्रजाकामस्य यजमानस्य यागभेदः । ७यजमाने सन्निहितेऽपि होतरेव कर्तृत्वं याज्यानुवाक्ययोर्होतृकर्तृत्वस्यान्ततः प्रसिद्धिः, कुरूक्तमसिति मन्त्रपाठे यजमानस्य स्वयंकर्तृत्वं च । ८पाणितलस्थाज्यरूपेडोपस्थानानन्तरं तद्भक्षणविधिः । ९ आज्येडाया ऊर्ध्वं शंयुवाको भवति न वेति संशये इतिकर्त्तव्यताविधानम् । १०सू०१अ०१०क०।१होत्राऽध्वर्युणा वा पत्न्यै वेदं प्रदाय वेदोऽसीत्यादिकामावेत्येवमन्तमन्त्रवाचनम् । २प्रजाकामायाः पत्न्या वेदशिरसा स्वनाभ्यालम्भनम् । ३कामनाभावे वाचनानन्तरं योक्त्रविमोकः । ४ हिरण्यखितं योक्त्रं निधाय तस्योपरिष्टात् वेदलवानां निधानम् । ५लवेभ्यः पुरस्तात् वेदलवसंश्लिष्टस्य पूर्णपात्रस्य निधानम् । ६याज्यानमभिभक्षयन्तीं पत्नीमभिमन्त्रयते पूर्णमसीति मन्त्रवाचनम् । ७पूर्णपात्रादुदकं गृहीत्वा तदुदकन् तां चैवं कुर्वतीं वाचयतीत्युक्तिः । ८योक्त्रसाधनात् पत्न्यञ्जलिसक्तानमात्मनश्च सर्व्वपाणिसक्तानं निधाय पूर्णपात्रं निनयन् माहं प्रजा-

मिति तां वाचयतीत्युक्तिः ।६वेदलक्षणानि सङ्गृह्य गार्हपत्यादारभ्य तन्तु तन्वन्नित्यादिना सन्ततं सृजन् आहवनीयं गच्छतीत्युक्तिः । १०सर्व्वाणि वेदलक्षणानि न स्मरितव्यानि नियमेन शेषितव्यान्युत्तरक्रियार्थमित्युक्तिः । ११ श्रौतातिरिक्तेषु गार्ह्येष्वपि मन्त्रसाध्येषु कर्म्मसु स्वाहाकारस्यैव कर्त्तव्यत्वं न वषट्कारस्येत्युक्तिः । १२ अविच्छितविशेषाणां होमाभ्याधानोपस्थानानां, तत्तदितिकर्त्तव्यताप्रकारस्य च विधानम् । १३ एकमन्वाहि कर्म्माणीति न्यायेन व्याहृतिभिरिति बहुवचननिर्देशात् चतुर्णां कर्म्मणां क्रमेणैव करणम् । १४ प्रयोगमध्ये मार्गान्तरेण निष्क्रान्तस्यापि नियमा भवन्त्येवेत्यस्य व्यतिरेकमुखेन व्यवस्थापनम् । १५ संस्थाजपः तस्य च सोमेष्टिषु निषेधः ।१६होतुरेव केवलमेतावत्त्वम् अग्नीध्रस्यान्यदपीत्युक्तिः ।१७ऋ० १अ०१३क०। १ ब्रह्माधिकारे विधयः । २ व्याख्यातानां होत्राचमनबज्ञोपवीतशौचानां ब्रह्माधिकारेऽतिदेशनम् ।३तत्र कर्म्मसु कश्चिद्गच्छति कश्चित्तिष्ठति तत्र भूयसामेव धर्म्मस्याचरणं ब्रह्मणः इति व्यवस्थापनम् ।४बर्हिर्वेदि क्षत्त्रियाजामभिमुखासादयेत् प्राचीत्युक्तिः । ५एकस्मिन्नपि प्रयोगे क्वचिदासनस्य क्वचित् स्थानस्य च लाभोक्तिः । ६ तिसृणां होमेषु अवघट्कारेषु च स्थानासनयोर्विकल्पः ।७अनन्तरसूत्रद्वयविधवादन्यत्रासनकथनम् । ८ समस्तपात्रसङ्कुश्यायेषाहवनीयं परीत्य तस्य दक्षिणतः कृष्णेषूपवेशनम् । ९ उक्तोपवेशनानन्तरं मन्त्रभेदजपः । उक्तजपस्य ब्रह्मजपत्वम् । ११अध्वर्युकर्त्तृकम् उपविष्टातिसर्जनम् । १२ ओं प्रणयेत्येतावदुपातिसर्जनरूपानुज्ञाप्रकारः । १३ कर्म्मानुरूपाणाम् आदेशानां कर्त्तव्यतोक्तिः । १४ उत्तरविवक्षार्थम् उद्गैः प्रणवादिकथनम् । १५ प्रणवादूर्द्धं वा उद्गैर्भावोक्तिः । १६ प्रणीताप्रणयनकालादूर्द्धं हविष्कृन्नाम्नोच्चारणपर्य्यन्तं वाग्यमनपूर्व्वकमासनम् । १७ पशुयागे चात्वालमार्जनपर्य्यन्तं वाक्संयमः । १८ सर्व्वसोमेषु धर्म्माभिप्रधारणपूर्व्वकं सुब्रह्मण्यापर्य्यन्तं वाङ्नियमः । १९ प्रातरनुवाककालात् परम् अन्तर्यामग्रहयागपर्य्यन्तं वाग्यमनोक्तिः । २०सवनत्रयेऽपि पुरोडाशप्रचारादि, तदिडापर्य्यन्तं वाग्यमनोक्तिश्च । २१स्तोत्रादौ सुध्यमित्यादिशस्त्रयाज्यावषट्कारपर्य्यन्तं वाग्यमनोक्तिः । २२ पवमानस्तोत्रेषु उपाकरणादि समाप्तिपर्य्यन्तं वाग्यमनोक्तिः २३ सर्व्वत्र मन्त्रवति कर्म्मणि वाग्यमनोक्तिः । २४ उक्तादन्यत्रापि विषये होतृतुल्यवाग्यमनभावः । २५ वाग्यमनभङ्गे प्रायश्चित्तविधानम् । २६ अग्नीषोमीयप्रणयनावधिवाग्यमनम् । २७ दक्षिणतो व्रजत एवाशुःशिशान इति सूक्तजपः । २८गमनापरिसमाप्तावपि उपवेशनादिकरणं, ब्रह्मजपविधानञ्च । २९ सोमयागे अग्निप्रणयनान्ते ब्रह्मजपनिषेधः । ३० विसृष्टवाक्त्वेऽपि यजमानस्तोक्तिः । ३१ विपर्य्यासान्तरितयोः प्रायश्चित्तविशेषोक्तिः । ३२ वेदभेदेन भेदेऽग्निभेदे प्रायश्चित्तभेदः । ३३ सर्व्वेभ्यो वेदेभ्यो यूपपदुर्भ्रंशापाते समस्ताभिर्व्वाग्भिरेकाऽऽहुतिरूपप्रायश्चित्तम् । ३४ खुगादापनात् प्रागङ्गारस्य बहिःपरिधि पाते कर्म्मभेदः । ३५ तत्र दिग्भेदेन निर्गतौ होमभेदः कर्म्मणि स्वाहाकारान्तत्वभावः । ३६ अध्वर्युमन्त्रहरणोक्तिः ३७ । सहस्रभङ्ग इत्यादिना प्रकृताङ्गारहोमोक्तिः । ३७ सू० १अ० १२ क० । १प्राग्वितरहरणनिधानपूर्व्वकं तत्प्राशनम् । २ दर्भाग्रस्थमार्जनपूर्व्वकं चतुर्धाकरणे कृते प्राग्वितरहरणे ब्रह्मणा आनीतब्रह्मभागस्य निधानम् । ३ प्राग्वितरहरणदेशस्य पश्चात् कृष्णेषु यजमानभागनिधानम् । ४ प्रजापतेरित्यादि मन्त्रेणान्वाहार्य्यावेक्षणम् । ५अन्येनाङ्गेनान्वाहार्य्यावघ्राणविधानं ब्रह्मभागे शिष्टभागविधानञ्च । ६ प्रस्थास्याम इति अध्वर्युमन्त्रपाठानन्तरं प्रतिष्ठेत्वेवानुज्ञोक्तिः । ७ समिदनुज्ञानं, जघन्यीभवतः सर्व्वप्रायश्चित्तहोमः, आग्नीध्रस्य ब्रह्मान्वारम्भणं च । ८ इतरेषां होत्रान्वारम्भणविधिः । ९ उक्तयोरेतयोर्होम एव कार्य्यं अन्वारम्भस्य परस्परभावः । १० सर्व्वेषां होमकर्त्तृणामन्वारम्भकर्त्तृणां च संस्थाजपेन उपासनविधानम् । १०सू० १ अध्याये १२ क० ।

१ पौर्ण्णमासेनेष्टिपशुसोमानामुपदिष्टत्वम् । २ उपदिष्टैरिष्टिपशुसोमैरमावास्यायां पौर्ण्णमास्यां वा यागस्य कर्त्तव्यतोक्तिः । ३ क्षत्रियवैश्ययोः पर्व्वणोरेवाग्निहोत्रहोमकर्त्तव्यताविधानम् । ४ राजन्यवैश्ययोः पर्व्वेतरेषु कालेषु तपस्विब्राह्मणायौदनदानम् । ५ क्षत्तसत्वसभावस्य सोमयाजिनश्च क्षत्रियस्य वैश्यस्य वा सदा होमविधानं न केवलं पर्व्वणोरित्युक्तिः । ६ बहूनां समानानां पक्षाद्विधाने सति क्रमेण सम्बन्धोक्तिः । ७ एकस्या एकस्या देवताया द्वे द्वे ऋचौ याज्यानुवाक्ये । ८ देवताविशेषस्य तद्विकृतियाज्यानुवाक्यानादेये नित्यवोस्तयोर्य्यं होतव्यत्वोक्तिः । ९ कर्म्मानुष्ठानभूतानामग्न्याधेयप्रभृतीनां मध्ये गार्हपत्याद्यग्न्युत्पत्त्यर्थमङ्गार-

निधानरूपाग्न्याधानम् । १० कृत्तिकादीनां सप्तानां नक्षत्राणामन्यतमेऽग्न्याधानविधानम् । ११ उक्तानां सप्तानां कस्मिंचित् नक्षत्रे पर्व्वणि वाऽग्न्याधानस्य कर्त्तव्यत्वम् । १२ वसन्ते ब्राह्मणगुणकाधानविधिः । १३ ग्रीष्मे क्षत्रियगुणकं वर्षासु वैश्यगुणकं शरदि उपक्रुष्टगुणकं चेति आधानत्रयविधानम् । १४ आपदि आधानपक्षे कालनियमाभावः । १५ कृतसोमयागसङ्कल्पस्य आधानमिच्छत आधानकालानवेक्षणम् । १६ आधानार्थमध्वर्युयजमानयोः शमीगर्भादश्वत्थादरण्याहरणविधिः । १७ अग्न्याधेयस्य पूर्वाङ्गत्वेनस्य कर्त्तव्यत्वम् । १८ दृष्टोनामग्निसाधनत्वोक्तिः । १९ प्रथमायामिष्टौ कैवल्याग्निपवमानाग्निनामके हे देवते । २० पवमानगुणकस्य द्वितीयस्याग्नेर्याज्यानुवाक्योक्तिः । २१ स्विष्टकृत्सम्बन्धिन्योर्याज्यानुवाक्ययोर्द्यावः संयाज्यात्वसंज्ञा । २२ सर्वत्र देवतागमे प्राकृतीनां सर्वासां देवतानामुद्धारोक्तिः । २३ आज्यभागौ स्विष्टकृतं चान्तरा यष्टव्यानां देवतानामुद्धर्त्तव्यत्वं विकृतौ पुनर्विहितानां तद्धर्मिकत्वञ्चेति । २४ देवताभ्योऽन्यत्रापि अतिदिष्टस्य विधेरेककार्य्यत्वोक्तिः । २५ द्वितीयायामिष्टौ पावकाग्निशुच्यग्निनामिके हे देवते । २६ साङ्गानित्यादेर्द्विगुणस्य संयाज्यात्वकथनं, तृतीयायामिष्टौ अधिकसामिधेनीद्वयोक्तिः । २७ अग्नीषोमाविन्द्राग्नी विष्णुरित्यस्य वैकल्पिकत्वम् । २८ अदितिनामिका दृष्टिः । २९ अदितीष्टेर्याज्योक्तिः । ३० प्रेद्धो अग्न इडो अग्न इत्यनयोः संयाज्यात्वोक्तिः विराजौ धाय्ये इत्युक्तिश्च । ३१ आद्योत्तमे इष्टी । ३२ आद्या वा इष्टिः । ३३ आद्यायां धाय्याविराजौ । ३४ वैराजतन्त्र्या इष्टेर्ज्ञापनम् । ३५ आधानेनेष्टिभिश्च सिद्धा अग्नयो द्वादशाहोरात्रं सर्वैस्रुक्पेयैव धार्य्यन्ते इत्येतदङ्गधारणोक्तिः । ३६ गतत्रियामसग्नयो यावज्जीवमजस्रा भवन्ति न द्वादशाहमेवेत्युक्तिः । ३७ सू० २ अ० १ क० । १ गार्हपत्यात् ज्वलदाहवनीयोद्धरणम् । २ देवं त्वेति मन्त्रेणाग्निहोत्रार्थसद्धरणम् । ३ आहवनीयं प्रति मन्त्रपूर्व्वकाग्निप्रणयनमन्त्रः । ४ आहवनीयायतनेऽग्निनिधानमन्त्रः । ५ सायं प्रातरूपः कालेषु निधानान्तकर्म्मकरणम् । ६ रात्र्यां यदेन इति मन्त्रेणाग्निप्रणयनम् । ७ आहिताग्नेर्व्रतचारित्वोक्तिः । ८ अनुदितहोमिन औदयाद्व्रतचारित्वोक्तिः । ९ अस्तमनसमये होमविधानम् । १० आचमनस्य नित्यत्वम् । ११ अग्निपर्य्युक्षणमन्त्रोदकादानविधिः पर्य्युक्षणे अग्नीनामुत्पत्तिक्रमस्य होमक्रमस्य वा विधानम् । १२ दक्षिणाग्निगार्हपत्याहवनीयपर्य्युक्षणे क्रमोक्तिः । १३ गार्हपत्यादविच्छिन्नोदकधाराहरणम् । १५ अधिश्रयणार्थं गार्हपत्यात् कतिपयाङ्गारपृथक्करणविधिः । १६ होमसाधनभूताग्निहोत्राधिश्रयणम् । १७ अधिश्रयणे मन्त्रविकल्पः । १८ द्यध्यधिश्रयणानधिश्रयणविकल्पः १८ सू० २ अ० २ क० । १ अकामकर्त्तृकस्य नित्याग्निहोत्रहोमस्य पयसा कार्य्यता । २ यामाद्यैन्द्रियतेजस्कामानां यवाग्वोदनदधिसर्पींषि यथासङ्ख्यमग्निहोत्रद्रव्याणि भवन्तीत्युक्तिः । ३ कालविक्षेपं विना अधिश्रितमात्र एवावज्वलनविधानम् । ४ अपक्वद्रव्यदध्यादीनामधिश्रितानामप्यवज्वलनविधिः । ५ पयसा होमे समन्त्रकं दोहनपात्रप्रक्षालनपूर्वं स्रुवेण प्रतिषेकविकल्पः । ६ एकस्मिन् पुरुषे प्रतिषेकाप्रतिषेकयोरसङ्करत्वोक्तिः । ७ अवज्वलनार्थं मन्त्रपूर्वकं गार्हपत्यात् स्रुहोतेनोल्मुकेन पुनः परिहरणविधानम् । ८ पच्यमानपयोऽवतारणमन्त्रः । ९ गार्हपत्येऽङ्गाराणां प्रक्षेपमन्त्रः । १० आहिताग्नेरतिसर्ज्जनमन्त्रः । ११ आहिताग्नेः पत्न्याश्च इतिकर्त्तव्यताकलापः । १२ अतिसृष्टस्योद्वयनविधिः । १३ पुत्राणां तारतम्यमिच्छतः सपुत्रस्य यजमानस्य काम्यकल्पः । १४ एकपुत्रस्यापि काम्यकल्पः । १५ समिद्धरणानन्तरं समन्त्रकं तदाधानविधानम् । १६ समिदाधानानन्तरम् आचमनपूर्वकं तदवधिहोमविधानम् । १७ पूर्वाङ्गत्वनन्तरं कृष्णेषु स्रुक्सादनपूर्वकं गार्हपत्यावेक्षणम् । १८ पूर्वाङ्गतेः प्रागुदक् उत्तरतो वा उत्तराङ्गत्वार्थं द्रव्योत्पादनविधानम् । १९ होमेषु सर्व्वत्र प्रजापतिध्यानविधानम् । २० भूयिष्ठद्रव्यपूर्णस्रुक्स्थानानन्तरं तद्वतलेपमार्जनं पाणितलगतलेपमार्जनञ्च । २१ लेपनिमार्जनकुशमूलानां दक्षिणत उत्तानाङ्गुलिनिधानम् । २२ कुशमूलानां दक्षिणतो जलावनिनयनविधानम् । २३ स्रुङ्निधानानन्तरं जलोपस्पर्शनम् । २४ आहिताग्निकर्त्तृकानुमन्त्रणविधानम् । २५ समन्त्रकमाधीयमानसमिदनुमन्त्रणम् । २६ ता अस्येत्यृचा पूर्वाङ्गत्वनुमन्त्रणम् । २७ शमीपस्थेन सकटाञ्चमीत्याद्यृचा पूर्वाङ्गत्वनुमन्त्रणम् । २८ याभिः काभिश्च त्वावराभिराग्नेयीभिर्ऋग्भिरुत्तराङ्गत्वनुमन्त्रणम् । २९ पूर्वसूक्तोक्तस्य ऋचां त्रयस्य निरूपणम् २९ सू० २ अ० ३ क० । १ पूर्णे पूर्णे संवत्सरेऽधिकाभिर्ऋग्भिः सकृदनुमन्त्रणम् । २ पर्वविहितयवाग्वादिना सायंप्रातर्होमेषु यजमानस्य स्वयं

कर्त्तव्यम् । २ पूर्णसंवत्सरेतरकाले येन केनापि ऋत्विजाग्निहोत्रहोमः । ३ पुत्रशिष्ययोरन्यतरेणाग्नेर्वासिना होमस्तद्व्रतविशेषश्च । ५ होमकर्त्तुः स्रुग्गतशेषभक्षणप्रकारः । ६ अपरर्त्विजोहोमपूर्वकं स्रुग्गतशेषभक्षणम् । ७ प्रथमोत्तरभक्षणहवे मन्त्रभेदौ । ८ समिदाधानपूर्वको गार्हपत्ये होमविधिः । ९ उत्तराङ्गतेर्नित्यत्वोक्तिः । १० समिदाधानपूर्वकं दक्षिणाग्निहोमप्रकारः । ११ उत्तराङ्गतेः पूर्ववत् नित्यत्वोक्तिः । १२ उक्तशेषभक्षणानन्तरं स्रुचाऽपां निनयनम् । १३ स्रुक्प्रक्षालनानन्तरं प्रागुदीच्योः चतुर्णां पूर्णानां स्रुचां निनयनीयत्वम् । १४ कुशदेशे पञ्चमी स्रुक् गार्हपत्यस्य पश्चात् धरीत्युक्तिः । १५ आहवनीये प्रतापितायाः स्रुचोऽन्यदिदेशे निधानम् । १६ परिचारकरूपाय परिक्रम्णे वा ताडय्याः स्रुचोदानम् । १७ उदक्प्लुतेन समित्रवस्याधानं पर्युक्षणादिकरणञ्च । १८ तिस्रः समिधां प्रथमायाः समन्त्रकाधानम् । १९ आवहनीयगार्हपत्यदक्षिणाग्निषु दीदिहि दीदाव दीदिदावेति मन्त्राणां क्रमेण स्वाहान्तानां पाठ्यत्वम् । २० उक्तकार्ये पूर्ववत् पर्य्युक्षणविधानम् । २१ पर्य्युक्षणहयधर्म्मस्य परिसमूहनहयेऽतिदेशः । २२ पर्य्युक्षणाभ्यां परिसमूहनयोः पूर्व्वभावोक्तिः । २३ सायंप्रातरुभयत्राग्निहोत्रहोमयोरेकाकारत्वम् । २४ सूर्य्योदयसमीपकालयेषकालादित्योदयकालानां प्रातर्होमस्य प्रधानकालत्वम् । २५ प्रातर्होमे विशेषोक्तिः २अ०४क०। १ प्रवत्स्यत आहिताग्नेरग्निप्रज्वालनाचमनाभिक्रमानन्तरं तदुपस्थानम् । २ दक्षिणाग्न्युपासनानन्तरं समन्त्रकं गार्हपत्याहवनीयेक्षणविधानम् । ३ आहवनीयदक्षिणाग्न्युपासनपूर्वकं गार्हपत्याहवनीयेक्षणं कृत्वाहवनीयसमीपं गत्वा तदुपस्थानम् । ४ प्रुतोऽग्नोनवेक्षमाणस्याहिताग्नेर्यथेष्टगमनम् । ५ अग्निसमीपं गत्वा वाग्विसर्गविधानम्, इतः प्राक् वाग्यमनविधानञ्च । ६ अभिलषितदेशगामिनं पन्थानं प्राप्य सदा शुनः पितुरिति मन्त्रपाठः । ७ यदि दैवात् मानुषाद्वा निमित्तात् अनुपस्थिताग्नेः प्रोषितस्य इहैवेति मन्त्रपूर्व्वकं प्रतिदिशमग्न्युपस्थानम् । ८ प्रोष्य स्वयमसमीपं प्राप्य अपि पन्थामिति मन्त्रपाठः । ९ समित्पाणेर्वाग्यतस्याहिताग्निज्वलनज्ञानाभिक्रमपूर्वकम् आहवनीयेक्षणम् । १० नानाग्निषु समिध उपनिधायाहवनीयोपस्थानम् । ११ उपनिहितानां समिधामभ्याधानम् । १२ दक्षिणाग्निसमीपे स्थितस्याहिताग्नेः गार्हपत्याहवनीयेक्षणविधानम् । १३ वाग्विसर्गस्य प्रकारभेदः । १४ दशरात्रादूर्द्धं प्रोष्य चतुर्गृहीतेनाज्येन प्रायश्चित्तहोमः । १५ एकानेकाग्निहोत्रविच्छेदे पूर्वोक्तयाज्ञत्वा होमविधानम् । १६ उक्ताहुतिहोमानन्तरं प्रतिहोमविधानम् । १७ अनाहिताग्नेरपि ऐक्षणप्रपदनयोः कर्त्तव्यत्वविधानं न केवलमाहिताग्नेस्तदित्युक्तिः । १८ प्रवासादागतस्य तदहनि विदितस्याग्नीकस्य न निवेदनीयत्वम् । १९ प्रवासादागतस्याहरहरग्निहोत्रहोमोपस्थानं तत्स्थानं तत्प्रयोगक्रमश्च २अ०५क०। १ अमावास्यायामपराह्णे पिण्डपितृयज्ञविधानम् । २ दक्षिणाग्नेरेकोलूखलं स्रुक्स्रुचौ तस्मादेव प्राग्दक्षिणायां दिशि मन्त्रपूर्वकं तत्प्रणयनम् । ३ अविगृह्यदिक्कानां सर्व्वेषां कर्म्मणां प्राग्दक्षिणां दिशमभिकर्त्तव्यत्वम् । ४ उभयोरपि अग्न्योरुपसमाधानपरिस्तरणपूर्व्वकं दक्षिणाग्नेः प्राग्दक् प्रत्यग्दग् वा एकैकशः चरुस्थालीप्रभृतीनां यज्ञपात्राणां सादनम् । ५ अग्निसमीपस्थितं शकटं दक्षिणत आरुह्य शूर्पोपरि व्रीहिपूर्णस्थालीनिमार्जनरूपतदाख्यदेशाद्व्रीहिपातनम् । ६ स्थाल्याख्यदेशात् शूर्पोपरि पातितानां व्रीहीणां शकटे निधानम् । ७ कृष्णाजिननिहिते उलूखले स्थाल्यन्तर्गतावशिष्टान् व्रीहीन् कृत्वा यजमानपत्नीकर्त्तृकस्तदवघातः । ८ अवहतानां व्रीहीणां दक्षिणाग्नौ अपवपम् । ९ दक्षिणाग्न्यतिप्रणीतयोरन्तराले रेखोल्लेखनम् । १० सकृदाच्छिन्नावत्तीर्ष्वभ्युक्षितरेखायां ध्रुवास्थितमाज्यं दक्षिणतो दक्षिणाग्नेर्निधाय तेनाज्येन अभिधारितस्य स्थालीपाकस्य दक्षिणाग्नेः पश्चादासादनम् । ११ आज्यनादीनां दक्षिणाग्नेर्दक्षिणतो निधानम् । १२ प्राचीनावीतिनो यजमानस्य उपसमाहितैरिध्मैर्म्लेक्षणेन स्रुक्स्रुचौरवदानसम्पदा होमः । १३ स्वधानमःशब्दस्य स्थाने स्वाहाकारं कृत्वा होमः । १४ अग्नौ मेक्षणानुप्रहरणपूर्वकं पिण्डस्थानेषु रेखायां त्रिभिर्मन्त्रैस्त्रिर्निनयनम् । १५ रेखायां पिण्डनिपरणम् (दानम्) । १६ गायगारिमते पित्रादीनां त्रयाणां ये मृताः स्रुक्स्रुचां पिण्डदानं जीवतां प्रत्यर्चार्चनम् । १७ तौरुक्षिमते पित्रादिभ्यस्त्रिभ्यः प्रेतेभ्यो जीवद्भ्यश्च सर्वेभ्यो निपरणम् । १८ गौतममते त्रयाणामेकस्मिन् द्वयोः सर्वेषु वा जीवत्सु यावदर्थं परान् पितॄन् स्रुक्स्रुचौ त्रिभ्यः प्रेतेभ्यः पिण्डनिपरणम् । १९ पित्रादीनां जीवितानां

हुतानाञ्च पिण्डदाने उपायविशेषकथनप्रतिज्ञा ।२० क्रमेण गौतमगार्ग्यगारितौल्वलीनां मतदूषणानि । २१ जीवव्यवहितेभ्यः पिण्डेभ्यो न निरूपणम् । २२ जीवेभ्यो होमः हुतेभ्यो निरूपणम् । २३ सर्वजीविनः सर्वहुतविधाने तत्र पिण्डहोमस्य निरूपणमन्त्रेण स्वाहाकारेण कर्त्तव्यत्वम्, अन्येषामपि प्रयोजनानां चिन्तनीयत्वञ्च । २४ पित्रादीनां नामोच्चारणे तत्पितामहप्रपितामहशब्दानां नामस्थाने प्रयोगः । २अ० ६क० । १निपूर्त्तानां पिण्डानामनुमन्त्रणम् ।२उक्तानुमन्त्रणप्रयोगे नियमोक्तिः । ३तूष्णीमेव चरोः प्राणभक्षणस्य कार्यत्वम् । ४उदकोपनयननिनयनस्य नित्यकर्तव्यत्वम् ।५पिण्डेषु अभ्यञ्जनाञ्जनदानम् ।६पिण्डेषु वासोदानं तत्र विशेषोक्तिः । ७यजमानस्य पितृपासनं तत्र मन्त्रश्च । ८ तिसृभिर्ऋग्भिः पितृप्रस्थानम् । ९ पिण्डस्थानां पितॄणां प्रवाहणम् । १० यजमानस्य दक्षिणाग्निं प्रति गतिः । ११ दक्षिणाग्निप्रतिगमनानन्तरं यजमानस्य गार्हपत्याग्निं प्रति गतिः । १२यजमानकर्त्तृकं पिण्डानां मध्यमादानम् । १३ पत्नीकर्त्तृकं तादृगवशिष्टमध्यमपिण्डप्राशनम् । १४ अवशिष्टपिण्डद्वयस्याप्सु प्रक्षेपः । १५ अतिप्रणीते वाऽग्नौ प्रक्षिप्य तादृगपिण्डद्वयदाहः । १६ यस्याश्चेच्छाभावोनिर्निमित्तः तादृगेन पिण्डस्य प्राशनम् । १७ क्षयकुष्ठादिमहारोगवतः तादृगपिण्डप्राशने सद्य एवारोगित्वमरणयोरन्यतरगतिलाभोक्तिः । १८ अनाहिताग्नेरप्येवं पिण्डपितृयज्ञकरणम् । १९ चरूत्थपणानन्तरं तदतिप्रणयनं ततस्तदुपसमाधानतत्परिस्तरणे कृत्वा होमकरणम् । २० द्विधः चरूपूर्णपात्रात्यागोत्सर्गः । २१ एकस्मादतिरिक्तस्य हवणेन हित्वं सम्पाद्य तदुत्सर्गकरणविधानम् । २अ० ७मक० । १ दर्शपूर्णमासावारभ्यमाणस्यान्वारम्भणीयेष्टिकरणम् । २ अग्नेर्भगीतिगुणोक्तिः । ३ इष्टेर्याज्यानुवाक्योक्तिः । ४ आधानानन्तरं तत्संवत्सरे रोगार्थहानिरूपनिमित्तसद्भावे पुनराधेयस्य, पुनराधेये च वज्रप्राणावाप इष्टेः कर्त्तव्यत्वम् ।५ उक्तायामिष्टौ विभक्तिभिः सहिताभ्यां प्रयाजानुयाजाभ्यां यजनम् । ६ नराशंसिनां नराशंसः । ७ आग्नेययोराज्यभागयोरुक्तिः । ८ आज्यभागयोर्गुणद्वयोक्तिः । ९ निगमेषु सगुणयोरेवानुवक्त्युक्तिः । १० याज्यायां देवतादेशरूपायाः इज्यायाः कथनम् । ११ अनुब्राह्मणिनामाचार्याणां मते पूर्वस्य केवलस्याग्नेः, अग्निर्हव्यवाडित्यनुवाक्यायाश्च नित्यत्वम् । १२ उक्तमते उत्तरस्यापि केवलस्याग्नेरुक्तानुवाक्याया नित्यत्वविधानम् । १३ उत्तरे याज्यामन्त्रे हविःशब्दस्य नित्यत्वोक्तिः । १४ संयाज्यामन्त्रभेदः । २अ० ८ क० । १ व्रीहिश्यामाकयवैः संवत्सरे प्रथमनिष्पन्नैः आग्रयणकर्मकरणम् । २ आग्रयणेनानिष्टा नवनिष्पन्नस्य भोजननिषेधः । ३ वर्षत्रयस्य लोकस्य आग्रयणेन यागविधानं व्रीह्याग्रयणे शरत्कालस्य प्राधान्यम् । ४ आग्रयणाख्या इष्टिः प्रथमः कल्पः, तदसम्भवेऽग्निहोत्रीयां धेनुं व्रीहिश्यामाकयवानामन्यतममाग्रयिता तत्पयसा सायंप्रातरग्निहोत्रहोम इति द्वितीय इति कल्पद्वयम् । ५ यवैराग्रयणस्य क्रियाऽक्रिया वा इति विकल्पः । ६ अविशेषेण वर्षत्रयाणां कल्पद्वये प्राप्ते रात्र इष्टिरेव नान्य इति विशेषोक्तिः । ७ एकेषां मते सर्वेषां इष्टिरेवेति व्यवस्थापनम् । ८ वर्षायां श्यामाकाग्रयणेष्टौ सोमदैवत्यचरुव्यवस्थापनम् । ९ अवान्तरेडाप्राशनानन्तरम् सद्ये प्राणौ कृत्वा तदभिमर्शनम् । १० इडाप्राशनानन्तरम् आचमनपूर्वको नाथ्यालम्भः । ११उक्तेन विधिना सर्वभक्षेषु सर्वेषां भक्षिणां सर्वभक्षणम् । १२व्रीहीणां यवानां चाग्रयणेष्टौकालादि तत्र यवाग्रयणस्य वसन्तकालविधानम् श्याम्याविराजग्रहणञ्च । १३श्यामाकाग्रयणस्य समानतन्त्रेण करणे सोमस्य तृतीयत्वव्यवस्थापनम् । १४ तत्र इन्द्राग्न्योः सोमस्य च याज्यानुवाक्याः । २अ० ९क० । १चातुर्मास्येभ्यः पूर्वं काम्या इष्टयः । २आयुष्कामेष्ट्यां जीवातुमत्यौ हे देवते अग्निरिन्द्रश्च । ३ उक्तयोर्देवतयोरग्नेरायुष्ट्वं गुणः, इन्द्रस्य च लाघवं गुणः । ४ आयुष्कामेष्ट्याम् अग्नीन्द्रयोर्देवतयोः संयाज्ये ।५ स्वस्त्ययनीयेष्ट्यां रक्षितवन्तौ देवौ अग्निः सोमश्च । ६ उक्तयोरग्नीषोमयोः संयाज्ये । ७ पुत्रकामेष्टौ अग्निः पुत्री देवता । ८उक्तायामिष्टौ हे संयाज्ये । ९ वज्रप्राणयोरिष्ट्योरग्निदेवतात्वम् । १०मूर्ध्नवतोऽग्नेर्नित्ये संयाज्ये । ११ कामगुणकस्याग्नेर्याज्यानुवाक्ये । १२ उत्तरयोरिष्ट्योर्वैरूप्यत्वं, तयोर्याज्यानुवाक्यायुगलयोर्वैरूप्यं वज्रप्राणयोरिन्द्रदेवतात्वं, तस्य चेन्द्रस्य विरूपसद्गुणकत्वं वैरूप्यं गुणकत्वं वा, अतस्तयोर्वैरूप्यसंज्ञाभाक्त्वञ्च । १३पुष्टिकामस्य याज्यानुवाक्ये । १५ इन्द्रो दाता स पुनर्दाता वा देवता भवति । १६ उभयथापि इन्द्रस्य याज्यानुवाक्ये । १७ आशानामाशापालानां वा देवता-

त्वम् । १८ आशाशापालानां याज्यानुवाक्यासाम्यम् । १९ इष्टिविशेषस्य लोकेष्टिसंज्ञोक्तिः । २० पृथिव्यादीनां पृथग्देवतात्वकथनम् । २१ त्रयाणां ऋषिणां याज्यानुवाक्यारूपास्तिस्र ऋचः । २२ त्रयाणां ऋषिणां तिसृणासु ऋचां विनियोगनम् २अ०१०मक०१ मित्रलब्धिहेतुभूता महावैराजी नामेष्टिः । २ महावैराज्यासम्नादीनां दशानां देवतात्वम् एकप्रदानत्वञ्च । ३ उक्तानां दशानां देवतानामनुवाक्योक्तिः । ४ प्रतिलोमभादिष्टानामुक्तानां दशानां यजनम् । ५ अष्टौ वैराजतन्त्रा इष्टयः । ६ तासां प्रथमाः षडिष्टय एकऋषिकः । ७ स्रुवाश्वशुरीया नाम आभिचारिकी इष्टिः । ८ स्रुवाश्वशुरीयेष्टौ याज्यावाक्यालिङ्गात् देवतायाः कल्पनीयत्वं, सा चेन्द्रः, इन्द्रः स्रुरगुष्णो वेति । ९ पूर्वोक्तायां देवतायाः संयाज्ये । १० स्वामिष्टत्वयोः सम्मतिकामानां संज्ञानो नाम इष्टिः । ११ संज्ञान्यां चतसृणां गुणानां देवतानाम् एकप्रदानत्वम् । १२ अग्निसोमेन्द्रादित्यानां सगुणानां देवतानां प्रतिपादनम् । १३ भेदकामानाम् ऐन्द्रामारुती इष्टिः । १४ इन्द्रस्य नित्ये याज्यानुवाक्ये । १५ इन्द्रमरुतोर्विकल्पविधानम् । १६ मारुताद्यागाद्बृहम् ऐन्द्रो यागः । १७ राजविशोरसम्मतिकामानाम् आहिताग्नीनां च प्रकृत्यैव संज्ञानो नामेष्टिः । १८ शत्रुभिः प्रष्टव्यमाणानाम् एन्द्रावार्हस्पत्या नाम इष्टिः । १९ अध्वर्यवश्चेत् ऐन्द्रावार्हस्पत्यं निरुप्य इन्द्राय नोदयेयुः यदा वार्हस्पत्यं निरुप्य इन्द्राय नोदयेयुः तदा उभयोरपि पशवोः याज्यानुवाक्यासाम्यम् १९ सू० । २अ० ११ क० । १ संवत्सरपतिप्रवसतः शुद्धिकामस्य पवित्रेष्टिविधानम् । २ पवित्रेष्टौ पावकत्वौ धाय्ये । ३ पवित्रेष्टौ न याज्ये । ४ पवित्रेष्टौ संयाज्ये । २अ०१२क० वर्षकामाणां कारीरी नामेष्टिः । २ कारीर्यां धाय्याद्वयम् । ३ वर्षकामेष्टिमात्रेऽग्नुमन्तौ गायत्रौ देवौ । ४ वर्षकामेष्टिमात्रेऽग्नेः सोमस्य च मन्त्रभेदः । ५ उक्तेष्टिमात्रे धामच्छद्मुकोऽग्निः । ६ उत्तरास्तिस्रो मरुद्देवत्या इष्टयः पिण्डीसंज्ञकाः । ७ धामच्छद्मुकस्याग्नेर्याज्यानुवाक्याद्वयस्य व्यवस्थया योजनीयत्वम् । ८ पिण्डीयागस्य करणम् । ९ संस्थितायामिष्टौ सर्वासां दिशाम् उपासनम् २अ० १३क० । १ इष्टयनसंज्ञकानि कर्माणि । २ एकानेकसंवत्सरसाध्यानि सांवत्सरिकाणि कर्माणि । ३ सांवत्सरिकाणां कर्मणां फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा प्रयोगः । ४ तुरायणं नाम इष्टयनम् । ५ अहन्यहनि अग्निदेवत्या इन्द्रदेवत्या विश्वदेवदेवत्या चैतास्तिस्र इष्टयः त्रिषु सवनेषु यथासङ्ख्यम् एकैकेष्टेः कार्यत्वञ्च । ६ त्रिऋविष्कायां एकस्यां एवेष्टेरुक्ताभिर्देवताभिर्युक्तायाः प्रतिदिनम् प्रातःसवन एव कर्त्तव्यत्वम् । ७ दाक्षायणयज्ञे पौर्णमास्यामावास्ययागद्वयम् । ८ आहवनीयः पूर्वे वे ते नित्ये न विद्येते । ९ उत्तरयोस्तु एव विकारो यत् पौर्णमास्यां द्वितीयं ऋविक्षस्य ऐन्द्रत्वम् । १० अमावस्यायां द्वितीयस्य ऋविषो मैत्रावरुणत्वम् । ११ प्रतिपर्व्वकर्त्तव्यं प्राजापत्यम् इडादधो नामेष्टयनम् । १२ द्यावापृथिव्योरयनं नामेष्ययनम् । १३ उक्तस्य इष्ययनस्य कालविधानम् । १४ एतच्छास्त्रानाम्नातास्विष्टिषु पौर्णमासात् तन्त्रान्यत्वविधानम् । १५ यजुर्वेदएव प्रकृतं तन्त्रं नान्यदपरमिति । १६ अग्निमन्थनसंयुक्तायामिष्टौ वैराजमेव तन्त्रम् । १७ अग्निमन्थने सत्यपि धार्य्ये एव केवले तन्त्रं न तदन्यत् । १८ याज्यानुवाक्यास्वरूपोक्तिः । १९ अनुवाक्यालक्षणोक्तिः । २० असम्भवे विहितच्छन्दसोऽन्यस्य वा याज्यानुवाक्यानां कर्त्तव्यत्वम् । २१ सर्वथाऽनुवाक्यापेक्षया याज्याया न हीयस्त्वम् । २२ उष्णिग्गृहत्वोर्न याज्यात्वम् । २३ सामनष्टहृतदग्धवतीनां वर्जनम् । २४ देवतापदसत्त्वे न लक्षणान्तरान्वेषणम् । २५ देवतापदेऽव्यक्ते लक्षणस्य गायत्र्यादेरास्रयणीयत्वम् । २६ देवतानामानधिगमे शाखान्तरादाहर्त्तव्यत्वोक्तिः । २७ सर्व्वथाऽनधिगमे याभ्यां काभ्यांचिद्गृभ्यां यागोऽनुवचनञ्च । २८ व्याहृतिभिर्वा यागानुवचने । २९ द्वितीयया विभक्त्या देवतामादिश्य प्रणवं यजनञ्च । ३० मन्त्रसंज्ञाभ्यां ऋग्भ्यां वा प्रणवनयजने । ३१ मन्त्रसंज्ञके ऋचौ । ३२ देवतापदरहिते ऋचौ भवत इति । २अ० १४क० । १ अग्निदैवत्ये चातुर्मास्याख्येष्ययनस्यारम्भार्थं पूर्वेद्युर्वैश्वानरपार्जन्याया इष्टेः कर्त्तव्यत्वम् । २ अग्न्याधेयादीनां उपांशुप्रधानत्वोक्तिः । ३ सोमोत्पन्ना इष्टयः । ४ प्रायश्चित्तप्रकरणोत्पन्ना इष्टयः । ५ अन्यायात्यानाम् एकपशूनाञ्च यागानां उपांशुत्वोक्तव्यत्वम् । ६ सर्वत्र वा वारुणवर्जम् उपांशुत्वम् । ७ चातुर्मास्येषु सावित्रयागस्य उपांशुत्वम् । ८ वैश्वदेववरुणप्रघासमाहेन्द्रशुनासीरीयेष्वाम् उपांशुत्वम् । ९ तन्त्रयुक्तानां पित्र्योपसन्नामकानामिष्टीनामुपांशुत्वम् । १० उत्तमादनुयाजात् प्राक् पुनराधेयेष्टेः स्वतन्त्रोपांशुत्वम् । ११ स्वतन्त्रोपांशुत्वविधिष्टानां सर्वसाम-

धेनोष्टोनां सुमन्द्रतन्त्वत्वम् ।१२ आगूःप्रणववषट्काराणां सर्वत्र उच्चैर्भावोक्तिः । १३ आप्रयणेष्टौ आग्नेन्द्रस्य ऐन्द्राग्नस्य वा प्रथमस्य हविष उच्चैर्भावकथनम् । १४ उच्चविहितस्य पुरोऽनुवाक्याप्रणवस्य प्राणसन्ततत्वम् ।१५ याज्यायाः आगूर्वषट्कारयोः प्राणसन्ततत्वम् ।१६ उपांशोस्तन्त्रस्वराणाम् उच्चत्वम् । १७ उपांशुतन्त्राणां तानि उच्चानि मन्द्रस्वराणि भवन्तीत्युक्तिः । २अ० १५क० । १ प्रातर्वैश्वदेव्यां प्रेषितस्याग्निमन्थनीयानुवचनाभिहिङ्कृतिकरणे । २ संप्रैषस्य प्रणवपर्यन्तं पूर्वाङ्गवसाने आरामो नोत्तरादानम् । ३ मध्ये अङ्गवसाने यत्रारामविधिः तत्रायासस्यैवात्रोत्तरारम्भः । ४ मथ्यमानोऽग्निश्चेन्न जायते तदाऽग्नेराजन्यनः पुनः पुनः अग्ने हंसीति सूक्तावापनम् । ५ अग्निजन्मश्रवणानन्तरम् उक्तसूक्तीयप्रणवेन शिष्टार्धचौपसन्ननम् । ६ अनावापपक्षे जातश्रवणानन्तरं शिष्टेनार्धर्चेन उत्तरायाः ऋचः उपसन्ननम् । ७ यज्ञेनेत्यनया ऋचा समापनम् । ८ सर्वत्र शस्त्रादिषु उत्तमायाः ऋचः समापनीयत्वम् । ९ बर्हिरग्न इति प्रयाजानन्तरं प्रयाजान्नादीनामावपनम् १० देवताष्टकोल्लेखः मरुतां स्तवस्त्वेति गुणकथनञ्च । ११ प्रकरणपठितानां निर्गुणानां मरुतां धाय्याद्वयकथनम् । १२ अनुयाजानां देशकथनम् । १३ अनुयाजाद्यन्यतमे काले वाजिभ्यो यागः । १४ अर्द्धजानुनाऽनवानयाज्याप्रयोगः । १५ यत्र क्वचं विषये एकस्मिन्नेवाध्वर्युसंप्रैषे तुल्यरूपयोरतुल्यरूपयोर्वैषट्कारयोः समस्तयोर्हिरनुमन्त्रणम् ।१६ याज्याधर्मस्तु इतरेषु अनुवषट्कारादिषु आगुरः प्रतिषेधः ।१७ दृष्टशिष्टं वाजिनम् इडाभिव भक्षार्थं अञ्जलौ निधाय उपहवयाचनम् ।१८ अध्वर्युब्रह्माग्नीध्राणां समीपे उपहवयाचनम् । १९ उक्तवाजिनस्य किञ्चिदादाय स्रुक्तोक्तमन्त्रेणावघ्राणम् । २० होतुर्भक्षणानन्तरम् अध्वर्युब्रह्माग्नीध्राणां क्रमेण वाजिनभक्षणम् । २१ यजमानादितरेषां सर्वेषां दीक्षितानां स्टहपतेरन्येषाञ्च प्रत्यक्षमेव तद्भक्षणम् । २२ वैश्वदेवीदिदिवसादपरिक्रान्दिने पौर्णमासेनेष्ट्वा तदानीमेव वक्ष्यमाणानां चातुर्मास्यव्रतानां केशनिवर्त्तनमध्वादिवर्जनरूपाणाम् आचरणारम्भः । २३ केशनिवर्त्तनम् । २४ प्रसृतवापनाधःशय्ये कार्ये मधुमांसलवणस्त्र्यवलेखनानि वर्ज्यानि। २५ कालविशेषे प्रतिषिद्धस्य प्रतिप्रसवार्थम् ऋतौ भार्योपगमनविधानम् । २६ उत्तरविवक्षार्थानुवादरूपं सर्वपर्वसु वापनम् । २७ आद्योत्तमयोर्वा पर्वणोर्वापनं न मध्यमयोरिति । २अ० १६क० ।१ प्रकृतवैश्वदेवेष्टिकायां पौर्णमासीमारभ्य पञ्चम्यां पौर्णमास्यां वरुणप्रघासैर्यागविधानम् । २ प्रणीयमानस्याग्नेः पश्चादुपविश्य प्रोक्षितस्याग्निप्रणयनीया प्रतिपत्तिः । ३ आसीनस्य सप्रणवायाः प्रथमायाः उपांश्वनुवचनम् । ४ उपांशुस्वरस्थानां स्वरान्तरस्थानसङ्गमे प्रणवेनावसाय अनुच्चस्य उत्तरस्या ऋच आरम्भः । ५ उक्तावसानानुच्चारणपूर्वकम् उत्तरारम्भस्य प्राणसन्ततभावित्वम् । ६ प्रणीयमानयोर्द्वयोरुत्तरमग्निमनुव्रजत उत्तरासाहचामनुवचनम् । ७ राजन्यवैश्ययोराद्ये ऋचौ । ८ उत्तरस्या वेदेः पश्चादवस्थाय शेषसमापनम् । ९ सोमेषु उत्तरवेदेः पश्चादवस्थाय समापनम् । १० यस्मिन्नेवासने पूर्वोक्तमनुवचनमारब्धं तस्मिन्नुपविश्य व्याहृतित्रयरूपवाग्विसर्जनम् । ११ अन्यत्रापि अनुवचनानुव्रजनयोर्वाग्विसर्गः । १२ तिष्ठतः संप्रैषेषु तिष्ठत एव वाग्विसर्गः । १३ वैश्वदेव्या समानाऽग्निमन्थना नाम इष्टिः । १४ यज्ञादीनां तिसृणां हविषाम् ऐन्द्राग्नाद्यादीनां कर्त्तव्यत्वम् । १५ तत्सूक्तगतमन्त्रस्य उपहवयाचने तृतीयत्वम् । मन्त्रे चतुर्थत्वम् । उपहवयाजनभक्षणयोश्च विशेषकथनम् । वैश्वदेव्यामपि एवमावृत्तौ १६ दृष्टौ संस्थितायामवभृतकर्म्म निमित्तं अध्वर्यूणाम् उदकदेशगमनम् । १७ अवभृतस्थानित्यत्वत्व दृष्टभावेऽन्येषामपि अव-धानादीनां सम्भवच । १८ चातुर्मास्याङ्गत्वेन हयोर्मासयोरैन्द्राग्नसंज्ञकपशुन्तरविधानम् । २अ० १८क० ।

१ वरुणप्रघासेभ्यः परम् ऐन्द्राग्नवत्परं अनीकवदाद्यादित्यान्तकर्म्मरूपाणां साकमेधानां यजनम् । २ साकमेधीयपौर्णमास्याः पूर्वेद्युः सवने सवने एकैका इष्टिः । ३ उक्तानुसवनीयानामिष्टीनां प्रथमायामनीकवान् अग्निः एतदुत्तरस्यां दधन्वती, मरुतः सान्तपनाः तदुत्तरा आज्यभागप्रभृतीड़ान्ता इष्टिः । ४ स्टहमेधेभ्यो मरुद्भ्यो देवताभ्य आम्नातयोर्द्वयोरुल्लेखः । ५ पुष्टिमतोर्विराजयोर्निगदरहितसंयाज्यात्वम् । ६ स्टहमेधीयादन्यत्रापि आवहनरहिते स्थले अनिगदयोः संयाज्ययोः सम्भवः । ७ पित्र्यायां पशौ चेतीष्टिद्वये आवाहने सत्यपि अनिगदं संयाज्याद्वयम् । । ८ समापितैष्टिकायां रात्रौ बहूनां वाग्मिकानाम् अन्नदानम् । ९ रात्रेः पश्चाद्भागे पौर्णदर्वीनामकस्य होमकर्म्मणः कर्त्तव्यत्वम् । १० हूयमाने ध्रुवे हूयमाने उक्तहोमकालः । ११ मेघध्वनौ हूयमाने तद्धोमकालः । १२ तस्योक्तहयस्याथाभावे ब्रह्मशब्देनाग्नीध्रं सम्बोध्य कैश्चित् स्वयमावर्त्तनम् ।

१३पूषणादर्वीवादिमन्त्रवेरध्वर्युणा होत्रप्रेषे याज्यानुवाक्यात्वम् । १४ क्रीडिभ्यो मरुद्भ्य उत्तरा इष्टिः । १५ क्रीडिनां मरुतां परोक्षवाक्तन्त्रावाज्यभागौ । १६अक्रीडिनां मरुतां याज्यानुवाक्ये । १७ माहेन्द्री इष्टिः । १८ माहेन्द्रामिष्टौ अष्टदेवतोक्तिः । १९माहेन्द्रां याज्याकथनम् । १९सू०२अ० १८क० । १ दक्षिणाग्नेरग्निमानीय तमन्वत्र स्थापयित्वा तत्र पित्र्याख्यकर्मकरणम् । २ पित्र्यायां इष्टेर्लुप्तप्रजापानुमन्त्रणादित्वम् । ३तस्यां पित्र्यायामिष्टौ कर्मणां प्राङ्मुखत्वम् । ४ अन्यस्यामिष्टौ दक्षिणामुखत्वम् । ५ इतरदिङ्मुखानि प्रकृतौ यथान्वयं करणीयानि । ६ अनुच्छसता उपनम्रतेतस्या ऋचस्तिरनुवचनं तत्र च तासामेव शामित्रेनीनां न पुनरभ्यासः । ७ तासां शामित्रेनीनामुत्तमेन प्रणवेन प्रतिपत्तिः । ८ आज्यपान्तदेवताव्याहवनानन्तरं प्राक्तनात् खिष्टकृताव्याहवनात् परं कव्यव्याहवनाख्याग्निसमाव्याहवनम् । ९ उत्तमे च प्रयाजे आज्यभेद्यः पूर्वं कव्यव्याहवनाख्याग्निनिगमनम् । १०सूक्तवाके विशेषोल्लेखः । ११कार्यार्थसन्नलोपेऽपि कार्यलोपप्राप्तौ कार्यस्य लोपप्रतिषेधः । १२पित्र्यायामिष्टौ अवान्तरेऽग्नीधीये दक्षिणाग्नेरग्नीधीयस्य च भावः । १३ इडाभक्षणे मार्जनाभावः । १४ सूक्तवाके यजमाननामादेशाभावः । १५ईक्षितः सोद होतरिति वोक्तस्योपवेशनम् । १६सव्योपर्युपस्थानां प्राचीनावीतिनां हविर्भिर्जीवातमदुद्धारणम् । १७ पित्र्यायामाग्नीध्रस्य दक्षिणत्वम् अध्वर्वोरुत्तरत्वम्, अनुवाक्याहवम्, अध्वर्व्यायामनवानम् । १८आश्रावणप्रत्याश्रावणसम्प्रैषेषु ओँ स्वधेत्यादीनां दीर्घानानां प्रयोक्तव्यत्वम् । २०श्रुतीनां नित्यत्वव्यवस्थापनम् । २१ पितृणां सोमवत्ता सोमस्य पितृमत्ता बर्हिषदः अग्निष्वात्तादीतिगुणोक्तिः । २२पञ्चानां पितृणां तिसृणामिह ऋचां इत्युक्तिः । २३ वैश्वस्तस्य चेद्देवतात्वं तदा उत्तमे लिङ्गे मध्यमाया याज्यात्वं प्रथमोत्तरयोरनुवाक्यात्वम् । २४ खिष्टकृतो याज्योक्तिः । २५ खिष्टकृतोऽग्नेः कव्यवाहनसंज्ञा । २६ खिष्टकृत ऊर्ध्वं प्रकृतिभावः । २७ मन्त्रलोपादिभिन्नानां सव्योपर्युपस्थतादीनामभावाय प्रकृतिभावविधानम् । २८ प्रकृतिभावादेवानुवाक्याया एकैकत्वम् । २९ वषट्कारक्रियायामेव संयाज्याद्वयम् । ३० विशेषनियमार्थं दक्षिणाडतो दक्षिणाग्नेरुपस्थानम् । ३१पित्र्यायामिष्टौ आवर्त्तनविरहेणोपस्थानम् । ३२दक्षिणाग्नेरुपस्थानमन्त्रः । ३३गार्हपत्याहवनीययोरुपस्थानम् । ३४ आहवनीयोपस्थानमन्त्रः । ३५ तन्मन्त्र इत्येकयचौ गार्हपत्योपस्थानम् ।३६प्रादक्षिण्येन गार्हपत्यमभितः समागमने मन्त्रः । ३७गार्हपत्यानन्तरं सव्याद्वह्निस्थस्वकरूपकर्मभेदार्थगमनम् । ३८अध्वर्युक्षस यजमानैरपि कर्त्तव्यत्वम् । ३९ प्रत्येत्य अदितिदेवताकया ऋचा चरणम् । ४०पुष्टिमत्यौ धाये विराजौ । ४० सू० २अ० १९क० । १ साकमेधकालमारभ्य पञ्चम्यां पौर्णमास्यां शुनासीरीया नामेष्टिः । २ पञ्चम्याः पौर्णमास्या अर्वागपि वा शुनासीरीयारम्भः । ३ नियुक्त्वानिति वायोर्युक्षः शुनासीरीयः शुनयेति इन्द्रस्य शुष्म इत्युक्तिः । ४एतत्प्रकरणगतानां शास्त्रान्तरीयाणाञ्च देवतानां एतत्प्रकरणज्ञाता एव वाज्यानुवाक्या इत्युक्तिः । ५ज्योतिष्टोमप्रकृतिकौ चातुर्मास्याङ्गभूतौ पशुसोमौ ताभ्यां शक्तिभेदेन व्यक्तसंस्ताभ्यां यागः । ६ चातुर्मास्यानां समाप्तौ पुनरभ्यासः ६सू० २अ०२०क० ।

२अध्याये पशुकर्माधिकारः । १प्रायश्चित्तात् पूर्वं पशुगणकं कर्म । २पशोरुभयतोऽन्यतरतो वा इष्टिकरणम् । ३ पशुयागसम्बन्धिन्या इष्टेरग्नीन्दैवत्यधिकल्पः । ४ पशुयागसम्बन्धिन्या इष्टेः करणपक्षे देवताविकल्पः । ५ एकस्मिन् पशुप्रयोगे आग्नेयी चाग्नावैष्णवी चेति इष्टिद्वयम् । ६ उभयेष्टिकरणपक्षे एकस्याः पुरस्तात् अपरस्या उपरिष्टात् कर्त्तव्यत्वम् । ७ सविधिकस्य वारुणप्राघासिकस्योक्तस्याग्निप्रणयनस्य पुनरुल्लेखः । ८ पशुबन्धयागसम्बन्धिन्या वेदेः पश्चादुपविष्टस्यानुवचनार्थं प्रेषितस्य यूपमज्यमानमभिधातुम् ऋग्विशेषानुवचनम् । ९ अज्यमानयूपानुवचनपरिधानयोर्मन्त्रभेदौ । १० सपशुकयूपबद्धले एकपशुतन्त्रके कर्मणि अन्ययूपानुवचनं परिधायान्ययूपसंस्तवनञ्च । ११प्रथमोत्तमयोरनभ्यासविधानम् । १२ पशुदेवताभ्योऽनन्तरं वनस्पत्याहवनम् । १३ संभार्गैः संभार्जनानन्तरं प्रकृताज्यतिभिर्होमः । सकृदुपहवपूर्वकैकाज्यतिहवनानन्तरं पुनः सकृदुपहवपूर्वकपञ्चाज्यतिहोमः, मन्त्रविपरिणमश्च । १५ सौम्ये एवाहनि पूर्वोक्तहोमः । १६ तीर्थेनैव लब्धविहारप्रदानाय प्रशास्त्रे समन्त्रकदण्डदानम् । १७ प्रशास्तुर्दक्षिणोत्तराभ्यां पाणिभ्यां समन्त्रकदण्डप्रतिग्रहणम् । १८ यावत् प्रैषवचनं नास्ति तावत् उल्लेन दण्डेन स्वपरयोः संस्पर्शननिषेधनियमः । १९ उपयुक्तानामन्येषामपि यज्ञाङ्गानां विहारेण व्यवायनिषेधः ।

२० प्रेषितस्य मैत्रावरुणस्य प्रैषानुवचनप्रकारः । २१मैत्रावरुणस्यानुवाक्यानुवचनम् । २२मैत्रावरुणस्य पर्य्यग्नि लोकमनीयतोन्नीमानसूक्तपाठः । २३आसीनेनैव मैत्रावरुणस्य सोमाधिकरणकर्मान्तरस्य करणम् ।२३सू० ३अ० १क० । १ पशुयागे एकादशप्रयाजनियमः । २ तत्र तेषां प्रयाजानां प्रैषा अपि एकादशसंख्याः । ३ प्रकृताबुक्तमप्राकृतेष्वपि प्रैषेषु स्वादिष्टेवर्धं पूर्वोक्तस्य प्रैषसूक्तस्य पुनरुपदेशः । ४अध्वर्युप्रैषस्य होतुरनाकाङ्क्षणीयत्वम् । ५ प्रैषलिङ्गाभिराप्रीभिर्होमयजनम् । ६ शुनकानां, वसिष्ठानां, सर्वेषाञ्चाप्रीसूक्तभेदकथनम् । ७ ऋषिनामधेयस्थानुशुनानामाप्रीणां याज्यात्वम् । ८ प्राजापत्ये तु वसिष्ठशुनकसहितानां सर्वासामाप्रीणां जामदग्न्यत्वम् । ९ दशसु सूक्तेषु प्रेषितस्य मैत्रावरुणस्य प्रैषवचनम् । १० उक्तप्रैषवचनस्य होतुरन्वर्वाग् दण्डनिधानम् । ११ अग्निशुनश्छाच्छे दैव्याः शमितार इत्यादिके मन्त्रे उक्तादि शब्दानामूहः । १२स्त्रीपुंसयोः समाहारे पुंलिङ्गनैवोहः । १३स्त्रीदेवतायामभिधेयायां मेधपतिशब्दस्य पुंवद्वचनम् । १४ स्त्रीपशौ मेधशब्दस्य पुंवद्वा स्त्रीवद्वा वचनविकल्पः । १५ अग्निगोरूढम् अक्तादिशब्दानामितरेषाञ्चोहनं, स्त्रीपुंसमाहारेषु सर्व्वत्र पुंवदेवाभिधानञ्च । १६न केवलमस्योहविधेः पशुकर्मार्थत्वं किन्तर्हि सर्वेषु यज्ञेषु निगदेषु चार्थवशेन कार्य्यत्वम् । १७प्रकृतौ समर्थनिगमेष्वूहनम् ।१८मन्त्रगतानां शब्दानां प्राकृतत्वेन ऊहनम् । १९प्रतिनिधिष्वपि प्राकृतानां शब्दानामूहनम् । २० उपमार्थानां श्येनादीनां शब्दानामूहनम् । २० सू० ३अ०२क० । १ अग्निशुनामकमन्त्रविशेषकथनं तत्स्थानां पदानामूहश्च । २अस्रेत्यादीनां त्रयाणां शब्दानां स्वे स्वे स्थाने उपांशुप्रयोक्तव्यत्वम् । ३षट्त्रिंशतिशब्दस्याभ्यासनियमः । ४मन्त्रविशेषजपानन्तरं विहारादाहृत्य दक्षिणाहृत आवर्त्तनम् पृष्ठतः कृत्वा आसनञ्च । ५ मैत्रावरुणस्याहृत्य पृष्ठतः करणम् । ६पुनरावर्तनकाले पराचामेवासनम् ६सू०३अ० ३क० । १वपायां अयमाणायां तत्संस्कारार्थं प्रेषितस्य स्रोवेधोऽनुवचनम् । २स्वाहाकृत्यर्थं स्रुगादापनस्य कर्तव्यत्वम् । ३ उत्तमा आप्रीयाज्या । ४ वपा पुरोडाशोहविरिति पशोर्यागाः । ५ नानादैवतेषु पशुषु याज्यानुवाक्याभेदादेव वपायागवत् पृथग्भावः । ६ प्रतिपशु मनोतामन्त्रस्यावर्त्तनम् । ७एकेषां मते मनोतायां अनावर्त्तनम् । ८ उक्तप्रदानगतप्रैषाणां समानलिङ्गत्वोक्तिः । ९ प्रदानप्रैषेषु विकृतिषु च या देवतासामैकैकस्या देवतायां अग्नीषोमस्थाने निर्दिश्य यष्टव्यत्वम् । १० गोमेषकृष्णानामेकैकस्या जातेर्द्वयोर्द्वयोः शब्दयोर्नियमनस्य वैकल्पिकत्वम् । ११ वनस्पतिसिष्टकृत्सूक्तवाकप्रैषेषु प्रदानप्रैषीयप्रयोगवत् प्रयोगः । १२ सूक्तवाकप्रैषेषु पुरोड़ाशेन पशुदेवतावर्जनम् । १३ हविषां नानारूपत्वात् स्वेन स्वेनैव शब्देन निगमने प्राप्ते पुरोडाशशब्देनैव चर्वादीनां निगमनविधानम् ।१४मेधोरभीयानिल्वेतयोः पदयोः पञ्चभिधायकत्वम् । १५ आम्नायसिद्धानां द्विवचनान्तानाम् एकवचनबहुवचनयोरिष्टिलकारपरिग्रहार्थं पाठविशेषः १५सू० ३अ० ४क० । १वपाहोमानन्तरं सम्प्रैषकानां बहूचानां सर्व्वेषां सकृन्मार्जनम् । २इदमाप इत्यनयर्चा बर्हिषा च उभाभ्यां मार्जनम् । ३ प्रत्यङ्गभूतायामिष्टौ आतिदेशिकमार्जनस्य प्रकृत्यर्थस्यैव मार्जनस्य एतावत्त्वोक्तिः । ४ पुरोडाशश्रपणपर्य्यन्तं तीर्थेन निष्क्रम्यासनविधिः । ५ प्रधानस्विष्टकृतोर्भेदप्रतिपत्त्यर्थं प्रधानेन चरित्वा स्विष्टकृता चरणविधिः । ६ स्विष्टकृच्चरणावसरे आगन्तुकैर्यागैरन्ये पशुपुरोडाशस्विष्टकृतां चरणम् ।७अन्वायत्तदेवतानां हविषां चावाहनादिषु निगमेषु अनुवृत्त्यभावः ।८पुरोडाशानामिति हविर्भेदे प्रैषस्योहात्वम् ।१०इड़ाया अर्द्धम् उक्तप्रैषस्योहाता १०सू० २अ०४क० । १इड़ोपधानानन्तरं मनोतानुचरणम् ।२हविषा चरणम् प्रैषाणां तत्सहितत्वञ्च । ३हविःप्रैषेकतर एवाग्नीषोमावेवेत्यत्र ऐतरेयाणां सम्मतिः । ४ द्विदैवतादन्यत्र एकदैवते बहुदैवते पशौ मैत्रावरुणयोर्दैवतात्वम् । ५एकदैवतेषु बहुदैवतेषु च प्रैषेषु तथात्वम् । ६ प्रकृतिभावे गार्ग्यगालवसंमतोल्लेखः । ७ अर्थभेदरहिते आम्नाये विकारस्य निरर्थकत्वम् । ८वपाहोमे हुते अर्द्धर्चयोर्मध्ये याज्यायाः समापनम् । ९ प्रैषसमाम्नायपठितं वनस्पतिप्रैषमितो ये यजा तयोर्वनस्पतियाज्यानुवाक्यात्वम् । १० आज्यभागयोः करणे प्रैषे प्रधानदेवताकृद्देवतयोर्निगमनम् । ११ स्विष्टकृति इड़ोपस्थानानन्तरम् अनुयाजैश्चरणम् । १२ उक्तस्यैतेनुयाजानामेकादशसङ्ख्याविधानम् । १३प्रकृतिस्थोऽन्यासां वैश्वदेव्यानामाहर्त्तव्यत्वम् । १४प्रैषाधिकारनिवृत्त्यर्थम् अनवानशब्दस्य पुनराहृत्तिः । १५ पुनरनवानस्य व्याख्यानार्थोल्लेखः । १६ सूक्तवाकप्रैषे आज्यभागयोर्यजनम् । १७पशुतन्त्रे पदलयस्याभ्यासस्वाभाव्याय पठितस्यापि पुनरभ्यासः । १८ देवताना-

मेकजातीयपशुकत्वकथनम् । १९ पशुशब्दानामेवावर्त्तनं नान्ययोर्देवयोः ।२० उत्तरे पूर्वेणोक्तस्योल्लेखः । २१अनवभृथे कर्म्मणि सूक्तवाकप्रैषसमापनानन्तरम् आहवनीये दण्डानुप्रहरणम् । २२ सावभृथे कर्म्मणि अवभृथानुप्रहरणम् । २३ वेदसरणोत्तरकल्पः संस्थाजपात् प्राक् निष्क्रम्य उदक्षमानस्य हृदयशूलस्यानुमन्त्रणे मन्त्रः । २४ उदक्षमानस्य हृदयशूलस्य उपरिष्टात् अपाकृपस्पर्शनमन्त्रः ।२५ अस्पृष्टाङ्गहृदयशूलानाम् अन्योन्यसंस्पर्शावेक्षणमन्तरेणैव सर्वेषामेकेन समिक्षयस्य ग्रहणम् । २६ मन्त्रविशेषपूर्वकं प्रथमायाः द्वितीयायाः तृतीयायाश्च समिधोऽभ्याधानम् । २७पूर्वयज्ञोतुरेव पूर्वमाभ्याधानं न सर्वेषां युगपत्' । २८संस्थाजपान्तं पशुतन्त्रम् । २८सू० ३अ०६क० । १ प्रदानाख्यकर्म्मोक्तप्रैषा एव सर्वत्र भवन्ति नान्ये इत्युक्तिः । २ येषां पशूनां यानि प्रदानानि तेषां पशूनां याज्यानुवाक्याकथनप्रतिज्ञा ।३सर्वत्र पूर्वसूक्ता अनुवाक्याः उत्तरा याज्या इति ज्ञापनम् । ४ याज्यानुवाक्यालिङ्गितदैवतेन वक्ष्यमाणानां पशूनां नानात्वोक्तिः । ५ अग्नेर्याज्यानुवाक्याः । ६ सरस्वत्या याज्यानुवाक्याः । ७सोमदेवतायाः याज्यानुवाक्याः । ८ पूष्णो याज्यानुवाक्याः । ९ बृहस्पतेर्याज्यानुवाक्याः । १० विश्वेषां देवानां याज्यानुवाक्याः । ११ इन्द्रस्य याज्यानुवाक्याः । १२ मरुतां याज्यानुवाक्याः । १३इन्द्राग्न्योर्याज्यानुवाक्याः । १४सवितुर्याज्यानुवाक्याः ।१५वरुणस्य याज्यानुवाक्याः । १५सू० २अ० ७क० । १ अष्टादशभिर्ऋग्भिः पशुकर्मविधानम्, तासामृचां प्रजापतिदेवताकत्वम् । २ याज्यानुवाक्यालिङ्गकल्पितदैवत्यानामिष्टिरूपाणां पशूनां विधानं, साकल्येनैतदध्यायगणितानां तासां त्रिंशत्सङ्ख्यकत्वोक्तिः । ३ खण्डद्वये समाम्नातानां पशूनां मध्ये केषाञ्चित् सोमाङ्गत्वं केषाञ्चित् स्वतन्त्रत्वञ्च । ४ पशूनां प्रकृतिभूतस्य ऐन्द्राग्नस्य निरूढनामकस्य पशोः कर्त्तव्यत्वम् । ५ निरूढस्य पशोः षट्सु षट्सु मासेषु वत्सरे वत्सरे वा कार्य्यता ।६प्राजापत्योपांशुसावित्रसौर्य्यवैष्णववैश्वकर्म्मणरूपपाशुकतन्त्रेषु उपांशुजपविकारोक्तिः । ७मैत्रावरुणादेरपि आगुरः स्थानभाजित्वम् । ८ आददादीनां सप्तानां यथास्थानसुपांशुत्वम् । ८सू० ४अ०८क० ।१सौत्रामण्याख्य कर्म्माधिकारः । २तत्रात्रिनसारस्वतैन्द्राः पशवः वार्हस्त्यत्वतुर्थः ऐन्द्रसावित्रवारुणाः पशुपुरोडाशाः यथासङ्ख्येन भवन्तीत्युक्तिः । ३चात्वालमार्जनानन्तरम् आग्निसारस्वतैर्यजैः प्रवरणं तेषाञ्चानुवाक्या प्रैषयाजप्रानां कथनम् । ४कुम्भीस्थसुरावेक्षणमन्त्रः यहपात्रस्थसुरावेक्षणप्रकारश्च । ५ सुरायहपयोयहयोर्भक्षजपविधानम् । ६ सुराग्रहेष्वेव प्राणभक्षविधानम् । ६सू० ४अ०६क० । १विधानान्यथाभावे प्रायश्चित्ताधिकारः । २ विहितस्याभावे प्रतिनिध्युपादानम् । ३ दृष्टिमध्यरूपस्थान्वाहितान्नेः प्रयाणोपयोगी अग्नीनां पृथग्नयनम् । ४ समन्वकं साज्याज्याहुतिहोमकं समारोपणं कृत्वा गमनविधानम् । ५ समारोपणरूपम् । ६ यजमानकर्त्तृकं गार्हपत्ये पाणिहयस्य सकृत्प्रतपनम् । ७उक्तप्रकारेणाहिताग्नेः समारोपणानन्तरमकृत्वागमनविधानम् । ८ यजमानकर्त्तृकं समन्वकमरणीमन्थनविधानम् । ९अवदीयमानस्याहवनीयस्य शम्यापरासादर्वाक् संयपनम् । १० यदि त्वतीयाद्यद्यभावात् पौर्णमासीं वातीयाद्यदि वाऽन्यस्याग्निषु यजेत यदि वास्यान्योऽग्निषु यजेत यदि वास्यान्योऽग्निरग्नीन् व्यवेयाद्यदि वा साग्निहोत्र उपसन्ने हविषि वा निरूप्ते चक्रीवच्चा पुरुषोवाऽविर्विहारमन्तरियाद्यदि वाध्वे प्रमीवेत इत्येवं निमित्ते इष्टिविधानम् । ११ उक्षाया इष्टेः पवित्रहुषकाग्निदेवताकत्वम् । १२ उक्षायामिष्टौ अनड्वाहुत्विग्वा । १३पूर्वोक्ताया इष्टेः अग्निभिन्नव्यवधाननिमित्तकत्वे विधानभेदः । १४शुना व्यवाये ऋषदानां भक्षणा परिपूरणम् । १५ भक्षराजोदकराजा च सम्पन्ने प्रतिराजि मन्त्राहुतिः । १६उक्षराजिभ्यां समानं कृत्वा ऽऽहवनीयानुगमनानन्तरं ततः प्रणीय तदुपस्थानम् । १७ पवि स्थितस्य अन्यपक्षेण दोहनीयायां गोः पयसाग्निहोत्रान्तरं प्रातरादौ प्राक् देहाग्निसंस्कारात् कृत्वा दाह इत्युक्तिः । १८ अपरपक्षे आहिताग्नेर्मरणशङ्कायां तत्पक्षावशिष्टाज्याहुतिभिः एतत्पूर्वपक्षनयनम् । १९आवाहनानन्तरं प्रधानयागादर्वाक् हविर्व्यापत्तौ तस्य प्रधानयागादेः सर्वस्याङ्गस्येष्टिं समाप्य पुनरिज्या न भवतीत्युक्तिः । २० च्युतकेशनखादिभिरन्यैर्वा बोभत्सैर्हविःषु दुष्टेषु नान्यः पक्षत्युक्तः शुद्धुपायः । २१ कठिनानां भेदने द्रवाणां चरणे हविषां दुष्टत्वम् । २२ दुष्टानां हविषां अग्नौ प्रक्षेपः । २३साज्याज्यस्य दुष्टस्य मध्यमेन पलाशपर्णेन वक्त्रोकद्वारे प्रतिवेचनम् अग्नौ वा तूष्णीमिति विकल्पः । २४ अन्तःपरिधिदेशे विध्यन्दमानस्य हविषो निर्वपणम् । २५प्रातर्दोहे अदुष्टे द्वयोः पात्रयोः कृत्वाऽन्यतरत्

दधिभावाय आतच्य नाभ्यां दधिपयोभ्यां प्रवरणम् । २६ पयसि दुष्टे तत्स्थाने पुरोडाशव्यवस्था । २७ दधिपयोरूपे साद्मायद्वये दुष्टे इन्द्राग्निदैवत्योदनसिद्ध्यर्थं पञ्चशरावपरिमितग्रीव्हिनिर्वपणम् । २८ इन्द्राग्नेग्राः पृथक्चरणम् । २९ एकेषां मते केवलमित्रदेवताकपञ्चशरावोत्पादनानन्तरम् इन्द्राग्नोः पृथक्चरणम् । ३० साद्माय्यार्थमपाक्तानां वत्सानां पाने वायुदेवत्या यजाग्वा यजनम् । ३१ गर्भमिति मन्त्रेण स्रवतोऽधिश्रितस्याग्निहोत्रस्याभिमन्त्रणम् । ३१सू० २अ० १०क० । १ उपावसृष्टाया दुह्यमानायाश्च अग्निहोत्रार्थागोरभिमन्त्रणम् । २ उक्षाया गोरुत्थापनम् । ३उक्षाया गोरूधसि सुखे चोदपात्रमुपोद्दृत्य दुग्ध्वा ब्राह्मणाय पानार्थं तत्प्रदानम् । ४शब्दायमानायै उक्षायै गवे यवसदानम् ।५दुग्धस्य गोधिताकारत्वे निरग्नेयस्य गार्हपत्येदाहविधानमन्त्रेण द्रव्येण च होमकरणम् । ६ दोहनोत्तरं पात्रस्य भेदने पात्रात् पतने वा विच्छिन्नपतितत्वागेनान्यस्माद्दुग्धस्याभिमन्त्रणम् । ७दोहनवस्थायां पयसः स्कन्दने स्कन्दांशाभिमन्त्रणम् । ८परिशिष्टेन स्रोतस्येन होमः। ९ होमस्थापर्यन्तौ अध्वानीयान्येन होमः । १०पयसि स्कन्ने प्रायश्चित्तम् । ११स्कन्ने स्कन्दाभिमर्शनम् । १२ पयःशेषेण होमविधिः । १३ स्रुग्गतस्याग्नेये पुनरुक्षीय होमकरणम् । १४स्थालीपाकशेषाभावे संस्कृतेनाज्येनोक्षीय होमः । १५ प्रधानहोमदयपर्यन्तम् उक्षरूपा प्रायश्चित्तिः । १६ पूर्वोक्तहोमे प्राकृतस्य मन्त्रस्थाप्यादरूपया वारुण्या ऋचा होमः वारुणीजपश्च । १७ वारुणीजपो वारुणीहोमः अनगनमिति त्रयस्य शेषेण होमे मालापचारहोमे पुनरुक्षीय होमे च कर्त्तव्यता । १८ गायत्रगारिभते उक्षपञ्चत्वे पुनर्होमः। १९ सरसरेति शब्दायमानस्याग्निहोत्रद्रव्यस्य अभिमन्त्रणम् । २० उद्वासिते विध्यन्दिते च प्रायश्चित्तान्तरम् । २१ बोभत्से मध्यमेन पलाशपर्णेन होमः । २२ अभिदृष्टेऽधिकसमिदाधानम् । २३ उत्तरस्या आहुतेः स्कन्दने समिदाधानम् । २३सू० २अ० ११क० । १ सायं होमस्य प्रदोषान्तकालविधानम् । २ सङ्गवानस्य प्रातर्होमकालत्वम् । ३ सायं प्रातर्होमेऽतीते चतुर्होतेनाज्येन होमः । ४ कस्मिन् काले केन मन्त्रेण होमस्तद्विधिः । ५ अग्निहोत्रे समाप्ते वारुणीष्टिः कार्या । ६होमोत्तरकाले प्रातः इन्द्राग्ने वरदानम् । ७अग्निहोत्रसमाप्तौ आहवनीयस्याहरणं कृत्वा पुनस्तद्धरणम् । ८ तद्विसिक्ता मित्रस्यर्थाभयदेवताका इष्टिः । ९ इष्टिसमाप्तौ यतवाचोः पत्नीयजमानयोरग्नीन् व्रतयतोरनन्नतोरहःशेषमुपोषणम् । १० द्वयोर्गवोर्दुग्धेन रात्रेः पूर्वचतुर्थभागे सायमग्निहोत्रहोमः । ११ एकस्मिन् पयस्यधिश्रिते द्वितीयमवनीय तेन होमकरणम् ।१२प्रातःकालातिपातनिमित्ता प्रातरिष्टिः । १३ उक्षायामिष्टौ व्रतभङ्गुकस्याग्नेर्दैवत्वम् । १४स्वकाले एव प्रणीतेष्वग्निषु होमकालातिपत्तौ प्रायश्चित्तोक्तिः । १५ दुःखेनाज्युपाते प्रायश्चित्तिः । १६ अग्निहोत्रार्थं विधिनानुद्धृतेआहवनीये यद्यस्तमियादर्कस्तदा बहुविद्ब्राह्मणेन तस्य निधानान्तं कारयेदित्युक्तिः । १७पूर्ववत् अनुद्धृतेऽभ्युदितो यद्यर्को बहुविद्ब्राह्मणेन तत्प्रणयनम् ।१८आज्यस्य हेमरजताद्यनयनरूपकार्यान्तरोक्तिः । १९कालात्ययेन प्रायश्चित्तविशेषोक्तिः ।२०उक्षविषये प्रातःकाले विशेषोक्तिः ।२१विद्यमाने आहवनीये गार्हपत्यानुगमने कर्तव्यताविधानम् । २२ मथनसमर्थज्ञाभावे भक्षनाऽरणी खेपयित्वा तन्मन्थनम् । २३ मन्थनविषये इतिकर्त्तव्यताकलापः ।
२४ उक्तमन्थनविषये द्वितीयः कल्पः । २५ पुनर्मन्थनविषये कल्पान्तरम् । २६ त्रिगुणयुक्तोऽग्निरेवात्र मन्थनविषये एका देवता । २७ अग्निहोत्रार्थं प्रणीते आहवनीयेऽनुगतप्रायश्चित्तत्वेन इष्टिविशेषोक्तिः । २८ ज्योतिष्मद्दुपसकाग्निरणयोः प्रकृते देवतात्वोक्तिः । २९ सर्वेष्वग्निष्वनुगतेषु आदित्येऽस्तमिते उदिते वाऽग्नेः पुनराधानरूपप्रायश्चित्तोक्तिः । ३० अरण्योः समारूढेषु अग्निषु अरण्योर्नाशे अन्याधेयस्य पुनराधेयस्य वा कर्त्तव्यत्वम् ।३०सू० ३अ० १२क० ।अतःपरं भाविनीनामिष्टीनाम् आग्नेयत्वोक्तिः। २व्रतातिपाते आग्नेयीष्टिः ।३ऋतेऽग्निकर्म्मचिदोषेणेष्टिः किन्तु व्याहृतिहोमः । ४ आगारदाहे क्षामायाग्नये, शान्ताग्निसंसर्जने च शुचयेऽग्नये, इष्टिः । ५ सर्वेषां द्वयोर्वा अग्न्योः परस्परं संसर्गे विविचयेऽग्नये उक्तेष्टिः । ६गार्हपत्याहवनीययोः संसर्गे वीतयेऽग्नये इष्टिः ७ पवनाग्निना संसर्गे संसर्गायाग्नये इष्टिः । ८ वैद्यतेऽग्नौ अशुभशुष्काय, शत्रूणामन्नभोजने वैश्वानरनामकायाग्नये चेष्टिकरणम् । ९ पुरोडाशकपाले नष्टेऽन्यद्दासिते पूर्वोक्तैवेष्टिः । १० अध्याधाविते उक्षाया इष्टेः कर्त्तव्यत्वम् । ११ जीवत्येवाहिताग्नौ मृतशब्दोक्तेखे शुभतयेऽग्नये इष्टिः । १२ तत्रेष्टौ मरुतोदेवता ।

१३ आमावास्याख्ये कर्मण्यारब्धे चन्द्रमसः पुरस्ताद्-भ्युदये जाते मरुद्देवताका उक्तेष्टिः । १४ प्रायश्चित्त-प्रकरणोक्तानां ब्राह्मणोक्तानाङ्गेष्टीनां वैकल्पिकत्वकथ-नम् । १५ ऋषिणां स्वज्ञानामभिमर्शनम् । १६ बर्हि-ष्यग्निं स्वयमाहृत्य आग्नीध्रकर्तृको होमः । १७ऊ-तवते आग्नीध्राय पूर्णपात्रदानम् । १८ देवताविपर्यास-रूपव्युत्क्रमे सङ्ख्याव्याहृतिहोमः प्रायश्चित्तं हिरण्यदानञ्च। १९कस्मिंचित् कर्मणि यद्यदेवताव्याहननमङ्गत्वा उत्तरकर्म-प्रवृत्तौ यदा स्मरणम् भवति तदैवोत्थाय तदाव्याहननं कर्त्तव्यम् । २०मनसा वा तदाव्याहननमित्यन्यमतम् । अस्यानिन्द्यां देवतायां स्मरणक्रमेण यागः । २०सू० ३अ० १३क० । १ अपक्वहविषा होमे हुते चतुःशरावौदनेन चतुर्ब्राह्मण-भोजनरूपा प्रायश्चित्तिः । २अदग्धं किञ्चिद्धविरवदानेभ्यो न पर्याप्तञ्चेत्तदा पूर्व्वोक्तप्रायश्चित्तम् । ३ हविष्यशेषे दग्धे पुनराहुतिः कार्य्या । ४ आव्याहनात् प्राक् हविर्दोषे पुनराहुतिरेव । ५ गुणभूतानां पुनराहुतिकथनम् । ६ स्विष्टकृतः प्राक् प्रधानभूतानां पुनराहुतिकथनम् । ७ अवदानदोषे पुनरायतनादवदानोक्तिः । ८शामे ग्रहेषु हुते हुते दक्षिणादानं न ऋत्विग्भ्य इत्युक्तिः। ९सर्वेषु कर्मसु विहितदक्षिणादाने यज्ञसम्यङ्नभूमिदानम् । १० पुरोडाश-श्रपणादूर्द्धं प्रायश्चित्ताभावः । ११ आदिभिरवखादानां तदर्शनादिभिरभिघ्नन्तीनाम् अन्यया वाऽशुचिसम्बन्धानां कपालानामभिघ्नानाम् अपामभ्यवहरणम् । १२कपालेभ्यो-ऽन्येषां मृण्मयानां भिन्नानामभिन्नानाञ्च अपामभ्यवहर-णम् । १३स्फुटितोत्पतितपुरोडाशानां निधानाभिमन्त्र-णे । १४अग्निहोत्रहोमायाग्निप्रणयनकाले मथ्यमाने-ऽग्नौ न जाते सौत्तिकमग्निं प्रणीय तत्र होमकरणम् । १५अन्वादीनुक्त्वा तेषां पूर्वपूर्व्वाभावे उत्तरोत्तरयजनम् । १६ब्राह्मणपात्रादिषु पञ्चसु आज्याहुतिधारणार्थं समिद्ध-वति इत्यनार्षाः समिधो न भवन्त्येवेति । १७होमानन्तरं मन्थनमपि भवतीत्युक्तिः । १८ यदि पात्रौ जुहुयात् तदा वासार्द्धिनो ब्राह्मणस्य नावरोधः करणीय इत्युक्तिः । १९ यद्यज्ञक्रमे जुहुयात् तदा आगमांसवर्जनम् । २० सत्त्वे चेत् दर्भासनधिषवणम् । २१अशु चेत् भोजनीयाभोज-नीयरूपविवेकाभावः । २२संवत्सरिकयावज्जीविकयोर्ब्रह्म-तयोर्विवेकोक्तिः । २३ आहुत्योरन्तराऽग्न्यानुगमने सति निहिते हिरण्ये द्वितीयाहुतिहोमः । ३अ० १४क०

चतुर्थाध्याये सोमयागेतिकर्त्तव्यताकलापः ।

१ आधानानन्तरमारब्धयोर्दर्शपूर्णमासयोरनन्तरम् इष्टि-पशुचातुर्मास्यैरिष्ट्वा सोमेन यजनम् । २ एकेषां मते दर्शपूर्णमासानन्तरम्, अन्येषां मते ताभ्यां पूर्व्वमपि सोमेन यजनम् । ३ सोमयागकर्तृणामृत्विजां संख्यानिरूपणाय प्रतिज्ञा । ४ते च त्रिपुरुषवन्नवत्वारस्तेन तत्र षोड़शर्त्विजः । ५ यज्ञप्रमाणस्तुत्वे षोड़शर्त्विजां मध्येस्वस्मिन्नेवा उत्तरे त्रयः स्वस्वगणभूता इति चतु-र्णामेव सुख्यत्वमित्युक्तिः । ६ होता मैत्रावरुणोऽ-च्छावाकोऽग्नीध्रश्चेत्युक्तो गणः । अध्वर्युः प्रतिप्रस्था-ता नेष्टोन्नेता इत्येको गणः । ब्रह्मा ब्राह्मणाच्छंसी आग्नीध्रः पोता"इत्येको गणः उद्गाता प्रस्तोता प्रतिहर्त्ता सुब्रह्मण्य इत्येको गण इत्येवं चतुर्षु ऋत्विग्गणेष्वाद्या चत्वारोसुख्याः ।७एतेषामेव ऋत्विजाम् अहीनैकाहेर्याजनं न सदस्यमिष्टमसाध्वर्युणा कर्त्तव्यमिति ज्ञापनम् । ८-मुख्यपतिसम्पदानासक्तानां षोड़शानाम् ऋत्विजां सर्व-र्यजनम् । ९ ऐष्टिके तन्त्रे सत्विणां पुरुषाणां समावापा-दिकर्म्मणि यथार्थभूतस्य कर्त्तव्यत्वम् । १० अन-र्मीनां दीक्षणात् प्रभृत्येव यथार्थमभिधानमैष्टिके तन्त्रे इत्युक्तिः । ११ याज्यानुवाक्ययोः अग्निर्मुखमित्युक्तिः । १२ दक्षप्रदाने ऊहविधानम् । १३ ग्रहेषु निवित्सु अप्राप्तस्य ऊहस्य विधानम् । १४ अनैष्टिकत्वात् ऋक्-त्वाच्च हतयाज्यायामप्राप्तोहविधानम् । १५ऋक्षाद् प्राप्तो कृष्णाज्योहविधिः ।।६ऋक्षावाकस्य निगदे उपहवे प्रत्युप-हवे चोहः ।।७आर्षेयप्रवरे मुख्यपतिप्रवरणानन्तरम् आ-त्मादीनां सख्यानां प्रवरणम् । १८ सख्यात्मवर्गादित्वं श्लोकक्रमेण । १९ समानार्षेयाणां समानगोत्राणां तन्वता । २० द्रव्यान्वयानां संस्काराणाम् आवर्त्तनम् । २१ एकेषां मते अग्निचित्यावत्सु ऋतुषु उखासम्भरणीयम् ऐष्टिकं कर्म्म । २२ ब्रह्मखत्त्वत्वत्त्वभृद्वृणकानां त्रयाणामग्नीनां देवतात्वोक्तिः । २३इदमभृतिकर्म्मणाम् उत्तरोत्तरं प्रकृतितरां भवितव्यत्वम् । २३ उक्तसोखासम्भ-रणीयस्य पौर्णमासात् प्रकृतितरत्वोक्तिः । २५ सोमप्रवर्ग्य-स्य प्रावणीयात्तुल्यतोक्तिः । २६ औपवसथ्येऽग्निप्रणय-नस्य प्रथमाया ऊर्द्धं स्वरेषु नियमाभावः । २७धर्मे मध्य-मोत्तमयोर्नियमाभावोक्तिः । २७सू० ४अ० १क० ।

१दीक्षणीयायामिष्टौ विराजौ धाय्ये । २ दीक्षणी-यायामग्नाविष्णू देवते । ३ सान्निचित्ये तीव्रसन्यानि हवींषि । ४ अन्वयोरुभयोराग्नावैष्णवादधिकानि ह-

वीभि । ५ भुवद्वह्न आदित्येभ्यः भुवनपतिभ्यो वा आदित्येभ्यो याजयानुवाक्ये । ६ इदमादिषु उदयनीयायाः प्राक् मार्जनाभावोक्तिः । ७ इडायां सूक्तवाके च स्थितानामाग्निधां स्थाने आग्नीध्रकमन्त्रस्य प्रयोगः । ८ इडानिगदकथनम् । ९ सूक्तान्तेऽनिगदोक्तिः । १० नामादेशाभावोक्तिः । ११ सवनीयपशविड़ायाः कथनम् । १२ अग्निप्रणयनोत्तरकालं गार्हपत्याहवनीययोर्मध्ये दीक्षितानामासनशयनरूपसङ्कारदेशः ।१३सत्रिणां दीक्षाविधानम् । १४महाव्रतसहिते सत्रे विशेषोक्तिः १५ द्वादशाहतापचितेषु यत्संख्याः ऋत्वास्तत्संख्याएवोपसदो दीक्षाश्च भवन्तीति । १६ विक्रयेकाहानां कर्माचारः । १७ दीक्षाकालएव विधातव्ये दीक्षोपसत्सहितानामेकाहःप्रयोगकालविधानम् ।१८दीक्षाहःसु परिसमाप्तेषु अनन्तरं यदहस्तस्मिन्नहनि सोमक्रयविधानम् । १सू० ४अ० २ क०।१ सोमक्रयदिवसे प्रायणीवेष्टिकरणम् । २प्रायणीयेष्टेः गंध्वन्तत्वम्, नोदयनीयान्तत्वमिति । ३ उक्षाया इष्टेरनाज्यभागत्वं नोदयनीयत्वमिति । ४ अङ्गर्गवेषु सोमक्रयस्य सकृदेव कर्त्तव्यत्वम् । ४ सू० ४अ० ३क० । १ सोमक्रयरूपं कर्म । २ क्रीतं सोमं प्राग्वंशसमीपं नेष्यत्सु अध्वर्युषु अनसः पश्चात् त्रिपदमात्रेऽतीते चक्रवर्त्तं नोर्मध्यभागस्य सरलदेशे प्रेषितस्य सतः पार्ष्णीआचालयतः प्रपदेन दक्षिणस्यां दिशि त्रिःपांशूद्वपनम् । ३ अन्तरेणैव वर्त्मनो अनुव्रजतएव उत्तराअनुवचनम् न व्रजनविक्षेपे इत्युक्तिः।४अवस्थितस्थानसो दक्षिणपार्श्वेन सोमसमीपं गत्वा तमीक्षमाणस्य तत्रैवावस्थानम् । ५ अवस्थितेऽनसि दक्षिणात् पश्चादभिक्रान्तस्य सोमानिसुखे अवस्थानम् ।आहवनीयस्यापतोनुव्रजनञ्च । ६सोमे निहिते तिष्ठतएव परिधानोक्तिः । ७ उपस्पर्शनविधयस्य विकल्पोक्तिः । ७सू० ४ अ० ४ क० ।

१ इड़ान्ता आतिथ्या नाम इष्टिः । २ आतिथ्येरग्निसन्धनरूपाङ्गकथनम् । ३ आतिथ्येष्टौ धाय्याहयं, संयाज्यद्वयम्, आर्त्विज्यं करिष्यतां स्वयमभिमर्शनम् । ४उदक्सपर्शानन्तरं सोमाध्यायनम् । ५ उपसत्सु उदक्सपर्शे उष्णोदकग्रहणम् । ६ आध्यायनमन्त्रः । ७उदक्सपर्शानन्तरं नमस्काराञ्जलिरूपेण पाणिनिधानस्य कर्त्तव्यत्वम् । ७सू० ४अ० ५क० । १ उदक्सपर्शनानाम् आध्यायननिङ्गवप्रवर्ग्याङ्गत्वोक्तिः । २ प्रसूचमनवानसङ्गा प्रणवेन तदवेक्षणम् । ३पूर्वस्माभिष्टवनस्य एतावत्त्वकथनम् ३सू० ४अ० ६क० । १ याजयाध्वर्यवधाने सत्यप्येकमेवाभिष्टवनम् । २ होत्रादिषु उपविष्टेषु अध्वर्युकर्तृकधर्मदुघाङ्गानस्य उत्तरारम्भे हेतुत्वोक्तिः । ३ अभिहिङ्कारवर्जम् उत्तराभिष्टवनविधानम् । ४ उत्तरपटलस्य समष्टिप्रयोजनानि । ५ उत्तमयोः प्रवर्म्ययोः स्वरूपकथनम् । ५ सू० ४अ० ७क० । १प्रवर्म्योपसदोः सम्बन्धाय प्रवर्म्यार्थं प्रणवस्य उपसत्करण विधानम् । २ उपसदि पित्र्याया जपलोपः । ३पित्र्यायैव प्रवेशोपेयशनयोर्व्याख्यानम् ।४ पित्र्याया उपवेशनातिदेशात् दक्षिणोपर्युपस्थताविधानम् । ५ उपसद्यावमीष्टये इत्याद्याः तिस्रः सामिधेन्यः ।ऐतासासुत्तमेन प्रणवेनाग्निं सोमं विष्णुमावाह्योपवेशनम् । ७ एकेषां मते देवतानामावाहनम् अनावाहनेऽपि उक्ता एव देवताः इत्युक्तिः। ८ खिष्टकृदादिप्रयाजाज्यभागलोपकथनम् । ९ आध्यायननिङ्गवयोर्नित्यत्वकथनम् । १०अपराह्णेऽपि कर्त्तव्यायासुपसदि विशेषादिकथनम् ।११तत्र पूर्व्वापराह्णिककर्म्माणि। १२पौर्व्वाह्णिकीनासुपसदां सुपूर्व्वाह्णे आपराह्णिकीनाञ्च सुपराह्णे कार्य्यतोक्तिः । १३पूर्व्वाह्णिकयापराह्णिकयोपसदौ एकीकृत्य एकोपसद्व्यवहारः, तादृश्या उपसदश्च त्रिष्वहःसु कर्त्तव्यत्वम् । १४षट्सु वेति व्यवस्थाविकल्पः । १५अहीनादीनाम् अध्वर्युप्रत्ययादुपसन्निश्चयः ।१६ एकेषां शाखिनां ज्योतिष्टोमस्य प्रथमप्रयोगे धर्म्मेच्छाभावोक्तिः । १७ औपवसथ्येऽहनि वर्त्तमानयोरुपसदोः पूर्वाह्णएव कर्त्तव्यत्वम् । १८होता दीक्षितश्चेत् तदा औपवसथ्येऽहनि प्रथमोपसदि समाप्तायां प्रेषितः पुरीष्यचित्यर्थमनुवचनम् । १९होतरि अदीक्षिते यजमानस्यानुवचनम् । २० पश्चात् पदमात्रे स्थित्वाऽभिहिङ्कृत्य पुरीष्यासोऽग्नयः इति सप्रणवाया ऋचस्तिरनुवचनम् । २१ समन्त्रश्चैवानुवचनं नोपांशवित्ति । २२ व्रजत्सु अध्वर्युषु अनुव्रजतोऽनुव्रजनम् । २३ तिष्ठत्सु अध्वर्युषु अनुवचनारम्भस्थाने स्थित्वा भूर्भुवः स्वरिति वाचं विसृज्य प्रणयतेति सम्प्रैषानुवचनम् । २४ होता दीक्षितश्चेत् प्रसोढकर्त्तृसङ्गतस्य अग्नेः अनुगीतस्याशंसनरूपसंस्कृतिः । २५तिस्रीध्यमया वाचा पूर्वोक्तमग्न्यनुशंसनम् । २६ अग्निष्टुच्छस्य पश्चात् वैश्वानरीययजनम् ॥ साग्निचित्येषु क्रतुषु पुरीष्यचितिः, अनुशंसनं, वैश्वानरीयमित्येतत् त्रयं भवतीत्युक्तिः । २८ ब्रह्मणो नियमभेदः । २९ उक्षाग्निप्रणयनस्य कर्त्तव्यत्वम् । ३० दीक्षितश्चेद्ब्रह्मा तदा तस्य

वसोर्धारा होमकाले तत्प्रतिगमनविधानम् ३ क्ष० ४अ० ८क०। १ऋविधानयोः यजटयोः अध्वर्युकर्तृकं प्रवर्त्तनम्। २ उक्तप्रवर्त्तने सोमप्रवर्हणेन कार्य्यतोक्तिः। ३ पूर्व्वोक्तानुवचने विशेषकथनम् ।३रराट्यामवद्यायाम् अधिहवोरित्यस्या ऋचः अर्द्धर्चेऽवसानम्। ५ वह्वां रराटीभोजमाणस्य ऋग्विशेषानुवचनम्। ६ उपनिहतयोर्मेधयोः ऋग्विशेषेण परिधानम् ६क्ष०४अ०६क०। १प्रेषितानुवचने इतिकर्त्तव्यताकलापः। २ अनुव्रजत उत्तरानुवचनम्। ३ ऋग्विशेषसमाप्तौ प्रणवेनोपरमः। ४ आग्निध्रीयमभिव्रजत्सु अध्वर्युषु उत्तरेण तमतिव्रज्य ऋग्विशेषस्यानुवचनम् ऋग्विशेषस्य चार्द्धर्चे आरामः। ५ प्रपद्यमानस्य सोमस्याऽनुप्रपदनप्रकारः। ६ शालामुखे मन्थोपवेशनप्रकारः ।७ब्रह्मकर्त्तृकस्य सोमप्रणयनस्य पाक्षिकत्वकथनम्। ८ सोमप्रणयतो ब्रह्मणः कर्त्तव्यभेदः। ९ आहवनीयस्य दक्षिणतः ब्रह्मोपवेशने नियमः। १० अग्निचित्यासहितायां सोमयागक्रियायाम् अग्निपुच्छस्य दक्षिणत उपवेशनम्। ११ अग्नीषोमीये पशौ उक्त ब्रह्मासनातिदेशः ।१२सौम्ये चाह्नि वषाहोमपर्य्यन्तमाहवनीयस्य दक्षिणत आसनम्। १३स्रुक्प्रतपने सोमं प्रदाय ऋविधाने चाप्येष यदि गतः स्यात्तदा प्रपद्यमाने सोमे आसादनार्थं पुनः प्रत्येयादित्युक्तिः। १४क्ष० ४अ०१०क०। १ अग्नीषोमीयेण पशुना चरणम्। २ प्रणयनपर्य्यन्तमुत्तरवेदिसमीपे आदरुग्रदानस्य कार्य्यभेदाः। ३होतुः स्वस्य धिष्ण्यस्य पश्चादुपवेशने कार्य्यभेदः। ४ मैत्रावरुणस्य स्वधिष्ण्यस्य पश्चादवस्थानम्। ५ देवस्तनां ऋचीति संज्ञाकथनम्, तत्र सर्व्वासामेतासां देवतानां सगुणत्वम्, रुद्रस्य गुणविकल्पश्च। ६ उक्तदेवतानां याज्यानुवाक्याकथनम्। ६क्ष० ४अ०११ क०। १ सर्व्वप्रथमानीतिवक्ष्यमाणानां ऋचां संज्ञा, तासाञ्चाम्नायाद्यत्वं तद्देवतोपदेशस्य ध्यानार्थत्वं तासामष्टौ संज्ञाः तत्रादितः षण्णामेकैकस्याश्चत्वारश्चत्वारो गुणशब्दाः ततोविष्णुपत्नी अदितिरित्येका, ततश्चानुमतिरिति द्वे। उक्तानामष्टानां देवतानां याज्यानुवाक्याकथनम्। वैश्वानरीयस्य नवत्वं, कायस्य दशमत्वञ्च। २ औपयाजैरङ्गारैर्व्यवायपरिहारे यज्ञस्य कार्य्यता। ४ आग्नीध्रस्योत्तरेण होतुर्नयनं दक्षिणे होतीये निधानम्। ५ शामित्रोदाहरणे दक्षिणेन मैत्रावरुणं, होतीय एव निधानम्। ६उपोत्थाननिष्क्रमणे कृत्वा वेदप्रहणम्। ७हृदयशूलोद्वासनप्रकारः। ८वसतीवरीणां परिहारे क्रियमाणे दीक्षितानामन्तर्भावः, अदीक्षितानां बहिर्भावश्च। ४अ०१२क०। १ यस्यां रात्रौ पशोः समाप्तिस्तस्यान्त्यभागे पत्निप्रवादनात् प्राक् प्रातरनुवाकायामन्त्रितस्य विधिपूर्व्वकः आज्याहुतिहोमः। २ उक्तविषये द्वितीयाज्याहुतिहोमः। ३ ब्रह्मणश्च होतुश्चायं विधिः समान इति। ४ ऋविधाने प्राप्य रराट्यभिमर्शनम्। ५ दक्षिणेन पाणिना पर्य्यावृत्य रराट्यभिमर्शनम्। ६ मन्द्रस्वरेण प्रातरनुवाकानुवचनम्। ७ प्रातरनुवाकार्थमाह्वानविशेषः। ८ अग्निदेवताकक्रतुः ४अ०१३क०। १औषसक्रतुः॥ २तत्रेतिकर्त्तव्यताकलापः ४अ०१४क०। १आश्विनः क्रतुः। २तत्र प्रातरनुवाकः। ३पूर्व्वोक्तादन्यः प्रातरनुवाकः। ४अन्यैस्छन्दोभिराग्नेयस्य गायत्रस्य छन्दसोनात्यावपनम्। ५ राजन्यस्य न त्रैष्टुभं, वैश्यस्य न जागतमिति। ६ अध्यासवत् एकपदद्विपदानां संहितानामन्ते प्रणवकरणम्। ७माङ्गल्यादीनां यथाक्रमं वक्तव्यता ।८ प्रेप्सतः स्वर्गकामस्य माङ्गल्यकथनम्। ९ तमसोपघातपर्य्यन्तं इडेद्याद्वीयस्रुक्प्रावर्त्तनम्। १० तमसोपघातकाले इडेद्याद्वीयस्य उत्तमयर्चा प्रतिप्रियतमिति सूक्तस्योपसन्धानम्। ११ उत्सर्पणस्वरूपकथनम्। ११क्ष० ४अ० १५क०।

५ अध्याये। १परिधानोत्तरानुवचनप्रकारः। २ तत्र निगदादि। ३ अपोनप्त्रीयाणां प्रयोगमन्त्रौ। ४ प्रातःसवनस्य मन्द्रस्वरेण प्रयोगः। ५ अध्वर्युकारस्यानुच्चासेन वचनम्। ६ इष्टिकामस्य सामधेनीवत् प्रक्रियावचनम्। ७ प्रकृतिभावे यथर्चमर्द्धर्चे लिङ्गाकाङ्क्षा। ८ दशमीग्रहणे ब्रह्मणानुवादः। ९ एकधनास्तु ऋक्षु आवर्त्तनीयर्चकथनम्। १० इष्टिपथमागतास्तु तास्तु जघ्यमन्त्रः। ११ समीपागतास्तु तास्तु जघ्यमन्त्रः। १२वसतीवरीषु समायातास्तु ब्राह्मणोक्तकार्य्यचरणम्। १०तीर्थदेशे होतृचमसे अपां पूर्व्वभागे आपोनदेवीःइति मन्त्रं समाप्य प्रणवेनोपरमः। १४ निगदकथनेन निष्क्रमणविधिः। १५ आसामेकधनानामागच्छन्तीनां सुखतो गत्वा ता। अपरेणातीत्य उत्तरतः स्थितिविधिः। १६ तासद्वरेणातीतासत्यावर्त्तनम्। १७ अन्याहृत्य मन्त्रक्रमेण व्रजनम् ऋगवानपत्ने प्रणवेनसन्तानक्रिया।१८तिस्रृणाम् उत्तमयानुप्रपदनम्।१९तत्पश्चानिरसनेन होमाभिमुखे उपवेशनप्रकारः। १९क्ष० ५अ० १क०। १ उपांशुनामयज्ञे हूयमाने तदभिमुखीभूय प्राणवायोर्नासिकाद्वारेण बहिष्करणम्। २बहिःस्रस्य वायो-

नासिक्या दोहे प्रवेशनप्रकारमन्त्रौ । २ उपांशुग्रहार्थसोमसवनसाधनपाषाणं व्यानाव त्वेत्यभिमृश्य वाग्विसर्गः । ४ मैत्रावरुणब्रह्मणोः कार्यभेदः । ५ ताभ्यामितरेषां दीक्षितानां कार्यभेदः । ६ विप्रुड्होमौ कृत्वा अध्वर्युस्तुष्णीं अन्योन्यं स्पृशन्त आतीर्थदेशात् सर्पन्तीत्युक्तिः । ७ बर्हिष्प्रवमानस्तुत्यर्थस्तुद्गातारमभिमृशेत्युक्त्वा ऋत्विजामुपवेशनम् । ८ तत्रैवासीनेन होत्रा तेषामुपविष्टानामनुमन्त्रणेमन्त्रः । ९ होतुर्दीक्षितत्वेऽनुमन्त्र यजमानार्थं गमनम् । १० दीक्षितस्य होतुरुत्तरसवनयोः सर्पणमपि । ११ ब्रह्मणमैत्रावरुणयोर्विधानभेदः । १२ प्रातःसवने ब्रह्मणः कार्यभेदः । १३ तस्यैव द्वितीयतृतीयसवनयोः कार्यभेदः । १४ मन्त्रभेदं कृत्वा मैत्रावरुणं प्रति स्रुच्यमित्युच्चैस्तेन नियोजनम् । १४ सू० ५ अ० २ क० । १ सवनीयेन पशुना चरणम् । २ शाखान्तरे या देवता पशोरुक्ता तद्दैवतः पशुः कार्यः । ३।४ क्रतुभेदे देवताभेदः । ५ अग्नीषोमीयपशुधर्म्मविशेषातिदेशः । ६ परिव्ययणप्रकारः । ७ ऐष्टिकेषु निगमेषु आवाहनप्रकारः । ८ हारियोजने विशेषः । ९ विषयभेदे प्राविलादिनिषेधः । १० अनिर्दिष्टदेवताकसोमानां देवताः सवनदेवता एवेति तासामावाहनम् । ११ सूक्तवाकेऽपि तासामनुवर्त्तनम् । १२ अच्छावाकं विनाऽन्येषां वषट्कर्त्तृणाम् प्रहृताहुति होमः । १३ चात्वालमार्ज्जनप्रभृति पशुकर्म्म कृत्वा सौमिककर्म्मकरणम् आदित्याद्युपस्थानञ्च । १४ आदित्याद्युपस्थानप्रकारः । १५ निर्म्मन्थदेशे यूपादिभिः सह आदित्यादीनामुपस्थानम् । १६ शामित्रोवध्यगोहरणात्पात्रोत्करास्तावानां सव्याहृतासुपस्थानम् (आस्तावोबर्हिष्प्रवमानस्तुतिदेशः)। १७ आग्नीध्राच्छावाकवदनस्थानदक्षिणमार्जालीयपरुषवसासादनदेशरूपस्थराणां दक्षिणाहृतासुक्प्रकारेण उपस्थानम् । १८ आग्नीध्रमुत्तरेण परिव्रज्य सदोद्वारं प्राप्य सदोऽभिमर्शनमन्त्रः १९ द्वारिमवे स्थूणे अभिमृश्य शालामुखीयादीनामुपस्थानम् । २० उपस्थितानुपस्थितयोर्दर्शनपूर्व्वकं सर्व्वतोऽध्वा सदसः पूर्व्वद्वारस्येनोपस्थानं कार्य्यम् । २१ उक्त्व द्रप्सृचं सह जपन्तः होता मैत्रावरुणः ब्राह्मणाच्छंसी पोता नेष्टोद्गेते पञ्च पूर्व्वद्वारेण सदःप्रविश्योपविशेदित्युक्तिः । २२ तेषामुक्तक्रमेण सदःप्रवेशः, व्युत्क्रमेण उपवेशनं ततो मन्त्रविशेषजपः । २३ प्रस्तरकाणां ऋत्विजामुपस्थानादिजपान्तधर्म्मस्य ब्रह्मण्यतिदेशः । २४ खलभक्षवसासमीपे तेषामुपवेशनम् । २५ उक्तरूपेणाग्नीध्रस्य तुप्रकारम् आग्नीध्रीवस्थानप्रवेशः । २६ प्रस्तरिणां तेषां दक्षिणादय उदक् संस्थानानीत्युक्तिः । २७ आद्ययोर्होतृमैत्रावरुणयोर्विपरीत्यं ततश्च मैत्रावरुणदक्षिणतः स्वस्थानतश्चोत्तरतोहोतुः स्थानम् । २८ तेषां यथास्थानमुपविष्टानां स्वस्वस्थानश्चोत्तरदेशस्य विसंस्थितसंचारसंज्ञा । २९ अनुक्तस्थानानामृत्विजां दक्षिणाधिष्ण्यमुत्तरेण विसंस्थितसञ्चारइत्युक्तिः । ३० सू० ५ अ० ३ क० । १ प्रतिसवनमिन्द्रदैवतैः पुरोडाशैश्चरणम् । २ प्रातःसवने धानावन्तं करम्भिणमित्यनुवाक्या । ३ माध्यन्दिनतृतीय सवनयोः प्रैषभेदः । ४ आदेशपदसङ्ग्रह तेनैव पदेन यागः । ५ यत्र क्वचित् कर्म्मणि प्रैषेण यागे कर्त्तव्ये यज योऽसु इत्यङ्गुल्य तयोः स्थाने आमूर्वषट्कारौ कृत्वा यागइत्युक्तिः । ६ अनुसवनमनुवाक्याभेदः । ७ अनुवाक्यास्थपुरोडाशस्य बहुवचनान्ततोक्तिः । ८ क्रमभेदे ऊहनिषेधः । ८ सू० ५ अ० ४ क० । १ द्विदैवत्ययाज्याप्रैषानुवाक्याभिधानम् । २ द्विदैवत्ययोरनुवाक्ययोरुक्तिः, तेऽग्यपृथक्सप्रणवे प्रयोज्ये ते च सहानवानम् । ३ प्रैषाणामनवाननिर्णयः । ४ ऋग्भेदे द्वे याज्ये ते च सहानवानम् एकाशुरे पृथक् वषट्कारे च वक्तव्ये इत्युक्तिः । ५ प्रातःसवने इदमादि अनवानं याज्यानुवाक्ययोरिति निर्णयः । ६ प्रैषौ याज्यानुवाक्ये च उत्तरयोर्ग्रहयोरनवानं भवतीत्युक्तिः । ७ सोमग्रहणपात्रमक्षत्वा अध्वर्युणा तद्ग्राह्यम् । ८ तत्र च मन्त्रः । ९ तद्गृह्य होत्रा दक्षिणोरुच्छादनेन तत्र स्थापयित्वा आकाशवतीभिरङ्गुलीभिरपिधानम् । १० एवमुत्तरपात्रयोर्ग्रहणासादनपिधानानि । ११ प्रतिग्रहभक्षणकाले सव्येन पिधानम् । १२ मैत्रावरुणग्रासादने विशेषः । १३ अनुवचनयाज्यासंप्रैषाः नित्यमध्वर्युणा कार्याः । १४ अनुसवनं चमसेषूच्चीयमानेभ्यः सोमेभ्य एकैकस्याज्यप्रक्षेपः । १५ अनुसवनं प्रेषितस्य होतुःस्वाभिः प्रस्थितयाज्याभिर्यजनम् । १६ प्रयाजादीनां नामादेयं प्रेषितानामेव यजनम् । १७ प्रयाजादिप्राङ्नयनम् । १८ प्रातःसवनीयप्रस्थितयाज्योक्तिः । १९ तृतीयसवनीयानुवषट्कारः । २० मारुत्यतोवे हारियोजने प्रस्थितयाज्यादिभेदः आश्विने याज्यान्यूनत्वञ्च । २१ यज्ञगाथा । २२ प्रतिवषट्कारं भक्षणम् । २३ तूष्णीमेवोत्तरभक्षणम् । २४ अध्वर्वोराहवनीयदेशात् सदसोगतिः । २५ अगच्छन्तमध्वर्युं प्रति अयमग्नीदिति होतुः प्रत्ता । २६ गृहीतस्य तस्य होतारं प्रति अयाड्डित्युत्तरोक्तिः ।

२७ ततो होट्चमन्त्रः । २७सू० ५अ० ५क० । १इतरपात्रद्वयं सव्येनापिधाय ऐन्द्रावायव पात्रं दक्षिणहस्तेनोत्तरभागे गृहीत्वा अध्वर्युणापि तस्य गृह्णाय एष वसुरिति मन्त्रेण होत्रा प्रणयनम् । २ नासिकाभ्यामवघ्राय होत्रा सोमस्य भक्षणे मन्त्रः ।३ होत्रा भक्षितमध्वर्युणा च प्रतिभक्षितं होट्चमसे किञ्चिदवनीय अनाचम्यैवोपक्षानादि कृत्वा पुनः सह भुक्त्वा शेषं होट्चमसे आनीय तत्पात्रोत्सर्गः । ४ उत्तरयग्रहपात्रे उक्तधर्मातिदेशः । ५ उत्तरयग्रहपात्रयोर्न पुनर्भक्षणम् । ६ द्विदैवत्यानां मध्ये कस्यचित् यग्रस्य होट्चमसे अनवनीतस्य नोद्गसर्गः । ७ होत्रा मैत्रावरुणस्य यग्रपात्रस्याध्वर्यवे पूर्ववत् प्रणयनम् । ८ तस्य दक्षसव्याभ्यां नेत्राभ्यां क्रमेणेक्षणम् । ९ मैत्रावरुणस्योत्सर्गान्तं कर्म्म कृत्वा दक्षहस्तेनाश्विनमपिधाय सव्येन होट्चमसादानेमन्त्रोक्तिः । १० सव्यस्थारत्निना सव्योरुवसनमाच्छाद्य तत्र निधायाष्टताङ्गुलीभिरपिधानम् । ११ होट्चमसं सव्येनापिधाय दक्षिणेनाश्विनं गृहीत्वा पूर्ववत् प्रणामनम् । १२ आश्विनमुत्सृज्य दक्षहस्तेन होट्चमसं निधाय जलं स्पृष्ट्वा इडोपह्वानम् । १३ इडोपह्वानकाले चमसिनः स्वस्वचमसस्योड्डासमीपे उद्यमनम् । १४ अवान्तरेडां प्राश्याचम्य होट्चमसभक्षणम् । १५ दीक्षितस्य होतुः दीक्षिता उपह्वयध्वमित्युक्त्वा चमसभक्षणम् । १६यजमाना उपह्वयध्वमित्युक्त्वा वा होतृचमस भक्षणम् ।१७सख्यान् प्रति पृथक् तत्तन्नामोत्कीर्त्तनेन इतरानसख्यान् प्रति होत्रका उपह्वयध्वमिति कीर्त्तनेन च चमसभक्षणम् । १८ उक्तरूपेण दीक्षितादीक्षितानां मैत्रावरुणादीनां स्वस्वचमसभक्षणम् । अदीक्षितानां समान भक्षं प्रति पूर्ववत् उपह्वानं कृत्वा चमसभक्षणमिति भेदः २० अवभृसानां सख्यचमसाद्भक्षणम् । २१ द्रोणकलशादुद्धृत्याचमसानां सोमभक्षणम् । २२ सर्वत्र सोमभक्षणे वाग्देवीत्यादिमन्त्रजपः । २३ होतुर्वषट्कर्त्तृत्वात् प्रथमभक्षणं पत्नीसंनाहादीनां भक्षणमिति गौतमसतम् । २४ तौल्वलिसते इतरेषामभक्षणम् । २५ गाणगारिसते सर्वेषां भक्षणम् । २६ सोमभक्षोत्तरं सख्यहृदयस्यर्शे मन्त्रः २७ प्रथमद्वितीयवोः सवनयोराद्यानां द्वितीयानाञ्च चमसानां जलेनाभिमर्शने मन्त्रद्वयम् । २८तृतीयसवने आद्यानामे व तथाभिमर्शनम् । २९ जघन्यपात्राणि विना सर्वपात्राणां सख्यहृदयाभिमर्शनम् । ३० इत्यभाष्यावनेनादितानां चमसानां नाराशंससंज्ञा ३०सू०५अ०६क० । १अग्निन्काले अच्छावाकस्याग्नीध्रस्योत्तरं सदोगत्वा स्वस्थाने उपवेशनम् । २अध्वर्युणा दत्तं पुरोडाशखण्डमिड़ामिवोद्यम्य प्रेषितस्याच्छावाकस्य जघं हृत्वम् । ३ यजमानेत्यादिना अन्त्येन प्रणवेनोपसन्नननरूपनिगदः । ४उक्तनिगदसमाप्तौ अध्वर्युणा होतरुपहवाकाङ्क्षा ।५ उपह्वाने प्रकारः ।६ उह्यीयमानाय प्रत्यक्षा इति सूक्तस्याच्छावाकेनानुवचनपूर्व्वकं यजनम् । ७पुरोडाशखण्डं निधाय जलं स्पृष्ट्वा चमसभक्षणम् । ८अस्पृष्टोदकानां सोमेतरहविषां स्पर्शनिषेधः । ९पुरोडाशखण्डप्राशनप्रकारः।१०यदाच्छावाक उपविष्टस्तदा ब्रह्मा तीर्थेन निष्क्रम्य बर्हिर्वेद्यामाग्नीध्रीयं प्राप्नोति अच्छावाकश्च दग्धरूपं पुरोडाशखण्डं प्राश्य तीर्थेन निष्क्रम्याचम्य तं देशं प्राप्नुयात् इतरे होत्रादयोऽप्यनुपविष्टएवाच्छावाके तं देशं प्राप्नुवन्तीत्युक्तिः । ११ अग्निन् काले जुह्विहत्त्यर्थमन्यदपि प्राश्य प्रतिस्थ उत्तरकण्डिकोक्तं कर्म्म कार्य्यम् ११सू० ५अ०७क० । १ सर्व्वेषु प्रतिसृप्रेषु ऋतुयाजैश्वरणम् । २ तत्र प्रैषाः । ३ प्रैषसमाम्नाये पञ्चमस्कन्धस्य ऋतुयाजानां प्रैषत्वम् । ४स्वस्वप्रैषेण प्रेषि तस्य यजनम् । ५ अध्वर्युग्रहपतिभ्यां प्रेषितस्य होतुर्यजनम् । ६ पार्ष्णिके षडेऽहनि अध्वर्युग्रहपतिभ्यां स्वयंयजनम् । ७ तयोर्यजनप्रकारः । ८ वषट्कर्त्तृणामानान्त्यर्थं ऋतुपात्रभक्षणम् । ९तत्र अध्वर्योः पृथक्भक्षणम् । १०तत्रैव काले प्रतिभक्तकस्योपह्वानम् ५अ०८क० । १ ऋतुपात्रभक्षोत्तरमध्वर्योः कार्य्यप्रकारः । २प्रातःसवने यस्कादिषु पूर्वोक्तप्रकारातिदेशः,पर्य्यायप्रभृतीनां सर्व्वत्रान्त्यग्रस्त्वम् । ३ उक्तेनोपाह्वानेनोत्तरयोरुपसन्ननम् । ४ओषामोदैवेत्यस्य प्रतिगरसंज्ञा सच यस्कस्वरतुल्यस्वरः इत्युक्तिः । ५ आहावे ओंसामोदैवेत्यादेः प्रतिगरसंज्ञा ऐप्रणवे श्रुतादि अवसाने अश्रुतादिरिति परिभाषितम् । ७ आहावोत्तरे प्रणवे प्रणवत्वं न श्रुतादित्वम् । ८अवसाने प्रणवस्य प्रतिगरसंज्ञा । ९ प्रणवान्तस्य उक्तविषयद्वय विकल्पः । १०अन्तःस्थप्रणवावसाने प्रतिगरसंज्ञा यस्कान्ते तु प्रणवत्वं न श्रुतादित्वम् । ११ त्रिपदषट्पदादौ शंसनावसानविशेषः । १२ निविदो यथापठितमवसानं कर्त्तव्यं तत्र कर्त्तृत्वञ्च । १३ निविदां आङ्गानाभावः । १४ तस्या उपसन्ननाभावश्च । १५ निविदासक्तमेन यदेनाज्यसूक्तस्योपसन्ननम् । १६ उक्तप्रकारेण सर्व्वा

निविदः शंसव्या इत्युक्तिः । १७ पदसमाम्नावानामपि निविदां तुल्यशंसव्यत्वम् । १८अस्या निविदोऽन्यासु निवित्सु पदसमाम्नावेषु च उपसन्तनम् । १९ अन्यासु निवित्सु आङ्गानङ्ग भवतीत्युक्तिः । २० यत्र द्वे सूक्ते तीणि वा आज्यकार्ये विहितानि तत्रादस्खैवादायाः तिःशंसनं नोत्तरस्येति नियमनम् अर्द्धर्चशोविस्पष्टं च तथात्वम् । २१ विष्टुचे प्राणसन्तानस्य कार्यता । २२प्रतिपदामाद्याया ऋचः पूर्वोक्तप्रकारेण गन्तव्यता । ऋगाबानस्य तथात्वञ्च । २३ ब्राह्मणविहितस्य आनुपूर्व्ये विकल्पः ।२४याज्यानानां शस्त्रत्वसत्तमाया आङ्गानपूर्व्वकपरिधानीयत्वञ्च ।२५सर्व्वासु शस्त्रपरिधानीयासु उक्तधर्म्मातिदेशः । २६उक्थं वाचीत्यादि शस्त्वा जपः तत्र याज्या, उक्थपात्रस्थाये भक्षणञ्च २७ सर्व्वशस्त्रयाज्यानेषु चमसिनसमसभक्षणम् । २८आदित्यसावित्रयर्हयोर्वषट्कर्त्तृभक्षणाभावः। ५अ०६क० । १शस्त्रात् परं स्तोत्रं भवतीत्युक्तिः । २एषेति प्रोक्ते प्रस्तोता उद्गातुर्हिङ्कारकाले प्रातः सवने शस्त्रायाङ्गवीरन् इत्युक्तिः । ३ उत्तरयोः सवनयोः प्रतिहारकाले तथाङ्गानम् । ४ वायुरत्रेगा यज्ञप्रोरित्यादीनां सप्तानाम्ऋचां पुरोरुक्संज्ञा तस्मात्तस्माउपरिष्टात् ऋचं ऋचं तत्र शंसेदित्युक्तिः । वायवायाहि दर्शतेति सप्तानां ऋचसंज्ञा ऐशस्त्रस्य प्रउगसंज्ञा । तत्र द्वितीयायास्त्रिःपाठत्वम् । ७ पुरोरुक्संज्ञकानां सप्तानाम्ऋचां मध्ये विद्वान् देवानित्येतस्या षष्ठ्याः अर्द्धचं अर्द्धचं त्रिरवसानेनाङ्गानम् । ८ पुरोरुचा उत्तमया न शंसेत् तस्या अंशसने ऽपि ऋचे आङ्गानं कर्त्तव्यम् । ९प्रउगस्य भाधुच्छन्दस्यार्षत्वम् । १०उक्थं वाचि श्लोकायत्येति शस्त्वा जपः । तत्र विश्वेभिः सोम्य मध्विति याज्या । प्रशस्ता ब्राह्मणाच्छंसो अच्छावाक इत्येते त्रयः शस्त्रिणोहोत्राकाश्च इत्युक्तिः । ११उक्तानां त्रयाणां प्रातः सवने चतुराहवानि शस्त्राणि । तृतीयसवने पर्य्यायेषु अतिरिक्तेषु भवन्तीत्युक्तिः। १२माध्यन्दिने पञ्चाहावानि । १३स्तोत्रियानुरूपेभ्यः प्रतिपदनुचरेभ्यः प्रगाथेभ्यःधाय्याभ्यश्च पृथगाङ्गानं कार्य्यम् । १४होतृरथेतानि उपहावस्य निमित्तानि । १५ तेभ्योऽन्यदग्नन्तरम् । होत्रा कर्त्तव्यम् । १५आदौ निविद्वानीयानां सङ्गानामनेकत्वेत् प्रथमेष्वाहावः । १७आपोहि ष्ठा इत्यादि ऋचे आहावः कार्य्यः । १८ तेषां शस्त्रादिषु वे ऋचासे स्तोत्रियानुरूपासेषु आहावः कार्य्यः । १९ माध्यन्दिने तेषामेव शस्त्रेषु तृतीया आदेशास्ते प्रगाथाः ज्ञेयाः । २०प्रगाथ इत्युक्ते स्तोत्रियोभवति नान्यथेत्युक्तिः । २१ याज्यानानि शस्त्राणि । उक्थं वाचीत्यादि शस्त्वा प्रातः सवने जपः । २२ षोड़शिन उक्थे यानि शस्त्राणि तेष्वपि अयमेव शस्त्वा जपः कार्य्यः । २३ षषोडशिनि उक्थे उक्थं वाचीत्यादे माध्यन्दिने विशेषः । २५ अनन्तरस्य पूर्व्वेण तुल्यविधत्वोक्तिः । २६ ऋन्द्रःप्रमाणमिन्द्रदैवतैः स्तोत्रियाणां तुल्यता । २९ आर्षेणापि तुल्यतेत्येकेआहुः ।२८आनोभित्रावरुण इत्यादयोयाज्याभेदाः तासां मध्ये कासाञ्चित् स्तोत्रीयानुरूपत्वम् । तासां मध्ये यासुकासुचिदृचिन्दोगाः स्तुवीरन् तदा तिसृभिरेव स्तोत्रियां कृत्वा गिरोभिरनुरूपः कर्त्तव्य इत्युक्तिः ५अ०१०क० । १,२,३,४,५ अतिरात्रषोड़शिनि स्तोत्रादीनां निष्क्रमणप्रवेशादिप्रकारः । ६ यजमानस्य पूर्व्वद्वारेण प्रतिसर्पणम् ५अ०११क०।उक्तकाले यावस्तुतः प्रपदनम् ।२तस्य उपसर्पणमपि तदैव ।३तस्य हविर्द्धानशकटस्य उत्तरशिरोरूपाच्छिरोदेशे हवनिरसनं कृत्वा सोमाभिमुखं स्थितिः । ४तत्रोपवेशने मन्त्राभावः। ५उपविष्टस्य यो अद्य सौम्येति मन्त्रजपः । ६ अध्वर्य्युणा तस्मै उष्णीषदानम् । ७तस्याञ्जलिना गृहीतेन तेन संमुखे शिरसोवेष्टनोत्तरं सोमाभिषवावाघाभिष्टवनम् ।८इदमादि मध्यमसवनं तत्र मध्यमस्वरेण प्रयोगश्च । ९ अर्बुदनामधेयस्तुक्तोक्तिः । १० तस्य प्रातुस्तमायाः आ व ऋञ्जसे इति सूक्तपाठः । ११ उक्त सूक्तयोरुपरिष्टात् गिष्टयार्बुदस्योत्तमया परिधाय वेद्यं यजमानस्योष्णीषं तस्मै देयम् ।१२अन्येषु दिनेषु आदाय पुनर्यजमानाय दानम् । १३ अन्यदिनेषु येन तद्दत्तं तस्मै एव तद्दानम् । १४ गाणगारिमते अपराभिरूपकरणम् । १५आधायस्य समेतु ते इत्यादयः द्वादश ऋचस्तावत्यश्चत्वार सूचा भवन्ति अर्बुदस्य चतुर्थी उत्तमा तत्र उत्तमा परिधानीया गिष्टा द्वादश ता अपि चत्वारस्तृचा एताः पावमान्यः । १६,१७,१८,१९, एषां चतुर्णां ऋचानां क्रमेण कर्म्मभेदे विनियोगज्ञापनम् यथा उदकसेकरूपे आधायने प्रथमम् मार्जने द्वितीयम् दोहने तृतीयं अभिषवेण द्रवीकृतस्याधवनीये सम्भरणरूपे आसेचने चतुर्थम् । २०प्रतिहृच्छन्दं चतुर्थ्या विनियोगः । २१ शन्नो भवन्त्वित्यृचो विनियोगः । २२अर्बुदपावमानीभ्योऽन्यत् सर्वं समानम् । २४ केषाञ्चिन्मते अर्बुदेव समता २५ अन्यमते प्र वो यावाण इत्यस्य समता २६,२७ स्तुते

माध्यन्दिने पवमाने विच्छन्दाङ्कारान् उपसर्पणम् । ५ अ० १२क० । १प्रवर्ग्यवति क्रतौ दधिघर्मेण चरणम् । (दधिघर्मः कर्मभेदः)। २ ऋगावानस्य तद्धर्मत्वम् । ३ भक्षिण इज्या । ४होतर्वदस्येत्युक्तस्य उक्तिश्रुतोऽवगम्यतेत्युक्तिः । ५ त्रातं हविरित्यङ्गौ त्रातं हविरित्यनुवचनम् इत्यमनुवाक्याः । ६ परि त्वाग्ने इत्यादि मन्त्रजपे निमित्तभेदोक्तिः । ७ दीक्षितस्यैव अनिष्टा जपः । ८सवनीयानां पुरस्तादुपरिष्टाद्वा पशुपुरोडाशेन चरणम् । ९ एकमते तेन नाचरणम् ।१०आश्वरथ्यमते तेनाचरणम् । ११ अहीनैकाहेषु नारांशंसादनात् परं दक्षिणानयनम् १२अहीनैकाहेषु दीक्षितस्य जप्यमन्त्रोक्तिः । १३ आग्नीध्रेण उक्ष्यमाणानां दक्षिणाङ्गतीनां हवनम् ।१४आङ्गतिमन्त्रप्रकारौ १५विहारदेशाभिक्रमेण नीतेषु दक्षिणाद्रव्येषु मध्ये प्राणिरूपदक्षिणाद्रव्यप्रतिपत्ते मन्त्रभेदः ।१६अप्राणिद्रव्यस्पाभिमर्शनमात्रम् । १७ कन्याया दैवविवाहविधिना दत्ताया आदानेऽभिमर्शनमात्रम् न पाणिग्रहणम् । १८ एवं प्रतिग्रहनियमः सर्वत्र । १९ प्रतिगृह्याग्नीध्रीयं प्राप्य उच्छिष्टहविषः सर्वे प्राणम् । ५ अ० १२क० ।

१ मरुद्दैवतेन यज्ञेन चरणम् । २ तत्पात्रभक्षणे मन्त्रः। मरुद्दैवतशस्त्रशंसनम् । ३ माध्यन्दिनसवने शस्त्रादिषु अध्वर्योराह्वानप्रकारः । ४ मरुद्दैवतौ प्रतिपदनुचरसंज्ञौ ऋचौ । इन्द्रनिहवः प्रगाथः । ६ ब्राह्मणस्तुत्यप्रगाथः । ७ऋचाः प्रतिपदनुचराः, ह्रचाः प्रगाथाः । आज्यमारभ्य ब्राह्मणस्तुत्यपर्यन्तं सर्वमर्धर्चम् । ८ स्तोत्रियानुचराः प्रतिपदनुचराः सर्वत्र प्रगाथाः । ९ गायत्रादीनि पञ्चान्तानि अर्धर्चशः शस्त्राणि भवन्तीत्युक्तिः । १०पञ्चम्या उत्तरेषु त्रिषु या अचतुष्पदास्तासामर्धर्चशः शंसनम् । ११ पञ्चपदासु पङ्क्तिषु द्वयोर्द्वयोः पादयोर्द्विरवसानम् । १२ आश्विनशस्त्रे याः पङ्क्तयस्तासामर्धर्चशः शंसनम् । पङ्क्तिशंसनं वेति विकल्पः । १३खलगतायाः पङ्क्तेः पङ्क्तिशंसनकथनम् । १४ पङ्क्तेः पङ्क्तिशंसने ये उत्तमे पदे अतिरिच्येते तयोः समं कृत्वा शंसनम् । १५ उक्तादन्यत्र पङ्क्तेः शंसनम् । १६अर्धर्चान्ते प्रणवं कृत्वा सन्ननम् । १७ तत्र धाय्याभेदाः । १८ मरुद्दैवतः प्रगाथः । १९ जनिष्ठा उग्र इति सूक्तोक्तिः । २० उक्तसूक्तस्यार्धा एकाधिकाः शस्त्वा तदन्तराले इन्द्रोमरुत्वान् इत्येतस्या निविदोधानम् । २१ माध्यन्दिने अयुग्मासु तथा धानम् । २२हृचे एकां शस्त्वा युग्मासु च अर्धां शस्त्वा निविद्धानम् । २३ तृतीयसवने एकां शस्त्वा निविद्धानम् । २४त्रिष्वपि सवनेषु नेत्रे स्तुजतात्मनः पापं ध्यायता च निविद्धेया । २५सर्वत्र तयैव परिधानातिदेशः । २६शस्त्वा जप्यमन्त्रः याज्यामन्त्रश्च । ५ अ०१४क० । १निष्केवल्येति शस्त्रनाम । २यदि पृष्ठकार्ये रथन्तरं सामसामगाः कुर्वीरन् अभि त्वा शूर ! नोनुमः" अभि त्वा पूर्वपीतय इत्येतौ प्रगाथौ स्तोत्रियानुचरौ स्याताम् पृष्ठशब्देनात्र ज्योतिष्टोमाङ्गभूतं सामाभिव्यक्तस्तुतगतरं सम्पाद्य स्तुतिजन्यं शास्त्रैकसमधिगम्यं कार्यमुच्यते । ३ अन्ययोरपि प्रगाथयोः स्तोत्रियानुरूपत्वोक्तिः । ४ उक्तानां सर्वेषां प्रगाथत्वम् सामगैर्द्विपदोत्तरं हचाकारतया गानेऽपि बह्वृचैरर्धर्चत्वेन शंसनम् कार्यम् । अनभ्यासेन हचाकारस्तवनेऽपि ता हृचा एव न हचाः कार्याः ताभिश्च शंसनं कार्यम् । ६इतीक्ष्वन्द्रस्के ह्रचे प्रगाथे चतुर्थपञ्चमौ पादौ पुनरभ्यस्य पञ्चमसप्तमयोः पादयोरवसानकरणविधिः । ७ यदि तिस्रोहचस्य एव चिकीर्षितास्तदा चतुर्थपञ्चमौ पादौ द्विरभ्यस्यावसानं कार्यम् । काकुभेषु प्रगाथेषु तृतीयसप्तमौ अभ्यस्यावसानं कार्यम् ९ प्रत्यादानेन उत्तरा ऋक्पूपा भवति । १० येषुहःसु हृहद्रथन्तरं वा तयोः संहितिर्वा पृष्ठकार्ये भवति तत्र हृहद्रथन्तरस्तोत्रियानुरूपयोः शंसनं यथा भवति तथा इन्द्रनिहवब्राह्मणस्तुत्यानां शंसनम् । ११ इतरपृष्ठेषु तेषां हृहतीं कृत्वा शंसनम् । १२ यदा हृहद्रथन्तरे गायत्रादिषु अभ्यस्तासु तिसृषु ऋक्षु स्तुवते स्वयोनिषु वा द्विपदोत्तराकारं तदापीन्द्रनिहवब्राह्मणस्तुत्यानां हृहतीं कृत्वा शंसनम् । १३येषां स्तोत्रियाणां प्रगाथाः स्तोत्रियानुरूपाःतेऽप्यैन्द्रनिहवब्राह्मणस्तुत्यवच्छस्याः । १४ उक्तभिन्नस्य सर्वस्य यथाश्रुतं शंसनम् । । १५ एकस्मिन् दिने सर्वधर्मभागितया उपदिश्यमानोज्योतिष्टोम एकाहशब्दवाच्यः परिमितशस्यः परिपूर्णशंसनयुक्तः । १६स एकाहः यद्युभयसामा हृहद्रथन्तरसामसाध्यः तस्य पवमाने योनिरनुरूपा भवतीति । १७ज्योतिष्टोमभिन्नः यःकश्चिदुभयसामा एकाहः स्यात् तत्र पवमाने यत् कृतं तस्य योनिरनुरूपा शस्त्रा । १८निष्केवल्ये धाय्याया अर्धं स्थानं योनिस्थानं तदेव शंसनस्थानम् । १९ अनेकासां सामयोनीनां सह शंसने प्राप्ते आदावेव सर्वासामाह्वानं सकृत् पृथक् वा कार्यम् । २० ब्राह्मणस्तुत्यमरुत्वतीयसामप्रगाथानामनेकेषां सहपातेषु इन्द्रनिहवादूर्ध्वमाह्वावः कार्यः । २१ तत्र

धाच्छासामप्रगाथयोः प्रदर्शनम् । २२ कुम्बिशेषे ऐन्द्रो निविट् धेयेत्युक्तिः । २३ अनुब्राह्मणं स्वरः उक्थं वाचीत्यस्य शस्त्वा जपः। पिबा सोममित्यादि याज्या । ५अ० १५क०।१होत्रकाणां स्तोत्रियानुरूपौ प्रगाथौ याज्या चेतिनिर्णयः । १ तत्रैव याज्यान्तरं तत्काले सवनसंस्था निमित्तकर्म कार्यता ५अ० १६क० । २ उत्तमस्वरेण हृतीयसवनम् २ आदित्यपदेन चरणम् । ३ हूयमान यज्ञाभीक्षणे जपमन्त्रः । ४स्तुते आर्भवे पवमाने विहृत्याङ्गारान् मनोतादिपश्चिड़ान्तं पशुकर्म कृत्वा नाराशंसादनपर्यन्तं पुरोडाशादिकर्म कार्यम् ।५नाराशंसेषु सादितेषु पुरोडाशस्य स्रुवेतमात् प्रदेशात् स्रुहीत्वा सर्वं चमसिनः पुरोडाशं तिस्रःतिस्रः पिण्डीकृत्य स्वात् स्वाच्चमसात् दक्षिणतः स्वान् स्वान् पितॄनुद्दिश्य चमसान्तिके अत्र पितर इति मन्त्रे स्व स्व पित्र्यपस्तेत्युक्तिः ६ सव्याहृतः आग्नेयीं प्राश्य हविरुच्छिष्टं सर्वे प्राश्नीयुः । ५अ० १७क०। १सावित्रेण यज्ञेन चरणम् । २तत्र मन्त्रभेदः। ३वषट्कृते होतुः शस्त्रवैश्वदेवशस्त्रोक्तिः । संयता तेन हेष्यदिशं विहाय सर्वदिग्धानञ्च । ४ माध्यन्दिनसवने शस्त्रादिषु आहावमन्त्रः। ५ तत् सवितुरित्यादि नवर्चां वैश्वदेवतोक्तिः तत्र उत्तमायाः परिधानीयत्वम् । ६ वैश्वदेवाग्निमारुतयोः सूक्तेषु सावित्रादिनिर्दोधानम् । ७ तत्र चतस्रोवैश्वदेवशस्त्रे प्रयोज्याः ८ आग्निमारुते शस्त्रे उत्तरास्तिस्रऋचः पाद्याः । ९ सूक्तानां दैवतस्यैव निविद्देवतात्वम् । १० दैवतेन सूक्तान्तरानात्वम् तथाच यावतां सूक्तानामेकं दैवतं तावदेक एव सूक्तान्त इत्युक्तिः । ११ वैश्वदेवाग्निमारुतयोरेकपात्निक एव धाय्याः । १२ सर्वत्र प्रकृतौ विकृतौ च वैश्वदेवशस्त्रे द्विः पक्षः अङ्गर्चगः सकृद् भूम्युपस्पर्शने परिधाने च मन्त्रः १३उक्थं वाचीत्यादि शस्त्वा जपः । विश्वे देवाः शृणुतेत्यादियाज्याः । ५अ०१८क० ।

१ सौम्यस्य चरुहविष्कर्मभेदस्य याज्या । २ तस्योभय पार्श्वे हृतयाजाभ्यासपांशुयागः । ३ तत्रैव विशेषोक्तिः । ४अध्वर्युणाऽऽहृतस्य उद्गातृभ्यः पूर्वं स्रुहीत्वे जघस्य मन्त्रः। ५ तस्मिंश्चरौ हृतयुते स्वस्वच्छायाऽदर्शने नैमित्तिकः मन्त्रहयजपः तौ च मन्त्रौ । ६ अङ्गुलोपकनिष्ठाभ्यामाज्येन नेत्रे अभ्यज्य ब्रह्मणेभ्यः प्रदानार्थमध्वर्यवे दानम् । ७ दर्भगोकाभवाग्निषु विकृतेषु पात्नीवतस्य आग्नीध्रस्य उपांशुजपमन्त्रः । ८ नेष्टुर्विसंस्थितसञ्चारेण तमनु प्रपद्य तस्यान्तिक उपविश्य पात्नीवतस्य भक्षणम् । ५अ० १९क० । १ सदसोनिष्क्रम्य आग्नीध्रं प्रति गतिः । २ आग्निमारुतं शस्त्रं हृतयाहुत्या प्रयोक्तव्यम् । ३ तस्याद्याऋचं पक्षःऋगावानं शंसेत् यदि सा पक्षः शस्त्वा भवेत् तदा पादेपादेऽनुच्छूसन्नेव शंसेत् । ४ यदि सा अर्द्धचगःशस्त्वा तदार्द्धेऽवसायानवानम् । ५ उत्तमेन वचनेन हितीयायाः सन्ननं कर्तव्यम् । ६ स्तोत्रारम्भे प्राङ्नतगिरस्त्वादिभूमिस्पर्शान्तगुणोक्तिः । ७ परिधानीयाया उत्तमेन वचनेन ध्रुवयज्ञस्रावसेचनं होत्रचमसे कार्यम् । ८ आग्निमारुते याज्याकथनम् । एतदग्नीषोमयागस्याग्निष्टोमसंज्ञा ५अ० २०क० ।

६अध्याये । १ हृतीयसवने होत्रकाणामपि शस्त्राणि भवन्ति । २ तत्र याज्याङ्गशस्त्राणां प्रदर्शनम् । ३ तदङ्गस्य उक्थ्यक्रतुत्वम् । ४स्त्र०६अ० १क० । १यदि षोड़शी क्रतुःस्यात् तदा हृतीयसवने होत्रकशस्त्रानन्तरं तस्य कार्यता । अथ शस्त्रनाम षोड़शी तस्य विधानाधिकारः । २ तत्र स्तोत्रियानुरूपौ तत्र च षड्ऋचः । ३ तत्र तिस्रोगायत्र्यः । ४ एका बृहती पङ्क्ती । ५ हृचौ उष्णिहवार्हतौ । आधूर्षा इति द्विपदा साच पक्षः शस्त्वा । ६ अन्येषां हृचानां त्रिष्टुबादीनामुक्तिः । ७ तत्र पूर्वं हृचं द्वेधा कृत्वा शंसेत् एकैकाहृचं द्वे द्वे कृत्वा शंसेत् । अस्य हृचस्य सप्तपदात्मकत्वात् एकैकाहृचमेकैकामनुष्टुभमेकैकां गायत्रीञ्च सम्पादयेत् तथा च आद्यैचतुर्भिश्चतुर्भिः पादैरनुष्टुभः तिसृभिस्तिसृभिः गायत्र्यः । अनेन प्रकारेण हृचा अपि षड्भवन्तीति । ९ निविदतिपत्तौ अक्षिप्रयानुष्टुभे हृचे निविद्धेवेति परिधानीयानुष्टुभहृचदर्शनम् । १० उत्तरमस्रोत्तमांशिष्ट्वा उत्तमां निविदं दध्यात् । ११निविद्विशेषस्य चिह्नप्रदर्शनम् । १२ परिधानीया ऋक् । तां जप्त्वा यागः ६ अ० २क० । १ विकृतस्य षोडशिनः इन्द्रा नुवस्त्वेत्याद्याः स्तवे पठिताः षड्ऋचः स्तोत्रियानुरूपौ भवतः । २ स्तोत्रियानुरूपाभ्यामूर्ध्वं विकृते यच्छस्त्रं तदेव गन्तव्यम् । ३ द्वाभ्यां पादाभ्यामनर्द्धर्चोन्तेऽवसानम् अनृगन्ते प्रणव इत्यनर्द्धर्चशः शंसनम् । ४ पूर्वार्धां पूर्वपदानां शंसनम् । ५ गायत्रीणां पङ्क्तिभिर्विकरणम् । ६ पङ्क्तीनां द्वे द्वे गिर्येते ताभ्यां प्रणवनम् । ७ उष्णिहोऽनुष्टुभीभिर्विकरणम् उष्णिहासन्तमान् पादान् द्वौ कुर्यात् । ८ चतुरोभागान् कृत्वा

ष्टकृतीपादैर्विकृरणम् तेन अष्टाक्षरमन्त्यमाद्यं चतुरक्षरं यथा भवति तथा विकरणम् । ६ द्विपदाश्च तत्र ताः सर्वाश्चतुर्धा कर्त्तव्याः । प्रथमायां सर्वे भागा व्यूहेनाव्यूहेन च पञ्चाक्षराः उत्तरास्तु चतुरक्षराः । तत्र च प्रथमां त्रिष्टुभा विकरेत् । उत्तरास्त्रिष्टोजगतीभिः । १० उत्तमायाद्विपदाया यच्चतुर्थमक्षरं तत् प्रथमस्य भागस्यान्त्यं तदेव द्वितीयस्याद्यम् । ११ तत्र विकरणप्रकारः । १२उत्तरास्तु इतरान् पादान् यथान् कृत्वाऽनुष्टुभं च कृत्वा शंसनम् । १३ स्तोत्रियानुरूपाभ्यामूर्द्धं प्रोथुश इत्येवदन्तस्य शस्त्रावयवस्य विकृतसंज्ञा । १४ यत्र यत्र विकृतो भवति तत्र तत्र यौ प्रतिगरौ तयोरुदाहृतिः । १५याज्यायाजमेन मिश्रणम् । १६ मिश्रणप्रकारः। १७ विकृतस्य विशेषस्ततोऽन्यत्र सर्वमविकृतेन समानम् । १८ विकृतस्यैव विशेषः । १९ आज्यं षोड़शिपात्रं सप्तपदाभं भक्षयेत् । २० धर्म्ये ये भक्षिणस्तेऽपि भक्षयन्तीत्यतिदेशः । २१ सुब्रह्मण्यवर्ज्जितमैत्रावरुणादयस्त्वयग्वन्दोगाः । २२ षोड़शिभक्षमन्त्राः । ऐऋ० २क० । १ अतिरात्राधिकारः । २ प्रथमे पर्य्याये ये स्तोत्रियानुरूपास्तेषामाद्यादाद्यर्चं विना अन्यासु सर्वासु ऋक्षु प्रथमानि पदानि द्विरुक्त्वा तत्रावसानम् । ३ त्रिष्टयोः पादयोः समस्य प्रणवनम् । ४ होतुराद्यां विना मध्यमानि सर्वासां पदानि सकृदुक्त्वाऽवसाय तान्येव प्रत्यादाय तैर्ऋगन्तानि सन्धाय प्रणवनम् । ५उत्तमे पर्य्याये स्तोत्रियानुरूपेषु सर्वामाद्यर्चमुत्तमानि पदानि मध्ये सर्वे साक्षावाकाः द्विरुक्त्वा तैः प्रणयुः । ६ उत्तमे पर्य्याये अच्छावाकः अन्तयतुरक्षराणि द्विरुक्त्वा प्रणुयात् । ७ शस्त्रायां चतुःपर्य्यायत्वम् । एतत्पाद्यं शस्त्रं होतुः।८याज्याभ्यः पूर्व्वप्रतीकानि पर्य्यासंज्ञा ।१०पर्य्यासोदाहरणम् । तेषां पर्य्यायसंज्ञापि ।११पर्य्यासभिन्नानां गायत्राणामावापत्वम् ऐऋ० १अतिरात्रे पर्य्यायेषु समाप्तेषु छन्दोगा आश्विनशस्त्रेण स्तुवते । २ शंसिष्यन् विसंस्थितसत्त्वरेण निष्क्रम्याग्नीध्रीये जानुभङ्गेन षड़ाकृतीर्जुह्वात् तत्र मन्त्राः तत्राज्यशेषप्राशनं तूष्णीमेव कुर्यात् । ३ होमार्थं पृथक्, कृतस्याज्यस्य त्रिष्टमाज्यं प्राश्य अप उपस्पृश्येन्द्राग्नाभ्यामेत् अनाचमनेऽपि नाशुद्धिरित्यत्र देवश्च इत्यादिश्रुतिनिदर्शनम् । ४प्राश्य प्रतिप्रस्थ पचात् स्वस्थानस्थ, समस्तजङ्घोरुरत्निभ्याम् उपस्थं कृत्वा (पादाङ्गुलीभिर्भूमिमाश्रित्य) उत्पतिष्यन् पक्षीव उपविशेत् । ५ऋतोपस्थोपवेशनस्यैव आश्विनशंसनम् । ६ एकपात्निन्याः प्रतिपदः पक्षः शंसनम् । ७ प्रतिपदा गायत्रस्याग्नेयस्योपसन्ननननम् । ८स्तोत्रशंसने प्रातरनुवाकधर्म्मातिदेशः । ९त्रयो वार्हता सूक्ता स्तोत्रियाः प्रगाथा वा तान् यथादैवतं यथाऋतं शंसेत् । १० अन्येषु ऋन्दःसु यथादैवतं शंसेत् । ११ द्विपदाः पक्षः शंसेत् । १२ एकपदाः प्रणवेनोपसन्तनुयात् । १३ एकपदाभ्यो याऽत्तराः ताः एकपदान्तगैः प्रणवैरुपसन्तनुयात् । १४ अर्द्धर्चशस्त्रेषु पक्षः शस्याः पक्षः शस्त्रेषु चार्द्धर्चशस्या वास्या उद्धरेत् । १५ सक्तन्यायेन वा शंसनम् नोद्धार इति विकल्पः । त्रिष्टुब्जगतीभ्योऽन्यत्र विशेषः । १७ उदिते सूर्य्ये प्रतिप्रियतमभित्यस्योत्तमेन प्रणवेन सूर्य्यो नोदित इत्येतत् सन्धाय तदादीनि सौर्य्याणि सूक्तानि शंसेत् । १८ सौर्य्यसूक्तानि सूर्य्यो नोदित इत्यादीनि दर्शितानि । १९ इतस्ते अति यदर्य इत्यादि परिधानीया। २०प्रतिपदे परिधानीयाया आद्यावत्वविधानम् । २१ यदि इतस्तोमः कुर्य्यात् तस्य योनिम् त्वामिद्धवामह इति ह्वयम् । एतेषु प्रगाथेषु द्वितीयाम् इन्द्रकेतुमित्यस्योपरिष्टात्, तृतीयाम् अभि त्वेत्यस्योपरिष्टात् शंसेत् । २२तत्र विकल्पः । २३आश्विनपक्षेण पुरोडाशेन चरणम् । तत्र अनुवाक्या त्रैधः याज्याद्वयम् अध्वर्द्वा आनवानङ्ग ऋभवोक्तानि । २५आश्विनपुरोडाशस्य खिष्टकृताचरणे संयाज्याद्वयम् इत्यन्तोऽतिरात्रः कृतः । ऐऋ० ५क० । १ नैमित्तिककार्यभेदकथनायोत्तरपन्थः यदि सर्वे पर्य्यायाः प्रयुक्ता न भवन्ति इत्येवमाशङ्क्य स्यात् अतिक्रान्तप्राया रात्रिः सा पर्य्यायाणामाश्विनस्य चापर्य्याप्तेति तदा सर्वेभ्यःपर्य्यायेभ्यः एकं पर्य्यायं समुत्तुल्य कुर्युः । २ तत्र करणप्रकारः । प्रथमात् पर्य्यात् होता सं शस्त्रमाददीत । मैत्रावरुणब्राह्मणाच्छंसिनौ द्वितीयात् पर्य्यायात् से शस्त्रे, उत्तमादच्छावाकः स्वमेव शस्त्रमित्येवं प्रकारः । ३ यदा तु प्रथमः पर्य्यायः प्रयुक्तः मध्यमोत्तमावप्रयुक्तौ तयोराश्विनस्य चापर्य्याप्ता रात्रिरित्याशङ्क्य स्यात् तदैवं कुर्युः । हौ होतृमैत्रावरुणौ प्रथमात्, ब्राह्मणाच्छंसच्छावाकौ तु उत्तमात् शस्त्रमाददीत । ४ सर्वेषां वा स्तोमनिर्हासः । ५ स्तोमनिर्हासे शस्त्रनिर्हासप्रकारः । ६ स्तोमनिर्हास सम्भरणयोर्निर्हासविधानम् । ७ एके शाखिनः होतृचर्च्यं स्तोमनिर्हासं कुर्व्वन्ति । ८ अग्ने ! विश्वतूस्त इत्येतत् आश्विनोक्त एकस्तोत्रियः । ९ आग्नेये क्रतौ तस्य एकस्तोत्रियस्य इतस्तोऋन्दः । १०त्रीणि षष्टियतानि

आश्विने पुरस्तात् सक्तच्छंसनम् यथाश्रुतमनुदेवतं ११ । १२ द्विषामह्नियां वा नद्यादिभिरव्यवधाने सुत्या-सन्निपाते सम्भवोदोषः । १३ तथा दोषसम्भावनायाम् आ सवनदेवतावाहनात् सम्यक्तरां कृत्वा कर्म कार्य्यम् । १४ सम्भवे दोषे सति मरुत्वतीये यस्मिंश्चस्मिन् सूक्ते निविद्धीयते तस्य सूक्तस्य पुरस्तादिदं सूक्तं शंसेत् । १५ निष्के-वल्ये योजात इवेति सूक्तशंसनम् । १६ वैश्वदेवशस्त्र वैश्व-देवसूक्तस्य पुरस्तात् शंसनम् । १७ एतेषु आगन्तुषु निविदादध्यात् यस्य पुरस्तात् यस्यानि सूक्तानि विहि-तानि तान्युद्धरेत् । १८ निविदः स्थाने यद्यतिहरेत् तदा यस्मिन् सूक्ते निविदतिपन्ना तत्पूर्व्वापरभूतं समाप्य आगन्तुकात् दैवतात् पुरस्तात् "मा प्रगामेति" सूक्तम-खण्डितं यस्याऽन्यस्मिन्नागन्तुके तद्दैवतानां निविदं दध्यात् । ६ अ० ६ क० । १ सवनार्यस्य सोमस्य सवने समाप्ते अतिरेके सोमातिरेकसंज्ञा । स च स्तुतशस्त्रो-पजननो भवति तत्र छन्दोगैः स्तोतव्यं, बह्वृचैः शस्तव्यम् । २ तत्र प्रातःसवने स्तोत्रियानुरूपयाज्याकथनम् । ३ गाय-त्र्या वैष्णव्या यजनं वेति विकल्पः । ४ गायत्रीरि-मते इन्द्रावैष्णव्या यजनम् । ५ "ऐन्द्रावैष्णवो" च सं वां कर्म्मेत्यादि" त्रिष्टुप्छन्दस्कात्र यजने याज्या । ६ माध्यन्दिनसवने स्तोत्रियानुरूपयोः याज्यायाश्च उक्तिः। ७ तृतीयसवने यद्यग्निष्टोमे सोमातिरेकः तदा उक्थ्यं कुर्य्यात् । यद्युक्थ्ये सोमातिरेकस्तदा षोडशिनं कुर्य्यात् यदि षोडशिनि तथा स्यात् तदाऽतिरात्रं कुर्य्यात् इत्युक्तिः। ८ अतिरात्रात्त्रेत् सोमातिरेकस्तदा प्रतरेत्यादि स्तोत्रियानुरूपौ कृत्वा माध्यन्दिनसवनवत् शेषकरणम् । ९ माध्यन्दिनीयाज्यात्ववम् ६ अ० ७ क० । १ क्रीते सोमे नष्टे दग्धे वा प्रायश्चित्तविधिः । २ सदोऽपिधा-नानि कविधीनानि अमन्त्रकं कुर्य्युरिति पूर्व्वपक्षः। ३ सम-न्त्रकं वा तदाचरणमिति सिद्धान्तः।४ सोमेन यागसिद्धिरि-त्यतोऽन्यसोमविधानेन सोमाभिषवः । ५ सोमाभरालाभे पूतिका फाल्गुनानि वा संसृष्टान्यभिषुण्युः । (पूतिका सोम-सदृशी लतारूपा फाल्गुनानि च सम्बरूपा ओषधिभेदाः अभियुक्तोपदेशेन स्वरूपतोज्ञेयाः) । ६ फाल्गुनालाभे दूर्व्वादिसंसृष्टपूतिकाभक्षणम् । ७ दीक्षासत्रतासु क्रीतसोम-नाशे वा सोमनाशात् दीक्षाकालवर्द्धनम् उपसत्सु जातासु सोमनाशे उपसत्कालवर्द्धनम् । तत्र सर्व्वत्र प्रधानका-लानुरोधेन कालवर्द्धनम् । कालवर्द्धनेऽपि सोमालाभे प्रतिनिधिना प्रधानकालमध्ये यागसमापनम् इत्येकः पक्षः । भूः स्वाहेति प्रायश्चित्तं कृत्वारब्धं प्रयोगं विसृज्य सोमं सम्प्राप्य पुनर्यागकरणमिति सिद्धान्त पक्षः । ८ सुत्यासु नष्टे सोमे तदलाभे प्रति-निधिप्रयोगकरणमेव न तत्रार्त्विज्यः प्रयोगत्यागोवेति सिद्धान्तः । प्रातःसवने सोमे नष्टे प्रतिनिधिद्रव्यम-भिषुत्य तद्रसेन प्रतिदुहोभिश्रणम् (सद्योदुग्धं पयः प्रतिधुक्) । १० माध्यन्दिने तत्र पक्वपयोभिश्रणम् । ११ तृतीयसवने पूर्व्ववत् दधिभिश्रणम् । १२ फाल्गुना-नां प्रतिनिधित्वेन यज्ञे आयन्तीयं साम ब्रह्म-साम भवति वारवन्तीयञ्च यज्ञायज्ञीयस्थाने । १३ ब्रह्मसाम तु तत्रविषये आयन्तीयं साम यज्ञायज्ञीयं तु यथोक्तमेवेति एकमतम् । १४ प्रतिनिधिना उदवसानी-यान्तं यज्ञं समाप्य तस्माद्देशादुदवसाय सोमं सम्प्राप्य पुनर्यागः कार्य्यः ।१५ पुनः प्रयोगे पुनर्दीक्षणा । १६ यद्यु-पात्तेऽपि प्रतिनिधौ यागात् प्राक् सोमलाभः तदा-प्रतिनिधिद्रव्यत्यागेन यथोक्तमेव सोमेन यजनम् प्रतिनि-धिनिमित्तानि सोमभक्षणादीनि न भवन्ति । यदा पुनर-हर्गणेषु सङ्ख्यासम्भवात् प्रतिनिधिनैकमहः क्रियते तदा सत्रप्रयोगं समाप्य उदवसाय तदेवाहः पुनः प्रयुञ्जीरन् तथा च आरब्धं फलसाधनं यज्ञं प्रयुज्य-समाप्यैतत् कर्त्तव्यं नावान्तरसेकसङ्ख्यः प्रयोगः एका-हेषु प्रतिनिधावुपात्ते प्रतिनिधिनैवेहा पुनर्यागः ।१७ ६ अ० ६ क० । १ दीक्षितानां मध्ये कस्यचित् व्याधा-द्युपतापे प्रायश्चित्तविधानम् । २ जीवानामस्यता इत्यादि मन्त्रचतुष्टयेन वा ओषधीरिति सूक्तेन च पीडितं स्रपयित्वानुमार्जनं कार्य्यम् एतत्सर्व्वं ब्रह्मणा कार्य्यम् । ३ अनुमार्जने मन्त्रभेदाः । ४ एवमुपतप्तस्य कर्म्माणि कृते सर्तेषां यथास्थानं गतिः । ५ तस्मिंश्चिन्मित्रे त्रातार-मिन्द्रमित्याद्या ऋक् तार्क्ष्यं कार्य्यं स्याद्या भवति । ६ तस्मिन् वैश्वदेवसूक्तादिजपः कार्य्यान्तरञ्च । ७ रोगनिवृत्तौ यथो-पदिष्टतया प्रकृत्यैव सर्व्वं कार्यम् । ७ सू० ६ अ० ६ क० । १ मृते तस्मिन् ऋतोर्द्धेन निर्गमय्य अवभृतार्थं सङ्कल्पिते देशे मृतस्य प्रेतालङ्कारादिकरणम् । २ मृतस्य केशश्मश्रु-लोमनखवापनम् । ३ उशीरेणानुलेपनम् । ४ नवमृत-मालापरिधापनम् । ५ प्रेतस्य देहस्थान्यक्षणि निःपुरीषाणि कृत्वा घृतदाल्येन पूरयित्वा पुनर्दीक्षे बन्धनीयानी त्येकमतम् । ६ मृतस्य वाससा वेष्टनप्रकारः । ७ तस्यैव

वस्त्रस्यैकदेशस्य प्रेतक्रियाधिकारिणा ग्रहणम् । ८प्रतेस्ताग्नीन् द्वयोररण्योः समारोप्य देवयजनस्य बहिर्वेदि प्रेतमाग्नेयाग्निं मथित्वा विहृत्य तत्रैव दहेयुः।९अनाहिताग्नेरौपासनरूपेणाऽऽहार्येण दाहः । १०दीक्षितस्य पत्नीमरणेऽपि लौकिकाग्निना दाहः । आहिताग्नेरपि सर्वाधाने लौकिकाग्निनैव पत्न्या दाहः । औपसनाग्निसत्त्वे तु तेन दाह इति भेदः । ११प्रेतदाहदेशादागत्य पूर्वापरीभूताङ्गसमापनं यथाविहितं कुर्युः । १२ दीक्षितदहनोत्तरं आस्थानुवचनाभिष्टवनसंस्तवनेषु विशेषोक्तिः । १३ ब्रह्मणानायतने परितः कर्त्तव्यभेदः । १४ होतुःस्वस्थानात् पश्चादुपवेशनम् । १५तत्र अध्वर्योरुपवेशनप्रकारः । १६ तत्र आयं गौरित्यादिषु ऋक्षु उपांशुस्तुतिप्रदर्शनम् । १७ स्वनोत्तरं होतुः कर्त्तव्यम् । १८ । १९ । तत्र यमदष्टान्ततया प्रेहिप्रेहीत्यादि स्वङ्गजपः । २० अनुद्रवणास्थिसञ्चने कृत्वा यथासनन्यत्विजामासादनम् । २१ तेषां भक्षणप्रकारादि । २२ दीक्षितस्य मृत्युदिने उक्तप्रकारं कर्म्म समाप्य सप्तदशस्तोमं त्रिवृत्पवमानकं रथन्तरपृष्ठमग्निष्टोमसंस्थं बृहद्रथन्तरं दीक्षितमरणनिमित्तं सत्रमध्ये सविशः कुर्युः । २३उक्ते अग्नि समाप्ते एतान्यस्थीनि अभृतकाले अवभृतार्थं संहृत्यितास्वप्सु कृत्स्नेन सह क्षिपेयुः एतस्य मृतस्य तद्धरिति वदन्तः सर्वे सविशः कुर्युः । २४मृतस्य दाहादारभ्य कार्य्यान्तरोपदेशः ।२५शेषसमापने मृतस्य संख्यापूरणाय तत्सदृक्षं दीक्षयित्वा सत्रसमापनं कुर्युः २६ मृतपतौ मृते तदहःप्रदत्तं समाप्यावभृथं कृत्वा सदोदग्ध्वा च सत्राद्दक्षान् भवति न पुनः शेषसमापनम् ।२७मृतपतेरपि अस्थिसंक्षपणादयः पूर्वेण तुल्याः कार्याः । २८ एकाहेषु यजमानस्य पूर्व्याह्णे तस्य तस्य प्रयनम् । २९ मृतस्य मृतपतेः वह्नीषु अप्सु अवभृथ कर्म्म कृत्वा प्रेतस्य तत्र निक्षेपः एवमालेखनस्य आचार्यस्योक्तिः । ३० आश्वरथ्यमते तस्य यज्ञपात्रैः सहदाहः । ३१ एतत्पक्षे अवभेद अवभृथोनान्यः । ६ब्य० १०क० । १ सोमयागस्य अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोड़शी वाजपेयोऽतिरात्रोऽप्तोर्यामः इति सप्त संस्थाः । २तासां मध्ये यान्तपयन्ति तस्मान्ते यज्ञपुच्छं नाम कर्म्म कर्त्तव्यम् । ३यज्ञपुच्छस्य प्रकारः । तत्र स्वङ्गवाकप्रैषस्य उत्तमत्वम् । ५तत्र पुरोडाशकरणं तद्देवता च । ६सवनीयस्य पशोःपशुपुरोडाशयपक्षे अवीक्षणेतां पुरोडाशैरिति वचनमित्युक्तिः । ७ सवनीयैः कार्ष्मभिः इन्द्रदृद्भिः पशुपुरोडाशेन पशुदेवताद्दद्भिः । ८ शंयुवाकादूर्द्धं हारियोजनं कार्य्यम् ।९हारियोजनस्य अनुयाक्याप्रैषयाज्याः । १०अहर्गणेषु अन्त्येष्वहःसु उक्त एव याज्यानुवाक्ये । ११अहर्गणेषन्त्येभ्योऽन्यानि, तेषां च प्रतीकोक्तिः । १२ सारस्वतसत्रादिषु यानि सुत्यानि सौत्याहोभिरुत्सरवन्ति तेष्वन्त्येषु नुवाक्या । १३ हारियोजने मैत्रावरुणस्य अनुवषट्कारात् प्राक्अतिप्रैषनामकप्रैषकथनम् । १४ अतिरात्रे तेऽग्नेः इत्यत्र तेऽद्येति प्रयोगः । १५ वक्ष्यमाणे स्वःसुत्यामित्यत्र अद्य सुत्यामिति प्रयोगः । १६ आग्नीध्रः अतिप्रैषस्थानं श्रुत्वा यज्ञः स्वः सुत्यामित्यादि मन्त्रं वदेत् ६ ब्य० ११क० । १ उन्नेतारहृतं द्रोणकलशमिडामिव प्रतिगृह्णीयात्पवमिह्रा द्रोणकलशस्थसोममवपद्येत् । २यस्तुः प्राणभक्षमन्त्रः हरिवत इत्यादि । द्रोणकलशस्थसोमं गृहीत्वा मन्त्राभ्यां सस्यहृदयमभिमृश्य येन पथा सदोहविर्धानं वा गतः तेन पथा तत्र प्रतिनिवृत्तिः । विनिमृष्टप्राङ्गतिनामकौ होमौ कुर्यात् तत्र होममन्त्रौ च । ३ षड्भिर्मन्त्रैः आहवनीये षट्षट्यकलाध्याधानम् । ते च देवकृतस्यैनसऽइत्यादयः स्वतोक्ताः षट् । ४ द्रोणकलशाद्धानान्गृहीत्वा पश्येयुः तत्र मन्त्रः आपूर्य्या इत्युक्तिः ४ तूष्णीमवघ्राय ता धानाः अन्तःपरिधिदेशे निवपेयुः। आहवनीयदेशात् सर्वे दक्षिणाहतः प्रस्तोत्राग्नीध्रीयं गच्छेयुः विनिमृष्टप्राङ्गतिपर्य्यन्तमेतत् सर्वं सर्वे कुर्युः । ७ तांश्चमसान् गत्वा आर्द्रदूर्वाजातीयानि निर्मीय खेखे चमसेऽन्तरा प्रक्षिप्य सर्वे चमसिनः स्वान् स्वान् चमसान् दूर्वादिरसयुक्तान् गृहीत्वा प्रोक्षिताभिरद्भिः स्वं स्वमात्मानं दक्षिणैः पाणिभिरप्रदक्षिणं पर्युक्षेरन् । ८सव्यैर्वा पाणिभिः प्रदक्षिणं पर्युक्षेरन् । ९तत्र पर्युक्षणे गायामन्त्रः । १०पित्रादिमत्यजीवने नैता गाया पाठ्याः नापि पर्युक्षणं कुर्युः तद्वर्जं सर्वं सर्वे कुर्युः । ११ अवघ्राणाभिमर्शनमन्त्राः । १२ सयजमानर्त्विजां परस्परस्य हृदयस्पर्शे मन्त्राः ६ब्य० १२क० । १पत्नीसंयाजैश्चरित्वा पत्न्यै वेदप्रदानादि पूर्णपात्रनियननान्तं कर्म्म कृत्वा वेदस्मरणं कृत्वाऽकृत्वा वा प्रायश्चित्तानि जुहूयात् ।

२ पशुभक्षिकस्य साम्नोनिधनरूपामन्त्यां भक्तिं कृत्वा सर्वेऽवभृथं कुर्युः । ३ जले क्रियमाणा इष्टिरवभृथेष्टिः । तवा चरणम् । ४ ५ अत्र विशेषाः । अस्थासिष्टौ प्रया-

जाद्यनुवाजान्ता नाख्यामिड़ा न बर्हिर्मन्त्रौ प्रयाजानुयाजावश्रुमन्त्रौ तौ च गायत्रौ । ६ तत्र वारुणं हविः हविर्दोषे सति यागावसरे हविरेतदाद्य यष्टव्यम् । ७ खिलिङ्गागे अग्नीवरुणौ देवते अव ते हेड़ोवरुण नमोभिरिति हे ऋचौ तत्र साधनम् । अत्र च निगदाभावात् अग्नीवरुणावादिश्य स त्वं इत्यृचा यष्टव्यम् । ८अखिलिङ्गौ नमोवरुणाय इति मन्त्रेण दक्षिणानूपादानुदके निदध्युः । ९ तत्र आचमने मन्त्रलयम् । १० आचमनप्रकारः । ११ शौचाङ्गमाचमनं कृत्वा स्नानाङ्गमाचमनं कृत्वा आस्रावः तत्र मन्त्राः । १२अदीक्षितानामृक्मन्त्रैरास्रावनं वाऽभ्युक्षणं वा । १३ उन्नेता स्वाम्नोक्तविधिना सर्वानुदकदाडुत्तारयेत् । १४ उन्नेता उन्नीयमानाः उन्नेतरित्यादि मन्त्रं जपेयुः । १५उदकादुत्तीर्य उद्वयं तमस इत्यादि मन्त्रं जपेयुः । १६ इत ऊर्ध्वं संस्थाजपपर्यन्तं हृदयशूलेन समानं तथा च अनवेक्षमाणाः इत्यादयः समिदाधानान्ताः सर्वैः कार्याः । १७ अपदक्षकर्माणः संस्थाजपं कुर्युः १७सू० १६अ० १२क० । १ गार्हपत्ये उदयनीयवा चरुम् । २ सा च प्रायणीयवा तुल्या । ३सर्वसाम्येऽपि अयं विशेषः । तत्र चतस्र आज्यहविषोदेवता अदितिः पञ्चमी चरुहविः पथ्या स्वस्तिस्तत्र प्रथमा इह चतुर्थी भवतीति । ४ याज्यानुवाक्ये च विपरीते तत्र या याज्या सा इह अनुवाक्या । तत्रानुवाक्या इह याज्या । ५ प्रायणीयायाः कर्तार एवात्र कर्तारः । ६ संयाज्याया ऐकरूप्यं न याज्यात्वेन वैपरीत्यम् । ७उदयनीयायां समाप्तायां मैत्रावरुणदैवतोऽनूबन्ध्यः पशुः । ८ सदसि आसीनैर्होत्रादिभिः पशुः कार्यः स च वारुणीव इत्येके । ९ उत्तरवेदिसमीपे आसीनैस्तैः कार्य इत्येके । १०तत्र नैमित्तिकः कर्मभेदः । अनूबन्ध्यपशोर्वपायां हुतायां यद्येकादशिन्यपतः हुता तदाऽग्नीषोमीयेण सङ्करेण गत्वा गार्हपत्ये त्वाष्ट्रेण पशुना चरुम् । ११ त्वाष्ट्रपशुकरणप्रकारः । त्वाष्ट्रं पशुं यूपाङ्गनादिकृत्वा उत्सृजेत् इत्येकः पक्षः । १२यदि अध्वर्यव आज्येन तं पशुयागं समापयेयुः तदा होतापि तथा कुर्यात् १३ आज्येन समापने अनेके पक्षाः । ब्राह्मणोक्तदिशा वेद्याः ।१४ आज्येन करणपक्षे पशुवत् शब्दप्रयोगः । १५ यद्यत्र देविका इवीत्रि अनुनिर्वपेयुः धातोऽनुमतिः राकासिनीवाली कुहूरिति पञ्च देवताः।१६तत्र धातृरूपस्थाने मन्त्रभेदः ।१७एषाञ्च पञ्चानां देव्य इति संज्ञा । देवीत्वपक्षे सूर्यः द्यौः अपा गौः पृथिवीति पञ्च देवताः।१८तत्र सूर्यस्य चातुर्मास्येभ्यो याज्यानुवाक्ये आद्ये । १९अनूबन्ध्यपशुद्रव्यस्थाने मैत्रावरुणीया पयस्या कर्तव्याः। २०सा च आज्यभागादिः वाजिनान्ता कार्या ।२१ कर्मिणो वाजिनं भक्षयेयुः । सत्रविषये सर्वे भक्षयेयुः । २२ उदवसानीयवा चरुः तत्करणप्रकारः । २३ प्रकृतेन ज्योतिष्टोमाख्येन सोमेन यजमानदक्षिणीयया दीक्षां प्रविष्टः स सोमेनेष्ट्वा अवभृथेष्टौ दीक्षोन्मोचनं कृत्वा तत्राहुस्थित एवानूबन्ध्यान्तं प्रयोगं समाप्य तदग्नेऽग्नीनरणोः समारोप्य उदग्देवजनात् यो देयस्तस्मिन्नग्नीन्धित्वोदवसानीयया यजते इत्येकोऽर्थः । अपरस्तु यदि सर्वे दीक्षिताः स्युः सत्रेति दीक्षिता उत्रिता इति पाठः कर्तव्यः समासपाठेऽर्थस्य दुर्गमत्वात् यदि सर्वे दीक्षिताः स्युस्तदा पूर्ववदेवानूबन्ध्यान्तं कर्म कृत्वा सर्वे स्वान् स्वानाग्नीन् स्वे स्वे चारुषीषु पृथक् पृथक् समारोप्य पूर्ववन्मथित्वा पृथगेवोदवसानीयवा यजेरन्निति विशेषतोऽर्थः । सेयमुदवसानीया एवंरूपा भवति । पुनराधाने वाम्नाता दृष्टिरूपा । सा च अविकृता अविभक्ताज्यभागविकारा उपांशुतन्त्ररहिता केवलमग्निदेवता । ६अ० २७क०

इत्थं पूर्वार्धस्य षडध्यायीरूपस्य प्रतिसूत्रमभिधेयार्था दर्शिताः उत्तरार्धमपि षड़ध्यायीरूपम् बाहुल्यभयात् तत्तत्प्रतिसूत्रप्रतिपाद्यार्था न दर्शिता मूलग्रन्थे द्रष्टव्याः। संक्षेपेणायमर्थस्तत्रत्यः । सप्तमाष्टमाध्याययोः सत्राधिकारेण इतिकर्तव्यतादिदर्शनम् । नवमे अहीनैकाहाधिकारेण इतिकर्तव्यताकलापः। दशमे रात्रिसत्रविवरणम् । एकादशे कामनाविशेषेण तदाचरणम् गवामयनचरणञ्च । द्वादशे गवायनसत्रैव दिनसङ्ख्यनादि । प्रागस्य चतुरध्यायात्मकत्वोक्तिः प्रामादिकी।

तदीयसङ्ग्रहसूत्रे प्रतिपाद्यविषया स्वावदभिधीयन्ते । तत्र प्रथमाध्याये । स्थालीपाकाद्युपाकर्मान्तानि कर्माणि । १ सङ्ग्रहव्याख्यानप्रतिज्ञा । २ पाकयज्ञप्रकारः । ३ पाकयज्ञप्रकारस्य त्रैविध्योपदेशः । ४ एतान्यपि कर्माणि नित्यानि श्रौतैस्तुल्यानि आहिताग्नेरपीत्युक्तिः । ५ पाकयज्ञानामर्थवादरूपं ब्राह्मणम् । १अ० १क० । १ सायम्प्रातःपक्वविधहोमः । २ देवयज्ञः । ३ स्वाहाकारेण बलिहरणम् । ४ बलिप्रदानार्हदेवतानिर्णयः । ५ दिक्षु देवताभ्यो देवताइरूपेभ्यो बलिहरणम् । ६ मध्ये ब्रह्मणे ब्रह्मइरूपेभ्यश्च बलिहरणम् । ७ मध्ये विश्वेभ्यो

देवेभ्यो बलिहरणम् । ८ मध्ये, दिवसे, दिवाचारिभ्यो भूतेभ्यो बलिहरणम् । ९ रात्रौ, नक्तञ्चारिभ्यो भूतेभ्यो बलिहरणम् । १० सर्व्वगेषे रक्षोभ्यो बलिहरणम् । ११ पितृयज्ञे प्राचीनावीती अन्यत्र निनयादिषु दक्षिणावीतोत्यृक्षिः । १अ० २क० । १यज्ञभागकर्म्मणां होमविधिः । २ पवित्राभ्यामाज्यस्योत्पवनम् । ३पवित्रलक्षणोत्पवनयोर्निर्णयः । आज्यहोमेषु परिस्तरणं कार्य्यं वा नवेति निर्णयः । ५ पाकयज्ञेषु आज्यभागौ कार्य्यौ वा नवेति निर्णयः । ६ धन्वन्तरियज्ञं शूलगवञ्च वर्जयित्वा सर्वेषु पाकयज्ञेषु ब्रह्मा कार्य्यो वा नवेति निर्णयः । ७ अनादेशे नामधेयेन होमः । ८ अनादेशे देवतानिर्णयः । ९ एकवर्हिरादियज्ञाः समानकालिकाः । १० पूर्व्वोक्तस्य प्रमाणार्थं यज्ञगाथोदाहरणम् । १अ० २क० । १चौलकर्म्मादीनां कालविधिः । २एके आचार्य्याः सर्व्वस्मिन् काले विवाहमिच्छन्ति । ३ आज्यहोमः । ४ अग्नाऊतयोव्याहृत्याऊतयश्च । ५ उभयाऊतिसमुच्चयपक्षः । एके अनादेशाऊतिमिच्छन्तीत्युक्तिः । ७तेषामाऊतयः । १अ०४क० ।१ वंशपरीक्षा । २ वरगुणकथनम् । ३कन्यागुणकथनम् ।४ परीक्षान्तरम् । ५ चेलाद्यष्टस्तुतिखण्डैः परीक्षा । ६ पित्र्यानां सद्विशेषकथनम् । १अ०५क० ।१ ब्राह्माद्यविधिविवाहोक्तिः । १अ० ६क० । १ विवाहे देशधर्म्मग्रामधर्म्मकुलधर्म्माणां कर्त्तव्यता । २ जनपदादिधर्म्मस्य सर्व्वत्र समानत्वमित्युक्तिः । ३ पाणिग्रहणविधिः । पुत्रकामिना अङ्गुष्ठस्य ग्रहणम् । ४ दुहितृकामिना अङ्गुलेर्ग्रहणम् । ५ उभयकामिना अङ्गुष्ठाङ्गुलिसहितहस्तस्य ग्रहणम् । ६ अग्न्युदककुम्भप्रदक्षिणे वधूजप्यमन्त्रः । ७अश्मारोहणे आचार्य्यजप्यमन्त्रः । ८लाजहोमप्रकारः । भ्रात्रादिर्हिलाजानावपतीत्युक्तिः । ९ वरोजामदग्न्यश्चेत् सिलाँजानावपति । १० लाजेषु हविरवधारणम् । ११ वरकर्त्तृकमवदानम् । १२अवदानस्य सर्व्वत्रातिदेशः । १३ वरकर्त्तृकहोममन्त्राः । १४ अमन्त्रकं स्रुपुटेन वधूकर्त्तृकं लाजदानम् । १५ एके लाजानोप्य पश्चात्परिणयमाहुरित्युक्तिः । १६शिखाविमोचनम् । १७दक्षिणशिखाविमोचनम् । १८ उत्तरशिखाविमोचनम् । १९ सप्त पदीगमनम् । २० उभयोः शिरसि उदकसेचनम् । २१श्यामान्तरगमने अन्तरा वसतिः ।१२ ध्रुवारुन्धत्यादिं दृष्ट्वा वाग्विसर्जनम् । १अ०७क० ।१ यानारोहणमन्त्रः । २नावारोहणमन्त्रः । ३उदकादुत्तारणमन्त्रः । ४वधूर्यदि रोदिति तदा ऋग्विशेषं जपेत् । ५विवाहाग्निं गृहीत्वा गन्तव्यम् । ६ देशदृष्टचतुष्पथादौ जप्यमन्त्रः । ७पथिकादृष्टकाः सन्ति चेत् तदोक्षणमन्त्रः । ८ गृहप्रवेशमन्त्रः । ९ उपवेशनदधिप्राशनहृदयाञ्जनादयः । १०विवाहावधि ब्रह्मचर्य्यधारणादिः । ११ त्रिरात्रं द्वादशरात्रं वा ब्रह्मचर्य्यधारणम् । १२ संवत्सरं वा ब्रह्मचर्य्यधारणम् । १३व्रतानन्तरं वधूवस्त्रदानम् । १४ब्राह्मणेभ्योऽन्नदानम् । १५ स्वस्तिवाचनम् । १अ० ८क० । १ पाणिग्रहणप्रभृतिगृह्याग्निपरिचरणम् । २ अग्नौ नष्टे प्रायश्चित्तं कृत्वा पुनरग्निपरिग्रहणम् । ३ एके अग्न्युपयाग्नौ पत्न्या उपवासं वदन्तीत्युक्तिः । ४तदग्निपरिग्रहणं अग्निहोत्रविधानेनेत्युक्तिः । ५होमादिकालव्यवस्था ।६होमद्रव्याणि । ७ उक्तद्रव्याभावे द्रव्यान्तरप्रतिनिधिः। ८सायंप्रातर्होमः । १अ०९क०। पार्व्वणस्थालीपाकः । २भोजननियमः । ३ ब्रह्मबर्हिषोर्ब्रह्मनम् । ४ तद्देवता । ५ कास्यदेवता । ६ स्रुक्सृष्टिनिर्व्वपणम् । ७ स्रुक्सृष्टिप्रोक्षणम् । ८ अवघातप्रक्षालनेनानेकत्र अपवानि । ९ एकत्र अपवं वा ।१०नानाअपवप्रकारः । ११ एकत्र अपवप्रकारः । १२ आज्योत्पवनादिः । १३ आघाराज्यभागौ स्विष्टिकृद्धोमश्च । १४ आग्नेयादिहोमः । १५ आज्यभागयोर्यज्ञचक्षुरूपत्वम् । १६ यज्ञपुरुषस्य उपवेशननियमः । १७ अग्नेरुत्तरपूर्व्वदेशे होमः।१८हविःस्थापनदेशः ।१९पशाद्धर्त्तिहोमनिर्णयः । २०स्विष्टिकृद्धोमनियमः । २१स्विष्टिकृद्धोमे हविःशेषाभावः ।२२स्विष्टिकृद्धोममन्त्रः ।२३पूर्णपात्रनिनयनम् । २४ पूर्णपात्रनिनयनकालः ।२५पाकयज्ञतन्त्रम् । २६दक्षिणादानम् । १अ०१०क० । १ पशुकल्पः ।२पशूपस्पर्शनम् । ३ पशुप्रोक्षणम् । ४पशुनिनयनम् । ५ मन्त्रवर्जम् पशुनिनयनम् । ६ उल्मूकाहरणम् । ७ शामित्रोक्तिः । ८ पशुन्यारम्भणम् । अन्यारम्भे कर्त्तृकथनम् । १० वपाहोमः । ११स्थालीपाकश्रपणम् । १२ पशुवदानं स्थालीपाकहोमश्च । १३अवदानसहितहोमो वा । १४ मन्त्रैकावदाने द्विर्द्विरवदानम् । १५ तूष्णीं हृदयशूलावरणम् । १अ०११क० । १ चैत्यवृक्षे स्विष्टिकृतः प्राक् बलिहरणम् । २ विदेशस्थचैत्यपक्षे पलाशदूतेन बलिहरणम् । ३ भयसम्भावनायां दूताय यष्टिदानम् । ४ नद्यन्तरा चेत् ध्रुवदानम् । ५ धन्वन्तरि-

चैत्यचैत्युरोहिताय बलिहरणम् । १अ० १२क० । १ पुंसवनम्, अनवलोभनञ्च । २ तृतीयमासे पुष्यनक्षत्रे उपोष्य तुल्यवर्षावत्सायागोर्दधिमात्रया प्राशनम् । ३प्रश्नवचनम् । ४ त्रिःप्राशनम् । ५ दूर्वारसस्य नासिकायां सेचनम् । ६ नक्षत्रहरणम् । ७ हृदयस्पर्शमन्त्रः । १अ० १३क० । १ सीमन्तोन्नयनं कर्म । २ तस्य कालनिर्णयः । ३ होममन्त्रः । ४सीमन्तव्यूहनम् । ५चतुर्धा व्यूहनम् । ६ वीणागाथकप्रेषणम् । ७गेयगाथाकथनम् । ८ब्राह्मणयो यद्भूयुस्तदाचरणम् । ९दक्षिणादानम् । १अ० १४क० । १ जातकर्म । २ मेधाजननजपः । ३ अंसस्पर्शनम् । ४ नामकरणम् । ५नामलक्षणम् । ६ चतुरक्षरं वा नाम । ७नाम्नि कामनाभेदेनाक्षरनिर्णयः । ८पुंनामधेयानि युग्माक्षराणि । ९ स्त्रीनामधेयानि अयुग्माक्षराणि । १० येन नाम्ना उपनीतः तेनाभिवादनं कुर्यात् । ११ मूर्द्धावघ्राणे मन्त्रजपः । १२ कुमार्या अमन्त्रकं कर्म । १अ० १५क० । १ अन्नप्राशनम् । २ अजमांसान्नाशनम् । ३तित्तिरिमांसान्नाशनम् । ४ घृतौदनान्नाशनम् । ५ अन्नाशनमन्त्रः । ६ कुमार्या अमन्त्रकम् । १अ० १६क० १ चौलं कर्म । २पूर्णपात्राधानम् । ३ कुमारावस्थानं द्रव्यासादनञ्च । ४ कुशपिञ्जूलहस्तकुमारपित्रवस्थानम् । ५ब्रह्मा वा कुशपिञ्जूलानि धारयेत् । ६ अपां निनयनमन्त्रः । ७ शिरउन्दनमन्त्रः । ८ कुशपिञ्जूलनिधानमन्त्रः । ९ तेषु ताम्रक्षुरस्थापनमन्त्रः । १० केशच्छेदनमन्त्रः । ११ केशस्थापनम् । १२ द्वितीयस्य तृतीयस्य मन्त्रौ । १३चतुर्थस्य मन्त्रः । १४ एवमुत्तरतस्त्रिर्वारम् । १५क्षुरधारशोधनमन्त्रः । १६ नापितानुशासनम् । १७ केशसन्निवेशकरणम् । १८ कुमार्या अमन्त्रकम् । १अ० १७ १ गोदानं कर्म । २ तत्र कालनिर्णयः । ३ मन्त्रे केशशब्देषु श्मश्रुशब्दकरणम् । ४ श्मश्रुवपनम् । ५क्षुरधारशोधने विशेषमन्त्रः । ६ नापितानुशासनम् । ७ आचार्याय दानप्रार्थना । ८ गोमिथुनदक्षिणादानम् । ९ संवत्सरव्रताचरणादेशः । १अ० १८क० । १ उपनयनम् । अष्टमे वर्षे ब्राह्मणस्य । २ गर्भाष्टमे वर्षे वा । ३ एकादशे वर्षे क्षत्रियस्य । ४ द्वादशे वैश्यस्य । ५ आ षोडशात् ब्राह्मणस्य नातीतः कालः । ६आ द्वाविंशात् क्षत्रियस्य, आ चतुर्विंशात् वैश्यस्य ।७अत ऊर्ध्वम् अकीर्णप्रायश्चित्तान् नाध्यापयेत् । ८ संवीतचर्मनिर्णयः । ९ परिधेयवासोनिर्णयः । १० मेखलाधिकारः । ११ जातिभेदे मेखलानिर्णयः । १२ दण्डाधिकारः । १३ जातिभेदे दण्डनिर्णयो दण्डपरिमाणञ्च । १अ० १९ क० । १ सर्वे दण्डाः सर्वेषां वा भवन्ति । २आचार्यान्तिके उपवेशननिर्णयः । ३ब्रह्मचारिण उपवेशननिर्णयः । ५ साङ्गुष्ठपाणिग्रहणम् । ५पाणिग्रहणमन्त्रः । ६आदित्यावेक्षणम् । ७ तत्र जप्यमन्त्रः । ८प्रदक्षिणावर्त्तनम् । हृदयस्पर्शनम् । १० अमन्त्रकं समिदाधानम् । १अ० २० क० । १ एकमते मन्त्रेण समिदाधानम् । २ मुखमार्ज्जनम् । ३तेजसा मार्जनम् ।४ सावित्र्युपदेशप्रार्थना । ५सावित्र्युपदेशः । ६सावित्रीवाचनम् । ७ ब्रह्मचारिणो हृदयदेशे ऊर्ध्वाङ्गुलिस्थापनं मन्त्रश्च ।१अ० २१क० । १ब्रह्मचर्य्यादेशः । २ ब्रह्मचर्य्यादेशमन्त्रः । ३ वेदब्रह्मचर्यकालनिर्णयः । ५ वेदग्रहणान्तं वा ब्रह्मचर्य्यं भवति । ५ भिक्षाकालनिर्णयः । ६ समिदाधानकालनिर्णयः । ७प्रथमभिक्षानिर्णयः । ८भिक्षामन्त्रः । ९भैक्ष्यमाहृत्याचार्य्याय निवेदनम् । १० पाकयज्ञः । ११ आधाराज्यभागान्तहोममन्त्रः । १२ सावित्र्या द्वितीयम् । १३ महानाम्न्यादिहोमः । १४ऋषिस्तृतीयम् । १५सौविष्टकृतं चतुर्थम् । १६ वेदसमाप्तिवाचनम् । १७ ब्रह्मचर्य्यव्रतधारणम् । १८ मेधाजननम् । १९ उदकुम्भाभिषेकवाचनम् । २० व्रतादेशशेषः । २१ अनुपेतस्य विधिविशेषः । २२ उपेतस्य विधिः । २ शतमलतञ्च । २४ गोदानमनूक्तम् । २५ कालोऽनिरुक्तः । २६ प्रायश्चित्तार्थं सावित्र्यन्तरम् । १अ० २२क० । १ ऋत्विग्लक्षणम् । २ एके युवानं वदन्ति । ३ वरणनिर्णयः । ४ वरणविशेषनिर्णयः । ५ सदस्यवरणम् । ६ वरणविशेषः । ७ होतृवरणमन्त्रः । ८ ब्रह्मवरणमन्त्रः । ९ अध्वर्य्वादिवरणमन्त्रः । १० होतृप्रतिज्ञा । ११ब्रह्मप्रतिज्ञा ।१२अपरप्रतिज्ञा जप्यमन्त्रश्च ।१३याज्यलक्षणम् ।१४ । १५ । १६ । १७ । १८ याज्यनिर्णयः ।१९सोमप्रवाकप्रश्नः ।२० कल्याणैः सह संप्रयोगः । २१तत्र निधिद्वानि । २२ आज्याहुतिहोमः । २३अनाहिताग्निसंस्कारशेषः । १अ० २३क० १ऋत्विजे मधुपर्काहरणम् । २ एवं स्नातकाय, विवाहार्थिने । ३ राज्ञे उपस्थिताय । ४ आचार्य श्वशुर पितृव्य मातुलेभ्यः । ५ मधुपर्कस्वरूपनिर्णयः । ६ सम्बन्धाभे कृतद्रव्यप्रतिनिधिः । ७ आसनपाद्यार्घाचमनीयानि गाञ्च निक्षिपेदेवेत् । ८ आसनप्रक्षेपे मन्त्रप्रकारौ ।

६ पादप्रक्षालननिर्णयः । १० वामपादादिप्रक्षालनम् । ११ अर्घ्यग्रहणम् । १२ अर्घ्यग्रहणमन्त्रः । १३ मधुपर्कग्रहणमन्त्रः । १४ मधुपर्कग्रहणादिमन्त्राः । १५ विरूढरणम् । १६ मधुपर्कभोजनम् । १७ सर्व-भक्षणनिषेधः । १८ हविर्निषेधः । १९ अवशिष्टमधुपर्क-प्रक्षेपः । २० सर्वभक्षणं वा । २१ आचमनम् । २२ द्वि-तीयाचमनम् । २३ आचान्तोदकाय गोदानम् । २४ आ-लम्भनपक्षे जपोऽनुक्ता च । २५ उत्सर्गपक्षे उत्स-र्गमन्त्रः । २६ मधुपर्काङ्गं भोजनममांसं न भवति । १अ० २४क० ।

२ अध्याये । १ अवघाकर्मकालः । २ सक्तुकलश-दर्व्यौस्थापनम् । ३ दिवाकृतदानादि । ४ अस्तमिते स्थालीपाकहोमः । ५ अवस्थाननिर्णयः । ६ पुरोड़ाशो-परिहोमः । ७ धानाऽञ्जलिहोमः । ८ उक्तशेषस्य प्रतिपत्तिः ९ सर्पबलिहरणम् । १० प्रदक्षिणोपवेशने परिदान-मन्त्रश्च । ११ अमात्याय परिदानम् । १२ परिदानान्त-रम् । १३ बलिमात्मानं चान्तरा न व्यवेयुरन्ये ।१४ सायं-प्रातर्बलिहरणम् । १५ प्रकारान्तरबलिहरणम् । २अ० १क० आश्वयुज्याम् आश्वयुजीकर्म । २ स्थालीपाक-होमः । ३ घृतहोमः । ४ आहिताग्नेः आग्रहाय-मन्त्रेतायां स्थालीपाकश्च । ५ अनाहिताग्नेर्लौकिकेऽग्नौ-२अ० २क० । मार्गशीर्ष्यां चतुर्ष्वाम् प्रत्यवरोहण-कर्म । २ पौर्णमास्यां वा । ३ पायसहोममन्त्रौ । ४ स्विष्टकृद्विधेः । ५ ध्यानं तन्मन्त्रश्च । ६ पुनर्जप्य-मन्त्रः । ७ अमात्यप्रवेशः । ८ द्वारद्वारतर प्रवेशः । ९ मन्त्र-विदो मन्त्रजपः । १० उत्थाय विर्जप्यमन्त्रः । ११ दिदिक्षु-स्थानां जपब्राह्मणभोजनस्वस्त्ययनानि, चतुर्थजप्यमन्त्रश्च १२ स्वस्त्ययनवाचनम् । २अ० ३क० । १ अष्टकाकर्मकालः । २ एकस्याम् अष्टम्यां वा । ३ पूर्वेद्युर्दिवसे सप्तम्यां पितृभ्यो दानम् । ४ तत्र ओदनक्षीरपायसानां त्रयाणम् । ५ चतुःशरावपरिमितधान्यं पिष्ट्वा पूपत्रयपणम् । ६ मन्त्रा एकैकहोमः, यावद्भिः कामयेत तावद्भिर्वा । ७ परदिने अष्टम्याम् अष्टका, पशुना स्थालीपाकेन वा । ८ अनु-द्युहो यवसमाहरेद्वा । ९ तयाणामप्यसम्भवे अग्नि-ना कक्षं दहेत् । १० यवसदाने कक्षदाहे मनसा ध्यानम् । ११ चतुर्णामेकस्याप्यनुष्ठाने नानष्टकः स्यात् । १२ देवताविकल्पप्रदर्शनम् । १३ वपाहोममन्त्रः । १४ सप्त होममन्त्राः । १५ स्विष्टकृति अष्टमहोमः । १६ ब्राह्मणभोजनोत्तरं स्वस्त्ययनवाचनम् । २अ० ४क० । १ आन्वष्टक्यं तदुत्तरनवम्यां कार्यम् । २ मांसकल्पादि । ३ पिण्डपितृयज्ञकल्पत्वप्रदर्शनम् । ४ पितृभ्यः मधुमन्थवर्जं पिण्डनिपरणम् । ५ मातृपितामहीप्रपितामहीभ्यः सुराच-मेन पिण्डनिपरणम् । ६ अवटसंख्यानिर्णयः । ७ पित्रा-दिपिण्डस्थानम् । ८ मात्रादिपिण्डस्थानम् । ९ भ्रातृव्यापरप-त्नीयसपत्न्यादिदिनत्रये कर्त्तव्ये साध्यावर्षे उक्तधर्मातिदेशः । १० कृष्णपक्षे अयुग्मासु तिथिषु आन्वष्टक्यवत् । मासि मासि पितृभ्य एव श्राद्धं कर्त्तव्यं न मात्रादिभ्यः । ११ आन्वष्टक्ये नवावरान् भोजयेत् ।१२ अशक्तौ सप्त पञ्च त्रीन् एकं वा । १३ दक्षिकर्मणि पूर्तकर्मणि च युग्मान् भोजयेत् । १४ इतरत्र युग्मब्राह्मणभोजनम् तिलस्थाने यव-दानञ्च । २अ० ५क० । १ रथारोहणात् पूर्वं तत्-स्पर्शनमन्त्रः । २ अक्षस्पर्शनमन्त्रः । ३ आरोहणक्रमस्त-न्मन्त्रश्च । ४ रश्मिस्पर्शनमन्त्रः । ५ गमनप्रवर्त्तमानेषु रथेषु जप्यमन्त्रः । ६ शकटाद्यारोहेऽपि तस्य जपः ।७ शकटाद्यक्षस्पर्शनमन्त्रः । ८ नावारोहणमन्त्रः । ९ नवरथे विशेषः ।१० कुटुम्बोपयोगिद्रव्याहरणम् ।११ स्टहसमीपाग-मनम् ।१२ रथावरोहणमन्त्रः ।१३ नवरथावरोहणमन्त्रः । १४ तत्र जप्यमन्त्रः । १५ तत्र पुनर्जप्यमन्त्रः । २अ० ६क० । १ वास्तुपरीक्षा । २ भूमिलक्षणम् । ३ भूमेरपरलक्षणम् । ४ भूमेरन्यलक्षणञ्च ।५ विरूढदुष्टवृक्षोत्पाटनम् । ६ भूमेरुच्च-निम्नतानिर्णयः । ७ भोजनस्टहस्थाननिर्णयः । ८ तत्-फलम् । ९ सभास्टहस्थाननिर्णयः । १० तत्फलम् । ११ तदपरस्थाननिर्णयः २अ० ७क० । १ वास्तुपरीक्षण क्रमः । २ तत्र खातखननं ततूपूरणञ्च । ३ प्रशस्तमध्य-मगर्हितवास्तुनिर्णयः । ४ अस्तमितेऽर्के जलैस्तत्पूरणम् । प्रशस्तमध्यमगर्हितनिर्णयः । ६ ब्राह्मणवास्तुनिर्णयः । ७ क्षत्रियवास्तुनिर्णयः । ८ वैश्यवास्तुनिर्णयः । ९ वस्त्र-फलैः वास्तुकर्षणम् । १० समचतुष्कोणं दीर्घं वा । ११ वास्तुप्रोक्षणम् । १२ अविच्छिन्नधारया प्रोक्षणे मन्त्रः । १३ अवान्तरस्टहप्रभेदनिर्णयः । १४ स्थूणानां गर्त्तेषु विशे-षविधिः । १५ मध्यमस्थूणागर्त्ते विशेषः । १६ मध्यमस्थूणा-गर्त्ते मन्त्रः ।२अ० ८क० ।१ वंशाधानानुमन्त्रणम् । २ वंशा-धानमन्त्रः ।३ मणिकप्रतिष्ठापनम् । ४ तन्मन्त्रान्तरविधानम् । ५ मणिकसेचनमन्त्रः । ६ वास्तुदोषशमनम् । ७ तत्प्रो-क्षणम् । ८ अविच्छिन्नजलधारादानम् । ९ स्थालीपाक-श्रपणादि शिववाचनञ्च ।२अ० ९क० । १ स्टहप्रपदनम् ।

२बीजवदुष्टङ्प्रपदनम् ।३तत्कालनिर्णयः । ४ तत्र होमकर्म्म । ५ अनुमन्त्रणम् । ६आयतीनां गवामनुमन्त्रणे मन्त्रः । ७एके अन्यरूक्तमिच्छन्ति । ८अयातीनां गवामनुमन्त्रणे । २अ०१०क०

तृतीयाध्याये पञ्चयज्ञादिसङ्ग्राह्यानि कर्माणि । १ पञ्चयज्ञप्रतिज्ञा । २ पञ्चानां नामकथनम् । ३पञ्चानां स्वरूपकथनम् । ४तेषामङ्गरङ्गकर्त्तव्यता । ३अ०१क०। १ स्वाध्यायविधिः। २ स्वाध्यायाध्ययननियमः । ३ ओंपूर्व्वां व्याहृतीः समस्ता ब्रूयात् । ४ सावित्र्यध्ययननियमः । ३अ० २क० । १ स्वाध्यायक्रमः । २ अध्ययने दैशाङ्गतिनिर्णयः । ३ अध्ययने पैत्राङ्गतिनिर्णयः । ४ अध्ययने कालावधिनिर्णयः । २अ० ३क० । १ देवतर्पणम् । २ ऋषितर्पणम् । ३ प्राचीनावीती । ४ आचार्य्यतर्पणम् । ५ पितृतर्पणम् । दक्षिणावीती । ६तिथिविशेषादौ निषेधवचनं नित्यस्वाध्यायस्यैव, न ब्रह्मयज्ञस्य । ७ब्रह्मयज्ञानध्यायः ३अ०४क०। १ अध्ययनप्रारम्भः । २ अध्ययनकालनिर्णयः । ३तत्र कालान्तरम् । ४ आज्यभागाङ्गतिः । ५ दधिसक्तुहोमः । ७होममन्त्रः ।७तत्रान्ये ह्रचा मन्त्राः । ८ एकोमन्त्रः । ९ तत्रापरोमन्त्रः । १० देवताहोमादिमार्जनम् । ११ जपनियमः । १२ व्याहृतिसावित्रीजपोवेदारम्भश्च । १३उत्सर्गविधिः । १४अध्ययनकालनिर्देशः । १५ ब्रह्मचारिधर्म्मयुक्तोऽधीयीत । १६ ब्रह्मचारिणामपि अध्ययनम् । १७ समाप्तस्तोजायां गच्छेदित्येके । १८प्रजोत्पत्त्यर्थं जायागमनमपरे । १९ उपाकरणकर्म्म । २० माघ्यां पौर्णमास्यां तत्करणम् । २१ तत्र सावित्र्यादितर्पणम् । १२आचार्य्यादितर्पणम् । २३ ततः षण्मासोत्तरमुत्सर्जनकर्म्म । ३अ० ५क० । १ काम्यकर्म्मस्थाने पाकयज्ञः । पुरोडाशस्थाने चरुः । २ कामप्राप्तिफलम् । ३ नैमित्तिकहोमः । ५ होममन्त्रः । ६अशुभस्वप्नदर्शने उपस्थानमन्त्रः । ७ तत्र मन्त्रान्तरम् । ८ जृम्भणादौ जप्यमन्त्रः । ९ अगमनीयगमनादौ आज्यहोमः । १० तत्र समिदाधानं वा । ११ तत्र मन्त्रजपो वा । ३अ०६क०। १अभ्युदितेऽर्के स्वपतः प्रायश्चित्तम् २ तत्र मन्त्रचतुष्टयम् । अभिनिर्मुक्तस्य प्रायश्चित्तहोमः । ३ सन्ध्योपासनम् । ४ तत्र सायङ्काले कर्त्तव्यभेदः । ५ तत्र प्रातर्नियमभेदः । ६ तत्र कालनिर्णयः । ७ कपोतपाते होमजपौ । ८ अर्घार्थं गच्छतो होमजपौ । ९ नष्टं वस्तु लब्धुमिच्छतो होमजपौ । १० मङ्गलमध्वानं गमिष्यतो होमजपौ । ३अ०७क० । १ समावर्त्तनम् । तत्र आचार्य्याय आत्मने वा एकादशद्रव्याहरणम् । २उभयोर्हेरण्यद्रव्यालाभे आचार्य्यायैव दानम् । ३ समिदाहरणनियमः । ४ कामनाविशेषे समिद्विशेषः । ५उभयकामस्यार्द्रशुष्का समित् । ६ समिदाधानादि गोदानम् ।७मन्त्रान् आत्मवाचकान् कुर्य्यात् ।८करङ्गोन्मर्दनम् । ९ स्नानाञ्जनविधिः । १० कुण्डलबन्धनम् । ११ अनुलेपनविधिः । १२ स्रग्बन्धनम् । १३ छात्रविधिः । १४ छत्रादानम् । १५ वैणवदण्डादानम् । १६मणयुष्णीषसमिधादानम् । ३अ०८क० ।

तृतीये १ उपदेशमन्त्रः । २ प्रत्यृचं समिदाधानम् । ३ मधुपर्केण पूजनम् । ४ अनुज्ञाते समावर्त्तनस्नानम् । ५ व्रतविशेषः । ६ निषेधविशेषः । ७ निषेधान्तरम् । ८ स्नातकस्य माहात्म्यम् । ३अ०९क० । १ गुरवे नामकथनम् । २ उपवेशनानुज्ञा । ३ उच्चैर्नामकथनम् । ४ उपांशुकथने मन्त्रः । ५ शिष्यस्य उपांशुकथने मन्त्रः । ६आचार्य्यं जप्यमन्त्रः । ७जपान्तरम् अनुमन्त्रणञ्च । ८ तत्प्रशंसा । ९ पक्षिणाम् अमनोज्ञा वाचः श्रुत्वा जप्यमन्त्रः । १० स्रगस्थामनोज्ञा वाचः श्रुत्वा जप्यमन्त्रः । ११ भयप्राप्तौ जप्यमन्त्रः । ३अ०१०क० । १सर्व्वाभ्योदिग्भ्यो भयप्राप्तौ जप्यमन्त्रोहोमश्च । २तत्र जप्यमन्त्रः स्तुतिविशेषश्च । ३अ०११क०। १राजसङ्ग्राहनम् । २तत्र जप्यमन्त्रः। ३राज्ञे कवचदाने मन्त्रः । ४ धनुर्दाने मन्त्रः । ५ राज्ञोजप्यमन्त्रः । ६ स्त्रीयजप्यमन्त्रः । ७इषुधिदाने मन्त्रः । ८रथगमने जप्यमन्त्रः । ९अश्वानुमन्त्रणम् । १०इषूनवेक्षमाणस्य जप्यमन्त्रः। ११संनह्यमानराजजप्यमन्त्रः । १२सारथिनारोप्यमाणे रथे जप्यमन्त्रः। १३राजेक्षणमन्त्रः । १४सौपर्णमन्त्रः । १५अनुक्रमेण रथगमनम् । १६युद्धप्रदेशनिर्णयः । १७दुन्दुभिवादने मन्त्रः ।१८वाणत्यागमन्त्रः । १९युध्यमाने राजनि पुरोहितजप्यमन्त्रः ।२०तत्पुनर्ग्रहणमन्त्रः।३अ०१२क०

चतुर्थाध्याये । आहिताग्नेः पौर्ण्णमासादिश्रान्तीयजपान्तानि कर्माणि ।१ व्याधिपीडितस्याहिताग्नेः कर्त्तव्यम् ।२यामकामत्वे प्रमाणम् ।३यामे वासत्यत्वे प्रमाणम् । ४अगदः सोमादिभिरिष्ट्वा यामं प्रविशेत् । ५ अनिष्ट्वा वा यामं प्रविशेत् । ६मृतस्याहिताग्नेश्चितावभूमिखननम् । ७खातस्य निष्कोषतानिर्णयः। ८खातस्य आयामनिर्णयः ।

६ खातस्य विस्तृतिनियमः । १० खातस्य अधोनिर्णयः । ११ श्मशानदेशनिरूपणम् । १२ तत्स्थानस्य बहुलौषधिकत्वम् । १३ कण्टकिवृक्षाद्युद्धासनम् । १४ दहनजलप्रक्षेपणस्य विशेषविधिः । १५ प्रेतस्य केशादिवपनम् । १६ बर्हिराज्यादिसंस्थापनम् । १७ पृषदाज्यनयनम् । ४अ०१क० । १ अग्नियज्ञपात्रादिनयनम् । २ प्रेतनयनकर्तृनिर्णयः । ३ शकटादिना प्रेतनयनमित्येके । ४अनुस्तरणीपशुस्त्रीनयनम् । ५ अनुस्तरणीं गामाजरेके क्रयणाम् एकवर्णामजामित्यपरे ८ पशोः सव्यबाहुबन्धनं कृत्वा आनयनम् । ६ तदनुज्ञमात्यादीनामागमनम् । १० दाहकर्तुः कर्तव्यभेदः । ११दक्षिणपूर्वदेशे आहवनीयनिधानम् । १२उत्तरपश्चिमे गार्हपत्यनिधानम् ।१३दक्षिणपश्चिमे दक्षिणाग्निनिधानम् । १४ चिताग्निचयनम् । १५ चितायां प्रेतसंवेशनम् । १६ प्रेतपत्नीसंवेशनम् । १७ क्षत्रियप्रेतस्य धनुःसंवेशनम् । १८ देवरादिना पत्न्याउत्थापनम् । १९तत्र दग्धे उत्थापके कर्त्ता, देवरे तेनैव मन्त्रस्य जपः । २०धनुरपनयने मन्त्रः । २१ पुनः कर्तृत्थापकयोर्मन्त्रजपः । २२ धनुर्भङ्गा क्षेपः । ४अ०२क० । १ पात्रयोजनम् । २दग्धहस्ते जुहूयोजनम् । ३सव्ये उपस्तरानयनम् । दक्षे पार्श्वे स्थस्य सव्येऽग्निहोत्रहवन्या योजनम् । ५ उरःप्रभृतिषु स्रुवादिनिधानम् । ६ नासिकयोः स्रुवाधानम् । ७ एकां स्रुवं भित्त्वा नासिकाद्वये योजनम् । ८ कर्णयोः प्राशित्राधानम् । ९ एकञ्चेत् भित्त्वोभयत्र तन्निधानम् । १० उदरे हविः पात्रीनिधानम् । ११ तत्र समवत्तधानचमससंयोजनम् । १२ उपस्थे शम्याधानम् । १३ अरणीसूर्योः, उदूखलमुसले जङ्घयोर्निदध्यात् । १४ प्रादहये स्रुवनिधानम् । १५ एकञ्चेत् छित्त्वा निधानम् पूर्ववत् । १६ आसेचनपात्रे पृषदाज्यपूरणम् । १७ हविषपलाद्युपयोगद्रव्यनिधानम् । १८ लोहलवणवादिनिधानम् । १९अनुस्तरणी वपामुत्खिद्य तत्र प्रेतस्य शिरोमुखाच्छादनं तनुमन्त्रेण । २० प्रेतपाणेर्वृक्कयोर्निधानम् । २१ हृदये हृदयाधानम् । २२ प्रेतपाणेः पिण्डप्राधानमित्येके । २३वङ्क्राभावे पिण्डप्राधानमित्यन्ये । २४प्रणीताप्रणयनानुमन्त्रणे । २५दक्षिणजानुपातेन दक्षिणाग्नौ चतुराज्याहुतिहोमः। २६प्रेतस्योरसि पञ्चमाहुतिहोममन्त्रः।३अ०३क०।१युगपदग्निप्रज्वालने प्रेषणम् । आहवनीयस्य प्राक् प्रेतदेहप्राप्तौ प्रेतस्य स्वर्गलोकगतिः पुत्रविशिष्टद्वित्व फलम् । गार्हपत्यस्य तदाप्तौ प्रेतस्यान्तरिक्षलोकप्राप्तिः पुत्रस्य द्वित्व फलम् । दक्षिणाग्नेस्तदाप्तौ प्रेतस्य मनुष्यलोकप्राप्तिः पुत्रस्य द्वित्व फलम् । ५ युगपत्प्राप्तौ सर्वसमृद्धिः फलम् । ६दहनमन्त्रः । ७ दहनप्रशंसा । ८ जानुमात्रे गर्त्तेऽवस्थाय दाहोत्तरमातिवाहिकशरीरमास्थाय धूमेन सह स्वर्गलोकगमनम् । ९ दाहकर्तृजघ्यमन्त्रः पृष्ठतोऽनीक्षित्वा सर्वेषां गमनञ्च । १० सकृत्स्नात्वा प्रेताय जलाञ्जलिं दत्त्वान्यानि वासांसि परिधाय दिवा आनक्षत्रदर्शनात् तत्रावस्थानम् । ११ रात्रौ आदित्यमण्डलं दृष्ट्वा स्वगृहं प्रविशेत् । १२ स्वगृहप्रवेशे द्वाद्यादिपूर्वापरनिर्णयः १३ स्वगृहमागत्य अश्मादीनामुपस्पर्शः । १४ तस्मिन् दिने अन्नं न पचेरन् । १५ क्रीताद्यन्नेन वर्त्तेरन् । १६ सपिण्डानां त्रिरात्रमचारलवणाशनम् । १७मङ्गलगुरुस्मृतौ द्वादशरात्रं तथाशनं दानाध्ययनवर्जनञ्च १८ सपिण्डेषु दशाहं दानाध्ययनवर्जनम् । १९ उपनेतृगुरौ असपिण्डेऽपि दशाहं द्वादशाहं वाऽशौचम् । २०अदत्तासु स्त्रीषु मृतासु दशाहम् । २१ एकदेशाध्यापकेषु त्रिरात्रम् । २२ असपिण्डज्ञातौ त्रिरात्रम् । २३दत्तासु स्त्रीषु त्रिरात्रम् । २४ अदन्तजाते त्रिरात्रम् । २५ असम्पूर्णगर्भे त्रिरात्रम् ।२६ सहाध्यायिषु मृतेषु एकाहम् । २७ समानप्रावीवे श्रोत्रिये एकाहम् । १ अस्थिसञ्चयनम् । २ स्त्रीपुरुषभेदेन कल्पनियमः । ३ प्रोक्षणमन्त्रः । ४सञ्चयने पूर्वापरनिर्णयः । ५ सञ्चयनानन्तरमवधाननिर्णयः । ६ पांशुप्रक्षेपः । ७ पांशुप्रक्षेपानन्तरम् उत्तराङ्गं जपेत् । ८स्फ्यकपालेन कुम्भं पिधाय पृष्ठतोऽनवेक्षं प्रस्थाय गोत्रोद्धार उपस्पृश्य प्रेताय श्राद्धदानम् । ४अ०५क० । १मृतगुरुकस्यान्यतोवाऽपक्षीयमाणपक्षादिकस्यामावस्यायां शान्तिकर्म । २क्रव्यादाग्निहरणम् । ३चतुष्पथे तदग्निपरित्यागः । ४पृष्ठतोऽनवेक्षणादि कृत्वा प्रस्थागत्याप उपस्पृश्य केशादीन् वापयित्वा नवघटादिकृशपिण्डोल्लानकल्पनम् । ५पचनाग्न्यग्निजननम् । ६ अग्निदीपनम् । ७अग्निसेचनम् । ८ अनड्वच्चर्मणश्चमात्यारोहणम् (कर्त्ता भिन्नाः सर्वे पुमांसः स्त्रियश्चामात्याः) । ९परिधिपरिधानम् । १०आज्याहुति चतुष्टयमन्त्रः ।११अमात्याः स्त्रियः तरुणास्तर्णेनवनीतं गृहीत्वा तेनाङ्गुष्ठोपकनिष्ठाभ्यां चक्षुषी आञ्जीरन् ।१२अज्ञमानानां स्त्रीणां कर्त्तावीक्षणम् ।१३कर्तुः अश्माभिमर्शनम्

।१४परिक्रमणजपः । १५क्षिप्तिछेदादिसमापनम् । १६ अक्षतवासस्साच्छादोपवेशनम् । १७ आ उदयादग्नय आसीरन् ।१८होमसमापनम् । ४अ०६क०।१ आद्धाधिकारः । २पार्व्वणकाम्यवृद्धिश्राद्धैकोद्दिष्टपश्वाद्धेषालविप्रलक्षणसंख्ये ।३सपिण्डीकरणभिन्ने यथेष्टं विप्रसंख्या तत्र तु लवणां लय एव कार्य्या इति भेदः। ४पिण्डपितृयज्ञे पक्षानां पिण्डनिपरणादीनां श्राद्धेऽतिदेशः। ५ ब्राह्मणाय जलदानम् ।६दर्भासनदानम् ।७पुनर्जलदानम् । ८अर्घपात्रे तिलावपनं तन्मन्त्रश्च। ९ पितृंश्च कर्म अप्रदक्षिणं कार्य्यम् । १०अर्घदानम् । ११ अर्घदानात् पूर्व्वं जलदानम्। १२अर्घस्थजलनिवेदनम् । १३ अर्घानुमन्त्रणं तन्मन्त्रश्च । १४अर्घ्या आपो यस्मिन् पात्रे एकीकृताः तत् प्रथमपात्रं नोद्धरेत् । ४अ०७क० । १ गन्धादिदानम् । २ अग्नौ करणानुज्ञा । ३ प्रत्यनुज्ञा । ४ अग्नौ करणहोमः । ५ पाणिष्वेव वा होमः । ६ देवपित्रर्थां क्रमेणाग्निसव्यपाणिसव्यत्वे । ७ भोजनपात्रेऽन्नदानविधानम् । ८ हुतशेषान्नदानम् । ९ भोजनपात्रे अधिकान्नदानम् ।१०भोजनात् प्रेषु पात्रमन्त्रः ।११पिण्डार्थमन्नसंहृत्य शेषनिवेदनम्। १२ अनाचान्तेषु पिण्डनिपरणम् । १३आचान्तेषु तदिच्छेके। १४ब्राह्मणानुज्ञानविकिरदानम् । १५अस्तु स्वधेति प्रत्यनुज्ञानम् विसर्जनञ्च ।४अ०८क० । १ अथ वृद्धिगवः । २ तस्य कालादिनिर्णयः । ३ पशुनिरूपणम् । ४पशुलक्षणम् । ५कृष्णबिन्दुयुक्तः पशुरित्येके । ६ जम्बुसदृशं कृष्णं कामं कृष्णीयात् । ७ पञ्चभिषेकः ।८शिर आरभ्य पुच्छदेशपर्य्यन्तमभिषेकः ।९पशूत्सर्गः । १० पशोर्द्वित्रिपर्य्यन्तं पालनम् । ११ तत्र दिग्निर्णयः । १२ग्रामदर्शनायोन्मुखदेशे पालनम् । १३अर्द्धरात्रादूर्द्धमुदितेऽर्के वा काले वृद्धिगवः कार्य्यः । १४यूपनिखननं तत्र पशुबन्धनञ्च । १५प्रोक्षणादि पशुकल्पेन समानम् । १६ विशेषस्तूयं पात्रात्रा पलाशेन वा वपाहोमः । १७हरादि द्वादशनामकः होममन्त्रः । १८ उमादिषड्नामको वा मन्त्रः । १९रुद्रनामको वा मन्त्रः । २०बलिहरणम् । २१चतुर्भिः सक्तैश्चतुर्दिगुपस्थानम् ।२२सर्व्वरुद्रयज्ञे तस्यातिदेशः । २३स्थालीपाकव्रीहीणां तुषफलीकरणानां पुच्छचर्म्मशिरःपादानामन्नावनुहरणम् । (क्षुद्रकणाः फलीकरणाः)२४गांवाल्यमते विशेषः । २५ अङ्गावदानसमये शोणितनिनयनम् । २६ संज्ञपनदेशे भूमौ निपतितं रुधिरं सर्पेश्च उद्दिशेत् । २७ सर्व्वशब्दानां रुद्रनामधेयत्वोक्त्या तस्य सर्व्वात्मत्वम् । २८ अस्यैव सर्व्वा सेनाः । २९ सर्व्वाण्युत्सृष्टान्यस्यैवांगभूतानि । ३० इत्येवं विद्वं यजमानं रुद्रः प्रीणाति ।३१अस्य कर्म्मणो वक्तारञ्च रुद्रो न हिनस्ति । ३२अस्य हुतशेषं न प्राश्नीयादेकमतम् । ३३अस्य द्रव्याणि यानं नाहरेयुः । ३४ नात्यागन्तव्यमिति पुत्त्रादीन् प्रतिषेधयेत् । ३५ नियमेन हुतशेषं प्राश्नीयादिति सिद्धान्तः। ३६ शूलगवस्य फलानि ३७ शूलगवेनेष्ट्वा अन्यं पशुमुत्सृजेत्। ३८सर्व्वथोत्सृष्टपशुर्नैव स्यात् ३९शूलगवनामकेन पशुकर्म्मणा रहितो न भवेत् तेन शूलगवस्य नित्यता । ४० शन्नातीयं जपित्वा स्रुक्प्रवेशः । ४१पशूपतापे गोद्वे अस्यैव रुद्रस्य यजनम् । ४२ स्थालीपाकं निधाय सर्व्वहुतं कुर्य्यात् । ४३ प्रतिधूमं गवानयनम् । ४४ शन्नातीयं जपन् पशूनां मध्यमियात् । ४५समाग्निसंस्थापनार्थं आचार्य्यनमस्कारः । ४अ०४५क०

आश्वलायनस्मृत्यपरिशिष्टप्रतिपादार्थाः । १ आचमनादि सामान्याङ्गम् । २ सन्ध्योपासनाङ्गाचमनादि । ३ मार्जनम् । ४ पापशोधनम् । ५ गायत्रीस्वरूपादि । ६तस्या ध्यानादि । ७ आचमनमन्त्रादि । ८ सन्ध्यायाऋषिदैवतच्छन्दांसि । ९ स्नानविधिः । १० माध्यन्दिन स्नानविधानम् । ११ मन्त्रस्नानम् । १२ वैश्वदेवः । १३ स्वस्तिवाचनादि । १४होमे स्रुग्विलादि । १५स्रुक्स्रुवादिसम्मार्गः । १६ ब्रह्मणः पञ्चकर्म्माणि । १७पार्व्वणस्थालीपाकः । १८ नित्यमौपासनम् । १९ पुनराधानम् । २० अनेकभार्य्यस्य परतऊढाया धर्म्मभागित्वम् । २१ कन्यावरणम् । २२ उपयमनादि । २३ अन्योन्यावलोकनम् । २४ आर्द्राक्षतारोपणादि । २५ अरुन्धतीकृत्यादि । २६ जातकर्म्मादि । इत्येते १अ० गताः

२अध्याये १ यज्ञयज्ञादि । २ यज्ञयज्ञसम्भारादि । ३ अङ्गानाङ्गानि । ४अङ्गविधिः । ५आवाहनमन्त्राः । ६ यज्ञाधामधिदेवतादि । ७ गणपत्यादिदेवतावाहनम् । ८ अग्न्युपधानादि । ९ यजमानाभिषेकः । १० होमविधानादि । ११ भोजनविधिः । १२ शयनादिविधिः । १३ प्रायश्चित्तानि । १४ ब्राह्मणनियमः । १५ गन्धादिदानादिपिण्डपितृयज्ञान्तं कर्म । १६ अग्नौ करणादिकर्म । १७ पिण्डदानादिश्राद्धशेषसमापनान्तं कर्म । १८ अग्निदग्धपिण्डदानादि । १९ आभ्युदयिके विशेषः । इत्येते २अ०गताः पदार्थाः।

तृतीयाध्याये १पितृमेधः । २ अग्निदानानन्तरम् ।

३ अग्निकार्य्यसमापनम् । ४कर्तुरुदकविधिः । ५ पिण्डक्रिया । ६ नवश्राद्धानि । ७ सञ्चयनम् । ८ दशाहकृत्यम् ९ एकोद्दिष्टम् । १० एकोद्दिष्टविधिः । ११ सपिण्डीकरणम् । १२आमश्राद्धम् । १३ अतीतसंस्कारः । १४पाक्षाब्दविधिः । १५ नारायणबलिः । १६ नागबलिः । १७ पुराणमेकोद्दिष्टम् । १८दर्शपोर्णमासौ । १९अ० पदार्थाः । ४अध्याये १पूर्त्तं कर्म्मादीनि अग्निकार्य्यान्तानि कर्म्माणि । १पूर्त्तानि । २ मण्डलादिविधिः । ३प्रतिमाद्रव्याणि । ४ प्रासादप्रतिष्ठादि । ५तदनुष्ठानादि । ६अग्निस्थापनादि । ७देवाभिषेकादि । ८शान्तिप्रतिष्ठादि । ९ वाप्यादिविधिः १०आरामादिविधिः । ११ होमविशेषः । १२प्राचीं दिशमन्वावर्त्तते । १३ दक्षिणां दिशमन्वावर्त्तते । १४ प्रतीचीं दिशमन्वावर्त्तते । १५ उदीचीं दिशमन्वावर्त्तते १६ पृथिवीमन्वावर्त्तते । १७ अन्तरिक्षमन्वावर्त्तते १८ दिवमन्वावर्त्तते । १९ रात्रिमन्वावर्त्तते । २० परमन्वावर्त्तते । २१ सर्व्वा दिशोऽन्वावर्त्तते । २२ अग्निकार्य्यफलम् । ४अ० गताः एते पदार्थाः ।

आश्वायन पुंस्त्री अश्व+गोत्रे अश्वा०फञ्। अश्वर्षेर्गोत्रापत्ये स्त्रियां ङीप् । [अश्वावतानर्षेरपत्ये स्त्रियां ङीप् ।

आश्वावतान पुंस्त्री०अश्वावताननामर्षेरपत्यम् विदा०अञ् ।

आश्वास पु०आ+श्वस–घञ् ।१निर्द्दतौ २आश्वयदाने ३भीतस्य भयनिवारणार्थे व्यापारे ४सान्त्वने च "धारणमाश्वासजननं श्रमभ्रष्ट्वं"सुश्रु० । [२सान्त्वनासम्पादके ।

आश्वासक त्रि० आ+श्वस–णिच्–ण्वुल् । १आश्वासकारके

आश्वासन न० आ–श्वस–णिच्–ल्युट् । १सान्त्वने ।"आश्वासनञ्च कृष्णेन दुःखार्त्तायाः प्रकीर्त्तितम्" भा०आ० १अ० कर्त्तरि ल्यु । २आश्वासकारके "तदिदं द्वितीयं हृदवाश्वासनम्" शक्र० । [तद्भावदर्शनाश्वासि" शक्र० ।

आश्वासिन् त्रि० आ+श्वस–णिनि । प्रत्याशायुक्ते । "मनस्तु

आश्वास्य त्रि०आ+श्वस–णिच्–यत् । १सान्त्वनीये । ल्यप् । २सान्त्वयित्वेत्यर्थे अव्य० ।

आश्विक त्रि० अश्वान् भारभूतान् हरति वहति आवहति वा ठञ् । भारभूतस्याश्वस्य १हारके २वाहके ३आवाहके च । अश्वस्य निमित्तं संयोग उत्पातो वा ठक् । अश्वलाभसूचके ४संयोगे ५उत्पाते ६निमित्ते च ।

आश्विन पु० आश्विनी पूर्णिमा यस्मिन् मासे अण् । स्वनाम ख्याते चान्द्रे मासभेदे"अहमश्वाश्विने तद्वत् सायाह्ने बोधयाम्यहम्" दुर्गाबोधनमन्त्रः । १अश्विमातृप्रधान आसाश्विष्टकानाम् अण् मतोर्लुक् । २इष्टकाभेदे स्त्री ङीप् । "वे हैता आश्वेनीरुपदधाति" शत०ब्रा०८,२,१,११। आश्विनौ देवते अस्य अण् ।३चितिभेदे च"प्रत आश्विनोः पवमानः" ऋ०९,८६,४, पञ्चाश्विन्योऽहरुत्तमेऽपञ्च वैश्वदेव्यः पञ्चप्राणभृतः पञ्चायस्या एकया न विंशतिर्विंशस्तोमा एकचत्वारिंशदुद्वितीया चितिः"शत०ब्रा० । ४यज्ञियकपालभेदे पु० "सौम्येन सहाश्विनो द्विकपालः सर्व्वत्र"कात्या० १२,६,२, "मैत्रावरुणश्च म आश्विनश्च मे इति" यजु० १८,१९, अश्विन्यां भवः अण् ।५अश्विनीकुमारयोः हि०व० । आश्विनौ देवते अस्य अण् । अश्विनीकुमारदेवताके ६ यज्ञे ७अस्त्रे च । आश्वलायनशब्दे उदा० ।

आश्विनी स्त्री अश्विना अश्वाकारवता नक्षत्रेण युक्ता पूर्णिमा नक्षत्राण् ।१आश्वनपौर्णमास्याम् २आश्विनशब्दोक्तार्थे च ।

आश्विनेय पु० द्वि० अश्विन्याः घोटकाकारवत्याः संज्ञायाः अपत्यं ढक् । १अश्विनीकुमारयोः तयोः तस्या उत्पत्तिकथा अरुणात्मजशब्दे २२६पृष्ठे दृश्या । तस्यापत्यं विदा० अञ् ।२नकुले ३सहदेवे च पु० तयोर्मात्रामश्विनीकुमाराभ्यामुत्पादितत्वात् तथात्वम् । "जिगाय समरे वीरानाश्विनेयः प्रतापवान्"भा०स०प०३अ० । अश्वस्यैकाहगमः पन्थाः ढक् । ३अश्वस्यैकाहगम्ये अध्वनि ।

आश्वीन पु० अश्वस्यैकाहगमः पन्थाः वा खञ् । अश्वस्यैकाहगम्ये देशे "सहस्राश्वीनो वा इतः स्वर्गो लोकः" ऐत० ब्रा० । चतुश्चत्वारिंशाश्वीनानि" श्रुतिः ।

आश्वेय त्रि० अश्वा देवता अस्य ढक् । १ तद्देवताके ऋषिरादौ अश्वाया अपत्यम् गुभ्रा०ढक् । २अश्वाभवे ।

आषाढ पु० आषाढी पूर्णिमाऽस्मिन् मासेऽण् । स्वनाम ख्याते चान्द्रे १मासभेदे "आषाढस्य प्रथमदिवसे" मेघदू० "शेते विष्णुः सदाषाढे कार्त्तिके प्रतिबुध्यते" इति पुरा० । आषाढी पूर्णिमा प्रयोजनमस्य अण् । व्रतिनां धार्य्ये पालाशे २दण्डे "उपस्थिताषाढम्" काद० "तत्पुरुषे च सञ्ज्ञीतव्रतेनाषाढिना" काद० । "अषाजिनाषाढधरः प्रगल्भवाक्"कुमा० । ३मलयपर्व्वते पु०भेदि०पृ०ढस्य ढः । आषाढोऽण्युक्तार्थेषु । स्वार्थे कन् आषाढकोऽण्युक्तार्थेषु ।

आषाढा स्त्री आ+सह–क्त "अवर्णाषाढेति" पा० निर्द्देशात् नि० यत्वमोत्वाभावश्च । राशिचक्रस्थे १विंशतितमे २एकविंशे च नक्षत्रे "मूलं पूर्व्वाषाढा प्रथमचाभ्युत्तरांघ्रकोधन्वी । मकरस्तत्परिशेषं श्रवणा चार्द्धं धनिष्ठायाः"इत्युक्तेः सा च पूर्व्वा उत्तरा च । तत्र पूर्व्वस्याः प्रथमपादस्य

धनूराशिषटकत्वमुत्तरायाश्च शेषपादत्रिकस्य मकरराशिषटकत्वम् तत्रार्थे न० च आषाढभूः" मङ्गलग्रहः तस्य तत्र जातत्वात्तथात्वम् ।

आषाढाभव पु० आषाढायां नक्षत्रे भवति भू-अच् । मङ्गलग्रहे आषाढाजातोऽत्रत्व क्विप् । आषाढाभूरत्रत्व ।

आषाढि स्त्री आ+सह-क्विन् नि०न ओत् षत्वञ्च । १सम्यक् सहने "तद्यषाढेः सौश्रमतेयस्योपदधुः" शत० ब्रा० ६,२,१, ३७ । २रतिदेव्याः स्थाने च शब्दार्णवः ।

आषाढी स्त्री आषाढया नक्षत्रेण युक्ता पूर्णिमा "नक्षत्रेण युक्तः कालः" पा० ट्यण् । १आषाढमासीयपौर्णमास्याम् । २यत्तिवेष्टकाभेदे च ।

आषाढीय त्रि० आषाढायां भवः "अविद्याषाढायामिति" पा० तस्येदम् इञ्त्वात् वा छ । १आषाढानक्षत्रे भवे २आषाढसम्बन्धिनि च ।

आष्टम पु० अष्टमोभागः अण् । अष्टमे भागे ।

आष्टृ अग-व्याप्तौ ष्टन् इडिच । आकाशे उज्ज्व० ।

आस उपवेशनेअदादि० आ० अक० सेट् । आस्ते आस्ताम् आसते आसीत आस्ताम् आस्व आस्वहै आस्महै आसिष्ट आसांबभूव आसामास आसाञ्चक्रे आसिता आसिष्यते । आसीनः आसितम् आसितवान् आसितुम् आसिता आस्तिः आसः आसनम् आसना "य आस्ते मनसा स्मरन्" गीता "दिवि देवास आसते" ऋ० १,२०,२ । "आसीतामरणात् क्षान्त्या" नासीत गुरुणा सार्द्धं शिलाफलकनौषु च" इति च मनुः । "सुखितमास्व ततः शरदां शतम्" सा० द० । "निवृत्तमास्यं पिबतात्त शेष्यम्" भट्टिः । "जगन्ति यस्यां सविकाशमासते" माघः । "आसिष्ट नैकत्र शुचा व्यरंसीत्" भट्टिः भावे आस्यते "आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः" मनुः । "इच्छामि नित्यमेवाहं त्वया पुत्र ! सहासितुम्" भा० व० । अ० "जनकोह वैदेह आसाञ्चक्रे" शत० ब्रा० १४,६,१,१ । तूष्णींभूय भयादासाञ्चक्रिरे हरिणद्विषः" भट्टिः "कैलासशिखरासीनम्" तन्त्रम् "आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणाम्" मेघदू० । "आसितं भाषितं चैव मतं यच्चाप्यनुष्ठितम्" रामा० । "जृम्भासितादिलत्" सा० द० । अधि-अध्यारोहणे सक० । गगनमध्यमध्यास्ते दिवाकरः काद० "छायामध्यास्य सैनिकाः "ययौ हरिणाध्यासितशाद्वलानि" इति च रघुः । जम्बूविटपमध्यास्ते परभृता" विक्रमो० । "आचख्यौ दिवमध्यास्य शासनात् परमेष्ठिनः" रघुः । अत्राधारस्य कर्मता । अनु-पश्चादुपवेशनेन सेवने सक० । "अन्वासितमरुन्मत्या स्वाहवेव हविर्भुजम्" रघुः । "इतः सखायमन्वास्ते सदैव धनदं नृपः" भा० स० १० अ० ।

अभि-आभिमुख्येन स्थितौ नैकट्ये च अक० अभ्यासः अभ्यासोवत्ते कपूर्वत्वे निमापद्येरन्" ऋ० उ० ।

उद-औदासीन्ये प्रकृतकर्म्मण उपरमे अक० "विधाय वैरं सामर्षं नरोऽरौ य उदासते" माघः । "उदासीनवदासीनः" गीता

उप-सेवने सक० । "नोपास्ते यश्च पश्चिमाम्" मनुः । "उपास्ते हरिहरौ सकारोऽश्नुते यतः" वाक्यप० । "वायुवच्चानुगच्छन्ति तथा दीनानुपासते" मनुः । "ऋतवस्तमुपासते" कुमा० ।

परि-उप-उपासनस्य प्रकर्षार्थे "यथैव क्षुधिता बालाः मातरं पर्य्युपासते" "पितामहं च के तस्यां सभायां पर्य्युपासते" भा० स० १अ० । (एनम्) "भुजङ्गाः पर्य्युपासते" कुमा० ।

सम्-उप-सम्यगुपासने सक० । "ससुपास्यत पुत्रभोग्यया" रघुः

परि-परितः स्थितौ अक० सम्यक् सेवने सक० । तामेतद्देवाश्च पर्य्यासते ये चेमे ब्राह्मणाः" शत० ब्रा० ।

सम्-सम्यक् स्थितौ उपवेशने च । "भोगिभोगसमासीनम्" "पश्चिमां तु समासीनः" मनुः ।

आस् अव्य० आ+अस्-क्विप्-आस+क्विप् वा । १ स्मरणे २आक्षेपे "आः क एष मयि जीवतीति" सट्टारा० । "आदुरात्मन् इयामङ्गलपाठक !" वेणी० । ३क्रोधे, ४सन्तापे, ५पीडायां सगर्वगर्जने च । "आः किमेतदिति क्रोधादाभाष्य महिषासुरः" देवीमा० । ६खेदे "विद्यामातरमाः प्रदर्श्य नटयन्तु भिक्षामटे निष्कृपाः" उद्भटः ।

आस पु० आस-घञ् । १आसने २स्थितौ ३उपवेशने आस्यतेऽनेन करणे घञ् । ४उपवेशनस्थाने गुह्यपार्श्वभागे "यथा कथाञ्चित् पुण्डरीकमेवमस्याक्षिणी" छा० उ० छान्दस० न० । अस्यते क्षिप्यतेऽनेन अस-करणे घञ् । ५धनुषि "स सासिः सासृक्षः सासः" किरा० "सासः सचापः" मल्लि० । ६न्यासः अस क्षेपे भावे घञ् । ७ विक्षेपे निरासः ।

आसक्त त्रि० आ+सञ्ज-क्त । १आसङ्गयुक्ते विषयान्तरपरिहारेण तदेकतानतयाभिनिष्टे २अनवरते न० जटा० ३तइति ४सम्यक्संबद्धे च त्रि० आसक्तचित्तः आसक्तचेताः ।

आसक्ति त्रि० आ+सञ्ज-क्तिन् । विषयान्तरपरिहारेणैकविषयावलम्बने "ते देवा आसक्तिमन्तं वदन्तः" "आसक्तवन्तं वदन्तः इति च" शत० ब्रा० ६,२,१,११,१२ । "नील-

लोहितं भवति लक्षासक्तिर्व्यज्यते" ऋ०१०,८५,२८ ।

आसङ्ग पु० आ+सृज-घञ् । १अभिनिवेशे, प्राप्तस्योपस्थितस्य वा नश्वरतो वस्तुनः २रज्ञणाभिलाषे, ३भोगाभिलाषे, ४ कर्त्तृत्वाभिमाने ५ विषयान्तरपरिहारेण चेतस एकत्राभिनिवेशे च । "नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः" सा०द० । "तेऽस्तुरङ्गसेभ्य आसङ्गाद्विभयञ्चक्रुः" शत०ब्रा०१,१,२,२ "तयोर्हैन स्वयमान आसङ्गो न विन्दति" शत०ब्रा०५,२,३,५, "त्यक्त्वा कर्म्मफलासङ्गम्" गीता । ६ सम्यक् सम्बन्धे "अर्थैवलासङ्गमपि प्रकाशते" कुमा० । आसज्यते कर्म्मणि घञ् । ७आसङ्गनीये उत्तरासङ्गः "त्वगुत्तरासङ्गवतीं निवीतिनीम्" कुमा० । ८सौराष्ट्रमृत्तिकायां राजनि० ६अनवरते न०१० तट्टति त्रि० जटा० । सौराष्ट्रमृत्तिकाया गात्रे आसङ्गनीयत्वात्तथात्वम् । अनवरतस्य च सततसम्बन्धात् आसङ्गत्वम् ।

आसङ्गत्य न० न सङ्गतः तस्य भावः ष्यञ् चतुरादिषु पर्य्युदासात् नोत्तरपदवृद्धिः । साङ्गत्याभावे असम्बन्धे ।

आसङ्गिनी स्त्री आसङ्गः सातत्यमस्त्यस्य इनि ङीप् । १वात्यायां त्रिकाण्ड० । २आसङ्गयुक्ते त्रि० स्त्रियां ङीप् ।

आसङ्गिम पु०आसङ्गे भवः डिमच् । सुश्रुतोक्ते कर्णवेधाङ्गकर्णबन्धनालङ्कृतिभेदे । "तत्र समासेन पञ्चदश कर्णबन्धना ज्ञातयोभवन्ति वक्त्रश्च बन्धूरकश्च आसङ्गिम" इत्यादिना विभज्य "अभ्यन्तरदीर्घैकपालिरासङ्गिमः" इति सुश्रुते लक्षितः ।

आसञ्जन न० आ+सृज-ल्युट् । १आसङ्गे २सम्यक्सम्बन्धे "व्रततिवलयासञ्जनात्" शक० । णिच्-ल्युट् । ३योजने

आसञ्जित त्रि० आ+सृज-णिच्-क्त । संयोजिते

आसत्ति स्त्री आ+सद-क्तिन् । १नैकट्यसंबन्धे २प्राप्तौ न्यायमते ३प्रत्यक्षजनकसन्निकर्षे "आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते" भाषा० । ४शाब्दबोधोपयोगिन्यभव्यवधानेन पदजन्यपदार्थोपस्थितौ । "आसत्तियोग्यताकाङ्क्षातात्पर्य्यज्ञानमिष्यते । कारणं सन्निधानन्तु पदस्यासत्तिरुच्यते, भाषा० "यत्पदार्थस्य यत्पदार्थेनान्वयोऽपेक्षितस्तयोरव्यवधानेनोपस्थितिः कारणम् । तेन गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यादौ न शाब्दबोधः । नीलो घटो द्रव्यं पट इत्यादावासत्तिभ्रमाच्छाब्दबोधः । आसत्तिभ्रमाच्छाब्दभ्रमाभावेऽपि न क्षतिः । नतु यत्र ह्रस्वो कृष्णश्चेति वाक्ये देवदत्त इत्युक्तं तत्रोत्तरपदस्मरणकाले पूर्वपदस्मरणस्य नाशात् अव्यवधानेन उत्तरपदस्मरणासम्भव इति चेन्न प्रत्येकपदसंस्कारै स्मरणावच्छिन्नयकस्मरणस्याव्यवधानेनोत्पत्तेः नानासन्निकर्षैरेकप्रत्यक्षस्येव नानासंस्कारैरेकस्मरणोत्पत्तेरपि सम्भवात् । तावत्पदसंस्कारसहितचरमवर्ण्ण ज्ञानस्योद्बोधकत्वात् । कथमन्यथा नानावर्णकपदस्मरणम् । परन्तु तावत्पदार्थानां स्मरणादेकदैव खलेकपोतन्यायात् तावत्पदार्थानां क्रियाकर्म्मभावेनान्वयबोधरूपः शब्दबोधो भवतीति केचित्" मुक्ता० ।

शाब्दबोधहेतोः आसत्तिस्च शब्दचिन्तामणौ निरूपिता यथा । "आसत्तिश्चाव्यवधानेनान्वयप्रतियोग्युपस्थितिः सा च स्मृतिर्नानुभवोऽतोनान्योन्याश्रयः अथ नानाविशेषणकर्म्मकर्त्तृकरणाधिकरणक्रियादिपदज्ञानजन्यक्रमिकपदार्थस्मृतीनां न योगपद्यं सम्भवति आशुतरविनाशिनां क्रमिकाणां मेलकानुपपत्तेरिति कथन्तावत्पदार्थान्वयबोधः विशेषणज्ञानसाध्यत्वाद्विशिष्टज्ञानस्येति चेत् औत्पत्तिकप्रत्येकपदस्मृत्यनुभवजन्यसंस्कारमेलकादेव तावत्पदस्मृतेः तत एकदैव तावत्पदार्थस्मृतौ सत्यां वाक्यार्थानुभवः न चान्यविषयसंस्कारेणान्यस्य न स्मरणमिति वाच्यं वाक्यार्थानुभवानुपपत्त्या फलबलेन संस्काराणां परस्परसहकारेण तत्तैकस्मरणकल्पनात् प्रत्येकपदसंस्काराणामिवानन्यगतिकतया पदस्मरणे । अथ "यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते । तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते" नचैवमन्वयान्तराभिधानं न स्यात् विरम्य व्यापाराभावादिति वाच्यं एवमपि प्रथमश्रवणे हेत्वनुपन्यासात् उत्तरस्य क्वेदं सामग्रीवैकल्यं न पूर्व्वस्येति चेत् अस्तावदेवं तथापि चरमतावत्पदार्थघटितवाक्यार्थानुभवे उक्तैव गतिरनन्यगतिकत्वात् । अत्र वदन्ति । सन्निधानं पदजन्यैवान्वयबोधहेतुः द्वारमित्यादावध्याहृतेनापि विधानादिनान्वयबोधदर्शनात् न च द्वारं पिधेहीतिशब्द एवाध्याहियते अनुपयोगात् अर्थस्यैवान्वयप्रतियोगित्वादावश्यकत्वाच्च अर्थापत्तेरुपपादकविषयकत्वात् न च शब्दज्ञानस्योपपादकमपि तु तदर्थः । अवश्यं कल्प्यार्थसाहचर्य्येण दैववशसम्भवशब्दस्मृतेरन्यथासिद्धेः अन्यथा पदबोधितस्यैवार्थस्यान्वयबोधकत्वमिति नियमशक्तिकल्पनापत्तिः स्वार्थान्वयपरत्वाच्छब्दानां द्वारमिति न पिधानान्वयबोधकमिति तदन्वयबोधार्थमवश्यं शब्दकल्पनमिति चेत् लक्षणायां व्यभिचारात् तत्राप्येपाद्यिप्रेन कर्त्रान्वयबोधाच्च अथ द्वारपदसहभावमात्रं पिधेहि शब्दस्य कल्प्यते लाघवात् न च पिधानाभिधायकानेक शब्दोपस्थितौ विनिगमकविरहः संस्कारतारतम्यात्-

पदविशेषस्मृतेरिति चेत् न आकाङ्क्षादिमत्प्रतियोग्यन्वितस्यार्थपरत्वस्य लक्षणत्वाल्लाघवेनार्थाध्याहारात् न च श्रुतपदानि लक्ष्यप्रयोजनानीति कथमध्याहृते तेषां तात्पर्यमिति वाच्यं श्रुतार्थान्वयानुपपत्त्याध्याहृते तात्पर्यात् कथन्तर्ह्योदनं पचतीत्यत्र समभिव्याहृतमात्रादन्वयबोधः कर्तायादेरपि स्मृतत्वादिति चेत् न तात्पर्यनियमादित्यवेहि "यत्परः शब्दः स शब्दार्थः" इति न्यायात् अन्यथा तवापि दैवशात् स्मृतकर्तायपदोपस्थानेनान्वयबोधः स्यात् अथ देवदत्त ओदनमित्यादिवाक्ये क्रियापदाध्याहाराभावेन कर्तुरनभिधानात् स्मृतोवा स्यादिति चेत् न अध्याहृतेनापि पचतिपदेन कर्तुरनभिधानात् । कर्तृसंख्याभिहितेति चेत् न, देवदत्तस्य पाकदृत्यत्र स्मृतीयापत्तेः तात्पर्यं तत्रत्र व्यवस्थेति चेत् हन्त्रं ननु द्वारं पिधेहीत्यादौ पिधानशब्दानुभवे पिधानोपस्थापकपदत्वेनान्वयबोधजनकत्वमिति चेत् न अन्वयप्रतियोग्युपस्थापकपदत्वेनजनकत्वात् न तु तदुपस्थापकत्वावत्पदत्वेन गौरवात् एवं पिधानान्वयबोधेऽपि अन्यथा गौणलाक्षणिकयोरन्वयबोधोन स्यात् तयोरननुभावकत्वादिति उच्यते क्रियापदोपस्थापिता क्रिया कारकपदोपस्थापितं च कारकं परस्परमाकाङ्क्षति न तूपस्थितिमात्रम् अन्यथा द्वारं कर्मता पिधेहि द्वारं पिधानकृतिरित्यत्रापि क्रियाकर्माध्याहार इवान्वयबोधप्रसङ्गः क्रियाकर्मणोरुपस्थितेस्तुल्यत्वात् एवंविधपदोपस्थापिते परस्परमाकाङ्क्षा नास्तीति चेत् तर्ह्याकाङ्क्षायां पदविशेषोपस्थापितत्वं तन्त्रं नतूपस्थितिमात्रम्। अर्थविशेषेऽसाधुत्वात् न तत्रान्वयबोध इति चेत् न पिधेहीति पदं विना द्वारमित्यस्यार्थस्यासाधुत्वात् तदर्थप्रयोगे साधुत्वस्य तुल्यत्वात् साधुत्वज्ञानस्यान्वयबोधेऽप्रयोजकत्वाच्च गौणीत्वाद्यपभ्रंशादावप्यन्वयबोधाच्च न चात्रासंसर्गाग्रहोबाधकाभावात् । तस्मात् क्रियापदस्य कारकपदेन, कारकपदस्य च क्रियापदेन सहान्वयबोधकत्वं नत्वेकं विनापरस्य । अपि च सकर्मकक्रियापदप्रयोगं विना द्वितीयानुपपत्तिः क्रियापदार्थयोगे द्वितीया चेत् घटः आनयनं कृतिरित्यत्रापि द्वितीयापत्तेः तथा पुष्पेभ्य इत्यत्र स्पृहयतिपदाध्याहारं विना चतुर्थ्यनुपपत्तिः यदि च स्पृहयतिपदार्थयोगे चतुर्थी तदा पुष्पमिच्छतीत्यत्रापि स्यात् स्पृहयतीच्छति पदयोरेकार्थत्वात् । अथ साधुत्वार्थं द्वारं पुष्पेभ्य इत्यत्र पिधेहि स्पृहयति पदाध्याहारोऽनुमन्यते नत्वन्वयबोधार्थं तस्यान्वयप्रतियोगिज्ञानादेवोत्पत्तेरिति चेत् तर्हि क्रियापदप्रयोगं विना न कारकविभक्तिः कारकपदप्रयोगं विना न तदन्वययोग्यं क्रियापदमिति केवलकारके क्रियापदाध्याहारः केवलक्रियायाञ्च कारकपदाध्याहारः साधुत्वार्थमावश्यक इति तज्जन्यबोपस्थितिरन्वयबोधौपयिकी । तस्मात् क्रियाकारकपदोपस्थापितयोरेव क्रियाकारकयोः परस्परान्वय इति शब्दाध्याहारएव कर्त्ताङ्गीकर्त्तव्यो वक्ष्यामः" ।

व्याख्यातं चैतत् मथुरानाथेन दिङ्मात्रमत्रोदाह्रियते "आसत्तिं निरूपयति आसत्तिश्चेति अन्वयप्रतियोगिनोःपदार्थयोरव्यवधानेनोपस्थितिरासत्तिरित्यर्थः स्याव्यवहितत्वसम्बन्धेन तत्पदार्थोपस्थितिमती तत्पदार्थोपस्थितिस्तत्पदार्थे तत्पदार्थस्यासत्तिरिति फलितार्थः नचैवमासन्नानासन्नविभागव्याघातः समूहालम्बनरूपपदार्थोपस्थितेरेव सर्वत्र शाब्दबोधोपयोगितया गिरिर्भुङ्क्तमग्निमान् देवदत्तेनेत्यादावपि शाब्दानुभवाव्यवहितपूर्ववर्त्तिसमूहालम्बनोपस्थितिमादायैवान्वयव्यधानेनोपस्थितिसत्त्वात् उपस्थितेरैक्येन व्यवधानासम्भवादिति वाच्यं भेदगर्भाव्यवधानस्य पूर्वोत्तरक्षणसाधारण्यात् प्रवेशात् तच्च स्वध्वंसाधिकरणभिन्नत्वे सति यः स्वप्रागभावाधिकरणसमय प्रागभावानधिकरणक्षणस्तदवच्छेदेन स्वसमवायिदेशोत्पत्तिकत्वे सति स्वभिन्नत्वम् । इत्यत्र प्रथमं वा प्रत्येकपदेभ्यः प्रत्येकपदार्थानां क्रमिका स्मृतिःसैवासत्तिरन्वयबोधाव्यवहितपूर्ववर्त्तिसमूहालम्बनरूपीपस्थितिः । अतएवासत्तिज्ञानं हेतुः प्रत्येकपदजन्यपदार्थोपस्थितीनामाशुविनाशिनीनां युगपच्छाब्दबोधात् पूर्वं समन्वयेन स्वरूपसद्भावासम्भवात् नचैवं दण्डी कुण्डली खड्गी देवदत्तइत्यादावेकविशेष्यकनानाविशेषणकान्वयबोधस्थले आसत्त्यभावप्रसङ्गः तत्र विशेषणोपस्थितेर्विशेषणान्तरोपस्थित्या व्यवधानादिति वाच्यं प्रकृतान्वयबोधानुगुण्योयः स्वध्वंसाधिकरणक्षणसद्भिन्नत्वस्याव्यवधानघटकीभूतस्यात्रदलार्थत्वात् विशेषणान्तरोपस्थितिरत्रत्य न प्रकृतान्वयबोधानुगुणः अननुगुणत्वञ्च फलबलकल्प्य यादृशयादृशक्षणेन व्यवधानेऽन्वयबोधोऽनुभवसिद्धस्तत्तत्क्षणभिन्नत्वस्यैवानुगुणत्वरूपत्वात् । अतएव गिरिर्भुङ्क्तमित्यादौ भुक्त्यादिपदार्थोपस्थितिक्षणोयत्रैकपदोच्चारणानन्तरं चिरतरं विलम्ब्यान्यपदमुच्चारितं तत्रा व्यवधायकक्षणोऽप्रिधानानुगुणस्तत्रान्वयबोधानुत्पत्तेरिति तदभयत्र नासत्तिः । नचैवं यत्र पदोपस्थितिर्व्यवधानेन, पदार्थोपस्थितिश्चाव्यवधानेन, तत्राप्यासत्त्यापत्तिरिति वाच्यं तत्पदोपस्थित्यव्यवहिततत्पदोपस्थितिजन्या तत्पदार्थो

पस्थितेरव्यवधानेन तत्पदार्थोपस्थितिस्तत्पदद्वयजन्यतत्पदार्थयोरन्वयबोधे आसत्तिरिति विवक्षितत्वात् । एवञ्च यत्र पदोपस्थितिरव्यवधानेन, पदार्थोपस्थितिश्च व्यवधानेन, यत्र वा पदार्थोपस्थितिरव्यधानेन, पदोपस्थितिश्च व्यवधानेन, तत्रोभयत्रापि नासत्तिः किन्त्वेकपदोपस्थितिजन्यपदार्थोपस्थितिरपरपदोपस्थितिश्च समूहालम्बनरूपा ततोऽपरपदार्थोपस्थितिः पदान्तरोपस्थितिश्च समूहालम्बनरूपेत्यादिकमेव पदार्थोपस्थितिस्तत्रैवासत्तिः पदोपस्थितेरव्यवधानमपि पूर्वोत्तरक्षणसाधारणं प्रकृतान्वयबोधानुगुणलक्षणघटितं बोध्यम् ननु आसत्तिभ्रमादन्वबोध इति सर्वैर्गीयते स कुत्रेति वाच्यं यत्र व्यवहितपदोपस्थितावव्यवहितत्वधीर्व्यवहितायां पदार्थोपस्थितौ अव्यवहितत्वधीर्वा तत्र तत्सम्भवात् । अथैवमासत्तिज्ञानस्य शाब्दबोधहेतुत्वे रूपसत्त्वाः पदजन्यपदार्थोपस्थितेः पृथक्कारणत्वे किं मानं, न च विशेषणज्ञानसाध्यं विशिष्टज्ञानमिति विशेषणज्ञानत्वेन कारणमिति वाच्यम् आसत्तिज्ञानस्यैव पदार्थविषयकत्वेन विशेषणज्ञानत्वादिति चेन्न तद्विलम्बेनापि शाब्दधीविलम्बात् तस्यापि पृथक्कारणत्वात् न च तद्व्यतिरेकस्थाने आसत्तिविलम्बादेव शाब्दधीविलम्ब इति वाच्यं नह्यासत्तिः स्वरूपसती हेतुः किन्तु तज्ज्ञानमेव तद्व्यतिरेकस्थानेऽपि सम्भवादिति निर्ग्रन्थकृतदण्डसत् एकलडुपस्थाप्यकृतिवर्त्तमानत्वयोरन्वयबोधस्थानेऽव्याप्नोत्यतुमित्यादिना एकदैव पदजात मनुमितं श्रुतं वा ततश्च समूहालम्बनपदार्थस्मरणं जातं तत्राव्याप्तेश्च तत्र प्रत्येकपदार्थोपस्थितेरभावात् नच तत्रापि क्रमिकप्रत्येकपदार्थोपस्थितिः कल्पनीयेति वाच्यम् अनुभवविरोधात् प्रत्येकपदार्थोपस्थितिमन्तरेणापि तत्र शाब्दबोधस्यानुभविकत्वात् किञ्च तस्याः स्वरूपसद्धेतुत्वं स्वयमेव निराकृतं क्रमिकप्रत्येकपदार्थोपस्थितेः शाब्दबोधात् पूर्वं विनष्टत्वात् नाप्येतज्ज्ञानं कारणं मानाभावात् नह्युपस्थितिज्ञानविलम्बात् शाब्दबोधविलम्बस्यानुभविकः न च दैवादृष्टादिना पदार्थोपस्थितौ पदजन्यत्वभ्रमेण शाब्दबोधानुदयात् तज्ज्ञानस्यापि हेतुत्वमिति वाच्यं इत्था पदजन्यपदार्थोपस्थितेः स्वरूपसतोहेतुत्वात्तद्भ्रमे शाब्दबोधाभावात् अव्यवधानांशवैयर्थ्याच्च न चैतद्भ्रमानन्तरं शाब्दानुभवदर्शनादेतज्ज्ञानं हेतुरिति वाच्यं नहि यत्सत्त्वे यद्भवत्यवते तदेव तत्कारणं, घटाव्यवहितपूर्ववर्त्तित्वावत्पदार्थानामेव घटहेतुत्वापत्तेः न च पदजन्यपदार्थोपस्थितौ अव्यवहितत्वाव्यवहितपदजन्यत्वयोः संसर्गे व्यवहितत्वव्यवहितपदजन्यत्वनिश्चये च शाब्दबोधानुत्पत्तेस्तन्निश्चयोहेतुः तयोः प्रतिबन्धकत्वकल्पने गौरवादिति वाच्यं तात्पर्यज्ञानसत्त्वे व्यवहितत्वव्यवहितपदजन्यत्वयोरपि शाब्दबोधदर्शनादनुत्पत्तेरेवासिद्धेः नचैवं व्यवहितपदकदम्बात्मकश्लोकादौ योजनायां कारितायामेवान्वयबोधोनत्यन्था इत्यत्र किं बीजमिति वाच्यं योजनायास्तात्पर्यग्राहकत्वात् । अतएव यस्य योजनां विनैव तात्पर्यग्रहस्तस्य न योजनापेक्षा । एतेन अन्वयप्रतियोगिपदं तदुपस्थापकपरं तथा च तदुपस्थापकपदोपस्थित्यव्यवधानेन तदुपस्थापकपदोपस्थितिस्तयो रासत्तिः न तु पदार्थोपस्थितीनामव्यवधानमपेक्षितमिति केषाञ्चिन्मतमपास्तं वक्ष्यमाणान्योन्यश्रयगङ्गातुल्यितेः समूहालम्बनोपस्थितिमादाय सर्व्वत्राख्याः सत्त्वेन आसन्नानासन्नार्थविभागव्याघातापत्तेः । न च भेदगर्भमव्यवधानं विवक्षणीयं पूर्व्वोक्तदोषाणामपि तुल्यत्वात् । एतज्ज्ञानस्य कारणत्वेऽकरूपेण मानाभावाच्च । केचित्तु अव्यवधानेनेति विशेषणे तृतीया अन्वयप्रतियोगिपदञ्च अन्वयप्रतियोगिन उपस्थितिं यत्नात् इति व्युत्पत्त्या अन्वयप्रतियोग्युपस्थापकपरं तथा च तत्पदार्थान्वितततत्पदार्थज्ञाद्वुद्धौ तत्पदे तत्पदाव्यवधानमासत्तिः नतूपस्थितीनामव्यवधानं विवक्षितं मौनिश्लोकादौ तिथ्यादिरूपदोषविशेषात् अव्यवधानस्यैवान्वयबोधः । न चैवं श्लोकादौ योजनायामन्वयबोधो न स्यात् वक्ष्यदं व्यवधानेनोच्चारितमिति विशेषदर्शनेन भ्रमासम्भवात् इति वाच्यं योजनयोपस्थितवाक्यान्तरादेव तत्रान्वयबोधात् न तु श्लोकादितः । अव्यवधानज्ञानतृणत्वणभेदाभेदसाधारणं स्वपरसाधारणञ्च वाच्यं तेनैकपदाद्युपस्थितयोः कृतिवर्त्तमानत्वयोरन्वयबोधेऽपि न काप्यनुपपत्तिरित्याहुः तदप्यसत् वक्ष्यमाणान्योन्याश्रयगङ्गातुल्यितेस्तात्पर्य्यादिज्ञानसत्त्वे अव्यवधानज्ञानाभावेऽपि शाब्दबुद्धेरानुभविकत्वाच्च नव्यास्तु इत्था पदजन्यपदार्थोपस्थितिरासत्तिरिवञ्च स्वरूपसत्त्वेव हेतुः अतएव त्रिस्रोतस्यां आसत्तिस्तु यद्यपि स्वरूपसत्त्वेव प्रयोजिका इत्यादिप्रभाकरोपाध्यायेनोक्तं न च एतस्या अपि कारणत्वे मानाभाव इति वाच्यं तत्रासति ज्ञानवेति वाक्यमाकर्ण्यतः प्रत्यक्षेण घटं पश्यतोघटस्य शाब्दबोधापत्तेः घटमानवेति वाक्यमाकर्ण्यतः कारणतया घटपदकारणा

कायकारणवत आकाशस्य शाब्दबोधापत्तेः नचैवं गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यादितोगिरिरग्निमान् भुक्तं देवदत्तेनेत्यन्वयबोधापत्तिरिति वाच्यं तथा तात्पर्य्यग्रहस्य इष्टापत्तेः कदाचित्तु तत्र तथान्वयबोधस्य सर्वैरेव इष्टत्वात् नचैवं क्वचिद्योजनायाः कथमुपयोगइतिवाच्यं तात्पर्य्यग्रहार्थं तदुपयोगितेत्युक्तत्वादिति प्राञ्चः अव्यवधानेनान्वयप्रतियोग्युपस्थितिरासत्तिरुक्ता सा च शाब्दबोधादेव तथा च तस्यापि आसत्तिः कारणं सा च शाब्दबुद्धिरूपा तस्याञ्च यद्यपरासत्तिः कारणं तदा अनवस्था फलीभूता चेत् अन्योन्याश्रय इत्यतआह सा चेति प्रसङ्गादन्वयबोधनिर्वाहकपदजन्यपदार्थोपस्थितिपरिपाटीं प्रदर्शयितुमाशङ्कते अथेति नन्वास्तु नतु इत्था पद जन्यपदार्थोपस्थितिर्वेदासत्तिस्तदा नानाविशेषणकस्थाने कथमन्वयबोधः ? सर्व्वासां पदार्थोपस्थितीनाम् एकदाऽसम्भवादित्याशङ्कते अथेति इत्याहुः। मेलकं मेलनम् । विशेषणज्ञानसाध्यत्वादिति विशेषणं पदार्थस्तदुपस्थितिसाध्यत्वात् इत्यर्थः इत्था पदयोजन्येत्यादिः । विशिष्टज्ञानस्य शाब्दबोधानुभवस्य । मेलकात् समूहात् एकदैव तावत्पदस्मृतिः न च सकलपदगोचरस्मरणाभावेऽपि प्रत्येकपदानुभवजनितप्रत्येकपदार्थस्मरणाहितसंस्कारेभ्य एव सकलपदार्थगोचरमनेकं स्मरणं सम्भवति तथा च सकलपदगोचरैकस्मरणपर्य्यन्तानुधावनं विफलमिति वाच्यं प्रकारान्तरेण पदार्थोपस्थितेः शाब्दबोधाहेतुत्वात् पदज्ञानजन्यत्वोपपत्तये तदनुधावनात् नतु श्रोत्रेण प्रत्येकपदानुभवोऽपि न सम्भवति तथाहि आदौ धोत्पत्तिस्ततो द्वितीयकाले घघत्वनिर्विकल्पकोत्पत्तिः अकारोत्पत्तिश्च अथ तृतीयकाले अकारतत्त्व निर्विकल्पकघत्वविशिष्टधीटोत्पत्तिघनायाः ततश्चतुर्थकाले अत्वविशिष्टधीटटत्वनिर्विकल्पकाकारनाशचरमाकारोत्पत्तयः इदानीञ्च घकारभानं न सम्भवति प्रत्यक्षं प्रति विषयस्य हेतुत्वात् ततः पञ्चमकाले टत्वविशिष्टबोधाकारतत्त्वनिर्विकल्पकटकारनाशाः इदानीं प्राथमिकाकारभानं न सम्भवति तदभावात् ततः षष्ठक्षणे अत्वविशिष्टबोधाकारनाशौ इदानीं टकारभानं न सम्भवति तदभावात् तथा च कथं वर्णसमूहात्मकपदगोचरशाब्दानुभवः न च पूर्व्वपूर्व्ववर्णोपनयसहितान्त्यवर्णसन्निकर्षात् शाब्दानुभवसम्भव इति वाच्यं बहिरिन्द्रियजप्रत्यक्षे उपनीतं विशेषणतयैव भासते इति नियमात् प्रत्येकवर्णसमूहस्यविशेष्यकपदप्रत्यक्षोपनयमर्य्यादया अवणसम्भवात् पदप्रत्यक्षे प्रत्येकं सर्वस्य वर्णस्य सख्यविशेष्यत्वात् न च पूर्व्ववर्णोऽन्त्यवर्णं विशेषणतया भासत इति वाच्यं पूर्व्ववर्णोऽन्यवर्णं विशेषणत्वनियामकस्य तत्सम्बन्धस्याभावात् इति चेत् मैवं घादिसमुदायमात्रं न घटादिपदं टघादेरपि घटपदत्वापत्तेरपि तु अव्यवहितोत्तरत्वसम्बन्धेन पूर्वपूर्ववर्णवदुत्तरोत्तरवर्ण एव पदं तच्च अवश्यं न दुर्ग्रहं पूर्व्वं पूर्ववर्णोपनयसहकारेणाव्यवहितोत्तरत्वसम्बन्धेन उत्तरोत्तरवर्णविशेषणतया पूर्वपूर्ववर्णग्रहसम्भवात्" वैयाकरणास्तु पूर्व्ववर्णज्ञानरूपाया उपनयसामग्र्याः सत्त्वेऽपि पूर्ववर्णस्यैवोत्तरवर्णे विशेषणत्वेन भाने नियामकाभात् विनिगमनाभावेन अव्यवहितपूर्व्वत्वसम्बन्धेनैव उत्तरोत्तरवर्णस्यापि विशेषणतया भानस्य दुर्वारतया अतृतशब्दयोस्तुल्यपदत्वापत्तेः तथा च अतृपदोच्चारणे तपदस्य अवश्यं श्राद्धत्वापत्तिरित्यतोवर्णसमुदायादन्यः स्फोट एव पदमित्याहुः तद्विशेषश्च स्फोटशब्दे वक्ष्यते ।

अत्रायं विशेषः । चिन्तामणिमते शब्दाध्याहारएव मधुरानाधेन तु आसत्तिपन्थगेवे आर्थाध्याहारोऽपीति व्यवस्थापितम् । यथा "अस्तु वा शब्दाध्याहार एवावश्यकं तथापि तज्जन्यपदार्थोपस्थितित्वेन कृतोहेतुत्वं लाघवात् पदार्थोपस्थितित्वेन हेतुत्वस्योचितत्वात् तथा च ओदनं पचतीत्यादौ सति तात्पर्य्यग्रहे यथाकथञ्चिदुपस्थितकर्त्रायादेरन्वयबोध इत्यर्थाध्याहारपक्ष एव सम्यक्" "वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः" सा० द० । "आसत्तिक्रमेणान्वयः" रघु० ।

आसदन न० आ+सद–ल्युट् । प्राप्तौ २नैकट्यसम्बन्धे च ।

आसन न० आस–ल्युट् । १स्थितौ "एकत्रासनभोजनैः" स्मृतिः। २स्वस्थानस्थितिरूपे राज्ञां षड्गुणान्तर्वर्त्तिगुणभेदे च । तद्विवृतिराग्नेये । "परस्परस्य सामर्थ्यविघातादासनं स्मृतम् । अरेश्च विजिगीषोश्च यानवत् षड्विधं स्मृतम्" । यानस्य पञ्चविधत्वञ्च । "विष्टभ्य सन्धाय तथा संभूयाथ प्रसङ्गतः । उपेक्षया च निपुणैर्यानं पञ्चविधं स्मृतमिति" तत्रैवोक्तम् । "परस्य स्वस्य सैन्यानां साध्यं ज्ञात्वा विचक्षणः । आसनं स्वामिने ब्रूयात् मन्त्री स्वामिहिते रतः इत्युक्ते ३विजिगीषोर्यात्रानिवर्त्तकव्यापारे च । आस्तेऽत्र आधारे ल्युट् । ४उपवेशनाधारे कम्बलाद्यासने । "आसनं वसनं भक्ष्या दारामत्रं अमण्डनुः । आत्मनस्तु शुचि प्रोक्तं न परेषां कदाचन" आ० त० धृ० । "प्रयत्नसक्तासनया स्थितायाः" रघुः । "स्वहस्तदत्ते शनिमासने शनिः" माघः "क्रूरासनं कौतुकवे-

दिमध्यम्' कुमा० 'शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः' गीता "स्वापवेदासने तस्मिन् खिन्नः कार्यैश्चये नृणाम्" मनुः। 'स वासवेनासनमर्द्धबृष्टम्' "प्राञ्जलिर्जेलजासनम्" कुमा०। ५ देवतापूजाङ्गे उपचारभेदे तद्भेदादि कालि० पु०। "आसनं प्रथमं दद्यात् पौष्पं दारुजमेव वा। वास्त्रं वा चार्म्मणं कौशं मण्डलस्योत्तरे न्यसेत्। पौष्पासनं यद्विहितं यस्य तद्यदि गर्भकम्। निवेदयेत्तदा पद्मे विपुलं हारि चोत्सृजेत्। पौष्पं पुष्पौघरचितं कृशस्रक्त्वादिसंयुतम्। अतिप्रीतिकरं देव्या ममाप्यनघ भैरव!। यत्तदारुसमुद्भूतमासनं मसृणं शुभम्। नोच्छ्रायं नातिविस्तीर्णमासनं विनियोजयेत्। अन्यदाच्छद्मवस्त्रापि दद्यादासनसत्तमम्। सकण्टकं चीरयुक्तं दारु सारविवर्जितम्। चैत्यवृक्षशमान संभूतं वर्जयित्वा विभीतकम्। वास्त्रं कौशं फालं वस्त्रं नेतत्त्रयं मतम्। रोमजं कम्बलञ्चैव तदनेन चतुष्टयम्। अनेन रचितं दद्यादासनं चेष्टभूतये। सिंहव्याघ्रतरक्षूणां ऋक्षस्य महिषस्य च। गजानां तुरगाणाञ्च कृष्णसारस्य चर्म्मणा। समरस्याथ रासस्य मृगाणां नवभेदिनाम्। चर्म्मभिः सर्व्वदेवानामासनं प्रीतिदं स्मृतम्। वास्त्रेषु कम्बलं श्रेष्ठमासनं देवतुष्टये। राङ्कवं चार्म्मणं श्रेष्ठं दारवं चन्दनोद्भवम्। यज्ञासनं कुशमयं तदासनमनुत्तमम्। सर्व्वेषामपि देवानामृषीणाञ्च यतात्मनाम्। योगपीठस्य सदृशमासनं स्थानमुच्यते। आसनस्य प्रदानेन सौभाग्यं भुक्तिमाप्नुयात्। रुरुरो रोहितो न्यङ्कुः शंवरो बभ्रुणो हरः। प्रसेणहरिणार्य्येति मृगा नवविधा मताः। हरिणस्यापि विज्ञेयः पक्षभेदोऽत्र भैरव!। कृष्णः खड्गो हरश्चैव पृषतश्च मृगस्तथा। एते बलिप्रदानेषु चर्म्मदाने च कीर्त्तिताः। सर्व्वेषां तैजसानाञ्च आसनं ज्येष्ठ मुच्यते। आयसं वर्ज्जयित्वा तु कांस्यं सीसकमेव च। शिलामयं मणिमयं तथा रत्नमयं मतम्। आसनं देवताभ्यस्तु भक्त्या सर्व्वं समुत्सृजेत्। अत्रैव साधकानाञ्च आसनं शृणु भैरव!। यत्रासीनः पूजकस्तु सर्व्वसिद्धिमवाप्नुयात्। रैणञ्च चार्म्मणं वास्त्रं तैजसञ्च चतुष्टयम्। आसनं साधकानाञ्च सततं परिकीर्त्तितम्। पूर्व्वोक्तं यच्च देवेभ्य आसनं परिकीर्त्तितम्। तत् सर्व्वमासनं शस्तं पूजाकर्म्मणि साधके। न यत्रेष्टासनो भूत्वा पूजाकर्म्मणि साधकः। काष्ठादिकासनं कुर्य्यात् मितमेवं सदा बुधः। चतुर्व्वितस्त्यङ्गुलेन दीर्घं काष्ठासनं मतम्। षोडशाङ्गुलविस्तीर्णमुत्सेधे चतुरङ्गुलम्। पद्माङ्गुलं वा कुर्य्यात्तु नोच्छ्रितं चासनं कारयेत्। पूर्व्वोक्तं वर्ज्जयेद्दार्व्वासनं पूजनेष्वपि। वास्त्रं द्विहस्ताद्धो दीर्घं सार्द्धहस्ताच्च विस्तृतम्। तत्रार्द्धहस्तात् तथोच्छ्रायं पूजाकर्म्मणि संन्यसेत्। यत्रेष्टं चार्म्मणं कुर्य्यात् पूर्व्वोक्तं सिद्धिदायकम्। षडङ्गुलाधिकं कुर्य्यान्नोच्छ्रये तु कदाचन। काम्बलं चार्म्मणं चैलं महामायाप्रपूजने। प्रशस्तमासनं प्रोक्तं कामाख्यायास्तथैव च। त्रिपुरायाश्च सततं विष्णोश्चापि कुशासनम्। बहूच्छ्रायं न चैव स्यात् तथैव बहुविस्तृतम्। दारु भूमिसमं प्रोक्तमन्यापि सर्व्वकर्म्मणि। पृथक् पृथक् कल्पयेच्च शोभनं तादृशासनम्। न पत्रमासनं कुर्य्यात् कदाचिदपि पूजने। न प्राग्यद्भं-न मृदुभूतमस्थिजं हिरदाहते। मातङ्गदन्तसञ्जातमासनं कामिके चरेत्। चर्म्म पूर्व्वोदितं प्राह्यं तथा गन्धमृगस्य च। सलिले यदि कुर्व्वीत देवतानां प्रपूजनम्। तत्रोत्थासन मासीनो नोत्थितस्तु समाचरेत्। तोये शिलामयं कुर्य्यादासनं कौशमेव वा। दारवं तैजसं वापि नान्यदासन माचरेत्। आसनारोपसंस्थानस्थानाभावे तु पूजकः। आसनं कल्पयित्वा तु मनसा पूजयेच्छले। यद्यासनस्य संस्थानं तोयमध्ये न विद्यते। अन्यत्र वा तदा स्थित्वा देवपूजां समाचरेत्। इत्येतत् कथितं पुत्र! पूज्यपूजक सङ्कृतम्'। आस्तेऽनेन करणे ल्युट्। ५ देहस्थैर्य्यसाधने करचरणादिबन्धभेदरूपे योगाङ्गभेदे 'यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयोऽष्टावङ्गानि" विभज्य "स्थिरसुखमासनम्" पात० सू० लक्षितं तस्य वृत्तिः यथा "निश्चलं सुखावहं च यदासनं तद्योगाङ्गम्। आस्तेऽनेनेत्यासनं तच्च द्विविधम् बाह्यं शारीरं च तत्र चैलाजिनकुशोत्तरं बाह्यं, शारीरं पद्मस्वस्तिकादि। तत्र पद्मासनं प्रसिद्धम्। सव्यमाकुञ्चितचरणम् दक्षिणोरुमूर्द्धन्यरे, दक्षिणं च सव्योरुमूर्द्धन्यरे, निश्चिमेदिति स्वस्तिकासनम्। द्वे पादतले वृषणसमीपे संपुटीकृत्य संपुटोपरिपार्ष्णिकच्छपिकां न्यसेदिति भद्रासनम्। योगपट्टेन सीपार्श्वासनम्। जानुप्रसारितबाह्वोः शयनं पर्य्यङ्कासनं क्रौञ्चोड्डनजादिवदुपवेशनं क्रौञ्चाद्यासनं द्रष्टव्यम्। आसनस्थैर्य्योपायमाह। "प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम्" पात० सू०। "स्वाभाविकः प्रयत्नश्चलत्वादासनविघातकः तस्योपरमेणासनं सिध्यति अनन्ते नागनायके स्थिरतरकणासहस्रविधृतविश्वमण्डले चित्तस्य समापत्त्या देहाभिमानाभावेनासनदृढत्वास्त्रैरासनं सिध्यति। तत्सिद्धिलिङ्गमाह। "ततोद्वन्द्वानभिघातः" पात० सू०। "आसन-

जयाच्छीतोष्णादिभिरनभिघातो बाधाभावो भवति" इत्तिः इदञ्च राजयोगाङ्गं हठयोगाङ्गानि पुनरन्येऽपि बन्धाः-कार्यो० उक्ताः यथा "महासुद्रां नभोमुद्रामुड्डीयानं जलन्धरम्। मूलबन्धन्तु योवेत्ति स योगी योगसिद्धिभाक्। शोधनं नाड़िजालस्य घटनञ्चन्द्रसूर्य्ययोः। रसानां शोषणं सम्यक् महामुद्राभिधीयते। योनिं वामाङ्घ्रिणापीड्य क्षत्वा वक्षःस्थले दृढम्। हस्ताभ्यां प्रसृतं पादं धारयेद्दक्षिणाङ्घ्रिरम्। प्राणान् कुक्षौ समापूर्य्य चिरं सञ्चारयेच्छनैः। एषा प्रोक्ता महामुद्रा महारोगविनाशिनी। चन्द्राङ्गे तु समभ्यस्य सूर्य्याङ्गे पुनरभ्यसेत्। या वक्तुल्या भवेत् संख्या ततोमुद्रां विसर्जयेत्। न हि पथ्यमपथ्यं वा रसाः सर्व्वेऽपि नीरसाः। अपि घोरं विषं पीतं पीयूषमिव जीर्य्यति। क्षयकुष्ठगुदावर्त्तगुल्माजीर्णपुरोगमाः। तस्य दोषाः क्षयं यान्ति महामुद्राञ्च योऽभ्यसेत्। कपालकुहरे जिह्वा प्रतिष्ठा विपरीतगा। भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी। न पीड्यते स रोगेण न च लिप्यते कर्म्मणा। बाध्यते नस कालेन योमुद्रां वेत्ति खेचरीम्। चित्तञ्चरति खे यस्माज्जिह्वा चरति खेगता। तेनैषा खेचरी नाम मुद्रा सिद्धैर्निषेविता। यावद्बिन्दुः स्थितोदेहे तावन्मृत्युभयं कुतः। यावद्बद्धा नभोमुद्रा तावद्बिन्दुर्न गच्छति। उड्डीनङ्कुरुते यस्मादहोरात्रं महाखगः। उड्डीयानं ततः प्रोक्तं तत्र बन्धोऽभिधीयते। जठरे पश्चिमं जानुनाभेरूर्द्ध्वञ्च धारयेत्। उड्डीयानं क्षयं बन्धोम्रियोरपि भयं जयेत्। बध्नाति हि शिराजालमधोगामि नभोजनम्। एष जलन्धरो बन्धः कण्ठे दुःखौघनाशनः। जलन्धरे कृते बन्धे कण्ठसङ्कोचलक्षणे। न पीयूषं पतत्यग्नौ न च वायुः प्रधावति। पक्षिभागेन संपीड्य योनिमाकुञ्चयेद्गुदम्। अपानमूर्द्धमाकृष्य मूलबन्धोऽभिधीयते। अपानप्राणयोरैक्यं क्षये मूलपुरीषयोः। युवा भवति वृद्धोऽपि सततं मूलबन्धनात्"।

रुद्रयामलेऽनेकविधान्यासनानि दर्शितानि यथा। "अथासनप्रभेदञ्च श्रृणुष्व सिद्धिकाङ्क्षिणाम्। यत्र तत्र फूलकानां सिद्धिरत्र महीतले। अधोमुखासनं नाथ! सर्व्वेषां प्राणिनां सुखम्। ऊर्द्धभागेन देवेश! धारयेत् मारुतं सुधीः। सर्व्वासनानां श्रेष्ठं हि ऊर्द्धपादो हि यत्-चरेत्। तदैव महितां सिद्धिं ददाति वायवी कला। पद्मासनं तथा कुर्य्यात्प्राणवायुषु सिद्धये। शुभासनं सदा ध्यायेत् पूरयित्वा पुनःपुनः। उरुमूले वामपार्ष्टं पुनः सङ्क्षिपेत् पदम्। वामोरौ स्थापयित्वा च पद्मासनमिति स्मृतम्। सव्यापसव्ययोगेन आसनं परिकल्पयेत्। तदैकासनकाले तु द्वितीयासनमारभेत्। दृष्ट्वे पादद्वयं सीव्नि दृढाङ्गुष्ठद्वयं सुधीः। कायसङ्कोचमाकृत्य दृष्ट्वा वज्रासनं भवेत्। इति वज्रासनं बद्धा वायुबद्धः पुनःपुनः। चिबुके स्थापयेद्यत्नाद्धृदि तेजश्च भास्करे। इत्यासनं हि सर्व्वेषां प्राणिनां सिद्धिकारणम्। वायुं वशे तु कुर्य्याद्यः स योगी नात्र संशयः। भावसिद्धिकरं नाथ! सर्व्वेषां दृष्टिकारणम्। वामपादतले कुर्य्यात् पादं दक्षिणमेव तत्। सव्यापसव्ययोगेन आसनद्वयमेव च। सर्व्वत्रैवं-प्रकारञ्च ज्ञात्वा नातीव साधयेत्। श्रृणुष्वान्यान्यासनानि द्वात्रिंशत्संख्यकानि च। सव्यापसव्ययोगेन द्विगुणं प्रभवेदिह। चतुःषष्ठ्यासनानीह वदामि वायुशोधनात्। द्वात्रिंशद्ग्रन्थिभेदेन कल्पयेत् वायुदृढये। कार्म्मुकासनमाकृत्य उदरे पूरयेत् सुखम्। तदा वायुर्वशं याति कालेन सूक्ष्मवायुना। वज्रपद्मासनं मन्त्री वेष्टयित्वा प्रधारयेत्। करेण दक्षिणेनैव वामपादाङ्गुलीतटम्। सव्यापसव्यद्विगुणं कार्म्मुकासनमेव च। कार्म्मुकद्वययोगेन शरवद्वायुना भवेत्। कुक्कुटासनमाबध्य नाड़ीनिर्म्मलहेतुतः। सत्कुलागममार्गेण कुर्य्यात् वायुनिवेशनम्। निजहस्तद्वयं भूमौ पातयित्वा जितेन्द्रियः। पद्मां बद्धा करौ देव! कर्परद्वयमध्यतः। सव्यापसव्ययुगलं कुक्कुटं ब्रह्मणाकृतम्। बद्धं कृत्वा अधःशीर्षं यः करोति खगासनम्। खगासनप्रसादेन श्रमलोपोभवेद्ध्रुवम्। पुनःपुनः श्रमादेव विषयश्रमलोपकृत्। लोलासनं सदा कुर्य्यात् वायुलौल्यापघातनात्। स्थिरवायुप्रसादेन स्थिरचेता भवेद्ध्रुवम्। पद्मासनं समाकृत्य पादयोः सन्निगह्वरे। हस्तद्वयमधोदेशे नियोज्य कुक्कुटाकृति। निजहस्तद्वयं लग्नं निपात्य हस्तनिर्भरम्। तस्मात् शरीरमुत्थाप्य स्थिरपद्मासनेऽनिलम्। स्थित्वैतदासने मन्त्री अधःशीर्षं करोति चेत्। उत्तमं त्वासनं ज्ञेयं योगिनामतिदुर्ल्लभम्। एतदागमनमात्रेण शरीरं शीतलं भवेत्। पुनःपुनः शोधनेन चेतना कुण्डली भवेत्। सव्यापसव्ययोगेन यः करोति पुनःपुनः। पूरयित्वा मूलपद्मे सूक्ष्मवायुं विकुम्भयेत्। कृत्वा कुम्भकमेवं हि सूक्ष्मवायौ लयद्विधौ। मूलादिब्रह्मरन्ध्रान्ते स्थापयेत् गगने पदे। एतत् शुभासनं कृत्वा सूक्ष्मरन्ध्रेष्वशेषतः। सूचीरन्ध्रे यथा सूत्रं पूरयेत् सूक्ष्मवायुना। एवं क्रमेण बन्धात्मा पूरकस्यापि

लक्षणम्। महासुखं समाप्नोति योगाष्टाङ्गनिषेवणात्। अथ वक्ष्ये महादेव! पर्वतासनमुत्तमम्। यत् कृत्वा स्थिर-रूपःस्यात् षट्चक्रादिविभोदनः। योन्यासनं सर्व्व-योगे योगिनामवलम्बनम्। तत्कालं सकलं तावत् खे-चरीवावदेव हि। पादगोदेन वाक्रम्य लिङ्गाग्रं योनिवो जवेत्। अन्यं पादसरो दत्त्वा तत्र योन्यासनं भुवि। एतन्मध्ये महादेव! बद्धयोन्यासनं शृणु। यत् कृत्वा विचरेत् योगी पृथिव्यामीश्वरो यथा। कृत्वा योन्यासनं नाथ! लिङ्गयुग्मादिवन्धनम्। सुखनासानेत्रकर्णं कनिष्ठाङ्गुलि-भिस्तथा। ओष्ठाधरं कनिष्ठाभ्यामनामाभ्याञ्च नासिके। मध्यमाभ्यां नेत्रयुग्मं तर्जनीभ्यामथ श्रुती। एतत् सिद्धा-सनं नाम योगिनामतिदुर्लभम्। कृत्वा वायुसम्भनं च मूलमारभ्य खम्भयेत्। सव्यापसव्ययोगेन सिद्धो भवति साधकः। शनैःशनैः समारुध्य कुम्भयेच्च प्रपूरयेत्। अरु-णोदयकालाच्च वसुदण्डेन भैरव!। सव्यापसव्ययोगेन-रेचीत्वा वाह्यगानिलम्। द्वितीयप्रहरे कुर्य्यात् वाह्य-पूजां मनोरमाम्। एतदासनमाकृत्य सिद्धो भवति साधकः। अथान्यदासनं वक्ष्ये यत् कृत्वा चामरोभ-वेत्। मत्साधकः शुचिः श्रीमान् कुर्य्याद्भावाभि भावितः। भेकनामासनं योग्यं नाथ! वक्ष्यामि तदुत्त-मम्। निधाय पादयुगलं स्कन्धे वाहौ पदोपरि। ध्याये दिदपदं श्रीमान् आसनस्थः सुखाय च। यदि सर्व्वाङ्गसञ्चोल्य गगने खेचरासनम्। महाभेकासनं प्रोक्तं सर्व्वसिद्धिप्रदायकम्। महाविद्या—महामन्त्रं प्राप्नोति जपतोह यः। एतत् प्रभेदं वक्ष्यामि यः करोति सचा-चरः। एकं पादसरो बद्धा स्कन्धेऽन्यपादरचयम्। एतत् प्राणासनं नाम सर्वसिद्धिप्रदायकम्। वायुं मूले समारोप्य प्रत्याकुञ्च्य प्रसारयेत्। केवलं पादमेकञ्च स्कन्धे चारोप्य यत्नतः। एकपादेन गगने तिष्ठेत् स दण्ड-वत् प्रभो!। अपानासनमेतद्धि सर्वेषां पूरकात्रयम्। कृत्वा सूक्ष्मशीर्षपद्मे समारोप्य च वायुभिः। तदा सिद्धो भवेन्मर्त्यो नात्र कार्य्या विचारणा। प्राणापानासने कृत्वा मन्त्री योगेश्वरो भुवि। समानासनमावक्ष्ये सिद्धिमन्त्रादिसा-धनम्। एकं पादसरो दत्त्वा गुह्येऽन्यं लिङ्गवन्धके। एत-द्वीरासनं नाथ! समानासनसंज्ञकम्। इत्याकृत्य जपे-न्मन्त्रं दृष्ट्वा वायुं चतुर्दले। कुण्डलीं भावयेन्मन्त्री कोटि विद्युल्लताकृतिम्। आत्मचन्द्रामृतरसैराप्लुतां योगिनीं हृदा। वीरासनं तु वीराणां योगवायुप्रसाधनम्। योजा-नाति महावीरः स योगी भवति ध्रुवम्। अथ वक्ष्ये महाकाल। समानासनसाधनम्। भेदक्रमेण यज्ज्ञात्वा वीराणामधिपोभवेत्। समानासनमाकृत्य बद्धाङ्गुष्ठं करेण च। एतेन साधुकारी स्यात् सर्वयोगादिसाधने। आसनं योहि जानाति वायुना हरणं तथा। कालादीनां निर्जयन्तु स कदाचित् न नश्यति। कालेन लभ्यते सिद्धिः काल-रूपोमहोज्ज्वलः। साधकैर्योगिभिर्ध्येयः सिद्धवीरासना-त्मना। अथ वक्ष्ये नीलकण्ठ। ग्रन्थिभद्रासनं शुभम्। ज्ञात्वा रुद्रो भवेत् क्षिप्रं सूक्ष्मवायुनिषेवणात्। कृत्वा-पद्मासनं मन्त्री जङ्घायाः कूपरे करौ। कर्परस्थलपर्य्यन्तं विभिद्य स्वाङ्गधारणम्। भित्त्वा पद्मासनं मन्त्री हस्ताङ्गै-न विपाटयन्। येन शीर्षं भवेद्यत्र सर्वाङ्गुलिभिराश्रितम्। ग्रन्थिभेदासनं कुर्य्यात् खेचरादिप्रदर्शनम्। कृत्वा सूक्ष्म-वायुत्रयं परमात्मनि कारयेत्। अथान्यासनमावक्ष्ये-योगपूर्वकरक्षणात्। कृत्वा पद्मासनं पादाङ्गुष्ठं जङ्घां हि संस्थितम्। हस्तमेकन्तु जङ्घायां कार्मुकं कर्परो ङ्कम्। पद्मासने समाधाय अङ्गुष्ठं परिधारयेत्। कार्मुकासनमेतद्धि सव्यापसव्ययोगतः। पद्मासनं वेष्ट-यित्वा अङ्गुष्ठं च प्रधारयेत्। यः करोति सदा नाथ! कार्मुकासनमुत्तमम्। रोगादिनाशं शत्रूणां जयं नीत्वा सुखी भवेत्। अथ वक्ष्येऽत्र संक्षेपात् सर्वाङ्गासनमुत्त-मम्। यत् कृत्वा निपुणो योगी विद्याभिः पण्डितो भवेत्। अधो निधाय शीर्षञ्च ऊर्द्धपादद्वयञ्चरेत्। पद्मा-सनं तु तत्रैव भूमौ कर्परयुग्मकम्। दण्डे दण्डे तु यः कुर्य्यात् श्वासशान्तिपरः सुधीः! नित्यं सर्वासनं हित्वा न कुर्याद्वायुधारणम्। मासेन तस्य सिद्धिः स्यात् सर्व्व-रोगविनाशनम्"। अन्यान्यश्यामलानि तत्रोक्तानि विस्त-राद्य दर्शितानि। निर्वाणतन्त्रे जन्तुसंख्यया चतुर-शीतिलक्षसंख्यकान्यासनान्युक्तानि किन्तु तेषां लक्षणवि-शेषास्तत्र नोक्ताः तेषां मध्ये द्वयोरेव प्राधान्यमित्यपि तत्रैवोक्तम्। यथा "आसनानि कुलेशानि! यावन्तोजीव-जन्तवः। चतुरशीतिलक्षाणि चैकैकं समुदाहृतम्। आस-नेभ्यः समस्तेभ्यः साध्यतं द्वयमुच्यते। एकं सिद्धासनं नाम द्वितीयं कमलासनम्"। एषां बहुविधानामासनानां मध्ये "सुखेनैव भवेद्यस्मिन्नासने ब्रह्मचिन्तनम्। आसनं तद्विजानीयादितरत् सुखनाशनम्" इत्यभियुक्तोक्तेः पातञ्जलोक्तस्य स्थिरसुखमासनमिति ब्रह्मचिन्तने साध्य-तेत्वेवमेयम्। तन्त्रसारे योगाङ्गासनानि पञ्च सलक्षणान्यु-

क्तानि यथा "पद्मासनं खस्तिकाख्यं भद्रं वज्रासनन्तथा। वीरासनमिति प्रोक्तं क्रमादासनषट्कम्। उर्व्वोरुपरि विन्यस्य सम्यक् पादतले उभे। अङ्गुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्युत्क्रमात्ततः। पद्मासनमिदं प्रोक्तं योगिनां हृदयङ्गमम्। जानूर्व्वोरन्तरे सम्यक् कृत्वा पादतले उभे। ऋजुकायो विशेद्योगी स्वस्तिकन्तत् प्रचक्षते। सीमनि पार्श्वयोर्न्यस्य गुल्फयुग्मं सुनिश्चलम्। दृषणाधः पार्श्वपादौ पाणिभ्यां परिरक्षवेत्। भद्रासनं समुद्दिष्टं योगिभिः परिकल्पितम्। उर्वोः पादौ क्रमाद्यस्येत्तस्योः प्रत्यङ्मुखाङ्गुली। करौ निदध्यादाख्यातं वज्रासनमनुत्तमम्। एकस्मादधः कृत्वा विन्यस्योरौ तथेतरम्। ऋजुकायोविशेन्मन्त्री वीरासनमितीरितम्" यत्र महामालोवसति तस्मिन् देशजस्कन्धदेशे आस्तेऽनेन आ+अस–कर्म्मणि ल्युट्। ७सम्यग् विवेचयसाधने। असनएव अण्। ८असनवृक्षे पु०९जीवकवृक्षे पु०। आसनशब्दस्थाने शसादौ तद्धितयाजादौ च परे आसन्नादेशः इति काशिकादयः मसोरमायान्तु तत् दूषयित्वा आस्यशब्दस्थाने एव तदादेश इत्युक्तं यथा "यत्तु आसनशब्दस्य आसन्नादेश इति काशिकायासङ्गतन्तत् प्रामादिकम् "आस्योष्टकस्य वर्त्ति कामभीके" इति मन्त्रे सुखादित्वर्थस्यौचित्यात् 'इष्टकस्य चित् वर्त्तिकामन्नरास्यादिति" मन्त्रान्तरसंवादाच्च व्याख्यातञ्च तत्रैव वेदभाष्ये इति। ["निषेदुषीमासनमन्धकारैः" रघुः।

आसनबन्ध पु०आसनार्थं बन्धः। करचरणादीनामन्योन्यबन्धे

आसनमन्त्र पु० आसनस्य शुद्ध्यर्थं दानार्थं वा मन्त्रः। तन्त्रोक्ते "आधारशक्तिकमलासनाय नमः" इत्यादिके तत्तत्प्रकरणोक्ते १मन्त्रभेदे २देवेभ्य आसनदानार्थे मन्त्रभेदे च। स च मन्त्रः "पुरुष एवेदं सर्व्वं यद्भूतं यच्च भाव्यम्। उतामृतत्वस्येशानो यदन्नेनाभिरोहति" श्रौतः। "शेषमन्त्रं महादिव्यं फलमणिसङ्कलकम्। कोटिसूर्य्यप्रतीकाशं मन्त्राणासनमीश्वर!" इति पौराणिकञ्च। एवमन्योऽपि तत्तत्कल्पोक्तो ज्ञेयः। आसनपरिग्रहार्थे ३मन्त्रे च "आसनमन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्म्मोदेवता आसनपरिग्रहे विनियोगः" तन्त्रसा०।

आसना स्त्री आस–युच्। १स्थितौ २उपवेशने।

आसनादि पु० आसनमादिर्यस्य। मन्त्रोक्ते पूजाङ्गे आसनप्रभृतौ उपचारगणे "आसनं स्वागतं पाद्यमर्घमाचमनीयकम्" उपचारशब्दे निदर्शितः।

आसनी स्त्री आस–आधारे ल्युट् ङीप्। १ विपणौ २मर्य्यादायाञ्च मेदि०। [नि०। वासुदेवे मेदि०।

आसन्द पु० आसीदत्यस्मिन् प्रलयकाले आ+सद्–अच्प्रादि०

आसन्दी स्त्री आसद्यतेऽस्याम् आ+सद–अच्प्रादि०नि०गौरा० ङीप्। १ उपवेशनयोग्ये आसनयन्त्रे (केदारा) २ क्षुद्रखट्वायाम् (कौँच)। ३सभामध्यवेदिकायाम् "औदम्बरीमासन्दीं नाभिदघ्नामरत्निमात्रामुत्तराहरन्ति" कात्या०७,२७। ४उत्तरवेदायां पीठिकायाञ्च। आसन्दीशब्दस्य निरुक्तिरपि शत० ब्रा० दर्शिता। "इदं वा आसन्दी अस्यां ह्येतं सर्व्वमासद्यम् तस्मादस्या आसन्दीमाहरन्ति" इति। स्वल्पार्थे कन्। क्षुद्रासनयन्त्रभेदे स्त्री। "जाम्बूनदमयीमासन्दिकाम्" काद०। आसन्दी+अस्त्यर्थे मतुप् मध्वा० मस्य वः। आसन्दीयुक्ते त्रि०स्त्रियां ङीप्। "आसन्दीवान् ग्रामभेदः" त्रि०कौ०।

आसन्न त्रि० आ+सद–क्त। १निकटस्थे, २उपस्थिते च। "आसन्नपतने कूले कूलं पिपतिषतीति" भा० भा०। ३सन्निधानयुक्ते ४सम्यक्स्थिते च "सर्व्वमत्रासन्नमिति" शत०ब्रा०। ५शब्दबोधसाधनासत्तियुक्ते वाक्ये "आसन्नानासन्नविभागव्याघातः" शब्दचिन्ता०। ६सूर्य्यौ च।

आसन्नकाल पु० आसीदत्यस्मिन् काले आ+सद–आधारे क्त कर्म्म०। मृत्युकाले।

आसन्य पु० आस्ये भवः यत् आसन्नादेशः। मुखभवे सुखान्तर्विलस्थे सुख्ये प्राणे "अथ हैनमासन्य प्राणमूचुः" शत०ब्रा०।

आसन्वत् त्रि० आस्यसमानार्थकः आसन्शब्दोऽस्ति ततः अस्त्यर्थे मतुप्। आस्ययुक्ते मुखे। "यद्भूतं यच्च भाव्यमासन्वत्तेन ते चारये विषम्" अथ० ६,१२,२।

आसमञ्ज पु० असमञ्ज एव स्वार्थे अण्। सूर्य्यवंश्ये सगरपुत्रे क्षत्रियभेदे।

आसम्बाध त्रि० समन्तात् संबाधा यत्र। सङ्कीर्णस्थाने परस्परसंघर्षणेन क्लिष्टे। "आसम्बाधा भविष्यन्ति पन्थानः शरदृष्टिभिः" रामा०।

आसव पु० आस्रूयते आ+स्रु–कर्म्मणि अण्। १ अभिषवजीये मद्ये (चोयानमद) तल्लक्षणादि भावप्र०। "यस्य पक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः। आसवस्य बीजद्रव्यगुणैर्तेवागुणाः समाः" नवपुराणमद्ययोर्गुणास्तत्रैव। "मद्यं नवमभिष्यन्दि लिदोषजनकः परम्। अल्पञ्च दुःखं याहि दुर्गन्धं विशदं गुरु। जीर्णं तदेव रोचिष्णु लघिष्ठेन्द्रियतर्पणम्। हृद्यं सुगन्धि गुणवद्बहु श्रम-

विशोधनम्"। सात्विकादिपानकर्त्तृभेदेन चेष्टाविशेषाश्च तल्लोक्ताः "सात्विकोगीतिहास्यादि राजसो साहसादिकम्। तामसो निन्द्यकर्म्माणि निद्रां च मदिरां चरन्" । चरन् पिबन् कुर्य्यादिति शेषः। "विधिना मात्रया काले हितैरन्नैर्बलावलम्। प्रकृतीवः पिबेन्मद्यं तस्य स्यादमृतं यथा। किन्तु मद्यं स्वभावेन यथैवान्नं तथा स्मृतम्" सम्प्रति तु मद्यभेदेन गुणविशेषादिकमुक्तं यथा

"सर्व्वं पित्तकरं मद्यमम्लं दीपनरोचनम्। भेदनं कफवातघ्नं हृद्यं वस्तिविशोधनम्। पाके लघु विदाह्यघ्नं तीक्ष्णमिन्द्रियबोधनम्। विकाशि स्फुटविश्लेषं ग्रहणु तस्य विशेषकम्। माद्वीकमविदाहित्वान्मधुरान्वयतस्तथा। रक्तपित्तेऽपि सततं बुधैर्न प्रतिषिध्यते। मधुरं तद्धि रूक्षञ्च कषायानुरसं लघु। लघुपाकि सरं शोथविषमज्वरनाशनम्। माद्वीकाल्पान्तरं किञ्चित् खार्জ্জूरं वातकोपनम्। तदेव विगदं रुच्यं कफघ्नं कर्शनं लघु। कषायमधुरं हृद्यं सुगन्धीन्द्रियबोधनम्। कासार्शोग्रहणीदोषमूत्राघातानिलापहा। स्नेहरक्तक्षयहिता सुरा दृंहणदीपनी। कासार्शोग्रहणीश्वासप्रतिश्यायविनाशिनी। श्वेता मूत्रकफस्नेहरक्तमांसकरी सुरा। अर्शोरोचकहृत्कुक्षितोदशूलप्रमर्दनी। प्रसन्ना कफवातार्शोविबन्धानाहनाशिनी। पित्तलाल्पकफा रूक्षा सर्व्वव्याप्तिप्रकोपणी। विष्टम्भिनी सुरा गुर्वी क्लेष्मला तु मधूत्किटा। रूक्षा नातिकफा ह्रद्या पाचनी चाग्निकी स्मृता। त्रिदोषो भेद्यग्रथ्यघ्न कोष्ठनो वदनप्रियः। ग्राह्यघ्नोऽजगलः पक्वा रूक्षस्फुटकफापहृत्। हृद्यः प्रवाहिकाटोपदुर्नामानिलशोषहृत्। वक्रसो हृतसारत्वाद्विष्टम्भी वातकोपनः। दीपनः स्फुटविश्लेषो विष्टब्धोऽल्पमदो गुरुः। कषायो मधुरः शीधुर्गौडः पाचन दीपनः। शार्करो मधुरो रुच्यो दीपनो वस्तिशोधनः। वातघ्नो मधुरः पाके हृद्य इन्द्रियबोधनः। तद्वत् पक्वरसः शीधुर्बलवर्णकरः सरः। शोफघ्नो दीपनो हृद्यो रुच्यः क्लेष्मार्शसां हितः। कर्शनः शीतरसिकः क्षयशूलोदरापहः। वर्षाकालरसः स्वर्य्यो विबन्धघ्नोऽर्शसां हितः। आरिष्टिकः पाण्डुरोगघ्नोव्रणः संग्राहको लघुः। कषायमधुरः शीधुः पित्तघ्नोऽसृक्प्रसादनः। जाम्बवो बद्धनिस्यन्दस्तुवरो वातकोपनः। तीक्ष्णः सुरासवो हृद्यो मूत्रलः कफवातनुत्। सस्नेहप्रियः स्थिरमदो विष्टब्धोऽनिलनाशनः। लघुर्मध्वासवश्छेदी मेहकृच्छ्रविषापहः। तिक्तः कषायशोफघ्नस्तीक्ष्णः स्वादुरवातलः। तीक्ष्णः कषायो मदकृन्नामकफगुल्महृत्। क्षमिमेदोऽनिलहरो मैरेयो मधुरो गुरुः। बल्यः पित्तहरो वर्ण्यो ग्रहणीकेचुरासवः। शीधुर्मधूकपुष्पोत्थो विदाह्यग्निबलप्रदः। रूक्षः कषायकफहृद्वातपित्तप्रकोपणः। निर्दिशेद्रसतान्यान् कन्दमूलफलासवान्। नवं मद्यमभिष्यन्दि गुरु वातादिकोपनम्। अनिष्टगन्धं विरसमहृद्यञ्च विदाहि च। सुगन्धि दीपनं हृद्यं रोचिष्णु क्षमिनाशनम्। स्फुटलोत्कारं जीर्णं लघु वातकफापहम्। अरिष्टो द्रव्यसंयोगसंस्कारादधिको गुणैः। बहुदोषहरश्चैव दोषाणां शमनश्च सः। दीपनः कफवातघ्नः सरः पित्तविशोधनः। शूलाध्मानोदरश्लीहज्वराजीर्णार्शसां हितः। पिप्पल्यादिकृतो गुल्मकफरोगहरः स्मृतः। चिकित्सितेषु वक्ष्यन्तेऽरिष्टा रोगहराः पृथक्। अरिष्टासवशीधूनां गुणान् कर्म्माणि चादिशेत्। बुद्ध्या यथास्वं संस्कारमवेक्ष्य कुशलो भिषक्। स्नान्द्रं विदाहि दुर्गन्धं विरसं क्षमिलं गुरु। अहृद्यं तरुणं तीक्ष्णसुण्णं दुर्भाजनस्थितम्। अल्पौषधं पर्य्युषितमत्यच्छं पिच्छिलञ्च यत्। तदर्द्धं सर्व्वदा मद्यं किञ्चिच्चेष्यन्तु यद्भवेत्। तत्र यत् क्लोकसम्भारं तरुणं पिच्छिलं गुरु। कफप्रकोपि तन्मद्यं दुर्जरञ्च विशेषतः। पित्तप्रकोपि बहुलं तीक्ष्णसुण्णं विदाहि च। अहृद्यं फेनिलं पूति क्षमिलं विरसं गुरु। तथा पर्य्युषितञ्चापि विद्यादनिलकोपनम्। सर्व्वदोषैरुपेतन्तु सर्व्वदोषप्रकोपणम्। चिरस्थितं वातरसं दीपनं कफवातजित्। रुच्यं प्रसन्नं सुरभि मद्यं सेव्यं मदावहम्। तस्यानेकप्रकारस्य सद्यस्य रसवीर्य्यतः। सौक्ष्म्यादौष्ण्याच्च तैक्ष्ण्याच्च विकाशित्वाच्च वह्निना। समेत्य हृदयं प्राप्य धमनीरूर्द्धमागतम्। विक्षोभ्येन्द्रियचेतांसि वीर्य्यं मदयतेऽचिरात्। चिरेण क्लेष्मिके दुःखि पानतो जायते मदः। अचिराद्वातिके दृष्टः पैत्तिके शीघ्रमेव तु। सात्विके शौचदाक्षिण्यधर्म्मखज्ञानलक्षणः। गीताध्ययन सौभाग्यसुरतोल्लाहक्षमदः। राजसे दुःखशीलत्वमात्मत्यागं ससाहसम्। कलहं साहसन्वन्तं करोति पुरुषे मदः। अशौचनिद्रामात्सर्य्यागम्यागमनलोलताः। असत्यभाषणञ्चापि कुर्य्यात्ति तामसे मदः। रक्तपित्तकरं शुक्तं क्लेदि भुक्तविपाचनम्। वैस्वर्य्यं जरयं क्लेष्मपाण्डुक्रिमिहरं लघु। तीक्ष्णोष्णं मूत्रलं हृद्यं कफघ्नं कटुपाकि च। तद्वत्तदासुतं सर्वं रोचनञ्च विशेषतः। गौड़ानि

रसगुल्कानि मधुगुल्कानि यानि च। यथापूर्वं गुरुतराण्य-भिष्यन्दकराणि च। हृद्यं तु दीपनं हृद्यं हृत्पा-ण्डुत्वशिरोरुगनुत्। मद्यखण्डोविकारज्ञं भेदि सौवीरकं तथा। धान्याम्लं धान्ययोनित्वाद्दीपनं दाहनाशनम्। स्वल्पोत्पादात्तु पवनकफहृत्याहरं लघु। तैक्ष्ण्याच्च निर्हे-रेदाशु कफं गण्डूषधारणात्। मुखवैरस्यदौर्गन्ध्यमल-शोषक्लमापहम्। दीपनं जरणं भेदि हितमास्यापनेषु च। सहृन्मात्रितानाञ्च जनानां साम्लमुच्यते।"

स्मृतौ तु जातिभेदेन मद्यविशेषपाननिषेधाच्च मद्य-विभागादि दर्शितं यथा प्रा० वि० मनुहारीतयमैः। "सुरा वै मलमन्नानां पाप्मा च मलमुच्यते। तस्माद्ब्राह्मण राजन्यौ वैश्यश्च न सुराम्पिबेत्"। तथा च श्रुतिः "सुरा वै मलमन्नानामन्नं पाप्मतमं सुरेति"। यद्यप्यन्नशब्दः शूक-धान्यतण्डुलविकारविशेष ओदने प्रसिद्धस्तथापि बहुतर वचनात् पिष्टयवाद्यादिविकारमपि लक्षयति। तेनान्न-विकारविशेषोमदहेतुः सुरा इत्युच्यते। स्मृतिः। "गौड़ी-पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा। यथैवैका तथा सर्व्वा न पातव्या द्विजोत्तमैरिति" त्रिविधैव सुरेति पुन-र्यवादिविकारव्यावृत्तस्य त्रितयस्यानुगतस्यैकस्य प्रवृत्तिनिमि-त्तस्याभावात् न पानक्रियाव्याप्यत्वम् द्रव्यव्यावर्त्तकधर्म्मस्य च महापातकहेतुपानकर्म्मत्वमुपाधिः सुरात्वानाधीनं महा-पातकं तज्ज्ञानाधीनञ्च सुरात्वज्ञानम् इतरेतराश्रयापत्तेः-पुनरुक्त्यवचनविरोधाच्च यथा पुलस्त्यः। "पानसं द्राक्षं माधूकं खार्জ্জूरं तालमैक्षवम्। मार्द्वीकं टाङ्कं माध्वीकमैरेयं नारि-केलजम्। समानानि विजानीयान्मद्यान्येकादशैव तु। द्वादशन्तु सुरा मद्यं सर्व्वेषामधमं स्मृतम्"। अनेनैकादशानां सुरात्वं निषेधति। मद्यशब्दस्तु मदहेतुद्रव्यद्रव्यमात्र-वचनः अन्नादेव वचनात् न तु मद्यमात्रं सुराशब्दस्यार्थः तथा च हारीतः। "गौड़ीं माध्वीं सुरां पैष्टीं पीत्वा-विप्रः समाचरेत्। तप्तकृच्छ्रं पराकञ्च चान्द्रायणमनुक्र-मात्"। त्रयाणां सुरात्वे क्रमेण प्रायश्चित्तत्रयं न स्यात्। तथा भविष्ये "सुरा पैष्टी तु सख्योक्ता न तस्यां तरते समे"। पैष्टीति तण्डुलविकारमात्रोपलक्षणम्। इतरे गौड़ी-माध्व्यौ। अतो अन्नविकार एव सुराशब्दस्य रूढत्वात् त्रिविधा सुरेति गौड़ीमाध्व्योर्गौणसुरात्वज्ञापनार्थम् तेने-तत्पानेऽपि महापातकत्वमतिदिशति यथैवैका तथा सर्व्वेति पैष्ट्यां पूर्व्वप्रसिद्धिं दर्शयति यथा पैष्टी सुरा तथा सर्व्वा गौड़ी माध्वी च। पूर्ववचनोक्तापि पैष्टी दृष्टान्तत्वेनात्र-दर्शिता। न पातव्या द्विजोत्तमैरित्यर्थः। त्रैवर्णिकपरत्वे उत्तमपदानर्थक्यात्। न तु बहुवच-नानर्थक्यपरीहारार्थं सुत्तमप्रातिपादिकानर्थक्यं शुक्लं बहुवचनस्य सजातीयोपस्थापकत्वेन चरितार्थत्वात्। अतो ब्राह्मणस्य त्रिविधसुरापानं महापातकम्। "क्षत्रियवैश्य-योस्तु" सुरा वै मलमन्नानामिति वचनेन पैष्ट्यां नेति स्थितम् गोविन्दराजविश्वरूपवीरेश्वरराघवमयमनुमतोऽर्थः। अत एव "एवं माध्वी च गौड़ी च पैष्टी च त्रिविधा सुरा। द्विजातिभिर्न्न पातव्या कदाचिदपि कर्हिचित्" इतिमनुवच-नेऽपि द्विजातिपदं ब्राह्मणपरमेव। अतएव द्विविधसुरा-पाने क्षत्रियादीनां महापातकं तावदस्तु दोषाभावमेवाह हारीतवाक्यकृत्यः। "कामादपि हि राजन्योवैश्यो वापि कथञ्चन। मद्यमेवासुरां पीत्वा न दोषं प्रतिपद्यते" तदेवं पैष्टी निषेधस्त्रैवर्णिकानाम् गौडीमाध्वीनिषेधस्तु ब्राह्मणस्यैव ननु ब्राह्मणराजन्याविति कर्तृविशेषणं पुंल्लिङ्गं तत्र विवक्षि-तम् अतः कथं ब्राह्मण्याः सुरापानं महापातकम् उच्यते निषिध्यमानक्रियायाविधेयत्वेन तत्कर्त्तुरनुपादेयत्वात्त द्विशेषणं लिङ्गमविवक्षितम् हविरभक्षयत्ववत्। अतस्त-ज्जातिस्त्रीणामपि पाननिषेधः। तथा च भविष्ये "तस्माच्च पेयं विप्रेण सुरामद्यं कथञ्चन। ब्राह्मण्यापि न पेया वै सुरा पापभयावहा"। "यद्ब्राह्मणी सुरापी स्याच्च तां देवाः पतितोकं नयन्तीति" श्रुतिः। "पतत्यधोशरीरेण भार्य्या यस्य सुरां पिबेत्। पतितार्द्धशरीरस्य निष्कृतिर्नोपपद्यते"। न चैवं क्षत्रियवैश्यस्त्रीणामनिषेधः ब्राह्मणी-पदस्य निषिद्धसुरापानकर्त्तृभार्य्योपलक्षकत्वात् "भार्य्या यस्य सुरां पिबेदिति सामान्यश्रवणाच्च।

वेदविहितः मद्यसवनप्रकारस्तु सौत्रामणीशब्दे वक्ष्यते। "बलरक्षःपिशाचान्नं मद्यं मांसं सुरासवम्। तद्ब्राह्म-णेन नात्तव्यं देवानामश्नता हविः" मनुः। "अनासवाख्यं करणं मद्यस्य" कुमा०। "नानासवपात्रसङ्कुलम्" काद०। "सुखं लाक्षाक्षिप्तं पिबति चषकं सासवमिव" भामिन०। "संविदासवयोर्मध्ये संविदेव गरीयसी" तन्त्र०। भावे घञ्। २मद्यादेरभिषवे (मदचोयन) आस्रूयतेऽत्र आधारे घञ्। ३अभिषवपात्रे। आ+सू-प्रसवे अच्। ६प्रसवकर्त्तरि त्रि०। "देवस्य सवितुर्मति-मासवं विश्वदेव्यम्" श्रुतिः। [त०। ताड़वृक्षे।

आसवद्रु पु० आसवस्य (ताड़ी) मद्यभेदस्य कारणं द्रुः शाक०

आसवनीय त्रि० आ+सु-कर्म्मणि अनीयर्। अभिषवणीये-

आसा स्त्री आ+सो-अङ्। अन्तिके निरु०"पितुर्न यस्या-सया" ऋ०१,१२७,८, "आसया अन्तिकेन" भा०। तस्य स्त्रीत्वमपि। "आ न इन्द्रो दूरादासात्" ऋ०४,२०,१, "आसादन्तिकादिति" भा०।

आसादन न०आ+सद-णिच्-ल्युट्। १सन्निधापने, २स्थापने "क्षत्वोत्तरपरिग्रहादि करोत्याज्यासादनात्" कात्या०६,२,५, आश्व० श्रौ० उदा० ३आसन्नतासम्पादने ४गर्हणे च "वयमासादने तस्य दर्पमद्य हरेमहि" भा०स०२०अ०।

आसादित त्रि०आ+सद-णिच्-क्त। १निकटीकृते २प्राप्ते च "आसादितप्रकटनिर्मलचन्द्रहासः" सा०द० ३आयोजिते ४सन्निधापिते ५सम्पादिते ६कामकेलिपरे च।

आसाद्य त्रि० आ+सद-णिच्-यत्। प्राप्ये "अभूदनासाद्यम-धिज्यधन्वनः" रघुः। २निकटीकार्य्ये ३अवसादं प्रापणीये आ+सद-णिच्-ल्यप्। ४प्राप्येऽर्थे अव्य०।

आसार पु०आ+सृ-घञ्। १धारासम्पाते २वेगवृष्टौ, "त्वामा-सारप्रशमितवनोपप्लवं साधु मूर्ध्ना"। "पुष्पासारैः स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः" मेघदू० "आसारसिक्तक्षिति-वाष्पयोगात्" रघुः। ३प्रसरणे, ४सैन्यानां सर्व्वतो व्याप्तौ च। ५करणे घञ्। सुहृद्वृन्दे। ६द्वादशराजमण्डलमध्ये नृपभेदे। द्वादशराजमण्डलज्ञाने दर्शितम् यथा "आत्ममण्डलमेवात्र प्रथमं मण्डलं भवेत्। समनात्तस्य विज्ञेया रिपवो मण्डलस्य तु। उभेतस्तु सुहृत् ज्ञेयः यत्नुमित्रमतः परम्। मित्रमित्रमतो ज्ञेयं मित्रमित्र रिपुस्ततः। एतत् पुरस्तात् कथितं पश्चादपि निबोध मे। पार्ष्ण्याक्रन्दस्ततः पश्चात् तत आक्रन्द उच्यते। आसारस्तु ततोऽन्यः स्यादाक्रन्दासार उच्यते। जिगीषोः यत्नुयु-क्तस्य विद्धस्य तथा द्विज!। तत्रापि निचयः शक्तोवक्तुं मनुजपुङ्गव! निग्रहानुग्रहे शक्तोमध्यस्थः परिकीर्त्तितः। निग्रहानुग्रहे शक्तः सर्वेषामपि यो भवेत्। उदासीनः स कथितो बलवान् पृथिवीपतिः। मण्डलं तव संप्रोक्त मेतत् द्वादशराजकम्" ७षड्विंशरगर्भैः रचिते दण्डदक्षन्दोभेदे च।

आसाव्य त्रि० आ+सु-ण्यत्। अभिषवणीये मद्यादौ।

आसिक पु० असिः प्रहरणमस्य ठक्। खड्गेन युद्धकारके

आसिका स्त्री पर्य्यावेषासनम् आस-पर्य्याये ण्वुल्। पर्य्या-वेष उपवेशने। "उद्दासिकाः सुथन्ने" पात०भा०।

आसिक्त त्रि०ईषत् सम्यक् वा सिक्तः आ+सिच-क्त। १ईषत् सिक्ते २सम्यक्सिक्ते च।

आसित न० आस+भावे-क्त। १उपवेशने। आसधातौ उदा०। आधारे क्त। उपवेशनाधारे स्थाने। आसि-तस्य सुनेरपत्यं शिवा० अण्। असितसुनेरपत्ये स च गार्ग्यिल्लगोत्रे प्रवरः।

आसिधार न० असिधारा इवाऽत्यलञ्। "युवा युवत्या सार्द्धं यत् सुप्तभर्त्तृवदाचरेत्। अन्तर्निहितसङ्गः स्यात् आसिधार-व्रतं हि तत्" इति यादवोक्ते व्रतभेदे "अभ्यस्यतीव व्रत-मासिधारम्" रघुः।

आसिद्ध त्रि० आ+सिध-क्त। राजाज्ञया वादिना कृतावरोधे प्रतिवादिनि "नासिद्धस्तं विसृजेत्" नार०।

आसिनासि पुंस्त्री आसिरिव तीक्ष्णाग्रा नासा यस्य असिनासः सुनिभेदस्तस्यापत्यम् इञ्। तदपत्ये ततः युवापत्ये फक् तौल्व० न लुक्। आसिनासायनः तत्पौत्रे।

आसिबन्धकि पु० असिबन्धकस्यापत्यम् इञ्। असिबन्धका-पत्ये ततः युवापत्ये फक् तस्य तौल्व० न लुक्। आसि-बन्धकायनः तत्पौत्रे।

आसीन त्रि०आस+शानच्। उपविष्टे आसधातौ उदा०

आसीनप्रचलायित न० आसीनेन उपविष्टेनैव प्रचलवत् आचरितम् प्रचल-क्यच् भावे क्त। उपविश्य निद्रावशेन प्रचलनरूपे (वसेढोला) दोलने।

आसुत् त्रि० आ+सु-क्विप्। कृताभिषवे। तस्येदम् गहा० क। आसुतीयः। तत्सम्बन्धिनि त्रि०।

आसुति स्त्री आ+सु-क्तिन्। सोमादिनिष्पीड़ने १अभिषवे, २मद्यनिष्पादने(चोयान)इति ख्याते मद्यपाके च। "परिष्कृ-तस्य रसिन इयमासुतिश्चारुर्मदाय" ऋ०८,१,२६। आ+सु-प्रसवे क्तिप्। ३प्रसवे। "योनाविन्द्र! सुध्यङ्नृवोय आसुतिं दाः" ऋ०१,१०४,७। आसुतेः सन्निकृष्टदेशादि चतुरर्थ्यां मध्या० मतुप्। आसुतिमत् तद्वति त्रि० स्त्रियां ङीप्।

आसुतीवल पु० आसुतिरस्यास्य बलच् दीर्घः। १यौज्ञिके। २सोमाभिषवव्यापिनि याज्ञिके च।

आसुर त्रि० असुरस्येदम् अण्। असुरसम्बन्धिनि। "आसुरं तद्विजानीयं पीत्वा चान्द्रायणञ्चरेत्" स्मृतिः "कुलाल-चक्रनिष्क्रान्तमासुरं मृन्मयं स्मृतम्। तदेव दृश्यघटितं स्याद्यादि दैविकं भवेत्" कात्या०श्रौ०। तेन (मानसा) प्रभृतिसृष्टस्यस्य दृश्यघटितत्वेन याज्ञवल्क्यादीनां तत्पाठ्यता। स्त्रियां ङीप्। "आसुरी रात्रिरत्यन्त तस्मात्तां परिवर्जयेत्" स्मृतिः। २असुरवदाचारयुक्ते तदाचारश्च गीतायामुक्तोयथा।

"द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च। दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु। प्रवृत्तिञ्च निवृत्तिञ्च जना न विदुरासुराः। न शौचं नापि चाचारो न सत्यं तेषु विद्यते। असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम्। अपरस्परसम्भूतं किमन्यत् कामहैतुकम्। एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः। प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः। काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः। मोहाद्गृहीत्वाऽसद्ग्राहान् प्रवर्त्तन्तेऽशुचिव्रताः। चिन्तामपरिमेयाञ्च प्रलयान्तामुपाश्रिताः। कामोपभोगपरमाएतावदिति निश्चिताः। आशापाशशतैर्बद्धाः कामक्रोधपरायणाः। ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान्। इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम्। इदमस्तीदमपि मे भविष्यति पुनर्धनम्। असौ मया हतः शत्रुर्हनिष्ये चापरानपि। ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी। आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया। यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः। अनेकचित्तविभ्रान्तामोहजालसमावृताः। प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ। आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः। यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्व्वकम्। अहङ्कारं बलं दर्पं कामं क्रोधञ्च संश्रिताः। मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः। तानहं द्विषतः क्रूरान् संसारेषु नराधमान्। क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु। आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि। मामप्राप्यैव कौन्तेय ! ततो यान्त्यधमां गतिम्। त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः। कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्। एतैर्विमुक्तः कौन्तेय ! तमोद्वारैस्त्रिभिर्नरः। आचरत्यात्मनः श्रेयस्ततो याति परां गतिम्। यः शास्त्रविधिमुत्सृज्य वर्त्तते कामचारतः। न स सिद्धिमवाप्नोति न सुखं न परां गतिम्। तस्माच्छास्त्रं प्रमाणन्ते कार्य्याकार्य्यव्यवस्थितौ। ज्ञात्वा शास्त्रविधानोक्तं कर्म्म कर्त्तुमिहार्हसि"।

३असुरवत् कर्त्तव्ये विवाहभेदे पु०। स च "ब्राह्मोदैवस्तथैवार्षः प्राजापत्यस्तथासुर" इति विभज्य "पैशाचश्चासुरश्चैव न कर्त्तव्यौ कदाचन" इति निषिध्य "ज्ञातिभ्योद्रविणं दत्त्वा कन्यायै चैव शक्तितः। कन्याप्रदानं स्वाच्छन्द्यादासुरोधर्म उच्यते" इति मनुना लक्षितः। ब्राह्मादिविवाहेषु प्रशस्त फललाभरूपफलसङ्गा "इतरेषु चशिष्टेषु नृशंसानृतवादिनः। जायन्ते दुर्विवाहेषु ब्रह्मधर्म्म द्विषः सुताः"। अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा। निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान् विवर्जयेत्"। "कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च" इति मनुना तस्य निन्दा कृता "आसुरो द्रविणादानात्" या०स्मृ०। आसुरादिविवाहस्तु कर्त्तव्योऽग्निसाक्षिकः" इत्युक्तेः तत्राप्यन्याधानं कार्य्यमेव "आसुरादिविवाहेषु पित्र्यगामि भवेद्धनम्" स्मृतिः "अप्रजस्त्वेधनं भर्त्तुर्भ्रातृदिषु चतुर्ष्वपि। दुहितॄणां प्रसूता चेच्छेषेषु पित्र्यगामि तत्" या०स्मृ०। "शेषेष्वासुरगान्धर्वराक्षसपैशाचेषु भार्य्यात्वं प्राप्नुयाः" इति मिता०। दायभागस्तु तत्तद्विवाहकालेषु दत्तं धनमिति व्याख्यातम्। ४राजर्षभे (राइसरिषा) स्त्री राजनि०।५ विड्लवणे न०। स्वार्थे अण्। ६असुरे। "तस्मादप्यस्नेहाददानमश्रद्धानमयजमानमाहुरासुरोवतेति" शा०उ० उक्ते ७अयजनशीले अयजनादिकर्त्तृत्वादस्यासुरत्वम्। अतएव मनुना "अयज्वनां हि यद्द्रव्यमासुरस्वं तदुच्यते इति" तद्द्रव्यस्यासुरधनत्वमुक्तम्। ततश्च शास्त्रानभ्यनुज्ञातविषयभोगहेतुरागप्रधाना, वैदिकनिषेधातिक्रमेण स्वभावसिद्धरागद्वेषानुसारिसर्व्वानर्थहेतुप्रवृत्तिहेतुभूता च राजसी प्रवृत्तिः आसुरी प्रकृतिः। आसुरी सम्पत्तु असुरमणहेतुभूता रजस्तमोमयी सम्पद् सा च अशुभवासनासन्ततिजन्या तल्लक्षणं तु "दम्भोदर्पोऽभिमानश्च क्रोधः पारुष्यमेव च। अज्ञानं चाभिजातस्य पार्थ !। सम्पदमासुरीम्" गीतोक्तम्। "दैवी सम्पद् विमोक्षाय निबन्धायासुरी मता" गीता दक्षेदाक्षकचिकित्साभेदे स्त्री यङ्ङ्च०।

आसुरस्व न० ष्यञ्। "अयज्वनान्तु यद्द्रव्यमासुरस्वं तदुच्यते" इति मनूक्ते अयाज्ञिकधने।

आसुरायण पु०असुरेरपत्यं युवा फक्। असुरेर्युवगोत्रापत्ये स च शुक्लयजुःसम्प्रदाय प्रवर्त्तके "आसुरायणाच्च याज्ञवल्क्यादासुरायणः" भट्ट० ब्रा० "आसुरेरुपसंख्यानम्" वार्त्ति०उक्तेः स्त्रियां ङीप्। आसुरायणी।

आसुरि पु० तत्त्वज्ञानोपदेशेन असति संसारम् असुरच् असुरः कपिलस्तस्य शिष्यः इञ्। सांख्ययोगाचार्य्ये कपिलशिष्ये ऋषिभेदे। "एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ। आसुरिरपि पञ्चशिखाय तेन बहुधा कृतं तन्त्रम्" सा०का०। सएव प्रत्यूहं तर्पणोपयिगये पठितः। "सनकश्च सनन्दश्च तृतीयश्च सनातनः। कपिलश्चासुरिश्चैव बोढुः पञ्चशिखस्तथेति" तर्पणे स्मृतिः।

युवापत्ये तु फक् तस्य लोप्त्व० न लुक्। आसुरिः तत्पुत्रः आसुरायणः तत्पौत्रः स च यजुर्वेदसंप्रदायप्रवर्त्तकः आसुरायणशब्दे उदा०।

आसुरिवासिन् पु० आसुरौ तत्समीपे वसति णिनि। आसुरिसन्नेरन्तेवासिनि प्राग्दीप्रवे शुक्लयजुःसंप्रदाय प्रवर्त्तके ऋषिभेदे। "प्राग्दीप्रवात् आसुरिवासिनः प्राग्दीप्रवः" शत०ब्रा०। [२सम्यक्सेके च।

आसेक पु० आ+सिच-घञ्। जलादिना १दृच्चादेरीषत्सेचने

आसेक्य पु० आसेकमर्हति यत् आ+सिच-ण्यत्वा। "पित्तोस्तु तल्यतीर्ण्यत्वादासेक्यः पुरुषो भवेत्। स शुक्रं प्राश्य लभते ध्वजोन्नतिमसंशयम्" इति वैद्यकोक्ते नपुंसकभेदे। ध्वजोन्नतये तस्य जन्मोत्तरं शुक्रसेकयोग्यत्वात् तथात्वम्।

आसेचन त्रि० न सिच्यते हृष्यति मनोऽत्र आधारे ल्युट् असेचनः स्वार्थेऽण्। १यद्दर्शने मनो न हृष्यति तस्मिन् मन आनन्दविशेषहेतौ पदार्थे। स्वार्थेकन्। तत्रैव। "नयनयुगासेचनकम्" सा०द०। रायमुकुटस्तु असेचनशब्देवाह। आ+सिच-भावे ल्युट्। २सम्यक्सेके न०। "तस्य सर्पिरासेचनं कृत्वा" शत०ब्रा०। करणे ल्युट्। ३आसेचनसाधने पात्रे। "या पात्राणि पूषन् आसेचनानि" ऋ० १,१६२,१३। ४ताडपे क्षुद्रपात्रे स्त्री ङीप्।

आसेदिवस् त्रि० आ+सद-लिट्। १निकटागते २प्राप्ते च। स्त्रियां ङीप् वसोरुत्वम् इटोनिषेधश्च। आसेदुषी।

आसेद्ध त्रि० आ+सिध-भावे घञ्। व्यवहारे राजाज्ञया प्रतिवादिनो गत्यादिरोधकर्त्तरि वादिनि स्त्रियां ङीप्। आसेधशब्दे उदा०।

आसेध पु० आ+सिध-भावे घञ्। व्यवहारे राजाज्ञया वादिना प्रतिवादिनः स्थानान्तरगत्यादिरोधे, तत्कालप्रकारभेदादिः मिता० नारदेनोक्तः। "वक्तव्येऽर्थे व्रजतिष्ठन्नसत्क्रामन्नश्च तद्वचः। आसेधवेद्विवादार्थी यावदाज्ञा नदर्शनम्। स्थानासेधः कालकृतः प्रवासात् कर्म्मणस्तथा। चतुर्विधःस्यादासेधो नासिद्धं विलङ्घयेत्। आसेधकाल आसिद्धः आसेधं योऽतिवर्त्तते। स विनेयोऽन्यथा कुर्व्वन्नासेद्धा दण्डभाग् भवेत्। नदीसन्तार कान्तारदुर्द्दशोपप्लवादिषु। आसिद्धस्तं परासेधसत्क्रामन्नापराभुयात्। निर्वेष्टुकामोरोगार्थी वियद्भुर्व्यसने स्थितः। अभियुक्तस्तवान्येन राजकार्य्येऽथतत्त्वतः। गवां प्रचारे गोपालाः शस्यावापे कृषीवलाः। गिल्लिनश्चापि तत्कालमायुधीयाश्च विग्रहे"। नासेद्धव्यादति शेषः

आसेवन न० सम्यक् सेवनम्। १सततसेवने २पौनःपुन्ये च। "निसृष्टपतावनासेवने" पा०। "आसेवनं पौनःपुन्यम्" सि०कौ०।

आसेवा स्त्री आ+सेव-अ। १पौनःपुन्ये "पौनःपुन्यमासेवा" सि०कौ०। २सम्यक्सेवायाञ्च।

आसेवित त्रि० आ+सेव-क्त। १सम्यक्सेविते २पौनःपुन्येन सेविते च भावे क्त। ३आसेवायां न०। ततः इष्टा०इनि। आसेवितिन्। आसेवनकर्त्तरि त्रि० स्त्रियां ङीप्।

आस्कन्द पु० आ+स्कन्द-घञ्। १उत्प्लवने २आक्रमणे ३संघोषणे ४तिरस्कारे घोटकानामास्कन्दिताख्ये ५गतिभेदे

आस्कन्दन न० आस्कद्यतेऽत्र आधारे ल्युट्। १युद्धे भावे ल्युट्। २तिरस्कारे ३आक्रमणे "चरणास्कन्दनमाभिताचलेन्द्रः" किरा०। ४अश्वगतिभेदे च।

आस्कन्दित आ+स्कन्द-स्वार्थे णिच्-क्त आस्कन्दोजातोऽस्य तारका० इतच् वा। १अश्वानां गतिभेदे स च षड्विधः तल्लक्षणञ्चाक्रं हेमचन्द्रेण। "गतयः षड्ध धाराख्यास्तुरङ्गाणां क्रमादिमाः। तत्र धौरितकं धौर्यं धोरणं धोरितञ्च तत्। वल्गुकङ्गुलिखिक्रोड़गतिवद्वल्गितं पुनः। अध्वकायसहत्वात् कुञ्चितायं नतत्त्रिकम्। प्लुतं तु लङ्घनं पक्षिद्वगवोरनुहारकम्। उत्तेजितं तेरितं स्यात् मध्यवेगेन या गतिः। उत्तेरितसपकण्ठमास्कन्दितमित्यपि। चतुर्भिश्च पदैः कोपादिव उत्प्लुत्य या गतिः"। संज्ञायां स्वार्थे वा कन्। तत्रैव। तारः इतच्। २आस्कन्दनयुक्तमात्रे त्रि०।

आस्क्र त्रि० आ+क्रम-ड वेदे नि०ह्रस्वः। आक्रामके "आनोविश्वा आस्क्रा गमन्तु देवाः" ऋ०१,१८३,२। "आस्क्राः शत्रूणामाक्रमितारः" भाष्यम्।

आस्त त्रि० आ+अस+क्तिचि क्त। सम्यक्क्षिप्ते।

आस्तर पु० आ+स्तृ-कर्म्मणि अप्। १कम्बलादिरूपास्तरणे (झूल) इति ख्याते। २विस्तरणीये कटादौ "वासो वल्कलमास्तरः किसलयः" भा०श०। भावे अप्। ३तृविस्तारे

आस्तरण न० आस्तीर्य्यते कर्म्मणि ल्युट्। १आस्तीर्य्यमाणे कटादौ "दिवास्तरणसंकीर्णे विस्तीर्णे गमनोत्तमे"। "दर्भास्तरणमास्तीर्य" भा० प० २५० अ०। २आस्तरण पक्षाम् स्त्री ङीप्। भावे ल्युट्। ३विस्तारे। "निवेशनं पुनर्नवीकृत्य लेपनास्तरणोपस्तरणैः" आचा०८०। आस्तरणे दीयते कार्य्यं वा व्युत्पा०अण्। ४आस्तरणे दीयमाने ५तत्र कार्य्ये च त्रि०।

आस्तरणिक त्रि० आस्तरणं प्रयोजनमस्य ठक्। आस्तरण-साधने वस्त्रादौ। "अथास्तरणिकं सर्वं हृताढ्यं समवेशयत्" रामा०। तत्रेदम् इदमत्वात् ठक्। आस्तरणीय आस्तरण सम्बन्धिनि त्रि०।

आस्तायन त्रि० अस्तोत्तमयम् अस्ति+विद्यमानस्य सन्निकृष्ट-देशादि पद्मा०फक्। विद्यमानसन्निकृष्टदेशादौ। [च

आस्तार पु० आस्तीर्यते आ+स्तृ-घञ्। १विस्तार्ये २विस्तारे

आस्तारपङ्क्ति स्त्री कर्म०। वैदिके छन्दोभेदे सा च सर्व्वानु० कात्या० दर्शिता यथा "पञ्चमं पङ्क्तिः पञ्चपदा। अथ चतुष्पदाद्या विराट् दशका। अयुजौ जागतौ ततोऽष्टकौ युजौ तद्विपरीतादौ चेत् प्रस्तारपङ्क्तिरन्त्यौ चेदास्तारपङ्क्तिरादन्त्यौ चेत् संस्तारपङ्क्तिर्मध्यमौ चेद्विष्टारपङ्क्तिः"।

आस्राव पु० आस्रुवन्त्यत्र आ+स्रु+आधारे घञ्। यज्ञे सोद्गृतां स्रवणाधारे देशे। "ततोऽद्गृतास्रावे सोध्यमाघानुपोपविवेश" आ०उ०। "उद्गातृन् उद्गातृपुरुषान् आगत्य आस्रुवन्त्यस्मिन्निति आस्रावस्तस्मिन्नास्रावे" भा०। "उदङ्मुखोगत्वाऽऽस्रावचात्वालशामित्रान् उदङ्मुखोनभोऽसंस्पृशः" द्राह्यायणः। "उदङ्मुखास्तिस्रन्तः ततः आस्रावदेशं चात्वालं शामित्रं च स्तुत्यादिभिर्मन्त्रैर्यथाक्रमसुपतिष्ठेरन्" ताण्ड्यब्रा० भा०। "बहिर्वेद्यास्रावे वा स्यापवेद्युः" आश्व० श्रौ०। भावे घञ्। २सम्यक्स्रवे।

आस्तिक त्रि० अस्ति परलोक इति मतिर्यस्य ठक्। १परलोकास्तित्ववादिनि "आस्तीत्युक्ता गतो यस्मादास्तिकस्तेन कथ्यते" इति निरुक्तसंज्ञके जरत्कारुसुनिसुते २मुनिभेदे आस्तिकोत्पत्तिकथा आस्तीकशब्दे वक्ष्यते। "आस्तिकस्य सुनेर्माता भगिनी वासुकेस्तथा जरत्कारुसुनेः पत्नी मनसादेवि ते नमः" मनसाप्रणाममन्त्रः।

आस्तिकार्थद पु० आस्तिकायार्थं ददाति दा-क। जनमेजये राजनि शब्दच०।

आस्तिक्य न० आस्तिकस्य भावः ष्यञ्। आस्तिकत्वे परलोकाद्यगन्तृत्वे "माहात्म्यमपि चास्तिक्यं सत्यं शौचं दयार्जवम्। विद्वद्भिः कथ्यते लोके पुराणैःकविसत्तमैः। भा०आ० १अ०। "आवितैः करणैः पूर्वमास्तिक्याच्छ्रुति दर्शनात्" भा०व० ८५अ०। "आस्तिक्यशुद्धमतयः प्रियधर्म्मार्थ्मम्" किरा०।

आस्तीक पु० वासुकिभगिन्यां जरत्कारुनाम्न्यां जरत्कारुनेःसुते मुनिभेदे तदुत्पत्तिकथा यथा।

"तत्र तां भैक्षकन्यां प्रादात्तस्मै महात्मने। नागेन्द्रो वासुकिर्ब्रह्मन् स तां प्रत्यग्रहीत। अस्वनामेति वै मत्वा भरणे चाविचारिते। मोक्षभावे स्थितश्चापि हृन्मूतः परिपन्थे। ततो नाम स कन्यायाः पप्रच्छ मुनन्दन!। वासुकिं भरणं चास्या न कुर्य्यामित्युवाच ह। भा० आ० ४६अ०। "सौतिरुवाच। वासुकिस्तप्रवीद्वाक्यं जरत्कारुर्महर्षिं तदा। सनाम्नी तव कन्येयं स्वसा मे तपसाऽन्विता। भरिष्यामि च ते भार्य्यां प्रतीच्छेमां द्विजोत्तम। रक्षणञ्च करिष्येऽस्याः सर्वशक्त्या तपोधन!। त्वदर्थं रक्ष्यते चैषा मया मुनिवरोत्तम!। ऋषिरुवाच। न भरिष्येऽहमेतां वै एष वै समयः कृतः। अप्रियञ्च न कर्त्तव्यं कृते चैनां त्यजाम्यहम्। सौतिरुवाच। प्रतिश्रुते तु नागेन भरिष्येभगिनीमिति। जरत्कारुस्तदा वेश्म भुजगस्य जगाम ह" इत्युपक्रम्य। "उत्सङ्गेऽस्याः शिरः कृत्वा सुषुप परिखिन्नवत्। तस्मिंश्च सुप्ते विप्रेन्द्रे सवितास्तमियाद्गिरिम्। अङ्गः परिचये ब्रह्मंस्ततः साऽचिन्तयत्तदा। वासुकेर्भगिनी भीता धर्म्मलोपान्ममस्विनी। किन्तु मे सुप्तं भूयाद्भर्तुरुत्थापनं न वा। दुःखशीलो हि धर्म्मात्मा कथं नाम्यापराधुयाम्। कोपो वा धर्म्मशीलस्य धर्म्मलोपोऽथवा पुनः। धर्म्मलोपो गरीयान्वै स्वादित्यत्रास्करोन्मतिम्। उत्थापयिष्ये यद्येनं प्रबुद्धं कोपं करिष्यति। धर्म्मलोपो भवेदस्य सन्ध्याऽतिक्रमणे ध्रुवम्। इति निश्चित्य मनसा जरत्कारुर्भुजङ्गमा। तस्मिंदीप्ततपसं शयानमनलोपमम्। उवाचेदं वचः श्लक्ष्णं ततो मधुरभाषिणी। उत्तिष्ठ त्वं महाभाग! सूर्य्योऽस्तमुपगच्छति। सन्ध्यासुपास्तु भगवन्नयः स्पृष्ट्वा यतव्रत!। प्रादुष्कृताग्निहोत्रोऽयं मुहूर्त्तो रम्यदारुणः। सन्ध्या प्रवर्त्तते चेयं पश्चिमायां दिशि प्रभो!। एवमुक्तः स भगवान् जरत्कारुर्महातपाः। भार्य्यां प्रस्फुरमाणौष्ठ इदं वचनमब्रवीत्। अवमानः प्रयुक्तोऽयं त्वया मम भुजङ्गमे!। समीपे ते न वत्स्यामि गमिष्यामि यथागतम्। यत्किरिह न वामोरु! मयि सुप्ते विभावसोः। अस्तं गन्तुं यथाकालमिति मे हृदि वर्त्तते। न वाऽप्यवमतस्येह वासो रोचेत कस्यचित्। किं पुनर्ब्रह्मशीलस्य मम वा महिषस्य वा। एवमुक्ता जरत्कारुर्भर्त्रा हृदयकम्पनम्। अब्रवीद्भुजगी तत्र वासुकेः सन्निवेशने। नावमानात्कृतवती तवाहं विप्रबोधनम्। धर्म्मलोपो न ते विप्र! स्वादित्येतन्मया कृतम्। उवाच भार्यामित्युक्तो जरत्कारुर्महातपाः।

ऋषिः कोपसमाविष्टस्त्यक्तुकामो भुजङ्गमाम् । न मे वाग-न्नतं प्राह गमिष्येऽहं भुजङ्गमे ! । समयो ह्येष मे पूर्व्वं त्वया सह मिथः कृतः । सुखमास्यूषितो भद्रे ! ब्रूयास्त्वं भ्रातरं शुभे ! । इतो मयि गते भीरु ! गतः स भगवानिति । त्वं चापि मयि निष्क्रान्ते न शोकं कर्त्तुमर्हसि । इत्युक्ता साऽनवद्याङ्गी प्रत्युवाच मुनिं तदा । जरत्कारुं जरत्कारुश्चिन्ताशोकपरायणा । बाष्पगद्गदया वाचा मुखेन परिशुष्यता । कृताञ्जलिर्व्वरारोहा पर्य्यश्रुनयना ततः । धैर्य्यमालम्ब्य वामोरूर्हृदयेन प्रवेपता । न मामर्हसि धर्मज्ञां परित्यक्तुमनागसम् । धर्मे स्थितां स्थितो धर्मे सदा प्रियहिते रताम् । प्रदाने कारणं यच्च मम तथ्यं द्विजोत्तम ! । तदलब्धवतीं मन्दां किं मां वक्ष्यति वासुकिः । मातृशापाभिभूतानां ज्ञातीनां मम सत्तम ! । अपत्यमीप्सितं त्वत्तस्तच्च तावन्न दृश्यते । त्वत्तोऽपत्यलाभेन ज्ञातीनां मे शिवं भवेत् । संप्रयोगो भवेन्नायं मम मोघस्त्वया द्विज ! । ज्ञातीनां हितमिच्छन्ती भगवंस्त्वां प्रसादये । इममभ्यक्तरूपं मे गर्भमाधाय सत्तम ! । कथं त्यक्ष्या महात्मा सन् गन्तुमिच्छस्यनागसम् । एवमुक्तस्तु स मुनिर्भार्य्यां वचनमब्रवीत् । यदुक्तमनृतं पूर्व्वं जरत्कारु तपोधनः । अस्त्यं सुभगे ! गर्भस्तव वैश्वानरोपमः । ऋषिः परमधर्म्मात्मा वेदवेदाङ्गपारगः । एवमुक्ता स धर्म्मात्मा जरत्कारुर्महानृषिः । उपाय तपसे भूयो जगाम कृतनिश्चयः" । "ततः प्रववृधे गर्भो महातेजा महाप्रभः । यथा सोमो द्विजश्रेष्ठ ! शुक्लपक्षोदितो दिवि । अथ काले तु सा ब्रह्मन् ! प्रजज्ञे भुजगस्वसा । कुमारं देवगर्भाभं पितृमातृभयापहम् । ववृधे स तु तत्रैव नागराजनिवेशने । वेदांश्चाधिजगे साङ्गान् भार्गवाच्यवनात्मुनेः । चीर्णव्रतो बाल एव बुद्धिसत्त्वगुणान्वितः । नाम चास्याभवत् ख्यातं लोकेषु आस्तीक इत्युत । अस्तीत्युक्त्वा गतो यस्मात्पिता गर्भस्थमेव तम् । वनं तस्मादिदं तस्य नामास्तीकेति विश्रुतम्" । भा०आ० ४७अ० "यो जरत्कारुणा जातो जरत्कारौ महायशाः । आस्तीकः सर्पसत्रे वः पन्नगान् योऽभ्यरक्षत । तं स्मरन्तं महाभागा ! न मां हिंसितुमर्हथ । सर्पापसर्प भद्रं ते गच्छ सर्प ! महाविष ! । जनमेजयस्य यज्ञान्ते आस्तीकवचनं स्मर । आस्तीकस्य वचः श्रुत्वा यः सर्पो न निवर्त्तते । शतधा भिद्यते मूर्ध्नि शिंशवृक्षफलं यथा" तत्रैव । "आस्तीकस्य कवेः साधोः सूनृतापरमास्तिनः" भा० आ०१५अ० आस्तीकमधिकृत्य कृतोपन्यासः अण् । २आस्तीकचरिताख्यायके भारतान्तर्गते अवान्तरपर्व्वभेदे । "पौष्यं पौलोममास्तीकमादिवंशावतारणम्" भा० आ०१अ० । "आयुष्मानिदमाख्यानमास्तीकं कथयामि ते" भा०आ० १५अ० । आस्तीके भोजयेद्राजन् ! दद्याच्चैव गुडौदनम्" भा०स्वर्गा०५ अ० । [जरत्कारुमुनिपत्न्याम् ।

आस्तीकजननी स्त्री ६त० । मनसादेव्यां वासुकिभगिन्यां

आस्तीर्ण त्रि० आ+स्तृ-क्त । विस्तीर्णे कृतप्रसारणे "आस्तीर्णतल्परचितावसथः शुनेन" माघः । "आस्तीर्णाजिनरत्नासु" रघुः ।

आस्तृत त्रि० आ+स्तृ-क्त । विस्तीर्णे

आस्तेय स्त्री अस्तीत्यव्ययतत्रविद्यमाने भवः "इतिकुच्छी-त्यादि०" पा० ढक् । विद्यमानपदार्थभवे ।

आस्त्र त्रि० अस्त्रस्येदम् अण् । अस्त्रसम्बन्धिनि । "त्वं त्वमिन्द्र-त्यास्त्रबुध्नाय वेन्यम्" ऋ० १०,१७१,३ । "आस्त्रबु-ध्नाय अस्त्रसम्बन्धिसुखतल्पमूलाय" भा० ।

आस्था स्त्री आ+स्था-अङ् । १आलम्बने, २अपेक्षायां, ३श्रद्धायां, ४स्थितौ, ५यत्ने "ईदादरे च "अनास्थया स्तनकरप्रसारिणीम्" नैष० । "स्त्री पुमानित्यनास्थैषा" "अनास्था बाह्यवस्तुषु" इति च कुमा० । "मर्त्यैवा-स्थापराङ्मुखः" "पिण्डेष्वनास्था खलु भोतिकेषु" रघुः । "आस्थाभवेऽस्मिन् तव राम ! रामे" भट्टिः । आधारे अङ् । ७सभायाम् आस्थाने ।

आस्थान न० आस्थीयतेऽत्र आ+स्था आधारे ल्युट् । १सभा-यामु "तदोयमास्थाननिकेतनाजिरम्" किरा० "राजा-नमास्थानमण्डपगतम्" काद० । २विश्रामस्थाने । आस्थानीत्यपि सभायाम् । टित्त्वात् ङीप् । आस्था बोधूर्त्तः सभाधूर्त्तः । भावे ल्युट् । ३आस्थायां ४श्रद्धायाञ्च न० ।

आस्थापन न० आ+स्था-णिच्-युक् ल्युट् । १सम्यक्स्थापने । करणे ल्युट । २सुश्रुतोक्ते व्रणोपक्रमणीयवस्तिभेदे च । "द्विविधोवस्तिः नैरूहिकः स्नैहिकश्च । आस्थापनं निरूह इत्यनर्थान्तरम् । "दोषनिर्हरणात् शरीररोग हरणाद्वा निरूहः वयःस्थापनादायुःस्थापनाद्वास्थापनम्"

आस्थापित त्रि० आ+स्था+णिच्-युक् क्त । सम्यक् स्थापिते आचितादिपाठात् अस्यान्तोदात्तता न ।

आस्थायिका स्त्री आ+स्था-धात्वर्थनिर्देशे ण्वुल् स्त्रीत्वात् टापि अत इत्त्वम् । १आस्थाने आस्थितौ । "जनकोह वैदेह आसाञ्चक्रे ब्रा० उ०भाष्ये "आसाञ्चक्रे आस्थायिकां दत्त-

वानितिसूत्रम् कर्त्तरि ख्युन्। आस्थावकः २आस्थान-कर्त्तरि त्रि०। स्त्रियां टाप् अत इत्त्वम्।

आस्थित त्रि० आ+स्था-क्त। १अवस्थाने २प्राप्ते ३आरूढे "एकं स्कन्दनमास्थितौ" रघुः। २आश्रिते च।

आस्थिति आ+स्था-क्तिन्। १कृतास्थायां २तात्पर्य्येण वर्त्तने च।

आस्थेय त्रि० आ+स्था-कर्म्मणि यत्। अवलम्बे। "नह्येषा बुद्धिरास्थेया" रामा०। "यत्नान्तरमास्थेयम्" काशिका।

आस्नात त्रि० आ+स्ना-कर्त्तरि क्त। कृतस्नाने कृतावगाहने

आस्नान त्रि० आ+स्ना-भावे ल्युट्। प्रक्षालनेन शुद्धौ। "आस्नाने तां निदध्मसि" अथ०१४,२,६५। [आस्नभवे।

आस्नेय त्रि० आस्ने भवः ढक् आसन्नादेशः अतोलोपः।

आस्पद न० आ+पद-घ सुट् च। १प्रतिष्ठायाम्,२पदे,३स्थाने, "ध्यानास्पदं भूतपतेर्विवेश" स्नानद्वेऽस्मिन् हरिचन्दना-स्पदे "सरागमस्या रशनागुणास्पदम्" इति च कुमा०। "तदास्पदं श्रीर्वरराजसंज्ञितम्"। रघुः "व्योम्नीव चक्रु-टीच्छलेन वदने केतुश्चकारास्पदम्" माघः ४क्रये,५प्रभुत्वे च ६अवलम्बने ७विषये च। "निधनता सर्व्वापदामास्प-दम्" किरा०। "तस्मात् केवलप्रकृतास्पदा तत्र योगितेति" माघस्य ५,२१व्या०मल्लि०। ८अवस्थाने उप-मन्द्यास्पदश्चैव" मनुः। ९लग्नावधिदशमस्थाने। "कर्म्मस्थानञ्च दशमं मेदुरत्नमास्पदं खञ्च" ज्योतिषम्।

आस्पन्दन न० आ+स्पन्द-ल्युट्। १ईषत्कम्पने ईषच्चलने

आस्पात्र न० आस्यरूपं पात्रं ष०। आस्यरूपे पात्रे "आस्-पात्रं जुहूर्देवानामिति" शत०ब्रा०१,४,२,१३। "आस्यरूपं पात्रमास्पात्रम्" भा०।

आस्फाल पु० आ+स्फल-चाले घिच्-अच् स्फुल+घञ् स्फालादेशः वा। १चालने २हस्तिकर्णचालने हारा०

आस्फालन न० आ+स्फल-चाले-णिच्-ल्युट्। १ताड़ने २चालने च। "ऐरावतास्फालनकर्कशेन" कुमा०। सुरद्विपास्फा-लनकर्कशाङ्गुलौ" "ऐरावतास्फालनविह्वलं यः" "आसां जलास्फालनतत्पराणाम्" रघुः। अनवरतधनुर्ज्यास्फा-लनेति" शकु०। "एलालतास्फालनलब्धगन्धः" माघः। २आटोपे ४प्रागल्भ्ये च।

आस्फालित त्रि० आ+स्फल+णिच्-क्त। १चालिते २आघट्टिते ३ताड़िते च। "अजस्रमास्फालितवल्लकीगुणः" माघे पाठान्तरम्

आस्फुजित् पु० अस्फुलति आ+स्फुल-बा०डुतं जयति जि-क्विप्। शुक्राचार्य्ये। "शुक्रोभृगुर्भृगुसुतः सित आस्फु-जित्च" ज्यो०त०

आस्फोट पु० आ+स्फुट-णिच्-कर्त्तरि अच्। १अर्कवृक्षे शब्दरत्ना० २नवमल्लिकायां स्त्री। ३स्फुरादेर्वाद्यशब्दे (ता-ल ठोका) ४संघर्षणजातशब्दमात्रे "साङ्गुलास्फोट-शब्दाश्च चालितः स महागिरिः भा०व० १३अ०।

आस्फोटक न० आ+स्फुट-णिच्-ख्युल्। (आखरोट) १प्रसिद्धे पर्व्वतीयफलभेदे २वाद्यशब्दकारके त्रि०।

आस्फोटन न० आ+स्फुट-णिच्-भावे ल्युट्। १प्रकाशने २वाद्यादेः शब्दकरणे "आस्फोटननिनादांश्च बालानां खेलतां तथा" रामा०। ३स्फूर्त्यादिना धान्यादेस्तुषादि निरसने (आछोन) व्यापारे च। "कुञ्चनास्फोट-नाघ्रानवेपथुव्यथनैः" सुश्रु०।

आस्फोटनी स्त्री आस्फोट्यते विदार्य्यतेऽनया आ+स्फुट-णिच्-करणे ल्युट् स्त्रीत्वात् ङीप्। (छुरिका) वेधनास्त्रे।

आस्फोटित न० आ+स्फुट-णिच्-भावे क्त। वाद्यादेः शब्दे २प्रकाशने च। कर्म्मणि क्त। विदलिते त्रि०।

आस्फोत पु० आ+स्फुट-अच् पृषो० टस्य तत्वम्। १अर्कवृक्षे २कोविदारवृक्षे, ३पलाशवृक्षे च "आस्फोतजातिकरवीर-पत्रैः" सुश्रु०। स्वार्थे कन्। आस्फोतकोऽर्कवृक्षे।

आस्फोता स्त्री आ+स्फुट-अच् पृषो०। १अपराजितायां, सा च द्विविधा श्वेतपुष्पी नीलपुष्पी च तयोर्गुणपर्य्यायौ भावप्र०। "आस्फोता गिरिकर्णी च विष्णुक्रान्ताऽपरा-जिता। अपराजिते कटुके श्वेते कण्ठशुद्धिदे। कुष्ठगुल्मविषोदावर्त्तशोथज्वरविषापहे। कषाये कटुपाके च सृतिक्ते रूक्षविबन्धिदे। ३सारिवायाम् (छापरमाली) लताभेदे च।

आस्माक त्रि० अस्माकमिदम् अस्मद्+इदमर्थेऽण् अस्मा-कादेशः। अस्मत्सम्बन्धिनि। स्त्रियां ङीप्। "रामादि-तादात्म्याङ्गीकारे चास्माकीं सिद्धान्तशय्यामधिशय्य" सा० द०। [सम्बन्धिनि।

आस्माकीन त्रि० अस्माकमिदम् खञ् अस्माकादेशः। अस्मत्-

आस्य न० अस्यते पाशोऽत्र+अस-आधारे ण्यत्। १मुखे "तदास्यदाक्षेऽपि गतोऽधिकाङ्कताम्" नैष०। "तं हि स्वयंभूः खादाखात्" यजुःशते सदाऽन्नन्ति" "पात्रास्योहि द्विजः स्मृतः" "नित्यमास्यं शुचि स्त्रीणाम्" इति च मनुः। २तन्मध्ये च। यज्ञादौ तद्धितयाजादौ अस्य स्थाने वा आसन्नादेशः। तदादेशपक्षे आस्ये भवः आसन्यः यथा च अस्यैव आसन्नादेशस्यानिता तथासनशब्दे ८८६ पृष्ठे उक्ता। आस्ये भवः यति वा नासन्नादेशः यलोपः।

३सुखभवे त्रि०। "तुल्यास्यप्रयत्नम्" पा०आस्ये भवमास्यं तालादिस्थानम्" सि०कौ०।

आस्यन्दन आ+स्यन्द्-भावे ल्युट्। ईषत्स्रवणे।

आस्यमय त्रि० आस्यं धयति-धे-अ-मुम्-उप०स०। मुग्ध०। सुखास्वादके मुखचुम्बके।

आस्यपत्र न० आस्यमेव पत्रमस्य। १पद्मे शब्दचन्द्रिका।

आस्यलाङ्गल पु० आस्यं लाङ्गलमिव भूमिविदारकं यस्य। शूकरे। [(दाड़ि)।

आस्यलोमन् न० आस्यभवं लोम। मुखसुखजाते लोम्नि

आस्यहात्य त्रि० असिनाऽहत्याऽहननम् ततः अस्त्यर्थे विसृजादि० अण्। अनुयतिका० द्विपदड्डिः। खड्गेन हननशून्ये।

आस्या स्त्री आस-भावे क्यप्। १स्थितौ, गतिराहित्ये। "आस्या वर्षंकरी स्यात्सौख्यसौकुमार्य्यकरी शुभा" शब्दर०।

आस्यासव पु० आस्यस्यासव इव। (ताल) इति ख्यातायाम् तालायाम्।

आस्र न० अस्रमेव स्वार्थेऽण्। रुधिरे। ततः सुखादि०अस्त्यर्थे इनि। आस्रो रुधिरयुक्ते त्रि० स्त्रियां ङीप्।

आस्रप पु० आस्रं रुधिरं पिबति पा-क उप०स०। १राक्षसे तद्देवताके २मूलनक्षत्रे च।

आस्रव पु०आस्रवति मनोऽनेन करणे अप्। १क्लेशे। कर्त्तरि अच्। २अर्हन्मतसिद्धे पदार्थभेदे। अर्हच्छब्दे २८।१६ दृष्टे विवृतिः।

आस्राव पु० आस्रवति रुधिरमस्मात् आ+स्रु-अपादाने घञ्। १क्षते "जातएषं तवास्रावस्त्वन्तु मोक्षाय बुध्यसे" भा०उ०५७अ०। भावे घञ्। २सम्यक्क्षरणे कर्त्तरि ण। सम्यक्क्षरणयुक्ते त्रि०। आस्रवति आ+स्रु-ण। सुखलालायाम्" "च्युतेरास्रववत् विद्यात् निगिरन्नेव तत् शुचिः" आ०त०मोत०"आस्रावोलाला" रघु०।

आस्रविन् त्रि०आ+स्रु-णिनि। मदादिक्षरणयोगे। "मङ्गामजदास्रावी प्रभञ्जन् विविधान् द्रुमान्" भा०व०प०।१४६ आस्रावयुक्ते च "दुष्टयोनिरास्रावो दीर्घकालानुबन्धी चेति दुष्टप्रणलिङ्गानि" सुश्रु०।

आस्रावित आ+स्रु-क्त पक्वे इट्। गलिते।

आस्राद पु०आ+स्वद-कर्म्मणि घञ्। १मधुरादिरसे २मङ्गारादिरसे च। भावे घञ्। ३रसानुभवे। "मध्वाघातोविषास्रादः, मनुः "न जायते तदास्रादो विना रत्यादिवासनाम्। "तदास्राद्ये विभावादेः परिच्छेदो न विद्यते" सा०द०"चूताङ्कुरास्रादकषायकण्ठः" कुमा०। आस्रादय आधुर्य्यादिरसानुभवहेतव्यापारभेदः स च लोके चर्व्वणादिः शृङ्गारादिरसास्राद्ये अन्यविधएव व्यापारः यथाह सा०द०। "न जायते तदास्रादोविना रत्यादिवासनाम्। वासना चेदानीन्तनी प्राक्तनी च रसास्रादहेतुः तत्र यदि आद्या न स्यात् श्रोत्रियजरन्मीमांसकादीनामपि सा स्यात् यदि द्वितीया न स्यात् रागिणामपि केषाञ्चिद्रसोद्बोधोन दृश्यते तत्र स्यात् उक्तञ्च धर्म्मदत्तेन "सवासनानां सभ्यानां रसस्यास्रादनं भवेत्। निर्व्वासनास्तु रङ्गान्तःकाष्ठकुड्याश्मसन्निभाः" इति। ननु कथं रामादिरत्यादयुद्बोधकारणैः सीतादिभिः सामाजिकरत्यादयुद्बोधइत्युच्यते। व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतिः। तत्प्रभावेन यस्यासन् पार्थोधिश्लवनादयः। सभ्यानां तद्भेदेन स्वात्मानं प्रतिपद्यते। ननु कथं मनुष्यमात्रस्य समुद्रलङ्घनादावुत्साहोद्बोधइत्युच्यते। उत्साहादिसमुद्बोधः साधारण्याभिमानतः। न्यूनाधिकसमुद्रादिलङ्घनादौ न दृश्यते। रत्यादयोऽपि साधारण्येन प्रतीयन्ते इत्याह। साधारण्येन रत्यादिरपि तद्वत् प्रतीयते। रत्यादेरपि ज्ञातृगतत्वेन प्रतीतौ सभ्यानां पौढ़ातद्वादिर्भवेत् परगतत्वेन त्वरसत्वापातः। विभावादयोऽपि प्रथमतः साधारण्येन प्रतीयन्ते इत्याह। परस्य न परस्येति ममेति न ममेति च। तदास्राद्ये विभावादेः परिच्छेदो न विद्यते। ननु तथापि कथमेवमलौकिकत्वमेतेषां विभावादीनामित्युच्यते। विभावनादिव्यापारमलौकिकमुपेयुषाम्। अलौकिकत्वमेतेषां भूषणं न तु दूषणम्। आदिशब्दादनुभावनसञ्चारणे। तत्र विभावनं रत्यादेर्विशेषेण आस्रादाङ्कुरणयोग्यतानयनम्। अनुभावनमेवंभूतस्य रत्यादेः समनन्तरमेव रसादिरूपतया भावनम्। सञ्चारणं तथाभूतस्यैतस्य सम्यक्चारणम्। विभावादीनां यथासंख्यं कारणकार्य्यसहकारित्वे कथं त्रयाणामपि रसोद्बोधे कारणत्वमित्युच्यते कारणकार्य्यसञ्चारिरूपा अपि हि लोकतः। रसोद्बोधे विभावाद्याः कारण्यान्येव ते मताः। ननु तर्हि कथं रसास्राद्ये तेषामेकः प्रतिभासइत्युच्यते। प्रतीयमानः प्रथमं प्रत्येकं हेतुरुच्यते। ततः संवलितः सर्व्वोविभावादिः सचेतसाम्। प्रधानकरसन्यायाच्चर्व्वप्रमाणोरसोभवेत्। यथा खण्डमरिचादीनां संमेलनादपूर्व्व इव कश्चिदास्रादः प्रधानकरसे संजायते विभावादिसंमेलनादिहापि तथेत्यर्थः" "ज्ञातास्रादो विदुतज्जघनां को विहातुं समर्थः" वेणीसं० ल्युट्। आस्रादनमस्त्यस्य न० उक्त सा०द०वाक्ये उदा०।

आस्वादक न० आ+स्वद-ण्वुल्। आस्वादनकर्त्तरि "दर्शयन् नर्त्तकोनैव रसस्यास्वादको भवेत्" सा०द०।

आस्वादित त्रि० आ+स्वद-णिच्-क्त। कृतास्वादे भक्षिते पदार्थे "आस्वादितार्द्रक्षतुका: ससुद्गात्" माघः।

आस्वाद्य त्रि० आ+स्वद-णिच्-यत्। १आस्वादयोग्ये पदार्थे "प्राक्षेन न तदाघ्रेयं नास्वाद्यञ्चैव जिह्वया" भा०आ०प० ३०अ०। "आस्वाद्यतोयाः प्रभवन्ति नद्यः ससुद्गमास्वाद्य भवन्त्यपेयाः" हितो०। आ+स्वद+णिच्-ल्यप्। २भक्षयित्वेत्यर्थे अव्य०।

आस्वान्त त्रि० आ+स्वन-क्तभावे दीर्घः। शब्दिते।

आह अव्य०ब्रू अच् णि०आदेशः उवाचेत्यर्थे तिपोणलि ब्रुवादेशस्तु वर्त्तमानकथनवाची एतद्भाद्विन्नः तङ् क्रियापदम् अयन्तु क्रियाप्रतिरूपकमव्ययम्। "अथाह वर्षी विदितो महेश्वरः" कुमा०।

आहक पु० आहन्ति आ+हन-ड संज्ञायां कन्। वैद्यकोक्ते ज्वरभेदे (नामाज्वर) "तनुना रक्तशोधेन युक्ता नासापुटान्तरे। गात्रभुलज्वरकरः क्षेष्मणा ह्याहकोज्वरः" वै०।

आहत त्रि० आ+हन-क्त। १ताडिते, "आहतादिकहारमभोरुराहते" "नयनयुगनिमीलत्तावदेवाहतोऽसौ" माघः। २अभ्याहतोहमित्यादौ ह्यर्थके वाक्ये न०। ३ढक्कायाम् पु०। "ईषद्धौतं नवं शुभ्रं सदशं यत्र धारितम्। आहतं तद्विजानीयात् सर्व्वकर्म्मसु पावनम्" वसिष्ठोक्तलक्षणे ४वस्त्रे न०। "आहतेन वसनेन तां परिदध्यात्" गोभि०। "आच्छादनं तु योदद्यादाहतं श्राद्धकर्म्मणि" वायु०पु०। "परिधायाहते शुक्ले वाससी क्षेमकुशुम्भे" ऋन्दो०५पुराणवस्त्रे न०तस्य उपभोगेन मर्दितप्रायत्वात्तथात्वम्। ६आघातप्राप्ते ७मर्दिते त्रि० "पादाहतं यदुत्थाय मूर्द्धानमधिरोहति" माघः। ८व्याप्तुर्घिते। ९अभ्यस्ते १०गुणिते च त्रि० "सूर्य्याब्धिसंख्यया हिति-सागरैरयुताहतैः" सू०सि०।

आहतलक्षण पु०आहतमभ्यस्तं लक्षणं यस्य। गुणैः प्रसिद्धे अमरः प्रसिद्धगुणानां हि सर्व्वैर्ज्ञातत्वेन परिचिततयाभ्यस्तगुणत्वात् तथात्वम्।

आहति स्त्री आ+हन-क्तिन्। शब्दहेतुसंयोगभेदे १आघाते २ताडने "प्रभातवाताहतिकम्पिताङ्गतिः" भट्टिः ३आगमने अत्र श्लोके पक्षे आकृतिरागतिरित्यर्थः ४गुणने "अंशाहतिस्त्वेदवधेन भक्ता" लीला०। ५मर्द्दने च।

आहनन आ+हन-करणे ल्युट्। १ताडनसाधने दण्डादौ। तत्र भवः यत्। आहनन्यः। आहननदण्डादिभवे "नमो दुन्दुभ्याय चाहनन्याय च" यजु० १६,३५। "आहन्यते वाद्यतेऽनेनाहननं वाद्यसाधनं दण्डादि तत्र भवस्तस्मै" वेददी०। भावे ल्युट्। २आहतिशब्दार्थे।

आहनस् त्रि० आ+हन-असुन्। १आहननीये २निष्पीड्ये सोमादौ। "तदाहना अभवत् पिप्युषी" ऋ०२,२३,१। आहनाः आहननीयः सोमादिः" भा०आहनसे साधु यत्। "आहनसं तत्साधने त्रि०। "आहनस्याङ्गै रेतः सिच्यते" ऐत०ब्रा०।

आहर त्रि० आहरति आ+हृ-अच्। सञ्चयकारके "वनान्तरादुपाहृत्तैः समित्कुशफलाहरैः" रघुः। टचि तु कर्म्मोपदएव साधुतेति भेदः।

आहरकरटा स्त्री आहर करट! ह्रस्वुच्यते यस्यां क्रियायां मयूर०। करटं प्रति आहरणार्थायां निदेशक्रियायाम्

आहरचेटा स्त्री आहर चेट! ह्रस्वुच्यते यस्यां क्रियायाम् मयू०। चेटं प्रति आहरणार्थनिदेशक्रियायाम्।

आहरण न० आ+हृ-भावे ल्युट्। स्थानात् स्थानान्तरप्रापणे आनयने। "स्तदाहरणसंघट्टो प्रतिष्ठाङ्गानमेवच"। देवीपु० "करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम्" सां०का० "समिदाहरणाय प्रस्थिता वयम्" यजु०२आयोजने अनुज्ञाने च "अश्वमेधस्य कौरव्य! चकाराहरणे मतिम्" भा० आश्व०७अ०। कर्म्मणि ल्युट्। ३आहियमाणे पदार्थे ४विवाहादौ उपढौकनद्रव्ये "सत्त्वानुरूपाहरणोऽतश्रीः" रघुः। [यनीये ३उपढौकनीये च।

आहरणीय त्रि०आ+हृ-अनीयर्। १आयोजनीये २आन-

आहरनिवपा स्त्री आहर निवप ह्रस्वुच्यते यस्यां क्रियायाम् मयू०। आहरणनिवापार्थे निदेशक्रियायाम्।

आहरनिष्किरा स्त्री आहर निष्किर ह्रस्वुच्यते यस्यां क्रियायाम् मयू०। आहरणनिष्किरणनियोगक्रियायाम्। एवमाहरवितानाा आहरवसना आहरसेना ह्रस्वादयोऽपि मयू० पठिताः तत्तत्कर्म्मार्थे नियोगक्रियायासु।

आहर्त्तृ त्रि०आ+हृ-तृच् स्त्रियां ङीप् १अर्ज्जके। "आहर्त्ता प्रोधयेत् भुक्तिमागमञ्चापि संसदि" हरः २आयोजके "आहर्त्ता तस्य सत्रस्य त्वन्नान्योऽस्ति नराधिप" भा०आ०५अ०३आनेतरि "आहर्त्ता सर्वरत्नानां सर्वेषां न सुखावहः" भा०व०१४अ०। ४अनुज्ञातरि "आहर्त्ता क्रतूनाम्" काद० गोदार्थे ह्रस्वि तु कर्म्मणि न वही। "आत्मनोवधमाहर्त्ता कासौ विहगतस्करः" विक्रमो०।

आहव न० आह्वयन्ते ऽरयोऽत्र आ+ह्वे–अप् संग्रामस्थे गुणः । १युद्धे । "एवं विधेनाहवचेष्टितेन" रघुः "प्राविशवाहवपत्ता आहावसुपलिप्लवः" भट्टिः "न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे" गीता । "उद्यतैराहवे शस्त्रैः क्षत्रधर्मेहतस्य च" "डिम्बाहवहतानाञ्च विद्युता पार्थिवेन च" इति च मनुः । आह्वयतेऽत्र आ+ह्व–आधारे अप् । २यज्ञे "तत्र नामवदसौ महाहवे" माघः 'आहवोयागः' भरतः ।

आहवन न० आह्वयतेऽस्मिन् आधारे ल्युट् । १यज्ञे "द्रष्टुमाहवनमग्न्यजस्रनाम्" माघः । भावे ल्युट् । २समन्ताद्धवने च "त्वे अग्ने आहवनानि भूरि" ऋ० ७,१,१७ ।

आहवनीय पु० आह्वयते १प्रणीयते प्रक्षिप्यते वा हविरत्र आ+ह्व–कर्म्मणि आधारे वा० अनीयर् आहवनमर्हति छ वा । १अग्निभेदे । तद्विवरणप्रकारः आश्व० स्रौ० उक्तः । "उत्सर्गेऽपराह्णे गार्हपत्यं प्रज्वाल्य दक्षिणाग्निमानीय विट्कृता द्वित्तवतो वा वैकयोनय इत्येके प्रियमाणं वा प्रज्वाल्याऽरणीमन्तं वा मथित्वा गार्हपत्यादाहवनीयमुद्धरेत्" सू० दिवाशेषवदुर्थयामे गार्हपत्यं प्रादुष्कृत्य दक्षिणाग्निं प्रज्वाल्य च वैश्मथदुद्धात् द्रव्यवतोवान्यस्य स्वद्धात् गार्हपत्याद्वा आनयेत् । तथा च अग्निमन्थनादिनाऽन्यतमप्रकारेण दक्षिणाग्निं साधयित्वा गार्हपत्यात् ज्वलन्तमग्निमाहवनीयार्थं सङ्गरेत् पात्रान्तरेण पृथक् कुर्य्यादिति तदर्थः । तत्र मन्त्रादिकविनियोग उत्तरसूत्रादावुक्तः । "आहवनीये वैश्वानरं हादशकपालमधिश्रयति" तैत्ति० । "यस्य गार्हपत्याहवनीयौ मिथः संसृज्येताम्" ऐत० ब्रा० । "पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणः स्मृतः । गुरुराहवनीयस्तु साग्नित्रेता गरीयसी" मनुः । कर्मणि अनीयर् । २सम्यग् होतव्ये हविरादौ त्रि० ।

आहार पु० आ+हृ–घञ् । १आहरणे । उपसर्गयोगात् २भोजने "निराहारो यताहारो तन्मनस्को समाहितौ" देवीभा० आहारविधिश्च सुश्रुते उक्तः यथा "अथाहारविधिं वक्ष्यामः विस्तरेणाखिलं शृणु । आप्लान्वितमसंक्लेशं शुचि कार्य्यं महानसम् । तत्राग्र्यैर्गुणसम्पन्नमन्नं भक्ष्यं सुसंस्कृतम् । शुचौ देशे सुसंगुप्तं समुपस्थापयेद्भिषक् ॥ विषन्नैरगदैः स्पृष्टं प्रीक्षितं व्यञ्जनोदकैः । सिद्धैर्मन्त्रैर्हुतविषं सिद्धमन्नं निवेदयेत् । बलप्राग्भवतः परं क्षुत्क्षमाहारस्योपकल्पनम् । इतं काण्डाग्र्यायसे देयं पेया देया तु राजते । फलानि सर्वभक्ष्याणि प्रदद्याद्दैलेषु च । परिशुष्कप्रदिग्धानि सौवर्णेषु प्रकल्पयेत् । प्रदूषणि रसांश्चैव राजतेष्वुपहारयेत् । कट्वरणि खडांश्चैव सर्व्वान् शैलेषु दापयेत् । दद्यात्ताम्रमये पात्रे सुशीतं सुश्रुतं पयः । पानीयं पानकं मद्यं मृण्मयेषु प्रदापयेत् । काचस्फटिकपात्रेषु शीतलेषु शुभेषु च । दद्याद्दधि पात्रेषु रावखाण्डकशर्करान् । पुरस्ताद्विमले पात्रे सुस्निग्धे मनोरमे । सूदः सूपोदनं दद्यात् प्रलेहांश्च सुसंस्कृतान् । फलानि सर्व्वभक्ष्यांश्च परिशुष्काणि यानि च । तानि दक्षिणपार्श्वे तु भुञ्जानस्योपकल्पयेत् । प्रदूषणि रसांश्चैव पानीयं पानकं पयः । खड़ान् यूषांश्च पेयांश्च सव्ये पार्श्वे प्रदापयेत् । सर्व्वान् गुडविकारांश्च रावखाण्डकशर्कराः । पुरस्तात् स्थापयेत्तासां हयोरपि च मध्यतः । एवं विज्ञाय मतिमान् भोजनस्योपकल्पनाम् । भोक्तारं विजने रम्ये निःसम्बाधे शुभे शुचौ । सुगन्धिपुष्परचिते समे देशेऽथ भोजयेत् । विशिष्टमिष्टसंस्कारैः पथ्यैरिष्टैरसादिभिः । मनोज्ञं शुचि नात्युष्णं प्रत्यग्रमशनं हितम् । पूर्व्वं मधुरमश्नीयान्मध्येऽम्ललवणौ रसौ । पश्चाच्छेषान् रसान् वैद्यो भोजनेष्ववचारयेत् । आदौ फलानि भुञ्जीत दाडिमादीनि बुद्धिमान् । ततः पेयांस्ततो भोज्यान् भक्ष्यांश्चित्रांस्ततः परम् । घनमूर्व्वं समश्नीयात् केचिदाङ्विपर्य्ययम् । आदावन्ते च मध्ये च भोजनस्य तु यस्यते । निरत्ययं दोषहरं फलेष्वामलकं स्मृतम् । मृणालबिसशालूककन्देक्षुप्रभृतीनि च । पूर्व्वं योज्यानि भिषजा नतु भुक्ते कथञ्चन । सुखसक्तैः समासीनः समदेहोऽन्नतत्परः । काले सात्म्यं लघु स्निग्धं विप्रसृष्टं द्रवोत्तरम् । बुभुक्षितोऽन्नमश्नीयान्नातिद्रुतविलम्बितम् । काले भुक्तं प्रीणयति सात्म्यमन्नं न बाधते । लघु शीघ्रं व्रजेत्पाकं स्निग्धोष्टं बलवर्द्धनम् । क्षिप्रं भुक्तं समं पाकं वातदोषं द्रवोत्तरम् । सुखं जीर्य्यति मात्रावद्धातुसाम्यं करोति च । अतीवा यतयामासु क्षपा येषु तथु स्मृताः । तेषु तत्प्रत्यनीकाद्यं भुञ्जीत प्रातरेव तु । येषु चापि भवेदुच दिवसा भूयमायताः । तेषु तत्काविहितमपराह्णे प्रशस्यते । रजन्यो दिवसाश्चैव येषु चापि समाः स्मृताः । ज्ञात्वा समसमक्षीरात्रं तेषु भुञ्जीत भोजनम् । नाप्राप्तातीतकालं वा क्षीनाधिकमथापि वा । अप्राप्तकाले भुञ्जानः शरीरे क्षतकौ नरः । तांस्तान् व्याधीनवाप्नोति मरणं वा नियच्छति । अतीतकाले भुञ्जानो वायुनोपहतेऽनले । कुक्षाहिपच्यते भुक्तं हितीयञ्च न काङ्क्षति । क्षीनमात्रमसन्तोषं करोति च बलक्षयम् । आलस्यगौरवाटोपसादांश्च कुरुतेऽ-

धिकम्। तस्मात्सुसंस्कृतं युक्त्या दोषैरेतैर्विवर्जितम्। यथोक्तगुणसम्पन्नमुपसेवेत भोजनम्। विभज्य कालदोषादीन् कालयोरुभयोरपि। अचोष्यं (अपरित्यम्) दुष्टसंक्लिष्टं पाषाणतृणलोष्टवत्। हिष्टं व्युषितमस्वादु पूति चान्नं विवर्जयेत्। चिरसिद्धं स्थिरं शीतमन्नसंघोक्षितं पुनः। अयानसुपदग्धञ्च तथा स्वादु न लक्ष्यते। यद्यत् स्वादुतरं तत्र विदध्यादुत्तरोत्तरम्। प्रक्षालयेद्द्विरास्यं भुञ्जानस्य मुहुर्मुहुः। विशुद्धे रसने तस्मै रोचतेऽन्नमपूर्ववत्। स्वादुना तस्य रसनं प्रथमेनापि तर्पितम्। न तथा स्वादयेदन्यत्तस्मात्प्रक्षाल्यमन्तरा। सौमनस्यं बलं पुष्टिमुत्साहं हर्षणं सुखम्। स्वादु सञ्जनयत्यन्नम स्वादु च विपर्ययम्। भुक्त्वा च यत्प्रार्थयते भूयस्तत् स्वादु भोजनम्। अधितप्तोदकं युक्त्या भुञ्जानस्यान्तरा पिबेत्। दन्तान्तरगतं चान्नं शोधनेनाहरेच्छनैः। कुर्यादनाहृतं तद्धि मुखस्यानिष्टगन्धताम्। जीर्येऽन्ने वर्द्धते वायुर्विदग्धे पित्तमेव तु। भुक्तमात्रे कफश्चापि तस्माद्भुक्ते हरेत्कफम्। धूमेनापोह्य हृद्यैर्वा कषायकटुतिक्तकैः। पूगकक्कोलकर्पूरलवङ्गसुमनःफलैः। कटुतिक्तकषायैर्वा मुखवैशद्यकारकैः। ताम्बूलपत्रसहितैः सुगन्धैर्वा विचक्षणः। भुक्त्वा राजवदासीत यावदन्नक्लमो गतः। ततः पदशतं गत्वा वामपार्श्वं तु संविशेत्। शब्दरूपरसस्पर्शगन्धांश्च मनसः प्रियान्। भुक्तवानुपसेवेत तेनान्नं साधु तिष्ठति। शब्दरूपरसस्पर्शगन्धाश्चापि जुगुप्सिताः। अशुच्यन्नं तथाभुक्तमतिहास्यञ्च वामयेत्। शयनं चासनं वापि नेच्छेदापि द्रवोत्तरम्। नाम्नातपौ न प्लवनं न यानं नापि वाहनम्। नचैकरससेवायां प्रसज्येत कदाचन। शाकावरान्नभूयिष्ठमश्नञ्च न समाचरेत्। एकैकशः समस्तान् वा नाश्नुयाद्रसान् सदा। प्राग्भुक्ते त्वविविक्तेऽग्नौ हिरन्नं न समाचरेत्। पूर्वभुक्ते विदग्धेऽन्ने भुञ्जानो हन्ति पावकम्। मात्रायुरं परिहरेदाहारं द्रव्यतश्च यः। पिष्टान्नं नैव भुञ्जीत मात्रया वा बुभुक्षितः। द्विगुणञ्च पिबेत्तोयं सुखं सम्यक् प्रजीर्यति। पेयलेह्याद्यभक्ष्याणां गुरु विद्याद्यथोत्तरम्। गुरूणामर्द्धसौहित्यं लघूनां तृप्तिरिष्यते। द्रवोत्तरो द्रवाच्चापि न मात्रायुरिष्यते। द्रवाद्यामपि शुष्कन्तु सम्यगेवोपपद्यते। विशुष्कमन्नमभ्यस्तं न पाकं साधु गच्छति। पिण्डीकृतमसंक्लिन्नं विदाहमुपगच्छति। स्रोतस्यन्नवहे पित्तं पक्वो वा यस्य तिष्ठति। विदाहि भुक्तमन्नद्वा तस्याभ्यन्नं विदह्यते। शुष्कं विरूक्षं विष्टम्भि वङ्क्षिव्यापदमावहेत्। आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः। अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः। अत्यम्बुपानाद्विषमाशनाद्वा सन्धारणात्स्वप्नविपर्ययाच्च। कालेऽपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य। दैन्याभिवक्रोधपरिप्लुतेन लुब्धेन रुद्धेन्यनिपीडितेन। ग्रहेणयुक्तेन च सेव्यमानमन्नं न सम्यक् परिणाममेति। माधुर्यमन्नं गतमामसंज्ञं विदग्धसंज्ञं गतमम्लभावम्। किञ्चिद्विपक्वं श्वयथोदरुग्णं विष्टब्धमाहुर्विरुजं गतम्। उद्गारशुद्धावपि भक्तकाङ्क्षा न जायते हृद्गुरुता च यस्य। रसावशेषेण तु सप्रसेकं चतुर्थमेतत् प्रवदन्त्यजीर्णम्। मूर्च्छाप्रलापो वमथुः प्रसेकः सदनं श्रमः। उपद्रवा भवन्त्येते मरणं चाप्यजीर्णतः। तत्रामे लङ्घनं कार्यं विदग्धे वमनं हितम्। विष्टब्धे स्वेदनं पथ्यं रसशेषे जयेत च। वामयेदाशु तं तस्मादुष्णेन लवणाम्बुना। कार्यं चालङ्घनं तावद्यावन्न प्रकृतिं भजेत्। लघुकायमतश्चैनं लङ्घनैः समुपाचरेत्। यावन्न प्रकृतिस्थः स्याद्दोषतः प्राणतस्तथा। हिताहितोपसंयुक्तमन्नं समशनं स्मृतम्। बद्धं स्रोतोमलाबद्धे वा विद्येयं विषमाशनम्। अजीर्णे भुञ्जते यत्तु तदध्यशनमुच्यते। त्रयमेतच्छिन्त्याशु बहून् व्याधीन् करोति च। अन्नं विदग्धं हि नरस्य शोत्रं शीताम्बुना वै परिपाकमेति। तच्चास्य शैत्येन निहन्ति पित्तमाक्लेदिभावाच्च नयत्यधस्तात्। विदह्यते यस्य तु भुक्तमात्रे दह्येत हृत्कण्ठगलञ्च यस्य। द्राक्षाभयां माक्षिकसम्प्रयुक्तां लोद्राभयां वा स सुखं जयेत। भवेदजीर्णं प्रति यस्य श्रद्धा स्निग्धस्य जन्तोर्बलिनोऽन्नकाले। प्रातःस शुण्ठीमभयामभक्ष्यो सुञ्जीत सम्प्राश्य हितां हितार्थी। स्वस्थं यदा दोषविबद्धमामं क्षीणं न तेजःपचमाद्दहोति। भवत्यजीर्णेऽपि तदा बुभुक्षा सा मन्दबुद्धिं विषवच्छिनत्ति"। "पञ्चभूतात्मके देहे आहारः पाञ्चभौतिकः। विपक्वः पञ्चधा सम्यगुणान् स्वानभिवर्द्धयेत्। अविदग्धः कफं पित्तं विदग्धः, पवनं पुनः। सम्यग्विपक्वो निःसार आहारः परिकीर्त्यते। विण्मूत्रमाहारमलः सारः प्राग्गीरितो रसः। स तु व्यानेन विक्षिप्तः सर्वान्धातून् प्रतर्पयेत्। कफः पित्तं मलः स्वेदः स्वाङ्गरोम च। नेत्रविट्त्वक् च क्लेदो धातूनां क्रमशोमलाः। दिवाविबुद्धे हृदये जायतः पुण्डरीकवत्। अन्नमल्पिन्नधातुत्वादजीर्णे पिहितं निशि। हृदि सन्क्लिष्टे रात्रौ प्रसुप्तस्य विशेषतः। क्षिप्रविसृधातुत्वादजी-

र्थं न क्षित दिवा" भाव०प्र० भोजनकालदेशपात्रादि-भेददर्शनपूर्वमेतद्व्याख्या प्रसङ्गात् कृता यथा। "आहारं पचति शिखी दोषानाहारः पचति। दोषक्षये धातूनुपचति पचति च धातुक्षये प्राणान्। आहारः प्राणिनां सद्योबलकृद्देहधारणः। स्मृत्यायुःशक्तिवर्णौजःसत्वशोभाविवर्द्धनः। यथोक्तगुणसम्पन्नसुपसेवेत भोजनम्। विचार्य देशकालादीन्कालयोरुभयोरपि"। उभयोःकालयोः प्रातः सायं च। तथा च "सायंप्रातर्मनुष्याणामशनं श्रुतिबोधितम्" नान्तरा भोजनं कुर्यादग्निहोत्रसमोविधिः"। प्रातः प्रथमयामादुपरि द्वितीययामादर्वाक् तथा च "यामसध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत्। यामसध्ये रसोत्पत्तिर्यामयुग्माङ्गलक्षयः" अन्यच्च "क्षुत्स्यं भवति पक्वेषु रसदोषमलेषु च। काले वा यदि वाऽकाले सोऽग्निकालउदाहृतः"। रसादौ पाकज्ञानमाह "उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितः। लघुता क्षुत्पिपासा च यदा कालः स भोजने" ।स्थानमाह "आहारन्तु नरः कुर्याद्विहारेषु सर्व्वदा। निर्जने क्षुद्भयोपेतः स्वात्मकाये क्षोयते श्रिया। निहारो मलमूत्रोत्सर्गः। अन्यच्च "आहारनिहारविहारयोगाः सदैव सद्भिर्विजने विधेयाः" इति। भाजनमाह "दोषक्षुद्वृष्टिदं पथ्यं हैमं भोजनभाजनम्। रौप्यं भवति चाक्षुष्यं पित्तक्षुत्कफवातजित्। कांस्यं बुद्धिप्रदं रुच्यं रक्तपित्तप्रसादनम्। पैत्तलं वातक्षुच्छस्थं क्रमिकफप्रणुत्। आयसे कान्तपात्रे च भोजनं सिद्धिकारकम्। श्रीखण्डाक्षुरं बल्यं कांसपात्रेषु सत्तमे। शैलजे मृण्मये पात्रे भोजनं श्रीनिवारणम्। दारुजे विशेषेण रुचिदं लेखकारि च। पात्रं पलमयं रुच्यं दीपनं विषपापनुत्। लवणपात्रं तु प्रागुक्तं तदभावे स्मृतोदितम्। पवित्रं शीतलं पात्रं घटितं स्फटिकेन यत्। काचेन रचितं तद्वत्तथा वैदूर्य्यसंभवम्। (प्रागुक्तं सुश्रुते सौवर्णादुक्तं तच्चाम्बुग्रन्थे ३२० पृष्ठे" दर्शितम्)। "भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणम्। अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनम्" लवणस्य पित्तजनकत्वादार्द्रकस्य कटुत्वेन पित्तनत्वात् बुभुक्षितस्य दग्धपित्तस्य कथं प्रथमं लवणार्द्रकभक्षणमुचितम् उच्यते "लवणं सैन्धवं श्रेयं चन्दनं रक्तचन्दनमिति" वचनाल्लवणमध्ये सैन्धवं तच्चिदोषघ्नम् यत आह गुणरत्ने "सैन्धवं लवणं स्वादु दीपनं पाचनं लघु। स्निग्धं रुच्यं हिमं हृद्यं सूक्ष्मं नेत्रं त्रिदोषकृत्" आर्द्रकं तु पित्तविरोधि मधुरपाकित्वात् यत आह तत्रैव "आर्द्रिका भेदिनी गुर्व्वी तीक्ष्णोष्णा दीपनी च सा। कटुका मधुरा पाके रूक्षा वातकफापहा"। अन्यदपि लवणार्द्रकं च नात्रपित्तविरोधि संयोगस्वभावात् संयोगस्वरूपञ्चैतादृशं भोजनस्य पूर्व्वं लवणार्द्रकभक्षणबोधकवचनमेव प्रमाणयति। भोजनादौ दृष्टिदोषविनाशाय ब्रह्मादीन् स्मरेत्। तद्यथा "अन्नं ब्रह्मा रसोविष्णुर्भोक्ता देवो महेश्वरः। इति संचिन्त्य भुञ्जानं दृष्टिदोषो न बाधते। अञ्जनागर्भसंभूतं कुमारं ब्रह्मचारिणम्। दृष्टिदोषविनाशाय हनूमन्तं स्मराम्यहम्" "अश्रीयात्तन्मना भूत्वा पूर्व्वं तु मधुरं रसम्। मध्येऽम्ललवणौ पश्चात्कटुतिक्तकषायकान्। फलान्यादौ समश्नीयाद्दाडिमादीनि बुद्धिमान्। विना मोचाफलं तद्वज्जम्बीरा च कर्कटी। स्मृणालबिसशालूककन्देक्षुप्रभृतीन्यपि पूर्व्वमेव हि भोज्यानि न तु भुक्त्वा कदाचन"। स्मृणालं पद्मनालं, बिसं बिसपत्रकं, शालूककन्दं प्रसिद्धम्।"गुरु पिष्टमयं द्रव्यं तण्डुलात् पृथुकादपि। न जातु भुक्तवान् खादेन्नात्तां खादेद्बुभुक्षितः। हतपूर्व्वं समश्नीयात्कठिनं प्रकृतौस्थितः। अन्ये पुनर्द्वयोर्वा तु वचनयोरेव न कुर्वन्ति" अयमर्थः प्राक् हतपूर्व्वं कठिनं समश्नीयात् यवाकाश्यादिवासिनः प्रथमं सक्तुभक्षणं हतपूर्व्वा रोटिकां भुञ्जते ततो मृदुतण्डुलपादिकमोदनं भुञ्जते अन्ये पुनर्द्वयोर्वा भोजनाग्रे दधिदुग्धतक्रादि भुञ्जते।"यदन्नं स्वादूत्तरं तद्धि विदध्यादुत्तरोत्तरम्। भुक्त्वा यत्रार्द्यते भूयस्तदुक्तं स्वादु भोजनम्"। स्वादुत्वस्य गुणमाह। "सौमनस्यं बलं पुष्टिस्तृप्तिः स्वादु रसनासुखम्। स्वादु सञ्जनयत्यन्नमस्वादु च विपर्ययम्"। अत्युष्णाद्यं बलं हन्ति शीतं शुष्कं च दुर्ज्जरम्। अतिस्निग्धं ग्लानिकरं युक्तियुक्तं हि भोजनम्। अतिद्रुतवताहारो गुणान् दोषान्न विन्दति। भोज्यं शीतमक्षुण्णं च स्वाद्विस्निग्धमतमशुतः। त्रिविधं गुरु तद्विवारयन्नाह "मन्दानलो नरो द्रव्यं मात्रागुरु विवर्जयेत् स्वभावतश्च गुरु यत्तथा संस्कारतो गुरु। मात्रागुरुस्तु सक्तादिर्मात्रादिः प्रकृतेर्गुरुः। संस्कारगुरु पिष्टान्नं प्रोक्तमिक्षुफलवयम्। आहारः षड्विधः चूष्यं लेह्यं पेयं तथैव च। भोज्यं भक्ष्यं तथा चर्व्यं गुरु विद्याद्यथोत्तरम्। चूष्यं इक्षुदाडिमादि, पेयं पानकशर्करोदकादि। लेह्यं रसालाकथितादि (कढी) इति लोके प्रसिद्धम्। भोज्यं भक्तसूपादि। भक्ष्यं लड्डुकमण्डकादि (खरं विशदमव्यक्तार्द्रं भक्ष्यमितिपात०भा०)। चर्व्यं चिपिटवण्डकादि। स्वभावगुरुसंस्कारगुरुणोः स्वभावलघुनश्च भक्ष्यस्य भोजनपरिमाणमाह "गुरूणामर्द्धसौहित्यं

ब्रूनां हविरिष्यते" अयमर्थः मांसपिष्टाद्यादिभिर्द्रवं सौष्ठित्यं कर्त्तव्यं मुद्गादिभिः स्वाभाविक्या मात्रया हविः कर्त्तव्येति। "द्रवोद्रवोत्तरश्चापि न मात्रायुरिष्यते"। द्रवः मेयादिर्द्रवोत्तरः तस्मादधिक ओदनादिः मात्रातोधिकोऽपि मात्रायुर्न मन्तव्यः मेयस्य सर्वतोलघुत्वात् उक्तञ्च सुश्रुते "मेयलेह्याद्यभक्ष्याणां गुरु विद्याद्यथोत्तरमिति" मेयं क्षीरादि लेह्यं रसालादि भक्ष्यं ओदनरूपादि भक्ष्यं ओदनादि "द्रवाढ्यमपि शुष्कं तु सम्यगेवोपपद्यते। विशुष्कमन्नमश्नन्तं न पाकं साधु गच्छति"। अयमर्थः शुष्कमपि स्रोतोरोधकरमपि द्रवाढ्यं सम्यक् पाकं याति। केवलस्य शुष्कान्नस्य दोषमाह विशुष्कमन्नमित्यादि। अपक्वं तत् किं भवतीत्यपेक्षायामाह "पिण्डीकृतमसंक्लिन्नं विदाहमुपगच्छति" पिण्डीकृतम् अतीवाबद्धभूतम् असंक्लिन्नमसम्यगार्द्रं विदाहमुपगच्छति विदग्धं भवतीत्यर्थः। शुष्कादीनां वैगुण्यमाह "शुष्कं विरूक्षं विष्टम्भि वह्निव्यापदमावहेत्" शुष्कश्चिपिटादि विरूक्षं क्षीरमत्स्यादि, विष्टम्भि चणकमसूरादि, वह्निमान्द्यङ्कुर्य्यात्। "न भुक्त्वा न रटैस्थित्वा, न निशायां न वा बहून्। न जलान्तरितानद्भिःसक्तून्वाऽन्नं केवलान्। पुनर्हीनं पूयकूपान्नं सामिषस्यवसा निशि। दग्धच्छेदनमुष्णं च सप्त सक्तुषु वर्जयेत्" विषमाशनस्य लक्षणमाह। "बद्धं श्लोकमलाडे वा श्लेष्मं तद्विषमाशनम्" बद्धत्वात्तस्य भक्षितस्य दोषमाह "आलस्यगौरवाटोपगण्डत्वं च करोत्यधिकम्। क्षीणमात्रमसन्तोषं करोति च बलक्षयम्" अधिकमन्नम्। अकाले भुक्तेर्दोषमाह "अप्राप्तकाले भुञ्जानो ह्यसमर्थतनुर्नरः तांस्तान् व्याधीनवाप्नोति मरणञ्चाधिगच्छति" अप्राप्तकाले कालादतिप्राक् भुञ्जानः असमर्थशरीरो भवति तथा सति तांस्तान् व्याधीन् शिरोव्यथाविसूचिकाऽलसकविलम्बिकादीन् प्राप्नोति तेषामाधिक्ये मरणमपि प्राप्नोतीत्यर्थः "काले तीतेऽभुतोजनोर्वायुनोपहतेऽनले। लङ्घनादिपचते भोक्तुं क्षुद्भोक्तुं पुनः क्षुधा"। कुक्षेर्भागद्वयं भोज्यैस्तृतीयं वारि पूरयेत्। वायोः सञ्चारणार्थाय चतुर्थमवशेषयेत्"। "रसेनान्नस्य रसना प्रथमेनोपतर्पिता। न तथा क्षुदमाप्नोति यथा पेय्याम्बुनान्तरा" "अत्यम्बुपानान्न विपच्यतेऽन्नमनम्बुपानाच्च स एव दोषः। तस्मान्नरो वह्निविवर्द्धनाय मुहुर्मुहुर्वारि पिबेदभूरि। भक्तस्यादौ जलं पीतं कार्श्यमग्निदोषकृत्। मध्येऽग्निदीपनं श्रेष्ठमन्ते स्थौल्यकफप्रदम्। अन्यत्र "समस्यूनस्य वा भुक्तमध्यान्तप्रथमाम्बुपाः" इति वाग्भटः" भुक्तं भोजनम् "हविषस्तु न चात्नीयात् क्षुधितो न पिबेज्जलम्। हविषस्तु भवेद्गुल्मी क्षुधितस्तु जलोदरी। नन्वाद्यं भोजनान्ते दुग्धं पिबन्ति तत्कथमुचितं यतस्त्रिधा विभक्तस्य भोजनद्रव्यस्य प्रथमो भागोवातस्य, द्वितीयः पित्तस्य, तृतीयः कफस्य, यत आह "अन्नीयात्तन्नना भूत्वा पूर्वं तु मधुरं रसम्। मध्येऽम्ललवणौ पश्चात्कटुतिक्तकषायकान्" अस्यायमभिप्रायः भोजने पूर्वं भुक्तो मधुरो रसो बुभुक्षितस्य वातपित्तयोः शमको भवति। भोजनमध्ये भुक्ते अम्ललवणे पित्तोपशमनेन वह्निवृद्धिं कुरुतः। भोजनान्त्यसमये भुक्ताः कटुतिक्तकषाया रसाः कफं शमयन्तीति। अतोभोजनावसानसमयस्य कफकालत्वात् तत्र कथं स्नेहजनकं दुग्धं पातुचितं भवति। यतउक्तम्। "दुग्धं स्वादुरसं स्निग्धभोजनं धातुवर्द्धनम्। वातपित्तहरं हृद्यं स्नेहलं गुरु शीतलमिति" उच्यते "विदाह्यन्नपानानि यानि भुक्ते हि मानवः। तद्विदाहोपशान्त्यर्थं भोजनान्ते पयः पिबेत्" अतएव ब्रह्मपुराणे "कुर्य्यात् क्षीरान्नमाहारं न दध्यन्नं कदाचनेति लवणाम्लकटूनानि विदाह्यन्नपि यानि तु। तद्दोषं हर्तुमाहारं मधुरेण समापयेदिति" भोजनावसानसमये दुग्धादिमधुरभोजने वातकफोपशमनेन लवणाम्लकटुभोजनजनितां पित्तस्य वृद्धिं नाशयति पित्तवृद्धिनाशनेन च पित्तवृद्धिरूपक्षीणा भवतीति कफवृद्धिरग्निमान्द्यादीनुत्पादयितुं न शक्नोति"।

आह्निकतत्त्वेऽप्याह्निकविधिरुक्तो यथा विष्णुपु०। "स केवलमघं भुङ्क्ते योभुङ्क्ते ह्यतिथिं विना। अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात्। इन्द्रियप्रीतिजननं दृष्ट्वापाकं विवर्जयेत्" तथा "सुवासिनीर्दुःखिनश्च गर्भिणीर्बालकान् शिशून्। संभोज्यान्नेन प्रथमं, चरमं स्वयं। अभुक्तवत्सु चैतेषु भुङ्क्ते यदि सुदुष्कृतम्। अतस्य नरकं गत्वा स्नेहभुग्जायते नरः। अश्नात्यात्मी मलं भुङ्क्ते अजन्तु पूयशोणितम्। अकृत्वा च बलिं भुङ्क्ते अदत्त्वा विषभोजनम् असंस्कृतान्नभुक्सूतं बालादिप्रथमं भवेत्। भुञ्जतश्च यथा पुंसः पापबन्धोन जायते। इह चारोग्यमतुलं बलवह्निस्तथा नृप"। तथा "प्रथमस्तत्पाणिस्तु भुञ्जीत प्रयतोऽन्वहं। अन्नं प्रशस्तं पथ्यञ्च प्रोक्षितं प्रोक्षणोदकैः। न कुत्सिताहृतं नैव जुगुप्सावद्संस्कृतम्"। विष्णुपु०"मन्त्राभिमन्त्रितं शस्तं न च पर्युषितं नृप!। अन्यत्र फलमांसेभ्यः शुष्कशाकादिकात्तथा। तद्वद्दारिकेभ्यश्च गुडपक्वेभ्य एव च।

भुञ्जीतोद्धृतसाराणि न कदाचिद्वरेश्वर ! । नाग्नेयं पुरुषो-ऽश्नीयादन्यत्र जगतीपते ! । मध्यन्दधिसर्पिर्भ्यः सक्तुभ्यश्च विवेकवान् । अश्नीयात्तन्मना भूत्वा पूर्वन्तु मधुरं रसम् । लवणाम्लौ तथा मध्ये कटुतिक्तादिकांस्ततः । प्रागूर्द्धं पुरुषोऽश्नन् वै मध्ये च कठिनाशनः । पुनरन्ते द्रवाणी तु बलारोग्ये न सङ्कति । अनिन्द्यं भक्षयेदन्नं वाग्यतोऽग्रमकुत्सयन् । पञ्च ग्रासान् महामौनं प्राणाद्याप्ययाय तत्" । मन्त्राभिमन्त्रितमिति मन्त्रानादेये गायत्रीति वचनात् गायत्र्यभिमन्त्रितम् । गारुडे "शाकं क्षुपञ्च भूविल्वं लवणञ्च विवर्जयेत् । नचैकरससेवायां प्रसज्येत कदाचन" । छन्दोग० प० । "मुनिभिर्हितमन्नसङ्कं विप्राणां मर्त्यवासिनां नित्यम् । अहनि च तथा तमस्विन्यां सार्द्धप्रहरयामान्तः" । अहनि अचिरोदितसूर्य्येतरदिनभाले । तत्राप्यायुर्वेदोक्ते विशेषः । "याममध्ये न भोक्तव्यं त्रियामन्तु न लङ्घयेत्" । याममध्ये रसस्तिष्ठेत्त्रियामे तु रसक्षयः" । तत्रापि पञ्चमयामार्द्धोत्तरकालो दक्षवचनात् (तत्त्वाङ्किकशब्दे ८०६ पृष्ठे वक्ष्यते त्रियामन्त्वितरद्वियाममित्येवायुर्वेदोक्ते पाठः । दक्षवचनानुरोधात् त्रियाममिति पाठकल्पनं बोध्यम्) । महामौनं हुङ्कारादिरहितम् । तथाचात्रिः "मौनव्रतं महाकष्टं हुङ्कारेणैव नश्यति । तथासति महान् दोषस्तस्मात्तु नियतश्चरेत् । एष क्रमः पौराणिकत्वात् सर्व्वसाधारणः । विष्णुः । "न तृतीयमयाश्नीयादापद्यपि कदाचन" । गोतमः । "आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः । रसाः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः । कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः । आहारा राजसस्येष्टा दुःखशोकामयप्रदाः । यातयामं गतरसं पूतिपर्य्युषितञ्च यत् । उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्" मनुः । "आयुष्यं प्राङ्मुखोभुङ्क्ते यशस्यं दक्षिणामुखः । श्रियः प्रत्यङ्मुखोभुङ्क्ते ऋतं भुङ्क्ते ह्युदङ्मुखः" । नियमे त्वेवम् अनियमे तु नोदङ्मुखः । हारीतः "नोदङ्मुखोऽश्नीयात्" । निष्कामस्य तु प्राङ्मुखेनैव यथाह देवलः । "प्राङ्मुखोऽन्नानि भुञ्जीत शुचिः पीठमधिष्ठितः । विशुद्धवदनःप्रीतोभुञ्जीत न विदिङ्मुखः" । जीवन्नाहकस्य दक्षिणामुखत्वनिषेधमाह व्यास० "दक्षिणामुखोन भुञ्जीत एवं विषभोजनमनायुष्यं मातरुपदिशति" । केचित्तु "कुरुक्षेत्रं गयाश्राद्धं तिलैस्सप्तभमेव च । न जीवत्पितृकः कुर्य्यादक्षिणामुखभोजनम्" इत्याचार रत्नाकरधृताज्जीवत्पितृकस्यापि निषेध इत्याहुः । व्यासः "पञ्चार्द्रोभोजनं कुर्य्यात् प्राङ्मुखोमौनमास्थितः । हस्तौ पादौ तथैवास्यमेषु पञ्चार्द्रता मता" । व्यासः "अन्येकपङ्क्त्यां नाश्नीयात् संहतः स्वजनैरपि । कोहि जानाति किं कस्य प्रच्छन्नं पातकं महत् । भक्षस्तम्भजलद्वारमार्गैः पङ्क्तिञ्च भेदयेत्" । जलादिना पङ्क्तिभेदाकरणे तु शङ्खः । "एकपङ्क्त्युपविष्टानां विप्राणां सहभोजने । यद्येकोऽपि त्यजेत् पात्रं शेषमन्नं विवर्जयेत् । मोहात् भुञ्जीत यः पङ्क्त्यामुच्छिष्टसहभोजनम् । प्राजापत्यं चरेद्विप्रः तत्रः सान्तपनन्तथा" ! । एतत्समानार्थमभिधायाह गोभिलः । "भुञ्जानेषु तु विप्रेषु यस्तु पात्रं परित्यजेत् । भोजने विघ्नकर्त्तासौ ब्रह्महापि तथोच्यते" । आप० "दिवा पुनर्न भुञ्जीतान्यत्र फलमूलेभ्यः" । मनुः "नातिप्रगे नातिसायं न सायं प्रातराशितः" अतिप्रगेऽचिरोदितसूर्य्ये अतिसायं सूर्य्यास्तमितसमये एवं प्रातराशितः दिनभोजनेनातिव्यग्रः न सायं न रात्रौ भुञ्जीतेत्यर्थः । आप० "यस्तु भोजनशालायां भोक्तुकामउपस्पृशेत् । आसनस्थोनचान्यत्र स विप्रः पङ्क्तिदूषकः" बौधा० "उपलिप्ते समे स्थाने शुचौ लब्धासनान्विते । चतुरस्रं त्रिकोणञ्च वर्त्तुलञ्चार्द्धचन्द्रकम् । कर्त्तव्यमानुपूर्व्येण ब्राह्मणादिषु मण्डलम्" । "अकृत्वा मण्डलं ये तु भुञ्जतेऽधमयोनयः । तेषान्तु यत्तरक्षांसि हरन्त्यन्नानि तद्बलात्" । आप० । "भिन्नकांस्ये तु योविप्रोयदि भुङ्क्ते तु कामतः । उपवासेन चैकेन पञ्चगव्येन शुद्ध्यति" तथा मृद्दारुभोजनेनापरिष्कृतपात्रेऽपि दोषमाह "ताम्रपात्रे न भुञ्जीत भिन्नकांस्ये मलाविले । पलाशपद्मपत्रेषु स्रष्टौ भुक्त्वेन्दवं चरेत्" । नव्यवर्द्धमानधृताग्नि० "अर्कपत्रे तथा पृष्ठे आम्रे ताम्रभाजने । करे कर्पटके चैव भुक्त्वा चान्द्रायणञ्चरेत्" । पृष्ठे कदलीपत्रादिपृष्ठे । पैठी० "ताम्ररजतसुवर्णाश्मपङ्कपुष्पिस्फटिकानां भिन्नमभिन्नमिति न दोषः" । अत्र पाषाणपात्रं भोजने विहितम् । "तैजसानां मणीनाञ्च सर्व्वरत्नमयस्य च । भस्मनाद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः" इति मनुना पाषाणपात्रस्य शुद्धिविधानाच्च । प्रचेताः "ताम्रलाभ्यञ्च कांस्यपात्रे च भोजनम् । यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत्" । अत्रिः "आसने पादमारोप्य योभुङ्क्ते ब्राह्मणः क्वचित् । सुखेन चान्नमश्नाति तस्य गोमांसभक्षणैः" । सुखेन हस्तोत्तोलनं विना गवादिवदित्यर्थः । आह्निकेधिके "आर्द्रपादस्तु भुञ्जीत

प्राङ्मुखश्चासने शुचौ । पादाभ्यां धरणीं स्पृष्ट्वा पादेनैकेन वा पुनः" । बौधा० "भोजनं हवनं दानमुपहारः परिग्रहः । बहिर्जानु न कार्य्याणि तद्दक्षिणमनं स्मृतम्" हारीतः "भाजनाद्बलिकर्म्म भोजनानि दैवतीर्थेन कुर्य्यात्" । पराशरभा० हेमाद्रौ मनुः "न पिबेच्च भुञ्जीत द्विजः सव्येन पाणिना । नैकहस्तेन च जलं स्पृष्ट्वेवावर्जितं पिबेत्" । मार्क० पु० "पादप्रसारणं कृत्वा न च वेष्टितमस्तकः" । मनुः "पूजयेदशनं नित्यं चाद्याच्चैतदकुत्सयन् । दृष्ट्वा हृष्येत् प्रसीदेच्च प्रणमेच्चैव सर्व्वदा । अन्नं हट्टा प्रणम्यादौ प्राञ्जलिः प्रार्थयेत्ततः । अक्षार्कं नित्यमस्त्वेतदिति भक्षाय वन्दयेत्" । विष्णु-पु० "नागः कर्म्मैव क्रकरो देवदत्तोधनञ्जयः । बहिःस्था वायवः पञ्च तेषां भूमौ प्रदीयते । अदत्त्वा बाह्य वायुभ्यः प्राग्वादिभ्यो न होमयेत्" । इति शिष्टपठित-वचनाद्वागादिभ्योबलिदानमिति प्राचीनाचारः । तत्रान्नं देवेभ्योदत्त्वैव भोक्तव्यं तथा च गीता "इष्टान् भोगान् हि वोदेवा दास्यन्ते यज्ञभाविताः । तैर्दत्तानप्रदायैभ्यो-योभुङ्क्ते स्तेन एव सः" । यज्ञैः भाविता संवर्द्धिताः वोयुष्मभ्यं भोगानन्नादीन् इष्ट्यादिद्वारा दास्यन्ति अतो देवैर्दत्तान् अन्नादीन् तेभ्योऽदत्त्वा योभुङ्क्ते स चौर एव । स्मृतिः "निवेद्य प्राशनात् पूर्व्वं देवपादोदकाकृतिः । क्षेतव्या जठरे वह्नौ स्तेन पाणितलेन तु" । तेन पादो-दकेनापोशानं कृत्वा प्राणाकृतिर्नैवेद्येन कार्य्या । स्वदत-नैवेद्यभक्षणन्तु पश्चादुपपादयिष्यते । ब्रह्मपु० "आपो-शानञ्च स्पृशीयात् सर्व्वतीर्थमयञ्च यत् । अमृतो-पस्तरणमसि विष्णोरन्नमयञ्च यत् । अत्र चास्तरणार्थन्तु प्राश्यते ह्यस्तं सकृत् । अमृतोपस्तरणमसि स्वाहेति च सकृद्वरेत्" । सन्ध्यापद्धतौ लिखितवचनं प्रमाणय-न्नोऽसीत्येतदनन्तरं स्वाहाकारं कुर्व्वन्ति । ब्रह्मपु० "हस्तेन लङ्घयेन्नान्नं नोदकेन कदाचन । दम्भाद्योलङ्घ येन्मुञ्जलेनान्नं निहतं भवेत् । हतान्नमभक्ष्यत्वं तस्य यान्ति दुरात्मनः । प्राणेभ्यस्त्वय पञ्चभ्यः स्वाहाप्रणवसं-युताः । पञ्चाहुतीस्तु जुहुयात् प्रलयाग्निनिभेषु च । प्राणाहुतिसङ्ग्राहः गौतमः । "तर्जनीमध्यमाङ्गुष्ठैर्मेलना प्राणाहुतिर्भवेत् । मध्यमानामिकाङ्गुष्ठैरपाने जुहुया त्ततः । कनिष्ठानामिकाङ्गुष्ठैर्व्याने च जुहुयाद्बुधः । तर्ज नीन्तु बहिष्कृत्वा उदाने जुहुयात्ततः । समाने सर्व्वहस्तेन वसुदावाहुतिर्भवेत्" । स्मृत्यर्थसारे । "प्राणाहुतौ घृता-भावे पश्चाद्भुञ्जीत नो घृतम्" । देवलः "न भुञ्जीत घृतं नित्यं स्पृहस्थो भोजनद्वये । पवित्रमन्न जुष्टञ्च सर्पिराज्यघा-पहम्" । काशी० "दर्भपाणिस्तु योभुङ्क्ते तस्य दोषो न बाधते । केशकीटादिसम्भूतन्ततोऽश्नीयात् सदर्भकः । यावदेवान्नमश्नीयान्न ब्रूयात्तदगुणागुणान् । अतोमौनेन-योभुङ्क्ते स भुङ्क्ते केवलामृतम्" । मनुः "स्वाध्याये भोजने चैव दक्षिणं पाणिमुद्धरेत्" । उद्धरेदुच्छादयेदित्यर्थः । बौधा० "आचम्य संयते देशे उपविश्यान्नं संस्पृश्य सव्यांगुलीभिरन्नमश्नीयात्" । संस्पृश्य अन्न-पात्रं सम्यक्स्पृशेदित्यर्थः । काशी० "प्रदद्यान्मृदः पतये भुवनपतये तथा । भूतानां पतये स्वाहेत्युक्त्वा भूमौ बलि-त्रयम् । आपोशानं विधानेन कृत्वान्नीयात् सुधीर्द्विजः" । ब्रह्मपु० "तेजोसीति जपंस्त्वन्नं प्रणमेदमृतञ्च यत् । आपोशानञ्च स्पृशीयात् सर्व्वतीर्थमयञ्च यत् । अमृतो-पस्तरणमसि विष्णोरन्नमयञ्च यत्" । अन्नमयस्य विष्णो-र्यदास्तरणमसीत्यर्थः ततश्च तेजोसीति नमस्कृत्य भुञ्जीतेत्यर्थः । भविष्यो० "स्नातस्तु वरुणस्तेजो जुहु-तोऽग्निः श्रियं हरेत् । भुञ्जानस्य यमस्त्वायुस्तस्मान्न-व्याहरेत्त्रिषु" । मौने विशेषमाह व्यास० । "तत्र त्रैविद्यवृद्धैर्मुनिभिरन्यैराश्रमिभिर्बहुश्रुतैर्दन्तैर्दान्तसन्ना-यान्मौन एव यावद्यावदर्थं भाषेत न मन्त्रलोपोभवती-तिविज्ञायते इति" मन्त्रलोपोमौनव्रतलोपः । ब्रह्मपु० "यस्तु पाणितले भुङ्क्ते यस्तु हुङ्कारसंयुतम् । प्रसृता-ङ्गुलिभिर्यस्तु तस्य गोमांसवद्भवेत् । करेण च पिबेत्तोयं यावन्मांसं न भक्षयेत् । मांसलिप्तकरे तोयं तुल्यं गोमांसभक्षणैः" । अत्र मांसलिप्तकरेण जलपाननिषेधात् मांसलिप्तकरं प्रक्षाल्यैवापोशनं कर्त्तव्यम् । प्रक्षापोशाने तु हस्तप्रक्षालननिषेधात् मांसलिप्तकरं प्रक्षाल्य पुनरन्नलिप्त करेण प्रक्षापोशानं कर्त्तव्यम् । षट्त्रिं० "पिब-तो यत् पतेत्तोयं भाजने सुखनिःसृतम् । अमेध्यं तद्भवे-दन्नं भुक्त्वा चान्द्रायणञ्चरेत् । वामपार्श्वे स्थिते तोये यो-भुङ्क्ते ह्यानदुर्बलः । श्वासे श्वासे मलं भुक्त्वा पानीयं रुधिरं पिबेत् । विद्यमाने तु हस्ते तु प्राक्षणोच्छानदुर्बलः । तोयं पिबति वक्त्रेण स्वादिजायेत नान्यथा । उद्धृत्य वामहस्तेन यत्तोयं पिबति द्विजः । सुरापानेन तुल्यं स्यात् मनुराह प्रजापतिः" । वामहस्तेन केवलवामहस्तेन । अत-एव "पीतशेषन्तु यत्तोयं तत्पिबेच्च द्विजोत्तमः" । "पीतशेषं पिबेन्नैव" इति ब्रह्मपु० अविशेषात् सर्व्वं

निषिद्धम्"। ब्रह्म० "तिलकल्कं जलं क्षीरं दधि क्षौद्रं घृतानि च। न त्यजेदर्द्रजग्धानि सक्तुं शाकं कदाचन"। भारते "पानीयं पायसं सर्पिर्दधिक्षौद्रघृतान्यपि। निरस्यं शेषमेतेषां न प्रदेयन्तु कस्यचित्"। एतच्च त्याज्यं अयत्नतो कस्यचित् देयमित्यर्थः। निरस्यं निःशेषमशनोयमित्यर्थः। तथा "अन्नं प्रगस्तं पथ्यञ्च प्रोक्षितं प्रोक्षणोदकैः"। इति प्रागुक्तविष्णुपुराणाद्युक्तेतरभक्षणे दोषमाह मनुः "आत्मस्थादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति"। अन्नदोषस्त्रिविधः दृष्टादृष्टादृष्टः। दृष्टादृष्टस्त्रायुर्व्वेदोक्तः। अदृष्टादृष्टः स्मृत्युक्तः। उभयत्रोक्तास्तु बालवत्सासिवत्सादुग्धादिदोषा दृष्टादृष्टादृष्टाः। अतएव मनुनैवोक्तम् "स्वाध्याये चैव युक्तः स्यात् नित्यमात्महितेषु च" युक्त उक्तवान्। हारीतः "पृथक् पानं पुनर्दानमामिषं पायसानि च। दन्तच्छेदनसूक्ष्मञ्च सप्त सक्तुषु वर्जयेत्"।

सचाहारस्त्रिविधः सात्विकराजसतामसभेदात् यथोक्तं गीतायाम् "आहारस्त्वपि सर्व्वस्य त्रिविधोभवति प्रियः। यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु" इत्युपक्रम्य "आयुःसत्त्वेत्यादि" तत्र वाक्यम् आ०त० ६०१पृष्ठे दर्शितम्"। अत्र सर्व्वत्र "क्तदभिहितोभावोद्रव्यवत् प्रकाशते" इति भाष्योक्तेः आह्रियते भुज्यते कर्म्मणि घञि वा आहारशब्दस्य भक्ष्यपरत्वम् अतएव भावप्र० "आहारः षड्विधश्चूष्यमित्यादि" ८६६पृष्ठे उक्तम्। स च षोढा "आहार्य्यं षड्विधं भोज्यं भक्ष्यं चर्व्यं तथैव च। लेह्यं चूष्यं तथा पेयं तदुदाहारणानि तु। भोज्यमोदनपूपादि भक्ष्यमोदनसक्तके। चर्व्यं चिपिटधानादि रसालादि तु लिह्यते। चूष्यमाम्रफलेक्षवादि पीयते पानकं पयः" भाप्रप्र० उक्तेः। आह्रियते इत्याहारः। शब्दादिविषयज्ञाने च आहारशुद्धि शब्देया० भा० वाक्यम् उदा०।

आहारपाक पु० आहारस्य भक्ष्यस्य पाकः रसादिभावेन परिणामः। वैद्यकोक्ते भुक्तस्याद्यादेराहारस्य रसादिरूपेण परिणामरूपे पाकभेदे तत्पाकप्रकारः पदार्थादर्शेष्टतयगार्ष्ण वाक्ये उक्तः तत्र अग्निशब्दे ३६पृष्ठे दर्शितम्। भावप्रकाशोक्तस्तत्प्रकारस्तु अन्नशब्दे ४५८ पृष्ठे उक्तः।

आहारशुद्धि स्त्री आहारस्य भक्ष्यादेः शुद्धिः। १भक्ष्यादिद्रव्यस्य २शुद्धौ सा च शुद्धिः स्मृत्युक्तादिशाऽवसेया। सा च अभक्ष्यमर्জ্জनेन भक्ष्यभोजनेऽपि भवति। अभक्ष्याणि च अभक्ष्यशब्दे २७४पृष्ठे उक्तानि। आहारदोषनिवारणार्थां शुद्धिः।२दुष्टाहारजन्यदोषनिवारणार्थायां शुद्धौ प्रायश्चित्ते। "आहारशुद्धिं वक्ष्यामि तन्मे निगदतः शृणु। अज्ञानतश्च भैक्षं वा पिबेद्ब्राह्मी सुवर्चसम्" इत्यादिना अत्रिसं० दर्शिता। ३शब्दादिविषयज्ञानशुद्धौ च "आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः" छा०उ०। "आह्रियते इत्याहारः शब्दादिविषयज्ञानम् तद्धि भोक्तुर्भोगायाह्रियते तस्य विषयोपलब्धिलक्षणस्य विज्ञानस्य शुद्धिराहारशुद्धिः रागद्वेषमोहदोषैरसंस्पृष्टविषयविज्ञानमित्यर्थान्तरं तस्याहारस्य शुद्धौ सत्यां तदृतोऽन्तःकरणसत्त्वस्य शुद्धिर्नैर्म्मल्यं भवति" भाष्यम्। आहारशब्दस्य भक्ष्यार्थतामपहाय तथा व्याख्यानं तु "रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्" इति गीतोक्तिमनुरुध्यैवेति आनन्दगिरिः।

आहारसम्भव पु० आहारात् भोज्यद्रव्यात् सम्भवति सम्+भू-अच्। आहारपाकजे देहस्थे रसधातौ। रसस्य यथाऽऽहारजत्वं तथाऽस्मत्करग्रन्थे ४५८पृष्ठे उक्तम्।

आहार्य्य त्रि० आ+हृ-ण्यत्। १आहरणीये "अथ मूलमनाहार्यं प्रकाशकरणयोधनम्" मनुः। २व्याप्ये "कार्य्यञ्च तस्य दशधाहार्य्यं धार्य्यं प्रकाश्यञ्च" सा०का० "आहार्य्यं व्याप्यं कर्म्मेन्द्रियाणां वचनादानविहरणोत्सर्गानन्दा यथा यथं व्याप्नुते च यथायथं दिव्यादिव्यतया दशेत्याहार्य्यं दशधेति" सां०कौ०। क्वचिन्मे "आहार्य्यशोभारहितैरभावैः" भट्टिः। स्वार्थे कन् तत्रैव "आहार्य्यकमपि तस्याः सहजमिवाशोभत" ७,२१, कुमा०मल्लि०। ४लौकिके ५ औपासनिकेऽग्नौ च "आहार्य्येणानाहिताग्निम्" "पत्नीञ्च" आश्व०औ०। "येनाहिताग्निना सर्व्वाधानं कृतं तस्य पत्नीं लौकिकेन, यस्यौपासनशास्त्रि तस्य पत्नीमौपसनिकेन दहेयुः" नारा०। ६इच्छाप्रयोज्यारोपेण विषयीकार्य्येबाधनिश्चयकालिके तद्धर्म्माभाववति तद्धर्म्मवत्त्वेन ज्ञेये। भावे क्त्र। ७ताद्यर्थज्ञाने न०। यथा निर्वह्निः पर्व्वतो वह्निमानिति ज्ञानं तत्र वह्न्यभाववति पर्व्वते वह्निप्रकारकत्वात् इच्छाप्रयोज्यत्वाच्च आहार्य्यम्। तच्च प्रत्यक्षमेव तदभाववत्त्वेन निश्चितेऽपि धर्म्मिणि तद्बोधस्य इच्छाप्रयोज्यत्वात् "परोक्षज्ञानम् अनाहार्य्यम् निश्चयश्चेति सिद्धान्तः" चिन्ता०। "शाब्दबोधोऽप्याहार्य्योभवत्यालङ्कारिका यथा अयं मुखमित्यादौ चन्द्रभिन्ने मुखे चन्द्रभेदज्ञानम् तच्चाहार्य्यमेव ८०४पृ०आरो-

पशब्देऽधिकसूक्तम् । "भवेदभिनयोऽस्यानुकारः स चतुर्विधः । आङ्गिकोवाचिकश्चैवमाहार्य्यः सात्विकस्तथा" सा०द०उक्ते नटादिभिरात्मनि कर्त्तव्ये रामाद्यारोपहेतुके ८अभिनयभेदे च । आ+हृ-कर्म्मणि ण्यत् उपसर्गयोगात् ६भावे "आहार्य्यं पञ्चिधं भक्ष्यमित्यादि" भाव० प्र० ।

आहाव पु०आ+ह्वे+घञ् संप्रसारणे ह्रस्वः । कूपसमीपे मवादीनां जलपानाय प्रस्तरादिना रचिते(खात) १ क्षुद्रजलाशये निपाने "प्राविशच्चाहवप्रख्या आहावस्तपसिस्रुवः" भट्टिः ।"आहावसदकाधारम्"जयम० "निपानमाहावः" पा०। २युद्धे। भावे घञ्। ३आह्वाने आ+ह्व-आधारे घञ्। ४अग्नौ । "नाभिं यज्ञानां सदनं रयीणां महामाहावमभि संनवन्त" ऋ० ६,७,२ । आहूयतेऽस्मिन्नाहावमग्निम् ह्वश्चुदकधारणमाहावं निपानास्थानीयं वा" भा०। आ+ह्वे-भावे करणे वा घञ्। ५मन्त्रविशेषेणाह्वाने ६आह्वानसाधने मन्त्रभेदे च "आदौ निविद्धानीयानां सूक्तानामनेकत्वेत् प्रथमेषुाहावः" आश्व०श्रौ० । "तस्यानेकत्वे प्रथम एवाहावः"इत्तिः"तृतीयसवने यस्यादिष्वाहावः आश्व०श्रौ० । "एषु आहावः प्रातःसवनेन शस्त्रादिषु" आ०श्रौ०। "एषु स्थानेषु ऋगन्तरेणाह्वाने विहिते गोसावोमित्यनेनैवाह्वानं कुर्यात् नान्येनेति नियम्यते" इत्तिः "गो सावो दैवेत्याहावे"आश्व० श्रौ० प्रतिगरसंज्ञार्थमिमे सूत्रे ।

आहिंसि पुंस्त्री अहिंसस्यापत्यम् इञ्। अहिंसकापत्ये ततः युवापत्ये फक् तौल्व०तस्य न लुक्। आहिंसायनः तत्पौत्रे ।

आहिक पु० अहिरिव कनू स्वार्थे अण्। १केतुग्रहे हेमच० तस्य सर्पतुल्याकृतित्वात्तथात्वम् ।२पाणिनिमुनौ च त्रिका०।

आहिच्छत्र त्रि०अहिच्छत्रदेशे भवः अण्। अहिच्छत्रदेशे भवे

आहिण्डिक पु० निषादेन वैदेह्यां जनिते अन्यजवर्ण्यसङ्करभेदे "आहिण्डिको निषादेन वैदेह्यामेव जायते" मनुः । "बालसंरक्षणादावाहिण्डिकानाम्" औशनसस्मृतोक्ता तद्वृत्तिर्ज्ञेया ।

आहित त्रि० आ+धा-क्त ह्रादेशः । १न्यस्ते, २स्थापिते, ३अर्पिते । "व्यावर्त्तनैरहिपतेरयमाहिताङ्गः" किरा० ४कृते,५कृताधानसंस्कारे च"प्रणीताग्राप्रणीतय यथाऽग्निदैवतं सत्याम्" मनुव्या० "आहितोऽनाहितोवाग्निरिति" कुल्लू० । [विख्याते २न्यस्तचित्ते च ।

आहितलक्षण त्रि० आहितं उक्तं यस्य । १सुखादिद्वारा

आहिताग्नि त्रि० आहितोऽग्निर्येन । वेदमन्त्रादिना कृत संस्काराग्नियुक्ते तदाधानप्रकारः आधानशब्दे ७०८ पृष्ठे उक्तप्रायः । आश्व०श्रौ० २अ० २क० विस्तरेणोक्तः । "न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः"मनुः।"गुरोरपीदं धनमाहिताग्नेः" रघुः । "आहिताग्निः सत्रवत्समिदं चरेत्"तैत्ति०"न वाऽऽहिताग्निनाग्नतं वदितव्यम्" शत० ब्रा० २,२,२,२० । "देवान् वा एव उपावर्त्तते य आहिताग्निर्भवति" ऐत०ब्रा० । आहार्य्येणैवानाहिताग्निम्"आश्व०श्रौ०। वा परनिपाते अग्न्याहितोऽन्यत्र ।

आहिताग्निगण पु०पाणिन्युक्ते वा परनिपातार्थे शब्दसमूहभेदे । स च गण; आहिताग्नि जातपुत्र जातदन्त जातश्मश्रु तैलपीत घृतपीत मद्यपीत जटभार्य्य गतार्थ" "आकृतिगणः तेनान्येऽपि" सि०कौ० ।

आहिति स्त्री आ+धा क्तिन् ह्रादेशः । १स्थापने २आधाने मन्त्रेणाग्न्यादेः संस्कारे ३आहुतौ च ।"तस्मिन् यत्किञ्चात्पादध्यादाहितय एव ताः आहितयोह वै ता आहुतय इत्याचक्षते"शत०ब्रा०१०,६,२,२२, । [(आहुड़े)।

आहितुण्डिक त्रि०अहितुण्डेन दीव्यति ठक् । व्याघ्र्याहिघि

आहिमत त्रि० अहिमतोऽदूरभवः अण्। सर्पविशिष्टदेशादूरभवे ।

आहुक पु० यदुवंश्ये क्षत्रियभेदे स च वसुदेवएव । "केशवोऽपि सदा युक्तः प्रविवेश पुरोत्तमम् । पूज्यमानो यदुश्रेष्ठैरुग्रसेनसुखैस्तथा । आहुकं पितरं वृद्धं मातरंच यशस्विनीम् । अभिवाद्य बलश्चैव स्थितः कमललोचनः"इति भा० सभा०२अ० । अत्र केशवपितृत्वेन कीर्त्तनात् वसुदेवस्य नामान्तरत्वं तस्य प्रतीयते "एवं आहुकश्चाहुकी चैव ख्यातौ ख्यातिमतांवरौ" हरि० ३८अ०। एवमाहुकिन् तद्वंश्ये क्षत्रिये पु० ।

आहुत न० उद्देश्यस्याभिसख्येन साक्षादेव हुतं दत्तम् आ+हु-क्त। स्मृत्युक्तकर्त्तव्येषु पञ्चसु यज्ञेषु १मनुष्ययज्ञे, २भूतयज्ञे चेत्यन्ये । कर्म्मणि क्त ।३आभिसख्येन हुते देवादौ त्रि०

आहुति स्त्री आ+हु-क्तिन् । देवोद्देशेन मन्त्रेणाग्नौ हविःक्षेपे । "अग्नौ प्राप्ताहुतिः सम्यगादित्यमुपतिष्ठते"मनुः । "वेत्थ सौम्य ! यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" छा०उ० । "प्रातराहुत्यां हुतायां पूर्वाहुत्यन्ते वरदानम्" कात्या० २०,१,२०। "जुहुयात्सर्पिराहुतीः" मनुः "प्राणाद्याहुतिपञ्चकम्" स्मृतिः। आहूयते कर्म्मणि क्त ।२आहूयमाने हवनीयद्रव्ये हविरादौ ।"पुनानं पवनोद्भूतैर्धूमैराहुतिगन्धिभिः"रघुः।"ब्रह्माहुतिहुतं यज्ञ"मनुः।

आहुल्य न० आ+ह्वल-बा०क्यप् संप्रसारणञ्च । काश्मीरादौ (तरबट) इति प्रसिद्धे कात्तृनवर्षपुष्पे गिलोफले क्षुपभेदे ।

आहुव त्रि०आ+ह्वा-धजर्थे कर्म्मणि क संप्र०उवङ् आह्वातव्ये "अतुक्रटीनामन्वाहुवः" छ० ८,१२,१९, आहुवः आह्वातव्यः"भा० । [२आह्वयमाने च ।

आह्व त्रि० आह्वयति आ+ह्वे-क्विप् संप्र० । १आह्वायके ।

आह्वत त्रि० आ+ह्वे-क्त । कृताह्वाने १आकारिते "आहूत इव मे शीघ्रम्" भाग०१०स्कन्धे । "नचाहूतोवदेत् किञ्चिद्वोनोदरुद्ध्यात्र सत्कृतः"या०स्मृतिः। "वियज्जमाखेनाहूतः पार्थेनाथ हिषन्नुरम्"भाघः।"आहूतो न निवर्त्तेत द्यूतादपि रणादपि"। आभूत+पृ०भस्य हः। २आभूतप्रलयपर्य्यन्ते "पटोलानि कदम्बानि डुलाकसहितानि च। न त्यजेत् कार्त्तिके यस्तु यावदाहूतनारकी" ति०त०पु० "आहूतम् आभूतप्रलयपर्य्यन्तम्" रघु० ३नामकृतव्यपदेशे विश्वे च । सृष्टिकाले हि भूतानां तत्तन्नामव्यपदेश इति विश्वव्यपदेश पर्य्यन्तमित्येव तस्यार्थोन्याय्यः । भावे क्त । ४आह्वाने ।

आह्वतप्रपलायिन् त्रि०आहूतः विवादनिर्णयाय राज्ञाहूतोऽपि प्रपलायते प्र+परा-अय-णिनि रस्य लः । व्यवहारे हीनवादिभेदे स च पञ्चविधः । "अन्यवादी क्रियाहेषी, नोपास्थाता निरुत्तरः। आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः"मिता०स्मृत्युक्तेः ।

आह्वतसंभव पु० आहूतस्य नाम्ना कृतव्यपदेशस्य विश्वस्य संभवोयत्र । प्रलयकाले तत्र हि कृतव्यपदेशस्य विश्वस्य व्यपदेशाभावेन व्यवहार्य्यत्वाभावः।"आहूतसंभवस्थानमस्मृतत्वं भाषते"इति पुराणे आभूतेत्यत्राहूतेति पाठान्तरम् ।

आह्वति स्त्री आ+ह्वे-क्तिन् । आह्वाने (डाका) ।

आह्वय अव्य०आ+ह्वे-ल्यप्। आह्वानं कृत्वेत्यर्थे "आहूय दानं कन्याया ब्राह्मोधर्म्मः प्रकीर्त्तितः"मनुः ।

आह्वत त्रि० आ+हृ-क्त । आनीते कृताहरणे ।

आह्वति स्त्री आहृ-क्तिन् । आहरणे आनयने ।

आह्वत्य अव्य० आ+हृ-ल्यप् । आहरणं कृत्वा आनीयेत्यर्थे "समाहृत्यान्यतन्त्राणि" अमरः ।

आहेय त्रि०अहेरिदम् ढक् । सर्पसम्बन्धिनि विषवर्म्मास्थ्यादौ

आहो अव्य०आ+हन-डो । १प्रश्ने, २विकल्पे, ३विचारे च । "वत्सायं पुरुषोक्षियत उदस्थात् प्राणाः क्रामन्त्याहो नेति" शत०ब्रा०१४,६,२,१२, "आहो विद्वानसं लोकं प्रेत्यकश्चित् समश्नुते" कठो० । "आहो निवत्स्यति समं हरिणाङ्कनाभिः" शाकुन्तले सखीं प्रति दुष्मन्तप्रश्नः ।

आहोपुरुषिका स्त्री अहमेव पुरुषः शूरः मत्वु० अहो पुरुषः तस्य भावः वुञ् स्त्रीत्वात् टाप् । दर्पजन्ये आत्मनि उत्कर्षसम्भावने (वाहादुरी) "आहोपुरुषिकां पश्य मम सङ्गत्यकान्तिभिः" भट्टिः ।

आहोस्वित् अव्य०आहो च स्वित् ह० । १विकल्पे, २प्रश्ने च "आहोस्वित् शाश्वतं स्थानं तेषां तत्र द्विजोत्तम !"भा० स०५अ० । द्विपदमित्येके ।

आह्नक न० अह्नां समूहः खण्डि० अञ् । दिनसमूहे"अहोरात्रे वा अभिर्वर्त्तमाने संवत्सरमाप्नुतः संवत्सर इदं सर्व्वमाङ्गार्यैतामरिष्टिं स्वस्तिमाशास्ते" शत०ब्रा०६,६, ४,२, अह्ना निर्वृत्तादि चतुरर्थ्याम् संज्ञादि० अञ् । दिननिर्वृत्तादौ त्रि० ।

आह्निक त्रि० अह्नि भवः अह्ना निर्वृत्तं साध्यं ठञ् स्त्रियां ङीप् । १दिनभवे २दिनसाध्ये च । "भरद्वाजस्तु कौन्तेय कृत्वा स्वाध्यायमाह्निकम्"भा०व०१३७अ० । "कृत्वाह्निकं सुरश्रेष्ठोजपते समरुद्गणः"भा०व०१४२ अ० । दिनकर्त्तव्यानि आह्निकतत्त्वे आह्निककृत्यप्रदीपादौ उक्तानि । दिवसकर्त्तव्यान्याचारशब्दे ६३१ पृष्ठे उक्तप्रायाणि दिनविभागेषु कर्त्तव्यभेदोदत्तेन संक्षेपात् दर्शितो यथा ।

"प्रातरुत्थाय कर्त्तव्यं यद्द्विजेन दिने दिने । तत्सर्वं संप्रवक्ष्यामि द्विजानामुपकारकम् । उदयास्तमयं यावन्न विप्रः खादिकोभवेत् । नित्यनैमित्तिकैर्मुक्तः कामैश्चान्यैरगर्हितैः । यः स्वकर्म परित्यज्य यदन्यत् कुरुते द्विजः । अज्ञानाद्यदि वा मोहात् स तेन पतितोभवेत् । दिवसस्याद्यभागे तु कृत्यं तस्योपदिश्यते । द्वितीये च तृतीये च चतुर्थे पञ्चमे तथा । षष्ठे च सप्तमे चैव अष्टमे च पृथक् पृथक् । विभागेष्वेषु यत्कर्म्म तत्प्रवक्ष्याम्यशेषतः । उषःकाले तु संप्राप्ते शौचं कृत्वा यथार्थवत् । ततःस्नानं प्रकुर्व्वीत दन्तधावनपूर्व्वकम् । अत्यन्तमलिनः कायोनरश्छिद्रसमन्वितः। स्रवत्येष दिवा रात्रौ प्रातःस्नानं विशोधनम् क्लिद्यन्ति हि प्रसुप्तस्य इन्द्रियाणि स्रवन्ति च । अङ्गानि समतां यान्ति उत्तमान्यधमैः सह । नानास्रोदसमाकीर्णः श्वयनादुत्थितः पुमान् । अस्नात्वा नाचरेत् कर्म जपहोमादि किञ्चन । प्रातरुत्थाय योविप्रः प्रातःस्नायी भवेत् सदा । समस्तजन्मजं पापं त्रिभिर्वर्षैर्व्यपोहति । उषस्युषसि यत्स्नानं सन्ध्यावासुदिते रवौ । प्राजापत्येन तत्तुल्यं महापातकनाशनम् । प्रातःस्नानं प्र-

शंसन्ति दृष्टादृष्टकरं हि तत् । सर्वमर्हति पूतात्मा प्रातः-स्नायी जपादिकम् । स्नानादनन्तरं तावदुपस्पर्शनमुच्यते । अनेन तु विधानेन आचान्तः शुचितामियात् । प्रक्षाल्य पादौ हस्तौ च त्रिः पिबेदम्बु वीक्षितम् । संहृत्याङ्गुष्ठमूलेन द्विःप्रमृज्यात्ततोमुखम् । संहृत्य तिसृभिः पूर्वमास्यमेवमुपस्पृशेत् । ततः पादौ समभ्युक्ष्य अङ्गानि समुपस्पृशेत् । अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम् । अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनःपुनः । कनिष्ठाङ्गुष्ठेन नाभिं हृदयञ्च तलेन वै । सर्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत् । सन्ध्यायाञ्च प्रभाते च मध्याह्ने च ततः पुनः । सन्ध्यां नोपासीत यस्तु ब्राह्मणोहि विशेषतः । स जीवन्नेव शूद्रः स्यान्मृतः श्वा चैव जायते । सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु । यदन्यत् कुरुते कर्म न तस्य फलमश्नुते । सन्ध्याकर्मावसाने तु स्वयंहोमोविधीयते । स्वयं होमे फलं यत्तु तदन्येन न जायते । ऋत्विक् पुत्रोगुरुर्भ्राता भागिनेयोऽथ विट्पतिः । एभिरेव हुतं यत्तु तद्धुतं स्वयमेव हि । देवकार्यं ततः कृत्वा गुरुमङ्गलवीक्षणम् । देवकार्याणि पूर्वाह्णे मनुष्याणाञ्च मध्यमे । पितॄणामपराह्णे च कार्याण्येतानि यत्नतः । पौर्वाह्णिकन्तु यत् कर्म यदि तत् सायमाचरेत् । न तस्य फलमाप्नोति बन्ध्यस्त्रीमैथुनं यथा । दिवसस्याद्यभागे तु सर्वमेतद्विधीयते । द्वितीये च तथा भागे वेदाभ्यासोविधीयते । वेदाभ्यासोहि विप्राणां परमं तप उच्यते । ब्रह्मयज्ञः स विज्ञेयः षड्ङ्गसहितस्तु सः । वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः । ततोदानञ्च शिष्येभ्योवेदाभ्यासोहि पञ्चधा । समित्पुष्पकुशादीनां स कालः समुदाहृतः । तृतीये चैव भागे तु पोष्यवर्गार्थसाधनम् । पिता माता गुरुर्भार्या प्रजा दीनाः समाश्रिताः । अभ्यागतोऽतिथिश्चान्यः पोष्यवर्ग उदाहृतः । ज्ञातिर्बन्धुजनः शीघ्रसम्बन्धः समाश्रितः । अन्येऽप्यधनयुक्ताश्च पोष्यवर्ग उदाहृतः । भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम् । नरकं पीड़ने चास्य तस्मादुद्यत्नेन तं भरेत् । सार्वभौमिकमन्नाद्यं कर्त्तव्यन्तु विशेषतः । ज्ञानविद्वाः प्रदातव्यमन्यथा नरकं व्रजेत् । स जीवति यएकोबहूनभिपोषजीव्यते । जीवन्मोऽमृतकाश्चान्ये य आत्मम्भरयो नराः । यद्भर्त्रे जीव्यते कैश्चित् कुटुम्बार्थे तथा परैः । आत्मार्थेऽन्योन यत्नोति स्वोदरेऽपि दुःखितः । दीनानाथविशिष्टेभ्योदातव्यं भूतिमिच्छता । अदत्तदाना जायन्ते परभाग्येपजीविनः । यद्दाति विशिष्टेभ्योयज्जुहोति दिने दिने । तत्तु वित्तमहं मन्ये शेषं कस्यापि रक्षति । चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत् । तिलपुष्पकुशादीनि स्नानद्रव्याण्यमे जले । नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते । तेषां मध्ये तु यन्नित्यं तत्पुनर्भिद्यते त्रिधा । मलापहरणं पश्चान्मन्त्रवत्तु जले स्नृतम् । सन्ध्यास्नानमुभाभ्याञ्च स्नानभेदाः प्रकीर्त्तिताः । मार्जनं जलमध्ये तु प्राणायामोयतस्ततः । उपस्थानं ततः पश्चात् सावित्र्याजपउच्यते । सविता देवता यस्या मुखमग्निस्त्रिधा स्थितः । विश्वामित्रऋषिश्छन्दोगायत्री सा विशिष्यते । पञ्चमे च तथा भागे संविभागोयथार्हतः । पितृदेवमनुष्याणां कीटानाञ्चोपदिश्यते । देवैश्चैव मनुष्यैश्च तिर्यग्भिश्चोपजीव्यते । गृहस्थः प्रलयं यस्मात्तस्माज्ज्येष्ठाश्रमी गृही । तयाणामाश्रमाणान्तु गृहस्थो योनिरुच्यते । तेनैव सीदमानेन सीदन्तीहेतरे त्रयः । मूलप्राणोभवेत् स्कन्धः स्कन्धाच्छाखाः सपल्लवाः । मूलेनैव विनष्टेन सर्वमेतद्विनश्यति । तस्मात् सर्वप्रयत्नेन रक्षितव्योगृहाश्रमी । राज्ञा, चान्यैस्त्रिभिः पूज्योमाननीयश्च सर्वदा । गृहस्थोऽपि क्रियायुक्तो न गृहेण गृहाश्रमी । न चैव पुत्रदारेण स्वकर्मपरिवर्जितः । अस्नात्वा चाप्यभुक्त्वा चाजप्त्वाऽदत्त्वा च मानवः । देवादीनामृणी भूत्वा नरकं प्रतिपद्यते । एकएव हि भुङ्क्तेऽन्नमपरोऽन्नेन भुज्यते । न भुज्यते सएवैकोयोभुङ्क्तेऽन्नं ससाक्षिणा । विभागशीलो योनित्यं क्षमायुक्तोदयापरः । देवातिथिभक्तश्च गृहस्थः स तु धार्मिकः । दया लज्जा क्षमा श्रद्धा प्रज्ञा योगः कृतज्ञता । एते यस्य गुणाः सन्ति स गृही मुख्यउच्यते । संविभागं ततः कृत्वा गृहस्थः शेषभुग्भवेत् । भुक्त्वा तु सुखमास्थाय तदन्नं परिणामयेत् । इतिहासपुराणाद्यैः पञ्चञ्च सप्तमं नयेत् । अष्टमे लोकयात्रा तु बहिःसन्ध्या ततः पुनः । होमोभोजनकञ्चैव यज्ञान्यद्गृहकृत्यकम् । कृत्वा चैवं ततः पश्चात् स्वाध्यायं किञ्चिदाहरेत् । प्रदोष पश्चिमौ यामौ वेदाभ्यासेन तौ नयेत् । यामद्वयं शयानोहि ब्रह्मभूयाय कल्पते । नैमित्तिकानि कास्यानि निपतन्ति यथा यथा । तथा तथैव कार्याणि न कालस्तु विधीयते । अग्निश्चेव प्रयुञ्जानोह्यग्निश्चेव तु लीयते । तस्मात् सर्वप्रयत्नेन कर्त्तव्यं सुखमिच्छता । सर्वत्र मध्यमौ यामौ हुतशेषं हविश्चयत् । भुञ्जानश्च शयानश्च ब्राह्मणोनावसीदति" अङ्गा पाशस् ठञ् । श्रुतात्मकशास्त्रभाष्यस्य पादांशव्याख्याभेदे न० । यथा कणादगौतमपाणिनिश्रुतभाष्यस्य

पादांशव्याख्यारूपाणि अक्षा पाशत्वात् आक्षिकानि "तमधीष्टोभृतो भूतोवेति" पा० ठञ्। दिवसे-सत्कृत्य-नियोजिते २अध्यापके ३भृते वेतनेन क्रीते दासादौ ४भूते सत्यत्वा व्याघ्रे ज्वरादौ च।

आक्षाद पु० आ+क्षद-घञ्।। आनन्दे। "नन्दस्यात्मज उत्पन्ने जाताह्लादो महामनाः" भाग०।

आक्षादन द० आ+क्षद-णिच्-ल्युट्। १आनन्दसम्पादने कर्त्तरि ल्यु। २आनन्दसम्पादके त्रि०। करणे ल्युट्। ३आनन्दसाधने त्रि०स्त्रियां ङीप्।

आक्षादित त्रि०आ+क्षद-णिच्-क्त। १कृतानन्दने। यस्या-नन्दो जनितस्तस्मिन्। आक्षादोजातोऽस्य तारo इतच्। २जाताक्षादे च।

आक्षादिन् त्रि० आ-क्षद-णिनि १आनन्दयुक्ते णिच्-णिनि। २आनन्दकारके। स्त्रियामुभयतो ङीप्।

आक्ष त्रि० आक्षयति आ+क्षे-ड। आक्षानकारके।

आक्षय पु० आक्षैर्यायते प्राप्यते या-घञर्थे क १तo। १नामनि आक्षायकैर्हि नामोच्चारणेनैव आक्षूयते इति आक्षायकत्वप्राप्तौ नाम्नः करणत्वात्तथात्वम्। आ+क्षे वा० करणे ञ इत्यन्ये "काव्यं रामायणाक्षयम्, रामा०। गजाक्षयं गताक्षयं नागाक्षयम् इत्यादि। २प्राणिभिर्मेषा-दिभिः सपणद्यूतभेदे च सचाष्टादशविवादान्तर्गतः। "तेषा-माद्यस्तृणादानम्" इत्युपक्रम्य "द्यूतमाक्षयएव च। पदा-न्यष्टादशैतानि व्यवहारस्थितौविदुः" मनूक्तेः। अस्य सम्-पूर्व्वकतापि "अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते प्राणिभिः क्रियमाणस्तु स विज्ञेयः समाक्षयः" मनुना तथा प्रयोगात् तत्स्वरूपञ्च मिता० नारo "अक्षवञ्चनशला-काद्यैर्दैवनं जिह्मकारितम्। पणक्रीड़ा वयोभिश्च पदं द्यूतसमाक्षयम्" व्याख्यातञ्च मिता० यथा "अक्षाः पाशकाः वञ्चनधर्म्मपट्टिका शलाका दन्तादिमय्यो दीर्घचतु-रस्राः आद्यग्रहणात् चतुरङ्गादिक्रीड़ासाधनकरितुरगा-दिकं सङ्गृह्यते। तैरप्राणिभिर्यद्दैवनं क्रीड़ा पणपूर्व्विका क्रियते तथा वयोभिः पक्षिभिः कुक्कुटपारावतादिभिः पशुभिश्चाजमेषादिभिश्च प्राणिभिर्वा पणपूर्विका क्रीड़ा क्रियते तदुभयं द्यूतसमाक्षयाख्यं विवादपदम्। द्यूतञ्च समाक्षयश्च द्यूतसमाक्षयम्। तत्प्रकारः तत्रैव दर्शितो यथा। "तत्र द्यूतसमाधिकारिणो वृत्तिमाह। "शलाके शतिकवृद्धेस्तु सभिकः पञ्चकं शतम्। सङ्घोद्यानूर्तकितवादितराद्यकं शतम्" या०। परस्परं सम्मतिपत्त्या कितवैः परिकल्पितः पणोग्लह इत्युच्यते। तत्र ग्लहे तदाश्रया शतिका शतप-रिमितादधिकपरिमाणा वा द्रष्टव्या यस्यासौ शतिकवृद्धिः द्यूतकितवात्पञ्चकंतच्चा शतमात्रवृत्त्यर्थं सभिको सङ्घो वात्। पञ्च पणाद्यावो यस्मिन् शते तच्छतं पञ्चकं "तद-स्मिन्वृद्ध्यायलाभेत्यादिना" (पा०)कन्। जितस्य ग्लहस्य विंशतितमभागं सङ्घोयादित्यर्थः। सभा कितवनिवासार्थो यस्यास्त्यसौ (ठन्) सभिकः कल्पिताद्यादिनिखिलक्रीड़ोप-करणसदुपचितद्रव्योपजीवी सभापतिरुच्यते। इतर आत्मनरपरिपूर्णशतिकवृद्धेःकितवाद्यकं शतञ्जितद्रव्यस्य दशमभागं सङ्घोयादिति यावत्। एवंकृतवृत्तिना सभिकेन किङ्कर्त्तव्यमित्यत आह। "स सम्यक्पालितोद्यद्राज्ञे भागं यथा कृतम्। जितसद्युग्राह्येवज्ञेत्रे दद्या-त्सत्यं वचःक्षमी" या०। एवं कृतवृत्तिर्द्यूताधिकारी स राज्ञा धूर्त्तकितवेभ्यो रक्षितस्तस्मै राज्ञे यथा कृतं सम्मतिपत्रमंशन्दद्यात्। तथा जितं यत् द्रव्यन्तदुद्ग्राह्-येद्वन्धकग्रहणेनासेधादिना च पराजितसकाशाद्बलेरेदु-द्धृत्य च तद्धनं जेत्रे जयिने सभिकोदद्यात्। तथा क्षमी भूत्वा सत्यञ्च वचोविश्वासार्थं द्यूतकारिणां वदेत्। तदुक्तद्वारेण। "सभिकः कारयेद्यूतन्देयन्दद्याच्च यत्कृत मिति"। यदा पुनः सभिकोदापयितुञ्च शक्नोति तदा राजा दापयेदित्याह।"प्राप्ते ग्लपतिना भागे प्रसिद्धे धूर्तमण्डले। जितं ससभिके स्थाने दापयेदन्यथा न तु" या०। प्रसिद्धे ऽप्रच्छन्ने राजाध्यक्षसमन्विते ससभिके सभिकसहिते कित-वसमाजे सभिकेन च राजभागे दत्ते राजा धूर्तकितव-मविप्रतिपन्नं जितम्धनन्दापयेत्। अन्यथा प्रच्छन्ने सभि-करहिते अदत्तराजभागे द्यूते जितम्धनङ्जेत्रे न दापयेत्। जयपराजयविप्रतिपत्तौ निर्णयोपायमाह। "द्वारो व्यव-हाराणां साक्षिणश्च तएव हि" या०। द्यूतव्यवहाराणां द्वारः सभ्यास्तएव कितवाएव राज्ञा नियोक्तव्याः न पुनःश्रुताध्ययनसम्पन्ना इत्यादिनियमोऽस्ति। साक्षिणश्च द्यूते द्यूतकाराएव कार्य्याः न वा तत्र स्त्रीबालवृद्धकितवेत्या-दिनिषेधोऽस्ति। क्वचित् द्यूतनिषेधमुदाहरणमाह। "राज्ञा सचिह्नश्चिरोषाः कूटाक्षोपधिदेविनः" या०। कूटै रक्षा-दिभिरुपधिना च मतिवञ्चनहेतुना मणिमन्त्रौषधादिना ये दीव्यन्ति तान् स्वपदादिनाङ्कयित्वा राजा स्वराष्ट्राच्चिर्वा-सयेत्। नारदेन निर्वासने विशेष उक्तः। "कूटाक्षदेविनः पापान् राजा राष्ट्राद्विवासयेत्। कण्ठेऽक्षमालामासज्य सर्व्वेषां विनयः स्मृत" इति। यानि च मनुवचनानि द्यू-

तन्निषेधपराणि "द्यूतं समाह्वयञ्चैव यः कुर्य्यात्कारयेत वा । तान् सर्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः" इत्यादीनि तान्यपि कूटाक्षदेवनविषयतया राजाध्यक्षसभिकरक्षितद्यूतविषयतया च योज्यानि । किञ्च "द्यूतमेकमुखं कार्य्यमस्करज्ञानकारणात्" या० । यत्पूर्वोक्तं द्यूतमेकं मुखं प्रधानं यस्य द्यूतस्य तत्तथोक्तं कार्य्यम् । राजाध्यक्षाधिष्ठितं राज्ञा कारयितव्यमित्यर्थः तस्करज्ञानकारणात् तस्करज्ञानरूपप्रयोजनप्रयोजकत्वात् । प्रायशः चौर्य्यार्जितधना एव कितवा भवन्त्यतश्चौरविज्ञानार्थमेकमुखं कार्य्यम् । द्यूतधर्म्मं समाह्वयेऽतिदिशन्नाह । "एष एव विधिर्दैवैः प्राणिद्यूते समाह्वये" या० । श्लोके यतिकरुद्धेरित्यादिना योद्यूते धर्म्म उक्तः सएव प्राणिद्यूते मल्लमेषमहिषादिनिर्वर्त्ते समाह्वयसंज्ञके ज्ञातव्यः" ।

आह्वयन न० आह्वयं करोत्यनेन आह्वय+णिच् करणे ल्युट् । नामादेशसाधने शब्दभेदे । कर्त्तरि ल्यु । आह्वानकारके त्रि० "रामस्याह्वयना द्विजाः" रामा० ।

आह्वयितव्य त्रि० आह्वयं करोति आह्वय+णिच्-कर्म्मणि तव्य । आह्वानीये आकारणीये । "नेयमाह्वयितव्या ते श्वयने वार्षपर्वणो" भा० आ० ८२ अ० ।

आह्वर त्रि० आ+ह्वृ-अच् । १कुटिले २उशीनरदेशोत्पन्ने च । तेन कन्याशब्दस्य षष्ठीसमासे ङीषन्तत्वम् । आह्वरकन्यम् । अलोत्तरपदस्थाद्यदाक्षत्वम् ।

आह्वा स्त्री आ+ह्वे-अङ् । १आह्वाने । करणेऽङ् । २संज्ञायाम् नामनि "लेपञ्च यस्यते सिक्थयताह्वगौरसर्षपैः" सुश्रु० ।

आह्वान न० आ+ह्वे-ल्युट् । आकारणे (डाका) "दूराह्वाने च गाने च रोदने च श्रुतोमतः" व्या० का० । करणे ल्युट् । २संज्ञायां नामनि नाम्नैवाऽऽकारणं हि क्रियते इति तस्तथात्वम् । करणे ल्युट् । ३आह्वानसाधने राजकीयपत्रे । (तत्रवचनमा) "यावदाह्वानदर्शनम्" भावे ल्युट् । व्यवहारे विवादनिर्णयार्थं ४राज्ञाऽऽकारणे (तत्रपत्रकरा) तत्र वक्ष्यमाणं प्रकारादि मिता० स्मृतिवाक्यात् दर्शितम् । यथा "विस्मृत्य कार्य्यं न्याय्यं चेदाह्वानार्थमतः परम् । स्मृत्वा वा निखिलेत्तस्मिन् पुरुषं वा समादिशेत् । अकल्यबालस्थविरविषमस्थक्षियाकुलान् । मत्तोन्मत्तप्रमत्तार्त्तभीष्टत्याह्वानयेन्नृपः । न हीनपक्षां युवतिं कुलजातां प्रसूतिकाम् । सर्ववर्णोत्तमां कन्यां तां ज्ञातिप्रभुकाः स्मृताः । तदधीनकुटुम्बिन्यः स्त्रैरिण्योगणिकाश्च याः । निष्कुला याश्च पतितास्तासामाह्वानमिष्यते । कालं देशञ्च विज्ञाय कार्य्याणाञ्च बलाबलम् । अकल्यादीनपि शनैर्यानैराह्वानयेन्नृपः । ज्ञात्वाभियोगं येऽपि सुप्ते प्रव्रजितादयः । तानप्याह्वानयेद्राजा गुरुकार्य्येष्वकोपयन्निति" अत्र सर्व्वत्र आह्वानं-करोति णिचि आह्वानयेदिति सिद्धम् । "ज्ञतोलुक् प्रकृतिवच्च कारक मिति वार्त्तिकं तु नेह प्रवर्त्तते दक्षलयहणात् ।

आह्वायक त्रि० आ+ह्वे-ण्वुल् युच् । आह्वानकारके आकारके ।

आह्वारक त्रि० आ+ह्वृ-ण्वुल् । कुटिले ।

रके । "आह्वायकोथः श्रुतस्मृतुष्टत्तिः" भट्टिः णिनि आह्वायीत्यत्र स्त्रियां ङीप् ।

आह्वृति स्त्री आ+ह्वृ-क्तिन् । १कौटिल्ये कर्त्तरि क्तिच् । २राजभेदे "स्त्री चैवाह्वृतिश्चैव नीलोनामदएव च" हरि० १४१अ० "स्त्री चैवाह्वृतिश्चैव तस्यतर्निश्चितौ रथे" हरिवं० १४२अ० "अरासन्धं समाश्रत्य तथैवाह्वृतिभीश्मकौ, हरि० १६०अ० ।

इति श्रीतारानाथतर्कवाचस्पतिसंकलिते वाचस्पत्ये आकारादिशब्दार्थनिर्णयः ।

इ

इ पु० अस्य विष्णोरयनम् अ+इञ् । १कामदेवे स हि रुक्मिण्यां विष्णोरंशात् कृष्णात् जातः तत्कथा यथा "रुक्मिण्यां वासुदेवाच्च लक्ष्म्यां कामोष्टतव्रतः । अम्बरान्तकरो जज्ञे प्रद्युम्नः कामदर्शनः" हरि० १६३अ० । एवं व्युत्पत्तिमत्त्वेन कामदेवस्यैव इशब्दार्थता नाभिधास्यतेति वहवः । कामदेवदैवत्याच्च अभिलाषे औपचारिक इत्यन्ये । नञर्थकस्य अ इशेदम् अ+इञ् । २भेदे, ३रोषोक्तौ, ४निराकरणे, ५अनुकम्पायाम्, ६गदे, ७विस्मये, ८निन्दायाम्, ९सम्बोधने च अव्य० चादि । निपातैकाच्कत्वात् अस्य प्रत्ययसंज्ञा तेन इ इन्द्र इत्यादौ न सन्धिः

इ गतौ भ्वादि० पर० सक० अनिट् । अयति ऐषीत् इयाय इयतुः इयुः इयविथ इयेथ । अयन् इतः इतिः अयनम् । आयः इत्वा । "उदयति य तदङ्गुतमालिभिः" नैष० "अयमुदयति सुधामयूखः पद्मिनीनाम्" उद्भटः । "उदयति वितनोर्ऊर्द्ध्वरश्मिरज्वौ" माघः । अयञ्च धातुः

कटो गतौ इत्यत्र इ रे इति प्रश्लेषात् लब्धः सि०कौ०

इक् स्मरणेऽधिपूर्वक एव कित् कित्करणमधीगर्थेत्यादौ विशेषार्थम् अदादि०पर०सक०अनिट्। अध्येति अध्यैषीत् अध्यगात् इत्यन्ये इण इवास्य तिङि रूपं न क्वति। अधीयत्। "ससीतयोराघवयोरधीयत्" भट्टिः। एतद्योगे कर्म्मणि संबन्धविवक्षायां षष्ठी। मातुरध्येति। प्रतिपदविहितत्वादनित्या षष्ठ्या न समासः मातुरध्ययनम्। "कियत्खिदिन्द्रो अध्येति कियन्मातुः कियत् पितुः" ऋ०४, १७,१२। "रामस्य दयमानोऽसावध्येति तव लक्षणः" भट्टिः सम्बन्धाविवक्षायां तु द्वितीया। "अग्निं स्वर्य्यमध्येषि मृत्यो!" कठो०। "अयमाग्नेयः संप्रतीममात्मानं वैश्वानरमध्येति" छा० उ०। "अधीहि भगवन्। ब्रह्मेति" छा०उ०। [बंशाङ्कुरे

इक्कट पु०एति भूमिसङ्घित्य गच्छति इ-कटच् वा गुणाभावः।

इक्कट पु०ईयते इ-किप् इत् लभ्यः कटो यस्मात् ष०तस्य कः। कटसाधने तृणविशेषे त्रिका० इक्कट इति शब्दरा०। तस्य सन्निकृष्टदेशादिः कुमुदा० चतुर्थ्यां अच्। इक्कटिक तत्सन्निकृष्टदेशादौ त्रि० स्त्रियां ङीष्। प्रैचा० चतुर्थ्याम् इनि। तदर्थे स्त्रियां ङीप्।

इक्कवाल पु०"चेत् कण्टके (१।४७।१०)पनक्करे (२,५,८,११) तु ग्रहाः समस्ताः स्वादिक्कवालइति राज्यसुखाप्तिहेतुः" नील० ता०उक्ते वर्षलग्नतः उक्तस्थानानामन्यतमस्थानेरव्यादिसप्तमग्रहाणां स्थितिहेतुके राजयोगभेदे।

इक्षु पु० इष्यतेऽसौ माधुर्य्यात् इष+क्सु। मधुररसयुते असिपत्रे खनामख्याते वृक्षे। तद्भेदगुणादिकमुक्तं भावप्र०। इक्षुर्दीर्घच्छदः प्रोक्तस्तथा भूमिरसोऽपि च। गुडमूलोऽसिपत्रश्च तथामधुरकः स्मृतः। इक्षवोरक्तपित्तघ्नाबल्याद्यास्याः कफप्रदाः। स्वादुपाकरसाः स्निग्धागुरवोमूत्रला हिमाः। अथेक्षुभेदाः "पौण्ड्रकोभीरुकश्चापि वंशकः शतपोरकः। कान्तारस्तापसेक्षुश्च काण्डेक्षुः सूचिपत्रकः। नैपालोदीर्घपत्रश्च नीलपोरोऽथ कोशकृत्। इक्षेताजातयस्तेषां कथयामि गुणानपि। तत्र पौण्ड्रकभीरुकयोर्गुणाः वातपित्तघ्नमनोमधुरोरसपाकयोः। सुशीतोदंशणोबल्यः पौण्ड्रकोभीरुकस्तथा अथ (कशिया) कोशकृतोगुणाः "कोशकारो गुरुःशीतोरक्तपित्तक्षयापहः। अथ (काजला) कान्तारेक्षुगुणाः कान्तारेक्षुर्गुरुर्हृद्यः श्लेष्मलोदंशणः सरः। (बडौखा) वंशकगुणाः "दीर्घपोरः सुकठिनः सक्षारो वंशकःस्मृतः। शतपोरकगुणाः "शतपर्वाभवेत्किञ्चित्कोशकारगुणान्वितः। विशेषात्किं-

चिद्गुरुश्च सक्षारःपवनापहः" सुश्रुते तु काण्डेक्षुरित्यत्र काण्डेक्षुरिति पाठः इतोऽवशिष्टानां गुणास्तत्रोक्ता यथा "कान्तारतापसावितृवंशकानुकरो गुणे। एवंगुणस्तु काण्डेक्षुःस तु वातप्रकोपणः। सूचीपत्रो नीलपोरो नैपालो दीर्घपत्रकः। वातलाःकफपित्तघ्नाः सकषाया विदाहिनः" भाव०प्र० "बालयुवद्वेक्षुगुणाः बालइक्षुः कफं कुर्यान्नदोषेऽकरश्च सः। युवा तु वातक्षुत्क्षयादुरीयत्तीक्ष्णश्च वातनुत्। रक्तपित्तहरोवृद्धः क्षतक्षुद्वह्निवीर्यकृत्। अथाङ्गभेदेन गुणभेदः मूले तु मधुरोऽत्यर्थं मध्येऽपि मधुरः स्मृतः। अग्रेऽल्पमिष्टं विज्ञेयं इक्षूणां लवणोरसः। अथ दन्तपीडितेक्षुरसस्य गुणाः दन्तनिष्पीडितस्येक्षोरसः पित्तास्रनाशनः। शर्करासमवीर्य्यःस्यादतिदाही कफप्रदः। अथ यन्त्रपीडितेक्षुरस गुणाः मूलाग्यजन्तुयन्त्रादिपीडनान्मलसङ्करात्। तस्मादाही विष्टम्भी गुरुः स्याद्यान्त्रिकोरसः। अथ पर्य्युषितेक्षुरसगुणाः रसःपर्य्युषितोनेष्टोवृष्योवातापहो गुरुर्विकफपित्तकरः श्वेतो भेदनवातिमूत्रलः। अथपक्वेक्षुरसस्य गुणाः इक्षोर्विकारास्तृड्दाहमूर्छापित्तास्रनाशनाः। गुरवोमधुरा बल्याः स्निग्धा वातहराःस्मृताः। श्यामोहरःस्यात इक्षवाविषहारिणः। अथ (झोला) क्वाथितस्य लक्षणं गुणाश्च इक्षोरसस्य यः पक्वः किञ्चिद्घाढो बद्धद्रवः। सएवेक्षुविकारेषु ख्यातःक्वाथितसंज्ञया। क्वाथितं गुर्वभिष्यन्दि दृंहणं कफशुक्रकृत्। वातपित्तश्रमान् हन्ति मूत्रवस्तिविशोधनम्। अथ मत्स्यण्डिकाः(सारगुड) (राव) इति ख्याताया लक्षणं गुणाश्च इक्षोरसोयः संपक्वोघनः किंचिद्द्रवान्वितः। मन्यवल्लम्बते यस्मात् मत्स्यण्डीति ततः स्मृता। मत्स्यण्डी भेदिनी बल्या लघ्वी पित्तानिलापहा। मधुरा दृंहणी हृद्या रक्तदोषापहा स्मृता। अथ (ढिमे गुड़) गुड़स्य लक्षणं गुणाश्च इक्षोरसोयः सम्यक्पोजायतेऽतोऽयंहृदः। स गुड़ोगौड़देशे तु मत्स्यण्ड्येव गुड़ोमतः। गुड़ोऽग्र्योगुरुः स्निग्धोवातघ्नो मूत्रशोधनः। नातिपित्तहरो भेदःकफकृन्मिश्रलप्रदः। अथ नवपुराणगुड़गुणाः गुड़ोनवः कफन्यासकासक्रमिहरोऽग्निकृत्। पित्तघ्नो मधुरः स्निग्धो वातघ्नोऽस्रक्प्रसादनः स पुराणोऽधिकगुणो बुधैः पथ्यतमः स्मृतः" द्रव्यभेदेन युक्तस्य गुड़स्य गुणाः श्लेष्माग्नमाशु विनिहन्ति सदार्द्रकेण पित्तं निहन्ति च तदेव हरीतकीभिः। गुरुष्ठ्रा समं हरति वातमशेषमित्थं दोषत्रयत्रयकराय नमो गुड़ाय" (खांड) खण्डस्य गुणाः

खण्डन्तु मधुरं हृद्यं चक्षुष्यं हृंहणं हिमम्। वातपित्तहरं स्निग्धं बल्यं वातहरं परम्। (चिनि) सितायाः लक्षणं गुणाश्च खण्डन्तु सिकतारूपं शुभ्रवेतं शर्करा सिता। सिता सुमधुरा रूक्षा वातपित्तास्रदाहहृत्। मूर्च्छाच्छर्दिज्वरान् हन्ति सुशीता शुक्रकारिणी। अथ "(मिश्रि) सितोपलगुणाः भवेत् पुष्पसिता शीता रक्तपित्तहरी मता। सितोपलनिभा लघ्वी वातपित्तहरा हिमा। शर्करा ऊर्ध्वतोसारलड्डादारक्तपित्तनुत्। यथा यथैव नैर्मल्यं मधुरत्वं तथा तथा। स्नेहगौरवमैत्यानि सरत्वं च तथा तथा" इति भावप्र० इक्षुवर्गः। एतत्प्रसङ्गात् सुश्रुते खण्डादिजातद्रव्याणामन्यद्रव्यजातशर्कराणाञ्च गुणा उक्ता यथा। "वो यो मद्यौषधिक्षीरखण्डशर्कराणां स्वको गुणः। तेन तेनैव निर्देशात्तेषां विस्रावणे गुणाः। सारस्थिता सुविमला निःक्षारा च यथा-यथा। तथा तथा गुणवती विज्ञेया शर्करा बुधैः। मधुशर्करा पुनर्ग्रन्थ्यतीसारहरी रूक्षा छेदनी प्रह्लादनी कषाया सुमधुरा मधुरविपाका च। यवासशर्करा मधुरकषाया तिक्तानुरसा छेदनहरी सरा चेति। यावत्यः शर्कराः प्रोक्ताः सर्वा दाहप्रशमनाः। रक्तपित्तप्रशमनाश्छर्दिमूर्च्छाश्रमापहाः। रूक्षं मधूकपुष्पोत्थं फाणितं वातपित्तकृत्। कफघ्नं मधुरं पाके कषायं बस्तिदूषणम्" "मन्दाक्रान्ता वितरति रसं नेक्षुयष्टिः कदाऽपि छन्दो०। श्रीफलक्षेक्षुदण्डस्य विप्राणां तु बलिर्मतः" कालिकापु० "कृष्णाखण्डमिक्षुदण्डांश्च" देवी पु० इक्षोर्विकारः अण्। ऐक्षव गुड़ादौ त्रि०। "ऐक्षवं गुड़वर्जितम्" स्मृतिः। इक्षूणां भवनं क्षेत्रं शाकटच् शाकनच् च वा तद्भवने क्षेत्रे। इक्षूणां छाया। इक्षुच्छायम् न० "इक्षुच्छायानिषादिन्य" रघुः अत्र छायानिषादिन्य इतिच्छेदः सि० कौ० इक्षूणां वनम्। अवनस्तित्वात् नित्यं षत्वम् इक्षुवणम्। २कोकिलाक्षे च राजनि०। ३इक्षुच्छायाम् [इक्षुभेदे स्वार्थे कन्। २इक्षुवृक्षे

इक्षुक पु० इक्षुप्रकारः स्वला० कन्। १इक्षुतुल्यस्वादे (नडा)

इक्षुकाण्ड पु० इक्षोः काण्डइव काण्डोऽस्य। १काशतृणे २सप्तपर्णवृक्षे (सज) इक्षुः काण्डइव ३इक्षुदण्डे च। "चिप्रं पुरो न जग्धे मरुरिक्षुकाण्डम्" माघः।

इक्षुकीय त्रि० इक्षवः सन्त्यस्मिन् छ नड्वा० कुक् च। इक्षुयुक्ते देशे तत्र भवः अण् विल्व० लुक्। ऐक्षुकक्षत्र भवे त्रि० स्त्रियां ङीप्।

इक्षुकुट्टक पु० इक्षून् कुट्टयति कुट्ट-णिल्युनि कन् ण्वुल्० ण्वुच्। इक्षुच्छेदके गुड़कारके जातीवर्णभेदे। [२काशतृणे स्त्री भावप्र०

इक्षुगन्ध पु० इक्षोरिव गन्धः एकदेशावयवो यस्य। १क्षुद्रगोक्षुरे

इक्षुगन्धा स्त्री इक्षोर्गन्धइव गन्धोऽस्याः। शुक्लविदार्याम्,

इक्षुज त्रि० इक्षोस्तद्रसाज्जायते जन-ड। इक्षुविकारे गुड़ादौ "फाणितञ्चैव मत्स्यण्डी गुड़ः खण्डकमेव च। सिता सितोपलाचैते षड्भेदा इक्षुजामताः। इक्षुगन्धे पुष्टे तद्गुणादिकसङ्गम्। [विशेषे २काशतृणे च।

इक्षुतुल्या स्त्री इक्षुणा तुल्या पत्रादिना। (जनार) १धान्य-

इक्षुदण्ड पु० इक्षुर्दण्ड इवदण्डकारे दीर्घत्वे इक्षुयष्टिरप्यत्र स्त्री

इक्षुदर्भा स्त्री इक्षोरिव दर्भोऽवयवोऽस्याः। तृणपत्रिकायाम् राजनि०। [इक्षुरसतुल्यजलवाहिनि नदीभेदे।

इक्षुदा स्त्री इक्षुमिक्षुरसास्वादं ददाति जलेन दा-क। इक्षुनेत्र न० इक्षुर्नीयते पुनरुत्पादनायारोप्यतेऽनेन नी-इत्र इक्षोर्नेत्रमिव वा। इक्षुनेत्राकारे तदुपन्यौ।

इक्षुपत्र पु० इक्षोः पत्रमिव पत्रमस्य। (जनार) धान्यभेदे।

इक्षुपाक पु० इक्षोः पाकः पक्वभावोरसादिः। गुड़ादौ

इक्षुप्र पु० इक्षुरिव पूर्यते पॄ-कर्मणि घञर्थे क छस्वपत्वे नोत्। शरतृणे रत्नमा०।

इक्षुबालिका स्त्री इक्षोर्बालः केशइव बालः शीर्षस्यपत्रादिरस्याः। इक्षुतुल्याग्रशीर्षे काशतृणे राजनि०।

इक्षुभक्षितौ स्त्री इक्षुर्भक्षितो यया जातिवाचकपूर्वपदनिष्ठान्तत्वात् ङीप् परनि०। इक्षुभक्षकवत्र्यां स्त्रियाम्

इक्षुमती स्त्री इक्षुः इक्षुरसोऽस्त्यस्याम् नद्यां मतुप् ङीप्। नदीभेदे "सीता चेक्षुमती वेत्रा देविका च महानदी" भा० आ० ८अ०। [६त०। इक्षुमूले २तदुपन्यौ न०।

इक्षुमूल पु० इक्षोर्मूलं यन्थिरिव मूलं यन्थिर्यस्य। १वंशतृणे।

इक्षुमेह पु० इक्षुरसतुल्योमेहः। सुश्रुतोक्ते प्रमेहभेदे तद्भेदा विंशतिर्निदानसहितास्तल्लोक्ता यथा "दिवास्वप्न्यायासाल्लस्यप्रसक्तं शीतस्निग्धमधुरमद्यद्रव्यान्नपानसेविनं पुरुषं जानीयात्प्रमेही भविष्यतीति। तस्य चैवं प्रदुष्टस्यापरिपक्वा एव वातपित्तश्लेष्माणो यदा मेदसा सहैकत्वमुपेत्य मूत्रवाहिस्रोतांस्यनुसृत्याधो गत्वा वस्तेर्मुखमाश्रित्य निर्भिद्यन्ते तदा प्रमेहान् जनयन्ति। तेषान्तु पूर्वरूपाणि हस्तपादतलदाहः स्निग्धपिच्छिलगुरुता गात्राणां मधुरगुक्लमूलता तन्द्रा सादः पिपासा दुर्गन्धश्च श्वासस्तालुगलजिह्वादन्तेषु मलोत्पत्तिर्जटिलीभावः केशानां दृढत्वं नखानाम्। तत्राविलप्रसूतमूत्रलक्षणाः सर्व एव सर्व

दोषसमत्वाः सह पिडकाभिः । तत्र कफाद्दकेक्षुसुरासिकतायवनैलवणपिष्टसान्द्रशुक्लफेनमेहाः दश साध्या दोषदूष्याणां समक्रियत्वात् । पित्ताच्नीलहरिद्राक्षक्षारमञ्जिष्ठागोक्षितमेहाः षट् याप्या दोषदूष्याणां विषमक्रियत्वात् । वातात्सर्पिर्वसाक्षौद्रहस्तिमेहाश्चत्वारोऽसाध्यतमा महात्ययिकत्वात् । तत्र वातपित्तमेदोभिरन्वितः श्लेष्मा श्लेष्मप्रमेहान् जनयति वातकफशोणितमेदोभिरन्वितं पित्तं पित्तप्रमेहान् । कफपित्तवसामज्जमेदोभिरन्वितो वायुर्वातप्रमेहान् । तत्र श्वेतमवेदनमुदकमेही मेहति इक्षुरसतुल्यमिक्षुमेही, सुरामेही सुरातुल्यं, सरजस्कं सिकतासुविलं सिकतामेही शनैः सकफं सूक्ष्मं शनैर्मेही, विशदं लवणतुल्यं लवणमेही, रूक्षरोमा पिष्टरसतुल्यं पिष्टमेही, आविलं सान्द्रं सान्द्रमेही, शुक्लतुल्यं शुक्लमेही स्तोकं स्तोकं सफेनं फेनमेही मेहति । अत ऊर्द्धं पित्तनिमित्तान्वक्ष्यामः । सफेनमच्छं नीलं नीलमेही मेहति सदाहं हरिद्राभं हरिद्रामेही, अक्षरसगन्धमक्षमेही, क्षुत क्षारप्रतिभं क्षारमेही, मञ्जिष्ठोदकप्रकाशं मञ्जिष्ठामेही । गोक्षितप्रकाशं गोक्षितमेही मेहति । अत ऊर्द्धं वातनिमित्तान्वक्ष्यामः । सर्पिः प्रकाशं सर्पिर्मेही मेहति वसाप्रकाशं वसामेही, क्षौद्ररसवर्णं क्षौद्रमेही,मत्तमातङ्गवदनुप्रदद्धं हस्तिमेही मेहति । मक्षिकोपसर्पणमालस्यं मांसोपचयः प्रतिश्यायः शैथिल्यारोचकाविपाकाः कफप्रसेकच्छर्दिनिद्राकासश्वासाश्चेति श्लेष्मजानामुपद्रवाः । क्षयश्वयोरवदरकं वस्तिभेदो मेदुतोदो हृदिन्दुलमन्थीकाज्वरातीसारारोचका वमथुः परिधूमायनं दाहो मूर्च्छा पिपासा निद्रानाशः पाण्डुरोगः पीतविण्मूत्रनेत्रत्वञ्चेति पैत्तिकानाम् । हृद्रुहो लौल्यमनिद्रा स्तम्भः कम्पः शूलं वङ्क्षणवृषणत्वञ्चेति वातजानाम् । एवमेते विंशतिः प्रमेहाः सोपद्रवा व्याख्याताः । तत्र वसामेदोभ्यामभिपन्नशरीरस्य त्रिभिर्दोषैश्चानुगतधातोः प्रमेहिणो दश पिडका जायन्ते । तद्यथा । शराविका सर्षपिका कच्छपिका जालिनी विनता पुत्रिणी मसूरिका अलजी विदारिका विद्रधिका चेति । शरावमात्रा तद्रूपा निम्नमध्या शराविका । गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी । सदाहा कूर्मसंस्थाना ज्ञेया कच्छपिका बुधैः । जालिनी तीव्रदाहा तु मांसजालसमावृता । महती पिडका नीला पिडका विनता स्मृता । महत्यल्पाविता ज्ञेया पिडका सा तु पुत्रिणी । मसूरसमसंस्थाना ज्ञेया सा तु मसूरिका । रक्ताविता स्फोटवती दारुणा त्वलजी भवेत् । विदारी कन्दवद्वृत्ता कठिना च विदारिका । विद्रधेर्लक्षणैर्युक्ता ज्ञेया विद्रधिका बुधैः । ये यन्मयाः स्मृता मेहास्तेषामेतासु तत्कृताः । गुदे हृदि शिरस्यंसे पृष्ठे मर्म्मसु चोत्थिताः । सोपद्रवा दुर्बलस्य पिडकाः परिवर्जयेत् । कृत्स्नं शरीरं निर्म्मीय मेदोमज्जवसायुतः । अधः प्रक्रमते वायुस्ते नासाध्यास्तु वातजाः । प्रमेहपूर्व्वरूपाणामालतिर्यत्र दृश्यते । किञ्चिच्छ्याधिकं मूत्रं तं प्रमेहिणमादिशेत् । कृत्स्नान्यङ्गानि वा यस्मिन् पूर्व्वरूपाणि मानवे । प्रदृत्तमूत्रमत्यर्थं तं प्रमेहिणमादिशेत् । पिडकापीड़ितं गाढमुपसृष्टमुपद्रवैः । मधुमेहिनमाचष्टे स चासाध्यः प्रकीर्त्तितः । स चापि गमनात् स्थानं, स्थानादासनमिच्छति । आसनाद्दुःखते शय्यां, शयनात् स्वप्नमिच्छति । यद्यद्धि वर्ष्मणां पञ्चानामुत्कर्षापकर्षकृतेन संयोगविशेषेण शबलबभ्रुकपिलकपोतमेचकादीनाम् वर्णानामनेकेषामुत्पत्तिर्भवति । एवमेव दोषधातुमलाहारविशेषोत्कर्षापकर्षकृतेन संयोगविशेषेण । भवति चात्र । सर्वएव प्रमेहास्तु कालेनाप्रतिकारिणः । मधुमेहत्वमायान्ति तदाऽसाध्या भवन्ति हि" तत्रैव चिकित्सास्थाने सर्वप्रमेहस्य प्रकारान्तरेण द्वैविध्यमुक्तम् । यथा "द्वौ प्रमेहौ सहजोऽपथ्यनिमित्तश्च भवतः तत्र सहजोमाढपिटकबीजदोषकृतः । अहिताहारजोऽपथ्यनिमित्तः। तयोः पूर्व्वोपद्रुतः क्षीणोरूक्षोऽल्पाशी पिपासुर्भृशं परिसरणशीलश्च भवति उत्तरेण स्थूलोबह्वाशी स्निग्धः श्लेष्मासनश्चप्रायेणेति" "तत्रोदकमेहिनं पारिजातकषायं पाययेत् इक्षुमेहिनं वैजयन्ती कषायम्" च सुश्रु०

इक्षुयन्त्र न० इक्षोर्निर्म्पीड़नं यन्त्रम् या० त०। इक्षुनिष्पीड़के यन्त्रे (महाशाल) "गोकुले कन्दुशालायां तैलयन्त्रेक्षुयन्त्रयोः। अमीमांसानि शौचानि" स्मृतिः ।

इक्षुयोनि पु० इक्षोरिव योनिर्यस्य । पुण्ड्रके इक्षौ राजनि०

इक्षुर पु० इष-बा०-कुरच् । १कौलिकाढ्ये (कुलेखारा) रत्ना० २गोक्षुरे (गोखुरी) ३इक्षौ च शब्दरत्ना० ४काशे राजनि० । संज्ञायां कन् । १कौलिकाढ्ये । २काशगुल्मे ३स्थूलगोक्षुरे च राजनि० ।

इक्षुरस पु० इक्षोः रस इव रसो यस्य । (नडा) इति ख्याते काशे १क्षुपभेदे । "काशः काशेक्षुरुद्दिष्टः स स्यादिक्षुरसाख्या । इक्षुवल्लिकेक्षुगन्धा च तथा पोटगलः स्मृतः । काशः स्वादुधुरस्निग्धः स्वादुपाको हिमः सरः । मूलरक्तास्रशुक्रीदाहक्षयपित्तासरोगहृत्" भाव० प्र० । ईत० ।

इक्षोः रसे पु० । तस्य गुणादिकमिक्षुशब्दे उक्तम् ।

इक्षुरसक्राथ पु० इक्षुरसस्य क्राथः पाकभेदः । क्षाणितादौ ।

इक्षुवल्ली(ल्लरी) स्त्री इक्षुरिव सुस्वादा वल्ली वल्लरी वा लता । क्षीरविदार्य्याम् । (क्षीरकन्द) । राजनि०

इक्षुवालिका स्त्री इक्षुरिव वलति वल–ण्वुल् । (तालमाखना) इतिख्याते क्षुद्रे २काये च ।

इक्षुवाटी स्त्री इक्षोर्वाटीव । पुण्ड्रे के इक्षौ राजनि० । ङीप० । २इक्षूत्पादकक्षेत्रे । स्वार्थे कन् । उभयत्र ।

इक्षुविकार पु० ६त० । इक्षुजशब्ददर्शिते षड्विधे गुड़ादौ

इक्षुवेष्टन पु० इक्षोरिव वेष्टनमस्य । भद्रमुञ्जे । "भद्रमुञ्जः शरो-वाततेजनस्त्विक्षुवेष्टनः । मुञ्जद्वयं तु मधुरं तुवरं शिशिरं तथा । कफपित्तदाहतृष्णार्त्तिमूत्रकृच्छ्रविरोगहृत् । दोषत्रयहरसृष्णं मेखलासूपयुज्यते" भावप्र० ।

इक्षुशर पु० इक्षुरिव शृणाति शृ–अच् । ४काशभेदे तद्वने हि गन्तुर्गात्रक्षतेर्दृष्टत्वात् तस्येक्षुवत् हिंसकत्वम् ।

इक्षुशाकट न० इक्षूणां भवनं क्षेत्रम् इक्षु+शाकटच् । (दोकल) इति ख्याते इक्षुभवनयोग्ये क्षेत्रे । तदर्थे शाकिनच् । इक्षुशाकिनशब्दोऽप्यत्रार्थे न० ।

इक्षुसमुद्र पु० इक्षुरसस्वादूदकः समुद्रः । सप्तसमुद्रभेदे । "लवणेक्षुसुरा-सर्पिर्दधिदुग्धजलान्वकाः" पुरा० तत्स्वरूपम् सि० शि० उक्तम् । "भूमेरर्द्धं क्षाररसिन्धोरुदक्स्थं जम्बुद्वीपं प्राहुराचार्य्यवर्य्याः । अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य वास्ये, क्षारक्षीराद्यम्बुधीनां निवेशः" "दक्षोक्तस्येक्षुरसस्य तस्मान्मद्यस्य च खाद्यजस्य चान्ने" ।

इक्षुसार पु० ६त० । क्षाणितादौ ।

इक्ष्वाकु पु० इक्षुमिक्ष्वाकरोति इक्षु+आ+कृ–डु । १कटुतुम्बीवृक्षे २सूर्य्यवंश्ये आदिराजे च । "यस्मेक्ष्वाकुरुपव्रते" ऋ०१०,६३,४ । स च वैवस्वतमनोः पुत्रः । "मनोर्वैवस्वतस्यासन् पुत्रा वै नव सत्तमाः । इक्ष्वाकुश्चैव नाभागोऽरिष्टः शर्य्यातिरेव च । नरिष्यःप्रांशुधृष्णू च नाभागारिष्टसम्मताः करूषश्च पृषध्रश्च नवैते भरतर्षभ" ! । "इक्ष्वाकुर्ज्येष्ठदायादोमध्यदेशमवाप्नवान्" हरिवं०१०अ० "तस्योत्पत्तिप्रकारस्तत्रैवोक्तः यु यतस्तु मनोः पुत्रइक्ष्वाकुरभवत्ततः" । "तस्य पुत्रशतं जज्ञे तस्मादिक्ष्वाकोर्भूरिदक्षिणम् । तेषां ज्येष्ठो विकुक्षिस्तु विकुक्षित्वादवोधिनाम्" "इक्ष्वाकुस्तु विकुक्षिं वै अष्टकायामजीजनत्" हरि० । इक्ष्वाकोरपत्यम् । अण् दक्षि०नि० । ऐक्ष्वाकस्तदपत्ये बहुषु तस्य लुक् इक्ष्वाकवः-"इक्ष्वाकूणां इरामेऽर्चे" "गक्षितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम्" "इक्ष्वाकुभिः पुरुषतरीकृतानि" इति च रघुः ।

इक्ष्वारि पु० इक्षुरिव समन्ताद्दक्षति आ+क्ष–इन् । कायफले । [इक्षुरिवालति अल–ण्वुण् वा । कायफले भावप्र०

इक्ष्वालिका स्त्री इक्ष्वाकालिरिव कायति प्रकाशते कै क–

इख गतौ भ्वादि० पर० सक० सेट् । इखति ऐखीत् । इखेख ऐखतुः । एखिता एखेष्यति ऐखिष्यत् ।

इङ्ख गतौ इदित् भ्वादि० पर०सक० सेट् । इङ्खति ऐङ्खीत् । इङ्खाम्–बभूव–आस–चकार । इङ्खिष्यति । इङ्खिता ऐङ्खिष्यत् । प्रेङ्खन् प्रेङ्खितम् प्रेङ्खणम् ।

इङ्ग गतौ इदित् भ्वादि०पर०सक० सेट् । इङ्गति ऐङ्गीत् । इङ्गिषत् । इङ्गितम् । "त्वया हृषीकमिदं विभो यद्यदङ्ग यद्वा नेङ्गति" भा०व०४२अ० । तस्यात्मनेपदित्वमपि "योऽवतिष्ठति नेङ्गते" यथा दीपोनिपातस्थो नेङ्गते सोपमा स्मृता" गीता । अत्र स्पन्दनमात्रपरतायामकर्म्मकत्वम् । णिच्–इङ्गयति चालयतीति प्रेरयतीति वार्थः । उङ्ग–प्रेरणे "शुनमङ्गासदिङ्गय" ऋ० ४,-५७ ५७,। सम्+सम्यक् चालने । "पुष्करिणीं समिङ्गयति सर्व्वतः" ऋ० ४,७,७,

इङ् अध्ययने अधिपूर्व्व एव ङित् अदा०आत्म०सक०अनिट् । अधीते अधीयीत अध्यैष्ट–अध्यगीष्ट । "अधिजगे, अध्यैष्यत–अध्यगीष्यत "योऽधीते शक्तितोऽन्वहम्" स्मृतिः । "नाधीयीत कदाचन" मनुः । "अध्यैष्ट वेदांस्त्रिदशानवष्टे" भट्टिः शानच् अधीयानः । अकर्त्तरि कर्त्तरि शत्रु अधीयत् "अधीयन्नात्मविद्विद्यां धारयन् मस्करिव्रतम्" भट्टिः अध्येतव्यम् "श्रोतव्यमिह सृष्टेश्च नाध्येतव्यं कदाचन" । "स्वाध्यायोऽध्येतव्यः" श्रुतिः । अध्ययनीयम् । अध्येयः "वेदएव सदाऽध्येयः" स्मृतिः । अध्येता । अधीतः "अधीतवेदवेदाङ्गत्वेन" वेदन्त सा० । भावार्थत्वात् कर्त्तरि क्त अधीतः "अधीते शतसाहस्रम्" स्मृतिः "अधीतिः "अधीतिबोधाचरणप्रचारणैः" नैष० । अध्येष्यमाणः । "नीत्वापोऽध्येष्यमाणस्तु आचमेत् प्रयतोऽपि सन्" मनुः भावे अधीतम् । अधीतमनेन इनि अधीती । "स्वसुश्चरासङ्कृतीमधीतिनोम्" कुमा० अधीत्य "अनधीत्य द्विजोवेदान् योऽन्यत्र कुरुते श्रमम्" स्मृतिः । "अधीत्य चतुरोवेदान्" पुरा० । अध्ययनम् । "अध्ययनेनाविप्रकृष्टः" पा० । "सत्ताशब्दैरध्ययनं विनापि" मघु० अध्यायः "स्वाध्यायोऽध्येतव्यः" श्रुतिः णिच् अध्यापयति "अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत" श्रुतिः अध्यापित अध्यजिगपत्

"अध्यापयामास पितॄन्" मनुः णिच्-सन्। अध्यापिपयिषति-ते अधिजिगापयिषति-ते केवलात् सन्। अधिजिगांसते। अध्यापकः अध्यापकशब्दे उदा० अध्यापितः "अध्यापितस्त्रीशनसापि नीतिम्" कुमा०। "भृतकाध्यापको यत्र भृतकाध्यापितस्तथा" मनुः।

इङ्ग पु० इगि भावे घञ्। १चलने कम्पने २इङ्गिते च। कर्त्तरि अच्। ३जङ्गमे "त्वया स्रष्टमिदं सर्व्वं यच्चेङ्गं यच्च नेङ्गति" भा० व० ४२ अ०। ४अङ्गुते च त्रि० मेदि०।

इङ्गन न० इगि भावे ल्युट्। १इङ्गिते २चलने ३स्थाने च। णिच्-ल्युट्। ४चालने। "उपांशुसवनस्यानिङ्गनमुतेः" कात्या० १०'१,६, यतउपांशुसवनस्यानिङ्गनमचालनम् श्रूयते "अनिङ्गमानानि शुरे आहवनीयसवनात्" श्रुतिः। कर्म०। युच् इङ्गना यत्र स्त्री।

इङ्गि(ङ)ल पु० इगि-इलच् वा लस्य डः। इङ्गुदवृक्षे। "वीरणद्वलमित्यभिङ्गिडमपुटेन जुहोति" श्रुतिः।

इङ्गित न० इगि-भावे क्त। १चलने २हृद्गतभावावेदके चेष्टाविशेषे "इङ्गितं हृद्गतो भावः इति" सज्जनोक्ते ३हृदयस्थे भावे। "अगूढसद्भावमितीङ्गितज्ञया" कुमा० "बाह्यैर्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम्। खररश्मेरिङ्गिताकारैर्वक्त्रभ्रुवां चेष्टितेन च" मनुना तस्य अन्तर्गतभावावेदकत्वस्मरणम्। "तत्र खरो गद्गदादिः, मुखरागोऽस्वाभाविकः इङ्गितं स्वेदवेपथुरोमाञ्चादि" व्यव० त० रघुः। "स विद्यादस्य कृत्यानि निगूढेङ्गितचेष्टितैः" आकारमिङ्गितं चेष्टां भृत्येषु च चिकीर्षितम्" "इङ्गिताकारचेष्टाज्ञं शुचिं दक्षं कुलोद्भवम्" मनुः। "तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च" रघुः। कर्त्तरि क्त ४चेष्टिते त्रि०।

इङ्गु पु० इङ्गति चलत्यनेनेगि-उण्। रोगे।

इङ्गुद पु० इङ्गुः रोगस्तम् द्यति दो-क। १तापसतरौ "इङ्गुदः कृष्णभूतादियकृन्नखविषक्रमीन्। हन्त्यूष्णः स्विन्नशूलघ्नस्तिक्तकः कटुपाकवान्" भाव० प्र०। गौरा० ङीष् इङ्गुदीत्यपि स्त्री। "तादृङ्गुदीस्नेहकृतप्रदीपम्" रघुः तस्याः फलम् अण् प्रज्ञादि० न लुक्। ऐङ्गुदं तत्फले न०। अस्याः पर्य्यायद्वारा लक्षणं दर्श्यते। हिङ्गुपत्रता विषहारिता वातनाशकता तैलफलत्वम् तीक्ष्णकण्टकता पूतिगन्धिता क्रोष्टुफलत्वम्। २ज्योतिष्मतीवृक्षे पु० रत्नमा०।

इङ्गेज पु० इङ्गते भोगार्थम् इगि-रन् इङ्गः लक्ष्यदेशस्तत्र जायते जन-ड अलुक् समा०। लक्ष्यस्थजने। "पूर्व्वाम्नाये लवणं षड्गीतिः प्रकीर्त्तिताः। फिरङ्गभाषया सन्ताः

स्तेषां संसाधनात् कलौ। अधिपामण्डलानाञ्च संग्रामेषुपराजिताः। इङ्गेजाः नवषट्पञ्च लक्ष्यजायापि भाविनः" मेरुत० २२प्रकाशे।

इच्छक पु० इच्छा+अस्त्यर्थे अच् इच्छं कमिव रसोऽस्य कप्। (टावाखेवु) इति ख्याते १वृक्षे। अस्त्यर्थे अच् स्वार्थे कन्। २इच्छायुक्ते त्रि०।

इच्छा स्त्री इष-भावे अ। इदं मे भूयादिति वेदान्तादिमते मनोधर्म्मभेदे सुखतत्साधनविषयचिन्तनौ न्यायमते, सुखादिज्ञानेन तत्साधनत्वज्ञानेन च जायमाने इदं मे भूयादित्येवंरूपे आत्मधर्म्मे २अभिलाषे च। "आत्मजन्या भवेदिच्छा इच्छाजन्या भवेत् कृतिः। कृतिजन्या भवेच्चेष्टा चेष्टाजन्या भवेत् क्रिया" न्यायसिद्धान्तः। "कामः संकल्पोविचित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्व्वं मन एवेति" श्रुतेः मनोधर्म्मत्वमिति सांख्यवेदान्तिनः। "विगतेच्छाभयक्रोधाः" गीता "जन्मनि क्लेशबहुलं किं न दुःखमतः परम् इच्छासंपद्यतो नास्ति यत्नेच्छा न निवर्त्तते" हितो०। "नीतो रात्रिः क्षणइव मया सार्द्धमिच्छारतैर्या" मेघ०। "मह्यं मह्येच्छः परिक्रीय्य स्नुषे" "विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया" रघुः। "योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया" "देवदत्तां पतिर्भार्य्यां विन्दते नेच्छयात्मनः" "जलं शस्त्रहतां वासाद्विदुषामिच्छयात्मनः" इति च मनुः। "स्वेच्छया विभजेत् सुतान्" दायभा० स्मृतिः। सा च द्विविधाफलोपायरूपविषयभेदात् यथाह भाषा० "सुखन्तु जगतामेव काम्यं धर्म्मेण जन्यते। अधर्म्मजन्यं दुःखं स्यात् प्रतिकूलं सचेतसाम्। निर्दुःखत्वे सुखे वेच्छा तज्ज्ञानादेव जायते। इच्छातु तदुपाये स्यादिष्टोपायत्वधीर्यदि। चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा च या भवेत्। तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत्। बलवद्दृष्टहेतुत्वमतिः स्यात् प्रतिबन्धिका। तदहेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते"। व्याख्यातं च तर्क०। 'इच्छा हि फलविषयिणी उपायविषयिणी च। फलन्तु सुखं दुःखाभावश्च। तत्र फलेच्छां प्रति फलज्ञानं कारणम्। अतएव स्वतः पुरुषार्थः सम्भवति। यज्ज्ञातं सत् स्वदर्त्तितयेष्यते स स्वतः पुरुषार्थ इति तल्लक्षणात्। इतरेच्छानधीनेच्छाविषयत्वं फलितोऽर्थः। उपायेच्छां प्रतीष्टसाधनताज्ञानं कारणम्। कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयिणीच्छा चिकीर्षा पाकं कृत्वा साधयामीति तदनुभवात्।

चिकीर्षां प्रति कृतिसाध्यताज्ञानमिष्टसाधनताज्ञानञ्च कारणम्। अतएव इच्छां कृतिसाध्यताज्ञानाभावान्न चिकीर्षा। बलवदिति बलवदनिष्टसाधनताज्ञानं तत्र प्रतिबन्धकम्। अतो मधुविषसंपृक्तान्नभोजने न चिकीर्षा। बलवद्द्वेषः प्रतिबन्धक इत्यन्ये। कस्यचिन्मत इति। बलवदनिष्टजनकत्वज्ञानं कारणमित्यर्थः। कृतिसाध्यताज्ञानादिमतो बलवदनिष्टसाधनताज्ञानशून्यस्य बलवदनिष्टजनकत्वज्ञानं विनापि चिकीर्षादां विलम्बाभावात् कस्यचिन्मत इत्यक्षरसो दर्शितः"।

विटतमेतत् दिनक०यथा"तत्र तयोर्मध्ये। अतएव फलज्ञानस्य फलेच्छां प्रति हेतुत्वादेव पुरुषार्थः संभवतीति सुखं दुःखाभावश्च पुरुषार्थः संभवतीत्यर्थः। ननु यज्ज्ञातं सदित्यादेः स्वविषयज्ञानजन्येच्छाविषयत्वमर्थस्तथा चोपायेऽतिव्याप्तिः तस्यापि स्वविषयकेष्टसाधनताज्ञानजन्येच्छाविषयत्वात् अत आह। इतरेच्छेति"।

अत्र ईश्वरेच्छामादायातिव्याप्तिवारणार्थं द्वितीयेच्छायां जन्यत्वं विशेषणीयम्। असम्भववारणाय आद्येच्छायामपि जन्यत्वं विशेषणीयम्। भवति च सुखेच्छायाः इतरविषयकेच्छानधीनत्वम् उपायेच्छायाश्च फलेच्छाधीनत्वञ्च। इष्टसाधनस्य फलेच्छाधीनेच्छाविषयित्वात् न तत्र लक्षणप्रसरः। पुरुषान्तरीयेच्छामादायातिव्याप्तिवारणाय समवायद्वयघटित सामानाधिकरण्यं निवेशनीयम् वस्तुतः स्वसमवायिसमवेतत्वप्रयोज्यत्वोभयसम्बन्धेन स्वत्वावच्छिन्नाया जन्येच्छायाविषयत्वं तत्त्वम् स्वपदमिच्छापरम् इत्यन्यत्र विस्तरः। तत्रेदं बोध्यं फलेच्छायां कारणं यत् सुखज्ञानसक्तं तत् स्मरणानुमित्यादिसाधारणम्। प्रत्यक्षत्वे प्रत्यक्षं प्रतिविषयस्य हेतुतया विषयज्ञानजन्यसुखादेर्वर्त्तमानत्वे एव तत्सम्भवेन वर्त्तमानस्य सुखस्य सिद्धत्वात् सिद्धे च इच्छाविरहात् न तद्विषयकेच्छासम्भव इति सूचितं चैतत् कणादसूत्रोपस्करयोः" यथा। "सुखाद्रागः" का० सू०। "सुहृच्चन्दनवनितासेवनजन्मनः सुखादुत्तरोत्तरं तज्जातीये सुखे तत्साधने वा राग इच्छा जायते" उप०"तन्मयत्वाच्च"सू०विषयासङ्गजनितो दृढतरः संस्कारविशेषस्तन्मयत्वम् तद्वशात् कामातुरस्य कामिनीमनुभवमानस्य सर्व्वत्र कामिनीदर्शनम्' उप०। "तन्मयत्वे तत्प्रकाशो बाह्याभ्यन्तरतत्त्वदा" इत्यन्यत्राप्युक्तम्। अत्र संस्कारादेव इच्छा जायते इत्युक्तेः संस्कारसाध्यस्मृतिद्वारैव संस्कारस्य हेतुत्वमवसीयते। क्वचिद्दृष्टवशात् क्वचित् जातिभेदवशाच्च इच्छासम्भवः तदप्युक्तम् तत्रैव "अदृष्टाच्च" "जातिविशेषाच्च" सू०। 'यद्यप्यदृष्टं साधारणं कारणं तथापि क्वचिदसाधारणकारणतामनुभवति यथैवे तज्जन्मानन्तभूतकामिनीसेवनसुखस्यापि यौवनोद्भेदे कामिनोरागः" उप०। न च तत्रापि अद्यप्रसूतबालकस्य स्तन्यपानरागवद्व जन्मान्तरीयतत्संस्कारजज्ञानस्यैव हेतुत्वमस्तु किमदृष्टस्य साधारणकारणस्यासाधारणकारणताकल्पनेनेति चेत् तत्कल्पनेऽपि तत्र जीवनादृष्टस्यैव क्वचिदपि अदृष्टविशेषस्यैवोद्बोधकस्थानीयतया अवश्यकल्पनीयत्वे तस्यैव हेतुत्वौचित्यात्। पदार्थभेदे जातिभेदकृत एव रागः। यथा मनुष्यजातीयानामन्नादौ रागः मृगजातीयानां तृणादौ, करभजातीयानां कण्टकादौ, शूकरादेर्विष्ठादौ रागोत्पत्तिः। तथा च विषयविशेषरागं प्रति जातिविशेष एव कारणतया कल्पनीयः। तत्रापि जातिविशेषोत्पादकतयादृष्टस्यकारणत्वेऽपि जातिविशेषस्य कारणत्वमस्त्येव तमनुत्पाद्यादृष्टस्याकारणत्वादिति बोध्यम् सुखं मे भूयादिति दुःखं मे मा भूयादित्येवं रूपः सुखदुःखाभिलाषः।

उपायेच्छां प्रति तु इष्टसाधनताज्ञानं हेतुः। भवति च पाके भोजनसाधनतया, भोजने च क्षुन्निवृत्तिसाधनतया ज्ञानात् इच्छा। तदुक्तं खिलाकण्ठे पाको जायताम् इत्येवं रूपम्। सेयमिच्छा ज्ञानजन्यादिवत् सविषया तद्विषयत्व द्विविधः बाधिताबाधितभेदात्। यत्र इष्टसाधने वस्तुनि इष्टसाधनत्वज्ञानादिच्छासा सद्विषयिणी यत्र तु अनिष्टसाधने वस्तुनि इष्टसाधनत्व भ्रमजा असद्विषयिणी। सा च प्राणिमात्रसाधारणी ईश्वरेच्छा तु सदा सद्विषयिणी तस्या बाधितपदार्थविषयकत्वाभावादेव तथात्वम् तेन तस्या नित्यत्वेन इष्टसाधनत्वज्ञानाधीनत्वाभावेऽपि न क्षतिः। योगिनां तु प्राकाम्यकामावसायितारूपैश्वर्य्ययोगात् कामानुसारिणएव विषयाभवन्तीति नासद्विषयिणीति भेदः यथोक्तं सां० कौ०। "प्राकाम्यमिच्छानभिघातः यतो भूम्यावुन्मज्जति निमज्जति यथोदके। कामावसायित्वं सा सत्यसङ्कल्पता। यथाऽस्य सङ्कल्पो भवति भूतेषु, तथैव भूतानि भवन्ति। अन्येषां नियया नियेतव्यमनुविधीयन्ते योगिनान्तु नियेतव्याः पदार्थाः नियमम्"। नियेतव्यनियमशब्दौ काम्यकामावुपलक्षयतः तथा च यथाकामं तेषां विषया भवन्तीति न असद्विषयकत्वं तेषां कामानामिति विवेच्यम्। इयमिच्छा

प्रवृत्तौ हेतुः इच्छाया बाधितविषयकत्वे प्रवृत्तिर्विसंवादिनी तदुत्तरं फलाभावेन तस्याः विसंवादित्वात्। सद्विषयकत्वे संवादिन्येवेति भेदः तथा च प्राणिमात्राणां प्रवृत्तौ इच्छा हेतुर्नेश्वरस्य प्रवृत्तौ तस्या नित्यत्वात्। गवादीनामपि हरितदर्शनादिना जायमानायाः प्रवृत्तेरुपलम्भात् तत्कारणमिच्छात्वेत्यनुभीयते इत्यांस्तु भेदः तेषां वस्तुनः सदसद्विवेकशून्यतयाऽसद्विषयेऽपीच्छा जायते। सैवमिच्छा सुबन्तोत्तरविहित काम्यच्कयजादिना, धातूत्तरविहितसनादिना च वाच्या। तत्र पुत्रकाम्या, अशनाया, उदन्या इत्यादौ काम्यजादिवाच्या, पिपासा बुभुक्षा जिज्ञासा इत्यादौ सनुवाच्या। सर्वत्र च इष्टसाधनज्ञानादेव तत्तदिच्छाविषयेषु इच्छा जायते सनुप्रत्ययवाच्यायां चिकीर्षायां तु नैवं किन्तु तत्र मतभेदे कारणान्तरमप्यस्ति तथा हि कृतिसाध्यत्वप्रकारकेच्छा चिकीर्षा पाकः कृत्वा साध्यताशिखारिका। तत्र च कृतिसाध्यत्वज्ञानं कारणमिति गुरवः तेन दृष्टिजलादौ कृतिसाध्यत्वाभावेन न तत्र चिकीर्षा। कृतिसाध्येष्टसाधनत्वज्ञानं बलवदनिष्टानुबन्धित्वज्ञानञ्च हेतुरिति नैयायिकाः। तेन दृषाजलताडनादौ कृतिसाध्यत्वपक्षेऽपि न चिकीर्षा तत्र इष्टसाधनत्वपक्षाभावात्। विषमिश्रिताद्यादेरिष्टसाधनत्वपक्षेऽपि बलवदनिष्टसाधनत्वपक्षाच्च चिकीर्षा। तदेतत् सङ्क्षे० उक्तं तच्च प्राक् दर्शितं तत्त्वदिनकरीयेषो यथा।

"ननु कृतिसाध्यताज्ञानस्य स्वातन्त्र्येण चिकिर्षां प्रति हेतुत्वे मानाभावः। तद्धर्मावच्छिन्नविशेष्यकेष्टसाधनताज्ञानस्य तद्धर्मप्रकारकेच्छां प्रति हेतुतायाः क्लृप्तत्वात् कृतिसाध्यपाकत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानादेव चिकीर्षोदयसम्भवादिति चेन्न यत्र कृतिसाध्यपाकत्वेनेष्टसाधनत्वं न स्फुटीतमपि तु शुद्धपाकत्वेन कृतिसाध्यत्वं शुद्धपाकत्वेनेष्टसाधनत्वं च स्फुटीतं तत्रापि पाकगोचरप्रवृत्तेरानुभाविकतया तदनुरोधेन चिकीर्षाया अवश्यकत्वेन तन्निर्वाहाय कृतिसाध्यताज्ञानस्य स्वातन्त्र्येण हेतुतायाः आवश्यकत्वात्। अथ कृत्वसाध्यताज्ञानस्य प्रतिबन्धकत्वादेव दृष्ट्यादौ चिकीर्षानुत्पादात् कृतिसाध्यताज्ञानस्य चिकीर्षां प्रति हेतुत्वे मानाभावइति चेन्न कृतिसाध्यत्वाभावतद्व्याप्यतदवच्छेदकधर्मज्ञानानां प्रतिबन्धकत्वकल्पनापेक्षया कृतिसाध्यताज्ञानस्य हेतुत्वे लाघवात्। इष्टसाधनताज्ञानमिति। अन्यथा निष्फलत्वज्ञानेऽपि चैत्यवन्दनादौ चिकीर्षापत्तिरिति भावः। अत्रेदमवधेयम्। पाकविशेष्यकेष्टसाधनताज्ञानस्य कार्यतावच्छेदकं न कृतिसाध्यपाकगोचरचिकीर्षात्वम् कृतिसाध्यत्वप्रकारकत्वनिवेशे प्रयोजनविरहात् पाकोजायतामितीच्छाया असंभवापत्तेश्च किन्तु पाकत्वावच्छिन्नसुखविशेष्यकेच्छात्वम् पाकसाध्यं सुखं जायतामितीच्छायां व्यभिचारवारणाय सुखेति। इष्टसाधनतेत्यनेच्छा स्वरूपसती विशेषणम्। तेनेच्छाज्ञानशून्यकालेऽपि चिकीर्षानिर्वाह इति। अतएव कृतिसाध्यताज्ञानस्य हेतुत्वादेव। बलवद्दृष्टेति। दृष्टं द्वेषविषयभूतं द्वेषश्च दुःखे तादृशेष्ट ज्ञानात्, सर्पादौ तत्साधनताज्ञानात्। द्वेषे बलवत्त्वं च जातिविशेषः। प्रतिबन्धकमिति। ननु बलवद्दुःखविषयसाधनत्वज्ञानस्य प्रतिबन्धकत्वे चैत्रस्यागम्यागमनजन्यनरके यदा बलवान् द्वेषस्तदा मैत्रस्य तादृशद्वेषशून्यस्यागम्यागमने तादृशनरकसाधनत्वज्ञानवतश्चिकीर्षाप्रवृत्त्योरनुपपत्तिः एवं चैत्रस्यैव कालान्तरे तादृशद्वेषसत्त्वेपि। न च तत्कालीनतत्पुरुषीयेच्छां प्रति प्रवृत्तिं प्रति च तत्कालीनतत्पुरुषीयबलवद्दुःखजनकत्वज्ञानस्य प्रतिबन्धकत्वं कल्प्यते। यत्पुरुषस्य यदा न क्वापि द्वेषस्तत्कालपुरुषान्तरभावेन तादृशप्रतिबन्धकत्वस्याकल्पनाच्च तत्र तादृशप्रतिबन्धकाप्रसिद्धिरतस्तदभावरूपकारणस्याभावात् प्रवृत्त्यनुपपत्तिरिति वाच्यम् यत्पुरुषस्य यदाऽगम्यागमनजन्यनरके बलवद्द्वेषस्तदा तत्पुरुषस्य तत्रेच्छानुत्पादादगम्यागमनगोचरतत्पुरुषीयतत्कालीनेच्छाया अप्रसिद्ध्या तत्पुरुषतत्कालान्तरभावेन तादृशकार्यकारणभावस्याभावेन तत्र तत्पुरुषीयागम्यागमनगोचरेच्छानुत्पादप्रयोजकस्य दुर्निरूपत्तेरिति चेन्न तद्धर्मप्रकारकद्वेषविशिष्टस्य तद्धर्मावच्छिन्नजनकत्वज्ञानस्य तत्र प्रतिबन्धकत्वकल्पनेनोक्तापत्त्यभावात्। तद्धर्मप्रकारकद्वेषानुत्तरतादृशेच्छायां तादृशद्वेषाभावः, तादृशद्वेषोत्तरतद्गोचरेच्छायां तद्धर्मावच्छिन्नजनकत्वज्ञानाभावः कारणम्। बलवद्दुःखेति। पाकादिगोचरेच्छायां बलवद्दुःखविषयसाधनत्वज्ञानजन्यः पाकगोचरोद्वेषः प्रतिबन्धकः पूर्वोक्तप्रतिबन्धकत्वद्वयकल्पनापेक्षया लाघवादिति भावः यत्र चोत्कटसुखोत्कटदुःखजनकमेकस्मिन् कर्मणि स्फुटीतं तत्र सत्प्रतिपक्षस्यस्य इवेच्छाद्वेषयोरुत्पत्तेस्स्वस्मते तत्र कार्यकाले द्वेषाभावस्य सत्त्वेनेच्छोत्पादापत्तिः। न च यत्र बलवद्दृष्टिसाधनत्वज्ञानेन द्वेषोत्पत्तौ द्वेषोजनितस्वदुत्तरक्षणे इच्छोत्पादापत्तिस्तवा-

योति वाच्यम्। तत्रेच्छोत्पादस्येष्टत्वात् ऋणविलम्बस्य यथनिर्णेयत्वादिति अन्यदत्रानेनाक्षरसः सूचितः। बलवदनिष्टाजनकत्वज्ञानमिति। अत्रापि तद्धर्मप्रकारक हेयोत्तरेच्छायां तद्धर्मावच्छिन्नाजनकत्वज्ञानं कारणं तादृश हेयानुत्तरेच्छायां तु तद्धर्मप्रकारकहेयाभावः कारणमिति निष्कर्षोबोध्यः। सूत्रे कस्य चिन्नत इत्यनेनाक्षरसः सूचितः। स च बलवदनिष्टाननुबन्धित्वज्ञानत्वस्य हेतुतावच्छेदकत्वे बलवदनिष्टजनकत्वप्रकारतानिरूपिताभावविशेष्यतायाश्चित्वादेस्तादृशनिरूप्यनिरूपकभावघटितत्वेन गौरवात्तदघटितबलवदनिष्टसाधनत्वज्ञानाभावत्वेनैव हेतुत्वं युक्तम्। अन्यथाप्रामाण्यज्ञानानाक्रान्तबलवदनिष्टाननुबन्धित्वज्ञानत्वापेक्षया प्रामाण्यनिश्चयानाक्रान्ततदनुबन्धित्वज्ञानत्वस्य प्रतिबन्धकतावच्छेदकत्वे गौरवमिति वाच्यम्। युद्धादौ बलवदनिष्टसाधनत्वसन्देहेऽपीच्छाप्रवृत्त्योरदृयाद्बलवदनिष्टानुबन्धित्वनिश्चयस्यैवेच्छाप्रतिबन्धकतायास्तदननुबन्धित्वसंशयस्यापि प्रतिबन्धकतायाश्च वाच्यतया च विपरीतगौरवादिति। न च बलवदनिष्टाननुबन्धित्वज्ञानस्याप्रवर्त्तकत्वे तद्विषयस्य विध्यर्थत्वाभावात् "न कलञ्जं भक्षयेदित्यादि"—वाक्यानामप्रामाण्यापत्तिरिति वाच्यम्। तज्ज्ञानस्य प्रवृत्तिजनकत्वाभावेऽपि प्रवृत्तिप्रतिबन्धकबलवदनिष्टसाधनत्वज्ञानविघटकत्वेन प्रवृत्तिप्रयोजकत्वात् प्रवृत्तिप्रयोजकज्ञानविषयस्य विध्यर्थत्वानपायात्। अत्र यद्यपि यत्र प्रथमक्षणे हेयः द्वितीयक्षणे फलेच्छा तृतीयक्षणे फलसाधनताज्ञानं तत्र तृतीयक्षणे हेयनाशाद्बलवत्येव चतुर्थक्षणे उपादेच्छा। यत्र फलेच्छादिक्षणेऽपि प्रवृत्त्युत्पत्तिस्तत्र फलेच्छारूपकारणाभावादेव नोपादेच्छा। एवमन्यत्रापि। आत्मविशेषगुणानां यौगपद्यानङ्गीकारादिति बलवदनिष्टानुबन्धित्वज्ञानस्य हेयस्य वा प्रतिबन्धकत्वं न युक्तं न युक्तञ्च बलवदनिष्टाननुबन्धित्वज्ञानस्य हेतुत्वं तथापि द्वितीयक्षणान्तरितेऽपि हेये इच्छाप्रवृत्त्योरनुदयस्यानुभविकतया ज्ञानयोरेव वा यौगपद्यमित्यभ्युपगमाद्वा पूर्वोक्तप्रतिबन्धकत्वस्य हेतुत्वस्य वावश्यकत्वमिति ध्येयम्"।

यद्वच्चिन्तामणौ तु प्रपञ्चः। तत्र कृतिसाध्यत्वनिश्चयस्य चिकीर्षादिहेतुत्वम् पूर्व्वपक्षीकृत्य अत्रोच्यते इत्यादिना स्वमतसिद्धं कारणं दर्शयित्वा सिद्धान्तितं यथा। "विषभक्षणादिव्यावर्त्तकं कृतिसाध्यत्वज्ञाने इष्टसाधनत्वं विषय तथावच्छेदकं लाघवात् न तु स्वविशेषणत्वसाप्रतिसन्धानजन्यत्वं गौरवात् न च सिद्धासिद्धत्वस्वयोःसाध्यत्वसाधनत्वयोर्विरोधः निर्विशेषितयोरविरोधात् पाकोऽसिद्धः साध्यः सिद्धः साधनञ्चेत्यनुभवात् तदा साध्यत्वं हि तदा साधनत्वविरोधि नियमतस्तेनैव तस्य प्रतिबन्धात् सहानवस्थाननियमात् न तु साधनत्वस्य अन्यदा साधनत्वस्य वा तयोरप्रतिबन्धात् अन्यदासाधनत्वेऽपि साधनत्वमक्षेव सामान्यभावे विशेषभावप्रसङ्गात् एवन्तदासिद्धत्वस्य तदासिद्धत्वेन विरोधः नियमयस्यैव प्रतिबन्धात् न तु सिद्धत्वमात्रेण अन्यदापि तत्र सिद्धत्वाभावप्रसङ्गात्। निर्विशेषितयोर्विरोधे च सिद्धत्वासिद्धत्वयोरन्यतरदेव प्राकादौ स्याच्च तु समयभेदेऽप्युभयम् न च तदा कृतिसाध्यत्वे सति तदेष्टसाधनत्वज्ञानं प्रवर्त्तकम्। अतएव "राजसूयेन यजेतेत्यत्र" यागस्य करणावस्थायां सिद्धत्वेन राजसूयस्य न साध्यता एकदाद्वयविरोधादिति कर्मनामधेयत्वं न तु करणस्य सिद्धत्वेन साध्यत्वविरोधः यागस्वरूपे तयोः सत्त्वात् अथ विरुद्धयोरवच्छेदभेदमादायैकत्र प्रतीतिःस्यात् नच कृतिसाध्यत्वेष्टसाधनत्वयोः समयभेदमादाय प्रतीतिरस्ति तथा सिद्धाभापादिति चेत् न साध्यत्वसाधनत्वयोरविरोधस्योक्तत्वात् एवं सिद्धासिद्धत्वयोर्भावाभावरूपत्वेऽपि न विरोधः एकधर्मिगतत्वेन भानसिद्धत्वात्। एवं संयोग तदभावयोरिवेन प्रकारेण ययोर्विरोधस्तेन तयोरेकधर्मिगतत्वं न प्रतीयते न तु रूपान्तरेणापीति। अपि च यदि साध्यत्वसाधनत्वयोर्विरोधस्तदापीष्टसाधनत्वेन कार्य्यसाधनत्वेन वा कार्य्यत्वं नानुसीवेत हेतुसाध्ययोर्विरोधेन सामानाधिकरण्याभावेन व्याप्त्यसिद्धेः पक्षे साध्यसाधनयोरन्यतरासत्त्वे बाधासिद्धयोरन्यतरपक्षाच्च। न चवाच्यमिदानीं मत्कृतिसाध्यत्वं साध्यम् अग्रे मदिष्टसाधनत्वं हेतुः, दैवाद्यनधीनत्वे सति यदग्रे मदिष्टसाधनं तदिदानीं मत्कृतिसाध्यमिति व्याप्तेः तथा च समयभेदमादाय साध्यत्वसाधनत्वयोरविरोध इति। इदानीमग्रिमपदार्थयोर्नानात्वादनुगतरूपाभावेन व्याप्तेरयक्षात् एवंन्यायेनान्यत्रापि तत्तत्समयान्तर्भावेन साध्यत्वसाधनत्वयोरप्रतीतेः। प्रतीतौ वा समयोदानीं कृतिसाध्यत्वे सत्यग्रे इष्टसाधनत्वज्ञानं प्रवर्त्तकमस्तु। न च पाकसाध्येष्टत्वेन कृतिसाध्यत्वमनुभवेयं असिद्धावस्थावतः पाकादिष्टानुत्पत्तेः पाकस्य सिद्धत्वमवगम्य तत्साध्यत्वमिष्टस्यावगन्तव्यम् असिद्धत्वञ्चावगम्य कृतिसाध्यत्वमिति सिद्धत्वासिद्धत्वयोर्विरोधोऽत्रापि दुर्वारः। अपि च स्वविशेषणधीजन्यकार्य्यतानानाभावात् सुखे कथं चिकीर्षा, न हि कृतिसाध्यताज्ञानमात्रात् सा सङ्गावना-

धस्य विषभक्षणादौ चिकीर्षाप्रसङ्गात्। अथोपायचिकीर्षायां तत्कारणं इच्छाकारणसुखत्वज्ञाने कृतिसाध्यत्वं यदा विषयस्तदा सुखे चिकीर्षा नो चेदिच्छामात्रमिति इयमेव चिकीर्षाहेतुरिति चेत् तर्हीच्छाहेतुज्ञाने यदा कृतिसाध्यत्वं भासते तदा चिकीर्षा नो चेदिच्छामात्रमित्येव सुखतदुपायचिकीर्षाकारणमस्तु लाघवात् सुखत्वज्ञानवदिष्टसाधनताज्ञानस्यापीच्छाकारणत्वात्। अतएव पाके इष्टसाधनताज्ञाने कृतिसाध्यत्वं विषय इति चिकीर्षा न तु इच्छादिज्ञाने तद्विषयत्वमितीच्छामात्रं सुखचिकीर्षायामिच्छाकारणज्ञाने कृतिसाध्यताविषयके चिकीर्षाजनकत्वावधारणात् अन्यथा तत्र चिकीर्षानुत्पत्तेः। वस्तुतस्तु उपायचिकीर्षा इष्टसाधनताज्ञानसाध्या उपायेच्छात्वात् इष्टोच्छावत् न च भोगचिकीर्षावत् तेन विनापि स्वादिलिप्रयोक्तत्वात् उपायेच्छायास्तदन्वयव्यतिरेकानुविधानात् इष्टे च स्वतोऽसुकरत्वेन इच्छानुत्पत्तेः। अनुगतोपायेच्छायामनुगतस्य प्रयोजकत्वे सम्भवति बाधकं विना त्यागायोगाच्च। न च चिकीर्षान्यत्वेसति उपायेच्छात्वमिच्छात्वं वा तज्जन्यत्वे प्रयोजकं गौरवात् सुखेच्छायां तदभावाच्च। एवञ्चोपायचिकीर्षायामिष्टसाधनताज्ञाने ध्रुवे इतिप्रसङ्गवारणार्थं कृतिसाध्यत्वप्रकारकत्वनिर्वाहार्थञ्च कृतिसाध्यत्वमपि विषयतावच्छेदकमस्तु न तु तद्विहाय तन्मात्रं तत्प्रकारकं विना कार्यानुत्पत्तेः। अत एव स्नपानप्रवृत्तावप्युपायेच्छाकारणत्वेन गृहीतस्येष्टसाधनताज्ञानस्यापि कल्पनं इष्टानुरोधित्वात् कारणतायाः। ननु साधनत्वमिच्छाविरोधि तस्य सिद्धधर्मत्वात् इच्छादौ तत्साध्येष्टज्ञानादिर्हेति चेत् न निर्विशेषितयोः सिद्धत्वासिद्धत्वयोरविरोधेनेच्छासाधनत्वयोरविरोधात् तदा असिद्धत्वं तत्सिद्धत्वञ्च नेच्छासाधनत्वयोः प्रयोजकमिति तथा न ज्ञायत एव। यत्तु तत्साध्येष्टज्ञानात् इच्छादाविच्छेति तत्तुच्छं असिद्धावस्थादुइच्छादेरिष्टानुत्पत्तेरवश्यं सिद्धत्वमवगन्तव्यमिच्छाविरोधित्वाच्चासिद्धत्वमिति तत्रापि विरोधस्य दुर्वारत्वात्। किञ्च चिकीर्षाजन्यकृतिसाध्यं मण्डलीकरणमित्यर्थप्रतिपादकं मण्डलीं कुर्यादितिवाक्यं प्रमाणं स्यात् विषयाबाधात्। एतेन नवीनमतमपास्तं यदस्य हि कृतिसाध्यत्वौदनकामनावत्त्वेष्टसाधनताज्ञानानां ज्ञानं तथान्यस्य ओदनकामनावत्त्वेष्टसाधनताज्ञानस्य ज्ञानं न प्रवृत्तिकारणं गौरवात् किन्तु मत्कृतिसाध्यत्वे सति मदिष्टसाधनताज्ञानमेव लाघवात् तथा च साध्यसाधनत्वयोर्न विरोधोऽनागतस्य पाकादेः कृतिसाध्यताज्ञानञ्च यथा, तथोपपादितं पुरस्तात्। किञ्च स्वकृतिसाध्यत्वमन्तरेणापि स्वकृतिसाध्येष्टसाधनताज्ञानात् स्वकल्पितेच्छिष्यादौ, यौवने कामोद्भेदात् संभोगादौ प्रवृत्तेश्च अदृष्टं प्रवर्त्तकम्। वस्तुतस्तु सिद्धविषयककृतिसाध्यताज्ञानात् कथं "पाकं कृत्वा साधयामीतीच्छा"? सिद्धे इच्छाविरहात् असिद्धस्याज्ञानात् अथ सिद्धविषयादेव कृतिसाध्यताज्ञानादसिद्धविषया कृतिसाध्यत्वेनेच्छा जायते इच्छाया असिद्धविषयत्वस्वभावत्वात्। एकप्रकारकत्वेन ज्ञानचिकीर्षयोः कार्यकारणभावोनत्वेकविषयत्वे सति गौरवात् इच्छाया अनागतविषयत्वात्तस्य चाज्ञानात्तथा कल्पनात् सुखादोच्छायामप्येवमिति चेत् न असिद्धविषयेच्छानुरोधेनानागतोपायज्ञानस्य दर्शितत्वात्। अस्तु चैवं तथापि कृतिसाध्यताज्ञाने इष्टसाधनत्वमेव व्यावर्त्तकमस्तु स्वपरकीयेष्टसाधनताज्ञानस्य फलकामनाज्ञानामेधया लघुत्वात् ज्ञानज्ञानस्य फलकामनाज्ञानस्य हेतुत्वे मानाभावाच्च"।

सेयमिच्छा अन्तःकरणधर्म्मोनात्मधर्म्मः इति वेदान्तिनः प्रतिपेदिरे। आत्मनो निर्गुणत्वात् श्रुतया "कामः संकल्पः इत्यादि श्रुत्वा मनोधर्म्मत्वावगमाच्च तथात्वम्। यथा च कामादीनां नात्मधर्म्मत्वं तथा शङ्कापूर्व्वकं इ० उ० भाष्ये समर्थितम्। यथा

"सुखित्वदुःखित्वादिदर्शनान्नेति चेत् न "न ह्यियते लोकदुःखेन बाह्य" इति श्रुतेः। प्रत्यक्षादिविरोधादयुक्तमिति चेत् न उपाध्याश्रयजनितविशेषविषयत्वात्प्रत्यक्षादेः "न दृष्टेर्द्रष्टारं पश्येर्विज्ञातारमरे केन विजानीयादविज्ञातं विज्ञाद्" इत्यादिश्रुतिभ्यो नात्मविषयं विज्ञानम्, किन्तर्हि बुद्ध्याद्युपाध्यात्मप्रतिच्छायाविषयमेव सुखितो दुःखितोऽहमित्येवमादिप्रत्यक्षविज्ञानमयमङ्गमिति विषयेण विषयिणः सामानाधिकरण्योपचारात् "नान्यदतोऽस्ति द्रष्टृ" इत्यन्यात्मप्रतिषेधाच्च। देहावयवविशेष्यत्वाच्च सुखदुःखयोर्विषयधर्म्मत्वम् "आत्मनस्तु कामाय" इत्यात्मार्थत्वश्रुतेरयुक्तमिति चेन्न। "यत्र वा अन्यदिव स्यात्" इत्यविद्याविषयवात्मार्थत्वाभ्युपगमात् "तत्केन कं पश्येत्" "नेह नानास्ति किञ्चन" "तत्र को मोहः कः शोक" इत्यादि विद्याविषये तत्प्रतिषेधाच्च नात्मधर्म्मत्वम्। तार्किकसमयविरोधादयुक्तमिति

चेन्न युक्तात्मनो दुःखित्वानुपपत्तेः। न हि दुःखेन प्रत्यक्षविषयेणात्मनो विशेष्यत्वं, प्रत्यक्षाविषयत्वात्। आकाशस्य शब्दगुणवत्त्ववदात्मनो दुःखित्वमिति चेन्न एकप्रत्ययविषयत्वानुपपत्तेः। न हि सुखप्राहकेण प्रत्यक्षविषयेण प्रत्ययेन नित्यानुमेयस्यात्मनो विषयीकरणमुपपद्यते। तस्य च विषयीकरणे आत्मन एकत्वाद्विषयभावप्रसङ्गः। एकस्यैव विषयविषयित्वं दीपवदिति चेन्न युगपदसम्भवादात्मन्यंशानुपपत्तेश्च। एतेन विज्ञानस्य यावदात्मकत्वं प्रत्युक्तम्। प्रत्यक्षानुमानविषययोश्च दुःखात्मनोर्गुणगुणित्वेनानुमानम् दुःखस्य नित्यमेव प्रत्यक्षविषयत्वाद्रूपादिसामानाधिकरण्याच्च मनःसंयोगजत्वेऽप्यात्मनि दुःखस्य, सावयवत्वविक्रियावत्त्वानित्यत्वप्रसङ्गात्। न ह्यविक्रत्य संयोगि द्रव्यं गुणः क्वचिदुपयन्नपपन्नो दृष्टः क्वचित्। न च निरवयवं विक्रियमाणं दृष्टं क्वचित् अनित्यगुणाश्रयं वा नित्यम्। न चाकाश आगमवादिभिर्नित्यतयावगम्यते। न चान्यो दृष्टान्तोऽस्ति विक्रियमाणमपि तत्तत्त्वव्यानिवृत्तेर्नित्यमेवेति चेन्न द्रव्यस्यावयवान्यथात्वव्यतिरेकेण विक्रियानुपपत्तेः। सावयवत्वेऽपि नित्यत्वमिति चेन्न सावयवस्यावयवसंयोगपूर्वकत्वे सति विभागोपपत्तेः। वज्रादिष्वदर्शनान्नेति चेन्नानुमेयत्वात्संयोगपूर्वत्वस्य। तस्मादात्मनो दुःखाद्यनित्यगुणाश्रयत्वोपपत्तिः। परस्माद्दुःखित्वेऽन्यस्य च दुःखिनोऽभावे दुःखोपशमनाय शास्त्रारम्भानर्थक्यमिति चेन्नाविद्याध्यारोपितदुःखित्वभ्रमापोहार्थत्वात्"।

यथा च कामस्य हृदयाश्रितत्वं तथाऽग्निकामशब्दे ७।८पृष्ठे दर्शितेऽष्टमा०वाक्ये प्रपञ्चितम्। एवमेव सांख्यपातञ्जलाद्यभिमतादिवत् सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि बुद्धेरेव धर्मा इत्याहुः। ईश्वरेच्छा तु समूहालम्बनात्मिका सर्वं जगत् भूयादित्याकारिका। "सोऽकामयत बहु स्यां प्रजायेयेत्यादि" श्रुतिः। "सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः" इति स्मृतिश्च तस्य तत्त्वे प्रमाणम्। सा च नित्येति नैयायिकादयः नित्यत्वाच्च न तत्र कारणमपेक्षा। व्योमादिवदनित्येति वेदान्तिनः। नित्यत्ववादिमतेऽपि सृज्यमानजीवादृष्टरूपसहकारिणैव तत्तत्कार्योत्पत्तिरिति ईश्वरशब्दे वक्ष्यते। मनोधर्मत्ववादिमते मनसस्त्रिगुणात्मकत्वेऽपि रजस एव तत्कारणत्वम् "काम एष क्रोध एष रजोगुणसमुद्भवः" गीतायां कामस्य रजोगुणकार्यत्वोक्तेः। ततश्च बुद्धेस्त्रिगुणात्मकत्वेन रजःकार्यं कामस्य तद्गुणत्वमेवोचितम्। अतएव इच्छाशक्तिक्रियाशक्तिज्ञानशक्तिस्वरूपिणीत्यादौ प्रकृतेरिच्छाशक्त्यादिरूपत्वकथनमपि सङ्गच्छते शक्तिशक्तिमतोरभेदात् प्रकृतिशक्तित्वाच्च तस्या बुद्धिगुणत्वमवगम्यते। अतएव "या देवी सर्वभूतेषु इच्छारूपेण संस्थिता" देवीमा०सर्वभूतेषु इच्छारूपेण प्रकृतिस्थितिरुक्ता

ईश्वरोपाधिमायाया इच्छादिमत्त्वेनैवेश्वरस्य तद्वत्त्वं रत्नत्रयपरीक्षायामुक्तं यथा "नित्यं निर्दोषगन्धं निरतिशयसुखं ब्रह्म चैतन्यमेकं धर्मोधर्मीति भेदद्वितयमपि पृथगभूय मायावशेन। धर्म्यात्मानुभूतिः सकलविषयिणी सर्वकार्यानुकूला शक्तिश्चेच्छादिरूपा भवति गुणगुणात्मयस्त्वेक एव। कर्तृत्वं तत्र धर्मी कलयति जगतां पञ्चसृष्ट्यादिलक्ष्ये धर्मः पुंरूपमाप्ता सकलजगदुपादानभावं बिभर्त्ति। स्त्रीरूपं प्राप्य दिव्या भवति च महिषी स्वाश्रयस्यादिकर्तुः, प्रोक्तौ धर्मप्रभेदावपि निगमविदा धर्मिवत् ब्रह्मकोटौ" इति तथा च एकमेव ब्रह्मानादिसिद्धया मायया कर्मी धर्म्मी चेति द्विविधमभूदित्यर्थः। तन्त्रोक्ते कालिकायाः २पीठशक्तिभेदे। "इच्छाज्ञानक्रियारूपे कामिनी कामदायिनी। रतीरतिप्रिया नन्दा मध्ये चैव मनोन्मनी" तन्त्रसा०कालिकापीठशक्तिवचने।

इच्छाकृत त्रि० इच्छया कृतः। "कामकृते। १अशीतिभागो दृद्धिः स्यात्" इत्युक्तातिक्रमेण अधमर्णेन यावेष्टं कृतायां २वृद्धौ स्त्री "वृद्धेर्वृद्धिकृद्वृद्धिः प्रतिमासन्तु कालिकी। इच्छाकृता कामकृता कायिका कायकर्म्मणा" याज्ञ०त० याज्ञवचनत्वेन धृतम्। मिताक्षरायां तु नैतद्वचनं दृश्यते। तत्र कारिता वृद्धिर्नारदवचनेन दर्शिता "वृद्धिः सा कारिता नाम यर्णिकेन स्वयंकृतेति"

इच्छानिवृत्ति स्त्री ६त०। पित्रादीनां धनादिभोगवाञ्छाया परमे। "पितर्युपरतस्पृहे इत्यादि" श्रुतेः तादृशस्पृहानिवृत्तौ पित्रादेः स्वत्वहानिः, पुत्रादेः स्वत्वोत्पत्तिश्च। तेन पुत्रादीनां तत्र पैत्रादिधनविभागः।

इच्छावत् त्रि० इच्छा अस्यास्ति मतुप् मस्य वः। धनादिस्पृहायुक्ते स्त्रियां ङीप्। सा च धनादिवाञ्छायुक्तायां कामुकायाम् स्त्रियां रमणेच्छायुक्तायां तु कामुकीति भेदः।

इच्छावसु पु० इच्छयैव वसु यस्य। कुबेरे जटा०

इच्छित पु० इच्छा जातास्य तारका० इतच्। स्पृहायुक्ते

इच्छु त्रि० इच्छतीति इष-उ नि०इच्छादेशः। इच्छाशीले "वस्त्रधर्म्मणि पुटीच्छुः" "उभयेच्छुरुभयोः" काशा०१८,५,१२,१२

इज्जल पु० ऐयते कर्म्मणि-क्विप् इत् सन्निपतितया गतं जलमनेन। (झिजोड) इत्वे तस्य जलसन्निकृष्टदेशजातत्वात् तथात्वम्।

इज्य पु० इज्याऽस्त्यस्य अर्श० अच्। १इड्यमतो "जीवाकिंशानुजेज्यानां चेलाखि स्वरजादयः" ज्यो०त० 'वित्तिते ज्यदिसे" स० चि०। जीवदेवताके २पुष्यनक्षत्रे च "ब्रह्मा हरोज्ये दुष्करान्यमैत्रेयादि दीपि० २गुरौ ४परमेश्वरे ५विष्णौ च। "यदिज्यो महेज्यत्व" विष्णु० स०। "यदयोऽप्ययमेवेज्यः" वे यजन्ति च सार्वाणि दैवतानि पितॄनपि। आत्मानमात्मना नित्यं विष्णुमेव यजन्ति ते ४हरिसंयोगोक्तेः" भा० ऐपूज्यमात्रे त्रि०। हरेज्यः

इज्या स्त्री यज-भावे क्यप् स्त्रीत्वात् टाप्। १यजने, "सोऽग्निज्याविशुद्धात्मा"। "जगत्प्रकाशं तदयेषनिज्यया" रघुः यजेर्दानाद्यर्थत्वात् २दाने, ३सङ्गमे च। कर्म्मणि क्यप्। ४प्रतिमावाम्। ५कृष्टिनन्याञ्च। [जूके अमरः।

इज्याशील पु० इज्या शीलमस्य। सततयजनशीले याय-

इड्याक पु० चङ्या दीर्घाऽस्त्यस्य आकत् पृ०। (चिङ्गिड़ि) मत्स्यभेदे त्रिका० २जलदन्तिके इति केचित्।

इट गतौ भ्वादि०पर०सक०सेट्। एटति ऐटीत्। इवेट ऐटत्। "त्वं त्यमिटतो रथमिन्द्र प्रावः सुतावतः" ऋ० १०,१७१,१।

इटसून न० इट-क इटं सूनं सूनं स्त्रि-क्त पृ० षस्य सः। शाखामये कटे। "वैतसे इटसून उत्तरतोऽग्नेरासीदन्ति" शत० ब्रा० १३,२,२,१६, "इटसूने शाखामये कटे" भा०

इट्चर पु० इष-संपदा०भावे क्विप् इषा कामेन चरति चर-अच्। गोपतौ (पाँड़) इषभे

इड् (ल) स्त्री इल-क्विप् वा लस्य डः। १इषिपि अग्ने "होतारमिल; प्रथमं यतध्यै" ऋ० ३,४,१, "इड़ो हवीरूषाण्यत्रानि" भा० "इड़स्पतिर्मघवा दक्षपत्नीः" ऋ० ६,५८, ४, "इड़: पशूनां पतिः" भा० २भूमौ "इन्द्रपानभूमिमलखतेड़:" ऋ० ७,४७,१, "इड़इड़ाया भूमेः" भा० ऐद्यते ऐड-क्विप् पृ०। २अन्ने ४वर्हिषि ५प्रजासु दर्शपौर्णमासाङ्गेषु पञ्चसु प्रयाजेषु हतीये ६प्रयाजे च। प्रयाजाश्च "समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजतीति" श्रुत्युक्ताः पञ्च। तेषां प्रयाजत्वनिर्वचनपूर्वकं पञ्चानामृतुरूपत्वमुक्तम् यथा "ऋतवो वै प्रयाजाः तस्मात् पञ्च भवन्ति पञ्च ऋतव" इत्युपक्रम्य "ततो देवा अचिन्वन् श्रान्यन्ये रसमरतान् प्रयाजान् दक्षणैरयजन्त ते ऋतून् संवत्सरं प्रायजन्नृतुभ्यः संवत्सरात् सपत्नाननरायंस्तस्मात् प्रजया प्रजया ह वै नामैतत् यत् प्रयाजाः इति तथो एवैष एतैर्ऋतून् संवत्सरं प्रजयत्युतुभ्यः संवत्सरात् सपत्नाननरेति तस्मात् प्रयाजैर्यजते" इति प्रयाजनिर्वचनेन ऋतुरूपत्वमेषामभिधाय समिदादीनां वसन्तादिरूपत्वमुक्तं तत्रैव यथा "समिधो यजति तद्वसन्तं, समिन्धे स वसन्तः समिद्धोऽग्नाऋतून् समिन्धे ऋतवः समिद्धाः प्रजाश्च प्रजनयन्योषधीश्च पचन्ति तद्देव खलु सर्वानृतूंश्चराद्धाऽथ यजयजेत्येवोत्तरानाहाऽजामितायैजामिमिह कुर्याद्यत्तनूनपातं यजेड़ो यजेति ब्रूयात्तस्मादृतव यजेत्येवोत्तरानाह, स वै समिधो यजति। वसन्तो वै समिद्वसन्तमेव तद्देवा अवृञ्जत वसन्तात् सपत्नाननरायन् वसन्तं वेष एतदृक्षे वसन्तात् सपत्नाननरेति तस्मात् समिधो यजति। अथ तनूनपातं यजति। योग्रो वै तनूनपादुग्रो ह्यासां प्रजानां तनूरूपति योग्रमेव तद्देवा अवृञ्जत योग्रात् सपत्नाननरायन् योग्रेवेष एतदृक्षे योग्रात् सपत्नाननरेति तस्मात्तनूनपातं यजति। अथेड़ो यजति। वर्षा वाइड़ इति हि वर्षा इड़ो यदिदं क्षुद्रं सरीसृपं योग्नेमन्नाभ्यां निष्पन्नं भवति तद्वर्षा रेड्डितमिवान्नमिच्छमानं चरति तस्माद्वर्षा इड़ो, वर्षा एव तद्देवा अवृञ्जत वर्षाभ्यः सपत्नाननरायन् वर्षा उएवैष एतदृक्षे वर्षाभ्यः सपत्नाननरेति तस्मादिड़ो यजति। अथ बर्हिर्यजति। शरद्वै बर्हिरिति हि शरद्बर्हिर्या इमा ओषधयो योग्नेमन्नाभ्यां निष्पन्ना भवन्ति ता वर्षा वर्धन्ते ताः शरदि बर्हिषो रूपं प्रक्षीर्णाः शेरे तस्माच्छरद्बर्हिः शरदमेव तद्देवा अवृञ्जत शरदः सपत्नाननरायच्छरदं वेष एतदृक्षे शरदः सपत्नाननरेति तस्माद्बर्हिर्यजति। अथ स्वाहाकारेति यजति। अग्नो वैष यज्ञस्य स्वाहाकारोऽग्ना ऋतूनां क्षेमन्नो वसन्तादि परार्द्धोऽग्नेमेव तदग्नं देवा अवृञ्जताग्नेनान्नात् सपत्नाननरायद्यज्ञेनो एवेष एतदग्नं ऋक्षेऽग्नेनान्नात् सपत्नाननरेति तस्मात् स्वाहाकारेति यजति" शत० ब्रा० १,५,२,११। समिदादीनां निरूढान्तरं प्रदर्श्य प्रजारूपत्वमिड़ाशब्दोक्तं यथा "स वै समिधो यजति। प्राणा वै समिधः प्राणानेवैतत् समिन्धे प्राणैर्ह्येष पुरुषः समिद्धस्तस्मादभिस्पर्धेति ब्रूयाद्यदुपतापी स्यात्र यद्युष्णः स्यादेव तावच्छंसेत समिद्धो हि स तावद्भवति यद्यु शीतः स्यात्तापयंसेत। तत्प्राणानेवात्मन्धत्ते तद्धधाति तस्मात् समिधो यजति। अथ तनूनपातं यजति। रेतोवै तनूनपात्रेत एवैतल्लिङ्गति

तस्मात्तनूनपातं यजति । अथेडो यजति प्रजावा इडो यदा वै रेतः सिक्तं प्रजायतेऽथ तदोड्डितमिवाग्निमिच्छमानं चरति तत् प्रैवैतज्जनयति तस्मादिडो यजति । अथ बर्हिर्यजति । भूमा वै बर्हिर्भूमानमेवैतत् प्रजनयति तस्माद्बर्हिर्यजति । अथ स्वाहाकारेति यजति । हेमन्तो वा ऋतूनां स्वाहाकारो हेमन्तो ह्येमाः प्रजाः स्वं वशमुपनयते तस्माद्धेमन्तान्नावत्योषधयः प्र वनस्पतीनां पलाशानि सच्यन्ते प्रतितरामिव वयांसि भवन्त्यधस्तरामिव वयांसि पतन्ति विपतितलोमेव पापः पुरुषो भवति हेमन्तोह्येमाः प्रजाः स्वं वशमुपनयते' । शत० ब्रा० १,५,४,२ । ऋतूनां यज्ञप्रयाजभागित्वमस्मिन्नर्थे जातम् इत्युक्तं तत्रैव "ऋतवोह वै देवेषु यज्ञे भागमीयिरे ज्ञानो यज्ञे भजत मा नो यज्ञादन्यतास्वेव नोऽपि यज्ञे भाग इति । तद्वै देवा न जज्ञुः। त ऋतवो देवेष्वजानन्त्स्वसुरानुपावर्तनाप्रियान्देवानां हिषतो भाद्रव्यान् । ते हैतामेधितुमेधाञ्चक्रिरे । यामेषामेतामनु ह्वखन्ति खनतो ह स्मैव पूर्वे वपन्तोयन्ति लुनन्तोऽपरे ह्वखनः शश्वद्वैश्योऽलब्धपच्या एवौषधयः मेचिरे । तद्वै देवानामागच्छत् । कनीयद्वृतोहिषन्निषतेऽरातीयति किमेतावन्मात्रमुपजानीत यथेदमितोऽन्यथा स्यादिति । ते होचुः ऋतूनेवानुमन्त्रयामहा इति के नेति प्रथमानेवैनान् यज्ञे यजामेति । सहाग्निरुवाच । आवयत्कां पुरा प्रथमं यजध क्राहं भवानीति न त्वामायतनाञ्जावयाम इति ते यद्वत्तनभिक्रूयमानाञ्जघान्मायतनाञ्जाव्यावयंस्तस्मादग्निरच्युतोनो ह वा आयतना ञ्जयते यस्मिन्नायतने भवति य एवमेतमग्निमच्युतं वेद । ते देवा अग्निमब्रुवन् । परे ह्येनांस्त्वमेवानुमन्त्रयस्वेति स होवाग्निरुवाच,ऋतवोऽहं वै वो देवेषु यज्ञे भागमिति कथं नोऽविद इति प्रथमानेव वो यज्ञे यक्ष्यतीति । त ऋतवोऽग्निमब्रुवन् क्वा वयं त्वामसासु भजामो वो नो देवेषु यज्ञे भागमविद इति स एवोऽग्निर्ऋतुलाभाद्भक्तः समिधो अग्ने तनूनपादन्न इडो अग्ने बर्हिरग्ने स्वाहाग्निमिति" शत० ब्रा० १,६,१,७,८ । प्रयाजैश्चरन्नीत्युपक्रम्य "इड अग्न आज्यस्य व्यन्तिति हतोयः" आश्व० श्रौ० । "इडस्पदे समिध्यसे" यजु० १५,२० "इड़ः पृथिव्याः" वेददी० ।

इड़ा (ला) स्त्री इल-अच् वा लस्य डत्वम् । १गवि, २वाचि, ३भूमौ, "प्रबुध्यते नूनमिडालतस्यः भा० व० २३५ अ० । "इडा पिन्वते विश्वदानीम्" ऋ० ४,५०,८, "इडा भूमिः" भा० । इल+गतौ करणे घञर्थे क । देहस्थे ४नाडीभेदे । "इड़ा च पिङ्गला चैव सुषुम्णा च सरस्वती चलम्बूषा कुहूश्चैव शङ्खिनी चित्रिणी तथा । विश्वोदरी विश्वसखी व्याप्त्याख्ये तावतर्दश" इति तन्त्रोक्तासु प्रधानासु चतुर्दशसु नाडीषु तिस्रः प्रधानाः तथा हि । "शिराः शतानि सप्तैव" या० "शिराः नाभिं बद्धास्त्वारिंशत् वातपित्तश्लेष्मवाहिन्यः सकलकलेवरव्यापिन्योनानाशाखाः सप्त सप्त शतानि भवन्तीति" मिता० । "सप्त शिराशतानि, हेम० । तेन देहमध्ये सप्त शतानि नाड्यः तन्मध्ये एतावतुर्दश प्रधानतयोक्ताः । तासु मध्येऽपि तिस्रः प्रधानाः देहस्थनाड़ीरूपकथ्य । शारदा० "नाड्यस्तत्र समुद्भूतास्तासु ख्यातास्तिस्रः समीरिताः । इड़ा वामे स्थिता नाड़ी पिङ्गला दक्षिणे मता । तयोर्मध्यगता नाड़ी सुषुम्णा च समाहिता । पादाङ्गुष्ठहृदयं याता शिखाभ्यां शिरसा पुनः। ब्रह्मस्थानं समापन्ना सोमसूर्याग्निरूपिणी । तस्या मध्यगता नाड़ी चित्राख्या योगिवल्लभा । ब्रह्मरन्ध्रं विदुस्तत्र पद्मसूत्रनिभं परम् । इड़ायां सञ्चरेच्चन्द्रः पिङ्गलायां दिवाकरः। ज्ञातौ योगनिदानज्ञैः सुषुम्णायां तु तावुभौ" तत्स्थानसङ्ख्या कार्य्यमाह "इड़यार्कंध्येद्वायुं वाह्यं षोडशमात्रया । धारयेत्पूरितं योगी चतुःषष्ट्या तु मात्रया। सुषुम्णामध्यगं सम्यक् द्वात्रिंशन्मात्रया शनैः। नाड्या पिङ्गलया चैनं रेचयेद्योगवित्तमः । प्रणायामभिमं प्राहुर्योगशास्त्रविशारदाः" २५ पटले । "पिङ्गलायां स्थिता क्षुधा इड़ायां सङ्गताः परे (दीर्घाः) । सुषुम्णामध्यगा ज्ञेयास्त्वारो ये नपुंसकाः" शार० ५ प० । दीर्घादिरयमित्येके । ५ इविरत्ने च "यजमानपत्नी इड़ां भक्षयन्ति" श्रुतिः । इल लत्वे धत्वे च "इड़ां नोमित्रावरुणोत इष्टिम्" ऋ० ७,६३,२ "इड़ामग्नम्" भा० "इतैर्गभूतिसुश्रुतमिलाभिः" ऋ० ७,६४,४। "इड़ाभिरद्भिः" भा० । ६ देवीभेदे "श्रुतिः प्रीतिरिडा कान्तिः,शान्तिः पुष्टिःक्रिया तथा । शिष्टाश्च देव्यः" इत्युपक्रम्य । "उपतस्थुर्महासत्त्वं बलिमिन्द्रं सहारवम्" हरिवं० २५६ अ० "इड़ा देवी भारती विश्वतूर्त्तिः" ऋ० ५,२,८ । "अभि न इड़ायूथस्य माता" ऋ० ५,४१,१६ । "इलामीडोपधरा मनोः पत्नी माध्यमिको वाक् वेति" भा० । बुधस्य जायायां पुरूरवसो मातरि पश्चात्मनुदुलत्ते सुद्युम्नतया ख्यातायां मित्रावरुणयोरंशजातायां कन्यायाञ्च तत्कथा हरिवं० "अकरोत् इक्ष्वाकासु मनुरिष्टिं प्रजापतिः । मित्रावरुणयोस्तात पूर्वमेव

विशाम्पते ! । अनुत्पन्नेषु नवसु पुत्रेष्वेषु तु भारत ! । तस्यान्तु वर्त्तमानायामिच्छां भरतसत्तम ! । मित्रावरुणयोरंशे मनुराकृतिमाजुहोत् । आकृत्यां हूयमानायां देवगन्धर्वमानवाः । तुष्टिञ्च परमां जग्मुर्मुनयश्च तपोधनाः । अङ्गोऽस्य तपसो वीर्य्यमहो श्रुतमहोऽङ्गतम् । तत्र दिव्याम्बरधरादिव्याभरणभूषिता । दिव्यसंहननाचैव इड़ा जज्ञे इति श्रुतिः । तामिलेत्येव होवाच मनुर्ईश्वरसन्निधौ । अनुगच्छस्व मां भद्रे तमिला प्रत्युवाच ह । धर्मयुक्तमिदं वाक्यं पुत्रकामं प्रजापतिम् । इड़ोवाच । मित्रावरुणयोरंशे जाताऽस्मि वदतांवर ! । तयोः सकाशं यास्यामि न मां धर्मो हतोऽवधीत् । मैवमङ्गा मनुं देवं मित्रावरुणयोरिला । गत्वाऽन्तिकं वरारोहा प्राञ्जलिर्वाक्यमब्रवीत् । अंशेऽस्मिन् युवयोर्जाता देवौ ! किं करवाणि वाम् । मनुना चाहमङ्गा वै अनुगच्छस्व मामिति । तां तथा वादिनीं साध्वीमिलां धर्मपरायणाम् । मित्रश्च वरुणश्चोभावूचतुर्यद्भिबोध तत् । अनेन तव धर्म्मेण प्रश्रयेण दमेन च । सत्येन चैव सुश्रोणि ! प्रीतौ स्वो वरवर्णिनि ! । आवयोस्त्वं महाभागे ख्यातिं कन्येति यास्यसि । मनोर्वंशकरः पुत्रस्त्वमेव च भविष्यसि । सुद्युम्न इति विख्यातस्त्रिषु लोकेषु शोभने । जगत्त्रियो धर्म्मशीलो मनोर्वंशविवर्द्धनः । निदत्ता सा तु तच्छ्रुत्वा गच्छन्ती पितुरन्तिकम् । बुधेनान्तरमासाद्य मैथुनायोपमन्त्रिता । सोमपुत्राद्बुधाद्राजंस्त्वां जज्ञे पुरूरवाः । जनयित्वा सुतं सा तमिला सुद्युम्नतां गता" ।

दुर्गायाञ्च "आचार्य्यां मदिरां चण्डीमिलां मलयवासिनम्" हरिवं० १७८ अ० दुर्गास्तवः । इड़ैव स्वार्थेकन् तलार्थे

इडाविका स्त्री इडावत् स्वल्पं मध्यभागम् अवति अव-ण्वुल् ङीप् । टापि अत इत्त्वम् । वरटायाम् (बोलता) शब्दच०

इडिक पु० वनभवे ज्ञाने हेम० [अण् । इडे चोरसा०

इडुर पु० इड्यतीति इड् इषश्चलनो तयति इड-कर्म्मणि

इडीय त्रि० इड़ाया अदस्त्वादूरदेशः छत्करा० छ । अत्रस्त्वादूरदेशादौ

इण् धित् इङोभेदार्थम् चदा० पर० सक० अनिट् । एति इतःयन्ति । इयात् इहियेत् आयत् अगात् इयाय ईयतुः ईयुः इयविय इयेव ईयिव । एता एथति ऐथत् एतव्यम् अवनीयम् इत्यम् । एता,आवकः इतः इतिः अवनम् अयः आयः'वन् ईयिवान् ईयुषी । इत्वा इत्वा उपेत्य । 'स्तनयन्नेति नानदत्' ऋ० १,१४०,५, "इतः क्व मैत्रावरुणौ किमेतौ ?" भट्टिः "अङ्गञ्च भाष्यकारञ्च कृशाश्वेवधियावभौ, नैव शब्दाम्बुधेः पारम्" कलापप० "एसोदेषां निष्कृतं जारिणीव" ऋ० १०,२४,५, "आवद्वापोऽयनमिच्छमानाः" ऋ० २,२२,७, "अगात् सराजं जलमध्ययोध्यम्" "ईयुर्भरद्वाजसनेर्निकेतम्" "ततः पृष्ठतः प्रथमियाय नभः" भट्टिः "सुष्टुद्योर्वर्त्तते यत्" ऋ० १,८२,२ "यन्ति वा आप एतादित्य एति चन्द्रमा यन्ति नक्षत्राणि" शत० ब्रा० ११,५,७,१० "मामेवैष्यत्य संशयम्" "मामेवैष्यति कौन्तेय !" इति च गीता "अपोदानीं स धर्म्मात्मा इयाज्ञे दर्शनम् रहः" भा० आ० ८२ अ० कर्म्मणि दैवते "इन्द्रोमायाभिः पुरुरूपईयते" श्रुतिः "वनितयाऽनितया" रजनीवधूः" रघुः

अति+अतिक्रमे सक० "नात्येति सकृदाहृता" स्मृतिः "षड्गीतिसुखेऽतीते" "अतीते चोत्तरायणे" स्मृतिः "अथ चेत् पञ्चमीं रात्रिमतीत्य परतोभवेत्" शुद्धित० स्मृतिः अभि+अति+आभिमुख्येनातिक्रमे सक० "योऽस्य स्वर्गोलोकोऽजितोभवेत् तमभ्यत्येति" शत० ब्रा० १२,५,२,८, । वि+अति+विशेषेणातिक्रमे "व्यतीतकालस्वरूपमभ्युपेतः"

अधि+चिन्तने गत्यर्थस्य प्राप्त्यर्थत्वात् ज्ञानार्थनाच्च लाभे ज्ञाने च । इकवत्

अनु+अनुगमने सक० । "आदित्यं वा अस्तंयान्तमन्वे देवा अनुयन्ति" शत० ब्रा० ११,६,२,४ । "श्रुतान्वितो दशरथ इत्युदाहृतः" भट्टिः सन्ततसम्बन्धे अन्वयः । "तदन्वेति शुद्धिमति" रघुः शाब्दबोधोपयोगिसम्बन्धभेदे च । "साकाङ्क्षशब्दैर्यो बोधस्तदर्थान्वयगोचरः" "शब्दशक्ति० सम+अनु सम्यगन्वये । "तस्यानुसमन्वयात्" पा० सू० ।

अन्तर्+अन्तर्गतौ अन्तरायः अन्तरेति इड् शब्देऽ१८ पृ० उदा०

अप+अपगमने अपसरणे सक० "अनुमेतमपेतकल्मषम्" भाग० "ध्रुवमपायेऽपादानम्" "अपाये यदुदासीनम्" भर्तृह० "सत्वे निधियतेऽपैति" भाष्यका० वि+विशेषेण विगमे "व्यपैति ददतः स्वधा" स्मृतिः "स्खलाचारव्यपेतेन मार्गेणाधर्षितः परैः" वा० स्मृतिः ।

अपि+प्राप्तौ सक० "स्वमपीतो भवतीति स्वपितीत्याह ते" श्रुतिः "एतु नद्यः सरस्वतीमपियन्ति सस्रोतसः" याज० क्षये सक० अव्ययः अपीतिः "अपीतौ दर्शनात्" "स्वाम्यवात्" पा० सू०

अभि-आभिमुख्येन गतौ सक० "देहान् यथेप्समभ्येति स्वित्वेनां मानुषीं तनुम्" अभि+उप+आभिमुख्येन प्राप्तौ सक० ।

"व्यतीतकालस्तदहमभ्युपेतः" रघुः "यद्येतत्सान्तर्गणितं तदिहाभ्युपैति" उद्भटः स्वीकारे "अभ्युपेत्य चक्षुरूपाम्" स्मृतिः
अव–अवगमने, ज्ञाने, सक० "अवैमि ते सारमतः खलु त्वाम्" कुमा०। अधोगतौ अक०। अनु+अव+सन्ततसम्बन्धे। अन्वायः। वि+अव+व्यवधाने "गार्हपत्यादवनीयौ न व्येयात्" कात्या० १,८,२३। "नान्तरा यज्ञाङ्गानि व्येयात्" श्रुतिः "अनुमत्या व्येयात्" स्मृतिः स्त्रीपुंसयोः संभोगार्थव्यापारे व्यवायः। सम्+अव+सम्यक्सम्बन्धे अयुतसिद्धरूपसंबन्धे। स चावयवावयविनोः, गुणगुणिनोः, क्रियाक्रियावतोः जातिव्यक्तेश्च सम्बन्धः। समवेतः समवायः। "संयुक्तसमवायतः तत्रापि समवेतानाम्" भाषा०। सम्बन्धमात्रे च "एते ह वै रात्रौ सर्वाण्यवयवानि" शत०ब्रा०११,१,७,४,सांख्ये,"सेनायां समवेतायां सैन्यास्ते" अमरः "धर्मक्षेत्रे कुरुक्षेत्रे समवेतायुयुत्सवः" गीता।
आ–आगमने सक०। "प्रज्ञानाय समितिमेयाय" "सत्त्वस्थाय" तस्माल्लोकात् पुनरेत्यस्मै लोकाय" आ० उ० "यूनः स्थविरआयति" मनुः अनु+आ+सम्यगमने सक०। अभि+आ+अध्यागमने आभिमुख्येनागतौ "सङ्गमभ्येहि सततं प्राप्तुमैश्वर्यमिद्धिमत्तमाम्" भा०अनु० २६अ०। उद्+आ+उद्गमने। उप+आ। समीपागमने। प्रति+आ+प्रत्यागमने "प्रत्यायत्यां रात्रौ" शत०ब्रा०२, ३,४,२। "नैनमेते रश्मयः प्रत्यायन्ति" शत०ब्रा०१४, ८,६,२।
उद्–उद्गतौ अक०। "उदेति सविता ताम्रस्ताम्र एवास्तमेति च" सा०द०। उदयः। उत्क्रमणे अक०। उदेति ह वै सर्वेभ्यः प्राणेभ्य एवं वेद" छा०उ०। अभि+उद्+आभिमुख्येनोद्गतौ "किञ्चिदभ्युदिते रवौ" भ०त०पु०। प्रति+उद् प्रत्युद्यानेन गतौ "प्रत्युदियाय पार्वती" कुमा० सम्+उद् सम्यगुदये "यद्वादित्यः सहस्रांशुः वै तमः पूर्वं व्यपोहति" भा०व० २०६अ०। "एकक्रियाय सहस्रांशौ क्षणौ युद्धेऽपराजितौ" भा०सभा०१अ०। सांख्ये च सहस्रवः उप+समीपगमने प्राप्तौ च "उपेयुषां मोक्षपथं मनीषिणाम्" माघः "योगी परं स्थानमुपैति दिव्यम्" गीता उपायः दुर+दुर्गमने। [ऋवृदृक्षः त्वम्" भट्टिः
निर्–निर्गमने। "नियदन्वविभूषितम्" दुर्गाध्यानम्। निरगारा–प्रेतभावप्राप्तौ परेतः। पलायने च "यः परैति स जीवति" प्रतिपत्तौ "नैव त्रेयो धार्तराष्ट्राः परैति" भा०वन० ५अ०।
परि–व्याप्तौ सक० परीतः "पवित्रं पर्येषि विश्वतः" ऋ० ७, १०६,१४, परिक्रमणे "प्रदक्षिणमग्निं परीत्य" स्मृ०। परिपाठाम् पर्यायः "जिह्वा पर्येति मे सुखम्" भा० आदि० १५२ अ०। [यन्ति" अथ०१५,१७,८।
अनु+परि+परिपाठ्या अनुगमने "संवत्सर एतदतयोऽनुपरि-
आ+परि अभिमुख्येन व्याप्तौ वि+परि+व्युत्क्रमप्राप्तौ विपर्ययः "विपर्ययन्तौ वा एतावग्निं भवतः" शत० ७,२,१,१५। "विपरीतमतोन्यथा" ज्योति०। "निमित्तानि च पश्यामि विपरीतानि केशव!" गीता
प्र+परलोकगतौ अक० प्रेतः "प्रेत्य संज्ञास्ति" कठो० अपगतौ च "तस्मात्तदाहरणात् प्रैति रसः" छा०उ०। प्रकर्षेण गतौ सक० "प्रयन्ति सर्वबीजानि रोप्यमाणानि चैव हि" भा०व० १६१ अ०।
अभि+प्र+अभिलाषे "कर्मणा यमभिप्रैति स सम्प्रदानम्" पा०अभिप्रायः "अभिप्रेतार्थसिद्धिमङ्गलम्" रघु०।
प्रति+प्रतिगमने "सरस्वतीह्येतवनं प्रतीयुः" "रात्रेः प्रतीयाय गुरोः सकाशम्" रघुः प्रतीयुषा पूर्वदृष्टेन जनेन" भट्टिः। ज्ञाने प्रत्ययः प्रतीतिः। "उच्चावचा जाम-दग्न्यधर्मा श्यामधर्मांश्च तानु विवाहे प्रतीयात्" आश्व० प०"सर्वोऽहमस्मीति प्रत्येति न नाहमस्मीति" "सर्वोलोको नाहमस्मीति प्रतीयात्" भा०भा०"कलहंसमालाः प्रतीयिरे श्रोत्रसुखैर्निनादैः" भट्टिः। विख्यातौ "सोऽयं वटःश्यामइति प्रतीतः" रघुः "तं प्रतीतं स्वधर्मेण" मनुः "चतुर्वर्गफलप्राप्तिर्हि काव्यतः–प्रतीतैव" सा०द० विश्वासे "पतिः प्रतीतः प्रसवोन्मुखीं प्रियाम्" रघुः "बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः" "बलवदपि दूयमानं मन्त्रापयतीव मां हृदयम्" शकु० "ताः स्वचारित्रसदृश्या प्रत्याययन्मैथिली" रघुः।
सम्+प्रति+सम्यग्ज्ञाने निश्चये सम्यग्विश्वासे च। "किं तत्कर्म वेत्युपलब्धसंज्ञाविकल्पयतोऽपि न संप्रतीयुः" भट्टिः।
वि+विगमे करिष्ये "पितरः कामं "व्येतु वोमानसोज्वरः" भा० आ०६६अ० "अनुमानं द्विविधं वीतमवीतञ्च" सा०कौ० "वीतशोकभयो विप्रो ब्रह्मलोके महीयते" "नियतो वीतवत्सरः" मनुः। "वीतशोकभयक्रोधः" गीता।
सम्+सङ्गमे मेलने अक० "आप्यायस्व समेतु ते विश्वतः सोम! वृष्ण्यम्" ऋ०१,९१,१६, "पार्थिवाः सर्वे समीयुस्तत्र भारत!" भा०आ०१८०अ० "राक्षसो हरिसुग्रीवौ समेयाय समीयतुः" "किमर्थो राघवस्तेन समीयुर्मानुषैः सह" रामा०

अभि+सम् आभिमुख्येन सम्यग्गतौ सक० "तं जातमभिसयन्ति देवाः" अथ ११,५,२, णिचि अबोधने गमादेशः। गमयति ते अजीगमत् त बोधनेन प्रत्या(प)यति ते प्रत्यापिपत् त-प्रत्यापयत् त। सनि अबोधने गमादेशःजिगमिषति बोधे तु प्रतीषिषति। उपसर्गस्यावर्णात् परस्य गुण भावेन एत्वं प्राप्तौ वृद्धिरेकादेशः। अवैति अवैमि उपैति।

इरण्ड पु०न० इदि-रण् ष्ट०। उक्ताकर्षके संदंशाकारे पदार्थे "अर्वनमिरण्डकाभ्यां परिगृह्णाति असौ वा आदित्य एषोऽग्निरहोरात्रे इरण्डे अस्तं तदादित्यमहोरात्राभ्यां परिगृह्णाति तस्मादेषोऽहोरात्राभ्यां परिगृहीतः यद्वेवैनमिरण्डाभ्यां परिगृह्णाति असौ वा आदित्य एषो अग्निरिमा उभयलोकाविरण्डे अस्तं तदादित्यमाभ्यां लोकाभ्यां परिगृह्णाति तस्मादेष आभ्यां लोकाभ्यां परिगृहीतः परिमण्डले भवतः परिमण्डलौ ह्रीमौ लोकौ भीङ्गे विदतो तस्मो एवोक्तोऽयो अनतिदाहाय" शत० ब्रा० ६,७,१,२५,२६, "परिमण्डलाभ्यामिरण्डाभ्यामुखां परिगृह्णाति" कात्या०१६, ५,२,१, "उखा याभ्यां मृद्यते तौ इरण्डौ" कर्क०।

इत् त्रि०एति गच्छति इ-क्विप्। गत्वरे व्याकरणोक्ते प्रक्रियाकालोच्चारिते प्रयोगकालेऽस्थायिनि वर्णभेदे यथा तिप् सिप् इत्यादौ पकारादि ते च "उपदेशेऽजनुनासिक इत्" "हलन्त्यम्" "न विभक्तौ तुस्माः" "आदिर्ञिटुडवः" "यः प्रत्ययस्य" "चुटू" "लशकृतद्धिते" पा०सूत्रेषु सापवादं दर्शिताः तस्य लोप" इत्यनेन तस्य प्रयोगेऽदर्शनञ्च विहितम् "आदिरन्त्येन सहेता" पा० १ अनन्तरार्थे ४अवधारणार्थे च अव्य० "यदेदन्ता अदड्ढन्त पूर्व आदिद्" यजु०१७,२५,, "आत् इत् इति च्छेदः इत् एवार्थे" वेददी० "उपोपेन्द्र मघवन्! भूय इत्तु" यजु०२,२४, इत् एवार्थे" वेददी० ५इत्थमित्यर्थे च "सचाह्नित्वेत्तानि वरुणस्य व्रतानि" यजु०४,२०, इदित्थंभूतमित्यमित्यर्थे" वेददी०

इत त्रि०इ-क्त।गते "वनितानितया रजनीव्रधूः" रघुः भावे क्त।१गतौ "तदितादिवादथो पयः" शत०ब्रा०६,२,१,१२। २ज्ञाने च न०। "वीतमवीतञ्चेति" सां०कौ०।

इतर त्रि०इत्रा कामेन तीर्यते तॄ-अप् तरति प्रचाद्यच् वा। नीचे पामरे "इतरस्य परिभूय ज्ञानम्, अविगणय्य तपःप्रभावम्, उत्कूल्य मान्धात्रीं, मन्त्रबलेन जड़ीकृतः" कादं०। इयतेऽनेन इतः विशेषकं राति रा क। २भेदान्तरे। "इतरतापगतानि यथेच्छया वितर तानि मह्यं चतुरानन!" उद्भटः। "यत्र हि द्वैतमिव भवति तत्रेतर इतरम् पश्यति" श्रुतिः। "ते यतध्वं परं गत्वा विजयायेतराय वा" भा०आ०१०अ०। वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः" या० स्मृ० "इतराणि च रक्षांसि प्रेतवानरकोटिषु" "इतरोदहने स्वकर्मणाम्" रघुः "तमिमं कुरु दक्षिणेतरम्" कुमा०। अस्य सर्वनाम कार्य्यम्। इतरे इतरस्मै इतरस्मात् इत्यादि। "विजयायेतराय वै इत्यादि छान्दसम् न तत्कार्य्यम्। वर्णाश्रमेतराणामित्यत्र बहुव्रीहिः तेन न सर्वनामकार्य्यम्। एवं "परं सर्वेतरे भुजे" रघुश्लोकेऽपि बहुव्रीहिः। तसिल् इतरतः। "जन्माद्यस्य यतोऽन्वया दितरतश्चार्थेष्वभिज्ञः स्वराट्" भाग०। त्राल् इतरथा "एवं देवेतरथा मानुषे" शत०ब्रा ६ ८ १,८, इतरेण निर्वृत्तम् संकलादि०अञ्। ऐतरः। इतरनिर्वृत्ते त्रि० इतरस्या पत्यम् शुभा० ढक्। ऐतरेयःतदपत्ये पुंस्त्री।

इतरेतर त्रि०इतर+द्वित्वं समासवद्भावश्च। अन्योन्यशब्दार्थे। "स्त्रीनपुंसकयोरुत्तरपदस्थायाविभक्तेरात्माव वा वक्तव्यः" वार्त्ति० इतरेतराम् इतरेतरं वा इमे ब्राह्मण्यौ वृषले वा भोजयतः "सि०कौ० समासवद्भावात् ङीत्तिमाले पुंभावः इतरेतरेण "दलद्वये टाबभावः स्त्रीत्वे चाङ्विरङ्खमोः। समासे सोरलुक्चेति सिद्धं बाह्वलकान्त्वयमित्युक्तं काश्यं तेन स्त्रीत्वे इतरेतरमित्येव। "इतरेषां तु वर्णानामिति रेतरकाम्यया" मनुः। "यथा नाभिचरेतां तौ वियुक्ता वितरेतरम्" मनुः। परमतदादिवत् सर्वनामकार्य्यम्। किन्तु नाद्धुड इति भेदः "व्यूहावुभौ तावितरेतरस्मात्" रघुः

इतरेतरयोगः पु०इतरेतरस्य योगः अन्वयः। प्रत्येकप्राधान्येन सर्वेषामन्वये। तदर्थे हि द्वन्द्वसमास इष्यते सचानेकवत् प्रत्येकप्राधान्यात्। धवश्च खदिरश्च इति वाक्ये हि धवखदिरौ इत्यत्र भिन्नक्रीत्यादि क्रियायां प्रत्येकस्य प्राधान्येनैवान्वयः तथा च एकजातीयक्रियान्वयितावच्छेदक विशिष्टे प्रत्येकान्वयबोधकत्वे इतरेतर योगाख्यः द्वन्द्वः संहतिप्राधान्ये तु समाहारद्वन्द्वः इति भेदः। २परस्परसम्बन्धे च।

इतरेतराश्रय पु० इतरेतरमाश्रयति आ+श्रि-अच्। अन्योन्याश्रये तर्कदोषभेदे अन्योन्याश्रय शब्दे २७७पृष्ठे विवृतिः।

इतरेद्युस् अव्य० इतरस्मिन्नह्नि इतर+एद्युस्। इतरदिवसे इत्यर्थे।

इतरेतर अव्य०। इतर द्वित्वम्। अनियतदिग्भागादौ।

"इतश्चेतश्च विचरन् तस्मिन् मुनिवराश्रमे" देवीभा०।

इतस्ततस् अव्य० इदम्+तसिल् इदादेशः। १अस्मादित्यर्थे "इतश्च दैत्यः प्राग्ग्रीवोनैत एवार्हति चवम्" कुमा०। २अस्मिन्नित्यर्थे च। "इतोनिषेदेति विसृष्टभूमिः" कुमा०। "प्रयुक्तमप्यस्त्रमितो वृथा स्यात्" रघुः।

इति अव्य० इण-क्तिच्। १हेतौ, २प्रकाशने, ३निदर्शने, ४प्रकारे, ५अनुकर्षे, ६समाप्तौ, ७प्रकरणे, ८स्वरूपे, ९सान्निध्ये, १०विवक्षानियमे, ११मते, १२प्रत्यये, १३अवधारणे, १४आस्थायाम्, १५परामर्शे, १६मानने, १७इत्यर्थे, १८प्रकर्षे, १९उपक्रमे च। तत्र स्वरूपद्योतकता त्रिधा शब्दस्वरूपद्योतकता प्रातिपदिकार्थद्योतकता वाक्यार्थद्योतकता चेति भेदात्। तत्र शब्दस्वरूपद्योतकत्वे तद्योगे न प्रथमा। "कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते" पुरा० "अतएव गतित्वाद्भूसत्तायामितोऽथम्" भर्तृहरिः "रामरामेति रामेति कूजन्तं मधुरं वचः" रामा० "रामेति रामभद्रेति रामचन्द्रेति वा जपन्" रामरक्षास्तम्। प्रातिपदिकार्थद्योतकत्वे प्रथमा। "जवस्त्विवानिलस्यारिः पुरस्तात् शरीरिति विभावितातिम्। विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः" माघः। "इगन्तश्च इत्युदाहृतः" भट्टिः। "वदन्त्यपर्ष इति च तं पुराविदः" कुमा०। वाक्यार्थद्योतकत्वे न प्रथमा निपातेनाभिहिते प्रतिपादिकार्थे एव प्रथमाविधानात् वाक्यस्य च शब्दा लक्षणया वा एकार्थबोधकत्वाभावेन प्रातिपदिकत्वाभावात् "भूसत्तायामितोऽथम्" भर्तृ० "श्रुतार्थस्य परित्यागादश्रुतार्थस्य कल्पनात्। प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदोषिका" मीमांसाका०। तत्र हेतौ "इतोव धारासमधीर्थं नेयः" 'इति स्म सा काश्यपेन लेखितम्' नैष०। प्रकारे "इति मदमदनाभ्यां रागिणः स्खटरागाः" माघः प्रकाशार्थे इतिहरि इत्यादौ अव्ययी०इदमर्थे "विरोधिसिद्धमितिकर्त्तुसद्यतम्" प्रकरणे इतिकृत्यमितिकर्त्तव्यम्। इतिवृत्तम्। भावे क्तिन्। २०मतौ २१ज्ञाने च स्त्री "प्रायोवीप्सापदप्र चतुष्प्रदिर्त्यै" ऋ० १,१२४,१"। २२ऋषिभेदे पु०।

इतिक त्रि० इतं गमनमस्यास्य ठन्। गतिमति ततः नडा० गोत्रापत्ये फक्। ऐतिकायनः तद्गोत्रापत्ये पुंस्त्री

इतिकथ त्रि० इति इत्थं कथा यस्य। अर्थमूल्यवाक्यप्रयोक्तरि अयद्धेयवचने।

इतिकथा स्त्री इति इत्थं कथा। अर्थमूल्यवाक्ये भेदि०।

इतिकर्त्तव्य त्रि० इति इत्थं कर्त्तव्यम्। इत्थंकर्त्तव्ये परिपाटीयुक्ते कर्तव्ये। "एवं सर्वविधायेदमितिकर्त्तव्यमात्मनः" मनुः "संदिदेशेतिकर्त्तव्यम् वज्रवेगमसाधिनौ" भा०व०२८५अ०"स च व्यवहारः कीदृशः कतिविधः कथञ्चेतिकर्त्तव्यताकलापोनाभिहितः" इति मिता०"कथयन्निति कर्त्तव्यं व्याकाङ्क्षे करवामहे" भा० आ० १९५ अ०। "धर्मे प्रमीयमाणे हि वेदेन करणात्मना। इतिकर्त्तव्यताभागं मीमांसा पूरयिष्यति" पुरा० इतिकृत्यादयोऽप्यत्र। "तेषु तेष्वितिकृत्यं हि पुरुषस्य समाप्यते" मनुः। "ततोऽर्जुनश्च कृष्णश्च विनिश्चित्येतिकृत्यताम्" भा० आ०२२० अ०।

इतिवृत्त न० इत्थं वृत्तम्। इदंप्रकारान्विते चरिते। "इतिवृत्तं नरेन्द्राणामृषीणाञ्च महात्मनाम्" भा० आ०२अ० उपचारात् तज्ज्ञापके २पुराणादौ च। "ममेतिवृत्तं किल नेयमद्भुतम्" रामा०। "दूरानुवर्त्तिनि स्यात् तस्य प्रासङ्गिकेतिवृत्ते तु" सा०द०।

इतिश पु० ऋषिभेदे। तस्य गोत्रापत्यम् नडा० फक्। ऐतिशायनस्तद्गोत्रापत्ये पुंस्त्री।

इतिह अव्य० इति एवं ह किल वृद्धः। उपदेशपरम्परायाम् यद्यपि वृद्धे यत्र वृद्धुपदेशपरम्परैव न तु केनापि वृद्धा तथा कथितम्। इति तत्र प्रसिद्धिमात्रता "इति ह स्माचुर्वृद्धा" सा०कौ०।

इतिहास पु० इतिह पारम्पर्योपदेश आस्तेऽस्मिन् आस-आधारेघञ्। इति०। "धर्मार्थकाममोक्षाणामुपदेशसमन्वितम्। पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते" इत्यलङ्कारलक्षणे पुराद्वृत्तप्रकाशके भारतादिग्रन्थे। "इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्" दक्षः "स्वाध्यायं श्रावयेत् पित्र्ये धर्मशास्त्राणि चैव हि। आख्यानानीतिहासांश्च पुराणानि खिलानि च" मनुः। "वाकोवाक्येतिहासपुराणः पञ्चमोवेदानां वेदः" छा०उ०। "इतिहासोत्तमादस्माज् जायन्ते कविबुद्धयः। पङ्गव्य इव भूतेभ्योलोकबंधविधयस्त्रयः। भारतस्येतिहासस्य पुण्यां ग्रन्थार्थसंयुताम्। संस्कारोपगतां ब्राह्मीं नानाशास्त्रोपबृंहिताम्" भा०आ०१अ०इत्युक्ते, भारतस्येतिहासरूपत्वम्। "इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्" श्रुतिः। २अन्यस्मिन् पुराद्वृत्ते स च भारते ग्रन्थिम-

ऋदो "अत्राप्युदाहरन्तीममितिहासं पुरातनम्" इत्यनेन बहुत्वे दर्शितः । "नरमेऽहनि तार्क्ष्यो वै पक्षिसत्त्रस्य वर्त्तयति विसस्तानोमान्यासत इति वर्त्तयति ब्रह्मचारिण इत्युपसमानीताः स्युस्तानुपदिशतीतिहासोवेदः सोयमितीतिहासमाचक्षीत" आश्व० श्रौ० वेदभागविशेषस्यैवेतिहासरूपत्वसङ्गम् । तच्च पुराकल्पप्रतिपादकत्वात् तथेति बोध्यम् तदभिप्रायेणैव "वाकोवाक्येतिहासपुराण इति" छान्दोग्याक्यमिति द्रष्टव्यम् । पौराणिकमतसिद्धे ३ऐतिह्ये प्रमाणे च ।

इतिहासपुराण न० इतिहासावेदकं पुराणम् । आथर्वणवेदभागभेदे समा० द्व० २इतिहासपुराणसमाहारे च ।

इत्कट पु० इतं गन्तारं जनं कटति आवृणोति खगिखास्यफलेन कट-आवरणे अच् ऐत० (ओकड़ा) इक्षे तत्समीपगन्तुर्क्षादौ हि तत्फलसंयोगात् गतिनिरोध इति लोकप्रसिद्धम् ।

इत्किला स्त्री किल-औकार्थे क किलः इत् गतः किलः यस्मात् । रोचनायाम् गन्धद्रव्यभेदे शब्दच० ।

इत्थम् अव्य० इदम्+थम् । १इदंप्रकारे इत्थम्भावः इत्थम्भूतः । २अनेन प्रकारेणेत्यर्थे च "इत्थमसंविलपन्तमसञ्जत्" नैष० । "इत्थं रतेः किमपि भूतमदृश्यरूपम्" कुमा० "इत्थं व्रतं धारयतः प्रजार्थम्" रघु० । "इत्थमाराध्यमानोऽपि" कुमा० "इत्थं क्षितीशेन वसिष्ठधेनुः" रघु० । "सिद्धाप्रयोगे एतच्छिन् उपपदे शसञ्च । इत्थङ्कारम् इत्थम्भावमित्यादि ।

इत्थम्भाव पु० इत्थं भावः प्राप्तिः भू-प्राप्तौ घञ् । कस्यचित् प्रकारस्य प्राप्तौ ।

इत्थम्भूत त्रि० इत्थं कञ्चित् प्रकारं भूतः प्राप्तः भू-कर्त्तरि क्त । कञ्चित् प्रकारं प्राप्ते "इत्थम्भूतलक्षणे" लक्षणेत्थम्भूताख्यानभागधेयेष्विति" च पा० ।

इत्थशाल पु० इत्थं शल-अच् पृ० । नील० ता० उक्ते योगभेदे तल्लक्षणं यथा "सोमेऽस्यभागैर्बहुभागसन्दे ऽभ्यस्थे निजं तेज उपाददीत खादित्यशालोऽयमथो त्रिविप्रालिप्राह्वीक्षोनोयदि पूर्णमेतत् । सोमोयदा भान्यबलस्थितः सन् सन्दे ऽभ्यभस्थे निदधाति तेजः । खादित्यशालोयमथैष दोग्धांशकाधिकांशैरिह सन्दृष्टे । तदा भविष्यद्वणनोयमित्यशालं त्रिधैं सुयोगमाहुः" । "लग्नेशकार्य्याधिपयोर्यदैव योगस्तदा कार्य्यसुखानि सन्तः । लग्नेशकार्य्याधिपतत्सहायाःयत्र स्वरन्ध्रं पतिसौम्यदृष्टे । तदा बलाढ्यं सबलानि योगं विशेषतः क्षेहदशातिशन्तः । सर्व्वादिसुस्थानगतः शुभैर्चेत् शुतैश्चितोभूद्धनिताप्यशाले । तदा शुभं प्राग्भवत् सुपूर्णमये भविष्यत्यपवर्त्तते च । व्यत्यस्तमस्थादिपरीतभावेऽप्येवं चितोऽनिष्टयहं प्रपद्यः । अभूच्छुभं प्राग्शुभं त्विदानीं संयातुकामे न च भाविवाच्यम्" नील० ता० । "प्राग्भिक्षवालोऽपर इन्दुवारस्तेत्थशालोऽपर ईसराफः" "वेदैरमेयेन कृतेत्थशालः" नील० ता० कम्बूलादौ विशेषः ततच्छब्दे वक्ष्यते अस्यर्थे इनि । इत्थशाली तादृशयोगवति त्रिके ।

इत्था अव्य० इदम्+थाल्-इदादेशः । १इत्थमित्यर्थे । "क इत्था वेद यत्र सः" कठो० "इन्द्रमित्थागिरोमम" ऋ० १०२,४,२ । २सत्ये निरु० इदम्+थम् डादेशः । ३इदंप्रकारेत्यर्थे । "इत्थाधिया यज्ञवन्तः" ऋ० ३,२७,६,

इत्य त्रि० इण-कर्म्मणि क्यप् । गम्ये । "इत्यः शिष्येण गुरुवत्" भट्टिः । "इत्येऽनभ्यासस्थ" वार्त्ति० सुम् अन्यभ्यासमित्यः दूरतः परिहर्त्तव्यः" सि० कौ० । भावे क्यप् । २गतौ स्त्री । "सेनस्येत्यामन्वित्रि तस्करस्य" यजु० १२,२१ "इत्यां गतिम्" वेददी० ।

इत्यवा पु० इत्यार्थं कायति शब्दायते कै-क इत्यायां गतौ राजभवनप्रवेशे अधिकृतोवा कन् ह्रस्वः । प्रतीहारा-धिकारिणि द्वारपाले । [ऐत्वरी ।

इत्वन् त्रि० इण्-क्वनिप् । गन्तरि स्त्रियां ङीप् वनोरच ।

इत्वर त्रि० इण्-क्वरप् । १पथिके, २नीचे, ३क्रूरकर्म्मणि च । ४षण्ढे पु० । स्त्रियां क्वरत्वात् ङीप् । सा चाभिसारिकायां ५स्त्रियाञ्च "सपत्नीवरं स्वा जगत्" ऋ० १०,८८,४ । [इच्छब्दे उ० ।

इद् अव्य० इदि क्विप् वा० नलोपः । इत् इत्यस्यार्थे एवकारार्थे

इद ऐश्वर्य्ये इदित् भ्वा० पर० अक० सेट् । इन्दति ऐन्दीत् इन्दाम्-बभूव आस चकार । इन्द्रः ।

इदंयुग न० कर्म्म० । एतद्युगे । इदंयुगे साधुः प्रतियुगा० खञ् । ऐदंयुगीनः एतद्युगसाधौ त्रि० ।

इदङ्कार्य्या स्त्री इदं कार्य्यं यस्याः । १इदानीन्तनभावायां शब्दच० २एतद्रूपकार्य्यान्विते त्रि० ।

इदन्तन त्रि० अस्मिन् काले भवः नि० ख्युन् तट् च । इदानीन्तने "शक्तिर्हीनैरिदन्तनैः" इह० स्मृतिः ।

इदन्ता स्त्री इदमो भावः । इदंशब्दार्थभावे अनुखादिना दर्शनयोग्यतायाम् "अनिर्देश्यमिति" श्रुतिपदव्याख्याने "इदन्तयानिर्देश्यमवाच्यम्" भाष्यम् ।

इदन्द्र पु० इदं पश्यति दृश-वा० ड्रुन् ऐत० । परमात्मनि तस्य निरुक्तैरेतरेये दर्शिता यथा "स एतमेव पुरुषं ब्रह्म

ततममपश्यदिदमदर्शमिति तस्मादिदन्द्रोनाम इदन्द्रो-ह्वै नामैनमेवंविदमिन्द्रं सन्तमित्याचक्षते परोक्षेण, परोक्ष-प्रिया हि देवाः" ऐत०उ०विदतश्चैतद्ब्राह्मे। "यस्मादिदमि-न्द्रोव वत्साच्चादपरोक्षादुभच्छ सर्व्वान्तरमपश्यत्तपरोक्षेण। तस्मादिदं पश्यतीति इदन्द्रो नाम परमात्मा। इदन्द्रो-ह्वै नाम प्रसिद्धो लोक ईश्वरः। तमेवं इदन्द्रम्। इदमितिपरोक्षाभिधानेनाचक्षते ब्रह्मविदः संव्यवहारार्थं पूज्यतमत्वात् प्रत्यक्षनामग्रहणभयात्। तथा हि परो-क्षप्रियाः परोक्षनामग्रहणप्रिया एव स्त्रोव हि यस्माद्देवाः किंतु सर्व्वदेवानामपि देवो महेश्वरः" विदतमेतदानन्दगि-रिणा "तस्मादिन्द्रनामप्रसिद्धापि तस्य ज्ञानस्याऽपरोक्षत्वमिति वक्तुं तस्मादिन्द्रइति वाक्यम् तद्व्याचष्टे। यस्मादिति। यस्मात् सर्वान्तरं ब्रह्म इदमित्यपरोक्षं प्रत्यगात्मत्वेवाऽपश्यत्-दित्यन्वयः। कथमिदन्द्रनामत्वमत आह। इदन्द्रो ह वा इति। ननिन्द्रो मायाभिरित्यादादिन्द्रप्रसिद्धेर्मे त्विदन्द्र इत्यत आह। तमेवमिति। इदन्द्रमेव खतः परोक्ष-त्वार्थम् अक्षरलोपेनेन्द्र इत्याऽऽहरित्यर्थः। परोक्षोक्तेः प्रयोजनमाह। पूज्येति। पूज्यानां परोक्षतयैव नाम वक्तव्यमित्यत्र प्रमाणमाह। तथा हीति। देवा इति पूज्या इत्यर्थः। अत एवाचार्य्या उपाध्याया इत्युक्तावेव प्रीतिं कुर्व्वन्ति लोके, न तु विष्णुमित्रादिनामग्रहण इति भावः। नाम्नः परोक्षत्वं नाम यथार्थनाम्नो रूपा-न्तरकरणेन स्वरूपाच्छादनमिति ज्ञेयम्"।

इदम् त्रि०इदि-कमि नलोपश्च। समीपवर्त्तिनि दृश्ये रुचुद्धो-ध्यापिते "इदमस्तु सन्निकृष्टं समीपवर्त्ति चैतदोरूपम्। अदसस्तु विप्रकृष्टम् तदिति परोक्षे विजानीयात्" इत्युक्तेः स-न्निकृष्टवाचित्यमस्य अतएव "अस्येति प्रत्यक्षादिसन्निधापितस्य जगत इदमादिदशः" भा०भा०उक्तम्। सन्निकृष्टत्वञ्च बुद्धि-मात्रेण, तच्च ज्ञानलक्षणया स्मरणादिना च भवति तेन "कौसुदीयं विरच्यते" इत्यत्र भाविन्यामपि कौमुद्यां बुद्धा सन्निधापितत्वेन इदंशब्दप्रयोगः। अतएव तदादेः बुद्धिस्थ-त्वोपलक्षितधर्म्मावच्छिन्ने शक्तिरिति नैयायिकादयः। तादर्थ्यपरत्वे एवास्य सर्व्वनामता शब्दस्वरूपपरत्वे तु न। "इ-दमोऽन्यादेशे" पा०। "इदमो निर्देशः" भा०भा०"इदमस्तु सन्नि-कृष्टम्" "अयमुदयति वितनोर्दूरभ्रमजालः" माघः। "अ-यमञ्चति पञ्चशरानुचरः" सा०द०टी०। "इदं किलाव्याजम-नोहरं वपुः" शकु०। "अयमसौ भगवानुत पाण्डवः" किरा०। "इमं विवस्वते योगम्" गीता "इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम्" मनुः। अन्या-देये एनादेशः द्वितीयाटोस्तु "एनं युवानं पतिं वः" इति इशोत्सर्गमन्तः'। "यद्येनमुच्यसि तदा कतरोवरस्ते" नैष०। "अनेन यूना सह पार्थिवेन" रघुः। अनूक्तौ एनेन। एवम् अनयोः एनयोः। सर्व्वनामकार्य्यम्। इमे अमी अस्मात् एतस्मात् अस्मिन् स्त्रियाम् इयम्। "इयं महेन्द्रप्रभृतीनधिश्रियः" कुमा० "इतीयं वैदिकी श्रुतिः" मनुः। अस्मैः अस्माः आसाम्। अत्राकच्। इमकौ इमकेत्यादि प्रत्यक्षविषयतयाकच्छब्दार्थेऽस्य क्वचित् वृत्तिः "अयं जनः प्रष्टुमनास्तपोधने!" "जनोऽयमुच्चैः पदलङ्घनोत्सुकः" "इतः स दैत्यः प्राग्भ्रीनेतएवार्हति क्षयम्" कुमा०। इदृश। यस्य इदम्यात् इदा। दानीम् इदानीम्। तस् अत्र तसिल् इतः। अयम् अव्यय-मपि। तेन श्रुत्व तट्च। इदन्तनः। मयट् इदमयः। स्त्रियां ङीप्। वति इदावान् स्त्रियाम् ङीप् इदवती।

इदा अव्य०इदम् दाच् वेदे नि०। इदानीमित्यर्थे "इदाहिते के विषतः" ऋ०६,२१ "इदा इदानीमिति भा०। इत् आ दत्व०। सम्यगवधारणादौ तद्युक्ते इत्येवंरूपे। इदावत्सरः। तस्य निरुक्तिश्चच्छब्दे वक्ष्यते।

इदानीम् अव्य०इदम्-दानीम् इश् च। सम्प्रत्यर्थे। "इदा-नीमावयोर्मध्ये सरित्सागरभूधराः" उद्भटः। "सा चे-दानीं प्रचेतसः" रघुः "इदानीञ्चेन्नातः क्षिपसि शमनाय-त्येव द तदा" जगन्नाथः। भवार्थे श्रुत्व तट्च। इदानीन्तनः वर्त्तमानकालभवे त्रि०स्त्रियां ङीप्। "वासना चेदानीन्तनी प्राक्तनी वेति" सा०द०।

इदावत्सर पु० इदाचिह्नितः वत्सरः। वत्सरपञ्चकान्त-र्गते वत्सरभेदे तदानयनप्रकारो यथा "यस्माद्यात् पञ्च-भिःपर्व्वात् समाद्याद्यासु वत्सराः। संवत्सरोदानुपूर्व्व्याच्चे तथोदापूर्व्वका मताः" ज्यो० तथा च एकाङ्के शिष्टे संवत्सरः, द्व्यङ्के परिवत्सरः, त्र्यङ्के इदावत्सरः, चतुरङ्के अनुवत्सरः, पञ्चाङ्के शिष्टे उदावत्सरः। तेषां फलन्तु भवि०त०विष्णु-ध०। "संवत्सरे तथा दानं तिलस्य तु महाफलम्। परि-पूर्व्वे तथा दानं यवानाञ्च द्विजोत्तम!। इदापूर्व्वेऽथव-स्त्राणां धान्यानाञ्चानुपूर्व्वके। उदासंवत्सरे दानं रजतस्य महाफलम्" उदावत्सरस्थाने इदुवत्सरोऽपि "परिवत्स-रोऽसावदावत्सरोऽसावित्सरोऽसि" राज०नु० "नमोमण्डलं सह द्यावापृथिव्योर्मण्डलाभ्यां कात्स्न्येन सह भुङ्क्ते तं कालं संवत्सरं परिवत्सरमिदावत्सरमनुवत्सरमुद्-

ऋरमिति भानोर्मान्द्यशैघ्र्यसमागतिभिः समाननन्ति" भाग०५ स्क०। "मण्डलाभ्यां चन्द्रार्कमण्डलाभ्यां सह भुङ्क्तीति तेन यदा सूर्यस्य शुक्लप्रतिपदि संक्रान्तिर्भवति तदा सौरचान्द्रयोर्मासयोर्युगपदुपक्रमो भवति स संवत्सरः। ततः सौरमानेन वर्षे षट् दिनानि वर्द्धन्ते चान्द्रमानेन च षट् क्षुपन्तीति द्वादशदिनव्यवधानादुभयोरप्यब्दावौ भवति एवं पञ्च वर्षाणि गच्छन्ति तत्र द्वौ मलमासौ भवतः। ततः पुनः यदः संवत्सरः" श्रीधरः। तथा च समकालारब्धसौरचान्द्रमासयुक्तोवत्सरःसंवत्सरः चान्द्रसौरमासयोरारम्भे समत्वपरिवर्ज्जितमासारब्धोवत्सरः परिवत्सरः। इदु इत्थं परिवत्, आरम्भे समत्वपरिवर्ज्जनवत्त्वेऽपि अन्ते तयोः समत्वप्रागतिमान् वत्सरः इदावत्सरः। अनुगतः सौरसंक्रान्तिं चान्द्रोमासो यत्र तादृशोवत्सरः अनुवत्सरः। अस्य वर्षस्यासंक्रान्तिमासस्योन्यतया संक्रान्त्यनुगतचान्द्रमास घटितत्वेन तथात्वम्। उत्क्रान्तो रविसंक्रान्तिं चन्द्रमासोऽत्र पुनः समकालारम्भागतिमांश योवत्सरः स उदावत्सरः। अस्यैव इदर्थत्वं चान्द्रसौरयोर्मासयोरारम्भे समकालप्राप्त्यैव। एवमेषामन्वर्थकता द्रष्टव्या। पञ्चमवर्षे मलमासद्वयपातकथनमपि "पञ्चमे पञ्चमे वर्षे द्वौ मासावधिमासकौ। तेषां कालातिरेकेण यज्ञाधामतिचारतः" एतच्च प्रायिकं "द्वात्रिंशद्भिर्गतैर्मासैः दिनैः षोड़शभिस्तथा। घटिकानां चतुष्केण पतति ह्यधिमासकः" काल० धृतसिद्धान्तवाक्यात् तेन प्रागुक्तभारतवाक्यं "मलमासः स विज्ञेयोमासे त्रिंशत्तमे भवेदिति" काठकसूत्रवाक्यञ्च ज्योतिःशास्त्रोक्तमध्यमानमाश्रित्यैव। सिद्धान्तवाक्यं तु स्फुटमानमाश्रित्येत्यनयोरविरोधः। एवमेव माधवादयः

इदुवत्सर पु० इदु-उ वत्सरः। इदावत्सरे। "इदुवत्सराय परिवत्सराय संवत्सराय" अथ०६,५५,१।

इदृ न० इन्ध-भावे क्त। १आतमे, २दीप्तौ, ३आश्चर्य्ये। च। कर्त्तरि-क्त। ४दीप्ते ५दग्धे च त्रि०। "समिद्धशरणादीप्ता" भट्टिः। "तमिद्धमाराधयितुं सकर्णकैः" माघः। "इद्धाबोधैरिति" भट्टौ बोधे इदृत्वं सर्वशास्त्रशुच्छ्राद्धीयाहित्वम् यासने इदृत्वमप्रतिहृतत्वम्। "अहो ददासि" भाग०।

इदृा अव्य० इन्ध-धाच् नि०। प्राकाश्ये खरादिः "समिद्धमिद्धेव"।

इध्म न० ध्यतेऽग्निरनेन इन्ध-मक्। १काष्ठे "यस्य इध्मं जतरत् सिध्मदानः" ऋ०४,२,६, "इध्मं काष्ठभारम्" भा०। २यज्ञियसमिद्भेदे पु०। तत्प्रमाणकरणप्रकारादि कात्या० श्रौ० दर्शितम्। "अयुग्धात्रूनि यूनानि" सू०। "इध्मबन्धनबर्हिर्बन्धनार्थानि यूनानि संनह्यनानि रज्जवोऽयुग्धात्रूनि भवन्ति। धातवस्त्रयस्त्रिंशद्भेदाः अयुजो विषमा एकत्रिंशत्पञ्चसप्तनवादिविषमसंख्या धातवोभेषां तान्ययुग्धात्रूनि। तथा चापस्तम्बः "त्रिधातु पञ्चधातु वा शुल्बं करोतीति" शुल्बं रज्जुमित्यर्थः। "पञ्चविंशतिकुशमयानि यूनानि" इति यज्ञपार्श्वे। तथा "समूलानामूलानां वा दर्भाणां पूर्ववत् शुल्बं कृत्वोदग्यं निधायेति" इध्मप्रस्तावे। मानवे च "शुल्बं प्रतिदधात्ययुग्धातु प्रदक्षिणमिति"। तित्तिरिस्तूक्ते। "अथत्रिरन्वाहितं शुल्बं कृत्वेति" कर्क० बर्हिषो बन्धन प्रकारमाह। "प्रागग्रे यूनउदग्यं बर्हिराचिनोति" सू०। प्रागग्रे यूने प्रागग्रे संनह्ने बन्धनार्थायां रज्जौ उदग्यं बर्हिराचिनोति बन्धनार्थं स्थापयति" कर्क०। अथेध्मबन्धनस्य प्रकारमाह। "उदग्ये प्रागग्रमिध्मम्" सू०। आचिनोतीत्यनुवर्तते उदग्ये यूने संनह्ने प्रागग्रमिध्माचिनोति बन्धनार्थं निदधाति" कर्क०। "प्रत्यग्यन्वीनवगूहति" सू०। इध्मबर्हिर्बन्धनार्थानां यूनां यन्वीन् प्रत्यगवगूहति यूने गाढं बद्ध्वा यूनस्थाग्रमूले संकल्प्य प्रदक्षिणमावेष्ट्य इध्मबर्हिषोरग्रभागे प्रोतयित्वा पश्चादिति तयोर्मूलभागे अवगूहति प्रेरयति प्रत्यक्शब्देन इध्मबर्हिषोःपश्चाद्भागो मूलभाग इत्युच्यते दिग्वाचिनोबर्हिष्युदग्ये निहिते असम्भवात्। काठके "यन्थिं कृत्वा पुरस्तात् प्रत्यञ्चमपकर्षतीति"। मानवे "शुल्बस्यान्तौ समायम्य "पूषा ते यन्थिमिति" प्रदक्षिणमावेष्टयति पश्चात् प्रत्यञ्चमपकर्षतीति" तैत्तिरीयेऽपि "पश्चात्प्राञ्चमपगूहतीति"। आपस्तम्बः "पुरस्तात् प्रत्यञ्चं यन्थिमपगूहति पश्चाद्वा प्राञ्चमिति"। "अष्टादशेध्मं परिधिदक्षाणाम्" सू०। "परिधीनां दक्षाः पलाशखदिरविकङ्कतादयः परिधिदक्षाः तेषां परिधिदक्षाणां सम्बन्धिनः अष्टादशसंख्याकाःकर्मेध्मं कुर्य्युः। मानवे "समूलैर्दर्भैः पालाशं खादिरं रौहितकं वाष्टादशदार्विध्मं संनह्यति त्रींश्च परिधीन् योवत्रियदक्षसक्षेति"। काठके "अष्टादशदारु शुल्बं समानदक्षस्य संनह्यति विंशतिमिष्टौ पशुबन्धे चेति"। अतएव सामिधेनीविहितो दक्षः इद्विर्भवति ह्रासे च ह्रासो न भवति पित्र्यादौ, तथाहापस्तम्बः "सामिधेनीविहितो दक्षानि विवर्धन्ते प्रकृतितो ह्रसमानास्तु प्रकृतिवदिति"। उपसद्यु तु "मात्रावदिध्मा

बर्हिरिति" वचनात् ह्रासः। "इध्मप्रमाणं चारत्निरिति सङ्गिः प्रकीर्तितमिति" कात्यायनः(कर्मप्रदीपे) तथा "समित्-पवित्रं वेदं च कुर्यात् प्रादेशसंमितम्। इध्मस्तु द्विगुणः कार्य्यः परिधिस्त्रिगुणः स्मृतः" "खादिरं प्रादेश इध्मो वा द्विगुणः परिधिस्तत" इति। "एकविंशति वा" सू०। अथ वा एकविंशतिमेकविंशतिसंख्याकाष्ठकमिध्मं कुर्यात् तथा चापस्तम्बः "खादिरं पालाशं वैकविंशतिदारुकमिध्मं करोति"। "ततः परिधीनेके" सू०। एके आचार्या-स्तत एकविंशतिसंख्यकाष्ठकादिध्मात्त्रीणि काष्ठान्यरत्नि पालाशेषोपादाय परिधीन् परिदधति "तद्वैकइध्मस्यैवैतान् परिधीन् परिदधतीति" श्रुतेः। अथ वैकमेवेदं सूत्रम् "एकविंशति वा ततः परिधीनेके" इति एके आचार्या विकल्पेन एकविंशतिसंख्यकाष्ठमिध्मं कुर्वन्ति तत इति तस्मादेवैकविंशतिकाष्ठकेध्मात् परिधीन् परिदधति च। एतदेव युक्ततरम् आपस्तम्बसूत्रे एकविंशतिकाष्ठानां विभागदर्शनात्। तथाचाहापस्तम्बः "खादिरं पालाशं वैक-विंशतिदारुकमिध्मं करोति त्रयः परिधयः पालाशकाष्ठकाः खादिरौदुम्बरविल्वरोहितकविकङ्कतानां वे वा यज्ञिया इत्ता आर्द्राः शुष्का वा सत्वक्काः,स्थविष्ठो मध्यमोऽणी-यान्द्राघीयान्दक्षिणार्धो द्वौ दक्षिण उत्तरार्धो द्वे, आधार समिधावनुयाज समिदेकविंशतिः समूलानामसमूलानां वा दर्भाणां पूर्ववच्छुल्वं कृत्वोदगग्रं निधावेति"। अथ एवंविधमेकोयमतम् यदेकविंशतिकाष्ठकः इध्मः। तस्मिन् पक्षे चेध्मादेव त्रीणि काष्ठान्यादाय परिधिपरि-धानमिति। बर्हिरनन्तरमिध्मबर्हिषोर्भूमौ निधानं न कार्यम् आपस्तम्बसूत्रे अनधोनिदधातीत्युक्तत्वात्। तद्वैक इध्मस्यैवैतान् परिधीन् परिदधतीत्यत्र हरिस्वामिनः तदु तथा न कुर्यादनवक्लृप्ता हि तस्यैते भवन्तीति बाह्मणात्तैः परिधिभिराहुतिं च भवितव्यम्। इध्मस्तु शुष्कः इध्मत्वादेव द्विप्रादेशश्च तेन ते इध्मैकदेशभूताः परिधित्वावासमर्थाः स्रुः तदिदमाह अभ्याधानाय होतः शुष्को ह्यादावाधेयः यावत्खरं पालाशमेनीये खरे सम्भवन्तीत्यभिप्रायः यस्तु परिधिवद्वृक्षा आहरति सोऽध्वर्यवेऽनीयादग्निखरादति-रिक्तमेवाहरति अग्निवेष्टनं च दारुभयात्र शुल्वमिति तदेषावक्लृप्ता इति" कात्या० १,३,१४,२१।

"अपरमितं प्रणयनीयं त्रियूनम्" सू०। "प्रणयनस्थायं प्रण-यनीयः तं प्रणयनीयनाग्निप्रणयनार्थमिध्मपरिमितमपरि-मितकाष्ठं त्रियूनं तिसृभिः संनहनरज्जुभिर्वेष्टितं कुर्यात् त्रीणि यूनानि बन्धनानि यस्य स त्रियूनः तं त्रियूनमिति। अपरिमितत्वं च प्रागुक्तेध्मकाष्ठसंख्यापेक्षयातिशये-नाधिकसंख्यकाष्ठकत्वम्। तेन चतुर्विंशतिसामिधेनीको महाटकापशुस्तत्र सप्तविंशतिः काष्ठानि भवन्ति। ततश्च प्रणयनीये ततो ऽप्यधिकानि अष्टाविंशतिप्रभृतीनि इष्टकासंख्यानि काष्ठानि भवन्ति" कर्क०।

छन्दोगप० "प्रादेशद्वयमिध्मस्य प्रमाणं परिकीर्त्तितम्। एवंमिताः स्रुवेवेह समिधः सर्व्वकर्म्मसु। समिधोऽष्टा-दशेध्मस्य प्रवदन्ति मनीषिणः। दर्शे च पौर्णमासे च क्रियास्त-न्त्रासु विंशतिः। समिदादिषु होमेषु मन्त्रदैवतवर्जिता। पुरस्ताज्जोपरिष्टाच्च इध्मनार्थं समिद्भवेत्। इध्मोऽप्ये-वार्द्धमाचार्य्यैर्हविराहुतिषु स्मृतः। यत्र चास्य निवृत्तिः-स्यात्तत् स्रुवेकरणमाचक्ष्महम्। अङ्गहोमसमित्तन्त्रसोष्मन्त्या-ख्येषु कर्म्मसु। वेषां चैतदुपर्य्युक्तं तेषु तत्सदृशेषु च। अन्वष्टकादिविपदि जन्तूहोमादिकर्म्मणि। सोमाहुतिषु सर्व्वासु नैतेष्विध्मो विधीयते। "इध्मजातीयकाष्ठार्द्धं प्रमाणं मेखलं भवेत्"। "सन्वन्द्भीतिरिध्मभृतिः पक्ष्यकैः" ऋ० ६,२०,१२। "इध्मानां काष्ठानां भृतिः" भा०। तृप्ति-तदेवगणभेदे स च भाग० ४स्क० १अ० दर्शितो यथा "तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिलस्पतिः। इध्मः कविर्विभुः स्वाङ्गः सुदेवो रोचनोहिषट्। तुषिता नाम ते देवा आसन् स्वायम्भुवेऽन्तरे" भाग०।

इध्मजिह्व पु० इध्मं काष्ठं जिह्वेवास्य। वह्नौ।

इध्मवाह पु० सोमासद्रागर्भजाते अगस्त्यपुत्रे ऋषिभेदे "सह-स्रसम्मितः पुत्र एकोऽस्त्यस्तु तपोधन!" इति सोमासद्रया-र्थितोऽगस्त्यस्तस्यां पुत्रमुत्पादयास तस्य नाम दृढस्युरि-ध्मवहनाच्च इध्मवाह इति नामान्तरं तदेतद्भा० व० । ९९। "तत आधाय गर्भन्तमगमत् वनमेव सः" "तस्मिन् वन-गते गर्भोवर्द्धे सप्त शारदान्। सप्तमेऽब्दे गते चाथ प्रा-च्यवत स महोज्वलः। ज्वलदग्निप्रभावेन दृढस्युर्नाम भारत!। साङ्गोपनिषदान् वेदान् जपन्निव महातपाः। तस्य पुत्रोऽभवद्वेदः स तपस्वी महाद्विजः। स बालएव तेजस्वी पितुस्तस्य निदेशने। इध्मानां भारवहनाच्चेध्म-वाहस्ततोऽभवत्"।

इन गतौ तना०पर०सक०सेट्। निरुक्ते इन्वतीति बहुवचनान्त इति केचित् इनोति इनुतः इन्वन्ति इनोसि इन्थः-इनुथः इनुयात् इनोतु इनु इनवानि ऐनोत्। ऐनीत् इवेन। निरुक्ते इन्वति इति एकवचनान्तस्तेन इन्धधातुरेवायमिति

बहवः स च भ्वादि० प० सेट्। इन्धति ऐन्धीत् इन्धामास तद्रूपम्। "ऋधायमाण इन्धसि" ऋ०१,१७६,१।

इन पु० इण-नक्। १ सूर्य्ये, "नन्दतिपङ्क्तिलग्नभवत्रयपुत्रव्यया इनाद्यैपदं स्वोच्चम्" जोत० ता०। २ प्रभौ "न न महीनमहीनपराक्रमम्" रघुः। ३ श्रेष्ठविशेषे च।

इनज्ञ खज्ञ गतौ ज्ञान्दस इकारोपसर्जनः भ्वा०पर०स०नज्ञतद्रूपम् इनज्ञति "दूरेचत्तायज्ञन्त सद्मनं यदिनज्ञत्" ऋ०१,१३२,६, "इनज्ञत् व्याप्नोति खज्ञ गतौ ज्ञान्दसइकारोपसर्जन इति भा० "शुक्रेण गोचिषाद्याभिनज्ञत्, ऋ०१०,४५,७, [इन्द्रे राजनि०।

इनानी स्त्री इनमानयति ज्ञन-णिच्-ल्युण् गौरा०। वटपत्नी

इन्धिहा स्त्री ताजकोक्तायां सुवहायाम्। तदानयनप्रकारादि नील० ता० उक्तम् यथा "खजन्मलग्नात् प्रतिवर्षमेकैकराशिभोगा सुवहा क्रमेण। खजन्मलग्नं रवितप्तयातं शरद्युतं सा भसुखेन्धिहा स्यात्। प्रत्यहं शरलिप्ताभिर्हते सानुपातनः। सार्द्धभंशहृयं मासस्त्र्याब्दः केऽपि स्मरवः। स्वामिसौम्येक्षणात् सौम्यं सुतदृष्ट्या भयं रुजः। भावालोकनसंयोगात् फलमस्या निरूप्यते। वर्षलग्नात् सुखाद्यान्त्यरिपुरन्ध्रेज्यशोभना। पुण्यकर्मायगा स्वाम्यं दत्तेऽन्यलोद्यमाद्धनम्। शत्रुवर्यमानसतुष्टिलाभं प्रतापवृद्धिं नृपतेः प्रसादम्। शरीरपुष्टिं विविधोद्यमांश्च ददाति सौख्यं सुवहा तनुस्था। उत्साहतोऽर्थागमनं यशश्च स्वबन्धुसम्मानसुपाश्रयाच्च। सिताब्रभोगोबलपुष्टिसौख्यं स्यादर्थभावे सुवहा यदाब्दे। पराक्रमाद्वित्तयशःसुखाप्तिः सौन्दर्यसौख्यं द्विजदेवपूजा। सर्वोपकारस्वजनपुष्टिकान्तिर्व्ययाश्रयेन्दुसुवहा तृतीये। शरीरपीड़ा रिपुभीः स्वबन्धैर्मनस्तापनिरुद्यमत्वे। स्यान्दुन्वहायां सुखभावगायां जनापवादाभयदद्विदुःखम्। यदीन्धिहा पञ्चनगाब्दवेधे सद्बुद्धिसौख्यात्मजवित्तलाभः। प्रतापवृद्धिर्विविधाविलासा देवद्विजार्च्चा नृपतिप्रसादः। क्षमत्वमङ्गेषु रिपूदयश्च भयं रुजस्तस्करतो नृपाद्या। कार्य्यार्थनाशो सुवहाऽरिगा चेद् दुर्बुद्धिवृद्धिः स्वजनेऽनुतापः। कलत्रबन्ध्युव्यसनारिभीतिरत्साहभङ्गो धनधर्म्मनाशः। स्मरोपगा चेन्मुवहा तनोः स्याद्रुजा मनोमोहविरुद्धचेष्टा। भयं रिपोस्तस्करतोविनाशो धर्मार्थयोःसुव्यसनागमश्च। स्यात्सुस्थिता चेन्मुवहा नराणां धनव्ययः स्वाङ्गसुखं विदूरे। स्वामित्वमर्थोपगमो नृपेभ्योधर्मोद्भवःपुत्रकलत्रसौख्यम्। देवद्विजार्च्चा परमं यशश्च भाग्योदयो भाग्यगतेन्धिहा स्यात्। नृपप्रसादं च जनोपकारं सत्कर्मसिद्धिं द्विजदेवभक्तिम्। यशोऽभिवृद्धिं विविधार्थलाभं दत्तेऽम्बरस्था सुवहा धनाप्तिम्। यदीन्धिहा लाभगता विलाससौभाग्यनैरुज्यमनःप्रसादाः। भवन्ति राजान्नयतोधनाप्तिः सन्मित्रपुत्राभिसताप्रयश्च। व्ययोऽधिको दुष्टजनैश्च सङ्गोरुजस्तथा विक्रमतोऽप्यसिद्धिः। धर्मार्थहानिर्मुवहा व्ययस्था यदा तदा सज्जनतोऽपि वैरम्। क्रूरैर्दृष्टःचुतहया यो भावो सुवहात्र चेत्। शुभं तद्भावजं नश्येदशुभञ्चापि वर्द्धते। शुभस्वामियुक्तेक्षिता वीर्य्ययुक्सेन्धिहा स्वामिसौख्येशशाली प्रपन्ना। शुभं भावजं पोषयेद्वाशुभं साऽन्यथात्वेऽन्यथा भाव जन्मोविमृश्य। जनुर्लग्नतोऽन्यत्यक्षत्रुबन्धुस्थिताब्दे हता क्रूरखेटैस्तु चेत्। विनश्येत् स यत्नेन्धिहा भाव एवं शुभस्वामिदृष्ट्या न नाशः शुभं च। यदोभयत्रापि हतो भावोनश्येत् स सर्व्वथा। उभयत्र शुभत्वेऽपि भावोऽसौ वर्द्धतेतराम्। वर्षेत्वनिष्टगेहस्था यद्भावे जनुषि स्थिता। क्रूरोपघातात्तं भावं नाशयेत् शुभयुक् शुभा। जनुर्लग्नतस्तुर्य्यगा सौम्ययुक्तावदेवेषे पितुर्द्रव्यलाभं विधत्ते। नृपाद्गीतिदा पापयुक्तातिकष्टाष्टमादावपीत्थं विमृश्याभिधेयम्। यस्मिन् भावे स्वामिसौम्येक्षिता सा भावोजन्मन्येव यत्तस्य वृद्धिः। एवं पार्थनाथ उक्तस्तु तस्येत्थं वीर्य्याद्वर्षतः सौख्यमेव। यदीन्धिहा सूर्य्यभक्षे युतेक्षिता सूर्य्येण राज्यं नृपसङ्गमञ्च। दत्ते सुखानां परभागमाप्तिं स्थानान्तरस्था फलदा हयेति। कुजेन युक्ता कुजभे कुजेन दृष्टा च पित्तोष्णरुजन्तनोति। यस्याभिधातं रुधिरप्रकोपं सौरेक्षिता सौरभक्षे विशेषात्। चन्द्रेण युक्तेन्दुभक्षेऽथ दृष्टेन्दुनापि वा धर्मयशोऽभिवृद्धिः। नैरुज्यसन्तोषमतिप्रवृद्धिं ददाति धामेज्यतोऽतिदुःखम्। बुधेन शुक्रेण युतेक्षितापि तद्वीक्षितापि वा स्त्रीमतिलाभसौख्यम्। धर्मं यशश्चाशुभं विधत्ते कष्टं च धामेज्ययोगतः स्यात्। युतेक्षिता वा गुरुणा गुरोर्भे वदीन्धिहा पुत्रकलत्रसौख्यम्। ददाति हेमाम्बररत्नकोषं शुभेत्थशास्त्रादिह राज्यलाभः। अनेर्गृहे तेन युतेक्षितापि यदीन्धिहा घातरुजं विधत्ते। मानक्षयं वह्निभयं धनस्य हानिं च जीवेक्षणतः शुभाप्तिम्। तमोसुखे चेन्मुवहा धनाप्तिर्यशःसुखं धर्मसमृद्धितश्च। रितेज्ययोगेक्षणतः पदाप्तिः सुवर्णरत्नाम्बरलाभयश्च। भोग्या राज्ञोर्ववास्तस्य सुखं पृष्ठं गता खवः। ततः सप्तमभं पृच्छं विमृश्येति फलं वदेत्। तत्पृष्ठभागेन शुभा यदा स्यात्तत्पृच्छगापद्विपुभीतिदुःखम्। धामेक्षाद्यर्क्षसुखस्य हानिर्वे ज्ञन्मनोत्थं सहवित्तनाशः। वे जन्म-

काले बलिनोऽवदकाले चेद्दुर्बलास्तैरशुभं समाने। विपर्य्यये पूर्व्वमनिष्टसूचकं तुल्यं फलं स्यादुभयत्र साम्ये। यदेऽष्टमेऽन्त्ये भुवि चेन्निहेगोऽस्तगोऽथ वक्रोऽशुभदृष्टयुक्तः। क्रूरार्त्तयास्तगतश्च भव्योन स्याद्गुजं यच्छति वित्तनाशम्। यद्यष्टमेशेन युतोऽवदृष्टःक्षुतास्यदृष्टो न शुभस्तदापि। योगद्वये स्वाश्रिधनं यदैकोयोगस्तदा स्तल्पसमत्वमाहुः। सुयवहारतत्पतिर्वापि जन्मनोचितयुक् शुभैः। वर्षारम्भे शुभं दत्तेऽवदेचेदन्येऽन्यथा शुभम्"।

इन्द्रम्बर इदि-क्विप् इन्द्, ऐश्वर्य्यान्वितमम्बरमिव नीलवर्णत्वात्। नीलोत्पले" शब्दमा०।

इन्दि (न्दी)स्त्री इदि-इन्। लक्ष्म्याम् वा ङीप् तत्रैव।

इन्दिन्दिर पु० इन्दि-किरच् नि०। भ्रमरे त्रिका०।

इन्दिरा स्त्री इदि-किरच्। लक्ष्म्याम्"इन्दिरा लोकमाता च लक्ष्मीस्तवः। [वल्लभः २पद्मे ६त०। ३लक्ष्मीस्थे।

इन्दिरामन्दिर न० इन्दिरायामन्दिरमिव। १विष्णौ राज०

इन्दिरालय पु०६त०। १पद्मे २नीलोपले च। क्लीवत्वमपि।

इन्दिवर न०इन्दिर्लक्ष्मीस्तस्यावरं वरणीयम्। नीलोत्पले वा ङीप् इन्दीवरमप्यत्र। "इन्दीवरदलश्यामसिन्दिरानन्दवर्द्धनम्" विष्णुस्तवः "इन्दीवरैरतुखचितान्तरेव" रघुः २उत्पलमात्रे च"नीलेन्दीवरलोचनत्वयुताम्"तन्त्र०[३तद्युक्तलतायाञ्च।

इन्दीवरिणी स्त्री इन्दीवर+समूहे इनि। १उत्पलसमूहादौ,

इन्दीवरी स्त्री इन्दीं लक्ष्मीं ह्वयति ह्व-अच् गौरा० ङीष्। शतमूल्याम्। मेदि० इन्द्रचिर्भक्तां टाबन्तः राजनि०।

इन्दीवार पु० इन्द्यालक्ष्म्यावारो वरणमत्र। नीलोत्पले।

इन्द्र पु० उनत्ति चन्द्रिकया भुवं क्लिन्नां करोति उन्द-र आदेरिच्च। १चन्द्रे, "दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव"रघुः"तस्याः प्रसन्नेन्दुमुखप्रसादम्" मनोदयैः पूरइवेन्दुदर्शनात्"रघुः "रामस्येन्दोरिव श्रियः"रघुः "न नर्म्मसाचिव्यमकारि नेन्द्रा""चिप्राइवेन्दोः सरुचोऽधिवेलम्"माघः"करैरिन्दोरन्तश्चरित इव संभिन्नमुकुलः" वेणी० चक्रतकरैः सकलतापनिवारणेनास्य इन्द्रत्वम्। २तद्वर्त्तमाने मृगशिरोनक्षत्रे "चन्द्रा हरीच्छेन्दुकरान्यमैत्रे दीपिति ३एकसंख्यायुक्ते, नवेन्दुवेदेषुद्धताग्रसंख्या" सि०शि०। ४कर्पूरे च।

अयं गगनमण्डले राशिचक्रे यहाणां मध्ये सर्व्वेषामधस्तात् स्थितः यथाह सू० सि०। "मन्दारेज्यभृगुसूत सूर्य्यशुक्रेन्दुजेन्दवः। परिभ्रमन्त्यधोऽधस्थाः"। तस्य कक्षामानमुक्तम्। सि० शि० यथा "साद्रीन्दुनोमतुरङ्गाब्धिमितार्ककक्षा (४३२।४८७। ३०) चान्द्री सङ्ख्या गुणिता जिनरामसंख्या"(३२४०००)। एतन्मितयोजनानि इन्दुकक्षामानम्। अनुक्षणं गच्छतां यहाणां राशिचक्रे इष्टसमये क्रीडार्थांशेऽवस्थितिरिति ज्ञानाय यहर्गणेन तस्य स्फुटी करणप्रकारादि तत्रैव दर्शितं यथा।"अब्धेब्धिबाहुगजकृच्छरगोऽङ्कपक्षाः (२५८८८८५०) कक्षां स्वयन्ति गणका भगणस्य चेमाम्। "अत्र रविकक्षातो भकक्षा षष्टि गुणा, एवं भकक्षायाः षष्ट्यंशोरविकक्षा" प्रभि० "कल्पोद्भवैः खितिदिनैर्गगनस्य कक्षा भक्षा भवेद्दिनगतिर्गगनेचरस्य। "पादोनगोऽब्धृतिभूमितयोजनानि (११-८५८४०) खेटा व्रजन्त्यनुदिनं निजवर्त्मनीमे" सि०शि० "यदि कुदिनैर्नक्षत्रमितयोजनानि गच्छन्ति तदैकेन किमिति फलं दिनगतियोजनानि। तानि च स्फुटत्वेन तावत् पादोनगोऽब्धृतिभूमितानि स्युः" प्रभि०। यहानयनमाह। "अर्हगणात् कक्षिनवाङ्कनिघ्नात् (६६२१) नवेन्दुवेदेषुहताग्र (२५४१६) लब्धा। अर्हगहीनो गोऽब्धृतीन्दु (११ ८५६) निघ्नो विवर्जितः स्फुर्गतयोजनानि" खयाखया तानि पृथक् च कक्षया हृतानि वा स्फुर्भगणादिकायहाः" सि० शि०। "अर्हगणे भूनेत्रनवनन्द ६६२१ गुणे नवगजशिखिवाणाग्निभिः २५४११ भक्ते यल्लब्धं तेन विवर्जितः कार्य्यः। कः ?। नन्देन्द्रिवहतीन्दु११८ गुणोऽर्हगणः। एवं गतयोजनानि स्युः तेभ्यः पृथक् पृथक् खया खया कक्षया भाजितेभ्यो भगणादिका यहाः लभ्यन्ते अत्रोपपत्तिः। दिनगतियोजनैरर्हगणे गतयोजनानि भवन्तीति सुगमम्। अत्र सुखार्थं गोऽब्धृतीन्दुभिः११८५६ संपूर्णैरर्हगणो गुणितः। सोऽधिको जातः। यदधिकं तच्छोध्यम्। तस्याधिकस्य ज्ञानार्थमुपायः। परमोऽर्हगणः कुदिनहृल्लब्धः। तेन गुणकेन गुण्यः। एवं गोऽब्धृतीन्दुनिघ्नः सन् खकक्षातोऽधिको भवति। तस्मात् खकक्षां विशोध्य शेषेणानुपातः। यदि कुदिनहृल्लब्धेनार्हगणेनैतावदधिकं भवति तदिष्टेनार्हगणेन किमिति। अत्र कुदिनानां तस्य शेषस्य च पञ्चपञ्चयुगवेदैरयुतगुणितैः ४४५५०००रपवर्तते सति शेषस्थाने कक्षिनवाङ्का उत्तमाः कुदिनस्थाने नन्देन्दुवेदेषुहताग्राः। एवं त्रैराशिकेन यल्लभ्यते तेन स्थूलगतिगुणितेऽर्हगणे वर्जिते गतयोजनानि भवन्ति। सर्वेषां यहाणां तान्येव गतेस्तुल्यत्वात्। अथ यहार्धमनुपातः। यदि कक्षाहृल्लब्धेनार्ध-

तयोजनैरेको भगणस्तदैभिः किमिति फलं गतभगणाद्याः सर्वे ग्रहा भवन्तीत्युपपन्नम्" प्रमिता०। "ग्रहस्य कर्णैव हि तद्भपातयोः पृथक् च कल्पात्र तदोयसिद्धये। अर्कस्य कर्णैव सितत्रयोः सा त्रेया तयोरानयनार्थमेव। उक्ते तयोर्ये चलतद्भकर्णे तत्रैव तौ च भ्रमतोऽर्कगत्या" सि० शि०। "अत्रोच्चस्य पातस्य च या कक्षा गच्छति सा तयोरानयनार्थमेव कल्पा। अन्यथा या ग्रहस्य कक्षा सैव तयोरपि। यतो ग्रहकक्षाया उच्चप्रदेशस्योच्चव्यपदेशः। यत्र च विमण्डलेन सह संपातस्तस्य प्रदेशस्य पातसंज्ञेति गोले सम्यक् प्रतिपादितमस्ति। तथा बुधशुक्रयोरत्र ये अर्ककक्षातुल्ये कर्णे आगच्छतस्ते तयोरानयनार्थमेव। किन्तु तयोर्ये चलकर्णे तत्रैव तौ च भ्रमतः परमकेंगत्या। एतदुक्तं भवति भूमध्यादर्कं प्रति नीतं सूत्रं यत्र चलकक्षायां लगति तत्र बुधो यत्र शुक्रच चलकक्षायां लगति तत्र शुक्रो भ्रमतीत्यर्थः" प्रमि०।

अत्र गगनकक्षा च कल्पार्हगणः। यथाहार्यभट्टः। "योयत्र भ्रमति खगस्तदृक्षं भवति तस्य कक्षाख्यम्। अम्बरकक्षा कल्पार्हगणनामा भवेद्ध्रुवगतिः"। स्वस्वकक्षायां स्थितानामपि ग्रहाणां नीचोच्चस्थानस्थितिवशतः परिधिभेदादिकं भवतीति ग्रहशब्दे वक्ष्यते। अत्र बुधशुक्रकर्णयोः रविकक्षातुल्यत्वं यदुक्तं तन्मध्यकक्षया फलानयनार्थम्। श्रीपतिना तु ग्रहान्तराणां कक्षास्थितिरुक्ता यथा। "अष्टाङ्कनवसप्तगजाः (८।१९।९) क्षितिनन्दनस्य, रुद्रेषदन्तकृतखेन्दुमिताश्च (१०४३२११) जैवी। रूपाश्विनाग युगखैलगुणेन्दुबाणाः (५।१२७४८२।) खाग्न्यङ्कसागर रसोत्कृतयः (२६९४९३०) सितस्य। भूधराहिनगनागरसर्त्तुरुद्राधराश्वियमिनः (१२७६९८७८७) शनिकक्षा। एतच्च खगोलशब्दे विस्तरेण वक्ष्यते।

इन्दुश्च जलमयः सूर्यसम्पर्कात् उज्ज्वलितो भवति तेन च दिने दिने यथा यथा शुक्ले पक्षे रविवियोगभेदात्तेजः सम्पर्कविशेषस्तथा तथा वर्द्धते क्षये तु रविमण्डलसन्निकृष्टतया क्रमशो दिने दिने तत्तेजःसम्पर्कविशेषाभावस्तेन क्रमेण दिने दिने क्षय इत्यादिकमभ्युक्तं सि० शि०। "तरणिकिरणसङ्गादेष पीयूषपिण्डो दिनकरदिशि चन्द्रश्चन्द्रिकाभिश्चकास्ति। तदितरदिशि बालाकुन्तलश्यामलश्री र्घट इव निजमूर्त्तिच्छायया वातपस्थः। सूर्यादधःस्थस्य विधोरधःस्थमर्धं शबलं सकलाऽसितं स्यात्। दर्शेऽथ भार्कान्तरितस्य शुक्लं तत् पौर्णमासां परिवर्त्तनेन। कक्षाचतुर्थे तरणेर्हि चन्द्रःकर्णान्तरे तिर्यगितो यतोऽज्ञात्। पादोनषट्काद्द (८५।४५) लवान्तरेऽतो दलं शबलस्य दलस्य शुक्लम्। उपचितसुपयाति शौक्ल्यमिन्दोरुभयत इनं व्रजतश्च मेचकत्वम्। जलमयजलजस्य गोलकत्वात् प्रभवति तीक्ष्णविषाणरूपताश्च। यद्याप्योदक् तपनशशिनोरन्तरं सोऽथ वाऽधः कोटिस्तूर्ध्वाधरमपि तयोर्यच्च तिर्यक् स कर्णः। दोर्मूलेऽर्कः शशिदिशि भुजोऽन्याच्च कोटिस्तदर्धे चन्द्रः कर्णो रविदिगनया दीयते तेन शौक्ल्यम्"।

"प्राग्वद्भुक्तिं रसरपार्श्वे चन्द्रकक्षां रविकक्षां च विलिख्य तल्लोर्ध्वरेखां तिर्यग्रेखां च कृत्वा चन्द्रकक्षोर्ध्वरेखासंपाते चन्द्रबिम्बं विलिख्येदं दर्शयेत्। तिर्यग्रेखाया उपरि चन्द्रकक्षाव्यासार्धमितेऽन्तरेऽन्यां तिर्यग्रेखां कुर्यात्। सा रेखा प्रत्यग्रविकक्षायां यत्र लग्ना तत्र स्थित एवार्कः ऊर्ध्वरेखावच्छिन्नचन्द्रबिम्बार्धं पश्चिमतः शुक्लं भवति। तस्यार्धमधस्तनं मनुष्यास्यम्। तत्स्थोऽर्कः व्यर्केन्दुसपादषड्भागोनं (८५।४५) राशित्रयं भवति। एतावत्येव व्यर्केन्दुभुजे बिम्बार्धं पश्चिमं पूर्वं वा शुक्लं भवितुमर्हति प्रमि०। "धाम्ना धामनिधेरयं जलमयो धत्ते सुधादीधितिः सद्यःक्षत्कृष्णालकन्दविशदच्छायां विवस्वद्दिशि। हृत्यै धर्मभृषेः करैर्घट इवान्यस्मिन् विभागे पुनर्बालाकुन्तलकालतां कलयति स्वच्छां तनोश्छायया" श्रीपतिः। "भानुश्चेत् प्रतिबिम्बितो जलमये शीतांशुगोले दिवा निस्तेजा निशि सुप्रभः कथमयो किं सूर्यबिम्बासमः। गोलार्धं रविणोज्ज्वलं च सकलं न स्यात् तदाग्ने यथा मासार्धैरखिलश्यतेति गदितात् ज्ञानाब्धयः पृच्छति" ज्ञानराजः।

ग्रह० सं० शौक्ल्यादि प्रकारादि प्रदर्शं तज्ज्ञानादिफलञ्च यथा "निजमधःस्थखेन्दोर्भाभिर्भानोः सितं भवत्यूर्द्धम्। स्वच्छायया न्यदसितं कृष्णखेवातपस्थस्य। सलिलमये शशिनि रवेर्दीधितयो मूर्च्छिताश्च मेनैशम्। क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्थान्तः। त्यजतो ऽर्कतलं शशिनः पश्चादवलम्बते यथा शौक्ल्यम्। दिनकरवशात्तयेन्दोः प्रकाशते ऽधःप्रभृत्युदयः। प्रतिदिवसमेवमर्कात् स्थानविशेषेण शौक्ल्यपरिवृद्धिः। भवति शशिनोऽपरार्द्धे पश्चाद्भागे घटस्येव। ऐन्द्रस्य शीतकिरणो मूलाषाढाद्वयस्य वा वातः। वाय्वेन, बीजजलचरकाननश्च वह्निभवदत्र। दक्षिणपार्श्वेन गतः शशी विशाखानुराधयोः पापः। मध्येन तु प्रशस्तः पित्रृक्ष विशाखयोश्चापि। षड्नागतानि पौष्णाद् द्वादश रौद्राच्च मध्ययोगानि। ज्येष्ठाद्यानि

नवक्षोणखुडुपतिनातोत्थ युज्यन्ते । उच्चतमीषच्छृङ्गं नौसंस्थाना विशालता चोक्ता । नाविकपीडा तस्मिन् भवति शिवं सर्वलोकस्य । अधोन्नते च लाङ्गलमिति पीड़ा तदुपजीविनां तस्मिन् । प्रीतिश्च निर्निमित्तं मनुजपतीनां सुभिक्षं च । दक्षिणविषाणमर्धोन्नतं यदा दुष्टलाङ्गलाख्यं तत् । पाखण्डनरेश्वरनिधनक्षुद्योगकरं बलानां च । समगतिनि सुभिक्षक्षेमदृष्टयः प्रथमदिवससदृशाः स्युः । दण्डवदुदिते पीड़ा गवां रूपक्षोपदण्डो ऽत्र । कार्मुकरूपे युद्धानि यत्र ह ज्या ततो जयस्तेषाम् । स्थानं युगमिति वाप्योत्तरायतं भूमिकम्पाय । युगमेव वाप्यकोट्यां किञ्चिन्नुन्नं स पर्व्वशावीति । विनिहन्ति सार्थवाहान् दृष्टेव विनिपातं कुर्यात् । आयुच्छ्रायादेकं यदि शशिनोऽवाङ्मुखं भवेच्छृङ्गम् । आवर्जितमिव सुभिक्षकारि तद्दोषनाशापि । अव्युच्छिन्ना रेखा समन्ततो मण्डला च कुण्डाख्यम् । अस्मिन्नाखुलिकानां स्थानत्यागो नरपतीनाम् । प्रोक्तस्थानाभावादुदगुन्नः सस्यदृद्धिदृष्टिकरः । दक्षिणतुङ्गश्चन्द्रो दुर्भिक्षभयाय निर्दिष्टः । शृङ्गेणैकेनेन्दुं विलीनमथवाप्यवाङ्मुखमशृङ्गम् । सम्पूर्णं चाभिनवं दृष्ट्वैको जीविताद्भयं पश्येत् । संस्थानविधिः कथितो रूपाख्यस्याद्भवन्ति चन्द्रमसः । खलोदुर्भिक्षकरो महान् सुभिक्षायङ्कः प्रोक्तः । मध्यतनुर्व्याख्यः क्षुद्भयदः सम्भ्रमाय राज्ञां च । चन्द्रो वृद्धरूपः क्षेमसुभिक्षावहो भवति । क्षेयो विशालमूर्तिर्नरपतिलक्ष्मीविवृद्धये चन्द्रः । स्थूलः सुभिक्षकारी प्रियधान्यकरस्तु तनुमूर्तिः । प्रत्यन्तान् कुन्तपांश्च हन्युडुपतिः शृङ्गे कृशेनाश्रिते, यस्त्वन्नुन्नयकद्वयेन, शशिनेनादृष्टिदुर्भिक्षकृत् ! श्वेतान् हन्ति नृपान्महेन्द्रगुरुणा, शुक्लेन चाल्पानृपान्, शुक्ले वाप्यमिदं फलं शशिकृतं कृष्णे यथोक्तागमम् । भिन्नः सितेन मगधान् यवनान् पुलिन्दान् नेपालभद्रिमरुकच्छसुराष्ट्रमद्रान् । पाञ्चालकैकयकुलूतकपूरुवादान् हन्याद्बहूंश्च नरजानपि सप्त मासान् । गान्धारसौवीरकखिन्नुकोरान् धान्यानि शैलान्द्रविड़ाधिपांश्च । द्विजांश्च मासान्दश शीतरश्मिः सन्नायवेद्वाक्पतिना विभिन्नः । उद्युक्तान् सह वाह्लैर्नरपतींस्त्रैगर्तकान्मालवान् कौलिन्दान् मणिमुक्तवान्यश्च शिबीनायोध्यकान् पार्थिवान् । हन्यात् कौरवमत्स्यशुक्लधिषतोन् राजन्यसुस्थानपि प्रालेयांशुरहोग्रहे तनुगते षण्मासमर्यादया । यौधेयान् सचिवान् सकौरव्यान् प्राग्ज्योतिषांश्च चार्जुनायनान् । हन्यादर्कजभिन्नखण्डहरः शीतांशुरेवमासपीड़या । मगधान्कुरूंश्च पीड़यन्वेद्वरणायाश्च तटं यशाङ्कजः । अपरत्र क्षतं युगं वदेद्यदि भित्त्वा शशिनं विनिर्गतः । चेद्भारोन्मुखभिन्नविनाशी शीतांशुः शिखिना यदि भिन्नः । कुर्यादायुधजोविविनाशं चौराणामधिकेन च पीड़ाम् । उल्कया यदा शशी यस्त एव हन्यते । हन्यते तदा नृपो यस्य जन्मनि स्थितः । भस्मनिभः पुरुषो ऽरुणमूर्तिः शीतकरः किरणैः परिक्षीणः । श्यावतनुः स्फुटितः स्फुरणो वा क्षुत्समरामयचौरभयाय । प्रालेयकुन्दकुसुदस्फटिकावदातो यत्रादिशद्रिसुतया परिरब्ध चन्द्रः । उच्चैःकृतो निशि भविष्यति मे शिवाय योद्यते स भविता जगतः शिवाय । यदि कुमुदखण्डहारगौरस्त्रिविनियमात् क्षयमेति वर्धते वा । अविकृतगतिमण्डलांशुयोगी भवति नृणां विजयाय शीतरश्मिः । शुक्ले पक्षे सप्तदशे प्रहर्षि ब्रह्मावर्तं यातिहृष्टं प्रजाश्च । होने हानिसुखता हृस्वतायां क्षये सर्वं तत्फलं व्यत्ययेन" । "भूमध्यात् चन्द्रादेरुच्छ्रितियोजनमपि" सि० शि० उक्तं यथा "नभनगाग्निनवाष्टरसा(ई८८३७७) रवेः रसरसेषु महीभुमिता ५१५६६ विधोः । निगदितावनिमध्यत उच्छ्रितिः श्रुतिरियं किल योजनसंख्यया" "अत्रोपपत्तिः कक्षाध्याये चन्द्रार्कयोः कक्षे कथिते किन्तु व्यासौ नोक्तौ तौ त्रैराशिकेनानेयौ । यदि भनन्दाग्निमिते ३८२७ परिधेः खबाणसूर्य्यमितोऽर्कव्यासः (लीलावत्युक्तदिशा आनीतः तदा) ४३२१४८७ । ३० मितायाः सूर्यकलायाः, ३२४००० मितचन्द्रकलाया वा कीदृश इत्यनुपातेन व्यास आनेयः तदर्द्धमेव श्रुतिः । इयमेव भूमध्यात् चन्द्रार्कयोः उच्छ्रितिः प्रमि०" इयं मध्यश्रुतिः, उच्चनीचयोरन्तरं यथा "मन्दश्रुतिर्हीन्दोः श्रुतिवत् प्रसाध्या" सि० शि० उच्चनीचकक्षापरिधिना उच्छ्रितिः साध्या त्रैराशिकेनानेया" प्रमि० युक्तञ्चेदम् यतोयां स्वस्वकक्षाया सञ्चारिस्थानविशेषाश्रित तत्तोच्चस्थानस्थितौ परिधेराधिक्यं नीचस्थाने तन्यूनता मध्ये मध्यता इति तदनुसारेण परिधिवैलक्षण्यात् उच्छ्रितिवैलक्षण्यमिति । एवमन्येषां यतोयामपि स्वस्वकक्षाभिरनुपातेन व्यासानीय तदर्द्धं मध्य श्रुतिरित्यादावगन्तव्यम् । अनेदं सूक्ष्मदृशीक्षणीयम् अत्र भूमध्यादिति भूमिव्यासार्द्धमध्यादित्येवार्थकं न तु भूपृष्ठमध्यात् इत्यर्थकम् । तथा च भूव्यासार्द्धस्य तत्तदुच्छ्रितेर्वर्जने भूपृष्ठादुच्छ्रितिर्भवति भूपृष्ठात्तु उक्तः उच्छ्रायोनैव युज्यते यतोयां कक्षारूपपरिधेर्व्यासार्द्धस्य भूगोलार्द्धैक्यान्तत्वेन तदर्द्धपर्य्यन्तमेव तदुत्तव्यासार्द्धत्वौचित्यादिति

एवं सौरागमादिभिः इन्दुमण्डलस्य सूर्य्यमण्डलादधः स्थित्वे सिद्धे" भाग० ५ स्क०। "एवं चन्द्रमा अर्कगभस्तिभ्य उपरिष्टात् लक्षयोजनत उपलभ्यमानोऽर्कस्य संवत्सरभुक्तिं, पक्षाभ्यां मासभुक्तिं, सपादर्क्षाभ्यां दिनेनैव पञ्चभुक्तिसञ्चारो द्रुततरगमनोभुङ्क्ते अथापूर्य्यमाणाभिरपक्षीयमाणाभिश्च कलाभिः पितृधामह्नोरात्राणि पूर्व्वापरपक्षाभ्यां वितन्वन् सर्व्वजीवनिवहप्राणो जीवश्च एकमेकं नक्षत्रं त्रिंशता मुहूर्त्तैर्भुङ्क्ते य एष षोड़शकलः पुरुषो भगवान्मनोमयोऽन्नमयोऽमृतमयोदेवपितृमनुष्यपशुपक्षिसरीसृपवीरुधां प्राणाप्यायनशीलत्वात् सर्व्वमय इति वर्ण्यते"। अत्र अर्कगभस्तिभ्य इत्यत्र हेतौ पञ्चमी अन्वयशश्च उपलभ्यमान इत्यत्र। यथा च सूर्य्यकिरणैरेव चन्द्रस्योपलब्धिस्तच्च प्रागुक्तवचनैः समर्थितम्। न तु अपादाने पञ्चमी उपरिष्टात् इत्यस्यान्वयिनी। तथात्वे सौरागमविरोधः स्यात्। उपरिष्टात् इत्यत्र भूमेरित्यध्याहार्य्यं लक्षयोजनमिति बहुयोजनपरमिति न काचिदनुपपत्तिः। एवमन्यान्यपि पौराणिकवचनानि व्याख्यातव्यानि। इन्दुपक्षत्वेन यथा पितृप्रादिनस्य सम्पादनं तदप्युक्तम्" सि० शि०। "विधुर्द्वभागे पितरो वसन्तः स्वधासुधादोधितिमामनन्ति। पश्यन्ति तेऽर्कं निजमक्षकोष्ठे दर्शे यतोऽस्मात् दृढं तदेषाम्। भाद्रान्तत्वात्र विधोरधःस्थं तस्मान्निशीथः खलु पौर्णमास्याम्। ऊर्ध्वे रविः पक्षदलेऽभ्युदेति शुक्लेऽसमेत्यस्तत एव सिद्धम्" अतोऽधःस्थत्वमर्कस्य पितृप्रेक्षया बोध्यम् तद्विषयमेव वा पौराणिकं सूर्य्यस्याधःस्थत्ववचनमिति न किञ्चिदनुपपन्नम्"। 'चन्द्रस्याधःस्थित्वे च यथा तिथ्यादिसम्भवः तथोक्तम् कालमाधवीये "अर्कान्निःसृतः प्राचीं वहन्नक्षरहः पतीति" वचनव्याख्याने।

"अयमर्थः अधः प्रदेशवर्त्ती शीघ्रगामी चन्द्रः ऊर्द्धप्रदेशवर्त्ती अशीघ्रगामी सूर्य्यः। तथा सति तयोर्गतिविशेषवशाद्यं चन्द्रमण्डलमन्यूनमनतिरिक्तं सत् सूर्य्यमण्डलस्याधो भागे व्यवस्थितं भवति तदा सूर्य्यरश्मिभिः साकल्येनाभिभूतत्वाच्चन्द्रमण्डलमीषदपि न दृश्यते। उपरितने दिने शीघ्रगत्वा प्राचीं याति राशेर्द्वादशभिरंशैः सूर्य्यस्तल्लङ्घ्य गच्छति। तदा चन्द्रस्य पञ्चदशसु भागेषु प्रथम भागोदर्शनयोग्योभवति। सोऽयं भागः प्रथमकलेत्यभिधीयते तत्कलानिष्पत्तिपरिमितकालः प्रतिपत्तिथिर्भवति एवं द्वितीयादितिथिष्ववगन्तव्यमिति"। तदेतद्विष्णुधर्म्मोत्तरे विस्पष्टमभिहितम्"चन्द्रार्कगत्या कालस्य परिच्छेदो यदा भवेत्। तदा तयोः प्रवक्ष्यामि गतिमाश्रित्य निर्णयम्। भगणेन समयेन ज्ञेया द्वादश राशयः। त्रिंशांशश्च तथा राशेर्भाग इत्यभिधीयते। आदित्याद्विप्रकृष्टस्तु भाग-द्वादशकं यदा। चन्द्रमाःस्यात्तदा राम! तिथिरित्यभिधीयते" "सेयं द्वादशभिर्भागैः सूर्य्यमुल्लङ्घितवतो प्रथमा चन्द्रकला शृङ्गद्वयोपेतसूक्ष्मरेखाकारा शौक्ल्यमोषदुपयाति उत्तरोत्तरदिनेषु सूर्य्यमण्डलविप्रकर्षात् तारतम्यानुसारेण शौक्ल्यमुपचीयते। अनयैव रीत्या सन्निकर्षतारतम्येन मेचकत्वमुपचीयते तदेतदुक्तम्" सि० शि०। उपचयमुपयाति शौक्ल्यमिन्दोरित्यादि ।६२१।पृष्ठे उक्तम्। सूर्य्याचन्द्रमसोर्यौ सन्निकर्षविप्रकर्षौ तयोरवसानदर्शपूर्णिमयोः संपद्यते तदाह गोभिलः। "यः परोविप्रकर्षः सूर्य्याचन्द्रमसोः सा पूर्णमासी यः परः सन्निकर्षः सामावास्येति"नन्वत्र चन्द्रकलानां सूर्य्ये प्रवेशनिर्गमौ प्रतीयेते सोमोत्पत्तौ ६२४पृ०तु वह्न्यादिदेवतासु। नायन्दोषः। अस्मदादिदर्शनापेक्षया ज्योतिःशास्त्रस्य प्रवृत्तत्वात् सोमोत्पत्तौ तु वह्न्यादिदेवतानान्तत्कालप्रयुक्ता तृप्तिर्विवक्षिता तत्र यदि सूर्य्ये प्रवेशनिर्गमौ यदि वा वह्न्यादिदेवतादिषु सर्व्वथापि कलाप्रयुक्ता एव प्रतिपदादितिथयः।'कालमा० यद्यपां कलानुसारेणैव स्वस्वकलास्थराश्यंशादिमानम् तथा च स्वल्पकलायां स्थितस्य राश्यंशकलादिकं स्वल्पं महत्यां स्थितस्य महत् यथोक्तमार्य्यभट्टेन।"षष्ठ्या सूर्य्याद्भानां प्रपूरयन्ति यदा भपरिधिमम् । दिव्येन भपरिधिं सममभ्रमन्तः सकलाश्च। मण्डलमल्पमधस्तात् कालेनाल्पेन पूरयति चन्द्रः। उपरिष्टात् सर्व्वेषां महच्च महता यनैश्चापि। अल्पे हि मण्डलेऽल्पोमहति महान्तच राशयोज्ञेयाः। अंशाः कलास्तथैवं विभागतुल्याः खल्वेषु। भानामधःयनैश्चरः सुरगुरुभौमार्कभृगुबुधचन्द्राः। एषामधश्च भूमिर्मेघीभूता च मध्यस्था" । तेन यद्यपां प्रागुक्तस्वस्वकला द्वादशभिर्भक्ताः राशिप्रमाणयोजनानि। ते च पुनस्त्रिंशद्भक्ता अंशमानयोजनानि। ते षष्ट्या भक्ता कलाभितयोजनानि एवं षष्ट्याभागे विकलादियोजनानि। अधिकं यद्यशब्दे वक्ष्यते। एतन्मण्डलाधिकारेचन्द्रोत्पत्तिरतिजातशब्दे ११९पृष्ठे उक्ता।

इन्दुक पु०इन्दुरिव शुभत्वात् कन्। अश्वत्थवृक्षे। राजनि०

इन्दुकला स्त्री ६त०। चन्द्रस्य राशिचक्रस्थे परिधौ तन्नामनिन्दुशब्दे ६२१ पृ०उक्तम्।

इन्दुकमल न० इन्दुरिव शुभ्रं कमलम्। सितोत्पले राजनि०
इन्दुकला स्त्री ङीप्। चन्द्रस्य षोड़शभागैकभागे। कलाच षोड़श। अमायां २२० पृष्ठे दर्शितास्वाच कृष्णपक्षे क्रमेण वह्न्यादिभिः पीयन्ते यथोक्तं कालमा० सोमोत्पत्तिवाक्यम् "प्रथमां पिबते वह्निर्द्वितीयां पिबते रविः। विश्वे देवास्तृतीयां तु चतुर्थीं सलिलाधिपः। पञ्चमीं तु वषट्कारः षष्ठीं पिबति वासवः। सप्तमीरुद्रयोर्दिव्या अष्टमीमजएकपात्। नवमीं कृष्णपक्षस्य यमः प्राश्नाति वै कलाम्। दशमीं पिबते वायुः पिबत्येकादशीं सुमा। द्वादशीं पितरःसर्वे समं प्राश्नन्ति भागशः। त्रयोदशीं धनाध्यक्षः कुबेरः पिबते कलाम्। चतुर्दशीं पशुपतिः पञ्चदशीं प्रजापतिः। निष्पीतः कलया शेषश्चन्द्रमा न प्रकाशते। कला षोडशिका या सा त्वपः प्रविशते सदा। अमायां तु सदा सोमस्तोषधीः प्रतिपद्यते। तस्योषधिगतं गावः पिबन्त्यनुगतं च यत्। तत्क्षीरमक्षतं भूत्वा मन्त्रपूतं द्विजातिभिः। हुतमग्निषु यज्ञेषु पुनराप्याय्यते यशो। दिने दिने कलावृद्धिः पौर्ण्यमास्यान्तु पूर्यते" इति। "पुनश्च ताः पीताः कलाशेनैव क्रमेण वह्न्यादिदेवताभ्यो निर्गत्य चन्द्रमण्डलं पूरयन्तीति" माधवः। यथा च कलापानसम्भवस्तथा इन्दुशब्दे दर्शितेन ६३२ पृ० कालमा० वाक्येनसमर्थितम्। तासांकलानां यद्यपि तिथिविशेषरूपता तथापि नामान्तराणि शारदा० उपासनार्थंसङ्कल्पानि यथा। "अमृता मानदा पूषा तुष्टिः पुष्टिरतिर्धृतिः। शशिनश्चन्द्रिका कान्तिः ज्योत्स्ना श्रीः प्रीतिरङ्गदा। पूर्णा पूर्णामृताह्वा च कामदा स्वरजाः कलाः"। तथा च षोड़शस्वरेभ्य आसासत्पत्तिरपि ध्येयाः" "शतमिन्दुकलाश्चवै" श्रुतिः।
इन्दुकलिका स्त्री इन्दुरिव शुभ्रा कलिका यस्याः। १केतक्याम्। ङीप् स्वार्थे कन्। २चन्द्रकलायाम्।
इन्दुकान्त पु० इन्दुःकान्तइव निष्यन्दकारित्वात् प्रियोऽस्य। १चन्द्रकान्ते मणौ इन्दुःकान्तः पतिः स्रोदयेन कारकत्वादीयो यस्याः। २रात्रौ। इन्दुःकान्तइव प्रकाशकत्वात् यस्याः। ३केतक्याम्। ङीप्। ४चन्द्रप्रियायाञ्च स्त्री।
इन्दुक्षय पु०। इन्दुःक्षीयतेऽत्र क्षि—आधारे अच् ङीप्। १दर्शे तत्र हि इन्दोः कलानां सूर्यकिरणासहनात् क्षयइव भवतीति इन्दुकलाशब्दे दर्शितम् "शतमिन्दु क्षये पुण्यं सहस्रं तद्दिनक्षये" मत्स्य० पु०। मावेऽच्। २चन्द्रस्य क्षये॥
इन्दुज पु० इन्दोर्जायते जन—ड। बुधे तदुत्पत्तिकथा हरिवं० २६अ० सोमस्य राजसूययज्ञकरणानन्तरमैश्वर्य्येण मत्तस्य मतिभ्रान्तिमुपवर्ण्य "बृहस्पतेः स वै भार्य्यां तारां नाम यशस्विनीम्। जहार तरसा सर्वानवमत्याङ्गिरःसुतान्" इत्युपक्रम्य ऋक्षाणां तत्र युद्धं वर्णयित्वा तत्र युद्धोपद्रवेण उपद्रुतदेवैः प्रार्थितेन ब्रह्मणा यत् कृतं तदुक्तं तत्रैव "ततोनिवार्य्यौशनसं तं वै रुद्रं भयङ्करम्। ददावङ्गिरसे तारां स्वयमेव पितामहः। तामन्तःप्रसवां दृष्ट्वा तारामाह बृहस्पतिः। मदोद्वाहां न ते योनौ गर्भो धार्य्यः कथञ्चन। योनेरुदस्यतं वै कुमारं दस्युघ्नमम्। दृष्ट्वाकाञ्चनमासाद्य ज्वलन्तमिव पावकम्। जातमात्रः स भगवान् देवानामभिपद्यत। ततः संशयमापन्नास्तारामूचुः सुरोत्तमाः। सत्यं ब्रूहि सुतः कस्य सोमस्याथ बृहस्पतेः। पृच्छ्यमाना यदा देवैर्नाह सा साध्वसाधु वा। तदा तां शप्तुमारब्धः कुमारोदस्युघ्नमः। तं निवार्य्य ततो ब्रह्मा तारां प्रपच्छ संशयम्। यदत्र तथ्यं तद्ब्रूहि तारे! कस्य सुतोऽयम्। सा प्राञ्जलिरुवाचेदं ब्रह्माणं वरदं प्रभुः। सोमस्येति महात्मानं कुमारं दस्युघ्नमम्। तं मूर्ध्न्युपाघ्राय तनयं सोमोधाता प्रजापतिः। बुध इत्यकरोन्नाम तस्य सुतस्य धीमतः"। अस्यैव पद्मत्वप्राप्तिः काशी० वर्णिता यथा" हरिबंशयत् बुधस्योत्पत्तिं वर्णयित्वा। "ततः सर्व्वेभ्योदेवेभ्यो जोरूपबलाधिकः। बुधः सोमं समापृच्छ्य तपसे धृत निश्चयः। जगाम काशीं निर्वाणराशिं विश्वेशपालिताम्। ततो लिङ्गं प्रतिष्ठाप्य स्वनाम्ना स बुधेश्वरम्। तपश्चचार चात्युग्रमुग्रं संशीलयन् हृदि"। इति तत्रैवोक्तम् तत्तपसा तोषितश्च महादेवस्तस्मै पद्मरूपेण गगनेस्थिति रूपं वरं ददौ" यथा "ततः प्राह महेशानस्तत्स्तुत्या परितोषितः। रौहिणेय! महाभाग्य! सौम्य! सौम्यवचोनिधे!। नक्षत्रलोकादुपरि तव लोको भविष्यति। मध्ये सर्वमहाणाञ्च सपर्य्यां लप्स्यसे पराम्' राशिचक्रे तत्स्थानञ्च ब्रह्मवै० "मन्दारेज्यभृगुसूनुसूर्य्यशुक्रेन्दुजेन्दवः। परिक्रमन्त्यधोऽधःस्थाः सिद्धविद्याधराधनाः" इत्यनेन चन्द्रस्थानादुपरि शुक्रात्पाधः प्रदेशे उक्तम्। तत्कक्षामानञ्च। इन्दुशब्दे पृ० ६३१ श्रीपतिवाक्ये उक्तम् तस्य चारप्रकारः बृहत्संहितायां दर्शिता यथा।

"नोत्पातपरिवक्त्रः कदाचिदपि चन्द्रजो व्रजत्युदयम्। जलदहनपवनभयक्षान्त्यार्द्रत्वविदृष्टौ वा। विचरच्छृङ्ग-

धनिष्ठाप्राजापत्येन्दुविश्वदैवानि । रुद्रन् क्षिप्रकरतनयः करोत्यदृष्टिं सरोगभयाम्। रौद्रादीनि मघान्तान्युपाश्रिते चन्द्रजे प्रजापीड़ा । यस्त्रनिपातच्युद्भवरोगानादृष्टिसन्तापैः। हस्तादीनि विचरन् षड्नक्षत्र्युपपीड़यन् गवामशुभः । क्षेहरसार्घविदृद्धिं करोति चोर्वीं प्रभूतात्राम् । आर्यमणं फौतभजं भाद्रपदासत्तरां यमेयं च । चन्द्रस्य सुतो निघ्नन् प्राणभृतां धातुसङ्घवलत् । आश्विनवारुणमूलान्युपरुद्रन् रेवतीं च चन्द्ररुजः । पश्यभिषग्नौजोविकसलिलजहरगोपघातकरः । पूर्वाद्यृक्षत्रितयादेकमपीन्दोः सुतोऽभिरुद्रीयात् । शुक्लस्तत्स्वराभयभयप्रदायी चरन् जगतः । प्राक्तविभिन्नसङ्क्षिप्रतीक्ष्णयोगान्तघोरपापाख्याः। सप्त परागरतन्त्रे नक्षत्रैः कीर्तिता गतयः । प्राक्तसंज्ञा वायव्यवास्यपैतामहानि वङ्गलाच । मिश्रा गतिः प्रदिष्टा यमिग्निवपिष्टभुजगदैवानि । सङ्क्षिप्तायां पुष्यः पुनर्वसुः फल्गुनीद्वयं चेति । तीक्ष्णायां भाद्रपदाद्वयं सयाक्राश्वयुक् पौष्णम् । योगान्तिकेति मूलं ह्वे चाषाढे गतिः सुतस्येन्दोः। घोरा श्रवणस्वाङ्गं वसुदेवं वारुणं चैव । पापाख्या सावित्रं मैत्रं शक्राग्निदैवतं चेति । उदयप्रवासदिवसैः स एव गतिलक्षणं प्राह्यं । चत्वारिंशच्चित्रं षड् द्विसमेता विंशतिर्हि नवकं च। नव मासार्धं दश चैकसंयुताः प्राक्तताद्यानाम् । प्राक्तगत्यामारोग्यवृष्टिसस्यप्रवृद्धयः क्षेमम् । सङ्क्षिप्तमिश्रयोर्मिश्रमेतदन्यासु विपरीतम् । ऋज्वी प्रतिवक्रा वक्रा विकला च मतेन देवलस्यैताः । पञ्चचतुर्द्वैकाहा ऋज्वादीनां षड्भ्यस्ताः। ऋज्वी हिता प्रजानामतिवक्रार्थं गतिर्विनाशयति । यस्यभयदा च वक्रा विकला भयरोगसञ्जननी । पौषाषाढश्रावणवैशाखेष्विन्दुजः समाधेषु । दृष्टो भयाय जगतः शुभफलदत् प्रोक्षितस्येषु । कार्त्तिके स्वयुजि वा यदि मासे दृश्यते तनुभवः शिशिरांशोः । यस्यचीरदृतभुग्मदतोयद्युद्भवानि च तदा विदधाति । रुद्रानि सोम्येऽस्तमिते पुराणि यान्युदेते तान्युपयान्ति सौम्यम् । अन्ये तु पवादुदिते वदन्ति लाभः पुराणां भवतीति तज्ज्ञाः । क्षेमकान्तिरथ वा शुक्लवर्णः सस्यकेन सदृशो वा। स्निग्धमूर्तिरलघुश्च हिताय व्यत्यये न शुभकृच्छशिपुत्रः"। गमने बुधस्थानसङ्क्षे भा०५ स्क० । "ततो बुधः सोमसुत उदीच्यमान तत उपरिष्टात् प्रावेण शुक्रवत् । यदार्कात् व्यतिरिच्येत तत्रातिभयप्रायानावृष्ट्यादिभयमाशंसते" । इन्दुजातेन्दुनन्दनेन्दुपुत्रादयोऽत्र । २नर्म्मदायां नद्यां स्त्री सा च मेकलकन्यका सोमसुता सनिशापात् नदीत्वमाप्ता। इयं च प्रतीच्यामवन्तिषु स्थिता प्रत्यक्स्रोतोवहा च यथा । "अवन्तिषु प्रतीच्यां वै कीर्त्तयिष्यामि ते दिशि । यानि तत्र पवित्राणि पुण्यान्यायतनानि च । प्रियङ्ग्वाम्बवणोपेता वानीरफलशालिनी। प्रत्यक्स्रोता नदी पुण्या नर्मदा तत्र भारत ! । त्रैलोक्ये यानि तीर्थानि पुण्यान्यायतनानि च । सरिद्वनानि शैलेन्द्रा देवाश्च सपितामहाः। नर्मदायां कुरुश्रेष्ठ ! सह सिद्धर्षिचारणैः । स्नातुमायान्ति पुण्यैर्षैः सदा वारिषु भारत" भा० आ० ८६अ०।

इन्दुजनक पु० ६त०।१अत्रिसुनौ तस्य ततउत्पत्तिकथा अत्रिजातशब्दे१११ पृष्ठे दृश्या । २ससुद्रे ततस्तस्योत्पत्तिकथा "ततः शतसहस्रांशुर्मथ्यमानात्तु सागरात् । प्रसन्नात्मा समुत्पन्नः सोमः शीतांशुरुज्ज्वलः" भा०आ०१८अ० । दृश्या । [जाङ्गलीदृक्षे ।

इन्दुपुष्पिका स्त्री इन्दुरिव शुभ्रं पुष्पमस्याः। (विषलाङ्गला)

इन्दुभ न० इन्दोश्चन्द्रस्य भं नक्षत्रं राशिर्वा । चन्द्रदेवताके १ऋक्षराशिरोनक्षत्रे अर्क्षशब्दे ४६८पृष्ठे नक्षत्राणामोषा दर्शिताः । २कर्कटराशौ च "कुजशुक्रबुधेन्द्वर्कसौम्यशुक्रावनीभुवाम्—क्षेत्राणि सुरजादयः क्रमो०। [२चन्द्रप्रभायाम् ।

इन्दुभा स्त्री इन्दुना भाति भा—क ३त०। १कुसुदल्याम्। ६त०। इन्दुभृत् पु० इन्दुं बिभर्त्ति भृ-क्विप्। शिवे । तस्य चन्द्राधारणमिन्दुमौलिशब्दे ८२६पृष्ठे सप्रमाणं दर्शयिष्यते ।

इन्दुमणि पु० इन्दोः कान्तोऽस्य तत्करेण स्यन्दनात् तादृशो मणिः प्राक०त०। १चन्द्रकान्तमणौ तस्य चन्द्रोदये निष्यन्दात् तन्मणित्वम् । तत्प्रियोमणिः स इव शुभ्रोमणिर्वा । २सक्तायाम् ।

इन्दुमण्डल क्ली० ६त०। चन्द्रस्य बिम्बे मण्डलाकारे पदार्थे "स्तुत्वा स्तुत्वा नमस्कृत्य विशेज्जेदिन्दुमण्डले" तन्त्रसा०। तन्मण्डलमानञ्च क्ली० गि० दर्शितं यथा । "बिम्बं रवेर्हिद्विगुरर्तु (६५२२) संख्यानीन्दोः खनागाम्बुधि(४८०) योजनानि । भूव्यासहीनं रविबिम्बमिन्दुकर्णाहतं भास्करकर्णभक्तम्। भूविस्तृतिर्लब्धफलेन हीना भवेत् कुभाविस्तृतिरिन्दुभागैः" "रवेर्योजनात्मकं बिम्बं मध्यमं द्वियमबाणषट्कतक्ष्याणि (६५२२) योजनानि । इन्दोस्तु शून्यवसुवेद (४८०)मितानि । अथ राहोरुच्यते । रविबिम्बं भूव्यासेन(१५८१) हीनं (१५१)क्रत्वेन्दुकर्णेन स्फुटेन योजनात्मकेन संगुण्य रविकर्णेन स्फुटेन भजेत् फलेन भूव्यासतो वर्ज्जितचन्द्रकक्षायां भूभाव्यासो भवति ।

फलानि योजनबिम्बानि । अत्रोपपत्तिः यस्मिन् दिने यस्य मध्यतल्यैव स्फुटा गतिः स्यात् तस्मिन् दिने उदयकाले चक्रकलाव्यासार्धमितेन यष्टिद्वितयेन मूलमिलितेन तत्स्पष्टया तदग्राभ्यां बिम्बप्रान्तौ विध्येत् । या यस्मयोरन्तकलास्ता रविबिम्बकला भवन्ति मध्यमाः। ताश्च द्वात्रिंशत् किञ्चिदधिकैकत्रिंशद्धिकलाधिकाः ३२ २१ । ३३ । एवं विधोरपि पौर्णमास्यां यदा मध्यैव गतिः स्पष्टा तदा विध्येत् तस्यैवं द्वात्रिंशत् कलाः ३२। ०। ६ । उत्पद्यन्ते । बिम्बकलानां योजनोत्कर्षानुपातः । यदि त्रिज्याव्यासार्ध एतावत्प्रमाणं बिम्बं तदा पठितस्तुतियोजनैः किमित्येवमुत्पद्यन्ते द्विद्विगर्तु (६५२२)संख्यानि योजनानि । विधोस्तु खनागाब्धि (४८०) मितानीति"। प्रमि० । बिम्बमेव गोलस्य व्यासशब्देनाभिधीयते "व्यासार्धेन्दुक्षितिगोलकानां क्रमेण तेजोजलसूक्ष्मवातानाम् । खुर्योजनव्यासतिवाणषड्भि(६५२२) र्व्योमाष्टवेदैः (४८०) कुगजेषुचन्द्रैः । (१५८१) इति श्रीपतिना बिम्बस्थाने व्यासशब्दप्रयोगात् । तस्यैव विष्कम्भ इति संज्ञा । "विष्कम्भमानं किल यत्र सप्त"इति लीला०व्यासस्थाने विष्कम्भशब्द प्रयोगात् अतएवार्थभेदेन व्यासनिरूपणे । "शशिबिम्बव्यासविवर्जितमित्युक्तम् ।"व्यासे भनन्दाग्नि(१६२७) हृते विभक्ते खवाणसूर्यैः (१२५० परिधिः स सूक्ष्मः" इति लीला०उक्तदिशा रविचन्द्रयोरुक्तव्यासमानेन परिधिरानेयः । स च रवेः किञ्चिदून (२०४६६) योजनमितः, चन्द्रस्य किञ्चिदूनः(१५०८) योजनमितः । तथा च मण्डलशब्दस्य व्यासपरत्वे (४८०) योजनानि परिधिपरत्वे किञ्चिदूनानि (१५०८) योजनानि इन्दोर्मण्डलस्य मानमित्यवधेयम् ।

इन्दुमती स्त्री इन्दुः प्रशस्योऽस्त्यस्याम् प्राशस्त्ये मतुप् । १पौर्णमास्याम् २अजभूपपत्न्यां विदर्भराजभगिन्यां च । "अवेक्ष्यरेषु क्रथकैशिकानां स्वयंवरार्थं सचिवैरिन्दुमत्याः" रघुः । "मनोभुवेन्दुमतीनिरासम्" रघुः । सा च हरिणो नाम सुराङ्गना तपविघ्नापात् मानुषजन्मप्राप्ता तदेतत् वर्णितं रघौ । "चरतः किल दुश्चरं तपस्तपविघ्नोः परिशङ्कितः पुरा। प्रजिघाय समाधिभेदिनीं हरिरस्यै हरिणीं सुराङ्गनाम् । स तपःप्रतिबन्धमन्युना प्रसभं विप्रकृतश्चकर्षिकाम् । अथपद्मव मानुषीति तां शमयेत्यम्बरयोर्निषा भुवि । भगवन् ! परवानयं जनः प्रतिकूलाचरितं क्षमस्व मे। इति चोपनतां चितिस्पृशं ऋतवानास्त रघुप्रदर्शनात् । क्रथकैशिकवंशसम्भवा तव भूत्वा महिषी चिराय सा । उपलब्धवती दिवश्च्युतं विवशा शापनिष्टत्तिकारणम्"इति अजं प्रति वसिष्ठसन्देशः ।

इन्दुमौलि पु० इन्दुर्मौलावस्य । महादेवे स हि इन्दुतपसा तुष्टस्तत्कलां शिरस्येकां धारयेति काशी० कथा यथा "तुष्टेन देवदेवेन स्वमौलौ या धृता सदा । आदाय तां कलामेकां जगत्संजीवनीम् पराम् । पश्चात् दक्षेण शप्तोऽपि मासान्ते क्षयमाप्य च । आप्याय्यतेऽसौ कलया पुनरेव तया शशी"।

इन्दुरत्न न० ६त० इन्दुरिव शुभ्रं रत्नम् वा । सङ्कायां तस्य चन्द्रदेवताकत्वात् चन्द्रदोषोपशान्त्यर्थत्वेन तत्प्रीतये दीयमानत्वात् तद्वच्छुभत्वाच्च तद्रत्नत्वम् । यद्दशब्दे यद्रत्नानि वक्ष्यन्ते ।

इन्दुलेखा स्त्री इन्दोर्लेखेव ।१चन्द्रकलायाम् २तदंशजन्यायां १सोमलतायाम्, तस्याः सोमाद्भवकथा इन्दुवल्लीशब्दे ६३६पृष्ठे दृश्या। तद्दात्र्यायनकारिकायाम् ३अच्छतायां, तद्गुणत्वात् ४यमानिकावाच्च । लस्य रः। इन्दुरेखाप्यत्र ।

इन्दुलोक पु०६त० । चन्द्रलोके । स हि कर्म्मिणामुपभोगस्थानतया शुक्लादिषु कथितः । चन्द्रलोके कर्म्मिणाम् आप्यशरीरं जायते तच्च कर्म्मसमवायिजलसूक्ष्माऽंशेभ्य एवेति निरूपणाय छा०उ०पञ्चाग्निविद्या प्रस्तावितो यथा "असौ वाव लोको गौतमाग्निस्तस्यादित्य एव समिद्, रश्मयो धूमो,ऽहरर्चि,श्चन्द्रमा अङ्गारा,नक्षत्राणि विस्फुलिङ्गाः । तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा सम्भवति १। पर्जन्यो वाव गौतमाग्निस्तस्य वायुरेव समिदभ्रं धूमो, विद्युदर्चिरशनिरङ्गारा, ह्रादुनयो विस्फुलिङ्गाः । तस्मिन्नेतस्मिन्नग्नौ देवाः सोमं राजानं जुह्वति तस्या आहुतेर्वर्षं सम्भवति २। पृथिवी वाव गौतमाग्निस्तस्याः संवत्सर एव समिदाकाशो धूमो, रात्रिरर्चिर्दिशोऽङ्गारा, अवान्तरदिशो विस्फुलिङ्गाः । तस्मिन्नेतस्मिन्नग्नौ देवा वर्षं जुह्वति तस्या आहुतेरन्नं सम्भवति ३। पुरुषो वाव गौतमाग्निस्तस्य वागेव समित्, प्राणो धूमो,जिह्वार्चिश्चक्षुरङ्गाराः, श्रोत्रं विस्फुलिङ्गाः । तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहुतेरेतः सम्भवति ४। योषा वाव गौतमाग्निस्तस्या उपस्थ एव समिद्यदुपमन्त्रयते स धूमो, योनिरर्चिर्यदन्तः करोति तेऽङ्गारा, अभिनन्दा विस्फुलिङ्गाः । तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्गर्भः सम्भवति ५। इति

त पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति स उल्बावृतो गर्भो दश वानव वा मासानन्तः शयित्वा यावद्वाथ जायते स जातो यावदायुषं जीवति तं प्रेतं दिष्टमितोऽग्नय एव हरन्ति यत एवेतो यतः सम्भूतो भवति" छा० उ०। "असौ वाव लोकोऽग्निर्हैगौतम! यथाऽग्निहोत्राधिकरणम् आहवनीयम् इह तस्याग्नेर्द्युलोकाख्यस्यादित्यएव समित् तेन हीद्धोऽसौ लोको दीप्यते अतः समिन्धनात् समिदादित्यः। रश्मयो धूमस्तदुत्थानात् समिधो हि धूम उत्तिष्ठति। अहरर्चिः प्रकाशसामान्यात् आदित्यकार्य्यत्वाच्च। चन्द्रमा अङ्गारः अङ्गः प्रथमेऽभिव्यक्तेः अर्चिषो हि प्रथमेऽङ्गारा अभिव्यज्यन्ते। नक्षत्राणि विस्फुलिङ्गाश्चन्द्रमसोऽवयवा इव विप्रकीर्ण्णत्वसामान्यात्। तस्मिन्नेतस्मिन् यथोक्तलक्षणेऽग्नौ देवाः यजमानप्राणा अन्नाद्यादिरूपाः अधिदैवं श्रद्धाम् अग्निहोत्राहुतिपरिणामावस्थरूपाः सूक्ष्मा आपः श्रद्धाभाविताः श्रद्धा उच्यन्ते "पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" त्यपां श्रौत्यतया प्रथमे श्रुतत्वात्। "श्रद्धा वा आपः श्रद्धामेवारभ्य प्रणीय प्रचरन्ति" च विज्ञायते। तां श्रद्धामपां जुह्वति। तस्या आहुतेः सोमो राजा। अपां श्रद्धाशब्दवाच्यानां द्युलोकाग्नौ हुतानां परिणामः सोमो राजा सम्भवति। यथा ऋग्वेदादिपुष्परसा अगादिमधुकरोपनीतास्तं आदित्ये वय आदिकार्य्यं रोहितादिरूपलक्षणमारभन्त इत्युक्तम्। तथेमा अग्निहोत्राहुतिसमवायिन्यः सूक्ष्माः श्रद्धाशब्दवाच्या आपोद्युलोकमनुप्रविश्य चान्द्रं कार्य्यमारभन्ते फलरूपमग्निहोत्राहुत्योः। यजमानाश्च तत्कर्त्तारः आहुतिमया आहुतिभावनाभाविता आहुतिरूपेण कर्म्मणाऽऽहृताः श्रद्धासमवायिनो द्युलोकमनुप्रविश्य सोमभूताभवन्ति। तदर्थं हि तैरग्निहोत्रं हुतम्। आहुतिपरिणाम एव पञ्चाग्निसम्बन्धक्रमेण प्राधान्येन विवक्षित उपासनार्थम्। न यजमानानां गतिम्। तां त्वविदुषां धूमादिक्रमेणोत्तरत्र वक्ष्यति विदुषाञ्चोत्तरां विद्याङ्गताम्॥ द्वितीयहोमपर्य्यायार्थमाह। पर्जन्यो वाव पर्जन्य एव गौतमाग्निः पर्जन्योनाम दृश्यु-पकरणाधिष्ठानो देवताविशेषः। तस्य वायुरेव समित्, वायुना हि पर्जन्योऽग्निः समिध्यते पुरोवातादिप्राबल्ये दृष्टिदर्शनात्। अभ्रं धूमो, धूमकार्य्यत्वाद्धूमवच्च सच्छ्यामत्वात्। विद्युदर्चिः प्रकाशसामान्यात्। अशनिरङ्गाराः काठिन्यात् विद्युत्सम्बन्धाद्वा। ह्रादुनयो विस्फुलिङ्गाः। ह्रादुनयो गर्जितशब्दाः मेघानां विप्रकीर्णत्वसामान्यात्। तस्मिन्नेतस्मिन्नग्नौ देवाः पूर्ववत् सोमं राजानं जुह्वति। तस्या आहुतेर्वर्षं सम्भवति। श्रद्धाख्या आपः सोमाकारपरिणता द्वितीये पर्य्याये पर्जन्याग्निं प्राप्य दृष्टित्वेन परिणमन्ते २। पृथिवी वाव गौतमाग्निरित्यादि पूर्ववत्। तस्याः पृथिव्याख्यस्याग्नेः संवत्सर एव समित् संवत्सरेण हि कालेन समिद्धा पृथिवी व्रीह्यादिनिष्पत्तये भवति। आकाशो धूमः पृथिव्या इवोत्थित आकाशो दृश्यते यथाऽग्नेर्धूमो, रात्रिरर्चिः, पृथिव्याख्यप्रकाशात्मिकाया अनुरूपा रात्रिः तमोरूपत्वात् अग्नेरिवानुरूपमर्चिः। दिशोऽङ्गारा उपशान्तत्वसामान्यात्। अवान्तरदिशो विस्फुलिङ्गाः क्षुद्रत्वसामान्यात्। तस्मिन्नित्यादि समानम्। तस्या आहुतेरन्नं व्रीह्यादि सम्भवति ३। पुरुषो वाव गौतमाग्निः। तस्य वागेव समित् वाचा हि सर्वेण समिध्यते पुरुषो न सूक्तः। प्राणो धूमो धूम इव सर्वाद्गिर्गमनात्। जिह्वार्चिर्लोहितत्वात्। चक्षुरङ्गारा भास आश्रयत्वात्। श्रोत्रं विस्फुलिङ्गाः विप्रकीर्ण्णत्वसान्यात्। समानमन्यत्। अन्नं जुह्वति व्रीह्यादि संस्कृतम्। तस्या आहुते रेतः सम्भवति ४। योषा वाव गौतमाग्निः। तस्या उपस्थ एव समित् तेन हि सा पुत्राद्युत्पादनाय समिध्यते। यदुपमन्त्रयते स धूमः स्त्रीसम्भवादुपमन्त्रणस्य। योनिरर्चिर्लोहितत्वात्। यदन्तः करोति तेऽङ्गारा अग्निसम्बन्धात्। अभिनन्दाः सुखजत्वा विस्फुलिङ्गाः क्षुद्रत्वात्। तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्गर्भः सम्भवतीति ५। एवं श्रद्धासोमवर्षान्नरेतोरूपनवपर्य्यायक्रमेणाप एव गर्भीभूतास्ताः। तत्रापामाहुतिसमवायित्वात् प्राधान्यविवक्षा आपः पञ्चम्यामाहुतौ पुरुषवचसो भवन्तीति। नत्वाप एव केवलाः सोमादिकार्य्यमारभन्ते। न चापोऽतिदुष्टत्वताः सन्तीति। तिष्टत्वतत्वेऽपि विशेषसंस्कारादो दृष्टः पृथिवीवन्निमा आपोऽयमग्निरित्यन्यतमवाङ्मात्रनिमित्तः। तस्मात्सर्वदितावभूतानि वाङ्मात्रात्कर्म्मसमवायीनि सोमादिकार्य्यारम्भकाण्यापः इत्युच्यन्ते। दृश्यते च द्रव्यवाङ्मात्रं सोमदृश्यरेतोदेहेषु बहुद्रव्यञ्च, शरीरं यद्यपि पार्थिवं तत्र पञ्चम्यामाहुतौ हुतायां रेतोरूपा आपो गर्भीभूताः। इति तु एवन्तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति व्याख्यातं एकः प्रभुः। यत्तु द्युलोकादीनां प्रत्याहुतयोरा-

ङ्योः पृथिवीं पुरुषं स्त्रियं क्रमेणाविश्य लोकं प्रत्युत्थायी भवतीति वाजसनेयके उक्तं तत्रासङ्गिकमिहोच्यते । इह च प्रथमे प्रश्नं उक्तं वेत्थ यदितोऽधि प्रजाः प्रयन्तीति । तस्य चायमुपक्रमः । स गर्भोऽपां पञ्चमः परिणामविशेषः आहुतिकर्मसमवायिनोनां ऋङ्मागद्वारोच्यानाम्, उल्बावृत उल्बेन जरायुणाऽऽवृतो वेष्टितो दश वा नव वा मासानन्तर्मातुः कुक्षौ स्थित्वा यावता कालेन न्यूनेनातिरिक्तेनानन्तरं जायते । उल्बावृत इत्यादिवैराग्यहेतोरिदमुच्यते । कटं हि मातुः कुक्षौ मूत्रपुरीषरक्तपित्तश्लेष्मादिपूर्णे तदनुचिप्रस्य गर्भस्योल्बाऽशुचिपूयावृतस्य लोहितरेतोऽशुचिबोजस्य मातुरशितपीतरसानुप्रवेशेन च विवर्द्धमानस्य निरङ्गशक्तिबलवीर्यतेजःप्रज्ञाचेष्टस्य शयनम् । ततो योनिद्वारेण पीड्यमानस्य कष्टतरा निःसृतिर्जन्मेति वैराग्यं याहयति । सप्तोत्तरशतसंख्यं दश वा मासानतिदीर्घकालमन्तः शयित्वेति । स एवं जातो यावदायुषं पुनर्घटीयन्त्रवद्भ्रमणागमनाय कर्म कुर्वन् कुलालचक्रवद्वा तिर्यग्भ्रमणाय यावत्कर्मणोपात्तमायुस्तावज्जीवति । तमेवं जीर्णायुषं प्रेतं मृतं दिष्टं कर्मणा निर्दिष्टं परलोकं प्रति । यदि चेज्जीवन् वैदिके कर्मणि ज्ञाने वाधिकृतस्तमेनं मृतमितोऽग्नेरादायाग्नयेऽन्त्यर्थमृत्विजो हरन्ति पुत्रा वान्यकर्मणे, अत एव इत आगतोऽग्नेः सकाशाच्छ्रद्धाद्याहुतिक्रमेण, अतश्च पञ्चभ्योऽग्निभ्यः सम्भूत उत्पन्नो भवति तस्मा एवाग्नये हरन्ति स्वामेव योनिमग्निमापादयन्तीत्यर्थः" भा०। एवं चन्द्रभावप्राप्तिप्रकारमुक्त्वा तत्प्राप्तुत्तरं कर्मभेदं प्रदर्श्य तत्र गतिप्रकारमाह "अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभि सम्भवन्ति, धूमाद्रात्रिं, रात्रेरपरपक्षम्, अपरपक्षाद्यान् षड्दक्षिणैति मासांस्तान्नैते संवत्सरमभिप्राप्नुवन्ति, मासेभ्यः पितृलोकं, पितृलोकादाकाशं, आकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति । तस्मिन् यावत्सम्पातमुषित्वाऽथैतमध्वानं पुनर्निवर्त्तन्ते" छा०उ० । "अथेत्यर्थान्तर प्रस्तावनार्थो य इमे ग्रामे इति ग्रामस्थानामसाधारणं विशेषणमरण्यवासिभ्यो व्यावर्त्तयितुम् । यथा वानप्रस्थपरिव्राजकानामरण्यं विशेषणं ग्रामस्थेभ्यो व्यावर्त्तयितुं तद्वत् । इष्टापूर्ते इष्टमग्निहोत्रादि वैदिकं कर्म पूर्तं वापीकूपतडागारामादिकरणम् । दत्तं च बहिर्वेदि यथाशक्त्यर्हेभ्यो द्रव्यसम्भागो दत्तम् इत्येवंविधं परिचरणपरिवाणाद्युपासते इतिशब्दस्य प्रकारदर्शनार्थत्वात् । ते दर्शनवर्जितत्वाद्धूमं धूमाभिमानिनीं देवतामाभिमुख्येन सम्भवन्ति प्रतिपद्यन्ते । तयाऽतिवाहिता धूमाद्रात्रिं रात्रिदेवतां, रात्रेरपरपक्षदेवताम्, एवमेव कृष्णपक्षाभिमानिनीम्, अपरपक्षाद्यान् षण्मासान् दक्षिणा दक्षिणां दिशमेति सविता तान्, मासान् दक्षिणायनान् षण्मासाभिमानिनोर्देवताः प्रतिपद्यन्त इत्यर्थः । सङ्क्रचारिणी हि षण्मासदेवता इति मासानिति बहुवचनप्रयोगस्तासु । नैते कर्मिणः प्रकृताः संवत्सरं संवत्सराभिमानिनीं देवतामभिप्राप्नुवन्ति । कुतः पुनः संवत्सरप्राप्तिप्रसङ्गो यतः प्रतिषिध्यते । अस्ति हि संवत्सरस्य प्रसङ्गात्तेऽवयवभूते दक्षिणोत्तरायणे तत्रार्चिरादिमार्गप्रस्थानासदृगयनमासेभ्योऽप्यविनः संवत्सरस्य प्राप्तिरुक्ता । अत इहापि तदवयवभूतानां दक्षिणायनमासानां प्राप्तिस्तुल्या तदवयविनः संवत्सरस्यापि पूर्ववत्प्राप्तिरापद्येतातस्तत्प्राप्तिः प्रतिषिध्यते नैते संवत्सरमभिप्राप्नुवन्तीति । मासेभ्यः पितृलोकं, पितृलोकादाकाशमाकाशाच्चन्द्रमसम् । कोऽसौ यस्तैः प्राप्यते चन्द्रमा य एष दृश्यतेऽन्तरिक्षे सोमो राजा ब्राह्मणानां तद्वत्तं देवानां तं चन्द्रमसमन्नं देवता इन्द्रादयो भक्षयन्ति । अतस्ते धूमादिना गत्वा चन्द्रभूताः कर्मिणो देवैर्भक्ष्यन्ते । नन्वनर्थायेष्टादिकरणं यदन्नभूता देवैर्भक्ष्येरन्, नैष दोषः अन्नमित्युपकरणमात्रस्य विवक्षितत्वात् । न हि ते केवलोत्तमेन देवैर्भक्ष्यन्ते, किं तर्ह्युपकरणमात्रं देवानां भवन्ति ते, स्त्रीपशुभृत्यादिवत् । दृष्टान्नशब्द उपकरणेषु स्त्रियोऽन्नं पशवोऽन्नं राज्ञामित्यादि । न च तेषां स्त्र्यादीनां पुरुषोपभोग्यत्वेऽप्युपभोगो नास्ति । तस्मात्कर्मिणो देवतानामुपभोग्या अपि सन्तः सुखिनो देवैः क्रीडन्ते । शरीरञ्च तेषां सुखोपभोगयोग्यं चन्द्रमण्डले आरभ्यते । तदुक्तं पुरस्ताच्छ्रद्धायज्ञा आपोद्युलोकान्नो हुताः सोमो राजा सम्भवतीति । ता आपः कर्मसमवायिन्य इतरैश्च भूतैरनुगताः द्युलोकं प्राप्य चन्द्रत्वमापन्नाः शरीराद्यारम्भिका इष्टाद्युपासकानां भवन्ति । अन्यायाञ्च शरीराद्धतावग्नौ हुतायामग्निना दह्यमाने शरीरे तदुत्था आपो धूमेन सहोर्द्ध्वं यजमानभावेन्च चन्द्रमण्डलं प्राप्य कृष्णमृत्तिकास्थानीया वाह्यशरीरारम्भिका भवन्ति । तदारब्धेन च शरीरेणेष्टादिफलमुपभुञ्जाना आसते यावत्तदुपभोगनिमित्तस्य क्षयः कर्मणः । सम्पतन्ति येनेति सम्पातः कर्मणः क्षयो या-

वक्ष्यमाणं यावत्कर्मणः क्षय इत्यर्थः । तावत्तस्मिंश्चन्द्रमण्डले उषित्वा क्षयाऽनन्तरमेतमेव वक्ष्यमाणमध्वानं मार्गम् पुनर्निवर्त्तन्त इति प्रयोगात्पूर्वमध्वसञ्चरन्द्रमण्डलं गता निष्टप्तावासश्चिति गम्यते । तस्मादिह लोके इष्टादिकर्मोपचित्य चन्द्रं गच्छन्ति तत्क्षये चावर्त्तन्ते । क्षणमात्रमपि तत्र स्थातुं न लभ्यते स्थितिनिमित्तकर्मक्षयात् स्नेहक्षयादिव प्रदीपस्य । किं तत्र येन कर्मणा चन्द्रमण्डलमारूढस्य सर्वस्य क्षये तस्मादवरोहणं किं वा सावशेष इति । किन्नतः । यदि सर्वस्यैव क्षयः कर्मणश्चन्द्रमण्डलस्थस्यैव भोगः स्यात् न वेति तत आगतस्यैह शरीरोपभोगादि न सम्भवति । ततः श्रेयस्त्वादिश्रुतिविरोधश्च स्यात् । नन्विष्टापूर्त्तदत्तव्यतिरेकेणापि मनुष्यलोके शरीरोपभोगनिमित्तानि कर्माण्यनेकानि सम्भवन्ति न च तेषां चन्द्रमण्डल उपभोगः । अतः क्वाचानि यन्निमित्तं चन्द्रमारूढास्तान्येव क्षीणानीत्यविरोधः श्रेयश्चेह सर्वेषां कर्मणसामान्यादविरुद्धः"भा० । एवं चान्द्रायणादिकं तत्प्राप्तिहेतुः ।

इन्दुलोह न० ६त० । इन्दुदेवताके, लौहे धातौ रौप्ये धातुभेदे तस्येन्दुवर्णत्वात् इन्दुदोषोपशान्त्यर्थं देवत्वाच्च तथात्वम् । स्वार्थे कन् । तत्रैव ।

इन्दुवदना स्त्री"इन्दुवदना जजसनैः सगुरुयुग्मैः"छन्द०र० उक्ते चतुर्दशाक्षरपादके वर्णछन्दोभेदे

इन्दुवल्ली स्त्री ६त० । चन्द्रनामिकायां सोमलतायाम् । तत्प्राप्तिस्थानमुक्तं श्रुतौ यथा "नैवासादयितुं शक्या सोमाः सोमसमा क्वचा । पीतावशेषमक्षतं देवैर्ब्रह्मपुरोगमैः। निहितं सोमवीर्य्यांस्तु सोमे चाप्योषधीगतौ । देवच्छन्दे हृदयरे तथा सिन्धौ महानदे । दृश्यते च जलान्तेषु मध्ये ब्रह्मर्षिभिः" तत्समाक्ष ओषधिशब्दे वक्ष्यते

इन्दुवार पु०"आपोलिम्बे (३,६,६,१२,)यदि खगाः स किलेन्दुवारो न स्याच्छुभः क्वचन ताजकशास्त्रगीतः" नी० ता० उक्ते वर्षलग्नतः (३,६,६,१२,) स्थानानामन्यतमस्थाने सर्व्वशुभस्थितिरूपयोगभेदे ।

इन्दुव्रत न० इन्दुलोकप्राप्त्यर्थं व्रतम् शाक०त० । चान्द्रायणे व्रते तस्य चन्द्रलोकप्राप्तिसाधनत्वात् चन्द्रह्रासवृद्धिप्रयुक्तारेव भोजने ह्रासवृद्धिसत्त्वाच्च चान्द्रायणत्वम् तदेतत् पञ्चविधं तत्स्वरूपविभागादि प्रा०वि० दर्शितं यथा । "एकैकं ह्रासयेत् पिण्डं कृष्णे शुक्ले च वर्द्धयेत् । उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं चरेत् । एतदेव विधिं कृत्वा आचरेत् यवमध्यमे । शुक्लपक्षादि नियतश्चरेच्चान्द्रायणव्रतम्" । "अष्टावष्टौ समश्नीयात् पिण्डान्मध्यदिने गते । नियतात्मा हविष्यस्य यतिचान्द्रायणं चरन् । चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः । चतुरोऽस्तमिते सूर्य्ये शिशुचान्द्रायणं व्रतम् । अष्टावष्टौ समश्नीयात् पिण्डान्मध्यदिने गते । नासेनान्नन् हविष्यस्य चन्द्रस्यैति सलोकताम्"मनुः । एतत् पञ्चविधं चान्द्रायणम् पिपीलिकातनुमध्यम्, यवमध्यं, यतिचान्द्रायणम्, सर्वतोमुखं शिशुचान्द्रञ्च । यथाह जाबालः "पिपीलिकायवमध्यं यतिचान्द्रायणन्तथा । चान्द्रायणन्तथा ज्ञेयं चतुर्थं सर्वतोमुखम् । पञ्चमं शिशुचान्द्रञ्च तत्तु पुण्यफलोदयम्" । कृष्णप्रतिपदमारभ्य मासमेकं यदा क्रियते तदा पिपीलिकामध्यं भवति, शुक्लप्रतिपदारम्भे यवमध्यमुभयत्रामावास्यायामभोजनं कृष्णप्रतिपदि चतुर्दशग्रासभोजनारम्भे ह्रासक्रमेण चतुर्दश्यामेकग्रासः अमावास्यायामभोजनम् एवं प्राप्नोति तथा च वसिष्ठः । "मासस्य कृष्णपक्षादौ ग्रासानश्नाच्चतुर्दश"। नन्वेवं क्रमेण पञ्चदशोत्तरं ग्रासशतद्वयं स्यात् न चत्वारिंशदधिकं शतद्वयम् तच्च याज्ञवल्क्योक्तम्" "यथा कथञ्चित् पिण्डानां चत्वारिंशच्छतद्वयमिति"।"यथा कथञ्चित् पिण्डानां तिस्रोऽशीतीः समाहितः" इति मनुनाप्युक्तम् । उच्यते संवत्सरदिवसे पौर्णमास्याम् अमावास्यायां वा पञ्चदशग्रासभोजनेन संख्यापूरणसम्भवात् अथ वा पञ्चदशादिक्रमेणेदं व्रतम् न प्रतिपदादिकं चतुर्दश्यामेव व्रतसङ्कल्पः । यथाह गौतमः पौर्णमासीं पञ्चदश ग्रासान् भुञ्जीत एकैकापचयेनापरपक्षमश्नीयात् अमावास्यायामुपोष्य एकैकोपचयेन पूर्वपक्षम्, विपरीतमेकेषाम्" शङ्खलिखितौ "अमावास्यां व्रतोपायनं यवमध्यम् अमावास्यां पञ्चदश पिण्डानश्नीयात्" उपायनमारम्भः । शुक्लेदम् अमावास्यामपि पञ्चदशकलात्मकस्य चन्द्रमसः सूर्य्यप्रविष्टत्वात् तत एकैककलानिर्गमस्य प्रतिपदादिषु दृष्टिगोचरत्वात् । जाबालः "एकैकं वर्द्धयेद्ग्रासं शुक्ले कृष्णे च ह्रासयेत् । अमावास्यां न भुञ्जीत यवमध्यञ्चरन् द्विजः। एकैकं ह्रासयेद्ग्रासं कृष्णे शुक्ले च वर्द्धयेत् । पौर्णमासीं न भुञ्जीत पिपीलिततनुमध्यमम्" । अत्र कल्पतरुव्याख्यानम् । एकैकं ह्रासयेदिति कृष्णप्रतिपदि पञ्चदशग्रासमारभ्य एकैकापचयेनामावास्यायामेकोग्रासः तदनन्तरं शुक्लप्रतिपदि द्वौ ग्रासावेवं वृद्धिक्रमेण चतुर्दश्यां पञ्चदश ग्रासाः सम्पद्यन्ते पौर्णमास्यामुपवास इति' पिपीलिका

तनुमध्यं चान्द्रायणम्"। अत्रिचान्द्रायणमाह यमः "त्रींस्त्रीन् पिण्डान् समश्नीयात् नियतात्मा दृढव्रतः। हविष्यान्नस्य वै मासस्यत्रिचान्द्रायणं स्मृतम्"। अत्र चत्वारिंशच्छतद्वयसंख्या नास्ति। ग्रासपरिमाणमाह पराशरः "कुक्कुटाण्डप्रमाणन्तु यावद्वा प्रविशेन्मुखम्। एवं ग्रासं विजानीयाच्छुद्ध्यर्थं कायशोधनम्"। सकल चन्द्रायण एव चतुर्दशग्रासपवासं कृत्वाऽपरदिने पञ्चदशग्रां संयमः कार्य्यः। यथा बौधायनः "शुक्लां चतुर्दशीमुपवसेत् कृष्णचतुर्दशीं वा केशश्मश्रुनखलोमानि वापयित्वा" इत्याद्यभिधाय "तिथिनक्षत्रादिहोमं प्रत्यहमन्नवान्" विस्तरभयान्न लिखितम्। अत्र सामान्यव्रतधर्म्मैः कर्त्तव्यः। विशेषमाह यमः "आर्द्रवासाश्चरेत् कृच्छ्रं स्नात्वा वस्त्रं न पीड़येत्। अङ्गुल्यग्रस्थितं ग्रासं गायत्र्या चाभिमन्त्रयेत्। भक्षयित्वा उपस्पृश्य पुनरेवाभिमन्त्रयेत्। ग्रायसं तैजसं पात्रं चक्रोत्पन्नं विवर्ज्जयेत्। असुराणां हि तत् पात्रं पानपात्रमचक्रजम्" अचक्रजं कुलालचक्रानिष्पन्नम्। अपरे धर्म्मा बौधायनादिषु द्रष्टव्याः। तेन एकत्रिंशद्दिनसाध्यं चान्द्रायणव्रतम्"। या० स्मृ०। "तिथिद्वया चरेत् पिण्डान् शुक्ले शिखरुसम्मितान्। एकैकं ह्रासयेत् कृष्णे पिण्डं चान्द्रायणं चरन्। अथाकृष्णचतुर्दशीं पिण्डानां चत्वारिंशच्छतद्वयम्। मासेनैवोपभुञ्जीत चान्द्रायणमथापरम्। कुर्य्यात्त्रिषवणस्नायी कृच्छ्रं चान्द्रायणं तथा। अनादिष्टेषु पापेषु शुद्धिचान्द्रायणेन तु। धर्म्मार्थं यश्चरेदेतद्वन्द्रलोकं स गच्छति सलोकताम्" अत्र (२४०) ग्रासंख्योक्तेर्मध्ये नोपवास इति प्रतीयते तथा हि प्रतिपदादिपञ्चदशसु ग्रासवर्द्धनेन भक्षणे "सैकपञ्चदशग्रासमर्धमर्धाद्यद्युतिः किल सङ्कलिताख्येति" लीला० चक्रादिना (१२०) ग्रासंख्या, पुनः कृष्णे ह्रासेन तथैव संख्येति (२४०) भोज्यग्रासंख्या। तथाच समर्थासमर्थभेदेन अनयोर्व्यवस्थेति सिद्धान्तः।

इन्दुशेखर पु० इन्दुः शेखरे यस्य। महादेवे इन्दुशब्दे ८३९६ पृ० विवृतिः। चन्द्रशेखरादयोऽत्र।

इन्दूर पु० उन्दूर+पृ० उन्दुरम्। मूषिके जटाध०।

इन्द्र पु० इदि-रन्। १परमेश्वरे। "इन्द्रोमायाभिः पुरुरूप ईयते" श्रुतिः। द्वादशादित्यमध्ये २आदित्यभेदे। ते च "अदित्यां कश्यपेनोत्पादिताः "धाताऽर्य्यमा च मित्रश्च वरुणोंऽशुर्भगस्तथा। इन्द्रोविवस्वान् पूषा च पर्ज्जन्यो दशमः स्मृतः। ततस्त्वष्टा ततोविष्णुरजघन्यो जघन्यजः" विष्णुध०। भा०आ०६५अ० तु इन्द्रस्थाने शक्रनाम्ना पठितः यथा "अदित्यां द्वादशादित्याः सम्भूता भुवनेश्वराः। ये राजन्नामतस्तांस्ते कीर्त्तयिष्यामि भारत!। धाताभित्रोऽर्य्यमा शक्रो वरुणस्त्वंशुरेव च। भगो विवस्वान् पूषा च सविता दशमः स्मृतः। एकादशस्तथा त्वष्टा द्वादशोविष्णुरुच्यते। जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः"। कल्पभेदान्नामभेद इति न विरोधः। २कटजद्रुवृक्षे ४रात्रौ च धरणिः ५ भारतवर्षोपद्वीपभेदे शब्दमा० इन्द्रदेवताके ऐन्द्रेष्टानक्षत्रे विष्कम्भादिषु योगेषु ७षड्विंशे योगे छन्दोग्यन्थप्रसिद्धे षण्णान्ता प्रस्तावे आद्यन्तगुरुद्वयेन लघुद्वयमध्येन युते ८चतुर्थे भेदे। ९देवराजे स च मन्वन्तरभेदात् चतुर्दशविधः यथा "मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः। ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते" भाग०८स्क०१अ०। इत्थं मन्वन्तरे षड्विधकीर्त्तनीयमुपक्रम्य मन्वन्तरभेदेन तत्तन्नामानि कथितानि अतीतानामभेदात्तस्य चतुर्दशसंख्या तल्लोका यथा "तुषिता नाम ते देवाः आसन् स्वायम्भुवेऽन्तरे। मरीचिमिश्राक्षयोयज्ञः सुरगणेश्वरः" भाग०८स्क०१अ०। १मन्वन्तरे यज्ञः। "स्वारोचिषो द्वितीयस्तु मनुरग्नेः सुतोऽभवत्" इत्युपक्रम्य "तत्रेन्द्रोरोचनस्त्वासीत् देवाश्च तुषितादयः" तत्रैव। २म० रोचनः। "तृतीय उत्तमोनाम प्रियव्रतसुतो मनुः" इत्युपक्रम्य "सत्यावेदश्रुता भद्राः देवा इन्द्रस्तु सत्यजित्" तत्रैव। ३म०सत्यजित्। "चतुर्थश्चोत्तमभ्राता मनुर्नाम्ना च तामसः" इत्यु० "सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः" तत्रैव। 'ईश्वरइन्द्रः' श्रीधरः। ४म०त्रिशिखः। "पञ्चमो रैवतोनाम मनुस्तामससोदरः" इत्यु०। "विभुरिन्द्रः सुरगणा राजन्! भूतरयादयः" तत्रैव ५अ०। ५म०विभुनाम। "षष्ठश्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः", इत्यु० "इन्द्रो मन्त्रद्रुमश्चात्र देवा आद्यादयो मताः" तत्रैव ५अ०। ६म०मन्त्रद्रुमः। "मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः। सप्तमो वर्त्तमानोऽयम्" इत्युप० "आदित्यावसवोरुद्रा विश्वे देवा मरुद्गणाः। अश्विनावृभवो राजन्निन्द्रस्तेषां पुरन्दरः"। तत्रैव अ०१३। ७म०पुरन्दरः। "अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः" इत्यु० "तत्र देवाः सुतपसो विरजा अमृतप्रभाः। तेषां विरोचनसुतो बलिरिन्द्रो भविष्यति" १३अ०। ८म०बलिः। "नवमो दक्षसावर्णिर्मनुर्वरुणसम्भवः" इत्युप० "परोमरीचिगर्भाद्या देवा इन्द्रः

श्रुतः स्मृतः" तत्रैव १३अ०। ६म०श्रुतः। "दशमोब्रह्मसावर्णिरुपश्लोकश्रुतोमहान्" इत्यु० "सुवासनविरुद्धाद्या देवाः शम्भुः सुरेश्वरः" १३अ०। १०म०शम्भुः। "मनुर्वै धर्मसावर्णिरेकादशम आत्मवान्" इत्यु० "विहङ्गमाःकामगमानिर्वाणरुचयः सुराः। इन्द्रस्तु वैधृतस्तेषां रुचयवचारुणादयः" १३अ०। ११म०वैधृतः। "भविता रुद्रसावर्णिर्नाम द्वादशमो मनुः" इत्यु० "ऋतधामा च देवेशो देवाश्च हरितादयः" १३अ०। ११म०ऋतधामा। "मनुस्तयोदशोभव्यो वेदसावर्णिरात्मवान्" इत्युप० "देवाः सुकर्मसत्रामसंज्ञा इन्द्रोदिवस्पतिः" १३अ०। १३म०दिवस्पतिः। "मनुर्या इन्द्रसावर्णिश्चतुर्दशम एष्यति" इत्यु० "पवित्रावाचुषादेवाः शुचिरिन्द्रो भविष्यति" १३अ०। १४म०शुचिः। पुराणान्तरादौ नामान्तराणि चतुर्दश कल्पभेदादविरुद्धानि। विस्तरभयान्नात्र नोक्तानि। एवंचक्रनामसंख्यासाम्यात् १० चतुर्दशसंख्यायाम्। स च शचीपतिः इलादिहन्ता, पूर्वदिग्पालः, दृढिदायकः, अमरेशः, मेघदृषभः तस्य पुत्रो जयन्तः, वनं नन्दनं हयउच्चैःश्रवाः गजऐरावतः, पुरी अमरावती नेतारणि सहस्रं वज्रमस्त्रम् हरीवाहः। विहितिस्तच्छब्दे दृश्या। तस्यानेकविधानि कार्य्याणि पुराणादौ वर्णितानि विस्तरभयान्नोक्तानि मनुकालपर्य्यन्तं तस्याधिकारकालस्तत्समाप्तौ तस्य प्रजापतेः सकाशात् ब्रह्मविद्याप्राप्तेरग्रे वक्ष्यमाणत्वात् कैवल्यप्राप्तिः "योयो देवानां प्रत्यबुध्यत" इत्यादिश्रुतेः। इत्येतत् नानाशास्त्रश्रुतीतिहासेषु प्रसिद्धम् स्वकालमध्येऽपि त्वष्टृपुत्रविश्वरूपवधजनितब्रह्महत्याक्रन्दनभिया तस्य स्वपदच्युतिः। तत्पापस्य विभज्यान्यत्र संक्रामणे पुनः स्वपदप्राप्तिः। असुरादिभिरपि बलाधिक्यवशात् तं युधि निर्जित्य कियत्कालपर्य्यन्तं तत्पदेऽधिकारिता प्राप्ता इत्यपि पुराणादौ प्रसिद्धम् "जित्वा च सकलान् देवान् इन्द्रोऽभूच्छ्विषासुरः" देवीभा० "शताश्वमेधकरणे अन्यस्यापि इन्द्रत्वप्राप्तिर्योग्यत्वेत्यत्र इन्द्रलोकशब्दे प्रमाणं वक्ष्यते।

इन्द्रश्च प्रजापतिसकाशात् एकशतवर्षं ब्रह्मचर्य्याचरणेन ब्रह्मविद्यां प्रापेति छा० उ० वर्णितं यथा "यदाङ्गरेकशतं ह वै कं वर्षाणि मघवान् प्राजापत्यो ब्रह्मचर्य्यमुवास तꣳ होवाच। मघवन्! मर्त्यं वा इदं शरीरमात्तं मृत्युना तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानमात्मा वै सशरीरः प्रियाप्रियाभ्यामात्तो न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्त्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः इत्यादि। "मघवन्! मर्त्यं वै मरणधर्म्मि शरीरम्। यद्यन्यमेऽह्याधारादिलक्षणः सम्भ्रमादलक्षश्च आत्मा मयोक्तो विनाशमेवापीतो भवतीति। शृणु तत्कारणम्। यदिदं शरीरं वै पश्यसि तदेतन्मृत्यु विनाशि। तच्छास्त्रं मृत्युना ग्रस्तं सन्ततमेव। कदाचिदेव म्रियत इति मर्त्यमित्युक्तं न तथा सन्त्रासो भवति यथा ग्रस्तमेव सदा व्याप्तमेव मृत्युनेत्युक्तं इति वैरग्यार्थं विशेष इत्युच्यते आत्तं मृत्युनेति। कथं नाम देहाभिमानतो विरक्तः सञ्जिवर्त्तत इति। शरीरमित्यत्र सहेन्द्रियमनोभिरुच्यते। तच्छरीरमस्य सम्भ्रमादस्य स्थितिस्थानतया गम्यमानस्यामृतस्य मरणादिदेहेन्द्रियमनोधर्म्मवर्जितस्येत्येतत्। अमृतस्येत्यनेनैवाशरीरत्वे सिद्धे पुनरशरीरस्येति वचनं वायुादिवत्प्रावयवत्वमूर्त्तिमत्त्वेभा भूतानीति। आत्मनो भोगाधिष्ठानम् आत्मनो वा सत दैहितस्तेजोऽबन्नादिक्रमेणोत्पन्नमधिष्ठानम् जीवरूपेण प्रविश्य सदेवाधितिष्ठत्यस्मिन्निति वाधिष्ठानम्। यस्येदमीदृशं नित्यमेव मृत्युग्रस्तं धर्म्माधर्म्मजनितत्वात्प्रियाप्रियवदधिष्ठानं तदधितिष्ठन्नात्मा सशरीरो भवति। अशरीरस्वभावस्यात्मनस्तदेवाहं शरीरं शरीरमेव चाहमित्यविवेकादात्मभावः सशरीरत्वम्। अत एव सशरीरः सन्नात्तो यस्याः प्रियाप्रियाभ्याम्। प्रसिद्धमेतत् तस्य च न वै सशरीरस्य सतः प्रियाप्रिययोर्बाह्यविषयसंयोगवियोगयोर्निमित्तयोर्बाह्यसंयोगवियोगौ भवेति मन्यमानस्यापहतिर्विनाश उच्छेदः सन्ततिरूपयोर्नास्तीति। तं पुनर्देहाभिमानादशरीरस्वरूपविज्ञानेन निर्वर्त्तितविवेकज्ञानमशरीरं सन्तं प्रियाऽप्रिये न स्पृशतः। स्पृशिः प्रत्येकं सम्बध्यते प्रियं न स्पृशत्यप्रियं न स्पृशतीति वाक्यद्वयं भवति। न खल्वेष शास्त्रोक्तधार्म्मिकैः सह सम्भाषेतेति यद्वत्। धर्म्माधर्म्मकार्य्ये हिताहिते, यतोऽशरीरता एतत्स्वरूपमिति। तत्र धर्म्माधर्म्मयोरसम्भवात्तत्कार्य्यभावो दूरत एवेत्यतो न प्रियाप्रिये स्पृशतः। ननु यदि प्रियमप्यशरीरं न स्पृशतीति यत्प्रथमतोक्तं सुषुप्तस्य विनाशमेवापीतो भवतीति तदेवेहाप्यापन्नम्। नैष दोषो धर्म्माधर्म्मकार्य्ययोः शरीरसम्बन्धिनोः प्रियाप्रिययोः प्रतिषेधस्य विवक्षितत्वात् "अशरीरं न प्रियाप्रिये स्पृशतः" इत्यादिश्रुत्या। आगमापायिनोर्हि स्पर्शशब्दो दृष्टो यथा शीतस्पर्शं उष्णस्पर्शं इति। न त्वग्नेरुष्णप्रकाशयोः स्वभावभूतयोरग्निना स्पर्श एव भवति। तथाग्नेः सवितुर्वोष्णप्रकाशवत्स्वरूपभूतस्य नित्यस्य प्रियस्यापि

नेह प्रतिषेधो "विज्ञानमानन्दम्" "आनन्दो ब्रह्मेति" श्रुतिभ्यः इहापि "भूमैव सुखम् इत्युक्तत्वात्" भा०। इत्युपक्रम्य बहूपदेशः कृतः। प्रपञ्चस्तत्र दृश्यः।

इन्द्रश्च देवानां मध्येऽतिशयेन ब्रह्मविन्तमः तथाहि। केनोपनिषदि असुरविजये देवानां महिमाभिमाने जाते तदभिमानापनोदनार्थं यक्षभूतेनाविर्भूतेन परब्रह्मणा अग्निवायोरभिमाननिरसने तयोर्निष्टत्तौ दृढभक्तिमिन्द्रं प्रत्येव हैमवत्युपदेशेन तस्यातिशयमहिमा सूचितः ततो दिग्मात्रं तद्भाष्यश्रुतदर्शयते। "ब्रह्म ह देवेभ्यो विजिग्ये तस्य ह ब्रह्मणो विजये देवा अमहीयन्त त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति तद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूव तन्न व्यजानन्त किमिदं यक्षमिति। तेऽग्निमब्रुवन् जातवेदः! एतद्विजानीहि किमेतद्यक्षमिति तथेति तदभ्यद्रवत्तमभ्यवदत् कोऽसीति अग्निर्वा अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति। तस्मिंस्त्वयि किं वीर्यमित्यपीदं सर्वं दहेयं यदिदं पृथिव्यामिति। तस्मै तृणं निदधावेतद्दहेति तदुपप्रेयाय सर्वजवेन तन्न शशाक दग्धुं स तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति" के० उ०। एवं वायोरप्यभिमाननिरसनतत्परवर्ण्यं "अथेन्द्रमब्रुवन्मघवन्नेतद्विजानीहि किमेतद्यक्षमिति तथेति तदभ्यद्रवत्तमभ्यवदत्तस्मात्तिरोदधे। स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीं तां होवाच किमेतद्यक्षमिति। सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वमिति ततो हैव विदाञ्चकार ब्रह्मेति। यस्माद्वा एते देवा अतितरामिवान्यान्देवान् यदग्निर्वायुरिन्द्रस्ते ह्येन नेदिष्ठं पस्पर्शुस्ते ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति तस्माद्वा इन्द्रोऽतितरामिवान्यान् स ह्येनन्नेदिष्ठं पस्पर्श स ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति" के० उ०। "तथेन्द्रमब्रुवन्मघवन्नेतद्विजानीहि इत्यादिपूर्वं यदिन्द्रः परमेश्वरो मघवान् बलवत्त्वात्तथेति तदभ्यद्रवत्तस्मादिन्द्रादात्मसमीपगतात्तद्ब्रह्म तिरोदधे तिरोभूतमिन्द्रत्वाभिमानोऽतितरां निराकर्त्तव्य इत्यतः संवादमात्रमपि नादात् ब्रह्मेन्द्राय। तदात्मयक्षिन्नाकाशे आकाशप्रदेशेऽन्तरात्मानं दर्शयित्वा तिरोभूतमिन्द्रस्य ब्रह्मणस्तिरोधानकाले यक्षिन्नाकाशे आसीत् स इन्द्रस्तस्मिन्नेवाकाशे तस्थौ। किं तद्यक्षमिति ध्यायन्त्र निवर्त्तेऽग्न्यादिवत्तस्येति यत्ते भक्तिं बुद्धा विद्या उमारूपिणी प्रादुर्भूता स्त्रीरूपा। स इन्द्रस्तासां सर्वेषां हि शोभमानानां शोभनतमां विद्यां तदा बहुशोभमानेति विशेषणसूपपद्यते। हैमवतीं हेमलताभरणवतीमिव बहुशोभमानामित्यर्थः। अथवा उमैव हिमवतो दुहिता हैमवती नित्यमेव सर्वज्ञेन ईश्वरेण सा वर्त्तत इति ज्ञातुं समर्था इति ज्ञात्वा तामुपजगाम इन्द्रस्तां ह उमां किलोवाच यमक्ष ब्रूहि किमेतद्यक्षमिति तिरोभूतं यदासीति। सा ब्रह्मेति होवाच ह किल ब्रह्मण ईश्वरस्यैव विजये ईश्वरेणैव जिता असुरा यूयं तत्र निमित्तमात्रं तस्यैव विजये यूयं महीयध्वं महिमानं प्राप्नुथ। एतदिति क्रियाविशेषणार्थम्। मिथ्याभिमानस्य युष्माकमेव महिमेति। ततस्तस्मादुमावाक्यात्स एव विदाञ्चकार ब्रह्मेतीन्द्रोऽवधारणात्ततो ह्यैवेति न स्वातन्त्र्येण। यस्मादग्निवायविन्द्रा एते देवा ब्रह्मणः संवाददर्शनादिना समीपमुपगतास्तस्मादैश्वर्यसुखैरतितरामिव भक्तिसुखादिभिर्महाभाग्यैरन्यान्देवानतितरामतिशयेन रेरते द्रवन्ते देवाः। द्रवशब्दोऽनर्थकोऽवधारणार्थो वा। यदग्निर्वायुरिन्द्रस्ते हि देवा यस्मादेतद्ब्रह्म नेदिष्ठमन्तिकं समीपं प्रियतमं पस्पर्शुः स्पृष्टवन्तो यतोऽतैर्ब्रह्मणः संवादादिप्रकारैस्ते हि यस्माच्च हेतोरेनद्ब्रह्म प्रथमः प्रथमाः प्रधानाः सन्त एतेतद्विदाञ्चकार विदाञ्चक्रुरित्येतद्ब्रह्मेति। यस्मादग्निवायू अपीन्द्रवाक्यादेव विदाञ्चक्रुः इन्द्रेण ह्युमावाक्यात्प्रथमं श्रुतं ब्रह्मेत्यतस्तस्माद्वै इन्द्रोऽतितरामतिशयेन रेते द्रवान्यान्देवान्, स ह्येतद्नेदिष्ठं पस्पर्श यस्माच्च ह्येनत्प्रथमो विदाञ्चकार ब्रह्मेति" भा० ११ अनाराजनि "इन्द्रियमिन्द्रलिङ्गमित्यादि" पा० १२ ऐश्वर्यान्विते त्रि०। भावे रत्। १२ऐश्वर्ये। १३इन्द्र वारुण्यां स्त्री टाप्। राजनि०। "इन्द्रायेन्दो! पवस्ते" ऋ०९,६७,२२। "तदिन्द्रसन्दिष्टमेन्द्र! यद्वचः" माघः। "इरो इन्द्रस्य" निरु०। १५इन्द्रपर्वते "महीमहेन्द्रस्तमवेक्ष्य सत्वरम्" नैष०। "राज्ञस्तैतं क्रतुतमं राज्ञां चैवाभिषेचनम्। अनिन्द्रमवलं राष्ट्रं दस्यवोऽभिभवन्त्युत" ५,१०आ०६७च० "देवताहन्द्वे उत्तरपदस्थस्य नेन्द्रस्य परस्य न वृद्धिः आग्नेन्द्रम् कर्म त्रि० को० लिङ्गाद्यैं ष। इन्द्रियम्। इन्द्रियशब्दे विवृतिः। इन्द्रोजोविकास्य देवपथा० कन् तस्य लुप्। इन्द्रस्तनूर्मूर्तिर्जोविकावति लुपि व्यक्तिवचनत्वात् पु०। इन्द्रोदेवताऽस्य अण्। इन्द्रदेवताके ऋविरादौ "ऐन्द्रं दध्यावशावाम्" श्रुतिः। स्त्रियां ङीप्। "ऐन्द्रा गार्हपत्यमुपतिष्ठते" श्रुतिः। 'ऐन्द्रोतमश्वरेश्वरम्"

दैवोमा० ऐन्द्रो दिक् "उपमितसमासे उत्तरपददस्यः श्रेष्ठत्वद्योतकः मनुजेन्द्रः वारणेन्द्र इत्यादि ।

इन्द्रक न० इन्द्रस्य राज्ञः कं सुखं यत्र । १सभाभेदे हेम० । ईत० । २इन्द्रसुखे ।

इन्द्रकर्मन् पु० इन्द्रस्येव ऐश्वर्यान्वितं कर्म्मास्य । विष्णौ "इन्द्रकर्म्मा महाकर्म्मा कृतकर्म्मा कृतागमः" विष्णुस० ।

इन्द्रकील पु० इन्द्रस्य कील इव अत्युच्चत्वात् । १मन्दरपर्व्वते इन्द्रस्य कील इव । २इन्द्रध्वजे न० "विधमेन्द्रकीलचतुष्पथश्वभ्राणासुपरिष्टात्" सुश्रु० ।

इन्द्रकुञ्जर पु० ईत० । ऐरावते तस्योद्भूतमन्थनकाले इन्द्रेण गृहीतत्वात् तथात्वम् यथाह "श्वेतैर्दन्तैश्चतुर्भिस्तु महाकायस्ततः परम् । ऐरावणो महानागोऽभवद्दन्तैश्चतुर्भुतः" भा० आ० १८अ० । इन्द्रगजगजगजादयोऽप्यत्र ।

इन्द्रकूट पु० इन्द्र ऐश्वर्यान्वितः कूटोऽस्य । पर्व्वतभेदे "ततस्तु पर्व्वताः सप्त केवलं समुपस्थिताः । जयन्तो वैजयन्तोऽथ नीलो रजतपर्व्वतः । महामेरुः सकैलास इन्द्रकूटश्च नामतः" हरि० १७ अ० ।

इन्द्रकृष्ट न० कृष्टं कर्षणं भावे क्त ततः अस्यर्थे अच् इन्द्रेण इन्द्रहेतुककर्षणेन कर्षणजातम् । वृष्टिजलसम्पन्ने धान्यभेदे "इन्द्रकृष्टैर्वपेत्तेयनि धान्यैश्चैव नदीसुखैः" भा० स० ५ अ० ।

इन्द्रकोष पु० इन्द्रस्य कोषइव सुखदायकत्वात् । १मञ्चे, २खड्गायाञ्च । [पर्व्वतादयोऽप्यत्र ।

इन्द्रगिरि पु० इन्द्रनामा गिरिः । महेन्द्रपर्व्वते । इन्द्र-

इन्द्रगुरु पु० ईत० । बृहस्पतौ इन्द्राचार्य्यादयोऽप्यत्र ।

इन्द्रगोप पु० इन्द्रो गोप इव रक्तकोऽस्य वर्षाभवत्वात्तस्य । वर्षाकालिके कीटभेदे शक्रगोपादयोऽप्यत्र । "अविरलवसुरसुरेन्द्रगोपाः" किरा० । "इन्द्रगोपकवर्णाभां शुक्लवर्णां मनोजवाम्" भा० स० ४० अ० । शुभतया वर्णनात् "बृहद्योवनया शक्रगोपकालोहितरागेणांशुकेन" कादं० रक्ततया वर्णनाच्च तस्य कीटस्य द्वैविध्यं रक्तश्वेतभेदात् ।

इन्द्रघोष पु० इन्द्र इतिशब्देन विख्यातं घुष्यते घुष-कर्म्मणि घञ् । इन्द्रे "इन्द्रघोषस्त्वा वसुभिः पुरस्तात् पातु" यजु० ५,११ । [श्वेतचन्दने राजनि० ।

इन्द्रचन्दन न० इन्द्रप्रियं चन्दनम् या० त० । हरिचन्दने

इन्द्रचाप पु० इन्द्रे इन्द्रस्वामिके मेघे चापइव । १शक्रधनुषि । "विद्युल्लम्बं ललितवनिताः सेन्द्रचापं सचित्राः" मेघदू० । "विद्युता सहितः स्वर्य्यः सेन्द्रचापे घने यदा" भा० व० २३० अ० । तदुत्पत्तिप्रकारादि वृह० स० उक्तम्

इन्द्रायुधशब्दे विवृतिः ईत० । २शक्रस्य शरासने च

इन्द्रचिर्भिटी इन्द्रस्यात्मनःप्रिया चिर्भटी सा० त० । लताभेदे । सा च इन्द्रतुल्यवर्णकुसुमा पुष्पान्वितमञ्जरीका दीर्घवल्ली, युग्मफलान्विता कट्वी शीतवीर्य्या पित्तश्लेष्मकासव्रण-दोषक्षमिनाशिनी चक्षुष्या च राजनि० ।

इन्द्रच्छन्दस् न० इन्द्र इव सहस्रनेत्रेण सहस्रसुच्छेन छाद्यते छद-असुन् नि० नुट् । सहस्रसुच्छे हारभेदे हेम० ।

इन्द्रजनन न० इन्द्रस्यात्मनः जननं देहसम्बन्धभेदः । आत्मनोदेहसम्बन्धभेदे । तदधिकृत्य कृतः ग्रन्थः अ । इन्द्रजननीयं तदधिकारेण कृते ग्रन्थभेदे न० ।

इन्द्रजाल न० इन्द्रेण कौशलार्थं स्वर्य्येण जालं दृष्टेर्नेत्रावरणं यथास्थितवस्तुदर्शनाद्यमत्वसाधनात्, इन्द्रस्य परमेश्वरस्य जालं मायेव वा । मन्त्रौषधादिना अन्यथास्थितस्य वस्तुनोऽन्यथात्वेन दर्शनसाधने (कुहक) (बाजी) १पदार्थे २मायारूपे जाले च । "अतएव महान्तोऽस्याः प्रवदन्तीन्द्रजालताम् । एतच्चात् किमिवेन्द्रजालमपरं यद्गर्भवासस्थितं रेतश्चेतनितरुस्तमस्तकपदप्रोद्भूतनानाङ्कुरम् । पर्य्यायेण शिशुत्वयौवनजरावेशैरनेकैर्वृतं पश्यत्यत्ति शृणोति जिघ्रति तथा गच्छत्यगच्छति । देहवद्वटधानासौ सविकार्य्यावलोक्यताम् । क धानाः क च वा इक्षुस्तम्बान्मायेति निश्चितु" प० द० "स्थूणाकर्णैन्द्रजालञ्च सौरञ्चापि तथार्जुनः । आग्नेयञ्चापि सौम्यञ्च ससर्ज कुरुनन्दनः" भा० व० २७४ अ० । इन्द्रेण इन्द्रकृतेन योगविशेषेण जालम् । २चक्षूरोगभेदे च । इन्द्रजालञ्च द्रव्यविशेषसंयोगेन अद्भुतवस्तुदर्शकव्यापारः (किमिटरि) इति इंलण्डभाषा प्रसिद्धः मन्त्रद्रव्यविशेषेण वस्तुनोऽन्यथा करणञ्च । तच्च दक्षालेयतन्त्रे मन्त्रविशेषसाध्यम् विस्तरेणाभिहितम् । इन्द्रजालतन्त्रे तु ओषधिविशेषेण तथाचरणं यदुक्तं ततोदिङ्मात्रं प्रदर्श्यते । "अथातः संप्रवक्ष्यामि चेन्द्रजालमनुत्तमम्" इत्युपक्रम्य

"अथातः संप्रवक्ष्यामि ओषधीनां विधिं वरे ! । येन विज्ञानमात्रेण सर्व्वसिद्धिर्भविष्यति । महाकालस्य बीजानि प्रस्थमेकं समाहरेत् । धात्रीरसेन देवेशि ! सप्त वारान् विभावयेत् । कर्षार्द्धा गुटिका तां तु मुखे निक्षिप्य पार्व्वति ! । अचिरेणैव कालेन स्वयं पारावतो भवेत् । अथातः संप्रवक्ष्यामि शृणुष्व मम वल्लभे ! । खगस्य बीर्य्यं संगृह्य तत्र कृष्णवर्त्तिकां पूरयित्वा पुनर्धत्तूरबीजानि वापयेत् यदाऽसौ तानि पुष्पितानि भवन्ति तदा यक्षोपरि

निक्षिपेत् स वागो भवति । मयूरशीर्षमादायकृष्ण-चतुर्दश्यां वृत्तिकां पूरयेत् शणबीजानि वापयेत् यदा फलितः पुष्पितो भवति तदा शणबीजानि गोवायां वन्धयेत् मयूरो भवति । कृष्णचतुर्दश्यां मयूरशीर्षमादाय कृष्णवृत्तिकां पूरयेत् कार्पासबीजानि वापयेत् तदा फलिताः पुष्पिता भवन्ति पुष्पफले संगृह्य समस्तं पेषयित्वा अङ्गं विलिप्य पानीयमध्ये प्रविश्य यदा जले तिष्ठति तदा मयूरो भवति । कृष्णकाकशीर्षमादाय काकमाचीबीजानि वापयेत् यदा फलिता पुष्पिता भवति तत्फलं संगृह्य मुखे प्रक्षिप्य काको भवति । काक इव गच्छति मक्षान्नशीर्षं भोजः । पारावतशीर्षमादाय कृष्णवृत्तिकां पूरयित्वा तिलबीजानि वापयेत् क्षीरोदकेन सेचनीयं यदा पुष्पितो भवति तदा मुखे संस्थाप्य अन्तर्हितो भवति । तेषां फलानां चूर्णं कृत्वा तेन चूर्णेन यं स्पृशति स किङ्करो भवति । सर्वस्वं ददाति । तानि तिलानि संगृह्य नेत्राञ्जनेन सह पिष्ट्वा कपिलादुग्धेन गुटिकां कारयेत् सप्तरात्रं पाचयेत् तां गुटिकां मुखे निक्षिप्य अन्तर्हितो भवति देवैरपि न दृश्यते मनुष्याणां का कथा । उष्ट्रशीर्षं पुरुषो भवति । जीवेद्वर्षशतं स्त्रियः सर्वे जनाश्च वश्या भवन्ति । वटधृशिरः समादाय कृष्णचतुर्दश्यां कृष्णवृत्तिकायां निक्षिपेत् लशुनबीजानि वापयेत् यदा फलं पुष्पं भवति तदा पुष्पमात्रं पुष्पं गृहीत्वा अञ्जनेन सह कपिलाघृतेन कज्जलं पातयेत् चक्षुरञ्जनीयं यावत् तावत् योजनशतं पश्यति भेदिन्यां, दिवा नक्षत्राण्यपि पश्यति । एवं उष्ट्रगर्दभमहिषादीनां दृश्यजीवानां शिरसि यत् यत्बीजं यस्य शिरसि वापयेत् यदा पुष्पितः फलितो भवति तदा यस्य बीजानि मुखे निक्षिप्यन्ते स जीवो भवति नात्र सन्देहः । मातुलुङ्गस्य मूलन्तु धुस्तूरबीजकेन च । पलाशपुष्पमादाय सूक्ष्मचूर्णन्तु कारयेत् । योऽस्य गन्धं समाघ्राति स च स्नेहेन पश्यति । दुन्दुभिं पटहांश्चैव शङ्खांश्चैव तु लेपयेत् । एष भूतोपसृष्टानां कुमारीणां गृहेषु च । भूपतिं सेवमानानां तथा तत्कर्मजीविनाम् । न चाग्निर्दहते वेश्म यत्रैष लोऽगदो भवेत् । पारावतस्य हृदयं चक्षुर्जिह्वा च शोणितम् । अञ्जनं रोचनायुक्तं वनितावशकृत् परम् । कपालं मानुषं गृह्य कनकस्य फलानि च । कर्पूरं मधुसंयुक्तं निघृष्य तिलकेन च । नारी वा पुरुषोऽनेन वश्यो भवति निश्चयः । एष कापालिको योगो वशिष्ठस्य शुभं मतम् । नरजिह्वां समुद्धृत्य सूक्ष्मचूर्णन्तु कारयेत् । जलेन च सुगीतेन दापयेत्तद्विचक्षणः । पाने फले च पुष्पे च भक्ष्ये भोज्ये च दापयेत् । प्रजापतिकुलोद्भूता यदि साक्षादरुन्धती सापि रक्ता प्रियं याति नान्यं पुरुषमिच्छति । हरितालं श्मशाने कृष्णचतुर्दश्यां लिखा कुङ्कुमिश्रं स्वाक्षम् अवश्यं वशीभवेत् स नरः । नरतैलं प्रेताम्बरवर्त्तिकं कृत्वा पाठेरात्रौ प्रज्वाल्यार्कदुग्धखण्डे कज्जलं कृत्वा चक्षुषी अभ्यञ्जेत् यं पश्यति स वश्यो भवति । कर्णदन्तमलं लाला स्वदेहाच्चिमलत्रयम् । नासिकोद्भवरक्तञ्च चूर्णमेतद्विभावितम् । एतत् सर्वं समुद्धृत्य गुटिकां कारयेद्बुधः । पानभोजनके देयं वशीकरणमुत्तमम् । काकजिह्वा वचा कुङ्कुमात्मनो रुधिरं स्त्रियः । तद्वात्तदन्नं कज्जिका तगरं गौरसर्षपाः । शिवनिर्माल्यसंयुक्तं समभागानि कारयेत् । भोज्ये पानेऽथवा देयं स्त्रीणान्तु वशकारकम् । नित्यं पुरुषमिच्छन्ती मृतमद्यमुपगच्छति । कृष्णसर्पस्याङ्गुलप्रमाणं शिरश्छित्त्वास्यं सर्षपादिभिः । पूरयित्वा छायाशुष्कं शोषयेत् । परतः सर्षपान् गृह्य पचित्वा तानि यस्यै दीयते स वश्यो भवति । पूगीफलं गिलित्वाऽपानमार्गेण निर्गतं संगृह्य धुस्तूररसान्वितं कृत्वा सप्त दिनानि पूजयेत् । पुनः कृष्णभेकरुधिरास्यं यस्यै दीयते स वश्यो भवति । दर्दुरयुग्मं गृहीत्वा तद्धूमेन दाहयेत् । तद्भस्म सह पानेन वश्यकृत् परमो मतः । अजगन्धस्य पत्राणां वचां कुङ्कुमेन भावयेत् । श्मशानभस्मसंयुक्तं चूर्णञ्चैत्रिषु दुर्लभम् । अनेनैव तु चूर्णेन योजयेत् त्रीणि पादपान् । पुष्पितं फलितं दृष्ट्वा चूर्णं दत्त्वाद्विलग्नयेत् । तत् क्षणात् फलते दृष्टो नरनारीषु का कथा । जिह्वामूले सप्तरात्रं सैन्धवेनापि मिश्रितम् । ददाति यस्य पानेषु सोऽपि वश्यो भवेत् क्षणात् । गोपितं सैन्धवञ्चैव दृष्टतीफलमेव च । लेपप्रभेतत् प्रयोक्तव्यं नरनारीवशङ्करम् । उष्ट्रातुः पञ्चमलिन आत्मनो रुधिरान्वितम् । स्त्रीपुंसयोः प्रदातव्यं वशीकरणमुत्तमम् । श्वेतार्कं रोचनायुक्तमात्ममूलेन पेषयेत् । ललाटे तिलकं कृत्वा त्रैलोक्यं क्षोभयेत् क्षणात् । दृष्टमात्रेण तेनैव सर्वो भवति किङ्करः । श्वेतार्कं चन्दनेनैव रञ्जयेत् सह लेपयेत् । दीयते कस्य चिद्यापि पश्चात् दासो भविष्यति । मधूकं सह तैलेन सार्षपेण तु लेपयेत् । एतेन पाणिमभ्यञ्ज्य भर्त्रा सा सङ्गता भवेत् ।

ष्टंदत्ते मैथुनीभावे पतिर्दासो भविष्यति"। "यानि कानि च बीजान्यङ्कोलतैलेन मेलयेत्। सफलो जायते हृद्यः सिद्धियोग उदाहृतः। अवस्तुखे विन्दुमात्रं तत्तैलं निःक्षिपेद् यदि। एकवामं भवेत् जोवो नान्यथा शङ्करोदितम्। गिरुवीजस्थितं तैलं पारावत पुरीषकम्। वराहस्य वसायुक्तं गृहीत्वा च समं समम्। गर्दभस्य वसायुक्तं हरितालं मनःशिलाम्। एभिस्तु तिलकं कृत्वा यथा लङ्केश्वरोऽभवत्। उलूकविष्टां गृहीत्वा त्वेरण्डतैलेन पेषयेत्। यस्याङ्गे निक्षिपेत् विन्दुं सक्षिप्रो जायते ध्रुवम्। सर्पदन्तं गृहीत्वा तु कृष्णहस्तिककण्टकम्। ककलारक्तसंयुक्तं सूक्ष्मचूर्णन्तु कारयेत्। यस्याङ्गे निक्षिपेच्चूर्णं सद्यो याति यमालयम्। सिन्दूरं गन्धकं तालं समं पिष्टा मनःशिलाम्। तल्लिप्तवस्त्रं गिरसि अग्निवत् दह्यते ध्रुवम्। अर्कक्षीरं वटक्षीरं क्षीरं डुम्बरसम्भवम्। गृहीत्वा पात्रके क्षिप्ते जलपूर्णं करोति च। दुग्धं तत्र भवेत् सद्यो महाकौतककौतुकम्। अङ्कोलतैलनिष्पाङ्को दृश्यते राजसाकृतिः। पलायन्ते नराः सर्वे पशुपक्षिगजा हयाः। अङ्कोलस्य तु तैलेन दीपं प्रज्वालयेद्वरः। रात्रौ पश्यति भूतानि खेचराणि महीतले। बुधे वा शनिवारे वा ककलां याद्य यत्नतः। यत्र मूत्रयते यत्र ककलां तत्र निःक्षिपेत्। निखनेद्भूमिमध्येषु उद्वृते च पुमः सुखी। नपुंसकं भवेत् सद्यं नान्यथा शङ्करोदितम्। गन्धकं हरितालञ्च गोमूलञ्च विषं तथा। सूक्ष्मचूर्णमयं कृत्वा किञ्चिद्वक्त्रं विनिःक्षिपेत्। विन्नाः सर्वे पलायन्ते यथा युद्धेषु कातराः" दत्तात्रेय तन्त्रे ११५०

इन्द्रजालिक त्रि० इन्द्रजालं शिल्पतयाऽस्त्यस्य ठन्। इन्द्रजालकारके। इनि इन्द्रजालीत्यपि स्त्रियां ङीप्।

इन्द्रजित् पु० इन्द्रं जितवान् जि-भूते क्विप्। दितिवंशीये असुरभेदे चाक्षुषमन्वन्तरे "दित्याः पुत्रशतं जज्ञे कश्यपादिति विश्रुतम्। हिरण्यकशिपुश्चैव हिरण्याक्षश्च वीर्यवान्" । इत्युपक्रम्य तत्पुत्रपौत्रादिवर्णने "इन्द्रजित् सर्वजिच्चैव वज्रनाभस्तथैव च" हरिवं० ३अ०। २रावणपुत्रे मेघनादे च "पुत्रमिन्द्रजितं वीरं रावणः प्रत्यधावत। जहि रामममित्रघ्नं सुग्रीवञ्च सलक्ष्मणम्। त्वया हि मम सत्पुत्र! यशोदीर्घसुपार्जितम्। जित्वा वज्रधरं संख्ये सहस्राक्षम् यशोपतिम्" भा०व० २८७। "तौ वीरौ शरबन्धेन बद्धाविन्द्रजिता रणे" भा०व० २८८ अ०।

इन्द्रजिद्धन्तृ पु० इन्द्रजितं हन्ति हन-तृच् ईत०। दशरथात्मजे लक्ष्मणे। तद्धननकथा। "अविध्यदिन्द्रजित्तीक्ष्णैः सौमित्रिं मर्म्मभेदिभिः। सौमित्रिर्बाणजालेन सर्वैरविध्यद्रावणिं शरैः"। इत्युपक्रम्य "एकेनास्य धनुश्चान्यं बाहुं देहात्पातयत्। द्वितीयेन शरेणास्य भुजं भूमौ न्यपातयत्। ततोऽन्येन तु बाणेन पृथुधारेण भास्वता। जहार सुनसङ्काशं शिरो भ्राजिष्णुकुण्डलम्। विनिकृत्तभुजस्कन्धं कबन्धं भीमदर्शनम्। तं दृष्ट्वा सूतमभ्यस्तैर्जघान बलिनां वरः" भा०व०२२८अ०।

इन्द्रतापन पु० इन्द्रं तापयति तप+णिच्+ल्यु। १असुरभेदे "इन्द्रतापनवातापी केतुमान् बलदर्पितः" असुरनामोत्कीर्त्तने" हरिवं० २६अ०। २मेघनादे च। दशग्रीवश्च बाली च मेघराजो दशावरः। टिट्टिभोविटभूतश्च संह्लादश्चेन्द्रतापनः" भा०स०प०अ० वरुणसभावर्णने।

इन्द्रतूल न० इन्द्रस्येव तूलमाकाशे उड्डीयमानत्वात्। आकाशे मरुता चाल्यमाने कार्पासे वृक्षे तिका०।

इन्द्रतोया स्त्री इन्द्रमैश्वर्य्यान्वितं तोयमस्याः, इन्द्रेण पूरितं तोयमस्या वा। गन्धमादनसमीपस्थे नदीभेदे। "इन्द्रतोयां समासाद्य गन्धमादनसन्निधौ" भा० अनु० प० २४।

इन्द्रदमन पु० "बाणश्च बेन्द्रदमनो बलिपुत्रादवाप्तवान्" हरिवं०३अ० उक्ते बाणासुरपुत्रभेदे।

इन्द्रदारु पु० इन्द्रस्य तद्ध्वजस्य साधनं दारु। देवदारुवृक्षे। इन्द्रध्वजशब्दे ६४६ पृष्ठे तस्य तद्ध्वजसाधनत्वम् दृश्यम्। इन्द्रद्रुमादयोऽप्यत्र।

इन्द्रद्युम्न इन्द्रस्येव द्युम्नं धनमस्य। भारतोक्ते १ऋषिभेदे २असुरावतारराजभेदे ३राजभेदे च। तत्र असुररूपोत्पत्तिः कृष्णेन हतः सन्। "इन्द्रद्युम्नोहतः कोपाद्युवनस्य कसेरुमान्। हतः सौभपतिः शाल्वस्तथा सौभं च पातितम्" भा० व० १२ अध्याये कृष्णं प्रति व्यासवाक्यम्। ऋषिभेदस्तु। "ततस्ते ब्राह्मणाः सर्वे वकं दाल्भ्यमपूजयन्नित्युपक्रम्य "द्वैपायनो नारदश्च जामदग्नः पृथुश्रवाः। इन्द्रद्युम्नोभालवित्र कृतचेताः सहस्रपात्" इति कतिचित् ब्राह्मणानभिधायाह। "एते चान्ये च बहवोब्राह्मणा संशितव्रताः। अजातशत्रुमानर्चुः पुरन्दरमिवर्षयः" भा० व० २६ अ०। राजभेदस्तु मार्कण्डेयादपि प्राचीनः तत्कथा भा०व० १६८अ०। युधिष्ठिरं प्रति मार्कण्डेयवाक्यम्। "स तानुवाचाथ खलु राजर्षिरिन्द्रद्युम्नो नाम क्षीण-

मुखस्त्रिदिवात् प्रच्युतः कीर्त्तिर्मे व्युच्छेदेति स मामुपातिष्ठदथ प्रत्यभिजानाति मां भवानिति। तमहमब्रवं न वयं वालायनिकाः कार्य्यचेष्टाकुलत्वाच्च प्रत्यभिजानाम्यात्मनोऽर्वानामनुष्ठानं न शरीरोपतापेनात्मनः समारम्भोऽर्वानामनुष्ठानं स मामुवाच अस्त्यन्यस्त्वत्तश्चिरजात इति तमहमब्रवम् अस्ति खलु हिमवति प्रावारकर्णो नामोलूकः प्रतिवसति स मत्तश्चिरजातो भवन्तं यदि जानीयादितः प्रस्थे चाध्वनि हिमवांस्तत्रासौ प्रतिवसतीति। ततः स ममात्मो भूत्वा तत्रावहृद्यत्र बभूवोलूकः अथैनं स राजा पप्रच्छ प्रतिजानाति मां भवानिति। स मुहूर्त्तमिव ध्यात्वाऽब्रवीदेनं नाभिजानामि भवन्तमिति। स एवमुक्त इन्द्रद्युम्नः पुनस्तमुलूकमब्रवीद्राजर्षिः। अथास्ति कश्चिद्भवतः सकाशाच्चिरजात इति स एवमुक्तोऽब्रवीदस्ति खल्विन्द्रद्युम्नं नाम सरस्तस्मिन्नाड़ीजङ्घो नाम वकः प्रतिवसति सोऽस्मत्तश्चिरजाततरस्तं पृच्छेति। तत इन्द्रद्युम्नो मामुलूकमादाय तत्सरोऽगच्छद्यत्रासौ नाडीजङ्घो नाम वको बभूव। सोऽस्माभिः पृष्टो भवानिममिन्द्रद्युम्नं राजानमभिजानाति स एवं मुहूर्त्तं ध्यात्वाऽब्रवीन्नाभिजानाम्यहमिन्द्रद्युम्नं राजानमिति ततः सोऽस्माभिः पृष्टः कश्चिद्भवतो ऽन्यश्चिरजाततरोऽस्तीति स नोऽब्रवीदस्ति खल्वस्मिन्नेव सरस्यकूपरो नाम कच्छपः प्रतिवसति स मत्तश्चिरजाततरः स यदि कथञ्चिदभिजानीयादिमं राजानं तमकूपारं पृच्छध्वमिति। ततः स वकस्तमकूपारं कच्छपं विज्ञापयामास। अस्यस्माकमभिप्रेतं भवन्तं कञ्चिदर्थमभिप्रष्टुं साध्वागम्यतां तावदिति तच्छ्रुत्वा कच्छपस्तस्मात् सरसः उत्थायाभ्यगच्छद्यत्र तिष्ठामो वयं तस्य सरसस्तीरे आगतञ्चैनं वयमपृच्छाम भवानिममिन्द्रद्युम्नं राजानमभिजानातीति। स मुहूर्त्तं ध्यात्वा वाष्पसम्पूर्णनयन उद्विग्नहृदयो वेपमानो विसंज्ञकल्पः प्राञ्जलिरब्रवीत्। कथमहमेनं न प्रत्यभिज्ञास्यामीह जन्मनि सहस्रकृत्वश्चितिषु यूपा आहिताः। सरस्येदमस्य दक्षिणाभिर्हविर्भोजिभिरतिक्रमणाभिः कृतम्। अत्र चाहं प्रतिवसामीति। अथैतत् सकलं कच्छपेनोदाहृतं श्रुत्वा तदनन्तरं देवलोकाद्देवरथः प्रादुरासीदाहाचाश्वायन इन्द्रद्युम्नं प्रति प्रसुतस्ते स्वर्गो यथोचितं स्थानं प्रतिपद्यस्व कीर्त्तिमानस्म्यक्षयो याहीति"।

एतत्सरश्चोक्तवाक्ये वर्णितं तच्चाधिकृत्य। "इन्द्रद्युम्नसरः प्राप्य हंसकूटमतीत्य च। यतस्तद्भ महाराज! तापसः समतप्यत" इत्युक्तेः यतस्तद्भृपर्व्वतसमीपे हंसकूटानन्तरं तत्सरः इति गम्यते। "हंसकूटस्य यच्छृङ्गमिन्द्रद्युम्नसरः प्रति" इति हरिवं० १५७ अध्यायेऽपि हंसकूटसन्निकृष्टत्वमस्यावगम्यते। पुरुषोत्तममूर्त्तिप्रकाशकत्वापरः पुरुषोत्तमशब्दे तद्विवृतिर्द्रष्टव्यते।

इन्द्रद्रु पु० इन्द्रस्य इन्द्रध्वजार्थोद्रुः। अर्जुनवृक्षे। तस्य तद्ध्वजनिर्म्माणे प्रथमोपात्तत्वात् तथात्वम्। इन्द्रध्वजशब्दे विवृतिः। इन्द्रनामा द्रुः। २कुटजवृक्षे राजनि०।

इन्द्रद्रुम न० इन्द्रद्रुवत् विपद्रुः। अर्जुनवृक्षे शब्दर०।

इन्द्रधनुस् न० इन्द्रे इन्द्रस्वामिके मेघे धनुरिव। इन्द्रायुध शब्दे वक्ष्यमाणे पदार्थे "विद्युतोऽशनिमेघांश्च रोहितेन्द्र धनूंषि च" मनुः। तस्य अजुत्वे रोहितत्वम्। वक्रत्वे इन्द्रधनुरिति भेदः।

इन्द्रध्वज पु० इन्द्रस्य तत्सन्तोषार्थोध्वजः। भाद्रशुक्लद्वादश्यां स्वराज्ये इष्ट्वादिशस्यद्वार्थं तत्प्रीतये राज्ञा क्रियमाणे ध्वजे तदुत्पत्तितत्करणप्रकारादि दर्शितं बृहत्संहितायां यथा

"ब्रह्माणमूचुरमरा भगवच्छक्राः क्ष नासुरान् समरे। प्रतियोधयितुमतस्त्वां शरण्यं शरणं समुपयाताः। देवानुवाच भगवान् क्षीरोदे केशवः स वः केतुम्। यं दास्यति तं दृष्ट्वा नाशौ स्थास्यन्ति वो दैत्याः। लब्धवराः क्षीरोदं गत्वा ते तुष्टुवुः सुराः सेन्द्राः। श्रीवत्साङ्कं कौस्तुभमणिकिरणोद्भासितोरस्कम्। श्रीपतिमचिन्त्यमसमं समन्ततः सर्वदेहिनां स्रष्टारम्। परमात्मानमनादिं विष्णुमविज्ञातपर्यन्तम्। तैः संस्तुतः स देवस्तुतोष नारायणो ददौ चैषाम्। ध्वजमसुरहरबधूमुखकमलवनतुषारतोच्छ्रायम्। तं विष्णुतेजोभवमष्टचक्रे रथे स्थितं भास्वति रत्नचित्रे। देदीप्यमानं शरदीव सूर्य्यं ध्वजं समासाद्य सुमोद शक्रः। सकिङ्किणीजालपरिक्षिप्तेन सकल्पवृक्षाधिष्टकान्वितेन। सच्छत्रितेनामरराड् ध्वजेन निघ्ने विनार्द्य समरे अरिसैन्यम्। उपरिचरस्यामरपो वसोर्ददौ चेदिपस्य वेणुमयीम्। यष्टिं तां स नरेन्द्रो विधिवज्जग्राह। प्रीतो मघेन मघवान् प्राहैवं ये त्वया करिष्यन्ति। वसुबलहेमवन्तस्ते भुवि सिद्धार्था भविष्यन्ति। क्षुदिताः प्रजाश्च तेषां भयरोगविवर्जिताः प्रभूताद्याः। ध्वज एव चाभिधास्यति जगति निमित्तैः फलं सदृशम्। पूजा तस्य नरेन्द्रैर्बृहद्विजयार्थिभिर्यथा पूर्वम्। शक्राज्ञया प्रयुक्ता तामागमतः प्रवक्ष्यामि। तस्य विधानं शुभकरणदिवस-

देशीभा० ऐन्द्री दिक् "उपमितसमासे उत्तरपददस्वः श्रेष्ठत्वद्योतकः मनुजेन्द्रः वारणेन्द्र इत्यादि ।

इन्द्रक न० इन्द्रस्य राज्ञः कं सुखं यत्र । १सभाभेदे हेम० । ईत० । २इन्द्रसुखे ।

इन्द्रकर्म्मन् पु० इन्द्रस्येव ऐश्वर्य्यान्वितं कर्म्मास्य । विष्णौ "इन्द्रकर्म्मा महाकर्म्मा कृतकर्म्मा कृतागमः" विष्णुस० ।

इन्द्रकील पु० इन्द्रस्य कील इव अत्युच्चत्वात् । १मन्दरपर्व्वते इन्द्रस्य कील इव । २इन्द्रध्वजे न० "विधमेन्द्रकीलचतुष्पथश्वभ्राणासपरिष्टात्" सुश्रु० ।

इन्द्रकुञ्जर पु० ईत० । ऐरावते तस्याहृतमन्थनकाले इन्द्रेण भटहोतत्वात् तथात्वम् यथाह "श्वेतैर्दन्तैश्चतुर्भिस्तु महाकायस्ततः परम् । ऐरावणो महानागोऽभवद्वज्रभृता धृतः" भा० आ० १८अ० । इन्द्रगजयक्रगजादयोऽत्र ।

इन्द्रकूट पु० इन्द्र ऐश्वर्य्यान्वितः कूटोऽस्य । पर्व्वतभेदे "ततस्तु पर्व्वताः सप्त केयूरं समुपस्थिताः । जयन्तो वैजयन्तोऽथ नीलो रजतपर्व्वतः । महामेरुः सकैलास इन्द्रकूटश्च नामतः" हरि० १७१ अ० ।

इन्द्रकृष्ट न० कृष्टं कर्षणं भावे क्त ततः अस्त्यर्थे अच् इन्द्रेण इन्द्रहेतुकवर्षणेन कर्षणजातम् । वृष्टिजलसम्पन्ने धान्यभेदे "इन्द्रकृष्टैश्च वप्तव्यानि धान्यैश्चैव नदीसखैः" भा० स० ५ अ० ।

इन्द्रकोष पु० इन्द्रस्य कोषइव सुखदायकत्वात् । १मञ्चे, २खड्गायाञ्च । [पर्व्वतादयोऽत्र ।

इन्द्रगिरि पु० इन्द्रनामा गिरिः । महेन्द्रपर्व्वते । इन्द्र-

इन्द्रगुरु पु० ईत० । बृहस्पतौ इन्द्राचार्य्यादयोऽत्र ।

इन्द्रगोप पु० इन्द्रो गोपो रक्षकोऽस्य वर्षाभवत्वात्तस्य । वर्षाकालिके कीटभेदे शक्रगोपादयोऽत्र । "अविरलवपुरसुरेन्द्रगोपाः" किरा० । "इन्द्रगोपकवर्णाभां शुक्लवर्णां मनोजवाम्" भा० स० ४० अ० । शुक्लतया वर्णनात् "वृद्धयौवनया शक्रगोपकालोहितरागेणांशुकेन" काद० रक्ततया वर्णनाच्च तस्य कीटस्य द्वैविध्यं रक्तश्वेतभेदात् ।

इन्द्रघोष पु० इन्द्र इतिशब्देन विख्यातं घुष्यते घुष-कर्म्मणि घञ् । इन्द्रे "इन्द्रघोषस्त्वा वसुभिः पुरस्तात् पातु" यजु० ५,११ । [श्वेतचन्दने राजनि० ।

इन्द्रचन्दन न० इन्द्रप्रियं चन्दनम् या० त० । हरिचन्दने

इन्द्रचाप पु० इन्द्रे इन्द्रस्वामिके मेघे चापइव । १शक्रधनुषि । "विद्युल्लम्बं ललितवनिताः सेन्द्रचापं सचित्राः" मेघदू० । "विद्युता सहितः सूर्य्यः सेन्द्रचापे घने यथा" भा० व० २२ अ० । तदुत्पत्तिप्रकारादि वृह० स० उक्तम्

इन्द्रायुधशब्दे विवृतिः ईत० । २शक्रस्य शरासने च

इन्द्रचिर्भिटी इन्द्रस्यात्मनःप्रिया चिर्भटी सा० त० । लतभेदे । सा च इन्द्रतुल्यवर्णकुसुमा पुष्पान्वितमञ्जरीका दीर्घफला, युग्मफलान्विता कट्वी शीतवीर्य्या पित्तश्लेष्मकासव्रण-दोषकृमिनाशिनी चक्षुष्या च राजनि० ।

इन्द्रच्छन्दस् न० इन्द्र इव सहस्रनेत्रेण सहस्रगुच्छेन छाद्यते छद-असुन् नि० नुट् । सहस्रगुच्छे हारभेदे हेम० ।

इन्द्रजनन न० इन्द्रस्यात्मनः जननं देहसम्बन्धभेदः । आत्मनोदेहसम्बन्धभेदे । तदधिकृत्य कृतः ग्रन्थः अ । इन्द्रजनीयं तदधिकारेण कृते ग्रन्थभेदे न० ।

इन्द्रजाल न० इन्द्रेण कौशलार्थं वश्येन जालं दृष्टेर्नेत्रावरणं यथास्थितवस्तुदर्शनाज्ञानसाधनात्, इन्द्रस्य परमेश्वरस्य जालं मायेव वा । मन्त्रौषधादिना अन्यथास्थितस्य वस्तुनोऽन्यथात्वेन दर्शनसाधने (कुहक) (बाजी) १पदार्थे २मायारूपे जाले च । "अतएव महान्तोऽस्याः प्रवदन्तीन्द्रजालताम् । एतस्मात् किमिवेन्द्रजालमपरं यद्गर्भवासस्थितं रेतश्चेतसि तिक्तमस्तकपदप्रोद्भूतनानाङ्कुरम् । पर्य्यायेण गिलत्यवीवनजरावैशैरनेकैर्हतं पश्चत्वात्ति म्रियते तथा गच्छत्यथ गच्छति । देहवद्वटधानासौ सुविचार्य्यावलोक्यताम् । क धानाः क च वा वृक्षस्तस्मान्मायेति निश्चिनु" प० द० "स्थूणाकर्णेन्द्रजालज्ञ सोऽप्यापि तथार्जुनः । आग्नेयञ्चापि सौम्यञ्च ससर्ज कुरुनन्दनः" भा० व० २७४ अ० । इन्द्रेण इन्द्रकृतेन योगविशेषेण जालम् । २क्षुद्रोपायभेदे च । इन्द्रजालञ्च द्रव्यविशेषसंयोगेन अद्भुतवस्तुदर्शकव्यापारः (किमिश्टरि) इति इंरेजभाषा प्रसिद्धः मन्त्रद्रव्यविशेषेण वस्तुनोऽन्यथा करणञ्च । तच्च दक्षालेयतन्त्रे मन्त्रविशेषसाध्यम् विस्तरेणाभिहितम् । इन्द्रजालतन्त्रे तु ओषधिविशेषेण तथाचरणं बहुक्रं ततोदिङ्मात्रं प्रदर्श्यते । "अथातः संप्रवक्ष्यामि चेन्द्रजालमनुत्तमम्" इत्युपक्रम्य

"अथातः संप्रवक्ष्यामि ओषधीनां विधिं वरे ! । येन विज्ञानमात्रेण सर्व्वसिद्धिर्भविष्यति । महाकालस्य बीजानि प्रस्थमेकं समाहरेत् । धात्वीरसेन देवेशि ! सप्त वारान् विभावयेत् । कर्त्तव्या गुटिका तां तु मुखे निक्षिप्य पार्व्वति ! । अचिरेणैव कालेन स्वयं पारावतो भवेत् । अथातः संप्रवक्ष्यामि शृणु त्वं मम वल्लभे ! । ज्ञानस्य बीजं संगृह्य तत्र कृष्णस्त्रिकां पूरयित्वा पुनर्धत्तूरबीजानि वापयेत् यदाकाले तानि पुष्पितानि भवन्ति तदा तस्योपरि

निक्षिपेत् स छागो भवति। मयूरशीर्षमादायकृष्ण-चतुर्दश्यां मृत्तिकां पूरयेत् शणबीजानि वापयेत् यदा फलितः पुष्पितो भवति तदा शणबीजानि ग्रीवायां बन्धयेत् मयूरो भवति। कृष्णचतुर्दश्यां मयूरशीर्षमादाय कृष्णमृत्तिकां पूरयेत् कार्पासबीजानि वापयेत् तदा फलिताः पुष्पिता भवन्ति पुष्पफले संमृद्य समस्तं मेषयित्वा चक्रं विक्षिप्य पानीयमध्ये प्रविश्य यदा जले तिष्ठति तदा मयूरो भवति। कृष्णकाकशीर्षमादाय काकमाचीबीजानि वापयेत् यदा फलिता पुष्पिता भवति तत्फलं संमृद्य मुखे प्रक्षिप्य काको भवति। काक इव गच्छति सप्ताहान्नीर्यं मोक्षः। पारावतशीर्षमादाय कृष्णमृत्तिकां पूरयित्वा तिलबीजानि वापयेत् क्षीरोदकेन सेचनीयं यदा पुष्पितो भवति तदा मुखे संस्थाप्य अन्तर्हितो भवति। तेषां फलानां चूर्णं कृत्वा तेन चूर्णेन यं स्पृशति स किङ्करो भवति। सर्वस्वं ददाति। तानि तिलानि संमृद्य नेत्राञ्जनेन सह पिष्ट्वा कपिलादुग्धेन गुटिकां कारयेत् सप्तरात्रं पाचयेत् तां गुटिकां मुखे निक्षिप्य अन्तर्हितो भवति देवैरपि न दृश्यते मनुष्याणां का कथा। उष्ट्रीर्षं पुरुषो भवति। जीवेद्वर्षशतं स्त्रियः सर्वे जनाश्च वश्या भवन्ति। मृद्भृशिरः समादाय कृष्णचतुर्दश्यां कृष्णमृत्तिकायां निक्षिपेत् लशुनबीजानि वापयेत् यदा फलं पुष्पं भवति तदा पुष्पनक्षत्रे पुष्पं मृद्गीत्वा अञ्जनेन सह कपिलाघृतेन कज्जलं पातयेत् चक्षुरञ्जनीयं यावत् तावत् योजनशतं पश्यति नेदिन्यां, दिवा नक्षत्राण्यपि पश्यति। एवं उष्ट्रगर्दभमहिषादीनां दृश्यजीवानां शिरसि यत् यत्बीजं यस्य शिरसि वापयेत् यदा पुष्पितः फलितो भवति तदा यस्य बीजानि मुखे निक्षिप्यन्ते स जीवो भवति नात्र सन्देहः। मातुलुङ्गस्य मूलन्तु धुस्तूरबीजकेन च। पलाण्डु पुष्पमादाय सूक्ष्मचूर्णन्तु कारयेत्। योऽस्य गन्धं समाघ्राति स च स्नेहेन पश्यति। दुन्दुभिं पटहांश्चैव मृदङ्गांश्चैव तु लेपयेत्। एष मृतोपस्कटानां कुमारीणां मुखेषु च। भूपतिं सेवमानानां तथा तत्कर्मजीविनाम्। न चाग्निर्दह्यते वेश्म यत्रैष सोऽगदो भवेत्। पारावतस्य हृदयं चक्षुर्जिह्वा च रोचितम्। अञ्जनं रोचनायुक्तं वनितावशकृत् परम्। कपालं मानुषं मृद्य कनकस्य फलानि च। कर्पूरं मधुसंयुक्तं निघृष्य तिलकेन च। नारी वा पुरुषोऽनेन वश्यो भवति निश्चयः।

एष कापालिको योगो वशिष्ठस्य शुभं मतम्। नरजिह्वां समादृत्य सूक्ष्मचूर्णन्तु कारयेत्। जलेन च सुगीतेन दापयेत्तद्विचक्षणः। पाने फले च पुष्पे च भक्ष्ये भोज्ये च दापयेत्। प्रजापतिकुलोद्भूता यदि साक्षादरुन्धती सापि रक्ता प्रियं याति नान्यं पुरुषमिच्छति। हरितालं प्रक्षयाने कृष्णचतुर्दश्यां क्षिप्त्वा कुष्ठविमिश्रं याज्यम् अवश्यं वशीभवेत् स नरः। नरतैलं प्रेतास्थवर्त्तिकं कृत्वा पात्रे रात्रौ प्रज्वाल्यार्कदुग्धस्कन्धे कज्जलं कृत्वा चक्षुषी अभ्यञ्जेत् यं पश्यति स वश्यो भवति। कर्णदलमलं लाला स्वदेहाच्छिन्नलवम्। नासिकोद्भवरक्तञ्च चूर्णमेतल्लालयुतम्। एतत् सर्वं समृत्य गुटिकां कारयेद्बुधः। पानभोजनके देयं वशीकरणमुत्तमम्। काकजिह्वा वचा कुष्ठमात्मनो रुधिरं स्त्रियः। तद्वात्तदन्नं कञ्जिका तगरं गौरसर्षपाः। शिवनिर्माल्यसंयुक्तं समभागानि कारयेत्। भोज्ये पाने ऽथवा देयं स्त्रीणान्तु वशकारकम्। नित्यं पुरुषमिच्छन्ती मृतमद्यतुमिच्छति। कृष्णसर्पस्याङ्गुलप्रमाणं शिरश्छित्त्वास्यास्यं सर्षपादिभिः। पूरयित्वा छायाशुष्कं शोषयेत्। परतः सर्षपान् याचयित्वा तानि यस्मै दीयते स वश्यो भवति। पूगीफलं गिलित्वाऽपानमार्गेण निर्गतं संमृद्य धुस्तूररसान्वितं कृत्वा सप्त दिनानि पूजयेत्। पुनः कृष्णमचन्दनैरधिवास्य यस्मै दीयते स वश्यो भवति। दर्दुरयुग्मं मृद्गीत्वा तद्धूमेन दाहयेत्। तद्भस्म सह पानेन वश्यकृत् परमो मतः। अजगन्धस्य पत्राणि वचां कुष्ठेन भावयेत्। प्रक्षयानभक्षसंयुक्तं चूर्णङ्कृत्वा दुर्लभम्। अनेनैव तु चूर्णेन योजयेत् त्रीणि पादपान्। पुष्पितं फलितं दृष्ट्वा चूर्णं दत्त्वाहिलग्नयेत्। तत् क्षणात् फलते दृष्टो नरनारीषु का कथा। जिह्वामूले सप्तरात्रं सैन्धवेनापि भिञ्चितम्। ददाति यस्य पानेषु सोऽपि वश्यो भवेत् क्षणात्। गोपितं सैन्धवञ्चैव दृष्टतीफलमेव च। लेपप्रमेतत् प्रयोक्तव्यं नरनारीवशङ्करम्। उष्ट्रातुः पञ्चमलिन आत्मनो रुधिरान्वितम्। स्त्रीपुंसयोः प्रदातव्यं वशीकरणमुत्तमम्। श्वेताकं रोचनायुक्तमात्ममूलेन मेषयेत्। ललाटे तिलकं कृत्वा त्रैलोक्यं क्षोभयेत् क्षणात्। दृष्टमात्रेण तेनैव सर्वो भवति किङ्करः। श्वेताकं चन्दनेनैव रञ्जयेत् सह लेपयेत्। दीयते कस्य चिद्यापि पश्चात् दासो भविष्यति। मधूकं सह तैलेन कार्पासेन तु मेषयेत्। एतेन पाणिमभ्यञ्ज्य भर्त्रा सा सङ्गता भवेत्।

संदृश्ते मैथुनीभावे पतिर्दासो भविष्यति"। "यानि कानि च बीजान्यङ्कोलतैलेन लेपयेत्। सफलो जायते कृष्णः सिद्धियोग उदाहृतः। शक्तुखे विन्दुमात्रं तत्तैलं निःक्षिपेद् यदि। एकयामं भवेत् जीवो नान्यथा शङ्करोदितम्। शिग्रुबीजस्थितं तैलं पारावत पुरीषकम्। वराहस्य वसायुक्तं गृहीत्वा च समं समम्। गर्दभस्य वसायुक्तं हरितालं मनःशिलाम्। एभिस्तु तिलकं कृत्वा यथा लङ्केश्वरोऽभवः। उलूकविष्टां गृहीत्वा त्वेरण्डतैलेन लेपयेत्। यस्याङ्गे निक्षिपेत् विन्दुं सक्षिप्रो जायते ध्रुवम्। सर्पदन्तं गृहीत्वा तु कृष्णहिककशोटकम्। ककलारक्तसंयुक्तं सूक्ष्मचूर्णन्तु कारयेत्। यस्याङ्गे निक्षिपेच्चूर्णं सद्यो याति यमालयम्। सिन्दूरं गन्धकं तालं समं पिङ्गामनःशिलाम्। तन्निप्रवस्त्रं शिरसि अग्निवत् दह्यते ध्रुवम्। अर्कक्षीरं वटक्षीरं क्षीरं डुम्बरसम्भवम्। गृहीत्वा पात्रके क्षिप्ते जलपूर्णं करोति च। दुग्धं तत्र भवेत् सद्यो महाकौतुककौतुकम्। अङ्कोलतैलसिक्ताङ्गो दह्यते राक्षसाकृतिः। पलायन्ते नराः सर्वे पशुपक्षिगजा हयाः। अङ्कोलस्य तु तैलेन दीपं प्रज्वालयेद्वरः। रात्रौ पश्यति भूतानि खेचराणि महीतले। युद्धे वा शत्रुनिवारे वा ककलां यात्र यत्नतः। शत्रुर्मूलयते यत्र ककलां तत्र निःक्षिपेत्। निखनेद्भूमिमध्येषु उड्डते च पुनः सुखी। नपुंसकं भवेत् सद्यं नान्यथा शङ्करोदितम्। गन्धकं हरितालञ्च गोमूत्रञ्च विषं तथा। सूक्ष्मचूर्णमयं कृत्वा किञ्चिद्वङ्गं विनिःक्षिपेत्। विन्नाः सर्वे पलायन्ते यथा युद्धेषु कातराः" दत्तात्रेय तन्त्रे ११५०

इन्द्रजालिक त्रि० इन्द्रजालं शिल्पतयाऽस्त्यस्य ठन्। इन्द्रजालकारके। इनि इन्द्रजालीत्यपत्र स्त्रियां ङीप्।

इन्द्रजित् पु० इन्द्रं जितवान् जि-भूते क्विप्। दितिवंशीये असुरभेदे चाक्षुषमन्वन्तरे "दित्याः पुत्रद्वयं जज्ञे कश्यपादिति विश्रुतम्। हिरण्यकशिपुश्चैव हिरण्याक्षश्च वीर्यवान्"। इत्युपक्रम्य तत्पुत्रपौत्रादिवर्णने "इन्द्रजित् सर्वजिच्चैव वज्रनाभश्चैव च" हरिवं० २अ०। २रावणपुत्रे मेघनादे च "पुत्रमिन्द्रजितं वीरं रावणः प्रत्यधावत। जहि राममभित्रघ्नं सुग्रीवञ्च सलक्ष्मणम्। त्वया हि मम सत्पुत्र! यशोदीप्तमुपार्जितम्। जित्वा वज्रधरं संख्ये सहस्राक्षम् शचीपतिम्" भा०व० २८७। "तौ वीरौ शरबन्धेन ब्रह्मेन्द्रजिता रणे" भा०व० २८८ अ०।

इन्द्रजिद्धन्तृ पु० इन्द्रजितं हन्ति हन-तृच् तैत०। दशरथात्मजे लक्ष्मणे। तद्धननकथा। "अविध्यदिन्द्रजित्तीक्ष्णैः सौमित्रिं मर्म्मभेदिभिः। सौमित्रिर्बाणजालेन विध्यद्भावर्षिणं शरैः"। इत्युपक्रम्य "एकेनास्य धनुश्चान्यं बाहुं देहात्पातयत्। द्वितीयेन शरेणास्य भुजं भूमौ न्यपातयत्। त्रुटितेन तु बाणेन पृथुधारेण भास्वता। जहार सुनसङ्काशं शिरो भ्राजिष्णुकुण्डलम्। विनिकृत्तभुजस्कन्धं कबन्धं भीमदर्शनम्। तं दृष्ट्वा सूतमथ्यस्तैर्जघान बलिनां वरः" भा०व०२२८अ०।

इन्द्रतापन पु० इन्द्रं तापयति तप+णिच्+ल्यु। १असुरभेदे "इन्द्रतापनवातापी केतुमान् बलदर्पितः" असुरनामोत्कीर्त्तने हरिवं० २६अ०। २मेघनादे च। दग्धौषश्च बाली च मेघराजो दृशावरः। टिट्टिभोविटभूतश्च संह्लादश्चेन्द्रतापनः" भा०स०प०अ० वस्वसभावर्णने।

इन्द्रतूल न० इन्द्रस्येव तूलमाकाशे उड्डीयमानत्वात्। आकाशे मरुता चाल्यमाने कार्पासे क्षुपे त्रिका०।

इन्द्रतोया स्त्री इन्द्रमैश्वर्य्यान्वितं तोयमस्याः, इन्द्रेण पूरितं तोयमस्या वा। गन्धमादनसमीपस्थे नदीभेदे। "इन्द्रतोयां समासाद्य गन्धमादनसन्निधौ" भा० अनु० प० २४।

इन्द्रदमन पु० "बाणस्य चेन्द्रदमनो लौहित्यात्तदपद्यत" हरिवं०३अ० उक्ते बाणासुरपुत्रभेदे।

इन्द्रदारु पु० इन्द्रस्य तद्ध्वजस्य साधनं दारु। देवदारुवृक्षे। इन्द्रध्वजशब्दे ८४६ पृष्ठे तस्य तद्ध्वजसाधनत्वम् दृश्यम्। इन्द्रद्रुमादयोऽप्यत्र।

इन्द्रद्युम्न इन्द्रस्येव द्युम्नं धनमस्य। भारतोक्ते १ऋषिभेदे २असुरावतारराजभेदे ३राजभेदे च। तत्र असुररूपोक्तप्रकारेण कृतः यथा। "इन्द्रद्युम्नोहतः कोपाद्यवनस्य कसेरुमान्। हतः सौभपतिः शाल्वस्तथा सौभं च पातितम्" भा० व० १२ अध्याये कृष्णं प्रति व्यासवाक्यम्। ऋषिभेदस्तु। "ततस्ते ब्राह्मणाः सर्वे वकं दाल्भ्यमपूजयन्नित्युपक्रम्य "द्वैपायनो नारदश्च जामदग्नः पृथुश्रवाः। इन्द्रद्युम्नोभालवित्र कृतचेताः सहस्रपात्" इति कतिचित् ब्राह्मणानभिधायाह। "एते चान्ये च बहवोब्राह्मणा संशितव्रताः। अजातशत्रुमानर्चुः पुरन्दरमिवर्षयः" भा० व० २६ अ०। राजभेदस्तु मार्कण्डेयादपि प्राचीनः तत्कथा भा०व० १६८अ०। युधिष्ठिरं प्रति मार्कण्डेयवाक्यम्। "स तानुवाचास्ति खलु राजर्षिरिन्द्रद्युम्नो नाम क्षीण-

मुखस्त्रिदिवात् प्रच्युतः कीर्त्तिर्मे व्युच्छिद्येति स मामुपातिष्ठदथ प्रत्यभिजानाति मां भवानिति। तमहमब्रवं न वयं वासायनिकाः कार्य्यचेष्टाकुलत्वाच्च प्रत्यभिजानास्यात्मनोऽर्थानामनुष्ठानं न शरीरोपतापेनात्मनः समारभामोऽर्थानामनुष्ठानं स मामुवाच अस्त्यन्यस्त्वत्तश्चिरजात इति तमहमब्रवम् अस्ति खलु हिमवति प्राचारकर्णो नामोलूकः प्रतिवसति स मत्तश्चिरजातो भवन्तं यदि जानीयादितः प्रस्थे चाध्वनि हिमवांस्तत्रासौ प्रतिवसतीति। ततः स समाश्वो भूत्वा तत्रावहद्यत्र बभूवोलूकः अथैनं स राजा पप्रच्छ प्रतिजानाति मां भवानिति। स मुहूर्त्तमिव ध्यात्वाऽब्रवीदेनं नाभिजानामि भवन्तमिति। स एवमुक्त इन्द्रद्युम्नः पुनस्तमुलूकमब्रवीद्राजर्षिः। अथास्ति कश्चिद्भवतः सकाशाच्चिरजात इति स एवमुक्तोऽब्रवीदस्ति खल्विन्द्रद्युम्नं नाम सरस्तस्मिन्नाड़ीजङ्घो नाम वकः प्रतिवसति सोऽस्मत्तश्चिरजाततरस्तं पृच्छेति। तत इन्द्रद्युम्नो माञ्जोलूकमादाय तत्सरोऽगच्छद्यत्रासौ नाडीजङ्घो नाम वको बभूव। सोऽस्माभिः पृष्टो भवानिममिन्द्रद्युम्नं राजानमभिजानाति स एनं मुहूर्त्तं ध्यात्वाऽब्रवीन्नाभिजानाम्यहमिन्द्रद्युम्नं राजानमिति ततः सोऽस्माभिः पृष्टः कश्चिद्भवतो ज्यश्चिरजाततरोऽस्तीति स नोऽब्रवीदस्ति खल्वकूपारे सरस्यकूपरो नाम कच्छपः प्रतिवसति स मत्तश्चिरजाततरः स यदि कथञ्चिदभिजानीयादिमं राजानं तमकूपारं कच्छपं पृच्छध्वमिति। ततः स वकोत्तमकूपारं कच्छपं विज्ञापयामास। अस्त्यस्माकमभिप्रेतं भवन्तं कञ्चिदर्थमभिप्रष्टुं साध्वागम्यतां तावदिति तच्छ्रुत्वा कच्छपस्तस्मात् सरसः उत्थायाभ्यगच्छद्यत्र तिष्ठामो वयं तस्य सरसस्तीरे आगतञ्चैनं वयमपृच्छाम भवानिममिन्द्रद्युम्नं राजानमभिजानातीति। स मुहूर्त्तं ध्यात्वा वाष्पसम्पूर्णनयन उद्विग्नहृदयो वेपमानो विसंज्ञकल्पः प्राञ्जलिरब्रवीत्। कथमहमेनं न प्रत्यभिज्ञास्यामीह स्थानेन सहस्रकृत्वश्चितिषु यूपा आहिताः। सरस्वेदमस्य दक्षिणाभिर्हैत्ताभिर्गोभिरतिक्रमणाभिः कृतम्। अत्र चाहं प्रतिवसामीति। अथैतत् सकलं कच्छपेनोदाहृतं श्रुत्वा तदनन्तरं देवलोकाद्देवरथः प्रादुरासीद्राज्ञश्चाभ्यवपत्य इन्द्रद्युम्नं प्रति प्रस्तुतस्ते स्वर्गो यथोचितं स्थानं प्रतिपद्यस्व कीर्त्तिमानस्म्यस्यो वाहोति"।

एतत्सरश्चोक्तवाक्ये वर्णितं तद्वाधिकृत्य। "इन्द्रद्युम्नसरः प्राप्य हंसकूटमतीत्य च। शतमृङ्गं महाराज! तापसः समतप्यत" इत्युक्तेः शतमृङ्गपर्व्वतसमीपे हंसकूटाननन्तरं तत्सरः इति गम्यते। "हंसकूटस्य यच्छृङ्गमिन्द्रद्युम्नसरः प्रति" इति हरिवं० १५७ अध्याये हंसकूटसन्निकृष्टत्वमस्यावगम्यते। पुरुषोत्तममूर्त्तिप्रकाशकत्वापरः पुरुषोत्तमशब्दे तद्विवृतिर्द्रष्टव्यते।

इन्द्रद्रु पु० इन्द्रस्य इन्द्रध्वजार्थोद्रुः। अर्জुनवृक्षे। तस्य तद्ध्वजनिर्म्माणे प्रथमोपात्तत्वात् तथात्वम्। इन्द्रध्वजशब्दे विवृतिः। इन्द्रनामा द्रुः। २कुटजवृक्षे राजनि०।

इन्द्रद्रुम न० इन्द्रद्रुवत् विग्रहः। अर्জुनवृक्षे शब्दर०।

इन्द्रधनुस् न० इन्द्रे इन्द्रस्वामिके मेघे धनुरिव। इन्द्रायुध शब्दे वक्ष्यमाणे पदार्थे "विद्युतोऽशनिमेघांश्च रोहितेन्द्र धनूंषि च" मनुः। तस्य ऋजुत्वे रोहितत्वम्। वक्रत्वे इन्द्रधनुरिति भेदः।

इन्द्रध्वज पु० इन्द्रस्य तत्सन्तोषार्थोध्वजः। भाद्रशुक्ल द्वादश्यां स्वराज्ये इष्ट्वादिश्यस्तदर्थं तत्प्रीतये राज्ञा क्रियमाणे ध्वजे तदुत्पत्तितत्करणप्रकारादि दर्शितं बृहत्संहितायां यथा

"ब्रह्मोषमूचुरमरा भगवच्छक्राः स्म नासुरान् समरे। प्रतियोधयितुमतस्त्वां शरण्यं शरणं समुपयाताः। देवानुवाच भगवान् क्षीरोदे केशवः स वः कोतुम्। यं दास्यति तं हत्वा राजौ स्थास्यन्ति वो दैत्याः। लब्धवराः क्षीरोदं गत्वा ते तुष्टुवुः सुराः सेन्द्राः। श्रीवत्साङ्कं कौस्तुभमणिकिरणोद्भासितोरस्कम्। श्रीपतिमचिन्त्यमसमं समनन्तः सर्वदेहिनां सूक्ष्मम्। परमात्मानमनादिं विष्णुमवित्रातपर्यन्तम्। तैः संस्तुतः स देवस्तुतोष नारायणो ददौ चैषाम्। ध्वजमसुरवधसुखकमलवनतुषारतोक्षांशुम्। तं विष्णुतेजोभवमष्टवक्त्रे रथे स्थितं भास्वति रत्नचित्रे। देदीप्यमानं शरदीव सूर्य्यं ध्वजं समासाद्य समोद शक्रः। सकिङ्किणीजालपरिष्कृतेन स्वकृत्तवस्त्रापिटकान्वितेन। सच्छ्रितेनामरराड् ध्वजेन निघ्ने विनाशं समरे ऽरिसैन्यम्। उपरिचरस्यामरपो वसोर्ददौ चेदिपस्य वेणुमतीम्। यद्दिं तां स नरेन्द्रो विधिवत्समूजवामास। प्रीतो महेन्द्रो भगवान् प्राहैवं ये त्वया करिष्यन्ति। वसुबलहेमवन्तस्ते भुवि सिद्धाज्ञा भविष्यन्ति। सुदिताः प्रजाश्च तेषां भयरोगविवर्जिताः प्रभूताश्चः। ध्वज एव चाभिधास्यति जगति निमित्तैः फलं सदसत्। पूजा तस्य नरेन्द्रैर्वक्तव्या विजयार्थिभिर्यदा पूर्वम्। शक्राज्ञया प्रयुक्ता तामागमतः प्रवक्ष्यामि। तस्य विधानं शुभकरणदिवस-

सौधस्थेषोश्रियम् श्रयेत् । यदा कलानिधिः क्वापि दर्शेऽदृश्यत्वमावहेत् । तदा स्वश्रेयसीं ज्योत्स्नां सौधेष्वेषु निगूहयेत् । यदभित्तौ वीक्ष्य स्वमन्ययोषिद्विशङ्किता । सुधा नाशु विधेद्विलमपि स्वां चित्रशालिकाम् । हर्म्येषु जोलमणिभिर्निर्मितेष्वल निर्भयम् । स्वनोलिमानमाधाय तमोऽङ्कःस्थेऽपि तिष्ठति । चन्द्रकान्तशिलाजालस्रुतमात्रासलं जलम् । तत्र चादाय कलशैर्नेच्छन्त्यन्यज्जलं जनाः । कुविन्दा न च सन्त्यत्र न चात्र पश्यतोहराः । चेलान्यत्रङ्गतान्यत्र यतः कल्पद्रुमार्पणात् । गणका नात्र विद्यन्ते चिन्ताविद्याविशारदाः । यतश्चिन्वन्ति सर्वेषां चिन्तां चिन्तामणिर्द्रुतम् । रूपकारा न सन्त्यत्र रसपाकविचक्षणाः । दुग्धे सर्वरसानेका कामधेनुरतोऽनिशम् । कीर्त्तिरङ्गैःश्रवाः श्रेयस्य सर्वतो वाजिराजिषु । रत्नरङ्गैःश्रवाः सोऽत्र श्रेयानां पौरुषाधिकः । ऐरावतो दन्तिवरश्चतुर्दन्तोऽत्र राजते । द्वितीय इव कैलासोऽङ्गमः स्फटिकोज्ज्वलः । तरुरत्नं पारिजातः स्त्रीरत्नं चोर्वशी त्विह । नन्दनं वनरत्नं च रत्नं मन्दाकिनी नृपाम् । त्रयस्त्रिंशत् सुराणां या कोटिः श्रुतिसमीरिता । प्रतीक्षते सावसरं सेवायै प्रत्यहं त्विह । स्वर्गेऽस्मिन्द्रपदादन्यद्व विभिद्येत किञ्चन । यदत्रि लोकाभैश्वर्यं न च तुल्यमनेन हि । अश्वमेधसहस्रस्य लभ्यं विनिमयेन यत् । किन्तेन तुल्यमन्यत् स्यात् पवित्रमथवा महत् । अर्द्धासनं श्रियः संयमनी पुण्यवत्यनिवारिता । गन्धवल्लकैणी च नैतत्तुल्या महर्द्धिभिः । अयमेव सहस्राक्षस्त्वयमेव दिवस्पतिः । यतमन्युरयं देवोनामान्येतानि नामतः । सम्राण्मि लोकपाला ये तएनं सहुपासते । नारदाद्यैर्ऋषिवरैरयमाशाभिरिज्यते । एतत्स्वैर्यैश्च सर्वेषां लोकानां स्वैर्यमिष्यते । पराजयान्नहेन्द्रस्य त्रैलोक्यं स्यात् पराजितम् । दनुजा मनुजादैत्यात्सपक्षन्यु यमंयमाः । गन्धर्वयक्षरक्षांसि माहेन्द्रपदलिप्सवः । नगराद्यामहीपालाराजिमेधविधायकाः । ऋतवन्तो महायत्नं यत्रैश्वर्यजिघृक्षवः । निष्प्रत्यूहं क्रतुशतं यः कश्चित् कुरुतेऽवनौ । जितेन्द्रियोऽमरावत्यां स प्राप्नोति पुरोभुवम् । यत्समाप्रक्रतुशता वसन्त्यत्र महीभुजः । ज्योतिष्टोमादिभिर्यज्ञैर्ये यजन्त्यपि ते द्विजाः । तुलापुरुषदानादि महादानानि षोडश । ये यच्छन्त्यमलाकारानले ज्वलनेऽमरावतीम् । अक्षोदवादिनोवीराः संग्रामेष्वपलायिनः । विश्रान्ता वीरशयने तेऽत्र तिष्ठन्ति मनुजाः । इन्द्रहेयात् समाख्याता महेन्द्रनगरीस्थितिः । यावज्जीवमन्यत्र यज्ञविद्याविशारदाः" १० अ० । "अतिक्षिप्येन्द्रलोकेशः" इति मनुना अतिक्षिपरिचर्याभिरपि तत्प्राप्तिरुक्ता । एवं राजसूययज्ञेनापि तत्प्राप्तिः भा० स० उक्ता । अत्रश्लोकादयोऽत्र ।

इन्द्रवंशा स्त्री "स्यादिन्द्रवंशा ततजैरसंयुतैः" छन्दः र० उक्ते द्वादशाक्षरपादके वर्णवृत्तभेदे ।

इन्द्रवज्रा स्त्री "स्यादिन्द्रवज्रा यदि तौ जगौ गः" छन्दः र० उक्ते एकादशाक्षरपादके वर्णवृत्तभेदे ।

इन्द्रवल्ली स्त्री इन्द्रप्रिया वल्ली शाक० त० । पारिजातलतायाम् "सोमवल्लीमिन्द्रवल्लीं शमीं विल्वस्य कण्टकान्" श्रुतिः । (राखालससा) २ इन्द्रवारुण्यां लतायाञ्च इन्द्रवल्लरीशब्दार्थे ।

इन्द्रवस्ति पु० इन्द्रस्यात्मनो वस्तिरिव । जङ्घामध्यभागे । "इन्द्रवस्तिपरिणाहांसपीठकूर्परान्तरायामः षोड़शाङ्गुलः" सक्थिमर्म्माणि त्रिप्रतलहृदयकूर्चकूर्चशिरोगुह्येन्द्रवस्तिजानुवीक्षोहितास्थानि विटपञ्चेति" विभज्य "पार्ष्णिं प्रति जङ्घामध्य इन्द्रवस्तिर्नाम तत्र शोणितक्षये मरणम्" इति च सुश्रुतः । अतोऽस्य जीवस्थानत्वात्तथात्वम् ।

इन्द्रवारुणी स्त्री इन्द्रस्यात्मनोवारुणीव प्रिया । (राखालससा) तिक्तरसायां श्वेतमूलायां पीतपुष्पायां लतायाम् । स्वार्थे कन् । इन्द्रवारुण्यिकापि अत्रैवार्थे ।

इन्द्रवीज न० इन्द्रस्य कुटजस्य वीजम् । इन्द्रयवे । "चक्षेन्द्रवीजं त्रिफलासर्पिर्मांसरसाम्बुभिः" सुश्रुतः ।

इन्द्रशुभ्र पु० ६त० देवदारुवृक्षे जटाधरः । तस्य इन्द्रध्वजहेतुत्वात्तथात्वम् । तस्येन्द्रध्वज साधनत्वेनेन्द्रध्वजशब्दे उक्तम् ।

इन्द्रशुद्धा स्त्री "अथातः क्षुद्ररोगान् व्याख्यास्यामः" इत्युपक्रम्य । "वल्मीकमिन्द्रशुद्धेत्यादि विभज्य" । "पद्मपुष्करवल्मीके पिडकाभिः समाचिताम् । इन्द्रशुद्धान्तु तां विद्याद्वातपित्तोत्थितां भिषक्" सुश्रुतोक्तलक्षणे क्षुद्ररोगभेदे । "शिरसीन्द्रशुद्धाञ्च गर्हणीं जालगर्द्दभम् । हरिद्वां गन्धनाम्नीं कक्षां विस्फोटकांस्तथा । पित्तजस्य विसर्पस्य क्रियया साधयेत् भिषक्" इति सुश्रुतः ।

इन्द्रव्रत न० इन्द्रस्येव वर्षणे व्रतम् । "वार्षिकांश्चतुरो मासान् यदेन्द्रोऽभिवर्षति । तथाभिवर्षेत् स्वं राष्ट्रं कार्मैरिन्द्र व्रतं चरन्" इति स्मृत्युक्ते प्रजापालने राज्ञोव्रतभेदे ।

इन्द्रशत्रु पु० इन्द्रः शत्रुः यातयिता यस्य । दशास्ये । इत्तात्वञ्च तथात्वम् यथा "स त्वटा चुक्रोध । कुविन्मोऽनुपपूत इति स त्वष्टारं वधायैवं चक्रे स योद्रोणकलशे शुक्रः परिशिष्ट आस यत प्रवक्तता चकारेन्द्रशत्रु-

र्धयेति सोऽग्निमेव प्राप्य सर्वभूतान्तरैव सर्वभूतेष्वुहैवैके प्राहुः अग्नीषोमावेवाभि सर्वभूत सर्वाविद्याः सर्वं यशः सर्वमन्नाद्यं सर्वा श्रीम् । स यद्वर्तमानः समभवत् । तस्माद्वृत्रोऽध यदपात् समभमत्तस्मादस्थि दनुश्च दनायुश्च । मातेव च पितेव च परिजग्रहतुस्तस्माद्वानव इत्याहुः अथ यदब्रवीदिन्द्रशत्रुर्वर्धयेति तस्मादुहैनमिन्द्र एव जघानाथ यद्व शत्रुरवर्धयेति शत्रुर्ह स एवेन्द्रमहनिष्यत्" शत० ब्रा०१,६,३,८,६,१०, "इन्द्रशत्रुरिति पूर्वपदोदात्ततयेन्द्रः शत्रुर्यस्येति बहुव्रीहिसमासं कृत्वा मन्त्रं प्रयुक्तवानतस्तमिन्द्रो जघान । यद्यसौ अन्त्योदात्ततया तत्पुरुषसमासेन, इन्द्रस्य शत्रुरिति व्यस्तनिर्देशेन वा ब्रूयात्तदा निचितमेव स इन्द्रं हन्यात्" इति भा० भा०तथा च षष्ठीतत्पुरुषेऽन्तोदात्तस्वरः तथात्वे इन्द्रस्य शत्रुरित्यर्थको भवेत् बहुव्रीहौ तु पूर्वपदस्वरतेति तथा तेन प्रयोगात् तमेव इन्द्रोजघान "अतएव वेदे स्वरहीनतयोच्चारणे यजमानस्यानिष्टं फलं भवति यथोक्तं शिक्षायाम् । "मन्त्रोहीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्" । उक्तस्वरानुसारिणी कथा भाग० यथा त्वष्टुः पुत्रस्य विश्वरूपस्य गुणादिकस्तवप्रसङ्गे "तस्यासन् विश्वरूपस्य शिरांसि त्रीणि भारत । सोमपीथं सुरापीथमन्नादमिति शुश्रुम । सर्वे वर्हिषि देवेभ्यो भागं प्रत्यक्षदृशः । अवदद्यस्य पितरो देवाः सप्रश्रयं नप ! । स एव हि ददौ भागं परोक्षमसुरान् प्रति । यजमानो ह्यवहद्भागं माहश्लेष्मवशानुगः । तद्देवहेलनं तस्य धर्मालोकं सुरेश्वरः । आलक्ष्य तरसा भीतस्तच्छीर्षाण्यच्छिनद्रुषा । सोमपीथं तु यत्तस्य शिर आसीत् कपिञ्जलः । कलविङ्कः सुरापीथमन्नादं यत् स तित्तिरिः । ब्रह्महत्यामङ्गिना जग्राह यदपीश्वरः । संवत्सरान्ते तदघं भूतानां स विशुद्धये । भूम्यम्बुद्रुमयोषिद्भ्यश्चतुर्धा व्यभजद्धरिः । भूमिस्तुरीयं जग्राह खातपूरवरेण वै । ईरिणं ब्रह्महत्यायां रूपं भूमौ प्रदृश्यते । तुर्यं छेदविरोहेण वरेण जगृहुर्द्रुमाः । तेषां निर्यासरूपेण ब्रह्महत्या प्रदृश्यते । शश्वत्कामवरेणाहुस्तुरीयं जगृहुः स्त्रियः । रजोरूपेण तासां स्रोसासिमासि प्रदृश्यते । द्रवभूयोवरेणापस्तुरीयं जगृहुर्मलम् । तासु बुद्बुदफेनाभ्यां दृष्टं तद्धरति क्षिपन् । कृतघ्नस्तत्तस्तदा जुह्वाबेन्द्राय शत्रवे । इन्द्रशत्रुर्विवर्द्धस्व मा चिरं जहि विद्विषम् । अथान्वाहार्यपचनादुत्थितो घोरदर्शनः । ततान्त्र इव लोकानां युगान्तसमयो यथा । विष्वग्विवर्द्धमानं तमिषुमात्रं दिने दिने । दग्धशैलप्रतीकाशं सन्ध्याभ्रानीकवर्चसम् । तप्ततास्रशिखाश्मश्रु मध्याह्नार्कोग्रलोचनम् । देदीप्यमाने त्रिशिखे शूल आरोप्य रोदसी । खलन्तसल्लदन्तञ्च चालयन्तं पदा महीम् । दरीगम्भीरवक्त्रेण पिबता च नभस्तलम् । लिहता जिह्वयर्क्षाणि ग्रसता भुवनत्रयम् । महता रौद्रदंष्ट्रेण जृम्भमाणं मुहुर्मुहुः । वितस्तादुद्वृलोका वीक्ष्य सर्वे दिशो दश । वेनाहता इमे लोकास्तपसा त्वाष्ट्रमूर्त्तिना । स वै हत इति प्रोक्तः पापः परमदारुणः भा०६स्क०८अ०। ततः "स इन्द्रशत्रुः कुपितोऽथं तया महेन्द्रवाहं गदयोपविक्रमः इति" तयोर्युद्धमभिधाय "भित्त्वा वज्रेण तत्कायं निष्क्रम्य बलभिद्रुषा । उच्चकर्त्त शिरः शत्रोर्गिरिशृङ्गमिवोन्नतम्" भाग०६स्क०१०अ०इन्द्रेण तस्य हननं वर्णितम् ।

इन्द्रशत्रुभ पु० इन्द्रजातः वर्षाकालजातः शलभः । इन्द्रगोपे ।

इन्द्रसारथि पु० ऐत० । इन्द्रस्य सारथौ मातलौ ।

इन्द्रसावर्णि पु० चतुर्दशे मनौ । "मनुर्वा इन्द्रसावर्णिश्चतुर्दशमेष्यति । उरुगम्भरब्रह्माद्या इन्द्रसावर्णिवीर्यजाः । पवित्राश्चाक्षुषा देवाः शुचिरिन्द्रो भविष्यति । अग्निबाहुः शुचिः शुक्रो मान्थात्राद्यास्तपस्विनः । सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः । विनतायां महाराज ! क्रियातन्तून् वितायिता" भा०८स्क०१३अ०। हरिवंशे तु "भूत्याञ्चोत्पादितो देव्यां भौत्योनाम रुचेःसुतः" इति भौत्योत्पत्तिसङ्गा "चतुर्दशेऽथ पर्याये भौत्यस्यैवान्तरे मनोः। अग्नीध्रः कश्यपश्चैव पौलस्योभार्गवस्तथा । भार्गवश्चाग्निबाहुश्च शुचिराङ्गिरसस्तथा । शुक्रश्चैव तथात्रेयः शुक्रोवाऽथ एव च । अजितः पौलहश्चैव मान्याः सप्रश्रयश्च ते इति" चोक्त्वा "देवतानां गणाः प्रोक्ताः पञ्च वै भरतर्षभ । तरङ्गभोरुवप्रश्च तरक्षात्तुषितश्च । अभिमानी प्रधीशश्च सुतः संक्रन्दनस्तथा । तेजस्वी सरयश्चैव भौत्यस्येते मनोः सुताः । भौत्यस्यैवाधिकारे तु पूर्वे कल्पस्तु पूर्यते" । अग्निपु०च "मनुश्चतुर्दशो भौत्यः शुचिरिन्द्रो भविष्यति । चाक्षुषाद्याः सुरगणा अग्निबाह्वादयो द्विजाः । चतुर्दशस्य भौत्यस्य सुता उरुगवा मनोः" इत्युक्तं तेन नामभेदविरोधः कल्पभेदात् समाधेयः ।

इन्द्रसुत पु० ऐत० । १जयन्ते, २मध्यमपाण्डवे पार्थे, ३अर्जुनवृक्षे, ४वालिनामके वानरे च । इन्द्रसुतादयोऽप्यत्र

इन्द्रसुरस पु० इन्द्रः कुटजवृक्ष इव सुरसः पक्षरसः । (निर्गुण्डी)

सिन्धुसारे। अमरे इन्द्रसुरिसेति पाठान्तरे षट्०। तत्रैव
इन्द्रसुरा स्त्री इन्द्रस्यात्मनः सुरेव प्रिया। (राखालससा) इन्द्रवारुण्याम् राजनि०"वार्त्ताकुशिम्बीन्द्रसुराघटोलेत्यादि" सुश्रु०। "गुडचीन्द्रसुरा क्षुण्णा कुलसर्षपनागरैः। तैलमेभिः शनैः पक्वं सुरास्नादिरसाप्लुतम्"सुश्रु०।

इन्द्रसूक्त न० इन्द्रदेवताकं सूक्तम्। ऋग्वेदान्तर्गते सूक्तभेदे तच्च"इन्द्रं विश्वा अवीवृधन्"इत्यादि एकादशर्चम्। ऋ०१म०११सूक्तम् एतच्च तत्तत्कर्मणि इन्द्रस्तुत्यर्थं पठनीयं तथा द्वारपालेन तुलादानादौ मण्डपस्य पूर्वदिशि पाठ्यञ्च "श्रीसूक्तं पावमानञ्च सोमसूक्तं सुमङ्गलम्। शान्त्यध्यायञ्चेन्द्रसूक्तं रक्षोघ्नं चेति वह्नयौ। पूर्वं द्वारं समाश्रित्य पठेतामिति निश्चयः" विधानपारि०पु०। तच्च सूक्तं तुलादानादिपद्धतौ ६२पृष्ठेऽस्माभिः प्रदर्शितम्।

इन्द्रसेन पु०इन्द्रस्य सेना इव सेना यस्य।१ नृपभेदे स च परिक्षितः पुत्रभेदः"परिक्षितोऽभवत् पुत्राः सर्वे धर्मार्थकोविदाः कक्षसेनोग्रसेनौ च चित्रसेनश्च वीर्यवान्। इन्द्रसेनः सुषेणश्च भीमसेनश्च नामतः" भा०आ०९४अ० अयञ्च प्रसिद्धात् परिक्षितः प्राचीनः कुरुवंश्यएव इन्द्रशब्दे विदुतिः। युधिष्ठिरस्य २ भृत्यभेदे।"इन्द्रसेनादयश्चैव भृत्याः परि चतुर्दश। रथैरनुययुः शीघ्रैः स्त्रिय आदाय सर्वशः" भा०व०१अ०"इन्द्रसेनो विशोकश्च पुरुषार्जुनसारथिः। अन्यांश्चाहरणे युक्ताः सन्तु मत्प्रियकारिणः"भा०स०३३अ०

इन्द्रसेना स्त्री ६त०। इन्द्रस्य १सेनायाम्। २वसुदेवमातरि मौद्गल्यस्य ज्येष्ठपुत्रपत्न्याम्। "मौद्गल्यस्य सुतो ज्येष्ठो ब्रह्मर्षिः सुमहायशाः। इन्द्रसेना यतोगर्भे वभ्राख्यं प्रत्यपद्यत" हरि०३२अ०"नारायणीवेन्द्रसेना बभूव वश्या नित्यं सङ्कर्षणस्याजमीढ" भा०व०११३अ०।

इन्द्रसेनानी पु० इन्द्रसेनां नयति नी-क्विप् ६त०। शक्रस्य सेनापतौ कार्त्तिकेये तत्कथा। कार्त्तिकेयेन पराजितेनेन्द्रेण कार्त्तिकाय इन्द्रत्वपदं दातुमीहमानेन सह तस्य उक्तिप्रत्युक्तिवर्णनेन तेन तत्सेनापत्यममङ्गोक्तमेतत् भा०व०२८अ० वर्णितं यथा "शक्रउवाच भवस्वेन्द्रो महाबाहो! सर्वेषां नः सुखावहः। अभिषिच्यस्व चैवाद्य प्राप्तरूपोऽसि सत्तम!। यावधि त्वमेव त्रैलोक्यमव्ययोविजयेरतः। अहन्ने किङ्करः शक्रोनममेन्द्रत्वमीप्सितम्। बलं तवाद्भुतं वीर! त्वं देवानामरीन् जहि। अवज्ञास्यन्ति मां लोका वीर्येण तव विस्मिताः। इन्द्रत्वं तु स्थितं वीरे! बलहीनं पराजितम्। आवयोर्विग्रहेभेदं प्रथयिष्यन्त्यतन्द्रिताः। भेदिते च त्वयि विभो! लोकोद्वेगमवाप्स्यति। द्विधाभूतेषु लोकेषु निचितेष्वावयोस्तदा। विग्रहः संप्रवर्त्तेत भूतभेदान्महाबल!। तत्र त्वं मां रणे तात! यथान्यद्विजेष्यसि। तथादिन्द्रो भवानेव भविता मा विचारय। स्कन्द उवाच। त्वमेव राजा भद्रन्ते त्रैलोक्यस्य ममैव च। करोमि किन्तु ते शक्र! शासनं तद्ब्रवीहि मे। इन्द्र उवाच। अहमिन्द्रो भविष्यामि तव वाक्यान्महाबल!। यदि सत्यमिदं वाक्यं निश्चयाद्धार्यितं त्वया। यदि वा शासनं स्कन्द! कर्त्तुमिच्छसि मे प्रभो। अभिषिञ्चस्व देवानां सेनापत्ये महाबल। स्कन्द उवाच। दानवानां विनाशाय सेनापत्ये ऽभिषिञ्च माम्"। भा०व०२२८अ० शक्रसेनापतिशक्रसेनाधिपादयोऽप्यत्र। "शक्रसेनापतिः स्कन्दः"पु०

इन्द्रसुत् पु० इन्द्रःसूयते ऽत्र। इन्द्रस्तुत्यधिकरणे उक्थ्ये यज्ञे द्वितीयाङ्गे "इन्द्रस्तुदुक्थ्यो द्वितीयमहर्भवति। इन्द्रोवै सर्वे देवाः सर्वेषां देवानामाप्त्यै तस्यैन्द्रापत्या भवन्त्योन्द्र्यः पुरोरुचः सर्वमैन्द्रमसदिति"शत०,१२,७,१,४, अयञ्चोक्थ्यसाध्यः तदुपक्रमएव कात्या०२१,१,४,। "अथ उक्थ्या अग्निष्टुदिन्द्रस्तुत् सूर्य्यस्तुत्"इत्यभिधानात्।

इन्द्रस्तोम पु० अतिरात्राङ्गे यागभेदे स च कात्या० २४, ४,६,। अतिरात्रोपक्रमेण "इन्द्रस्तोमो विश्वजिता" विश्वजितः स्थाने इन्द्रस्तोमः कार्य्यः" कर्क०। पूर्वोक्तसपक्रमस्य तत्प्रकारादि तत्र दर्शितम्। अयञ्चराज्ञा कार्य्यः"इन्द्रस्तोमो राजयज्ञः" "सहस्रं दक्षिणा"कात्या० २२,११,१५,१६, स च उक्थ्यसाध्यः "उक्थ्यः" कात्या० १२,११,१७ उक्तेः।

इन्द्रह्रद स्त्री इन्द्रः ह्रूयतेऽनया ह्रे-क्विप् ६त०। शक्रस्नानसाधने ह्रदभेदे। कर्त्तरि क्विप्। २तदाह्वानकर्त्रृमुनिभेदे च। ततो गर्गा० अपत्ये यञ्। ऐन्द्रह्रव्यस्तदपत्ये पुंस्त्री।

इन्द्रा स्त्री इदि-रन्। १फणिज्झकवृक्षे (काटाजमीर) मेदिनिः (राखालससा) २इन्द्रवारुण्याम्। राजनि० ३शच्याम् शब्दर०।

इन्द्राग्नि पु० द्वि०व०। इन्द्रश्चाग्निश्च देवताद्व०। शक्राग्न्योर्मिलितयोर्देवयोः। "इन्द्राग्नी यत्र हूयेते" म०त० स्मृतिः "पुरोहितकामस्येन्द्राग्न्योः सोमः" कात्या०२२, ११,२०,२१ उक्तेः। तत्र सोमे पुरोहितस्य राज्ञो वा सह वाऽधिकारः तत्र ब्राह्मणस्य दक्षिणा चतुर्विंशतिगवः राज्ञः अष्टचत्वारिंशद्गवः"कर्क०। तौ देवते अस्य अण्। ऐन्द्राग्नं तद्देवताके हविषि शस्त्रे च। इन्द्रस्य पर्जन्य-

स्याग्निः । मेघभवे विद्युदग्न्यादौ पु० । २इन्द्राग्निधूमः ।

इन्द्राग्निधूम पु० इन्द्राग्नेः पर्ज्जन्याग्नेर्धूम इव । हिमे धूमस्य यथाऽग्निप्रभवत्वम् तथा जलमयहिमस्य पर्ज्जन्याग्निसम्पर्कादेव जायमानत्वात् तथात्वम् ।

इन्द्राणी स्त्री इन्द्रस्य पत्नी-ङीप् आनुक् च । इन्द्रपत्न्यां शच्याम् "अदित्यै रास्नासीन्द्राण्या उष्णीषः" यजु० ३८,२ । "नैवेन्द्राणी न रुद्राणी न मनायी न रोहिणी" भट्टिः यथेन्द्राणी हरिहये स्वाहा चैव विभावसौ" भा० आ० १८६ अ० । "आजगाम सहेन्द्राण्या शक्रः सुरगणैर्वृतः" भा० व० ४३अ० । इन्द्रं परमैश्वर्यमानयति आ+नी-ब्रा०ड गौ०ङीष् । "ऐश्वर्यं परमं यस्या वशे चैव सुरासुराः । इदि च परमैश्वर्ये इन्द्राणी तेन सा स्मृता" इति देवीपु० उक्तनिरुक्तिर्यां । २दुर्गायां शक्तिभेदे । "ब्रह्माणीन्द्राणि । रुद्राणि ! भूतधात्रि ! यशस्विनि ! त्राहि मां सर्व्वदुःखेभ्यो नारायणि ! नमोऽस्तु ते" हरिवं० १७८अ० "सा च अष्टमार्द्धकालगता ऐन्द्रीत्यपरपर्य्याया तस्याश्च इन्द्रस्यासुकारिवित्यादपि तथात्वम् । इन्द्रइव आनयति जीवयति रोगोपशमनेन आन+णिच्-अच् पृषो० नत्वम् । ३स्थूलजायां राजनि० । ४स्त्रीणां करणे पुनीलसिन्दुवारवृक्षे (सोन्दाल) मेदि० । (निर्गुण्डी) इ० इन्द्रे अमरः, स्वार्थे कन् । इन्द्राणिकाप्युक्तार्थेषु ।

इन्द्राद्रय पु० । इन्द्रस्येवादर्शनमस्य आ+दृश-टक् ईत० । इन्द्रगोपे कीटे ततः तस्येदं० विकारे अञ् । ऐन्द्राद्रय० । तद्विकारे त्रि० ।

इन्द्रानुज पु० ईत० । १ वामने स हि अदित्यामिन्द्रजनकोत्तरं कश्यपेनोत्पादितः तदवतारयुक्ते २ नारायणे च "इन्द्रानुजानुचरभूपतयोऽध्यवात्सुः" माघः । इन्द्रावरजादयोऽप्यत्र ।

इन्द्राभ पु० कुरुवंश्यधृतराष्ट्रस्य पुत्रभेदे अयञ्च धृतराष्ट्रः आम्बिकेयादन्यः तथा हि "ततः संवरणात् सौरी सुषुवे तनयं कुरुम्" इत्युपक्रम्य तस्य "अविक्षितमभिष्यन्तमित्यादिना" चतुरो अविक्षिदादीन् सुतानुक्त्वा "अविक्षितः परिक्षित्तु" इत्यादिना तस्यापि परिक्षिदादीनष्टौ सुतानुक्त्वा "जनमेजयस्य तनया भवितार महाबलाः । धृतराष्ट्रः प्रथमजः पाण्डुर्वाह्लीक एव च । निषधश्च महातेजास्तथा जाम्बूनदो बली" इत्यादिना जनमेजयस्याष्टौ सुतानुक्त्वा धृतराष्ट्रोऽथ राजासीत् तस्य पुत्रोऽथ कुण्डिकः हस्ती वितर्कः क्रमश्च कुण्डिनश्चापि पञ्चमः । हरिश्चरश्चथेन्द्राभः सूनमन्युश्चापराजितः" इति भा० आ० ९४अ० उक्तः ।

इन्द्रायुध न० ६त० । १ शक्रस्यास्त्रे वज्रे "स्तनाद् मेघनादस्य धनुश्चेन्द्रायुधप्रभम्" रघुः । इन्द्रे तदधिष्ठितमेघे आयुधमिव । सूर्य्यकिरणसंपर्कात् मेघे जायमाने २धनुराकारेपदार्थभेदे तल्लक्षणाद्युक्तं ब्र० स० "सूर्य्यस्य विविधवर्णाः पवनेन विघट्टिताः कराः साभ्रे । वियति धनुःसंस्थाना ये दृश्यन्ते तदिन्द्रधनुः । केचिदनन्तकुलोरगनिःश्वासोद्भूतमाडराचार्य्याः । तद्यायिनां नृपाणामभिसुखमजयावहं भवति । अच्छिन्नमवनिगाढं द्युतिमत् स्निग्धं घनं विविधवर्णम् । हिरुदितमनुलोमं च प्रशस्तमस्य; प्रयच्छति च । विदिगुद्भूतं दिक्स्थामिनाशनं व्यभ्रजं मरककारि । पाटलपीतकनीलैः शस्त्राग्निभुक्तता दोषाः । जलमध्येऽनाहर्भुवि शस्त्रवधस्तरौ स्थिते व्याधिः । वल्मीके शस्त्रभयं निधि सचिववधाय धनुरैन्द्रम् । दृष्टिं करोत्यदृश्यां दृष्टिं दृश्यां निवारयत्यैन्द्राम् । पश्चात् सदैव दृष्टिं कुलिशभृतश्चापमाचष्टे । चापं मधोनः कुरुते निशायाम् आखण्डलायां दिशि भूपपीड़ाम् । वा व्यापरोदकृत्प्रभवं निहन्यात् सेनापतिं नायकमन्त्रिणौ च । निशि सुरचापं सितवर्णाभं जनयति पीड़ां द्विजपूर्व्वाणाम् । भवति च यस्यां दिशि तद्दृश्यं नरपतिसख्यं न चिराज्जन्यात्" । "न दिवोन्द्रायुधं दृष्ट्वा कस्यचिद्दर्शयेद्बुधः" मनुः "इन्द्रायुधद्योतिततोरणाङ्कम्" रघुः । ततः तस्येदं० विकारे अञ् । ऐन्द्रायुधस्तद्विकारे त्रि० ।

इन्द्रारि पु० ईत० । असुरे ।

इन्द्रालिङ्ग पु० इन्द्रमिन्द्रधनुरालिङ्गति लिङ्ग-तौच्छ्रे-क । इन्द्रगोपे कीटभेदे तस्य विकारः तस्येदं० अञ् । ऐन्द्रालिङ्गस्तद्विकारे त्रि० ।

इन्द्रावसान पु० इन्द्रस्य पर्जन्यस्यावसानमत्र । मरुदेशे । ततः उल्लादि० भवार्थे अञ् । ऐन्द्रावसानः मरुभवे त्रि० ।

इन्द्राशन पु० इन्द्राय ऐश्वर्याय अश्नते भुञ्जते अश-कर्म्मणि ल्युट । (सिद्धि) १भङ्गायाम् शब्दर० । तत्सेवने हि राज्यमपि तुच्छं भवतीति तस्यास्तथात्वम् । इन्द्रः इन्द्रधनुरिव अश्नुते अश्नैरक्षवर्णफलत्वात् । (कुँच) २गुञ्जाफले हारा० ।

इन्द्रासन पु० इन्द्र आत्मा अश्नते विशिष्यतेऽनेन अस-करणे ल्युट् । (सिद्धि) १ संविदाफले तत्सेवने हि आत्मनोविशिष्टत्वात्तस्य तथात्वम् । पञ्चभौतिकस्य प्रसादे आदिलक्षुके श्लेष्मपुरुषयात्मके २ प्रथमे भेदे न० ।

इन्द्रिय न० इन्द्रस्य आत्मनो लिङ्गं इन्द्र+घ । ज्ञान-

क्रियासाधने ? चक्षुरादौ २हस्तादौ च । "इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा" पा० तस्या नेकाविधार्थकता दर्शिता इतिशब्दः प्रकारार्थे इन्द्रेण दुर्जयमिन्द्रियमित्यपि" सि० कौ०। अत्र सूत्रे इन्द्रेण परमात्मना दृष्टमित्युक्तिरपि इन्द्रियस्य चक्षुरादीनां प्रत्यक्षागोचरतां निरस्यति । यद्वा इन्द्रेणात्मना दृष्टत्वेनाभिमतं काणोऽहं बधिरोऽहमित्याद्यभिमतम्। "एतस्माज्जायते प्राणोमनः सर्वेन्द्रियाणि चेति" श्रुतेः इन्द्रियस्य ईश्वरसृष्टत्वम् । इन्द्रदत्तमिति इन्द्र ऐश्वर्यं दत्तोऽहं स्वस्वकार्ये हि तेषामैश्वर्यमीश्वरेण दत्तम् अतएव तानि बलादिव गृहीत्वा विषयेषु प्राणिनं स्वस्वविषयग्रहणाय प्रवर्त्तयन्ति । असति ह्यैश्वर्ये न तद् सम्भवति । चक्षुरादीनामात्मानुमापकत्वज्ञेयम् । करणव्यापारः सकर्तृकः करणव्यापारत्वात् छिदिक्रियायां वास्यादिव्यापारवदिति करणव्यापारेण कर्त्तुरनुमानमत्र तत्साजात्यात् ज्ञानक्रियाकरणमपि सकर्तृकं करणत्वादिति चक्षुरादिना ज्ञानसाधनेनात्मनोऽनुमानम् । तथा इन्द्रियस्याप्रत्यक्षत्वेऽपि ज्ञानक्रिया सकरणिका क्रियात्वात् छिदिक्रियावत् इत्यनुमानम् तत्सत्त्वे प्रमाणम् । तत्तन्मतभेदेन इन्द्रियस्य भौतिकत्वाभौतिकत्वसर्वगतत्वासर्वगतत्वप्राप्यकारित्वाप्राप्यकारित्वादिकम् आत्मशब्दे ६६५ पृष्ठे प्रपञ्चेन परीक्षितम् । इन्द्रियञ्च द्विविधं ज्ञानकर्म्मेन्द्रियभेदात् तत्र श्रोत्रादीनि ज्ञानेन्द्रियाणि हस्तादीनि कर्म्मेन्द्रियाणि । "श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका चैव पञ्चमी । पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता" मनुः । "नासिकालोचने जिह्वा त्वक् श्रोत्रं चेन्द्रियाणि च । हस्तौ पायुरुपस्थञ्च वाक्पादौ च दशैव तु" शारदा०। "बुद्धीन्द्रियाणि श्रोत्रघ्राणरसनत्वगाख्यानि । वाक्पाणिपादपायूपस्थानि कर्म्मेन्द्रियाख्यानि" सां० का० । एतानि च बाह्येन्द्रियाणि । "उभयात्मकमत्र मनः संकल्पकमिन्द्रियञ्च साधर्म्म्यात्" सां०का० मनस्तूभयविधकरणोपकारित्वात् करणम् । तच्च ज्ञानकर्म्मव्यापारसामान्ये कारणमपि न तत्र करणम् असाधारणकारणञ्चैव करणत्वात् रूपादिज्ञाने चक्षुरादीनामिव तस्य असाधारणबाह्यग्राह्यविशेषाभावात् किन्तु सुखाद्युपलब्धौ असाधारणात् तत्रैवास्य करणत्वमिति नैयायिकादयः। वेदान्तिनस्तु मनसोनेन्द्रियत्वमङ्गीकुर्व्वन्ति तच्च आत्मशब्दे दर्शितम् । अतएव "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनमिति" मनोबुद्धेरिन्द्रियात् पृथग्निर्देशः । सांख्यमते "सात्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात् । भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्" सां०का० रजोगुणोपबृंहितसात्विकादेवाहङ्कारात् एकादशेन्द्रियोत्पत्तिरुक्ता तेनाहङ्कारिकाण्येन्द्रियाणि । "घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः" गो०सू० भौतिकानीति नैयायिकाः । "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेति" श्रुतेः आत्मोपादानानीति वेदान्तिनः। अत्र इन्द्रियेभ्यः मनसः पृथग्निर्देशादपि मनसोनेन्द्रियत्वम् अतएव कठोपनिषदि गीतायाञ्च "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः" "इन्द्रियाणि हयानाहुर्मनः प्रग्रहमेव चेति" च इन्द्रियमनसोर्भेदनिर्देशः" । यथा च तदुत्पत्तिः तथा पञ्चदश्यां दर्शितम् यथा । "तमःप्रधानप्रकृते रुद्रोगायेश्वरेच्छया । वियत्पवनतेजोऽम्बुभुवो भूतानि जज्ञिरे । सत्वांशैः पञ्चभिस्तेषां क्रमाद्धीन्द्रियपञ्चकम् । श्रोत्रत्वगक्षिरसनघ्राणाख्यमुपजायते । तैरन्तःकरणं सर्वैर्वृत्तिभेदेन तत् द्विधा । मनोविमर्शरूपं स्याद्बुद्धिः स्याच्चयात्मिका । रजोंशैः पञ्चभिस्तेषां क्रमात् कर्म्मेन्द्रियाणि तु । वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे" १दीपे । तेषां स्थानकार्य्यादिकन्तु तत्रैव २दीपे "श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं चेन्द्रियपञ्चकम् । कर्णादिगोलकस्थं तत्प्राप्यं धावेद्बहिर्मुखम् । कदाचित् पिहिते कर्णे श्रूयते शब्द आन्तरः । प्राणवायौ जाठराग्नौ जलपानेऽन्नभक्षणे । व्यज्यन्तेऽन्तराः स्पर्शीलने चान्तरं तमः । उद्गारे रसगन्धौ चेत्यज्ञाणामान्तरग्रहः । पञ्चोक्तादानगमनविसर्गानन्दकाः क्रियाः । ऋषिवाणिज्यसेवाद्याः पञ्चस्वन्तर्भवन्ति हि । वाक्पाणिपादपायूपस्थं कर्म्मेन्द्रियपञ्चकम् । मनो दशेन्द्रियाध्यक्षं हृत्पद्मगोलकस्थितम् । तज्ज्ञानःकरणं बाह्येष्वस्वतन्त्रं विनेन्द्रियैः । अक्षेषूर्ध्वार्पितेष्वेव गुणदोषविचारकम् । सत्वं रजस्तमश्चास्य गुणा, विक्रियते हि तैः । धैरग्यं ज्ञानिरौदार्यमित्याद्याः सत्वसम्भवाः । कामक्रोधौ लोभमोहावित्याद्या रजउत्थिताः । आलस्यभ्रान्तितन्द्राद्या विकारास्तमउत्थिताः । सात्विकैः पुण्यनिष्पत्तिः पापोत्पत्तिश्च राजसैः । तामसे नोभयं किन्तु हतायुःपथं भवेत्" । तत्रेन्द्रियाणां कार्य्यभेदा अपि सां०का०दर्शिताः यथा 'शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः। वचनादानविहरणोत्

सर्गानन्दाश्च पञ्चानाम्"। आदिपदात् स्पर्शरूपरसगन्धानां ग्रहणम् तथा च श्रोत्रस्य शब्दग्रहणम्, त्वचः स्पर्शग्रहणम्, चक्षुषो रूपग्रहणम्। जिह्वाया रसग्रहणम्। घ्राणस्य गन्धग्रहणमसाधारणं कार्यं भवति। एवं वागादीनां वचनादिकर्माण्युक्तानि। "अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम्। साम्प्रतकालं बाह्यं, त्रिकालमाभ्यन्तरं करणम्" सां० का०। "अन्तःकरणं त्रिविधं बुद्धिरहङ्कारो मन इति। शरीराभ्यन्तरवृत्तित्वादन्तःकरणम्। दशधा बाह्यमिन्द्रियं त्रयस्यान्तःकरणस्य विषयाख्यं विषयमाख्याति विषयसंकल्पाभिमानाध्यवसायेषु कर्त्तव्येषु द्वारीभवति। तत्र बुद्धीन्द्रियाख्यालोचनेन, कर्मेन्द्रियाणि तु यथास्वं व्यापारेण" सा० कौ०। "विषयाणां ग्रहीतृणि मनैः पञ्चेन्द्रियाणि च" मनुः। "शौचमिन्द्रियनिग्रहः" मनुः। "इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ" "इन्द्रियाणि प्रमाथीनि" गीता०। पञ्च बाह्यानि ज्ञानेन्द्रियाणीति मनुष्याद्यभिप्रायम् क्वचित् जीवे अदृष्टवशात् ततो न्यूनताऽपि। यथा इक्षाणाम् स्पर्शसाधनत्वगिन्द्रियमात्रम् शङ्खशुक्त्यादीनाम् त्वग्जिह्वे द्वे इन्द्रिये मक्षीलतादीनां त्रीण्येन्द्रियाणि। सर्पादीनां चत्वारीन्द्रियाणि तेषां श्रोत्राभावात् कृम्मीरस्य च चत्वारि तस्य जिह्वाभावात् द्वित्वबधेयम्। एतेषाञ्च जीवानां लिङ्गशरीरसत्त्वेऽपि तत्तद्गोलकस्यानन्यत्वात्र तत्तत्कार्य्यार्थं वृत्तिः। बौद्धमते गोलकान्येवेन्द्रियाणि। तन्मतं विवरणोपन्यासे दूषितं तच्च ६६६६ दर्शितम्। २रेतसि ३ वीर्य्ये च। "इन्द्रियकामस्य" श्रुतिः "समावदिन्द्रिया भवन्ति" ताण्ड्य०। "समानसाम्यात्" भा०

इन्द्रियगोचर पु० इन्द्रियस्य गोचरः विषयः। शब्दादिषु विषयेषु ते हि प्रतिनियतमेकैकस्येन्द्रियस्य याह्या यथा श्रोत्रस्य याह्यः शब्दः, त्वगिन्द्रियस्य स्पर्शस्तद्विशिष्टद्रव्यञ्च, चक्षुषोरूपं तदाश्रयद्रव्यञ्च, रसनायाः रसः, घ्राणस्य गन्ध इत्यादि। एवमन्यान्यपि न्यायादिमते तत्तदिन्द्रियग्राह्या ग्रन्थोक्तानि यथा "घ्राणस्य गोचरोगन्धो गन्धत्वादिरपि स्मृतः। तथा रसोरसत्तायास्तथा शब्दोऽपि च श्रुतेः"। आदिपदात् सुरभिदुर्गन्धत्वयोर्ग्रहणम्। तथा रसत्वमाधुर्य्यादिसंज्ञितः। एवं शब्दत्वतारत्वमन्द्रत्वादिसंज्ञितः "उद्भूतरूपं नयनस्य गोचरोद्रव्याणि तद्वन्ति पृथक्त्व संख्ये। विभागसंयोगपरापरत्वस्नेहद्रव्यत्व परिमाणयुक्तम्। क्रिया जातिं योग्यवृत्तिं समवायं च ताद्यम्। स्पर्शान्तं चक्षुः, सम्बन्धादालोकोद्भूतरूपयोः। उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः। रूपान्यच्चक्षुषो योग्यं रूपमत्वापि कारणम्" भाषा० सोऽपि उद्भूतस्पर्शोऽपि चकारात् तद्वृत्तिस्पर्शत्वद्द्रुत्वकठिनत्वादि याह्यम्। एते च बाह्येन्द्रियाणां विषयाः। तेषां मते मनस इन्द्रियत्वात् तद्ग्राह्यास्त्वैवोक्ता यथा "मनोग्राह्यं सुखं दुःखमिच्छा द्वेषोमतिः कृतिः" एवं सुखत्वदुःखत्वादिकमपि

इन्द्रियग्राम पु० ६त०। इन्द्रियसमुदाये "बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति" मनुः। इन्द्रियवर्गादयोऽत्र। "निर्दवार मधुनेन्द्रियवर्गः" माघः।

इन्द्रियज त्रि० इन्द्रियाज्जायते जन–ड। त०। इन्द्रियसन्निकर्षजाते प्रत्यक्षे। "तदिन्द्रियजतद्धर्म्मबोधसामग्र्यापेक्षते" भाषा०। इन्द्रियजातादवोऽत्र इन्द्रियाणि च विषय सन्निकर्षद्वारा ज्ञाने करणानि विषयसन्निकर्षश्च तत्र व्यापारः व्यापारेणैव तेषां जनकत्वात् ज्ञानानां तज्जन्यत्वम्।

इन्द्रियज्ञान न० इन्द्रियेण जनितं ज्ञानम्। प्रत्यक्षे ज्ञाने।

इन्द्रियनिग्रह पु० इन्द्रियाणां निग्रहः यथेष्टं प्रवृत्तानां स्वस्वविषयेभ्यः निवर्त्तनेन निरोधः। इन्द्रियाणां यथेष्टं प्रवृत्तानां स्वस्वविषयेषु प्रसङ्गनिवारणे। स च सर्व्ववर्णसाधारण धर्म्मः "धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम्" मनुः। इन्द्रियनिग्रहः "अप्रतिषिद्धेऽपि विषयेऽनतिप्रसङ्गः" एका० त० रघु०। २योगसाधनाङ्गे श्रोत्रादीनां ज्ञानेन्द्रियाणां वागादीनां च कर्मेन्द्रियाणां स्वस्व व्यापारेषु अनियोजनरूपे रोधने च। सर्वेषामनिरोधे योगसिद्धाभावोभङ्ग्या गीतायामुक्तः"। "इन्द्रियाणान्तु सर्व्वेषां यद्येकं क्षरतीन्द्रियम्। तदस्य हरति प्रज्ञां दृतेः पात्रादिवोदकम्" मनसोनिग्रहादेवान्येषां निग्रहो भवति नान्यथा "इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते। तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि" गीतायां तथोक्तेः। मनोनिग्रहोपायश्च "असंशयं महाबाहो! मनोदुर्निग्रहं चलम्। अभ्यासेन तु कौन्तेय! वैराग्येण च गृह्यते" गीतोक्तेः अभ्यासवैराग्यरूपः। यथेच्छमिन्द्रियप्रसङ्गे पापमुक्तम् "विहितस्याननुष्ठानात् निन्दितस्य च सेवनात्। अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति" या० स्मृ०। इन्द्रियजयोऽत्र इन्द्रियजये च शौचमेव हेतुः। यथाह पात० स्वभाष्ययोः, "शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः" "सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनानि

च" सू० "शुचेः सत्वगुद्रिक्तात् सौमनस्यं तत ऐकाग्र्यं तत इन्द्रियजयस्ततश्चात्मदर्शनयोग्यत्वम् बुद्धिसत्त्वस्य भवतीति" भा० एष च बाह्य उपायः। आभ्यन्तर उपायस्तु योक्तः। "ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः" पा० सू० "सामान्यविशेषात्मा यद्यादिर्धर्मः तेष्विन्द्रियाणां वृत्तिर्ग्रहणं (१रूपम्) न च तत्सामान्यमात्रग्रहणाकारम् कथमनालोचितः सविषयविशेष इन्द्रियेण मनसानुव्यवसीयेतेति। स्वरूपं पुनः प्रकाशात्मनोबुद्धिसत्त्वस्य सामान्यविशेषयोरनुगतसिद्धावयवभेदानुगतः समूहो द्रव्यमिन्द्रियम्। (२रूपम्) तेषां तृतीयं रूपम्। अस्मितालक्षणोऽहङ्कारः तस्य सामान्यस्येन्द्रियाणि विशेषाः। चतुर्थं रूपं व्यवसायात्मकाः प्रकाशक्रियास्थितिशीला गुणाः, येषामिन्द्रियाणि साहङ्काराणि परिणामः। पञ्चमं रूपं गुणेषु यदनुगतं पुरुषार्थवत्त्वमिति पञ्चसु तेषु इन्द्रियरूपेषु यथाक्रमं संयमः, तत्र तत्र जयं लब्ध्वा पञ्चरूपजयादिन्द्रियजयः प्रादुर्भवति योगिनः" भाष्यम् तत्फलमपि तत्रोक्तम्। "ततो मनोजवित्वं विकरणभावः प्रधानजयश्च" पा० सू० "कायस्य मनोवदनुत्तमगतिलाभो मनोजवित्वम्। विदेहानाम् (देहानपेक्षाणाम्) इन्द्रियाणामभिप्रेतदेशकालविषयापेक्षो वृत्तिलाभः अतीतानागतदूरस्थबाह्यार्थविषयश्च वृत्तिलाभो विकरणभावः। सर्वप्रकृतिविकारवशित्वं प्रधानभावः इत्येताश्चित्रः सिद्धयो मधुप्रतीका उच्यन्ते एताश्च करणपञ्चकरूपजयादधिगम्यन्ते" भा० एतासाञ्च बाह्यसिद्धीनां पारम्पर्येण सत्वपुरुषान्यताख्यातिरेव तु सख्यं फलमिति तत्रैव प्रसिद्धम्।

इन्द्रियवध पु० इन्द्रियाणां वधः स्वस्वकार्येषु शक्तिविघातः। इन्द्रियाणां स्वस्वकार्यानुकूलशक्तिप्रतिघाते ते च एकादशधा यथाह सां० का० कौण्डीः "एकादशेन्द्रियवधाः सह बुद्धिवधैरिष्टाः" का० एकादशेन्द्रियवधाः स्वस्वकार्ये वैकल्यरूपाः तत्र "बाधिर्यमित्यादि कौ० वाक्यम् अशक्तिशब्दे ४७२ पृष्ठे उदाहृतम्

इन्द्रियबोधन त्रि० इन्द्रियं बोधयति स्वपानसाध्यवैकल्यबुध+णिच्+ल्यु। स्वपानसाध्यवैकल्यबोधके मद्ये मद्यपाने हि इन्द्रियमात्रस्य स्वस्वकार्यव्यापारापाटवकरणात् आत्मवीर्यं तानि बोधयतीति तस्य तथात्वम्। "सर्वं पित्तकरं मद्यम्" इत्युपक्रम्य 'पाके लघु विदाह्यूष्णं तीक्ष्णमिन्द्रियबोधनम्'। "कषायमधुरं मद्यं लघ्वीन्द्रियबोधनम्"। "वातघ्नो मधुरप्रायोदृष्टश्च इन्द्रियबोधनः" सुश्रु०।

इन्द्रियवत् त्रि० इन्द्रियं वशयतया प्राशस्त्येन वास्त्यस्य मतुप् मस्य वः। १वश्येन्द्रिये २प्रशस्तेन्द्रिये च स्त्रियां ङीप्। इन्द्रियेण तुल्यम् इन्द्रियस्येव इन्द्रिये इव वा वति। इन्द्रियतुल्ये अव्य० इन्द्रियं वीर्यमस्यास्य मतुप् मस्वः वेदे पूर्वपद नि० दीर्घः। वीर्यान्विते। "तेजः पशूनां हविरिन्द्रियावत्" वाज०। हविष्य इन्द्रियवान् मदिन्तम" वाज०। क्वचित् वेदे दीर्घोन। सर्वं हुतमिन्द्रियवत" यजु० १४, २,

इन्द्रियवृत्ति स्त्री ६त०। "यद्यादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः। वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्" सांख्योक्ते श्रोत्रादीनां यद्यादिषु प्रकाशनार्थे व्यापारे कर्मेन्द्रियाणां वचनादानादिव्यापारे च। तत्र बुद्धीन्द्रिय वृत्तिश्च इन्द्रियजन्या बुद्धेस्तत्तदाकारेण परिणामः सा च निर्विकल्पकस्थानीया इति सा० कौ० समर्थितं तच्च ८२६पृ० आलोचनशब्दे दर्शितम् कर्मेन्द्रियवृत्तिश्च वचनादानादिरूपोव्यापारः। मनोरूपेन्द्रियवृत्तिस्तु संकल्पविकल्पाध्यवसायरूपा मनोबुद्धेः परिणामभेदः।

इन्द्रियसंप्रयोग पु० इन्द्रियाणां संप्रयोगः स्वस्वविषयेषु प्रयोगःव्यापारणम्। विषयेरिन्द्रियसम्बन्धे असत्ख्यातिशब्दे ५२३पृष्ठे उदा०।

इन्द्रियसन्निकर्ष पु० इन्द्रियस्य स्वस्वविषयैः सह सन्निकर्षः सम्बन्धभेदः। प्रत्यक्षसाधने इन्द्रियस्य स्वस्वविषयैः सम्बन्धभेदरूपे प्रत्यक्षजनकव्यापारे। स च न्यायमते षोढा यथा "विषयेन्द्रियसंबन्धोव्यापारः सोऽपि षड्विधः। द्रव्यप्रत्यक्षे संयोगात् संयुक्तसमवायतः द्रव्येषु समवेतानां, तथा तत्समवायतः तत्रापि समवेतानां, शब्दस्य समवायतः। तद्वृत्तीनां समवेतसमवायेन तु ग्रहः। विशेषणतया तद्भावानां ग्रहो भवेत्" भाषा०। तथा च द्रव्यस्य प्रत्यक्षे इन्द्रियसंयोगः कारणम् द्रव्यसमवेतगुणकर्मजातीनां प्रत्यक्षे इन्द्रियसंयुक्तसमवायः। द्रव्यसमवेतसमवेतानां गुणत्वकर्मत्वादीनां प्रत्यक्षे इन्द्रियसंयुक्तसमवेतसमवायः। शब्दस्य प्रत्यक्षे श्रोत्रसमवायः शब्दवृत्तिशब्दत्वादेः, श्रोत्रसमवेतसमवायः कारणम्। "अभावप्रत्यक्षे समवायप्रत्यक्षे च इन्द्रियसंयुक्तस्वरूपसम्बन्धविशेषणता हेतुः। वैशेषिकमते तु समवायस्य न प्रत्यक्षम्। अत्र यद्यपि विशेषणता नानाविधा तथा हि भूतलादौ घटाभावः संयुक्तविशेषणतया गृह्यते संख्यादौ रूपाद्यभावः संयुक्तसमवेतविशेषणतया, संख्यात्वादौ रूपाद्यभावः संयुक्तसम-

वेवतमवेतविशेषणतया । शब्दाभावः केवलश्रोत्रावच्छिन्न-विशेषणतया । कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेत-विशेषणतया । एवं कत्वावच्छिन्नाभावे खत्वाभावादिकं विशेषणविशेषणतया । एवं घटाभावादौ पटाद्यभावः संयुक्तविशेषणविशेषणतया । एवमन्यदप्यूहम् तथापि विशेषणतात्वरूपेणैकैव सा गण्यते अन्यथा घीढा सन्निकर्ष इति प्राचां प्रवादो व्याहन्यतेति" सङ्का० । इन्द्रिय संयोगादयोऽत्र

इन्द्रियस्वाप पु० इन्द्रियाणां स्वस्वविषयेषु स्वाप इव अप्रवृत्तिरत्र । सुषुप्तावस्थायाम् तत्र हि मनःसहितसर्वेन्द्रियाणामुपरमः श्रुत्यादावुक्तः "सुषुप्तिकाले सकले प्रलीने" इति स्मृत्या "यत्र सुप्तो न कञ्चन पश्यतीति" श्रुत्या इन्द्रियमात्रलयस्यावगमात् । इन्द्रियैः स्वस्य स्वकारणभावस्यापः प्राप्तिर्यत्र । इन्द्रियाणां स्वरूपतः स्वकारणलयकाले प्रलये । मरणे तु न स्वरूपतस्तेषां लयः । "तस्मात्क्रामन्त प्राणोऽनुत्क्रामति प्राणमनुक्रामन्तं मनोऽनुक्रामतीत्यादि" श्रुतेः "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधन" मिति स्मृतेश्च प्राणानामाप्रलयस्थायित्वावगतेः । तत्र गोलकाभावेन वृत्तिमात्रं न भवति पुनर्देहान्तरे गोलकोदये वृत्तिलाभ इति भेदः "तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्त" इति यां० सू० भाष्ययोर्विवृतिः एवं सांख्यमतेऽपि किन्तु तन्मते लिङ्गदेहे प्राणपञ्चकं विहाय पञ्चभूतानां प्रवेश इत्येतावन्मात्रभेदः ।

इन्द्रियात्मन् पु० इन्द्रियमेवात्मा । इन्द्रियस्वरूपे कर्म्मधा० । २ इन्द्रियेषु ।

इन्द्रियादि पु० ईत० । सांख्यमतसिद्धे इन्द्रियकारणे अहङ्कारे "सात्विक एकादशः प्रवर्त्तते वैकृतादहङ्कारात्" सा० का०

इन्द्रियाधिष्ठातृ ईत० । इन्द्रियाणामचेतनानां स्वस्वकार्य्येषु व्यापारसम्पादनाय ईश्वरनियोजिते देवभेदे । तेच देवाः "दिग्वातार्कप्रचेतोऽग्निवह्नीन्द्रोपेन्द्रमित्रकाः" । शारदा० दर्शिताः यदार्षादर्शे एतद्यथा० "एते इन्द्रियाधिष्ठातृदेवाः । यदाहुः वैकारिकादिगाद्याश्च चन्द्रेणैकादश स्मृताः । इन्द्रियाणामधिष्ठातृदेवास्ते सात्विकाः मता" इति तथा च श्रोत्राधिष्ठातृदेवता दिक् । त्वचः वायुः, चक्षुषः सूर्यः । रसनायाः प्रचेताः, घ्राणस्याश्विनौ, वाचः अग्निः, पाणेः शक्रः, पादस्य उपेन्द्रः (विष्णुः), पायोः मित्रः, उपस्थस्य कः ब्रह्मा । मनसः चन्द्रमाः ।

इन्द्रियायतन ईत० । श्रोत्राद्याधारे देहे तस्य इन्द्रियाधारत्वात्तथात्वम् । स च सूक्ष्मएव देहः । यदाह सा० का० "पूर्व्वोत्पन्नम (ञ) सक्तं नियतं महदादिसूक्ष्मपर्यन्तम् । संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्" । "प्रधानेनादिसर्गे प्रतिपुरुषमेकैकमुत्पादितम् आ चादिसर्गात् आ च महाप्रलयादवतिष्ठते महदादिसूक्ष्मपर्यन्तं महदहङ्कारैकादशेन्द्रियपञ्चतन्मात्रपर्य्यन्तम् एषां समुदायः सूक्ष्मशरीरं शान्तघोरमूढैरिन्द्रियैरन्वितत्वाद्विशेषः । नन्वस्तेतदेव शरीरं भोगायतनं पुरुषस्य, ऊर्द्धं दह्यमानेन षाट्कौशिकेन शरीरेणेत्यतआह संसरतीति उपात्तमुपात्तं च शरीरं जहाति हायंहायं चोपादत्ते, कस्मात् ? निरुपभोगं यतः, षाट्कौशिकं शरीरं विना सूक्ष्मं निरुपभोगं, तस्मात्संसरति । ननु धर्म्माधर्म्मनिमित्तः संसारः न च सूक्ष्मशरीरस्यास्ति तद्योगः, तत्कथं संसरतीत्यत आह भावैरधिवासितं धर्म्माधर्म्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्य्यानैश्वर्य्याणि भावास्तदन्विता बुद्धिः तदन्वितञ्च सूक्ष्मशरीरमिति तदपि भावैरधिवासितं यथा सुरभिचन्दनसम्पर्काद्वस्त्रं तदामोदवासितम्भवति तस्माद्भावैरेवाधिवासितत्वात्संसरति । कस्मात्पुनः प्रधानमिव महाप्रलयेऽपि तच्छरीरं न तिष्ठतीत्यत आह लिङ्गम् स्वयं गच्छतीति लिङ्गं हेतुमत्त्वेन चास्य लिङ्गत्वमिति" भावः । सा०कौ० । "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्" स्मृतिः । पञ्चद० इदमेव वाक्यमुपन्यस्तम् । न्यायादिमते स्थूलदेहएव इन्द्रियायतनं तैः सूक्ष्मदेहानङ्गीकारात् इति भेदः जीवाऽदृष्टवशादेवापूर्व्वदेह एव तत्तदिन्द्रियाण्यपि तत्तद्देहे उत्पद्यन्ते मनांसि तु अनन्यानि तानि च नित्यानि तेषाञ्च अदृष्टवशात् एकैकस्मिन् देहे एकैकस्य प्रवेश इति हि तेषां सम्मतम् । २ आत्मनि च "आत्मेन्द्रियाद्यधिष्ठतो" लिङ्गशरीरशब्दे एतेषां युक्तायुक्तत्वपरीक्षणम् करिष्यते ।

इन्द्रियाराम त्रि० इन्द्रियेषु आरमति आ+रम-घञ् । इन्द्रियार्थभोगप्रसक्ते "अघायुरिन्द्रियारामो मोघं पार्थ ! स जीवति" गीता० ।

इन्द्रियार्थ पु० ईत० । इन्द्रियगोचरशब्दार्थे शब्दादौ "इन्द्रियार्थेषु सर्वेषु न प्रसज्जेत कामतः" मनुः । इन्द्रः इन्द्रिये तद्विषये च द्वि० व० । "इन्द्रियार्थसन्निकर्षोत्पन्नम्" गौ० सू० । इन्द्रियेणार्थस्यसन्निकर्ष इत्येव तत्र विग्रहस्तु न्याय्यः ।

इन्द्रियाविन् त्रि० इन्द्रियं वश्यतया प्राशस्त्येन वाऽस्यास्ति वा०

(5) Vol I

विनि वेदे पूर्व्वपददीर्घः । १वश्येन्द्रिये २प्रधानेन्द्रिये च । "सप्तार्चिश्चिन्द्रियं दधा तन्द्रियाव्येव भवति" श्रुतिः ।

इन्द्रियेश पु० ६त० । १जीवे तदधिष्ठानेनैव तेषां इत्त्यु-त्पत्तेस्तथात्वम् २इन्द्रियाधिष्ठातृदिगादिदेवादिषु च ।

इन्द्रेज्य पु० ६त० । इन्द्रस्तुतौ यज्ञे ज्येन्द्रपूजादयोऽत्र

इन्द्रेश्वर पु० इन्द्रेण स्थापित ईश्वर ईश्वरलिङ्गम् । महेन्द्रपर्वतस्थे इत्यासुरवधजनितब्रह्महत्याविघातार्थं यज्ञेन स्थापिते शिवलिङ्गभेदे तत्कथा प्रा० वि० कालि० पुराणम् । "उक्त्वा हत्वा ततः शक्रोमाहेन्द्रे स्थाप्य शङ्करम् । लिङ्गं विशुद्धः पापौघैस्ततः स त्रिदिवं गतः । अद्यापीन्द्रेश्वरं दृष्ट्वा तथा रामेश्वरं प्रभुम् । मुच्यते ब्रह्महत्याया नरो वै नात्र संशयः" ।

इन्ध दीप्तौ रुधा० आ०अक० सेट् निशामनिट् । वर्त्तमानेचाऽतोनिशा । इन्धे, इन्धाते,इन्धते, "यं त्वां जनास इन्धते ऋ०८,४,१ इन्धीत, इन्धाम् । इन्त्स इन्त्सम् । ऐन्ध ऐन्धिष्ट इन्धाम्-बभूव । आस चक्रे इन्धिञ्चक्रे ऐन्धिष्यत । इन्धितव्यम् । इन्धिता इन्धनम् । इद्धोवर्त्तते । क्विप् समित् इन्धानः "अग्निमिन्धानो मनसा धियम् सचेत मर्त्यः" ऋ० । भावे इध्यते ऐन्धि । "परो यदिध्यते दिवि" ऋ०७०१४ पदगणव्याख्यासः ।

इन्ध पु०इन्ध+करणे-घञ् । १काष्ठे इन्ध-अच् । २दीप्तियुक्ते । ३तन्नामके ऋषिभेदे पु० ततः गोत्रे नडा०फक् । ऐन्धायनस्तद्गोत्रापत्ये पुंस्त्री । दीप्तियुक्ते दक्षिणनेत्रे विशेषेण स्थिते ४परमात्मनि पु० । तस्य तदर्थत्वञ्च समर्थितम् इ०उ०भा० । "इन्धोह वै नामैष योऽयं दक्षिणेऽक्षन् पुरुषस्तं वा एतमित्थं सन्तमिन्द्र इत्याचक्षते परोक्षेणैव, परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः" "इन्धोह वै नाम इन्द्र इत्येवं नामायं "वसुर्वै ब्रह्मेति" आदित्यान्तर्गतः पुरुष एषः, योऽयं दक्षिणेऽक्षन् अक्षिणि विशेषेण व्यवस्थितः । स च सत्यनामा तं वा एतं पुरुषं दीप्तियुक्तत्वात् प्रत्यक्षं नामाख्य इन्द्र इति तमित्थं सन्तमिन्द्र इत्याचक्षते परोक्षेण, यस्मात् परोक्षप्रिया इव हि देवाः प्रत्यक्षनामग्रहणं द्विषन्ति" भा० "इन्धयति दीपयति इन्ध-णिच्-अच् । ५दीपके त्रि० । एतस्मात् पूर्वस्यो ! आङ्माभ्यां समासे सुम् । आधुमिन्धः अग्निमिन्धः । "होताध्वर्युरावया अग्निमिन्धो ग्रावग्राभः" यजु० २५,२८, अग्निमिन्धश्च अग्नीत् नाम ऋत्विक् ।

इन्धन न०इध्यतेऽनेन इन्ध+करणे-ल्युट् । १काष्ठे "इन्धनोघगण्यग्निस्विषा नात्येति पूषणम्" माघः । "कामिनीषु विवाहेषु गवां भक्षे तथेन्धने" मनुः । इन्धने इन्धनापहारे इत्यर्थः "इन्धनार्थमशुष्काणाम्" प्रा०वि० स्मृतिः । इन्धयति इन्ध-णिच्-ल्यु । २दीपनकर्त्तरि त्रि० । भावे ल्युट् । ३प्रज्वालने न० ।

इन्धन्वन् त्रि० इन्धन+मत्वर्थीयः । वेदे वनिप् नि० वर्त्तवोपः । इन्धनयुक्ते । "इन्धन्वभिर्धेनुभीरश्वबुधभिः" ऋ० २,३४,५, "इन्धन्वभिः समिन्धनवद्भिः" भा० ।

इन्ध गतौ भ्वा० निरु० । इनधातौ ६२८ पृष्ठे विवृतिः ।

इन्धका स्त्री इन्धति इन्ध-अक् स इव कायति कै-क । मगधगिरीनद्यूपरिस्थे इन्द्रजाख्यतारासु अमरटीका ।

इभ पु० इण्-भ किच्च । १हस्तिनि, "वन्येभदानाविलगन्धदुर्द्धराः" माघः २ततत्संख्यातुल्यसंख्याके अष्टसंख्यान्विते च । गजाहि अष्टसु दिक्षु स्थिता ऐरावतादयोऽष्टौ वर्त्तन्ते इति तेषामष्टत्वम् । ते च "ऐरावतः पुण्डरीकः वामनः कुमुदोऽञ्जनः । पुष्पदन्तः सार्व्वभौमः सुप्रतीकश्च दिग्गजाः" अमरोक्तक्रमेण पूर्व्वादीशानान्तदिक्षु स्थिताः । अस्य च उत्तरपदस्थत्वे श्रेष्ठार्थद्योतकता व्याघ्रादेराकृतिगणत्वात् उपमितसमासः । स्त्रियां ङीप् । जातित्वात् पोटागब्देन समासेऽस्य पूर्वनिपातः पुंवद्भावश्च इभपोटा

इभलक्षणविभागादि वृह०सं० "मध्याभद्रा: सुविभक्तदेहा न चोपदिग्धाश्च कृशाः कृशाश्च । गात्रैः समैश्चापसमानवंशा वराङ्गलक्ष्मैर्जघनैश्च भद्राः ॥ वक्षोऽथ कक्षावलयः सुखाश्च लम्बोदरं लम्बकृकाटिकश्च । स्थूलाश्च कुक्षिः सह मेचकेन सैंहो च दङ्मन्दमतङ्गजस्य ॥ मृगास्तु तुल्याधरवालमेढ्रास्तन्वङ्घ्रिकण्ठद्विजकर्णकेशाः । स्थूलेक्षणाश्चेति यथोक्तचिह्नैः सङ्कीर्णनागा व्यतिमिश्रचिह्नाः ॥ पङ्क्तोन्नतिः सप्त मृगस्य दैर्घ्यमष्टौ च कक्षाः परिणाहमानम् । एकाहिहस्तावथ मन्दभद्रौ सङ्कीर्णनागो ऽनियतप्रमाणः ॥ भद्रस्य वर्णो हरितो मदस्य मन्दस्य हारिद्रकसन्निकाशः । कृष्णो मदाभिष्टितो मृगस्य सङ्कीर्णनागस्य मदो विमिश्रः ॥ ताम्रौष्ठतालुवदनाः कलविङ्कनेत्राः स्निग्धोन्नतायतमनाः पृथुलायताक्षाः । चापोन्नतायतनिगूढनिमग्नवंशास्त्र्यङ्करोमचितकूर्मसमानकुम्भाः । विस्तीर्णकर्णश्रुतनाभिललाटशुण्डाः कूर्मोन्नतैर्द्विनवविंशतिभिर्नखैश्च । रेखात्रयोपचितवृत्तकराः सुवालाः धन्याः सुगन्धिमदशुक्करमारुताश्च । दीर्घाङ्गु-

शिरःपुष्करः सजलाम्भोदनिनादहृद्धिष्णः । हृद्दायतहस्तकन्धरा धन्या भूमिपतेर्मतङ्गजाः । निर्मदाभ्यधिकहीननखाङ्गान् कुजवामनकमेषविषाणान् । हस्तकोशफलपुष्करहीनान् श्यावनीलयवलासिततालून् । खल्पवक्रहरसत्कुणषण्डान् हस्तिनीं च गजलक्षणयुक्ताम् । गर्भिणीं च वपतिः परदेयं प्रापयेदितिविरूपफलाख्ये"।

हेमा० परि० ख० लक्षणसङ्ग्रहे विष्णुध० । "नागाः प्रशस्ता धर्म्याश्च ! प्रमाणादधिकाश्च ये । दीर्घहस्ता महोच्छ्राया-ऽवामनाश्च विशेषतः । निगूढवंक्षामध्यश्चा व्यूढा व्यूढोरु मस्काकाः"(व्यूढा विपुलाः)"विंशत्यङ्गादशनखाः। शीतकालमदाश्च ये । ते प्रशस्तमहानागाः ये तथा सप्तसङ्ख्यिताः। दन्तच्छदेषु दृश्यन्ते येषां खस्तिकलक्षणम् । भृङ्गारबालव्यजना वर्द्धमानाङ्कुशास्तथा । धार्य्या नैते तथा धार्या वामना ये च मत्कुणाः । हस्तिन्योवाच गर्भिण्योये च मूढा मतङ्गजाः । अपाकलाश्च कुब्जाश्च सह्नाएव भार्गव ! । कुदन्ताश्च तथा वल्गा वामकूटाश्च वल्गतः । अनुरूक्षाश्च कूटाश्च ये चण्डा विकटाश्च ये" । राम उवाच वामनाद्याश्च ये नागाः प्रोक्तानिन्दितलक्षणाः । तेषां तु श्रोतुमिच्छामि लक्षणं वदतांवर ! । पुष्कर उवाच । आनाभ्दायामसंपूर्णोवोऽधिहस्तो भवेद्गजः । वामनः स समाख्यातोमत्कुणोदन्तवर्जितः।(आनाभ्दः स्थूलता) (आयामो देर्घ्यम्)दशां चतुर्थीं संप्राप्य वर्द्धते यस्य न द्विजौ । स्थूणाधनावतौ स्यातां स मूढो हि गजोऽधमः । अपाकलो विशालेन दन्तेनैकेन वारणः । संक्षिप्तवक्षोजघनः पृथुमध्यसमुन्नतः । प्रमाणहीननाभिश्च स कुब्जोवारणाधमः। अनुन्नताभ्यां सह्नः कुदन्तःस्यात्ततो बहिः । (बहिर्दन्तलोमनि) । वामदन्तोन्नतो नागो वामकूट इव स्मृतः । दन्तावनुस्मृतौ यस्य सोऽनुस्मृतिति कीर्तितः । एकदन्तसमा नागः कूट इत्यभिधीयते । पादयोः सन्निकर्षः स्यात् यस्य नागस्य गच्छतः। स पक्षघोऽध्वनि युद्धे च लक्षणज्ञैर्न पूजितः । अरत्न्यर्धाधिकं यस्य विस्तरेणान्तरम्। विकटः सविनिर्दिष्टो दुर्गतिर्निन्दितोगजः । राम उवाच। श्रोतुमिच्छाम्यहम् देव! कुञ्जरं सप्तसङ्ख्यितम् । यं प्राप्य किल राजानोजयन्ति वसुधां नृपाः । पुष्कर उवाच । वर्चः सत्वञ्च रूपञ्च नित्यं सङ्गननक्षवः। सप्त तानि सदा यस्य स गजः सप्तसङ्ख्यितः । ये वामवङ्क्षिपार्श्वभागेनाष्ठाष्ठकामाःपिटकोत्थयापि। ते नागमुख्या विजयाय युद्धे भवन्ति राज्ञां न हि संशयोऽत्र" तत्रैव गराग्रर-संक्षिता । "हस्तिनां जातिदेशवर्णाकृतिप्रमाणचेष्टादिलक्षणमनुव्याख्यास्यामः । तत्र जातयस्तसो भवन्ति । भद्रा मन्द्रा मृगा मिश्राचेति तत्परिज्ञानमाकृतिचेष्टादिभिरुपदिश्यते । तत्र भद्र जातिवाहृद्यायतसुखोष्णोद्वेङ्गमस्तकः उदयसत्वोऽनुद्धतकरः श्रोता दीर्घपुष्कराङ्गुलिबालधिः महामन्योरोमशयोवः । स्थूलमेढ्रोदरताम्रतालुजिह्वौष्ठः सुपार्श्वः स्निग्धः सवर्णमृदुरोमा कूर्म्मपादः सध्रस्थितिचितांसः पृथ्वासनः सूक्ष्मबिन्दुचित्रोवङ्गतुरोमोपचितश्रोत्रःसुनखो धनुःपृष्ठवंशो मधुवर्णताम्रयूथाभिरचिता सहिष्णुरन्ध्रवेदो बलवान् कामातरोद्दाघमर्दी मृदुनोपायेन साध्य आत्मपदे शयाकी च भवति"। (उदयो उच्चः अनुद्धतकरः अनुक्रमेण उद्धतकरः पुष्करः करायं मन्या घमनी अन्ध्रवेदी अपे वक्ष्यते) । मन्द्रजातिः संकेताभिज्ञः सुमुखो महोदरकरश्रोताः स्थूलदन्तत्वतृष्टवंक्षः स्थूलहस्तजिह्वांसयोवः, पृथुहस्तमस्तकः सुविभक्तोरःशिराःसुमृदुरुत्तश्रोत्रः स्थूलास्थिकरकवापीविसपादः सूक्ष्मनाभिस्तनुताम्रतालुकर्णकटः दीर्घोङ्गमेढ्राङ्गुलिबालबालधिर्मुष्करन्ध्रकक्षवरशेपदिग्धोहर्षश्च: सुबद्धजघनः सदृक्षोरक्षोगम्भीरवेदी मन्द्रजातिः जातगद्धोद्दमन्मवक्षोच्छ्वासाध्योयूथानुगामी यदृच्छागतोपि नारिभयमाविशति। (गम्भीरवेदी वक्ष्यते उपदिग्धो लिप्तः) मृगजातीयः पुनर्हस्वपुष्करोद्धतहस्तबालाङ्गमेहनसुदन्तनखपृथुवंक्षोवाक्षोदरमेढ्रतनुर्विशालनेत्रस्तवाद्दत्ततनुश्रोत्रः कृष्ठोष्ठो घनायताण्डकायः संक्षिप्तकराङ्घ्रिन्यस्तमस्तकोदीर्घजिह्वोविषाणोपनीतः शीघ्रोवङ्गगमोभारसाहो मनस्वी दुर्दमः स्वयूथपथ्यनानुचारी भिन्नपुरीषोऽतिक्रमणवेदी क्लेशसहः क्रन्दनश्चेति । मिश्रास्तु तेषां परस्परसंयोगजाः सर्वसंकरलक्षणा इति। भद्रा श्रेष्ठा भवन्त्यासां मन्द्रा मध्या कनीयसी । मृगा मिश्राऽधिकै श्चैषां गुणदोषैः समासतः । अथ वनभेदेन गजनेदाः । अत्रैषां प्राच्यकारूषदशार्णमार्गवेयककालिङ्गकापरान्तिकसौराष्ट्रपञ्चनदाख्यान्यष्टौ वनानि वासस्थानानि तेषां पृथक् पृथक् कर्म्म लक्षणमुपदेक्ष्यामः तत्र हिमवद्गङ्गाप्रयागकौशल्यान्तरे प्राच्यवनमत्रोत्पन्नाः कपिलाः अल्पाः कृशपार्श्वयोवारणाश्चलपृथुपेचकवंक्षणखङ्काः पृथुहस्तामन्दवेगारूढाश्चपलाकृतयो भवन्ति । (पेचकः पुच्छमूलम्) मेकलो मत्स्यो गङ्गावतारश्चेति कारूकाख्यवनमत्रोत्पन्नाः श्यामाश्चखड्गाः सुचरणाश्चुक्षानात्मा-

वताः शीघ्रोदग्राङ्घ्रिरुद्दामैर्ह्रस्वैर्ह्रस्विनो भवन्ति। महागिरिदशार्णविन्ध्याटवीरावतीनां मध्ये दशार्णं वनमभिख्यातमत्र दीर्घाङ्गुलिपुष्करा: प्राज्ञाः श्यामा वा दुर्पिताः सुदृत्तजघनाद्याः सितसूक्ष्मबिन्दुचित्रा-श्चूतफलतुल्यमद गन्धिनोविशालोत्सङ्गदन्ताः स्थूलह-स्तास्थिराग्रीवा मध्यज्ञाः स्वासनाःसत्ववन्तश्च। पारि-यात्रवैदिशब्रह्मावर्त्तवनानामन्तर्मार्गेयकं वनमत्रोद्गताः शीघ्रदीर्घक्रमेणोपदिग्धाङ्गाः बलवन्तोऽभिजाताः सुप्र-माणाः मध्यस्थाहृदुत्वचः कचाविलप्राया अल्पेच-काहरिश्यावाखण्डच्छन्नाः सुदृस्ताः स्निग्धरोमाणः स्थिराः सुपरोराः करेणूनामधिपतयः स्वस्तापाश्च। विपुलसद्दक्षिणारण्योत्कलानां मध्ये कालिङ्गकं वन-मत्र कलविङ्काद्याः सर्व्वश्वेताः स्थिरपदाः शीघ्राः सुदृस्थरोमाणस्तनुत्वगुदरादीर्घकेशवालधयो दीर्घ-क्रमाः बलवन्तोऽल्पेचकाः पद्मप्रभा वातुरुदग्रा धनुः-पृष्ठवंशारक्ततालुजिह्वौष्ठाः सुप्रयोगपदस्थाःवराहज-घनाः नीचदत्तनखाःस्थिरचरणाः आशुवेदिनोमधुद-ग्धनाः पीतदृस्थशिरोधराः महोरगहृदुत्करा: सुदृ-दीर्घहस्ताहस्तिनो भवन्ति। नर्म्मदोदधिसैवदेशान्तो-पद्वारणमन्तरतोऽपरान्तिकं वनमत्र मानिनो धीराः श्यामाःसंप्रतिष्ठिताः दृश्यजघनशिरोधरा पीनायतविधा-त्राः स्वास्थका सुदृत्वच उदग्रादीर्घरक्तताल्वोष्ठजिह्वा-महोत्सङ्गाः पद्मगन्धिनो धनुःपृष्ठवंशाविदृत्तास्था-नान्ववनविचारिणः। द्वारकार्बुदावर्त्तनर्मदान्तरत: सौ-राष्ट्रकं वनमत्रोत्पायुपदस्थज्ञाः पिङ्गायताक्षाः मध्या-यताङ्घ्रयोऽल्पेचका सुदृविभक्तमात्रापतिलोमलोमचर-रणास्तनुत्वङ्नखनखाः सूक्ष्मदन्ताः शिक्षात्यज इति। हिमवद्विन्ध्यकुरुजाङ्गलकानामभ्यन्तरे वनं प्रच्छदाख्यं तत्र स्फुटितरुक्षत्वेतांशुदन्तास्तनुबिन्दूपचितकराः सुगन्धयोसुदृवोमशापेचकदेशाङ्गप्रमाणाःसूक्ष्मदृहृत्वचोदु-र्विनेयाध्वानशीलाः कलभदृयो भवन्त्यपि। वनेषु तेषु जायन्ते प्रधानामध्यमोत्तमाः। प्रशस्ता निन्दिताश्चापि तेषां वक्ष्यामि लक्षणम्। नखजतुकाऽवङ्काशं क्षुद्रमल्पाङ्गु-ष्ठपुष्करं दुर्गन्धं कर्कशत्वोमाणमाततञ्चाल्पस्थूलविरलप-र्वाणं हस्तिनो हस्तमध्यन्यविघातघ्नं पीतं सुदृरोमा-वमनुपूर्वपतितं चारुदीर्घाङ्गुलिपोनं पृथुपुष्करंसुदृवल्लि-नम्। सुगन्धिदृत्तं पद्मदृस्रावयतं द्विरक्तं दृहृत्क्रोतोयो-वस्तार्थं च। कक्षस्फुटितारुक्षमलिनविषमचक्रखण्ड-स्फुच्छदन्नावपूजितौ पूजितौ च स्निग्धश्लक्ष्णमदक्षिणोद्व-तामलिनसमसंहितौ मधुपवर्णौ सुकृतिताग्रावावाधमच्छा-यातावदशाङ्गुलपरिणाहौ। अथ विरूपविषमे वराह-नकुलध्वाङ्क्षवानराभे रूक्षविच्छिन्नेक्षणे सन्निमीलिते लोचने न पूजिते पूजिते च कलविङ्काभस्तूर्य्यसन्नि-वक्षितुल्ये स्वनुपचिते च। प्रशस्तं समाहितमायतपृथु-बाहितमवस्थितरक्ततालुजिह्वौष्ठचारुरूक्ष्मश्लक्ष्णबिन्दू प-चितं सर्व्वसंपूर्णम्। सुदृहृदुनिर्व्यापपीडितपुष्करं विषमासनात् षडङ्गुलावाग्वन्धनाभावेन नतकुम्भल-म्बेनातिरिक्त प्रमाणं घण्टाधनपिङ्गं रूक्षास्थूलहस्त रोमोपचितमपूजितं शिरोवारणानां पूजितं महो-दयस्थानसुपवितसप्रक्रमनिम्नखरनिर्व्यापं पृथुपुष्करं स्नि-ग्धसुदृसूक्ष्मयुग्मरोमसुविभक्तोष्णीषवितानावपाङ्गं वा हस्तोत्क्रोपकटौ दृत्तौ स्वभौ तनुविषमसिरातती पीडितान्तावतिरिक्तप्रमाणौ संहतच्छिद्रौ स्नान्द्रसुदृप्र-माणसिरालावपाठितपुटसंविपुलसूचिकौ, पृथच्छिद्रौ दुन्दुभिस्वनौ वा। क्रोडावक्षाच्छिद्रातिदीर्घातुपचित-पीड़िका सुसंहती पृष्ठास्थनात्सुहृतायतास्थानावपीडिता ग्रीवा वारणस्याग्रशस्ता यस्या तु प्रष्ठोपरि पिण्डिका दृढारब्धी स्त्रिबलि: सास्थारब्धिपरीणाहा द्वादशाङ्गुलायता सर्वसम्पूर्णा वा। विषमसवाप्यं संक्षिप्तस्वं संपुटमा-नसं विगर्हितं स्थिरं च विनतमल्पहृतं वक्त्रं पृथ्वंसम-शोभनम्। शोभनसुपचितसूक्ष्मं धनुःप्रमाणमेवं संस्थानं विद्यात्। अथ पूर्व्वगात्रव्यिहोच्चतांसं विकसितहस्तयो-र्दृत्तं शिरालम्भनं सास्थव्याधिहनोष्णनिर्ग्नं विषमक-र्णाविलम् प्रमाणहीनमनिष्टम् दृष्टमनुपूर्व्योपचितं स्थिरविभक्ताजिलसत्कोटमनुपविम्बसमच्छिद्रमन्त्रोपचितम-थोरस्कं वा। अथ जघनं घनसुच्छ्रितास्थि निर्मांसपेचकं कलाक्षीनातिरिक्तप्रमाणं बालध्यनुत्यायि समनर्द्धकरम्। खर्वकरमत्यपेचकं पद्मोपचितसदृश्यगुल्फस्फटचतुरस्रमाय-ताग्रं चारुवालधिपरिपूर्णाण्डकोषावततया नाभिरा-लपद्मवाकारभेहनमजघनसञ्चयनं च श्यावात्सूक्ष्मस्फुटित-नखसन्धिसन्धि, परपासारतलसङ्घा न पूजिताः पादाः अन्ये भवन्त्यपि च। विंशत्यङ्गुलादशनखाः स्थिराः कूर्मसं-हिताः। गजानां पूजिता: पादा ये च सुवर्त्तिकाविलाः। पादाः कचाविला रूक्षविवर्णाः परुषाः कृशाः। वार-णानान्न शस्ताः सुवर्णा वा स्निग्धतनूरुहाः। सूक्ष्मबिन्दु चितां स्निग्धां त्वचं शंसन्ति दन्तिनाम्। आसप्तशो

विशालस्य विषाणौ पार्श्व उन्नतौ । उशन्नतो विशालेन दन्तेनैकेन वारणः । अनुन्नताभ्यां संपन्नःकुदन्तः स्याद्वलावधिः । ऊर्ध्वं वक्त्रान्तरालस्य प्रतिमानसमौ द्विजौ । क्षुद्रस्थूलातिदीर्घेण दन्तेनैकेन वा गुणाः । वर्ज्यास्ते शुभकामेन सर्व्व एवातिगर्हिताः । अवृष्टवे नदीजानां पङ्कमेऽदे वनौकसाम् । दन्तमूलपरीणाहान् द्विगुणानुत्कलयेत्परे । शरयष्टिधनुश्चक्रशूलपट्टिसलक्षणाः । दन्ताग्रराजयो यस्य स नरं वोढुमर्हति । रोमशां तु संज्ञयो यश्च पिटक स उदाहृतः । स ज्येष्ठः सप्तभागोनोमध्यभोऽसौ मतङ्गजः । अन्यः षड्भागहीनःस्यादतोऽन्योऽपि न पूजितः । सुखाय प्रेक्षके दैर्घ्यं पृष्ठपार्श्वोदरान्तरम् । आनाभ्रउच्छ्रय पादाद्विज्ञेयो यावदासनम्" । वनविशेषेण गजलक्षणं तत्रैव वार्हस्त्यसंहिता । "वनानां मध्ये प्राच्यं काल्लिङ्गकमापरान्तिकं च त्रीणि वनान्यतिशोभनानि । तथाऽन्यमपि प्राच्यं वनं मध्यवनमपरेषामिव शोभनम् । तत्रैरावतकुलप्रसूतिसम्भवाः प्रायेण भद्रमिश्रभद्रलक्षणाः महाकायाः करिणो भवन्ति । विनयसत्वयक्षिसम्पन्नाःपूगफलप्रभास्ताम्रत्विषः प्रविरलमदा गजा युद्धेचापसर्पणोपसर्पणक्षमा वा भवन्ति नातिक्रोधनाः ससहेजिताः सत्वं दर्शयन्ति । ते च दन्तैः कवलैः कायोपघातातिशयेन मदाभिसुखाः कर्त्तव्याः । कालिङ्गके वाऽपरान्तिके च त्रेतायुगोत्पन्नाः मन्दा महागजान्वयजा मन्दाभिधानाः प्रायशो मृगावयवाः सङ्कीर्णा गजाः ससत्पद्यन्ते । नात्युदया जलदप्रभा नातिस्थिरा मन्दा युद्धप्रियाश्च गजा भवन्ति । तथा कारूषदाशार्णमार्गणेयकाभिधानेषु मध्यमा गजाः ससत्पद्यन्ते मृगमन्दजातयः ते च चावयवाः मध्यमबलामध्यमप्रमाणाः स्थूलरोमाविलशरीरास्तनुरदा मन्दगतयः । तथा सौराष्ट्रे पाञ्चनदाभिधाने द्वापरयुगोत्पन्ना मृगमतङ्गजान्वया मृगप्राया गजाभवन्ति भीरवः कुत्सिताङ्गाः नातिचण्डादुर्मदाः दुष्टत्वाच्च एवंविधा गजाः ससत्पद्यन्ते वनाच्च वनान्तरे गतेषु दुष्टत्वेषु गजेषु धेनुकासम्भवेन शुभ्रवर्णेऽपि कालिङ्गकेऽपि । त्रासशीलत्व भीरुत्व ह्रस्व वामनमस्तकः । हीनाग्रभोगो दुःशीलस्वसंहतशरीरश्च । ससच्छ्रितस्थनायामी परीणाहविवर्जितः । मृगसरूपोदीनत्व मृगजातिर्गजाधमः । अतः परं प्रवक्ष्यामि संकीर्णस्य च लक्षणम् । पशुत्वाद्वारणानाञ्च अन्योन्यं च विशेषिषु । धेनुकासु भवन्त्येते गजा संकीर्णलक्षणाः । भद्रोमन्द्रोमृगोवाथ शुद्धजातिः प्रजायते । तस्मान्मिश्राणि रूपाणि गदतोमे निबोधत । आनन्त्यान्मिश्रजातानां नियमोनोपपद्यते । तथापि किञ्चिदुद्देशान्मिश्रलक्षणमुच्यते । भद्रमन्द्रो भद्रमृगो भद्रमन्द्रमृगस्तथा । इह भेदत्रयं मन्दमृगयोरपि जायते । भद्रादीनां च सर्वेषां रूपं संकीर्णसंज्ञितम् । ऊर्ध्वांघः कार्य्यभेदेन तज्ज्ञानं सिद्धते द्विधा । त्रिधा च भिद्यतेसूय एकैकन्तु यथाक्रमम् । एवमष्टादशविधं कीर्त्तितं मिश्रलक्षणम् । शुभाशुभं विभागेन सास्मृतम् निगदाम्यहम् । भद्रमन्द्रोभवेद्दिष्टोमृगमन्दस्तथाधमः । भद्रमन्द्र मृगश्चैव मध्यमः परिकीर्त्तितः । भद्रजाति र्महाकायोगजोमध्ये तु दन्तिनाम् । मन्द्रोऽवयवलेशेन स शुक्लो भवति द्विपः । मृगस्यापि हि रूपेण किञ्चिच्चानुगतेन वै । अशुभत्वं न भद्रस्य जायते शोभनोहि सः । लोचनानां प्रधानत्वं यस्माच्छास्त्रेषु कीर्त्तितम् । तस्मान्मृगाक्षिसंशुक्लोभद्रोऽपि हि न शस्यते । भद्रेणो परिकायेन मान्द्रेणाधोगतेन वा । उन्नतोहि गजानान्तु भद्रमन्द्रोभवेद्गजः । अनेनैव हि रूपेण विपर्य्यासेन यो गजः । सोऽपि शोभन एव स्यान्मन्द्रभद्रइति स्मृतः । एवं विधात् मृगे चापि लक्षणान्मिश्रलक्षणम् । महावयवबाहुल्यात् मृगरूपस्य लेशतः । भद्रावयवनिर्मुक्तोमध्यमोऽसौ गजो भवेत्" कायेन यो भवेद्भद्रो मन्द्रोवापि मतङ्गजः । मृगगालोऽपरश्चैव स भवेद्गवान् गजः । मृगरूपाधिकत्वं च दृश्यते यस्य दन्तिनः । अधमस्तु स विज्ञेयः सत्वशक्तिविवर्जितः । करदन्ताधिकुम्भश्च यो मृगोजायते गजः । शेषावयवभद्रोऽपि क्षीण एव भवेदसौ । एवमेवं श्रमात्तेषु मिश्रभेदा मयोदिताः । नोदिता येऽपि तेऽत्रापि मिश्रा ज्ञेया मनीषिभिः । मिश्रलक्षणसंयोग उत्कटं यस्य दृश्यते । रूपन्नामधेयोऽसौ जायते हि मतङ्गजः । अतः परम्प्रवक्ष्यामि लक्षणं गिरिचारिणाम् । तथा नदीचराणां च तथैवोभयचारिणाम् । महाबला महाकायाश्चित्रांसा गिरिचारिणः । सुपार्श्वाश्चारुदिग्धाङ्गाडढपादागतक्लमाः । उदग्यानिर्भयाश्चैव सङ्गकीकवलप्रियाः । तटाघातविधौ भुग्नदन्तदारित भूतलाः । शार्दूलादिमहासत्वस्फोटातङ्कविवर्जिताः । मदस्रावक्षतोल्लाहादुर्दमावारिभीरवः । पांशुक्रीडारता नित्यं द्रुभोन्मूलनतत्पराः । विषाणवेष्टनाशीलाः खेदसन्तापनीरकाः । कराग्रस्फोटनिरता शीत्कारकरणप्रियाः । अनुदग्राघनश्यामाः शीकरोद्गिरणप्रियाः । तोयकर्म्मणि निःशङ्कामतङ्गाश्च नदीचराः । उभयेषुचर-

न्ध्रे ते नदीपर्व्वतसानुषु। वे गजाकृष्टमनसस्ते भवन्त्यतियोभनाः। सर्वेषामेव नागानां छायालक्षणमुत्तमम्। यद्यथा जायते यस्य तत्तथैवाभिधीयते। सत्वांशकत्वाद्भद्रस्य पाटला भवति प्रभा। नवपल्लवसच्छाया स्निग्धा तनुतनूरुहा। तथातमोऽंशकत्वाच्च कृष्णा मन्द्रस्य जायते। तरुणाम्बुदसंकाशा स्थूलकृष्णकपाविला। रजोऽंशकत्वाच्च तथा मृगस्यापि हि धूसरा। मलिनाम्बुदसंकाशा रूक्षा तनुतनूरुहाः। एवं छायाविशेषाः स्युर्भद्रादीनामयोदिताः। छाया संमिश्रभावाच्च मिश्रा भवति दन्तिनाम्। वनजातिगुणैर्भद्रः गजश्रेष्ठो नरोत्तम!। तमोऽशकत्वं मन्द्रस्य यदुक्तं निबोध मे। दुर्मनस्त्वं तथाऽऽलस्यं निद्रालुत्वं च मूढता। गम्भीरवेदिता चेति मन्द्रस्य तम उत्थितेः। एवं रजोगुणो राजन् मृगस्येन रजोऽंशकः। धैर्य्यं स्थैर्य्यं पटुत्वं च विनीतत्वं सुकर्मता। अन्यर्थवेदिता चैव भयस्थानेषु मूढता। सुभगत्वं च धीमत्त्वं सत्वस्यैते गुणाः स्मृताः। अतः सत्वांशकोराजन् भद्रजातिरुदाहृतः। चिलत्वं बाहुशिरसोरन्तर्भणिगतं तथा। दन्तयोर्मधुवर्णत्वं नेत्रयोर्मधुपिङ्गता। आसनस्य पृथुत्वञ्च पूर्णता कुक्षिपार्श्वयोः। पृथुत्वं पृष्ठभागस्य घनत्वं समसन्धिता। स्निग्धच्छाया त्वचायामःपरिणाहोच्छ्रयौ तथा। सश्रीकत्वं गुरुत्वं च कायस्यैते गुणाः स्मृताः। सर्वलक्षणसंपूर्णो दृश्यते न मतङ्गजः। प्रधानावयवे लोके यत्नः कार्यो मनीषिभिः। हीनं कृष्णं च कल्माषं पुष्करं न प्रशस्यते। संपूर्णं मांसलं रक्तं सुकुमारं शुभं स्मृतम्। लम्बकुलनुभवेद्धीनं हीनस्यातिविनाशनम्। कृष्णं भर्तुर्विघातायकल्माषं भर्तृरोगदम्। संपूर्णं सिद्धिदं भर्तुः पुष्करं चतुरङ्गुलम्॥ सौभाग्यदं मांसलन्तु सुकुमारं तथार्थदम्। रक्तपद्मदलच्छायं तथा मिष्टान्नपानदम्। अतः परं शुभेक्षेये श्रोतसी पाटलोदरे। पञ्चाङ्गुलप्रमाणेन वर्तुलत्वेन चार्थदे। अवाङ्मुखं च ताम्रं च कर्णतालं सुखप्रदम्। हस्वा स्थूला च विपुला चिलिणी श्यामलोनिता। कुञ्चिता च तथा दृष्टिः सप्रधा दन्तिनां मता। तासां तु लम्बकुलायामा सा हस्वेत्यभिसंज्ञिता। हस्वा करोति नृपतेर्विनाशं शीघ्रमेव हि। स्थूल दुर्भिक्षकरणी श्यामला नृपदुःखदा। करोति चिलिणीनित्यं तस्यैव तु वसुक्षयम्। भुग्ना दृष्टिर्विनाशाय राज्ञोधनविनाशिनी। कुञ्चिताहीनयोश्चैव युद्धकाले रिपोर्जयम्। अतः परं प्रवक्ष्यामि क्रमेण करलक्षणम्। न करं दीर्घमिच्छन्ति बाहुधेः शास्त्रपण्डिताः। न बाहुसमं हस्तं नातिदीर्घं क्रमायतम्। न तनुं नातिकायं च न रूक्षं न व्रणक्षतम्। नाक्रमेण क्रतोल्लेखं न हीनं दशनान्तरम्। न हस्ताङ्गुलिसंयुक्तं नातिसंकटपुष्करम्। एतल्लक्षणसंयुक्तं करं शंसन्ति कोविदाः। बालधेः सुसमोहीनः समोवा दन्तिदुःखदः। अतिदीर्घोभवेद्धर्तुरायुषः क्षयकारकः। तनुर्व्याधिकरो यातुरतिकायोऽर्थनाशनः। रूक्षोव्याधिप्रणङ्कुर्याद्व्रणक्षतं व्यथाम्। प्रतिलोमेन च स्थूलोगजस्य सुखनाशनः। असमञ्जसहीनश्च असमञ्जस वर्तुलः। दुःखशोकभयायासकर्त्ता भवति नित्यशः। दशनान्तरहीनश्च जायते दन्तिरोगदृत्। कथितं पूर्वमेवेषु पुष्कराङ्गुलिलक्षणम्। अतो मया न कथितं शास्त्रतत्करलक्षणे। निर्वलीकोदीर्घरोमा क्रमवृत्तत्वसंयुतः। अणुबिन्दुविचित्रश्च दैर्घ्येण च शताङ्गुलः। बालधेः पुष्करं यावदायामोजात्यपेक्षया। अरत्निवयाऽऽनाहश्च हीनहीनतरक्रमात्। युक्तस्तेन मानेन करः पूज्यतमो भवेत्॥ निर्वलीके च सौभाग्यन्दीर्घरोमार्थदः स्मृतः। क्रमवृत्तोजयं कुर्य्यादणुबिन्दुचितोधनम्। सुप्रमाणं भवेद्वालः करस्य परिवर्द्धनः। आनाहवांश्च सततं राज्यस्कीर्तिकरोभवेत्। करस्य कीर्त्तितं ह्येतल्लक्षणं शुभसंज्ञितम्। अतःपरं प्रवक्ष्यामि लक्षणं दन्तवेटयोः। कवहीनावतिस्थूलौ विषमौ शिथिलौ तथा। दन्तवेटौ सदा भर्तुः प्रमाणाध्यासशोभदौ। दन्तमूले सुसम्बद्धौ सकचौ किञ्चिदुन्नतौ। दृढौ सदा तथा भर्तुर्हितदौ परिकीर्त्तितौ। अतःपरं प्रवक्ष्यामि लक्षणन्तु विषाणयोः। व्यक्तता सङ्कटत्वं च प्रांशुता भक्षशुभ्रता। वक्रत्वं रुक्षता चैव धूसरत्वं च रूक्षता। स्तब्धताऽधोगतित्वञ्च हीनता मूलसध्यवोः। म्लानयोः स्थूलता चैव दीर्घता चातिमात्रता। सर्पच्छत्रकवत्त्वं दोषाह्येते चतुर्दश। दन्तयोस्तु समाख्याताः फलं तेषान्निबोध मे। व्यक्तौ च सङ्कटौ दन्तौ मदहानिकरौ तु तौ। दन्तिनस्तनुतायुक्तौ व्याधिदौ परिकीर्त्तितौ। भक्षाशुभौ तथा भर्तुर्मृत्यु क्लेशकरौ मतौ। वक्रौ चार्थविनाशाय रुक्षौ च परिकीर्त्तितौ। धूसरौ रूक्षतायुक्तौ गजस्यायुर्विनाशनौ। मृदुत्वयुक्तौ नागस्य गत्यब्रणकरौ मतौ। स्थूलायाधोगतित्वे च भर्तुर्वातज दुःखदे। अशुभं लक्षणं ह्येतद्दन्तयोः कथितं मया। शुभं च साम्प्रतम्वक्ष्ये यथावदनुपूर्वशः। स्निग्धौ समौ सुनिष्क्रान्तौ संपूर्णौ व्रणवर्जितौ। सुकुमारौ दृढौ वापि ताम्रचूडौ फलोपमौ। दक्षिणाभ्युन्नतौ किञ्चित् मृणालकुसुदप्रभौ। मुग्धकुन्दलताभौ हेमचम्पक-

पिङ्गरौ । मधुपिङ्गो हतच्छायौ पोपूषसदृशप्रभौ । केतकीकुसुमाभौ च मृगाङ्किरणप्रभौ । अध्यर्द्धारत्निमानौ च तदर्द्धानाहसंयुतौ । अमीभिर्लक्षणैर्युक्तौ दन्तौ नागस्य सम्मतौ । स्निग्धौ धनप्रदौ भर्तुरायुषश्च करौ मतौ । अरिष्टौ तु सुनिष्क्रान्तौ संपूर्णौ राज्यदौ मतौ । निर्व्रणौ राज्यलाभाय सुकृटायौ जयप्रदौ । दृढौ रोगविनाशाय ताम्रवर्णौ कुलोपमौ । अरिसंघविनाशाय कीर्त्तितौ शास्त्रपण्डितैः । दक्षिणाभ्यव्रतौ भर्तुः कीर्त्तिताभ्यकारकौ । कृष्णालकुसदच्छायौ सुभिक्षारोग्यकारकौ । हेमचम्पकसङ्काशौ वज्राभरणदौ मतौ । कुरुतो मधुपिङ्गौ च निःसपत्नं महीतले । पशुलाभकरौ ज्ञेयौ हतपीयूषसन्निभौ । केतकीकुसुमाभौ च भर्तुर्वैभवविवर्द्धनौ । अध्यर्द्धारत्निकौ दन्तौ सुतभृत्यजयप्रदौ । आनाहज्ञानसंयुक्तौ सदास्फोतिकरौ मतौ । इदं शुभकरं राजन् ! दन्तयोर्लक्षणं मतम् । अतःपरं प्रवक्ष्यामि नेत्रयोरपि लक्षणम् । मार्जारनकुलक्रौञ्चशार्दूलमृगनिभेक्षणात् । सर्वदोषकरान् राजन् ! गजान् दूरेण वर्जयेत् । स्निग्धे मधुनिभे दीप्ते कलविङ्काक्षिसन्निभे । रक्तपद्मदलच्छाये पद्मरागमणिप्रभे । निर्धूमाग्निशिखाकारे इन्द्रनीलसमप्रभे । सौम्यदृष्टिसमायुक्ते लम्बकुले लोचने शुभे । स्निग्धे दृढिकरे भर्तुर्मधुपिङ्गे जयप्रदे । दीप्ते दीप्तिकरे चैव प्रतापायतने तथा । कलविङ्काक्षिरूपे च धनधान्यविवर्द्धने । चामीकरकरे नित्यं रक्तपद्मदलप्रभे । पद्मरागनिभे चैव रत्नालङ्कारकारके । निर्धूमाग्निशिखाकारे प्रतिपक्षभयङ्करे । मानयुक्ते च सौम्ये च लोचने बलवर्द्धने । अञ्जिकूटकटोद्देशनिम्नौ राज्यविनाशनौ । संपूर्णौ च बलोत्साहमदवृद्धिकरौ मतौ । दन्तात्रयं भवेन्नित्यं तालुकं षोडशाङ्गुलम् । षडङ्गुलं पृथुत्वेन वंशगण्डगतं भवेत् । तथा शुभाशुभं चैव लक्षणज्ञैः प्रकीर्त्तितम् । ह्रस्वमरिष्टघ्नञ्च कृष्णं कलमाषमेव वा । चतुर्विधमनिष्टं स्यादृषयोवदभिधीयते । कृष्णं मसीसमं ज्ञेयं कलमाषं कृष्णलोहितम् । मांसलं धूम्रवर्णं च परिदग्धं प्रकीर्त्तितम् । ह्रस्वञ्च तिलच्छायं कथितं शास्त्रवेदिभिः । गर्भस्थस्य यदा पित्तं पीयते तालुकं भृशम् । कृष्णतालुस्तदा नागोजायते पापलक्षणः । व्याधिभिः पीड्यते नित्यं वातपित्तकफोद्भवैः । तृतीयां वा चतुर्थीं वा दशां प्राप्य विनश्यति । संग्रामे वा प्रलायेत बन्धयन्त्रक्षतव्रणः । यस्य कृष्णातपूर्णाङ्गः क्षतान्तभवनं व्रजेत् । वातपित्तकफा यस्य कुर्वन्ति तालुके गदम् । गर्भस्थस्यैव कलमाषतालुकं तस्य जायते कृष्णतालुनि ये दोषा रक्ते चैव गुणाः स्मृताः । कलमाषतालुनस्तु भवन्ति च हयोरपि । रक्तच्छायं यदा वंशे पार्श्वयोर्लक्षितं भवेत् । तदा मध्यफलं ज्ञेयं गुणदोषसमाश्रयात् । यदा वंशे च कृष्णं स्यात्पार्श्वयोस्ताम्रता भवेत् । भर्तुर्हन्ति गजनकं कलमाषं तालुकं तदा । किञ्चिद्धीनं तु यत्तालु परिदग्धं तदा भवेत् । नागस्याधोरथस्यापि बलक्षयकरं हि तत् । ह्रस्वं च भवेत् तालु पित्तकोपसमुद्भवम् । महामात्रविनाशाय वारणस्योपजायते । (महामात्रोहस्तिपकः) कृष्णतालोरपि यदा दक्षिणावर्त्तनं भवेत् । दृश्यते नित्यमेवं हि तदासौ दोषवर्जितः । यथा स्मरन्ति नो दोषान् सुलोकः सुसमाहितः । गुणान् करोति हृदये न तथा कथितानपि । दोषघ्नं लक्षणं यस्य यदाचार्यैरुदाहृतम् । तत्तथैवावगन्तव्यं नान्यथात्वापि भाषितम् । एवं जिह्वापि मन्तव्या तालुनः समलक्षणा । अरत्निमात्रा दैर्घ्येण विस्तारेऽष्टाङ्गुला मता । अशुभं लक्षणं ज्ञेयं तत्तालुकस्य मयोदितम् । शुभं च साम्प्रतं वक्ष्ये लक्षणं शृणुतानघ ! । रक्तं श्वेतं कषायं च तालुकंस्यात् शुभप्रदम् । रक्तं दृढिकरं भर्तुस्तथा चायुर्विवर्द्धनम् । दन्तिनोऽशोकपुष्पाभं रिपुक्षयकरम्मतम् । श्वेतं पुष्टिकरं चापि वारणस्योपजायते । चम्पकाभं तथा भर्तुरारोग्यस्य विवर्द्धनम् । कषायं सर्वदा ख्यातं प्रवाहः सौख्यवर्द्धनम् । एवं जिह्वापि रक्ताभा सर्वसौख्यप्रदा मता । अतःपरं प्रवक्ष्यामि कृकण्याश्रित्य लक्षणम् । दन्तिनो मानहीने च कृकणी मानवर्जिते । (कृकणी ओष्ठसन्धी) सुखरोगकरे नित्यं पण्डितैः परिकीर्त्तिते । सर्वसौख्यप्रदे तस्य संपूर्णे द्वादशाङ्गुले । अतःपरं च प्रवक्ष्यामि लक्षणं चिबुकोष्ठयोः । अरोमशश्चलीयुक्तमाताम्रं च तथा लघु । गजस्यौष्ठं न शंसन्ति सुनयो दन्तरोगदम् । दीर्घरोमा सुसंपूर्ण ओष्ठः पद्मदलप्रभः । षोडशाङ्गुलानाहश्च हस्तार्द्धं वायतः शुभः । भर्तुरायुःकरोदीर्घो दीर्घरोमा च कीर्त्तितः । पूर्णः पूरयते कोशं रक्तः सौभाग्यदोभवेत् । अरोमशं तथाहीनं चिबुकं न प्रशस्यते । तद्धि वारणनाथस्य सुखरोगकरम्मतम् । चतुरङ्गुलमानन्तु स्थूलं रोमार्विलं यत् तदग्रस्थं गजेन्द्राणां सुखालङ्कारकारकम् । निम्नं च विषमे चैव हीने चैवाशुभे मते । महत्तानिकरे नित्यं सगदे कर्णरोगदे । यत्तच्चिबादुन्नते च समे चैव सुखप्रदे । मानं च कर्णपाल्यास्तु मूलादारभ्य स्मर्यते । बाहिरावधि कुम्भं च हीनं निम्नं च गर्हितम् । सुखरोगकरं नित्य'

लक्षहानिकरं च तत् । पूर्णं चैवोन्नतं सार्द्धहस्तमात्रायतं भवेत् । तद्धि वारणनाथस्य सुखरोगकरं मतम् । चतुरङ्गुलमानं तु स्थूलम् रोमाविलक्षं यत् । तत् प्रथमं गजेन्द्राणां सुखालङ्कारकारकम् । अरत्निपरिणाहश्च करिणां सत्यक्षिदम् । वामनं हस्तहीनञ्च परिणाहविवर्जितम् । अव्यक्तञ्च न शंसन्ति वातकुम्भं विषत्करम् । द्वादशाङ्गुलविस्तारन्दैर्घ्येणाष्टादशाङ्गुलम् । व्यक्तं शुक्तिपुटाकारं तदुभर्तुर्लाभकारकम् । गर्त्ताकारे च निर्याणे कठिने चातिकुत्सिते । शिरोरोगजनने गजस्यारोहकस्य च । संपूर्णे सुकुमारे च सुप्रयत्ने प्रकीर्त्तिते । राज्यवृद्धिकरे नित्यं भर्तुर्विजयकारके । इदमेव हि विज्ञेयं लक्षणं कटपार्श्वयोः । अतःपरं प्रवक्ष्यामि लक्षणं कुम्भयोरपि । विषमत्वमरोमत्वं देहच्छायाविवर्णता । समता कण्ठपृष्ठाभ्यां समाधिक्यमपूर्णता । व्यक्तता वामनत्वं च परिणाहविहीनता । तनुभावः शिखरयोः कुम्भदोषा दश स्मृताः । भर्तुरापत्करो ज्ञेयो विषमो रोमवर्जितो । देहच्छायाविवर्णौ तु शत्रुलोकविवर्द्धनौ । कण्ठपृष्ठसमौ चैव प्रयातुः प्रविनाशनौ । मानाधिकौ च हीनौ च भर्तुरुच्छेदकारकौ । व्याप्तौ च वामनौ चैव भर्तुः कीर्त्तिविनाशनौ । परिणाहविहीनौ च कोशक्षयकरौ मतौ । शिखरस्य तनुत्वेन युक्तौ कुम्भौ तु रोगदौ । अशुभं लक्षणं ह्येतल्लाञ्छितञ्च शुभं श्रृणु । समौ दीर्घकवाक्रान्तौ विस्तीर्णशिखरौ तथा । कर्णमूलात्समारभ्य हस्तार्द्धजमितोच्छ्रयौ । सुसंहतौ च पीनौ च कामिनीकुचसन्निभौ । समाक्रान्तललाटौ च देहच्छाया समप्रभौ । आरोहकशरीरार्द्धदर्शनावरणक्षमौ । सश्रीकौ च सुहृत्तौ च शुभौ कुम्भौ प्रकीर्त्तितौ । समौ च दीर्घरोमाढ्यौ भर्तुः श्रीसौख्यकारकौ । समानौ रिपुनाशाय तथैव च सलक्षणौ । सुसंहतौ च पीनौ च वरस्त्रीलाभकारकौ । शत्रुनाशकरौ ज्ञेयौ कामिनीकुचसन्निभौ । समाक्रान्तललाटौ च सुखदौ रोगनाशनौ । आरोहिस्वगितद्वौ च सश्रीकौ च जयप्रदौ । हस्तौ च हस्तिनां कुम्भौ पुष्पालङ्कारकारकौ । अतःपरं प्रवक्ष्यामि कर्णयोरपि लक्षणम् । निर्लोमयौ श्लक्ष्णकोमलौ तनुच्छिद्रौ तनुत्वचौ । (श्लक्ष्णा सिरा) सङ्कटौ विषमौ रूक्षौ लम्बितायौ च निष्ठुरौ । स्तब्धौ च तनुकौ चैव कर्णौ नागस्य निन्दितौ । फलञ्च साम्प्रतं वक्ष्ये यथावदनुपूर्वशः । निर्लोमयौ श्लक्ष्णकोमलौ गजस्य कर्णरोगदौ । निष्ठुरौ लम्बितायौ च वातकोशहरौ मतौ । स्तब्धौ च तनुकौ चैव गजस्यायुर्विनाशनौ । अतःपरं प्रवक्ष्यामि शुभकर्णविनिश्चयम् । स्थिरप्रिमाणसंयुक्तौ सिराजालविवर्जितौ । समत्वचौ महाच्छिद्रौ स्निग्धौ दुन्दुभिनिस्वनौ । कपोलमण्डलास्फालात्ततशब्दौ सुखप्रदौ । कर्णौ चामरसंकाशौ मृदुरोमसमार्चनौ । अजर्जरमृदुघ्राणावीषदुत्प्राग्वलिकौ । मयूरतालदलाभौ सुविस्तीर्णसमौ शुभौ । स्थिरप्रिमाणसंयुक्तौ भर्तुरायुःकरौ मतौ । सुश्लक्ष्णजालविनिर्मुक्तौ शिरोरोगविनाशकौ । समत्वचौ महाच्छिद्रौ गजलाभकरौ मतौ । स्निग्धौ कान्तिकरौ नित्यं जयदौ दुन्दुभिस्वनौ । शत्रुनाशकरौ प्रोक्तौ मृदुरोमोक्षतार्चनौ । अजर्जरमृदुघ्राणौ प्रयातुः सौख्यकारकौ । गजस्योपचयार्थं च दैर्घ्यदुत्प्राग्वलिकौ । मयूरतालदलाभौ तुरङ्गबलवर्द्धनौ । सुविस्तीर्णौ समौ भर्तुर्भूमिलाभकरौ मतौ । कर्णयोस्तु समाख्यातं सर्वतश्शुभलक्षणम् । कण्ठस्य साम्प्रतं वक्ष्ये यथावदनुपूर्वशः । अवक्रोन्नतो दीर्घश्च कण्ठश्च शुभदोभवेत् । आरोहकप्रमाणाच्च क्रमशः कुञ्जरस्य च । अवक्रः परिणाहेन सप्तषष्ट्यधिकं शतम् । अङ्गुलानां तथायामे द्वादशैवाङ्गुलानि तु । सम्पूर्णपिण्डितोदग्रवक्षान्तर्मणिविभूषितः । कण्ठोवारणनाथस्य एवं भूतः सुपूजितः । ऋजुः प्रमोदजननः सम्पूर्णःकार्यसिद्धिदः । अच्छस्त्रोजयलक्ष्मभर्तुः कीर्त्तितः पूर्णपिण्डकः । उदयोन्मण्डलं च प्रतापं कुरुते तथा । अन्तर्मणिसमायुक्तोमणिरत्नप्रदो भवेत् । कराक्रान्तिनिम्नं च आसनेन प्रयच्छते । कराक्रं यातुरशुभं निम्नं च व्रणकारकम् । दैर्घ्येण हस्तमात्रं तु विस्तीर्णञ्च शुभं स्मृतम् । विस्तीर्णं विस्तृतं राज्यं सम्पूर्णं कुरुते जयम् । वंशस्यापि प्रवक्ष्यामि लक्षणं च शुभाशुभम् । आत्युच्छ्रितोनिम्नपारः हस्वो वंशोनशस्यते । राज्ञां च पादरोगार्त्तां कर्त्ता च स भवेत्सदा । वक्षस्यङ्गुलायासमासनात्परिमासनम् । यावत् प्रपूर्यते पार्श्वं वंशोऽश्वफलकाकृतिः । शुभो ज्ञेयो गजेन्द्राणामायामः कुरुते सुखम् । पूर्णपार्श्वस्तु लाभाय धनुःपृष्ठः स्थिरं भवेत् । अरत्निद्वयमानं तु प्रेक्षकात्परिमासनम् । धनास्थि विषमं निम्नङ्कुत्सितं दुष्करोगदम् । मांसोपचयपूर्णं च विस्तीर्णञ्च शुभं मतम् । जघनोपरि रोगार्त्तां तद्धि नाशकरं मतम् ।(प्रेक्षकात्पृष्ठमूलात्)। पृष्ठोगजस्य नो श्लक्ष्णो बहुदीर्घोऽतिलम्बितः । करोति महतीं पीडां राज्ञश्चाधोरणस्य च । ह्यङ्गुलस्तु पृथुत्वेन दैर्घ्येणाष्टादशाङ्गुलः । संपूज्यः प्रेक्षकोज्ञेयो गजभर्तुः सुखप्रदः ।

वक्रं स्थूलञ्च हस्वं च दुष्टं कवविवर्जितम् । समानाङ्गं च नागस्य सर्व्वदोषकरं भवेत् । अवक्र ऋजुदीर्घश्च ग्रन्थिहीनः सुमेचकः। गोपुच्छवालप्रतिमकचत्रातविभूषितः। भूमिं तु न स्पृशेत् यस्तु चतुर्भिश्चाङ्गुलैः सदा । स शुभो वालधिर्ज्ञेयो गजमर्त्तुःसुखप्रदः । अतिप्रमाणं ह्रस्वं च कर्व्वुरं विगतप्रभम् । सिरालं चाशुभं मेढ्रं राजहस्तिपदुःखदम् । यस्तं षड्ङ्गुलायामं नाहतः षोड़शाङ्गुलम् । सिराजालविनिर्मुक्तमाखपक्षवसप्रभम् । द्व्यङ्गुलं स्रोतसा युक्तं विन्दुमात्रविवर्जितम् । मेढ्रं प्रशस्तं विज्ञेयं भर्तुर्जीवितवर्द्धनम् । अतःपरं प्रवक्ष्यामि लक्षणं गात्रयोरपि । हीने तनूच दीर्घे च सममांसोच्छ्रये तथा। विषमे च कवाक्रान्ते गात्रे नागस्य निन्दिते । हीने तनूच कृशतः प्रयातुर्विनिपातनम् । सममांसोच्छ्रये वाहुर्विषमे च विपत्करे । कवाविले गजस्यैव गात्ररोगकरे तथा । अतःपरं प्रवक्ष्यामि गात्रयोः शुभलक्षणम् । सार्द्धद्विरत्निस्त्रिरत्निः शताङ्गुलसमानता । एवंमिते स्थिते गात्रे भर्तुरारोग्यसौख्यदे । समे च कवहीने च गजलाभकरे तथा । गजस्य पुष्टिदे नित्यं मांसले च घने स्थिते । गात्रे वारणनाथस्य एवंभूते शुभे मते । चिपिटे वा सफलके गात्ररोगकरे सदा । संपूर्णे राज्यदे भर्तुर्गजस्य वसुसुप्रदे । तथैव रोमनिचिते गजस्य गतोरगदे । अतःपरं प्रवक्ष्यामि नखानाञ्च शुभाशुभम् । हीनाःकृष्णाश्च खण्डाश्च रूक्षाश्च न नखाः शुभाः । यदा च रोगदा हीनाःकृष्णा भर्तुर्विनाशनाः । खण्डारूक्षागजस्यैव पादव्याधिविवर्द्धनाः । स्निग्धाश्चन्द्रार्द्धसङ्काशा मानेनैव सुरोनखाः । सप्तादिपञ्च संख्यानि अङ्गुलानि क्रमेण हि । एवं विधा नखाः यस्य भर्तुरारोग्यकारकाः । अतःपरं प्रवक्ष्यामि पादयोरपि लक्षणम् । हीनौ सुतलौ रूक्षौ चरणौ दन्तिदुःखदौ । हस्तप्रमाणौ दैर्घ्येण कूर्माकारौ सुखप्रदौ । अतःपरं प्रवक्ष्यामि लक्षणञ्चापरान्वितम् । अत्युच्छ्रिते च हीने च निन्दिते चापरे तनू । सम्मुखे च शुभे ज्ञेये तत्प्रत्यायामसंयुते । निन्दिते रोगदे ज्ञेये पूजिते प्रभुसौख्यदे । द्वादशाङ्गुल हीनं तु आसनात्परिमासनम्। अपरपादयोरापि आयामोऽरत्निमात्रकः । नखानां च तथा मानं षड़ादिचतुरङ्गुलम् । प्रधानावयवानान्तु लक्षणं कथितं यथा। उत्सेधायामनाहानां साम्यतं कथनाम्यहम्। समतन्तुसमायुक्ततनुना वर्त्तितेन च । सुप्रशस्ते दिने नित्यं मानं कुर्वीत मानवित् । सप्तारत्नि गजेन्द्राणां प्रमाणं वनजन्मनाम् । आसनं यावदुत्सेधस्तत्सन्धिस् कीर्त्तितः । पेचकात्प्रतिमानन्तु आयामोरत्नयो नव । मध्यदेशे तदानाहो दशरत्निः प्रकीर्त्तितः । मानमेतद्धि भद्रस्य मुनिभिःपरिकीर्त्तितम् । सप्तमेन तु भागेन हीनं मन्दस्य जायते । मन्द्राद्धीनं मृगाख्यस्य षड्भागेन प्रकीर्त्तितम् । एवं क्रमेण वक्तव्यं मानं मानविशारदैः। किञ्चिन्मानाधिके वापि न दोषः संप्रपद्यते । दोषाणां च गुणानाञ्च ह्रद्विरेव फलप्रदा । सत्वं हि वारणेन्द्राणां नित्यं तन्वेषु संस्थितम् । स्निग्धे मधुनिभे दीप्ते कलविङ्काक्षिसन्निभे । रक्तपद्मदलच्छाये पद्मरागमणिप्रभे। नीलच्छाये अतीक्ष्णे च गजे सत्वं प्रतिष्ठितम् । माजारवानरादीनां सदृशे नीचले गजे । हीनसत्वाश्च जायन्ते गिरिकूटोपमा अपि । अधिकं पुष्करं यस्य मांसलत्वेन जायते। प्रभवाच कषायं स्यान्मानेनाङ्गुलपञ्चकम् । किञ्चिदूने च विज्ञेये श्रोतसी चतुरङ्गुले । स्थूलपञ्चाङ्गुलायामा त्र्यङ्गुला नाहमानता । हस्तोऽपि पूर्वमानस्य स्थूलत्वेनाधिकोभवेत् । रोमशोनातिदीर्घश्च पृथुलः षड्भिरङ्गुलैः । आयामेन च हीनःस्यात् पूर्वमानात् षड़ङ्गुलैः । नातिगोपुच्छसंस्थानःकृष्णविन्दुविभूषितः । आनाहे रत्निमानौ तु सार्द्धहस्तद्वयायतौ । पीवरौकुसदच्छायौ किञ्चिच्चम्पकपिङ्गलौ । स्निग्धौ सुग्धतमावेव दन्तौ नागस्य कीर्तितौ । दन्तावेतावतिस्थूलौ कवाक्रान्तौ सुनिष्ठुरौ । पञ्चाङ्गुलौ कटौ ज्ञेयौ मांसोपचयपूरितौ । ज्ञेये कटोपरि तथा श्रोतसो द्व्यङ्गुलान्तरे । एकाशीत्यङ्गुलानाहे द्वात्रिंशत्यङ्गुलायते । किञ्चिन्नतं कवाक्रान्तं वाहित्थं परिकीर्तितम् । प्रतिमानं तु विज्ञेयं हस्तः सचतुरङ्गुलः । अध्यर्द्धरत्निमानं च प्रमाणान्तरभेदतः । आयाममस्तु विज्ञेयस्तु धरस्य दशाङ्गुलः । विंशत्यङ्गुलमानस्तु परिणाहोऽभिधीयते । पञ्चाङ्गुलं तु चिबुकं हनुकिणौ तु नवाङ्गुले । षड्विंशदङ्गुलायामे सङ्कते परिकीर्त्तिते । अध्यर्द्धरत्निकौ कर्णौ विस्तारेण कवाचितौ । कषायपल्लवौ स्थूलौ कृष्णविन्दुविचित्रितौ । सपद्मागकरायामाववचूलौ कवाविलौ । पञ्चाङ्गुलान्तरौ पीनावुभावोष्ठौ दशाङ्गुलौ । कर्णात् कर्णान्तरं यावत् यस्यवत्यङ्गुलं शिरः । वातकुम्भं तथा ज्ञेयं स्थूलं सप्तदशाङ्गुलम् । अङ्गुलानां शतं साष्टमानाहि द्व्यङ्गुलाधिकम् । आयतत्वं च कण्ठस्य दशाङ्गुलमिति स्मृतम् । भद्रस्यैवासनं ज्ञेयं तथोक्तं सप्तरत्निकम् । षडङ्गुलोच्छ्रितं स्थूलं तुल्यं लाङ्गूलमानतः। पुच्छमूलाद् द्विहस्तन्तु जायते पश्चिमासनम् । उच्चदेश

तु हीनं स्यादासनं षड्भिरङ्गुलैः । मेचकस्याङ्गुलायामोलम्बत्वेनाङ्गुलत्रयम् । विंशत्यङ्गुलमानाहे भवेत् पुच्छोदयोगमम् । प्रान्तपादक्रमेणैव तथायामेऽङ्गुलत्रयम् । दैर्घ्येण तु स विज्ञेयो भूमेरष्टाङ्गुलोच्छ्रितः । इदं बालधिमानं तु मन्दस्य परिकीर्त्तितम् । सार्द्धद्वारत्निके मूले अपरे संप्रकीर्त्तिते । उदरे चातिमात्रं स्यान्मेढ्रं हस्तद्वयायतम् । विंशत्यङ्गुलमानाहे लक्षणच्छायं सदा भवेत् । पञ्च चत्वारि च त्रीणि अङ्गुलानि नखाः क्रमात् । आपाण्डुविवराः कुन्दाभासाग्रापरपादयोः । अनेनैव तु मानेन गात्रपादसमाश्रयाः । नखा मन्दस्य विज्ञेयाश्चरणाग्र कचाविलाः । अतिस्थूलः पृथुत्वेन सार्द्धहस्ताधिकः करः । अरत्निकं वा, दैर्घ्येण प्रमाणं गात्रयोरपि । उरोमणि स्तथा श्रेयोरत्निमात्रोऽतिमांसलः । विंशत्यङ्गुलमानस्तु अन्तर्गलमणिर्भवेत् । अनेनैव हि मानेन वातकुम्भः प्रकीर्त्तितः । एते प्रशस्ता मन्दस्य सूनाव ! कथितास्तव । नोक्ता ये तेऽपि भद्रस्य विज्ञेयाः समलक्षणाः । मृगस्य साम्प्रतं वक्ष्ये प्रदेशान् लक्षणान्वितान् । त्र्यङ्गुलं पुष्करं तस्य त्र्यङ्गुले श्रोतसी तथा । अङ्गुलानि च चत्वारि कीर्त्तितास्तस्य चाङ्गुलाः । ततुः करः त्र्यरत्निःस्यादानाहे सार्द्धरत्निकः । बाहित्यात् पुष्करं यावत् स्यान्नं सद्भिरुदाहृतम् । तथा तनुतरौ दन्तौ दीर्घौ सार्द्धद्वारत्निकौ । हस्तौ च मस्तकौ स्यातान्नयोः सप्तदशाङ्गुलौ । प्रतिमानं तथा श्रेयं निम्नं पञ्चदशाङ्गुलम् । द्व्यङ्गुलं चिबुकं तस्मादधरस्तु षड्ङ्गुलः । अष्टादशाङ्गुलाहे स्कन्धौ तु षड्ङ्गुलौ । स्यातामङ्गुलविंशत्यौ कपोलौ निम्नमध्यगौ । कटौ द्व्यङ्गुलमानौ तु निर्यांसे चतुरङ्गुले । नेत्रे चापि तथा स्यातान्निम्नभे स्थूलतारके । नातिव्यक्तं समांसं स्याद्वातकुम्भं दशाङ्गुलम् । गर्त्ताकारञ्च निम्नं च कटकुम्भं तथैव तु । अष्टाङ्गुलान्तरं कुम्भ आयामे षोड़शाङ्गुलः । विंशत्यङ्गुलकौ कर्णौ स्यातौ रुन्धौ च वर्त्तुलौ । षष्ठत्यङ्गुलमानाहे आयामे षोड़शाङ्गुलौ । ग्रीवा मृगस्य विज्ञेया कराभासनं भवेत् । सार्द्धद्वारत्निकायामः कुञ्जरस्योतिमात्रया । वंशोमृगस्य विज्ञेयो निम्नतत्सन्निभप्रभः । स्थूलास्थि विषमं निम्नं पुच्छमध्यं त्रिरत्निकम् । आसनेन समं चैव मृगस्य पश्चिमासनम् । पञ्चाङ्गुलस्तु विज्ञेयः पेचकोदुदरं स्मृतः । कचाग्रन्थिसमाकीर्णैः स्थूलोच्छ्रयैश्च बालधिः । अपराधादपार्श्वाभ्यां हस्तमात्रसमुच्छ्रयः । दीर्घतनुरुच्छ्रयोहिषप्रत्यङ्गुलायतः । तत्प्रमाणे तथा गात्रे चिपिटे चापि निम्नभे । चरणाग्र गतच्छायैश्चतस्रोद्यङ्गुलैर्नखैः । संयुक्ताःस्फुटिता निम्ना मानेनादशाङ्गुलाः । एतद्दृश्यमात्रेण कथितं मृगलक्षणम् । अतःपरं प्रवक्ष्यामि तेषां बलपरीक्षणम् । गजानां बलहीनेन शुद्धेष्वपि शोभनाः गुणेषूपि बलं श्रेष्ठं तत् परीक्षीत पण्डितः । शरीरान्तर्गतः प्राणो बलशब्देन कीर्त्यते । क्रियते वारणस्याथ तस्योपायैः परीक्षणम् । जाम्बूनदस्य ताम्रस्य पलानां रजतस्य वा । अष्टादशसहस्राणि युक्ता संघट्ट वेगवान् । दशयोजनमध्वानं गच्छति क्रमवर्जितः । यो गजो गजमध्ये तु स उत्तमबलः स्मृतः । यश्चतुर्दशसाहस्रभारमादाय गच्छति । सप्तयोजनमध्वानं स मध्यबलोमतः । दशसाहस्रिकं भारं संहीत्वा पञ्चयोजनम् । अध्वानं योहि संयाति स हीनबल उच्यते । सन्निभागहिहस्तेन परिणाहेन संयुतम् । चतुर्हस्तनिखातं तु योभिनत्त्युत्तमोहि सः । अथ वोत्पाटयेद्वापि बलेन महता युतः । सार्द्धत्रिहस्तखातन्तु सप्तहस्तोच्छ्रितं तथा । पञ्चाशदङ्गुलीकेन परिणाहेन संयुतम् । भिनत्ति योगजः शीघ्रं क्षिपत्युद्धृत्य वा पुनः । स गजानान्तु सर्वेषां मध्ये मध्यबलो मतः । हस्तत्रयनिखातन्तु षड्हस्तोच्छ्रयमेव वा । युक्तं स्थूलतया चैव पूर्वसंख्यार्द्धमात्रया । भिनत्ति क्षेपया यस्तु उत्खातं वा करोति वा । तत्स्मं कुञ्जरमध्ये तु स हीनबल उच्यते । गुरुत्वं च यतः श्रेष्ठं गुरुत्वादधिकं बलम् । बलादभ्यधिकं सत्वं तस्मात्सत्वं निरूपयेत् । शुद्धस्फटिकसङ्काशं सत्वं हृदि शरीरिणाम् । दुर्लक्ष्यं विद्यते सम्यगुपायैस्तद्धि लक्षयेत् । सुप्रशस्ते दिने लग्ने गजोगैरिकमण्डितः । कर्णे चामरशङ्खादिसुखाभरणभूषितः । पादान्दोलनसंजातघण्टारवनिभस्वनः । आरोहककरास्फालक्षतोत्साहोद्धता ननः । अत्यन्तं ढोकयेच्छीघ्रं पार्श्वकोलाहलाकुलः । वेगोत्थानक्षतास्फोटदन्तसंघट्टमर्दनैः । क्षतं कामपि न हस्तस्य वेदनां यो न मन्यते । यो हि मर्दैःक्षतास्फालैः स्वकटं भर्त्तुमिच्छति । नापसर्पति भीत्यानीप्रतिघातं रणात् क्वचित् । कण्ठगर्जितनादेन परिपूरितदिङ्मुखः । निवर्त्यते च दुःखेन स भवेत् सत्ववान् गजः । पदात्यश्वसमूहं वा गजमालातिभीषणम् । रागोत्थानसमुद्भूतगम्भीरकलहाकुलम् । उत्थाय समरे गच्छेद्रोषरञ्जितलोचनः । दन्तदारणरागेण प्रतिनागक्षतेक्षणः । प्रसारितैरतिस्थूलैर्निःशङ्कं कर्णपल्लवैः । यो गच्छत्यतिवेगेन स भवेत् सत्ववान्-

गजः । शार्दूलाकृतिसत्त्वानां त्रासवर्जितसानसः। कृतकं च तथा नागं योभिनन्त्युत्तमो हि सः । दावानलाग्निखिन्नेषीयद्भसंत्रासवर्जितः । वनेषु विचरत्येष स सत्वसहितो गजः । कृतशङ्कावशाद्यस्तु न वारोऽग्निमीयते । सङ्कचन् मस्तकं दीनोमन्दान्मन्दतरो भवेत् । आलोकयति पार्श्वानि चीत्कारकरणप्रियः । आलोकयति सोद्भ्रां लोचनाभ्यामतिदृषम् । पदात्यश्वसमूहं वा ज्वलन्तमिव मन्यते । अधमस्तु सुविज्ञेयो गज सः त्रासवर्जितः। यस्तु संघटते मन्दं घटितत्रापसर्पति । तथापसर्प वेगेन दन्ताघातं प्रयोजयेत् । किञ्चित्सिर्यग्मुखोभूत्वा कृतचीत्कारनिस्वनः । कुरुते दन्तसंघातम् स विज्ञेयोऽधमोगजः" ।

प्रथमादिपञ्चकदशासु मदविकारभेदमुक्त्वाह तत्रैव । "तटतरुभवनोन्मूलनरतस्तु पञ्चाङ्कजो भवति । करवदनाग्रिकटस्थल गलनमदसलिलसिक्तभूमितलः । संग्रामे रिपुभरकरविसृक्करनिकरशस्त्रसङ्घः । करवीरपुष्पलोहितलोचनः स चारुदारुणाकारः । प्रतिनागसंघदारणप्रकृतिरंगलस्तु सप्तम्याम्। न शृणोति नैव पश्यति च न भयञ्जानाति सर्वसत्वकृतम् । यश्च घनास्फालितं मुखरितं चानन पतति कारयन् । न सहन्ते तस्य गन्धं सङ्कोचितनात्कृजकरकटाः करिणः । महितनिजबला विमुक्तनादाः प्रणश्यन्ति । न तथा शङ्खाभरणैर्न चामरैर्नोच्चमालाभिः । भवति यथा मदसारैर्मुखस्य शोभा गजेन्द्राणाम् । क्रमविरहिता भवति हि षष्ठी वा पञ्चमी चतुर्थी वा । दोनावस्था करिणां सत्ववतां मदविशेषेण । व्यतिषङ्गमदविकारे स्कन्धन्ति शिशुमदेऽपि मातङ्गाः । सत्वातिरेकयुक्ताबलस्य शोभां परां प्राप्ताः" । स्थलभेदे न मदोद्गमफलं तत्रैवाह ।"कुरुते नरपतिदृष्टिं दक्षिणगण्डस्थलोद्वतन्दानम् । रोमोद्गतं च वातुर्विशेषसुखदं सदा भवति । उभयकटस्थलसमनिर्गतं च विषयस्य वृद्धिकरम् । शिशिरसुगन्धिपरिमलं सुखप्रदं जायते भर्तुः । माङ्गल्यं श्रीजननं सौभाग्यकरं सत्वजननं च । माद्यन्ति यत्र देशे दशाविपाकेन बलकृतानन्दाः । करिणस्तस्मिन् राजा वर्द्धितवंशः सुखं वसति । कृतकबङ्गलीलापरिमलश्च सुखदोमदो भवति । सूत्रपुरीषस्पर्शादाकृकफरसोनादितीव्रगन्धरः। अशुभकरोऽसौ नरपतियात्राद्याजायते मदः । जायन्ते ये भावा राजन् ! मदखण्डमण्डित सुखस्य । नागस्य मदविशेषास्तांस्तान् प्रवक्ष्यामि । चालयति दुर्गन्धनिवाताय पुष्करं क्षिपति प्रेरयति । लेढिजिघ्रायेण सृक्कणी विघटितोऽघटः । संपीड्य पुष्करायेण चाङ्गुलिं निःश्वसद्वाधोवदनः । तिर्यक्प्रेक्षी भवति मीलिताक्षः क्षणं स्थित्वा । तिर्यक् चालितवदनमङ्गुल्या पुष्करप्रकम्पेन । किञ्चित्सस्पृहताक्षः कर्णकण्डूयनं कुरुते । किञ्चिच्च दर्शयित्वा मेढ्रं नाशयति कोशकन्मूलम् । क्षुब्धः क्रीड़ति परिवर्त्तितानतो बन्धनस्तम्भ कृतमत्सरः । प्रधावति संवेद्य करं विषाणसद्यस्य गर्जति सलिलपूरितजलधरगम्भीरनादेन । उद्दामितायष्टस्तः स्वच्छन्दङ्कृतिकापि । गुरुमल्लिकश्च भवति वनतरुगह्वनोन्मूलनातुरतः। वागङ्कुशसुखजातं बाधनं न सहते ह्यभिन्नसत्वोयः। तिर्यग्मिकलत्वाच्च तथा सगजो गुरुमल्लिकोज्ञेयः । रमते च पांशुविकरणकर्दमावगाहाद्यैः । एवंविधस्वभावो मदभेदवशाद्गजो भवति । यो यस्मिन्नेव कृतो मुञ्चति मदमत्तकुजः सुखदम् । स च तस्मिन्नेव पुनः प्रभिद्यते दानयुक्तश्च । इति मददृष्टिविशेषाः कथितास्तव भूतलेश ! तत्त्वेन । परिवर्त्तते मदोयैर्हैतुभिरशुभैस्तु तान्वक्ष्ये । प्रतिवारणाभियानाद्भूराध्वगमनात्कुभोजनाच्चापि । बन्धनदोषाच्च तथा क्षुत्पीड़नाच्चापि । शार्दूलादित्रासाद्वावानलोल्काग्निप्रपतनाच्च । (व्यथनिरत्र विद्युत्) । नश्यति मदोगजानां शीघ्रं वर्त्म विघ्नतश्च तथा । मातापितृजैर्दोषैर्मन्दमदानन्दवर्जिताश्च तथा । जायन्ते हिरदा यैर्यैर्वा तथा साम्प्रतं वक्ष्यामि । मन्दमदेन हि करिणा जगतः किञ्चिन्मदोगजो भवति। मदविरहितेन तथा जनितोमदविवर्जितोऽप्येव । समदेन तु योजातोगजो गजेन्द्रेण भवति तस्य मदः । एवं मदप्रकारा मातङ्गानां समुद्दिष्टाः । शृणु साम्प्रतं नरेश्वर ! मदापसरणोद्भवानि चिह्नानि । यानि भवन्ति गजानां मन्दमृदुमदविगलितसमुदयानाम् । रूक्षच्छायायुक्तोनिस्नोचितगण्डस्थलगतश्रीः। कृष्यति येभ्यः शङ्काङ्करोति तेभ्योऽपि सत्वस्थः। गण्डस्थलेन जिघ्रति करेणुकां स्पृशति नैव हस्तेन । मूत्रपुरीषाणि च नो जिघ्रति वारणकृतानि यातुर्वा शनैर्गच्छति। सततं परिमृष्टदानराजिपरीकीर्णकटोहस्तेनातीव सङ्कर्षणं कुरुते। सङ्करभिनन्दति निद्रामलसो मनसा न हस्तिपमुपयाति । लिङ्गान्येतानि करिणो मदेन सूच्यमानस्य जायन्ते । प्रतिकूलरयुद्धकृतो बलहर्षदशावयोभ्यस्त्वशुभः । भवति मदोनागानां तापादिसमुद्भवश्च शुभः"। "रूपवान्मदसम्पन्नोविन्ध्यशैलसमप्रभः। जायते सत्वहीनस्तु कुञ्जरः केन हेतुना। केन वा रूपहीनोऽपि मदोद्भवविवर्जितः । सत्ववान्

जायते नागो एतदाख्यातुमर्हसि" इति नलेनपृष्टो हस्तिशास्त्रं उवाच। "यथा जातकयोगेन जन्तूनां च शुभाशुभम्। तथा बन्धनकालोत्थलक्षणानामपि जायते। सुसंस्थानास्थितैः सौम्यदृष्टैः पीड़ाविवर्जितैः। बन्धनं यस्य जायेत स भवेत् सत्ववान् गजः। स्कीनचक्षुषु स्कन्धे ये गजाः क्रूरदृष्टिभिः। ये चालोकितनक्षत्रास्ते भवन्ति भयाकुलाः"। उक्तञ्च शम्भुना "मृगजातयोऽपि हि शूरा भवन्ति मधुपिङ्गलोचनाः स्निग्धाः। दृषसिंहभीमदृढिकलम्नेषु स्त्रीकृताः करिणः"। पुनर्नलेनप्रश्ने गुरोः प्रत्युक्तिस्तथैव। "राजन् पञ्चविधं चैव गजानां विदितं मतम्। अल्पं प्रथमं ज्ञेयं प्रत्यर्धं च तथापरम्। अन्यर्धं चैव गम्भीरं सत्तानं पञ्चमं भवेत्। प्रतोदाङ्कुशदण्डाद्यैर्विद्याद्धेजितानि यः। तीव्रसङ्कुचितस्पृष्टः स स्यादल्पवेदिता। स्तोकं बद्ध बद्ध स्तोकं सतं मन्येत योगजः। वागङ्कुशादिभिर्नित्यं सहि प्रत्यर्धवेदिता। जानात्यङ्कुशतोत्राद्यैर्यथा तत्तथैव हि। सतङ्कायभयैर्क्रोऽन्यर्धज्ञः स गजोभवेत्। अङ्कुशादिप्रहारान् राजन्! यश्चिरेणावगच्छति। तोत्रानपि स गम्भीरवेदी भवति वारणः। रोमणामपं हृष्टेनापि स्पृष्टं वेत्ति तु यो गजः। उत्तानवेदिनं तन्तु गजं विद्धि महाभुज! सर्वाणि वेदितव्यानि भद्रादीनां भवन्ति वै। प्रकृतिस्थस्य सततं भद्रस्यान्यर्धवेदिता। गम्भीरवेदिता चापि मन्दस्यैव प्रकीर्त्तिता। उत्तानवेदिता नित्यं मृगस्यैव भवेन्नृप!। वेदित्वं गजजातीनां तिसृणामपि जायते। साम्प्रतञ्च यथाशास्त्रं कथ्यते वेगलक्षणम्। तिसृणामपि जातीना सत्तमाधममध्यमम्। न चाल्पं न च दृढं द्विपञ्चपदसंस्थितम्। गजोत्थानसहोत्थानं नरं प्राप्नोति येन तु। रयाविष्टेन मनसा स वेगउत्तमोमतः। (द्विपञ्चपदसंस्थितं दशपदस्थितं गजोत्थानसहोत्थानं गजधावनसमसवधाविनम्) येन वेगेन स्पृशति नरं सप्तपदान्तरम्। पदानां शतमात्रन्तु स मध्यमजवो भवेत्। येन पञ्चपदस्थं हि नरं स्पृशति नोदितः। पदानान्तु शतं सार्द्धं स हीनोजव उच्यते। शतद्वयं वा धनुषां गच्छेदुद्भ्रमिताननः। द्वात्रिंशता च मात्राभिः स उत्तमजवो भवेत्। पञ्चाशता च मात्राभिः यावाद्यस्तु शतद्वयम्। स मध्यमोऽधमोज्ञेयो मात्राषाष्ट्या शतद्वयात्। एवं परीक्ष्यते राजन्! वेगो वीथिषु दन्तिनाम्। अतःपरं प्रवक्ष्यामि गजस्य गुणलक्षणम्"।

तत्र कल्माषगीतः "भारार्द्दितोवा क्षुधितः क्षीणः श्रान्तोवुभुक्षितः। रात्रौ वा दिवसे वापि निर्विकारस्तु यो भवेत्। कल्माषगीतः स ज्ञेयो समस्तगजलक्षणैः। विकारं कुरुते यस्तु पीड्यमानःक्षुधादिभिः। तमकल्माषिनं राजन् गजन्दुष्टं प्रकल्पयेत्। कोपोऽपि द्विविधोज्ञेयः शिशुश्चैवाशिशुस्तथा। द्विविधस्यापि राजेन्द्र! यथावच्छृणुलक्षणम्। उद्वेजितोऽपि कालेन कोपं बध्नाति निर्भरम्। क्षिप्रं स्पृशति च क्रोधं दुर्निवारं मुहुः सहम्। शिशुक्रोधः स विज्ञेयो गजलक्षणकोविदैः। वार्षमाणोऽपि यत्नेन न शमं याति सृजति। स ज्ञेयस्त्वशिशुक्रोधो राजन्! स हि रणप्रियः। साम्प्रतंचैव वक्ष्येऽहमायुर्लक्षणमुत्तमम्। आभ्यन्तरं च बाह्यञ्च लक्षणं द्विविधं स्मृतम्। आभ्यन्तरं योगसाध्यं बाह्यं किञ्चिच्च लक्ष्यते। तेनान्तरं परित्यज्य बाह्यं लक्षणमुत्तमम्। ज्ञेयसत्वसमायोगा। भवन्ति हादशैव हि। एकं हस्तगतं ज्ञेयं द्वितीयं वदनाश्रितम्। ततोयच्च विषाणस्थञ्चतुर्थं शिरसिस्थितम्। पञ्चमं नवनस्थं च षष्ठं कर्णाश्रितं भवेत्। कण्ठस्थं सप्तमञ्चैव अष्टमङ्कायसंस्थितम्। नवमं चरणे ज्ञेयं शेषाङ्गस्थं द्विपञ्चमम्। एकादशञ्च कान्तिस्थं हादशं सत्वसंस्थितम्। एवं हादश ज्ञेयानि मातङ्गानां भवन्ति हि। हादशैव दशात्रेयाः शेषाङ्गेष्वभिलक्षिताः। विंशोत्तरं वर्षशतमद्रस्यायुः प्रकीर्त्तितम्। अवदान्यगीतिर्भन्दस्य चत्वारिंशत् मृगस्य च। मिश्रस्य चायुषः संख्या जातिभावेन जायते। प्रदेशज्ञानतत्त्वज्ञोजातिं सम्यग्लक्षयेत्। सर्वज्ञेलैः सुसंपूर्णैः संपूर्णायुर्गजो भवेत्। हीनैश्च हीयते चायुर्यथावदभिधीयते। दशावदानां क्षयं कुर्याद्धस्तलक्षणवर्जितः। विंशत्यवदविनाशश्च हीने ज्ञेयत्रये भवेत्। ज्ञेयत्रयावहीने च त्रिंशदवदपरिक्षयः। चत्वारिंशत्समाहानिर्हीने ज्ञेयचतुष्टये। (समासंक्षयतः)। पञ्चाशदवदाहोयन्ते हीने तु ज्ञेयपञ्चके। षट्ज्ञेयहीनतायान्तु षष्टिवर्षविनाशनम्। सप्तत्यवदविनाशाय सप्तज्ञेयविहीनता॥ अशीतिरष्टभिर्हीने वर्षाण्याशु विनश्यति। नवतिर्नवभिर्हीनै ज्ञेयैर्नाशं हि प्रयाति। दशभिश्च तथा हीनैर्नश्यत्यवदशतं ध्रुवम्। दशोत्तरं चावदशतं हीना ज्ञाया विनाशयेत्। विंशोत्तरं चावदशतं हीने सत्वे विनश्यति। एवं दशावदनाशं च ज्ञेयं कुर्यादलक्षणम्। एवमायुःक्षयं विद्यात् गजस्य गजकोविदः। सामान्यलक्षणं ह्येतत् जीवितस्य परीक्षणे। विशेषलक्षणं यावद् ग्रहलक्षणजातितः। एवमुद्देशमात्रेण गजायुर्लक्षणं तव। कथितं साम्प्रतं राजन्! दोषज्ञं वद्मि लक्षणम्। पादानां लक्षणं सम्यक् दन्तदोषं प्रधाय-

वेत् । दन्तयोर्लक्षणं हन्ति दोषान् वाह्लित्यसंश्रितान् । वाह्लित्यलक्षणैः सम्यक् नेत्रदोषज्ञयो भवेत् । नेत्रयोर्लक्षणं हन्ति दोषांस्तालुसमाश्रितान् । स्कन्धदोषविनाशश्च क्रियते तालुलक्षणैः ॥ स्कन्धानां लक्षणं कुर्यात् सगददोषनाशनम् । कपोलकटदोषघ्नाः सगदस्याशुभा नृप ! ॥ निर्याणवातकुम्भानान्दोषघ्नः करयोर्गुणः । कुम्भदोषविनाशाय तयोरेव गुणो भवेत् । कर्णदोषविनाशस्तु क्रियते कुम्भलक्षणैः । कण्ठदोषविनाशाय कर्णलक्षणमेव हि । आसनस्य हि ये दोषास्तान् हरेत्कर्णजोगुणः । वंशदोषज्ञयकर आसनस्य गुणो भवेत् । गुणाघ्नन्ति हि वंशस्य दोषान् तत्स्थलसंश्रितान् । पश्चिमासनदोषघ्नं लक्षणं तत्स्थलश्रितम् । कुक्षिपेचकदोषघ्नं पश्चिमासनलक्षणम् । गुणाः पेचककुक्षिस्थाः पुच्छदोषविनाशनाः । मेढ्रदोषज्ञयं कुर्यात् पुच्छलक्षणमेव हि । मेहनस्य गुणा हन्ति दोषांश्चैवापरान्वितान् । अण्डकोषगतं दोषमपरालक्षणं हरेत् । नाभिदोषज्ञयं कुर्यादण्डकोशस्य लक्षणम् । नाभेर्गुणश्च हन्त्यन्ते दोषासनसमाश्रिताः । उरोभोगिगतान् दोषान् नाशयेत् स्तनलक्षणम् । चिबुकस्य हरेद्दोषान् उरोभोगिगतोगुणः । यथा दोषज्ञयो राजन् ! लक्षणैः क्रियते शुभैः । दोषातिरेकोऽपि तथा प्रदेशगुणनायकः । प्रदेशोऽनन्तरस्यैव प्रदेशस्य गुणान्वितः । कुरुते दोषनाशं हि स दोषोगुणनाशनः । करकुम्भविषाणाक्षिकर्णलक्षणसंयुतः । सर्वैरेवाशुभैरन्यैर्हीनलक्षणवाशुभोगजः । मृदुं चन्द्रांशुशुभ्रं स्याद्रक्तं च ज्वलनप्रभम् । वज्रं काञ्चनसङ्काशङ्कालदण्डःसपिङ्गलः । एतेषां च समायोगाद्दन्तानां मधुपिङ्गता । यतो गजविषाणानामतो मधुनिभाः शुभाः । भद्रजातेर्गजस्यैतन्मन्दस्य च मृगस्य च । धृतपीयूषकुन्देन्दुकैतकीच्छविपङ्कजम् । एवं जातित्रयस्यापि सामान्यं शोभनं मतम् । कपोतधूमभस्माम्भिसर्पच्छत्रकसन्निभाः दन्तयोस्त्वशुभारजन् ! छाया पञ्चविधा अपि । अध्यर्द्धारत्निकं राजन् ! प्रमाणं दन्तयोः शुभम् ।

अत ऊर्द्धं प्रवक्ष्यामि गजानां वर्णलक्षणम् । आहारस्य विशेषेण वातपित्तकफैस्तथा । देशलक्ष्मगुणैश्चैव बीजयोनिवशेन । ग्रहालोकननक्षत्रलग्नराशिवशेन च । पूर्वकर्म्मवशाच्चापि धातूनाञ्च विपर्ययात् । भवन्ति कारणैरेभिर्वर्णानानाविधा नृप ! ॥ दिव्यसत्वाः शुभैर्भेदैर्विविधास्ते भवन्ति हि । सिन्दूरशङ्खकुन्देन्दुविद्युज्ज्वाम्बुनदप्रभाः । इन्द्रनीलसमानाभा भवन्ति शुभकान्तयः । अतिश्वेताश्च रक्ताश्च शुकवर्हिणसप्रभाः । एते देवगजाः सर्व्वे भूतले न भवन्ति हि । अतिश्वेताश्च रक्ताश्च शुकवर्हिणसप्रभाः । दैवयोगाद्दने प्राप्ते कचिदेव भवन्ति हि । वन्दनीयश्च पूज्योऽसौ नासौ स्याद्योनराधिपैः । भृङ्गाराङ्गारभस्माम्भिपङ्कमाञ्जिष्ठसन्निभाः । स्याद्धूम्रसवर्णाश्च गजास्ते तेऽतिनिन्दिताः । एवं वर्णविशेषास्तु कथितास्तव सुव्रत ! । गजमेकादशगुणं वक्ष्यमाणं निबोध मे । मधुसन्निभदन्तश्च श्यामोमधुनिभेक्षणः । उदरेपाण्डुवर्णश्च वक्त्रे च कमलप्रभः । हिरेफसमवालश्च कुन्देन्दुसदृशैर्नखैः । स्थूलतारोमयुक्तश्च शेषेष्वङ्गेषु पीतकः । विचित्रश्च सखं यस्य रक्तैः श्वेतैश्च बिन्दुभिः । स नागोगजयूथानां मध्ये राजाऽत्र जायते । तं प्राप्य नृपतिर्भुङ्क्ते सागरान्तं महीतलम् । नीलसवर्णसंस्थानः स गजोयूथनायकः । सखे मदे च हस्ते च कर्णोदरशिरस्सुयः । कैर्यैः शुभैः वलिभिर्विन्दुभिः परिलक्षणैः । सवर्णोयो भवेन्नी कैलासः सोऽभिधीयते । अत:परं प्रवक्ष्यामि निःश्वासस्य तु लक्षणम् । निःश्वासोद्विविधोज्ञेयः शुभश्चैवाशुभस्तथा । शुभः सुरभिगन्धः स्यात् पूतिगन्धोऽशुभोमतः । विशेषेण तयोश्चैव लक्षणं भूप ! कीर्त्यते । स्वच्छता दीर्घता चैव समता च सुगन्धिता । सौकुमार्य्यं मृदुत्वं च निश्वासस्य तु षड्गुणाः । स्थूलता रुक्षता चैव दुर्गन्धत्वं तथोष्णता । पारुष्यं विषमत्वञ्च दोषाश्चापि भवन्ति षट् । दशारत्निप्रमाणं च रेणुकं पित्तलक्षणम् । यो निश्वसिति दीर्घं च स दीर्घायुर्गजो मतः । अरःपरं प्रवक्ष्यामि गजालोकित लक्षणम् । स्निग्धं स्थिरं च सौम्यं च वारिजोत्पलतारकम् । सलज्जं प्रतिनागं तु प्रेक्षितं शुभकारणम् । उद्विग्नक्षुब्धं दीनमविकाशिततारकम् । ऊर्द्धाधः पार्श्वदृष्टञ्च निर्लज्जं निन्दितं भवेत् । कक्षानां साम्प्रतं भेदान् वक्ष्यमाणाद्विबोध मे नेत्रयोः पुटपालिस्थाः कक्षाः शुभफलाः स्मृताः । संख्या तस्यैव मानन्तु रोम्णां चैव प्रकीर्त्तितम् । देहच्छायासवर्णत्वं मृदुत्वं च तथा परम् । अनाविलत्वं घनता नम्रा च स्फुटितायता । ऋजुमत्ता च सूक्ष्मत्वं रोम्णां सप्त गुणा स्मृताः । दोषाश्च सप्तसंख्याः स्युर्गुणानां च विपर्य्ययात् । शुभानि शुभकर्त्तृणि दुःखदान्यशुभानि च । अतःपरं प्रवक्ष्यामि लक्षणं पक्ष्मसंचयम् । बाह्योत्तानानि रूक्षाणि दीर्घाण्यायतनानि च । मृदूनि पिङ्गवर्णानि पक्ष्माणि करिणः सदा । स्निग्धच्छायानि लक्ष्णानि समानि च दृढानि च । अयनानि सक्ष्मद्राणि पक्ष्माण्यतिशुभानि च । गजानां स्वामिनः

सौख्यं कुर्वन्ति रमणीयताम् । दृढाः स्निग्धायतस्निग्धाश्च सुदन्ताश्च ऋजुप्रभाः । तालदण्डसमाकारा बाला भर्तुर्जयप्रदाः । गुनःशुक्लसमा रूक्षाः कपिलाः स्फुटितास्तथा । बलत्वातिगवोपेताः सुदृष्टास्त्वतिनिन्दिताः । भर्तुरारोहिणश्चात्र नित्योद्वेगकरास्तु ते । अतःपरं प्रवक्ष्यामि केशानामपि लक्षणम् । स्निग्धा ऋजवः स्निग्धा घना मधुकरप्रभाः । केशा वारणनाथस्य क्षेमदृद्धिकरा मताः । रूक्षास्तु निष्ठुराः पिङ्गाः स्फुटिताश्च जुगुप्सिताः । कुर्वन्ति दन्तिनां नित्यं स्वस्य नाथस्य चाशुभम् । पक्ष्मबालकेशरोमृणां लक्षणं कथितं मया । रूक्षिमार्जारमण्डूकश्वगालैश्च समप्रभम् । वानरस्य समं चैव सूक्ष्मं नागस्य निन्दितम् । स्निग्धान्यापूर्णगण्डानि गिरिकूटनिभानि च । आपूर्णमेघरूपाणि पूजितानि सुखानि वै । मदहीनं लघु सूक्ष्मं बाह्निधूमनिःप्रभं तथा । वराहलोचनाक्रान्तमदृष्टचिबुकं तथा । ललाटतटपर्यन्तगर्तौघतिभिरन्वितम् । सगदं हीनतायुक्तं सूक्ष्मं नागस्य निन्दितम् । सुखस्य लक्षणं सम्यक् कथितं तव सुव्रत ! । अतःपरं प्रवक्ष्यामि मातङ्गगतिलक्षणम् । समा च लघुपादा च वेगेऽप्यतिशुभा मता । दीर्घक्रमा सुखोत्क्षिप्ता गात्रसंवरहारिणी । शुभलक्षणसंयुक्ता पुरुषस्य वहस्य च । मातङ्गदर्पसंहानां गतिर्दृक्ष्या शुभा मता । क्लेशचालितगात्रा या विषमा सूक्ष्मक्रमा । वेगेऽपि मन्दसञ्चारा विक्षेपान्दोलितासना । मृगस्य कृकलासस्य जम्बूकस्य खरस्य च । गमनेन समा या, सा शुभा नो दन्तिनाकृतिः । कथितं तव राजेन्द्र ! गजानां गतिलक्षणम् । स्थितानाञ्च यथायोगं शास्त्रतं लक्षणं शृणु । पञ्चस्थितसप्तस्थित नवस्थित द्वादशस्थितांश्चैव । पुण्यवतां जायन्ते राज्ञां गिरिसन्निभाः करिणः । लक्षणसहितैः स्निग्धैः करवक्त्रविषाणकर्णनयनैश्च । संयुक्तो भवति गजो वसुदः पञ्चस्थितो नागः । (वसुदः धनदः) परिणाहायामोच्छ्रयबलविक्रमधैर्यैकान्तिसम्पन्नः । भर्तुः प्रतापजननो ज्ञेयः सप्तस्थितो हस्ती । उत्साहवेगसाहसमदसत्वगुरुत्वदक्षतायुक्तः । करदन्तकर्मसु कुशलो नवस्थितः करी भवति । बुद्धिर्मेधा सत्वं यत्रोरुभौ तथाऽक्षिणी हृदयम् । रोमाणि ऋविषादाः तथासनं पृष्ठवंशश्च । द्वादश चैतानि सदा स्थितानि दृश्यन्ते यस्य नागस्य । स द्वादशस्थितोवै भवति गजः सर्वसौख्यकरः । सञ्चारस्थितभेदाः कथिता मुनिसंश्रया गजेन्द्राणाम् । दिव्यानरसत्वानां लक्षणमिह सास्त्रतं वक्ष्ये । निहतद्विपदचतुष्पदकृष्णपाञ्च स्मृतिं च न यो मुञ्चति । न च जिघ्रति मूत्रादीन् स वारणोदिव्यसत्वस्तु । दत्तञ्च योऽत्ति मांसं सत्वानां सर्वं तु लोभेन । जिघ्रति मूत्रपुरीषाणि पिशाचसत्वः स विज्ञेयः । एवं सत्वपरीक्षा क्रियते नरनाथ ! वारणेन्द्राणाम् । खरलक्षणमिदानीमशुभं शुभञ्च वक्ष्यामि । स्थानान्यष्टौ रूपते ! भवन्ति शस्तस्य वारणेन्द्राणाम् । तालोदरशिरउरःकरजिह्वामूलं गलकपोलौ च । गम्भीरसौम्यदृष्टास्तथात्रमीरितास्तथा स्निग्धाः । नादाः शुभा नराधिप ! षडेव कथिता गजेन्द्राणाम् । चत्वारस्त्वशुभा रौद्राभयशोकसङ्क्रमोत्पन्नाः । एवं शुभाशुभाश्च दशप्रकाराः खरा ज्ञेयाः । अन्येऽपि गलवङ्क्षणानिलास्फालनोद्भवा बहवः । शब्दाभवन्ति करिणां शुभाशुभं न तैर्भवति । निम्नोचितचिबुकावितविरुञ्जितकूजितखरोट्टनादनिभाः । वायसजम्बूककपिकाष्टभङ्गसदृशारवास्त्वशुभाः । ज्ञेयानि शुभानि सदा मृदङ्गजीमूतदुन्दुभिनिभानि । पातायितगर्जितहसितानि हृंहितानि नागानाम् । पातायितञ्च तालोदरसम्भवं गर्जितकं चैव । जिह्वासम्भवं च फेनायितमित्यभिख्यातम् । हसितं कपोलजनितं पुष्करविवरोद्भवञ्च नागानाम् । भवति धनधान्यवाहनभूलाभकरं नरेन्द्रस्य । हस्तेन मृदङ्गरवं तु कर्णाभ्यां दुन्दुभिस्वनञ्चैव । दर्दुररवं तु पेचकेन करोति योऽसौ जयकरः । सर्वस्थानसमत्वा शब्दा नरनाथ ! वारणेन्द्राणाम् । आचार्यैः सर्वैर्हसितसंज्ञाश्च रवाः शुभा ज्ञेयाः । एते च जयपराजयकथनसमर्था भवन्ति भूपानाम् । गर्हितशुभप्रदेशस्थानाङ्कपरिवर्जिता नादाः । शुष्कलक्षकाष्ठकण्टकवल्मीकास्थिश्मशानदुष्टासु । पाषाणाङ्गारादिषु भूमिषु यदि संस्थिताः करिणः । हृंहन्ति हीनलक्षणमेतद्भर्तुस्तदाऽशुभं भवति । प्रभूतमदृष्टङ्करवं तु यदि हृंहन्त्यानन्दपूरिताः करिणः । प्रस्थानं भवति तदा नराधिपस्य विजयस्तदा राजन् ! । सभामध्ये च यदा हृंहन्ति सार्दूलवत् गजाश्चुष्टाः । भवति ससैन्यस्य तदा विजयः संख्ये नरेन्द्रस्य । (संख्यं संग्रामः) कलहंसनादमधुरं किञ्चिदिगोत्क्षिप्तपुष्करस्तु यदा । हृंहति सदा च हस्ती तदापि जयोभवेद्भर्तुः । सुखविवरकपोलगतं हृंहत्यसकृत् गजो यदा हृष्टः । मधुरङ्कजहसितञ्च जयप्रदं भवति भूपानाम् । त्रीन् वारान् क्रौञ्चरवं हंसरवं हृंहितं यदा कुरुते । एतदपि नागहसितञ्जयप्रदम्भवति भूपानाम् । गर्जति घनवत् सततं यदि वारणः प्रहृष्टमनाः सुखरम्भनिविष्टकरस्तदाऽरिविजयोऽभवेद्भर्तुः । घनरव

स्फोतसलिलं ससीत्करं हुंहितं यदा कुरुते । भवति तदा वारणनाथस्य भवति शत्रुनाशः खल्वेव । कथितान्येतानि मया शुभानि गजहुंहितानि नरनाथ ! । अशुभानि च नागानामतःपरं प्रवक्ष्यामि । शङ्काचालितनयनोवराहघुरितनिःस्वनं कुरुते । तत्प्रतिदलस्य नूनम् तदा क्षयो भवति । भूपाल ! वेल्लितभूतलहस्तो नदति यदा धरणिप्रकम्पनादक्षम् । नरपतिराष्ट्रविनाशो भवति तदा शत्रुसैन्यकृतः। भद्रसदृशखरतरसदृशं निःस्वनं यदि करी कुरुते । जनयति विजयविनाशात् पुरराष्ट्रपीडनं च तदा । बलिभुग्निस्वनसदृशं यदि वा सस्तृष्काख्यं च हस्तम् । वामान्दोलितचरणोयदा करी हुंहुति सनिःश्वासम् । आलानगतः कुरुते तदा बह्वीर्याताव रिभिःपार्श्वैः। एवं प्रकृतिस्थावदि मतङ्गजा हुंहितानि कुर्वन्ति । आत्यन्तिकानि रात्रां चैव भवन्ति नान्यानि" । "यदि रिपुगजाभिमुखो निवार्यमाणोऽपि याति रभसेन। विंशतिपदानि नागस्तत्रापि जयोभवत्येव । अमदोस्रवाति मदं दुर्गन्धमदश्च सुरभिमदम् । दुष्टगजानां प्रवमन्दुर्लक्षणमेवं सकलम् । हस्वतनुर्मधिवदनो हि महाशिरास्तथाकर्णयुगलश्च । नातिस्थूलोऽसिसवर्णस्तथानि च गात्रवदनरोमाणि । व्यालः स भवति हस्ती दुष्टात्मा दुष्टशीलश्च । स्थूलाक्षिदन्तशुण्डो दीर्घविषाणोनामितमुखश्रीः । पृथुपादःक्षामनखो वक्रोहनुपृष्टदण्डेन। विस्तृतकुक्षिल श्रोदरश्च लम्बोवराहनयनश्च । श्रेयोवकीलनामा स्यातोऽयं सर्वदोषकरः । अतिहस्वापरगात्रो दृढमुखः काकलम्बनयनश्च । स्थूलतरार्धोन्नतदन्तदीर्घसुगलस्फुटितवर्हिनखपादः । स्थूलनखःस्थूलपृष्करकरश्च वामन संज्ञो गजाधमो दुष्टशीलश्च । विषाणे चातिदृढे हस्वे परिमण्डलौ तथा कर्णौ । वदनञ्च मांसलं स्यादधोगतस्थूलनयनञ्च । समांसलत्वयुक्तो हस्वो हस्वाङ्गुलिः करो यस्य । नाम्ना च विश्वरूपमुख इति ख्यातो दुष्टमातङ्गः । करकर्णशिरोबालधिविषाणगात्राणि यस्य हीनानि । आदग्धभोऽतिवामनाङ्गः पापात्मा स स्वामिनाशकरः । शयनादुत्थाय बलादुद्धावति पादौ कर्षति क्षणेन । प्रत्युपसि गच्छति पुनः क्वापि समुपस्थापितमुखश्च । अनिष्टगात्रस्निग्धेक्षिवलति तस्याननं च कर्णाभ्याम् । स श्रेयो वातकरः पापात्मा सर्वपापकरः । यस्य च किलाल्पं मेढ्रं हस्वं हस्वाङ्गुलिस्तनुर्हस्वा । अतिनिम्नञ्च वाहित्थं कर्णौ च तनुत्वचौ हस्वौ । गात्रापरञ्च दीर्घं नखाश्च जनितान्तराक्षया । सर्वाणि च काकाभपक्षरोमाणि च विद्यन्ति। उदरङ्गालक्ष्णं स्यात् ग्रीवा तन्वायता च शुभा च । वंशिकनामा मतोऽसौ दुष्टगजोवर्जनीयश्च । यस्य करालौ दशनौ स्थूलौ मालान्तरन्तथा हुस्वम् । मक्षिपक्षशुक्लवर्णःकपिजम्बुकलोचनोऽतिविकृततनुः । पापात्मायं हस्ती राज्ञा क्षेमः प्रयत्नेन । दिवसमपि यत्र तिष्ठति तं क्षेमं दहति पावकप्रख्यः । राज्ञा विन्ध्याटवने वा पुरराष्ट्रे वा स मोक्तव्यः। अतिखरपरिघतनुर्नकुलच्छायस्तनूरुहैश्छन्नः । यो हस्ती पातारं स पातयित्वा विनाशयति । भल्लासदृशसुखोयः कर्णकषायश्च कर्कशारुहाः। क्षणारुहान्वयोऽसौ भर्तुर्विपदेव मातङ्गः। रोमभिरधोमुखगतैः काकाक्षो दीर्घवक्त्रश्च । स्थिरहस्वकर्णयुगलः स राक्षसोहस्ती क्षमेण । तिर्यक्प्रेक्षणनिरतोदुर्गन्धः काककुम्भवदनश्च । मूलपुरोपघ्राणे सस्तम्भको भवति चण्डालः। कुम्भौ यस्य विशालौ विच्छिन्नस्थूलतारके च नेत्रे । तन्वायतं त्विकं स्यात् बालविबालासु बडरुग्राः । रक्तौ मेचकशोणौ मेढ्रोपरिसंस्थितोदरश्च महत् । चलपक्ष्मलस्तु हस्ती स भवति नाम्ना महादुष्टः । अङ्गं प्रसार्य वदनं विधुय चाधोरणं निपातयति । स जले स्थले च नागो विवर्जनीयः प्रयत्नेन । हस्वकराङ्गुलिबालतनुदशनत्वाल्पायामगात्रश्च । मत्कुणजातिः स गजः क्षुद्रशीलश्च रूक्षश्च । कालनखो हरिवर्णोहर्ष्यक्षो हस्वबालधिश्चैव । वङ्कपक्ष्मा दुर्गन्धिर्म्लेच्छसन्निभतालुकैरूक्षैः । अतिपिङ्गलकर्णचूलोरोमशहस्तो वराहनयनश्च । तनुनखसिरालक्ष्णैर्नखान्तरैर्दुश्चरणैश्च । विकुरोनाम गजोऽसौ खार्क्षैः सर्वत्र कर्कशोत्तान्वोः । वङ्कपापकर्मयुक्तो व्यालानामप्यधोनायम् । रूक्षोवाहित्थभागो विषमो दन्तौ च यस्य नागस्य । धूमशिखेव च्छाया स निन्दितो वर्जनीयश्च । दन्तौ चातिहस्वौ स्थूलौ रूक्षौ च मांसलो हस्तः । चिबुकं मांसविशुष्कं स्थूलतरे तारके यस्य । स्थूलनखो दुष्टात्मा नासौ सांग्रामिको भवेद्धिरदः। अति दुष्टकर्मनिरतो भयालुको वर्जनीयश्च । क्षणा रूक्षा च्छाया वायसजङ्घा च दृश्यते यस्य । भूतोदनञ्च कुरुते निःशङ्कं यः कराग्रेण । निःशेषं शब्दांश्च करोति यः सहस्तनिष्पेषम् । परिहरणीयो राज्ञायाने स्थे स महता प्रयत्नेन । अतीवविरलपक्ष्मा ध्यानपरः शब्दकरणनिरतश्च । द्विगुणीकृत्य कराग्रन्तुदति च भूतलन्तु नित्यम् । वामेन च लिखति मह्नीमादेन कुत्सितापत्ये । जर्जरविरूपकर्णः पापात्मा निन्दितो हस्ती । आनाहायामोच्छ्रयसत्वसमृद्धो महाशिरालविद्धः । हस्वाङ्गुलिबालकरो हस्वापरगात्रकर्णश्च ।

एषोऽपि वामनःस्याद्यद्यपि भवेद्युद्धप्रियोऽसौ द्विरदः। राज्ञा तथापि लक्षणविवर्जितो वर्जनीयश्च। स्थूलशुण्डदण्ड-कर्णौविहीनजघनापरभागरूक्षः। महता मेढ्रेण युतो-नष्टमदः कोपनश्चांग। मन्दालोकननिस्तोमहाशिराः पृथुविषाणनयनश्च। हस्ती नपुंसकोऽसौ विवर्जनीयश्च संग्रामे। अल्पायुषो भवन्ति हि सङ्कीर्णजिह्वोष्ठतालुका-नागाः। नरपतिभिस्ते सततं विवर्जनीयाः प्रयत्नेन! आयामपरिहीनं समनाक्कोच्छ्रायसुखेन नमितम्। उ-च्छ्रितवक्त्रं कुब्जं विषमकुम्भं कुक्कुरसमानहीनहस्तं च। एवंभूतं तु गजं राजा दूरेण वर्जयेन्मतिमान्। मद्द-यति मन्दबुद्धिर्यस्तस्य कुलक्षयो भवति। लक्षणयुक्तोऽपि गजो द्वात्रिंशत्येकविंशतिनखश्च। एकोनविंशतिनखः सप्तद-शनखश्च यो भवति। षोड़श पञ्चदश वा नखान् धत्ते युक्तो वा चतुर्भिः। एकादशत्रयोदशनवदशभिर्हिदशनखै-श्चैव। संयुक्तस्त्वशुभकरः सम्प्राप्ताभिश्च पापनखैः। द्वि-दाक्षाष्टादशनखाः विंशतिनखयुक्ताश्च शुभाः। कुरुते स्वामिविनाशं द्वाविंशतिनखोऽपि। एकोनविंशतिनखो युवराजविनाशं कुरुते। सप्तदशनखस्तु गजो नरपतिपात्र विनाशने समर्थः। षोड़शनखमातृकोनायकनाशं ध्रुवं कुरुते। पञ्चदशनखश्च योऽसौ सेनापतिनिधनलक्षजो भव-ति। कुरुते चतुर्दशनखोव्याधिं पुरवासिनां हस्ती। त्रयो-दशनखो राष्ट्रवित्तविनाशङ्करोति भूपस्य। द्वादशनखस्तु कुरुते पदातितुरगक्षयं संख्ये। एकादशनखयुक्तो गजहानिकरो भवेत् स गजः। पुरदाहं च दशनखः करोति हस्ती दुरालोकम्। चतुरङ्गस्य बलस्य ना-शनन्तु नवनखो गजः कुरुते। अष्टनखश्च पुरोहित वंशसमूलनसमर्थः। सप्तनखः प्रतिहारं नाशयति च षड्नखोऽमात्यम्। पञ्चनखो भक्तिकरं चतुर्नखो द्वार-पालञ्च। त्रिनखोविषवाक्षेपं द्विनखश्चान्तः पुरानुबन्धञ्च। एकनखोनखरहितोराष्ट्रविनाशं ध्रुवं कुरुते। एवम्भूत-नखाये नरपतिना न ते गजाग्र्याह्याः। लाङ्गलभङ्गिना-मोऽतिलोमयोर्हीनकर्णकरवालः। हस्ती विवर्जनीयो हीननखः पूतिलोमा च। ज्वलनकृतं यक्षकृतं दुर्भिक्ष-कृतं महद्भयं कुरुते। यस्मिन् देशे वसति नाशयति वन स दुष्टात्मा। यस्य न भवतोदन्तौ ज्वलनकृतं दुर्भिक्षकृतं महद्भयं कुरुते। यस्मिन्देशे स वसति नाशयति वनं स दुष्टात्मा। यस्य न भवतो दन्तौ कुलरूपवतोऽपि गर्भ-दोषेण। स गजोमत्कुणनामा न तं रक्षे योजयेद्राजा। कुब्जरघटागतोऽसौ हरति गजानां बलं च सत्वञ्च। अतएव समरकाले नराधिपैर्वर्जनीयश्च। तनुशुण्डदीर्घदन्तोन्नति-सङ्कटवक्त्रविघटितविषाणः। एकदशनस्त्वधोनखरदनश्च गजः प्रभुं त्यजति। रदनविहीनो हस्ती निःशेषबलक्षयु-तोऽपि। भवति न नृपतियोग्योमदजलकलिङ्ग ग-न्धोऽपि। दूषितविरहितदीने सत्यरहिते विव-र्णे च। निष्प्रभकुब्जकुक्कुरे राजा नारोहति सङ्गरह-हिते च। एवम्भूतास्त्याज्याः मिलनाग्रका रणे करिणः। यस्मिन्भागमुजलं निपतति नागस्य यस्य नित्यं हि। नयनव्याधिवियुक्तस्य तस्य भर्त्ता रणे जियते। वर्द्धनशीलाश्च नखा भर्तुश्चैव संबाधनकराः। जिह्वानखसुखमेह-ननयनानि भवन्ति यस्य कृष्णानि। बाह्यित्यचिल्ल कृष्णः स गजोभर्तुः क्षयं कुरुते। बाह्वांसफलकपीठो राजन्! कृशेन पृथ्वंशेन। वदनेन च कपिवदनानुका-रिणानिन्दितो हस्ती। कर्णौ दन्तौ च समौ न नतौ भवतो यस्य नरनाथ!। स नराधिपबलविनायकरः करी जायते समरे। चित्रौ रोमचितौ वास्थूलौ वातिप्रलम्बितास्यौ वा। कोषौ कोषविनाशं स करोति नागश्च भूपानाम्। सितवि-न्दुभिर्विचित्रं श्वेतं वा यस्य जायते मेढ्रम्। स गजःयाक्ष विनाशङ्करोति भूपस्य संग्रामे। जायन्तेव विचित्राणि यस्य देहे भवन्ति रोमाणि। स गज प्रतिगजबलेन विक्षुब्धो निजबलं दहति। सम्प्रोक्षितस्य वदनात् यस्य गजेन्द्रस्य गलति रुधिरजालम्। ज्वलनकृतं सूचयति भवदसौ भर्तृनाशकरः। इति कथितं तव नृपते! दुष्टमातङ्गलक्षणं सम्यक्। पापकरिणोलक्षणमतः परं संप्रवक्ष्यामि। यल्लक्षणं मयोक्तम्भद्रादीनां शुभं च दुष्टं च। तत्करिणोप्यपि योज्यं जातिविभागेन च युक्तस्य। सुलक्षणेन सहितानि करेणुकानामकानि भवन्ति। युवतिसदृशानि पुरुषोचितानि च तथा पीनान्य-कानि करेणूनाम्। गजसंस्थाना करिणी निर्मांसदन्ता सुपीनकाया च। स्थूलायता च सततं प्रभूतदया मता-च करिणीनाम्। प्राच्यवनसम्भूता: प्रायेण लक्षणयुता भवन्ति करिण:। सुलक्षणेषु च छाया लक्षणं प्रधानं तच्च पञ्चविधं भवति। पृथिव्यग्नेजोवाय्वाकाशात्मकम्। तत्र पृथिव्यग्नेज श्यामकं प्रशस्तं वायाकाशात्मकमप्र-शस्तम्। क्रमेण छायाभिधीयते बलोपचयक्षयेण सततपद्यते। तस्यैव देहोद्योतजननी स्थिरा प्रभाऽ-भिधीयते। छायाफलस्य द्विगुणफलसम्पादनसमर्था प्रभा

भवति। छाया देहसमाश्रिताः स्थिरप्रभावाऽस्थिरा च्छाया बलोपचयवशेन समुत्पद्यते। नरेन्द्रस्यैवोद्योगकाले शुभकर्मफलसूचनार्थं गजस्य प्रभा प्रकटीभवत्येव। एवं छायागतो भेदोऽवगन्तव्यः। साम्प्रतं छायारूपमभिधीयते। स्निग्धा गम्भीररूपा पार्थिवी च्छाया भवति। स्निग्धाजीमूतसन्निभा च सलिलसम्भूता, स्निग्धा रक्ता च ताम्रा च तेजसी च्छाया। एवं चैतल्लक्षणं शुभमशुभलक्षणानि गजस्य सम्भाव्य सुखप्रदं भवति। अथाशुभा कथ्यते निःप्रभा रूक्षा रूक्षा भग्नाकुलवर्णा च वायवी। रूक्षा तन्वी कृष्णादिविविधवर्णा आकाशात्मिका। इत्थं छायाद्वयमति गर्हितम् गजलक्षणानि तिरस्कृत्याशुभप्रदम्भवत्यनेन प्रकारेण च्छायालक्षणसङ्कटं भवति। विकटक्षुखवालदद्रुलयाङ्गहीनाङ्गेषु व्याधिपीड़ितविकलाङ्गेषु गजेषु नारोहति राजा भल्वार्यैतेष्वारोहन्नोति। यादृशं च समरकाले मातङ्गं राजा समारोहति तादृशस्य लक्षणमभिधीयते। बलं कण्ठे स्थितं नित्यं कुञ्जराणां नरेश्वर!। अतःसंपूर्णकण्ठस्तु स्निग्धपिङ्गललोचनः। घनमांसचितांसस्तु दिशोऽवघ्राणतत्परः। वराहजघनश्चैव सुविस्तीर्णोवराननः। सुप्रतिष्ठितपादस्तु यः स्यादुरुमस्तिकः। प्राजापत्योगजोह्येष संग्रामार्हः प्रकीर्त्तितः। मधुपिङ्गलदन्तोयः किञ्चिद्वापीतकच्छविः। रोमाणि चैव रूपाणि सुखं च कमलप्रभम्। रक्तोत्पलदलच्छाये सूक्ष्मे तीक्ष्णे च लोचने। ऐन्द्रोगजस्तु वित्तेयोरिपुहृन्दविनाशनः। ताम्रतालुकजिह्वोष्ठसुजातनिविड़ापरः। पीनोन्नतगरीरस्तु रक्तकोकनदच्छविः। आयतेन तु दन्तेन करेण सुखशोभिना। पीयूषपिङ्गदन्तो हि गजःकौवेर उच्यते। तरुणाम्बुदसंकाशोद्गतप्रभविषाणभृत्। संपूर्णकण्ठपादस्तु संपूर्णसमसक्थकः। हृदङ्गध्वनिगम्भीरनादपूरितदिङ्मुखः। आयतेन च हस्तेन सीकरोत्किरणप्रियः। वारुणोऽयं गजोराजन् संग्रामेषुतिपूजितः। कण्ठस्त्रिवलिसंयुक्तः संपूर्णोयस्य दृश्यते। लोचने ताम्रपिङ्गे च दन्तौ केतकसप्रभौ। पादौ च वलिनौ यस्य पीनमात्रसमांसलौ। पृथुलौ विन्दुचित्रौ च कर्णौ चाताम्रपल्लवौ। ऐशानोऽयङ्गजो राजन्! रथकर्मणि युज्यते। तालुन्युरसि वक्त्रे च पक्षयोरुभयोरपि। आताम्रा यस्य दृश्येत च्छाया हृदुतनूरुहा। सौम्यस्तु वित्तेयः कुञ्जरः समरोचितः। अर्चिःपिङ्गल रोमा वः केशैश्च श्वेतपिङ्गलः। पिङ्गलाक्षिविषाणश्च रक्त पुष्करतालुकः। आग्नेयः स गजोज्ञेयस्तेजसाग्निसमप्रभः। राज्ञा बुद्धिमता नित्यं धार्य्यः समरकर्मणि। कृष्णवर्णं युताग्राणि सुस्निग्धांसि लोचने। निर्धूमाग्निसमच्छाये सूक्ष्मस्निग्धे करत्वचा। कायश्च पीननासःस्याद्दीर्घे वायुसमः शुभः। राजन्! वायव्यमिच्छन्ति तङ्गजं शास्त्रकोविदाः। संख्ये नियुक्तश्च गजोनागयेद्रिपुवाहिनीम्। निरङ्कुशत्वं चपलत्वं तस्य दोषद्वयं भवेत्। निरङ्कुशत्वं शमयेत् प्रयोगास्त्रासनादिभिः। चपलत्वं च तथा नित्यं सुकुमारक्रियादिभिः। रोमाण्यञ्जनरूपाणि नखाः शङ्खसमप्रभाः। निस्त्रिंशविमलच्छायः स भवेद्वैष्णवोगजः। स वैरिणं जयेद् राजन्! रिपुसैन्यविमर्दनः। कुम्भवक्त्रः कटौ यस्य निस्त्रिंशघनसंनिभौ। विन्दुभिश्चित्रितं तं यस्य स विचित्रश्रवो गजः। तेन संग्रामकर्माणि कुरुते यो नराधिपः!। नित्यं चारिजयं तेन स राजा फलमश्नुते। सुदन्तो दीर्घहस्तश्च दृढदङ्गुलिपुष्करः। घनमांसशरीरश्च कूर्म्माकारोहि सत्तम!। सांग्रामिकोगजोह्येष जीवत्यपि समाश्रितम्। संग्रामविजयो नित्यं प्रतापजननक्षमः। महाशिरा महाकायो महामेढ्रो महाकरः। महादन्तोदरश्चैव महानागोवरासनः। महानेत्रो महौष्ठश्च महाकर्णोमहासुखः। महामदो महाकण्ठोभवेत्सांग्रामिकोगजः। यद्गजलक्षणं पूर्वसूक्तं नृप! तच्छुभमेव हि। मन्दस्यापि हि यस्तं स्यादाद्यावेतौ च महागजौ। संपूर्णलक्षणोपेतो न भवेच्च महीतले। अनयोरेव भेदास्तु नागानां बहुदाहृताः। सांग्रामिका द्विपा राजन्! शुभलक्षणलक्षिताः। कथितास्तव तत्त्वेन राजसौख्यकरागजाः"। आभिषेचनिकगजलक्षणं तत्रैव। "पीनमांसचितांसश्च कूर्म्माकारनखस्तथा। समवर्त्तितसांसस्तु सुदृत्तः कल्पनापरः। लागकुक्षिः सुपार्श्वश्च रोमाणाढ्यसमन्वितः। ज्वलनोज्ज्वलनेत्रस्तु सुविषाणो महाकरः। संपूर्णचिबुकश्चैव क्रमायामोरयान्वितः। बलसत्वसमायुक्तः स्निग्धच्छविमनोरमः। सांग्रामिको भवेद्राज्ञ आभिषेचनिको गजः"।

तत्रैव पालकाव्ये गजहृदये। "आयुः सविंशति शतं मानं स्यात् सामजन्मनाम्। राजपुत्र! दिशाम्येवमायुष्यादि दशादश। लक्षणानि वदे तेषां श्रेयांस्येवं विधानिनाम्। लक्षणालक्षणं श्रेयमायुष्यादिदशाफलम्। श्रेयांसि हस्तौदन्तौ शीर्षं च चक्षुषी। कर्णौ ग्रीवा च गात्रञ्च वक्षः कार्य्यस्य भेदतः। लक्षणं सङ्गिकटं यद्विप्रकटञ्च यद्भवेत्। मतङ्गजबलोपेतं प्रभूतञ्च मनीषिभिः। तत्रे कुले वने जातौ प्रचारे वस्तु लक्षणम्। दशायाञ्च तदाख्यातं

प्रभूतमिति सूरिभिः। दक्षिणद्क्षिणाङ्गं च इस्तिनः पुरुषदं मतम्। तथा वामं च वामाङ्गं इस्तिनोऽफलदं मतम्। लक्षणं दक्षिणाङ्गोत्थं फलं भूमिभुजां मतम्। महद्वाक्यं भवेद्यच्च लक्षणं तन्महाफलम्। यदल्पमप्रकाशञ्च तदल्पफलदं मतम्। मध्यमानफलं मध्यं लक्षणं तु समादिशेत्। शुभाशुभेन मिश्रेण बहुत्वेनादिशेत् फलम्। कदाचित् शुभदं चास्य गजानामप्यलक्षणम्। शुभकर्माणमासाद्य राजानमथ वा द्विजम्। यथा हि सर्वसरितः समुद्रं समुपेत्य हि। स्वरसेन विशुध्यन्ते भवन्ति लवणाम्भसः। एवमासाद्य भर्त्तारं बहुलक्षणलक्षितम्। भवन्ति बाधितानोह दुर्लक्षणफलानि च"। इत्युपक्रम्य गजदेहस्थानविभागनामभेदस्तत्रैव दर्शितः। यथा "विषाणयोर्यस्थिर्यक्स्थादायताग्रो यद्दोऽपि सः। किविवा च यद्दस्याधःकुम्भोपरि च बिम्बकः। अथ यद्दोपरिस्थोऽपि पुरष्करोऽपि भवेत्तथा। तथा यद्दोपरिस्थे च किविदोपरिभागके। वाहितोपरि केशाग्र मस्तकं च तथा मतम्। स्थातां मस्तकपिण्डौ च मस्तकस्थ बिन्दुकः। तथा बिन्दूपरि स्थातां वितानौ बिन्दुपार्श्वतः। ततोऽन्तरवितानं च पृष्ठं तत्र विनिर्दिशेत्। बिन्दुवितानयोश्चान्तः पुरस्तात् पाकिलौ किल। नीचे मस्तकपिण्डाद्वि वितानबिन्दुपाकलः। निर्यांसं च वितानोर्द्धं कर्णौ वापि ततः कटौ। कटयोः श्रोतसी वापि कटस्रावस्रयोरधः। पृष्ठतः कटिसंधी च गण्डौ च कटयोरधः। कटगण्डान्तसङ्गागे घाटसन्धी च घाटके। घाटसन्ध्युपरिष्टाच्च कर्णसन्धिसमीपगे। अवखे गात्रगण्डाधःकपोलौ च तदन्तरे। रोमकूपौ च पादौ च कपोलाधस्तथा मतौ। ततः सगदसन्धी च सगदान्तरमत्र च। आसगदात् हन्वर्धः प्रदेशः शिरसोमतः। अक्षिकूटाधुपरि ऊर्ध्वाबुभावुपरि वै तयोः। गुहेवाक्षोऽधरः स्यात्तु नेत्रस्रावौ तयोरधः। अपाङ्गावक्षिबाह्ये च तत्सन्धी चाक्षिपृष्ठतः। पक्ष्मणोर्मण्डले चाथ तत्सन्धी वर्त्म मण्डलौ। वर्त्ममण्डल सन्धी च ततश्च श्वेतमण्डले। श्वेतमण्डलसन्धी च ततः कृष्णे च मण्डले। तत्सन्धी च ततः कृष्णे सत्सन्धी वर्त्ममण्डले। तयोरपि तथा सन्धी प्राग्भागे चक्षुषोरपि। कनीनिके समाख्याते सन्धी तत्र तथानयोः। इत्यङ्गितदेशानां समुद्देशो भवेदिह। किल चित्तौ च कर्णौ च कर्णयोश्चूलिका ततः। तदधः कर्णपिण्पल्यौ बहिके हे प्रदेशगे। कर्णमस्तकसन्धी च पश्चात् कर्णापवर्त्तयः। तदन्तश्च समस्थानावुद्घातौ परिकीर्त्तितौ। कर्णचूलिकयोरग्रे पिङ्गाक्ष्यौ च भाषितौ। पुरस्तात् कर्णपिण्पल्याः कर्णसंवेशचर्मणी। कर्णान्तः कर्णनाड्यौ च तन्वेतां तस्य भागतः। तयोर्वीथिःकबन्धश्च मणङ्गमध्यकर्णयोः। कर्णसन्ध्योरधस्ताच्च तथाधःसन्धिसंज्ञितौ। तदधःकर्णपाल्यौ च प्राक् कर्णोपरितस्तयोः। नाड़ीपार्श्वगतौ चात्र मध्यकर्णौ तयोरधः। अधःकर्णौ समाख्यातौ बहिःकर्णापवर्त्तयोः। पार्श्वकर्णौ बहिःकर्णौ कर्णयोश्च क्रमाद् बहिः। अन्तरान्तरकर्णौ च पर्श्वन्तकर्णपार्श्वयोः। अधस्ताच्चेति भागाः स्युः कर्णयोः करिणोऽपि च। ग्रीवायाः प्राग्भवोभागो ग्रीवा सन्धिस्ततस्तथा। ग्रीवापृष्ठं ततः स्याच्च मध्ये तच्च ककाटिका। ग्रीवापृष्ठे तथाधस्ताद्गलमाडर्द्धिपस्य च। अधःकण्ठस्तयोर्द्धं मन्ये ते गलकण्ठयोः। धमन्यौ कण्ठपार्श्वे च तयोश्चावलिपिण्डिका। गलस्य पार्श्वयोरूर्द्धं दर्दुरौ चात्र निर्दिशेत्। गुहे मन्योपरिस्थातामुपरिष्टात्तयोस्तथा। किविकौ च तथा चोक्तौ पश्चादुपरि चैतयोः। पार्ष्णिघातौ च संख्यातौ पार्ष्णिघातान्तरे तथा। उत्सङ्गावुपरि स्थातां स्कन्धादूर्द्धं तथानयोः। तन्मध्ये पक्षवयोर्द्धमिति ग्रीवांशसंग्रहः। (इस्तिप्रकेन पार्ष्णिभ्यां यौ देशौ हन्यते तौ पार्ष्णिघातौ) गात्रमात्रभायतं च भवेदासनमादितः। तत्पार्श्वयोः प्रतोकागौ तावंसौ च तयोरधः। तदधःप्रत्यंसौ च तथैवांसफले तथा। तदधस्तात्ततोबाहू ततोबाहूत्तरं तथा। अवांगत्र गुहे तत्र बाह्यपृष्ठोद्भवे अपि। अपरे च तदूर्द्धं च तयोस्तद्भाविकौ तथा। पाल्यावधाङ्गादूर्द्धञ्च तयोरावासपृष्ठतः। पाल्यन्ताङ्गपुरस्ताच्च भुजयोरुदितौ यवौ। यवभागोपरि तथा पुरस्तात् फलकोच्छ्रितौ। पिण्डिकाधश्च वेमाख्यौ विशेषौ यवयोरधः। उत्सङ्गौ च विशेषाधः प्रहौ चापि तयोरधः। तत्सन्धी च ततः पर्व्वसन्धानौ तदधोमतौ। तदधः पाणिपादौ वै कूर्चौ चात्र तयोरधः। तदधोनखकूर्चाश्च ततो नखशिखा दश। पुरःपुरोनखौ नाम्ना सनखौ चैव विस्तृतौ। तत्पश्चात्, नखग्रीवा विशेषाः पार्श्वतोनताः। अन्तःपार्श्वबहिःपार्श्वे स्यातां पार्श्वनखेषु च। कथाश्च राजयशात्र पादनाड्यविकास्तथा। तलसन्धी ततः स्यातां तले च तदनन्तरम्। तलप्रदेशपुरतस्तत्परा नखवृन्दतः। तलकर्णौ ततः पश्चात् तलप्रहौ ततःपरौ। तलयोरन्तरं चैव हृदये च करोरके। किंविनोराजयशेति तलसङ्गाविका अपि। पल्लहस्तौ ततः स्यातामनन्तर्बाहू ततोऽन्तरे। बहिर्बाहू बहिश्चोर्द्धं गात्रं सर्वं ततोऽपि च। स्कन्धौ गात्र

प्रहोर्द्ध च कक्षयोरन्तरं ततः। इति प्रदेशा गदिता गजानां गात्रगोचराः। कण्ठस्थान्तर्मणिः पूर्वं स्रोवापर्वं समाश्रयः। उरोमणिः समाम्नातस्ततः स्यादुरसः स्थितिः। याऽधोभा पार्श्वगा तत्र गात्रसन्धिसमाश्रिता। आवर्त्तमणिरुक्तस्तत्र विज्ञो भास्करसङ्गतः। ततः सन्धिकरस्तु स्यात्तस्याधः स्तनयोः पुरः। मातयोरन्तरं चापि चतुरङ्गान्तरं भवेत्। अधःस्तनौ च स्तनयोरन्तरे चाथ चूचुके। स्तनान्तौ स्तनकूर्चौ च क्रोडिको चापि कूर्चके। चतुरङ्गान्तरालं च भवेद्वृषणयोरधः। स्तनयोरुपरिष्टाच्च पुरस्तात् स्तनयोर्भवेत्। हृदयं चास्य पार्श्वस्थावायामौ च बहिस्तयोः। स्यातामायामकाण्डौ च तदधोविवरौ ततः। ततः क्रोडं पदाधस्तात् पश्चाद्यामकाण्डयोः। रन्ध्रे चापरवस्तिश्च स्तनयोरुपनन्तरम्। जठरे नाभिरित्येते प्रदेशाः किल वर्णिताः। आपराङ्घ्रिपरःशेफोरेतःस्रावाधिः स्मृतः। ततोऽण्डकोषसन्धिः स्यात् कोषसन्धिश्च शेफतः। क्रमान्मेहनमत्र स्यात् मेढ्रसंज्ञो भवेदपि। आनिर्गमात्तथा तस्य वाङ्क्षपार्श्वगतौ मतौ। अग्रतस्तत्र कक्षदं तस्यान्त्री पार्श्वयोरपि। मेहनस्य पुरःस्रोतो वङ्क्षणौ कोषपार्श्वगौ। अपरान्त्रविणौ शुक्रे तथा वङ्क्षणमध्यगे। इत्यण्डकोषभागाः स्युः क्रमादासनमुच्यते। तदन्त्रासनमुद्दिष्टं वक्रवंशस्य पृष्ठतः। भवेदपरवंशश्च ततोन्यच्चाधः आसनम्। पश्चिमासनमप्यस्य पृष्ठतः परगस्य च। अत आस्त्रिप्रदेशश्च ततो वंशश्च वालधिः। (आस्त्रिरासनम्)। आश्वेत्यभिधानाच्च भागाः पश्चात्रिवादिनः। स्यातां च तत्पदाधस्तात् पत्तसन्धी तथा ततः। स्याताञ्च पत्तपार्श्वे च गर्भूकाच्च क्रमादपि। पत्ताधोनन्तरौ चानुकूची पत्तसमाश्रितौ। निष्कामौ मध्यगौ तत्र शङ्खचक्रोर्द्धमध्यतः। कक्षाभोगौ काकपक्षौ शङ्खच्छायाकरौ ततः। उत्कटौ कुक्षिपक्षाच्च त्रास्थिपार्श्वगतावपि। कालकोत्कटदेशानां पालवंशश्च पार्श्वयोः। कालके पिण्डिके चाधो विद्याद्वापरयोः स्थिते। उत्कटपिण्डिका त्रास्थिस्थानमेवालम्बनम्। जघनं परतोऽस्याच्च एवं कालवका दश। भवेत् पायुश्च पायोस्तु गुदमभ्यन्तरं तथा। बहिर्गुदस्य वर्त्म स्यात् गुदान्तः कन्दरं विदुः। विलपायुन्तरे कक्षौ तथा पिण्डिकयोरपि। अधस्तादन्तरे किंचिन्यन्तरे तस्य संस्थितिः। पिण्डिकाधश्च मण्डूकावष्टोली पिण्डिकान्तरे"। अवयवप्रमाणभेदात्तथैव। "पिण्डिकारत्निकामाना शुष्करोऽपि भवेत्तथा। कर्णसन्धिर्भवेच्चापि तच्चारत्निप्रमाणतः। कर्णावर्त्तौ पाल्यौ च स्यातां हस्तसमच्छ्रितौ। कर्णश्रीश्च तथा विद्याद्विस्तारे द्वादशाङ्गुले। कर्णाग्रावपि हस्तौ द्वावायामपरिणाहतः। कर्णवर्त्तिं विद्धि कर्णप्रमाणेन च रत्निकाम्। शिरः आसनसंदिष्टं मानेन त्रिकहस्तकम्। शिरस्तु प्रमाणेन स्यात् षड्ङ्गुलमासनात्। आसनेन समं शीर्षं कल्याणकरमित्यपि। यत्रासनं च नीचेन शिरसः स्यात् षड्ङ्गुलम्। अवाग्यो नाम स प्रोक्तो गजोनिन्दितलक्षणः। शिरो यस्य भवेदुच्चमासनाद् द्वादशाङ्गुलम्। सोऽभ्युद्यताभिधानेन लक्षणादासनं भवेत्। आसनं वङ्क्षणोद्देशाद् याहच्च पत्तभागतः। मङ्क्षसमानफलक उत्कटोऽवस्थितोऽपि च। अष्टौत्येवं समाख्यातं लक्षणादासनं भवेत्। हस्तहृदयप्रमाणेन प्रेचकात् पश्चिमासनम्। द्वादशाङ्गुलनिम्नं स्यादासनात् पश्चिमासनम्। सार्द्धहस्तत्रयं चाधः प्रमाणमपि बालधेः। सप्ताङ्गुलप्रमाणेन पायुश्च परिमण्डलः। अरत्निपरिमाणेन विदुस्तद्गुणान्तरम्। अरत्नितोऽधिकं यस्य विस्तरेण स्तनान्तरम्। तिर्य्यग्योमचयं गात्रमरिभ्यः शोकदोगजः। अरत्नित्रयमानेन नाभिदेशस्तनान्तरम्। नाभिश्च मूलकोषश्च गुदारत्न्यर्द्धमानतः। अण्डकोषश्च हस्तार्द्धप्रमाणेन समन्वितः। हे चारत्नी तथार्द्धं च कोषमानं भवेदपि। सोऽर्द्धहस्तहृदयायामोहस्तानाहयुतोमतः। प्रौढे तु परिणाहः स्यादरत्निद्वितयं तथा। हस्तयोरार्द्धमानं स्यात् चतुर्भागेण संयुतम्। तस्य पार्श्वतः प्रौढावरत्निप्रमितौ मतौ। चतुर्भागयुतारत्निर्भवेद्वस्तलोपरि। अष्टाङ्गुलप्रमाणेन स्यातां ततः पुरोनखौ। सप्ताङ्गुलापनखः पार्श्वे पञ्चाङ्गुलानखाः। चतुर्विंशत्यङ्गुलश्च भवेद्बालापरे तथा। अपराभ्यां भवेदूनस्तिररत्न्यर्द्धेन मानतः। अरत्निश्च तलायामोभवेच्च करयोरपि। सप्ताङ्गुलास्तु वैगोधाः पाल्योः पार्श्वनखास्तथा। पञ्चाङ्गुलाश्चाङ्गुलाश्च नवापि नखा मताः। इत्यङ्गमानं नागस्य दिङ्मात्रमिहदर्शितम्। समाङ्गा अपि माताङ्गा दृश्यन्ते दुःखदाः क्वचित्। दृश्यन्ते विषमाङ्गाश्च क्वचित् कल्याणदायिनः। तस्मात् प्रमाणं केषाञ्चिदप्रमाणतया मतम्। प्रमाणं ज्ञातमाचार्यैः सर्वलक्षणवेदिभिः। अथाङ्गसङ्गमात्तावत् मातङ्गानां गुणागुणाः। भूयोऽन्यगुणदोषाभ्यां प्रसङ्गात् कथिताः पुनः। उपरिक्रमतो ह्रस्वो नातिस्तब्धोऽस्थुदुस्थितिः। हस्तस्निग्धाग्ररोमा च लोहिताङ्गिपुष्करः। सर्वव्यक्तप्रमाणश्च गजः कल्याणकारकः। भाग्यप्रदो बालहस्तस्तवाततनूरुहः। अर्वदो हीनविन्दुश्च गजो दुःख-

प्रदो मतः । द्विपास्यकरा ह्रस्वा हीनपार्श्वाच दर्द्विदाः । पुष्करं हीनमध्यञ्च विद्याद्वर्त्तृविनाशनम् । युक्तमाने निगाढे च निर्मलश्रोतसी शुभे । सुसमाहिते च स्नातासुत्पलायतसमद्युती । उन्नद्धौ क्रमसद्धौ च स्निग्धावश्युदितौ समम् । दक्षिणौ च समानौ च प्रहारप्रगुणच्छवी । ततः प्रदक्षिणावर्त्तावुदात्तौ दन्तिनां रदौ । करस्य गाढतो चापि श्वेतास्थिसदृशद्युती । विषाणे च तथा स्नातां चापार्श्वे वारणस्य च । वो दक्षिणैकदन्तस्य श्रिया त रहितो गजः । वामैकदन्तो दन्ती च दुःखदः सादिनोमतः । दशां प्राप्य चतुर्थीं च द्वितीयां यस्य न द्विजौ । स्थूलावनायतौ स्नातां स मूढो नाम दुर्गजः । ऊर्द्धसंस्थानवक्रौ च प्रतिमानगतौ न वा । युयुत्सामिव कुर्व्वाणा यस्य बाह्याः सदुर्द्दिपः । दन्तौ हलोपमौ यस्य दीर्घौ पार्श्वेन चोन्नतौ । दक्षिणेन विषाणेन वामदन्तदरन्तथा । कारवेद्यस्तु मातङ्गो वामदारी स वै भवेत् । तथा दक्षिणदारी च दक्षिणदरणं तथा । वामेन कारवेद्योदो यातः स्वामिनएव सः । तथा हलविषालेन दन्तेनैकेन दन्तिनः । स्थूलेनाखर्वदीर्घेण दुःस्थिताश्योऽपि वर्ज्जितः । अन्तर्नताभ्यां सहन्तः कुदन्तोऽपि नतावधः । कूपे वामोन्नतिश्चापि रदाभ्यां द्विरदः क्वचित् । दन्तदर्वासमाश्यो हि द्विरदो मध्यलक्षणः । वर्त्तिनतौ हस्तलक्ष्यौ रदौ यस्य स दुर्गजः । कृष्णायतौ रदौ मूले विनर्द्दिन्ति मदागतिम् । श्यामलाकार रदनार्पन्थिमङ्गनासाधा । दुर्जाता विषमा वक्रफलकाच कृशास्तथा । आतदीर्घातिहस्वाच वदनेनाधशंसिनः । त्रिरत्निमितमेढस्य पञ्चरत्निमितोरदः । यद्दिन्तोत्तुकथितो राजपुत्र ! मनीषिभिः । प्रपूर्णं प्रतिमानञ्च ताराभं वर्ज्जितम् । सूक्ष्मबिन्दु समानद्धं मृदुत्वक्कायरोमयम् । स्नायतं पृथुवाहित्वं सर्व्वगात्रसमाहितम् । रक्तौष्ठतालुदयनविलग्नसुस्वरस्थितिम् । तं राजा वर्जयेत् युद्धे शुभलक्षण वर्जितम् । बालार्कसदृशे यस्य हरिवर्णविलोचने । मनःशिलाप्रभे वापि हर्यक्षोऽसौ सुभिक्षदः । पद्मापाङ्गे च विपुले सुप्रसन्ने सितासिते । यस्याक्षिणी सचाक्षिभ्यां विभक्ताक्षो हितप्रदः । यस्य तङ्गे च नयने महती दृष्टिमण्डले । स्निग्धनिर्मलवर्त्मे च तारकाढ्यः स सम्मतः । यस्याक्षजः समाभासे दृत्ताकारे विलोचने । पारावताक्षं नागं तं प्रशंसन्ति शिवप्रदम् । क्षुद्रे नात्यायते नेत्रे प्रसन्ने सूक्ष्मदर्शने । यस्य स्नातां सचाध्यक्षो वारणः शुभलक्षणः । ऐपद्वैरिकसङ्घाते दृश्यते यस्य चाक्षिणी । ध्याङ्क्षाक्षः स विनिर्दिष्टो दुर्भिक्षारिभयावहः । कृष्णापाङ्गे शुभे नेत्रे कांस्यसदृशसप्रभे । यस्य स्नातां भवेच्छावं नृकराक्षः स गर्हितः । समन्ततो नोपचिते संकुटे च मनागुन्नतौ । प्रौढाक्षिकूटौ यस्यापि विध्वगक्षः स दुर्भगः । वैधव्याद्विषमप्रेक्षो नेत्रो हरितया दृशा । तथा निष्प्रभया दृष्ट्या वर्ज्जितः कालपिङ्गलः । तन्द्रीयस्यानुदृश्येत विरूपं विषमं तथा । तथैव तिर्य्यग्दृक् हस्ती तिर्य्यक्प्रेक्षी स दूषणः । अधःप्रेक्षी च यो यः स्याद्दुर्गामिविलोचनः । सदृशो वभ्रुमार्जारप्रभृत्यमतचक्षुषाम् । स स्यादनिष्टदृक् हस्ती तिर्य्यक्प्रेक्षी च दूषणः । अधःप्रेक्षी च सक्षेयो दुर्दुर्गामिदर्शनः । दृष्टिः स्निग्धा प्रफुल्ला च सुस्थितामलतारका । ऊर्द्धपक्ष्म प्रसन्नस्य वारणस्य विलोक्यते । उदयतारको नाम्ना साम्ना पार्श्वविसर्पिणी । विस्तब्धाचलपक्ष्मा तु कुपिताऽनेकपस्य दृक् । सर्वाङ्गलक्षणेष्वेषोऽपि चतुर्लक्षणसत्तमम् । इत्येवं लक्षणज्ञानां पूर्वेषामनुशासनम् । प्रयत्ननेत्रे हिरदे न्यूनाङ्गाधि पश्यति" मतङ्गादिलक्षणन्तु प्रायेण वार्हस्त्योक्तलक्षणसमभिव्यक्तत्वोक्तं यत्र विशेषस्तदुच्यते । "एकरूपप्रजातानि स्निग्धानि च मृदूनि च । रोमाणीष्टानि रोम्णाञ्च प्रेक्षको दक्षिणाङ्गजः । लाङ्गूलस्यैव रोमाणि दृश्यन्ते यस्य हस्तिनः । संहतानि विचित्राणि स पूज्यो वारणोत्तमे ।"

करिणो वामनत्वादौ कारणान्तरं तत्फलञ्चोक्तं तत्रैव "वायुकाशगुणाधिक्यपृथिवीगुणसर्ज्जनात् । जायते किल मातङ्गः कुब्जो वा वामनोऽपि च । यतो भूतगुणोऽन्योन्यमधितिष्ठति मानतः । तेनैव जायते खर्वो दन्तीति मुनयो विदुः । हीनाङ्गोऽङ्गविकारी स्यादधिकाङ्गोऽधिकं हरेत् । राष्ट्राक्षिती भवेतान्न खञ्जकुब्जाविति स्थितिः । आयामानाच्च संयुक्तो हस्वाकारो हि वामनः । नतोव्यन्तरनिर्यासो महास्थिसगदोऽपि च । अस्थिस्नेतौ च हस्वौ च दन्तौ यस्याश्रितौ करम् । स त्रासयित्वा राजानं हत्वा वाथ पलायते । हस्वभेदाङ्गुलिकरः क्रोडाश्रिस्नेतरोमयुक्तो कपिकौशिककाकाक्षिनकुलप्रख्यलोचनः । कालपिङ्गलनेत्रश्च तत्र्वाननहनुस्तथा । वल्गा समाननिर्यासः प्रलम्बपृष्ठपेचकः । मण्डूकाभरुचित्वक् च सान्द्रानलसमोऽपि च । परिमण्डल कर्णश्च खट्वाङ्गशिवध्वजः । प्रौढोन्नताक्षि कूटाक्षः सकिलासाङ्घ्रिमेहनः । व्यालदृत्तवगन्तव्यो निर्मदो दन्तिदूषणः । सबली यस्य संदानौ प्रौढौ चापि कदाचितौ । चिबुके चावतस्थूले व्रणैश्च तनुराविला । अधोवक्त्राणि रोमाणि

हनू च क्षरोमणे। सुदक्षाक्षतयः पादा डिम्बइत्यपि विश्रुतः। आस्यौष्ठावसुरसनाः काल कल्माषकान्तयः। कर्णौ कवाचितौ नूनौ ताम्रवर्णश्च बालधिः। कराभिप्रेषणासक्तौ मानोनाङ्गुलिपुष्कले। स्थूले च पक्ष्मणी नेत्रप्रभे दुष्प्रेक्ष्ये तथा। दुर्बद्धानि तथाङ्गानि बलीमुखनिभं मुखम्। रेषुद्विरेफाकुरूपा मणिकाभिश्चिताकृतिः। अरक्तिमानौ दन्तौ च शुष्कावप्यनिमूढितौ। कर्णौ च कठिने यस्य नीलगोपक विद्युति। विवर्णं कठिनं रूक्षं भिन्नमिश्रतनुरुहम्। नपुंसकश्च मातङ्गो स दूरे त्यागमर्हति। सङ्गिसारागभावेन यत्तत्तुर्वानरोपमा। स पूतनोऽग्निभयदो यूथहा परिवर्जितः। तिर्यक्प्रेक्षी चाधःप्रेक्षी दुर्गन्धमदसंयुतः। कालपिङ्गोदरोनेष्टो मातङ्गः स्यात् मतङ्गजः। पुष्करे स्तनमध्ये च वामहस्ते मतङ्गजः। किलासैराहतः स्याच्च तद्दाढ्ये दुर्नयं दिशेत्। पश्चात्समुत्थितावापोनिम्नमीलितलोचनः। बाह्यित्यसंक्षिप्तसुखोनिबद्धाक्षो मतङ्गजः। नूनं विंशतिवर्षश्च दन्तौ यस्य प्रमाणतः। अतिमात्रौ न वै स्यातां नागोनागसमस्तु सः। क्षीणातिरिक्तदशनो यस्य वै तस्य स्वयुद्दः" इत्यवयवदोषाः।

"अथ वर्णस्तथावर्त्ताः पुष्पाख्याभा क्षरोमतिः। बलं सत्वमनूरुक्षं गन्धोवोधितमिश्रितम्। स्याद्भूतगुणवैशेष्याद् वर्णवैशेष्यमेव हि। वातादिभ्योऽपि दोषेभ्योवर्णवैशेष्यमिष्यते। रौक्ष्यं परातिरेकेण सर्वं वातस्य वैभवेत्। सोष्मता शोणितात्, पित्तात् रौद्रता, सौम्यतेन्दुजा" इत्युपक्रम्य "कफो गर्भगयानस्य स्निग्धतां प्रतिपद्यते। पित्तं गर्भगयानस्य स्वच्छत्वं प्रतिपद्यते। तत्करी कथितः कालस्तथैव स्निग्धदर्शनः। पित्तं कफश्च युगपद् वेविष्टि तु ततस्ततः। श्यामवर्णोऽपि मातङ्गो जायते स्निग्धएव वै। गर्भे च मांससहिते कफरक्ते यदा स्थिते। चिरं गर्भगयानस्य हरिस्निग्धस्ततोऽथसौ। रक्तपित्तकफानाञ्च सङ्करत्वगतौ तथा। हरितारुणपीताद्या नानावर्णा भवन्ति हि। सर्वत्रानुगतेन मीलनाद्भूज्ञता भवेत्। पारुष्यं धूसरत्वं च सुस्निग्धत्वं भवेत्तथा। क्वचिद्वर्णविभेदाय पूर्वसम्भवकारणात्। यच्चनवत्वचाराच्च पित्तबीजवशात्तथा। तत्रापि श्वेतवर्णाश्च शुक्लवर्हिसमत्विषः। शुद्धहेमरुचश्चेभाः सुरेषु प्राचि च क्वचित्। रक्ताक्ष्यन्त हरयः कृष्णाः श्यामाश्च करिणः स्मृताः। हरिबन्धुकवर्णश्च कृष्णाञ्जनसन्निभः। न कालो न हरिर्नागोभ्राभः श्याम इष्यते। एतेषु त्रिषु वर्णेषु हरिवर्णो-वरोमतः" । इति वर्णभेदकारस्यादिनिरूपणम्।

"आवर्त्ताः षड्विधश्चैव त्वग्जोद्गमनभङ्गजः। कोषजः पक्ष्मजातश्च बालजो रोमजोऽपि च। कोषरोमभवौ शस्तौ दन्तकल्पनजः शुभः। शोकानर्थप्रदाः प्रोक्तास्त्वग्जपक्ष्मजबालजाः। भ्रूमिदोरोमजावर्त्तः कोषावर्त्तोजयप्रदः। दशनसम्भवावर्त्तः सुतदारप्रदस्तथा। कथितः पक्ष्मजावर्त्तोऽतिजातभयप्रदः। अग्रकङ्कालजावर्त्तः सामन्ता रोमसम्भवः। अग्रस्तोदक्षिणावर्त्तोवामावर्त्तो विगर्हितः। मतो व्यक्तो स्निग्धः सवर्णः पोतरोमजः। वामाङ्गे दक्षिणावर्त्तोवामावर्त्तश्च दक्षिणे। आवर्त्तः सम्मतोऽभीष्टो द्विजराजसमप्रभः। शुभोऽप्यचेलजातोऽसौ शुभं नैव प्रयच्छति। अशुभचेलजातश्च नानिष्टफलदः शुभः। अवश्यके यकृतले स्तनयोरन्तरे तथा। ग्रीवाया मस्तिकूटोर्द्धं कुम्भयोरन्तरे तथा। उत्पले दन्तवेष्टे च कर्णमध्ये च वक्त्रे। आवर्त्ता वारणानां हि सुनिष्टेयाः शुभप्रदाः। स्तनान्तरे शिरोमध्ये कुम्भान्तश्चूलिकान्तरे। वक्षस्यावर्त्तसम्भवः कुञ्जरः पद्मभङ्गजः। ग्रीवावर्त्तोऽभिषेकाय स्तनावर्त्तोजयाय च। सुखाय चूलिकावर्त्तः कुम्भोरोरोमजः प्रिये। बंधे प्रौढेऽथ बाह्यित्ये मन्यास्थ सगदे कटे। कर्णोऽक्षिकूटे नाभौ च कक्षपक्ष्मांसकुक्षिषु। बालधौ पेचके मेढ्रे रम्भ्रुवन्धिकलासु च। आवर्त्ता न प्रशस्यन्ते कर्णभागगताश्च ये। कोषप्रमाणलघवोमर्मपर्वप्रदेशगाः। अशुभचेलजाताश्च सकिलासान्तरोत्थिताः। मनोनेत्राभिरामो हि सुहृच्छोभदितो महान्। ऊर्ध्वाग्रस्तोदीर्घश्च रोमजोऽथजयावहः। मर्मभागेषु नागस्य निष्टास्ते रोमजादयः। समभागगतावर्त्ताः सर्वतः सुखदामताः"। इत्यावर्त्तः।

"स्वस्तिकादिसुसंस्थानं पुष्पं दर्शनदेहजम्। स्निग्धं भवेत् शुभच्छायमच्छिन्नं वाञ्छितप्रदम्। कबन्धादिकसंस्थानं विषतन्तुसमं स्फुटम्। रूक्षं क्षणञ्च कुसुमं तातानर्थकसंचक्रम्। दद्यात् सुतं सितं पुष्पं स्निग्धपीतञ्च हेमदम्। नीलोत्पलाभं नीलाग्रं स्निग्धकालञ्च हस्तिदम्। यदि स्यात् पूजिते भागे कुसुमं स्निग्धपाण्डुरम्। सुरधापसमाकारं तदुभनेदृभूभुजः शुभम्। शक्रचापनिभं पुष्पं दन्तोपरि च दन्तिनः। दिशेदिष्टं सुमित्रं च क्षेमं च क्षितिरक्षिणः। स्तनान्तः स्निग्धरूक्षे च पुष्पे नाम सभे तथा। पुष्पे श्रोत्रान्तःकाले च स्वाभिवृद्धिं विनिर्दिशेत्। श्रीवृक्षादिनिभाकारे वैजयन्तीध्वजोपमे। शंखप्रा-

सादसदृशे ऋक्षचामरवीथिभिः । सोमस्तर्क्ष्यसमाभासे शिविकायानमूर्त्तिभिः । दिष्टे शुभाय नृपतेर्निन्द्यमहिसमाऽऽति । ऋक्षव्यादनिभाकारं रणापसरकारणम् । धूमाभं पुष्पमिच्छन्ति सत्त्वेऽग्निभयाय च । कृष्णं पुष्पं तथा नेष्टं द्विषद्रोगविवर्द्धनम्" । इति पुष्पम्

"भूखाम्बुमरुज्जाता भवेच्छाया विषाणिनाम् । यक्षा भूजलवह्न्युत्था न यक्षा खानिलोद्भवा । छायायाः सम्भवः पूर्वं, परतः परितः प्रभा । छायायाः सम्भवः पूर्वं प्रभा तत्परमश्नुते । वर्णमात्रश्रिता च्छाया प्रभा वर्णस्य नाश्रयः । लक्षणानि तु नागानां पापानि च शुभानि च । छायावशात् फलन्त्येव छाया तेनातिलक्षणम् । यस्य स्यालक्षणं भद्रं छाया भद्रा भवेच्च तु । न चासौ शुभदोहस्ती छायोपहतलक्षणः । पापलक्षणयुक्तोऽपि शुभच्छायायुतो गजः । फलं लक्षणजं हित्वा छायाफलमवाप्नुयात् । नीराजनेऽभिषेके च ध्वजोच्छ्राये रणोदये । तेषु तेषु च कालेषु भवेच्छाया च शोभना । वक्षसि प्रतिमानेऽसे कुम्भे कर्णे कटेषु च । नियाँणे मस्तकस्थाने वेदयोश्च कपोलयोः । पिण्डिकाजघनाभोगे तेषु तेषु पदेषु च । प्रदेशेषु प्रधानेषु छायाया वीक्षणं भवेत् । प्रशस्ता पार्थिवी छाया वह्निजा जलजापि च । नेष्यते व्योमजा छाया मातरिश्वभवापि च । पार्थिवी स्निग्धगम्भीरा सर्ववर्णे विभाव्यते । छाया स्यात्सा च रक्ता च स्निग्धा जाम्बूनदाग्निजा । छाया नीलाम्बुदाभासा स्निग्धा सलिलसम्भवा । अव्यक्तरूपा तरुजा छाया गगनजा मता । धूम्रा रूक्षा च वायव्या भस्माभा निष्प्रभा तथा । एताश्छायाः परीक्ष्याः स्युर्मातङ्गे राजपूजिते । नीलाम्बुजेन्द्रनीलाभा नीलाञ्जननिभाऽपि च । स्निग्धा पार्थिवी च्छाया सुभिक्षक्षेमकारिणी । बालार्कपद्मकिङ्किल्लयक्तगोपकसन्निभा । ज्वालाभा तप्तहेमाभा वह्निजा विजयप्रदा । छायाम्बुयी पयःपद्मकुन्दरूप्यनिभद्युतिः । सौम्याख्यया प्रतीता च भर्त्तुरर्थप्रदा सदा । जलबुद्बुदसङ्काशा धूम्रद्युतिरतिस्थिरा । निन्द्रा च व्योमजा छायानित्योद्वेगकरी मता । सर्ववर्णेरमेताऽपि निष्प्रभा भस्मसन्निभा । विच्छिन्ना विकृता च्छाया वायवी सा भयावहा । वैरिञ्ची वैष्णवी रौद्री छाया माधवनी तथा । कौबेरी राक्षसी सार्पी गान्धर्वी च तथाऽऽसुरी । पैशाची चेति याम्छाया च्छायादिव्याः क्वचित् शुभाः । मूलोत्पत्तिलक्षणे तासां भेदोनेष्ट तु कीर्त्तितः । तेजोऽतिसक्ता भद्रस्य पाटला भवति प्रभा । छाया रक्तकला रूक्षपद्मपूगनिभाऽपि वा । कृष्णा च मन्दकरिणश्छाया तु मृगहस्तिनः । भल्लिनाम्बरधूम्रेव गोवाणायुधदर्शना" इति छाया ।

"हस्तिनां विविधा ध्यानाच्छिद्रेभ्यः करतोऽपि च । भवन्ति वायुवशतो गात्राणां वेष्टनेन च । प्रयाणेषूभिषिक्तेषु ध्वजे जातिकुलेषु च । नागेषु दुःस्थितं छाद्यं मस्तकाद्ये न जातिषु । क्षुधितोऽत्यन्तनिद्रान्तस्तृषितो दुःस्थति क्वचित् । यदि दन्ती शुभे देशे समये च वशप्रदः । दर्शयेद्दुःस्थितं भद्रं तत्फलं स्फीतमादिशेत् । सरोवरे तथाऽऽरामे गोष्ठे विबुधवेश्मनि । निकृष्टे हृदयदेशे हि विज्ञेयः शुभदोध्वनिः । यात्रायामभिषेके च यज्ञादिसमये तथा । समये चैव युद्धे च दुःस्थितं स्याच्छिवप्रदम् । अश्वस्यादिकाष्ठ वल्मीकदुष्टस्थाने भयप्रदः । सुप्तोत्थे च प्रधूमे च प्रतिश्यायदिनेषु च । अतिग्लौतेऽतिघर्मे च प्रभाते चाशुभोरवः । भूतले न्यस्तहस्तो हि पर्य्यश्रुनयनोगजः । कूजन् निर्ध्वनं कुर्यात् यदि वा नश्यतीश्वरः । करेण दुःस्थितोनागो दुश्चिन्तापरिप्लुतः । आदिशेन्मन्त्रिणोनाशमथ वा दृढनायतेः । व्यावर्तवदनस्तस्य साक्षाद्धोगतच्चक्षुषः । जघने वामतो बालं तथा निक्षिपतोऽसकृत् । (बालं बालधिम्) । निषीदतो लङ्घयतो क्षुद्रोमूर्च्छितः । वामे निक्षिप्य गण्डूषं दुःस्थितं स्यादनेकृत् । खेद्यः स्रवति नागानां घनतां यदि शोणितम् । (क्षेद्यः क्षिद्रेभ्यः)तथा मन्यान्तदेशे च प्राणिनां क्षयमादिशेत् । वह्न्यग्नेवीक्षणोभूत्वा प्राच्यां वाऽर्कोदयं प्रति । दन्ती नीक्षरवं कुर्यात्तदा स्यात् पावकाद्भयम् । करेण यदि मातङ्गो दुःखमाणः स्तनं स्पृशेत् । आलाने लम्बमानस्तु संयुति क्षयमादिशेत् । (संयुति युद्धे) । आलाने लम्बमानस्तु गीत्कुर्वन् कुरुते ध्वनिम् । गात्रं प्रक्षोलयन्नागस्तत: प्रस्थानमादिशेत् । घ्रात्वा करं विषाणस्थं विषमं कूजते यदि । निरीक्षमाणो गगनं कृतां दृष्टिसदाहरेत् । यदाभ्युन्नतवक्त्रोष्ठ स्तनस्थानस्तु जिघ्रतः । तथा कुक्षितलस्तेन सुखं गात्रं च जिघ्रतः । कुर्वतो दक्षिणं हस्तं घ्रनैर्निक्षिपतोऽपि यत् । दुःस्थितं स्यात्तदिष्टस्य तथान्योन्यकरस्पृशः । स्पृष्ट्वा शुभवस्तूनि कुसुमादीनि चेद्द्विपः । कुर्याच्छब्दं शुभं तेन फलं शुभतरं भवेत् । उच्चैरभिमुखः शब्दो यदा नदति वारणः । अरुक्षमध्यमानेन तदा तस्य जयो ध्रुवः । सुखेन संवृतकरान् कर्णाढ्यां दुन्दुभिध्वनिम् । करेण मुरजाकारान् कुर्वन् कल्याणकारकः । कलसादिसमाकारा

विकटान समाः स्मृताः"। इति ध्वनिः। गतिबले तु प्राग्युक्ते एवात्र प्रवेश दर्शिते नातस्ते अत्रोदाहृते।

"सत्वं त्रिविधमिच्छन्ति श्रेष्ठमध्याधमैर्गुणैः। सात्विकं राजसं चापि तामसञ्च विचक्षणाः। एषामपि गुणाक्तेषा बहवस्ते न कीर्त्तिताः। सत्वस्योक्तागुणाः शौर्यं बुद्धिर्धैर्यं सुहर्षता। रजसोवे गुणास्ते च क्रोधोत्साहा वपि क्वचित्। गुणाश्च तमसस्तन्द्रातमोमोहप्रमादिताः। ह्रीमन्तः क्लान्तियुक्ताश्च प्राप्ताश्च चिरजीविनः। क्रियालेशसहाः स्वान्ताः सात्विकाः सामसम्भवाः। चिष्याश्च मध्यसाध्याश्च कीर्त्तितानिर्भयाः क्वचित्। क्रियायोगसहाः किञ्चिद्राजसा मध्यमायुषः। तामसा दुःखिता मूढा विरूपा लघुजीविताः। युक्तोऽन्यगुणैः सर्वैर्युक्तश्चेत् सात्विकैर्गुणैः। श्रेष्ठोगुणः स समरे तथाऽध्वनि मतङ्गजः। एषां वागीयनिर्दिष्टा विषयापेक्षया स्थितिः। भद्रे सन्निहितं सत्वं, रजोमन्द्रे, तमो रूक्षे। देवगन्धर्वयक्षाणां पन्नगासुररक्षसाम्। पिशाचानां ऋक्षाणां हस्त्यं वेद्यं नागस्य वेदितम्"। इति सत्वम्।

"यत् पूर्वसम्भवं खट्टं सत्वं रूपं गतिः स्वरः। तस्यानुकरणात् युक्तमनूकमिति कोविदाः। सत्वरूपजवारावैः शुभानुकारिता शुभा। देवर्षिगणगन्धर्वनागानूकाः शुभामताः। एवमेव च दुष्टानुकृतोदुष्टाः प्रकीर्त्तिताः। दैत्यरक्षःपिशाचानामनूकं परिवर्ज्जितम्। दृषसिंहखरक्रादि समानूकामता द्विपाः। नेष्टाः खरटभादिसमानाकृतियोगिनः"। अनूकम्।

"आस्याच्छिकुम्भकर्णेषु मदनिश्वासवायुषु। शल्लदमधुमूत्रेषु गन्धं सप्तपलक्षयेत्। दृढगन्धान्विषेवेत वारणान् धरणीपतिः। दुष्टगन्धान् सदा भूपोवर्जयेत्। सर्पिर्मधुसुराक्षाजदधिक्षीरानुकारकः। माक्षिकोक्षीरमदिरापद्मकाद्यादिसन्निभः। मालतीकेतकीजातीचन्दनाधिकसौरभः। सुरसालफलामोदोगन्धोनागस्य सम्मतः। अक्षद्रुमूलगलत्पूतिवसाकृष्णपकुत्सितः। पक्षिनीड़पलाण्ड्वादिसप्रतिगन्धविनिर्म्मितः। खरोष्ट्रशुकरसमः प्रक्षयानधूनसन्निभः। सोमसत्कृष्णसत्वस्य गन्धोनागस्य दुःखदः"। इति गन्धः।

"पञ्चधा विदितं स्याच्च विज्ञेयं वारणजनाम्। अल्पोत्तानगभीरप्रत्यर्थान्यवर्धभेदतः। वस्तूहातादुहिजते दूरादंसादि संकुचेत्। अत्यर्थं सहुचेत् स्पृष्टः स गजोऽत्यर्थवेदिता। योऽपि त्वक्स्पर्शमात्रेण रोमस्पर्शवशेन वा। विद्याद्रुग्वाङ्कुशादींश्च स स्वादुत्तानवेदिता। त्वग्भेदात् शोणितस्रावात् तीव्रप्रव्यथनादपि। अङ्कुशादीन् विजानाति स हि गम्भीरवेदिता। शनैर्हतोऽहं वेत्ति शनैर्वेत्ति अहाहतः। विपरीतमतिर्नागो ज्ञेयः प्रत्यर्थवेदिता। प्रत्येति वार्य्यमाणो यो निग्रहीतश्च गच्छति। प्रतिलोमायते संज्ञां सोऽपि प्रत्यर्थवेदिता। शनैर्हतः शनैर्वेत्ति अहं वेत्ति अहाहतः। प्रत्येति प्रतिषिद्धश्च नोद्यमानश्च गच्छति। यथासंज्ञं विदध्याच्च सर्वकर्माणि योऽङ्कुशम्। अन्वर्थवेदिनं प्राज्ञोजानीयात्तं शुभं गजम्" इति विदितम्।

"मतङ्गजेङ्गितं वक्ष्ये शृणु तदवधानतः। शुभज्ञानञ्च येन स्यात् यात्रादिसमये नृप!। अनुयात्रं गतोहन्यात् किञ्चिद्रूपं यदि द्विपः। तज्जयः, प्रतियात्रं तु रूपाहत्वा पराजयः। इडा रिपूनभिसुखान् वार्य्यमाणोऽपि चेद्गजः। प्रजेत्तद्विजयोनूनं यदि वा प्राप्नुयात् वशे। दक्षिणेनाग्रपादेन क्षितिसृत्पाटवेद्यदि। उत्तोलवेद्वामपादं तदा जयसुदीरयेत्। करेण वामहस्तेन यदा पृष्ठीं प्रमार्जयेत्। सिञ्चत्यनेन कर्णौ च तदा सौख्यं समादिशेत्। मेचकं कुटिलं कृत्वा करं जिघ्रति चेत् द्विपः। प्रहृष्टहृदयाङ्गिञ्च तदाभ्युदयमादिशेत्। दक्षिणं तु यदा दन्तं दन्ती प्रहृदितेन्द्रियः। परिपृजति हस्तेन तदा स्यात् प्रियसङ्गमः। तथैव गलसन्निञ्च पुष्करेण पराङ्मुखम्। श्रीयोगसुपयातं तु वारणोविनिवेदयेत्। सङ्कोच्य दक्षिणं पादं वामपादेन वा भुवम्। विलिखेद्वारणः खिन्नस्वङ्गर्त्तुः स्यात् पराजयः। यदा तु दुर्मनादन्तं वामं हस्तेन शोधयेत्। तदात्मनोवदेद्वार्यं यात्रुर्वाय निषादिनः। करेण वामगात्रं च खिन्नगात्रः प्रमार्ष्टि चेत्। तदानिष्टं भवेद्भर्त्तुरन्यथा च शुभं भवेत्। व्यथमानः पतेत् त्रस्तः कक्षबन्धे यदा द्विपः। नाभिनन्देच्च माख्यादि तदा परिभवो भवेत्। अकस्मादेव कुप्यन्ति भ्रमन्ति च पतन्ति च। करिणो यदि तद्विद्यात् विपक्षं सप्तपस्थितम्। यदा पश्यति मातङ्गोविद्रवञ्च पराजयम्। प्रवासं परराष्ट्रं वा तदा भवति दुर्मनाः। अदंशग्रहणपीड़ायां करेण परिवीजनात्। गण्डूपदेशनिक्षेपात् सव्याजमुपसर्पणात्। अकस्माच्च स्खलनात्वा धरण्यां प्रणिपातनात्। जलप्रतारवैसख्यादक्षितभक्षसेवनात्। स्वल्पकर्षतया गत्वा पादाग्रवेगनादपि। द्रुतदद्रादिपीडुत्वादकस्माच्चकरः करी। आत्तयक्षोजलोत्तीर्णोरिपूणां यक्षणं वदेत्" इङ्गितम्।

"जायते द्विविधः कोपः संज्ञासंज्ञ विद्याधिनाम्।

शिष्यक्रोधोऽनीदृशः स्यादनिष्टोऽशिष्यरोषवः। यः क्रुध्यति चिरेणैव मृदुक्रोधो भवेदपि। वाग्दण्डमात्रबन्धेन प्रतिषिद्धो न शाम्यति। अनुशाम्यति रोषाच्च स शिष्यक्रोधसंज्ञितः। इष्यते सर्व्वकार्य्येषु शुभजातिर्मतङ्गजः। यः क्रुध्यत्यचिरेणैव भृशक्रोधो भवेदपि। प्रतिषिद्धश्च वाग्दण्डतोज्झप्रजनकाङ्कुशैः। शाम्यत्येव चिरेणापि रोषादिरतिमेति च। अशिष्यक्रोधसंज्ञोऽसौ वित्तेयो वारणाधमः" इति कोपः। विस्तरस्तु पालकाव्यादौ द्रष्टव्यः।

इभकर्णा स्त्री० इभोपपदा कर्णा शाक०त०। गजपिप्पल्याम्।

इभकेशर पु० इभमद इव केशरोऽस्य। नागकेशरे "इष्टङ्गाटकाम्रयुग्मेभकेशरागुरुचन्दनैः" सुश्रु०।

इभगन्धा स्त्री इभस्य गन्ध एकदेशोदन्त इव पुष्पमस्याः। नागदन्त्याम् सा च स्थावरविषभेदः यथा सुश्रुते "मूलं पत्रं फलं पुष्पं त्वक्क्षीरं सारएव च। निर्य्यासोधातवश्चैव कन्दश्च दशमः स्मृतः" इत्युपक्रम्य "कुसुदतेरेणुकाकरञ्जमहाकरञ्जकर्कोटकरेणुकखद्योतकवर्च्चरीभगन्धा सर्पघातिनन्दनसारपाकादीनि द्वादश फलविषाणि" इति विभज्य "शुष्कश्लेष्मः फलविषैर्दोषोऽन्यद्वेष एव चेति" तद्विकारो दर्शितः।

इभदन्ता स्त्री इभस्य दन्तइव शुभ्रं पुष्पमस्याः। गजदन्त शुभ्रपुष्पवत्यां १नागदन्त्याम्, सा च स्थावरफलविषा।

इभनिमीलिका स्त्री इभं हस्तिनमपि निमीलयति सेवनात् निद्रापयति। १भङ्गायाम्। इभस्येव निमीलिका। २वैद्यप्रसिद्धायाम्

इभपालक पु० इभं पालयति। (माऽऽत) हस्तिपके।

इभपीटा स्त्री पीटा पुंलक्षणा इभी परनिपातः पुंवद्भावश्च। पुंगजलक्षणयुक्तायां हस्तिन्याम्।

इभभर पु०६त०। गजसमूहे [सिंहे।

इभमाचल पु० इभमाचलयति खा+चल-णिच्-घा०ख।

इभया स्त्री इभैर्वायते भक्षतया प्राप्यते या-कर्म्मणि घञर्थे क ३त०। स्वर्णजीरीवृक्षे रत्नमाला इभयेति वा पाठः।

इभयुवति स्त्री युवतिरिभी पूर्व्ववि० पुंवद्भावश्च। युवत्यां हस्तिन्याम् वा ङीप्।

इभास्य पु० इभस्यास्याख्या यस्य। नागकेशरे त्रिका०।

इभानन पु० इभस्याननमेवानन यस्य। गजानने गणेशे तस्य यथा तदाननत्वं तथोक्तं "स्वयं गोलकनाथश्च पुण्यबलस्य प्रभावतः। पार्व्वतीगर्भजातश्च तव पुत्रो भविष्यति। स्वयं देवगणानाञ्च यज्ञादीनां क्षमानिधिः। गणेश इति विख्यातो भविष्यति जगत्त्रये। "अनिद्धा शिरश्छेदात् गजवक्त्रेण योजितः। गजाननः शिशुस्तेन निर्व्वृतिः केन बाध्यते" ब्रह्मवै० पु० ६अ०। अनिद्धा तच्छिरश्छेदकथा तत्रैव १२अ०। "पार्व्वतीवचनं श्रुत्वा सोऽतुमेने हृदा स्वयम्। पश्यामि किं न पश्यामि पार्व्वतीसुतमित्यहो। यदि बालो मया दृष्टस्तस्य विघ्नो भवेद्ध्रुवम्। अन्यथा मे प्रलापस्तत्परतः स्यात्तरक्षम्। इत्यालोच्य च धर्म्मिष्ठो धर्म्मं कृत्वा स्वसाक्षिणम्। बालं दृष्ट्वा मनश्चक्रे न बालमातरं मुनिः। विघ्नमानसः पूर्व्वं शुष्ककण्ठोष्ठतालुकः। सव्यलोचनकोणेन ददर्श च शिशोर्मुखम्। अनिद्धा दृष्टिमात्रेण चिच्छेद मस्तकं मुने!। चक्षुर्निवारयामास तस्यौ नम्रानन मुनिः" एवं शिरश्छेदशङ्का। "तान् सर्व्वान् मूर्च्छितान् दृष्ट्वा चारुह्य गरुडं हरिः। जगाम पुष्पभद्रां स उत्तरस्यां दिशि स्थिताम्। पुष्पभद्रानदीतीरे ददर्श काननस्थितम्। गजेन्द्रं निद्रितं तत्र शयानं हस्तिनोयुतम्। दिशुत्तरस्यां शिरसं मूर्च्छितं सुरतश्रमात्। परितः शावकान् दृष्ट्वा परमानन्दमानसम्। शीघ्रं सुदर्शनेनैव चिच्छेद तच्छिरो मुदा। स्थापयामास गरुडे रुधिराक्तं मनोहरम्"। गजशिरश्छेदशङ्का तत्पत्न्या स्तुतेन हरिणा तस्य कल्पान्तजीवनं वरोदत्त इत्युपवर्ण्य। "आगत्य बालकस्थानं बालं कृत्वाऽथ वक्षसि। रुचिरं तच्छिरः कृत्वा योजयामास बालके। ब्रह्मस्वरूपी भगवान् ब्रह्मज्ञानेन लीलया। जीवनं योजयामास हुङ्कारोच्चारणेन च। पार्व्वतीं बोधयित्वा तु दत्त्वा क्रोडे च तं शिशुम्। बोधयामास तां नाथ आध्यात्मिकविबोधनैः" "सेनाचरीभवद्भिाननदानवारिवासेन यस्य जनितासुरभीरखर्वीः" नैष०। इभवक्त्रेभमुख-गजाननादयोऽप्यत्र। "तं नमामि गजाननम्" माधवः।

इभारि पु० ६त०। सिंहे इभाभिलाषादयोऽप्यत्र। [यङ्लुच०।

इभोषणा स्त्री इभोपपदा उषणा शाक०त०। गजपिप्पल्याम्

इभ्य त्रि० इभं गजमर्हति दण्डा० यत्। १प्रचुरगजादिधनाढ्ये २दक्षे ३हस्तिपके च पु०। "उपस्थिते चाक्रायण इभ्ययामे प्रद्राणक उवास" छा०उ० तस्य भाष्ये इभो हस्ती तमर्हतीतीभ्य ईश्वरोहस्त्यारोहोवेति। "जामिः सिन्धूनां भ्रातेव स्वसामिभ्याद्न राजा वलान्यत्ति" ऋ०१, ६५,३, स्वार्थे कन्। इभ्यकस्तत्रैव स्त्रियान्तत्वे टापि वा अत इत्वम् इभ्यका-इभिका। इभाढ्यायां स्त्रियाम्।

इभ्यतिल्विल त्रि० इभ्यस्तिल्विलः पृषो०। गजादिभिः प्रचुरे आढ्ये। "यदि प्रतीचीयादिभ्यतिल्विल इव धान्यति-

स्त्रिको भविष्यतीति विद्यात्" शत०ब्रा० ४,५,८,११,

इरम्या स्त्री इरमर्हति रेव्यत्वेन दण्डा० यत्। १हस्तिन्यां २शङ्खकीटजे च मेदि०।

इरमदा अव्य० इरम्-इरार्थे-दाच् "प्रत्नपूर्व्विश्वेमात् दाच् छन्दसि" पा० सू० निर्देशात् नि० इमादेशः। इदानीन्तनत्वे। "तं प्रत्नथा पूर्व्वथा विश्वेमथा इव ज्येष्ठतातिं बर्हिषदं स्वर्विदम्" ऋ० ५,४४,३। "प्रत्नथा पुरातनयजमाना इव पूर्व्वथाऽऽदीया पूर्व्वे यथा। विश्वथा विश्वे सर्वे प्राणिनो यथा। इमथा इदानीं वर्त्तमाना यजमाना इव" भा०। "इयङ्क्" यजु०७अ०११च पठिता।

इरयत्तु त्रि० यज+सन उ वेदे नि संप्रसारणम्। यष्टुमिच्छौ "धन्वन्निव प्रापा असि त्वमग्न इयक्षवे" ऋ०१०,४,१, वेदे प्रायेण सर्वत्र नि० संप्रसा०। "शुभ्रं वां रथिरिषणा-वियक्षन्" १,१५२,२, देवानां इयक्षनो यजमान इयक्षति" ऋ०८, २१,११५,

इरयत् त्रि० इदं परिमाणमस्य इदम्-वतुप्। एतावदर्थे "नीतं यदि नवनीतं क्रियदिति यशोदया पृष्टः। इयदिति गुरुजनसविधे विधृतधनिष्ठापयोधरः पायात्" उद्भटः। "इयान् वाव किल पशुर्यावती वपा" ऐत०। "इयन्ति वर्षाणि तपो मयोद्यमम्" रघुः। "इदं निक्षिपतीति विग्रहियता मन्यामहे दुःस्थितम्" सा०द०। अत्र साधनप्रकारः इदम्+परिमाणार्थे वतुप् वस्य यः इदम इश् "यस्येति" पा०प्रकृतीकारलोपे प्रत्ययमात्रस्थितिः। अतएवात्र वैयाकरणा औपनिषदाश्च पठन्ति। "उदितवति परस्मिन् प्रत्यये शास्त्रयोनौ गतवति विलयञ्च प्राप्तेऽपि अपशब्दे। सपदि पदमुदीतं केवलं प्रत्ययोत्थं तदियदिति निगदति कोऽद्य पण्डितोऽपि"। स्त्रियां ङीप्।

इरयत्ता स्त्री कुत्सिता इयत्ता कुत्सितार्थे कन् ह्रस्वः। कुत्सितेयत्तायाम्। ततः अर्थ आ० अस्त्यर्थे अण्। कुत्सितेयत्तायुते अल्पप्रमाणे "इयत्तकं कुसुम्भकस्यकं भिनद्मि" शाङ्गना" ऋ० १,१६१,१५,

इयत्ता स्त्री इयतो भावः तल्। १सीमायां, २परिमाणे, ३संख्यायाञ्च। "न गुणानामियत्तया" "यशः परिच्छेत्तुमियत्तयाऽलम्" "इयत्तया रूपमियत्तया वा" इति च रघुः।

इयस् त्रि० इ-कर्त्तरि असुन् किच्च। १गन्तरि भावे असुन्। २गतौ "तेषां हैयंगवीनस्य किमिहास्ति कर्त्तव्यम्" शत०ब्रा०२, २,२,२,

इर-ईर्षायां कण्ड्वा०यक् च०। इर्यति इर्य्यते।

इरज्-ईर्षायां कण्ड्वादि०यक् प०। इरज्यति। "इरज्यवे प्रयसे जन्तभिरखे रायः" ऋ०१०,१४०,४। "इरज्यन्त यज्युधोविवाचि" ऋ०७,२३,२, यदेषामग्रं जगतामिरज्यसि" ऋ०१०,७५,२। "युवं विप्रस्य मन्मनामिरज्यवः" ऋ०१,१५१,६।

इरण त्रि० ईरिण+अण्०। जघरभूमौ अमरटीका रमा०।

इरम्मद पु० इरया जलेन अन्नेन वा माद्यति वहते इरा-मद-खच् नि० हस्वः मुम् च। १वडवाग्नौ २वाडवानले च। "इरम्मदं हव्यवाहं यदत्त" यजु०११,७४।

"इरया अन्नेन माद्यति उग्रं पश्येत्यादि" पा०नि०"वेददी०। "इहते हवामहे इत्येतदिरम्मदमितीरया ह्येव मत्तः" शत०ब्रा०६,६,२,४।

इरस् इरज्वत् कण्ड्वा०इरस्यति "मात्रयूषन्नाश्च इरस्यः" ऋ०७,४०,६। "यस्या इरस्यसीदम्" ऋ०१०,८६,३।

इरा स्त्री इर्-रक् इरं कामं राति रा-क वा। १भूमौ, २वाचि, ३सुरायाम्, ४जले, ५अन्ने च। "इरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवी रेतसावति" ऋ० ५,८४, १। "इरामस्मा ओदनं पिन्वमानाः" शत०ब्रा०६,६,३३। दैत्यस्त्रियां पत्नीभेदे। "धर्मपत्न्यः समाख्याताः कश्यपस्य वदाम्यहम्। अदितिर्दितिर्दनुःकाला अमायुः सिंहिका मुनिः। क्रूरः प्राधा इरा क्रोधा विनता सुरभिःखशा" इत्युपक्रम्य "इरा दक्षलतावल्लीतृणजातीश्च सर्व्वशः"। अस्त्रतेति शेषः। गरुडपु०।

इराक्षीर पु० इरा जलं क्षीरमिवास्य। क्षीरसदृशे।

इराचर न० इरायां जले भूमौ वा चरति चर-ट ह्रस्वः। १वर्षोपले त्रिका० २भूचरे १जलचरे च त्रि० स्त्रियां ङीप्।

इराज पु० इरा सुरेव अजति क्षिपति अज-अच् न वी भावः। कन्दर्पे हला०। [त्रिका०।

इराम्बर न० इरा जलमम्बरमिव यस्य। वर्षोपले करकायाम्।

इरावत् इरा+मत्वि मतुप् मस्य वः। समुद्रे तत्र भवः अण् ऐरावतः। अर्जुनेन नागकन्यायासुत्पादिते २वीरभेदे तदुत्पत्तिकथा" भा०भी० ६१अ०।

"अर्जुनस्यात्मजः श्रीमानिरावाञ्छाम वीर्य्यवान्। सुषायां नागराजस्य जातः पार्थेन धीमता। ऐरावतेन सा दत्ता ज्ञानपत्या महात्मना। पत्यौ हते सुपर्णेन ज्ञपया दीनचेतना। भार्य्यार्थं तार्क्ष्य जग्राह पार्थः कामवशानुगाम्। एवमेष समुत्पन्नः परमेष्ठेरर्जुनात्मजः। स नागलोके संवृद्धो नाना च परिरक्षितः। पितृव्येण

परित्यक्तः पार्थेहेषाद् रात्मना । रूपवान् बलसम्पन्नो गुणवान् सत्यविक्रमः । इन्द्रलोकं जगामाशु श्रुत्वा तत्रार्जुनं गतम् । सोऽभिगम्य महाबाहुः पितरं सत्यविक्रमः । अथवादयदव्यग्रो विनयेन कृताञ्जलिः । न्यवेदयत चात्मानमर्जुनस्य महात्मनः । इरावानस्मि भद्रं ते पुत्रस्तार्क्ष्यं तव प्रभो ! । मातुः समागमो यत्र तत्सर्वं प्रत्यवेदयत् । तच्च सर्वं यथावृत्तमनुसस्मार पाण्डवः । परिष्वज्य सुतञ्चापि सोत्मनः सदृशं गुणैः । प्रीतिमानभवत् पार्थो देवराजनिवेशने । सोऽर्जुनेन समादिष्टो देवलोके तदा वप ! । प्रीतिपूर्वं महाबाहुः स्वकार्य्यं प्रति भारत । युद्धकाले त्वयास्माकं सख्यं देयमिति प्रभो । बाढमित्येवमुक्त्वा च युद्धकाल इहागतः" ।

"इरावन्तं तु निहतं दृष्ट्वा पार्था महारथाः" भा०भी० ९२ अ० । "पुत्रं विनिहतं श्रुत्वा इरावन्तं धनञ्जयः ।" ९५ अ० । २नदीभेदे स्त्री ङीप् । भा० स०प०९अ० वरुणसभावर्णने । "इरावती वितस्ता च सिन्धुर्देवनदी तथा" "इरावत्यां हतो भोजः काम्बोर्य्यसमो युधि" भा० व० १२अ० "यतद्भुकामहं तीर्त्वा तथा रम्यामिरावतीम्" । भा०क० ४४ अ० । "इरावत्यां महाभोजावग्निसूर्य्यसमौ युधि" हरिवं० १६१ । "इरावती धेनुमती हि भूतं" ऋ०७,९९,३। ४अत्रादियुक्ते त्रि० "यासिष्टं वर्त्तिरश्विनाविरावत्" ऋ०७,४० ५ । "इरावत् इविरन्नादियुक्तम्" भा० । "सुन्दतावन्तः सुभगा इरावन्तोहतप्रभाः" अथ० ७,९०,६ ।

इरावती स्त्री इरां भूमिम् अवति अव-घा०अङ्ग ङीप् । वटपत्रीवृक्षे, सा हि पाषाणभेदनेनापि भूमिमाच्छादनात् पालयतीति तस्यास्तथात्वम् ।

इरिकावन न० इरैव कन् अत इत्त्वम् इरिकाप्रधानं वनम् । चुम्ना० "इरिकादीनि वनोत्तरपदानि संज्ञायाम्" पा० ग०सू० पाठात् न षत्वम् । जलप्रधाने वनभेदे । इरिकादीनि च "इरिका तिमिर समीर कुवेर हरि कर्म्मार" ।

इरिण न० ऋ-इन किच्च । १जघरभूमौ, २निराजलदेशे, ३स्तम्बे च । "यथा गौरो अपाकृतं हव्यन्नेत्येरिणम्" ऋ०८,४, ३ । "यद्येरिणे बीजमुप्त्वा न वप्ता लभते फलम्" मनुः ।

इरिन् त्रि० इर-कण्ड्वा० णिनि यलोपः । १प्रेरके । "न देवामिरी सचसे दृष्ट्या" ऋ०५,८७,३। २दर्शके च ।

इरिमेद पु० इरी रोगादीर्ण्यकः मेदोनिर्य्यासो यस्य । विट्खदिरे । "इरिमेदः कषायोष्णो सुखदन्तगदास्रजित् । कृमि कण्डूविषश्लेष्मकुष्ठविषप्रणान्" भावप्र० ।

इरिविल्लिका स्त्री इरिविल्ल्व कन् । "पिप्पलीसप्तमाङ्कस्थां दत्तासुपरजाज्वराम् । सर्व्वौषधिकां सर्व्वसिद्धां जानीयादिरिविल्लिकामिति" निदानोक्ते मस्तकस्थे व्रणभेदे । कनभावे इरिविल्लाप्यत्र । "इरिविल्लां गन्धनाम्नीं कक्षां विस्फोटकासघा । पित्तजस्य विसर्पस्य क्रियया साधयेद्भिषक्" सुश्रु० ।

इरेश पु० ६त० । १वरुणे, २वागीशे, ३भूमिपतौ, ४विष्णौ च

इर्गल न०स्त्री अर्गल+पृ० । द्वाररोधके काष्ठभेदे तस्य हितम् अपूपादि० यत् । इर्गल्यः छ इर्गलीयः । तत्साधने इत्ते ।

इर्य्य त्रि० इर-कण्ड्वा० अच् वेदे नि० न यलोपदीर्घौ । प्रेरके । "यूयं राजानमिर्य्यं जनाय विश्पतिम्" ऋ०५,५८,४ ।

इर्वारु स्त्री उर्व्व-आरु पृषो० । (काकुड़) १कर्कट्याम् । २हिंसके त्रि० । "सिंहव्याघ्रदृकतरक्षुचण्डीपिमार्ज्जारऋक्षगालभृगेर्व्वारुकप्रभृतयो गुहाशयाः" सुश्रुतः । भृगेर्वारुकः भृगहिंसकः । आलु । इर्व्वालुरप्युक्तार्थे ।

इर्वारु(लु)शुक्तिका स्त्री इर्वारुः(लुः) शुक्तिकेव स्वयंस्फोटनात् । (फुटी) (स्वयं भिन्नविषकर्कट्याम्) ।

इल शयने अक० गतौ क्षेपे च सक०तुदा०पर०सेट् । इलति । ऐलीत्इवेल ऐलतुः इलितः इलः ।

इल क्षेपणे चुरा०उभ०सक० सेट् । एलयति ते ऐलिलत् त । ऐलयीत् ऐलिष्ट "कथं वातमेलयति कथं न रमते मनः" अथ०१०,७,२१ । "आसां देवतानां यांयां कामयते सा भूत्वेलयति" शत०ब्रा० १०,२,८,८ ।

इलविला स्त्री इलस्यसुनिपत्न्याम् कुबेरजनन्याम् । एतत्सम्बन्धेनैव कुबेरस्य ऐलविल इति नाम ।

इला स्त्री इल-क । १भूमौ, २गवि, ३वाचि, ४जम्बुद्वीपस्थनववर्षमध्ये वर्षभेदे तत्सीमा चेलाहृतशब्दार्थे वक्ष्यते । ५ वैवस्वतमनुकन्यायां बुधपत्न्याम् । सा हि विष्णुवरात् पुंस्त्वमासाद्य पुनः शङ्करशापात् स्त्रीत्वं गता बुधस्तु तामुपगम्य पुरूरवसमुत्पादयामासेति पुराणे प्रसिद्धम् । तत्र इडाशब्दे उक्तप्रायम् ६ खप्रशीले त्रि० ।

इ(ए)ला कण्ड्वा० यक् प० अक० सेट् । इ(ए)लायति ।

इलाहृत न० इला पृथिवीवाहृतं निघ्नादिभिः । नवधर्म्मात्मकजम्बुद्वीपस्य वर्षभेदे तच्च वर्षम् "पश्चान्माल्यवतः, प्राच्यां गन्धमादनपर्वततः । इलाहृतं नीलगिरेर्याम्यतो, निषधाद्दक्" इत्युक्त चतुःसीमावच्छिन्ने देशेऽस्ति । "माल्यवांश्च

यमकोटिपत्तनाद्रोमकाच्च किल गन्धमादनः । नीलवैडूर्यनिषधावधी च तावन्तरालमनयोरिलावृतम् । निषधनीलसुगन्धसुमाल्यकैरलमिलावृतमावृतमावभौ । अमरकेलिकुलायसमाकुलं रुचिरकाञ्चनचित्रमहीतलम्' 'सि० शि० । "एतेन भारतमिलावृतवद् विभाति" माघः । इलावृतस्थपर्व्वतादिवर्णनम् । भाग० ५स्क० ६अ० ।

"एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्वतः सौवर्णः कुलगिरिराजोमेरुर्द्वीपायामसमुच्छ्रायः कर्णिकाभूतः कुवलयकमलस्य मूर्द्धनि द्वात्रिंशत्सहस्रयोजनवितत ऊर्द्धे षोडशसाहस्रं तावतान्तर्भूम्यां प्रविष्टः । उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवानिति त्रयोरस्यकृरिरम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरयः प्रागायता उभयतः क्षारोदावधयोद्विसाहस्रपृथव एकैकशः पूर्वस्मात् पूर्वस्मादुत्तरोत्तरेण दशांशाधिकांशेन दैर्घ्येण एव भवन्ति । एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः । अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम् । तथैवेलावृतमपरेण पूर्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं प्रपद्यतः । केतुमालभद्राश्वयोः सीमानं विदधाते । मन्दरोमेरुमन्दरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोच्छ्राहा मेरोश्चतुर्दिशमवष्टम्भगिरय उपकॢप्ताः । चतुर्ष्वेतेषु चूत जम्बूकदम्बन्यग्रोधाश्चत्वारः पादपप्रवराः पर्वतकेतव इव द्विसहस्रयोजनोद्धाहास्तावद्विटपवितताः शतयोजनपरिणाहाः । तद्वच्चत्वारः पयोमधुरसेक्षुदजलाः । यदुपस्पर्शिन उपदेवगणा योगैश्वर्य्याणि स्वाभाविकानि भरतर्षभ ! धारयन्ति । देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमिति । येष्वमरपरिवृढाः सहसुरललनालङ्घामयूथपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरन्ति । मन्दरोत्सङ्ग एकादशशतयोजनोत्तुङ्गदेवचूतगिरेर्यो गिरिशिखरस्थूलानि फलान्यमृतकल्पानि पतन्ति । तेषां विशीर्य्यमाणानामतिमधुरसुरभिगन्धवहलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखराच्चिपतन्ती पूर्वेणेलावृतमुपप्लावयति । यदुपजोपस्पर्शानुभावो यक्षपत्नीनां पुण्यजनवधूनामवयवसौरभं सुगन्धवातो दशयोजनं समन्तादनुवासयति । एवं जम्बूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जम्बूनदी नाम मेरुमन्दरशिखरादयुतयोजनादवनितले निपत्ती दक्षिणेनात्मानं यावदिलावृतमुपस्पन्दति । तावदुभयोरपि रोधसोर्मृत्तिका तद्रसेनानुविध्यमाना च वायुसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति । यदुह वाव विबुधादयः सहयुवतिभिर्मुकुटकटिसूत्रकुण्डलाद्याभरणरूपेण खलु धारयन्ति । यस्तु महाकदम्बः सुपार्श्वपार्श्वनिरूढस्कन्धस्य कोटरेभ्यो विनिःसृताः पञ्चायामपरिणाहाः सुमधुराः सुपार्श्वगिरेरात् पतन्त्योऽपरेणात्मानमिलावृतमनुमोदयन्ति । याश्चोपयुञ्जानानां मुखनिर्वासितो वायुः समन्ताच्छतयोजनमनु वासयति । एवं कुमुदनिरूढो यः शतवल्शो नाम वटस्तस्य स्कन्धेभ्योनीचीनाः पयोदधिमधुघृतगुडान्नाद्याम्बरशय्यासनाभरणादयः सर्व एव कामदुघानदाः कुलदाद्यात् पतन्त्यस्तसुरेणेलावृतमुपयोजयन्ति । यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गन्ध्यजरामयापमृत्वादीतोष्णवैवर्ण्यापसर्गादयस्तापविशेषा भवन्ति । यावज्जीवं सुखं निरतिशयमेव कुरङ्गकुररकुसुम्भवैकङ्कत्रिकूटशिखरपतङ्गरुचकनिषधसितकामरुकपिलशङ्खवैदूर्य्यजारुधिहंसऋषभनागकालञ्जरनीरदादयोगिरयो मेरोः कर्णिकाया इव केशरभूतामूलदेशे परित उपकॢप्ताः । जठरदेवकूटौ मेरुं पूर्वेणाष्टादशयोजनसहस्रोच्छ्रायतौ द्विसहस्रपृथुतनू भवतः । एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ । एवमुत्तरतः त्रिशृङ्गमकरौ । अष्टाभिरेभिः परिष्कृतोऽग्निरिव परितश्चकास्ति काञ्चनगिरिः । मेरोर्मूर्द्धनि भगवत आत्मयोनेर्मध्यत उपकॢप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति । तामनु परितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टावुपकॢप्ताः"। भा० भी० ६स्क० जम्बूखण्डविभागे तु ।

"धनुःसंस्थे महाराज ! हे वर्षे दक्षिणोत्तरे । इलावृतं मध्यमन्तु पञ्च वर्षाणि चैव हि । उत्तरोत्तरमेतेभ्यो वर्षमुद्दिश्यते गुणैः । आयुःप्रमाणं चारोग्यं धर्म्मतः कामतोऽर्थतः । समन्वितानि भूतानि तेषु वर्षेषु भारत ! । एवमेषा महाराज ! पर्व्वतैः पृथिवी चिता । हेमकूटस्तु समस्तान् कैलासो नाम पर्वतः । यत्र वैश्रवणो राजन् ! गुह्यकैः सह मोदते । अस्योत्तरेण कैलासात् मैनाकं पर्वतस्मृतं । हिरण्यशृङ्गः समस्तान् दिव्यो मणिमयो गिरिः । तस्य पार्श्वे महद्दिव्यं शुभं काञ्चनवालुकम् । रम्यं विन्दुसरो नाम यत्र राजा भगीरथः । दृष्ट्वा भागीरथीं गङ्गामुवास बहुलाः समाः । यूपा मणिमयास्तत्र चैत्याश्चापि हिर-

स्वयाः । तत्रेडा तु गतः सिद्धिं सहस्राक्षो महायशाः । सदा भूतपतिर्यत्र सर्वलोकैः सनातनः । उपासते तिग्मतेजा यत्र भूतैः समन्ततः । नरनारायणौ ब्रह्मा मनुः स्थाणुश्च पञ्चमः । तत्र दिव्या त्रिपथगा प्रवमन्ती प्रतिष्ठिता । ब्रह्मलोकादपक्रान्ता सप्तधा प्रतिपद्यते । वक्षोकसरा नलिनी पावनी च सरस्वती । जम्बूनदी च सीता च गङ्गा सिन्धुश्च सप्तमी । अचिन्त्या दिव्यसङ्घायाः प्रभोरेवैष संविधिः । उपासते यत्र सत्रं सहस्रयुगपर्य्यये । इक्ष्वाकुश्चा च भवति तत्र तत्र सरस्वती । एता दिव्याः सप्त गङ्गा स्त्रिषु लोकेषु विश्रुताः" ।

इलिनी स्त्री चन्द्रवंश्यमेधातिथिपुत्रकन्यायाम् । "मेधातिथिः सुतस्तस्य यस्मात् कण्वोऽभवद् द्विजः । इलिनी नाम यस्यासीत् कन्या वै जनमेजय !" हरिवं० २२ अ० ।

इली स्त्री इल-गतौ क गौरा० ङीष् । करवाले (काटार)।

इलीविश्य पु० असुरभेदे "न्यविध्यदिलीविशस्य हदाविध्यद्गिरिं भिनच्छुष्णमिन्द्रः" ऋ०१,३३,१२,

इलीश पु० इलीव करवालिकेव शोभते शुभ-ड । करवालिका सदृशावयवे खड्गाख्याते मत्स्यभेदे ।

इलिश पु० इलीश+पृ० । इलीशमत्स्ये (इलिश) ।

इल्वल पु० इल+स्वप्ने वलच्-नि० गुणाभावः । १मत्स्यभेदे २असुरभेदे च मेदि०स च सिंहिकापुत्रभेदः "सिंहिकायां यथोत्पन्ना विप्रचित्तेः सुतास्त्रया । दैत्यदानवसंयोगाज्ज्ञातास्तीव्रपराक्रमाः । सैंहिकेया इति ख्यातास्त्रयोदश महाबलाः । व्यंशः शल्यश्च बलिनौ नभश्चैव महाबलः । वातापिर्नमुचिश्चैव इल्वलः सुमहासुरः । खाञ्जिकोनरकश्चैव (कालनेमि) कालनाभस्तथैव च । राजन्ज्यैष्ठ्यं तु तेषां वै सूर्य्यचन्द्रमसौ नृप" हरि० २अ० । तच्चरितं यथा

"इल्वलो नाम दैतेय आसीत् कौरवनन्दन ! । मघिमत्यां पुरि पुरा वातापिस्तस्य चानुजः । स ब्राह्मणं तपोयुक्तमुवाच दितिनन्दनः । पुत्रं मे भगवानेकमिन्द्रतुल्यं प्रयच्छतु । तस्मै स ब्राह्मणो नादात् पुत्रं वासवसन्निभम् । चुक्रोध सोऽसुरस्तस्य ब्राह्मणस्य ततोऽथ्यम् । तदाप्रभृति राजेन्द्र ! इल्वलो ब्रह्महासुरः । मन्युमान् भ्रातरं त्यागं मायावी ह्यकरोत्ततः । मेषरूपी च वातापिः कामरूपोऽभवत् क्षणात् । संस्कृत्य च भोजयति ततो विप्रं जिघांसति । स चाह्वयति यं वाचा गतं वैवस्वतक्षयम् । स इनदेहमास्थाय जीवन् स प्रत्यदृश्यत । ततो वातापिमसुरं त्यागं कृत्वा सुसंस्कृतम् । तं ब्राह्मणं भोजयित्वा पुनरेव समाह्वयत् । तामिल्वलेन महता स्वरेण वाचमीरिताम् । श्रुत्वागतिमायो बलवान् क्षिप्रं ब्राह्मणकण्टकः । तस्य पार्श्वं विनिर्भिद्य ब्राह्मणस्य महासुरः । वातापिः प्रहसन्राजन्निष्क्राम विनायवन् । एवं स ब्राह्मणान्राजन् ! भोजयित्वा पुनः पुनः । हिंसयामास दैतेय इल्वलो दुष्टचेतनः" भा०व०६६अ० ।

२मृगगिरौ नलगिरिःस्यात्तु पञ्चसु तारासु स्त्रीव०त० । तत्र इल्वका इति पाठान्तरम् । इल्वन्ति प्रीणयन्ति इविप्रीणने कुन् इदित्त्वात् नुम् त्रिपकादि० न जात इत्त्वम् इति भानुदीक्षितः । तेन इल्वका इति ककारमध्यपाठकल्पनं प्रामादिकमेव । [ऐत्वीत् । इत्वकाः ।

इव व्याप्तौ प्रीणने च इदित् भ्वा०पर०सक० सेट् । इल्वति

इव अव्य०इल्व-निह० क । १सादृश्ये, २उत्प्रेक्षे च यास्, ३ईषदर्थे, वाक्यालङ्कारद्योतकता चास्य तत्र उपमायाम् "इवेन नित्यसमासोविभक्त्यलोपश्चेति" वार्त्ति० उक्तेर्नित्यसमासः विभक्तेर्लोपाभावश्च स च समासस्वरार्थ एव । "वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये" रघुः । "हंसीव क्षण ! ते कार्त्तिः स्वर्गङ्गामवगाहते" चन्द्रालोकः । एतत्प्रयोगे श्रौती उपमा "श्रौती यत्रेवशब्दा इवार्थे वा वतिर्यदि" सा०द०उक्तेः । उत्प्रेक्षायाम् । "गुणा गुणानुबन्धित्वात् तस्य सप्तसवा इव" रघुः । "गङ्गास्रोत इवाम्भसि सुरत्राज ! क्षणाच्चलत्व निःस्वनः । स्रोतोवारिवधूवर्गगर्भपातनपातकी" "सुखमेधोऽग्रयोभाति पूर्णचन्द्रइवापरः" सा०द० इवादिशब्दप्रयोगे उत्प्रेक्षाया वाच्यत्वम् । "वाच्ये वादिप्रयोगे स्यादप्रयोगे परा पुनः" सा०द०उक्तेः । वाक्यालङ्कारे "सर्वदा क इव वा सह्यिते" किरा० "किमिव हि मधुराणां मण्डनं नाकृतीनाम्" शकु० "सृजति सा कियतोमिव न व्यथाम्" नैष० ईषदर्थे "तदस्तिपर्युषितमिव" मृत०भा० "आवर्जिता किञ्चिदिव स्तनाभ्याम्" कुमा० ४अवधारणार्थे च । "त्रिधे पूष्ण त्रिधुक्षते वदेवाः" ऋ०१,१८४,१। "इषुक्षतेव इवशब्द एवार्थे" भा० । "क्षत्रेव तु वा ईश्वरा" मृत०भा० । इवशब्दोऽवधारणार्थे" भा० ।

इवीका स्त्री इवीका पृ० । इवीकायशब्दार्थे अमरटीका ।

इष गतौ सर्पणे च दिवा०पर०सक०सेट् । इष्यति, ऐष्यत् । ऐषीत् इषितः एषित्वा । "इष्यन् वाचस्पवक्लेव होतः" ऋ० ६,६३,६ । "योऽभियात इषितः प्रवाति" अथ० १०,८,२५ । "स तत्कृधीषितस्तूयमग्ने" अथ० ६,२५,५ । "हिन्वानो वाचमिष्यसि" ऋ० ६,६३,६ । इच्छा-

वामपि "अप इष्य होतरित्यप इच्छ होतरित्येवैतदाह" शत० ब्रा० ३,६,३,१५। गतौ तुदादिरपि इषति निरु०।

अनु+अन्वेषणे गवेषणे "अन्विष्यनलसतः सीताम्" रामा० "यावदेनामन्वेष्यामि" शकु०। "न रत्नमन्विष्यति मृग्यते हि तत्" कुमा०। "तस्मान्विष्यन् वेतसगूढं प्रभवं सः" रघुः। स्वार्थे णिच्। तत्रैव "राममन्वेषयामि" सा०द०।

प्र+प्रेरणे। "अप्रैषीद्राजपुत्री मां सुराहारीं तवान्तिकम्" भा०व०१६६ अ०। "गत्वा प्रैषीच्च रावणम्" भट्टिः "अध्वर्युप्रेषितोमैत्रावरुणः प्रेष्यति" आश्व०श्रौ०। "गौणः प्रेषं च प्रेष्यति" कात्या०१२,६,१ "अग्नीषोमाभ्यां छागस्य वपायै मेदसे प्रेष्य" शत० ब्रा० ३,८,२,२७। घञ् प्रैष्यः। ण्यत् प्रैषः। स्वार्थे णिच्। प्रेषयति प्रेषयामास। "स च मां प्रेषयामास" रामा०। [षितः पर्य्येषणा।

परि+सत्कारपूर्व्वकनियोजने पर्य्येषति स्वार्थे णिच् पर्य्येषयति।

इष वाञ्छायाम् तुदा०पर०सक०सेट् वेट् कुः। १इच्छति, "इच्छामि संवर्द्धितमात्मजाया ते" कुमा०। इच्छेत् "यदीच्छेद्विपुलान् भोगान्" मनु० त०पु०। "राजान्नेवास्मिन्नाज्येभ्यः सोदग्रोच्छेदनं ध्रुवा" या०स्मृ०। ऐच्छत् ऐषीत् "ऐषीः पुनर्जन्मजयाय यत्नम्" भट्टिः इषेय "इषेय वा कर्तुमवध्यमात्मनः" कुमा०। ऐषतुः। इच्छन् "किमिच्छन् कस्य कामाय किमर्थमनुसंज्वरेत्" स्मृतिः।

एषिता—ऐटा एषित्वा—इड्वा। भावे य इच्छा "आत्मजन्या भवेदिच्छा" न्यायका०। इष्टः "इष्टोऽसि मे सखा चेति" गीता। कर्म्मणि इष्यते "तिरात्राच्छुद्धिरिष्यते" स्मृतिः। एष्टव्यः एषितव्यः। "एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्" पु०।

अनु+अन्वेषणे। "तं खलन्त इवान्वीयुः" भट्ट०ब्रा०। "इत्थं तमात्मानमिच्छामो यमन्वेष्टा" छा०उ०। "अनुपदमन्वेष्टा" पा० "वयं तत्त्वान्वेषात् मधुकर! हतास्त्वं खलु कृती" शकु०

प्रति+ प्रतिग्रहे प्रतीच्छति (प्रतिगृह्णाति)। "ततः प्रतीच्छ प्रहरेति वादिनी" नैष० "सुतां प्रतीच्छ मे कन्याम्" प्राप्तौ च "बुद्धो शरणमन्विच्छ" गीता। स्वार्थे णिच् वेदे०नि० गुणाभावः। इषयति "इच्छंस्तदा-स्तरायेव मदन्त इषयेम ज्योतिः" ऋ०१,१८५,६। "इषयेम इच्छाम" भा०।

परि+अन्वेषणे च परीच्छति (अन्विष्यति) "भगवन्तं वा अङ्गेभिरारिप्सिष्टैः पर्य्येषिष्यम्" छा०उ०।

अभि+सम्यगिच्छायाम् अभीष्टम्।

इष आभीक्ष्ण्ये क्रयादि० पौनःपुन्ये पर०अक० सेट्। इष्णाति इष्णुते इषाण। "इष्णन्निषाणामुं मेषाण सर्व्वलोकं मदीषाण" यजु० २१,२२,अ०। ऐषात् ऐषीत्। एषितः एषित्वा। प्रेरणे च। "भिनद्मिरिं शवसा वज्रमिष्णन्" ऋ० ४,१७,३। इष्णन् प्रेरयन्" भा०। इच्छार्थेऽपि "पूर्वीरिषश्चरति मध्व इष्णन्" ऋ० १,१८१,६। "मध्वः मधुनः इष्णन् इच्छन्" भा०। आभीक्ष्ण्यञ्च क्रियापौनःपुन्यम्। क्रिया च धात्वर्थविशेषः स च वाञ्छागत्यादिरेव तस्यैवाभीक्ष्ण्यद्योतनेऽस्य साधुत्वम्

इष गतौ भ्वा० उभ०सक० सेट्। एषति ते। ऐषीत् ऐषिष्ट अनु—अनुसरणे। अन्वेषति। "अन्वेषन्तोवनं राजन्" "देशमन्वं दुराचारमन्वेषन् वानराधिपाः" रामा०।

इष् त्रि० इष—इच्छायां क्विप्। १इच्छायुक्ते। इट्चरः। "विदाद्भूलं शतक्रतुं विदादिषम्" ऋ२,१२,४। कर्म्मणि क्विप्। २इष्यमाणे त्रि० ३अन्ने स्त्री "मधुमतीर्न इषस्कृधि" यजु० ७,२, "आश्विनायच्चरीरिषः १,३,१। "इषे त्वोर्ज्जे त्वा" यजु० १,१,। इष्यतेइष—अन्तर्भूतण्यर्थे कर्म्मणि क्विप्। ४एषणीये। "इषस्तुतो मरुद्गणे" ऋ० ५,५०,५, "इषः एषणीयस्य" भा०। इष—गतौ भावे क्विप्। ५यात्रायाम् स्त्री

इष पु० इष—गतौ क्विप्—इट् यत्रा साधिनं मासे जिगीषूणा-मस्मिन् अर्थ्य आ०अच्। सौरे चान्द्रे च आश्विने मासि। "आश्वयुजे भाद्रमासे युवतिस्थगते चार्थलाभः प्रदिष्टः" राजमा०उक्तेः "सौराश्विनस्य यात्राया अर्थलाभदत्वात्तथात्वम्"। अत एव रघौ "सरितः कुर्वती गाधाः पयसाम्यानकर्दमान्। यात्रायै नोदयामास तं भक्तेः प्रथमं शरत्"। शरत्कालस्य राज्ञां यात्रार्थत्वमुक्तम्। शरदुत्वञ्च "इषोर्जश्च शरदिति" श्रुत्युक्त आश्विनकार्त्तिकमासरूपः कालः तस्य च सौरत्वमृतुशब्दे वक्ष्यते "आमेखलं सञ्चरतां घनानां छायामिषेणानुगतां निषेव्य" कुमा०पाठान्तरम्। "ध्वनि-मिषेणनिषेवणमस्यतः" माघः। तत्र चान्द्रे "इषे मासि सिते पक्षे नवम्यामार्द्रयोगतः" तिथि० देवीपु०। अत्र चान्द्रोगौणः "यच्छरदृतूंश्च ओषधीः पच्यन्ते तेनोभैतावित्योजश्च" शत० ब्रा० ४,३,१,१७, "अन्तर्भूतण्यर्थे भावे घञर्थे क"। २प्रेरणे "इषवान् मम रेजति" ऋ०१,२६,६, "इषवान् प्रेषणवान्" भा०। इष—इच्छायां कर्म्मणि घञर्थे क ३अन्ने न०निघ०।

इषणि स्त्री इष—भावे अनि वेदे०नि० गुणाभावः। प्रेरणे

"दुहाना धेनुर्वजनेषु कारवेलना यतिनं पुरुरूपमिषणि" ऋ०२,२,६, इषणि एषणायाम् भा० । सम्पूर्वा क्तिच् । स्त्रीत्वे तु एषणिः वा ङीप् । इषणिमिच्छति क्यच् । वेदे० नि० इलोपः इषस्यति "ऋतस्य वुध्न उषसामिषण्यन्" । ऋ०२,६१,७, ततः भावे अ । "इषण्या प्रेषणायाम् "इषण्यया नः पुरुरूपमाभेर" ऋ०८,४६,१८।

इषव्य त्रि०इषणा विध्यति इषौ कुशलो वा यत् । शरलक्ष्ये, १शरव्ये २शरत्यागकुशले च "आराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी" यजु०ऋ०२२,२२ "इषुभिर्विध्यति इषव्यः यद्वा इषौ कुशलः" वेददी० [धातयः" ऋ०६,७६,१,

इषि त्रि०इष-कि । इच्छावति "विचिदस्राना इषयोव्य-

इषिका स्त्री इष-गत्यादौ कुन् अत इत्त्वम् । इषीकाशब्दार्थे तूलगब्दपरे ह्रस्वः इषिकतूलम्" तदीयतूले ।

इषीका स्त्री इष-गत्यादिषु ईकन् कित् ह्रस्वश्च । १गजनेत्रगोलके । २काशे, ३मुञ्जामध्यवर्त्तितृणे च तदालम्ब्यैव अश्वत्थाख्या पाखण्डबधाय महास्त्रं प्रत्यक्तम् यथा भा० प० १४अ० "व्यथितात्माऽभवत् द्रौणिः प्राप्तक्षेममन्यत । तत दिव्यमहीनात्मा परमास्त्रमचिन्तयत् । जग्राह च स चेषीकां द्रौणिः सव्येन पाणिना । स तामापदमासाद्य दिव्यमस्त्रमुदैरयत्" इत्युपक्रम्य "ततस्तस्मिन्नीषीकायां पावकः समजायत । प्रधक्ष्यन्निव लोकांस्त्रीन् कालान्तकयमोपमः" इमामिषीकामधिकृत्य कृतोऽन्यः अण् ऐषीकं भारतान्तर्गतपर्वभेदे "मुञ्जा वेणीका तूलमिति"शत०ब्रा० "यदि नडानां यदि वेणूनां यदि वेषीकाणाम्" शत०ब्रा० १,१,४,१६, ४शरशलाकायां५वीरणकाशिकायाञ्च उज्ज्व० "तस्मिन्नास्यदिषीकास्त्रं रामोरामास्त्रबोधितः" रघुः ।

इषिर त्रि०इष-गतौ किरच् । १गतिशीले । "यं न इषिरो अभियाति रातिः" ऋ०७,३५,४, "इषिरः गतिशीलः"भा० २चलनशीले च "निसामनामिषिरामिन्द्र भूमिम्" ऋ०२, ३०,६। "इषिरां चलनीम्" भा० ४अग्नौ पु० उज्ज्व०

इषु पुंस्त्री ईष्यते क्षिप्यतेऽनेन इष-उ ह्रस्वश्च । १बाणे "प्रतिसंहरविषुम्"रघुः । "इषुमतिरुषिं हे दंदशूकान् जिघांसौ" भट्टिः । "इषुभिः प्रतियोत्स्यामि" गीता स्त्रीत्वे "तस्य साध्वीरिषवो याभिरस्यति"ऋ०२,२१,४,८। "याभिषु गिरिशन्त ! विभर्ष्यस्तवे" यजु० १६,२। तस्तुल्यसंख्ये २पञ्चसंख्यान्विते च । पञ्चशरशब्दे वक्ष्यमाणस्य कामशरस्य पञ्चसंख्याकत्वस्यानुसारेण शरशब्देन हि पञ्चसंख्या बोध्यते । "पञ्चपञ्चाशत्सप्तेषु क्षेयमोजः सु राशिषु" ज्योति० । ३ दृत्तक्षेत्रान्तर्गते जीवावधिपरिधिपर्य्यन्तकृतसरलरेखायाञ्च तदानयनप्रकारः शोदाहरणः लीला०दर्शितो यथा

"ज्याव्यासयोगान्तरघातमूलं व्यासस्तदूनोद्धृतः शरः स्यात् । व्यासाच्छरोनाच्छरसङ्गुणाच्च मूलं द्विनिघ्नं भवतीह जीवा । जीवार्द्धमक्षे शरभक्तयुक्ते व्यासप्रमाणं प्रवदन्ति दृत्ते" उदा० दृग्विस्तृतिर्दृत्तसान्तर्गता ज्या भवेत् । तत्रेषुं वद बाणाख्यां ज्यावर्गाभ्याञ्च विस्तृतिम्" न्यासः । व्यासः १०, ज्या ६, अनयोर्योगः १६, अन्तरं ४ तयोर्घातो ६४, तस्य मूलं ८, तेनोनोव्यासः २, दलितः शरः१। तेन १०दृत्तव्यासके दृत्तक्षेत्रे यदि जीवमितिः ६ तदा शरमानम् ? एकत्रस्त इति क्षेयम् । ज्ञातशरव्यासके दृत्तक्षेत्रे जीवानयनं यथा व्यासः १० हृतः, शरः १हृतः तेनोनितः व्यासः ९, तस्य मूलम् ३ । द्वाभ्यां युक्तितम् ६, जीवामानम् । ज्ञाताभ्यां ज्यावर्गाभ्यां व्यासानयनम् । यथा जीवा ६ तस्यार्द्धं ३, तस्य वर्गः ९। शरसंख्यया १ भक्तोः ९ । शरसंख्यया १ योगे व्यासमानम् १० । एवमन्यसंख्यकजीवादौ अनया दिशा शरादानयनम् । यत्राणां क्रान्तिदृत्तक्षेत्रस्य शरानयनं संक्षेपेण दर्शितम् सि०शि०

"सविराशियुगृहीत्वा क्रान्तिस्त्रिज्योद्धृतः शरः । स्फुटोऽसौ क्रान्तिसंस्कारे दृक्कर्मण्यप्यजे तथा" सू० । "अयं संक्षिप्तो गौणप्रकारः । मुख्यस्तु पूर्वं व्याख्यात एव । तथापीह युक्तिमात्रमुच्यते । विषुवद्वृत्तात् क्रान्तिर्ध्रुवाभिमुखी । क्रान्त्यग्राच्छरः कदम्बाभिमुखः । कथं तेन तिर्य्यक्स्थेन सा संस्कार्या । अतः क्रान्त्यग्रे यदृणमुक्तं तस्य शरायस्य च यदन्तरं रज्जु तेन संस्कृता सती स्फुटा भवति । तज्ज्ञानार्थं कोटिरूपम् । शरः कर्णरूपः । तद्वर्गान्तरपदं द्युज्याहृत्ते भुजः । एतत् त्रयं दिग्वलनजलत्रयसंभवम् । तत्र सविराशियुक्क्रान्तिः कदम्बध्रुवस्थबोरन्तरम् । तज्ज्या भुजः । तद्द्युज्या कोटिस्त्रिज्या कर्णः । यदि त्रिज्यया येयं कोटिस्तदा शरेण केत्युपपद्यम् । कोटिरूपस्यैव शरस्य ध्रुवेनुखस्थात्रिज्यया त्रिजं दृक्कर्म कर्तुं युज्यते" प्रमि० विस्तरस्तत्रैव "विश्वेपक्षिप्राः क्षितिजादिकानां खेगा ११० द्विबाणेन्दुमिता १५२ रसाब्धाः ७६ । षट्त्रीन्दवः १३६, खाग्निभुवः १३० सितत्रयातौ स्फुटौ खखखकेन्द्रयुक्तौ" सू० "क्षितिजस्य खरुद्रमिता ११० सप्तमा

विक्षेपलिप्ताः । बुधस्य द्विघ्नेन्दुमिताः १५२ । गुरोः षट्सप्तिः ७६ । शुक्रस्य षड्विघ्न१२६ तुल्याः । शनेः खत्रीन्दु १३० मिता वेदितव्याः । तथा बुधशुक्रयोर्यौ गणितागतौ पातौ तौ स्वस्वशीघ्रकेन्द्रेण युक्तौ कार्यौ । एवं स्फुटौ स्तः । अत्रोपपत्तिः । मध्यमगतिवासनायां वेधप्रकारेण वेधबलये यद्विक्षेपोपपत्तिर्दर्शितैव । किंत्वत्यफलज्यार्धधनुषा सन्निष्टहेण तुल्यं यदा शीघ्रकेन्द्रं भवति तदा त्रिज्यातुल्यः शीघ्रकर्णो भवति तस्मिन् दिने वेधबलये यावान् परमो विक्षेप उपलभ्यते तावान् यद्दृक्क्षेपः परमो मध्यमविक्षेपः । एवमेते भौमादीनामुपलब्धाः पठिताः । अत्र शनिशुक्रयोः पातस्य स्फुटत्वमुच्यते । भगणाध्याये ये बुधशुक्रयोः पातभगणाः पठितास्ते स्वशीघ्रकेन्द्रभगणैरधिकाः सन्तो वास्तवा भवन्ति । ये पठितास्ते खल्वाः कर्मलाघवेन सुखार्थम् । अतः पठितचक्रभवौ स्वशीघ्रकेन्द्रयुतौ वास्तवभगणनिष्पन्नौ स्फुटौ भवतः । तथा चोक्तं गोले "ये चात्र पातभगणाः पठिता ग्रन्थगोले शीघ्रकेन्द्रभगणैरित्यादि" । इदानीं यद्दविक्षेपानयनमाह "प्रमि० । "मन्दस्फुटात् खेचरतः खपातयुक्ताद्भुजज्या पठितेषुनिघ्नी । स्वशीघ्रकर्णेन हृता शरः स्यात् खपातमन्दस्फुटगोलदिक्कः" स्फु० । "मन्दस्फुटाद्दृग्यदृक्षात् खपातयुक्ताद्भुजज्या साध्या । सा यद्दृक्क्षस्य पठितेन शरेण गुण्या स्वशीघ्रकर्णेन भाज्या फलं स्फुटविक्षेपः स्यात् । खपातो मन्दस्फुटो यद्दृक्षो यदि राशिषट्कादूनस्तदोत्तरो विक्षेपोऽन्यथा दक्षिणः । अत्रोपपत्तिः । मन्दस्फुटो यद्दृक्षः स्वशीघ्रप्रतिमण्डले भ्रमति । तत्र च तस्य पातोऽपि । पातो नाम प्रतिमण्डलविमण्डलयोः संपातः । तस्मादारभ्य विक्षेपप्रवृत्तिः । इह सुसरलवंशशलाकया कक्षामण्डलं तत्प्रतिमण्डलं च छेद्यकोक्तविधिना विरचय्य तत्र शीघ्रप्रतिमण्डले मेषादेः प्रतिलोमं पातस्थानं च चिह्नयित्वा तत्र विमण्डलं निवेश्यम् । पातचिह्नाद्राशिषट्कान्तरे विमण्डलप्रतिमण्डलयोरन्यं सम्पातं कृत्वा पातात् पूर्वं तच्चिह्नेऽन्तरे पतितविक्षेपप्रमाणेन प्रतिमण्डलादुत्तरतो विमण्डलं क्वचिदाधारे स्थिरं कृत्वा मेषादेरनुलोमं मन्दस्फुटं यद्दृक्षं प्रतिमण्डले विमण्डले च दत्त्वा विक्षेपोपपत्तिं दर्शयेत् । तत्र तयोर्यद्दृक्षयोर्यावान् विप्रकर्षस्तावांस्तत्र प्रदेशे विक्षेपः । अथ तस्यानयनम् । पातस्थाने हि विक्षेपाभावः । ततश्चिह्नेऽन्तरे परमो विक्षेपः । अन्तरेऽनुपातेन । अतः पातयद्दृक्षचिह्नयोरन्तरं तावज्ज्ञेयम् । तच्च तयोर्योगे सति भवति । यतो मेषादेरनुलोमं यद्दृक्षं दत्तम् । पातस्तु प्रतिलोमम् । अतस्तयोर्योगः शरार्धं किल केन्द्रम् । तस्य दोर्ज्या साध्या । यदि त्रिज्यातुल्यया दोर्ज्यया पठितविक्षेपतुल्यं प्रतिमण्डलविमण्डलयोरन्तरं लभ्यते तदाऽभीष्टया यद्दृक्स्थानभवया दोर्ज्यया किमिति फलं शीघ्रकर्णाग्रे विक्षेपः । अत्र द्वितीयोऽनुपातः । यदि शीघ्रकर्णाग्रे एतावान् विक्षेपस्तदा त्रिज्याग्रे क इति । अत्र सुखभाजकयोस्त्रिज्यातुल्ययोस्सुखत्वाच्चाग्रे लब्धे सति दोर्ज्यायाः पठितविक्षेपो गुणः शीघ्रकर्णो हरः । फलं कक्षाप्रदेशे विक्षेपो ज्यारूपस्तस्य चापं स्फुटविक्षेप इत्यर्थः । भूचिह्ने खलस्थैकमर्यं वह्नौ द्वितीयमर्यं विमण्डले यद्दृक्स्थाने निबद्धं खलं कर्णः । खलकक्षमण्डलयोरन्तरं स्फुटः शर इत्यादि सर्वं क्षेत्राय दर्शनीयम् । इदानीं विक्षेपस्य क्रान्तिसंस्कारयोग्यतासाधनमन्यत् स्फुटीकरणमाह" । प्रमि० "चिह्नावर्गादयनवलनज्याहतिं प्रोह्य मूलं यद्दिर्यज्या द्युचरविशिखस्ताड़ितस्त्रिज्यवाप्तः । यद्वा राशित्रयुतखगद्युज्यकाघ्नस्त्रिभौर्व्यां भक्तः स्फुटीभवति नियतं क्रान्तिसंस्कारयोग्यः" भू० । यद्दृक्षं "भुतायनांशोऽपक्रोटिशिञ्जिनीत्यादिनायनं वलनं साध्यम् । अत्र वलनशब्देन वलनज्या ग्राह्या न धनुः । तथा इतः प्रभृति दृक्क्षग्राभिः कर्म कर्तव्यम् । यतो दृक्क्षग्राभिः शरज्या शरकलातुल्यैव भवति । तस्मानयनम् । वलनस्य वर्गं त्रिज्यावर्गादपास्य यन्मूलं लभ्यते तद्दृष्टिसंज्ञं ज्ञेयम् । तया यज्या यद्दविक्षेपो गुणितस्त्रिज्यया भक्तः स्फुटः क्रान्तिसंस्कारयोग्यो भवति । अथानुकल्प उच्यते । यद्वा राशित्रयुतखगद्युज्यकाघ्न इति राशित्रयुतस्य यद्दृक्षस्य यावती द्युज्या तया वा गुणस्त्रिज्यया भक्तः स्फुटो भवति । अत्र भाजकस्यैकत्वादुपचयत्वात् फलं स्वल्पान्तरमित्यतोऽनुकल्पेनोक्तम् । अत्रोपपत्तिः । क्रान्त्यभावात् किल शरो भवति । शराग्रे यद्दृक्षः क्रान्तिः शरेण संस्कृता स्फुटा भवति । अत्र गणितागतेनैव शरेण क्रान्तिः स्फुटा क्रियते तदयुक्तम् । यतः क्रान्तिर्विषुवन्मण्डलात् तिर्यग्भ्रुवाभिमुखी । विक्षेपस्तु क्रान्तिमण्डलात् तिर्यग्भूपः कदम्बाभिमुखः यथोक्तं गोले । "सर्वतः क्रान्तिसूत्राणां ध्रुवे योगो भवेद्यतः । विषुवन्मण्डलग्राह्या ध्रुवे याम्या तथोत्तरा" । सर्वतः क्षेपसूत्राणां ध्रुवाज्जिनवलान्तरे । योगः कदम्बसंज्ञोऽयं क्षेपो

वलनबोधकत्। तत्रापमण्डलप्राच्या याम्या सौम्या च दिक् सदा। कदम्बभक्षत्तं चेति"। अतो विक्षेपः कदम्बाभिमुखो भवति। ध्रुवाभिमुख्या क्रान्त्या सह कथं तस्य मिन्नदिक्कस्य योगवियोगावुचितौ। तयोर्यद्भिन्नदिक्कं तदायनवलनवशात्। अथ तद्गोलोपरि प्रदर्श्यते। यथोदितं गोलं विरचय्य क्रान्तिवृत्ते यदृग्रहचिह्नं तस्मात् परितो नवतिभागान्तरेऽन्यत् त्रिज्यावृत्तं निवेश्यम्। अथ यद्ग्रहचिह्नाद्ध्रुवोपरिगामि सूत्रं तस्मिन् वृत्ते यत्र लगति तत्कदम्बयोरन्तरस्य ज्या त्रिज्या स कर्णः। तयोर्यद्गान्तरपदं कोटिः। सा च यदिसंज्ञा। क्रान्त्यग्राहित्विषः कदम्बाभिमुखः कर्णरूपः। तस्य कोटिरूपकरणायानुपातः। यदि त्रिज्याकर्णे यदिः कोटिस्तदा शरकर्णे का। फलं क्रान्तिसंस्कारयोग्यो विक्षेपो भवति। तेन संस्कृता क्रान्तिः स्फुटा। विक्षेपाग्रस्थस्य यद्ग्रहस्य विषुवन्मण्डलस्य च यद्याम्योत्तरमन्तरं सा स्फुटा क्रान्तिरुच्यते अयानुकूल्येऽपीयमेव वासना। अत्र बलिराशिग्रहक्रान्तिज्या भुजस्थाने कल्पिता स भुजः। तद्वर्गज्या यदिस्थाने कल्पिता सा कोटिः। तत्रापि त्रिज्या कर्ण इति सर्वसपद्मम्' प्रभि०। तत्रैव स्थानारेऽयुक्तम्।

"नाड़िकामण्डलात् तिर्यग्गतापमः क्रान्तिवृत्तावधिः क्रान्तिवृत्ताक्षरः। क्षेपवृत्तावधिस्तिर्यगेवं स्फुटो नाड़िकावृत्तखेटान्तराक्षेऽपमः" सू०। "क्रान्तिवृत्ते यत् स्फुटग्रहस्थानं तस्य नाड़िकावृत्तात् तिर्यग्गन्तरं सा क्रान्तिः अथ विमण्डले च यत् ग्रहस्थानं तस्य क्रान्तिवृत्तात् तिर्यग्गन्तरं स विक्षेपः। अथ विमण्डलस्थग्रहस्य नाड़ीवृत्तात् तिर्यग्गन्तरं सा स्फुटा क्रान्तिः" प्रभि०।

२सामवेदविहिते यज्ञभेदे। "इषुवज्यौ साग्नवेदे विहितौ" सि०कौ०। इषुप्रकारः स्थूला० कन्। इषुकः शरप्रकारे

इषुकामशमी स्त्री पुरीभेदे "पूर्वेषुकामशमी" सि०कौ०।

इषुकार पु० इषुं करोति कृ-अण् उप०। बाणकारके शिल्पिभेदे "पिङ्गला कुररः सर्पः सारङ्गोऽन्वेषणं विना। इषुकारः कुमारी च षडेते गुरवोमल" बौद्धोक्तं समर्थयितुं पिङ्गलादीनां यथोपदेशकारित्वात् गुरुत्वं तथा वर्णितम् यथा। "आशा बलवती राजन्! नैराश्यं परमं परम् सुखम्। आशां निराशां कृत्वा तु सुखं स्वपिति पिङ्गला। कामिथं कुररं हत्वा बध्यमानं निरामिषैः। आमिषस्य परित्यागे तु कुररः सुखमेधते। मद्वारक्षो हि दुःखाय न सुखाय कदाचन। सर्पः परकृतं वेश्म प्रविश्य सुखमेधते। सुखं जीवन्ति मुनयो भैक्षवृत्तिसमाश्रिताः। अयत्नेनैव जीवन्ति सारङ्गादव पक्षिणः। इषुकारो नरः कश्चिदिषावासक्तमानसः। समीपेनापि गच्छन्तं राजानं नाववुद्धवान्" बहूनां कलहो नित्यं द्वयोः सङ्घटनं ध्रुवम्। "एकाकी विचरिष्यामि कुमारीगृहको यथा" भा०शा० प० अ० १७८ इषुकृदादयोऽप्यत्र।

इषुकृत त्रि० इषुरिव शीघ्रगामी ऋजुगामी वा कृतः। बाणतुल्यं शीघ्रगामितया ऋजुगामितया च कृते। "त्रिये पूषन्निषुकृतेव देवा नासत्या" ऋ०१८४,२। इषुकृतेव इवशब्द एवार्थे। आशिधावनाय इषुवच्छीघ्रमृजुगामिनौ कृताविव सन्तौ" भा० इषुकृता इव नासत्या इत्यादौ सर्वत्र छान्दस आ। एतेन इषुकृच्छब्दोदाहरणतया एतस्या ऋचः उपन्यासः प्रमादिक एव।

इषुध शरधारणे कण्ड्वा प०अक०सेट्। इषुध्यति ऐषुध्यीत् इषुधिता-इषुधिता। वाचंयमोऽपि "विशो राय इषुध्यति द्युम्नं दधीत पुष्यसि" ऋ०६,५०,१। पतिं वो अघ्न्यानां धेनूनामिषुध्य" ऋ० ८,५८,२। भावे अ। इषुधा प्रार्थनायां स्त्री। "दिवोवाक्षोघ्नस्य वीरैरिषुध्येव मरुतो रोदस्योः" ऋ०१,१२२,१। उणा इषध्यु प्रार्थके "इषध्यव ऋतमापः पुरन्धेः" ऋ०५,४१,६।

इषुधर पु० इषुं धरति भृ-अच् ६त०। बाणधरे इषुभृदादयोऽप्यत्र। "यशांसि सर्वेषुभृतां निरास्यत्" भट्टिः।

इषुधि पुंस्त्री० इषवो धीयन्तेऽत्र धा-कि इषुध-इन् वलोपो वा। बाणाधारे बाणधारके वा तूणे। स्त्रीत्वे "धनुर्गाण्डीवमादाय तथाऽक्षय्ये महेषुधी" भा०व०। २८अ०। निसर्गेण इषुधीरसक्तः" ऋ०१,३३,३। पुंस्त्वे "बह्वाऽऽक्षय्यौ महेषुधी"रामा०। "बह्वीनां पिता बहुरस्य पुत्रश्चिरोऽस्योति समनावगत्य"। "इषुधिः सङ्गा धृतनाम" ऋ० ६,७५,५। "बहव इषवो धीयन्ते इषूणां निधानत्वात् "इषुधिरिषूणां निधानम्" यास्कः"भा०।

इषुप पु० इषुं पिबति पा०पाने क उप०ष०। असुरभेदे सहि अंशावतारे मग्नजिन्नामा राजासीत् यथाह भा० आ०६७अ०"इषुपोनाम यस्तेषामसुराणां बलाधिकः। मग्नजिन्नाम राजासीत् भुवि विख्यातविक्रमः"।

इषुपुङ्खा स्त्री इषोः पुङ्खमिव पुच्छमस्याः। शरपुङ्खाद्वर्चे।

इषुपुधा स्त्री इषुरिव पृथ्वमस्याः। शरडण्डायाम्।

इषुमत् पु० इषवः सन्त्यस्य प्राशस्त्येन मतप्। प्रशस्तबाणधरे। "इषुमति रघुसिंहे दन्दशूकान् जिघांसौ" भट्टिः।

इषुमात्र न० इषु प्रमाणमस्य इषु+मात्रच्। १शरप्रमाणे अग्नि-वेदिनां २कृष्णे कृष्णशब्दे विदतिः।२इषुप्रमाणमात्रे त्रि० स्त्रियां ङीप्। "यद्येकः पशुः स्यात् एकप्रादेशां कुर्यात् अथ यदि पञ्च पशवः स्युः पञ्चप्रादेशां कुर्यादिषुमात्रीं वा वीर्य्यं वा इषुवीर्य्यसम्मितैव तद्भवति। पञ्चप्रादेशा इक्ष त्वेव पुरेषुर्भवति" शत०ब्रा० ६,५,२,१०। इदमुखा-मधिकृत्य प्रवृत्तम्। उखां करोतीत्युपक्रम्य "पञ्चप्रादेशा गिषुमात्री वा तिर्य्यक् पञ्चपशौ" कात्या० १६,३,२५, उक्तेः। इषुमानं च अङ्गुल्यवधिबाहुमूलपर्य्यन्तमानं तच्च प्रादेशत्रयम् यात्रिकसम्प्रदायप्रसिद्धम्। ४शरगतिपर्य्य-न्तमाने च। "अथ यदब्रवीत् वर्द्धस्वेति। तस्माद् इ क्षेषु-मात्रमेव तिर्य्यक् वर्द्धते इषुमात्रं प्राङ्सोऽवैवावरं सम्-इषम् दधाव" शत०ब्रा० १,६,३,११ इक्षासुरवर्द्धन प्रकारः। "इषुमात्रं धनुषः सकाशात् बलात् प्रयुक्तेषु-र्यावद्दूरं गच्छति तावन्मात्रं प्रतिक्षणं तिर्य्यक् उभय पार्श्वतः अवर्द्धत" भा०। शरविक्षेपप्रमाणञ्च। इषु-विक्षेपशब्दे दृश्यम्।

इषुविक्षेप पु० इषोर्विक्षेपयोग्यदेशः। साद्ध शतहस्तमिते शरविक्षेपयोग्ये देशे तन्मानमाह आ०त० पितामहः "मध्यमेन च यत्नेन प्रक्षिपेत्तु शरत्रयम्। हस्तानाञ्च शते साद्धे लक्ष्यं कृत्वा विचक्षणः। तत्प्रमाणदेशातिक्रमेणैव पुरोधोत्सर्गः कार्य्यः। "ततः कल्यं समुत्थाय कुर्य्यात् मैत्रं नरेश्वर! नैर्ऋत्याभिमुखे क्षेपमतीत्याभ्यधिकं भुवः"। मैत्रं मित्रदेवताकपायुसम्बन्धात् पुरोधोत्सर्गं इषुविक्षेप मतीत्य इषुविक्षेपयोग्यदेशाद्बहिः" आ०त० रघु०।

इषेत्वक पु० इषे त्वा इतिभागोऽस्यत्वानुवाके अध्याये वा गोपथ० वुन्। इषेत्वा इतिशब्दयुक्ते अनुवाके अध्याये च। स च यजुर्वेदीयः प्रथमाध्यायः तत्रादौ इषे त्वोर्ज्जेत्येति शब्दत्वात् तस्य तथात्वम् एवं तदन्तर्गतोऽनु-वाकोऽपि तथा।

इष्कर्त्तृ त्रि० निस्+कृ-तृच् "निगन्दोबह्वलमिति" प्राति-शाख्यसूत्रेणोपसर्गैकदेशनकारलोपः। निष्कर्त्तरि। "इषकर्त्तारमध्वरस्य प्रचेतसम्" ऋ० १०,१४०,५। इषुकृदादयोऽप्यत्र।

इष्कृति स्त्री निस्+कृ-क्तिच् इष्कर्त्तृवत् नलोपः। गर्भान् निष्क्रमकारिण्यां मातरि जनन्याम्। "इष्कृतिर्नाम वो माता वोयूयं स्थ निष्कृतीः" यजु० १२,८३,। "इष्-कृतिर्नाम निष्कृतिनाम्नी माता जननी" वेददी०।

इष्ट त्रि० इष-कर्म्मणि क्त। १अभिलषिते, २प्रिये "इष्टोऽसि सखा चेति गीता० च। यज भावे क्त। ३यज्ञादौ न० कर्म्मणि, क्त। ४पूजिते ५एरण्डवृक्षे पु०। ६संस्कारे न०। "एकाग्निकर्म्म हवनं त्रेतायां यच्च हूयते। ऋग्वेदाच्च यद्दानमिष्टं तदभिधीयते। अग्निहोत्रं तपः सत्यं वेदानाञ्चानुपालनम्। आतिथ्यं वैश्वदेवञ्च प्राहुरिष्टमिति स्फुटम्" जातूकर्णोक्ते ७धर्म्म-कार्य्ये न०। इष्टञ्च इच्छाविषयः तच्च द्विविधं गौणं मु-ख्यञ्च। तत्र इतरेच्छानधीनेच्छाविषयोसुखं तत्साधनं गौणम्। तत्र मुख्यमिष्टं सुखं दुःखाभावश्च। तदिच्छाया इतरेच्छानधीनत्वात्। तत्साधनं पाकभोजनादि गौणं सुखदुःखाभावेच्छयैव तदिच्छायाः सत्त्वेन्नात् अ-धिकमिच्छाशब्दे ६।२ पृष्ठे उक्तम्। तत्रेच्छाविषये "सह यज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः। अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्"। "अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्म्म चोच्यते"। "इष्टं हि वो देवा दास्यन्ते यज्ञ भाविताः" इति च गीता। यज्ञे "पुरोडाशभुजामिष्टमिष्टं कर्त्तुमलन्तराम्" माघः इष्टं यागः इष्टमभीष्टं कर्त्तुमल-न्तरामित्यर्थः। "इष्टं दत्तमधीतं वा विनश्यत्यनुकीर्त्तनात्" देवलः। इष्टं यजनम् "शु०त०रघु० टक्कते च "यज्ञैरिष्ट क्रतुगतम्" विक्रमो० स्मृतिपरिभाषिते इष्टकर्म्मणि द्विजातीनामेवाधिकारः न स्त्रीशूद्रयोः यथाह "इष्टसंज्ञं द्विजातीनां धर्मः सामान्य उच्यते। अधिकारी भवेच्छूद्रः पूर्त्ते धर्म्मे न वैदिके" जातूकर्णः "वैदिके वेदसाध्ये अग्नि-होत्रादाविति" रत्नाकरः। "पितव्यगुरुदौहित्रान् भर्त्तुः स्वसीयमातुलान्। पूजयेत् कव्यपूर्त्ताभ्याम् इष्टानाचार्य्यतिथीन् स्त्रियः" इष्टस्मृतिवचने स्त्रिया पूर्त्तमात्रेऽधिकार-विधानात् तत्र "जलाशयोत्सर्गरूपपूर्त्ते गोरवतारणानुम-न्त्रणयोर्यजमानकर्तृकमन्त्रपाठ विधानात् तत्र अमन्त्रकतया स्त्रीशूद्रयोरनधिकारेण तद्वति यागेऽपि तयोर्नाधिकारः विशेषोपदेशाभावात्" इति हैतनिर्ण यानुसारिणः। इषोत्सर्गे तदङ्गहोम इव ब्राह्मण द्वारा तन्मन्त्रपाठसम्भवात्तयोरपि तत्राधिकारः इति रघुनन्दनादयः। "अमन्त्रस्य तु शूद्रस्य विप्रोमन्त्रेण स्टजते" वराहपु० "तद्वुतमङ्गतञ्चाग्नौ न स्त्री जुहुयादनुमेतः" आप० वचनं तु स्वयंहोमविषयम्। "श्रौतस्मार्त्तक्रियाहेतोर्हविषश्चत्विजः स्वयम्" याज्ञ० श्रौत इव स्मार्त्तेऽपि कर्म्मणि ऋत्विग्वरणोक्तेः। अतएव "ऋ-त्विग्वादे निरुक्तश्च सभौ संपरिकीर्त्तितौ। यज्ञे स्वाध्याय-

यात् पुण्यं हानिं वादेऽय वा जयमिति" बृह० उक्ते:ए "श्रौते कर्मणि न० "उद्बुध्यस्वाग्ने प्रतिजागृह्यि त्वमिष्टापूर्त्ते संसृजेथामयञ्च" यजु० १५,५४ इष्टापूर्त्ते श्रौतस्मार्त्ते कर्मणी" वेददी०। १० इच्छया कल्पिते त्रि० "इष्टकृतिरिष्टगुणिता व्येका दलिता विभाजितेष्टेन" लीला० ११यत्नेन तोषिते परात्मनि १२विष्णौ च पु० "इष्टोविशिष्टः शिष्टेष्टः" विष्णुस० "इष्टः परमानन्दात्मकत्वेन प्रियः यत्नेन पूजितो वेति" भा०। यज–करणे वा० क्त, भावे क्त अस्यर्थे अच् वा। १२ इष्टकावां न०। "मरुतार्केण शुध्यन्ति पक्षेष्टरचितानि च" विष्णु०।

इष्टकचित त्रि० इष्टकया चितः चुस्तः। इष्टकाभिर्व्याप्ते

इष्टकर्मन् न० इष्टप्रसिद्ध्यर्थं कर्म शाक०त०। लीलावत्युक्ते गणितभेदे तत्प्रकारो यथा "अथेष्टकर्मसु करणसूत्रं इष्टम् "उद्देशकालापवर्तितराशिः शुद्धो हृतोऽशैरहितो युतो वा। इष्टाहतं इष्टमनेन भक्तं राशिर्भवेत् प्रोक्तमितीष्ट कर्म। अत्रोद्देशकः। षड्घ्नः खत्रिभागोनोदयभक्तः समन्वितः। राशित्रयांशार्द्धपादैः, स्यात् कोराशिर्द्यूनसप्ततिः। न्यासः गुणः ५। खत्रिभागः १/३। हरः१०। राश्यंशाः १/३ १/२ १/४। इच्छम्। ६८। अत्र किल कल्पितराशिः ३। षड्घ्नः। १५। खत्रिभागोनः। १०। दशभक्तः। १। कल्पित ३ राशेस्त्र्यंशार्द्धपादैः ३/३ ३/२ ३/४ समन्वितोहरोजातः १७/४। अथ इष्टम् ६८ इष्टेन ३ गुणितम् २०४। हरेण १७/४ भक्तं जातोराशिः। ४८। एवं सर्वत्रोदाहरणे राशिः केनचिद्गुणितोभक्तोवा राश्यंशेन रहितोयुतोवा इष्टस्तत्रेष्टं राशिं प्रकल्प्य तस्मिन्नुद्देशकालापवर्तकर्मणि कृते यस्मिन्पद्यते तेन भजेदिष्टमिष्टगुणं फलं राशिः स्यात्। तत्र इष्टजात्युदाहरणम्। यूथार्द्धं सत्रिभागं वनविवरगतं कुञ्जराणाञ्च इष्टं षड्भागयुक्तं नद्यां पिबति च सलिलं सप्तमांशेन मिश्रः। पद्मिन्या चारुमांसः स्थलमसहितः क्रीड़ते सानुरागोनागेन्द्रोहस्तिनीभिस्त्रिसहिरतुगतः का भवेद्यूथसंख्या। न्यासः

१/२ १/६ १/८ इच्छम् ४। एवं सवर्णने
१/२ १/७ १/६ द्वाभ्यामपवर्त्तितं २/३।४/२१।
५/३६। पुनरेषां सवर्णितानामैक्यं नवभिरपवर्त्तितं २५१/२५२ इष्टोनं १/२५२ अनेन ४ इष्टे इष्टगुणिते भक्ते जाता कल्पितसंख्या १००८। अपरोदाहरणम्। अमलकमलरागेस्त्र्यंशषड्भांशयुक्तैस्त्रिनयनहरिरुद्रांयेन तर्पेण चार्चा। गुरुपदमथ षड्भिः पूजितं शेषपद्मैः सकलकमलसंख्यां क्षिप्रमाख्याहि तस्य। न्यासः १/२ १/६ १/६ १/४ इच्छम्। ६। अत्रेष्टं राशिम् १ प्रकल्प्य प्राग्वज्जातोराशिः १०। अथ शेषजात्युदाहरणम्। खार्द्धं प्रादात्प्रयागे नवलवयुगलं शोऽवशेषाच्च काश्यां शेषार्द्धं शुल्कहेतोः पथि दशमलवान् षट् च शेषान्न्यायात्। शिष्टा निष्कत्रिपष्टिर्निजगृहगमनयातीर्थपान्थः प्रयातस्तस्य द्रव्यप्रमाणं वद यदि भवता शेषजातिः श्रुतास्ति। न्यासः।

१/१ इच्छम् ६२। अत्र रूपम् १ राशिं प्रकल्प्य
१/२ भागान् शेषान् शेषादपास्य अथवा भागा-
२/६ पवाहविधिना सवर्णिते जातम्। ७/६०
१/४ अनेन इष्टगुणिते ६२ इष्टे। भक्ते जातं
६/१० द्रव्यप्रमाणम्। ५४०। इदं त्रिशोनसत्रैराशिरपि सिध्यति। अथ त्रिशेषजात्युदाहरणम्। "पद्मांशेऽलिकुलात्कदम्बमगमत्त्र्यंशः शिलीन्ध्रं तयोर्विश्लेषस्त्रिगुणोमहीतलगतिं कुटजं दोलायमानोऽपरः। काले! केतकमालतीपरिमलप्राग्भैककालप्रियाद्भूताद्भूतसतोभ्रमति खे भृङ्गोऽलिसंख्यां वद। न्यासः १/५ १/२ २/५ इच्छम्।११। जातस्त्रिकुलमानम् ।१५। एवम् अन्यत्रापि"।

इष्टका स्त्री इष–तक्नु टाप् इष्टकेषीकामालानाम्" पा० निर्देशात्साधुः इष्टम्। (इट्) मृदादिनिर्म्मिते १मृत्खण्डभेदे यज्ञिये अग्निचयनार्थे २मृदादिनिर्म्मिते द्रव्यभेदे च शत० ब्रा० तु निर्वचनान्तरमुक्तं यथा। "यावद्यावद्वै जुह्वत्यात्तावत्तावत् भवतीति तद्यद्या इष्टे कमभवत्तद्याद्वेष्टका" ६,१,२,२३। "तं देवा अन्योराक्षतिभिरभिषञ्चन्तो यांयामाकृतिमजुहवुः सासैवं प्रकेष्टका भूत्वा समपद्यत तद्यदिष्टात् कमभवत्तद्यादिष्टकात्वं तद्यादग्निना इष्टकाः पचन्त्याकृतीरेवैनास्तत् कुर्वन्ति" इति च तत्रैव। इष्टकाकरणकालप्रकारादि" काल्पा० श्रौ० १६,२क० दर्शितं यथा। "उखासम्भरणमष्टम्याम्" १सू०। "उखायाः सम्भरणमुखासम्भरणम् तदष्टम्यां भवति "अष्टकायामुखां सम्भरतीति

(६,२,२,२१) श्रत०ब्रा० वचनात्। उखा चोपलक्षणम् अषाढाद्यत्र सम्भ्रियतएव ततश्चान्तराले तस्या अपि प्रयोक्तृत्वम्। सम्प्रदायस्तु फाल्गुनकृष्णाष्टम्याम्" कर्कः "आहवनीयस्य पुरस्तान्न्यत्वा चतुरश्रे अभ्रे स्फ्यमिरण्ड-मवदधाति भूमिसमम्" २सू०। "भूमिसममन्यूनानतिरिक्तम्" क०। "पिरण्डमपरेण अभ्रे वल्मीकवपां छिद्रां निदधाति" ३सू०। 'पिरण्डाहवनीययोर्अभ्रे अर्धपथे" क०। "अभ्रे पिरण्डाहवनीययोर्मध्ये, वल्मीकवपाम् उपदीकाकृतस्य स्फ्यस्य वपामिव वपाम् अन्तःपुटां छिद्रां छिद्रसंयुक्ताम्" संप्र०। "आहवनीयं दक्षिणेन त्रिवृन्मुञ्जपञ्चाङ्गीवद्वास्त्रिवृन्ति प्राङ्मोऽश्वगर्दभाजाः पूर्वापरा रासभोमध्येऽश्वपूर्वाः" ४सू०। "आहवनीयस्य दक्षिणतः त्रिवृद्भिर्मुञ्जमयीभिः पञ्चाङ्गीभिः पञ्चाङ्गो सुस्थिरिकाः ताभिर्वद्वास्त्रिवृन्ति प्राङ्मुखाः अश्वगर्दभाजाः पूर्वापररीत्या रासभोमध्येऽश्वपूर्वाः" क०। "उत्तरत आहवनीयस्यारत्निमात्र उभयतस्त्रीक्षा वैष्णवी सुषिराभ्रिः कल्माष्यभावेऽकल्माषी प्रादेशमात्यरत्निमात्रीवा" ५सू०। "आलभन्तीत्यनूनासुत्तरतो मा भूदित्याहवनीयमग्रहणम्" क०। "परिपाकवयात्कर्बुरा" संप्र०। "हिरण्मयीमेके" ६सू०। "एके आचार्या इच्छन्ति, अतश्च विकल्पः" क०। "अष्टस्रुचीतं जुहोति संततमष्टस्रुचम् जुह्वान इति (११,१) ७सू०। "अष्टस्रुचीतमाज्यद्रव्यं संततं जुहोति" क०। 'देवस्य त्वेति (११,२) अभिमादाय "हस्त आधायेत्येनामभिमन्त्रयते"। (११,११) ८सू०। "अग्रप्रभृतीश्च प्रत्यृचं प्रतृर्त युञ्जायां योगे-योगइति (११,१२,१४) ९सू०। "अभिमन्त्रयते" क०। "अनुपस्तृणन्नुत्क्रमयत्येनान् प्राचः प्रतिमन्त्रं प्रतृर्वन्नुर्वन्नरिचं पृथिव्याः सधस्थादिति" (११,१५,१६) १० सू०। "अग्निषु च्यवतस्तु पिरण्डं गच्छन्त्यग्निं पुरीष्यमिति" (११,१६)। (६,२,२,१) श्रत०ब्रा० ११सू०। "दक्षिणतश्च पशवो युगपत्" १२सू०। "गच्छतां च दक्षिणतः पशवः, उत्तरतश्च पुरुषाः युगपद्गमनं कुर्वन्ति"क०। "अनड्वा पुरुषमीक्षते देवपितृमनुष्यानर्थकमग्निं पुरीष्यमिति"। (११,१६) १३सू०। "यो देवादीक्षयति स देवपितृमनुष्यार्थकः" क०। "वल्मीकवपामादाय छिद्रेण पिरण्डमीक्षतेऽन्वग्निरिति" (११,१७) १४सू०। "तद्वा निदधात्येनाम्। १५सू०। "वल्मीकवपाम्" क०। "आगत्येत्यभिमन्त्रयतेऽनुम्" (११,२८) १६सू०। "आक्रम्येत्येनेन (११,१९) पिरण्डमधिष्ठापयति" १७ सू०। "एनेनेत्यन्योऽभिधीयते" क०। "द्यौस्त्वा इति (११,२०) पृक्षोपरि पार्ष्णिं धारयन्नुपस्तृणन्नुत्क्रामेत्युत्क्रामयति (११,२१) १८सू०। "अश्वम्" क०। "उदक्रमीदित्यभिमन्त्रयते (११,२२) १९ क०। "अश्वमेव" क०। "आहवनीयवत् स्थापयति पिरण्डस्य" २०सू०। "पशून्" क० "उपविश्य स्फ्यमभिजुहोत्या त्वा जिघर्मीति (११,२३) 'व्यतिषक्ताभ्यामनुगृभ्यामाज्यतो (११,२२,२३) स्रुवेणाश्वपदे" २१सू०। "स्फ्यसंस्कारत्वादुपविश्येत्युच्यते, व्यतिषङ्गश्च एकस्याः पूर्वार्ध इतरार्धः इतरयोरप्येवमेव" क०। "अभ्रया पिरण्डं त्रिः परिलिखति परि वाजपतिरिति (११,२५,२७) बहिर्बहिरुत्तरयोत्तरयाभ्रया पिरण्डं खनति देवस्य त्वेति (११,२८) २२सू०। "अभियजनमभ्यन्तरनिवृत्त्यर्थम् तथा चाह "अत्र वा वैष्णव्यभिरुत्सीदतीति "(६,५,-४,३ श्रत०ब्रा० उत्तरया परया ऋचा पूर्वलिखितादुत्तरेणोत्तरेणाग्रप्रदेशे परिलिखति"। क० "कृष्णाजिनमासीनोऽन्तरतस्त्रिष्वनु पुष्करपर्णमपां पृष्ठमिति" (११,२९) २३सू०। "तस्मिन्नुत्तरेणाजिने" क०। "विमार्ष्टीनद्विरिति (११,२९) २४सू०। "पुष्करपर्णम्" क० "आलभत उभे यज्ञं च स्यादिति"(११,३०३१) २५सू०। "उभे कृष्णाजिनपुष्करपर्णे, शक्त्यत्वाच्च युगपदालम्भनम्" क०। "पिरण्डं पुरीष्योऽसीति (११,, ३२)। "२६ सू० "आलभते" क०। "पार्ष्णिभ्यां परिस्तृणीतेनं दक्षिणोत्तराभ्यां दक्षिणः साभ्रिस्त्वामग्नइति" (११,३२ ३८)। षड्भिः सर्वं सकृत्वा" २७सू० "मन्त्रे मन्त्रः "अथैनं परिस्तृणातीति" श्रत०ब्रा० (६,४,२,२) वचनात्"क० इति द्वितीया कण्डिका।

"पुष्करपर्णे निदधाति"१सू०। "अपः स्रुचेऽनवत्यपो देवीरिति (११,३८)२सू०। "स्रुचः पिरण्डावटः" क०। सं तद्वति (११,३९) वा तमपद्यिपति "३सू०। "स्रुचएव" क०। "अनामिकया संवपति पुरस्तात्सव्यादक्षिणत उत्तरतश्च" ४सू०। "संवापचावटे पुरीषस्य" क०। "आक्षीर्णयोरन्नादमुद्गृह्णाति सुजात इति"(११,४०) ५सू०। "अक्षीर्णयोः कृष्णाजिनपलाशपर्णयोः" क०। "बन्धनायोभवोः प्राणान् सर्वत अर्ध्वान् करोति"संप्र०। 'त्रिवृता सुत्रयोत्तोपनह्यति वासोऽग्नइति। (११,४०) ६सू०। "उद्गृह्णीतानन्नान्" क०। 'उत्तिष्ठति पिरण्डमादायोदु तिष्ठेति" (११,४१) ७सू०। "अर्ध्वबाहुः

प्राञ्चं प्रस्तृणात्यूर्ध्व° ज्रयुण इति" (११,४२) ८सू०। "प्रसारितबाहुः पिण्डम्" क०। "अवहत्योपरिनाभि धारयन्नग्रभ्रतीनभिमन्त्रयते सजातः स्थिरो भव शिवो भवेति"। (११,४२,४५)" ९सू०।"अवहत्य पिण्डं नाभेरुपरि धारयन्"क०।"धारयत्येवासुपरि पिण्डमनुस्तृणन् प्रैतु वाजी इषाग्निमित्यग्रखरवोः" (११,४६) १० सू०। "एवं पन्थनासुपरि पिण्डमनुपस्तृणन् धारयति प्रैतु वाजीत्यग्रस्य, इषाग्निमिति खरस्य" क०। "अग्न आयाहीत्याहृत्य (११,४६) खराच्छागस्यैतं सुत्यमित्यानिधानात्" (११,४७) ११ सू०। "धारयत्यनुपस्तृणन्नेव" क०। "आयन्त्यावर्त्य पन्थनजः पुरस्ताद्रासभो मध्ये" १२सू०। "खस्थानस्थितानामेवाहुतिः" क०। "अनड्वा पुरुषमीक्षते पूर्ववदग्निं पुरीष्यमिति"। (११,४७) १३ सू०। "अनन्यार्थत्वात् पूर्ववच्छब्देनाग्निषु प्रज्वलत्सिध्यति (२, ११)" क०। "उत्तरत आहवनीयस्योद्गतावोचिते सिकतोपकीर्णे परिहते प्राग्द्वारे निदधात्योषधय इति" (११,४७,४८)१४ सू०। "वि पाजसेति" (११,४९) प्रसुच्यैनमजलोमान्यादाय प्रागुदीचः पन्थनुत्सृजति १५ सू०। "प्रसुच्य पिण्डमजलोमानि गृहीत्वा प्रागुदीचीं दिशं प्रति पन्थनुत्सृजति" क०। "आपो हि ष्ठेति (११,५०) पर्णकषायप्रक्षसदकमासिञ्चति पिण्डे" १६ सू०। "पर्णकषायं पलाशकषायम्" क०। पलाशत्वग्भिःक्वथितसदकं पलाशकषायपक्वम्" संय०। "फेनं च तूष्णीं ततः स्रुत्वा" १७सू०। "तत एवोदकात् पूर्वतरं फेनं स्रुत्वोदकमासिञ्चति चषब्दात्फेनम्" क०। "अजलोमभिः संस्रजति मित्रः संस्रज्येति (११, ५२)" १८ सू०। "पिण्डम्"। "शर्करायोरसाश्मचूर्णैश्च स्रुग्भिः संस्रज्येति (११,५४)" १९सू०। "शर्करा प्रसिद्धा अयोरसो लोहसिङ्घाणः कीट इति यः प्रसिद्धः अश्मचूर्णः पाषाणचूर्णः चषब्दादेतैः पिण्डं संस्रजति" क०। "शर्कराः स्रुक्सम्बन्धुकाः अयोरसो लोहरसो यत्साध्यमानाल्लोहात्पृथग्भवतीति कीट इति लोके प्रसिद्धः अश्मा दृढपाषाणः तेषां चूर्णैः संस्रजति" संय०। "संस्रष्टामिति" (११, ५५,५७) संयौति" २०सू०। "पिण्डं मिश्रयति आज्ञालयतीत्यर्थः" क०। "अषाढां करोति महिषी प्रथमवित्रा तदाख्या" २१सू०। "अषाढाख्यामिष्टकां महिषी करोति। महिषीशब्दस्यान्यताप्रसिद्धत्वादाह प्रथमवित्रा तदाख्या" "तद्वै महिषीति"ब्रा० (६,५,२,१) क०। "भार्याणां मध्ये प्रथमं लब्धा प्रथमपरिणीता या स्त्री सा तदाख्या" संय०। "यजमानपादमात्रीं त्रयस्त्रिंशताम्" २२सू०। "महिषीपादमात्री वा मूदिति यजमानपक्षम्" क०। "त्रिषु स्थानेषु लिखिताम्" संय०। "यजमान उखां करोति मृदमादाय मखस्य शिर इति (११,५७) २३ सू०। "मृदादाने मन्त्रः" क०। "प्रादेशमात्रीं तिर्यगूर्ध्वां च" २४ सू०। "तिर्यगायामप्रमाणे विस्तारप्रमाणे च" क०। "पञ्चप्रादेशान्निष्पन्नामात्रीं वा तिर्यक्पञ्चपशौ" २५ सू०। "ऊर्ध्वं तु प्रादेशमात्रैव पञ्चपशावपि" क०। "ध्रुवस्थेति (११,५८) ध्रुवयति" २६ सू०। "आर्त्तं पिण्डम्" क०। "अन्तानुद्वीय सर्वतः प्रथमं धातृमादधाति रुद्रास्त्वेति" (११,५८) २७सू०। "धातृशब्दानृत्विक्प्रक्षेप एव" क०। "प्रथितस्य तन्तून्तानुद्वीय ऊर्ध्वान् गमयति, धातुं प्रथमपिण्डकाम्" संय०। "संलिख्य स्रुचा स्रुवेणोत्तरमादित्यास्त्वेति" (११,५८) २८सू०। "संलिख्य शिथिलया मृदा संलिख्य वारिणा संस्रुचां सुकुमारां कृत्वा" संय०। "विष्ण त्वेति (११, ५८) समीकरोति" २९सू०। (६,५,२,३) शत० ब्रा०। "विततीयउत्तरे वर्तिं सर्वतः करोत्यदित्यै रास्नेति (११,५९) ३०सू०। उखाया ऊर्ध्वप्रमाणोत्तरे विततीये उपरि वर्त्तमाने ततीये भागे सर्वतः सर्वासु दिक्षु मृण्मयीं वर्त्तिं दृत्याकारां रास्नां (काञ्ची गुणस्थानीयाम्) करोति"क०। "ऊर्ध्वांस्तूष्णीं प्रतिदिशं ३१सू०। "वर्त्तीः करोति चतस्रोऽपरा वर्तिं प्राप्ताः"३२सू०। उखाशब्दस्यातिवचनत्वाद्बहुत्वेनोक्ता भवति" क०। "सर्वासु दिक्षु पार्श्वमध्ये बाह्यप्रदेशे अपरास्तस्रो दृत्तीरूर्ध्वांस्तूष्णीं करोति किमुक्ताः सूत्रत आरभ्य दृत्तिं प्राप्ताः तिस्रो रास्नां यावदुक्ताः" संय० इति २कण्डिका

"स्तनानिवाग्रे प्रोन्नयति" १ सू०। "ऊर्ध्ववर्त्तीनामेकैकस्याः" क०। "आसां चतसृणां दृत्तीनामग्रेषु तिरश्चा दृत्तेरुपरि स्तनानिव स्तनसदृशान्मृद्वयवानुन्नयति" संय०। "द्विस्तनामष्टस्तनामेके" २सू०। "तां वैके द्विस्तनामष्टस्तनामिति (६,५,२, १२) श्रुतेः द्विस्तनपक्षएकस्मिन्नेव वर्त्मन्यै क्रियते अष्टस्तनपक्षे द्वौ द्वाविति क०।"विलं गृह्णात्यदितिष्ट्वेति'(११,५२) ३सू०। "सुखे गृह्णातीत्यर्थः" क०। "स्रुत्वायेति (११,५२) निदधाति उखाम्" ४सू०। "तिस्रएके" ५सू०। "उखाः

कुर्वन्ति" (६,५,२,१२) श०ब्रा०। "तथा च ऋत्विग्वरणादेकैका निधानान्ता क्रियते" क०। "इष्टकास्तिस्रो विश्वज्योतिषः पृथग्लक्षणास्त्रालिखिताः" ६स्०। "तृयद्वर्षे चयद्वाद्यजमान एव तिस्र इष्टकाः विश्वज्योतिःसंज्ञकाः पृथग्लक्षणाः करोति लक्षणकरणं च प्रथमाद्वितीयाप्रक्षप्रत्यर्थमेवोपधानं यथा स्यादिति" क०। "मृदसपयसां निदधाति" ७सू०। "उखां क्रियमाणामसपयेतरत्सपयसा तां ह्रदमतिरिच्यमानां निदधाति कार्यार्थम्" क०। "अवशिष्टां ह्रदसपयसंज्ञां" निदधाति" संग्र०। "सप्तभिरश्वयज्ञक्षिरुखां धूपयति दक्षिणाग्न्यादीप्तैरेकैकेन वसवस्त्वेति (११, ६०) प्रतिमन्त्रम् ८सू०। "यज्ञक्षिरश्वमेख्ड्ः" संग्र०। "अभ्रा अभ्रं चतुरश्रं खनत्यदितिर्दृंहेति (११, ६१) ६सू०। "अग्निश्च पूर्वोक्तश्च प्रकृतत्वात् अत्र सा वैष्णव्यभिरुत्सीदतीति (६,५,४,२) श०ब्रा०वचनात्" क०। "अपधमास्तीर्य यथाक्रमवदधाति" १०सू०। अभ्रे, येनैव क्रमेण कृता अपाठाद्याः उखायां तु विशेषः, "देवानां त्वेत्युखां (११,६१) न्युब्जाम्" ११सू०। "अवदधाति" क०। "अपधेनावच्छाद्य दक्षिणाग्निनादीपयति धिषणास्थेति (११,६१) १२सू०। "निर्मन्थ्येन वा धूपनमपधे" १३सू०। "कर्त्तव्ये" क०। "वरत्रोद्वेतोत्तमाणो (११,६१) जपति" १४सू०। "उखाभीक्षमाणः" क०। "आचरति मित्रस्थेति (११, ६२) १५सू०। "आचरणं च अपधप्रक्षेपः" क०। अषाढादीनामधस्तादुपरिष्टाच्च पुनः अपधं प्रक्षिपति" संग्र०। "यावद्वाचरेत्" १६सू०। "यावद्भिः प्रकारैः अपधं प्रक्षिपेत्तावद्भानेनैव मन्त्रेणाचरेत्" संग्र०। "दिवैव प्रदहनोद्धरणे" १७सू०। "कर्तव्ये" (६,५,४,१०) श०ब्रा०। "प्रदहनं पचनम् उद्धरणं बहिर्निष्कासनम्" संग्र०। "उद्यति अपधम्" १८सू०। "पदार्थतया" क०। "भस्मसाद्भूतं पराकरोति" संग्र०। देवस्त्वेत्युखाम्" १९सू० (११,२२)। "उद्यति" क०। "उत्तानां करोत्यव्यवमानेति (११,६३) २०सू०। "उद्यच्छत्युखाम्" (११,६४) २१सू०। "ऊर्ध्वं यच्छति" क०। "परिगृह्य पात्रे करोति मित्रैतां तदृति" (११, ६४, २२सू०। "अजापयसावसिञ्चति वसवस्त्वेति" (११,६५) प्रतिमन्त्रम्" २३सू०। "उखाम्। त्रित्वपक्षे च उत्तानकरणाद्येकैका अजापयसावसेकान्ता कर्त्तव्या" क०। "इष्टकाक्रियातस्त्रालिखितानाम्" २४ सू०। "ऋत ऊर्ध्वमिष्टकास्त्रालिखिताः क्रियन्ते" क०। "अपरिमितालिखिता वोत्तरयोः" २५ सू०। "द्वितीयाचतुर्थ्योः कृत एतत् ते हि प्रकल्पान्नायते "रसो वै ते चितौ अपरिमित उ वै रस इति" (८,७,२,१७), श०ब्रा०। "अतश्च विकल्पोऽयम्" क०। "पूर्ववदग्निः पाके" २६ सू०। "इष्टकानां पाके भवति निर्मन्थ्यो दक्षिणाग्निर्वा" क० फाल्गुनामावास्यायां दीक्षासङ्का ऋत्वग्रेषं तत्राह। "दग्धोक्तवचनान्तं कृत्वाध्वर्युयजमानयोरन्यतर उखामाहवनीयेऽधिश्रयति सङ्कुलायगवकुलायावस्तीर्णासु अन्तरेणाग्नं मा तु भित्था इति (११, ६८) तिस्रश्चुदङ्प्राङ्" २१सू०। दग्धोक्तवचनान्तमाध्वरिकं कर्म कृत्वा उखामाहवनीयेऽधिश्रयति, सा च सङ्कुलायावस्तीर्णा भवति अन्तरेणाग्नं। प्रागुदीचीं दिशमभिमुखः। अधिकारसपत्नीवत्त्वाच्च" क०"रुक्मप्रतिमोचनविष्णुक्रमवाजप्रेषु च" २२सू० प्रागुदीचीं दिशमभिमुखो भवति"क० "अग्नावारूढे त्रयोदशाक्षां प्रादेशमात्रीः समिधश्चादधाति" २३सू०। "उखायामग्नावारूढे त्रयोदश समिधश्चादधाति, प्रादेशमात्रीश्च यिष्टानुकरणप्रक्षप्रत्यर्थम्" क०। "अनारोहत्यङ्गारानोप्यैके" २४सू०। अनारोहत्यग्नावुखायाम् अङ्गारानोप्यैके समिदाधानं कुर्वन्ति" क०। ता इदानीमाह, "इतोऽग्नां कार्मुकीं द्रुघ्न इति" (११, ७०) २५सू०। "आदधाति, द्रुमको धमनः तदीया कार्मुकी" क०। "वैकङ्कतीं परश्वा इति(११,७१) २६सू०। "औदुम्बरीं परश्वा इति" (११,७२) २७सू०। "अपरशुवृक्णां यद्वनइति"(११,७३) २८सू०। "या परशुना न छिन्ना" क०। "अकुठारच्छिन्नाम्" संग्र०। "अधःशयां यदक्तीति" (११,७४) २९सू०। "भूमिसंलग्ना या सदा रूढा भवति" संग्र०। "पालाशीः प्रलूनमरुरुरिति" (११,७५)। ३०सू०। "आदधाति अर्थतः पालाश्यो भवन्तीति (६,६,३,७)श०ब्रा वचनात्, एवं चापरशुवृक्णा अधःशया औदुम्बर्यावेव भवतः ज्ञात्वन्तराविधानात्" क०। "उपोत्तमां त्रिंशत्यक्त्वेन्" ३१सू०। "उत्तमायाः समीपे उपोत्तमा द्वादशी, तां त्रिंशत्य यजमानस्येच्छयादधाति अन्यस्य त्रिंशत्पुरोहितव्यतिरिक्तस्य उभे उपोत्तमोत्तमे दक्षयाधीयेते, एवं हि श्रूयते" श०ब्रा० (६,६,३,१२) क०। "एवं च सति, उत्तमां पुरोहितस्य" ३२सू०। "दक्षयादधाति" क०। "उत्तमाम् बाहूदृति" (११,८२) संग्र०। "अन्यस्योभे" ३३सू०। "अन्यत्रिंशत्पुरोहितस्य च

ऐकादश भवन्ति त्रयोदश वा" क० । "त्रिंशत्पुरो-डाशितव्यतिरिक्तस्य द्वादशत्रयोदशत्वाविच्छेदेन भवतः" संग्र० "स्वाहाकारः सर्वासूखायाम्" ४४सू० । "उखाया-माधीयमानासु समित्सु, अतोऽन्यत्रापि स्वाहाकारो भवति सर्वास्वित्यभिधानात्" क० । "उखायां सर्वासु समित्सु स्वाहाकारो भवति" संग्र० । "औदुम्बरभक्षादि दण्डान्तमन्त्रके" ४५सू० । "एवं सति प्रागौदुम्बरभक्षहोमा-दुखाधिश्रयणादि" तान्यु ह्येकउखायामेवैतान्यौदुम्बरभक्षाणि जुह्वतीति वचनात्" (६,६,१,२२) क० । "व्रतावसरे" संग्र० इति ४ कण्डिका ।

"यजमानः करण्डे रुक्मं प्रतिमुञ्चते परिमण्डल-मेकविंशतिपिण्डं कृष्णाजिननिष्यूतं लोमसु शुक्ल-कृष्णेषु गणस्थले त्रिष्टत्योतमुपरिनाभि बर्हिष्मिण्डं दधानो रुक्म इति"(१२,१) । "रुक्मं हि प्रजत्य सर्व-मेवैतच्छ्रयते (६,६,१,२), यजमानग्रहणाच्च स्वय-मेव यजमानः प्रतिमुञ्चते, द्वादशाहे च सर्वे यजमानाः प्रतिमुञ्चेयुः अत ऊर्ध्वं पिण्डाद्यारम्भः एवं हि सर्वैः कृतं भवति" क० । "परिमण्डलं वर्तुलम्, एकविंशति-पिण्डम् पिण्डं निर्बाधम् निर्बाध्यन्ते उन्नताः निःका-श्यन्ते उन्नताः स्वरूपाद्बहिर्निःसृता भवन्ति, कृष्णाजिन शुक्लकृष्णेषु लोमसु निष्यूतं नितरां स्यूतम्, पुनः कोद-वम् त्रिगुणे त्रिष्टति गणमये स्थले ओतं प्रोतम् तथा उप रिनाभि, पुनः बर्हिष्मिण्डं बर्हिर्निर्बाधम्" संग्र० । "इष्ट्वधिक्रान्दीपुंसुक्करञ्चवस्त्रिष्टतो बर्हिष्माः"२सू० उखा याभ्यां स्पृष्टते तौ इष्ट्वौ, शिक्यं प्रतिष्ठम्, आस-न्दी च । ऋतरक्षा रज्ज्वो बर्हिष्मा भवन्ति" क० । "बर्हिष्माः कर्दमलिप्ताः" संग्र० । "परिमण्डलाभ्या-मिष्ट्वाभ्यामुखां परिस्पृणाति नक्षोषासेति" (१२, २) ३सू० । "हरति द्यावाक्षामेति" (१२,२) ४सू० । "तामेवोखाम्" क० । "आहवनीयस्य पुरस्ताद्द्वात्रिं-शदन्दीवदासन्द्यां चतुरश्राक्ष्यां शिक्यवत्यां निदधाति देवा अग्निमिति (१२,२) ५सू० । "उद्द्वात्रिंशदन्दीवदिति प्रादेशमादी गम्यते" (१२,४,२) क० । सा च चतुरक्षी सह पादैः, तस्यां शिक्यवत्यामासन्द्यां च निदधाति उखाम्" क० । "शिक्यपाशं प्रतिमुञ्चते षड्भ्यां त्रिवृ-द्भ्यां पाशेभ्यो" (१२,३) ६सू० "पाशायाम्" क० । "सशिक्यं प्राञ्चं प्रस्पृणाति सुपर्णोऽसीति" (१२,४) पिण्डवत् ७सू० । "सह शिक्येन प्राञ्चमग्निं प्रस्पृणाति, पिण्डवदिलूर्ध्वं बाहुः (२,८) । "धारणं च" ८सू० । "पिण्डवदेव उपरिनाभि" क० । अत्र द्वाभ्यामृग्भ्यां शुक्लयजुर्वेदस्याध्यायादि, त्रिभिरृग्भिः कात्यायनश्रौतसूत्रस्या-ध्यायकण्डिकादि । चतुर्भिरृग्भिः शतपथब्राह्मणस्याध्यायादि ज्ञेयं तेन तत्तत्प्रतीकमात्रमृहीतमन्त्रसूत्रादि तत्तत्स्थाने द्रष्टव्यम् विस्तरस्तु शत० ब्रा० ६ कां० द्रष्टव्या । लौकि-केष्टरचितप्राचीरादौ इष्टकाघनफलेन इष्टकासंख्या-ज्ञानोपायो दर्शितोलीला० यथा "चितौ करणसूत्रं सार्द्धदृत्तम् । उच्छ्रयेण गुणितं चितेः किल क्षेत्रसम्भव-फलं घनं भवेत् । इष्टकाघनहृते घने चितेरिष्टकापरि-मितिश्च लभ्यते ॥ इष्टलोच्छ्रयहृद्विभक्तिचितेः खुःखराश्च दृषदां चितेरपि ॥ उदाहरणम् । अष्टादशाङ्गुलं दैर्घ्यं विस्तारो द्वादशाङ्गुलः । उच्छ्रितिश्चाङ्गुला यासामिष्ट-कास्वाचितौ किल ॥ यद्विस्तृतिः पञ्चकराष्टहस्तं दैर्घ्यं च यस्यां त्रिकरोच्छ्रितिश्च । तस्यां चितौ किं फलमिष्टकानां सङ्ख्या च का ब्रूहि कति खराश्च ॥ इष्टकायाः घनहस्त-मानम् २/३६ चितेः क्षेत्रफलम्४० । उच्छ्रयेण गुणितं चितेर्घनफलम् १२० । यथोक्तकरणे लब्धा इष्टका सङ्ख्या २५६० । खरसङ्ख्या २४ । एवं पाषाणचयेऽपि" 'व्यासात् षोड़शभागः सर्वेषां सद्मनां भवति भित्तिः । पक्वेष्टकाकृतानां दारुकृतानां च स विकल्पः । बृह०स० । "नेष्टकारचिते पितॄन् संतर्पयेत्" शङ्खलि० । "स्पृणयात् कोटिगुणितं फलं स्वाद्दारुभिः कृतात् । कोटिकोटिगुणं पुण्यं फलं स्वादिष्टकामये" मठ०त० पु० । वास्तु-यागे 'आकाशपदे' इष्टकारोपाचारः वास्तु याग-शब्दे द्रष्टव्यः ।

इष्टकाचयन न० इष्टकयाऽग्नेश्चयनम् । इष्टकया अग्नेश्च-यने तत्प्रकारः कात्या०श्रौ०सू० । "एतया विकृत्याभिमन्त्र्यै-कोऽन्यचितं चिन्वन्ति द्रोणचिद्रथचक्रचित्कङ्कचित्प्रउगचिद्-भयतःप्रउगः ससृज्ञ पुरीषः" १६,५,६ । "एते ह्यग्नि-विशेषाः तदाकारांश्चिन्वन्त्येके एके सुपर्णचितम् विकृ-त्यादृश्या विकृतेरग्न्यन्तरेष्वप्राप्तिर्मा भूदित्युच्यते एवं हि श्रूयते "तं हैकएतया विकृत्याभिमन्त्र्यान्यां चितिं चिन्वन्तीति" (६,७,२,८ शत०ब्रा०) क० । "विकृत्या एतया ऋचा अन्यचितं यद्विश्वमन्यमग्निं चिन्वन्ति त-मेवाह द्रोणचिदित्यादि" संग्र० । "ससृज्ञ पुरीषे प्रतिदिशं पुरीषाहरणम्" १० सू० । प्रतिदिशं पुरीषमाहृत्याहृत्य तेनैव चयनम्" क० । "विष्णुक्रमान् क्रमते विष्णो-

रिति" (१२,५ यजु०) "प्रतिमन्त्रमन्यदुपभृतं च तक्षिं-क्षिन्" ११ सू० । "तक्षिन् क्रमणे" क० । "अक्रम-यतुर्वै" १२सू०। "उदपदृष्टं तु भवत्येव" क० । दिशो दीक्षते दिशोऽनुविक्रमस्वेति (१२,५) १३सू० "प्रतिदिशं मन्त्रः" क० । "पिण्डवत्प्राशुदङ्मुखं प्रस्तृणात्यक्रन्ददग्नि-रिति" (१२,६) १४ सू० । पिण्डवदित्यूर्ध्वं बाह्वः (२,८) क० । "अवरोहत्यग्नेऽभ्यावर्तिन्निति" (१२,७) १५सू० "प्रत्यवरोहत्यग्निम् यावत्तत्य ऊर्ध्वोऽवरोहतीति" (६,७,२,६) "श्रुतेस्तदुत्प्रत्यवरोहणम्" कर्कः । "उपरि-नाभि धारयन्वा त्वाहार्षमित्यभिमन्त्रयते" (१२,११) १६ सू०। "अग्निम्" क०। "पाया उन्मुञ्चोदुत्तममिति" (१२,१२) "पिण्डवत्प्राग्दक्षिणा प्रस्तृणात्यग्ने दृहन्निति" (१२,१३) १७सू० । "अवहरति हंसः शुचिषदिति" (१२,१४) । १८ सू० । "आसन्धां करोति दृहदिति" (१२,१४) १९सू०। "उपतिष्ठते सीद त्वमिति" (१२,१५) २०सू० । "वात्सप्रेण च दिवस्परीत्येकादशभिः" (१२,१८,२८) २१सू०। "उपतिष्ठते" क०। "अनुवाकेनैके" (१२,१८,२९) २२सू०। "उपतिष्ठन्ते" क०। "अत्र दीक्षितोऽयमिति" २३सू०। "अक्षिद्वत्सरे दीक्षितोऽयमित्याह (७,४,११) "दण्डान्ते शृङ्गाधिश्रपणाद्युक्तम् अतः प्राक्तनादुक्त्यर्थ-मिदमुच्यते" क० । "आदत्तिरतः संवत्सरम्" २४सू०। "अत ऊर्ध्वं यदुच्यते तत् संवत्सरं यावदावर्तते" क० । "अत ऊर्ध्वं यत्कर्मोच्यते भक्षोदपनादि तच्च संवत्सरं यावदादत्तिर्भवति" संग्र० । ५कण्डिका

"उखावा भक्षोदपनमक्षमिते पात्रे" १सू० । "तच्च प्राग्वाग्विसर्गात्" "भक्षोदुप्य वाचं विसृजत" इति श्रुतेः (६,७,४,१४) क०। "भक्षोदपनं भक्षोदरक्षम्" संग्र० । "वाचं विसृज्य समिदाधानं रात्रौ रात्रौमप्रयावमिति" (११,७५) २सू० । "एवमुदिते भक्षोदपनादि" ३सू० । "कर्तव्यम् अयं तु विशेषः" क०। "अहरहरित्याधानम्" (११,२५) ४सू० । "विष्णुक्रमवात्प्रे चाहर्व्यत्वात्समुदिते समिधमाधाय" ५सू० । "अहर्व्यत्वात्तेन कर्तव्ये" क० "अक्षिन्दिने विष्णुक्रमाः उत्तरक्षिन्वात्समग्रम् एवं याव-द्दीक्षं कर्तव्यम्" संग्र० । "स्वप्नप्रतिमोचनादि प्राग्वात्स-माद्विष्णुक्रमाः" ६सू०। "तयोर्विभागमाह । साग्निके क्रतौ संवत्सरं दीक्षा आम्नाताः संवत्सरमित्यपक्रम्य चिनोतेति (१०,२,६,८) पवित्रे चतस्रो दीक्षा आम्नाताः पवित्रवद्दीक्षेति (१५,१,३) तत्राग्नौ सति चिन्त्य-ते किमग्निनिमित्ता दीक्षा भवन्तु उत सौमिक्य इति उभयं चैतच्चरितार्थम् पवित्राद्धविराग्निक्यचरितार्थाः अनग्निके च पवित्रे सौमिक्य इति तेन साग्निमति प-वित्रं कथं भवतीति नियमकारणाभावादनियमे प्राप्त आह" क० "सोमाविरोधेन वा तत्प्रधान्यात्" ७सू० । "सोमस्य प्रधानभूतत्वात् तदीक्षा एव दीक्षा भवन्ति" क० "सोमयागेनाविरोधः सोमाविरोधः तेनाविरोधेनैव दीक्षा भवति वाक्यारम्भे कृतः तत्प्रधान्यात् सोमस्य प्राधान्यात् अग्नेश्च तदङ्गत्वात् तेन द्वादशाहे वाजपेये द्वादश सप्त-दश वा भवन्ति नाग्निप्रयुक्तसंवत्सरदीक्षाः" संग्र० । "न्यञ्च समिधं व्रते प्रते-प्रतेऽञ्चपतदित्याधानम् । (११,८२) ८सू० "उखेऽग्नौ यजमानः करोति" संग्र० । "संव-त्सरश्चतिनोऽसंवत्सरश्चतेऽपि" ९सू० । पूर्वं कक्षि-क्षिद्यत्ते साग्निके वैनैकवारं संवत्सरमुखोऽग्निर्भूतो भवति स संवत्सरश्चतो तस्मात्संश्चतेऽप्युखेऽग्नौ चयनं भवति (६,५,१,६५) संग्र० "संवत्सरं सोष्यतः" १० सू०। "संवत्सरमभिषवं करिष्यतः असंवत्सरश्चतेऽपि चयनं भवति (६,५,१ ६६) क० । "संवत्सराक्षिताग्नेः" ११सू०। "असंवत्सरश्चतेऽपि चयनमिष्यते" (६,६,१,६७) क० । "जातस्य च" १२सू० । "संवत्सरे जातस्य च असंवत्-सरश्चतेऽपि चयनं भवति" (६,५,१,६८) क० । "गर्भाधानादिनादारभ्य संवत्सरे पूर्णेऽतीते वा यो जात-स्तस्य भवति" संग्र० । "यास्यास्यमन्यम्" १३सू० । "अन्यं जघन्यमिदं पश्चान्तरम् यस्यासानुरूपभरणं कृत्वा-ग्निश्चीयत इति (६,५,१,६२)क०। "यास्यास्यं यस्यासा-नुरूपमग्निं कृत्वा चयनं भवति" संग्र० । "अचयनं वा परस्मै" १४सू० । चयनं वेति विकल्पः एवं हि श्रूयते (६, ५,२,१२) त्रयो ह वै" इत्युपक्रम्य परस्मै करोतीति निन्दार्थवादः प्रतिषेधार्थः तस्मादप्येवंवित् कार्यं परस्मा अग्निं चिनुवादिति ६,५,२,३, प्रतिप्रसवः अतः प्रतिषेधप्रतिप्रसवाभ्यां विकल्पः" संग्र० । "प्रामनः कृत्वो-ख्यस्योत्तरतः समिदाधानं समिधाग्निमिति (१२, ६०)१५ सू०। "उख्यस्योत्तरतः प्राङ्मुखमनः कृत्वोख्यएव समिदाधा-नम्" क० । "सासन्दीकमुद्यम्योदुत्तेति (१२,६१) दक्षिण-तोऽनसि करोति" १६सू० । "सासन्दीकमुख्यमुद् त्वेत्युत्-क्षिप्यानसो दक्षिणतोऽवस्थितोऽनसि करोति" कर्कः । "स्थाल्यां गार्हपत्यं पचात्" १७सू० । "अनसि करोति दक्षिणाग्निं च विहरतीवे करोति" क०। "अनड्वाहौ युङ्क्ता

प्रेदग्न इति (१६,२६) प्राङ् यात्वा यथार्थम्" १८सू०। "गच्छेत्" क०। "आरोहेत् पार्श्वतो गच्छेत्"१६सू०। "यजमानः संस्कारात्"क०। "अहे खर्जल्यक्रन्ददग्निरिति (११,२२) जपति" २०सू०। "खर्जनं च शब्दकरणम्" क०। "वासिऽवहरत्युद्धृतावोक्षितउत्तरतः समिदाधानं प्र-प्रायमिति (१२,२४) २१सू०। "यत्र वासस्तत्रैवावहरणम् न प्रागवसतेः एवं ह्याह (६,८,१,१२) स यदि पुरावसथं विसृजेतानस्रेवाग्निः स्यादिति" वसत्यां तु उत्तरतोऽग्नीनवतार्य समिदाधानं "प्र-प्रायमिति"। उद्धृतावोक्षितयहणं च परिसमूहनाद्युपसंग्रहार्थमपि स्मार्तं ह्येतदनूद्यते (६,३,३,१८) उद्धते वाऽवोक्षितेऽग्निमादधातीति" एवं च सति तदपचारे स्मार्तं प्रायश्चित्तम्"क०। "वासार्थे रथे उत्तरस्यां दिशि अग्निमवतारयति" संप०। "वनीवाहनमेतद्दीक्षासु यदेच्छेत्" ३२सू०। "वनीवाहनमिति" संज्ञास्य कर्मणः सा च संव्यवहारार्था "अङ्गं वनीवाहनादिति" (२५सू०) अस्य दीक्षासु कर्तव्यम्। यदेच्छोपजायते महावीरकरणयूपच्छेदनवनीवाहनानि दीक्षासु क्रियन्ते क्रमस्तु नैषाम् पाठाभावात्" क०। "अभ्रूण्यभक्षावपनं क्रयणीयादौ" २३सू०। उल्यभक्षावपनमप्यु कर्तव्यम् आदौ क्रयणीयस्यास्रः"क०। "अन्यत्र चेच्छन्" २४सू०। "करोति"क०। "ऊर्ध्वं वनीवाहनात् क्रमयोगात्" २५सू०। अन्यत्रेच्छया कुर्वन् वनीवाहनादूर्ध्वं करोति मन्त्राणां पाठक्रमयोगात्" क०। "वनीवाहनादूर्ध्वं सोमक्रयदिने आदौ अन्यत्र दीक्षा भक्षावपनम्। कुतः क्रमयोगात् पूर्वं वनीवाहनमन्त्राः पश्चाद्भक्षापोऽभ्यवहरणस्य" संप०। "पलाशपुटेनापो देवीरित्येकया (१२,३५) २६सू०। "पलाशपुटेन भक्षं गृहीत्वाऽवपति"क०। "ततो द्वाभ्याम्" (१२,३६-३७) २७सू०। "पुनरवपति द्वाभ्यामृग्भ्याम्"क०। "आद्याभ्यां (१२,३५-३६) वा पूर्वम्" २८सू०। "पूर्वमावपनं द्वाभ्यामृग्भ्याम् तत एकयर्चा" वाशब्दो विकल्पार्थः तूष्णीमुतित्वात्" क०। "अनामिकया प्राशादादत्ते प्रसद्येति (१२,३८-४१) २९सू०। "प्राशाद्भक्षनः किंवदन्यनामिकयादत्ते" (६,८,२,७)। "प्राशोक्षामुपतिष्ठते बोधा मरुतः" (१२,४२) ३०सू०। "यत्तदात्तं भक्षं तत्प्राश्य" क०। "प्रायश्चित्तिं समिधोपगृह्य" ३१सू०। ऐकश्रुत्यका।

"आज्यं विस्रस्य जुहोति" (१२,४२) जुहोति" ३सू०। "प्रायश्चित्तिरित्यस्य होमस्य संज्ञा उपपूर्वस्य हन्तिर्यहणार्थो दृष्टोऽन्यत्रापि "अथ स्रुचोपगृह्याज्यमिति (२,४,१,२५)" क०। "समिधा करणभूतया स्रुक्स्थानीयया उपगृह्य गृहीत्वा" संप०। "उत्थाय दधाति समिधं धुनश्चेति (१२,४४) २सू०। उत्थानयहणं च प्रतिपत्तित्वात् गुणार्थं चेति। नैमित्तिकान्यत्रैव प्रकरणे पठ्यन्ते तदर्थमाह" क० "गार्हपत्येऽनुगते निर्मथ्य" ३सू०। "आदधाति मन्थनं प्राप्तत्वादाज्यम् उच्यते प्रायश्चित्तार्थम्"। "प्राजहिते उपशान्ते मथित्वा प्रायश्चित्ती करोति" संप०। "हुत्वावहनीये सांकाग्निनेन हुत्वाः" ४सू०। "हुत्वानु वर्तमानानु आहवनीयेऽनुगते सांकाग्निनेन हुत्वा तमादधाति" सांकाग्निनशब्दः प्रयुक्तमेव हुत्वेत्यर्थकः एतद्धोच्यते पूर्ववत्क्रमयनं मा भूदिति" क०। "आहवनीये ऽतिप्रणीतेऽनुगते सांकाग्निनेन हुत्वा अजुना सदोहविर्धानमध्यमार्गेणैव हुत्वा" संप०। "आग्नीध्रीयमुत्तरेण सदः" ५सू०। "हुत्वा निदधाति उत्तरेण सदो हुत्वेतीध्माव्युदासार्थः" क०। आग्निध्रीयमग्निमनुगतं सदस उत्तरेणैव हुत्वा" संप०। "प्रहृज्ञ्रादाहृतोखेत्र" ६सू०। "उल्खे चानुगते पूर्ववत्प्रहृज्ञ्रात् अयं तु विशेषः आहृता आहृहणं च मन्त्रनिहत्त्यर्थम्। "एतयैवाहृताहृहरन् यजुरिति (६,६,४,६) श्रुतेः"क०। "उल्खेऽग्नावनुगते गार्हपत्यादाहवनीयमग्निमित्याहृत्य (११,१७ समितमित्युपस्थाय (१२,५७ आहृता मन्त्ररहितक्रियामात्रेण पूर्ववदुक्तां प्रहृज्ञ्रात् उखासाहवनीयेऽधिश्रित्योल्खमग्निमुत्पादयेत्" संप०। "अध्वरप्रायश्चित्तिं च सर्वेषु यथाकालं पूर्वां-पूर्वाम्"७सू०। "अध्वरप्रायश्चित्तिं च करोति सर्वेषु निमित्तेषु तां च पूर्वाम् पूर्वां चशब्दादाग्नेयीं च। सर्वयहणं च भक्षापोऽभ्यवहरणार्थम्। (२२) तत्रापि हि विधीयेते (६,८,२,११) उभे प्रायश्चित्ती "करोतिये एवाग्नावनुगते इति" यथाकालमिति चाध्वरप्रायश्चित्तधर्मसूच्यते आग्नेयी तु विस्रसमयहरणेव" क० "सर्वेषु पूर्वोक्तेषुग्न्वनुगमेषु यथाकालं परमेष्ट्यादिकालाकृतिं (२६,६,१) पूर्वां पूर्वां जुहुयात् पश्चादग्निप्रायश्चित्तिम् चकारात्" संप० "उखाभेदने नवस्थाल्यां महासुरुखाकपालकरणधायावपति" ८सू०। यद्योगोखाभिद्योतेति" (६,६,४,८) प्रकृत्य सर्वमिदमाम्नातम् एतद्वैकोखापक्षे भवति। नित्यपक्षे तु द्वयोरेवैकस्थावपनम्"(६,५,२,२२)क०।"उखोपघ्ने पिष्टा मही स-

क्रोडां करोत्याहुता" ६सू०। "उखाखण्डमेकमुखायां प्रचिन्वन् द्वितोयमुपधायया सह पिङ्गा, आहुता मन्त्रमर्जम्, आहुरुद्धेन क्रियामात्रमुच्यते तथा चोक्तम् (६,६,४, २) एतयैवाहुतानुपहरन् यजुरिति" क०। "आहुता मन्त्ररहितेतिकर्त्तव्यतया" संग्र०।"पक्वायामावपति कपालं च १०सू०। "पक्वायामुखायाम् अग्निं कपालं च" क०। 'उखोपधये पिङ्गा संसृज्य निदधाति"११सू०। "उखाकपालमुपधयां च पिङ्गा संसृज्य स्थापयति" क०।

इदानीं चयनप्रकारमाह। अध्यात्मं चयनमुपविश्य" १२सू०। "आत्मनआभिमुख्येन चयनं कर्तव्यम् न परागिति, तथा च नैर्ऋतीषु वचनात्पराक्चयनमुक्तम् (७, २,१,१२)। अपरो विशेषः" "सव्यबाहुमन्तरं कृत्वोत्तरलक्षणाभिरिष्टकाभिः" १३सू०"। "चेतव्यः"क०। "नित्ये सादनस्यददोहसाउपधानादुत्तरे तया देवतया ता अस्येति (१२, ५३, ५५,)१४सू०। "सर्वास्विष्टकासु एते नित्ये भवतः तया देवतेति सादनम् ता अस्येति स्यददोहसाधिवदनम्" क०। "अविशेषोपदेशात्" १५सू०। "अविशेषेण ह्यनारभ्य कञ्चिदिष्टकाविशेषमेते यूयेते"क०। "विशेषमनुपादाय सामान्येन तयोरुपदेशात् विधानात्" संग्र०। "अनाम्नातप्रतिषेधाच्च" १६सू०। "यत्र नैर्ऋत्यादिषु नाम्नायेते नित्ये संहितायां न पठ्येते तत्रापि प्रतिषेधः श्रूयते (७,१,१,१४) सादनस्यददोहसाधिवदनीति" "अतः प्रतिषेधात् सर्वत्राम्येते भवतः" संग्र०। "एकनोदनाख्येकदेशास्तु तन्त्रेण" १७सू०। एकनोदना अपस्या वपस्या इत्येवमादि, एकनोदना अपि यद्येकदेशा भवन्ति, यथा तासामेव देशभेदः अपस्याः पञ्चपञ्चान् कान्तेष्विति (१७,६,२) अतश्च प्रत्यनूक्तं नित्ये, देशभेदे त्वसति तन्त्रेणेति"क०। "एकनोदना एकं विधिवाक्यं यासां ताः। एको देश एकमुपधानस्थानं यासां ताः तत्र तन्त्रेण नित्ये भवतः" संग्र०। "आत्मनि यजमतीः" १८सू०। "इष्टका उपदधाति न पशुपुच्छयोः" क० (८,७,२,३)। लोकम्पृणासु दशसु दशसु मन्त्रो लोकं पृणेति (१२, ५४)। (६,१,२।२) १९सू०। "आसादनं च" २०सू०। लोकं पृणानाम्, स्यददोहसाधिवदनं तु भवति अप्रतिषिद्धत्वात्" क०। 'प्रतिचिति हे-हे उपधाय" २१सू०। लोकं पृणामन्त्रवचनम्, पुनर्दशसु-दशसु। "प्रथमं हे-हे उपधाय ततो दश-दशोपदध्यात्" संग्र०। "अयुग्मनयमध्यमानूके" २२सू०। अयुग्मो य इष्टकानयो यथा वालखिल्याः सप्त तासां मध्यमानूके उपधेये" क०। "त्रिपञ्चसप्तादिगणः" संग्र०। "एका च" २३सू०। "या चैकेष्टका साध्यनूक एव, यथा विश्वज्योतिर्हि यजुर्वेदेवमादि" क०।"अभितो युग्माः"२४सू०।"अनूक्तमभितोऽर्धाधिकया युग्मा उपधीयन्ते"क०। "उदञ्चो वर्गाः पूर्वापरे" २५सू०। "यत्र पूर्वापरदृति देशव्यपदेशः तत्रोदग्लक्षणा इष्टकावर्गा उपधीयन्ते" क०। "तिर्यगनूक्तमभितोऽर्धावधिके पूर्वापरे देशे इष्टकानां वर्गाः समूहाः उदग्लक्षणा उपधेयाः" संग्र०। "प्राञ्चो दक्षिणोत्तरे" २६सू०। "यत्र तु दक्षिणोत्तरव्यपदेशः तत्र प्राग्लक्षणा इति" क०। "प्रागनूक्तमितोऽर्धावधिके दक्षिणोत्तरे प्राञ्चः प्राग्लक्षणाः उपधेयाः" संग्र०। "भिन्नक्रमणयोरचयनम्" (८,७,२, १६) २७सू०। "दीक्षाणामुत्तमेऽहनि वेद्यग्निमानम्" २८सू०। "कर्त्तव्यम्"क०। "उखास्थानेऽर्धव्यामेन गार्हपत्यस्य परिलिखति" २९सू०। "मण्डलमिति शेषः' क०। "मण्डलाद्वा प्रक्रमणमन्तःपात्यस्य"३०सू०। "पूर्वार्धाद्व्यामस्य त्रीन् प्रावः प्रक्रमान् प्रक्रामतीति वचनात् (१०,२,३,१)। "पूर्वार्धादेव व्यामस्य प्रक्रमणम् न तस्माद्धि प्रक्रमणमनग्नौ चरितार्थम्" क०। "वावधारणे, मण्डलादेवान्तःपात्यस्य क्रमणम् न पूर्वार्द्धात् तस्मात्" संग्र०। "पश्चाद्यूपावट्यात्पादमात्रे चित्यस्य" ३१सू०। यूपावटे भवः यद्धुर्यूपानस्यः तस्मात्पश्चात् पश्चालोकमात्रे चित्यस्याग्नित्रेतस्य स्थानं भवति" संग्र०। "यजमानेनोर्ध्वबाह्वप्रपदोच्छ्रितेन समस्थितेन वा" ३२सू०। (१०, २,२,६)। "प्रपदोच्छ्रितः पादाग्रे व्यवस्थितः समस्थितः प्रसिद्ध एव, तत्क्रियायानोदितत्वात्प्रक्रमणवदध्वर्युर्मा भूदिति यजमानग्रहणम्" क०। ७कण्डिका।

"द्विपुरुषां रज्जुं मित्त्वा"१सू०।"द्विपुरुषां रज्जुं मित्त्वेति निगदे व्याख्यातम्" । "उभयतःप्राशाम्" २सू०। "मध्ये लक्षणम्"३सू०। "अभितोऽर्धपुरुषयोश्च"४सू०। "मध्यमात्लक्षणात् पुरुषपञ्चमे"संग्र०"अर्धे च" ६सू०।"पुरुषपञ्चमस्यार्धे"क०। "अनुष्ठ्याभावस्य पार्श्वयोः यद्धुर्मध्येऽर्धपुरुषयोश्च" ७सू०। "पार्श्वाभ्यन्तुच्यार्धपुरुषीययोः प्रतिमुच्य दक्षिणायास्य मध्यमे नितोदं करोति"८सू०। "गर्तम्"संग्र० "उद्धृत्य पार्श्वाभ्यां मध्यमे प्रतिमुच्य दक्षिणाधिनितोदमायस्य मध्यमे यद्धुः"९सू०। 'तस्मिन् पार्श्वं प्रतिमुच्य पूर्वार्धे च दक्षिणायस्य मध्यमे यद्धुः"

१०सू०। "पश्चादर्धपुरुषे च" ११सू०। "उन्मुच्य पूर्वार्द्धात् पश्चार्धं प्रतिमुच्य दक्षिणायस्य मध्यमे शङ्कुः" १२सू०। "अभितोऽर्धपुरुषयोश्च" १३सू०। "एवमुत्तरोऽन्तः" १४सू०। "दक्षिणे पार्श्वे पूर्ववदायस्य पञ्चमभागीये शङ्कुः" १५सू०। "तस्मिन् पार्श्वं प्रतिमुच्य पूर्वं चार्धपुरुषीये पञ्चमभागीयार्धपुरुषीययोः सन्धिपार्श्व तस्मिन्छङ्कुः" १६सू०। "एवं पश्चात्" १७सू०। "एवमुत्तरः पक्षः" १८सू०। "तथा पुच्छं वितस्या" १९सू०। इच्छन् पक्षपुच्छाभ्यासेषु चतरङ्गुलंचतरङ्गुलं संकर्षति विकर्षेत्तले" २०सू०। "यत्र पक्ष आत्मानमश्नेति स पक्षाभ्यासः एवं पुच्छाभ्यासः। अभ्यासेषु पक्षयोः पुच्छस्य च आत्मसम्बन्धिसमीपे चतरङ्गुलं चत्वारि-चत्वार्यङ्गुलान्युभयोः पार्श्वयोः सङ्कर्षति सङ्कोचयति, तथा अग्रे पक्षपुच्छप्रान्ते उभयोः पार्श्वयोः चतरङ्गुलं विकर्षति विस्तारयति" संग्र०। "पञ्चारत्निः-पुरुषो दशपदो द्वादशाङ्गुलं पदं प्रक्रमस्त्रिपदः समविभक्तस्य" २१सू०। "पञ्चारत्नयोः यस्य सः पञ्चभिरत्निभिः पुरुषः दशभिः पदैः पुरुषो द्वादशभिरङ्गुलैः पदम् इत्येवमर्थौ न भवति इतः प्रागरत्न्यादीनां लक्षणानुक्तत्वेनासिद्धत्वात्, अतश्चैवम् पुरुषस्य समविभक्तस्य यः पञ्चमो भागः सोऽरत्निः तस्य दशमो भागः पदम्, पदस्य द्वादशो भागोऽङ्गुलम् त्रिभिः पदैरेकः प्रक्रमः इति तु भवति पदस्य सिद्धत्वात्" क०। "परित्य रज्ज्वा सहितं बहीरज्ज्वेकपदे यते परिश्रितो मिनोति" २२सू०। "रज्ज्वा परित्य सर्वतोवेष्टयित्वा रज्ज्वाबहिर्भागे सहितं रज्जुसंलग्नं यथा भवति तथा एकपञ्चाधिके द्वे यते परिमिनोति" क० "चतुर्णवतानि वा त्रीणि" २३सू०। चतुर्णवत्यधिकानि त्रीणि शतानि" क०। "अध्वोः शर्कराः स्युः" २४सू०। "उत्तरेषु पुरुषीयेष्वेकयतविधात्" २५सू०। "उत्तरेषु अष्टविधादिषु चयनेषु वा एकयतविधात् एकयतविधचयनं यावत् एकाधिकयतपुरुषात्मकपञ्चनवतितमचयनपर्यन्तम् पुरुषोयेण एकैकपुरुषपरिमाणेन अग्निमानं भवति तस्माद् सप्तविधमेव प्रथमं विदधीतेति" (१०,२,३,१८) क० "यथाग्निवेदीष्टकाप्रमाणम्" २६सू०। वेदिश्च इष्टकाश्च वेदीष्टकाः तासां प्रमाणं वेदीष्टकाप्रमाणम् तद्यथाग्नि भवति, अग्निमानमनतिक्रम्य यथाग्नि, यथाग्निक्षेत्रस्य प्रमाणं वर्द्धते तथा वेदिप्रमाणं वर्धते इष्टकाप्रमाणं च वर्द्धते, न हि वेदिमिष्टकां विना तन्मध्ये वर्धितस्याग्नेर्मानं सम्भवति, नापि इष्टका न वर्धिता वर्धितमग्निक्षेत्रं पूरयितुं शक्नुवन्ति, अतो युक्तमुभयोर्वृद्धिः" क०। "अन्तःपात्यगार्हपत्ययोरिच्छन्" २७सू०। "पूर्वार्धाद्यासस्य लोन् प्राचः स वेदान्तः प्रक्रमः प्रक्रमति" (१०,२,३,१) यः प्रक्रमत्रयपरिमितो देशः सोऽन्तःपात्य उच्यते, तस्मान्तःपात्यस्य गार्हपत्यस्य गार्हपत्यचितेश्च इच्छन् इच्छया वृद्धिं कुर्यात् इच्छया न कुर्यात् तद्वैकउत्तरा" श्रुतेः (१०२,३,६) क०। "उत्तरपक्षस्यापरस्यां सक्थ्यां परिश्रितो मिनोति जङ्घामात्रीं नाभिमात्रीं मुखमात्रीमिति" २८ सू०। "अग्नेरुत्तरपक्षस्यापरस्यक्थ्यां पश्चिमकोणे एवम्प्रमाणास्त्रिस्रः परिश्रितो मिनोति" क०। अत्रसर्वत्र चतरङ्गैः शतपथब्राह्मणाध्यायादि बोध्यम्। त्रिभिः कातीयश्रौतसूत्राध्यायादि द्वाभ्यां शुक्लयजुर्वेदाध्यायादि तेन तत्तत्स्थाने अत्रोक्तप्रतीकयुक्तमन्त्रमूलवाक्यादिकं द्रष्टव्यमिति सङ्केतज्ञापनम्। विस्तारस्तु शतपथब्राह्मणे लिखिताङ्क सूचिताध्यायादौ द्रष्टव्यः।

इष्टकापथ न० इष्टकायामपि पन्था यस्य अच् समा० इष्टं कापथं यस्याधोसुखवायुकरणात्। १वीरणमूले। इष्टकया निर्मितः पन्था अच् समा०। इष्टकानिर्मिते २पथि पु०।

इष्टकाव त्रि० इष्टका अस्त्यर्थे व। इष्टकायुक्ते।

इष्टकावत् त्रि० इष्टका+चतुरर्थे मध्वादि० मतुप् मस्य वः। इष्टकासन्निकृष्टदेशादौ स्त्रियां ङीप्।

इष्टगन्ध पु० कर्मधा०। १सुगन्धौ। इष्टोगन्धोऽस्य। २सुगन्धिद्रव्ये त्रि० ३वालुकायां न० मेदि०।

इष्टतम त्रि० अतिशयेन इष्ट+तमप्। १प्रियतमे २अतिशयाभीष्टे "बहुर्यदिष्टतमं लोके" गीता। द्वयोर्मध्ये अतिशयेन इष्टः तरप्। इष्टतरः द्वयोर्मध्ये अतिशयेन इष्टे त्रि०।

इष्टदेव पु० इज्यते यज-कर्मणि क्त कर्मधा०। १पूज्ये देवे तन्त्रादुक्तविधानेन यस्य मन्त्र उपासतया स्वीकृतस्तस्मिन् २देवे च। इष्टदेवतादयोऽत्र स्त्री।

इष्टनि त्रि० यज-तनिक् संप्र० इष-तनिक् वा। १यष्टव्ये २एष्टव्ये च। "तुविष्वणिरश्वतीर्धूराखिष्टनिरार्क्षा खिष्टनिः" ऋ० १,१२७,६। "इष्टनिरेष्टव्योयष्टयो वा" भा०। [व्याकरणोक्तसंस्कारानुसारेण प्रयोगे।

इष्टप्रयोग पु० इष्टस्य शिष्टप्रयुक्ततया निश्चितस्य प्रयोगः।

इष्टवत् न० यज-क्त वा क्लवत्व स्त्रियां ङीप्। १यजनकर्त्तरि २ऋत्विग्युक्ते च। "इष्टं वेदाध्ययनादिः साध्यतयाऽस्यास्ति मतुप् मस्य वः। २इष्टकर्म्मकर्त्तरि। वेदे तु पूर्वपददीर्घः इष्टावान् "इष्टावन्तोरातिषाचोदधानाः" ऋग्० १८,३,

२० । "इष्टिभिः पशुबन्धैश्च चातुर्मास्यैस्तथैव च । अग्निष्टोमादिभिर्यज्ञैर्येन येष्टं स इष्टवान्" व्यासोक्ते ४ऋत्विजादि कारिणि त्रि० । स्त्रियां ङीप् ।

इष्टव्रत त्रि० इष्टं व्रतं यस्य । १व्रतशीले इष्टानि कल्याणानि व्रतानि कर्माणि सिध्यन्ति येन । २इष्टकर्मसाधने अन्नादौ "इष्ट इष्टव्रता अकः" ऋ० ३,५९,९ । "इष्टानि कल्याणानि व्रतानि कर्माणि याभिः सिध्यन्ति ता इष्टयः अन्नानि" भा० ।

इष्टसाधन न० ६त० । अभीष्टसाधने इच्छाशब्दे उदाहृतिः । ततो भावे त्व । इष्टसाधनत्व तद्भावे न० । तल् । इष्टसाधनता तद्भावे स्त्री ।

इष्टा स्त्री इज्यतेऽनया यज–करणे वा० क्त । अभीष्टे राजनि० तत्समिधा होज्यते इति तस्याः तथात्वम् कर्मणि क्त । अनिमतायां स्त्रियाम् ।

इष्टाकृत त्रि० अनिष्टमिष्टं कृतम् इष्ट+च्व्यर्थे डाच् कर्मणि क्त । इष्टीकृते "सतामिष्टाकृतं नाम पूर्वावरसहस्रिकम्" रामा० ।

इष्टादि पु० "इष्टादिभ्यश्च" पा० स्त्रार्थे तत्कृगमनेनेत्यर्थे विहितेनिप्रत्ययनिमित्तभूतशब्दसमूहे स च गणः । "इष्ट पूर्त्त उपसादित निगदित परिगदित परिवादित निकथित निषादित निपठित संकलित परिकलित संरक्षित परिरक्षित अर्चित गणित अवकीर्ण अयुक्त व्यहीत आम्नात श्रुत अधीत अवधान आसेवित अवधारित अवकल्पित निराकृत उपकृत उपाकृत अनुयुक्त अनुगणित अनुपठित व्याकुलित" आकृतिगणस्तेन "कठेन पठितो माणिन् खलः खेलतु" नैय० ।

इष्टापत्ति स्त्री ६त० कर्मधा० वा । १इष्टस्यापत्तौ इष्टावाप्तौ च वादिना दर्शितापत्तेः प्रतिवादिन इष्टत्वे हि सा भवति । "इष्टापत्तौ दोषान्तरमाह" जग० ।

इष्टापूर्त्त न० इष्टं च पूर्त्तं च द्वयोः समाहारः पूर्वपददीर्घः । इष्टशब्दोक्ते अग्निहोत्रादौ "वापीकूपतडागादि देवतायतनानि च । अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते" इति मनूक्ते पूर्त्ते च । "वितथन्तु वदेद्युर्थे धर्मं प्रह्लाद पृच्छते । इष्टापूर्त्तञ्च ते घ्नन्ति सप्त सप्तपरावरान्" भा० स० ६ई० अ० । "इष्टापूर्त्तेन च तथा वक्तव्यमनृतं नृतु" आ० प० १६५ अ० । "इष्टापूर्त्तफलं न स्याद्यज्ञियो न गुरुर्भवेत्" भा० व० २२ अ० । क्वचित् इतरेतरद्वन्द्वोऽपि हि० नृ० । "इष्टापूर्त्ते संसृजेथामयञ्च" यजु० १०,५४ ।

इष्टार्थोद्युक्त त्रि० इष्टे अर्थे उद्युक्तः । उत्सुके इष्टार्थं लाभाय त्वरमाणे कालासहिष्णौ ।

इष्टाश्व त्रि० इष्टोऽश्वोयस्य । १प्रियहये २राजभेदे पु० । "किमिष्टाश्व इष्टरश्मिरेतः" ऋ० १,१२२,१३ । "इष्टाश्व एतन्नामको राजा" भा० ।

इष्टि स्त्री यज–क्तिन् । १यागभेदे । स च कात्या० श्रौ० सू० दर्शितः "कर्मशब्दो द्रव्यदेवतायुक्तो यजतिः" । ४,३,१,सू० "क्रियाशब्दः आख्यातप्रत्ययान्तो निर्वपत्यादिशब्दो यजतिः प्रत्येतव्यः यागोक्तेष इत्यर्थः न निर्वापलक्षणादिरूपसंस्कारमात्रविधायकः यजतिशब्दोऽत्र तदर्थयागपरः । एवं यागत्वे सिद्धेऽपि इदं संदिह्यते सौर्यं चरुं निर्वपेदग्निषोमीयमजमालभेतेत्यादौ किं यागमात्रं भवति उत धर्मा अपि भवन्तीति यदा च धर्मा भवन्तीति पक्षस्तदापि संदेहः किं पूर्वाङ्गतिसम्बन्धिनो धर्मा भवन्ति उताग्निहोत्रसम्बन्धिनः, आहोस्विद्दर्शपूर्णमासयोः, अथवा ज्योतिष्टोमस्येति, अथवा दर्शपूर्णमासयोरेवेति, । धर्मानामनाम्नानाद्यथाश्रुतं यागमात्रं कर्तव्यमिति प्राप्ते आह" क० "दर्शपूर्णमासधर्मा इष्टिपशुषु सामर्थ्यात्" २सू० । सौर्यादौ धर्मा भवन्ति न यागमात्रम् एवमेतानि विधिवाक्यानि समर्थान्यर्थवन्ति सप्रयोजनानि भवन्ति अन्यथा साकाङ्क्षत्वादर्थप्रतिपादनाभावेन निरर्थकान्येव स्युः । तथा हि सौर्येण यागेन ब्रह्मवर्चसं भावयेदित्यत्रांशत्रयवती भावना विधीयते किम्, केन, कथमिति, किमंशो ब्रह्मवर्चसम्, तत्र केनांशः सौर्येणेति, कथमंशस्तु वाक्यमध्ये नास्ति तेन कथं भावयेदिति वाक्यं कथमंशसापेक्षम् । यच्च सापेक्षं भवति तदध्याहारेणानुषङ्गेण वा पूरयित्वा निराकाङ्क्षं कर्तव्यम् । अन्यथा तस्यानर्थक्यापत्तेः न च वेदे मात्रामात्रस्य तदिष्यते तस्मादत्र निराकाङ्क्षीकरणाय विध्यन्तेतिकर्तव्यतापरपर्यायः कथमंशोऽत्र कश्चिदनुषङ्गनीय इति सिद्धे आह "दर्शपूर्णमासधर्मा इष्टिपशुषु सामर्थ्यादिति" सर्वासु इष्टिषु अग्नीषोमीये पशौ च दर्शपूर्णमासयोरेव धर्मा भवन्ति सामर्थ्यात् पूर्वोक्त एव हेतुरत्रापि योज्यः । दर्शपूर्णमासधर्मा एव सौर्यादिविधीनां शेषीभवितुं समर्थाः चरुपुरोडाशादयो ह्यवघातादिभिरेव सिध्यन्ति नाभिघारादिभिरिति । इष्टिपशुष्विति इष्टिषु सर्वासु अग्नीषोमीये पशौ च पशुव्यतिरेकेषु ह्यग्नीषोमीयधर्मा भवन्ति" क० । इत्यारभ्य पञ्चविंशत्या सूत्रैस्तत्र विस्तरेणावसेयः । तथा च दर्शपौर्णमासेतिकर्तव्यताको यागभेद इष्टिरग-

न्या ।तत्करणप्रकारः आश्व० श्रौ० सूत्रे दर्शितो "यथा पौर्णमासेनेष्टिसोमा उपदिष्टाः"। २,१,१, प्रथमेऽध्याये दर्शपूर्णमासौ व्याख्यातौ विध्यन्तरसहितौ। उत्तरवेद्यः पशवश्च वक्ष्यन्ते विध्यन्तरविहिताः। तेषां विध्यन्तरापेक्षास्ति" "अतोऽयमर्थः सूत्रस्य, यस्मिञ्छास्त्रे उपदिष्टा इष्टयः पशवश्चापि अविशेषिताङ्गभागास्ते सर्वे वार्त्रघ्नाङ्गभागा इति"। "पौर्णमासेनेत्यस्यायमर्थः, पौर्णमासेन व्याख्याता इति वार्त्रघ्नाङ्गभागा इत्यर्थः। तेन समाम्नातानामिष्टीनां पशूनाञ्च अन्यदेवतागमनात् सिद्धो भवति। तथा चोक्तमिध्मयनप्रकरणे "असमाम्नातास्वर्थात् तन्त्रविकारः" नारा० वृत्तिः तस्य कालस्तत्रैव दर्शितः यथा "तैरमावास्यायां पौर्णमास्यां वा यजेत" सू० २,१,२, "तैरिष्टिपशुसोमैरमावास्यायां पौर्णमास्यां वा यागः कर्तव्य इति इष्टिपशूनां प्रकृतिप्राप्त एवायं कालः पुनर्विधीयते ह्याहकालतां निवर्त्य सदाख्यालताप्राप्त्यर्थम्। किञ्च दर्शप्रकृतेरमावास्या पौर्णमासप्रकृतेः पौर्णमासीत्येवं नियमं निवर्त्य अनियमेन उभयकालताप्राप्त्यर्थम्। प्रकृत्यविरोधात् पर्वण्यहन्यहोरात्रे विकृतिः कर्तव्या। यद्याङ्गः पूर्वभागे पर्व स्यात् तदा प्रकृतिं कृत्वा विकृतिः कार्या। यदा परभागे रात्रौ वा तदा विकृतिं कृत्वा प्रकृतिः कार्येति सोमस्यागमप्राप्तः कालो विधीयते। इज्यादिशब्दसम्बन्धादेव यजेतेत्यपि सिद्धे यजेतेतिवचनं सोमस्य याग एवानयोः कालयोः सम्पादनीयो नान्यत् दीक्षादीति" वृत्तिः। "राजन्यस्याग्निहोत्रं जुहुयात्" २सू०। "वैश्यस्याग्निहोत्रहोमः पर्वण्योरेव कर्तव्यो नान्यस्मिन् काल इति चशब्दाद्ध्रुवोऽन्यनयोरेव कालयोरग्निहोत्रं जुहुयात् नान्यस्मिन्नित्यवगम्यते। बल विशेषमाह" वृत्तिः। "तपस्विने ब्राह्मणायेतरं कालं भक्षसपहरेत्" ३सू०। "तपस्वी कर्मनिरतस्तस्मै ब्राह्मणाय अतपस्विनेऽपि ब्राह्मणायैव दद्यात् न जात्यन्तराय तपस्विनेऽपीति। इतरं कालमिति, इतरेषु सर्वेष्वग्निहोत्रकालेष्वित्यर्थः। भक्षसपहरेत्, भक्षं पक्वोदनं पक्वान्नसपहरेत्, दद्यात्। एतदुक्तं भवति। राजन्यवैश्ययोः पर्वण्यग्निहोत्रकालद्वयं वर्जयित्वा इतरेषु कालेषु ब्राह्मणायोदनो दातव्योऽग्निहोत्रहोमः कर्तव्य इति। अग्निधारणन्तु क्रियत एव" वृत्तिः। ततोऽग्न्याधानं प्रसङ्गादुक्तं तच्चाधानशब्दे पूर्वं दर्शितम् अग्न्याधानोत्तरं कर्त्तव्यमाह "यदि क्रियेताननुयुः" २,१,१८, सू० "अग्नीनेवेति वाक्यशेषः। यद्यनधिकारत्वादाधानविधेर्विनियोजकस्य प्रकरणस्य व्यापारासम्भवादाधानाङ्गमिष्टयो न स्युः, इष्टीनाञ्चानधिकारत्वादिष्ट्यङ्गमाधानं न स्यात्, तथापि न कश्चिद्दोषः, अन्यार्थत्वेनैवोभयोरप्यनुष्ठानसिद्धेः"। "अग्निसन्धे सूत्रयोजना। यद्यासामिष्टीनामाधानाङ्गता स्यात् तथापि आश्वयुजीयाद्यग्निसम्बन्धात् तानेवाग्नीनिष्टयस्तनुयुः विस्तारयेयुः कुर्युः साधयेयुरित्यर्थः। तनूशब्दस्तु साधनादिषु विशेषं दर्शयति। आधानेऽग्नीनां साध्यत्वेन सम्बन्धानामेव साध्यत्वम्। इष्टिषु साधनत्वेन सम्बन्धानामपि कल्पनागौरवभयात् साध्यत्वमिति विशेषं मत्वाह भगवः एवं यद्याधानेनेष्टिभिश्चान्यत एवागतः साध्या इत्यनधिकाराणां कथमनुष्ठानसिद्धिरिति न्यायाविदामेष उपालम्भो नास्माकम्। अस्माकं तु साध्यसाधनसम्बन्धेऽवगते तदर्थिनां कर्तृत्वेनावगतानां ब्राह्मणादीनां कथञ्चिदधिकारकल्पनयानुष्ठानसिद्धिः। अथवाऽनधिकाराणामनन्यशेषाणामपि तत्साधनसाध्यरूपेणोपकारकत्वेन कामं श्रुतिप्रयुक्तैर्वैदिधानामनुष्ठानसिद्धिरित्यलमतिविस्तरेण" नारा० वृत्तिः। ""प्रथमायामग्निरग्निः पवमानः" १६ सू०। "प्रथमायामिष्टौ ह्ये देवते। अग्निः प्रथमः केवलः। द्वितीयः पवमानगुणकोऽग्निः। केवलस्याग्नेर्नित्ये एव। "अग्न आयूंषि पवसेऽग्ने पवस्व स्वपाः" २०सू०। "एते द्वितीयस्य पवमानगुणकस्य" वृ०। "स हव्यवाडमत्याऽग्निर्होता पुरोहित इति स्विष्टकृतः संयाज्ये इत्यूर्क सौविष्टकृती प्रतीयात्" २१सू०। "सौविष्टकृत्योर्याज्यानुवाक्ययोर्यश्चोरनेन संयाज्ये इति संज्ञा विधीयते" वृ०। "सर्वत्र देवतागमे नित्यानामपायः" २२ सू०। "सर्वत्रेति प्रकरणान्तरेऽपीति दर्शयति। देवतागम इत्यत्र समासनिर्देशस्य तुल्यत्वाद्देवतायाः देवतयोर्देवतानां वा आगम इत्येवं भवति। नित्यानां प्राकृतीनामित्यर्थः। अपाय उद्धार इत्यर्थः। एतदुक्तं भवति। विकृतौ देवतायाः एकस्या आगमे द्वयोर्बहूनां वा अनागमेऽपि प्राकृतीनां सर्वासामुद्धार इति स्यां पुनर्विकृतौ इष्टिनोदनां कृत्वा देवतां न विदधाति, तत्र नोद्धारः प्राकृतीनाम्। तत्र ता एव देवता भवन्तीत्यर्थः। यथा गदितः सोमेन पशुना इष्ट्या वा इत्यादौ" वृ०। "याः स्विष्टकृतमन्तराज्यभागौ च तास्तत्स्थाने" २३सू०। "नित्यानामपाय उक्तः। तत्र किं सर्वा नित्या उद्धर्तव्याः उत काचिद्देवतेत्येतं संशयं निवर्तयति वा आज्यभागौ स्विष्टकृतं चान्तरा देवता यष्टव्याः उद्धर्तव्याः। याः पुनर्विकृतौ विहिताश्चात्स्थाने उ-

कृतानां प्राकृतीनां स्थाने भवन्ति" इति वचनात्, तद्धर्मिकाश्च भवन्तीति गम्यते" इ०। "एष समानजातिधर्मः" २४ सू०। "योऽयमतिदिष्टो विधिर्देवताभ्योऽन्यत्रापि स समानजातीयेषु भवति। समानजातीय एककार्य इत्यर्थः" इ०। "द्वितीयस्यां इधन्वन्तौ अग्निः पावकोऽग्निः शुचिः स नः पावकादिदोऽग्ने पावकरोचिषाग्निः शुचिव्रततम उदग्ने शुचयस्तव" २५ सू०। "एकः पावकगुणकोऽग्निः, अपरः शुचिगुणकः। 'साङ्गान् विद्वा अभियुजोऽग्निमीळे पुरोहितमिति संयाज्ये' तृतीयस्यां सामिधेन्यावापदते प्रायुरोत्तमायाः पृथुपाजा अमर्त्यइति द्वे" २६ सू०। "आवपते इति वचनात् अधिके एते सामिधेन्यौ भवतः। प्रथमायां द्वितीयस्यां तृतीयस्यामिति वचनात् यस्यामिष्टौ यत् तन्त्रं विहितं तस्यामेकदेवतायामपि तत् तन्त्रं भवति न यथोक्तनानादेवतायामेवेति" इ०। "ध्याख्ये इत्यक्त एते प्रतीयात् पृष्टिमन्तावग्निना रयिमश्नवद्वयस्वानो अमीवहेति। अग्नीषोमाविन्द्राग्नी विष्णुरिति वैकल्पिकानि" २७ सू०। "त्रयाणामेको गृह्यते" इ०। "अदितिः" २८ सू०। अदितिदान्या, अस्यां द्वे देवते" इ०। "उत त्वामदिते सुव्रतानामृतस्य पत्नीमवसे हुवेम तुविक्षत्रामजरन्तीमुरूचीं महि मही षु मातरं सुशर्माणमदितिं सुप्रणीतिम्" २९ सू०। "एषा कल्पजा" इ०। "प्रेहो अग्न इमो अग्न इति संयाज्ये विराजावित्युक्त एते प्रतीयादिति तिस्रः" ३० सू०। "इत्येतास्तिस्र इष्टयोऽनुक्रान्ता इत्यर्थः। उक्तानुकीर्त्तनमुत्तरार्थम्। यदाद्योत्तमे वैव स्यातामाद्या वेति पक्षस्तदापि तिस्रोऽमिष्टीनां यावत्यो देवतास्ताः सर्वा यष्टव्या इत्येवमर्थम्। आद्योत्तमपक्षे मध्यमायां ये देवते ते आद्यायामेव प्रत्येप्रत्ये। यदा पुनराद्यैव तदा सर्वा देवता आद्यायामेव प्रत्येप्रत्या इत्येवमर्थम्' इ०। "आद्योत्तमे वैव स्याताम्" ३१ सू०। "इष्टी इति शेषः। 'आद्या वा" ३२ सू०। "आद्यैवेष्टिर्भवतीत्यर्थः' इ०। 'तथा सति तस्यामेव धाय्ये विराजौ" ३३ सू०। "यदाद्यैव भवति तदा द्वितीयतृतीययोरपि देवतास्तत्र भवन्तीत्युक्तम्। अतस्तस्यामेव धाय्ये विराजौ भवतः। धाय्याविराजामनुप्रवेशस्य निमित्तं तृतीयस्या इष्टेर्देवतानुप्रवेश इत्येवमर्थं तथा सतीत्युक्तम्' इ०। "इतिमात्रे विकारे वैराजतन्त्रेति प्रतीयात्" ३४ सू०। "पौर्णमासतन्त्रायामिष्टौ धाय्याविराण्मात्रे विकारे सति वैष्टिवैराजतन्त्रेति वेदितव्या' इ०। "आधानाद् द्वादशरात्रमजस्राः" ३५ सू०। "अग्न्याधानमिष्टीरुक्त्वा आधानाद्ध्वं द्वादशरात्रमजस्रा इत्युक्तम्। तस्यायमभिप्रायः, यावता कर्मसमुदायेनाग्नीनां सिद्धिर्भवति तावतः कर्मसमुदायस्याधानशब्दो वाचक इति ज्ञापयितुम्। तेनाग्न्याधेयं पुनराधेयं चेत्यत्र वैष्टिकस्याधानस्य यद्यत् भवतीति सिद्धम्। आधानेनेष्टिभिश्च सिद्धाग्नयो द्वादशाहोरात्राणि सर्वे खल्वपेक्षैव धार्यन्ते। एतदजस्रधारणमग्निहोत्रपूर्व एवाधाने भवति, अग्निहोत्रस्यैवानन्तरमुच्यमानत्वात्। अनुष्ठानक्रमेणैव कर्मणां व्याख्यानमित्युक्तत्वाच्च" इत्तिः। एवमिष्टिसामान्यं प्रदर्श्य विशेषेष्टयस्तत्र दर्शिताः तत्रादौ नवशस्येष्टिः साचायायणशब्दे दर्शिता तत्र रात्र एवाधिकारः त्रयाणां वर्षाणामविशेषेणेतिकल्पद्वये प्राप्ते रात्रौ विशेष उच्यते "इष्टिस्तु रात्रेः" "सर्वेषां चैके एके सर्वेषामिष्टिरेवेति मन्यन्ते" २,६,६,७,। "श्यामाकेऽग्रासौम्यचरुः स च वर्षर्त्तौ तत्र याज्यादिकं २,६,८,६,१०, सू० उक्तम्। अन्यनवान्नभोजने जयमन्त्रादिकमुक्तम् १२,१३। एतानित्या इष्टयः अधकाम्याः इष्टयः २,१०,१२, सूत्रादौ। तत्र आयुष्कामेष्टिस्तत्र अग्निगुणभेदजीवातुमद्देवता २,१०,२,३,४, सू०। स्वस्त्ययनेष्टिः रक्षितवद्देवताका तत्र याज्यादिकम् ५,६,७, पुत्रकामेष्टिः पुत्रवद्गुणकाग्निदेवताका तत्र याज्यादि ८,१, १०, वैश्वदेवेष्टिः विश्वद्गुणकेन्द्रदेवताका तत्र याज्यादिकं १३,१४,१५, सू०। आग्नेष्टिराशापालदेवताका तत्र याज्यादिकम् १७,१८, सू०। लोकेष्टिः पृथिव्यन्तरिक्षदेवताका तत्र याज्यादिकम् २०,२१,२२, सू० मित्रप्राप्तिकामेष्टिः अग्निसोमवरुणमित्रेन्द्रबृहस्पतिसवितृपूषन् सरस्वतीदेवताका तत्र याज्यादि ११,२,३,४,३। इत्यभिष्टिः महावैराजीनामा। अभिचारकामेष्टिः क्रुधाक्षुरीयनाम्नी क्रूरगुणकेन्द्रदेवताका तत्र याज्यादि ११,७,८,६। विमतसम्मतिकामेष्टिः संज्ञानो नाम वसुरुद्रादिगुणकाग्निसोमादि चतुष्टयदेवताका तत्र याज्यादि १०,११। भेदकामेष्टिः। इन्द्रामरुद्देवताका तत्र याज्यादि १३,१४,१५,१६, सू०। सम्मत्तिकामेष्टिः ऐन्द्रामारुती संज्ञानोक्त याज्यादिकम्। १७, सू०। शत्रभिभवनिवृत्तिकामेष्टिः ऐन्द्रावार्हस्पत्या तत्र याज्यादि १८।६ सू०। पवित्रेष्टिः। अग्न्यादिदेवताका तत्र याज्यादि २,१२,१। "वैश्वानरीं व्रातपतीं पवित्रेष्टिं तथैव च। ऋताहुतौ प्रयुञ्जानः पुनाति दशपौरुषम्"। दृष्टिकामेष्टिः कारीरी नाम सा च अग्न्यादि-

नादेवताका अग्निदेवताका वा तत्र याज्यादि २,१२,१,२, ४,५,६,७,८,९,सू० । सर्वाश्च एता दर्शपौर्णमासेतिकर्तव्यताकाः । पशुयुगके कर्मणि पशोरुभयतोऽन्यतरतो वा पशुकामेष्टिः सा च आग्नेयी आग्नावैष्णवी वा आश्व० श्रौ०सू० २,१,२,३,४ सू०। तस्यामितिकर्त्तव्यतायाज्यादि तदुत्तरसूत्रजातैरुक्तम्। विध्यपराधप्रायश्चित्तेष्टिः २, १०,१,सू० विध्यपराधस्वरूपकारणप्रदर्शनपूर्वकं तत्करण-प्रकारादि तदुत्तरसूत्रजातैर्दर्शितम् । वारुणीष्टिः तत्-प्रकारादि २,१२,५, प्रातःकालातिपत्तौ प्रातरिष्टिः तत्र देवतादि २,१२,१२, आत्वांशुपात्रे च सैवेष्टिः २,१२,१५ निमित्तभेदेऽर्थे प्रायश्चित्तेष्टौ देवताभेदादि २,१२,१६, आरभ्य आध्यायात् सूत्रैरुक्तम् । उखासम्भरणीवेष्टिः तद्देवतादि ४,१,२१ २६सू०। दीक्षाप्रयोजनेष्टिः दीक्षणीया नाम तत्रदेवतादि ४,२,१,१८, सू०पर्यन्तेनोक्तम् । प्रायणीयेष्टिः तत्र देवतादि ४,२,१सूत्रादौ। आतिथ्येष्टिः तत्र देवतादि ४,५,१सूत्रादौ । उदवसनीयेष्टिः तद्देवतादि ६,१४,१, सूत्रादौ उदवसनीयेष्टिः तद्देवतादि ६,१४,१, २१, सूत्रादौ । अन्याः पुनराधेयेष्टिप्रभृतयोऽपि इष्टयः विस्तरभयान्नोक्ताः आकरेषु द्रष्टव्याः ।

शत०ब्रा० १,६,२,१२, इष्टिकरणप्रकारविशेषो दर्शितःयथा। "स यदेष्टिं कुर्वीत सप्रदय सामिधेनीरनु-वाक्यामुपांशु देवता यजति तद्वीष्टिरूपं, मूर्द्धन्यतो याज्यानु-वाक्ये स्यातां वार्तघ्नायाज्यभागौ, विराजौ संयाज्ये"।"अग्ने-रिष्टिमभिधाय अथ पृथक् प्रयोक्तव्याया आग्नेयेष्टेर्वैशे-षिकमङ्गजातमाह । यदेष्टिं दर्शपूर्णमासाभ्यां पृथगेव कुर्वीत प्रधानदेवता उपांशु यजेत तदुपांशुत्वं काम्येष्टि रूपं खलु । मूर्द्धन्वत्यौ "अग्निर्मूर्द्धा" "भुवो यज्ञस्य" इत्येते। (यजु०१२,१४,१५,) मूर्द्धन् शब्दवत्यौ प्रधानस्य याज्ये स्विष्ट-कृद्याज्यापुरोऽनुवाक्ये, विराजौ विराट्छन्दस्के "प्रेद्धो अग्ने" "इमो अग्न" इत्येते (यजु०१७,७६,७७,) भवतः" भा०

दर्शपौर्णमासयागं कृत्वा प्रायश्चित्तेष्टिः कार्या तत्प्रकारः शत०ब्रा० ११,१,२,१,दर्शितो यथा। "पौर्णमासेनेष्ट्वा इन्द्राय विरुद्धेऽनुनिर्वपति तेन यथेष्ट्वैवं यजतआमावास्येनेष्ट्वा-ऽदित्यै चरुमनुनिर्वपति तेन यथेष्ट्वैवं यजते १ । स यत्पौर्णमासेनेष्ट्वा इन्द्राय विरुद्धेऽनुनिर्वपतीन्द्रो वै यज्ञस्य देवतार्धेतदग्नीषोमीयं पौर्णमासं हविर्भवति तत्र नेन्द्राय त्वेति किं चन क्रियते एतेनो ह्यस्येतत् सेन्द्रं हविर्भवत्ये-तेन सेन्द्रो यज्ञोऽथ यद्विरुद्धे त्वेति सर्वा उ हि रुद्धो नाष्ट्राः पौर्णमासेन इन्ति २ । अथ यदामावास्येनेष्ट्वा अदित्यै चरुमनुनिर्वपत्येष वै सोमो राजा देवानामन्नं यज्ञन्द्रभाः स यत्रैष एतां रात्रिं न परस्ताद्य पश्चाद्दर्शे तेनैतदन्नवेव हविर्भवति तेनाप्रतिष्ठितमियं वै पृथिव्य-दितिः सेयमद्भा सेयं प्रतिष्ठितेतेन ह्यस्यैतदन्नवेव हविर्भवत्येतेन नाप्रतिष्ठितमेतत्तु तद्यस्मादनुनिर्वपत्यथ तस्मादनुनिर्व पेत् ४ । स यत्पौर्णमासेनेष्ट्वा इन्द्राय विरुद्धेऽनुनिर्वपति सैन्द्रो मे यज्ञोऽसदिति सर्वो वै यज्ञ इन्द्रस्यैव स यत्सर्वो यज्ञ इन्द्रस्यैवैतेनो ह्यस्यैतत् सेन्द्रं हविर्भवत्येतेन सेन्द्रो यज्ञः ४। अथ यदामावास्येनेष्ट्वा अदित्यै चरुमनुनिर्वप-त्यामावास्यं वा अनुनिर्वाप्यं पौर्णमासेन वा इन्द्रो वृत्र-महंस्तस्मा एतद्वृत्रं जघ्नुषे देवा एतद्विरनुनिरवपन् यदा-मावास्यं किमनुनिर्वाप्येऽनुनिर्वपेदिति तस्मात्तानुनिर्व-पेत् ५ । स यत् पौर्णमासेनेष्ट्वा अथान्यद्विरनुनिर्वपत्या-मावास्येनेष्ट्वाथान्यद्विरनुनिर्वपति हिपन्नं वृत्रं स्यादेव्यं प्रत्युच्छ्रयतेऽथ यः पौर्णमासेनैव पौर्णमासीं यजतआमा-वास्येनामावास्यामसपत्ना हैवास्यानुपबाधा श्रीर्भवति ६ । पौर्णमासेन वै देवाः पौर्णमासीं यजमाना आमावा-स्येनामावास्यां छिद्रएव प्राणानसधत्त छिद्रे प्रायाजन्त स यो हैवं विद्वान् पौर्णमासेनैव पौर्णमासीं यजतआमा-वास्येनामावास्यां छिद्रएव प्राणानसधत्ते छिद्रे प्रजा-यते स यद्यनुनिर्वपेद्याद्दक्षिणां नादक्षिणं हविः स्यादिति ह्याहुर्दर्शपूर्णमासयोर्ह्वैषा दक्षिणा यदन्वाहार्य इति न्वनुनिर्वाप्यस्याथाभ्युदितस्य७"३कण्डिका।"अथामावास्येति मन्यमान उपवसति । अथैष पश्चाद्दर्शे स हैष दिव्यः खा, स यजमानस्य पशूनभ्यवेक्षते तदपशव्यं स्यादप्रायश्चित्तिरत एतस्माद् हैतद्वीषावचन्द्रमसादिति"१ । आयासुपसर्पन्ति । एतेनो हैतदुपतपदाचक्षते ऋषयश्चित-मित्येतस्य हैवैतदाचक्षते २ । अथस्यान्द्रमस इति । चन्द्रमा वै सोमो देवानामन्नं तं पौर्णमासमभिषुण्वन्ति सोऽपर-पक्षेऽप ओषधीः प्रविशति पशवो वा अप ओषधीरदन्ति तदेनमेतां रात्रिं पशुभ्यः संनयति ३ । सोऽद्यामावास्येति मन्यमान उपवसति । अथैष पश्चाद्दर्शे तद्यजमानो यज्ञ-पथादेति तदाहुः कथं कुर्यादित्या यज्ञपथाद्यजेता३ न यजेता३ इति यजेत हैव न ह्यन्यदपक्रमणं भवति ऋः-स्वः एवैष ज्यायानुदेति स आमावास्यविधेनैवेष्ट्वाथेष्टिमनुनिर्वपति तद्दृष्टैव स्यो वा ४ । तस्य त्रीणि हवींषि भवन्ति । अग्नये पथिकृतेऽष्टाकपालं पुरोडाशम्, इन्द्राय वृत्रघ्नेएकादशकपा-

लम्, अग्नये वैश्वानराय द्वादशकपालं पुरोडाशम् ५। स यदग्नये पथिकृते निर्वपति। अग्निर्वै पथः कर्ता स यस्मादेवादो यजमानो यज्ञपथादेति तमेनमग्निः पन्थानमापादयति ६। अथ यदिन्द्राय हरिवते। पाप्मा वै हरिवो यो भूतेर्वारयित्वा तिष्ठति कल्याणकर्मणः साधोस्तमेतदिन्द्रेणैव हरिवता पाप्मानं हरं हन्ति तस्मादिन्द्राय हरिवते ७। अथ यदग्नये वैश्वानराय द्वादशकपालं पुरोडाशं निर्वपति यत्र वा इन्द्रो हरमहंस्तमग्निना वैश्वानरेण समदहत्तदस्य सर्वं पाप्मानं समदहत्तथोएवैष एतदिन्द्रेणैव हरिवता पाप्मानं हरं हत्वा तमग्निना वैश्वानरेण संदहति तदस्य सर्वं पाप्मानं संदहति स यो हैवं विद्वानेतयेष्ट्या यजते न हास्यात्मन्न पाप्मा परिशिष्यते ८। तस्यै सप्तदश सामिधेन्यो भवन्ति। उपांशु देवता यजति याः कामयते ता वाज्यानुवाक्याः करोत्येवमाज्यभागावेवं संयाज्ये ९। तिस्रो धन्वं दक्षिणां ददाति। धन्वना वै स्वानं बाधन्ते तदेतमेवैतद्बाधते यत्तिस्रो धन्वं दक्षिणां ददाति १०। दण्डं दक्षिणां ददाति। दण्डेन वै स्वानं बाधन्ते तदेतमेवैतद्बाधते यद्दण्डं दक्षिणां ददात्येषा वा इत्यादिष्टा दक्षिणा दद्यात्त्वे वाक्षामम्यन्यद्यादृतरा दक्षिणास्तासां यत् सम्यद्येत सा सा हैषा पथ्येष्टिस्तयाप्यनभ्युद्दृष्टो यजेतैव" ४ क०। "दर्शयागे पुरस्ताच्चन्द्रदर्शनमायश्चित्तेष्टिरुक्ता अथ पश्चात्तद्दर्शने नैमित्तिकीमिष्टिं विधित्सुराह। अथानन्तरं सायंकाले एष चन्द्रमाः पश्चात् प्रतीच्यां दिशि दृश्ये दृश्यते। अभ्यवेक्षते अभ्यवहर्तुं पश्यति यथा शालाद्वको वने संचरतो मेषादीन् पशूनभ्यवजिहीर्षति। एतस्मादेव खलु चन्द्रसम्बन्धिसदृशेन पूर्वोक्तवत् अकारः समासान्तः तस्माच्चन्द्रादिति भीषा उक्तरूपया भीत्या, छायासदृशच्छन्ना गवाद्याः पशवः तिरोहिता यजमानस्य भवन्तीत्यर्थः पशूनात्मोपतापकारि यदेतच्चन्द्रदर्शनं तत् खलु चित्तं शून्या रिक्तीकृतमित्याचक्षते २। एतमेव चन्द्रगतं दोषमेवमाचक्षते, चन्द्रमसः सम्बन्धी तन्मण्डलमध्यवर्ती मृग इति अत एव तस्य मृगाङ्क इति प्रसिद्धिः। उपरिष्टाच्छायां गतं देवादृक्षं चन्द्रमसं पौर्णमासीकाले द्रवीकुर्वन्ति। पशव ओषधीर्जग्ध्वा अमृतं पीत्वात्मनि तं चान्द्रमसं क्षतं रसममावास्यायां धारयन्ति तत एनं रसममावास्यासम्बन्धिन्यां रात्रौ पशुभ्यः सकाशात् संनयति सम्यक्प्रापयति। तत्संनयनं प्रतिपच्चन्द्रदर्शने सति नोपपद्यते। २दर्शयागस्यातिक्रान्तकालत्वे दोषसम्पत्तस्य तन्नानुष्ठानप्रकारमाह। प्रकृतो दर्शयागः शीघ्रं समापनीयः अनन्तरमेवैवेतद्दोषपरिहाराय प्रायश्चित्तेष्टिः कर्त्तव्या। स चामावास्याविधेनैवेति यद्योदितकालेऽनुदितोऽमावास्यायागस्तत्प्रकारेणैव प्रतिपदि प्रक्रान्तां दर्शेष्टिं समाप्य४। अथास्मिन्नौ प्रकृतिवद्विकृतिः कर्त्तव्येति नोदकप्राप्तेषूक्तेषु विशेषं विधत्ते। प्रकृतौ पञ्चदश अत्र नोदकप्राप्ताः पृषदाज्यवत्यौ धाय्ये इडेति सप्तदश (सामिधान्यः) भवन्ति। प्रकृतौ प्रधानयागे उच्चैर्धर्मः। प्रकृतदेवतालिङ्गयुक्ताश्चतस्रः पञ्चां दाशतय्यां समाम्नाता या ऋचताः कामयते। आज्यभागयोः स्विष्टकृद्यागे च याज्याकाण्डम् ६। तिसृभिरृग्भिर्युक्तं धनुः तिसृधन्वम् पूर्ववदकारः समासान्तः। एतं चन्द्रात्मकं दिव्यं स्वानम् १०। अदृश्यमानचन्द्रेऽपि" ११ भा०

"इष्टेः पार्वायणान्तीयाः केवलानिर्वपेत् सदा" मनुः "प्राजापत्यां निरूप्येष्टिम्"। "हेमन्ते नवशस्येष्टा" मनुः "आरेभिरे जितात्मानः प्रतीयामिष्टिसत्विजः" रघुः। २"यागमात्रे च "कर्तुमिष्टिमभिवाञ्छता मया" माघः राजसूयवागाभिप्रायमिदम्। इष-क्तिन्। ३इच्छायाम्। इष्टप्रयोगनिर्वाहाय पातञ्जलभाष्यकृतः इच्छाबोधके ४श्लोकात्मके वाक्यभेदे च। यथा। "द्विपर्य्यन्तानामेवेष्टिः" सर्वनाम्नोऽवृत्तिमात्रे ङ्वद्भाव" इत्यादि। एतयेच्छा "ठक्छसोर्व" वार्त्ति० "एकतद्धिते चेति" सूत्रञ्च गतार्थम्' सि० कौ०। "अनुत्सूत्रपदन्यासेति" माघव्याख्यायाम् अनुत्सूत्रपदन्यासैकतात्पर्यरक्षणं सूत्रप्रसंख्याननैरपेक्ष्येण सूत्राक्षरैरेव" इति मल्लि०।

इष्टिका स्त्री इष-तिकन्। इष्टकाशब्दार्थे "उच्चैर्धर्मं त्विष्टिकया करणं कोठविनाशनम्" सुश्रु०। "इष्टिका काञ्चनीचात्र चयनार्थं कृता भवत्" भा० आश्व० ८८अ०।

इष्टिकापथिक न० इष्टिकायाः पथिकं तद्भेदेनापि प्रभवत्वात्। नामख्यकलक्षणे राजनि०। [क्रतयागे।

इष्टिकृत् त्रि० इष्टिं यागं कृतवान् कृ-भूते क्विप् दैत०।

इष्टिन् त्रि० इष्टमनेन इष्टा० इनि। क्रतयागे "अध्वरेष्विष्टिनां पाता" भट्टिः।

इष्टिपच पु० इष्टये इच्छायै अभिलाषार्थं पचति न यज्ञार्थं पच-अच्- ४त०। १ क्षपणे २ दैत्येच शब्दर०। स च स्वेच्छापूरणार्थमेव पचति न यज्ञार्थमिति तस्य तथात्वम्।

इष्टिपशु पु० दैत०। यज्ञिये पशौ। [त्रिका०।

इष्टिमुष् त्रि० इष्टिं यागं मुष्णाति मुष-क्विप् दैत०। दैत्ये

इष्टियाजूक पु० इच्छा यायजूकः। "काम्येष्टियाजनशीले। "तस्माच्चेष्टियाजूकः स्यात् पशुभ्यः एकं प्रायच्छत्" ह०उ०।

इष्टियाजूकः इष्टियजनशीलः इष्टिशब्देन काम्या इष्टयः प्रातपथप्रसिद्धाः ताच्छील्ययोगात्काम्येष्टि यजनप्रधानो न स्यात्" भा० ।

इष्टोक्षत त्रि० अनिष्टमिष्टं कृतम् इष्ट+च्वि-कृ-कर्मणि क्त । अनिष्टे इष्टे कृते। अनिष्टिरिष्टिः कृता । इष्टिभेदे सत्रे न० । "सत्रमिष्टोकृतं नाम समुपास्ते महातपाः" भा०व०२५६अ० ।

इष्ट स्त्री इष-भावे क्तन् । इच्छायाम् उणादिकोषः ।

इष्टयन न० इष्टयानं गमनं यत्र । "यागविशेषाचरणभेदे" इष्टयनञ्च आश्व० श्रौ०२,१४, सूत्रादौ दर्शितं यथा "अत ऊर्द्धमिष्टयनानि" ।"अत ऊर्द्धं यानि यज्ञस्यैऽस्मिन् अध्याये तानि इष्टयनसंज्ञानीति विद्यात् । इष्टिभिरयनं गमनं येषु कर्मसु तानीष्टयनानि" नारा०ट० । "संवत्सरिकाणि"२सू० ।"संवत्सरेण क्रियन्ते संवत्सरेण क्रियन्त इत्यभयथा विपक्षः कर्तव्यः,दाक्षायणयज्ञचातुर्मास्यानामनेकसांवत्सरिकत्वसिद्ध्यर्थम् ट० ।"तेषां फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा प्रयोगः"३सू० ।"फल्गुनीभिर्युक्ता पौर्णमासी फाल्गुनी, चित्रया युक्ता चैत्री । तेषां सांवत्सरिकाणां आगन्तुकानामस्मिन् काले प्रारम्भः कार्यः । दर्शपूर्णमासयुक्तविकारकृपाणां दाक्षायणयज्ञादीनामारम्भे कालनियमो नास्तीति तेषामित्युच्यते" नारा०ट० । "त्रयाणम्" ४सू० । "त्रयाणं नामेष्टयनमुच्यते"ट० ।"अग्निरिन्द्रो विश्वेदेवा इति पृथग्निष्टयोऽनुसवनमहरहः"५सू० ।"अग्निदेवत्या इन्द्रदेवत्या विश्वदेवदेवत्या चैतास्तिस्र इष्टयः त्रिषु सवनेषु यथासङ्ख्येन एकैकेष्टिः कार्याऽहन्यहनि । अहरहरिति वचनं पौर्णमास्यमावास्ययोर्बाधनार्थम्" ट० । "एका वा त्रिष्टविः" ६सू० "एताभिरेव देवताभिर्युक्ता एकैकेष्टिस्त्रिष्टविष्काऽहन्यहनि प्रातः सवन एव कर्त्तव्या वेत्यर्थः" ट० । "इडादधोनामेष्टयनं तत्र देवतादि २ १४ १-१०" द्यावापृथिव्योरयनं नामेष्टयनं तत्र देवतादि २,१४,१२,१५" "चातुर्मास्यानि इष्टयनानि तद्देवतादि २,१५,१ सूत्रादौ । एवमन्यान्यपि इष्टयनकर्म्माणि आकरे द्रष्टव्यानि

इष्ट्वा अव्य० यज-क्त्वा । १यागं कृत्वेत्यर्थे । "अश्वमेधेन चेष्ट्वा" मुक्तकटिकम् । इष-क्त्वा । २अभिलष्येत्यर्थे च ।

इष्म पु० इष्यति इच्छत्यनेन वा इष-गतौ इष-इच्छायां मक् वा । १वसन्तकाले २कामे च भावे मक् । ३गतौ । ततः अस्त्यर्थे इनि । इष्मिन् गतियुक्ते त्रि० स्त्रियां ङीप् । "ते वायोमन्त इष्मिणो अभीरवः" ऋ० १,२७,६। "इष्मिणः गतिमन्तः"भा० । इष-इच्छायां कर्म्मणि मक् ।४द्रव्यमात्रे अन्नादौ अस्त्यर्थे इनि अन्नादिमति "हिरण्यवाः सायुधास इष्मिणः"ऋ०५,८, ७५। इष्मिणोऽन्नवन्तः"भा० ।

इष्य पु० इष्यते इष-क्यप् । वसन्ते ऋतौ हेम० । तस्य ऋतूनां मध्ये इष्टतमत्वात्तत्वम् "ऋतूनां कुसुमाकरः" गीतायां तस्य भगवद्रूपत्वोक्तेः इष्टत्वम् ।

इष्य पु० इष-सर्षणे वन्-गुणाभावः । आचार्य्ये उद्देश्यार्थमुपक्रम्यमाणत्वात्तत्वम् । उञ्छवृत्तस्तु दैव दाने इत्यस्यैव रूपं दीर्घादि इत्याहुः । उपदेशदानाच्च तस्य तथात्वम् ।

इष्यग्र न०ऐत० । बाणाग्रे । गहादिपाठात् भवादौ ङ । इषुसीय तद्भवादौ त्रि० । [इषुनीकोय तद्भवादौ त्रि० ।

इष्यनीक न० ऐत० । बाणावयवे । गहा० भवादौ ङ ।

इष्वसन पु०इषवोऽस्यन्तेऽनेन अस-ल्युट् ऐत० । धनुषि ।"रामस्येष्वसनदर्शनोत्सुकम्" रघुः ।

इष्वास पु० इषवोऽस्यन्तेऽनेन अस-घञ् ऐत० । १धनुषि "अत्र शूरा महेष्वासाभीमार्ज्जुनसमा युधि" "काश्यश्च परमेष्वासः शिखण्डी च महारथः"गीता । अर्शआदिपाठात् क्लीवत्वमपि । इषून् अस्यति अस-अच् उप०स० । २शरक्षेपके त्रि०(तीरन्दाज) मेदि० ।

इस् अव्य० इंकामम् स्यति सो-किप् त्रि० आलोपः । १सन्तापे २कोपे ३दुःखानुभवे च शब्दर० ।

इह अव्य० इदम्+ह प्रत्ययः । अस्मिन् काले देशे दिशि वा १इत्यर्थे "एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन" श्रुतिः "इह जन्मनि जन्मान्तरे वा" वे०सा० । "नेह नानास्ति किञ्चन" "नेहाभिक्रमनाशोऽस्ति" गीता । "तदस्त्विहमिह भूतं भूतगत्या जगत्या:" नैष० । प्रथमार्थेह । २अनुभूयमाने लोके इहासत्यार्थफलभोग विरागः वेदा० वा० च इहकालः । इह भवः विदितो वा कर्मा० ठञ् । ऐहिक इहभवे इहविदिते च त्रि० । "ऐहिकमप्यप्रस्तुतप्रतिबन्धे दाक्षादिनिषेधात्" शु०त०रघु० । [मानकाले ।

इहकाल पु०इदम्+प्रथमार्थे ह इह कर्म्म० । एतत्काले वर्त्तमाने ।

इहतन त्रि० इहभवं खञ् तुट् च । इहभवे स्त्रियां ङीप् ।

इहत्य त्रि० इह भवः इह+त्यप् । इहकालादिजाते । स्वार्थे कन् । इहत्यक तत्रार्थे स्त्रियां नित्यमित्त्वम् । इहत्यिका

इहद्वितीया स्त्री मयू०स० । अत्यद्वितीयायाम् ।

इहपञ्चमी स्त्री । मयू०स० । अत्यल्पपञ्चम्याम् ।

इहल पु० इह भवं लाति ला-क । चेदिदेशे त्रिका० तद्वासिनि न०व० ।

इहलोक पु० इदम्-प्रथमार्थे ह कर्म्म० । एतल्लोके वर्त्त-

भूयमाने लोके इहलोके भवः ठक् अनुश० द्विपदद्वद्विः ऐहलौकिक तद्भवे त्रि० ।

इहामुत्र अव्य० इह च अमुत्र च इ० । एतल्लोके परलोके च "इहामुत्रार्थफलभोगविरागः" वेदा०सा० ।

इति वाचस्पत्ये इकारादिवर्णशब्दार्थनिरूपणम् ।

ई

ईं अव्य० ईं क्विप् । १ विषादे २ दुःखभावनायाम् ३क्रोधे ४अनुकम्पायाम् ५प्रत्यये ६सन्निधौ ७संबोधने च । मेदि न्यासयं सान्ततया पठितः । पृषो०साधुः ।

ईं स्त्री अस्य विष्णोः पत्नी ङीप् । लक्ष्म्याम् ।

ईं कान्तौ (इच्छायाम्) गतौ व्याप्तौ क्षेपे भोजने सक० गर्भग्रहणे अक० अदादि अनिट् पर० । एति ईतः इयन्ति । ऐत् । ऐषीत् । इयाय इयतुः । एता एष्यति ऐष्यत् । "ईतः । अस्यालनेर्यदित्वमपि "न हि तरणिरुदीते" दिक्पराधीनवृत्तिः" कविक० टी०दुर्गा० ।

ईं याचने द्विक० आत्मने० अदादि अनिट् निरु० । ईते इयीत ईताम् । ऐत । ऐट । इये । "आ योदेवास ईमहे वामं प्रत्नध्वरे" यजु० ४,५ । "अजस्रं धर्ममीमहे" यजु० २६,३ ।

ईं गतौ दिवा०सक० अनिट् आत्म० । ईयते ऐट । ईतः "पङ्क्तैरन्वीतवधूसुखद्युतः" माघः । ईङ्–गतौ भ्वा० ।

ईक्ष दर्शने पर्य्यालोचने च भ्वा० आत्म० सक० सेट् । ईक्षते ईक्षेत ईक्षताम् ऐक्षत ऐक्षिष्ट ईक्षाम्–बभूव आस–चक्रे–ईक्षिता ईक्षिषीष्ट ईक्षिष्यते ऐक्षिष्यत । ईक्षितव्यः ईक्षणीयः ईक्ष्यः ईक्षिता ईक्षितः ईक्षित्वा वीक्ष्य । ईक्षणम् ईक्षा । ईक्षमाणः । कर्म्मणि ईक्ष्यते ईक्ष्यमाणः । धातुनिर्देशे ईक्षतिः ईक्षिः । "न धर्मद्वेषु वयः समीक्षते" न कामवृत्तिर्वचनीयमीक्षते" कुमा० । "तदैक्षत ब्रह्म स्यां प्रजायेय" श्रुतिः । "स प्रजापतिरीक्षां चक्रे" श्रुतिः "सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । ईक्षते योगयुक्तात्मा" गीता । "कथमीक्षामहे सर्वे, दुर्योधन! तवेङ्गितम्" भा०व०२८८श्लो० । "ऐक्षिष्ट पुंभिः प्रचितान् स गोदान्" भट्टिः वेदे पदव्यात्वासोऽपि "कविर्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" कठो० । पृषोदरादित्वात् ऐनशुकाशुभालोचने च तद्योगे शुभाशुभसंबन्धिनि चतुर्थी । "राधीक्ष्योर्यस्य विप्रश्नः" पा० । "यदीयः विविधः प्रश्नः क्रियते तस्मिन् चतुर्थीस्यर्थः । "क्षणाय ईक्षते गर्गः दृष्टो गर्गः शुभाशुभं पर्य्यालोचयतीत्यर्थः" सि०कौ० । "ईक्षतेर्नाशब्दम्" शा०सू० । "कारणे ईक्षितृत्वश्रवणात्" भा० ।

अधि+विवेचने अधीक्षते "कृष्णकर्कितोलोकः सत्येऽप्यपाय मधीक्षते" हितो० ।

अनु+अनुचिन्तने । "तामन्वीक्षत हृयं वै वल्मीकवपेयम्" शत०ब्रा० ६,३,३,५ । "अन्वीक्षमाणोरामस्तु विपक्षं भ्रान्तचेतनम्" रामा० ।

अप–आकाङ्क्षायामनुरोधे अवधिनियमे च । "अपेक्षते प्रत्ययसूत्रम् त्वाम्" कुमा० "अपेक्षन्ते न च क्लेशं न पात्रं न दशान्तरम् । परोपकारनिरतामधिदीपा इवोत्तमाः" उद्भटः । "किमपेक्ष्य फलम् पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः" किरा० । "हित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजामताः""अपेक्षाबुद्धिनाशाच्च तेषां नाशः प्रकीर्तितः" भाषा० "शब्दोव्यङ्कत्वेऽर्थान्तरमपेक्षते" सा०द० । "सापेक्षत्वेऽप्यगमकत्वात् समासः" पा०भा० "सा प्रक्रिया या कर्त्तव्यमपेक्षा" मीमा० । "नदीशः परिपूर्णोऽपि मित्रोदयमपेक्षते" चन्द्रा० ।

वि+अप+विशेषेणापेक्षायाम् । "न व्यपेक्षन्त सस्वस्तुकाः प्रजाः" रघु० । "व्यपेक्षमाणौ सहसोत्थितौ गतौ" रामा० "समर्थः पदविधिः" पा०भा० व्यपेक्षाऽव्यपेक्षापक्षद्वयसुपन्यस्तम् । तत्र व्यपेक्षापक्षोमतान्तरेण उपन्यस्तः स च युक्तिविरुद्धत्वात् कैयटविररणादौ दूषितः "वाक्यवत् सा व्यपेक्षाऽपि दृष्टावपि न हीयते" भर्तृ० । सा च शब्दबोधिपयोगिन्याकाङ्क्षारूपा आकाङ्क्षाशब्दे विवृतिः ।

अव+ चाक्षुषदर्शने । "वीतस्पृहाणामवहेऽहं व एतेऽत्र समागताः" गीता । "अवेक्षमाणोमहतीं सुरर्षभुः" माघः सम्यक्पर्य्यालोचने च । "यदवोचदवेक्ष्य सुन्दरी" किरा० ।

अनु+ अव+पर्य्यालोचने अनुसन्धाने च "सूक्ष्मतां चान्ववेक्षेत योगेन परमात्मनः" मनुः ।

अभि+अव+भोजनार्थेऽशने । "यजमानस्य प्रभूनभ्यवेक्षते" शत० ब्रा० ११,१,५,११, "अभ्यवेक्षते अभ्यवहर्तुं पश्यति" भा० ।

परि+अव+समन्ताद्दर्शने । "ततो वाचस्पतिर्जज्ञे तं मनः पर्य्यवेक्षते भा० आश्व०२१अ० ।

प्रति+अव+ प्रतीत्य पर्य्यालोचनया दर्शने । "अथेमां प्रत्यवेक्षमाणो जपति" शत०ब्रा० ५,२,४,२० ।

सम्+अव+सम्यग्दर्शने । "ऋषीपमोऽयं समवेक्षते सभाम्" भा०वि०२।८श्लो०।"यदि दृष्टं बलं सर्वं वयञ्च समवेक्षिताः" भा०आ०२५अ० । सम्यक्पर्य्यालोचने च "सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा" मनुः ।

आ+सम्यग्दर्शने ।"अथचिन्तेक्ष पाञ्चालीम्"भा०स०२३८०१

उद्+अर्द्धदर्शने । "सहस्ररश्मिना साक्षात् सप्रणामसुदीक्षिताः" कुमा० । अपेक्षायाञ्च "त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती" मनुः ।

उप+क्षेपत्वज्ञानेन परित्यागे "उपेक्षया स्वत्वहानिः" दायभा०टी० "ये मां विप्रकृतां चक्षुर्भ्यामेवेक्षध्वं विशोकवत्"भा० व०११अ० प्रतिचिकीर्षाभावे"उपेक्षते यः स्वयमभ्येनीर्जटाः" कुमा० "नोपेक्षेत क्षणमपि राजा साहसिकं नरम्" मनुः अपर्य्यालोचने अनुसन्धानाभावे च"गूढेन चरता तत्त्वमुपेक्षितमिदं मया"रामा० ।

सम+उप+सम्यगुपेक्षायाम् । "शत्रुपक्षं समाधातुं योगोक्षात् सम्प्रपेक्षते" भा०स०१०६० श्लो०।

निस्+निर्+निःशेषेण दर्शने निश्चयार्थं दर्शने च ।"यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान्"गीता ।

परि+तत्त्वानुसन्धाने प्रमाणाद्युपन्यासेन वस्तुतत्त्वावधारणे च "परीक्ष्य लोकान् कर्म्मचितान्"श्रुतिः। न्यायसूत्रवृत्त्यादौ प्रमाणप्रमेयादि परीक्षा बहुशो दर्शिता । सम्यक्विवेचने च ।"नैता रूपं रीक्षन्ते नासां वयसि संस्थितिः। सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते" मनुः । लक्षणादिमत्त्वेन ज्ञाने च अन्नविद्याविदश्चैव सूता विप्राश्च तद्विदः । मेध्यमश्वं परीक्षन्तां तव यज्ञार्थसिद्धये" भा०आश्व०६० २७ श्लो०।"बलात् परीक्षितः पुंस्त्वे"या०ऋ० । 'सर्व्वस्य हि परीक्षान्ये स्वभाव नेतरे गुणाः' हितो०भक्तिमत्त्वादिना ज्ञाने च ।"भावां मयोद्धाव्य परीक्षितोऽसि"रघुः । विवादे सत्यत्वासत्यत्वादिसंशयनिरासाय स्वपक्षप्रामाण्यव्यवस्थापनाय परपक्षदूषणे युक्तापरीक्षादि । परीक्षाशब्दे विदुतिः ।

प्र+प्रकर्षेण दर्शने "प्रेक्षन्ते सर्व्वभूतानि बलयः पर्व्वसन्धिषु" भा०व०११६५७ । "यत् किञ्चिद्दर्शयार्थेषु सन्धिधौ प्रेक्षते धनी"भा०व०मनुः। "उदायुधानापततस्तान् द्रुमान् प्रेक्ष्य राघवः"रघुः । "पुनः प्रेक्ष्य च श्लथनम्" कुमा०।

अभि+प्र+आभिमुख्येन दर्शने ।"प्राची दिगभिप्रेक्ष्य महर्षिरिदमब्रवीत्" भा० व०१६३अ० । "दह्यमानमभिप्रेक्ष्य स्त्रियश्चाः संप्रदद्रुवुः" भा०व०८८अ० ।

उद्+प्र+उत्प्रेक्षायां किञ्चिद्धर्म्मसाधर्म्येणान्यस्यान्यरूपता कल्पने उद्भावने च । "उत्प्रेक्षामोदयं तावन्मतिमन्तं विभीषणम्"रामा०।"तदुत्प्रेक्षोत्प्रेक्ष प्रियसखि गतांस्तांश्च दिवसान्"अमरुश०। "भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना"सा०द०।"अलङ्कारशब्दे३९५पृष्ठे विवृतिः।

सम्+प्र+सम्यग्दर्शने । "संप्रेक्ष्य नासिकाग्रं स्वम्" गीता "योगक्षेमं च संप्रेक्ष्य वणिजोदापयेत् करम्" मनुः ।

अभि+सम्+प्र+आभिमुख्येन सम्यग्दर्शने ।"अभिसंप्रेक्ष्य भर्त्तारं कृष्णा वचनमब्रवीत्" भा० आदि० प०२०११ ।

प्रति+अनुरोधे अपेक्षायां पूजने च ।"प्रतीक्ष्यं तत् प्रतीक्ष्यायं पिहस्खे प्रतिस्तुतम्" माघः "प्रथमं संस्थिता भार्य्या पतिं प्रेत्य प्रतीक्षते" भा०आ० ३०३३ । नाभिनन्देत मरणं नाभिनन्देत जीवितम् । कालमेव प्रतीक्षेत" मनुः ।"संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिः" मनुः ।

सम्+प्रति+सम्यक्प्रतीक्षायाम् "मुहूर्त्तं संप्रतीक्षस्व" भा० आ० २६०३ । "एकवेणीधरा हि त्वां नगरी संप्रतीक्षते" रामा० ।

वि+विशेषेण दर्शने ।"वीक्षन्ते त्वां विक्षिताश्चैव सर्वे"गीता । "सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्य्ययम्" मनुः । "जड़ीकृतस्त्र्यम्बकवीक्षणेन" रघुः ।

अनु+वि+सन्ततवीक्षणे पश्चाद्वीक्षणे च । "तस्माद्दिशोऽनुवीक्षमाणोऽजपति" शत०ब्रा० ५,२,१,२५ ।

अभि+वि+आभिमुख्येन वीक्षणे।"नचैनं भुवि शक्नोति कश्चिदभिवीक्षितुम्" मनुः ।

उद्+वि+ऊर्द्ध्ववीक्षणे।"उद्वीक्षमाणा भर्त्तारं सखेन परिशुष्यता" रामा० "पतिव्रतामिमां साध्वीं तवोद्वीक्षितुमप्युत" भा० अनु० २अ० "उद्वीक्षितं प्रकृतिभिर्भरतानुगामि:" रघुः ।

सम्+उद्+वि+समन्तादुद्वीक्षणे "निषेदुर्भूमिपाः सर्वे समुद्वीक्ष्य परस्परम्" रामा० ।

प्रति+वि+प्रतिदर्शने यत्कर्त्तृकं स्वदर्शनं तस्य स्वेन दर्शने । "ततः सराजा प्रतिवीक्ष्य ताः स्त्रियः" रामा० ।

सम्+वि+सम्यग्वीक्षणे ।

सम्+सम्यग्दर्शने पर्य्यालोच्य दर्शने । "पुरस्तादेव प्रतीचे समीक्षमाणायानुब्रूयात्" शत०ब्रा० ११,५,४,१४ । "समीक्ष्य बहुधा चरेत्" मनुः । "अथ हस्तसहस्रेण शीकरेण स नागराट् । समैक्षत गुडाकेशम्" भा० आश्व०२२२।श्लो०।"तान् समीक्ष्य स कौन्तेयः सर्व्वान् बन्धूनवस्थितान्" गीता "उचितमेवं समीक्ष्यक्रमतान्ना-

रिणः" हितो० "समीक्ष्य कुलधर्मांश्च स्वधर्मं प्रतिपादयेत्" मनुः ।

प्र+सम्+प्रकर्षेण सम्यगीक्षणे । "सह सर्व्वाः ससृत्विग्भाः प्रसमीक्ष्यापदोऽत्यगम्" मनुः "कुलं ख्यातिञ्च वृत्तं च बुद्ध्या तु प्रसमीक्ष्य च" भा० आ० ४२७४ श्लो० ।

ईक्षण न० ईक्ष-भावे ल्युट् । १ दर्शने । करणे ल्युट् । २ नेत्रे । तत्र दर्शने "खिद्यः कार्य्येक्षणे नृणाम्" मनुः नेत्रे । "अभिसख्ये मयि संहतमीक्षणम्" यजु० "सदा संरब्धनयनौ सदा चानिमेक्षणौ" भा० आ० २२ अ० । "इत्यद्रिशोभा प्रहितेक्षणेन" रघुः ।

ईक्षणिका स्त्री० ईक्षणं हस्तरेखादीक्षणेन शुभाशुभदर्शनं शिल्पमस्य ठन् । शुभाशुभफलकथनोपजीविनि सान्तर्द्रिके । स्त्रियां टाप् । "मङ्कलादेशदक्षाय भद्राक्षेक्षणिकैः सह" मनुः"

ईक्षति पु० ईक्ष-घात्वर्थनिर्देशे क्तिप् । ईक्षणे । "ईक्षतेर्नाशब्दम्" भा० ब्रह्म० ।

ईक्षा स्त्री ईक्ष-भावे अ टाप् । ईक्षणे १दर्शने २पर्य्यालोचने च "स ईक्षां चक्रे" श्रुतिः "श्रवणादनु ईक्षा अन्वीक्षा" । न्यायसू० वृत्तिः । आन्वीक्षिकीशब्दे विवृतिः ।

ईक्षेण्य त्रि० ईक्ष-बा० एन्य । १दर्शनीये २पूजनीये च । "ईक्षेण्यासोऽवोऽनः" ऋ० ६,७७,२ । "ईक्षेण्यासः ईक्षणीयाः" भा० ।

ईख गतौ इदित् भ्वा० पर० सक० सेट् । ईङ्खति ऐङ्खीत् । ईङ्खाम् बभूव आस चकार । ईङ्खिता ईङ्खिष्यति ऐङ्खिष्यत् । ईङ्खितः "सन्त्रासमवितः शक्रः प्रेङ्खच्च क्षुभिता क्षितिः" भट्टिः "भुञ्जु ससद्र आ रजसः पार ईङ्खितम्" १०,१४३,५ । णिचि ईङ्खयति । "य ईङ्खयन्ति पर्वतास्तिरः समुद्रमर्णवम्" ऋ० १,१६,७ । "ईङ्खयन्तीरपस्युव इन्द्रं जातमुपासते" ऋ० १०,१५३,१ । "ईङ्खयतु परिजना पविङ्खया" रघुः ।

ईग गतौ इदित् दुगिवत् । ईङ्गति ऐङ्गीत् ईङ्गते इत्येके ।

ईज गतौ निन्दायाञ्च भ्वा० आत्म० सक० सेट् । ईजते ऐजत ऐजिष्ट ईजाम्-बभूव आस चक्रे । ईजिता ईजिष्यते ऐजिष्यत ।

ईज गतौ निन्दने च इदित् भ्वा० आत्म० सक० सेट् । ईङ्गते ऐङ्गिष्ट । ईङ्गाम्-बभूव आस चक्रे । ईङ्गितम् । अयम् अपाणिनीयः कविकल्पद्रुमे तु पठितः ।

ईजान त्रि० यज-ताच्छील्ये कानच् द्वित्वम् । यजमाने यागशीले । "ततोमङ्किः क्रतुभिरीजानो भरतस्सदा" भा० आ० ६३ अ० । "यः सेतुरीजानानामक्षरं ब्रह्म यत् परम्" कठो० ।

ईड स्तुतौ अदा० आत्म० सक० सेट् । ईडे ईडिषे ईडिध्वे ऐडिष्ट ईडाम्-बभूव आस चक्रे । ईडिता ईडिष्यते ऐडिष्यत । ईड्यः ईडितः ईडनम् ईडा । "अग्निमीडे पुरोहितम्" ऋ० १,१,१ । डकारं लकारतया बह्वृचाः पठन्ति । "अजमध्यस्थडकारञ्च लकारं बह्वृचा जगुः । अजमध्यस्थटकारञ्च ळकारं तु यथाक्रममिति" ऋ० भा० वाक्योक्तेः । वङ्गदेशसम्प्रदायस्तु तयोः अजमध्यस्थयोः ळ्ळकारतया पाठः इतिभेदः । यास्कस्तु "ईडिरध्येषणकर्म्मा पूजाकर्मा चेत्याह गन्धर्वाः सुरसङ्घाश्च बह्वश्च मह-र्षयः । अन्तरीक्षं गतं देवं गीर्भिरभ्याभिरीडिरे" रामा० "नेडिषे यदि काकुत्स्थम्" भट्टिः "ईड्यानो देवा इष्टानाम्" ऋ० १०,६६,१४ । "भवन्तमीड्यं भवतः पितेव" । "याज्ञीनतामग्रजदीड्यमानः" इति च रघुः । "अग्निः पूर्व्वेभिर्ऋषिभिरीड्योनूतनैरुत" ऋ० १,१,२ । णिचि ईडयति ते ऐडिडत् त ।

ईडा स्त्री ईड्-भावे अ स्त्रीत्वात् टाप् । स्तुतौ ।

ईडित त्रि० ईड-क्त । स्तुते यस्य स्तवः कृतस्तच्छब्दे ।

ईडेन्य त्रि० ईड-बा० एन्य । १स्तवनीये २पूजनीये च । "ईडेन्यो नमस्यश्चिरस्तमांसि दर्षतः" ऋ० १,१४६,७ ।

ईक्षत् त्रि० ईट् अस्त्यस्य मतुप् स्त्रियां ङीप् । सनाथे ईश्वरवति । ईश्वरमाचष्टे णिच् मतोर्लुक् । ईश्वयति ।

ईति पु० ईयते ई-क्तिच् । १डिम्बे, २उत्पादिते त्रि० ३प्रवाहे, "अतिवृष्टिरनावृष्टिः शलभाः मूषिकाः खगाः । प्रत्यासन्नाश्च राजानः षडेतेऽईतयः स्मृता" इत्युक्ते ४क्षयेरूपद्रवभेदे च स्त्री । "निरीतिभावं गमितेऽतिवृष्टयः" नैष० "निरातङ्कानिरीतयः" रघुः "ईतयोव्याधयस्त्वन्तर्दोषाः क्रोधादयस्तथा । उपद्रवाश्च वर्तन्ते आधयः चुद्भयं तथा" भा० व० १४८ अ० ।

ईदृक्ष त्रि० अयमिवपश्यति इदम्+दृश-कर्मकर्त्तरि क्स इशादेशः दीर्घः । ईदृशे एतद्रूपदर्शने एवंविधे । "ईदृक्षास एताइक्षास उ षु णः सदृक्षासः" वाजसने० १७,८ ।

ईदृश् त्रि० अयमिव पश्यति इदम्+दृश-कर्मकर्त्तरि-किन् इशादेशः दीर्घः । १एतादृशदर्शनवति एवंविधे ईदृङ् नान्यादृङ् च सदृङ् च प्रति सदृङ्" यजु० १७,८१ । "इमं पुरोडाशं दृष्ट्वेमा पश्यतीति ईदृङ् वेददी० व्याख्यानात् २तदर्थेऽपि । तस्य भावः त्व ईदृक्त्वं तद्भावे न० तल् । ईदृक्ता तस्य भावे स्त्री । "विष्णोरिवास्यानवधार्यवीर्यमीदृक्तया रूपमियत्तया वा" रघुः ।

ईक्षण त्रि०अवमिव पश्यति ईक्ष्+ल्यु-कर्मकर्तरि कङ् इणादेशः दीर्घः । एवंविधदर्शनवति । "ईक्षणैश्चरतैर्जाने सत्यं दोषाकरो भवान्" चन्द्रा०। "यच्चान्यत् किञ्चिदीक्षणम्" । "न क्षीक्षणमनायुष्यं लोके किञ्चन विद्यते" प्रत्येक्ष चेक्षया विप्रागर्ह्यं ब्रह्मवादिभिः" मनुः । "तानीक्षणान ईक्षणे" ऋ०१,१७,१ । "ईक्षणे एवं विधे" भा० । स्त्रियां ङीप् "सर्व्वेषामीक्षणो रसाभिव्यक्तिः" सा०द० । मुग्धबोधकारस्तु अवमिव दृश्यते इति विग्रहे क्वादौ चकार तच्च "कर्त्तरि क्वदिति" पा० अनुशासनविरोधादुपेक्ष्यम् ।

ईप्सा स्त्री आप्तुमिच्छा आप-सन्-अ । १आप्तुमिच्छायाम् २इच्छायाञ्च । "ईप्सैषा पिशुनं शुद्धं ममत्वं परिपालनम्"। भा० आश्व० २७अ० ।

ईप्सित त्रि०आप-सन् क्त । १आप्तुमिष्टे क्रियाफलेन व्याप्तुमिष्टे "कर्त्तुरीप्सिततमं कर्म्म" पा० । "निर्वर्त्त्यं च विकार्य्यं च प्राप्यञ्चेति त्रिधा मतम् । तत्रेप्सिततमं कर्म्म चतुर्द्धान्यत्तु कल्पितम्" भट्टि० "तमवप्नुहणं किमीप्सितमालभे मा भूत्" सि०कौ० । २इच्छाविषये च ।

ईप्सु त्रि० आप्तुमिच्छुः । आप+सन्—उ । आप्तुमिच्छौ । "मन्दःकवियशःप्रेप्सुरिति" रघुः पाठान्तरं "यौचेप्सुः सर्व्वदाचामेत्" मनुः । "धर्म्मेप्सवस्तु धर्म्मज्ञाः" मनुः । "सौरभ्यमीप्सुरिव तेसखमारुतस्य" रघुः ।

ईम् अव्य० ई-वा सुट् । १अवधारणार्थे । "एमेनमवधारयन्ति" यजु० ३३,६०। "आ ईम् एतौ निपातौ अवार्थौ" वेददी० २इदमर्थे च । "चयत ईमर्य्यो अप्रयुच्छन्" ऋ०१,१६७,८ । "इह ब्रवीतु य ईमङ्ग वेदस्य" ऋ०१,१६४,७ । "सोमेभिरीं पृणता भोजमिन्द्रम्" ऋ० २,१४,१० । "ईमिमम्" इति भा०।

ईय त्रि० ई-वा० क्यप् । व्याप्ये । "आयद्दा ईयचक्षसा" ऋ०५,६७,६ "ईयचक्षसा व्याप्तदर्शनौ" भा० ।

ईयिवस् त्रि० इण्-क्वसु । "मतवति । क ईयिवान् सदम्" मुग्धबो० "प्रतीयुषा पूर्वदहे जनेन" भट्टिः । "उपेयुषो मोक्षपदं मनस्विनः" माघः । "उपेयिवाननाश्वादि" पा० ङ०उपेयुषचनात् अन्यत्रापि क्वसुः ।

ईर गतौ प्रेरणे च चुरा० उभ० पक्षे भ्वा० पर०सक०सेट् । ईरयति ते-ईरति ऐरिरत्-त-ऐरीत् । ईरयाम्-ईराम् वा बभूव आस चकार । ईरयिता ।ईरिता ईरयिष्यति-ईरिष्यति । ईरणम् । ईरितः ईरयन्-ईरन् । ईरः ईर्ष्य-माणः । "आपः ससृक्मैरयन्" ऋ०८,६९,१२। "अंशोरूर्म्मीरव" ऋ०९,७९,१४ । "यदक्ष शुक्रमैरयन्" ऋ०२,१७,२ "ऐरिरञ्च महाक्रमम्" भट्टिः क्वचने च । "अव वाचमीरयति" शत०ब्रा० "ब्रह्मा रथन्तरं साम ईरयति भगवल्लिके भा० आनु० १४अ० । विरोधवाक्यञ्च यत्नेर्य्यमाणम्" भा०व० १३३ अ० । "दमयन्त्या यत्नेरितम्" भा०व०२७४२। "स्थितं नश्यन्ति सङ्कल्पैरीरितम्" रामा० "इतीरिता पत्नरत्नेन तेन" इतीरयित्वा विरचय्य वाङ्मयम्" नैष० ।

उद् उत्प्रेरणे । "उदीरयामासुःसचीवसचानू" रघुः । उच्चारणे क्वचने च "यदग्नीकोऽग्यसदीरिष्यति" रघुः । "उदीरयामासुरिवोन्मदानाम्" रघुः ।

अभि+उद्+आभिमुख्येनोच्चारिते । "आस्तीकस्त्विभस्त्रिति वाचस्त्रिस्तोऽभ्युदैरयत्" भा० अ० २।७१ ।

सम्+उद्+सम्यगुच्चारे सम्प्रेरणे च । पांशवोऽपि कृतक्षेत्रे वायुना समुदीरिताः" भा०व० ५०७० ।

प्र+प्रेरणे । प्रेरयति ।"समीरणः प्रेरयिता भवेति" कुमा०। "अपः प्रेरय सागरस्य बुध्नात्" ऋ०१०'८६,४।"किन्तुभ्यं आश्वयेन मत्सकाशमुपयः प्रेरिताः स्थ" भक्त० "यात्रायै प्रेरयामास तं भक्तेः प्रथमं भरत्" रघुः ।

सम्+ सम्यक्प्रेरणे समुच्चारणे सम्यग्गतौ च "समीरणः । "समीरवाङ्कुशाराव रात्रसस्य कपिः शिखाम्" भट्टिः । "ताभिराभरणैः शब्दस्खलिताभिः समीरितः" भा० व० १२१८अ० ।

ईर् अदा०आत्म०सक०सेट्। ईर्त्ते ईराते ईरते ऐरत ऐरिष्ट ईरास् बभूवाञ्चास-चक्रे ईरिष्यति "इन्द्रा मधुमत ईरते" ऋ० ५,६३,१४ "इमदीर्त्ते पयो गोः" ऋ०६, ८१,२। 'अस्मे राजास ईरताम्' ऋ० ४,८,७ । वायुमच्युषादिवोऽधिरीर्त्ते" तैत्ति० । अस्मात् निशाया नेट् ।"न हि रात्रानुदीर्णानाम्" भा०आ० ५।१२८ श्लो० । "उदीर्ण रागप्रतिरोधकस्य सङ्गः" माघः । अस्मैव पक्षे चुरादित्वं तेन न तस्य ण्यादित्वमित्येके ।

ईरण न०ईर-भावे ल्युट् । १प्रेरणे २गतौ च । युच् । ईरणा तत्रैव स्त्री । नन्द्या०ल्यु । ३प्रेरके त्रि०"समीरणः प्रेरयिता भवेति"कुमा० ।

ईराला स्त्री ईर्यतेऽत्र रस-आधारे घञ् ईत० । नदीभेदे । "ईरालाञ्च महानदीम्" भा०व० १८८अ० ।

ईरिण त्रि० ईर-इनन् । ऊषरभूमौ । मेदि०"ततस्तदीरिणं

जातं सहस्रावसर्पिकम्" भा० अनु० ७२५७श्लो० । "वशिष्ठाश्रमपदं शून्यमासीन्महात्मनः । मुहूर्त्तेनैव निःशब्दमासीदरिणमद्भिमम्" रामा० ।

ईरिन् त्रि० ईर-णिनि । १प्रेरके २गन्तरि च स्त्रियां ङीप् । खगच्छादस्य इद्धिरेका० खेरी खेरिणी । "रे रे खेरिणि ! निर्व्याचारकविते मारुत् प्रकाशीभव" चन्द्रा० २राजभेदे पु० । "धृतराष्ट्रार्च्चकशतमगीतिर्जनमेजयाः । शतञ्च ब्रह्मदत्तानामीरिणाञ्च शतं तथा" भा० स० ८३० श्लो० यमसभासद्यर्षणे

ईर्ष्य ईर्ष्यायां परदुद्रव्रक्षिण्णुतायाम् भ्वा० पर० सक० सेट् । ईर्ष्यति ऐर्ष्यीत् । ईर्ष्याम् बभूव आस चकार । ईर्ष्यिता ईर्ष्यात् ईर्ष्यिष्यति ऐर्ष्यिष्यत् । ईर्ष्या ।

ईर्ष्या स्त्री ईर्ष्य-भावे अ स्त्रीत्वात् टाप् । अन्यसमायाम् परदुद्रव्रक्षिण्णुतायाम् । "पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् । वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः" मनुः एतेषाञ्च क्रोधप्रभवत्वात् क्रोधजत्वम् अतएव "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" पा० "द्रोहादयोऽपि कोपप्रभवा एव सन्तोऽतो विशेषणं सामान्येन यं प्रतिकोपः" सि० कौ० । "ईर्ष्याशोकक्लमामेता मोहमात्सर्य्यवर्ज्जिताः" भा० व० २६० "त्यक्तैर्ष्यस्त्यक्तमन्युश्च क्षयमानोऽब्रवीदिदम्" भा० अनु० २अ० । अयं शब्दोनिर्यकार इति केचित् "ईर्ष्यतेस्तृतीयस्तेति" वार्त्ति० उक्तेः कविकल्पद्रुमे, पा० गणपाठे च यान्नतया पाठात् निर्यकारपाठे मूलं चिन्त्यम् । तेन सयकारएव साधीयान् ।

ईर्ष्यालु त्रि० ईर्ष्या लाति ला-बा० डु । ईर्ष्यायुक्ते ।

ईर्ष्यु त्रि० ईर्ष्य-उण् । अन्यसमायोगे "ईर्ष्युर्गन्धर्वराजो वै जलक्रीड़ासुपागतः" भा० आ० १७० अ० । "पर्य्यगच्छत तामीर्ष्युः सुग्रीवगतमानसाम्" भा० २७६ अ० ।

ईला स्त्री ईड-क टाप् लः । १पृथिव्यां, २वाचि, ३गवि, च । अस्य स्तुत्यादित्वमेवेति बहवोमन्यन्ते शब्दार्थचिन्तामणौ तु दीर्घपाठः । तन्मूलं चिन्त्यम् ।

ईलि(ली) स्त्री ईर्ष्यते ईर-इन् रस्य लः वा ङीप् । १करपालिकायाम् (काटारी) २तुल्यगदाकारे कुन्तदण्डे च । भरतः ।

ईलित त्रि० ईड-क्त इस्य लः । स्तुते अमरः ।

ईलिन पु० ईड-इनन् इस्य लः । चन्द्रवंश्ये नृपभेदे । "ईलिनं तु सुतं तंसुर्जनयामास वीर्य्यवान्" "ईलिनोजनयामास दुष्मन्तप्रभृतीन् नृपान्" भा० आ० ९३अ० । "तंसुं स्वरस्वती पुत्रं मतिनारादजीजनत् । ईलिनं जनयामास कालिङ्ग्यां तंसुरात्मजम्" । "ईलिनस्तु रथन्तर्य्यां दुष्मन्तादीन् पञ्चसुतानजीजनत्" भा० आ० ९५अ० ।

ईवत् त्रि० ई-गतौ भावे क्विप् अस्त्यर्थे मतुप् वेदे नि० मस्य वः । गतिमति "य ईवते ब्रह्मणे गातुमैरत" ऋ०

४,४,६ई। "अस्य वीरो ऐवतोऽग्नेरीशीत मर्त्यः" ऋ० ४,१५,५ "मनू हिन्वा गच्छत्व ऐवतो द्यून्" ऋ०४,४१,२ "प्राय वसुभ्य ऐवदानमोवः" ऋ०५,४६,५ "जनाय चिद्य ऐवत उ लोकं चकार" ऋ० ६,६२,२। "उपश्रोतास ऐवतोवचांसि" ऋ० ७,२३,१। लोके तु ऐमानित्येव स्त्रियां ङीप्।

ईश ऐश्वर्ये अदा०आत्म० सक०सेट्। ईष्टे, ईशिषे ईशिध्वे ऐशिष्ट। ईशाम्-बभूव आस चक्रे। ईशिता ईशिषोष्ट ईशिष्यते ऐशिष्यत। ईशनम् ईशिता। ईशितः। ईशा। ईशित्वा। "धनानामीशते यज्ञाः"। "यदीशिषे त्वं न मयि स्थिते च" भट्टिः। "पुरुषोवै पशूनामैन्द्रस्तस्मात् पशूनामीष्टे" शत० ब्रा० ४,५,५,७। एतद्योगे कर्म्मणः सम्बन्धविवक्षायां षष्ठी। वेदे तु क्वचित् क्विचि न आस्त। "सप्त एषां पितरश्च नेमिरे" ऋ० १०,५६,७। ताच्छील्ये चानश् ईशानः।

ईश् त्रि० ईश-क्विप्। ईश्वरे "ईशावास्यमिदं सर्वम्" यजु० ४०,१, "नमो देवेभ्यो नम ईश एषां कृतं चिदेनोमनसा विवासे" ऋ०६,४१,८। "स देवानामीशां पर्य्येतु स ईशानोऽभवत्" अथ० १५,१,५। "सप्त एवेशामारण्यानां पशूनामवरुन्धे" शत० ब्रा०१२,७,२,८।

ईश पु०ईश-क। १ईश्वरे "वागीशं वाग्भिरभ्यर्च्याभिः प्रणिपत्योपतस्थिरे" कुमा०। "वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे" माधवः "इत्थं क्षितीशेन वसिष्ठधेनुः" रघुः। २परमेश्वरे पु०। "लोकेश! चैतन्यमयादिदेव!" प्रातः स्तवे पुरा०। "ईशस्यैष निवेशितः पदयुगे भक्त्यावयार्थं यमत्" न्यायचर्चायामीशस्य मनव्यपदेशभाक्" कुसुमा०। ३महादेवे। "ब्रह्माच्युतेशार्कवनस्पतीनाम्" "खमन्वतोऽहोमचतुष्टयं स्यात्" हेमा० मत्स्यपु०। मल० त० "ब्रह्माच्युतेशानवनस्पतीनामिति" पाठः। रुद्रसंख्यातुल्यसंख्याकत्वात् ४एकादशसंख्यायाम्। "तारोमाया वर्म्मबीजमूहिरीशस्वरान्विता" तन्त्रसारे त्वरितामन्त्रोद्धारे ईशस्वर एकादशस्वर एकार इति कृष्णा० ५तद्वाचके आर्द्रानक्षत्रे च। "नेशेज्याग्निविशाखवाय्वहिभधायार्य्यः" राजमा०।

ईशकोण पु० ईशस्वामिकः कोणः। पूर्वोत्तरायां दिशि ईशदिगादयोऽत्र। तत्कोणस्य ईशाधिदेवत्वात् तथात्वम्। "इन्द्रोवह्निः पितृपतिर्नैर्ऋतोवरुणोमरुत्। कुबेर ईशः पतयः पूर्व्वादीनां दिशां क्रमात्" इत्यमरोक्तेश्च तथात्वम्। ईशस्य तेजसोऽग्नित्वं बालार्कद्युतया ज्योति०उक्तम्। "सूर्य्यः शुक्रः क्षमापुत्रः सैंहिकेयः शनिः शशी। सौम्यस्त्विदृशमन्त्री च पूर्व्वादिक्प्रदिगीश्वराः" इति निरूप्य "दिगीशाग्ने शुभा यात्रा पृष्ठाग्ने मरणं ध्रुवमिति" तद्विपरीतदिशि यात्रा निषिद्धा।

ईशन न०ईश-भावे ल्युट्। ऐश्वर्ये "य ईशेऽस्य जगतोनित्यमेव नान्योहेतुर्विद्यत ईशनाय" श्वेताश्व० उ०। ईशे ईष्टे इत्यर्थः। "सर्पिष ईशनमत्र न समासः" सि०कौ०।

ईशपुरी स्त्री ईत०। काञ्च्याम् ईशनगर्य्यादयोऽत्र।

ईशबल न० ईशकृतं बलम्। पाशुपतमतसिद्धे पाशुपतानां द्वितीये पादे "तासां माहेश्वरी शक्तिः सर्व्वानुग्राहिका शिवा। धर्म्मानुवर्तनादेव पाश इत्युपचर्य्यते" इत्युक्तबले पाशुपतशब्दे विवृतिः।

ईशसख पु० ईत० टच्समा०। कुबेरे। बहु० न टच्। ईशसखा इत्येव। ईशमित्रादयोऽत्र। ईशेन यथा ऽस्यसख्यं तथा भारते वर्णितं यथा। "पितामहो रावणस्य साक्षाद्देवः प्रजापतिः। स्वयम्भुः सर्वलोकानां प्रभुः स्रष्टा महातपाः। पुलस्त्यो नाम तस्यासीन्मानसोदयितः सुतः। तस्य वैश्रवणो नाम गवि पुत्रोऽभवत् प्रभुः। पितरं स समुत्सृज्य पितामहसुपस्थितः। तस्य कोपात् पिता राजन्! ससर्ज्जात्मानमात्मना। स जज्ञे विश्रवा नाम तस्मात्तेजोवृतो द्विजः। प्रतीकाराय सक्रोधस्ततो वैश्रवणस्य वै। पितामहस्तु प्रीतात्मा ददौ वैश्रवणस्य ह। अमरत्वं धनेशत्वं लोकपालत्वमेव च। ईशानेन तथा सख्यं पुत्रत्वञ्च नलकूबरम्। राजधानीं निवेशञ्च लङ्कां रक्षोगणान्विताम्। विमानं पुष्पकं नाम कामगञ्च ददौ प्रभुः। यक्षाणामाधिपत्यञ्च राजराजत्वमेव च" भा०व० २७३अ०।

ईशा स्त्री ईश-अ।१ऐश्वर्ये। "ईशायै मन्युं राजानं बर्हिषिदधुरिन्द्रियम्" यजु० २१,५७। "ईशायै ईशनमोषा" वेददी०ईष्टे ईश-क। २ऐश्वर्यान्वितायां स्त्रियां ३दुर्गायां च। ईशस्य पत्नीत्यर्थे ङीप्। ईशी ईशपत्न्यां दुर्गायाम्।

ईशान त्रि० ईश-ताच्छील्ये चानश्। १ऐश्वर्यशीले २रुद्रमूर्त्तिभेदे पु०। "तमीशानं जगतस्तस्थुषस्पतिम्" ऋ० १,८६,५। "ईशानसंदर्शनलालसानाम्" कुमा० ३तद्देवताके आर्द्रानक्षत्रे तत्तुल्यसंख्यायाम् ४एकादशसंख्यायाम्। शिवस्य अष्टसु मूर्त्तिषु सूर्य्यमूर्त्तिरूपतया पूज्ये ५शिवमूर्त्तिभेदे अष्टौ मूर्त्तीरभिधाय "मूर्त्तयोऽष्टौ शिवस्यैताः पूर्व्वादिक्रमयोगतः। आग्नेयन्ताः प्रपूज्यास्तु वेद्यां लिङ्गे शिवं यजेत्" ति०त० भविष्य पु०।

ईशानादिपञ्चमूर्त्ति स्त्री ब०व० ईशानादयः पञ्च मूर्त्तयः । महादेवस्य "ईशानतत्पुरुषाघोरवामदेवसद्योजातरूपेषु पञ्चसु रूपेषु तन्त्रासप्रयोगस्तन्त्रसारे शिवप्रकरणे दृश्यः ।

ईशावास्य पु० ईशा वास्यमिति पदमस्यस्य यच् । "ईशावास्यमिदं सर्वमित्यादिके यजुर्वेदस्य ४० अध्यायस्थे ब्रह्मविद्याप्रतिपादके उपनिषद्रूपे ग्रन्थे । "यजुर्वेदीयनिषद्वचनायाम् "ईशावास्य, बृहदारण्यक, जाबाल, हंस, परमहंसेत्यादि मुक्ति० उ० । तल्लोत्तरलोमे ईशापि । "ईशा केन कठप्रश्नः सप्तमाण्डूक्यतित्तिरिः । ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा" मुक्ति० उ० । इदमेवेशावास्योपनिषदित्युच्यते ।

ईशिल त्रि० ईष्टे ईश-बृच् स्त्रियां ङीष् । ईश्वरे । "न तस्य कश्चित् पतिरस्ति नेशिता" श्वेता० उ० ।

ईशितव्य त्रि० ईश-तव्य ।१अधीने यं प्रति ऐश्वर्यं क्रियते तस्मिन् । भावे तव्य । २ऐश्वर्ये न० ।

ईशिता स्त्री ईशिनो भावः तल् । अणिमाद्यैश्वर्यमध्ये सर्वेषां स्वामित्वरूपे १ऐश्वर्ये । त्व ईशित्वमप्यत्र न० । "ईशित्वञ्च वशित्वञ्च तथा कामावसायिता" सां० कौ० । "ईशित्वञ्च वशित्वञ्च लघुत्वं मनसस्तथा" भा० आ० २८अ० "येन स्थावरादिसर्वभूतानि वशीभूतानि भवन्ति तादृशे योगजन्ये २धर्मभेदे च । ऐश्वर्यशब्दे विवृतिः ।

ईशिन् त्रि० ईष्टे ईश-घिनि । १ईश्वरे २प्रभौ ३पत्यौ । "शंसेदुपामदशेषाय दशेशोविंशतीशिनम्" मनुः स्त्रियां ङीप् । "सर्वाहोँ वानीशिनीभिः" श्वेता० उ० ।

ईश्वर पु० ईश-वरच् । १महादेवे २कन्दर्पे पातञ्जलोक्ते, क्लेशजन्मकर्मविपाकाशयैरपरामृष्टे पुरुषविशेषे ३चैतन्यात्मनि, "ईश एवाहमत्यर्थं न च मामीशते परे । ददामि च सदैश्वर्यमीश्वरस्तेन कीर्त्यते" इत्युक्तलक्षणे ४परमेश्वरे, "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति" गीता प्रभवादिमध्ये ५एकादशे वत्सरे च तत्फलम् । "सुमित्रं क्षेममारोग्यं कार्षसस्य महार्घता । ज्वरं मधु गवञ्च ईश्वरे दुर्लभं प्रिये !" ज्योति० ६आढ्ये, ७स्वामिनि च त्रि० स्त्रीत्वे गौरा० ङीष् । "ईश्वरीं सर्वभूतानामिति" श्रीसूक्तम् ।

आर्हता नित्येश्वरं न मन्यन्ते तच्च अर्हच्छब्दे ३८२पृष्ठे दर्शितम् एवं सांख्यैरपि "ईश्वरासिद्धेः" सां० सू० । "नित्येश्वरो निषिद्धः ईशेश्वरसिद्धिः सिद्धा" "उपासा सिद्धस्य प्रयोजनमात्रम्" सां० सूत्राभ्यां प्रकृत्युपासकस्य जन्मैश्वर्यं खोक्तम्" सां० कौ० च नित्येश्वरस्य कर्तृत्वं निरासितं यथा ।

"न च क्षीरप्रवृत्तेरपीश्वराधिष्ठाननिबन्धनत्वेन साध्यत्वाच्च साध्येन व्यभिचारइति साम्प्रतं प्रेक्षावत्प्रवृत्तेः स्वार्थकारुण्याभ्यां व्याप्तत्वात् ते च जगत्सर्गाद्यावर्त्तमाने प्रेक्षावत्प्रवृत्तिपूर्वकत्वमपि व्यावर्त्तयतः तस्यापाप्तसकलेप्सितस्य भगवतोजगत्सृजतः किमप्यभिलषितं भवति नापि कारुण्यादस्य सर्गे प्रवृत्तिः प्राक् सर्गाज्जीवानामिन्द्रियशरीरविषयानुत्पत्तौ दुःखाभावेन कस्य प्रहाणेच्छा कारुण्यं ? सर्गोत्तरकालं दुःखिनोऽवलोक्य कारुण्याभ्युपगमे दुरुत्तरमितरेतराश्रयत्वं कारुण्येन सृष्टिः सृष्ट्वा च कारुण्यमिति । अपि च करुणया प्रेरितः ईश्वरः सुखिन एव जन्तून् सृजेच्च विचित्रान् । कर्म्मवैचित्र्यादिति चेत् कृतमस्य प्रेक्षावतः कर्म्माधिष्ठानेन तदनधिष्ठानमात्रादेवाचेतनस्यापि कर्मणः प्रवृत्युपपत्तेस्तत्कार्य्यशरीरेन्द्रियविषयानुत्पत्तौ दुःखानुत्पत्तेरपि सुकरत्वात् । प्रकृतेस्तचेतनयाः प्रवृत्तेर्न स्वार्थानुपपत्तौ न वा कारुण्यं प्रयोजकमिति नोक्तदोषप्रसङ्गावतारः" ।

नित्येश्वरस्य यथानुमानं तथा आन्वीक्षिकीशब्दे ७३६ पृष्ठे सर्वदर्शनसंग्रहवाक्येन प्रदर्शितम् ईश्वरसाधनं तु गौ० सूत्रवृत्त्याद्युक्तं यथा "ईश्वरः कारणं पुरुषकर्म्माफल्यदर्शनात्" सू० । "शुद्धविशिष्टमात्मान्तरमीश्वरः" भा० । "शुद्धैर्नित्येच्छाप्रयत्नैर्विशेषगुणैः, सामान्यैः संयोगादिभिश्च विशिष्टमात्मान्तरं जीवेभ्यो भिन्न आत्मा जगदाराध्यः सृष्ट्यादिकर्त्ता वेदद्वारा हिताहितोपदेशको जगतः पितेति । अनुमानन्तु क्षित्यादिकं सकर्त्तृकं कार्य्यत्वादृष्टादिवदित्याद्यूह्यम्" वृत्तिः । वार्त्तिकसूत्रे च "संज्ञाकर्म त्वस्मद्विशिष्टानां लिङ्गम्" "प्रत्यक्षप्रवृत्ततया संज्ञाकर्मणः" सूत्राभ्यामीश्वरसाधनं दर्शितं विवृतमेतदुपस्कारे यथा ।

"तुशब्दः स्वर्गादिलिङ्गव्यवच्छेदार्थः संज्ञा नाम, कर्म्म कार्य्यम्" क्षित्यादि तदुभयमस्मद्विशिष्टानाम् ईश्वरमहर्षीणां सत्त्वेऽपि लिङ्गम् कथमेतदित्यत आह । अत्रापि संज्ञा च कर्म्म चेति समाहारद्वन्द्वादेकवद्भावः संज्ञाकर्तृकर्म्मलक्षणस्तु भेदलक्षणार्थः । तथाहि यस्य स्वर्गापूर्व्वादयः प्रत्यक्षाः स एव तत्र स्वर्गापूर्व्वादिसंज्ञाः कर्त्तुमीष्टे नेतरः एवञ्च घटपटादिसंज्ञानिवेशनमपि ईश्वरसंङ्केताधीनमेव यः शब्दो यत्रेश्वरेण सङ्केतितः स तत्र साधुः यथा वा काशि-

दोषधिनकुलदंष्ट्रायस्पृष्टा सा सर्व्वोऽपि सर्पविषं हन्तीत्येतादृशी संज्ञा अस्मदादिविशिष्टानां लिङ्गमनुमापकं यावदपि मैत्रादिसंज्ञा पिता पुत्रे क्रियते तावदपि "द्वादशेऽह्नि पिता नाम कुर्य्यात्" इत्यादि विधिना नूनमीश्वरप्रयुक्तैव तथाच सिद्धं संज्ञाया ईश्वरलिङ्गत्वम् । एवं कर्म्मा अपि कार्य्यमपीश्वरे लिङ्गं तथाहि चित्यादिकं सकर्तृकं कार्य्यत्वात् घटवदिति अत्र यद्यपि शरीराजन्यं जन्यं वा जन्यप्रयत्नाजन्यं जन्यं वा सकर्तृकत्वासकर्तृकत्वेन विवादाध्यासितं वा सन्दिह्यमानकर्तृकत्वं वा चित्यादित्वेन न विवक्षितम् अदृष्टद्वारा चित्यादेरपि जन्यप्रयत्नजन्यत्वात् विवादसन्देहयोर्व्याप्तिप्रसक्तत्वेन पक्षतानवच्छेदकत्वात् किन्तु सकर्तृकत्वमपि यदि कृतिमज्जन्यत्वं तदाऽस्मदादिना सिद्धसाधनम् अस्मदादिकृतेरप्यदृष्टद्वारा चित्यादिजनकत्वात् उपादानगोचरकृतिमज्जन्यत्वेऽपि तथा,-अस्मदादिकृतेरपि किञ्चिदुपादानगोचरत्वात्, कार्य्यत्वमपि यदि प्रागभावप्रतियोगित्वं तदा ध्वंसे व्यभिचार इति तथापि क्षितिः सकर्तृका कार्य्यत्वात् अत्र च सकर्तृकत्वमदृष्टाद्वारककृतिमज्जन्यत्वं कार्य्यत्वञ्च प्रागभावावच्छिन्नसत्ताप्रतियोगित्वं नचाङ्कुरादौ सन्दिग्धानैकान्तिकत्वं साध्याभावनिश्चये हेतुसत्त्वसन्देहे सन्दिग्धानैकान्तिकत्वस्य दोषत्वात् अन्यथा सकलानुमानोच्छेदप्रसङ्गः, न च पक्षातिरिक्ते दोषोऽयमिति वाच्यं राजाज्ञापत्तेः नहि दोषस्यायं महिमा यत् पक्षं नाक्रामति तदाद्यङ्कुरस्फुरदवयवायां निश्चितव्याप्तिकेन हेतुना तत्र साध्यसिद्धेरप्रत्यूहत्वात् न सन्दिग्धानैकान्तिकता तदस्फुरदवयावान्तु सुतरामिति संक्षेपः" ।

एवं न्यायकन्दलीभाष्यादिषु प्रदर्शितेश्वरानुमानप्रकारमधिकृत्य कुसुमाञ्जलिकरिदासटीकयोः दिग्मात्रमेव किञ्चित् विस्पष्टमुक्तं यथा

"तत्साधकप्रमाणाभावात् इति पक्षधर्मताप्रतिपत्तिः नन्वीश्वरे साधकप्रमाणमेव नास्त्यत्वत्राह" इरि० । "कार्य्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः । वाक्यात् सङ्ख्याविशेषाच्च साध्योविश्वविदव्ययः" का० "चित्यादि सकर्तृकं कार्य्यत्वात् घटवत् सकर्तृकत्वञ्च उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वम् । आयोजनं कर्म्म एवञ्च सर्गाद्यकालीनद्व्यणुकारम्भकपरमाणुद्वयसंयोगजनकं कर्म्म चेतनप्रयत्नपूर्व्वकं कर्म्मत्वात् अस्मदादिशरीरक्रियावत् । धृतीति ब्रह्मादि पतनप्रतिबन्धकीभूतप्रयत्नवदधिष्ठितं धृतिमत्त्वात् वियति विहङ्गमधृतकाष्ठवत् धृतिश्च गुरुत्ववतां पतनाभावः । धृत्वादेरित्यादिपदात् नागपरिग्रहः ब्रह्माण्डादि प्रयत्नवद्विनाश्यं विनाशित्वात् पाञ्चभौतिकपटवत् । पदात् पद्यतेऽनेनेति व्युत्पत्त्या पदं व्यवहारः पटादिसम्बन्धावच्छेदकव्यवहारः स्वतन्त्रपुरुषप्रयोज्यः व्यवहारत्वात् आधुनिकलिप्यादिव्यवहारवत् । प्रत्ययतः प्रामाण्यात् वेदजन्यज्ञानं कारणगुणजन्यं प्रमात्वात् प्रत्यक्षादिप्रमावत् । श्रुतेर्वेदात् वेदः पौरुषेयोवेदत्वात् आयुर्वेदवत् । किञ्च वेदः पौरुषेयोवाक्यत्वात् भारतवत् वेदवाक्यानि पौरुषेयाणि वाक्यत्वात् अस्मदादिवाक्यवत् । संख्याविशेषात् । द्व्यणुकपरिमाणं सङ्ख्याजन्यं परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वात् ह्रस्वपरिमाणकपालद्वयारब्धघटपरिमाणात्, प्रकृष्टताद्वयकपालसंयुक्तकपालद्वयारब्धघटपरिमाणवत् अणुपरिमाणञ्च न परिमाणजनकं नित्यपरिमाणत्वात् अणुपरिमाणत्वाद्वा एवञ्च सर्गादौ द्व्यणुकपरिमाणहेतुपरमाणुनिष्ठद्वित्वसंख्या च नाऽस्मदाद्युपेक्षानुद्बुद्धा अतस्मदादीन्ननामेक्षाबुद्धिरीश्वरस्यैवेति । विश्वविदव्ययइति विशिष्टसाध्यत्वं तेन नित्यसर्व्व विषयकज्ञानसिद्धिः नन्तु शरीर विशिष्टस्य कर्त्तृतया विशेषणबाधात्मकोविशिष्टबाध इति कर्त्तृजन्यत्वव्यापकशरीरजन्यत्वाभावात् कर्त्तृजन्यत्वाभाव इति सत्प्रतिपक्षता च । यद्वा कर्त्ता शरीर्य्येव इति व्याप्तिविरोधिनी यद्वा व्याप्त्या यथादर्शनप्रकृतया शरीरी कर्त्ता च उपनेयः, पक्षधर्म्मतया च चित्यादावशरीरीति साध्याप्रसिद्धिः विशेषणविशेष्यविरोधश्च यद्वा शरीरजन्यत्वाद्युपाधिना व्याप्यत्वासिद्धिरिति कार्य्यत्वहेतौ पक्षदोषत्वात्" इरि० । "न बाधोऽस्योपजीव्यत्वात् प्रतिबन्धेन दुर्बलैः । सिद्धसिद्धोर्विरोधेन नाधिक्षिप्तनिबन्धना" का० "ईश्वरे धर्म्मिणि शरीरबाधात् कर्त्तृत्वबाधेन, अधिकरणज्ञानं विना अभावज्ञानासम्भवात् अस्य कार्य्यत्वस्य धर्म्मिसाधकस्याधिकरणज्ञानजनकतया अवश्यमपेक्षणीयत्वेन बलवत्त्वात् । एवञ्च न विशेषणबाधात्मकोविशिष्टबाधः प्रत्यक्षात्मकः । ईश्वरोन कर्त्ता अशरीरत्वात् इत्यनुमानबाधोऽपि नेत्यर्थः । चित्यादौ न सकर्तृकत्वं शरीराजन्यत्वात् इति न प्रतिबन्धकं सत्प्रतिपक्षहेतोः शरीरांशवैयर्य्यात् व्याप्त्यासिद्धा दुर्बलत्वात् । धृतीवेऽपि कार्य्यत्वव्याप्तेः पक्षधर्म्मत्वसहकारात् विपक्षबाधकतर्कावताराच्च बलवत्त्वम् । उपन्यस्तायाः कर्त्ता शरीर्य्येवेति व्याप्तेर्दुर्बलतया न प्रतिबन्धः । चतुर्थे च यदि पक्षधर्म्मतया अशरीरी उपस्थितस्तदा न विरोधः

कर्तृत्वस्याशरीरत्वसमानाधिकरणस्योपलम्भात् तदनुपस्थाने तु न विरोधः विरोधाश्रयस्यासिद्धेः पञ्चमे च विपक्षबाधकतर्कसत्त्वात् तदभावनिबन्धनाज्ञानरूपासिद्धि व्याप्यत्वासिद्धिर्वा न शरीरजन्यत्वोपाधेरपि विपक्षबाधकाभावेनाप्रयोजकत्वात्। ननु यदीश्वरः कर्त्ता स्यात् शरीरी स्यादिति प्रतिकूलतर्कावतारस्तत्राह "हरि०। "तर्काभासतया त्वेषा तर्कांगुष्ठिरदूषणम्। अनुकूलस्तु तर्कोऽत्र कार्य्यलोपो विभूषणम्" का० "प्रतिकूलतर्कास्तावदीश्वरासिद्धा आश्रयासिद्धा इत्याभासाः। कर्त्तारं विना कार्यं न स्यादिति तर्कस्तु विभूषणं सहकारकः। "अहं सर्व्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते" इत्यागमश्चात्र। "आर्षं धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना। यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतर" इति तर्कानुगृहीतस्यागमस्य बलवत्त्वम्" ननु कार्य्यत्वं प्रयत्नजन्यत्वेऽप्रयोजकम् अत्राह "हरि०। "स्वातन्त्र्ये जड़तापत्तिर्नाभीष्टं दृष्टघातकम्। हेत्वभावे फलाभावोविशेषस्तु विशेषवान्" का०"न हि कर्त्तारं हेतुं विना कार्यं परमाणोरेव यत्नवत्त्वेऽचैतन्यानुपपत्तिः अचेतनस्य चेतनप्रेरितस्यैव जनकत्वात् अदृष्टस्य दृष्टकारणसहकारेणैव फलजनकत्वात्। न च चेष्टायामेव भोक्तृप्रयत्नोहेतुः न तु क्रियासामान्ये इति,चेष्टायां विशेषप्रयत्नस्य हेतुत्वेऽपि क्रियासामान्ये प्रयत्नसामान्यस्य कारणत्वानपायात् अन्यथा बीजविशेषस्याङ्कुरविशेषे जनकत्वेनाङ्कुरसामान्यं प्रति बीजत्वेन हेतुतायाऽपि विलोपापत्तेः ननु धृत्यादीनां प्रयत्नजन्यत्वे किं मानमित्यत्राह "हरि०।"कार्य्यत्वान्निरूपाधित्वमेवं धृतिविनाशयोः। विच्छेदेन पदस्थापि प्रत्ययादिव पूर्ववत्" ।"धृतिविनाशयोः प्रयत्नजन्यत्वान्निरूपाधित्वं विच्छेदेनान्तरा प्रलयेन आदर्शाद्यभावात् अर्वाग्दर्शो नाद्यव्यवहारमूलं व्यवहारानभिज्ञत्वादिति सर्गाद्यकालीन घटादिव्यवहारप्रवर्त्तकः पुरुषः सिध्यति। एवं प्रत्ययादेर्वेदजन्याधीप्रामाण्यादेरपि निरूपाधित्वम्"हरि०।

विस्तरेणेश्वरानुमानपक्षस्य प्रावेष लुप्तप्रायतया कुसुमाञ्जलिग्रन्थे दिङ्मात्रेण तत्प्रकारस्य सत्त्वेऽपि न्यायकन्दल्याम् अनुमानचिन्तामणिस्थेश्वरवादे च विस्तरेण वर्णितं तयोश्च प्रावेष लुप्तप्रायतया तयोः प्रचारार्थमिहोपन्यासः क्रियते तत्रादौ

न्यायकन्दली। "किं पुनरीश्वरसद्भावे प्रमाणम् आगमस्तावत् अनुमानञ्च महाभूतचतुष्टयमुपलब्धिमत्पूर्वकं कार्य्यत्वात् यत्कार्य्यं तदुपलब्धिमत्पूर्वकं यथा घटकार्य्यं,कार्य्यञ्च महाभूतचतुष्टयं तस्मादेतदप्युपलब्धिमत्पूर्वकमिति। ननु प्रमाणेन पूर्वकोऽनुपलब्धेरसिद्धं पृथिव्यादिषु कार्य्यत्वमिति चेत् तदयुक्तं सावयवत्वात् तल्लिङ्गैः यत् सावयवं तत्कार्य्यं यथा घटः सावयवञ्च पृथिव्यादि तस्मादेतदपि कार्य्यमेव ॥ ननु व्याप्यग्रहणादनुमानप्रवृत्तिः कार्य्यत्वबुद्धिमत्पूर्वकत्वयोश्च व्याप्यग्रहणमशक्यं, घटादिषु कर्त्तृप्रतीतिकाले एवाङ्कुरादिवृत्पद्यमानेषु तदभावप्रतीतेः न चाङ्कुरादीनामपि पक्षत्वमिति न्याय्यं संदृहीतायां व्याप्तावनुमानप्रवृत्तिकाले प्रतिवाद्यपेक्षया पक्षादिप्रविभागः दृष्ट तु सर्व्वदैव प्रतिपक्ष प्रतीत्याक्रान्तत्वाद्व्याप्तिग्रहणमेव न सिध्यति। अत्र प्रतिसमाधीयते। यदि चैव हैतानुपलम्भाद्व्याप्तिग्रहणाभावः तदानीं मीमांसाभाष्यकृतोऽभिमतं सामान्यतोदृष्टमादित्यगत्यनुमानमपि न सिद्ध्यति तत्रापि देवदत्तगतिपूर्वकदेशान्तरप्राप्तिग्रहणकाल एव नक्षत्रादिप्रदेशान्तरप्राप्तिमात्रोपलम्भात् अत्र तेषु देशविप्रकर्षेणापि गतेरनुपलब्धौ सम्भवन्त्यां न तया व्याप्तिग्रहणहेतोर्निरुपाधिप्रवृत्तस्य भूयोदर्शनस्य प्रतिरोधः तुल्यकक्षत्वाभावात् एवञ्चेदशरीरत्वेनाभ्युपेतस्य कर्त्तुः स्वरूपविप्रकर्षेणाप्यङ्कुरादिष्वनुपलम्भसम्भवात् न तेन निरुपाधिप्रवृत्तस्य भूयोदर्शनस्य सामर्थ्यमुपहन्यते इति समानम्। अपि च भोः किमनेन कर्तृमात्रं साध्यते पृथिव्यादिनिर्म्माणसमर्थो वा। कर्तृमात्रसाधने तावदभिप्रेतासिद्धिः नह्यस्मदादिसदृशः कर्त्ताऽभिप्रेतो भवतां नच तेनेदं पृथिव्यादिकार्य्यमवांगदृशा शक्यनिर्म्माणम्, पृथिव्यादि निर्म्माण समर्थस्तु न सिद्ध्यति अनन्वयात् अन्वयबलेन हि दृष्टान्त दृष्टकर्तृ सदृशः सिध्यतीति नायं प्रसङ्गः। कर्तृविशेषस्याप्रसाधनात्। व्याप्तिसामर्थ्याद्बुद्धिमत्पूर्वकत्वसामान्ये साध्यमाने पृथिव्यादिनिर्म्माणसामर्थ्यलक्षणोऽपि विशेषः सिध्यत्येव निर्विशेषस्य सामान्यस्य सिद्ध्यभावात्। ननु मा सिध्यत सामान्यमिति चेत् कार्य्यत्वेन सह तद्व्याप्तेः प्रतिक्षेपात्। यदि हि व्याप्तमपि न सिध्यति धूमादग्निसामान्यं न सिध्येत् अग्निविशेषस्यानन्वितस्यासिद्धेः निर्विशेषस्यानन्वयात्। अथेदमुच्यते हयमनुमानस्य स्वरूपं व्याप्तिः पक्षधर्मता च तत्र व्याप्तिसामर्थ्यात् सामान्यं सिध्यति पक्षधर्म्मतावलेन चाभिप्रेतो विशेषः, पर्वताद्यवच्छिन्नवह्निलक्षणात् सा सिद्ध्यति अन्यथा पक्षधर्म्मतायाः कोपयोगः कानुमानस्य दृष्टान्तादिवत् प्रामाण्यम्। एवञ्चेत् ईश्वरानुमानेऽपि तुल्यमन्यत्राभिनिवेशात् अत्र मतं सिध्य-

त्यनुमानेऽपि विशेषोऽपि यत्र प्रमाणविरोधोनास्ति। तथाहि धूमात् पर्वतनितम्बवर्तिवह्निविशेषसिद्धौ का नामानुपपत्तिः दृष्टो हि देशात् कालाभेदः खलक्षणानाम्। ईश्वरानुमाने तु विशेषेण सिद्ध्यति प्रमाणविरोधात्। तथाहि नात्र शरीरपूर्वकत्वं साधनीयं शरीरे सत्यवश्यमिन्द्रियप्राप्तावतीन्द्रियोपादानोपकरणादिकारकशक्तिपरिज्ञानाऽसम्भवे सति कर्तृत्वासम्भवात्। अशरीरपूर्वकत्वञ्च अत्रकृसाधनम् सर्वोऽपि कर्त्ता पूर्वं कारकस्वरूपमवधारयति ततः कारणान्यधितिष्ठति तत इच्छतीदमनेन निर्वर्त्तया मीति ततः प्रवर्त्तते तदनु कार्यं व्यापारयति ततः करणान्यधितिष्ठति ततः करोतीति। अनवधारयन्निच्छन्प्रयतमानः कार्यमव्यापारयन्न करोतीत्यन्वयव्यतिरेकाभ्यां बुद्धिवच्छरीरमपि कार्य्योत्पत्तावुपायभूतं निखिलोपाधिष्वेषु व्याप्रियाङ्कप्रमाणादेवावधारितं न शक्यतेप्रहातुं वह्नेरिवेन्धनविकारदाहसामर्थ्यं धूमानुमाने। तत्परित्यागे च बुद्धिरपि त्यज्यतां प्रभावातिशयवादशरीरवदबुद्धिमानेवायमीश्वरः करिष्यति। उपादानोपकरणादिस्वरूपानभिज्ञोनाशक्नोतीति चेत्। कुत एतत्? तथाऽनुपलम्भादितिचेत् फलितं तर्हि ममापि मनोरथदुर्भेद,न तथा यावदिच्छाप्रयत्नाव्यवहितकार्य्योत्पत्तावुपयुज्यते यथेदमव्यवहितव्यापारं शरीरम्। एवं तर्हि का गतिरत्र,बुद्धिमत्कर्त्तृपूर्वकत्वसामान्यस्य, अगतिरेव उभयोरपि शरीरित्वाशरीरित्वविशेषयोरनुपपत्तेर्निर्विशेषसामान्यस्य सिद्ध्यभावात्। किमनुमानस्य दूषणं न किञ्चित्। पुरुष एवायं विशेषाभावाच्छ्रयविषाणायमाने साधनानर्हसामान्ये साधनं प्रयुञ्जानोनिन्द्यते यथा कश्चिन्निगदति ऊर्ध्वाधश्चेद्यमाकाशं प्रति व्यापारयन्। अथानुमानदूषणं विना न तुष्यति भवान् तदिदमशरीरिपूर्वकत्वानुमानं व्याप्रियाङ्कप्रमाणबाधितत्वात् कालात्ययापदिष्टं व्याप्रियाङ्कप्रमाणबाधितत्वात् कालात्ययापदिष्टं व्याप्रबलेन चाभिप्रेतमशरीरित्वविशेषम् विरुन्धत् विशेषविरुद्धं ततश्च विरुद्धावान्तरविशेष एवेति पूर्वपक्षसंक्षेपः"। अत्र प्रतिसमाधिः। किं शरीरित्वमेव कर्त्तृत्वमुत परिदृष्टसामर्थ्यकारकप्रयोजकत्वम् न तावच्छरीरित्वमेव कर्त्तृत्वं सुप्रक्षोदासीनस्य च कर्त्तृत्वप्रसङ्गात् किन्तु परिदृष्टसामर्थ्यकारकप्रयोजकत्वं तच्चिनु सति कार्य्योत्पत्तेः। तच्चाशरीरस्यापि निर्वहति यथा स्वशरीरप्रेरणायामात्मनः। अस्ति तत्तस्य स्वकर्म्मोपार्जितं तदेव शरीरमिति चेत् सत्यमस्ति परं प्रेरणोपयोगो न भवति स्वात्मनि क्रियाविरोधात्। प्रेर्यं तथास्तीति चेत् ईश्वरस्यापि प्रेर्यं: परमाणुरस्ति। ननु स्वशरीरे प्रेरणायामिच्छाप्रयत्नाभ्यामुत्पत्तेरिच्छाप्रयत्नयोश्च सति शरीरे भावादसत्यभावात् अस्ति तत्र स्वप्रेरणायामिच्छाप्रयत्नजननद्वारेणोपायत्वमिति चेत् न तस्येच्छाप्रयत्नयोरुपजननं प्रत्यकारकत्वात् ज्ञानात्मकयोरिच्छाप्रयत्नयोः प्रेरणाकरणकाले तु तदनुपायभूतमेव शरीरमकर्म्मत्वादिति व्यभिचारः। अनभेप्सितशरीरव्यापारेच्छाप्रयत्नमात्रसचिवस्यैव चेतनस्य कदाचिदचेतनव्यापारसामर्थ्यदर्शनात् बुद्धिमद्व्यभिचरितकार्य्यत्वमितीश्वरसिद्धिः। इच्छाप्रयत्नोत्पत्तावपि शरीरमपेक्षणीयमिति चेत् अपेक्षातां यत्र तयोरागन्तुकत्वं यत्र पुनरिमौ स्वाभाविकौ वासाते तत्रास्मापेक्षणं व्यर्थम्। न च बुद्धीच्छाप्रयत्नानां नित्यत्वे कश्चिद्विरोधः दृष्टा हि गुणानां रूपादीनामाश्रयभेदेन द्वयी गतिः नित्यताऽनित्यता च। तथा बुद्ध्यादीनामपि भविष्यतीति सेयमीश्वरवादे वादिप्रतिवादिनोः परा काष्ठा, अतः परं प्रपञ्चः। आत्माधिष्ठिताः परमाणवः प्रवर्त्तिष्यन्ते इति चेत् न तेषां स्वकर्मोपार्जितेन्द्रियगणाधीनसंविदां शरीरोत्पत्तेः पूर्वं विषयावबोधविरहात्। अस्त्यात्मनामपि सर्वविषयव्यापि सहजचैतन्यमिति चेत् न सहजं शरीरसंबन्धभाजां तत् केन विलुप्तं येनेदं सर्वत्रापूर्ववदनाभासयति। शरीरावरणतिरोधानात्तदात्मन्येव समाधीयते न वह्निर्मुखं भवतीति चेत् व्यापकत्वेन तस्य विषयसंबन्धानुच्छेदेन नित्यत्वेन च विषयप्रकाशस्वभावस्यानिहत्तो जातिरोधानवाचोयुक्तिः? इच्छाप्रतिबन्धवैचैतन्यतिरोधानमिति चेत् कथं तर्हि शरीरिणा विषयग्रहणम्। क्वचिदस्य इच्छयो न विरुध्यन्ते इति चेत् कुतोऽयं विशेषः? इन्द्रियप्रत्यासत्तिविशेषात् यद्येवमिन्द्रियाधीनचैतन्यस्य विषयग्रहेषु इच्छाभावो न सन्निधिमात्रनिबन्धनः सत्यपि व्यापकत्वे सर्वार्थेषु इच्छाभावात् इन्द्रियवैयर्थ्यप्रसङ्गाच्च साधूक्तं सशरीरिणामात्मनां न विषयावबोध इति। तथा चैके वदन्ति"पराञ्चि खानि व्यतृणोत् स्वयम्भुस्तस्मात् पराङ् पश्यति नान्तरात्मेति"। अनवबोधे चैतन्यं नाधिष्ठानमिति तेभ्यः परः सर्वार्थदर्शी सहजज्ञानमयः कर्त्तृस्वभावः कोऽप्यधिष्ठाता कल्पनीयः चेतनमधिष्ठातारमन्तरेणाचेतनानां प्रवृत्त्यभावात्। स किमेकोऽनेको वा? एक इति वदामः बहूनामसर्वज्ञत्वेऽस्मदादिवदसामर्थ्यात् सर्वज्ञत्वे एकस्यैव सामर्थ्यादपरेषामनुपायत्वात् न च संप्रदोषाणां भूयसामेकमत्ये हेतुरस्तीति कदाचिदनुत्पत्तिरपि कार्यस्य स्यात् एकाभिप्रायानुरोधेन

सर्वेषां प्रवृत्तावेकस्यैवेश्वरत्वं नापरेषां सदःपरिषदामिव, कार्योत्पत्त्यनुरोधे प्रत्येकमनीश्वरत्वम्। तदेवं कार्यविशेषेण सिद्धस्य कर्तृविशेषस्य सर्वज्ञत्वान्न तत्र चिह्नस्तुतिः विशेषानुपपत्तेः। अतो न तन्निबन्धनं मिथ्याज्ञानं मिथ्याज्ञानाभावाच्च न तन्मूलौ रागद्वेषौ तयोरभावात् तत्पूर्विका प्रवृत्तिः प्रवृत्त्यभावे च न तत्साध्यौ धर्माधर्मौ तयोरभावात्तज्जयोरपि सुखदुःखयोरभावः सर्वदैव चानुभवसद्भावात् स्मृतिसंस्कारावपि नासाते इत्यष्टगुणाधिकरणं भगवानीश्वर इति केचित्। अन्ये तु बुद्धिरेव तस्याश्चेतना क्रियाशक्तिश्चित्येवं वदन्त इच्छाप्रयत्नावनङ्गीकुर्वाणाः षड्गुणाधिकरणमयमित्याहुः। स किं बद्धोमुक्तो वा न तावत् बद्धोबन्धनसमाप्तिप्रसङ्गबन्धनहेतोः क्लेशादेरसम्भवात् मुक्तोऽपि न भवति स्वविच्छेदपर्यायत्वान्मुक्तेः। नित्यमुक्तः स्यात् यदाह तत्रभवान् पातञ्जलिः "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषईश्वर" इति।

अनुमानचिन्तामणौ ईश्वरवादो यथा

"एवमनुमाने निरूपिते तस्माज्जगन्निर्माणपुरुषधौरेयसिद्धिः चित्यादौ कार्यत्वेन घटवत् सकर्तृकत्वानुमानात्। ननु चित्यादि प्रत्येकं न पक्षः तस्य स्वशब्देनाभिधातुमशक्यत्वात् नापि मिलितम् एकरूपाभावात् अत एव सकर्तृत्वविचारारम्भकसंशयविषयः, तथाविवादविषयोवा न पक्षः एकरूपाभावेन तयोरशक्यत्वात् वादिनोर्निश्चितत्वेन संशयाभावात्। न च वाद्यनुमानयोरुल्यत्वेन मध्यस्थस्य संशयः। अनुमानाभ्यां तस्य संशयः मध्यस्थप्रश्नानन्तरञ्चानुमानमिति परस्पराश्रयात् घटेऽपि कदाचित् तयोः सम्भवात्, प्रत्येकसंशये विवादाभासत्वेनानुमानेऽर्थान्तरतापत्तेश्च। न च शरीरामेक्षेण कर्त्रा यत्र कृतं शरीराजन्यं जन्यं वा पक्षः जन्यात्मविशेषगुणशब्दस्फुटीकारसर्गाद्यकालीनवेदघटादिलिप्यादि संप्रदायाणामीश्वरमात्रकर्तृकाणामसंग्रहात् असिद्धेश्च अदृष्टद्वारा शरीरिणोऽपि चित्यादिकर्तृत्वात्। नापि जन्यकृत्यजन्यं जन्यम् उभयसिद्धकृतिजन्यान्यजन्यं वा पक्षः चित्यादीनामदृष्टद्वारा जन्यकृतिजन्यत्वात्। नाप्यदृष्टजनककृत्यजन्यं जन्यं कृतिसाक्षाज्जन्यं वा पक्षः ईश्वरकृतेरदृष्टजनकत्वेन चितौ तदभावात् घटादावप्येवं पक्षत्वेनांशतः सिद्धसाधनात्। न च चितिरेव पक्षः, अङ्कुरेण सन्दिग्धानैकान्तात्। न च निश्चितविपक्षे हेतुसन्देहात् स इति वाच्यं हेतौ साध्याभाववद्वर्तित्वसंशयस्य दूषकत्वात् स च साध्याभाववति हेतुसन्देहात् हेतुमति साध्याभावसन्देहाद्वा उभयथापि दोषः। न चैवं पक्षेऽपि तत्, अनुमानमात्रोच्छेदकत्वेन तदितरत्र तस्य दूषकत्वात्। अङ्कुरे हेतोरनिश्चयेन सन्दिग्धानैकान्तिकं तन्निश्चयेन साध्यसन्देहवति साध्यानुमितिरेव पक्षवत् सामग्रीसत्त्वात्। अत एवाङ्कुरः पक्षसम इति चेन्न तस्यापक्षत्वेन हेतोः पक्षधर्मताविरहेण स्थापनानुमानाविषयत्वात्। तदा तस्यापि पक्षत्वे प्रतिज्ञानुपपत्तिः। अत्र मानान्तराधीनतत्साध्यानुमित्यनन्तरञ्च पक्षेऽनुमितावितरेतराश्रयाच्चैकमप्यनुमानम्। तत्रापि चित्या सन्दिग्धानैकान्तात्, चितेर्विवादविषयत्वेऽङ्कुरे साध्यमाने अर्थान्तरञ्च। किञ्चैवमेकैकोपादानाभिज्ञसिद्धावपि नेश्वरसिद्धिः नापि सर्गाद्यकालीनं द्व्यणुकं पक्षः परमाणि सर्गाद्यसिद्धेः इति" पक्षान्तरेषः। "किञ्च सकर्तृकत्वं ? न तावत् कृतिमत्त्वस्वभावः कृतिमज्जन्यत्वं वा अस्मदादिना सिद्धसाधनात्। उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वं तदिति चेत् उपादानगोचरत्वं यदि यत्किञ्चिदुपादानगोचरत्वं तदा अस्मदादिनाऽर्थान्तरत्वं ज्ञानादीनामपि जनकत्वं विवक्षितं न च घटोपादानगोचरज्ञानादीनां क्षितिजनकत्वं सम्भवति व्यभिचारादिति चेन्न क्षितिजनकादृष्टजनकज्ञानादीनाम् उपादानविषयनियमेनादृष्टद्वारा तेनैव सिद्धसाधनात्। न च साक्षात्तज्जन्यत्वं विवक्षितं तद्धि न कृतिजन्याजन्यत्वे सति कृतिजन्यत्वं स्वजनककृत्यव्यवहितोत्तरक्षणवर्त्तित्वं वा घटदृष्टान्तस्य साध्यविकलत्वापत्तेः घटादौ कुलालादिकर्तृकत्वाभावप्रसङ्गाच्च। न च शरीरक्रियादृष्टान्त इति वाच्यं घटेनानैकान्तात् चेष्टात्वस्योपाधित्वाच्च। नापि चित्यादुपादानगोचरत्वं विवक्षितं अप्रसिद्धेः न चोपादानशब्दस्य सम्बन्धिशब्दत्वेन घटचित्यादिसमभिव्याहारे तत्तदुपादानगोचरत्वं चैत्रोमाहभक्तोमैत्रवदिति वाच्यं शाब्दे हि बोधे तथा न चात्र शब्दः प्रमाणं वादिनोऽनाप्तत्वात्। अनुमाने त्वनुगतेन व्याप्यकत्वघटितेन रूपेण व्यापकसिद्धिः तच्चोपादानत्वमेवेति कथं नार्थान्तरम्। किञ्चैवं घटादावपि तदुपादानलक्षणेनोपस्थित्यासामान्येन रूपेण कृत्याप्यनुपस्थितेर्व्याप्तिरेव न ग्रहेत्। अपि च सामान्यलक्षणया ज्ञानलक्षणया योगजधर्मरूपया वा प्रत्यासत्त्योपादानगोचरापरोक्षज्ञानतज्जन्यचिकीर्षाकृतिमता ईश्वरादिना सिद्धसाधनम् तेषां चित्यव्यवहितपूर्वक्षणसमवायसत्त्वेऽपि तदृत; सत्त्वात् अदृष्टद्वारा

तेषामपि जनकत्वसम्भवाच्च । ज्ञानादिसाक्षाज्जन्यत्वस्य निरस्तत्वात् । अथ योगजधर्मजन्यजन्यसविकल्पकजन्य सामान्यलक्षणाप्रत्यासत्त्यजन्योपादानगोचरापरोक्षज्ञान चिकीर्षाकृतिमज्जन्यमिति साध्यम् यद्वा अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्यजन्यज्ञानादिमदजन्यं जन्यम् अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यमिति साध्यम् ज्ञानाव्यवहितोत्तरसमयवर्त्तीच्छाव्यवहितोत्तरक्षणवर्त्तिकृतीनां जनकत्वं विवक्षितं न तु ज्ञानादीनां यौगपद्यं पौर्वापर्यं वाऽतो न साध्याप्रसिद्धिर्नेवा चित्यादौ बाध इति नैवं द्वेषोगजधर्मसामान्यज्ञानरूपप्रत्यासत्तीनामनागतगोचरसाक्षात्कारस्य च तज्जनकप्रत्यासत्तीनाञ्च परस्याप्रसिद्धतया तदजन्यस्य साक्षात्कारस्याप्यसिद्धत्वेन पक्षसाध्ययोर्विशेषणासिद्ध्या परं प्रत्याश्रयासिद्धेः साध्याप्रसिद्धेः । तत्सिद्धौ वा पक्षे तदजन्यत्वासिद्धिः क्षितिजनकाऽदृजनककृतिचिकीर्षासाक्षात्काराणां योगजधर्माद्यजन्यानामदृष्टद्वारा क्षितिजनकत्वेन सिद्धसाधनात् न च तादृशसाक्षाज्जन्यत्वं विवक्षितं घटादिदृष्टान्ते तदसम्भवात् । दृष्टान्ते घटादौ जनकेष्टसाधनताज्ञानस्यानुमितित्वेन जन्यसविकल्पकव्याप्यिग्रहजन्यत्वेन साध्याप्रसिद्धेश्च । नन्तु व्याप्तिबलेन साध्यं सिध्यति व्याप्तिश्च यत्र यत्र कार्यत्वं तत्र तत्र तदुपादानाभिन्नकर्तृत्वमितिरूपा न तु यद्यत् कार्यं तत्तत् किञ्चिदुपादानाभिन्नजन्यमिति एवञ्च यत्र कार्यत्वं तत्र तदुपादानाभिन्नजन्यत्वमिति विशिष्टव्याप्त्या चित्यादौ कार्यत्वं चित्याद्युपादानाभिन्नजन्यत्वमेव साध्यमस्ततो न सिद्धसाधनमितिचेन्न घटे पटे च व्याप्तिग्रहः कार्यत्वस्य किं प्रत्येकं घटोपादानाद्यभिन्नजन्यत्वेन, तत्तदुपादानाभिन्नजन्यत्वेन, उपादानाभिन्नजन्यत्वेन वा आद्ये पटोपादानाभिन्नजन्यत्वादौ कार्यत्वस्य व्यभिचार एव । द्वितीयेऽननुगमः । तत्तच्छब्दाभिधेयघटाद्युपादानगतानुगतरूपाभावात् कथं व्यापकताग्रहः । तत्तच्छब्दस्य स्वभावात् समभिव्याहृतपरतया नायं दोष इति चेत् न अनुमानेशब्दस्वभावोपन्यासस्याप्रयोजकत्वात् । अतएवेदानीं देवदत्तोवहिरस्ति विद्यमानत्वे सति दृश्यत्वात् विद्यमानत्वे सति योयदा यत्र नास्ति स तदा तदतिरिक्तदेशेऽस्ति यथाऽत्रैव बहिरसन् घटे प्रतिज्ञामीत्यत्र पक्षे दृष्टान्तसाधारण्यसत्त्वयोरनुगतयोरभावाद्यान्वयी किन्तु व्यतिरेकीत्युक्तम् । तृतीये सिद्धसाधनमेव । अथ सर्गाद्यकालीनं द्व्यणुकं ज्ञानेच्छाकृतिसमानकालीनसामग्रीजन्यं कार्यत्वात् घटवत् । अदृष्टसामग्रीजन्यत्वेऽदृष्टत्वापत्तिरिति चेन्न परं प्रति सर्गाद्यसिद्धेः ज्ञानादीनां सिद्धावपि द्व्यणुकजनकत्वात् तदानीमसिद्धावप्रयोजकत्वाच्च । एतेन सर्गाद्यकालीनं द्व्यणुकं द्व्यणुकासमवायिकारणसमकालीनकृतिजन्यमिति निरस्तं द्व्यणुकासमवायिकारणसमानकालीनकृतित्वेन गौरवाप्रयोजकाभ्यामजनकत्वात्" साध्याक्षेपः । "किञ्च कार्यत्वं ? न तावत् योगोपस्थितकृत्यर्हत्वम् असिद्धेः नापि पूर्वकालासत्त्वे सत्युत्तरकालसम्बन्धः, तत्तत्पूर्वकालस्यानुगतत्वात् सकलपूर्वकालस्याप्रसिद्धेः नापि कादाचित्कत्वं प्रागभावप्रतियोगित्वं ध्वंसेनानैकान्तात् । नापि सत्त्वे सति तत्त्वं सत्तालातेः परं प्रत्यसिद्धेः स्वरूपसत्त्वस्य च ध्वंसेऽपि सत्त्वात् यत्तु अयं घटः एतदृटजनकानित्यज्ञानचिकीर्षाकृत्यतिरिक्तज्ञानादिजन्यः कार्यत्वात् पटवदित्यादि तन्न विपक्षे बाधकाभावेनाप्रयोजकत्वात् अन्यथाऽयं घटः एतदृटजनकानित्याऽदृष्टातिरिक्तानित्याऽदृजन्यः कार्यत्वात् अपरघटवत् । एतत्सुखदुःखसाक्षात्कारौ एतज्जनकानित्यसुखदुःखसाध्यौ सुखदुःखसाक्षात्कारत्वादित्यादिना नित्यधर्मसुखदुःखाश्रयस्यापि सिद्धिप्रसङ्गात् । अयं घटः स्वजनकानित्यज्ञानादतिरिक्तनित्यज्ञानाद्यजन्यः अपरघटवदित्यादिना सत्प्रतिपक्षाच्च । केचित्तु दृश्यते तावदभिमतविषयग्राहिण्यिन्द्रिये मनोनिवेशवतः पुंसोमनःक्रियानुकूलो यत्नः तथा च सर्गाद्यकालीनशरीरजन्यज्ञानध्वंसानाधारकालाधारज्ञानजनकात्ममनःसंयोगजनिका मनःक्रिया तन्मनोयोगोचरप्रयत्नानाधारतन्मनोयोगोचरप्रयत्नतद्ग्राह्येतरसकलकारणाधारकालानन्तरकालानाधाराद्यसत्ताका तन्मनःक्रियात्वात् ममतन्मनःक्रियावत् अर्थात् प्रयत्नाधारकालानन्तरकालाधारा सा क्रिया सिद्धवतीत्याहुः । तत्र सर्गाद्यकाले ज्ञाने जनकमनःसंयोगजनकक्रियायां मानाभावः पूर्वक्रिययैव संयोगसंभवात् । ईश्वरादिनां तन्मनोयोगोचरप्रयत्नाधारकालोऽप्रसिद्धएव क्रियात्वस्यैव हेतुत्वे व्यर्थविशेषणत्वच्च । किञ्चैवं प्रयत्नानाधारकालानन्तरकालाधारत्वम् अर्थात् तद्भिन्नो मानान्तरादीश्वरासिद्धावर्थान्तरत्वमिति" हेत्वाक्षेपः । "अत्रोच्यते अदृष्टाद्वारकोपादानगोचरजन्यज्ञत्वजन्यानि समवेतानि जन्यानि, अदृष्टप्रागभावव्याप्यप्रागभावाप्रतियोग्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि, स्वजनकादृष्टोत्तरोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि वा अपरोक्षज्ञानचिकीर्षाप्रयत्नविषयीभूतोपादानानि

वा समवेतत्वे सति प्रागभावप्रतियोगित्वात् यदेवं तदेवं यथा घटः। तथा चैतानि तस्मात्तथा। उक्तपक्षे कस्यचिदनन्तभावेऽपि तदादाय निरुक्तस्य पक्षत्वनिर्देशे समूहालम्बनरूपैवानुमितिरुत्पत्स्यते। न च जन्यज्ञत्वजन्यत्वं तावत् अननुगतेष्वेकरूपाभावेन अग्रहीतसम्बन्धमिति वाच्यं जन्यज्ञत्वजन्यत्वं हि जन्यज्ञतिजन्यान्यत्वमित्यन्यत्वेन रूपेण सामान्यलक्षणया तावतामुपस्थितेः न च जन्यत्वविशेषणव्याहत्याप्रसिद्धिः प्रमेयो घट इति वदव्यावर्त्तकत्वेनापि तदुपरक्तबुद्धेरहेयत्वेन तस्योपरञ्जकत्वात्। उक्तान्यतमत्वमेव सकर्तृकत्वम् अतएव घटभोक्ता न तत्कर्त्ता व्यवह्रियते एवञ्च शब्दस्फुटकारादीनां पक्षतैव ज्ञानेच्छादीनामपि पक्षत्वान्न सन्दिग्धानैकान्तः उपादानस्य सिद्धत्वेऽप्युपादेयस्यासिद्धत्वात्तद्रूपेण तत्रापि चिकीर्षा। यद्वा पक्षे हेतौ च समवेतत्वं न विशेषणं तेन ध्वंसोऽपि पक्षः साध्ये चोपादानपदं कारणमात्रपरमुपादेयमेव वा जन्येच्छाकृतिजन्यत्वञ्च पक्षे विवक्षितं तेन कृतिध्वंसस्य कृतिजन्यत्वेऽपीच्छाजन्यत्वाभावात् पक्षत्वम्। चितिरेव वा पक्षः न चाङ्कुरे सन्दिग्धानैकान्तिकं पक्षपक्षसमनिरपेक्षेण घटादौ निश्चितव्याप्तिलिङ्गस्य तयोर्दर्शनेनोभयत्रानुमित्यविरोधात्। नन्वनुमित्योरन्योन्यापेक्षत्वं येनान्योन्याश्रयः स्यात् प्रतिज्ञाया अविषयत्वात्तत्र पक्षसमव्यपदेशः। न चाङ्कुरस्य पक्षत्वेनानिर्देश्यात्तत्र न पक्षधर्मतात्तानमिति वाच्यं सिषाधयिषाविरहसहकृतसाधकप्रमाणविरहवति लिङ्गज्ञानस्यानुमितिमात्रकारणत्वात्। तच्च चितौ पक्षावयवेनाङ्कुरे स्वत एवेति न कश्चिद्विशेषः। यदि च चितौ हेतुनिश्चयदशायां हेतुसत्तयाऽङ्कुरस्य निश्चयस्तदा क्व सन्दिग्धानैकान्तिकम्?। अथ पक्षसमे साध्याभावसामानाधिकरण्यसंशयाद्धेतौ व्याप्तिग्रह एव नोत्पद्यते उत्पन्नोऽपि वा बाध्यत इति चेत्तर्हि महानसे धूमव्याप्तिग्रहो न स्यात् भूतोऽपि वा बाध्येत सन्दिग्धवह्निपर्वतापर्वतधूमवतामेकधर्माभावेनाप्रमेयत्वात् तस्मात्साध्यसन्देहवति हेतुनिश्चयो न दोषः किन्तु गुणएव। अन्यथानुमानमात्रमुच्छिद्येत। पक्षादन्यत्र दूषणमिति यदुक्तं तत्र पक्षान्यत्वं यदि, तदाऽनभीप्सितानुमितिर्न स्यात्। अथ सन्दिग्धसाध्यान्यत्वं साधकबाधकप्रमाणाभावविषयान्यत्वं वा विवक्षितं तदाङ्कुरेऽपि तन्नास्ति अथ प्रतिज्ञाविषयान्यत्वं तदा स्वार्थानुमितिच्छेदः नियतविषयज्ञानाजन्यत्वेन पक्षविशेषणात् सर्वविषयज्ञानसिद्धिः साध्ये च ज्ञानेच्छाप्रयत्नानां विशेषणत्वेन विशिष्टस्य साधनत्वं विवक्षितं तेन न तदोषलक्षितक्षेत्रज्ञे नार्थान्तरं सामान्यतोऽपि साध्यनिर्देशे पक्षधर्मतावलेनाभिमतविशेषसिद्धेः। नन्वाद्यसाध्यद्वये घटाद्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतीनामेव जनकत्वमायातीत्यर्थान्तरम्। न च तेषां व्यभिचारात् चित्यादावकारणत्वमिति वाच्यम्। अनादौ प्रवाहे कस्यचित् कदाचित् चितिद्व्यणुकादि पूर्वं घटाद्युपादानगोचरज्ञानादिसत्त्वात्। न च सर्गाद्यकालीनस्यापि पक्षत्वात्तत्रेश्वरसिद्धिः परं प्रति तदसिद्धेरिति चेत् न ज्ञानादीनां त्रयाणां स्वविषयसमवेतकार्यं प्रत्येव जनकत्वावधारणेनैतदनुमानस्य तद्विषयत्वात् अतएवान्योपादानगोचरापरोक्षज्ञानाद्यजन्यत्वेन पक्षविशेषणमपि न युक्तम्। तृतीयसाध्ये तु नार्थान्तरं चित्यादेर्घटाद्युपादानासमवेतत्वात्। ननु सामान्यलक्षणादिप्रत्यासत्त्या चित्याद्युपादानगोचरं यत् प्रत्यक्षं तज्जन्यमेवास्तु तथाचेश्वरे न प्रत्यक्षं न वेच्छाप्रयत्नौ तयोः समानाधिकरणज्ञानाविषयेऽसत्त्वात्। न च तादृशप्रत्यासत्त्यजन्यत्वं प्रत्यक्षे विशेषणं, परं प्रत्यक्षसिद्धेरिति चेन्न द्रव्यत्वेन ज्ञानलक्षणया वा कपालगोचरप्रत्यक्षेऽपि घटादावकर्तृत्वात् चित्यादौ कर्तृत्वनिर्णायकं ज्ञानं सिध्यत्तद्विलक्षणमेव सिध्यति न चावयवविभागद्वारा चित्यादिद्व्यणुकलक्षणात् सप्तद्व्यादिषु हस्तक्षेपात् परमाणुद्वयसंयोगेन द्व्यणुकेष्वकस्मादादि कर्तृकत्वादिसतः सिद्धसाधनमिति वाच्यं तत्र हि चितिनाशे कर्तृत्वं न खण्डचितौ अवस्थितसंयोगेभ्य एव तदुत्पत्तेः सकलतदुपादानगोचरज्ञानेच्छाकृतीनामभावाच्च अत एव द्व्यणुकेऽपि न कर्तृत्वं जलचेपादधिकपरिमाणसप्तद्व्यादेः सपक्षत्वमेव घटस्येव। ननु घटे साध्यविकलत्वम् अन्वयव्यतिरेकाभ्यां ज्ञानादेरेव जनकत्वात् न तु तदाश्रयस्य धर्मिग्राहकस्यान्वयव्यतिरेकस्य वा ग्राहकस्याभावात्। न च घट आत्मजन्य उत्पत्तिमत्त्वात् ज्ञानवदिति वाच्यम् आत्मसमवेतत्वस्योपाधित्वात् घट आकाशजन्य उत्पत्तिमत्त्वात् शब्दवदिति वत् अप्रयोजकत्वाच्चेति चेन्नैवं प्रयत्नवदात्मसंयोगस्येष्टाद्वारा घटहेतुतः प्रयत्नवानात्मापि हेतुः न चात्मसंयोगे सत्यपि प्रयत्नं विना न चेष्टेति प्रयत्न एव तत्कारणम् असमवायिकारणं विना कार्यानुत्पत्तेः न चात्मसंयोगस्य कारणत्वेऽपि संयोगपरिचायकसामान्यमात्रेति वाच्यं संयोगमात्रस्याकारणत्वेन संयोगिविशेषितस्य हेतुत्वात्। आत्मसंयोगव्यतिरेकप्रयुक्तक्रियाव्यतिरेकाभिन्नात्मसंयोगः कारणमिति चेन्न या क्रिया व्यधिकरणवदीयगुणजन्या सा तत्संयोगासमवायिकारणिका यथा स्पर्शवद्-

द्रव्यसंयोगजक्रियेति तत्सिद्धेः न च क्रियायामूर्त्तमात्रसमवेतसमवायिकारणत्वनियमः कार्य्यमात्रामिप्रायेण ज्ञानादौ व्यभिचारात् विशेष्याप्रयोजकत्वात् असमवायिकारणसंयोगाश्रयस्य तत्कार्य्यजनकत्वनियमाच्च । अन्ये तु अनुकूलकृतिसमवायित्वं कर्त्तृत्वं न तु जनकत्वे सति, गौरवात् कर्त्तरि कारकव्यवहारस्याभियुक्तानां "सविशेषण" इतिन्यायेन कृतिपर्य्यवसन्न एव । एवं ज्ञानेच्छाकृतिजन्यत्वमेव साध्यं तदाश्रयत्वमेवेश्वरस्य कर्त्तृत्वम् । अथ घटे कृतिसाध्येष्टसाधनताज्ञानं चिकीर्षाद्वारा हेतुः तच्च न प्रत्यक्षं चिकीर्षाविषयेऽनागते इन्द्रियासामर्थ्यात् किन्त्वनुमितिरूपं तथा च साध्यविकलोदाहरणं साध्याप्रसिद्धिर्वेति चेन्न सिद्धवत्सिद्धविषया हि कृतिः सिद्धविषयप्रत्यक्षे सति भवति न हि रूपौदनयजनां संस्थानविशेषे कृतिसाध्येष्टसाधनारणकस्य प्रत्यक्षेणोपस्थितिं विना प्रवृत्तिः अतएव यागे शब्दात्तदुपजीविलिङ्गाद्वा कृतिसाध्येष्टसाधनत्वेऽवगतेऽपि ऋषिरादीनां प्रत्यक्षेणानुपस्थितौ न प्रवृत्तिः न चोपादानप्रत्यक्षं प्रवर्त्तकज्ञानोपयोगम् अप्रत्यक्षपरमाणौ तत्क्रियायामिष्टसाधनताज्ञानेऽप्यप्रवृत्तेः प्रवृत्तिविषयस्पन्दङ्कुरादेः प्रत्यक्षत्वाच्च यद्दृष्टकारादिना व्यभिचारः न चाभिमतत्वाग्रहकेन्द्रियसंयोगान्मनसि प्रयत्नजन्यक्रियाप्रदर्शनाद्व्यभिचारः अदृष्टसहकृतत्वगिन्द्रियेण हि मनोवहनाड्यादीनामुपलम्भेन तद्गोचरप्रयत्नान्नाडीक्रिया ततः स्पर्शवद्वेगवन्नाड्या नोदनान्मनसि क्रिया न तु प्रयत्नात् । अतएव जलाद्यभ्यवहारमन्तरेणेच्छाद्वेषाभ्यां हेतुनाडीनामनाद्यभ्यासवासनावशाददृष्टसहकृतत्वगिन्द्रियेणोपलम्भात् तद्गोचरः प्रयत्नः । नन्वेवं घटादावनुमिते जन्यत्वदर्शनादीश्वरेऽनुमितिरेव न सिद्धेत् यद्वा च प्रत्यक्षेन्द्रियजन्यत्वेऽपि नित्यं तदीश्वरे तथानुमितेर्नित्यजन्यत्वेऽपि सा तत्र नित्यैव अनित्येनानादिद्व्यणुकाद्यजननादिति चेन्न सुखदुःखाभावादिसाधनानुमिते तर्हि घटादौ हेतुत्वं सिद्धं न च तावता शरीराद्यदृष्टाभावेन सुखमात्रस्यतो न चिकीर्षादौ तथानुमितिर्वेत्यर्थः सम्भवति न च तादृशानुमितेरनुमित्यन्तरस्य वाऽनुमितित्वेन घटादौ इच्छाविषयप्रत्यक्षजन्यहेतुत्वं सिद्धमतो नेश्वरेऽनुमितिः । नन्वहेषजन्यकृतिसाध्ये चिकीर्षाविरहाद्व्यभिचारः तदृष्टान्तेन चिकीर्षादौ हेषसाध्यत्वादीश्वरे हेषोऽपि स्यात् हेषवत्त्वं संसारित्वेन भगवतोऽपि तथा स्यादिति चेन्न न हि सर्पादिहेषादेव तत्राघातानुकूलव्यापारे कृतिरुत्पद्यते प्रयोजनं विना दुःखैकफले प्रेक्षावतां कृतेरनुपपत्तेः किन्तु दुःखसाधनध्वंसं तत्साध्यदुःखानुत्पादं वा फलसहिष्णु तत्साधनताज्ञानात्, तथा चेष्टसाधनताज्ञानाभावेच्छाभावेति सैव कृतिकारणं द्वेषस्तु परम्परया तदुपयोगः, कृतस्तर्हि हेषः, यतुं हेषीति अबाधितप्रत्ययात् । न चाहश्यकर्तुरनुपलब्धिबाधः, अनुपलब्धिमात्रस्य बाधकत्वेऽतीन्द्रियोच्छेदात् योग्यानुपलब्धेरसिद्धेः परात्मनोऽयोग्यत्वनियमात् यत्यदृष्टप्रतिबन्धाच्च नादृश्यमात्रनिरासः परमाण्वादिस्वीकारात् नाप्ययोग्यकर्तृकनिरासः चेष्टया ज्ञानादिमतः परात्मनोऽनुमानात् परं प्रति तस्य योग्यत्वात् । नापि यदृष्टे पशुत्ववद प्रयोजकं, कर्तुः कार्य्यमात्रे कारणत्वावधारणात् प्रतिबन्दिमात्रस्यादूषणत्वात् । यत्ने पशुत्वनायोग्यत्वसिद्धिः कुतोनेति चेत् अर्थान्तरत्वात् विपक्षे बाधकाभावात् व्याप्यसिद्धेः यदृष्टत्वस्य योग्यसंस्थानविशेषव्यङ्ग्यत्वे योग्यस्य विरोधेन यद्धितमशक्यत्वात् यत्ने यदृष्टस्याभाव इति सर्वेषामबाधितप्रत्यक्षबाधितत्वाच्च । अथ कृतिकार्यत्वयोर्नान्वयव्यतिरेकाभ्यां व्याप्तिग्रहः त्वन्मते व्यापकस्यैः सत्त्वेन देये समवे वा कृतिमात्रव्यतिरेकानिरूपणात् नित्यकृतेरन्वयोऽपि दृष्टोतो न वह्निमात्रव्यतिरेकोऽस्ति दृश्यते च । न चैवमाकाशात्मनोरप्यसिद्धिः समवायिमात्रस्य व्यतिरेकानिरूपणेन कार्यं समवायिकारणजन्यमिति व्याप्तेरसिद्धेरिति वाच्यं समवायिकारणत्वपक्षे हि तत्सम्बन्धाभावोऽप्रयोजको निमित्तमात्रसाधारणत्वात् किन्तु यत्समवायि तत्र कार्यं यत्र समवायि तत्र नेत्यन्योन्याभावसादाय कार्यं समवायिजन्यमिति व्याप्तिग्रहसम्भवात् । समवायित्वेन तयोरन्योन्याभावोऽस्ति दृश्यते च । यद्वा भावकार्यं समवेतमिति व्याप्त्या तयोः सिद्धिरिति यथा हि यद्यद्वह्नेरन्वये धूमोदृष्टस्तद्व्यतिरेके धूमव्यतिरेकदर्शनात् वह्निधूममात्रयोर्व्याप्त्यर्थः न तु पर्वतीयवह्नेः अन्वयव्यतिरेकग्रहात् । न चान्यान्वयव्यतिरेकाभ्यामन्यव्याप्तिग्रहेऽतिप्रसङ्गः यद्विशेषयोरन्वयव्यतिरेकग्रहः तत्सामान्ययोर्बाधकं विना व्याप्तिग्रहात् स च वह्निधूमव्याप्तिग्रहे उत्पद्यमानः सकलधूमगोचरो धूमत्वपुरस्कारेण प्रसिद्धधूमगोचर एव न भवति । तथापि कृतिविशेषकार्यविशेषयोरन्वयव्यतिरेकग्रहो बाधकं विना कृतिकार्यत्वमात्रयोर्व्याप्तिग्रह उपायः न तु पक्षधर्मतावलेन अविशेषान्वयव्यतिरेकग्रहः अनुमानमालो-

च्छेदप्रसङ्गात्। एतेन "कार्यत्वस्य विपक्षव्यावृत्तिकृतत्वे सम्भवतीतीन्द्रियः कर्त्ता चेद्व्यतिरेकसिद्धिविधुरा व्याप्तिः कथं सिध्यति। दृश्योऽयं व्यतिरेकसिद्धिमनसा कर्त्ता समाधीयते तस्माद्यापि तदा दृश्यादिकमिति व्यक्तं विपक्षेऽबाधमिति" निरस्तम्। ननु यदि कर्त्तृमात्रव्यतिरेकग्रहादृश्यकर्त्तृसिद्धिस्तदा वह्निमात्रव्याप्यधूमादृश्यजठर्यग्निसिद्धिरपि स्यात्, न स्यात् अदृश्यवह्नेर्धूमानुपपत्तेः दृश्यस्यैव तत्र हेतुत्वात्। ननु ज्ञानेच्छाप्रयत्नत्रयव्यतिरेकान्न कार्यव्यतिरेकः किन्तु एकैकव्यतिरेकात् तथा च व्यर्थविशेषणत्वे विशिष्टव्यतिरेको न हेतुव्यतिरेकव्याप्य इति न हेतोर्विशिष्टसिद्धिः साध्याभावव्यापकाभावप्रतियोगिन एव साध्यगकत्वादिति चेन्न यत एकैकव्यतिरेकात् कार्यव्यतिरेकोऽतएव कार्यत्वादेरेकैकसिध्यत्त्रयमपि सिध्यति। आर्षन्तु समाजः।

स्यादेतत् अशरीरसर्वज्ञनित्यज्ञानादिमान् कर्त्ता पक्षे विवक्षितः घटादौ च कार्यत्वस्य तद्विपरीतकर्त्तृसहचारादिदर्शनाद्विशेषविरुद्धत्वमिति न हेतोर्विवक्षितसाध्यविपरीतसहचारमात्रस्यादूषणत्वात् अन्यथानुमानोच्छेदप्रसङ्गात्। न चानित्यज्ञानासर्वज्ञशरीरकर्त्तृत्वेन समं कार्यत्वस्य व्याप्तिरस्ति येन तद्विपरीतसाधने विरुद्धं स्यात् ताडशव्याप्तिश्च त्वया मया वा नाङ्गीक्रियते कङ्कुरादौ योग्यानुपलम्भेन शरीरिकर्त्तृत्वाभावात्। अथ यथादर्शनबलप्रवृत्तव्याप्त्याऽनित्यज्ञानादिमान् कर्तोपनेयः पक्षधर्मतया च नित्यज्ञानादिमान् तथा चोपनेयविशेषयोर्विरोधेन व्याप्यपक्षधर्मतयोर्विरोधात् परस्परसहकारितविरहान्नानुमान विशेषविरोधादिति चेन्न अनित्यज्ञानादिकर्तृजन्यत्वेन व्याप्त्यभावात् ज्ञानादिमत्कर्तृजन्यत्वव्याप्तेः पक्षधर्मतावलेभ्यः विशेषाविरोधात् केवलाया व्याप्तेश्च पक्षधर्मतायाश्च पृथग्गुपनायकत्वाभावाच्च एकवैयर्थ्यप्रसङ्गाच्च तथा च निरपेक्षतावां विशेषानुपस्थापनादेव न विरोधज्ञानं सापेक्षतादशायाञ्च सहोपलम्भादेव विरोधप्रतियोगिनोः सिद्धग्रसिद्धिभ्यां विरोधभावज्ञानाभावाच्च। सिद्धविशेषेण साध्यविशेषेण च एव विरोधे च विशेषविरोधः यथा चन्दनप्रभवत्वक्ष्मानयं सुरभिभूखण्डत्वात्। ननु ज्ञानतृनित्यत्वयोः कर्तृताशरीरितृयोश्च परस्परविरुद्धतृन एकधर्म्यसमावेशात् कथं नित्यज्ञानादिकर्तृसिद्धिः, न उपसंहारस्थानाभावात्। तथाहीश्वरे तद्बुद्धौ चाशरीरितृकर्तृबुद्धिनित्यत्वे च उपसंहियमाणे विरुद्धे, न तु स्वाश्रयस्थिते उभयोच्छेदप्रसङ्गात्, न चेश्वरबुद्धिर्वा स्थिता उपस्थितौ वा धर्मिग्राहकमानेन तयोर्विरोधापहारात् अनुपस्थिते च तयोर्विरोधज्ञानमकिञ्चित्करमेव आकाशादिबुद्धौ व्योमादौ कुविन्दे तक्षात्मनि च उपस्थिते विरोधोपसंहारात्, बुद्धिनित्यतृयोः कर्तृत्वाशरीरित्वयोरनधिगमेऽपि ईश्वरेऽशरीरिकर्तृत्वनित्यज्ञानादिसिद्धिरग्रत्यूहैव। अतएव नित्यतृावयवतृयोर्विरोधज्ञानमकिञ्चित्करमेवेति परमाणुसिद्धिः। ईश्वरतद्बुद्ध्यादिकं तर्कितमिति चेन्न तर्कस्य प्रसङ्गनस्य संशयस्य वाऽज्ञानेऽसम्भवात्। स्यादेतत् घटादौ कृतिसाध्यता कृत्यादिव्यापारादिद्वारैव न तु साक्षात्, न च पितापुत्रयोरेकघटसाधकत्वमिव प्रयत्नकृत्यादिव्यापारयोः साधकत्वं वाच्यं घटार्थं कृत्यव्यापारादिना व्याप्रियमाणस्य कुलालसमीपदेशस्थस्य कृत्यादिव्यापारशून्यस्य तद्घटकर्तृत्वापत्तेः न च कृत्यादिव्यापारवत्ताऽशरीरस्य सम्भवति अन्यादृशी च कृतिसाध्यता न दृष्टा, शरीरतद्व्यापारौ चाङ्कुरे बाधिताविति कर्तुरपि बाधः। अन्यथा तदनुमानात् चेतन एव कर्त्ता क्षितौ च अनुमीयते बुद्ध्यादिमत्पराक्तनयोग्यानुपलब्धिबाधाभावात् शरीरव्यापारद्वारैव चेतनस्य हेतुत्वात् शरीरव्यापारस्य चाङ्कुरे बाधात् बाधितइति चेत्तर्हि कर्तृमात्रस्यापि तद्द्वारैव चेष्टेतरकार्यकर्तृत्वदर्शनात् तत्रापि कर्तृमात्रे बाधोऽपि। एवञ्च कृतिसाध्यत्वे शरीरव्यापारजन्यत्वं प्रयोजकमिति सएवोपाधिः। एवं ज्ञानेच्छयोरपीच्छाकृतिद्वारा जनकत्वमिति कथं द्वारं विना क्षित्यादौ जनकत्वमिति। उच्यते। जन्यमात्रे कृत्यादिजनककृतित्वेन न जनकत्वं चेष्टायां क्षित्यादौ च व्यभिचारात् घटादौ च तथा जनकत्वमिति जन्यमात्रे कृतिमात्रस्य जनकत्वविरोधिविशेषयोर्जन्यजनकभावे बाधकं विनासामान्ययोरपि तथाभावनियमात्। न हि विशेषे विशेषप्रयोजकत्वेन सामान्यप्रयोजकत्वविरोधः। चेष्टेतरकार्ये शरीरद्वारैव कृतेर्हेतुत्वात् तेन विना क्षित्यादौ न कृतिसाध्यत्वमिति चेत् चेष्टेतरकार्यमात्रे शरीरव्यापारकृतित्वेन जनकत्वे क्षित्यादौ व्यभिचारात्। किन्तु तद्विशेषघटादौ दृष्टकृतत्वात्। न चैवमाभवातजड़ीकृतकलेवरस्य प्रयत्नादेव घटोत्पत्तिः स्यात् कृत्यादिव्यापारं विनैव कृतेर्हेतुत्वादिति वाच्यं घटे कृतौ कृत्यादिव्यापारस्यापि हेतुत्वात्। यदुक्तं चेतन एव कृतेरनुमीयत इति तत्र कृत्यादिव्यापारकृतिमान् यदि चेतनोऽभिमतः तदा कृत्यादिव्यापारस्याङ्कुरे योग्यानुपलब्धिबाधात् अथ कृत्यादिव्यापाररहितकृतिमानभिमतस्तदोच्यते स एव

भगवानीश्वरः । अतएव सद्भावनिरूपकत्वे नियतपूर्ववर्त्तित्वं कारणत्वं समवाय्यसमवायिनोरुक्तत्वेन निमित्तेऽपि तदभावात् अन्यथा प्रतिबन्धकाभावानन्तरं प्रतिबन्धकसत्त्वे कार्यं स्यात् प्रतिबन्धकाभावस्य पूर्वं सत्त्वात् न च ज्ञप्तेः सद्भावनिरूपकत्वं स्वतः कार्यसमवेऽभावात् तथा चैतत्परिचायितव्यापारद्वारा तस्याः सद्भावनिरूपकत्वमतः शरीरव्यापारद्वारैव ज्ञप्तेर्जनकत्वं न केवलाया इत्यपास्तम् समवाय्यसमवायिप्रतिबन्धकाभावानामविनश्यदवस्थत्वेन कारणत्वात् तथैवान्वयव्यतिरेकात् तेन तेषामभावे विनाशक्षणे च कार्यम्, अन्यथा प्रतिबन्धि कार्यसद्भावनिरूपणे कार्योत्पत्तेः प्राक्सद्भावस्य निरूपयितुमशक्यत्वात् कारणत्वानिश्चये कापि प्रवृत्तिर्न स्यादिति, तज्ज्ञातीयत्वस्यावश्यवाच्यत्वे विनश्यदवस्थं कथं सद्भावेनापि व्यवच्छेद्यम् अतः स्वरूपयोग्यतारूपा कारणता तत्रापि, कार्याभावस्तु सहकारिविरहात् अन्यथा निमित्तानां प्रत्येकं कार्यसद्भावनिरूपकत्वेन जनकत्वे गौरवं प्रागभावस्य प्रतियोग्यजनकत्वप्रसङ्गात् अन्यथा उत्पद्यो पि घटनरुत्पद्येत सामग्रीसत्त्वात् । न च स एव तत्र प्रतिबन्धकः अभावान्तरस्याकारणत्वेन तत्र कारणीभूताभाव प्रतियोगित्वरूपस्य प्रतिबन्धकत्वस्य प्रागभावकारणत्व एव विश्रामात् । न चैकसामग्री एकदा एकमेव कार्यं जनयति स्वभावादिति वाच्यं सामग्रीतरिहरूपस्य कार्यं तदभाव प्रयोजकत्वेन सामग्र्यां सत्यां कार्यस्य, तदभावे सामग्रीविरूपस्य कार्याभावस्य वक्तव्येपायितत्वात् । स्यादेतत् कर्त्ता शरीर्यैव ज्ञानमनित्यमेव बुद्धिरिच्छाद्वारैव ज्ञप्तिद्वारैवेच्छा हेतुरित्यादि प्राथमिकप्राग्प्रत्यक्षविरोधात् नाशरीरनित्यज्ञानादिकर्तृसिद्धिः । अतएव शरीरमनित्यमेवेति नियमान्न कर्तृत्वेन नित्यातीन्द्रियशरीरसिद्धिरीश्वरे । न चाप्रयोजकं निरूपाधित्वेन शङ्काकलङ्कानवतारात् कार्यत्वसकर्तृकत्वयोर्यदि निरूपाधिकत्वमस्ति तदापि तुल्यबलत्वेन सत्प्रतिपक्षात् तत्प्रतिबन्धोऽस्तु । न च कार्यत्वं पक्षधर्मतासत्त्वाद्बोधः कर्त्ता शरीर्यैवेत्यादौ तन्नास्तीति वाच्यं ज्ञानमनित्यमेवेति व्याप्तेरेव ज्ञानजन्यत्वविरोधित्वात् एवं कार्यं ज्ञानजन्यं ज्ञानमनित्यमेवेत्यनयोर्विरोध एव अविरोधे तु इदमपि स्यात् तथा च क्षित्यादौ शरीर्यनित्यज्ञान पर्यवसाने विरोध एव स्यात् । किन्तु ज्ञानमनित्यमेवेत्यादौ नित्यज्ञानादेरप्रसिद्धेः तदव्यावर्त्तकतया नोपाधिनिश्चयस्तदुद्भावनं वा कार्यत्वसकर्तृकत्वव्याप्तिदशायां शरीरव्यापारव्यभिचारात् उपाधेर्निश्चयः सुवचोवाच्यो तितत्र ज्ञानमनित्यमेवेत्यादिव्याप्तेरसिद्धेः विपक्षे बाधकाभावेनाप्रयोजकत्वात् निरूपाधिसहचारदर्शनव्यभिचारादर्शनादेव व्याप्तिग्रहः । निरूपाधित्वमेव विपक्षे बाधकमिति चेन्न अवयवीमहानेव तेज उद्भूतरूपमेवेत्यादि व्याप्तिग्रहात् परमाणुनेत्रादेरसिद्धिप्रसङ्गः । अतएव चाक्षुषत्वेऽनेकद्रव्यवत्त्वम्, साक्षात्कारे विषयेन्द्रियसन्निकर्षस्य हेतुत्वात् तन्मूलकविपक्षबाधकेन परमाण्वादिसाधकस्य बलवत्त्वात् परमाण्वादिसिद्धौ विरोधिव्याप्तेर्बाधः न तु वैपरीत्यं विपक्षे बाधकाभावेन तस्याबलवत्त्वादिति मन्यसे तर्हि ज्ञानादिकार्यकारणभावावधारणात् तन्मूलकविपक्षबाधकेन निष्कलङ्कव्याप्तिग्रहात् पक्षधर्मतायाश्च सहितात्यित्वज्ञानादिसिद्धौ व्यभिचाराच्च व्याप्तिः । अन्यथा साध्यं पक्षातिरिक्त एवेत्यादि निरूपाधिसहचाराद्व्याप्तिग्रहबलात् सकलानुमानोच्छेदः । वयन्तु ब्रूमः । पक्षधर्मतावलात्नित्यं ज्ञानं सिध्यत् बुद्धिरनित्यैवेति व्याप्तिग्रत्यक्षेण न प्रतिबध्यतेऽस्मदादिबुद्धिविषयकत्वेन भिन्नविषयकत्वात् एकविषयविरोधिज्ञानस्यैव प्रतिबन्धकत्वात् नित्यत्वानित्यत्वयोरेकजातीये द्वयेऽविरोधात् । बुद्धिमात्रेऽनित्यत्वावगमात् कथं तद्विशेषनित्यत्वबुद्धिरिति चेन्न बुद्धिमात्रेश्वरानीश्वरबुद्धिपरत्वे विरोधात् व्यभिचाराच्च अस्मदादिबुद्धिपरत्वे च भिन्नविषयत्वेनाप्रतिबन्धकत्वात् । बुद्धित्वं नित्यावृत्त्यैवेत्यवगतमतस्तत्र कथं नित्यवृत्तित्वावगम इति चेन्न उभयसिद्धनित्यावृत्तित्वावगतौ विरोधाभावात् । बुद्धित्वमनित्यत्वव्याप्यमवगतं नानित्यत्वाभाववति ज्ञातव्यमिति चेत् अनित्यत्वव्याप्यमनित्यमात्रवृत्तित्वं तत्र चोक्तमेव । एतेन कर्त्ता शरीर्यैवेत्यादावपि ज्ञानं प्रतिबन्धकमिति निरस्तम् । ननु कर्तृजन्यत्वे जन्यत्वं नावच्छेदकं किन्तु घटत्वादिकमेव तेनैव रूपेणान्वयव्यतिरेकात् आवश्यकत्वाच्च अननुगतमपि जन्यतावच्छेदकं वह्निजन्यतायां धूमत्वादिवत् । अथ घटत्वादिवज्जन्यत्वमवच्छेदकं न हि विशेषोऽस्तीति सामान्यमप्रयोजकं तथा च वह्निजन्यत्वे धूमविशेषः प्रयोज्योऽस्तीति न धूमसामान्यमग्निं गमयेत् तस्माद्विशेषयोः कार्यकारणभावः तत्सामान्ययोरपि बाधकं विना तथात्वनियमः । न तत्र बाधकाभावात् अत्र ज्ञानमनित्यमेवेत्यादि प्राथमिकबहुव्याप्तौ बाधात् तुच्छत्वेन व्याप्तिसंशयाधायकत्वात् । न च कार्यकारणभावमूलकत्वेन कार्यत्वव्याप्तिर्बलीयसीति वाच्यं विरोधिग्रहणेन कारणभावस्यैवासिद्धेः । एतेन धूमादौ वह्नितं जन-

कतावच्छेदकमनुगतं सम्भवतीति चेन्न जन्यत्वमनुगतमस्यतो बाधकं विना न सुच्यते इति, निरस्तम्। ज्ञानमनित्यमेवेत्यादिसहचारावसायस्य बाधकं विना पक्षधर्म्मव्याप्तिपर्य्यवसायितत्वेन बाधकत्वादिति मैवम् निरूपाधित्वेन सहचारावसायस्य साधकं बाधकं च विना साधारणत्वे व्याप्तिसंशयाधायकत्वात्। अन्यथा साध्यं पक्षातिरिक्त एव सुखं दुःखसंभिन्नमेवेत्यादि व्याप्तिग्रहस्य कार्य्यकारणभावव्याहकबाधकत्वे तत्संशायकत्वे वा कारणानुमानोच्छेदनिरीहं जगज्जायेत। तस्माद्विशेषयोः कार्य्यकारणभावस्तत्सामान्ययोः कार्य्यकारणभावो बलवता बाधकेनापनीयते, न चात्र तदस्ति विरोधिव्याप्तिसाधकस्य विपक्षबाधकस्याभावात्। नव्यास्तु कार्य्यं कर्त्तृजन्यमिति व्याप्तितोऽशरीरनित्यज्ञानकर्त्तृपस्थितौ ज्ञानमनित्यमेवेत्यनेन विरोधप्रतिसन्धाने न तु तां विना प्रतियोग्यनुपस्थितौ विरोधोऽनिरूपणात् तथा चोपजीव्यबाधात् ज्ञानमनित्यमेवेति व्याप्तिज्ञानमकिञ्चित्कर एव। अतएव पक्षधर्मतावलाक्षतं विरोधिव्याप्तिज्ञानं न हेत्वाभासतयोक्तं विरोधिप्रतियोगिसिद्ध्यधिकरणत्वादिति

स्यादेतत् अस्तु शरीरजन्यत्वमुपाधिः न च पक्षेतरत्वरूपविपक्षमात्रव्यावर्त्तकविशेषणत्वात् साधनविशेषितत्वात् साधनतुल्ययोगक्षेमत्वेन साध्यव्यापकत्वनिश्चयाच्च नोपाधित्वं, चेष्टेतरकार्य्येषु शरीरव्यापारद्वारैव कर्त्तुः कारणत्वात् नहि शरीरविनाकृतः कर्त्ता शरीरक्रियां घटादिकं वा जनयति! न च यत्सहकृतं यज्जनकम् तेन विना तज्जनकम् अतोऽव्याप्तेः शरीराजन्यमेव कर्त्तृजन्यमिति साध्यव्यापकत्वनिश्चयात्। पक्षेतरत्वादौ च विपक्षबाधकाभावाच्च साध्यव्यापकतानिश्चय इति तेषामनुपाधित्वे बीजम्। अत एव बाधोद्धोतं वह्नीतरत्वं वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभववह्निमत्त्वं रसवत्त्वेन गन्धवत्त्वे साध्ये पृथिवीत्वमुपाधिः विपक्षबाधकैक्षेयां साध्यव्यापकत्वनिश्चयात्। न च साधनविशेषितत्वमपि, जन्यत्वं प्रागभावप्रतियोगित्वं शरीरजन्यत्वञ्च शरीरकारणवत्त्वमन्यानिरुक्तेः इतरपदसमभिव्याहारेण जन्यपदादितरकारणकस्यैव प्रतीतिरिक्तदर्थत्वकल्पनादिति विधौ वक्ष्यते। अतएव शरीरिकर्त्तृकत्वमुपाधिः शरीरसहकृतस्यैव कर्त्तुः कारणत्वात् व्याप्यव्यापकयोश्चोरनिवेशयत एव प्रमाणस्य व्याप्तिग्राहकत्वात्। शरीरिकर्त्तृकत्वकर्त्तृकत्वयोर्न व्याप्तिग्रह इति चेन्न विशिष्टाविशिष्टभेदेन व्याप्यव्यापकभावाविरोधात्। अत एव जन्यत्वे कारणजन्यत्वमनुभीयत इति, नैवं कर्त्तुर्हि शरीरसहकारिता किं घटादौ कर्त्तव्ये कार्य्यमात्रे वा स्वकार्य्ये वा आद्ये कर्त्ता शरीरं विना घटादिकं न करोतीति किमायातं कर्त्तुः कार्य्यमात्रकरणे। द्वितीये च कार्य्यमात्रं कर्त्तृजन्यमिति न त्वया स्वीक्रियते स्वीकारे वा शरीराजन्यमपि कार्य्यं कर्त्तृजन्यमिति साध्याव्यापकत्वम्। तृतीये तु न स्वजन्यत्वं स्वजन्यतावच्छेदकमात्राश्रयात्। तथापि यत्र कर्त्तृत्वमस्ति तत्र शरीरजन्यत्वमावश्यकमिति तस्य साध्यव्यापकत्वं तुल्ययोगक्षेमत्वेन हेतुव्याप्यतासंशयाधायकत्वेन सन्दिग्धोपाधित्वं वेति चेन्न लाघवेन बाधकं विना कर्त्तृजन्यत्वे सति जन्यत्वमवच्छेदकं न तु शरीरजन्यत्वं गौरवात् तथा च शरीरजन्यत्वं न सकर्त्तृकत्वव्यापकं घटादौ त्वार्थः समाजः,घटत्वेन शरीरजन्यत्वनियमात् न तु व्यापकत्वप्रयुक्तो मानाभावात्. शरीरजन्यत्वं न सकर्त्तृकत्वव्यापकं तद्व्याप्यजन्यत्वाव्यापकत्वात् नित्यत्ववदिति बाधकात् इच्छादिनापि कर्त्तृत्वनिर्वाहेण शरीरस्याप्रयोजकत्वात् साक्षात्प्रयत्ननिश्चयजन्यत्वस्य साधनव्यापकत्वाच्च। शरीरिकर्त्तृकत्वमपि नोपाधिः जन्यमात्रे कर्त्तुः शरीरसहकारितानिरहात्। अथ यद्विशेषयोः कार्य्यकारणभावस्तत्सामान्ययोरपि बाधकं विना तथा नियम इति त्वया निरटङ्कि तथा च कर्त्तृविशेषशरीरजन्यविशेषयोः कार्य्यकारणभावनियमात् कर्त्तृमात्रशरीरजन्यमात्रयोरपि तथाभावः तथा च शरीरजन्यत्वं कर्त्तृतावच्छेदकमिति भवत्वुपाधिः। नचैवं घटवच्छरीरजन्यत्वं सकर्त्तृकत्वव्याप्यं न व्यापकमपीति वाच्यं उभयसिद्धसकलसकर्त्तृत्वदृष्टान्तेन साध्यव्यापकतानिर्णयात् जन्यत्वेऽपि सकर्त्तृकत्वव्यापकत्वव्याहकमस्तीति चेत्तर्हि उभयत्र व्याहकसाम्ये विनिगमकाभावात् व्याप्तिसंशयाधायकत्वेन सन्दिग्ध उपाधिर्व्याप्यत्वासिद्धिर्वा। हेतुव्याप्यतासंशयाधायक एव सन्दिग्धोपाधिः न च साध्यव्यापकत्वे साधनाव्यापकत्वे वा, उभयथैवासन्देहात्। न च वाच्यं शरीरजन्यत्वयोरन्वयव्यतिरेकज्ञाने जन्यत्वसकर्त्तृकत्वयोस्तदुपव्याव्यहक इति लाघवात् तयोरेव व्याप्तिग्रहो न तूपाधिसाध्ययोः हेतुसाध्ययोरन्वयव्यतिरेकज्ञानात् शरीरजन्यत्वानवगमेऽपि भवतीति विनिगमकमिति, यतो न कर्त्तृमात्रजन्यमात्रयोरन्वयव्यतिरेकाभ्यां व्याप्तिग्रहः कर्त्तृमात्रस्य व्यतिरेकाभावात्। किन्तु विशेषयोरन्वयव्यतिरेकेण कार्य्यकारणभावेन वा सामान्ययोरुपव्याहकत्वं च तुल्यादे-

चेति चेदुच्यते । अस्तु तावत् घटत्ववत् जन्यत्वशरीरजन्यत्वयोरपि कर्त्रजन्यतावच्छेदकत्वेन सकर्तृकत्वव्याप्यत्वं व्याकुलसमानत्वात् विनिगमनाभावाद्विरोधाभावाच्च सकर्तृकत्वव्यापकत्वन्तु शरीरजन्यत्वस्य कुतः, घटत्ववदव्यापकस्यापि जन्यतावच्छेदकत्वात् । उभयसिद्धसकर्तृकोऽन्वयव्यतिरेकाभ्यां शरीरजन्यत्वस्य व्यापत्वकथन इति चेन्न शरीरजन्यत्वविनिवेशत्वेन तल्लक्षणावेन प्रथमं कर्त्रजन्यत्वे जन्यत्वमवच्छेदकं लक्ष्यमिति तद्विरोधेन शरीरजन्यत्वस्य सकर्तृकत्वव्यापकत्वानवगमात्। अतएव न संदिग्धोपाधित्वम्। ननु घटादौ शरीरजन्यत्वे कर्त्रजन्यत्वमनुगतमवच्छेदकं बाधकाभावात् न च लाघवाद्घटत्वादिकमेव तथा, कर्त्तृजन्यत्वेऽपि जन्यत्वस्यातथात्वापत्तेः । एवं शरीरजन्यत्वस्य व्याप्यं सकर्तृकत्वं वह्नेर्धूम इवेति भवत्पाधिः । किञ्च कर्त्रजन्यत्वे जन्यत्वं शरीरजन्यत्वे वा सकर्तृकत्वमवच्छेदकमिति संशयेऽपि न क्षतेः साध्यव्याप्यतानिश्चय इति चेत्तर्हि घटादौ कर्त्रजन्यत्वे गृहीते तस्य शरीरावच्छेदकत्वं गृहीतव्यं घटे च घटत्वव्यजन्यत्वमपि बाधकं विना कर्त्रजन्यतावच्छेदकं गृहीतमतोऽजन्यमात्रे कर्त्रजन्यत्वाच्च शरीरजन्यत्वे तदवच्छेदकं प्रथमगृहीतोपजीव्यविरोधात् । अतएव न तस्य क्षतौ व्याप्तिसंशयाधायकत्वमपि । एतेनानणुत्वचित्यवयवत्वन्यत्वादय उपाधित्वेन निरस्ताः जन्यत्वस्य साध्यव्याप्यत्वेन तेषां साध्याव्यापकत्वात् । तथापि चित्यादिकं न कर्त्रजन्यं शरीराजन्यत्वात् श्यामवदिति सत्प्रतिपक्षोऽस्तीति चेत् न अस्य प्रसिद्धकर्त्रजन्यत्वाभावविषयकत्वात् अप्रतीतप्रतियोगिकस्याभावस्य निरूपयितुमशक्यत्वात् स्थापनानुमानस्य पक्षधर्मतावलात् प्रसिद्धकर्त्रभिन्नकर्तृकत्वसाधकमतोभिन्नविषयकत्वान्न प्रतिबध्यप्रतिबन्धकभावः । अतएव तद्व्यापकरहितत्वादिकमभावसाधकं बाधकमप्यस्तं तस्य प्रसिद्धाभावविषयकत्वेनाप्रसिद्धाभावाविषयकत्वात् । व्यक्तिसाधकस्य विशेषतोऽप्रसिद्धव्यक्तिसाधकत्वनियमात् अन्यथानुमानवैयर्थ्यात् । कर्त्रजन्यत्वमनुगतं घटादौ प्रसिद्धं यत् साध्यं तदभावो मया साध्यत इति चेत् कर्त्रजन्यत्वमनुगतमपि पक्षधर्मतावलेन प्रसिद्धं कर्त्तारमादाय पर्य्यवस्यति तदभावस्तु प्रसिद्धस्य कर्त्तुरभावमादाय सिद्ध्यति नाप्रसिद्धस्य अनुगतस्यापि कर्त्रजन्यत्वस्य तदभावस्य च, कर्त्रव्यक्तिघटितत्वात् अन्यथा व्यक्तितदभावासिद्धिप्रसङ्गात् । सर्वथा सत्प्रतिपक्षोच्छेदः तस्य गोत्वाद्येकभावाभावविषयकत्वात् । एतेन ज्ञानत्वं न नित्यावृत्ति ज्ञानमात्रवृत्तिधर्मत्वात् स्मृतित्ववत्, ज्ञानं न नित्यगुणवृत्तिगुणत्वव्याप्यजातियोगि चेतनविशेषगुणत्वात् सुखवत् "आत्मा न नित्यविशेषगुणाधारवृत्तिद्रव्यत्वापरजातिमान् विभुत्वात् गगनवदित्याद्यपास्तं, प्रसिद्धनित्ये व्योमादौ प्रसिद्धायाश्च रूपत्वजलत्वादिजातेर्व्यतिरेकविषयत्वात् अप्रयोजकत्वाच्च । किञ्च नित्यादौ शरीराजन्यत्वमसिद्धम् अदृष्टद्वारा तज्जन्यत्वात् नचादृष्टाद्वारकजन्यज्ञानाजन्यत्वं हेतुः ज्ञाने जन्यत्वविशेषणस्यावश्यार्थकतया व्यर्थत्वात् । न च स्थापनायां पक्षविशेषणेऽप्येष दोषः प्रमेयोघट इतिवत्तदुपरक्तबुद्धेरहेयत्वात् अपि च शरीराजन्यत्वे व्यर्थविशेषणत्वं लाघवेनाजन्यत्वस्यैव व्याप्यत्वात् । न च निष्प्रयोजनविशेषणमसिद्धं व्याप्रियमहीपयुक्तविशेषणवत्, पक्षधर्मतौपयिकविशेषणस्यापि सप्रयोजनत्वात् व्यभिचारवारकस्यापि सार्थकत्वे ऽनुमितिप्रयोजकत्वस्यैव बीजत्वात् । व्यभिचारवारकविशेषणवत्येव व्याप्रियमह इति चेत् न निर्विशेषणेऽपि गोत्वादौ व्याप्रियमहात् । तत्रापि व्यक्तिविशिष्टव्याप्रियमह इति चेन्न खतोव्याहृत्तगोत्वस्यावृत्तिव्यभिचारात् अन्यथानुपपन्नाश्रयात् । अपि च व्यभिचारवारकविशेषणवत्येव व्याप्रियमहस्यप्रयोजकं सहचारदर्शनादिसत्त्वे तदभावेन व्याप्रियमहाविलम्बात् । व्यभिचारावारकविशेषणशून्यएव व्याप्रियमह इति चेन्न प्रमेयत्वेन ज्ञायमानेधूमे व्याप्रियमहात् । अथ तत्रोपात्तव्यभिचारावारकविशेषणत्वं विवक्षितं न च तत्र प्रमेयत्वं विशेषणमुपात्तमिति चेन्न विरोधात् न हि तत्रोपात्तं तेन शून्यइति संभवति। यद्विषयकत्वेन परामर्शः कारणमनुभितौ तल्लिङ्गं प्रकृते च व्यभिचारादनुपपत्तिसिद्धेर्यं न विशेषणविषयकत्वेन तत्त्वमिति चेन्न धूमस्याप्यतत्त्वापत्तेः व्यभिचारात्तद्विषयत्वेनानुमित्यकारणत्वात् । अथैकमवच्छेदकमपरत्र व्याप्तिः यद्वा लाघवेन व्यासज्यवृत्तिरेकैव व्याप्तिरिति विशिष्टव्याप्त्यर्था तत्र विशेष्यतावच्छेदकस्य व्याप्यत्वावच्छेदकत्वं विशेषणस्य तदवच्छेदकत्वमिति नियमात् । एकवृत्तित्वबाधे सत्येव व्यासज्यवृत्तित्वमिति व्याप्तेश्च न शरीरजन्यत्वाभावे नीलधूमादौ च व्याप्तिरिति विशेषमात्रे सा, तथा च स्वरूपासिद्धिः । तद्वारणार्थं विशेषणाभिधाने व्याप्यत्वासिद्धिरिति चेन्न अव्यभिचारस्यानौपाधिकत्वस्य वा विशिष्टे नीलधूमादौ सत्त्वेन तद्व्यतिरेकसाधने बाधात् । न च विशेष्यत्वमुपाधिः साधनव्यापकत्वात्। किञ्च सौरभ-

विशेषवह्नुमरक्षितमिदं चन्दनप्रभववह्निरक्षितत्वात् निर्धूमोऽयमार्द्रेन्धनप्रभववह्निरक्षितत्वादित्यादावपि विशेषाभावेन कार्य्यविशेषानुमानं न स्यात् वह्निरक्षितत्वादिकञ्चोपाधिर्भवेत् व्यतिरेकिण्यद्रव्यातिरिक्तद्रव्यानाश्रितत्वं हेत्वभाववाप्यं न स्यात् द्रव्यानाश्रितत्वस्यैव व्याप्यत्वात् खमध्ये गन्धस्यैव वायुरूक्षत्वादित्यादौ त्वयाप्यसिद्धिवारकविशेषणस्वीकारात्। अपि च गौरवेण विशिष्टस्य व्यापकतापि न स्यात् तथा च स्थापनानुमाने उपादानगोचरापरोक्षज्ञानचिकीर्षाऽऽहितसंस्कारजन्यता धूमेनार्द्रेन्धनप्रभववह्निर्घटत्वेन शरीरजन्यत्वमपि नानुमीयेत। यत्तु जन्यज्ञानयोग्याभावमेत्यया शरीरजन्यज्ञानयोग्याभावस्याल्पत्वात्तेषामेव व्याप्यत्वमिति विपरीतमेव लाघवमिति तन्न विरोधाभावेन बहूनामल्पस्य च व्याप्यत्वात् स्नेहे शीतस्पर्शवत्त्वजलत्वयोर्गन्धाभावेऽपृथिवीत्वपृथिवीत्वाभावयोरिव। अन्यथा नीलधूमस्यैव व्याप्यत्वे धूमसामान्यस्याव्याप्यत्वप्रसङ्गः किञ्च तत्रापि बहुनयोग्याभावापेक्षया जन्यत्वात्यन्ताभावस्यैव व्याप्यता स्यात् एकत्वात् प्रमेयत्वाद्यनन्तधर्मविशिष्टे व्याप्त्यापि प्रयोजनाभावान्नानुमाने तदुपन्यासः। अथ लाघवेन जन्यत्वस्य शीघ्रोपस्थितिकतया जन्यत्वाभावत्वेन शीघ्रं व्याप्तिग्रहः न तु शरीरजन्यत्वाभावत्वेन विलम्बितप्रतीतिकत्वात्। यत्र विशेषणविशेष्यान्यतराभाववति साध्यं तत्र विशिष्टाभावस्यापि व्याप्तिरिति चेन्न एवं सति उत्पत्तिमत्त्वे सति सत्त्वादिकमनित्यत्वं सकर्तृकत्वव्याप्यतया न निर्गृह्येत शीघ्रोपस्थितिकतया घटत्वादेरेव तथात्वात्। यदि च सामान्यविशेषभावाद्विरोधाभावेन सोभयस्यापि व्याप्यत्वं तदा शरीराजन्यत्वजन्यत्वाभावयोरपि तुल्यम्॥ किञ्च शरीरं जन्यत्वं विशिष्यदृशावपि विशिनष्टि न तु साक्षात्, तथा च शरीरजन्यत्वाभावोऽखण्ड एव हेतुरतो न व्यर्थं विशेषणता। न चात्र विशिष्टाभावो विशेष्याभाव एव चित्त्वादावजन्यतापत्तेः। अतएव स्थापनायां शरीरजन्यत्वमुपाधिः साध्याभाववद्व्याप्याभावप्रतियोगित्वेन साध्यव्यापकत्वनियमात्। व्यर्थविशेषणेऽधिकं नियतस्थानमिति चेन्न हेतुद्वयोपन्यासे ह्याधिक्यम्। अत्र तु विशिष्टमेव हेतुरिति विरुद्धस्यैव उक्तमिति।

उच्यते। नीलधूमादौ वह्निरत्यैव अन्यथा विशेषाभावव्याप्यत्वे निराश्रया वह्निः स्यात् नीलत्वमपि न व्याप्यतावच्छेदकं गौरवात् किन्तु धूमत्वमेव दण्डत्वेन कारणत्वे रूपमिव धूमत्वञ्च न नीलत्वे किन्तु तदाश्रये धूमे इति न नीलधूमस्य हेतुत्वम् नीलधूमे नीलस्य विशेषणत्वे तद्विशिष्टे न धूमत्वम्, उपलक्षणत्वे च धूमत्वमिति। किञ्च। व्याप्यतावच्छेदकस्यैव हेतुतावच्छेदकत्वमिति न नीलधूमत्वं तथा। नचैवं धूमत्वस्यावच्छेदकत्वेऽपि सामग्रीसत्त्वात् नीलधूमादनुमित्युत्पत्तौ हेत्वाभासत्वं न स्यात् अनुमितिप्रतिबन्धकस्य तत्त्वादिति वाच्यं तदभावेऽपि नीलधूमप्रयुक्तसाध्यवत्प्रत्ययस्य भ्रमत्वेन तत्कारणत्वस्याभासत्वसम्भवादितिदिक्॥ एवञ्च शरीराजन्यत्वेऽपि न शरीरमवच्छेदकं गौरवात् येन विशेषेण विना व्याप्तिर्न गृह्यते तस्यैव व्याप्यतावच्छेदकत्वनियमात्। अतएव गन्धस्यैव वायुरूक्षत्वादित्यत्राप्रसिद्धेन गन्धादिषु मध्ये इति विशेषणं विना व्याप्तिर्ग्रहीतुं न शक्यते इत्यसिद्धिवारकं विशेषणं सार्थकमेव। सुरभिधूमविशेषादौ च चन्दनप्रभवाग्न्यादेः कारणत्वात् कारणाभावस्य कार्य्याभावप्रयोकतया व्याप्यनिश्चयः व्यापके च न व्यर्थविशेषणता विशिष्टस्य कारणत्वेन व्यापकत्वात् विशेषव्यतिरेकिण्यंशे विपक्षबाधकेनानन्यगतिकतया विशिष्टस्य व्यापकत्वात् विशिष्टाभावस्य हेत्वाभाववाप्यत्वं यत्र च विपक्षबाधकं नास्ति तत्र विशिष्टस्य व्यापकतापि न, यथा सकर्तृकत्वे। नापि शरीरजन्यत्वाभावोऽखण्डोहेतुः यदि हि शरीरजन्यत्वं सकर्तृकत्वप्रयोजकं स्यात् तदा तदभावप्रयुक्तः सकर्तृकत्वाभाव इति तस्य साध्यव्याप्यता स्यात् न चैवम्, जन्यत्वं लाघवात्तथा। तथा चाजन्यत्वमेवोपाधिः साध्यव्याप्याभावः साध्याभावव्यापक इति नियमेन तस्य साध्यव्यापकतानिश्चयात् सकर्तृकत्व शरीरजन्यत्वयोर्व्याप्यप्रभावेन तदभावयोरपि व्याप्यप्रभाव इति व्याप्यत्वासिद्धत्वाच्च। अतएव शरीरजन्यत्वाभावस्याकर्तृकत्वव्याप्यत्वात् तदभावयोरपि व्याप्यव्यापकभाव इति निरस्तम् शरीरजन्यत्वस्य सकर्तृकताऽप्रयोजकत्वं तु न चाजन्यत्वं पूर्वसाधनव्यतिरेकत्वेन नोपाधिः सत्प्रतिपक्षोच्छेदप्रसङ्गादिति वाच्यं स्थापनायां यत्राभासत्वं तत्र विशेषादर्शनदशायां सत्प्रतिपक्षे पूर्वसाधनव्यतिरेकस्य साध्यावव्यापकत्वेनानुपाधिकत्वात् यथा शब्दोऽनित्योगुणत्वादित्यत्र शब्दोनित्यो व्योमैकगुणत्वादित्यादिना सत्प्रतिपक्षे गुणत्वाभावो नोपाधिः जलपरमाणुरूपे साध्यावव्यापकत्वात्। नचैवमनैकान्तिकत्वमेव तदोद्भावयं सत्प्रतिपक्षमुपेक्ष्य तस्योद्भावानर्हत्वात्। किञ्च प्रागभावप्रतियोगित्वे सति समवेतत्वस्य तत्प्रतियोगित्वे सति

सत्त्वस्य, सत्त्वे सति उत्पत्तिमत्त्वस्य वा हेतुत्वे, एवमन्यत्रापि व्यतिरेक उपाधिरिति न पूर्वं साधनव्यतिरेकः। अत एव जन्यत्वस्य नोपाधित्वं ध्वंसे साध्याव्यापकत्वादिति न दोषः। अन्ये तु यद्विषये यद्विरूपिता व्याप्तिर्येन निषेधेन विना न घटते तत्र विशिष्टं व्याप्यतावच्छेदकम् अकर्तृकताभावनिरूप्यायां च शरीरं विनैव प्रतियोगितया जन्यत्वमवच्छेदकं कल्प्यमिति न शरीरजन्यत्वमवच्छेदकं धूमे नील इव अतोगौरवेण शरीरजन्यत्वं सप्रतियोगितया नावच्छेदकमिति व्याप्यतावच्छेदकाभावाच्च शरीरजन्यत्वाभावोऽकर्तृकत्वव्याप्यः। व्यभिचाराभावात्तथेति चेन्न चित्यादावव्यभिचारात्, अन्यथा चित्यादिकं नाऽदृष्टहेतुकं शरीरजन्यत्वाभावादित्यपि स्यात्। नन्वस्तु तावदशरीरनित्यज्ञानादिकर्तृत्वानुमितिस्तथापि सानुमितिरयथार्थैवाशरीरे कर्तृत्व ज्ञानत्वात् ज्ञानेच्छायत्नेषु नित्यज्ञानत्वात् शरीराजन्ये सकर्तृकत्वज्ञानत्वात् घटः कर्त्रा घटज्ञानादिकं नित्यं व्योम सकर्तृकमितिज्ञानवदिति साध्यं, नचोपजीव्यबाधः अनुमितिर्ह्युपजीव्या न तु तद्यथार्थमपीति चेन्न कर्तृकार्यत्वयोर्निरुपाधिकार्यकारणभावेन तस्याप्रयोजकत्वात् अन्यथा पर्वते वह्न्यनुमितिरयथार्था उभयसिद्धवह्निमद्भिन्ने वह्नित्वज्ञानत्वादित्यादिना सकलान्वयव्यतिरेक्युच्छेदः। किञ्चानुमितेरयाथार्थ्यमनेन ज्ञाप्यं, न तु कार्यं, तथा च दोषादुत्पन्नस्यानेन ज्ञापने तत्रायमेव दोषोदोषान्तरं वा नाद्यः अन्योन्याश्रयात् उत्पन्ने तस्मिन् ज्ञापनं ज्ञापकादेव तस्माद्दोषात्तदुत्पत्तिरिति। नान्त्योऽसिद्धेः। तर्कापरिशङ्कितस्तु न दूषणम्, यदीश्वरः कर्त्ता स्यात् शरीरी स्यात्, प्रयोजनवान् अनित्यज्ञानवान् स्यात्, चित्यादि सकर्तृकं स्यादिति तर्कांशे विपर्यये ज्ञात्र्याश्रयासिद्ध्यर्थविशेषणतादिना विपर्यायपर्यवसानेनाभासत्वात्।

ननु चित्यादावेककर्तृसिद्धिः कुतः ? एककर्तृकत्वेन व्याप्त्यभावात् न च लाघवात्, तस्याप्रमाणत्वात्। सकर्तृकत्वमानादेव तत्सिद्धिरिति चेत् न तावदनुमितिमात्रे लाघवं सहकारि, व्यभिचारात् मानाभावाच्च न हि लिङ्गपरामर्शे सति तद्विलम्बेनानुमितेर्विलम्बो येन तत् सहकारि स्यात्। नापि लब्धानुमितौ, अन्योन्याश्रयात् नापि वह्न्यनुमितौ धूमेन वह्न्यनुमितावेकत्वादिसंशयाभावापत्तेः। साधकाभावेन नानात्वासिद्धौ कर्तृसिद्धेरेवैककर्तृसिद्धिरिति चेत् न एकत्वसाधकाभावेनैकत्वासिद्धौ कर्तृसिद्धिरेव नानासिद्धिरित्यस्यापि सुवचत्वात्। अथ यमनालम्बमानानुमितिः पक्षे न साध्यसंसर्गं विषयीकरोति स पक्षधर्मतावलात् सिद्ध्यति न त्वधिकमपि तथा च द्वितीयं कर्त्तारं न विषयीकुर्वत्यपि कर्त्तारं विषयीकरोत्येवेति न द्वितीयमवगाहते। एकस्तु कर्त्ता सिद्ध्यति तद्विषयत्वेन कर्तृविषयैव न स्यात् एकविषयत्वाभावेन नानाविषयत्वाभावस्याप्यभावात् तदुपटितत्वात्तस्येति चेदेवं तर्हि कर्त्रैकत्वमपि न विषयः स्यात् एकत्वविषयत्वं विनापि कर्तृविषयत्वसम्भवात्। वस्तुगत्यैकः सिद्ध्यति नत्वेकत्वेनेति चेन्न एकत्वासिद्धा वस्तुगत्यैक इति ज्ञातुमशक्यात् तथा चेश्वरे एकत्वानेकत्वयोर्नित्यसंशय इति।

उच्यते। यत्र प्रमाणे लघुगुरुविषयता सम्भवति तत्र लाघवसहकारेण कार्यतात्पर्याग्रहे प्रत्यूहोत्तिनिमित्तग्रहके उपमाने शब्दशक्त्याग्रहकेऽनुमाने च तथाविधप्रमाणमात्रे च सकलतान्त्रिकैः सहकारित्वकल्पनात् एवं लाघवमेवं गौरवमिति ज्ञानानन्तरं बाधकं विना लघुनामेव कारणत्वकार्यत्वव्याप्यत्वप्रवृत्तिनिमित्तत्वशब्दशक्त्यादीनां ज्ञानदर्शनात्। तत्रापि लाघवानादरे शब्दशक्त्यादिसंशये तन्मूलकव्यवहारोच्छेदो विनिगमकाभावात्, सोऽयं विचारमारभते लाघवञ्च तदङ्गं नाङ्गीकुरुते इति सङ्गावाग्रहम्। नन्वेवं वस्तुगत्या नानाकर्तृकेषु घटत्वेन कुलालकर्तृकत्वानुमानेऽपि बाधकानवतारदशायां लाघवादेककर्तृसिद्धिः स्यात् न चेदापत्तिः अनुमित्यनन्तरं नानात्वैकत्वे संशयादिति चेन्न तत्रापि लाघवेन कर्त्रैक्यमेव सिद्ध्यति तत्सन्देहस्तु ज्ञानप्रामाण्यसंशयादिति यत्र ज्ञानाकर्तृकत्वसाधकप्रमाणादेवैककर्तृकतात्ज्ञानं तत्र बाध्यते न चैवं चित्यादिकर्तृक्यपि प्रामाण्यसंशयादेकत्वानेकत्वसंशयोदुरुच्छेदः एकत्व बाधकस्याभावेन प्रामाण्यनिश्चयात्। नचैकत्वसाधकाभाव एव बाधः, अनुमितेरेव लाघवसहकारेणैकत्वसाधनात्। अन्ये तु चितिकर्त्ता अङ्कुरकर्त्रभिन्नः अशरीरकर्तृत्वात् अङ्कुरकर्तृवदित्यभेदानुमानादेव कर्तृसिद्धिः न च चितिकर्त्ता अङ्कुरकर्तृभिन्नः अङ्कुराकर्तृत्वात् कुलालवदिति सत्प्रतिपक्षः अनित्यज्ञानानाश्रयत्वस्योपाधित्वादित्याहुः तत्राप्रयोजकत्वे भेदाभेदसंशयौगौरवलाघवे एव शरणम्।

तथापि कथं नित्यसर्वविषयज्ञानसिद्धिः। पक्षधर्मताबला-

दिति चेत् व्यापकत्वाप्रहात् न च विनानुपपत्तिं सोऽपि विषयः व्यतिरेकविलयापत्तेः । अत्र प्राञ्चः यमर्थमनालम्बमानानुमितिः पक्षे साध्यसम्बन्धं विषयीकरोति स पक्षधर्मताबलात् सिद्ध्यतीति प्रतीत्यनुपपत्तिमूलकोऽन्वयी प्रतीत्यनुपपत्त्या च व्यतिरेकी तदिच्छानादिद्व्यणुकादि प्रवाहस्य पक्षत्वे तदुपादानस्यानादिज्ञानगोचरत्वं विनानोपादानगोचरज्ञानजन्यत्वमनादिकार्य्यप्रवाहस्यानुमिति रालम्बते अनादितैव च नित्यता सर्वसङ्कावपि तल्लक्ष्यमनादिभावत्वात् पक्षतदुपादानविषयतैव सर्वविषयता लाघवात्तु तावद्विषयकमनाद्येकमेव ज्ञानं सिद्ध्यति न तु नित्यानि नानाज्ञानानीति । नव्यास्तु अनित्यज्ञानाजन्यत्वेन पक्षविशेषणात् ज्ञानं सिध्यत् नित्यमेव सिद्ध्यति अनित्ये बाधात् । वाचस्पतिमिश्रास्तु लाघवादेकज्ञानसिद्धावुत्पत्तिमतोऽनादिकार्य्यप्रवाहं प्रत्यजनकत्वात् परिशेषेण नित्यज्ञानादिसिद्धिः नियतविषयता च ज्ञानस्य कारणाधीना कारणञ्च नित्यज्ञानान्निवर्त्तमानं नियतविषयतामादाय निवर्त्तत इति सर्वविषयत्वसिद्धिरिति । षट्पदार्थीप्रतिपादकवेदकर्त्तृत्वेन ईश्वरस्य षट्पदार्थीगोचरसाक्षात्कारवत्त्वेन वा सार्व्वज्ञ्यं घटाकाशसंयोगं प्रतीश्वरस्य कर्त्तृत्वात् घटादिगोचरमपि ज्ञानं सिद्ध्यतीति केचित् । नन्वीश्वरस्य कथं घटकर्त्तृकः कार्य्यत्वात् क्षितिवदिति चेन्न घटस्य द्विकर्त्तृकतया तदृष्टान्तेन क्षित्यादेरपि द्विकर्त्तृकतापत्तेः तथा च घटवत् क्षितिः क्षितिवदृष्ट इतीश्वरानन्यकार्य्यकर्त्तृत्वेन कारणता न तु द्विकर्त्तृकत्वेनेति चेत् तर्हि नेश्वरकर्त्तृकत्वेन कारणता किन्तु कर्त्तृत्वेनेति मैवं ज्ञानादीनां नित्यत्वेन सर्वविषयतया घटाद्युपादानविषयत्वसंपीति कथं न तेषां घटादिकारणत्वं कुलालादिज्ञानतुल्यत्वात् । तदाहुराचार्याः "परमाणुदृष्टादिभ्रान्तसिद्धौ ज्ञानादीनां नित्यत्वेन सर्वविषयत्वे वेत्यादिज्ञानस्यापि नाशप्राप्तत्वात् न तु तदधिष्ठानार्थमेवेश्वरसिद्धिरिति "अहं सर्वस्य प्रभवोमत्तः सर्वं प्रवर्त्तते इत्यागमाच्चायमर्थोऽवसेयः । अथेश्वरस्य सर्वज्ञत्वे सर्वविषयभ्रान्तेर्ज्ञाने ईश्वरोऽपि भ्रान्तःस्यात् भ्रमस्यैव तस्यापि भ्रमविषयविषयकत्वादिति चेत् रजतत्वप्रकारकज्ञानवानयमिति ज्ञानं न भ्रमः अभ्रान्तस्य तथात्वात् । इदं रजतमितिज्ञाने रजतत्वं प्रकारः तेन स भ्रमः ईश्वरज्ञाने च रजतत्वप्रकारकत्वं प्रकार इति न भ्रमः अतएवास्मदादिरपि भ्रान्तिज्ञो न भ्रान्त इति । स्यादेतत् प्रयोजनं विना कथमीश्वरः प्रवर्त्तते ? सुखस्याभावात् अधर्म्माभावेन निर्दुःखत्वात् । करुणया प्रवर्त्तते इति चेत्तर्हि परदुःखदुःखप्रहाणे प्रयोजने तथा च सुखिनमेव सृजेन्न नारकिणम् । धर्माधर्मपरतन्त्रत्वात् तदनुरूपं फलं प्रापयतीति चेत्तर्ह्यवश्यकत्वात् कर्मनिर्मितमेव जगदीश्वरस्तु किमीश्वरेण अनपेक्षितकीटादिज्ञानवता कर्मनिरपेक्षत्वे चैकदैव सदा च सर्गप्रलयौ स्यातां ज्ञानादीनां नित्यत्वात् किञ्च तत्प्रयत्नस्य करुणाजन्यत्वेन शरीरादिजन्यतापत्तौ संसारितापत्तिः न । ईश्वरानभ्युपगमेन विचारस्याश्रयासिद्धत्वात् तमभ्युपगम्य पृच्छसि चेत् आकस्मिकं जगतएव तदिच्छाविषयत्वेन स्वेष्टसाधनताज्ञानसत्त्वात् । वस्तुतस्तु क्षित्यादितत्तदसाधारणक्रमिकादृष्टादिसामग्री ईश्वरज्ञानाद्यो यदा यदा भवन्ति क्षित्यादिकं करोतीति व्यवहारः सर्गप्रलयासाधारणक्रमिकादृष्टादिसामग्रीसमयवर्त्तित्वमेव तदिच्छायाधिकीर्षासंज्ञिकीर्षात्वे नचैवं किञ्चिज्जन्यज्ञानादिनेति वाच्यं क्षित्यादीनां कार्य्यत्वेन ज्ञानजन्यतया नित्यज्ञानादीनामपि जनकत्वं सुखादिवज्ज्वरोरात्माकाशादिवत् । नन्वशरीरात् कथं वेदघटादिशब्दव्यवहारसंप्रदायः । उच्यते सर्गादावदृष्टोपस्थापितभूतभेदाल्लीनशरीरोत्पत्तावदृष्टवदात्मसंयोगाददृष्टसहकृतप्रयत्नवदीश्वरसंयोगाद्वा सकलवेदार्थगोचरज्ञानाद्विवक्षासहितान्नीनकलेवरकण्ठतालुवादिक्रियाजन्यसंयोगाद्वेदोत्पत्तिः। एवं कुलालादिशरीरावच्छेदेनादृष्टसहकृतप्रयत्नवदीश्वरसंयोगात्तद्घटीच्छासहितचेष्टोत्पत्तौ सकलघटानुकूलव्यापारो घटोत्पत्तिः । एवं प्रयोज्यप्रयोजकज्ञानाय व्यापाराभिमतशरीरावच्छेदेनापि अदृष्टसहकृतेश्वरज्ञानेच्छाप्रयत्नादेव वाग्व्यवहारः, ततस्तत्सुशीलो बालोऽप्युत्पद्यते सोऽयं भूतावेशन्यायः । यत्तु यथा क्षित्यादिना शौनिष्कोकोऽनुमाय पक्षते तथा सर्गान्तरोत्पन्नतत्त्वज्ञानवता भोगार्थं सर्गादावुत्पन्नेन मन्वादिना सर्वज्ञेन ईश्वराभिप्रायस्यवेदः साक्षात्कृत्यानूद्यते ततोऽयमसंप्रदायः स एव कार्यमूहं कृत्वा वाग्व्यवहारं करोतीति मतं तच्च प्रतिसर्गाद्यनन्तसर्वज्ञकल्पनायां गौरवात् तेषामेव क्षित्यादिकर्त्तृत्वसम्भवेन ईश्वरानुगमाच्च । एतेन सर्गादौ सर्गान्तरसिद्धयोगिनएव क्षितिकर्त्तारः सन्त्विति निरस्तं सर्गादावनन्तसर्वज्ञसिद्धिश्च किं प्रमाणान्तरात् क्षित्यादिकर्त्तृत्वाक्षेपाद्वा नाद्यस्तदभावात् नान्त्यः अनादिद्व्यणुकादिकार्य्यप्रवाहस्य सकर्त्तृकत्वानु-

मानादृलाघवसहकृतादेकस्यैव सर्वत्रस्य सिद्धेः ॥ अथेश्वरज्ञानमूलकशब्दशक्तिपक्षे प्रयोज्यव्यापारानुमितघटज्ञाने घटशब्दस्य कारणतापक्षोभ्रमः स्यात् तदीयज्ञानस्य नित्यत्वात् तथा च तज्जन्यघटशब्दशक्तिग्रहस्य भ्रमत्वे सकलशब्दज्ञानं भ्रमःस्यात् भ्रमपरम्परामूलकत्वात् अनित्यसर्वज्ञमूलकशब्दत्वपक्षे च नायं दोष इति चेन्न व्यापारानुमितमिदं घटज्ञानं घटपदजन्यमिति ज्ञानस्य शब्दशक्तिग्रहकारणस्य भ्रमत्वेऽपि घटपदं घटशक्तमिति ज्ञानस्य यथार्थत्वात् विषयाबाधात् न च भ्रममूलकत्वेन तस्य भ्रमत्वमनुभवेन तदंशे व्याधिकरणप्रकाराभावेनाबाधात् बाधितविषयत्वस्योपाधित्वाच्च । अत्र घटमानयेति शब्दानन्तरं खलसङ्गाराधिष्ठितदारुफलस्य घटानयनव्यवहारदर्शनाद्वालो घटपदे व्युत्पद्यते तन्मूलकशाब्दज्ञानमपि न भ्रमः तस्यापि भ्रमत्वे प्रयोज्य व्यवहारादिदानीं व्युत्पत्तिर्न स्यात् किमयं प्रयोज्यश्चेतन व्यवहाराद्व्युत्पद्योऽचेतनव्यवहाराद्वेति संशयस्य वज्रलेपायमानत्वात् ॥ "विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतः पात् । सं बाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन्देव एकेत्यादि श्रुतयः" । "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । योलोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः" इत्यादयः स्मृतयश्च बहुलीभानत्वेनानुसन्धेया इति" ।

खण्डनलक्षणं तु ईश्वरविषये प्रश्नाद्यनुपपत्त्युपन्यासेन व्यतिरेकमुखेन ईश्वरस्य प्रामाणिकत्वमुररीकृतं यथा 'तथाहीश्वरसङ्गावे किं प्रमाणमिति ब्रूयाः प्रतिवक्तव्यः किंशब्दोऽयमाक्षेपार्थो वाऽकुत्सितार्थो वा २वितर्कार्थो वा ३प्रश्नार्थो वा ४स्यात् । तत्र यदि प्रथमः पक्षः तदेश्वरसङ्गावे नास्ति प्रमाणमित्युक्तं स्यात् तथा च सति न प्रतिज्ञामात्रात्साध्यसिद्धिरिति हेत्वादिकं वाच्यं भवति । तच्च भवता नाभ्यधायि तस्माच्छून्यत्वं दोषः । अतएव न द्वितीयः, ईश्वरसङ्गावे कुत्सितं प्रमाणमित्यस्यापि प्रतिज्ञामात्रत्वात् । अपि च साध्यासाधकत्वाद्वा तत् कुत्स्यते भवता अन्यथा २वा । अन्यथा चेदलं तदुद्भावनया साध्यसिद्धेरप्रत्यूहत्वात् । नापि प्रथमः प्रमाणञ्च साध्यासाधकञ्चेति व्याघातात् । गौणोऽयं प्रमाणशब्द इति चेन्न प्रमाणत्वयोगिनि वक्तव्यं प्रमाणशब्दप्रयोगः तदा गौणताव्याघातः सुस्थत्वात् । अथ प्रमाणाभासे तदा, अलन्तदुद्भावनया ईश्वरसङ्गावे यः प्रमाणाभासः स कुत्सितश्चात्र परस्यापि सम्मतिपन्नत्वात्, ईश्वरसङ्गाव इति च विशेषोपादानं व्यर्थं स्यात् अन्यत्रापि हि विषये प्रमाणाभासः कुत्सितएव साध्यासाधकत्वात् । नापि तृतीयः तथा सति हि वितर्कस्य पक्षान्तरसापेक्षत्वेन पक्षान्तरमपि वचनीयं भवति ईश्वरसङ्गावे किमेतत् प्रमाणमस्तान्यदिति तच्च ? भवता नाभ्यधायि अतो न्यूनत्वं दोषः । नापि चतुर्थः प्रश्नार्थात् खलु किंशब्दात्कस्यचित् पदार्थस्य जिज्ञास्यमानता प्रतीयते सा चेह प्रमाणपदसमभिव्याहारात् प्रमाणविषयिणी प्रतीयते यद्विषयश्च प्रश्नस्तदुत्तरवादिनाभिधेयं तत् । अयं प्रश्न ईश्वरसङ्गावे प्रमाणसामान्यविषयस्तद्विशेषविषयो वाभिप्रेत आद्यचेदीश्वरसङ्गावे प्रमाणमित्येवोत्तरमापद्येत यद्विषयो हिप्रश्नस्तदभिधेयं, प्रमाणसामान्यविषयश्च प्रश्नः तच्च प्रमाणशब्देनाभिधीयतएव । अथ द्वितीयः तथापीश्वरसङ्गावे प्रमाणमित्येवोत्तरमापद्येत यथा प्रश्नवाक्ये प्रमाणशब्दविशेषपरस्तथोत्तरवाक्येऽपि । कोऽसौ विशेषइति चेन्न पूर्ववदुक्तोत्तरत्वात् । किञ्च अस्यापि प्रश्नस्य विशेषोविषयः किंशब्दस्य विशेषशब्देन सामानाधिकरण्यात् तथाच सति विशेषएवोत्तरं स्यात् । स्यादेतत् विशेषशब्देन न विशेषमात्रमनिर्द्धारितमत्र विवक्षितं किन्त्वसाधारणो व्यक्तिरूप विशेषशब्दस्य तात्पर्यं तस्मात्कासावसाधारणो प्रमाणव्यक्तिरिति प्रश्नार्थः तत्र च ताडक्षाः प्रमाणव्यक्तेरभिधानमुत्तरं युक्तं नैवंविधाः प्रलापाइति नैतदेवं यतोऽत्रापि विशेषशब्देनोत्तरम् यथा प्रश्नवाक्यगतस्य विशेषशब्दस्य सर्वतोव्यावृत्तस्वरूपायां प्रमाणव्यक्तौ तात्पर्यं तथोत्तरवाक्यस्थितस्यापि । एवञ्च सति यत्र विषये भवदीयस्य प्रश्नवाक्यस्य तात्पर्यं तदेवाक्षाक्षसुत्तरवाक्येन प्रतिपादितमिति युक्तमुक्तम् । अथ मन्यसे किमिह प्रमाणमिति पृच्छतोऽयमभिप्रायः अत्राचैंऽनुमानं प्रमाणमितरद्वेति । अत्राप्यनुमानमित्युत्तरमयुक्तम् । किं तदनुमानमिति चेत् । अयमपि प्रश्नोऽनुमानमात्रविषयः उत तद्विशेषविषय इति विकल्प्य प्रमाणप्रश्नवदुत्तरं वाच्यमिति । अत्र च संग्रहश्लोकौ । "यथाविधं यं विषयं नियम्य प्रश्नस्य निर्वक्ति परो यथोक्ता । वाच्यस्तथैवोत्तरवादिनापि तथैव वाचा स तथाविधोऽर्थः । प्रश्नस्य यः स्याद्विषयः स वाच्यो वाचा तथा चैव भवेद्विरुद्धः । इदं त्वयाध्यास्तमेतयैव गिरा स्वपक्षाविषयस्य वक्ता ।" प्रश्नार्थाश्च किंशब्दाज्जिज्ञासाविषयतार्थस्य प्रतीयते जिज्ञासा च ज्ञातुमिच्छा इच्छा च नाज्ञाते भवतीतिप्रसङ्गात् तस्मादीश्वरविषयं प्रमाणं ज्ञातुमिच्छता तत्र स्वज्ञानमिच्छाकारणीभूतं वक्तव्यं तदर्थमर्थं

यथार्थं वा स्यात् यथार्थश्चेत् तर्हि तेनैव ज्ञानेन स्वकीयो विषयः प्रमाणमुपस्थाप्यते विषये प्रमाणप्रवृत्तिमन्तरेण तदीययथार्थत्वस्य वक्तुमशक्यत्वात्। तेनापि प्रमाणेन स्वगोचरेश्वरसद्भाव उपस्थाप्यतदुत्थानायासेनैव सिद्धोऽस्माकमीश्वरसिद्धिमनोरथः। अथायथार्थं तत्राप्यस्मियथार्थज्ञानविषये यद्यस्माभिरयथार्थमेव ज्ञानमुत्पादनीयमिति भवतः पृच्छतोवाञ्छितं तदा ज्ञेयं स्वाधीनेऽर्थे परामर्शो भवानेवायथार्थज्ञानोत्पादनकृयक्लेशवैयर्थकं तत्र मिथ्याज्ञानमजोजनत्वया परमभ्युपादयतु वयं पुनर्यथार्थज्ञानमुत्पादयितारोमिथ्याज्ञाने सर्वथैवाकृतिनः किमिह नियुज्यमहीति। अथ मदीयस्यायथार्थज्ञानस्य योविषयः स मदीययथार्थज्ञानविषयोभवता क्रियतामिति त्वदीयं वाञ्छितं तदा व्याघातादीदृश्यर्थे भवतः प्रवृत्तिरेवानुपपन्ना शुक्तिका रजतत्वेन मम यथार्थज्ञानविषयोभवत्विति तदर्थं प्रेक्षावान् कथङ्कारं प्रयतेत येन रूपेणायथार्थज्ञानविषयत्वं तेनैव रूपेण यथार्थज्ञानविषयत्वे व्याघातात्। अथ मन्यसे स्वसिद्धान्तमनुरुध्यानेन त्वया यथार्थज्ञानं तत्रोत्पादनीयमतस्तदर्थं भवानत्नुयुज्यतइति। सैवम् यदीश्वरसद्भावविषयोभवता प्रमाणाभासः प्रमाणतया भ्रान्त्या प्रतीतः तस्य प्रमाणत्वं अस्माभिर्व्युत्पादनीयमिति नास्माकमीदृशः सिद्धान्तः प्रत्युत ईश्वरसद्भावविषयं यत्प्रमाणं भवता प्रमाणाभासत्वेन भ्रान्त्वा प्रतीतमस्ति तत्प्रमाणमेवेति। स्यान्मतम् ईश्वरसद्भावविषयस्य प्रमाणस्य भवता ज्ञापनमावश्यं क्रियतामित्यभिमतं पृच्छतामस्माकं, नतु प्रमाणेना प्रमाणेन वेति विशेषोऽभिमतइति, न ज्ञापनमात्रस्याप्रमाणज्ञानमादायाप्युपपत्तेः तत्र स्वाधीने ज्ञेयं परामर्शेत्वाद्युक्तमनुषङ्गनीयम्। स्यादेतत् ज्ञेयमीश्वरसद्भावविषया प्रमाणप्रतीतिरस्माकमुत्पन्ना सा व्यभिचारिणी सत्या वेति संशयोऽस्माकं तेनैकपक्षनिर्द्धारणाधीनं यदिदं दूषणमवादि भवता तद्विरुद्धमापद्यतइति नैतदस्ति एवं हि तस्यां प्रतीतौ यथार्थत्वायथार्थत्वसंशयेन तस्याः प्रतीतेर्गोचरो यत्प्रकारं तस्यापि योऽसौ विषयरेश्वरसद्भावस्तत्र सर्वत्रैव संशयानस्य भवतः प्रश्नोऽयं नतु विप्रतिपन्नस्येति स्यात् तथाच स्वीकृत मिथ्याभावं प्रसादय चिरं चरणशुश्रूषाभिरस्मान् ज्ञेत्स्यामस्ते संशयमिति। विप्रतिपन्नाएव वयमाक्षार्थाः संशयोऽस्माकमिति चेत् तर्ह्यवधृतैककोटयएव यूयं कार्यान्तरोधात्तु संशयमानस्यामङ्गं दुरुक्तं स्यात् एवं तर्हि तदेव कोऽवधारयं यथार्थमयथार्थं वेति विकल्पोक्तयुक्त्या दूषणीयम्। एतेनानध्यवसायेन तदस्माभिः प्रतिपन्नमित्यपि निरस्तं वेदितव्यं, व्यभिचारिविषयमव्यभिचारिविषयं वा तदिति विकल्प्याभ्यां तस्यापि प्रस्तुत्वात् "परस्परविरोधे हि न प्रकारान्तरस्थितिरिति" न्यायात्। एवमीश्वराभिसन्ध्यादावपि तत्तत्स्थाने तिङन्तपदेनासाधारणरूपकथनमनुसर्तव्यम्" । तृतीयः परिच्छेदः ।

"ननु तथापि भावात्मके तस्मिन्नीश्वरे विधायकं किञ्चित्प्रमाणं वक्तव्यमिति चेत् किं पुनर्भावत्वं विधित्वमिति चेन्न पर्यायाप्रश्नात्। स्वरूपसत्त्वमिति चेत् अभावस्यापि तथाभावात् प्रतिस्वं व्यावृत्तत्वेनानुगतत्वापत्तेश्च। अस्तीतिप्रतीतिविषयत्वमिति चेन्न अभावोघटस्यास्तीति प्रत्ययसम्बन्धेनाभावस्यापि तथात्वप्रसङ्गात्। नास्तीतिप्रतीतिविषयत्वेऽपि च घटादेर्भावत्वानिवृत्तेः। अस्तीति चास्त्यर्थो वा शब्दोवा विवक्षितः नाद्यः तस्यानिरुक्तेः। सत्ता तदर्थइति चेन्न सामान्यादीनां तदभावादभावापत्तेः स्वरूपसत्त्वञ्च निरस्तम्। नापि द्वितीयः अभावोऽस्तीतिप्रतीतेरुक्तत्वात् वर्त्तत इत्याद्याकारेण च प्रतीयमानस्याभावस्यप्रसङ्गात्। सोऽस्ति पर्यायइति चेन्न उभयसाधारणैकार्थनिर्व्वचनमन्तरेण पर्यायत्वस्य प्रतिपादयितुमशक्यत्वात्। यत्रैकस्मात्पदप्रयोगः तत्रैवापरस्य वर्त्ततइति प्रयोगात्। सामान्येन तावत् पर्यायत्वं शक्याधिगममिति चेन्न प्रमेयाभिधेयादिशब्दानां तथात्वे ऽप्यपर्यायत्वात् यत्रैकस्य प्रवृत्तिनिमित्तार्थत्वे च तन्निर्व्वचनप्रसङ्गस्तदवस्थः सएवानवस्थाभावत्वमुच्यतां किं शब्दोक्तेन खगवेषणया। अपरप्रतिषेधात्मकत्वं भावत्वमिति चेन्न व्यवच्छेद्यासम्बन्धेनापरपदवैयर्थ्यात् भावाभावयोः परस्परप्रतिषेधात्मकतास्वीकाराच्च। तथापि भावो नास्तीत्यभावप्रतिपत्तिवदभावोनास्तीति भावस्य प्रतीतिरिति चेन्न तावतापि लक्षणानिरुक्तेः। अपरप्रतिषेधसुखेन प्रतीयमानत्वमेव भावत्वमिति चेन्न चक्षुरादिभिर्भावत्वप्रकृषप्रसङ्गात्। न हि प्रतीयमानत्वं चक्षुरादिग्राह्यम् अभावोनास्तीतिप्रतीतेर्निर्विषयत्वप्रसङ्गाच्च नहीयं भावविषया भवत्पक्षे परप्रतिषेधसुखेन प्रतीयमानत्वात्। नाप्यभावविषयैव तन्निषेधार्थत्वात्। नैवं प्रतीतिरेवास्तीति चेन्न शाब्द्याः प्रतीतेः सम्बन्धात् आकाङ्क्षादिमद्भिः पदैः प्रतिस्वं संसर्गबोधनात् "अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि"। प्रत्यक्षप्रतीतिरूपा विवक्षितत्वादयमदोषइति चेन्न सर्व्वस्य भावस्य प्रत्यक्षत्वानङ्गीकाराच्च सेश्वरपक्षे सर्व्वं प्रत्यक्षमिति चेन्न तेन तेषामपरप्रतिषेधाक-

तया ग्रहणे प्रमाणाभावात्। तेषां विधिरूपतया तथैव ग्रहणमिति चेन्न विधिरूपत्वस्यानवधारणात्। यदपरप्रतिषेधात्मकतया शब्देनापि बोध्यते तत्तावत् भावरूपमिति चेन्न परपदवैयर्थ्यात् तस्यागोऽश्वावित्वादित्यापत्तेः। सुरभि चन्दनमित्यादाविवान्योपनीतभागवत्। तत्र चाद्यत्वं भविष्यतीति चेन्न तथाविधेनैव विषयेण विशिष्टाया बुद्धेर्विशेषणतायाश्च स्वाश्रयोऽप्यंशतः स्यात्। तेनोपलक्षिताद्यावस्तुत्वे चाभावविशिष्टभावग्रहार्थेऽप्यभावस्य तथात्वापत्तेः। यदेवंविधं तद्भावरूपमिति यदेतेवंविधत्वाद्भावत्वमन्यद्ग्राह्यम् अभेदे यदेवंविधं तद्भावरूपमिति नियमानुपपत्तेः। अथोपलक्षणत्वे चोपलक्ष्यस्यान्यस्य वाच्यत्वात् अस्यैव भावार्थत्वे चाभावोनास्तीति ज्ञात्वा प्रतीयमानस्य भावस्य भावत्वाप्रसङ्गात्। भिन्नस्य भावत्वं न सम्भवति यत्पदार्थव्यतिरेकप्रसङ्गात्। यच्च किञ्चिद्भावत्वं तत्तात्कन्यस्ति नोवा यस्ति चेत्तात्कनि इत्तिविरोधः नास्ति चेत्तस्यान्यप्रतिषेधमुखेन चाप्रतीयमानस्याभावत्वप्रसङ्गइति"। "नन्वेवमीश्वरे प्रमाणानुपदर्शनात्तदभाव एवापद्यत इति चेत् अभावत्वं किमभिधीयते निषेधात्मकत्वमिति चेत् तदादि प्रतिषेधात्मकत्वं तदा भावेऽप्यस्ति भावाभावयोर्द्वयोरपि परस्परप्रतिषेधात्मकत्वस्वीकारात्। अथाभावत्वमेव तदा न निरुक्तः पर्यनुयोगः। एतेन निषेधमुखेन प्रतीयमानत्वमिति निरस्तम्। भावविरोधित्वमिति चेन्न सर्वभावविरोधित्वं तद्विशेषविरोधित्वं वा। नाद्यः असिद्धेः नहि घटा भावोभूतलादि विरुणद्धि। न द्वितीयः भावानामपि केषाञ्चित्तथाभावात्। अथासङ्कानवस्थानं विरोधो विवक्षितः स भावानां नास्तीति चेन्न गोत्वादौ तस्यापि भावात्। एकविधाद्यन्निषेधः स इति चेन्न भेदे विरोधिभावभेदयोरेव प्रसङ्गात्। एकविधिरेवापरनिषेधः स इति चेन्न निषेधस्याभावार्थत्वे भावार्थत्वे चासिद्धेः। नास्तीति प्रतीयमानत्वमिति चेन्न घटाभावोनास्तीति घटस्य तथाप्रतीयमानतया अभावत्वापत्तेः अस्तीति भावत्वनिरुक्तौ बदुक्तं दूषणं तदापत्तेव। प्रतियोगिनिरूपणाधीननिरूपणत्वमिति चेन्न प्रतियोगिनः परार्थत्वेऽतिप्रसङ्गात् विरोध्यर्थत्वे चैतदनिरुक्तेः अस्वदर्थत्वे नञर्थस्यासिद्धेः अतीतानागतज्ञानादौ विषयादिनातिप्रसङ्गात्। यच्च किञ्चिदभावस्य लक्षणमुच्यते स भावोऽभावो वा स्यात्। नाद्यः भावस्याभावानान्वितत्वात् विधिधर्मेण च कथमपि तथात्वे तन्निर्वाच्यं स्यात्। अन्यदेव तदिति चेन्न तद्भावस्याभावत्वे स्वहत्तिः भावत्वे च व्याघातात्। न द्वितीयः तस्यात्मनि इत्तौ विरोधापत्तेः अदृष्टावव्यापकत्वप्रसङ्गादिति। प्रतिषेध्यविशिष्टमेव यत् प्रतिभाति सोऽभावइति चेन्न प्रतिषेधानिरुक्तौ प्रतिषेध्यानिरुक्तेः विशिष्टपदार्थश्च निर्वचनीयः स्यात्। तत्र विशिष्टं विशेषणविशेष्यतत्सम्बन्धेभ्यो भिन्नमभिन्नं वा। नाद्यः दण्डपुरुषसम्बन्धमन्तरेण दण्डिनोऽन्यस्याप्रतीतेः दण्डिनमानयेत्युक्ते तदानयप्रसङ्गाच्च। तत्सम्बन्धेनोपलक्षितत्वात्तथेति चेन्न अतद्वत उपलक्षणत्वेऽतिप्रसङ्गात्। तद्वतश्चान्यत्वात् सम्बन्धोहेतुः सच तदधिकरण एवेति चेन्न सम्बन्धात्तदधिकरणसम्बन्धान्यत्वापत्तेरित्येषः न पन्थाः। तत्सम्बन्धिनि तत्र व्यवहारइति चेन्न तस्यापि विशिष्टत्वेनान्यत्वापत्तौ व्यवहारविषयगतविशेषस्य वक्तुमशक्यत्वात्। एवं परम्पराकल्पनायामप्यनवस्थामात्रं नतु व्यवहार्यगतोविशेषः कश्चित्। द्वितीये तु प्रत्येकं दण्डिव्यवहारप्रसङ्गोविशेषाभावात् न ते प्रत्येकं दण्डिपदार्थाः किन्तु मिलिताइति चेत् मिलिता इति किं ते च मेलकं चाभिधीयते उत तेभ्योऽन्यएव कश्चित् आद्ये प्रत्येकं सएव प्रसङ्गः मेलकेऽप्यधिकः। द्वितीयस्तु प्रतीतिव्यवहारविरोधात्पूर्वं निरस्तः"। इत्यादिना ४परि० विशिष्टपदार्थं निरस्य ईश्वरप्रमाणाभावस्य निर्वचनमपि निराकृतम् अधिकं तत्र द्रष्टव्यम्।

तत्र निरीश्वरसांख्यमते उपासासिद्धस्य प्रकृतिलीनस्य पुरुषस्यैव सन्निधिमात्रेण प्रधानप्रवर्त्तनेन कर्तृता। सेश्वरयोगरूपसांख्यप्रवचनमते नित्येश्वरस्यैव सन्निधिमात्रेण प्रधानप्रवर्त्तनेन तथात्वम् इति भेदः। प्रदर्शितेष्वेषु मतेषु ईश्वरोनिमित्तकारणम्, वेदान्तिमते तु उपादानकारणं निमित्तकारणञ्चेति भेदः तदेतत् भा०सू०भाष्ययोर्दर्शितम् यथा "जन्माद्यस्य यतः" भा० सू० प्रतिज्ञातस्य ब्रह्मणोजन्मादिकारणत्वस्य विशेषनिर्द्धारणाय प्रवृत्तम् "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" सू०। "तथाभ्युदयहेतुत्वाद्धर्मोजिज्ञास्य एवं निःश्रेयसहेतुत्वाद्ब्रह्मापि जिज्ञास्यमित्युक्तं ब्रह्म च "जन्माद्यस्य यतः" इति लक्षितं तच्च लक्षणं घटकटकादीनां स्वतःसुवर्णादिवत् प्रकृतित्वे कुलालसुवर्णकारादिवन्निमित्तत्वे च समानमित्यतो भवति विमर्शः किमात्मकं पुनर्ब्रह्मणः कारणत्वं स्यादिति; तत्र निमित्तकारणमेव तावत् केवलं स्यादिति प्रतिभाति कस्मात्? ईक्षापूर्वककर्तृत्वश्रवणात्। ईक्षापूर्वकं हि ब्रह्मणः कर्तृत्वमवगम्यते "स ईक्षाञ्चक्रे स प्राण-

सृजत"इत्यादिश्रुतिभ्यः। ईक्षापूर्व्वकञ्च कर्त्तृत्वं निमित्तकारणेष्वेव कुलालादिषु दृष्टम् अनेककारकपूर्व्विका च क्रिया फलसिद्ध्यै लोके दृष्टा स च न्याय आदिकर्त्तर्य्यपि युक्तः संक्रामयितुम्, ईश्वरत्वप्रसिद्धेश्च ईश्वराणां हि राजवैद्यखतादीनां निमित्तकारणत्वमेव केवलं प्रतीयते तद्वत् परमेश्वरस्यापि निमित्तकारणत्वमेव युक्तं प्रतिपत्तुम् । कार्य्यञ्चेदं जगत् सावयवमचेतनमशुद्धञ्च दृश्यते कारणेनापि तस्य तादृशेनैव भवितव्यं कार्य्यकारणयोः सारूप्यदर्शनात् ब्रह्म च नैवं लक्षणमवगम्यते "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" इत्यादि श्रुतिभ्यः। पारिशेष्याद्ब्रह्मणोन्यदुपादानकारणमशुद्धादिगुणकं श्रुतिप्रसिद्धमभ्युपगन्तव्यं ब्रह्मकारणत्वश्रुतेर्निमित्तमात्रे पर्य्यवसानादित्येवं प्राप्ते ब्रूमः। प्रकृतिश्चोपादानकारणञ्च ब्रह्माभ्युपगन्तव्यं निमित्तकारणञ्च न केवलं निमित्तकारणमेव कस्मात् "प्रतिज्ञादृष्टान्तानुरोधात् एवं हि प्रतिज्ञादृष्टान्तौ श्रुतौ नोपरुध्येते। प्रतिज्ञा तावत्"उत तमादेशमप्राक्ष्योवेनाश्रुतं श्रुतम्भवत्यमतं मतमविज्ञातं विज्ञातमिति"तत्र चैकविज्ञानेन सर्वमन्यदविज्ञातमपि विज्ञातं सम्भवतीति प्रतीयते तच्चोपादानकारणविज्ञाने सर्व्वविज्ञानं सम्भवति उपादानकारणाव्यतिरेकात् कार्य्यस्य, निमित्तकारणादव्यतिरेकस्तु कार्य्यस्य नास्ति,लोके तत्त्वावाप्त्यतिरेकदर्शनात् । दृष्टान्तोऽपि"यथा सोम्यैकेन मृत्पिण्डेन विज्ञातेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारोनामधेयं मृत्तिकेत्येव सत्यम्,इत्युपादान गोचर एवाम्नायते "यथैकेन लोहमणिना सर्व्वं लोहमयं विज्ञातं स्यात्" "एकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्यादिति" तथान्यत्रापि "कस्मिन्नु भगवोविज्ञाते सर्व्वमिदं विज्ञातं भवतीति"प्रतिज्ञा "यथा पृथिव्यामोषधयः सम्भवन्तीति" दृष्टान्तः "आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्व्वं विदितमिति" प्रतिज्ञाय "स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दान् शक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुध्याघातस्य वा शब्दो गृहीत इति" दृष्टान्तः एवं यथासम्भवं प्रतिवेदान्तं प्रतिज्ञादृष्टान्तौ प्रकृतित्वसाधकौ द्रष्टव्यौ। यत इतीयमपि पञ्चमी "यतो वा इमानि भूतानि जायन्ते" इत्यत्र "जनिकर्तुः प्रकृतिरिति"पा०विशेषस्मरणात् प्रकृतित्वञ्च एवोपादाने द्रष्टव्या। निमित्तत्वन्तु अधिष्ठात्रन्तराभावादवगन्तव्यं यथा हि लोके मृत्सुवर्णादिकमुपादान कारणं कुलालस्वर्णकारादीनधिष्ठातृनपेक्ष्य प्रवर्त्तते नैवं ब्रह्मण उपादानकारणस्य स्वतोऽन्योधिष्ठातापेक्ष्योऽस्ति प्रागुत्पत्तेः"एकमेवाद्वितीय"मित्यवधारणात् अधिष्ठात्रन्तराभावोऽपि प्रतिज्ञादृष्टान्तानुरोधादेव नोदितो वेदितव्यः" अधिष्ठातरि ह्युपादानादन्यस्मिन्नभ्युपगम्यमाने पुनरप्येकविज्ञानेन सर्व्वविज्ञानसङ्गासम्भवात् प्रतिज्ञादृष्टान्तोपरोध एव स्यात् तस्मादधिष्ठात्रन्तराभावादात्मनः कर्त्तृत्वम् उपादानान्तराभावाच्च प्रकृतित्वम् । कृतस्वात्मनः कर्त्तृत्व प्रकृतित्वे"भा०।"अभिध्योपदेशाच्च" सू०।"अभिध्योपदेशच्चात्मनः कर्त्तृत्व प्रकृतित्वे गमयति"सोऽकामयत बहु स्यां प्रजायेति" "तदैक्षतेति"च तत्राभिध्यानपूर्व्विकायाः स्वातन्त्र्यप्रवृत्तेः कर्त्तृत्वं गम्यते"बहु स्यामिति"पुत्रगात्मविषयत्वात् बहुभवनाभिध्यानाच्च प्रकृतिरित्यपि गम्यते" भा० । "साक्षाच्चोभयाम्नानात्" सू० । "प्रकृतित्वञ्चायमभ्युच्चयः इतश्च प्रकृतिर्ब्रह्म यत् कारणं साक्षाद्ब्रह्मैव कारणमुपादायोभौ प्रभवप्रलयावाम्नायेते"सर्व्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति"यद्धि यस्मात् प्रभवति यस्मिंश्च प्रलीयते तत् तस्योपादानं प्रसिद्धं यथा व्रीहियवादीनां पृथिवी" साक्षादिति चोपादानान्तरानुपादानं सूचयति आकाशादेवेति । प्रत्यस्तमयञ्च नोपादानादन्यत्र कार्य्यस्य दृष्टः"भा० । "आत्मकृतेः परिणामात्" सू० । "इतश्च प्रकृतिर्ब्रह्म यत् कारणं ब्रह्मप्रक्रियायाम्" "तदात्मानं स्वयमकुरुतेति" आत्मनः कर्म्मत्वं कर्त्तृत्वञ्च दर्शयति आत्मानमिति कर्म्मत्वं स्वयमकुरुतेतिकर्त्तृत्वम् । कथं पुनः पूर्व्वसिद्धस्य स्वतः कर्त्तृत्वेन व्यवस्थितस्य क्रियमाणत्वं शक्यं सम्पादयितुम् ? परिणामादिति ब्रूमः पूर्व्वसिद्धो हि सन्नात्मा विशेषेण विकारात्मना परिणमयामासात्मानमिति विकारात्मना च परिणामो दृष्टान्तेषु प्रकृतिरूपलब्धः । स्वयमिति च विशेषणाच्चिन्मात्रानपेक्षत्वमपि प्रतीयते । परिणामादिति वा पृथक्करणं तस्यैवोऽर्थः । इतश्च प्रकृतिर्ब्रह्म यत् कारणं ब्रह्मण एव विकारात्मनायं परिणामः सामानाधिकरण्येनाम्नायते" "सच्च त्यच्चाभवन्निरुक्तञ्चानिरुक्तञ्चेत्यादिनेति" भा०। "योनिश्च हि गीयते" सू० । "इतश्च प्रकृतिर्ब्रह्म यत् कारणं ब्रह्म योनिरित्यपि सर्व्वत्र वेदान्तेषु "कर्त्तारमीशं पुरुषं ब्रह्म योनिमिति" यद्भूतयोनिं परिपश्यन्ति धीराः" इति च । योनिशब्दश्च प्रकृतिवचनः समधिगतोलोके "पृथिवी योनिरोषधिवनस्पतीनामिति,। स्त्रीयोनेरप्यस्त्येवावयवव्यवहारो

स्तं प्रत्युपादानत्वम् क्वचित् स्थानवचनोऽपि योनिशब्दो-दृष्टः "योनिष्ट इन्द्रनिषदे अकारोति" वाक्यशेषात्। तत्र प्रकृतिवचनता परिस्फुटते "यथोर्णनाभिः सृजते गृह्णते च" इत्येवं जातीयकात्। तदेवं प्रकृतित्वं ब्रह्मणः सिद्धम्। यत् पुनरिदमुक्तं हेत्वपूर्वकं कर्तृ निमित्तकारणमेव कुलालादिषु लोके दृष्टं नोपादानेऽखिलादि तत् प्रत्युच्यते, न लोकवदिह भवितव्यं नतुयमनुमानगम्योऽर्थः शब्दगम्यत्वात्तस्यार्थस्य, यथाशब्दमिह भवितव्यं शब्देश्वितुरीश्वरस्य प्रकृतित्वं प्रतिपादयतीत्यवोचाम पुनश्चैतत् सर्वं विस्तरेण प्रतिवक्ष्यामः" भा०।

तत्र चेतनकारणतावादे सांख्याक्षेपप्रदर्शनपूर्वकं ब्रह्मणोयथा कारणत्वसम्भवस्तथा व्यवस्थापितं तत्रैव "इतरव्यपदेशाद्धिताकारणादिदोषप्रसक्तिः" या०सू०।

"अन्यथा पुनश्चेतनकारणवाद आश्रीयते चेतनाद्धि जगत् प्रक्रियावामाश्रीयमाणायां हिताकारणादयोदोषाः प्रसज्यन्ते कुतः? इतरव्यपदेशात् इतरस्य शारीरस्य ब्रह्मात्मत्वं व्यपदिशति श्रुतिः "स आत्मा तत्त्वमसि श्वेतकेतो"! इति प्रतिबोधनात्। यद्वा इतरस्य ब्रह्मणः शारीरात्मत्वं व्यपदिशति" तत्सृष्ट्वा तदेवानुप्राविशदिति" सृष्टुरेवाविक्रियस्य ब्रह्मणः कार्यानुप्रवेशेन शारीरात्मत्वप्रदर्शनात्। "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति"पर देवताजीवमात्मशब्देन व्यपदिशन्तो न ब्रह्मणोभिन्नः शारीरइति दर्शयति। तस्माद्दुब्रह्मणः स्रष्टृत्वं तच्छारीरस्यैवेत्यतः स्वतन्त्रकर्त्ता स च हितमेवात्मनः सौमनस्करं कुर्यात् नाहितं जन्ममरणजरारोगाद्यनेकानर्थजालम्। न हि कश्चिदपरतन्त्रोबन्धनागारमात्मानं कृत्वानुप्रविशति न च स्वयमात्मनिर्मलः सन्नात्मानं मलिनं देहमात्मत्वेनोपेयात् कृतमपि कथञ्चिद्यात् दुःखकरं तदिच्छया जन्मात् सुखकरं चोपाददीत स्वरेच्च भवेदं जगद्विविधं विचित्रं विरचितमिति सर्वो हि लोकः स्रष्टं कार्यं कृत्वा करति भवेदं कृतमिति। यथा च मायावी स्वयं प्रसारितां मायामिच्छया अनायासेनोपसंहरति एवं शारीरोऽपीमां सृष्टिमुपसंहरेत्। स्वकीयमपि तावच्छरीरं शारीरो न शक्नोति अनायासेनोपसंहर्तुम्। एवं हितक्रियादर्शनादन्याया चेतनाज्जगत् प्रक्रियेति मन्यते" भा०।

"अधिकन्तु भेदनिर्देशात्"सू०।"तुशब्दः पूर्वपक्षं व्यावर्त्तयति। यत् सर्वज्ञं सर्वशक्ति ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं शारीरादधिकमन्यत् तदयं जगतः स्रष्टृ ब्रूमः न तस्मिन् हिताकरणादयोदोषाः प्रसज्यन्ते। न हि तस्य हितं किञ्चित् कर्त्तव्यमस्ति अहितं वा परिहर्त्तव्यं मित्यमुक्तत्वात्। न च तस्य ज्ञानप्रतिबन्धः शक्तिप्रतिबन्धो वा क्वचिदप्यस्ति सर्वज्ञत्वात् सर्वशक्तित्वाच्च। शारीरस्यैवंविधस्याप्रसज्यन्ते हिताकारणादयोदोषाः न तु तं वयं जगतः स्रष्टारं ब्रूमः। कुत एतत् भेदनिर्देशात् "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्योनिदिध्यासितव्यः""सोऽन्वेष्टव्यः स विजिज्ञासितव्यः""सता सौम्य! तदा संपन्नोभवति""शारीर आत्मा प्राज्ञेनात्मना अन्वारूढ"इत्येवं जातीयकः कर्तृकर्मादिभेदनिर्देशो जीवादधिकं ब्रह्म दर्शयति। नन्वभेदनिर्देशोऽपि दर्शितः "तत्त्वमसीत्येवञ्जातीयकः कथं भेदाभेदौ विरुद्धौ सम्भवेताम्?। नैष दोषः। आकाशघटाकाशन्यायेनोभयसम्भवस्य तत्र तत्र प्रतिष्ठापितत्वात्। अपि च यदा "तत्त्वमसीत्येवञ्जातीयकेनाभेदनिर्देशेनाभेदः प्रतिबोधितो भवति, अपगतम्भवति तदा जीवस्य संसारित्वं, ब्रह्मणश्च स्रष्टृत्वं, समस्तस्य मिथ्याज्ञानविजृम्भितस्य भेदव्यवहारस्य सम्यग्ज्ञानेन बाधितत्वात् तत्र कुत एव स्रष्टिः, कुतो वा हिताकारणादयोदोषाः। अविद्याप्रत्युपस्थापितनामरूपकृतकार्यकारणसंघातोपाध्यविवेककृता हि भ्रान्तिर्हिताहितकरणादिलक्षणः संसारो न तु परमार्थतोऽस्तीत्यसकृदेवावोचाम जन्ममरणच्छेदनभेदनाद्यभिमानवत्। अबाधिते तु भेदव्यवहारे "सोऽन्वेष्टव्य इत्येवञ्जातीयकेन भेदनिर्देशेनावगम्यमानं ब्रह्मणोऽधिकत्वं हिताकरणदोषप्रसक्तिं निरुणद्धि"भा०।"अन्यार्थादिच्च तदनुपपत्तेः" सू० "यथा च लोके पृथिवीत्वसामान्यान्वितानामप्यन्नानां केषिन्मधुरामधुरयोर्व्वैदूर्य्यादयोऽन्ये मध्यमवीर्य्याः स्वर्ण्यान्नाद्योऽन्ये प्रहीणाःश्वावलेपणार्हाःपाषाणा इत्यनेकविधं वैचित्र्यं दृश्यते यथा चैकस्मिन्नपि वीजानां बहुविधं पत्रपुष्पफलगन्धरसादिवैचित्र्यं चन्दनचम्पकादिषूपलभ्यते यथा चैकस्माच्छरीरस्य लोहितादीनि केशलोमादीनि च कार्याणि विचित्राणि भवन्ति एवमेकस्यापि ब्रह्मणोजीवप्राज्ञसृष्टयः कार्यवैचित्र्यं चोपपद्यत इत्यतस्तदनुपपत्तिः परपरिकल्पितदोषानुपपत्तिरित्यर्थः। श्रुतेश्च प्रमाणत्वादिकारस्य वाचारम्भणमात्रत्वात् स्वप्नदृग्भावैचित्र्यवदित्यभ्युपगमः" भा०। "उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि" सू०। "चेतनं ब्रह्मैकमद्वितीयं जगतः कारणमिति यदुक्तं तन्नोपपद्यते कस्मात्? उपसंहारदर्शनात्। इह हि लोके कुलालादयो

घटपटादीनां कर्त्तारोऽदृष्टचक्रसूत्रादयनेककारकोपसंहारेण संगृहीतसाधनाः सन्तस्तत् कार्यं कुर्वाणादृश्यन्ते ब्रह्म चासहायं तवाभिप्रेतं तस्य साधनान्तरानुपसंग्रहे सति कथं सृष्ट्युपपद्येत तस्मान्न ब्रह्म जगत्कारणमिति चेन्नैष दोषः यतः क्षीरवत् द्रव्यस्वभावविशेषादुपपद्यते यथा हि लोके क्षीरं जलं वा स्वयमेव दधिक्षिमभावेन परिणमते-ऽनपेक्ष्य बाह्यं साधनं, तथेहापि भविष्यति। ननु क्षीरादयोऽपि दध्यादिभावेन परिणममानमपेक्षन्तएव बाह्यं साधनम् औष्ण्यादिकं, कथमुच्यते क्षीरवद्धीति नैष दोषः। स्वयमपि हि क्षीरं बाह्य यावतीञ्च परिणाममात्रामनुभवत्येवं पार्यते ताञ्च तावतीमौष्ण्यादिना दधिभावाय। यदि स्वयं दधिभावशीलता न स्याद्नौष्ण्यादिनापि बलाद्दधिभावमापद्येत। न हि वायुराकाशो वौष्ण्यादिना बलाद्दधिभावमापद्येत। साधनसम्पत्त्या च तस्य संपूर्णता सम्पाद्यते। परिपूर्णशक्तिकञ्च ब्रह्म न तस्यान्येन केनचित् पूर्णता सम्पादयितव्या। श्रुतिश्च तत्र भवति "न तस्य कार्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति" तस्मादेकस्यापि ब्रह्मणो विचित्रशक्तियोगात् क्षीरादिवद्विचित्रः परिणामोपपद्यते" भा०। "देवादिवदपि लोके" सू०। "स्यादेतत् उपपद्यते क्षीरादीनामचेतनानामनपेक्ष्यापि बाह्यं साधनं दध्यादिभावः दृष्टत्वात् चेतनाः पुनः कुलालादयश्च साधनसामग्रीमपेक्षैव तस्मै-तस्मै कार्याय प्रवर्त्तमाना दृश्यन्ते कथं ब्रह्म चेतनं सदसहायं प्रवर्त्तेतेति? देवादिवदिति ब्रूमः। यथा लोके देवाः पितर ऋषय इत्येवमादय महाप्रभावाश्चेतना अपि सन्तोऽनपेक्ष्य किञ्चिद्बाह्यं साधनमैश्वर्यविशेषयोगादभिध्यानमात्रेण स्वतएव बहूनि नानासंस्थानानि शरीराणि प्रासादादीनि रथादीनि च निर्मिमाणा उपलभ्यन्ते मन्त्रार्थवादेतिहासपुराणप्रामाण्यात्। तन्तुनाभश्च स्वतएव तन्तून् सृजति बलाका चान्तरेणैव शुक्रं गर्भं धत्ते, पद्मिनी चानपेक्ष्य किञ्चित् पुरुषानसाधनं सरोनरात् सरोनरं प्रतिष्ठते। एवं चेतनमपि ब्रह्मानपेक्ष्य बाह्यं साधनं स्वतएव जगत् सृजति स यदि ब्रूयात् वयन्ते देवादयो ब्रह्मणो दृष्टान्ता उपात्ताश्चो दार्ष्टान्तिकेन ब्रह्मणा समान स्वभावा न भवन्ति शरीरमेव ह्यचेतनं देवादीनां शरीरान्तरादिविभूत्युपादाने-उपादानं न तु चेतनमात्मा, तन्तुनाभस्य च ध्रुवतरजन्तु-भक्षणाज्जातां कठिनतामापद्यमानो तन्तुर्भवति, बलाका चलनविद्युत्व श्रवणादृगर्भं धत्ते, पद्मिनी च चेतनप्रयुक्ता सत्यचेतनेनैव शरीरेण सरोनरात् सरोनरमुपसर्पति वल्लीव वृक्षं न तु स्वयमेव अचेतना सरोनरोपसर्पणे व्याप्रियते तस्माद्नैते ब्रह्मणो दृष्टान्ता इति, तं प्रति ब्रूयात् नायं दोषः। कुलालादिदृष्टान्तवैलक्षण्यमात्रस्य विवक्षितत्वादिति। यथा हि कुलालादीनां देवादीनाञ्च समाने चेतनत्वे कुलालादयः कार्यारम्भे बाह्यं साधनमपेक्षन्ते न देवादयस्तथा, ब्रह्म चेतनमपि न बाह्यं साधनमपेक्षिष्यते इत्येतावदयं देवादीन् दृष्टान्तेन विवक्षामः। तस्माद्यदेकस्य सामर्थ्यं दृष्टं तथा सर्वेषामेव भवितुमर्हतीति नास्त्येकान्त इत्यभिप्रायः" भा०। "कृत्स्नप्रसक्तिर्निरवयवत्वशब्दव्याकोपो वा" सू०। "चेतनमेकमद्वितीयं ब्रह्म क्षीरादिवद्देवतादिवच्चानपेक्षितबाह्यसाधनं स्वयम्परिणममानं जगतः कारणमिति स्थितम्। शास्त्रार्थपरिशुद्धये तु पुनराक्षिपति कृत्स्नप्रसक्तिः कृत्स्नस्य ब्रह्मणः कार्यरूपेण परिणामः प्राप्नोति निरवयवत्वात् यदि ब्रह्म पृथिव्यादिवत् सावयवमभविष्यत्ततोऽस्यैकदेशः पर्य्यवसत एकदेशश्चावास्थास्यत, निरवयवन्तु ब्रह्म श्रुतिभ्योऽवगम्यते "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" "दिव्योह्यमूर्त्तः पुरुषः स बाह्याभ्यन्तरोह्यजः" "इदं महद्भूतमनन्तमपारम्" "विज्ञानघन एव स एव नेति नेत्यात्माऽस्थूलमनण्वित्याद्याभ्यः" सर्वविशेषं प्रतिषेधवित्रीभ्यः। ततश्चैकदेशपरिणामासम्भवात् कृत्स्नपरिणामप्रसक्तौ सत्यां मूलोच्छेदः प्रसज्येत द्रष्टव्यत्वोपदेशानर्थक्यञ्चापद्यम् अवयवदृष्टत्वात् कार्यस्य। तद्व्यतिरिक्तस्य च ब्रह्मणोऽभावादजत्वादिशब्दव्याकोपश्च। अथैतद्दोषपरिजिहीर्षया सावयवमेव ब्रह्माभ्युपगम्येत तथापि ये निरवयवत्वस्य प्रतिपादकाः शब्दास्तदाहृतास्ते मन्येयुः। सावयवत्वे चानित्यत्व प्रसङ्ग इति सर्वोयाऽयंपक्षो न घटयितुं शक्यत इत्याक्षिपति" भा०। "श्रुतेस्तु शब्दमूलत्वात्" सू० "तथ-शब्देनाक्षेपं परिहरति न खल्वस्मत्पक्षे कश्चिदपि दोषोऽस्ति न तावत् कृत्स्नप्रसक्तिरस्ति कुतः? श्रुतेः तथैव हि ब्रह्मणोऽवस्थानं श्रूयते प्रकृतिविकारयोर्भेदेन व्यपदेशात् "सेयन्देवतैक्षत हन्ताहमिमास्तिस्रोदेवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति" "तावानस्य महिमा ततोज्यायांश्च पूरुषः पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवीति" चैवं जातीयकात् तथा हृदयायतनत्ववचनात् सत्-

सम्पत्तिवचनाच्च । यदि च कृत्स्नं ब्रह्म कार्यभावेनोपयुक्तं स्यात् "सता सोम्य! तदा सम्पन्नो भवतीति" सुषुप्तिगतं विशेषणमनुपपन्नं स्यात् विकृतेन ब्रह्मणा नित्यं सम्पन्नत्वात् अविकृतस्य च ब्रह्मणोऽभावात् तत्रेन्द्रियगोचरत्वप्रतिषेधाद्ब्रह्मणः, विकारस्य चेन्द्रियगोचरत्वोपपत्तेः । तस्मादस्ति अविकृतं ब्रह्म न च निरवयवत्वशब्दव्याकोपोऽस्ति श्रुयमाणत्वादेव निरवयवत्वस्याभ्युपगम्यमानत्वात् । शब्दमूलत्वाच्च ब्रह्म शब्दप्रमाणकं नेन्द्रियादिप्रमाणकं तद्यथाशब्दमभ्युपगन्तव्यम् । शब्दश्चोभयमपि ब्रह्मणः प्रतिपादयति अकृत्स्नप्रसक्तिं निरवयवताञ्च । लौकिकानामपि मणिमन्त्रौषधिप्रभृतीनां देशकालनिमित्तवैचित्र्यदर्शनात् शक्तयोविरुद्धानेककार्यविषया दृश्यन्ते ता अपि तावन्नोपदेशमन्तरेण केवलेन तर्केणावगन्तुं शक्यन्ते अस्य वस्तुन एतावत्त्वमेतत्प्रकारा एतद्विषया एतत्प्रयोजनाश्च शक्तय इति किमुताचिन्त्यप्रभावस्य ब्रह्मणोरूपं विना शब्देन निरूप्येत । तथाचाहुः पौराणिकाः "अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् । प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणमिति" । तस्माच्छब्दमूलएवातीन्द्रियार्थयाथात्म्याधिगमः। ननु शब्देनापि न शक्यते विरुद्धार्थाः प्रत्याययितुं निरवयवञ्च ब्रह्म परिणमते न च कृत्स्नमिति यदि निरवयवं ब्रह्म स्यान्नैव परिणमेत कृत्स्नमेव वा परिणमेत अथ केनचिद्रूपेण परिणमेत केनचिद्रूपेणावतिष्ठेतेति रूपभेदकल्पनात् सावयवमेव प्रसज्येत । क्रियाविषये "अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीत्येवंजातीयिकायां विरुद्धप्रतीतावपि विकल्पाश्रयणं विरोधपरिहारकारणं भवति पुरुषतन्त्रत्वादनुष्ठानस्य इह तु विकल्पाश्रयेणापि न विरोधपरिहारः सम्भवति अपुरुषतन्त्रत्वाद्वस्तुनः तस्माद्दुष्टमेतदिति नैष दोषः । अविद्याकल्पितरूपभेदाभ्युपगमात् । नह्यविद्याकल्पितेन रूपभेदेन सावयवं वस्तु सम्पद्यते । न हि तिमिरोपहतनयनेनानेक इव चन्द्रमा दृश्यमानोऽनेक एव भवति । अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वाच्येन ब्रह्म परिणामादिसर्वव्यवहाराश्रयतां प्रतिपद्यते पारमार्थिकेन च रूपेण सर्वव्यवहारातीतमपरिणतमवतिष्ठते वाचारम्भणमात्रत्वाच्चाविद्याकल्पितस्य नामरूपभेदस्य, न निरवयवत्वं ब्रह्मणः कुप्यति । नचैवं परिणामश्रुतिः परिणाममप्रतिपादनार्था तत्प्रतिपत्तौ फलानवगमात् । सर्वव्यवहारहीनब्रह्मात्मभावप्रतिपादनार्था त्वेषा तत्प्रतिपत्तौ फलावगमात् । "इदमेव नेति नेत्यात्मा" इत्युपक्रम्याह "अभयं वै जनक! प्राप्तोऽसीति" । तस्मादकृत्स्नपक्षे न कश्चिदपि दोषप्रसङ्गोऽस्ति' भा० । "आत्मनि चैवं विचित्राश्च हि" सू० । 'अपि च नैवात्र विवदितव्यं कथमेकस्मिन् ब्रह्मणि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिः स्यादिति यत आत्मन्यप्येकस्मिन् स्वप्नादौ स्वरूपानुपमर्देनैवानेकारा सृष्टिः पठ्यते "न तत्र रथा न रथयोगाः पन्थानोभवन्त्यथ रथान् रथयोगान् पथः सृजते" इत्यादिना । लोकेऽपि देवादिषु मायाद्यादिषु च स्वरूपानुपमर्देनैव विचित्राश्चर्यवस्तुसृष्टयो दृश्यन्ते तथैकस्मिन्नपि ब्रह्मणि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिर्भविष्यतीति' भा० । "स्वपक्षदोषाच्च" सू० । "परेषामप्येष समानः स्वपक्षदोषः प्रधानवादिनोऽपि हि निरवयवमपरिच्छिन्नं शब्दादिहीनं प्रधानं सावयवस्य परिच्छिन्नस्य शब्दादिमतः कार्यस्य कारणमिति स्वपक्षः तत्रापि कृत्स्नप्रसक्तिर्निरवयवत्वात् प्रधानस्य प्राप्नोति निरवयवत्वाभ्युपगम्यकोपोवा । ननु नैव तैर्निरवयवं प्रधानमभ्युपगम्यते सत्त्वरजस्तमांसि हि त्रयोगुणाः तेषां साम्यावस्था प्रधानं तैरेवावयवैः तत् सावयवमिति, नैवं जातीयकेन सावयवत्वेन प्रकृतोदोषः परिहर्तुं पार्यते यतः सत्त्वरजस्तमसामप्येकैकस्य समानं निरवयवत्वम् एकैकमेवेतरद्वयानुत्सृष्टं स्वजातीयस्य प्रपञ्चस्योपादानमिति समानत्वात् स्वपक्षदोषप्रसङ्गस्य । तर्काप्रतिष्ठानात् सावयवत्वमेवेति चेत् एवमप्यनित्यत्वादिदोषप्रसङ्गः । अथ शक्तय एव कार्यवैचित्र्यसूचिता अवयवा इत्यभिप्रायः, तास्तु ब्रह्मवादिनोऽप्यविशिष्टाः । तथा चाणवादिनोऽप्यणुरन्यतरेण संयुज्यमानो निरवयवत्वाद्यदि कात्स्न्येन संयुज्येत ततः प्रविभागानुपपत्तेरणुमात्रताप्रसङ्गः । अथैकदेशेन संयुज्येत तथापि निरवयवत्वाभ्युपगम्यकोप इति स्वपक्षेऽपि समानएव दोषः। समानत्वाच्च नान्यतरस्मिन्नेव पक्षे उपक्षेप्योभवति । परिशुद्धस्तु ब्रह्मवादिना स्वपक्षे दोषः" भा०। "सर्वोपेता च तद्दर्शनात्" सू०। "एकस्यापि ब्रह्मणो विचित्रशक्तियोगादुपपद्यते विचित्रो विकारप्रपञ्च इत्युक्तं तत् पुनःक्वचनुपगम्यते विचित्रशक्तियुक्तं परं ब्रह्मेति ?" तदुच्यते सर्वोपेता च तद्दर्शनात् सर्वशक्तियुक्ता च परा देवतेत्यवगन्तव्यं कुतः ? तद्दर्शनात् तथाहि दर्शयति श्रुतिः सर्वशक्तियोगं परस्यादेवतायाः "सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः" "सत्य-

कामः सत्यसङ्कल्पः" "यः सर्वज्ञः सर्ववित्" "एतस्य वा अक्षरस्य प्रशासने गार्गि ! सूर्याचन्द्रमसौ धृतौ तिष्ठत" इत्येवञ्जातीयका" भा०। "विकरणत्वान्नेति चेत्तदुक्तम्" सू०। "स्यादेतत् विकरणां परां देवतां शास्ति शास्त्रम् "अचक्षुष्कमश्रोत्रमवागमनः" इत्येवञ्जातीयकम् । कथं सा सर्वशक्तियुक्तापि सतो कार्याय प्रभवेत् ? देवादयोहि चेतनाः सर्वशक्तियुक्ता अपि सन्त आध्यात्मिककार्यकरणसम्पन्ना एव तत्तत्कार्याय प्रभवन्तो विज्ञायन्ते । कथञ्च "नेति नेतीति" प्रतिषिद्धसर्वविशेषाया देवतायाः सर्वशक्तियोगः सम्भवेदिति ? चेत् यदत्र वक्तव्यं तत् पुरस्तादेवोक्तं, श्रुत्यवगाह्यमेवेदमतिगम्भीरं परं ब्रह्म न तर्कावगाह्यम् न च यद्यैकस्य सामर्थ्यं दृष्टं तथान्यस्यापि सामर्थ्येन भवितव्यमिति नियमोऽस्तीति । प्रतिषिद्धसर्वविशेषस्यापि ब्रह्मणः सर्वशक्तियोगः सम्भवतीत्येतदर्थविद्याकल्पितरूपभेदोपन्यासेनोक्तमेव । तथा च शास्त्रम् "अपाणिपादोजवनोग्रहीता पश्यत्यचक्षुः स शृण्वोत्यकर्णः" इत्यकरणस्यापि ब्रह्मणः सर्वसामर्थ्ययोगं दर्शयति" भा०। "न प्रयोजनवत्त्वात्" सू०। "अन्यथा पुनश्चेतनकर्तृकत्वं जगत आशिपति, न खलु चेतनः परमात्मेदं जगद्विश्वं विरचयितुमर्हति कुतः ? प्रयोजनवत्त्वात् प्रवृत्तीनाम् । चेतनो हि लोके बुद्धिपूर्वकारी पुरुषः प्रवर्त्तमानो न सन्दोपक्रमामपि तावत् प्रवृत्तिमात्मप्रयोजनानुपयोगिनीमारभमाणोदृष्टः किमुत गुरुतरसंरम्भाम्, भवति च लोकप्रसिद्धानुवादिनी श्रुतिः "न वा अरे सर्वस्य कामाय सर्वं प्रियम्भवत्यात्मनस्तु कामाय सर्वं प्रियम्भवतीति" । गुरुतरसंरम्भा चेयं प्रवृत्तिर्यदुद्भावनं प्रपञ्चं जगद्विश्वं विरचयितव्यम् । यदीयमपि प्रवृत्तिश्चेतनस्य परमात्मन आत्मप्रयोजनोपयोगिनी परिकल्प्येत परिकल्पनीयत्वं परमात्मनः भूयमाणं बाध्येत प्रयोजनाभावे वा प्रवृत्त्यभावोऽपि स्यात् । अथ चेतनोऽपि सन्नुपाधिदोषापराधादन्यैरेवात्मप्रयोजनं प्रवर्त्तमानोदृष्टस्तथा परमात्मापि प्रवर्त्तिष्यत इत्युच्येत, तथा सति सर्वज्ञत्वं परमात्मनः भूयमाणं बाध्येत तथादृष्टिश्चेतनात् सृष्टिरिति" भा० । "लोकवत्तु लीलाकैवल्यम्" सू० "तुशब्दोऽक्षेपं परिहरति । यथा लोके कस्यचिदाप्तैषणस्य राज्ञो राजामात्यस्य वा व्यतिरिक्तं किञ्चित्प्रयोजनमनभिसन्धाय केवलं लीलारूपाः प्रवृत्तयः क्रीडाविहारेषु भवन्ति यथा वोच्छ्वासप्रश्वासादयोऽनभिसन्धाय बाह्यं किञ्चित्प्रयोजनान्तरं स्वभावादेव भवन्ति एवमीश्वरस्याधनपेक्ष्य किञ्चित्प्रयोजनान्तरं स्वभावादेव केवलं लीलारूपा प्रवृत्तिर्भविष्यति । नहीश्वरस्य प्रयोजनान्तरं निरूपयमाणं न्यायतः श्रुतितो वा सम्भवति । न च स्वभावः पर्यनुयोक्तुं शक्यते । यद्यथाकामियं जगद्विश्वविरचना गुरुतरसंरम्भेवाभाति तथापि परमेश्वरस्य लीलैव केवलेयम् अपरिमितशक्तित्वात् । यदि नाम लोके लीलास्वपि किञ्चित् सूक्ष्मं प्रयोजनमनुप्रेक्षत तथापि नैवात्र किञ्चित्प्रयोजनमवेक्षितुं शक्यते आप्तकामताश्रुतेः। नाप्यप्रवृत्तिरुन्मत्तप्रवृत्तिर्वा सृष्टिश्रुतेः सर्वज्ञत्वश्रुतेश्च । नचेयं परमार्थविषया सृष्टिस्थितिश्रुतिः अविद्याकल्पित नामरूपव्यवहारगोचरत्वात् ब्रह्मात्मभावप्रतिपादनपरत्वाच्चेत्येतदपि न विस्मर्त्तव्यम्" भा०। "वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति" सू०। "पुनश्च जगज्जन्मादिहेतुत्वमीश्वरस्याचिख्यासते स्थूणानिखननन्यायेन प्रतिष्ठातस्यार्थस्य दृढीकरणाय । नेश्वरो जगतः कारणमुपपद्यते कुतः ? वैषम्यनैर्घृण्यप्रसङ्गात् । कांश्चिदत्यन्तसुखभाजः करोति देवादीन्, कांश्चिदत्यन्तदुःखभाजः करोति पश्वादीन्, कांश्चिन् मध्यमभाजोमनुष्यादीनित्येवं विषमां सृष्टिं निर्मिमाणस्येश्वरस्य पृथग्जनस्येव रागद्वेषापत्तेः श्रुतिस्मृत्यवधारितस्वच्छत्वादीश्वरस्वभावविपरिलोपः प्रसज्येत । तथा स्वप्रजनैरपि जुगुप्सितं निर्घृणत्वमतिक्रूरत्वं दुःखयोगविधानात् सर्वप्रजोपसंहरणाच्च प्रसज्येत । तस्माद्वैषम्यनैर्घृण्यप्रसङ्गाच्चेश्वरः कारणमित्येवं प्राप्ते ब्रूमः वैषम्यनैर्घृण्ये नेश्वरस्य प्रसज्येते कस्मात् ? सापेक्षत्वात् । यदि हि निरपेक्षः केवल ईश्वरोविषमां सृष्टिं निर्मिमीत स्यातामेतौ दोषौ वैषम्यं नैर्घृण्यञ्च । न तु निरपेक्षस्य निर्माटृत्वमस्ति, सापेक्षो ह्येश्वरोविषमां सृष्टिं निर्मिमीते । किमपेक्षत इति चेदुच्यते धर्माधर्मावपेक्षत इति वदामः । अतः सृज्यमानप्राणिधर्माधर्मापेक्षा विषमा सृष्टिरिति नायमीश्वरस्यापराधः । ईश्वरस्तु पर्जन्यवद्द्रष्टव्यः यथा हि पर्जन्यो व्रीहियवादिसृष्टौ साधारणं कारणम्भवति व्रीहियवादिवैषम्ये तु तत्तद्बीजगतान्येवासाधारणानि समर्थानि कारणानि भवन्ति, एवमीश्वरोदेवमनुष्यादिसृष्टौ साधारणं कारणम्भवति देवमनुष्यादिवैषम्ये तु तत्तज्जीवगतान्येवासाधारणानि कर्माण्यपि कारणानि भवन्ति । एवमीश्वरः सापेक्षत्वान्न वैषम्यनैर्घृण्याभ्यां दुष्यति । कथं पुनरवगम्यते सापेक्ष ईश्वरो नीचमध्योत्तमसंसारं निर्मिमीते इति । तथा हि दर्शयति

श्रुतिः "एष ह्येव साधु कर्म्म कारयति तं, यमेभ्योलोकेभ्य उन्निनीषते,एष उ एवासाधु कर्म्म कारयति तं, यमधोनिनीषते" इति "पुण्यो वै पुण्येन कर्म्मणा भवति, पापः पापेनेति" च। स्मृतिरपि प्राणिकर्म्मविशेषापेक्षमेवेश्वरस्यानुग्रहीतृत्वं निग्रहीतृत्वञ्च दर्शयति "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इत्येवञ्जातीयका" भा०। "न कर्म्माविभागादिति चेन्नानादित्वात्" सू०। "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति" प्राक्सृष्टेरविभागावधारणान्नास्ति कर्म्म, यदपेक्षा विषमा सृष्टिः स्यात्, सृष्ट्युत्तरकालं हि शरीरादिविभागापेक्षं कर्म्म। कर्म्मापेक्ष ईश्वरः प्रवर्त्तता नाम, प्राक् विभागाद्वैचित्र्यनिमित्तस्य कर्म्मणोऽभावात्सुखैकाद्या सृष्टिः प्राप्नोतीति चेन्नैष दोषः, अनादित्वात् संसारस्य। भवेदेष दोषोयद्यादिमानयं संसारः स्यात् अनादौ तु संसारे बीजाङ्कुरवद्धेतुहेतुमद्भावेन कर्म्मणः, सर्गवैषम्यस्य च प्रवृत्तिर्न विरुध्यते। कथं पुनरेतदवगम्यते अनादिरेष संसार इति? अत उत्तरं पठति" भा०। "उपपद्यते चाप्युपलभ्यते च" सू०। "उपपद्यते च संसारस्यानादित्वं आदिमत्त्वे हि संसारस्याकस्माद्बद्धानामपि पुनःसंसारोद्भूतिप्रसङ्गः अकृताभ्यागमप्रसङ्गश्च सुखदुःखादिवैषम्यस्य निर्निमित्तत्वात्। न चेश्वरो वैषम्यहेतुरित्युक्तम्। न चाविद्या केवला वैषम्यकारणम् एकरूपत्वात्। रागादिक्लेशयुक्तानादिप्रकर्म्मापेक्षा त्वविद्या वैषम्यकरी स्यात्। न च कर्म्म अन्तरेण शरीरं सम्भवति, न वा शरीरमन्तरेण कर्म्म सम्भवतीतीतरेतराश्रयदोषप्रसङ्गः 'अनादित्वे तु बीजाङ्कुरन्यायेनोपपत्तेर्नकश्चिद्दोषो भवति। उपलभ्यते च संसारस्यानादित्वं श्रुतिस्मृत्योः। श्रुतौ तावत् 'अनेन जीवेनात्मनेति, सर्गप्रस्तावे शरीरमात्मानं जीवशब्देन प्राणधारणनिमित्तेनाभिलपन्नादिः संसार इति दर्शयति। आदिमत्त्वे तु ततः प्रागनवधारितः प्राणः स कथं प्राणधारणनिमित्तेन जीवशब्देन सर्गप्रस्तावेऽभिलप्येत। न च धारयिष्यतीत्यतोऽभिलप्येत अनागताद्धि सम्बन्धादतीतः सम्बन्धो बलीयान् भवति अभिनिष्पन्नत्वात्। "सूर्य्याचन्द्रमसौ धाता यथापूर्व्वमकल्पयदिति" च मन्त्रवर्णः पूर्व्वकल्पसद्भावं दर्शयति। स्मृतावप्यनादित्वं संसारस्योपलभ्यते। "न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा" इति भगवद्गीता। पुराणे चातीतानामनागतानाञ्च कल्पानां न परिसाणमस्तीति स्थापितम्" शङ्करभाष्यम्।

ईश्वरस्य केवलनिमित्तकारणतापक्षोऽपि न्यायवैशेषिकाद्यभिमतः तत्रैव प्रत्याख्यातः यथा "पत्युरसामञ्जस्यात्" भा० सू०। "इदानीं केवलाधिष्ठातेश्वरकारणवादः प्रतिषिध्यते। तत्कथमवगम्यते?। "प्रकृतितिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" "अभिध्योपदेशाच्च" इत्यत्र प्रकृतिभावेनाधिष्ठातृभावेन चोभयस्वभावस्येश्वरस्य स्वयमेवाचार्य्येण प्रतिष्ठापितत्वात्। यदि पुनरविशेषेणेश्वरकारणवादमात्रमिह प्रतिषिध्येत पूर्व्वोत्तरविरोधाद्व्याहताभिव्याहारः सूत्रकार इत्यं तदापद्येत। तस्मादप्रकृतिरधिष्ठाता केवलं निमित्तकारणमीश्वर इत्येष पक्षो वेदान्तविहितब्रह्मैकत्वप्रतिपत्त्यावाप्त्रेनात्र प्रतिषिध्यते। सा चेयं वेदबाह्येश्वरकल्पनानेकप्रकारा। केचित्तावत्साङ्ख्ययोगव्यपाश्रयाः कल्पयन्ति प्रधानपुरुषयोरधिष्ठाता केवलं निमित्तकारणमीश्वरः इतरेतरविलक्षणाः प्रधानपुरुषेश्वरा इति। माहेश्वरास्तु मन्यन्ते "कार्य्यकारणयोगविधिदुःखान्ताः पञ्च पदार्थाः पशुपतिनेश्वरेण पशुपाशविमोक्षायोपदिष्टाः। पशुपतिरीश्वरोनिमित्तकारणमिति,। तथा वैशेषिकादयोऽपि केचित् कर्त्रात्मत्वं स्वप्रक्रियानुसारेण निमित्तकारणमीश्वरं वर्णयन्ति। अत उत्तरमुच्यते। "पत्युरसामञ्जस्यादिति"। पत्युरीश्वरस्य प्रधानपुरुषयोरधिष्ठातृत्वेन जगत्कारणत्वं नोपपद्यते कस्मात्? असामञ्जस्यात्। किं पुनरसामञ्जस्यम् हीनमध्यमोत्तमभावेन हि प्राणिभेदान् विदधत ईश्वरस्य रागद्वेषादिदोषप्रसक्तेरस्मदादिवदनीश्वरत्वं प्रसज्येत। प्राणिकर्म्मापेक्षत्वाददोष इति चेन्न कर्म्मेश्वरयोः प्रवर्त्यप्रवर्त्तृविभक्तयोः इतरेतराश्रयदोषप्रसङ्गात्। अनादित्वादिति चेन्न वर्त्तमानकालवदतीतेष्वपि कालेष्वितरेतराश्रयदोषाविशेषादन्धपरम्परान्यायापत्तेः। अपि च प्रवर्त्तनालक्षणदोषा इति न्यायवित् समयः। न हि कश्चिददोषप्रयुक्तः परार्थं स्वार्थं वा प्रवर्त्तमानो दृश्यते स्वार्थप्रयुक्त एव च सर्व्वोजनः परार्थेऽपि प्रवर्त्तत इत्येवमयसामञ्जस्यम्। स्वार्थैकत्वादीश्वरस्यानीश्वरत्वप्रसङ्गात्। पुरुषविशेषत्वाभ्युपगमाच्चेश्वरस्य पुरुषस्य चौदासीन्याभ्युपगमादसामञ्जस्यम्" भा०। "सम्बन्धानुपपत्तेश्च" सू०। "पुनरप्यसामञ्जस्यमेव न हि प्रधानपुरुषव्यतिरिक्त ईश्वरोऽन्तरेण सम्बन्धं प्रधानपुरुषयोरीक्षिता। न तावत् संयोगलक्षणः सम्बन्धः सम्भवति प्रधानपुरुषेश्वराणां सर्वगतत्वात् निरवयवत्वाच्च।

नापि समवायलक्षणः, आश्रयाश्रयिभावानिरूपणात् । नान्यः कश्चित् कार्यगम्यः सम्बन्धः शक्यते कल्पयितुं, कार्यकारणभावस्यैवाद्याप्यसिद्धत्वात् । ब्रह्मवादिनः कथमिति चेत् न तस्य तादात्म्यलक्षणसम्बन्धोपपत्तेः । अपि चागमबलेन ब्रह्मवादी कारणादिस्वरूपं निरूपयति नावश्यन्तस्य यथादृष्टं सर्वमभ्युपगन्तव्यम् । परस्य तु दृष्टान्तबलेन कारणादिस्वरूपं निरूपयतोयथादृष्टमेव सर्वमभ्युपगन्तव्यमित्ययमस्त्यतिशयः । परस्यापि सर्वज्ञप्रणीतागमसद्भावात् समानागमबलमिति चेन्न इतरेतराश्रयप्रसङ्गात् आगमप्रत्ययात् सर्वज्ञसिद्धिः सर्वज्ञप्रत्ययादागमसिद्धिरिति । तस्मादनुपपन्ना साङ्ख्ययोगादिनामीश्वरकल्पना । एवमन्यास्वपि वेदबाह्यास्वीश्वरकल्पनासु यथासम्भवमसामञ्जस्यं योजयितव्यम्"भा०। "अधिष्ठानानुपपत्तेश्च"सू०। "इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य । स हि परिकल्प्यमानः कुम्भकार इव मृदादीनि प्रधानादीनि अधिष्ठाय प्रवर्त्तेत न चैवमुपपद्यते । नह्यप्रत्यक्षं रूपादिहीनञ्च प्रधानमीश्वरस्याधिष्ठेयं सम्भवति मृदादिवैलक्षण्यात्"भा०। "करणवच्चेन्न भोगादिभ्यः"सू०।"स्यादेतत् यथा करणयामं चक्षुरादिकमप्रत्यक्षं रूपादिहीनञ्च पुरुषोऽधितिष्ठत्येवं प्रधानमपीश्वरोऽधिष्ठास्यतीति, तथापि नोपपद्यते भोगादिदर्शनाद्धि करणग्रामस्याधिष्ठितत्वं गम्यते न चात्र भोगादयो दृश्यन्ते । करणग्रामसाम्ये चाभ्युपगम्यमाने संसारिणामिवेश्वरस्यापि भोगादयः प्रसज्येरन् । अन्यथा वा सूत्रमिदं व्याख्यायते । "अधिष्ठानानुपपत्तेश्च" । इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य साधिष्ठानो हि लोके शरीरोराजा राष्ट्रस्येश्वरोदृश्यते न निरधिष्ठानः,अतश्च तद्दृष्टान्तबलेनाभीष्टमीश्वरं कल्पयितुमिच्छत ईश्वरस्यापि किञ्चित्शरीरं करणायतनं वर्णयितव्यं स्यात् न च तद्वर्णयितुं शक्यते सृष्ट्युत्तरकालभावित्वात् शरीरस्य प्राक्सृष्टेस्तदनुपपत्तेः । निरधिष्ठानत्वे चेश्वरस्य प्रवर्त्तकत्वानुपपत्तिः एवं लोके दृष्टत्वात् ।"करणवच्चेन्न भोगादिभ्यः"सू०। "अथ लोकदर्शनानुसारेश्वरस्यापि किञ्चित्करणानामायतनं शरीरं कामेन कल्प्यते एवमपि नोपपद्यते सशरीरत्वे हि सति संसारिवद्भोगादिप्रसङ्गादीश्वरस्याप्यनीश्वरत्वं प्रसज्येत"भा० । "अनवयवमसर्वज्ञता वा"सू०।"इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य । स हि सर्वज्ञस्तत्रभ्युपगम्यते अनन्यज्ञानन्च प्रधान' अनन्याच्च पुरुषान्निर्भिन्ना अभ्युपगम्यन्ते । तत्र सर्वज्ञेनेश्वरेण प्रधानस्य पुरुषाणामात्मनश्चेयत्ता परिच्छिद्येत वा न वा परिच्छिद्येत, उभयथापि दोषोऽनुषक्त एव । कथं? पूर्वस्मिंस्तावद्विकल्पे इयत्तापरिच्छिन्नं वस्तु घटादिवदल्पवत् दृष्टं तथा प्रधानपुरुषेश्वरत्रयमपीयत्तापरिच्छिन्नत्वादल्पवत् स्यात् । संख्यापरिमाणं तावत् प्रधानपुरुषेश्वरत्रयरूपेण परिच्छिन्नं, स्वरूपपरिमाणमपि तद्गतमीश्वरेण परिच्छिद्येतेति । पुरुषगता च महासंख्या । ततश्चेयत्तापरिच्छिन्नानां वे संसारानुच्यन्ते तेषां संसारोऽल्पत्वात् संसारित्वञ्च तेषामल्पवत् । एवमितरेष्वपि क्रमेण सत्यमानेषु संसारित्वस्य ह्रस्वत्वं स्यात् । प्रधानञ्च सविकारं पुरुषार्थमीश्वराधिष्ठेयं संसारत्वेनाभिमतं तच्छून्यतायामीश्वरः किमधितिष्ठेत? किं विषये वा सर्वज्ञतेश्वरते स्याताम् ?। प्रधानपुरुषेश्वराणां चैवमल्पत्वे सति, आदिमत्त्वप्रसङ्गः आद्यन्तवत्त्वे च शून्यवादप्रसङ्गः। अथ मा भूदेष दोष इत्युत्तरविकल्पोऽभ्युपगम्यते न प्रधानस्य पुरुषाणामात्मनोवेयत्तेश्वरेण परिच्छिद्यत इति । तत ईश्वरस्य सर्वज्ञत्वाभ्युपगमहानिरपरो दोषः प्रसज्येत । तस्मादयुक्तस्तार्किकपरिगृहीतईश्वरकारणवादः" ।

ईश्वरकारणतादार्ढ्याय अचेतनप्रधानकारणवाद खण्डनमपि भा०सू०भाष्योः । यथा "रचनानुपपत्तेश्चानुमानम्" सू० । 'तत्र साङ्ख्यामन्यन्ते यथा घटशरावादयो भेदाम्मृदात्मकतयान्वीयमाना मृदात्मकसामान्यपूर्वकाः लोके दृष्टाः तथा सर्वे एव बाह्याध्यात्मिका भेदाः सुखदुःखमोहात्मकतयान्वीयमानाः सुखदुःखमोहात्मकसामान्यपूर्वका भवितुमर्हन्ति । यत्तत् सुखदुःखमोहात्मकं सामान्यं तत् त्रिगुणं प्रधानं मृद्वदचेतनं चेतनस्य पुरुषस्यार्थं साधयितुं प्रवृत्तं स्वभावभेदेनैव विचित्रेण विकारात्मना विवर्त्तते इति । तथा परिमाणादिभिरपि लिङ्गैस्तदेव प्रधानमनुमिमते । तत्र वदामः यदि दृष्टान्तबलेनैवैतच्चिन्त्यते नाचेतनं लोके चेतनमनधिष्ठितं स्वतन्त्रबुद्धिविधिप्रतिषेधपुरुषार्थनिर्वर्त्तनसमर्थान् विकारान् विरचयत् दृष्टम् । मेरुप्रासादशयनासनविहारभूम्यादयो हि लोके प्रज्ञावद्भिः शिल्पिभिर्यथाकालं सुखदुःखप्राप्तिपरिहारयोग्या रचिता दृश्यन्ते तथेदं जगदखिलं पृथिव्यादि नानाकर्म्मफलभोगयोग्यं बाह्याध्यात्मिकञ्च शरीरादि नानाजातीयान्वितं प्रतिनियतावयवविन्यासमनेककर्मफलानुसारात्

धिष्ठानं दृश्यमानं प्रत्यवद्भिः सम्भाविततमैः शिल्पिभिर्मनसाप्यालोचयितुमशक्यं सत् कथमचेतनं प्रधानं रचयेत् ? लोष्टपाषाणादिष्वदृष्टत्वात्। मृदादिष्वपि कुम्भकाराद्यधिष्ठितेषु विशिष्टाकाररचना दृश्यते तद्वत् प्रधानस्यापि चेतनान्तराधिष्ठितत्वप्रसङ्गः। न च मृदाद्युपादानस्वरूपव्यपाश्रयेणैव धर्मेण मूलकारणमवधारणीयं न बाह्यकुम्भकारादिव्यपाश्रयेणेति किञ्चिन्नियामकमस्ति च चैवं सति किञ्चिद्विरुध्यते प्रत्युत श्रुतिरनुगृह्यते चेतनकारणतासमर्पणात्। अतोरचनानुपपत्तेश्च हेतोर्नाचेतनं जगत्कारणमनुमातव्यम्भवति। अन्यथाद्यनुपपत्तेश्चेति चशब्देन हेतोरसिद्धिं समुच्चिनोति। नहि बाह्याध्यात्मिकानां भेदानां सुखदुःखमोहात्मकतयाऽन्वय उपपद्यते सुखादीनाञ्चाज्ञानरूपतया प्रतीतेः शब्दादीनाञ्चाज्ञातरूपत्वप्रतीतेः तन्निमित्तत्वप्रतीतेश्च शब्दादिविशेषेऽपि च भावनाविशेषात् सुखादिविशेषोपलब्धेः। तथा परिमितानां भेदानां मूलाङ्कुरादीनां संसर्गपूर्वकत्वं दृष्ट्वा बाह्याध्यात्मिकानां भेदानां परिमितत्वात् संसर्गपूर्वकत्वमनुमिमानस्य सत्वरजस्तमसामपि संसर्गपूर्वकत्वप्रसङ्गः परिमितत्वाविशेषात्। कार्यकारणभावस्तु प्रेक्षापूर्वं निर्मितानां शयनासनादीनां दृष्ट इति न कार्यकारणभावाद्बाह्याध्यात्मिकानां भेदानामचेतनपूर्वकत्वं शक्यं कल्पयितुम्' भा०। "प्रवृत्तेश्च" सू०। "आत्मार्थमवदियं रचना तत्सिद्ध्यर्था या प्रवृत्तिः साध्यावस्थानात् प्रच्युतिः सत्वरजस्तमसामङ्गाङ्गिरूपापत्तिर्विशिष्टकार्याभिमुखप्रवृत्तिर्वा सापि नाचेतनस्य प्रधानस्य स्वतन्त्रस्योपपद्यते मृदादिषुदर्शनाद्रथादिषु च। न हि मृदादयोरथादयो वा स्वयमचेतनाः सन्चेतनैः कुलालादिभिरध्यादिभिर्वाऽनधिष्ठिता विशिष्टकार्याभिमुखं प्रवृत्तयो दृश्यन्ते। दृष्टाच्चादृष्टसिद्धिः। अतः प्रवृत्त्यनुपपत्तेरपि हेतोर्नाचेतनं जगत्कारणमनुमातव्यम्भवति। ननु चेतनस्यापि प्रवृत्तिः केवलस्य न दृष्टा सत्यमेतत्तथापि चेतनसंयुक्तस्य रथादेरचेतनस्य प्रवृत्तिर्दृष्टा नत्वचेतनसंयुक्तस्य चेतनस्य प्रवृत्तिर्दृष्टा। किं पुनरत्र युक्तं यस्मिन् प्रवृत्तिर्दृष्टा तस्य सेत्यु तत्संयुक्तस्य दृष्टा तस्यैव सेति। ननु यस्मिन् दृश्यते प्रवृत्तिस्तस्यैव सेति युक्तम् उभयोः प्रत्यक्षत्वात् नतु प्रवृत्त्याश्रयत्वेन केवलचेतनोरथादिवत्प्रत्यक्षः प्रवृत्त्याश्रयदेहादिसंयुक्तस्यैव तु चेतनस्य सद्भावसिद्धेः केवलाचेतनरथादिवैलक्षण्यं जीवद्देहस्य दृष्टमिति। अतएव प्रत्यक्षे देहे सति चैतन्यदर्शनादसति तददर्शनात् देहस्यैव चैतन्यमपीति लौकायतिकाः प्रतिपन्नाः। तस्मादचेतनस्यैव प्रवृत्तिरिति। तत्राभिधीयते न ब्रूमो यस्मिन्चेतने प्रवृत्तिर्दृश्यते न तस्य सेति भवति तु तस्यैव सा सापि चेतनाद्भवतीति ब्रूमः। तद्भावे भावात्तदभावे चाभावात् यथा काष्ठादिव्यपाश्रयापि दारुपुत्रिकादिलक्षणा क्रियानुपलभ्यमानापि केवले ज्वलने ज्वलनादेव भवति तत्संयोगे दर्शनात्तद्वियोगे चादर्शनात्तद्वत्। लौकायतिकानामपि चेतनएव देहोऽचेतनानां रथादीनां प्रवर्त्तकोदृष्टत्वविप्रतिषिद्धं चेतनस्य प्रवर्त्तकत्वम्। ननु तव देहादिसंयुक्तस्यात्मनोविज्ञानस्वरूपमात्रव्यतिरेकेण प्रवृत्त्यनुपपत्तेरनुपपन्नं प्रवर्त्तकत्वमिति चेन्न अयस्कान्तवद्रूपादिवच्च प्रवृत्तिरहितस्यापि प्रवर्त्तकत्वोपपत्तेः यथाऽयस्कान्तोमणिः स्वयं प्रवृत्तिरहितोऽपि अयसः प्रवर्त्तको भवति यथा च रूपादयो विषयाः स्वयं प्रवृत्तिरहिता अपि चक्षुरादीनां प्रवर्त्तका भवन्त्येवं पुरुषस्तिरहितोऽपीश्वरः सर्वगतः सर्व्वात्मा सर्व्वज्ञः सर्व्वशक्तिश्च सन् सर्व्वं प्रवर्त्तयेदित्युपपन्नम्। एकत्वात् प्रवर्त्त्यभावे प्रवर्त्तकत्वानुपपत्तिरिति चेन्न अविद्यापुत्र्युपस्थापितनामरूपमायावेशवशेनासकृत् प्रत्युक्तत्वात्। तस्मात् सम्भवति प्रवृत्तिः सर्वज्ञकारणत्वे 'न त्वचेतनकारणत्वे' भा०। "पयोम्बुवच्चेत्तत्रापि" सू०। "स्यादेतत् यथा क्षीरमचेतनं स्वभावेनैव वत्सविवृद्धये प्रवर्त्तते यथा च जलमचेतनं स्वभावेनैव लोकोपकाराय स्यन्दते एवं प्रधानमप्यचेतनं स्वभावेनैव पुरुषार्थसिद्धये प्रवर्त्तिष्यत इति। नैतत् साधूच्यते, यतस्तत्रापि पयोम्बुनोश्चेतनाधिष्ठितयोरेव प्रवृत्तिरित्यनुमिमीमहे उभयवादिप्रसिद्धे रथादावचेतने केवले प्रवृत्त्यदर्शनात्। श्रुतञ्च "योऽप्सु तिष्ठन्नद्भ्योन्तरोयोऽपोन्तरोयमयति" "एतस्य वा अक्षरस्य प्रशासने गार्गि! प्राच्योऽन्या नद्यः स्यन्दन्ते" इत्येवञ्जातीयकं समस्तस्य लोकपरिस्पन्दितस्येश्वराधिष्ठिततां श्रावयति। तस्मात् साध्यपक्षनिक्षिप्तत्वात् पयोऽम्बुवदित्यनुपन्यासः। चेतनायाश्च धेनोः स्नेहेनेच्छया पयसः प्रवर्त्तकत्वोपपत्तेः वत्सचूषणेन च पयस आक्षेप्यमाणत्वात्। नचाम्बुनोऽत्यन्तमनपेक्षा निम्नभूम्याद्यपेक्षत्वात् स्यन्दनस्य। चेतनापेक्षेत्यन्तं सर्वत्रोपदर्शितम्। "उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धीत्रत्र" इ बाह्यनिमित्तनिरपेक्षमपि स्वाश्रयं कार्यं भवतीत्येतल्लोकदृष्ट्या हि

दर्शितं शास्त्रदृष्ट्या पुनः सर्वज्ञेश्वरापेक्षत्वमापद्यमानं न पराणुद्यते" भा० । "व्यतिरेकानवस्थितेश्चानपेक्षत्वात्" सू० । "साङ्ख्यानां त्रयोगुणाः साम्येनावतिष्ठमानाः प्रधानं न तद्व्यतिरेकेण प्रधानस्य प्रवर्त्तकं निवर्त्तकं वा किञ्चिद्बाह्यमपेक्ष्यमवस्थितमस्ति पुरुषस्तूदासीनो न प्रवर्त्तको न निवर्त्तक इत्यतोऽनपेक्षं प्रधानम् अनपेक्षत्वाच्च कदाचित् प्रधानं महदाद्याकारेण परिणमते कदाचिच्च परिणमत इत्येतदयुक्तम् । ईश्वरस्य तु सर्वज्ञत्वात् सर्वशक्तित्वान्महामायित्वाच्च प्रवृत्त्यप्रवृत्ती न विरुध्येते" भा० "अन्यथाभावाच्च न तृणादिवत्" सू० । "स्यादेतत् यथा तृणपल्लवोदकादि निमित्तान्तरनिरपेक्षं स्वभावादेव क्षीराद्याकारेण परिणमते एवं प्रधानमपि महदाद्याकारेण परिणंस्यतइति । कवच्च निमित्तान्तरनिरपेक्षं तृणादीति गम्यते निमित्तान्तरानुपलम्भात् । यदि हि किञ्चिन्निमित्तान्तरमुपलभेमहि ततो यथाकामं तेन तेन निमित्तेन तृणाद्युपादाय क्षीरं सम्पादयेमहि न तु सम्पादयामहे । तस्मात् स्वाभाविकस्तृणादेः परिणामः तथा प्रधानस्यापि स्यादिति। अत्रोच्यते । भवेत्तृणादिवत् प्रधानस्य स्वाभाविकः परिणामो यदि तृणादेरपि स्वभाविकः परिणामोऽभ्युपगम्येत न त्वभ्युपगम्यते निमित्तान्तरोपलब्धेः कथं निमित्तान्तरोपलब्धिः अन्यत्वाभावात् धेन्वैव हृतपयुक्तं तृणादि क्षीरीभवति न प्रक्षीणमनड्वाद्युपयुक्तं वा यदि हि निर्निमित्तमेतत् स्यात् धेनुशरीरसम्बन्धादन्यत्रापि तृणादि क्षीरीभवेत् । न च यथाकामं नरैर्नक्रं सम्पादयितुमिष्टेतावता निर्निमित्तता सम्भवति, भवति किञ्चित् कार्यं मानुषसम्पाद्यं किञ्चिद्दैवसम्पाद्यम् । मनुष्या अपि च यत्नवन्त्येवोचितेनोपायेन तृणाद्युपादाय क्षीरं सम्पादयितुं प्रभूतं हि क्षीरं कामयमानाः प्रभूतं घासं धेनुद्वारयन्ति ततश्च प्रभूतं क्षीरं लभन्ते । तस्मान्न तृणादिवत् स्वाभाविकः प्रधानस्य परिणामः" भा० । "अभ्युपगमेऽप्यर्थाभावात्" सू० । "स्वाभाविकी प्रधानस्य प्रवृत्तिर्नभवतीति स्थापितम् । अथापि नाम भवतः श्रद्धामनुरुध्यमानाः स्वाभाविकीमेव प्रधानस्य प्रवृत्तिमभ्युपगच्छेम तथापि दोषोऽनुषज्येतैव कुतः ? अर्थाभावात् यदि तावत् स्वाभाविकी प्रधानस्य प्रवृत्तिर्न किञ्चिदन्यदपेक्षते इत्युच्येत ततो यथैव सहकारि किञ्चिन्नापेक्षते एवं प्रयोजनमपि किञ्चिन्नापेक्षिष्यत इत्यतः प्रधानं पुरुषस्यार्थं साधयितुं प्रवर्त्तते इतीयं प्रतिज्ञा हीयेत । स यदिब्रूयात् सहकार्यर्थं केवलं नापेक्षते न प्रयोजनमपीति तथापि प्रधानप्रवृत्तेः प्रयोजनं विवेक्तव्यं भोगोवा स्यादपवर्गो वा उभयं वेति । भोगश्चेत् कोदशोऽनाधेयातिशयस्य भोगो भवेत् अनिर्मोक्षप्रसङ्गश्च । अपवर्गश्चेत् प्रागपि प्रवृत्तेरपवर्गस्य सिद्धत्वात् प्रवृत्तिरनर्थिका स्यात् शब्दाद्युपलब्धिप्रसङ्गश्च । उभयार्थताभ्युपगमेऽपि मोक्षव्यानां प्रधानमात्राणामानन्त्यादनिर्मोक्षप्रसङ्ग एव । न चौत्सुक्यनिवृत्त्यर्था प्रवृत्तिः, न हि प्रधानस्याचेतनस्यौत्सुक्यं सम्भवति न च पुरुषस्य निर्मलस्य, दृक्शक्तिसर्गशक्तिवैयर्थ्यभयाच्चेत् प्रवृत्तिस्तर्हि दृक्शक्त्युच्छेदवत् सर्गशक्त्युच्छेदात् संसारोच्छेदादनिर्मोक्षप्रसङ्ग एव तस्मात् प्रधानस्य पुरुषार्था प्रवृत्तिरित्येतदयुक्तम्" भा० । "पुरुषाश्मवदिति चेत्तथापि" सू० । "स्यादेतत् यथा कश्चित् पुरुषो दृक्शक्तिसम्पन्नं दृक्शक्तिविहीनमन्धमधिष्ठाय प्रवर्त्तयति यथा वाऽयस्कान्तोमणिः स्वयमप्रवर्त्तमानोऽयः प्रवर्त्तयत्येवं पुरुषः प्रधानं प्रवर्त्तयिष्यतीति दृष्टान्तपुनर्वेन पुनः पुनरवस्थानम् । अत्रोच्यते तथापि नैव दोषान्निर्मोक्षोऽस्ति । अभ्युपेतहानं तावद्दोष आपतति, प्रधानस्य स्वतन्त्रस्य प्रवृत्त्यभ्युपगमात् पुरुषस्य च प्रवर्त्तकत्वानभ्युपगमात् । कथञ्चोदासीनः पुरुषः प्रधानं प्रवर्त्तयेत् । पङ्गुरपि ह्यन्धं पुरुषं वाग्दादिभिः प्रवर्त्तयति नैवं पुरुषस्य कञ्चित् प्रवर्त्तनव्यापारोऽस्ति निष्क्रियत्वाच्चिर्गुणत्वाच्च । नाप्ययस्कान्तवत् सन्निधिमात्रेण प्रवर्त्तयेत् सन्निधिनित्यत्वेन प्रवृत्तिनित्यत्वप्रसङ्गात् । अयस्कान्तस्य चानित्यः सन्निधिरस्ति स्वव्यापारसन्निधिपरिमार्जनाद्यपेक्षा चास्तात्यनुपन्यासः पुरुषाश्मवदिति । तथा प्रधानस्याचैतन्यात् पुरुषे चौदासीन्यात् उतीयस्य च तयोः सम्बन्धुरभावात् सम्बन्धानुपपत्तिः । योग्यतानिमित्ते सम्बन्धे योग्यतानुच्छेदादनिर्मोक्षप्रसङ्गः । पूर्ववच्चेहाप्यर्थाभावो विकल्पयितव्यः । परमात्मनस्तु स्वरूपव्यवस्थानमौदासीन्यं मायाव्यवस्थानञ्च पूर्वकत्वमित्यस्मतिशयः" भा० । "अङ्गित्वानुपपत्तेश्च" सू० । "इतश्च न प्रधानस्य प्रवृत्तिरवकल्पते यद्धि सत्वरजस्तमसामन्योन्यगुणप्रधानभावसत्सङ्घ साम्येन स्वरूपमात्रेणावस्थानं सा प्रधानावस्था तस्यामवस्थायामनपेक्षस्वरूपाणां स्वरूपप्रणाशभयात् परस्परं पुरुषार्थक्रियानुपपत्तेः। बाह्यस्य च कस्यचित् क्षोभयितुरभावाद्बाह्यवैषम्यनिमित्तो महदाद्युत्पादोन स्यात्" भा० । "अन्यथानुमितौ च ज्ञशक्तिवियोगात्" सू० । "अथापि

स्यात् अन्यथा वयमनुमिमीमहे यथा नायमनन्तरो दोषः प्रसज्येत । नह्यनपेक्षस्वभावाः कूटस्थादात्मनोभिर्गुणा अभ्युपगम्यन्ते प्रमाणाभावात् । कार्यवशेन तु गुणानां स्वभावोऽभ्युपगम्यते यथा यथा कार्योत्पाद उपपद्यते तथा तथैतेषां स्वभावोऽभ्युपगन्तव्यः । चलं गुणवृत्तमिति चास्यभ्युपगमः । तस्मात् साम्यावस्थायामपि वैषम्योपगमयोग्या एव गुणा अवतिष्ठन्त इति । एवमपि प्रधानस्य शक्तिवियोगात् रचनानुपपत्त्यादयः पूर्वोक्ता दोषा तदवस्था एव । शक्तिमपि त्वनुमिमानः प्रतिवादित्वान्निवर्त्तेत चेतनमेकमनेकप्रपञ्चस्य जगत उपादानमिति ब्रह्मवादप्रसङ्गात् । वैषम्योपगमयोग्या अपि गुणाः साम्यावस्थायां निमित्तभावान्नैव वैषम्यं भजेरन् भजमाना वा निमित्ताभावाविशेषात् सर्वदैव वैषम्यं भजेरन्निति प्रसज्येत एवायमनन्तरोऽपि दोषः" भाष्यम् ।

वेदान्तिपक्षपरिशुद्धये साङ्ख्याद्युद्भावितदोषनिराकरणमपि तत्रैव यथा "नन्वौपनिषदानामप्यसमञ्जसमेव दर्शनं तथ्यतापकयोर्जात्यन्तरभावानभ्युपगमात् एकं हि ब्रह्म सर्वात्मकं सर्वस्य प्रपञ्चस्य कारणमभ्युपगच्छतामेकस्यैवात्मनोविशेषौ तथ्यतापकौ न जात्यन्तरभूताविति अभ्युपगन्तव्यं स्यात् । यदि चैतौ तथ्यतापकावेकस्यात्मनो विशेषौ स्यातां स ताभ्यामात्मा तथ्यतापकाभ्यां न निर्मुच्येत इति तापोपशान्तये सम्यग्दर्शनसंपादिताब्रह्मात्मनर्थकं स्यात् । नह्यौष्ण्यप्रकाशधर्मकस्य प्रदीपस्य तदवस्थस्यैव ताभ्यां निर्मोक्ष उपपद्यते । योऽपि जलवैद्युतरङ्गफेनाद्युपन्यासस्तत्रापि जलात्मन एकस्य वीच्यादयो विशेषा आविर्भावतिरोभावरूपेण नित्या एवेति समानो जलात्मनो वीच्यादिभिरनिर्मोक्षः । प्रसिद्धश्चायं तथ्यतापकयोर्जात्यन्तरभावो लोके । तथा हि अर्थी चार्थ्यश्चान्योन्यमिष्टौ लक्ष्येते यद्यर्थिनः स्वतोऽन्योऽर्थ्यो न स्यात् यस्यार्थिनो यद्विषयकमर्थित्वं स तस्यार्थ्यो नित्यसिद्ध एवेति तस्य तद्विषयमर्थित्वं न स्यात् । यथा प्रकाशात्मनः प्रदीपस्य प्रकाशाख्योऽर्थी नित्यसिद्ध एवेति न तस्य तद्विषयमर्थित्वमभवति अप्राप्ते ह्यर्थेऽर्थिनोऽर्थित्वं स्यादिति । तथार्थस्यार्थ्यत्वं न स्यात् यदि स्यात् स्वार्थत्वमेव स्यात् न चैतदस्ति । सम्बन्धिशब्दौ ह्येतावर्थी चार्थ्यश्चेति द्वयोश्च सम्बन्धिनोः सम्बन्धः स्यान्नैकस्यैव । तस्माद्विज्ञातावर्थार्थिनौ । तथाऽनर्थार्थिनावपि । अर्थिनोऽनुकूलोऽर्थः प्रतिकूलोऽनर्थः ताभ्यामेकः पर्य्यायेणोभाभ्यां सम्बध्यते तत्रार्थस्यात्मीयस्याद्भूयस्त्वाच्चानर्थस्योभावप्यर्थावनर्थ एवेति तापकः स उच्यते । तथस्तु पुरुषोय एकः पर्य्यायेणोभाभ्यां सम्बध्यत इति तयोस्तथ्यतापकभावानुपपत्तेः । भवेदेष दोषो यद्येकात्मतायामन्यतापकावन्योन्यस्य विषयविषयिभावं प्रतिपद्येयातां नत्वेतदस्ति एकत्वादेव । न ह्यग्निरेकः सन्नात्मानन्दहति प्रकाशयति वा सत्यौष्ण्यप्रकाशादिधर्मभेदे परिणामित्वे च किन्तु कूटस्थे ब्रह्मण्येकस्मिंस्तथ्यतापकभावः सम्भवेत् क्व पुनरत्यन्तथ्यतापकभावः स्यादिति उच्यते किं न पश्यसि ? कर्मभूतो जीवद्वेष्टस्तथ्यः तापकः सवितेति । ननु तन्निर्नाम दुःखं सा चेतयितुर्नाचेतनस्य देहस्य यदि हि देहस्यैव तन्निः स्यादेहनाशे स्वयमेव नश्यतीति तन्नाशायसाधनं नैषितव्यं स्यादिति । उच्यते देहाभावे हि केवलस्य चेतनस्य तन्निर्न दृष्टा न च त्वयापि तन्निर्नाम विक्रिया चेतयितुः केवलस्येष्यते । नापि देहचेतनयोः संहतत्वम् अशुद्धादिदोषप्रसङ्गात् । न च तन्नेरेव तन्निमभ्युपगच्छसीति कथं तथापि तथ्यतापकभावः । सत्यं तथ्यं तापकं रज एवेति चेन्न ताभ्यां चेतनस्य संहतत्वानुपपत्तेः । सत्वानुरोधित्वाच्चेतनोऽपि तथ्य इवेति चेत् परमार्थतस्तर्हि नैव तथ्य इत्यापतति इवशब्दप्रयोगात् न चेत्तथ्यते नेवशब्ददोषाय । नहि डुण्डुभः सर्प इवेत्यावता सविषो भवति, सर्पो वा डुण्डुभ इवेत्यावता निर्विषो भवति । अतश्चाविद्याकृतोऽयमन्यतापकभावो न पारमार्थिक इत्यभ्युपगन्तव्यमिति । एवं सति समापि किञ्चिद्दूषयति । अथ पारमार्थिकमेव चेतनस्य तथ्यत्वमभ्युपगच्छसि तत्रैव कुतरां निर्मोक्षः प्रसज्येत नित्यत्वाभ्युपगमाच्च तापकस्य तथ्यतापकयोर्नित्यत्वेऽपि सनिमित्तसंयोगापेक्षत्वापत्तेः संयोगनिमित्तादर्शननिवृत्तावात्यन्तिकः संयोगोपरमः ततश्चात्यन्तिको मोक्ष उपपन्न इति चेन्न अदर्शनस्य तमसो नित्यत्वाभ्युपगमात् । गुणानाञ्चोद्भवाभिभवयोरनियतत्वादनियतः संयोगनिमित्तोपरम इति, वियोगस्याप्यनियतत्वात् साङ्ख्यैरानिर्मोक्षोऽपरिहार्यः स्यात् । औपनिषदस्य त्वात्मैकत्वाभ्युपगमादेकस्य च विषयविषयिभावानुपपत्तेर्विकारभेदस्य च वाचारम्भणमात्रत्वश्रवणादनिर्मोक्षायङ्का स्वप्नेऽपि नोपजायते । व्यवहारे तु वत्र यथा दृष्टस्तथ्यतापकभावस्तत्र तत्रैव स इति न नोदयितव्यः परिहर्त्तव्यो वा भवति" ।

"प्रधानकारणवादो निराकृतः परमाणुकारणवादः इदानीं निराकर्त्तव्यः । तत्रादौ तावद्वैशेषिका-

रणवादिना ब्रह्मवादिनि दोषउल्लेख्यते स प्रतिसमाधीयते। तत्रायं वैशेषिकाणामभ्युगमः कारणद्रव्यसमवायिनो गुणाः कार्यद्रव्ये समानजातीयं गुणान्तरमारभन्ते शुक्लेभ्यस्तन्तुभ्यः शुक्लस्य पटस्य प्रसवदर्शनात्तद्विपर्ययाऽदर्शनाच्च। तस्माच्चेतनस्य ब्रह्मणो जगत्कारणत्वेऽभ्युपगम्यमाने कार्येऽपि जगति चैतन्यं समवेयात् तददर्शनात्तु न चेतनं ब्रह्म जगत्कारणमभ्युपगन्तुमर्हतीति। इत्यमभ्युपगमतोदोषयत्रैव प्रक्रियया व्यभिचारयति "भा०। "महद्दीर्घवद्ध्रस्वपरिमण्डलाभ्याम्" सू०। "एषा तेषां प्रक्रिया परमाणवः किल कञ्चित्कालमनारब्धकार्या यथायोगं रूपादिमन्तः पारिमाण्डल्यपरिमाणास्तिष्ठन्ति। ते च पश्चादृष्टादिपुरःसराः संयोगसचिवाश्च सन्तो द्व्यणुकादिक्रमेण कृत्स्नं कार्यजातमारभन्ते कारणगुणाश्च कार्ये गुणान्तरम्। यदा द्वौ परमाणू द्व्यणुकमारभेते तदा परमाणुगता रूपादिगुणविशेषाः शुक्लादयो द्व्यणुके शुक्लादीनारभन्ते। परमाणुगुणविशेषस्तु पारिमाण्डल्यं न द्व्यणुके पारिमाण्डल्यमपरमारभते द्व्यणुकस्य परिमाणान्तरयोगमभ्युपगमात्। अणुत्वह्रस्वत्वे हि द्व्यणुकवर्त्तिनी परिमाणे वर्षयन्ति। यदापि द्वे द्व्यणुके चतुरणुकमारभेते तदापि समानं द्व्यणुकसमवायिनां शुक्लादीनामारम्भकत्वम्। अणुत्वह्रस्वते तु द्व्यणुकसमवायिनो अपि नैवारभेते चतुरणुकस्य महत्त्वदीर्घत्वपरिमाणयोगाभ्युपगमात्। यदापि बहवः परमाणवो बहूनि वा द्व्यणुकानि द्व्यणुकसहितो वा परमाणुः कार्यमारभन्ते तदापि समानैषा योजना। तदेवं यथा परमाणोः परिमण्डलात् सतोऽणु ह्रस्वञ्च द्व्यणुकञ्जायते महद्दीर्घञ्च त्र्यणुकादि न परिमण्डलम्। यथा वा द्व्यणुकादणोर्ह्रस्वाच्च सतोमहद्दीर्घञ्च त्र्यणुकादि जायते नाणु नोत ह्रस्वम् एवं चेतनाद्ब्रह्मणो ऽचेतनं जगज्जनिष्यत इत्यभ्युपगमे तव किं क्षिप्तम्। अथ मन्यसे विरोधिना परिमाणान्तरेणाक्रान्तं कार्यद्रव्यं द्व्यणुकादि ततो नारभ्यकाणि कारणगतानि पारिमाण्डल्यादीनि इत्यभ्युपगच्छामि न तु चेतनाविरोधिना गुणान्तरेण जगत व्याक्रान्तत्वमस्ति येन कारणगता चेतना कार्ये चेतनान्तरं नारभेत। न ह्यचेतना नाम चेतनाविरोधी कश्चिदगुणोऽस्ति चेतनाप्रतिषेधमात्रत्वात् तस्मात् पारिमाण्डल्यादिवैषम्यात् प्राप्नोति चेतनाया आरम्भकत्वमिति। मैवं मंस्थाः यथा कारणे विद्यमानानामपि पारिमाण्डल्यादीनामनारम्भकत्वमेवं चैतन्यस्यापीत्यस्यांशस्य समानत्वात्। न च परिमाणान्तराक्रान्तत्वं पारिमाण्डल्यादीनामनारम्भकत्वे कारणं प्राक् परिमाणान्तरारम्भात् पारिमाण्डल्यादीनामारम्भकत्वापत्तेः। आरब्धमपि कार्यद्रव्यं प्राक् गुणारम्भात् क्षणमात्रमगुणं तिष्ठतीत्यभ्युपगमात्। न च परिमाणान्तरारम्भे व्यणुके पारिमाण्डल्यादीनीत्यतः स्वसमानजातीयं परिमाणान्तरं नारभन्ते परिमाणान्तरस्यान्यहेतुकत्वोभ्युपगमात्। "कारणबहुत्वात् पृथक्त्वविशेषाच्च महत् तद्विपरीतमणु। एतेन दीर्घत्वह्रस्वत्वे व्याख्याते"। इति हि काणभुजानि सूत्राणि। न च सन्निधानविशेषात् कुतश्चित् कारणात् बहुत्वादीनि एवारभन्ते न पारिमाण्डल्यादीनीत्युच्येत द्रव्यान्तरे गुणान्तरे वारभ्यमाणे सर्वेषामेव कारणगुणानां स्वाश्रयसमवायाविशेषात्। तस्मात् स्वभावादेव पारिमाण्डल्यादीनामनारम्भकत्वं तथा चेतनाया अपि द्रष्टव्यम्। संयोगाच्च द्रव्यादीनां विलक्षणानामुत्पत्तिदर्शनात् समानजातीयोत्पत्तिव्यभिचारः। द्रव्ये प्रकृते गुणोदाहरणमयुक्तमिति चेन्न दृष्टान्तेन विलक्षणारम्भमात्रस्य विवक्षितत्वात्। न च द्रव्यस्य द्रव्यमेवोदाहर्त्तव्यं गुणस्य वा गुणएवेति कश्चिन्नियमे हेतुरस्ति। सूत्रकारोऽपि भवतां द्रव्यस्य गुणसदाजहार "पृथक्त्वापृथक्त्वानामपृथक्त्वात् संयोगस्य पञ्चात्मकत्वं न विद्यते" इति। यथा पृथक्त्वापृथक्त्वयोर्भूम्याकाशयोः समवयन् संयोगोऽपृथक्त्वः एवं पृथक्त्वापृथक्त्वेषु पञ्चसु भूतेषु समवयत् शरीरमपृथक्त्वं सत्तात् पृथक्त्वन्तु शरीरं दृश्यते तस्मान्न पाञ्चभौतिकमिति। एतदुक्तं भवति गुणश्च संयोगः द्रव्यं शरीरम्" इति भा०।

ईश्वरस्य सर्वकर्तृत्वेऽपि न स्वाभिन्नजीवसृष्टृत्वमिति निर्णयाय ईश्वरस्य जीवसृष्टृत्वादिनोतैष्णवस्य मतमुत्थाप्य तत्रैव निराकृतं यथा! "उत्पत्त्यसम्भवात्" भा० सू०। "येषामप्रकृतिरधिष्ठाता केवलं निमित्तं कारणमीश्वरोऽभिमतस्तेषां पक्षः प्रत्याख्यातः। येषां पुनः प्रकृतिश्चाधिष्ठाता चेत्युभयात्मकं कारणमीश्वरोऽभिमतस्तेषां पक्षः प्रत्याख्यायते। ननु श्रुतिसमाश्रयणेनाप्येवंरूप एवेश्वरः प्राङ्निर्द्धारितः प्रकृतिश्चाधिष्ठाता चेति। श्रुत्यनुसारिणी च स्मृतिः प्रमाणमिति स्थितिः। तत्कस्य हेतोरेष पक्षः प्रत्याख्यास्यते? इति। उच्यते यद्यप्येवंजातीयकोऽयंसमानत्वान्न विसंवादगोचरोभवति अस्ति तु कश्चान्तरं विसंवादस्थानमिति अतस्तत्प्रत्याख्यानायारम्भः। तत्र भगवतः

सन्यन्ते । भगवानेवैको वासुदेवो निरञ्जनः ज्ञानस्वरूपः परमार्थतत्त्वं स चतुर्द्धात्मानं प्रविभज्य प्रतिष्ठितो वासुदेव व्यूहरूपेण, संकर्षणव्यूहरूपेण, प्रद्युम्नव्यूहरूपेण· अनिरुद्धव्यूहरूपेण च । वासुदेवोनाम परमात्मोच्यते । सङ्कर्षणो नाम जीवः । प्रद्युम्नोनाम मनः । अनिरुद्धो नामाहङ्कारः । तेषां वासुदेवः परा प्रकृतिः अपरे संकर्षणादयः कार्य्यम् । तस्मिन्भूतं भगवन्तमभिगमनोपासनेज्यास्वाध्याययोगैर्वर्षशतमिह क्षीणक्लेशोभगवन्तमेव प्रतिपद्यत इति । तत्र यत्तावदुच्यते योऽसौ नारायणः परोऽव्यक्तात् प्रसिद्धः परमात्मा सर्व्वात्मा स आत्मानमनेकधा व्यूह्य व्यवस्थित इति तन्न निराक्रियते "स एकधा भवति त्रिधा भवतीत्यादि" श्रुतिभ्यः परमात्मनोऽनेकधाभवनस्याधिगतत्वात् । यदपि तस्य भगवतोऽभिगमनादिलक्षणमाराधनमजस्रमनन्यचित्ततयाभिप्रेयते तदपि न प्रतिषिध्यते श्रुतिस्मृत्योरीश्वरप्रणिधानस्य प्रसिद्धत्वात् । यत्पुनरिदमुच्यते वासुदेवात् संकर्षण उत्पद्यते संकर्षणाच्च प्रद्युम्नः प्रद्युम्नाच्चानिरुद्ध इति अत्र ब्रूमः न वासुदेवसंज्ञकात् परमात्मनः सङ्कर्षणसंज्ञकस्य जीवस्योत्पत्तिः सम्भवति अनित्यत्वादिदोषप्रसङ्गात् । उत्पत्तिमत्त्वे हि जीवस्यानित्यत्वादयो दोषाः प्रसज्येरन् ततश्च नैवास्य भगवत्प्राप्तिर्मोक्षः स्यात् कारणप्राप्तौ कार्य्यस्य विलयप्रसङ्गात् । प्रतिषेधिष्यति चाचार्योजीवस्योत्पत्तिम् "नात्माऽश्रुतेर्नित्यत्वाच्च" इति । तस्मादसङ्कल्पैषा कल्पना"भा० ।"न च कर्त्तुः करणम्" सू० ।"इतश्चासङ्कल्पैषा कल्पना यस्माच्हि लोके कर्त्तुर्देवदत्तादेः करणं परश्वाद्युत्पद्यमानं दृश्यते । वर्णयन्ति च भागवताः कर्त्तुर्जीवात् संकर्षणसंज्ञकात् करणं मनः प्रद्युम्नसंज्ञकमुत्पद्यते कर्त्तृजाच्च तस्मादनिरुद्धसंज्ञकोऽहङ्कार उत्पद्यत इति । न चैतद्दृष्टान्तमन्तरेणाध्यवसातुं शक्यमः न चैवम्भूतां श्रुतिमुपलभामहे"भा०।"विज्ञानादिभावे वा तदप्रतिषेधः"सू०।"अथापि स्यात् न चैते संकर्षणादयो जीवादिभावेनाभिप्रेयन्ते किन्तर्हीश्वरा एवैते सर्व्वे ज्ञानैश्वर्य्यशक्तिबलवीर्य्यतेजोभिरैश्वर्यधर्म्मैरन्विता अभ्युपगम्यन्ते । वासुदेवा एवैते सर्व्वे निर्दोषा निरधिष्ठाना निराबाधाश्चेति । तस्मादायं यथादर्शितस्तत्त्व सम्भवोदोषः प्राप्नोतीति । अत्रोच्यते । एवमपि तदप्रतिषेध उत्पत्तिसम्भवस्याप्रतिषेधः प्राप्नोत्येवायमुत्पत्तिसम्भवोदोषः प्रकारान्तरे कथं न भवेदित्यभिप्रायः । परस्परभिन्ना एवैते वासुदेवादयः चत्वार ईश्वरास्तुल्यधर्म्माणो नैषामेकात्मत्वमस्तीति ततोऽनेकेश्वरकल्पनानर्थक्यम् एकेनेश्वरेणेश्वरकार्य्यसिद्धेः । सिद्धान्तहानिश्च भगवानेवैको वासुदेवः परमार्थतत्त्वमित्यभ्युपगमात् । अथायमभिप्रायः एकस्यैव भगवतः एते चत्वारोव्यूहास्तुल्यधर्म्माणइति तथापि तदवस्थ एवोत्पत्त्यसम्भवः । न हि वासुदेवात् सङ्कर्षणस्योत्पत्तिः सम्भवति, सङ्कर्षणाच्च प्रद्युम्नस्य, प्रद्युम्नाच्चानिरुद्धस्य, अतिशयाभावात् । भवितव्यं हि कार्य्यकारणयोरतिशयेन यथा मृद्घटयोः । नह्यसत्यतिशये कार्य्यं कारणमित्यवकल्पते । न च पञ्चरात्रसिद्धान्तिभिर्वासुदेवादिषु एकैकस्मिन् सर्व्वेषु वा ज्ञानैश्वर्य्यादितारतम्यकृतः कश्चिद्भेदोऽभ्युपगम्यते । वासुदेवा एव हि सर्व्वे व्यूहा निर्विशेषा इष्यन्ते । नचैते भगवद्व्यूहाश्चतुःसंख्यायामेव व्यवतिष्ठेरन् ब्रह्मादिस्तम्बपर्य्यन्तस्य समस्तस्यैव जगतोभगवद्व्यूहत्वावगमात्"भा० । "विप्रतिषेधाच्च" सू०।"विप्रतिषेधाच्चास्मिन् शास्त्रे बहुविध उपलभ्यते गुणगुणित्वकल्पनादिलक्षणः ज्ञानैश्वर्य्यशक्तिबलवीर्य्यतेजांसि गुणाः आत्मन एवैते भगवतो वासुदेवा इत्यादिदर्शनात् । वेदप्रतिषेधश्च भवति । चतुर्षु वेदेषु परं श्रेयोऽलब्ध्वा शाण्डिल्य इदं शास्त्रमधिगतवानित्यादि वेदनिन्दादर्शनात् । तस्मादसङ्कल्पैषा कल्पनेति सिद्धम्" भा० ।

उपासनया प्राप्तैश्वर्य्यस्यानित्येश्वरस्य तु न जगत्कर्त्तृत्वमित्यपि तत्रैव व्यवस्थापितं यथा "जगद्व्यापारवर्ज्यं प्रकरणादसन्निहितत्वाच्च" शा० सू० । "ये सगुणब्रह्मोपासनात् सत्येव मनसेश्वरसायुज्यं व्रजन्ति किन्तेषां निरवग्रहमैश्वर्यं भवत्याहोस्वित् सावग्रहमिति संशयः । किंतावत् प्राप्तं निरङ्कुशमेवैषामैश्वर्यं भवितुमर्हति "आप्नोति स्वाराज्यं सर्व्वेष्वे देवाचलिसावहन्नि" "तेषां सर्वेषु कामचारो भवतीत्यादि" श्रुतिभ्यः । इत्येवं प्राप्ते पठति "जगद्व्यापारवर्जमिति" । जगदुत्पत्त्यादिव्यापारं वर्जयित्वा अन्यदणिमाद्यात्मकमैश्वर्यं सङ्कल्पानां भवितुमर्हति जगद्व्यापारस्तु नित्यसिद्धस्यैवेश्वरस्य । कुतः ? तस्य तत्र प्रकृतत्वात् असन्निहितत्वाच्चेतरेषाम् । परएव ह्येश्वरो जगद्व्यापारेऽधिकृतः तमेव प्रकृत्योत्पत्त्याद्युपदेशाच्चित्यशब्दनिबन्धनत्वाच्च । तदन्वेषणविजिज्ञासनपूर्वकमितरेषामादिमदैश्वर्यं श्रूयते तेनासन्निहितास्ते जगद्व्यापारे । समनस्कत्वादेव चैषामनैकल्ये कस्यचित् स्थित्यभिप्रायः कस्यचिच्च संहाराभिप्राय इत्येवंविरोधोऽपि कदाचित् स्यात् । अथ कस्यचित्

सङ्कल्पमन्यस्य सङ्कल्प इत्यविरोधः समर्थ्यते ततः परमेश्वराद्भूततन्मात्रमेवेतरेषामिति व्यवतिष्ठते" भा०। "प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः" सू०। "अथ यदुक्तं आप्नोति स्वाराज्यमित्यादि प्रत्यक्षोपदेशाच्चिरवयस्कमैश्वर्यं विदुषां न्याय्यमिति तत्परिहर्त्तव्यम् अत्रोच्यते। नायं दोषः आधिकारिकमण्डलस्थोक्तेः आधिकारिकोयः सवितृमण्डलादिषु व्यवस्थितः परमेश्वरस्तदात्तैवेयं स्वाराज्यप्राप्तिरुच्यते। यत्कारणमनन्तरम् "आप्नोति मनसस्पतिमित्याह। योहि सर्व्वमनसामतिः पूर्व्वसिद्धईश्वरस्तं प्राप्नोति एतदुक्तं भवति। तदनुसारेण चानन्तरम् "वाक्पतिश्चक्षुष्पतिः श्रोत्रपतिर्विज्ञानपतिश्च भवतीत्याह। एवमन्यत्रापि यथासम्भवं नित्यसिद्धेश्वरायत्तमेवेतरेषामैश्वर्यं योजयितव्यम्" भा०। उपासासिद्धस्य यथा जगत्कर्त्तृत्वं न भवति तथानुमानचिन्तामणावनुपदं दर्शितम्। सांख्योक्तदोषनिरसनपूर्व्वकं तस्य सर्व्वविषयंनित्यज्ञानत्वं तत्रैव समर्थितं यथा "यत्पुनरुक्तं ब्रह्मणोऽपि न सर्व्वज्ञत्वं सर्व्वज्ञत्वेपपद्यते नित्यज्ञानक्रियत्वे ज्ञानक्रियां प्रति स्वातन्त्र्यासंभवादिति। अत्रोच्यते इदं तावद्वक्तव्यं प्रष्टव्यः कथं नित्यज्ञानत्वे सर्व्वज्ञत्वहानिरिति ?। यस्य हि सर्व्वविषयावभासलक्षणं ज्ञानं नित्यमस्ति सोऽसर्व्वज्ञ इति विप्रतिषिद्धम्। अनित्यत्वे हि ज्ञानस्य कदाचिज्जानाति कदाचिन्न जानातीत्यसर्व्वज्ञत्वमपि स्यात्, नत्वसौ ज्ञाननित्यत्वे दोषोऽस्ति। ज्ञाननित्यत्वे ज्ञानक्रियां प्रति स्वातन्त्र्यव्यपदेशोनोपपद्यते इति चेन्न प्रततोष्णप्रकाशेऽपि सवितरि दहति प्रकाशयतीति स्वातन्त्र्यव्यपदेशदर्शनात्। ननु सवितृदाह्यप्रकाश्यसंयोगे सति दहति प्रकाशयतीति व्यपदेशः स्यात् न तु ब्रह्मणः प्रागुत्पत्तेर्ज्ञानकर्मसंयोगोऽस्तीति विषमोदाहरणं, न असत्यपि कर्मणि सविता प्रकाशत इति कर्त्तृत्वव्यपदेशदर्शनात्, एवमसत्यपि ज्ञानकर्मणि ब्रह्मणः "तदैक्षतेति" कर्त्तृत्वव्यपदेशोपपत्तेर्न वैषम्यम्। कर्मापेक्षायां तु ब्रह्मण ईक्षितृत्वश्रुतयः श्रुतरानुपपन्नाः। किं पुनस्तत् कर्म ? यत् प्रागुत्पत्तेरीश्वरज्ञानस्य विषयो भवतीति तत्त्वान्यत्वाभ्यामनिर्व्वचनीये नामरूपे अव्याकृते व्याचिकीर्षिते इति ब्रूमः। यत्प्रसादाद्धि योगिनामभ्यतीतानागतविषयं प्रत्यक्षं ज्ञानमिच्छन्ति योगशास्त्रविदः किमु वक्तव्यं तस्य नित्यसिद्धेश्वरस्य सृष्टिस्थितिसंहृतिविषयं नित्यं ज्ञानं भवतीति। यदप्युक्तं प्रागुत्पत्तेर्ब्रह्मणः शरीरादिसंबन्धमन्तरेणेक्षितृत्वमनुपपन्नमिति न तद्वोद्यमवतरति सवितृप्रकाशवत् ब्रह्मणोज्ञानस्वरूपनित्यत्वेन ज्ञानसाधनापेक्षानुपपत्तेः। अपि च अविद्यादिमतः संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिः स्यात् न ज्ञानप्रतिबन्धकरणरहितस्येश्वरस्य। मन्त्रो चेमावीश्वरस्य शरीराद्यनपेक्षतामनावरणज्ञानतां च दर्शयतः। "न तस्य कार्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति" "अपाणिपादोजवनोग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तमिति च"।

अस्मादेव च जीवानां तत्तत्कर्म्मफलसिद्धिर्यथा तथा शा०सूत्रभाष्ययोर्वर्णितम् यथा "फलमत उपपत्तेः" सू०। "तस्यैव हि ब्रह्मणो व्यावहारिक्यामीयिलीयितव्यविभागावस्थायामयमन्यः स्वभावोवर्ण्यते। यदेतदिदानिंव्यामिश्रलक्षणं कर्म्मफलं संसारगोचरं त्रिविधं प्रसिद्धं जन्तूनां किमेतत् कर्म्मणो भवत्याहोस्विदीश्वरप्रसादादिति ? भवति विचारणा। तत्र तावत् प्रतिपद्यते फलमतईश्वराद्भविष्यतीति कुतः ? उपपत्तेः सहि सर्व्वाध्यक्षः सृष्टिस्थितिसंहारान् विचित्रान् विदधद्देशकालविषयाभिज्ञत्वात् कर्म्मिणां कर्म्मानुरूपं फलं संपादयतीत्युपपद्यते। कर्म्मणस्तनुक्षणं विनाशिनः कालान्तरभावि फलं भवतीत्यनुपपन्नम् अभावाद्भावानुत्पत्तेः। स्यादेतत् कर्म्म विनश्यत् स्वकालएव स्वानुरूपं फलमर्जयित्वा विनङ्क्ष्यति तत्फलं कालान्तरितं कर्त्ता भोक्ष्यत इति तदपि न परिशुद्ध्यति प्राग्भोक्तृसम्बन्धात् फलत्वानुपपत्तेः यत्कालं हि यत् सुखं दुःखं वात्मना भुज्यते तस्यैव लोके फलत्वं प्रसिद्धम्। नह्यसम्बद्धस्यात्मना सुखस्य दुःखस्य वा फलत्वं प्रतियन्ति लौकिकाः। अथोच्येत कर्म्मकार्य्यादपूर्व्वात् फलमुत्पत्स्यत इति तदपि नोपपद्यते अपूर्व्वस्याचेतनत्व काष्ठलोष्टसमस्य चेतनाप्रवर्त्तितस्य प्रवृत्त्यनुपपत्तेः तदस्तित्वे च प्रमाणाभावात्। अर्थापत्तिः प्रमाणमिति चेन्न ईश्वरसिद्धेरर्थापत्तिपरिक्षयात्" भा०। "श्रुतत्वाच्च" सू०। "न केवलमनुपपत्तेरेवेश्वरं फलहेतुं कल्पयामः किंतर्हि श्रुतत्वादपीश्वरमेव फलहेतुं मन्यामहे तथाहि श्रुतिर्भवति "स वा एष महानज आत्माऽऽद्योदेवसुदान" इत्येवं जातीयका" भा०। "धर्म्मं जैमिनिरत एव" सू०। "जैमिनिस्त्वाचार्य्यो धर्म्मं फलस्य दातारं मन्यते अतएव हेतोः श्रुतेरुपपत्तेश्च, श्रूयते तावदयमर्थः स्वर्गकामोयजेतेत्येवमादिषु वा-

क्षीषु । तत्र च विचित्रतेर्विषयभावोपगमादयागः स्वर्गस्योत्पादक इति गम्यते अन्यथा ह्यननुग्राहकोयाग आपद्येत तत्रास्योपदेशस्य वैयर्थ्यं स्यात् । नन्वनुक्षणविनाशिनः कर्मणः फलं नोपपद्यत इति परित्यक्तोऽयं पक्षः। नैष दोषः श्रुतिप्रामाण्यात् । श्रुतिचेत् प्रमाणं यथायं कर्मफलसम्बन्धः श्रुतउपपद्यते यथा कल्पयितव्यः नचानुत्पाद्य किमप्यपूर्वं कर्म विनश्यत्कालान्तरितं फलं दातुं शक्नोतीत्यतः कर्मणो वा सूक्ष्मा काचिदुत्तरावस्था, फलस्य वा पूर्वावस्थाऽपूर्वं नामास्तीति तर्क्यते । उपपद्यते चायमर्थः उक्तेन प्रकारेण ईश्वरस्तु फलं ददातीत्यनुपपन्नम् अविचित्रस्य कारणस्य विचित्रकार्यानुपपत्तेः वैषम्य नैर्घृण्यप्रसङ्गादनुग्राहकवैयर्थ्यापत्तेश्च तस्माद्धर्मादेव फलमिति" भा० । "पूर्वन्तु बादरायणोहेतुव्यपदेशात्" सू०। "बादरायणस्त्वाचार्यः पूर्वोक्तमेवेश्वरं फलहेतुं मन्यते । केवलात् कर्मणोऽपूर्वाद्वा केवलात् फलमित्ययं पक्षस्तुशब्देन व्यावर्त्यते । कर्मापेक्षाद्वाऽपूर्वापेक्षाद्वा यथा तथास्येश्वरात् फलमिति सिद्धान्तः । हेतुव्यपदेशात् । धर्माधर्मयोरपि कारयितृत्वेनेश्वरोहेतुर्व्यपदिश्यते फलस्य च दातृत्वेन "एष ह्येव साधु कर्म कारयति तं, यमेभ्यो लोकेभ्य उन्निनीषते एष उ एवासाधु कर्म कारयति तं, यमधोलोकं निनीषत" इति । अर्थ्यते चायमर्थो भगवद्गीतासु ।"योयो यांयां तनुं भक्तः श्रद्धयार्चितुमिच्छति । तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् । स तयाश्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामान् मयैव विहितान् हि तानिति"। सर्ववेदान्तेषु चेश्वरहेतुका एव सृष्टयो व्यपदिश्यन्ते तदेवेश्वरस्य फलहेतुत्वं यत् स्वकर्मानुरूपाः प्रजाः सृजति । विचित्रकार्यानुपपत्त्यादयोऽपि दोषाः कृतप्रयत्नापेक्षत्वादीश्वरस्य न प्रसज्यन्ते"भा०।

मीमांसकैस्तु ईश्वरस्याचेतनताङ्गीकारेण न फलहेतुत्वं किन्तु कर्मण्य एव फलसिद्धिरित्यरोचितं तच्च जैमिनीयमतत्वेन भा०सूत्रभाष्ययोर्दर्शितम् अविषङ्गशब्दे चेश्वरस्याचेतनत्वं यथा तथा ४५।पृष्ठे दर्शितम् ।

"कर्त्ता शास्त्रार्थवत्त्वात्" शास्त्रेण जीवानां कर्तृत्वेऽपि स्वतश्च कारयितृत्वं यथाह भा०सूत्रभाष्ययोः ।

"परात्तु तच्छ्रुतेः"सू०।"यदिदमविद्यावस्थायामुपाधिनिबन्धनं कर्तृत्वं जीवस्याभिहितं तत् किमनपेक्ष्येश्वरं, भवत्याहोस्विदीश्वरापेक्षमिति ? भवति विचारणा । तत्र प्राप्तं तावन्नेश्वरमपेक्षते जीवः कर्तृत्व इति । कस्मात् ? अपेक्षाप्रयोजनाभावात् । अयं हि जीवः स्वयमेव रागद्वेषादिदोषप्रयुक्तः कारणान्तरसामग्रीसम्पन्नः कर्तृत्वमनुभवितुं शक्नोति तस्य किमीश्वरः करिष्यति ? । न च लोके प्रसिद्धिरस्ति कृष्यादिकासु क्रियासुखनडुदादिवदीश्वरोऽपरोऽपेक्षितव्य इति । क्लेशात्मकेन च कर्तृत्वेन जन्तून् संसृजत ईश्वरस्य नैर्घृण्यं प्रसज्येत, विषमफलञ्चैषां कर्तृत्वं विदधतो वैषम्यम् । नन्वेवं वैषम्यनैर्घृण्येन सापेक्षत्वादित्युक्तम् । सत्यमुक्तं सति त्वीश्वरस्य सापेक्षत्वसम्भवे, सापेक्षत्वञ्चेश्वरस्य सम्भवति सतोर्जन्तूनां धर्माधर्मयोः, तयोश्च सद्भावः सति जीवस्य कर्तृत्वे, तदेव चेत् कर्तृत्वमीश्वरापेक्षं स्यात् किंविषयमीश्वरस्य सापेक्षत्वमुच्यते । अकृताभ्यागमश्चैवं जीवस्य प्रसज्येत । तस्मात् स्वतएव जीवस्य कर्तृत्वमिति । एतां प्राप्तिं तुशब्देन व्यावर्त्त्य प्रतिजानीते परादिति । अविद्यावस्थायां कार्यकरणसङ्घातविवेकदर्शिनोजीवस्याविद्यातिमिरान्धस्य सतः परमात्मनः कर्माध्यक्षात् सर्वभूताधिवासात् साक्षिणश्चेतयितुरीश्वरात्तदनुज्ञया कर्तृत्वभोक्तृत्वलक्षणस्य संसारस्य सिद्धिः तदनुग्रहहेतुकेन च विज्ञानेन मोक्षस्य सिद्धिः भवितुमर्हति । कुतः ? तच्छ्रुतेः । यद्यपि दोषप्रयुक्तः सामग्रीसम्पन्नश्च जीवः, यद्यपि च लोके कृष्यादिषु कर्मसु नेश्वरकारणत्वं प्रसिद्धं तथापि सर्वास्वेव प्रवृत्तिषु ईश्वरोहेतुकर्त्तेति श्रुतेरवसीयते । तथा हि श्रुतिर्भवति "एष ह्येव साधु कर्म कारयति तं, यमेभ्यो लोकेभ्य उन्निनीषते, एष उ एवासाधु कर्म कारयति तं, यमधोलोकं निनीषते" इति "य आत्मनि तिष्ठन्नात्मनोन्तरोयमयतीति"चैवं जातीयका । नन्वेवमीश्वरस्य कारयितृत्वे सति वैषम्यनैर्घृण्ये स्याताम् अकृताभ्यागमश्च जीवस्येति नेत्युच्यते"भा० "कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः"सू०।"तुशब्दोनोदितदोषव्यावर्त्तनार्थः। कृतायः प्रयत्नोजीवस्य धर्माधर्मलक्षणः तदपेक्ष एव चैनमीश्वरः कारयति ततश्चैते नोदिता दोषा न प्रसज्यन्ते । जीवकृतधर्माधर्मवैषम्यापेक्ष एव तत्फलानि विषमं विभजते पर्जन्यवदीश्वरोनिमित्तमात्रेण । यथा लोके नानाविधानां यवव्रीहादीनां गुच्छगुल्मादीनां वाऽसाधारणेभ्यः स्वबीजेभ्यो जायमानानां साधारणनिमित्तं भवति पर्जन्यः, नह्यसति पर्जन्ये रसपुष्पफलपल्लवादिवैषम्यं तेषां जायते नाप्यसत्सु स्वबीजेषु, एवं जीवकृतप्रयत्नापेक्षईश्वरस्तेषां शुभाशुभं विदध्यादिति शिष्यते । नन्वेवं कृतप्रयत्नत्वमेव जीवस्य

परायत्ते कर्तृत्वे नोपपद्यते । नैष दोषः । परायत्तेऽपि हि कर्तृत्वे करोत्येव जीवः कुर्वन्तं हि तमीश्वरः कारयति । अपि च पूर्वप्रयत्नमपेक्ष्येदानीं कारयति, पूर्वतरञ्च प्रयत्नमपेक्ष्य पूर्वमकारयदित्यनादित्वात् संसारस्यानवद्यम् । कथं पुनरवगम्यते कृतप्रयत्नापेक्ष ईश्वर इति ? विहितप्रतिषिद्धावैयर्थ्यादिभ्य इत्याह । एवं हि "स्वर्गकामो यजेत ब्राह्मणो न हन्तव्यः" इत्येवंजातीयकस्य विहितस्य प्रतिषिद्धस्य चावैयर्थ्यं भवति अन्यथा तदनर्थकं स्यात् ईश्वर एव विधिप्रतिषेधयोर्नियुञ्जेत अत्यन्तपरतन्त्रत्वाज्जीवस्य । तथा विहितकारित्वमप्यनर्थेन संसृजेत्, प्रतिषिद्धकारित्वमप्यर्थेन, ततश्च प्रामाण्यं वेदस्यात्मियात् । ईश्वरस्य चात्यन्तापेक्षत्वे लौकिकस्यापि पुरुषकारस्य वैयर्थ्यं तथा देशकालनिमित्तानां पूर्वोक्तदोषप्रसङ्गश्चेत्येवंजातीयकदोषजातमादिग्रहणेन दर्शयति" भा० ।

सेश्वरसांख्यमते तु ईश्वराधिष्ठितप्रधानस्य जगत्कर्तृत्वं तत्रेश्वरप्रसादाद्योगसिद्धितत्स्वरूपादिकं पातञ्जलसूत्रभाष्यविवरणेषु दर्शितं यथा ।

"किमेतस्मादेवासन्नतरः समाधिर्भवति अथास्य लाभे किं भवत्यन्योऽपि कश्चिदुपायो ? न वेति" भा० "ईश्वरप्रणिधानाद्वा" सू० २३ । "प्रणिधानाद्भक्तिविशेषादावर्जितईश्वरस्तमनुगृह्णात्यभिध्यानमात्रेण तदभिध्यानमात्रादपि योगिनः आसन्नतरः समाधिलाभः फलञ्च भवतीति" भा० २३ । अथ प्रधानपुरुषव्यतिरिक्तः कोऽयमीश्वरोनामेति ?" भा० । "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" सू० २४ । "अविद्यादयः क्लेशाः । कुशलाऽकुशलानि कर्माणि । तत्फलं विपाकः । तदनुगुणा वासना आशयाः । ते च मनसि वर्त्तमानाः पुरुषे व्यपदिश्यन्ते स हि तत्फलस्य भोक्तेति । यथा जयः पराजयो वा योद्धृषु वर्त्तमानः स्वामिनि व्यपदिश्यते । योऽनेन भोगेनाऽपरामृष्टः स पुरुषविशेष ईश्वरः । कैवल्यं प्राप्तास्ति सन्ति च बहवः केवलिनः ? ते हि क्लेशि बन्धनानि छित्वा कैवल्यं प्राप्ताः ईश्वरस्य च तत्सम्बन्धो न भूतो न भावी यथा मुक्तस्य पूर्व्वा बन्धकोटिः प्रज्ञायते नैवमीश्वरस्य, यथा वा प्रकृतिलीनस्योत्तरा बन्धकोटिः सम्भाव्यते नैवमीश्वरस्य, स तु सदैव मुक्तः, सदैवेश्वर इति । योऽसौ प्रकृष्टसत्वोपादानादीश्वरस्य शाश्वतिकः उत्कर्षः स किं सनिमित्तः ? आहोस्विन्निर्निमित्तः ? इति तस्य शास्त्रं निमित्तं, शास्त्रं पुनः किंनिमित्तम् ? एतयोः शास्त्रोत्कर्षयोरीश्वरसत्वे वर्त्तमानयोरनादिः सम्बन्धः । एतस्मादेतद्भवति सदैवेश्वरः सदैव मुक्त इति । तच्च तस्यैश्वर्यं सास्मातिशयविनिर्मुक्तं न तावदैश्वर्यान्तरेण तदतिशय्यते यदेवातिशयि स्यात् तदेव तत् स्यात् तस्य । यत्र काष्ठाप्राप्तिरैश्वर्यस्य स ईश्वरः, न च तत्समानमैश्वर्यमस्ति । कस्मात् ? द्वयोरेकस्मिन् युगपत्कामितेऽर्थे नवमिदमस्तु पुराणमिदमस्तिति एकस्य सिद्धावितरस्य प्राकाम्यविघाताद्दूनत्वं प्रसक्तं, द्वयोश्च तुल्ययोर्युगपत्कामितार्थप्राप्तिर्नास्ति, अर्थस्य विरुद्धत्वात् तस्माद् यस्य सास्मातिशयविनिर्मुक्तमैश्वर्यं स ईश्वरः, स च पुरुषविशेषः इति" भा० २४ । किञ्च "तत्र निरतिशयं सर्व्वज्ञबीजम्" सू० २५ । यदिदमतीतानागतप्रत्युत्पन्नप्रत्येकसमुच्चयातीन्द्रियग्रहणमल्पं बहिति सर्व्वज्ञबीजमेतद्विवर्द्धमानं यत्र निरतिशयं स सर्व्वज्ञः । अस्ति काष्ठाप्राप्तिः सर्व्वज्ञबीजस्य, सातिशयत्वात् परिमाणवदिति यत्र काष्ठाप्राप्तिर्ज्ञानस्य स सर्व्वज्ञः स च पुरुषविशेष इति । सामान्यमात्रोपसंहारे क्लेशोपक्षयमनुमानं न विशेषप्रतिपत्तौ समर्थमिति । तस्य संज्ञादिविशेषप्रतिपत्तिरागमतः पर्य्यन्वेष्या । तस्मात्सानुग्रहाभावेऽपि भूतानुग्रहः प्रयोजनम् । ज्ञानधर्म्मोपदेशेन कल्पप्रलयमहाप्रलयेषु संसारिणः पुरुषानुद्धरिष्यामीति । तथाचोक्तम् "आदिविद्वान्निर्म्माणचित्तमधिष्ठाय कारुण्याद्भगवान् परमर्षिरासुरये जिज्ञासमानाय तन्त्रं प्रोवाचेति" भा० २५ । स एषः "पूर्व्वेषामपि गुरुः कालेनानवच्छेदात्" सू० २६ । "पूर्व्वे हि गुरवः कालेनावच्छिद्यन्ते यत्रावच्छेदार्थेन कालोनोपावर्त्तते स एष पूर्व्वेषामपि गुरुः कुतोऽस्य सर्गस्यादौ प्रकर्षगत्या सिद्धः तथातिक्रान्तसर्गादिष्वपि प्रत्येतव्यः" व्यासभाष्यम् २६ ।

विवृतमिदं वाचस्पतिना यथा "क्लेशान्तरव्यावर्तयितुं विकल्पयति किमेतस्मादेवेति । नवशब्दः संशयनिवर्त्तकः । ईश्वरप्रणिधानाद्वा । व्याचष्टे—प्रणिधानाद्भक्तिविशेषान्नानसाद्वाचिकात्कायिकाद्वा आवर्जितोऽभिमुखीकृतस्तमनुगृह्णाति, अभिध्यानमनागतेऽर्थे इच्छा इदमस्माभिप्रेतमस्तिति, तन्मात्रेण न व्यापारान्तरेण, शेषं सुगमम्" २३ । ननु चेतनाऽचेतनाभ्यामेव व्यूढं विश्वम्, नान्येन, ईश्वरश्चेदचेतनस्तर्हि प्रधानं, प्रधानविकाराणामपि प्रधानमध्यपातात्तदाह न तस्यावर्त्तनमचेतनत्वात् अथ चेततनस्तथापि चितिशक्तेरौदासीन्या-

दसंसारितया चाक्षिप्तादिविरहात् कृतश्चावर्जनम् ? कृतश्चाभिध्यानम् ? इत्याशयवानाह, अथ प्रधानेति । अत्र सूत्रेणोत्तरमाह "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषईश्वरः" । (न्यायकन्दल्यां क्लेशकर्मेत्यत्र जन्मेतिपदमधिकम् दृश्यते तच्च लिपिकरप्रमादकृतम्) अविद्यादयः क्लेशाः, क्लिश्नन्ति खल्वमी पुरुषं सांसारिकं विविधदुःखप्रहारेणेति । "कृशलाकृशलानोति" धर्म्माधर्म्मौ तेषाञ्च कर्म्मजत्वादुपचारात् कर्म्मत्वम् । विपाकोजात्यायुर्भोगाः विपाकानुगुणा वासनास्तास्चित्तभूमौ आशेरत इति आशयाः नहि करभजातिनिर्वर्त्तकं कर्म्म प्राग्भवीयकरभभोगभावितां भावनां न यावदभिव्यनक्ति तावत्करभोचिताय भोगाय कल्पते, तस्माद्भवति करभजात्यनुभवजन्मा भावना करभविपाकानुगेति । नन्वमी क्लेशादयोबुद्धिधर्म्मा न कथञ्चिदपि पुरुषं परामृशन्ति तस्मात् पुरुषप्रकृष्टादेव तदपरामर्शसिद्धेः कुत क्लेशकर्म्मेत्यादिनेत्यत आह, "ते च मनसि वर्त्तमानाः सांसारिके पुरुषे व्यपदिश्यन्ते" कस्मात् ? "स हि तत्फलस्य भोक्ता चेतयितेति" । तस्मात् पुरुषत्वादीश्वरस्यापि तत्सम्बन्धः प्राप्त इति तत्प्रतिषेधउपपद्यत इत्याह, योऽनेन बुद्धिस्थेनापि पुरुषमात्रसाधारणेन भोगेनापरामृष्टः । स पुरुषविशेष ईश्वरः, विशिष्यते इति विशेषः पुरुषान्तराद्व्यवच्छिद्यते । विशेषपदव्यावर्त्त्यं दर्शयितुकामः परिनोदनापूर्वं परिहरति कैवल्यं प्राप्नोत्यहि इति । प्रकृतिलयानां प्राकृतोबन्धः, वैकारिकोविदेहानाम् दक्षिणकादिबन्धोदिव्यादिव्यविषयभोगभाजाम् । तान्यमूनि त्रीणिबन्धनानि । प्रकृतिभावनासंस्कृतमनसोहि देहपातानन्तरमेव प्रकृतिलयतामापद्यन्ते इतितेषां पूर्व्वा बन्धकोटिः प्रकाशते तेनोत्तरकोटिविधानमात्रमिह तु पूर्व्वापरकोटिनिषेध इति संक्षिप्य विशेषं दर्शयति "स तु सदैव मुक्तः सदैवेश्वरः" इति । ज्ञानक्रियाशक्तिसम्पदैश्वर्य्यं । अत्र पृच्छति "योऽसाविति" ज्ञानक्रिये हि न चित्तक्लेशपरिणामिन्यौ सम्भवत इति । रजस्तमोरहितविशुद्धचित्तसत्त्वाश्रये वक्तव्ये । नचेश्वरस्याविद्याप्रभवचित्तसत्त्वसत्कर्मैश्च सह स्वस्वामिभावसम्बन्धः सम्भवतीत्यतउक्तं, प्रकृष्टसत्त्वोपादानादिति । नेश्वरस्य पृथग्जनसेवाविद्यानिबन्धनचित्तसत्त्वेन स्वस्वामिभावः, किन्तु तापत्रयपरीतान् प्रेत्यभावसहार्थत्वात् जन्तूद्धरिष्यामीज्ञानधर्म्मोपदेशेन । न च ज्ञानक्रियासामर्थ्यातिशयसम्पत्तिमन्तरेण तदुपदेशः, नचेयमप्रकृष्टरजस्तमोमलविशुद्धसत्त्वोपादानं विनेत्यालोच्य सत्त्वप्रकर्षमुपादत्ते भगवानपरामृष्टोऽप्यविद्याऽविद्याभिमानीवाविद्यायास्तत्त्वमविद्वान् भवति न पुनरविद्यामविद्यात्वेन सेवमानः, न खलु शैलपोरासत्वमारोप्य तात्त्वाचेष्टादर्शयन् भ्रान्तोभवति तदिदमाचार्यमसद्रूपत्व तात्त्विकमिति । स्यादेतदुद्दिधीर्षया भगवता सत्त्वमुपादेयं तदुपादानेन च तदुद्दिधीर्षा अस्या अपि प्राकृतत्वात्तयाचान्योन्यसंश्रय इत्यतउक्तं, याद्भुतिक इति । भवेदेतदेवं यदीदंप्रथमता सर्गस्य भवेत्, अनादौ तु सर्गसंहारप्रबन्धे सर्गान्तरसत्प्रसङ्गिक्लेशाविषमये, पूर्वं मया सत्त्वप्रकर्षं उपादेय इति प्रणिधानं कृत्वा भगवान् जगत्संजहार, तदा चेश्वरचित्तसत्त्वं प्रणिधानवासनावासितप्रधानसाम्यमुपगतमपि परिपूर्णं महाप्रलयावधौ प्रणिधानवासनावशात्तथैवेश्वरचित्तसत्त्वभावेन परिणमते यथा चैत्रः श्वः प्रातरेवोत्थातव्यं मयेति प्रणिधाय सुप्तस्तदैवोत्तिष्ठति प्रणिधानसंस्कारात्, तस्मादनादित्वादीश्वरप्रणिधानसत्त्वोपादानयोः याद्भुतिकत्वेन नान्योन्यसंश्रयः । नचेश्वरस्य चित्तसत्त्वं महाप्रलयेऽपि न प्रकृतिसाम्यमुपैतीति वाच्यं ? यस्य हि न कदाचिदपि प्रधानसाम्यं न तत्प्राधानिकं नापि चितिशक्तिः अत्रा तत्त्वेऽर्थान्तरमप्राप्तिकमापद्येत । तच्चायुक्तं, प्रकृतिपुरुषव्यतिरेकेणार्थान्तराभावात् । सोऽयमीदृश ईश्वरस्य याद्भुतिक उत्कर्षः किं सनिमित्तः सप्रमाणकः ? आहोस्विन्निर्निमित्तः निष्प्रमाणकः ? इति । उत्तरम्—तस्य याद्भुं निमित्तं श्रुतिस्मृतीतिहासपुराणानि याद्भुतम् । नोदयति याद्भुं पुनः किं निमित्तम् ? प्रत्यक्षानुमानपूर्व्वं हि याद्भुतम् ? नचेश्वरस्य सत्त्वप्रकर्षे कस्यचित् प्रत्यक्षमनुमानं वास्ति । नचेश्वरप्रत्यक्षप्रभवं याद्भुमिति युक्तं, कल्पयित्वापि ह्ययं स्वयं ब्रूयादात्मैश्वर्यप्रकाशनायेति भावः। परिहरति प्रकृष्टसत्त्वनिमित्तम् । अयमभिसन्धिः मन्त्रायुर्वेदेषु तावदीश्वरप्रणीतेषु प्रवृत्तिसामर्थ्यादर्थाव्यभिचारविनिश्चयात् प्रामाण्यं सिद्धम् । नचौषधिमेदानां तत्तद्योगविशेषाणाञ्च मन्त्राणाञ्च तत्तद्वर्णावापोद्धारेण सहस्रेणापि पुरुषायुर्वैलौकिकप्रमाणव्यवहारोशक्यः कर्तुमन्वयव्यतिरेकौ । नचागमादन्वयव्यतिरेकौ ताभ्यां चागमस्तत्सन्तानयोरनादित्वादिति प्रतिपादयितुं युक्तं, महाप्रलये तत्सन्तानयोर्विच्छेदात् न च तद्भावे प्रमाणाभावः । अभिन्नं प्रधानविकारि जगदिति हि प्रतिपादयिष्यते । सदृशपरिणामस्य पूर्वं सदृशपरिणामकृता दृष्टा । यथा क्षीरेणुरसादेर्दधिगुडादिरूपम् ।

विसदृशपरिणामस्य पूर्वसदृशपरिणामता च दृष्टा। तद्दिह प्रधानेनापि महदहङ्कारादिरूपविसदृशपरिणामेन सता भाव्यम्। कदाचित् सदृशपरिणामेन सदृशपरिणामवत्त्वात् साम्यावस्था स च महाप्रलयः। तस्मान्नास्त्यायुर्वेदप्रणयनात् तावद्भगवता रजस्तमोमलावरणतया परितः प्रद्योतमानं बुद्धिसत्वमास्थेयं तथा चाभ्युदयनिःश्रेयसोपदेशपरोऽपि वेदराशिरीश्वरप्रणीतस्तद्बुद्धिसत्वप्रकर्षादेव भवितुमर्हति। न च सत्वोत्कर्षे रजस्तमःप्रभवौ विभ्रमविप्रलम्भौ सम्भवतस्तत्प्रभूतसत्वनिमित्तं शास्त्रमिति। स्यादेतत् प्रकर्षकार्यतया प्रकर्षं बोधयच्छास्त्रम् शेषवदनुमानं भवेन्न त्वागम इत्यत आह, एतैरिति। न कार्यत्वेन बोधयति अपि त्वनादिवाच्यवाचकभावसम्बन्धेन बोधयतीत्यर्थः। ईश्वरस्य हि बुद्धिसत्वे प्रकर्षोवर्त्तते, शास्त्रमपि तद्वाचकत्वेन तत्र वर्त्तते इति। उपसंहरति, एतस्मात् ईश्वरबुद्धिसत्वप्रकर्षवाचकाच्छास्त्रादेतद्भवति ज्ञायते विषयेण विषयिणोलक्षणात्। सदैवेश्वरः सदैव मुक्तः इति। तदेव पुरुषान्तराद्व्यवच्छिद्येश्वरान्तरादपि व्यवच्छिनत्ति तच्च तस्येति। अतिशयविनिर्मुक्तिमाह न तावदिति। कुतः? यदेवेति। कस्मात् सर्व्वातिशयविनिर्मुक्तं तदैश्वर्य्यम्? इत्यत आह, तस्माद्यत्नेति। अतिशयनिष्ठामप्राप्तानामौपचारिकमैश्वर्य्यमित्यर्थः। साम्यविनिर्मुक्तिमाह न च तत्समानमिति। प्राकाम्यमविहतेच्छता तद्विघाताद्यूनत्वम्, अन्यूनत्वे वा द्वयोरपि प्राकाम्यविघातः कार्य्यानुत्पत्तिर्वा विरुद्धधर्मसमाक्रान्तमेकदा कार्य्यमुपलभ्येतेत्याशयवानाह द्वयोश्चेति। अविरुद्धाभिप्रायत्वे वा प्रत्येकमीश्वरत्वे कृतमन्यैरेकेनैवेशनायाः कृतत्वात्, सम्भूयकारित्वे वा न कश्चिदीश्वरः परिच्छेदवत्, नित्येशनायोगिनाञ्च पर्य्यायायोगात्, कल्पनागौरवप्रसङ्गाच्चेति द्रष्टव्यं तस्मात्सर्व्वमवदातम्" २४वि०। एवमस्य क्रियाज्ञानशक्तौ शास्त्रं प्रमाणमभिधाय ज्ञानशक्त्यनुमानं प्रमाणयति, किञ्च "तत्र निरतिशयं सर्व्वज्ञबीजम्"। व्याचष्टे यदिदमिति। बुद्धिसत्वावरकतमोऽपगमतारतम्येन यदिदमतीतानागतप्रत्युत्पन्नानां प्रत्येकञ्च समुच्चयेन च वर्त्तमानानामतीन्द्रियाणां ग्रहणं तस्य विशेषणमत्यं वर्द्धिति सर्व्वज्ञबीजं कारणम्, क्वचित् किञ्चिद्देवादीनादि ग्रहाति, क्वचिच्छ्रुततरं, क्वचिच्छ्रुतमनुमितं प्राज्ञप्रेक्षया ग्रहणस्वल्पत्वं बहुत्वं कृतम् एतद्विवर्द्धमानं यत्र निष्प्रकाशमतिशयात् स सर्व्वज्ञ इति तदनेन प्रमेयमात्रं कथितम्। यत्र प्रमाणयति अस्तिकाष्ठाप्राप्तिः सर्व्वज्ञबीजस्येति" साध्यनिर्देशः निरतिशयत्वं काष्ठा यतः परमतिशयवत्ता नास्तीति। तेन नावधिमात्रेण सिद्धसाधनम्, सातिशयत्वादिति हेतुः। यद्यत् सातिशयं तत्तत् सर्व्वं निरतिशयं यथा कुवलयामलकविल्वेषु सातिशयं महत्त्वम् आत्मनि निरतिशयमिति व्याप्तिं दर्शयति परिमाणवत्। न च परिमाणादिगुणैर्व्यभिचार इति साम्प्रतं न खल्ववयवपरिमाणवत्त्वं, किन्त्वापरमाणुभ्य ऊर्ध्वावयवविभ्यो यावन्तः केचन, तेषामूर्ध्वैकवर्त्तिनो परिमृणः समाहृत्य परिमण्डलमानाभिमानः ज्ञानन्तु प्रतिक्षेत्रं समाप्यत इत्येकद्विबहुविषयतया युक्तं सातिशयमिति न व्यभिचारः। उपसंहरति, यत्र काष्ठा इति। ननु सन्ति बहवस्तीर्थकरा बुद्धार्हत्कपिलर्षिप्रभृतयस्तत् कस्मात् ते एव सर्व्वज्ञा न भवन्यस्मादनुमानात्? इत्यत आह, सामान्येति। कुतस्तर्हि तद्विशेषप्रतिपत्तिः? इत्यत आह, तस्येति। बुद्धादिप्रणीत आगमाभासो नत्वागमः, सर्व्वप्रमाणबाधितलक्षणैरात्मादिमार्गोपदेशकत्वेन विप्रलम्भकत्वादिति भावः। तेन श्रुतिस्मृतीतिहासपुराणलक्षणादागमतः आगच्छन्ति बुद्धिमारोहन्ति यस्मादभ्युदयनिःश्रेयसोपाया इत्यागमः। तस्मात् संज्ञादिविशेषप्रतिपत्तिः। संज्ञाविशेषः शिवेश्वरादिश्रुत्यादिषु प्रसिद्धः। आदिपदेन षड्ङ्गतादशाख्यते संगृह्यते। यथोक्तं वायुपुराणे "सर्व्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलप्रशक्तिः। अनन्तशक्तिश्च विभोर्विधिज्ञाः षड्ङ्गरङ्गानि महेश्वरस्य"। तथा "ज्ञानं वैराग्यमैश्वर्य्यं तपः सत्यं क्षमा धृतिः। सृष्टित्वमात्मसंबोधोऽधिष्ठातृत्वमेव च। अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे" इति। स्यादेतन्नित्यत्वप्रसङ्गो भगवतैश्वर्य्यातिशयसम्बन्धस्य स्वार्थे तृष्णासम्भवात्, कारुणिकस्य च सुखैकतानजनसर्व्वज्ञपरस्य दुःखबहुलजीवलोकजननानुपपत्तेरप्रयोजनस्य च प्रेक्षावतः प्रवृत्त्यनुपपत्तेः क्रियाशक्तिशालिनोऽपि न जगत्क्रियेत्यत आह, तस्यात्मानुग्रहाभावेऽपीति। भूतानां प्राणिनामनुग्रहः प्रयोजनं यद्भाव्युपभोगविवेकख्यातिरूपकार्यकरणात् किल, चरितार्थं चित्तं निवर्त्तते ततः पुरुषः केवलो भवति अतस्तत्प्रयोजनाय कारुणिकोविवेकख्यात्युपायं कथयति तेनाचरितार्थत्वात् चित्तस्य जन्मनू, ईश्वरः पुरुषपुण्यसहायः सुखदुःखे भावयन्नपि नाकारुणिकः। विवेकख्यात्युपायक

नाथ भूतानुग्रहद्वारमाह ज्ञानधर्मोपदेशेनेति । ज्ञानञ्च धर्मश्च ज्ञानधर्मौ तयोरुपदेशेन ज्ञानधर्मसङ्ग्रयाद्ब्रह्मविवेकख्यातिपरिपाकात् । कल्पप्रलये-ब्रह्मणोदिनावसाने यत्र सत्यलोकवर्जं जगदस्तमेति, महाप्रलये सप्तसत्यलोकसह ब्रह्मणोऽपि निधने, संसारिणः स्वकारणगामिनस्तदा मरणदुःखभाजः । कल्पेत्यु पलक्षणम् । अन्यदापि स्वार्जितकर्मपाकवशेन जन्ममरणादिभोजः पुरुषानुद्धरिष्यामीति कैवल्यं प्राप्य पुरुषा उद्धृता भवन्त्वित्यर्थः । एतच्च करुणाप्रयुक्तस्य ज्ञानधर्मोपदेशनं कपिलानामपि सिद्धमित्याह, "तथा चोक्तं आदिविद्वान् कपिल" इति । आदिविद्वानिति पञ्चशिखाचार्यवचनम् आदिशब्दसप्तम्यानादिगुरुविषयं, नत्वनादिसृष्टपरमगुरुविषयम्, आदिसर्गेषु कदाचिन्मुक्तेषु विद्वत्सु कपिलेषु अस्माकमादिर्विद्वान् मुक्तः स एव च गुरुरिति । कपिलस्यापि जायमानस्य महेश्वरानुग्रहादेव ज्ञानप्राप्तिः । श्रूयते हि कपिलोनाम विष्णोरवतारविशेषः प्रसिद्धः स्वयंभूस्तु हिरण्यगर्भः, तस्यापि साङ्ख्ययोगप्राप्तिर्वेदे श्रूयते इति "स एवेश्वरः आदिविद्वान् कपिलोविष्णुः स्वयम्भूरिति" स्वायम्भुवादीनामपीश्वर इति भावः २५ । "सम्मति भगवतो ब्रह्मादिभ्योविशेषमाह, "स एव इति प्रातनिका न तु सूत्रम् "पूर्वेषामपि गुरुः कालेनानवच्छेदात्" । व्याचष्टे, पूर्वे हीति । कालस्तु शतवर्षादिः, अवच्छेदार्थेन अवच्छेदनप्रयोजनेनोपावर्त्तते, न वर्त्तते प्रकर्षस्य गतिः प्राप्तिः प्रत्येतव्या आगमात् । तदनेन प्रबन्धेन भगवानीश्वरोदर्शितः" २६ वाचस्पतिविवरणम् ।

तस्येश्वरस्य लक्षणम् "जन्माद्यस्य यतः" इ० सूत्रभाष्ययोर्दर्शितम् तच्चोपादाननिमित्तकारणोभयकारणपरतया समर्थितं तच्चानुपदमेवोदाहृतम् । तस्य लक्षणानि नवमितानि यथाह ब्रह्मणस्तटस्थलक्षणोदाहरणे वेदा० परि० "प्रकृते च जगज्जन्मादिकारणत्वम् । अत्र जगत्पदेन कार्यजातं विवक्षितम् । कारणत्वञ्च कर्तृत्वम् अतो ऽविद्यादौ नातिव्याप्तिः । कर्तृत्वञ्च तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम् । ईश्वरस्य तावदुपादानगोचरापरोक्षज्ञानसद्भावे च "यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः । तस्मादेतद्ब्रह्म नाम रूपमन्नञ्च जायते" इत्यादि श्रुतिस्मृतिसम् । तादृशचिकीर्षासद्भावे च "सोऽकामयत बहु स्यां प्रजायेयेति-श्रुतिस्मृतिसम् । तादृशकृतौ च "तन्मनोऽकुरुतेत्यादि" वाक्यम् । ज्ञानेच्छाकृतीनामन्यतमगर्भं लक्षणमित्यं विवक्षितम् अन्यथा व्यर्थविशेषणापत्तेः । अतएव जन्मस्थितिध्वंसानामन्यतमस्यैव लक्षणे प्रवेशः । एवञ्च लक्षणानि नव सम्भवन्ति । ब्रह्मणोजगज्जन्मादिकारणत्वे च "यतोवा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्तीत्यादि" श्रुतिस्मृतिसम् । यद्वा निखिलजगदुपादानत्वं जगदाकारेण परिणम्यमानमायाधिष्ठानत्वं वा । एतादृशमेवोपादानत्वमभिप्रेत्य "इदं सर्वं यदयमात्मा" "सच्चासच्चाभवत्" "बहु स्यां प्रजायेय" इत्यादिश्रुतिषु ब्रह्मप्रपञ्चयोरात्मात्मव्यपदेशः । घटः सन् घटोभाति घटस्ट इत्यादिलौकिकव्यपदेशोऽपि सच्चिदानन्दरूपब्रह्माध्यासात्' । अतएव "अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् । आद्यं त्रयं ब्रह्मरूपं मायारूपं ततो द्वय"मित्युक्तम् । श्रीधरस्वामिनाऽपि भाग० १ श्लो० टीकायाम् "विश्वसर्गविसर्गादिनवलक्षणलक्षितम्" इत्यनेन ब्रह्मणः सर्गादित्वस्य ज्ञानचिकीर्षाकृतिमत्त्वेन नव लक्षणान्युक्तानि । "मायोपाधिरयं जीवोह्यविद्योपाधिरीश्वर" इत्युक्तेः तस्याविद्योपाधित्वम् अविद्या च कार्यकारणभेदेन द्विविधा तत्र कार्यरूपा मायाशब्देन वाच्या कारणरूपा तु अविद्याशब्दवाच्या । तत्र कार्यरूपाभिप्रायेणैव "इन्द्रोमायाभिःपुरुरूप ईयते" श्रुतिर्द्रष्टव्या । अविद्याभिप्रायेणैव तु "मायान्तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्" । "अजामेकां लोहितशुक्लकृष्णवर्णामित्यादि" श्रुतिश्च द्रष्टव्या । तस्या एकत्वेऽपि सत्वरजस्तमोरूपगुणभेदात् त्रैविध्येन तदुपहितचैतन्यस्यापि त्रैविध्यम् । तदभिप्रायेणैव "स च परमेश्वरः एकोऽपि स्वोपाधीभूतमायानिष्ठसत्वरजस्तमोगुणभेदेन ब्रह्मविष्णुमहेश्वरादिशब्दवाच्यतां भजते" इति वेदा० परि० । "सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते । स्थित्यादये हरिविरिञ्चिहरेतिसंज्ञाः" भागवतम् । मत्स्यावतारप्रभृतयोऽपि ब्रह्मकोटयएव । अत एव सिद्धान्तबिन्दौ "ब्रह्माकारविष्णुप्रभृतीनां स्वाकाराणाञ्च भारतीप्रभृतोमामोश्वररूपत्वमुक्तम् । तस्य नित्यतया निरवयवत्वेऽपि तत्तज्जीवादृष्टवशात् तेषामुपासासिद्ध्यर्थं श्रुतिवेदपुराणप्रसिद्धाकारग्रहणम् "चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः । उपासकानां सिद्ध्यर्थं ब्रह्मणोरूपकल्पने"त्युक्तेः "योयो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति । तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहमिति" गीतोक्तेश्च । ईश्वरविभूतिशब्दे च दर्शयिष्यमाण

तत्तत्स्थानेषु ईश्वरस्याराध्यता। "यदा यदा हि धर्मस्य ग्लानिर्भवति भारत!। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्" गीतोक्तेः जीवानां कार्य्यवशात् तस्य विग्रहवत्त्वेनाविर्भावः। किन्तु स्वाद्दृष्टायत्तशरीरपरिग्रहस्यैव संसारित्वेन ईश्वरस्य शरीरपरिग्रहे जीवादृष्टस्यैव हेतुत्वेनेश्वरस्य न संसारित्वमिति भेद इति द्रष्टव्यम्। तत्र परमेश्वरे "यस्मिन्नीश्वर इत्यनन्यविषयः शब्दोयथार्थाक्षरः" विक०। "उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धयः" पुरा०। "जगदाङ्करनीश्वरम्" गीता "न हीश्वरव्याहृतयः कदाचित् पुष्णन्ति लोके विपरीतमर्थम्" कुमा०। "क्लेशकर्म्मफलभोगवर्जितं पुंविशेषमसमोश्वरं विदुः" माघः। आढ्ये "ईश्वरोऽहमहं भोगीकोऽन्योऽस्ति सदृशो मम" गीता स्वामिनि। "आत्मेश्वराराधां न हि जातु विघ्नाः समाधिभेदप्रभवोभवन्ति" कुमा०। शिवे स्वामिनि च "प्रालेयशीतमचलेश्वरमीश्वरोऽपि" कुमा० ऐश्वर्य्यान्वितस्त्रियां टाप्। "सविधे शयनेऽप्यनीश्वरा सफलीकर्त्तुमहो मनोरथान्" रघु०। दुर्गायां तु ईश्वरपत्नीत्वाविवक्षायां टाबेव। "विन्यस्तमङ्गलमहौषधिरीश्वरायाः" किरा०।

ईश्वरविभूति स्त्री ६त०। ईश्वरस्य विभूतौ संसारमर्य्यस्थानविशेषु तदीयांशभेदे। वेषु वेषु च भावेषु तस्य चिन्तनीयता तत् दर्शितं गीतायाम्। "हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः। प्राधान्यतः कुरुश्रेष्ठ! नास्त्यन्तो विस्तरस्य मे। अहमात्मा गुडाकेश! सर्व्वभूताशयस्थितः। अहमादिश्च मध्यञ्च भूतानामन्त एव च। आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्। मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी। वेदानां सामवेदोऽस्मि देवानामस्मि वासवः। इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना। रुद्राणां शङ्करश्चास्मि वित्तेशोयक्षरक्षसाम्। वसूनां पावकश्चास्मि मेरुः शिखरिणामहम्। पुरोधसाञ्च मुख्यं मां विद्धि पार्थ! बृहस्पतिम्। सेनानीनामहं स्कन्दः सरसामस्मि सागरः। महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम्। यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः। अश्वत्थः सर्व्ववृक्षाणां देवर्षीणाञ्च नारदः। गन्धर्व्वाणां चित्ररथः सिद्धानां कपिलोमुनिः। उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम्। ऐरावतं गजेन्द्राणां नराणाञ्च नराधिपम्। आयुधानामहं वज्रं धेनूनामस्मि कामधुक्। प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः। अनन्तश्चास्मि नागानां वरुणोयादसामहम्। पितृणामर्य्यमा चास्मि यमः संयमतामहम्। प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम्। मृगाणाञ्च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम्। पवनः पवतामस्मि रामः शस्त्रभृतामहम्। झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी। सर्गाणामादिरन्तश्च मध्यञ्चैवाहमर्জ্জুন!। अध्यात्मविद्या विद्यानां वादः प्रवदतामहम्। अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च। अहमेवाक्षयः कालोधाताहं विश्वतोमुखः। मृत्युः सर्व्वहरश्चाहमुद्भवश्च भविष्यताम्। कीर्त्तिः श्रीर्वाक् च नारीणां स्मृतिर्मेधा धृतिः क्षमा। बृहत्साम तथा साम्नां गायत्री छन्दसामहम्। मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः। द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम्। जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम्। वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः। मुनीनामप्यहं व्यासः कवीनामुशना कविः। दण्डोदमयतामस्मि नीतिरस्मि जिगीषताम्। मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम्। यच्चापि सर्व्वभूतानां बीजं तदहमर्জ্জুन!। न तदस्ति विना यत् स्यान्मया भूतं चराचरम्। नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप!। एष तूद्देशतः प्रोक्तोविभूतेर्विस्तरोमया। यद्यद्विभूतिमत् सत्त्वं श्रीमदूर्জ্জितमेव वा। तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्। अथ वा बहुनैतेन किं ज्ञातेन तवार्জ্জुन!। विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितोजगत्"। स्मृतौ च।

ईश्वरसाक्षिन् पु०ईश्वर एव साक्षी। वेदान्तिमतविशेषे मायोपहिते चैतन्ये स च वेदान्तपरिभाषायां दर्शितो यथा "ईश्वरसाक्षी तु मायोपहितं चैतन्यं तच्चैकं तदुपाधिभूतमायाया एकत्वात् "इन्द्रोमायाभिः पुरुरूपईयते" इत्यादिश्रुतौ मायाभिरिति बहुवचनस्य मायागतशक्तिविशेषाभिप्रायतया मायागतसत्वरजस्तमोरूपगुणाभिप्रायतया चोपपत्तिः। "मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्। तस्यावयवभूतैस्तु व्याप्तं सर्व्वमिदं जगत्। तस्मादेवमयो यज्ञः सम्भृतः सम्भृतात्मभिः। तस्यावयवभूतास्तु सर्व्वे देवा गणास्तथा। अवयवित्वं मायाया अवयवानां तत्कार्य्यत्वात्। तदुक्तं श्रुतिभिः "मायां तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्। तस्यावयवभूतैस्तु व्याप्तं सर्व्वमिदं जगत्" इति। तत्र मायाया एकत्वेऽपि तत्तत्कार्य्यानुरोधेन तत्तत्कार्य्यजनकतावच्छेदकतया तत्तत्कार्य्यजनकतावच्छेदकतया तत्तत्कार्य्यजनकतावच्छेदकतया

धित्वे सादित्वम् इतीश्वरत्वसादित्वयोर्भेदः नतु धर्म्मिणोरीश्वरतद्वतोः। स च परमेश्वर एकोऽपि स्वोपाधीभूतमायानिष्ठसत्वरजस्तमोगुणभेदेन ब्रह्मविष्णुमहेश्वरादिशब्दवाच्यतां भजते। नन्वीश्वरानादित्वे "तदैक्षत बहु स्यां प्रजायेय, इत्यादौ सृष्टिपूर्व्वसमये परमेश्वरस्यागन्तुकमीक्षणमुच्यमानं कथमुपपद्यते ?। उच्यते। यथा विषयेन्द्रियसन्निकर्षादिकारणवशेन जीवोपाध्यन्तःकरणस्य वृत्तिभेदा जायन्ते तथा क्रियमाणप्राक्तिकर्म्मवशेन परमेश्वरोपाधीभूतमायया वृत्तिविशेषाः इदमिदानीं खट्व्यमिदमिदानीं पालयितव्यमिदमिदानीं संहर्त्तव्यमित्याकारावृत्तिभेदाजायन्ते तासाञ्च वृत्तीनां तत्प्रतिबिम्बितत्वस्य च सादित्वमिति"

ईश्वरी स्त्री ईश्वरस्य शिवस्य पत्नी ङीप्। १दुर्गायाम्। "ईश्वरीमीश्वरप्रियाम्" दुर्गास्तवः। ईश्व- वनिप् ङीप् रान्तादेशश्च। २सिङ्घिनीलतायां ३वन्ध्याकर्कश्याम्, ४क्षुद्रजटालतायाम्, ५नाकुलीवृक्षे च। ऐश्वर्य्यान्वितायां स्त्रियाम् च। "ईश्वरो सर्व्वभूतानां त्यामिहोपह्वयेश्रियम्" श्रीसूक्तम्।

ईष उञ्छे (उञ्छनमल्पधान्यादानम्) तु०प०सक० सेट्। ईषति ऐषीत्। ईषाम् बभूव आस चकार। ईषिता ईष्यात् ईषिष्यति ऐषिष्यत् "विश्वस्यादीषतो यजमानस्य परिधिः" तैत्ति०।

ईष्ट दाने ईक्षणे, सर्षणे हिंसने च भ्वादि०आत्म०सक०सेट्। ईष्टे। ऐष्टिष्ट ईषाञ्च बभूव आस चक्रे। ईषिता ईषिषीष्ट ईक्ष्यते ऐक्षिष्यत। ईषत् ईषा "सूरश्चैव त्वेषादीषतेवधः" ऋ० १,१४१,८। "अस्मादहं तन्विषादीषमाणः" ऋ०१,१७१ ४७।

ईष पु० ईष-क। उत्तममनोः पुत्रभेदे। "औत्तमेयान् महाराज! दश पुत्रान् मनोरिमान्। ईष ऊर्जस्तनूर्ज्जश्च मधुर्माधव एव च। शुचिः शुक्रः सहश्चैव नभस्यो नभएव च" हरिवं०७अ०।

ईषत् अव्य०ईष-अति। १अल्पे, २किञ्चिदर्थे च। "ईषत्सहासममलं परिपूर्णचन्द्रबिम्बानुकारि" देवीमा० ईषदीषदनुद्घातविद्यया तातमालसदमाविवर्द्धयन्" कुसुमा०। "ईषदकृता" प्रा०समा०। ईषदुष्णः ईषत्पाण्डु। ३स्वल्पार्थे च "ईषद्धौतं नवं शुक्लं सदृशं यत्र धारितम्" वर्षिष्ठः। "ईषत् स्खलत्यतन्तुकमिति रघुनन्दनः" एतदुपपदे धातोः खल् ईषत्करः ईषद्दम्भः। डाप्रत्यये तु ङीष् वा। ईषद्दर्शः ईषद्दर्शनः। एतत्पूर्व्वे आद्रे उपपदे खद् ईषद्दाढाङ्कुरः "ईषदाढाङ्कुरोऽप्येषः भङ्गिः ईषदाढान्भवम्।

ईषत्कर न० ईषत् क-खच्। १लेशे, २अल्पे च। ३अल्पप्रयाससाध्ये त्रि०। [र्षे २तद्वति त्रि०

ईषत्पाण्डु पु०"ईषदकृतेति"पा०स०। १अल्पपाण्डौ धूसर-

ईषदुष्ण पु० "ईषदकृतेति" पा०स०। अल्पतप्ते १मन्दोष्णे २तद्वति त्रि० [२तद्वति त्रि०

ईषद्रक्त पु०"ईषदकृतेति"सा०स०। अल्परक्तवर्णे १अव्यक्तरागे

ईषा स्त्री ईष-क। १शकटस्य दीर्घकाष्ठे "देवानामित्युपस्तम्भनस्य पशादीषाम्" कात्या० २,३,१४, "शकटस्य दीर्घं काष्ठमीषा" वेददी०। २रथावयवभेदे च "ईषामन्ये हयानन्ये रथमन्ये न्यपातयन्" भा०व०२४०अ०। "पाञ्चालस्य रथस्येषामाशुत्य सहसाऽपतत्" भा० आ० १२८अ०। ३हलयुगयोर्मध्यमकाष्ठे ४लाङ्गलदण्डे च।

ईषादन्त पु०ईषेव दन्तोऽस्य। १दीर्घदन्तगजे २उद्गतदन्ते त्रि०

ईषिका स्त्री ईषेव "ईषे प्रतिकृतावितिं"पा०कन्। १गजाक्षिगोलके, २तूलिकायाम, ३अस्त्रविशेषे च। "सोऽभिमन्त्र्य शरेषीकामीषिकास्त्रेण वीर्य्यवान् काकं तमभिसन्धाय ससर्ज पुरुषर्षभः" रामा०। फर्फरीकादि०नि० ईषीकापि। तूलिकायाम् हरणभेदे "सोऽभिमन्त्र्य शरेषीकामीषिकास्त्रेण वीर्य्यवान्" ईषिकेति तालव्यमध्योऽयत्वार्थे।

ईषिर पु० ईष हिंसने किरच्। अग्नौ उज्ज्वलदत्तः।

ईष्म पु०ईष-सर्षणे करणे मक्। १कामदेवे ईष ईक्षणे कर्म्मणि मक्। २वसन्तर्त्तौ च उज्ज्वल०।

ईह चेष्टने भ्वादि०आत्म०अक०सेट्। ईहते ऐहिष्ट ऐहिषीष्ट ऐहिष्यत। ईहाम्-बभूव आस चक्रे ईहिता ईहिषीष्ट ईहिष्यते ऐहिष्यत। ईहनम् ईहा ईहमानः ईहितः "यत्नस्यानीहमानस्य किञ्चिदृत्वा पृथक् क्रिया" स्मृतिः। "ऐहिष्ट तं कारयितुं कृतात्मा" भट्टिः। प्रियाणि वाक्यान्यभिमीहितस्य। "हन्तुं क्रोधवशादीहाञ्चक्राते तौ परस्परम्" इति च किरा०। अस्य इच्छापूर्व्वकचेष्टापरत्वे सक० "नेहेतार्थान् प्रवक्ष्येन"मनुः। "तस्याराधनमीहते" गीता।

ईहा स्त्री ईह-अ। १चेष्टायाम्, २उद्यमे, ३वाञ्छायाञ्च। "ईहादेहार्थनाशः स्यात्सन्धानञ्चेत् उपतापिते। ज्योति०।

ईहामृग पु० ईहां मृगयते अण् ईहाप्रधानो वा मृगः पशुभेदः। (नेकड़ावाघ)। १दके ईहया ईहासाध्यो मृगः। २व्याघ्रिभङ्गे अलङ्कारशास्त्रकथिते ३नाटकभेदे च साहि० ६परि०। यथा "ईहामृगो मिश्रवस्तुचतुरङ्कः प्रकीर्त्तितः।

सुखप्रतिसुखे सन्धी तत्र निर्व्यूहणं तथा । नरदिव्यावनियमौ नायकप्रतिनायकौ । ख्यातौ धीरोद्धतावन्यो गूढभावादयुक्तकृत् । दिव्यस्त्रियमनिच्छन्नीमपहारादिनेच्छतः । अङ्गारावासमध्यस्थ किञ्चित् किञ्चित् प्रदर्शयेत् । पताका नायका दिव्या मर्त्यापि दृगोद्धता । युद्धमानीय संरम्भं परं व्याजाच्चिवर्त्तते । महात्मानो बधं प्राप्ता अपि बध्याः सुरत्न नो । एकाङ्कोदेव एवात्र नेतेत्याहुः परे पुनः । दिव्यस्त्रीहेतकं युद्धं नायकाः षड्डितीतरे । मिश्राणि ख्याताख्यातानि । अन्यः प्रतिनायकः पताकानायकास्तु नायकप्रतिनायकयोर्मिश्रिता दश । नायको मृगवदलभ्यां नायिकामत्र ईहते वाञ्छतीतीहामृगः यथा कुसुमशेखरविजयादि"

ईहामृक पु० ईहाप्रधानो मृगः । (नेकडियावाघ) ईहामृगे ।

ईहित त्रि० ईह क्त । १चेष्टिते २अपेक्षिते भावे क्त । ३उद्योगे ४चरिते न । "समीहितार्थसिद्धिःस्यात्" तन्त्रम् ।

इति वाचस्पत्ये ईकारादिशब्द-निरूपणम् ।

उ

उ-शब्दे भ्वादि० अक० आ० अनिट् । अवते औट । उवे ओता ओषीट ओष्यते औष्यत । अवनम् उतः । "उवे अम्ब सुलाभिके यथेवाङ्क भविष्यति" ऋ० १०, ८६, ७।

उ अव्य० उ-किप् न तुक् । १सम्बोधने २कोपवचने, ३अनुकम्पायां, ४नियोगे (अवधारणे) "उमेति मात्रा तपसे निषिद्धा पश्चादुमाख्यां सुमुखी जगाम" कुमा० । "उदु ष्य देवः सविता स, वाय" ऋ० २, ३८, १ । "उपो रुरुचे युवतिर्न योषा" ऋ० ७, ७७, १ । "वेत्थो यथेमं लोकं पुनरापद्यन्न इति" छन्दो० उ० । "एष उ एवासाधु कर्म्म कारयति तम्" श्रुतिः ५अङ्गीकारे ६प्रश्ने च "हेमच० ७पादपूरणे । अतति सातत्येन तिष्ठति अत-डु । ८शिवे पु० । स्वरूपार्थे कारः उकारोऽपि शिवे "अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः । मकारस्तु स्मृतो ब्रह्मा प्रणवस्तु त्रयात्मकः" इति ओमित्यस्य अवयवार्थनिरूपणे पुरा० । उमशब्दात् स्वरूपार्थे कारः । उकारः । वह्निमस्वरे । स च उत्तानुदात्तस्वरितभेदेन प्रथमं त्रिधा पुनः अनुनासिकाननुनासिकभेदेन प्रत्येकं द्विधेति षड्विधः कारतकारानुत्तरस्तु ह्रस्वदीर्घप्लुतभेदेन त्रिविधोऽपि प्रत्येकं प्रागुक्तभेदषट्कात् अष्टादशविधः । तस्य वर्णस्य कुण्डलिनीरूपत्वादिनाध्येयत्वमुक्तम् कामधेनुतन्त्रे यथा "उकारं परमेशानि । विद्धि कुण्डलिनीं स्वयम् । पीतचम्पकसङ्काशं पद्मदेवं सदाऽमलम् । पद्मप्राणमयं देवि ! चतुर्वर्गप्रदायकम्" तन्त्रान्तरे अकारोकारमकारात्मकप्रणवस्य मध्ये द्वादशकलात्मकार्कमण्डलरूपेण अकारस्य, षोड़शकलात्मकचन्द्रमण्डलरूपेण उकारस्य, दशकलात्मकवह्निमण्डलरूपेण च मकारस्य ध्येयत्वोक्त्या अभेदोपचारात् षोड़शकलात्मके, ६चन्द्रमण्डले च तत्र मकारान्तस्यैव तत्त्वमतेति वह्वचः । उ, इत्यस्य एकाच् निपातत्वात् प्रत्ययसंज्ञा तेन अचि परे न सन्धिः । उ-उमेशः" सि० कौ० । "एष उ वासाधुकर्म्म कारयति तम्" श्रुतिः । स चचादिगणीयः ।

उकानह पु० पीतरक्तवर्णे कृष्णरक्तवर्णे च घोटके । हारा०

उकार पु० उ-स्वरूपार्थे कारः । १उस्वरूपे वर्णे । "अकारश्चाप्युकारश्च मकारश्च प्रजापतिः । वेदत्रयात् निरदुहत् भूर्भुवःस्वरितीति च" मनुः । २महेश्वरे च उशब्दे उ० ।

उक्त त्रि० वच-क्त० गौणे कर्मणि क्त । यस्य ज्ञानाय कथ्यते १ताडये जने । "अनुक्तेनापि वक्तव्यं सुहृदा हितमिच्छता" नीतिः "तथेत्युक्त्वा च सा देवी" पुरा० गौणकर्मसमभिव्याहारे तु सख्ये कर्मणि क्त । २कथिते वाक्यादौ ३शब्दबोधिते "उक्तानि प्रतिषिद्धानि पुनः सम्भावितानि च" । श्रुतिः "उक्तार्थानामप्रयोगः व्या० प० । भावे क्त कथने न० । "सम्पृच्यसाम्नः वक्तुरुक्तौ सुसत्प्राणिना" माघः । ४एकाक्षरपादके छन्दोभेदे स्त्री मेदि० "उक्त्वात्युक्त्वा तथा मध्येति" वृत्त० र० केचिदत्र "उक्थात्युक्थेति पठित्वा उक्थशब्दस्तदर्थे इत्याहुः । उक्तञ्च प्रायेण अभिधाशब्दा बोधितार्थे एव । "प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते । यथा गुणे तथा तद्वदनुक्तादपि प्रतीयते" भर्त्तृ० । शक्तिः कारकशक्तिरित्यर्थः ।

उक्ति स्त्री वच-भावे क्तिन् । कथने । "अतिसंक्षिप्तविचित्रननोक्तिभिः" सप्तश० । उक्तिप्रत्युक्तिरूपं वाक्योवाक्यम्" ज्यो० भा० २शब्दशक्तौ च "एकयोक्त्या पुष्यवन्तौ दिवाकरनिशाकरौ" अमरः ।

उक्थ न० वच-थक् । अप्रगीतमन्त्रसाध्ये "स्तोत्रे "इन्द्राय नन मर्म्मयोक्थानि च शंसत नः" ऋ० १, ८१, ५ । "उक्था-

नि अप्रगीतमन्त्रसाध्यानि स्तोत्राणि" भा० "अथ योऽसावन्तरक्षिणि पुरुषो दृश्यते सैवर्क् तत् साम तदुक्तं तदुब्रह्म" छा० उ० । तथा हि स्तोत्रं द्विविधं प्रगीतमन्त्रसाध्यमप्रगीतमन्त्रसाध्यञ्च तत्र प्रगीतमन्त्रसाध्यं शस्त्रम् अप्रगीतमन्त्रसाध्यन्तु स्तोत्रमिति तयोर्भेदः । गवामयने प्रायणीयसंज्ञकाहे प्राप्तपञ्चदशस्तोत्रात्मके २चतुर्विंशस्तोमभेदे उपचारात् ३तत्साध्ये उक्थ्ययागे च तद्विधानञ्च" ता० ब्रा० ४अ० २ख० उक्तं यथा "१प्रायणीयमहर्भवति"१ इत्युपक्रम्य "चतुर्विंशं भवति"४ क० "इदमहरुक्थसंस्थन्तत्र सर्वेषु स्तोत्रेषु चतुर्विंशएव स्तोमः कार्य्यः ४ । तदेतत् प्रशंसति" भा० । "चतुर्विंशत्यक्षरा गायत्री तेजोब्रह्मवर्चसङ्गायत्री तेज एव ब्रह्मवर्चसमारभ्य स्वर्यन्ति" ५ । "अवञ्च स्तोमचतुर्विंशतिसंख्याकः गायत्री च चतुर्विंशत्यक्षरा सा च गायत्री तेजः, प्रजापतिमुखादग्निना सहोत्पन्नत्वात् अस्यास्तेजोरूपं ब्रह्मवर्चसं च तेजोऽवान्तरभेद इति तेजोब्रह्मवर्चसरूपा गायत्री । एवं सति चतुर्विंशतिस्तोमं प्रथमतः प्रयुञ्जानाः साक्षादेव प्रत्यक्षमेव संवत्सरं प्रारभन्ते अक्षिण्यहनि प्रयुञ्जानाः संख्याद्वारेण तेजोब्रह्मवर्चसङ्गारभ्य अवटभ्य स्वर्यन्ति स्वर्गं गच्छन्ति५ । पुनरपि विहितं स्तोमम् अनूद्य प्रशंसति" भा० । "चतुर्विंशतिर्भवति चतुर्विंशो वै संवत्सरः साक्षादेव संवत्सरमारभन्ते"६ । "चतुर्विंशत्यर्द्धमासात्मकत्वात् संवत्सरस्य चतुर्विंशत्वं तथा सति चतुर्विंशस्तोमं प्रथमतः प्रयुञ्जानाः साक्षादेव प्रत्यक्षमेव संवत्सरमारभन्ते ६ । अथेमं स्तोमं स्तोत्रीयागतसंख्याद्वारेण प्रशंसति" भा० । "यावत्यचतुर्विंशस्योक्थस्य स्तोत्रीयास्तावत्यः संवत्सरस्य रात्रयः स्तोत्रीयाभिरेव संवत्सरमाप्नुवन्ति"७ । "पञ्चदशस्तोत्रे अक्षिण्यहनि पञ्चदश तु स्तोत्रेषु प्रत्येकं चतुर्विंशस्तोत्रीयायुक्तेषु परिगणनायां मिलित्वा षष्ट्युत्तरशतस्तोत्रीदा भवन्ति । तथा सति चतुर्विंशस्तोमस्य यावत्यः स्तोत्रीयाः संवत्सरस्यापि तावत्यो रात्रयः एवं प्रयुञ्जानाः सहितस्तोत्रेण चतुर्विंशेन स्तोत्रीयाभिरेव संवत्सरं प्राप्नुवन्ति७ । स्तोत्रसंख्ययापीदमहः प्रशंसति" भा० । "पञ्चदश स्तोत्राणि भवन्ति पञ्चदशार्द्धमासस्य रात्रयोऽर्द्धमासश एव तत्संवत्सरमाप्नुवन्ति"८ । "स्पष्टोर्थः८" । अथ स्तोत्रशस्त्राणि सङ्गिल्य तत्संख्ययापीदमहः प्रशंसति" भा० "पञ्चदश स्तोत्राणि पञ्चदश शस्त्राणि समासो मासश एव तत् संवत्सरमाप्नुवन्ति९" स्पष्टोऽर्थः९ भा० । तत्राग्निष्टोमकर्त्तव्यतारूपं पूर्वपक्षमुपन्यस्योत्तरपक्षमाह "अथो खल्वाहुरुक्थमेव कार्य्यमङ्गः सम्पद्यै" १२ । "अथो इति पूर्वपक्षव्यावृत्त्यर्थः । उक्थसंस्थमेवैदहः कार्य्यः किमर्थमङ्गः सम्पद्यै सम्पूर्णतायै इति ब्रह्मवादिन आहुः । अग्निष्टोमे हि पूर्वयोः सवनयोः पञ्च पञ्च स्तोत्राणि तृतीये तु द्वे एवेत्यङ्गः सम्पद्यते न भवति, उक्थे तु तृतीयसवने पञ्च स्तोत्राणीत्यङ्गः सम्पद्यै भवति१३ । उक्थसंस्थाङ्गीकारे युक्त्यन्तरमाह" भा० । "सर्वाणि रूपाणि क्रियन्ते सर्वं ह्येतेनाप्यते" १४ "उत्तरेषामङ्गां सम्बन्धीनि यानि रूपाणि स्तोमपृष्ठविभक्त्यादीनि तान्यस्मिन्नुक्थे क्रियन्ते अतः सर्वं हि यज्ञसम्बन्धिरूपं तेनाङ्गा उक्थसंस्थेन आप्यते प्राप्यते तत उक्थसंस्थैव कार्य्येत्यर्थः । सर्वरूपकरणञ्च सर्वावाप्तिश्च सम्पादनद्वारेणेति निदानकारेणैवमुच्यते, "अथो खल्वाहुः सर्वाणि रूपाणि क्रियन्त इति" आचार्याः एतेष्वेव सर्वान् स्तोमान् सर्वाणि पृष्ठानि सर्वा विभक्तीर्दशरात्ररूपा इति विभक्तिमात्रेण कल्पयन्त इति संस्तोक्ता पुनस्तिष्टुप्पञ्चदशौ चतुर्विंशः सम्पादयत इत्यादिना"१४ भा० । एतान्येव स्तोमपृष्ठादीनि प्रत्येकं क्रमेण विविच्य तत्र प्रदर्शितानि तत्सर्वं तत एवागन्तव्यम् । तत्र च तस्मिन्नहनि यथा स्तोमादिकं विधेयम् तदपि तत्रैव दर्शितं ततएव तदवसेयम् । अत्र उक्थसाध्ययागे अभेदोपचार इति बोध्यम् ।

४स्तोत्रायां स्त्री उक्थागस्त्यशब्दे उदा० उच्यतेऽनेन करणे घञ् । ५उक्थसाधने प्राणे च "यस्य ज्ञानवियोगेन लोकोऽज्ञप्रियदर्शनः । उक्थेन रहितोऽयं स्तनकः प्रोच्यते यथा" भाग० १स्क० १५अ० ।

उक्थपत्र पु० उक्थानि अप्रगीतमन्त्रसाध्यानि स्तोत्राणि पत्रं वाहनमिव यस्य । १यज्ञे, स्तोत्रैरेव हि यज्ञोवाह्यते इति तस्य तथात्वम् । "समिद्धे अग्नावधिमासमहान उक्थपत्र ईड्योऽभीत:" यजु० १७,५५ । "यजमानोवै मास महान उक्थपत्र इत्युक्थानि स्तोत्रस्य पत्राणि" शत० ब्रा० ६,२,३,६ इत्युक्तेः २ यजमानेऽपि । [त्तथात्वम् ।

उक्थपात्र न० ६त० । यजमाने तस्य उक्थस्तावकत्वा-

उक्थभृत् पु० उक्थं बिभर्त्ति सम्यक्विभजते भृ-क्विप् ६त० । उक्थविभाजके ऋषिभेदे "उक्थभृतं सामभृतं बिभर्त्ति ग्रीवासम्" ऋ० ७, ३३, १४ । उक्थभृतं उक्थानां स्तोत्राणां संभर्त्तारम्" ।

उक्थवर्द्धन पु० उक्थैः स्तोत्रैर्वर्द्धतेऽसौ वृध-णिच् कर्मणि

ख्युट्। स्तोत्रैर्वर्द्धनीये इन्द्रदेवे। "त्वं हि स्तोमवर्द्धन इन्द्रासुक्थवर्द्धनः" ऋ०८,१४,११। "उक्थैः शस्त्रैर्वर्द्धनीयः" भा०। इन्द्रस्य यथा उक्थवर्द्धनीयत्वं तथोक्तं "उक्थमिन्द्राय शंस्यं वर्द्धनं पुरुनिष्षिधे" ऋ० १,१०,५, "इन्द्रायेन्द्रार्थं वर्द्धनं वृद्धिसाधनम् उक्थं शस्त्रम्" भा०

उक्थवाहस् पु०उक्थानि शस्त्राणि वहति वह-असुन् णिच्च। शस्त्रपाठके विप्रे "यं विप्रा उक्थवाहसोऽभिप्रमं दुरावयः" ऋ० ८,१२,१३,। उक्थवाहसः उक्थानां शस्त्राणां वोढारः" भा०।

उक्थशंसिन् पु० उक्थानि शस्त्राणि शंसति शन्स-णिनि। शस्त्रस्तावके ऋत्विग्भेदे "नयसीत द्विषः क्रणोष्युक्थशंसिनः" ऋ० ६,४५, ६। स वीरं धत्ते अग्न उक्थशंसिनं त्मना सहस्रपोषिणम्" ऋ० ८, १०३, ४।

उक्थशस् पु०उक्थं शस्त्रं शंसति क्विप्। शस्त्रस्तावके। उक्थशास्शब्दे उदा०। पदकाले सर्व्वत्र तस्य ह्रस्वमध्यपाठः। स च छान्दसो ह्रस्वइति माधवः। क्विप् प्रत्ययेनैवोपपत्तौ न छान्दसत्वमिच्छन्ये। "तस्मादुक्थशसं भूविष्ठं परिचक्षते" शत०ब्रा०। १०,५,२,५।

उक्थशास् पु० उक्थानि शंसति शन्स-खि नि० वलोपः उप० स०। शस्त्रशंसके। "शुचीदयन्दीधितिमुक्थशासः" ऋ० ४,२,१६। "अस्य पदकाले ह्रस्वश्छान्दसः" माधवः। "नीहारेण प्रावृता जल्प्याचासुतृप उक्थशासश्चरन्ति" ऋ०१०,८२, ७। "नरः शंसन्त्युक्थशास उक्था" ऋ०७,१६,६।

उक्थशुष्म त्रि० उक्थं शस्त्रं शुष्मं बलं यस्य। उक्थरूपबलयुक्ते स्तवादिवाक्ये "सप्तं न सिन्धव उक्थशुष्मा उरुव्यचसम्" ऋ० ६,२६, २। "उक्थशुष्मान् वृषभरान्वृत्रप्रसक्तां" ऋ० १०,६३,३।

उक्थादि पु०ढक्०। तदधीते वेत्ति वेत्यर्थे विहित-ठक्प्रत्ययनिमित्ततया पाणिन्युक्ते शब्दसमूहे स च गणः "उक्थलोकायत न्याय न्यास पुनरुक्त निरुक्त निमित्त द्विपद ज्योतिष अनुपद अनुकल्प यज्ञ धर्म्म चर्च्चा क्रमेतर ह्रस्व संहिता पद क्रम संघट्ट इत्ति परिषद् संग्रह गण गुण आयुर्वेद तन्त्रायुर्वेद"। "उक्थं सामविशेषस्तल्लक्षणपरोपन्थविशेषोऽपि लक्षणया तदधीते वेद वा औक्थिकः। सुखादुक्थशब्दाट्ठगधौ नेष्येते" सि०कौ०।

उक्थामद न०उक्था स्तोत्रया मादाति मद-अच्। उक्थासाधने सोमभेदे "अग्निर्वसुभिः सविता सोमैरिन्द्र उक्थामदैर्बृहस्पतिस्सन्दोभिः" कठसं० "बृहस्पतिरुक्थामदानि शंसिषम्" ऐत०।

उक्थावी त्रि० उक्थानि अवति अव-ई। शस्त्रस्तावके "बृहद्वते वयस्वत उक्थाव्यं वर्द्धयामि" यजु०७,२२।

उक्थाशस्त्र न०उक्था होत्रा च शस्त्राणि च द्वन्द्वः। होत्रायामृचि शस्त्रे च। "छन्दोभिरुक्थाशस्त्राणि सान्त्वयन्त्य आप्यते" यजु० १६,२८।

उक्थिन् पु० उक्थं स्तुत्वतयाऽस्त्यस्य उक्थ+इनि। १शस्त्रस्तावके होत्रादौ। "प्र वामर्च्चन्त्युक्थिनो नीथाविदोजरितारः" ऋ० ३,१२,५, "उक्थं शस्त्रं तद्वन्तः शस्त्रिणो होत्रादयः" भा०। "तदद्याचित्त उक्थिनोऽनुष्टुवन्ति पूर्व्वथा" ऋ० ८,१५, ६,। उक्थं स्तोत्रसाधनतयाऽस्त्यस्य इनि। २शस्त्रस्तुत्ये इन्द्रादौ। "हिरण्यपर्णमुक्थिनं रयिनां वित्तं वसिं भगमिन्द्रं वयोधसम्" यजु० २८,३३ उक्थं शस्त्रं संस्काराङ्गसाधनतयाऽस्त्यस्य इनि। ३शस्त्रसाध्ये संस्कारयुक्ते सोमादौ। "तुभ्येदिन्द्र! मरुत्वते सुताः सोमासो अद्रिवः हृदा हूयन्त उक्थिनः" ऋ० ८,७६,८। "उक्थिनोऽन्या होत्रा उक्थिनःशस्त्रवन्तः सोमाः अनुक्था अन्याः" ऐत०।

उक्थ्य त्रि० उक्थमर्हति यत्। शस्त्रस्तुत्ये देवादौ। "इन्द्रः सहस्रदावां वरुणः शंसानां क्रतुर्भवत्युक्थ्यः" ऋ० १,१७,५। "उक्थ्याः स्तुत्यः" भा० "होता यक्षीत उक्थ्यः" ऋ० १,७६,१२। २उक्थसाधने शस्त्रे च। "गाय गायत्रमुक्थ्यम्" ऋ०१,३८,१४। उक्थ्यं शस्त्रयोग्यं गायत्रमुक्थ्यम्" भा०। उक्थसम्बन्धित्वात् ३शस्त्रेऽपि। "उक्थ्यं वाचि घोषाय त्वेति शस्त्वा जपेत्" आश्व०श्रौ०५,६,२६। "उक्थ्यं शस्त्रं शस्त्रसम्बन्धितया" नारा०वृत्तिः। "सोमयागात् परं कर्त्तव्येषु षट्सु यागेषु मध्ये ४यज्ञभेदे स च। "प्रथमं सोमा" इत्युपक्रम्य "षडुत्तरे" "अत्यग्निष्टोम उक्थ्यः षोड़शी वाजपेयोऽतिरात्रोऽप्तोर्यामः कात्या० १०,६,२७,२८ विहितः। तत्प्रकारस्तु तत्रैव दर्शितः प्राक्। तस्य उक्थसाध्यत्वात् उक्थ्यमिति नाम।

"उक्थे तु होत्रकाणाम्" १। "तृतीयसवनद्रव्यमुवर्त्तते। उक्थे त्वयं विशेषः। तृतीयसवने होत्रकाणामपि शस्त्राणि भवेयुः। तानीमानीत्याह" इत्तिः। "एतु पृथु ध्रुवाणि तवाग्निरगामि भारतवर्षणीष्टतमस्तवाद्यामसुर इति तृचाविन्द्रावरुणा युवमावां राजानाविन्द्रावरुणा मदुमत्त-

मस्रेति याज्या । वयस्व त्वामपूर्व्य इति प्रगाथौ । सर्वाः ककुभः प्रमंहिष्ठायोदप्रुतोऽच्छाम इन्द्रं दृहस्पते युवमिन्द्रश्च वस्व इति याज्या । अथाहीन्द्र गिर्वण इयन्त इन्द्र गिर्वण ऋतुर्जनित्रीनू मर्त्तो भवासित्रः स वां कर्मणेन्द्राविष्णू मदपती मदानामिति याज्या"२ । "अत्र सर्वाः ककुभ इत्युक्तं किमनेनोक्तम् । काकुभेषु तावत् प्रगाथेषु तृतीयपञ्चमयोरभ्यासे सति ककुभ एव सर्वा भवन्ति । तथैव च स्तुवन्ति ऋन्दोगाः । अतोऽन्यत् प्रयोजनमन्वेषणीयम् । तदिदमुच्यते । होलकाश्च येषां प्रगाथाः स्तोत्रीयानुरूपा इतीन्द्रनिहवब्राह्मणस्तत्रवर्जनं विहितम् । तत्र वार्हतानामेवायं विधिरित्युक्तत्वात् काकुभेष्वनुप्राप्नोति तन्निवृत्त्यर्थं ककुभ इति वचनम् । सर्वेग्रहणं सर्वकाकुभप्रगाथसंग्रहार्थम् । तेन वार्हतेष्वेवासौ विधिरिति मन्तव्यम् । 'इत्यन्त उक्थ्यः'३ । "एवमन्त उक्थ्यः ऋतुरित्यर्थः । इत्यन्तोऽग्निष्टोम इत्यस्यानन्तरम् एतानि शस्त्राण्युक्थ्यः इत्यन्ते उक्थ्य इत्येतावत्युच्यमाने एतानि शस्त्राण्युक्थ्य एवेति गम्यते । तत् किमर्थमुक्थे इ होलकाणामित्यतोऽक्थ्यग्रहणम् । अयमभिप्रायः । अथ सोमेनेति त्रिषु ज्योतिष्टोमाख्यः सोमयागोऽधिक्रियते, स च संस्थाभेदाद्रूपभेदाच्चतुर्धा भिन्नो व्युत्पादितो भवति । तत्र सर्वत्र सोमेन यजेतेत्येतद्विधिविहित एवैको यागः केनचिदुपाधिवशेनाभ्यस्तो भिन्नो नाम प्रतीयते । अतः सर्वेषां प्रकरणित्वे प्राप्ते अग्निष्टोम एव प्रकरणी, अन्ये तस्यैव गुणा विकारा इति ज्ञापयितुमुक्थ्य इत्युच्यते । उक्थ्य एतावदेवौपदेशिकं, अन्यत् सर्वमातिदेशिकमित्यर्थ इत्येवं आश्व०श्रौ०६,१,क० तस्य प्रकारोऽभिहितः उक्थेन संस्थार्थे यहरूपे ५ पात्रभेदे । 'उक्थ्यासुपयाम गृहीत, इति' कात्या०६,६,२१ । 'उक्थ्यादि' कात्या० १४,२,१० उक्थ्यग्रहणादि प्राकृतं कर्म्म भवति उक्थ्यस्यात्या उक्थ्यसंज्ञकं यहं गृह्णाति" कर्कः । प्रागुक्थ्यान्मरुत्वतीयग्रहपात्रेण इन्द्रमरुत्व इति" कात्या० १०,१,१४ । आग्रयणग्रहणानन्तरमुक्थ्यग्रहणात् प्रागिति" कर्कः ।

उक्ष–सेचने भ्वा० सक०प० सेट् । उक्षति औक्षीत् उक्षाम्–बभूव आस चकार । उक्षिता उक्ष्यात् उक्षिष्यति औक्षिष्यत् । उक्षितव्यः उक्षणीयः उक्ष्यः । उक्षिता उक्षन् उक्षितः । उक्षा उक्षणम् । उक्षित्वा सस्रुक्ष । कर्म्मणि उक्ष्यते ओक्षि उक्ष्यमाणः "उक्षन्यक्षौ मरुद्धिताइव" ऋ०१,१६६,२, "औक्षन् घृतेनमन्मोदाः" भट्टिः । "उक्षां प्रचक्रुर्नगरस्य मार्गान्" भट्टिः । अव्यवधाने एवासुप्रयोगविधानात् प्रशब्दव्यवधानात्तासुप्रसक्तिरतोऽत्र जयमङ्गलेन उक्षान् प्रचक्रुरिति पठितम् उक्षान् सिक्तानिति तदर्थः "घृतसुक्षता मधुवर्णमर्चते" ऋ०१,८७,२, "गङ्गाप्रवाहोक्षितदेवदारु" कुमा० । "गन्धवद्वृषिरचन्दनोक्षिता" "किञ्चिदुक्षितशिखण्डकावुभौ" रघुः । क्वचिदस्य पदव्यत्ययः । "ऋक्षमपो अपिन्वसृक्षमाणाः" ऋ० ४,४२,४ "तसृक्षमाणमव्यये वारे पुनन्ति" ऋ०६,६६,५' 'प्रसव्यमात्मानमुदकैः पर्य्युक्षते" आश्व०श्रौ० । उक्षणञ्च द्रव्यद्रव्येण संयोगविशेषजनकव्यापारः । (सेचा) ।

अभि+अवतानपाणिना सेचने । "उत्तानेनैव हस्तेनप्रोक्षणं परिकीर्त्तितम् । न्यञ्चताऽभ्युक्षणं प्रोक्तं तिरश्चाऽवोक्षणं स्मृतमिति" छन्दोग० उक्षेः तथार्थत्वम् । अभ्युक्षणशब्दे विवृतिः "परस्पराभ्युक्षणतत्पराणाम् रघुः । "शिरसि शकुनलामभ्युक्षा" शक० । "अथाद्भिरभ्युक्षति, एष वा अपां संस्कारो यदद्भिरभ्युक्षति" शत०ब्रा०२,१,१,२,।

अव+तिर्य्यक्पाणिना सेचने "दक्षा मधुभिश्चेषावोक्षति" तैत्ति० । "उद्गृतमवोक्षितं भवति यत्रैनमुपावहरत्यभ्युक्षते वा अवोक्षितेऽग्निमादधति" शत०ब्रा०६, ४,४,१८, "उद्गृह्यावोक्षति यत्रैनमुपावहरति" शत०ब्रा० ६,८,१,१२, ।"तिरश्चाऽवोक्षणं स्मृतम्" छन्दोग० ।

आ+समन्तात् दैवद् वा सेचने "आ नोगव्यूतिमुक्षतं घृतेन" ऋ०७,६२,५ व्यवहितार्थेति उपसर्गस्य व्यवधानम् ।

उद्+ऊर्द्ध्वेणात् सेचने । "किं तृतीयमेतां दिशमुदौक्षीः"? शत०ब्रा०११,५,२,४। [ब्रा०२,७,४,६' ।

उप+सामीप्येन सेचने । "अधस्तादुपोक्षत्यापोदेवीः" शत० निस्+निशेषेण सेचने । "यत्स्रुच्युपानीय निरौक्षिषम्" शत०ब्रा०११,५,२,७ ।

परि+वेष्टनाकारेण समन्तात् सेचने "प्रसव्यमुदकैरात्मानं पर्य्युक्षते" आश्व०६,१२, "प्रसव्यं वामावर्त्तनेन वेष्टयित्वेत्यर्थः ना०इ० ।"आहवनीयं पर्य्युक्ष्योदधारां निनयत्या गार्हपत्यात्"कात्या०४,१२,१६, "पर्य्युक्ष्य हस्तस्थोतेनोदकेन समन्तात् सिक्त्वा"कर्कः ।"पर्य्युक्षितं सविदसि"कात्या० ४,१४,२० ।

प्र+उत्तानहस्तेन सेचने "उत्तानैनैव हस्तेन प्रोक्षणं परिकी-

क्तितम्" ऋग्वे० उक्तेऽर्थवादे "अपिधानं प्रोक्षिताभ्याम्" कात्या० ६,१०,४, । "तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः" ऋ० १०,९०,७, "प्रोक्षिताः स्थ अग्नये त्वा जुष्टं प्रोक्षामि । अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि" यजु० १,१, "ऋक्षोऽस्याखरेष्ठो अग्नये त्वा जुष्टं प्रोक्षामि । वेदिरसि बर्हिषे त्वा जुष्टां प्रोक्षामि । बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि" यजु० २,१, "रक्षोघ्नो वो वलगहनः प्रोक्षामि वैष्णवान्" यजु० ५,२५, "संस्कारः पुंस एवेष्टः" प्रोक्षणाभ्युक्षणादिभिः" कुसुमा० "इत्यनेकैः पुरुषसंस्कार इति नैयायिकाः । मीमांसकमते द्रव्यसंस्कारः इति भेदः अभ्युक्षणशब्दे विवृतिः । "प्रोक्षितं भक्षयेन्नासम्" मनुः । सम्+प्र+ सम्यक् प्रोक्षणे । "प्राणानायम्य संप्रोक्षेत्-चेनाद्भिर्वैतेन तु" या० स्मृतिः।

वि+विशेषेण सेचने "ऋचो वि रोरुवज्जठरे विवक्षते" ऋ० १०,९२,५। "व्यवहिताचेति" पा० उपसर्गव्यवधानम् । "केवलमिन्द्रेव क्षास तां व्यौक्षदोषं धयेति" शत० ब्रा० २,२,४,५ ।

अभि+वि+ आभिमुख्येन विशेषेण सेचने । "तत्तस्माद् तथैव संरुध्याम् यथाग्निं नाभिव्युक्षेत्" शत० ब्रा० १,२,१,१० सम्+सम्यक् सेचने । "समुक्षितं सुतं सोमम्" ऋ० ३, ६०,५ । "इदं ते अन्नं युज्यं समुक्षितम्" ऋ० ८,४,१२

उक्ष त्रि० उक्ष-अच् । १सेक्तरि "सुप्रतिष्ठा मनोऽक्षदुक्षाय नः" यजु० ८,८४,कर्मणि घञ् । २सिक्ते "उक्षान् प्रचक्रुः" भट्टिः

उक्षण न० उक्ष-ल्युट् । द्रवद्रव्येण संयोजनव्यापारे "वसिष्ठमन्नोक्षणजात् प्रभावात्" रघुः । [नावस्थे दृषे ।

उक्षतर पु० अल्प उक्षा दृक्षत्वे तरप् । अप्राप्तवार्द्ध-

उक्षन् पु० उक्ष-कनिन् । १दृषे, २क्षयभौषधौ च । "विदलित-मद्दाकूलासक्षां विषाणविघट्टनैः" माघः । "उक्षेव यूथा-परियन्नरावीत्" ऋ० ६,७१,६ । "उक्षा मिमाति प्रति यन्ति धेनवः" ऋ० ६,६६,४। "गरदूषनादृदीधितिमानि-वोक्षणः" कुमा० "न वराहं न चोक्षाणं न रुरुमानृ विविधां-स्तथा" भा० व० १२१। "उक्षाणं पक्वा सह ओदनेन तस्मात् कपोतात् प्रति ते नयेहा" भा० व० १९६ । "नीलं चोक्षाणं मेध्यमश्वालभेत" भा० आश्व० ११अ० । २सेच-नकर्त्तरि । सेचके त्रि० । "उक्षा समुद्रो अरुषः सुपर्णः" ऋ० ५,४७,२, उक्षा बिभर्त्ति भुवनानि वाजयुः" ऋ० ६,८२,३ । आत्मन उक्षाणं दृषमिच्छति उक्षायति

वेदे तु न नलोपः । उक्षयति । "वयं हि वां हवामहे उक्षण्वन्तो व्यश्ववत्" ऋ०, ६,६ । ततः कर्त्तरि उ उक्षण्यु आत्मनोऽप्येच्छौ "व्यश्वावसुविदमुक्षण्युरप्राणादृषिः" ऋ० ८,२३,१८। जातदृढमहद्भ्यः परस्य अच् समा० । जातोक्षः दृढोक्षः महोक्षः "महोक्षं वा महजां वा श्रोत्रियाय प्रकल्पयेत्" स्मृतिः "विलोक्य दृढोक्षमधिष्ठितं त्वया" कुमा० । उक्षोऽपत्यम् अण् टिलोपः । औक्ष तदपत्ये तस्येदमित्यणि अनपत्ये तु नलोपः न टिलोपः । औक्ष सि० कौ० उक्षां समूहः वुञ् । औक्षक दृषसंघे न० । कुरुपूर्ब्बंशे ४राजभेदे च । तस्य गोत्रापत्ये स्त्र न दृद्धिः । उक्षण्य-तद्गोत्रापत्ये पुंस्त्री० । तदन्तत्वात् फक् उक्षण्यायनः "ऋज्वमुक्षण्यायने रजतं हरयाणे" ऋ० ८,५,२,३२ । "उक्षनामा कश्चित् कुरोः पूर्व्वजः तस्य गोत्रापत्ये उक्षन् शब्दात् स्त्रियः तदन्तत्वात् फक् । संज्ञापूर्व्वकविधिरनित्य इति न दृद्धिः अयञ्च छान्दसः लोकेऽस्य न प्रयोगः" भा०।

उक्षवश्र त्रि० उक्षा वशा वशास्थानीयो यस्य । वन्ध्याऽ-लाभे वशात्वेन कल्पितदृषके यजमानभेदे । तत्र वशा-रूपादिकमभिधाय दृषस्य तत्प्रतिनिधित्वम्" शत० ब्रा० ४,५,१,६, उक्तं यथा "मैत्रावरुणी वशा भवति यत्र वै देवाः रेतः सिक्तं प्राजनयंस्तदग्निमारुत" मित्यु-क्रम्य पश्वादीनामुत्पत्तिमभिधाय "अथ यदा न कश्चन रसः पर्य्यशिष्यत त एषा मैत्रावरुणी वशा समभवत् तस्मादेषा न प्रजायते रसाद्धि रेतसः पशवस्तदु यदेनतः समभवत् तस्मादेनं यज्ञस्यानुवर्त्तते तस्माद्वा एषात्र न प्रजायते मैत्रावरुणी वशाऽवक्लृप्तमा भवति यदि वशां न विन्देदृषभवश एव स्यात्" । २दृषायत्ते त्रि० । "उक्षवेऽदपि वेहत्स्थानीयकल्पितदृषे यजमाने" शत० ब्रा० उद्विधिरुक्तः।

उक्षित त्रि० उक्ष-क्त । सिक्ते उक्षधातौ उदा० ।

उख गतौ भ्वादि० पर० सक० सेट् । ओखति औखीत् उवोख अखतः ओखिता उख्यात् ओखिष्यति औखिष्यत् उखा ।

उख गतौ इदित् भ्वादि० पर० सक० सेट् । उङ्खति औङ्खीत् । उङ्खाम्—बभूव आस चकार । उङ्खिता उङ्खात् उङ्खि-ष्यति औङ्खिष्यत् ।

उखर्वल पु० उख-वलच् रुडागमः किच्च । मूरिपत्रे दृषभेदे राजनि० "बलदो रुचिकारी च पशूनां सर्वदा-हितः"। अस्य गुणः राजनि० उक्तः ।

उखल पु० उख-कलच् । मूरिपत्रे दृषभेदे उखर्वले राजनि० ।

उखा स्त्री उख-क । १पाकपात्रे पिठरादौ । (काँड़ि) ।

"द्रवोच्चणं मांसवन्ता उखाया उत पात्राणि यूष्ण आसेचनानि" ऋ० १,१६२,१२। ऋचमेतामाश्रित्यैव "मांसवन्ता उखाया:" इति पा० भाष्यकृतोदाहृतम्। यज्ञियेष्टकासाधने २चूल्लीरूपे पदार्थे तत्करणप्रकारः कात्या० श्रौ० १६,१,१, स्रुवादौ उक्तः तच्च इष्टकाशब्दे ६६१पृष्ठे दर्शितम्। "उखास्रत्" सि० कौ० शत० ब्रा० तु स्थालीपरोक्षशब्दस्य निरुक्तिरन्यथैवोक्ता यथा। "अन्नेनमुखयाद्वै बिभर्त्ति इमे वै लोका उखा इमे वा एतं लोका यन्मर्हन्ति एभिरेतं लोकं देवा ऋषिभरेभिरेवैनमेतल्लोकैर्बिभर्त्त्येषा यदुखा नाम एतद्वै देवता वैतेन कर्मणैतयाद्दतेमाँ लोकानुदखनन् यदुखनंस्तस्मादुखा उत्खा वैतामखेत्याचक्षते परोक्षं, परोक्षकामा हि देवाः" ६,७,१,२२, २३। अस्य "न क्रोड़ादिबह्वच" पा० क्रोड़ादिगणपाठात् स्वाङ्गवाचिताऽपि तेन दृहदुखेत्यत्र न ङीष्। उखायां संस्कृतं यत्। उख्य तत्र संस्कृते त्रि०। भवार्थे दिगा० यत्। उख्य उखाभवे त्रि०। तस्य वर्ग्यादि० कर्म्मधारयसमासे आद्योदात्तता।

उख्य त्रि० उखायां संस्कृतं यत्। उखासंस्कृते मांसादौ "स्थूलमुख्यञ्च होभवान्" भट्टिः उखायां भवः दिगा० यत्। उखाभवे त्रि०। "उख्यान् स्रुक्षेषु बिभ्रतः" अथ० ४, १४,२। उख्यानग्नीन्। "अथ यद्येष उख्योऽग्निरनुमन्त्रेत" शत० ब्रा० ६,६,४,१०। "प्रागनःक्रत्वोख्यस्योत्तरतः समिदाधानम्" "अभूख्यभावपनं क्रत्वर्थोयादौ" कात्या० १६,६,१०,१५,२२। "संविलां क्रत्वोख्यं निरवपति समितमिति" १७,१,१६। स्त्रियां टाप् ततः कत्रर्थादि० जातादौ ढकञ्। औख्येवः उख्याजाते त्रि०।

उगण त्रि० उद्गूर्ण उदायुधः गणो यस्य पृषो०। उदायुधगणोपेते "याः सेना अभीत्वरीराज्याधिनीरुगणा उत" यजु० ११, ७७, "उगणाभ्यस्तृंहतीभ्यश्च वोनमोनमः" यजु० १६,१४।

उग्र पु० उच-रक् गवादेशः। १महादेवे, वायुमूर्त्तिधारिणि शिवे क्षत्रियात् जठायां शूद्रायामुत्पन्ने २संकीर्णवर्णे (आगुरी) उपपुराणात् ३गोभाङ्गनद्ये, ४केरलदेशे, क्रूरसंज्ञके "उग्रः पूर्व्वमघानका" इति ज्योतिषोक्ते ५नक्षत्रपञ्चके च हेत्वलङ्कारभेदे न०। ७उत्कटे त्रि०। टवचायां, ६यवान्यां, १०धन्याके, ११उपजातेः स्त्रियां च स्त्री टाप्। तत्र "शिववाचकोग्रनामनिरुक्तिः" यथा "तमब्रवीदुग्रोऽसीति तद्यदस्य तन्नामाकरोत् वायुरुद्रः प्रभवहावुर्वा उग्रस्तस्माद्यदा वसवहात्युग्रोवातोत्याहुः सोऽब्रवीत् ज्यायान् वा अतोऽस्मि" शत० ब्रा० ६,१,३,१२। उक्षन्नुत्युक्षेः १२आयौ पु०। उग्ररूपत्वादेवास्य मूर्त्तिपूजने उग्राय वायुमूर्त्तये नम इति तिथितत्त्वे उक्तम्। शूद्रस्य विप्रकन्यायां जात उग्र इति स्मृतेः" उशनसोक्ते १२चाण्डालरूपवर्णसंकरे च क्षत्रियाच्छूद्रकन्यायां क्रूराचारविहारवान्। चलशूद्रवपुर्जन्तुरुग्रनामा ततोऽभवदिति मनूक्तादयं भिन्नः" "क्षत्रियपुक्कसानान्तु बिलौकोबधबन्धनमिति" मनुः करणेन समा चास्य हस्तिभार्यागर्भनिर्म्मिता" स्मृतिः अस्योग्रस्य। १४उत्कृष्टे त्रि०। "उग्रं वर्म रुचिन्नवः" यजु० २६,१६। १५असुरभेदे पु० "विप्रचित्तिः शिविः शङ्कुः" इत्युपक्रम्यासुरगणनायां "वेगवान् केतुमानुग्रः सोग्रव्यग्रोमहासुरः" हरिवं० ३६३अ०। तत्र वचायाम् "वत्साङ्गयप्रियङ्गूपाग्र्याङ्गुयरसाङ्गनैः" "उग्रा कुष्ठम्" तीक्ष्णगन्धा विड्वङ्गं श्वेतं नित्यं चावपीड़े करञ्जम्"। "विड्वङ्गभल्लातकचित्रकोग्राकटुत्रिकाम्बोदसुराङ्गजाश्च" इति च सुश्रु० १६तीक्ष्णवीर्य्ये त्रि०। १७कालिकावरणभेदे स्त्री। "विप्रचित्ता तथोग्रोग्रप्रभा दीप्ता घनत्विषः" कालीकवचम्। १८उग्रतारायोगिनीभेदे च। "महाकाल्यथ रुद्राणी उग्रा भीमा तथैव च" कालिकापु०। १६दीर्घे च उग्रनासिकः। २०सर्व्वकार्य्येषु उद्यते "उग्रासोऽग्रण उग्रवाहवः इति" ऋ० ८,२०,१२। उग्रासः उद्यूर्णा सर्वकार्य्येषु उद्यताः" भा० उद्य-समवाये इति धातोर्निष्पन्नतया क्रोधतीक्ष्णरसादिना विशेषसम्बन्धात् एषां च सर्वेषाम् उग्रत्वम्। उग्रप्रभोग्रदंष्ट्रादियोगिनीभेदेऽपि उत्कटाद्यर्थता श्लेषम्" भा०।

उग्रक त्रि० उग्र+संज्ञायाम् कन्। नागभेदे। नागनामाख्याने "आर्य्यकोग्रकश्चैव नागः कनकपोतकः" भा० आ० ३५ अ०। २मुरे च "उग्रपुत्रशब्दे उदा०।

उग्रकर्म्मन् त्रि० उग्रं कर्म्मास्य। १हिंसे पश्वादौ २प्राणिहिंसके २क्रूरादौ च। [इन्द्रभेदे राजनि०।

उग्रकाण्ड पु० उग्रः काण्डोऽस्य। (करेला) कारविल्ले

उग्रगन्ध पु० उग्रः गन्धः पुष्पादेरस्य। १चम्पके, २कटफले ३अर्जकवृक्षे ४लशुने च। ५हिङ्गुनि न०। ६उत्कटगन्धाढ्ये त्रि०। ७यवान्याम् टवचायाम्, ६अजमोदायाञ्च स्त्री टाप्। राजनिघण्टुमेदिनी।

उग्रचण्डा स्त्री० उग्रा चण्डा कोपना कर्म्म०। १देवीभेदे। तदाविर्भावः कालिका० पु० ५८,६० अ० उक्तः "उग्रचण्डा तु या मूर्त्तिरष्टादशभुजाऽभवत्। सा नवम्यां

पुरा कृष्णपक्षे कन्यां गते रवौ। प्राडूर्ता महाभागा योगिनीकोटिभिः सह"। अनयैव मूर्त्त्या दनुवधो विनाकृतः। यथा "आषाढस्य तु पूर्णायां सत्वं हादय वार्षिकम्। दनुः कर्त्तुं समारेभे हताः सर्व्वे दिवौकसः। ततोऽस्मिन् न हतस्तेन दनुषेण दुरात्मना। कपालोति सतो चापि तज्जायेति च नो हता। ततो रोषसमायुक्ता प्राणांस्तत्याज सा सती। त्यक्तदेहा सती चापि चण्डमूर्त्तिस्तदाऽभवत्। ततः प्रवृत्ते सत्वे तु तस्मिन् हादशवार्षिके। नवम्यां कृष्णपक्षे तु कन्यायां चण्डमूर्त्तिधृक्। योगनिद्रा महामाया योगिनीकोटिभिः सह। सतीरूपं परित्यज्य यत्तभङ्गमथाकरोत्। शङ्करस्य गणैः सर्व्वैः सहिता शङ्करेण च। स्वयं वभञ्ज सा देवी महासत्वं महात्मनः"। "उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका" इत्युक्ते २दुर्गावरणभेदे च।

उग्रता स्त्री उग्रस्य भावः कर्म्म वा तल्। उग्रस्य १भावे २कर्म्मणि च ३व्यलङ्कारोक्ते व्यभिचारिगुणभेदे। तल्लक्षणं सा० द०। "शौर्य्यापराधादिभवं भवेच्चण्डत्वमुग्रता। तत्र स्वेदशिरःकम्पतर्ज्जनाताड़नादयः"। त्व। उग्रत्व तद्भावकर्म्मणोः न०। ष्यञ्। औग्र्य तत्रैव न०।

उग्रतारा स्त्री उग्रादपि भयात् तारयति भक्तान् तॄ-णिच्-अच् ५त०। तारारूपायां देव्याम्। "तारकत्वात् सदा तारा महाभीमप्रदायिनी। उग्रापत्तारिणी यस्मादुग्रतारा प्रकीर्त्तितेति तन्त्रोक्तात्र वा निरुक्तिः। तदाविर्भावः कालिकापु० ८१अ० "विनिःसृतायां देव्यास्तु मातङ्ग्याः कायतस्तदा। भिन्नाञ्जननिभा कृष्णा साभूद्घोरी क्षणादपि। कालिकाख्याऽभवत् सापि हिमाचलकृतात्रया। तामुग्रतारामाख्यथो वदन्तीह मनीषिणः। उग्रादपि भयाद्रक्षेत् यस्मात् भक्तान् सदाम्बिका। एषैवैकजटाख्याति यस्मात्तस्या जटैकिका। श्रुतं चिन्तय चाख्याः सम्यक् वेतालभैरवौ!। यथा ध्यात्वा महादेवीं भक्तः प्राप्नोत्यभीप्सितम्। चतुर्भुजां कृष्णवर्णां सर्पाभरणभूषिताम्। खड्गं दक्षिणपाणिभ्यां बिभ्रतीन्दीवरं तथः। कर्त्रीञ्च खर्परञ्चैव क्रमाद्वामेन बिभ्रतीम्। घं लिखन्तीं जटाजूटं बिभ्रतीं शिरसा स्वयम्। सर्पाभरणभूषाढ्यां घोरदंष्ट्रां भयानकाम्। लम्बोदरीं चतुर्हस्तां व्याघ्रचर्म्मावृतां कटौ। पिङ्गोग्रैकजटाटोपभीषणां पितृमूर्द्धनि। प्रत्यालीढपदां घोरां मुण्डमालाविभूषिताम्। सद्यश्छिन्नशिरःखड्गवामपाणिमहोत्पलाम्। कर्त्रीखर्परयुग्मं तु दक्षिणोर्द्ध्वकराम्बुजाम्। महाकालहृदम्भोजकृतरामां वरप्रदाम्। घोराट्टहासां पिङ्गोग्रैकजटामुकुटभूषिताम्। कण्ठावसक्तमुण्डालीगलद्रुधिरचर्च्चिताम्। कर्त्रीखर्परहस्ताढ्यां पिबन्तीं रुधिरं मुहुः। चितामध्यस्थितां घोरां महाभीमां भयानकाम्। शवहृत्पद्ममध्यस्थां प्रत्यालीढपदस्थिताम्। शवासनां शवाकर्णावतंसां लोलरसनां घोरदंष्ट्रां भयानकाम्। महाघोरारावयुक्तातिभीषणा। चिन्त्योपतारा सततं भक्तिमद्भिः सुखेप्सुभिः" अन्यत्र च "रूपं शृणु नरश्रेष्ठ! येन ध्येया सदा शिवा। कृष्णा लम्बोदरी दीर्घा विरला रक्तदन्तिका। चतुर्भुजा कृशाङ्गी तु दक्षे कर्त्रीकखर्परौ। खड्गं चेन्दीवरं वामे शीर्षं त्वेकजटां पुनः। वामपादं शवस्योर्व्वीनिधायोत्थाप्य दक्षिणम्। शवस्य हृदये न्यस्य साट्टहासं प्रकुर्व्वती। नागहारशिरोमालाभूषिता कामदा परा"। अस्यारूपविषये बहुविप्रतिपत्तिरस्तीत्यतस्तन्निरूपणं तावत् क्रियते

राघवभट्टे पञ्चकल्पतरौ मन्दारदृत्तप्रकरणे श्रीशङ्कराचार्य्य कृतैतदीयमूर्त्तिप्रकाशकस्तोत्रं यथा। "ज्वलत्पावकज्वालयोज्वालभास्वच्चितामध्यसंस्थां शुचिं सुस्मितां। शवं वामपादेन कण्ठे निपीड्य स्थितां दक्षिणेनाङ्घ्रिणोरु निपीड्य। दृढ्भीमलम्बोदरीं मेघवर्णां ससर्पोरुकर्पीनसत्नां भोगरम्याम्। जवारागरागप्रदृप्तत्रिनेत्रां लसज्जिह्वया दंष्ट्रया भीषणास्याम्। ससद्दीपिचर्म्मावृताङ्गीं नितम्बे जटाजूटमध्यस्थितेन्दीवरालीम्। शिरोदेयभास्वत्पिशङ्गाभसर्पां जटाजूटमध्यस्थिताक्षोभ्यमूर्त्तिम्। शिवः केशवस्त्वात् शिरश्छिन्नसद्योगलच्छोणितां मानवीं सुस्रमालाम्। दधानां च पद्माग्रदाख्यानसंस्थाम् अतश्छिन्नसुखड्गालिसंनामिताङ्गीम्। समाच्छिन्नमांसोत्करामूर्द्धदंष्ट्रे स्फुरत्पाणिना धारयन्तीं महासीम्। करे वाम ईषत्स्फुरद्रक्तनालं लसद्दीप्तपद्मेरुहं धारयन्तीम्। करे सव्य उच्चैरधस्साद्दधानां शितां कर्त्तृकां वामपार्श्वौ कपालम्। जगद्वर्त्तिसंसारसंजातजाड्यं स्वतः कर्त्तृकाधारया खण्डयन्तीम्। विचित्रास्थिमालं करालं कपालं ललाटे च पद्मान्वितं धारयन्तीम्"। इति तत्रैव मन्त्रप्रदीपे "महाष्टसिद्धिप्रकटाङ्घ्रिभूषणाम् इत्यनेन अष्टनागानामष्टसिद्धिरूपत्वोक्त्या तेषां भूषणविशेषरूपतया यथा स्थितिस्तथा तत्रैव दर्शितं यथा। "जटास्वनन्तः श्वसनेच तक्षको महादिपद्मो हृदि हारभूषणम्। तथैव कर्कोटकतोपवीतकम् स मेखलायामथ देवि! वासुकिः। स शङ्खपालः किल कङ्खोरुतः करेषु, पद्मः पदयुक्समाश्रयः। भुजेषु नागः कुलिकोऽङ्गदे मतः" इति "तेषां वर्णा अपि क्रमशोदर्शिताः सितोऽथ रक्तोधवलश्च मेचकः तथैव पीतोऽप्यसितश्च पाटलः। भुजङ्गमानामिह वर्णजातयो भवन्ति सर्वेषु नरेषु सन्ति ताः"। तत्तद्वायं निर्गलितार्थः। अभ्रंलिहपिशङ्गैकजटा अवाक्छुभ्रसङ्काशतक्षकनागकृतकुण्डला शुभ्रशेषनागकृतहारा दूर्व्वा-

दलश्यामनागक्षतयज्ञोपवीता नीलवस्त्रा लम्बोदरी खर्वा चतुर्भुजा तत्र उपरि दक्षिणे सरक्तमांसखण्डमण्डितमुष्टिनिविष्टजटाजूटसंलग्नोग्रखड्गविभूषितकरा उपरि वामे रक्तनालकिञ्जिल्किकखरनीलोत्पलकरा अधस्तात् दक्षिणे वीजभूषितकर्तृकालङ्कृतकरा अधस्तात् वामे त्रिजगज्जाड्यखण्डककपालमण्डितकरा भुजचतुष्टये धूम्राभनागक्षतकेयूरा कनकाभनागक्षतकङ्कणा शवारूढा प्रत्यालीढस्थानाधिष्ठिता निर्भरयन्त्रणाप्रायेण शवहृदयस्थितदक्षिणचरणा शवोरुहृदयस्थितप्रासारितवामपादा कुन्दाभनागक्षतकटीसूत्रा पाटलनागक्षततनुपूराङ्कृता सद्यश्छिन्नगलद्रुधिरान्योन्यकेशग्रथितपादपद्मप्रलम्बित-पञ्चाशत्तमन्दमुण्डमाला ज्वलदनलचिंतामध्यस्थिता हीपिचर्मालङ्कृतकृष्णवस्त्रा योषिदखिलालङ्कारभूषिता मौलावक्षोभ्यरूपनागभूषिता पञ्चसंख्यान्वितकपालमालाभूषितललाटा ललज्जिह्वा दंष्ट्राकरालवदना भीमा घोरा। अत्र प्रमाणवाक्ययोः शवहृदयस्थत्वे वामदक्षिणपादयोर्विकल्पश्रुतेर्मूर्त्तिद्वयमिति मन्ये। प्रत्यालीढपदाङ्गिशवहृदित्युक्तेः आलीढं दक्षिणं पादं प्रत्यालीढं तु वामकमित्युक्तेः आलीढशब्दे दर्शितवाक्याच्च प्रत्यालीढशब्दस्य आलीढविपर्य्ययरूपत्वात् वामचरणस्यैव शवहृदयस्थितिरिति तु न्याय्यम्।

उग्रधन्वन् पु० उग्रं धनुर्यस्य ब०स० अनङ् समा०। १शिवे २शत्रुभिरसह्यधनुष्के त्रि०। "स इषुहस्तैः स निषङ्गिभिर्वशी संस्रष्टा सयुध इन्द्रोगणेन। संसृष्टजित् सोमपा बाहुशर्द्ध्युग्रधन्वा प्रतिहिताभिरस्ता" ऋ०१०, १०३, ३।

उग्रनासिक त्रि० उग्रा दीर्घा नासिका यस्य। दीर्घनासिके।

उग्रपुत्र पु० उग्रस्य शूरस्य पुत्रः। १शूरवंशजाते। "काश्यो वा वैदेहोगोग्रपुत्रः उज्जं धनुरधिज्यं कृत्वा" शत० ब्रा० १४, ६, ८। "उग्रपुत्रः शूरान्वयः" भा०। "उग्रस्य शिवस्य पुत्रः। २कार्त्तिकेये। उग्र ऊर्ध्वः पुत्रो यस्मिन्। ३तादृशे गभीरजलाशये "आँ उग्रपुत्रे जिघांसतः" ऋ० ८, ६७, ११। उग्रपुत्रे उग्राः ऊर्ध्वाः पुत्रा यस्मिन् तत्तस्मिन् हृदे" भा०।

उग्रमत्स्य त्रि० उग्रं मत्स्यति उग्र+डग—खश् मुम्। पापाचरणतया क्रूरदृष्टियुक्ते उपजातौ ब्राह्मादौ "उग्रमत्स्याकृषेऽरण्ये" भट्टिः।

उग्रमय पु० असुरभेदे उग्रशब्दे उदा०।

उग्रशेखरा स्त्री उग्रस्य शेखरं वासस्थानत्वेनास्त्यस्याः अर्श० अच्। गङ्गायाम् शब्दर० सा हि तस्य शिरसि स्थिता

उग्रश्रवस् पु० उग्रम् उत्कृष्टं श्रुतिधरं श्रवः कर्णौ यस्य। १रोमहर्षणे सौतौ। "लोमहर्षण उग्रश्रवाः सौतिः पौराणिको नैमिषारण्ये" भा० १अ०। २धृतराष्ट्रपुत्रभेदे च। तत्पुत्रनामाख्याने "उग्रश्रवा उग्रसेनः क्षेममूर्त्तिश्चवैव च" भा० आ० ६७अ० "उग्रश्रवा उग्रसेनः सेनानीर्दुष्पराजयः" भा० आ० ११७अ०।

उग्रसेन पु० उग्रा सेना यस्य। १धृतराष्ट्रपुत्रभेदे, उग्रश्रवःशब्दे उदा०। २कुरुवंश्ये नृपभेदे। "कुरोस्तु पुत्राश्चत्वारः सुधन्वा सुधनुस्तथा। परिक्षिच्च महाबाहुः" इत्युपक्रम्य "परिक्षितस्तु दायादो धार्मिको जनमेजयः। जनमेजयस्य दायादास्त्रय एव महारथाः। श्रुतसेनोग्रसेनौ च भीमसेनश्च नामतः" हरि० ३२ अ०। अयञ्च जनमेजयः अभिमन्युपौत्रात् भिन्नएव। अतएव "द्वावृषी तव वंशेऽस्मिन् द्वावेव च परिक्षितौ। भीमसेनात्तयोराजन्! द्वौ चापि जनमेजयौ" इति जनमेजयं प्रति तत्रोक्तम्। यदुवंश्ये ३नृपभेदे च। "अन्धकश्च महाबाहुं दक्षिणश्च यदुनन्दनम्" इत्युपक्रम्य "अन्धकात् काश्यदुहिता चतुरोऽजनयत्सुतान्। कुकुरं भजमानञ्च शमं कम्बलबर्हिषम्। कुकुरस्य सुतोधृष्णुर्धृष्णोश्च तनयस्तथा। कपोतरोमा तस्याथ तैत्तिरिस्तनयोऽभवत्। अन्धे पुनर्वसुस्तस्मादभिजिच्च पुनर्वसोः। तथा वै पुत्रमिथुनं बभूवाभिजितः किल। आहुकश्चाहुकी चैव ख्यातौ ख्यातिमतां वरौ" इत्याहुकोत्पत्तिमभिधाय "आहुकस्य तु काश्यायां द्वौ पुत्रौ संबभूवतुः। देवकश्चोग्रसेनश्च देवगर्भसमावुभौ। नवोग्रसेनस्य सुताः तेषां कंसस्तु पूर्वजः" हरि० ३८अ०।

उग्रसेनज पु० जायते इति जन—ड ईत०। कंसे तस्योग्रसेन क्षेत्रेऽहरजातत्वेन तत्पुत्रत्वम्। कंसशब्दे विवृतिः

उग्रादेव पु० उग्रेणादीव्यति आ+दिव—अच् ३त०। राजर्षिभेदे "अग्निना तुर्वशं यदुं परावत उग्रादेवँ हवामहे" ऋ० १, ३६, १८, उग्रादेवनामकञ्च राजर्षिम्" भा०।

उग्रायुध पु० उग्राणि आयुधान्यस्य। १पौरवे राजभेदे तस्योत्पत्तिर्भीमकृतनलकूबरादि हरिवं० २० अ०। "अजमीढस्य दायादः" इत्युपक्रम्य तद्वंशपरम्परा उक्त्वा "तस्य वै सुव्रतेः पुत्रः शतो नाम महाबलः" इति शतोत्पत्तिरुक्ता। "कार्त्तिरुग्रायुधः सोऽथ वीरः पौरव नन्दनः। बभूव येन विक्रम्य पृथ्वस्य पितामहः। नोधोनाम महातेजाः पञ्चालाधिपतिर्नृपः। उग्रायुधस्य दायादः क्षेम्यो नाम महायशाः। क्षेम्यात् सुवीरो नृपतिः

सुवीरात्तु ऋषङ्गयः । ऋषङ्गयाद्बभ्रुरथ इत्येते पौरवाः स्मृताः । सचाक्षुषायुषस्तात ! दुर्बुद्धिरभवत्तदा । प्रहृद्य चक्रो बलवान्नीपानामकरोन्महान् । स दर्पपूर्णोऽहृत्वाजौ नीपानन्यांश्च पार्थिवान् । पितर्युपरते मह्यं आवया मास किल्बिषम् । महामात्यैः परिवृतं शयानं धरणीतले । उग्रायुधस्य राजेन्द्र ! दूतोऽभ्येत्य वचोऽब्रवीत् । अद्य त्वं जननीं भीरु ! गच्छकामीं यशस्विनीम् । स्त्रीरत्नं मम भार्यार्थे प्रयच्छ कुरुनन्दन ! । एवं राज्यञ्च ते स्फीतं धनानि च न संशयः । प्रदास्यामि यथाकाम मह्यं वै रत्नभाग् भुवि । मम प्रज्वलितं चक्रं निशम्यैदं वृद्धवर्ण्यम् । यत्नतो विप्रवन्त्याजौ दर्पनादेव भारत ! राष्ट्रक्षेऽक्षि चेत् क्षत्रि प्राणानां वा कुलस्य वा । शासने मम तिष्ठस्व न हि ते शान्तिरन्यथा । अथ:प्रसारणयने यदानस्तेन नोदितः । दूतोऽन्नहितमेतद्वै वाक्यमग्नि शिखोपमम् । ततोऽहं तस्य दुर्बुद्धेर्विज्ञाय मतमच्युत ! । आज्ञापयं वै संग्रामे सेनाध्यक्षांश्च सर्वशः । विचित्रवीर्यं बालञ्च मदुप्राज्ञयमेव च । दृष्ट्वा क्रोधपरीतात्मा युद्धायैव मनोदधे । निष्टप्तीतस्तदाऽहं तैः सचिवैर्मन्त्रकोविदैः । ऋत्विग्भिर्हेवकल्पैश्च सुहृद्भिश्चार्थदर्शिभिः । स्निग्धैश्च शास्त्रविद्भिश्च संयुगस्य निवर्त्तने कारणं चापितञ्चापि युक्तरूपं तदाऽनघ !" । "प्रहृत्तन्नस्य तच्चक्रमधर्म निरतस्य वै । परदाराभिलाषेण सद्यस्तात निवर्त्तितः । नत्वहं तस्य जाने तन्निहृत्तं चक्रमुत्तमम् । हृतं स्वकर्म्मणा तन्तु पूर्व्वं सङ्घेन निन्दितम् । ऋतशौचः शरो चापो रथो निष्क्रम्य वै पुरात् । ऋतस्वस्ययनो विप्रैः प्रायोधयमहं रिपुम् । ततः संसर्गमागम्य बलेनास्त्रबलेन च । त्रासनञ्चक्रवद्युद्धं देवासुरमिवाऽभवत् । स मयाऽस्त्रप्रतापेन निर्दग्धोरणमूर्द्धनि । पपातामिसुखः शूरस्त्यक्त्वा प्राणानरिन्दम ! । एतस्मिन्नन्तरे तात ! काम्पिल्यात् पृषतोऽभ्यगात् । हते नीपेश्वरे चैव हते चोग्रायुधे नृपे । अक्षिक्षत्रं स्वकं राज्यं पित्र्यं प्राप महाद्युतिः । द्रुपदस्य पिता राजन्नमैवानुमते तदा" भा०हरिव०२०अ० २४तराष्ट्रपुत्रभेदे । तच्चामकीर्त्तने भा०आ० ६७अ० । "उग्रायुधोभीमगरः कनकाङ्गदढायुधः" ।

उग्रेश पु०उग्राणासत्कटरूपाणां प्रमथानामीशः । प्रमथाधिपे शिवे । "शङ्करं भवभीशानं पिनाकभृदुमापतिम्" भा० ब०प० १०६ अ० ।

उङ्कण पु०उमिति कृत्वा कुत्सते हिंसते कुत्स कर्म्मणि घञर्थे क । (उकुण) उत्कुत्से । शब्दमाला ।

उच समवाये दि० पर०सक०सेट् । उच्यति इरित् औचत्,-औचीत् उवोच ओचिता उच्चात् ओचिष्यति औचिष्यत् उचितः उच्यः । "उवोचिथ हि मघवन् देष्णम्" ऋ० ७,३७,३ । उचतिः सेवाकर्मेति माधवः "अभि वा एष एतानुच्यति" तैत्ति० । "नियो गवं पौरुषेयीमुवोच" ऋ० ७,४,३ । "तत्र सेदिन्युच्यते सर्वाच यातुधान्यः" अथ० २,१४,३ ।

उचथ न० उच्यते स्तूयतेऽनेन वच-कथन् । स्तोत्रे "यद्वां मानास उचथमवोचन्" ऋ० १,१८२,८ । उचथम् स्तोत्रम्" भा० । "एवात इन्द्रोचथमर्हेम" ऋ० २,१६,७ । "कुविदो अग्निरुचथस्य" ऋ० १,१४३,६ ।

उचथ्य त्रि०उचथं स्तोत्रमर्हति यत् । १स्तुत्ये २राजभेदे पु० "उचथ्ये वसुषि यः स्वराट्" ऋ० ८,४६,२८ । "उचथ्ये स्तुत्ये । यद्वा उचथ्यो वसुश्च राजानौ" भा० ।

उचित त्रि० उच-क्त वच-कितच् वा । १यस्ते २परिचिते, ३शुक्ले । "अमात्यैरिव नीवारभागधेयोचितैर्मृगैः" दिनानि दीनोद्धरणोचितस्य" "प्रविश्य भीमासुरगोचितोचितः" मङ्खोऽपनुद्यव्यपरोपणोचितम्" रघुः "सार्द्धं कथञ्चिदुचितैः पिचुमर्दपत्रैः" । "स्वर्गसुखमुचितं दधच्छिखो" माघः । "वंशोचितत्वादभिमानवत्त्वाः" किरा० ।

उच्च त्रि० उत्क्रियय वाहू चीयते, उपर्य्युपरिनिविष्टैरवयवैश्चीयतेऽसौ वा उद्+चि-ड । १उन्नते । "पुरस्तादुच्चम्" काल्या०७,१,२१। "स तदुच्चकुचौ भवन् प्रभाभरः-चक्रमभिमातनोति यत्" नैषधम् । अस्मात् उत्कर्षे तरप् तमप् । "किंस्वित् गुरुतरं भूमेः किं स्विदुच्चतरञ्च खात्" भा०व० ३अ० । उच्चतमम्" काल्या० ७,१, १५ । देवयजनवर्णने "परितः समीपदेशवर्त्तिप्रदेशेभ्यो यदतिशयेनोच्चम्" कर्कः । राशिचक्रमध्ये गृहविशेषाणां २राशिभेदे, यथा "मेषो वृषो मृगः कन्या कर्कीमीनतुलाधराः । भास्करादेर्भवन्त्युच्चाः राशयः क्रमशस्त्विमे" ज्योति०त० । स्वरूपमुक्तं तत्रैव "रविर्मेषे वृषे चन्द्रो गुरुः कर्के बुधः स्त्रियाम् । धनिर्युके (तुलायाम्) मृगे (मकरे)भौमः शुक्रो मीने च तुङ्गिनः" । तेषां राशिभागभेदे परमोच्चतामाह तत्रैव "त्रिंशद्भागे दिशो (१०) रामाः (३)अष्टविंशतिभिस्तिथिः १५। तत्रेषुः (५) सप्तविंशच्च विंशतिश्चोच्चसंज्ञकाः" । तथा च रवेर्मेषस्य दशमे भागे,

प्रभोच्चता ,चन्द्रस्य वृषे ३अंशे, कुजस्य मकरे २८भागे बुधस्य कन्यायाः १५भागे, गुरोः कर्के ५भागे, भृगोः मीन २७भागे शनेस्तुला २०भागे तथात्वम् । "खोच्चाच्च सप्तमं नीचं प्राग्वद्भागैर्विभिर्हरेत् । उच्चान्तः सप्तसंस्थः स्यात् नीचान्ते तु सुनीचकः" परिपूर्णबलः सप्ते सुनीचे दुर्बलोग्रहः। सप्तसुनीचयोरन्तर्भागहारात् फलं दिशेत्" ज्योति०त० राजकलोस्तु "उच्चं सप्तमं षष्ठं त्रिकोणं कन्याष्टकं शुक्रशनी च मित्रे । सूर्यः शशाङ्कोधरणीसुतश्च राहो रिपुर्विंशतिकः परांशः । सिंहस्त्रिकोणं धनुरष्टसंज्ञं मीनोष्टकं शुक्रशनी विपक्षौ। सूर्यारचन्द्राः सुहृदः समानौ जीवेन्दुजौ षट्त्रिंशिनः परांशाः" ज्यो०त०। राशिपरत्वेऽस्य पुंस्त्वं भपरत्वे क्लीवतेति भेदः । भागहारात् ग्रहबलसाधनं तदानयनप्रकारः नी०ता० सूर्यादेर्मेषादीन्युच्चान्यभिधाय "तत् सप्तमं नीचमनेन हीनो य होऽधिकश्चेत् रसभाद्विशोध्यः । चक्रात्, तदंशाद्बलवो बलं स्यात्" ३तथा च ताजके खोच्चे २०कला बलं तेन षड्भिः राशिभिर्यदि पूर्णबलं तदा दृष्टांशैः किमिति १८०,२०,१, लैराशिकेन प्रत्येकांशं १/६ बलमायाति । जातके तु खोच्चे ६०कला बलं तेन प्रत्यंशं १/२ बलम्। नी०ताजके "त्रिंशत्खभे त्रिंशतिरुच्चभे खे" इति उक्तम्। जातके तु श्रीपतिः ६० कला बलमाह यथा "नीचोनोद्युचरोऽधिको यदि भवेत् षड्भात् तदाप्रच्युतच्छात् लृप्तकलः खखाष्टखकृभि (१०८००) र्भक्तोबलं तद्भजम् । पादोनं तु बलं ३/४,त्रिकोणाष्टगे खलैं १/२ दलं च त्रयो ३/८ वस्वंशा ह्यधिमित्रगेऽच चरणो १/४ मित्रे समर्क्षोऽष्टमः। १/८ । शत्रुभे भवति षोडशांशक ११६ स्वाधिशत्रुभवने रदांशकः १/३२ । अतः त्रिकोणादौ पादोनादिबलकथनात् खोच्चे पूर्णबलमिति प्रतीयते तेन ६०कलास्तत्र बलम् ।

उच्चाभिमानिनि ग्रहाणां गतिभेदकारके भगणस्थे ३जीवभेदे तेनैवाकर्षणात् गृहाणासुच्चादिगतिसम्भवः ।

स च द्विविधः शीघ्रोच्चः मन्दोच्चश्च तादृशोच्चतायां कारणञ्च सू०सि० रङ्गनाथाभ्यां दर्शितं यथा "अदृश्यरूपाः कालस्य मूर्तयो भगणाश्रिताः । शीघ्रमन्दोच्चपाताख्या ग्रहाणां गतिहेतवः;"सू०सि०१। "शीघ्रोच्चमन्दोच्चपातसञ्ज्ञकाः पूर्वोक्तपदार्था जीवविशेषाः सूर्यादिग्रहाणां गतिकारणभूताः सन्ति । ननु कालेनैव ग्रहचक्रं भवतीति कालो गतिहेतुर्नैत इत्यत आह कालस्येति । पूर्वप्रतिपादितकालस्य स्वरूपाणि तथा चैषां कालमूर्त्तित्वेन ग्रहगतिहेतुत्वं नासम्भवीति भावः। ननु कालस्य घट्यादिमूर्त्तित्वादेषां तदात्मकत्वाभावात् कथं कालमूर्तित्वमित्यत आह भगणाश्रिता इति । भगोलस्थक्रान्तिवृत्तानुसृतग्रहगोलस्थक्रान्तिवृत्तप्रदेशाश्रिता इत्यर्थः । तथा च ग्रहराश्यादिभोगानां कालवशेनैवोत्पन्नत्वात् तदात्मकानां कालमूर्तित्वमिति भावः। ननु ते दृश्यन्ते कुतो नेत्यत आह अदृश्यरूपा इति । वायवीयशरीरा अव्यक्तरूपत्वादप्रत्यक्षा इति भावः । एवं च ग्रहाणामुच्चादिसम्भवात् स्वटक्रियोत्पन्नेति तात्पर्यम् ।। अथानयोरुच्चपातयोर्मध्य उच्चयोर्गतिहेतुत्वं प्रतिपादयति" र०ना०। "तद्वातरश्मिभिर्बद्धास्तैः सव्येतरपाणिभिः। प्राक् पश्चादप्रदघ्नन्ते यथासन्नं खदिङ्मुखम्" २ सू०सि०। "तेषामुच्चसंज्ञकजीवानां वायुरूपा ये रश्मयो रज्जवस्ताभिर्बद्धा विभात्मकग्रहास्तैरुच्चसंज्ञकजीवैः सव्यवामहस्तैरुच्चबद्धत्वेन हस्तवाङ्मुख्याद्बद्धवचनं हस्ताभ्यामित्यर्थः । खदिङ्मुखं स्वाभिमुखं यथासन्नं ग्रहबिम्बं भवति तथा प्राक् पश्चात् पूर्वपश्चिमभागाभ्यामित्यर्थः । अपदघ्नन्ते आकर्षन्ते। अयमभिप्रायः भचक्रगोलस्थक्रान्तिवृत्तानुसृतग्रहाकाशगोलान्तर्गतक्रान्तिवृत्ते कक्षारूपे स्वस्वप्रदेशे ग्रहोच्चपातास्तिष्ठन्ति। तत्र बिम्बव्यासोनकक्षाकारत्वं प्रवहवायुतिरिक्तवायुरूपं स्वतोगतिस्थाने कल्प्यमानं ग्रहबिम्बव्यासे पूर्वापरे प्रोतसञ्जीवग्रहसहयान्तर्गतमस्ति । अथ ग्रहबिम्बसञ्ज्ञस्थानात् स्वशक्त्या गच्छदपि वामहस्थितसूत्रे खोच्चस्थानात्, पूर्वरूपेण ग्रहस्थानात् पश्चिमरूपेण दृढसूत्रावयवशक्तेन स्वस्थानात् पश्चात् स्वाभिमुखमाकृष्यते निरन्तरसञ्ज्ञदैवतैः स्वशक्त्या यावत् षड्भान्तरं तयोरन्तरं तन्मार्गेणाकर्षणसम्भवात् पूर्वस्थितं गच्छद्ग्रहबिम्बं, सव्यहस्तस्थितसूत्रे खोच्चस्थानात् पूर्वस्थितं स्वाभिमुखमाकृष्यते स्वशक्त्या निरन्तरं यावदन्तराभावस्तयोरिति"र०ना०।"अथात एवैकरूपां पूर्वाधिकारावगतां गतिं त्यक्त्वा कुतः प्रत्यक्षविलक्षणां गतिं प्राप्य ग्रहा इत्यत आह । "प्रवहाख्यो मरुत् तांस्तु खोच्चाभिमुखमीरयेत् । पूर्वापरापकृष्टास्ते गतिं यान्ति पृथग्विधाम्"सू०सि०३।"प्रवहाख्यः प्रवहसंज्ञको मरुद्वायुः पश्चिमाभिमुखं भ्रमंस्तान् तत्कारादुच्चानि खोच्चाभिमुखं स्वस्य प्रवहभ्रमणेनोच्चं भावप्रधाननिर्देशादुच्चता यस्यां दिशि तत् खोच्चं पूर्वादिक् पूर्वभाग एव ग्रहाणां प्रवहभ्रमे-

खोच्चगमनदर्शनात् तत्सम्मुखं पूर्वदिशीति तात्पर्यार्थः। रेरवेत् पश्चिमाभिमुखखमण्डलिप्रागुक्तयन्त्रावलम्बनरूपेण चालयतीत्यर्थः। अतः कारणात् ते यन्त्राः पूर्वं पश्चिमदिशोरारूढाः पृथग्विधां प्रथमावगतैकरूपभिन्नप्रकारावगतां प्रतिक्षणविलक्षणां गतिं गमनक्रियां यान्ति प्राप्नुवन्ति। अवलम्बनाकर्षणाभ्यां प्रतिदिनं यन्त्राणां गतेरन्यादृशत्वं तदनुसारेण गृहचारज्ञानं युक्तमिति गृहाणां स्वदृक्क्रियोत्पन्नेति भावः। यद्वा नतु वायुरज्जुभिः कथं गृहाणामाकर्षणं सम्भवति तद्रज्जूनां विरलतया घनीभूतत्वाभावेनाकर्षणायोग्यत्वादित्यत आह। प्रवाहाख्य इति। उच्चदेवतादृक्क्षद्वयस्थितकक्षाकारक्षत्रं वायुः प्रवहवायुसम्बन्धात् प्रवहसञ्ज्ञो न पश्चिमाभिमुखभ्रमत्प्रवहाख्यकक्षान् गृहान् स्वोच्चाभिमुखं स्वोच्चदेवता स्थानसम्मुखमीरयेत् प्रेरयति चालयति। तत्कारादुच्च स्थानात् पूर्वस्थिनं गृहे वायुः पश्चिमगत्वा गृहं चालयति पश्चिमस्थे वायुः पूर्वगत्वा गृहं चालयतीत्यर्थः। तथा च कक्षाकारक्षत्रं तदा तदा तथा तथा भ्रमतीति दैवतैराख्यत इत्युपचारादुच्यत इति भावः। अत एव गृहाणां स्वदृक्क्रियोत्पन्नेत्याह। पूर्वापरादृक्षस्था इति उच्चदैवतैः पूर्वापरदिशयोरारूढा गृहाः पृथग्विधां मध्यमातिरिक्तप्रकारां गतिं गमनक्रियां यान्ति। अतो न केवलं मध्यक्रियया निर्वाहः" २ र०ना०। अथ प्राक् पश्चादपक्षयन्त्र इत्युक्तं विशदयति। "गृहात् प्राग्भगणार्द्धस्थः प्राङ्मुखं कर्षति गृहम्। उच्चसञ्ज्ञोऽपरार्द्धस्थस्तद्वत् पश्चान्मुखं यहम्" ४ सू०सि०। "गृहस्थानात् पूर्वभागस्थराशिषट्कस्थित उच्चसञ्ज्ञो जीवो गृहबिम्बं पूर्वदिगभिमुखं स्वाभिमुखं कर्षत्याकर्षति। अपरार्द्धस्थो गृहस्थानात् पश्चिमभागस्थराशिषट्कस्थितउच्चसञ्ज्ञो जीव इत्यर्थः। गृहबिम्बं पश्चान्मुखं पश्चिमदिगभिमुखं स्वाभिमुखं तद्वदाकर्षतीत्यर्थः" ४ र०ना०। "अथ पूर्वोक्तसिद्धं फलितमाह। "स्वोच्चापक्रान्ता भगणैः प्राङ्मुखं यान्ति यद्गृहाः। तत् तेषु धनमित्युक्तक्षणं पश्चान्मुखेषु तु" सू०सि० ५। "स्वोच्चजीवाकर्षिता गृहाः पूर्वाभिमुखं भगणैः राशिभिर्भगोलस्थक्रान्तिवृत्तानुसृतस्वाकाशगोलान्तर्गतक्रान्तिवृत्ते द्वादशराश्यन्विते यद्राशिविभागैरित्यर्थः। यद् यत्संख्याभितं भक्रान्ति तत् तत्सङ्ख्याभितं भागादिकं फलरूपं तेषु पूर्वोक्तगृहराश्यादिभोगेषु धनं योज्यम्। पश्चान्मुखेषु पश्चिमाकर्षितगृहपूर्वावगतराश्यादिभोगेषु तत्कालादृक्षाभितं फलरूपं पश्चिमतो गच्छन्ति तदित्यर्थः। ऋणं क्षीणमिति एतत् पूर्वैः कथितम्" र०ना०५। सि०शि० "रुद्रा भचक्रं कमलोद्भवेन गृहैः सहैतद्भगणादिसंस्थैः। यच्चदृभमे विश्वसृजा नियुक्तं तदन्तरे च तथा ध्रुवत्वे। ततोऽपराशाभिमुखं भपञ्जरे खेचरे शीघ्रतरे भ्रमत्यपि। तदल्पगत्येन्द्रदिशं नभश्चराश्चरन्ति नीचोच्चतरात्मवर्त्मसु"। "यदेतद्भचक्रं गृहैः सह भ्रमदृश्यते तद्विश्वसृजा जगदुत्पादकेन कमलोद्भवेन ब्रह्मणा सृष्ट्यादौ रुद्रा ततः यच्चदृभमेऽनवरतभ्रमणे नियुक्तम्। एतदुक्तं भवति। भान्यश्विन्यादीन्यन्यानि विशिष्टानि ज्योतींषि तेषां समूहचक्रं गृहाश्च सूर्यादयस्तैः सह रुद्रम्। तानि भानि प्राक्संख्यया समन्तान्निवेशितानि। गृहास्तु भगणादावश्विनीसखे निवेशितास्तु उपर्युपरिसंस्थया। तत्रादौ तावदधश्चन्द्रः तदुपरि बुधः, ततः शुक्रः, ततो रविः तस्माद्भौमः, ततो गुरुः ततः शनिः। सर्वेषामुपरि दूरे भचक्रम्। एषां कक्षाप्रमाणानि चक्राध्याये प्रतिपादयिष्यन्ते। अहो बत्यूर्ध्वोर्ध्वस्था गृहास्तदोपरि दूरतो भगणस्तत् कथं भगणादिसंस्थैर्गृहैरित्युच्यते? सत्यम्। अत्र भूमध्ये सूत्रस्यैकमग्रं बद्धा द्वितीयमग्रं भचक्रेऽश्विनीमुखे किल निबद्धम्। तस्मिन् सूत्रे प्रोता मणय इव चन्द्रादयो गृहा सृष्ट्यादौ ब्रह्मणा निवेशिताः। भमण्डलं द्वादशधा विभज्यैवं भूमध्यात् सूत्राणि प्रतिभागं नीत्वा किल बद्धानि तैः सूत्रैः सह गृहकक्षायां ये संपातास्ते तासु कक्षासु राश्यन्ताः। तद्वत्प्रकारा राशय इति संक्षिप्तमिहोक्तम्। कक्षाध्याये गोले च किञ्चिद्विस्तार्य वक्ष्यामः। एवंविधं भचक्रं रुद्रा ब्रह्मणा गगने निवेशितम्। यत्र निवेशितं तत्र प्रवहो नाम वायुः। स च नित्यं प्रत्यग्गतिः। तेन समाहृतं भचक्रं सखेचरं पश्चिमाभिमुखभ्रमे प्रवृत्तम्। यत् तस्य प्रत्यग्भ्रमणं तच्छीघ्रतरम्। यत एकेनाह्ना भमण्डलस्य परिवर्त्तः। एवं तस्मिन् भपञ्जरे सखेचरे शीघ्रतरे भ्रमत्यपि खेचरा इन्द्रदिशं चरन्ति पूर्वाभिमुखं व्रजन्ति नीचोच्चतरात्मवर्त्मसु। अनन्तरकथितेषु स्वस्वमार्गेषु तेषां प्राग्भ्रमणम्। तत् तदल्पगत्या, प्रत्यग्गतेर्बलत्वात् प्राग्लघुगत्या व्रजन्तो नोपलक्ष्यन्त इति भावः। तथा तस्य भपञ्जरस्य यो दक्षिणोत्तरावर्त्तौ तस्य ये तारे ते ध्रुवत्वे

नियुक्ते" भरि० । तथा श्रीपतिः । "स्वव्यापारात् प्राग्गतिः खेचराणामूर्ध्वाधस्ताद्यास्यसौम्यापराणि । गोलाभिघ्नैः पञ्च यातानि यानि तेषामुक्तान्यन्यथेहोनितानि । प्रत्यग्गतिः प्रवहवायुवशेन तेषां नीचोच्चवृत्तजनितोर्ध्वमधश्च सा स्यात् । याम्योत्तरा स्वपमवृत्तविमण्डलाभ्यां षोढा गतिर्निगदितैवमिह ग्रहाणाम्" उच्चता च महत्त्वव्याप्यगुणभेदः । सा च उपर्य्युपरिसन्निवेशितावयवनां महत्त्वे भवति तस्य गुणचनत्वात् ततः भावेऽर्थे ष्यञ् । औच्च्यम् उच्चतायां न० । त्व । उच्चत्व तत्रार्थे न० तल् । उच्चता स्त्री । "उच्चस्थे गृहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ लग्ने कर्कटके पुनर्वसुदिने मेषं गते भूपणि । निर्दग्धुं निखिलाः पलायसमिधः मध्यादयोध्यारणेराविर्भूतमभूदपूर्व्वविभवं यत्किञ्चिदेकं महः" तिथित०पु० । "ग्रहैस्तत: पञ्चभिरुच्चसंस्थितैरसूर्यगैः सूचितमाग्यसम्पदम्" रघुः । "स्वोच्चस्थः स्वसुहृदां वर्गेऽपि वा" ज्योति०त० ।

उच्चकैस् अव्य०उच्चैस्+टेरकच् । १उच्चतायां २तद्विशिष्टे च । "जनितमुद्स्यादुच्चकैरुच्छ्रितोरः" "स्थितोदयाद्रेरभिसायमुच्चकैः" माघः । उत्कर्षार्थे तरवादि उच्चैर्शब्दवत् ।

उच्चक्षुस् त्रि० उत्क्षिप्तमुत्पाटितं वा चक्षुर्यस्य प्रा०ब० । १ऊर्द्धोत्क्षिप्तनेत्रे २उत्पाटितनेत्रे च । ततः च्वि ह्रस्वश्चूकरोति उच्चक्षूभवति उच्चक्षूस्यात् ।

उच्चटा स्त्री उद्-चट-अच् । १लशुनभेदे, २गुडूचायां ३चूड़ालतायाम्, ४भूम्यामलक्याम् ५नागरङ्गलतायाञ्च ।

उच्चण्ड त्रि० उद्-चडि-अच् । १अत्यन्तोग्रे २अतिकोपने, ३त्वरायुक्ते अविलम्बिते । ४प्रखरसूर्य्ये पु०५तद्वति त्रि० ।

उच्चतरु च०कर्म्म० । १नारिकेले वृक्षे । २उच्चद्रुमयुक्ते च ।

उच्चताल न०उच्चः तालः हस्ततालः यत्र । १पानगोष्ठ्यां मत्ततया तत्र उच्चैर्हस्ततालदानात्तथात्वम् ।२उच्चतालवृक्षे च

उच्चदेव पु०उच्चः श्रेष्ठो देवः । वासुदेवे त्रिका० । तस्य "सर्व्वदेवमयो हरिः" इत्युक्तेः सर्व्वदेवमयत्वात् सत्वप्रधानत्वाच्च उत्कृष्टत्वम् अतएव भागवते "श्रेयांसि तत्र खलु सत्वतनोर्हरेर्णां स्युरिति"सत्वप्रधानत्वात् तस्य श्रेयःसाधनत्वमुक्तम् ।

उच्चन्द्र पु० उच्छिद्रः खल्वाटविशिष्टचन्द्रो यत्र प्रादि०ब० शिष्टशब्दलोपः । रात्रिशेषे शब्दरत्ना० ।

उच्चय पु०उत्पाद्य चयः चि-अच् । १पुञ्जादेरुल्लोलने । "पुष्पोच्चयं नाटयति" भट्ट० । "करिष्यामि शरैस्तीक्ष्णैस्तच्छिरःकमलोच्चयम्" रघुः । "प्रत्युपसदमेकोच्चयेन कपालान्येककपालप्रभृतीनाम्" कात्या० २३,२,२० । उक्तरेषु पुरुषोच्चयेनैवैकशतविधात् १६, ८,२५ । २नारीकञ्चुकगुन्थौ "नीविः स्यादुच्चयोऽध्वयम्" मार्त्तण्डः उत्कृष्टचयः । ३उच्चत्वसमुदाये च अमुच्चयः । "वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः" सा०द० । स निर्घृणः क्रुद्धं रामोऽधी मनःशिलोच्चये" रामा० । "एकतः सरितः सर्व्वाः गङ्गाद्याः सलिलोच्चयाः" भा०व० ८८ अ० । "नैकद्रव्योच्चयवतीं सम्पदविपणापणाम्" भा० अनु०२०अ० । शिलोच्चयोऽपि क्षितिपालसञ्चैः" रघुः । कर्म्मणि अच् । ४हस्ताभ्यामुद्धृत्यावचिते नीवारे"हारा० ।

उच्चल न० । उद्+चल-अच् । १मनसि हेमच०तस्य "असंशयं महाबाहो ! मनोदुर्निग्रहं चलम्" गीतोक्तेश्चञ्चलस्वभावत्वात्तथात्वम् ।२चञ्चलस्वभावयुक्ते त्रि० ।

उच्चलित त्रि० उद्+चल-क्त । गमनोद्यते प्रस्थिते गन्तुमुद्यते

उच्चललाटा स्त्री उच्चं ललाटं यस्याः । उन्नतललाटरूपदुर्लक्षणायां स्त्रियाम् । स्त्रीणां च दुर्लक्षणम् कन्याशब्दे वक्ष्यते

उच्चनीच त्रि० उच्चैश्च नीचैश्च मयू० समा० । उन्नतावनतप्रदेशादौ "दृष्टारमुच्चनीचानां कर्म्मभिर्देहिनां गतिम्" । भा० आश्व०१६ अ० ।

उच्चा अव्य०उद्+ची-ड्रा । १उच्चैःशब्दार्थे । "अमी य ऋक्षा निहिता स उच्चा" ऋ० १,२४,१० । "उच्चा उच्चैःप्रदेशे" भा० । "उच्चा दिवि दक्षिणावन्तोऽस्थुर्ये" ऋ० १०,१०७,२ । "अस्माकं शुत्रमधिपञ्च कृष्टीरुच्चा" २,२,१० । "उच्चा उच्चैः" भा० । "अवतमुच्चाचक्रं परिज्मानम्" ८,७२, १० । "उच्चाचक्रमुपरिस्थितचक्रम्" भा० उच्चावुच्चं नीचादुच्चाचक्रतुः पात्रे याः" ऋ० १,११६,२२ । २उन्नतायां स्त्रियां स्त्री "उच्चारणत्पक्षिगणास्तटीस्थम्" माघः ।

उच्चाटन न०उद्-चट्-णिच्-ल्युट् । १उत्पाटने स्वस्थानात् २विश्लेषणे "उच्चाटनं स्वदेशादेर्भ्रंशनं परिकीर्त्तितम्" इति या०ति०उक्ते ३षट्कर्म्मान्तर्गतेऽभिचारभेदे च। उच्चाट्यतेऽनेन करणे ल्युट् । तन्त्रोक्ते ४तत्साधनकर्म्मणि । तन्त्रसारे वगलाया अभिचारप्रयोगे कृष्णलक्षणमुपक्रम्य "वश्ये तु चतुरस्रं चाकर्षणे तु त्रिकोणकम् । तथैवोच्चाटने प्रोक्तं षट्कोणे मारणं स्मृतम् । वश्ये मेषासनं श्रेष्ठं कर्षणं व्याघ्रकर्म्मणि । शान्तौ मृगासनं प्रोक्तं सम्मोगोच्चर्म्मणि स्मृतः । उद्वासनं तथोच्चाटे विद्वेषे खरगा-

सनम्" मारणे महिषीचर्म्म मोहने च गजासनम्। मधुलाजतिलादीनि वश्यशान्तिकराणि च। आकर्षणे तथा लोध्रं सतिलं मधुरान्वितम्। निम्बपत्रञ्च तैलाक्तं विद्वेषकरणं परम्। हरितालं हरिद्रा च लवणेन च संयुता। स्तम्भनेचैतत् देवेशि! प्रज्ञाञ्चैव गतिं मतिम्। वाजिनाक्षस्य सारेण रुधिरेण च होमयेत्। मारणे तु रिपोर्देवि! श्मशानाग्नौ हुनेन्निशि। क्षुद्राणां काकपक्षाणां भस्मधूमेन संयुतम्। लाजानुन्मिश्रयेत्तानु सर्वरोगप्रशान्तये" तन्त्रसा०। उच्चाटनप्रकारा बहवोदर्शितास्तत्र सामान्यप्रकारस्तत्राभिधीयते निबन्धे "शान्तिवश्यस्तम्भनानि विद्वेषोच्चाटने ततः। मारणं तानि शंसन्ति षट् कर्माणि मनीषिणः। रतिर्ब्राह्मी रमा ज्येष्ठा दुर्गा काली यथाक्रमात्। षट्कर्म्मदेवताः प्रोक्ताः तत्तादेताः प्रपूजयेत्। ईशचन्द्रेन्दुनिर्ऋतिवायुवह्नीनां दिशोमताः। सूर्य्योदयं समारभ्य घटिकादशकं क्रमात्। ऋतवः सुर्व्वसन्ताद्या अहोरात्रे दिनेदिने। वसन्तग्रीष्मवर्षाख्यशरद्धेमन्तशैशिराः। जलं शान्तिविधौ शस्तं वश्ये वह्निरुदाहृतः। स्तम्भने पृथिवी शस्ता विद्वेषे व्योम कीर्त्तितम्। उच्चाटने स्मृतो वायुर्भौमाग्निर्मारणे मतः। तत्तद्भूतोदये सम्यक् तत्तन्मण्डलसंयुतम्। तत्तत् कर्म्म प्रकर्त्तव्यं मन्त्रिणा निश्चितात्मना। श्वेतांशुसलिलक्षौणीव्योमवायुहविर्भुजाम्। वर्णाः सुमन्त्रबीजानि षट्कर्मसु यथाक्रमम्। ग्रथनञ्च विदर्भश्च संपुटो रोधनं तथा। योगः पल्लव इत्येते विन्यासाः षट्सु कर्मसु। मन्त्रान्ते विहितान् कृत्वा साध्यवर्णान् यथाविधि। ग्रथनं तत् विजानीयात् प्रशस्तं शान्तिकर्मणि। मन्त्रार्णहृदयमध्यस्थं साध्यनामाक्षरं लिखेत्। विदर्भ एष विज्ञेयो मन्त्रिभिर्वश्यकर्मणि। आदावन्ते च मन्त्रस्य स्वाहान्तोऽसौ सम्पुटः स्मृतः। एष स्यात् स्तम्भने शस्त इत्युक्तो मन्त्रवेदिभिः। नाम्न आद्यन्तमध्येषु मन्त्रस्य स्याद्रोधनं स्मृतम्। विद्वेषणविधाने तु प्रशस्तमिदमुत्तमम्। मन्त्रस्यान्ते भवेन्नाम योगः प्रोच्चाटने मतः। अन्ते नाम्नो भवेन्मन्त्रः पल्लवोमारणे मतः"। भूतानामुदयः या०चि०। "दग्धाक्षारा गतिर्भूमेः पुटयोरूभयोरधः। तोयस्य पावकस्योर्द्ध्वगतिस्तिर्य्यङ्नभस्वतः। गतिर्ब्रह्मणो भवेन्मध्ये भूतानामुदयः स्मृतः। धरणे स्तम्भने कुर्य्यात् स्तम्भनं वश्यमात्मवित्। शान्तिकं पौष्टिकं कर्म तोयस्य, तेजसस्तथा। मारणादीनि मरुतोविपक्षोच्चाटनादिकम्। मन्त्रविद्वेषणं शस्तमुदये च विहायसः"। भूतमण्डलादिकं तत्रैवावसेयम्। षट्कर्मकरणनिमित्तमाह रुद्रयामले "उपस्थिते महाग्रहे राष्ट्रपीड़ासु रुग्भये। भूमिवित्तमहोत्पाते भूतभीतिविपत्सु च। नातःपरतरं कर्म्म कलौ शान्तिकरं प्रिये!। मारणं मोहनं स्तम्भं विद्वेषणमथापि वा। वशीकरकर्म्माणि तथोच्चाटनकर्म्म च। सर्वत्र साधयेन्मन्त्री ततोनान्यत् शुभावहम्। विशेषतः शत्रुसंघरोगोपद्रवनाशनम्। शत्रूणां कर्म्मनाशे च तथा शत्रुपराजये। आत्मनो विजये चैव नातःपरतरा क्रिया"। घञ्। उच्चाटोऽत्र पु०। "उद्वासनं तथोच्चाटे" तन्त्रसारः।

उच्चार पु० उद्+चर–णिच्-घञ्। १उच्चारणे। "तस्यकार्य्येऽनुच्चारः" स्मृ०वो०। "मन्त्रोच्चारपरायणः" पु०। उच्चार्य्यते अपानवायुना उत्क्षिप्यते कर्म्मणि घञ्। २पुरीषे। विण्मूत्रोत्सर्गविधानप्रकारः आ० त० नानावचनैर्दर्शितो यथा विष्णुधर्म्मोत्तरे "निद्रां जह्याद्गृहे राम! नित्यमेवारुणोदये। वेगोत्सर्गं ततः कृत्वा दन्तधावनपूर्व्वकम्। अरुणोदयकालमाह स्कन्दपुराणम् "उदयात् प्राक् घतस्रस्तु नाड़िका अरुणोदयः। तत्र स्नानं प्रशस्तं स्यात्तद्धि पुण्यतमं स्मृतम्"। नाड़िका दण्डः। "नाड़ीषष्ट्या दिवानिशम्" इत्युक्तेः। विष्णुधर्म्मोत्तरे "वेगरोधं न कर्त्तव्यमन्यत्र क्रोधवेगतः"। "वेगरोधं न कर्त्तव्यमिति तु कां दिशं गन्तव्यमितिवत् भावाख्यातेतरत्वात् साधुत्वम्। आयुर्वेदोक्तेऽपि "न वेगिनोऽन्यसिद्धिः स्यात् नाजित्वा साध्यमामयम्"। अङ्गिराः "उत्थाय पश्चिमे रात्रेस्मृत आचम्य चोदकम्। अन्तर्धाय हरेर्भूमिं शिरः प्रावृत्य वाससा। वाचं नियम्य यत्नेन क्षीवनोच्छ्वासवर्जितः। कुर्य्याच्च त्वपुरीषे तु शुचौ देशे समाहितः" विष्णुपुराणम् "ततः कल्यं समुत्थाय कुर्य्यान्मैत्रं नरेश्वर!। नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः" तिष्ठेदातिचिरं तस्मिंश्चैव किञ्चिदुदीरयेत्"। कल्यसुत्थानकालम्, मैत्रं मित्रदेवताकपायुसम्बन्धात् पुरीषोत्सर्गम्, नैर्ऋत्यामुत्थानदेशमारभ्य उत्थायेत्यनेनोपस्थितेः। इषुविक्षेपमतीत्य इषुविक्षेपयोग्यदेशादर्हिः। तद्देशपरिमाणमाह पितामहः "मध्यमेन तु यामेन प्रक्षिपेत्तु शरत्रयम्। कृत्वानान्तु शते सार्द्धं हस्तं कृत्वा विचक्षणः"। आपस्तम्बः "मूत्रपुरीषे कुर्य्यात् दक्षिणां दिशं दक्षिणापराम्वेति"। दक्षिणापरा नैर्ऋती। मनुः "मूत्रोच्चारसमुत्सर्गं दिवा कुर्य्यादुदङ्मुखः। दक्षिणाभिमुखो

रात्रौ सन्ध्ययोश्च यथा दिवा"। उच्चारः पुरीषम्। यत्तु यमवचनं "प्रत्यङ्मुखश्च पूर्व्वाह्णे अपराह्णे च प्राङ्मुखः। उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुखः" इति तत् उदङ्मुखेन सन्ध्येऽह्नोविकल्पार्थं सूर्य्याभिमुखनिरासार्थञ्च न तु नियमार्थं देवलवचनविरोधात्। तथा च "सदैवोदङ्मुखः प्रातः सायाह्णे दक्षिणामुखः। विण्मूत्रे आचरेन्नित्यं सन्ध्यायां परिवर्জ্জयेत्" इति। प्रातःसायाह्नशब्दौ दिगरात्रिपरौ पूर्व्वोक्तमनुवचनैकवाक्यत्वात्। सन्ध्यायां परिवर्জ্জयेदिति तु पीड़ितेतरपरम्। यमः "कृत्वा यज्ञोपवीतन्तु पृष्ठतः कण्ठलम्बितम्। विण्मूत्रे च शुचौ कुर्य्यात् यद्वा कर्णे समाहितम्"। पृष्ठतः पृष्ठे कण्ठलम्बितं निवीतम्। अत्र लम्बितं निवीतम्। "संवीतं मानुषे क्रमे" इति तैत्तिरीयश्रुतेः। मानुषे सनकादिक्रमे। पृष्ठलम्बितं निवीतम्" इति बौधायनवचनाच्च। तथा च हारवत् कृत्वा पृष्ठलम्बितम् स्कन्धे इत्यर्थः। अत्र व्यवस्थामाह सांख्यायनः। "यद्येकस्कन्धे यज्ञोपवीतं कर्णे कृत्वा अवगुण्ठितः" इति कर्णे दक्षिणकर्णे। "पवित्रं दक्षिणकर्णे कृत्वा विण्मूत्रमाचरेत्" इति श्रुतौ तथा दर्शनात्। अवगुण्ठितः कृतशिरोऽवगुण्ठनः। मनुः "छाया यामन्धकारे वा रात्रावहनि वा द्विजः। यथासुखमुखः कुर्य्यात् प्राणबाधाभयेषु च" महाभारते। "प्रत्यादित्यं प्रतिजलं प्रति गान्धं प्रतिद्विजम्। मेहन्ति ये च पथिषु ते भवन्ति गतायुषः"। प्रतिः सांमुख्ये। मनुः "न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे। न फालकृष्टे न जले न चित्यां न च पर्व्वते। न जीर्णदेवायतने न वल्मीके कदाचन। न ससत्त्वेषु गर्त्तेषु न गच्छन्नपि संस्थितः। न नदीतीरमासाद्य न च पर्व्वतमस्तके। वायुग्निविप्रादित्यमपःपश्यंस्तथैव च। न कदाचन कुर्व्वीत विण्मूत्रस्य विसर्জ্জनम्"। ससत्त्वेषु प्राणिमत्सु संस्थितः उत्थितः पर्व्वतमस्तकनिषेधोऽधिकदोषाय। वशिष्ठः। "आहारनिहारविहारयोगाः सुसम्भृता धर्म्मविदा तु कार्य्याः। वाग्बुद्धिकायार्थानि तपस्तथैव धनायुषी सुव्रतमेव कार्य्ये"। निहारो मूत्रपुरीषोत्सर्गः विहारः स्त्रीसम्भोगः। योगः समाधिः। वाग्बुद्धिरशुभाभावत्यागः। बुद्धिशुद्धिरनिष्टचिन्तात्यागः। हारीतः "आहारन्तु रहः कुर्य्यात् निहारञ्चैव सर्व्वदा। शुद्धाभ्यां सन्ध्यामुपेतः स्यात् प्रकाशे क्षीयते तया"। विष्णुपुराणम् "सोमाग्न्यर्कांम्बुवायूनां पूज्यानाञ्च न सम्मुखे। कुर्य्यात् दीवनविण्मूत्रससद्भर्गञ्च पण्डितः"। आपस्तम्बः "न च सोपानत्को मूत्रपुरीषे कुर्य्यादिति"। वृहन्मनुः "करन्यस्तोपवीतेन कृत्वा मूत्रपुरीषके। मूत्रवत्स्थन्तु पानीय पीत्वा चान्द्रायणञ्चरेत्"। भरद्वाजः "अथ विलाप्य विण्मूत्रं लोष्टकाष्ठलतादिना। उदस्तवासा उत्तिष्ठेदुदङ्मुखः प्रयतमेहनः" उदस्तवासा कटिदेशादुत्क्षिप्तवस्त्रः" आ०त०। "मूत्रोच्चारौ च कारयेत्"। "यस्योच्चारं विना मूत्रं सम्यग् वायुश्च गच्छति" सुश्रु०। "दाने तपसि शौर्य्ये च यस्य न प्रथितं मनः। विद्यायामर्थलाभे च मानुस्तस्य उच्चार एव सः" हितो०। उच्चक्रम चारोगतिः। २ यज्ञादीनां राशिनक्षत्रान्तर सञ्चारे। "ऋक्षाद्यं यतेनाद्यैर्यांस्तु चित्रशिखण्डिषु। "उच्चारे संक्रिकाकारैः" सि०रा०त०।

उच्चारण न० उद्घातेन कण्ठाद्यभिघातेन चार्य्यते निष्पाद्यते उद्+चर-णिच्-ल्युट्। कण्ठताल्वाद्यभिघातेन शब्दजनके व्यापारे तत्प्रकारस्तु "आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। सोदीर्णोमूर्द्धभिहतो वक्त्रमापद्य मारुतः। वर्णान् जनयते तेषां विभागः पञ्चधा मतः"इति शिक्षोक्तदिशावसेयः। वर्णोत्पत्तिस्थानानि चाष्टौ। "अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च" शिक्षाकदुक्तानि। विवृतिर्वर्णशब्दे दृश्या। यथा च कण्ठताल्वाद्यभिघातेनोच्चारणसम्भवस्तथा" ईश्वरशब्दे अनुमा०चिन्ता०१०२६ पृष्ठे दर्शितम्। "उच्चारणक्षोऽव गिरां दधानम्" माघः। "वेदोच्चारणकार्य्यार्थमयुक्तं तत्त्वया धृतम्" भा०व०२१४ अ०। "सजातीयोच्चारणमेवोच्चारणविषयत्वं वेदस्यापौरुषेयत्वम्" मीमांसकाः वेदान्तिनश्च प्रतिषेदिरे।

उच्चारित त्रि० उच्चार-तारका० इतच्। कृतविसर्गे। उद्+चर-णिच्-कर्म्मणि क्त। यत्नोच्चारणं कृतं ताडेन वर्णादौ "तत्रैव शक्तिवैकल्यप्रमादालस्यादिभिः। अन्यथोच्चारिताःशब्दा अपशब्दा इतीरिताः" भर्त्तृह०। उद्+अन्तर्भूतण्यर्थे चर-क्त। उच्चरितोऽप्युक्तार्थे "सकदुच्चरितः शब्दः सकदर्थं गमयतीति" तत्पार्थ्यमन्ये न्यायः।

उच्चार्य्य अव्य० उद्+चर-णिच्+ल्यप्। १कण्ठाद्यभिघातेन उत्पाद्येत्यर्थे। कर्म्मणि यत्। २उच्चारणीये वर्णादौ त्रि०।

उच्चार्य्यमाण त्रि० उद्+चर-णिच्-कर्म्मणि शानच्। यत्नोच्चारणं क्रियते तस्मिन् वर्णादौ "कर्म्मणि कार्य्योच्चार्य्यमाणो वर्णवृत्तसंज्ञः, मुग्धबो०।

उच्चावच त्रि० उदक् उत्कृष्टश्च अवाक् अपकृष्टश्च मयू०नि०। उत्कृष्टापकृष्टात्मके नानाभेदे "उच्चावचैरपि गतैः सहस्रसंख्याम्" माघः "भवत्युतेव महाब्राह्मण उतेवोच्चावचं निगच्छति" शत०ब्रा० १४,५,१,१६। अथ खलूच्चावचा जनपदधर्मा ग्रामधर्माश्च तान् विवाहे प्रतीयात्" आश्व०गृ० १,७,१। "उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः"। "उच्चवचानि भूतानि सततं चेष्टयन्ति याः" मनुः

उच्चिङ्गट पु० हस्तिगण्डमत्स्ये, २कोपनपुरुषे च मेदि०।

उच्चिटङ्ग पु० विषकीटभेदे (उच्चिङ्गड़े) सुश्रुते "अङ्गमस्य विषस्योक्तान्यधिष्ठानानि षोड़श" इत्युपक्रम्य "इक्षिकविच्छिरराजीवमत्स्योच्चिटङ्गसमुद्गदक्षिकालविषाः" इत्युक्त्वा तस्य शुक्रतण्डविषत्वमप्युक्तम् "क्षुद्रजातण्डोच्चिटङ्गवरटोगतपदीशुक्रबलभिकाभृङ्गीभ्रमराः शुक्रतण्डविषाः" तेषामुत्पत्तिस्थानमपि तत्रोक्तम् "सर्षाणां शुक्रविण्मूत्रशवपूत्यन्नसम्भवाः। वायुग्राह्यप्रजातयः कीटास्तु विविधाः स्मृताः" इत्युपक्रम्य "उच्चिटङ्गोऽग्निमामा तु विच्छिर्टिङ्गोमयूरिका" इत्यादीन् अष्टादश कीटाननिधाय "अष्टादशेति वायव्याः कीटाः पवनकोपनाः" सुश्रु०। [वल्लखण्डे।

उच्चूड(ल) पु० उन्नता चूड़ा यस्य डस्य वा लत्वम्। ध्वजोर्ध्वस्थे

उच्चैःशिरस् त्रि० उच्चैरुन्नतं शिरोऽस्य। उन्नतमस्तके महत्तरे "समत्वमुच्चैःशिरसा सतोव" कुमा०। वा रोः शत्वम्।

उच्चैःश्रवस् त्रि० उच्चैरुन्नतं श्रवोऽस्य। उन्नतकर्णे समुद्रजाते श्वेतवर्णे इन्द्रस्य वाहनभूते सप्तमुखे २अश्वभेदे पु०। अस्य चोत्पत्तिकथा यथा "तत उच्चैःश्रवसामश्वानां हयोऽभूदिन्द्रपाण्डरः" भाग० ७स्क० ७अ०। "सटहीतोऽश्वः सप्तमुखत्वेन रूपं बलात् किलेति" भागवतोक्तेरस्य सप्तमुखत्वम्। "धन्वन्तरिश्चेति मद्यं श्रीर्देवी कौस्तुभोमणिः। शशाङ्को विमलश्चापि सप्तैतस्युः समन्ततः। उच्चैःश्रवा हयोरत्नः पीयूषं तदनन्तरमिति" हरिवं० २२० अ०। "उच्चैरुच्चैःश्रवास्तेन हयरत्नमहारि च" कुमा०। "उच्चैःश्रवाजलनिधेरिव जातमात्रः" "न चिरसुच्चैःश्रवसः पदक्रमम्" माघः। "उच्चैःश्रवसमश्वानाम्" गीतोक्तेः भगवद्विभूतित्वमस्य। "उच्चैःश्रवःसुतानश्वान् बलादध्यानवह्नयः" हरि०१४५अ० "दिग्गजसुताद्भागान् हयांश्चोच्चैःश्रवोऽन्वयान्" हरि०१५६अ० अस्य वा विसर्गस्य शत्वे उच्चैश्शृश्रवा अपत्यं। अस्य पृषो० अदन्तत्वमपि। "उच्चैःश्रवससंज्ञं तत् प्रणिपत्य समर्पितम्" देवीभा०। उच्चैरुन्नतं शब्दं स्रवोति स्रु-असुन्। २बधिरे त्रि०।

उच्चैर्घुष्ट न० घुष-भावे क्त उच्चैर्घुष्टम्। (डेडरा) सर्वजनश्राव्यघोषणायाम्।

उच्चैर्घोष पु०घुष-घञ् उच्चैर्घोषः। १सर्वजनश्रवणयोग्यशब्दे "यदुच्चैर्घोषस्तनयित्नुरिवदहति" शत०ब्रा०। ७ब०। २उच्चैःशब्दान्विते क्रन्दनादौ ६ब०। ३रुद्रमूर्त्तिभेदे। "उच्चैर्घोषाय क्रन्दयते" यजु०१६,१६।

उच्चैस् अव्य०उद्+चि-डैसि। १तुङ्गत्वे, २उन्नते ३महति ४अर्द्धदेशजाते "उच्चैरुदात्तः" पा०। "उच्चैरुच्चैरवास्तेन" कुमा० "शिलोच्चयोऽपि क्षितिपालमुच्चैः" रघुः "विचकर्ष च संक्षिप्तैर्युच्चैः" किरा०। "अक्षत्वा चेलया पादमुच्चैर्मूर्द्धनु विद्विषाम्" माघः। "उच्चैरधःपातिपयोमुचोऽपि" "अनोऽयमुच्चैःपदलङ्घनोत्सुकः" "उच्चैर्हिरण्यं शुक्लम्" कुमा०। या वः काले वहति सलिलोद्गारमुच्चैर्घनाली" मेघ०। "उच्चैरश्वति मन्दतामरसताम्" चन्द्रालो० अस्य शब्दस्य गुणवाचितया प्रकर्षे तरप् तमप् च ततः अद्रव्यप्रकर्षे आमु। उच्चैस्तराम् उच्चैस्तमाम्। औन्नत्यातिशये "उच्चैस्तरां वक्ष्यति शैलराजः" कुमा०। द्रव्यप्रकर्षे तु नास्तु। उच्चैस्तर उच्चैस्तम अत्युन्नतवृक्षादौ त्रि०। अग्रियस्योच्चैः कथने उच्चैस्+ऊ-ङ्याबन्तौ ख्यप् च। उच्चैःकारम् उच्चैःकृत्वा उच्चैःकाय अग्निं यमावहेत्" सि०कौ०।

उच्छ्रन्न त्रि० उद्-स्रद क्त। लुप्तप्राये आच्छन्ने। "उच्छ्रन्नप्रच्छन्नग्रन्थे वेदस्याचारमूलत्वेत्यादि विधिवादे मधुरा० यथा च वेदस्य छिन्नमूलग्रन्थतया उच्छिन्नत्वेऽपि अविगीतशिष्टाचारादेव तदनुमानंतथा समर्थनाय शब्दचि० शब्दाप्रामाण्ये वादिपूर्व्वपक्षं निरस्य व्यवस्थापितं यथा। "स्यादेतत् स्मृत्याचारयोर्वेदमूलत्वे तत्रोच्छेदादिविवादस्तदेव तसिद्धं तथा हि वेदसमानार्था महाजनपरिग्रहीता च स्मृतिः, स्वार्थोपस्थित्यनन्तरं स्मृत्यर्थानुभावकवेदानुमानेऽपि प्रतीतिप्राबल्यात् साध्यप्रसिद्ध्यर्थसपजीव्यत्वाच्च स्मृतेरेवापूर्व्वादिवाक्यार्थज्ञानमस्तु किं वेदेन, तदर्थस्य स्मृतित एव सिद्धेः अपूर्व्वस्य शब्दैकवेद्यत्वेन स्मृतितोऽतीतस्य ज्ञापकत्वेनानुवादकतापत्तेश्च सा च स्मृत्यनरादिलब्धादिरेव स्मृतिधारावश्यकी, अन्यथा मनुस्मृतेः पूर्वं तवापि वेदानुमानं न स्यात्। सर्व्वा च स्मृतिः स्मृतिजन्यवाक्यार्थप्रमाजन्यत्वेन महाजनपरिग्रहीतत्वेन च प्रमाणमिति नास्त्यपरम्परा। प्रत्यक्षा च स्मृतिः स्मृतिमूर्द्धानुमिता अनुमितवेदवत् तस्या अनुभावकत्वात्।

वेदार्थस्मृतिताप्रसिद्धिस्तु प्रसिद्धवेदमूलस्मृतिसाहचर्यभ्रमात् प्रत्यक्षवेदावबोधितलोभन्यायमूलस्मृताविव तान्त्रिकाणां लिङ्गाभासजन्यवेदमूलकत्वभ्रमात् सम्भवन्मूलान्तराणां वेदमूलत्वं कल्पयति। अथ स्मृरिनिबन्धृहेवेदमूलकत्वप्रसिद्धिरपि महाजनपरिग्रहीता एवञ्च सा वेदमूलत्वनिबन्धना अविगीतमहाजनपरिग्रहीतवेदमूलत्वप्रसिद्धित्वात् प्रत्यक्षवेदमूलस्मृतौ तत्प्रसिद्धिवत्। एवं वेदार्थस्मृतिताप्रसिद्धिरपि अन्यथा महाजनपरिग्रहानादरे वेदस्मृत्योरपि प्रामाण्यं न स्यादिति चेत् न यूपदारुत्वादिस्मृतेस्तत्प्रसिद्धौ व्यभिचारात् क्रतूपलोभादित एव तत्सम्भवात् विचारकाणां विप्रतिपत्तेश्च। तत्र तत्प्रसिद्धौ विगान महाजनानामिति चेत् न तत्रापि मूलान्तरसम्भवाद्विप्रतिपत्तेश्च विगानमेव तेषाम्, अतएव स्मृतीनां न्यायमूलत्वे सम्भवति वेदमूलत्वप्रसिद्धावपि न वेदमूलत्वं, न च वेदमूलेयमिति ज्ञात्वा स्मृतेर्महाजनपरिग्रहात्तन्मूलत्वं वेदमूलेयमिति प्रथमं गृहीतुमशक्यत्वात् शक्यत्वे वा किमनुमानेन, न च वेदमूलत्वेन प्रकारेण महाजनपरिग्रहः, असिद्धेः, मन्वादिस्मृतित्वेन पूर्वं महाजनपरिग्रहेणोत्तरेषां परिग्रहादनुष्ठानाद्युपपत्तेः। एवं लोकाचारेऽपि वेदलिङ्गेनैव कर्त्तव्यताज्ञानोपपत्तेः किं वेदेन, तदर्थस्य लिङ्गादेवोपपत्तेः, अविगीताऽलौकिकविषयकशिष्टाचारस्य वेदमूलत्वदर्शनात् वेदानुमाने चाविगीतशिष्टाचारत्वेन भोजनाद्याचारोऽपि वेदमूलः स्यात् वेदं विनापि तत्कर्त्तव्यताधीसम्भवाच्च तदर्थवेदइति दृष्टान्तोऽपि तुल्यम्। आचारकर्त्तव्यतानुमानयोरनादित्वेनाचाराणां कर्त्तव्यतानुमानमूलकत्वान्नान्धपरम्परा। न च पूर्वानुमानसापेक्षसकलाचारानुमानमिति स्वतन्त्रप्रमाणमूलकत्वाभावात् साध्यव्याप्तिपक्षधर्मतासत्त्वेन पूर्वेषां स्वतन्त्रप्रमाणत्वात्। नापीतरप्रामाण्याधीनं सर्वस्य प्रामाण्यमिति न निरपेक्षत्वं, प्रत्यक्षादेरपि तथात्वापत्तेः। एतेन विवादास्पदमाचारोनिरपेक्षप्रमाणमूलकः अविगीतमहाजनाचारत्वात् प्रत्यक्षवेदमूलाचारवदिति निरस्तम् अनुमानस्य निरपेक्षप्रमाणत्वात् प्रमाणमूलत्वेनैवबुद्धेरुपपत्तेः निरपेक्षत्वस्य गौरवेणाप्रयोजकत्वाच्च। न च सापेक्षत्वेन न प्रमाणता व्याप्त्यादिसत्त्वात् अन्यथा प्रमाणैरपेक्षस्य वैयर्थ्यात्। नचाचारे वेदमूलकत्वप्रसिद्धेस्तदनुमानम्, असिद्धेः व्यभिचारादन्यथोपपत्तेश्च। न च वेदमूलत्वेन महाजनपरिग्रहात्तथा। न हि वेदमूलेयमिति ज्ञात्वा महाजनानां तत्परिग्रहः वेदमूलत्वस्य प्रथमं ज्ञातुमशक्यत्वात् शक्यत्वे वा किमनुमानेन। न च वेदमूलत्वेन महाजनपरिग्रहीतोऽयमाचारः इति ज्ञात्वा तत्र महाजनपरिग्रहः, गौरवात् असिद्धेश्च पूर्वं महाजनपरिग्रहादेवोत्तरेषां परिग्रहानुष्ठानोपपत्तेः। तादृशस्मृत्याचारयोर्वेदमूलत्वेन व्याप्तेर्वेदमूलत्वसिद्धिरिति चेत् न असम्भवन्मूलान्तरस्योपाधित्वात् अन्यथा लोभन्यायमूलस्मृतेरप्रसङ्गः। अस्तु स्मृत्याचारयोरनादित्वं न चाचारात् स्मृतिः स्मृत्या चाचारः इत्यन्धपरम्परा मूलीभूतप्रमाणाभावादिति वाच्यं स्मृत्याचारयोरुभयोरपि प्रमाणत्वात्। अन्यथा न ततो वेदानुमानमिति।

उच्यते प्रलये पूर्वस्मृत्याचारयोरुच्छेदात् सर्गादौ नित्यसर्वज्ञेश्वरप्रणीतवेदमूलत्वं स्मृत्याचारयोः, अन्यथा मूलाभावेनान्धपरम्पराप्रसङ्गः। न च मन्वादीनामतीन्द्रियार्थदर्शित्वं तदुपायश्रवणादेस्तदानीमसत्त्वात् पूर्वपूर्वसर्गसिद्धसर्वज्ञा एव त इति चेत् न प्रमाणाभावात्। स्मृत्याचारयोः प्रमाणमूलकत्वमेव तत्कल्पकमिति चेत् न प्रतिसर्गं तेषामन्यान्यकल्पने गौरवमित्येकस्यैव नित्यसर्वज्ञस्य कल्पनात्। न च स्मृतय एव ततप्रणीताः तासां मन्वादिकर्तृकत्वेन स्मृतौ बोधात्, स्मृतावेव स्मृतीनां वेदमूलत्वस्मरणाच्च। एवञ्च स्मृत्याचारयोर्महाजनपरिग्रहाद्वेदमूलत्वसाधकमपि भगवति प्रमाणम्। अतएव "प्रतिमन्वन्तरं चैषा श्रुतिरन्याऽभिधीयत" इत्यागमोऽपि। एवञ्च पूर्वप्रत्यक्षवेदमूलावेव स्मृताचारौ अस्मे च कालक्रमेणायुरारोग्यबलस्मृतिधारणादिशक्तेरहरहरपचीयमानत्वात् तदध्ययनविच्छेदात् शाखोच्छेदात् स्मृत्याचाराभ्यामेव कर्त्तव्यतामधिगत्य प्रवृत्तिः। नन्वेवं स्मृतिरस्तु वेदमूला मङ्गलाद्याचारस्तु ईश्वरादेव भविष्यति घटलिङ्गादिसम्भवावदिति चेत् न वह्निव्यापारघटितस्य तत्तदाचारस्य गुरुत्वेन "मङ्गलमाचरेदित्यादिवाक्यस्यैव लाघवेन कल्पनात्'।

"निष्टप्तारगौचेषु परपाकोपजीविषु उच्छवृत्तिभिक्षेषु भिक्षकांक्षेत्प्रभोजिषु" स्मृतेः।

उच्छल त्रि० उद्-शल अच्। आधारातिक्रमेण सर्वतः श्रुते। शद्ल। उच्छलत् तत्रैव "स्फोच्छलच्छुक्लकाकुलेन" माघः "स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा" काव्यप्र०। ल्युट्। उच्छलन परितः द्रवणे न०।

उच्छादन न० उद्-छद-णिच्-ल्युट्। आच्छादने

२गन्धद्रव्यद्वारा देहमार्जने च अमरटी० "स्नापनोच्छादनेन" रामा० ।

उच्छास्त्र त्रि० उद्गतं शास्त्रात् प्रा०स० । १अतिक्रान्तशास्त्रे २शास्त्रविरुद्धे धर्मभेदे च । उत्क्रान्तं शास्त्रं यत्र । शास्त्रातिक्रमयुक्ते उच्छास्त्रं यथा तथा वर्त्तते उच्छास्त्रवर्त्तिन् शास्त्रातिक्रमेण यथेष्टचारिणि स्त्रियां ङीप् । "न राज्ञः प्रतिगृह्णीयात् क्रूरस्योच्छास्त्रवर्त्तिनः । या० स्मृ० । "इमस्योच्छास्त्रवर्त्तिनः" भाग० ७स्कन्ध० अ० ।

उच्छासन त्रि० उत्क्रान्तः शासनम् । शासनातिक्रान्तरि ।

उच्छिख त्रि० उद्गता शिखा यस्य प्रा०ब० । १उद्गतायां २उदर्चिषि वह्नौ पु० "माङ्गल्योर्ध्वबलयिनि पुरः पावकस्योच्छिखस्य" रघुः । २तक्षकनागकुलजाते नागभेदे पु० "तक्षकस्य कुलेजातान् प्रवक्ष्यामि निबोध तान्" इत्युपक्रम्य "उच्छिखः शरभोभङ्गोविल्वतेजा विरोहणः" भा० आ० ५७ अ० ।

उच्छिङ्गन न० उद्+शिघि आघ्राणे भावे ल्युट् । नासिकावायुनाऽन्तःस्थितकफादिनिःसारणे । "उच्छिङ्गनेन हर्त्तव्योदृष्टिमण्डलजः कफः" । "नेत्रे विलम्बिनि विधिर्विहितः पुरस्तादुच्छिङ्गनं शिरसि वार्द्धवसेचनञ्च" सुश्रु० ।

उच्छित्ति स्त्री उद्+छिद्-भावे क्तिन् । समूलोत्पाटने अत्यन्तसंमर्दने । "यद्वा तद्वा तदुच्छित्तिः पुरुषार्थः" सा०रत्नम् । "सङ्करः सर्ब्बवर्णानां प्रजानोधर्म्मकर्म्मणाम्" । प्रजानामपि चोच्छित्तिर्दैवव्यसनहेतुजा" सुश्रु० "अविनाशी वा अरे अयमात्माऽनुच्छित्तिधर्मा" बृ० उ० २१ ।

उच्छिन्न त्रि० उद्+छद् । १समूलं नाशिते २विदलिते ।

उच्छिरस् त्रि० उद्गतं शिरोऽस्य । १उद्गते २माङ्गल्यादिना उन्नतमस्तके महिमान्विते "शैलालजापि पितुरुच्छिरसोऽभिलाषम्" कुमा० शौर्य्योदार्य्यादिना हि लोक उन्नतशिरा भवति अपकृष्टकर्म्मणा तु अनवरतशिराः प्रसिद्धः

उच्छिलीन्ध्र त्रि० उत्थितं शिलीन्ध्रम् । १छत्राके । २विकसितशिलीन्द्रयुक्ते त्रि० । "उच्छिलीन्ध्रामवन्त्यामिति" मेघदू० ।

उच्छिष्ट त्रि० उत्+शिष-क्त । १भुक्तावशिष्टे, २त्यक्ते च । अर्शा० अच् । ३अक्षतयोनेर्भुक्तान्ने । तत्रोच्छिष्टस्याभक्ष्यता सापवादमभक्ष्यशब्दे २७६ पृष्ठे उक्ता तत्रायं भेदः वर्णविशेषस्योच्छिष्टभोजने पापतारतम्यात् प्रायश्चित्ततारतम्यं प्रायश्चित्तविवेकादावुक्तं यथा "स्वमुच्छिष्टन्तु यो भुङ्क्ते योभुङ्क्ते त्यक्तभाजने । एवं वैश्यस्तः प्राह भुक्त्वा चान्द्रायणञ्चरेत्" चतुर्व्विंशवचनम् । "तच्च ज्ञानाभ्यासविषयमिति" प्रा०वि० । "ब्राह्मणोच्छिष्टभोजने महाव्याहृतिभिरभिमन्त्र्यापः पिबेत्, क्षत्रियोच्छिष्टभोजने ब्राह्मीरसविपक्वेन लाक्षं क्षीरेण वर्त्तयेत्, वैश्योच्छिष्टभोजने त्रिरात्रोपोषितो ब्रह्मवर्चसं पिबेत्, शूद्रोच्छिष्टभोजने सुराभाण्डोदकपाने च षड्रात्रमभोजनं चान्द्रायणं वा अभिमन्त्रितं जलं पीत्वोपवसेत्" यङ्गलि० "व्रतरूपत्वात् एतद्ब्राह्मणस्य ब्राह्मणाद्युच्छिष्टाशनेऽज्ञानतः सकृत् एवं क्षत्रियादेः समाधमवर्णोच्छिष्टाशने समाधमवर्णोक्तमेतदेव यथायथमुन्नेयम् शूद्रोच्छिष्टाशने तु ब्राह्मणस्य ज्ञानतः सकृद्विषयम् षड्रात्राभोजनम्" प्रा०वि० । यथा पद्मपुराणे । "अज्ञानाद्यस्तु भुञ्जीत शूद्रोच्छिष्टं द्विजोत्तमः । त्रिरात्रोपोषितोभूत्वा पञ्चगव्येन शुद्ध्यति" । "एतद्द्विजोत्तमपदग्रहणाद्ब्राह्मणविषयम् । क्षत्रियादिपरत्वे वक्ष्यमाणविष्णुवचनविरोधात् । एतदपि सकृद्विषयं अत्र च त्रिरात्रोपवासमघमर्षणमपि जपनीयम्" प्रा०वि० । यथा शातातपः । "शूद्रोच्छिष्टभोजने त्रिरात्रमघमर्षणञ्च जपेत्" "चान्द्रायणन्तूभयत्रैव ज्ञानाभ्यासे क्षत्रियादीनाञ्च त्रिपादपादहानिरूहा । क्षत्रियस्य च ब्राह्मणोच्छिष्टाशने ब्राह्मणोक्तप्रायश्चित्तार्द्धं, वैश्यस्य ततोऽप्यर्द्धम् । एवं वैश्य शूद्रयोरपि स्वापेक्षया पूर्ब्बवर्णत्वेनोन्नेयम् उशनो वचने वर्णक्रमेण हसितप्रायश्चित्तदर्शनात्" प्रा०वि० । यथा "अज्ञानान् भुक्तशेषस्तु भक्षितोयैर्द्विजातिभिः । चान्द्रं क्षत्रे तदर्द्धञ्च क्रमात्तेषां विशोधनम्" । तथा विष्णुरपि न्यायप्राप्तमेवार्थमन्वाह । "आमश्राद्धाशने त्रिरात्रं वर्त्तेत ब्राह्मणः शूद्रोच्छिष्टाशने वमनं कृत्वा सप्तरात्रं वैश्योच्छिष्टाशने पञ्चरात्रम्, राजन्योच्छिष्टाशने त्रिरात्रम्, राजन्यः शूद्रोच्छिष्टाशने पञ्चरात्रम् वैश्योच्छिष्टाशने । त्रिरात्रं वैश्यः शूद्रोच्छिष्टाशने च" "अत्र वमनं कृत्वा पयसा वर्त्तेतेति सर्व्वत्रान्वेति" प्रा०वि० । "चण्डालपतितादीनामुच्छिष्टान्नस्य भक्षणे । द्विजः शुध्येत् परार्केण शूद्रः कृच्छ्रेण शुद्ध्यति" अङ्गिराः "एतदज्ञानविषयं ज्ञानतो द्वैगुण्यादिकम् प्रा०वि० । मनुनापि सामान्याभ्योज्यप्रकरणे । "शुष्कं पर्य्युषितं चैव शूद्रस्योच्छिष्टमेव च "क्रूरस्योच्छिष्टभोजिन" इति चोक्तम् । शूद्रस्य तु द्विजोच्छिष्टभोजने न दोषः । द्विजोच्छिष्टन्तु भोजनमिति" तस्य मनुना तद्वृत्तितयोक्तेः । एकपङ्क्तिस्थमध्ये

केनचिदपि भोजनपात्रत्यागे तत्पङ्क्तिस्थानां तदन्नमुच्छिष्टवत् यथा "अप्येकपङ्क्त्यां नाश्नीयात् संहतः स्वजनैरपि। कोहि जानाति किं कस्य प्रच्छन्नं पातकं महत्। भक्तस्याम्बुजलद्वारमार्गैः पङ्क्तिञ्च भेदयेत्" व्यासः। जलादिना पङ्क्तिभेदाकरणे तु यज्ञः "एकपङ्क्त्युपविष्टानां विप्राणां भोजने क्वचित्। यद्येकोऽपि त्यजेत्पात्रं शेषमन्नं विवर्जयेत्। मोहात् भुञ्जीत यः पङ्क्त्यामुच्छिष्टसदृशोजनम्। प्राजापत्यं चरेद्विप्रः चान्द्रः सान्तपनन्तथा"। "विड्वराहादिभिरुच्छिष्टं दुष्टमन्नं विवर्जयेत्, अन्यत्र हिरण्योदकस्पर्शात्" देवलः अज्ञानादुच्छिष्टादिभोजने तदुत्तार्य्यमित्याह "अभोज्यमन्नं नात्तव्यमात्मनः शुद्धिमिच्छता। अज्ञानाद्भुक्तमात्तार्यं शोध्यं वाप्याशु शोधनैः" वमनपक्षेऽपि अल्पप्रायश्चित्तं भवत्येव "आमश्राद्धाशने विप्रात्तं पयसा वर्त्तेत ब्राह्मणः, मृद्भोच्छिष्टाशने वमनं कृत्वा सप्तरात्रमुपवसेत्" विष्णुना वमनोत्तरमपि प्रायश्चित्तविधानात् "अन्यान्नं भुक्तशेषन्तु भक्षयित्वा द्विजातयः। चान्द्रं कृच्छ्रं तदर्द्धं तु ब्रह्मचर्य्यविधिं विधिः" मिता० आप० वचनन्तु ब्राह्मणस्य सकृदज्ञानविषयम् बलात्कारातुत्तारेऽप्येतरताम्बूलादुच्छिष्टपरमिति" प्रा० त० रघु०। अन्यजैः बलात्कारिते उच्छिष्टादेर्भोजनेऽपि दोषएव। "दासीकृतोबलान्म्लेच्छश्वपाकाद्यैश्च दस्युभिः। अशुभं कारितः कर्म्म गवादेः प्राणहिंसनम्। उच्छिष्टमार्ज्जनञ्चैव तथा तस्यैव भक्षणम्" इत्याद्यभिधाय "मासोषिते द्विजातौ तु प्राजापत्यं विशोधनम्। चन्द्रायणन्वाहिताग्नेः पराकमथ वा भवेत्" देवलोक्तेः। उच्छिष्टचाण्डालादिस्पर्शेऽपि दोषः" प्रा० त० उक्तः यथा। "आपस्तम्बः 'भुक्तोच्छिष्टस्त्वनाचान्तश्चाण्डालैः श्वपचेन वा। प्रमादात् स्पर्शनं गच्छेत् तत्र कुर्य्याद्विशोधनम्। गायत्र्यष्टसहस्रन्तु हुत्वादां वा शतं जपेत्। त्रिरात्रोपोषितो भूत्वा पञ्चगव्येन शुद्ध्यति। भुक्तोच्छिष्टोऽन्यजैः स्पृष्टः प्राजापत्यं समाचरेत्। अर्द्धोच्छिष्टे स्मृतः पादः पाद आचमने तथा"। "प्राजापत्यं त्वाने अर्द्धोच्छिष्टोवेनाद्यासः आस्ये निष्ठिप्रः न तु निगीर्णः" प्रा० त० रघु०। काश्यपः 'श्वशूकरान्त्यचाण्डालमद्यमांसरजस्वलाः। यद्युच्छिष्टः स्पृशेत्तत्र कृच्छ्रं सान्तपनं चरेत्। "एतज्ज्ञानाभ्यासे सान्तपने धेनुद्वयम्'। प्रा० त० ब्रह्मपुराणे "उच्छिष्टेन तु मृद्भेन विप्रः स्पृष्टस्तु ताद्दशः। उपवासेन शुद्धिः स्यात् शुना संस्पृष्टएव वा। उच्छिष्टेन तु विप्रेण विप्रःस्पृष्टस्तु ताद्दशः। उभौ स्नानं प्रकुर्य्यातां सद्य एव समाहितौ"। "अनुच्छिष्टब्राह्मणस्य नक्तमिति" प्रायश्चित्तविवेकः।

"सर्वमन्नमेकलोढ्वा उच्छिष्टसमीपे दर्भेषु" आ० त० गोभिलः। २दत्तावशिष्टे च। "उच्छिष्टे सतिदान् दर्भान् दक्षिणाग्राद्विधापयेत्" आ० त० ब्रह्मपु०। "असंस्कृतप्रमीतानां, योगिनां, कुलयोषिताम्। उच्छिष्टं भागधेयं स्यात् दर्भेषु विकिरेच यः" आ० त० ब्रह्मपु०। "प्रेतश्राद्धे यदुच्छिष्टं गृहे पर्य्युषितं च यत्। दम्पत्योर्भुक्तशेषञ्च न भुञ्जीत कदाचन" आ० त० स्मृतिः। "उच्छिष्टं पाकपात्रेऽवशिष्टम्, गृहे उपरागे पर्य्युषितं, दम्पत्योराश्रमस्वामिनोर्भोजनानन्तरं पाकस्थाल्यामवशिष्टमिति" आह्निकतत्त्वधृतिः। ३मद्यनि। मक्षिकोच्छिष्टत्वात्तस्य तथात्वम्। "उच्छिष्टं शिवनिर्माल्यम्—श्राद्धे प्रयच्छते" पु०। उच्छिष्टोदनः।

उच्छिष्टगणेश पु० तन्त्रोक्ते गणपतिभेदे। तस्य मन्त्रध्यानादिकं तत्रैव दृश्यम् "भुक्तोच्छिष्टोजपेन्नित्यं गणेशस्य सदा प्रियः" "उच्छिष्टश्चाशुचिर्भूत्वा जपपूजनमाचरेत्"। अनुच्छिष्टो न सिध्येत्तु तस्मादेवं समाचरेत्"। "सदोच्छिष्टोगणेशानो यक्षराजेन धीमता" इति च तत्रैव

उच्छिष्टचाण्डालिनी स्त्री तन्त्रोक्ते मातृकोदेवीमूर्त्तिभेदे। तस्या मन्त्रध्यानादिकं तन्त्रसारे दृश्यम्। "भोजनानन्तरं देवि! विनैवाचमने कृते" इत्युपक्रम्य "उच्छिष्टेन बलिं दत्त्वा जपेत्सङ्कृतमानसः। उच्छिष्टेन च कर्त्तव्यो जपोऽस्याः सिद्धिमिच्छता। उच्छिष्टजपमानस्य जायन्ते सर्वसिद्धयः" इति च तत्रैव।

उच्छिष्टभोजन पु० उच्छिष्टं पञ्चयज्ञावशिष्टं भोजनमस्य। १पञ्चयज्ञावशिष्टस्य भक्षके "यज्ञशिष्टाशिनः सन्तोऽच्यन्ते सर्वकिल्बिषैः" मनुना तथा भोजने किल्बिषतारकत्वकीर्त्तनात् तथा भोजनस्य कर्त्तव्यत्वम्। उच्छिष्टं देवनैवेद्यावशिष्टं भोजनमस्य। २देवनैवेद्यभोजके च। "तेदत्तमप्रदायैभ्योयो भुङ्क्ते स्वेन एव सः" गीतायां देवानिवेदने दोषश्रवणात् देवाय दत्त्वैव भोज्यता।

उच्छिष्टभोजिन् त्रि० उच्छिष्टं इतरस्य भुक्तावशिष्टं भुङ्क्ते भुज-णिनि। निषिद्धोच्छिष्टभोक्तरि "क्रूरस्योच्छिष्टभोजिनः" मनुः। [वर्द्धते सद-क्विप्। (भोम) सिद्धके।

उच्छिष्टमोदन न० उच्छिष्टं भ्रमरोच्छिष्टं मधु तेन मोदते

उच्छिष्य त्रि० उद्+शिष-वेदे नि० क्यप्। अवशेषणीये

लोके तु खदेव। उच्छेष्यम् अवशेषणीये ऽन्नादौ त्रि०।

उच्छीर्षक न० उत्थापितं शय्यातउत्तोल्य स्थापितं शीर्षं यस्मिन् प्रा०व०कप्। शीर्षोपधाने (बालिश)। प्रा०ई०व०। २उन्नतशीर्षके धान्यादौ त्रि० हला०। अर्द्धं शीर्षे कायति कै-क। ३शिरःप्रदेशे "उच्छीर्षके स्त्रियै कुर्याद् भद्रकाल्यै च पादतः" मनुः उच्छीर्षके वास्तुपुरुषस्य शिरः प्रदेशे" कुल्लूकभट्टः। [शुष्के।

उच्छुष्क त्रि० उद्गतः शुष्कम् प्रा०स०। उर्द्धप्रदेशात्

उच्छून त्रि० उद्-श्वि-क्त। १उन्नते २स्फीते च "हयोच्छूनैः किमेभिर्भुजैः" सा०द०। "अनरतरुदितोच्छूनताम्रदृष्टि-मद्राक्षम्" दशकु०। भावे क्त। ३स्फीततायाम्। (फोला)

उच्छृङ्खल त्रि०उद्गतं शृङ्खलातः निरा०स०। १बन्धनरहिते, २नियन्तृरहिते, ३अप्रतिबन्धे च। "अन्यदुच्छृङ्खलं सत्वम-न्यच्छास्त्रनियन्त्रितम्" "समूर्द्धदुच्छृङ्खलशङ्खनिस्वनः" माघः। [पाठके २नाशके च।

उच्छेत्तृ त्रि० उद्+छिद-तृच् स्त्रियां ङीप्। १समूलसत्-

उच्छेद पु०उद्+छिद-भावे घञ्। १समूलोत्पाटने २विनाशने च "किमिति सर्व्वपशूच्छेदः क्रियते" हितो० "ततः सत्यवत्यचिन्तयत् मा दौष्कुलोवंश उच्छेदं व्रजेदिति" भा०आ०९५ अ०। "सतां भवोच्छेदकरः पिता ते" रघुः। भावे ल्युट्। उच्छेदनमप्यत्र न०"यस्तु नोच्छेदनं चक्रे कृषिकानासुदारधीः" आ० प० १६२ अ०।

उच्छेद्य त्रि० उच्छेदमर्हति उच्छेद+अर्हार्थे यत्। १उच्छे-दार्हे उद्+छिद-कर्मणि ण्यत्। २समूलसत्पाटनीये च।

उच्छेषण न०उच्छिष्यते उद्+शिष-कर्मणि ल्युट्। १उच्छि-ष्टे "उच्छेषणं भूमिगतमजिह्मस्याशटस्य च" उच्छे-षणन्तु तत्तिष्टेत् यावद्विप्रा विसर्ज्जिताः" मनुः "सरस्वती-मुखगृहणोच्छेषणोक्ततोदशनच्छद रुष चुम्बयितुम्" दशकु०। भावे ल्युट्। २भुक्तावशेषणे।

उच्छोषण त्रि० उद्+शुष-णिच्-ल्यु। १सन्तापके, २ऊर्द्धशो-षके च "यच्छोकमुच्छोषणमिन्द्रियाणाम्" गीता। भावे ल्युट्। ३सम्यक्शोषणे। "तरसा सेतुबन्धनेन सागरो-च्छोषणेन च" रामा०। "उच्छोषणं समुद्रस्य पतनं चन्द्र-सूर्य्ययोः" रामा०।

उच्छोषुक त्रि० उद्+शुष-वा०उक। ऊर्द्धगोषप्राप्ते, "स यद्येतावन्तरेणान्यो दोग्धौषधीस्तदनेन लोकेन नाना-कुर्य्यादुच्छोषुका ह स्युः" शत०ब्रा०१२,१,१,१

उच्छ्र(च्छ्रा)य पु०उद्+श्रि-करणे अच् घञ् वा। १उन्नततायाम् उन्नततया हि ऊर्द्धमाश्रीयते इति तस्यास्तथात्वम्। "दम्भो धर्म्मध्वजोच्छ्रयः" भा०व०३१२अ०। "पत-नान्ताः समुच्छ्रयाः" नीति०। "अपरेद्युस्ततस्तस्याः क्रियतेऽभ्युच्छ्रयोन्दयैः" भा०आ०६२अ०। प्रासादैः सुकृतोच्छ्रायैः" भा०आ०१८५अ०। "यत्प्रसादाधीना नरेन्द्रा-णामुच्छ्रायाः पतनानि च" वा०स्मृतिः। "उच्छ्रायपतनं धनिनां दर्शयन्निव" कटस०। "शृङ्गोच्छ्रायैः कुलद-विगदे योवितत्य स्थितः खम्" मेघदू०। "गुणार्ज्जनो-च्छ्रायविरूढवृद्धयः" किरा०। २ उन्नद्रव्याङ्के "उच्छ्र-येण गुणितं चितेः फलम्" लीला०।

उच्छ्रयण न० उद्+श्रि करणे ल्युट्। १औन्नत्ये उद्+श्रि-कर्त्तरि ल्यु। २उत्तुङ्गे त्रि०। "सर्व्वारम्भोच्छ्रयणानि" आश्व० भ०४,६,२१। उच्छ्रयणानि उत्तुङ्गानि" नारा० टीकाः।

उच्छ्रावण न० उद्+श्रु-णिच्+ल्युट्। ऊर्द्धैःश्रावणे उद्घोषे "उद्दिश्य कुपितो वस्तु तोषितः श्रावयेत् पुनः। तच्चिन् न्यूते न दोषोऽस्ति हयोरुच्छ्रावणे कृते" विष्णु०। "उ-च्छ्रावणसङ्घोषः" प्रा०त०रघुनन्दनः।

उच्छ्रित त्रि० उद्+श्रि-कर्त्तरि क्त। उन्नते १ऊर्द्धदेशं प्राप्ते। "उच्चकैरुच्छ्रितोरःस्थलनलिननिषण्णाम्" माघः। २संजाते ३समुन्नद्धे ४प्रवृद्धे च मेदि०। ५व्यक्ते हेमच०

उच्छ्रिति स्त्री उद्+श्रि-बा० करणे क्तिन्। १उच्छ्राये उन्नता-याम् २उत्कर्षे च "यत्रार्थे निधनं प्राप्ताः प्राप्नुवन्त्यु-च्छ्रितीः पुनः" मनुः। "चतस्रश्चापि चाद्यास्तु सर्वलिङ्गो-च्छ्रितीर्वदेत्" सुश्रु०। ३उन्नसंख्यायाम् "दृष्टकोच्छ्रयवृद्धु-च्छ्रितिचितेः" लीला०।

उच्छ्वसित न० उद्+श्वस-क्त। १विकाशिते, २जीविते, ३स्फुरिते "विगदोच्छ्वसितेव मेदिनिः रघुः। ४प्राणेषु च "सा खलु भगवतः कमलस्य कुलपतेरुच्छ्वसितम्" शकु०। कर्त्तरि क्त। ५उच्छ्वासयुक्ते ६आश्वास युक्ते च त्रि०। "त्वासमुत्कण्ठोच्छ्वसितहृदया वीक्ष्य संभाव्य चैवम्" मेघदू०।

उच्छ्वास पु० उद्+श्वस-घञ्। १अन्तर्मुखश्वासे, आख्यायिका याः २परिच्छेदे, यथा दशकुमारस्य प्रथमोच्छ्वासादि प्राच-वायोर्दीर्घगत्या ३बहिर्गतौ ४आश्वासे च। "दीर्घो-च्छ्वासनिपेवीच्छ्वासप्रेक्षणबाहुल्यम्" काव्या० "वायोर्मार्गनिरो-धाच्च न गर्भस्थः प्ररोदिति" निश्वासोच्छ्वाससंरोधमुखप्राप्तु गर्भोऽधिगच्छति" सुश्रु०। उच्छ्वासवहनाड़ीभेदास्तु तत्र दर्शिताः। "ऊर्द्धगाः यद्रसगन्धरूपरसगन्धप्रश्वासोच्छ्वास-

जृम्भितलुङ्गसितकथितरुदितादीनि विशेषानभिव्यञ्जयः शरीरं धारयन्ति "पीड्यश्वसनोद्गाढः सोच्छ्वासः शिथिलः स्मृतः"। "श्लोतपादकरोच्छ्वासश्छर्द्यश्वासश्च यो भवेत्। काकोच्छ्वासश्च यो मर्त्यस्तं धीरः परिवर्जयेत्" सुश्रु०। "सन्ततोच्छ्वासिनं क्षीणं नरं क्षपयति ज्वरः" सुश्रु०। उच्छ्वासश्च दीर्घनिश्वासः स च यावत्कालेन श्वासरूपप्राणक्रिया भवति ततोऽल्पकालेन, दीर्घदेशपर्य्यन्तप्राणवायोर्बहिर्गमने भवति। "उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती" मेघदू०। "इत्युच्छ्वासोऽस्तं प्राण आदध" कात्या० ४,८,२६।

उच्छ्वासिन् त्रि० उद्+श्वस-णिनि स्त्रियां ङीप्। १ऊर्द्धश्वासयुक्ते २दीर्घनिश्वासयुक्ते। "समधिकतरोच्छ्वासिना" मेघ०। ३उद्गते च "उच्छ्वासिकालाङ्गनरागमज्ञो:" कुमा० "समधिकतरोच्छ्वासिना" मेघ० "५ऊर्द्धश्वासयुक्ते मुमूर्षौ" "बलैतदूर्द्धोच्छ्वासी भवति" इ०उ०उत्क्रमणशब्दे दृश्यम्।

उछ उञ्छे (कणशआदाने) तुदा० इदित् पर०सक०सेट्। उञ्छति औञ्छीत्। उञ्छाम्-बभूव आस चकार। उञ्छिता उञ्छ्यात् उञ्छिष्यति औञ्छिष्यत्। उञ्छः उञ्छनम् उञ्छितः। प्र+मार्जने प्रोञ्छनं (पोछा) प्रोञ्छितः।

उछ वध्ये समापने च विरामे पा० तुदा०पर०सक०सेट्। उञ्छति औञ्छीत् उञ्छाम् बभूव आस-चकार। उञ्छिता उञ्छ्यात् उञ्छिष्यति औञ्छिष्यत्। णिच् उञ्छयति ते औतिच्छत् औचिच्छत् त। सनि उतिच्छिषति उचिच्छिषति। इदित् तेन निष्ठाया नेट्। उत्तः।

उज्जय(यि)नी स्त्री विक्रमादित्यराजधान्याम् अवन्तीपुर्य्याम् अवन्तीशब्दे विवृतिः। "सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः" मेघदू०। इयञ्च लङ्कावधिमेरुपर्य्यन्तसमरेखास्थपुरीमध्येऽनन्यतमा यथाह श्रीपतिः "लङ्का कुमारी नगरी च काञ्ची पानाटमद्रिश्च सितः षडास्राः। श्रीवत्सयुग्मं च पुरी ततश्च माहिष्मती चोज्जयिनी प्रसिद्धा। स्वादाश्रमोऽस्माद्गगरं सुरम्यं ततः पुरं पट्टशिवाभिधानम्। श्रीगर्गराटं च सरोहितास्यं स्थानेश्वरं श्रीतगिरिः सुमेरुः। इतीव याम्योत्तरगा धरायां रेखामिमां गोलविदो वदन्ति। अन्यानि रेखास्थितिभाञ्जि लोके ज्ञेयानि तज्ज्ञैः पुटभेदनानि"। सू०सि०तु सामान्येनोक्तम् यथा "राक्षसालयदेवौकःशैलयोर्मध्यसूत्रगाः। रोहीतकमवन्ती च तथा सन्निहितं सरः"। "राक्षसालयो लङ्का देवानां सद्मरूपः पर्व्वतो मेरुरनयोर्मध्ये ऋजुसूत्रं तत्र स्थिता देशा रेखाख्याः। लङ्कादक्षिणसूत्रस्थास्तनुपयुक्तास्तत्र मनुष्यागोचरत्वादिति नोक्ताः। ज्ञानार्थमुदाहरति। रोहीतकमिति। यथा रोहीतकं नगरमवन्त्युज्जयिनी सन्निहितं सरः कुरुक्षेत्रम्। चकारस्तथेत्यव्ययपरः। तथान्यानि परस्परं सन्निहिततया ज्ञेयानि" र०भा०। "यथोज्जयिन्या कुजतुर्यभागे प्राच्यां दिशि स्याद्यमकोटिरेव" सू०सि०।

उज्जयन्त न० उद्+जि-झ। रैवतपर्वते शैल०।

उज्जानक पु० उत्तङ्कमुनेराश्रमान्तिके सप्तद्रुसविधे मरुभूमिषु वालुकामयदेशभेदे। यत्र हि मधुपुत्रो धुन्धुरुतङ्कप्रार्थितेन कुवलाश्वेन विष्णुतेजसा दंष्ट्रितवीर्य्येण निपातितः तत्कथा यथा भा०हरिवं०११अ०। "समाश्रमसमीपे वै समेषु मरुधन्वसु। सप्तद्रो वालुकापूर्ण उज्जानक इति श्रुतः। देवानामयवध्यश्च महाकायो महाबलः। अन्तर्भूमिगतस्तत्र वालुकान्तर्हितो महान्। राजसश्च मधोः पुत्रो धुन्धुर्नाम महासुरः। येते लोकविनाशाय तप आस्थाय दारुणम्"। इत्युपक्रम्य तद्वधोवर्णितस्तत् कथाधुन्धुमारशब्दे दर्शयिष्यते २उत्तरदेशस्येऽपि देशभेदे "एतद्द्वारं महाराज! मानसस्य प्रकाशते" इत्युपक्रम्य "एष उज्जानकोनाम पावकिर्वत्र यान्तवान्" भा०व०१३०अ० देशभेद उक्तः।

उज्जासन न० उद्+जस-णिच्-ल्युट्। १मारणे वधे एतद्योगे कर्म्मणः संबन्धत्वविवक्षया षष्ठी प्रतिपदविहिततया च तया षष्ठ्या न समासः "चौरस्योज्जासनम्" सि०कौ०। "प्रतिपदविहिता षष्ठी न समस्यते" वार्त्ति०। "प्रोक्ता प्रतिपदा षष्ठी समासस्य निवृत्तये" भर्त्तृ०। तथैवोक्तम्

उज्जिघ्र त्रि० उद्+घ्रा-श। आघ्राणकर्त्तरि।

उज्जिति स्त्री उद्+जि-क्तिन्। उत्कृष्टजये "अग्नीषोमयोरुज्जितिमनुज्जेषम्" यजु० २,२५। "उज्जितिमनु पकृतविघ्नेन कविःस्वीकरणरूपसत्कृष्टजयम्" वेददी०। "सोमस्योज्जितिमित्यस्मिन्नेनस्यतिः" कात्या० १०,७,१४। "उज्जितिश्चो पोत्तरो माहेन्द्रः" कात्या०१४,५,३१। अग्नीषोमयोरुज्जितिमनूज्जेषम्। "अग्नीषोमयोरुज्जितिमनूज्जयति" "इन्द्राग्न्योरुज्जितिमनूज्जयति" शत०ब्रा० १,८,३,१,२,३,४। २उज्जयसिद्धयुक्तमन्त्रकरणकाङ्क्षतौ च। "अथोज्जितेः" इत्युपक्रम्य "अग्निरेकाक्षरेण प्राणमुज्जयत्तमुज्जेषम्" इत्यादि शत०ब्रा० २,२,१६,१७ उक्तम्।

उज्जिहान त्रि० उद्+हा-शानच्। उद्गच्छति।

उज्जीविन् त्रि० उद्+जीव-णिनि। नाशप्रायतायाप्राप्युत्तरं पुनरुज्जीवनवति।

उज्जृम्भ पु० उद्+जृभि-घञ्। १विकाशे २स्फुटने। उद्गता जृम्भा (हाइतोला) यस्मात्" प्रा०ब० गतलोपः। २सुखविकाशनभेदे ३कर्त्तरि अच्। ४प्रकाशान्विते ५उज्जृम्भावति त्रि० "उज्जृम्भदनाम्भोजा भिनत्त्यङ्गानि साङ्गना" माघः

उज्जृम्भण न० उद्+जृभि-भावे ल्युट्। विकाशे सुखविकाशनभेदे व्यापारे (हाइतोला)। "उद्गारकाशश्ववथुजीवनोज्जृम्भणानि च" सुश्रुतः। उद्+जृभि-अ। उज्जृम्भाऽप्यत्र स्त्री।

उज्जृम्भित त्रि० उद्+जृभि-क्त। विकाशिते। भावे क्त। २चेष्टायाम् (हाइतोला) ३सुखव्यापारभेदे न०।

उज्जेष पु० उद्+जिष-गत्याम् भावे घञ्। १उत्कर्षप्राप्तौ उज्जिति यज्ञे उद्०। अच्। २उत्कृष्टे त्रि०।

उज्जेषिन् त्रि० उद्+जिष-गत्यां णिनि स्त्रियां ङीप्। उत्कर्षं प्राप्ते "क्रीडी च याकी चोज्जेषी" यजु०१७, ८५ "उज्जेषी उत्कृष्टजयनशीलः" वेददी०।

उज्ज्या न० उद्गता ज्या यस्य प्रा० वा गतलोपः। "आरोपितमौर्वीके धनुषि। उज्ज्यधन्वा:" कात्या०२२,२, १७। "उज्ज्यधन्वा आरोपिज्यधनुष्काः" कर्क०। उत्क्रान्ता अवतारिता ज्या यतः प्रा० ५ब० वा क्रान्तलोपः। अवतारितमौर्वीके धनुषि "काण्ड्रोवा वैदहोवोयपुत्र उज्ज्यं धनुरधिज्यं कृत्वा" ब्रा०उ०।

उज्ज्वल त्रि० उद्+ज्वल-अच्। १दीप्ते, २विशदे, ३विकाशिनि च। ४शृङ्गाररसे पु०। "स राशिरासीन्नृहसां महोज्ज्वलः" "शृङ्गारभङ्गया महाकाव्येचास्मिन् नैषधीयचरिते सर्गोनिसर्गोज्ज्वलः" नैष०। "स्वातन्त्र्यसुज्ज्वलमवाप करेषु राज्ञः" अविरतसंहतिमुज्ज्वलां दधानैः" माघः। "अस्माकं सखि! वाससी न रुचिरे पर्यायकं नोज्ज्वलम्" सा०द० "विचित्रोज्ज्वलवेषा तु वल्गद्भूरनिस्वनाः" सा० द०"सुसखाः पल्लवोज्ज्वलाः"सुश्रु०। अस्य च रसान्तरत्वं गोस्वामिग्रन्थे स्थितम्। ५स्वर्णे न० राजनि० धातुमध्ये तस्योद्दीप्तोत्पत्तेस्तथात्वम्। तस्य भावः ष्यञ् औज्ज्वल्य त्व। उज्ज्वलत्व तद्भावे न०। तल्। उज्ज्वलता स्त्री तत्रैव।

उज्ज्वलदत्त पु० उणादिवृत्तिकारके विद्वद्भेदे। तस्येदम्। अ। उज्ज्वलदत्तीय तत्कृतग्रन्थे पु० तत्कृतवृत्तौ तु स्त्री।

उज्ज्वलन न०उद्+ज्वल-भावे ल्युट्। १दीप्तौ २वैशद्ये च।

उञ्छ त्यागे तुदा० पर० सक० सेट्। उञ्छति 'औञ्छीत् उञ्छाम्—बभूव आस चकार। उञ्छिता जञ्छात् उञ्छिष्यति औञ्छिष्यत्। उञ्छितः। त्वमङ्ग यस्याः पतिरुञ्छितक्रमः" नैष०। "अद्यापि नोज्झति हरः किल कालकूटम्" चौरपञ्चाशिका। "प्राणानौञ्छीच्च खड्गेन छिन्नस्तेनैव मूर्द्धनि" भट्टिः। "सपदि विगतनिद्रस्तल्पसंज्ञाञ्जकारं"। "अविरतोञ्छितवारिविषाङ्कुभिः" "परस्परार्चिसाद्यमदूरोञ्छितवर्त्मसु स्रगद्रुहेषु" सेकान्ते मुनिकन्याभिस्तत्क्षणोञ्छितदृष्टकम्" "उदवे मदाच्यसुञ्छता" इति च रघुः। अतः 'भिद्योद्धौ नदे"पा० नि०क्यप् नदे कर्त्तरि भस्य धत्वम्। "उदकमुञ्छति उद्धोनद": सि०कौ०।

प्र+प्रकर्षेण त्यागे। "खादच्छिणी प्रेयस्यपि प्रोञ्छिता" प्र०बो०। "लिखितमपि ललाटे प्रोञ्छितुं कः समर्थः" हितो०। सम्+ सम्यक्त्यागे।

उञ्छ त्रि०उञ्छति उञ्छ-अच्। त्यागिनि। "ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः। गर्हितान्नाद्ययोर्जग्धिः सुरापानसमानि षट्" मनुः।

उञ्छ पु० उञ्छि-घञ्। "अबाधितस्थानेषु पथि क्षेत्रेषु च च अप्रतिहतावकाशेषु यत्र कृत्स्नौषधयो विद्यन्ते तत्राङ्गुलीभ्यामेकैकं कणं समुच्चिनोतीति"बौधा०सूत्रे कणश आदाने। "शिलोञ्छमप्याददीत विप्रोऽजीवन् यतस्ततः" मनुः। "एवं वृत्तस्य रूपतेरुञ्छेनापि च जीवतः" मनुः। "तान्युञ्छपक्वाङ्कितसैकतानि" रघुः। "निराहारस्तु स मुनिरुञ्छं मार्गयते पुनः" "तथामुमुञ्छधर्माणं दुर्वासा मुनिसत्तमः" शिलोञ्छवृत्तिधर्म्माणा मुद्वहन संयतेन्द्रियः" भा०व० १५६अ०। "प्रतिग्रहाच्छिलः श्रेयांस्ततोऽप्युञ्छः प्रशस्यते" मनुः। "व्यालग्रहान्नुञ्छवृत्तीनन्यांश्च वनचारिणः" मनुः। अस्य क्लीवताऽपि "उञ्छं भैक्ष्यं यदन्यच्च तत्परिग्रहणम् स्मृतम्" निगमोक्तेः "प्रतिग्रहात् शिलं श्रेयस्ततोऽप्युञ्छं प्रशस्यते" स्मृत्यन्तरे चोक्तम्। उञ्छ शिलमिति समस्तमपि शब्दान्तरं केचिदिच्छन्ति। उञ्छेन पक्षिचञ्चूवद्गृहेण शिल्यते संचीयते इति तदुत्पत्तेः "ऋतमुञ्छशिलं श्रेयमृतं स्यादयाचितम्। ऋतन्तु याचितं भैक्ष्यं प्रमृतं कर्षणं स्मृतम्" मनुः।

उञ्छ न० उञ्छि-भावे ल्युट्। आपणक्षेत्रादिपतिस्व क्षेत्रस्वामिगृहीतविक्रीतावशिष्टस्य धान्यादेः कणश आदाने

उञ्छशिल न० शिल-अपहारे क ३त०। क्षेत्रस्वामिना गृहीतशस्यात् क्षेत्रात्कणशः समुच्चयरूपे आहरणे। अस्य

दन्त्यसकारमध्यतामपि बोधितं पृषोदरादि० कल्पवन्ति ।

उट न० उ+टक् नेच्चम् । ललाटे, २पर्णे च ।

उटज पुंन० उटेभ्यो जायते जन+ड । पत्रादिनिर्मितशालायां मन्वादिरुक्ते । "उटजद्वाररोधिभिः" "स्रगेर्वत्तितरोमन्थ मुटजाङ्गनभूमिषु" रघुः "नवोटजाभ्यन्तरसंभृतानलम्" कुमा०

उठ गतौ भ्वा०पर०सक०सेट् । ओठति ओठीत् । उवोठ ऊठतुः ओठिता उद्यात् ओठिष्यति औठिष्यत् ।

उड संहतौ सौत्र० पर०अक० सेट् । ओडति औडीत् । उवोड ऊडतुः । ओडिता उद्यात् ओडिष्यति औडिष्यत् । उडु

उडु क्ली न० उड-बा० कु । नक्षत्रे, २जले च स्त्रीत्वे वा ऊङ् । "इन्दुप्रकाशस्तमितोडुतुल्याः" । "उत्तस्थितोडुभिरतोवतरां शिरोभिः" माघः ।

उडुचक्र न० उडूनां चक्रमिव मण्डलम् । नक्षत्रमण्डले भचक्रे तस्य संस्थितिश्च" सि०शि० उक्ता उल्लेखश्च तत्र दर्शितम् । उडुचक्रस्वरूपादि सू० सि० उक्तम् यथा "ब्रह्माण्डमध्ये परिधिर्व्योमकक्षाभिधीयते । तन्मध्ये भ्रमणं भानामधोऽधः क्रमशस्तथा । मन्दामरेज्यभूपुत्रसूर्यशुक्रेन्दुजेन्द्वः । परिभ्रमन्त्यधोऽधस्थाः सिद्धविद्याधरा घनाः" । "ब्रह्माण्डान्तःपरिधिस्तुल्य मानं वृत्तं व्योमकक्षा यच्चक्राकारकल्पोच्यते । तन्मध्ये ब्रह्माण्डमध्य आकाशे भानां नक्षत्राणां सर्वेषां सर्वतस्तुल्योर्ध्वान्तरितानां भ्रमणं भवति । तथा तुल्योर्ध्वान्तरेणाधोधोनक्षत्रेभ्यः शनिबृहस्पतिभौमार्कशुक्रबुधचन्द्राश्चभस्तात् परिभ्रमन्ति । सिद्धा विद्याधराघनाश्चाधस्थाश्चन्द्रादधः स्थिता अधोऽधः क्रमेणाकाशे स्थिताः । प्रवहवायावावस्थानाभावाच्चन्द्रवन्न तेषां परिभ्रमः" र०ना० । तस्योत्पत्तिविभागस्तथैव । "पुनर्द्वादशधात्मानं भभजद्राशिसञ्ज्ञकम् । नक्षत्ररूपिणं भूयः सप्तविंशात्मकं वशी" सू० सि० । "पुनरनन्तरमात्मानं द्वादशधा द्वादशस्थानेषु राशिसंज्ञकं भभजत् मनःकल्पितं वृत्तं द्वादशविभागं राशिचक्रमकरोदित्यर्थः । भूयो द्वितीयवारमात्मानं नक्षत्ररूपिणं सप्तविंशात्मकं भभजत् । मनःकल्पितं तदेव वृत्तं सप्तविंशतिविभागं चाकरोदित्यर्थः । नतु न्यूनाधिकविभागाः कथं न कृताः ? उक्तसङ्ख्यायां नियामकाभावादित्यत आह वशीति । इच्छाविषयं वशं विद्यते यस्येति वशी स्वतन्त्रेच्छस्य नियोगानर्हत्वात् । स्वेच्छया तत्सङ्ख्याका विभागाः कृता इति भावः । सप्तविंशतिविभागव्यञ्जकानि नक्षत्राणि तारात्मकानि निर्मितानीत्यर्थसिद्धम्" र०ना० । तत्र राशिनक्षत्रनामानि ज्योति०त०उक्तानि यथा "मेषवृषमिथुनकर्कटसिंहाःकन्यातुलावृश्चिकधनुरथ मकरः कुम्भोमीन इति च राशयः कथिताः" । "अश्विन्या सह भरणी कृत्तिकापादः कीर्त्तितोमेषः । वृषभः कृत्तिकाशेषं रौहिणर्क्षञ्च मृगशिरसः । मृगशिरसोऽर्द्धं चार्द्रा पुनर्वसोस्त्रिपादं मिथुनम् । पादः पुनर्वसोरन्त्यः पुष्योऽश्लेषा च कर्कटः कथितः । सिंहोऽथ मघा पूर्वफल्गुनीपाद उत्तरायाः । तच्छेषं हस्ता च चित्रार्द्धं कन्याख्यः स्यात् । तौलिनि चित्रार्द्धं स्वातिविशाखायाश्च पादत्रयम् । अलिनि विशाखापादस्त्वथानुराधान्विता ज्येष्ठा । मूलं पूर्वाषाढा प्रथमत्र्यंशोत्तरांशको धन्वी । मकरस्तत्परिशेषं श्रवणाधार्द्धं कनिष्ठायाः । कुम्भोऽथ धनिष्ठार्द्धं शतभिषापौर्वभाद्रपदत्रयम् । भाद्रपदायाः शेषस्तथोत्तरा रेवती मीनः" अश्विन्यादिनक्षत्राणां तारासंख्यातत्संनिवेशरूपं च श्रीपतिनोक्तम् । "पञ्चत्रिकृत्तिथियुगेन्दुकृतानि भूतवाणाग्निनेत्रशरभूकृतयुगाग्निरामाः । रुद्राब्धिरामगुणवेदशतद्वियुग्मदस्रा बुधैर्निगदिताः क्रमशो भतारा । तुरगमुखसदृक्षं योनिरूपं क्षुराभं शकटनिभमथैषस्योक्तमार्क्षेण तुल्यम् । मणिमुरजशरवक्राभानि शालोपमं च शयनसदृशमन्यच्चाल पर्यङ्करूपम् । हस्ताकारमजस्रमौक्तिकसमं चान्यत् प्रयाणोपमं धिष्ण्यं तोरणवत् स्थितं बलिनिभं स्यात् कुण्डलाभं परम् । क्रुध्यत्केसरिविक्रमेण सदृशं यथासमानं परं चान्यद्वृश्चिविलासवत् स्थितमतः खड्गाटकशक्ति च । त्रिविक्रमाभं च मृदङ्गरूपं वृत्तं ततोऽन्यद्यमलहयाभम् । पर्यङ्कतुल्यं सुरजानुकारमित्येवमभ्रादिभचक्ररूपम्" ।

भचक्रपरिधिमानम् सि०शि० उक्तम् "अब्धेस्त्रिभाद्गजहृद्गोऽश्वपक्षाः" (२५८८८८५०योजनानि) कक्षां स्पृशन्ति गणका भगणस्य चेमाम्" । तस्य भूमध्यात्उच्छ्रितियोजनानि तु तत्रोक्तानि यथा "नागाब्धिषड्हयरसाग्निकुवेदसंख्यो" (४।२६।३६५८) नक्षत्रमण्डलभवः अवधो निरुक्तः" । अस्य च द्वादशधा विभक्तस्य प्रवहवायुना भास्यमाणस्य दिने प्रथमोदयः रात्रौ च प्रथमास्तमय इति भेदः । "स्वादुद्रुमो निजनिजोदयभानुतुल्ये सूर्यास्तभास्करसमोऽस्तमये च भानाम्" सि०शि० उक्तेः । २तारायां समूहे च "वप्रेण पर्यन्तचरोडुचक्रः" माघः ।

उडु(डू)प पुं० उडुनि जले पाति पा-क । प्लवे भेलायाम् ।

"उडुपप्लवसन्तारोवत्र नित्यं भविष्यति" भा० आ० ८ अ०। "वह्नेर्वारिवहं फेनोडुपपरिप्लुतम्। भा० व० १३९ अ०। "तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्" रघुः। उडुरूपजलसन्तारहेतुत्वादस्य उडुपत्वम्। चर्मावनद्धयानपात्रे न० तच्छोकव्याख्याने मल्लिनाथेन "उडुपेन चर्मावनद्धयानपात्रेणेत्यभिधाय "चर्मावनद्धसडुपं प्लवकाष्ठं कस्खवदिति" सज्जनोक्तिरुदाहृता। पृषो०। उडपोऽपि प्लवे अमरटी०। उडूनि उडूर्वा नक्षत्राणि पाति पा–क। २चन्द्रे स हि ताराणां पतिरतस्तद्रूपकः। उडूनां दिवा हि सूर्यकिरणैरभिभवात्प्रकाशत्वेन रात्रौ च प्रकाशवत्त्वेन निशाधीशचन्द्रस्य ततपतित्वम्। एवम् "नक्षत्राणामधीशत्वमोषधीनां तथैव चेति" का०स्व० प्रजापतिना तदधीशत्वदानसूक्तम्"। गोतायामपि"नक्षत्राणामहं शशी"इत्युक्तेः तन्मध्ये तस्य श्रेष्ठत्वादपि तत्पतिता "सङ्खिलभवे शशिनि" इत्त०सं० तस्य जलमयत्वोक्तेः उडुमयत्वात् जलमयत्वात् तस्य उडुपतित्वं वा बोध्यम् दक्षकन्याश्विन्यादितारापतित्वाद्वा तथात्वम्।

उडु(डू)पति पु० उडूनां पतिः। १चन्द्रे २जलेशे वरुणे च। "परिसुप्तधतां बधिगवोडुपतेः" माघः। "रसात्मकस्योडुपतेव रश्मयः" कुमा०।

उडुपथ पु० उडूनां पन्थाः। आकाशे। तत्र हि उडूनां प्रत्यहं प्रवहवायुना भ्रमणात् तथात्वम्।

उ(दु)डुम्बर पु० उं शब्दं डयते खे उन्नरः उत्कटः उम्बरः प्रा०स० पृषो० दस्य वा डत्वम्। (यज्ञ डुमर) १यज्ञाङ्गे वृक्षे २तत्फले च, यज्ञावयवख्यात्। ३देवेक्ष्यात्। ४कृष्णभेदे च न०। "उ(दु)डुम्बरो यज्ञफलो यज्ञाङ्गो हेमदुग्धकः। उदुडुम्बरोहितोरूक्षो गुरुपित्तकफास्रजित्। मधुरस्तुवरोवर्ष्यो व्रणशोधनरोपणः" इति भा० व० उक्तगुणकः। तस्य विकारः अण्। औ(दु)डुम्बर तद्विकारे पात्रादौ त्रि०। स्त्रियां ङीप्। "यज्ञौडुम्बरं पात्रं जानुभ्यां धरणिं गतः" स्मृतिः। "औडुम्बरीं स्रुचं गायेत" स्मृतिः। [ङीष्। दन्त्योष्ठ्ये यश्च०।

उडुम्बरपर्णी स्त्री उडुम्बरस्य पर्णमिव पर्णमस्याः गौरा०

उडुराज् पु०उडुषु राजते राज–क्विप्। चन्द्रे। अच्, उडूनां राजा टच् समा० वा। उडुराजोऽत्यल्पं "तदोडुराजः कुमुदः करैर्मुखं प्राच्याविलिम्पन्" भाग०१०, २८अ०।

उडुलोमन् पु० उडुरिव लोमास्य। ऋषिभेदे। तस्यापत्यम् बाह्वा० इञ्। औडुलोमि तदपत्ये पुंस्त्री०। बहुषु अकारः। उडुलोमाः। [विरूपेऽड्डयने निराशतास्" नैष०।

उड्डयन न० उद्+डी–ल्युट्। पक्षिणामूर्द्धगतौ "गतौ

उड्डामर त्रि० उत्कटो डामरः प्रा०स०। १उद्भटे २श्रेष्ठे च ३तन्त्रभेदे पु०। [तिभेदे।

उड्डीन न० उद+डी–भावे क्त। ऊर्द्धेतापतनरूपे खगग-

उड्डीयन न०उद्+डी–ड उड्डः स्वाचरति क्यङ् उड्डीय–भावे ल्युट्।। उत्पतने। "कथमुड्डीयनेऽशक्तान् पतने च समात्मजान्" भा० आ० २२३अ०। उड्डीय–कर्त्तरि ताच्छील्ये वा चानश्। उड्डीयमान उड्डयन कर्त्तरि तच्छीले च त्रि०।

उड्डीश पु० उद्+डी–क्विप् तस्य ईशः। उत्पतन कर्त्तृणामीश्वरे १महादेवे २तन्त्रभेदे च मेदि०। योगिनां हि उत्पतनं योगशास्त्रप्रसिद्धम् महादेवस्य च तदीशत्वात् तथात्वम्। उड्डीयतन्त्रस्य तु उत्पतनसाधनोपायविधायकत्वात् तथात्वम्।

उ(औ)ड्र पु०उड–सौ० वा० रक् र वा उ–र–रक् वा डुगागमोवा। कूर्मविभागस्यप्राच्यदेशभेदे "सवङ्गाङ्गान् सपौण्ड्रोड्रान् सचोलान् द्रविड्रान्धकान्" भा० ब० ५९ अ०। औ(उ)ड्रदेशश्च कूर्मविभागे ब०सं० प्राच्यतयोक्तः यथा "प्राच्यामित्युपक्रम्य मिथिलसमतटोड्रान्ध्रवङ्गदन्तुरकाः" इति। स च उत्कलात् भिन्नएव तत्रैवानन्तरम् "पौण्ड्रोत्कलकाशिमेकलान्ध्राः इत्युक्तेः। भारते च सहदेवदक्षिणदिग्विजये "पाण्ड्यांश्च द्रविडांश्चैव सहितांश्चोड्रकेरलैः स०३० अ० उक्तेस्तस्य दक्षिणानगरीतः दक्षिणत्वात् तथात्वम् कूर्मविभागे प्राच्यत्वमिति न विरोधः। सर्वत्र उड्रशब्दश्रवणात् उकारादित्वम् रघुनन्दनेन तु ओड्रादिदेशव्यवस्थितमित्युक्तत्वात् ओकारादित्वमपि। अस्य देशवाचित्वात् तस्य राजा तदभिजन इत्यर्थे च अण्। औड्र तद्राजे तदाभिनि च बहुषु तस्य लुक्। उड्राः तद्राजेषु तन्निवासिषु च।

उणक त्रि०ओण–अपसारणे खुल् गौरा०उणक इति पाठात् नि० ह्रस्वः। अपसारके। स्त्रियां गौरा०ङीष्। उणकी।

उणादि पु०उण्प्रत्यय आदिर्येषाम्। शाकटायनोक्ते उण्प्रभृतौ प्रत्ययसमूहे। "उणादयो बहुलम्" "ताभ्यामन्यत्रोणादयः" पा०। "उणादयोऽव्युत्पन्नाः प्रातिपादिकानीति"पा०भा०। व्युत्पन्ना इति पाठान्तरम्। व्युत्पत्तिपक्षाभिप्रायेणैः "राघवस्य ततः कार्य्यं कार्त्तवीर्यवधूद्भवः" इति भट्टौ कार्य्यमित्यत्र द्वितीया अव्युत्पन्नत्वे

सा न स्यादिति बोध्यम् उणादिवृत्तिश्च उज्ज्वलदत्तकृता प्रसिद्धा ।

उण्डुक पु० "गर्भस्य यकृत्प्लीहानौ शोणितजौ । शोणितफेनजः फुप्फुसः शोणितकिट्टप्रभव उण्डुकः" इति सुश्रुतोक्ते रुधिरकिट्टजाते देहस्थमलाशये कोष्ठभेदे तन्मलविभाजकत्वं कलाभेदस्य तत्रोक्तं यथा "यकृत् समन्तात् कोष्ठञ्च तथान्त्राणि समाश्रिता । उण्डुकस्थं विभजते मलं मलधरा कला" सुश्रु० देहप्रत्यङ्गविभागशारी सुश्रु० "तस्य पुनः संख्यानम् त्वचः कला धातवो मला दोषा यकृत्प्लीहानौ फुप्फुस उण्डुको हृदयमाशय" इत्युक्तम् । "स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च । हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते इति तस्य आमाशयपक्वमूत्राद्याधारस्थानम् । शल्योद्धारे च तत्रैव । "अस्थिशल्यमन्यद्वा तिर्य्यक् कण्ठासक्तमवेक्ष्य जोगोण्डुकं दृढैकस्तम्बबद्धम् द्रव्यभक्तोपहितं पाययेत् ।

उत् अव्य० उ-क्विप् । १प्रश्ने २वितर्के ३संशये ४अत्यर्थे ५अर्द्धे च । ६उदिते त्रि० । "तस्य उदितिनाम" ऋ० उ० । उद् इति वा छेदः ।

उत अव्य० उ-क्त । १विकल्पे, २समुच्चये, ३वितर्के, ४प्रश्ने, ५अत्यर्थे च । "यदक्रन्दः प्रथमं जायमान उद्यन्त् समुद्रादुत वा पुरीषात्" यजु० २८,१२ । "मानाग्निहोत्रमुत मान मौनम्" भा० आ० २६२अ० । "एतावन्ति च दासानां सहस्राण्युत सन्ति मे" भा०स०२२१अ० । "तत् किमयं मातपदोषः स्यादुत यथा मे मनसि वर्त्तते" शकु० । "वीरोरसः किमयमित्युत दर्पएषः" वीरच० "प्रभुः प्रहर्त्तुं किमुताभ्यर्हिंसाः" रघुः । "सारतोन विरोधी न स्वाभाको भरवानुत" किरा० । "धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत" ज्ञानमाच्छाद्य तु तमः प्रमादे सञ्जयत्युत" गीता । [प्रोतश्च" श्रुतिः

उत त्रि० वेञ-क्त । सूते यविते अमरः "यस्त्रिप्रोतश्च ।

उतङ्क पु० आयोदधौम्यशिष्यवेदनामकस्य मुनेः शिष्यभेदे तदुपाख्यानञ्च" भा० आ० ३अ० । वेदमुनिं प्रक्रम्य "स कदाचित् याज्यकार्य्याभिप्रस्थित उतङ्कनामानं शिष्यमनियोजयामास" इत्युपक्रम्य "तत्तौभ्य ! गम्यतामनुजाने भवन्तं श्रेयोऽवाप्स्यसीति स उपाध्यायेनानुज्ञातो भगवानुतङ्कः कुण्डलाभ्यां प्रतिचिकीर्षुर्द्यौक्षिनपुरं प्रतस्थे" इत्यन्तेन विस्तरेण तच्चरितमुपवर्णितम् । तस्यायं संक्षेपः। गुरुदक्षिणादानार्थं गुरवे उतङ्केन निवेदिते गुरुणा स्वपत्नीवचनात् पौष्यदत्तपर्यधृष्टतत्कुण्डलहरणमेव गुरुदक्षिणात्वेन कल्पितम् तच्च पौष्यदत्तपत्नीहृतं कुण्डलहरणं प्राप्य आनयतस्तस्य प्रमादतस्तत्कुण्डलापहरणम् अथ वह्निनो लब्धवरप्रसादात् नागलोकं गत्वा धूमप्राचुर्य्येण नागलोकावरणे तद्बलात्तत्कुण्डलहरणं नागैर्दत्तमानीय गुरुपत्न्यै दत्तमिति

२भार्गवे गौतमस्य शिष्यभेदे च तत्कथा भारते "उतङ्को महता युक्तस्तपसा जनमेजय !। गुरुभक्तः स तेजस्वी नान्यत् किञ्चिदपूजयत् । सर्वेष्वाश्रमधर्मेषु स्वाध्यायेषु आसीन्मनोरथः । औतङ्कीं गुरुवृत्तिं वै प्राप्नुयामेति भारत !। गौतमस्य तु शिष्याणां बहूनां जनमेजय । उतङ्केऽभ्यधिका प्रीतिः स्नेहश्चैवाभवत्तदा । स तस्य दमशौचाभ्यां विक्रान्तेन च कर्मणा । सम्यक् सेवोपचारेण गौतमः प्रीतिमानभूत् । अथ शिष्यसहस्राणि समनुज्ञातवान्द्विजः । उतङ्कं परया प्रीत्या नाभ्यनुज्ञातुमैच्छत । तं क्रमेण जरा तात ! प्रतिभेदे महामुनिम् । न चान्वबुध्यत तदा स मुनिर्गुरुवत्सलः । ततः कदाचिद्राजेन्द्र ! काष्ठान्यानयितुं ययौ । उतङ्कः काष्ठभारञ्च महान्तं समुपानयत् । स तद्भाराभिभूतात्मा काष्ठभारमरिन्दम !। निधायैव चितौ राजन् ! परिश्रान्तो बुभुक्षितः। तस्य काष्ठे विलग्नाऽभूज्जटा रूपसमप्रभा । ततः काष्ठैः सह तदा पपात धरणीतले । ततः स भारनिग्रिष्टः क्षुधाविष्टश्च भारत ! । दृष्ट्वा तां वयसोऽवस्थां रुदोदार्त्तस्वरं मुहुः । ततो गुरुसुता तस्य पद्मपत्रनिभानना । जग्राहाश्रूणि सुश्रोणी करेण पृथुलोचना । पितुर्नियोगाद्धर्मज्ञा शिरसाऽवनता तदा । तस्या निपेततुर्दग्धौ करौ तैरश्रुबिन्दुभिः । न हि तानश्रुपातांस्तु शक्ता धारयितुं मही । गौतमस्तत्रवोद्विग्नमुतङ्कं प्रीतमानसः । कस्मात्तात ! तवाद्येह शोकोत्तरमिदं मनः । तत्त्वैरं ब्रूहि विप्रर्षे ! श्रोतुमिच्छामि तत्त्वतः । उतङ्क उवाच । एवङ्गतेन मनसा भवत्प्रियचिकीर्षया । भवद्भक्तिगतेनेह भवद्भावानुगेन च । जरेयं नाववुद्धा मे नाभिज्ञातं सुखञ्च मे । शतवर्षोषितं मां हि न त्वमभ्यनुजानीयाः । भवता त्वभ्यनुज्ञाताः शिष्याः प्राक्तरा मम । उपपन्ना द्विजश्रेष्ठाः शतशोऽथ सहस्रशः । गौतम उवाच। त्वयीतिशुक्लेन मया गुरुशुश्रूषया तव । अल्पक्रामन्महान् कालो नावबुद्धो द्विजर्षभ !। किन्त्वद्य यदि ते श्रद्धा गमनं प्रति भार्गव !। अनुज्ञां प्रतिगृह्य त्वं स्वगृहान् गच्छ मा चिरम् । उतङ्क उवाच। गुर्वर्थं किं प्रयच्छामि ब्रूहि

त्वं द्विजसत्तम। तमुपाहूय गच्छेयमनुज्ञातस्त्वया विभो!। गौतम उवाच। दक्षिणा परितोषो वै गुरूणां सद्भिरुच्यते। तव त्राचतरतो ब्रह्मंस्तुष्टोहं वै न संशयः। दत्तश्च परितुष्टं मां विजानीहि भृगूद्वह!। युवा षोड़शवर्षो हि यद्यद्य भविता भवान्। ददानि पत्नीं कन्यान्तु त्वां ते दुहितरं द्विज!। एवमुक्तेऽङ्गना नान्या त्वत्तेजोऽर्हति सेवितुम्। ततस्तां प्रतिजग्राह युवा भूत्वा यशस्विनीम्। गुरुणा चाभ्यनुज्ञातो गुरुपत्नीमथाब्रवीत्। कं भवत्यै प्रयच्छामि गुर्वर्थं विनियुङ्क्ष्व माम्। प्रियं हितञ्च काङ्क्षामि प्राणैरपि धनैरपि। यद्दुर्लभं हि लोकेऽस्मिन् रत्नमत्यद्भुतं महत्। तदानयेयं तपसा न हि मेऽत्रास्ति संशयः। अहल्योवाच। परितुष्टाऽस्मि ते विप्र! नित्यं भक्त्याऽनयाऽनघ!। पर्याप्तमेतद्भद्रन्ते गच्छ तात! यथेप्सितम्। वैशम्पायन उवाच। उतङ्कस्तु महाराज पुनरेवाब्रवीद्वचः। आज्ञापयस्व मां मातः! कर्त्तव्यञ्च तव प्रियम्। अहल्योवाच। सौदासपत्नीविष्टब्धे दिव्ये ते मणिकुण्डले। ते समानय भद्रन्ते गुर्व्वर्थः सुकृतो भवेत्। स तथेति प्रतिश्रुत्य जगाम जनमेजय!। गुरुपत्नीप्रियार्थं वै ते समानयितुं तदा। स जगाम ततः शीघ्रमुतङ्को ब्राह्मणर्षभः। सौदासं पुरुषादं वै भिक्षितुं मणिकुण्डले। गौतमस्त्वब्रवीत् पत्नीमुतङ्को नाद्य दृश्यते। इति पृष्टा तमाचष्ट कुण्डलार्थं गतञ्च सा। ततः प्रोवाच पत्नीं स न ते सम्यगिदं कृतम्। शप्तः स पार्थिवो नूनं ब्राह्मणं तं वधिष्यति। अहल्योवाच। अजानन्ता नियुक्तः स भगवन्! ब्राह्मणोमया। भवत्प्रसादाच्च भयं किञ्चित्तस्य भविष्यति। इत्युक्तः प्राह तां पत्नीमेवमस्त्विति गौतमः। उतङ्कोऽपि वने शून्ये राजानं तं ददर्श ह"। आश्व० ५६ अ०। इत परं तत्कुण्डलानयनादिकं नागतलकपिप्लुपवर्ण्यं वह्निप्रसादात्तत् नागलोकादानीय गुरुपत्न्यै तद्दानमुक्तमित्ययं संक्षेपो विस्तरस्तत्र द्रष्टव्यः। अत्रैव तोयाभिलाषपूरणार्थमीश्वरेण उतङ्कमेघः प्रवर्त्तितः तत्कथा उतङ्कमेघशब्दे द्रष्टव्या।

उतङ्कमेघ पु० उतङ्कार्थमीश्वरेण प्रवर्त्तितोमेघः। मरुदेशस्योतङ्कतोयाकाङ्क्षापूरणार्थमीश्वरेण कृष्णेन नियोजिते मेघे। तत्कथा भा० आश्व० ५५ अ०। "उतङ्क उवाच। अवश्यकरणीयञ्च यद्येतन्मन्यसे विभो!। तोयमिच्छामि यत्रेदं मरुप्वेतद्धि दुर्लभम्। ततः संस्मृत्य तत्तेज प्रोवाचोतङ्कमीश्वरः। एवमेवं सति चिन्त्योऽहमित्युक्त्वा द्वारकां ययौ। ततः कदाचिद्भगवानुतङ्कस्तोयकाङ्क्षया। स्मरितः परिचक्राम मरौ सस्मार चाच्युतम्। ततो दिग्वाससं धीमान्मातङ्गमलपङ्किनम्। अपश्यत मरौ तस्मिन् स्वयूथपरिवारितम्। भीषणं वह्निनिस्त्रिंशं बाणकार्मुकधारिणम्। तस्याधः स्रोतसो ऽपश्यत् द्वारि भूरि द्विजोत्तमः। स्मरन्नेव च तं प्राह मातङ्गः प्रहसन्निव। एह्युतङ्क! प्रतीच्छस्व मत्तो वारि भृगूद्वह!। कृपा हि मे समुदिता त्वां दृष्ट्वा दृष्टसमाश्रितम्। इत्युक्तस्तेन स मुनिस्तत्तोयं नाभ्यनन्दत। चिक्षेप च स तं धीमान् वाग्भिरुग्राभिरच्युतम्। पुनः पुनश्च मातङ्गः पिबस्वेति तमब्रवीत्। न चापिबत् स सक्रोधः क्षुधितेनान्तरात्मना। स तयो निश्चयात्तेन प्रत्याख्यातो महात्मना। स्वभिः सह महाराज! तत्रैवान्तरधीयत। उतङ्कस्तं तथादृष्ट्वा ततो व्रीडितमानसः। मेने प्रलब्धमात्मानं कृष्णेनामित्रघातिना। अथ तेनैव मार्गेण शङ्खचक्रगदाधरः। आजगाम महाबुद्धिरुतङ्कश्चैनमब्रवीत्। न दत्तं तादृशं दातुं त्वया पुरुषसत्तम। सलिलं विप्रमुख्येभ्यो मातङ्गस्रोतसा विभो। इत्युक्तवचनं तन्तु महाबुद्धिर्जनार्दनः!। उतङ्कं सस्मया वाचा सान्त्वयन्निदमब्रवीत्। यादृशेनेह रूपेण योग्यं दातुं धृतेन वै। तादृशं खलु ते दत्तं तच्च त्वं नावबुध्यथाः। मया त्वदर्थसक्तो वै वज्रपाणिः पुरन्दरः। उतङ्कायाहृतं देहि तोयरूपमिति प्रभुः। स मामुवाच देवेन्द्रो न मर्त्योऽनर्हतां व्रजेत्। अन्यमर्थं वरं देहीत्यसकृद्भृगुनन्दन। अहृतं देयमित्येव मयैवोक्तः शचीपतिः। स मां प्रसाद्य देवेन्द्रः पुनरेवेदमब्रवीत्। यदि देयमवश्यं वै मातङ्गो हि महामते!। भूत्वाऽहृतं प्रदास्यामि भार्गवाय महात्मने। यद्येवं प्रतिगृह्णाति भार्गवोऽहृतमद्य वै। प्रदातुमेष गच्छामि भार्गवस्याहृतं विभो!। प्रत्याख्यातस्त्वहं तेन दास्यामि न कथञ्चन। स तथा समयं कृत्वा तेन रूपेण वासवः। उपस्थितस्तया चापि प्रत्याख्यातोऽहृतं ददत्। चाण्डालरूपी भगवान्! क्षमस्वांस्ते व्यतिक्रमः। तच्च शक्यं मया कर्त्तुं भूय एव तवेप्सितम्। तोयेप्सां तव दुर्द्धर्षां करिष्ये सफलामहम्। येषुहृदेषु च ते ब्रह्मन्! सलिलेप्सा भविष्यति। तदा मरौ भविष्यन्ति जलपूर्णाः पयोधराः। रसवच्च प्रदास्यन्ति तोयं ते भृगुनन्दन!। उतङ्कमेघा इत्युक्ताः ख्यातिं यास्यन्ति चापि ते। इत्युक्तः प्रीति-

मान् विप्रः ऋणेन स बभूव ह । अद्याश्रुतद्रुमेषाच्च मरौ वर्षन्ति भारत" ।

उतथ्य पु० अङ्गिरसः श्रद्धायां पत्न्यामुत्पन्ने गुरोर्ज्येष्ठभ्रातरि । "त्रयोऽङ्गिरसः पुत्रा एते सर्वत्र विश्रुताः । बृहस्पतिरुतथ्यश्च संवर्त्तश्च मुनिव्रतः" भा०आ० ६९अ० । तस्यापत्यम् अण् औतथ्यः स च उतथ्येन ममतायामुत्पन्नः बृहस्पतिशापात् जात्यन्धतां प्राप्तस्तत्कथा यथा "औतथ्य इति ख्यात आसीद्वीर्यवान्मुनिः पुरा । ममता नाम तस्यासीद्भार्य्या परमसम्मता । उतथ्यस्य यवीयांसु पुरोधास्त्रिदिवौकसाम् । बृहस्पतिर्बृहत्तेजा ममतामन्वपद्यत । उवाच ममता तन्तु देवरं वदतांवरम् । अन्तर्व्वत्नी त्वहं भ्राता ज्येष्ठेनारब्धताभिति । अयञ्च मे महाभाग ! कुचावेव बृहस्पते ! । औतथ्यो वेदमन्त्रापि चक्रुक्रं प्रत्यधोयत । अमोघरेतास्त्वञ्चापि द्वयोर्न्नास्त्यत्र सम्भवः । तस्मादेवञ्च नत्वद्य उपारमितुमर्हसि । एवमुक्तस्तदा सम्यग्बृहस्पतिरधीरधीः । कामात्मानं तदात्मानं न शशाक नियच्छितुम् । स बभूव ततः कामी तया सार्द्धमकामया । उत्सृजन्तन्तु तं रेतः स गर्भस्थोऽभ्यभाषत । मोस्तात ! मा गमः कामं द्वयोर्न्नास्तीह सम्भवः । अल्पावकाशो भगवन् ! पूर्व्वं चाहमिहागतः । अमोघरेताश्च भगान्न पीडां कर्त्तुमर्हसि । अस्तुवैव तु तद्वाक्यं गर्भस्थस्य बृहस्पतेः । जगाम मैथुनायैव ममतां चारुलोचनाम् । शुक्लोत्सर्गं ततो बुद्ध्वा तस्या गर्भगतो मुनिः । पद्भ्यामारोधयन्मार्गं शुक्रस्य च बृहस्पतेः । स्थानमप्राप्तमपतद्रेतः प्रतिहतं तदा । पपात सहसा भूमौ ततः क्रुद्धो बृहस्पतिः । तद्दृष्ट्वा पतितं शुक्रं शशाप स रुषान्वितः । उतथ्यपुत्रं गर्भस्थं निर्भर्त्स्य भगवान्मुनिः । यस्मात् त्वमीदृशे काले सर्व्वभूतेच्छिते सति । एवमाद्य वदस्यस्मात्तमो दीर्घं प्रवेक्ष्यसि । स वै दीर्घतमा नाम शापादृषिरजायत । बृहस्पतेर्बृहत्कीर्त्तेर्बृहस्पतिरिवौजसा । जात्यन्धो वेदवित्प्राज्ञः पत्नीं लेभे स विद्यया । तरुणीं रूपसम्पन्नां प्रद्वेषीं नाम ब्राह्मणीम् । स पुत्रान्जनयामास गौतमादीन् महायशाः । अथैतस्यैव तदा सनानुकुलवृत्तये । धर्म्मात्मा च महात्मा च वेदवेदाङ्गपारगः । गोधर्म्मं गौरभेयाच्च शोऽधीत्य निखिलं मुनिः । प्रावर्त्तत तदा कर्त्तुं श्रद्धावांस्तमशङ्कया" । भा०आ०१०४अ० । "भ्रुवावेदो पतत्यत्रे रुतथ्यतनयस्य च" मनुः । "उतथ्यतनयस्य गौतमस्येति" कुल्लू० । तस्य उतथ्यपौत्रत्वेऽपि तत्कुलवर्द्धनात्तथात्वं तस्य जात्यन्धतया स्मृतिकर्त्तृत्वाभावेन तत्पौत्रस्यैव गौतमस्य स्मृतिकर्त्तृत्वात् तस्यैव सम्मतिकथनं युक्तमिति" "तथाप्युतथ्यानुजगादाग्रे गदाग्रजः" भाघः । अयञ्च आङ्गिरसगोत्रप्रवरमध्यस्य ऋषिभेदः ८१७पृ० विदृतः ।

उतथ्यानुज पु० ६त० । बृहस्पतौ उतथ्यावरजादयोऽस्यत्र । "तथाप्युतथ्यानुजवज्जगादाग्रे गदाग्रजः" । [चारे च

उताहो अव्य०उत च आहो च द्व० । १विकल्पे, २प्रश्ने ३वि-

उत्क त्रि० उद्गतं मनोऽस्य उद्+नि०-क । १उन्मनस्के २अन्यमनस्के । "अगमयदङ्गिसुतासमागमोत्कः" कुमा० । "तच्छ्रुत्वा च श्रवणसुभगं गर्ज्जितं मानसोत्काः" मेघ०" । "उत्कं धरं द्रष्टुमवेक्ष्य गौरिसुत्कन्धरं दारुक इत्युवाच" माघः ।

उत्कच त्रि०उद्गताः उद्गतो-कचोऽस्य । १विकचे केशशून्ये २उद्गतकेशे च "प्रथस्य विकचः पादावस्टक्षात् स पितुस्तदा । मातुश्च परमेष्वासस्तौ च नामास्य चक्रतुः । घटोत्कोत्कच इति माता तं प्रत्यभाषत । अब्रवीत्तेन नामास्य घटोत्कच इति स्म सा" भा०आ०१५९अ० ।

उत्कट पु० अतीव कटति उद्+कट-अच् । १रक्तकौशे, २शरे च ३त्वक्पत्रे । (तेजपात) ४गुडत्वचि (दारचिनि) च न० । ४अविसंवादिविषये त्रि० । उत्कोटिसम्भवना तत्कौत्कट्यं विषयताविशेषः स च अविसंवादिप्रवृत्तिप्रयोजकताप्रयोज्य इति नव्यनैयायिकाः । उद्गतः कटः आवरणं यस्य प्रादि०व० । ५तीव्रे त्रि० । ६भिन्नकटे गजे पु० । "चन्द्रांशुनिकराभासाहाराः कामाक्षिदुत्कटाः" रामा० । मदोत्कटः । "शुक्लोक्षिसंयोगे यो भवेद्दोष उत्कटः" सुश्रु० "कितवा यानि दीव्यन्तः प्रलपन्त्युत्कटा इव" भा० स०६३अ० । ७विषमे त्रि० उत्कटागमनम् "कांश्चित्तु कृटजानान्तु विटपेषूत्कटानिव" भा०व०१५६अ० । ८सैन्हीलतायाम् स्त्री ।

उत्कण्ठ पु० उद्गतः कण्ठं पादोबल । "नारीपादौ च हस्तेन धारयेद्वलके पुनः । स्तनापितकरः कामी बन्धश्चोत्कण्ठसंज्ञितः" इति रत्यङ्के बन्धभेदे उद्गतःकण्ठो यस्य । २उद्ग्रीवे त्रि० । "रथस्थनोत्कण्ठसृगः" रघुः ।

उत्कण्ठा स्त्री०उद्+कठि-अ । इष्टलाभाय कालासहनरूपे १औत्सुक्ये २चिन्तायाञ्च । "वासस्यद्य मकुन्तलेति हृदयं संस्मृत्य सोत्कण्ठया" शकु० । "उत्कण्ठायां हृदि न कुरुते कारणानां सहस्रम्" पदाङ्कदू० "त्वामुत्कण्ठा विरचित-

पदम्" केकोत्कण्ठा भवनशिखिनः" मेघदू०।

उत्कण्ठित त्रि० उत्कण्ठा जाताऽस्य तारकादि० इतच्। १उत्कण्ठायुक्ते २नायिकाभेदे स्त्री। "साक्षेपाक्षुद्रतमविरतोत्कण्ठमुत्कण्ठितेन" मेघदू०। नायिकाभेदस्तु "आगन्तुं कृतचित्तोऽपि दैवान्नायाति यत्प्रियः। तदनागमदुःखेन विरहोत्कण्ठिता तु सा" सा०द० उक्तः। "उत्कण्ठिताऽसि तरले! न हि नहि सखि! पिच्छिलः पन्थाः सा०द०।

उत्कता स्त्री उत्कं तनोति तन–ड। गजपिप्पल्याम् शब्दच० उत्कस्य भावः तल्। २ उत्सुकतायाम्।

उत्कन्धर त्रि० उन्नतः कन्धरोऽस्य प्रा०व० वा नतलोपः। उन्नतग्रीवे "उत्कन्धरं दारुकदत्युवाच" माघः।

उत्कम्प पु० उत्कृष्टः कम्पः प्रा०त०। १ कामादिजनिते कम्पने। "सोत्कम्पानि प्रियसहचरीसम्भ्रमालिङ्गितानि" माघः। भावे ल्युट्। उत्कम्पनमप्यत्र न०। व्याधिर्जरा-"दिवोदाद्यैर्भूमीच्छोत्कम्पनादिकृत्" शैवभवस्योत्कम्पनादयः" इति च सा०द०। उत्कम्पते अच्। २उत्कम्पान्विते त्रि०। "विस्मयोत्कम्पच्छदया नाम चक्रुर्मरुद्वध्वः" आ०प० ३० अ०। णिनि। उत्कम्पिन् स्त्रियां ङीप्। उत्कम्पान्विते, उत्कम्पयति णिजन्तात् णिनि उत्कम्पकारके च "किमिदं हृदयोत्कम्पि मनोमम विषीदति" रामा०।

उत्कर पु० उद्+कृ–अप्। १धान्यादीनां राशीकरणे २ प्रसारणे, ३ हस्तापसारणे ४ हस्तपदादिविक्षेपे ५ समूहे च। "हस्तापसारोत्करयुतं कलुषं विषसंयुतम्" सुश्रु०। "केशरोत्करसंमिश्रमशोकानामिवोत्करम्" भा०व० १११५०। कर्म्मणि अप्। ६ उत्कीर्य्यमाणे धूल्यादौ "अथ खनति प्राज्ञस्तत्करमित्किरति" शत०ब्रा० २,६,१,६,। उत्कीर्य्यतेऽत्र आधारे अप्। पांश्वादेरुच्चेपाधारे गर्त्तादौ, "चत्वालोत्करावन्तरेण सञ्चरः" कात्या० १,२,४२, सञ्चरोमार्गः चत्वालोगर्त्तः उत्करस्तूच्चेपणगर्त्तस्तयोरन्तराले विहितकार्य्यार्थिं सञ्चारमार्गः। "प्रणीतोत्करावशिष्टेषु" कात्या० १,२,४२,।

उत्करादि पु० चतुर्य्याम् "उत्करादिभ्यश्च" पा०विहितछप्रत्ययनिमित्ते शब्दगणे स च गणः "उत्कर संफल शर्कर पिप्पल पिप्पलीमूल अश्मन् सुवर्ण खलाजिन तिक कितव अणक लेवण पिचुक अवत्य काय क्षुद्र भस्त्रा शाल जम्बा अजिर चर्म्मन् उत्कोच घास्त खदिर शूर्पणाय स्रावणाय लेवाकव हस्त उच्च शाक पलाश विजिगीषा अनेक आतप फल सम्भर अर्क गर्त्त अग्नि वैराणक इङ्गार अरण्य निधान पर्ण नीचायक शंकर अवरोहित चार विशाल वेत्र अरीहण खण्ड वातागर मन्त्रणार्ह इन्द्रदत्त नितान्ताऽत्त आर्द्रदत्त"। ऊ उत्करीय तत्सन्निहितदेशादौ त्रि०।

उत्कर्ण त्रि० उन्नतःकर्णो यस्य यस्मिन् वा प्रा०व० वा नतलोपः। श्रुतकर्णोत्तोलने "उत्कर्णमुद्धाहितकन्धरेण" माघः।

उत्कर्त्तन न० उत्+कृत–ल्युट्। १ छेदने २ उत्पाटने "दंशस्योत्कर्त्तनं कुर्यादल्पव्ययसुखस्य च" सुश्रु० उत्कर्त्तनञ्च सूढगर्भचिकित्सोपायः। सुश्रुते दर्शितः यथा। "उत्कर्षणापकर्षणस्थानापवर्त्तनोत्कर्त्तनभेदनच्छेदनपीडनजृम्भणदारणानि"। उत्कर्त्तनकर्म्मयोग्यता च शुष्कफलालाबुकालिन्दकतुम्बीसुरकर्कारुकप्रभृतिषु च्छेद्यविशेषान् दर्शयेदुत्कर्त्तनपरिकर्त्तनानि चोपदिशेत्" सुश्रु० उक्तवस्तुषु उपरिशस्त्रचालने तदीयोपरिस्थ शूकमात्रखण्डनं न त्वक्खण्डनं यथाभवति एवं गर्भरक्षणेन उपरितनवस्तुमात्रच्छेदनं यत्तदुत्कर्त्तनमिति शिवार्कसङ्क्रमिति तात्पर्य्यम्। २ उत्पाट्यच्छेदने च।

उत्कर्ष पु० उद्+कृष–घञ्। १प्राशस्त्ये २अतिशये ३स्वकालात् परकालकर्त्तव्यतायाम्। यथा पतितमासिकानां स्वकाले दैवादकरणे मृतसजातीयपरमासीयतिथौ करणम् "एकोद्दिष्टे तु संप्राप्ते यदि विघ्नं प्रजायते। मासेऽन्यस्मिन् तिथौ तस्मिन् तदा दद्यात् विचक्षणः" इति स्मृतौ-तथा विधानात्तस्य तथात्वम्। "पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः" रघुः। स्त्रीणाञ्च उत्कर्षः भर्त्तृगुणेनैव "यादृग्गुणेन भर्त्रा स्त्री संयुज्यते यथाविधि। तादृग्गुणा सा भवति समुद्रेणेव निम्नगा। अतश्चाम्बा वशिष्ठेन संयुक्ताऽधमयोनिजा। शारङ्गी मन्दपालेन जगामाभ्यर्हणीयताम्। एताश्चान्याश्च लोकेऽस्मिन्नपकृष्टप्रसूतयः। उत्कर्षं योषितः प्राप्ताः स्वैः स्वैर्भर्तृगुणैः शुभैः" मनुः। "उत्तमैरुत्तमैर्नित्यं संबन्धानाचरेत् सह। निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत्" मनुः।

उत्कर्षः निश्चिततयाऽस्त्यस्य अच्। ४उत्कर्षनिमित्ते त्रि० "निश्चिद्भवत्यं जैह्म्यमुत्कर्षं च वचोऽनृतम्। रत्नखलामुखास्वादः सुरापाणसमानि तु" या०स्मृ०। उत्कर्षमुत्कर्षनिमित्तं राजकुलादावचतुर्वेद एव चतुर्वेदोक्तम्" इत्यनृतभाषणम्" मिता०। उत्कृष्यते अपकृष्टे श्रोतुर्गुणविशेषेण विभज्यत इति व्युत्पत्त्या गुणविशेषद्वारैव

अपकृष्टात् विभजनम्। स च स्वस्वजातिषु उत्तमगुणेनैव। तत्र विप्राणां विनयविद्यादिना, राज्ञां शौर्य्यवीर्य्यादिना, वैश्यानां धनादिना, शूद्राणां नम्रतादिना। एवमन्यत्रापि यथायथमूह्यम्। द्वयोर्मध्ये एकस्योत्कर्षेऽर्थे तरप् विद्वत्तरः शूरतरः बहूनां मध्ये तु तमप्। विद्वत्तमः शूरतमः इत्यादि। "उत्कर्षे हेतवः प्रोक्ता गुणालङ्काररीतयः" सा०द०। "उत्तरोत्तरमुत्कर्षो वस्तुनः सार उच्यते" सा०द०। "यथा वर्णानामुत्कर्षापकर्षकृतेन संयोगविशेषेण" सुश्रु० भावे ल्युट्। उत्कर्षणम्यत्र न०। उत्कृष्यते कर्षणि घञ्। ५उत्कर्षान्विते। उद्गत उत्कर्षः। ६उत्पाद्यकर्षणे उद्गते पु० "सन्धानमुत्कर्षमिव व्युदस्य" माघः। ल्युट्। उत्कर्षणमयत्र न०। "स्फाटिकं स्थलमासाद्य जलमित्यभिशङ्कया। वस्त्रस्योत्कर्षणं राजा कृतवान् बुद्धिमोहितः" भा०स० ४६अ०।

उत्कर्षक त्रि० उत्कर्षयति उत्+कृष-णिच् ण्वुल्। १उत्कर्षाधायके "काव्यस्योत्कर्षका उच्यन्ते" सा०द० उद्+कृष-ण्वुल्। उत्पाद्य २कर्षणकारिणि। [त्कर्षे।

उत्कर्षित त्रि० उत्कर्षोजातोऽस्य तारका० इतच्। जातो-

उत्कर्षिन् त्रि० उत्कर्षति उत्क्षिप्य कर्षति। २उत्क्षिप्यकर्षके उद्धारके "अयं स रशनोत्कर्षी पीनस्तनविमर्दनः" सा०द० इतम्। २उत्कर्षान्विते च। स्त्रियामुभयतो ङीप्।

उत्कल पु० "जगन्नाथप्रान्तदेश उत्कलः परिकीर्त्तितः" इत्युक्ते १उड्रदेशस्थे (उड़िसा) इति ख्याते देशभेदे। स च देशः कूर्म्मविभागे प्राच्यतया दृ०स०उक्तः तत्र उड्रशब्दे उक्तम्। अन्यदेशभेदेन च तस्य दाक्षिणात्यत्वमिति भेदः "उत्कलादेशितपथः कलिङ्गाभिमुखं ययौ" रघुः। ४सुद्युम्नपुत्रे राजभेदे। "मनोर्वैवस्वतः पुत्रस्त्वमेव च भविष्यसि। सुद्युम्न इति विख्यातस्त्रिषु लोकेषु विश्रुतः" इत्युपक्रम्य "सुद्युम्नस्य च दायादास्त्रयः परमधार्मिकाः। उत्कलश्च गयश्चैव विनताश्च भारत!। उत्कलस्योत्कला राजन्! विनताश्च पश्चिमा। दिक् पूर्व्वामभरतश्रेष्ठ गयस्य तु गया पुरी" हरिवं० १० अ० इत्युक्तेश्च तस्य उत्कला ख्या पुरी आसीत् तत्संबन्धित्वाच्च तद्देशस्योत्कलत्वम्। उत्कलोऽभिजनोऽस्य अण्। औत्कल तद्देशाभिजने तद्देशानां राजा अण्। औत्कल तद्देशानां राजनि। उभयत्र बहुषु अणो लुक्। "उत्कला मेकलाः पौण्ड्राः कलिङ्गाश्चैव संयुगे" भा०औ० ४अ०। उत्कं सन् लाति ला+क। २व्याधे, ३भारवाहके च शब्दमा०। ४ध्रुवपुत्रभेदे पु०। "प्रजापतेर्दुहितरं शिशुमारस्य वै ध्रुवः। उपयेमे भ्रमिं नाम तत्सुतौ कल्पवत्सरौ। इडायामपि भार्य्यायां वायोः पुत्र्यां महाबलः!। पुत्रसूत्फलनामानं योषिद्रत्नमजीजनत्" भाग० ४स्क०१०अ०। पञ्चगौडमध्ये ५विप्रभेदे च। "सारस्वताः कान्यकुब्जाः गौडमैथिलकोत्कलाः"।

उत्कलिका स्त्री उद्-कल-बुन्। १उत्कण्ठायाम्, कामादिजातायां २त्रुटौ च। ३तरङ्गे हला० "वनावलीरुत्कलिकासहस्रप्रतिक्षणोत्कूलितशैवलाभाः" माघः। ४कलिकायां कोरके ५हेलायाञ्च हेमच०।

उत्कलिकाप्राय न० "भवेदुत्कलिकाप्रायं समासाद्य दृढाक्षरम्"। छ०म० उक्ते गद्यभेदे

उत्कलित त्रि० क्त उद्+कल-क्त। उद्गतिते

उत्कषण न० उद्+कष-ल्युट्। कर्षणे। "सद्यःसीरोत्कषणसुरभिक्षेत्रमारुह्य मालम्" मेघदू०।

उत्काका स्त्री उत्केवाकति अक-अच्। प्रतिवर्षंप्रसूतायां गवि शब्दचि० तु उत्कारेति शब्दमाह।

उत्काकुद् त्रि० उद्गतं काकुदमस्य "उद्विभ्यां काकुदस्य" पा० अन्त्यलोपः समा०। उद्गततालुके।

उत्कार पु० उद्+कृ-"कृ धान्ये" पा० घञ्। धान्यादेः विक्षेपे "उत्कारेषु च धान्यानामनभीष्टपरिग्रहाः" भट्टिः।

उत्कारिका स्त्री उद्+कृ-ण्वुल्। सुश्रुतोक्ते शोफादिनिवारके पाचनभेदे यथा "व्रणस्य षष्टिरुपक्रमा भवन्ति। व्यपतर्पणमाक्षेप" इत्युपक्रम्य "निर्वापणमुत्कारिका कषाय" इत्यादीनि विभज्य उत्कारिकाविषयपाचनप्रकारोदर्शितः। "निवर्त्तते न यः शोफो विरेकान्नैरुपक्रमैः। तस्य संपाचनं कुर्य्यात् समाहृल्लौषधानि तु। दधितक्कासुराशुक्त धान्याम्लैर्योजितानि तु। स्निग्धानि लवणीकृत्य पचेदुत्कारिकां शुभाम्"। "क्षैक्षिकेषु च बीजेषु पचेदुत्कोरिकां शुभाम्"। "क्षैक्षिकफलसारोत्कारिका वा"। "क्षुद्रौभावितास्तत्कारिकां दापयेत्" इति च सुश्रु०।

उत्कास पु० उत्कमस्यति अस-अण् उप०स०। ऋषिभेदे तस्य गोत्रापत्यम् इञ्। औत्कासि तद्गोत्रापत्ये बहुषु तु अस्त्रियां तस्य लुक्। उत्कासाः। अस्यते क्षिप्यतेऽनेन अस करणे घञ् आसः ऊर्द्ध्वं क्षेप्तव्यस्य आसः। २ऊर्द्ध्वगतक्षेपोत्पादकरोगभेदे च। स च अन्तःस्थितकफादेरूर्द्ध्ववायुना उत्क्षेपसाधनं रोगः खनामख्यातः।

उत्कासिका उत्कमूर्द्धजलमस्यति अस-ण्वुल्। अर्द्धजीर्ण-जेपके रोगभेदे।

उत्कासन न० उत् ऊर्द्धस्थस्य कस्य आसनं क्षेपणम् अस+णिच्-ल्युट्। अन्तःस्थकफरूपस्य कस्य ऊर्द्धदेशेन निस्सारणरूपे व्यापारे। "आहारशेषभक्षे ग्लपीनाणुशस्त्रानि त्रसनोत्कासनप्रधमनैर्निर्हरेत्"। "सन्विगतः पीड्यमानो न प्रवर्त्तत आकुञ्चनप्रसारणोन्मनविनमनप्रधावनोत्कासनप्रशाहणैश्च स्रवति" सुश्रु०। (कासीकरान)

उत्किर त्रि० उद्-कृ कर्त्तरि ग। उत्क्षेपके। "पुष्परेणुकिरैर्वातैः" रघुः "निनाय सात्यन्तहिमोत्किरानिलाः। "आशुतारक्षीरमन्दारकुसुमोत्किरवीचिषु" कुमा० "शाखिभिः कुसुमोत्किरैः" भट्टिः

उत्कीर्ण त्रि० उद्+कृ-क्त। १उल्लिखिते, २कृतवेधे च "मणौ वज्रसमुत्कीर्णे" रघुः। ३अर्द्धक्षिप्ते च "रजोभिस्तुरगोत्कीर्णैः" रघुः। ४लिखिते "उत्कीर्णापि विप्रलभते" काद०।

उत्कीर्त्तन न० उच्चैः कीर्त्तनम्। देवनामादेः उच्चैः कथने।

उत्कीर्त्तित त्रि० उद्+कीर्त्त-क्त। उच्चैः कथिते। [हारा०।

उत्कुट न० कुट-सङ्घाते क उद्गतंकुटो यत्र। उत्तानशयने

उत्कुण त्रि० उत्तोल्य कुण्यते हिंस्यते कुण-हिंसने अद० चुरा० कर्म्मणि अच्। उत्तोल्य हिंस्ये (उकुण) ख्याते केशकीटे हेमच०।

उत्कूट पु० उद्गतं कूटमस्य। ऋते हारा०।

उत्कूल त्रि० उत्क्रान्तः कूलात् निरा०स०। १उत्क्रान्तकूले नदादौ। कूलमुद्गतः अत्या०स०। २कूलप्राप्ते। तत्करोतीत्यर्थे निचि कर्म्मणि क्त। उत्कूलित। कूलं प्रापिते त्रि०। "प्रतिस्रोतःकूलितगैवलाभाः" माघः।

उत्कृति स्त्री षड्विंशत्यक्षरपादके छन्दोभेदे। "उक्तात्युक्ते" ल्युपक्रम्य "विकृतिः सङ्कृतिश्चैव तथातिकृतिरुत्कृतिः" छ०र०

उत्कृत्य अव्य० उद्+कृत-ल्यप्। १उत्कर्त्तनं कृत्वेत्यर्थे। "उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधेत्यादि" मालती०। ऋदुपधत्वात् कर्म्मणि क्यप्। २उत्कर्त्तनीये छेदनीये त्रि०

उत्कृष्ट त्रि० उद्+कृष-क्त। १प्रगते २उत्तमे ३उत्कर्षान्विते "सङ्कासनमभिप्रेत्य मुत्कृष्टस्यापकृष्टजः" "वसनस्य दशा त्याज्या स्फुटयोत्कृष्टवेदने" "कन्यां भजन्योमुत्कृष्टं न किञ्चिदपि दापयेत्" "बीजस्य चैव योन्याश्च बीजमुत्कृष्टमुच्यते" इति च मनुः। ४कर्षणयुक्ते क्षेत्रादौ च। अतः अतिशये तरप् तमप् च उत्कृष्टतरः उत्कृष्टतमः।

उत्कृष्टभूम पु० उत्कृष्टा भूमिर्यत्र बा० अच् समा०। प्रशस्तभूमौ देशे जटा० अभिधानात् पुंस्त्वम्।

उत्कोच पुंस्त्री उद्गतः कोचः सङ्कोचः कार्य्यप्रतिबन्धोद्येन। अन्याय्यकर्म्मकरणार्थं स्वार्थप्रतिबन्धनिरासाय वादिप्रतिवादिभ्यां दाने (घुस्) इति ख्याते। "तयोत्कोचपरीक्षासव्यायामक्लमयोगतः" अद्भुतगणनायां नारदः। "उत्कोचजीविनो द्रव्यहीनान् कृत्वा प्रवासयेत्" या० स्मृ०। उत्कोचदत्तस्यादत्ततैव यथा "दत्तं सप्तविधं प्रोक्तमदत्तं षोड़शात्मकमिति" सामान्यतोऽभिधाय "अदत्तं तु भयक्रोधेत्यादिना षोड़शविधादत्तपदर्थान्नारदेन दर्शिताः अदत्तशब्दे तत्रोदाहृतम् ॥१२५६ द्रष्टव्यम् "उत्कोचेन कार्य्यप्रतिबन्धनिरासार्थमधिकृतेभ्योदत्तम्" मिता०

उत्कोचक पु० उत्कोचे उत्कोचद्रव्यग्रहणे प्रस्तुतः बा० कन्। १उत्कोचग्राहिणि "उत्कोचकान्वोपधिका वञ्चकाः कितवास्तथा" इत्यपक्रम्य "एवमादीन् विजानीयात् प्रकाशाञ्छौचवञ्चकान्" मनुः। २धौम्यान्यभान्तिके तीर्थभेदे "यवीयान् देवलस्त्वेष वने भ्राता तपस्यति। धौम्य उत्कोचके तीर्थे तं शुश्रूषध्वं यदीच्छत"। "तत्र उत्कोचकं तीर्थं गत्वा धौम्याश्रमं ततः" भा०आ०१८३अ०।

उत्क्रम पु० उद्+क्रम-घञ् अवद्विः। व्युत्क्रमे, विपरीतक्रमे "क्रमोत्क्रमाभ्यामेतस्मादिमान्" ज्यो०त०। "अधोत्क्रमायानुपक्रमाय शतमानं भवति" शत०ब्रा० १३, ४,२,१०। उद्+क्रम-घञ्। २उत्क्रान्तौ ऊर्द्ध गतौ।

उत्क्रमण न० उद्+क्रम-ल्युट्। १अपसरणे "सोमवदुत्क्रमण मपगमनञ्च" काल्या०१८,५,१७। २देहात् जीवादेरपसरणे "शतं चैका च हृदयस्य नाड्यस्तासां मूर्द्धानमभि निस्सृतैका। तयोर्द्ध मायन्नमृतत्वमेति विष्वङ्न्या उत्क्रमणे भवन्ति" कठोप० अस्य भाष्यं यथा "तत्र शतञ्च शतसङ्ख्याका एका च सुषुम्णा नाम पुरुषस्य हृदयाद्विनिःसृता नाड्यः शिरास्तासां मध्ये मूर्द्धानं भित्त्वाऽभिनिःसृता निर्गता एका सुषुम्णा नाम तयाऽन्तकाले हृदये आत्मानं स्वोकृत्य योजयेत्। तया नाड्योर्द्ध मुपरि आयन् गच्छन्नादित्यद्वारेणामृततत्वमनश्वरधर्म्मत्वमाप्नोतिक्रम्। "आमूर्द्धभ्यः स्थानमस्तत्व हि भाष्यते" इति स्मृतेः। ब्रह्मणा वा सह कालान्तरेण मुक्तिमस्तत्वमेति भुक्त्वा भोगानतुपमान् ब्रह्मलोकगतान्, विष्वङ् नानाविधगतयोऽन्या नाड्य उत्क्रमणे निमित्तं भवन्ति संसारप्रतिपत्त्यर्था एव भवन्ती-

स्वर्थः"। तत्रोत्क्रमणप्रकारः बृ० उ० ६,२,४,ब्रा० दर्शितो यथा "तद्यथाऽनः सुसमाहितमुत्सर्ज्जेद्यावदेवमेवायं शारीर आत्मा प्राज्ञेनात्मनाध्यारूढमुत्सर्ज्जयाति यत्रैतदूर्ध्वोच्छ्वासी भवति" ३५क०। स यत्रायमणिमानं न्येति जरया वोपतपता वाणिमानं निगच्छति तद्यथाम्रं वोदुम्बरं वा पिप्पलं वा बन्धनात्प्रमुच्यत एवमेवायं पुरुष एभ्योऽङ्गेभ्यः प्रमुच्य पुनः प्रतिन्यायं प्रतियोन्यादवति प्राणायैव" ३६क०। "तद्यथा राजानं प्रियाः सन्तसुपायः प्रत्येनसः सृतयामणोऽभिसमावन्त्येवमेवैसमात्मानमन्तकाले सर्व्वे प्राणा अभिसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवति" ३८क०। "स यत्रायमात्माऽबल्यं न्येत्य सम्मोहमिव न्येत्यथैनमेते प्राणा अभिसमायन्ति स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति स यत्रैष चाक्षुषः पुरुषः पराङ् पर्य्यावर्त्तते तथा रूपज्ञो भवति ?। एकीभवति न पश्यतीत्याहुरेकीभवति न जिघ्रतीत्याहुरेकीभवति न रसयत इत्याहुरेकीभवति न वदतीत्याहुरेकीभवति न शृणोतीत्याहुरेकीभवति न मनुत इत्याहुरेकीभवति न स्पृशतीत्याहुरेकीभवति न विजानातीत्याहुस्तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति, चक्षुषो वा मूर्द्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यस्तसुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्व्वे प्राणा अनूत्क्रामन्ति सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति। तं विद्याकर्म्मणी समन्वारभेते पूर्व्वप्रज्ञा च" ४ब्रा०१क०।

अत्र शाङ्०भाष्यं यथा। "इत आरभ्यास्य संसारोवर्ण्यते। यथायमात्मा स्वप्नान्माङ्गुष्ठान्तमागत एवमयमस्माद्देहाद्देहान्तरं प्रतिप्रस्थित इत्याहात्र दृष्टान्तः। तत्तत्र यथा लोके अनः शकटं सुसमाहितं सुष्ठु भग्नं वा समाहितं भाण्डोपस्करणेनोलूखलमुसलस्यूर्णपिठरादिनाद्यन्तेन च सम्यक्त्वं सम्भारेणाक्रान्तमित्यर्थः। तथा भाराक्रान्तं सदुत्सर्जच्छब्दं कुर्व्वद्यथा यायाद्गच्छेत् शाकटिकेनाधिष्ठितं सत्। एवमेव यथोक्तदृष्टान्तोऽयं शारीरः शरीरे भवः। कोऽसौ आत्मा लिङ्गोपाधिर्य्यः स्वप्नवृद्धान्ताविव जन्ममरणाभ्यां पाप्मसंसर्गवियोगलक्षणाभ्यामिहलोकपरलोकावनुसञ्चरति यस्योत्क्रमणमनु प्राणाद्युत्क्रमणम्। स प्राज्ञेन परेणात्मना स्वयंज्योतिःस्वभावेनान्वारूढोऽधिष्ठितोऽवभासमानस्तथा चोक्तम्" "आत्मनैवायं ज्योतिषाऽस्ते पल्ययते" इति। उत्सर्जन् याति तत्र चैतन्यात्मज्योतिषा भास्ये लिङ्गे प्राणप्रधाने गच्छति सति तदुपाधिरप्यात्मा गच्छतीव। तथा च स्मृत्यन्तरम् "कस्मिन्नुहमित्यादि" "ध्यायतीवेति" च। अत एवोक्तं प्राज्ञेनात्मनान्वारूढ इत्यन्यथा प्राज्ञेनैकीभूतः शकटवत्कथमुत्सर्जन् याति तेन लिङ्गोपाधिरात्मा उत्सर्जन्मर्म्मसु निःसृत्यमानेषु दुःखवेदनार्त्तः शब्दं कुर्व्वन् याति गच्छति। तत्कस्मिन्काले? इत्युच्यते। यत्रैतद्भवत्येतदिति क्रियाविशेषणमूर्द्ध्वोच्छ्वासो यदोर्द्ध्वोच्छ्वासित्वमस्य भवतीत्यर्थः। दह्यमानस्याप्यनुवदनं वैराग्यहेतोः। इदम्भूतः कष्टः खल्वयं संसारो येनोत्क्रान्तिकाले मर्म्मस्वत्सृज्यमानेषु स्फुटितोपो दुःखवेदनार्त्तस्य पुरुषार्थसाधनप्रतिपत्तौ चासामर्थ्यं परवशीकृतचित्तस्य। तस्माद्यावदियमवस्था नागमिष्यति तावदेव पुरुषार्थसाधनकर्त्तव्यतायामप्रमत्ता भवतेत्याह कारुण्याच्छ्रुतिः ३५क०। तत्रोर्द्ध्वोच्छ्वासित्वं कस्मिन्काले ? किं निमित्तं ? कथं ? निमित्तं ? वा स्यादित्येतदुच्यते। सोऽयं प्राज्ञतः शिरःपाण्यादिमान् पिण्डो यत्र यस्मिन् काले जरयाऽणिमानमणोर्भावमणुत्वं कार्श्यमित्यर्थः नि एति निगच्छति। किं निमित्तं जरया वा स्वयमेव कालपक्वफलवज्जीर्णः कार्श्यं गच्छति उपतपतीत्युपतपत् ज्वरादिरोगयुक्तो नोपतपता वा उपतप्यमानो हि रोगेण विषमाग्नितयाऽन्नं भुक्तं न जरयति ततोऽन्नरसेनानुपचीयमानः पिण्डः कार्श्यमापद्यते तदुच्यते उपतपता वेति वाणिमानं निगच्छति। यदाल्पत्वं कार्श्यं प्रतिपन्नो ज्वरादिनिमित्तैस्तदोर्द्ध्वोच्छ्वासी भवति। यदोर्द्ध्वोच्छ्वासी तदा भृताहितसम्भारशकटवदुत्सर्जन् याति जराभिभवो रोगादिपीडनं कार्श्यापत्तिश्च शरीरवतोऽवश्यं भाविन एतेऽनर्था इति वैराग्यायेदमुच्यते। यदाऽसावुत्सर्जन् याति तदा कथं शरीरं विसृजतीति दृष्टान्त उच्यते। तत्तत्र यथाम्रं वा फलमुदुम्बरं वा फलं पिप्पलं वा फलं विपच्यमानेकदृष्टान्तोपादानं मरणस्थानियतनिमित्ततास्थापनार्थम्। अनियतानि हि मरणस्य निमित्तान्यसङ्ख्यातानि च। एतदपि वैराग्यार्थमेव। यस्मादयमनेकमरणनिमित्तयोगस्तस्मात्सर्वदा मृत्योरासन्नवर्त्तत इति। बन्धनाद्बध्यते येन स्नेहेन स बन्धनकारणो रसो यस्मिन् वा बध्यत इति स्नेहमेवोच्यते बन्धनम्। तस्माद्रसात् स्नेहाद्बन्धनात्प्रमुच्यते वातादनेकनिमित्तम्, एवमेवायं पुरुषो लिङ्गात्मा लिङ्गोपाधिः एभ्योऽङ्गेभ्यश्चक्षुरादिदेहावयवेभ्यः समभ्युच्यते समग्रैर्लिङ्गैर्येन प्रमुच्यते न सुषुप्तगमनकाल इव प्राणेन रक्षन्। किन्तर्हि सह वायुनोपसंहृत्य, पुनः प्रति-

न्यायं पुनःशब्दात्पूर्वमथयं देहाद्देहान्तरमसङ्गतवान् यथा खप्नबुद्धान्तौ पुनः पुनर्गच्छति तथा पुनः प्रतिन्यायं प्रतिगमनं यथागतमित्यर्थः। प्रतियोनि योनिं योनिं प्रति कर्म्मश्रुतादिवशादाद्रवति। किमर्थम्? प्राणायैव प्राणव्यूहायैवेत्यर्थः। सप्राण एव हि गच्छति ततः प्राणायैवेति विशेषणमनर्थकं प्राणव्यूहाय हि गमनं देहाद्देहान्तरं प्रति। तेन तस्य कर्मफलभोगार्थसिद्धिः। न प्राणसत्तामात्रेण तस्मात्तदर्थायं युक्तं विशेषणं प्राणव्यूहायेति"२६।"तमेवं जिगमिषुं के सह गच्छन्ति? येवा गच्छन्ति ते किं तत्क्रियाप्रबुद्धा? आहोस्वित्तत्कर्म्मवशात्स्वयमेव गच्छन्ति परलौकिकशरीरकर्तृणीव भूतानीत्युच्यते दृष्टान्तः। तद्यथा राजानं प्रयियासन्तं प्रकर्षेण यातुमिच्छन्तमुग्राः प्रत्येनसः सूतग्रामण्यस्त्र एवाभिसमायन्त्याभिसख्येन समायान्त्येकीभावेन तमभिमुखा आयान्त्यनात्मज्ञा एव राज्ञा केवलतज्जिगमिषाभिज्ञाः। एवमेवेममात्मानं भोक्तारमन्तकाले मरणकाले सर्व्वे प्राणा वागादयोऽभिसमायन्ति यत्रैतदूर्द्धोच्छ्वासो भवतीति व्याख्यातम्" २८।

"स यत्रायमात्मेति संसारोपवर्णनं प्रस्तुतम्। तत्रायं पुरुष एभ्योऽङ्गेभ्यः सम्मोचणम् । तत् सम्मोचणं कस्मिन् काले कथं वेति? सविस्तरं संसरणं वर्णयितव्यमित्यारभ्यते। सोऽयमात्मा प्रस्तुतो यत्र यस्मिन् काले अवल्यमवलभावं नि एत्य गत्वा यद्देहस्य दौर्बल्यं तदात्मन एव दौर्बल्यमित्युपचर्य्यते अवल्यं नेत्येति। न ह्यसौ स्वतोऽमूर्त्तत्वादवलभावं गच्छति तथा सम्मोहमिव संमूढता संमोहोविवेकाभावः संमोहमिव नि एति निगच्छति न चास्य स्वतः संमोहोऽसंमोहो वास्ति नित्यचैतन्यज्योतिःस्वभावत्वात् तेनेवशब्दः संमोहमिव न्येतीति। उत्क्रान्तिकाले हि करणोपसंहारनिमित्तो व्याकुलीभाव आत्मन इव लक्ष्यते लौकिकैः तथा च वक्तारो भवन्ति संमूढः संमूढोयमिति। अथ वोभयत्रेवशब्दप्रयोगो योज्योऽवल्यमिव न्येतीत्यसम्मोहमिव न्येतीति। उभयस्य परोपाधिनिमित्तत्वाविशेषात् समानकर्तृकनिर्देशाच्च। अथास्मिन् काले एते प्राणा वागादय एनमात्मानमभिसमायन्ति तदास्य शारीरस्यात्मनो ऽङ्गेभ्यः सम्मोचणम्। कथं पुनः सम्मोचणं, केन वा प्रकारेणात्मानमभिसमायन्ति? इत्युच्यते। स आत्मा एतान्तेजोमात्रान्तेजसो मात्रान्तेजोमात्रान्तेजोऽवयवा रूपादिप्रकाशकत्वाच्चक्षुरादीनि करणानीत्यर्थः। ता एताः सम्मभ्याददानः सम्यङ्निर्लेपेनाभ्याददानः आभिमुख्येनाददानः संहरमाणस्तत्स्थापेक्षया विशेषणं समिति न तु स्वप्ने निर्लेपेन समभ्यादानमस्ति त्वादानमात्रम्। "गृहीता वाग् गृहीतञ्चक्षुरस्य लोकस्य सर्वावतो मात्रामुपादाय शुक्रमादायेत्यादि" वाक्येभ्यः हृदयमेव पुण्डरीकाकाशमन्वक्रामत्यन्वव गच्छति हृदयेऽभिव्यक्तविज्ञानो भवतीत्यर्थो बुद्ध्यादिविज्ञेषोपसंहारे सति। न हि तस्य स्वतश्चलनं विज्ञेषोपसंहारादिक्रिया वा "ध्यायतीव लेलायतीव" इत्युक्तत्वात्। बुद्ध्याद्युपाधिद्वारैव हि सर्वक्रियाध्यारोप्यते तस्मिन्। कदा पुनस्तस्य तेजोमात्राभ्यादानमित्युच्यते। स यत्रैष चक्षुषि भवत्यात्मा चक्षुषः आदित्यांशो भोक्तुः कर्म्मणा प्रयुक्तो यावद्देहधारणं तावच्चक्षुषोऽनुग्रहं कुर्वन् वर्त्तते। मरणकाले तस्य चक्षुषोऽनुग्रहं परित्यजति स्वमादित्यात्मानं प्रतिपद्यते। तदेतदुक्तम् "यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति, वातं प्राणश्चक्षुरादित्यमित्यादि"। पुनर्देहग्रहणकाले संश्रयिष्यति तथा स्वप्नतः प्रबुध्यतश्च। तदेतदाह। चाक्षुषः पुरुषो यत्र यस्मिन् काले पराङ् पर्य्यावर्त्तते परि समन्तात् पराङ् व्यावर्त्तत इति यथाऽस्मिन् काले ऽरूपज्ञो भवति समूर्द्धनि रूपं न जानाति। तदायमात्मा चक्षुरादितेजोमात्राः समभ्याददानो भवति स्वप्नक् इव। सएकीभवति करणजातं स्वेन लिङ्गात्मना। पार्श्वस्था आहुर्न पश्यतीति। तथा घ्राणदेवतानिवृत्तौ घ्राणमेकीभवति लिङ्गात्मना। तदा न जिघ्रतीत्याहुः। समानमन्यत्। जिह्वायां सोमो वरुणो वा देवता तन्निवृत्त्यपेक्षया न रसयत इत्याहुः। तथा न वदति न गृह्णीति न भनक्ति न स्पृशति न विजानातीत्याहुस्तदोपलक्ष्यते देवतानिवृत्तिः करणानाञ्च हृदय एकीभावः तत्र हृदयमुपसंहृत्य तेषु योऽस्यव्यापारः स कथ्यते। तस्य च एतस्य प्रकृतस्य हृदयस्य हृदयच्छिद्रस्येत्येतत्। अथं नाडीमुखं निर्गमनद्वारं प्रद्योतते स्वप्रकाश इव स्वेन भासा तेजोमात्रादानजतेन स्वेनैव ज्योतिषाऽऽत्मनैव च तेनात्मज्योतिः प्रद्योतेन हृदयाग्रेणैष एष आत्मा विज्ञानमयो लिङ्गोपाधिर्निर्गच्छति निष्क्रामति। तथाऽऽथर्वणे "कस्मिन् नहमुत्क्रान्त उत्क्रान्तो भविष्यामि? कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति? स प्राणमसृजतेति" तत्र चात्मचैतन्यज्योतिः सर्वदाभिव्यक्ततरं तदुपाधिद्वारा ज्ञानक्रिया जन्ममरणगमनागमनादिसर्वविक्रियालक्षणः संव्यवहारस्तदात्मकं हि द्वादशविधं करणम्। बुद्ध्यादि

तत्सूक्ष्मं तज्जीवनं सोऽन्तरात्मा जगतस्तस्थुषश्च। तेन प्रद्योतेन हृदयाग्रप्रकाशेन निःक्रममाणः। केन मार्गेण निष्क्रामतीत्युच्यते। चक्षुषो वाऽऽदित्यलोकप्राप्तिनिमित्तं ज्ञानं कर्म वा यदि स्यात्। मूर्ध्नो वा ब्रह्मलोकप्राप्तिनिमित्तं चेत्। अन्येभ्यो वा शरीरदेशेभ्यः शरीरावयवेभ्यो यथाकर्म यथाश्रुतमिति तं विज्ञानात्मानमुत्क्रामन्तं परलोकाय प्रस्थितं परलोकायोद्भूताकूतमित्यर्थः। सर्वाधिकारस्थानीयोराज्ञ इवानूत्क्रामति तस्मिन् प्राण अनूत्क्रामन्तं वागादयः सर्वे प्राणा अनूत्क्रामन्ति। यथाप्रधानान्वाचिख्यासेयम् न तु क्रमेण सार्थवदुगमनमिह विवक्षितम्। एष आत्मा सविज्ञानो भवति स्वप्नइव विशेषविज्ञानवान् भवति कर्मवशादस्वतन्त्रः। सातन्त्र्येण हि सविज्ञानत्वे सर्वैः कृतकृत्यः स्यात् नैव तु तल्लभ्यते अतएवाह व्यासः "सदा तद्भावभावितः" इति कर्मणानुद्भाव्यमानेनान्तःकरणवृत्तिविशेषाश्रितवासनात्मकविशेषविज्ञानेन सर्वोलोक एतस्मिन् काले सविज्ञानोभवति सविज्ञानमेव च गन्तव्यमन्वक्कामत्यनुगच्छति विशेषविज्ञानोद्भासितमेवेत्यर्थः। तस्मात्तत्काले स्वातन्त्र्यार्थं योगधर्मानुसेवनं परिसंख्यानाभ्यासश्च विशिष्टपुरुषोपपत्तये श्रद्दधानैः परलोकार्थिभिरप्रमत्तैः कर्त्तव्य इति सर्वशास्त्राणां यत्नतोविधेयोऽर्थो दुश्चरिताद्धोपरमस्तम् न हि तत्काले शक्यते किञ्चित्संपादयितुम् कर्मणानीयमानस्य स्वातन्त्र्याभावात् "पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन" इत्युक्तेः एतस्य ह्यनर्थस्योपशमोपायविधानाय सर्वशाखोपनिषदः प्रवृत्ताः नहि तद्विहितोपायानुसेवनं सत्यात्यन्तिकस्यानर्थस्योपशमोपायोऽस्ति तस्मादत्रैवोपनिषद्विहितोपाये यत्नपरैर्भवितव्यमित्येव प्रकरणार्थः प्रकटवत्संभृतसम्भार उपसर्जं दुयादीत्युक्तं किंपुनस्तस्य परलोकाय प्रस्थितस्य पथ्यदनं शाकटिकसम्भारस्थानीयं गत्वा वा परलोकं यद्भुङ्क्ते शरीरादारभ्यकञ्च यत्तत् किम् ? इत्युच्यते। तं परलोकाय गच्छन्तमात्मानं विद्या कर्मणी विद्या च कर्म च विद्याकर्मणी विद्या सर्वप्रकारा विहिता प्रतिषिद्धा अविहिता ऽप्रतिषिद्धा च तथा कर्म विहितं प्रतिषिद्धं चाविहितमप्रतिषिद्धञ्च समन्वारभेते सम्यगन्वारभेते अन्वालभेते अनुगच्छतः पूर्वप्रज्ञा च पूर्वानुभूतविषया प्रज्ञा पूर्वप्रज्ञातीतकर्मफलानुभववासनेत्यर्थः। सा च वासनाऽ पूर्वकर्मारम्भे कर्मविपाके चाङ्गं भवति। तेनासावध्यन्वारभते नहि तया वासनया विना केनचित् कर्म कर्तुं फलं चोपभोक्तुं शक्यते नह्यनभ्यस्ते विषये कौशलमिन्द्रियाणां भवति, पूर्वानुभववासना प्रवृत्तानां त्विन्द्रियाणामिहाभ्यासमन्तरेण कौशलमुपपद्यते, दृश्यते च केषाञ्चित् कास्तुचित् क्रियासु चित्र कर्मादिलक्षणासु विनैवेहाभ्यासेन जन्मत एव कौशलम् कास्तुचिदत्यन्तसौकर्य्ययुक्तास्वप्यकौशलम् केषाञ्चित्, तथा विषयोपभोगेषु स्वभावत एव केषाञ्चित्कौशलाकौशले दृश्येते तच्चैतत् सर्वं पूर्वप्रज्ञोद्भवानुद्भवनिमित्तं, तेन पूर्वप्रज्ञया विना कर्मणि वा फलोपभोगे वा न कस्यचित् प्रवृत्तिरुपपद्यते, तस्मादेतत्त्रयं शाकटिकभारस्थानीयं परलोकपथ्यदनं विद्याकर्मपूर्वप्रज्ञाख्यम्। यस्माद्विद्याकर्मणी पूर्वप्रज्ञा च देहान्तरप्रतिपत्तुर्भोगसाधनं तस्माद्विद्याकर्मादि शुभमेव समाचरेत्। यथा दृष्टदेहसंयोगभोगोपभोगौ ४ब्रा० स्यातामिति प्रकरणार्थः"१क०।

शा०सू० भाष्ययोश्च उत्क्रमणप्रकारः प्रपञ्चितो यथा "वाङ्मनसि दर्शनाच्छब्दाच्च" सू०। "अथापरासु विद्यासु फलप्राप्तये देवयानं पन्थानमतारविष्यन् प्रथमं तावद्यथाशास्त्रमुत्क्रान्तिक्रममाचष्टे समाना हि विद्वदविदुषोरुत्क्रान्तिरिति वक्ष्यति। अस्ति प्रायणविषया श्रुतिः "अस्य सोम्य! पुरुषस्य प्रयतोवाङ् मनसि सम्पद्यते, मनः प्राणे, प्राणस्तेजसि, तेजः परस्यान्देवतायामिति" किमिह वाच एव वृत्तिमत्त्वात् मनसि सम्पत्तिरुच्यते उतवाग्वृत्तेरिति ? विषयः। तत्र वाङ्मनसि सम्पद्यत इति प्राप्तं तथा हि श्रुतिरनुगृहीता भवति। इतरथालक्षणा स्यात् श्रुतिलक्षणाविषये च श्रुतिर्न्याय्या न लक्षणा तस्माद्वाच एवायं मनसि प्रविलय इत्येवं प्राप्ते ब्रूमः। वाग्वृत्तिर्मनसि सम्पद्यत इति। कथं वाग्वृत्तिरिति व्याख्यायते यावता वाङ्मनसीत्येवाचार्यः पठति। सत्यमेतत् पठिष्यति तु "परस्यात् अविभागोवचनादिति"। तस्मादत्र उक्त्युपक्रमबलं विवक्षितमिति गम्यते। तत्त्वप्रलयविवक्षायान्तु सर्वत्रैवाविभागसाम्यात् किं परत्रैव विशिष्यादविभाग इति। तस्मादत्र उक्त्युपसंहारविवक्षायां वाग्वृत्तिः पूर्वमुपसंहियते मनोवृत्तावस्थियामित्यर्थः। कस्मात् ? दर्शनात् दृश्यते हि वाग्वृत्तेः पूर्वोपसंहारोमनोवृत्तौ विद्यमानायाम्। न तु वाच एव वृत्तिमत्त्वमनुपसंहारः केनचिदपि द्रष्टुं शक्यते। ननु श्रुतिसामर्थ्याद्वाच एवायं मनस्यप्यय इत्युक्तेत्याह अतत्प्रकृतित्वात् यस्य हि यत उत्पत्तिरस्य

तत्र त्रयोनाड्योमूर्द्धव शरावस्थ । न च मनसो वागुत्पद्यत इति किञ्चन प्रमाणमस्ति । इत्युद्धवाभिप्रायौ त्व प्रकृतिसमाश्रयावपि दृश्येते । पार्थिवेभ्योऽन्नेभ्यस्तैजसस्याग्नेर्वृत्तिरुद्भवति अप्सु चोपशाम्यति । कथं तर्ह्यस्मिन् पक्षे वाङ्मनसि सम्पद्यत इति शब्दः, इत्यत आह शब्दाच्चेति । शब्दोऽप्यस्मिन् पक्षेऽवकल्पते वृत्तिवृत्तिमतोरभेदोपचारादित्यर्थः" भा० । "अतएव च सर्वाण्यनु" सू० । "तस्माद्वपयान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि सम्पद्यमानैः" इत्यत्राविशेषेण सर्वेषामेवेन्द्रियाणां मनसि सम्पत्तिः श्रूयते तत्राप्यत एव वाच एव चक्षुरादीनामपि वृत्तिके मनस्य वस्थिते वृत्तिनोपदर्शनात्तत्त्वप्रलयासम्भवाच्छब्दोपपत्तेश्च वृत्तिद्वारेणैव सर्वाणीन्द्रियाणि मनोऽनुवर्त्तन्ते । सर्वेषाङ्करणानां मनस्युपसंहराविशेषे सति वाचः पृथग्ग्रहणं वाङ्मनसि सम्पद्यत इत्युदाहरणानुरोधेन" भा० । "तन्मनः प्राण उत्तरात्" सू० । "समधिगतमेतत् वाङ्मनसि सम्पद्यत इत्यत्र वृत्तिसम्पत्तिर्विवक्षितेति । अत्र यदुत्तरं वाक्यम् "मनः प्राणवृति" किमत्रापि वृत्तिसम्पत्तिरेव विवक्षिता उत वृत्तिमत्सम्पत्तिरिति ? विचिकित्सायां वृत्तिमत्सम्पत्तिरेवेति श्रुत्यनुग्रहात्तत्प्रकृतितोपपत्तेश्च तथा हि "अन्नमयं हि सौम्य ! मन" आपोमयः प्राण" इत्यत्र अन्नयोनि मन आमनन्ति अप्योनिञ्च प्राणम् । आपश्चान्नमश्नतेति श्रुतेः' "अतश्च यन्मनः प्राणे प्रलीयते अन्नमेव तदप्सु प्रलीयते-अन्नं हि मनः, आपश्च प्राणः, प्रकृतिविकारभेदादित्येवं प्राप्ते ब्रूमः तदप्यात्मश्रोत्रवाङ्नेत्रवृत्तिमनोवृत्तिद्वारेणैव प्राणे प्रलीयत इत्युत्तराद्वाक्यादवगन्तव्यम् । तथा हि सुषुप्तोर्मूर्च्छायाञ्च प्राणवृत्तौ परिस्पन्दात्मिकायामवस्थितायां मनोवृत्तीनामुपशमो दृश्यते । न च मनसः स्वरूपाप्ययः प्राणे सम्भवति अतत्प्रकृतित्वात् । ननु दर्शितं मनसः प्रकृतित्वम् । नैतत्सारं न ह्योदनेन प्राणात्मकेन तत्प्रकृतित्वेन मनः प्राणे सम्पत्तुमर्हति । एवमपि ह्यद्भ्यो मनः सम्पद्येत अप्सु चान्नं अप्स्वेव च प्राणः । नह्येतस्मिन्नपि पक्षे प्राणभावपरिणताभ्योऽद्भ्योमनोजायत इति किञ्चन प्रमाणमस्ति । तस्मान्न मनसः प्राणे स्वरूपाप्ययः । इत्यप्यये तु शब्दोऽवकल्पते वृत्तिवृत्तिमतोरभेदोपचारादिति दर्शितम्" भा० । "सोऽध्यक्षे तदुपगमादिभ्यः" सू० । "स्तिमेतदस्य यतोनोत्पत्तिश्रुस्य तस्मिन् वृत्तिलयो न स्वरूपलय इति । इदमिदानीं प्राणस्तेजसीत्यत्र चिन्त्यते किं यथाश्रुति प्राणस्य तेजस्येव वृत्त्युपसंहारः किं वा देहेन्द्रियपङ्क्तराध्यक्षे जीवे ? इति । तत्र श्रुतेरनतिशङ्कत्वात् प्राणस्य तेजस्येव सम्पत्तिः स्यात् अश्रुतकल्पनाया अन्याय्यत्वादित्येवं प्राप्ते प्रतिपद्यते सोऽध्यक्ष इति । स प्रकृतः प्राणोऽध्यक्षेऽविद्याकर्म्मपूर्व्वप्रज्ञोपाधिके विज्ञानात्मन्यवतिष्ठते तत्प्रधाना प्राणवृत्तिर्भवतीत्यर्थः । कुतः ? तदुपगमादिभ्यः । "एवमेवेममात्मानमन्तकाले सर्व्वे प्राणा अभिसमायन्ति यत्रैतदूर्द्ध्वोच्छ्वासी भवतीति" हि श्रुत्यन्तरम् अध्यक्षोपगामिनः सर्व्वान् प्राणानविशेषेण दर्शयति । विशेषेणैव" तमुत्क्रामन्तं प्राणोऽनूत्क्रामतीति" पञ्चवृत्तेः प्राणस्याध्यक्षानुगामितां दर्शयति तदनुवृत्तिताञ्चेतरेषाम्, "प्राणमनूत्क्रामन्तं सर्व्वे प्राणा अनूत्क्रामन्तीति" । "सविज्ञानोभवतीति" चाध्यक्षस्यान्तर्विज्ञानवत्त्वप्रदर्शनेन तस्मिन्नपीतकरणग्रामस्य प्राणस्यावस्थानं गमयति । ननु "प्राणस्तेजसीति" श्रूयते कथं प्राणोऽध्यक्ष इत्यधिकारापः क्रियते । नैष दोषः अध्यक्षप्रधानत्वादुत्क्रमणादिव्यवहारस्य श्रुत्यन्तरगतस्यापि च विशेषस्यापेक्षणीयत्वात् । कथं तर्हि "प्राणस्तेजसीति" श्रुतिरित्यत आह" भा० । "भूतेषु तच्छ्रुतेः" सू० । "स प्राणसंयुक्तोऽध्यक्षः तेजःसहचरितेषु भूतेषु देहबीजभूतेषु सूक्ष्मेष्ववतिष्ठत इत्यवगन्तव्यम् "प्राणस्तेजसि" इत्यतः श्रुतेः । ननु चेयं श्रुतिः प्राणस्य तेजसि स्थितिं दर्शयति न प्राणसंयुक्तस्याध्यक्षस्य । नैषः दोषः "सोऽध्यक्षः" इत्यध्यक्षस्याभ्यन्तराल उपसंख्यातत्वात् । योऽपि हि क्षुण्णान्मथुरां गत्वा मथुरायाः पाटलिपुत्रं व्रजति सोऽपि क्षुण्णात् पाटलिपुत्रं यातीति शक्यते वक्तुम् । तस्मात् प्राणस्तेजसीति प्राणसंयुक्तस्याध्यक्षस्यैवैतत्तेजःसहचरितेषु भूतेष्ववस्थानम् । कथं तेजःसहचरितेषु भूतेष्वित्युच्यते यावता तेजः श्रूयते "प्राणस्तेजसि" इत्यत आह" भा० । "नैकस्मिन् दर्शयतोहि" सू० । "नैकस्मिन्नेव तेजसि शरीरान्तरप्रयाणवेलायां जीवोऽवतिष्ठते कार्य्यस्य शरीरस्यानेकात्मकत्वदर्शनात् । दर्शयत-श्चैतमर्थं प्रज्ञाप्रतिवचने" "आपः पुरुषवचस" इति । तद्व्याख्यातं "त्र्यात्मकत्वात्तु भूयस्त्वात्" इत्यत्र । श्रुतिस्मृती चैतमर्थं दर्शयतः । श्रुतिः "पृथिवीमय आपोमयस्तेजोमयो वायुमय आकाशमय" इत्याद्या । स्मृतिरपि "अव्यक्तो-मात्रा ऽविनाशिन्यो दशार्द्धानान्तु याः स्मृताः । ताभिः सार्द्धमिदं सर्व्वं सम्भवत्यनुपूर्व्वशः" इत्याद्या । ननु चोपसं-

क्षुनेषु करणेषु शरीरान्तरप्राप्तावेलायां क्वायन्दा पुरुषो भवतीत्युपक्रम्य क्वत्यन्तरं कर्माश्रयतां निरूपयति "तौ च यदूचतुः कर्म चैव तदूचतुः अथ च यत् प्रशशंसतुः कर्म चैव तत् प्रशशंसतुरिति"। तत्रोच्यते । तत्र कर्मप्रयुक्तस्य यच्छातित्यक्षसंज्ञकस्येन्द्रियविषयात्मकस्य बन्धनस्य प्रवृत्तिरिति कर्माश्रयतोक्ता इह पुनर्भूतोपादानाद्देहान्तरोत्पत्तिरिति भूताश्रयत्वमुक्तम् । प्रशंसाशब्दादपि तत्र प्राधान्यमात्रं कर्मणः प्रदर्शितं न त्वाश्रयान्तरं निवारितम् तस्मादविरोधः" भा०।"समाना चा सृत्युपक्रमादमृतत्वञ्चानुपोष्य" सू० "सेयमुत्क्रान्तिः किं विदुदविदुषोः समाना ? किं वा विशेषवतीति ? विशयानानां विशेषवतीति तावत् प्राप्तम् । भूताश्रयविशिष्टा ह्येषा पुनर्भवाय भूतान्याश्रीयन्ते न च विदुषः पुनर्भवः सम्भवति" "अमृतत्वं हि विदानभश्नुते" इति श्रुतेः । तस्मादविदुष एवैषोत्क्रान्तिः । ननु विद्याप्रकरणे समाम्नानाद्विदुष एवैषा भवेत्, न स्वापादिवद्यथाप्राप्तानुकीर्त्तनात् । तथा हि "यत्रैतत्पुरुषः स्वपिति नाम अभिश्रियति नाम पिपासति नामेति" च सर्वप्राणिसाधारणा एव स्वापाद्योनुकीर्त्यन्ते विद्याप्रकरणेऽपि प्रतिपिपादयिषितवस्तुप्रतिपादनानुगुण्येन, न तु विदुषोविशेषवत्तोविधित्सयान्ते एवमियमप्युत्क्रान्तिर्मुहाजनगतैवानुकीर्त्यते यस्यां परस्यां देवतायां पुरुषस्य प्रयत्तस्तेजः सम्पद्यते, "स आत्मा तत्त्वमसीति" प्रतिपादयितुम् । प्रतिपिद्धा चैषा विदुषः । तस्मादविदुष एवैषेत्येवं प्राप्ते ब्रूमः । समानैषोत्क्रान्तिः वाङ्मनसोत्याद्या विदद्विदुषोरा सृत्युपक्रमाद्वक्तुमर्हति अविशेषश्रवणात् । अविद्वान् देहयोनीनि भूतसूक्ष्माण्याश्रित्य कर्मप्रयुक्तोदेहपरिग्रहमनुभवितुं संसरति विद्वांस्तु ज्ञानप्रकाशितं मोक्षं नाडीद्वारमाश्रयते तदेतदा सृत्युपक्रमादिलुक्तम् । नन्वात्मतत्त्वं विदुषा प्राप्यं न च देहेन्द्रियान्तरायत्तं तत्र कुतो भूताश्रयत्वं सृत्युपक्रमो वेति" । अत्रोच्यते । अनुपोष्य चेदम् अदग्धाज्ञानमविद्यादीनू क्लेशानपरविद्यासामर्थ्यादापेक्षिकमसत्त्वं प्राप्नुते । सम्भवति तत्र सृत्युपक्रमोभूताश्रयत्वञ्च । न हि निराश्रयाणां प्राणानां गतिरुपपद्यते । तस्मात्तदोषः" भा० । "तदाऽपीतेः संसारव्यपदेशात्"सू०।"तेजः परस्यां देवतायामिति अत्र प्रकरणसामर्थ्यात्तद्यथा प्रकृतं तेजः साध्यत्वं संप्राप्तं सकरणग्रामं भूतान्तरसहितं प्रयतः पुंसः परस्यां देवतायां सम्पद्यत इत्येतदुक्तं भवति । कीदृशीपुनरियं सम्पत्तिः स्यादिति चिन्त्यते । तत्रात्यन्तिकएवतावत् स्वरूपप्रविलय इति प्राप्तं तत्प्रकृतित्वोपपत्तेः । सर्व्वस्य हि जन्ममतोवस्तुजातस्य प्रकृतिः परा देवतेति प्रतिज्ञापितम् । तस्मादात्यन्तिकोऽयमविभागापत्तिः इत्येवं प्राप्ते ब्रूमः । तत्तेजआदिभूतसूक्ष्मं श्रोत्रादिकरणाश्रयभूतमाऽपीतेरा संसारमोक्षात् सम्यग्ज्ञाननिमित्तादवतिष्ठते । "योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः । स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्" इत्यादिसंसारव्यपदेशात् । अन्यथा हि सर्वः प्रायणसमय एवोपाधिप्रलयसमवादत्यन्तं ब्रह्म सम्पद्येत तत्र विधिशास्त्रं चानर्थकं स्यादविद्याशास्त्रञ्च । मिथ्याज्ञाननिमित्तश्च बन्धो न सम्यग्ज्ञानादृते विश्लेषितुमर्हति। तस्मात्तत्प्रकृतित्वेऽपि सुषुप्तिप्रलयवद्बीजभावावशेषैवैषा सत्सम्पत्तिः" भा० । "सूक्ष्मं प्रमाणतश्च तथोपलब्धेः" सू० । "तत्रेतरभूतसहितं तेजोजीवस्याश्रयाच्छरीरात् प्रवसत आश्रयभूतं स्वरूपतः परिमाणतश्च सूक्ष्मं भवितुमर्हति । तथा हि नाडीनिष्क्रमणश्रवणादिभ्योऽस्य सौक्ष्म्यमुपलभ्यते । तत्र तनुत्वात् संस्कारोपपत्तिः स्वच्छत्वाच्चाप्रतीघातोपपत्तिः अतएव च देहाद्बहिर्गच्छत्पार्श्वस्थैर्नोपलभ्यते" भा० । "नोपमर्देनातः" सू० । "अतएव च सूक्ष्मत्वाच्चास्य स्थूलशरीरस्योपमर्देन दाहादिनिमित्तेनेतरत् सूक्ष्मशरीरमुपसृज्यते" भा० । "अस्यैव चोपपत्तेरेष ऊष्मा" सू० । "अस्यैव च सूक्ष्मशरीरस्यैष ऊष्मावमेतस्मिन् जीवच्छरीरे संस्पर्शेनोष्मिणमात्रं विजानाति । तथा हि मृतावस्थायामवस्थितेऽपि देहे विद्यमानेषुपि च रूपादिषु देहगुणेषु नोष्मोपलभ्यते जीवदवस्थायामेव तूपलभ्यते इत्यत उपपद्यते प्रसिद्धशरीरव्यतिरिक्तरूपाश्रय एवैष ऊष्मेति । तथा च श्रुतिः "उष्ण एव जीविष्यंश्शीतो मरिष्यन्निति" भा०। "प्रतिषेधादिति चेन्न शारीरात्" सू०।"अमृतत्वञ्चानुपोष्येत्यतोविशेषणादात्यन्तिकेऽमृतत्वे गत्युत्क्रान्त्योरभावोऽभ्युपगतः तत्रापि केनचित् कारणेनोत्क्रान्तिमाशङ्क्य प्रतिषेधति । "अथाकामयमानोयोऽकामो निष्काम आप्तकाम आत्मकामोन तस्य प्राणाउत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येतीति"। अतः परविद्याविषयात् प्रतिषेधात् न परब्रह्मविदोदेहात् प्राणानामुत्क्रान्तिरस्तीति चेन्नेत्युच्यते । यतः शारीरादात्मन एव उत्क्रान्तिप्रतिषेधः प्राणानां, न शरीरात् । कथमवगम्यते । "न

तस्मात् प्राणाउत्क्रामन्तीति"शाखान्तरे पञ्चमीप्रयोगात्। सम्बन्धसामान्यविषया हि षष्ठी शाखान्तरगतया पञ्चम्या सम्बन्धविशेषे व्यवस्थाप्यते। तस्मादिति च प्राधान्यादभ्युदयनिःश्रेयसाधिकृतो देही सम्बध्यते न देहः। न तस्मादुच्चिक्रमिषोर्जीवात् प्राणाउत्क्रामन्ति सहैव तेन भवन्तीत्यर्थः। सप्राणस्य प्रवसतो भवत्युत्क्रान्तिर्देहादित्येवं प्राप्ते प्रत्युच्यते"भा०।"स्पष्टोह्येकेषाम्"सू०।"नैतदस्ति यदुक्तं परब्रह्मविदोऽपि देहादस्त्युत्क्रान्तिः प्रतिषेधस्य देहापादानत्वादिति। यतोदेहापादान एवोत्क्रान्तिप्रतिषेध एकेषां समाम्नातॄणां स्पष्ट उपलभ्यते। तथाह्यार्त्तभागप्रश्ने "यत्रायं पुरुषोम्रियते तदस्मात् प्राणाः उत्क्रामन्त्याहोस्विन्न ?" इत्यत्र"नेतिहोवाच याज्ञवल्क्यः" इत्यनुत्क्रान्तिपक्षं परिस्पष्टं न तर्ह्ययमनुत्क्रान्तेषु प्राणेषु स्वत इत्यस्यामाशङ्कायाम्" "अत्रैव समवलीयन्ते" इति प्रविलयं प्राणानां प्रतिपाद्य तत्सिद्धये "सउच्छ्वयत्याध्मायत्याध्मातोस्मृतः शेते" इति सशब्दपराहतस्य प्रकृतस्योत्क्रान्त्यवधेरुच्छ्वयनादीनि समामनति"देहस्य चैतानि स्पर्शे देहिनः"। तत्सामान्यात् "न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते"इत्यत्राप्यभेदोपचारेण देहापादानस्यैवोत्क्रमणस्य प्रतिषेधः; यद्यपि प्राधान्यं देहिन इति व्याख्येयम्। येषां पञ्चमीपाठः येषान्तु षष्ठीपाठस्तेषां विद्वत्सम्बन्धिन्युत्क्रान्तिः प्रतिषिध्यत इति प्राप्तोत्क्रान्तिप्रतिषेधार्थत्वादस्य वाक्यस्य देहापादनेव सा प्रतिसिद्धा भवति देहादुत्क्रान्तिः प्राप्ता न देहिनः। अपि च"चक्षुषो वा मूर्द्धोवान्येभ्यो वा शरीरदेशेभ्यस्तदुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति"इत्येवमविद्वद्विषये सप्रपञ्चमुत्क्रमणं संसारगमनञ्च दर्शयित्वा"इति तु कामयमान"इत्युपसंहृत्याविद्वत्कथाम्"अथाकामयमान"इतिव्यपदिश्य विदुषं, यदि तद्विषयेऽप्युत्क्रान्तिमेव प्रापयेदसमञ्जस एव व्यपदेशःस्यात्। तस्मादविद्वद्विषये प्राप्तयोर्गत्युत्क्रान्त्योर्विद्वद्विषये प्रतिषेध इत्येवमेव व्याख्येयं व्यपदेशार्थत्वाय। न च ब्रह्मविदः सर्वगतब्रह्मात्मभूतस्य प्रलीनकाम कर्मणश्च उत्क्रान्तिर्गतिर्वोपपद्यते निमित्ताभावात्। "अत्र ब्रह्म समश्नुत" इति चैवं जातीयकाः श्रुतयोगत्युत्क्रान्त्योरभावं द्योतयन्ति" भा०। "स्मर्यते च" सू०। स्मर्यतेऽपि च महाभारते गत्युत्क्रान्त्योरभावः। "सर्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः। देवा अपि च मार्गेषु मुह्यन्तेऽस्य पदैषिण"इति। ननु गतिरपि ब्रह्मविदः स्मर्यते"शुकः किल वैयासकिर्मुमुक्षुरादित्यमण्डलमभिप्रतस्थे पित्रा त्वनुगम्याहूतोभो इति प्रतिशुश्रावेति"। न सशरीरस्यैवायं योगबलेन विशिष्टदेशप्राप्तिपूर्वकः शरीरोत्सर्ग इति द्रष्टव्यं सर्वभूतदृश्यत्वाद्युपन्यासात्। नह्यशरीरं गच्छन्तं सर्वभूतानि द्रष्टुं शक्नुयुः। तथा च तत्रैवोपसंहृतम्। "शुकस्तु मारुताक्षीघ्रां गतिं कृत्वान्तरिक्षगः। दर्शयित्वा प्रभावं स्वं सर्वभूतगतोऽभवदिति। तस्मादभावः परब्रह्मविदोगत्युत्क्रान्त्योः। गतिस्तुतीनान्तु विषयमुपरिष्टाद्व्याख्यास्यामः"भा०"तानि परे तथाह्याह"सू०।"तानि पुनः प्राणशब्दोदितानीन्द्रियाणि भूतानि च परब्रह्मविदस्तस्मिन्नेव परस्मिन्नात्मनि प्रलीयन्ते। कस्मात् ? तथाह्याह श्रुतिः "एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्तीति"। ननु "गताःकलाः पञ्चदश प्रतिष्ठा" इति विद्वद्विषयैवापरा श्रुतिः परस्मादात्मनोऽन्यत्रापि कलानां प्रलयमाहस्म। न सा खलु व्यवहारापेक्षा पार्थिवाद्याः कलाः पृथिव्यादीरेव स्वप्रकृतीरपियन्तीति। इतरा तु विद्वत्प्रतिपत्त्यपेक्षा कृत्स्नं कलाजातं परब्रह्मविदो ब्रह्मैव सम्पद्यत इति तस्माददोषः" भा० "अविभागो वचनात्" सू०। "स पुनर्विदुषः कलाप्रलयः किमितरेषामिव सावशेषो भवत्याहोस्विन्निरवशेष ? इति। तत्र प्रलयसामान्याच्छ्रुत्यवशेषताप्रसक्तौ ब्रवीति अविभागापत्तिरिति। कुतः? वचनात्। तथाहि कलाप्रलयमुक्त्वा श्रुतिः"भिद्येते चास्य नामरूपे पुरुष इत्येवं प्रोच्यते सएषोऽकलोऽमृतो भवतीति"। अविद्यानिमित्तानाञ्च कलानां न विद्यानिमित्ते प्रलये सावशेषतोपपत्तिः। तस्मादविभाग एवेति"भा०।"तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्सत्त्वेसगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया" सू०। "समाप्ता प्रासङ्गिकी परविद्यागता चिन्ता। संप्रति त्वपराविद्याविषयामेव चिन्तामनुवर्त्तयति। समानाऽऽसृत्युपक्रमा चाविद्वदविदुषोरुत्क्रान्तिरित्युक्तं तमिदानीं सृत्युपक्रमं दर्शयति। तस्योपसंहृतवागादिकलाएसोऽस्मिन्क्रमिषतो विज्ञानान्मन ओक आयतनं हृदयम्। "सएतस्मात्जीवघनात्। समभ्याददानो हृदयमेवान्ववक्रामतीति" श्रुतेः। तदग्रज्वलनम्। तत्पूर्विका चक्षुरादिस्थानापादाना चोत्क्रान्तिः श्रूयते "तस्य वैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति "चक्षुषो वा मूर्द्धोवान्येभ्यो वा शरीरदेशेभ्य" इति। सा किंविशेषेष्वेव विद्वदविदुषोर्भवति ? अथास्ति कश्चिद्वि-

दुषो विशेषनियम: ? इति विचिकित्सायां श्रुत्यविशेषाद नियमप्राप्तावाचष्टे । समाने पि हि विद्हदविदुषोर्हृदया यप्रद्योतने तत्प्रकाशितद्वारत्वे च मूर्द्धस्थानादेव विद्वान्विष्क्रामति स्थानान्तरेभ्यस्त्वितरे । कुतः ? विद्यासामर्थ्यात् । यदि विद्वानपीतरवत् यतः कुतश्चिद्देहदेशादुत्क्रामेन्नैवोत्क्रान्तं लोकं लभेत तत्वानर्थिकैव विद्या स्यात् । तच्छेषगत्यनुस्मृतियोगाच्च विद्याशेषभूता च मूर्द्धन्यनाडीसम्बन्धा गतिरनुशीलयितव्या विद्या विशेषेषु विहिता तामभ्यस्य स तयैव प्रतिपद्यत इति युक्तम् । तस्माद्दयालयेन ब्रह्मणा स्वपासितेनानुग्रहीतस्तद्भावमापन्नोविद्वान् मूर्द्धन्यर्यैव शतादधिकया शतादतिरिक्तया एकयातमया नाड्या निष्क्रामति इतराभिरितरे । तथा हि हार्दविद्यां प्रकृत्य समामनन्ति "शतञ्चैका च हृदयस्य नाड्यस्तासां मूर्द्धानमभिनिःसृतैका । तयोर्द्धमायन्नमृतत्वमेति विष्वङ्न्या उत्क्रमणे भवन्तीति" भा० । "रश्म्यनुसारी" सू० । "अस्ति दहरोऽस्मिन्नन्तराकाश" इति हार्दविद्या "अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म" इत्यपक्रम्य विहिता । तत्प्रक्रियायाम् अथ एतासां हृदयस्य नाड्य इत्युपक्रम्य सप्तपञ्च नाडीरश्मिसम्बन्धमुक्त्वोक्तम् । "अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्द्ध्वमाक्रमत" इति । पुनश्चोक्तम् "तयोर्द्धमायन्नमृतत्वमेतीति" । तस्माच्छताधिकया नाड्या निष्क्रमन् रश्म्यनुसारी निष्क्रामतीति गम्यते । तत्किमविशेषेणैवाहनि रात्रौ वा म्रियमाणस्य रश्म्यनुसारित्वमाहोस्विदहन्येवेति संशये सति श्रुत्यविशेषश्रवणादविशेषेणैव तावद्रश्म्यनुसारीति प्रतिपाद्यते" भा० । "निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च" सू० । "अस्यहनि नाडीरश्मिसम्बन्ध इत्यहनि मृतस्य स्याद्रश्म्यनुसारित्वं रात्रौ तु प्रेतस्य न स्यात् नाडीरश्मिसम्बन्धविच्छेदादिति चेन्न । नाडीरश्मिसम्बन्धस्य यावद्देहभावित्वात् यावद्देहभावी हि शिराकिरणसम्बन्धः । दर्शयति चैतमर्थं श्रुतिः "अथोत्तरेणादित्यात् प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते ता अमुष्मिन्नादित्ये सृप्ताः" इति । निदाघसमये च निशायामपि किरणानुवृत्तिरुपलभ्यते प्रतापादिकार्यदर्शनात् । लोकानुवृत्तेस्तु दुर्लक्ष्यत्वान्नरजनीषु गैरिकेष्विव दिनेषु । "अहरेवैतद्रात्रौ विदधातीति" चैतदेव दर्शयति । यदि च रात्रौ प्रेतोविनैव रश्म्यनुसारेणोर्द्ध्वमाक्रमेत रश्म्यनुसारानर्थक्यं भवेत् । न ह्येतद्विधिष्वाभिधीयते योदिवा प्रैति स रश्मीनमेक्ष्योर्द्धमाक्रमते यस्तु रात्रौ सोऽनमेक्ष्यैवेति" । अथ तु विद्वानपि रात्रिप्रायणाऽपराधमात्रेण नोर्द्धमाक्रमेत प्राक्चिकफला विद्योति अप्रवृत्तिरेव तस्यां स्यात् स्वल्पकालानियमात् । अथापि रात्रावपरतोऽहरागमप्रतीक्षेत । अहरागमेऽप्यस्य कदाचिद्दूरस्रिस्रसम्बन्धार्हं शरीरं स्यात् पावकादिसम्पर्कात् । "स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छतीति" च श्रुतिरनुदीक्षां दर्शयति । तस्मादविशेषेणैवेदं रात्रिन्दिवं रश्म्यनुसारित्वम्" भा० । "शतस्यायनेऽपि दक्षिणे" सू० । "अतएवोदीच्यानुपपत्तेः अप्राक्चिकफलत्वाच्च विद्याया अनियतकालत्वाच्च स्वल्पोदक्षिणायनेऽपि म्रियमाणो विद्वान् प्राग्वोल्वे विद्याफलम् । उत्तरायणमरणप्राग्वृत्तिप्रसिद्धेर्भीष्मस्य च प्रतीक्षादर्शनात् "आमूर्य्यमाणपक्षाद्यान् षडुदङ्डेति मासान् तानिति" च श्रुतेरपेक्षितत्वमुत्तरायणमितीमामायङ्कामनेन स्वल्पेऽपपद्यते । प्राग्वृत्तिप्रसिद्धिरविहतिषया । भीष्मस्य प्रतिपालनमाचारपरिपालनार्थं पितृप्रसादलब्धस्वच्छन्दमृत्युताख्यापनार्थञ्च । श्रुतेस्त्वर्थं वक्ष्यति आतिवाहिकस्तल्लिङ्गात्" इति । ननु च "यत्र काले त्वनावृत्तिमावृत्तिञ्चैव योगिनः । प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभेति" कालप्राधान्येनोपक्रमात्राहरादिकालविशेषः स्मृतावनावृत्तये नियतः कथं रात्रौ दक्षिणायने वा प्रयातोऽनावृत्तिं यायादिति । अत्रोच्यते भा० । "योगिनः प्रति च स्मर्यते स्मार्त्ते चैते" सू० । "योगिनः प्रति चायमहरादिकाल विनियोगोऽनावृत्तयेस्मर्यते स्मार्ते चैते योगस्मार्त्ते न श्रौते । अतोविषयभेदात् प्रमाणविशेषाच्च नास्य स्मार्त्तस्य कालविनियोगस्य श्रौतेषु विज्ञाने ध्वतारः । "अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्" । "धूमोरात्रिस्तथा कृष्णः षण्मासादक्षिणायन मिति" श्रौतावेव देवपितृयाणौ प्रत्यभिज्ञायेते स्मृतावपीति । उच्यते । "तत्काले वक्ष्यामीति स्मृतौ कालप्रतिज्ञानादिरोधसायङ्कामनेन परिहार उक्तः । यदा पुनः स्मृतावपि अग्न्याद्यादेवा एवातिवाहिका स्मर्यन्ते तदा न कश्चिद्विरोध इति भा०"

उत्क्रमणीय त्रि० उद्+क्रम-कर्मणि अनीयर् । अतिक्रमणीये "न वेदवचनात्तात ! न लोकवचनादपि । गतिरुत्क्रमणीया ते प्रयागमरणं प्रति" भा०व० ८५ अ० । उद्क्रमणस्येदम् अ । उत्क्रमणसम्बन्धिनि त्रि० ।

उत्क्रान्त त्रि० उद्+क्रम-कर्त्तरि क्त। १अतिक्रान्ते देहादेहान्तरप्राप्तौ २अपहृते मृते च। "उत्क्रान्तानामाभिधायोपरिष्टात्" माघः "उत्क्रान्तानां मृतानाम्" मल्लि०।

उत्क्रान्ति स्त्री उत्+क्रम-क्तिन्। देहादुत्क्रमणे अपसरणे च उत्क्रमणशब्दे विवृतिः।

उत्क्रोश पु० उद्+क्रुश-अच्। १कुररीपक्षिणि। अयञ्च पक्षी सुश्रु० जलचरमध्ये प्लवत्वेन संचारित्वेनोक्तः। "हंससारसक्रौञ्चेत्यादुपक्रमे "महद्गलूक्रोशकाचाञ्चेत्यानोनुक्ता "प्लवाः संचारिणः" इत्यन्तेन। "उत्क्रोशरससंसिद्धा मनल्यक्षेद्रां यवागूं पाययेत्" सुश्रु०। २उच्चैःक्रन्दिनि त्रि०। ततः चतुरर्थ्यां उत्करा० ङ। उत्क्रोशीय तत्सन्निहिते देशादौ।

उत्क्लेदिन् त्रि० उद्+क्लिद-णिच्-णिनि। जर्द्रीकृतः क्लेदकारके आर्द्रीकारके "लघु तीक्ष्णोष्णसूक्ष्मोदि सूक्ष्मं वातानुलोमनम्" सुश्रु०। स्त्रियां ङीप्।

उत्क्लेश पु० उद्+क्लिश-घञ्। जर्द्रगवायुक्ते क्लेशे स च "उत्क्लिश्यान्नं न निर्गच्छेत् प्रसेकोद्वेजनेरितम्। हृदयं पीड्यते चास्य तमुत्क्लेशं विनिर्दिशेत्" इत्युक्तलक्षणः रोगभेदः। "गुरुपाकरुदविष्मुक्तवा कफोत्क्लेशेन च" "क्लिन्नसूत्क्लेशजननम्" "हृष्णाश्लीलकफोत्क्लेशच्छर्द्विश्वासनिवारणम्" सुश्रु० घञ्। उत्क्लेशनमप्यत्र न० "दद्यादुत्क्लेशनं पूर्वम्" सुश्रु०।

उत्क्लेशक त्रि० उद्+क्लिश-णिच्-ण्वुल्। १उत्क्लेशकारके "कौण्डिल्यकः करभक इत्युपक्रमे "क्लीतः कृमिःशरारी च यश्चाप्युत्क्लेशकः स्मृतः"। एते ह्यग्निप्रकृतयश्चतुर्विंशतिरेव च" सुश्रुतोक्ते २अग्निप्रकृतिके कीटभेदे। उत्क्लिश्यति उद्+क्लिश-णिनि। ३जर्द्रगवायुक्तेउत्क्लेशकारके त्रि० स्त्रियां ङीप्। "अस्त्रीभूतं कफोत्क्लेशि न हितं तत् पिपासवे" सुश्रु०।

उत्क्षिप्त त्रि० उद्+क्षिप्-क्त। १ऊर्द्धं क्षिप्ते "क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना" "उत्क्षिप्तसिक्थैरतशतांशुकरावलम्बैः" माघः २उद्घाटिते च। (रश्मिभिः) उत्क्षिप्तगुलमैश्च तथा हृतैश्च सपताकिभिः" भा० व० १५अ० "गुरुणो यत्र स्थितेन बोधसंघेन चतुर्दिगवस्थितारिपक्षोद्दृष्टुं बाधादिना प्रहर्त्तुं च शक्यन्ते ताद्दग्भूस्थानमुत्क्षिप्तगुल्मैः परकीयगुल्मोद्घाटनकरैः" नीलक०। धुस्तूरे पु० शब्दच०। तस्य फलसेवने उन्मत्तताधायकत्वात्तथात्वम्।

उत्क्षिप्तिका स्त्री उत्क्षिप्तः धुस्तूरइव कन् स्त्रीत्वात् टापि अत इत्त्वम्। धुस्तूराकारे कर्णभूषणभेदे हेमचन्द्रः।

उत्क्षेप पु० उद्+क्षिप-घञ्। १ऊर्द्धक्षेपणे "पक्षोत्क्षेपादुपरिविसतङ्क्षणसारप्रभाणाम्" मेघ०। "पक्षोत्क्षेपात् समोदितः" सुश्रु०। कर्त्तरि अच्। २उत्क्षेपकारके त्रि०

उत्क्षेपक त्रि० उद्+क्षिप-ण्वुल्। १ऊर्द्धं प्रक्षेपके २उत्क्षिप्यापहारके चौरे च। "उत्क्षेपकग्रन्थिभेदौ करसंदंशहीनकौ। कार्य्यौ द्वितीयापराधे करपादैकहीनकौ" याo स्मo यस्माद्यौ उत्क्षिपत्यपहरतीत्युत्क्षेपकः। शस्त्रादिवद्वं खड्गादि विच्छेदकृत्य वा योपहरत्यसौ ग्रन्थिभेदः तौ यथाक्रमङ्गुष्ठेन सन्दंशसदृशेन तर्ज्जन्यङ्गुष्ठेन हीनौ कौ कार्य्यौ द्वितीयापराधे पुनः करञ्च पादञ्च करपादं तच्च तदेकञ्च करपादैकन्तद्धीनं ययोस्तत्करपादैकहीनकौकार्य्यौ। उत्क्षेपकग्रन्थिभेदकयोरेकमेकं करम्पादञ्च छिन्द्यादित्यर्थः। एतदप्युत्तमसाहसप्राप्तियोग्यद्रव्य विषयम्। "तदङ्गच्छेद इत्युक्तोदण्ड उत्तमसाहस" इति नारदवचनात्। द्वितीयापराधे तु वध एव। तथा च मनुः "अङ्गुलीं ग्रन्थिभेदस्य छेदयेत् प्रथमे पदे। द्वितीये हस्तचरणौ तृतीये वधमर्हतीति" मिता०।

उत्क्षेपण न० उद्+क्षिप-ल्युट्। १ऊर्द्धक्षेपणे। "उत्क्षेपणं तथावक्षेपणमाकुञ्चनं तथा। प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च" भाषा० "उतक्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्म्माणि" कणा० सू० "इतिरवधारणार्थः भ्रमणादेरपि गमनान्तर्गतत्वात्। अत्र च उत्क्षेपणत्वावक्षेपणत्वाकुञ्चनत्वप्रसारणत्वगमनत्वानि कर्म्मत्वसाक्षाद्व्याप्याः पञ्च जातयः। नन्वेतदनुप्रपञ्चं गमनस्य कर्म्मपर्य्यायत्वात् सर्व्वत्र गच्छतीतिबुद्धेर्दृष्टत्वादुत्क्षेपणत्वादीनां चतसृणां जातीनां परस्परात्यन्ताभावसमानाधिकरणानां सामानाधिकरण्यानानुभवात् चतस्र एव कर्म्मत्वव्याप्या जातय इति चेत् सत्यं कर्म्मपर्य्याय एव गमनं पृथगभिधानन्तु भ्रमणरेचनस्यन्दनोर्द्ध्वज्वलननमनोन्नमनादीनां भिन्नभिन्नबुद्धिव्यपदेशभाजामेकेन शब्देन सङ्ग्रहार्थं यद्वा गमनत्वमपि कर्म्मत्वव्याप्यं पञ्चमी जातिरेव तेन भ्रमणरेचनादिष्वेव गमनप्रयोगो मुख्यः उत्क्षेपणावक्षेपणादिषु यदि गमनप्रयोगस्तदा भाक्तः स्वाश्रयसंयोगविभागासमवायिकारणत्वमेव गौणमुख्यसाधारणो धर्म्मः गमनत्वजातेस्तन्निवर्तदिग्देशसंयोगविभागासमवायिकारणत्वमेव व्यङ्गकं तच्च भ्रमणादिषु सर्व्वत्रेति गमनमध्येनैव तेषां ग्रहणमिति। निष्क्र-

मणत्वप्रवेशनत्वादिका तु न जातिः एकस्मिन्नेव कर्म्मणि स्वस्माद् स्वस्मान्तरं गच्छति पुरुषे कस्यचित् द्रष्टुः प्रविशतीति प्रत्ययः कस्यचित्तु निष्क्रामतीति तत्र जातिसङ्करः स्यात् तथा भ्रमणादेरेकस्या जलप्रणाल्या निष्क्रम्यापरां प्रविशति निष्क्रामति प्रविशतीति प्रत्ययदर्शनादुपाधिसामान्यमेवैतदध्यवसेयम्। उत्क्षेपणादौ तु मुसलमुत्क्षिपाणीतीच्छाजनितेन प्रयत्नेन प्रयत्नवदात्मसंयोगादसमवायिकारणाद्धस्ते तावदुत्क्षेपणं तत उत्क्षेपणविशिष्ट हस्तनोदनादसमवायिकारणात् मुसलेऽप्युत्क्षेपणाख्यं कर्म्म युगपद्वा तत जर्द्धमुत्क्षिप्रयोर्हस्तमुसलयोरवक्षेपणेच्छाजनितप्रयत्नवदात्मसंयोगाद्धस्तनोदनाच्च युगपदेव हस्ते मुसले चावक्षेपणम् उलूखलपातानुकूलं संजायते ततो दृढतरद्रव्यसंयोगाद् यदकस्मान्मुसलस्योर्द्धगमनं भवति तत्र नेच्छा न वा प्रयत्नः कारणं किन्तु संस्कारमात्रादेव मुसलस्योत्पतनं तच्च गमनमात्रं नत्वुत्क्षेपणं, भाक्तस्तत्रोत्क्षेपणव्यवहारः एवमनुलोमप्रतिलोमवायुद्वयसङ्कटवशाद्व्योम्नस्तत्रेरिततृणपत्रनकादौ चोत्क्षेपणव्यवहारो भाक्तः। एवं स्रोतोद्वयसङ्कटवाज्जलोर्द्धगमनेऽपि। एवमुत्क्षेपणावक्षेपणव्यवहारः शरीरतदवयवतत्संयुक्तमुसलतोमरादिष्वेव मुख्यः। भवति हि हस्तमुत्क्षिपति बोमरमुत्क्षिपतीति एवमवक्षिपतीत्यपि" उपस्करः।

उत्क्षेपणञ्च औते कर्म्मणि गोघ्राणाद्योग्यदेशक्षेपणे भवति तथा हि। "मूतयोः कृत्वा वेणुयष्ट्यां वा कुमे वाऽऽसञ्ज्योभयतः स्थाणुहस्तबंशवल्मीकानामन्यतमस्मिन्नुत्क्षेपणवदासजत्येतत्ते" कात्या०५,१०,२१। "उत्क्षेपणवदिति गोरघ्राणदेशम्" कर्कः यजु० २,६१ मन्त्रव्या० "गोभिराघ्रातमशक्यत्वादिति" वेददी० तत्पदं व्याख्यात्। "अतिमात्रलोहिततनौ बाहू घटोत्क्षेपणात्" शक्र०। करणे ल्युट्। २धान्यमर्दनकाष्ठादौ मेदि० ३उदञ्चने ४गोड्डपणे च हेमच०। कर्म्मणि ल्युट्। ५व्यञ्जने न०।

उत्खचित त्रि० उद्+खच-क्त। १उद्गूथिते २रचिते च। "कुसुमोत्खचितान् बलीभृतः" रघुः। [शब्दच०।

उत्खला स्त्री उद्+खल-जन्यर्थे-अच्। सुरानामगन्धद्रव्ये

उत्खात त्रि० उद्+खन-क्त। १उन्मूलिते २उत्पाटिते "फलैः संवर्द्धयामासुरुत्खातप्रतिरोपिताः" रघुः। "रथेनानुत्खातखिन्नगतिना शक्र० भावे क्त। ३उत्खनने न०। उत्खातकेलिः।

उत्खातकेलि पु० उत्खातस्योत्खननमेव केलिः। "उत्खातकेलिः शृङ्गाद्यैर्वप्रक्रीडा निगद्यते" दत्युक्तलक्षणे हस्तिगजादेः शृङ्गादिना मृत्तिकाखननरूपक्रीडायाम्।

उत्खाय अव्य० उद्+खन-ल्यप्। उत्पाट्येत्यर्थे। "वल्कानुत्खाय तरसा" रघुः पचे उत्खन्येत्ययत्र। [अमरः।

उत्खेद पु० उद्+खिद-भावे घञ्। छेदने उद्+खद्धातौ उदा०।

उत्त त्रि० उन्द्-क्ते दने क्त वा तस्य नः। क्लिन्ने आर्द्रवस्तुनि

उत्तंस पु० उद्+तसि-अच्। १कर्णाभरणे, २शिरोभूषणे च। "नोत्तंसं क्षिपति क्षितौ श्रवणतः सा मे स्खुटेऽप्यागसि" सा०द०। अस्य कर्णभूषणवाचकत्वेऽपि कर्णपदसमभिव्याहारे भूषणमात्रपरता तत्काले कर्णस्थितत्वद्योतनार्थं वा कर्णादिशब्दप्रयोगः।

उत्तट त्रि० उत्क्रान्तं तटम् अत्या० त०। तटपर्य्यन्ताभावके "उत्तटा इव नदीरवाः स्वलीम्" रघुः।

उत्तप्त त्रि०उद्+तप-क्त। १संतप्ते २शुष्कमांसे न०भावे क्त। ३उत्तापे न०। उद्गतं तप्तं तापो यस्य ।४स्नाते त्रि०मेदि०

उत्तब्ध त्रि० उद्+स्तभ्-क्त। १ऊर्द्धस्तब्धे २ऊर्द्धावस्थिते।

उत्तम त्रि०उद्+तमप्। १उत्कृष्टे। "ज्योतिषामुत्तमोदेव! दीपोऽयं प्रतिगृह्यताम्" दीपमन्त्रः "यदस्तया हरन्नसुत्तमं तमः" माघः "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः" "यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" गीता। द्विजोत्तमः नरोत्तमः नृपोत्तम! "धर्म्मोऽधर्मविदुत्तमः" विष्णुसह०। उत्-उद्गतः अतिशये तमप्। २विष्णौ पु०। "अनादिनिधनो धाता विधाता धातुरुत्तमः" विष्णुसह०। "धातुरुत्तम इति नामैकं सर्वविशेषणं सामानाधिकरण्येन। सर्वधातुभ्यः कृत्रिव्यादिभ्य उत्कृष्टश्चिदात्मरित्यर्थः धातुर्विरिञ्चेरुत्कृष्ट इति वा। नामद्वयं वा कार्य्यकारणप्रपञ्चधारणात् धातुश्चिद्धातुः उत्तमः सर्व्वेषामुद्गतानामुद्गतत्वादुत्तमः" भा०। ३अन्ये। "उत्तमैकाभ्यां च" पा०। "उत्तमशब्दोऽन्यार्थः" सि० कौ०। उत्तानपादस्य पुत्रभेदे ४ध्रुवसत्रभ्रातरि पु० स च उत्तानपादस्य सुरुचौ भार्य्यायामुत्पन्नः। "जाये उत्तानपदस्य सुनीतिः सुरुचिस्तया। सुरुचिः प्रेयसी पत्युर्नेतरा यत् सुतो ध्रुवः। एकदा सुरुचेः पुत्रमङ्कमारोप्य लालयन्। उत्तमं नाभ्यनन्दत्त ध्रुवं राजाप्यनन्दत" भा०४स्क० ८अ०। "उत्तमस्त्वकृतोद्वाहो मृगयायां बलीयसा। हतः पुण्यजनेनाजौ तन्मातास्य गतिं

गता" भा० ४ स्क० १० अ०। प्रियव्रतस्य ५पुत्रभेदे स एव ह्रतोयमनुः यथोक्तं भाग० ८स्क० १अ०। "तृतीय उत्तमो नाम प्रियव्रतसुतोमनुः। पवनः सृञ्जयो यज्ञहोत्राद्यास्तत्सुता नृप!। वशिष्ठतनयाः सप्त ऋषयः प्रमदादयः। सत्यावेदश्रुता भद्रादेवा इन्द्रस्तु सत्यजित्। धर्म्मस्य सूनृतायान्तु भगवान् पुरुषोत्तमः। सत्यसेन इति ख्यातः जातः सत्यव्रतैः सह"। हरिवं० ७अ० तु औत्तमित्वेनायं पठितः यथा। "स्वायम्भुवोमनुस्तात! मनुः स्यारोचिषस्तथा। औत्तमिस्तामसश्चैव रैवतश्चाक्षुषस्तथा। वैवस्वतश्च कौरव्य! साम्प्रतोमनुरुच्यते" इति सप्तमनूद्दिश्य। "इदं तृतीयं वक्ष्यामि तन्निबोध नराधिप!। वशिष्ठपुत्राः सप्तासन् वासिष्ठा इति विश्रुताः। हिरण्यगर्भस्य सुता ऊर्जा नाम सुतेजसः। ऋषयोऽत्र मया प्रोक्ताः कीर्त्यमानान् निबोध तान्। औत्तमेयान् महाराज! दशपुत्रान् मनोरमान्। ईष ऊर्जस्तनूर्ऊर्ज्जश्च मधुर्माधव एव च। शुचिः शुक्रः सहश्चैव नभस्यो नभएव च। मानवस्तत्र देवाश्च मन्वन्तरसुदाहृतम्"। तत्र स्वार्थे ञ्य औत्तमिः। ऋषिपुत्रादिनामभेदस्तु कल्पभेदादविरुद्धः"। [रत्नमा०।

उत्तमफलिनी कर्म्म० नित्यस०। (क्षीरादि)। दुग्धिकाटक्षे

उत्तमर्ण पु० उत्तमस्य ऋणमस्य। ऋणप्रयोजके (महाजन)। उत्तमर्णदद्यादिपरहणधर्म्मोविष्णुना दर्शितो यथा "अधोत्तमर्णोऽधमर्णाद्यथादत्तमर्थं गृह्णीयात् द्विकं त्रिकं चतुष्कं पञ्चकञ्च शतं वर्षानुक्रमेण प्रतिमासम्। सर्वे वर्णा वा स्वप्रतिपत्त्या दद्युः। अकृतामपि वृद्धिरतिक्रमेण यथाविहिताम्। आधुपभोगे द्रव्यभावः। दैवराजोपघाताद्ते विनष्टमाधिरुत्तमर्णोदद्यात्। अन्तर्दशौ प्रविष्टायामपि। न स्थावरमाधिमृते वचनात्। गृहीतधनप्रवेशार्थमेव यत् स्थावरं दत्तं तदुद्गृहीतधनप्रवेशे दद्यात्। दीयमानं प्रयुक्तमर्थमुत्तमर्णस्याग्रहृतस्तत: परं न वर्द्धते। हिरण्यस्य परा द्वैगुण्या, धान्यस्य त्रिगुणा, वस्त्रस्य चतुर्गुणा, सन्ततिः स्त्रीपशूनाम्। किण्वकार्पासवल्कचर्म्मायुधेष्टकाङ्गारान्नामत्वया, अनुक्तानां द्विगुणा। प्रयुक्तमर्थं यथा कथञ्चित् साधयन्न राज्ञोवाच्यः स्यात्। साध्यमानयेद्राजानमभिगच्छेत्तत्समं दण्डयः। उत्तमर्णयेद्राजानमियात्तद्विभावितोऽधमर्णोराज्ञे धनदशमांशसहितं दण्डं दद्यात्। प्राप्तार्थयोत्तमर्णोविंशतितितमभागम्। सर्व्वापह्नाप्येकदेशविभावितोऽपि सर्वं दद्यात्। तस्य च भावनास्तिरोभवन्ति लिखितं साक्षिणः समयक्रिया च। ससाक्षिकमाप्तं ससाक्षिकमेव दद्यात्। लिखितार्थप्रविष्टे लिखितं पाटयेत्। असमुपदाने लेख्यासन्निधाने चोत्तमर्णोलिखितं दद्यात्"। अधिकऋणशब्दे वक्ष्यते। उत्तमं देवत्वेनास्यस्य ठन्। उत्तमर्णिकोऽप्यत्र। "पञ्च पञ्चशतम् दाप्यः प्राप्तार्थोत्तमर्णिकः" या०स्मृ०। "यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः। तैस्तैरुपायैः संसृज्य दापयेदधमर्णिकम्" मनुः "ते च उपाया बृहस्पतिना दर्शिताः यथा। "ब्रह्मना याचितश्चार्थमानीय ऋणिकाद्धनैः। अन्याद्धृतादि वाऽऽहृत्य दाप्यते तत्र सोपधिः। दारपुत्रपशून् हृत्वा कृत्वा द्वारोपवेशनम्। बलार्थी दाप्यतेऽर्थं स्वं तदाचरितमुच्यते। बद्ध्वा स्वगृहमानीय ताडनाद्यैरुपक्रमैः। ऋणिको दाप्यते यत्र बलात्कारः स कीर्त्तितः"।

उत्तमशाख पु० उत्तमा उत्कृष्टा शाखाऽस्य। उत्कृष्टशाखे द्रुमे गरुड० चतुर्थ्यां ङ्ङीप्। उत्तमशाखीय तद्विशिष्टादौ त्रि०।

उत्तमश्लोक त्रि० उत्तमः श्लोकः चरितं यस्य। १पुण्यकीर्त्तौ कर्म्म०। २उत्तमे काव्ये पु०। स च ध्वनिरूपः "इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्यात् ध्वनिर्बुधैः कथितः" काव्यप्र० उक्तलक्षणः।

उत्तमस् त्रि० उद्गतं तमो येन प्रा०ब० वा लक्षितत्वोपः। १उद्गततमस्के २तमोऽतीते च। "क उत्तमः श्लोकगुणानुवादात् पुमान् विरज्येत विना पशुघ्नात्" भाग० १०स्क० १अ०

उत्तमसाहस पु० साहसमधिकृततयाऽस्यस्य अर्श० अच्+कर्म्म०। स्वल्पके साहसाधिकारेण विहिते १उत्कृष्टे दण्डे। "पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः। मध्यमः पञ्च विज्ञेयः सहस्रं त्वेव चोत्तमः" मनुः "अनाख्याय ददद्दोषं दण्ड्य उत्तमसाहसम्" या०स्मृ० नानास्थाने उत्तमदण्डविषयमाह विष्णुः यथा दण्ड्य इत्युपक्रमे "परस्य पत्नीयाचेयेऽते तूत्तमसाहसम्"। "व्यङ्गयतायुक्ताचेये कार्षापणशतम्" "भाटयुक्ते तूत्तमम्" "पारजायी सवर्णागमने तूत्तमसाहसं दण्ड्यः"। "अदुष्टां (कन्याम्) दुष्टामिति ब्रुवंस्तूत्तमसाहसम्" "फलोपगमद्रुमोच्छेदी कीटोपघाती तूत्तमसाहसं दण्ड्यः" (अवगोरयिता) शस्त्रेणोत्तमसाहसं दण्ड्यः" नेत्रकन्धराबाहुसक्थ्यं सभङ्गे चोत्तमम्" (साहसं दण्ड्यः) "रत्नान्यपहार्य्युत्तमसाहसम्"। "वक्षयोः (पितापुत्रयोर्विवादे) पाठान्तरः

स्यात्तस्योत्तमसाहसः "तुलामानकूटकर्तुश्च तदकूटे कूटादिनश्च द्रव्याणां प्रतिरूपविक्रयिकस्य च"। "समूय वणिजां प्रथममनर्घेणावरुन्धताम्" प्रत्येकं "विक्रीणताञ्च"। "यस्तूत्तमवर्णान् दासे नियोजतिस्तोत्तमसाहसदण्डः"। "सीमाभेत्तारमुत्तमसाहसेन दण्डयित्वा पुनः सीमां कारयेत्" "अमञ्जस्याविक्रेयस्य च विक्रयी देवप्रतिमाभेदकश्चोत्तमसाहसम् दण्डनीयः। "भिषङ्मिथ्याचरन्नुत्तमेषु पुरुषेषु"। २ प्राणिहिंसादिरूपे बलवते कर्मभेदे न०। तत्रोत्तमसाहसादिरूपलक्षणविभागादि मिता० दर्शितं यथा। "सामान्यद्रव्यप्रसभहरणात् साहसं स्मृतम्" या०स्मृ०। "सामान्यस्य साधारणस्य यत्रेष्टं विनियोगानर्हत्वाविशेषेण परकीयस्य वा द्रव्यस्यापहरणं साहसम्। कुतः प्रसभहरणात् प्रसह्याहरणाद्बलावष्टम्भेन हरणादिति यावत्। एतदुक्तं भवति। राजदण्डज्ञानाक्रोशं चोल्लङ्घ्य राजपुरुषेतरजनसमक्षं यत्किञ्चिद्धरणमारणपरदारप्रधर्षणादिकं क्रियते तत् सर्वं साहसमिति साहसलक्षणम्। अतः साधारणधनपरधनयोर्हरणस्यापि बलावष्टम्भेन क्रियमाणत्वात्साहसत्वमिति। नारदेनापि साहसस्य स्वरूपं विहितम्। "सहसा क्रियते कर्म यत् किञ्चिद्बलदर्पितैः। तत्साहसमिति प्रोक्तं सहो बलमिहोच्यते"। तदिदं साहसशब्दार्थवाग्दण्डपारुष्यस्तोभसंग्रहेषु व्याप्तमपि बलदर्पावष्टम्भोपाधितोभिद्यत इति दण्डातिरेकार्थं पृथगभिधानस्य दण्डवैचित्र्यप्रतिपादनार्थं प्रथमादिभेदेन त्रैविध्यमभिधाय तल्लक्षणान्येव विहितम्। "तत् पुनस्त्रिविधं ज्ञेयं प्रथमं मध्यमन्तथा। उत्तमञ्चेति शास्त्रेषु तस्योक्तं लक्षणं पृथक्। फलमूलोदकादीनां चेलोपकरणस्य च। भक्ष्यान्नौषधमद्यानां प्रथमं साहसं स्मृतम्। वासःपक्षिपशुस्त्रीणां गृहोपकरणस्य च। एतेनैव प्रकारेण मध्यमं साहसं स्मृतम्। व्यापादोविषयस्त्र्यादेः परदाराभिमर्शनम्। प्राणोपरोध यत्रान्यदुक्तमुत्तमसाहसम्। तस्य दण्डः क्रियाद्वेधः प्रथमस्य शतावरः। मध्यमस्य तु शास्त्रज्ञैर्दृष्टः पञ्चशतावरः। उत्तमे साहसे दण्डः सहस्रावर इष्यते। वधः सर्वस्वहरणं पुराद्विर्वासनाङ्कने। तद्वच्छेदः प्रणष्टौ दण्ड उत्तमसाहसे" इति। वधादयश्चापराधतारतम्यादुत्तमसाहसे समस्ताव्यस्ता वा योज्याः"। तत्र परद्रव्यापहरणरूपे साहसे दण्डमाह" मिता०। "तन्मूल्याद्द्विगुणोदण्डोनिक्षेपे तु चतुर्गुणः" या०स्मृ०। "तस्यापहृतद्रव्यस्य मूल्याद्द्विगुणोदण्डः यः पुनः साहसं कृत्वा नाहमकार्षमिति निह्नुते तस्य मूल्याच्चतुर्गुणो दण्डो भवति। एतस्मादेव विशेषदण्डविधानात् प्रथमसाहसादिसामान्यदण्डविधानमपहारव्यतिरिक्तविषयम्" मिता०

उत्तमस्त्रीसंग्रहण न०परस्त्रियाः संग्रहणं कर्म०। स्मृत्युक्ते परस्त्रियासक्तत्वे मिथुनाभावाय प्रवृत्तिरूपव्यापारभेदे तत्स्वरूपविभागादि मिता० दर्शितं यथा

"प्रथम साहसादिदण्डप्राप्त्यर्थं त्रेधा तत्स्वरूपं व्यासेन विहितम्। "त्रिविधन्तत्समाख्यातमधमं मध्यमोत्तमम्। वदेशकालभाषाभिर्निर्जने च परस्त्रियाः। कटाक्षावेक्षणं हास्यप्रथमं साहसं स्मृतम्। प्रेषणञ्चन्दनाख्यानाम्बूपभूषणवाससाम्। प्रलोभनञ्चान्नपानैर्मध्यमं ससदाहृतम्। सहासनं विविक्तेषु परस्परमपाश्रयः। केशाकेशि पदञ्चैव सम्यक् संग्रहणं स्मृतम्"। स्त्रीपुंसयोर्मिथुनीभावः संग्रहणं संग्रहणज्ञानपूर्वकत्वात्तत्कर्तुर्दण्डविधानस्य तज्ज्ञानोपायत्वमावदाह। "पुमान् संग्रहणे याज्ञः केशाकेशि परस्त्रियाः। सद्योवा कामजैश्चिह्नैः प्रतिपत्तौ द्वयोस्तथा" या०स्मृ०। संग्रहणे प्रवृत्तः पुमान् केशाकेश्यादिभिर्लिङ्गैर्ज्ञात्वा ग्रहीतव्यः। परस्परकेशग्रहणपूर्विकाक्रीडा केशाकेशि "तत्र तेनेदमिति सरूपे" इति पा०बहुव्रीहौ सति "इच् कर्मव्यतिहारे" पा० इति समासान्त इच् प्रत्ययः अव्ययत्वाच्च सुप्लुप्ततीयाविभक्तिः। तत्तायमर्थः। परभार्यया सह केशाकेशिक्रीडनेनाभिनवैः करस्पृदशनादिकृतव्रणैः रागकृतैर्लिङ्गैर्द्वयोः सम्मतिपत्त्या वा ज्ञात्वा संग्रहणे प्रवृत्तो ग्रहीतव्यः। परस्त्रीग्रहणं नियुक्तावरुद्धादिव्युदासार्थम्। किञ्च। "नीवीस्तनप्रावरणसक्थिकेशावमर्शनम्। वदेशकालसम्भाषं सहैकस्थानमेव च" या०स्मृ०। यःपुनः परदारपरिधानपन्थिप्रदेशकृतभावरणजघनमूर्धरुहादिस्पर्शनं साभिलाषवाचरति। तथा वदेशे निर्जने जनताक्षीणे वान्धकाराकुलेऽकाले संलापनङ्करोति। परभार्यया वा सहैकसङ्कादौ रिरंसयेवावतिष्ठते। सोऽपि संग्रहणे प्रवृत्तो याज्ञः। एतच्चाशङ्कमानदोषपुरुषविषयमितरस्य न दोषः। यथाह मनुः। "यस्त्वनाचारितः पूर्वमभिभाषेत कारणात्। न दोषमाप्नुयात्किञ्चिन्न हि तस्य व्यतिक्रमः" इति यः परस्त्रियास्पृष्टः क्षमतेऽवापि याज्ञ इति तेनैवोक्तम्। "स्त्रियं स्पृशेददेशे यः स्पृष्टोवा मर्षयेत्तथा। परस्परस्यानुमते सर्वं संग्रहणं स्मृतमिति" यच्च मयेयं विद्वद्भाऽसद्वृत्ति-

तेति श्लाघया भुजङ्गजनसमक्षङ्गापयत्यसावपि याच्ञा इति तेनैवोक्तम् । "दर्पाद्वा यदि वा मोहात् श्लाघया वा स्वयं वदेत् । पूर्वं भवेयमुक्तेति तच्च संपूर्णं स्मृतम्"

उत्तमा स्त्री उत्कृष्टसौन्दर्य्यान्वितायाम् स्त्रियाम् अमरः ।

उत्तमाङ्ग न० कर्म्म० । मस्तके । "बभौ पतङ्ग इवोत्तमाङ्गे" कुमा० । "कश्चिद् द्विषत्खड्गहृतोत्तमाङ्गः" रघुः । "पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथञ्चन" मनुः । मस्तकस्य अङ्गेषूत्तमत्वं चक्षुरादीन्द्रियाधारत्वात् प्राणवायुसञ्चारस्थानत्वात् सर्वेषामङ्गानामुपरिवर्त्तमानत्वाच्च । अतएव "गर्भस्य हि मस्तकात् प्रथमं शिरः सम्भवतीत्याह गौतमः शिरोमूलत्वाद्धेतेन्द्रियाणाम्" सुश्रु० गौतमीयमते इन्द्रियमूलत्वमस्योक्तम् "तच्च शरीरम् षडङ्गं शाखाश्चतस्रो मध्यं पञ्चमं षष्ठं शिरः" इति सुश्रु० षड़ङ्गविभागे हस्तपादानां चतस्रः शाखात्वेन मध्यमस्य मध्यत्वेन उपवर्ण्य सर्वशेषे शिरसः कथनं पूर्वोक्तहेतोः प्राधान्यात्तस्येति बोध्यम् । प्रत्यङ्गविभागेऽपि "मस्तकोदरेत्यादिना सुश्रु० मस्तकस्य प्रथमनिर्देशः प्राधान्यादेव लोकेऽपि मस्तकच्छेदनेऽवशिष्टाङ्गैः न प्रत्यभिज्ञा छिन्नमस्तकमात्रेण तु प्रत्यभिज्ञा इत्यतो मस्तकस्य प्रत्यभिज्ञासाधनत्वादपि उत्तमत्वम्" कथमन्यथा देवदत्तादिदेहस्य हस्तादिषु च अङ्गेषु मध्ये हस्तादिना न प्रत्यभिज्ञा इत्यतः मस्तकस्य उत्कृष्टत्वम् । हस्तादिच्छेदनेऽपि जीवनसम्भवात् मस्तकस्य छेदने तदभावादपि मस्तकस्य प्राधान्यमित्यपि मन्तव्यम् ।

उत्तमाम्भस् न० सांख्यशास्त्रप्रसिद्धे नवविधतुष्टिमध्ये तुष्टिभेदे "नापहृत्य भूतानि विषयोपभोगः सम्भवतीति हिंसादोषदर्शनात् विषयोपरमे या तुष्टिः सा पञ्चमी उत्तमाम्भ उच्यते" सा० कौ० । अम्भसोटेः अम्भसोऽकरं प्रतीव विवेकख्यातिं प्रति हेतुत्वात्तथात्वम् ।

उत्तमाढ्य त्रि० उत्तमं क्रियते उत्तम-च्वि-कर्म्मणि वा० आढ्य नि० णिलोपः । उत्तमीकृते । "उतेदमुत्तमाढ्यम्" ऋ० ६,२२,६, "उत्तमाढ्यमुत्तमीकृतम्" भा० ।

उत्तमारणी स्त्री उत्तममृच्छति ऋ-अनि ङीप् । इन्दीवर्य्याम्

उत्तमौजस् त्रि० उत्तममोजो यस्य । १उत्कृष्टतेजस्के दशमन्वन्तराधिपमनोः २पुत्रभेदे पु० हरिवं० "दशमे त्वथ पर्य्याये" इत्युपक्रम्य "मनोः सुतोत्तमौजाश्च कृतिः खड्गश्च वीर्य्यवान् । यतानीको निरामित्रो दृढसेनो जयद्रथः । सूरिद्युम्नः सुवर्चाश्च दश त्वेते मनोः सुताः" ७अ० । सुतोत्तमौजा इत्यत्र सन्धिरार्षः । द्वापरयुगीये २युधामन्यु भ्रातरि च्छे पु० । "नेह पश्यामि विबुधा ! राधेयमिततेजसम् । भ्रातरौ च महात्मानौ युधामन्यूत्तमौजसौ" भा० स्वर्गा० २अ० । "युधामन्यु श्च विक्रान्त उत्तमौजाश्च वीर्य्यवान्" गीता "उत्तमौजाश्च शल्यश्च कौरवाः कैकयास्तथा" हरिवं० ६२ अ० । "उत्तमौजास्तथा शाल्वः कैरलेयश्च कौशिकः" हरिवं० ६६अ० ।

उत्तम्भ पु० उद्+स्तम्भ-घञ् । १प्रवृत्तिरोधिकायामनिष्टसाधनतोनिष्टत्तौ । (थामा) २अवलम्बे च ।

उत्तम्भन न० उ+स्तम्भ-ल्युट् । १अवलम्बने । करणे ल्युट् २तत्साधने । "वरणस्योत्तम्भनमसि" यजु० १४, २२ । "समीपेऽन उपस्थायोत्तम्भनेन स्तम्भाति" काल्या० ७, ६,२२ ।

उत्तर न० उत्तीर्य्यते प्रकृताभियोगोऽनेन उद्+तॄ-अप्, उद्-तरप् वा । राजसभीये वादिप्रकृताभियोगापनोदके उत्तराख्ये १व्यवहाराङ्गे हितोपदेशे "प्रश्नोद्यधिया पृच्छा तस्य खण्डनमुत्तरमित्युक्तं" २दोषभञ्जनवाक्ये । ३जिज्ञासितविषयावेदके वाक्ये । ४उदीच्यां दिशि स्त्री । अनन्तरे पृदेशे, ६काले च पु० । ७अनन्तरोत्तरदिग्देशकालवृत्तौ त्रि० अश्विन्यादिषु १२,२१,२६ संख्यकेषु ८नक्षत्रेषु न० स्त्री । "उत्तरात्रयवास्यरोहिणीरौद्रसार्पपित्र्यभेषु चाग्नेये" "रेवत्युत्तरोहिणी मृगशिरो मूलानुराधा मघा" "त्रीण्युत्तराणि स्वभूः" ज्यो० त० । तत्र वादे उत्तरतादात्म्यादिलक्षणादि मिता० दर्शितं यथा । "श्रुतार्थस्योत्तरं लेख्यं पूर्ववेदकसन्निधौ" या० । "श्रुतोभयार्थयोर्येन प्रत्यर्थिनाऽसौ श्रुतार्थस्योत्तरं पूर्वपक्षादुत्तरत्व भवतीति उत्तरं लेख्यं लेखनीयम् । पूर्ववेदकस्यार्थिनः समीपे उत्तरञ्च यत्पूर्वोक्तस्य निराकरणन्तदुच्यते । यथाह । "पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम् । अव्याख्यागम्यमित्येतदुत्तरन्तद्विदोविदुरिति" । पक्षस्य व्यापकन्निराकरणसमर्थम् सारं न्याय्यं न्यायादनपेतम्, असन्दिग्धं सन्देहरहितम्, अनाकुलं पूर्वापराविरुद्धम्, अव्याख्यागम्यं अप्रसिद्धपदयोगेन दुःश्लिष्टविभक्तिसमासाध्याहाराभिधानेन वा अन्यदेशभाषाभिधानेन वा यद्वाक्येयार्थन्न भवति तदुत्तरम् । तच्चतुर्विधम् । सम्प्रतिपत्तिर्मिथ्या प्रत्यवस्कन्दनं पूर्वन्याय्यमेति । यथाह

कात्यायनः । "सत्यं मिथ्योत्तरञ्चैव प्रत्यवस्कन्दनं तथा । पूर्व्वन्यायविधिश्चैवसुत्तरं स्याच्चतुर्विधमिति" । तत्र सत्योत्तरं यथा रूपकशतमनेनाहमाधारयतोक्ते सत्यमाधारयामीति । यथाह । "साध्यस्य सत्यवचनं प्रतिपत्तिरुदाहृता" । मिथ्योत्तरन्तु नाहमाधारयामीति । तथा च कात्यायनः । "अभियुक्तोऽभियोगस्य यदि कुर्य्यादपह्नवम् । मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः" इति । तच्च मिथ्योत्तरञ्च चतुर्विधम् । "मिथ्यैतन्नाभिजानामि तदा तत्र न सन्निधिः । अजातत्वाच्च तत्काल इति मिथ्या चतुर्विधमिति" । प्रत्यवस्कन्दनन्नाम सत्यं स्वीकृतं प्रतिदत्तं प्रतिपन्नञ्चमिति वा । यथाह नारदः "अर्थिना लेखितोयोऽर्थः प्रत्यर्थी यदि तन्यथा । प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं स्मृतमिति" । पूर्व्वन्यायोत्तरन्तु यत्राभियुक्त एवं ब्रूयादस्मित्तर्थे अनेनाहमभियुक्तस्तत्र चायं व्यवहारमार्गेण पराजित इति । उक्तञ्च कात्यायनेन "आचारेणावसन्नोऽपि पुनर्लेखयते यदि । सोऽभियोक्तोजितः पूर्व्वं पूर्व्वन्यायस्य उच्यते" इति । एवमुत्तरलक्षणे स्थिते उत्तरलक्षणरहितानाम् उत्तरपदाभासमानानामुत्तराभासत्वमर्थसिद्धं स्पष्टीकृतञ्च स्मृत्यन्तरे । "सन्दिग्धमन्यत् प्रकृतादल्पमतिभूरि च । पक्षैकदेशव्याप्यन्यत्तथा नैवोत्तरम्भवेत् । यद्यप्युक्तपदमव्यापि निगूढार्थन्तथाकुलम् । व्याख्यागम्यमसारञ्च नोत्तरं स्यार्थसिद्धये" इति । तत्र सन्दिग्धम् सुवर्णशतमनेन स्वीकृतमिति उक्ते सत्यं स्वीकृतम्, सुवर्णशतमाधृतं वेति । प्रकृतादन्यत् यथा सुवर्णशताद्यभियोगे पणशतमाधारयामीति । अल्पं सुवर्णशताभियोगे पञ्च धारयामीति । अतिभूरि सुवर्णशताभियोगे द्विशतमाधारयामीति । पक्षैकदेशव्यापि हिरण्यवस्त्राद्यभियोगे हिरण्यं स्वीकृतमान्यदिति । व्यस्तपदम् । रूपादानाभियोगे पदान्तरेणोत्तरम् । यथा सुवर्णशताभियोगे अनेनाङ्गाङ्कित इति । अव्यापि देशस्थानादिविशेषणाव्यापि । यथा मध्यदेशे वाराणस्यां पूर्व्वस्यां दिशि चेलमनेनापहृतमिति पूर्व्वपक्षे लिखिते चेलमपहृतमिति । निगूढार्थं यथा सुवर्णशताभियोगे किमहमेवाक्षै धारयामीत्यत्र ध्वनिना प्राश्निकः सभ्योवार्थी वान्यर्णं धारयतीति निगूढार्थम् आकुलं पूर्व्वापरविरुद्धम् । यथा सुवर्णशताभियोगे कृते सत्यं स्वीकृतञ्च धारयामीति । व्याख्यागम्यम् दुःश्लिष्टविभक्तिसमासाध्याहाराभिधानेन अन्यदेशभाषाभिधानेन वा । यथा सुवर्णशतविषये पित्र्यामभियोगे स्वीकृतं शतं वचनात् सुवर्णानां पितर्न जानामीति । अत्र पितुर्वचनात् सुवर्णानां शतं स्वीकृतमिति न जानामीति । अन्याय्यं न्यायविरुद्धम् । यथा सुवर्णशतमनेन दत्त्वा स्वीकृतं दत्तिरेव दत्ता न मूलमिति अभियोगे सत्यं दत्तिर्दत्ता न मूलं स्वीकृतमिति । उत्तरमित्येकवचननिर्देशादुत्तराणां सङ्करोनिरस्तः । यथाह कात्यायनः । "पक्षैकदेशे यत्सत्यमेकदेशे च कारणम् । मिथ्या चैवैकदेशे च सङ्कराख्यमुत्तरमिति" । अनुत्तरत्वे कारणमेवोक्तम् । "नचैकस्मिन् विवादे तु क्रिया स्यादादिनोर्द्वयोः । नचार्थसिद्धिरुभयोर्न चैकत्र क्रियाद्वयमिति" । मिथ्याकारणोत्तरयोः सङ्करेऽपिप्रत्यर्थिनोर्द्वयोः क्रिया- प्राप्नोति । "मिथ्या क्रिया पूर्व्ववादे कारणे प्रतिवादिनोति स्मरणात् । तदुभयमेकस्मिन् व्यवहारे विरुद्धम् । यथा सुवर्णशतं रूपकशतं चानेन स्वीकृतमित्यभियोगे सुवर्णं न स्वीकृतं रूपकशतं स्वीकृतं प्रतिदत्तञ्चेति । कारणं प्राङ्न्यायसङ्करेतु प्रत्यर्थिन एव क्रियाद्वयम् । "प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत् क्रियामिति" । यथा सुवर्णं स्वीकृतं प्रतिदत्तं रूपके व्यवहारमार्गेण पराजित इति । अत्र च प्राङ्न्याये जयपत्रेण वा प्राङ्न्यायदर्शिभिर्वा भावयितव्यम् । कारणोत्तरे तु साक्षिलेख्यादिभिर्भावयितव्यमिति विरोधः । एवमुत्तरत्रयसङ्करेऽपि द्रष्टव्यम् । यथाऽनेन सुवर्णं रूपकशतं वस्त्राणि च स्वीकृतानीत्यभियोगे सत्यं सुवर्णं स्वीकृतं प्रतिदत्तञ्च रूपशतं तु न स्वीकृतं वस्त्रविषये पूर्व्वन्यायेन पराजित इति । एवञ्चतुःसङ्करेऽपि । एतेषाञ्चोत्तरत्वं योगपद्येन । तस्य तस्यांशस्य तेन तेन विनाऽसिद्धेः क्रमेणोत्तरत्वमेव । क्रमस्यार्थिनः प्रत्यर्थिनः सभ्यानाञ्चेच्छया भवति यत्र पुनरुभयोः सङ्करे यस्य प्रभूतार्थविषयत्वन्तत्क्रियोपादानेन पूर्व्वं व्यवहारः प्रवर्त्तयितव्यः पश्चादल्पविषकोत्तरोपादानेन व्यवहारो द्रष्टव्यः । यत्र च सम्प्रतिपत्तेरुत्तरान्तरस्य सङ्करस्तत्रोत्तरान्तरोपादानेन व्यवहारो द्रष्टव्यः । सम्प्रतिपत्तौ क्रियाभावात् । यथाहारीतेन "मिथ्योत्तरङ्कारणञ्च स्यातामेकत्र चेदुभे । सत्यं वापि सङ्कान्त्या तत्र स्याद्वा किमुत्तरम्" इत्युक्तोक्तम् । "यत् प्रभूतार्थविषयं यत्र वा स्यात् क्रियाफलम् । उत्तरन्तत्र तज्ज्ञेयमसङ्कीर्णमतोऽन्यथा" । सङ्कीर्णमवतीति शेषः शेषायेच्छया ऐच्छिकः कृतो भवतीत्यर्थः । तत्र प्रभूतार्थं यथाऽनेन सुवर्णं

रूपकगतं वस्त्वादि च गृहीतानि इत्यभियोगे सत्यं सुवर्णं गृहीतं रूपकगतञ्च न गृहीतं वस्त्वादि तु गृहीतानि प्रतिदत्तानि चेति अत्र मिथ्योत्तरस्य प्रभूतविषयत्वादर्थिनः क्रियामादाय प्रथमं व्यवहारः प्रवर्त्तयितव्यः। पश्चाद्वस्तुविषयो व्यवहारः। एवं मिथ्याप्राड्न्यायसङ्करे कारणप्राड्न्यायसङ्करे च योजनीयम्। तथा तत्रिह्नवाभियोगे सत्यं सुवर्णं रूपकगतञ्च गृहीतं न्यासादि वस्त्वादि तु न गृहीतानि गृहीतानि प्रतिदत्तानीति वा। वस्तुविषये पूर्वं पराजित इति वोत्तरे सम्प्रतिपत्तेर्भूरिविषयत्वेऽपि तत्र क्रियाभावान्मिथ्योद्युत्तरक्रियामादाय व्यवहारः प्रवर्त्तयितव्यः। यत्र तु मिथ्याकारणोत्तरयोः कृतस्पष्टपक्षव्यापित्वम्। यथा ऋङ्गप्याहितया कश्चिदुदति इयङ्कौमदीया अमुकस्मिन् काले नष्टा अथास्य गृहे दृष्टेति। अन्यस्तु मिथ्यैतदेतत्प्रदर्शितकालात् पूर्व्वमेवास्माद्गृहे स्थिता मम गृहे जाता चेति वदति। इदन्तावत् पक्षनिराकरणसमर्थत्वान्नानुत्तरम्। नापि मिथ्यैव कारणोपन्यासात्। नापि कारणम्। एकदेशस्याभ्युपगमाभावात्। तस्मात् सकारणं मिथ्योत्तरमिदम्"। अत्र कश्चिद्विशेषो व्यव०त०दर्शितः यथा "कात्यायनः। "सद्यः कृतेषु कार्य्येषु सद्यएव विवादयेत्। कालातीतेषु वा कालं दद्यात् प्रत्यर्थिने प्रभुः"। वादिनोक्तस्य साध्यस्य प्रतीपमर्थयते इति प्रत्यर्थी। नारदः "गृहनक्षेत्रवादानामसामर्थ्यात् स्मृतेरपि। क्षणादिषु हरेत् कालं कामनक्षत्वभुक्तया"दा०। बृहस्पतिः। "यदा त्वेवंविधः पक्षः कल्पितः पूर्व्ववादिना। दद्यात् तत्पक्षसम्बन्धं प्रतिवादी तदोत्तरम्"। सम्बन्धमुक्तम् अन्यथा अन्यवादित्वेन भङ्गप्रसङ्गात्। "अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः। आकूतः प्रपलायी च हीनः पञ्चविधः स्मृतः"। प्रपलायी त्रिपक्षेण सौनकस्तु सप्तभिर्दिनैः। क्रियाद्वेषी तु मासेन साक्षिभिश्चस्तु तत्क्षणात्" इति नारदोक्तेः क्रिया लेख्यादिका, साक्षिभिः पराजितः। वादिनोक्तस्य साध्यस्य प्रतीपं वदतीति प्रतिवादी उत्तीर्य्यते निर्णीयते प्रकृताभियोगोऽनेनेति उत्तरम्। उत्तरस्वरूपं तद्भेदांश्चाह नारदः। "पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम्। अव्याख्यागम्यमित्येवमुत्तरं तद्विदोविदुः। मिथ्यासंप्रतिपत्तित्व प्रत्यवस्कन्दनन्यथा। प्राड्न्यायचोत्तरा; प्रोक्ताश्चत्वारः शास्त्रवेदिभिः। अभियुक्तोऽभियोगस्य यदि कुर्य्यादपक्षवम्। मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः"। पक्षस्य भाषार्थस्य व्यापकम् आच्छादम् अभियोगप्रतिकूलमिति यावत्। अतएव "पूर्व्वपक्षार्थसम्बन्धं प्रतिपक्षं निवेदयेदि"त्युक्तम्। न च विप्रतिपत्त्या न्यायोऽर्थमागतस्य धारयसीत्यभियुक्तस्य धारयामीति संप्रतिपत्तेः कथमुत्तरत्वम् अभियोगाप्रतिकूलत्वादिति वाच्यम् भाषावादिनोर्मूर्खत्वेनापटुकरणतया वा कदाचिद्भाषाविवादादेवार्थं हीयते इति भाषाविसर्गपर्य्यन्तं विप्रतिपत्तेरप्युत्तरवादिनोभाषार्थं सम्यगवगम्य तन्निषेधार्थं सम्यगुत्तरासम्भवात् विहल्लभावां चासत्यवचनमत्यन्ताधर्म्मकारकम्। परोक्षिपराजये च दण्डत्वं वादिना च वैरमित्यादि प्रतिसन्दधतः सम्प्रतिपत्तेरुत्तरत्वं सम्भवत्येव। एवम् एतेभ्य एवानिस्सारात् साध्यत्वेनोपदिष्टस्य पक्षस्य सिद्धत्वेनोपन्यासेन साध्यत्वनिवारणात् सिद्धसाधनेनापि वादिनः प्रत्यवस्थानाच्चोत्तरत्वं सम्प्रतिपत्तेः सिद्धमिति सारं प्रकृतोपयोगि अनाकुलं पूर्व्वापरविरोधशून्यं अव्याख्यागम्यमध्याहारादिकं विनैव प्रतीतम् अभियोगस्य अभियुज्यते इत्यभियोगः सहेतुकं साध्यं तस्यापक्षवमित्यर्थः"। "उत्तराभासमाह कात्यायनः। "पक्षतेन तत्सम्बन्धमन्यत्सप्रतिभूरि च। पक्षैकदेशव्याप्येवं तच्च नैवोत्तरं भवेत्। अस्तव्यस्तपदव्यापि निगूढार्थं तथाकुलम्। व्याख्यागम्यमसारञ्च नोत्तरं यस्मते बुधैः"। अस्तव्यस्तपदव्यापि अनन्वितार्थपदव्याप्तमिति व्यवहारतिलके भवदेवभट्टाः। मिथ्योत्तरभेदमाह पुनर्व्यासनारदौ। "मिथ्यैतत्त्वाभिजानामि मम तत्र न सन्निधिः। अजातवाक्षि तत्काले इति मिथ्या चतुर्विधम्"। मिथ्यैतदितिशब्दतोनाभिजानामीत्यादिकमर्थतोऽपह्नवः। तथा च कात्यायनः। "श्रुत्वा भाषार्थमन्यस्तु यदि तं प्रतिषेधति। अर्थतः शब्दतोवापि मिथ्या तज्ज्ञेयमुत्तरम्"। त्वं मह्यं धारयसीति प्रतिज्ञायां न गृहीतमिति शब्दतः। कालविशेषगर्भायां तस्यां सख्यां तदानीं जात इति अर्थतः। देशकालविशेषगर्भायां तदा तत्र नाहमासम् इत्यर्थतः। देशादिमत्यां तच्छून्यायां वा न जानामीत्यर्थतएव योग्याकारणेनार्थतस्तदपह्नवप्रतिपादनात्। अत्र चरमत्रयं अपह्नवावस्कन्दनसहेन अपह्नवाभावप्रतिपादकं सापदेशमिथ्योत्तरमात्रम् आद्यं मिथ्योत्तरमात्रम्। तच्च कारणोत्तरं त्रिविधं बलवत्तुल्यबलं दुर्बलञ्च तत्र बलवदुत्तरं यथा मत्तः त्वं गृहीत-

मिति सर्वं किन्तु परिशोधितमिति अत्रोत्तरवादिन एव क्रियानिर्देशः । तथा च नारदः । "आधर्म्यं पूर्वपक्षस्य यच्चिन्नार्थवशाद्भवेत् । विवादे साक्षिणस्तत्र प्रष्टव्याः प्रतिवादिनः" । आधर्म्यं दुर्बलत्वं पूर्वपक्षस्य । ततश्च स्थापकसाध्यस्य धार्य्यमाणत्वस्य ध्वंसकारणं निर्यातनादि तद्रूपमुत्तरं कारणोत्तरम् । अतएव मिथ्योत्तरादस्य भेदः तर्हि धार्य्यमाणत्वस्याव्याप्त्याभावप्रयोजकमयङ्गरूपं न तु ध्वंसरूपम् । तुल्यबलकारणोत्तरं यथा मदीयेयं भूमिः क्रमागतत्वादिति वादिनोक्ते मदीयेयं भूमिः क्रमागतत्वादिति प्रतिवादिना तत्रोत्तरमिति तत्र पूर्ववादिनः साध्यव्यापन्यासः । तदसामर्थ्ये प्रतिवादिनः । तथा च याज्ञवल्क्यः । "साक्षिण्युभयतः सत्तु साक्षिणः पूर्ववादिनः । पूर्वपक्षेऽधरीभूते भवत्युत्तरवादिनः" । दुर्बलकारणोत्तरं यथा ममेयं भूः क्रमागतत्वादिति वादिनोक्ते ममेयं भूर्दशवर्षभुज्यमानत्वादिति प्रत्युत्तरम्" व्य०त०रघु० ।

"शोधयेत् पूर्ववादं तु यावन्नोत्तरदर्शनम् । अवष्टब्धस्योत्तरेण निहतं शोधनं भवेत्" नार० । इत्याद्यावयवभेदेन० । "विधयो विधयश्चैव पूर्वपक्षस्तथोत्तरम् । निर्णयश्चेति सिद्धान्ताः शास्त्रेऽधिकरणं स्मृतम्" मीमांसा । तच्च सिद्धान्तानुकूलतर्कोपन्यासरूपम् ।१०प्रतिवचने न० "प्रचक्रमे च प्रतिवक्तुमुत्तरम्" रघु० ।११उपरिस्थे, "समे देशे प्रतिष्ठाप्य चैलाजिनकुशोत्तरम्" गीता । "मृदुप्रवालोत्तरपुष्पशय्याम्" रघुः १२ऊर्द्धभागे "तद्वाहनादवनतोत्तरकायमीषत्" रघुः "दूर्वाङ्कुरायत्तमभिन्नपुटोत्तरः इति रघुः । १३वामभागे । "पिष्टपात्रे निधायार्घं न्यञ्चमुत्तरतोन्यसेत्" मत्स्य पु० । "न्यसेदित्यत्राख्यातोपस्थापितकर्तृकमपार्थं न्यासः कर्तव्यः" श्रा०त०रघु० । तस्य तदर्थत्वे उदा० तत्रैव यथा "तस्मादुत्तस्य दक्षिणतो लक्ष्म भवति तं पुण्यलक्ष्मीकमित्याचक्षते उत्तरतः स्त्रियाः उत्तरायणा हि स्तौति" शतपथश्रुतिः । "उत्तरे चास्य सौवर्णं लक्ष्म पार्श्वे भविष्यति" भारतम् दिशि "अस्युत्तरस्यां दिशि देवतात्मात्मा" कुमा० । "सर्वेषाञ्चैव वर्णानां मेरुरुत्तरतः स्थितः" भू० अत्र दक्षो पुंवद्भावः । दिग्दिशकालवर्त्तिपरत्वेऽपि अस्य स्वाभिधेयावधिनियमरूपव्यवस्थावाचित्वात् सर्वनामतया तत्कार्यम् उत्तरे ग्रामाः उत्तरस्यै नगर्यै उत्तरस्मिन् दिने, संज्ञायां तु न सर्वनामकार्यम् उत्तराः कुरवः । तत्रोत्तरकालवृत्तौ "अङ्गमन्नमधिकर्द्धिरुत्तरः पूर्वसूत्रसमपोदुदुत्तवः" रघुः "सखीभिरुत्तरशोचिताभिमाम्" कुमा० । अवधिश्च द्विविधः दैशिकः कालिकश्च तत्र दैशिकः "समुद्रस्योत्तरे तीरे जम्भला नाम राक्षसी" गर्भप्रसवमन्त्रः । अत्र दिग्देशावधिवाचित्वे उद्+अर्द्धार्थे तरप् । तथा हि अङ्गावधिमेरूपर्य्यन्तदेशानाम् भूगोले क्रमश उन्नतत्वात् तत्सन्निहितदेशस्य उन्नत्वादुत्तरत्वम् "स्वापेक्षया मेरुसन्निहितत्वमेव उत्तरत्वमिति" सङ्गा० । अतएव तद्देशस्योन्नत्वादेव च क्रमशस्तत्र उत्तरध्रुवस्योन्नत्वम्" सि०शि० उक्तम् "निरक्षदेशे क्षितिमण्डलोपगौ ध्रुवौ नरः पश्यति दक्षिणोत्तरौ । तदाश्रितं खे जलयन्त्रवत्तथा भ्रमद्ग्रहचक्रं निजमस्तकोपरि । उदग्दिशं याति नरो यथा यथा तथा तथा तत्र ततस्तथाखिलम् । उदक् ध्रुव पश्यति चोन्नतं क्षितेस्तदन्तरे योजनजाः पलांशकाः" तद्दिशः क्रमशः उन्नत्वाच्च दक्षिणस्या अधस्त्वम् । अतएव तद्दिगोऽवाचीत्वम् । तद्दिक्कृतदेशस्यापि उत्तरदिक्कस्त्वेनोत्तरत्वम् । कालिकस्य उत्तरत्वं तु स्वापेक्षया परत्वम् तच्च स्वापेक्षया ऽल्पसूर्य्यक्रियासामानाधिकरण्यम् । सूर्य्यक्रियया खण्डकालव्यवहारात् तत्र प्राग्वर्त्तिकालवृत्तेः बहुसूर्य्यक्रियासामानाधिकरण्यात् तथात्वम् । तथा च एतदर्थार्थपरत्वे उदः उत्क्रान्ति प्रकर्षे तरप् । उत्तरकालवाचित्वेऽपि अव्यवच्छिते एवास्य वृत्तिरौत्सर्गिकी लक्षणया अधिककालोत्तरत्वमपि प्रतीयते । तेन स्वाव्यवच्छितोत्तरक्षणवृत्तिकत्वमित्यादिप्रयोगोदृष्टव्यः । अधिकार्थे तु उदः उत्कर्षार्थत्वमिति विवेकः । १४प्रधाने "धर्मोत्तरं मध्यममाश्रयन्ते" रघुः "क्षणात्तात तवाद्येह शोकोत्तरमिदं मनः" भा० अनु० १६३ अ० १५अधिके "देवीं तु मनसा ध्यात्वा शतमष्टोत्तरं जपेत्" तन्त्रम् । "सप्तोत्तरं मर्मशतं हृदे च सन्निगते तथा" वा० सू० । उत्तीर्य्यतेऽनात् संसारः अपादाने अप् । १६विष्णौ पु० । "उत्तरोगोपतिर्गोप्ता" विष्णुस० "जन्मसंसारबन्धनादुत्तरन्यत उत्तरः विश्वस्माद् वा उत्कृष्टः-भा० । १७शिवे पु० तस्यापि तथात्वात् । भावे अप् । १८उत्तरणे उल्लङ्घने । १९विराटस्यैकपुत्रे पु० स च भूमिञ्जयापरनामा । २० तत्कन्यायां स्त्री तत्कथा यथा भा०विरा० प०२५।१२६अ० । "इडा भूमिञ्जयं नाम पुत्रं मत्स्यस्य मानिनम्" इत्युपक्रम्य "उवाच रहसि प्रीतः कृष्णां सर्वार्थकोविदः । उत्तरं ब्रूहि कल्याणि ! क्षिप्रं मद्वचनादपि" । "उत्तरायाः प्रसूतेः सर्वं जान-

व्रतिन्दमः" "अथोत्तरा च कन्याव सख्यसमनुवँ सदा" "यद्युत्तरोऽयं संग्रामे विजेष्यति महारथान्" इति च। उत्तरा च अभिमन्योः पत्नी तत्कथापि तत्रैव ७१,अ०। "उत्तरां प्रतिगृह्णातु सव्यपाचो धनञ्जयः" इति विराटेनोक्ते "प्रतिगृह्णाम्यहं राजन्! स्नुषां दुहितरं तव" "स्नुषार्थे उत्तरां राजन्! प्रतिगृह्णामि ते सुताम्" "तां प्रत्यगृह्णात् कौन्तेयः सुतस्यार्थे धनञ्जयः। सौभद्रस्यानवद्याङ्गीं विराटतनयां तदा। तत्रातिष्ठन् महाराजो रूपमिन्द्रस्य धारयन्। स्नुषां तां प्रतिजग्राह कुन्तीपुत्रो युधिष्ठिरः। प्रतिगृह्य च तां पार्थः पुरस्कृत्य जनार्दनम्। विवाहं कारयामास सौभद्रस्य महात्मनः" ७२अ०। २१ अष्टकवने "कृतात्र देवी वचनाधिकारिणी त्वत्तस्तरं दासि! ददासि का सती" भैष०। उत्तरकालभावित्वादुत्तरत्वाच्चास्य तथात्वमभिप्रेत्यासितोधानतया चास्य निपङ्क्तस्थानत्वं तदभिप्रायेण उक्तश्लोकेन निपङ्क्तार्थकाक्षेपः कृतः।

उत्तरकाण्ड न० वाल्मीकि रामायणान्तर्गते सप्तमे काण्डे।

उत्तरकाल पु० कर्म०। भविष्यत्काले क्रमिकर्म्मणां तस्य गौणकालत्वमाह "एवमागामिवागीयसख्यकालादधस्तनः। स्वकालादुत्तरोगौणः कालः पूर्वस्य कर्म्मणः" हरिहरः।

उत्तरकुरु पु० नववर्षात्मकस्य जम्बुद्वीपस्य वर्षभेदे। वर्षाणां संस्थितिः सि०शि० उक्ता

"लङ्कादेशाद्विभगिरिरुदग्हेमकूटोऽथ तस्मात् तस्माच्चान्यो निषध इति ते सिन्धुपर्य्यन्तदैर्घ्याः। एवं सिद्धपुराद्दुत्तरतः शृङ्गवान् नाम गिरिः। ततः श्वेतगिरिः। ततो नीलगिरिरिति। तेऽपि सिन्धुपर्य्यन्तदैर्घ्याः। तेषामन्तरे च वर्षाणि। तत्रादौ कुरुवर्षम्। तदुत्तरे हिरण्मयम्। ततो रम्यकमिति। अथ यमकोटेरुत्तरतो माल्यवान् नाम गिरिः। स तु निषधनीलपर्य्यन्तदैर्घ्यः। तस्य जलधेश्च मध्ये भद्राश्वं वर्षम्। एवं रोमकादुत्तरतो गन्धमादनः तस्य जलधेश्च मध्ये केतुमालम्। एवं निषधनीलमाल्यवद्गन्धमादनैरावृतमिलावृतं नाम नवमखण्डम्। सा स्वर्गभूमिः। अतस्तत्र देवक्रीडास्थानि" प्रभि०। तत्र प्रधाना नदी भद्राख्या "चक्षुश्च केतुमालश्च भद्राख्या चोत्तरान् कुरून्"। सि०शि०। भा०उ०प०७अ० तद्वर्षं वर्ण्यते यथा "दक्षिणेन तु नीलस्य मेरोः पार्श्वे तथोत्तरे। उत्तराः कुरवो राजन् पुण्याः सिद्धनिषेविताः। तत्र द्रुमा मधुफला नित्यपुष्पफलोपमाः। पुष्पाणि च सुगन्धीनि रसवन्ति फलानि च। सर्व्वकामफलास्तत्र केचिद्वृक्षा जनाधिप!। अपरे क्षीरिणो नाम द्रुमास्तत्र नराधिप। ये क्षरन्ति सदा क्षीरं षड्रसञ्चाप्यतोपमम्। वस्त्राणि च प्रसूयन्ते फलेष्वाभरणानि च। सर्व्वा मणिमयी भूमिः सूक्ष्मकाञ्चनवालुका। मणिरत्ननिभं रम्यं वज्रवैदूर्य्यसन्निभम्। भूभागं दृश्यते तत्र पद्मरागसमप्रभम्। सर्व्वर्त्तुसुखसंस्पर्शा निष्पङ्का च जनाधिप। पुष्करिण्यः शुभास्तत्र सुखस्पर्शा मनोहराः। देवलोकच्युताः सर्व्वे जायन्ते तत्र मानवाः। शुक्लाभिजनसम्पन्नाः सर्व्वे सुप्रियदर्शनाः। मिथुनानि च जायन्ते स्त्रियश्चाप्सरसोपमाः। तेजान्ते क्षीरिणां क्षीरं पिबन्त्यमृतसन्निभम्। मिथुनं जायते काले समकालं प्रवर्द्धते। तुल्यरूपगुणोपेतं समवेषं तथैव च। एवमेवानुरूपञ्च चक्रुर्वृक्षसमं प्रभो!। निरामयाश्च ते लोका नित्यं मुदितमानसाः। दशवर्षसहस्राणि दशवर्षशतानि च। जीवन्ति ते महाराज! न चान्योऽत्र जहात्युत। भारुण्डा नाम शकुनास्तीक्ष्णतुण्डा भयानकाः। तान्विहंस्य क्षुधार्त्ता हि भक्षयन्ति च। उत्तराः कुरवो राजन्! व्याख्यातास्ते समासतः"। तेनास्य पुंस्त्वक्लीबात्वञ्च उक्तावाकोभ्यः। भा०स०२७अ० अर्জ্জुनोत्तरदिग्विजये "इदं पुरं यः प्रविशेदृजुर्वं न स भवेन्नरः। प्रीयामहे त्वया वीर! पर्य्याप्तो विजयस्तव। न चात्र किञ्चिद्ग्रहीतव्यम-

ज्जैनात्र प्रदृश्यते । उत्तराः कुरवोह्येते नात्र युद्धं प्रवर्त्तते । प्रविष्टोऽपि हि कौन्तेय ! नेह द्रक्ष्यसि किञ्चन । नहि मानुषदेहेन शक्यमत्राभिवीक्षितुम् । अथेह पुरुषव्याघ्र । किञ्चिदन्यद्विकीर्षसि । तदुच्यतां हि च करिष्यामो वचनात्तव भारत । ततस्तानब्रवीद्राजन्नर्जुनः प्रहसन्निव । पार्थिवत्वं विकर्षंसि धर्म्मराजस्य धीमतः । न प्रवेक्ष्यामि वो देशं विरुद्धं यदि मानुषैः । युधिष्ठिराय यत् किञ्चित् करपण्यं प्रदीयताम्" । "ततोदिव्यानि वस्त्राणि दिव्यान्याभरणानि च । क्षौमाजिनानि दिव्यानि तस्य ते प्रददुः करम्" । "तेऽवतीर्य्य बहून् देशानुत्तरांश्च कुरूनपि" । भा० व० १४५ अ० । "विजित्य यः प्राच्यमथोदुत्तरान् कुरूनकृष्यं वसु वासवोपमः" किरा० ।

उत्तरकोशला स्त्री कर्म्म० । अयोध्यानाम्न्यां नगर्य्याम् । "यदुपतेः क्व गता मथुरा पुरी रघुपतेः क्व गतोत्तरकोशला । इति विचिन्त्य कुरुष्व मनः स्थिरं न सदिदं जगदित्यवधारय" उद्भटः ।

उत्तरक्रिया स्त्री कर्म्म० । उत्तरकालकर्त्तव्ये कर्म्मणि "सर्व्वेष्वर्व्वविवादेषु बलवत्युत्तरा क्रिया । आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा" या० स्मृ० । "एकमेव क्षेत्रमेकस्याधिं कृत्वा किमपि गृहीत्वा पुनरन्यस्याधाधाय किमपि गृह्णाति तत्र पूर्वस्यैव तद्भवति नोत्तरस्य एवं प्रतिग्रहे क्रये च" मिता० । २वार्षिके पिण्डक्रिये च । "प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु । क्रियन्ते याः क्रिया पित्र्याः प्रोच्यन्ते ता नृपोत्तराः" । विष्णुपु० । ३अन्तिमक्रियायाञ्च ।

उत्तरङ्ग न० उत्तरमङ्गम् कर्म्म० । शकन्ध्वा० । १हारोर्द्ध स्थदारुणि । २प्रा० ब० । उद्गततरङ्गे त्रि० । "भागीरथीं शीतोदोत्तरङ्गः" रघुः "अपामिवाधारमनुत्तरङ्गम्" कुमा० ।

उत्तरच्छद पु० कर्म्म० । शय्याया उपर्य्यास्तरणवस्त्रे । "शशोत्तरच्छदविमर्दक्लान्तकरागम्" । "सोत्तरच्छदमध्यास्त नेपथ्यग्रहणाय सः" रघुः ।

उत्तरज्योतिष पु० प्रतीचीस्थदेशभेदे भारते स० ३१ अ० नकुलप्रतीची विजये । "कृत्स्नं पञ्चनदञ्चैव तथैवामरपर्वतम् । उत्तरज्योतिषञ्चैव तथा दिव्यकटं पुरम् । द्वारपालञ्च तरसा वशे चक्रे महाद्युतिः । रामठान् हारहूणांश्च प्रतीच्यांश्चैव ये नृपाः" ।

उत्तरतन्त्र न० सुश्रुतान्तर्गते ग्रन्थभेदे । "इदानीमत उत्तरतन्त्रमभिधास्यामः" सुश्रु० ।

उत्तरतस् अव्य० उत्तर+प्रथमापञ्चमीसप्तम्यर्थेषु तसिल् । उत्तरस्मिन् उत्तरस्मात् उत्तर इत्यर्थे । तस्य उत्तरत्वाय्यत्र अव्य० ताभ्यां भवार्थे त्यप् । उत्तरतस्य इत्तरत्वे तद्भवे त्रि० ।

उत्तरदायक त्रि० उत्तरं ददाति दा+ण्वुल् । १प्रत्युत्तरदायिनि । उत्तरेण वाक्येन दायति शोधयति निजदोषम् दैप्-शोधे-ण्वुल् । स्वामिना स्वकार्य्यप्रमादकथनेतद्दोषस्यादोषत्वख्यापनेन निजदोषशोधके भृत्यादौ । "परुषं सि रता नारी भृत्यश्चोत्तरदायकः । सर्पश्च गृहे वासः मृत्युरेव न संशयः" चाण० ।

उत्तरदिक्काल पु० ७त० । "रवाद्युत्तरतः कालः सोमे वायव्यभागके । भौमे तु पश्चिमे भागे बुधे नैर्ऋतकोणके । जीवे च याम्यदिग्भागे शुक्रे आग्नेयकोणके । शनौ तु पूर्वदिग्भागे कालचक्रं प्रकीर्त्तितम्" रत्नसारोक्ते रविवारे उत्तरदिग्वर्त्तिकालचक्रे । रात्रौ तु वैपरीत्यम् उत्तरदिक्पाशशब्दे द्रष्टव्यम् अन्यदिक्कालोऽप्युक्तदिशानेयः

उत्तरदिक्पाश पु० ७त० । "रवौ तु दक्षिणे पाशः सोमे आग्नेयकोणके । भौमे तु पूर्व्वदिग्भागे बुधे ईशानकोणके । जीवे चोत्तरदिग्भागे शुक्रे वायव्यकोणके । शनौ तु पश्चिमे भागे पाशचक्रं प्रकीर्त्तितम् । रात्रावेतौ वैपरीत्यात् पाशकालौ यथोदितौ" रत्नसा० उक्ते दुष्टस्थितिवारे उत्तरदिशि यात्रायुद्धादिनिषेधोपयोगिनि पाशचक्रे । एवमन्यदिक्स्थयुक्तदिशा पाशोबोध्यः ।

उत्तरदिक्शूल त्रि० उत्तरदिशि शूलमिवास्यस्य अच् । "ज्येष्ठा पूर्व्वा भाद्रपदा रोहिण्युत्तरफाल्गुनी । पूर्व्वादिषु क्रमाच्छूलाः यात्रादौ मरणप्रदाः । मूलाख्यानि च विष्ण्वाग्नसंज्ञाश्च वासराः । यायिनां क्षयदाः क्षीणमथ वा चार्थनाशकाः" भरद्वाजोक्ते उत्तरदिशि यात्रादौ वर्ज्ज्ये १उत्तरफल्गुनीनक्षत्रे २बुधवारे च दिक्शूलवारस्तु पृथ्वदिगीशवारः दिगीशाश्च उत्तरदिगीशशब्दे वक्ष्यन्ते । मूला इत्यत्र स्त्रीत्वं ताराविशेषत्वात् ।

उत्तरदिगीश पु० ईत० । "इन्द्रोवह्निपितृपतिर्नैर्ऋतोवरुणोमरुत् । कुबेर ईशः पतयः पूर्व्वादीनां दिशां क्रमात्" इत्युक्ते १कुबेरे उत्तरदिक्पालादयोऽत्र । "कुबेरसुग्रां दिगसुग्गरक्षौ" कुमारे "कौबेरदिग्भागमपास्य मार्गम्" माघे च उत्तरदिशः कुबेरसम्बन्धित्वसङ्गम् "सूर्य्यः शुक्रः क्षमापुत्रः सैंहिकेयः शनिःशशी । सौम्यस्त्विदृशमन्त्री च प्राच्यादिकदिगीश्वराः" इत्युक्ते २बुधे

एतच्च "दिगीशाढ्ये शुभा वाला पृष्ठाढ्ये मरणं ध्रुवम्" इत्युक्तेः उत्तरदिशः पृष्ठीभूतदक्षिणस्यां वृषधारेयात्रानिषेधाय "प्राच्यादिक्रमां नाथाः यथासंख्यं प्रदक्षिणम्। मेषाद्याः राशयो ज्ञेया स्थिराद्यत्तरभक्षात् इत्युक्तेषु १कर्कटवृश्चिकमीनेषु राशिषु च तेषु लग्नेषु तत्स्थे चन्द्रे च उत्तरदिग्गमनं शस्तमित्यपि बोध्यम्।

उत्तरदिग्द्वार न० उत्तरदिशि द्वारं सुखमस्य। "प्राच्यादिषु चतुर्दिक्षु सप्तसप्तानलर्क्षतः" ज्यो०उक्तसाभिजित्काष्टाविंशतिनक्षत्रमध्ये २३,२४,२५,२६,२७,१,२। नक्षत्रेषु तानि च यात्रादिषु तत्र दिशि शस्तानि।

उत्तरदिग्बलिन् पु० उत्तरस्यां दिशि बली। "प्राच्यां सौम्य गुराचार्यौ याम्यां भास्करभूभिजौ। प्रत्यक् सौरिरदोच्यान्तु सितेन्दू दिग्बलान्वितौ" ज्यो०त० उक्ते १शुक्रे २चन्द्रे च।

उत्तरपक्ष पु० कर्म्म०। वादे पूर्व्वपक्षस्य खण्डनरूपे सिद्धान्तपक्षे। "प्रापयन् पवनव्याधेर्गिरस्तरपक्षताम्" माघः। २उत्तरविकल्पे ३कृष्णपक्षे च शुक्लपक्षस्यैव सारारम्भकत्वात् कृष्णपक्षस्योत्तरत्वात् तथात्वम्।

उत्तरपट पु० कर्म्म०। १उत्तरीये। ततः स्वार्थोत्तरपटः सप्रखेदः सवेपथुः" भा०१३६अ०। २श्रेष्ठोत्तरच्छदे च

उत्तरपथ पु० उत्तरः पन्थाः अच् समा०। १उत्तरस्थिते २अव्यवहिते च पथि। उत्तरः उत्तरायणचिह्नितः पन्थाः। ३देवयाने पथि येन हि अर्चिरादिमार्गेण विद्यावन्तो ब्रह्मलोकं गच्छन्ति ताडशे मार्गे। तत्र मार्गे च ये तदभिमानिनो देवास्ते अर्चिरादिशब्दे २६४ पृष्ठे उक्ताः तेषाञ्च यथा आतिवाहिकत्वम् तथा आतिवाहिक शब्दे ६५१ पृष्ठे उक्तम्। "उत्तरपथेनाहृतञ्च" पा०। ठञ्। औत्तरपथिक तत्पथेनाहृते त्रि०।

उत्तरपथिक त्रि० पन्थानं गच्छति 'पथः ष्कन्' पा०पथिकः उत्तरः तद्देशभवः पथिकः। उत्तरदेशभवे १पथिके स्त्रियां ङीष्।

उत्तरपद न० उत्तरञ्चोत्तरवर्त्ति पदम्। १समासचरमावयवपदे २स्वोत्तरवर्त्तिपदे च। "एकाजुत्तरपदे णः" पा०। ३समासयोग्ये पदे च। "प्राधान्यं हि विधेर्यत्र प्रतिषेधेऽप्रधानता। पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्" मीमांसा। भवति च "यजतिषु येयजामङ्कं कुर्य्यात् नानुयाजेषु" इत्यत्र नञः समासयोग्यानुयाजेन साहित्यात् पर्य्युदासपरता तथा रात्रौ श्राद्धं न कुर्वीतेत्यादौ नञो रात्र्या समासयोग्यत्वात्तथात्वम् "अश्नन्त्यां मांसं नास्त्रीत्यादित्यत्र तु क्रियापदयोगेन तस्य समासयोग्यत्वाभावेन न तत्रोत्तरपदयोग इति न पर्य्युदासपरता किन्तु प्रसज्यप्रतिषेधार्थकता "अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता। प्रसज्यप्रतिषेधोऽत्र क्रियया सह यत्र नञ्" इति मीमांसकोक्तेः। "पदोत्तरपदात्" वार्त्ति० उत्तरपदमधीते वेत्ति वेत्यर्थे ठक्। उत्तरपदिक तदध्येतरि तद्वेत्तरि च त्रि०।

उत्तरपश्चिमा स्त्री उत्तरायाः पश्चिमाया अन्तराला दिक् दिक्स०। १उत्तरपश्चिमयोरन्तरालदिशि नैर्ऋतकोणे। सा विद्यतेऽस्य अच्। २नैर्ऋतविदिक्सम्बन्धिनि देशे पु० "उत्तरपश्चिमे गार्हपत्यम्" आश्व० श्रौ० ४,२,१२। ३तद्वर्त्तिनि त्रि०।

उत्तरपाद पु० कर्म्म०। चतुष्पादात्मकस्य व्यवहारस्य द्वितीये पादे "पूर्व्वपक्षः स्मृतः पादो द्वितीयश्चोत्तरः स्मृतः। क्रियापादस्तृतीयः स्यात्तुर्यो निर्णय उच्यते। मिश्रोक्तौ तु चतुष्पात् स्यात् प्रत्यवस्कन्दने तथा। प्राङ्न्याये च स विज्ञेयोद्विपात् संप्रतिपत्तिषु" दक्षस्मृतिः।

उत्तरपुरस्तात् अव्य० उत्तरस्याः पूर्व्वस्या अन्तराला दिक् उत्तरपूर्व्वा ततः प्रथमापञ्चमीसप्तम्यर्थे अस्ताति पुंवद्भावः पूर्व्वस्य पुरादेशः। ईशानकोणे "उत्तरपुरस्तादाहवनीयस्य जानुमात्रं गर्त्तं खात्वा" आश्व०श्रौ०४,४,८।

उत्तरपूर्व्वा स्त्री उत्तरस्याः पूर्व्वस्या दिशोऽन्तराला दिक् पुंवद्भावः दिक्स०। ईशानकोणे "आग्नेयस्तूत्तरपूर्व्वार्द्धे" कात्या०१,३,२०। दिङ्नामसमासे वा एवास्य सर्व्वनामकार्य्यम् योत्तरा सा पूर्व्वा यस्य सुखस्य एवं बहुव्रीहौ तु न सर्व्वनामकार्य्यमिति भेदः। तेन तादृशार्थेऽपि अस्य इत्त्वे त्रि०। "योत्तरा सा पूर्व्वा यस्या उन्मुखायास्तस्यै उत्तरपूर्व्वायै" त्रि०को०।

उत्तरफल्गुनी स्त्री फलति फल-निष्पत्तौ "फलेर्गुक् च" उषा० उनन् गुक् च गौरा० ङीष् कर्म्म०। अश्विन्यादिषु द्वादशे नक्षत्रे तस्याः स्वरूपम् उडुचक्रशब्दे १०७१ पृ० अक्षेषाशब्दे ४६७ पृष्ठे च तदधिदेवादि उक्तम्। फल्गुनशब्दात् स्वार्थे अण् ङीष्। फाल्गुनी कर्म्म०। तत्रैवार्थे। इयं ध्रुवगणान्तर्गता "ध्रुवगणस्त्रीषूत्तराणि स्मृः" इत्युक्तेः यथा चास्य फाल्गुनत्वं तथा समर्थितम् शत०ब्रा०। "फल्गुनीषूत्तरा आदधीत एता वा इन्द्रनक्षत्रम् यत् फल्गुन्योऽस्य प्रतिनाम्नोऽर्जुनोऽहर्वै नामेन्द्रो यदस्य शुक्लं नामार्जुन्योर्वै नाम तत्ता एतत्परोक्षमाचक्षते फाल्गुन्य इति कौषी तस्मादाहुः शुक्लं

नाम यस्मिन्"२,१,२,११अस्याः प्रथमपादः सिंहराशिः उत्तरपादत्रयं कन्याराशिः प्रमाणं उडुचक्रशब्दे दृश्यम् ।

उत्तरभाद्रपद् स्त्री भद्राय हितः भाद्रः पत् पादस्तुर्यांशो यस्याः ब० ततः कर्म्म० । अश्विन्यादिनक्षत्रेषु षड्विंशे नक्षत्रे । पदशब्देन समासे टाप् । उत्तरभाद्रपदाश्रब्द । स्वरूपादिकमुडुचक्रशब्दे १०७१पृष्ठे उक्तम् । अधिपत्यादिकमस्मिन्नायशब्दे वोक्तम् । इयं ध्रुवगणः "ध्रुवगणस्त्री-ण्युत्तराणि स्मृः"इत्युक्तेः मीनराशिघटिका ।

उत्तरमानस न० उत्तरमुत्तरस्यं मानसम् । तीर्थभेदे "कालोदकं नन्दिकुण्डं तथाचोत्तरमानसम् । अध्येत्य योजनशतादुभूषुहा विप्रमुच्यते"भा० अनु० २५ अ० । २गयामध्ये उत्तरदिक्स्थे तीर्थभेदे "उत्तरे मानसे, स्नानं करोम्यात्मविशुद्धये" इति गयाश्राद्धपद्धतिः । दक्षिणमानसमपि तत्रत्यतीर्थभेदः "दिवाकर! करोमीह स्नानं दक्षिणमानसे" इति तत्रैव ।

उत्तरमीमांसा स्त्री उत्तरस्य वेदशेषभागस्य उपनिषद्-रूपस्य मीमांसा पङ्क्त्याद्यन्यायोपेतवाक्यसमुदायात्मकोविचारः । "अथातो ब्रह्मजिज्ञासा" इत्यादौ "जन्माद्यस्य यतः" इत्यन्ते चतुरध्यायीरूपे षोडशपादात्मके शारीरस्य ब्रह्मात्मत्वप्रतिपादके वेदव्यासरचिते शारीरकसूत्राख्ये ग्रन्थे । तत्र प्रतिपाद्यविषयादिसंक्षेपतः वैयासिकमालायां भारतीतीर्थमुनिना दर्शितं यथा "शास्त्रं ब्रह्मविचाराख्यमध्यायाः सुचतुर्विधाः । समन्वयाविरोधौ द्वौ साधनं च फलं तथा" ४ । समन्वये स्पष्टलिङ्गमस्पष्टत्वमुपास्यगम् । त्रेयगं पदमात्रं च चिन्त्यं पादेष्वदः क्रमात्" ५ । द्वितीये स्मृतितर्काभ्यामविरोधोऽन्यदुष्टता । भूतभोक्तृश्रुतेर्लिङ्गश्रुतेरत्यविरुद्धता" ६ । तृतीये विरतिस्तत्त्वंपदार्थपरिशोधनम् । गुणोपसंहृति र्ज्ञानबहिरङ्गादिसाधनम् ७ । चतुर्थे जीवतोमुक्ति रुत्क्रान्तिर्गतिरुत्तरा । ब्रह्मप्राप्तिब्रह्मलोकावाप्तीः पादार्थसंग्रहः" ८ । "अध्यायचतुष्टयात्मकस्य शास्त्रस्य ब्रह्मविचारोऽर्थः सर्वेषां वेदान्तवाक्यानां ब्रह्मणि तात्पर्येण पर्य्यवसानं प्रथमाध्यायेन प्रतिपाद्यते । द्वितीयेन सम्भावितविरोधः परिह्रियते । तृतीयेन विद्यासाधननिर्णयः । चतुर्थेन विद्याफलनिर्णयः इत्येते अध्यायार्थाः ४। तत्र प्रथमाध्यायगतपादार्थान् विभजते । समन्वयेति । स्पष्टब्रह्मलिङ्गयुक्तं वाक्यजातं प्रथमे पादे चिन्त्यम् ।"आनन्दमयोपदेशाद्" इत्यत्र सार्वत्र्यसार्वात्र्य-सर्वपापविरहादिकं च ब्रह्मणोऽसाधारणतया स्पष्टब्रह्मलिङ्गम् । अस्पष्टब्रह्मलिङ्गत्वे सत्युपास्यविषयं वाक्यजातं द्वितीयपादे चिन्त्यम् । तद्यथा प्रथमाधिकरणविषये शाण्डिल्योपास्तिवाक्ये मनोमयत्वप्राणशरीरत्वादिकं सोपाधिकब्रह्मणो जीवस्य च साधारणत्वादस्पष्टब्रह्मलिङ्गम् । तृतीयपादे त्वस्पष्टब्रह्मलिङ्गत्वे सति ज्ञेयब्रह्मविषयं वाक्यजातं चिन्त्यं तद्यथा प्रथमाधिकरणे हृदयङ्गतब्रह्मतत्त्ववाक्ये द्युभ्वन्तरिक्षाद्योतत्वं स्वतात्मनः परब्रह्मणश्च साधारणत्वादस्पष्टं ब्रह्मलिङ्गम् । यद्यपि द्वितीयपादे कठवल्ल्यादिगतब्रह्मतत्त्ववाक्यानि विचारितानि । तृतीयपादे दहरोपासनावाक्यं विचारितं तथाप्यवान्तरसंगतिलाभेन तद्विचारस्य प्रासङ्गिकत्वाच्च पादार्थयोः साङ्कर्यापत्तिः इत्येवं पादत्रयेण वाक्यविचारः समाप्तः । चतुर्थपादे त्वव्यक्तपदमजापदं चेत्येवमादिसन्दिग्धपदं चिन्त्यम्५। द्वितीयाध्यायगतपादार्थान्विभजते द्वितीये इति । प्रथमपादे सांख्ययोगकाणादादिस्मृतिभिः सांख्यादिप्रयुक्ततर्कैश्च विरोधो वेदान्तसमन्वयस्य परिहृतः । द्वितीयपादे सांख्यादिमतानां दुष्टत्वं प्रदर्शितम् । तृतीयपादे पूर्वभागेण पञ्चमहाभूतस्मृतीनां परस्परविरोधः परिहृतः उत्तरभागेण जीवस्मृतीनाम् चतुर्थपादे लिङ्गशरीरस्मृतीनां विरोधः परिहृतः ६। तृतीयाध्यायगतपादार्थान्विभजते तृतीये इति । प्रथमपादे जीवस्य परलोकगमनागमने विचार्य वैराग्यं निरूपितम् । द्वितीयपादे पूर्वभागेण त्वंपदार्थः शोधितः । उत्तरभागेण तत्पदार्थः । तृतीयपादेन सगुणविद्याया गुणोपसंहारो निरूपितः निर्गुणे ब्रह्मणि च पुनरुक्तपदोपसंहारश्च । चतुर्थपादे निर्गुणज्ञानस्य बहिरङ्गभूतान्याश्रमवयआदीन्यन्तरङ्गभूतयमदमनिदिध्यासनादीनि च निरूपितानि ७ । चतुर्थाध्यायगतपादार्थान्विभजते चतुर्थे इति । प्रथमपादे श्रवणाद्याश्रया निर्गुणसगुणोपासनया-सगुणं वा ब्रह्म साक्षात्कृत्य जीवतः पापपुण्यलेपविनाशलक्षणा मुक्तिरभिहिता । द्वितीये पादे म्रियमाणस्योत्क्रान्तिप्रकारोनिरूपितः । तृतीयपादे सगुणविदो मृतस्योत्तरमार्गोऽभिहितः । चतुर्थपादे पूर्वभागेण निर्गुणब्रह्मविदो विदेहकैवल्यप्राप्तिरभिहिता, उत्तरभागेण सगुणब्रह्मविदो ब्रह्मलोकप्राप्तिर्निरूपिता"तद्वा० । मीमांसा हि वेदतात्पर्यनिर्णयार्थः न्यायपञ्चकात्मकविचारः । सा च द्विविधा पूर्वमीमांसा उत्तरमीमांसा च तत्र पूर्वमीमांसा जैमिनिप्रणीता "अथातोधर्मजिज्ञासा" इत्यादिका, उत्तरमी-

मांसा दर्शिता। इयमेव च ब्रह्ममीमांसात्वेन प्रसिद्धा

उत्तररामचरित न० उत्तरं रामस्य चरितं यत्र। भवभूति-प्रणीते नाटकभेदे।

उत्तरवयस वि०उत्तरं वयः नि०बेदे अच् समा०। वृद्धावस्थायाम् "तस्मादुत्तरवयसे पुत्रान् पितोपजीवति" शत० ब्रा० १२,२,२,४। लोके तु उत्तरवयस् इत्येव।

उत्तरवस्ति पु० सुश्रुतोक्ते चिकित्साङ्गे यन्त्रभेदे। तत्स्वं रूपप्रयोगप्रकारादि यथा तत्रैव

"वस्तेरुत्तरसंज्ञस्य विधिं वक्ष्याम्यतःपरम्। चतुर्दशाङ्गुलनेत्रमात्राङ्गुलिसन्मितम्। मालतीपुष्पसदृशाग्रं छिद्रं सर्षपनिर्गमम्। मेढ्रायामसमं केचिदिच्छन्ति खलु तद्विदः। स्नेहप्रमाणं परमं कुड्वद्वात्र प्रकीर्त्तितः। पञ्चविंशदधोमात्रां विदध्याद्वुद्धिकल्पिताम्। निविष्टकर्णिकं मध्ये नारीणां चतुरङ्गुलम्। मूलस्रोतःपरीणाहसदृवाच्छिद्रमङ्गुलम्। तासामपत्यमार्गे तु निदध्यात्तुरङ्गुलम्। द्व्यङ्गुलं मूलमार्गे तु कन्यानान्त्वेकमङ्गुलम्। विधेयं चाङ्गुलं तासां विधिवद्वक्ष्यते यथा। स्नेहस्य प्रस्थतद्वात्र स्वाङ्गुलीमूलसंमितम्। देयं प्रमाणं परममर्धाङ्गुलविकल्पितम्। औरभ्रः शौकरो वापि वस्तिराजत्र पूजितः। तदलाभे प्रयुञ्जीत गलचर्म्म तु पक्षिणाम्। अस्यालाभे हृतेः पादो मृदुचर्म्म ततोऽपि वा। अथाहरेत्सुपक्वान्नं सुस्निग्धं प्रथिताशयम्। यवागूं सप्ततनीरां पीतवन्तं यथाबलम्। निषण्णमाजानुसमे पीठे स्थानाश्रये समे। स्वभ्यक्तवस्तिमूर्द्धानं तैलेनोष्णेन मानवम्। ततः समं स्थापयित्वा नालमस्य प्रहर्षितम्। पूर्वं शलाकयाऽन्तिम्य ततो नेत्रमनन्तरम्। शनैःशनैर्हृताभ्यक्तं विद्ध्यादङ्गुलानि षट्। ततोऽवपीडवेद्वस्तिं च नैनंत्वं च निर्हरेत्। ततः प्रत्यागते स्नेहमपराह्णे विचक्षणः। भोजयेत् पयसो मात्रां यूषेणाथ रसेन वा। अनेन विधिना दद्याद्वस्तींस्त्रीं-श्चतुरोऽपिवा। जर्जाजान्वै स्त्रियै दद्यादुत्तानायै विचक्षणः। कल्यैतरस्यै कन्यायै दद्यात्सुखं पीडितम्। त्रिकर्णिकेन नेत्रेण दद्याद्योनिसुखं प्रति। गर्भाशयविशुद्ध्यर्थं स्नेहेन द्विगुणेन तु। अप्रत्यागच्छति भिषक् वस्तावुत्तरसंज्ञिते। मूत्रोत्वस्तिं निदध्यात्तु संयुक्तं शोधनैर्गणैः। गुदे वर्त्तिं निदध्याद्वा शोधनद्रव्यसंयुताम्। प्रवेशयेद्वा मतिमान्वस्तिद्वारमथैषणीम्। पीडवेद्वाप्यधोनाभेर्वेलेनोत्तरसंज्ञिना। चारग्वधस्य पत्रेषु निर्गुण्ड्याः सुरसेषु च। कुर्याद्वोमूलपिष्टेषु वर्त्तीर्वापि ससैन्धवाः। सङ्कोचार्थप्रशमाः प्रविभज्य वयांसि तु। वस्तेरागमनार्थाय ता निदध्याच्छलाकया। आगारधूमदहतीपिप्पलीफलसैन्धवैः। हृता वा शुक्तगोमत्रसुरापिष्टैः सनागरैः। अनुवासनसिद्धिञ्च वीक्ष्य कर्म प्रयोजयेत्। शर्करामधुमिश्रेण शीतेन मधुकाम्बुना। दह्यमाने तदा वस्तौ दद्याद्वस्तिं विचक्षणः। क्षीरद्वयप्रवेण पयसा शीतलेन च। शुक्रं दुष्टं शोणितं चाङ्गनानां पुष्पोद्भवं तस्य नाशञ्च कृत्स्नम्। मूत्राघातान्मूत्रदोषान् प्रदद्यात् योनिव्याधिं संस्थितिं चापरायाः। शुक्रोत्थं शर्करामश्मरीञ्च शुक्रं वस्तौ वङ्क्षणे मेढ्रने च। घोरानन्यान् वस्तिजांश्चापि रोगान् हित्वा मेढ्रात्तुत्तरो हन्ति वस्तिः। सम्यग्दत्तस्य लिङ्गानि व्यापदः क्रम एव च। वस्तेरुत्तरसंज्ञस्य समानं स्नेहवस्तिना"।

उत्तरवादिन् त्रि० उत्तरमुत्तरपक्षं वदति वद-णिनि। वादे प्रतिवादिनि (आगामी) "सान्त्विष्वभयतः सत्सु भवन्ति पूर्ववादिनः। पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः" या०स्मृ०।

उत्तरवेदि स्त्री कर्म्म० वा ङीप्। 'तरन्तुकारन्तुकयोर्वदन्तरं रामह्रदानाञ्च मचक्रुकस्य च। एतत् कुरुक्षेत्रसमन्तपञ्चकं पितामहस्योत्तरवेदिरुच्यते" भा० व० ८३अ० उक्ते कुरुक्षेत्रान्तर्गते समन्तपञ्चकरूपे तीर्थे। कुरुक्षेत्रञ्च "उत्तरेण दृषद्वत्या दक्षिणेन सरस्वतीम्। ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिपिष्टपे" इत्युक्तस्थले तीर्थभेदः। इयमेव ब्रह्मवेदीत्युच्यते "ब्रह्मवेदी कुरुक्षेत्रं पुरुषं ब्रह्मर्षिसेवितम्" तत्रैवोक्तेः। यज्ञेऽग्निस्थानपार्श्वे २वेदिभेदे तत्स्वरूपादि दर्शितं यथा। "तत्र महावेदिपश्चिमरेखामध्यात् पूर्वतः, समित्त्रयमितां, प्राचीरेखा मध्यात् पश्चिमतः समिन्मात्रां, दक्षिणरेखामध्यात् उत्तरस्थासुत्तररेखामध्यात् दक्षिणस्थां तथैव समिन्मात्रां भूमिं त्यक्त्वा कुण्डादिमध्ये समिद्द्वयमितदीर्घविस्तारां समचतुरस्रासुत्तरवेदिमग्निस्थापनाय वेदिमध्ये कल्पयेत्"। "उत्तरवेद्यग्निप्रणयनमन्थनशूपदाज्यं वरुणप्रघासादधः" कात्या०५,७,१५। "दक्षिणेन निर्ऋत्य दक्षिणस्थासुत्तरवेदिश्रोणी निदधाति ८,६,१८। ७अथात आहवनीय एवोपकिरन्त्युत्तरवेदिम्" शत० ब्रा० २,४,१, १८। "तद्वै द्वे वेदी द्वावग्नी भवतः। तद्यद्वै द्वे वेदी द्वावग्नी भवतस्तदुभयतस्तदुभयत एवैतत् वरुणप्रघासान् प्रजाः प्रसृज्यन्तीतश्चोर्द्धा इतश्चावाचीस्तस्माद्वै द्वे वेदी द्वावग्नी भवतः। स उत्तरस्यामेव वेदौ उत्तरवेदिम् उप-

किरति न दक्षिणस्याम्" शत०ब्रा०२,५,२,५,६ ।

उत्तरशालङ्कट पुंस्त्री द०व०उत्तरश्च शालङ्कटश्च द्वन्द० ततः गोत्रप्रत्ययस्य लुक् । उत्तरशालङ्कगोत्रोत्पन्ने ।

उत्तरसक्थ न० उत्तरः सक्थः एकदे०त० टच्समा० । सक्थ्न उत्तरभागे

उत्तरसाक्षिन् त्रि० "साक्षिणामपि यः साक्षी स्वपक्षं परिभाषताम् । अवणाच्चावणाद्वापि स साक्ष्युत्तरसंज्ञक" इति नारदोक्ते साक्षिभेदे ।

उत्तरसाधक त्रि० उत्तरः सन् साधयति सिध-णिच् साधादेशः ण्वुल् । सहाये सहकारिणि । स हि इतरसामर्थ्योत्तरे तदुत्तरवर्त्ती सन् कार्य्यं साधयति ।

उत्तरा अव्य० उत्तर+प्रथमापञ्चमीसप्तम्यर्थे आच् । उत्तरस्यां दिशि काले देशे वेत्यादयर्थे । १प्रययावुत्तरासङ्गः" भा०स० २८अ० । २उत्तरस्यां दिशि ३विराटकन्यायां स्त्री । "प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु । क्रियन्ते याः क्रियाः पित्र्याः प्रोच्यन्ते उत्तरा हि ता" इत्युक्तासु सपिण्डीकरणोत्तरासु वार्षिकश्राद्धक्रियायासु च स्त्री ।

उत्तरात् अव्य० उत्तर+दिगादेशकालविषये आति । उत्तरस्यादुत्तरस्मिन्नित्यर्थे । "पश्चादोत्तरादधरादाद्पुरस्तात्" ऋ० ६,१६,६ । "त्वं नः पश्चादधरादुत्तरात् पुरः" ऋ० ८,६१,१६ ।

उत्तरात्तात् अव्य०उत्तरात्+बा० वेदे०नि० तति । उत्तरादित्यर्थे । "सप्त वीरासोऽधरादुदायन्नष्टोत्तरात्तात् समजग्मिरन्ते" ऋ० १०,२७,१५ । "पुरस्तात् सवितोत्तरात्तात् सविताऽधरात्तरात् १०,२६,१४ ।

उत्तराधर त्रि० कर्म्म० उत्तरश्च अधरश्च । उच्चावचे उत्तराधरा इव भवन्त्योषधि" शत०ब्रा०५,२,४,२१ । उपरितनेऽधस्तने पु० "पुनर्विबुधः स्फुरितोत्तराधर" कुमा० ।

उत्तराधिकारिन् त्रि० उत्तरं पूर्व्वस्वामिस्वत्वोपरमानन्तरमधिकरोति तद्धने स्वाम्यमाप्नोति अधि+कृ-णिनि । पूर्व्वस्वामिस्वत्वोपरमे तद्धने स्वामित्वप्राप्ते पूर्व्वस्वामिसम्बन्धिपुत्रादौ स्त्रियां ङीप् । तत्र कस्यधने कस्याधिकारः। तत्र तावत् यद्देशप्रचलितदायभागमतानुसारिक्रमोऽभिधीयते तत्र तद्ग्रा० श्रीकृष्णेनोक्तम् यथा । "अत्रायं मृतपुरुषधनाधिकारिक्रमः । तत्र प्रथमं पुत्रः तदभावे पौत्रः तदभावे प्रपौत्रः, मृतपितृकपौत्र-मृतपितृपितामहकप्रपौत्रयोस्तु पुत्रेण सह युगपदधिकारः । प्रपौत्रपर्य्यन्ताभावे पत्नी सा च प्राप्तभर्त्तृदाया भर्त्तृकुलं तदभावे पितृकुलं वा समाश्रिता सती शरीररक्षार्थं भर्त्तृदायं भुञ्जीत तथा भर्त्तुरुपकारार्थं यथाकथञ्चिद्दानादिकमपि कुर्व्वीत न तु स्त्रीधनवत् स्वच्छन्दं विनियुञ्जीत । तदभावे दुहिता तत्र प्रथमं कुमारी तदभावे नाग्दत्ता, तदभावे जाता सा च पुत्रवती सम्भावितपुत्रा च ते द्वे युगपदेवाधिकारिण्यौ, वन्ध्या पुत्रहीना विधवा च नाधिकारिणी । जातायाश्चभावे दौहित्रः । तदभावे पिता । तदभावे माता, तदभावे भ्राता, तत्रापि प्रथमं सोदरः तदभावे वैमात्रेयः, सुतस्य भ्रातृसंसृष्टत्वे तु सोदरमात्रविषये प्रथमं संसृष्टसोदर एवाधिकारी तदभावे चासंसृष्टसोदरः, एवं वैमात्रेयमात्रविषये प्रथमं संसृष्टवैमात्रेयः तदभावे चासंसृष्टवैमात्रेयः, यदा तु संसृष्टोवैमात्रेयः सोदरश्चासंसृष्टः तदा तावुभौ तुल्यवदधिकारिणौ । भ्रातृणामभावे भ्रातृपुत्रः, तत्रापि प्रथमं सोदरभ्रातृपुत्रः तदभावे वैमात्रेयभ्रातृपुत्रः, संसर्गे तु सोदरभ्रातृपुत्रमात्रविषये प्रथमं संसृष्टसोदरभ्रातृपुत्रः तदभावे चासंसृष्टसोदरभ्रातृपुत्रः, वैमात्रेयभ्रातृपुत्रमात्रविषये प्रथमं संसृष्टवैमात्रेयभ्रातृपुत्रः तदभावे चासंसृष्टवैमात्रेयभ्रातृपुत्रः, यदा तु सोदरभ्रातृपुत्रोऽसंसृष्टो वैमात्रेयभ्रातृपुत्रस्तु संसृष्टः तदा द्वौ भ्रातृवत्तुल्याधिकारिणौ । भ्रातृपुत्राभावे भ्रातृपौत्रः तत्रापि भ्रातुः सोदरासोदरक्रमः संसर्गासंसर्गक्रमश्च बोध्यः । तदभावे पितृदौहित्रः स च सोदरभगिनीपुत्रः वैमात्रेयभगिनीपुत्रश्च, तदभावे पितामहः, तदभावे पितामही, तदभावे पितुः सहोदरः तदभावे पितृवैमात्रेयः । तदभावे पितृसोदरपुत्रपितृवैमात्रेयपुत्रपितृसोदरपौत्रपितृवैमात्रेयपौत्राणां क्रमेणाधिकारः । तदभावे पितामहदौहित्रः तत्रापि पितृसोदरभगिनीपुत्रः पितृवैमात्रेयभगिनीपुत्रश्च, वक्ष्यमाणप्रपितामहदौहित्राधिकारेऽप्येवम्, तदभावे प्रपितामहः तदभावे प्रपितामही तदभावे पितामहसहोदरभ्रातृतद्वैमात्रेयभ्रातृतत्पुत्रपौत्रप्रपितामहदौहित्राः क्रमेणाधिकारिणः । एतावत्पर्य्यन्तानां धनिभोग्यपिण्डदातृणामभावे धनिदेयपिण्डदातृणां मातामहमातृष्वसादीनामधिकारः तत्रापि प्रथमं मातामहस्तदभावे मातृष्वतत्पुत्रपौत्राणां क्रमेणाधिकारः तदभावे चाधस्तनसकुल्यानां धनिभोग्यत्वेपदार्हाणां प्रतिप्रथमप्रभृतिपुरुषक्रमाणां क्रमेणाधिकारः, तदभावे पुनरूर्द्धतनसकुल्यानां धनिदेयत्वेपभुग्नार्हप्रपिता-

महादितत्सन्ततीनामासत्तिक्रमेणाधिकारः, तदभावे समानोदकानामधिकारः। तेषामभावे चाचार्यस्य तदभावे शिष्यस्य तदभावे सब्रह्मचारिणोऽधिकारः, तदभावे चैकपाम्यसगोत्रसमानप्रवरयोः क्रमेणाधिकारः। उक्तपर्य्यन्तानां सर्वेषां सम्बन्धिनामभावे ब्राह्मणधनवर्ज्जं राजा गृह्णीयात्, ब्राह्मणधनन्तु वैद्यादिगुणयुक्ता ब्राह्मणा गृह्णीयुः। एवं वानप्रस्थधनं भ्रातृत्वेनानुमतोऽपरवानप्रस्थ एकतीर्थी गृह्णीयात्। तथा यतिधनं सच्छिष्यः। नैष्ठिकब्रह्मचारिणोधनमाचार्यः उपकुर्व्वाणस्य तु ब्रह्मचारिणोधनं पित्रादिर्गृह्णीयादिति सङ्क्षेपः"।

दायक्रमसंग्रहे भ्रातृदौहित्रपितृव्यदौहित्रपितामहसोदरदौहित्राणामप्यधिकारोऽभिहितः। विवादभङ्गार्णवमते पुत्रपौत्रदौहित्रयोरप्यधिकारः। इदन्तु बोध्यं पितृधनविभागे जनन्याः पुत्रतुल्यांशेऽधिकारः। पितामहधनविभागे च पितृजनन्याःपौत्रतुल्यांशेऽधिकारः। जीवद्भागे तु पित्रा पितामहेन वा भागइयं यावद्भ्यः अप्राप्तस्त्रीधनानां सर्वासां स्वसपत्नीनां पुत्रस्य मृतपितृपौत्रस्य चैकैकोऽंशोदेयः, अनेकपितृकाणां तु पितृतोभागकल्पना एवं मातृधने पितामहीधनेऽपि पितृतोभागकल्पना इति। स्थावरे तु विशेषः "अविभक्तं स्थावरं यत् सर्वेषामेव तद्भवेत्" इत्यस्मृतिवचनात् तुल्यरूपाणां सोदरासोदराणां समाधिकारः। स्त्रीधने विशेषस्तवैव। "अतोयं स्त्रीधनाधिकारिक्रमनिर्णयः। तत्र कन्याधने प्रथमं सोदरभ्रातृत्वाभावे मातृत्वाभावे पितुरधिकारः। वरदत्तातिरिक्तवाग्दत्ताधनेष्वेवं, वरदत्तधने तु वरस्याधिकार इति। जढावा यौतकधने प्रथमं कुमारी, तदभावे वाग्दत्ताऽधिकारिणी, एतयोरभावे जढयोः पुत्रवतीसम्भावितपुत्रयोर्युगपदधिकारः। एकस्या अभावेऽपरायाः, एतयोरभावे बन्ध्याविधवयोस्तुल्याधिकारः, एकाभावे चापरायाः,। ततः पुत्रदौहित्रपौत्रप्रपौत्रसपत्नीपुत्रपौत्रप्रपौत्राणां क्रमेणाधिकारः। मन्वङ्गिरसौ तु सपत्नीपुत्रानन्तरं दौहित्रस्याधिकार इति विशेषः। ततोब्राह्मादिविवाहपञ्चकसमयलब्धयौतकधने भर्त्ता, भ्राता माता पिता चेति क्रमः, आसुरादिविवाहत्रयसमयलब्धयौतकधने माता पिता भ्राता भर्त्ता चेति क्रमः। ततो देवरः ततोदेवरपुत्रभ्रातृश्वशुरपुत्रौ, ततोभगिनीपुत्रः, ततोभर्तृभागिनेयः, ततोभ्रातृपुत्रः, ततोजामाता, ततः श्वशुरः, भ्रातृश्वशुरः,। ततश्चानन्तर्य्यक्रमेण सपिण्डाः, ततः सकुल्याः, ततः समानोदका इति। यौतकातिरिक्तेऽपि पितृदत्ते प्रथमं कुमारी, ततः पुत्रः, ततः पुत्रवतीसम्भावितपुत्रे, ततः पौत्रदौहित्रप्रपौत्रसपत्नीपुत्रपौत्रप्रपौत्राः। ततो बन्ध्या विधवा च युगपदधिकारिण्यौ, ततोब्राह्मादिक्रमेणैव पूर्ब्ववत् क्रमः। पितृदत्तातिरिक्ते अयौतकधने तु पुत्रक्रमाद्योर्युगपदधिकारः, तयोरभावे पुत्रवतीसम्भावितपुत्रयोः, ततः पौत्रदौहित्रप्रपौत्रसपत्नीपुत्रपौत्रप्रपौत्राः क्रमेणाधिकारिणः,। ततो बन्ध्या विधवा च युगपदधिकारिण्यौ ततः पूर्ब्ववत् ब्राह्मादिक्रमः"। अत्र सर्वत्र प्रमाणं दायभागेऽनुसन्धेयम्।

चिन्तामणिमते पुत्रदत्तकपौत्रदत्तपितापितामहकप्रपौत्राधिकारं दायभागमतवत् सप्रपञ्चं निरूप्य अपुत्रत्वंधने विशेषोऽभिहितो यथा।

"अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्" मनुः। "आपस्तम्बः अपुत्रधनाधिकारी आसप्तमसपिण्डस्तदभावे व्यवहितस्तदभावे आचार्य्यस्तदभावेऽन्तेवासी"। याज्ञवल्क्यः "पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा। तत्सुतोगोत्रजोबन्धुः। शिष्यस्सब्रह्मचारिणः। एषामभावे पूर्ब्वस्य धनभाग्युत्तरोत्तरः। स्वर्य्यातस्य ह्यपुत्रस्य सर्ब्ववर्णेष्वयं विधिः"। पितरावित्यत्र क्रमाकाङ्क्षायामादौ माता तदभावे पिता विष्णुरप्येकमूलत्वात्। तत्सुतो भ्रातृपुत्रः अपुत्रस्य पुत्रपौत्रप्रपौत्रशून्यस्य। कात्यायनः "विभक्ते संस्थिते द्रव्यं पुत्राभावे पिता हरेत्। भ्राता वा जननी वापि माता वा तत्पितुः क्रमात्"। पित्रर्ज्जितं पिता, भ्रात्रार्ज्जितं भ्रात्रादिरिति व्यवस्थितोविकल्पः। पैठीनसिः "अपुत्रस्य स्वर्य्यातस्य भ्रातृगामि धनं तदभावे पितरौ लभेताम्"। देवलः "ततोदायमपुत्रस्य विभजेरन् सहोदराः। तुल्यादुहितरोवापि म्रियमाणः पितापि वा। सवर्णाभ्रातरोमाता भार्य्या चेति यथाक्रमम्। एषामभावे गृह्णीयुः सकुल्याः सहवासिनः"। तुल्याः सहोदराश्च सवर्णाभ्रातरोऽत्र बैमात्रेयाः। अत्र च देवलोक्तक्रमेण सह विष्णुयाज्ञवल्क्योक्तक्रमयोर्व्विरोधभाग्यत्र यथाक्रममिति पदं देवलीयं याज्ञवल्क्योक्तक्रमानतिक्रमेणेति हलायुधेन व्याख्यातम्। देवलवचनलिखनानन्तरं विष्णुयाज्ञवल्क्योक्तवचने लिखितवतः कल्पतरुकृतोऽप्येवमेवाशयः। एतच्च न मनोरमं न हि श्लोक्तक्रमसङ्कल्पं परोक्तक्रमो यथाक्रममिति श्लोक्तस्यार्थोभवितुमर्हतीति उपस्थितं विज्ञायानुपस्थितपरित्यक्तमौरवात् एवमपि पैठीनसिवचननविरोधापरीहाराच्च। तस्मात्पूर्ब्वपुरुषार्ज्जितधने विष्णु-

याज्ञवल्क्योक्तक्रमस्तदन्यधने तु पैठीनस्याद्युक्तक्रम इति रत्नाकरः। बौधायनः "सपिण्डाभावे सब्रह्मचारी आचार्यः अन्तेवासी ऋत्विग्वा हरेत् तदभावे राजा"। सगोत्रजाभावे बन्धुः याज्ञवल्क्यवचनात् स च स्वबन्धुः पितृबन्धुः मातृबन्धुश्च। "आत्मपितुःभ्रातुः पुत्रा आत्ममातुःभ्रातुः सुताः। आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः। पितुः पितृभ्रातुः पुत्राः पितुर्मातुः-भ्रातुः सुताः। पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः। मातुः पितृभ्रातुः पुत्रा मातुर्मातुःभ्रातुः सुताः। मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः"। एतेषां क्रमेणाधिकारः। तदयं संक्षेपः। आदौ पुत्रसद्भावे-पौत्रसद्भावे प्रपौत्रसद्भावे साध्वी भार्य्या तदभावे दुहिता तदभावे माता तदभावे पिता तदभावे दौहित्रसद्भावे भ्राता तदभावे तत्पुत्रसद्भावे आसन्नसपिण्ड-सद्भावे यथाक्रमं व्यवहितसपिण्डसद्भावे आसन्नसकुल्य-सद्भावे व्यवहितसकुल्यसद्भावे मातुलपुत्रादिः सर्वाभावे ब्राह्मणधनवर्ज्जं राजगामि ब्राह्मणधने तु ब्राह्मणान्त-रमेव धनग्रहणाधिकारीति। याज्ञवल्क्यः "वानप्रस्थयति ब्रह्मचारिणामृक्थभागिनः। क्रमेणाचार्य्यसच्छिष्यधर्म्म-शालेकतीर्थिनः"। क्रमेण प्रतिलोमक्रमेण तेन ब्रह्मचारि-योगुरुकुलस्थस्याचार्य्यः, यतेः सच्छिष्यः, वानप्रस्थस्य शालत्वेनानुमतोऽपरोवानप्रस्थएव"।

अधिकारिक्रमे पितृदौहित्रादेरकीर्त्तनात् तस्य नाधि-कार इति विशेषः।

स्त्रीधने विशेषः "तत्र मातुः जनन्यां संस्थितायान्तु समं सर्वे सहोदराः। भजेरन्मातृकं रिक्थं भगिन्यश्च समांशतः। याभ्यासां खुर्दुहितरस्तासामपि यथांशतः। मातामह्याधनात् किञ्चित् प्रदेयं प्रीतिपूर्वकम्"। समविभ-मांशम्, समांशतः सहोदराः, भगिन्यः कुमार्य्यएव समांशा-स्तदाह हरहस्तिः "स्त्रीधनं स्यादपत्यानां दुहिता च तदंशिनी। अप्रत्ता चेत्समूढा तु लभते मानमात्रकम्"। अपत्यानां पुत्राणां तदंशिनीति विशेषात्पुत्रा समत्व लाभः समूढा विवाहिता मानमात्रकं द्रव्यानुसारेण किञ्चित्। गौतमः "स्त्रीधनं दुहितृणामप्रत्तानामप्रतिष्ठि-तानाञ्च"। "अप्रतिष्ठिता अनपत्या निर्धनभर्तृका दुर्भ-गा" चेति रत्नाकरादयः। एता अपुत्रा अपि पुत्रवन्मातृ-धनभाजः। मनुः "मातृक यौतुकं यत्स्यात्कुमारीभागएव सः"। यौतुकं विवाहकाले पित्रादितो लब्धम्। वशिष्ठः "मातुः पारिणाय्यं स्त्रियोविभजेरन्"। पारिणाय्यं परि-च्छदादयेकश्रुतिकादि। याज्ञवल्क्यः "मातुर्दुहितरः शेष-मृणान्ताभ्य ऋतेऽन्वयः"। मातृधनं तदृणाच्छेषं ऋणशो-धनावशेषं दुहितरोभजेरन्, ताभ्य ऋते दुहितृणामभावे-ऽन्वयः दौहित्रीदौहित्रो मनुवचनानुरोधात्। ब्राह्म्या-दिदैवाहिकं परिच्छदादिकञ्च यत्मातृधनं तद्विषयमेतत्। कात्यायनः "दुहितृणामभावे तु ऋक्थभ्युत्तेषु तद्भवेत्। बन्धूनामथभावे तु भर्त्तृगामि तत् स्मृतम्। भगिन्योबान्धवैः सार्द्धं विभजेयुः समर्द्धकाः। स्त्रीधनस्येति धर्म्मोऽयं विभागस्तु प्रकल्पितः"। दुहितृणामिति पारिणाय्यं विवाहकाले यौतुकलब्धं पितृदत्तञ्च यन्मातृधनं तत्तासां पुत्राभावे पुत्रगामि भवतीत्यर्थः तदतिरिक्तन्तु स्त्रीधनं तस्या अभावे पुत्रीपुत्रोभयगामि इत्युक्तमेव प्राक्। बन्धुदत्तमिति पित्र-तिरिक्तेन दत्तं यत्तद्भ्रातृभगिन्यौ किन्तु कन्या तत्र-मांशा विवाहिता तु किञ्चिद्भागभागिनीति भगिन्य इत्यादे-रर्थः। अभावे पुत्रीपुत्राद्यभावे स्त्रियाधनं पतिगामी-त्यर्थः मनुः "ब्राह्म्यादैवार्षगान्धर्व्वं प्राजापत्येषु यद्धनम्। अतीतायामप्रजायां भर्तुरेव तदिष्यते। यत्त्वस्याः स्याद्-धनं किञ्चिद्विवाहेष्वासुरादिषु। अतीतायामप्रजायां मातापित्रोस्तदिष्यते"। अप्रजायामनपत्यायाम्। गौतमः "भगिनीशुल्कं सोदर्याणामूढं मातुः पूर्वं चेत्केचे"। आसु-रादिविवाहत्रयलब्धविषयमेतत्। बौधायनः "ऋक्थं स्व-तायाः कन्यायाम्भ्रातरः सोदराः समम्। तदभावे भवे-न्मातुस्तदभावे भवेत्पितुः" वि०चि०। अत्र यस्य भर्तृ-गामित्वन्तं तदभावे तत्सपिण्डानामासन्नक्रमेणाधि-कारः। यस्य तु पितृगामित्वोक्तं तत्र तदभावे तत्रत्या-सन्नसपिण्डा अधिकारिणः इति बोध्यम्।

मिताक्षरामते तु जन्माधीनस्वत्वाङ्गीकारेण पैतामहे पित्रे च धने पितापुत्रयोः पितामहपौत्रयोश्च तुल्याधिकारः। पितुः पितामहस्य चोपरमे पुत्रस्य, पौत्रस्याप्य स्वपिह-योर्म्येऽधिकारः। जीवद्विभागे तु स्वार्ज्जिते पितृद्रव्यं संहा-रिता पैतामहे तुल्यांशिता। धनिनृतविभागे तदुपरमे पुत्रा-दिनृतविभागे च धनिपत्निनामेकैकांशेऽधिकारः। दुहि-तृणान्तु प्रत्येकं स्वजातीय कल्पितभागचतुर्थांशभागिता। सासदायिकस्वत्वाङ्गीकारेण च भ्रात्रादीनामपुत्रादीनामवि भक्तत्वे संसृष्टत्वे च एकस्य मरणे इतरस्य स्वत्वस्थितेः तत्र पत्न्यादीनां न स्वत्वसृत्पद्यते तथा च विभक्तासंसृष्टधनएव पत्न्यादीनामधिकारः। पत्नीदुहितरश्चेत्यादि या० वचनात्

तच्च वचनं चिन्तामणिमते ११००पृष्ठे दर्शितम् तस्य वचनस्य व्याख्यायाम् मिता० तत्क्रमोदर्शितो यथा "तस्मादृक्थस्य स्वर्यातस्य विभक्तस्यासंसृष्टिनः परिणीता स्त्री संयता सकलमेव धनं गृह्णातीति स्थितम्। तदभावे दुहितरः। दुहितर इति बहुवचनं समान जातीयानामसमानजातीयानाञ्च समविभागप्राप्त्यर्थम्। तथा कात्यायनः। "पत्नी भर्तुर्धनहरी या स्याद व्यभिचारिणी। तदभावे तु दुहिता यद्यनूढा भवेत्तदेति" बृहस्पतिरपि "भर्तुर्धनहरी पत्नी तां विना दुहिता सुता" अङ्गादङ्गात्सम्भवति पुत्रवद्दुहिता नृणाम्। तस्मात्पितृधनं तस्यः कथं गृह्णाति मानवः" इति। तत्र चोढानूढासमवायेऽनूढैव गृह्णाति। "तदभावे तु दुहिता यद्यनूढा भवेत्तदेति" विशेषस्मरणात्। तथा प्रतिष्ठिताऽप्रतिष्ठितासमवायेऽप्रतिष्ठिता तदभावे प्रतिष्ठिता "स्त्रीधनं दुहितॄणाम् अप्रतानामप्रतिष्ठितानाञ्चेति" गौतमवचनस्य पितृधनेऽपि समानत्वात् नचैतत्पुत्रिकाविषयमिति मन्तव्यम्। "तत्समः पुत्रिकासुतः" इति पुत्रियास्तत्सुतस्य चौरससमत्वेन पुत्रप्रकरणेऽभिधानात्। चशब्दादुहितृभावे दौहित्रो धनभाक् यथाह विष्णुः। "अपुत्रपौत्रसन्ताने दौहित्रा धनमाप्नुयुः। पूर्वेषां तु स्वधाकारे पौत्री दौहित्रकाः समा" इति मनुरपि। "अक्षता वाक्षता वापि यं विन्देत्पितृमातृतम्। पौत्री माता महस्तेन दद्यात्पिण्डं हरेद्धनमिति"। तदभावे पितरौ मातापितरौ धनभाजौ। यद्यपि युगपदधिकरणवचनतायां द्वन्द्वस्मरणात् तदपवादत्वादेकशेषस्य धनग्रहणे पित्रोः क्रमो न प्रतीयते। तथापि विष्णुवाक्ये मातृशब्दस्य पूर्वनिपातादेकशेषाभावपक्षे च मातापितरावितिं मातृशब्दस्य पूर्वं श्रवणात्पाठक्रमावगमाद्धनसम्बन्धेऽपि क्रमापेक्षायां प्रतीतक्रमानुरोधेनैव प्रथमं माता धनभाक्, तदभावे पितेति गम्यते। किञ्च पिता पुत्रान्तरेष्वपि साधारणो माता तु न साधारणीति प्रत्यासत्त्यतिशयात् "अनन्तरः सपिण्डाद्यस्तस्य तस्य धनम्भवेदिति" वचनान्मातुरेव प्रथमं धनग्रहणं युक्तं न च सपिण्डेष्वेव प्रत्यासत्तिर्नियामिका अपि तु समानोदकादिष्वपि विशेषेण धनग्रहणे प्राप्ते प्रत्यासत्तिरेव नियामिकेति ऋष्यादेव वचनादवगम्यत इति। मातापित्रोर्मातुरेव प्रत्यासत्तिशयात् धनग्रहणं युक्ततरम्। तदभावे पिता धनभाक्। पितृभावे भ्रातरो धनभाजः। तथा च मनुः। "पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वेति ऋणपत्रस्य पुत्रस्य माता दायमवाप्नुयात्। मातर्यपि च दृक्तायां पितुर्माता हरेद्धनमिति" मनुवचनाज्जीवत्यपि पितरि मातरि दृक्तायां पितुर्माता पितामही धनं हरेन्न पिता। यतः पितृगृहीतधनं विजातीयेष्वपि पुत्रेषु गच्छति। पितामही गृहीतं तु सजातीयेष्वेव गच्छतीति पितामह्येव गृह्णातीति। एतदभ्याचार्योनानुमन्यते। विजातीयं पुत्राणामपि धनग्रहणस्योक्तत्वात् "चतुस्त्रिद्वयेकभागिनः" इत्यादिनेति। यत्पुनः "अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः" इतिमनुस्मरणम् तदपि अभिप्रायं न पुत्राभिप्रायम्। भ्रातृभ्यपि सोदराः प्रथमं गृह्णीयुरिन्द्रोदराणां भ्रातृविप्रकर्षात्। "अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेदिति" स्मरणात्। सोदराणामभावे भिन्नोदरा धनभाजः। भ्रातृणामप्यभावे तत्पुत्राः पितृक्रमेण धनभाजः। भ्रातृभ्रातृपुत्रसमवाये भ्रातृपुत्राणामनधिकारः भ्रातृभावे भ्रातृपुत्राणामधिकारवचनात्। यदा त्वपुत्रे भ्रातरि स्वर्याते तद्भ्रातॄणामविभक्तेन धनसम्बन्धे जाते भ्रातृधनविभागात्प्रागेव यदि कश्चिद्भ्राता मृतस्तदा तत्पुत्राण्यस्मितोऽधिकारे प्राप्ते तेषां भ्रातृत्वाद्ध विभज्य ग्रहणे पितृतोभागकल्पनेति युक्तम्। भ्रातृपुत्राणामप्यभावे गोत्रजा धनभाजः गोत्रजाः पितामहादयः सपिण्डाः समानोदकाश्च तत्र पितामही प्रथमन्धनभाक्। "मातार्यपि च दृक्तायाम्पितुर्माता धनं हरेदिति" मात्रनन्तरं पितामह्या धनग्रहणे प्राप्ते धिक्कादीनां भ्रातृसुतपर्यन्तानां बहुक्रमत्वेन रुध्येरन्प्रवेशाभावात्पितुर्माता धनं हरेदित्यस्य धनग्रहणाधिकारप्राप्तिमात्रपरत्वादुत्कर्षे तत्पुत्रानन्तरम् पितामही गृह्णातीत्य विरोधः। पितामह्याश्चाभावे समानगोत्रजाः सपिण्डाः पितामहादयोधनभाजः भिन्नगोत्राणां सपिण्डानां बन्धुशब्देन ग्रहणात्। तत्र च पितृसन्तानाभावे पितामही पितामहः पितृव्यास्तत्पुत्राश्च क्रमेण धनभाजः पितामहसन्तानाभावे प्रपितामही प्रपितामहस्तत्पुत्रास्तत्पुत्रा वक्ष्येवमासप्तमात्समानगोत्राणां सपिण्डानान्धनग्रहणं वेदितव्यं तेषामभावे समानोदकानान्धनसम्बन्धः। ते च सपिण्डानामुपरि सप्त वेदितव्या जन्मनामज्ञाना वधिका वा। यथाह बृहन्मनुः। "सपिण्डता तु पुरुषे सप्तमे विनिवर्तते। समानोदकभावस्तु निवर्तेता चतुर्दशात्। जन्मनाम्नोः श्रुतेरेके तत्परस्योदहृत" इति।

गोत्रजाभावे बन्धवोधनभाजः। बन्धवश्च त्रिविधा आत्मबन्धवः पितृबन्धवो मातृबन्धवश्चेति । यथोक्तम् । आत्मपितृष्वसृदुहितृ इत्यादि चिन्तामणिमते ११०१ पृ०दर्शितम् तत्र चान्तरङ्गत्वात् प्रथममात्मबन्धवोधनभाजस्तदभावे पितृबन्धवस्तदभावे मातृबन्धव इति क्रमोवेदितव्यः। बन्धूनामभावे आचार्यस्तदभावे शिष्यः"पुत्राभावे यः प्रत्यासन्नः सपिण्डस्तदभावे आचार्यः आचार्याभावेऽन्तेवासी" इत्यापस्तम्बस्मरणात् । शिष्याभावे सब्रह्मचारी धनभाक् तेन सहैकस्मादाचार्यादुपनयनाध्ययनतदर्थज्ञानप्राप्तिः स सब्रह्मचारी तदभावे ब्राह्मणद्रव्यं यः कश्चित्श्रोत्रियो गृह्णीयात् "श्रोत्रिया ब्राह्मणस्यानपत्यस्य सकुल्यभाजे-रन्निति"गौतमस्मरणात् । तदभावे ब्राह्मणमात्रम् यथाह मनुः "सर्वेषामप्यभावे तु ब्राह्मणारिक्थभागिनः । त्रैविद्याः शुचयोदान्तास्तथा धर्म्मान हीयत"इति। न कदाचिदपि ब्राह्मणद्रव्यं राजा गृह्णीयात् "अहार्य्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिरिति"मनुवचनात् । नारदेनाप्युक्तम् "ब्राह्मणार्थेषु तद्राज्ये दायादवेद न कश्चन । ब्राह्मणायैव दातव्यमेनसो ह्यात्मपोऽन्यथेति"। क्षत्रियादिधनं सब्रह्मचारिपर्य्यन्तानामभावे राजा हरेन्न ब्राह्मणः। यथाह मनुः । "इतरेषान्तु वर्णानां सर्वाभावे हरेन्नृपः" इति ।"पुत्राः पौत्राश्च दायं गृह्णन्ति । तदभावे पत्न्यादय इत्युक्तमिदानीन्तदुभयापवादमाह । "वानप्रस्थयतिब्रह्मचारिणां रिक्थभागिनः। क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः" याज्ञ० ।"वानप्रस्थस्य यतेर्ब्रह्मचारिणश्च क्रमेण प्रतिलोम क्रमेणाचार्यः सच्छिष्यो धर्मभ्रात्रेकतीर्थी च रिक्थस्य धनस्य भागिनः । ब्रह्मचारी नैष्ठिकः उपकुर्वाणस्य धनं मातृबान्धवादयएव गृह्णन्ति । नैष्ठिकस्य धनग्रहणेऽपवादत्वेनाचार्यो गृह्णाति इत्युच्यते । यतेस्तु धनं सच्छिष्यो गृह्णाति । सच्छिष्यः पुनरध्यात्मशास्त्रश्रवणधारणतदर्थानुष्ठानक्षमः दुर्वृत्तस्याचार्यादेरपि भागानर्हत्वात् । वानप्रस्थधनस्वर्ग्यभ्रात्रेकतीर्थी गृह्णाति धर्मभ्राताएकतीर्थ्येकाश्रमी धर्मभ्रातासौएकतीर्थी च धर्मभ्रात्रेकतीर्थी । एतेषामाचार्यादीनामभावे पुत्रादिषु सत्सप्येकतीर्थ्येव गृह्णाति"मिता०।"सोदरखासंसृष्टे वैमात्रेयस्य च संसृष्टत्वे तस्याधिकारः। अत्रेदं बोध्यं"अपुत्रौत्रसन्ताने" इति वदता विष्णुना प्रपौत्रस्याप्यधिकारः सूचितः तस्यापि तत्सन्तानत्वात् सपिण्डत्वाच्च अन्यथा अधिकारिसूत्रव्याख्यायाम् उपरितनानामेव कीर्त्तनात् तस्यानधिकारित्वापत्तेः। अतएव ऋणादानप्रकरणे तत्सुतः पौत्रसुतः प्रपौत्र इत्यस्यैतद्विषयत्वं मिताक्षराकृता प्रपौत्रस्याधिकारः सूचितः । तदयुक्तम् सन्तानस्य च प्रपितामहपौत्रपर्य्यन्ताभावेऽधिकारः तेषामसपिण्डत्वेऽपि गोत्रजसमानोदकत्वाविशेषात् सपिण्डाधिकारे अधस्तनानामेव प्रथमग्रहणवत् गोत्रजाधिकारेऽपि अधस्तनानामेव ऊर्द्धतनाभेदेन प्रथमं ग्रहणौचित्यादिति एतन्मते च असगोत्रसपिण्डमध्ये, दौहित्रस्यैव ग्रहणात् पितामहदौहित्रादेर्नाधिकारः । बन्धुशब्दस्य असगोत्र सपिण्डपरत्वेऽपि बन्धुशब्दस्य पारिभाषिकपरत्वेन तेन कीर्त्तनादिति बहवः । वीरमित्रोदये तु विषमशिष्टभिया मातुलादीनामधिकारोव्यवस्थापितः तन्मते तेषां बन्धुपदेन ग्रहणात् इति भेदः । तथा दायलब्धधने पत्न्यादयेषु दानभोगादावधिकारः इति मिता० वीर० मते तु स्वामिन उपकाराभावे नष्टादौ दानेऽनधिकार इति भेदः । "आधिवेदनिकाद्यस्त्रीति" याज्ञवल्क्यवचनेन स्त्रिया सकुल्यविभागकृतादिलब्धधनमात्रस्य स्त्रीधनत्वं व्यवस्थाप्य तद्विभागः मिता० दर्शितो यथा "अतीतायामप्रजसि बान्धवास्तदवाप्नुयुः" या० । तत्पूर्व्वोक्तं स्त्रीधनमप्रजस्त्रीपत्न्यां दुहितृदौहित्रपुत्रपौत्ररहितायां स्त्रियामतीतायां बान्धवा भर्त्रादयोवक्ष्यमाणा गृह्णीयुः । सामान्येन बान्धवाधनग्रहणेऽधिकारिणो दर्शिताः। इदानीं विवाहभेदेनाधिकारिभेदमाह । "अप्रजःस्त्रीधनं भर्त्तुर्ब्राह्मादिषु चतुर्ष्वपि । दुहितॄणां प्रसूता चेच्छेषेषु पितृगामि तत्"या०। अप्रजःस्त्रियाः पूर्वोक्तायाब्राह्मदैवार्षप्राजापत्येषु चतुर्षु विवाहेषु भार्यात्वं प्राप्तायाः अतीतायाः पूर्वोक्तधनं प्रथमं भर्तुर्भवति । तदभावे तत्प्रत्यासन्नानां सपिण्डानां भवति । शेषेष्वासुरगान्धर्वराक्षसपैशाचेषु विवाहेषु तदप्रजःस्त्रीधनं पितृगामि । माता च पिता च पितरौ तौ गच्छतीति पितृगामि एकशेषनिर्दिष्टायाऽपि मातुः प्रथमं धनग्रहणं पूर्वमेवोक्तम् । तदभावे तत्प्रत्यासन्नानां धनग्रहणम् । सर्वेष्वेव विवाहेषु प्रसूताऽपत्यवती चेत् दुहितॄणां तद्धनं भवति । अत्र दुहितृशब्देन दुहितृदुहितर उच्यन्ते । साक्षाद्दुहितॄणाम् "भ्रातुर्दुहितरःशेषम्" इत्यत्रोक्तत्वात् । अतश्च भ्रातृधनं मातरि सत्तायां प्रथमं दुहितरोगृह्णन्ति । तत्र चोढानूढासमवायेऽनूढा गृह्णाति । तदभावे परिणीता तत्रापि प्रतिष्ठिताऽप्रतिष्ठितासमवायेऽप्रतिष्ठिता गृह्णाति तदभावे प्रतिष्ठिता । यथाह गौतमः "स्त्रीधनं

उत्तरेण अव्य० उत्तर+एनप्। आसन्नदिग्देशकालानां प्रथमापञ्चमीसप्तम्यन्तानामर्थेषु "तत्रागारं धनपतिमुत्तरेणाऽलकादीयम्" मेघ०। एतद्योगे द्वितीया। "किञ्चित् पश्चात् व्रज लघुगतिर्भूयएवोत्तरेण" मेघ०। "हृदयदेशमात्रमेतोत्तरेण" आश्व०श्रौ०१,२०६,"एतस्मिन् काले प्रपद्याच्छावाकउत्तरेणाग्नीध्रीयम्" आश्व० श्रौ० ५,७,१।

उत्तरेद्युस् अव्य० उत्तरस्मिन् दिने उत्तर+एद्युस्। अनन्तरदिवसे इत्यर्थे।

उत्तरोत्तर उत्तरस्मादुत्तरः। अनन्तरोदितानन्तरे। "पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा। तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः। एषामभावे पूर्वस्य धनभागुत्तरोत्तरः" या०स्मृ०। २क्रमेण उत्तरे। "उत्तरोत्तरमुत्कर्षो वस्तुनः सार "उच्यते सा०द०।

उत्त(रो)रौष्ठ पु० उत्तरः उपरितनः ओष्ठः वा ओष्ठिः। उपरितने ओष्ठे। "अधरो(रौ)ष्ठं दशति उत्तरो(रौ)ष्ठं वा लेढि" "उत्तरौष्ठञ्च योनिञ्चादुद्धारांश्च करोति च" सुश्रु०

उत्तर्जन न० उद्+तर्ज्जनम् प्रा० स०। उद्भर्त्सने। तच्च क्रोधकार्य्ये यथाह सा०द०।"निन्दाक्षेपापमानादेरमर्षोऽभिनिविष्टता। नेत्ररागशिरःकम्पभ्रूभङ्गोत्तर्ज्जनादिकृत्"

उत्तलित त्रि० उद्+तल-क्त। १उत्क्षिप्ते।

उत्तान त्रि० उद्गतस्तानो विस्तारो यस्य। (चित) भूमिलग्नपृष्ठतया ऊर्द्धभावेन १स्थिते २ऊर्द्धमुखे च।"उत्तानपाणिद्वयसन्निवेशात् प्रफुल्लराजीवनिभाङ्गभध्ये" कुमा०। "उरःस्थोत्तानचरण: सव्ये न्यस्येतरं करम्" उत्तानं किञ्चिदुन्नाम्य मुखं विष्टभ्य चोरसा" या०स्मृ०। "पिण्डपात्रं तदुत्तानं कृत्वा विप्रान् विसर्ज्जयेत् या० स्मृतिः "प्रत्येत्य प्रस्तरे निर्णुदन उत्तानहस्ता दक्षिणोत्ताना वा" कात्या० ८,२,६। "उत्तानार्यै विचक्षणः" सुश्रु०

उत्तानक पु०उद्-तन-एवुल्। उद्गतास्ये रत्नभा०। [राजनि०

उत्तानपत्रक पु०उत्तानमूर्द्धमुखं पत्रमस्य कप्। रक्ते एरण्डे

उत्तानपाद पु० स्वायम्भुव मनोः पुत्रे ध्रुवपितरि १ऋषभेदे। "वैराजात् पुरुषात् वीरं यतरूपा व्यजायत। प्रियव्रतोत्तानपादौ वीरात् काम्या व्यजायत" हरि० २अ०। "स्वायम्भुवस्यापि मनोर्हरेरंशांशजन्मनः। प्रियव्रतोत्तानपादौ यतरूपापतेः सुतौ। वासुदेवस्य कलया रक्षायां जगतः स्थितौ। जाते उत्तानपादस्य सुनीतिः सुरुचिः स्त्रियां। सुरुचिः प्रेयसी पत्युर्नेतरा यत्सुतोध्रुवः" भाग० ४स्क०८अ० इतउत्तरं तद्धरितं तत्र पर्व्वितम्। उत्तानउच्छ्रितः पादोऽस्य। १परमेश्वरे पु०"पादोऽस्य सर्व्वाभूतानि त्रिपादस्यामृतं दिवीति" श्रुतेरस्य सर्व्वोपरिस्थपादत्वात् तथात्वम्। अस्य समासे वा अलुकोपे उत्तानपादपि तत्रैव"भूर्जज्ञ उत्तानपदोभुव आशा अजायन्त"। "तदुत्तान पदस्परि" ऋ० १०,७२,३,४, अत्र भवे पादः पदादेशः। २उत्तानपादसुते शिशुध्रुवौ त्रि०।

उत्तानपादज पु० उत्तानपादात् जाते जन-ड। ध्रुवे तद्धरितं भागवते ४स्क० ८अध्यायादौ वर्णितम्।

उत्तानशय त्रि० उत्तानः ऊर्द्धमुखः सन्नेव शेते शी-अच्। अतिशिशौ तदानीमवताने सामर्थ्याभावादस्य तथात्वम्।

उत्तानशीवन् त्रि० उत्तानः सन् शेते शी-क्वनिप्। अतिशिशौ २उत्तानस्थिते च। स्त्रियां ङीप् वनोरच्। उत्तानशीवरी "ये पर्व्वताः सोमपृष्ठा आप उत्तानशीवरीः"ऋग्० ३,२१,१०।

उत्ताप पु० उद्+तप-घञ्। १उष्णतायाम्, २सन्तापे च।

उत्तार पु० उद्+तॄ-णिच् अच्। १उद्गमने २उल्लङ्घने ३पारनयने च। "संसारसागरोत्तारतरणिः" प्रबोध० "स घोरामापदं प्राप्यनोत्तारमधिगच्छति" भा०उ०१२६अ०। उद्+तार: प्रा०स०। ४अलवनोऽन्यशब्दादौ त्रि०।

उत्तारक त्रि० उद्+तॄ-णिच् ण्वुल्। पारप्रापके।

उत्तारण न० उद्+तॄ-णिच्-ल्युट्। पारप्रापणे। कर्त्तरि ल्यु। २पारप्रापके त्रि० ३विष्णौ पु० "उत्तारणोदुष्कृतिहा"विष्णुस०"संसारसागरादुत्तारयतीत्युत्तारण:"भा०

उत्तार्य्य त्रि० उद्+तॄ-णिच्-कर्म्मणि यत्। १उद्गमनीये। "अज्ञानभुक्तं तूत्तार्य्यं शोध्यं वाप्याशु शोधनैः" मनुः। ल्यप्। २उद्गमनं कृत्वेत्यर्थे अव्य०। उद्+तॄ-कर्म्मणि ण्यत्। ३उल्लङ्घनीये त्रि०।

उत्ताल त्रि० उद्+चुरा० तल-प्रतिष्ठायाम् अच्। प्रतिष्ठिते महति। "उत्तालतालीवनसंप्रवृत्तः" माघः।

उत्तिष्ठहोम पु० उत्तिष्ठतोऽनुपविष्टस्य होमो यत्र। अनुपविष्टकर्त्तृकत्वेऽहोमे यजतिरूपे यागभेदे। तत्र कुलोपविष्टेन कृत्वा उत्तिष्ठता होमः करणीय इति विचिकित्सायां यजतिजुहोत्योर्द्वैदप्रदर्शनेन तन्निर्णीतं काल्या० १,२,५,६,७, सूत्रेषु "यजतिजुहुतीनां कोविशेषः" सू० "यजतीनां यागानां जुहोतीनां होमानाञ्च को विशेषः कोभेदः इति प्रश्नः" कर्कः। तिष्ठहोमाः वषट्कारप्रदानाः याज्यापुरोनुवाक्यावन्तश्च यजतयः" सू०। अध्यन्त इति शेषः। तिष्ठता होम

वेषु ते तिष्ठोमाः वषट्कारेण प्रदानं वेषु ते वषट्कार प्रदानाः तथा याज्यावन्तः पुरोनुवाक्यावन्तश्च वे ते यजतय उच्यन्ते" कर्कः। "उपविष्टहोमाः स्वाहाकारप्रदानाः जुहोतयः" सू०।"उपविष्टेन कर्त्रा होमोवेषु ते उपविष्टहोमाः स्वाहाकारेण प्रदानं वेषु ते जुहोतय उच्यन्ते" कर्कः तिष्ठत्पदञ्च उत्तिष्ठत्परम्

उत्तिष्ठमान पु० उद्+स्था-शानच्। वर्द्धमाने "उत्तिष्ठमानस्तु परैर्नावेक्ष्यः पथ्यमिच्छता" माघः। ऊर्द्धचेष्टायां त शब्द। उत्तिष्ठत् अनुपविष्टे दण्डायमाने त्रि०स्त्रियाम् ङीष् नुम्"। उत्तिष्ठन्तो [क्त। २कृतोत्तरपदे नदादौ त्रि०।

उत्तीर्ण त्रि०उद्+तॄ-कर्त्तरि क्त।१सक्ते, २पारङ्गते कर्म्मणि

उत्तुङ्ग त्रि० उत्कटं तुङ्गं प्रा०स०। अत्युन्नते। "उत्तुङ्गशैलशिखरस्थितपादपानां काकः क्षणोऽपि फलमालभते सपत्नः। सिंहो बली द्विरदकुम्भविदारणोऽपि सीदत्यहो तरुतले खलु पक्षहीनः" उद्भटः "स्वर्गादुत्तुङ्गममलं विषाणं यत् स्थितिनः" भा०व०८८अ०। "करप्रचेया सस्तुङ्गां प्रसृमरिं पृथीयसीम्" "यच्चालसत्तुङ्गतया विलेतुम्" "उत्तुङ्गमातङ्गितालचूपलम्" माघः।

उत्तुष पु० उद्गतः कण्डनाभावेऽपि तुषोऽस्मात्। प्रा०व० वा मतयज्ञोपः। लाजाख्ये (खइ) भृष्टधान्ये

उत्तेजना स्त्री उद्+तिज-णिच् युच्। १प्रेरणायाम्, २व्यथताकरणे, ३उद्दीपने, ४तीक्ष्णीकरणे च। "व्याधभूनोत्तेजनया मणीनाम्" माघः ल्युट्। तत्रैव न०।

उत्तेजित त्रि० उद्+तिज-णिच्-क्त। १प्रेरिते, २उद्दीपिते च। भावे क्त। ३प्रेरणायाम् ४उद्दीपने च न०। "उत्तेजितं मध्यवेगं योजनं त्रयवत्तया" हेमचन्द्रे ५अश्वगतिभेदे न०।

उत्तेरित न० उद्-तॄ भावे क्तच् गुणे नि० एत्वम्। अश्वगतिभेदे। अर्ण आद्युचि। "उत्तेरितोऽतिवेगाढ्यो न ह्रस्वोति न पश्यति" हेमचन्द्रगतियुक्ते २अश्वे पु०।

उत्तोरण त्रि०उद्गतं तोरणमत्र प्रा०व०वा मतयज्ञोपः। १उद्गतद्वारयुक्ते नगरादौ। "उत्तोरणामन्यवराजधानीम्" रघुः। "उत्तोरणं राजपथं प्रपेदे" कुमा० उद्गतं तोरणम् प्रा०स०। २उद्गे तोरणे पुंन०।

उत्तोलन न० उद्+तुल-उन्नाने भावे ल्युट्। ऊर्द्धं नीत्वा तोलने। [कृततोलने च

उत्तोलित त्रि० उद्+चु०तुल-क्त। १उत्क्षिप्ते, २उत्क्षिप्य

उत्थक्त त्रि० उद्+त्यज-क्त। १ऊर्द्धक्षिप्ते, २परित्यक्ते च।

उत्थास पु० उद्+तॄस-घञ्। अतिभवे।

उत्थ त्रि० उद्-स्था-क। १उद्गते २समुद्भूते च। "रजांसि समरोत्थानि तच्छोणितनदीष्विव" रघुः। "भवत्समाश्वासनोत्थाय परितोषाय मूर्च्छते" कुमा०। "निद्रालस्य प्रमादोत्थं तत् तामसमुदाहृतम्" गीता "तपनं प्रियविच्छेदे खरावेशोत्थचेष्टितम्" सा०द०।

उत्थान न०उद्+स्था-ल्युट्।१ऊर्द्धपतने, २उद्यमे, ३ऊर्द्धभवनचेष्टायाम्, ४उद्भवे च। करणे ल्युट्।५उत्थापके, ६पौरुषे, ७हर्षे च। अधिकरणे, ल्युट्। ८रथे, ९राज्यविन्यासरूपे १०तन्त्रे, ११प्राङ्गणे, १२चैत्ये च। "इन्दुं नवोत्थानमिवेन्दुमत्यै" रघुः "भ्रातृणामविभक्तानां यद्युत्थानं भवेत् सह" मनुः। "मम धर्म्मार्थसुत्थानं न कामक्रोधसंज्ञितम्" रामा०"उत्थानमभिजानन्ति सर्वभूतानि भारत!। प्रत्यक्षं फलमत्रन्ति कर्म्मणां लोकसाक्षिकम्" भा०व० ३२अ०। मेदश्छेदक्षयोदरं लघु भवत्युत्थानयोग्यं वपुः" भक्ति०। "पङ्गु वा सप्त चाटौ च यैरुत्थानं न गच्छति" सुश्रु०।१३प्रबोधे च "भक्ष्यते भटुत्थाने मत्पार्श्वे परिवर्त्तने" ति०त०पु०।

उत्थानैकादशी स्त्री उत्थानस्य हरेः निद्रातःप्रबोधनस्य कालः एकादशी। चान्द्रकार्त्तिकशुक्लैकादश्याम्। तत्र काल व्यवस्था-ति०त० रघुनन्दनेन दर्शिता यथा मात्स्ये "शेते विष्णुः सदाषाढे भाद्रे च परिवर्त्तते। कार्त्तिके परिबुध्येत शुक्लपक्षे हरेर्दिने" भविष्यनारदीययोः "मेषादिगते खपिति हरौ विष्णुर्वैष्णवमध्ये परिवर्त्तते च। पौष्णावसाने च सुरारिहन्ता प्रबुध्यते मासचतुष्टयेन" भविष्ये "निशि स्वापोदितोत्थानं सन्ध्यायां परिवर्त्तनम्। अन्यत्र पादयोगेऽपि द्वादश्यामेव कारयेत्"। अन्यत्र स्वापादिविहितरात्र्यादीतरकाले दशमीप्रतिपदोश्च। "किन्तत्र मेषादिपादेन? दशम्यंशेन यो दिवा। पौष्णशेषेण किन्तेन? प्रतिपद्यश्च यो निशि"। दशम्यंशेन दशम्या अंशोयत्र पादे तेन। यः प्रतिपदि वा प्राप्तस्तेन वा किम्?। अत्र दशमीप्रतिपदोर्वर्जनात् तदितरैकादश्यादिपञ्चतिथिषु मेषादिनक्षत्रपादविशेषस्थे द्वादशीं विनापि शयनादिरिति प्रतीयते। वचनान्तरम् "रेवत्यन्ते यदा रात्रौ द्वादश्यां च समाविशेत्। तदा विबुध्यते विष्णुर्दिनान्ते प्राप्य रेवतीम्" दिनान्ते त्रिधाविभक्तदिनतृतीयभागे दिवोत्थानमित्यनुरोधात्। विष्णुधर्म्मोत्तरे "विष्णुर्दिवा न स्वपिति न च रात्रौ प्रबुध्यते। द्वादश्यास्तु संयोगे पादयोगो न कारयेत्। अप्राप्ते द्वादशीशब्दे उत्थानशयने हरेः। पादयोगेन कर्त्तव्ये नाहोरात्रं

विचिन्तयेत्" वराहपुराणम् । "द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे । आभाकासितपक्षेषु शयनादर्च्चनादिकम्" आभाकानाम् आषाढभाद्रकार्त्तिकानाम् । ततश्च द्वादश्यां निशादौ नक्षत्रमात्रयोगात् द्वादश्याद्यन्ताभावे तिथ्यन्तरे निशाद्यनादरेण पादविशेषयोगात्, तदभावे द्वादश्यां सन्ध्यायामेव शयनादिकं बोधनन्तु द्वादश्यां रात्रौ रेवत्यन्तपादयोगे दिनद्वतीयभाग इति विशेषः" ।

उत्थापन न० उद्+स्था-णिच्-ल्युट् । १उत्तोलने उन्नतीकरणे २चालने ३प्रबोधने ४उद्यमने च । "एवं यत्नोपायान न्यांश्च शिरोत्थापनहेतून् बुद्ध्यावेक्ष्य" सुश्रु० ।

उत्थाप्य त्रि० उद्+स्था-णिच् कर्म्मणि यत् । १उत्तोलनीये २चालनीये । ल्यप् । ३उत्तोल्येत्यर्थे ४मिश्रीकृत्येत्यर्थे "आकृत्य प्रणवेनैव उत्थाप्य प्रणवेन च" उत्थाप्य मिश्रीकृत्य प्रा०त० रघु० । ५उत्थाप्येत्यर्थे च अव्य० ।

उत्थित त्रि० उद्+स्था-क्त । १ऊर्द्ध्वयुक्ते, २उत्थानयुक्ते, अनुपविष्टे । "अर्द्धोत्थिता सत्वरसम्भ्रमोत्थितायाः" कुमा० रघुश्च "न यावदेतावुदपश्यदुत्थितौ" "भित्त्वोत्थितं भूमिभिवोरगाणाम्" माघः । ३उत्पन्ने ४उद्युक्ते च ।

उत्थिताङ्गुलि पु० उत्थिता उद्यता अङ्गुलयो यत्र । (चापड़) विस्तृताङ्गुलिके करतले चपेटे शब्दच० ।

उत्पचनिपचा स्त्री उत्पच निपचेल्युच्यते यस्यां क्रियायाम् मयू० । उद्धृत्य पाकादिनिर्देशार्थक्रियायाम् ।

उत्पचिष्णु त्रि० उद्+पच-इष्णुच् । १उद्धृत्य पचनशीले । पचः विक्लित्तिरूपपाकपरत्वे । अर्हतः पाकशीले २हविरादौ ।

उत्पट पु० उत्पटति उद्+पट-गतौ अच् । उच्चादीनां त्वचमुद्भिद्य उद्गते निर्य्यासे । 'त्वच एवास्य रुधिरं प्रस्यन्दि त्वच उत्पटः" शत० १४,६।९।२१, "उत्पटः उच्चनिर्यासः" भा० । [त्रिका० २उत्पतनकर्त्तरि त्रि० ।

उत्पत पु० उत्पतति ऊर्द्धं गच्छति उद्+पत-अच् । १पक्षिणि

उत्पतन न० उद्+पत-ल्युट् । १ऊर्द्धगमने, २उत्क्षेपणे च । उत्क्षेपणशब्दे उदा० ।

उत्पतनिपता स्त्री उत्पत निपत इत्युच्यते यस्यां क्रियायाम् मयू० । उत्पतनादिनिर्देशार्थक्रियायाम् ।

उत्पताक त्रि० उत्क्षिप्ता पताका यत्र प्रा० ब० वा तोत्क्षिप्तशब्दलोपः । उत्क्षिप्तपताके पुरादौ । "पुरन्दरश्रीः पुरमुत्पताकम्" रघुः

उत्पतित त्रि० उद्+पत-क्त । ऊर्द्धगते ।

उत्पतिष्णु उद्+पत-इष्णुच् । उत्पतनशीले । "ससङ्भ्रमोत्पतिष्णूनामिवानामुत्पतिष्णवः" रघुः "उत्पतिष्णू सहिष्णु च चेरतुः खरदूषणौ" भट्टिः ।

उत्पत्ति स्त्री उद्+पत+क्तिन् । १ऊर्द्धपतने ऊर्द्धगतौ । उत्पद्यते प्रथमतो ज्ञायतेऽनेन उद्+पद-करणे क्तिन् । प्राथमिकप्रतीतिविषयप्रवृत्तिसाधनेष्टसाधनताबोधके कर्मस्वरूपज्ञापके २विधिवाक्ये यथा "स्वर्गकामोऽश्वमेधेन यजेतेत्यादि" वाक्यम् प्रथमं यागादौ इष्टसाधनत्वं बोधयत् तत्र प्रवर्त्तयतीति तस्य तथात्वम् विधिशब्दे विवृतिः । "योगसिद्धिर्वा अर्थस्योत्पत्त्ययोगित्वात्" जैमि०सू० । उद्+पद०क्तिन् । आद्यक्षणसम्बन्धरूपे ३उद्भवे । उत्पत्तौ वादिविप्रतिपत्तयः सन्ति तथाहि असतः सदुत्पद्यते इति बौद्धाः । प्रागुत्पत्तेरसत्कारणव्यापारादुत्पद्यते इति नैयायिकादयः । प्रागुत्पत्तेः सदपि कारणव्यापारादभिव्यज्यते इति सांख्या वेदान्तिनश्च प्रतिपेदिरे तयोरवान्तरभेदः सतो विवर्त्त इति वेदान्तिनः परिणाम इति सांख्याः । तदेतत् सांख्य०कौ० । प्रदर्शितं यथा केचिदाहुरसतः "सज्जायत इति, एकस्य सतो विवर्त्तः कार्य्यजातं न वस्तु सदित्यपरे । अन्ये तु सतोऽसज्जायतइति । सतः सज्जायते इति ब्रह्मवादः । तत्र पूर्व्वस्मिन् कक्षत्रये प्रधानं न सिध्यति । सुखदुःखमोहभेदवत्सुखरूपपरिणामशब्दाद्यात्मकत्वं हि जगत्कारणस्य प्रधानत्वं सत्त्वरजस्तमःस्वभावत्वम् । यदि पुनरसतः सज्जायेत असद्विरूपाख्यं कारणं कथं सुखादिरूपशब्दाद्यात्मकं स्यात् सदसतोस्तादात्म्यानुपपत्तेः । अथैकस्य सतो विवर्त्तः शब्दादिप्रपञ्चस्यापि सतः सज्जायत इति न स्यात् । नचाद्वयस्य प्रपञ्चात्मकत्वमपि त्वप्रपञ्चस्य प्रपञ्चात्मकतया प्रतीतिर्भ्रम एव । येषामपि क्षणभङ्गादिचरणादीनां सतएव कारणात्सतो जन्म तेषामपि सदसतोरेकत्वानुपपत्तेर्न कार्य्यात्मकं कारणमिति न प्रधानसिद्धिः । अतः प्रधानसिद्ध्यर्थं प्रथमं तावत्सत्कार्य्यं प्रतिज्ञानीते" कौ० । "असदकरणादुपादानग्रहणात्सर्व्वसम्भवाभावात् । शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्य्यम्" का० "सत्कार्य्यं कारणव्यापारात् प्रागपीति शेषः । तथा च न सिद्धसाधनं नैयायिकनयेनोद्भावनीयम् । यद्यपि बीजमङ्कुरादिप्रध्वंसानन्तरमङ्कुरादावुत्पत्तिरुपलभ्यते तथापि न प्रध्वंसस्य कारणत्वमपि तु भावस्यैव बीजाद्यवयवस्य । अभावात्तु भावोत्पत्तौ तस्य सर्व्वत्र सुलभत्वात्सर्व्वत्र सर्व्वकार्य्योत्पाद-

प्रसङ्ग इत्यादि न्यायवार्त्तिकतात्पर्यटीकायामभिहितमस्माभिः। अपसूत्रप्रत्ययवासति बाधके न शक्नोमीत्येति शक्नुमिति कणभक्षाक्षचरणमतमवशिष्यते। तत्रेदं प्रतिज्ञातं सत्कार्यमिति। अत्र हेतुमाह असदकरणात्। असद्वेत्कारणव्यापारात् पूर्वं कार्यं नास्ति सत्त्वं केनापि कर्तुं शक्यं न हि नीलं शिल्पिसहस्रेणापि शक्यं पीतं कर्तुम्। सदसत्त्वे घटस्य धर्मावितिचेत् तथाप्यसति धर्मिणि न तस्य धर्म इति सत्त्वं तदवस्थमेव तथा च नासत्त्वम् असम्बद्धेनातदात्मना वाऽसत्त्वेन कथमसन् घटः। तस्मात्कारणव्यापाराद्धूमिव ततः प्रागपि सदेव कार्यमिति। कारणाच्चास्य सतोऽभिव्यक्तिरेवावशिष्यते। सतश्चाभिव्यक्तिरुपपन्ना। यथा पीड़नेन तिलेषु तैलस्य, अवघातेन धान्येषु तण्डुलानां, दोहनेन सौरभेयीषु पयसः। असतः करणे तु न निदर्शनं किञ्चिदस्ति। न खल्वभिव्यक्ष्यमाणं चोत्पद्यमानं वा क्वचिदसदृष्टम्। इतश्च कारणव्यापारात् प्राक् सदेव कार्यमित्याह उपादानग्रहणात् उपादानानि कारणानि तेषां ग्रहणं कार्येण सम्बन्धः उपादानैः कार्यस्य सम्बन्धादिति यावत्। एतदुक्तं भवति कार्येण सम्बद्धं कारणं कार्यस्य जनकं सम्बन्धश्च कार्यस्यासतो न सम्भवति तस्मात् सदिति। स्यादेतत् असम्बद्धमेव कारणैः कस्मात् कार्यं न जन्यते? तथा चासदेवोत्पत्स्यतेऽत आह सर्वसम्भवाभावात्। असम्बद्धस्य जन्यत्वे असम्बद्धत्वाविशेषेण सर्वं कार्यजातं सर्वस्माज्जायेत नचैतदस्ति तस्मान्नासम्बद्धमसम्बद्धेन जन्यते अपि तु सम्बद्धं सम्बद्धेन जन्यते इति। यथाऽऽहुःसाङ्ख्याः "असत्त्वे नास्ति सम्बन्धः कारणैः सत्त्वसङ्गिभिः। असम्बद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिरिति"। स्यादेतत् असम्बद्धमपि तदेव तत् करोति यत्र यत्कारणं शक्तं शक्तिश्च कार्यदर्शनादवगम्यते अतो नाव्यवस्थेति अत आह शक्तस्य शक्यकरणात्। सा शक्तिः शक्तकारणान्वया सर्वत्र वा स्याच्छक्ये वा। सर्वत्र चेत्तदवस्थैवाव्यवस्था शक्ये चेत्कथमसति शक्ये तदिति वक्तव्यम्। शक्तिभेद एव स नाऽन्यो यतः किञ्चिदेव कार्यं जनयेन्न सर्वमिति चेत् हन्त भोः शक्तिविशेषः कार्यसम्बन्धो वा स्यादसम्बन्धो वा, सम्बन्धत्वे नासता सम्बन्ध इति सत् कार्यम्। असम्बन्धत्वे सैवाव्यवस्थेति सुष्ठूक्तं शक्तस्य शक्यकरणादिति। इतश्च सत्कार्यमित्याह कारणभावाच्च कार्यस्य कारणात्मकत्वात् न हि कारणाद्भिन्नं कार्यं कारणञ्च यदिति कथं तदभिन्नं कार्यमसद्भवेत्' सा० को०। उत्पत्तेश्च यथा विभावरूपता तथाविर्भाव शब्दे ८३० उक्तम्।

व्याख्यातं छन्दस्याभिस्तृतीकायां यथा असतः—सत्त्वेन वक्तुमशक्यात् निरुपाख्यात् अभावात् सत्-भावरूपं वस्तु, जायते जाततया व्यवतिष्ठते तथा हि अङ्कुरादिकं बीजनाशानन्तरमेव, दध्यादि दुग्धनाशानन्तरमेव, उत्पद्यमानं दृश्यते अतोऽनुमीयते कार्यभावा अभावकारणकाः कार्यत्वात् बीजनाशोत्तरजाताङ्कुरादिवत्। यत्रापि च तन्वादिषु पटकारणेषु स्वरूपेण नाशो न दृश्यते तत्राप्यनुमानेनैव तज्ज्ञानं जननीयम्। युक्तं चैतत् उत्पन्ने पटे यदि तन्तवो न नष्टास्तदा तन्तवइमे इति व्यवहारविषयतामापद्येरन् न च तथा, अतस्तत्र तन्तुव्यवहाराभावात् पटरूपेण व्यवहाराच्च तन्तवोनष्टा इत्यनुमातव्यम्। न च कारणनाशे दग्धतन्तुषु पटदाहवत् पटनाशापत्तिरित्याशङ्क्यम्, तन्तूनां पटकारणत्वस्याद्यापि अविरुद्धत्वात्, ये हि भावकारणका इति वदेयुस्तान् प्रत्येवैतदुदूषणमवतरेत् नाभावकारणतावादिनं प्रतीति सुस्थितमभावकारणवादिबौद्धादिमतम्। सतः त्रैकालिकबाधरहितात् कूटस्थवदपरिणामिनः विवर्त्तः स्वाज्ञानकल्पितः स्वज्ञाननिवर्त्त्यः परिणामविलक्षणः अन्यथाभावापत्तिः उपचारात् तथा उत्पद्यमानं कार्यजातमपि विवर्त्तः न वस्तु सदिति वस्तुतः पारमार्थिकेन सत्त्वेन नान्वितं किन्तु व्यवहारयोग्यसत्तयान्वितम्। तथा हि शुक्तिकादौ रजतादिज्ञानं सर्वानुभवसिद्धं तच्च प्रत्यक्षमेव रजतं साक्षात्करोमीत्याद्यनुभवात् प्रत्यक्षे च विषयेन्द्रियसन्निकर्षस्य कारणत्वात् देशान्तरस्थितरजतस्य च चक्षुरसन्निकृष्टतया न प्रत्यक्षविषयता। न च पूर्वज्ञातस्य रजतस्य ज्ञानेन उपनीतस्य शुक्तिकायां भ्रम इति वाच्यम् ज्ञानोपनीतस्य ज्ञानस्वीकारे साक्षात्कारानुभवापलापापत्तेः। अतएव न पूर्वानुभूतरजतस्मरणमात्रमनुभवविरोधात्। अतोऽगत्या तत्र शुक्तिकायामसज्जनितस्तत्पद्यते इत्येव कल्पनीयम्। तदुत्पत्तौ च शुक्तिकादिविषयकज्ञानं कारणं रजतविषयसंस्कारश्च तत्सहकारितया कल्पनीयः। तदेव अध्यस्तत्वम् यदुत्पन्नस्य तस्यासतो रजतस्य शुक्तिकातादात्म्येन तत्प्रत्यक्षविषयता। तत्रोत्पन्नेऽपि रजते शुक्तिकाया मनागपि व्यावहारिकसत्त्वस्य आधातो न भवतीति यथा, एवं कूटस्थे अपरिणामिनि आत्मनि स्वाज्ञानेनाहते वियदादिकाध्यस्तस्य

तृपद्यते तत्र च तदज्ञानं हेतुः तच्च संस्कारश्च सहकारीति तथा च विवादाध्यासिता घटादयः सति अध्यस्तात्मज्ञाननाश्यत्वे सति सत्तादात्म्येन प्रतीयमानत्वात् शुक्तितादात्म्येन प्रतीयमानशुक्तिज्ञाननाश्यरजतवदित्यनुमानात् अध्यस्तत्वं घटादीनां सिद्धम् । अध्यस्तत्वं च साक्षात्कारिप्रत्यक्षविषयत्वं प्रागुक्तं तच्च तस्यासतोऽप्यसत्पक्षे प्रत्यक्षविषयता न स्यादिति अध्यस्तत्वरक्षायै तत्किञ्चित्पक्षिरध्यङ्गीकार्या । ज्ञाननाश्यत्वं च तेषां मिथ्यात्वात् शुक्तिज्ञाननाश्यासद्रजतवदित्यनुमात्यभिलाषां विस्तरेण इति वेदान्तिमतम् । सतो भावात् विद्यमानादेवेत्यर्थः । असत् उत्पत्तेः, कारणव्यापाराद्वा पूर्वमविद्यमानं, कारणव्यापारादुत्तरन्तु जायते सद्भवतीति काणादनैयायिकादयः । सतः सत्त्वाश्रयात् भावादेव सत्, कारणव्यापारात् प्रागपि, कारणावस्थारूपसूक्ष्मरूपेण विद्यमानं जायते कारणव्यापारात्तु अभिव्यज्यते व्यवहारयोग्यतामापाद्यते इति वावदिति वृद्धाः साङ्ख्यादयः । एवमुत्पत्तिविषये चतुर्षु पक्षेषु स्थितेषु आद्यपक्षत्रये अनुभिन्नितकार्यात्मककारणरूपप्रधानसिद्धिं क्रमशः प्रदर्शयितुं क्रमप्राप्तं बौद्धपक्षमाह यदि पुनरित्यादि । निरुपाख्यमनिर्वचनीयमिदन्तया वक्तुमशक्यमिति यावत् सति हि लक्षणे वस्तु तल्लक्षणवत्त्वेन वक्तुं शक्यम् अभावस्य च लक्षणाभावात् कथङ्कारं वक्तव्यता । यद्यपि भावभिन्नत्वं, सत्त्वेन प्रतीत्यनर्हत्वम्, असत्त्वेन प्रतीत्यर्हत्वं वा तल्लक्षणं कैश्चिदुच्यते तानि च सर्वाण्यपि अभावज्ञानसापेक्षतया दुर्ज्ञेयत्वादन्योन्याश्रयदोषग्रस्तत्वाज्ज्ञातुमशक्यान्येव । सुखदुःखमोहात्मककार्यदर्शनात् कारणस्यापि तथाभूतात्मकत्वमनुभिन्नितं तच्च भावस्यैव कारणतापक्षे सेत्स्यति नाभावस्य भावाभावयोस्तादात्म्यानुपपत्तेरिति भावः । विवर्त्तवादे च कार्यजातस्याध्यासेन तादात्म्यभानेऽपि वस्तुतोऽसत्त्वेन सदसतोस्तादात्म्यानुपपत्त्या पूर्ववदनुभिन्नितप्रधानसिद्धिरित्याह अथैकस्येत्यादि । सतोऽसज्जायते इति पक्षेऽपि सदसतोस्तादात्म्यानुपपत्त्यैव न प्रधानसिद्धिरित्याह सदसतोरेकत्वेइत्यादि । एवमाद्यपक्षत्रिके प्रधानासिद्धिमुद्भाव्य सत्कार्यपक्षे तत् साधयितुं सत्कार्यपक्षसमर्थनाय कारिकामवतारयति सत्कार्यं प्रतिजानीते इत्यादि । कार्यं सत् कारणव्यापारात् प्रागपि विद्यमानमित्यर्थः तेन कारणव्यापारोत्तरं सत्त्वस्य नैयायिकादिवादिषु सिद्धत्वेन न सिद्धसाधनमिति दर्शयितुं विशिनष्टि कारणव्यापारादित्यादि । चतसृषु वादिविप्रतिपत्तिषु दर्शितासु असत्कार्यपक्षनिराकरणेऽपि इतरयोः पक्षयोरनिराकरणात् तत्पक्षयोः प्रधानासिद्धिरित्याशङ्क्य मूले तन्निराकरणाभावेऽपि अयुक्तत्वादेव तयोः पक्षयोर्न ग्राह्यतेति कथयितुमादौ बौद्धपक्षं दूषयितुमुत्थापयति यद्यपीत्यादि । दूषयति तथापीत्यादि । अयमाशयः सम्बद्धं सम्बन्धिनमेव जनयतीति नियमेन कार्यकारणयोः सम्बन्धोऽपेक्षितः बीजनाशाङ्कुरयोश्च केनापि सम्बन्धेन न सम्बन्धिता घटते येन तयोः कार्यकारणभावः स्यात् । असम्बद्धस्य कार्यजनकत्वे सर्वस्मात् सर्वकार्योत्पत्तिरित्यव्यवस्था स्यात् । न च बीजेनैवाङ्कुरप्रागभावः न तन्तुषुित्वत्व स्वभाव एव शरणं तथा च अङ्कुरप्रागभाव एव नियामकोभविष्यतीति वाच्यम् प्रागभावस्य सूक्ष्मावस्थातिरिक्तत्वे अङ्कुरतत्प्रागभावयोश्च विभिन्नकालिकतया केनापि सम्बन्धेन सम्बन्धित्वाभावेन नियामकत्वाभावात् असम्बद्धस्य नियामकत्वे पूर्वदोषतादवस्थ्यात् । न च प्रतियोगितासम्बन्धेन तयोः सम्बन्धितेति वाच्यम् अभावसम्बन्धितायाः एव प्रतियोगितापदार्थतया तस्या अप्यसत्पक्षेऽसिद्धत्वात् न च बीजस्य नाशात् कथं तस्य अङ्कुरकारणत्वमिति, तस्य नाशेऽपि तदवयवस्यानाशात् तस्यैव कारणत्वं वाच्यमिति सर्वं सुस्थम् । विवर्त्तवादे च यद्यपि तदनन्यत्वमारम्भणशब्दादिभ्य इति (ब्र० सू० २, १, १४) सूत्रेण कार्यकारणयोरभिन्नत्वमेव स्वीकृतं तथापि घटपटादिज्ञानानामध्यस्तविषयकतया विषयाणां मिथ्यात्वं तैरङ्गीक्रियते तथा हि विवादाध्यासितानि घटादिज्ञानानि अध्यस्तविषयकाणि सत्ताविषयकज्ञानत्वात् शुक्तिकायां रजतज्ञानवदित्यनुमानेन घटादिज्ञानानामध्यस्तविषयकत्वे सिद्धे अध्यस्तस्य च ज्ञाननाश्यतया मिथ्यात्वमित्यसत्त्वमेव तथा च सदसदोस्तादात्म्यानुपपत्तिदोषेण नैतत्पक्षाश्रयणम् । किञ्च मिथ्यात्वं ज्ञाननिवर्त्यत्वं तच्च नेदं रजतमिति बाधकज्ञा यथा रजतस्य मिथ्यात्वं प्रसिद्धमेवं घटादेर्मिथ्यात्वसाधकस्य बाधस्यादर्शनाच्च तस्य मिथ्यात्वमेवञ्च हेत्वसिद्धेः कथं घटादिज्ञानादावध्यस्तविषयकत्वसिद्धिः । एतदर्थमेव असति बाधक इत्युक्तम् । तथा च शुक्तिरजतबाधकवदत्र बाधकाभावाच्च तस्य मिथ्यात्वम् । न चाद्वैतश्रुतिरेव बाधिका, तस्याः अन्यार्थपरतया ह्यैताभावनिषेधपरत्वाभावात् अतएव "नाह्यैतश्रुतिर्विरोधो जातिपरत्वात्" इत्यनेन साङ्ख्यसूत्रेण श्रुतेः समानजातीयबहुजीवपरत्वं समर्थितम् । एवं पक्षत्रय-

मयुक्तिकतया निरस्य दण्डयुक्तिकस्य काणादादिपक्षस्य निरसनीयतयाऽवशेषतां दर्शयति कणभक्षेत्यादि कणमक्षकणं भक्षयतीति कणभक्षः कणादः । अक्षं चक्षुश्चरणे यस्येति अक्षचरणो गोतमस्तदनुसारिमतमित्यर्थः

ननु भावस्य सत्त्वमसत्त्वं च कादाचित्को धर्मो न तु स्वाभाविकः तथा च उत्पत्तेः प्राक् असत्त्वं परतस्तु सत्त्वम् यथा घटे पाकात् पूर्वं श्यामता, पाकोत्तरं रक्तता, तद्वत् कालविशेषे धर्मविशेषो भविष्यतीति असत्कार्यपक्षेऽपि न काचित् क्षतिरिति शङ्कते सदसत्त्वे इति । परिहरति तथाप्यसतीति । अवसाययः असत्त्वस्य भावधर्मत्वे उत्पत्तेः प्रागपि तस्य धर्मिणः सत्त्वं स्वीकर्त्तव्यं तथा हि धर्मसत्त्वं धर्मिसत्त्वं विनानुपपद्यमानं धर्मिसत्त्वमपि तदाक्षिपति तथा चापादकेन असत्त्वरूपधर्मसत्त्वेन आपाद्यस्य धर्मिसत्त्वस्य सिद्धिः इति । सत्त्वं कार्यसत्त्वं तदस्य उत्पत्तेः प्रागपि स्थितमिति न तदानीं धर्म्यसत्त्वासिद्धिरित्याह तथा च नासत्त्वमिति असत्त्वधर्मिणस्तदानीमपि सिद्धत्वान्न धर्म्यसत्त्वमित्यर्थः । तदेवोपपादयति असम्बद्धेनेत्यादि । असम्बद्धेन धर्मिणा सहेति शेषः असत्त्वेनेत्यत्राख्यान्वयः । अतदात्मना अतत्स्वरूपेण वा असत्त्वेन कथमसत् स्यात् असत्त्वाश्रयः स्यादित्यर्थः धर्मिणा सह सम्बद्धेनैव धर्मेण तदाश्रयत्वनियमात् असम्बद्धस्य च तादात्म्येनैव तथात्वनियमाच्च प्रकृते असत्त्वस्य घटेन सह सम्बन्धाभावात् तत्तादात्म्याभावाच्च न तदाश्रयत्वमिति भावः । सत्कार्यपक्षमुपसंहरति तस्मादिति । तैलस्य, तण्डुलानां, पयसश्चाभिव्यक्तिरित्यत्रानुकूल्याऽन्वयः । असत्त्वे कार्यस्य उत्पत्तेः प्रागसत्त्वे सत्त्वबद्भिः सत्त्वाश्रयैः कारणैः सह सम्बन्धोनास्ति । असम्बद्धस्य चोत्पत्तौ प्रागुक्ता अव्यवस्थितिः सर्वस्मात् सर्वोत्पत्तिरित्येवं रूपा अव्यवस्था । प्रथमं तत्पदं हितीयान्तं कार्यपरम्, द्वितीयं तु कारणपरं प्रथमान्तम् । कार्यानुकूला कारणनिष्ठैव शक्तिः कार्यजननियामिकेत्यवसेयम् तथा च कार्यसत्त्वे कथं तदनुकूलत्वं तस्याः स्यादिति समर्थयितुं शक्तेरितरनिष्ठत्वं विकल्प्य दूषयति सा शक्तिरिति" ।

यथा च असतो न सदुत्पत्तिः सतश्चाभिव्यक्तिः तथा छा०उ०भाष्ययोः समर्थितं यथा "सदेव सौम्येदमग्र आसीदेकमेवाऽद्वितीयम् । तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतःसज्जायते । कुतस्तु खलु सौम्यैवं स्यादिति ? होवाच कथमसतः सज्जायेतेति ?। सत्त्वेव सौम्येदमग्र आसीत् एकमेवाद्वितीयम् । तदैक्षत बहु स्यां प्रजायेयेति" छा०उ० "सदेव सदित्यस्तितामात्रं वस्तु सूक्ष्मं निर्विशेषं सर्वगतम् । एकं निरञ्जनं निरवयवं विज्ञानं यद्वगम्यते सर्ववेदान्तेभ्यः । एवशब्दोऽवधारणार्थः । किन्तदवधियते ? इत्याह । इदं जगन्नामरूपक्रियाव्यक्षितमुपलभ्यते यत्तत्सदेवासीदित्यासीच्छब्देन सम्बध्यते । कदा सदेवेदमासीदित्युच्यते अग्रे जगतः प्रागुत्पत्तेः । किं नेदानीमिदं सदु येनाग्र्यआसीदिति विशेष्यते, न, कथं तर्हि विशेषणम् ? इदानीमपीदं सदेव किन्तु नामरूपविशेषणवदिदंशब्दबुद्धिविषयं चेतीदञ्च भवति । प्रागुत्पत्तेस्त्वग्रे केवलसच्छब्दबुद्धिमात्रगम्यमेवेति सदेवेदमग्र आसीदित्यवधार्यते । न हि प्रागुत्पत्तेर्नामरूपवदेदमिति यद्गृहीतुं शक्यं वस्तु सुषुप्तकाल इव । यथा सुषुप्तादुत्थितः सत्त्वमात्रमवगच्छति सुषुप्ते सन्मात्रमेव केवलं वस्त्विति तथा प्रागुत्पत्तेरित्यभिप्रायः । यदेदमुच्यते लोके पूर्वाह्णे घटादिसिक्षुणा कुलालेन मृत्पिण्डं प्रसारितमुपलभ्य यामान्तरं गत्वा प्रत्यागतोऽपराह्णे तत्रैव घटशरावाद्यनेकभेदभिन्नं कार्यमुपलभ्य मृदेवेदं घटशरावादि केवलं पूर्वाह्णे आसीदिति, तत्रोच्यते सदेवेदमग्र आसीदिति । एकमेवेति । स्वकार्यपतितमन्यद्व्यावर्त्तयत्येकमेवेत्युच्यते । अद्वितीयमिति । मृद्व्यतिरेकेण मृदो यथाऽन्यद्घटाद्याकारेण परिणमयितृकुलालादिनिमित्तकारणं इदं तथा सद्व्यतिरेकेण सतः सत्कारिकारणं द्वितीयं वस्त्वन्तरं प्राप्तं प्रतिषिध्यते । अद्वितीयमिति नास्य द्वितीयं वस्त्वन्तरं विद्यत इत्यद्वितीयम् । ननु वैशेषिकपक्षेऽपि सत्सामानाधिकरण्यं सर्वत्रोपपद्यते । द्रव्यगुणादिषु सच्छब्दबुद्ध्यनुवृत्तेः । सद्द्रव्यं सन् गुणः सत् कर्मेत्यादिदर्शनात्, सत्त्वमेवं स्यादिदानीम्, प्रागुत्पत्तेस्तु नैवेदं कार्यं सदेवासीदित्यभ्युपगम्यते वैशेषिकैः, प्रागुत्पत्तेः कार्यस्यासत्त्वाभ्युपगमात् । न चैकमेव सदद्वितीयं प्रागुत्पत्तेरिच्छन्ति । तस्माद्वैशेषिकपरिकल्पितात् सतोऽन्यत्कारणमिदं सदुच्यते मृदादिदृष्टान्तेभ्यः । तत् तत्र कैतत्किम् प्रागुत्पत्तेर्वस्तुनिरूपणे एके वैनाशिका आहुर्वस्तु निरूपयन्तोऽसद्भावमात्रं प्रागुत्पत्तेरिदं जगदेकमेवाग्रेऽद्वितीयमासीदिति । सद्भावमात्रं हि प्रागुत्पत्तेस्त्वं कल्पयन्ति बौद्धाः । न तु सत्प्रतिद्वन्द्विवस्त्वन्तर-

मिच्छन्ति। यथा सङ्गासदिति गृह्यमाणं यथाभूतं तद्विरीतं तत्त्वं भवतीति नैयायिकाः। ननु सदभावमात्रं प्रागुत्पत्तेश्चेदभिप्रेतं वैनाशिकैः कथं प्रागुत्पत्तेरिदमासीदसदेकमेवाद्वितीयञ्चेति कालसम्बन्धः सङ्गासम्बन्धोऽद्वितीयत्वं चोच्यते तैः। बाढम्। न युक्तं तेषां भावाभावमात्रमभ्युपगच्छताम्। असत्त्वमात्राभ्युपगमोऽप्ययुक्त एवाभ्युपगन्तुरनभ्युपगमानुपपत्तेः। इदानीमभ्युपगन्ताभ्युपगम्यते न प्रागुत्पत्तेरिति न प्रागुत्पत्तेः सदभावस्य प्रामाण्याभावात्। प्रागुत्पत्तेरसदेवेति कल्पनानुपपत्तिः। ननु कथं वस्त्वाश्रते शब्दार्थत्वे ऽसदेवमेवाद्वितीयमिति पदार्थवाक्यार्थोपपत्तिसदनुपपत्तौ चेदं वाक्यमप्रमाणं प्रसज्येतेति चेत् नैष दोषः सङ्कल्पनिवृत्तिपरत्वाद्वाक्यस्य। सदित्ययं तावच्छब्दः सदाकृतिवाचकः। एकमेवाद्वितीयमित्येतौ च समानाधिकरणौ। तथेदमासीदिति च। तत्र नञ् सङ्काशे प्रयुक्तः सङ्काशमेवालम्ब्य सङ्काशार्थविषयां बुद्धिं सदेकमेवाद्वितीयमिदमासीदित्येवंलक्षणां ततः सङ्काशार्थान्निवर्त्तयति। अन्यारूढ इवान्यालम्बनोऽयं तदभिमुखविषयान्निवर्त्तयति तद्वत्। न तु पुनः सदभावमेवाभिधत्तेऽतः प्रकृतस्य विपरीतग्रहणनिवृत्त्यर्थं परमिदमसदेवेत्यादि वाक्यं प्रयुज्यते। दर्शयित्वा हि विपरीतग्रहणं ततो निवर्त्तयितुं शक्यत इत्यर्थवत्ताऽसदादिवाक्यस्य चौतत्वं प्रामाण्यञ्च सिद्धमित्यदोषः। तस्मादसतः सर्व्वाभावरूपात्किञ्चिदमानमजायत सदुत्पद्यम्। अडभावश्चान्दसः। तदेतद्विपरीतग्रहणं सङ्गावैनाशिकपक्षं दर्शयित्वा प्रतिषेधति। कुतस्तु? प्रमाणात् खलु हे सौम्य! एवं स्यादसतः सज्जायते इत्येतं कुतो भवेत् न कुतश्चित्प्रमाणादेवं सम्भवतीत्यर्थः। यदपि बीजोपमर्द्दोऽङ्कुरो जायमानो दृष्टोऽभावादेवेति तदप्यभ्युपगमविरुद्धं तेषाम्। कथं? ये तावद्बीजावयवा बीजसंस्थानविशिष्टास्तेऽङ्कुरेऽप्यनुवर्त्तन्त एव न तेषामुपमर्द्दोऽङ्कुरजन्मनि। यत्पुनर्बीजाकारसंस्थानं तद्बीजावयवव्यतिरेकेण वस्तुभूतं न वैनाशिकैरभ्युपगम्यते यद्बीजं रजन्यामुपमृद्येताथ तदप्यवयवव्यतिरिक्तं वस्तुभूतं तथाच सत्यभ्युपगमविरोधः। अथ संवृत्त्याभ्युपगतं बीजसंस्थानरूपमुपमृद्यत इति चेत्। केयं संवृत्तिर्नाम किमभावभाव उत भाव इति। यद्यभावो दृष्टान्ताभावः। अथ भावस्तथापि नाभावादङ्कुरोत्पत्तिः बीजावयवेभ्यो ऽङ्कुरोत्पत्तेः। अवयवा अप्युपमृद्यन्त इति चेत्। न तदवयवेषु दृश्यत्वात्। यथा वैनाशिकानां बीजसंस्थानरूपोऽवयवी नास्ति। तथावयवा अपीति तेषामप्युपमर्द्दानुपपत्तिः। बीजावयवानामपि सूक्ष्मावयवासदवयवानामभ्युपगमे सूक्ष्मासदवयवा दृश्येवं प्रसङ्गस्याऽनुवृत्तेः सर्व्वत्रोपमर्द्दानुपपत्तिः। सङ्कल्पनिवृत्तेः सत्त्वानिवृत्तिश्चेति सङ्गादिनां सत एव सदुत्पत्तिः सेत्स्यति। न त्वसङ्गादिनां दृष्टान्तोऽस्त्यसतः सदुत्पत्तौ। मृत्पिण्डाद्घटोत्पत्तिर्दृश्यते सङ्गादिनां, तद्भावे च भावात्तदभावे चाभावात्। यद्भावादेव घट उत्पद्येत घटार्थिना मृत्पिण्डो नोपादीयेत। अभावशब्दवद्बुद्ध्यनुवृत्तिश्च घटादौ प्रसज्येत न त्वेतदस्तीति नासतः सदुत्पत्तिः। यदप्याङ्मृद्बुद्धिर्घटबुद्धेर्निमित्तमिति मृद्बुद्धिर्घटबुद्धेः कारणमुच्यते न तु परमार्थत एव सद्घटो वास्तीति तदपि सद्बुद्धिर्विद्यमाना विद्यमानाया एव घटबुद्धेः कारणमिति नासतः सदुत्पत्तिः। मृद्बुद्धिघटबुद्धोर्निमित्तनैमित्तकतया नानर्थमात्रं न तु कार्य्यकारणत्वमिति चेत् न बुद्धीनां नैरन्तर्य्ये गम्यमाने वैनाशिकानां बहिर्दृष्टान्ताभावात्। अतः कुतस्तु खलु सौम्यैवं स्यादिति होवाच कथं केन प्रकारेणासतः सज्जायेतेति? असतः सदुत्पत्तौ न कश्चिदपि दृष्टान्तप्रकारोऽस्तीत्यभिप्रायः। एवमसङ्गादिपक्षसन्दर्शनोपसंहरति सत्त्वेव सौम्येदमग्र आसीदिति स्वपक्षसिद्धिः। ननु सङ्गादिनोऽपि सतः सदुत्पद्यत इति नैव दृष्टान्तोऽस्ति। घटाद्घटान्तरोत्पत्त्यदर्शनात्। सत्यमेवं न सतः सदन्तरमुत्पद्यते किं तर्हि सदेव संस्थानान्तरेणावतिष्ठते। यथा सर्पः कुण्डली भवति। यथा च मृद्भूर्खं पिण्डघटकपालादिप्रभेदैः। यद्येवं सदेव सर्व्वप्रकारावस्थं कथं प्रागुत्पत्तेरिदमासीदित्युच्यते। ननु न श्रुतं त्वया सदेवेत्यवधारणमिदं शब्दवाच्यस्य कार्य्यस्य। प्राग् तर्हि प्रागुत्पत्तेरसदेवासीच्चेदं शब्दवाच्यमिदानीमिदं जातमिति, न सत एवेदंशब्दवृद्धिविषयतयावस्थानात् यथा सदेव पिण्डघटादिशब्दवृद्धिविषयेत्येवावतिष्ठते तद्वत्। ननु यथा सद्दृश्येवं पिण्डघटाद्यपि तद्वत्सद्बुद्धेरन्यवृद्धिविषयत्वात्कार्य्यस्य सतोऽन्यदवस्थान्तरं स्यात्कार्य्यजातं यथाऽश्वाद्गौः, न पिण्डघटादीनामितरेतरव्यभिचारेऽपि सत्त्वाव्यभिचारात्। यद्यपि घटः पिण्डे व्यभिचरति पिण्डश्च घटे, तथापि पिण्डघटौ सत्त्वं न व्यभिचरतस्तस्मान्नान्यत्वं पिण्डघटौ, व्यभिचरत्वञ्च गौरश्वो वा गाम्, तस्मात्कादि संस्थानमात्रं घटादयः। एवं सत्संस्थानमात्रमिदं सर्व्व-

मिति युक्तं प्रागुत्पत्तेः सदेवेति वाचारम्भणमात्रत्वादिकारसंस्थानमात्रस्य । ननु निरवयवं सत् "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" "दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यज"इत्यादिश्रुतिभ्यो, निरवयवस्य सतः कथं विकारसंस्थानसृपपद्यते। नैष दोषो रज्वाद्यात्मवेभ्यः सर्पादिसंस्थानवद्बुद्धिपरिकल्पितेभ्यः सदवयवेभ्यो विकारसंस्थानोपपत्तेः। "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" "एवं सदेव सत्यमिति" श्रुतेः। एकमेवाद्वितीयं परमार्थत इदंबुद्धिकालेऽपि तत्त्वतु ऐक्षतेत्यां दर्शनं ज्ञतवान्। अतश्च न प्रधानं साङ्ख्यपरिकल्पितं जगत्कारणम् प्रधानस्याचेतनत्वाभ्युपगमात्। इदन्तु सच्चेतनमीक्षितृत्वात्तत्कथमैक्षतेत्याह बहु प्रभूतं स्यां भवेयं प्रजायेय प्रकर्षेणोत्प्रद्येय। यथा मृद्दु घटाद्याकारेण यथा वा रज्वादि सर्पाद्याकारेण बुद्धिकल्पितेन। असदेव तर्हि सर्वं यद्दृश्यते रज्जुरिव सर्पाद्याकारेण, न, सत एव ह्यैतभेदेनान्यथाग्रहणाद्वासत्त्वं कस्यचित्क्वचिदिति ब्रूमः। यथा सतोऽन्यदस्तन्तरं परिकल्प्य पुनस्तस्यैव प्रागुत्पत्तेः प्रध्वंसाद्धेतुमत्त्वं ब्रुवते तार्किका न तथाऽस्माभिः कदाचित्क्वचिदपि सतोऽन्यदभिधानमभिधेयं वा वस्तु परिकल्प्यते सदेव तु सर्वमभिधानमभिधीयते च वदन्यबुद्ध्या यथा रज्जुरेव सर्पबुद्ध्या सर्प इत्यभिधीयते यथा, वा पिण्डघटादिर्मृदोऽन्यबुद्ध्या पिण्डघटादिशब्देनाभिधीयते लोके। रज्जुविवेकदर्शिनां तु सर्पाभिधानबुद्धी निवर्त्तेते यथा च मृद्विवेकदर्शिनां घटादिशब्दबुद्धी तद्वद्धिविवेकदर्शिनामन्यविकारशब्दबुद्धी निवर्त्तेते।"यतो वाचो निवर्त्तन्तेऽप्राप्य मनसा सहेति" "अनिरुक्तेऽनिलयन" इत्यादिश्रुतिभ्यः"भा० ह०उ० भाष्ये अभावादिकारणवादनिराकरणेन उत्पत्तेः प्रागपि सत्कार्यं कारणव्यापारादभिव्यज्यते इति स्थिरीकृतम् यथा। "नैवेह किञ्चनाग्र आसीत् मृत्युनैवेदमावृतमासीत् ह०उ०। "नैवेह किञ्चनाग्र आसीत्। इह संसारमण्डले किञ्चन किञ्चिदपि नामरूपप्रविभक्तं विशेषं नैवासीत् न बभूव। प्रागुत्पत्तेर्मृदादेः किं शून्यमेव स्यात्, नैवेह किञ्चनेति श्रुतेः न, कार्यं कारणं वासीदुत्पत्तेश्च। उत्पद्यते हि घटः। अतः प्रागुत्पत्तेर्घटस्य नास्तित्वम् नतु कारणस्य नास्तित्वं, मृत्पिण्डादिदर्शनात्। यद्वोपलभ्यते तस्यैव नास्तिता। अस्तु कार्यस्य, नतु कारणस्य, उपलभ्यमानत्वात् न प्रागुत्पत्तेः सर्वानुपलम्भात्, अनुपलब्धिरभावो हेतुः सर्वस्य जगतः प्रागुत्पत्तेर्न कारणं कार्यञ्चोपलभ्यते। तस्मादसदेवैवाग्र आसीदित्यभावोऽस्तु, न ह्यत्र नैवेदमावृतमासीदिति श्रुतेः। यदि हि किञ्चिदपि नासीत् येनाव्रियते यद्वाव्रियते तदा भावच्छन्मृत्युनैवेदमावृतमिति। न हि भवति गगनकुसुमच्छन्नो वन्ध्यापुत्र इति। भवति च मृत्युनैवेदमावृतमासीदिति। तस्माद्योनावृतं कारणेन यद्वावृतं कार्यं प्रागुत्पत्तेस्तदुभयमासीच्छ्रुतेः प्रामाण्यात् अनुमेयत्वाच्च। अनुमीयते च प्रागुत्पत्तेः कार्यकारणयोरस्तित्वम् कार्यस्य हि सतो जायमानस्य कारणे सदुत्पत्तिदर्शनात् असति चादर्शनात्। जगतोऽपि प्रागुत्पत्तेः कारणास्तित्वमनुमीयते घटादिकारणास्तित्ववत्। घटादिकारणस्याप्यसत्त्वमेवानुपमृद्य मृत्पिण्डादिकं घटाद्युत्पत्तेरिति चेन्न मृदादेः, कारणत्वात्। मृत्सुवर्णादि हि तत्र कारणं घटरुचकादेः, न पिण्डाद्याकारविशेषः तदभावे तदभावात्। असत्यपि पिण्डाकारविशेषे मृत्सुवर्णादिकारणद्रव्यमात्रादेव घटरुचकादिकार्योत्पत्तिर्दृश्यते। तस्मान्न पिण्डाकारविशेषो घटरुचकादिकारणम्। असति तु मृत्सुवर्णादिद्रव्ये घटरुचकादिर्न जायत इति मृत्सुवर्णादिद्रव्यमेव कारणं नतु पिण्डाकारविशेषः। सर्वं हि कारणं कार्यमुत्पादयत् पूर्वोत्पन्नस्वात्मकार्यस्य तिरोधानं कुर्वत् कार्यान्तरमुत्पादयति। एकस्मिन् कारणे युगपदनेककार्यविरोधात्। न च पूर्वकार्योपमर्दे कारणस्य स्वात्मोपमर्दो भवति। तस्मात् पिण्डाद्युपमर्दे कार्योत्पत्तिदर्शनमहेतुः। प्रागुत्पत्तेः कारणसत्त्वे पिण्डादिव्यतिरेकेण मृदादेरसत्त्वादयुक्तमिति चेत् पिण्डादिपूर्वकार्योपमर्दे मृदादिकारणं नोपलभ्यते। घटादिकार्यान्तरेऽप्यनुवर्तत इत्येतदयुक्तम्। पिण्डघटादिव्यतिरेकेण मृदादिकारणस्यानुपलम्भादिति चेत् न मृदादिकारणानां घटाद्युत्पत्तौ पिण्डादिनिवृत्तावनुवृत्तिदर्शनात्। साहचर्यादन्वयदर्शनं कारणानुवृत्तेरिति चेन्न पिण्डादिगतानां मृदाद्यवयवानामेव घटादौ प्रत्यक्षत्वेऽनुमानाभासत्वाद्घटत्वादिकल्पनानुपपत्तेः। न च प्रत्यक्षानुमानयोर्विरुद्धा व्यभिचारिता प्रत्यक्षपूर्वकत्वादनुमानस्य सर्वत्रैवानाश्वासप्रसङ्गात्। यदि च क्षणिकं सर्वं, तदेवेदमिति गम्यमानं तद्बुद्धेरपि अन्यतद्बुद्ध्यपेक्षत्वे तस्या अप्यन्यबुद्ध्यपेक्षत्वमित्यनाश्वासायां तद्बुद्धगमिदमित्यस्या अपि बुद्धेर्मृषात्वात् सर्वत्रानाश्वासतैव। तदिदमुद्धारेऽपि

कर्त्रभावे सम्बन्धानुपपत्तिः । सादृश्यात्सम्बन्ध इति चेन्न। तदिदम्बुद्ध्योरितरेतरविषयत्वानुपपत्तेः । असति चेतरेतरविषये सादृश्यग्रहणानुपपत्तिः । असत्येव सादृश्ये तद्बुद्धिरिति चेन्न । तदिदम्बुद्ध्योरपि सादृश्यबुद्धिवदसन्निधियत्वप्रसङ्गात् । असन्निधियत्वमेव सर्व्वबुद्धीनामस्त्विति चेन्न बुद्धिबुद्धेरप्यसन्निधियत्वप्रसङ्गात् । तदर्थस्त्विति चेन्न । सर्व्वबुद्धीनां मृषात्वेऽसत्यबुद्ध्यनुपपत्तेः । तस्मादसदेतत् सादृश्यात्तु तद्बुद्धिरित्यतः सिद्धः प्राक्कार्योत्पत्तेः कारणसद्भावः । कार्यस्य चाभिव्यक्तिलिङ्गत्वात् । कार्यस्य च सद्भावः प्रागुत्पत्तेः सिद्धः कथम् ? अभिव्यक्तिलिङ्गत्वात् । अभिव्यक्तिर्लिङ्गमस्येत्यभिव्यक्तिः साक्षाद्विज्ञानालम्बनत्वप्राप्तिः । यद्धि लोके प्रावृतं तम आदिना घटादि वस्तु तत् आलोकादिना प्रावरणतिरस्कारेण विज्ञानविषयत्वं प्राप्नुवत् प्राक्सद्भावं न व्यभिचरति । तदेदमपि जगत् प्रागुत्पत्तेरित्यवगच्छामः । न हि अविद्यमानो घट उदिते ऽभ्यादित्य उपलभ्यते । ननु तेऽविद्यमानत्वाभावादुपलभ्यतैवेति चेत् । न हि तव घटादिकार्थी कदाचिदप्यविद्यमानमित्युदितेऽभ्यादित्य उपलभ्येतैव । मृत्पिण्डेऽसन्निहिते तम आद्यावरणे चासति विद्यमानत्वादिति चेत् न द्विविधत्वादावरणस्य । घटादिकार्यस्य द्विविधं ह्यावरणं सदादेरभिव्यक्तस्य तमःकुड्यादि प्राङ्मृदोऽभिव्यक्तेर्मृदाद्यवयवानां पिण्डादिकार्यान्तररूपेण संस्थानम् । तस्मात् प्रागुत्पत्तेर्विद्यमानस्यैव घटादिकार्यस्याहृतत्वादनुपलब्धिः । नष्टोत्पन्नभावाभावयद्भप्रलयभेदस्वभिव्यक्तिरिरोभावयोर्द्विविधत्वापेक्षः । पिण्डकपालादेरावरणवैलक्षण्यादयुक्तमिति चेत् तमःकुड्यादि हि घटाद्यावरणं घटादिभिन्नदेशं दृष्टं न तथा घटादिभिन्नदेशे दृष्टे पिण्डकपाले तस्मात्पिण्डकपालसंस्थानयोर्विद्यमानस्यैव घटस्याहृतत्वादनुपलब्धिरित्ययुक्तमावरणधर्मवैलक्षण्यादिति चेत् न क्षीरोदकादेः क्षीराद्यावरणेनैकदेशत्वदर्शनात् । घटादिकार्यं कपालचूर्णाद्यवयवानामल्पभावादनावरणत्वमिति चेत् न विभक्तानां कार्यान्तरत्वादावरणत्वोपपत्तेः । आवरणाभाव एव यत्नः कर्त्तव्य इति चेत् पिण्डकपालावस्थयोर्विद्यमानमेव घटादिकार्यमाहृतत्वान्नोपलभ्यत इति घटादिकार्यार्थिना तदावरणविनाश एव यत्नः कर्त्तव्यो न घटाद्युत्पत्तौ । न चैतदस्ति तस्मादयुक्तं विद्यमानस्यैवाहृतत्वादनुपलब्धिरिति चेत् न अनियमात् । न हि विनाशमात्रप्रयत्नादेव घटाद्यभिव्यक्तिर्नियता तम आद्याहृते घटादौ प्रदीपाद्युत्पत्तौ प्रयत्नदर्शनात् । सोऽपि तमोनाशायैवेति चेत् दीपाद्युत्पत्तावपि यः प्रयत्नः सोऽपि तमस्तिरस्कारायैव । तस्मिन्नष्टे घटः स्वयमेवोपलभ्यते न हि घटे किञ्चिदाधीयत इति चेत् न प्रकाशवतो घटस्योपलभ्यमानत्वात् । यथा प्रकाशविशिष्टो घट उपलभ्यते प्रदीपकरणे, न तथा प्राक् प्रदीपकरणात् । तस्मात् न तमस्तिरस्कारायैव प्रदीपकरणम् किन्तर्हि प्रकाशवत्त्वाय । प्रकाशवत्त्वे नैवोपलभ्यमानत्वात् । क्वचिदावरणविनाशेऽपि यत्नः स्यात् यथा कुड्यादिविनाशे । तस्मान्न नियमोऽस्ति अभिव्यक्त्यर्थिनावरणविनाश एव यत्नः कार्य इति । नियमार्थवत्त्वाच्च । कारणे वर्त्तमानं कार्यं कार्यान्तराणामावरणमित्यवोचाम । तत्र यदि पूर्व्वाभिव्यक्तस्य कार्यस्य पिण्डस्य व्यवहितस्य वा कपालस्य विनाश एव यत्नः क्रियेत तदा विदलचूर्णाद्यपि कार्यम् स्यात् । तेनाप्याहृतो घटो नोपलभ्यत इति पुनः प्रयत्नान्तरापेक्षैव । तस्माद्घटाद्यभिव्यक्त्यर्थिनो नियत एव कारकव्यापारोऽर्थवान् । तस्मात् प्रागुत्पत्तेरपि सदेव कार्यम् । अतीतानागतप्रत्ययभेदाच्च । अतीतो घटोऽनागतो घट इत्येतयोश्च प्रत्यययोर्वर्त्तमानघटप्रत्ययवन्न निर्विषयत्वं युक्तम् । अनागतार्थिप्रवृत्तेश्च । नह्यसत्यर्थितया प्रवृत्तिर्लोके दृष्टा । योगिनां चातीतानागतज्ञानस्य सत्यत्वात् असंवेद्यविष्यद्घटऐश्वरमविष्यद्घटविषयं प्रत्यक्षज्ञानं मिथ्या स्यात् । न च प्रत्यक्षमपचर्य्यते । घटसद्भावे ह्यनुमानमवोचाम विप्रतिषेधाच्च । यदि घटो भविष्यतीति कुलालादिषु व्याप्रियमाणेषु घटार्थी, प्रमाणेन निश्चितम् । येन च कालेन घटस्य सम्बन्धो भविष्यतीत्युच्यते तस्मिन्नेव काले घटोऽस्तीति प्रतिषिद्धमभिधीयते भविष्यद्घटोऽस्तीति न भविष्यतीत्यर्थः अयं घटो न वर्त्तत इति यद्वत् । अथ प्रागुत्पत्तेर्घटोऽस्तीत्युच्यते घटार्थं प्रवृत्तेषु कुलालादिषु तत्र यथा व्यापाररूपेण वर्त्तमानास्तावत् कुलालादयस्तथा घटो न वर्त्तत इत्यसच्छब्दस्यार्थश्चेन्न विरुध्यते कस्मात् स्वेन हि भविष्यद्रूपेण घटो वर्त्तते । न हि पिण्डस्य वर्त्तमानता कपालस्य वा घटस्य भवति । न च तयोर्भविष्यत्ता घटस्य । तस्मात् कुलालादिव्यापारवर्त्तमानतायां प्रागुत्पत्तेर्घटोऽस्तीति न विरुध्यते । यदि घटस्य वस्तुन्यविद्यत्ताकार्यरूपं तत् प्रतिषिध्येत । तत्प्रतिषेधे विरोधः स्यात् । नहु तद्वान् प्रतिषेधति । न च सर्व्वथा

क्रियावतामेकैव वर्त्तमानता भविष्यत्त्वं वा। अपि च चतुर्विधानामभावानां घटस्येतरेतराभावो घटादन्यो दृष्टो यथा घटाभावः पटादिरेव न घटस्वरूपमेव। न च घटाभावः सन् पटोऽभावात्मकः किन्तर्हि भावरूप एव घटस्य प्राक्प्रध्वंसात्यन्ताभावानामपि घटेन व्यपदिश्यमानत्वात् घटस्येतरेतराभाववत् तथैव भावात्मकता अभावानाम्। एवञ्च सति घटस्य प्रागभाव इति न घटस्वरूपमेव प्रागुत्पत्तेर्नास्ति। अथ घटस्य प्रागभाव इति घटस्य यत् स्वरूपं तदेवोच्यते, घटस्येति व्यपदेशानुपपत्तिः। अथ कल्पयित्वा व्यपदिश्येत शिलापुत्रकस्य शरीरमिति यद्वत्। तथापि घटस्य प्रागभाव इति कल्पितस्यैवाभावस्य घटेन व्यपदेशो न घटस्वरूपस्यैव। अथार्थान्तरं घटाद्घटस्याभाव इति उक्तोत्तरमेतत्। किञ्चान्यत्प्रागुत्पत्तेः अग्रविषाणवदभावभूतस्य घटस्य स्वकारणसत्तासम्बन्धानुपपत्तिः द्विनिष्ठत्वात् सम्बन्धस्य। अयुतसिद्धानामदोष इति चेत् न भावाभावयोरयुतसिद्धत्वानुपपत्तेः। भावभूतयोर्हि युतसिद्धताऽयुतसिद्धता वा स्याद्न तु भावाभावयोरभावयोर्वा। तस्मात् सदेव कार्यं प्रागुत्पत्तेरिति सिद्धम्" एतदभिप्रेत्य गीतायामुक्तम् "नासतो विद्यते भावोनाभावो विद्यते सतः" इति

अथ भूतोत्पत्तिप्रकारः काणादभाष्यन्यायकन्दल्योर्दर्शितो यथा "ततः प्रातः प्राणिनां भोगभूतये महेश्वरस्य सिसृक्षानन्तरं सर्वात्मगतदृष्टिलब्धाऽदृष्टापेक्षेभ्यस्तत्संयोगेभ्यः पवनपरमाणुषु कर्मोत्पत्तौ तेषां परस्परसंयोगेभ्यो द्व्यणुकादिप्रक्रमेण महान् वायुः सस्तत्पद्मोदोधूयमानस्तिष्ठति" भा०। "यद्यपि तदाऽऽत्मनां प्राणसंबन्धोनास्ति तथापि प्राणिन इत्युक्तं योग्यत्वात्। तेषां भोगभूतये सुखदुःखानुभवोत्पत्तये महेश्वरस्य सिसृक्षा सर्जनेच्छा जायते तदनन्तरं सर्वेषामात्मसु गतान्यदृष्टानि वृत्तिं लभन्ते। यद्यपि युगपदुत्पद्यमानासंख्येयकार्योत्पत्तौ व्याप्रियमाणा दिगादिचित्यत्वादेकैवेश्वरेच्छा क्रियाशक्तिरूपा तथाप्येषा तत्तत्कालविशेषसहकारिप्राप्तौ कदाचित् संहारार्था भवति कदाचित् सृष्ट्यर्था भवति यदा संहारार्था तदा तदनुरोधाददृष्टादीनां वृत्तिनिरोध औदासीन्यलक्षणो जायते यदा त्वसौ सृष्ट्यर्था भवेत्तदा वृत्तिलाभः स्वकार्यजननं प्रति व्यापारी भवति। वृत्तिर्लब्धा यैस्तानि वृत्तिलब्धानि आहिताग्न्यादित्वात् निष्ठायाः पूर्वनिपातोदन्यजात इति यथा। सर्वात्मगतानि वृत्तिलब्धानि अदृष्टानि तान्यपेक्षन्ते ये तत्संयोगा आत्माणुसंयोगास्तेभ्यः पवनपरमाणुषु कर्माण्युत्पद्यन्ते पवनपरमाणवः समवायिकारणं लब्धवृत्त्यदृष्टवदात्माणुसंयोगोऽसमवायिकारणमदृष्टं निमित्तकारणमेवं कर्मोत्पत्तौ तेषां पवनपरमाणूनां परस्परसंयोगा जायन्ते तस्मात्संयोगेभ्यश्च द्व्यणुकान्युत्पद्यन्ते तदनु त्र्यणुकानीति अनेन क्रमेण महान् वायुः सस्तत्पद्मानो नभस्याकाशे दोधूयमानः क्वचिद्प्रतिहतत्वायद्देगातिशययुक्तस्तिष्ठति" क०। "तदनन्तरं तस्मिन्नाप्येभ्यः परमाणुभ्यस्तेनैव क्रमेण महान् सलिलनिधिरुत्पद्यः पोप्लूयमानः" भा०। "प्रतिरोधकाभावात् सर्वत्र प्लवमानस्तिष्ठति" क०। "ततस्तस्मिन्नेव पार्थिवेभ्यः परमाणुभ्यो द्व्यणुकादिक्रमेण सस्तत्पद्मा महापृथिवीस्थिरस्वभावा तिष्ठति। ततस्तैजसेभ्यः परमाणुभ्यः सस्तत्पद्मो महांस्तेजोराशिर्दैदीप्यमानस्तिष्ठति" भा०। "तदनन्तरं सलिलनिधेरुत्पत्त्यनन्तरं तस्मिन्नेव जलनिधौ पार्थिवेभ्यः परमाणुभ्यो महापृतिवी संहता स्थिरस्वभावाऽवतिष्ठते तदनन्तरं तस्मिन्नेव महोदधौ तैजसेभ्योऽणुभ्यो द्व्यणुकादिक्रमेणोत्पन्नो महांस्तेजोराशिः केनचिदनभिभूतत्वाद्दीप्यमानस्तिष्ठति यद्यपि पयःपावकयोः स्वाभाविकोविरोधोऽस्ति तथाप्यदृष्टवशादाधाराधेय भावोनानुपपन्नः" क०। "एवं सस्तत्पद्मेषु चतुर्षु महाभूतेषु महेश्वरस्याभिध्यानमात्रात्तैजसेभ्योऽणुभ्यः पार्थिवपरमाणुसहितेभ्यो महदण्डमारभ्यते। तस्मिंश्चतुर्वदनकमलं सर्वलोकपितामहं ब्रह्माणं सकलभुवनसहितस्तत्पाद्य प्रजासर्गे नियुङ्क्ते" भा०। "एवमनन्तरोक्तेन क्रमेणोत्पन्नेषु महाभूतेषु महेश्वरस्याभिध्यानमात्रात्तैजसेभ्यः परमाणुभ्यः पार्थिवपरमाणुसहितेभ्योऽण्डं महद्भिमारभ्यते हिरण्मये पार्थिवावयवा उपलक्ष्यन्ते नेदं वह्निपुञ्जप्रायं मा भूत्। तस्मिन्नण्डे चत्वारि वदनकमलानि यस्य तं ब्रह्माणं सर्वलोकपितामहं सर्वेषामेव लोकानामाद्यं पुरुषं समस्तैर्भुवनैः सहोत्पाद्य प्रजानां सर्गे जनने विनियुङ्क्ते "त्वमिदं कुर्विति" क०। "स च महेश्वरेण विनियुक्तो ब्रह्मातिशयज्ञानवैराग्यैश्वर्यसम्पन्नः प्राणिनां कर्मविपाकं विदित्वा कर्मानुरूपज्ञानभोगायुषः सुतान् प्रजापतीन् मानसान् मनुदेवर्षिपितृगणान् सुखबाहूरुपादतश्चतुरोवर्णान् यानि चोच्चावचानि भूतानि तानि क्षुद्राऽऽशयानुरूपैर्धर्मज्ञानवैराग्यैश्वर्यैः संयोजयतीति" भा०। ज्ञानञ्च वैराग्यञ्चैश्वर्यञ्च ज्ञानवैराग्यैश्वर्याणि अतिशयेन ज्ञानादीनि तैः सम्पन्न उपचितः ज्ञानातिशयात् प्राणिनां धर्मा-

धर्मो यथावत् प्रत्येति। वैराग्यादपह्नपातेन प्रवर्त्तते। ऐश्वर्यात् कर्म्मफलं भोजयति। प्राणिनां कर्मविपाकं विदित्वेति विविधेन प्रकारेण पाकोविपाकः कर्मणां विपाकः कर्मविपाकस्तं विदित्वा एतावदस्य कर्मफलं भविष्यतीति ज्ञात्वा कर्म्मानुरूपाणि ज्ञानभोगायूंषि येषां तान् प्रजापतीन् दक्षाद्यान् मानसान् मनःसंकल्पप्रभवान् मनुदेवर्षिपितृगणान् मनून् देवान्दक्षीन् पितृगणान् सुखबाहुरूपादतश्चतुरोवर्णान् मुखात् ब्राह्मणान्, बाहुभ्यां क्षत्रियान्, ऊरुभ्यां वैश्यान्, पद्भ्यां शूद्रान्, अन्यानि चोच्चावचानि क्षुद्रक्षुद्रतराणि भूतानि सृष्ट्वा आश्रयानुरूपैराशेते फलोपभोगकालं यावत् आत्मन्यवतिष्ठत इत्याशयः कर्म तदनुरूपैर्ज्ञानधर्मवैराग्यैश्वर्यैः संयोजयतीति मात्रयाप्यन्यथा न योजयतीत्यर्थः"। यत् खलु केचिदेवमाचक्षिरे प्रेक्षावत्प्रवृत्तिरिष्टार्था वा स्यादनिष्टपरिहारार्था वा नचेष्टानिष्टप्राप्तिपरिहारार्थो, न चेष्टानिष्टप्राप्तिपरिहारावीश्वरे समस्तावाप्तकामे सम्भवतः तेनास्य जगद्विसर्गे प्रवृत्तिरनुपपन्ना तत्रोत्तरं प्राणिनां भोगभूतय इति परार्था सिसृक्षायां प्रवृत्तिर्न स्वार्थनिबन्धनेत्यभिप्रायः। नन्वेवं तर्हि सुखमयीमेव सृष्टिं कुर्यात् न दुःखयुक्तां करुणया प्रवृत्तत्वादित्यत्रैवपरिहारः प्राणिनां कर्मविपाकं विदित्वेति। परार्थं प्रवृत्तेरपि न सुखमयीमेव करोति विचित्रकर्म्माशयसहायस्य कर्तृत्वादित्यर्थः नचैवं सति करुणाविरोधोदुःखोत्पादस्य वैराग्यजननद्वारेण परमपुरुषार्थहेतुत्वात्, यदि धर्माधर्मावपेक्ष्य करोति नास्य स्वाधीनं कर्तृत्वमिति अनीश्वरतादोष इत्यस्यायं प्रतिसमाधिः। आशयानुरूपैः धर्मज्ञानवैराग्यैश्वर्यैः संयोजयति स हि सर्वप्राणिनां कर्मानुरूपं फलं प्रयच्छन् कथमनीश्वरः स्यादिति भावः न हि योग्यतानुरूपेण भृत्यानां फलविशेषप्रदः प्रभुरप्रभुर्भवति। कल्पादावुत्पद्यानां प्राणिनां सर्वशब्दार्थं व्युत्पद्यानां सहेतस्याशक्यकरणाच्छब्दव्यवहारानुपपत्तिरिति चोदनायां प्रत्यवस्थानबीजमिदं मानसानिति। योनिजशरीरं हि महता गर्भवासादिदुःखप्रबन्धेन विलुप्तसंस्कारं जन्मान्तरानुभूतस्य सर्वस्य न स्मरति। अयमयः प्रजापतयो मनवस्तु मानसा अयोनिजशरीरविशिष्टा दृष्टसंबन्धिनो दृष्टसंस्काराः कल्पान्तरानुभूतं सर्वमेव शब्दार्थव्यवहारं सुप्तप्रतिबुद्धवत् प्रतिसन्दधते प्रतिसन्दधानाश्च परस्परं बन्धवो व्यवहरन्ति। तेषां व्यवहाराच्च तत्कालवर्त्तिनां प्राणिनामुत्पत्तिः तद्व्यवहाराच्चापरेषामित्युत्पद्यते व्यवहारपरम्परया शब्दार्थं व्युत्पत्तिरित्यर्थः"क०।

वेदान्तिमते भूतोत्पत्तिप्रकारो वेदा०प०दर्शितो यथा। "तत्र सर्गाद्यकाले परमेश्वरः कृत्स्नप्रपञ्चवैचित्र्यहेतुप्राक्तनकर्म्मसहकृतापरिमितानिरूपितशक्तिविशेषविशिष्टमायासहितः सन्नाकाशरूपाणां निखिलप्रपञ्चं प्रथमं बुद्धावाकलयन्नहं करिष्यामीति सङ्कल्पयति "तदैक्षत बहु स्यां प्रजायेयेति" श्रुतेः। तत आत्मन आकाशादीनि पञ्चभूतानि अपञ्चीकृतानि तन्मात्रपदप्रतिपाद्यानि उत्पद्यन्ते तत्राकाशस्य शब्दोगुणो, वायोस्तु शब्दस्पर्शौ तेजसस्तु शब्दस्पर्शरूपाणि, अप्यान्तु शब्दस्पर्शरूपरसाः, पृथिव्यास्तु शब्दस्पर्शरूपरसगन्धाः। न तु शब्दः आकाशमात्रगुणत्वं वायुत्वादावपि तदुपलम्भात्। वासौ भ्रमः बाधकाभावात्। इमानि भूतानि त्रिगुणमायाकार्याणि अतस्त्रिगुणात्मकानि। एतेषु सत्वगुणोपेतैः पञ्चभूतैः श्रोत्रत्वक्चक्षूरसनघ्राणानि पञ्चेन्द्रियाणि मनोबुद्ध्यहङ्कारचित्तानि च जायन्ते। श्रोत्रादीनां पञ्चानामनुक्रमेणैव दिग्वातार्कवरुणाश्विना अधिष्ठातृदेवताः मनआदीनां चतुर्णां क्रमेण चन्द्रचतुर्मुखशङ्कराच्युताः अधिष्ठातृदेवताः। एतेषु एव रजोगुणोपेतैः पञ्चभूतैर्यथाक्रमेण वाक्पाणिपादपायूपस्थाख्यानि कर्मेन्द्रियाणि जायन्ते। तेषाञ्च क्रमेण वह्नीन्द्रोपेन्द्रमृत्यु प्रजापतयोऽधिष्ठातृदेवताः। रजोगुणोपेतैः पञ्चभूतैरेव पञ्च वायवः प्राणापानव्यानोदानसमानाख्याजायन्ते। तत्र प्राणनवान् वायुः प्राणोनासाग्रस्थानवर्त्ती। अपानवानपानः पायुादिस्थानवर्त्ती। विष्णुगमनवान् व्यानः अखिलशरीरवर्त्ती। ऊर्द्धमननवानुदानः कण्ठस्थानवर्त्ती। अशितपीताद्यादिसमीकरणः समानः नाभिस्थानवर्त्ती। तैरेव तमोगुणोपेतैरपञ्चीकृतभूतैः पञ्चीकृतभूतानि जायन्ते "तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति" त्रिवृत्करणश्रुतेः पञ्चीकरणोपलक्षणार्थत्वात्। पञ्चीकरणप्रकारश्चेत्थम्। आकाशादौ द्विधा विभज्य तयोरेकं भागं पुनश्चतुर्धा विभज्य तेषां चतुर्णांशानां वायुादिषु चतुर्भूतेषु संयोजनम्। एवं वायुं द्वेधा विभज्य तयोरेकं भागं पुनश्चतुर्धा विभज्य तेषां चतुर्णां आकाशादिषु संयोजनम्। एवं तेजोऽप्पृथिव्यंशानामपि। तदेवमेकैकभूतस्यार्द्धं स्वांशात्मकम् अर्द्धान्तरञ्च चतुर्विधभूतमयमिति पृथिव्यां दौ

स्यांशाधिक्यात् पृथिव्यादिव्यवहारः । तदुक्तम् "वैशेष्यात्तद्वादस्तद्वादः" (सां०सू०)इति । पूर्वोक्तैरेव पञ्चीकृतभूतैर्लिङ्गशरीरं परलोकयात्रानिर्वाहकं मोक्षपर्यन्तस्थायि मनोबुद्धिभ्यासुपेतं ज्ञानेन्द्रियपञ्चककर्मेन्द्रियपञ्चकप्राणादिपञ्चकसंयुक्तं जायते । तदुक्तम् । "पञ्चप्राणमनोबुद्धि दशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनमिति" । तच्च द्विविधं परमपरञ्च । परं हिरण्यगर्भलिङ्गशरीरं महत्तत्त्वरूपम्, अपरमस्मदादिलिङ्गशरीरञ्चाहङ्कारतत्त्वमित्याख्यायते । एवं तमोगुणयुक्तेभ्यः पञ्चीकृतभूतेभ्योभूम्यन्तरिक्षस्वर्गमहर्जनस्तपःसत्यात्मकस्योर्द्धलोकसप्तकस्य अतलपातालवितलसुतलतलातलरसातलमहातलाख्यस्याधोलोकसप्तकस्य ब्रह्माण्डस्य जरायुजाण्डजस्वेदजोद्भिज्जाख्यचतुर्विधस्थूलशरीराणाञ्चोत्पत्तिः । तत्र जरायुजानि जरायुभ्योजातानि मनुष्यपश्वादिशरीराणि । अण्डजानि अण्डेभ्यो जातानि पक्षिसर्पादिशरीराणि । स्वेदजानि स्वेदाज्जातानि यूकमशकादिशरीराणि । उद्भिज्जानि भूमिमुद्भिद्य जातानि वृक्षादिशरीराणि । वृक्षादीनामपि पापकर्मभोगायतनत्वेन शरीरित्वम् । तत्र परमेश्वरस्य पञ्चतन्मात्रादुत्पत्तौ सप्रदायवदोषेतल्लिङ्गशरीरोत्पत्तौ हिरण्यगर्भस्थूलशरीरोत्पत्तौ च साक्षात्कर्तृत्वम् । इतरनिखिलप्रपञ्चोत्पत्तौ च हिरण्यगर्भद्वारा "हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति" श्रुतेः हिरण्यगर्भोनाम मूर्त्तित्रयादन्यः प्रथमोजीवः "स वै शरीरी प्रथमः स वै पुरुष उच्यते । आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्त्तत" । "हिरण्यगर्भः समवर्त्तताग्रे" इत्यादि "श्रुतेः" ।

सांख्यमते प्रकृतिरेका नित्या अचेतना साम्यावस्थापन्नसत्वरजस्तमआत्मिका, पुरुषास्तु बहवश्चिन्मात्रा अपरिणामिनः कूटस्था नित्याः । पूर्वकल्पे प्रकृतिपर्य्यन्तसाक्षात्कारिणा प्रकृतिलोनोपाधिकेन आदिविदुषा ईश्वरपदाभिधेयेन स्वस्वामिभावरूपसंयोगवती स्वलीनाननन्तवृत्तितत्त्वनिष्टपूर्वकल्पार्जितादृष्टवशेव प्रकृतिः सर्गाद्यकाले सत्वादिगुणवैषम्यापन्ना महादाद्याकारेण परिणमते । यथा च परिणमते तथा दर्शितम् सां०सू०प्र० भाष्ययोः यथा । "सत्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोऽहङ्कारोऽहङ्कारात् पञ्च तन्मात्राण्युभयमिन्द्रियं तन्मात्रेभ्यः स्थूलभूतानि पुरुष इति पञ्चविंशतिर्गणः"सू० । "सत्वादीनि द्रव्याणि न वैशेषिकादिवदयुताः संयोगविभागवत्त्वात् अयुतसिद्धत्वगुरुत्वादिधर्मकत्वाच्च । तेष्वत्र शास्त्रे सत्वादौ च गुणशब्दः पुरुषोपकरणत्वात् पुरुषपशुबन्धकत्वगुणात्मकमहदादिरज्जुनिर्माणत्वाच्च प्रयुज्यते । तेषां सत्वादिद्रव्याणां या साम्यावस्थान्यूनातिरिक्तावस्था न्यूनाधिकाभावेनासंहृतावस्थेति यावत् अकार्य्यावस्थेति निष्कर्षः । अकार्यावस्थोपलक्षितं गुणसामान्यं प्रकृतिरित्यर्थः । यथाश्रुते वैषम्यावस्थायां प्रकृतिनाशप्रसङ्गात् । "सत्वं रजस्तम इति एषैव प्रकृतिः सदा । एषैव संसृतिर्जन्तोरस्याः पारे परं पदम्" इत्यादिश्रुतिभिर्गुणमात्रस्यैव प्रकृतित्ववचनाच्च । सत्वादीनामनुगमाय सामान्येति । पुरुषव्यावर्त्तनाय गुणेति । महदादिव्यावर्त्तनाय चोपलक्षितान्निति । महदादयोऽपि हि कार्य्यसत्वादिरूपाः पुरुषोपकरणतया गुणाश्च भवन्तीति । तदत्र प्रकृतेः स्वरूपमेवोक्तम् । अस्या विशेषस्तु पश्चाद्वक्ष्यते । प्रकृतेः कार्य्यो महान् महत्तत्त्वम् । महदादीनां स्वरूपं विशेषश्च वक्ष्यते । महतश्च कार्य्योऽहङ्कारः । अहङ्कारस्य कार्यद्वयं तन्मात्राण्युभयमिन्द्रियं च । तत्रोभयमिन्द्रियं बाह्याभ्यन्तरभेदेनैकादशविधम् । तन्मात्राणां कार्याणि पञ्च स्थूलभूतानि । स्थूलशब्दात् तन्मात्राणां सूक्ष्मभूतत्वमप्युपेयम् । पुरुषस्तु कार्यकारणविलक्षणः इति श्लोकं पञ्चविंशतिर्गणः पदार्थव्यूह एतदतिरिक्तः पदार्थो नास्तीत्यर्थः । अथ वा सत्वादीनां प्रत्येकव्यक्तानन्त्यं गणशब्दो वक्ति । अयं च पञ्चविंशतिको गणोद्रव्यरूप एव । धर्मधर्म्यभेदात् तु गुणकर्मसामान्यादीनामत्रैवान्तर्भावः । एतदतिरिक्तपदार्थत्वे हि ततोऽपि पुरुषस्य विवेकाग्रहतया तदसंपत्ते न्यूनतापद्येत" ।

प्रकृतेरचेतनत्वेऽपि पुरुषभोगापवर्गार्थं वत्सविवृद्ध्यर्थं क्षीरवत् प्रवृत्तिः । यथोक्तं सां०का० कौ० । "पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य । पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः" का० "प्रधानस्येति कर्म्मणि षष्ठी प्रधानस्य सर्व्वकारणस्य यद्दर्शनं पुरुषेण तदर्थं, तदनेन भोग्यता प्रधानस्य दर्शिता ततश्च भोग्यं प्रधानं भोक्तारमन्तरेण न सम्भवतीति युक्तास्य भोक्तृपेक्षा । पुरुषस्यापेक्षां दर्शयति पुरुषस्य कैवल्यार्थम् । तथा हि प्रधानेनासम्भिन्नः पुरुषस्वरूपं दुःखत्रयं स्वात्मन्यभिमन्यमानः कैवल्यं प्रार्थयते तच्च सत्पुरुषान्यताख्यातिनिबन्धनम् । न च सत्पुरुषान्यताख्यातिः प्रधानमन्तरेणेति कैवल्यार्थं पुरुषः प्रधानमपेक्षते । अनादित्वाच्च संयोगपरम्परायाः,

भोगाय संयुक्तोऽपि कैवल्याय पुनः संयुज्यते इति युक्तम् । ननु भवत्वनयोः संयोगोमहदादिसर्गस्तु कृतस्य इत्यत आह तत्कृतः सर्गः संयोगो हि न महदादिसर्गमन्तरेण भोगाय पर्याप्त इति संयोगएव भोगापवर्गार्थं सर्गं करोतीत्यर्थः" कौ० तथाऽचेतनायाः प्रकृतौ दृष्टान्तस्तत्रैवोक्तः "वत्सविवृद्धि-निमित्तं क्षीरस्य यथा प्रवृत्तिरजस्य । पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य"सां०का० ।

पातञ्जले तु प्रतिकल्पमनेकेषां प्रकृतिलीनानां सर्गहेतुत्व कल्पने गौरवात् एकस्यैव ईश्वरस्य तदधिष्ठानत्वाङ्गीकारेण प्रकृतेस्तथा परिणाम इत्यङ्गीकृतं यथा चैकस्यैव सर्वोत्कर्ष सार्वज्ञ्यं तथा ईश्वरशब्दे १०५२ पृष्ठे सूत्रभाष्यविवरणेषु दर्शितम् । ४ अभिव्यक्तौ च अभिव्यक्तेर्यथा उत्पत्ति-रूपता तथा अभिव्यक्तिशब्दे ३०० पृष्ठे दर्शितम् ।

एवं भूतभौतिकोत्पत्तिप्रकारः मतभेदेन निरूपितः । अथ विशेषभौतिकोत्पत्तौ कारणविशेषस्तावदभिधीयते तत्र जन्यमात्रोत्पत्तौ ईश्वरः अदृष्टं कालश्च नि-मित्तकारणमिति नैयायिकादयः । वेदान्तिमते ब्रह्मणोऽ-विद्याद्वारा निमित्तोपादानरूपोभयकारणता । सांख्यमते प्रकृतेरुपादानता । जन्यभावोत्पत्तौ द्रव्यमुपादानकारणं यथा घटे कपालम् पटे तन्तवः, कुण्डले, सुवर्णम् समवा-यिकारणम् । तत्तद्द्रव्यसंयोगश्चासमवायिकारणम् । गुणो-त्पत्तौ द्रव्यं समवायिकारणम् अवयवगुणोवाद्रव्यादिसंयोगो वा असमवायिकारणं यथा घटरूपे कपालरूपं, पटरूपे तन्तुरूपम्, श्यामघटे रक्तोत्पत्तौ अग्निसंयोगः । एव-मात्मनि ज्ञानाद्युत्पत्तौ मनःसंयोगादि असमवायिकार-णम् । संयोगविभागोत्पत्तौ क्रिया असमवायिकारणम्, इत्याद्यूह्यम् । ध्वंसरूपाभावोत्पत्तौ प्रतियोगी निमित्त-कारणम् । वायुादौ रूपाद्यभावस्तैवात्यन्ताभावतया नित्यत्वम् घटाभावस्य नाशे तु भूतले घटापसरणं तद-नयनं च तदुत्पत्तौ निमित्तकारणं तेनायमुत्पत्तिवि-नाशशाली चतुर्थः संसर्गाभावः इति न्यायैकदेशिनः ।

देहोत्पत्तिप्रकारः कायशब्दे, गर्भोत्पत्तिप्रकारश्च गर्भ-शब्दे वक्ष्यते । "उत्पत्तिमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके । व्यापारभेदापेक्षायां करणत्वादिसम्भवः"भर्तृह० । "उत्पत्तिवद्वा दोषः"सां०सू० । "न निरोधो नचोत्पत्तिर्न बद्धो न च साधकः । न मुमुक्षुर्न वा मुक्त इत्येषा परमार्थता" अभियुक्तोक्तिः । जीवोत्पत्तिस्तु देहाद्देहान्तर सम्बन्ध एव तन्निमित्तप्रकारादि । द्र० उ०भा० दर्शितं यथा "तद्यथा राजानमायान्तमुग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः पानैरावसथैः प्रतिकल्पन्तेऽयमायात्ययमागच्छ-तीत्येवं हैवंविदं ब्रह्मायातोदमागच्छतीति" "तत्राप्येतं शरीरं परित्यज्य गच्छतो नास्य देहान्तरोपादाने सामर्थ्यमस्ति देहेन्द्रियवियोगात् । न चान्योऽस्य ह्रस्व-स्थानीयो रज्जुरिव राज्ञो शरीरान्तरं कृत्वा प्रतीक्षमाणो विद्यते । अथैवं सति कथमस्य शरीरान्तरोपादानमित्यु-च्यते । सर्वं ह्यस्य जगत्सकर्मफलोपभोगायतनं कर्मफलो-पभोगाय चायं प्रवृत्तो देहाद्देहान्तरं प्रतिपित्सुः । तस्मा-त्सर्वमेव जगत्सकर्मप्रयुक्तं तत्कर्मफलोपभोगयोग्यं साधन-कृत्वा प्रतीक्षत एव । "कृतं लोकं पुरुषोऽभिजायत इति" श्रुतेः। यथा स्वप्नजागरितं प्रतिपित्सोः। तत् कथमिति ? लोकप्रसिद्धो दृष्टान्त उच्यते । तत्र यथा राजानं राज्या-भिषिक्तमायान्तं स्वराष्ट्रे उग्रा जातिविशेषाः क्रूरकर्माणो वा प्रत्येनसः प्रति प्रत्येनसि पापकर्मणि नियुक्ताः प्रत्ये-नस्करादिदण्डनादौ नियुक्ताः सूताश्च ग्रामण्यश्च सूत-ग्रामण्यः सूता वर्णसङ्करजा जातिविशेषा ग्रामण्यो ग्राम-नेतारस्ते पूर्वमेव राज्ञ आगमनं बुद्ध्वाऽन्नैर्भोज्यमच्छादि-प्रकारैः पानैर्मैदरादिभिरावसथैश्च प्रासादादिभिः प्रति-कल्पन्ते निष्पादयन्तीव प्रतीक्षन्तेऽयं राजा आयात्ययमाग-च्छतीत्येवं वदन्तः । एवं ह एवंविदं कर्मफलस्य वेदि-तारं संसारिणमित्यर्थः । कर्मफलं हि प्रस्तुतं तदेव-शब्देन परामृश्यते । सर्वाणि भूतानि शरीरकर्तृणि कर-णानुपकृतीनि चादीन्यादिनि तत्कर्मप्रयुक्तानि कृतैरेव कर्मफलोपभोगसाधनैः प्रतीक्षन्ते । इदं ब्रह्म भोक्तृ कर्तृ चास्माकमायाति । तथेदमागच्छत्येवमेव कृत्वा प्रतीक्षन्त इत्यर्थः भाष्यम् । 'तत्र विस्तरस्तत्रैवोक्तो यथा ।

"तद्यथा तृणजलायुका तृणस्यान्तं गत्वान्यमाक्रम-माक्रम्यात्मानमुपसंहरत्येवमेवायमात्मेदं शरीरं निहत्या-ऽविद्यां गमयित्वान्यमाक्रममाक्रम्यात्मानमुपसंहरति । तद्यथा पेशस्कारो पेशसो मात्रामुपादायान्यद्रूपतरं कल्या-णतरं रूपं तनुतएवमेवायमात्मेदं शरीरं निहत्याऽविद्यां गमयित्वान्यद्रूपतरं कल्याणतरं रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वाऽन्येषां वा भूतानाम् । स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयोऽतेजमयः कामयीऽकाममयः क्रोधमयोऽक्रोधोमयो धर्ममयोऽधर्ममयः सर्वमयस्त-

यदेतदिदमयोऽदोमय इति यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेन । अथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसम्पद्यते" छ० उ० ।

"एवं विद्यादिसंस्कारसम्भृतो देहान्तरं प्रतिपद्यमानो हित्वा पूर्वं देहं पक्षीव वृक्षान्तरं प्रतिपद्यते, अथ वाऽऽतिवाहिकेन शरीरान्तरेण कर्मफलजन्मदेशं नीयते किं वातस्यस्यैव सर्वगतानां करणानां वृत्तिलाभो भवत्याहोस्विच्छरीरस्यैव सङ्कुचितानि करणानि ह्रदस्य भिन्नघटप्रदीपप्रकाशवत्पर्यन्तो व्याप्य पुनर्देहान्तरारम्भे सङ्कोचमूच्छन्ति किं वा मनोमात्रं वैशेषिकसमय इव देहान्तरारम्भदेशं प्रतिगच्छति किं वा कल्पनान्तरमेव वेदान्तसमय इत्युच्यते ।"त एते सर्वएव समाः सर्वेऽनन्ता"इति श्रुतेः । सर्वात्मकानि तावत् करणानि सर्वात्मकप्राणसंश्रयाच्च तेषामाध्यात्मिकाधिभौतिकपरिच्छेदः प्राक्तिकर्मज्ञानभावनानिमित्तः । अतश्चदृशात् स्वभावतः सर्वगतानामनन्तानामपि प्राणानां कर्मज्ञानवासनानुरूप्येणैव देहान्तरारम्भवशात् प्राणानां वृत्तिः सङ्कुचति विकसति च । तथाचोक्तम् । "समः शुचिषा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेणेति" । तथाचेदं वचनमनुकूलम् "स यो हैतानननन्तानुपास्ते"इत्यादि"तं यथा यथोपासत" इति च । तत्र वासनापूर्वप्रज्ञाख्या विद्या कर्मतन्त्रा जलूकावत्प्रान्तएव स्वप्रकाश इव कर्मकृतं देहाद्देहान्तरारम्भते हृदयस्यैव पुनर्देहान्तरं पूर्वाश्रयं विसृजतीत्येतस्मिन्नर्थे दृष्टान्त उपादीयते तत्तत्र देहान्तरसञ्चार इदं निदर्शनम् । यथा येन प्रकारेण तृणजलायुका तृणजलौका तृणस्यान्तमवसानं गत्वा प्राप्यान्यत्तृणं तृणान्तरमाक्रममाक्रम्यत इत्याक्रमस्तमाक्रममाक्रम्याग्निवात्मानमात्मनः पूर्वावयवसंपसंहरत्यन्यावयवस्थाने । एवमेवायमात्मा यः प्रकृतो यः संसारी इदं शरीरं पूर्वोपात्तं निहत्य स्वप्नं प्रतिपिपासुरिव पातयित्वा विद्यां गमयित्वा चेतनं कृत्वा स्वात्मोपसंहारेणान्यमाक्रमं तृणान्तरमिव तृणजलौका इव शरीरान्तरं गृहीत्वा प्रसारितया वासनयाऽऽत्मानमुपसंहरति । तदात्मभावमारभते । यथा स्वप्ने देहान्तरमारभते । स्वप्नदेहान्तरस्य इव शरीरारम्भवेशे आरभ्यमाणे देहे जङ्गमे स्थावरे वा । तत्र च कर्मवशात्करणानि सञ्चरन्ति संहन्यन्ते बाह्यात्तु कुशमृत्तिकास्थानीयं शरीरमारभ्यते । तत्र च करणव्यूहमपेक्ष्य वागाद्युपग्रहः । या अग्न्यादिदेवताः संश्रयन्ते एष देहान्तरारम्भविधिः"।

तत्र देहान्तरारम्भे नित्योपात्तमेवोपादानमुपगृह्योपगृह्य देहान्तरमारभते आहोस्विदपूर्वमेव पुनः पुनरादत्त इत्यत्रोच्यते दृष्टान्तः । तत्तत्रैतस्मिन्नर्थे यथा पेशस्कारी पेशः सुवर्णं तत्करोतीति पेशस्कारी सुवर्णकारः पेशसः सुवर्णस्य मात्रामुपादायापच्छिद्य गृहीत्वाऽन्यत् पूर्वकाद्रव्यविशेषादभिनवतरमभिनवतरं कल्याणात् कल्याणतरं रूपं तनुते निर्मिमीतेत्येवमेवायमात्मेत्यादि पूर्ववत् । नित्योपात्तान्येव पृथिव्यादीन्याकाशान्तानि पञ्चभूतानि यानि "द्वे वाव ब्रह्मणो रूपे" इति चतुर्थे व्याख्यातानि पेशःस्थानीयानि । तान्येवोपगृह्योपगृह्यान्यदन्यच्च देहान्तरं नवतरं कल्याणतरं रूपं संस्थानविशेषं देहान्तरमित्यर्थः । कुरुते पितृंश्च वा पितृभ्यो हितं पितृलोकोपभोगयोग्यमित्यर्थः । गान्धर्वं गन्धर्वाणामुपभोगयोग्यम् । तथा देवानां दैवम्, प्रजापतेः प्राजापत्यम्, ब्रह्मणः इदं ब्राह्मं वा, यथाकर्म यथाश्रुतमन्येषां वा भूतानां सम्बन्धि शरीरान्तरं कुरुत इत्यभिसम्बध्यते । यस्य यस्यानन्तस्य उपाधिभूता यैः संसृज्यन्तेऽयमिति विभाव्यते ते पदार्थाः पृथक्त्वेनैकत्व प्रतिनिर्दिश्यन्ते । स वा अयं य एवं संसारात्मा ब्रह्मैव पर एव योऽग्न्यादित्यतोयविज्ञानमयो विज्ञानं बुद्धिस्तेनोपलक्ष्यमाणस्वरूपः । कतम आत्मेति । योऽयं विज्ञानमयः । प्राणेष्वित्युक्तं विज्ञानमयो विज्ञानप्रायो यस्मात्तद्धर्मत्वमस्य विभाव्यते "ध्यायतीव लेलायतीवेति"। तथा मनोमयो मनःसन्निकर्षान्मनोमयः । तथा प्राणमयः प्राणः पञ्चवृत्तिस्वरूपो येन चेतनवत्तीव लक्ष्यते । तथा चक्षुर्मयोरूपदर्शनकाले । एवं श्रोत्रमयः शब्दश्रवणकाले । एवं तस्य तस्येन्द्रियस्य व्यापारोन्मुखे तत्तन्मयो भवति । एवं बुद्धिप्राणद्वारेण चक्षुरादिकरणमयः सन् शरीरारम्भकपृथिव्यादिभूतमयो भवति । तत्र पार्थिवादिशरीरारम्भे पृथिवीमयो भवति तथा वरुणादिलोकेष्वप्यशरीरारम्भे आपोमयो भवति । तथा वायव्यशरीरारम्भे वायुमयो भवति । तथाकाशशरीरारम्भे आकाशमयो भवति । एवमेतानि तैजसानि देवशरीराणि । तेष्वारभ्यमाणेषु तत्तत्रावस्थो जीवमयो भवति । अतो व्यतिरिक्तानि पश्वादिशरीराणि नरकमेतादिशरीराणि चातेजोमयानि ।

तान्यपेक्षयाऽऽहातेजोमय इति एवं कार्य्यकरणसङ्घातमयः सङ्घात्मा प्राप्तं वस्त्वन्तरं पश्यन्निदमयः, अदोमय इत्यप्राप्तव्यमिति। एवं विपरीतप्रत्ययस्तदभिलाषः काममयो भवति। तस्मिन् कामे दोषं पश्यंस्तद्विषयाभिलाषोपशमे चित्तं प्रसन्नमकलुषं शान्तं भवति तन्मयोऽकाममयः। एवं तस्मिन्निवृते कामे केनचित्तु कामः क्रोधत्वेन परिणमते तेन तन्मयो भवन् क्रोधमयः। स क्रोधः केनचिदुपायेन निवर्त्तितो यदा भवति तदा प्रसन्नमनाकुलं चित्तं सदक्रोध उच्यते। एवं तेन तन्मयः एवं कामक्रोधाभ्यामकामक्रोधाभ्याञ्च तन्मयो भूत्वा धर्ममयोऽधर्ममयश्च भवति। न हि कामक्रोधादिभिर्विना धर्मादिप्रवृत्तिरुपपद्यते। "यद्यद्धि कुरुते कर्म तत्तत्कामस्य चेष्टितमिति" श्रुतेः। धर्ममयोऽधर्ममयश्च भूत्वा सर्वमयो भवति। समस्तं धर्माधर्मयोश्च कार्यं यावत्किञ्चिद्व्याकृतं तत्सर्वं धर्माधर्मयोः फलम्। तत्प्रतिपद्यमानस्तन्मयो भवति किं बहुना तदेतत् त्रिविधस्य यदयमिदन्मयो मध्यमाणविषयादिमयस्तस्मादयमदोमयः अद इति परोक्षं कार्य्येण मध्यमाणेन निर्दिश्यते। अनन्ता ह्यन्तःकरणे भावनाविशेषाः। नैव ते विशेषतो निर्देष्टुं शक्यन्ते। तस्मिंस्तस्मिन्कृत्ये कार्यतो ऽवगम्यन्ते। इदमस्य हृदि वर्त्ततेऽदोऽस्येति। तेन मध्यमाणकार्य्येणेदन्मयतया निर्दिश्यते। परोक्षोऽन्तःस्थो व्यवहारोऽयमिदानीमदोमय इति। सङ्क्षेपतस्तु यथा कर्त्तुं यथा वाऽऽचरितुं शीलमस्य सोऽयं यथाकारी यथाचारी स तथा भवति। करणं नाम नियता क्रियाविधिप्रतिषेधादिगम्या, आचरणं नाम अनियतमिति विशेषः। साधुकारी साधुर्भवति। यथाकारीत्वस्य विशेषणम्। पापकारी पापो भवति च। यथाचारीत्वस्य ताच्छील्यप्रत्ययोपादानात् अत्यन्ततात्पर्यतैव तन्मयत्वं न तु तत्कर्ममात्रेणेत्याशङ्क्याह पुण्यः पुण्येन कर्मणा भवति पापः पापेनेति। पुण्यपापकर्ममात्रेणैव तन्मयता स्याद्न तु ताच्छील्यमपेक्षते। ताच्छील्ये तु तन्मयत्वातिशयद्योतयं विशेषः। तत्र कामक्रोधादिपूर्वकपुण्यापुण्यकारिता सर्वमयत्वे हेतुः संसारस्य कारणं देहाद्देहान्तरसञ्चारस्य च। एतन्मयुक्तो ह्यन्यदन्यद्देहान्तरमुपादत्ते। तस्मात्पुण्यापुण्ये संसारस्य कारणमेतत्। विषयो हि विधिप्रतिषेधावत्र शास्त्रस्य साफल्यमिति। अथोऽथ्यते बन्धनमोक्षकुशलाः खल्वात्मः सत्वं कामादिपूर्वके पुण्यापुण्ये शरीरारम्भकारणम्। तथापि कामप्रयुक्तो हि पुरुषः पुण्यापुण्यकर्म्मणोपचिनोति। कामप्रहाणे तु कर्म्म विद्यमानमपि पुण्यापुण्योपचयकरं न भवति। उपचिते ऽपि पुण्यापुण्ये कर्म्मणी कामशून्ये फलारम्भके न भवतः। तस्मात्काम एव संसारस्य मूलम्। तथाचोक्तमाथर्वणे "कामान् यः कामयते मन्यमानः स्वकर्म्मभिर्जायते तत्र तत्रेति"। तस्मात्काममय एवायं पुरुषो यदन्यमयत्वं तदकारणं विद्यमानमपोह्यतोऽवधारयति काममय एवेति। स च काममयः सन् यादृशेन कामेन यथाकामो भवति तत्क्रतुर्भवति सकाम ईदृदभिलाषमात्रेणाभिव्यक्तो यस्मिन्विषये भवति स विरुन्धानः स्फुटीभवन् क्रतुत्वमापद्यते। क्रतुर्नामाध्यवसायो निश्चयो यदनन्तरा क्रिया प्रवर्त्तते यत्क्रतुर्भवति यादृक्कामकार्य्येण क्रतुना यथारूपः क्रतुरस्य सोऽयं यत्क्रतुर्भवति तत्कर्म कुरुते। यद्विषयः क्रतुस्तत्फलनिर्वृत्तये यद्योग्यं कर्म तत्कुरुते निर्वर्त्तयति। यत्कर्म कुरुते तदभिसम्पद्यते तदेयं फलमभिसम्पद्यते" भा०।

उत्पत्तिक्रम पु० उत्पत्तौ क्रमः। जगतामुत्पत्तिपरिपाट्याम्। स च क्रमः "ब्रह्मेति प्रकृत्य तैत्ति० उ० भाष्यवार्त्तिके यथा।

"तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधीभ्योऽन्नम् अन्नाद्रेतः रेतसः पुरुषः। स वा एष पुरुषोऽन्नरसमयः" उप०। "तस्मादिति मूलवाक्यस्थितं ब्रह्म परामृश्यते। एतस्मादिति। मन्त्रवाक्येन, अनन्तरं यथा स्थितं यद्ब्रह्मैव ब्राह्मणवाक्येन स्तवितम् यच्च सत्यं ज्ञानमनन्तं ब्रह्मेत्यनन्तरमेव लक्षितम् तस्मादेतस्माद्ब्रह्मण आत्मन आत्मशब्दवाच्यात्। आत्मा हि तत्पदस्य 'तत् सत्यं स आत्मेति' श्रुत्यन्तरादौ ब्रह्मात्मा। तस्मादेतस्माद्ब्रह्मण आत्मस्वरूपादाकाशः सम्भूतः सदुत्पन्नः। आकाशो नाम शब्दगुणोऽवकाशकरो मूर्त्तद्रव्याणां, तस्मादाकाशात् स्वेन स्वगुणेन पूर्वेण च कारणगुणेन शब्देन द्विगुणो वायुः सम्भूत इत्यनुवर्त्तते। वायोश्च स्वेन रूपगुणेन पूर्वाभ्याञ्च त्रिगुणोऽग्निः सम्भूतः। अग्नेः स्वेन रसगुणेन पूर्वैश्च त्रिभिश्चतुर्गुणा आपः सम्भूताः। अद्भ्यः स्वेन गन्धगुणेन पूर्वैश्चतुर्भिः पञ्चगुणा पृथिवी सम्भूता। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नाद्रेतोरूपेण परिणतात्पुरुषः शिरःपाण्याद्याकृतिमान्। स वा एष पुरुषोऽन्नरसमयोऽन्नरसविकारः। पुरुषाकृतिभावितं हि सर्वेभ्योऽङ्गेभ्यस्तेजः

सम्भूतं रेतो बीजं तस्माद्यो जायते सोऽपि तथा पुरुषाकृतिरेव स्यात् सर्वजातिषु जायमानानां जनकाकृतिनियमदर्शनात् सर्वेषामन्नरसविकारत्वे ब्रह्मवंश्यत्वे चाविशिष्टे। कस्मात्? पुरुष एव स्रष्टव्यते प्राधान्यात्। किं पुनः प्राधान्यं कर्मज्ञानाधिकारः पुरुष एव हि शक्तत्वादर्थित्वाच्च अर्थी विद्वान् समर्थः कर्मज्ञानयोरधिक्रियते। "पुरुषत्वे वा विस्तरात्मा स हि विज्ञानेन सम्पन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद स्वप्नं वेद लोकालोको मर्त्येनाहृतमोक्षतीत्येवं सम्पन्नोऽथेतरेषां पशूनामशनापिपासे एवाभिज्ञानमित्यादिश्रुत्यन्तरदर्शनात्" भा०।

एतेषाञ्च ब्रह्माधिष्ठितानामेव तत्तत्कार्यरूपेणाविर्भावः शा०सू०भाष्ययोर्निरूपितो यथा।

"तदभिध्यानादेव तु तल्लिङ्गात् सः" सू०।"किमिमानि विवदादीनि भूतानि स्वयमेव स्वविकारान् सृजन्याहोस्वित् परमेश्वर एव तेन तेनात्मनावतिष्ठमानोऽभिध्यायन् तं तं विकारं सृजतीति सन्देहे सति प्राप्तं तावत् स्वयमेव सृजन्तीति कुतः"आकाशाद्वायुर्वायोरग्निरित्यादि"श्रुतन्त्रश्रवणात्। नन्वचेतनानां स्वतन्त्राणां प्रवृत्तिः प्रतिषिद्धा,नैष दोषः। "तत्तेजऐक्षत ता आपऐक्षन्तेति च भूतानामपि चेतनत्वश्रवणादित्येवं प्राप्तेऽभिधीयते। स एव परमेश्वरस्तेन तेनात्मनावतिष्ठमानोऽभिध्यायंस्तं विकारं सृजतीति कुतः? तल्लिङ्गात्। तथा हि शास्त्रम्"यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरोयमयतीत्येवं जातीयकं, साध्यत्वमेव भूतानां प्रवृत्तिं दर्शयति। तथा "सोऽकामयत बहु स्यां प्रजायेयेति" प्रस्तुत्य"सच्च त्यच्चाभवत् तदात्मानं स्वयमकुरुतेति"च तस्यैव सर्वात्मकभावं दर्शयति। यत्तु ऐक्षणश्रवणमग्नेर्जलोः,तत् परमेश्वरावेशवशादेव द्रष्टव्यं "नान्योऽतोऽस्ति द्रष्टा"इतीक्षित्रन्तरप्रतिषेधात् प्रकृतत्वाच्च सत ऐक्षितुः "तदैक्षत बहु स्यां प्रजायेयेत्यत्र"। "भूतानामुत्पत्तिक्रमश्चिन्तितः" शा०भा०।

उत्पत्तिमत् त्रि० उत्पत्तिर्विद्यतेऽस्य मतुप् स्त्रियां ङीप्। उत्पत्तिविशिष्टे "विपदुत्पत्तिमतामुपस्थिता" रघुः।

उत्पत्तिविधि पु० उत्पत्तिः कर्मस्वरूपप्रापको विधिः। "स्वर्गकामोऽश्वमेधेन यजेतेत्यादौ कर्मस्वरूपप्रापके विधौ। विधिशब्दे विवृतिः। उत्पत्तिवाक्यमथत्र न०।

उत्पत्तिव्युत्क्रम पु० उत्पत्तितोव्युत्क्रमः। उत्पत्तिक्रमात् विपरीते क्रमे। स च शा०सू० भाष्ययोर्दर्शितः यथा "भूतानामुत्पत्तिक्रमश्चिन्तितोऽधेदानीमप्ययक्रमश्चिन्त्यते "विपर्ययेण तु क्रमोऽतउपपद्यते च" शा०सू०। "किमनियतेन क्रमेणाप्ययः,उतोत्पत्तिक्रमेणाथ वातद्विपरीतेनेति?। त्रयोऽपि चोत्पत्तिस्थितिप्रलया भूतानां ब्रह्मायत्ताः श्रूयन्ते "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्तीति"। तत्रानियमोऽविशेषादिति प्राप्तम्। अथ वोत्पत्तेः क्रमस्य श्रुतत्वात् प्रलयस्यापि क्रमाकाङ्क्षिणः स एव क्रमःस्यादित्येवं प्राप्ते ततोऽभूमः विपर्ययेण तु प्रलयक्रमोऽत उत्पत्तिक्रमाद्भवितुमर्हति। तथा हि लोके दृश्यते येन क्रमेण सोपानमारूढस्ततो विपरीतेन क्रमेणावरोहतीति। अपि च दृश्यते स्रष्टोजातं घटाद्यप्ययकाले सद्भावमप्येति अद्भ्यश्च जातं हिमकरकादि अभावमप्येतीत्यतश्चोपपद्यते एतत्,यत् पृथिव्यद्भ्योजाता सती स्थितिकालव्यतिक्रान्तावधोऽधीयात्, आपश्च तेजसोजाताः सत्यस्तेजोऽधीयुः,एवं क्रमेण सूक्ष्मसूक्ष्मतरज्ञानन्तरमनन्तरं कारणमपीत्य सर्वं कार्यजातं परमकारणं परमसूक्ष्मं ब्रह्माप्येतीति वेदितव्यम्। न हि सकारणव्यतिक्रमेण कारणकारणे कार्याप्ययोन्याय्यः। सूक्तावप्युत्तिक्रमविपर्ययेणैवाप्ययक्रमस्तत्र तत्र प्रदर्शितः। "जगत्प्रतिष्ठा देवर्षे! पृथिव्यप्सु प्रलीयते। ज्योतिःष्वापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते"इत्येवमादौ। उत्पत्तिक्रमस्तूत्पत्तावेव श्रुतत्वान्नाप्यये भवितुमर्हति न चासावयोग्यत्वादप्ययेनाकाङ्क्ष्यते। न हि कार्ये म्रियमाणे कारणस्याप्ययोयुक्तः कारणाप्यये कार्यस्यावस्थानानुपपत्तेः। कार्याप्यये तु कारणस्यावस्थानं युक्तं मृदादिष्वेवं दृष्टत्वात्" भा०।तदेतत् वेदा०प०स्रष्टसृक्रम् यथा।"भूतानां भौतिकानाञ्च न कारणलयक्रमेण लयः कारणलयसमये कार्याणामाश्रयमन्तरेणावस्थानानुपपत्तेः किन्तु सृष्टिक्रमविपरीतक्रमेण तत्तत्कार्यनाशे तत्तज्जनकाऽदृष्टनाशस्यैव प्रयोजकतया उपादाननाशस्याप्रयोजकत्वात् अन्यथा न्यायमतेऽपि महाप्रलये पृथिवीपरमाणुगतरूपरसादेरविनाशापत्तेः। तथा च पृथिव्या अप्सु, अपां तेजसि, तेजसोवायौ, वायोराकाशे, आकाशस्य जीवाहङ्कारे, तस्य हिरण्यगर्भाहङ्कारे, तस्य चाविद्यायामित्येवंरूपएव प्रलयः। तदुक्तम् विष्णुपुराणे "जगत्प्रतिष्ठा देवर्षे! पृथिव्यप्सु प्रलीयते। तेजस्यापः प्रलीयन्ते तेजोवायौ प्रलीयते। वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते। अव्यक्तं पुरुषे ब्रह्मन्निष्कले सम्प्रलीयते। पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः"।

उत्पत्य अव्य० उत्+पत-ल्यप्। ऊर्द्धं पतित्वेत्यर्थे उत्पत्यपाकला मयू०। जन्मप्रभृत्युन्नत्ते

उत्पथ पु० उत्क्रान्तः पन्थानम् अत्या० समा० अच्। गत्यपथातिक्रान्ते २न्यायरीत्यतिक्रान्ते च। भिन्नपर्यादतया अपकृष्टः पन्थाः उदभावे प्रा०स० अच् समा० कदर्य्ये पथि "गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः। उत्पथप्रतिपन्नस्य न्याय्यं भवति शासनम्" भा० आ० १५०उ०। "प्रमदाद्युत्पथं नेतुं कामक्रोधवशानुगम्" मनुः। "छिन्नावरोधाङ्कनसुत्पथेन गाम्" माघः

उत्पन्न त्रि० उद्+पद-क्त। उद्भूते। "औरसे पुनरुत्पन्ने क्षतीयांगहराः सुताः" स्मृ० "उत्पन्नस्य पुनरुत्पादः" न्यायम० उत्पन्नेन हरति उत्पन्ना० ठञ्। औत्पत्तिक तेन हारके त्रि०।

उत्पल न० उद्+पल-अच्। १नीलपद्मे, २कुमुदादौ, ३कुष्ठौषधौ च। उत्क्रान्तं पलं मांसम् अत्या० समा०। ४मांसशून्ये त्रि०। "गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानाम्" मेघ०। "यत्रोत्पलदलश्यामस्त्रीणां सुरतिषाम्" "सकर्णोत्पलतां प्रभेदे" "नवावतारं कमलादिवोत्पलम्" रघुः "अन्योन्यसृष्टपीडयदुत्पलाक्ष्याः" कुमा०। तच्च त्रिविधं नीलं रक्तं श्वेतञ्च "भ्रुवंस नीलोत्पलपत्रधारया" शकु०।

उत्पलगन्धिक न० उत्पलस्य गन्धइव गन्धोऽस्य इत् समा० संज्ञायां कन्। गोगीर्षाख्ये चन्दने।।

उत्पलपत्र न० उत्पलस्य पत्रमिव। १तिलकभेदे स्त्रीणां स्नानादौ २नखक्षते च। ङीप्। इन्दीवरस्य दले।

उत्पलपत्रक न० उत्पलपत्रमिव कन्। उत्पलपत्राकारे सुश्रुतोक्ते शस्त्रभेदे। अर्द्धधारशब्दे २७५ पृष्ठे तल्लक्षणादि दर्शितम्। "दन्तिपत्रनखशस्त्रमुद्रिकोत्पलपत्रकार्द्धधाराणि छेदने भेदने च" सुश्रु०।

उत्पलभेदक पु० सुश्रुतोक्ते कर्णबन्धनातिभेदे। स च पञ्चदशविधः। तल्लिमागलक्षणादि सुश्रु० दर्शितं यथा।

"तत्र समासेन पञ्चदशकर्णबन्धनातयः। तद्यथा नेमिसन्धानक उत्पलभेदको वल्लूरक आसङ्गिमोगखण्डकर्ण आहार्यो निर्व्यधिमो व्यायोजिमः कपाटसन्धिकोऽर्द्धकपाटसन्धिकः संक्षिप्तो हीनकर्णो वल्लीकर्णो यष्टिकर्णः काकोलक इति। तेषु पृथुलायतसमोभयपालिर्नेमिसन्धानकः। ह्रस्वायतसमोभयपालिरुत्पलभेदकः। ह्रस्व ह्रस्वसमोभयपालिर्वल्लूरकः। अभ्यन्तरदीर्घैकपालिरासङ्गिमः। बाह्यदीर्घैकपालिर्मगखण्डकर्णः। अपालिरुभयतोऽयाहार्यः। पीठोपमपालिरुभयतः, क्षीरपुत्रिकाश्रितो निर्व्यधिमः। स्थूलाणुसमविषमपालिर्व्यायोजिमः। अभ्यन्तरदीर्घैकपालिरितरह्रस्वपालिः कपाटसन्धिकः। बाह्यदीर्घैकपालिरितरह्रस्वपालिरर्द्धकपाटसन्धिकः। तत्र दीर्घतेकर्णबन्धविकल्पाः साध्यास्तेषां स्वनामभिरेवाकृतयः प्रायेण व्याख्याताः। संक्षिप्तादयः पञ्चासाध्यास्तत्र शुष्कगण्डकुलिरह्रस्वपालिरितरह्रस्वपालिः संक्षिप्तः। अनधिष्ठानपालिः पर्य्यन्तयोः क्षीणमांसो हीनकर्णः। तनुविषमह्रस्वपालिर्वल्लीकर्णः। अधिकमांसस्नायुशिरायतस्थूलपालिर्यष्टिकर्णः। निर्मांससंक्षिप्तास्थ्यगोखितपालिः काकोलकपालिरिति"। "बन्धेष्वपि तु शोफदाहरागपाकपिडकास्रावयुक्ता न सिद्धिमुपयान्ति"।

उत्पलशा(सा)रिवा त्रि० उत्पलं तदाकारपुष्पमस्त्यस्याः अर्श० अच् कर्म्म०। अनन्तमूलायां ग्रन्थिलतायाम्। "इक्षादनी पयस्या च लता चोत्पलसा(शा)रिवा" सुश्रु०।

उत्पलषट्क न० ज्वरातीसारचिकित्साङ्गे षट्क० उक्ते औषधभेदे। यथा "ज्वरातीसारे भेषजादिक्रमः स्थानसङ्गिते हितः। ज्वरातिसारी भेषजं वा पिबेत् साम्लां यूषतां नरः। वृक्षिपर्णीबलाबिल्वनागरोत्पलधान्यकैः"।

उत्पलावती स्त्री उत्पलमुत्पलाकारं नेत्रमस्त्यस्याः मतुप् मस्यवः संज्ञायां दीर्घः। अक्षरोभेदे" काशीख० ६अ० अक्षरोल्लोलवर्णने। "निर्मथ्यमानात् क्षीरोदात् पूर्व्वमक्षरसम्भवः। निःसृता त्रिजगज्जेतुमीश्वरास्त्रं मनोभुवः। "उर्व्वशी मेनका रम्भा चन्द्ररेखा तिलोत्तमा। वपुष्मती कान्तिमती लोलावत्युत्पलावती। अलम्बुषा गुणवती स्थूलकेशी कलावती। कलानिधिर्युवतिनिधिः कर्पूरतिलकोर्व्वरा। अनङ्गलतिका चापि तथा मदनमोहिनी। चकोराक्षी चन्द्रकला तथा मुनिमनोहरा। आवट्टावा तपोहेट्टी चारुनासा सुकर्षिका। दारुसंजीवनी सुभ्रीः कृष्णशुक्ला शुभानना। तपःशुक्ला तीर्थशुक्ला दानशुक्ला क्षिमावती। पद्मावमेधिका चैव राजसूयार्थिनी तथा। अग्निहोत्रिका तद्वद्वाजपेयगतोद्भवा। कार्य्यविस्मारयित्री च दृष्टिद्वारा सुकल्पिनी। इत्याद्यक्षरसां श्रेष्ठं सहस्रं परिसंयुतम्। एतच्छ्रीअक्षरो लोके वसत्यत्या अपि स्त्रियः"।

उत्पलिनी स्त्री उत्पलानि सन्त्यस्मिन् देशे तेषां समूहो वा इनि। १उत्पलयुक्तलतायां, २कुमुदसमुदाये च। "बहवे

सा महाराज बिभ्रती रूपमुत्तमम् । अश्विनोत्पविनी श्रीश्रमग्नेरिव शिखा शुभा" भा०व० ६६ अ० । २उत्पन्नयुक्ते त्रि० ।

उत्पवन न० उद्+पू-ल्युट् । यज्ञियपात्रादिसंस्कारभेदे स च आव० श्रौ० १,३,२,३ सूत्रयोर्दर्शितो यथा । "पवित्राभ्यामाज्यस्योत्पवनम्" २सू० । "अप्रक्षिप्तावनन्तर्भौ प्रादेशमात्रौ कृत्वा नानान्तर्योर्गृहीत्वाङ्गुष्ठोपकनिष्किकाभ्यासुत्तानाभ्यां पाणिभ्यां "सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति" प्रागुत्पुनाति सकृन्मन्त्रेण, द्विस्त्रिर्वा" २सू० । "कार्यमिति शेषः । अथ किंलक्षणे ? पवित्रे कर्त्रे वा उत्पवनं ? कार्यमित्येतदुद्वयं निर्णेतुमाह । अप्रक्षिप्तः सूक्ष्मच्छिद्रावयोरनिष्टत्यर्थः । न विद्यते अनन्तर्मध्ये गर्भो ययोस्तौ तथोक्तौ प्रादेशमात्रौ कृत्वौ । एवंलक्षणयुक्तौ कृत्वौ पवित्रसंज्ञौ । नानेत्यस्य सर्गार्थम् । पवित्रे अन्तयोरसंस्पृष्टे अङ्गुष्ठोपकनिष्किकाभ्यासुत्तानाभ्यां पाणिभ्यां गृहीत्वा प्रागुत्पुनातिसकृन्मन्त्रेण, द्विस्त्रिर्वा" ना०इ० । तत्र समन्त्रकामन्त्रकव्यवस्था नारा०उक्तौ दर्शिता पूर्वेणामन्त्रकमुत्पवनं विधीयते । अनेन तु समन्त्रकम् । तत्र वैतानिके अमन्त्रकं गृह्ये कर्म्मणि समन्त्रकमित्येवं विनियोगः" इति । "उत्पवनप्रकारः" शत० ब्रा० । "प्रोक्षणीषु पवित्रे भवतः । ते तत आदत्ते, ताभ्यामाज्यमुत्पुनात्येको वाऽउत्पवनस्य बन्धुर्मेध्यमेवैतत्करोति । स उत्पुनाति "सवितुष्ट्वा प्रसवऽउत्पुनाम्यच्छिद्रेण सूर्यस्य रश्मिभिरिति" सोऽसावेवबन्धुः" । "अथाज्यलिप्ताभ्यां पवित्राभ्याम् प्रोक्षणीरुत्पुनाति "सवितुर्वः प्रसवऽउत्पुनाति"एको वा उत्पवनस्य बन्धुः" २२,२१,२४,१,१,१, "द्रव्याणाञ्चैव सर्वेषां शुद्धिरुत्पवनं स्मृतम्" मनुः "प्रादेशप्रमाण कुशद्वयाभ्यासुत्पवनेन शुद्धिः" कल्पू० ।

उत्पश्य त्रि० उद्+दृश-कर्त्तरि यत् । ऊर्द्धं प्रेक्षके । २उन्मुखे ३ऊर्द्धदृष्टौ हेम० ।

उत्पाटन न० उद्+पट-णिच्+ल्युट् । उन्मूलने सुश्रुतोक्ते २व्रणवेदनाभेदे च । यथा "अत ऊर्द्धं सर्वव्रणवेदनाबन्धप्रमाः तोदनभेदनताडनस्फोटनायमनमन्थनविश्लेषणचुम्बनायननिर्दलनाऽभञ्जनस्फोटनविदारणोत्पाटनकम्पन विविधशूलविशोषणविकरणपूरणस्रावणस्रावकुञ्चनाकुञ्चिकाः सम्भवन्ति" ।

उत्पाटक पु० उद्+पट-भेदने णिच्-ण्वुल् । उन्मूलके सुश्रुतोक्ते २पाल्यासपद्रवभेदे उत्पुटशब्दे विवृतिः ।

उत्पाटिका स्त्री उद्+पट-णिच् ण्वुल् टाप् अत इत्वं । दृक्षस्थनीरसायां त्वचि "तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहिः । त्वच एवास्य रुधिरं प्रस्यन्दि त्वच उत्पटः" सु०उ० । उत्पाटनकर्त्र्यां स्त्रियां च ।

उत्पात पु० उद्+पत-घञ् । ऊर्द्धपतने । उद्+पत-ण । अकस्मादागते प्राणिनां शुभाशुभसूचके दैवनिमित्ते २भूकम्पादौ ३सुश्रुतोक्ते विस्राव्यपाल्यासपभेदे च ।

"पाल्यामयास्तु विस्राव्या रुग्णकाः प्राग्निबोध तान् । परिपोटस्तथोत्पात उन्मन्थो दुःखवर्द्धनः । पञ्चमः परिलेही च कर्णपाल्या गदाः स्मृताः । सौकुमार्याच्छिरोत्पृष्टः सहसाभिप्रवर्द्धते । कर्णशोफो भवेत्पाल्यां सरुजः परिपोटवान् । क्षणाद्रुग्णनिभः स्रव्यः स वातात् परिपोटकः । गुर्व्वाभरणसंयोगात्ताडनोद्वर्षणादपि । शोफः पाल्यां भवेच्छ्यावो दाहपाकरुगन्वितः । रक्तो वा रक्तपित्ताभ्यासुत्पातः सगदो मतः । बलाद्वर्द्धयतः कर्णं पाल्यां वायुः प्रदूष्यति । स्फोट्य सकर्णं कुर्य्याच्छोफं तद्वर्णवेदनम् । उन्मन्थकः सकण्डूको विकारः कफवातजः । वर्द्धमाने यदा कर्णे कण्डूदाहरुगन्वितः । शोफो भवति पाकश्च त्वक्स्थोऽसौ दुःखवर्द्धनः । कफासृक्कृमयः कुर्य्युः सर्षपाभा विकारिणीः । स्रावियोः पीड़काः पाल्यां कण्डूदाहरुगन्विताः । कफासृक्कृमिसम्भूतः सविसर्पान्वितस्रुतः । लिह्यात्सगण्डकर्णी पाली परिलेहीति स स्मृतः"।

शुभाशुभसूचकोत्पातश्च दिव्यान्तरीक्षभौमभेदात् त्रिविधः । स च बृ०सं० दर्शितो यथा "आनवे रुत्पातान् गर्गः प्रोवाच तानहं वक्ष्ये । तेषां सङ्क्षेपोऽयं प्रकृतेरन्यत्वसुत्पातः । अपचारेण नराधासुपसर्गः पापसञ्चयाद्भवति । संसूचयन्ति दिव्यान्तरिक्षभौमास्तदुत्पाताः । मनुजानामपचारादपरक्ता देवताः सृजन्त्येतान् । तत्प्रतिघाताय नृपः शान्तिं राष्ट्रे प्रयुञ्जीत । दिव्यं सपर्व्ववैकृतम् उल्कानिर्घातपवनपरिवेषाः । गन्धर्वपुरपुरन्दरचापादि यदान्तरिक्षं तत् । भौमं चरस्थिरभवं तच्छान्तिभिराहृतं शमसुपैति । नाभसमुपैति मृदुतां शास्यति नो दिव्यमित्येके । दिव्यमपि शमसुपैति प्रभूतकनकाज्यगोसहस्रदानैः । वृद्धायतने भूमौ गोदोहात् कोटिहोमाच्च । आत्मसुतकोशवाहनपुरदारपुरोहितेषु लोकेषु । पाकसुपयाति दैवं परिकल्पितमष्टधा स्मृतेः । अनिमित्तभङ्गचलनस्खेदाद्युनिपातजल्पनादीनि । लिङ्गा-

र्यायतनानां नाशाय नरेशदेशानाम् । दैवतयात्राशकटा-
श्वचक्रयुगकेतुभङ्गपतनानि । सम्पर्यासनसादनसङ्काश न
देशस्वपशुभदाः । ऋषिधर्मपितृब्रह्मप्रोद्भूतं द्विजाती-
नाम् । यद्दृश्यलोकपालोद्भवं पशूनामनिष्टं तत् । गुरु
सितयनैश्चरोत्थं पुरोधसां, विष्णुजं च लोकानाम् । स्कन्द-
विशाखसम्भवं माण्डलिकानां नरेन्द्राणाम् । वेदव्यासे
मन्त्रिणि विनायके वैक्लवं चमूनाथे । धातरि सविश्व-
कर्मणि लोकाभावाय निर्दिष्टम् । देवकुमारकुमारीवनिता-
प्रेष्येषु वैक्लवं यत् स्यात् । तच्चरपतेः कुमारकुमारि
कास्त्रोपरिजनानाम् । रक्षःपिशाचगुह्यकनागानामेत-
देव निर्देश्यम् । सार्षेज्याग्नेयाभिः सर्वेषामेव फलपाकः ।
बुद्ध्वा देवविकारं शुचिः पुरोधास्त्रयोपितः स्नातः ।
स्नानकुसुमानुलेपनवस्त्रैरभ्यर्चयेत् प्रतिमाम् । मधुपर्केण
पुरोधा भर्त्रा बन्धुभिश्च विधिवदुपतिष्ठेत् । स्थालीपाकं
जुहुयाद्घृतेन चन्द्रं च तद्भिः । इति विबुधविकारे
शान्तयः सप्तरात्रं द्विजविबुधगवाचां गोतन्द्यूत्सवाश्च ।
विधिवदवनिपालैर्यैः प्रयुक्ता न तेषां भवति दुरितपाको
दक्षिणाभिश्च रक्षः" देवप्रतिमावैक्लवम् । "राष्ट्रे यस्या-
ग्निः प्रदीप्यते दीप्यते च नेध्मवान् । मनुजेश्वरस्य
पीडा तस्य सराष्ट्रस्य वित्तेया । जलमांसार्द्रज्वलने
क्षतिवधः प्रहरणे रणो रौद्रः । सैन्यग्रामपुरुषे च
नाशो वह्नेर्भयं कुरुते । प्रासादभवनतोरणकेत्वादिज्व-
लनेन दाघेषु । तडिता वा यक्षरक्षात् परचक्रक्षागमो
नियमात् । धूमो ज्वलिसमुत्थो रजसमथाऽजिनं महा-
भयदम् । अभ्रे निश्चुडनाथो दर्शनमपि चाक्षि दोष-
करम् । नगरवनोष्मादाखुजमनुजानां भयकरं ज्वलन-
माखुः । धूमाग्निविस्फुलिङ्गैः शस्त्राम्बरकेशगैर्मृत्युः । आयु-
धवस्त्रवसनसर्पणखनाः कोशभिर्गमणवेपनानि वा । वैक्ल
तानि यदि वायुधे प्रहरणास्त्रेषु रौद्ररणसङ्कुलं वदेत् ।
सन्धैर्वाक्षैः क्षीरवृक्षाक्षभिद्भिर्होतव्यो ज्वलिः सर्षपैः
सर्पिषा च । ब्रह्मण्यादीनां वैक्लवे शान्तिरेवं देयं चाग्निं
काञ्चनं ब्राह्मणेभ्यः" । इत्यग्निवैक्लवम् । "शाखाभङ्गे
ऽक्षाद् इक्षाणां निर्दिशेद्रणोद्योगम् । हसने देशस्य मरणं
रुदिते च व्याधिवाक्षुद्भयम् । राष्ट्रविभेदस्त्वन्तौ बाल-
वधो अतीव कुसुमिते बाले । इक्षात् क्षीरस्रावे सर्वद्रव्य-
क्षयो भवति । मद्ये वाक्षननाशः संग्रामः शोणिते
मधुनि रोगः । क्षेद्रे दुर्भिक्षभयं महद्भयं निःसृते
दधिले । शुक्लविरोहे वीर्यान्नक्षयः शोणिते च विरु-
द्धानाम् । पतितानामुत्थाने स्वयं भयं दैवजनितं च ।
पूजितवृक्षे स्रुतौ कुसुमफलं नृपवधाय निर्दिष्टम् । धूम-
स्तस्मिन् ज्वालाथवा भवेद्नृपवधायैव । सर्पेषु तरुषु वापि
जनसङ्क्षयो विनिर्दिष्टः । इक्षाणां वैक्लवे दशभिर्मासैः
फलविपाकः । खड्गाम्बरधूपाम्बरपूजितस्य खलं निधायो-
परि पादपस्य । कृत्वा शिवं रुद्रजपो हुतं कार्यो रुद्रेभ्य
इत्यत्र षड्रुद्रहोमः । पायसेन मधुना च भोजयेद्
ब्राह्मणान् हतदुतेन भूपतिः । मेदिनी निगदितात्र दक्षि-
णा वैक्लवे तरुलते महर्षिभिः" । इति वृक्षवैक्लवम् । "नले
ऽजयवादीनामेकक्षिन् द्विसिसम्भवो मरणम् । क्षयति
तदधिपतीनां यमलं जातं च कुसुमफलम् । अतिवृद्धिः
शस्त्राणां नानाफलकुसुमभवो वृक्षे । भवति हि यद्वोक-
क्षिन् परचक्रस्यागमो नियमात् । अर्धेन यदा तैलं
भवति तिलानामतैलता वा स्यात् । अक्षस्य च वैरस्यं तदा
च विन्द्याद्भयं सुमहत् । विकृतकुसुमं फलं वा त्यासा-
दयेद्वा पुराद्वृद्धिः कार्यम् । सौम्यो ऽत्र चरुः कार्यो
निर्वापो वा पशुः शान्त्यै । वृक्षे च दृढा विकृतिं प्रदेयं
तत् क्षेत्रमेव प्रथमं द्विजेभ्यः । तद्भैव मध्ये चरुमत्र भौमं
कृत्वा न दोषान् समुपैति तज्ज्ञान्" । इति वृक्षवैक्लवम् ।
"दुर्भिक्षमनावृष्ट्यामतिवृष्ट्यां क्षुद्भयं सपरचक्रम् । रोगो
ऽनृतुभवायां ऽपवधो ऽनभ्रजातावाम् । शीतोष्णविप-
र्यासे नो सम्यक्तयु च सस्यवृत्तेषु । यक्षारक्षाद्राष्ट्रभयं
रोगभयं दैवजनितं च । अन्यतौ सप्ताहं प्रबन्धवर्षं
प्रधानवपमरणम् । रक्ते यक्षोद्योगो मांसास्थिवसा-
दिभिर्भरकः । धान्यक्षिरवृक्षकृक्षकृसुमादैर्वर्धितैर्भयं
विन्द्यात् । अङ्गारपांशुवर्षं विनाशमायाति तच्चरम् ।
उपला विना जलधरैर्विकृता वा प्राणिनो यदा दृष्टाः ।
क्षिप्रं वाप्यतिवृष्टौ यक्षानामीतिसङ्क्षननम् । क्षीरवृत-
क्षौद्राणां दक्षो रुधिरोष्णवारिणां वर्षे । देशविनाशो
ज्ञेयो ऽसृग्वर्षे चापि नृपयुद्धम् । यदाग्नेये ऋक्षे छाया न
दृश्यते दृश्यते प्रतीपा वा । देशस्य तदा सद्भयमायातं
विनिर्देश्यम् । अभ्रे नभसीन्द्रधनुर्दिवा यदा दृश्यते
ऽथवा रात्रौ । प्राच्यामपरस्यां वा तदा भवेत् क्षुद्भयं
सुमहत् । सूर्येन्दुपर्जन्यसमीरणानां योगः स्फुटो दृष्टि-
विकारकाले । धान्यान्नगोकाञ्चनदक्षिणाय देयाच्छतः
शान्तिमुपैति पापम्" । इति दृष्टिवैक्लवम् । "अपसर्पणं
नदीनां नगरादविरेण शून्यतां कुरुते । शोषश्चाशो-
ष्याणामन्येषां वा हृदादीनाम् । क्षेद्रासृङ्मांसवहाः

सङ्कुलकलुषाः प्रतोपगाश्चापि । परचक्रस्यागमनं नदाः कथयन्ति पञ्चमासात् । व्वलाधूमकाश्चा रुदतोत्कुटानि चैव कूपानाम् । गीतप्रजल्पितानि च जनमरकाय प्रदिष्टानि । तोयोत्पत्तिरखाते गन्धरसविपर्यये च तोयानाम् । सलिलाशयविकृतौ वा मरुद्भयं तत्र शान्तिरियम् । सलिलविकारे कुर्यात् पूजां वरुणस्य वारुणैर्मन्त्रैः । तैरेव च जपहोमं शुभमेवं पापमुपयाति" । इति जलवैकृतम् । "प्रसवविकारे स्त्रीणां द्विलिचतुःप्रभृतिसम्भवतो वा । होनातिरिक्तकाले च देशकुलसङ्क्षयो भवति । बड़वोष्ट्रमहिषगोहस्तिनीषु यमलोद्भवे मरणमेषाम् । षण्मासाभ्यन्तरफलं ग्रामौ स्त्रीको च गर्भोक्तौ । नार्यः परस्य विषये त्यक्तव्यास्ता हितार्थिना । तर्पयेच्च द्विजान् कामैः शान्तिं चैवात्र कारयेत् । चतुष्पदाः स्वयूथेभ्यश्चक्रव्याः परभूमिषु । नगरं स्वामिनं यूनमन्यथा हि विनाशयेत्" । इति प्रसववैकृतम् । "परस्त्रीनावभिगमनं भवति तिरश्चामसाधु धेनुनाम् । उच्चाण्डान्योऽन्यं पिबति स्रवा वा सुरभिपुत्रम् । मासत्रयेण विन्द्यात् तच्चिह्नैः संभयं परागमनम् । तत्प्रतिघातायैतौ स्त्रीको गर्गेण निर्दिष्टौ । त्यागो विवासनं दानं तत्स्थाप्य शुभं भवेत् । तर्पयेद्ब्राह्मणांश्चात्र जपहोमांश्च कारयेत् स्त्रीक्षीरपाकेन धातारं पशुना च पुरोहितः । प्राजापत्येन मन्त्रेण यजेद्वस्त्रदक्षिणम्" । इति चतुष्पादवैकृतम् । "यानं वाहनियुक्तं यदि गच्छेत्र व्रजेच्च वाहयुतम् । राष्ट्रभयं भवति तदा चक्राणां सादभङ्गे च । अनभिहतस्यैव नादः शब्दो वा तेषां ताडितेषु यदि नाद्यात् । व्युत्पत्तौ वा परागमो नृपतिमरणं वा । गीतरवतूर्यनादा नभसि यदा वा चरस्थिरान्यत्वम् । मृत्युस्तदा महा वा विस्वरतूर्ये पराभिभवः । गोखाङ्गखयोः शृङ्गे दर्वीस्पर्शादुपस्करविकारे । क्रोष्टुकनादे च तथा शस्त्रभयं मुनिवचश्चेदम् । वायव्येषु नृपतिर्वायुं सक्तुभिरर्चयेत् । आ वायोरिति पञ्चर्चा जप्याश्च प्रयतैर्द्विजैः । ब्राह्मणान् परमान्नेन दक्षिणाभिश्च तर्पयेत् । वस्त्रदक्षिणा होमाः कर्तव्याश्च प्रयत्नतः" । इति वायव्यवैकृतम् । "पुरपक्षिणो वनचरा वन्या वा निर्भया विशन्ति पुरम् । नक्तं वा दिवसचराः क्षपाचरा वा चरत्यहनि । सन्ध्याद्वयेऽपि मण्डलभावभ्रान्तो मृगा विहङ्गा वा । दीप्तायां दिशश्चया कोणस्थः संहता भयदाः । स्वानः प्रहृष्टरूपा द्वारे वाशन्ति जम्बुका दीप्ताः । प्रविशेत्सुरेन्द्रभवने कपोतकः कौशिको यदि वा । कुक्कुटरुतं प्रदोषे हेमन्तादौ च कोकिलालापाः । प्रतिलोमप्रखलचराः श्लेनादाश्चाम्बरे भयदाः । गृहचैत्यतोरणेषु द्वारेषु च पक्षिसङ्गसम्पातः । मधुवल्मीकाम्भोरुहसमुद्भवाश्चापि नाशाय । स्वभिरस्थिशवावयवप्रवेशनं मन्दिरेषु मरकाय । पशुशब्दव्याहारे नृपस्यलुर्मुनिवचश्चेदम् । मृगपक्षिविकारेषु कुर्याद्धोमान् सदक्षिणान् । देवाः कपोत इति च जप्याः पञ्चभिर्द्विजैः । शुदेवा इति चैकेन देवा गावश्च दक्षिणा । जपेच्चाकूतसूक्तं वा मनोवेदशिरांसि च" । इति मृगपक्षादिवैकृतम् । "शक्रध्वजेन्द्रकीलस्तम्भद्वारप्रपातभङ्गेषु । तडित्कपाटतोरणकेतूनां नरपतेर्भरणम् । सन्ध्याद्वयस्य दाम्निधूमोत्पत्तिश्च कानने श्मशाने । छिद्राभावे भूमेर्दरणं कम्पश्च भयकारी । पाषण्डानां नास्तिकानां च भङ्गः साध्वाचारप्रोज्झितः क्रोधशीलः । दैर्घ्यः क्रूरो विषहासक्तचेता यस्मिन् राजा तस्य देशस्य नाशः । प्रहर प्रहर छिन्धि भिन्धीत्यायुधकाशाश्रुप्राणयो बाला । निगदन्तः प्रहरन्ति तलापि भयं भवत्याशु । अङ्गारगैरिकाद्यैर्विलिखितमेतामिलेखनं यस्मिन् । नायकचित्रितमथ वा क्षये क्षयं याति न चिरेण । लुतापटाङ्गबलं न सन्ध्ययोः पूजितं कलहयुक्तम् । निर्योच्छिष्टस्त्रीकं च यद्दुष्टं तत्क्षयं याति । दृष्टेषु यातुधानेषु निर्दिशेन्नरकमाशु सम्भ्रमम् । प्रतिघातायैतेषां गर्गः शान्तिं चकार माम् । महाशान्त्योऽथ बलयो भोज्यानि सुमहान्ति च । कारयेत महेन्द्रं च माहेन्द्रीभिः समर्चयेत्" । इति शक्रध्वजेन्द्रकीलादिवैकृतम् । "नरपतिदेशविनाशे केतोरुदये ऽथ वा ग्रहेर्क्षेर्नोः । उत्पातानां प्रभवः स्वर्तुभवाश्चादोषाय । ये च न दोषान् जनयन्त्युत्पाताश्चान्तरस्वभावकृतान् । ऋषिपुत्रकृतैः श्लोकैर्विद्यादेतैः समासोक्तैः । वज्राशनिमहीकम्पसन्ध्यानिर्घातनिःस्वनाः । परिवेषरजोधूमरक्ताकीलमनोदयाः । द्रुमेभ्यो ऽक्षरसस्नेहवल्लपुष्पफलोद्गमाः । गोपलिमदडिम शिवाय मधुमाधवे । तारोल्कापातकलुषं कपिलार्केन्दुमण्डलम् । अनग्निज्वलनस्फोटधूमरेखानिलाहतम् । रक्तपद्मारुणं सान्ध्यं नभः क्षुब्धार्णवोपमम् । सरितां चाम्बुसंशोषं हृदा याम्ये शुभं वदेत् । शक्रायुधपरीवेषविद्युत्स्फुटविरोहणम् । कम्पोद्दलनवैकृत्यं रसनं दरणं क्षितेः । सरोनद्युदपानानां हृद्वृद्धितरणक्षयाः । सरणं चाद्रिमेघानां वर्षासु न भयावहम् । दिव्यस्त्रीभूतगन्धर्वविमानाद्भुतदर्शनम् । लक्षरतानां सहन

दर्शनं च दिवाम्बरे। गीतवादित्रनिर्घोषा वनपर्वतसानुषु। सस्यद्विजप्रां हानिरपापाः शरदि स्मृताः। शीतानीलत्व धारत्वं नर्दनं मृगपक्षिणाम्। रक्षोयक्षादिसत्त्वानां दर्शनं वागमानुषी। दिशो धूमान्धकाराश्च सनभोवनपर्वताः। उल्काः सूर्येंदवास्तो च हेमन्ते शोभनाः स्मृताः। हिमपातानीलोत्पाता विरूपाङ्गतदर्शनम्। कृष्णाङ्गनाभमाकाशं तारोल्कापातपिङ्गरम्। चित्रगोद्विजाः स्त्रीषु गोऽजाश्वमृगपक्षिषु। पत्राङ्कुरलतानां च विकाराः शिशिरे शुभाः। ऋक्षस्वभावजा स्त्रीते दृष्टाः स्वर्तौ प्रभप्रदाः। ऋतोरन्यत्र चोत्पाता दृष्टास्ते भयदारुणाः। उल्कानां च या गाथाः गिन्युनां भाषितं च यत्। स्त्रियो यच्च प्रभाषन्ते तस्य नास्ति व्यतिक्रमः। पूर्वं चरति देवेषु पश्चाद्गच्छति मानुषान्। नाचोदिता वाग्वदति सत्या स्त्रीषा सरस्वती। उत्पातान् गणितविवर्जितोऽपि बुद्धा विख्यातो भवति नरेन्द्रवल्लभश्च। एतत्सन्निवचनं रक्षसमुक्तं यज्ज्ञात्वा भवति नरस्त्रिकालदर्शी" ४६अ०। "दिव्यान्तरिक्षात्रयमुक्तमादौ मया फलं शस्तमशोभनं च। प्रायेण चारेषु समागमेषु युद्धेषु मार्गादिषु विस्तरेण। भूयो वराहमिहिरस्य न युक्तमेतत् कर्तुं समासकृदसाविति तस्य दोषः। तज्ज्ञैर्न वाच्यमिदमेव फलानुगीतियंद्वृच्छिलिकमिति प्रथितं वराङ्गम्। स्वरूपमेव तस्य तत् प्रकीर्तितानुकीर्तनम्। ब्रवीम्यहं न चेदिदं तथापि मे त्व वाच्यता। उत्तरवीथिगता द्युतिमन्तः क्षेमसुभिक्षशिवाय समस्ताः। दक्षिणमार्गगता द्युतिहीनाः क्षुद्भयतस्करशस्त्रुकराः स्युः। कोशागारगते भृगुपुत्रे पुष्यस्थे च गिरामृषिवर्ये। निर्वैराः क्षितिपाः सुखभाजः संहृष्टाश्च जना गतरोगाः। पीड़यन्ति यदि कृत्तिकां मघां रोहिणीं श्रवणमैन्द्रमेव वा। भोजका सूर्यमपरे यद्गास्तदा पश्चिमा दिगनयेन पीड्यते। प्राच्यां चेद्वृजवदवस्थिता दिनान्ते प्राच्यानां भवति हि विग्रहोनृपाणाम्। मध्ये चेद्भवति हि मध्यदेशपीड़ा रूक्षैर्मन्दैर्न तु रुचिरैर्मयूखवद्भिः। दक्षिणां कक्षमाश्रितैस्तु तैर्दक्षिणापथपयोसुचां भवः। क्षीणरूक्षतनुभिश्च विग्रहः स्थूलदेवकिरणान्वितैः शुभम्। उत्तरमार्गे स्वटमयूखाः शान्तिकरास्ते तद्भृपतीनाम्। रूक्षशरीरा भक्षसवर्णा दोषकराः स्युर्दैगन्धपाषाणाम्। नक्षत्राणां तारकाः सग्रहाणां धूमज्वालाविस्फुलिङ्गान्वितास्तेत्। आलोकं वा निर्निमित्तं न यान्ति यांति ध्वंसं सर्वलोकः समूलः। दिवि भाति यदा दुहिनांशुयुगं द्विजदृद्विरतीव तदाशु शुभा। तदनन्तरवर्षरणो र्कयुगे जगतः प्रलयस्त्रिचतुःप्रभृति। सुनीनभिजितं ध्रुवं मघवतश्च भं संस्पृशन् शिखी घनविनाशकृत् कृशलकर्महा शोकदः। भुजङ्गमश्च स्पृशेद्भवति वृष्टिनाशो ध्रुवं क्षयं व्रजति विद्रुतो जनपदश्च बालाकुलः। प्रागद्वारेषु चरन् रविसुतो नक्षत्रेषु करोति च वक्रम्। दुर्भिक्षं कुरुते भयस्य मित्राणां च विरोधमवृष्टिम्। रोहिणीशकटमर्कनन्दनो यदि भिनत्ति रुधिरोऽथवा शिखी। किं वदामि यदनिष्टसागरे जगदशेषमुपयाति सङ्क्षयम्। उदयति सततं यदा शिखी चरति भचक्रमशेषमेव वा। अनुभवति पुराकृतं तदा फलमशुभं सचराचरं जगत्। धनुःस्थायी रूक्षो रुधिरसदृशः क्षुद्भयकरो बलोद्योगं चेन्दुः कथयति जवं व्याख्य च यतः। अवाक्शृङ्गो गोघ्नो निधनमपि सस्यस्य कुरुते ज्वलन्भूमावन् वा नृपतिमरणायैव भवति। स्निग्धः स्थूलः समश्रृङ्गो विशालस्तुङ्गोदग्विचरन्नागवीथ्याम्। दृष्टः सौम्यैरशुभैर्विप्रमुक्तो लोकानन्दं कुरुतेऽतीव चन्द्रः। पित्र्यमैत्वपुरुहूतविशाखात्वाष्ट्रमैत्र्य च युनक्ति शशाङ्कः। दक्षिणेन न शुभो क्षितिजस्याद् यद्युदक् चरति मध्यगतो वा। परिध इति मेघरेखा यातिर्यग्भास्करोदयेऽस्ते वा। परिधिस्थ प्रतिसूर्यौ दण्डस्त्वृजुरिन्द्रचापनिभः। उदये ऽस्ते वा भानोर्यदि दीर्घा रश्मयस्तमोघास्ते। सुरचापखण्डमृजु यदु रोहितमैरावतं दीर्घम्। ऋक्षांशसमाख्या व्यक्तीभूता न तारका यावत्। तेजः परिवेषनिमुखाद् भानोरुदयं यावत्। तस्मिन् सन्ध्याकाले चित्रैरेतैः शुभाशुभं वाच्यम्। सर्वैरेतैः स्निग्धैः सद्योवर्षं भयं रूक्षैः। अच्छिन्नः परिवेषो वियद्वि विमलं श्यामा मयूखा रवेः स्निग्धादीधितयः सितं सुरधनुर्विद्युच्च पूर्वोत्तरा। स्निग्धो मेघतरुर्दिवाकरकरैरालिङ्गितो वा यदा वृष्टिः स्याद्यदि वार्कमस्तसमये मेघो महांश्छादयेत्। खण्डो वक्रः क्रव्यादो क्षुब्धः काकादैर्वा चिह्नैर्विद्धः। यस्मिन्देशे रूक्षवाकेक्षणभावः प्रायो रात्रः। वाहिनीं समुपयाति पृष्ठतो मांसभक्षखगमण्डो युयुत्सतः। यस्य तस्य बलविद्रावो महान् अपगैस्तु विजयो विहङ्गमैः। भानोरुदये यदि वासमये गन्धर्वपुरप्रतिमा ध्वजिनी। बिम्बं निरुणद्धि तदा नृपतेः प्राप्तं समरं सभयं प्रवदेत्। यस्या शान्तद्विजमृगघुष्टा सन्ध्या स्निग्धा मृदुपवना च। पांशुध्वस्ता

जनपदनाशं यत्तेरूक्षा रुधिरनिभा वा। यद्विस्तरेणकथितं मुनिभिस्तद्भिन्नं सर्वं मया निगदितं पुनरुक्तवर्जम्। श्रुत्वापि कोकिलरुतं बलिभुग्विरौति यत्तत्स्वभावजतमस्य पिकं न जेतुम्" ४७अ०। एवमन्येऽप्युत्पाताः सन्ति विस्तरभयान्नोक्ता आकरे द्रष्टव्याः उत्पात विशेषे मङ्गणकर्मवर्ज्जनकालव्यवस्था रघुनन्दनेन दर्शिता यथा "गर्भः। दाहे दिशाञ्चैव धराप्रकम्पे वज्रप्रपातेऽथ विदारणे वा। धूमे तथा पांशुकरप्रपाते न कारयेन्माङ्गलिकादि कार्य्यम्। उल्कापाते च निर्घाते तथैवाकालवर्षणे। छिद्रे सूर्य्ये विनिर्दिष्टे न कुर्यान्माङ्गलक्रियाम्। धूमकेतौ समुत्पन्ने ग्रहणे चन्द्रसूर्य्ययोः। ग्रहणाद्यं सङ्करे चैव न कुर्यान्माङ्गलक्रियाम्। छिद्रसूर्य्यं वा विच्छिद्रं वा दृष्ट्वा गगनमण्डले। रात्रौ शक्रधनुश्चैव मङ्गलानि विवर्जयेत्। दिग्दाहे दिनमेकन्तु ग्रहे सप्त दिनानि च। भूमिकम्पे च सम्भूते लाङ्गलानि परिवर्जयेत्। उल्कापाते च त्रितयं धूमे पञ्च दिनानि च। वज्रपाते दिनमेकं वर्जयेत् सर्वकर्म्मसु"। भोजराजः "ग्रहे रवीन्दोरवनिप्रकम्पे केतूद्गमोल्कापतनादिदोषे। व्रते दशाहानि वदन्ति तज्ज्ञास्त्रयोदशाहानि वदन्ति केचित्"। "ग्रहणकाले भूकम्पोल्कापातवज्रपातादिदोषसमाहारे त्रयोदशाहं अशुद्धम्। किञ्चिदूनतत्समाहारेऽपि दशाहम्। ग्रहणाद्येकैकदोषे त्र्याहमिति" वाचस्पतिमिश्राः। अत्र ऋतिसागर धृतसारसंग्रहे। "राज्यादिसमहासिद्धौ यज्ञदानतपःसु च। होमस्वाध्याययोश्चैव वर्जयेद्दशरात्रकम्। सत्रहोमे महादाने वर्जयेत् सोमके मखे। तपःस्वाध्याययोश्चैव चिरारम्भे त्रयोदश" इति व्यवस्था अन्यत्र। "उल्कापाते भुवः कम्पे अकालवर्षगर्जिते। वज्रकेतूद्गमोत्पाते ग्रहणे चन्द्रसूर्य्ययोः। प्रयाणन्तु त्यजेत् यत्नः सप्तरात्रमतः परम्। ब्राह्मणः क्षत्रियो वैश्यस्त्यजेत् कर्म त्रिरात्रकम्। शूद्रस्त्वेको चैकरात्रं सर्वं कर्म्म समाचरेत्"। पराशरः। "प्रयाणे सप्तरात्रं स्यात् त्रिरात्रं व्रतबन्धने। एकरात्रं परित्यज्य कुर्यात् पाणिग्रहं ग्रहे"। भृगुः। "राजन्यानां तु सप्ताहं ब्राह्मणानां त्र्यहन्तथा। शूद्रस्यार्द्धदिनं प्रोक्तं सर्वकार्य्येषु वै भृगुः"। शूद्रस्यापद्विषयम्। कर्म्म इत्युपलक्षणम्। ग्रहणादावप्येवमेवान्यत्र कल्प पठितत्वात्" मल०त०। पीयूषधारायां तु विशेष उक्तः। नारदः "अनिष्टे त्रिविधोत्पाते चिन्तिका सुतदर्शने। सप्तरात्रं न कुर्वीत बालोद्वाहादि मङ्गलम्" वसिष्ठः सर्व्वग्रासे दिनान्यष्टौ सर्व्वकार्य्येष्वुवर्जयेत्। षट्दिनानि त्रिभागोने अर्द्धग्रासे चतुर्दिनम्। चतुर्थांशे त्रिरात्रं स्यात् ग्रहणे चन्द्रसूर्य्ययोः" नारदः "उत्पातग्रहणादूर्द्धं सप्ताहं निखिले त्यजेत्"। अङ्गिराः "सर्व्वग्रासे तु सप्ताहमर्द्धग्रासे दिनत्रयम्। त्रिभागे काङ्क्षुलतोग्रासे दिनमेकं तु वर्जयेत्" "अनयोर्विषयव्यवस्था देशभेदेनाचारभेदेन चावगन्तव्या" मी०धा०। अत्यावश्यककार्य्ये परिहारस्तत्रोक्तः ज्योतिर्निबन्धे "दिनानि पञ्च वसिष्ठस्त्रिदिनं गर्गस्तु कौशिकस्त्वेकम्। यवनाचार्य्यस्य मते पञ्च मुहूर्त्तांश्च दूषयति"। प्रायुक्तवराहः प्रदर्शित शुभोत्पातेऽप्येव दिनं वर्ज्यम्। "शुभदोत्पातेऽप्येवं दुष्टं दिनम्" मुहू०चि० उक्तेः। एवञ्च ऋक्षादिव्यवस्थापितं विवाहे ग्रहणे एकदिनवर्ज्जनम् अल्पग्रास विषयमापद्विषयं वा उक्तवचनजातसामञ्जस्यात्। यस्यादिविषये विशेषः ग्रहणशब्दे वक्ष्यते "एकताल-द्रवोत्पातपवन प्रेरितोगिरिः" रघुः। ओघामासे मत्सरोत्पातवातः" माघः। "उत्पातेन ज्ञापिते च" पा०। "उत्पातगृहदुष्टञ्च" ज्यो०।

उत्पातक त्रि० उत्पातयति उत्पातं जनयति उद्+पत-णिच् ण्वुल् ।उत्पातजनके उद्+पत-ण्वुल्। २ऊर्द्धपतनशीले च। "दंशोत्पातकभङ्गूकमक्षिकामशकादृतम्"। भा० स्वर्गा० २अ०।

उत्पाद पु० उत्+पद-भावे घञ्। १उत्पत्तौ "दुःखे च शोणितोत्पादे शाखाङ्गच्छेदने तथा" या० उत्पत्तिशब्दे विवृतिः उत्क्षिप्तःपादोऽनेन। "उत्क्षिप्तपादे त्रि०।

उत्पादक पु० ऊर्द्धस्थिताः पादा अस्य कप्। अष्टपदे शरभाख्ये गजारातौ ।पशुभेदे तस्य पृष्ठस्थचतुश्चरणत्वादूर्द्ध पादत्वम्। उत्-पद-णिच्-ण्वुल्।२पितरि पु०। ३उत्पादनकर्त्तरि त्रि०। "उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता" "आहुरुत्पादकं केचिदपरे क्षेत्रिणं विदुः" "नोत्पादकः प्रजाभागी तद्वेवान्याङ्गनास्वपि" मनुः। स्त्रियां टापि अत इत्त्वम्। उत्पादिका ४उत्पादकस्त्रियां ५छिलमोचिकायां शब्दच० ६पूतिकायां भरतः ७ देहिकानामकोटे च स्त्री त्रिका०।

उत्पादन न० उद्+पद-णिच्-ल्युट्। जनने उत्पत्तिकरणे "उत्पादनमपत्यस्य जातस्य परिपालनम् तथा" मनुः

उत्पादशय पु० उत्पादः ऊर्द्धक्षिप्तपादः सन् शेते शी-क्विप्। (टिटिर) ।टिट्टिभपक्षिणि हेमच०। २शिखौ च। तयोः

उत्तानपादतया शयनात्तथात्वम् । उत्पादं शयनमस्य उत्पादशयनोऽत्र ।

उत्पादित त्रि० उद्+पद-णिच्-कर्मणि क्त । जनिते । "अयनारम्भमासस्य विभोरुत्पादिताः परैः" माघः ।

उत्पादिन् त्रि० उद्+पद-णिनि । १उत्पत्तिमति । "सर्व-मुत्पादि भङ्गुरम्" हितो० । उत्पादयति णिच् णिनि । २उत्पादके । "दुःखोत्पादि मदे द्रव्यं क्षिपन् प्राज्ञहरस्तथा" या०स्मृ०उभयतः स्त्रियां ङीप् ।

उत्पाद्य अव्य०उद्+पद-णिच्-ल्यप् । १जनयित्वेत्यर्थे "क्रीत्वा स्वयं वाप्युत्पाद्य" मनुः । "धनानुत्पाद्य संरक्षेद्वृत्तिं चैषां प्रकल्पयेत्" स्मृतिः । कर्मणि यत् । जननीये त्रि० । "लावण्यमुत्पाद्य इवास यत्नः" कुमा०

उत्पाली स्त्री उन्नतिं पालयति पाल-अण् गौरा०ङीष् । आरोग्ये शब्दच० ।

उत्पाव पु० उद्+पु "उदि श्रयतियौतिपूदूधुवः" पा०अप् बाधित्वा घञ् । उत्पवने यज्ञियपात्रादेः संस्कारभेदे

उत्पिञ्जर(ल) त्रि०उद्+पिजि कलच् वा लस्य रः । अत्यर्थाकुले । "कुर्वाणमुत्पिञ्जरजातपक्षैः" माघः । उत्पिञ्जरीभूतदलैरित्यर्थः रत्नवोरभेदः" मल्लि० । "तदुत्पिञ्जलकं युद्धमासीद्देवासुरोपमम्" भा०द्रो०२५अ० ।

उत्पिब त्रि० उद्+पा-ड । उद्गत्य पायिनि ।

उत्पिष्ट त्रि० उद्गतः पिष्टं उद्+पिष-क्त । उद्गतः क्त येऽर्थे १उन्मथिते । "सन्धिमुक्तमुत्पिष्टं विच्छित्तिमत्सन्धिप्रमतिच्छिन्नं तिर्यक्छिन्नमिति षड्विधम्" सुश्रुतोक्ते षड्विधसन्धिमुक्तरूपेऽस्थिभङ्गे तत् कार्यं तथोक्तं "विशेषेणोत्पिष्टे सन्धावुभयतः शोफाभेदनाप्रादुर्भावो-विशेषतश्च नानाप्रकारा वेदना रात्रौ प्रादुर्भवन्ति" ।

उत्पीड त्रि० उद्-पीड-अच् । संघर्षेण १पीडके २संबाधके च । भावे घञ् । २उन्मथने । "स तु बाणवरोत्पीडादिक्षवत्सहसुत्थितम्" भा०व०२१अ० "आकाङ्क्षन्तौ नयनसलिलोत्पीडरुद्धावकाशम्" मेघ० । ख्युट् । उत्पीडन तत्र न० । अ । तत्रैव स्त्री । अत्र उत्पीड्यत उत्पीडाकारके । "अन्योन्यसत्पीडयदुत्पलाक्ष्याः" कुमा० । स्त्रियां ङीप् [पुष्प्यते ।

उत्पुच्छ नामधातुः पुच्छमुद्गच्छति उद्+पुच्छ+क्विप् उत्-

उत्पुच्छ पु० उत्क्षिप्तः पुच्छोवेन प्रा०व० वा क्षिप्तलोपः । ऊर्ध्वक्षिप्त पुच्छे पशौ ।

उत्पुट त्रि० उद्घाटितं पुटमस्य प्रा०व० वा घाटितलोपः । पुटमुन्मे प्रफुल्ले । तेन निर्वृत्तम् सङ्घादि०अण । औत्पुट तेन निष्पाद्ये त्रि० । तेन हरति उत्सङ्घादि० ठञ् औत्पुटिक तेन हारके त्रि० स्त्रियां ङीप् ।

उत्पुटक पु० उद्+पुट-कन । सञ्जातोके पाल्यासपद्रवभेदे । "अतऊर्द्धं नामलिङ्गे वक्ष्ये पाल्यासपद्रवान् । उत्पाटकोत्पुटकः स्फावः कण्डूयुतोऽतिरुक् । अवमन्थः सकण्डूको ग्रन्थिको जन्मबस्तथा । स्फावी च दारुवांचैव श्लक्ष्णेषां क्रमशः क्रियाम्" । लेपस्तत्पुटके दद्यात् तैल मेभिश्च साधितम्" सुश्रु० ।

उत्पुत त्रि० उद्+पु-क्त । पवित्रादिना शोधनसंस्कारे पात्रादौ । दृष्टपूते उत्पवितोऽत्र त्रि० । तेन हरति उत्सङ्घा० अण् । औत्पुत तेन हारके त्रि० ।

उत्पेय त्रि० उद्गत्य पेयम् । उद्गत्यपेये जलादौ ।

उत्प्रभ त्रि० उद्गता प्रभाऽस्य प्रा०व० गतलोपः । १उद्गत प्रभान्विते २उदर्चिषि वह्नौ पु०हेम० ।

उत्प्राश्यन न० उद्गत्य प्राश्यनम् । उत्क्षेप्य भोजने

उत्प्रास पु० उद्+प्र+अस-दीर्घादिषु घञ् । उपहासे । "प्रियं सोत्प्रासवक्रोक्त्या मध्याधीरा दहेद्भ्रुवा" सा०द० ।

उत्प्रेक्षण न० उद्+प्र-ईक्ष-भावे ल्युट् । १उद्भावने । २क्रियादिना कस्यचित् पदार्थस्य सम्भावने । ३अर्थालङ्कारभेदे च । णिनि । उत् प्रेक्षिन् तत्कारके त्रि० स्त्रियां ङीप्

उत्प्रेक्षा स्त्री उद्+प्र+ईक्ष-अ । उद्भावने अर्थालङ्कारभेदे अलङ्कारशब्दे पृष्ठे २९५विधृतिः । [मज्जने

उत्प्लवन न० उद्+प्लु-ल्युट् । उपरि प्लवने (भासा) अनि

उत्प्लवा स्त्री उत्प्लवति उद्+प्लु-अच् । नौकायां शब्दच०

उत्फाल पु०उद्+फल-घञ् । १उल्लम्फे २अर्द्धोविसरणे च

उत्फुल्ल त्रि० उद्+फल-क्त नि० । १विकसिते दलानामन्योन्यविश्लेषेण प्रकाशिते "उत्फुल्लनीलनलिनोदर तुल्यभासः" माघः । २उत्ताने त्रि० ३स्त्रीणां गुप्तेन्द्रिये न० मेदि० ।

उत्स पु०उनत्ति जलेन उन्द-स किच्च नलोपः । पर्व्वतादेः १स्रवज्जलस्य पातस्थाने । २जलप्रवाहे च "आसिञ्चन्नुत्सम् गौतमाय तष्णजे" ऋ०१,५४,५, "विष्णोः पदे परमे मध्व उत्सः" ऋ० १,५४,५ वङ्क साकं सिषिचुरुत्सम्" २,२४,४, "उत्सो वा तत्र जायतां ह्रदो वा पुण्डरीकवान्" अथ०४,१०४,१, उत्से भवः उत्सा० अञ् । औत्स तद्भवे त्रि० । ३ऋषिभेदे ततः गोत्रे अश्वादि०फञ् औत्सायन तद्गोत्रे पुंस्त्री० स्त्रियां ङीप्

उत्सक्थ त्रि॰ अर्द्धं गते सक्थिनी अस्य ब समा॰ स्त्रियां ङीप्। अर्द्धोरुके "उत्सक्थ्या अवगुदंधेहि समक्षि चारया दृषन्" यजु॰ २२,३१।

उत्सङ्ग पु॰ उत्पत्य सजतेऽत्र उद्+सन्ज आधारे घञ्। १मध्यभागे "दरीष्वहोत्सङ्गनिषक्तभासः" कुमा॰ "हृषदोवासितोत्सङ्गाः" रघुः। "तत्सैकतोत्सङ्गविलिङ्क्रियाभिः" रघुः "अथोत्सङ्गे निहितमसकृद्दुःखदुःखेन गात्रम्" मेघ०। २क्रोडे "तस्योत्सङ्गप्रणयिन इव स्रस्तगङ्गादुकूलाम्" "उत्सङ्गे वा मलिनवसने सौम्य! निक्षिप्य वीणाम्" मेघ॰ अर्द्धतया सजतेऽत्राधारे घञ्। ३उपरिभागे "सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः" मेघ० उत्क्रान्तः सङ्गम् अत्या० स०। ४सन्यासिनि सङ्गरहिते तत्त्वज्ञे प्रा॰स०। ५अर्द्धतः संसर्गे च।

उत्सङ्गादि हरतीत्यर्थे ठञ्निमित्ते "हरत्युत्सङ्गादिभ्यः" पा॰ ठक्ते शब्दसमूहे स च गण उत्सङ्ग उदुप उत्कुत उत्सङ्ग उत्कुट पिटक पिटाक" औत्सङ्गिकः स्त्रि॰की०।

उत्सङ्गिन् त्रि॰ उत्सङ्ग अर्द्धसंसर्गः अस्त्यस्य इनि स्त्रियां ङीप्। अर्द्धसंसर्गयुक्ते।

उत्सङ्गित त्रि॰ उत्सङ्गिनः उत्संसृष्टाः कृताः उत्सङ्गिन्+तत्करोतीत्यर्थे णि-कर्मणि क्त। संसर्गयुक्तीकृते। "उत्सङ्गितोत्तुङ्गतरङ्गबाहुः" माघः।

उत्सञ्जन न॰ उद्+सन्ज-णिच्-ल्युट्। १अर्द्धतः संयोजने उत्क्षेपणे। "सम्माननोत्सञ्जनाचार्यकरणेत्यादि" पा॰ तत्र उत्सञ्जने "दण्डमुद्यमयति उत्क्षिपतीत्यर्थः" सि॰कौ०।

उत्सत्ति स्त्री उद+सद-क्तिन्। उच्छेदे।

उत्सधि पु॰ उत्सः जलप्रवाहोधीयतेऽस्मिन् धा-कि उप॰ स०। जलप्रवाहवति कूपादौ "अर्कैरूर्द्धं तुतुद उत्सधिं पिबध्यै" ऋ॰१,८८,४,

उत्सन्न त्रि॰ उद्-सद-क्त। १उच्छिन्ने समूलमुच्छिन्ने २नष्टे च "मकरध्वजदर्पोत्सन्नविग्रहः" काद० ३अत्यायाससाध्ये च "उत्सन्नयज्ञ इव वा एष यज्ञातुर्मास्यानि" शत॰ब्रा॰२, ५,२,४८, दर्शपौर्णमासवज्ज्ञातुर्मास्यानामनुष्ठानबाहुल्याभावादुत्सन्नयज्ञत्वम्" भा॰ तेन हरति उत्सङ्गा॰ ठञ्। औत्सन्निक तेन हारके त्रि॰।

उत्सर्ग पु॰ उद्+सृज-कर्मणि घञ्। १सामान्यविधाने, तस्यासति बाधके सर्व्वत्र प्रकृतत्वात्तथात्वम्। "क्वचिदपवादविषयेष्वुत्सर्गोऽभिनिविशते" पात॰भा०। "अपवादैरुत्सर्गाः-क्षतब्राह्मत्वयः परैः" कुमा० २त्याग्ये। भावे घञ्। २अपानवायोर्व्यापारे विण्मोक्षणे ४त्यागे ५दाने "तस्योत्सर्गेण शुध्यन्ति जप्येन तपसैव च" मनुः "श्रीलक्षणोत्सर्गविनीतवेषाः" कुमा० ६समाप्तौ व्रतोत्सर्गः। "उत्सर्गमेके सत्योपगुणत्वात्" आश्व॰श्रौ॰१,४, २१,० "स्रोतोत्सर्गो वैकस्याद्भः" कात्या॰२४,७,२५, ७आर्षिकवेदपाठसमाप्तौ। वेदाध्ययनोत्सर्गकालश्च मिता॰ दर्शितो यथा "पौषमासस्य रोहिण्यामष्टकायामथापि वा। जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद्बहिः" या॰ "पौषमासस्य रोहिण्यामष्टकायां श्रावणहस्तेन जलसमीपे छन्दसां वेदानां स्वसूत्रोक्तविधिना उत्सर्गं कुर्यात्। यदा पुनर्भाद्रमासे उपाकर्म तदा माघशुक्लस्य प्रथमदिवसे उत्सर्गं कुर्यात्। यथोक्तं मनुना "पौषे तु छन्दसां कुर्यादुत्सर्गं विधिवद्बहिः। माघशुक्लस्य वा प्राप्ते पूर्वार्द्धे प्रथमेऽहनीति"। तदनन्तरमधिमासेऽहोरात्रं वा विरम्य शुक्लपक्षेषु वेदान् कृष्णेषूक्तान्यधीयीत। यथाह मनुः "यथाशास्त्रन्तु कृत्वैवमुत्सर्गं छन्दसां बहिः। विरमेत्पक्षिणीं रात्रिं वह्याधेकमहर्निशम्। अत ऊर्द्धं तु छन्दांसि शुक्लेषु नियतः पठेत्। वेदाङ्गानि तु सर्वाणि कृष्णपक्षेषु सम्पठेदिति"। अत्रानध्यायमाह या॰ "त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबन्धुषु। उपाकर्मणि चोत्सर्गे स्वाध्यायोत्रिये तथा" "उत्सर्गे मनूक्तपक्षिण्यहोरात्राभ्यां सहास्य विकल्प" इति मिता॰ "ओंपूर्वा व्याहृतीः सावित्रीञ्च त्रिरभ्यस्य वेदादिमारभेत्" "तथोत्सर्गे" आश्व॰श्रौ॰ २,५,१२,१३, उत्सर्जनशब्दे विवृतिः।

उत्सर्गिन् त्रि॰ उत्सर्गोऽस्यास्य इनि। उत्सर्गयुक्ते। "अयनमुत्सर्गिणाम्" २४,४,२१, त्रिषु भिन्नविषेषु एकस्याहेनाग्निष्टोमस्योत्सर्गेणास्योत्सर्गित्वम्" कर्कः। अयनं गवामयनम्।

उत्सर्जन न॰ उद्+सृज-ल्युट्। १दाने, २त्यागे, च। वेदोत्सर्गरूपे यज्ञासकर्त्तव्ये वैदिकानां २क्रियाभेदे स च आश्व॰ श्रौ॰ उक्तो यथा "मध्यमाष्टकायामेताभ्यो देवताभ्यो व्रतेनोपाकृत्योपाध्यायवन्ति" २०सू०। "मध्यमाष्टकायग्रहणं यज्ञासान्नोपलक्षणार्थम्"। तेन तस्याः समीपे माघ्यां पौर्णमास्यामित्यर्थः शाखान्तरे चैवं दृश्यते। 'एताभ्यो देवताभ्यो व्रतेन सावित्र्यादिभ्य आज्यम्' इत्युक्तम्। अग्निमीड़ इत्यादिभ्योऽग्निना व्रतेन स्थालीपाकयज्ञमक्रत्वाऽग्नेनेति यज्ञेन ब्रुवन् स्वसिद्धमन्नं याज्ञमिति दर्शयति, ततः खिलव्रतं, ततो वेदारम्भ-

थम्। ततो होमशेषं समाप्यापोऽवगाहन्त इत्यर्थः नारा० "एता एव तद्देवतास्तर्पयन्ति" २१ सू०। "स्नात्वा सावित्र्यादीन्या नव ऋग्मिमीड इत्याद्याश्च विंशतिं तर्पयन्नीत्यर्थः। ऋग्देवता आदित्य तर्पयेयुः। द्वितीयान्तं कृत्वा तर्पयामीत्येकान्नविंशद्वाक्यानि कृत्वा तावत्कृत्वस्तर्पयेयुः" ना० ह०। "आचार्यान् ऋषीन् पितॄंश्च" २२ सू०। यच्च ब्रह्मयज्ञाङ्गं तर्पणमुक्तं तदेतदङ्गत्वेनेदानीमपि कार्यमित्यर्थः। चशब्दो देवतातर्पण समुच्चयार्थः। तेन प्रजापत्यादयो ऽपि तर्प्याः। देवतास्तर्पयन्नीत्यत्र देवताग्रहणमत्रापि समुच्चयार्थम् क्रमश्च तन्त्रोक्त एव" ना० ह०। "एतदुत्सर्जनम्" २३ सू०। "अस्येयं संज्ञा। ततः षण्मासान् षड़ङ्गान्यधीयीत। षण्मासानधीयीतेत्यारभ्य एवमन्ना धर्मा महणाध्ययन एवेत्याङ्गरेके। अन्ये त्वविशेषेणेत्याहुः" ना० ह०। उत्सर्गशब्दे दर्शितेन कालेनास्य विकल्पः शास्त्रिभेदेन व्यवस्थाः "पौषे तु छन्दसां कुर्याद्बहिरुत्सर्जनं बुधः" मनुः। [छन्दसे च

उत्सर्पण न० उद्+सृप्-ल्युट्। १उत्सृज्य पुरतोगतौ, २उद्ध-

उत्सर्पिन् त्रि० उत्सर्पति णिनि। उत्सर्पतिष्यौ "पयोधरोत्सर्पिषु शीर्ष्यमाणः" रघुः। "उत्सर्पिभिः प्रांशुभिरंशुजालैः" किरा० २अतिगर्वितेस्त्रियां ङीप्। "उत्सर्पिणी खलु महतां प्रार्थना" शक्०। सा च हेमचन्द्रोक्ते कालचक्रार्द्धगते २कालगतिभेदे "सागरकोटिकोटीनां विंशत्या स समाप्यते। अवसर्पिण्यां षड़रा उत्सर्पिण्यां तथैव विपरीताः। एवं द्वादशभिररैर्विवर्त्तते कालचक्रमिदम्" हेम०। [पत्न्यायां गवि जटा०

उत्सर्य्या स्त्री उत्+सृ-यत्। १ऋतुसत्यां गर्भयोग्यावस्था-

उत्सव पु०उद्+सु-अप्। आनन्दजनकव्यापारे विवाहादौ। "ऋद्धिमन्तमधिकर्द्धिमुत्सवं पूर्वसूत्सवमपोहतुत्तरः" "स कृत्वा विरतोत्सवान्" रघुः। "धर्मसेतुसमाकीर्णां यज्ञोत्सववतीं शुभाम्" "हृष्टपुष्टजनाकीर्णां नित्योत्सवसमाकुलाम्" भा० व०२०६ अ०

उत्सवसङ्केत पु०उत्सव आनन्दजनकः सङ्केतः स्त्रीपुंसयोः रत्यर्थमनुरागादाङ्गानम् यस्य। अस्येयं स्त्रीत्वेऽपि दाम्पत्यनियमभङ्गे स्त्रीपुंसयोरनुरागमात्रहेतुकसैरविहारशालिनि पार्वतीये जातिभेदे। भा०स० अर्জ্জুनस्योत्तरदिग्विजये "पौरवं युधि निर्জ্জित्य दस्यून् पर्वतवासिनः। गणानुत्सवसङ्केतान् जयत् सप्त पाण्डवः, २६अ० अत्र नीलक०दर्शितरीत्यैव व्याख्या। तद्धर्मजे प्रतीचीस्थेऽपि जातिभेदे "गणानुत्सवसङ्केतान् व्यजयत् पुरुषर्षभः" नकुलस्य प्रतीचीविजये ३१अ० "गरैरुत्सवसङ्केतान् स जित्वा विरतोत्सवान्" रघुः।

उत्सादन उद्+सद-णिच्-ल्युट्। १उत्सारणे, २उद्धर्त्तने कषाय द्रव्येण स्नेहाद्यपसारणे ३उच्छेदकरणे "उत्सादनार्थं लोकानां रात्रौ भ्रमन्ति ऋषीनिह" भा० व० १०३ अ०। "उत्सादनार्थं लोकानां धुन्धुर्नाम महासुरः" भा० व०१००अ०। "न हि दैवने किञ्चित् विद्यतेऽन्यत् प्रयोजनम्। उत्सादनार्हते तेषां वनस्थानां महाद्युते!" भा० व०२३७ अ०। स्थानान्तरनयने "क्रयणवेद्यारभ्रण प्रवर्ग्योत्सादनेत्या०" कात्या०१४,१,१२, "उपसदन्ते प्रवर्ग्योत्सादनम्" कात्या०१८,२,१०। उत्साद्यतेऽत्र उद्+सद-णिच् आधारे ल्युट्। महावीरादिपरित्यागदेशे। "उत्सादनदेशं गच्छन्ति सामगानानन्तरम्" कात्या० २६,७,१०, उत्सादनदेशं प्रति आगच्छन्ति उत्सादनं महावीराणां परित्यागः स यत्र देशे विहितः श्रुतौ" कर्क०

उत्सादनीय त्रि०उद्+सद-णिच्-कर्म्मणि अनीयर्। १उच्छेद्ये २उन्मूलनीये उत्सर्त्तनीये कषादिद्रव्ये। "कुर्यादुत्सादनीयानि सर्षीण्यालेपनानि" च सुश्रु०।

उत्सादि पु०भावार्थे "उत्सादिभ्योऽञ् पा० अञ् प्रत्ययप्रकृतिशब्दगणे। स च उत्स उदपान विकर विनद महानद महानस महाप्राण तरुण तलुन (वधूकवाऽसे) पृथिवी धेनु पङ्क्ति जगती त्रिष्टुप् अनुष्टुप् जनपद भरत उशीनर योध्र योलुकृष्ण(उदः स्थानदेशे) पृषदंश मल्लकीय रथन्तर मध्यन्दिन हरित महत् सवत् कुरु पञ्चाल इन्द्रावसान उष्णिक् ककुभ् सुवर्ण देव (योध्रादिश्छन्दसि) औत्स तद्धवे त्रि०।

उत्सादित त्रि०उद्+सद-णिच्-क्त। उन्मूलिते उद्धर्त्तिते च "भद्रासनेऽपविष्टः परिधायाम्बरं लघुः। सस्नौ चन्दनसंयुक्तैः पानीयैरभिमन्त्रितैः। उत्सादितः कषायेण बलवद्भिः सुशिक्षितैः" भा०द्रो०८२अ०।

उत्सारक पु०उद्+सृ-णिच्-ण्वुल्। द्वारपाले हेमच० तेन हि प्रभुद्वारतो जना दूरीक्रियन्ते इति तस्य तथा व्यपदेशः त्रि०। [२चालने, ३स्थानान्तरकरणे च।

उत्सारण न० उद्+सृ-णिच्-ल्युट्। १दूरीकरणे

उत्सारित त्रि०उद्+सृ-णिच्-क्त। दूरीकृते चालिते "गुरुस्यान्यमङ्गं गुरुकेन हन्यादुत्सारितेनैवसुप्तान्मादोन्" लीला०

उत्साह पु०उद्+सह-घञ्। १उद्यमे, २अध्यवसाये, कर्त्तव्य

कार्येषु ३स्थिरतरे प्रयत्ने "उत्साहो मन्त्रमूलं स्यादिति नीतिविदां मतम्। प्रभुशक्तिर्मन्त्रमूला तस्मादुत्साहवान् भवेत्" इत्युक्ते राज्ञां ४गुणविशेषे, "चारेणोत्साहयोगेन क्रियायैश्च कर्मणाम्" मनुः। "नीताविवोत्साहगुणेन सम्पदः" कुमा०। ५कल्याणे, गङ्गरत्नावली ६स्फुरणे, मेदिनी "कार्यारम्भेषु संरम्भः स्थैर्यात्तत्साह उच्यते" सा० द० उक्तलक्षणके वीररसस्य ७स्थायिभावे। स च वीररसस्य स्थायी भावः "रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चेमे स्थायिनः प्रोक्ता यमस्तथा" स्थायिनो विभज्यस्य "उत्तमप्रकृतिर्वीरः उत्साहस्थायिभावकः" तत्रोक्तेः। तस्य उद्दीपनभावे "मन्त्रोत्साहः प्रतोऽपि स्तगवापवादिना भाषणेन" शक्र०। "शक्तिसङ्कोऽनहंवादी धृत्युत्साहसमन्वितः" गीता "महोत्साहः स्थूललक्षः कृतज्ञोदृढसेवकः" या० स्मृ० अस्त्यर्थे बला० मतुप् इनि वा उत्साहिन् उत्साहवत् तद्विशिष्टे त्रि० स्त्रियां ङीप्।

उत्साहक त्रि० उद्+सह-ण्वुल्। उत्साहान्विते "हृज-काध्यामिति" पा० षष्ठीनिषेधेऽपि वाजका० षष्ठ्या समासः। कार्योत्साहकः।

उत्साहन न० उद्+सह-णिच्-ल्युट्। उत्साहजनने

उत्साहवर्द्धन पु० उत्साहं वर्द्धयति वृध-णिच्-ल्यु। वीररसे। वृध-ल्युट् वैत०। उत्साहस्य वृद्धौ न०।

उत्साहशक्ति स्त्री उत्साहएवशक्तिर्बलम्। राज्ञां विक्रमहेतौ बले। "षड्गुणाः शक्तयस्तिस्रः प्रभावोत्साह मन्त्रजाः" अमरः। "कर्त्तव्येषु कर्मसु स्थैर्यात् प्रयत्न उत्साहः" मल्लि०।

उत्सिक्त त्रि० उद्+सिच-क्त। १उद्रिक्ते अतिशयिते २उद्रिक्ते ३उद्धते गर्विते च। "जानीयादस्थिरां वाचमुत्सिक्त मनसां तथा" मनुः।

उत्सुक त्रि० उत्सुवति पु प्रेरणे अितद्वादि० डु कृत्। १दृष्टावाप्रये कालक्षेपासहिष्णौ २दृष्टार्थेऽनुक्ते च "दिनावसानोत्सुकबालवत्सा" "श्रुत्वा रामः प्रियोदन्तं मैथिलेः तत्सङ्गमोत्सुकः" "यत्सोत्सुकापि स्तिमिता सपर्यामम्" "आयङ्गोत्सुकसारङ्गां चित्रकूटस्थलीं जहौ" रघुः। उत्सुकस्य भावः ष्यञ्। औत्सुक्य तद्भावे न०। "दृष्टावाप्रेरौत्सुक्यं कालक्षेपासहिष्णुता। चित्ततापत्व राखेददीर्घनिश्वसितादिकृत्" सा० द०। "औत्सुक्येन कृतत्वरा सहभुवा व्यावर्त्त्यमाना स्त्रिया" रत्ना०। अत्या० अभूततद्भावार्थे क्यङ्। उत्सुकायते उत्सुकायमाना "यस्योत्सुकायमाना त्वं न प्रतीपायसेऽन्तिके" भट्टिः

उत्सूत्र त्रि० उत्क्रान्तः सूत्रम् अत्या० स०। विधानसूत्रातीते "अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना" माघः।

उत्सूर पु० उत्क्रान्तः अतिक्रान्तः सूरं सूर्य्यम् अत्या० स०। दिनात्यये हेमच० उत्सूर्यादयोऽत्यये। "श्रोत्सूर्यमन्यानृतखापयाद्युषम्"। अच० ४,५,७, "उत्सूर्य्यायिनश्चासन् सर्व्वे चासन् प्रगे निशा" भा० शा० २२८अ०

उत्सृज्य अ० उद्+सृज-ल्यप्। १त्यक्त्वेत्यर्थे "अदुपदात् कर्म्मणि क्यप्। २त्यक्तव्ये त्रि०

उत्सृष्ट त्रि० उद्+सृज-क्त। १त्यक्ते २दत्ते च। "ब्राह्मणानाञ्च यत्किञ्चित् मयोत्सृष्टं तु निर्ज्जने। तत् कश्चिदन्यो न नयेत् विभाज्यत्वं यथाक्रमम्। न वाक्यं न च तत्तीरं पातव्यं केनचित् क्वचित्"। ब्रह्म पु०। "महोत्सोत्सृष्टपशवः सूतिकागन्तुकादयः" या० स्मृ०।

उत्सेक पु० उद्+सिच-घञ्। १गर्व्वे, "उपदा विविशुः सम्यक् नोत्सेकाः कोशलेश्वरम्" रघुः। "नोत्सेकमगमच्चेदं कदाचिदिह नः कुलम्" भा० आ० ११० अ०। २उद्रेके "पातव्यं त्रासकासघ्नं क्षयोत्सेके गलग्रहे" सुश्रु०। ३उद्धृत्य बहिः सेचने च।

उत्सेकिन् त्रि० उत्सेक+अस्त्यर्थे इनि। १अतिगर्विते २गर्वयुक्ते च स्त्रियां ङीप्। "भाग्येष्वनुत्सेकिनी" शक्र०

उत्सेचन न० उत्क्रम्य आधारमतिक्रम्य सेचनम्। आधारातिक्रमेण द्रवणे (उपचार)

उत्सेध पु० उत्सेधति कारणमतिक्रम्य वर्द्धते उद्+सिध-गत्याम् अच्। १देहे तस्य शुक्रशोणितरूपस्वकारणातिक्रमेण वर्द्धनाश्रयत्वम्। भावे घञ्। २उन्नतौ तस्य उदभिहितभावत्वात् "पुत्रवित्तार्ज्जनात् पितेत्यादौ, पुत्रार्जितवित्त इव उन्नत्याश्रयेऽपि इतिः तथात्वेऽपि विशेषणसमासे ब्राह्मणश्रमणादिवत् परनिपातः हिमनिध्यन्द्यपाख्य इत्यादिवदिति भेदः। यथा "पयोधरोत्सेधनिपातचूर्णिताः इति कुमा० "तस्य प्रमाणमार्द्धसाक्षियवर्द्धोत्सेधसदृशानि" सुश्रु०। "उत्सेधनिर्द्धूतमहीरुहाणां ध्वजैः" माघः "तच्छाखाचमसा दीर्घाः प्रादेशायतरङ्गुलाः। तथैवोत्सेधतोऽप्येवायतरस्तास्तु इत्यपि" छन्दोगप० "पयोधरोत्सेधविशीर्णसंहतिं" कुमा०। कर्त्तरि अच्। ३उच्चे त्रि०। "वाच्यं श्वेतपुच्छे उत्सेधमेव तं कुरुते तस्मादुत्सेधं प्रजाभयेऽभि संश्र-

यन्ति" शत०ब्रा०१३,२,२,६, "उत्सेधसङ्घं पर्व्वतादिकं प्रासादं वा" भा० ।

उत्स्खन पु०उद्+स्खनः । १उद्खनने । ब० । २खनति क्वि० ।

उत्स्वप्न त्रि०उत्+स्वप्नः अतिक्रान्तः स्वप्नं तन्मर्य्यादामुल्लङ्घ्य वा० ब० । निद्रायां बाह्येन्द्रियाणां विलीनत्वेनमनसैव सर्व्वव्यवहारनियमेन तदतिक्रमेण जाग्रदवस्थावत् स्वप्नवचनादिव्यवहारे । उत्स्वप्नमिव चरति क्यङ् उत्स्वप्नायते यथा रङ्गकटिके "विदूषक उत्स्वप्नायते" स्वप्नइवपदार्थस्य स्वप्नवाचा व्यवहरतीत्यर्थः । एवमुत्तररामचरितेऽपि "अत्थि एत्थ अज्जउत्त" इत्यादिना सीतायां उत्स्वप्नो वर्णितः ।

उद् अव्य०उ-क्विप् तुक् "उदोऽनूर्द्ध्वचेष्टायाम्" पा०नि०पृथो०दत्वम् । १प्रकाशे, २विभागे, ३लाभे, ४ऊर्द्धे, ५उत्कर्षे, ६प्राबल्ये, ७आश्चर्य्ये, ८शक्तौ, ९प्राधान्ये, १०बन्धने, ११अभावे, १२मोक्षे, "तस्य उदिति नामेति" श्रुतेः १३ब्रह्मणि च । गगरत्ने उदः अर्थानभिधाय उदाहृतं यथा "उत् प्राबल्यवियोगोर्द्ध्वकर्म्मलाभप्रकाशाश्चर्य्यमोचनाभावदलप्राधान्यशक्तिषु" तत्र प्राबल्ये उद्बलः विद्वेषे उद्वृणच्छति । ऊर्द्ध्वचेष्टायाम् उत्तिष्ठति । लाभे प्रभात् शतसुत्पन्नम् । प्रकाशने उज्ज्वलति चाश्चर्य्ये उत्फुल्लः । मोक्षे उद्गतः । अभावे उत्पथः । दलने उत्फुल्लः । प्राधान्ये उद्दिष्टः शक्तौ उत्साहः"

उदक न० उन्द-ण्वुल् नि०नलोपश्च । जले "अनीत्वा पङ्क्तयां धूलिमुदकं नावतिष्ठति" माघः । "सकृत् प्रसिञ्चत्युदकं नामगोत्रेण वाग्यतः । प्रोक्षिते कालशेषः स्यात् पूर्णे दत्तोदकः शुचिः" । या० स्मृ० "यावानर्थ उदपाने सर्व्वतः संप्लुतोदके" गीता । "उदकस्योदः संज्ञायाम्" पा०समासे संज्ञायामुदकस्योदादेश उदपानः उदधिः उदमेघः । क्षीरोदः । "मेघर्त्तिभयेषुकाम्ये" पा० । पूर्व्वपदस्यस्य उदादेशः । उदपेषं पिनष्टि उदवासः "सहस्रशरात्तोरुदवाससत्परा" कुमा० उदवाहनः उदधिर्घटः पूरयितव्ये उदकुम्भादौ परे वा । उदकुम्भः उदकुम्भः । "शान्युदकुम्भहस्ताः" भट्टिः पूर्वपितव्य इत्यादयुक्तेः उदकपर्वत उदकस्थाली इत्यादौ न । "मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च" पा० । उदमन्थः उदकमन्थः (जलविलोड़नम्) । उदौदनः उदकौदनः (उदकेन सिद्धः ओदनः) । "उदौदनं प्राश्यित्वा सर्पिष्मन्तमश्नीयात्" शत०ब्रा०१४,६,४,१५ । उदसक्तवः (उदकमिश्रितसक्तवः)। उदबिन्दुः उदवज्रः उदहारः उदहारः (जलहारकः) उदवीवधः उदगाहः (जलावगाहः)पक्षे न ।२उदकसाध्ये तर्पणे च । "अनड्वर्षं निखनेत् न कुर्य्यादुदकं ततः" । "क्षतोदकान् सप्तशीर्षान्" "कामोदकं सखिप्रत्ताखस्त्रीयश्वशुरर्त्विजाम्" "न ब्रह्मचारिणः कुर्य्युरुदकं पतिताय वै । "नाशौचोदकभाजनम्" इति च या०स्मृ० ।

उदकक्लच्छ पु० "उदकसक्तुभ्यां मासाभ्यवहारेष्वौदकक्लच्छ्रः" इति विष्णुक्ते व्रतभेदे ।

उदकक्रिया स्त्री उदकेन क्रिया तर्पणम् । शास्त्रविहिते जलादितर्पणे "एवं मातामहाचार्य्यप्रेतानामुदकक्रिया" या०स्मृ० । "अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा । "पिण्डोदकक्रियाहेतोः" स्मृतिः "उदककर्म्मोदकार्थादयोऽप्यत्र न० । उदकदानमप्यत्र न० । "तोयकर्म्मणि चारब्धे रात्रामुदकदानिके" भा०आ०अ० ।

उदकपरीक्षा स्त्री विवादादौ लौकिकप्रमाणालाभे कार्य्ये दिव्यशपथभेदे तत्प्रकारश्च मिता०व्य० । "सत्येन मामिरत्न त्वं वरुणेत्यभिशाप्य कम् । नाभिदघ्नोदकस्थस्य मुहीलोरु जलं विशेत्" या० उक्तः । अपशब्दस्तु मिता० व्य० । दि० तत्त्वे च अनुसन्धेयः ।

उदकम् अव्य०उन्द्-अकमु किच्च । क्षेदे गगर० । साक्षा० क्रिया वा गतित्वम् । उदकंकृत्यउदकंकृत्वा क्षेदं कृत्वेत्यर्थः ।

उदकमेह पु० उदकमिव मेहः । प्रस्रुतोक्ते मेहभेदे । तल्लक्षणं तत्रैव "तत्र श्वेतमवेदनमुदकसदृशमुदकमेही मेहति" । इक्षुमेहशब्दे ६।० पृष्ठे विवृतिः ततः अस्त्यर्थे इनि । उदकमेहिन् तद्युक्ते त्रि० स्त्रियां ङीप् ।

उदकल त्रि० उदकमस्त्यस्य सिध्मा०वा लच् । उदकयुक्ते व्रजभावे मतुप् मस्य वः । उदकवत् तत्रार्थे स्त्रियां ङीप् । पिच्छा० इलच् । उदकिल तत्रार्थे त्रि० ।

उदकशुद्ध त्रि० उदकेन शुद्धः । स्नाते २उदकस्पर्शेन शुद्धे च । ततः भवादौ अण् अनुशतिक० द्विपदवृद्धिः । औदकशौद्ध तद्भवे त्रि० ।

उदकषट्पल न० "घृतात्रैः पञ्चकोलैस्तु पञ्चकैस्त्रिगुणोदकैः । समक्षीरं घृतप्रस्थं जीवनीयशृतं शृतं" चक्रदत्तोक्ते घृतभेदे ।

उदकान्त पु० उदकमेवान्तः सीमा । उदकपर्य्यन्ते । "सप्तरात्रात् परमे उदकान्ते दीक्षेरन्" आश्व० श्रौ० १२, ६।२, "श्रोदकान्तात्तुच्छल्लनोऽनुगन्तव्यः" शब्द० ।

उदकीय पु० नामधातु आत्मन उदकमिच्छति उदक+ क्यच्। उदकीयति अतितर्षायान्तु उदन्यति।

उदकोर्स(र्य) पु०उदकेन कीर्णः(र्यः) संज्ञायाम् उदादेशः। महाकरञ्जे राजनिर्घ० शालिः रत्नमा०।

उदकेचर पु० उदके जले चरति अच् वा सप्तम्या अलुक्। जलचरे मत्स्यादौ। अध्यर्धमत्स्य सामदोराजेत्याह तस्योदकेचरा विषक्त इव आसत इति मत्स्याश्च" शत०ब्रा० १३,४,३,१२ जलचरे पञ्चिकूर्मादौ च ते च सुश्रुते विभाजिताः ते च आनूपशब्दे ७३१ पृष्ठे दर्शिताः। सप्तम्यालुकि उदकचरोऽत्र, णिनि, उदकचारिन् अत्र स्त्रियां ङीप्।

उदकोदर न० सुश्रुतोक्ते उदरव्याधिकारकरोगे। उदरशब्दे विवृतिः"उदकोदरिणस्तु वातहरतैलाभ्यामित्यादि"सुश्रु०

उदक्क त्रि० उद्+अञ्चु+क। कूपादित उत्तोलिते। "उदक्कमुदकं कूपात्" सि०कौ०।

उदक्प्रवण त्रि० उदक् उत्तरा प्रवणं निम्नम्। क्रमशोदक्षिणत उत्तरनिम्ने। "अथर उदक्प्रवणे समे वा" कात्या० २,३,४। २उत्तरमार्गगतिहेतौ च "एष वा उदक्प्रवणोयत्रो यत्रैवंविद् ब्रह्मा भवति" छा०उ०। "उदक्प्रवणः उत्तरमार्गं प्रति हेतुरित्यर्थः" भा०। "प्राची हि देवानां दिगथो उदक्प्रवणोदीची हि मनुष्याणां, दिग्दक्षिणतः पुरोधं प्रत्युदूहन्त्येषा वै दिक् पितॄणां सा यद् दक्षिणा प्रवणा स्यात्" शत०ब्रा०। १,२,५,१७।

उदक्य त्रि०उदकमर्हति दण्डा०यत्। १जलार्हे व्रीह्यादौ। २ततस्नानार्हेऽशुचौ ३ऋतुमत्यां स्त्री। तस्याश्च स्नानदिवसपर्य्यन्तमशुद्धेः ततः शुद्ध्यर्थमुदकार्हत्वात् तथात्वम्। "उदक्या स्नुतिका वापि अन्त्यजं संस्पृशेद्यदि। त्रिरात्रेणैव शुध्येत इति शातातपोऽब्रवीत्" शु०त० उद्वहपरा०। "उदक्यायां च संभाषां न कुर्वीत कदाचन" भा०अ०प० १०४ अ०। "उदक्यायासते ये च द्विजाः केचिदनन्वयः" भा० शान्ति०१६५ अ०। अथ प्रसङ्गात् प्रथमरजोदर्शनतिथ्यादिफलतदीयधर्मभेदा उच्यन्ते ते च विधानपारिजाते दर्शिता यथा।"प्रथमर्त्तौ द्वितीयेवा शुभाशुभनिरीक्षणम्। कर्त्तव्यं ज्ञातिभिः सम्यग् धर्म्मशास्त्रविधानतः"। तत्र वस्त्रफलम्। वराहसंहितायाम्"शुभगा श्वेतवस्त्राढ्या रोगिणी रक्तवाससा। नीलाम्बरधरा नारी विधवा प्रायते ध्रुवम्। भोगिनी पीतवस्त्रा स्यात्ववस्त्रा पतिव्रता। दुर्भगा मलिनवस्त्रा च सुभगा चौषवस्त्रिणी"।रजोवर्णफलम्। "आलोहिते भवेद्वन्ध्या श्वेतवर्णे च पुत्रिणी। कृष्णे च विधवा नारी रजस्येतत्त्रिलक्षणम्" विवाहोत्तरकालभेदफलम् "कृतानां वत्सरार्धेन भामे पद्मे तथा खलु। रजसोदर्शनं स्त्रीणां सर्वदैवाशुभावहम्"। अथ तिथिफलम् "आद्यर्त्तौ विधवा नारी प्रतिपद्याहताऽङ्गजा। वैधव्यदा प्रतिपदा द्वितीया पुत्रवर्द्धिनी। सौभाग्यदा तृतीया च चतुर्थी सुखनाशिनी। पञ्चमी सुभगा चैव षष्ठी सम्पत्तिनाशिनी। सप्तमी धननाशाय, पुत्रदा सौख्य दाष्टमी। नवमी क्लेशदा स्त्रीणां दशमी च सुखप्रदा। एकादश्यर्थनाशाय द्वादशी रतिवर्द्धिनी। त्रयोदशी शुभाश्चैवा दुर्भगा च चतुर्दशी। पौर्णमासी तथामावास्या दुःखरोगविवर्द्धिनी"। अथ मासफलम् तत्रैव"चैत्रे मासि विशेषेण वैधव्यं लभते ध्रुवम्। वैशाखे बन्धुपुत्राढ्या ज्यैष्ठे रोगाहता भवेत्। आषाढी स्वसुदः प्रोक्तः श्रावणीधनहा भवेत्। भाद्रे तु दुर्भगा क्लीवा आश्विने च तपस्विनी। कार्त्तिके निर्धना बाला मार्गशीर्षे बहुप्रजा। पौषे स्यात् पुंश्चली नारी माघे पुत्रसुखान्विता। फाल्गुने सर्व्व सम्पन्ना प्रथमर्त्तौ फलं श्रुतम्"। अथवारफलम्। "आदित्ये विधवा नारी सोमे दैन्यमवाप्नुयात्। मङ्गले ज्ञानप्रधाताय बुधे च धनिनी भवेत्। गुरौ च भर्त्तृसुखदा कन्यापुत्रपरूर्भगा। पौष्णस्थकारिणी मन्दे म्रियते भर्त्तुरग्रतः"। अन्यत्रान्यवारेऽपि "रूपवती पतिव्रता दुःखपुत्रिणी भोगभागिनी। पतिव्रता क्लेशभोगा सूर्य्यवारादिषु क्रमात्" अथ वेलाफलम्। "प्रातःकाले रजः स्त्रीणां प्रथमं शोकवर्द्धनम्। सङ्गवे सुखसन्तत्वं मध्याह्ने धनसन्ततिः। अपराह्णे धनावाप्तिः सायाह्ने मध्यमं फलम्। पूर्वरात्रे सुखायालं मध्यरात्रे धनक्षयः। पररात्रेऽर्थनाशाय प्रथमर्त्तुफलं श्रुतम्"। अथ स्नानफलम्। "गृहस्थे सुखावाप्तिर्गृहारे वियोगिनी। शय्यायां सुखदा भूमावनेकापत्यसन्ततिः"। दृष्टफलम्। "पुरुष्या दृश्यते यत्तु रजः स्त्रीणां सुखाय तत्। विरूक्षवा तु यद्दृष्टं रजो वैधव्यदं श्रुतम्। रजः पश्यति चेत्कन्या पुमान्वा तत्सुखं भवेत्। स्वयं दृष्टं तया स्त्रीणा मात्मघाताय कल्पते"। अथावासफलम्। "पितृगृहे रजो दैन्यं विदधाति पितुः कुले। देवस्थाने पितृस्थाने धनस्थानेऽन्यवेश्मनि। मार्गे भर्त्तृवियोगे च चण्डालादेश्च सूतप्रजा"। अथ नक्षत्र फलम्।"अश्विनी सुखदा स्त्रीणां भरणी कामवर्द्धिनी। कृत्तिका दैन्यदा श्वेता रोहिणी

सुखदा भवेत् । मृगस्तु कामभोगाय सुखदं रुद्रदैवतम् । अदितिदैवतं सुखं दद्याद्गुरुभं सुखवर्द्धनम् । अश्लेषा शुभनाशाय योगायाथ मघा मता । वैधव्यं फल्गुनीहन्ति हस्तः पुत्रविवर्द्धनः । चित्रा चित्रतनुं नारीं कुरुते नात्र संशयः । स्वातौ शुभाय नारीणां विशाखा सुखनाशिनी । अनुराधार्थभोगाय ज्येष्ठा मर्त्यवियोगदा । शुभाशुभं मूलं पूर्व्वाषाढार्थनाशिनी । सुखदा चोत्तराषाढा श्रवणः सुखवर्द्धनः । धनिष्ठापञ्चकं स्त्रीणां प्रथमर्त्तौ सुखप्रदम् । तिथिरेकगुणा प्रोक्ता नक्षत्रं च चतुर्गुणम् । वारः षड्गुणो ज्ञेयो मासश्चाष्टगुणः स्मृतः । वस्त्रं दशगुणं विद्याद्दर्शनं च ततोऽधिकम् । अशुभं चेद्रजः स्त्रीणां प्रथमर्त्तौ हि दृश्यते । विधानं तत्र कर्त्तव्यमरिष्टघ्नं विशेषतः" इति । अथ योगादिफलम् । परिघस्य तु पूर्व्वार्द्धे व्यतीपाते च वैधृतौ । व्याघातस्यत्रयोविंशामशुभं प्रथमार्त्तवम्" । विष्टिर्विष्टिभद्रेत्यर्थः । अन्यत्रापि । "यमा संक्रान्तिविष्टादौ व्यतीपाते च वैधृतौ । परिघस्य तु पूर्व्वार्द्धे षट्च गण्डातिगण्डयोः । व्याघाते नव, शूले तु नाड्यः पञ्चदशैव तु । वैधव्यमर्थहानिञ्च सूतनाशं महद् भयम् । वैधव्यं गलगण्डित्वं दारिद्र्यं क्षीणजीवनम् । तेजोहानिं समायाति एषु पुष्पवती क्रमात् । अथ राशिफलम् । "मेषे सव्यभिचारा स्याद्वृषभे परभोगिणी । मिथुने धनभोगाढ्या कर्कटे व्यभिचारिणी । सुप्तपाढ्या सिंहराशौ तु कन्यायां श्रीमती तथा । विलग्ना तुलायां तु वृश्चिके तु पतिव्रता । दुश्चारिणी धनुःपूर्वे त्वपरे च पतिव्रता । मकरे मानहीना च कुम्भे निर्द्धनवन्ध्यता । मीने विलग्ना लग्ने यत्सस्या विवाहवत्" । अथ लग्नफलम् नारसिंहीये । "लग्नस्थ सप्तमस्थाने सूर्य्यो वैधव्यकारकः । पुत्रहानिकरस्तारो बुधः सत्पुत्रदो भवेत् । इज्यस्तिथैनायुर्ध्यं शुक्रः सापत्न्यकारकः । शनैश्चरे च वन्ध्या स्याद्राहौ तु मरणं ध्रुवम्" । अथ गुरुशुक्रोदयफलम् । "आयुः श्रीः प्रीतिरारोग्यमुदिते गुरुभार्गवे । मन्दोदये विरोधः स्यात् क्लेशः स्यात्तामसोदये । तामसो राहुः । अन्यत्र । "संमार्जनोकाष्टहरणाग्निधूपांस्तस्ते दधाना कुलटा तदा स्यात् । तत्तोपयोगे तमसि स्थिता चेद्दुष्टं रजो भाग्यवती तदा स्यात्" इत्यादि सर्वं ज्योतिःशास्त्रतोऽवगन्तव्यम् ।

अथ ऋतुस्वरूपम् । "नाभिमूले स्थितं पुष्पमृतुर्दशसमन्वितम् । तस्मिन् सर्वाच दधते गर्भसम्भवकारणम् । अधोमुखं स्थितं स्त्रीणां तद्धि शुक्लाऽऽर्तवं स्मृतम् । बाल्यात्परत्व प्राप्तौ शुक्लं विकसद्भवेत् । उत्फुल्लं कुसुमं स्त्रीणां स्वभावात् प्रवदेद्रजः । तदा प्रभृति सर्वासां मासि मासि ऋतुर्भवेदिति" । अथ प्रथमर्त्तौ मङ्गलाचारः प्रयोगपारिजाते स्मृतिचन्द्रिकायाम् । "प्रथमर्त्तौ तु पुत्रिण्याः पतिपुत्रवती स्त्रियाः । अक्षतैरासनं कुर्यात्तस्मिंस्तासुपवेशयेत् । हरिद्रागन्धपुष्पादीन् दद्यात्ताम्बूलकङ्कणम् । आशिषोवाचयेयुस्ताः पतिपुत्रवती भव । दीपैर्नीराजनं कुर्यात्सदीपे वासयेद्गृहे । ताः सर्वाः पूजयेत्पश्चान्नवपुष्पाक्षतादिभिः । लवणाप्यसङ्गादि दद्यात्ताभ्यः स्वशक्तितः" । अन्यच्चाह दक्षः । "आर्त्तवाभिप्लुता नारी नैका वेश्मनि संविशेत् । न संसर्गं व्रजेद्भिन्नं स्नात्वा पापात्प्रमुच्यते । अञ्जनाभ्यञ्जने स्नानं प्रवासं दन्तधावनम् । न कुर्यात्सार्त्तवा नारी यद्यप्यामीक्षणं तथा । नखानां कृन्तनं रज्जुतालपत्रादिवीजनम्" । नेत्यनुष्टौ सएव "दध्ने शराबे भुञ्जीत पेयं चाङ्गुलिना पिबेत्" । अथ रजस्वला स्नानशुद्धिविधानम् स्मृतिरत्नावल्यां दक्षः "उदक्ये हे सगोत्रे वा सवर्णे वाऽथवा पुनः । तयोः स्नानं मिथः स्पर्शे पञ्चगव्यं ततः पिबेत् । सवर्णे योनिसम्बन्धे सगोत्रे च रजस्वले । मिथः संस्पृशतोऽमत्या स्नानमात्रेण शुद्धतः । मत्यैकरात्रं नाश्नीतः पञ्चगव्यं पिबेत्ततः । उदक्ययोर्यदान्योन्यमसम्बन्धः सवर्णयोः । स्पृशेदमत्या स्नात्वा च तस्मिन्नाद्यात् शुचिर्भवेत्" । तस्मिन् स्पर्शदिने । "मत्या तु नाऽऽद्यादाशुद्धेर्भुक्त्वा चेत् प्रतिवासरम् । उपोषणं तदा केचिदाहुस्तद्दिनसंख्यया । उपवासेत्वशक्तौ चेत्तत्समं दानमाचरेत् । सम्भाषेतां स्पृशेतां वा ब्राह्मणौ च रजस्वले । आस्नानकालाद्भाषितोद्भुभे मत्या मिथः क्वचित् । स्नात्वोपवासं कुर्यातां पञ्चगव्येन शुध्यतः । एवमभ्यसतश्चाब्दप्रायश्चित्तं समाचरेत् । मत्या रजस्वलान्योन्यं दृष्ट्वा ब्राह्मणी स्पृशेत् । आस्नानकालाद्भाषितोदतिकृच्छ्रं समाचरेत् । चाण्डालं सार्त्तवा नारी संस्पृशेत् भोजनान्तरे । वाग्यता बहिरासीनाऽऽस्नानकालादुपोषणम् । प्राजापत्यञ्चरेत् पश्चात् पञ्चगव्यं ततः पिबेत् । विप्रान् द्वादशसंख्याकान् भोजयित्वा विशुध्यति । पुत्रिणी संस्पृशेन्नोद्वादशुद्धं वा नरं स्त्रियम् । स्नानादर्वाङ् न भुञ्जीत भुक्त्वा कृच्छ्रं समाचरेत् । स्पृष्ट्वोदक्या पञ्चनखान् द्विशफैकशफान् पशून् । अश्वजानि च सर्वाणि नाद्यादा स्नानवासरात्" । परा-

मरः। "रजस्वला यदा दृष्टा शुना अभ्यूकरासनैः। पङ्क्तिरात्रं निराहारा पञ्चगव्येन शुद्ध्यति। उर्द्धं तु त्रिगुणं नाभे र्यद्धे तु त्रिगुणं तथा। चतुर्गुणं स्पृष्टं मूर्द्धि दृष्टेऽन्यत्राव्रता भवेदिति"।

तस्या नैमित्तिकस्नानशुद्धिस्नानप्रकारस्तत्रैव दर्शितः यथा। तत्र नैमित्तिकस्नानप्रकारस्तु स्मृत्यर्थसारे। "स्नाने नैमित्तिके प्राप्ते रजोदर्शने पात्रान्तरितेनोदेन स्नात्वाङ्गिः सिक्तगात्रा साकोपाङ्गं वस्त्रं संनिधीद्यान्यवस्त्रधारणं कृत्वा व्रतस्थेदिति"। अथ शुद्धिस्नानं स्मृत्यर्थसारएव। "रजस्वला चतुर्थेऽहनि शौचं कृत्वा मलं प्रक्षाल्य दन्तधावनपूर्वकं संयते स्नायात्" इति। अथ स्नानानन्तरमपि रजःस्पर्शे विशेषोऽभिधीयते। कात्यायनेन "रजस्वला यदा नारी त्रिरात्रमशुचिर्भवेत्। प्रथमेऽहनि चाण्डालो द्वितीये ब्रह्महावितौ। तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुद्ध्यति। भर्त्तुः शुद्धा चतुर्थेऽह्नि स्नाता नारी रजस्वला। दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुद्ध्यती"त्युक्तत्वाधिक्षिप्तम्। "रागजं रोगजञ्चैव द्वयं कालजं तथा। यद्रागरोगद्रव्योत्थं तद्दुष्टं प्राह भार्गवः। कालजं तु रजःसंज्ञं तस्मात् तत्रैव सा शुचिः"। एषां लक्षणानि। "यत्तीव्रप्रसृतेरुत्थं मेदोदध्याकुलात्तु यत्। तद्रागजमिति प्रोक्तं प्रजोर्द्वदशसङ्गमम्। रोगेण यद्रजः स्त्रीणामन्यत्रं संप्रवर्त्तते। नाशुचिः स्त्री ततस्तेन यतो वैकारिकं मलम्। व्यन्तादिदोषवैषम्यादवलम्बं प्रवर्त्तते। रोगजं तत्समुद्दिष्टमथ द्रव्यजमुच्यते। द्रव्यजं धातुवैषम्यश्चेतद्द्रव्योपभोगजमिति"। "आरभ्य चार्त्तवदिनादेकविंशतिवासरे। मासादूर्द्धं रजोयत् स्यात्तत्कालजमुदाहृतम्। रजस्वला यदा नारी पुनरेव रजस्वला। सा त्रिंशतिदिनादूर्द्धं त्रिरात्रमशुचिर्भवेत्"। ततः पूर्वं तु "रजस्वला यदि स्नाता पुनरेव रजस्वला। अष्टादशदिनादर्वागशुचित्वं न विद्यते। एकोनविंशतेरर्वागेकाहं स्यात् ततोऽह्नकम्। विंशत्प्रभृत्युत्तरेषु त्रिरात्रमशुचिर्भवेदिति"। काश्यपस्तु। 'रजस्वला सती नारी पुनरेव रजस्वला। अष्टादशाहात् प्राग्यापि अशुचिः स्यात्त्रिरात्रकम्। त्रयोदशदिनादूर्द्धं रजसा मुच्यते यदा। अष्टादशाहात् प्राग्यापि त्रिरात्रमिति निश्चयः। एकादश्येत्यहोरात्रं त्रिरात्रं द्वादशेऽहनि'। उर्द्धं त्रिरात्रं विज्ञेयमिति कुरुञ्जिचोदितमित्यादि' परस्परविरुद्धवचनम् 'जातिगुणवयोऽवस्थादेशभेदेन व्यवस्थापनीयम्'। स्नानकालोत्तरोत्तरत्वेन व्यवस्थेति रघु०। रजःकालाज्ञाने प्रजापतिराह "अविज्ञाते मले सा च सलवहसना यदि। ततं मेहेषु जुष्टं स्याच्छुद्धिस्तस्याः त्रिरात्रतः। रजः प्राप्तकालसंदेहेऽपि स एवाह। 'निःसंदेहे परिज्ञाने चार्त्तवे शुद्धिकारणम्। संदेहजाते स्नानं स्यादित्युवाच प्रजापतिरिति'। अथ रात्रौ रजोदर्शने विशेषः। "अर्द्धरात्रपर्यन्तं पूर्वदिनमित्यपरे परदिनगणना वा त्रिभागाया रात्रेर्भागद्वयं पूर्वदिनान्तर्गतमित्यन्ये। सूर्योदयावधिपूर्वदिनमित्यपरे। तदाह काश्यपः। 'उदिते तु यदा सूर्ये नारीणां दृश्यते रजः। जनयं वा विपत्तिर्वा यस्याहस्तस्य शर्वरी। अर्द्धरात्रावधिः कालः सूतकादौ विधीयते। रात्रिं कृत्वोत्त्रिभागां तु द्वौ भागौ पूर्वगामिनौ। उत्तमोऽयः प्रभातेन दुष्यते सूतसूतके। रात्रावेव सुतत्यक्ते सूते रजसि सूतके। पूर्वमेव दिनं पाद्यं यावदभ्युदितेरविरिति"। अत्रापि देशाचारादिना व्यवस्था द्रष्टव्या। अथ रजस्वलायाः ज्वरादिरोगसंभवे शुद्धिविधानं स्मृत्यर्थसारे। "रजस्वलां ज्वरितां चतुर्थेऽहनि सचेलनवगाह्याप्लाव्य दशकृत्वोद्वादश कृत्वो वाप्या तां स्पृष्टाचमेदिति"। उशनापि "ज्वराभिभूता या नारी रजसापि परिप्लुता। कथं तस्या भवेच्छौचं शुद्धिः स्यात् केन कर्मणा?। चतुर्थेऽहनि संप्राप्ते स्नापयेदन्या तु तां स्त्रियम्। सा सचेलावगाह्याप: स्नात्वा स्नात्वा पुनः स्पृशेत्। दशद्वादशकृत्वो वा आचामेच्च पुनः पुनः। अन्ते च वाससां त्यागात्ततः शुद्धा भवेत्तु सा। दत्वा च्छाया ततोदानं द्रव्याद्येन विशुध्यति। ज्ञातराणां तु सर्वेषामेवं शुद्धिर्विधीयत" इति। अथोदक्यास्पृष्टानां चेतनानां सचेलं स्नानम् अचेतनपीठादीनां प्रक्षालनं, ततोदक्यादिस्पृष्टाचेतनस्पर्शे आचमनम् "उदक्याऽशुचिभिः स्नायाच्च स्पृष्टैरुपस्पर्शेदिति" शातातपवचनात् उदक्यादिस्पृष्टचेतनस्पर्शे तु द्वितीयस्यापि स्नानमेव यथाह मनुः "दिवाकीर्त्तिमुदक्यां च पतितं सूतिकां तथा। अवेक्षेतस्पर्शनं चैव स्पृष्ट्वा स्नानेन शुद्ध्यति" इतीयस्य स्नानमाचमनं यथाह संवर्त्तः "तत्स्पर्शिनं स्पृशेद्दृश्यस्तु स्नानं तस्य विधीयते। अदृश्यमाचमनं प्रोक्षणं द्रव्याणां प्रोक्षणं तथा" एतदतिविषयं बुद्धिपूर्वस्पर्शे तु द्वितीयस्यापि स्नानमेव "पतितचण्डालसूतिकोदक्याऽवस्पर्शितस्पर्शनेऽचेलस्पर्शनाच्छुद्धिरिति" गौतमस्मरणात्। चतुर्थस्याचमनं यथाह देवलः "उप-

स्पृश्यागुचिस्पृष्टं तृतीयं चापि मानवः । हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुद्ध्यति" अशुद्धस्योदकादिस्पर्शे तु देवलः "अशुद्धान् स्वयमप्येतानशुद्धस्तु यदि स्पृशेत् । स शुध्यत्युपवासेन तथा कृच्छ्रेण वा पुनः । श्राद्धादिस्पर्शे तूपवासःकृच्छ्रंस्तु स्पर्शादिके" इति । अधिकमार्त्तण्डशब्दे ८०८पृष्ठे उक्तम् । [प्रपञ्च ।

उदगद्रि उदगुत्तरस्यामद्रिः । हिमाचले । उदक्पर्वतादयो-

उदगयन न० उदक् उदीच्यामयनम् । १उत्तरायणे । ७त० । माघादिके मासषट्के "उदगयने आपूर्य्यमाणे पक्षे कल्याणे नक्षत्रे चौलकर्म्मोपनयनगोदानविवाहा" आश्व० गृ० १,४,१, "अहस्तावोदगयनं रात्रिः स्याद्दक्षिणायनम्" मनुः । उत्तरायणशब्दे ११०४पृ० विवृतिः ।

उदग्दशा न० उदक् उत्तरा दशा यस्य । उत्तराग्रे वस्त्रे "उत्तीर्य्यान्यानि वासांसि परिधाय सकृदेनान्यापीद्योदग्दशानि विद्वज्ज्ञासत आनक्षत्रदर्शनात्" आ० श्रौ० ४,४,१०, "उदग्दशानि उदग्गानि" नारा० भ० । "अथ वासो द्विगुणं वा चतुर्गुणं वा प्राग्दशं वोदग्दशं वोपसृजति" शत० ब्रा० ३,२,२,६, [ऊर्द्धभूमिके देशे जङ्घा०

उदग्भूम त्रि० उदक् उन्नता भूमिर्यस्य अच् समा० । उत्-

उदग्र त्रि० उद्गतमग्रं यस्य । १ऊर्द्धे उन्नते २दीर्घे "हरिन्मणिश्यामसदग्रविग्रहः" किरा० "नयन् मधुच्छिदः शैलसदृग्रदशनांशुभिः" "आक्रम्य संस्थितसदग्रविशालवक्षम्" माघः "अवलिनाथोऽयसदग्रबाहुः" "संदधे दृग्रसदृग्यतारकाम्" "शतात् किल त्रायत इत्युदग्र" रघुः । "शैलोदग्रे राजशब्दे श्रृंगे च" "सन्नक्तलोदग्यतरप्रभावः" "आविष्कृतोदग्यतरप्रभावम्" रघुः । ३उन्नते च । "मदोदग्रा ककुद्मन्तः" रघुः । [उन्नतदन्ते

उदग्रदत् त्रि० उदग्रा दन्ता यस्य दन्तादेशः स्त्रियां ङीप् ।

उदग्राभ पु० उदकं भक्षयति यक्ष-अण् उप० स० संज्ञायां सदादेशः वेदे हस्य भः । १मेघे "एवा पवस्व मदिरो मदायोदग्राभस्य नमयन् वधस्नैः" ऋ० ९,९७,१५, "उदग्राभसदकग्राक्षिणं मेघम्" भा० लोके तु उदग्राह इत्येव । उदग्रा उन्नता आभायस्य । २मङ्गप्रभे त्रि० ।

उदङ्क पु० उदच्यते उद्धियतेऽत्र उद्+अनच-घञ् । "उदङ्कोऽस्त्रदके" पा०नि०कुः । १धर्म्मभये स्तादिपात्रे (कुपो) तैलोदङ्कः स्तोदङ्कः । उदच्यते आहार्य्यतेऽनेन करणे घञ् । आकर्षसाधने २संदंशे "हृदयोदङ्कसंस्थानं स्तानानामसङ्गिभम्" भट्टिः । ३ऋषिभेदे पु० "अब्रवीन्म उदङ्कः शौल्वायनः" शत० ब्रा० १४,९,१०,४, अस्य हन्दे अहन्दे च उपकारकत्वे गोत्रप्रत्ययस्य वा लुक् । औदङ्कायनाः उदङ्काः ।

उदङ्मुख त्रि० उदक् उत्तरा मुखमस्य । उत्तरमुखे "मण्डपं कारयेत्तत्र प्राङ्मुखं वाप्युदङ्मुखम्" अग्न्याधानप्रकरणे पुरा० "स्तं भुङ्क्ष्वोदङ्मुखः" । "यथाशास्त्रमुदङ्मुखः" । "मूत्रोच्चारसमुत्सर्गं दिवा कुर्य्यादुदङ्मुखः" मनुः । "उदङ्मुखान् प्राङ्मुखान् वा पूर्वाह्णे वै शुचिः शुचीन्" मनुः । "उदङ्मुखःसौऽस्त्रविदस्त्रमन्त्रम्" रघुः । "स्थानादस्मात् सरसनिचुलादुत्पतोदङ्मुखःखम्" मेघ० ।

उदचमस पु० उदकस्य उदकधारणार्थश्चमसः संज्ञायां सदादेशः । उदकस्थापनार्हे चमसरूपे पात्रभेदे "अथान्तरेणोदचमसं निनयति" शत० ब्रा० ७,२,१,१७ । "चतसृषु चतसृषु स्त्रीस्त्रीनुदचमसान्निनयति" कात्या० १७,२,४,

उदच् त्रि० उद्+अनच-क्विप् । १ऊर्द्ध गते उत्तरे २देशे ३अनन्तरे ४काले उत्तरदिग्देशकालवृत्तौ च । ५उत्तरदिशि स्त्री ङीप् अचोऽन्त्योपे उद्यादेशे दीर्घः उदीची "तेनोदीचीं दिशमनु रवेः" मेघ० । ततः अस्त्यर्थे तस्य लुक् । प्रथमापञ्चमीसप्तम्यन्तार्थे वर्त्तमाने दिग्देशकाले अव्य० "अयने हे गतिरुदग् दक्षिणार्कस्य वत्सरः" अमरः "उपवीयथितं यथौ रवेरुदगावृत्तिपथेन नारदः" रघुः "संपूयोत्पुनात्युदगपाभ्याम् पवित्राभ्याम्" "उदग्गग्ने रक्षस्व कुणर्त्त कारयन्ति" सं० त० गोभि० । "प्रागग्रमुदग्रं वा धौतं वस्त्रं प्रसारयेत्" वि० पा० सू० । "आचम्योदक्परावृत्य" मनुः । "तारसिन्धोरुदक्स्थम्" सि० शि० ।

उदज पु० उद्+अज-अच् अभावः । पशुप्रभेदे ।

उदजिन पु० उत्क्रान्तमजिनम् अत्या० स० । चर्म्मातीते निरुदकादि० अस्यान्तोदात्तता ।

उदञ्च पु० उदकं जानाति चा-क संज्ञायाम् उदादेशः । ऋषिभेदे तस्यापत्यम् तिका० फिञ् । औदञ्चायनि तदपत्ये पुंस्त्री० ।

उदञ्च् त्रि० उद+अनच-क्विच् । उदक्शब्दार्थे । भत्वे उदङ्ङ् उदङ् इति भेदः । ततः प्रथमान्तार्थे अस्त्यर्थे तस्य लुक् । उदक् प्रथमान्तार्थे दिग्देशादौ अव्य० "यान् षडुदङ्ङेति तान् मासान्" श्रा० उ० । उदङ् उत्तरस्याम् ।

उदञ्चन न० उद्+अनच-णिच् करणे ल्युट् । १पिधानार्थे पात्रे (ढाकना) । "प्रतिप्रस्थाता संस्रावावनयत्युद्गेतारं चमसेन वोदञ्चनेन वा" शत० ब्रा० ४, ३,५, २१,

"प्रतिप्रस्याता च संस्तावाधवनीयादुद्वेतोदङ्नेन चमसेन वा" कात्या० १०,५,१। भावे ल्युट्। २जर्द्धक्षेपणे। कर्त्तरि ल्यु। ३उत्क्षेपके त्रि०। "सत्पतिर्विश्वासामूधः सधियामुदञ्चनः" ऋ०५,४३,१२। "उदञ्चन जर्द्धसङ्गमयिता" भा०।

उदञ्चित त्रि० उद्-अञ्च्-पूजायां क्त। पूजिते। णिच्-क्त। २जर्द्धगमिते ३उत्क्षिप्ते। हेम०। "उदञ्चिताङ्घ्रिं तदधिशोरुः" भट्टिः।

उदञ्चु त्रि० उद्+अञ्च्-उन्। उद्गतिर्गते। बाहु० अप्यत्रे इञ्। औदञ्चवि तदपत्ये पु० स्त्री०।

उदण्डपाल पु० उद्भिन्नमण्डं पलति गच्छति कारणतया पल-गतौ अण् उप०स०। १मत्स्ये २सर्पे च भेदि० तयोरण्डोद्भेदेन जातत्वात्तथात्वम्। [र्थचि०।

उदद्या स्त्री उद्+अद-बा० यत्। तैलपिपीलिकायां शब्दा-

उदधान पु० उदकं धीयतेऽत्र आधारे ल्युट्। उदादेशः। १कुम्भे २मेघे च।

उदधि पु० उदकानि धीयन्तेऽस्मिन् धा-आधारे कि उदादेशः। १समुद्रे, २घटे च। "उदधेरिव निम्नगायतैः" "चन्द्रोदय इवोदधेः" रघुः। "यैः कृतः सर्व्वभक्षोग्निरपेयश्च महोदधिः" मनुः। समुद्रसामान्यस्येयं संज्ञा तत्तत्पदसमभिव्याहारे तु विशेषस्य बोधः। यथा क्षारोदधिः क्षीरोदधिः सुरोदधिः। ३मेघे च। "क्षुदव सघ्नुरपो दक्षोदधिं भिन्नं" यजु० १८,५४। ४उदकधानकर्त्तरि सूर्य्ये च "संसूर्य्यश्च दिद्युतदुदधिर्निधिः" यजु० २८,२२ सूर्य्यस्य च जलपूर्णाहृताग्निर्नाडीभिर्जलाकर्षणेन तद्धारणात्तथात्वं यथा च तस्याम्बुताधायकत्वम्" तथाऽम्बुतशब्दे ३२३ पृष्ठे उक्तम्।

उदधिक्रा त्रि० उदधिं क्रामति क्रम-क्विप् ङीप्। समुद्रक्रामके।

उदधिमल पु० उदधेर्मल इव। समुद्रफेने राजव०।

उदधिमेखला स्त्री उदधिर्मेखलेव यस्याः। मध्यस्थाने समुद्रवेष्टितायां पृथिव्याम्। भूगोले "भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं जम्बूद्वीपं प्राङ्गराचार्य्यवर्य्याः। अर्द्धं न्यञ्चिन् द्वीपषट्कस्य बाह्ये क्षारक्षीराद्यम्बुधीनां निवेशः" सि०शि० उक्तेः बाह्यार्द्धे एवाम्बुधीनां निवेशात् तेषां पृथिवी मध्यवेष्टकतया मेखलातुल्यत्वम्।

उदधिसुता स्त्री ऐत०। १लक्ष्म्याम् तस्या उदधिजातत्वात् तथात्वम्। उदधितनयादयोऽप्यत्र २चन्द्रे पु०।

उदन् न० उन्द्+कनिन्। उदके। "उदकशब्दादेयोऽयमित्यन्ये अन्यएवायं शब्द इत्यपरे। "धारासर्गेवोदभिर्वुन्दन्ति भूम" ऋ०१,८५,५ "अव क्रन्ना भरते फेनमुदन्" ऋ०१,१०४,२,। उदन् उदनीत्यर्थः परमे व्योमन् इति वत् सप्तम्या लुक् नलोपाभावश्च

उदन्त पु० उद्गतोऽन्तोनिर्णयो यस्मात्। १वार्त्तायाम् इत्तान्ते कृत्यादिकथने,। "श्रुत्वा रामः प्रियोदन्तम्" रघुः "कान्तोदन्तः सुहृदुपनतः सङ्गमात् किञ्चिदूनः" मेघ० "एवंप्रायेण चास्योदन्तेन" काद०। २साधौ, मे स्वार्थे कन्। तत्रैव उद्गतोऽन्तोऽस्य पाक्षवशात् प्रा०व०गतलोपः। ३पाकवशात् प्राप्तान्ने त्रि० "श्रुतमसदिति तदाङ्यस्यु॰दन्तं तर्हि जुह्वयादिति तर्ह्यनोदन्तं कुर्य्यादुप हृ दहेद्यदुदन्तं कुर्य्यादप्रजस्त्वं वै रेत उपदग्धं तस्मात्तोदन्तं कुर्य्यात्" शत०ब्रा०२,३,१,१४, "अधिश्रितं वारुणमुदन्तं मौष्णम्" कात्या० २५,२,३,

उदन्तिका स्त्री उदन्तमुद्वृत्तान्तं करोति उदन्त+णिच्+ण्वुल् टाप् अत इत्वं च। लघौ हारा०।

उदन्य नामधातु अतिगर्द्धनोदकमिच्छति क्यच् निपा० उदन्यति औदन्यीत् उदन्याम्-बभूव आस चकार। उदनिता-उदन्यिता उदन्या।

उदन्या स्त्री अतिगर्द्धेन उदकमिच्छति क्यजन्तात् अ। १पिपासायाम्। "व्यक्षन्नुदन्यां शिशिरैः पयोभिः" भट्टिः वेदे० बा०नयनार्थेऽपि क्यच्। २उदकनयने च "अथयत्रैतत्पुरुषः पिपासतिनाम तेज एव तत्पीतं नयते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येव तत्तेज आचष्ट उदन्येति" छा०उ० यथा च पुरुषस्य पिपासा भवति तद्भाष्ये समर्थितं यथा

"यत्र यस्मिन् काल एतन्नाम पिपासति पातुमिच्छतीति पुरुषो भवति। अशिशिषतीतिवदिदमपि गौण्यैव नाम भवति। इदीक्षतस्याशितस्यान्नस्य नेत्रा आधोऽन्नशुद्धं देहं क्लेदयन्त्यःशिथिलीकुर्व्युरब्भाक्तस्याद्यादि तेजसा न शोष्यन्ते। नितराञ्च तेजसा शोष्यमाणासासु देहभावेन परिणममानासु पातुमिच्छा पुरुषस्य जायते तदा पुरुषः पिपासति नाम तदेतदाह। तेजएव तत्तदा पीतमन्नादि शोषयेद्देहगतलोहितप्राणभावेन नयते परिणमयति। तद्यथा गोनाय इत्यादि समानमेव। तत्तेज आचष्टे लोकः। उदन्येति उदकं नयतीत्युदन्या उदन्येतीति छान्दसम्"। पिपासा च प्राणस्य धर्म्मः यथाह

भा० ति० "बुभुक्षा च पिपासा च प्राणस्थ, मनसः स्मृतौ। शोकमोहौ, शरीरस्थ जन्मस्थ, षड्भयः"। उन्द्: अयम् उदन्य उदकसम्बन्धिनि त्रि० "विश्वा उदन्यया धर्षाधारा उदन्वा इव" ऋ०२,७,२, "उदन्वा उदकसम्बन्धिनी"भा०

उदन्वु त्रि० उदन्य-मत्वर्थातोः उनु। पिपासौ "दृष्णजे न दिव उह्या उदन्वते" ५,५७,१, "हरिं नवं ते अव ता उदन्युवः" ऋ०८,८६,२७, उदन्युवः उदकेच्छावन्तः"भा० उवङ् छान्दसः।

उदन्वत् पु०उदकानि सन्त्यस्मिन् मतुप् उदन्भावः मस्य वः। समुद्रे "उदन्वदभ्रःपरिवीतमूर्त्तिः" भाघः। "नवैरुदन्वानिव चन्द्रपादैः" कुमा० "अवकाशं किलोदन्वान्' ते च प्रादुदन्वन्तं बुबुधे चादिपूरुषः' रघुः। वेदे त्रि०। २उदकयुक्तमात्रे त्रि०" स्त्रियां ङीप्। "उदन्वता परिदीया रथेन' ऋ०५,८३,७,"उदन्वता उदकयुक्तेन रथेन" भा० "उदन्वतीरनुदकाश्च याः" ऋ०७,५४,४, [औदपीत्।

उदप आघाते सौत्रः पर० सक० सेट्। उदपति। औदपीत्

उदपात्र न० उदकपूर्णं पात्रम् उदादेयः। जलपूर्णे पात्रे "भिक्षामप्युदपात्रं वा सकृत्प्राप्य विधिपूर्वकम्" मनुः।

उदपान पु०न० उदकं पीयतेऽस्मिन् पा ल्युट् उदादेयः। कूपसमीपस्थे खाते क्षुद्रजलाधारे। "तड़ागा उदपानानि वाप्यः प्रस्रवणानि च" निर्जलेषु च देशेषु खानयामासुरुत्तमान्। उदपानान्" रामा०। "अल्पवर्षप्रस्रवणोदपानोदकप्रायः" सुश्रु०। ७त०।उदपानसमङ्कः पात्रेसमितादि० ७स०युक्तारोहा०। वाद्युदाहृता।

उदमान पु० "कृत्वा खादःभिर्द्वादशैर्द्वादशपादैव चाढकः। चतुराढ़ यतिकोभाग उदमान उदाहृत"इत्युक्ते मानभेदे।

उदय पु०उद्+इ-अच्। ज्योतिषोक्ते राशेरुदयरूपे लग्ने। आधारे अच्। "यैर्यैस्तु दृश्यते भागान् स तेषामुदयः स्मृतः"इत्युक्तलक्षणे रवेर्द्वियोग्यस्थाने २उदयाचले पूर्व्वपर्व्वते। "उदयाचलमध्यक्षितेन्द्रवधूः" माघः "उदयगिरिनवीनबालमन्दारपुष्पम्" उद्भटः। भावे अच्। २पक्षभदर्शनयोग्यभवने, ४ङदौ, ६उद्भवे ७उत्तमे "आत्मोदयः परग्लानिः' माघः "प्रभातसमयमिव पूर्वदिग्भाग रागानुमेयमितोदयम्" काद०। "नवोदयं भावमिवौषधीनाम्" "निवातनिमितां वेलां चन्द्रोदय इवोदधेः" "उदयमस्तमयञ्च रघूद्वहात्" रघुः। "अपमेषोदय' वर्षमटकुसुमं फलम्"। "यो तु स्वप्नावबोधौ तौ सूतानां प्रलयोदयौ"। कुमा० "उदये सदृशाच्छमुजस्थता"। "आगमैः सदृशारम्भ आरम्भसदृशोदयः"। "प्रस्तुतानुदयापवर्गयोः" रघुः। "शीलाङ्कुरः प्रागुदयादिवाम्भः" कुमा०८उत्कर्षे। "विजितजगच्चयोदयम्' माघः। प्रकाशानुदयश्च स्वाधिष्ठितराशीनामुदयात् "निजनिजोदयलग्नसमुद्गमे सदृशयोऽपि ग्रहेक्षनभःसदाम्" सि० शि०। राशीनां देशभेदेनोदयकालविशेषः सि० शि०। तत्रादौ निरक्षदेशलङ्कादौ तज्ज्ञानसाधनं यथा "एकस्य राशेर्भुक्तौ ज्ञेया या हृयोस्त्रिभस्यापि क्रमेणेतरेषाम्। स्वल्पान्तरालजातिवर्जितानां मूलानि तासां त्रिगुणा २४३८ हृतानि। स्वस्वद्युभौर्व्या विभजेत् फलानां चापान्यधोऽधः परिशोधितानि। क्रमोत्क्रमस्थानि निरक्षदेशे मेषादिकानामुदयासवः स्युः" शि०। "एकस्य राशेर्भुक्तौ ज्ञेयस्त्रयो व्या। हृयोरिति षोड़शी व्या। त्रिभस्येति त्रिज्या। तासां वर्गितानां स्वस्वीयस्वकीयक्रान्तिज्यावर्गैर्वर्जितानां मूलानि त्रिज्याभुक्तिहतानि स्वस्वद्युज्यया विभजेत्। फलानां चापान्यधोऽधः परिशोधितानीति तृतीयात् द्वितीयं द्वितीयात् प्रथमं शोध्यम्। प्रथमं तथाविधमेव। एवं लङ्कोदयासवः स्युः। अत्रोपपत्तिः। अक्षोदक्कतः क्रान्तिवृत्तस्य निर्यक्स्थितत्वात् त्रिभाधि क्षितिज्यन्ते। तद्यथा। मेषान्तस्थ ज्या क्रान्तिवृत्ते कर्णः। तत्क्रान्तिज्याभुजाक्षितिजे भुजः। तद्गतान्तरपदं मेषान्तेऽक्षोरालवृत्ते कोटिः। एवं राशित्रयस्थ ज्या कर्णः। तत्क्रान्तिज्या भुजः। तद्गतान्तरपदं वृषभान्तेऽक्षोरालवृत्ते कोटिः। एवं त्रिराशिज्या कर्णः परमक्रान्तिज्या भुजः। परमात्यद्युज्या कोटिः। एताः कोटयश्चापकरणार्थं त्रिज्याहृते परिणामिता त्रिज्यागुणाः स्वस्वद्युज्यया भक्ताश्चापानि। प्रथमं मेषोदयस्य चापः। द्वितीयं राशित्रयस्य। तृतीयं राशित्रयस्य। अतो विलोमितानीत्युपपन्नम्। इदानीं प्रकारान्तरेणाह' ग्रहि०। "कोटादिराश्यन्तजकोटिजीवाघ्नित्रिज्या २४३८ गुणाः स्वस्वदिनक्षयघ्नाः। चापीकृताः प्राग्वदधो विशुद्धाः कोटादिकानामुदयासवो वा"शि०।"कोटादिराश्यन्तजकोटिजीवाघ्ना एकद्वित्रिराशिज्या भवन्ति ।७१८।२८७७ ।२४३८। एताश्चिज्यया गुणाः स्वस्वदिनक्षयया भक्ता इति। मेष वृषभान्ते द्युज्या मेष कोटान्तेऽपि २२१८। मेषान्तेद्युज्या मेष त्रिंशान्तेऽपि २२६६। वृषान्ते द्युज्या त्रि-

ज्यैर ३४२८। आभिस्ता भाज्याः। फलानां चापान्यधोऽधः शुद्धानि कीटादीनामुदयासवः स्युर्निरक्षे वा। त एव मिथुनदृषभमेषाणामित्यर्थः। अत्रोपपत्तिः। क्रान्तिवृत्ते वसन्ताद्ये सप्तसंक्रमणं वृत्वा द्वितीयमपं कीटान्ते निबध्यते तस्य सप्तस्यार्द्धमेकाराशेर्ज्या भवति। एवं सप्तसंक्रमणं मेषान्ते वृत्वा द्वितीयं सिंहान्ते तस्य सप्तस्यार्धं राशित्रयस्य ज्या भवति। एवं मेषवृषादौ वृश्चकस्यार्धं त्रिज्या। एता एव वृषभान्तमेषान्तमीनान्ताहोरात्रवृत्तानां ज्या भवन्ति यतस्तत्संपातेषु क्रान्तिवृत्ते सप्तराशि वृश्चान्ते। अतस्तासां त्रिज्यावृत्तपरिगतानां चापान्तराणि कीटादिप्राणासुदया भवन्तीति गोले प्रदर्शयेत्। इदानीं पुनः प्रकारान्तरेणाह प्रभि०। "मेषादिजीवास्त्रिघ्नहृद्युनौर्व्या २१४१ शुद्धा हृताः स्वस्वदिनज्यया वा। चापीकृताः प्राग्वदधो विशुद्धा मेषादिकानामुदयासवो वा" शि०। स्पष्टार्थमिदम्, अस्योपपत्तिर्गोले कथितैव सुगमा च अथ निरक्षदेशानयनमाह" प्रभि०।' "तेऽभ्राद्रिभूपा १६७० गुणगोऽद्रिचन्द्राः १७८२ सप्ताग्निनन्देन्दुमिता १६३७ अर्धते। क्रमोत्क्रमस्थाश्चरखण्डकैः स्वैः क्रमोत्क्रमस्थैव विहीनयुक्ताः। मेषादिपक्षासुदवाः स्वदेशे तुलादितोऽमी च विलोमसंस्थाः। उदेति राशिः समयेन येन तल्लग्नमोऽसं समुपैति तेन" शि०। "अत्र धनुःकरणे जीवानां स्थूलत्वाद्द्वितीयतृतीयावुदयौ नार्थैः सम्यक्पठितौ। अत्र प्रथमप्रकारेण प्रथम उदयो गृह्यते। द्वितीयादिप्रकारेण द्वितीयतृतीयौ। शेषं स्पष्टार्थम्। अत्रोपपत्तिः। निरक्षदेशार्कोदययोरन्तरं चरम्। निरक्षे स्वदेशे च मेषादिः समुदेति। मेषान्त आदौ क्षितिजे, तत उन्मण्डले लगति। अतश्चरखण्डोनो मेषोदयः स्वदेशोदयो भवति। एवं वृषमिथुनयोरपि। कर्कादौ तु चरखण्डानामुपचीयमानत्वान्न तानि परिणमन्ति। तुलादौ तूनखण्डस्याधःस्थितत्वाच्चरखण्डानि धनं भवन्ति। मकरादौ तु चरखण्डनामपचीयमानत्वाद्ऋणं परिणमन्ति। इत्यादि गोले सम्यग्विलोक्यते" प्रभि०। "चरखण्डाश्च तत्रैवोक्ता यथा "स्वदेशजैस्तच्चरखण्डकैर्वा लघुज्यकावद्गविदोक्षिभागात्। मेषादिराशित्रितयस्य यानि चराण्यधोऽधः परिशोधितानि। तानि स्वदेशे चरखण्डकानि दिङ्नागसत्र्यंशगुणै१०।८। २/२० र्विनिघ्नी। पलप्रभा तोयपलात्मकानि स्थूलानि वा स्युश्चरखण्डकानि। स्थूलं चरं चाम्बुपलात्मकं तैस्तत्प्राणचापं यदि वापि सूक्ष्मम्" शि०। "अथ वा तच्चरं वक्ष्यमाणैस्त्रिभिः खण्डकैः स्वदेशजैर्लघुज्याप्रकारेणांशमितदशाग्रमित्यादिना साध्यम्। कथादित्याह। रविदोःक्षिभागात्। अर्कस्य सायनांशस्य यो भुजस्तस्य यल्लंबांशखण्डादंशमितदशाग्रमित्यादिना। अथ खण्डकानि। मेषादिराशित्रयस्येत्यादि सुगमम्। अथ स्थूलखण्डकैर्यच्चरं तत् स्थूलं पानीयपलात्मकं भवति। तत् षड्गुणं प्राणात्मकम्। तस्माद्यदि धनुः क्रियते तदा सूक्ष्मं चरार्धं स्यात्। अत्रोपपत्तिः। एकमङ्गुलं पलभां प्रकल्प्य एकद्वित्रिराशीनां पृथक् चराण्यानीय तानि षड्भिर्विभज्य पानीयपलात्मकानि कृत्वा यावदधोऽधो विशोध्यन्ते तावद्दिङ्नागसत्र्यंशगुणा उत्पद्यन्ते। अतोऽनुपातः। यद्येकाङ्गुलया पलभयैतानि चरखण्डानि तदेष्टया किमिति। एवं चरखण्डानि स्युः। परं तानि ज्यात्मकानि यतः पूर्वं स्वल्पत्वात् धनुर्नोत्पन्नम्। अत एव तत्प्राणचापं यदि वापि सूक्ष्ममित्युक्तम्। खण्डकैश्चरकरणे लघुज्यासाधनवद्वासना। तत्र लघुज्याखण्डकानि नव चरखण्डकानि त्रीणि परमे राशित्रये भुजे यथा त्रीणि लभ्यन्ते। तदर्धं रविदोःक्षिभागादित्युक्तम्" प्रभि०।

गोलाध्याये च उदयान्तरकर्मोपपत्तियुक्तं देशान्तरसंस्कृतं स्पष्टतया तत्साधनमुक्तं यथा "अक्षगुणो मध्यमसावनेन लघुत्वात् स्फुटसावनस्य। तदुत्खेटा उदयान्तराख्यकर्मोद्भवेनोनयुताः फलेन। लङ्कोदये स्युर्न कृतास्तदार्द्धयतेऽन्तरन्नक्षलमल्पकत्वं" शि०। योऽयमक्षगुण आनीतः स मध्यमसावनेनैव कृतः? स्फुटसावनस्य चलत्वात् तदाविधेनानुपातेन स्फुटो नावातीत्यर्थः युगादेरारभ्य वर्तमानरविवर्षादेः प्राक् यावान् मध्यमसावनस्तावानेव स्फुटसावनः स्यात् किन्तु रविवर्षादेरूर्ध्वं यावान् मध्यमसावनस्तावान्न स्फुटः अतस्तदुत्खेटा उदयान्तराख्यकर्मोद्भवेन फलेनोनयुताः सन्तो लङ्कोदये स्युर्नान्यथा लङ्कायां भास्करोदये मध्या इति यदुक्तं तदसत्। अधोदयान्तरकर्माह" प्रभि० "मध्यार्कभुक्त्याप्तयवोनि रूपे ये ये च मध्यार्ककलासमानाः। तदन्तरं यत् स्फुटमध्ययोस्तत् द्युनिशयोः खाद्विवरं गतिघ्नम्। हृतं द्युरात्रासुभिराप्तलिप्ता हीनाग्रहाधेदसवोऽल्पकाः स्युः। तदन्यथाद्यास्तु निजोदयैर्ये द्युक्षस्तु पूर्वं विहितं तदानीम्। कृतं तथा स्याच्चरकर्मनित्यं कर्म ग्रहाणासुदयास्तराख्यम्" शि०। "सायनांशेन रविणा मेषादेरारभ्य ये भुक्तराशयस्तत्संबन्धिनो ये निरक्षोदयासवो गगनसूधरघट्क-

चन्द्राः १९७०। इत्थादयस्तेषामैक्यं कृत्वा भुज्यमान राशेर्यं भुक्तभागास्तांस्तदुदयासुभिः सङ्गुण्य त्रिंशता ३० विभज्य लब्धासवोऽपि तत्र शेषाः एवं मध्यार्कभुक्तासवः स्युः। भदिनात्तादूर्ध्वं तावत्सख्यके काले लङ्कायां मध्यमसूर्योदयः। तत्काले हि यष्टाः साध्याः अथ चार्कर्गणेन ये सिद्धास्ते मध्यमार्कवशमितेऽस्यात्मके काले भदिनात्तादूर्ध्वं जाताः, अतोऽस्मिन् कलानां च यदन्तरं तेनार्कोदयोऽन्तरितः। अतस्तदुदयान्तरास्यं कर्मोच्यते तैरन्तरासुभिर्यद्भगतिं सङ्गुण्यार्कसावनाक्षोरात्रासुभि २१६५९विभज्य लब्धकला यद्दे ऋणं कार्याः यदि कलाभ्योऽसवोऽल्पकाः स्युः, अन्यथा धनं,यदि तु स्वदेशोदयं मध्यमार्कभुक्तानस्फुटानीयेदं कर्म कृतं तदौदयिकानां यष्टाणां चरकर्मापि कृतं स्यात् यदि तु स्फुटार्कभुक्तानस्फुटान् स्वोदयासुभिरानीयेदं कर्म कृतं तदोदयान्तरभुजान्तर चरकर्माणि त्रीण्यपि कृतानि स्युः तर्हि कथमिदमुदयान्तरास्यं कर्माद्यैर्न कृतं तदाह यतोऽन्तरं तच्चलमल्पकञ्च तेन चरणान्तेषु चतुर्ष्वपि अन्तराभावः तन्नाध्येष्यन्तरस्य इहिलयो। इदानीं देशान्तरस्वरूपमाह'प्रमि०"देऽनेन लङ्कोदयकालिकास्ते देशान्तरेण स्वपुरोदये स्युः। देशान्तरं प्राग्यरं तदाद्यद्याभ्योत्तरं तद्धरसंज्ञकम्" शि०। "ये उदयान्तरकर्मणा लङ्कायामौदयिका यष्टा जातास्ते देशान्तरकर्मणा स्वपुरौदयिकाः स्युः। तच्च देशान्तरं द्विविधम् एकं पूर्वापर,मन्यद्याम्योत्तरं तद्धरसंज्ञकं तत्र तावत्पूर्वापरमाह" प्रमि०। "यल्लङ्कोज्जयिनीपुरोपरिकुरुक्षेत्रादिदेशान् स्पृशत् स्वतं मेरुगतं ध्रुवैर्विगदिता सा मध्यरेखा भुवः। यादौ प्रागुदयोऽपरत्र विषये पश्चाद्भि रेखोदयात् स्वात्तस्मात् क्रियते तदन्तरभवं खेटेष्वृणं स्वं फलम्" शि०।"लङ्काया मेरुपर्यन्तं नीयमाना या रेखा उज्जयिनीकुरुक्षेत्रादिदेशान् स्पृशन्ती याति सा मध्यरेखेत्युच्यते। रेखायां यदार्कोदय स्तत्कालात् पूर्वमेव पूर्वदेशे भवति रेखोदयकालादनन्तरं पश्चिमदेशेऽर्कोदयः। तदन्तरकालस्वदन्तरयोजनैः स्वदभूवेदनाद्यानुपातेन ज्ञायते यदि स्फुटपरिधियोजनैः षष्टि ६० घटिका लभ्यन्ते तदा रेखास्वपुरयोरन्तरयोजनैः किमितीति त्रैराशिकेन देशान्तरघटिकालभ्यन्ते मध्यगत्याऽथ चानीता नाद्यास्त्रिरनुपातः यदि घटीषष्ट्या यष्टस्य गतिकला लभ्यन्ते तदा देशान्तरघटीभिः किमिति अथ योजनैरेवाऽनुपातः। यदि स्फुटपरिधियोजनैर्गतिः प्राप्यते तदा देशान्तरयोजनैः किमिति फलं कलाः प्राग्वत्, यतस्तादादुदयः पश्चाद्भवं यतस्तत रेखोदयादनन्तरमर्कोदय इत्युपपन्नम्। इदानीं भूगोले स्फुटपरिधिप्रदेशं स्फुटतानुपातं चाह'प्रमि० "स्वदेशमेर्वन्तरयोजनैर्यल्लम्बांशजैर्मेरुगिरेः समन्तात्। हृत्तं स्फुटो भूपरिधिर्यतः स्यात्त्रिज्याहृतो लम्बगुणः कृतोऽस्मात्" शि०"स्वपुरस्य मेरुगर्भस्य चान्तरे यावन्ति योजनानि तावन्ति लम्बांशजानि, यतो निरक्षदेशस्वपुरान्तरयोजनान्यक्षांशजानि, भागेभ्यो योजनानि च व्यस्तमित्युपपद्यत इत्यर्थः; तैर्लम्बांशजैर्योजनैर्मेरुगिरेः समन्ताद्यद्वृत्तक्षेत्रमद्यते स स्फुटो भूपरिधिः; यो मध्यपरिधिः पठितः स निरक्षदेशोपरि। अयन्तु स्वपुरोपरि,अतः किञ्चिन्न्यूनो भवति अथ तदानयनं मध्यपरिधेरभीष्टत्रिज्याहतं व्यासार्धं प्रकल्प्य तस्मिन् व्यासार्धे स्वपुरे यावती लम्बज्या तावत् स्फुटपरिधेर्व्यासार्धं भवितुमर्हति अतस्तेन त्रैराशिकं यदि त्रिज्याव्यासार्धे मध्यमः परिधिर्लभ्यते तदा लम्बज्यामिते कः इति फलं स्फुटपरिधिरित्युपपन्नम्"प्रमिताक्षरा।

इष्टकाले लग्नाद्यानयनम् अत्रमध्ये ५।६।७ लङ्कोदयप्रमाणदर्शनपूर्वकसङ्गत्याद्यम् विशेषस्तु शि०शि०। "तात्कालिकार्केण युतस्य राशेरभुक्तभागैर्गुणितोदयात् स्यात्। भोग्यासवः खाग्निहृतादवाप्ता भुक्तासवो भुक्तहरैः स्फुरेवम्। इष्टासुसङ्गादपनीय भोग्यांसदयतो राश्युदयांश्च शेषम्। स्वगुणैर्हृत् खाग्निगुणं लवाद्यमगुरुपूर्वैर्भवनैरजाद्यैः। युक्तं तनुः स्यादनयनांशकोनमिष्टासवोऽल्पा यदि भोग्यजेभ्यः। त्रिंशद्गुणाः स्वोदयभाजितास्ते लब्धांशयुक्तो रविरेव लग्नम्"शि०। "यस्मिन् काले लग्नं ज्ञेयं तस्मिन् काले तात्कालिकोऽर्कः सायनांशः कार्यः। तेनार्केण युतस्य राशेर्यं भोग्यांशास्तैस्तदुदयासवो गुणास्त्रिंशता भाज्याः। ये लब्धास्ते भोग्यासवः स्युः। अथेष्टासुभ्यो भोग्यासून् विशोध्य तदग्रतो यावन्त उदयाः शुध्यन्ति तावन्तः शोध्याः। ततः शेषात् खराभगुणादशुद्धोदयेन भक्ताद्यल्लब्धमंशाद्यं तदशुद्धोदयात् पूर्वं यावन्तो मेषाद्या उदयास्तावद्भी राशिभिर्युतमयनांशैश्च रहितं तल्लग्नं स्यात्। अथ यदीष्टासवो भोग्येभ्योऽल्पः तदेष्टासवस्त्रिंशद्गुणास्तदुदयासुभिर्भाज्याः। फलेनांशाद्येन युतो रविर्लग्नं स्यात्" प्रमि० लग्नांशादिना कालानयनं तत्रैव दर्शितं यथा "अर्कस्य भोग्यासुभुक्तयुक्तो मध्योदयाढ्यः समयो विलग्नात्। यदैकभे लग्नरवी तदा तद्भागान्तरंस्वोदयखाग्निभागः। लग्नेऽल्पके तु द्युनिशात् स शोध्यस्तात्कालि-

कार्कादसञ्च कालः । चेत् सावनाः प्रद्युरभीष्टनाड्यस्तदैव तात्कालिकतिग्मरश्मेः ॥ आर्क्षी यदेष्टघटिका विलग्नं कालश्च तल्लौदयिकात् सञ्च" गि०।"अर्कस्य प्राग्वद्भोग्यकालः साध्यः । लग्नस्य सावनांशस्य भुक्तकालः साध्यः तयोरैक्यमर्कोदयतो लग्नपर्यन्तं ये मध्ये राशयस्तेषामुदयाश्च ये भोग्यास्तावैव । एवं लग्नात् कालो भवति । अत्र यदैकराशौ लग्नार्कौ भवतस्तदा तयोरन्तरांशैः स्वोदयं सङ्गुण्य त्रिंशता भजेत् फलमिष्टकालः स्यात् । परं यद्यर्काल्लग्नमधिकम् । यद्यल्पं तदा सकालोऽहोरात्राच्छोध्यः । शेषमिष्टकालः स्यात् । अत्रेष्टकालसाधनेऽर्कस्य भोग्यमौदयिकादेव क्रियते । यतः कालज्ञानात् तात्कालिकत्वमर्कस्य कार्यम् । अतः स्थूलः काल आयाति । अनेन कालेन तात्कालिकमर्कं कृत्वा शुद्धः कालः साधयितुं शक्यते । परं यदि प्रद्युः सावनघटिका इष्टाः । एतदुक्तं भवति । उदयानन्तरमेतावतीष्वर्कसावनघटिकासु क्रीदृग् लग्नं भवतीत्येतदभीष्टं तदैव तात्कालिकार्काल्लग्नं साध्यते तदैव च लग्नादसकृत् कालः। यदा पुनरिष्टघटिका आर्क्षीरुदयिकादेवार्काल्लग्नं लग्नात् कालः सञ्च । अस्योपपत्तिः सुगमा। तात्कालिकीकरणकारणता मेव कथिता व्याख्याता च । इदानीं विलोमेन लग्नसाधनमाह" ग्रमि० ।"भुक्तास्तु शुद्धेर्विपरीतलग्नं भुक्तांशमेषाग्रलवोनितोऽर्कः" गि० "यदोदयात् पूर्वघटीषु लग्नमिष्टं तदा शेषास्तुभ्यो विशोध्य तत्कालिकमर्कं कृत्वा तस्य भुक्तासवः साध्यास्तानिष्टासुभ्यो यावन्त उदया विशुध्यन्ति तावतो विलोमेन विशोधयेत् । शेषात् खरामगुणितादविशुद्धो द्रवभक्ताद् ये लब्धा व्यंशास्तैस्तथार्कभुक्तांशैश्च तथा विशुद्धोदयतुल्यैरांशिभिश्चोनोक्तो रविर्लग्नं भवति" ग्रमि० । होराद्रेक्काणोदयसाधनमपि तत्रैव यथा "लङ्कोदयाः स्थूलत्वात् स्थूला उदया भवन्ति रात्रीणाम् । सूक्ष्मार्थी होरार्धं कुर्याद्रेक्काणकानां वा" गि०"यथा रात्र्युदयाः साधितास्तथा होरोदया अपि साध्याः । तद्यथा पञ्चदशादिपञ्चदशभागोत्तरभागानां ज्या होराज्याः षड् भवन्ति । ताभिर्भिन्नान्त्यज्या २१४१ पृथक् पृथग्गुणा स्वस्वद्युज्यया भाज्या। फलानां धनंऋणोऽधः शुद्धानि । यतः पञ्चमं पञ्चभाज्यतुर्थ-मित्यादि । शेषाणि होरोदयासवो भवन्ति । एवं दशादिदशोत्तरभागैरेक्काणोदया भवन्ति । ते च नव । तथा होरांशाश्च षट् चराणि । ऋणधोऽधः शुद्धानि तानि तेषां चरखण्डानि तैः क्रमोत्क्रमस्थैः क्रमोत्क्रमस्था उनयुताः सन्तः स्वदेशे होरोदया भवन्ति। मेषादीनां द्वादश, ते च व्यस्तास्तुलादीनाम् । एवं चतुर्विंशतिः२४। एवमेव द्रेक्काणोदयाः षट्त्रिंशत् । तथा चार्कस्य सावनांशस्य भागाः पञ्चदश १५ हृता गताः होराः स्युः । शेषांशास्ते भुक्तास्ते पञ्चदशघ्नाः शुद्धा भोग्यांशाः स्युः । भोग्यांशघ्नाः स्वदेशहोरोदयः पञ्चदशहृताः फलं भोग्यासवः स्फुटास्तानिष्टासुभ्यो विशोध्य तदगुतो होरोदयांश्च शोधयेत् ॥ शेषं पञ्चदशगुणमशुद्धहोरोदयेन भजेत् फलं लवाः । अशुद्धपूर्वाणां होरोदयानां संख्यया गुणितैः पञ्चदशभिर्युताः सन्तो लग्नस्यांशा भवन्ति । एवं लग्नात् कालसाधनेऽपि । एतेन द्रक्काणोदयैरपि लग्नसाधनम् । तत्र पञ्चदशस्थाने दश १० गुणने भजने च कल्प्याः । एवं होरोदयैर्द्रेक्काणोदयैर्वा साधितं लग्नादिकसदवान्तराख्यं कर्म च सूक्ष्मं भवति अन्यथा स्थूलम्" ग्रमि० ।

यदाणामुदयान्तरकर्म तल्लोक्तम् "भानोः फलं गुणितमर्कोद्भुतस्य राशेर्यौदयेन खखनागमही १८०० विभक्तम् । गत्वा यदस्य गुणितं द्युनिशासु भक्तं खर्णं यदेऽर्कवदिदं तु भुजान्तराख्यम्" गि० । "अर्कस्य यद्भुजफलं यस्मिन् राशौ रविर्वर्तते तस्य राशेः सम्बन्धी यो निरक्षोदयस्तेन तद्गुणितराशिकलाभि १८०० र्भक्तं पुनर्यद्गत्वा गुणितमहोरात्रासुभि २१६५६ र्भक्तं यत् फलं तद्गुणेऽर्कवत् धनर्णं कार्यम् । यदर्कस्य भुजफलम् धनं, तदा सूर्यस्यान्येषां च धनम् । यदि ऋणं तदा ऋणमित्यर्थः । अत्रोपपत्तिः । ये मध्यमार्कौदयिकास्ते स्फुटार्कौदयिकाः क्रियन्ते । तत्रार्कफलस्यासुकरणायानुपातः । यदि राशिकलाः१८०० निरक्षोदयासुभिरेतच्छन्ति तदा फलकलाः कतिभिरिति । लब्धं भास्वत्फलेत्या चरसंज्ञा भवन्ति । अथान्योऽनुपातः । यदि द्युनिशासुभिर्गतिकला लभ्यन्ते तदैभिः किमिति । ताः कला ऋणं धनं च यतो मध्यमार्कौदयात् प्राक् स्फुटार्कोदयः स्यादतः तत्फलं खं यतोऽनन्तरमित्युपपन्नम् । इदानीमुदयान्तरमाह"ग्रमि०।"शुक्रायनांशयुतं तु मध्यमस्य भुक्तासवोऽर्कस्य निरक्षदेशे । मेषादिभुक्तोदयसंयुता ये स्वायनांशान्वितमध्यभानोः । लिप्तागणस्तद्विवरेण निघ्नो गतिर्गुणस्य द्युनिशासुभक्ता । खर्णं यदे चेदसवोऽधिकोना इदं यदाणासुदयान्तराख्यम्" गि० "मध्यमार्कस्य सायनांशस्य ये राशेर्भुक्तभागास्तैरुदयं

निरक्षदेशीयं संगुण्य लिंगता विभजेत् फलं तस्य राशेर्भुक्तासवः। अथ मेषाद्या येऽर्केण भुक्ता राशयस्तेषां च निरक्षोदयासवस्तत्र योज्यास्ते मेषादिभुक्तोदयासवः स्युः। अथ मध्यमार्कस्य सायनांशस्य कलाः कार्याः। तासां कलानां तेषामसूनां च यदन्तरं तेन यष्टगतिर्गुण्या द्युनिशासुभिर्भाज्या लब्धाः कला यष्टे धनं कार्याः यदि कलाभ्योऽसवोऽधिकाः स्युः, यदि न्यूनास्तदा ऋणम्। अत्रोपपत्तिः। इह यः पूर्वमहर्गणः कृतः समध्यमसावनमानेन स्फुटसावनस्य चलत्वात्। रविमध्यगतिकलातुल्यासुभिः संहिता नाडिकाः षष्टिघटिकाः ६०,५९,८। इदं मध्यममर्कसावनम्। ता गतिकला वैरसुभिरुद्धरन्ति तद्युताः षष्टिघटिकाः स्फुटसावनम्। तच्चलम्। प्रत्यहं गत्यन्यत्वात् प्रतिमासं राश्युदयान्यत्वाच्च। ताडयोऽहर्गणः कर्तुं नायातीति मध्यमः कृतः। तेन सम्यगर्कोदये यदा न भवन्ति कदाचिदर्कोदयात् प्राक् कदाचिदनन्तरम्। अत एव प्रागुक्तम्। "दशगिरः पुरि मध्यमभास्करे क्षितिजसन्निधिगे सति मध्यमः" गि०। इति। अथ स्फुटमध्याहर्गणयोरन्तरानयनम्। मेषादेरारभ्य येऽर्कभुक्ता राशयस्ते वैरसुभिरुद्धरन्ति त एकीकृता। तावत्स्वल्पके काले भदिनान्नादूर्ध्वमहर्गणेन भवितव्यम्। अथ च मेषादिभुक्तकलातुल्येऽन्तरे कृतः। अतोऽसूनां कलानां च यदन्तरं तावद्भिरसुभिरहर्गणोऽन्तरितः। यदा क्षोरात्रासुभिर्गतिर्लभ्यत तदैभिरन्तरासुभिः किमिति। फलं यष्टेषु खं यदासवोऽधिकाः। अन्यथा ऋणमित्येतदुक्तं युक्तमेव"। इदानीं येऽस्योदयान्तरस्य वासनां न बुध्यन्ते तेषां प्रतीत्यर्थमन्यदाह"प्रमि०।"चेत् खोदयैः स्फुटरवेरसवः कृतास्ते विश्लेषिताच्च यदि मध्यरवेः कलाभिः। वाङ्नन्दराख्युदयान्तरकं चराख्यं कर्मत्वयं विहितमौदयिके तदा स्यात्"गि०।"यदि स्फुटरवेः खोदयेन भुक्तासवः कृता मेषादिखोदयैक्य युतास्तेषामसूनां मध्यार्ककलानां च यदन्तरं तेन भुक्तिर्गुणिता द्युनिशासुभिर्भक्ता यद्यसवोऽधिकास्तदा फलं यष्टे खम्। अन्यथा ऋणम्। एवं कृते सति भुजान्तरमुदयान्तरं चराख्यं च कर्मत्वयमपि कृतं स्यादौदयिके यष्टे। इदानीं प्रकारान्तरेणौदयिककर्माह"प्रमि०। "मध्याद्वैरयनभागयुताद्विनिघ्नाद्धोर्ज्या लब्धगतिगुणा खनगाग्नि २७० भक्ता। खर्णं यष्टे युगयुजोः पदयोर्विलिप्ताख्यं स्फुटं खलु भवेदुदयान्तरं वा"गि०। "मध्यनार्कस्य सायनांशस्य द्विगुणितस्य या लघुलग्नखर्कदोर्ज्या तया गुणिता यष्टगतिः खनगयमैः २७० हृता फलं विकलादि यष्टे धनम्। एवं युग्मपदस्थितेऽर्के। अयुग्मपदस्थिते त्वृणम्। अत्रोपपत्तिः। क्रान्तिवृत्तस्य चत्वार्यपि पदानि पृथक् पृथक् पञ्चदशभिः पञ्चदशभिर्घटिकाभिरुद्गच्छन्ति। परं नैकैको राशिः पञ्चभिरत उदयान्तरकर्म पदमध्यं यावदुपचीयते ततोऽपचीयते। अत एव पदान्तरेषु तत्साम्यम्। पदमध्येषु परमता। यदत्र निरक्षोदयैः कर्म दर्शितं तत्साधनबोधार्थम्। तत् स्थूलम् उदयानां स्थूलत्वात्। अत एवार्यं सङ्गादिभिः सूक्ष्मत्वार्थं लङ्कोदयाः पठिताः"। इदमुदयान्तरं कर्म यथा सम्भवति तथोच्यते। मध्यार्कस्य सायनांशस्य दोर्ज्यां द्युज्यां च कृत्वा तया द्युज्यया सा दोर्ज्या भाज्या मिथुनान्तद्युज्यया गुणनीया। तस्या धनुषो येऽसवस्तैर्मध्यार्कस्य सायनांशस्य भुजकला जनाः सन्ति स्फुटा अन्तरासवो भवन्ति। तैरुदयोऽन्तरित इत्यर्थः। एवं पदमध्ये षड्विंशतिः पलानि किञ्चिदधिकानि भवन्ति। तानि ज्याप्रकारेण साधयितुमर्को द्विगुणितः। द्विगुणितस्यार्कस्य यावद्भुजः क्रियते तावत् पदमध्ये राशित्रयं भवति। तद्दोर्ज्यया लब्ध्या षड्विंशत्या चानुपातः। यदि खार्कमितया दोर्ज्या षड्विंशतिर्लभ्यते तदाभीष्टया किमिति। अत्र षड्विंशत्या खार्का अपवर्तिता गुणकस्थाने रूपम्। हरस्थाने साधांशत्वारः। फलं पानीयपलानि। पुनरन्योऽनुपातः। यदि पानीयपलषष्ट्या गतिकलातुल्या विकला लभ्यन्ते तदैभिः किमिति। पूर्वं लब्धी दोर्ज्या गुणः साधांशत्वरो हरः। इदानीं षष्टिर्हरः, अतो यष्टगतेर्दोर्ज्या गुणः। हरस्यार्धांतो हरः खनगाग्निः २७०। इत्युपपन्नम्। ओजपदेऽसवः कलाभ्य ऊना एव भवन्त्यतस्तत्र ऋणम्। युग्मपदे त्वधिका अतस्तत्र धनम्"प्रमि०

यष्टाणां लग्नाद्दृश्यत्वोन्नत्वे, चन्द्रे विशेषस्य च निरूपणं तत्रैव "निशीथलग्नादुदयास्तलग्ने न्यूनाधिके यस्य खगः सदृश्यः। दिनेऽपि चन्द्रो रविसन्निधानाच्छशं गतयेत् सति दर्शने भा"गि०। "दिनकरेऽस्तंगते यदिष्टकाले लग्नं तदिष्टलग्नम्। तस्माद्युयष्टेरुदयास्तलग्नं न्यूनमस्ताख्यं चाधिकं यदि भवति तदा यष्टेर्दृश्यः स्तोऽन्यथा चेददृश्यः। एवं सत्यर्के सति चन्द्रो दिवसेऽपि दृश्यः। यदि यष्टेर्दृश्यत्वं तदा यष्टेश्च छाया साध्या" प्रमि०।

तारायष्टीनामुदयास्तसमयोन्नतिज्ञानं यथा सू०सि० रङ्गना०।"अथोदयास्तसमययोः परिज्ञानं प्रकीर्त्यते।दिवा-

करकराक्रान्तमूर्त्तीनामल्पतेजसाम्" सू०। "अथ नक्षत्रग्रहयुत्यधिकारानन्तरम्। सूर्यकिरणाभिभूता मूर्त्तिर्बिम्बं येषां तेषां चन्द्रादिषड्ग्रहाणां नक्षत्राणां च। अतएवाल्पतेजसां न्यूनप्रभावतासदयास्तमययोः अधिकाले सूर्यादधिकासन्निहितसन्निहितत्वसम्भावनया क्रमेणोदयास्तयोः सूर्यान्निःसृतस्य यस्मिन् काले यदन्तरेण प्रथमदर्शनं सम्भावितं स उदयः। सूर्याद्दूरस्थितस्य यस्मिन् काले यदन्तरेण प्रथमादर्शनं सम्भावितं सोऽस्तः। अनेन नित्योदयास्तव्यवच्छेदस्तयोरित्यर्थः। परिज्ञानं सूक्ष्मज्ञानप्रकारः प्रकीर्त्यते अतिसूक्ष्मत्वेन मयोच्यत इत्यर्थः। तथा च ग्रह इत्युद्देशेऽस्तमनमुद्दिष्टमपि तस्य पूर्वमेव सूर्यासन्नत्व एव सम्भवात् तद्विलक्षणतया ग्रहयुतिप्रसङ्गे नोक्तम्। नक्षत्रग्रहयुतिस्तु ग्रहयुतिवदिति तदनन्तरसङ्गा। अतः प्रतिबन्धकजिज्ञासापगमेऽवश्याज्ञाव्यत्वादस्यावसरसङ्गतित्वात् तल्लक्ष्यत्वा नक्षत्रग्रहयुत्यधिकारानन्तरं प्रागुद्दिष्टमस्तमनं तत्प्रसङ्गादुदयञ्च प्रतिपाद्यत इति भावः। तत्र प्रथमं पञ्चतारायां पश्चिमास्तपूर्वोदयावाह "र०ना०।" सूर्यादभ्यधिकाः पश्चादस्तं जीवकुजार्कजाः। जनाः प्रागुदयं यान्ति शुक्रौ वक्रिणौ तथा" सू०। "वक्रगतौ शुक्रबुधौ तथा सूर्यादधिकौ पश्चिमास्तं गच्छतः। सूर्यादल्पौ पूर्वोदयं प्राप्नुतः। शेषं स्पष्टम्। अथ चन्द्रबुधशुक्राणां पूर्वास्तपश्चिमोदयावाह र०ना०। "जना विवस्वतः प्राच्यामस्तं चन्द्रज्ञभार्गवाः। व्रजन्त्यभ्यधिकाः पश्चादुदयं शीघ्रयायिनः" सू०। "शीघ्रयायिनः सूर्यगत्यधिकगतय इत्यर्थः। एतेन बुधशुक्रावर्कगत्यल्पगती सूर्यादल्पौ पूर्वास्तमधिकौ च पश्चिमोदयं न प्राप्नुत इत्युक्तम्। शेषं स्पष्टम्। अत्रोपपत्तिः। रविगतितोऽल्पगतिर्यः शीघ्रोर्काद्दूनचेत् प्राच्यां दर्शनयोग्यो भवितुमर्हति। यतः सूर्यस्याधिकत्वेन बहुगतित्वाच्छीघ्रोत्तरमधिकविप्रकर्षात् प्रवहवशेन न्यूनस्य पूर्वसदयादधिकस्थानन्तरसदयनियमात्। ग्रहस्य क्रान्तिजसंलग्नताकालानन्तरं यावत् सूर्यस्य तादृगः कालस्तावत्पर्यन्तं विप्रकर्षे दर्शनसम्भवात्। एवं यदाल्पगतिः सूर्यादधिकस्तदा प्रवहवशेनार्कस्य पूर्वसदयादनन्तरसदितग्रहस्य दर्शनासम्भवात् प्रवहवशेनादौ न्यूनार्कस्यास्तसम्भवादनन्तरमधिकग्रहस्यास्तसम्भवात् सूर्यास्तानन्तरं पश्चिमभागे ग्रहदर्शनसम्भवेऽप्यधिकगतिसूर्यस्य ध्रुवस्थितत्वेनोत्तरोत्तरमधिकसन्निकर्षात् पश्चिमायामदर्शनं सम्भवत्येव। ते तु भौमगुरुशनयः। वक्रत्वे न्यूनगतित्वाद्बुधशुक्रौ चेति। अथार्कगतितोऽधिकगतिग्रहः। सूर्यादूनस्फुटोक्रर्त्योत्तरोत्तरमधिकसन्निकर्षात् पूर्वक्षितिजदर्शनं याति। यदा सूर्यादधिकस्फुटोक्रर्त्योत्तरोत्तरमधिकविप्रकर्षात् पश्चिमायासदयः। ते तु शीघ्राश्चन्द्रबुधशुक्रा इत्युपपन्नसङ्गम्। अथाभीष्टदिन आसन्ने सूर्योदयास्तकालिकौ सूर्यदृग्ग्रहौ तत्कालज्ञानार्थं कार्यावित्याह" र०ना०। "सूर्यास्तकालिकाः पश्चात् प्राच्यासदयकालिकौ। दिनकरग्रहौ कुर्याद्दृक्कर्मार्थ ग्रहस्फुटं" सू०। "पश्चात् पश्चिमास्तोदयसाधनेऽभीष्टदिन आसन्ने सूर्यग्रहौ सूर्यास्तकालिकौ कुर्याद्दृष्टकः। पूर्वास्तोदयसाधने सूर्योदयकालिकौ कुर्यात् दिनेऽभीष्टकाले कुर्यात्। चकारो विकल्पार्थकः। अनन्तरं ग्रहस्य दृक्कर्म आयनाख्यदृक्कर्मद्वयं कुर्यात्। तुकार आयदृक्कर्मस्तोवपूर्वार्द्धोक्तमिति विशेषार्थकः। अत्रोपपत्तिः। पश्चादस्तोदयसाधने पश्चिमायां तद्दर्शनमिति सूर्यास्तकालिकौ सूर्यग्रहावभिष्टकालांशसाधनार्थं सूक्ष्मौ। पूर्वोदयास्तसाधने पूर्वदिशि तद्दर्शनमिति सूर्योदयकालिकौ सूर्यग्रहावभिष्टकालांशसाधनार्थं सूक्ष्मावन्यकाले तु किञ्चित्स्थूलावपि ज्ञातौ दृक्कर्मसंस्कृतग्रहस्य सूर्यवत् क्षितिजसंलग्नतायोग्यत्वाद्दृक्कर्मसंस्कृतो ग्रहः कार्य इति। अथेष्टकालांशानयनमाह" र०ना०।" ततोलग्नान्तरप्राणाः कालांशाः षष्टिभाजिताः। प्रतीच्यां षड्भयुतयोस्तद्भग्नान्तरासवः" सू०। "ततस्ताभ्यां सूर्यदृग्ग्रहाभ्यां लग्नान्तरप्राणाः" भोग्याच्छून्यकस्याद्य" इत्युक्तप्रकारेणान्तरकालासवः षष्टिभक्ता इष्टाः कालांशा भवन्ति। प्रागुदयास्तसाधने प्रतीच्यां, पश्चिमोदयास्तसाधने षड्भयुतयोः षड्राशियुक्तयोः सूर्यदृग्ग्रहयोर्लग्नान्तरासवः। अनन्तरासवस्तद्वत् षष्टिभक्ता इष्टकालांशा भवन्तीत्यर्थः। अत्रोपपत्तिः। दृग्ग्रहसूर्याभ्यामन्तरकालो ग्रहस्य सूर्योदयकाले दिनगतं पूर्वोदयास्तनिमित्तमुपयुक्तम्। एवं पश्चिमोदयास्तनिमित्तं सूर्यदिग्ग्रहाभ्यामस्तकालासुभिरन्तरकालः सूर्यास्तकाले ग्रहस्य दिनशेषकाल उपयुक्तः तत्रास्तकालानामसुक्षेरुदयासुभिः साधनार्थं समौ सूर्यदृग्ग्रहौ ज्ञातौ स कालोऽस्माकः। यदि अहोरात्रासुभिश्चक्रकलात्मकं चक्रांशा लभ्यन्ते तदेष्टासुभिः क इत्यनुपाते प्रमाणफलयोः फलापवर्त्तनेन हरस्थाने षष्टिः। अतोऽस्माकान्तरकालः षष्टिभक्त इष्टकालांशा इत्युपपन्नसङ्गम्। अत्रेदमवधेयम्। सूर्योदयकालि-

काभ्यामर्कदृग्गृहाभ्यामानीतेन दिनगतेन पूर्वं चास्रोदृग्गृहः। सूर्यास्तकालिकाभ्यां षष्ठभाभ्यामर्कदृग्गृहाभ्यामानीतेन दिनशेषाप्ते चास्रः षष्ठो दृग्यहः। क्रमेण यद्योदयास्तकाले प्राक्पश्चिमदृग्यहौ भवतः। ताभ्यां सूर्यषष्ठभसूर्याभ्यां च क्रमेण पूर्वरोत्थनरकालो ग्रहस्य सूर्योदयास्तकाले क्रमेण दिनगतशेषो नाडयौ घटिभक्तौ कालांशाविष्टौ सूच्यौ। अथेष्टकालिकाभ्यामानीतकालेन पूर्ववज्ज्ञातिताभ्यां प्राक्पश्चिमदृग्यहाभ्यां सूर्यषष्ठभसूर्याभ्यां चानीतकालो नाडयोऽपि सूच्यासन्नः। सूर्योदयास्तसम्बन्धाभावात् तदुत्पन्ना कालांशा अपि तथा। अथ सूर्योदयास्तकालिकाभ्यामानीतैकवारं कालात् कालांशाः स्थूला इष्टकालिकाभ्यामानीतैकवारकालात् कालांशा अतिस्थूलाः उभयत्र कालस्य सावनत्वात्। न हि सावनघटिघटीभिश्चक्रपरिपूर्त्तिर्येन सूच्याः सिद्ध्यन्ति। अथ यैः कालांशैरुदयोऽस्तो वा भवति तान् विवक्षुः प्रथमं गुरुशनिभौमानां कालांशानाह" र०ना०।"एकादशमरेज्यस्य तिथिसङ्ख्यार्कजस्य च। अस्तांशा भूमिपुत्रस्य दशसप्ताधिकास्ततः"सू०।"तत इष्टकालांशावगमानन्तरमस्तांशाः। अस्तो यैरंशैर्भवति तेऽंशा अस्तोपलक्षणादुदयांशा ज्ञेयाः। अमरेज्यस्य गुरोरेकादश कालांशाः। शनेः पञ्चदश सङ्ख्या कालांशानाम्। चः समुच्चये। भौमस्य सप्ताधिका दश सप्तदश कालांशा इत्यर्थः। अथ शुक्रस्याह"र०ना०।"पञ्चादस्तमयोऽष्टाभिरुदयः प्राङ्महत्तया। प्रागस्तमुदयः पञ्चादल्पत्वादुदगभिर्भगोः"सू० "शुक्रस्य महत्तया वक्रत्वेन नीचासन्नत्वात् स्थूलबिम्बतया पञ्चिमायामस्तोऽष्टाभिः कालांशैः प्राच्यामुदयश्च तैः नाधिकैः। प्राच्यां शुक्रास्तत्वादणुबिम्बत्वादुदगभिः कालांशैरस्तं गच्छन् कुर्यात् नाल्पैः। पश्चिमायामुदयस्तस्याणुबिम्बस्य दशभिः कालांशैरेव ज्ञेयः। अथ बुधस्याह"र०ना०"एवं बुधो द्वादशभिश्चतुर्दशभिरंशकैः। वक्री शीघ्रगतिश्चार्कात्करोत्यस्तमयोदयौ"सू०।'वक्री शीघ्रगतिः। चः समुच्चये। बुधः सूर्याद्द्वादशभिश्चतुर्दशभिश्च कालांशैरस्तोदयौ एवं शुक्रवीत्या करोति। पश्चादस्तं प्रागुदयं च द्वादशभिः कालांशैर्महाबिम्बतया बुधः करोति। प्रागस्तं पश्चादुदयं च चतुर्दशभिः कालांशैरणुबिम्बत्वाद्बुधः करोतीत्यर्थः। अथ प्रोक्तेष्टकालांशाभ्यामस्तोदयस्य वा गतैष्यत्वज्ञानमाह" र० ना०।"एभ्योऽधिकैः कालभागैर्दृश्या न्यूनैरदर्शनाः। भवन्ति लोके खचरा भानुभागैस्तमूर्त्तयः" सू०। "एभ्य एकादशमरेज्यस्येति श्लोकत्रयोक्तेभ्योऽधिकैरिष्टकालांशैर्दृश्या दर्शनयोग्या अभीष्टकाले गृहा भवन्ति। तथा चास्तसाधने दृश्यत्वे अस्त एष्यः। उदयसाधने दृश्यत्व उदयो गत इति भावः। अल्पैरिष्टकालांशैर्गृहा लोके भूलोके अदर्शना न विद्यते दर्शनं दृष्टिगोचरता येषां ते अदृश्या अभीष्टकाले भवन्ति। नन्वदृश्याः कुतो भवन्तीत्यत आह। भानुभागैस्तमूर्त्तय इति सूर्यासन्नत्वेन सूर्यकिरणदीप्ता गृहा अभिभूता सूर्यकिरणप्रतिहतलोकनयनाविषयो मूर्त्तिर्बिम्बस्वरूपं येषां त इत्यर्थः। तथा चास्तसाधने अदृश्यत्वेऽस्तो गतः। उदयसाधनेऽदृश्यत्व उदय एष्य इति भावः। अत एव।"उक्तेभ्य ऊनाभ्यधिका यदीष्टाः खेटोदयो गम्यगतस्तदा स्यात्। अतोऽन्यथा चास्तमयोऽवगम्यः" इति भास्कराचार्योक्तं सङ्गच्छते। अत्रोपपत्तिः उक्तकालांशतुल्येष्टकालांशे यत्काले गृहो साधितौ तत्काले एव गृहस्योदयोऽस्तो वार्कजतः। उक्तकालांशानां सूर्यसान्निध्यजनिताद्यन्तगृहादर्शने हेतुत्वप्रतिपादनात्। तथा चेष्टकालांशा उक्तेभ्योऽल्पास्तदा गृहस्यासन्नत्वमेवेत्युदयसाधन इष्टकालांशा उक्तेभ्योऽल्पास्तदेष्टकालादग्रे गृहस्योदयः। यदीष्टकालांशा उक्तेभ्योऽधिकास्तदेष्टकालाद्गृहस्योदयः पूर्वं जातः। एवमस्तसाधन इष्टकालांशा अधिकास्तदेष्टकालादग्रे गृहास्तः। यदीष्टकालांशा न्यूनास्तदेष्टकालात् पूर्वं गृहास्तो जात इत्युपपन्नमुक्तम्। अथोदयास्तयोर्गतैष्यदिनाद्यानयनमाह" र०ना०।'तत्कालांशान्तरकला भुक्त्यन्तरविभाजिताः। दिनादि तत्फलं लब्धं भुक्तियोगेन वक्रिणः"सू०। "उक्तेष्टकालांशयोरन्तरस्य कलाः सूर्यगृहयोर्गत्योः कलात्मकान्तरेण भक्ताः। दिनादिकमुदयास्तयोः फलमुदयास्तयोर्गतैष्यदिनाद्यं भवतीत्यर्थः। वक्रगतिग्रहस्य विशेषमाह। लब्धमिति। वक्रिणो वक्रग्रहस्य भुक्तियोगेन सूर्यगृहयोः कलात्मकगतियोगेन भक्ताः फलं गतैष्यदिनाद्यं ज्ञेयम्। अत्रोपपत्तिः। यदा सूर्यपृष्ठयोर्गत्यन्तरकलाभिरेकं दिनं तदेष्टप्रोक्तकालांशयोरन्तरकलाभिः किमित्यनुपातेनोदयास्तयोरभीष्टकालाद्गतैष्यदिनाद्यागमः। वक्रगृहे तु सूर्यगृहयोर्गतियोगेन प्रायशमन्तरमतो गतियोगादनुपात उपपन्न इत्युपपन्नमुक्तम्। अथ गृहगतिकलयोः क्रान्तिवृत्तस्थत्वात् कालांशान्तरस्याहोरात्रवृत्तस्थत्वाच्चानुपातः प्रायेणेच्छयोर्वैलात्येनायुक्त इति मनसि धृत्वा तयोरेकजातित्वसम्पा-

दनार्थं गृहगत्योरिच्छाजातीयत्वं वदंस्तदन्तरेणानुपातस्तु युक्त एवेत्याह" र० ना०। "तद्भक्तानुहते भुक्तौ अष्टादशगतोद्धृते। स्यातां कालगती ताभ्यां दिनादि गतगम्ययोः" सू०। "भुक्तौ रविगृहयोर्गती कलात्मिके तद्भक्तानुहते कालसाधनार्थं गृहस्य यो राश्युदयो यद्दीतस्तेनाक्षात्मकोदयेन गुणिते अष्टादशगतेन भक्ते फले स्वर्यगृहयोः कालांशवत् कालगती स्याताम्। ताभ्यां गतिभ्यां गतगम्ययोरुदयास्तयोर्दिनादि पूर्वोक्तप्रकारेण साध्यम्। न तु पूर्वोक्तप्रकारेण, यथास्थितगतिभ्यां स्थूलत्वापत्तेः। अत्रोपपत्तिः। यदि एकराशिकलाभीराश्युदयासवस्तदा गतिकलाभिः क इत्यनुपातेनाक्षोदयासवस्तत्र गम्यासवः कलासमा इत्युपपन्नतरम्। अथ नक्षत्राणां स्वर्यसान्निध्यवशादस्तोदयज्ञानार्थं कालांशान् विवक्षुः प्रथममेषामाह" र०ना०। "स्वात्यगस्त्यमृगव्याधचित्राज्येष्ठाः पुनर्वसुः। अभिजिद्ब्रह्महृदयं त्रयोदशभिरंशकैः" सू०। "मृगव्याधो लुब्धकः। त्रयोदशभिः कालांशैर्द्यूनाष्टद्यूनानि नक्षत्राणि भवन्ति। शेषं स्पष्टम्। अथान्येषामाह" र०ना०। "हस्तश्रवणफाल्गुन्यः अविजारोहिणीमघाः। चतुर्दशांशकैर्द्यूना विशाखाश्विनदैवतम्" सू०। फाल्गुन्यः पूर्वोत्तराफाल्गुनीहयम्। आश्विनदैवतमश्विनीकुमारो दैवतं स्वामी यस्येत्यश्विनीनक्षत्रम्। द्यूना उपलक्षणाद्द्यूना अपि लिप्तपरिणामेन यथायोग्यं बोध्यः। शेषं स्पष्टम्। अथान्येषामाह" र०ना०। "क्रत्तिकामैत्रमूलानि सार्पं रौद्रर्क्षमेव च। द्यूनानि पञ्चदशभिरार्द्राहित्यं तथा" सू०। "कृत्तिकानुराधामूलनक्षत्राणि पञ्चदशभिः कालांशैर्द्यूनानि। उपलक्षणाच्च द्यूनेऽपि। एवकारोन्यूनाधिकव्यवच्छेदार्थः। अस्मेषार्द्रा। चःसमुच्चये। आर्द्राहित्यं पूर्वोत्तराषाढात्रयं तथा पञ्चदशकालांशैर्द्यूनं इत्यर्थः। अथान्येषामवशिष्टानामाह" र०ना०। "भरणीतिष्यसौम्यानि सौम्यभात् त्रिःसप्तकांशकैः। शेषाणि सप्तदशभिर्द्यूनाष्टद्यूनानि भानि तु" सू०। "तिष्यः पुष्यः सोमदैवतं मृगशिरो नक्षत्रमेतानि नक्षत्राणि सौम्यभादणुबिम्बत्वात् त्रिःसप्तकांशकैरेकविंशतिकालांशैर्द्यूनाष्टद्यूनानि। उदितान्यस्तङ्गतानि च भवन्तीत्यर्थः। शेषाणि पूर्वाधिकारोक्तनक्षत्रेभ्योऽतिरिक्तानि शततारापूर्वोत्तराभाद्रपदारेवतीसंज्ञानि ब्रह्मापांवह्यापसञ्ज्ञानि च सप्तदशभिः कालांशैर्द्यूनाष्टद्यूनानि भवन्ति। तुकारो द्यूनाद्यूनोत्व समुच्चयार्थकः। अथ दिनाद्यानयनार्थमिच्छाया एव प्रमाणजातीयत्वकरणमाह" र० ना०। "अष्टादशगताभ्यस्ता द्यूनांशाः खोदयासुभिः। विभज्य लब्धाः क्षेत्रांशैर्द्यूनाष्टद्यूनाश्च वा" सू०। "द्यूनांशाः कालांशा अष्टादशगतगुणितास्तान् खोदयासुभिर्गृहराश्युदयासुभिर्भक्ता लब्धाः क्षेत्रांशाः क्रान्तिवृत्तखांशास्तैरंशैर्द्यूनाष्टद्यूनता उदयासौ प्रकारान्तरेणोक्तरीत्या ज्ञेयौ। कालांशाभ्यां क्षेत्रांशानानीय तदन्तरकला यथास्थितगत्योरन्तरेण योगेन वा भक्ताः फलमुदयासुयोर्गतैष्यदिनाद्यं पूर्वागतमेव स्यादित्यर्थः। अत्रोपपत्तिः। यदि राश्युदयासुभिरेकराशिकलासुदा कालांशकलाहतखांशभिः का इति क्रान्तिवृत्ते कलाः। षष्टिभक्ता अंशा इति पूर्वमेवेक्षास्थाने कालांशा एव हृता लाघवात्। इत्युत्तमपपन्नम्। गृहाणामसकृदिष्टस्तोऽसकृदिष्टोदय इत्युक्तम्। तथा नक्षत्राणां नोक्तम् गत्यभावाद्विषयोगयोगासम्भवेन गतैष्यदिनाद्यानयनासम्भवेऽत्र आह" र०ना०। "प्रागेषामुदयः पश्चादस्तोऽर्कर्क्षं पूर्ववत्। गतैष्यदिवसप्राप्तिर्भानुभुक्त्या सदैव हि" सू०। "एषां नक्षत्राणां प्राच्यासुदयः प्रतीच्यामस्तो गत्यभावादल्पगतिगृहवत्। एषां नक्षत्राणां ह्यर्कर्क्षाच्चाष्टमं पूर्ववत् पूर्वप्रकारेण कार्यम्। परन्तु श्लोकपूर्वार्धोक्तमिति ध्येयम्। सदा नित्यम्। एवकारात् कदाचिदप्यन्यथा नेत्यर्थः। हि निश्चयेन। रविगत्या गतैष्यदिवसानां लब्धिः स्यात्। नक्षत्रगत्यसम्भवात् योगे गृहगतिवत्। अथ कतिपयानां नक्षत्राणां सूर्यसान्निध्यवशादस्तो नास्तीत्याह। "अभिजिद्ब्रह्महृदयं स्वातीवैष्णवयासवः। अहिर्बुध्नसदस्त्यत्वान्न लुप्यन्तेऽर्करश्मिभिः" सू०। अभिजित्। ब्रह्महृदयम्। अनेनैकदेशस्य ब्रह्मर्क्षोऽपि गृहणम्। स्वातीश्रवणधनिष्ठाः। अहिर्बुध्नसत्तराभाद्रपदा एतानि नक्षत्राण्युत्तरदिक्स्थत्वादुत्तरक्षेपाधिक्यादित्यर्थः। सूर्यकिरणैर्न लुप्यन्ते अस्तं न यान्तीत्यर्थः। अत्रोपपत्तिः "यस्मादर्काद्धिकोऽस्तभागुः प्रजायते सौम्यगरातिदैर्घ्यात्। तस्मान्नभोबिम्बसमानिध्यवशेन नास्ति विष्णोरुदयास्तसमयः कथञ्चित्"। इति भास्कराचार्योक्ता। परमिदमुक्तमदाक्षिणात्यभावात्। अन्यथा पूर्वाभाद्रपदाया अपि तथात्वापत्तेरिति दिक्" र०ना०। "यथा भौमादीनां सूर्यसान्निध्योदयास्तयोश्चन्द्रो दीप्तासकलबिम्बदर्शनं तथा चन्द्रस्य खोदयास्तकाले सकलबिम्बदर्शनं शुक्लत्वेन न भवति। किन्तु बिम्बैकदेश एव शुक्लत्वेन दृश्यत इति भौमादिविलक्षणत्वं चन्द्रस्य कुत इत्याशङ्क्य

वा; पूर्वाधिकारे सप्तम्यस्तेत्युत्तरभूतग्रहोद्गमनाधिकारोऽत्रग्रमुपस्थित आरभ्यो व्याख्यायते। तत्र ग्रहोद्गमे रूदयकालात् पूर्वकालेऽस्तकालानन्तरकाले चासन्नकतिपयदिवसेषु दर्शनात् पूर्वाधिकारे चन्द्रस्य कालांशानुक्त्वा तदुदयास्तानुक्तेश्च प्रथममुपस्थितचन्द्रोदयास्तयोः साधनमतिदिशति" र० ना०। "उदयास्तविधिः प्राग्वत् कर्त्तव्यः शीतगोरपि। भागैर्द्वादशभिः पश्चाद्दृश्यः प्राग्वात्यदृश्यताम्" सू०। "चन्द्रस्य अपिशब्दः पूर्वाधिकारोक्तैर्ग्रहनक्षत्रैः समुच्चयार्थकः। उदयास्तविधिरुदयास्तयोः साधनप्रकारः प्राग्वत् पूर्वाधिकारोक्तरीत्या गणकेन कार्यः। ननु कालांशानां पूर्वमनुक्तेः कथं तद्विधिरत आह। भागैरिति। द्वादशभिरंशैश्चन्द्रः पश्चिमायां दृश्य उदितो भवति। प्राच्यामदृश्यतामस्तं प्राप्नोति। अत्र पश्चात् प्रागिति पुनरुक्तमपि पूर्वं बुधशुक्रयोः साहचर्येण चन्द्रोदयास्तदिनुक्ता तत्साहचर्येण चन्द्रस्य पश्चिमास्तपूर्वोदयौ वर्तेते इति कस्यचिन्मन्दबुद्धेर्भ्रमस्य वारणायेति ध्येयम्"।

सूर्योदये विशेषः शु०त०ब्र०सं०। "रेखामात्रं च दृश्येत रश्मिभिश्च समन्वितम्। उदयं तं विजानीयाद्धोमं कुर्य्यात् विचक्षणः" "उदयादोदयाद्धानोर्भीमसावन वासरः" सू० सि०। "सावनः स्यादहोरात्रसदयादोदयाद्रवेः" काल०मा० ब्रह्म० सि०। गुरुशुक्रोदये च सर्वं मङ्गलकार्य्याणि कर्त्तव्यानि। अगस्त्योदयः अगस्त्यशब्दे उक्तः। "प्रसन्नादोदयादम्भः कुम्भयोने र्महौजसः" रघुः।

उदयगामिनी स्त्री उदयं सूर्योदयं गच्छति गम-णिनि ङीप्। "सूर्योदयावधिमुहूर्त्तादिकालव्यापिन्यां तिथौ। कर्मानुष्ठाने उदयकाले कियत्कालस्य याह्यता तन्निर्णीतम्" का०मा०। "व्रतोपवासनियमे घटिकैका यदा भवेत्। उदये सा तिथि ग्राह्या विपरीता तु पैतृके" ब्र०पु०। "व्रतोपवासस्नानादौ घटिकैका यदा भवेत्। उदये सा तिथिर्ग्राह्या श्राद्धादावस्तगामिनी" विष्णु०ध०पु०। "आदित्योदयवेलायां याऽल्पापि च तिथिर्भवेत्। पूर्णा स्त्रैव सा ज्ञेया प्रभूता नोदयं विना" देवलः। "यां तिथिं स मनुप्राप्य उदयं याति भास्करः। सा तिथिः सकला ज्ञेया स्नानदानजपादिषु" देवलः। "उदयन्नेव सविता यां तिथिं प्रतिपद्यते। सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु" व्यासः। "पञ्चदशेऽपि तिथयस्तिथिं पूर्वां तथोत्तराम्। त्रिभिर्मुहूर्त्तैर्विध्यन्ति सामान्योऽयं विधिः स्मृतः" पैठी०। "उदिते दैवतं भानौ पैत्र्यं चास्तमिते रवौ। द्विमुहूर्त्तं त्रिरङ्गे च सा तिथिर्द्वयकृत्ययोः" बौधा०। "भानावुदिते सत्युत्तरकालेऽर्द्धमुहूर्त्तद्वयं दैवत्यम्। तस्मिंश्चास्तमिते ततः पूर्वकालीनमर्द्धमुहूर्त्तत्रयं पित्र्यदैवत्यमतस्तावत्कालव्यापिनी या तिथिर्भवति सैव क्रमेण हव्यकव्ययोर्ग्राह्या" अत्रागङ्कापूर्वकं माधवेन समाहितम्। ननूक्तं ऋत्वृदिवसाभ्यनुज्ञातथाप्युत्तरविद्धयास्तिथेर्ग्रहणे कियत्परिमाणमुदयेऽपेक्षणीयमिति विवेचनीयम्। तत्र बौधायनेनाल्पापीत्यभिधानात् निमेषमात्रं प्रतिभाति, व्यासेन उदयन्नेवेत्यभिधानात् तथैव प्रतिभाति। भविष्यत्पुराणे तु घटिकामात्रं बौधायनवचनान्तरे द्विमुहूर्त्तमित्येवं विरोधमाशङ्क्य "अत्रोच्यते "पौर्वाह्णिक्यस्तु तिथयस्त्रिमुहूर्त्ताः फलप्रदाः" इ० या० वचनेन दैवे पूर्वाह्णव्याप्तायास्त्रिमुहूर्त्तमितायास्तिथेर्ग्रहणम्। त्रिमुहूर्त्तन्यूनायास्तिथेः पूर्वाह्णव्याप्त्यभावात् पूर्वाह्णस्य च षड्धा विभक्तस्य मुख्यत्वात् उदिते भानौ त्रिमुहूर्त्तातिथिर्ग्राह्या। यत्तु "त्रिमुहूर्त्ता न कर्त्तव्या या तिथ्युदयगामिनी" ति तत् त्रिमुहूर्त्तव्याप्तेर्बाधकं प्रत्युतोहोलकमेव। तथा हि प्रतिषेधः सर्वत्र प्रसक्तिपूर्वकः, प्रसक्तिश्च यथोक्तरीत्या पौर्वाह्णिकवाक्यात् त्रिमुहूर्त्तत्वेविधिविधायिपैठीनसिवाक्याद्वा भवति तस्य प्रसक्तं त्रिमुहूर्त्तत्वं समतिथौ बाधकाभावात्तत्रैव तिथित्रये त्वधिकव्याप्तिविधित्सया प्रतिषिध्यते अतश्च तत्र चतुर्मुहूर्त्तस्पर्शिनी तिथिर्ग्राह्या तिथिसाम्यात्। तिथिद्वावपि मुहूर्त्तत्रयमेव मुख्यं मुहूर्त्तद्वयं त्वनुकल्पः। एतदेव सूचयितुं द्विमुहूर्त्तापीत्यत्र अपिशब्दः प्रयुक्तः"। ततः प्रासङ्गिकमन्यत् समाधाय उपसंहृतम् यथा "प्रकृते तु सूर्योदये मुहूर्त्तत्रयव्यापिनी प्रतिपदानव्रतयोर्ग्राह्या एवं सत्युदयमात्रव्याप्तिग्राह्यं घटिकामात्रव्याप्तिग्राह्यं च वैश्वानराधिकरणन्यायेनावयुत्यानुवादरूपतया त्रिमुहूर्त्तव्याप्तिं प्रशंसति। अथवा यदा पूर्वेद्युरुदयकालं परित्यज्योपरि सर्वत्र व्याप्नोति परेद्युरुदयकालमात्रं व्याप्नोति तदानीमुदयानन्तरभाविन्यामुख्यायास्त्रिमुहूर्त्तव्याप्तेर्दिनद्वयेऽप्यभावेन द्वयोरपि दिनयोर्गौणकालत्वे सति किं ग्राह्यमिति जिज्ञासायां पूर्वदिने गौणकर्मकालव्याप्तेर्भूयस्त्वात्तस्यैव ग्रहणं न्यायतः प्राप्तं जैनापि निमित्तेन तत्प्रत्यूहे सति परेद्युः कर्मकालव्याप्तिसम्पादनाय पूर्णत्वमभिधायोदयविहीनस्य

व्याप्तिवाक्यस्य हेयत्वोक्तिव्याजेन तदेव प्रशस्यते । "आदित्योदयवेलायां याल्पापि च तिथिर्भवेत् । पूर्णा इत्येव मन्तव्या प्रभूता नोदयं विनेति" । यदा पूर्वेद्युः सङ्कल्पमारभ्य परेद्युरुदयोत्तरमेव तिथित्रयवशात्प्रतिपत्सामग्री तदा यद्यपि दिनद्वये सोदयमुहूर्त्तत्रयसत्त्वं नास्ति तथापि पूर्वेद्युरेवानुष्ठेयम् । "सा तिथिः सकला ज्ञेया यस्यामस्तमितोरविः इतिवचनेन सम्पादायाः सोदयतिमुहूर्त्तायाः व्याप्तेर्विद्यमानत्वात् । यदा न परेद्युरुदयमुहूर्त्तव्याप्तिरस्ति तदा पूर्वेद्युरेवानुष्ठानम् । अस्तमयव्याप्तेरधिकत्वात् । अतएव पद्मपुराणेऽभिहितम् । "व्रते स्नाने तथा नक्ते पिण्डकार्य्ये विशेषतः । यस्यामस्तङ्गतो भानुः सा तिथिः पुण्यभाग्भवेदिति" । तत्रैव द्वितीयाप्रकरणे च दैवं षड्विधम् उपवासैकभक्तनक्तायाचितदानव्रतभेदेन, तीर्थस्नानजपहोमादयस्तु व्रतशब्देनैव संगृहीताः । पित्र्यं द्विविधम् एकोद्दिष्टं पार्वणं चेति । तत्र सर्व्वत्र कर्म्मकालव्याप्तिर्ग्राह्या । अवशिष्टा गौणः । तिथिव्याप्तिश्च द्विविधा स्वाभाविकी तिथिव्याप्तिः साकल्यापादिततिथिव्याप्तिश्चेति । तद्यथा यदा सङ्कल्पपर्य्याप्तावास्या तदानीमपरिततोमध्याह्नो मुख्यश्चैव प्रतिपदा व्याप्तो भवति । यदा मध्याह्नादिमारभ्य तिथित्रयवशात् परेद्युः सङ्कल्पान्ता प्रतिपद्भवति तदा पूर्व्वेद्युर्गौणकालव्याप्तिमुपजीव्यैकभक्तानुष्ठानाय तत्स्वीकारे सति मध्याह्नेऽवश्यानुष्ठेयत्वात् तत्र च स्वाभाविकप्रतिपदोऽप्राप्तावेऽपि साकल्यवचनापादितप्रतिपद्व्याप्तिः स्वीकृता एवञ्च सति कर्म्मकालव्याप्तौ सर्व्वत्रतीनामत्यन्तनिबन्धदर्शनात् कर्म्मकालव्याप्तिरावश्यकमितरेभ्यः प्रबलमिति निश्चीयते । तदनुसारेण द्वितीयाद्यास्वपि तिथिषूपवासादौ दैवे, एकोद्दिष्टादौ पित्र्ये च कर्म्मकालव्याप्तियुक्ताः स्वीकर्त्तव्याः । उपवासस्तु सर्व्वतिथिषु नारदीये दर्शितः "शुक्ला वा यदि वा कृष्णा प्रतिपत्प्रभृतीन् तिथीन् । उपोष्यैव बलिन्दत्त्वा विधिना त्वपरे दिने । ब्राह्मणान् भोजयित्वा तु सर्व्वपापैः प्रमुच्यते" इति । उपवासस्य चौरात्रः कर्म्मकालः । तस्मात्सङ्गवापिनी तिथिर्ग्राह्या सदसन्मध्ये खण्डतिथिरपि । तत्र का ग्राह्येति निरूप्यते । तत्र सूर्य्योदये त्रिमुहूर्त्ता तदोऽधिका वा प्रतिपद्भवति उत्तरदिनेचास्तमयादर्वाक् त्रिमुहूर्त्ता ततोऽधिका वा तृतीया भवति सेयमुभयविद्धा द्वितीया । तत्र वेधकतिथेरुदयेऽस्तमये वा त्रिमुहूर्त्तत्वं वेधप्रयोजकं न तु ततोन्यूनत्वे । तदेव पैठिनसिवाक्येन पूर्वमुदाहृतम् । वेध्यतिथेश्च त्रिमुहूर्त्तसङ्गावोऽपेक्षित इति "द्विमुहूर्त्तं त्रिरुक्थ" इत्यनेन लघुमनुवचनेन दर्शितम् । "उदयास्तमयवोरेव वेधः" इत्यस्यायमर्थः "उदये सा तिथिर्ग्राह्या विपरीता तु पैठके" इत्यादिभिः कात्यायनवचनैरवगन्तव्यः । एवं सति उदाहृतविषये द्वितीया उभयवेधेऽपि उत्तरविद्धैवोपाद्या युग्मादिवाक्येनान्वयव्यतिरेकाभ्यामुत्तरवेधस्य प्राशस्त्याभिधानात्" इति । पाद्मन्यूनासरूपदैवविषयं तदप्युक्तं तेनैव । "यद्यप्युपोष्यत्वं साक्षादभिहितं तथापि कर्म्मान्तरविशेषानुपादानादुपवासविषयत्वं परिशेष्यते तथा हि न तावत् पित्र्यविषयत्वं सम्भवति "द्वितीयादिकयुग्मानां पूज्यता नियमादिषु । एकोद्दिष्टादिवद्ध्रासवृद्ध्यादिदेशनेति" व्यासेन युग्मादिगास्तस्य सर्व्वादिगास्तस्य च दैवपित्र्यविषयकत्वेन व्यवस्थापनात् इति" । एवञ्चोपवासेतरदैवकर्म्मणि उदयगामिन्या ग्राह्यता तदपवादकं युग्मगास्त्वम् । तत्र च पैठीनसिवचनेन त्रिमुहूर्त्ततिथेरेव वेधप्रयोजकताऽभिधानेन ततो न्यूनकालिकतिथ्या वेधाभावात् गौड़देशीया यत् स्वर्गमात्रेण वेधं कल्पयन्ति तन्नाङ्गसमालम्भ रघुनन्दनेन कुत्रापि तथा वेधानुक्तेः कालमा० हेमाद्रिप्रभृतिषु द्विमुहूर्त्तादिव्याप्तावेव वेधकत्वव्यवस्थापनात्, युग्मगास्त्वस्य सामान्यगास्त्वतया वेधसामान्यप्रतिपादनेऽपि पैठीनसिना तस्य विशेषाभिधानात्तथैव व्यवस्थस्य युक्तत्वमित्युपश्यामः । युग्मादिगास्त्वस्य बाधकन्तु "युगाद्या वर्षवृद्धिश्च सप्तमी पार्वती प्रिया । रवेरुदयभोजने न तत्र तिथियुग्मता" ति० त० देवी० पु० "भगवत्याः प्रवेशादिविसर्गान्ताय याः क्रियाः । तिथावुदयगामिन्यां सर्व्वास्ताः कारयेद्बुधः" दुर्गो० त० नन्दि० पु० "शरत्काले महापूजा क्रियते या च वार्षिकी । सा कार्य्योदयगामिन्यां न तत्र तिथियुग्मता" तत्रैव पुरा० "पूर्व्वाह्णे तु सदा कार्य्याः शुक्ला मनुयुगादयः । दैवे कर्म्मणि पित्र्ये च कृष्णा चैवापराह्णिके । हेमा० नारदीयम् "युगादिमन्वादिश्राद्धादिषु शुक्लपक्षे उदयव्यापिनी तिथिर्ग्राह्या कृष्णपक्षे ऽपराह्णव्यापिनी ग्राह्या सूत्रार्थसारस्य दिनद्वये तु तथा लाभे परैवेति हेमाद्रिः । विधानपारिजातादयोऽप्येवम् । निर्ण० सि० "सर्व्वतिथ्यतीपातो युगमन्वादयस्तथा । समुखा उपवासेषु दानादावल्पिका स्मृता" अनन्तभट्टधृतवचने आदिपादात् श्राद्धसंग्रह इत्याह । इदन्त्ववधेयम् । "कर्म्मणो-

वस्य यः कालस्तत्कालव्यापिनी तिथिः। तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम्" कर्म्मणोविहितकालव्यापिन्या एव याह्यत्वाभिधानेन यत्, तिथित्रयवशात् उभयदिने त्र्यमुहूर्त्तातिरिक्तदिनत्रतीयांशरूपपूर्व्याह्णव्याप्तिः स्यात्, प्रतियोगिवैयधिकरण्यघटितव्याप्तेः प्रवेशनेन मुहूर्त्तकालव्याप्तावपि पूर्व्याह्णव्यापकतया यत्किञ्चिन्मित्येव रघुनन्दनस्याशयः। तथा च "आरभ्य तस्यां दशमी च यावत्" इत्यादौ यथा पूजायान्तत्तथीनां प्रतियोगिवैयधिकरण्यघटितव्यापकताप्रवेश एवमत्रापि मुहूर्त्तव्यापकतानातोन्यूनदण्डादिव्यापने याह्यता। भवति च द्वित्रमुहूर्त्तव्यापिन्यापिमुहूर्त्तव्यापितेति सर्व्वं सुस्थम्। तेन मुहूर्त्तन्यूनतायां न याह्यता द्वित्रमुहूर्त्तादिव्याप्तिस्तु मुख्येति। एवञ्च युग्मादिगास्वाविषये क्षयप्रतिपदादौ उभयदिने पूर्व्याह्णमुहूर्त्तव्याप्तित्वेऽपि त्रिमुहूर्त्तायां एव याह्यतेति विवेकः। एवमत्रागामिन्यामपि अस्मादर्वाक् त्रिमुहूर्त्तायामित्यपि बोध्यम्।

उदयगिरि पु० उदय उदयस्थानं गिरिरिव। सूर्य्यादेरुदयस्थाने पर्वतवदाच्छादके भूवृत्तपादे "उदयगिरिवनालीबालमन्दारपुष्पम्" उद्भटः उदयगिरिशिखरसंस्थिते प्रतप्तकनकनिकरपीतलोहिते सवितरि" सुश्रु० उदयाचलादयोऽत्र। "स्थितोदयाद्रेरभिसायमुच्चकैः" माघः। भूगोलपादस्थैव यथा सूर्य्यादेराच्छादकत्वम् तथा सिद्धान्तग्रन्थे स्थितम्। यद्यपि सूर्य्योदयस्य देशविशेषे विशेषस्थाने एव सम्भवः तथापि निरक्षदेशावधिकएव देशे मुख्यत्वम् "लङ्कापुरेऽर्कस्य यदोदयः स्यात् तदा दिनार्धं यमकोटिपुर्याम्। अधस्तदा सिद्धपुरेऽस्तकालः स्याद्रोमके रात्रिदलं तदैव। यत्रोदितोऽर्कः किल तत्र पूर्वा तत्रापरा यत्र गतः प्रतिष्ठाम् तद्याम्यतोऽन्ये च ततोऽखिलानासदङ्कस्थितोमेरुरिति प्रसिद्धम्" सिद्धान्तशिरोमणौ तथैव व्यवस्थापितम्।

तथा च लङ्कादिपुरीचतुष्टयस्य भूवृत्तपादान्तरस्थितत्वेन द्वितीयपृष्ठपरिस्थे सूर्य्यादौ प्रथमं दृश्यता तत्पूर्व्वादिस्थदेशे तु ततः पूर्वम्। पश्चात् स्थितदेशेषु च ततः पश्चात् दृश्यता एवञ्च भूवृत्तपादेनाच्छादने तदतिक्रमे दर्शनयोग्यत्वाद्उदयः। ततश्च यत्र देशे यदा दर्शनं तत्र तदा तद्देशापेक्षया सूर्य्यादेर्भूबिम्बपादोपरिस्थितत्वेन तत्स्थानस्य उदयगिरित्वम् यत्र चादर्शनं तद्देशवासिनामस्तगिरित्वं शास्त्रेषु कल्पितम्। एवञ्च निरक्षदेशावधि भूवृत्तपादान्तरेषु स्थित लङ्कापुरवासिनां यमकोटिरेवोदयस्थानमेवमन्यत्र ज्ञेयम्। सिद्धपुराणे तु अन्याः पुरीरुक्ता तत्रोदयादिव्यवस्थामाह "मानसोपरि माहेन्द्री प्राच्यां मेरोः स्थिता पुरी। दक्षिणे भानुपुत्रस्य वरुणस्य तु वारुणे। सौम्ये सोमस्य विपुला तासु दिग्देवताः स्थिताः। अमरावती संयमिनी सुखा चैव विभा क्रमात्। लोकपालोपरिष्टात्तु सर्वतो दक्षिणायने। काष्ठाङ्कितस्य सूर्यस्य गतिर्यां तां निबोधत। दक्षिणां प्रक्रमेद्भानुः शिप्रेषुरिव धावति। पुरान्तगो यदा भानुः शक्रस्य भवति प्रभुः। सर्व्वैः सायमनैःसौरो ह्युदयो दृश्यते द्विजाः!। स एवं सुखवत्यान्तु निशान्तस्थः प्रदृश्यते। अस्तमेति तदा सूर्यो विभायां विश्वदृग्विभुः। मया प्रोक्तोऽमरावत्यां यथाऽसौ याति भास्करः। तथा संयमिनीं प्राप्य सुखाख्यैव विभां खगः। यदा पराङ्कस्तत्रेयं पूर्वाह्णोनैर्ऋते द्विजाः!। तदा त्वपररात्रेऽयं वायुभागे सुदारुणः। ऐशान्यां पूर्वरात्रस्तु गतिरेषास्य सर्वतः" इति। व्याख्यातञ्च ज्ञा० उ० आनन्दगिरिणा "तथा चोपरिष्टादमरावत्यास्तिऽन्मध्याङ्कं तत्रैयकोणस्थानां तृतीययामसमाप्तेयकोणस्थानामाद्ययामं संयसिन्यामुदयं च करोति सविता। एवं यदा याम्ये मध्याह्ने तिष्ठति तदेन्द्रे अस्तमयः, आग्नेये तृतीययामः, नैर्ऋतिकोणे प्रथमो यामः, वारुणे उदयः। यदा च वारुणे मध्याह्नस्तदायाम्येऽस्तमयः, नैर्ऋतिकोणे तृतीयो यामः, वायव्ये प्रथमयामः, सौम्ये उदयः। यदा च सौम्ये मध्याह्नस्तदा वारुणेऽस्तमयः, वायव्ये तृतीययामः, ऐशानकोणे प्रथमो यामः, ऐन्द्रे उदयः। तथाग्नेयकोणे वर्त्तमानस्तत्स्थानां मध्यं दिनम्, यमेन्द्रपुर्योरादितृतीययामौ, नैर्ऋतैशानकोणयोरुदयास्तमयौ च करोति" एतच्च मानसापेक्षयोदयास्तमयकीर्त्तनान्न पूर्वोक्तेन विरुद्धम् "अब यदादित्यः पुरस्तादुदेता पश्चादस्तमेता द्विस्ता दूर्द्ध उदेताऽर्वागस्तमेता इत्यादि" ज्ञा० उ० भाष्ये "पश्चादुत्तरत ऊर्द्धमुदेता विपर्ययेणास्तमेता। पूर्वस्मात्पूर्वस्माद्दक्षिणोत्तरोत्तरेण कालेनोदयास्तमयौ" इत्यपौराणं दर्शनम्। सवितुश्चतुर्दिगभिन्द्रयमवरुणसोमपुरीप्रदेशास्तमयकालस्य तुल्यत्वं हि पौराणिकैरुक्तम्। मानसोत्तरस्य मूर्द्धनि मेरोः प्रदक्षिणाद्गतेस्तुल्यत्वादिति" इत्याशङ्क्य अलोकः परिहार आचार्यैरमरावत्यादीनां पुरीणां द्विगुणोत्तरोत्तरेण कालेनोदासः स्यात्। उदयश्च नाम सवितुस्तद्दिवासिनां प्राणिनां चक्षुर्गोचरतापत्तिस्तदत्ययश्चास्तमयं न परमार्थत उदयास्तमयेस्तः। तद्दिवासिनाञ्च प्राणिनामभावे तान् प्रति तेनैव

मार्गेण गच्छन्नपि नैवोदेता नास्तमेतेति चक्षुर्गोचरता-पत्तेरुदस्तमयस्य चाभावात् । तथाऽमरावत्याः सकाशाद्द्विगुणकालं सांयमनीं पुरीं वसत्यतस्तन्निवासिनः प्राणिनः प्रति दक्षिणतः द्रवोदेत्युत्तरतोऽस्तमेतीत्युच्यते ऽस्मद्वुद्धिमपेक्ष्य तयोत्तरास्वपि पुरीषु योजना । सर्वेभ्यश्च मेरूत्तरो भवति । यदाऽमरावत्यां मध्याह्नगतः सविता तदा सांयमन्यामुदयन् दृश्यते तत्र मध्याह्नगोचरो वारुण्यामुदयन्दृश्यते । तथोत्तरस्यां प्रदक्षिणाद्दृश्यत्वात् । द्रवाद्दतवासिनां सर्वतः पर्व्वतप्राकारनिवारितादित्यरश्मीनां सवितोर्द्ध द्रवोदेताऽर्वागस्तमेता दृश्यते पर्वतोर्द्धच्छिद्रप्रवेशात्सवितृप्रकाशस्य । तथर्गाद्यस्तोपजोविनामस्तानाञ्च द्विगुणोत्तरोत्तरपौर्व्वक्त्यमनुमीयते भोगकालद्वैगुण्यलिङ्गेन" आ० उ० भाष्यम् ।

उदयन पु० उद्+इ-ल्यु । १अगस्त्ये मुनौ, कुसुमाञ्जलिग्रन्थस्तियन्थकारके २उदयनाचार्य्ये च । "व्याकृतेन किरणावलीसदयन:" द्रव्यकिरणावली । अयञ्च आत्मतत्त्वविवेकादिनामापि ग्रन्थकर्त्ता । ३छन्दोमञ्जरी "उदयनभिवानन्दितवत्सकुलम्" काद० ४वत्सराजे च । वत्सराजचरितञ्च हर्षचरितव्याख्यायां विस्तरेण वर्णितम् । "प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्" मेघ० उद+इ-भावे ल्युट् । ५उदये न० "पूर्वतः सागरस्येव चन्द्रस्योदयनं प्रति" भा० भी० ५८अ० "एषा युक्ते परावतः सूर्य्यस्योदयनादधि" ऋ० १,४८,५, "सप्तमीत्याद्युदयनमादित्यस्य" शत० ब्रा० १२, ८,१६ । ६समाप्तौ च "सैषा त्रिष्टुप्प्रायणा त्रिष्टुदुदयना" ता० ब्र० २, १५,२ त्रिष्टुप् अन्तवत्कम् उदयने समाप्तौ यस्याः" भा० ।

उदयनीया स्त्री उदयने समाप्तौ विहिता तन्निमित्तत्वेन तत्सम्बन्धिनी वा ऋ । समाप्तिनिमित्ते १इष्टिभेदे "गार्हपत्य उदनीयामाचरति" आश्व० श्रौ० ६,४,१,१, नेदमादिषु माऽनेनमर्वागुदयनीयायाः" ४,२,६, । चरुमेलक्षणवर्हिर्निदधात्युदयनीयायै" कात्या० ७,५,१६, । अवभृथादुत्थान निमित्ते २अतिरात्रे पु० "इक्षावेवोदयनीयोऽतिरात्रः" शत० ब्रा० १२,१,३,३, अवभृथादेत्योदयनीयेन चरित्वानुबन्ध्यस्य पशुपुरोडाशमनु दैविकानां हवींषि निर्वपति" ६, ५,१,३४। "प्रायणीय एवातिरात्रे युञ्जन्त्युदयनीये विसृजन्ति" । "अथो यथा प्रायणीयेऽतिरात्रे समिधेनीरनूच्य ब्रूयादुदनीयएवातोऽनुवक्काऽस्मीति" ६,४,४,१५,१६

उदयवेला स्त्री सूर्य्यस्य तत्किरणस्य वा उदयस्य वेला समयः । १सूर्य्योदयकाले २अरुणोदयकाले च "माघेमासेसिते पक्षे रटन्त्याख्यचतुर्दशी । तस्यामुदयवेलायां स्नात्वा नावेक्षते यमम्" म० त० यमः । "उदयवेलायाम् अरुणोदयवेलायामिति" म० त० रघु० । या० ति० उक्ते ३भूतानामुदयसमये च भूतोदयशब्दे विवृतिः ।

उदयान्तर न० उदयस्योदयत्राणार्थम् अन्तरं यत्र । सि० शि० उक्ते यज्ञाणामुदयत्राणार्थे संस्कारभेदे उदयशब्दे विवृतिः ।

उदयास्तसूत्र न० "ऋजौ द्युरात्रसमखण्डलमध्यभागजीवायका भवति पूर्वपराशयोः सा । अयाप्ययोः प्रगुणमत्र निवद्धत्वं यत्तद्वदन्ति गणका उदयास्तसूत्रम्" सि० शि० उक्ते क्षितिखाङ्गोरात्रवृत्तसम्पातयोर्बद्धे सूत्रे

उदर न० उद्+ऋ-अप् । १जठरे नाभिस्तनयोर्मध्यभागे । "दश स्थानानि दण्डस्येत्युपक्रम्य "उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमौ । चक्षुर्नासा च कर्णौ च घ्राणं देहस्तथैव च" मनुः । "मस्तकोदरपृष्ठनाभिललाटनासाचिबुकबस्तिग्रीवाश्चत्वेता एकैकाः" शरीरविभागे सुश्रुतः । "उदरञ्च गुदौ कोष्ठौ विस्तारोऽयसुदाहृतः" या० ऋ० । "उदरेऽन्त्रपक्तिः" शत० ब्रा० ८,६,२१,३ । "उदरं पारिमाति सदिना" "सदसत्संशयगोचरोदरी" नैष० आधारे अप् । २युद्धे । ३मध्यभागमात्रे च "ताम्रोदरेषु तरुपल्लवेषु" रघुः "लतादिविच्छित्तोदरे" अम० "कुसुममिव पिनद्धं पाण्डुपत्रोदरेण" शक० उद्+इ-अप् पृषो० दलोपश्च, उदरस्थत्वाद्वाह्योदरशब्दवाच्यता "तात्स्थ्यात्तद्धर्म्मताभ्याञ्च तत्समीपतयाऽपि च ।" तत्साहचर्य्यात् शब्दानां वृत्तिरुक्ता चतुर्विधा" भा० प्र० उक्तेः । ४उदररोगे । उदररोगनिदानादि सुश्रुते उक्तं यथा "अथात उदराणां निदानं व्याख्यास्यामः । धन्वन्तरिर्धर्म्मभृतां वरिष्ठो राजर्षिरिन्द्रप्रतिमो बभूव । ब्रह्मर्षिपुत्रं विनयोपपन्नं शिष्यं सुश्रुतमभ्यभाषत: । पृथक् समस्तैरपि चेह दोषैः श्लोदरं बद्धगुदं तथैव । आगन्तुकं सप्तममष्टमञ्च दकोदरं चेति वदन्ति तानि । क्षुद्वर्त्मनाग्नेरहितागमस्य संशुष्कपुत्वन्ननिषेवणाद्वा । क्लेदादिमिथ्याचरणाच्च जन्तोर्द्धिं गताः कोष्ठमभिप्रपन्नाः । गुल्मार्शतिव्यङ्गितलक्षणानि कुर्वन्ति घोराण्युदराणि दोषाः । कोष्ठादुपक्लेदवदन्नसारो निःसृत्य दुष्टोऽनिलवेगनुन्नः । त्वचः ससुन्नस्य गतैः समन्ताद्विवर्द्धमानो जठरं करोति । तत्पूर्व्वरूपं बलवर्णकाङ्गावस्थाविनाशो जठरे हि राज्ञः । श्लीपापरित्राणविदाहवत्त्वो वस्तौ रुजः पादगतश्च शोफः । सङ्कृच्छ्र पार्श्वोदरपृष्ठनाभीर्यद्वद्धते कृच्छ्रशिरावनद्धम् ।

सम्भवमानाहृदयशब्दं सतोदभेदं पवनात्मकं तत् ।
यच्छोषहृष्णाज्वरदाहयुक्तं पैत्तं सिरा तत्र भवन्ति पीताः ।
पीताक्षिविण्मूत्रनखाननत्वं पित्तोदरम् २ तत्त्वचिराभिदृद्धि । यच्छीतलं शुक्लसिरावनद्धं गुरु स्थिरं शुक्लनखाननत्वं ।
स्निग्धं महच्छोफयुतं ससादं कफोदरम् ३ तच्च चिराभिदृद्धि ।स्त्रियोऽन्नपानं नखरोममूत्रविड्वर्चसैर्युक्तमसाधुहृत्साः ।
यस्तं प्रयच्छन्त्यरवो गरांश्च दुष्टाम्बुदूषीविषसेवनाद्वा ।
तेनाशु रक्तं कुपिताश्च दोषाः कुर्वन्ति घोरं जठरं त्रिलिङ्गम् ५। तच्छीतवाताभ्यसनद्भवेषु विशेषतः कुप्यति दह्यते च ।
स चातुरो मूर्च्छति सम्भ्रमञ्च पाण्डुः क्षयः शुष्यति हृष्यया च । प्रक्षीर्णितं दूष्यदरन्तु घोरं प्लीहोदरम् कीर्त्तयतो निबोध । विदाह्यभिष्यन्दिरतस्य जन्तोः प्रदुष्टमत्यर्थमसृक् कफश्च । प्लीहाभिवृद्धिं सततं करोति प्लीहोदरम् ५ तत्प्रवदन्ति तज्ज्ञाः । वामे च पार्श्वे परिवृद्धिमेति विशेषतः सीदति चातुरोऽत्र । मन्दज्वराग्निः कफपित्तलिङ्गैरुपद्रुतः क्षीणबलोऽतिपाण्डुः । सव्येतरस्मिन् यकृति प्रदुष्टे श्वेयं यकृद्दाल्युदरं तदेव । तस्मान्मलैरुपलेपिभिर्वा बालाश्मभिर्वा सहितैः पृथग्वा । सङ्क्षीयते तत्र मलः सदोषः क्रमेण नाड्यामिव सङ्करोहि । निरुध्यते चास्य गुदे पुरीषं निरेति कृच्छ्रादपि चाल्पमल्पम् । वृद्ध्याभिमध्ये परिवृद्धिमेति यत्तोदरं विट्समगन्धिकत्वं । प्रच्छर्दयत् वह्नयुदं ई विभाव्यं ततः परिस्राव्युदरं निबोध । यस्यं यदन्नोपचितं तदन्त्रं भिनत्ति यस्यागतमन्यथा वा । तस्मात् च्युतान्नाम्बुसिलप्रकाशः स्रावः स्रवेद्वै गुदतस्तु सूयः । नाभेरधस्तोदरमेति वृद्धिं निस्तुद्यतेऽतीव विदह्यते च । एतत्परिस्राव्युदरं ७ प्रदिष्टं दकोदरं कीर्त्तयतो निबोध । यः स्नेहपीतोऽप्यनुवासितो वा वान्तो विरिक्तोऽथ वा निरूढः ।
पिबेज्जलं शीतलमाशु तस्य स्रोतांसि दुष्यन्ति हि तद्वहानि । स्नेहोपलिप्तेष्वथ वापि तेषु दकोदरम्पूर्ववदभ्युपैति । स्निग्धं महत्यभिवृत्तनाभि श्वयोन्नतं पूर्णमिवाम्बुना च । यथा वृतिः क्षुभ्यति कम्पते च शब्दायते चापि दकोदरं ८ तत् । व्याध्मानं गमनेऽग्निवृद्धिर्बलं च दुर्बलाग्निना । शोफः सदनमङ्गानां सङ्गो वातपुरीषयोः । दाहस्तृष्णा च सर्वेषु जठरेषु भवन्ति हि । अन्ते सलिलभावन्तु भजन्ते जठराणि तु । सर्वाण्येव परीपाकात्तदातानि विवर्जयेत्" । विस्तरस्तु भा० प्र० द्रष्टव्यः । गर्भपातनजारोगा यकृत्प्लीहजलोदराः इत्युक्तेः पुंस्त्वमपि । ५अन्ते त्रि० "उदरमन्तरं कुरुते" श्रुतिः

उदरग्रन्थि पु० उदरे ग्रन्थिरिव । गुल्मरोगे हेम० । गुल्मशब्दे विवृतिः उदरगुल्मोऽत्र पु० "इलोर्विकारहारी च भवेदुदरगुल्मवान्" भाता० स्मृतिः । [उदरबन्धवस्त्रे हेम०

उदरत्राण न० उदरं त्रायतेऽनेन त्रै–ल्युट् । (कमरबन्ध)

उदरथि पु० उद्+ऋ–बाहुलकात् थिन् । समुद्रे उज्ज्वलदत्तः ।

उदरपिशाच त्रि० उदरे तत्पूर्त्तौ पिशाच इव । सर्व्वान्नभक्षके हेमच० । [स्त्रीत्वे पूरयित्वेत्यर्थे ।

उदरपूरम् अव्य० उदर+पूर–साकल्ये क्रमुल् । उदरं साक–

उदरम्भरि त्रि० उदरं बिभर्त्ति भृ–खि मुम् च । पशुयत्राद्यकरणेनात्मोदरमात्रपोषके ।

उदररोग पु० ईत० । (उदरी) इति ख्याते रोगे । उदर शब्दे विवृतिः । उदरव्याधिरत्र "कदलीयवचारन्तु पानीयेन प्रसाधितम् । तदाखादेन नश्यन्ति उदरव्याधयोऽखिलाः" गरु० पु० ।

उदरवत् त्रि० उद्गतमुदरमस्यास्य तुन्दादि० इडभावः मतुप् मस्य वः । इदुदुदरयुक्ते । पक्षे–ठन् । उदरिक इति । उदरिन् पिच्छा० इलच् । उदरिल उक्तार्थे त्रि० इनौ मतौ च स्त्रियां ङीप् ।

उदरशय पु० उदरे शेते शी–पाचा० अच् । गर्भशये

उदरशाण्डिल्य पु० ऋषिभेदे "वृद्धशौदरशाण्डिल्याः पारार्थ्याः क्षपोवलः" भा० स० ७अ० । "तं चैतमतिधन्वा शौनकः उदरशाण्डिल्यायोक्तोवाच" छा० उ० ।

उदराध्मान न० ईत० । (पेटफाँपा) रोगभेदे । तत्कारणमुक्तं सुश्रु० "कषायः संग्राहको रोपणः सन्धनः शोधनो लेखनः शोषणः पीड़नः क्लेदोपशोषणश्चेति स एवं गुणोऽल्पेऽल्पवात्यर्थमुपसेव्यमानोऽतिपीड़ासशोषोदराध्मानवाक्यपक्षमन्यास्तम्भगात्रस्फुरणसुप्तिमायनाकुञ्चनाक्षेपणप्रभृतीन् जनयति" । तच्चाजीर्णस्य लिङ्गं तदप्युक्तं सुश्रुते तत्र उद्गिरणशब्दे वक्ष्यते ।

उदरामय पु० उदरस्थामं रोगं याति नयति वा–क । स्वनामख्याते रोगे अतिसारशब्दे दृ० विवृतिः । "शीतं मधुयुतं कृत्वा पायवेतोदरामये" "शर्करोपहितं शीतं पायवेच्छोदरामये" सुश्रु० ।

उदरावर्त्त पु० उदरे आवर्त्त इव गभीरत्वात् । नाभौ ।

उदरिणी स्त्री० उदरं तत्स्थगर्भोऽस्त्यस्याः इनि ङीप् । गर्भिण्याम् ।

उदर्क पु० उद्+अर्क–अर्च-वा घञ् । उत्तरकाले २भाविफलके शुभाशुभकर्म्मणि च । "तद्बलबलमुदर्कं जीवतश्च मृतस्य च"

"सोऽनुभूयासुखोदर्कान्" प्रेत्येह च सुखोदर्कान् प्रजाधर्मान् निबोधत" मनुः। "नन्वयमुदर्कः प्राक्तनस्य दुष्कृतस्य" दशकु०। "नानाप्रकृतयः समानोदर्का ऋतवो वा अन्यत्रान" शत०ब्रा० ८,७,१,२।

उदर्चिस् पु० उद् ऊर्ध्वमर्चिः शिखाऽस्य। १ऊर्ध्वशिखे वह्नौ। उत्कृष्टकान्तित्वात् २कदर्पे ऊर्ध्वरेतस्त्वात् ३शिवे च। ४ऊर्ध्वशिखान्विते त्रि०"प्रदक्षिणप्रक्रमणात् क्रमाणोरुदर्चिषस्त्रिपुरं चकाशे" "अर्चेवोदर्चिषं सूर्य्यम्" रघुः। "क्षुरस्योदर्चिः सहसा तृतीयादक्षः क्रमात्तःकिल निष्पपात" कुमा०। प्रा०स०। ५ऊर्ध्वायां शिखायां न०स्त्री०।

उदर्द पु० उद्+ऋर्द-अच्। "वरटादष्टसंस्थानः शोथः संजायते बहिः। सकण्डूस्फोटबहुलस्तद्वदुर्दिज्वरविद्वान्। उदर्दमिति तं विद्यात्पीतपित्तमथापरे। वाताधिकं शीतपित्तमुदर्दश्च कफाधिकम्" इति निदानोक्ते रोगभेदे।

उदर्य्य त्रि०उदरे भवः उदर+यत्। जठरभवे "यदुदर्यस्य मेदसः परिशिष्यते" शत०ब्रा० १,८,४,५, "पुरीतता नभ, उदर्येण चक्रवाकौ" यजु० २५,८।

उदलावणिक त्रि० उदकीभूतं लवणमुदलवणम् उदादेशः। तेन पक्वम् ठञ् उत्तरपदवृद्धिः उदकीभूतलवणपक्वे व्यञ्जनादौ क्षुद्रायु०।

उदवसित न० उद्+अव+सि-सो-क्त। गृहे अमरः।

उदवाप पु० उदकं वपति पिण्डस्थानीयतया वप-अण् उदादेशः उप० स०। जलमात्रेण श्राद्धकर्त्तरि २तर्पणकारिणि च। तस्यापत्यम् इञ्। औदवापि तदपत्ये पुंस्त्री ततः तस्येदमित्यर्थे रैवति० अ। औदवापीय तत्सम्बन्धिनि त्रि०।

उदवास पु० उदके व्रतार्थं वास उदादेशः। व्रतार्थं जलवासे। "अवाक्शिरास्तु योवस्येत् उदवासं च योवसेत्। सततं चैकपायी यः स लभेतेप्सितां गतिम्" भा०आनु० १७अ०"सहस्रपरमीरुदवासतत्परा" कुमा०।

उदवाह पु०उद उदकं वहति वह-अण् उप०स०। जलवाहके १मेघे। "दिवा चित्तम तस्करन्ति पर्जन्येनोदवाहेन" ऋ०१, २८,८, २उदकवाहकमात्रे त्रि०"या योयस्तूदवाहाको अद्य इदं ये विश्वे मरुतो जुनन्ति" ऋ०५,५८, "उक्षा वहन्तु मरुत उदवाहा उदप्रुतः" अथ० १८,२,२२,

उदशराव पु०उदकपूर्णः शरावः श०त०पूरणितत्पे एकदेशादौ उदादेशः। जलपूर्णे शरावे "उदशरावे आत्मानमवेक्ष्य यदात्मनो न विजानीयस्तन्मे ब्रूतमिति तौ होदशरावेऽपेक्षाञ्चक्राते" छा०उ०६प्र०।

उदशुद्धि त्रि० उद्रा उदकेन शुद्धिः। स्नाते तस्यापत्यम् इञ्। औदशुद्धि तदपत्ये पुंस्त्री ततः यूनि इञन्तत्वात् फिञ् तस्य पैङ्गा०लुक्।

उदश्रु त्रि० उद्गतमश्रु यस्य प्रा०ब० मतोलोपः। उद्गतनेत्रजले "तस्य पश्यन् स सौमित्रिरुदश्रुर्व्यसृजद्धनुः" रघुः।

उदश्वित् न० उदकेन जलेन श्वयति वर्द्धते श्वि-क्विप् संज्ञायाम् उदादेशः। अर्द्रजलेन मथिते तक्रे अमरः। "पाने सूत्तमुदश्वित्त्व दधि शुक्लत्व भोजने"। मर्द्दनं दध्युदश्वित्क्रियामथ वा तक्रलाभ्युना" सुश्रु०।

उदसन न० उद्+अस-ल्युट्। १निरसने २उत्क्षेपणे च।

उदस्थान न० उद्रा स्थापितं स्थानं शाक०त०। १उदकस्थापिते स्थाने। ततः भवार्थे उत्सा०अञ्। औदस्थान तद्भवे त्रि०। उदनि स्थानं वासः। २जलवासे। तत्शीलमस्य अत्सा०ण। औदस्थान जलवासशीले त्रि०।

उदहरण पु० उदकं ह्रियतेऽनेन हृ-करणे ल्युट् उदादेशः। कुम्भे। "प्रत्यगेकधनानयुग्मानुदहरणांस्त्रिप्रभृत्या पञ्चदशभ्यः" कात्या० ६,२,२२। "उदहरणाः कलसाः" इति कर्कः। "निधायोदहरणे त्रिर्विपक्षयते" "अथैतमग्निमुदहरणेऽवधाय" शत०ब्रा०६,१,२,५,६,६।

उदहार त्रि० उदकं हरति हृ-अण् उप०स० उदादेशः। १जलहारके "प्रविविक्षां नदीं रात्रावुदहारोऽहमागतः" दशकु० स्त्रियां ङीप्। "उतेव गोपा अदब्धब्रध्नतुदःहार्य्यः सदसो सद्यातिं" यजु०१६,७। तेन सि०कौ०"टिड्ढाणञित्यादि" सूत्रे तद्धितार्थान्तस्यैव ग्रहणोक्तिरित्या श्रतएव सुग्धबो० कर्म्मण्यण्" पा०सूत्रपरिवर्त्तनेन "ढात्परण्" इति सूत्रे ङीषर्थं विधेयं कृतम्। तथा च कुम्भकारीत्येव साधु न तु कुम्भकारा। प्रयुज्यते च नाटकादौ प्रतिहारीत्येव तत्र च प्रतिशब्दस्य प्रत्येकार्थत्वात् कर्म्मोपपदत्वं सुलभम्। भावे घञ् ६त०। २जलहरणे च।

उदाज पु० उद्+अज-घञ् न कृत्वं व्यभावः। पशुप्रेरणे

उदात्त पु० उद्+आ+दा-क्त। वर्णोत्पत्तिस्थानेषु ऊर्द्ध रुच्चारिते १स्वरे २तद्युक्ते त्रि०। "उच्चैरुदात्तः" पा०। "तास्यादिषु सभागेषु स्थानेषूर्द्धभागे निष्पन्नोऽनुदात्तः" सि०कौ०। "उदात्तश्चानुदात्तश्च स्वरितश्च स्वरा अचीति" शिक्षाग्रन्थे; अचामेव तैस्संज्ञत्वम्। अनेकाच्कपदे "अनुदात्तं

पदमेकवर्ज्यम्" पा० एकश्रुतोदात्तता अन्यस्य चानुदात्त-तोक्ता । तत्रादौ सामान्यत उदात्तविधायकं सूत्रं दर्श्यते । "अङ्गेः शकुन्यृक्षसर्ज्जनामस्थानम्" पा० । अङ्गेः परा विभक्तिरुदात्ता । प्रतीचोबाहून् । "अडिदमदाद्यप्पुम् रैदाभ्यः" पा० अट् इदम् पदादि अप् पुम् रै दिव् इत्येभ्योऽसर्ज्जनामस्थानविभक्तिरुदात्ता । प्रभीहः । एभिर्भिः । पदुदन्नोमास् हृच्छिश इति षट् पदादयः । पद्भ्याम् । दद्भिः । नसा नासि । हृदा निधा । दुर्नसः । रायो । दिवः । "अटनो दीर्घात्" पा० । दीर्घान्नादटनः परः शसादिरुदात्तः । अटभिः । "शतुरनुमो-द्यजादौ" पा० अनुम् यः शतृप्रत्ययस्तदन्नादन्तोदात्तात् परा नदी अजादिश्च शसादिर्विभक्तिरुदात्ता । जानती जानतः । दधती दधत इत्यादौ तु अभ्यस्तानामादिरित्याद्यु-दात्तत्वविधानेन अन्तोदात्तत्वाभावात् न तथा । सतुनस्तुदन्तोत्यादौ न । "उदात्तयणोहल्पूर्व्वात्" पा० उदा-त्तस्थाने योयण् हल्पूर्व्वस्तस्मात् परा नदी शसादिर्विभक्तिश्च उदात्ता । नेत्री, नेत्रा, क्रतवा सवित्रा । "नोङ्धात्वोः" पा० अनयोर्यणः परे शसादय उदात्ता न स्युः । ब्रह्मबन्धुभ्या । "हलन्ताच्च" पा० हलन्तादन्तोदात्ताद्धटश्च परो मतुप् उदात्तः । अग्निमान् उदधिमान् । तुट् अजन्तस्य नः । "रैवतोऽन्" वा० रैवान् । "नामन्यतरस्याम्" पा० । मतुपि योहलन्तस्तदन्तादन्तोदा-त्तात् परोनाम् उदात्तोवा । सुमतीनाम्" "ङ्याश्छन्दसि" पा० ङ्याः परोनाम् उदात्तो वा । अभिभक्तीनाम् । "षट्त्रिचतुर्भ्यो हलादिः" पा० एभ्योहलादिर्वि-भक्तिरुदात्ता । षड्भिः त्रिभिः । "न गोश्वन्साववर्ण्यराडङ्क्रुङ्भ्याः" पा० एभ्यः परं प्रागुक्तं सावेकाचस्तृतीया वि-भक्तिरिति न कार्य्यम् । "दिवोझल्" पा० दिवः परा झलादिर्वैदात्ता । "द्यु चान्यतरस्याम्" पा० । द्युः परा झलादिर्वैदात्ता । द्यभिः । "उपोत्तमं रिति" पा० रित्प्रत्ययान्तमुपोत्तममुदात्तम् । आहवनीयः । "मतोः पूर्व्वमात् संज्ञायां स्त्रियाम्" मतोः पूर्व्वमाकारः उदात्तः संज्ञायां स्त्रियाम् । उदुम्बरावती शरावती अशरावती "एकादेशउदात्तेनोदात्तः" पा० । उदात्तेन सहैकादेश उदात्तःस्यात् । क वोऽह्नाः । "स्वरितोवानुदात्ते पदादौ" पा० अनुदात्ते पदादौ परे उदात्तेन सहैकादेशः स्वरितो वा पक्षे उदात्तः । "वीदंज्योतिर्हृदय"। "उच्चै-स्तरां वा वषट्कारः" पा० यज्ञकर्म्मणि वषट्शब्द उच्चैस्तराम् अन्तोदात्तः एकश्रुतिर्वा "शत्रन्लक्षणायां स्वरि-तस्योदात्तः" पा० । शत्रन्लक्षणाख्ये निग्दे एकश्रुतिर्न स्यात् स्वरितस्य उदात्तः स्यात् । "झल्युपोत्तमम्" पा० षट्त्रि चतुर्भ्यो वा झलादिर्विभक्तिस्तदन्तेपदे उपोत्तममुदा-त्तम् । पद्भिः दशभिः । "विभाषा भाषायाम्" पा० । उक्तविषये लोके वोदात्तः । "अनश्च तवै युगपत्" पा० तवै प्रत्ययान्तस्याद्यन्तौ युगपदुदात्तौ । दातवै । "अस्थिदधिसक-थ्यक्ष्णामनङुदात्तः" पा० । दध्नादेशोऽनङुदात्तः "वतुर-नडुहोरामुदात्तः" पा० इत्यादीनि उदात्तविधायकानि । तत्र बहुच्के पदे कश्चोदात्ततेति निर्णयाय आद्यन्तोदा-त्तादिभेदेन" पा० त्रैविध्ययुक्तं तथा च केचिदाद्यु-दात्ताः केचिदन्तोदात्ताः केचित् मध्योदात्ताः । तत्राद्युदात्ततविधायकत्वात्रापि आद्युदात्तशब्दे ७०६ पृ० उक्तानि अन्तोदात्तविधायकानि अन्तोदात्तशब्दे २०६ पृ० दिङ्मात्रमुदाहृतानीह्यतः प्रसङ्गात्तान्यत्र प्रदर्श्यन्ते "उच्चादीनाञ्च" पा० अन्त उदात्तः स्यात् उच्चादयच्च । उच्च स्रेच्च जञ्च जल्प जप वुष युग (गरोद्गूर्णे) (वेदवेदनवन्द्याः करणे) (सुयुद्रुव-स्रुन्दसि) (वर्त्तनिःस्रोत्रे) (दरःखन्ने) (सान्त्वना-पौ भावगर्हायाम्) (उत्तमसत्तमौ सर्व्वत्र) भज गन्ध-भोग मन्थ । अत्रैव निपातनात् युगबुधयोर्धअन्तत्वेऽपि न गुधः" । "चतुरः शसि" पा० । चतुरोऽन्त-उदात्तः शसि परे । चतुरः । चतेरुरन्निति निच्चादा-द्युदात्तत्वेऽपि शसि अन्तोदात्ततैव । "अन्तोऽवत्याः" पा० अवतीशब्दस्थान्त उदात्तः । वेत्रवती । "ईवत्याः" पा० ईवत्यन्तस्यापि अन्त उदात्तः । अक्षीवती सनीवती । "चितः" पा० चित्प्रत्ययान्तस्यान्त उदात्तः स्यात्" । "चितः सप्रकृतेर्बहुव्रजर्थम्" वार्त्ति० । चिति प्रत्यये सति प्रकृतिप्रत्ययसमुदायस्यान्त उदात्तः । "नमन्तान्यत्रके सभे "यके सरस्वति"तकत् कुरुते "तद्धितस्य" पा० चितस्त-द्धितस्यान्त उदात्तः पूर्व्वेण सिद्धे ञित्स्वरबाधनाय । चफञ् कौञ्जायनाः । "कितः" पा० कितस्तद्धितस्यान्त उदात्तः । ढक् आग्नेयः । "तिसृभ्योजसः" पा० अन्त उदात्तः । तिसृः । "अन्तोदात्तादुत्तरपदादन्यतरस्याम्" पा० नित्याधिकारस-मासादन्यत्र यदुत्तरपदमन्तोदात्तमेकाच् ततः परा तृतीया विभक्तिरन्तोदात्ता वा । परमवाचा । "थलि च सेटीडन्ते वा" पा० सेटि थलि परे क्ङिदात्तः क्ङिदन्तोवाद्या-दिर्वा । लुलुविथ चत्वारोऽपि मध्योदात्ताः ।

फिट्सूत्रैरपि १पादे केचित् यद्वा अन्तोदात्ताः दर्शिता यथा। "फिषोऽन्तउदात्तः"१। प्रातिपदिकं फिट् तस्यान्त उदात्तः स्यात्। उच्चैः। "पाटलापालङ्काम्बासागरार्था नाम्" २। एतदर्थानामन्तउदात्तः। पाटला फलेरुहा शुरुपा पाकलेति पर्यायाः। लघावन्त इति प्राप्तः। पालङ्कोव्याधिघातत्वारेवतआरग्वध इति पर्यायाः। अम्बार्थः माता। उनर्वनन्तानामाद्युदात्ते प्राप्ते। सागरः। समुद्रः। "गेहार्थानामस्त्रियाम्"३। गेहम्। नब्विषयस्येति प्राप्ते। अस्त्रियां किम् शाला आद्युदात्तोऽयम् इकैव पर्युदासाज्ज्ञापकात्। "गुदस्य च" ४। अन्तउदात्तःस्याद्वत स्त्रियाम्। गुदम्। अस्त्रियां किम् "आन्नेभ्यस्ते गुदाभ्यः"। खाङ्गशिटामदन्तानामित्यन्तरङ्गमाद्युदात्तत्वम् ततष्टाप्। "ध्यपूर्वस्य स्त्रीविषयस्य"५। धकारयकारपूर्वयोरन्योऽच् स उदात्तः। अन्तर्धा। स्त्रीविषयवर्णेति प्राप्ते। छाया। माया। जाया। यान्तस्यान्यात् पूर्वमित्याद्युदात्तत्वे प्राप्ते। स्त्रीति किम् वाह्यम् यञन्तत्वादाद्युदात्तम्। विषयग्रहणं किम् इच्छा। क्षत्रिया। यतोऽनाव इत्याद्युदात्तश्छन्दसः। क्षत्रियशब्दस्तु यान्तस्यान्यात्पूर्वमिति मध्योदात्तः। "खान्तस्याद्यादेः"६। नखम्। उखा। सुखम्। दुःखम्। नखस्य खाङ्गशिटामित्याद्युदात्ते प्राप्ते। उखा नाम भाण्डविशेषस्तस्य ऋविमत्वात् खयुवर्णं ऋत्विमाख्या चेदिङुवर्णस्योदात्तत्वे प्राप्ते। अद्यादेः किम् शिखा। सुखम्। सुखस्य खाङ्गशिटामिति नब्विषयस्येति वा आद्युदात्तत्वम्। शिखायास्तु शीङः खो निङ्खचेति उणादिषु निपातोक्तेः अन्तरङ्गत्वाद्यापः प्रागेव खाङ्गशिटामिति वा बोध्यम्। "बंहिष्ठसंवत्सरतिगत्यान्तानाम्"७। एषामन्त उदात्तः स्यात्। अतिशयेन बहुलो बंहिष्ठः। निपातादाद्युदात्ते प्राप्ते। "बंहिष्ठैरश्वैः सुहता रथेन"। "बहुबंहिवन्नाति विधे" इत्यादौ अव्ययादाद्युदात्तः। संवत्सरः। अव्ययपूर्वपदप्रकृतिस्वरोऽत्र बाध्यते इत्याङ्गः। सप्ततिः। अशीतिः। लघावन्त इति प्राप्ते। चत्वारिंशत्। इहापि प्राग्वत्। अभ्युत्या। "नावद्यस्य" ८। अव्ययपूर्वपदप्रकृतिस्वरोऽत्र बाध्यते इत्याङ्गः। बाधादिसूत्रेण गतार्थमेतत्। "दक्षिणस्य साधौ" ९। अन्त उदात्तः स्यात्। साधुवाचित्वाभावे तु व्यवस्थायां सर्वनामतया खाङ्गशिटामित्याद्युदात्तः। अर्थान्तरे तु लघावन्त इति गुरूदात्तः। दक्षिणः सरलोदारपरश्चन्दानुवर्त्तिमिति कोशः। "खाङ्गाख्यायामादिर्वा"१०। इह दक्षिणस्याद्यन्तावुदात्तौ। दक्षिणो बाहुः आख्यायामिति किम्। प्रत्यङ्मुखमासीनस्य वामपार्श्वदिक्षिणो भवति। "छन्दसि च" ११। अखाङ्गार्थमिदम्। दक्षिणः। इह पर्यायेणाद्यन्तावुदात्तौ। "कृष्णखाङ्गाख्या चेत्" १२। अन्तउदात्तः। वर्णानामन्येत्याद्युदात्ते प्राप्ते अन्तोदात्तो विधीयते। कृष्णानां व्रीहीणाम्। "कृष्णो नो नाव इषभः"। खाङ्गाख्यायान्तु "कृष्णो रात्र्याम्"। "वा नामधेयस्य"१३। "कृष्णखेलेव। "अयं वा कृष्णोऽग्निना"। कृष्णऋषिः। "शुक्लगौरवोरादिः"१४। नित्यमुदात्तः स्यादित्येके। वेत्यनुवर्त्ततइति तु युक्तम्। "सरो गौरा यथापि वेत्यत्रानोदात्तदर्शनात्"। "अङ्गुलेर्दकवकवणानां छन्दसन्तः"१५। अङ्गुलस्य खाङ्गानामकुर्व्यादीनामिति द्वितीयखोदात्तत्वे प्राप्तेऽन्तोदात्तार्थं आरम्भः। वचायग्रहणं नियमार्थं छन्दस्येवेति। तेन लोके आद्युदात्ततेत्याङ्गः। "वृक्षस्य च"१६। छन्दस्यन्तउदात्तः स्यात् भाषायाम् वा। वृक्षम्। "अर्ज्जुनस्य वृक्षाख्या चेत्"१७। उनर्वन्नानामित्याद्युदात्तस्यापवादः। "अर्यस्य स्वाम्याख्या चेत्" १८। यान्तस्यान्यात् पूर्वमिति यतोऽनाव इति वाद्युदात्ते प्राप्ते वचनम्। "आयाया अदिगाख्या चेत्"१९। दिगाख्यायामत्यर्थमिदम्। अतएव ज्ञापकाद्विरूपर्य्यायस्याद्युदात्तता। "इन्द्र आयाभ्यस्करि"। "नक्षत्राणामाब्विषयाणाम्"२०। अन्तउदात्तः स्यात्। अश्लेषाऽनुराधादीनां लघावन्त इति प्राप्ते। ज्येष्ठाषाढविशाखनिडानामिदन्नन्तत्वेनाद्युदात्ते प्राप्ते वचनम् "न कृपूर्वः कृत्तिकाख्या चेत्" २१। अन्तउदात्ता स्त्री। कृत्तिका नक्षत्रम्। केचित्तु कृपूर्वो य आप् तद्विषयाणामिति व्याख्याय आर्थिका बहुलिका इत्यत्राप्यन्तोदात्तो नेत्याङ्गः। "घृतादीनाञ्च" २२। "घृतं मिमिक्षे" आकृतिगणः। "ज्येष्ठकनिष्ठयोर्वयसि उदात्तः स्यात्। "ज्येष्ठ आह चमसा"। "कनिष्ठ आह चतुरः"। वयसि किम् ज्येष्ठः श्रेष्ठः, कनिष्ठोऽल्पिष्ठः। इह नित्यादाद्युदात्त एव। "वित्तमिष्योः खरितो वा" २४। अनयोरन्तः खरितो वा स्यात्। पक्षे उदात्तः। सि० कौ०। फिट्सूत्रे २पादे येषां द्वितीयादृचासुदात्तताऽभिहिता तत् प्रदर्श्यते "अथ द्वितीयं प्राणीषात्"१। दैर्घान्तस्य धातोरित्यतः प्राक् द्वितीयाधिकारः। "तृषां प्राङ्करात्"२। मकरवरुडेत्यतः प्राक् तृचामित्यधिकारः। "खाङ्गानाम-

कुर्वादीनाम्" २। कवर्गरेफवकारादीनि वर्जयित्वा त्रयाणां खाङ्गानां द्वितीयस्तदात्तम्। ललाटम्। कुर्वादीनान्तु कपोलः। रसना। वदनम्। "मादीनाञ्च" ४। मलयः। मकरः। "शादीनां शाकानाम्"५। शीतन्या शतपुष्पा। "पान्तानां शुर्वादीनाम्" ६। सदपः आतपः। लघ्वादीनान्तु अनूपम्। "युतान्यखलानाम्" ७। युत अयुतम्। अनि धमनिः। अषि विषिः। "मकरवरुड़पारेवतवितस्तेक्षाजिह्माशाकलोमाकाशायुतशाकाशीनामादिर्वा" ८। एषामादिर्द्वितीयो वोदात्तः। मकरः। वरुड इत्यादि। "छन्दसि च" ९। अमकराद्यर्थं आरम्भः। लक्षानुसारादादिर्द्वितीयं वोदात्तं ज्ञेयम्। "कर्कमादीनाञ्च"१०। आदिर्द्वितीयं वोदात्तम्। "सुगन्धितेजनस्य ते वा"११। आदिर्द्वितीयस्तेशब्दश्चेति त्रयः पर्य्यायेणोदात्ताः। सुगन्धितेजनाः। "नपः फलान्तानाम्"१२। आदिर्द्वितीयश्चोदात्तम्। राजादनफलम्। "यान्तस्यान्त्यात् पूर्व्वम्" १३। कुलायः। "यान्तस्य च नालघुनो"१४। नायशब्दो लघु च उदात्तौ स्तः। सनाथा सभा। सरथा सेना "शिशुमारोदुम्बरबल्वीवर्दोष्ट्रारपुरुरवसाञ्च" १५। अन्त्यात् पूर्व्वस्तदात्तं द्वितीयं वा। "साङ्ख्यकाम्बिल्यनासिक्यदार्वाघाटानाम्" १६। द्वितीयस्तदात्तं वा। "रैभ्यान्तस्य फलादेरादिर्वा"१७। फलीषा। साङ्गलीषा। ४पादे "शकटिशकधोरत्तरमक्षरं पर्य्यायेण"१। उदात्तम्। शकटिः। शकटी। "गोष्ठजस्य ब्राह्मणनामधेयस्य" २। अक्षरमक्षरं पर्य्यायेणोदात्तम्। गोष्ठजः ब्राह्मणः अन्यत्र गोष्ठजः पशुः। कदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः। "पारावतश्येनोत्तमवर्जम्" २। श्येनं क्रमेणोदात्तम्। पारावतः। "धूम्रजानुसङ्गकेशकालबालस्थालीपाकानामधूम्रजस्थानाम्" ४। एषाञ्चतुर्णान्धूम्रभृतींश्चतुरो वर्जयित्वा शिष्टानि क्रमेणोदात्तानि। धूम्रजानुः सङ्गकेशः कालबालः स्थालीपाकः। "कपिकेशहरिकेशयोश्छन्दसि" १५। कपिकेशः हरिकेशः।

समासस्य बहुपदघटिततया कस्योदात्ततेति निर्णयाय केचित् पूर्व्वपदप्रकृतिस्वराः केचित् उत्तरपदप्रकृतिस्वराः केचित् पूर्व्वपदे आद्युदात्ताः केचिच्च तदन्तोदात्ताः केचित् उत्तरपदे आद्युदात्ताः केचिच्च तदन्तोदात्ताः इति विभागं मनसि निधाय पाणिनिना ६अध्याये समासस्वरप्रकरणमारब्धं यथा "समासस्य" पा०अत्र उदात्तः। यश्चियम्। इति सामान्यतोविधाय विशेषमाह।

तत्पादौपूर्व्वपदप्रकृतिस्वरः। "बहुव्रीहौ प्रकृत्या पूर्वपदम्" पा०। उदात्तस्वरितयोर्गिपूर्व्वपदं प्रकृत्या स्यात् ब०व्री०। अन्तोदात्ततापवादः। "सत्यश्चित्तखवस्तमः"। सर्वान्तुदात्ते पूर्वपदे तु अन्तोदात्तएव। समपादः। "तत्पुरुषे तुल्यार्थद्वितीयासप्तम्युपमानाऽव्ययद्वितीयाकृत्याः"। पा०। सप्तैते पूर्व्वपदभूतास्तत्पुरुषे प्रकृतिस्वराः। तुल्यश्वेतः समश्वेतः। किरिणा काणः किरिकाणः। मदयत्सखः। मदयति मादके इन्द्रे सखा। श्यामश्यामः घन श्यामः। "अव्यये नञ्कुनिपातानामिति वाच्यम्" वार्त्ति०। अयत्नः। नञित्वाद्युक्तेः प्रोष्ठपादीयानित्यादौ न। द्वितीया श्रयणसुखम्। क्षत्रिया भोज्योष्णम्। "वर्षौवर्षेऽभ्येते" पा० वर्ष्वाचिन्युत्तरपदे एतवर्ज्जिते वर्ष्वाचि पूर्व्वपदं प्रकृत्या तत्पुरुषे। कृष्णसारङ्गः। वर्ष्वः किं परमकृष्णः इत्यादौ, वर्ष्वसु किं कृष्णतिला इत्यादौ च न, एवं कृष्णैत इत्यत्रापि। "गाधबाधयोः प्रमाणे"पा० एतयोरुत्तरपदयोः प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या। अरित्रगाधम् तत्प्रमाणमित्यर्थः। गोदवसम् यावद्गवे दीयते तावदित्यर्थः। "दायाद्यं दायादे" पा० धनदायादः। "प्रतिबन्धि चिरकृच्छ्रयोः" पा०। प्रतिबन्धिवाचि पूर्व्वपदं प्रकृत्या एतयोः परयोः। गमनचिरम्। कथनकृच्छ्रम्। गमनादिकारणविकलतया चिरकालभावि कृच्छ्रयोगितया चात्र प्रतिबन्धः। अन्यत्र मूलकृच्छ्रमित्यादौ न। "पदेऽपदेशे" पा०। व्याजवाचिनि उत्तरपदे प्राग्वत्। मूलपदेन प्रस्थितः। अनपदेशे तु विष्णुपदम् अत्र न "निवाते वातत्राणे" पा० पार्श्ववाचिनिवाते परे वातत्राणवाचिनि तत्पुरुषे प्राग्वत्। कुटीनिवातम्। वातत्राणाभावे तु राजनिवाते वसतीत्यत्र न "शारदेऽनार्त्तवे" पा० आर्त्तत्वभिन्नवाचिनि शारदे परे प्राग्वत्। रज्जुशारदसदकम्। रज्ज्वाः सद्य उद्धृतमित्यर्थः। आर्त्तवार्थत्वे तु उत्तमशारदमित्यादौ न। "अध्वर्युकषाययोर्जातौ" पा० एतयोः परयोर्जातिवाचकस्य प्राग्वत्। कठाध्वर्युः दौवारिककषायम्। अजातेस्तु परमाध्वर्युरित्यादौ न "सदृशप्रतिरूपयोः सादृश्ये" पा० पितृसदृशः पितृप्रतिरूपः। असादृश्ये तु परमसदृश इत्यादौ न। सादृश्यमत्र पूज्यता न तु सादृश्यमात्रम् सि० कौ०। "द्विगौ प्रमाणे" पा० द्विगौ प्रमाणवाचिनि परे पूर्वपदं प्रकृतिस्वरम्। प्राच्यसप्तसमः।

षष्ठ्यर्थसमासः प्रमाणमस्य सप्तमम्; ततः कर्म०। "गन्तव्यपण्य वाणिजे" पा०। वाणिजशब्दे परे एतदर्थको प्राग्वत् तत्पुरुषे। मद्वाणिजः; गोवाणिजः। अगन्तव्यादौ तु परमवाणिज इत्यादौ न। "मात्रोपज्ञोपक्रमच्छाये नपुंसके" पा० "मात्रादिषु परतः नपुंसकवाचिनि तत्पुरुषे प्रकृत्या। भिक्षामात्रम्। पाणिन्युपज्ञम्। नन्दोपक्रमम्। इदमुच्छायम्। नपुंसके किम् इच्छाया इत्यादौ न। "सुखप्रिययोर्हिते" पा०। गमनसुखं गमनप्रियम्। "प्रीतौ च" पा० प्रीतौ गम्यायां प्रागुक्तम्। ब्राह्मणसुखं पयःपानम्। ब्राह्मणप्रियोऽनध्यायः। "स्वं स्वामिनि" पा०। गोस्वामी। अन्यत्र परमस्वामीत्यादौ न। "पत्यावैश्वर्ये" पा०। भूपतिः। "न भूवाक्चिद्दिधिषु" पा०। "प्रागुक्तं न। भूपतिः वाक्पतिः; चित्पतिः दिधिषुपतिः। "वा भुवनम्" पा०। प्रागुक्तं वा। भुवनपतिः। "आशङ्काबाधनेदीयस्तु सम्भावने" पा०। गमनाशङ्कमस्ति गमनाबाधम् गमननेदीयः। गमनमाशङ्कते आबाध्यते निकटतरमिति सम्भाव्यते इत्यर्थः। असम्भावने तु परमनेदीय इत्यादौ न। "पूर्वं भूतपूर्वे" पा० भूतपूर्वार्थे पूर्वशब्दे परे पूर्वपदं प्रकृत्या। आढ्यपूर्वः। "सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये" पा०। सद्मसविधम्। एवं सनीडादिषु। असामीप्ये तु सह मर्यादया समर्यादं चैत्रेण चैत्रसमर्यादमित्यादौ न। "विस्पष्टादीनि गुणवचनेषु" पा०। विस्पष्टकटुकम्। विस्पष्ट विचित्र व्यक्त सम्यक् पण्डित कुशल चपल निपुण" एते विस्पष्टादयः। अगुणवचने तु विस्पष्टब्राह्मण इत्यादौ न। "अल्पावमकनृपापवत्तु भावः कर्मधारये" पा०। अल्प, अवम, कन् इत्यादेशवति पापिवाचिनि च परे भाववाचि पूर्वपदं प्रकृत्या। गमनाल्पकं गमनाल्पीयः गमनावमम् गमनकनिष्ठम्। गमनपापिष्ठम्। "कुमारश्च" पा०। कर्मधारये पूर्वपदं प्रकृत्या। कुमारश्रमणः। "आदिः प्रत्येनसि" पा० कुमारस्यादिरुदात्तः प्रत्येनसि परे कर्म०। कुमारप्रत्येनाः। "पूगेष्वन्यतरस्याम्" पा० कुमारचातकाः कुमारजीवृताः। "द्विगन्नकालकपालभगालशरीरेषु द्विगौ" पा०। द्विगन्ने पञ्चारत्निः। काले पञ्चमास्यः दशमास्यः। पञ्चकपालः पञ्चभगालः। (भगालः पात्रभेदः)। पञ्चशरीरः। "बह्वन्यतरस्याम्" पा०। प्रकृत्या वा। बह्वरत्निः बहुमास्यः। "दिष्टिवितस्योश्च" पा०। प्रकृत्या वा। पञ्चदिष्टिः पञ्चवितस्तिः। "सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात्" पा०। अकालवाचि सप्तम्यन्तमु एषु परेषु प्रकृत्या। साङ्काश्यसिद्धः आतपशुष्कः स्थाल्पक्वः वक्रबन्धः। काले तु पूर्वाह्णसिद्ध इत्यादौ न। परिप्लवपापा वर्त्तमानाहोरात्रावयवेषु" पा०। एते प्रकृत्या वर्त्तमानाहोरात्रावयववाचिनि परे। परित्रिगर्त्तं दृष्टोदेवः। प्रतिपूर्वाह्णम्। प्रत्यपररात्रम्। उपपूर्वरात्रम्। अपत्रिगर्त्तम्। "उपसर्गा आद्युदात्ताः अभिवर्ज्यम्" इति बहुव्रीहितत्पुरुषयोः सिद्धत्वादव्ययीभावार्थमिदम्" सि०कौ०। "राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु" पा०। बहुवचनान्तानां राजन्यानामन्धकवृष्णिषु वर्त्तमाने द्वन्द्वे पूर्वपदं प्रकृत्या। शिनिवासुदेवाः। "संख्या" पा०। द्वन्द्वे संख्यावाचि पूर्वपदं प्रकृत्या "द्वादशत्रयोदश। "आचार्योपसर्जनश्चान्तेवासी" पा०। द्वन्द्वे प्रागुक्तम्। पाणिनीयवौडीयाः "कार्त्तकौजपादयश्च" पा०। द्वन्द्वे एषां पूर्वपदं प्रकृत्या। ते च कार्त्तकौजपौ सावर्णिकमाण्डूकेयौ अवन्त्यश्मकाः पैलशालंकायनाः कपिशालंकायनाः गौतिकाचपाङ्खालेयाः; कटूकवाधूलेयाः शाकलशुनकाः शाकलशणकाः शणकबाभ्रवाः आर्ष्टाभिषौद्गलाः कुन्तिसुराष्ट्राः चिन्तिसुराष्ट्राः; तण्डवतण्डाः अविमक्तकाम्बिद्धाः बाभ्रवशालङ्कायनाः बाभ्रवदानच्युताः कठकालापाः कठकौथुमाः; कौथुमलौगाक्षाः स्त्रीकुमारम् मौदपैप्पलादाः। वत्सजरन्तः सौश्रुतपार्थवाः जराशठा याज्ञवल्क्यानुवाक्ये। "महान् व्रीह्यपराह्णदृष्टोषास आवालभारभारतहैलिहिलरौरवप्रवृद्धेषु" पा०। एषु परेषु महच्छब्दः प्रकृत्या। महाव्रीहिः; "सन्महदिति प्रतिपदोक्तसमास एवायं स्वरः न पदोसमासे" सि०कौ०। "शुक्लकृष्ण वैश्वदेवे" पा०। शुक्लकृष्णवैश्वदेवम् महावैश्वदेवम्। कृष्णं लाति शुक्लः ततः कन्। "उष्ट्रः सादिवाम्योः" पा० उष्ट्रसादिः उष्ट्रवामिः। "गौःसादसादिसारथिषु" पा०। गोसादः गोसादिः गोसारथिः। "कुरुगार्हपतरिक्तगुर्वसूत जरत्यश्लीलदृढरूपापरेवडबातैतिलकद्रुः पण्यकम्बलोदासीभाराण्णञ्" पा०। एषां सप्तानां समासानां दासीभारादेश पूर्वपदं प्रकृत्या। ईत०। कुरुगार्हपतम्। "ढञेरिति वाच्यम्" वार्त्ति०ढञिगार्हपतम्। कर्म०रिक्तगुरुः। कर्म०असूतजरती। क०अश्लीलदृढरूपा। पारेवडवेव इवार्थे क० विमक्तलोपश्च नि०। क०तैतिलकद्रुः। क०पण्यकम्बलाः। ईत०। दासीभारः देवकृतिः; देवभीतिः देवलातिः वसुनीतिः ओषधिचन्द्रमाः आकृतिगणः। "अस्य ततपुरुषस्य पूर्वपदप्रकृतिस्वर इष्यते न विशिष्य विधानं स सर्वोऽपि दासीभारादिषु दृश्यः" सि०कौ०। "चतुर्थी तदर्थे" पा०। चतु-

र्थेनार्थाव यत् तदाचिनि परे पूर्वपदं प्रकृत्या । ४त०। यूपदारु ।"अर्थे"पा०। अर्थे परे चतुर्थ्यन्तं प्रकृत्या । देवार्थम् ।"क्ते च"पा०। क्तान्ते परे चतुर्थ्यन्तं प्रकृत्या ।४त० गोक्षितम् । "कर्मधारयेऽनिष्ठा" पा०। क्तान्ते परे पूर्वमनिष्ठान्तं प्रकृत्या । श्वेषिक्षताः पूगक्षताः श्वेता क्षतमित्यादौ न । निष्ठान्तस्यापि न, क्षताक्षतम् । "अहीने द्वितीया" पा० । अहीनवाचिनि समासे क्तान्ते परे द्वितीयान्तं प्रकृत्या । कष्टं श्रितः कष्टश्रितः । यागमतः "अनुपसर्ग इति वक्तव्यम्"वार्त्ति०। नेह सुखप्राप्तः कष्टाश्रितः । "तृतीया कर्मणि" पा०। कर्मवाचकक्तान्ते परे तृतीयान्तं प्रकृत्या । हरिहृतः महाराजहृतः । कर्मणि किं रथेनायातः रथायात इत्यादौ न । "गतिरनन्तरः" पा०। कर्मार्थे क्तान्ते परेऽव्यवहितोगतिः प्रकृत्या । पुरोहितम् । व्यवधाने तु न अभ्युद्धृतः । "तादौ च निति कृत्यतौ" पा० । तकारादौ निति तुमुन्ण्वुलभिन्ने कृति परे गतिरनन्तरः प्रकृत्या ।"प्रभूतौ सङ्भवः गौः" कृत्स्वरापवादः । तौ तु न, आगन्तुः। "तवै चान्तश्च युगपत्"पा० तवै प्रत्ययान्तस्यान्त उदात्तः गतिश्चानन्तरः प्रकृत्या तच्च युगपत् । अन्तेतवै । "अनिगन्तोऽञ्चतौ वप्रत्यये" पा० । अनिगन्तगतिर्वप्रत्ययान्ताञ्चतौ परे प्रकृत्या । "वेपराञ्चस्तान्" "न्यधी"पा०। तस्मिन् परे न्यधी गती प्रकृत्या । न्यङ् अध्यङ् । "दैवदन्यतरस्याम्"पा०। दैवत्कडारः । दैवद्भेद इत्यादौ तु कृत्स्वरएव ।"हिरण्यपरिमाणं धने" पा० । वा प्रकृत्या । द्विसुवर्णधनं कर्मधारयः ।"प्रथमोऽविरोपसम्पत्तौ"पा०। प्रथमः प्रकृत्या नूतनत्वे । प्रथमवैयाकरणः । सम्प्रति व्याकरणमध्येतं प्रवृत्त इत्यर्थः । संख्यार्थत्वे तु न । "कतरकतमौ कर्मधारये" पा० । वा प्रकृत्या । कतरकठः । "आर्यो ब्राह्मणकुमारयोः" पा० । कर्म० प्रकृत्या । आर्यब्राह्मणः आर्यकुमारः ।"राजा च" पा०। राजब्राह्मणः राजकुमारः।"षष्ठी प्रत्येनसि" पा० षष्ठ्यन्तोराजा प्रत्येनसि परे वा प्रकृत्या । राजप्रत्येनाः । कर्म० न । "क्ते नित्यार्थे" पा० । क्तान्ते परे नित्यार्थे समासे पूर्वं प्रकृत्या । नित्यकृसितः "श्यामः शिल्पिनि" पा०। वा प्रकृत्या । श्यामनापितः । अशिल्पिनि न, श्यामरथ्या । "राजा च प्रशंसायाम्" पा०। शिल्पिवाचिनि परे प्रशंसार्थं राजपदं वा प्रकृत्या । राजनापितः राजकुलालः। अशिल्पिनि तु राजकुलोत्यादौ न ।

एवम् अनोदात्तापवादं पूर्वपदप्रकृतिस्वरमभिधाय आद्युदात्तस्वरमपि तदपवादतयाऽभिदधे ।

"आदिरुदात्तः"पा०।अधिकारोऽयम् ।"सप्तमीहारिणौ धर्म्येऽहरणे"पा० सप्तम्यन्तं हारिवाचि च आद्युदात्तं स्यात् धर्म्ये परेऽहरणे । देयं यः स्वीकरोति स हारीत्युच्यते धर्म्यमित्याचारनियतं देयम् । सकटेकार्षापणम् । हलेहिपदिका । संज्ञायामिति सप्तमीसमासः कारणान्नि चेल्लुक् । यात्रिकाद्यः वैयाकरणरूढ्या । क्वचिदयमाचारः सकुटादिषु कार्षापणादि भूतित्वेन देयम् यात्रिकादीनां त्वर्थादिरिति तत्र यात्रिकादीनां धर्म्यरूपदेयस्य स्वीकारित्वात् यात्रिकादिपदस्यो दात्तत्वम् । बीजनिषेकाद्युत्तरकालं देहसुखार्थं यदुदीयते तद्धरणं तस्मिन् परे न । वाडवहरणम् । वडवाया अयं वाडवः तस्मिन् हरणमित्यर्थः । परोऽपि कृत्स्वरो हारिस्वरेण बाध्यते इत्यहरणनिषेधेन ज्ञापितम् । "युक्ते च" पा०। युक्तवाचिनि समासे पूर्वमाद्युदात्तम् । गोवल्लवः । कर्त्तव्ये तत्परश्चेह युक्तः । "विभाषाध्यक्षे" पा० । अध्यक्षे परे प्रागुक्तं वा । गवाध्यक्षः । "यापयश्च शिल्पिनि" पा०। यापनापितः । यापापक इति प्रतिपदोक्तस्यैव यकृणात् षष्ठीसमासे न । "गोत्रान्तेवासि माणवब्राह्मणेषु क्षेपे" पा० । क्षेपे गम्ये एषु पूर्वपदमाद्युदात्तं स्यात् । तत्र गोत्रे भार्यासौनुतः । सुनुतापत्यस्य भार्यप्रधानतयेह क्षेपः । अन्तेवासिनि । कुमारीदाक्षाः ओदनपाणिनीयाः । कुमार्यादिलाभका मनयैव दाक्ष्यादिप्रोक्तशास्त्राध्यायिनां क्षेपः । भिक्षामाणवः भिक्षां लप्स्येऽहमिति माणवः इति क्षेपः । भयब्राह्मणः भयेन ब्राह्मणः सम्पद्यते इति क्षेपः । "अङ्गानि मैरेये" पा० मधुमैरेयः मधुनो मद्याङ्गत्वात् तत्परे तथात्वम् । "भक्ताख्यास्तदर्थेषु" पा०। भिक्षादयोऽन्नविशेषाः कंसादिरूपपात्रस्य तदर्थत्वात् तत्परे भिक्षादीनां प्रागुक्तम् । भिक्षाकंसः भाजीकंसः । "गो विडालसिंहसैन्धवेषूपमाने" पा० । उपमानवाचिषु एषु पूर्वपदमाद्युदात्तम् । धान्यगवः धान्यं गौरिवेति वाक्ये गवाक्षत्वा सन्निविशेतं धान्यं धान्यगवः । गोविडालः । लवणसिंहः सक्तुसैन्धवः ।"अके जीविकार्थे" पा०। अकान्ते परे जीविकार्थवाचिनि समासे पूर्वपदमाद्युदात्तम् । दन्तलेखकः । दन्तलेखनेन जीविकावान् । "प्राचां क्रीडायाम्" पा०। प्राच्यानां क्रीडावाचिनि समासे अकान्ते परे प्रागुक्तम् । उद्दालपुष्पभञ्जिका ।

"अधि नियुक्ते" पा०। अधन्ते परे नियुक्तवाचिनि समासे प्राग्वत्। कृतधारः। "शिल्पिनि चाकृञः" पा०। शिल्पिवाचिनि अकृञः पराधन्ते परे प्राग्वत्। तन्तुवायः। अशिल्पिनि तु न, कृतवापः। कृञोऽपि न, कुम्भकारः। "संज्ञायाञ्च" पा०। अधन्ते प्राग्वत्। तन्तुवायो नाम लूताकृमिः। अकृञ इत्येव रथकारोनाम ब्राह्मण इत्यत्र न। "गोतन्तियवं पाले" पा०। गोपालः तन्तिपालः यवपालः। अनियुक्तार्थोऽयमारम्भः नियुक्ते तु पूर्वेण सिद्धः। "णिनि" पा०। णिन्यन्ते परे प्राग्वत्। पुष्पहारी। "उपमानं शब्दार्थप्रकृतावेव" पा०। उपमानवाचि पूर्वपदं णिन्यन्ते परे आद्युदात्तम्। उष्ट्रक्रोशी श्वाडम्बरावी। अशब्दार्थे तु हंसवल्लीत्यादौ न। प्रकृतिग्रहणेन उपसर्गेण शब्दार्थत्वे गर्दभोच्चारीत्यादौ न। "युक्तारोह्यादयश्च" पा०। एते आद्युदात्ताः। युक्तारोही आगतरोही आगतयोधी आगतपक्षी आगतनन्दी आगतपुत्रारी आगतमल्लाः क्षीरहोता भगिनीभर्त्ता श्यामगोधुक् अश्वत्तिरात्रः गर्गत्तिरात्रः व्युष्टित्तिरात्रः गणपादः एकर्णितिपाद् पाले सन्धिताद्यश्च युक्तारोह्यादिः। "दीर्घकाशतुषभ्राष्ट्रवटं जे" पा०। जे परे एतानि आद्युदात्तानि। दीर्घजः काशज इत्यादि। "अन्त्यात् पूर्वं बह्वचः" पा०। बह्वचः पूर्वस्यान्त्यात् पूर्वपदं जे परे आद्युदात्तम्। उपसरजः। आमलकीजः। "ग्रामेऽनिवसन्तः" पा०। ग्रामे परे अनिवसदादि पूर्वपदमाद्युदात्तम्। मल्लग्रामः, (मल्लसमूहः) देवग्रामः (देवस्वामिकः ग्रामः)। निवसतस्तु दाक्षिग्राम इत्यादौ न। "घोषादिषु च" पा० घोष इत्येवमादिषु चोत्तरपदेषु पूर्वपदमाद्युदात्तं स्यात्। घोष कट बल्लभ हृद वदरी पिङ्गल पिशङ्ग माला रज्जु शाला कूट शाल्मली अश्वत्थ दक्ष शिल्पी सनि प्रेक्षा घोषादि। दाक्षिघोषः। "शालाद्यः शालायाम्" पा०। शालिशाला व्याडिशाला। ते च शालि गेलि भागिल व्याडि आखण्डि खाटि गोमि। "प्रस्थेऽवृद्धमकर्क्यादीनाम्" पा०। प्रस्थपरे अवृद्धं (वृद्धाद्यचः वृद्धिर्न) तादृग्पूर्वपदमाद्युदात्तं न तु कर्क्यादीनाम्। इन्द्रप्रस्थः। वृद्धस्य तु दाक्षिप्रस्थ इत्यादौ न। कर्क्यादयश्च कर्की मन्नी मकरो कर्कन्धु शमी करीर कन्दुक कवल वदरी। "शालादीनाञ्च" पा०। वृद्धार्थमिदम्। शालाप्रस्थम्। शालादयश्च। शाला शाला शोषा द्राक्षा क्षाक्षा क्षामा काक्षी एक काम। "अमहद्ब्रह्मनगरेऽनुदीचाम्" पा०। ब्रह्मनगरम्। महद्ब्रह्मयोस्तु महानगरं नवनगरमित्यादौ न। उदीचान्तु कार्त्तिनगरमित्यादौ न। "अर्म्मे चावर्णं द्राच् त्राच्" पा०। अर्म्मे परे द्राच्कं त्राच्कं वाऽवर्णान्तं पूर्वपदमाद्युदात्तं स्यात्। शुभ्रार्म्मम्। कृकटार्म्मम्। अनवर्णस्य वृहद्दर्ममित्यादौ न। अधिकाच्केऽपि कपिञ्जलार्म्ममित्यादौ न। अमहद्ब्रह्ममित्येव तेन महार्म्मम् नवार्म्ममित्यादौ न। "न भूताधिकसञ्जीवमद्राक्षकञ्जलम्" पा०। अर्म्मे एतानि नाद्युदात्तानि। भूतार्म्मम्।

एवं समासे पूर्वपदस्य आद्युदात्ततामभिधाय तस्यैव अन्तोदात्ततामपि तत्र उक्त्वा यथा "अन्तः" पा० अधिकारोऽयं प्राग्उत्तरपदादिग्रहणात्। "सर्वं गुणकात्स्न्यें" पा०। सर्वशब्दरूपं पूर्वपदमन्तोदात्तं स्यात् गुणसाकल्ये गम्ये। सर्वश्वेतः सर्वश्वेतान्। श्वेतत्वमहत्त्वगुणाभ्यां कृत्स्नव्यापकताद्योतनादस्य तथात्वम्। सर्वसौवर्ण इत्यादौ तु गुणेन व्याप्त्यभावान्न। अशाकल्ये तु सर्वेषां श्वेततरः सर्वश्वेत इत्यादौ तरलोपे न। "संज्ञायां गिरिनिकायवोः" पा०। एतयोः पूर्वमन्तोदात्तम्। अञ्जनागिरिः मौञ्जिनिकायः। असंज्ञायान्तु परमगिरिः ब्राह्मणनिकाय इत्यादौ न। "कुमार्यां वयसि" पा०। कुमारीपरे पूर्वपदमन्तोदात्तम् वयसि। वृद्धकुमारी जरत्कुमारी। कुमारीशब्दः पुंसा सह सङ्गमाभाववतीपरः वृद्धादिसामानाधिकरण्यात् वयोवाचित्वमत्र। अवयसि तु परमकुमारीत्यादौ न। "उदकेऽकेवले" पा० अकेवलं मिश्रं तद्वाचिनि समासे उदके परे पूर्वपदमन्तोदात्तम्। गुडोदकम्। गुडमिश्रितसदकमित्यर्थः स्वरे कृतेऽत्र एकादेशे स्वरितोदानुदात्ते पदादाविति पक्षे स्वरितः। अमिश्रे तु शीतोदकम् इत्यादौ न। "द्विगौ क्रतौ" पा० द्विगावुत्तरपदे क्रतुवाचिनि समासे प्राग्वत्। गार्ग्यत्तिरात्रः। अद्विगौ तु अतिरात्र इत्यादौ न "सभायां नपुंसके" पा० क्लीवान्न सभापरे प्राग्वत्। गोपालसभम्। अक्लीवे राजसभेत्यादौ न। तत्पुरुषस्यैव ग्रहणं तेन रमणीयसभं ब्राह्मणकुलमित्यादौ न। "पुरे प्राचाम्" पा०। देवदत्तपुरम्। नान्दीपुरम्। अप्राचि तु शिवपुरमित्यादौ न। "अरिष्टगौडपूर्वे च" पा०। अरिष्टपुरम्। गौडपुरम्। पूर्वग्रहणात् अरिष्टाश्रितपुरं गौडभल्लपुरमित्यत्रापि स्यात्। "न हास्तिनफलकमार्देयाः" पा०। पुरे परे एतानि नान्तोदात्तानि। हास्तिनपुरम्। फलकपुरम्। मार्देयपुरम्।

"कुसूलकूपकुम्भशाल बिले" पा०कुसूलबिलम् । कूपबिलमित्यादि "दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु" पा० । एषु परेषु दिग्वाचकशब्दाः अन्तोदात्ताः । पूर्वेषुकामशमी । अपरकृष्णवर्त्तिका । पूर्वपञ्चालाः पूर्वचानराटम् । इह पूर्वकालवाचित्वेऽपि पूर्वादेः दिशि दृष्टत्वाद्दिक्शब्दत्वम् "आचार्योपसर्जनश्चान्तेवासिनि" पा० आचार्योपसर्जने अन्तेवासिनि परे दिक्शब्दाः अन्तोदात्ताः । पूर्वपाणिनीयाः आचार्यैत्युक्तेः पूर्वान्तेवासीत्यादौ न । "उत्तरपदस्यौ सर्वञ्च" पा० । उत्तरपदस्येत्यधिकृत्य या दृष्टिर्विहिता तदन्युत्तरपदे परे सर्वशब्दः दिक्शब्दवदन्तोदात्तः । सर्वपाञ्चालः पूर्वपाञ्चालः।"बहुव्रीहौ विश्वं संज्ञायाम्"पा०। ब०व्री०विश्वशब्दः पूर्वपदमन्तोदात्तं संज्ञायाम् । पूर्वपदप्रकृतिस्वरेण प्राप्तस्याद्युदात्तस्यापवादः । विश्वकर्मा विश्वदेवः । कर्म०विश्वदेवा इत्यादौ न । अव्ययीभावात् बहुव्रीहावित्यधिकारः । "उदराश्वेषुषु" पा० । एषु परेषु पूर्वपदमन्तोदात्तं स्यात् बहुव्रीहौ । दृषोदरः दुर्भगः भक्षेषुः । "क्षेपे" पा०। निन्दने गम्ये प्रागुक्तम् । घटोदरः कटुकाश्वः चलाचलेषुः । अनुदर इत्यत्र नञ्सुभ्यामिति पूर्वप्रतिप्रतिषेधेन भवति"सि०कौ०। "नदी बन्धुनि"पा०। गार्गीबन्धुः ।"निरुपसर्गपूर्वान्यतरस्याम्"पा०। निष्क्रान्तसुपसर्गं पूर्वपदमन्तोदात्तं वा । प्रधौतपादः ।

एवं समासे आदिपदस्याद्यन्तोदात्ततां विधाय उत्तरपदस्याद्युदात्ततामाह यथा । "उत्तरपदादिः" पा० । उत्तरपदाधिकारः आपादान्तम् । आद्यधिकारस्तु प्रकृत्या भगालमित्यवधिकः । "कर्णोवर्णलक्षणात्"पा०। वर्णवाचिनः लक्षणवाचिनश्च परः कर्णशब्दः आद्युदात्तो बहुव्रीहौ । शुक्लकर्णः शङ्कुकर्णः । अन्यस्मात्तु शोभनकर्ण इत्यादौ न । "संज्ञौपम्ययोश्च" पा० । उत्तरपदस्थः कर्ण आद्युदात्तः । मणिकर्णः गोकर्णः । "कण्ठपृष्ठग्रीवाजङ्घञ्च" पा०। संज्ञौपम्ययोर्बहुव्रीह्योः । संज्ञायाम् शिति कण्ठः काण्डपृष्ठः सुग्रीवः माडीजङ्घः । औपम्ये खरकण्ठः गोपृष्ठः अश्वग्रीवः गोजङ्घः । "शङ्कमवस्थायाञ्च" पा०। अवस्थायाम् उद्गतशङ्कः दीर्घशङ्कुलशङ्कः अत्र शङ्कोड्मनादिना वयो ज्ञाप्यते । संज्ञायाम् अश्वशङ्कः । औपम्ये मेषशङ्कः । "नञोजरमरमित्रमृताः" पा० । नञः परादेते आद्युदात्ता बहु०। अजरम् । अमरम् । अमित्रम् अमृतम् । "शोभनसी अलोमोषसी" पा० । सोः परे लोमोषसी त्यक्त्वा भद्रनमसन्ं चाद्युदात्तं बहु०। सुकर्माणः सुयुजः । सुमनाः सुब्रह्मा सुवर्चाः सुपेशसः । लोमोषसोस्तु सुलोमा सूषा इत्यादौ न । "क्रत्वादयश्च"पा०। सोः परे एते आद्युदात्ताः । सुक्रतुः सुप्रतीकः । क्रतु इत्यादीनां प्रतीक प्रवृत्तिर्द्रष्टव्या । "आद्युदात्तं द्व्यच् छन्दसि"पा०। यदाद्युदात्तं द्व्यच् तत् सोरुत्तरं बहुव्रीहौ तथैव स्यात् वेदे लोके तु न । सुश्वाः सुरथाः । आद्युदात्तं किम् सुबाहुः । द्व्यच् किं सुतुः सुहिरण्य इत्यादौ न । "वीरवीर्यौ च" पा०। वेदे सुवीरः सुवीर्यः लोके तु न । अत्र वीर्यशब्दस्य वीर्यशब्दस्य यद्यप्यत्वेऽपि यतोनावइत्याद्युदात्तं नेति ज्ञापितम् ।"कूलतीरतूलमूलशालाक्षसममव्ययीभावे" पा०। बहुव्रीह्यधिकारोनिवृत्तः । अव्ययीभावे कूलादीन्याद्युदात्तानि स्युः । उपकूलम् उपतीरम् उपशालम् । उपाक्षं सुषमम् निःषमम् । तिष्ठद्गवादि०स० । "कंसमन्थशूर्पपाय्य काण्डं द्विगौ"पा०। द्विगौ एतानि आद्युदात्तानि । द्विकंसः द्विमन्थः द्विशूर्पः द्विपाय्यम् द्विकाण्डम् । "तत्पुरुषे शालायां नपुंसके"पा०। क्लीवशालान्ते तत्पुरुषे उत्तरपदमाद्युदात्तम् । ब्राह्मणशालम् । "कन्या च" पा०। क्लीवलिङ्ग कन्यान्तस्तत्पुरुषः प्राग्वत् । सौश्रमिककन्यम् । "आदिचिह्णादीनाम्" पा० । कन्यान्ते तत्पुरुषे क्लीवलिङ्गे चिह्णादीनामादिरुदात्तः । न तु कन्याशब्दरूपस्योत्तरपदस्य पूर्वापवादः । चिह्णकन्यम् । चिह्णादिश्च चिह्ण मड्डर मड्डुर वैतल पटत्क वैड्डालिकर्णक वैड्डालिकर्णि कुकुट चिक्कण चित्कण।"चेलखेटकटुककाण्डं गर्हायाम्" पा०। निन्दायां चेलादीन्युत्तरपदान्याद्युदात्तानि । पुत्रचेलम् । नगरखेटं दधिकटुकम् । पुत्राकाण्डम् । चेलादिसाहचर्य्येण पुत्रादीनां निन्दा व्याख्या० स० । "चीरमुपमानम्" पा०। उत्तरपदस्थमुपमानं चीरम् आद्युदात्तम् । वल्कं चीरमिव वल्कचीरम् । अनौपम्ये तु परमचीरम् इत्यादौ न । "पललसूपशाकं मिश्रे"पा० मिश्रार्थे समासे उत्तरपदस्थानामेषां प्राग्वत् । इतपललं इतसूपः इतशाकः । भक्ष्येण मिश्रीकरणमिति समासः । अमिश्रे तु परमपललमित्यादौ न । "कूलसूदस्थलकर्षाः संज्ञायाम्"पा० । उत्तरपदस्थानामेषामादिरुदात्तः संज्ञायाम् । दात्रिकूलम् । शाखिसूदम् । दाक्षायणस्थली। दात्रिकर्षः श्यामभेदस्य एताःसंज्ञाः । असंज्ञायां तु परमकूलमित्यादौ न । "अकर्मधारये रा-

उद्यम्" पा०। ब्राह्मणराज्यम् कर्मधारये तु परमराज्यमित्यादौ न। "वर्म्यादयः" पा०। अकर्मधारय इत्येव। अर्जुनवर्म्यः वासुदेवपत्र्याः कर्मधा० परमवर्म्य इत्यादौ न। वर्म्यादिष दिगाद्यन्तर्गणः तच्छब्दे दृश्यः। "पुत्रः पुम्भ्यः" पा०। पुंशब्देभ्यः परः पुत्र आद्युदात्तस्तत्पुरुषे। दासकिपुत्रः माहिषपुत्रः। स्त्रीभ्यस्तु दाचीपुत्र इत्यादौ न। "नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः" पा०। एभ्यः पुत्रोनाद्युदात्तः। आचार्यपुत्रः उपाध्यायपुत्रः। राजपुत्रः ईश्वरपुत्रः नन्दपुत्रः। ऋत्विक्पुत्रः याजकपुत्रः। संयुक्ताः संबन्धिनः। श्यालपुत्रः। ज्ञातिपुत्रः भ्रातृपुत्रः। "चूर्णादीन्यप्राणिषष्ठ्याः" पा०। एतानि प्राणिभिन्नषष्ठ्यन्तात् पराण्याद्युदात्तानि तत्पुरुषे। शङ्खचूर्णम्। प्राणिनस्तु मत्स्यचूर्णमित्यादौ न। चूर्णादयश्च। चूर्ण करिष करिष शाकिन शाकट द्राक्षा तूल कुन्दम दलप चमसी चक्रन चौल। "षट् च काण्डादीनि" पा०। काण्ड चीर पलल रूप शाक कूल इत्येतानि षट् अप्राणिषष्ठ्यन्तात् आद्युदात्तानि। दूर्वाकाण्डं दर्भचीरम् तिलपललम् सद्गरूपः मूलकशाकम् नदीकूलम्। "कुण्डं वनम्" पा०। वनवाचिनि तत्पुरुषे कुण्डमाद्युदात्तम्। दर्भकुण्डम् कुण्डशब्दोऽत्र खादिष्वे।

अथ उत्तरपदे प्रकृतिस्वरविधानसूत्राणि। "प्रकृत्या भगालम्" पा०। भगालवाच्युत्तरपदं तत्पुरुषे प्रकृत्या। कुम्भीभगालम्। कुम्भीनदालम् कुम्भीदापालम्। मध्योदात्तार्थते। प्रकृतेत्यधिकारः अन्त इति यावत्। "शितेर्नित्याबह्वचः बहुव्रीहावभसत्" पा०। शितेः परं नित्याबह्वचकं प्रकृत्या बहुव्रीहौ। शितिपादः। शितिसक्थः। पादः इषा० आद्युदात्तः अंशवद्वः नित्स्वरवान्। शितेराद्युदात्तत्वात् बहुव्रीहौ पूर्वपदप्रकृतिस्वरापवादेन उत्तरस्य प्रकृतिस्वरविधानात्तस्य बाधः। "गतिकारकोपपदात् कृत्" पा०। एभ्यः कृदन्तं प्रकृतिस्वरं स्यात्तत्पुरुषे। गतेः, प्रकारकः प्रहरणम्। कारकात् दृष्प्रभृतयः। उपपदात् उच्चैःकारम्। ईषत्करः। ग्रेषषठोस० तु ईषस्य कारकः ईषत्कारक इत्यादौ न। "उभे वनस्पत्यादिषु युगपत्" पा०। एषु पूर्वोत्तरपदे युगपत् प्रकृत्या। वनस्पतिः वृक्षस्पतिः। ते च वनस्पति वृक्षस्पति शचीपति तनूनपात् नराशंस शुनःशेफ मधुजामार्कौ त्वष्टावरूत्री बर्हिषद्वसू मर्मृज्यू। "देवताद्वन्द्वे" पा०। उभे युगपत् प्रकृत्या स्तः। इन्द्रावरुणौ। "नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु" पा०। पृथिव्यादिवर्ज्जितेऽनुदात्तादावुत्तरपदे प्राग्वत्। "इन्द्राग्निभ्यां कं वषट्" पृथिव्यादौ तु द्यावापृथिव्यौ इत्यादौ स्यादेव। तत्र नि० आद्युदात्तः द्यावा, पृथिवीत्वनोदात्तः। एवं रुद्रशर्वौ इन्द्रापूषणौ इत्यादौ।

अथोत्तरपदे अनोदात्ततद्विधायकसूत्राणि यथा "अन्नः" पा०। अधिकारोऽयम्। "घाघञ्काजविलकाषाम्" पा० घ, घञ्, क, काच्, अप् इत्, क, एतदन्तानाम् उत्तरपदस्थानां गतिकारकोपपदात् परेषामन्त उदात्तः। तत्र घ अपभृथः। अथ आवसथः। घञ् प्रभेदः। क पुरुष्टुतः। काच् प्रस्तयः। अप् प्रस्तवः प्रस्तवः। इत्र प्रस्तवित्रम्। क मोदयः मूल० क। गतिकारकोपदमिन्ने तु सुस्तुवदृतप्रादौ न सोः पूजार्थत्वेन गतित्वाभावात्। "रूपसमानात् क्रः" पा०। सोरूपसमानाच्च परं क्रान्तमनोदात्तम्। सुकृतम् सुशङ्कृतः। "संज्ञायामनाचितादीनाम्" पा०। गतिकारकोपपदात् क्रान्तमनोदात्तं न तु आचितादौ। "उपभूतः शाकल्यः" आचितादौ न। आचितादयश्च ६२९ पृ० दर्शिताः। "प्रहृद्वादीनाञ्च" असंज्ञार्थमारम्भः। प्रहृद्यं यानं प्रहृद्योऽश्वः। प्रयुतास्रुण्वः। आकर्षे अवहितः (अवहितो भोगेषु)। खट्वारूढः कविस्तः आकृतिगणोऽयम्। प्रहृद्यानम्। अप्रहृद्यो दृषत्तो रथः। "कारकाद्दत्तश्रुतयोरेवाशिषि" पा०। कारकपदादुत्तरपदपदस्थयोर्दत्तश्रुतशब्दयोरेव संज्ञायामनोदात्तः आशीर्वादे गम्ये। देवदत्तः विष्णुश्रुतः। अनयोरेवेति नियमात् देवपालित इत्यादौ न। "इत्थम्भूतेन कृतमिति च" पा०। इत्थम्भूतेन कृतमित्यस्मिन्नर्थे यः समासः कृतः ततः क्रान्तसत्तरपदमनोदात्तम्। सुप्रकल्पितम्। अत्र कृतमिति सामान्यक्रियावाचि। कृतीया कर्मणीत्यस्यापवादः। "अनोभावकर्मवचनः" पा०। कारकात् परमनप्रत्ययान्तं भाववचनं कर्मवचनञ्चानोदात्तम्। भावे पयःपानम्। कर्मणि राजभोजनाः शालयः। "मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः" पा०। कारकात् परास्येतानि तत्पुरुषेऽनोदात्तानि। कृत्स्वरापवादः। मन् रथवर्त्म। क्तिन् पाणिनिकृतिः। करणे ल्युट् छन्दोव्याख्यानम्। तेन न पूर्वेण गतार्थः। राजशयनम् राजासनम् अन्यस्थानम् एषु आधारे ल्युट्। ब्राह्मणयाजकः। याजकादिषु याजकादिगणे वक्ष्यते

गोक्रीताः । कस्कभिन्नात्तु प्रभृतिः सङ्कृतिः इत्यादौ तादौ निंतीति स्वरः । "सप्तम्याः पुण्यम्" पा० । अन्तोदात्तम् । अध्ययनपुण्यम् । तृतीयातत्पुरुषे तु वेदपुण्यमित्यादौ न । "अनार्षकलहं तृतीयायाः" पा० । तृतीयायाः परावेतौ अन्तोदात्तौ तत्पुरुषे । मासोनम् मासविकलम् । वाक्कलहः । तृतीयापूर्वपदप्रकृतिस्वरापवादः । अर्थेति स्वरूपग्रहणं तेन धान्यार्थं इत्यत्रापि अर्थशब्दस्य तथात्वम् । जनशब्देन तदर्थग्रहणमिति केचित् । "मिश्रश्चानुपसर्गमसन्धौ" पा० । तृतीयायाः परम् अनुपसर्गं मिश्रं प्राग्वत् । तिलमिश्रम् सर्पिर्मिश्रम् । मिश्रग्रहणेऽन्यत्र सोपसर्गस्य ग्रहणमिति अनुपसर्गं विशेषणात् ज्ञापितम् । सन्धौ तु ब्राह्मणमिश्रो राजा इत्यादौ न, ब्राह्मणैः सह ऐकार्थ्यमापन्न इत्यर्थः । "नञोगुणप्रतिषेधे सम्पाद्यर्हितालमर्थास्तद्धिताः" पा० । सम्पाद्यादयस्तद्धितान्ता गुणनिषेधार्थकनञः परेऽन्तोदात्ताः । न कर्णवेष्टनाभ्यां सम्पादितं सुखं भवति अकर्णवेष्टनिकम् । न च्छेदमर्हति अच्छेदिकः । न वत्सेभ्योहितः अवत्सीयः । न सन्नाघाय प्रभवति असन्नाघीयः । "यत्तदोश्चातदर्थे" पा० । तदर्थार्थभिन्नौ यत्तदौ यौ तद्धितौ तदन्तस्योत्तरपदस्य गुणनिषेधार्थात् नञः परस्यान्त उदात्तः । पाशानां समूहः पाश्या न पाश्या अपाश्या । अदन्त्यम् । तदर्थार्थान्ते तु अपादभ्रमित्यादौ न । यतः तानुबन्धस्य ग्रहणात् इतरानुबन्धस्य यस्य अवामदेव्यमित्यादौ न । अत्र वामदेवशब्दाद्ध्यावित्यत् ष्ण्य वा । "अचक्रवर्मणष्ठक्" पा० । अजन्तं कान्तञ्च नञः परमन्तोदात्तमसामर्थ्ये गम्ये । अपचः पक्तुं न शक्तः । अक्षिणः । सामर्थ्ये तु अपचोदीक्षित इत्यादौ न । दीक्षितस्य न पाकासामर्थ्यं किन्तु निषेधादपचत्वम् । "आक्रोशे च" पा० । नञः परावच्क्रान्तावन्तोदात्तौ स्तेये । अपचोजालमःपक्तुं न शक्नोतीत्येवमाक्रुश्यते । अक्षिपः । "संज्ञायाम्" पा० । नञः परमन्तोदात्तं संज्ञायाम् स्तेये । अदेवदत्तः 'ह्रस्वोकेष्वुच्चार्यादयश्च" पा० । नञः परे एतेऽन्तोदात्ताः स्युः । ह्रस्व अकर्त्तव्यः । उक अनागास्तुकः । इष्णुच् अनलङ्करिष्णुः । खिष्णुचोऽपि । अनाढ्यम्भविष्णुः । अचारुः । चार्वादयश्च चारु साधु कौधकि अनङ्गमेजय वदान्य अकस्मात् (वर्त्तमानवर्द्धमानत्वरमाणध्रियमाणहियमाणरोचमानशोभमानाः संज्ञायाम्) (विकारसदृशे व्यस्तसमस्ते) स्तूपपति स्तूपपतिक (राजाङ्कोत्तरपदे) अराजा अनडुहः । भाषायां तु अव्ययस्वरः । "विभाषा ह्रस्वह्रस्वोक्षुचिषु" पा० । ह्रस्व अकर्त्तव्यः । अनह्रस्वम् । ह्रस्वोक्षम् अशुचिः । पक्षे अव्ययस्वरः । "बहुश्रीह्रावित्यमेतत्तद्धाः प्रथमपूरणयोः क्रियागणने" पा० । एभ्य एतयोरन्त उदात्तः बहुव्रीहौ । इदं प्रथमं यस्य इदं प्रथमः । एवम् एतद्द्वितीयं तत्पञ्चमम् । द्रव्यगणने तु अयं प्रथमः प्रधानं येषां ते इदंप्रथमा इत्यादौ न । बहुव्रीह्यधिकारः । "संख्यायाः स्नः" पा० । द्विस्ना चतुःस्ना । "विभाषा छन्दसि" पा० । "द्विस्नां करोति वामदेव्यः" । पक्षे न "संज्ञायां मित्राजिनयोः" पा० । देवमित्रः कृष्णाजिनम् । असंज्ञायां प्रियमित्रः इत्यादौ न । "ऋषिप्रतिषेधोभिक्षे" वार्त्ति० । विश्वामित्र ऋषिः अत्र न । "व्यवायिनोऽन्तरम्" पा० । व्यवधायकात् परमन्तरमन्तोदात्तम् । वस्त्रान्तरः । "सुखं खाङ्गम्" पा० । गौरसुखः । असुखे तु दीर्घसुखा शाला इत्यादौ न । "नाव्ययदिक्शब्दगोमत्तृस्वसृदिष्टयुवत्सेभ्यः" पा० । एभ्यः परं सुखं नान्तोदात्तम् तेन पूर्वपदप्रकृतिस्वरः । दुर्मुखः । प्राङ्मुखः गोमुखः । गोसदृशवत्सपूर्वपदस्योपमानलक्षणोऽपि विकल्पोबाध्यते उरस्यादपवादन्यायात् । "निरुपमानादन्यतरस्याम्" पा० । निरुपमानात्तु उपमावाचिनश्च परं खाङ्गं सुखं वान्तोदात्तम् । प्रलम्बितमुखः पक्षे निरुपसर्गेति पूर्वपदान्तोदात्तत्वम् । पूर्वपदप्रकृतिस्वरत्वेन गतिस्वरोऽपि भवति । सिंहमुखः । पक्षे पूर्वपदप्रकृतिस्वरः । "जातिकालसुखादिभ्योऽनाच्छादनात् क्रीतकृतमितपूतिपक्वाः" पा० । सारङ्गजग्धः मासभूतः सुखभूतः । सुख दुःख इत्र इच्छ अस्त्र आस्त्र अक्षीक प्रतीप करुण क्रोड इत्येतानि सुखादीनि । आच्छादनात्तु वस्त्रच्छत्र इत्यादौ न । कृच्छ्रकृतः कृच्छ्रमितः कृच्छ्रप्रतिपन्न इत्यादौ च न । वा जाते" पा० । एभ्यो जातियद्योऽन्तोदात्तः । दन्तजातः मासजातः । पक्षे पूर्वपदप्रकृतिस्वरः "नञ् सुभ्याम्" पा० । आभ्यां परमन्तोदात्तं बहुव्रीहौ । अग्रीहिः सुमाषः । "कपिपूर्वम्" पा० । नञ् सुभ्यां परमुत्तरपदस्य पूर्वमुदात्तं कपि परे । अवह्रस्वकुः । सुकुमारोकः । "ह्रस्वान्ते अन्त्यात्पूर्वम्" पा० । ह्रस्वान्ते उत्तरपदे समासे अन्त्यात् पूर्वं पदमुदात्तं नञ्सुभ्यां बहुव्रीहौ । अग्रीहिकं सुमाषकः । "बहोर्नञ्वदुत्तरपदभूम्नि" पा० । उत्तरपदार्थे बहुत्वविशिष्टो बहोः परस्य पदस्य नञः परस्येव स्वरःस्यात् । बहुग्रीहिकः बहुमित्रः । अबहुत्वे तु बहुषु मानोऽस्य बहुमान इत्यादौ न । "न गुणादयोऽवयवाः" पा० । अवयवे-

वाचिवो बहोः परे गुणादयोनान्तोदात्ताः ब०व्री०। बहुगुणा रज्जुः। बहुक्षरं पदम्। गुणादयश्च गुण अक्षर अध्याय सक्त छन्द: मान। गुणादिराकृतिगणः। अनवयवे तु अध्ययनश्रुतसदाचारादिगुणपरत्वे बहुगुणोद्विज इत्यादौ न। "उपसर्गात् खाङ्क्रुवमपर्यु" पा०। प्रष्टुः। अभ्रुवे तु उद्वाङ्क्रित्यादौ विपर्युत्यादौ च न। "वनं समासे" पा०। समासमात्रे उपसर्गात् परं वनमन्तोदात्तं स्यात्। प्रवणम्। "अन्तः" पा०। अन्तर् शब्दात् परं वनमन्तोदात्तम् समासमात्रे। अन्तर्वणोदेशः। "अन्तश्च" पा०। उपसर्गादन्तशब्दोऽन्तोदात्तः। पर्यन्तः समन्तः। "न निर्विभ्याम्" पा०। न्यन्तः व्यन्त इत्यादौ न। पूर्वपदप्रकृतिस्वरे वृषि च कृते उदात्तस्वरितयोर्येण इति स्वरितः। "परेरभितोभावि मण्डलम्" पा०। परेः परम् अभितोभवतो भावि कूलादि, मण्डलं चान्तोदात्तम्। परिकूलम् परिमण्डलम्। "प्रादस्वाङ्गं संज्ञायाम्" पा०। प्रष्टङ्गम्। स्वाङ्गे तु पृषदश्वादौ न "निरुदकादीनि च" पा०। निरुदक निरुपल निर्मक्षिक निर्मशक निष्कालक निष्कालिक निष्पेष दुस्तरीप निस्तरीक निरजिन उदजिन उपाजिन (परेर्हस्तपादकेशकर्षाः) निरुदकादिराकृतिगणः। एतानि अन्तोदात्तानि। निरुदकम्। "अभेर्मुखम्" पा०। अबहुव्रीह्यर्थमप्रधानार्थमस्वाङ्गार्थमारम्भः। अभिमुखा शाला। "अपाङ्" पा०। अपसृतम् अलापि पूर्ववदारम्भः। अपसृता शाला "स्त्रिगपूतवीणाञ्जोऽध्वकृत्रिसीरनासनाम च" पा०। अपादिमान्तोदात्तानि। अपस्त्रिगम् अपपूतम्। अपाङ्गः। अपाध्वा समासान्तविधेरनित्यत्वात् नेह समा०। अपकृत्रि। अपसीरम् अपहलम्। अपनाम। स्त्रिगादिपदमबहुव्रीह्यर्थम् अध्रुवार्थमस्वाङ्गार्थञ्च। "अधेरुपरिस्थम्" पा०। अध्यरुढोदन्नोऽधिदन्नः दन्तस्योपरिजातोदन्त इत्यर्थः। अनुपरिस्थे अधिकरणमित्यादौ न। "अनोरप्रधानकनीयसी" पा०। अनोः परमप्रधानवाचि कनीयच्चान्तोदात्तम्। अनुगतोज्येष्ठम् अनुज्येष्ठ इत्यादि। अत्र पूर्वपदार्थप्राधान्यात् ज्येष्ठशब्दस्याप्रधानत्वम्। अनुगतः कनीयान् प्रा०स०। अनुकनीयान्। अत्र उत्तरपदार्थप्राधान्यम्। प्राधान्यार्थमेव कनीयसः पृथग्ग्रहणम्। "पुरुषश्चान्वादिष्टः" पा०। अनोः परः अन्वादिष्टवाची पुरुषः अन्तोदात्तः। अन्वादिष्टः पुरुषः प्रा० स०। अनुपुरुषः। "अतेरकृत्पदे" पा०। अतेः परमकृदन्तं पदं पदशब्दश्चान्तोदात्तः। अलङ्कुशोनागः। अतिपदा गायत्री। कृत्पदे तु अतिचारः इत्यादौ न। "अतेर्धातुलोप इति वाच्यम्" वार्त्ति०। "प्रादिभ्योधातुजस्य वा चोत्तरपदलोप इति अत्यादयः क्रान्त्याद्यर्थे द्वितीयययेति यत्र धातुलोपस्तत्रैवायं स्वरः। तेन शोभनोगार्ग्यः प्रा०स०। अतिगार्ग्यः अत्र न। अतिक्रान्तः कारुकम्। अतिकारुक इत्यत्रापि स्यात् कारुकशब्दस्य कृदन्तत्वेऽपि धातुलोपएव कृदन्तनियमनात् अतिकार इत्यादौ तु धातुलोपभावान्नेति भेदः। "नेरनिधाने" पा०। निधानमप्रकाशः तद्भिन्ने प्रकाशार्थे नेरुत्तरपदमन्तोदात्तम्। निमूलम् न्यग्रम्। निधाने तु निहितो दग्धः निदग्ध इत्यादौ अप्रकाशितः सुप्तोदग्ध इत्यर्थके न। "प्रतेरंश्वादयस्तत्पुरुषे" पा०। प्रतिगतोऽंशुः प्रत्यंशुः प्रतिजनः प्रतिराजा समासान्तविधेरनित्यत्वात्र टच्। बहुव्रीहौ तु न। अंश्वादयश्च १०४० दर्शिताः। "उपाद्दृग्रजजिनमगोरादयः" पा०। उपात् परं दृग्रुक्मजिनञ्चान्तोदात्तम् न तु गौरादयः। ते च गौर तैष तैल खेट खोट जिह्वा कृष्णा कन्या शुध कल्य पाद। उपदेवः उपेन्द्रः उपाजिनम्। गौरादौ उपगौर इत्यादौ न। "शोरवर्णे पथे" पा०। आर्चेपे गम्ये शोःपरमन्तोदात्तम्। शुप्रत्ववसितः सुरत्नपूजार्थः वाक्यार्थस्तु निन्दा अस्तुत्या तथाऽभिधानात्। "विभाषोत्पुच्छे" पा०। उत्पुच्छे शब्दे वान्तोदात्तः। उत्क्रान्तः पुच्छात्, पुच्छमुद्यति उत्पुच्छयतेर्वा अरच्। उभयलक्षणत्वं यच्छब्दम्। उत्पुच्छः। "द्वित्रिभ्यां पद्दन्मूर्धसु बहुव्रीहौ" पा०। आभ्यां परेष्वेषु अन्तोदात्तो वा बहुव्रीहौ। द्विपाद् त्रिपाद्। त्रिमूर्धा। समासान्तविधेरनित्यत्वज्ञापकमिदम्। तत्पुरुषे तु द्वयोर्मूर्धा द्विमूर्धेत्यादौ न। "सक्थ्यक्ष्णोऽङ्गात्" पा०। ऋतसमासान्तसक्थस्य अङ्गात् परस्य वान्तोदात्तः। गौरसक्थः ऋक्षसक्थः। क्रान्तात्तु चक्रसक्थ इत्यादौ न किन्तु यच्समासान्तस्य चित्त्वात् नित्यमन्तोदात्तता। "पदादिष्वन्दसि बहुलम्" पा०। वेदे उत्तरपदस्य यच्छब्दादिरुदात्तो बहुलम्। "अङ्गिसक्थमालभेत" बहुलग्रहणात् "परादिश्च परान्तश्च पूर्वान्तवापि दृश्यते। पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं तत:" वार्त्ति०। इति समासस्वराः। एवमुदात्ते विहिते क्वचित्तस्य निघातेनानुदात्तता स्यात् तत्र निघातशब्देसापवादं वक्ष्यते।

"निहन्त्यरीनेकपदे यउदात्तः स्वरानिव" माघः। "अवि-

कत्वनः क्षमावानतिगम्भीरो अहासत्वः । स्थेयान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः" सा० द० २ उक्ते (पूर्वपदलोपेन) नायकभेदे । भावे क्त । २दाने ४वाद्यभेदे शब्दर० ५ अलङ्कारभेदे पु० । स च अलङ्कारशब्दे २६६४ पृष्ठे दर्शितः । कर्त्तरि क्त ६ अभिहिते ७असम्बे ८दातरि च त्रि० ।

उदात्तराघव न० नाटकभेदे ।

उदान पु० अन-घञ् ऊर्द्धमानोऽस्य । ऊर्द्धगतिशीले कण्ठादिदेशवर्त्तिनि प्राणवृत्तिभेदे वायौ । "अथ योऽस्योर्द्ध ऊर्ध्वः सउदानः स वायुः समाकाशः" छा० उ० । "आपादतलादारभ्योर्द्धसत्क्रमात् उत्कर्षार्थञ्च कर्म्म कुर्वन्निति उदानः" छा० उप० भा० । पदार्थादर्शे योगार्थे तत्स्थानाद्युक्तम् "स्रन्दयत्यधरं वक्त्रं गात्रनेत्रप्रकोपनः । उद्वेजयति मर्म्माणि उदानो नाम मारुतः । विद्युत्पावकवर्णः स्याद्गुत्थानासनकारकः । पादयोर्हस्तयोश्चापि सर्वसन्धिषु वर्त्तते" । सुश्रुते च "यथाग्निः पञ्चधा भिन्नो नामस्थानात्मकर्म्मभिः । भिन्नोऽनिलस्तथा ह्येको नामस्थानक्रियाभयैः । प्राणोदानौ समानश्च व्यानश्चापान एव च । स्थानस्था मारुताः पञ्च यापयन्ति शरीरिणम् । वायुर्यो वक्त्रसञ्चारी स प्राणो नाम देहधृक् । सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते । प्रायशः कुरुते दुष्टो हिक्कोच्छ्वासादिकान् गदान् । उदानो नाम यस्तूर्द्धमुपैति पवनोत्तमः । तेन भाषितगीतादिविशेषोऽभिप्रवर्त्तते । ऊर्द्धजत्रुगतान् रोगान् करोति च विशेषतः । आमपक्वाशयचरः समानो वह्निसङ्गतः । सोऽन्नं पचति तज्जांश्च विशेषान्विविनक्ति हि । गुल्माग्निसङ्क्रातीसारपक्वातीन् करोति गदान् । कृत्स्नदेहचरो व्यानो रससंवहनोद्यतः । स्वेदासृक्स्रावणो वापि पञ्चधा चेष्टयत्यपि । क्रुद्धश्च कुरुते रोगान् प्रायशः सर्वदेहगान् । पक्वाशयानालयो ऽपानः काले कर्षति चाशयम् । समीरणः सशकृन्मूत्रशुक्रगर्भार्त्तवान्वयः । क्रुद्धश्च कुरुते रोगान् घोरान् वस्तिगुदाश्रयान् । शुक्रदोषप्रमेहांस्तु व्यानापानप्रकोपजाः । युगपत्कुपितास्त्वापि देहं भिन्युरसंशयम्" छान्दोग्ये च भोजनस्याग्निहोत्रस्थानीयतया तस्यादनेन प्राणादिपञ्चकाहुतेर्नित्यं कर्त्तव्यता तत्फलञ्चोक्तम् यथा । "उरएव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्य्यपचन आत्ममाहवनीय इत्युपक्रम्य" । (तद्भाष्ये च आत्मन हूयते अस्मिन्नन्नमित्याहवनीयत्वमुक्तम्) आहुतिप्रकारः फलसहितो दर्शितो यथा ।

"तद्यद्वक्तं प्रथममागच्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात् प्राणाय स्वाहेति प्राणस्तृप्यति, प्राणे हूयति चक्षुस्तृप्यति चक्षुषि हूयत्यादित्यस्तृप्यत्यादित्ये हूयति द्यौस्तृप्यति दिवि हूयन्यां यत्किञ्च द्यौरादित्यश्चाधितिष्ठतस्तत्तृप्यति तस्मात्तुहूयिं हूयति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति१ । अथ यां द्वितीयां जुहुयात्तां जुहुयाद्व्यानाय स्वाहेति व्यानस्तृप्यति, व्याने हूयति श्रोत्रं हूयति श्रोत्रे हूयति चन्द्रमास्तृप्यति चन्द्रमसि हूयति दिशस्तृप्यन्ति दिक्षु हूयन्तीषु यत्किञ्च दिशश्च चन्द्रमाश्चाधितिष्ठन्ति तत्तृप्यति तस्मात्तुहूयिं हूयति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति२ । अथ यां तृतीयां जुहुयात्तां जुहुयादपानाय स्वाहेत्यपानस्तृप्यति, अपाने हूयति वाक्तृप्यति वाचि हूयन्यामग्निस्तृप्यत्यग्नौ हूयति पृथिवी हूयति पृथिव्यां हूयन्यां यत्किञ्च पृथिवी चाग्निश्चाधितिष्ठतस्तत्तृप्यति तस्मात्तुहूयिं हूयति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति३ । अथ यां चतुर्थीं जुहुयात्तां जुहुयात् समानाय स्वाहेति समानस्तृप्यति, समाने हूयति मनस्तृप्यति मनसि हूयति पर्जन्यस्तृप्यति पर्जन्ये हूयति विद्युत्तृप्यति विद्युति हूयन्यां यत्किञ्च विद्युच्च पर्जन्यश्चाधितिष्ठतस्तत्तृप्यति तस्मात्तुहूयिं हूयति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति४ । अथ यां पञ्चमीं जुहुयात्तां जुहुयादुदानाय स्वाहेत्युदानस्तृप्यति, उदाने हूयति वायुस्तृप्यति वायौ हूयत्याकाशस्तृप्यत्याकाशे हूयति यत्किञ्च वायुश्चाकाशश्चाधितिष्ठतस्तत्तृप्यति तस्मात्तुहूयिं हूयति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति५ । स य एतदविद्वानग्निहोत्रं जुहोति यथाङ्गारानपोह्य भस्मनि जुहुयात्तादृक् तत्स्यात् । अथ य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवति । तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते य एतदेवं विद्वानग्निहोत्रं जुहोति । तस्माद्ध वैवंविदृत्वयापि चरुस्थालीयोच्छिष्टं प्रयच्छेदात्मनि वैवास्य तद्धुतं स्यादिति तदेष श्लोकः । यथेह शुधिता बाला मातरं पर्य्युपासते । एवं सर्वाणि भूतान्यग्निहोत्रमुपासत इत्यग्निहोत्रमुपासत इति" ।

उदाशु पु० उद्+आप-उनु । जरासन्धपौत्रे क्षत्रियभेदे । "जरासन्धस्य पुत्रोवै सहदेवः प्रतापवान् । सहदेवात्मजः

श्रीमानुदापुः समहायशाः । उदापुर्जनयामास पुत्रं परमधार्मिकम्" । हरिव० ३२ अ० ।

उदार त्रि० उद्+आ+रा-क । १दातरि, २महति, ३सरले, ४दक्षिणे, ५गम्भीरे, ६असाधारणे च । "मङ्क्षूदारा गुणभेऽर्ज्जुनस्य" "सतमेति विनेतुरुदारमतेः" साकेतोपानसुदारमध्युवास" "रघुः उदारमनसं कलभाविकस्वरः" माघः । "ईप्सितार्थक्रियोदारं तेऽभिनन्द्य गिरेर्वचः" "तथा हि ते शीलमुदारदर्शने !" कुमा० । ततो भावे ष्यञ् औदार्य्य न० तल् उदारता स्त्री त्व उदारत्व न० तद्भावे ।

उदारथि उद्+आ+ऋ-अथिन् । ऊर्द्धमार्गगतरि । "करम्भ ओषधे भव पीवो इव उदारथिः" ऋ० १,१८७,१०, "करम्भं कृत्वा तिर्यं पीवस्काकुदारथिम्" अथ० ४,७,१ ।

उदारधी स्त्री उदारा धीः । १उत्कृष्टबुद्धौ उदारा धीर्यस्य । २उत्कृष्टबुद्धिमति त्रि० "धियः समर्थैः स गुणैरुदारधीः । रघुः । उदारा महती सर्वार्थविषयत्वात् धीर्यस्य । ३विष्णौ पु० । "निमेषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः" विष्णुस० "यः सर्वज्ञः सर्वविदिति" श्रुतेरस्य सर्वार्थविषयबुद्धिमत्त्वात्तथात्वम् ।

उदावर्त्त पु० उद्+आ+वृत-घञ् । रोगभेदे तल्लक्षणादि सुश्रुते दर्शितं यथा

"अथातः उदावर्त्तप्रतिषेधमध्यायं व्याख्यास्यामः । अधश्चोर्द्ध च भावानां प्रवृत्तानां स्वभावतः । न वेगान् धारयेत्प्राज्ञो वातादीनां जिजीविषुः । वातविण्मूत्रजृम्भाश्रुक्षवोद्गारवमीन्द्रियैः । व्याहन्यमानैरुदितैरुदावर्त्तो निरुच्यते । क्षुत्तृष्णाश्वासनिद्राणामुदावर्त्तो विधारणात् । तस्याभिघाते व्यासेन लक्षणञ्च चिकित्सितम् । त्रयोदशविधश्चासौ भिन्न एतैस्तु कारणैः । अपथ्यभोजनाच्चापि वक्ष्यते च तथापरः । आध्मानशूलौ हृदयोपरोधं शिरोरुजं श्वासमतीव हिक्काम् । कासप्रतिश्यावगलग्रहांश्च बलासपित्तप्रसरञ्च घोरम् । कुर्यादपानाभिहतः स्वमार्गे हन्यात्पुरीषं सुखतः चिभेदा । नाडीपनूलौ परिकर्त्तनञ्च सङ्गः पुरीषस्य तथोर्द्ध्ववातः ॥ पुरीषमाष्ठादपि वा निरेति पुरीषवेगेऽभिहते २नरस्य । मूत्रस्य वेगेऽभिहते ३नरस्तु कृच्छ्रेण मूत्रं कुरुतेऽल्पमल्पम् । भेदे गुदे वङ्क्षणसक्थयोश्च नाभिप्रदेशेष्वथ वापि मूर्द्धनि । व्यानश्चवस्तिञ्च भवन्ति तीव्राः शूलाश्च शूलैरिव भिन्नमूर्त्तेः । मन्यागलस्तब्धशिरोविकारा जृम्भोपघातात् ४पवनात्मकाः स्युः । स्रोत्राननघ्राणविलोचनोत्था भवन्ति तीव्राश्च तथा विकाराः । आनन्दजं शोकसमुद्भवं वा नेत्रोदकं ५प्राप्तमसृज्जतो हि । शिरोगुरुत्वं नयनामयाश्च भवन्ति तीव्राः सह पीनसेन । भवन्ति गाढं त्ववशोर्ध्वघातात् ६शिरोऽक्षिनासास्यरुजेषु रोगाः । कण्ठास्यपूर्णत्वमतीव तोदः कूजश्च वायोरथ वा प्रवृत्तिः । उद्गारवेगेऽभिहते ७भवन्ति जन्तोर्विकाराः पवनप्रसूताः । छर्दैर्विघातेन ८ भवेच्च कुष्ठं तेनैव दोषेण विदग्धमन्नम् । मूत्राशये वा गुदसञ्चयेषु शोफो रुजा मूत्रविनिग्रहश्च । शुक्राश्मरी तत्स्वयथं भवेद्वा ते ते विकारा विहते तु शुक्रे ९ । तन्द्राङ्गमर्दावरुचिः श्रमश्च क्षुधोऽभिघातात् १०क्षुधता च दृष्टेः । कण्ठास्यशोषः श्रवणावरोधस्तृष्णाभिघातात् ११हृदये व्यथा च । आलस्य निश्वासविनिग्रहेण १२ हृद्रोगमोहावथ वापि गुल्मः । जृम्भाङ्गमर्दोऽक्षिशिरोऽभिजाड्यं निद्राभिघाताद्य १३वापि तन्द्रा । क्षुधार्दितं परिक्लिष्टं क्षीणं शूलैरभिद्रुतम् । शब्दासहं मतिमानुदावर्त्तिनमुत्सृजेत् । सर्वेष्वेतेषु 'विधिवदुदावर्त्तेषु कृतलक्षणः । वायोः क्रियाविघातज्ञा स्वमार्गप्रतिपत्तये" । उद्ग उदकस्यावर्त्तः । २जलस्य स्रोतोभ्रमणे । ३स्त्रीचिह्नरोगभेदे स्त्री सा च सुश्रुते दर्शिता यथा "विंशतिर्व्याधदोषोनैर्ऋतिर्दिष्टा रोगसङ्घैः । मिथ्याचारेण ताः स्त्रीणां प्रदुष्टेनार्त्तवेन च । जायन्ते बीजदोषाच्च दैवाच्च ह्यसृजस्ताः पृथक् । उदावर्त्ता तथा वन्ध्या विप्लुता च परिप्लुता । वातला चेति वातोत्था पित्तोत्था रुधिरस्रवा । वामिनी स्रंसिनी चापि प्रत्यग्री पित्तला च या । अत्यानन्दा च या योनिः कर्णिनी चरणाह्वया । स्त्रैणिका सकफा ज्ञेया षण्ढी च फलिनी तथा । महती सूचिवक्त्रा च सर्वजेति त्रिदोषजा" । "सफेनिलसुदावर्त्ता रजः कृच्छ्रेण मुञ्चति" ।

उदावसु पु० निमिवंश्ये नृपभेदे । "निमिः परमधर्मात्मा सर्वसत्ववतां वरः । तस्य पुत्रोऽभिधानेन बभूवानुपमद्युतिः । तस्यापि जनकोनाम जनकस्याप्युदावसुः" रामा० निमिशब्दवर्णने । अयञ्च जनकः प्रसिद्धजनकाद्भिन्न एव तत्र वाल्मे "स्वर्णरोमणोऽभवत्पुत्रो ह्रस्वरोमा ततो बली । तस्य पुत्रद्वयं जज्ञे धर्मज्ञस्य महात्मनः । ज्येष्ठोऽहमनुजस्त्वायं भ्राता मम कृतध्वज इति" दशरथं प्रति स्वकुलकीर्त्तने जनकोक्तौ स्वशब्देनात्मनः कीर्त्तनेन ततो भेदप्रतीतेः । [याज्ञ ।

उदास पु० उद्+अस-घञ् । १उत्प्रेक्षणे २निरसने ३उपेक्षा-
उदासीन त्रि० उद्+आस-खानच् । १मध्यस्थे, २विवदमानयोरेकतरपक्षानवलम्बके, जिगीषोर्नृपतेः शत्रुमित्रभूमितो व्यवस्थिते परतरे, कामन्दके २५५ पृ० दर्शिते "मण्डला-

हरितेत्यादुदासीनोवत्साधिकः" इत्युक्त लक्षणे ३राजभेदे। ४उपेक्षके च "उदासीनवदासीन:" गीता० ।

उदास्थित पु० उद्+आ+स्था-क्त । द्वारप्राप्ते २चरे ३अध्यक्षे च हेम० प्रव्रज्यारूढपतिते ४प्रव्रज्यावसिते चरे च स च पञ्चविधचरान्तर्गत: । प्रव्रज्यावसित: प्रव्रज्यारूढपतित एव । तल्लक्षणादि "अतृत्तं चाष्टविधं कर्म पञ्चवर्गञ्च तत्त्वत:" इति मनुवचनस्य कुल्लू० व्याख्यायाम्

"कापटिकोदास्थितसत्रिपतितवैदेहिकतापसव्यञ्जनात्मकं पञ्चविधं चारवर्गं पञ्चवर्गशब्दवाच्यं तत्त्वतश्चिन्तयेत्" इति संक्षेपेणोक्ता । तत्र परमर्म्मज्ञ: प्रगल्भश्छात्र: कपटव्यवहारित्वात्कापटिकस्तं दत्तार्थिनमर्थमानाभ्यासुपस्थ रहसि राजा ब्रूयात् 'अस्य दुर्वृत्तस्यास्य तत्तदानीमेव मयि वक्तव्यमिति' । प्रव्रज्यारूढपतित उदास्थित: तं लोकेषु विदितदोषं प्रज्ञाशौचयुक्तं दत्तार्थिनं ज्ञात्वा रहसि राजा पूर्ववद्ब्रूयात् बहूत्पत्तिकमठे स्थापयेत् प्रचुरमक्षोत्पत्तिकभूम्यन्तरञ्च तद्वृत्त्यर्थमुपकल्पयेत् यथान्येषामपि प्रव्रजितानां राजचारकर्मकारिणां यासाच्छादनादिकं दद्यात् । कर्षक: क्षीणवृत्ति: प्रज्ञाशौचयुक्तो दरिद्रपतिव्यञ्जनस्तमपि पूर्ववदुक्त्वा स्वभूमौ कृषिकर्म कारयेत् । वाणिजक: क्षीणवृत्ति: वैदेहिकव्यञ्जनस्तमपूर्ववदुक्त्वा धनमानाभ्यामात्मीकृत्य वाणिज्यं कारयेत् । मुण्डोजटिलोवा वृत्तिकामस्तापसव्यञ्जन: सोऽपि क्वचिद्ग्रामे वसन् ब्रह्मसुण्डजटिलान्तरकपटशिष्यगणवृतो ग्रामराजोपकल्पितवृत्ति: तपस्यां कुर्यात् मासद्विमासान्तरितं प्रकाशं वदरादिमुष्टिमश्नीयात् रहसि च राजोपकल्पितं यथेष्टमाहारं कल्पयेत् । शिष्याश्चास्यातीतानागतज्ञानादिकं ख्यापयेयु: तेन बहुलोकवेदनमासाद्य सर्वेषां विश्वसनीयत्वात् सर्वे कार्य्यकार्य्यञ्च पृच्छन्ति। एवंरूपं पञ्चवर्गं यथावच्चिन्तयेत्" विशेषेणोक्तम् ।

उदाहरण न० उद्+आ-हृ-भावे ल्युट् । एकदेशप्रसिद्धया सकलसिद्ध्यर्थं कथने । कर्मणि ल्युट् । दृष्टसिद्ध्यर्थमुच्यमाने दृष्टान्ते, "त्वदुदाहरणादतौ गुणा इति सादृश्यकारसद्दृश्या" नैष० प्रकृतसिद्ध्यर्थं निदर्शनरूपे ३उपोद्घाते च । उदाह्रियते व्याप्यिपक्षधर्म्मतो येन करणे ल्युट् व्याक्रियते प्रतिवादिपराजयार्थं वादिना प्रयुक्तप्रतिज्ञादिपञ्चकान्तर्गते व्याप्यिपक्षधर्म्मताप्रदर्शके ४वाक्यभेदे प्रतिज्ञादय गौ० सू० इत्युक्तोदर्शिता यथा

"प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवा:"। अनेन विभागेन प्रतिज्ञाद्यन्यतमत्वमिति लक्षणं सूचितम् अत्र च प्रतिज्ञादीनां पञ्चानामवयवत्वकथनाद्दशावयवत्वादोष्युदस्त इति मन्तव्यं ते च भाष्ये दर्शिता यथा "जिज्ञासा संशय: शक्यप्राप्ति: प्रयोजन संशयव्युदासश्चेति" एते प्रतिज्ञादिसहिता दश" व्याख्यातं चेदं तात्पर्यटीकायाम् "प्रयोजनं ज्ञानादिबुद्धय: तत्प्रवर्त्तिका जिज्ञासा, तज्जनकः संशय:, शक्यप्राप्ति: प्रमाणानां ज्ञानजननसामर्थ्यं, संशयव्युदासस्तर्क:, अयमेवार्थोनिबन्धे निरूढित: । जिज्ञासा विप्रतिपत्तिरिति कश्चित् एतेषाञ्च न न्यायावयवत्वं न्यायाघटकत्वात् । न न्यायजन्यबोधानुकूलत्वेनैवावयवत्वं एकदेशस्यापि तत्त्वप्रसङ्गात् प्रयोजनेऽतिव्याप्तेश्च" इत्ति: । तत्र उदाहरणलक्षणविभागौ तत्रैव दर्शितौ यथा

"साध्यसाधर्म्म्यात्तद्धर्म्मभावी दृष्टान्त उदाहरणम्" सू० । "दृष्टान्तउदाहरणमिति लक्षणं दृष्टान्तवचनं दृष्टान्तकथनयोर्व्यावयव इत्यर्थ: तेन दृष्टान्तस्य सामयिकत्वेनासार्वत्रिकत्वेऽपि न क्षति: । योग्यतावच्छेदकन्तु अवयवान्तरार्थान्वितार्थकावयवत्वं तच्च द्विविधं अन्वयिव्यतिरेकिभेदात्तत्रान्वयुदाहरणं लक्षयति साध्यसाधर्म्म्यात्तद्धर्म्मभावीति अन्वयुदाहरणमिति शेष: परे तु सम्पूर्णसूत्रमन्वयुदाहरणलक्षणमेव सामान्यलक्षणं तूक्तमित्याहु: साध्यसाधर्म्म्यात् साध्यसदृचरितधर्म्मात् प्रकृतसाधनादित्यर्थ: तं साध्यरूपं धर्म्मं भावयति तदा च साधनवत्ताप्रयुक्तसाध्यवत्तानुभावकोऽवयव: साध्यसाधनव्याप्त्युपदर्शक उदाहरणमिति यावत् । व्यतिरेक्युदाहरणं लक्षयति" इ० । "तद्विपर्य्ययाद्वा विपरीतं व्यतिरेक्युदाहरणम्" सू० । तद्विपर्य्ययात् साध्यसाधनव्यतिरेकव्याप्त्युपदर्शनात्तथा च साध्यसाधनव्यतिरेकव्याप्त्युपदर्शकोदाहरणं व्यतिरेक्युदाहरणं यथा जीवच्छरीरं सात्मकं प्राणादिमत्त्वात् यत्रैवं तत्रैवं यथा घट इति । वाकार: प्रयोगसमुच्चये तथा चान्वयुदाहरणं व्यतिरेक्युदाहरणं वा प्रयोक्तव्यतिमित्यर्थ: इ० । चिन्तामणिकृता तु तल्लक्षणादिकमुक्तं यथा

"हेतावुक्ते कथमस्य गमकत्वमित्याकाङ्क्षायां व्याप्यिपक्षधर्म्मतयो: प्रदर्शनप्राप्तौ व्याप्ते: प्राथम्यात् तत्प्रदर्शनायोदाहरणं तत्रानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानजनकव्याप्यत्वाभिमतवह्निनियतव्यापकत्वाभिमतसम्बन्धबोधजनकशब्दत्वसदाहरणत्वं सामान्यलक्षणम् साध्यसाधनसम्बन्धबोधकत्वं, साध्यसाधनाभावसम्बन्धबोधकत्वञ्च विशेषलक्षणद्वयम् । न्यायावयवदृष्टान्तवचनमुदाहरणमिति तु

न दृष्टान्तप्रयोगस्य सामयिकत्वेनासार्वत्रिकत्वात्, योयोधूमवान् सोऽग्निमानित्येव व्याप्तिप्रतीतेः। नापि प्रकृतानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानविषयव्याप्त्युपनायकं वचनं तत्, उपनयातिव्याप्तेः। उपनयाभिधानप्रयोजकजिज्ञासाजनकवाक्यसदाहरणम् एतदेवान्वयव्यतिरेकिव्याप्तिविषयत्वविशेषितं विशेषलक्षणद्वयमित्येके, अत्र च व्यभिचारवारणाय वीप्साभाङ्कः यत्र च सामानाधिकरण्यादेव व्याप्तिलाभे न वीप्सा केवलान्वयिन्यभेदानुमाने च वीप्सायामपि व्यभिचारतादवस्थ्यमिति तु व्यर्थं, वीप्सा च व्यर्थे, न तत्रेऽपि विरुद्धरूपोपस्थितयोरपि तत्पदेन परामर्शादुबुद्धिस्थवाचकत्वादिति न व्युत्पत्तिविरोधः यथा "यद्यत् पापं प्रतिजहि जगन्नाथ! नमस्ते तत्र इत्यादौ"।

दीधितिकृता तु निरूढ्योक्तम्। इतरार्थान्वितस्वार्थाबोधकन्यायावयवत्वसदाहरणत्वम् अन्वयव्याप्तिबोधकतत्त्वं व्यतिरेकव्याप्तिबोधकतत्त्वञ्च विशेषलक्षणद्वयमिति"। ४कथाप्रसङ्गे च। "अथाङ्गिरसमध्वर्युमुदाहरणवस्तुषु" कुमा०"उदाहरणानि कथाप्रसङ्गाः तान्येववस्तूनि"भल्लि०। भावे ल्युट्। ५कथनमात्रे। दृष्टान्तसम्बन्धतया प्रामाणिकवाक्योपन्यासे च। [उदाहृति तत्रार्थे उक्तौ च स्त्री।

उदाहार पु० उद्+आ+हृ-घञ्। उदाहरणार्थे। क्तिन्।

उदाहृत त्रि०उद्+आ+हृ-क्त। १दृष्टान्ततयोपन्यस्ते, २कथिते च "श्रुतान्विते दशरथ इत्युदाहृतः" भट्टिः। प्रामाणिकप्रयुक्ततया ३उपन्यस्तेच।

उदित त्रि०वद-क्त। १कथिते। "श्रुतिस्मृत्युदितं धर्मम्"मनुः भावे क्त। २कथने न०। "प्रियः कियद्दूरमिति त्वयोदिते" नैष०उद्-इण्-क्त। ३उत्थिते, "तदुदितः स हि यो यदनन्तरः" नैष०। ४उदयं प्राप्ते "उदिते जुहोति अनुदिते जुहोति"श्रुतिः "उदितेऽनुदिते चैव समयाध्युषिते तथा" मनुः। "उदिते जगतीनाथे यः कुर्य्यादुदकधावनम्" स्मृतिः। "उदितं सोमनक्षत्रं ब्रह्मा सद्यः शुचिर्भवेत्"। प्रारब्ध० उदयप्राप्तिश्च मकरादौ भूक्तपादान्तरितदेशोपरिस्थे एव भवति सा च दिवा न भवति सहस्रांशुकराभिभूतत्वेन दर्शनयोग्यत्वाभावात्। तथा च दर्शनयोग्ये मकरादौ तच्छब्दस्य वृत्तिः।"उदिते स्तुतिसङ्घेऽहे" नील०क० "चतुर्थ्यामुदितचन्द्रोनेक्षितव्यः कदाचन" इति व्याख्याने "उदितः कथितः"इति अर्होदितव्याहृत्तिपरं वेति ति०त० उक्ते५सम्पूर्णोदिते च त्रि० भावे क्तः। ६राशीनामुदये लग्ने। कर्त्तरि क्त। उदयं प्राप्ते ७राशौ च। "लग्नमेकन्तु दोषाणां हन्याद्वैवोदिते गुरुः" "ज्योति०ऽनरपतिजयचर्य्यायाक्ते स्वरभेदे स च भुक्तावशिष्टःस्वरः यथा। "द्वादशाब्दादिनाद्यानाः स्वस्थानाद्वै च कालतः। उदयन्ते पुनस्तत्रान्तरे एकादशोदयैः। वर्षमासदिवानाडीपलानि च क्रमादिकम्। कालमानं मया प्रोक्तं षड्धा च स्वरोदये। यत् भुक्तं स्वभोगेन लब्धं शेषोदितं भवेत्। लब्धे भुक्ताः स्वरा ज्ञेयाः शेषाङ्के तूदितस्वराः। यस्मिन् षष्ठ्या विभक्ते तु भुक्तं स्यादुदितस्वरे। उदितस्य स्वरस्य स्वनामस्वरवर्णेन तत्"। अधिकं चक्रशब्दे बालादिचक्रे वक्ष्यते। षड्स्वरोक्ते ६ स्वरभेदे च। तल्लक्षणं प्रकारश्च बालादिचक्रवत् ज्ञेयः। तदभुक्तं तत्रैव। "तिथिः प्रतिपदादिश्च कुजादिर्वारनायकः। नन्दा भद्रा जयारिक्ता पूर्णा चापि यथाक्रमम्। क्रमेणाङ्काः प्रदातव्या यावद्वाङ्कसमुच्चयः। चन्द्राष्टौ ८। प्रथमे देया नगनागं ८७द्वितीयके। तृतीये चाग्निनवकं ९३ चतुर्थे तु अष्टषट्काः ६८। पञ्चोत्तरशतं१०५ देयमु क्रमेण पञ्चकोदतः। अङ्कपरुषन्तु"वयोराशिं स्वराङ्कञ्च एकीकृत्य विचारयेत्"। इत्यादि सप्तादिगुण्यगणनार्थं, सप्तशून्यशब्दे विवृतिः। एतेषां पञ्चकोदयस्थवर्णादीनां संज्ञा तत्रैवोक्ता यथा "उदितं भ्रमितं भ्रान्तं सन्ध्यास्थं तदनन्तरम्" संज्ञान्तरमपि तत्रैव "जन्म कर्म्म च आधानं पिण्डं क्षिप्तं तथैव चेति "उदिते विजयोभित्यं भ्रमिते लाभ एव च। भ्रान्ते तु सिद्धिमाप्नोति सन्ध्यास्थे मरणं ध्रुवम्। यत्र नामाक्षरं प्राप्तं तत्रैव उदितस्वरः। १०सम्मते। "पुरोहितञ्च कुर्वीत दैवज्ञमुदितोदितम्" या०स्मृ०। विद्याभिजनशीलादिभिरुदितैः शास्त्रोक्तैरुदितं सम्मतम्" मिता०।११बालनामगन्धद्रव्ये छीवेरे(वाला) न०अमरः।

उदिति स्त्री उद्+इ-क्तिन्। उदये उद्गमने "यन्नक्षं वा निशितिं वोदितिं वा" ऋ०६,१५,११।

उदीक्षण न० उद्+ईक्ष-ल्युट्। १ऊर्द्ध दर्शने २उद्भावने च।

उदीक्ष्य अव्य०उद्+ईक्ष-ल्यप्। १ऊर्द्धं दृष्ट्वेत्यर्थे २उद्भाव्येत्यर्थे च। कर्मणि यत्। ३उद्भावनीये ४उदीक्षणीये च त्रि०

उदीचीन त्रि० उदीचि उदीच्यां वा दिशि भवः खः उदादेशे अञ्छोपे पूर्व्वदीर्घः। उत्तरदिग्देशकालभवे। "उदीचीनप्रवणे करोत्युदीची वै मनुष्याणां दिक्" शत०ब्रा०१२८,१,६। "उदीचीनदशं वै तत्पवित्रं भवति" शत०ब्रा० १,७,१,१२।

उदीच्य त्रि० उदच्+भवार्थे यत् उदादेशः अल्लोपे दीर्घः

उत्तरदिग्देशकालभवे। "शरैरस्त्रैरिवोदीच्यानुद्धरिष्यन् रसानिव" रघुः। २कर्मसमाप्तौ कर्त्तव्ये दक्षिणादिदानादिरूपे कर्मादौ च। "अध्वतरोरध्वानुदीच्येषु"कात्या० २२,२,२५। "अध्वतरीयुक्तान् रथानुदीच्येषु ददाति" कर्कः। यथा होमादौ प्रकृतहोमानन्तरं कर्त्तव्योदकाञ्जलिसेकादि। यथाह सं०त० "अथोदीच्यकर्म, तत्र गोभिलः। "समिधमाधायानुपर्य्युक्ष्य तथैवोदकाञ्जलीन् सिञ्चेत् अन्वमंस्थाः"इति यथायथमूह्यम्। उदीच्यदेशाश्च शरावत्याः पश्चिमोत्तरस्यां देशभेदाश्चैव मत्स्यपुराणे दर्शिताः यथा "वाह्लीका वाटधानाश्च आभीराः कालतोयकाः। परम्ब्राश्चैव शूद्राश्च पह्लवाश्चात्मखण्डिकाः। गान्धारा जवनाश्चैव सिन्धुसौवीरभद्रकाः। शका हूणाः पुलिन्दाश्च पारदा हारमूर्त्तिकाः। रामठाः कण्ठकाराश्च केकया देशमालिकाः। क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च। आत्रेयोऽथ भरद्वाजः प्रस्थलाः सदशेरकाः। लम्पकास्तलगानाश्च सैनिकाः सहसाकुजैः एते देशा उदीच्यास्तु पुरार्णैः परिकीर्त्तिताः"। बृहत्सं०कूर्म्मविभागे तु अन्येऽपि ते उक्ता यथा "उत्तरतः कैलासो हिमवान्वृषभान् गिरिर्धनुश्चांच। क्रौञ्चो मेरुः कुरवस्तोत्तराः क्षुद्रमीनाश्च। केकयवात्यिवासनभोगप्रस्थार्जुनायनाम्भीष्राः। व्यादर्शान्नहोपित्रिगर्तत्रगाननाश्वसुखाः। केशधरचिपिटनासिकदासेरकवाटधानधरधानाः। तक्षशिलाप्युत्कलावतकैलावतकण्ठधानाश्च। अम्बरमद्रकमालवपौरवकक्षारदण्डपिङ्गलकाः। माणक्यलवणकोकलशीतकमाण्डव्यभूतपुराः। गान्धारयशोवतिहेमतालराजन्यखचरगव्याश्च। यौधेयदासमेयाःश्यामाकाः क्षेमधूर्त्ताश्च" अनयोर्विरोधपरिहारः अपेक्षाभेदात् नामान्तरानुल्लेखाच्च बोध्यः।

उदीच्यवृत्ति स्त्री "षड्विधमेऽहो सभे कलासाच्च समे द्युनौ निरन्तराः। न समात्र पराजिता कला वैतालीयेऽन्ते रलौ गुरुः" इत्युपक्रम्य "उदीच्यवृत्तिर्द्वितीयलः सक्षोऽप्येष भवेदयुग्मयोः"छ०र०उक्ते वैतालीयभेदे छन्दसि। [देखे।

उदीप त्रि० उद्गता आपोयतः अच् समा० ईत्वम्। उद्गतजले

उदीरण न० उद्+ईर-ल्युट्। १उच्चारणे "उद्घातः प्रणवोद्गासां न्यायैस्त्रिभिरुदीरणम्"कुमा०युच् तत्रैव स्त्री।

उदीरित त्रि०उद्+ईर-क्त। १कथिते २उद्गिरे ३प्रेरिते च। "अभिलाषमुदीरितेन्द्रियः"कुमा०।भावे क्त। ४कथने न०।

उदीर्ण त्रि० उद्-ॠ-क्त। १उदिते २मरुति ३उद्गिरे च। "उदीर्णरागप्रतिरोधकं मुहुः" माघः। "भवच्छ्रवरोदीर्णसारकाख्यो महासुरः" कुमा०। ४विष्णौ पु०। "उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतःस्थिरः" विष्णु०स०।

उदुत्य न० उदुत्यमितिपदयुक्तम्। सूर्य्योपस्थानार्थे मन्त्रे स च सन्ध्याप्रयोगे दृश्यः "उदुत्यञ्जातवेदसञ्च चित्रं देवेति तत्परम्। तच्चक्षुरित्युपस्थानं मन्त्रा ब्रह्मस्य सिद्धिदाः। कात्यीय०।

उदुम्बर पु० उदुम्बरवत्। (यज्ञडुमर) १वृक्षे। २देहस्थां २नपुंसके ४कृष्णभेदे च ५ताम्रे न०। ६अशीतिरक्तिकापरिमिते कर्षे पु०। उदुम्बरशब्दे उदा०। "यदुदुम्बरवर्णानां षष्टीषु मण्डलं महत्। शीतं न गमयेत् स्वर्गं किन्तत् कृतगतं नयेत्"। सौत्रमणीयागे सुरापाणदुष्टत्वबोधकम्। "हीवेरचक्रभङ्गोदुम्बरत्वञ्च साधितम्"। कच्छुरामूलकल्कं वा उदुम्बरफलोपमम्" सुश्रुतः। ७साल्वजनपदावयवे च। "साल्वावयवेत्यादि" पा० ततोभवार्थे वृञ्। औदुम्बरि तद्भवे त्रि०"साल्वावयवा उदुम्बरादयः"सि०कौ० उदुम्बर एव स्वार्थे अण् तस्मिन् प्यामे। "औदुम्बरकापिञ्जलगजाह्वयवेति मध्यमिदम्" ह०सं०। उदुम्बरे कृमिः पात्रेसमि० स०। उदुम्बरकृमिः तन्मध्यस्थकृमौ। उदुम्बर इव मशकः पात्रेसमिता०स। स्थूलमशके पु०

उदुम्बरदला स्त्री उदुम्बरस्येव दलमस्याः। दन्तीवृक्षे राजनि०

उदुम्बरपर्णी स्त्री उदुम्बरपर्णीवत् सर्वम् न ङीत्वम्। तदर्थे

उदुम्बरावती स्त्री उदुम्बरफलानि बाहुल्येन सन्त्यस्यां नद्यां मतुप् संज्ञायां दीर्घः। नदीभेदे।

उदुम्बल पु० उदुम्बरशब्दे रस्य वा लः। उदुम्बरे "उपेदन्तमुदुम्बलम् तुण्डेलसतसशालुदम्" अथ०८,६,१७,। उरुश्च लमस्य पृषो०। २विस्तीर्णबलयुक्ते त्रि०उरुणसावसुरूपा उदुम्बलौ यमस्य दूतौ चरतोजनाँ अनु"ऋ०१०,१४,१२, "उदुम्बलौ उरुबलौ विस्तीर्णबलौ" भा०।

उदूखल न० ऊर्द्धं खं यति या-क पृषो०नि०। तण्डुलादिकरणार्थं काष्ठादिरचिते १द्रव्ये, २युग्मगुलौ च। "सधान्यमुदूखलं मुषलेनाभिहन्यात्" सुश्रु०। सुश्रुतोक्ते शारीरे २सन्धिभेदे पु० सन्धयश्च सुश्रु० दर्शिताः "कोरोदूखलसासङ्गप्रतरतन्त्रसेवनी वायसतुण्डमण्डल गङ्गावर्त्ताः" इत्यष्टविधान् सन्धीनुक्त्वा "कक्षावङ्क्षणदृगनेषूदूखल इति उदूखलाकृतित्वाच्च तदस्थिकुहरस्य तथात्वम्।

उदूढ त्रि०उद्+वह-क्त। १जडे, २स्थूले, ३धृते च। "उदूढलोकत्रितयेनेति" माघः। "उदूढवक्षःस्थगितैकदिङ्मुखे"किरा० ४विवाहितस्त्रियां स्त्री।

उद्वत्त् स्त्री उत्कृष्टा ऋक् समासान्तविधेरनित्यत्वात् न समा० । उत्कृष्टायामृचि । "मा पातमस्य यज्ञस्योद्वः मा पाद्यं वृत्र आस्य यज्ञस्योद्वः" यजु० ४,६,१० "उद्वः उत्तमायाम् ऋचः पर्यन्तम्" वेददी० । यजुर्भिर्यज्ञस्योद्वं गच्छन्ति यज्ञस्योद्वं गच्छानीति" शत० ब्रा० २,१,१,१२ उद्+ऋच-क्तौ क्विप् । २उदये "सत्वाः सन्तु यजमानस्य कामाः इत्याहैष वै कामो यजमानस्य यदनार्त्त उद्वं गच्छति" तैत्ति० "स्वस्ति ते देव सोम सुत्यामुद्वमशीय" ऐत० उद्वेजय त्रि० उद्+एज-णिच्-खश् । उद्वेगकारके "उद्वेजयान् भूतगणान् न्यधेधीत्" भट्टिः । [उद्वगशब्दे उदा० ।

उद्वोदन पु० उद्वेन सिद्ध ओदनः उदादेयः । जलमात्रसिद्धे

उद्वत त्रि० उद्+गम-क्त । १उदिते, २उत्पन्ने, "ववोऽतिपातोद्वतवातवेपिते" नैष० । २ऊर्द्ध गते, ३उद्वान्ते च ।

उद्वतशृङ्ग पु० उद्वतमुत्थितं शृङ्गमस्य । जातशृङ्गावस्थपशौ

उद्वति स्त्री उद्+गम-क्तिन् । १उदये २ऊर्द्ध गतौ ३उत्पत्तौ च ।

उद्वन्धि त्रि० उत्कटो गन्धोऽस्य प्रा० व० ह्रस्वलोप दृत्समा० । १उत्कटगन्धादेव २उत्कटगन्धयुक्ते च । "विजम्भणोद्वन्धिषु कुङ्कुमेषु" रघुः ।

उद्गम पु० उद्-गम-घञ् अमन्तत्वात् न वृद्धिः । १उदये २ऊर्द्ध गतौ ३उद्भवे ४उन्नतौ च । "रोमोद्गमः प्रादुरभूदुमायाः" कुमा० "फलेन सहकारस्य पुष्पोद्गम इव प्रजाः" रघुः । "हरितदर्भोद्गमरुद्धया मृगीभिः" किरा० भावे खुट् । उद्गमनमप्यत्र न० "आङ उद्गमने" पा० ।

उद्गता स्त्री "सजसादिमे सलघुके च नसजगुरुकेऽप्यथोद्गता । अक्षिगतमनजलगागयुताः सजसा जगौ च चरणमेकतः पठेत्" छ० र० उक्ते विषमवृत्ते छन्दोभेदे ।

उद्गमनीय न० उद्+गम-अनीयर् । धौतवस्त्रहृदये "स्टहीतपत्युद्गमनीयवस्त्रेति" कुमारः । "तत् स्यादुद्गमनीयं यत् धौतयोर्वस्त्रयोर्युगम्" इत्यमरव्याख्यायां युगमित्यविवक्षितम् इति प्रायशः यद्वस्त्रं तदेवेति व्याख्याव चीरस्वामी इममेव श्लोकमुदाजहार । "स्टहीतं पतिं प्रति उद्गमनीयं वस्त्रं यस्येति मल्लि० । स्त्रीणाञ्चैकवस्त्रधारित्वं लोकप्रसिद्धं वैदिके कर्म्मणि एव द्विवस्त्रता श्रुतएव पतिं प्रतीतीत्यध्याहृत्य व्याख्यातम् । "धौतोद्गमनीयवाससी" दशकुमा० ।

उद्गाढ न० उद्+गाह-क्त । १अतिशये २अत्यन्ते । २अतिशययुक्ते त्रि० । "प्रेमार्द्राः प्रणयस्मृयः परिचयादुद्गाढरागोदयाः" सा० द० ।

उद्गाता पु० उद्गैर्गायति साम उद्+गै-तृच् । १सामवेदगायके । अस्य च उद्गीथरूपसामावयवस्योद्गैर्गानादुद्गातृत्वम् । यथा चास्य तथात्वं तथा उद्गीथशब्दे वक्ष्यते । षोडशसु ऋत्विक्षु मध्ये २ऋत्विग्भेदे । ते च ऋत्विजः अध्वर्य्वादिशब्दे ५,४६० दर्शिताः । "एवं हरेदध्वर्य्वर्ब्रह्माधाने च वाजिनम् । होता चापि हरेदश्वमुद्गाता चाध्वनः क्षये" मनुः । राजसूये तस्य च दक्षिणाभेद उक्तः "सौवर्णी स्रगुद्गातुः" आश्व० ६,४,६ । उद्गातृप्रशंसनपूर्व्वं तत्कर्म्म च शत० ब्रा० दर्शितं यथा । "अथाति ह वा एतद्धोता यक्ष्यंस्तं । तस्मा एतदृत्विजे प्रब्रूयाध्वर्यवेऽस्थाति तस्मात् प्रतिगरोनाम । तं वै प्राङ्मासीनमाह्वयते सर्वे वा अन्य उद्गातुः प्राङ्ग आर्त्विज्यं कुर्वन्ति तथो ह्यस्यैतत् प्रागेवार्त्विज्यं कृतं भवति । प्रजापतिर्वा उद्गाता । योषाग्नर्धोता स एतत् प्रजापतिरुद्गाता योषायामृचि होतरि रेतः सिञ्चति यत् स्तुते तद्धोता यज्ञेन प्रजनयति तच्छ्रुति यथायं पुरुषः शितस्तृदेनच्छ्रुति तस्माच्छस्त्रं नाम" ४,३,१,१, २,३, । उद्गीथगानकर्त्तृत्वाच्च यथाऽस्योद्गातृत्वं तथोक्तं ब्रा० उ० । "तस्यर्क् च साम च मेथौ तस्मादुद्गीथस्तस्मात्त्वेवोद्गातैवास्य हि गाता" "एवमेवोद्गातारस्त्वाचोद्गातः ! या देवतोद्गीथमन्वायत्ता ताश्चेदविद्वान् उद्गास्यसि मूर्द्धा ते विपतिष्यतीति" च । तथाज्ञानपूर्व्वकोद्गानस्य फलमपि तत्रोक्तं यथा "य एवदेवं विद्वान् साम गायति उभौ स गायति सोऽमुनैव स एष ये चामुष्मात् पराञ्चोलोकास्तांश्चाप्नोति देवकामांश्च अथानेनैवमेवैतस्मादर्व्वाञ्चोलोकास्तांश्चाप्नोति मनुष्यकामांश्च । तस्मादुहैवं विद्वांसं ब्रूयात् कं ते काममागायानीति एष ह्येव कामागानस्येष्टे य एतदेवं विद्वान् साम गायति" छा० उ० ।

उद्गार पु० उद्+गृ+अप्दीर्घश्च वार्त्तिकेन उद्वोर्य्वः" पा० घञ् । उद्गमने । "खर्जुरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु" रघुः । "सलिलोद्गारमुद्वेधिमानाः" "धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति" मेघ० । "शनिर्झरोद्गार इवाद्रिराजः" रघुः । (ढेकुर) इति २कण्ठशब्दभेदे च । "धूमोद्गारे तथा वान्ते क्षुरकर्म्मणि मैथुने । स्नातके स्नातके चैव नित्यं नैमित्तिकं त्यजेत्" आ० त० स्मृतिः । वमनप्रकारः निदानादिसहितः सुश्रुते दर्शितो यथा

"अथातो वमनविरेचनव्यापच्चिकित्सितं व्याख्यास्यामः । वैद्यातुरनिमित्तं वमनं विरेचनं च पञ्चदशधा व्यापद्यते तत्र वमनस्याधोगतिरूर्द्ध विरेचनस्येति पृथक् । समान-

समयोः सावशेषौषधत्वं जीर्णौषधत्वं हीनाधिकदोषापहृतत्वं वातशूलमयोगातियोगौ जीवादानमाध्मानं परिकर्त्तिका परिस्रावप्रवाहिका हृदयोपसरणं विबन्धः इति। तत्र बुभुक्षापीडितस्यातितीक्ष्णाग्नेर्मृदुकोष्ठस्य चावतिष्ठमानं दुर्बलस्य वा गुणसामान्यभावाद्वमनमधोगच्छति। तत्रेक्षितानवाप्तिर्दोषोत्क्लेशश्च तमाशु स्नेहयित्वा भूयस्तीक्ष्णतरैर्वामयेत्। अपरिशुद्धामाशयस्रोतोऽल्पत्वेन सम्यगाशयस्य वाऽहृद्यमतिप्रभूतविरेचनं पीतमूर्द्धं गच्छति तत्राशुद्धामाशयसल्लक्षणेनाध्मानमाशु वामयित्वा भूयस्तीक्ष्णतरैर्विरेचयेत्। आमान्वये त्वामवत्तद्विधानम्। अहृद्योऽतिप्रभूते च हृद्यं प्रमाणं युक्तञ्च। अतऊर्द्धमुक्तिवत्त्वौषधे न हृतीयं पाययेत्। ततस्तेन मधुघृतफाणितयुक्तैर्लेहैर्विरेचयेत्। दोषविस्थितमल्पमौषधमवस्थितमूर्द्धभागिकमधोभागिकं वा न सम्यति दोषान्। तत्र हृष्णापार्श्वशूलं ऊर्द्धमूर्द्धपर्वभेदोहृल्लासारुचयश्च विशुद्धिश्च भवति। तमुष्णाभिरद्भिराशु वामयेत्। सावशेषौषधमतिप्रभावितदोषमतिबलमसम्यग्विरिक्तमध्यं वामयेत्। क्रूरकोष्ठस्यातितीक्ष्णाग्नेरल्पमौषधमल्पगुणं वा भक्षयत्याकमुपैति तत्र समुद्रीर्णा दोषा यथाकालमनिर्हियमाणा व्याधिं बलविभ्रंशमापादयन्ति। तमनल्पमन्दमौषधञ्च पाययेत्। अस्निग्धस्विन्नेनाल्पगुणं वा भेषजमुपयुक्तमल्पान्दोषानुहन्ति। तत्र वमने दोषशेषः गौरवमुत्क्लेशं हृदयाविशुद्धिं व्याधिवृद्धिं करोति तत्र यथायोगं पाययित्वा वामयेद्दृढतरम्। विरेचने गुदपरिकर्त्तनमाध्मानं शिरोगौरवमनिस्तरणं वा वायोर्व्याधिवृद्धिं करोति। तमुपपाद्य भूयः स्नेहस्वेदाभ्यां विरेचयेद्दृढतरम्। दृढं बद्धप्रवाहितदोषं वा हृतीये दिवसेऽल्पगुणं चेति। अस्निग्धस्विन्नेन रूक्षमौषधमुपयुक्तमग्रङ्गचारिणा वा वायुं कोपयति। तत्र वायुः प्रकुपितः पार्श्वपृष्ठश्रोणिमर्म्मशूलं मूर्द्धानं भ्रमं संज्ञानाशञ्च करोति। तमभ्यङ्ग धान्यस्वेदेन स्वेदयित्वा यष्टीमधुकविपक्वेन तैलेनानुवासयेत्। स्नेहस्वेदाभ्यामविभावितशरीरेणाल्पमौषधमल्पगुणं वा पीतमूर्द्धमधोवा नाभ्येति दोषांश्चोत्क्लिश्य तैः सह बलक्षयमापादयति। तत्राध्मानं हृदयग्रहस्तृष्णा मूर्च्छा दाहश्च भवति तमयोगमित्याचक्षते तमाशु वामवेल्लदनफलबलवणाम्बुभिर्विरेचयेत्तीक्ष्णतरैः कषायैश्च। दुर्बलस्य तु समुत्क्लिष्टा दोषा व्याप्य शरीरं कण्डूश्वयथुकुष्ठपिडकाज्वराङ्गमर्दनिस्तोदनानि कुर्वन्ति। ततस्तानवशेषान्मृदुभिषधेनापहरेत्। अस्निग्धस्विन्नस्य मृदुविरिक्तस्याधोनाभेः स्तब्धपूर्णोदरता शूलं वातपुरीषसङ्गः कण्डूमण्डलप्रादुर्भावो भवति तमास्थाप्य पुनः संस्नेह्य विरेचयेत्तीक्ष्णेन। नातिप्रवर्त्तमाने तिष्ठति वा दुष्टसंशोधने तत्क्षणे जनार्थसृष्टोदकं पाययेत् पाणितापेन पार्श्वोदरमुपसेवयेत्। ततः प्रवर्त्तन्ते दोषाः। अनुप्रवृत्तेष्वल्पदोषे जीर्णौषधं बहुदोषमक्षःशेषं बलञ्चावेक्ष्य भूयोमात्रां विदध्यात्। अप्रवृत्तदोषं दशरात्राद्दुर्बलपसंस्कृतदेहं स्नेहस्वेदाभ्यां भूयः शोधयेत्। दुर्विरेच्यमास्थाप्य पुनः संस्नेह्य विरेचयेत्। स्त्रीभयशोकैर्वेगाघातशीलाः प्रायशः स्त्रियो राजसमीपस्था वणिजः श्रोत्रियाश्च भवन्ति। तस्मादेते दुर्विरेच्या बहुवातत्वादत एव तानतिस्निग्धान् स्वेदोपपन्नान् शोधयेत्। स्निग्धस्विन्नस्यातिमात्रमतिबहुकोष्ठस्य वा तीक्ष्णाधिकदत्तमौषधमतियोगं कुर्यात्। तत्र वमनातियोगे पित्तातिप्रवृत्तिर्बलक्षयो वातकोपश्च बलवान् भवति तं स्नेतेनाभ्यङ्गावगाहाभ्यां शीतास्वप्सु शर्करामधुभिर्लेहैरुपचरेद्यथास्वम्। विरेचनातियोगे कफक्षयातिप्रवृत्तिरक्तरक्तक्षयश्च तत्रापि बलविभ्रंशो वातकोपश्च बलवान् भवति तमतिशीताम्बुभिः परिषिच्यावगाहयेद्वा शीतैस्तण्डुलाम्बुभिर्मधुभिश्चर्द्धीः पाययेत्। पिच्छावस्तिं चास्मै दद्यात् क्षीरसर्पिषा चैनमनुवासयेत् प्रियङ्ग्वादि चास्मै तण्डुलाम्बुना पातुं प्रयच्छेत्। क्षीररसयोश्चान्यतरेण भोजयेत्। तस्मिन्नेव वमनातियोगे प्रवृद्धे शोणितं क्षीवति छर्दयति वा तत्र जिह्वानिःसरणमक्ष्णोर्व्याकृत्तिर्हनुसंक्षपणं तृष्णा हिक्काज्वरो वैसंज्ञ्यमित्युपद्रवा भवन्ति तमजाक्षुद्रचन्दनोशीराङ्गनलाजचूर्णैः सशर्करोदकैर्मन्थं पाययेत्। पलरसैर्व्वा सक्षतक्षौद्रशर्करैः शुङ्गाभिर्वा वटादीनां पेयां सिद्धां सक्षौद्रां वर्त्तोयाभिर्वा पयसा जाङ्गलरसेन वा भोजयेत् अतिस्रुतशोणितविधानेनोपक्रमेत्। जिह्वामतिसर्पितान्त्रिकटुकलवणचूर्णप्रघृष्टां तिलद्राक्षाप्रलिप्तां वा पीडयेत् प्रविष्टायामस्यमन्ये तस्य पुरस्तात्स्रावयेयुः। व्याकृत्ते चाक्षिणी हताभ्यक्ते पीडयेत्। हनुसंक्षपणे वातश्लेष्महरं नस्यं स्वेदांश्च विदध्यात्। तृष्णादिषु च यथास्वं प्रतिक्रियेत। विसंज्ञे वेणुपीलागीतस्वनं श्रावयेत्"।

उद्गारस्राजीर्णरोगलिङ्गत्वसिद्धिरत्रैवोक्ते। अपथ्यादिभोजनरूपकारणसहिताजीर्णं स्वरूपादि शुश्रुते उक्तम्। "प्राग्भुक्ते त्वविविक्तेऽग्नौ हिरण्यं न समाचरेत्। पूर्वभुक्तो विदग्धेऽन्ने भुञ्जानो हन्ति पावकम्। मात्रागुरु परिस्रुते

दाहारं द्रव्यतश्च यः । विदाह्नं नैव भुञ्जीत मात्रया वा बुभुक्षितः । द्विगुणञ्च पिबेत्तोयं सुखं सम्यक् प्रजीर्य्यति । मेषलेह्याद्यभक्ष्याणां गुरु विद्याद्यथोत्तरम् । गुरूणामर्द्धसौहित्यं लघूनां तृप्तिरिष्यते । द्रवोत्तरो द्रवैरापि न मात्रागुरुरिष्यते । द्रवाढ्यमपि शुष्कन्तु सम्यगेवोपपद्यते । विशुष्कमन्नमश्नन्तं न पाकं साधु गच्छति । पिण्डीकृतमसंक्लिन्नं विदाहमुपगच्छति । स्रोतस्यन्नवहे पित्तं पक्वो वा यस्य तिष्ठति । विदाहि भुक्तमन्यद्वा तस्यान्नं विदह्यते । शुष्कं विरूक्षं विष्टब्धि वह्निव्यापदमावहेत् । आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः । अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः । अत्यम्बुपाराद्विषमाशनाद्वा सन्धारणाल्लङ्घनविप्रकर्ष्याच्च । कालेऽपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य । ईर्ष्याभयक्रोधपरिप्लुतेन लुब्धेन रुग्दैन्यनिपीडितेन । प्रद्वेषयुक्तेन च सेव्यमानमन्नं न सम्यक् परिणामभेति । साधूर्ध्वमन्नं गतमामसंज्ञं विदग्धसंज्ञं गतमम्लभावम् । किञ्चिद्विपक्वं भृशतोदशूलं विष्टब्धमाहुर्विरुजत्वतस्तम् । उद्गारशुद्धावपि भक्तकाङ्क्षा न जायते हृद्गुरुता च यस्य । रसावशेषेण तु सप्तमेकं चतुर्थमेतत्प्रवदन्त्यजीर्णम् । मूर्च्छाप्रलापो वमथुः प्रसेकः सदनं भ्रमः । उपद्रवा भवन्त्येते मरणं चाप्यजीर्णतः । तत्रामे लङ्घनं कार्य्यं विदग्धे वमनं हितम् । विष्टब्धे स्वेदनं पथ्यं रसशेषे शयीत च । वामयेदाशु तं तस्माद्यवान्नेन लवणाम्बुना । कार्य्यं चानशनं तावद्यावन्न प्रकृतिं भजेत् । लघुकायमतश्चैनं लङ्घनैः समुपाचरेत् । यावन्न प्रकृतिस्थःस्याद्दोषतः प्राणतस्तथा । क्षिताक्षितोपसंयुक्तमन्नं समशनं स्मृतम् । वह्नेः लोकमङ्गाल्ये वा वित्तेयं विप्रमाशनम् । अजीर्णे भुञ्जते यत्तु तदध्यशनमुच्यते । त्रयमेतद्विपद्यन्ते बहून् व्याधीन् करोति वा । अन्नं विदग्धं हि नरस्य शीघ्रं पीताम्बुना वै परिपाकमेति । तद्रसस्य शैत्येन निहन्ति पित्तमाक्लेदिभावाच्च नयत्यधस्तात् । विदह्यते यस्य तु भुक्तमात्रे दह्येत हृत्कण्ठगलञ्च यस्य । द्राक्षाभयां माक्षिकसम्प्रयुक्तां लीढ्वाऽभयां वा स सुखं लभेत । भवेदजीर्णं प्रति यस्य श्रद्धा स्निग्धस्य जन्तोर्बलिनोऽन्नकाले । प्रातः स शुद्धोमभयामयश्रो भुञ्जीत सम्माक्ष हितं हितार्थी । खलं यदा दोषपिहितमार्गं लोनं न तेजः पवनादधोति । भवत्यजीर्णेऽपि तदा बुभुक्षा सा मन्दवह्निं विषवन्निहन्ति ।

इत्यमजीर्णताकारणप्रदर्शनपूर्वमुद्गारशुद्धेः प्रकारस्तत्रैव दर्शितः यथा "या मात्रा परिजीर्य्येत चतुर्भागगतेऽहनि । सा मात्रा दीपयत्यग्निमल्पदोषे च पूजिता । या मात्रा परिजीर्य्येत तथार्द्धदिवसे गते । सा ह्यधा हंहणी चैव मध्यदोषे च पूजिता । या मात्रा परिजीर्य्येत चतुर्भागावशेषिते । स्नेहनोवा च सा मात्रा बद्धदोषे च पूजिता ॥ या मात्रा परिजीर्य्येत तथा परिणतेऽहनि । ग्लानिमूर्च्छामदानुत्क्षिप्य सा मात्रा पूजिता भवेत् । अहोरात्रादसन्दुष्टा या मात्रा परिजीर्य्यति । सा तु कुक्षिविशोन्मादग्रहापस्कारनाशिनी । यथाग्नि प्रथमां मात्रां पाचयेत विचक्षणः । पीतो हृतिबद्धस्नेहो जनयेत्प्राणसंशयम् । मिथ्याचाराद्वहुत्वाद्वा यस्य स्नेहो न जीर्य्यति । विष्टब्ध चापि जीर्य्यन्तं वारिणोष्णेन वामयेत् । जीर्णाजीर्णविशङ्कायां स्नेहस्योष्णोदकं पिबेत् । तेनोद्गारो भवेच्छुद्धो भक्तं प्रति रुचिस्तथा । क्षुः पच्यमाने हृद्दाहभ्रमसादारतिक्लमाः । परिविच्याद्विरेफाभिजीर्णस्नेहं ततो नरम् । यवागूं पाययेच्छीघ्रां कामं क्षिप्राल्पतण्डुलाम् । देयौ यूषरसौ वापि सुगन्धी स्नेहवर्जितौ । कृतौ वात्यल्पसर्पिष्कौ यवागूवां विधीयते । पिबेत्त्र्यहं चतुरहं पञ्चाहं षडहं तथा । सप्ताहात्परं स्नेहः सात्म्यीभवति सेवितः" ।

उद्गारस्य नागवायुकार्य्यम् यथोक्तपदार्थाः० योगार्णवे "उद्गारे नाग इत्युक्तो नीलजीमूतसन्निभः । उन्मीलने स्थितः कूर्म्मोभिद्याङ्गनसमप्रभः । क्षवथौ तु स्मृते चैव जपाकुसुमसन्निभः । जृम्भणे देवदत्तःस्यात् शुक्लस्फटिकसन्निभः । धनञ्जयस्तथा घोषे मकारजलवर्णकः । ललाटे चोरसि स्कन्धे हृदि नाभौ त्वगस्थिषु । नागाद्या वायवः पञ्च टेहे तु परिवेष्टिताः" । [जिरके शब्दचि० ।

उद्गारशोधन त्रि० उद्गारं शोधयति शुध-णिच्-ल्यु । क्षण-

उद्गारिन् त्रि० उद्+गृ-णिनि स्त्रियां ङीप् । उद्गारयुक्ते । "यत्ते सौम्यं धनकृत्प्रियं सौरभोद्गारि वास्तः" उद्भवदू० । "धारास्वनोद्गारिदरीसुखोऽसौ" रघुः । "यः पण्यस्त्रीरतपरिमलोद्गारिभिर्नागराणाम्" मेघ० ।

उद्गिरण न० उद्+गृ-ल्युट् त्रि० कर्त्तरि । उद्वमने । उद्गारे (ढेकुर) २कण्ठस्वरभेदे च । "आध्मानमुद्गिरणमम्लरसो विदाहोऽजीर्णस्य पानजनितस्य भवन्ति लिङ्गम्" सुश्रु० । उद्गारशब्दे विवृतिः ।

उद्गीति स्त्री उद्+गै-भावे क्तिन् । १उच्चैर्गाने कर्मणि क्तिन् । "आर्य्यागकलहितयं व्यत्ययरचितं भवेदुद्गीतिः किल गदिता तद्दुयलंघभेदसंयुक्ता" छ०र०उक्ते मात्रा-

इत्तभेदे। उद्+गै–भावे क्त। उद्गीत उच्चैर्गाने न०। उद्गीथ पु० उद्+गै–थक्। सामगानावयवभेदे।

"उद्गीथरसपदपाठवत्ताच्च साम्नाम्" देवीभ०। साम्नोहि पञ्चविधाः सप्तविधा वा अवयवाः। "प्रस्तावस्तत उद्गीथः प्रतिहार उपद्रवः। निधनं पञ्चधेत्याऽर्हिङ्कारः प्रथमतया" भाष०भाष्यधृतवाक्यात्। तत्र साम्न आद्योभागः प्रस्तोता गेयः प्रस्तावनामा। द्वितीयोभाग उद्गाता गेय उद्गीथनामा। तृतीयोभागः प्रतिहर्त्ता गेयः प्रतिहारनामा। चतुर्थोभागः पुनरुद्गाता गेय उपद्रवनामा। पञ्चभिर्युगपत् गेयः निधननामा इति पञ्चविधः। गानारम्भकाले सर्वैरृत्विग्भिर्मिलित्वा हुङ्कारकरणरूपो हिङ्कारः, ओङ्कारपूर्व्वकत्वात् सर्वेषां वेदानां प्रथमरूपः प्रथमावयवः इति सप्तावयवत्वं तदेतत् सा० उप० दर्शितम् यथा "समस्तस्य खलु साम्न उपासनं साधु" इति साधुत्वोपन्यासेन "अग्निः प्रस्तावोऽन्तरिक्षमुद्गीथ आदित्यः प्रतिहारो द्यौर्निधनमित्यूर्द्धेषु अथाष्टसेषु द्यौर्हिङ्कार आदित्यः प्रस्तावोऽन्तरिक्षमुद्गीथोऽग्निः प्रतिरिक्षमुद्गीथोऽग्निः प्रतिहारः पृथिवी निधनम्। कल्पन्ते ह्यस्मै लोका ऊर्द्धा सादृत्ताच्च य एतदेवं विद्वाँश्चैव, पञ्चविधं सामोपास्ते" इदौ पञ्चविधस्योपासनमुक्तं तत्रैव

"द्यौ पञ्चविधं सामोपासीत पुरोवातो हिङ्कारो, मेघो जायते स प्रस्तावो, वर्षति स उद्गीथो, विद्योतते स्तनयति स प्रतिहारः, उद्गृह्णाति तन्निधनं, वर्षति ह्यस्मै वर्षयति ह य एतदेवंविद्वान् द्यौ पञ्चविधं सामोपास्ते। सर्व्वासु पञ्चविधं सामोपासीत मेघो यत् समुद्भवते स हिङ्कारो, यद्वर्षति स प्रस्तावो, याः प्राच्यः स्यन्दन्ते स उद्गीथो, याः प्रतीच्यः स प्रतिहारः, समुद्रो निधनम्। न ह्यासु प्रैत्यशुभान् भवति य एतदेवंविद्वान् सर्व्वासु, पञ्चविधं सामोपास्ते"।

ऋत्वादिषु पञ्चविधस्योपासनं तत्रैवोक्तम्

"ऋतवः पञ्चविधं सामोपासीत वसन्तो हिङ्कारो, ग्रीष्मः प्रस्तावो, वर्षा उद्गीथः, शरत्प्रतिहारो, हेमन्तो निधनम्। कल्पन्ते ह्यस्मा ऋतव ऋतुमान् भवति य एतदेवंविदृतुषु पञ्चविधं सामोपास्ते"।

"पशुषुपञ्चविधं सामोपासीताजा हिङ्कारो, ऽवयः प्रस्तावो, गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनम्। भवन्ति ह्यस्य पशवः, पशुमान् भवति य एतदेवंविद्वान् पशुषु पञ्चविधं सामोपास्ते"

"प्राणेषु पञ्चविधं परोवरीयः सामोपासीत प्राणो हिङ्कारो, वाक् प्रस्ताव, श्चक्षुरुद्गीथः, श्रोत्रं प्रतिहारो, मनो निधनं, परोवरीयांसि वैतानि। परोवरीयो ह्यस्य भवति परोवरीयसो ह लोकाञ्जयति य एतदेवंविद्वान् प्राणेषु पञ्चविधं परोवरीयः सामोपास्ते इति तु पञ्चविधस्य"। वाचि सप्तविधस्य साम्न उपासनं तत्रैवोक्तम्

"अथ सप्तविधस्य वाचि सप्तविधं सामोपासीत यत्किञ्च वाचो ह्रं इति स हिङ्कारो, यत्प्रेति स प्रस्तावो, यदेति स आदिः, (प्रणवः)। यदुदिति स उद्गीथो, यत्प्रतीति स प्रतिहारो, यदुपेति स उपद्रवो, यन्नीति तन्निधनम्। दुग्धेऽस्यै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतदेवं विद्वान्वाचि सप्तविधं सामोपास्ते"।

आदित्ये सप्तविधस्योपासनं तत्रैवोक्तम्

"अथ खल्वमुमादित्यं सप्तविधं सामोपासीत सर्व्वदा समस्तेन साम। मां प्रति मां प्रतीति सर्व्वेण समः तेन साम। तस्मिन्निमानि सर्व्वाणि भूतान्यन्वायत्तानीति विद्यात्तस्य यत्पुरोदयात्स हिङ्कार, स्तदस्य पशवोऽन्वायत्तास्तस्मात्ते हिङ्कुर्वन्ति हिङ्कारभाजिनो ह्येतस्य साम्नः। अथ यत्प्रथमोदिते स प्रस्ताव, स्तदस्य मनुष्या अन्वायत्तास्तस्मात्ते प्रस्तुतिकामाः प्रशंसाकामाः प्रस्तावभाजिनोह्येतस्य साम्नः। अथ यत्सङ्गवेलायां स आदित्यः (ओङ्कारः) तदस्य वयांस्यन्वायत्तानि तस्मात्तान्यन्तरिक्षेऽनारम्बणान्यादायात्मानं परिपतन्त्यादिभाजीनि ह्येतस्य साम्नः। अथ यन्मध्यन्दिने स उद्गीथ, स्तदस्य देवा अन्वायत्तास्तस्मात्ते सत्तमाः प्राजापत्यानामुद्गीथभाजिनो ह्येतस्य साम्नः। अथ यदूर्द्धं मध्यन्दिनात् प्रागपराह्णात् प्रतिहार, स्तदस्य गर्भा अन्वायत्तास्तस्मात्ते प्रतिहृता नावपद्यन्ते प्रतिहारभाजिनो ह्येतस्य साम्नः। अथ यदूर्द्धमपराह्णात् प्रागस्तमयात् उपद्रव, स्तदस्यारण्या अन्वायत्तास्तस्मात्ते पुरुषं दृष्ट्वा कक्षं वृक्षमित्युपद्रवन्त्युपद्रवभाजिनो ह्येतस्य साम्नः। अथ यत्प्रथमास्तमिते तन्निधनं तदस्य पितरोऽन्वायत्तास्तस्मात्तन्निदधति निधनभाजिनो ह्येतस्य साम्नः। एवं खल्वमुमादित्यं सप्तविधं सामोपास्ते"।

अतिरात्रयज्ञफलाय सप्तविधसामोपासनं तत्रैवोक्तम्

"अथ खल्वात्मसम्मितमतिमृत्यु सप्तविधं सामोपासीत हिङ्कार इति त्र्यक्षरं प्रस्ताव इति त्र्यक्षरं तत्समम्। आदिरिति द्व्यक्षरं प्रतिहार इति चतुरक्षरं तत द्वयं तत्समम्। उद्गीथ इति त्र्यक्षरमुपद्रव इति चतु-

क्षरं त्रिभिस्त्रिभिः समं भवत्यक्षरमतिशिष्यते त्र्यक्षरं तत्समम्। निधनमिति त्र्यक्षरं तत्सममेव भवति, तानि ह वा एतानि द्वाविंशतिरक्षराणि। एकविंशत्यादित्यमाप्नोत्येकविंशो वा इतोऽसावादित्यो द्वाविंशेन परमादित्याज्जयति तदाकं तद्विशोकम्। आप्नोतीहादित्यस्य जयं परो ह्यस्मादित्यजयाज्जयो भवति य एतदेवं विद्वानात्मसम्मितमतिमत्सु सप्तविधं सामोपास्ते सामोपास्ते"।

पुनः पञ्चविधस्य मनआदिनात्मा उपासनं तत्रोक्तं यथा "मनो हिङ्कारो वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारः प्राणो निधनमेतद्गायत्रं प्राणेषु प्रोतम्। स य एवमेतद्गायत्रं प्राणेषु प्रोतं वेद प्राणी भवति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, महामनाः स्यात्तद्व्रतम्। अभिमन्थति स हिङ्कारो धूमो जायते स प्रस्तावो ज्वलति स उद्गीथो ऽङ्गारा भवन्ति स प्रतिहार उपशाम्यति तन्निधनं संशाम्यति तन्निधनमेतद्रथन्तरमग्नौ प्रोतम्। स य एवमेतद्रथन्तरमग्नौ प्रोतं वेद ब्रह्मवर्चस्यन्नादो भवति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, न प्रत्यङ्ङग्निमाचामेन्न निष्ठीवेत्तद्व्रतम्। उपमन्त्रयते स हिङ्कारो ह्वयते स प्रस्तावः स्त्रिया सह शेते स उद्गीथः प्रतिस्त्री सह शेते स प्रतिहारः कालं गच्छति तन्निधनं पारं गच्छति तन्निधनमेतद्वामदेव्यं मिथुने प्रोतम्। स य एवमेतद्वामदेव्यं मिथुने प्रोतं वेद मिथुनीभवति मिथुनान्मिथुनात् प्रजायते सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, न कांचन परिहरेत्तद्व्रतम्। उद्यन् हिङ्कारः उदितः प्रस्तावो मध्यन्दिन उद्गीथोऽपराह्णः प्रतिहारोऽस्तं यन्निधनमेतद्बृहदादित्ये प्रोतम्। स य एवमेतद्बृहदादित्ये प्रोतं वेद तेजस्यन्नादो भवति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, तपन्तं न निन्देत्तद्व्रतम्। अभ्राणि समुद्यन्ते स हिङ्कारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनमेतद्वैरूपं पर्जन्ये प्रोतम्। स य एवमेतद्वैरूपं पर्जन्ये प्रोतं वेद विरूपांश्च सरूपांश्च पशूनवरुन्धे सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या वर्षन्तं न निन्देत्तद्व्रतम्। वसन्तो हिङ्कारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत् प्रतिहारो हेमन्तो निधनमेतद्वैराजमृतुषु प्रोतम्। स य एवमेतद्वैराजमृतुषु प्रोतं वेद विराजति प्रजया पशुभिर्ब्रह्मवर्चसेन, सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, महत्त्व न निन्देत्तद्व्रतम्। पृथिवी हिङ्कारोऽन्तरिक्षं प्रस्तावो द्यौरुद्गीथो दिशः प्रतिहारः समुद्रो निधनमेताः शक्वर्यो लोकेषु प्रोताः। स य एवमेताः शक्वर्यो लोकेषु प्रोता वेद लोकी भवति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, लोकान्न निन्देत्तद्व्रतम्। अजा हिङ्कारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनमेता रैवत्याः पशुषु प्रोताः। स य एवमेता रैवत्यः पशुषु प्रोता वेद, पशुमान् भवति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, पशून्न निन्देत्तद्व्रतम्। द्यौरु हिङ्कारः त्वक् प्रस्तावो मांसमुद्गीथोऽस्थि प्रतिहारो मज्जा निधनमेतद्यज्ञायज्ञीयमङ्गेषु प्रोतम्। स य एवमेतद्यज्ञायज्ञीयमङ्गेषु प्रोतं वेदाङ्गी भवति नाङ्गेन विहूर्छति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, संवत्सरं मज्ञो नाश्नीयात्तद्व्रतं मज्ञो नाश्नीयादिति वा। अग्निर्हिङ्कारो वायुः प्रस्ताव आदित्य उद्गीथो नक्षत्राणि प्रतिहारश्चन्द्रमा निधनमेताद्राजनं देवतासु प्रोतम्। स य एवमेतद्राजनं देवतासु प्रोतं वेदैतासामेव देवतानां सलोकतां सार्ष्टितां सायुज्यं गच्छति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या, ब्राह्मणान्न निन्देत्तद्व्रतम्। त्रयो विद्या हिङ्कारस्त्रय इमे लोकाः स प्रस्तावोऽग्निर्वायुरादित्यः स उद्गीथो नक्षत्राणि वयांसि मरीचयः स प्रतिहारः सर्पा गन्धर्वाः पितरस्तन्निधनमेतत्साम सर्वस्मिन् प्रोतम्। स य एवमेतत्साम सर्वस्मिन् प्रोतं वेद सर्वं ह भवति। तदेष श्लोको भवति 'यानि पञ्चधा त्रीणि तेभ्यो न ज्यायः परमन्यदस्ति। यस्तद्वेद स वेद सर्वं सर्वा दिशो बलिमस्मै हरन्ति' सर्वमस्मीत्युपासीत तद्व्रतम्"।

एवं सामावयवानां तत्तद्दृष्ट्युपासनसङ्ख्या उद्गीथरूपावयवस्य ओङ्कारादिदृष्ट्युपासनयुक्तं तत्रैव यथा "ओमित्येतदक्षरमुद्गीथः तद्वा एतन्मिथुनं यद्वाक्च प्राणश्चर्क् च साम च। तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे संसृज्यते यदा वै मिथुनौ समागच्छत आपयतो वै तावन्योन्यस्य कामम्। आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते। तद्वा एतदनुज्ञाक्षरं यद्धि किञ्चा-

नुजानात्योमित्येव तदाह एषो एव सङ्गृह्यैतदनुज्ञा समर्द्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते। तेनेयं त्रयी विद्या वर्त्तते ओमित्यात्मानं संसत्योमित्युद्गायत्येतस्यैवाक्षरस्यापचित्यै महिम्ना रसेन। तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद। नाना तु विद्या चाविद्या च। यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति"। तस्य प्राणदृष्ट्या उपासन मुक्तं तत्रैव "देवासुरा ह वै यत्र संयेतिरे उभये प्राजापत्यास्ह देवा उद्गीथमाजह्रुरनेनैनानभिभविष्याम इति। ते ह नासिक्यं प्राणमुद्गीथमुपाञ्चक्रिरे तं ह्यासुराः पाप्मना विविधुः तस्मात्तेनोभयं जिघ्रति सुरभि च दुर्गन्धि च पाप्मना ह्येष विद्धः। अथ ह वाचमुद्गीथमुपासाञ्चक्रिरे तां ह्यासुराः पाप्मना विविधुस्तस्मात्तयोभयं वदति सत्यञ्चानृतं च पाप्मना ह्येषा विद्धा। अथ ह चक्षुरुद्गीथमुपासाञ्चक्रिरे तद्ध्यासुराः पाप्मना विविधुस्तस्मात्तेनोभयं पश्यति दर्शनीयं चादर्शनीयं च पाप्मना ह्येतद्विद्धम्। अथ ह श्रोत्रमुद्गीथमुपासाञ्चक्रिरे तद्ध्यासुराः पाप्मना विविधुस्तस्मात्तेनोभयं शृणोति श्रवणीयञ्चाश्रवणीयञ्च पाप्मना ह्येतद्विद्धम्। अथ ह मन उद्गीथमुपासाञ्चक्रिरे तद्ध्यासुराः पाप्मना विविधुस्तस्मात्तेनोभयं सङ्कल्पते सङ्कल्पनीयञ्चासङ्कल्पनीयञ्च पाप्मना ह्येतद्विद्धम्। अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे तं ह्यासुरा ऋत्वा विदध्वंसुर्यथाश्मानमाखनऋत्वा विध्वंसेत। एवं यथाश्मानमाखनऋत्वा विध्वंसत एवं ह वै स विध्वंसते य एवंविदि पापं कामयते यश्चैनमभिदासति स एषोऽश्माखनः। नैवैतेन न सुरभि न दुर्गन्धि विजानात्यपहतपाप्मा ह्येष तेन यदश्नाति यत्पिबति तेनेतरान् प्राणानवति। एतमु एवान्ततोऽविद्वोत्क्रामति व्याददात्येवान्नत इति"। अङ्गिरस्त्वेन तस्योपासन तत्रैवोक्तम् यथा।

"तं ह्याङ्गिरा उद्गीथमुपासाञ्चक्र एतमु एवाङ्गिरसं मन्यन्ते अङ्गानां यद्रसः। तेन तं ह बृहस्पतिरुद्गीथमुपासाञ्चक्र एतमु एव बृहस्पतिं मन्यन्ते वाग्वै बृहती तस्या एष पतिः। तेन तं ह्यास्यमुद्गीथमुपासाञ्चक्र एतमु एवास्यं मन्यन्त आस्याद्यदयते। तेन तं ह बको दाल्भ्यो विदाञ्चकार। स ह नैमिषीयाणामुद्गाता बभूव स ह स्वैभ्यः कामानागायति। आगाता ह वै कामानां भवति य एतदेवंविद्वानक्षरमुद्गीथमुपास्ते इत्यध्यात्मम्।

अथाधिदैवतं य एवासौ तपति तमुद्गीथमुपासीतोद्यन् वा एष प्रजाभ्य उद्गायति। उद्यंस्त्समोभयमपहन्त्यपहन्ता ह वै भयस्य तमसो भवति य एवं वेद। समान उ एवायञ्चासौ चोष्णोऽयमुष्णोऽसौ स्वर इतीममाचक्षते स्वर इति प्रत्याक्षर इत्यमुं तस्माद्वा एतमिममुद्गीथमुद्गीथमुपासीत"।

तस्य व्यानत्वेनोपासनं तत्रैव यथा

"अथ खलु व्यानमेवोद्गीथमुपासीत यद्वै प्राणिति स प्राणो यदपानिति सोऽपानः। अथ यः प्राणापानयोः सन्धिः स व्यानो यो व्यानः सा वाक्। तस्मादप्राणन्नपानन्वाचमभिव्याहरति। या वाक् सर्क् तस्मादप्राणन्नपानन्नृचमभिव्याहरति ऋक्तस्साम तस्मादप्राणन्नपानन् साम गायति यत्साम स उद्गीथस्तस्मादप्राणन्नपानन्नुद्गायति। अतो यान्यन्यानि वीर्यवन्ति कर्माणि यथाग्नेर्मन्थनमाजेः सरणं दृढस्य धनुष आयमनमप्राणन्नपानंस्तानि करोत्येतस्य हेतोर्व्यानमेवोद्गीथमुपासीत"।

उद्गीथाक्षराणां प्राणादित्वेनोपासनं तत्रोक्तम्।

"अथ खलूद्गीथाक्षराण्युपासीत उदिति द्यौर्वा उदिति प्राण एवोत्, प्राणेन ह्युत्तिष्ठति वाग्गी, र्वाचो ह गिर इत्याचक्षते अन्नं वम्, अन्ने ह्येदं सर्वं स्थितम्। द्यौरेवोत्, अन्तरिक्षं गीः, पृथिवी यम्, आदित्य एवोत्, वायुर्गीरग्निस्यम्, सामवेद एवोत्, यजुर्वेदो गीः, ऋग्वेदस्यं, दुग्धेऽस्मै वाग्दोहं यो वाचो दोहः अन्नवानन्नादो भवति य एतान्येवं विद्वानुद्गीथाक्षराण्युपास्त उद्गी थ इति"। तस्य प्रणवत्वेनोपासनं तत्रैव "अथ खलु य उद्गीथः स प्रणवः स उद्गीथ इति होवाचैतदनादृत्यैवापि दुरुद्गीतमनुसमाहरतीत्यनुसमाहरतीति"। तस्य परोवरीयस्त्वेनोपासनं तत्रोक्तं यथा

"त्रयो ह वा उद्गीथे कुशला बभूवुः शिलकः शालावत्यश्चैकितायनो दाल्भ्यः प्रवाहणो जैवलिरिति ते ह वा ऊचुरुद्गीथे वै कुशलाः स्मो हन्तोद्गीथे कथां वदाम इति। तथेति समुपविविशुः स ह प्रवाहणो जैवलिरुवाच भगवन्तावग्रे वदतां ब्राह्मणयोर्वदतोर्वाचं श्रोष्यामीति। स ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच हन्त त्वा पृच्छानीति पृच्छेति होवाच। का साम्नो गतिरिति स्वर इति होवाच स्वरस्य का गतिरिति प्राण इति होवाच प्राणस्य का गतिरित्यन्नमिति होवाचान्नस्य का गतिरित्याप इति होवाच। अपां का गतिरित्यसौ लोक इति होवाच अमुष्य लोकस्य का गतिरिति न स्वर्गं लोक-

मतिनयेदिति होवाच स्वर्गं वयं लोकं सामाभिसंस्थापयामः स्वर्गसंस्तावं हि सामेति । तं ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाचाप्रतिष्ठितं वै किल ते दाल्भ्य ! साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति । हन्ताहमेतद्भगवतो वेदानीति विद्धीति होवाच । अस्य लोकस्य का गतिरित्ययं लोक इति होवाच अस्य लोकस्य का गतिरिति न प्रतिष्ठां लोकमतिनयेदिति होवाच प्रतिष्ठां वयं लोकं सामाभिसंस्थापयामः प्रतिष्ठासंस्तावं हि सामेति । तं ह प्रवाहणो जैवलिरुवाचालवत्त्वै किल ते शालवत्य ! साम, यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतेष्यतीति मूर्धा ते विपतेदिति हन्ताहमेतद्भगवतो वेदानीति विद्धीति होवाच । अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम् । स एष परो वरीयानुद्गीथः स एषोऽनन्तः परोवरीयो ह्यस्य भवति परोवरीयसोह लोकान् जयति य एतदेवं विद्वान् परोवरीयां समुद्गीथमुपास्ते । तं हैतमतिधन्वा यौनक उदरशाण्डिल्यायोक्त्वोवाच यावत्त एनं प्रजायामुद्गीथं वेदिष्यन्ते परोवरीयो हैभ्यसावदस्मिँल्लोके जीवनं भविष्यति । तथामुष्मिँल्लोके लोक इति स य एतमेवंविदानुपास्ते परोवरीय एव हास्यासौ लोके जीवनं भवति तथाऽमुष्मिँल्लोके लोक इति लोके लोक इति" उद्गीथस्य देवताऽपि तल्लोक्या "अथ हैनमुद्गातोपससादोद्गातः या देवतोद्गीथमन्वायत्ता ताञ्चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीति सा भगवानवोचत् कतमा सा देवतेति । आदित्य इति होवाच सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैः सन्तं गायन्ति सैषा देवतोद्गीथमन्वायत्ता ताञ्चेदविद्वानुदगास्यो मूर्धा ते व्यपतिष्यदयोक्तस्य भवेति"। अत्राकाशादित्यशब्दौ ब्रह्मपरौ आकाशस्तल्लिङ्गादित्यादि" भा०क्ष०भा०व्यवस्थापितम् ।

उद्गीर्ण त्रि० उद्+गॄ-क्त । १उद्गते २उद्गमिते । "प्रणमादर्द्धियामेतदनुद्गीर्णहरायुधम्" कुमा० "बलय कलिमोद्गृह्णन्नुद्गीर्णेतोयम्" मेघ० । [गुडाग्रकृभिः" स्मृतिः

उद्गूर्ण त्रि० उद्+गुरो-क्त । उद्यते उत्तोलिते "उद्गूर्णेव

उद्ग्रथित त्रि० उद्+ग्रन्थ-क्त । उत्तोल्य ग्रथिते

उद्गन्ध त्रि० उद्गतोपन्यात् निरा०स० । १उन्मुक्ते २वन्यलोन्मुक्ते । उद्+गन्ध-घञ् । २उन्मोचने पु० ।

उद्ग्रभण न० उद्+ग्रह-ल्युट् वेदे हस्य वा भः । १उद्धृत्यग्रहणे २ऊर्द्धं विस्रंसे दाने च "प्रतिमन्त्रञ्चोद्ग्रभणं तक्षिं तक्षिन्" काल्या०१६,५,११, अत्याभावे उद्ग्रहणमप्यत्र । "तक्षोद्ग्रहणावेव स्यात्" शत०ब्रा० १४,५,४,१२

उद्ग्राभ पु० उद्+ग्रह-घञ् वा वेदे हस्य भः । १उद्धृत्य ग्रहणे २ऊर्द्धं विस्रंसादाने च । "बाजस्य साप्रसव उद्ग्राभेणोद्ग्रभीत्" यजु०१७,६२, "उद्ग्राभेण ऊर्द्धं विस्रंसा दीयते इदग्रभणम् दानम्" वेददी० । अत्याभावे उद्ग्राहोऽप्युक्तार्थे २वादभेदे च । उद्ग्राहमङ्गः ।

उद्ग्राहिणी स्त्री उद्+ग्रह-णिनि ङीप् । पाशाक्षरज्जौ स्वार्थे कन् अतइत्त्वम् । उद्ग्राहिकाशब्द ।

उद्ग्राहित त्रि० उद्+ग्रह-णिच्-क्त । १उपन्यस्ते, २बद्धे, ३उदीर्णे, ४प्रत्याहिते, ५प्राहिते च मेदि० ।

उद्ग्र पु० उद्+ग्रह-अप् नि० । १हस्तघृते, २बन्धौ, ३देहवायौ, ४प्रशंसायां ५प्रशस्ते च "पित्रायाद्भिगुरुश्रोषधृत्युद्ग्रान् संबन्धमागताम्" भट्टिः । अस्य च प्रशंसावचनतया जातिवाचकेन "प्रशंसावचनैश्च" पा० समासे जातिवाचकस्य पूर्वनिपाते गवोद्गः अजोद्ग इत्यादि "उद्ग्रादयश्च नियतलिङ्गा न तु विशेष्यलिङ्गाः" सि० कौ० ।

उद्ग्रहण न० उद्+ग्रह-ल्युट् । उद्धर्षणेन चालने । युच् । उद्ग्रहणापि तत्रैवार्थे स्त्री । "तत्रावश्यं बलयकलिमोद्ग्रहणोद्गीर्णतोयम्" मेघ० ।

उद्घन पु० ऊर्द्धं निवेश्य हन्यतेऽत्र उद्+हन-आधारे अप् नि० । काष्ठादितक्षणसाधनेऽधःस्थकाष्ठादौ यदुपरि निधाय काष्ठादिकं हन्यते तत्र । "लौहोद्घनघनक्षुण्णा सन्तिताघनां स्त्रियम्" भट्टिः ।

उद्घर्षण न० उद्+घृष-ल्युट् । दृषत्कादिकठिनादि द्रव्यैः गात्रादिमार्ज्जने । "उद्घर्षणं तु विज्ञेयं कण्डूकोटमलापहम्" सुश्रु० "सिरामुखविविक्तत्वं त्वक्स्थस्थानेच तेजनम् । उद्घर्षणोत्सादनाभ्यां लाघवायातमस्यम्" सुश्रु० । घञ् उद्घर्षोऽप्यत्र पु० ।

उद्घस न० उद्+घस कर्म्मणि अच् । मांसे हारा० ।

उद्घाट पु० उद्घाट्यते प्रच्छादितवस्तु दर्शनार्थमत्र उद्+घट-णिच्-आधारे अच् । प्रच्छादितस्य पण्यादिद्रव्यस्य दर्शनार्थोद्घाटनाधारे राजस्थापिते रक्षभेदे (चौकीघर)

उद्घाटक पुंन० उद्+घट-णिच्-ण्वुल् । कूपात् जलोद्धारणार्थे (अरघट्ट) (घुरना) इति ख्याते यन्त्रभेदे । उद्घाटनकारिणि त्रि० णिनि तत्रैव स्त्रियां ङीप् । "उद्

घाटिनी कुड्किका" प्रसन्नरा० करणे ल्युट्। उद्घाटन तत्साधने न०। भावे ल्युट्। उद्घाटन प्रतिबन्धनिरासे, कृतबन्धस्य बन्धापकरणे च न० (खोला)।

उद्घाटित त्रि० उद्+घट-णिच्-क्त। १अपाकृते आच्छादनरहिते प्रकाशिते आवरणरहिते कृतोद्घाटने।

उद्घाटितज्ञ पु० उद्घाटितं प्रकाशितं यथा तथा जानाति ज्ञा-क। विज्ञे।

उद्घात पु० उद्+हन-घञ्। (ठोकरलागा) १प्रतिघाते। "यथावदुद्घातसुखेन मार्गम्" रघुः। "यथावदुद्घातसुखेन सोऽध्वना" माघः। "उद्घातिनी भूमिरिति रश्मिसंयमनात्" भक्त०। "प्राणेन प्रेर्यमाणेन अपानः पीड्यते यदि। गत्वा चोर्द्धं निवर्त्तेत एतदुद्घातलक्षणम्" इत्युक्ते २प्राणवायुनाऽपानाभिघाते। नाभिमूलात् प्रेरितस्य वायोर्विरिच्यमानस्य शिरसाभिहननमुद्घात इत्युच्यते। ३आरम्भे "उद्घातः प्रणवोयासाम्" कुमा० "आकुमारकमोद्घातं शालिगोप्यो जगुर्यशः" रघुः। ४उत्सङ्गे ५मन्दरे ६शास्त्रपरिच्छेदे।

उद्घुषित त्रि० उद्+घुष-रवे क्त। १कृतोद्घोषे २प्रकटिताभिप्राये वाक्ये न० अमरः। उद्घुष्ट तु उद्घुष्ट। उद्घुष्टे मेदि०।

उद्घोष पु० उद्+घुष-घञ्। उच्चशब्दकरणे "दोषोद्घोष भ्रूविभेदावज्ञाक्रोधेङ्गितादिकृत्" सा०द०।

उद्दंश पु० उद्दशति उद्+दन्श-अच्। मत्कुणदंशके (उकुण) कीटभेदे।

उद्दण्ड त्रि० दण्डोद्यमनम् नियमनम् उत्क्रान्तोदण्डम् अत्या०स०। १प्रचण्डे। उन्नतो दण्डो यस्य। २उन्नतदण्डयुक्ते त्रि० "उद्दण्डपद्मं सरसीव शारदम्" रघु०। "उद्दण्डधवलच्छत्रः" क्षितो०। मा०स०। ३उन्नतदण्डे पु०

उद्दण्डपाल पु० उन्नतदण्ड उद्दण्डः सन्नेव पाल्यते पालकर्मणि घञ्। उन्नतदण्डाकारे १सर्पभेदे २मत्स्यभेदे च मेदि०

उद्दन्तुर त्रि० उत्सङ्गे। १उन्नते २उच्चदन्तान्विते च।

उद्दान न० उद्+दो-भावे ल्युट्। १बन्धने अमरः "उद्दाने क्रियमाणे तु मत्स्यानां तत्र रज्जुभिः" भा०आ०१३७अ० २उद्यमे ३चूल्यां ४वाडवानले ५मध्ये ६लग्ने च पु०विश्वः

उद्दान्त त्रि० उद्+दम-क्त। अतिदमिते।

उद्दाम त्रि०उद्गतं दाम्नः अच्समा०। १बन्धनरहिते, "गन्धद्विपमुद्दामो वने मत्त इव द्विपः" भा०व०१४६अ०। अप्रतिनियमे २स्वतन्त्रे ३अत्युग्रे च। "उद्दामानि प्रथयति शिखावेश्मभिर्यौवनानि" मेघ० "नद्याकाश गङ्गाया स्रोतस्युद्दामदिग्गजैः" रघुः उत्कृष्टं श्रेष्ठं दाम पाशाख्यमस्त्रं यस्य। ४वरुणे पु० ५गम्भीरे त्रि० "उद्दामभावपिशुनामलवद्गुहाखिलादि" भाग०१स्क०। ६दण्डकभेदे छन्दोभेदे पु० "यदि न युगलं ततः सप्तरेफात्सदा दण्डवृत्तिप्रयातो भवेद्दण्डकः। प्रतिचरणविवृद्धरेफाःस्फुरत्सौख्य व्यालजीमूतलीलाकरोद्दामगद्गादयः" इति वृत्तर०।

उद्दाल पु० उद्+दल+णिच्-अच्। १वङ्गवारकवृक्षे, २वनकोद्रवे "भोज्याः प्रराण्यश्यामाकोद्दालशालयः" सुश्रु०

उद्दालक पु० उद्दलयति भूमिमुद्भिनत्ति+उद्+दल-णिच्-ण्वुल्। १वनकोद्रवे उत्पन्ने तु शिलाजत्वित्यादावुपक्रम्य "भद्रकोरदूषकश्यामाकोद्दालकादीनां विरूक्षणच्छेदनीयानाञ्च द्रव्याणां विधिवदुपयोगः" "अथ सर्वेषां प्राणिनामयमाहारार्थं वर्ग उपदिश्यते। तद्यथा रक्तशालिषष्टिकगवेधुकनीवारकोद्रवोद्दालकश्यामाकगोधूमवेणुयवादयः" इति च सुश्रुतः। आयोदधौम्यशिष्ये आरुणौ २ऋषिभेदे। तस्य तन्नामकत्वप्राप्तिः भा० आ० ३अ० उक्ता "यथा एतस्मिन्नन्तरे कस्मिंश्चिदृषौ धौम्यस्यास्य शिष्यास्त्रयो बभूवुः उपमन्युरारुणिर्वेदश्चेति। स एकं शिष्यमारुणिं पाञ्चाल्यं प्रेषयामास गच्छ केदारखण्डं बधानेति। स उपाध्यायेन संदिष्ट आरुणिः पाञ्चाल्यस्तत्र गत्वा तत् केदारखण्डं बद्धुं नाशकत्। स तत्र क्लिश्यमानोऽपश्यदुपायं भवत्वेवं करिष्यामीति। स तत्र संविवेश। केदारखण्डे गयाने च तथा तस्मिंस्तदुदकं तस्थौ। ततः कदाचिदुपाध्याय आयोदो धौम्यः शिष्यानपृच्छत् क्व आरुणिः पाञ्चाल्यो गत? इति। ते तं प्रत्यूचुर्भगन्! प्रेषितो गच्छ केदारखण्डं बधानेति। स एवमुक्तस्तान् शिष्यान् प्रत्युवाच तस्मात् तत्र सर्वे गच्छामो यत्र स गत इति। स तत्र गत्वा तस्याह्वानाय शब्दमकार। भो आरुणे! पाञ्चाल्य क्वासि वत्स! एहीति। स तत्स्वरमारुणिरुपाध्यायवाक्यं तस्मात् केदारखण्डात् सहसा उत्थाय तदुपाध्यायसमीपस्थे। प्रोवाच चैनमयमस्मात्र केदारखण्डे निःसरमाणमुदकमवारणीयं संरोद्धुं संविष्टो भगवच्छब्दं श्रुत्वैव सहसा विदार्य्य केदारखण्डं भवन्तमुपस्थितः। तदभिवादये भगवन्मामात्मजं भवान् कमर्थं करवाणीति। स एवमुक्त उपाध्यायः प्रत्युवाच यस्मात् भवान् केदारखण्डं विदार्योत्थितः तस्मादुद्दालक एव

नाम्ना भवान् भविष्यतीति उपाध्यायेनानुगृहीतः"। "उद्दालकोद्दारुणिः श्वेतकेतुं पुत्रमुवाच" छा०उ० "उद्दालकाद्युद्दालकोऽरुणादरुणः" इति ह०उ०।

उद्दालकपुष्पभञ्जिका स्त्री० उद्दालकानां पुष्पाणि भज्यन्ते यत्र क्रीड़ायाम् खुञ्। क्रीड़ाविशेषे यत्र उद्दालकपुष्पभञ्जनं क्रियते तस्यां क्रीड़ायाम्।

उद्दालकव्रत न०उद्दालकं पापनाशकं व्रतम्। पतितसावित्रीकस्य कार्य्ये वशिष्ठोक्ते व्रतभेदे "पतितसावित्रीक उद्दालकव्रतं चरेत्। द्वौ मासौ यावत्तेन वर्त्तयेन्मासं माक्षिकेणाष्टरात्रं घृतेन षड्रात्रमयाचितं त्रिरात्रमभक्तोऽहोरात्रमुपवसेत् इति"वशिष्ठः। मिता०या०वि० उद्दालव्रतमित्येव पाठः संक्षिप्तग्रन्थे उद्दालकेति पाठः प्रामादिकः।

उद्दालकायन पु० उद्दालकस्य गोत्रापत्यं फक्। ऋषिभेदे श्वेतकेतौ। तस्य तत्पुत्रत्वमुद्दालकशब्दे उक्तम्।

उद्दालवत् पु० उद्दालो मूलेदारभेदः प्रकाशस्थानतया विद्यतेऽस्य मतुप्। उद्दालके ऋषौ। "यस्मान् ऋषिरुद्दालवान् धानान्नवान्" शत०ब्रा० ११।२३,९।

उद्दास पु०उद्+दास-घञ्। उत्पीड़ने ततः बला०अस्त्यर्थे मतुप् इरित्वं। उद्दासवत् उद्दासिन् तद्वति त्रि० स्त्रियां ङीप्।

उद्दित त्रि० उद्+दो-क्त। बद्धे भरतः

उद्दिष्ट त्रि०उद्+दिश-क्त। १उपदिष्टे, २अभिलषिते "तत्समुद्दिष्टं कर्म" संक्षिप्तसारः छन्दःशास्त्रोक्ते निर्द्धारितगुर्व्वादिस्थितिकभेदस्य प्रस्तारे कतसंख्यकत्वज्ञानार्थे ३उपायभेदे न०। तत्प्रकारो यथा "उद्दिष्टं द्विगुणानाद्यादुपर्य्यङ्कान् समालिखेत्। लघुस्था ये तु तत्राङ्कास्तैः सैकैर्मिश्रितैर्भवेत्" इत्तर०। आद्यात् आद्यवर्णमारभ्य उपरि यथोत्तरं द्विगुणान् द्विगुणान् अङ्कान् समालिखेत् तत्र लघुवर्णोपरिस्थाङ्कैर्मिश्रितैः एकेन युक्तैः उद्दिष्टं स्यात्। यथा त्र्यक्षरप्रस्तारे मध्यगुरुको भेदः प्रस्तारे कियत्संख्यक इति प्रश्ने यथोत्तरं द्विगुणान् द्विगुणान् अक्षरसंख्यया अङ्कान् दद्यात् तत्र आद्यलघूपरिस्थेनैकाङ्केन तृतीय लघूपरिस्थचतुरङ्केन योगे पञ्चाङ्कः एकेन युक्तः षडङ्कः संपद्यते एवञ्च षष्ठोऽयं भेदस्त्र्यक्षरस्योत्तरम्। एवमन्यत्र कल्प्यम्। सर्वगुरुकभेदे तु लघुवर्णाभावात् योजकाङ्काभावेन एकमात्रेण योज्याङ्केन प्रथमोभेद एवोद्देश्यः। मात्राछन्दसि उद्दिष्टं विस्तरभयान्नोक्तप्रकारे दृश्यम्।

उद्दीपक त्रि० उद्+दीप-णिच्-ण्वुल्। उद्भासके प्रकाशके।

उद्दीपन न० उद्+दीप-णिच्-ल्युट्। १प्रकाशने, २उत्तेजने च। स्मृ। अलङ्कारोक्ते रसाद्युद्दीपके "उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये" "रत्याद्युद्बोधकालोके विभावाः काव्यनाट्ययोः। आलम्बनोद्दीपनाख्यौ तस्य भेदा बुधौ स्मृतौ" आलम्बनस्य चेष्टाद्या देशकालादयस्तथा" सा०द०। उक्ते आलम्बनस्य चेष्टादौ विभावे यथा शृङ्गारे रसे "चन्द्रचन्दनरोलम्बस्तद्याद्युद्दीपनं मतम्" हासे "विकृताकारवाक्चेष्टं यदालोक्य हसेज्जनः। तदालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम्"। करुणे "गोऽकोऽत्र स्थायिभावः स्याच्छोच्यमालम्बनं मतम्। तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः"। वीरे "आलम्बनविभावास्तु विजेतव्यादयोमताः। विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः"। भयानके "यस्माद्युत्पद्यते भीतिस्तदालम्बनं मतम्। चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः"। जुगुप्सायाम् "दुर्गन्धमांसपिशितमेदांस्यालम्बनं मतम्। तत्रैव कृमिपाताद्यमुद्दीपनमुदाहृतम्"। अद्भुते "पीतवर्णो, वस्तु लोकातिगमालम्बनं मतम्। गुणानां तस्य महिमा भवेदुद्दीपनं पुनः"। शान्ते "परमात्मस्वरूपं वा तस्यालम्बनमिष्यते। पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः। महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः" सा०द०।

उद्दीप्त त्रि० उद्+दीप-क्त। प्रकाशान्विते।

उद्दीप्र पु० उद्+दीप्-रन्। १गुग्गुलौ वाच २उद्दीप्ते त्रि०।

उद्दृप्त त्रि० उद+दृप-क्त। उद्धते गर्व्वान्विते

उद्देश पु० उद्+दिश+घञ्। १अनुसन्धाने, २अन्वेषणे, ३अभिलाषे ४उपदेशे च। आधारे घञ्।५उपदेशदेशे "यद्योद्देशं संज्ञापरिभाषम्" व्या०परिभाषा। व्याख्यातैषा नागेशेन "उद्देशमनतिक्रम्य यद्योद्देशम्। उद्देश उपदेशदेशः। अधिकरणसाधनत्वायम्। यत्र देशे उपदिश्यते तद्देश एव वाक्यार्थबोधेन गृहीतसत्तया गृहीतपरिभाषार्थेन च सर्वत्र शास्त्रे व्यवहारः। देशोच्चारणकाल एवात्र शास्त्रे व्यवह्रियते। तत्तद्वाक्यार्थबोधे जाते भविष्यति किञ्चिदनेन प्रयोजनमिति ज्ञानमात्रेण सन्तुष्यद्यद्वाक्यप्रतिपत्त्यपेक्षोऽयम्" इति "उदित्"पा०१,१,११ सूत्रे कैयटः। केचित्तु परिभाषाविषये "तस्मिन्"पा०१,१,६६ इत्यादिवाक्यार्थबोधे भ्रमप्रमोनिर्देशादिकेति पर्य्यालोचनायां सकलतद्विषयोपस्थितौ सकलतत्संस्काराय गुणभेदं परिकल्प्य वाक्यतत्त्वैव नियमः। कार्य्यकालपक्षे तु त्रिपाद्यामधुपस्थितिरिति विशेषः। एतदेवाभिप्रेत्य "अधिकारो नाम त्रिप्रकारः क्वचिदेकदेशस्थः सर्वशास्त्रमभिव्याप्नोति यथा प्र-

दीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयतीति" "यत्री स्याने" [१,१,४८ इति पा० सूत्रे भाष्य उक्तम् । अधिकारशब्देन पारार्थ्यात् परिभाषाप्युच्यते ।"कचित्परिभाषारूप" इति कैयटः । दीपो यथा प्रभाद्वारा सर्वस्टहप्रकाशक एवमेतत्सबुद्धिजननद्वारा सर्वशास्त्रोपकारकमिति तत्तात्पर्यम् । एतच्च पक्षद्वयसाधारणं भाष्यं, पक्षद्वयेऽपि प्रदेशैकवाक्यतायां इतः प्रतीतेः । तत्रैतावान्विशेषः । यद्योद्देशे परिभाषादेशे सर्वविधिसङ्कोचप्रसङ्गात्तभेदं परिकल्प्य तैरेकवाक्यतापरिभाषणम् । तदुक्तं "कृञ्चि च" १,१,५ पा० इति सूत्रे कैयटेन । "यद्योद्देशे प्रधानान्यात्मसंस्काराय संनिधीयमानानि गुणभेदं प्रयुञ्जत इति" । कार्यकाले तु तत्तद्विधिप्रदेशे परिभाषाबुद्धिरिति । अत्रैकदेशस्य इत्यनेन तत्र तत्र तत्तद्बुद्धावपि तत्तद्देशस्थत्वं वारयति यथा व्यवहर्तृणां कार्यार्थमनेकदेशगमनेऽपि न तत्तद्देशीयत्वव्यवहारः किं त्वभिजनदेशीयत्वव्यवहार एव तद्वत् ।

ईसंक्षेपे "एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरोमया" गीता "समासकथनमुद्देशः इति सुश्रुतोक्ते ऽतन्त्राधिकरणभेदे । उत्कटोद्देशः प्रा० स० । ऽउत्कटदेशे च "नवने नन्दनोद्देशे न चैत्ररथसंश्रये" रामा० ।"अस्ति कश्चिद्वनोद्देशे" हितो० भूरिप्रयोगः ततस्तसिल् । उद्देशादिलाद्यर्थे अव्य० ।

उद्देशक पु० उद्+दिश-ण्वुल् । १उपदेशके २उदाहरणवाक्ये च । "अत्रोद्देशक इति" लीला० भूरिप्रयोगः । २प्रच्छके "उद्देशकालापवदिष्टराशिः" लीला० इष्टकर्म शब्दे ६६१पृ० दृश्यम् । "उद्देशेन पूजाभिसन्धिना रोपितः कनु । पूजाद्यभिसन्धिना रोपिते वृक्षादौ "चैत्यमायतने बहुविप्रोद्देशकवृक्षयोः" त्रिका० इति केचित् उद्देशशब्देन बहुव्रीहौ कप् इति तु न्याय्यम् ।

उद्देश्य त्रि० उद्+दिश-यत् । १अभिसन्धेये यमुद्दिश्य विधेयप्रवृत्तिस्तस्मिन् २अनुवाद्ये । उद्देश्यविधेयभावस्थले "अनुवाद्यमनूद्यैव न विधेयमुदीरयेत्" इति नियमात् उद्देश्यवाचकस्य प्राक् प्रयोगः यथा पर्वतो वह्निमान् । वह्निः पर्वते इत्यादौ तु वह्नेरेवोद्देश्यत्वं पर्वतवृत्तित्वं तत्र विधेयम् । अतएव "न्यक्कारोह्ययमेव मे यदरयः" इत्यादौ अयंपदस्य उद्देश्यवाचितयादौ प्रयोगौचित्येन परतः प्रयोगात् वाक्यगतविधेयाविमर्षदोष इति समर्थितमाभट्टादिभिः । "इद्वृदादेच् इति" पा० सूत्रेऽपि तथैव भाष्यकृताङ्गीकृत्य सङ्कर्षणमेव तथाप्रयोग इत्युक्तम् यथा "एतदेकमाचार्यस्य सङ्कर्षणं स्मर्यताम् । आङ्गिक आचार्योमहतः शास्त्रौघस्य सङ्कर्षणं इन्निग्रहादितः प्रयुङ्क्ते । सङ्कर्षणादीनि च शास्त्राणि प्रथमे वीरपुरुषकाणि भवन्त्यायुष्मत्पुरुषाणि च अध्येतारश्च इन्द्रियुक्ता यथा स्युरिति । सर्वत्रैव हि व्याकरणे पूर्वोच्चरितः संज्ञी परोच्चारितः संज्ञेति "अदेङ् गुणः" इति यत्नेन । उद्देश्यविधेयभावेनान्वयस्थले विवक्षया उभयलिङ्गवचनानुसारेण प्रयोगः यथा वेदाः प्रमाणं भवति भवन्ति वा ।"अमानि तस्य निलयस्योडुपं हिमालयद्राक्षिकराः शिरःस्थिताः" "मुखदोष्णरोपि मनोभुवा तदुपमाः कुसुमान्यखिलाः शराः" इति नैषधे उभयथैव प्रयोगः । व्युत्पत्तिवादे तु गदाधरेण उद्देश्यवचनानुसारेणैव वचनादिप्रयोग इति सङ्गतायासेन व्यवस्थापितं तच्च तत एवावसेयम् । "उद्देश्यप्रतिनिर्देश्यातिरिक्तविधेयत्वात्"सा० द० । उद्देश्यमेव प्रतिनिर्दिश्यम् प्राग् विधेयस्योद्देश्यतया पुनर्निर्देशकर्म इत्यर्थः यथा "उदेति सविता ताम्रस्ताम्र एवास्तमेति च" इत्युदाहृतौ प्राग् विधेयस्य ताम्रस्य अस्ततायुत्तरविधानार्थं पुनः प्रतिनिर्देशात् कथितपदत्वं न दोषावेति तदाशयः । तदन्यत्रैव तस्य दोष इति बोध्यम् ।

अनुवाद्यता च प्रमाणान्तरसिद्धस्य किञ्चिद्धर्मविधानार्थम् पुनरुपन्यास्यता यथा पर्वतोवह्निमान् इत्यादौ पर्वतरूपोद्देश्यस्य सिद्धत्वेऽपि वह्निमत्त्वरूपधर्मविधानार्थमुपन्यासः । ततो भावे तल् । उद्देश्यता स्त्री त्व । उद्देश्यत्व न० । विषयतासामान्ये सा च अनुमितौ शाब्दबोधे च विशेष्यतारूपा प्रवृत्तौ तु स्वजनकेच्छाविषयत्वरूपा "स्वर्गकामो यजेतेत्यादि" वाक्यजनितेष्टसाधनताज्ञानतः स्वर्गफलोद्देश्यकेव यागे प्रवृत्तेः इति स्वर्गस्य तत्रोद्देश्यता एवमन्यत्रापि ऊह्या । इच्छाविषयत्वे च "अवच्छेदावच्छेदेन साध्यसिद्धेरुद्देश्यत्वे" गदा० । [मितिदोषभेदे

उद्देश्यासिद्धि स्त्री दैत० । अनुमितिप्रतिबन्धकासिद्धिरूपे अनुमितिदोषभेदे ।

उद्देहिका स्त्री उद्गतो देहोऽस्य कप् अत इत्त्वम् । कीटभेदे हारा० ।

उद्द्योत पु० उद्+द्युत-घञ् वा दस्योदः । विशिष्टप्रकाशे "त्रिभिर्नेत्रैः कृतोद्द्योतं त्रिभिः स्रग्भिरवोदितैः" भा० अनु० १४ अ० । "निरवद्यविद्योद्द्योतेन द्योतितस्तत्तोऽयमर्थः" दायभा० उद्+द्युत-णिच्-अच् । २किरणावलीव्याख्याने २जगदीशकृते काव्यप्रदीपव्याख्याने

३पङ्क्षाभाष्यप्रदीपव्याख्याने च ग्रन्थे पु० ५उद्द्योतके त्रि०

उद्द्राव पु० उद्-द्रु-घञ्। १पलायने अमरः। उत्कटो द्रावोयस्य प्रा०ब०। २उत्कटगतियुक्ते। "यते स्वाङ्गा धावते स्वाङ्गोद्द्रावाय स्वाङ्गोद्द्रुताय स्वाङ्गा" यजु०२२,८, "उद् कधिकोद्द्रावोयस्य सउद्द्रावः" वेददी०। "उदि श्रयतियौति प्रुद्रुवः" पा०उत्पूर्व्वकादेव घञ् विधानात् केवलात्तु "ऋदोरप्" पा० अबेव। तेन तथाविधकल्पनं निर्मूलमेव। तत्र संज्ञायां कर्त्तरि घञ् इत्येवोचितम्।

उद्धत पु० उद्+हन-क्त। १राजमल्ले। २वाक्यादिदण्डके, ३अविनीते, ४प्रगल्भे ५उद्यते च त्रि०। "परिगतोज्झनदुद्धतवारुधिः" भट्टिः "मदोद्धताः प्रत्यनिलं विचेरुः" कुमा० "सहजचापलदोषसमुद्धतः" "जनावरुद्धोद्धतमिभ्यु रंहसाम्" प्रचुरोद्धतध्वजविलम्बिवाससः "अथानुद्धतसद्भवः" माघः। ५क्षतोक्षेखने च। "उत्तरत आहवनीयस्योद्धतावोक्षिते सिक्तोपकोर्षे परिदृते प्राग्द्वारे पिण्डं निदधात्योषधय इति" कात्या०१६,२,१४, "परिदृते उद्धते क्षतोक्षेखने अवोक्षिते सिक्ते" यजु०११,३७मन्त्रे वेददी०। ततो भावे ष्यञ्। औद्धत्य न०। तल्। उद्धतता स्त्री, त्व, उद्धतत्व न०, तद्भावे चाङ्क्षाद्यादौ।

उद्धतमनस्कत्व न०उद्धतं मनोयस्य कप् तस्य भावः त्व। अभिमाने गर्वे शब्दचन्द्रिका।

उद्धति स्त्री उद्+हन-गतौ-क्तिन्। १उद्धतौ २उद्यतौ। हन-आघाते क्तिन्। ३पाषाणादिनाऽऽघातैं(ठोकरलागा)"अभूतलस्पर्शितया निरुद्धतिस्रावतीर्थोऽपि न लक्ष्यते रयः" भट्ट०। [रेभिः" भट्टिः।

उद्धम त्रि०उद्+धमा-ड धमादेशः। क्षतशब्दे "ध्वनीनासुद्धमं

उद्धमचूड़ा स्त्री उद्धम-चूड़े! इत्युच्यते यस्यां क्रियायाम् भरयू०स०। चूड़ां प्रति उद्धमानार्थनिदेशक्रियायाम्। एवं उद्धरचूड़ा उद्धमविधमा अपि भरयू० स०। तत्तत्क्रियार्थं निदेशक्रियायाम्। [र्भशम्" भट्टिः।

उद्धय त्रि०उद्+धेट-अ। उद्धूल पानकर्त्तरि। "मधूनासुद्धयं

उद्धरण न० उद्+हृ-भावे-ल्युट्। १ सक्थौ, २वमने, ३क्षणगुडौ, ४उन्मूलने ५उत्तारणे। "दिनानि दीनोद्धरणोचितस्य"रघुः। "तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यम्" वायुपु०। "कण्टकोद्धरणे नित्यमातिष्ठेत् यत्नमुत्तमम्" मनुः। ६उत्थापने। "प्रतिकर्मोद्धरणसंप्रयुक्ते" कात्या० १,१,२६, "आहवनीयदक्षिणाग्न्योर्गार्हपत्यादुद्धरणं कर्त्तव्यम्"कर्कः। ७उद्धृत्य हरणे परिवेषणे च। "सव्येन वोद्धरणं सामर्थ्यात्"कात्या०४,१,१०, "उद्धरणं परिवेषणम्" कर्कः। ८वह्निनिष्कासने। "दिवैव प्रदहनोद्धरणे" कात्या० ०१६,४, उद्धरणं वह्निनिष्कासनम्" कर्कः। ९उत्पादने। "आहवनीयजागरणे तत एवोद्धरणम्" कात्या० २५, १,५, "तत्र आहवनीयोद्धरणम्" कर्कः। आग्नेयोद्धारशब्दे तत्प्रकारः ६१२ पृ० उक्तः। कर्मणि ल्युट्। १०वाग्नेयादौ।

उद्धरणीय त्रि०उद्+हृ-कर्मणि अनीयर्। १उन्मूलनीये २उत्तापनीये ३आहरणीये च। तत्र उद्धर्त्तव्योऽत्रेत्र त्रि०।

उद्धरावसृजा स्त्री उद्धर अवसृज इत्युच्यते यस्यां क्रियायाम् भरयू०स०। उद्धरणावसर्जनार्थनिदेशक्रियायाम्।

उद्धर्त्तृ त्रि०उत्+हृ-तृच् स्त्रियां ङीप्। १उद्धारकारके २उन्मूलके ३तारणकारके च। "विशोतभर्त्तुस्तु पथि चौरोद्धर्त्तुरीतके"या०स्मृ० स्त्रियां ङीप्। स्वसृ। उद्धारक उन्मूलके त्रि०

उद्धर्ष पु०उत्कृष्ट उद्भूतोवा हर्षः मा०स०। १उत्कृष्टे २हर्षे उद्भूतहर्षे च। उद्भूतोहर्षं यस्य प्रा०ब०। ३जातहर्षे त्रि० "उद्धर्षय मघवन्नायुधानि" यजु०७।४२ "उद्धर्षय उद्भूतहर्षयुक्तं कुरु" वेददी० नामधातुरूपम्। तत्र हेतुरिजन्तरूपमिवेव न्याय्यम्।

उद्धर्षण न० उद्+हृष-णिच-ल्युट्। १हर्षयुक्तकरणे २प्रोत्साहने च "हितसद्धर्षणं चैव उवाच प्रथितं वचः"रामा० "एवमेतन्महाबाहो! यथा वदसि पार्थिव!। कृतमुद्धर्षणं पूर्वम्" इत्यादिषु भा० आश्व० १७ अ० बहुत्वप्रयोगः। आधारे ल्युट्। २रोमाञ्चे हेम०।

उद्धर्षिन् त्रि०उद्+हृष-णिच्-णिनि। उद्धर्षकारके स्त्रियां ङीप्। सा च वसन्ततिलकाख्ये वर्णवृत्तभेदे। "उक्तावसन्ततिलका तभजा जगोगः। सिंहोन्नतेयमुदिता मुनिकश्यपेन। उद्धर्षिणीयमुदिता मुनिसैतवेन" वृ०र०।

उद्धव पु०उद्+हु-आधारे अप्। १यज्ञाग्नौ,२उल्वे अमरः। ३कृष्णदयिते यादवविशेषे च। उद्धवस्य यादवविशेषः। हरिवंशवर्णने। "उद्धवो देवभागस्य, महाभाग! सुतोऽभवत्। पञ्चविंशानां पुरं प्राप्तदेवश्रवसमुद्धवम्" हरिवं० ३५अ०। "भारतीमाहितभरामथानुद्धतमुद्धवः" माघः। भाग०११स्क० एनं प्रश्नेव भगवतोज्ञानोपदेशो वर्णितः स एव उद्धवसंवादत्वेन प्रसिद्धः पाराशर्ये च पर्व्वदिने तत्पर्य्यालोचनया "यावदुद्धवसंवादं मर्त्योऽज्ञः परिकीर्त्तयेत्" इत्युक्तेः

उद्धवदूत न०उद्धवोदूतोयत्र। दूतत्वेन उद्धवं परिकल्प्य यो-

यक्तिरूपे काव्यभेदे उद्वत्सन्देशोऽपि काव्यभेदे पु० ।

उद्वस्त त्रि० उत्तिप्तौ हस्तौ येन प्रा०व० । उत्क्षिप्तहस्ते उद्वाहौ "उद्वस्तः क्षयपरुषविरप्रलापी दुर्गन्धो मृगमशुचिस्रवाऽतिलोलः । बद्धाशो विजनहिमाम्बुरात्रिसेवी व्याचेष्टन् भ्रमति रुदन् पिशाचजुष्टः" सुश्रु० ।

उद्वान न० उद्वीयतेऽस्मिन्निः धाञ्-आधारे ल्युट् । चूल्ल्याम् । कर्मणि ल्युट् । २वमिते, ३उद्वते च । [२वमिते रमा०

उद्वान्त पु० उद्+धा वा०भ । मदस्रुत्ये हस्तिनि अमरः

उद्वार पु० उद्ह्रियते उद्+हृ भावे-घञ् । १शुक्तौ, २क्षणशुद्धौ ३उद्धारणे । कर्मणि घञ् । सर्वधनादुद्धृत्य व्येऽादिश्योदेये ४अंशभेदे यथा चोद्धारस्तथा मनुना दर्शितः यथा "ज्येष्ठस्य विंशउद्धारः सर्वद्रव्याद्यदुत्तमम् । ततोऽर्धं मध्यमस्य स्यात्तुरीयन्तु यवीयसः ।" "ज्येष्ठश्चैव कनिष्ठश्च संहरेतां यथोदितम् । येऽन्ये ज्येष्ठकनिष्ठाभ्यां तेषां स्यान्मध्यमन्धनम् । सर्वेषान्धनजातानामाददीताग्र्यमग्रजः । यच्च सातिशयं किञ्चिद्दशतश्चाप्युदाहरम् । उद्धारो न दशस्वस्ति सम्भक्तानां स्वकर्मसु । यत्किञ्चिदेव देवेभ्यो ज्यायसे मानवर्द्धनम् । एवं समुद्धृतोद्धारे समानंशान् प्रकल्पयेत् । उद्धारेऽनुद्धृते त्वेषामियं स्यादंशकल्पना ।" अन्योऽपि विशेषः स्मृत्यन्तरे उक्तः किन्तु "तथोद्धारविभागस्तु नैव संप्रति वर्त्तते" मिता० स्मृत्युक्तेः इदानीमुद्धारो नास्तीति सर्वनिबन्धकर्तॄणामेकमत्यात्तदुक्तम् "स्वान्वयव्योग्यपदान्तराक्षेपेण श्रुतपदस्य परित्यागे यथा गां बधान अश्वमानयेत्यादौ आवापोद्धाराभ्यां गोशब्दस्य साक्षादभिधानम्" मा०ट० । अन्वयव्यतिरेकावेवावापोद्धारौ इति तु तत्त्वम् । "जगद्धात्र्यस्यां हरधुनि ! समुद्धारसमयः" गङ्गालहरी । दैवकर्म्मणि च "पथ्यं समुद्धृतोद्धारं विक्रेयं वित्तवर्द्धनम्" मनुः "उद्धृतोद्धारमित्यस्य "वर्जनीयवर्जितम्" कुल्लू० व्याख्या । ७उत्कर्षे च "सगुणानामेव कर्मणामुद्धार उपजने" आश्व०श्रौ० १२,४,१४ "यस्मात् प्रधानकर्म्मणामुद्धारे उपजने उत्कर्षे च सगुणानामेव सर्वस्योद्धरणम्" ना०ट०

उद्धारण न० उद्+हृ+णिच्-ल्युट् । १उत्थापने "लाङ्गलोद्धारणोद्धुरः" भा०व० १४७अ० । हृ-णिच् ल्युट् । २उद्धारसम्पादने ।

उद्धि पु०उद्+धा-कि । जर्द्धारके । "पुरोडाशाः यथा अन्तरिक्षमुद्धिः" शत०८,६,२२, "उद्धारको दशरात्र उद्धिः पुत्राभिधावी पक्षे" शत०ब्रा०१२,२,२,२ ।

उद्धुर त्रि० उद्गता धुरस्मात् प्रा०व० अच् समा० । १निरस्ते २भारशून्ये २दृढे । "प्रसक्तालकचक्रबन्धुरोद्धुरोरः" माघः । "जघनभंसबन्धोद्धुरम्" मालतीमा० । "यत्नवानपि तु श्रीमाञ्छङ्कूलोद्धारधोद्धुरः" भा०व० १४७ अ० । ४ उच्चे च "यथादृढबद्धभुजं पितरमुद्धुरध्वनिमङ्गजनानुयातमानीय" दशकु० ।

उद्भूत त्रि० उद्+भू-क्त । उत्कम्पिते "उद्भूतसङ्घैर्ध्वजिनीभिरंशुभिः" माघः । "पुनानं पवनोद्भूतैः" रघुः । [२उत्कल्पने च ।

उद्भूनन न० उद्+भू-णिच्-नक् भावे ल्युट् । १तत्क्षेपणे

उद्भूपन न० उद्+भूप-आवाभावपक्षे भावे ल्युट् । १द्रव्यविशेषेण जर्द्धसन्तापनरूपे व्यापारे (भावरादेखोवा) "यष्टीलोकपुरीषाणि केशा हस्तिनखास्थतम् । दग्धस्य च रोमाणि योज्यान्युद्भूपनेऽपि च" सुश्रु० । (करणे ल्युट्) २तत्साधने द्रव्ये । "सर्षपाः सर्पनिर्म्मोको वचाकाकादनेऽहतम् । उद्भाजाविगवाश्वैव रोमाण्युद्भूपनं शिशोः । यष्टीलोकपुरीषाणि यवा यवफलो हतम् । सन्ध्ययोरुभयोः कार्य्यमेतदुद्भूपनं शिशोः" सुश्रु० ।

उद्भूलन न० धूलिवदुन्मर्दयति उद्+धूलि-णिच् । उद्भूलयति ततः भावे ल्युट् । १धूलिवन्मर्दने २पाकार्थोपकरणभेदे च । (मशलाचूर्ण) "चूर्णस्योद्भूलनं देयं भोज्ये क्षीरेक्षुसम्भवे । व्यञ्जनेषु च सर्वेषु शाकजेष्वम्लजेषु च । मांसमत्स्यभवेष्वेवं प्रलेहतलनादिषु । आदावेव क्षिपेत् स्नेहे ततोऽर्द्धोदकं क्षिपेत् । वेसवारं सलवणं क्षिप्त्वा तत् पिशितं पचेत् । अर्द्धस्निग्धे क्षिपेत्क्रमच वा दाडिमीरसम् । सिद्धे पाके च दातव्यं चूर्णमुद्भूलनस्य तत्" पाकशास्त्रम् ।

उद्भूषण न० उद्+भूष-ल्युट् । रोमाञ्चे हला०

उद्भृत त्रि०उद्+भृ-क्त । १उत्क्षिप्ते, २भुक्तोज्झिते, ३उत्क्षोभिते, ४पृथक्कृते, ५उच्छेदिते च । "इतीव वाक्यैर्निजवेग दर्पितैः पयोधिरोधस्यमसङ्कृतं रजः" नैष० "उद्भृतासि पिनाकिना" क्षुरिकाङ्कमन्त्रः । "पयोऽनुद्भृतसारञ्च" "मत्स्येष्वुद्भृततल्लजैः" आ०त०पु० "उद्भर्तुमैच्छत् प्रसभोद्भृतारिः" रघुः ।

उद्भृतपाणि त्रि० उत्तरीयात् उद्भृतः बहिष्कृतः पाणिर्येन । उत्तरीयबहिष्कृतहस्ते । स्वाध्याये भोजने चैव दक्षिणं पाणिमुद्धरेत्" मनूक्तकर्म्मण्येव तथा भवनम् ।

उद्भृति स्त्री उद्+भृ-क्तिन् । १उत्क्षेपणे २उत्क्षोभने च । "शल्योद्भृतिर्व्रणस्नानं द्यूतस्त्रीमृगदर्शनम्" सुश्रु० ।

उद्धान न० उद्धमति वह्निरत्र उद्+धा-ल्युट् ।१ चुल्लाम्

उद्धा इ० उज्झ-क्विप् "भिद्योद्धो नदे" पा०नि० । नदभेदे "कूलं भिद्योद्धप्रवाहिभी" भट्टिः "तोयदागमदयोद्धभिद्ययोः" रघुः ।

उद्धन्धक पु० । (धोबा)वर्णसङ्करभेदे । "व्यायोगवेन विप्रायां जातास्वाम्बोपजोविनः । तस्यैव क्षपकन्यायां जातः क्षत्रिय उच्यते । क्षत्रियस्य क्षपायान्तु जाता उद्धन्धकाः स्मृताः। निर्णेजवेयुर्वस्त्राणि वस्त्रोपाश्च भवन्त्यतः" उशना ।

उद्धन्धन न० उद्+बन्ध-भावे ल्युट् । अङ्गतः पाशादिना गलादिबन्धने । "उद्धन्धनस्थता ये च गतिर्येषां न विद्यते । तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्" वायु पु० गयामाहात्म्ये "विषमुद्धन्धनं चैव शस्त्रमग्निप्रवेशनम् । करिष्ये न हि तान्दास्यान् पुनर्द्रष्टुमिहोत्सहे" भा०व० ७अ० । "जलाग्न्युद्धन्धनभृता: प्रव्रज्यानशनच्युताः । विषप्रपतनप्रायादात्मघातच्युताश्च ये । सर्वे ते प्रेतवसिताः सर्वे धर्मबहिष्कृताः । चान्द्रायणेन शुद्धेयुस्तप्तकृच्छ्रद्वयेन वा" प्रा०वि०धृतः । भावे घञ् उद्धन्धोऽप्यत्र पु० ।

उद्धा(द्धा)हु त्रि० उत्तोलितो(वा)बाहुर्येन प्रा०ब० । उत्तोलितबाहौ "प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः रघुः ।

उद्बुद्ध त्रि० उद्+बुध-क्त । १विकसिते न्यायादिमते ज्ञातवस्तुनः संजन्यिज्ञानादिना २लतोद्दीपने संस्कारे च । यथा कृत्तिदर्शनात् अनुभूतकृत्तिपकसंस्कारस्य उद्बोधरूपे उद्दीपने सति कृत्तिपकः स्मर्य्यते इति । ३प्रबुद्धे ४जागरिते च "उद्बुद्धां च जगद्धात्रीं पूजयेद्दीपमालया" तिथ्या०पु० येन येन वस्तुना संस्कार उद्बुध्यते तथा उद्बोधकशब्दे वक्ष्यते । "उद्बुद्धसंस्कारैः स्वैः स्वैर्बहिर्भावं प्रकाशयेत्" सा०द० ।

उद्बोध पु० उद्+बुध घञ् । १किञ्चिद्बोधे न्यायादिमते स्मृतिजनने २संस्कारोद्दीपने च । "उद्बोधादिसहोधः साधारण्याभिधानतः" नन्वत्र कथं रागादिरित्याद्युद्बोधकारणे सीतादिभिः सामाजिकानां रत्याद्युद्बोधः" इति "रत्याद्युद्बोधका लोके विभावाः काव्यनाट्ययोः" इति च सा०द० ।

उद्बोधक त्रि० उद्बोधयति उद्+बुध-णिच्-ण्वुल् । १उद्दीपके २उद्बोधकारके ३तत्कर्त्तरि पु० उदयेन सर्वेषां प्रबोधकत्वात्तस्य तथात्वम् । उद्बोधकानि च न्यायसूत्रवृत्त्योर्दर्शितानि यथा "प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिपक्षाश्रयाश्रितसम्बन्धानन्तर्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्यः" सू० "स्मरणमिदानीमुत्पद्यते निमित्तसदृशदर्शनात्परं स्मृतस्य प्रत्येकभेदेनान्वयः। प्रणिधानं मनसोविषयान्तरसञ्चारस्मारणम् । निबन्ध एकप्रत्ययोपनिबन्धनं यथा प्रमाणेन प्रमेयादिस्मरणम् । अभ्यासः संस्कारबाहुल्यम् एतच्च यद्यपि नोद्बोधकत्वं तथापि तादृशे प्रीप्रसद्बोधकसमवधानं स्मादित्याशयेन तदुपन्यासः । अभ्यासोद्दतसंस्कारः उद्बोधकत्वे नोल्लसतीति केचित् । लिङ्गं व्याप्यं व्यापकस्य स्मारकम् । लक्षणं यथा कपिध्वजादि चूडादेः । सादृश्यं देवदत्तादेः । परिपक्षः शोकादेरस्य सुखाभिलाषोच्छेदः तदेकतरेणान्यतरस्मरणम् । आश्रयाश्रितौ राजादितत्परिजनौ परस्परस्मारकौ । सम्बन्धोगुरुशिष्यभावादिः गोदृष्टन्यायात् पृथगुक्तः । आनन्तर्यं प्रीतिव्यवधानादेः । विरोधो यथा दारादेः । एकार्थार्थनेवाभिप्रेततयः परस्परस्मारकाः । विरोधादहिनकुलादेरन्यतरेणापरस्मरणम् । अतिशयः संस्कारउपनयनादिराचार्यादिस्मारकः । प्राप्तिर्धनादेर्दातारं स्मारयति । व्यवधानमावरणं यथा खड्गादेः कोषादि । सुखदुःखयोरन्यतरेणापरस्य ताभ्यां तत्कारणस्य वा स्मरणम् । इच्छाद्वेषौ यद्विषयकतया गृहीतौ तस्य स्मारकौ । भयं स्मरणादेर्भयहेतोर्वा स्मारकम् । अर्थित्वं दातुः । प्राप्तादेः क्रिया वाक्यादेः, रागाद्रीतेः पुत्रादेः स्मरणं, धर्माधर्माभ्यां जन्मान्तरानुभूतसुखदुःखसाधनयोः प्रागनुभूतसुखादेश्च स्मरणमिति उक्तेषु च किञ्चित्सरूपसत्किञ्चिच्च ज्ञातमुद्बोधकं शिष्यव्युत्पादनाय वाच्यं प्रपञ्चः" ह० ।

उद्भट पु० उद्+भट-करणे-अप् । तरङ्गादेः प्रस्फोटनहेतौ १भूपे, तदाकारत्वात् २कङ्कपे, ३श्वेताश्वे महाश्वे, ४प्रसरे, च "पदेपदे सन्ति भटारथोद्भटाः" नैष० उद्गतो भटात् यस्मात्" निरा०त० । यस्यबहिर्भूते लोकप्रसिद्धे ज्ञातयज्ञे लोके ।

उद्भव पु० उद्+भू-भावे अप् । १उत्पत्तौ । "स्वर्गे चतुर्थे त्वङ्गानां पञ्चमे श्रोत्रियोद्भवः" या०स्मृ० । कर्त्तरि अच् । २उत्पत्तिमति । "दिलीपस्तनुर्मखिराकरोद्भवः" "सोमोद्भवायाः सरितो नसोमः" रघुः । "कुमाराद्ददोषोऽस्मिंस्तेन मध्ये सोमोद्भवायाः सुरनिम्नगायाः" सङ्क्षः । "विष्णुपादोद्भवा गङ्गा" पुरा० "सत्यमालोद्भवत्वात्ते भिन्ना अप्यन्तु भावतः" सा०द० । अपादाने अप् । ३उत्पत्त्यपादाने । "अहमात्मा भूताशयस्थित सर्वस्य भवितापि भूतानामुद्भवश्च भविष्यताम्" गीता । उद्गतो भवात् निरा० स० । ४संसारात्तीते ५विष्णौ पु० । "उद्भवः क्षोभणोदेवः" विष्णुस० "प्रपञ्चोत्पत्त्युपादनकारणत्वात् उद्भवः, उद्गतः संसारादिति वा" भा० उभयथा वाच्यम् ।

६उद्भूतत्वे विशेषगुणगते जातिभेदे उद्भूतशब्दे विवृतिः।

उद्भावन न० उद्+भू-णिच्-ल्युट्। १कल्पने, २उत्पादने च उद्+भु०भू०ल्युट्। ३चिन्तने ४उत्प्रेक्षणे च "उद्भावनमकुर्व्वन्तौ विदुरस्य मते स्थितः" भा०आ०१४१अ०

उद्भास पु० उद्+भास-भावे घञ्। उद्दीप्तौ। ततः अस्त्यर्थे "नैकाजादेरतो जातेः सप्तम्याश्च न तौ स्फुटौ" वार्त्ति० घञ्रूपैकाक्षरात् इनेरप्राप्तौ बाला० पाठात् मतुप् इनि वा। उद्भासवत् उद्भासिन्-तद्युक्ते त्रि०। "विभूषणोद्भासि पिनद्धभोगि वा" कुमा० स्त्रियां ङीप्।

उद्भिज्ज पु० उद्भिनत्ति क्विप् उद्भित् तथा सन् जायते जन-ड कर्म्म०। भूमिसद्भिदि जाते १तरुगुल्मादौ "उद्भिज्जाः स्थावराः सर्वे बीजकाण्डप्ररोहिणः" इति मनुः। पदा० योगार्ण्वे। "देहसर्द्धिर्योजनोर्द्धैव उत्पत्तिभेदतः। उद्भिज्जः स्वेदजोऽण्डोत्थयतर्थैव जरायुजः। उद्भिद्य भूमिं निर्गच्छद्भिदः स्थावरश्च यः" इति विभज्य तदुत्पत्तिप्रकारस्तत्र दर्शितः "उद्भिज्जाः स्थावरा ज्ञेयास्तृणगुल्मादिरूपिणः। तत्र सिक्ता जलैर्भूमेरूष्मणश्च विपाचिताः। वायुना व्यूह्यमानास्तु बीजत्वं प्रतिपद्यन्ते। तथाचोप्तानि बीजानि संसिक्तान्यम्भसा पुनः। उच्छूनतां स्फुटत्वं च मूलभावं प्रयान्ति च। तन्मूलादङ्कुरोत्पत्तिरङ्कुरात् पर्व्वसम्भवः। पर्व्वाल्लक्षणतः काण्डः काण्डाच्च प्रसरः पुनः"। एतेषां च यथा पापभोगायतनत्वात् देहवत्त्वं तथाऽण्डोनिजशब्दे २४०पृष्ठे उक्तम् "शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः" या० स्मृतौ शारीरपापेन तेषां देहोत्पत्तिश्रवणात् भोगायतनदेहवत्त्वमवसेयम्। अतएव सङ्गावल्याम् चेष्टाश्रयत्वं शरीरलक्षणमुक्त्वा "द्रुमादीनामपि चेष्टासत्त्वाज्जीव्यादिः। न च द्रुमादीनां शरीरित्वे किं मानम्? इति वाच्यम् आध्यात्मिकवायुसम्बन्धस्य प्रमाणत्वात् तत्रैव किं मानम्? इति चेत् भग्नक्षतसंरोहणादिना तदनुमानात्" इत्युक्तम्। यथा च स्थावराणां स्वस्वकर्म्मोत्पन्नदेहवत्त्वं तथाऽवरोहशब्दे ४४० पृष्ठे भा०स्मृ०भाष्येण दर्शितम्। तेषां विभागोन्यायकन्दल्याम् दर्शितं यथा "स्थावरास्तृणौषधिलतावानस्पत्यतय इति" भा०। "दर्भमूलपादिः ओषधयःफलपाकान्ता गोधूमादयः, ये न पुष्पफलास्ते द्रुमा कोविदारप्रभृतयः लता प्रसिद्धैव। अवतन्वन्ति अवताना बिटपाक्षदलः केतकी बीजपूरादयः ये विना पुष्पं फलन्ति ते वनस्पतय ओदुम्बरादयः"। न्या०क०। २भूमिसद्भिद्यजातमात्रे त्रि०स्वार्थादिविभागे सुश्रुतः "द्रव्याणि पुनरोषधयश्च द्विविधाः स्थावरा जङ्गमाश्च। तासां स्थावराश्चतुर्विधाः। वनस्पतयो द्रुमा वीरुध ओषधय इति। तत्रपुष्पाः फलवन्तोवनस्पतयः पुष्पफलवन्तो द्रुमाः। प्रतानवत्यः स्कन्धिन्यश्च वीरुधः। फलपाकान्ता ओषधय इति। जङ्गमा अपि चतुर्विधा जरायुजाण्डजस्वेदजोद्भिज्जाः। तत्र पशुमनुष्यव्यालादयो जरायुजाः। सर्पसरीसृपप्रभृतयो ऽण्डजाः। कृमिकीटपिपीलिकाप्रभृतयः स्वेदजाः। इन्द्रगोपमण्डूकप्रभृतय उद्भिज्जाः"।

उद्भिद् पु० भूमिमुद्भिनत्ति उद्+भिद्-क्विप्। १उद्भिज्जगुल्मवल्लीलतारूपे पञ्चविधे स्थावरभेदे उद्भिज्जशब्दे उदा०। उद्भिनत्ति पचाद्यच्। २यागभेदे "उद्भिदा यजेत" श्रुतिः उद्भिदादिशब्दानां यथा कर्म्मनामधेयता व्युत्पत्तिसम्भवं जै०सू०भाष्यवोक्ता दर्शितं यथा

'उक्तं समाम्नायेदमर्थं तस्मात् सर्वं तदर्थं स्यात्१,४,१, सू०। 'उद्भिदा यजेत' 'बलभिदा यजेत' 'अभिजिता यजेत' 'विश्वजिता यजेत' इति समामनन्ति, तत्र सन्देहः, किम् उद्भिदादयो गुणविधयः, आहोस्वित् कर्म्मनामधेयानि? इति। कुतः संशयः? उभयथाऽपि प्रतिभाति वाक्यात्, उद्भिदा इत्येष शब्दो यजेतइत्यनेन संबध्यते, स किं यैदधिकरण्येन संबन्धमुपैति, उद्भिदा द्रव्येण यागमभिनिर्वर्त्तयेदिति, उत सामानाधिकरण्येन, उद्भिदा यागेन यजेत इति हेधाऽपि एतस्मिन् प्रतिभाति वाक्ये, सम् भवति संशयः।

किं तावत् प्राप्तम्? उक्तमस्माभिः, समाम्नायस्तदमर्थं, क्वचिदस्य भागोविधिः, योऽविदितमर्थं वेदयति, यथा 'सोमेन यजेत' इति क्वचिदर्थवादः, यः प्रशंसनम् विधिं द्योतयति, यथा 'वायुर्वै क्षेपिष्ठा देवता' इति, क्वचित्मन्त्रः, योविहितमर्थं प्रयोगकाले प्रकाशयति, यथा 'बर्हिर्देवसदनन्दामि' इत्येवमादि, तस्मादुद्भिदादयोऽमीषां प्रयोजनानामन्यतमस्य प्रयोजनाय भवेयुः, तत्र तावद्भार्थवादः, वाक्यशेषो हि स भवति विधातव्यस्य, न च मन्त्रः, एवंजातीयकस्य प्रकाशयितव्यस्य अभावात्, पारिशेष्यात् गुणविधिः, उद्भिद्गुणता यागस्य विधीयते प्रसिद्धेरनुपक्षात्, गुणविधेरर्थवत्त्वात्, प्रवृत्तिविशेषकरत्वाच्च। न च, एवं यागार्थता लोकेऽवगम्यते! न च, वेदेन परिभाष्यते! अतोगुणविधयः। 'यदि गुणविधिः, न तर्हि कर्म विधीयते, अविहिते च कर्मणि

तत्र गुणविधानमनर्थकम्। न इति ब्रूमः, प्रकृतौ ज्योतिष्टोमे गुणविधानमर्थवद्भविष्यति,यदि नामधेयं स्यात्, यावदेव यजेत इति, तावदेव उद्भिदा यजेत इति, न प्रकृतौ कश्चित् गुणविशेषः स्यात्। गुणविधौ च गुणसंयोगात् अभ्यधिकमर्थं विदधत उद्भिदादयः शब्दा अर्थवन्तो भविष्यन्ति तस्मात् गुणविधय इत्येवं प्राप्तम्"भा० "अपि वा नामधेयं स्यात् यदुत्पत्तावपूर्वविधायकत्वात्" १,४,२,सू०"अपि वा इति पक्षो विपरिवर्त्यते। नामधेयं स्यात् इति प्रतिजानीमहे, एवमविहितमर्थं विधास्यति ज्योतिष्टोमात् यागान्तरं, श्रुतिर्वैवं यागमभिधास्यति, इतरथा श्रुतिरुद्भिदादीनू यज्ञतो उद्भिदादिगतो लक्षयेत्! उद्भिदा यागेन कुर्यादिति। यागेन कुर्यात् इति यजेतेत्यस्यार्थः करणं हि यागः। उद्भिदाद्यपि ह्रतीयानिर्देशात् करणं, तत्र उद्भिदा यागेन इति कर्मनामधेयत्वेन सामानाधिकरण्यसामञ्जस्यं, द्रव्यवचनत्वे मत्वर्थलक्षणया सामानाधिकरण्यं स्यात्। श्रुतिलक्षणाविषये च श्रुतिर्ज्यायसी। तस्मात् कर्मनामधेयम्। 'नतु प्रसिद्धं द्रव्यवचनत्वमपह्नूयेत, अप्रसिद्धं कर्मवचनत्वं प्रतिपाद्येत' उच्यते, ह्रतीयानिर्देशात् कर्मवचनता। कुतः ? करणवाचिनो हि प्रातिपदिकात् ह्रतीया भवति, करणं च यागः, तेन यागवचनमिममनुमाक्षामहे।

"नैतद्युक्तं,यदि ह्रतीयानिर्देशे सति उद्भिदादिभ्यः शब्देभ्यो यागे बुद्धिरुत्पद्येत, स्यादेतदेवं, न हि नो बुद्धिरुत्पद्यते, तस्मात् अयुक्तम्। ह्रतीयावचनम् अन्यथा नोपपद्यते" इति चेत्। कामं नोपपादि, न जातुचित् अवगम्यमानेऽपि यागवचनो भविष्यति, तस्मात् गुणविधयः। लक्षणेति चेत्, वरं लक्षणा कल्पिता, न यागाभिधानं, लौकिकी हि लक्षणा, रूढोऽप्रसिद्धकल्पनेति। अपि च यदि नामधेयं विधीयते, न यागः,अथ यागः, न नामधेयम्, उभयविधाने वाक्यभेदः" इति। उच्यते, न नामधेयं विधायिष्यते, अनुवादा हि उद्भिदादयः। कुतः प्राप्तिः ? इति चेत्। ततोऽभिधीयते, उच्चरद्भ्यासमर्थात् भिद्यमानसमर्थाच्च उद्भिच्छब्दः क्रियावचनः, उद्भेदनं प्रकाशनं पशूनामनेन क्रियते इत्युद्भित् यागः, एवमाभिमुख्येन जयात् अभिजित्, विश्वजयात् विश्वजित्, एवं सर्वत्र। अतः कर्मनामधेयम्। यत्त्वप्रवृत्तिविशेषकरोऽनर्थकः इति, नामधेयेऽपि गुणफलोपबन्धे नार्थवत्, तस्मात् कर्मनामधेयान्येवंजातीयकानि—इति सिद्धम्"भा० गवामयने वर्षे षष्ठमासिकोत्तमाभिप्लविकस्थाने १एकादशे दिने। "षष्ठस्य मासस्योत्तमयोरभिप्लवयोः स्थाने त्रिवृद्बृहद्रोदरात्र उद्भिद्बलभिदौ" आश्व०श्रौ० १२, १,६,"षष्ठस्य मासस्य ये त्रयोऽभिप्लवाः तेषां यौ उत्तमाभिप्लवौ तयोः स्थाने त्रिवृत्स्तोमको व्यूहोदरात्रः उद्भिद्बलभिदौ च द्वे अहनी इत्येतानि द्वादशाहानि" भारा०ब्र०। गवामयनशब्दे विवृतिः।

उद्भिद् पु० उद्+भिद-क्विप्। १वृक्षादौ पञ्चविधे स्थावरे। २उद्भेदके त्रि० "होतां यक्षत्तनूनपात्मुद्भिदम्" यजु० २८,२५ "उद्भिदं यज्ञफलानामुद्भेत्तारम्" वेददी०।

उद्भिन्न त्रि० उद्+भिद-क्त। १उत्पन्ने कर्मणि क्त। २विघाटने दलिते च। "शोषनोद्भिन्नमेघया"।

उद्भूत त्रि० उद्+भू-क्त। १उत्पन्ने "शिवलिङ्गतयोद्भूतः कोटिसूर्य्यसमप्रभः" ति०त० पु० "सस्तुभयनोदुभूतः" कल्पमन्त्रः न्यायमते २प्रत्यक्षयोग्ये "उद्भूतरूपं नयनस्य गोचरः" उद्भूतस्पर्शवद्द्रव्यं गोचरः कोऽपि च त्वचः" भाषा०। उद्भूतत्वञ्च उद्भवापरपर्य्यायो रूपादिविशेषगुणगतोजातिभेदः कथा० सत्वदृष्टौ उक्तः यथा "अनेकद्रव्यसमवायात् रूपविशेषाच्च रूपोपलब्धिः"क० सू०। "तेन रसगन्धस्पर्शेषु ज्ञानं व्याख्यातम्"सू०।"रूपगतोविशेषोरूपविशेषः तद्भूतमनभिभूतत्वं रूपत्वञ्च तस्माद्रूपस्योपलब्धिः। नन्वेवं परमाणोर्द्व्यणुकस्य च रूपं स्यात्तेनत्वत उक्तमनेकद्रव्यसमवायादिति अनेकपदं भूयस्परं तेनानेकानि भूयांसि द्रव्याणि आश्रयतया यस्य तदनेकद्रव्यं त्रसरेणुप्रभृति तत्समवायात्, घटादयोऽवयवद्वारारब्धाः परम्परयाऽनेकद्रव्याश्रया एव, रसस्पर्शादौ रूपत्वविरहात् चाक्षुषत्वाभावः चाक्षुषे तेजसि च उद्भूतत्वविरहात्। उद्भवः रूपादिविशेषगुणगतो जातिविशेष एव रूपत्वादिव्याप्यः। नन्वेवं शुक्लत्वसुरभित्वकटुत्वादिभिरपि परस्परभावानुपपत्तिरेव तत्तद्व्याप्यतज्जातित्वकल्पने तु कल्पनागौरवम् उद्भवपदस्य नानार्थत्वञ्चेति चेन्न बाह्यैकैकेन्द्रियग्रहणयोग्यगुणत्वस्वैवोपाधेरुद्भवत्वात् तदुपाधिविरहस्यैवानुद्भवत्वात्, । अनुद्भवाभाव एव उद्भव इति केचित्। तच्चिन्त्यम् अनुद्भवस्याप्येवं व्यवस्थापयितुमशक्यत्वात्। अतीन्द्रियविशेषगुणत्वमनुद्भूतत्वमिति चेत् एवं तर्हि ऐन्द्रियकविशेषगुणत्वस्यैवोद्भवत्वापत्तेः। ऐन्द्रियकत्वावच्छेदकं किमिति चेत् वक्तव्यम्, विशेषगुणेष्वेवोद्भूतत्वं जातिः गुणगतजातौ परस्पर-

भावानुपपत्तिर्न दोषायेत्यपि वदन्ति । तेनेति रूपमात्रज्ञानेनेत्यर्थः यथा रूपविशेषात् रूपवानभिभूतत्वोद्भूतत्वलक्षणात्, रूपोपलब्धिस्तथा रसविशेषात् रसवानभिभूतत्वोद्भूतत्वलक्षणात् रसोपलब्धिः एवमितरत्रापि योज्यम् । अनेकद्रव्यसमवायाच्चातिदेशः । आश्रयसमवायिनिन्द्रियाणामनुद्भवाद्गन्धरसस्पर्शानामप्रहणम् पाषाणादावनुद्भवाद्गन्धरसयोः। तद्व्यक्तिं तयोरुपलम्भात् तयोः पाषाणादावुपलब्ध एव न तु स्पष्ट इत्येके । विभक्तावयवाभद्रव्यरूपानुद्भवात्तदप्रहणम् एवं रसेऽपि । उष्णजले तेजोरूपस्यानुद्भवात् स्पर्शस्य चाभिभवात् वितस्तपूरचम्पकादौ रूपरसस्पर्शानामनुद्भवादनुपलब्धः। जलादौ रूपस्पर्शोद्भूतमेव शुक्लत्वमास्वरत्वे परमभिभूते । रूपमप्यभिभूतमित्येके जलकणस्थन्तु रूपान्तरसंस्पर्शात् । अभिभवश्च बलवज्जातीयप्रहणतमप्रहणं न तु बलवज्जातीयसम्बन्धमात्रम्, बलवज्जातीयसम्बन्धसाम्यप्रहणनिरूपतया अप्रहणस्यैवोपजीव्यत्वात् नचाप्रहणप्रयोजकत्वेन बलवज्जातीय एवोपजीव्यः, अप्रहणस्य प्रहणप्रागभावस्य तदत्यन्ताभावस्य वा तदप्रयोज्यत्वात् प्रहणध्वंसस्य च तत्ताभावात् । तथापि तर्हि बलवज्जातीयप्रहणतमप्रहणमनुपपन्नमेवेति चेत् अस्त्येवं तथापि सजातीयस्य बलवत्त्वे दुर्बलत्वे वा तादृशसम्बन्धसत्त्वे वा प्रहणाप्रहणे एव प्रयोजके एवेति स एवाभिमतपदार्थः"।

उद्भूति स्त्री॰ उद्+भू–क्तिन् । १उत्पत्तौ । उत्कटा भूतिः । २उत्तमविभूतौ ३ऐश्वर्ये च । "उमा बधूर्भवान् दाता याचितार इमे वयम् । वरः प्रभुरसं क्षेप्य स्वत्कुलोद्भूतये विधिः" कुमा०।

उद्भेद पु॰ उद्+भिद–घञ् । १रोमाञ्चे । भावे घञ् । २उद्भिद्योत्पत्तौ ३प्रकाशे च । "उमाकलोद्भेदमनु प्रवृद्धः" कुमा० । "तं यौवनोद्भेदविशेषकान्तम्" रघुः । "पुष्पोद्भेदं सह किसलयैर्भूषणानां विशेषात्" मेघ० । "कन्दोद्भेदा वैदूर्या वारिणीव" माघः । "हसितं तव तथाहासो यौवनोद्भेदसम्भवः" "स्फुटोऽपि मन्मथोद्भेदस्तदागमनहेतुकः" सा०द० । ४भेदने च "गजोद्भेदं समासाद्य शिरालोपोपितोनरः" भा०व०८४अ०। ल्युट् । उद्भेदनमप्यत्र न०। "यमसोद्भेदनं विप्रास्तत्रापि कथयन्त्युत" भा० व०८८अ०। "उद्भेदनं प्रकाशनम्" उद्भिच्छब्दे वरदरा० ।

उद्भ्रम पु॰ उद्+भ्रम–करणे घञ् न ह्रस्वः । १उद्वेगे भावे घञ् । २भ्रमात् भ्रमणे। भावे ल्युट् । उद्भ्रमणमप्यत्र न०

उद्भ्रान्त न॰ उद्+भ्रम–भावे क्त । १उद्भ्रमणे अम॰ स्वार्थे कन् । घूर्णितगतौ शक्र०। अन्तर्भूतण्यर्थे भावे क्त । २बाह्यमुद्यम्य खड्गभ्रामणे। उद्+भ्रम–कर्त्तरि क्त।३भ्रान्तियुक्ते ४अर्द्धभ्रमणकर्त्तरि च त्रि० । "मारीचोद्भ्रान्तहारीतः, रघु०

उद्य त्रि॰ वद–क्यप् । कथनीये "अवतोद्यं न तत्रास्ति" भट्टिः शब्दपदं एवास्य साधुत्वम् न पृथक्प्रयोग इति ।

उद्यत् त्रि॰ उद्+या–शतृ । उद्गच्छति "उद्यता जयिनि कामिनीमुखे तेन साहसमनुष्ठितं पुनः" का॰प्र॰ "उद्यन् सवृद्राद्रुत वा पुरीषात्" यजु॰२९,१२। "नेक्षेतोद्यन्तमादित्यम्" मनुः । स्त्रियां ङीप् । सा च २विष्टुतिभेदे च सा च ताण्ड्य॰ब्रा॰ दर्शिता

"तिसृभ्योऽङ्गुरोति स प्रथमया, तिसृभ्योऽङ्गुरोति स मध्यमया, तिसृभ्योऽङ्गुरोति स उत्तमयोद्यतो त्रिवृतिः" । "एकैकस्य साम्नः पञ्च विभक्तयः प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनाख्याः, तत्र ङ्गुरस्त्रिभिरुद्गाद्भिः सर्व्वत्र कर्त्तव्यः अतएव स्तुवतश्चोच्यते "साम्ने साम्ने ङ्गुर्युरिति" तिसृभ्य इति "क्रियाधोपपदस्य च कर्म्मणि स्थानिनः" पा॰ कर्मणि चतुर्थी तिसृभ्यो गातुं ङ्गुर्यात् एकवचनमतन्त्रम् उद्गात्रेव हेतोः" अतस्त्रयोऽप्युद्गातारो ङ्गुर्युरित्यर्थः । एवमुत्तरत्रापि ङ्गुरविधायकेषु वाक्येषु योजना । स ङ्गुरोति स ङ्गिर्कर्त्ता प्रथमया त्रिरुक्तया गायेत् अयं प्रथमः पर्य्यायः । तिसृभ्यो ङ्गुरोति स ङ्गिर्कर्त्ता मध्यमया त्रिरुक्तया गायेत् अयं द्वितीयः पर्य्यायः, पुनरपि तिसृभ्यो ङ्गुरोति स ङ्गिर्कर्त्ता ह्रस्वोत्तमा अन्त्या तया त्रिरुक्तया गायेत् एवः तृतीयः पर्य्यायः । अनेन पर्य्यायेण त्रिवृत्स्तोमः सम्पद्यते उक्तप्रकारेण त्रिधा वर्त्तत इति त्रिवृत् स्तोमः तस्य विष्टुतिरेषा उद्यती उद्गं गच्छन्ती उद्गेषु पर्य्यायेषु प्रथममध्यमोत्तमक्रमेण उद्गमनादुद्यत्संज्ञेयमेषा त्रिवृतः प्रथमा विष्टुतिः" भा॰ सामसं॰भाष्ये साधनेनोद्यतीनामकविष्टुतेः प्रकारः स्पष्टं दर्शितो यथा "पठितानां नवानामृचां गातं त्रिभिः पर्य्यायैः कर्त्तव्यम् तत्र प्रथमपर्य्याये त्रिषु स्तोकेषु आद्याऋचस्य ऋचः, द्वितीये पर्य्याये मध्यमाः, तृतीये पर्य्याये चोत्तमाः । तिसृभ्य इति तृतीयार्थे पञ्चमी, ङ्गुरोति गायतीत्यर्थः । सेयं यथोक्तप्रकारोपेता गोतिस्त्रिवृत्स्तोमस्य विष्टुतिः (स्तुति-प्रकार-विशेषः), ऋचाः विष्टुतेरुद्यती नामेति,भा॰ पञ्चदशस्तोमेऽपरा उद्यती विष्टुतिः ता॰ब्रा॰दर्शिता यथा

"तिसृभ्यो हिङ्करोति स पराचीभिः, पञ्चभ्यो हिङ्करोति स एकया स तिसृभिश्च एकया, सप्तभ्यो हिङ्करोति स तिसृभिस्स एकया स तिसृभिरुद्यती पञ्चदशस्य विष्टुतिः" ब्रा०"त्रिषु पर्वाविषूत्तरोत्तरसंख्योत्कर्षमेत्युद्यती पञ्चदशस्य विष्टुतिरिति। त्रिषु पर्वाविषूत्तरोत्तरसंख्योत्कर्षमेतोत्युद्यतीत्युच्यते" भा०।

सप्तदशस्तोमस्यापराप्युद्यतो तत्रैव दर्शिता

"अथोद्यत्याख्यां सप्तदशस्तोमस्यापरां विष्टुतिमाह" भा०।

"तिसृभ्यो हिङ्करोति स पराचीभिः, पञ्चभ्यो हिङ्करोति स एकया स तिसृभिस्स एकया, नवभ्योहिङ्करोति स तिसृभिस्सतिसृभिस्स तिसृभिरुद्यतो सप्तदशस्य विष्टुतिः" ब्रा०। 'तिसृभ्यः पञ्चभ्यो नवभ्य इति क्रमेण संख्याया ऊर्द्धगमनादुद्यतो ऊर्द्धं गच्छन्ती एतत्संज्ञा एषा सप्तदशस्तोमस्य विष्टुतिः" भा०।

अयं संक्षेपः गवामयने त्रिवृदादयः स्तोमाः विहिताः तेषां त्रिवृदादिस्तोमानां तिस्रोविष्टुतयः (सन्निवेशविशेषरूपेण स्तवनानि) तत्र वक्ष्यमानसाधनस्य त्रिवृत्स्तोमस्य तिस्रो विष्टुतयः उद्यती कुलायिनी परिवर्त्तिनी चेति तत्राद्या दर्शिता अन्ये तत्तच्छब्दे वक्ष्यन्ते।

उद्यत त्रि० उद्+यम-कर्त्तरि-क्त। १उद्यमयुक्ते ऋतोद्यमे "आततायी वधोद्यतः" अमरः। भावे क्त। २उद्यमे न०। यमेर्नियमनार्थत्वे कर्मणि क्त। ३उत्तोलिते ४उद्यमिते "प्रहरक्षेज उद्यत आश्विनः" यजु०२९,५। "उद्यम्यते स्मोद्यतः" वेददी०। "पर्य्यायोद्यतकार्म्मुकौ" रघुः।

उद्यति स्त्री उद्+यम-भावे क्तिन्। उद्यमे। "वैश्वदेवानि जुहोत्यस्यमेधस्योद्यत्यै" शत०ब्रा० १३,१,८,१।

उद्यम पु० उद्+यम-घञ् न ह्रस्वः। १प्रयासे प्रयत्नभेदे २उद्योगे। "निशम्य चैनां तपसे कृतोद्यमाम्" "यशाक मेना न नियन्तुमुद्यमात्" कुमा०। ३उत्तोलने च "विप्रदग्धोद्यमे ऋक्षमतिऋक्षं निपातने" वा०ऋ०।

उद्यमन न० उद्+यम-णिच्-ल्युट्। १उत्क्षेपणे २उत्तोलने।

उद्यमित त्रि० उद्+यम-णिच्-क्त। १उत्तोलिते २उद्यमाय प्रेरिते। "आत्मनोमधुमदोद्यमितानाम्" किरा०।

उद्यान पुंन० उद्यायतेऽत्र उद्+या-आधारे ल्युट् ऊर्द्धादि। आरामे। तत्करणप्रकारादि आरामशब्दे ८०१पृ०उक्तम्। "बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या" "उद्यानानां नवजलकणैर्यूथिकाजालकानि" मेघ०

उद्यानपाल त्रि० उद्यानं पालयति पाल-अण् उप०स०। (माली) उद्यानरक्षके "उद्यानपालसामान्यस्तवस्तुपास्ते" कुमा०। ख्युल्। उद्यानपालकोऽप्यत्र। स्त्रियां टाप् ऋतइत्त्वम्। "ततः प्रविशति उद्यानपालिका" मालविकाग्निमित्रनाटकम्।

उद्यापन पुंन० उद्+या-णिच्-ल्युट् ऊर्द्धादि। व्रतादिसमापने व्रतप्रतिष्ठायाम्। हेमाद्रौ व्रतखण्डे "उद्यापनं प्रवक्ष्यामि" इत्यवतारे व्रतभेदे प्रयोगः। प्रतिष्ठा च कर्म्मान्तरं न तदङ्गमिति' रघु०। अस्येतिकर्त्तव्यतासामान्यप्रकारः व्रततत्त्वादौ अनुसन्धेयः। विशेषतस्तु तत्तद्व्रतोक्तविधायवाक्येभ्योऽवसेयः विस्तरस्तु हेमाद्रौ व्रतखण्डे द्रष्टव्यः। तत्र तिथि० त० व्रतारम्भप्रतिष्ठयोर्वर्ज्यकालमाह ज्योतिषे "गुरोर्भौगोरस्तवाक्ये वार्धके सिंहके गुरौ। वक्रिजीवाष्टविंशेऽह्नि गुर्वादित्ये दशाह्निके। पूर्वराशावनायातातिचारिगुरुवत्सरे। प्राग्यायिगत्यृजोश्चातिचारे त्रिपक्षके। कन्याद्यङ्गत सप्ताहे नीचस्थेज्ये मलिम्लुचे। भानुलङ्घितके भार्गि जवे राहुयुते गुरौ। पौषादिकचतुर्मासे चरषाड्डित वर्षगे। एकेनाङ्गा चैकदिने द्वितीयेन दिनत्रये। द्वितीयेन तु सप्ताहे माङ्गल्यानि शुभान्विताः। विद्यारम्भकर्णवेधौ चूड़ोपनयनोद्वहान्। तीर्थस्नानमनाद्यन्तं तथानादिसुरेज्यम्। परीक्षाऽऽरामयज्ञांश्च पुरश्चरणदीक्षणे। व्रतारम्भप्रतिष्ठा च गृहारम्भप्रवेशने। प्रतिष्ठारम्भणे देवकूपादेर्जयन्ति च। हानिं यद्दिवसाद्यास्ते जीवस्य भार्गवस्य च। हासप्रतिभहत्यस्ते पादास्ते द्वादश क्रमात्। यस्मात् प्राक् परयोः पक्षं गुरोर्वार्द्धकबालते। पक्षं द्वादोमहास्ते भृगुवांद्धोदयाद्दिकः। पादास्ते तु दशाहानि द्वादशुक्रो दिनत्रयम्"। एवं व्रतारम्भप्रतिष्ठयोर्वर्ज्यप्रकालोक्तेः सिंहस्थरवौ तदकर्त्तव्यताकल्पनं साहसमेव हरितालिकादिव्रते तद्वर्जनस्यासम्भवात् तस्य सिंहस्थरविकत्वेनैव निमित्तत्वात् तच्च हरितालिकाशब्दे वक्ष्यते। सिंहस्थरविकालस्याद्यद्विबोधकवाक्यस्य व्रतारम्भप्रतिष्ठाव्यतिरिक्तविषयकत्वेनाप्यपपत्तेः। "पूर्वे काले व्रतानां तु प्रतिष्ठां विधिवच्चरेत्। न तत्र कालनियमस्तत्र विघ्ने पराद्दिके इति" वचनात् पूर्वकाले न समयाशुद्धिर्बाधिकेति केचित्। एतद्वचनस्यामूलकत्वमाकरग्रन्थे।

उद्याम पु० उद्यम्यतेऽनेन उद्+यम-करणे घञ् वा ह्रस्वः। ऊर्द्धनियमनसाधने रज्ज्वादौ। "शिक्यपाशं प्रतिमुञ्चते

षड्द्याम॑ विश्वारूपाणीति" काल्या० १६,५,६, उद्गर्हं यस्यते निवस्यते वैस्ते उद्यामाः षड्द्यामारज्जवः जर्डा-कर्षणहेतवोयस्य" यजु० १२,१० ३मन्त्रव्या० वेददी० "षड्-द्यामं भवति षड्दिशो दिशो मौञ्जं विदत्" "संवत्सर एषोऽग्निर्वैश्वानरः शिक्यस्तनुभिर्हि संवत्सरः यज्ञोति स्यातं यच्छ्रोति तस्माच्छिक्यस्तनुभिरेवैनमेतद्विभर्त्ति षड्द्यामं भवति षड्दृतवः" शत० ब्रा० ६,७,१,१६,१८,

उद्याव पु० उद्+यु–अप् बाधित्वा "उदि श्रयतियौति-प्रुड्भ्यः" पा० घञ्। ऊर्द्धतोमिश्रणे अनुदि तु अवेव।

उद्यास पु० उद+यस–घञ्। १उद्यमे कर्त्तरि संज्ञायां घञ्। २देवभेदे पु०। "आयासाय स्वाहा प्रयासाय स्वाहा संयासाय स्वाहा वियासाय स्वाहोद्यासाय स्वाहा" यजु० १६,११, "आयासादयो देवविशेषाः" वेददी०।

उद्योग पु०न० उद्+युज–घञ् अर्द्धर्चादि।१उद्यमे कर्म्म-करणार्थं प्रयासभेदे "उद्योगादनिवृत्तस्य सुसहायस्य धीमतः। छायेवानुगता तस्य नित्यं श्रीः सहचारिणी" नीति०। "यज्ञादिविषयोद्योगकर्म्मणा मनसा गिरा" या०स्मृतिः। "उद्योगं सर्व्वसैन्यानां दैत्यानामादिदेश ह" देवीभा०। भोजसेनवत् उत्तरपदलोपे २उद्योगपर्व्वणि च। "उद्योगः सैन्यनिर्याणं श्वेतोपाख्यानमेव च" भा०आ० १अ० "उद्योगे भरतश्रेष्ठः सर्व्वकामगुणान्वितम्। भोजनं भोजयेद्विप्रान् गन्धमाल्यैरलङ्कृतान्" भा०स्वर्गा० ६अ०

उद्योगपर्व्वन् न० उद्योगस्य प्रतिपादकं पर्व्व। व्यास रचितभारतान्तर्गते पञ्चमे पर्व्वणि। "उद्योगपर्व्व विज्ञेयमतऊर्द्धं महाद्भुतम्"। "उद्योगपर्व्व विज्ञेयं पञ्चमं ब्रह्मणः परम्" तत्त्वदीपिकान्तर्गतपर्व्वसूची। "उद्योग पर्व्व निर्द्दिष्टं सन्धिविग्रहसम्मितम्" भा०आ० १अ०।

उद्योगिन् त्रि०उद+युज–घिणुन्। उद्योगयुक्ते। "उद्-योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति। दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिध्यति कोऽत्र दोषः" हितो०।

उद्योजक त्रि० उद्+युज–ण्वुल्। प्रवर्त्तके।

उद्र पु०उनत्ति क्लिद्यति उन्द-रक्। जलविड़ाले। (उदिराल)

उद्रङ्क(ङ्ग) पु० सौभपुरे व्योमचारिदैत्यभेदे जटाधरः।

उद्रथ पु० उद्गतोरथो यस्मात्। १रथकीले। उद्गतरथ-तुल्यः पथो यस्य। ताम्रचूड़विहगे। मेदिनिः।

उद्रपारक पु० "इतराङ्कुले जातान् शृणु नागान् यथा-तथम्" इत्युपक्रम्य "भैरवोसृग्वेदाङ्गः पिशङ्गश्चोद्र-पारकः" भा०आ०५७अ० सर्पसत्रे हुतनागउक्ताः। [च

उद्रिक्त त्रि० उद्+रिच–क्त। १अतिगर्विते,२अधिके, ३स्फुटे

उद्रेक पु० उद+रिच–घञ्। १दर्पे, २अतिशये, ३उपक्रमे च। "गतोभक्त्युद्रेकः परिणतिमसौ चक्रवपुषा" पुष्पदन्तः। "प्रतीयते धनोद्रेको जनानामविजानताम्" भा०व० १६२ अ०। "स्नेहोरागश्च तन्त्रा च मोहोद्रेकश्च केव-लः" भा०अनु०२अ०। ४महानिम्बे स्त्री राजनि०।

उद्गीथ न० सामभेदे। "तदाङ्गरीभ्य एव वा एषा होत्रा यदृक्सावाक्या यदृक्सावाकमनुसन्तिष्ठत ईश्वरेभ्यो भवितो-रिति यद्यृक्वं स्यात्तत्रैकमक्षरमुद्गीथ इत्याचक्षतः प्रतिष्ठाये वीर्य्यं वा एते सामनी वीर्य्यएवान्ततः प्रतितिष्ठन्ति"। ब्रा० "अतोवदीयसृक्थम् उक्थसंस्थं स्यात् उक्तदोषपरिहाराय त्रैकक्षमं चोद्गीथं चोभे सामनी अन्ततस्तृतीयसवनस्थाने प्रतिष्ठाये त्रैकक्षमं ब्रह्मसाम उद्गीथमृक्सामेत्येवं कर्त्तव्ये इत्यर्थः" ता०ब्रा०भा०।

उद्गत् त्रि०उद् उत्कर्षितस्वभावोऽस्यस्य वा मतुप् मस्य वः। १उत्कृष्टे २उन्नते च। "स उद्गतोनिवतोयाति वेविषत्" ऋ०३,२,१०। "उद्गतः उच्छ्रायवतः" भा०। "उद्गत्सखा अजणोतना" १,१६१,११। "उद्गत्सुव्रतेषु" भा०।

उद्वत्सर पु०उत्क्रान्तोरविसंक्रान्तिं चान्द्रोमासोयत्र प्रा०ब०। वत्सरपञ्चकान्तर्गते वत्सरभेदे इदावत्सरहावृद्दे विदतिः उदावत्सरोऽथत्र।

उद्वपन न०उद्+वप–ल्युट्। १दाने २उप्तोप्तने (तोला)। "उखायामक्षोद्वपनमस्तमिते पात्रे" "अनुदिते भक्षोद्व-नादि" काल्या० १६,६,१,३। उत्क्रान्तोवपनम् अत्या० स०। ३उत्पाटने च।

उद्वमन न० उद्+वम–ल्युट् उदुपसर्गस्य धात्वर्थानुगम-मात्रमत्र। वमने। उद्गारशब्दे विदतिः।

उद्वयस् त्रि० उद्गतं वयोऽन्नं यस्मात् प्रा०ब०। अन्नोत्पा-दके वायौ "अपां रसमुद्वयसं सूर्य्ये सन्तं समाहितम्" यजु० ६,३, "उद्गतं वयोऽन्नं यस्मात् वायोः स उद्वया वायुः वायुनैव हि धान्यानि निष्पद्यन्ते" वेददी०। उत्-क्रान्तो वयः कालिकावस्थाम् अत्या०स०। अतिक्रान्त वयसि वृद्धे त्रि०।

उद्वर्त्त पु० उद्+वृत–घञ्। १अतिशये २आधिक्ये च। (उपचान) पिष्–घञ्। चूर्णविशेषैः २देहस्थमलाद्यपसा-रणव्यापारे।

उद्वर्त्तन न० उद्वर्त्यतेऽनेन उद्+वृत–णिच् करणे–ल्युट्।

शरीरनिर्मलीकरणद्रव्यादौ। चूर्णैरुद्वर्त्तनैः पादौ तैलाक्तामवचूर्णयेत्" स्मृतः। "नाक्तमेद्रक्तविण्मूत्रश्लेष्मोद्वर्त्तनादि च" वा०स्मृतिः। भावे ल्युट्। २द्रव्यभेदैः स्नेहाद्युपहारार्थे व्यापारे च। "उद्वर्त्तनं वातहरं कफमेदोविनाशनम्। स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परम्" "ववाश्वगन्धायष्ट्याह्वैस्त्रिफलेनोद्वर्त्तनं हितम्। मतावर्य्यश्च गन्धाभ्यां पयस्यैरण्डजीवनैः" "ततोऽस्य बलातैलमभ्यङ्गार्थेऽवार्य्यम् यवपिष्टमुद्वर्त्तनार्थे" स्मृतः। ३विलेपने, ४घर्षणे च। उद्+वृत-ल्युट्। ५उत्पतने ६उच्छ्वसने च "गात्रस्योद्वर्त्तनञ्चैव हितं संवाहनानि च" स्मृतः "चटुलशफरोद्वर्त्तनप्रेक्षितानि" मेघः।

उद्वर्त्तनीय त्रि०उद्वर्त्तनाय हितम् छ। उद्वर्त्तनसाधने द्रव्ये "दद्युरुद्वर्त्तनीयं गोधूमवचूर्णमिति" दुर्गाचोपपत्तिः।

उद्वर्हन न० उद्+बृह-ल्युट्। १व्यजनार्थे शिक्ये। णिच्-ल्युट्। २उद्वहतासम्पादने। ल्यु। २उद्वर्हसम्पादके त्रि०।

उद्वर्हण न०उद्+वृह-ल्युट्। १उन्मूलने २उत्पाटने ३उद्वरणे। क्त। उद्वर्हित उन्मूलिते त्रि०

उद्वह पु०उद्वहति अर्हं भवति उद्+वह-अच्। पुत्रे "पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः" स्मृतेस्तस्य नरकत्राणकर्त्तृत्वात् तथात्वम् २वंशकारके "उदवमत्तमतङ्ग रघूद्वहात्" "पार्थिवोदुद्वहद्रघूद्वहः" रघुः ३कन्यायां स्त्री ऊङ् प्रवहवायोरुपरिवहति अच्। वायुसप्तमार्गते ४द्वतीयस्कन्धस्थे वायौ पु०। आवहशब्दे दृश्यतिः "आवहः प्रवहश्चैव विवहश्च समीरणः। परावहः संवहश्च उद्वहश्च महाबलः। तथा परिवहः श्रीमानुत्पातभयशंसिनः। इत्येते क्षुभिताः सप्त मारुता गगनेचराः" हरि०२३ैअ०। वा० भावे अप्। ५विवाहे "चूडोपनयनोद्वहान्" राजमा०।

उद्वहन न० उत्तोल्य वहनम्। उत्तोल्य स्कन्धादिना वहने। "कृष्णेन देहोद्वहनाय शेषः" कुमा० "कैलासनाथोद्वहनाय भूयः" "आपीनभारोद्वहनप्रयत्नात्" रघु० २विवाहे च "भुवः प्रयुक्तोद्वहनक्रियायाः" रघुः। "खपितृभ्यः पितादद्यात् सुतसंस्कारकर्म्मसु। पिण्डानोद्वहनात्तेषां तदभावेऽपि तत्क्रमात्" स्मृतिः।

उद्वादन न० उद्+वद-णिच्-ल्युट्। १उच्चैरावेदने। "उपदीच्यो खेऽग्निषु नखनिकृन्तनाद्युद्वादनान्तं साग्निपातिकम्" कात्या०२५,१४,२, "उपदीच्यो नेदिदः खानग्नीनुद्विहृत्य नखनिकृन्तनाद्युद्वादनान्तं साग्निपातिकं कर्म्म कुर्य्यात्' कर्कः। उद्वादनप्रकारश्च श्रौ०ब्रा० ३,२,१,१८, दर्शतोयवा "अयैक उद्वदति दीक्षितोऽयं ब्राह्मणोदीक्षितोऽयं ब्राह्मण इति निवेदितमेवैनमेतत्सन्तं देवेभ्यो निवेदयत्यवं मनावीर्य्योयोवत्तं प्रापदित्यं युष्माकैकोऽभूत्तं गोपायतेत्येवैतदाह त्रिष्कृत्याह"। "उद्वदति उच्चैरावेदयति" भा० २उच्चैर्वाद्यकरणे च उद्+वच-णिच् ल्युट्। उद्वावचनमत्र न० "यत्रेन्द्र उद्वाचनं लब्धा चक्रे अधस्पदम्" अथ० ५,८,८,

उद्वान पु० उद्+वन-संभक्तौ घञ्। १उद्वमने णिच्-कर्म्मणि अच्। २उद्वमिते त्रि० रायमुकुटः।

उद्वान्त न० उद्+वम-क्त। कृतोद्वमने उद्गीर्णे अमरः।

उद्वाप पु० उद्+वप-भावे घञ्। १उन्मूलने २उद्धरणे। ३भूयमाण परिपरित्यागे पश्चात् "आवापोद्वापाभ्याम्" मुक्ता०। कर्म्मणि घञ्। उद्वाप्य सञ्चीयमाने ४भक्षादौ। "कपालानि भक्षोद्वापे कुर्य्यात्" कात्या० ५,२,६, भक्षोद्वापशब्देन प्रत्यहं गार्हपत्यादिखरेभ्यो भक्षोद्धृत्य यो राशिः क्रियते स उच्यते कर्कः"। णिच् भावे अच्। ५सस्यछेदने।

उद्वाय पु० उद्+वा-घञ्। १उद्वासने २उपशमे। तत आचारे क्विप्। उद्वायति। "वायुर्वाव संवर्गोयदा वा अग्निरुद्वायति वायुमेवाप्येति" श्रु०उ०। "उद्वायति उद्वासनं प्राप्नोत्युपशाम्यति" भा०। गणव्यत्ययोवात्।

उद्वास पु० उद्+वास-घञ्। स्वस्थानातिक्रमेण अस्तप्राप्तौ "अमरावत्यादीनां पुरीणां द्विगुणोत्तरोत्तरेण कालेनोद्वासः" श्रु०उ०भा०। ततः बलादि०इनि मतुप् वा। उद्वासिन् उद्वासवत् तद्वति त्रि० स्त्रियां ङीप्।

उद्वासन न० उद्+वस-ल्युट्। १भारणे उद्+वस+णिच्-ल्युट्। २विसर्जने। सुगादीनाम् उद्वोत्तलनेनान्यत्र स्थापनरूपे अग्न्याधानाङ्गे ३संस्कारभेदे "अप उपस्पृश्य शालाद्वार्थे परिस्तरणपात्रसंसादनप्रोक्षणाज्यनिर्वपणाधिश्रयणस्रुक्संमार्जनोद्वासनावेक्षणानि कृत्वाग्नीन्ध्र उत्पूय पश्चादाज्यग्रहणम्" कात्या०८,१,२, "अतोद्वासनमाहवनीय आयिणः २,७,८, "आज्याधिश्रयणस्रुक्संमार्जनोद्वासनावेक्षणानि" कात्या० ८,६,२१, ४स्थानान्तरनयने च "दक्षिणतोऽधिश्रयणोद्वासने" २५,८,६, अग्नि अधिश्रयणस्थानं च गार्हपत्याद्दक्षिणस्यां दिशि कुर्य्यात्" कर्कः।

उद्वास्य अव्य० उद्+वस-णिच्-ल्यप्। विसृज्येत्यर्थे "उद्वास्य देवं स्वेधाग्नि" तत्त्वम्। २स्थानान्तरं नीत्वेत्यर्थे च कर्म्मणि यत्। ३उत्तोल्यनीये ४उद्धरणीये च त्रि०।

उद्वाह पु० प्र० उद्+वह घञ्। विवाहे स च ज्ञानविशेष इति रघु० येन ज्ञानेन ममेयं भार्या, ममायं पतिरिति व्यवहारो भवति तादृशं ज्ञानम्। तच्च सम्बन्धभेदेनोभय निरूपम्। चरमसंस्कार इति नव्यनैयायिकाः। चरमत्वञ्च संस्कारप्रागभावासहचरितत्वम्। द्वितीयविवाहस्य संस्कारत्वाभावात् तत्प्रागभावसत्त्वेऽपि आद्यविवाहे चरमत्वाक्षतिः। तत्र च स्त्रियाः संस्काररूपतया विवाहत्वव्यवहारः। यस्य पुरुषस्य विवाहात् प्रागेव चूड़ादिषु जातेषु मरणम् तत्र पुरुषे चूड़ादौ संस्कारप्रागभावासहचरितत्वात् अतिव्याप्ते नैतत् लक्षणम्। किन्तु शास्त्रविहितसंस्कारानन्तरत्वमेव चरमत्वमिति युक्तम्। शास्त्रेषु च संस्कारेषु विवाहस्यैवानन्तरतया विधानादितरेषामुपनयनादिनेति नातिप्रसङ्गः। यूपाहवनीयादौ यथा संस्कारादेव तत्तच्छब्दप्रवृत्तिः एवं शास्त्रविधिना कृतसंस्कारयोरेव दम्पत्योस्तच्छब्दप्रवृत्तिः। संस्कारत्वालौकिकत्वात् तत्तत्कर्मकलापसाध्य इति न आदानमात्रेण तत्सिद्धिः। अतएव "अविप्लुत ब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेदिति" या० स्मृतौ "उद्वहेत द्विजोभार्याम्" इत्यादौ च विधिश्रवणम्, आदानमात्रस्य प्रमाणान्तरप्राप्ततया तदंशे विधित्वासम्भवात् अप्राप्तप्रापकस्यैव विधित्वात् अतएव "पाणिग्रहणिकामन्त्रा नियतं दारलक्षणम्। तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे" इति मनुना मन्त्रविशेषाणामेव भार्यात्वरूपसंस्कारप्रयोजकत्वमभिहितम्। आदानमात्रस्य विवाहत्वे तस्य च लौकिकत्वात् स्वकीयेतरद्रव्यवत् तद्दानविक्रयापत्तिःस्यात् "न निष्क्रयविसर्गाभ्यां भर्तुर्भार्या वियुज्यते" इति कात्यायनेन दानविक्रयाभ्यां भार्यात्वविगमाभावं वदता च विवाहस्य लौकिकत्वं निरासितम्। किञ्च विवाहसंस्कारस्य वैधत्वे यथाविधानमेव तत्र प्रवृत्तिः कार्य्या। विधानातिक्रमे च कर्तुः प्रत्यवायोऽनिष्टं च फलं भवतीति गम्यते। तद्विधानप्रकारश्च आश्व० गृ० १, ४, कण्डिकादौ दर्शितः अन्योऽपि प्रकारस्तत्तद्गृह्यकारैरुक्तः। स च ततोऽवसेयः। उद्वाहे वर्ज्जनीयकन्याः स्मृतिषु दर्शिता यथा। "असपिण्डा च या मातुरसगोत्रा च या पितुः सा प्रशस्ता द्विजातीनां दारकर्म्मणि मैथुने" मनुः। असपिण्डश्च असपिण्डशब्दे ५४१पृ० मतभेदेनोक्ताः। "अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम्। अरोगिणीं भ्रातृमतीमसामानार्षगोत्रजाम्" याज्ञ०। अन्यत्रोक्ताः। "सप्त पौरुषेया कन्या वर्ज्जनीयाः कुलाधमाः। वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला। उदकस्पर्शिता या च या च पाणिगृहीतिका। अग्निं परिगता या च पुनर्भूप्रभवा च या। इत्येताः काश्यपेनोक्तादहन्ति कुलमग्निवत्" काश्य०। "तत्र सपिण्डासगोत्रासमानप्रवरासु भार्यात्वमेव नोत्पद्यते रोगिण्यादिषु भार्यात्वे उत्पन्नेऽपि दृष्टदोष एव" मिता०। एवमेव रघुनन्दनादयः। समानार्षेषु आर्षशब्दे ८१२ पृष्ठे दर्शिताः। "सगोत्रां मातरञ्चैके नेच्छन्त्युद्वाहकर्म्मणि। जनकानान्तरविप्राश्च उद्वहेत्साविशङ्कितः" इति उ० त० व्यासः। "मातुलस्य सुतां मूढ़ां मातृगोत्रां तथैव च। समानप्रवरां चैव गत्वा चान्द्रायणं चरेत्" मिता०। "आ सप्तमात् पञ्चमाच्च बन्धुभ्यः पितृमातृतः। अविवाह्या सगोत्रा च समानप्रवरा तथा। पञ्चमे सप्तमे वापि येषां वैवाहिकी क्रिया। ते च सन्तानिनः सर्वे पतिताः शूद्रतां गताः" नारदः। बन्धवश्च उत्तराधिकारशब्दे १०६६पृ० दर्शिताः। "सगोत्रास्वेदमत्वाऽपत्यक्षेत्राहवदेनाम् विभृयात् समानार्षेषां विवाहश्च चान्द्रायणं चरेत्" समन्तः। "समानगोत्रप्रवरां सखिहाञ्जोपगम्य च। तस्यास्तत्पापजं चान्द्रायणादेव क्षीयते" आप०। "सर्वाः पितृपत्न्यो मातरस्तद्भ्राता मातुलस्तत्पत्न्यो मातुलान्यस्तदपत्यानि भगिन्यस्तदपत्यानि भागिनेयानि ता धर्म्मतोऽविवाह्याः अन्यथा सङ्करकारिण्यस्तथाध्यापयितरिति" समन्तुः। "अध्यापयितरेतद्विवाहमन्त्रपाठयितरेतत् सङ्करकारित्वमिति" रत्नाकरादयः। अध्यापयितुर्गुरोः कन्या अविवाह्येति रघुनन्दनेनोक्तम् "समानप्रवरा वाऽपि शिष्यसन्ततिरेव च। ब्रह्मदातुर्गुरोश्चैव सन्ततिः प्रतिषिध्यते" मत्स्यपु०। "मातुर्भ्रातुः सुतं स्वात् सुप्रसिद्धमथापि वा। तन्नाम्नी या भवेत् कन्या मातृनाम्नीं प्रचक्षते। प्रमादात् यदि सङ्गीयात् प्राजापत्यं समाचरेत्। ततश्चान्द्रायणं कृत्वा तां कन्यां परिवर्ज्जयेत्" मत्स्य पु०। तथा श्यालिकापुत्रा अपि पुत्रस्थानिकतया अविवाह्यत्वमुक्तं दत्तकमी० दृश्यम्। अत्र सपिण्डविषयेऽपवादः "सन्निकर्षेऽपि कर्त्तव्यं त्रिगोत्रात् परतो यदि"। मत्स्य पु०। "असम्बन्धा भवेन्मातुः पिण्डे नैवोदकेन वा। सा विवाह्या द्विजातीनां त्रिगोतान्तरिता च या"। मनुः। शूद्राधान्तु अतिदिष्टादिष्टगोत्रभागित्वेन सगोत्राविवाहो न निषिद्धः इति रघुनन्दनादयः। "द्विजानामसवर्णासु कन्यारूपमसत्तया" इत्यु० ना० उक्तेः कन्यौ असवर्णाविवाहनिषेधात्तद्विषयेणोनाभिहितः। द-

जिणस्यां मातलक्योद्वाहस्तु शिष्टैरपि क्रियते तस्य स्मृतिविरुद्धत्वेऽपि किञ्चित् श्रौतं लिङ्गमास्थाय तेषांतथाचरणमिति बहवः। तस्य श्रौतलिङ्गस्यान्यार्थपरता परापर भाष्यादौ दर्शिता। अतएव द्वारकास्थपदक्षिणदेशवासिनां तथाचरणे भाग०१०स्कन्धे। "वद्ध्यनुस्मरन् वैरं रुक्मी कृष्णावमानतः। अतरत् भागिनेयाय सुतां कुर्वन् सतः प्रियम्"। "दौहित्रायानिरुद्धाय पौत्रीं रुक्माददद्वरेः। रोचनां बद्धवैरोऽपि स्वसुः प्रियचिकीर्षया जानन्नधर्मं तद्यौनं स्नेहपाशयशानुगः"। अधर्मं जानन्निति क्रुं तेन तस्याधर्मत्वम्। "मातुलस्य सुतामूढ्वेति" प्रागुक्तवचनात्तस्याधर्मत्वम् सुव्यक्तमेव। स च विवाहोऽष्टविधः "ब्राह्मो-दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः। गान्धर्वोराक्षसश्चैव पैशाचश्चाष्टमोऽधमः" मनुः एतेषां लक्षणं तत्तच्छब्दे द्रष्टव्यम्। "येन भार्यां हृता पूर्वं क्रतोद्वाहा परस्य वै" हरिवं०।

उद्वाहन न० उद्+वह-णिच्-ल्युट्। १पुनर्देवहाहसम्पादने २उन्नयने ३स्थानान्तरनयने। उद्वाह्यते स्थानान्तरं नीयतेऽनेन उद्+वह-णिच्-करणे ल्युट्। ४उद्वाहसाधने "उद्घाटनं घटीयन्त्रं सलिलोद्वाहने जले:" अमरः। उद्+वह-स्वार्थे णिच्-भावे ल्युट्। ५विवाहे। वाहनस्य हलाकर्षणस्योपरि वाहनं कर्षणं यत्र। द्वैहिकस्त्रे क्षेत्रे यत्र प्रथममेकवारं हला पुनः कर्षणं क्रियते तादृशे क्षेत्रे हेम०। [टक्के (कड़ि) हेम०।

उद्वाहनी स्त्री उद्वाह्यते स्वार्थे णिच्-कर्मणि ल्युट्। वरा-

उद्वाहिक त्रि० उद्वाह: प्रयोजनमस्य ठक् संज्ञापूर्वकविधेरनित्यत्वात् न वृद्धिः। विवाहसाधने मन्त्रादौ "नोद्वाहिकेषु मन्त्रेषु नियोगे वेदनं क्वचित्" मनुः। वृद्धौ औद्वाहिकोऽप्यत्र त्रि०।

उद्वाहित पु०स्त्री उद्वाहोजातोऽस्य तारका० इतच्। जातविवाहे "बाले वृद्धे तथैवार्त्ते मृते च दैवमन्त्रिणि। उद्वाहितायां कन्यायां दम्पत्योरेकनामनम्" राजमा०।

उद्वाहिनी स्त्री उद्वाहः उद्वरणं साध्यतयाऽस्त्यस्याः इनि ङीप्। रज्ज्वां मेदिनिः।

उद्विग्न त्रि० उद्+विज-कर्त्तरि क्त। उद्वेगयुक्ते, "निमग्नोद्विग्नसंक्षोभैः पद्मैर्दीनैव मेदिनी" भट्टिः। दुःखपरिहाराक्षमतया२व्याकुलचित्ते,३क्षुभिते च।

उद्वेजन न० उद्+वि+ईज-भावे ल्युट्। १अतीव कम्पे। करणे ल्युट्। २तत्साधने नेत्रे "सस्रोजनोद्वेजनकौशदीक्षम्" रघुः।

उद्वेत त्रि० उद्+वि+इ-क्त। विशेषेणोद्गते। (अस्तापिच्छोवा) समन्तात् स्रावित "ततोयुधिष्ठिरानीकमुद्वीतार्णवनिस्वनम्" भा० द्रो० १६५अ०।

उद्वृत्त त्रि० उद्गतो वृत्तात् निरा०स०। १दुर्वृत्ते। उद्+वृत-क्त। २उत्क्षिप्ते ३भुक्तोज्झिते। ४अधिके। "उद्वृत्तोहि यत्नः समधिकफलमाचष्टे" व्या० न्याय:। "कल्पद्रुमोद्वृत्तमिवार्थवान्भः" भा० आ० प०७। ५क्षुभिते च "उद्वृत्तनक्रात् सहसोन्मथ्यमानं रघुः।

उद्वेग पु० उद्+विज-घञ्। १व्याकुलचित्ततायाम् २विरहजन्ये दुःखोद्गमे, "मनोभिः सोद्वेगैः प्रणयविकृतिभ्रस्तरचयः" किरा०। "सहसोद्वेगमियं व्रजेदिति" रघुः। "मानोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्याः" मेघ०। "योजिताप्यं बाधते उद्वेगं जनयति शिरोऽभ्यूहीते नासिकाञ्च स्रावयति स कटुकः" सुश्रु०। "सङ्कोचेऽप्यथनुद्वेगो माधुर्यं परिकीर्त्तितम्" सा०द०। ३भये च। ४गुडाकफले न०। उद्गतोवेगोऽस्मात्। ५निश्चले, ६स्तिमिते ७शीघ्रगामिनि च त्रि०।

उद्वेजन त्रि० उद्+विज-भावे ल्युट्। १उद्वेगे अमरः "परदाराभिमर्षेषु प्रवृत्तान् वृत्तं महीपतिः। उद्वेजनकरैर्दण्डैर्विक्षयित्वा प्रवासयेत्" मनुः तत्र साधु क्त। उद्वेजनीय उद्वेजके त्रि० "परिहरेदुद्वेजनीयाश्च कथाः" सुश्रु०।

उद्वेजित त्रि० उद्+विज-णिच्-क्त। क्रतोद्वेगे "उद्वेजिता दृष्टिभिराश्रयन्ते" कुमा०।

उद्वेदि त्रि० उद्गता वेदिर्यस्य प्रा० ब० नतलोपः। उन्नतवेदिके। "विमानं नवसमुद्वेदि चतुःस्तम्भप्रतिष्ठितम्" रघुः

उद्वेप पु० उद्+वेप-भावे घञ्। १उत्कम्पने। कर्त्तरि अच्। २तद्युक्ते त्रि०। ततः तेन निर्वृत्तमित्यर्थे संज्ञा० अण् औद्वेप तन्निर्वृत्ते त्रि०। स्त्रियां ङीप्।

उद्वेल त्रि० उत्क्रान्तोवेलाम् अत्या० स०। १वेलातिक्रान्ते २मर्य्यादातिक्रान्ते "भवभग्नयोर्द्वेलादाचक्षुर्नैर्ऋतोदधेः" रघुः

उद्वेष्टन न० उद्+वेष्ट-ल्युट्। १हस्तपादयोर्बन्धने, २उपवेष्टने च। "वक्त्रे मधुरता तन्द्रा हृदयोद्वेष्टनं भ्रमः" "हृदयोद्वेष्टनं तन्द्रा लालास्रुतिररोचकः" सुश्रु०। उद्गतं वेष्टनात् निरा०त०। ३उत्क्रमबन्धने त्रि०। "कयाचिद्वेष्टन बालमाख्यया" रघुः कुमारच

उद्वोढृ पु० उद्+वह-तृच्। परिणेतरि। "उद्वोढापि भवेत् पापी संसर्गात् कुलनायिके!। वेश्यागमनजं पापं तस्य पुंसोदिनेदिने" ब्रह्मनि०त०।

उध्रस उञ्छे क्र्या० पर० अक० सेट्। उध्रसाति औध्रासीत्

उभ्रसाम्-बभूव आस चकार । [सयति ते । औदिभ्रसत् त उभ्रस उत्क्षेपे उञ्छे च (कणशब्दादाने) चु०सक०सेट् । उभ्र-
उन्द् क्लेदने रुधा०पर०सक०सेट् । उनत्ति उनः उन्द्नि उ-
न्द्यात् उनत्तु । औनत् औनाम् औन्दम् औनः-औ-
नत् । औन्दीत् । उन्दाम्-बभूव आस चकार । उन्दिता उन्दिष्यति औन्दिष्यत् । उन्दन् उन्दनम् उत्तिः उन्नः-
उत्तः । "इतप्रुषा मनसा हव्यसुन्दन्" ऋ० २,३,२ ।
"यत्र ह्याप उन्दन्त्यक्तिमन्ति तदोषधयोजायन्ते" शत० ७,५,२,३ । भ्वादित्वमपि । "शिरस्त्रिरुन्दति अदितिः केशान् वपत्याप उन्दन्तु पर्वसः इति" आश्व० श्रौ० १,१७,
७ । णिच् उन्दयति-ते औन्दिदत्-त सन् उन्दिदिषति ।

उन्दुर(रु) पु० उन्द्-उर-उरच् वा । मूषिके मूषिक-भेदास्तद्गोपद्रवाश्च सचिकित्साः सुश्रु०दर्शिता यथा। "अथातो मूषिककल्पं व्याख्यास्यामः । पूर्वसङ्काः शुक्र विधा मूषिका ये समासतः । नामलक्षणभेषज्यैरष्टादश निबोध तान् । लालनः पुत्रकः क्षणो क्षिंसिरक्षिकिर-क्षया । क्षुछुन्दरोऽलसश्चैव कषावदशनोऽपि च । कृलि-क्षवाजितश्चैव चपलः कपिलस्तथा । कोकिलोऽरुणसंज्ञश्च महाक्षणस्तथोन्दुरः । श्वेतेन महता सार्द्धं कपिलेनाखुना तथा । मूषिकश्च कपोताभस्तथैवाष्टादश स्मृताः । शुक्रं पतति यत्रैषां शुक्रदष्टैः स्पृशन्ति वा । नखदन्तादिभि-स्तस्मिन् गात्रे रक्तं प्रदुष्यति । जायन्ते पन्नयः शोफा कर्णिका मण्डलानि च । पिडकोपचयश्चोग्रा विसर्पाः किटिभानि च । पूर्वभेदोरुजस्तीव्रा ज्वरोमूर्च्छा च दारु-
णा । दौर्ब्बल्यमरुचिः श्वासो वमथुर्लोमहर्षणम् । दष्ट-रूपं समासोक्तमेतच्च व्यासतः शृणु । लालास्रावो लालनेन क्षिकाच्छर्दि च जायते । तण्डुलीयककल्कन्तु लिह्यात्तत्र समाक्षिकम् । पुत्रकेणाङ्गसादश्च पाण्डुवर्णश्च जायते । पीयते पन्निभिश्चाक्ष्णा श्रावकसद्भिः । शिरीषेक्षुदकल्कन्तु लिह्यात्तत्र समाक्षिकम् । क्षणेना सृक् क्षरति दुर्दिनेषु विशेषतः । शिरीषफलकल्कन्तु पिबेत् किंशुकभक्षणा । क्षिंसिरेणाक्षविड्भेदो जृम्भा क्षोभाच्छदर्षणम् । पिबेदारग्वधादिन्तु सुवान्तस्तत्र मान-वः । चिक्किरेण शिरोदुःखं शोफो क्षिका वमी तथा । जालिनीमदनाढ्योटकषायैर्वामयेत्तु तम् । क्षुछुन्दरेण छर्द-र्दिज्वरोऽतीसारश्चैव च । पीत्वास्रमः पृथग्शोफो गन्धा-ज्ञानं विसूचिका । चव्यं हरीतकीं शुण्ठीं विडङ्गं पि-प्पलीं मधु । यवनार्द्रकभक्षारं दष्टस्यास्रात् दापयेत् । पीताऽ-
स्रस्योऽलसेनोर्द्ध्वाधुर्दशे रुजा ज्वरः । मङ्गादं सर्पिषक्तं लिह्यात्तत्र समाक्षिकम् । निद्रा कषायदग्धेन क्षुच्छोषः कार्श्यमेव च । चौद्रोपेताः शिरीषस्य लिह्यात् सार-फलत्वचः । कृलिक्षेन रुजः शोफो राज्यश्च दंशम-ण्डले । सक्षे सस्निग्धसारे च लिह्यात्तत्र समाक्षिके । अजितेन वमी मूर्च्छा क्षुदपक्षः क्षणेनेक्षता । तत्र क्षु-द्दीरपिष्टां कालिन्दीं मधुना लिखेत् । चपलेन भवे-च्छर्दिर्मूर्च्छा च सक्त क्षणया । सभद्रकाष्ठां सक्टां चौ-द्रेण लिफलां लिखेत् । कपिलेन क्षणे कोथो ज्वरो पन्थुग्रहस्तथा । चौद्रेण लिह्यात्फलां श्वेतां-चापि पुनर्णवाम् । पन्नयः कोकिलेनोग्रो ज्वरो दाहश्च दारुणः । वर्षाभूनोलिनीकाथसिद्धं तत्र घृतं पिबेत् । अरुणेनानिलः क्रुद्धो वातजान् कुरुते गदान् । मह-क्षणेन पित्तञ्च श्वेतेन कफ एव च । महता कपिलेना सृक् कपोतेन चतुष्टयम् । भवन्ति चैषां दंशेषु पन्नि-मण्डलकर्णिकाः । पिडकोपचयाद्योग्राः शोफश्च भय-दारुणः" ।

उन्दुर(रु)कर्णी स्त्री उन्दुरस्य कर्ण इव पर्णमस्याः गौ०ङीष् । आखुकर्ण्याम् । (उन्दुरकानी) स्वार्थे कन् तत्रैव

उन्दूरु पु० उन्द्-ऊरु । मूषिके । [पक्षे उत्त आर्द्रे त्रि० ।

उन्न त्रि० उन्द्-क्त । क्लिन्ने आर्द्रे (भिजे) २दयापरे च ।

उन्नत त्रि० उद्+नम-क्त । उच्चे, २महति च । "उन्नतेन स्थितिमता धुरसङ्गता भुवः" कुमा० "स्थितः सर्वो-न्नतेनोर्वीम्" रघुः । "बन्धुरं त्वन्नतानतम्" अमरः । "मधुरोन्नतभङ्गलालितञ्च दृशोः" माघः ।

स्त्री० शि० उच्चे दिनमानज्ञानसाधने २उपायभेदे न० । "उन्नाप्रभाभिमतदिक्क्रियमेत तावत् तामेव कालनियमेन च वर्द्धिम भूयः । स्यादुन्नतं द्युगतशेषकयोर्यदल्पं तेनोनितं दिनदलं नतसंज्ञकं च । अथोन्नताद्यूनयुताच्चरेण क्रमादुद-ग्दक्षिणगोलयोर्ज्ञा । स्यात् स्फुटमेतदुक्तं द्यौर्व्या व्यासार्धभङ्गं च कलाभिधानम्" शि० । "दिवसस्य यद्गतं यच्च शेषं तयोर्यदल्पं तदुन्नतसंज्ञं भवति । तेनोन्नतेनोनीकृतं दिन-दलप्रमाणं तन्नतसंज्ञं भवति । अथोन्नताद्युन्नतकालाद्युक्त-रगोले च तैर्नानिता दक्षिणे युताद्या ज्या तत्स्फुटम् । सा स्फुटसंज्ञेत्यर्थः । तत् स्फुटं द्युज्यया गुणितं त्रि-ज्यया भक्तं फलासंज्ञं भवति । अक्षोपपत्तिः । यस्मिन् काले ज्ञाया साध्या तस्मिन् काले स्वाक्षोरालग्नतो यावती-भिर्घटिकाभिः क्षितिजादुन्नतो रविस्तावान्नतसंज्ञः । येन

कालेन मध्याह्नात्तस्य नतसंज्ञा । अथ चरेणोनयुतस्योन्नतकालस्य किल ज्या साध्या । सा च ज्या मध्यावधिर्भवति । स च मध्यप्रदेशोऽहोरात्रवृत्तस्योन्मण्डलसंपाते भवति। यत उन्मण्डलसंपाताभ्यामूर्ध्वमहोरात्रवृत्तस्यार्धमधोऽर्धम् । अत उन्मण्डलावधेर्जीवा साध्या । क्षितिजोन्मण्डलयोरन्तरं चरार्धम् । अतश्चरार्धेन वर्जिताद्युन्नतादुत्तरगोले, दक्षिणे तु युतात् । यत उत्तरगोले क्षितिजादुपर्युन्मण्डलं, दक्षिणेऽधः । तस्मात् कलाद्या ज्या साधिता सा क्षितिवृत्तपरिधिता । सा च स्फुटसंज्ञा । अथ यदि क्षितिवृत्त एतावती तदा द्युज्यावृत्ते कियतीत्यनुपातेन द्युज्यावृत्तपरिधिता । सा च कलासंज्ञा" प्रमि०।

सि०शि०उक्ते यन्त्रसाधनलब्धानार्थे ४उपायभेदे च । "यन्त्रवेधविधिना ध्रुवोन्नतिर्या नतिश्च भवतोऽत्रलम्बकौ । तौ क्रमाद्विषुवद्भाहृद्देशेऽथ वा नतसमुन्नता लवाः" सि० "चक्रयन्त्रेण यद्वेधवद्ध्रुवं विध्येत् । तत्र यन्त्रनेम्यां ये उन्नतांशास्तेऽक्षांशाः । ये नतास्ते लम्बांशाः । अथ वा विषुवद्दिनार्धे येऽर्कस्य नतोन्नतांशास्तेऽक्षलम्बांशा इति युक्तियुक्तम्" प्रमि०।"उन्नतं द्युनिशमण्डले कुजात् सावनं द्युतिविधौ हि तज्ज्यका । तिर्यगत्रवशतोऽस्फुटार्कवच्छेदको न तु नरः स लम्बवत्" शि०।"इष्टमण्डले क्षितिजादुपरि यद्यपर्यन्तं ये ऽंशास्ते उन्नताः समध्यादधस्ते नताः । उन्नतांशानां ज्या भुजः । नतांशज्या हग्ज्या भुजः कक्ष्यत्रिज्याभिहतः कार्यः । दृष्टः कदलेनोच्छ्रितत्वात् । अयमर्थो यद्वच्छायाधिकारे व्याख्यात एव" प्रमि०।

"उदग्देशं याति यथा यथा नरस्तथा स्यादुन्नतमत्रमण्डलम् । उदग्दिगं पश्यति चोन्नतं क्षितेस्तदन्तरे योजनजाः पलांशकाः" सि०शि० ।

ततः भावे ष्यञ् औन्नत्य न० । तत् उन्नता स्त्री । त्व उन्नतत्व न०, तद्भावे "तदेव नैसर्गिकमुन्नतत्वम्" रघुः

उन्नतकाल पु० सि०शि० उक्ते ज्ञानतः कालज्ञानसाधने प्रक्रियाभेदे "पलश्रुतिघ्नस्त्रिगुणश्च वर्गो द्युज्येष्टकर्णाहतिहृद्भवेद्वा । इष्टान्त्यका तद्रहितान्त्यका वा भवन्ति या उत्क्रमचापसिद्धाः । नतासवस्ते स्फुरदर्कलं तैरूनीकृतं चोन्नतकाल एवम्" शि० । "क्षिप्तावर्गः पलकर्णेन गुण्यः द्युज्यया दृष्टकर्णस्य च घातेन भाज्यः यत्फलं लभ्यते सेष्टान्त्यका । तयेष्टान्त्यया रहितया अन्त्यायां यच्छेषं तस्योत्क्रमेण धनुः कार्यं तस्य धनुषोयावत्यः कलास्तावत्सङ्ख्यैः कालैः नतासवोज्ञेयाः तैर्नतासुभिरूनीकृता-दिनदलासव उन्नतासवः स्युः । प्रकारान्तरेण तेषामिष्टकालवेधोपपत्तिः । यदोष्टच्छायाकर्णेन द्वादशाङ्गुलशङ्कुर्लभ्यते तदा क्षितिजाकर्णेन क इति । अत्र क्षितिजाया द्वादश गुण इष्टकर्णो हरः । फलं महाशङ्कुः । अथ तस्य स्फुटिकरणार्थमनुपातः । यदि द्वादशाङ्गुलशङ्कोर्विषुवत्कर्णः कर्णस्तदास्य महाशङ्कोः क इति । पूर्वं क्षितिजाया द्वादश गुण इष्टहारी हरः । अतस्तुल्यत्वाद्द्वादशाङ्गुलयोर्गुणहरयोर्नाशे कृते सति क्षितिजायाः पलकर्णो गुण इष्टच्छायाकर्णो हरः फलमिष्टस्फुटिः । अस्येष्टान्त्याकरणायानुपातः । यदि द्युज्यया क्षितिजा लभ्यते तदिष्टस्फुटया किमिति । इदानीं क्षितिजा गुणो द्युज्या हरः । हरयोर्घातो हर इति द्युज्येष्टकर्णाहृतिर्भवति । गुण्ययोर्घाते क्षितिजावर्गः पलकर्णगुणितो भवति । एवं फलमिष्टान्त्यका । तया वर्जितायाः अन्त्यायाः यदवशेषं सा नतस्योत्क्रमज्या शरसंज्ञा । अतस्तस्या धनुरुत्क्रमेण स नतकालः स्यात् । नतकालो दिनार्धात् पतित उन्नतकालः स्यादित्युपपन्नम्" प्रमि०

उन्नतानत न० उन्नतं च तदानतञ्च । उच्चनीचस्थानादौ । "उन्नतं तून्नतानतम्" अमरः ।

उन्नति स्त्री उद्+नम-क्तिन् । १उद्दो, २उदये, ३शङ्कुभाव्यांशाश्च तत्र चन्द्रस्फुटोन्नतिः सि०शि० उक्ता यथा "मासान्तपादे प्रथमेऽथ चेन्दोः स्फुटोन्नतिर्यद्दिवसेऽवगम्या । तदोदयेऽस्ते निशि वा प्रसाध्यः शङ्कुर्विधोः स्वोदितनाडिकाद्यैः" शि० । "कृष्णाष्टम्या उपरि प्रथमेऽह्न वा शुक्लाष्टम्याः प्रागेव यस्मिन्नहनीष्टदिने यस्मिन्नहन्युन्नतिर्ज्ञातुमभीष्टा तस्मिन् दिने मासान्तपाद औदयिकौ चन्द्रार्कौ स्फुटौ कार्यौ । प्रथमचरणे त्वस्तकालिकौ ततः स्फुटोन्नतिर्ज्ञेया । निशि वा । एतदुक्तं भवति । मासान्तपाद उदयकाले यस्मिन्नहन्युन्नतिः साध्या । प्रथमा चरणे त्वस्तकाले । अथ वा किमुदयास्तनियमेन । यस्मिन्नुदये तस्मिन्नुदयात् प्राग्भिष्टघटीहृद्यकाले वा यस्मात्ते तस्मात्पराद्धास्तु घटीषु वा स्फुटोन्नतिः साध्या । तत्र तात्कालिको चन्द्रार्कौ कृत्वा चन्द्रस्य स्फुटक्रान्त्युदयास्तलग्नोन्नतघटिकादिभिस्तदुपकरणैः शङ्कुः साध्यः । अत्रोपपत्तिः । चन्द्रस्यार्धादूने शुक्ले तत्कोटी शृङ्गाकारे भवतः । तत्रेष्टकाले कतरा शृङ्गोन्नतिर्भविष्यतीति ज्ञातव्यम् । तत्र शुक्लस्य शृङ्गाकारतार्धादूने शुक्ले । तच्चार्धादूनत्वं मासान्तपादे प्रथमे च संभवति । द्वितीयतृतीययोरपि चरणयोर्न क्वचित्प्रादिभिः कृष्णशृङ्गोन्नतिरानीता सा मम न सम्म-

ता । नहि नरैः क्षणगृह्णोन्नतिः ऋटोपलक्ष्यते । प्रसिद्धा तु शुक्रगृह्णोन्नतिः। अत उक्तं मासान्तपादे प्रथमेऽह्य वेति। "वक्षोजो करिकुम्भ विम्बकरोमध्युन्नतिं, गच्छतः" । स्तोके-नोन्नतिमायाति" इति च सा०द०

उन्नतोश पु० ६त० । गरुडे त्रिका० ।

उन्नद्ध त्रि० उद्+नह-क्त । १उद्धते । उत्कटे च । "जहा-स्यतेज उन्नद्धमस्यतोऽस्यस्यतेजसा" भा० १स्क०। उन्नद्धं उ-त्कटम्" । श्रीधरः ।

उन्नमन न० उद्+नम-ल्युट् ।१उन्नतौ। खिच्-ल्युट् न दृद्धिः। २उत्तोलने सुश्रुतोक्ते ३यन्त्रकर्म्मभेदे च। तानि चतुर्विंशतिः यथोक्तं तत्रैव । "यन्त्रकर्म्माणि तु निर्घातनपूरणबन्धन-व्यूहनवर्त्तनयोजनविवर्त्तनविवरणपीडनमार्गविशोधनविक-र्षणाहरणाकुञ्चनोन्नमनविनमनभञ्जनोन्मथनाक्षूणैषणदार-णर्जूकरणप्रक्षालनप्रधमनप्रमार्जनानि चतुर्विंशतिः" । उन्नमनञ्च व्रणरुधिरस्रावसाधनं यथोक्तं तत्रैव "सन्धि-गतः पीड्यमानो न प्रवर्त्तते आकुञ्चनप्रसारणोन्नमन विनमनप्रधावनात् कासनप्रवादैश्च सूचति" ।

उन्नमित त्रि० उद्+नम-खिच्-क्त । १उत्तोलिते, २ऊर्द्धीकृते च "अथ प्रयत्नोन्नमितानमत्फणैः" कुमा० "क्वचिदुन्नमिता-ननौ" रघुः । [मण्डित' तत्' नाथः

उन्नम्र त्रि० उद्+नम-रन् । उन्नते "उन्नम्रताम्रपटमण्डप

उन्नय पु० उद्+नी-"क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिवि-शते"इत्युक्तेः अच् । कूपादितो जलादेरुत्तोलने अमरः ।

उन्नयन न० उद्+नी-ल्युट् । १वितर्के, २ऊर्द्ध प्रापणे च । "अनादिष्टांश्चेदोन्नयनश्रुतेः काल्या०" ६,५,२४, उन्नयन श्रुतिश्च । "अतोऽहिदेवेभ्य उन्नयन्त्यतोमनुष्येभ्यः" शत०ब्रा० ४,५,६,२, "चमसोन्नयनकाले बाहुभ्यां दक्षो-ल्लृह्य तच्चमसेनोन्नयेत्' काल्या० १०,६,३१, "तेभ्यश्चोन्नय-नमभ्यभि सोमानुन्नयन्ति श्रुतेः" काल्या०२२,१०, ५, "उन्नयन्त्यस्मात् अपादाने ल्युट्" । ३पूतभृत्पात्रे । "उन्नयने च" काल्या०२५,१२,१४, तदेव भवति उन्नय-स्यादित्युन्नयनम् पूतभृदुच्यते" कर्कः । उन्नमितं नयनं येन प्रा०ब० । उन्नमितनेत्रे त्रि० ।

उन्नस त्रि०उन्नता नासा यस्य अच् समा० नसादेशः । उन्न-तनासिके । "उन्नसं दधतो वक्त्रम्" भट्टिः ।

उन्नाद पु० उद्+नद-घञ् । उच्चशब्दे "गरुत्तोन्नादसंजुष्टम् नानाद्विजनिषेवितम्" भा०ब०१५८अ० ।

उन्नाभ पु० उन्नता नाभिर्यस्य अच् समा० । सूर्य्यवंश्ये नृपभेदे "उन्नाभ इत्युद्गतनामधेयः"रघुः असंज्ञायान्तु न अच् । उन्नाभिरित्येव त्रि० । उन्नता नाभिः प्रा०स० । उन्नत-नाभौ पुंस्त्री० ।

उन्नाय पु० उद्+नी-"अयोद्वोर्नियः" पा०घञ् । १ऊर्द्धनयने २वितर्के ३उच्चये च "उन्नायानधिगच्छन्तः प्रह्वावेवंसुधा भृताम्" भट्टिः । [हेमच० ।

उन्नाह पु० उद+नह-घञ् । १उत्तोल्यबन्धने २काञ्चिके न०

उन्निद्र त्रि०उद्गता निद्रा यस्य । १विकसिते निद्राशब्दस्य सङ्कोचभावरूपनेत्रनिमीलनार्थकत्वेन तथात्वम् । "उन्नि-द्रपुण्डरीकाक्षमकरध्वजभासा" माघः । २निद्रारहिते च । "तासुन्निद्रामवनिशयनां सौधवातायनस्थाम्' मेघ० । "प्रत्यापन्नविवर्त्तनेर्विगमयत्युन्निद्रएव क्षपाः" शकु० । उन्निद्रता च जागरणं तच्च विप्रलम्भशृङ्गारे कामजत-दयविधावस्थाभेदः तावदवस्थाः ४४७पृ० उक्ताः ।

उन्नीत त्रि० उद्+नी-क्त । १ऊर्द्धं नीते २वितर्किते च ।

उन्नेट त्रि० उद्+नी-ट्रच् स्त्रियां ङीप् । १ऊर्द्धनायिनि २उद्भावके च षोढ़शसु ऋत्विक्षु २ऋत्विग्भेदे पु० स च अध्वावाकशब्दे ८५१पृ० दर्शितः । तस्य च गोते कृष्णसम्भादनादुदकादुत्तारयाच्चोन्नेतृत्वम् "उन्नेतैनानु-न्नयति" "उन्नेतरुन्नयोन्नयोन्नेतर्वस्त्रो अभ्युन्नयान इत्युन्नीयमानाजपन्ति" आश्व० श्रौ० ६,१२,१२,१४ । "उन्नेता स्वयाखोक्तविधिना सर्वानुदकादुत्तारयति" "उन्नेत-रित्येतं मन्त्रं जपन्ति" ना०ह० "आहृतमुन्नेता द्रोणकलशमिडामिव प्रतिप्रस्थोपहवमिडावेत्तेत" आश्व० श्रौ० ६,१२,१ । "अथोन्नेत्र उपांशुसवनं प्रयच्छ-त्यथाहोन्नेतारमाह्वय आवह्य" इति संप्रेष्टाति प्रति-प्रस्थाता संस्थानुन्नेता वसतीनोदञ्चनेन वा" शत०ब्रा० ४,३,५,१८,२१ । ततः उन्नात्रा० अच् न दृद्धिः । उन्नेत्र उन्नेतृसम्बन्धिनि त्रि० । "प्रतिप्रस्थातान्नीध्रोन्नेत्रे" काल्या० २४,४,४६ । इत्थं औन्नेत्रमित्यपि तत्रैव त्रि० ।

उन्नेय त्रि० उद्+नी-यत् । १ऊर्द्धनयनीये २उद्भावनीये च ।

उन्मज्जक पु०उद्+मस्ज-ण्वुल् । "कण्ठदघ्ने जले स्थित्वा" तपः कुर्वन् प्रवर्त्तते । उन्मज्जकः स विज्ञेयस्तापसेषूत्तम पूजितः" इत्युक्तलक्षणे १तापसे । जलादेरुपरि २उत्-प्लावके त्रि० । [(भासा) प्लवने ।

उन्मज्जन न० उद्+मस्ज-ल्युट् । मज्जनविपरीतव्यापारे

उन्मण्डल न० उद्गतं मण्डलम् । वि० मि० उद्गे दिन रात्रयोः क्षयवृद्धिसाधने मण्डलभेदे । यथाङ्क तत्रैव ।

"पूर्वापरक्षितिजसंगमयोर्विलग्नं याम्ये ध्रुवे पलभवैः क्षितिजादधःस्थे । सौम्ये कुजादुपरि चाक्षभवैर्ध्रुवे तदुन्मण्डलं दिननिशोः क्षयवृद्धिकारि" गि० । "समदृत्तक्षितिजयोर्यौ पूर्वापरौ संपातौ तयोर्ध्रुवचिह्नयोर्य सक्रं यच्चिह्यते तदुन्मण्डलसंज्ञम् । दिनरात्रोर्वृद्धिक्षयौ तद्वशेन भवतः" ग्रहि० । सूर्य्यसिद्धान्ते रङ्गनाथेन च खण्डसक्रं यथा "प्राक्पश्चिमाश्रिता रेखा प्रोच्यते समम्डलम् । उन्मण्डलं च विषुवन्मण्डलं परिकीर्त्यते" सू० । "प्राक्पश्चिमाश्रिता पूर्वापरसम्बद्धा साधिता रेखा समदृत्तसञ्ज्ञते । सैव रेखोन्मण्डलं विषुवन्मण्डलम् । चः समुच्चये । उभयसंज्ञकं कथ्यते । अलोपपत्तिः । क्षितिजपूर्वापरदृत्तसंयोगौ पूर्वापरे तल्लम्बं पूर्वापरसूत्रमिति । पूर्वापरदृत्तस्य भूमावूर्ध्वाधरानुकारिदृत्तत्वेनादर्शनाद्रेखाकारतयैव दर्शनाच्च पूर्वापरदृत्तमपि तल्लम्बम् । पूर्वापरदृत्तस्य समम्डलत्वेनाभिधानात् तद्रेखा समम्डलसञ्ज्ञोक्ता । अथ स्वनिरक्षदेशक्षितिजदृत्तस्योन्मण्डलाख्यस्य तल्लंयोगयोः संलग्नत्वात् तन्मध्यसूत्रत्वेन पूर्वापरसूत्रस्यापि सत्त्वात् पूर्वापरसूत्रमुन्मण्डलसञ्ज्ञम् । एतेनान्यदेशक्षितिजसञ्ज्ञया स्वदेशक्षितिजसञ्ज्ञा सुतरां सिद्धेति पूर्वापरसूत्रस्य क्षितिजवृत्तसञ्ज्ञा द्योतिता । पूर्वापरस्थानयोः क्षितिजदृत्तस्य संलग्नत्वादुल्लिखितदृत्तस्य क्षितिजानुकारित्वाच्च" रङ्ग० । "उदृत्तादयोऽत्र । परोऽथ वोदृत्तगते रवौ श्रुतिः" सि० शि० । प्रा० स० । २ऊर्द्धमण्डले त्रि० ।

उन्मण्डलकर्ण पु० स०शि० उन्मे क्षायवा दिनज्ञानार्थे उन्मण्डलस्थार्कस्य क्षायाकर्णे । तदानयनं तत्रैव यथा "युतायनांशार्कवृहद्भुजज्यया खरामतिथ्यभ्भुवो" (१०१५ २०) हृता: परः । पलश्रुतिघ्नः पलभाविभाजितः परोऽथ वोदृत्तगते रवौ श्रुतिः"शि० । "अर्कस्य सायनांशस्य बृहती भुजज्या साध्या । नतघ्नखण्डज्येत्यर्थः । तया ज्यया पूर्णाग्नितिथिन्यग्यगिनो (१०१५२०) भाज्याः । यल्लब्धमसौ परास्यः । स परः पलकर्णेन गुण्यः पलभया भाज्यः । फलमुन्मण्डलगतस्यार्कस्य क्षायाकर्णो वा भवति" ग्रहि० ।

उन्मण्डलवृत्त पु०वि०शि० उन्मे अक्षक्षेत्रप्रदर्शनार्थे उन्मण्डलग्रहो । "अग्रादिखण्डं कथिता च कोटिरुदृत्तना दोः श्रवणोऽपमज्या । उदृत्तना कोटिरथाग्रकाग्रखण्डं भुजस्तच्छ्रवणः क्षितिज्या । खण्डं यदूर्द्धं समदृत्तगड्डोयत् तदृतेलाग्रं च कोटिकर्णौ । अग्रादिखण्डं भुज एवमत्रौ क्षेत्राख्यमूर्ध्वाभवानि तावत्" शि० । "अत्र किल निरक्षदेशे यदेव विषुन्मण्डलं तदेव समम्डलम् । तथा क्षितिजादन्यदुन्मण्डलं नाम वलयं नास्ति । तत्र ध्रुवौ च क्षितिजासक्तौ । अत्र निरक्षदेशादृष्टा यथा यथोत्तरतो गच्छति तथा तथोदग्ध्रुवसक्तं पश्यति । तथा यैर्भागैर्ध्रुव उन्नतस्तैरेव भागैरक्षसंज्ञैः स्वस्वक्षितिजाद्दक्षिणतो विषुवन्मण्डलं नतं पश्यति । विषुवन्मण्डलस्य तिर्यक्स्थितत्वात् तदाश्रितान्यहोरात्रवृत्तानि स्वस्थाने तिरश्चीनानि भवन्ति । अतः साक्षे देशे खगोलवलयानां तिरश्चीनखगोलवलयानां च संपातात् लङ्कासिद्धपुरादौ क्षितिजोन्मण्डले । तान्यक्षक्षेत्रसंज्ञान्युपयोगित्वात् कथ्यन्ते । अक्षभा नाम पलभा प्रसिद्धा सा भुजः । द्वादशाङ्गुलः शङ्कुः कोटिः । अक्षकर्णस्तत्र कर्णः"ग्रहि० उदृत्तनाथत्र । एवमुन्मण्डलार्कशङ्कुरत्र ।

उन्मत्त पु० उद्+मद–कर्त्तरि क्त । १धूस्तूरे "विल्वैरण्डार्कवर्षाभूदधित्थोन्मत्तशिग्रुभिः" सुश्रु० । २सचक्रुद्दक्षे च । कर्त्तरि क्त । २उन्मादवति, ३यत्नावेशवति च त्रि० । "बालमूढास्वतन्त्रार्त्तमत्तोन्मत्तापवर्जितम्" नारदः । "उन्मत्तेन वातिकाद्युन्मादयुक्तेन" मिता० । "उन्मत्तानाञ्च या गाथा विष्णूनां चेष्टितं च यत् । स्त्रियो यच्च प्रभाषन्ते नास्ति तत्र व्यतिक्रमः" म०त० मत्स्यपु० । ४उद्धते च उन्मत्तगङ्गम् । अतिशयेन मत्तः । ५अतिमत्ते "मदोन्मत्तस्य भूपस्य कुञ्जरस्य च गच्छतः" पञ्चतन्त्रम् ।

उन्मत्तक पु० उन्मत्त इवकन् । १तापसभेदे । अवधूतशब्दे ४२८ पृष्ठे विवृतिः । स्वार्थे कन् । २उन्मत्तार्थे । "क्लीबोऽथ पतितस्तज्ज पङ्गुरुन्मत्तको जडः" याज्ञवल्क्यः ।

उन्मत्तगङ्गा अव्य० उन्मत्ता उद्धता गङ्गा यत्र संज्ञायाम् बन्धपदार्थत्वे अव्ययी० । देशभेदे । "उन्मत्तगङ्गा नाम देशः" सि०कौ० ।

उन्मत्तगीत त्रि० उन्मत्तेन गीतम् "इत्थङ्भूतेन कृतमिति" या० इत० । उन्मत्तेन गीते एवम् उन्मत्तप्रलपितादयोऽपि उन्मत्तेन प्रलपितादयर्थे त्रि० ।

उन्मथन न० उद्+मथ–भावे ल्युट् । १उन्मर्दने २हिंसने । "अन्योन्यस्तोन्मथनादभूताम्" रघुः "वायुनोन्मथनं चापि भ्रमश्च क्रमतस्तथा" सुश्रु० । सुश्रुतोक्ते ३यन्त्रकर्मभेदे च उद्भ्रमशब्दे ११८०पृ० दृश्यम् । कर्त्तरि ल्यु । ४उन्मर्दनकारके त्रि० । "विपञ्चचित्तोन्मथना नखाग्रयाः" किरा० ।

उन्मथित त्रि० उद्+मथ-क्त । उद्घृष्टे मर्दिते ।

उन्माद पु० उद्गतोमदोमत्तताऽस्य प्रा० ब० गतलोपः ।

२उद्गतमदे। "उन्मदसुगमदरभसवशंवदनवदलमालतमाले" जयदेवः "उदीरयामासुरिवोन्मदानाम्" रघुः "अयोर्ध्वि-लोलोन्मदराजहंसे" रघुः। ३ब०। २उद्गतमदसाधने "मधु-कराङ्गनया सङ्गरुन्मदध्वनिभृता निभृताक्षरसञ्जगे" माघः।

उन्मदन त्रि० उद्भूतोमदोऽस्य प्रा०ब० भूतमोपः। उद्भूत-कामे। "तदाप्रभृत्युन्मदना बभूव" कुमा०।

उन्मदिष्णु त्रि० उद्+मद-ताच्छील्ये ष्णुच्। उन्मादशीले।

उन्मनस् त्रि० उद्भ्रान्तं मनोऽस्य। १उत्कण्ठायुक्ते, २अन्य-मनस्के च। "पयोधरेष्वोरसि काचिदुन्मनाः" माघः। "उन्मनाः प्रथमजन्मचेष्टितान्यस्मरन्नपि बभूव राघवः" रघुः वा कप्। उन्मनस्कोऽप्यत्र। भृशा० अभूततद्भावे कृञ् सलोपश्च उन्मनायते उन्मनायमानः "भृशसुन्मनायित-मस्" । चिव-क्रम्बस्तिषु सलोपश्च उन्मनीकरोति उन्म-नीभवति उन्मनीस्यात्"।

उन्मनी स्त्री उन्मनस्+ङीष्०। योगिनामवस्थाभेदे। "उन्मन्य-स्याधिगमाय विहितोपायमेकं तव निर्दिशामि। पश्यन्नूर्दा-वीनडगा प्रपञ्चं सङ्कल्पसन्मूलय सावधानः" आचार्यः।

उन्मन्थ पु० उद्+मन्थ-भावे घञ्। वधे २क्षिंसने ३उन्मर्दने च।

उन्मन्थन न० न० उद्+मन्थ-ल्युट्। अर्द्धतो दण्डादिना विलोडने। करणे ल्युट्। तत्साधने २दण्डादौ।

उन्मर्दन न० उद्+मृद-ल्युट्। १उद्वर्त्तने सुश्रुतोक्ते वायु-प्रसादनार्थे २व्यापारभेदे। वायो रस्यैकस्य सुश्रु०"त्वङ्-मांसासृक्स्थिरं प्राप्ते कर्य्याद्रक्तविमोक्षणम्। स्नेहोपना-ह्याग्निकर्म बन्धनोन्मर्दनानि च" व्रणोपद्रवनिवारणार्थे सुश्रुतोक्ते ३व्यापारभेदे च" "शमनोन्मर्दनस्नेहदहनक्षपण-क्रियाः"। करणे ल्युट्। ४उन्मर्दनसाधने द्रव्यादौ। "अथैतान्युपकल्पयेत् समावर्त्तयिष्यन् मधिं कुण्डले वस्त्रयुगं क्षौमोपानद्युगं दण्डं क्षौमोन्मर्दनमनुलेपनमाञ्जनशलाकां-श्चमित्यात्मने चाचार्याय च" आ०गृ० ३,८,१, "उन्म-र्दनमभिषेकेऽवनीयैके" कात्या०१६,४,८। "उन्मर्दन-चन्दनादि" कर्कः।

उन्मा स्त्री उद्+मा-अ। अर्द्धमाने। "सहस्राक्षमुन्मासि साहस्रोऽसि" यजु० १५,६५, "उन्मा" उन्मानं तुलादि वेददी०।

उन्माथ पु० उन्मथ्यतेऽनेन उद्+मथ-करणे घञ्। १आभिष-दानेन व्रणादिबन्धनार्थं निवेशिते वूटवन्धे (फांट) इति ख्याते। भावे घञ्। २विलोडनोत्थापने, ३क्षिंसने च। "तत्रचागत्य चाण्डालोच्चरखे कृतचेतनः। प्रयोजयति

चोन्माथं निशमस्तं गते रवौ" भा०शा० १३८ अ०।

उन्माद पु०उद्+मद-अधारे घञ्। रोगभेदे स च सुश्रुते दर्शितो यथा "अथात उन्मादप्रतिषेधमध्यायं व्याख्यास्यामः॥मदय-न्त्यु द्धता दोषा यस्मादुन्मार्गमाश्रिताः। मानसोऽयमतो व्याधिरुन्माद इति कीर्त्तितः॥ एकैकशः समस्तैश्च दोषै-रत्यर्थमूर्च्छितैः। मानसेन च दुःखेन स पञ्चविध उच्यते॥ विषाद्भवति यस्य यद्याख्यास्यते भेषजम्। स चाप्रवृद्धस्मरणो मदसंज्ञां विनर्त्ति च॥ मोहोहेगौ स्वनः श्रोत्रे गात्राणाम-पकर्षणम्। अत्युत्साहोऽरुचिश्चाग्रे स्रग्रे कलुषभोजनम्॥ वायुनोन्मथनञ्चापि भ्रमश्च क्षणतस्तथा। यस्य स्यादचिरे-णैवमुन्मादं सोऽधिगच्छति॥ रूक्षक्लविः परुषवाक् धमनी ततोवा श्वासाहरः क्षयतनुः स्फुरिताङ्गसन्धिः। आस्फोट-यन् पठति गायति नृत्यशीलो विक्रोशति भ्रमति चाय-निलप्रकोपात्॥ वृद्धस्वेददाहवह्वशी बहुभुग्विनिद्र श्छायाग्निमानिलजलान्नविहारसेवी। तोयेषु हि म्लपयति निचयेऽपि स वह्निगन्धो पित्ताद्दिवा नभसि पश्यति तारकाश्च॥ कफेनाग्निसादसदनारुचिकासयुक्तो योषिद्वि-द्विरतिरत्यरतिप्रचारः। निद्रावरोऽल्पकवनोऽल्पभुगल्प-सेवी रात्रौ भृशं भवति चापि कफप्रकोपात्॥ सर्व्वात्मके त्रिभिरपि व्यतिमिश्रितानि रूपाणि वातकफपित्तकृतानि विद्यात्। सम्पूर्णलक्षणमसाध्यमुदाहरन्ति सर्व्वात्मकं कविदपि प्रवदन्ति साध्यम्॥ चौरैर्नरेन्द्रपुरुषैररिभिस्तथान्यै र्वित्तावसिक्तस्य धनक्षयव्यसनाद्वा। गाढं क्षते मनसि च प्रियया विरंसोजायेत योत्कटतरो मनसो विकारः॥ चित्तं स जल्पति मनोऽनुगतं विसंज्ञो गायत्यधो हसति रोदिति चापि मूढः। रक्तेक्षणो हतबलेन्द्रियभाः सुदीनः श्यावाननो विमलतेन भवेत् परासुः॥ स्निग्धं स्विन्नं मनुजमुन्मादार्त्तं विबोधयेत्"। एतद्व्याख्यानेन तत्त्वविभागादि चोक्तं भावप्रकाशे "तत्र उन्मादस्य निरुक्ति-माह। "मदयन्त्युद्धता इत्यादि" सुश्रुतवाक्यम् यस्माद्धेतो-रुद्धताः प्रवृद्धा दोषा उन्मार्गमाश्रिताः मदयन्ति चित्तं विक्षिपन्त्यतस्तस्मादुन्माद इतिकीर्त्तितः। स उन्मादः मानसोव्याधिः मनोवैकल्यकरत्वात्। तस्यैवावस्थाभेदेन लक्षणान्तरमाह। "स चाप्रवृद्धस्मरणइत्यादि" सुश्रु० "उन्मादस्य विप्रकृष्टनिदानमाह। "विरुद्धदुष्टाशुचिभोजना-नि प्रधर्षणं देवगुरुद्विजानाम्॥ उन्मादहेतुर्भवतीत्यतोऽन्यो मनोऽभिघातो विषमाश्च चेष्टाः"। दुष्टं धत्तूरबीजादिस-हितम्। अशुचि रजस्वलादिस्पृष्टम्। प्रधर्षणमभिभवः।

विप्रमाह चेटाः बलवद्विषयहृदयः। सन्निकृष्टं निदानमाह। "एकैकयः इत्यादि" सुश्रु० तस्य सम्प्राप्तिमाह। "तैरल्पसत्वस्य मलाः प्रदुष्टा बुद्धेर्निवासं हृदयं प्रदूष्य। स्रोतांस्यधिष्ठाय मनोवहानि प्रमोहयन्त्याशु नरस्य चेतः"। अल्पसत्वस्य अल्पसत्वगुणस्य। मलाः वातादयः। बुद्धेर्निवासं हृदयं प्रदूष्येति। एतेनाश्रयस्य दुष्ट्या तदाश्रितायां बुद्धेरपि दुष्टिरुक्ता। मनोवहानि स्रोतांसि हृदयस्थितानि इह एतानि विशेषतो बोद्धव्यानि। यतस्तैरेव सकलशरीरस्रोतांस्येव मनोधिष्ठानत्वेनोक्तानि। प्रमोहयन्ति विप्लवं कुर्वन्ति। उन्मादस्य सामान्यं रूपमाह। "धीविभ्रमः सत्वपरिप्लवश्च पर्वाकुला दृष्टिरधीरता च। अबद्धवाक्त्वं हृदयस्य शून्यं सामान्यमुन्मादगदस्य लिङ्गम्"। धीविभ्रमः शुक्तिकायां रजतज्ञानम्। सत्वपरिप्लवः सत्वं मनस्तस्य चाञ्चल्यम्। अबद्धवाक्त्वम् असम्बद्धभाषित्वम्। शून्यं स्मृतिशून्यम्। वातिकोन्मादस्य निदानपूर्विकां सम्प्राप्तिमाह। "रूक्षाल्पशीतान्नविरेकधातुक्षयोपवासैरनिलोऽतिवृद्धः। चिन्तातिदुष्टं हृदयं प्रदूष्य बुद्धिं स्मृतिं वाप्युपहन्ति शीघ्रम्"। प्रदूष्य प्रकर्षेण दूषयित्वा। तस्यैव रूपमाह। "अस्थानहास्यस्मृतिविप्लवगीतवाग्विक्षेपणरोदनानि। पारुष्यकार्श्यारुणवर्णताश्च जीर्णे बलज्ञानिलजस्य रूपम्"। अस्थाने अनवसरे हास्यादीनि रोदनान्तानि। जीर्णे आहारे। बलं व्याधेः। पैत्तिकस्य निदानपूर्विकां सम्प्राप्तिमाह। "अजीर्णकटुम्लविदाह्यशीतैर्भोज्यैश्चितं पित्तमतीववेगम्। उन्मादमल्पसत्वात्मकस्य हृदिस्थितं पूर्ववदाशु कुर्यात्"। हृदि स्थितं पित्तं चितं सञ्चितम् पुनः अजीर्णे कटुम्लविदाह्यशीतैर्भोज्यैरतीवेगं सत् उन्मादं कुर्यात् पूर्ववत् हृदयं प्रदूष्य इत्यर्थः। तस्य रूपमाह "। अमर्षसंरम्भविनष्टभावाः सन्तर्जनाभिद्रवणौष्ण्यरोषः। प्रच्छायशीतासृजलाभिलाषः पीतावभासं पित्तजस्य लिङ्गम्"। अमर्षोऽसहिष्णुता। संरम्भः आरम्भो आडम्बर इति यावत्। सन्तर्जनं परत्रासनम्। अभिद्रवणं पलायनम्। औष्ण्यं गात्रे। रोषो दारुणविषेयः। प्रच्छायेत्यादि छायायां, शीतयोरसृजलयोरभिलाषः। श्लैष्मिकस्य निदानपूर्विकां संप्राप्तिमाह। "सम्पूरणैर्मेद्यविचेष्टितस्य सोष्मा कफो मर्मणि संप्रदुष्टः। बुद्धिं स्मृतिं वाप्युपहन्ति चित्तं प्रमोहयन् सञ्जनयेद्विकारम्"। संपूरणैर्भोजनादिभिः। मन्दविचेष्टितस्य व्यायामरहितस्य। सोष्मा कफ इति कफोऽप्युन्मादं करिष्यन् पित्तं सहाय मपेक्षते व्याधिस्वभावात्। मर्मणि अत्र मर्मशब्देन हृदयमुच्यते। विकारसन्मादरूपम्। तस्य रूपमाह। "वाक्चेष्टितं मन्दमरोचकत्वं नारीविविक्तप्रियता च निद्रा। छर्दिश्च लाला च बलञ्च भुक्ते श्लैष्मादिशीतप्रभवे कफात्मके स्यात्"। वाक्चेष्टितं मन्दं वचनमल्पम्। नारीविविक्तप्रियता नारीप्रियता विजनप्रियता च। भुक्ते सति बलं व्याधेः। सान्निपातिकस्य निदानपूर्वकं लक्षणमाह। "यः सन्निपातप्रभवोऽतिघोरः सर्वैः समस्तैः स तु हेतुभिः स्यात्। सर्वाणि रूपाणि बिभर्त्ति तीव्रविरुद्धभैषज्यविधिर्विवर्ज्यः" स सान्निपातिक उन्मादः। सन्निपातप्रकर्षेणैव सर्वात्मकत्वं लभ्यम्। पुनः सर्वैरिति यत्कृतं तद्रजःसमःप्राप्यार्थम्। तेन रजस्तमोभिलितैरित्यर्थः। तेन वातादयो रजस्तमोभिर्मनोदोषैर्मिलिताः समस्तैश्च निदानैः कुपिता उन्मादं जनयन्ति। सर्वैर्हेतुभिः समस्तैर्मिलितैः स्यात्। यतोऽन्योन्याधिः सर्वैर्हेतुभिर्मिलितैरेव भवतीति नियमो नास्ति। अयन्तु व्याधिस्वभावात् सर्वैर्हेतुभिर्मिलितैः स्यात्। तादृगुन्मादः विरुद्धभैषज्यविधिः विरुद्धभैषज्यविधिरिति कोऽर्थः। त्रिदोषजे प्रत्येकं वातादिप्रत्यनीका कार्या। सा च परस्परविरोधिनी त्रिदोषं हन्ति किञ्चिदेव द्रव्यमामलकादि तज्ज्ञात्वायौगिकम्। अतएव विवर्ज्यैः न चिकित्सा इत्यर्थः"। मनोदुःखजस्य विप्रकृष्टं निदानमाह। 'चोरैर्नरेन्द्रपुरुषैरित्यादि" सुश्रु०। अन्यैर्हिंसादिभिः। गाढमतिशयेन। क्षते अभिक्षते प्रियया प्राप्तुमशक्यया रिरंसोः पुरुषस्य विकारः उन्मादरूपः। तस्य रूपमाह। "चित्तं प्रजल्पतीत्यादि" सुश्रु० चित्तमात्रार्थम्। मनोऽनुगतं गोप्यमपि। विसंज्ञो विरुद्धज्ञानः। अतीव मूढः अतीवज्ञानशून्यः। अत्र विकल्पो बोद्धव्यः। विषजस्य रूपमाह। "रक्तेक्षण इत्यादि" सुश्रु० परासुसूक्तः। अरिष्टमाह। "अवाङ्मुखस्तूष्णुखो वा क्षीणमांसबलो नरः। जागर्त्यकोशन्देहेऽन्नमादेन विनश्यति"। अथ देवादिकृतस्योन्मादस्य सामान्यं लक्षणमाह। "अमर्त्यवाग्विक्रमवीर्यचेष्टो ज्ञानादिविज्ञानबलादियुक्तः। प्रकोपकालो नियतश्च यस्य देवादिजन्मा स मनोविकारः"। अमर्त्यवाग्विक्रमवीर्यचेष्टः न मर्त्यस्येव मनुष्यस्येव वागादयो यस्य सः। विक्रमः पराक्रमः। वीर्यं शौर्यम्। ज्ञानादि विज्ञानबलादियुक्तः। ज्ञानं बुद्धिः। आदिपदेन तद्भेदा मेधाविचारणाशक्त्यादयो गृह्यन्ते। विज्ञानं शि-

ख्यादिविषयकं ज्ञानम् । चेष्टा पाटवम् । आदिपदेनाभिमानादि गृह्यते । निर्यतः वक्ष्यमाणतिर्यादिभिः । मनोविकारः उन्मादः । तत्र देवाविष्टस्य लक्षणमाह । "सन्तुष्टःशुचिरतिदिव्यमाल्यगन्धो निस्तन्द्रोऽपितयसंस्कृतप्रभावो । तेजस्वी स्थिरनयनो वरप्रदाता ब्रह्मण्यो भवति नरः स देवजुष्टः"। अतिदिव्यमाल्यगन्धः अतिशयो दिव्यमाल्यस्येव गन्धो यस्य सः । निस्तन्द्रः निद्ररहितः । अपितयं सत्यम् । ब्रह्मण्यः ब्राह्मणभक्तः। दैत्याविष्टस्याह । "संखेदो डिजगुरुदेवदोषभक्तो जिह्माक्षो विगतभयो विमार्गदृष्टिः । सन्तुष्टो भवति न चान्नपानजातैर्दुष्टात्मा भवति स दैत्यसंजुष्टः"। विमार्गदृष्टिः कुमार्गरतः । दुष्टात्मा दुष्टस्वभावः । गन्धर्वाविष्टस्याह । "दृष्टात्मा पुलिन वनान्तरोपसेवी स्वाचारः प्रियपरिगीतगन्धमाल्यः । नृत्यन् वै प्रहसति चारु चाल्पशब्दं गन्धर्वग्रहपरिपीड़ितो मनुष्यः" । दृष्टात्मा दृष्टजीवात्मा । पुलिनं तोयोत्थितं तटम् वनान्तरं वनमध्यम् तयोः सेवी । स्वाचारः अनिन्दिताचारः । प्रियाणि परि समन्ततोभावेन गीत गन्धमाल्यानि यस्य स तथा । चारु चाल्पशब्दमिति कृत्यक्रियाविशेषणम् । यक्षाविष्टस्याह । "ताम्राक्षः प्रियतनुरक्तवस्त्रधारी गम्भीरोऽद्भुतगतिरत्यवाक् सहिष्णुः। तेजस्वी वदति च किं ददामि कस्मै यो यक्षग्रहपरिपीड़ितो मनुष्यः" । पित्राविष्टस्याह । "प्रेतानां स दिशति संस्तरेषु पिण्डान् शान्तात्मा जलमपि वाऽपसव्यवस्त्रः । मांसेक्षुस्तिलगुड़पायसाभिकामस्तद्भक्तो भवति पितृग्रहाभिजुष्टः"। प्रेतानां मृतानां पितॄणाम्। दिशति ददाति । अपसव्यवस्त्रः दक्षिणस्कन्धधृतोत्तरीयः । नागाविष्टस्याह ।"यस्तूर्ध्वं प्रसरति सर्पवत् कदाचित् सृक्कण्यौ मुहुरपि जिह्वयावलेढि । क्रोधालुर्घृतमधुदुग्धपायसेक्षुर्विज्ञेयः स खलु भुजङ्गमेन जुष्टः" । प्रसरति सर्पवत् उरसा चलति । सृक्कण्यौ ओष्ठप्रान्तौ । राक्षसाविष्टस्याह ।"मांसासृग्विविधसुराविकारलिप्सुर्निर्लज्जोऽशमतिनिष्ठुरोऽतिशूरः । क्रोधालुर्विपुलबलो निशाविहारी शौचद्विट् भवति स राक्षसैर्गृहीतः" । अतिनिष्ठुरोऽतिनिर्दयः ब्रह्मराक्षसाविष्टस्याह । "देवद्विग्गुरुवेदो वेदवेदाङ्गविच्छुचिः । बालपीड़ाकरोऽहिंस्रो ब्रह्मराक्षससेवितः । अहिंस्रः अहिंसाशीलः । पिशाचाविष्टस्याह । "उद्वस्त्रः क्षयपरुषो विरूढभाषी दुर्गन्धो भयमशुचिस्त्रवातिलोलः । बह्वाशी विजनवनान्तरोपसेवी व्याचेष्टन् स्वपति रुदन् पिशाचजुष्टः" । उद्वस्त्रः नग्नः । दिगम्बर इति विदेहवचनात् । (स०सुश्रु० उद्वस्त्र इति पाठः) क्षयो निर्मांसः । परुषो रूक्षः । अतिलोलः सर्वस्मिन् अन्नपाने लोलुपः । व्याचेष्टन् विरूढमाचेष्टन् । यक्षा हिंसाक्रीड़ापूजार्थं गृह्णन्ति । अतएवोक्तम् । "अशुचिं भिन्नमर्यादं क्षतं वा यदि वाऽक्षतम् । हिंसु हिंसाविहारार्थं सत्कारार्थमथापि वा । तत्र हिंसार्थं गृहीतस्य लक्षणमाह । "स्खलाक्षो द्रुतमटनः सफेणवामी निद्रालुः पतति च कम्पते च योऽति । यथाद्रिशिरद नगादिविच्युतः स्यात् सोऽसाध्यो भवति तथा त्रयोदशेऽह्नि । यथाद्रीत्यादि यः पर्वतादिपतितःसन् यद्वैगृह्यत इत्यर्थः । आदिशब्देन भित्तिप्रासादादयो गृह्यन्ते त्रयोदशेऽह्नि सर्व एव देवादिगृहीतोऽसाध्यः । देवादीनामावेशसमयमाह ।"देवग्रहाः पौर्णमासास्तु राः सन्ध्ययो रपि । गन्धर्वाः प्रायशोऽस्यां वत्राश्च प्रतिपद्यपि । पितरः कृष्णपक्षे च पञ्चम्यामपि चोरगाः । रक्षःपिशाचा रात्रौ च चतुर्दश्यां विशन्ति हि" । कृष्णपक्षे अमावास्याम् । प्रायशःपदादन्यत्रापि । तिथ्यभिधानप्रयोजनं लक्षणार्थं तत्र तिथौ बलिदानार्थञ्च । ननु यदि देवादयो विशन्ति तदा विशन्तस्ते दृश्यन्ते कथं नेत्यत आह । "दर्पणादीन् यथा छाया शीतोष्णं प्राणिनो यथा । स्वमणिं भास्करादिंश्च यथा देहश्च देहधृक् । विशन्ति न च दृश्यन्ते यद्वात्तद्वच्छरीरिणम्" । दर्पणादीत्यादि शब्देनान्यदपि निर्मलद्रव्यं गृह्यते । छाया प्रतिबिम्बम् । स्वमणिं सूर्यमणिम् । देहधृक् जीवात्मा" । भा०प्र० । एतानि च वाक्यानि सुश्रुतोत्तरतन्त्रस्थानि । तत्र हि "गुह्यागमतविज्ञानमनवस्था सहिष्णुता । क्रियाबाऽमानुषी यस्मिन् स ग्रहः परिकीर्त्यते"इति ग्रहशब्दं परिभाष्य"असंख्येया ग्रहगणा ग्रहाधिपतयस्त्रयः । व्यज्यन्ते विविधाकाराभिर्यत्ते तथाष्टधा देवासुरा यत्नुगणाश्च तेषां गन्धर्वयक्षाः पितरोभुजङ्गाः । रक्षांसि वा चापि पिशाचजातिरेषोऽष्टधा देवगणग्रहाख्यः" इति विभज्य"संतुष्टः शुचिरित्यादिना तत्तुष्टानां लक्षणान्याह । तानि भा०प्र०सङ्कलय्योदाहृत्य व्याख्यातानीति द्रष्टव्यम् । अन्ते च प्रकृतदेवादीनां न क्वचित् प्रवेशः किन्तु तत्परिचारकाणामेव देवाद्याचरतां प्रवेश इत्युक्तं यथा सुश्रु० उत्त०।"तपांसि तीर्थाभिगमा दया च दानं व्रतानि धर्मो नियमश्च सत्यम् । सुप्राक्षवाऽपीह तेषु नित्या व्यक्ताः समस्ताश्च

यथाप्रभावम् । न ते मनुष्यैः सह संविशन्ति न वा मनुष्यान् क्वचिदाविशन्ति । ये वा विशन्तीति वदन्ति मोहात्ते भूतविद्याविषयादपोहाः । तेषां यक्षाणां परिचारका ये कोटीसहस्रायुतपद्मसंख्याः। अरुग्वसामांसभुजः सुभीमा निशाविहाराश्च समाविशन्ति । निशाचराणां तेषां हि ये देवगणसंस्तुताः। ते तु तत्प्रत्यसंसर्गाद्विज्ञेयास्तु तदङ्गनाः । देवयक्षा इति पुनः प्रोच्यन्ते शुचयश्च ये । देववच्च नमस्यन्ते प्रत्यर्थ्यन्ते च देववत् । स्वामियोक्तक्रियाचाराः क्रमएव सुरादिषु । नैर्ऋतेया दुश्चरितरक्षासां स प्रसवः स्मृतः । सत्यत्वादपहस्तेषु हसिस्तेषां गणैः कृता । हिंसाविहारा ये केचिद्दिव्यं भावमुपाश्रिताः । भूतानीति कृता संज्ञा तेषां संज्ञा प्रवक्तृभिः । यक्षसंज्ञाभिभूतानि यस्माद्धेत्वनया भिषक् । विद्यया भूतविद्यात्वमतएव निरुच्यते"। अथोन्मादस्य सामान्यचिकित्सा

'वातिके स्नेहपानं प्राक् विरेकः पित्तसम्भवे । कफजे वमनं कार्यं परे वक्ष्यादिक्रमः । यश्चोपदेक्ष्यते किञ्चिदपस्मारे चिकित्सितम् । उन्मादेतच्च कर्त्तव्यं सामान्याद्दोषदूष्ययोः । ज्वरादिदुःशैलेभ्यो विषमेभ्यश्च तं सदा । रक्षेदुन्मादिनं यस्मात् सद्यः प्राणहरा हि ते । ते ज्वरादयः" । विशेषचिकित्सा भा०प्र०आदौ दृश्या । सचायं रोगः। महापातककर्म्मविपाकजः । "उन्मादस्त्वग्दोषो राजयक्ष्मेत्यादि" सु० त० नारदोक्तेः "चित्तसंमोह उन्मादः कामशोकभयादिभिः"। सा०द० उक्ते २व्यभिचारिभावभेदे ।

उन्मादक पु० उद्+मद-णिच्-ण्वुल् । उन्मादजनके धुस्तूरादौ । [उन्मादकारके त्रि० ।

उन्मादन पु०उद्+मद-णिच्-ल्यु । १कन्दर्पबाणभेदे त्रिका० ।

उन्मादवत् त्रि० उन्मादोऽस्यास्य मतुप् मस्य वः । उन्मादयुक्ते स्त्रियां ङीप् । [न्मादिनं यस्मात्"इत्यत्र० ।

उन्मादिन् त्रि० उद्+णिनि स्त्रियां ङीप् । उन्मत्ते "रक्षेदु-

उन्मान न०उद्+मा-भावे ल्युट् । ऊर्द्धमाने तच्च प्रथितगुरुत्वेन पलादिमितपाषाणादिना तुलाधारफलके एकपार्श्वे स्थितेन अन्यपार्श्वस्थद्रव्यादेरुन्नमनादिना गुरुत्वविशेषज्ञापनव्यापारः (ओजनकरा)"ऊर्द्धमानं किलोन्मानम्" वार्त्तिकोक्ते २ऊर्द्धतः प्रमाणे च । अस्त्रियामर्थे "प्रमाणे द्वयसज्दघ्नञ्मात्रचः" पा०"प्रयमश्च द्वितीयश्च ऊर्द्धमाने मतौ समं"वार्त्तिकोक्तेः द्वयसच् दघ्नच् । ऊरुद्वयः ऊरुदघ्नः"गजपतिद्वयसोरिति" माघः । सामान्यप्रमाणे तु मात्रजेव । ऊरुमात्रं प्रस्थमात्रम् । ३करणे ल्युट् । २तुलादौ । ३द्रोणपरिमाणे पु० वैद्यकम् ।

उन्मार्ग त्रि०उत्क्रान्तः मार्गात् निरा०स० । मार्गातिक्रान्ते मार्गच्च पन्थाः रीतिश्च" "नाययति च दिङ्मोहमिवोन्मार्गः" काद० । २विरुद्धपथे च "मदोन्मत्तस्य भूपस्य कुञ्जरस्य च गच्छतः । उन्मार्गे वार्यतां यान्ति सङ्घाताः समीपगाः;" पञ्चतन्त्रम् । उन्मादशब्दे उदा० ।

उन्मिति त्रि० उद्+मद-क्तिन् । ऊर्द्धमाने ।

उन्मिष त्रि०उद्+मिष-क । १प्रफुल्ले २किञ्चित्प्रकाशयुक्ते च

उन्मिषित त्रि० उद्+मिष-क्त । १प्रफुल्ले, विकसिते २किञ्चित् प्रकाशिते च । "व्यलोकयद्युन्मिषितैस्तडिन्मयैः" कुमा० ।

उन्मीलन न०उद्+मील-ल्युट् । १विकाशे २चक्षुरादेः पुटविभेदे (ताकान) "ज्ञानाञ्जनशलाकाभिर्नेत्रोन्मीलनकारकः" भा०आ०८४अ० । "सम्मीलनेन्मीलनके तथैव" त्रि० शि० । भावे वञ् उन्मीलोऽप्यत्र पु० ।

उन्मीलित त्रि० उद्+मील-क्त । १विकसिते "ते चोन्मीलित मालतीसुरभयः प्रौढाः कदम्बानिलाः" सा०द० । २क्तस्तृष्टे च क्षिच्-कर्मणि क्त । ३प्रकाशिते "उन्मीलितं तूलिकयेव चित्रम्"कुमा० । ४भेदितसङ्घे नेत्रादौ "अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया । चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः" गुरुनतिमन्त्रः ।

उन्मुक्त त्रि० उद्+मुच-क्त । बन्धनरहिते

उन्मुख त्रि० उद्+उर्द्धं मुखमस्य । १ऊर्द्धास्ये,२उद्युक्ते च । "उन्मुखद्वारःस्ववीचिताः"कुमा० । "तस्मिन् संयमिनामादेयजाते परिषयोन्मुखे" कुमा० । "विपुलतरोन्मुखलोचनावलम्बम्" "इत्यापतन्निभिन्नपयोदमुन्मुखाः" माघः । "असौ शरण्यः शरणोन्मुखानाम्" "वा नीतपोरा स्वपदोन्मुखेन" । "मनोऽभिरामाः श्रवणौ रथनेमिस्वनोन्मुखैः" रघुः स्त्रियां ङीप् । "चूतयष्टिरिवाभ्याशे मधौ परभृतोन्मुखी" कुमा०"प्रतिबिम्बापि कैकेया चन्द्रलेखेव मुखोन्मुखी" "पतिः प्रतीतः प्रसवोन्मुखीं प्रियाम्" "अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभिः" "इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा" मेघ० ।

उन्मुद्र त्रि०उद्गता मुद्रा यस्मात् प्रा०ब० । १त्यक्तमुद्रे,२विकसिते च

उन्मूल नामधा०मूलत उत्पाटयति उद्+मूल-णिच् । उन्मूलयति ते "उन्मूलयन् मङ्गलवृक्षान्" भा०व०१३६अ०

उन्मूलन न० उन्मूल+णिच्-ल्युट् । उत्पाटने उद्गतमूलकरणे । "न पादपोन्मूलनशक्तिरंहः" रघुः ।

उन्मूलित त्रि० उन्मूलि-नामधा० क्त। उत्पाटिते "उन्मूलिता हलधरेण पदावघातैः" उद्भटः "दूरे सन्तु फलानि हन्त भवता तन्मूलमुन्मूलितम्" उद्भटः।

उन्मृजावसृजा स्त्री उन्मृज अवमृज इत्युच्यते यस्यां क्रियायां मयू०स०। उन्मार्जनावसार्जनार्थनिदेशक्रियायाम्।

उन्मृश्य त्रि० उद्+मृश-क्यप्। "हस्तमुत्तोलयन्मृश्ये। "इत्युन्मृश्या हैव द्यौरास" शत०ब्रा० १,४,१,२२, ल्यप्। २ऊर्द्धतः स्पृष्टेत्यर्थे अव्य०।

उन्मेय त्रि० उद्+मा-यत्। १परिमेये "याचित: शकटोन्मेये" त्रिका०। २उन्मानमेये सुवर्णादौ च।

उन्मेष पु०उद्+मिष-घञ्। १चक्षुरादेरून्मीलने, किञ्चित्प्रकाशे च। "सकिरणपरिवेषोन्मेषशून्याः प्रदीपाः" रघुः। "दीर्घिकाकमलोन्मेषेणावन्मात्रेण साध्यते" कुमा०"विद्युदुन्मेषदृष्टिम्" मेघ०। भावे ल्युट्। उन्मेषणमप्यत्र न० "मन्मथोन्मेषणातिविस्रोर्णा शोभैव कापि:" सा०द०।

उन्मोचन न०उद्+मुच-ल्युट्। बन्धनात् उद्धृत्य विश्लेषणे। "उन्मोचनप्रमोचने उभे वाची वदामि" अ०५,३०,१,

उप अव्य०वप-क। १अधिकार्थे, २क्षीणे, ३आसन्ने, ४सामीप्ये, ५सादृश्ये, ६प्रतियत्ने सतो गुणान्तराधाने, ७व्याप्तौ, ८पूजायाम् ९अल्पत्वे, १०आरम्भे, ११दाने, १२दीप्तास्थाने, १३आचार्यकरणे १४अन्वये, १५निर्देशने च। गरत्ने "उप सामीप्यसामर्थ्यव्याप्त्याचार्यकृतिक्षतिदोषदानक्रियावीप्सारम्भाध्ययनपूजनेषु" इति उपार्थानुक्त्वा क्रमेणोदाजहार तत्र सामीप्ये उपकूपम्। सामर्थ्ये उपकरोति। व्याप्तौ उपकोर्ष्टम्। आचार्यकृतौ उपदिशति। क्षतौ उपरतः, दोषे उपघातः (इन्द्रियाणां स्वव्याहृयङ्गासामर्थ्यम्। दाने उपहरति। क्रियाभेदे उपचरति। दीप्तायां देवं देवमुपचरति। आरम्भे उपक्रमते भोक्तुम्। अध्ययने उपाध्यायः। पूजने उपचरितः पिता पुत्रेण" इति। प्रतियत्ने (संस्कारे) "उपत्वाग्नेय्यै समिधमाहरेति" शा०उ०सामीप्ये "उपोपविश्य प्राणान् संसृजन्" स०त०गो०। सादृश्ये उपदेवः उपधातुः। "उपोऽधिके च" पा०"१ईषदाधिक्ये "उप च त्रयोदश मासः" शत०ब्रा० ६,२,२, अस्य क्षीणेऽप्याधिक्ये च कर्मप्रवचनीयता तत्र क्षीणार्थयोगे तत्सम्बन्धिनि द्वितीया। उप क्षरिं हराः-क्षरेक्षीणा इत्यर्थः। अधिकार्थयोगे सप्तमी। उप परार्धे क्षरेर्गुणाः-परार्धादधिकाइत्यर्थः। सामीप्येऽव्ययीभावः उपकूपम् उपकूलम्। "उपसर्गाः क्रियायोगे" पा० क्रियायोगे उपसर्गता अन्यत्र गतिता ततः भवार्थे त्यकन् उपत्यका।

उपक पु० उप+संज्ञायां कन्। १क्षपिभेदे ततः नडा० फक्। औपकायनः तस्य अद्वन्द्वे द्वन्द्वे च बहुत्वे वा लुक्। अद्वन्द्वे औपकाः औपकायनाः। द्वन्द्वे उपकनकाः औपकायनकायनाः। अनुकम्पितः उपेन्द्रदत्तादिः "प्राचामुपादेरडज्बुचौ" पा०बुच् "ठाजादावूर्द्धं द्वितीयादचः" पा०इन्द्रदत्तलोपे। उपक २अनुकम्पिते उपेन्द्रदत्तके पु०। पक्षे अडच् उपडः। चात् ठच् घन् इलच् च। तत्र ठचि औपिकः घनि औपिवः इलचि औपिलः। तदर्थे पु० अजादावित्युक्तेः कनि न लुक्। उपेन्द्रदत्तकः। एवमन्यस्यापि उपपूर्वकस्य संज्ञाशब्दस्य रूपं बोध्यम्। तेन तत्रापि उपकादिशब्दप्रवृत्तिः।

उपकण्ठ त्रि०उपगतः कण्ठम् अत्या०स०। १निकटे, २कण्ठासन्ने च "तस्योपकण्ठे धवनीलकण्ठः" कुमा०। "आक्रम्य चार्यं श्रवणोपकण्ठे" "उपकण्ठं सरोदधेः" रघुः ३सामान्ये ४अन्यानाश्लेन्दितगतौ च न०। विभक्त्यर्थे सामीप्ये वा अव्ययी०।५कण्ठ इत्यर्थे "रथाङ्गभर्त्रेऽभिनवं वरस्य यस्याः पितेव प्रतिपादितायाः। प्रेम्णोपकण्ठं सुहृदङ्गभाजो रत्नावलीरत्नधिरावबन्धे" माघः। उपकण्ठम्-कण्ठे पक्षेऽन्तिके इत्यर्थः ६कण्ठसामीप्ये च अव्य०

उपकनिष्ठका स्त्री उपगता कनिष्ठिकाम् अत्या०स०। अनामाङ्गुलौ "अप्रच्छिन्नायावन्नखमौ प्रादेशमात्रौ कृशानाबान्तयोर्मूलेत्वाङ्गुष्ठोपकनिष्ठिकाभ्याम्" आ०श्र०सू०१,३,२ "अङ्गुष्ठोपकनिष्ठिकाभ्यामेकैकमस्यासंछादयन्तः" ४,५,४।

उपकन्या स्त्री उपगता कन्याम् अत्या० स०। कन्यासदृशादौ अस्य गौरा० पाठात् उपाद्दह्रस्वत्वेऽपि नान्तोदात्तता।

उपकरण न०उपक्रियतेऽनेन उप-कृ-ल्युट्। १प्रधानसाधके अङ्गे यथा सूपभोजनादौ व्यञ्जनादि, शयने खट्टादि, स्नानेऽनुलेपनादि, पूजायां पुष्पादि यागे पत्नादि। "यच्च वेश्म शुभं दद्यात् सर्वोपकरणान्वितम्" शु०त०नन्दिपु०। "भक्तावकाशाम्बुदकमन्नोपकरणव्ययान्" या० स्मृ०। २स्वपादीनां अलङ्कारादिपरिच्छदे च। उपगतः करणम् अत्या० स०। ३इन्द्रियानुगते त्रि० विभक्त्यर्थे सामीप्ये वाऽव्ययी०। ४करणे इत्यर्थे ५इन्द्रियसामीप्ये च अव्य०।

उपकर्ण अव्य० विभक्त्यर्थे सामीप्ये वा अव्ययी०। १कर्ण इत्यर्थे २श्रोत्रसामीप्ये च। तत्र प्रायभवः ठक् औपकर्णिकः तत्र प्रायभवे त्रि० "यः स्वामी रम जानाति तावौपकर्णिकलोचनः" भट्टिः।

उपकर्त्तृ त्रि० उप-कृ-तृच् स्त्रियां ङीप्। उपकारके आनुगुण्यकारके "उपकर्त्रीरिणा सन्धिर्न मित्रेणापकारिणा" माघः। "हीनान्यनुपकर्त्तृणि प्रहृष्टानि विकृष्यते" रघुः।

उपकलाप अव्य० विभाषार्थे सामीप्ये वाऽव्ययी०। १कलापे इत्यर्थे २तत्सामीप्ये च ततो भवार्थे परिखा० आ। औपकलाप्य तद्भवे त्रि०।

उपकल्प त्रि० उपगतः कल्पम् अत्या०स। कल्पोपगते। गौरा० पाठात् उपात् ह्रस्वत्वेऽपि नात्तोदात्तता।

उपकल्पन न० उप+कृप-णिच्-ल्युट्। १सम्पादने २आयोजने च "वक्ष्यामस्ततः परं सम्यगाहारस्योपकल्पनम्" सुश्रु० युच्। तत्रैव स्त्री। "एवं विज्ञाय मतिमान् भोजनस्योपकल्पनाम्" सुश्रु०।

उपकादि पु० इन्द्वेऽन्दे च बहुत्वे गोत्रप्रत्ययलुगनिमित्ते पाणिन्युक्ते शब्दसमूहे। स च उपक लमक भटक कपिञ्जल कृष्णाजिन कृष्णसुन्दर चूड़ारक आड़ारक गड्डक उदङ्क सुधायुक अम्बक पिङ्गलक पिट्ट सुपिट्ट मयूरकर्ण खरीजङ्घ गलाथल घृतकैल पदङ्गल कठेरणि कुणीतक काशतल्ल निदाघ कलशीकण्ठ दामकण्ठ कृष्णपिङ्गल कर्णक मर्णक जटिलक बधिरक जन्तुक अनुलोम अनुपद प्रतिलोम अपलम्ब प्रताप अनभिहित कमलक वटारक लेखाभ कमन्दक पिङ्गलक वर्षक मस्करकर्ष मदाध कबलक कमलक कदामत्त।

उपकार पु० उप+कृ-भावे घञ्। प्रधानस्यानुगुण्यसंपादने, उपकृतौ "उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः" माघः। "कृतोपकारेण रतिर्विभूय" कुमा० "उपकारोमहांस्तात कृतोऽयं मम खेचरैः" भा०व०१५०अ०। तस्योपकार्यारचितोपकार(चा)रा" रघुः। उपकारश्च सहकारिभिः कारणस्य कार्योत्पादनार्थमानुगुण्यभेदः यथा दर्शादिवागस्य प्रधानापूर्व्वसाधनेऽङ्गादीनां प्रयाजादीनां क्रियाकापूर्व्वसाधनद्वारा तदानुगुण्यम्। स च बौद्धैः कुर्व्वद्रूपतारूपस्य बीजादेरक्षुनत्वस्य सम्पादनरूपातिशयाधानमुच्यते सर्व्वदर्श०। "तथाहि सहकारिभिः सलिलपवनादिभिः पदार्थसार्थैराधीयमाने बीजस्यातिशये बीजसत्पादकमभ्युपेयम् अपरथा तदभावेऽप्यतिशयः प्रादुर्भवेत्। बीजस्यातिशयमादधानं सहकारिसापेक्षमेवाधत्ते अन्यथा सर्व्वदोपकारापत्तौ अङ्कुरस्यापि सदोदयः प्रसज्येत। तस्मादतिशयार्थमपेक्षमाणैः सहकारिभिरतिशयवान्नरमाधेयं बीजे, तच्चिरध्युपकारे पूर्व्वत्वादेव सहकारिसापेक्षस्य बीजस्य जनकत्वे सहकारिसम्पाद्यबीजगतातिशयानवस्था प्रथमा व्यवस्थिता। अथोपकारः कार्यार्थमपेक्षमाणोऽपि बीजादिनिरपेक्षं कार्यं जनयति तत्सापेक्षो वा। प्रथमे बीजादेरहेतुत्वमापतेत्। द्वितीये अपेक्षमाणेन बीजादिना उपकारे अतिशय आधेयः एवं तत्र तत्रापीति बीजादिजन्यातिशयनिरतिशयपरम्परापातः इति द्वितीयानवस्था स्थिरा भवेत्। एवमपेक्षमाणेनोपकारेण बीजादौ धर्म्मिण्युपकारान्तरमाधेयमित्युपकाराधेयबीजातिशयाश्रयातिशयपरम्परापातइति तृतीयानवस्था दुरवस्था स्यात्। अथ भावादभिन्नोऽतिशयः सहकारिनिराधीयत इत्यभ्युपगम्यते तर्हि प्राचीनो भावो ऽनतिशयात्मा निष्टप्तः अन्त्यातिशयात्माकुर्व्वद्रूपादिपदवेदनीयो जायत इति फलितम्।

उपकारक त्रि० उप+कृ-ण्वुल्। १उपकारकर्त्तरि। "आगन्तवोऽपि कदाचिदुपकारका दृश्यन्ते" हितो०। स्त्रीत्वे टापि अतइत्त्वे उपकारिका। सा च २रूपाजीवे, ३पटनिर्म्मिते गृहे च। ४कारणमात्रे त्रि०। "स्वर्गस्त्वग्निन्द्रियाद्यस्य स्यादुपकारकः" भाषा० णिनि। उपकारिन् उपकारके त्रि०। "तदुपकारीणि शरीरकस्थलादीनि" वेदा० भा०। "दातव्यमिति यद्दानं दीयतेऽनुपकारिणे" गीता "मात्रापित्रोर्गुरौ मित्रे विनीते चोपकारिणि" दक्षः। स्त्रियां ङीप्।

उपकार्य्य त्रि० उप+कृ-ण्यत्। १उपकारयोग्ये। २राजावासे, ३पटनिर्म्मितराजसदने च स्त्री टाप्। "तस्योपकार्यां रचितोपकार(चा)रा" रघुः। "तीरोपकार्यां गतमात्र एव" शब्दप्रतिविहितोपकार्यमार्य्यः" रघुः राजभवने "रम्यां रघुप्रतिनिधिः स नवोपकार्याम्"। "उपकार्या राजसद्मन्युपचारचितेऽन्यवदिति विश्वोक्तेः ५उपचारव्याप्ते त्रि०

उपकिरण न० उप+कृ-ल्युट् नि० इत्त्वम्। १व्याप्तौ २समन्तात् विक्षेपे च "आकूत्करोत्किरणं वा" काल्या० २५,१०,२४। समीप्यादौ अव्ययी०। ३किरणसामीप्यादौ अव्य०।

उपकीचक पु० उपगतः कीचकम् अत्या०स०। विराटनृपश्यालककीचकानुजे विराटसैन्यभेदे "समवेतेषु सर्व्वेषु तामूचुरुपकीचकाः। हन्यतां शीघ्रमसती यत्कृते कीचकोहतः"। ते च पञ्चाधिकशतमिताः कीचकत्वेनापि प्रसिद्धाः "एवं ते निहता राजन्! शतं पञ्च च कीचकाः। स च सेनापतिः पूर्वमित्येतत् शतषट्शतम्" भा०वि०२२,२३अ०।

उपकुक्षि स्त्री उप+कुक्ष-इ। कृष्णजीरके।

उपकुक्षिका स्त्री उप+कुक्ष-ण्वुल् अतइत्त्वम्। १तल्पायां

(तँते) २क्षुच्चैडायाच्च । स्वार्थे कन् । २क्षणजीरके ।

उपकुर्व्वाण पु० उपकुरुते गुरोर्दक्षिणादानादिना उप+कृ-यानच् । समावर्त्तनयोग्ये स्वाध्यायपठनावधिकब्रह्मचर्य्यवति १ब्रह्मचारिणि "न पूर्वं गुरवे किञ्चिदुपकुर्व्वीत धर्म्मवित् । स्नास्यंस्तु गुरुणाऽऽज्ञप्तः शक्त्या गुर्व्वर्थमाहरेत्" मनुना स्नास्यतएव गुरूपकारविधानेन ततः पूर्व्वमुपाकारकर्त्तृत्वनिषेधेन चास्यैवोपकर्त्तृत्वात्तथात्वम् । ब्रह्मचारी हि द्विविधः नैष्ठिक उपकुर्व्वाणश्च । यो निरवधि गुरुसन्निधानम् उपनयनादूर्द्धं गुरौ वसति स नैष्ठिकः । यस्तु स्वाध्यायपठनान्तं गुरौवसन् गुरुणानुज्ञातः गुरोरुपकारं कृत्वा स्नानगार्हस्थ्ये करोति स उपकुर्व्वाणः । स्नास्यतो दक्षिणा च मनुनोक्ता यथा "छत्रं च्हिरण्यं गामश्वं वस्त्रोपानहमासनम् । धान्यं शाकञ्च वासांसि गुरवे प्रीतिमावहेत्" । आश्व० गृ० १,८,१,२ तु "अर्द्धतान्युपकल्पयेत समावर्त्स्यमाने मणिं कुण्डले वस्त्रयुगं छत्रमुपानद्युगं दण्डं व्रजमन्नर्द्धनमनुलेपनमाञ्जनमुष्णीषमित्यात्मने चाचार्य्य च" "यद्यु भयोर्न विन्देताचार्य्यायैव" । एकादश द्रव्याण्युक्तानि एतद्गोपलक्षणं गुरोरभिलषितं दद्यादित्यलमेव तात्पर्य्यम् अत एव या० स्मृ० "गुरवे तु वरं दत्त्वा स्नायीत तदनुज्ञया" तद्वरदानमेवोक्तम् "गुरवे पूर्वोक्ताय वरमभिलषितं यथाशक्ति दत्त्वा स्नायात् तदशक्तौ तदनुज्ञयाऽदत्तवरोऽपि" मिता० । संज्ञायां कन् तत्रैव । "उपकुर्व्वाणकास्तु स्वाध्यायपठनार्थाः" स्मृ० उ० भा० । तात्स्थ्ये चानश् । २उपकारशीले त्रि० ।

उपकुल्या स्त्री उप+कुल-यञ्+टाप् । १पिप्पल्याम् (पिप्पुल) अमर० "हरिद्रोपकुल्याविशालेत्यादि" सुश्रु० तत्पर्य्यायगुणादि भा० म० दर्शितं यथा

"पिप्पली मागधी क्षुण्णा वैदेही चपला कणा । उपकुल्योषणा शौण्डी कोला स्यात् तीक्ष्णतण्डुला । पिप्पली दीपनी हृद्या स्वादुपाका रसायनी । अनुष्णा कटुका स्निग्धा वातश्लेष्महरा लघुः । पित्तला रेचनी हृन्नि श्वासकासोदरज्वरान् । कृमिप्लीहगुल्मार्शःश्रीहन्मूलाममारुतान् । आर्द्रा कफप्रदा स्निग्धा शीतला मधुरा गुरुः । पित्तप्रशमनी सा तु शुष्का पित्तप्रकोपिनी । पिप्पली मधुसंयुक्ता श्लेष्मविनाशिनी । श्वासकासज्वरहरी हृद्या मेधाग्निवर्द्धनी । जीर्णज्वरेऽग्निमान्द्ये च शस्यते गुडपिप्पली । कासजीर्णज्वरश्वासहृत्पार्श्वरुशिरोगनुत् । द्विगुणः पिप्पलीचूर्णाद्गुडोऽत्र भिषजां मते" ॥ उपगतः कुल्याम् क्तस्मसरः अत्या० स० । कुल्योपगते त्रि० । २सामीप्यादौ अव्ययी० । ३कुल्यासामीप्यादौ अव्य० ।

उपकुश पु० सुश्रुतोक्ते १सुखरोगभेदे । "सुखरोगाः सप्तस्वायतनेषु" इत्युपक्रम्य ओष्ठादीनि सप्तायतनानि उक्त्वा "दन्तमूलगतास्तु शीतादो दन्तपुप्पुटको दन्तवेष्टकः शौषिरो महाशौषिरः परिदर उपकुशोदन्तवैदर्भौ वर्त्मनोऽधिमांसो नाड्यः पञ्चेति" दन्तमूलगतानुक्त्वा "वेष्टेषु दाहः पाकश्च तेभ्योदन्तास्रवन्ति च । आधट्टिताः प्रस्रवन्ति शोणितं मन्दवेदनाः । आध्मायने स्रुते रक्ते सुखं प्रति च जायते । यस्मिन्नुपक्रमः स स्यात् पित्तरक्तकृतोगदः" । लक्षितः । "संशोध्योभयतः कार्य्यं शिरश्चोपक्रमे तथा" सुश्रु० ।

उपकूप त्रि० उपगतः कूपं अत्या० स० । १कूपोपगते देशे सामीप्यादौ अव्ययी० । २कूपसामीप्ये ३कूप इत्यर्थे च अव्य० ।

उपकूल न० कूले कूलस्य समीपं वा अव्य० । १कूलेइत्यर्थे । २तीरसामीप्ये च अव्य० । "उपकूलं स कान्तारः पुरो पौरुष भूषणः" रघुः ततो भवादौ अण् "अव्ययो भावाङ्गेति" या० "परिमुखादिभ्य एवेति" वार्त्तिके नियमनाच्च अ । स्त्रीपकूलः तद्भवादौ त्रि० ।

उपकृत त्रि० उप+कृ-क्त । १कृतोपकारे यस्योपकारः कृत स्तस्मिन् । भावे क्त । २उपकारे न० "उपकृतं बहु तत्किमुच्यते सुजनता प्रथिता भवता परम्" मा० द० । उपकृतमनेन इष्टा० इनि । उपकृतिन् येनोपकारः कृतस्तस्मिन् त्रि० स्त्रियां ङीप् ।

उपकृष्ण त्रि० उपगतः कृष्णम् अत्या० स० । १कृष्णोपगते उपादुद्यच्कत्वेऽपि गौरा० पाठात् नान्तोदात्तता । सामीप्यादौ अव्ययी० । २कृष्णसामीप्यादौ अव्य० । [समर्थे च ।

उपकृत्त त्रि० उप-कृप-क्त । १नियते २विच्छिन्ने ३उपभोगायोग्ये च ।

उपकोसल पु० कोसलापत्ये ऋषिभेदे । "उपकोसलोह कामलायनः सत्यकामे जाबाले ब्रह्मचर्य्यमुवास" छा० उ० "उपकोसलोनामतः कोसलस्यापत्यं कामलायनः" भा० ।

उपक्रम पु० उप-क्रम-घञ् न वृद्धिः । १उपायस्थानपूर्वकारम्भे, २प्रथमारम्भे "ज्योतिरुपक्रमात्तु तथाह्यधीयत एके" "समानाञ्चास्त्युपक्रमादमृतत्वं चानुपोष्य" भा० सू० । "तत्र च प्रतिकुर्व्वन्ति यदि पश्यन्त्युपक्रमात्" भा० व० २१५ अ० । "उपक्रमोपसंहारौ—हेतु-

(30)

Col
31/10/26

Archaeological Library
Call No. 19786.
R 5a 4 K/Tar.
Author—Taranatha Tarka Vachaspati
Title— Vachaspatya Vol. I
Date of Issue | Date of Return

"A book that is shut is but a block"

CENTRAL ARCHAEOLOGICAL LIBRARY
GOVT. OF INDIA
Department of Archaeology
NEW DELHI.

Please help us to keep the book clean and moving.